GOVERNMENT OF INDIA
ARCHÆOLOGICAL SURVEY OF INDIA
ARCHÆOLOGICAL
LIBRARY

ACCESSION NO. 19788
CALL No. RSa4K/Tar

D.G.A. 79

D 2292

New Acc. 19788

CENTRAL ARCHAEOLOGICAL LIBRARY New Delhi.
VACHASPATYA
Issued on
गृह 19733 [ २६३८ ]
J.D.M.Beglar.
गृह D2222
Vol. 3

विस्तारायामसुषितं नवैः षोडशभिः कृतम्। खगृहाणां विभागेन प्रमाणमिह लक्षयेत्। व्यासाच्च षोडशोभागः सर्वेषां भित्तयः स्मृताः। पक्षेष्टकाकृतानां च न दारूणां कदाचन। रूपसेनापतिस्तेषां शतानीति शतैर्युताम्। अङ्गुलानि द्वारमानं प्रवदन्ति मनीषिणः। विप्रादीनां विंशतिस्तु अङ्गुलानि च सप्त च। द्वारस्य मानं तत्प्रोक्तं द्विगुणोच्छ्राय उच्यते। उच्छ्रायहस्तसंख्यायाः परिमाणाङ्गुलानि च। शाखाहीनेऽपि वाङ्मुखं कार्यं सार्द्धांशसंयुतम्। उच्छ्रायात् सप्तयुषितादशीतिः पृथुता मता। भागः पुनर्नवगुणागीत्यंशसम्मानकम्। दशांशहीनं तच्छाय स्तम्भानां परिमाणकम्। वेदाश्रो रूचकः। स्तम्भो यज्ञोऽष्टाश्रियुतो मतः। द्विवज्रः षोडशाश्रस्तद्विगुणाश्रः प्रलोनकः। समन्ततो वृत्ताख्यः स्तम्भः प्रोक्तो द्विजोत्तमैः। विभज्य नवधा स्तम्भं कुर्यादुदुम्बर घटम्। पद्मं तु षोडशारोश्च कुर्याद्भागेन भागतः। स्तम्भसमं वाङ्मुखं भारतुलानासुपर्युपर्यासाम्। भवति तत्रोपतुलानामूनं पादेन पादेन। अप्रतिबिद्धालिन्दं समन्ततो वास्तु सर्वतोभद्रम्। रूपविबुधसमूहानां कार्यं द्वारैश्चतुर्भिरपि"।

अथ द्विशालानि गृहाणि दक्षिणे दुर्मुखं कृत्वा पूर्वे च खरसंज्ञकम्। तद्वाताख्यं भवेद्गेहं पातरोगप्रदं कृतम्। दक्षिणे दुर्मुखं गेहं पश्चिमे धान्यसंज्ञकम्। यमस्थं द्विशालं तन्मृत्युदं नाशदं कृतम्। पूर्वे तु खरनामानमुत्तरे धान्यसंज्ञकम्। दण्डाख्यं तद्विशालं स्याद्गृहं कुर्यात् पुनः पुनः। दुर्मुखं दक्षिणे कुर्यादुत्तरे जयसंज्ञकम्। वैद्याख्यं तद्विशालन्तु वस्वनाम धनक्षयम्। खरञ्च पूर्वदिग्भागे पश्चिमे धान्यसंज्ञकम्। गृहं चुल्लीद्विशालं तद्धनधान्यविनाशनम्। आक्रन्दं दक्षिणे भागे पश्चिमे धनदं तथा। द्विशालं चेक्षुसंज्ञं तत्प्रमुदं धनप्रदम्। विपक्षं दक्षिणे भागे पश्चिमे क्रूरसंज्ञकम्। शोभनाख्यं द्विशालं तद्धनधान्यकरं परम्। विजयं दक्षिणे भागे विजयं चैव पश्चिमे। द्विशालं चैव कुमाराख्यं च पितृदिसंयुतम्। धान्यञ्च पूर्वदिग्भागे धान्यं चैवोत्तरे भवेत्। नन्दाख्यं तद्दिशालञ्च धनदं शोभनं कृतम्। विजयं सर्वदिग्भागे द्विशालाख्यं तदेव हि। जयाख्यं नाम तद्गेहं शुभदं द्वारतो भवेत्। विपुलं सर्वदिग्भागे द्विशालं तत्प्रजायते। तानि सप्तदशसंज्ञानि धनधान्यप्रदानि च। धनदं सर्वदिग्भागे सुखदं वा मनोरमम्। कालनामाश्च तद्गेहं सर्वांशे शोभनं कृतम्। द्विशालानां सप्तानां च भेदाश्चैव त्रयोदश। फलपाकार्थमेतेषां मया प्रोक्तं सुविस्तरात्। पूर्वदक्षमथ याम्यपश्चिमं पश्चिमोत्तरसुदीचिपूर्वमम्। प्राक्प्रतीचीमथ दक्षिणोत्तरं वास्तु षड्विधमिदं द्विशालकम्। अथ त्रिशालानि "उत्तरद्वारहीनं यत् त्रिशालं धनधान्यदम्। श्रिरत्नमाभनामानं रात्रां सौख्यविवर्द्धनम्। प्राक्द्वारशालाहीनन्तु सुचेलं नाम तद्गृहम्। इदिं पुत्रपौत्राणां धनधान्यसद्मदम्। याम्यशालाविहीनं तत् त्रिशालं चुल्लीसंज्ञकम्। विनाशनं धनस्यापि पुत्रपौत्रादिनाशनम्। पश्चिमशालाविहीनन्तु पक्षघ्नं नाम तद्गृहम्। पुत्राणां दोषदं चैव परञ्च पुरवासिनाम्। चत्वारोऽमी मयाप्रोक्ता भेदाश्चैव चतुर्विधाः। तस्माद्विचार्य कुर्वीत गृहकर्मणि कोविदैः"। अथ चतुःशालानि "याम्यशालां न्यसेदादौ द्वितीयां पश्चिमे ततः। तृतीया चोत्तरे स्थाप्या चतुर्थी पूर्वपश्चिमा। गृहाणां क्रमयोगेन चतुःषष्टिः समासतः। अनेकयोगभेदाच्च शतं त्रिंशोत्तरं कृतम्। अलिन्दानां व्यवच्छेदो नास्ति यत्र समन्ततः तद्वास्तु सर्वतोभद्रं। चतुर्द्वारसमन्वितम्। एकशाले चतुःशाले दुर्भिक्षं राजविप्लवे। स्वामिना नीयमानायां प्रतिशुक्रो न दुष्यति। रूपाणां विबुधानाञ्च गृहं सौख्यप्रदायकम्। प्रदक्षिणं ततः सर्वैःशालाभित्तेरलिन्दकैः। विनापरेण द्वारेण नन्द्यावर्त्तमिदं कृतम्। श्रेष्ठं सुतारोग्यकरं सर्वेषां गृहजन्मनाम्। द्वारालिन्दोगतस्थेको नेत्रयोर्दक्षिणाङ्गतः। विधाय दक्षिणद्वारं वर्द्धमानमितिं कृतम्। शुभदं सर्ववर्णानां इदिं पुत्रपौत्रदम्। पश्चिमोत्तरतोऽलिन्दं प्रागन्तौ वैतदुच्छ्रितौ। अन्यस्तन्मध्यविष्टतः प्रागद्वारं स्वस्तिकं शुभम्। प्राक्पश्चिमावलिन्दौ यावन्तौ तद्वतौ परौ सौम्यद्वारं विना यत्स्याद्वर्द्धमानं तु तत् कृतम्"। यत्सच्च पङ्क्तान्तरं टीकेत्यभियुक्तोक्तेः अत्रासद्भावोनाभवः" ह०स० वाक्येन मत्स्यपुराणवाक्येन च स्पष्टीक्रियते यथा ह०स० "उत्तमप्रतिमाभ्यधिकं हस्तशतं रूपगृहं पृथुत्वेन। अष्टाशीत्यान्त्येवं पञ्च सपादानि दैर्घ्यं च। पङ्क्तिः पङ्क्तिहीना सेनापतिसद्मनां चतुःषष्टिः। पञ्चैवं विस्तारात् पञ्चांशसमन्विता दैर्घ्यं। षष्टिश्चतुर्विहीना वेश्मानि भवन्ति पञ्च सचिवस्य। खाष्टांशयुता दैर्घ्यं तदर्धतो राज-



R Sa4K Tar

CENTRAL ARCHAEOLOGICAL LIBRARY NEW DELHI
Acc. No. .....
Date. .....
Call No. .....



ऽष्टिशीर्षाम्। षड्भिः षड्भिश्चैवं युवराजस्यापवर्जिताऽशीतिः। ब्रह्मशालिता च दैर्घ्यं पञ्च तदर्धेनदनुजानाम्। नृपसचिवानरत्नत्वं सामन्तप्रवरराजपुरुषाणाम्। नृपयुवराजविशेषः कञ्चुकिवेशग्राकनाज्ञानाम्। अध्याधिक्षतानां सर्वेषामेव कोशरतित्वम्। युवराजमन्त्रिवरं कर्मान्ताध्यक्षदूतानाम्। चत्वारिंशद्धीना चतुश्चतुर्भिस्तु पञ्च यावदिति। षड्भागयुता दैर्घ्ये दैवज्ञपुरोधसोर्भिषजः। वास्तुनि यो विस्तारः स एव चोच्छ्रायनिश्चयः शुभदः। शालैकैषु गृहेष्वपि विस्तारादिगुणितं दैर्घ्यम्। चातुर्वर्ण्यव्यासे द्वात्रिंशत् स्याच्चतश्चतस्रीनां। का षोडशादिति परं न्यूनतरमतीव हीनानाम्। सदशांशं विप्राणां क्षत्रस्याष्टांशसंयुतं दैर्घ्यम्। षड्भागयुतं वैश्यस्य भवति शूद्रस्य पादयुतम्। नृपसेनापतिमन्त्रिपुरोरन्तरमानेन कोशरतिभवने। सेनापतिचातुर्वर्ण्यविवरतो राजपुरुषाणाम्। अथ पारसवादीनां स्वमानसंयोगदलसमं भवनम्। हीनाधिकं स्वमानादशुभकरं वास्तु सर्वेषाम्। पञ्चाश्रमिणाञ्च मितं धान्यायुधवह्निरतिमष्टाशां च। नेच्छन्ति शास्त्रकारा ह्रस्वगताङ्गुष्ठितं परतः। सेनापतिनृपतीनां सप्तत्रिंशद्धिते द्विधाकृते व्यासे। शाला चतुर्दशकृते पञ्चत्रिंशद्धते ऽन्तिन्दः। ह्रस्वद्वात्रिंशादिषु चतुश्चतुस्त्रिकत्रिकाः शालाः। सप्तदशत्रितयतिथित्रयोदशकताङ्गुलाभ्यधिकाः। त्रित्रिद्विद्विद्विसमाः क्रमाद्दङ्गुलानि चैतेषाम्। व्येका विंशतिरष्टौ विंशतिरष्टादश त्रितयम्। शालात्रिभागतुल्या कर्त्तव्या वीथिका बहिर्भवनात्। यद्यपतो भवति सा सोष्णीषं नाम तद्वास्तु। सावाश्रयमिति२ पश्चात् सावष्टम्भं२ तु पार्श्वसंस्थितया। सुस्थितमिति४ च समन्तात् शास्त्रज्ञैः पूजिताः सर्वाः। विस्तारषोडशांशः सचतुर्भागो भवेदुच्छ्रायः। द्वादशभागेनोनो भूमौ भूमौ समन्तानाम्। व्यासात् षोडशभागः सर्वेषां सद्मनां भवति भित्तिः। एकेष्टकाकृतानां दारुकृतानां तु स विकल्पः। एकादशभागयुतः सप्तप्रतिर्द्वपवेशयोर्व्यासः। उच्छ्रायोऽङ्गुलतुल्यो द्वारस्यार्द्धेन विष्कम्भः। विप्रादीनां व्यासात् पञ्चांशोऽष्टादशाङ्गुलसमेतः। साष्टांशो विष्कम्भो द्वारस्य द्विगुण उच्छ्रायः। उच्छ्रायहस्तसङ्ख्याविस्तारमाणान्यङ्गुलानि बाहुल्यम्। शाखाद्वयेऽपि कार्यं सार्द्धं तद्द्वाराङ्गुलयोः। उच्छ्रायात् सप्तगुणादंशीतिभागः पृथुत्वमेतेषाम्। नवगुणितेऽशीत्यंशः स्तम्भस्य दर्शांशहीनोऽग्रे। समचतुरस्रो रुचकोः वज्रोऽष्टाश्रिर्द्विवज्रकोऽद्विगुणः। द्वात्रिंशता तु मध्ये प्रलीनकोऽष्ट इत्युक्तः। स्तम्भं विभज्य नवधा वज्रमंः भागो घटोऽस्य भागोऽन्यः। पद्मं३ तयोत्तरोष्ठं कुर्याद्भागेन भागेन। स्तम्भसमं बाहुल्यं भारतुलानाहुपर्वुपर्यांसाम्। भवति तुलोपतुलानामूर्ध्वं पादेन पादेन। क्षत्रप्रतिष्ठाविन्दं समन्तो वास्तु सर्वतोभद्रम्। नृपविबुधसमूहानां कार्यं द्वारैश्चतुर्भिरपि। नन्द्यावर्त्तं३मविन्दोः शालाकृत्वात् प्रदक्षिणान्मतैः। द्वारं पश्चिममञ्चित् विहाय शेषाणि कार्याणि। द्वारान्निर्गतोऽन्तगतः प्रदक्षिणोऽन्यः शुभस्तत्रान्यः। तद्वच्च वर्द्धमाने३ द्वारं तु न दक्षिणं कार्यम्। अपरोऽन्तगतोऽविन्दः प्रागन्तगतौ तदुत्थितौ चान्यौ। तदवधिविहतत्वान्दः प्राग्द्वारं स्वस्तिके४ऽशुभदम्। प्राक्पश्चिमावविन्दावन्तगतौ तदवधिस्थितौ शेषौ। रुचके५ द्वारं न शुभदमुत्तरतोऽन्यानि शस्तानि। श्रेष्ठं नन्द्यावर्तं सर्वेषां वर्द्धमानसञ्ज्ञं च। स्वस्तिकरुचके मध्ये शेषं शुभदं नृपादीनाम्। उत्तरशालाहीनं शिरश्चत्रनाभं त्रिशालकं धन्यम्। प्राक्शालया वियुक्तं सुक्षेत्रं दक्षिणं वास्तु। याम्याहीनं चुल्ली त्रिशालकं वित्तनाशकरमेतत्। पक्षघ्नमपरया वर्जितम् सुतध्वंसवैरकरम्। सिद्धार्थमपरयाख्ये यमसूर्ये पश्चिमोत्तरे शाले। दण्डाख्यसदकपूर्वे वातास्यं प्राग्युता याम्या। पूर्वापरे तु शाले स्तब्धचुल्ली दक्षिणोत्तरे काचम्। सिद्धार्थेऽर्थावाप्तिर्यमसूर्ये स्तब्धपतेर्मृत्युः। दण्डवधो दण्डाख्ये कलहोद्वेगः सदैव वातास्ये। वित्तविनाशश्चुल्ल्यां ज्ञातिविरोधः कृतः काचे"।

तत एकाशीतिपदं चतुःषष्टिपदञ्च द्विधा वास्तुनरविभागसङ्ख्योक्तम् "सम्माता वंशानां मध्यानि समानि यानि च पदानाम्। मर्माणि तानि विद्यान्न परिपीडयेत् प्राज्ञः। नाभ्यशुचिभाण्डकीलस्नाय्वादीनि पीडितानि शल्यैव। स्तब्धभर्तृस्तम्भे पीडासङ्गे प्रजस्य कण्डूयते यद्वङ्गं स्तब्धपतिना यत्र वाऽमरा[illegible] अशुभं भवेद्विमित्तं विक्षतिर्वाग्नेः सशल्यं तत्। धनहानिर्दारुमये पशुपीडारुग्भयानि चास्थिक्षते। (षोडशमये शस्त्रभयं कपालकेशेषु मृत्युः स्यात्। अङ्गारे स्तेनभयं भस्मनि च विनिर्दिशेत्तदाग्निभयम्। शल्यं हि [illegible]

संस्थं सुवर्णरजताहतेऽत्यशुभम्। मर्मण्यमर्मगो वा रुग्वद्व्यर्थागमं तृणसमूहः) (चेपकम्) अपि नागदन्तको मर्मसंस्थितो दोषकृद्भवति। रोगाद्यायुं पिहितो ऽतागमं शोषस्तत्रमपि वितथात्। सख्याङ्गुर्यं जयनाच्च भग्नमदितेच सुपीवात्। तद्धमाता नव ये तान्यति मर्माणि सम्यदिष्टानि। यच्च षट्स्वाष्टांशसत्प्रोक्तं मर्मपरिमाणम्। षट्वस्तसंख्यया सम्मितानि शोऽङ्गुलानि विस्तीर्णैः। वंशव्यासोऽध्यर्द्धः शिराप्रमाणं विनिर्दिष्टम्। इत्यभिहन् ब्रह्मार्थं यत्राद्रक्षेद्दृष्टो गृहान्तःस्थम्। उच्छिष्टादुपघाताद्गृहपतिरुपतप्यते तस्मिन्। दक्षिणभुजेन हीने वास्तुनरेऽर्थक्षयोऽङ्गनादोषाः। वामेऽर्थधान्यहानिः शिरसि गुणैर्हीयते सर्वैः। स्त्रीदोषाः सुतमरणं प्रेष्यत्वं चापि करेण वैकल्ये। अविकलपुरुषे वसतां मानार्थयुतानि सौख्यानि। गृहनगरग्रामेषु च सर्वत्रैवं प्रतिष्ठिता देवाः। तेषु च यथानुरूपं वर्णा विप्रादयो वास्याः। वास्तुगृहाणि च विद्याद् विप्रादीनामुदग्दिगाद्यानि। विप्रतां च तथा भवनं भवति तान्येव दक्षिणतः। नवगुणसूत्रविभक्तान्यष्टगुणेनाथवा चतुःषष्टेः। द्वाराणि यानि तेषामनलादीनां क्रमोपनयः। अनलभयं स्त्रीजन्मप्रभूतधनता नरेन्द्रवाङ्मुख्यम्। क्रोधपरताऽन्नतत्वं क्लैब्यं च पूर्वेण। अल्पसुतत्वं प्रैष्यं नीचत्वं भक्ष्यपानसुतद्विट्। रौद्रं क्रतुघ्नधनं सुतवीर्यघ्नं च याम्येन। सुतपीडा रिपुवृद्धिर्न धनसुताप्तिः सुतार्थबलसम्पत्। धनसम्पद्भृपतिभयं धनक्षयो रोग इत्यपरे। बधबन्धौ रिपुवृद्धिर्धनसुतलाभः समस्तगुणसम्पत्। पुत्रधनाप्तिर्वैरं सुतेन दोषाः स्त्रिया नैःस्वम्। मार्गतरुकोणकूपस्तम्भसमविद्धमशुभदं द्वारम्। उच्छ्रायाद्विगुणमितां त्यक्त्वा भूमिं न दोषाय। रथ्याविद्धं द्वारं नाशाय कुमारदोषदं तरुणा। षट्द्वारे गोको व्ययोऽम्भुनि स्राविणि प्रोक्तः। कूपेनापस्कारो भवति विनाशश्च देवताविद्धे। स्तम्भेन स्त्रीदोषाः कुलनाशो ब्रह्मणोऽभिमुखे। उन्मादः स्वयमुद्घाटितेऽथ पिहिते स्वयं कुलविनाशः। मानाधिके नृपभयं दस्युभयं व्यसनदं नीचम्। द्वारं द्वारस्योपरि यत्तद्ध शिवाय सद्गृहं यच्च। खाय्यात्तं क्षुद्रवदं कुलं कुलनाशनं भवति। पीडाकरमतिपीडितमन्तर्विनतं भवेदभावाय। वास्तुविनते प्रवासो दिग्भ्रान्ते दस्युभिः पीडा। मुखद्वारं नान्यैर्द्वारैरतिसन्दधीत गृहपद्मम्। वटफलपत्रप्रसवादिभिश्च तन्मङ्गलैश्चिनुयात्। ऐशान्यादिषु कोणेषु संस्थिता वास्तोः सद्गृहसौताः। चरकी विदारिनामाथ पूतना राक्षसी चेति। पुरभवनग्रामार्थां ये कोणास्तेषु निवसतां दोषाः। श्वपचादयो ऽन्त्यजात्यास्तेष्वेव विहङ्गमायान्ति। ग्राम्यादिष्वशुभफला जातास्तरवः प्रदक्षिणेनैते। उदगादिषु प्रशस्ताः पुत्रवटोदुम्बराश्वत्थाः। आसन्नाः कण्टकिनो विपुभयदाः क्षीरिणोऽर्थनाशाय। फलिनः प्रजाक्षयकरा दारुण्यपि वर्जयेदेषाम्। न छिन्द्याद्यदि तरूंस्तान् तदन्तरे पूजितान्यमेदन्यान्। पुन्नागाशोकारिष्टबकुलपनसान् शमीशालौ। शस्तौषधिद्रुमलतामधुरा सुगन्धा स्निग्धा क्षमा न सुषिरा च मही नराणाम्। अश्वध्वनि श्रमविनोदसुपागतानां धत्ते श्रियं विसत शाश्वतमन्दिरेषु। सचिवालयेऽर्थनाशो धूर्तगृहे सुतवधः समीपस्थे। उद्वेगो देवकुले चतुष्पथे भवति चाऽकीर्तिः। चैत्ये भयं चतुष्पथे वल्मीकश्वभ्रसङ्कुले विपदः। गर्तायां तु पिपासा कूपाकारे धनविनाशः। उदगादिषुपविष्टं विप्रादीनां प्रदक्षिणेनैव। विप्रः सर्वत्र वसेदनुवर्णमथेष्टमन्येषाम्। गृहमध्ये हस्तमितं खात्वा परिपूरितं पुनः श्वभ्रम्। यद्यूनमनिष्टं तत् समे समं चाधिकं यत्। श्वभ्रमथ वाम्बुपूर्णं पदशतमित्यानतस्य यदि नोनम्। तद्धन्यं यच्च भवेत् पलान्यपामाढकं चतुःषष्टिः। ग्रामे वा नृत्याद्ये श्वभ्रस्थे दोषवर्त्तिरभ्यनिलम्। ज्वलति दिशि यस्य शस्ता सा भूमिस्तस्य वर्णस्य। श्वभ्रोषितं न कृसरं यस्मिन् प्रह्लादतेऽनुवर्णसमम्। तत्तस्य भवति शुभदं यस्य च यस्मिन्नुनोरमते। सितरक्तपीतकृष्णा विप्रादीनां प्रशस्यते भूमिः। गन्धश्च भवति यस्या इतरुधिराद्याममद्यसमः। कृशयुक्ता शरबल्वजा दूर्वाकाशाश्वता क्रमेण मही। अनुवर्णं वृद्धिकरी मधुरकषायाम्लकटुका च। क्षतां प्ररूढबीजां गोऽध्युषितां ब्राह्मणैः प्रशस्तां च। गत्वा महीं गृहपतिः काले संवत्सरोदिष्टे। मङ्गलनानाकारैर्दध्यक्षतसुरभिकुसुमधूपैश्च। दैवतपूजां कृत्वा स्थपतीनभ्यर्च्य विप्रांश्च। विप्रः स्रुचा शमीं, वज्रेण क्षत्रियो विल्वोद्भवाम्। शूद्रः पादौ स्रुचा कुर्याद्रेखां गृहारम्भे। अङ्गुष्ठेन कुर्यान्मध्याङ्गुल्याथवा प्रदेशिन्या। कनकमणिरजतशङ्खादधिफलकुसुमाक्षतैश्च शुभम्। शस्त्रेण शस्त्रसत्त्वं बन्धो लोहेन भक्षनाग्निभयम्। तस्करभयं

लक्षणेन च कार्योल्लिखिता च राजभयम्। वक्रा पादालिखिता शस्त्रभयक्रोधदा विरूपा च। चर्माङ्गारास्थिकृता दलेन च कर्तुरधिपाय। वैरमपसव्यलिखिता प्रदक्षिणं सम्पदो विनिर्देश्याः। वाचः परुषा निर्भीर्वितं श्रुतं चाशुभं कथितम्। अर्घनिचितं कृतं वा प्रविशन् स्वपतिर्गृहे निमित्तानि। अवलोकयेद्गृहपतिः क्व संस्थितः स्पृशति किं चाङ्गम्। रविदीप्तौ यदि शकुनिस्तस्मिन् काले विरौति परुषरवः। संस्पृष्टाङ्गसमानं तस्मिन्देशेऽस्थि निर्देश्यम्। शकुनसमये ऽन्यवान्ये रुक्षस्वरादयोऽनुवाशने। तत्प्रभवमस्थि तस्मिंस्तदङ्गसम्भूतमेवेति। स्रवे प्रसार्यमाणे गर्दभरावोऽस्थिशल्यमाचष्टे। स्रष्टृगालरुक्षिते वा स्रवे शल्यं विनिर्देश्यम्। दिशि याम्यायां शकुनिर्मधुरविरावी यदा तदा वाच्यः। अर्घस्तस्मिन् स्थाने स्वक्षेत्रराधिपिते ऽङ्के वा। स्रवच्छेदे स्रष्टुः कीले चावाङ्मुखे महान् रोगः। स्वष्टनाथस्यपतीनां मृत्तिलोपे स्रष्टुरादेश्यः। स्खलाद्भ्रुते शिरोरुक् कुलोपसर्गोऽपवर्जिते कुम्भे। भग्नेऽपि च कर्मिबधद्भ्रुते करादृष्टगृहपतेर्हन्तुः। दक्षिणपूर्वे कोणे कृत्वा पूजां शिवां न्यसेत्प्रथमम्। शेषाः प्रदक्षिणेन स्वस्वार्यवैं सस्तत्वाद्याः। कलशगन्धवरयुतः कृतधूपविलेपनः सस्तत्वाद्यः। स्वस्वस्तत्वैव कार्यो द्वारोच्छ्रायः प्रयत्नेन। विहगादिभिरवलीनैराकस्मितपतितदुःस्थितैश्च फलम्। शकुध्वजफलसदृशं तस्मिंश्च शुभं विनिर्दिष्टम्। प्रागुत्तरोन्नते धनसुतलाभः सुतवधश्च दुर्गन्धे। वक्रे बन्धुविनाशो नम्रि गमौ च दिग्मूढे। दक्षेद्यदि स्रष्टृहर्द्धिं ततः समन्ताद्विपर्ययेत्तुल्यम्। एकोद्देशे दोषः प्रागग्न्यायुत्तरे कुर्यात्। प्राग्भवति मित्रवैरं मृदुर्दक्षिणेन यदि हर्द्धिः। अर्थविनाशः पश्चादग्निहर्द्धौ मनस्तापः। ऐशान्यां देवस्रष्टृ मन्त्रानसं चापि कार्यमाग्नेय्याम्। नैर्ऋत्यां भाण्डोपस्करोऽथ धान्यानि मारुत्याम्। प्रागादिस्थे सलिले सुतहानिः शिखिभयं रिपुभयं च। स्त्रीकलहः स्त्रीदोष्ट्यं नैःस्व वित्तात्मजविद्विद्भिः। खगनिलयभस्मसंशुष्कदग्धदेवालयश्मशानस्थान्। चीरतरुवल्मीतकनिम्बारुणवर्जितांश्चैत्यात्। रात्रौ कृतबलिपूजं प्रदक्षिणं छेदयेद्दिवा हुत्वम्। धन्यसदक्ष प्राक्पतनं न स्याद्गोऽन्यथा पतितः। छेदो यद्यविकारो ततः शुभं दारु तद्गृहौपयिकम्। पीते तु तरुमण्डले निर्दिशेत् तरोर्मध्यगां गोधाम्। मञ्जिष्ठाभे भेकं नीले सर्पं तथारुणे सरटः। सुरभाभेऽथ्रा कपिले तु भूमकोऽम्भश्च खड्गाभे। धान्यगोगुरुछागशुराणां न स्वपेदुपरि नाध्यनुवंशम्। नोत्तरापरशिरा न च नग्नो नैव चार्द्रचरणः शिवमिच्छन्। भूरिपुष्पनिकरं सतोरणं तोयपूर्णकलशोपशोभितम्। धूपगन्धबलिपूजितामरं ब्राह्मणध्वनियुतं विवेदृष्टगृहम्" मत्स्यपुराणे वास्तुप्रकरणे चोक्तं यथा "पूर्वं भूमिं परीक्षेत पश्चाद्वास्तुं प्रकल्पयेत्। श्वेता रक्ता तथा पीता कृष्णा चैवानुपूर्वशः। विप्रादेः शस्यते भूमिरतः कार्यं परीक्षणम्। विप्राणां मधुरास्वादा कटुका क्षत्रियस्य तु। तिक्ता कषाया च तथा वैश्यशूद्रेषु शस्यते। अरत्निमात्रे वै गर्ते खनित्रे च सर्वशः। पूरयेत्तमेव गर्तं समन्तात्तु समन्ततः। पूर्णमेव भवेच्छ्रेष्ठं न्यूनं हीनं समं समम्। ज्वालयेद्भूपरीक्षार्थं तत्पूर्णं सर्वदिक्सुखम्। दीप्तौ पूर्वादिगृह्णीयादग्नीनामनुपूर्वशः। वास्तुः सामूहिकोनाम दीयते सर्व्वतस्तु यः। शुभदः सर्ववर्णानां प्रासादेषु गृहेषु च। अरत्निमात्रावोगर्त्ते परीक्ष्य स्नातपूरणे। अधिके श्रियमाप्नोति न्यूने हानिं समे समम्। फालक्षष्टेऽथवा देशे सर्ववीजानि वापयेत्। त्रिपञ्चसप्तरात्रेण यत्र रोहन्ति तान्यपि। ज्येष्ठा समा कनिष्ठा भूर्जलनोत्तरा सदा। पञ्चगव्यौषधिजलैः परीक्षित्वा च सेचयेत्। एकाशीतिपदं कृत्वा रेखाभिः कनकेन च। पश्चात्पिष्टेन चालिख्य स्रवेणावेष्ट्य सर्वतः। दश पूर्वायता रेखा दश चैवोत्तरायताः। सर्ववास्तुविभागेषु विज्ञेया नवका नव। एकाशीतिपदं कृत्वा वास्तुविद्यर्चयास्तुषु। पदस्थान् पूजयेद्देवां स्त्रिंशत्पञ्चदशैव तु ४५। द्वात्रिंशद्बाह्यतः पूज्याः पूज्याश्चान्तस्त्रयोदश। नामतस्तान् प्रवक्ष्यामि स्थानानि च निबोधत। ऐशानकोणादिषु तान् पूजयेद्विधिवन्नरः। शिखी चैवाथ पर्जन्यो जयन्तः कुलिशायुधः। सूर्यसत्यौ भृशश्चैव आकाशो वायुरेव च। पूषा च वितथश्चैव बृहत्क्षतयमावुभौ। गन्धर्वो भृङ्गराजश्च मृगः पितृगणस्तथा। दौवारिकोऽथ सुग्रीवः पुष्पदन्तो जलाधिपः। असुरः शोषपापौ च रोगोऽहिर्मुख्य एव च। भल्लाटः सोमसर्पौ च अदितिश्च दितिस्तथा। बहिर्द्वात्रिंशदेते तु तदन्तस्तु ततः शृणु। ऐशानादिचतुष्कोणसंस्थितान् पूजयेद्बुधः। आपश्चैवाथ सावित्रो जयोरुद्रस्तथैव च, मध्ये नवपदे ब्रह्मा तस्याष्टौ च समीपगान्।

साध्यानेकान्तरान् विद्यात् पर्वाद्याद्यामतः शृणु । अर्यमा सविता चैव विवस्वान् विबुधाधिपः । मित्रोऽथ राजयक्ष्मा च तथा पृथ्वीधरः स्मृतः । अष्टमद्वारपर्यन्तमेषु परितो ब्रह्मणः स्मृताः । आपश्चैवापवत्सश्च पर्ज्यन्योऽग्निर्दितिस्तथा । पदिकानान्तु वर्गोऽयमेवं कोणेष्वयेषतः । तन्मध्ये तु चतुष्पदे द्विपदास्तु सवंशः । अर्यमा च विवस्वांश्च मित्रः पृथ्वीधरस्तथा । ब्रह्मणः परितोदिक्षु त्रिपदास्ते तु सवंशः । वंशानिदानीं वक्ष्यामि क्रमेणापि पृथक् पृथक् । वायुं यावत्तथा रोगात् पितृभ्यः स्त्रिवनं पुनः । सख्यात् भृगं तथा गोषाहितयं यावदेव तु । सुग्रीवाददितिं यावत् स्मृतात् पर्जन्यमेव च । एते वंशाः समाख्याताः कचिच्च क्रमेव तु । एतेषां यस्तु सम्पातः पदं मध्यं समं तथा । मर्म चैतत्समाख्यातं त्रिगुणं कोणगञ्च यत् । सान्धिसन्धिषु वर्ज्यानि तुलाविधिषु सर्वदा । कीलोच्छिष्टोपघातादि वर्जयेद् यत्नतो जनः । सर्वत्र वास्तुनिर्दिष्टो पितृवैश्वानरायतः । मूर्ध्नस्मिः समादिष्टो सखे चापः समाश्रितः । पृथ्वीधरोऽर्यमा चैव स्तनयोस्तावधिष्ठितौ । वक्षःस्थले चापवत्सः पूजनीयः सदा बुधैः । नेत्रयोर्दितिपर्जन्यौ श्रोत्रेऽदितिजयन्तकौ । सूर्येन्द्रांससंस्थौ तु पूजनीयौ प्रयत्नतः । सूर्यसत्यादवस्तद्वत् बाह्वोः पञ्च च पञ्च च । रुद्रश्च राजयक्ष्मा च वामहस्ते समाश्रितौ । सावित्रः सविता तद्वद्दक्षहस्तं दक्षिणमाश्रितौ । विवस्वानथ मित्रश्च जठरे संव्यवस्थितौ । पूषा च पापयक्ष्मा च हस्तयोर्भणिबन्धने । तथैवासुरयोषौ च वामपार्श्वे समाश्रितौ । पार्श्वे तु दक्षिणे तद्वत् पितरः सङ्कटस्थितः । अर्यमाम्बुपौ श्रेयौ जान्वोर्गन्धर्वपुष्पकौ । जङ्घयोर्भृंगसुग्रीवौ स्फिक्स्थौ दौवारिको मृगः । जयमृगौ तथा सेढे पादयोः पितरस्तथा । मध्ये नवपदे ब्रह्मा हृदये स तु पूज्यते । चतुःषष्टिपदोवास्तुः प्रासादे ब्रह्मणा स्मृतः । ब्रह्मा चतुष्पदस्तत्र कोणेष्वर्धपदास्तथा । बहिः कोणेषु पार्श्वो तु साधिष्ठाभयसंस्थिताः । त्रिंशत्तिर्द्विपदाश्चैव चतुःषष्टिपदे स्मृताः । अष्टादशसु कक्षेषु कक्षभूतिः स्वाभ्यङ्के यत्र जायते । शल्यं स्वप्नवेत्तत्र प्रासादे भवने तथा । सशल्यं भयदं यस्मादशल्यं शुभदायकम् । हीनाधिकाङ्गतां वास्तोः सर्वथा तु विवर्जयेत् । नगर ग्रामदेशेषु सर्वत्रैवं विवर्जयेत् । चतुःशालं त्रिशालञ्च द्विशालं चैकशालकम् । नामतस्तान् प्रवक्ष्यामि स्वरूपेण द्विजोत्तम ! । चतुःशालं प्रवक्ष्यामि स्वरूपन्नामतस्तथा । चतुःशालञ्चतुर्द्वारैरनिन्द्यैः सर्वतोमुखम् । तत् सर्वतोभद्रं शुभं देवनरालयम् । पश्चिमद्वारहीनन्तु नन्द्यावर्तं प्रचक्षते । दक्षिणद्वारहीनन्तु वर्द्धमानं प्रचक्षते । पूर्वद्वारविहीनं तत् स्वस्तिकं नाम विश्रुतम् । रुचकं चोत्तरद्वारविहीनं तत् प्रचक्षते । सौम्यशालाविहीनं यच्छिशालं धान्यकृच्च तत् । क्षेमदङ्करं नृणां वस्तुपुत्रफलप्रदम् । शालया पूर्वया हीनं सुक्षेत्रमिति विश्रुतम् । धन्यं यशस्यमायुष्यं श्रीकरीह विनाशनम् । शालया याम्यया हीनं यच्छिशालं तु शालया । कुलक्षयकरं नृणां सर्वव्याधिविनाशनम् । हीनं पश्चिमया यत्तु पद्मनं नाम तत् पुनः । मित्र बन्धून् सुतान् हन्ति तथा सर्वभयावहम् । याम्यापराभ्यां शालाभ्यां धन्यं धान्यफलप्रदम् । क्षेमदङ्करं नृणां तथा पुत्रफलप्रदम् । यमसूर्यं च विज्ञेयं पश्चिमोत्तरशालिकम् । राजाग्निभयदं नृणां कुलक्षयकरं च तत् । उदक्पूर्वे तु शाले हि दण्डाख्यं यत्र तद्भवेत् । अकालमृत्युभयदं परचक्रभयावहम् । धनाख्यं पूर्वयाम्याभ्यां शालाभ्यां यद्विशालकम् । तच्चक्षुभयदं नृणां पराभवभयावहम् । चुल्ली पूर्वापराभ्यां तु सा भवेन्मृत्यु सूचिनी । वैधव्यदायकं स्त्रीणामनेकभयकारकम् । कार्यसुत्तरयाम्याभ्यां शालाभ्यां भयदं नृणाम् । सिद्धार्थसंज्ञं वर्ज्याणि द्विशालानि सदा बुधैः । अथातः संप्रवक्ष्यामि भवनं भूपतेः । पञ्चप्रकारं तत्प्रोक्तमुत्तमादिविभेदतः । अष्टोत्तरं हस्तशतं द्विकरश्चोत्तमोमतः ! चतुर्वर्ग्येषु विस्तारो हीयते चाष्टभिः करैः । चतुर्थांशाधिकं दैर्घ्यं पक्षस्यापि निगद्यते । युवराजस्य वक्ष्यामि तथा भवनपञ्चकम् । षड्भिः षड्भिस्तथाशीतिर्हीयते तत्र विस्तरात् । त्रिंशेन चाधिकं दैर्घ्यं पक्षस्यापि निगद्यते । सेनापतेः प्रवक्ष्यामि तथा भवनपञ्चकम् । चतुःषष्टिस्तु विस्तारात् षड्भिः षड्भिस्तु हीयते । पक्षस्येतेषु दैर्घ्यं च षड्भागेनाधिकं भवेत् । मन्त्रिणामथ वक्ष्यामि तथा भवनपञ्चकम् । अष्टचत्वारिंशेना स्यात् करपृष्टः प्रविस्तरे । अष्टांशेनाधिकं दैर्घ्यं पक्षस्यापि निगद्यते । सामन्तामात्यलोकानां वक्ष्ये भवनपञ्चकम् । चत्वारिंशत्तथाष्टौ च चतुर्भिर्हीयते क्रमात् । चतुर्थांशाधिकं दैर्घ्यं पक्षस्येतेषु गद्यते । शिल्पिकञ्च किनाञ्चैव

वेश्मानां गृहपञ्चकम्। अष्टाविंशत् कराणान्तु त्रिहीनं विस्तरे क्रमात्। द्विगुणं दैर्घ्यमेवोक्तं मध्यमेष्वेवमेव तत्। दूतीकर्मोचितानां वक्ष्ये भवनपञ्चकम्। चतुर्थांशाधिकं दैर्घ्यं विस्तारोदादशैव तु। अर्धार्द्धकरहानिःस्याद्विस्तारात्पञ्चधः क्रमात्। दैवज्ञगुरुवैद्यानां सभास्तारपुरोधसाम्। तेषामपि प्रवक्ष्यामि तथा भवनपञ्चकम्। चत्वारिंशत्तु विस्ताराद्धर्भिर्हीयते क्रमात्। पञ्चखेतेषु दैर्घ्यं तु षड्भागेनाधिकं भवेत्। चातुर्वर्ण्यस्य वक्ष्यामि सामान्यं गृहपञ्चकम्। द्वात्रिंशतिः करायान्तु चतुर्भिर्हीयते क्रमात्। आ षोड़शादिति परं नूनमन्यावसायिनाम्। दशांशेनाष्टभागेन त्रिभागेणाथ पादिकम्। अधिकं दैर्घ्यमित्याद्यब्राह्मणादेः प्रशस्यते। सेनापतेर्नृपस्यापि गृहयोरन्तरेण तु। उपवासगृहं कार्यं भाण्डागारन्तथैव च। सेनापतेर्गृहस्यापि चातुर्वर्ण्यस्य चान्तरे। वासाय च गृहं कार्यं राजपूज्येषु सर्वदा। अन्तरप्रभवानान्तु स्वपितोर्गृहमिष्यते। तथा हस्तशतादर्द्धं गदितं वनवासिनाम्। सेनापतेर्नृपस्यापि सप्तत्या सहिते कृते। चतुर्दशकृते व्यासे शालाव्यासः प्रकीर्तितः। पञ्चत्रिंशान्विते तस्मिन्नन्दिः रुद्रदाहृतः। तथा षट्त्रिंशद्धस्ता तु सप्ताङ्गुलसमन्विता। विप्रस्य सकृती शाला न दैर्घ्यं परतोभवेत्। दशाङ्गुलाधिका तद्वत् क्षत्रियस्य निगद्यते। पञ्चत्रिंशत्करा वैश्ये अङ्गुलानि त्रयोदश। तावत्करैव शूद्रस्य युता पञ्चदशाङ्गुलैः। शालायास्तु त्रिभागेण यस्याग्रे वीथिका भवेत्। सोत्तीर्यं नाम तद्वास्तु, पश्चात् सायाच्छयं भवेत्। पार्श्वयोर्वीथिका यत्र सावष्टम्भात्तदुच्यते। समलाद्वीथिका यत्र सुस्थितं तदिहोच्यते। शुभदं सर्वमेतद्धाद्यावर्णेत्र चतुर्विधम्। विस्तारात् षोड़शोभागस्तथा हस्तचतुष्टयम्। प्रथमो भूमिकोच्छ्राय उपरिष्टात् प्रहीयते। द्वादशांशेन सर्वासु भूमिकासु तथोच्छ्रयः। पक्वेष्टकाभवा भित्तिः षोड़शांशेन विस्तरात्। दारवैरपि कल्प्या स्यात्तथा मृण्मयभित्तिका। गर्भमानेन भानन्तु सर्ववास्तुषु शस्यते। गृहव्यासस्य पञ्चाशद्दशभिरङ्गुलैः। संयुतोद्वारविष्कम्भो द्विगुणश्चोच्छ्रयो भवेत्। द्वारशाखासु बाहुल्यमुच्छ्रायः करसम्मितैः। अङ्गुलैः सर्ववास्तूनां पृथुत्वं शस्यते बुधैः। उदुम्बरोत्तरायामस्तदर्धं परिकीर्तितः" २५१अ०।

"अथातः संप्रवक्ष्यामि तस्य मानविनिर्णयम्। कृत्वा सम्यगनोच्छ्रायं सदा सप्तगुणं बुधैः। अशीत्यंशः पृथुत्व स्यादष्टषष्टयुपैः सह। रुचकस्तत्तरस्तः स्यादष्टाश्रो वज्र उच्यते। द्विवज्रः षोड़शास्रस्तु द्वात्रिंशास्रः प्रकीर्तितः। मध्यप्रदेशे यस्याग्रे हस्तोहस्त इति स्मृतः। एते पञ्च महास्तम्भाः प्रशस्ताः सर्ववास्तुषु। पद्मवल्लीलताकुम्भपत्रदर्पणरूपिताः। तस्यास्य नवमांशेन पद्मकुम्भान्तरान्वितः। तस्मात्तस्या तुला प्रोक्ता हीना चोपतुला ततः। त्रिभागेणेह सर्वत्र चतुर्भागेण वा पुनः। हीनं हीनं चतुर्थांशात् तथा सर्वासु भूमिषु। वासगेहेषु सर्वेषां प्रवेशो दक्षिणेन तु। द्वाराणि तु प्रवक्ष्यामि प्रशस्तानीह यानि तु। पूर्वेणेन्द्रं जयन्तञ्च द्वारं सर्वत्र शस्यते। वास्तु च वितथञ्चैव दक्षिणेन विदुर्बुधाः। पश्चिमे पुष्पदन्तं च वारुणञ्च प्रशस्यते। उत्तरेण तु भल्लाटं सौम्यं तु शुभदं भवेत्। तथा वास्तुषु सर्वत्र वेधं द्वारस्य वर्जयेत्। द्वारे तु रथ्यया विद्धे भवेत् सर्वकुलक्षयः। तरुणा हेष्मबाहुल्यं शोकः पङ्क्तेन जायते। अपस्मारो भवेन्नूनं कूपवेधेन सर्वदा। व्यथा प्रस्तम्भेन स्यात्कीलेनाग्निभयं भवेत्। विनाशो देवताविद्धे स्तम्भेन स्त्रीकृतो भवेत्। गृहभर्तुर्विनाशः स्याद् गृहेण च व्यधे कृते। अमेध्यावस्करैर्विद्धे गृहिणी वन्ध्यकी भवेत्। तथा शस्त्रभयं विद्यादन्यजस्य गृहेण तु। उच्छ्रायाद्द्विगुणां भूमिं त्यक्त्वा वेधो न जायते। स्वयमुत्पाटिते द्वारे उच्चाटोगृहवासिनाम्। स्वयं वा पिहिते विद्यात् कुलनाशं विचक्षणः। मानाधिके राजभयं न्यूने तस्करतो भवेत्। द्वारोपरि च यद्द्वारं तदलक्षसुखं स्मृतम्। अध्वनोमध्यदेशे तु अधिको यस्य विस्तरः। वज्रन्तु सङ्कटं मध्ये सद्योभर्तुर्विनाशनम्। तथान्यपीड़ितं द्वारं वड्डदोषकरं भवेत्। मूलद्वारात्तथान्यन्तु नाधिकं शोभनं भवेत्। कृत्स्नश्रीपार्थिवस्त्रीभिर्मूलद्वारन्तु शोभवेत्। पूजयेज्जापि तत्तस्मिन् बलिना चाक्षतोदकैः। भवनस्य वटः पूर्वे दिग्भागे सर्वकामिकः। उदुम्बरस्तथा याम्ये वारुण्यां पिप्पलः शुभः। प्लक्षोत्तरतोधन्यो विपरीतास्त्रसिद्धये। कण्टकी चोरहन्त्रश्च व्यसनः फल्गिनीद्रुमः। भार्याक्रान्त्यै प्रजाक्रान्त्यै भवेतां क्रमशस्तदा। न छिन्द्यात्यदि तानन्यानन्तरे व्यापयेच्छुभान्। पुन्नागाशोकवकुलशमीतिलकचम्पकान्। दाडिमीपिप्पलद्राक्षा रुचा कुसुमसङ्कुलान्। जम्बीरपूगपनसद्रुसङ्केतकीमल्लीतीश्वरीलतपत्रिकामल्लिकाभिः। यस्त्रालिङ्गेरकदलीदलपाटलाभिर्युक्तं तदत्र भवनं श्रियमातनोति" २५४अ०। द्वारवेधे वराहवाक्यं मी०धा०व्याख्यातं यथा

"मार्गतश्चोत्तरकूपकाम्भसमविद्धमशुभदं द्वारम्। उच्छ्राद्याहिगुप्तितां भूमिं त्यक्त्वा न दोषावेति" इ०स०भमोजलनिर्गमप्रदेशः प्रणालिकेत्यर्थः। विद्धं सम्मुखावस्थितम्। अतोच्छ्रायो द्वारस्य गृह्यते। तथा च वर्गः "द्वारोच्छ्रायाद्विगुणितां भूमिं त्यक्त्वा बहिःस्थिताः। न दोषाय भवन्त्येव" इति। रथ्याविद्धं द्वारं नाशाय कुमारदोषदं तरुणा। षड्द्वारे शोको व्यधोऽम्बुनि खार्थिनि प्रोक्तः। कूपेनापस्कारो भवति विनाशश्च देवताविद्धे। क्रमेण स्त्रीदोषः कुलनाशो ब्रह्मणोऽभिमुखे भवति" इ०स० षड्विद्धं द्वारं षड्द्वारं यस्य द्वारस्यापतः निरन्तरं षड्विशति। देवता सुरप्रतिमा। नाशः स्वामिन एव। ब्रह्मवेध एकाशीतिपदचक्रस्थितब्रह्मवेधो गृह्यते। यदाह विश्वकर्मा "गृहमध्ये कृतं द्वारं द्रव्यधान्यविनाशनमिति" विशेषमाह भरद्वाजः "शिरो मर्माणि वंशश्च नाभं मध्यं च सर्वशः। विहाय वास्तुमध्यं च द्वाराणि विनिवेशयेदिति" वास्तुमध्यं ब्रह्मस्थानम्। "तत्र द्वारं चेद्विधनप्रदमिति" वसिष्ठोक्तेश्च व्यत्यापवादमाह विश्वकर्मा "देवागारे विहारे च प्रपायां मण्डपेषु च। प्रतोल्यां च मंखे वास्तुमध्ये द्वारं निवेशयेदिति" वास्तुमध्यं ब्रह्मस्थानं देवालयादिस्थानेषु कृतस्य गृहान्तर्गतद्वारस्य ब्रह्मणो न वेध इति निष्कृष्टोऽर्थः"।

षट्कर्मस्वि वर्ज्यकाष्ठमाह ज्यो० त० "क्षीरिद्रुमोद्भवं दारु षट्कर्मसु न निवेशयेत्। कृताधिवासं विहगैरनिलानलपीडितम्। गजैर्विभग्नञ्च तथा विद्युच्छिन्नं पीडितम्। चैत्यदेवालयोत्पन्नं वज्रभग्नं श्मशानजम्। देवाद्यधिष्ठितं दारु नोपनिम्बविभीतकात्। कण्टकिनोऽसारतरून् वर्जयेत् षट्कर्मसु। वटाश्वत्थौ च निर्गुण्डीं कोविदारांस्तथैव च। कृष्णकं शाल्मलीञ्चैव पलाशञ्च विवर्जयेत्"।

गृहजातरूपुष्पवृक्षादिफलसूत्रं तत्रैव "रक्तपुष्पाद्भयं प्राहुः क्षीरिणा च यशोभयम्। कण्टकारिभयं कुर्यात् गृहभेदश्च शाल्मलिः" वास्तुमध्यदिग्भेदात् कूपफलसूत्रम् स०चि० "कूपे वास्तोर्मध्यदेशेऽर्धनाशस्त्वैशान्यादौ पुष्टिरैश्वर्यदृद्धिः। स्त्रीनाशः स्त्रीविनाशोमृतिश्च सम्मत्पीडाशत्रुतः स्याच्च सौख्यम्" मू०"वास्तोर्गृहस्य मध्यदेशे मध्यभागे कूपे जलकूपे कृते सति स्वामिनोऽर्धनाशः स्यात्। ऐशान्यादिषु पुष्टिरित्यादिफलम्। यथा ऐशान्यां कूपे पुष्टिः। पूर्वस्यां कूपे ऐश्वर्यवृद्धिः। आग्नेय्यां कूपे पुत्रनाशः। दक्षिणस्यां कूपे स्त्रीविनाशः। नैर्ऋत्यां कूपे गृहकर्तुर्मृतिः। पश्चिमायां कूपे सम्पत्। वायव्यां कूपे शत्रुतः सकाशात्पीडा। उत्तरस्यां कूपे सुखम्। गृहस्वामिन एव" पी०भा०। एवं गृहसन्निवेशप्रकारेऽवधारितेऽधुना गृहारम्भकालः प्रदर्श्यते। तत्रादौ सौरमासभेदेन वास्तुनरसुखादिप्रदर्शनेन पूर्वादिसुखगृहारम्भकालमाह विश्व० वा०शा० "वास्तुनागं जगत्प्राणं पूर्वस्यां प्रथमाश्रितम्। कुक्षिप्रदेशे निखनेद्वास्तुनागस्य मन्त्रितः। त्रिषु त्रिषु च मासेषु नभस्यादिषु च क्रमात्। यद्दिङ्मुखो वास्तुनरस्तन्मुखं सदनं शुभम्। अन्यदिङ्मुखगेहं तु दुःखशोकभयप्रदम्। इषाकादिदिक्मेषां सिंहादि गखवेदृक्षे। देवालये च मीनादि तडागे मकरादिकम्। पूर्वादिषु शिरः कृत्वा नागः शेते त्रिभिस्त्रिभिः। भाद्रादौवामपार्श्वेन तस्य क्रोडे गृहं शुभम्" व्यक्तमाह ज्यो०त० "वास्तुप्रमाणेन तु गात्रवेष वामेन शेते खलु नित्यकालम्। त्रिभिस्तु मासैः परिहृत्य भूमौ तं वास्तुनागं प्रवदन्ति दृद्धाः। भाद्रादिके वासवदिग् शिराः स्यात् मार्गादिकेषु त्रिषु याम्यमूर्द्धा। प्रत्यक् शिराः स्यात् खलु फाल्गुनादौ ज्येष्ठादि कौबेर शिराः सनागः। मूर्ध्नि स्थिते भवेन्मृत्युः पृष्ठे स्यात् पुत्रभार्ययोः। जघनेऽर्थत्रयं विद्यात् सर्वसम्पत्तयोदरे" गृहारम्भाद्युपयोगिराङ्मुखादिकमाह वा०शा० "ईशानतः कालसर्पः संहारेण प्रसर्पति। विदिक्षु शेषवास्तोश्च सुखं त्यक्त्व चतुर्थकम्। खनेच्च सौरमानेन व्यत्यये चाशुभं भवेत्। चतस्रिद्विकशालानामेष दोषो न विद्यते। एकं नागेन्द्रसंयुक्तं मन्दिरारम्भणं शुभम्। अधोमुखे च नक्षत्रे शुभेऽह्नि शुभवासरे। चन्द्रतारानुकूले च भवनारम्भणं शुभम्। त्रिषु त्रिषु च मासेषु मार्गशीर्षादिषु क्रमात्। पूर्वदक्षिणतोवेशपश्चिमस्थायां क्रमादगुः (राङ्मुखः) सम्मे धन विनाशः स्यात् द्वारे वह्निभयं भवेत्। गमने कार्यहानिः स्यात् गृहारम्भे कुलक्षयः। रक्षःकुबेराग्नि जलेशयाम्यावायव्यकाशासु च सूर्यवासात्। वसेदासप्तदिग्भक्षक्षे सुखे विवर्ज्यो गमने गृहे च। शिरःखाते विनाशः स्यान्नाताप्तिश्च पृष्ठके। स्त्रीपुत्रनाशः पुच्छे तु गोत्रपुत्रविनाशनम्। कुक्षौ सर्वसमृद्धिः

खाद्यनधान्यसुतागमः । सिंहादिषु त्रिमासेषु चाग्नेयां कृत्तिकाश्रितः । वृश्चिकादिषु त्रैशाख्यां कुम्भादिषु च वायुदिक् । वृषादित्रिषु नैर्ऋत्यां सुखपुत्रं न शोभनम् । गृहारम्भविहितमासादि विश्व० वा०शा०उक्तं यथा "चैत्रे व्याधिमवाप्नोति यो नवं कारयेद्गृहम् । वैशाखे धनरत्नानि ज्यैष्ठे मृत्युं तथैव च । आषाढे भृत्यरत्नानि पशुवर्जमवाप्नुयात् । श्रावणे मित्रलाभं च हानिं भाद्रपदे तथा । युद्धं चैवाश्विने मासि कार्त्तिके धनधान्यकम् । धनहानिं मार्गशीर्षे पौषे तस्करतोभयम् । माघे चाग्निभयं विद्याल्लक्ष्मीर्हानिश्च फाल्गुने । गृहसंस्थापनं सूर्ये मेषस्थे शुभदं भवेत् । वृषस्थे धनहानिः स्यान्मिथुने मरणं ध्रुवम् । कर्कटे शुभदं प्रोक्तं सिंहे भृत्यविवर्द्धनम् । कन्या रोगं तुला सौख्यं वृश्चिके धनवर्द्धनम् । कार्मुके तु महाहानिर्मकरे खाद्यनागमः । कुम्भे तु रत्नलाभः स्यान्मीने सद्म भयावहमिति" चान्द्रमासफलान्याह श्रीपतिः "शोकोधान्यं क्षतिपशुक्षतिर्द्व्यब्दविर्द्धिनाशोयुद्धं भृत्यक्षतिरथ धनं श्रीश्च वह्निभयञ्च । लक्ष्मीप्राप्तिर्भवति भवनारम्भकर्तुः क्रमेण चैत्रादूचे शनिरिति फलं वास्तुशास्त्रोपदिष्टम्" इति अन्यच्च "आषाढचैत्राश्वयुजोर्जमाघज्यैष्ठेषु च प्रौष्ठपदेषु नूनम् । निकेतनानां घटनं नृपाणां योगेश्वराचार्यमते न शस्तम्" इति । मते न इति पदच्छेदः । अत्र सौराणां चान्द्रमासानां महान् शुभाशुभफलदभेदेन विरोधः । अत्र चिकीर्षितगृहद्वारादुत्तरविलंबसमशोधनविधिना मासेष्वेव वैशाखादिषु गृहारम्भः कार्य इति विरोधाभावः इति विश्वरूपाः । तत्र द्वारनियममाह श्रीपतिः "कर्किनक्रहरिकन्यागतेऽर्के पूर्वपश्चिमसुखानि गृहाणि । तोलिमेषवृषवृश्चिकयाते दक्षिणोत्तरसुखानि च कुर्यात् । अन्यथा यदि करोति दुर्मतिर्व्याधियोऽधनतानाशमश्नुते । मीनचापमिथुनाङ्गनागते कारयेद्ग गृहमेव भास्करे" इति । कर्कार्कसंक्रान्तौ श्रावणे मासि नाहमेव गृहम् उक्तहेतोः । एवं मकरार्कसंक्रान्तौ पौषे मासि अनेनैव हेतुना दक्षिणोत्तरमुखं गृहं मेषवृषार्कसंक्रान्तौ वैशाखे स्यात् । तुलावृश्चिकार्कसंक्रान्तौ मार्गशीर्षमासे तथैव गृहं स्यादित्यर्थः । अथात्र सौराणां चान्द्राणां च माघानां निषेधस्तृणादिनिर्मेयगृहाद्वारस्थे नैव भवति । यदुक्तं व्यवहारमयूखे "त्रिमिर्हेष्वपि क्षणेषु खातकूते शुभे दिने । हस्तादारुगृहारम्भे मासदोषो न विद्यते" इति । अग्नीषोमीयेऽपि "पाषाणेष्टादिगेहादि त्रिमासे न कारयेत् । हस्तादारुगृहारम्भे मासदोषो न विद्यते' अत्र केचिदनियतदिग्गृहारम्भे सर्वदा मासदोषो न प्रवर्तत इत्याहुः तत्र वचनाभावात् । किं च "दिङ्मूढे कृतनाशः स्यादित्यनियतदिग्गृहस्य विचारकोटिसन्निवेशाभावात् । अथ गृह

निर्माणनक्षत्राण्याह। ध्रुवेति। ध्रुवाणि मृदूनि च प्रसिद्धानि वस्त्रः शतभं स्वाती प्रसिद्धा वसुः धनिष्ठा अर्कोऽस्ता पुष्यश्च एषु भेषु गृहनिर्माणं सत् शुभफलदम्। यदाह गर्गः "त्रुत्तरेऽपि च रोहिण्यां पुष्ये मैत्रे।७ करहये १२।१४। धनिष्ठाहितये पौष्णे २७ गृहारम्भः प्रशस्यते" अत्र वाक्ये मृगानभिधानेऽपि तदुक्तिर्मकेश्वरवाक्यालोचनेन "प्रारम्भो भवनस्य वारुण२४मृदु१४।१७।५।२७ स्वात्यर्क१२ पुष्यध्रुवै४।१२।२१।२६। वैष्णेय२२ युतैरिति" अत्र सूतिकागृहनिर्माणे विशेषमाह सूतीगेहमिति। यदित्यां पुनर्वसौ सूतिकागृहनिर्माणं शस्तम्। तत्रेति तत्र सूतिकागृहे हरि अधिष्ठितयोः श्रवणाभिजितोर्नक्षत्रयोः प्रवेशः शस्तः। उक्तं च ओपतिना "पुनर्वसौ च सूतिकागृहस्य निर्मितिः शुभा। विरञ्चिविष्णुभान्तरे प्रवेशनं हितं भवेत्" इति। तदेतद्ब्राह्मणव्यतिरिक्तवर्णत्रिकपरम् यदाह लल्लः "पुनर्वसौ ध्रुवादीनां कर्तव्यं सूतिकागृहम्। श्रवणाभिजितोर्मध्ये प्रवेशं तत्र कारयेदिति" व्याख्यकत्वे तु श्रवणाभिजितोर्मुहूर्तस्तदुदयो वा याह्यः इत्यर्थः। ब्राह्मणस्य तु प्रागुक्तनक्षत्रेष्वेव सूतिकागृहनिर्माणप्रवेशौ। तत्र सूतिकागृहं नैर्ऋत्यां कार्यं यदाह हृद्यवशिष्ठः "ऐन्द्र्यां तु विक्रयस्थानमाग्नेय्यां पचनालयः। वारुण्यां भोजनगृहं नैर्ऋत्यां सूतिकागृहम्। याम्यायां शयनस्थानं वायव्यां पशुमन्दिरम्। कौबेर्यां तु धनस्थानमैशान्यां देवतालयः" इति। सूतिभास्करे गर्गः "वारेऽनुकूले राशौ तु दिने दोषविवर्जिते। मातृकूवदिशि प्रोक्तं सूतिकाभवनं बुधैरिति" कालनियम उक्तो रत्नकोशे "आसन्नप्रसवे मासि कुर्याच्चैव विशेषतः। तद्वत् प्रसवकाले स्यादिति शास्त्रेषु निश्चयः" इति। वराहेणाप्यानेकनक्षत्राणामभिधानं कृतं यथा "हस्तादित्यशशाङ्कतिष्यपवनप्राज्येशमित्रोत्तराचित्रात्विश्रवणेषु हस्तिकघटौ स्थित्वा विरिक्ते तिथौ। शुक्राचार्यमनैश्चरज्ञशनिनां वारेऽनुकूले विधौ सद्भिर्वेश्मनि सूतिकागृहविधिः क्षेमङ्करः कीर्त्यते" इति। वेश्मनि चतुर्थस्थाने सद्भिः शुभग्रहैः। सूतिकागृहप्रवेशे कालविशेषमाह ज्योतिर्वसिष्ठः "अथातः संप्रवक्ष्यामि सूतिकागारवेशनम्। मासि तु नवमे प्राप्ते पूर्वपक्षे शुभे दिने। प्रसूतिसमये काले सद्य एव प्रवेशयेदिति" पूर्वपक्षे शुक्लपक्षे। प्रवेशे नक्षत्रादीन्याह गर्गः "रोहिण्यैन्द्रवपौष्णेषु स्वातीवारुणयोरपि। पुष्ये पुनर्वसौ हस्तधनिष्ठात्रुत्तरासु च। "मैत्रत्वाष्ट्रे तथाश्विन्यां सूतिकागार वेशनम्"। "सर्वे शुभग्रहाः केन्द्रे पापाश्च त्रिषडायगाः। शुभांशे शुभसन्दृष्टे सूतिकागारवेशनमिति"। प्रागभिहितानां सौरचान्द्रमासानां प्रकारान्तरेणैकवाक्यतां शार्दूलविक्रीडितेनाह। केचिदिति पूर्वदिग्द्वारपक्षे नैकवाक्यता उक्ता इदानीमेतादृशमुच्यते मेषसंस्थे रवौ मधौ चैत्रेमासि गेहं प्रारब्धं शुभं स्यात्। तथा वृषस्थे सूर्ये ज्यैष्ठे मासि, कर्कस्थेऽर्के शुचावाषाढे, सिंहगतेऽर्के भाद्रपदे मासि, घटे तुलास्थे रवौ आश्वयुजि आश्विनमासि। अलौ वृश्चिकगेऽर्के जर्ले कार्त्तिके मासि। मृगे मकरस्थेऽर्के पौषे मासि, नक्रघटे मकरकुम्भस्थेऽर्के माघे मासि प्रारब्धं गृहं शुभं स्यात् इत्यर्थः इति केचिन्निगदितम्। अस्यायमाशयः। मीनचापेत्यादिना द्विस्वभावराशयो निषिद्धाः शेषो धान्यमित्यादिना च कियन्तश्चान्द्रा अपि मासा निषिद्धाः। अतोऽन्ये सौरा चान्द्रा वा विहितास्तेषामयमेव एकवाक्यताप्रकारः। मेषस्थे रवौ चैत्रेऽपि गृहं शुभम्। यस्तु चैत्रो निषिद्धः स मीनार्कविषयः। वृषभस्थे रवौ ज्यैष्ठेऽपि शुभम्। वैशाखस्तु विहितएवास्ति ज्येष्ठो निषिद्धः स मिथुनार्कविषयः। कर्कटस्थे सूर्ये आषाढेऽपि शुभं आषाढनिषेधस्तु मिथुनार्कविषयः। सिंहगते सूर्ये भाद्रपदेऽपि शुभम्। श्रावणश्चेत्तत्र स्यात् विहितत्वादेव शुभः। यस्तु भाद्रपदनिषेधः स कन्यार्कविषयः। तुलागते सूर्ये आश्विनेऽपि शुभम्। यस्तस्य निषेधः। स कन्यार्कपरः। वृश्चिकस्थे सूर्ये कार्त्तिकेऽपि शुभं स्यात् निषेधविषयं स्वयमेव वक्ष्यति। मार्गशीर्षौ विहित एव। मकरस्थे सूर्ये पौषे शुभं धनुरर्के सान्निध्ये सोऽप्यशुभः। मकरकुम्भस्थे सूर्ये माघेऽपि शुभं निषेधस्तु धनुरर्कविषयः। अत एव "पौषफाल्गुनवैशाखमाघश्रावणकार्तिकाः। मासाः सूर्क्षगृहनिर्माणे पुत्रारोग्यशुभप्रदाः" इति नारदवाक्यम् "मासे तपस्ये तपसि माधवे नभसि त्विषे। ऊर्जे च सद्गृहनिर्माणं पुत्रपौत्रधनप्रदम्" इति वसिष्ठवाक्यं च आश्विनकार्त्तिकमाघमासानां शुभत्वप्रतिपादकं तुलावृश्चिकमकरकुम्भार्कविषयं मीनार्कराशित्वप्राशस्त्यपरं च वचनान्तरबोधितो निषेधः प्रागुक्तविषय एव। फाल्गुनस्य शुभत्वं

कुम्भार्कविषयं मीनार्कसाङ्घिये तु निषिद्धम्। नन्वु कार्त्तिकमाघमासौ श्रीपतिना निषिद्धौ तयोः को विषय इत्यत आह अर्थेति ऊर्जः कार्तिको मासः कन्यायां कन्यागते रवौ न सन् न शुभः। च पुनः तथा माघमासो धनुषि धनुरर्के न सन् ऋषिः पादपूरणे। नन्वेतदयुक्तं प्रतिभाति यतश्चान्द्रमासेषु चैत्रादिमास-संज्ञाः सन्ति तत्र कार्त्तिके मासि कन्यासंक्रान्तिः। माघे मासि धनुरर्कश्च कदापि न सम्भवेत्। यतः कार्त्तिकस्य माघमासस्य च शुक्लप्रतिपदादितिथिशतितिथयः यावत् तावत् संज्ञेत्यत आह कृष्णादिमासादिति। अस्ति द्विविधो मासः शुक्लादिः कृष्णादिश्चेति। तत्र शुक्लप्रतिपदमारभ्यामावास्यापर्यन्तः शुक्लादिः। कृष्णपक्ष-प्रतिपदमारभ्य पूर्णिमान्तः कृष्णप्रतिपदादिः। यथा। चैत्रशुक्लपक्षे मतद्वयेऽपि स एव चैत्रपूर्णिमाव्यतिरिक्तं कृष्णपक्षः चैत्रमास एव एवं चान्द्रमासो भवति। स एव कृष्णपक्षो यदि वैशाखकृष्णपक्षत्वेन व्यवह्रियते। भाविशुक्लपक्षो वैशाखशुक्लः सर्ववादिसिद्धः। तदा कृष्णादिमासः सम्भवति उभयथा हि शास्त्रे व्यवहारः "अथ-शुक्लकृष्णपक्षे तु चान्द्रं कुर्यात् दिने दिन इति" वी०धा० तत्र विहितनिषिद्धतिथिनक्षत्रादिनिरूपणम् वा०ग्रा० "अथातः संप्रवक्ष्यामि गृहकालविनिर्णयम्। यथा-कालं शुभं ज्ञात्वा तदा भवनमारभेत्। बृहद्यात्रायां पुष्यधनिष्ठाहित्रये रवौ (१२)। मूले पुनर्वसौ सौम्यवारे-प्रारम्भणं शुभम्। आदित्यभौमवर्ज्याःस्युर्वाराः सर्वे शुभावहाः। द्वितीया च तृतीया च पञ्चमी षष्ठिका तथा। सप्तमी दशमी चैव द्वादश्येकादशी तथा। त्रयो दशी पञ्चदशी तिथयः स्युः शुभावहाः। दारिद्र्यं प्रतिपत् कुर्यात् चतुर्थी धनहारिणी। बहव्यश्चाटनं चैव नवमी शस्त्रघातिनी। दर्शे राजभयं चैव भूते दार विनाशनम्। धनिष्ठापञ्चके नैव कुर्यात् सप्तसमच्छ्रयम्। स्तम्भारम्भिलान्यासं प्राकारादि समारभेत्। जामित्रं द्विविधं चैव वेधोपग्रहकर्त्तरी। एकार्गलं तथा लत्ता युतक्रकचसंज्ञकाः। पातश्च द्विविधोवर्ज्यो व्यतीपातश्च वैधृतिः। कुलिकं कण्टकं कालं यमघण्टस्तथैव च। कुयोगातिथिवारोत्थान्विधिभोत्था भयारजा। विवाहादिषु ये वर्ज्यास्तेवर्ज्या वास्तुकर्मणि"

वास्तुचक्रं तत्रैव "वास्तुचक्रं प्रवक्ष्यामि यच्च व्यासेन भाषितम्। यस्मिन्गृहे स्थितो मानुस्तदादि तीणि म-स्तके। चतुष्कमथपादे स्यात् पुनश्चत्वारि पश्चिमे। पृष्ठे च तीणि कुक्षौ च चत्वारि वामतः। च-त्वारि दक्षिणे कुक्षौ पुच्छे भत्रयमेव च। मुखे भत्रयमेवं क्षुरटाविंशतितारकाः। शिरस्तारान्विदाहाय स्टङ्कोदा-रोऽथपादयोः। स्यैर्यं स्यात् पश्चिमे पादे पृष्ठे चैव धनागमः। कुक्षौ स्याद्दक्षिणे लाभः पुच्छे च स्वामिनाश-नम्। वामकुक्षौ च दारिद्र्यं मुखे पीडा निरन्तरम्"। तत्र वर्ज्यकालमाह विश्व०वा०ग्रा०। कृष्णपक्षे तिथौ रिक्ते गण्डान्ते रविसंक्रमे। रविभौमदिने विष्टौ व्यती-पाते च वैधृतौ। भासदग्धं वारदग्धं तिथिदग्धं च वर्जयेत्। अनुक्तेऽपि विघ्नेषु न कर्त्तव्यं कदाचन। क्रकचं चन्द्रदग्धं च योगानां वज्रसंज्ञकम्। उत्पातै-र्दूषितमृक्षं त्रिस्पृशं दर्शसंज्ञकम्। वज्रव्याघातशूलेषु व्यतीपातातिगण्डयोः। विष्कम्भगण्डपरिघं वर्ज-यित्वा च कारयेत्"। विहितमुहूर्तमाह तत्रैव "स्वातौ मैत्रेऽथ माहेन्द्रे गान्धर्वे भगरोहिणे। तथा वैराजसावित्रे मुहूर्ते स्टङ्कमारभेत्। चन्द्रादि सबलं ज्ञात्वा शुभं लग्नं निरीक्ष्य च। खाभोच्छ्रायादि कर्त्तव्य-मन्यत्र परिवर्जयेत्"।

तिथिभेदेन पूर्वादिदिङ्मुखगृहारम्भनिषेधमाह सु०चि०। 'पूर्णेन्दुतः प्राग्वदनं नवम्यादिषूत्तरास्यन्त्यं पश्चि-मास्यम्। दर्शादितः शुक्लदले नवम्यादौ दक्षिणास्यं न शुभं वदन्ति" मू०"पूर्णेन्दुतः पूर्णिमातः कृष्णाष्टमी-पर्यन्तं प्राङ्मुखं गृहं शुभं न वदन्ति। कृष्णन-वमीतश्चतुर्दशीपर्यन्तं क्रियमाणं गृहमुत्तरास्यं न शु-भम्। अथ दर्शादितः शुक्लाष्टमीपर्यन्तं पश्चिमास्यं गृहं न शुभम्। शुक्लनवमीतश्चतुर्दशीपर्यन्तं दक्षिणास्यं गृहं न शुभं वदन्ति। तासु तिथिषु तत्तद्दिङ्मुखं गृहं न कर्त्तव्यम् इति वाक्यार्थः फलितः। यदुक्तं व्यवहारसमुच्चये "पूर्णिमातोऽष्टमीं यावत् पूर्वास्यं वर्जयेद्गृहम्। उत्तरास्यं न कुर्वीत नवम्यादिचतु-र्दशीम्। अमावास्याष्टमीं यावत्पश्चिमास्यं विवर्जयेत्। नवम्यादौ दक्षिणास्यं यावत् शुक्लचतुर्दशीमिति"। दिग्भेदमुक्तनक्षत्राण्याह "अश्विन्याद्याः सप्त पूर्वे मघाद्याः सप्त दक्षिणे। मैत्राद्याः पश्चिमे सप्त धनिष्ठाद्यास्तथोत्तरे। अग्ने चन्द्रे स्वामिभयं कर्मकर्त्तुश्च पृष्ठके। दक्षिणे च धनं दद्याद्गृहे स्त्रीसुखसम्पदः। स्टङ्कोपलक्षकार्येषु यत्र कुत्रेषु चन्द्रमाः। शलाकास्थापने देयं अश्विन्यादिकमेव

च। क्रूरं चन्द्रस्य वास्तोश्च ऋणे गृहे न शस्यते। लग्नाद्यादिचार्योऽत्र चन्द्रः सद्यःफलप्रदः। गृहे चन्द्रे सम्मुखस्थे गृहस्थे न शुभं गृहम्। वामदक्षिणतः चन्द्रः प्रशस्तो वास्तुकर्मणि"

तत्र विहितनिषिद्धलग्नादिकमाह तत्रैव चर-लग्नं चरांशञ्च सर्वथा परिवर्जयेत्। लग्नभाद्योपचयभे लग्ने वर्गे तथैव च। प्रारब्धं प्रकुर्वीत नैधनं परिवर्जयेत्। पापैस्त्रिषडायगतैः सौम्यैः केन्द्रत्रिकोणगे। निर्माणं कारयेद्धीमानष्टमस्थैः खलैर्हृतिः। मनुष्य-लग्ने सौम्यानां ह्यन्योन्ये योगतस्तथा। कुम्भं विहा-यान्यलग्ने सौम्ययुक्तेक्षिते। जलाशयादिवास्तूनां प्रारम्भः शुभदः स्मृतः" अत्र शुभयोगास्तत्रैव "गुरुर्लग्ने रविः षष्ठे द्यूने७ सौम्ये सुखे४ स्थिते। तृतीयस्थे ऽर्के पुत्रेऽत्र तद्गृहं तु शतायुषम्। सगुरुर्लग्नेऽम्बरे१०सौम्ये लाभस्थाने११ च भास्करे। गुरुः केन्द्रगतो यत्र शतवर्षाणि तिष्ठति। त्रिद्युने३ऽब्धेऽम्बरे१० चन्द्रे लाभे११ च कुजभास्करौ। आरम्भः क्रियते यस्य क्षणीत्वायुः क्रमात् भवेत्। लग्ने भगौ पुत्रगेऽब्धेऽम्बरे भौमे त्रिगे रवौ। यस्य गृहस्य प्रारम्भः स च तिष्ठेच्छतं समाः। लग्नस्थौ गुरुशुक्रौ चेत् रिपुह्राशिगते कुजे। सूर्ये लाभगते११ यस्य द्वितयात्तदानि तिष्ठति। खोऽस्थो वा भगुर्लग्ने खोऽब्धे जीवे सुखःस्थिते। खोऽब्धे लाभगते११ मन्दे सहस्राणि समाः स्थितिः। खोऽब्धे स्वभवने सौम्ये लग्नस्थे वापि केन्द्रगैः। प्रारम्भः क्रियते यस्य शतद्वयं स तिष्ठति। दृश्योत्तरालयाहीन्दुविष्णु धाहजलोडुषु। ८।१२।२१।२६।८।५।२२।४।२०। गुरुणा सहितेष्वेषु कृतं गेहं स्थिरा युतम्। दिदैवत्याङ्घ्रिवारीश रुद्रादिति वसूडुषु। १६।१४।२४।६।७।२३। शुक्रेण सहितेष्वेषु कृतं धान्यप्रदं गृहम्। हस्तार्यमत्वाष्ट्रदलचतुराख्येन्द्रभेषु च १२।१२।१४।२।४।१८। बुधेन सहितेष्वेषु धनपुत्रसुखप्रदम्"। कुयोगास्तत्रैव "शत्रुक्षेत्रगतैः खेटैर्नीचस्थैर्वा पराजितैः। प्रारब्धं यस्य भवनं लक्ष्मीस्तस्य विनश्यति। एकोऽपि परभागस्थो दशमे सप्तमेऽपि वा। वर्षाधिपे बलैर्हीने तद्गृहं परहस्तगम्। पापान्तरगते लग्ने चन्द्रे सौम्ययुतेक्षिते। अष्टमस्थे ऽर्कपुत्रे च क्षणीत्यन्द्रा-दिहन्यते। मन्दे लग्नगते चैव कुजे सप्तमसंस्थिते। शुभै रवीक्षिते वापि शतवर्षाण्विहन्यते। लग्नेशे शशिनि क्षीणे क्रूरस्थाने च भूसुते। प्रारम्भः क्रियते यस्य गीघ्रं तद्व विनश्यति। दशापतौ बलैर्हीने वर्षनाथे तथैव च। पीडितर्क्षगते सूर्ये न विदध्यात्कदाचन। पितृमूलेज्यभाग्यार्कपौष्णभेषु च १०।१९।८।११।१२।२७ यत् कृतम्। कुजेन सहितेष्वेषु गृहं सन्दह्यतेऽग्निना। मूलक्ष रेवती चैव कृत्तिकाषाढमेव च। पूर्वफाल्गुनी हस्तो च मघा चैव तु सप्तमम्। एषु भौमेन युक्तेषु वारे तस्यैव वेद्मम यत्। अग्निना दह्यते कृत्स्नं पत्तनाग्रः प्रजायते। अग्निसंज्ञगते सूर्ये चन्द्रे वा तत्र संस्थिते। निर्मितं मन्दिरं नूनमग्निना परिदह्यते। ज्येष्ठानु-राधके चैव भरणीखातिपूर्वभे। धनिष्ठाद्यपि ऋक्षेषु शनिस्थिते हिनस्ति च। कूपको नामतः प्रोक्तो धनधा-न्यादिके गृहे। पुत्रे जातेऽथवा तस्मिन् दह्यते यक्ष-राक्षसैः। प्रासादेष्वेवमेव स्याद्वापीकूपेषु चैव हि। तस्माद्विचार्य कुर्वीत गृहारम्भं शुभे शुभम्। नाग-न्दिग्नि मकरालिकुलीरलग्ने, मेषे घटे धनुषि कर्मसु दीर्घसूत्रम्। कन्याभृषे मिथुनगे ध्रुवमर्थलाभं ज्योति-र्विदः कलसंसिद्धयेषु सिद्धिम्। सायाह्ने तु कृतं वास्तु कर्तुर्वित्तविनाशदम्। मङ्गानिशास्वपि तथा सन्ध्ययोर्नैव कारयेत्"। भावस्थग्रहफलानि तत्रैव "लग्नेऽर्के विप्रपातः स्यात्कोशहानिश्च शीतगौ। क्षत्रं विक्षत्सरापुत्रे दारिद्र्यं रविनन्दने। जीवे धर्मार्थकामाः स्युः पुत्रोत्पत्तिश्च भार्गवे। चन्द्रजे कृषिवा शक्तिर्यो-वदायुः प्रवर्त्तते। द्वितयस्थे रवौ हानिश्चन्द्रे शत्रु भयं भवेत्। भूमिजे बन्धनं प्रोक्तं नानाविघ्नानि भानुजे। बुधे द्रविणसम्पत्तिर्गुरौ धर्माभिवर्द्धनम्। यथाकामविनोदेन भृगौ कामं व्रजेत् फलम्। तृतीय-स्थेषु पापेषु सौम्येष्वेषु विशेषतः। सिद्धिः स्यादचिरा देव यथाभिलषितं प्रति। चतुर्थस्थानगे जीवे पूजा सम्पद्यते नृपात्। चन्द्रजे चार्थलाभः स्याद्भूमिलाभश्च भार्गवे। वियोगः सुहृदां भानौ मन्त्रभेदो महीसुते। बुद्धिनाशो निशानाथे सर्वनाशोऽर्कनन्दने। पञ्चमे तु सुराचार्ये चिरो वसुधनागमः। शुक्रे पुत्रसुखावाप्तो रत्नलाभस्तथेन्दुजे। सुतदुःखं सहस्रांशौ यशाङ्के कल-हः कृतः। भौमे कार्यविरोधः स्याद्बौरौ बन्धु-विमर्दनम्। षष्ठस्थानगते सूर्ये रोगनाशं विनिर्दि-शेत्। चन्द्रे पुष्टिः कुजे प्राप्तिः सौरौ शत्रुबलक्षयः। गुरौ सन्मोदयः प्रोक्तो भृगौ विद्यागमो भवेत्। सर्व-ज्ञानार्थकौशल्यं नक्षत्रपतिनन्दने। सप्तमस्थानगे जीवे

बुधे दैन्यगुरोरुक्ते। गजवाजिधरित्रीणां क्रमाल्लाभं विनिर्दिशेत्। भास्करे कीर्त्तिभङ्गः स्यात् कुजे विपदमादिशेत्। स्त्रिमनो क्लेश आवासः सौरौ सर्वं धनक्षयः। मतङ्गे पङ्कुताऽस्थे भौमे सौरौ च रुग्भयम्। चन्द्रे रोगविवृद्धिः स्यात् कुजे शोकागमो भवेत्। बुधे मानधनप्राप्तिर्जीवे च विजयो भवेत्। शुक्रे स्वजनभेदः स्यान्मन्त्रस्थापि देहिनः। वाणीशे नवमस्थाने विद्याभोगाभिनन्दनम्। बुधे विविधभोगाप्तिर्भागवे विजयो भवेत्। चन्द्रे धातुक्षयः प्रोक्तो धर्मक्षानिश्च भास्करे। कुजे चाथ भयं विद्याद्विजे धर्मदुषणम्। दशमस्थानगे शुक्रे शयनासन सिद्धयः। सुराचार्ये मङ्गलौख्यं विजयः स्त्रीधनं बुधे। मार्त्तण्डे च सुहृद्द्वेषस्तथा शोकविवर्द्धनम्। भौमे रत्नागमः प्रोक्तः शनौ कीर्त्तिविलोपनम्। लाभस्थानेषु सर्वेषु लाभस्थानं विनिर्दिशेत्। व्ययस्थानेषु सर्वेषु विनिर्देश्यो व्ययः सदा। स्वोच्चे पूर्णफलः प्रोक्तः पादोनः स्वर्क्षगो यदुः। स्वत्रिकोणेऽर्द्धफलदः पादं मित्रपदाश्रितः। समर्क्षे रिपुराशौ च समकष्टफलो यदुः। नीचस्थो विफलो ह्येष वर्गेऽस्तफलदः शुभः"।

गृहारम्भे रव्यादिगोचरादिशुद्धिफलादि वा॰ मा॰

"गोचराष्टकवर्गाभ्यां वामवेधं विचिन्तयेत्। दशा चान्तर्दशादिश्च विचार्य्यात्र कर्मणि। गुरुशुक्रबले विप्रात् सूर्यभूमिजयोर्बला। शशिसौम्यबले सौरिबले वर्णानुपूर्वशः। गृहारम्भं प्रकुर्वीत वर्णनाथबले सति। सर्वेषामपि वर्णानां सूर्यचन्द्रबलं स्मृतम्। विषमस्थे रवौ स्वामी पीड्यते गृहिणी विधौ। शुक्रेण पीड्यते लक्ष्मीर्जीवेन सुखसम्पदः। बुधेन पुत्रपौत्राश्च भौमेन भ्रातृबान्धवाः। सौरिणा दासवर्गाश्च पीड्यन्ते नात्र संशयः। विशेषेण तु सूर्यस्य बलं प्रोक्तं गृहे बुधैः। सर्वेषामेव वर्णानां रविशुद्धिर्विधीयते। दशापतौ क्षीणबले वर्णनाथे तथैव च। पीडितर्क्षगते सूर्ये न विदध्यात् कदाचन। प्रथमकोष्ठगे रोगं द्वितीये चार्थनाशनम्। तृतीये धनलाभं च चतुर्थे भयदो रविः। पञ्चमे पुत्रलाभं च शत्रुनाशाय शत्रुगे। स्त्रीकष्टं सप्तमे सूर्ये मृत्युश्चाष्टमगेऽनले। नवमे धर्मनाशाय दशमे कर्मसंयुतिः। एकादशे भवेल्लक्ष्मीर्द्वादशे च धनक्षयः। पुत्रेऽ द्वितीये द्यूने० च सूर्ये मध्यबलो रविः। द्वितीयपुत्राङ्गऽष्टमतश्चिदशाङ्गात् परः शुभः। अस्तगा नीचराशिस्थाः पररार्क्षे परैर्जिताः। दृष्टस्था बालभावस्था वक्रगाश्चातिचारिणः। रिपुदृष्टि वर्गयाता उल्कापातेन दूषिता। न फलन्ति यदा गेहमारम्भे तान् प्रवर्जयेत्"।

गृहारम्भे खातारम्भोपयोगिनक्षत्राण्याह माण्डव्यः। "अधोमुखैर्मैत्रदधीत खातं शिलासया चोर्द्धमुखैश्च पक्षम्। तिर्य्यङ्मुखैर्द्वारकपाटदानं गृहप्रवेशो मृदुभिर्ध्रुवैश्च" अधोमुखादिनक्षत्राण्याह पी॰पा॰गरुडपु॰

"भरणी कृत्तिकाऽश्लेषा मघामूलविशाखिकाः। तिस्रः पूर्वास्तथा चैव अधोवक्त्राः प्रकीर्त्तिताः। वापीकूपतडागादिखननं च तृषादिकम्। देवतागारखननं निधानखननं तथा। गणितं ज्योतिषारम्भं खनी बिलप्रवेशनम्। कुर्यादेवोमतान्येव कार्याणि ध्रुवभ ध्रुव!। रोहिण्यार्द्रा तथा पुष्यो धनिष्ठा चोत्तराश्रयम्। वास्तुं श्रवणं चैव नव चोर्द्धमुखाः स्मृताः। एषु राज्याभिषेकं च मङ्गलं च कारयेत्। उर्द्धमुखान्युक्तानि सर्वाण्येषु च कारयेत्। रेवती चाश्विनी चित्रा स्वाती हस्तः पुनर्वसुः। अनुराधा मृगः श्रेष्ठा एताः पार्श्वमुखाः स्मृताः। गजोष्ट्राश्ववीवर्ददमनं भक्षिकस्य च। बीजानां वपनं कुर्याद्गमनागमनादिकम्। चक्रयन्त्र रथादीनां नावादीनां प्रवाहनम्। पार्श्वेषु यानि कर्माणि कुर्यादेतेषु तानि च"

नक्षत्रभेदे द्वारनिर्माणाय सफलं द्वारचक्रमाह रु॰चि॰

"सूर्यर्क्षादुडुभैः शिरस्यथ फलं लक्ष्मीकृतः कोणभैर्नागैरुदरसनं ततो गजभितैः शाखासु सौख्यं भवेत्। देहल्याङ्घ्रिभैर्ऋतिर्गृहपतेर्मध्यस्थितैर्वेदभैः सौख्यं चक्रसिटं विलोक्य सुधिया द्वारं विधेयं शुभम्" मू॰

"द्वारस्य चत्वारः पाषाणा आवश्यकाः। द्वौ ऊर्द्ध्वाधोभावेनावस्थितौ समावल्पपरिमाणौ। तत्र उत्तरङ्गदलमूर्द्ध्वावस्थितस्य संज्ञा। अधोवस्थितस्य तु देहलीति सर्वसाधारणं नाम। द्वौ पार्श्वयोः स्थितौ भद्रापरिमाणौ शाखासंज्ञौ (साइ) इति भाषया द्वयोरपि संज्ञा एवं दीर्घचतुरस्रद्वारं भवति। पाषाणासम्भवे तु काष्ठादेरपि निवेशः। तत्र द्वारे चिकीर्षिते सूर्यधिष्ठितनक्षत्रादुडुगणैश्चतुर्भिर्नक्षत्रैः शिरस्यवस्थितैः सद्भिः लक्ष्मीप्राप्तिरूपं फलं स्यात्। ततस्तदग्रेनागैः कोणभैर्द्वारवस्थित्या चतुःकोणेष्ववस्थितैरष्टसंख्यकैर्नक्षत्रैरुदरसनं तत् द्वारगृहं सर्वदा जलवासरहितं स्यात्। ततस्तदग्रिमै

र्जभितेरष्टाभिर्भैः याम्यात्तु तत्रावस्थितैर्गृहस्वामिनः सौख्यरूपं फलं स्यात्। ततस्तदधिभेर्युग्मैस्त्रिभिर्नक्षत्रैर्दैवज्ञावस्थितैर्गृपतेर्मृतिः स्यात्। ततस्तदधिभैर्वेदभैश्चतुर्भिर्नक्षत्रैर्मध्यस्थरूपेऽवकाशे स्थितैः सौख्यं स्यात्। फलितार्थमाह। चक्रमिति। इदं द्वारचक्रं विलोक्य सुधिया शुभं शुभफलदं द्वारं विधेयं कर्त्तव्यम्। तदुक्तं ज्योतिर्निबन्धे "द्वारचक्रं प्रवक्ष्यामि भाषितं विश्वकर्मणा। सूर्यभाद्भचतुष्कं तु द्वारस्योपरि विन्यसेत्। हे हे कोष्ठे च दातव्ये याम्यायुग्मे इयं इयम्। अधश्च त्रीणि देवानि वेदा मध्ये प्रतिष्ठिताः। राज्ञां स्यादुर्दुनक्षत्रे कोष्ठेऽहसनं भवेत्। याम्यायां लभते लक्ष्मीमधश्चैव क्षतिं लभेत्। मध्यभेषु लभेत्सौख्यं चिन्तनीयं सदा बुधैरिति" अथ द्वारस्थापनम् "द्वारस्थापननक्षत्राण्युच्यन्तेऽश्विनी चोत्तरा। हस्तापुष्यश्रुतिमृगाः क्षुरैरेताः प्रकीर्त्तिताः। स्वातौ पूषणि च रोहिण्यां द्वारशाखावरोपयेदिति" ज्योतिर्निबन्धेऽभिहितत्वात्तेऽपि याह्याः। तिथयोऽपि तत्रैवाभिहिताः "पञ्चमी धनदा चैव सुनिनन्दवसौ शुभम्। प्रतिपत्सु न कर्त्तव्यं क्षते दुःखमवाप्नुयात्। द्वितीयायां द्रव्यहानिः पशुपुत्रविनाशनम्। तृतीया रोगदा ज्ञेया चतुर्थी भङ्गकारिणी। कुलक्षयं तथा षष्ठी दशमी धननाशिनी। विरोधकदमा पूर्णा न द्वाराशावरोपयेदिति" एवं सति विरुद्धतिथिं विहाय विहिततिथिषु विहितभेषु च तत्रापि चक्रगृहेषु भेषु द्वारं विहितं शुभफलदात् स्यादिति विवक्षितोऽर्थः" पी०धा०

तत्प्रवेशकालमाह रु०चि० "सौम्यायने ज्यैष्ठतपोऽश्विमाधवे बालानिहत्तौ ऋपतेर्नवे गृहे। द्वाहेऽहनं द्वारस्थमुद्वहेदुभिर्जनैर्वस्त्रसमोपचोदवे स्थिरे" (१) मु० "ज्योर्वे गृहेऽम्बादिभयाच्चवेऽपि मार्गार्जवोः चावधिकेऽपि सत् स्यात्। वेधोऽम्बुपेऽश्वानिलवासवेषु नावश्यमत्रादिविचारणात्। (२) महद्व्रवच्चित्रचरेषु मूलभे वास्तुर्चनं भूतबलिञ्च कारयेत्। त्रिकोणकेन्द्रायधनत्रिगैः शुभैर्लग्नं त्रिषडायगतैश्च पापकैः। (३) गुहाम्बुरन्ध्रे विलनुर्भसन्धौ व्यक्तैररिक्षाचरदर्शनैश्च। अथेऽम्बुपूर्वं कलसं द्विजांश्च त्वा विवेहेऽत्र भजेद्गृहम्। (४) यामो रविर्म्लेसुतार्थलाभतोऽर्के पञ्चमे प्राग्वदनादिमन्दिरे। पूर्वोत्तरौ प्राग्वदने गृहे शुभो नन्दादिके याम्यजलोत्तरानने। (५) यत्रे भूरविभात् प्रवेशसमये कुम्भेऽग्निदाहः क्षताः। प्राच्यामङ्गसनङ्क्षताः भवगता लाभः क्षताः। पश्चिमे। श्रीर्नैदाः कलिरुत्तरे सुखमिता नर्भे विनाशो गृहे रामाः। स्वैर्यमतः स्त्रिरत्नधनलाभः। वष्ठे भवेत्सर्वदा" (६) मु०

"तत्रापूर्वप्रवेशस्तुपूर्वप्रवेशयोः कालशुद्ध्यादिकमिन्द्रवंशाच्छन्दसाह सौम्यायने इति। एतेषु सौम्यायन इत्यादिवेषु पदार्थेषु सत्सु ऋपतेर्यात्रानिहत्तौ अथवा नवे नूतनोत्थापिते गृहे प्रवेशनं स्यात्। सौम्यायने उत्तरायणे। अत्र शुक्रगुर्वस्तादिको दोषो याथारामतडागेत्यादिनोक्त इति न पुनरुक्तः। एवं गोर्वाणाम्बुप्रतिष्ठेत्यादिना दक्षिणायननिषेधोऽपि। अतःपरिशेषात्सौम्यायनपक्षे सिद्धे तदुक्तिर्मन्दबुद्धीनां शीघ्रप्रतिपत्तयर्थी। उक्तं च वसिष्ठेन "अथ प्रवेशो नवसद्मनश्च सौम्यायने जीवसिते बलार्घे" इति बलाढ्ये उदिते। नारदेनापि "अथ सौम्यायने कार्यं नववेश्मप्रवेशनम्। राज्ञां यात्रानिहत्तौ वेति" केवलायां भूमौ क्रीतायां प्राप्तायां वा स्वतःसिद्धायां वोत्थापितं गृहं नूतनमित्युच्यते। ज्यैष्ठेति ज्यैष्ठमाघफाल्गुनवैशाखमासेष्वेव सत्सूत्तरायणे प्रवेशनं शुभम्। यदाह नारदः माघफाल्गुनवैशाखज्यैष्ठमासेषु शोभनः। प्रवेशो मध्यमोज्ञेयः सौम्यार्त्तिकमासयोरिति" सौम्यो मार्गशीर्षः। मध्यमोऽग्रहायणः। चान्द्रमासफलान्याह वसिष्ठः "माघेऽर्थलाभः प्रथमप्रवेशे पुत्रार्थलाभः खलु फाल्गुने च। चैत्रेऽर्थहानिं धनधान्यलाभो वैशाखमासे, पशुपुत्रलाभः। ज्यैष्ठे च मासेषु परेषु मूलं हानिप्रदः शत्रुभयप्रदश्च"। "शुक्ले च पक्षे सुतरां विशुद्धे लग्ने च यावद्बलवी च तावत्" इत्यादुक्तेरेव पञ्चदशपक्षेषु शुक्लपक्षस्यैव तिथिवारनक्षत्रादयो ग्राह्यन्ते। वसिष्ठेन तु गृहप्रवेशे सौरमानमनादृत्य दूषितं यथा "सूर्यादिषड्राशिषु संस्थितेऽर्के नवप्रवेशः शुभदः सदैव। कुम्भं विनान्येऽपि केचिदूचुर्न सौरमिष्टं खलु तत्प्रवेशे। इति व्यर्थः नूतनगृहप्रवेशो मकरादिषड्राशि संस्थिते सूर्ये शुभफलदो भवति तत्रापि मासादिषु कुम्भरहितेषु चतुर्षु मासेषु शुभतरः तत्र "अथ प्रवेशो नवसद्मनश्च सौम्यायने" इति स्वयं प्राक् सौम्यायन इत्युक्तत्वात् किमित्येव तत् पुनरुक्तमिवत आह। कुम्भं विनेति। सत्सूत्तरायणे कुम्भसंक्रान्तौ नूतनगृहप्रवेशो न भवतीत्येतदर्थं पुनरुक्तमित्यर्थः। तस्मिन्



19783

पूर्वापरविरुद्धम्। तथाहि "माघेऽर्थलाभः प्रथमः प्रवेशः" इत्यादिना मावफाल्गुनयोरादूमासयोः शुभफलाभिधानात्तत्रैव च कृष्णसंक्रान्तिसद्भावाद्वयोरन्यतरस्याशुभत्वं प्रतिपाद्यते। उभयमासनिर्देशः कृष्णस्तु नास्त्येवेति चेत्। उच्यते। सन्ति हि द्विविधाश्चान्द्रमासा शुक्लादयः कृष्णादयश्चेति। तत्र फाल्गुनपूर्णिमोत्तरमासस्य कृष्णादिमासगणनया चैत्रत्वात्तस्य च विरुद्धफलत्वात्तद्विषयकोऽयं कृष्णसंक्रान्तिनिषेधः। चान्द्रमासस्य शुक्लादिकृष्णाद्यभिधायकानि वाक्यानि गृहारम्भप्रकरणेऽस्माभिरुक्तानि अयमपि निषेधो मासस्य कृष्णादित्वे ज्ञापकः। अथ कर्कादिसंक्रान्तिषु मतान्तरमाश्रान्त्येवपीति केचिदाचार्याः कन्येऽपि कर्कादिषड्राशिस्थिते सूर्येऽपि नवगृहप्रवेशः कार्य इत्यूचुः। तदेतद्दृढव्रतपूर्विकगृहप्रवेशविषयम्। तदुक्तं स्वयमेव "नवप्रवेशे त्वथ कालशुद्धिर्न दृढव्रतपूर्विकयोः कदाचिदिति"। नूतनलक्षागारप्रवेशविषयं वा। तदुक्तं ज्योतिःप्रकाशे "गृहारम्भादितैर्मासैर्विप्रैर्विप्रैरिति गेहकृत्। विशेषौशन्यावने कर्म लक्षागारं तु सर्वदेति" अतएव "कुलीरकन्यकाकुम्भे दिनेशे न विशेद्गृहम्। ग्रामं वा नगरं वापि भवनं वा सुराधिपेति" गुरुवाक्यमप्येवमेव व्याख्येयम्। ननु पौषचैत्रादिषु विरुद्धफलेषु चान्द्रमासेषु विहितसंक्रान्तिषु सदा नूतनगृहप्रवेशः कार्यो वा नवेत्यत आह न सौरमिति खलु निश्चये न सौरं मानं सत् प्रवेशे नेष्टं न शुभफलदम्। विरुद्धशुभफलयोश्चान्द्रसौरमासयोः साम्ये विहितचान्द्रमासैरेव गृहप्रवेशः कार्य इत्यलमतिप्रसङ्गेन। द्वाःस्थेति। द्वाःस्थलक्षणान्यपि गृहारम्भे उक्तानि। स्तम्भानि भ्रुवाणि चोद्गानि प्रसिद्धानि। द्वाःस्थानि च तानि स्तम्भोद्गानि चेति कर्मधारयः। तादृशैर्भैः प्रवेशनं हि स्यात्। अयमर्थः यस्मिन् गृहे प्रवेशः कर्तुमिष्यते तस्य द्वारं बहिर्गतमिष्टं तद्विज्ञानलक्षणैर्विहितैः प्रवेशः कार्यः। यदाह वसिष्ठः "बहिर्गतद्वारं मन्दिरं तद्विगृह्यैरुक्तैर्भैः स्यात् संप्रवेशो न दुर्गैरिति" उक्तदोषाह स एव "चित्रोत्तराषाढशताभिजिद्वस्तस्वातीश्वरभेषु १४।१२।२१।२६।४५।१७।२३।२७।२४ नूनम्। वायुर्धनारोग्यसुतप्रपौत्रकीर्तिदः स्याच्चिविधः प्रवेशः" इति। नारदोऽपि "वसित्रान्त्येषु २२।८।२७ वस्वन्त्याद्रिमित्रस्थिरोडुषु २४।१४।१७।४।१२।२१।२६। शुभःप्रवेशोदेवेज्यशुक्रयोर्ऊर्ध्वमानयोरिति"। अत्र पुष्यधनिष्ठायततारकाश्चत्वारो जीर्णगृहप्रवेशविषयम्। उक्तञ्च ज्योतिःप्रकाशे "प्रवेशो नूतने कर्म्य भ्रुवैर्भैः सुखाप्तये। पुष्यस्वातीयुतैस्तौ च जीर्णे स्याद्वासवह्नये" इति। एतदुपलक्षणमित्यग्रे वक्ष्यति। अस्मिन्नेवाशये मनसि निधायाह श्रीपतिः "शुभः प्रवेशो मृदुभिर्ध्रुवाख्यैः क्षिप्रैश्चरैः स्यात् पुनरेव यात्रा। उग्रैर्मृदोदारुणभैः कुमारो राज्ञां विशाखासु विनाशमेति" "क्षत्रिकासु भवनं क्षणात्तना दहते प्रविशतां न संशयः। तनुरुक्षं च सदनं हि तत्कृत्वद्वारभेषु शुभकृत् प्रवेशनमिति" वसिष्ठोऽपि "कर्कादितेयानिलदक्षविष्णु १२।७।१५।२।२२ऋक्षे प्रविष्टं नवमन्दिरं यत्। अद्दलयात्तत्परकस्यतां गेहेषु (विहितभिन्नेषु) धिष्ण्येषु च स्वल्पदं स्यादिति" प्रवेश लग्नान्याह लक्ष्मेति। लक्ष्मं लक्षराशिः लग्नलग्नं च प्रसिद्धम्। ताभ्यामुपचये तृतीयषष्ठैकादशगमस्थेष्वन्येषु तथा स्थिरास्थिराशिषु लग्नगतेषु सत्सु नवगृहप्रवेशनं शुभम्। यदाह वसिष्ठः "कर्तुर्विलग्नादथ लक्षराशेर्लग्नस्थितो राशिरिति प्रदिष्टः। निर्व्याधिदारिद्र्यभयङ्कराय क्षुद्दुःखनाशाय रिपुनाशदश्च। कलत्रहन्ता निधनप्रदश्च रोगप्रदः सिद्धिकरोऽर्थदश्च। क्रमाच्च वैराग्यभयदः क्रमेण च सदैव नूनं त्रिविधः प्रवेशः" इति। अतो निष्कृष्टमर्थमाह गृहप्रवेशे राजमार्तण्डः "कर्तुर्भोपचयगाश्च विलग्ने राशयः शुभफलाय भवन्तीति" नारदोऽपि "कर्तुर्लक्षमलग्ने वा तात्कालिकोपचये ऽपि वा। प्रवेशलग्ने स्याद्गृहिरन्ध्रभे शोकनिःस्वतः" इति। पुनर्वसिष्ठः "सौम्ये स्थिरे भे शुभदृष्टयुक्ते लग्नेऽथ वा द्वारगृहे विलग्ने" इति। सौम्ये सौम्यषड्वर्गयुक्ते। द्वारगृहे द्विस्वभावराशौ। अत्र विवाहप्रकरणोक्ता एकविंशतिविधा दोषा वर्ज्या इत्यपि ध्येयम्। एकविंशतिदोषानुपलक्ष्य वसिष्ठेनोक्तम् "कर्तुर्नाशो गृहारम्भे प्रवेशे पतिनाशनम्" इति (१)। अथ जीर्णगृहादिविषये प्रवेशे विशेषमिन्द्रवज्राक्षन्दसाह जीर्णे पुरातनेऽस्मिन्निर्मिते गृहेऽथवा सिद्धएव स्वहेऽस्मादिभयात् खस्मिन्कृतं भयं दाहः। आदिशब्देन वज्रपतितभयं राजकोपोवा। इत्यादृष्टदृष्टैः पतिते गृहे पुनरपि सम्यक्कृते कृत्वापिते गृहेऽपि प्राक्पदोक्ताः सर्वेऽपि मासास्तदृगृहप्रवेशे ज्ञेयाः। किन्तु। मार्गो

जैयोः मार्गशीर्षकार्त्तिकयोश्च आवश्यकेऽपि आवश्यके नास्ति वेधः प्रवेशः स्यात् शुभफलदः स्यात्। यदाह सनत्कुमारः "गृहारम्भोदितैर्भासैर्विगर्हैर्वीरवर्जितैरुद्धृगृहमिति" अत्र सामान्यतो गृहारम्भोदिता मासा गृहप्रवेशेऽभिहिताः" ते चैमे। "पौष्यफाल्गुनवैशाखमाघ श्रावणकार्त्तिकाः। मासाः क्षुर्ष्टक्षनिर्भीषे पुत्रारोग्यधनप्रदाः" इति नारदोक्तेः मार्गशीर्षफाल्गुनवैशाख माघश्रावणकार्त्तिका विहिताः। तत्र उत्तरायणे एव गृहप्रवेशस्य वाक्यान्तरेण विहितत्वात् आवश्यकार्त्तिकमार्गशीर्षाणामुत्तरायणत्वाभावाद्विरोधेन नूतनजीर्णगृहप्रवेशाभ्यां व्यवस्था कथं? प्रागभिहितनारदवाक्येनोत्तरायणसाहचर्येण नूतनगृहप्रवेशस्यपूर्वगृहप्रवेशयोर्विधानात् "गृहारम्भोदितैर्मासैः" इत्यनेन तु सामान्यतस्त्रिविधस्यापि गृहप्रवेशस्याभिधानादुत्तरायणीयामासास्त्रिविधगृहप्रवेशे शुभाः दक्षिणायनीया मासाः श्रावणादयस्तु जीर्णगृहप्रवेशविधयाः। अतएव नारदो मार्गशीर्षकार्त्तिकयोर्नूतनगृहप्रवेशे मध्यमत्वमाह ऋषीदेवजीर्णगृहप्रवेशे उत्कृष्टत्वमध्यवस्यते। अम्बुमेति अम्बुः अततारका रेवत्यः प्रथमः। अनिलः स्वातीवासवं धनिष्ठा एवापि भेषु जीर्णस्टक्षेऽग्न्यादिभयाद्भवेऽपि गृहे प्रवेशः शुभः प्राक्पठितेषु तु भेषु शुभ एवेति वैशंतिकन्यायादवगम्यते। यदुक्तं ज्योतिःप्रकाशे "प्रवेशो नूतने कार्य्यः ध्रुवैर्मैत्रैः क्षिप्रे। पुष्ये स्वातियुतैस्तैश्च जीर्णे स्याद्दारुवर्जिते" इति। नावश्यमिति अत्रैवंविधे जीर्णे गृहे अग्न्यादिभयाद्भवेऽपि गृहेऽवश्यं नक्षत्रादिविचारणा शुक्रास्तपूर्वसप्ताह्यवार्धक्यादिदुष्टस्य गुरुभरस्यपुरुनुप्रवेशवत्सरादीनां दोषाणां विचारणा विचारो नास्ति। यत्तादयः शाकदोषाः सन्तु वा मा वा तथापि गृहप्रवेशः कार्यः। परन्तु दोषेऽपि यथाकथंचित्सङ्कल्पशुद्धिमात्रमङ्गीकृत्य विहितनक्षत्रेष्वेव कार्यः। वास्तुपूजा त्वेवंविधेऽपि गृहप्रवेशे भवतीत्यपि ध्येयम् यदुक्तं ज्योतिःप्रकाशे "नित्ययाने गृहे जीर्णे प्राक्षने परिधानके। वधूप्रवेशे साकल्ये न शौचं गुरुशुक्रयोरिति" वसिष्ठेनाप्युक्तम् "नवप्रवेशे खलु कालशुद्धिर्न हस्तसौपूर्विकयोः कदाचिदिति" तस्मादार्यः। नूतनगृहप्रवेशे कालशुद्धिरिष्टार्थी। हस्तं हस्तामयाख्यो गृहप्रवेशः सौपूर्विको रात्रौ वास्तुसमाप्तौ गृहप्रवेशः। तादृग्योर्गृहप्रवेशयोः कालशुद्धिः कदाचिदपि नापेक्षिता। इति सम्भवे उक्तेनास्तु। किन्तु प्रवेशदिनीयपञ्चाङ्गशुद्धियुक्ते शुभलग्ने गृहप्रवेशः कार्यः। पूर्वस्मिन्नार्षे नूतने प्रवेशे यथा वास्तुपूजा तथा हस्तसौपूर्विकयोरपि कार्यैवार्चा। नारदस्तु वास्तुनिष्ठत्तिप्रवेशे कालशुद्धिरपेक्षितैवेत्याह तदाद्यं प्रागभिहितम्। तदेतयोर्वाक्ययोरावश्यकाऽनावश्यकविधयत्वेन व्यवस्था। तयाचां गृहप्रवेशानां लक्षणमुक्तं वसिष्ठेन "अपूर्वसंज्ञः प्रथमः प्रवेशो वास्तुशमने तु सपूर्वसंज्ञः। हस्तामयस्तस्मिन्नभयादिजातः प्रवेश एवं त्रिविधः प्रदिष्टः" इति। एतद्व्याख्यानं वास्तुनिष्ठत्तावितिपद्यव्याख्यातावस्ति तत्तत एवावधार्यम्। अथेदं ध्येयम् यत्त्रिविधेऽपि प्रवेशे प्रवेशदिनीयनक्षत्रं क्रूरार्क्षान्तं क्रूरविद्धं वा तत्सर्वथा वर्ज्यमिति। उक्तं च वसिष्ठेन "क्रूरग्रहाधिष्ठितविद्धभं च विवर्जनीयं त्रिविधप्रवेशे" इति।(२) "अथ गृहप्रवेशदिनात् प्राक्कर्त्तव्यां वास्तुपूजां विवक्षुस्तत्रत्यान्युपजातिकापूर्वार्द्धेनाह ऋक्षद्रुवेति। ऋक्षेषु ध्रुवाणि स्थिराणि चराणि नक्षत्राणि प्रसिद्धानि मूलभं च एषु सप्तदशसु भेषु नक्षत्रेषु वास्तोः वास्तुपुरुषस्यार्चनं भूतबलिं च कारयेत्। गृहपतिर्वास्तुपूजां कुर्यात्। पुरोहितो गृहपतिं वास्तुपूजादिकं कारयेत्। शुक्रोरन्यतरस्मिन्निति यौ कर्त्तुः कर्मत्वम्। यदाह अथोशनः "चित्राश्वतिभिषास्वातीहस्तः पुष्यः पुनर्वसुः। रोहिणी रेवतीमूलं श्रवणोत्तरफल्गुनी। धनिष्ठा चोत्तराषाढा तथा भाद्रोत्तरान्विता। अश्विनी मृगशीर्षं च अनुराधा तथैव च। वास्तुपूजननेतेषु नक्षत्रेषु करोति यः। स प्राप्नोति नरो लक्ष्मीमिति प्राह परात्परः" इति। वास्तुपूजाप्रकारमाह। वसिष्ठः "निर्माणे मन्दिरार्थां च प्रवेशे त्रिविधेऽपि वा। वास्तुपूजा तु कर्त्तव्या यत्नात्तां शृणुयाम्यतः। गृहमध्ये हस्तमात्रं समन्तात्सप्तहस्तयोः परि। एकाशीतिपदं कार्यं तिलैस्तुल्यं सुशोभनम्। एकद्वित्रिपदाः पञ्चचत्वारिंशत् सुरार्चिताः। द्वात्रिंशद्भ्रातृतो वक्ष्यमाणाश्चान्तस्थयोदश। तेषां स्थानानि नामानि वक्ष्यामीश्वरकोपतः। तत्राग्निः शिखी कोणस्थस्त्रयी चैकपदेश्वरः। तस्माद्दक्षिणतः पर्जन्यश्चासावेकपदेश्वरः। जयन्तेन्द्रार्कसत्याख्याश्चत्वार द्विपदेश्वराः। आकाशवायू परतः क्रमादेकपदेश्वरौ। एवं प्राच्यां नव भ्रात्वा स्वेवमेवान्यदिक्षु च। आद्यवान्त्यावेकपदौ द्विपदाः पञ्च मध्यगाः। पूषाद्यदौ समानाः (पितृसंज्ञा-

धीशान्ताः) क्षुरसरावाम्बभागगाः। आद्यद्वान्त्यावेकपदौ द्विपदाः पञ्च मध्यगाः। अष्टौ पितृमघाधीशात् रोगान्ताः पञ्चिमेश्वराः। आद्यन्तौ द्वावेकपदौ द्विपदाः पञ्च मध्यगाः। रोगादिदिग्वसुराः सप्त सौम्यादिशि क्रमात्। तत्राधस्थचतुष्कोष्वीशानादिषु च क्रमात्। आपः सावित्रविजयरुद्राश्चैकपदेश्वराः। मध्ये नवपदो ब्रह्मा तस्यैशानादिकोणगाः। आपवत्सोऽथ सविता विबुधाधिपसंज्ञकः। राजयक्ष्मा च चत्वारः सुरार्द्वैकपदेश्वराः। ब्रह्मणः पूर्वतो दिक्षु त्रिपदाश्चामरा अमी। अर्यमा च विवस्वांश्च मित्रः पृथ्वीधरः क्रमात्। सप्तस्वेतेषु देवेषु स्थापितेशोदयं भवेत्। कोष्ठेषु पञ्च पञ्चैव (२०)चतुर्वेकपदाः सुराः। प्रागादिदिक्षु द्विपदाः पञ्च पञ्च ३०यथाक्रमम्। ब्रह्मणः ९ पूर्वतोदिक्षु त्रिपदाःस्युः समीपगाः १२। क्षिरण्यरेताः पर्जन्यो जयन्तः पाकशासनः। सूर्यःसत्यो भृशाकाशौ वायुः पूषा च वैतथः। इन्द्रस्ततः पितृपतिर्गन्धर्वो भृङ्गराजकः। मृगः पितृमघाधीशस्तथा दौवारिकाह्वयः। सुग्रीवः पुष्पदन्तश्च जलाधीशो निशाचरः। शोषः पापश्च रोगोऽहिर्मुख्यो भल्लाट एव च। सोमसर्पौ दितिदितो हानिश्चेदमराः स्मृताः। आपश्चैवापवत्सश्च जयोरुद्रौ तथैव च। मध्ये नवपदो ब्रह्मा तस्यौ तस्य समीपतः। प्राच्यां ह्युत्तरिता देवाः परितो ब्रह्मणः स्मृताः। अर्यमा सविता चैव विवस्वान् विबुधाधिपः। मित्रोऽथ राजयक्ष्मा च तथा पृथ्वीधरःक्रमात्। आपवत्सोऽष्टमः पञ्चचत्वारिंशत् सुरोत्तमाः। ज्ञात्वैवं स्थाननामानि ब्रह्मणा सहिताद्यन्तैः। वास्तुनो वास्तुमन्त्रेण गन्धपुष्पाक्षतादिभिः। प्रथमेनाथवेहापि अथवा स्वस्वनामभिः। गुग्गुलुञ्चरुं दद्यात्घृतदीपफलैः सह। अपूपैर्भक्ष्यरत्नैश्च शाल्यैः सह समर्चयेत्। ताम्बूलञ्च ततो दद्याद्देवेभ्यश्च पृथक् पृथक्। दत्त्वा पुष्पाञ्जलिं कर्त्ता प्रार्थयेद्वास्तुपूरुषम्।" "एवं यः कुरुते सम्यग्वास्तुपूजां प्रयत्नतः। आरोग्यं पुत्रपौत्रादि धनधान्यं लभेच्चरः। वास्तुपूजामकृत्वा यः प्रविशेत्सदमन्दिरे। रोगाद्यानाविधान् क्लेशानश्नुते सर्वसङ्कटम्"। (चतुःषष्टिपद वास्तुमण्डलम्) इ०स०५२ ब० यथा "अष्टाष्टकपदमथ वा लक्त्वा रेखाश्च कोष्ठमालिखेत्। ब्रह्मा चतुःपदोऽत्रिंशदर्धपदा ब्रह्मकोष्ठगाः। अष्टौ च बहिःकोष्ठेषार्धपदास्तदुभयस्थिताः साष्टौ। ब्रह्मभ्यो ये शेषास्ते द्विपदा विंशतिस्ते च" ॥

अधिकं वास्तुयागशब्दे द्रष्टव्यम्)। केचित्तु पञ्चाङ्गशुद्धिमालक्ष्य पूर्वदिन एव वास्तुपूजामाहुः यदाह नारदः "विधाय पूर्वदिवसे वास्तुपूजां यथाक्रियामिति"। श्रीपतिरपि "अथ प्रवेशो नवमन्दिरस्य वास्तोनिरुक्तावथ भूपतीनाम्। सौम्यायने पूर्वदिने विधाय वास्तूच्चनं भूतबलिं च सम्यगिति" अथ सम्यगुक्तिं तिथिशुद्धिं चोपजातिकोत्तरार्द्धेनेन्द्रवज्रया चाह। त्रिकोणे इति। शुद्धेति। नवमषष्ठमचतुर्थसप्तमदशमैकादशद्वितीयतृतीयस्थानानामन्यतमस्थानस्थैः शुभग्रहैः। पूर्णचन्द्रबुधगुरुशुक्रैरुपलक्षिते। अत्र चन्द्रस्य सम्बन्धित्वं ध्येयं तथा तृतीयषडेकादशस्थैः पापग्रहैरुपलक्षिते तथा चन्द्रे चतुर्थस्थानं रन्ध्राष्टमस्थानं च। शुद्धे सर्वग्रहरहिते चन्द्रे रन्ध्रे यद्विलग्नादये लग्ने वेश्म गृहमाविशेत्। यदाह वसिष्ठः "केन्द्रत्रिकोणावधनत्रिसंस्थैः शुभैस्त्रिषड्यायगतैः खलैश्च। लग्नान्त्यषष्ठाष्टमवर्जितेन चन्द्रेण लग्नोनिलयः प्रवेशः" इति। अन्यच्च "प्रवेशलग्नाच्छशिनस्थितो यः क्रूरग्रहः क्रूरगृहे यदि स्यात्। प्रवेशकर्त्तारमथ त्रिवर्गलग्नाष्टवर्गैः शुभराशिगश्चेदिति" नारदः "स्थिरलग्ने स्थिरे राशौ नैधने शुद्धिसंयुते। त्रिकोणकेन्द्रखत्र्यायसौम्यैस्त्र्यारिगैः परैः। लग्नान्त्याष्टमस्थानवर्जितेन शिमांशुनेति" प्रवेशः स्यादिति पूर्वेण सम्बन्धः। शुद्धः "शुभं शुद्धसदने यात्रायामदमं तथा। दमनं च गृहारम्भे चतुर्थं सप्तमेऽशने" इति। यत्तु श्रीपतिना "केन्द्रस्थिरत्र्यायैः शुद्धैः क्रूरैः षट्त्र्यायगैर्युतौ। लग्ने भनौ वा केन्द्रे वा स्थिरभाग्योदये विशेदिति" केन्द्रस्य शुद्धत्वस्य तत्सापत्यग्रहराहित्यवत्त्वं ध्येयम्। लग्नस्य शुद्धत्वोक्तेस्तत्सप्तमयोरप्यभिधानार्थं। कीदृशे लग्ने विशेत्तदाह लग्नौ भं राशिर्लग्नं च। लग्नेऽपि लग्नकाले भे लग्नभे। ताभ्यां खलु रहसभवनं विगतो लग्नभंशुभैर्युक्तम्। खलग्नलग्नात् खलग्नराशेर्वा चतुरोराशिः प्रवेशलग्नगो नाऽपेक्षित इत्यर्थः। पुनः कीदृशे क्रूरैरित्यादरदर्शनैः। क्रूरौ प्रसिद्धौ वारौ। रिक्षा ४।८।१२ उपलक्षणत्वाद्रन्ध्रतिथयोऽपि। चरलग्नानि मेषकर्कतुलामकराः। उपलक्षणत्वात्तदंशा अपि। दर्शोऽमावास्या चैत्रो मासः। उपलक्षणत्वादाषाढोऽपि। विगता अर्कादयो यस्मिन् अर्कादयः प्रवेशदिने त्रिभिरित्यर्थः। यदाह वसिष्ठ "न चैत्रे भेऽपि न चाषाढलग्ने

पञ्चेष्टकेऽष्टमशुद्धियुक्ते । कार्यः प्रवेशो न चरांशलग्ने शुभेक्षिते वाथव संयुते वा । रिक्तामसां दग्धतिथिं दिनेशभूसुतषडवर्गमिनेन्दुदृष्टम् । क्रूरग्रहाधिष्ठितविद्धभं च विवर्जनीयं त्रिविधप्रवेशे" इति । वार फलमथाह स एव "दहते प्रविशतां च मन्दिरं वह्निना नियतमेव वह्निभे । ब्रह्मभूमिसुतवासरे तथा शीतरश्मिदिवसे हि हृद्विदम् । चन्द्रजार्किसितवासरेषु च श्रीकरं सुखमहार्थलाभदम् । सूर्यसृग्दिवसे स्थिरप्रदं किन्तु चौरभयमत्र विद्यते" इति । एषां निष्कृष्टमर्थमाह श्रीपतिः "रिक्ता तिथिर्भूसुतभानुवारौ निन्द्याश्च योगाः परिवर्जनीयाः । मेषः कुलीरोमकरस्तुला च त्याज्याः प्रवेशे हि तथा तदंशाः" इति । निषिद्धलग्नफलान्यभिहितानि राजमार्तण्डे "भूपो यात्वा मेषलग्ने प्रवेशे नाशङ्कस्तेत् कर्कटस्योदये वा । व्याधिं सौम्यान्वीक्षिते लग्नवर्त्तिन्याकीकेरे चाप्नुयाद्धान्यनाशम्" । आकीकेरे मकरे । "लग्नेऽन्यत्रांशकेऽप्येधामे तद्दुष्टफलप्रदाः । शुभान्यन्यानि लग्नानि प्रवेशे सुतयो विदुरिति" अन्यानि स्थिरराशि द्विस्वभावानि च । उक्तं च वसिष्ठेन "पञ्चाङ्गसंशुद्धदिने निशेशतारावले चाष्टकवर्गयुक्ते । सौम्ये स्थिरे मे शुभदृष्टियुक्ते लग्नेऽथ वा द्वयङ्गगृहे विलग्ने" इति । विशेषो राजमार्तण्डे "निन्दिता अपि शुभांशसमेतास्तौलिमेषमकराः सकुलीराः । कर्तृभोपचयगाश्च विलग्ने राशयः शुभफलाय भवन्तीति" । एतल्लग्नान्तराशुद्धौ वङ्कालासहिष्णुत्वे वा द्रष्टव्यम् । शुभांशाः द्वयमिथुनकन्याधनुर्मीनानामंशा इत्यर्थः कर्कतुलांशयोः स्वरूपतो निषिद्धत्वात् । विशेषान्तरमाह वसिष्ठः "यः क्षीणचन्द्रोऽन्त्यषडष्टसंस्थः पापेक्षितः पापयुतोऽथ वा स्यात् । कर्तुः स्वियं हन्ति स वह्निरोध त्रिवर्षतः सौम्यनिरीक्षित चेदिति" अथ राज्ञां यात्रानिष्क्रमप्रवेशेऽयं विशेषोध्येयः यत्र मासे यात्रा कृता तस्मात्सप्तमे मासि यात्रा दिनात्सप्तमे दिने वा प्रवेशोनिषिद्धः यदाह गुरुः। "निर्गमात्सप्तमे मासि प्रवेशो नैव शोभनः । नवमे दिवसे चैव प्रवेशं नैव कारयेदिति" । वामं रविभिति । गृहप्रवेशसमये रविं सूर्यं वामं तद्दिगभिमुखात् प्रवेश्य गृहाद्बामभागस्थं कृत्वा वेश्म गृहं विशेत् । तथा पुरोऽग्ने सस्यमुखं पूर्णघटं जलपूर्णं कलसपल्लवशोभितं पूगीफलादिपूर्णं घटं वा कृत्वा । चकारस्यात्तुल्यसमुच्चयार्थत्वाद्ब्राह्मणांश्च सज्जलकलसानपि ब्राह्मणान्वाग्ये कृत्वा वेश्म विशेत् । अत्र शुक्रः पृष्ठगः कार्यो दक्षिणोऽपि विशेषो ध्येयः यदाह वसिष्ठः "कृत्वा शुक्रं पृष्ठतो वामतोऽर्कं विप्रान् पञ्चानयतः पूर्णकुम्भम् । हर्म्यं रम्यैरोषधिवृक्षगुल्मवितानैः स्त्रीभिः सम्यग्गीतमाल्यैर्विशेत्तदिति" गुरुस्तु वामगोऽपगोवा शुक्रो निषिद्धः, किन्तु पृष्ठगतो दक्षिणगतो वा शुभ इत्याह "पृष्ठगं दक्षिणं वापि भृगुं कृत्वा विशेत्सदा । पुरोगं वामगं वापि शुक्रं कृत्वा विशेच्च नेति" अत्र शुक्रस्य दिक्चतुष्टयस्थत्वज्ञानं चन्द्रवदेव ज्ञेयं विशेषानुक्तेः । तच्च गृहारम्भप्रकरणेऽस्माभिरुक्तम् अयं च सर्ववर्णानां त्रिविधेऽपि प्रवेशे विधिः राज्ञां तु यात्रानिष्क्रमौ विशेषमथाह श्रीपतिः "कृत्वा विप्रान् सज्जलकलसांश्चायतो वामतोऽर्कं स्नातः सम्यो विमलवसनो मङ्गलैर्वंदवोधैः । व्यक्तैर्यात्राकविनयकृनैर्हारमार्गेण राजा हर्म्यं पुष्पकरुचिरनोरणाढ्यं विशेच्चेति" कीदृशं वेश्म भकूटशुद्धं भकूटं षष्ठाष्टकादि तेन शुद्धम्। उपलक्षणत्वाद्विवाहप्रकरणोक्तं "वर्गोवश्यं तथा तारा" इत्येवमादिकं च। तेनापि शुद्धं ध्येयम् यदाह वसिष्ठः "राशिकूटादिकं सर्वं दम्पत्योरिव चिन्तयेदिति"।४। अथ वामगतार्कज्ञानं तिथिभेदेन पूर्वाद्यभिमुखगृहप्रवेशं चेन्द्रवंशाच्छन्दसाह वाम इति । अष्टमपञ्चमद्वितीयैकादशस्थानेभ्यः पञ्चसु स्थानेषु स्थिते रवौ सति ग्राम्वदनादिमन्दिरे प्रवेष्टव्ये गृहप्रवेशकर्तुर्वामो रविर्ज्ञेयः तद्यथा । यस्मिन् लग्ने प्रवेशः कर्तुर्मिष्यते तस्मादष्टमं यत् स्थानं तस्मात् पञ्चसु स्थानेषु अर्के स्थिते पूर्वाभिमुखगृहप्रवेशकर्तुर्वामः सूर्यः स्यात् । तथा लग्नाद्यत् पञ्चमस्थानं ततः पञ्चसु स्थानेषु अर्के स्थिते दक्षिणाभिमुखगृहप्रवेशकर्तुर्वामः सूर्यः । एवं लग्नाद्द्वितीयं स्थानं ततः पञ्चसु स्थानेषु सूर्ये पश्चिमाभिमुखगृहप्रवेशकर्तुर्वामः सूर्यः । तथैव लग्नाद्यदेकादशस्थानं ततः पञ्चसु स्थानेषु सूर्ये स्थिते उत्तराभिमुखगृहप्रवेशकर्तुर्वामः सूर्य इत्यर्थः । उक्तञ्च "रन्ध्रात्पुत्राद्धनादायात्पञ्चस्वर्के स्थिते क्रमात् । पूर्वाशादिमुखं गेहं विशेद्वामो भवेद्यतः" इति । विद्वज्जनैरपि "लग्नात्प्रागादितोदिक्षु द्वौ द्वौ राशी नियोजयेत् । एकमेकं न्यसेत्कोणे सूर्यं वामं विचिन्तयेत् । प्राच्यां लग्नात् द्वौ राशी स्याद्यौ कोणे चैकः । तथा

पूर्णातिथाविति। प्राग्वदने पूर्वाभिमुखे गृहे पूर्णातिथौ पञ्चम्यां दशम्यां पूर्णिमायां वा प्रवेशः शुभः। नन्दादिके तिथिगणे वाम्यजलोत्तरानने गृहप्रवेशः शुभः। यथा दक्षिणाभिमुखे गृहे नन्दायां प्रतिपदि षष्ठ्यामेकादश्यां वा प्रवेशः शुभः। जलं पश्चिमदिक् तदभिमुखे भद्रायां द्वितीयायां सप्तम्यां द्वादश्यां वा प्रवेशःशुभः। उत्तराभिमुखे गृहे जयायां तृतीयायामष्टम्यां त्रयोदश्यां वा प्रवेशःशुभ इत्यर्थः। यदाह गुरुः "नन्दायां दक्षिणद्वारं भद्रायां पश्चिमामुखम्। जयायामुत्तरद्वारं पूर्णायां पूर्वतोविशेदिति" मूले नन्दादिके इति पदोपादानादिक्षायकृष्णं यद्यप्यायाति तथापि विदिक्षु द्वारनिषेधादिह्यां चतुष्टयेन चतुर्णांद्वाराणां सम्बन्धात्तस्याः स्वरूपतो निषेधाच्च रिक्तायकृष्णासम्बोध्येवः। सोऽपि संग्रहवाक्ये स्पष्ट एव। ५। तत्र गृहप्रवेशे वास्तुकलसचक्रं शार्दूलविक्रीडितेनाह। वक्त्रे इति। कलसस्याऽष्टधा विभागाः परिकल्प्याः मुखं कण्ठो गर्भो मूलं चेति चत्वारो विभागाः पूर्वादिदिक्परत्वेन चत्वारो विभागा एवमष्टौ स्युः। तथाविभागपरत्वेन सूर्यं भान्नक्षत्रन्यासे फलमुच्यते। वक्त्रे इति। गृहप्रवेशसमये इति सर्वत्रापि सम्बध्यते कुम्भे कलसाकृतौ वास्तुनि रविभात्भूयाक्रान्तनक्षत्रादिति स्वभूतोपे पञ्चमी। रव्यृक्षमारभ्य नक्षत्रन्यास इत्यर्थः। तत्र कलसस्य वक्त्रोमुखे भूरेकं सूर्याक्रान्तनक्षत्रमेव स्थाप्यतत्फलं गृहस्याऽभिदाहः। ततः सूर्यभात् क्रमात्तदग्निभानि चत्वारि भानि प्राच्यां स्थाप्यानि, फलं सुहृत्सनं जनवासभूम्बंगृहंस्यात्। ततः क्रमा यमगतात्तदग्निभानि चत्वारि भानि दक्षिणस्यां यमदिशि स्थाप्यानि, फलं गृहपतेर्लाभो द्रव्यप्राप्तिः। ततः क्रमाः तदग्निभानि चत्वारि भानि पश्चिमे पश्चिमायां स्थाप्यानि, फलं गृहपतेः श्रीप्राप्तिः। ततो वेदाः तदग्निभानि चत्वारि भानि उत्तरे उत्तरस्यां स्थाप्यानि। फलं कलिर्लोकैः सह गृहसम्बन्धी निरर्थकः कलहः स्यात्। ततोयुगमितात्तदग्निभानि चत्वारि भानि गर्भे कलसमध्ये स्थाप्यानि, फलं विनाशः। कण्ठेत्याकाङ्क्षायां गर्भोपादानाद्भाविनां गर्भाणां विनाश इत्यर्थः। ततोरामात्तदग्निभानि त्रीणि भानि मुखे चुल्ले स्थाप्यानि। फलं स्वैरं गृहपतेर्वङ्कालं तत्र गृहे निवासः। ततोऽनलात्तदग्निभानि त्रीणि भानि कण्ठे स्थाप्यानि, फलं स्थिरत्वं सर्वदा गृहपतेर्भवेत्। एवमभिजिद्दृहितानि स्युः। तदुक्तं विश्वकर्मणा "षटाकारं लिखेच्चक्रं रविभिर्ऋक्रमेण च। सुखैकं दिशु चत्वारि त्रिकोणि गुदकण्ठयोः। एवं चक्रं समालेख्यं प्रवेशार्थं सदा बुधैः" अत्र चत्वारि इति वीप्सा द्रष्टव्या। दिशु इत्यनेन गर्भोऽप्युपलक्ष्यते। तथा तत्फलनिर्देशस्तत्रैव "कण्ठेनाशो मुखे प्रोक्त, उद्वासः पूर्वतो भवेत्। दक्षिणे चार्थलाभाय, पश्चिमे श्रीप्रदो भवेत्। उत्तरे कलहश्चैव, गर्भे गर्भविनाशनम्। स्थिरता च गुदे, कण्ठे कलसस्य प्रकीर्त्तितेति" ज्योतिःप्रकाशेऽपि "भवेदपञ्चकं तिथिः। १।४।४।४।४।४।३।२ प्रवेशे कलसेऽर्कभात्। स्तिर्गतिर्धनं श्रीः स्थाहैरं शुक् स्थिरता सुखमिति" वेदपञ्चकं वेदाश्चत्वारस्तेषां पञ्चवारं चत्वारि भानिलेख्यानीत्यर्थः। स्तिरित्यादीन्यष्टौ यथासङ्ख्यं फलानि। अत्र कलसचक्रे शुभफलदस्थाने यातं सत्येव विहितनक्षत्राणां परित्यागे शुक्लत्वापि यद्दिङ्मुखं गृहप्रवेशो विधिस्मितः तद्दिङ्मुखविहितनक्षत्रपरित्यागः। यथा पूर्वदिङ्मुखगृहप्रवेशे विधिस्मिते रोहिणी सूर्ये स्याद्धे। दक्षिणाभिमुखगृहप्रवेशे। उत्तरफाल्गुनीचित्रे। एवं पश्चिमाभिमुखे अनुराधोत्तराषाढे। एवम् उत्तराभिमुखे उत्तरभाद्रपदारेवत्यौ स्याद्धे इति निष्कर्षोऽर्थः। अतएवोक्तं वसिष्ठेन "यद्दिगद्वारं मन्दिरं तद्दिगृक्षैरक्रूरैः स्याद्विद्धेशो न क्रूरैरिति"। तद्दिगृक्षैरिति उक्तर्क्षैरिति चानयोः सामानाधिकरण्येनान्वयः। भिन्नवाक्यत्वे तु विवक्षिते चकारः कर्त्तव्यः। "सम्भवत्येकवाक्यत्वे वाक्यभेदो हि दूषणमिति" न्यायाच्च। अतएव "अर्कादितेयानिलदस्रविष्णुऋक्षे प्रविष्टं नव मन्दिरं यत्। व्यूढत्रयात्तत् परहस्तयातं शेषेषु धिष्ण्येषु च स्वल्पदं स्यादिति" "निषेधोऽप्युपलक्षो भवति" पी॰धा॰

**गृहकच्छप** पुं॰ष॰ गृहे कच्छप इव। मेषशृङ्गिलतायाम् शब्दर॰।

**गृहकन्या** स्त्री ष॰ गृहे कन्येव। धृतकुमार्याम् राजनि॰

**गृहकपोत** पुंस्त्री ष॰ गृहे स्थितः कपोतः। कपोतभेदे स्त्रियां जातित्वात् ङीष्। "शिष्यायितं गृहकपोतशतैर्यथा स्यात्" सा॰ द॰ "आवर्त्तिभिर्भृङ्गकपोतशिरोधराभैः" माघः। कपोतशब्दे दृश्यम्।

**गृहकर्त्तृ** त्रि॰ष॰ गृहं करोति क-तृच् ह्रस्वः। १गृहकारके (घरामि) २घूसरेऽतिसूक्ष्मे षट्कभेदे पुंस्त्री राजनि॰। स्त्रियामुभयत्र ङीष्।

गृहकारक पु० गृहं करोति कृ–ण्वुल् ६त०। गृहनिर्माणकारके वर्णसङ्करभेदे। "प्रतिमाघटकादेव कन्यायां नापितस्य च। तुन्नवायस्य सम्भूतिः सोपान गृहकारकः" पराशरः २गृहकर्त्तरि (घरामि) त्रि०। "गृहखण्डचक्रसंयोगात् कुम्भकारो यथा घटम्। करोति तृणमृत्काष्ठैर्गृहं वा गृहकारकः" यात्त०।

गृहकारिन् त्रि० गृहं करोति कृ–णिनि। (घरामि) १गृहकारके स्त्रियां ङीप् (कृमिरक्षा) २कीटभेदे। सा च जातिः उपस्करश्चरणपापजाता। यथाह "यकोभवति हुत्वाग्निं गृहकारी ह्युपस्करम्" मनुः।

गृहकुक्कुट पुंस्त्री गृहे रूढः कुक्कुटः। कुक्कुटभेदे "श्वेताय दद्याद्गृहकुक्कुटाय चतुर्थभक्ताय बुभुक्षिताय" हेम०।

गृहकूलक पु० गृहस्य कूले समीपे भवः कन्। चिञ्चिडाख्ये शाके शब्दार्थचि०।

गृहगोधा स्त्री गृहस्य गोधेव। (टिकटिकी) ज्येष्ठाम् राजनि०। स्वार्थे क। तत्पर्यायो अमरः "श्वेता गृहगोधिकार्द्धनरे" इ०स०५४अ०। पुरुषार्द्धप्रमाणतोयपायिका श्वेता गृहगोधिकेत्यर्थः। पिङ्गलवर्णायास्तस्यावामे स्थितायाः गमने शुभत्वं यथाह इ०स० ८६अ० "शिवा शृगाली रक्ता शुच्छुः पिङ्गला गृहगोधिका। सूकरी परपुष्टा च प्रशस्यानच वामतः "गृहगोधिकेति संज्ञा विज्ञेया कृष्णसर्पस्य। दिङ्मण्डलेऽभ्यन्तरवाह्यभागे फलानि विद्यात् गृहगोधिकायाः" ८८अ० [(टिकटिकी) हेम०।

गृहगोलिका स्त्री गृहे गोधिका पृषो०। ज्येष्ठाम्

गृहचूल्ली स्त्री "पूर्वापरे तु शाले गृहचूल्ली दक्षिणोत्तरे काचम्" इ०स० ५२ उक्ते द्विशाले गृहभेदे

गृहज पु०गृहे दास्यां जायते जन–ड। दासभेदे "ध्वजाहृतोभक्तदासो गृहजः क्रीतदत्त्रिमौ। पैतृकोदण्डदासश्च सप्तैते दासयोनयः" मनुः। "दासास्तु गृहजादयः" नारदः १७२६ पृ० ३अम्। [काङ्क्षिके त्रिका०।

गृहणी स्त्री गृहे नीयते नी–कर्मणि क्विप् संज्ञायां णत्वम्।

गृहतटी स्त्री गृहस्य तटीव। वोधिकायाम्(पिंडा दाओआ) इति ख्याते पदार्थे हारा०।

गृहदेवता स्त्री गृहे वास्तौ स्थिता देवता। वास्तुपुरुषदेहस्थेषु ब्रह्मादिषु ब्रह्मान्तेषु ४५ संख्यकदेवताभेदेषु गृहशब्दे ३अम्। "गृहाय गृहदेवताभ्यो वास्तुदेवताभ्यः" श्राद्धम०गृ०१।२।४ सू०

गृहदेवी स्त्री गृहे तत्कुले विवाहस्य पूज्या देवी। जरानाम राक्षस्याम् तत्कथा भा० स० १७ अ० "जरा नामाऽस्मि भद्रं ते राक्षसी कामरूपिणी। तव वेश्मनि राजेन्द्र! पूजिता न्यवसं सुखम्। गृहे गृहे मनुष्याणां नित्यं तिष्ठामि राक्षसी। गृहदेवीति नाम्ना वै पुरा सृष्टा स्वयम्भुवा। दानवानां विनाशाय स्थापिता दिव्यरूपिणी। यो मां भक्त्या लिखेत् कुड्ये सपुत्रां यौवनान्विताम्। गृहे तस्य भवेद्वृद्धिरन्यथा हानिमाप्नुयात्। त्वद्गृहे तिष्ठमाना तु पूजिताऽहं सदा विभो!। लिखिता चैव कुड्येऽहं पुत्रैर्बन्धुभिरावृता। गन्धपुष्पैस्तथा धूपैर्भक्ष्यभोज्यैः सुपूजिता। साऽहं प्रत्युपकारार्थं चिन्तयाम्यनिशं तव। तवेमे पुत्रसकले दत्तवत्यस्मि धार्मिक!। संक्षेपितो मया दैवात् कुमारः सम पद्यत। तव भाग्यान्महाराज! हेतुमात्रमहं त्विह। मेरुं वा खादितुं शक्ता किं पुनस्तव बालकम्। गृहसंपूजनात्तुष्टा मया प्रत्यर्पितस्तव" [रत्नमा०।

गृहद्रुम पु०गृहमिव द्रुमः। मेषशृङ्गीवृक्षे (गाडरशिङा)

गृहधूप पु० गृहस्य धूप इव। धूपभेदे "मयूरपिच्छं निम्बस्य पत्राणि डहरतीफलम्। मरिचं हिङ्गु मांसीञ्च, बीजं कार्पाससम्भवम्। अगरोमाहिनिर्मोकौ विडा वैडालिकी तथा। गजदन्तश्च तत्चूर्णं किञ्चिद्घृततैलमिश्रितम्। गृहेषु धूपनं दत्तं सर्वान् बालग्रहान् जयेत्। पिशाचान् राक्षसान् हत्वा सर्वज्वरहरं भवेत्" शब्दार्थचि०। गेहधूपोऽप्यत्र।

गृहधूम पु०गृहगतो धूमः। (झुल) ख्याते पदार्थे। "सैन्धवं करवीरञ्च गृहधूमं विषं तथा" "ततो हरिद्रा गृहधूमरोध्रपतङ्गचूर्णैः समनःशिलालैः" सुश्रु०।

गृहनमन न० गृहं नमयति नम–णिच्–ल्यु पूर्वपदात् संज्ञायां णत्वप्राप्तौ नुम्वा० न णत्वम्। वायौ।

गृहनायन पुंस्त्री गृहं नाशयति प्रवेशेन नश–णिच्–ल्यु। वनकपोते (घुघु) राजनि० कपोतशब्दे तस्य गृहनाशकता ३अम्रा स्त्रियां जातित्वात् ङीष्। [ङीष्।

गृहनीड पुंस्त्री गृहे नीडमस्य। चटके हारा० स्त्रियां

गृहप पु० गृहं पाति पा–क। गृहपतौ

गृहपति पु० ६त०। गृहस्वामिनि, १गृहस्थे, द्वितीयाग्नौ २मन्त्रिणि, ३धर्मे च मेदि० ४सत्रयागकर्त्तरि यजमाने "बहुषु गृहपतये" कात्या० श्रौ०८।२।३ "गृहपतिर्यजमानमयुक्तत्वात्" १२।१।८। "यजमानं यत्कर्म तत् गृहपतिः करोति कर्मान्तरे तस्यायुक्तत्वात्

दतरेषां चाध्वर्यवादिषु योगात्" कर्कः "ऋत्विक्षु च सदस्येषु स वै गृहपतिस्तदा। उपविष्टेषूपविष्टः शौनकोऽथाब्रवीदिदम्" भा० आ० ४ अ०। "वनौकसां गृहपतिनामनुत्तमम्" भा० शा० २४३ अ०। आर्षत्वात् न दीर्घः। ५यजमानभावे "गृहपतिना संयुक्ते ञ्यः" पा०"गृहपतिर्यजमानस्तेन संयुक्तः गार्हपत्योऽग्निः" सि० कौ०। गृहपतेरपत्यादि अण्यञ् अण्। गार्हपत गृहपतिसम्बन्धिनि त्रि० स्त्रियां ङीप्। ६अग्निभेदे "अग्निर्गृहपतिर्नाम नित्यं यज्ञेषु पूज्यते" भा० २२१ अ० गृहस्य पतिः। ७गृहस्वामिभावे स्त्रियां सपूर्वत्वात् वा नान्तादेशे गृहपत्नी गृहपतिरिति रूपद्वयमितिभेदः। "गृहान् गच्छ गृहपत्नी" ऋ० १०।८५। गृहपत्नी स्वगृहस्वामिनी" भा०

गृहपाल त्रि० गृहं पालयति पाल्–अण्। गृहरक्षके "तमन्यं शूद्रमासीनं गृहपालमथाब्रवीत्" भा०व०२३७ अ०। २कुक्कुटे शब्दार्थचि०

गृहपोतक गृहं पोत इव यस्य कप्। वास्तुस्थाने शब्दरत्ना०

गृहप्रवेश्य पु० ७त०। गृहे विधानेन प्रवेशे गृहशब्दे तद्विहितदृश्या [शब्दार्थचि०।

गृहबभ्रु पुंस्त्री गृहस्थितो बभ्रुः। गृहस्थिते नकुले।

गृहबलि पु० गृहे देयो बलिः। वैश्वदेवकर्मणि "ततो गृहबलिं कुर्यात्" मनुः।

गृहबलिप्रिय ६त०। वकपक्षिणि शब्दार्थचि०।

गृहबलिभुज् पुंस्त्री गृहे दत्तं बलिं भुङ्क्ते भुज–क्विप्। १काके २चटके च हेम०।

गृहभर्त्तृ त्रि०६त०। गृहस्वामिनि "गृहभर्तुस्तनुत्वेऽवद्दे पीडामङ्गे प्रयच्छति" ह०स० ५३अ०। स्त्रियां ङीप्।

गृहभूमि स्त्री गृहयोग्या भूमिः। वास्तुभूमौ हलायु०

गृहमणि पु० गृहे मणिरिव। प्रदीपे हारा०।

गृहमार्जिका स्त्री मृज–ण्वुल् ६त० (चामचिका) अजिनपत्रयाम् त्रिका०। [जातित्वात् ङीप्।

गृहमृग पुंस्त्री गृहे मृग इव। कुक्कुरे हेम० स्त्रियां

गृहमेध पु० गृहेण दारैः मेधते संगच्छते मेध–अच् ३त०। कृतदारपरिग्रहे १गृहस्थे। मेध–हिंसायां भावे घञ् ७त०। २पशुहननात्मकहिंसायाम् मेधो हिंसाहेतको यज्ञः पशुहननात्मको यस्य। ३पशुयज्ञकर्त्तरि गृहस्थे। गृहे कर्त्तव्य यज्ञो यस्य। ४मरुद्भेदे "गृहमेधास आगत मरुतो माप भूतन" ऋ०७।५८। १०

गृहमेधिन् पु० गृहेण दारैर्मेधते संगच्छते मेध–णिनि। १गृहस्थे "पञ्च क्रमा महायज्ञाः प्रत्यहं गृहमेधिनाम्। अध्यापनं ब्रह्मयज्ञः पितृयज्ञस्तु तर्पणम्। होमो दैवो बलिर्भौतो नृयज्ञोऽतिथिपूजनम्। पञ्चैतान् यो महायज्ञान् न हापयति शक्तितः" मनुः। "प्रजायै गृहमेधिनाम्" रघुः। गृहे कर्त्तव्यो मेधो यज्ञोऽस्यास्ति इनि। २मरुद्भेदे "मरुद्भ्यो गृहमेधिभ्यः सायं चरुः पयसि" कात्या० श्रौ० ५।६।६। गृहमेधः पशुहनननिमित्तहिंसा अस्यास्ति इनि। ३गृहस्थे "गृहमेधी व्रीहियवाभ्यां चरहसन्नयोर्यजेत। ग्रामाकैर्वन्यैर्वैवंसु आपत्कल्पे अन्येन, पुरातनैर्वेति" आ० श्रौतसूत्रे। "मेधृ मेधाहिंसः। यो मेधृ सङ्गमे चेत्यत्र चकारेण पूर्वगणस्थमेधाहिंसयोरनुवृत्तिः तेन मेधृ हिंसार्थः तथा च गृहनिमित्तेन जातायाः "पशुघ्ना गृहस्थस्य चूल्ली पेषणमुपस्करः। कण्डनी चोदकुम्भश्च बध्यते यास्य वाहयन्" इति मनूक्तायाः पशुघ्नारूपहिंसायाः कारी गृहमेधी गृहस्थ" इत्यर्थः रघुः। ४तत्पत्न्यां स्त्री ङीप्। पतिकृतयज्ञसम्बन्धात्तस्यात्वम्।

गृहमेधीय त्रि० गृहमेधस्येदं छ। १गृहस्थकर्त्तव्ये कर्मभेदे "सान्नपनीयवेद्यां गृहमेधीयं विदधत्" कात्या० श्रौ० ५।६।६ व्या० हरिस्वामी। गृहमेधी मरुद्भेदे देवताऽस्य छ। २गृहमेधिनामकमरुद्देवताके ऋचादौ त्रि०। "सहस्रियं दक्ष भागमेतं गृहमेधीयं मरुतो जुषध्वम्" ऋ० ७५७।४

गृहमेध्य त्रि० गृहमेधो देवताऽस्य वा यत्। गृहमेधदेवताके ऋचादौ। अर्शा०अच् तत्कृत्ययुक्तेऽपि त्रि० "गृहमेध्या भवेच्छिल्पं भूषणानि च पत्नयेत्" शुक्ल० अध्यङ्गकः। "गृहमेध्या गृहकृत्यपरा" रघुः।

गृहयन्त्र क्ली० गृहे यन्त्रं वस्त्रधारणदारुविशेषः। गृहस्थितवस्त्राद्याधारे (आलना) प्रसिद्धे काष्ठनिर्मिते पदार्थे "गृहयन्त्रपताकाश्चोरपौरादरनिर्मिता" कुमा०

गृहयाय्य त्रि० चु० गृह—"सुदक्षिस्यृहिगृहिभ्य आयः" उ०सू०आय। गृहस्वामिनि इति सिद्धान्तकौमुद्यो। शब्दकल्पद्रुमे गृहयाय्यशब्दकल्पनमतीव प्रामादिकम् आयप्रत्ययस्य प्रमध्यत्वाभावात्

गृहयालु त्रि० चु०गृह–आलु। ग्रहीतरि।

गृहवाटिका स्त्री गृहसमीपे वाटिकेव आरामः] गृहसमीपस्योपवने हारा०।

**गृहवित्त** त्रि० गृहं वित्तं यस्य । गृहस्वामिनि द्वारा० स्त्रियां टाप् ।

**गृहसंवेशक** पु० गृहं गृहनिर्माणं संविशति उपजीवति सम+विश-ण्वुल् । वास्तुविद्योपजीविनि । "गृहसंवेशको दूतो द्वारोपक एव च" मनुः ।

**गृहस्थ** पु० गृहे दारेषु तिष्ठति अभिरमते स्था-क । गृहिणि गृहस्थाश्रमिणि द्वितीयाश्रमस्थे "गृहस्थस्तु यदा पश्येत् वलीपलितमात्मनः" मनुः ।

**गृहस्थधर्म** पु० ६त० । गृहस्थकर्त्तव्ये धर्मभेदे

स च धर्मः मन्वादिभिर्दर्शितः । तत्रादौ मनुनोक्तो यथा "गुरुणानुमतः स्नात्वा समावृत्तो यथाविधि । उद्वहेत द्विजो भार्यां सवर्णां लक्षणान्विताम् । असपिण्डा च या मातुरसगोत्रा च या पितुः । सा प्रशस्ता द्विजातीनां दारकर्मणि मैथुने । महान्त्यपि समृद्धानि गोऽजाविधनधान्यतः । स्त्रीसम्बन्धे दशैतानि कुलानि परिवर्जयेत् । हीनक्रियं निष्पुरुषं निश्छन्दो रोमशार्शसम् । क्षयामयाव्यपस्मारिश्वित्रिकुष्ठिकुलानि च । नोद्वहेत् कपिलां कन्यां नाधिकाङ्गीं न रोगिणीम् । नालोमिकां नातिलोमां न वाचाटां न पिङ्गलाम् । नर्क्षवृक्षनदीनाम्नीं नान्त्यपर्वतनामिकाम् । न पक्षिप्रेष्यनाम्नीं न च भीषणनामिकाम् । अव्यङ्गाङ्गीं सौम्यनाम्नीं हंसवारणगामिनीम् । तनुलोमकेशदशनां मृदङ्गीमुद्वहेत् स्त्रियम् । यस्यास्तु न भवेद् भ्राता न विज्ञायेत वा पिता । नोपयच्छेत तां प्राज्ञः पुत्रिकाधर्मशङ्कया । सवर्णाग्रे द्विजातीनां प्रशस्ता दारकर्मणि । कामतस्तु प्रवृत्तानामिमाः स्युः क्रमशोऽवराः । शूद्रैव भार्या शूद्रस्य सा च स्वा च विशः स्मृते । ते च स्वा चैव राज्ञश्च ताश्च स्वा चाग्रजन्मनः । न ब्राह्मणक्षत्रिययोरापद्यपि हि तिष्ठतोः । कस्मिंश्चिदपि वृत्तान्ते शूद्रा भार्योपदिश्यते । हीनजातिस्त्रियं मोहाद्उद्वहन्तो द्विजातयः । कुलान्येव नयन्त्याशु ससन्तानानि शूद्रताम् । शूद्रावेदी पतत्यत्रेरुतथ्यतनयस्य च । शौनकस्य सुतोत्पत्त्या तदपत्यतया भृगोः । शूद्रां शयनमारोप्य ब्राह्मणो यात्यधोगतिम् । जनयित्वा सुतं तस्यां ब्राह्मण्यादेव हीयते । दैवपित्र्यातिथेयानि तत्प्रधानानि यस्य तु । नाश्नन्ति पितृदेवास्तस्य च स्वर्गं स गच्छति । हव्यलोपेनपौतस्य निःश्वासोपहतस्य च । तस्माद्वै प्रस्तुतस्य निष्कृतिर्न विधीयते । चतुर्णामपि वर्णानां प्रेत्य चेह हिताहितान् । अदाविमान् समासेन स्त्रीविवाहान्निबोधत । ब्राह्मो दैवस्तथैवार्षः प्राजापत्यस्तथाऽऽसुरः । गान्धर्वो राक्षसश्चैव पैशाचश्चाष्टमोऽधमः । यो यस्य धर्म्यो वर्णस्य गुणदोषौ तु यस्य यौ । तदः सर्वं प्रवक्ष्यामि प्रसवे च गुणागुणान् । षड़ानुपूर्व्या विप्रस्य त्रीनस्य चतुरोऽवरान् । विट्शूद्रयोस्तानेव विद्याद्धर्म्यान्न राक्षसान् । चतुरो ब्राह्मणस्याद्यान् प्रशस्तान् कवयो विदुः । राक्षसं क्षत्रियस्यैकमासुरं वैश्यशूद्रयोः । पञ्चानान्तु त्रयो धर्म्या द्वावधर्म्यौ स्मृताविह । पैशाचश्चासुरश्चैव न कर्त्तव्यौ कदाचन । पृथक् पृथग्वा मिश्रौ वा विवाहौ पूर्वचोदितौ । गान्धर्वो राक्षसश्चैव धर्म्यौ क्षत्रस्य तौ स्मृतौ । आच्छाद्य चार्चयित्वा च श्रुतशीलवते स्वयम् । आहूय दानं कन्याया ब्राह्मो धर्मः प्रकीर्त्तितः । यज्ञे तु वितते सम्यगृत्विजे कर्म कुर्वते । अलङ्कृत्य सुतादानं दैवं धर्मं प्रचक्षते । एकं गोमिथुनं द्वे वा वरादादाय धर्मतः । कन्याप्रदानं विधिवदार्षो धर्मः स उच्यते । सहोभौ चरतां धर्ममिति वाचानुभाष्य च । कन्याप्रदानमभ्यर्च्य प्राजापत्यो विधिः स्मृतः । ज्ञातिभ्यो द्रविणं दत्त्वा कन्यायै चैव शक्तितः । कन्याप्रदानं स्वाच्छन्दादासुरो धर्म उच्यते । इच्छयान्योऽन्य संयोगः कन्यायाश्च वरस्य च । गान्धर्वः स तु विज्ञेयो मैथुन्यः कामसम्भवः । हत्वा छित्त्वा च भित्त्वा च क्रोशन्तीं रुदतीं गृहात् । प्रसह्य कन्याहरणं राक्षसो विधिरुच्यते । सुप्तां मत्तां प्रमत्तां वा रहो यत्रोपगच्छति । स पापिष्ठो विवाहानां पैशाच श्चाष्टमोऽधमः । ऋद्धिरेव द्विजाग्र्याणां कन्यादानं विधिष्यते । इतरेषान्तु वर्णानामितरेतरकाम्यया । यो यस्यैषां विवाहानां मनुना कीर्त्तितो गुणः । सर्वं शृणुत तं विप्राः सम्यक् कीर्त्तयतो मम । दश पूर्वान् परान् वंश्यानात्मानञ्चैकविंशकम् । ब्राह्मीपुत्रः सुकृतकृन्मोचयत्येनसः पितॄन् । दैवोढाजः सुतस्त्रींस्त्रीन् षट् षट् कायोद्भवः सुतः । ब्राह्मादिषु विवाहेषु चतुर्ष्वेवानुपूर्वशः । ब्रह्मवर्चस्विनः पुत्रा जायन्ते शिष्टसम्मताः । रूपसत्त्वगुणोपेता धनवन्तो यशस्विनः । पर्याप्तभोगा धर्मिष्ठा जीवन्ति च शतं समाः । इतरेषु तु शिष्टेषु नृशंसानृतवादिनः । जायन्ते दुर्विवाहेषु ब्रह्मधर्मद्विषः सुताः । अनिन्दितैः स्त्रीविवाहैरनिन्द्या भवति प्रजा । निन्दितैर्निन्दिता नृणां तस्मान्निन्द्यान् विवर्जयेत् ।

पाणिग्रहणसंस्कारः सवर्णासूपदिश्यते । असवर्णास्वयं ज्ञेयो विधिरुद्वाहकर्मणि । शरः क्षत्रियया ग्राह्यः प्रतोदो वैश्यकन्यया । वसनस्य दशा ग्राह्या शूद्रयोद्वहने । ऋतुकालाभिगामी स्यात् स्वदारनिरतः सदा । पर्व्ववर्जं व्रजेचैनां तद्व्रतो रतिकाम्यया । ऋतुः स्वाभाविकः स्त्रीणां रात्रयः षोडश स्मृताः । चतुर्भिरितरैः सार्द्धमहोभिः सद्विगर्हितैः । तासामाद्याश्चतस्रस्तु निन्दितैकादशी च या । त्रयोदशी च शेषास्तु प्रशस्ता दश रात्रयः । युग्मासु पुत्रा जायन्ते स्त्रियोऽयुग्मासु रात्रिषु । तस्मादयुग्मासु पुत्रार्थी संविशेदार्त्तवे स्त्रियम् । पुमान् पुंसोऽधिके शुक्रे स्त्री भवत्यधिके स्त्रियाः । समेऽपुमान् पुंस्त्रियौ वा क्षीणेऽल्पे च विपर्य्ययः । निन्द्यास्वष्टासु चान्यासु स्त्रियो रात्रिषु वर्जयन् । ब्रह्मचार्येव भवति यत्र तत्राश्रमे वसन् । न कन्यायाः पिता विद्वान् गृह्णीयाच्छुल्कमण्वपि । गृह्णन् शुल्कं हि लोभेन स्यान्नरोऽपत्यविक्रयी । स्त्रीधनानि तु ये मोहादुपजीवन्ति बान्धवाः । नारीयानानि वस्त्रं वा ते पापा यान्त्यधोगतिम् । आर्षं गोमिथुनं शुल्कं केचिदाहुर्मृषैव तत् । अल्पोऽप्येवं महान् वापि विक्रयस्तावदेव सः । यासां नाददते शुल्कं ज्ञातयो न स विक्रयः । अर्हणं तत् कुमारीणामानृशंस्यञ्च केवलम् । पितृभिर्भ्रातृभिश्चैताः पतिभिर्देवरैस्तथा । पूज्याः भूषयितव्याश्च बहुकल्याणमीप्सुभिः । यत्र नार्य्यस्तु पूज्यन्ते रमन्ते तत्र देवताः । यत्रैतास्तु न पूज्यन्ते सर्वास्तत्राफलाः क्रियाः । शोचन्ति जामयो यत्र विनश्यत्याशु तत् कुलम् । न शोचन्ति तु यत्रैता वर्द्धते तद्धि सर्वदा । जामयो यानि गेहानि शपन्त्यप्रतिपूजिताः । तानि कृत्याहतानीव विनश्यन्ति समन्ततः । तस्मादेताः सदा पूज्या भूषणाच्छादनाशनैः । भूतिकामैर्नरैर्नित्यं सत्कारेषूत्सवेषु च । सन्तुष्टो भार्य्यया भर्त्ता भर्त्रा भार्य्या तथैव च । यस्मिन्नेव कुले नित्यं कल्याणं तत्र वै ध्रुवम् । यदि हि स्त्री न रोचेत पुमांसं न प्रमोदयेत् । अप्रमोदात् पुनः पुंसः प्रजनं न प्रवर्त्तते । स्त्रियान्तु रोचमानायां सर्वं तद्रोचते कुलम् । तस्यान्त्वरोचमानायां सर्वमेव न रोचते । कुर्विवाहैः क्रियालोपैर्वेदानध्ययनेन च । कुलान्यकुलतां यान्ति ब्राह्मणातिक्रमेण च । शिल्पेन व्यवहारेण शूद्रापत्यैश्च केवलैः । योसिरश्चैव यानैश्च ह्रस्वा राजोपसेवया । अयाज्ययाजनैश्चैव नास्तिक्येन च कर्मणा । कुलान्याशु विनश्यन्ति यानि हीनानि मन्त्रतः । मन्त्रतस्तु समृद्धानि कुलान्यल्पधनान्यपि । कुलसङ्ख्याञ्च गच्छन्ति कर्षन्ति च महद्यशः । वैवाहिकेऽग्नौ कुर्वीत गृह्यं कर्म यथाविधि । पञ्चयज्ञविधानञ्च पक्तिश्चान्वाहिकी गृहे । यच्च खलु गृहस्थस्य चुल्ली पेषण्युपस्करः । कण्डनी चोदकुम्भश्च बध्यते यास्तु वाहयन् । तासां क्रमेण सर्वासां निष्कृत्यर्थं महर्षिभिः । पञ्च क्लृप्ता महायज्ञाः प्रत्यहं गृहमेधिनाम् । अध्यापनं ब्रह्मयज्ञः पितृयज्ञस्तु तर्पणम् । होमो दैवो बलिर्भौतो नृयज्ञोऽतिथिपूजनम् । पञ्चैतान् यो महायज्ञान् न हापयति शक्तितः । स गृहेऽपि वसन्नित्यं सूनादोषैर्न लिप्यते । देवतातिथिभृत्यानां पितृणामात्मनश्च यः । न निर्वपति पञ्चानामुच्छ्वसन्न स जीवति । अहुतञ्च हुतञ्चैव तथा प्रहुतमेव च । ब्राह्मं प्राहुतं प्राशितञ्च पञ्च यज्ञान् प्रचक्षते । अधोऽहुतो हुतोहोमः प्रहुतो भौतिको बलिः । ब्राह्म्या हुतं द्विजाग्र्याग्नौ प्राशितं पितृतर्पणम् । स्वाध्याये नित्ययुक्तः स्याद्दैवे चैवेह कर्मणि । दैवकर्मणि युक्तो हि बिभर्त्तीदं चराचरम् । अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते । आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः । यथा वायुं समाश्रित्य वर्त्तन्ते सर्वजन्तवः । तथा गृहस्थमाश्रित्य वर्त्तन्ते सर्व आश्रमाः । यस्मात्त्रयोऽप्याश्रमिणो ज्ञानेनान्नेव चान्वहम् । गृहस्थेनैव धार्य्यन्ते तस्माज्ज्येष्ठाश्रमो गृही । स सन्धार्य्यः प्रयत्नेन स्वर्गमक्षयमक्षता । सुखन्वेच्छता नित्यं योऽधार्यो दुर्बलेन्द्रियैः । ऋषयः पितरो देवा भूतान्यतिथयस्तथा । आशासते कुटुम्बिभ्यस्तेभ्यः कार्यं विजानता । स्वाध्यायेनार्चयेत्तर्षीन् होमैर्देवान् यथाविधि । पितॄन् श्राद्धैश्च नृन्नैर्भूतानि बलिकर्मणा । कुर्यादहरहः श्राद्धमन्नाद्येनोदकेन वा । पयोमूलफलैर्वापि पितृभ्यः प्रीतिमावहन् । एकमप्याशयेद्विप्रं पित्र्यर्थे पाञ्चयज्ञिके । न चैव प्राशयेत् कञ्चिदैन्दवे प्रति हिजम् । वैश्वदेवस्य सिद्धस्य गृह्येऽग्नौ विधिपूर्वकम् । आभ्यः कुर्याद्देवताभ्यो ब्राह्मणो होममन्वहम् । अग्नेः सोमस्य चैवादौ तयोश्चैव समस्तयोः । विश्वेभ्यश्चैव देवेभ्यो धन्वन्तरय एव च । कुह्वै चैवानुमत्यै च प्रजापतय एव च । सह द्यावापृथिव्योश्च तथा स्विष्टकृतेऽन्ततः । एवं सम्यक् हविर्हुत्वा सर्वदिक्षु प्रदक्षिणम् । इन्द्रानलार्कसोमेभ्यः साधुभ्यो

बलिं हरेत्। मरुद्भ्य इति तु द्वारि विभेदप्यरुद्भ्य इत्यपि। वनस्पतिभ्य इत्येवं मुषलोलूखले हरेत्। उच्छ्रयणे श्रियै कुर्याद्वृद्धकाम्ये च पादतः। ब्रह्मवास्तोष्पतिभ्यास्तु वास्तुमध्ये बलिं हरेत्। विश्वेभ्यश्चैव देवेभ्यो बलिमाकाश उत्क्षिपेत्। दिवाचरेभ्यो भूतेभ्यो नक्तञ्चारिभ्य एव च। पूर्ववास्तुनि कुर्वीत बलिं सर्वात्मभूतये। पितृभ्यो बलिशेषन्तु सर्वदक्षिणतो हरेत्। शुनाञ्च पतितानाञ्च श्वपचां पापरोगिणाम्। वायसानां कृमीणाञ्च शनकैर्निर्वपेद्भुवि। एवं यः सर्वभूतानि ब्राह्मणो नित्यमर्चति। स गच्छति परं स्थानं तेजोमूर्त्तिः पथर्जुना। कृत्वैतद्बलिकर्मैवमतिथिं पूर्वमाशयेत्। भिक्षाञ्च भिक्षवे दद्याद्विधिवद्ब्रह्मचारिणे। यत् पुण्यफलमाप्नोति गां दत्त्वा विधिदृग्गुरोः। तत् पुण्यफलमाप्नोति भिक्षां दत्त्वा द्विजो गृही। भिक्षामप्युदपात्रं वा सत्कृत्य विधिपूर्वकम्। वेदतत्त्वार्थविदुषे ब्राह्मणायोपपादयेत्। नश्यन्ति हव्यकव्यानि नराणामविजानताम्। भक्षीभूतेषु विप्रेषु मोहाद्दत्तानि दातृभिः। विद्यातपःसमृद्धेषु हुतं विप्रमुखाग्निषु। निस्तारयति दुर्गाच्च महतश्चैव किल्बिषात्। संप्राप्ताय त्वतिथये प्रदद्यादासनोदके। अन्नञ्चैव यथाशक्ति सत्कृत्य विधिपूर्वकम्। शिलानप्युञ्छतो नित्यं पञ्चाग्नीनपि जुह्वतः। सर्वं सुकृतमादत्ते ब्राह्मणोऽनर्चितो वसन्। तृणानि भूमिरुदकं वाक् चतुर्थी च सूनृता। एतान्यपि सतां गेहे नोच्छिद्यन्ते कदाचन। एकरात्रन्तु निवसन्नतिथिर्ब्राह्मण स्मृतः। अनित्यं हि स्थितो यस्मात्तस्मादतिथिरुच्यते। नैकग्रामीणमतिथिं विप्रं साङ्गतिकं तथा। उपस्थितं गृहे विद्याद्भार्यां यत्राग्नयोऽपि वा। उपासते ये गृहस्थाः परपाकमबुद्धयः। तेन ते प्रेत्य पशुतां व्रजन्त्यन्नादिदायिनाम्। अप्रणोद्योऽतिथिः सायं सूर्योढो गृहमेधिना। काले प्राप्तस्त्वकाले वा नास्यानश्नन् गृहे वसेत्। न वै स्वयं तदश्नीयादतिथिं यन्न भोजयेत्। धन्यं यशस्यमायुष्यं स्वर्ग्यञ्चातिथिपूजनम्। आसनावसथौ शय्यामनुव्रज्यामुपासनम्। उत्तमेषूत्तमं कुर्याद्धीने हीनं समे समम्। वैश्वदेवे तु निर्वृत्ते यद्यन्योऽतिथिराव्रजेत्। तस्यान्नं यथाशक्ति प्रदद्याद्च बलिं हरेत्। न भोजनार्थं स्वे विप्रः कुलगोत्रे निवेदयेत्। भोजनार्थं हि ते शंसन् वान्ताशीत्युच्यते बुधैः। न ब्राह्मणस्य त्वतिथिर्गृहे राजन्य उच्यते। वैश्यशूद्रौ सखा चैव ज्ञातयो गुरुरेव च। यदि त्वतिथिधर्मेण क्षत्रियो गृहमाव्रजेत्। भुक्तवत्सु कृतविश्रामं कामन्तमपि भोजयेत्। वैश्यशूद्रावपि प्राप्तौ कुटुम्बेऽतिथिधर्मिणौ। भोजयेत् सह भृत्यैस्तावानृशंस्यं प्रयोजयन्। इतरानपि सख्यादीन् सम्प्राप्ता गृहमागतान्। सत्कृत्यान्नं यथाशक्ति भोजयेत् सह भार्यया। सुवासिनीः कुमारांश्च रोगिणो गर्भिणीस्तथा। अतिथिभ्योऽग्र एवैतान् भोजयेदविचारयन्। अदत्त्वा तु य एतेभ्यः पूर्वं भुङ्क्तेऽविचक्षणः। स भुञ्जानो न जानाति श्वगृध्रैर्जग्धिमात्मनः। भुक्तवत्सु च विप्रेषु स्वेषु भृत्येषु चैव हि। भुञ्जीयातां ततः पश्चादवशिष्टन्तु दम्पती। देवान्मनुष्यान्पितॄंश्च गृह्याश्च देवताः। पूजयित्वा ततः पश्चाद्गृहस्थः शेषभुग् भवेत्। अयं स केवलं भुङ्क्ते यः पचत्यात्मकारणात्। यज्ञशिष्टाशनं ह्येतत् सतामन्नं विधीयते। राजत्विक्स्नातकगुरून् प्रियश्वशुरमातुलान्। अर्हयेन्मधुपर्केण परिसंवत्सरात् पुनः। राजा च श्रोत्रियश्चैव यज्ञकर्मण्युपस्थितौ। मधुपर्केण संपूज्यौ न त्वयज्ञइति स्थितिः। सायन्तनस्य सिद्धस्य पक्वमन्नं बलिं हरेत्। वैश्वदेवं हि नामैतत् सायं प्रातर्विधीयते। पितृयज्ञन्तु निर्वर्त्य विप्रबन्धूञ्जयेऽग्निमान्। पिण्डान्वाहार्यकं श्राद्धं कुर्यान्मासानुमासिकम्। पित्र्यं मासिकं श्राद्धमन्वाहार्यं विदुर्बुधाः। तस्मिन्निमेण कर्त्तव्यं प्रयत्नेन प्रयत्नतः। तत्र ये भोजनीयाः स्युर्यै च वर्ज्या द्विजोत्तमाः। यावन्तश्चैव वैश्यास्तान् प्रवक्ष्याम्यशेषतः। द्वौ दैवे पितृकार्ये त्रीनेकैकमुभयत्र वा। भोजयेत् सुसमृद्धोऽपि न प्रसज्जेत विस्तरे। सत्क्रिया देशकालौ च शौचं ब्राह्मणसम्पदः। पञ्चैतान् विस्तरो हन्ति तस्मात्तं हेत विस्तरम्। प्रथिता प्रेतकल्पैषा पितॄंश्च नाम विभुवये। तस्मिन् युक्तश्चरेत्नित्यं प्रेतकल्पैव लौकिकी। श्रोत्रियायैव देयानि हव्यकव्यानि दातृभिः। अर्हत्तमाय विप्राय तच्चै दत्तं महाफलम्। एकैकमपि विद्वांसं दैवे पित्र्ये च भोजयेत्। पुष्कलं फलमाप्नोति नामन्त्रज्ञान् बह्वृनपि। दूरादेव परीक्षेत ब्राह्मणं वेदपारगम्। तीर्थं तद्धव्यकव्यानां प्रदाने सोऽतिथिः स्मृतः। सहस्रं हि सहस्राणामनृचां यत्र भुञ्जते। एकस्मान् मन्त्रवित् प्रीतः सर्वानर्हति धर्मतः। ज्ञानोत्कृष्टाय देयानि कव्यानि च हवींषि च। न हि हस्ता-

वस्त्रगन्धिनौ रुधिरेणैव शुद्धयतः । यावतो ग्रसते ग्रासान् हव्यकव्येष्वमन्त्रवित् । तावतो ग्रसते प्रेत्य दीप्तशूलर्ष्टि-योगुडान् । ज्ञाननिष्ठा द्विजाः केचित् तपोनिष्ठास्तथा-परे । ज्ञानानिष्ठासु कव्यानि प्रतिष्ठापानि यत्नतः । हव्यानि तु यथान्यायं सर्वत्रैव चतुर्ष्वपि । अश्रोत्रियः पिता यस्य पुत्रः स्याद्वेदपारगः । अश्रोत्रियो वा पुत्रः स्यात् पिता स्याद्वेदपारगः । ज्यायांसमनयोर्विद्यात् यस्य स्याच्छ्रोत्रियः पिता । मन्त्रसम्भूजनार्थन्तु सत्कार-मितरोऽर्हति । न श्राद्धे भोजयेन्मित्रं धनैः कार्योऽस्य संग्रहः । नारिं न मित्रं यं विद्यात् तं श्राद्धे भोज-येद्द्विजम् । यस्य मित्रप्रधानानि श्राद्धानि च हवींषि च । तस्य प्रेत्य फलं नास्ति श्राद्धेषु च हविःषु च । यः सङ्गतानि कुरुते मोहाच्छ्राद्धेन मानवः । स खगां-स्तृप्यते लोकाच्छ्राद्धमित्रो द्विजाधमः । सम्भोजनी साऽभि-हिता पैशाची दक्षिणा द्विजैः । इहैवास्तं तु सा लोके गौरन्धेवैकवेश्मनि । यद्गेरिणे बीजमुप्तं न वप्ता लभते फलम् । तथाऽन्धे हविर्हुत्वा न दाता लभते फलम् । दातृन् प्रतिग्रहीतृंश्च कुरुते फलभागिनः । विदुषे दक्षिणा दत्ता विधिवत् प्रेत्य चेह च । कामं श्राद्धेऽ-र्थयेन्मित्रं नामिरूपमपि त्वरिम् । द्विषता हि हविर्भुक्तं भवति प्रेत्य निष्फलम् । यत्नेन भोजयेच्छ्राद्धे वह्वृचं वेदपारगम् । शाखान्तगमथाध्वर्युं छन्दोगन्तु समाग्नि-कम् । एषामन्यतमो यस्य भुञ्जीत श्राद्धमर्चितः । पितॄणां तस्य तृप्तिः स्याच्छाश्वती साप्तपौरुषी । एव वै प्रथमः कल्पः प्रदाने हव्यकव्ययोः । अनुकल्पस्त्वयं ज्ञेयः सदा सद्भिरनुष्ठितः । मातामहं मातुलञ्च स्वकीयं श्वशुरं गुरुम् । दौहित्रं विट्पतिं बन्धुमृत्विग्याज्यौ च भोज-येत् । न ब्राह्मणं परीक्षेत दैवे कर्मणि धर्मवित् । पित्र्ये कर्मणि तु प्राप्ते परीक्षेत प्रयत्नतः । ये स्तेनपतितक्लीबा ये च नास्तिकवृत्तयः । तान् हव्यकव्ययोर्विद्याननर्हान्मनु-रब्रवीत् । अटिलज्ञानधीयानं दुर्बलं कितवन्तथा । याज-यन्ति च ये पूगांस्तांच श्राद्धे न भोजयेत् । चिकित्सकान् देवलकान् मांसविक्रयिणस्तथा । विपणेन च जीवन्तो वर्ज्याः सूर्यव्रतव्ययोः । प्रेष्यो ग्रामस्य राज्ञश्च कुनखी श्यावदन्तकः । प्रतिरोद्धा गुरोश्चैव त्यक्ताग्निर्वार्द्धुषि-स्तथा । वल्ली च पशुपालश्च परिवेत्ता निराकृतिः । ब्रह्मद्विट् परिवित्तिश्च गणाभ्यन्तर एव च । कुशीलवो-ऽवकीर्णी च वृषलीपतिरेव च । पौनर्भवश्च काणश्च यस्य चोपपतिर्गृहे । भृतकाध्यापको यश्च भृतकाध्यापित-स्तथा । गूढशिष्यो गुरुश्चैव वागुदृष्टः कुण्डगोलकौ । अकारणपरित्यक्ता मातापित्रोर्गुरोस्तथा । ब्राह्मैर्यौनैश्च सम्बन्धैः संयोगं पतितैर्गतः । अगारदाही गरदः कुण्डाशी सोमविक्रयी । समुद्रयायी वन्दी च तैलिकः कूटकारकः । पिता विवदमानश्च कितवो मद्य-पस्तथा । पापरोग्यभिशस्तश्च दाम्भिको रसविक्रयी । धनुःशराणां कर्त्ता च यश्चाग्रेदिधिषूपतिः । मित्रध्रुक् दूतवृत्तिश्च पुत्राचार्य्यस्तथैव च । श्यामरी गण्डमाली च मित्रघ्नो पिशुनस्तथा । उन्मत्तोऽन्धश्च वर्ज्याः स्युर्वेद-निन्दक एव च । हस्तिगोऽश्वोष्ट्रदमको नक्षत्रैर्यश्च जीवति । पक्षिणां पोषको यश्च युद्धाचार्य्यस्तथैव च । स्रोतसां भेदको यश्च तेषाञ्चावरणे रतः । गूढसंवेशको दूतो दुश्चारोपक एव च । शुकीड़ी श्येनजीवी च कन्यादूषक एव च । क्लिंशो दशसूनश्च गणानाञ्चैव याजकः । आचारहीनः क्लीबश्च नित्यं याचनकस्तथा । क्षयिजीवी श्वीपदी च सर्व्वनिन्दित एव च । चौर-श्चिकः सार्व्विकः परपूर्वापतिस्तथा । प्रेतनिर्हारक-श्चैव वर्जनीयाः प्रयत्नतः । एतान् विगर्हिताचारा नपाङ्क्तेयान् द्विजाधमान् । द्विजातिप्रवरो विद्वानुभयत्र विवर्जयेत् । ब्राह्मणस्त्वनधीयानस्तृणाग्निरिव शाम्यति । तस्मै हव्यं न दातव्यं न हि भस्मनि हूयते । अपा-ङ्क्तप्रदाने यो दातुर्भवत्यूर्द्धं फलोदयः । दैवे हविषि पित्र्ये वा तं प्रवक्ष्याम्यशेषतः । अव्रतैर्यद्द्विजैर्भुक्तं परि-वेत्तादिभिस्तथा । अपाङ्क्तेयैर्यदन्यैश्च तद्वै रक्षांसि भुञ्जते । दारात्निहोत्रसंयोगं कुरुते योऽग्रजे स्थिते । परिवेत्ता स विज्ञेयः परिवित्तिस्तु पूर्वजः । परिवित्तिः परीवेत्ता यया च परिविद्यते । सर्वे ते नरकं यान्ति दातृयाजकपञ्चमाः । भ्रातुर्मृतस्य भार्यायां योऽनुर-ज्यते कामतः । धर्मेणापि नियुक्तायां स ज्ञेयो दिधि-षूपतिः । परदारेषु जायेते द्वौ सुतौ कुण्डगोलकौ । पत्यौ जीवति कुण्डः स्यान्मृते भर्त्तरि गोलकः । नो तु जातौ परक्षेत्रे प्राणिनौ प्रेत्य चेह च । दत्तानि हव्यकव्यानि नाशयेते प्रदायिनाम् । अपाङ्क्तान् यावतः पाङ्क्तान् भुञ्जानाननुपश्यति । तावतां न फलं तत्र दाता प्राप्नोति वालिशः । द्वौ श्राद्धौ नवतेः, काणः शतेः, श्वित्री शतस्य तु । पापरोगी सहस्रस्य दातुर्नाशयते फलम् । यावतः संस्पृशेदङ्गैर्ब्राह्मणान्

शूद्रयाजकः। तावतां न भवेद्दातुः फलं दत्तस्य पौर्त्तिकम्। वेदविच्चापि विप्रोऽस्य लोभात् कृत्वा प्रतिग्रहम्। विनाशं व्रजति क्षिप्रमामपात्रमिवाम्भसि। सोमविक्रयिणे विप्रा भिषजे पूयशोणितम्। नष्टं देवलके दत्तम् अप्रतिष्ठन्तु वाट्कुणौ। यत्तु वाणिजके दत्तं नेह नामुत्र तद्भवेत्। भक्षनीव हुतं हव्यं तथा पौनर्भवे द्विजे। इतरेषु त्वपाङ्क्तेषु यथोद्दिष्टेष्वसाधुषु। मेदोऽसृङ्मांसमज्जास्थि यदन्यद्भक्ष्यं मनीषिणः। अपाङ्क्तोपहता पङ्क्तिः पाप्यते यैर्द्विजोत्तमैः। तान्निबोधत कार्त्स्न्येन द्विजापध्वान् षडङ्गिपावनान्। अपध्वाः सर्वेषु वेदेषु सर्वप्रवचनेषु च। श्रोत्रियान्वयजाश्चैव विज्ञेयाः षडङ्गिपावनाः। त्रिणाचिकेतः पञ्चाग्निस्त्रिसुपर्णः षडङ्गवित्। ब्राह्मदेवात्रसन्नानो ज्येष्ठसामग एव च। वेदार्थवित् प्रवक्ता च ब्रह्मचारी सहस्रदः। शतायुश्चैव विज्ञेया ब्राह्मणाः षडङ्गिपावनाः। पूर्वेद्युरपरेद्युर्वा श्राद्धकर्मण्युपस्थिते। निमन्त्रयेत तत्प्रवरान् सम्यग्विप्रान् यथोदितान्। निमन्त्रितो द्विजः पित्र्ये नियतात्मा भवेत् सदा। न च छन्दांस्यधीयीत यस्य श्राद्धं तद्भवेत्। निमन्त्रितान् हि पितर उपतिष्ठन्ति तान् द्विजान्। वायुवच्चानुगच्छन्ति तथासीनानुपासते। क्रोधितस्तु यथान्यायं हव्यकव्ये द्विजोत्तमः। कथञ्चिदत्यतिक्रामन् पापः शूकरतां व्रजेत्। आमन्त्रितस्तु यः श्राद्धे हव्यकव्ये सहोदते। दातुर्यत् दुष्कृतं किञ्चित्तत् सर्वं प्रतिपद्यते। अक्रोधनाः शौचपराः सततं ब्रह्मचारिणः। न्यस्तशस्त्रा महाभागाः पितरः पूर्वदेवताः। यत्काद्दत्पत्तिरेतेषां सर्वेषामग्रजन्मनः। ये च तैरुपचर्याः स्युर्नियमैस्तान्निबोधत। मनोर्हिरण्यगर्भस्य ये मरीच्यादयः सुताः। तेषामृषीणां सर्वेषां पुत्राः पितृगणाः स्मृताः। विराट्सुताः सोमसदः साध्यानां पितरः स्मृताः। अग्निष्वात्ताश्च देवानां मारीच्या लोकविश्रुताः। दैत्यदानवयक्षाणां गन्धर्वोरगरक्षसाम्। सुपर्णकिन्नराणाञ्च स्मृता बर्हिषदोऽत्रिजाः। सोमपा नाम विप्राणां क्षत्रियाणां हविर्भुजः। वैश्यानामाज्यपा नाम शूद्राणान्तु सुकालिनः। सोमपास्तु कवेः पुत्रा हविष्मन्तोऽङ्गिरःसुताः। पुलस्त्यस्याज्यपाः पुत्रा वशिष्ठस्य सुकालिनः। अग्निदग्धानग्निदग्धान् काव्यान् बर्हिषदस्तथा। अग्निष्वात्तांश्च सौम्यांश्च विप्राणामेव निर्दिशेत्। यएते तु गणा सप्त पितृणां परिकीर्त्तिताः। तेषामपीह विज्ञेयं पुत्रपौत्रमनन्तकम्। ऋषिभ्यः पितरो जाताः पितृभ्यो देवदानवाः। देवेभ्यस्तु जगत् सर्वं चरं स्थास्नुपूर्वशः। राजतैर्भाजनैरेषामथ वा राजतान्वितैः। दार्व्यपि श्रद्धया दत्तमक्षयायोपकल्पते। देवकार्य्यादृद्विजातीनां पितृकार्य्यं विशिष्यते। दैवं हि पितृकार्य्यस्य पूर्वमाप्यायनं स्मृतम्। तेषामारक्षभूतन्तु पूर्वं दैवं नियोजयेत्। रक्षांसि हि विलुम्पन्ति श्राद्धमारक्षवर्जितम्। दैवाद्यन्तं तदीहेत पित्राद्यन्तं न तद्भवेत्। पित्राद्यन्तं क्षीयमाणं क्षिप्रं नश्यति सान्वयम्। शुचिं देशं विविक्तञ्च गोमयेनोपलेपयेत्। दक्षिणाप्रवणञ्चैव प्रयत्नेनोपपादयेत्। अवकाशेषु चोच्छेषु नदीतीरेषु चैव हि। विविक्तेषु च तृप्यन्ति दत्तेन पितरः सदा। आसनेषूपकॢप्तेषु बर्हिष्मत्सु पृथक् पृथक्। उपस्पृष्टोदकान् सम्यग्विप्रांस्तानुपवेशयेत्। उपवेश्य तु तान् विप्रानासनेष्वजुगुप्सितान्। गन्धमाल्यैः सुरभिभिरर्च्चयेद्देवपूर्वकम्। तेषामुदकमानीय सपवित्रांस्तिलानपि। अग्नौ कुर्य्यादनुज्ञातो ब्राह्मणो ब्राह्मणैः सह। अग्नेः सोमयमाभ्याञ्च कृत्वाप्यायनमादितः। कविदानेन विधिवत् पश्चात् सन्तर्पयेत् पितॄन्। अन्यभावे तु विप्रस्य पाणावेवोपपादयेत्। यो ह्यग्निः स द्विजो विप्रैर्मन्त्रदर्शिभिरुच्यते। अक्रोधनान् सुप्रसादान् वदन्त्येतान् पुरातनान्। लोकख्याप्यायने युक्तान् श्राद्धदेवान् द्विजोत्तमान्। अपसव्यमग्नौ कृत्वा सर्वमाहृत्य परिक्रमम्। अपसव्येन हस्तेन निर्वपेदुदकं भुवि। स्त्रीस्तु तत्राद्विःशेषात् पिण्डान् कृत्वा समाहितः। औदकेनैव विधिना निर्वपेद्विधिवत्सुधः। न्युप्य पिण्डांस्ततस्तांस्तु प्रयतो विधिपूर्वकम्। तेषु दर्भेषु तं हस्तं निमृज्याद्भेषभागिनाम्। आचम्योदक् पराहृत्य विरायस्य शनैरसून्। षड् ऋतूंश्च नमस्कुर्यात् पितृनेव च मन्त्रवित्। उदकं निनयेच्छेषं शनैः पिण्डान्तिके पुनः। अवजिघ्रेच्च तान् पिण्डान् यथा न्युप्तान् समाहितः। पिण्डेभ्यस्त्वल्पिकां मात्रां समादायानुपूर्वशः। तानेव विप्रानासीनान् विधिवत् पूर्वमाशयेत्। म्रियमाणे तु पितरि पूर्वेषामेव निर्वपेत्। विप्रवद्वापि तं श्राद्धे स्वकं पितरमाशयेत्। पिता यस्य तु दत्तः स्याज्जीवेद्वापि पितामहः। पितुः स नाम संकीर्त्त्य कीर्त्तयेत् प्रपितामहम्। पितामहो वा तच्छ्राद्धं भुङ्क्ते तेजस्वितां व्रजेत्। कामं वा समनुज्ञातः स्वयमेव समा-

चरेत् । तेषां दत्त्वा तु हस्तेषु सपवित्रं तिलोदकम् । तत्पिण्डाग्रं प्रयच्छेत स्वधैषामस्त्विति ब्रुवन् । पात्रिभ्यान्नमुपसंगृह्य स्वयमन्नस्य बर्हिषम् । विप्राग्निके पितॄन् ध्यायन् शनकैरुपनिक्षिपेत् । उभयोर्हस्तयोर्युक्तं यदन्नमुपनीयते । तद्विप्रलुप्तमन्यत्तु राक्षसा दुष्टचेतसः । गुणांश्च सूपशाकाद्यान् पयो दधि हृतं मधु । विन्यसेत् प्रयतः सम्यक् भूमावेव समाहितः । भक्ष्यं भोज्यञ्च विविधं मूलानि च फलानि च । हृद्यानि चैव मांसानि पानानि सुरभीणि च । उपनीय तु तत् सर्वं शनकैः सुसमाहितः । परिवेषयेत प्रयतो गुणान् सर्वान् प्रचोदयन् । नाक्षमापातवेलायात् न कुर्यान्नान्नतं वदेत् । न पादेन स्पृशेदन्नं नचैतदवधूनयेत् । अक्षुद्भमवति प्रेतान् कोपोऽरीनन्नतं गुनः । पादस्पर्शस्तु रक्षांसि दुष्कृतीनवधूननम् । वदृयद्रोचेत विप्रेभ्यस्तत्तद्दद्यादमत्सरः । ब्रह्मोद्याश्च कथाः कुर्यात् पितृणामेतदीप्सितम् । स्वाध्यायं श्रावयेत् पित्र्ये धर्मशास्त्राणि चैव हि । आख्यानानीतिहासांश्च पुराणानि खिलानि च । हर्षयेद्ब्राह्मणांस्तुष्टो भोजयेच्च शनैः शनैः । अन्नादोनासक्तश्चैतान् गुणैश्च परिचोदयेत् । व्रतस्थमपि दौहित्रं श्राद्धे यत्नेन भोजयेत् । कुतपञ्चासने दद्यात् तिलैश्च विकिरेन्महीम् । त्रीणि श्राद्धे पवित्राणि दौहित्र कुतपस्तिलाः । त्रीणि चात्र प्रशंसन्ति शौचमक्रोधमत्वराम् । अस्तुण्डं सर्वमन्नं स्याद्भुञ्जीरंस्ते च वाग्यताः । न च द्विजातयो ब्रूयुर्दात्रा पृष्टाश्चविशेषान् । यावदन्नं भवत्यन्नं यावदश्नन्ति वाग्यताः । पितरस्तावदश्नन्ति यावन्नोक्ता हविर्गुणाः । यद्देशतिगिरा भुङ्क्ते यद्भुङ्क्ते दक्षिणाशुखः । सोपानत्कश्च यद्भुङ्क्ते तद्वै रक्षांसि भुञ्जते । चाण्डालश्च वराहश्च कुक्कुटः श्वा तथैव च । रजस्वला च षण्ढश्च नेक्षेरन्नतो द्विजान् । होमे प्रदाने भोज्ये च यदेभिरभिवीक्षिते । दैवे कर्मणि पित्र्ये वा तद्गच्छत्यथातथम् । घ्राणेन शूकरो हन्ति पक्षवातेन कुक्कुटः । श्वा तु दृष्टिनिपातेन स्पर्शनेनावरवर्णजः । खञ्जो वा यदि वा काणो दातुः प्रेष्योऽपि वा भवेत् । हीनातिरिक्तगात्रो वा तमप्यपनयेत्ततः । ब्राह्मणं भिक्षुकं वापि भोजनार्थमुपस्थितम् । ब्राह्मणैरभ्यनुज्ञातः शक्तितः प्रतिपूजयेत् । सार्वर्षिकमन्नाद्यं सन्नीयाज्याय वारिणा । समुत्सृजेद्भुक्तवतामग्रतो विकिरन् भुवि । असंस्कृतप्रमीतानां त्यागिनां कुलयोषिताम् । उच्छिष्टं भागधेयं स्याद्भेषु विकिरश्च यः । उच्छेषणं भूमिगतमविक्षुस्थाशठस्य च । दासवर्गस्य तत् पित्र्ये भागधेयं प्रचक्षते । आमपिण्डक्रियाकर्म द्विजातेः संस्थितस्य तु । अदैवं भोजयेच्छ्राद्धं पिण्डमेकन्तु निर्वपेत् । सकृत्पिण्डक्रियायान्तु कृतायामस्य धर्मतः । अनयैवाहुता कार्या पिण्डनिर्वपणं कृतैः । श्राद्धं भुक्त्वा य उच्छिष्टं हृपनाय प्रयच्छति । स कूडो नरकं याति कालसूत्रमवाक्शिराः । श्राद्धभुग्गृहमेधीतत्तं तदहर्योऽधिगच्छति । तस्याः पुरीषे तन्मासं पितरस्तस्य शेरते । पृष्ट्वा खदितमित्येवं तृप्तानाचामयेत्ततः । आचान्तांश्चानुजानीयादभि भो ! रम्यतामिति । स्वधास्त्वित्येव तं ब्रूयुर्ब्राह्मणास्तदनन्तरम् । स्वधाकारः परा हृाशीः सर्वेषु पितृकर्मसु । ततो भुक्तवतां तेषामन्नशेषं निवेदयेत् । यथा ब्रूयुस्तथा कुर्यादनुज्ञातस्ततो द्विजैः । पित्र्ये खदितमित्येव ब्रूयाद्गोष्ठे तु सुस्थितम् । सम्पन्नमित्यभ्युदये दैवे रुचितमित्यपि । अपराह्णस्तथा दर्भा वास्तुसम्पादनं तिलाः । तृप्तिर्हृष्टिर्द्विजाशास्याः श्राद्धकर्मसु सम्पदः । दर्भाः पवित्रं पूर्वाह्णो हविष्यादि च सर्वशः । पवित्रं यच्च पूर्वोक्तं पित्र्ये हव्यसम्पदः । सम्पन्नानि पयः सोमो मांसं यच्चानुपस्कृतम् । अचारलवणञ्चैव प्रकृत्या हविरुच्यते । विसृज्य ब्राह्मणांस्तांस्तु नियतो वाग्यतः शुचिः । दक्षिणां दिशमाकाङ्क्षन् याचेतेमान् वरान् पितॄन् । दातारो नोऽभिवर्द्धन्तां वेदाः सन्ततिरेव च । श्रद्धा च नो मा व्यगमद्बहु देयञ्च नोऽस्त्विति । एवं निर्वपणं कृत्वा पिण्डांस्तांस्तदनन्तरम् । गां विप्रमजमग्निं वा प्राशयेदप्सु वा क्षिपेत् । पिण्डनिर्वपणं केचित् पुरस्तादेव कुर्वते । वयोभिः खादयन्त्यन्ये प्रक्षिपन्त्यनलेऽप्सु वा । पतिव्रता धर्मपत्नी पितृपूजनतत्परा । मध्यमन्तु ततः पिण्डमद्यात् सम्यक् सुतार्थिनी । आयुष्मन्तं सुतं सूते यशोमेधासमन्वितम् । धनवन्तं प्रजावन्तं सात्विकं धार्मिकं तथा । प्रक्षाल्य हस्तावाचम्य ज्ञातिभ्यः सतृणं दत्त्वा बान्धवानपि भोजयेत् । उच्छेषणन्तु तत्तिलैर्दुयावद्दुविप्रा विसर्जिताः । ततो वलिं कुर्यादिति धर्मो व्यवस्थितः । हविर्वैश्वदेवाय यज्ञानन्याय कल्पते । पितृभ्यो विधिवद्दत्तं तत् प्रवक्ष्याम्यशेषतः । तिलैर्व्रीहियवैर्माषैरद्भिर्मूलफलेन वा । दत्तेन मासं

प्रीयन्ते विधिवत् पितरो नृणाम् । द्वौ मासौ मत्स्य-मांसेन त्रीन्मासान् हारिणेन तु । औरभ्रेणाथ चतुरः शाकुनेनाथ पञ्च वै । षण्मासान् छागमांसेन पार्षतेन च सप्त वै । अष्टावेणस्य मांसेन रौरवेण नवैव तु । दश मासांस्तु तृप्यन्ति वराहमहिषामिषैः । शशकूर्म-योस्तु मांसेन मासानेकादशैव तु । संवत्सरन्तु गव्येन पयसा पायसे न च । वार्धीणसस्य मांसेन तृप्तिर्द्वा-दशवार्षिकी । कालशाकं महाशल्काः खड्गलोहा-मिषं मधु । आनन्त्यायैव कल्पन्ते सत्यव्याहि च सर्वशः । यत्किञ्चिन्मधुना मिश्रं प्रदद्यात्तु त्रयोदशीम् । तदप्य-क्षयमेव स्याद्धर्मतु च मघासु च । अपि नः स कुले जायाद्यो नो दद्यात्त्रयोदशीम् । पायसं मधुसर्पिर्भ्यां प्राक्छाये कुञ्जरस्य च । यद्यद्ददाति विधिवत् सम्यक् श्रद्धासमन्वितः । तत्तत् पितृणां भवति परत्रानन्त-मक्षयम् । कृष्णपक्षे दशम्यादौ वर्ज्यं वित्वा चतुर्दशीम् । श्राद्धे प्रशस्तास्तिथयो यथैता न तथेतराः । युक्तु कुर्वन् दिनर्क्षेषु सर्वान् कामान् समश्नुते । अयुक्तु तु पितॄन् सर्वान् प्रजां प्राप्नोति पुष्कलाम् । यथा चैवापरः पक्षः पूर्वपक्षाद्विशिष्यते । तथा श्राद्धस्य पूर्वाह्णादपराह्णो विशिष्यते । प्राचीनावीतिना सम्यगपसव्यमतन्द्रिणा । पितृमा निधनात् कार्यं विधिवद्भूमपाणिना । रात्रौ श्राद्धं न कुर्वीत राक्षसी कीर्त्तिता हि सा । सन्ध्ययो-रुभयोश्चैव सूर्य्ये चैवाचिरोदिते । अनेन विधिना श्राद्धं त्रिरब्दस्येह निर्वपेत् । हेमन्तयोर्ग्रीष्मवर्षासु पाङ्क्त-यन्निरूपमन्वहम् । न पैतृयज्ञियो होमो लौकिकेऽग्नौ विधीयते । न दर्शेन विना श्राद्धमाहिताग्नेर्द्वि-जन्मनः । यदेव तर्पयत्यद्भिः पितॄन् स्नात्वा द्विजोत्तमः । तेनैव कल्पमाप्नोति पितृयज्ञक्रियाफलम् । वक्तृन् वदन्ति वै पितॄन् रक्षांस्येव पितामहान् । प्रपितामहांस्त्वादित्यान् श्रुतिरेषा सनातनी । विघसाशी भवेन्नित्यं नित्यं वामृतभोजनः । विघसो भुक्तशेषन्तु यज्ञशेषं तथामृतम् । एतद्धोऽभिहितं सर्वं विधानं पाङ्क्तयज्ञि-कम् । द्विजातिमुख्यवृत्तीनां विधानं श्रूयतामिति" श्रु० । "चतुर्थमायुषो भागमुषित्वाद्यं गुरौ द्विजः । द्वितीयमायुषो भागं कृतदारो गृहे वसेत् । अहोहेष्वेव भूतानामलसो हेष वा पुनः । या वृत्तिस्तां समास्थाय विप्रो जीवेदनापदि । यात्रामात्रप्रसिद्ध्यर्थं स्वैः कर्म्म-भिरगर्हितैः । अक्लेशेन शरीरस्य कुर्वीत धनसञ्चयम् । ऋताऽमृताभ्यामाजीवेत्तु मृतेन प्रमृतेन वा । सत्यानृता-भ्यामपि न श्ववृत्त्या कदाचन । ऋतमुञ्छशिलं ज्ञेयममृतं स्यादयाचितम् । मृतन्तु याचितं भैक्षं प्रमृतं कर्षणं स्मृतम् । सत्यानृतन्तु वाणिज्यं तेन चैवापि जीव्यते । सेवा श्ववृत्तिराख्याता तस्मात्तां परिवर्जयेत् । कुसूलधान्यको वा स्यात् कुम्भीधान्यक एव वा । त्र्यहै-हिको वापि भवेदश्वस्तनिक एव वा । चतुर्णामपि चैतेषां द्विजानां गृहमेधिनाम् । ज्यायान् परः परो ज्ञेयो धर्मतो लोकजित्तमः । षट्कर्म्मको भवत्येषां त्रिभि-रन्यः प्रवर्त्तते । द्वाभ्यामेकश्चतुर्थस्तु ब्रह्मसत्रेण जीवति । वर्त्तयंश्च शिलोञ्छाभ्यामग्निहोत्रपरायणः । दृष्टीः पार्वायणान्तीयाः केवला निर्वपेत् सदा । न लोकवृत्तं वर्त्तेत वृत्तिहेतोः कथञ्चन । अजिह्मामशठां शुद्धां जीवेद्ब्राह्मणजीविकाम् । सन्तोषं परमास्थाय सुखार्थी संयतो भवेत् । सन्तोषमूलं हि सुखं दुःखमूलं विप-र्य्ययः । अतोऽन्यतमया वृत्त्या जीवंस्तु स्नातको द्विजः । स्वर्ग्यायुष्ययशस्यानि व्रतानीमानि धारयेत् । वेदोदितं स्वकं कर्म नित्यं कुर्यादतन्द्रितः । तद्धि कुर्वन् यथाशक्ति प्राप्नोति परमां गतिम् । नेहेतार्थान् प्रस-ङ्गेन न विरुद्धेन कर्मणा । न विद्यमानेष्वर्थेषु नार्त्ता-मपि यतस्ततः । इन्द्रियार्थेषु सर्वेषु न प्रसज्जेत का-मतः । अतिप्रसक्तिञ्चैतेषां मनसा सन्निवर्त्तयेत् । सर्वान् परित्यजेदर्थान् स्वाध्यायस्य विरोधिनः । यथा-तथाध्यापयंस्तु सा ह्यस्य कृतकृत्यता । वयसः कर्मणोऽर्थस्य श्रुतस्याभिजनस्य च । वेषवाग्बुद्धिसारूप्यमाच-रन् विचरेदिह । बुद्धिडम्बकरागाशु धन्यानि च हि-तानि च । नित्यं शास्त्राण्यवेक्षेत निगमांश्चैव वैदि-कान् । यथा यथा हि पुरुषः शास्त्रं समधिगच्छति । तथातथा विजानाति विज्ञानञ्चास्य रोचते । ऋषियज्ञं देवयज्ञं भूतयज्ञञ्च सर्वदा । नृयज्ञं पितृयज्ञञ्च यथा-शक्ति न हापयेत् । एतानेके महायज्ञान् यज्ञशास्त्र-विदो जनाः । अनीहमानाः सततमिन्द्रियेष्वेव जुह्वति । वाच्येके जुह्वति प्राणं प्राणे वाचञ्च सर्वदा । वाचि प्राणे च पश्यन्तो यज्ञनिर्वृत्तिमक्षयाम् । ज्ञानेनैवापरे विप्रा यजन्त्येतैर्मखैः सदा । ज्ञानमूलां क्रियामेषां पश्यन्तो ज्ञानचक्षुषा । अग्निहोत्रञ्च जुह्वयादाद्ये वयुनिशोः सदा । दर्शेन चार्द्धमासान्ते पौर्णमासेन चैव हि । यज्ञान्ते नवशस्येष्ट्या तदन्ते द्विजोऽध्वरैः ।

पशुना स्वयनस्यादौ समाने सौमिकैर्मखैः। नानिष्ट्वा नवशस्येष्ट्या पशुना चाग्निमान् द्विजः। नवान्नमद्यात्मांसं वा दीर्घमायुर्जिजीविषुः। नवेनानर्चिता ह्यस्य पशुहव्येन चाग्नयः। प्राणानेवात्तुमिच्छन्ति नवान्नामिषगर्द्धिनः। स्वासनाशनशय्याभिरद्भिर्मूलफलेन वा। नास्य कश्चिद्वसेद्गेहे शक्तितोऽनर्चितोऽतिथिः। पाषण्डिनो विकर्मस्थान् वैडालव्रतिकान् शठान्। हैतुकान् बकवृत्तींश्च वाङ्मात्रेणापि नार्चयेत्। वेदविद्याव्रतस्नातान् श्रोत्रियान् गृहमेधिनः। पूजयेद्धव्यकव्येन विपरीतांश्च वर्जयेत्। शक्तितोऽपचमानेभ्यो दातव्यं गृहमेधिना। संविभागश्च भूतेभ्यः कर्त्तव्योऽनुपरोधतः।" इत्येवं स्नातकगृहस्थधर्माः उक्ताः शेषं स्नातकशब्दे वक्ष्यते। काशी०ख० ३६ अ० गृहस्थधर्मा उक्ता यथा

"न क्लेशेन विना द्रव्यमर्जनीये कुतः क्रिया। क्रियाहीने कुतो धर्मो धर्महीने कुतः सुखम्। सुखं हि सर्वदा काङ्क्ष्यं तच्च धर्मसमुद्भवम्। तस्माद्धर्मोऽत्र कर्त्तव्यश्चातुर्वर्ण्येन यत्नतः। न्यायागतेन द्रव्येण कर्त्तव्यं पारलौकिकम्। दानञ्च विधिना देयं काले पात्रे च भावतः। विधिहीनमपात्रे यो ददाति प्रतिपद्यम्। न केवलं हि तद्याति शेषमत्रैव नश्यति। व्यसनार्थे कुटुम्बार्थे यज्ञार्थे च दीयते। तदक्षयं भवेदत्र परत्र च न संशयः। मातापितृविहीनं यो मौञ्जीपाणिग्रहादिभिः। संस्कारयेद्विजैरर्थैस्तस्य श्रेयस्तनत्कलम्। अग्निहोत्रैर्न तच्छ्रेयो नाग्निष्टोमादिभिर्मखैः। यच्छ्रेयः प्राप्यते ह्यर्थैर्द्विजैरक्षिन् प्रतिष्ठिते। पितृगेहे तु या कन्या रजः पश्येदसंस्कृता। भ्रूणहा तत्पिता ज्ञेयो दुष्टा सापि कन्यका। यस्यां परिणयेन्मोहात् स भवेद्वृषलीपतिः। तेन सम्भाषणन्नाद्यमपाङ्क्तेयेन सर्वदा। विज्ञाय दोषमुभयोः कन्यायाश्च वरस्य च। सम्बन्धं कारयेत् पश्चादन्यथा दोषभाक् पिता। स्त्रियः पवित्राः सततं नैता दुष्यन्ति केनचित्। मासि मासि रजोह्यासां दुष्कृतान्यपकर्षति। पूर्वं पितृभिः सुरैर्भुक्ताः सोमगन्धर्ववह्निभिः। भुञ्जते मानुषाः पश्चान्नैतादुष्यन्ति केनचित्। स्त्रीणां शौचं ददौ सोमः पावकः सर्वमेध्यताम्। कल्याणं वाणीकन्यत्वेन मेध्याः सदा स्त्रियः। कन्यां भुञ्जे रजःकालेऽग्निः शुची सोमदर्शने। स्नानोद्वाहे च गन्धर्वस्तत्प्रागेव प्रदीयते। ऊर्ध्वरोमा त्वपत्यघ्नी कुलघ्नी भूनयौवना। पितृघ्न्यावित्तरजास्तस्माः परिवर्जयेत्। कन्यादानफलप्रेप्सुस्तस्माद्याद्यादनग्निकाम्। अन्यथा न फलं दातुः प्रतिग्राही पतेदधः। कन्यामभुञ्जां सोमाद्यैर्ददद्दानफलं लभेत्। दैवभुक्तां ददद्दाता न स्वर्गमधिगच्छति। शयनासनयानानि कृतपं स्त्रीसुखं कृशम्। यज्ञपात्राणि सर्वाणि न दुष्यन्ति बुधाः क्वचित्। वक्त्रः प्रस्रवने मेध्यः, शकुनिः फलपातने। नार्यो रतिप्रयोगेषु या सुगन्धकृते शुचिः। अजाश्वयोर्मुखं मेध्यं गावो मेध्याश्च पृष्ठतः। पादतो ब्राह्मणामेध्याः स्त्रियो मेध्यास्तु सर्वतः। बलात्कारोपभुक्ता वा चौरहस्तगतापि वा। न त्याज्या दूषिता नारी नास्यास्त्यागो विधीयते। अम्भसा तावच्छुद्धिः स्याच्छुद्धिः कांस्यस्य भस्मना। संशुद्धा रजसा नार्या स्फटिकी वेगतः शुचिः। मनसापि हि या नेच्छेच्चिन्तयेत् पुरुषान्तरम्। सोमवत् सह सौख्यानि भुङ्क्ते चात्मापि कीर्त्तिभाक्। पिता पितामहो भ्राता सकुल्यो जननी तथा। कन्याप्रदः पूर्वनाशे प्रकृतिस्थः परः परः। अप्रयच्छन् समाप्नोति भ्रूणहत्यामृतावृतौ। स्वयं त्वभावे दातॄणां कन्या कुर्यात् स्वयं वरम्। हृताधिकारां मलिनां पिण्डमात्रोपजीविनीम्। परिभूतामधःशय्यां वासयेद्व्यभिचारिणीम्। व्यभिचारावृतौ शुद्धिर्गर्भे त्यागो विधीयते। गर्भभर्तृवधादौ च महत्स्वपि च कल्पिते। शूद्रैव भार्या शूद्रस्य सा च स्वा च विशः स्मृते। ते च स्वा चैव राज्ञस्तु ताश्च स्वा चाग्रजन्मनः। वारोह्य शूद्रां शयने विप्रो गच्छेदधोगतिम्। उत्पाद्य पुत्रं शूद्रायां ब्राह्मण्यादेव हीयते। दैवपित्र्यातिथेयानि तत्प्रधानानि यस्य तु। देवाद्यास्तानि नाश्नन्ति स च स्वर्गं न गच्छति। जामयो यानि गेहानि शपन्त्यप्रति पूजिताः। तानि कृत्याभिनिर्हितानीव सर्वतः समन्ततो विनश्यन्ति समूलं हतकुलानि वै। तस्माज्जायां सदा रक्षेत् सिद्धौ सत्यां सुवासिनीं भूषणाच्छादनाशनैः। भूतिकामैर्नरैर्नित्यं सत्कृत्येषूत्सवेषु च। यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः। यत्रैतास्तु न पूज्यन्ते सर्वास्तत्राफलाः क्रियाः। यत्र तुष्यति भर्त्ता स्त्री स्त्रिया भर्त्ता च तुष्यति। तत्र वै श्रीः कुलं क्षेमं सम्पदो नित्यं पदे पदे। अपोऽश्नतो घृतं सोमः पशवो मांसमौदनिकः। प्राशितं पितृसंयुक्तं ब्राह्मं द्विजातिभोजनम्। पञ्चयज्ञानिमान् कुर्वन् ब्राह्मणो नावसीदति। एतेषामननुष्ठानात् पञ्चत्वनामवाप्नुयात्। ब्राह्मणं कुलं पुत्रे-

हाङ्गजातमनामयम्। वैद्यं सुखं समागम्य मूढं सन्नोपमेव च। जातमात्रः शिशुस्तावद्यावदष्टौ समाः स्मृताः। भक्ष्याभक्ष्येषु नो दुष्येद्यावच्चौपनीयते। भरणं पोष्यवर्गस्य दृष्टादृष्टफलोदयम्। प्रत्यवायोऽस्य भरणे भर्त्तव्यस्तु प्रयत्नतः। माता पिता गुरुः पत्नी तथा पुत्रादि समाश्रिताः। अभ्यागतोऽतिथिश्चाग्निः पौष्यवर्गो नवो नव। स जीवति पुमान् योऽत्र बन्धुभिरुपजीव्यते। जीवन्मृतोऽत्र विज्ञेयः पुरुषः सोदरम्भरिः। दीनानाथविशिष्टेभ्यो दातव्यं भूतिमिच्छता। अदत्तदानाज्जायन्ते परभाग्योपजीविनः। विभागशीलसंयुक्तोदयावांश्च समारतः। देवतातिथिभक्तस्तु गृहस्थो धार्मिकः स्मृतः। पर्वरीमध्यगामी हौ स्नातमेषन्तु वह्निः। तत्र स्वपंस्तदन्नं च ब्राह्मणो नावसीदति। नवैतानि गृहस्थेन कार्याण्यभ्यागते सदा। सुधामयानि यत् सौम्यं वाक्यञ्चतुर्थमेव च। अभ्युत्थानमिहायाते सत्येनैपूर्वभाषणम्। उपासनमनुव्रज्या गृहस्योन्नतिहेतवे। तथैवह्यायवृद्धानि कार्याण्येतानि वै नव। आसनं पादशौचञ्च यथाशक्त्यन्नं क्षितिः। यथा दत्तं जलाभ्यङ्गदीपा गार्हस्थ्यसिद्धिदाः। तथा नव विकर्माणि त्याज्यानि गृहमेधिना। पैशुन्यं परदाराश्च द्रोहः क्रोधाश्रुताम्रियम्। हेयोदश्चाश्च माया च स्वर्गमार्गार्गलानि हि। नवावश्यककर्माणि कार्याणि प्रतिवासरम्। स्नानं सन्ध्या जपो होमः स्वाध्यायो देवतार्चनम्। वैश्वदेवन्नवातिथ्यं नवमं पितृतर्पणम्। नव गोप्यानि यान्यत्र सुने! तानि निशामय। जन्मर्क्षं मैथुनं मन्त्रो गृहच्छिद्रञ्च पञ्चमम्। आयुर्धनापमानं स्त्री न प्रकाश्यानि सर्वथा। नवैतानि प्रकाश्यानि रुजः पापमकृत्सितम्। प्रायोग्य मृणमुद्विग्न स्वान्वयः क्रयविक्रयौ। कन्यादानं सुखोत्कर्षो नान्यत् केनापि कुत्रचित्। पालनीयविनीतेषु दीनानाथोपकारिषु। मातापितृगुरुस्नेहतत्परैः दत्तमक्षयम्। निष्फलं नवकं प्रोक्तं चाटचारणतस्करे। कुवैद्ये कितवे धूर्त्ते शठे मन्दे च बन्दिनि। आपत्स्वपि न देयानि नव वस्तूनि सर्वदा। अन्यथे सति सर्वस्वं दाराश्च परमागतः। न्यासाधी कुलदत्तिञ्च निक्षेपं स्त्रीधनं सुतम्। यो ददाति स मूढात्मा प्रायश्चित्तैर्विशुद्ध्यति। एतत्त्रयाणां नवकं ज्ञात्वा त्रिदमवाप्नुयात्। अन्यच्च नवकं वक्ष्ये सर्वेषां स्वर्गमार्गदम्। सत्यं शौचमहिंसा च दानित्तानं दया दमः। अस्तेयमिन्द्रियाक्रोधः सर्वेषां धर्मसाधनम्। अभ्यस्य नवकन्त्वेनं स्वर्गमार्गप्रदीपिकाम्। सतामभिमतां पुण्यां गृहस्थो नावसीदति। जिह्वा भार्या सुतो भ्राता मित्रदासस्समाश्रिताः। यस्यैते विनयाद्याश्च तस्य सर्वत्र गौरवम्। पानं दुर्जनसंसर्गः पत्या च विरहाटनम्। स्वप्नोऽन्यगेहवासश्च नारीणां दूषणानि षट्। समार्घं धान्यसुद्धृत्य मद्यार्घं यः प्रयच्छति। स हि वार्द्धुषिको नाम तस्यान्नं नैव भुञ्जयेत्। अर्घे मार्घिकं हत्वा मध्ये तु हलिनोपतिम्। अन्ते वार्द्धुषिकञ्चैव निराशाः पितरोगताः। मद्धिणीत्युच्यते नारी या च स्याद्व्यभिचारिणी। तां प्रहृष्टां कामयते यः स मार्घिकः स्मृतः। स्वदेयं या परित्यज्य परदेये प्रधावते। हलिनी सा हि विज्ञेया न स्त्री हलिनी भवेत्। यावद्दुग्धं भवत्यन्नं यावत्क्षीरेण भुज्यते। तावदन्नन्ति पितरो यावत्क्षीरा हविर्दुघाः। विद्याविनयसम्पन्ने श्रोत्रिये गृहमागते। क्रीडन्त्योषधयः सर्वा याज्ञामः परमाहुतिम्। भ्रष्टशौचव्रताचारे विप्रे वेदविवर्जिते। रोदित्यन्नं दीयमानं किं मया दुष्कृतं कृतम्। यस्य कोऽगतश्चान्नं वेदाभ्यासेन जीर्यते। स तारयति दातारं दश पूर्वान् दशापरान्। न स्त्रीणां वपनं कार्यं न च गाः समनुव्रजेत्। न च रात्रौ वसेद्गेहे न कुर्याद्दैवकीं क्षुतिम्। सर्वान् क्षेत्रान् समुद्धृत्य क्षेत्रवेदकुलिङ्गयम्। एवमेव तु नारीणां शिरसो मुण्डनं भवेत्। राजा वा राजपुत्रो वा ब्राह्मणो वा बहुश्रुतः। अकारयित्वा वपनं प्रायश्चित्तं तु निर्दिशेत्। क्षेत्राणां रक्षणार्थाय द्विगुणं व्रतमाचरेत्। द्विगुणा दक्षिणा देया ब्राह्मणे वेदपारगे। यो गृहीत्वा विवाहाग्निं गृहस्थ इव मन्यते। अन्नं तस्य न भोक्तव्यं श्वपाको हि स स्मृतः। दाराग्निहोत्रसंयोगाच्च कुरुते योऽन्यत्र स्थिते। परीवेत्ता स विज्ञेयः परिवित्तिस्तु पूर्वजः। परिवेत्तिः परीवेत्ता या चैव परिविद्यते। सर्वे ते नरकं यान्ति दातृयाजकपञ्चमाः। क्लीबे देशान्तरस्थे च मूके प्रव्रजिते जडे। कुष्ठे सर्वे च पतिते न दोषः परिवेदने। वेदाक्षराणि यावन्ति नियुक्तादर्थकारणात्। तावतीर्वै भवेत्कन्या वेदविक्रयलक्षभेत्। यस्तु प्रव्रजितो भूत्वा पुनरेवते मैथुनं पुनः। षष्टिं वर्षसहस्राणि विष्ठायां जायते कृमिः। मूढाद्यं गृहसम्भूतं मूढेषु च सङ्गासनम्। मूढाद्धि-

द्यागमः क्वचित् ज्वलन्नमपि पातयेत्। शूद्रादाहृत्य निर्वापं ये पचन्त्यबुधा द्विजाः। ते यान्ति नरकं घोरं ब्रह्मतेजोविवर्जिताः। हस्तदत्तानि ये स्नेहाभ्यञ्जनं लवणानि च। दातारं नोपतिष्ठन्ति भोक्ता भुङ्क्ते तु किल्बिषम्। आयसेनैव पात्रेण यत्किञ्चिदपनीयते। भोक्ता तद्दिष्टमं भुङ्क्ते दाता च नरकं व्रजेत्। अकृत्वा दन्तकाष्ठञ्च प्रत्यूषेऽवश्यञ्च यत्। मृत्तिकाभक्षणं यच्च समं गोमांसभक्षणैः। पानीयं पायसं मैक्षं हृतं लवणमेव च। हस्तदत्तं न भक्षीयात् तत्तुल्यं गोमांसभक्षणैः। अपतो निवसेन्मूर्खो दूरस्थश्च गुणान्वितः। गुणान्विताय दातव्यं नास्ति मूर्खे व्यतिक्रमः। ब्राह्मणातिक्रमोनास्ति विप्रे वेदविवर्जिते। ज्वलन्तमग्निमुत्सृज्य न हि भस्मनि हूयते। यश्चिरोटमधीयान ब्राह्मणं यो व्यतिक्रमेत्। भोजने चैव दाने स दग्ध्वा सप्तमं कुलम्। गोरक्षकान् वाणिजकान् तथा कारुकुशीलवान्। प्रेष्यान् वार्द्धुषिकांश्चैव विप्रान् शूद्रवदाचरेत्। देवद्रव्यविभागेन ब्रह्मस्वहरणेन च। कुलान्याशु विनश्यन्ति ब्राह्मणातिक्रमेण च। मा देहीति च यो ब्रूयाद्देवाग्निब्राह्मणेषु च। तिर्यग्योनिं शतं गत्वा चाण्डालेष्वभिजायते। वाचा यच्च प्रतिज्ञातं कर्मणा नोपपादितम्। अश्नन्नद्धर्मसंयुक्तमिह लोके परत्र च। विघसाशी भवेन्नित्यं नित्यञ्चामृतभोजनः। यज्ञशेषोऽमृतं भुक्तशेषन्तद्विघसं विदुः। सन्ध्यादंसात् परिभ्रष्टे नाभिदेशव्यवस्थिते। वस्त्रे स एकवासास्तं दैवे पित्र्ये च वर्जयेत्। यदेव तर्पयत्यद्भिः पितॄन् स्नात्वा द्विजोत्तमः। तेनैव सर्वमाप्नोति पितृयज्ञक्रियाफलम्। हस्तं प्रक्षाल्य गण्डूषं यः पिबेद्भोजनान्तरे। दैवं पित्र्यं तथात्मानं त्रयं स उपधातयेत्। गणान्नं गणिकान्नञ्च यदन्नं ग्रामयाजके। स्त्रीणां प्रथमगर्भेषु भुक्त्वा चान्द्रायणञ्चरेत्। पक्षे वा यदि वा मासे यस्य गेहेऽत्ति न द्विजः। भुक्त्वा दुरात्मनस्तस्य चरेच्चान्द्रायणं व्रतम्। सतीनान्दोचितानाञ्च यतीनां व्रतचारिणाम्। एतेषां स्तकञ्चास्ति नार्त्विज्यं कर्म कुर्वताम्। अजीर्णेऽभ्युदिते वान्ने ग्रस्तकर्मणि मैथुने। दुःस्वप्ने दुर्जनस्पर्शे स्नानमेव विधीयते। चैत्यवृक्षं चितिं यूपं शिवनिर्माल्यभोजनम्। वेदविक्रयिणं स्पृष्ट्वा सचेलोजलमाविशेत्। अग्न्यगारे गवां गोष्ठे देवब्राह्मणसन्निधौ। स्वाध्याये भोजने पाने पादुके वै विवर्जयेत्। खलक्षेत्रगतं धान्यं कूपवापीषु यत् जलम्। अश्नात्यदपि तद्दुग्धं यच्च गोव्रजगतं पयः। यद्देवतीर्थशिरा भुङ्क्ते यद्भुङ्क्ते दक्षिणामुखः। सोपानत्कश्च यो भुङ्क्ते तद्वै रक्षांसि भुञ्जते। यातुधानाः पिशाचाश्च राक्षसाः क्रूरकर्मिणः। हरन्ति रसमन्नस्य मण्डलेन विवर्जितम्। ब्रह्मान्नाश्च सुराः सर्वे वशिष्ठाद्या मनीषयः। मण्डलं चोपजीवन्ति ततः कुर्वीत मण्डलम्। ब्राह्मणे चतुरस्रं स्यात् क्षत्रे वै वाहुजन्मनः। वर्त्तुलन्तु विशः प्रोक्तं शूद्रस्याभ्युक्षणं स्मृतम्। नोत्सङ्गे भाजनं कृत्वा नो पाणौ नैव कर्पटे। नासने न च शय्यायां भुञ्जीत न मलार्दितः। धर्मशास्त्रस्थमारूढा वेदस्कन्धराद्विजाः। क्रीडार्थमपि यद्ब्रूयुः स धर्मः परमः स्मृतः। रात्रौ दधियुतं द्रव्यं धर्मकामो न भक्षयेत्। अन्यतो धर्महानिः स्यात् व्याधिभिश्चोपपीड्यते। क्वाथितं गोरसं तोयं लवणं मधु काञ्जिकम्। हस्तेन ब्राह्मणो दत्त्वा हस्तं चान्द्रायणं चरेत्। गन्धाम्बरस्रङ्माल्यानि यः प्रयच्छति धर्मवित्। स दुर्गन्धिः सदाऽतृष्टो बलं यशोपजायते। नीलीरक्तञ्च यद्वस्त्रं दूरतस्तद्विवर्जयेत्। स्त्रीणां क्रीडार्थसंयोगे शयनीये न दुष्यति। पालनाद्विक्रयाच्चैव तद्वित्तैरुपजीवनात्। अपवित्रो भवेद्विप्रस्तिभिः कृच्छ्रैर्विशुद्ध्यति। स्नानं दानं जपो होमः स्वाध्यायः पितृतर्पणम्। हृता तस्य भवायत्ता नीलीवासो बिभर्त्ति यः। नीलीरक्तं यदा वस्त्रं द्विजः स्वाङ्गेषु धारयेत्। तन्तुसंघातसंख्याते नरके स वसेद्ध्रुवम्। अहोरात्रोषितो भूत्वा पञ्चगव्येन शुद्ध्यति। अमृतं ब्राह्मणस्याद्यं क्षत्रियाद्यं पयः स्मृतम्। वैश्यस्य चाज्यमेवाद्यं शूद्राद्यं रुधिरं स्मृतम्। वैश्यदेवेन होमेन देवताभ्यर्चनैर्जपैः। अमृतं तेन विप्राद्यं ऋग्यजुःसामसंस्कृतम्। व्यवहारानुरूपेण न्यायेन च यदर्जितम्। क्षत्रियस्य पयस्तेन प्रजापालनतो भवेत्। कृषिगोरक्षवाणिज्यादन्नसत्याद्य यच्छति। सीतायज्ञविधानेन वैश्याद्यं तेन सम्मतम्। अज्ञानतिमिराच्छन्नं मद्यपानरतस्य च। रुधिरं तेन शूद्राद्यं वेदमन्त्रविवर्जितम्। न हृता शपथं कुर्यात् स्वल्पेऽप्यर्थे नरोबुधः। हृता हि शपथं कुर्वन् प्रत्येह च विनश्यति। कामिनीषु विवाहेषु गवां भक्ष्ये धनक्षये। ब्राह्मणाभ्युपपत्तौ च शपथे नास्ति पातकम्। सत्येन शापयेद्विप्रं क्षत्रियं वाहनायुधैः। गोबीजकाञ्चनैर्वैश्यं शूद्रं सर्वैस्तु पा-

तकैः । अग्निं वाऽहारयेदेनमप्सु चैनं निमज्जयेत् । स्वर्गयेत् पुत्रदाराणां शिरांस्येनञ्च वा पृथक् ।" अधिकमाचारशब्दे ६२२ पृष्ठादौ दृश्यम् ।

स च धर्मो व्याससंहितायाम् २य० उक्तो यथा

"नित्यं नैमित्तिकं काम्यमिति कर्म त्रिधा मतम् । त्रिविधं तच्च वक्ष्यामि सट्टस्यस्यावधार्यताम् । यामिन्याः पश्चिमे यामे त्यक्तनिद्रो हरिं स्मरेत् । आलोक्य मङ्गलद्रव्यं कर्मावश्यकमाचरेत् । कृतशौचो निधेय्याग्निं दन्तान् प्रक्षाल्य वारिणा । स्नात्वोपास्य द्विजः सन्ध्यां देवादींश्चैव तर्पयेत् । वेदवेदाङ्गशास्त्राणि इतिहासानि चाभ्यसेत् । अध्यापयेच्च सच्छिष्यान् सद्विप्रांश्च द्विजोत्तमः । अलब्धं प्रापयेल्लब्धा क्षणमात्रं समापयेत् । समर्थो हि समर्थेन नाविज्ञातः क्वचिद्वसेत् । सरित्सरसि वापीषु गर्तप्रस्रवणादिषु । स्नायीत यावदुद्धृत्य पञ्च पिण्डानि वारिणा । तीर्थाभावेऽप्यशक्त्या वा स्नायात्तोयैः समाहृतैः । सट्टाङ्गनगतस्तत्र यावदम्बरपीडनम् । स्नानमन्त्रैर्यतैः कुर्यात् पावनैरपि मार्ज्जयेत् । मन्त्रैः प्राणांस्त्रिरायम्य सौरैर्वार्कं विलोकयेत् । तिष्ठन्, स्मित्वा तु गायत्रीं ततः स्वाध्यायमारभेत् । ऋचाञ्च यजुषां साम्नामथर्वाङ्गिरसामपि । इतिहासपुराणानां वेदोपनिषदां द्विजः । शक्त्या सम्यक् पठेन्नित्यमलसमध्यासमापनात् । स यज्ञदानतपसामखिलं फलमाप्नुयात् । तस्मादहरहर्वेदं द्विजोऽधीयीत वाग्यतः । धर्मशास्त्रेतिहासादि सर्वेषां शक्तितः पठेत् । कृतस्वाध्यायः प्रथमं तर्पयेच्चाथ देवताः । ज्ञात्वा च दक्षिणं दर्भैः प्राग्यैः सव्यैस्तिलैः । एकैकाञ्जलिदानेन प्रजापतिस्योपवीतकः । समलानुहयो ब्रह्मसूत्रधार उदङ्मुखः । तिर्यग्दर्भैश्च वामाग्रैर्यवैस्तिलविमिश्रितैः । अम्भोभिरुत्तरद्विप्रैः कनिष्ठामूलनिर्गतैः । द्वाभ्यां द्वाभ्यामञ्जलिभ्यां मनुष्यांस्तर्पयेत्ततः । दक्षिणाभिमुखः सव्यजान्वा च द्विगुणैः कुशैः । तिलैर्जलैश्च देशिन्या मूलदर्भाहिनिःसृतैः । दक्षिणांसोपवीतः स्यात् क्रमेणाञ्जलिभिस्त्रिभिः । सनर्पयेद्दिव्यपितॄंस्तत्परं च पितॄन् स्वकान् । मातृमातामहांस्तद्वत्त्रीनेवं हि त्रिभिस्त्रिभिः । मातामहानां येऽप्यन्ये गोत्रिणो दाक्षवर्जिताः । तानेकाञ्जलिदानेन तर्पयेच्च पृथक् पृथक् । असंस्कृतप्रमीता ये प्रेतसंस्कारवर्जिताः । वस्त्रनिष्पीडनाम्भोभिस्तेषामाप्यायनमाचरेत् । कृतर्पितेषु पितृषु यस्तं निष्पीडयेच्च यः । निराशाः पितरस्तस्य भवन्ति सुरमानुषाः । पयोदर्भस्वधाकारगोत्रनामतिलैर्भवेत् । सदत्तं तत्पुनस्तेषामेकेनापि कृता विना । अन्यचित्तेन यद्दत्तं यद्दत्तं विधिवर्जितम् । अनासनस्थितेनापि तज्जलं रुधिरायते । एवं सन्तर्पिताः कामैस्तर्पकांस्तर्पयन्ति च । ब्रह्मविष्णुशिवादित्यमित्रवरुणनामभिः । पूजयेच्चन्दनैर्मन्त्रैर्वैदमन्त्रोक्तदेवताः । उपस्थाय रवेः काष्ठां पूजयित्वा च देवताः । ब्रह्माग्नीन्द्रौषधीजीवविष्णुनामकृतांजलिम् । ब्रह्मा यज्ञेति सत्कार्य नमस्कारैः स्वनामभिः । कृत्वा सूर्यं समालभ्य स्नानमेवं समाचरेत् । ततः प्रविश्य भवनमावसथ्ये हुताशने । पाकयज्ञांश्च चतुरोविदध्याद्विधिवद्विजः । अनाहिताग्निरावसथ्याग्निरादातव्यं हुतश्रुतम् । श्राकलेन विधानेन जुहुयाद्गौकिकेऽनले । व्यस्ताभिर्व्याहृतिभिश्च समस्ताभिस्ततः परम् । षड्भिर्दैवकृतस्येति मन्त्रवद्भिर्यथाक्रमम् । प्राजापत्यं स्विष्टकृतं हुत्वैवं द्वादशाहुतीः । ओङ्कारपूर्वं स्वाहान्तस्त्यागः स्विष्टविधानतः । भुवि दर्भान् समातीर्य बलिकर्म समाचरेत् । विश्वेभ्यो देवेभ्य इति सर्वभूतेभ्य एव च । भूतानां पतये चेति नमस्कारेण शास्त्रवित् । दद्याद्बलित्रयस्थाने पितृभ्यश्च स्वधा नमः । पात्रनिर्णेजनं वारि वाय्यां दिशि निःक्षिपेत् । उद्धृत्य षोडशग्रासमात्रमन्नं हतोक्षितम् । इदमन्नं मनुष्येभ्यो हन्तेत्युक्त्वा ससृत्सृजेत् । गोत्रनामस्वधाकारैः पितृभ्यश्चापि शक्तितः । षड्भ्योऽन्नमन्नं दद्यात् पितृयज्ञविधानतः । वेदादीनां पठेत् किञ्चिदल्पं ब्रह्मसुखाप्तये । ततोऽन्यदन्नमादाय निर्गत्य भवनाद्बहिः । काकेभ्यः श्वपचेभ्यश्च पक्षिपेदुग्रसेन च । उपविश्य सट्टद्वारि तिर्यग्यावन्मुहूर्तकम् । अप्रमत्तोऽतिथिं क्षिप्तुर्भावयुद्वीक्षकः । आगतं दूरतः शान्तं भोक्तुकाममकिञ्चनम् । दृष्ट्वा सम्मुखमभ्येत्य सत्कृत्य प्रश्रयार्चनैः । पादधावनसम्मानाभ्यञ्जनादिभिरर्चितः । त्रिदिवं प्रापयेत्पद्मो यज्ञस्याभ्यधिकोऽतिथिः । कालागतोऽतिथिर्द्वेवेदपारो सट्टागतः । द्वावेतौ पूजितौ स्वर्गं नयतोऽधस्तपूजितौ । विवाहस्नातकक्षत्राभ्यदाचार्यर्त्विगृत्विजः । श्वश्रूर्भवन्ति धर्मेण प्रतिवर्षं गृहागताः । गृहागताय सत्कृत्य श्रोत्रियाय यथाविधि । भक्ष्योपकल्पवेदेकं महाभागं विसर्जयेत् । विसर्जयेदतुल्यञ्च सतृप्तश्रोत्रियातिथीन् । स्त्रियमातुलसम्बन्धि-

बान्धवान् सपशूनतान्। भोजयेद्दक्षिणाभिश्च सत्कृतां भिक्षुकोऽर्हति। श्राद्धमन्नन्नमाद्यं ददद्गच्छत्यधोगतिम्। गर्भिणीबालवृद्धेषु बालवृद्धातुरादिषु। बुभुक्षितेषु भुञ्जानो गृहस्थोऽश्नाति किल्बिषम्। नाद्यादृश्वेव पारक्यं कदाचिदनिमन्त्रितः। निमन्त्रितोऽपि निन्द्येन प्रत्याख्यानं द्विजोऽर्हति। शूद्राभिशस्तवार्धुषिवागदुष्टक्रूरतस्कराः। क्रुद्धापविद्धवध्योद्यबधबन्धनजीविनः। शैलूषशौण्डिकोच्छिष्टोन्मत्तव्रात्यव्रतच्युताः। नग्ननास्तिकनिर्लज्जपिशुनव्यसनान्विताः। कदर्यस्तोजिताशार्थं परवादरताः नराः। अनीशाः कीर्तिमन्तोऽपि राजदेवस्वहारकाः। शयनासनसंसर्गदुष्टकर्मादिदूषिताः। अश्रद्दधानाः पतिता भ्रष्टाचारादयश्च ये। अभोज्यान्नाः स्मृतस्यादो यस्य यः स्यात् स तन्नमः। नापितान्वयमित्रार्द्धसीरिणो दासगोपकाः। शूद्रान्नामन्नमीषान्तु भुञ्जानं नैव दुष्यति। धर्मैकान्योन्यभोज्यान्ना द्विजास्तु विदितान्वयाः। स्वदत्तोपार्जितं मेध्यमाकरस्थं समाचिकम्। अग्नीढमग्नेरुद्धृतमस्पृष्टं शूद्रवायसैः। अनुच्छिष्टमसंदुष्टमपर्युषितमेव च। अश्रानवाद्यमद्याद्यमाद्यं नित्यं सुसंस्कृतम्। जरराऽपूपसंयावयावसं शष्कुलीति च। नाश्नीयाद्ब्राह्मणोमांसमनियुक्तः कथञ्चन। क्रतौ श्राद्धे नियुक्तो वा अनश्नन् पतति द्विजः। स्वगवोपार्जितं मांसमभ्यर्च्य पितृदेवताः। क्षत्रियो हीनवर्णैस्तत् क्रीत्वा वैश्योऽपि धर्मतः। द्विजोजग्ध्वा हविर्मांसं कृत्वाप्यविधिना पशून्। निरवेक्षश्चयं यासमाप्नोत्याचन्द्रतारकम्। सर्वान् कामान् समाप्नोति फलमश्वमेधस्य च। मुनिश्राद्धमवाप्नोति गृहस्थो मांसवर्जनात्। द्विजैर्भोज्यानि गव्यानि माहिषाण्यपि पयांसि च। पलाण्डुलशुनक्षत्रकरञ्जमूलकमेव च। गृञ्जनाद्यखद्यक्षुगजदग्धभक्षणानि च। अकालकुसुमादीनि द्विजोजग्ध्वैन्द्वं चरेत्। वाग्दूषितमपिप्रातमन्यपीडितकार्यपि। भूतेभ्योऽन्नमदत्त्वा च तदन्नं स्वहिषोदहेत्। हैमराजतकांस्येषु पात्रेष्वद्यात् सदा स्वही। तदभावे साधुगन्धकोष्ठ्रमयतासु च। पलाशपद्मपत्रेषु गृहस्थोभोक्तुमर्हति। अभ्युक्षाद्यं नमस्कारैर्भुवि दद्याद्बलित्रयम्। भूपतये भुवः पतये भूतानां पतये तथा। अपः प्राश्य ततः पश्चात् पञ्चप्राणाहुतिक्रमात्। स्वाहाकारेण जुहुयाच्चेमदाद्यवासुखम्। अनन्यचित्तोभुञ्जीत वाग्यतोऽन्नमकुत्सयन्। आ हस्तेरन्नमश्नीयादकुत्सं पात्रसंस्थितम्। उच्छिष्टमन्नमुद्धृत्य यासमेकं भूविक्षिपेत्। आचान्तः साधुसङ्गेन सद्विद्यापठनेन च। इष्टदेवकथाभिश्च शेषान्नमतिवाहयेत्। सायं स्नात्वाऽऽसपासीत कृत्वाग्निं मन्त्रसंयुतः। आपोशानक्रियापूर्वमश्नीयादन्नं द्विजः। सायमभ्यतिथिः पूज्यो होमकालागतोऽनिशम्। अन्नया शक्तितोनित्यं श्रुतं कृत्यादपूजितः। नातिहस्व उपस्पृश्य प्रक्षाल्य चरणौ शुचिः। अग्रपादशिराः शयीत शयने शुभे। शक्तिमानुदिते काले स्नानं सन्ध्यां न लोपयेत्। ब्राह्मे मुहूर्ते चोत्थाय चिन्तयेद्वितमात्मनः। शक्तिमान् मतिमान् नित्यं इत्तमेतत् समाचरेत्"।

इत्तपराशरे तु तत्तन्नित्यं विस्तरतोविधानतश्चोक्तं विस्तरभयात् नोद्धृतम्।

दिवसीयसत्कर्मभेदे गृहस्थकर्त्तव्यधर्मभेदमाह दक्षः।

"प्रातरुत्थाय कर्त्तव्यं यद्द्विजेन दिने दिने। तत् सर्वं संप्रवक्ष्यामि द्विजानामुपकारकम्। उदयात्प्रभृति यावच्च विप्रः चक्षिकोभवेत्। नित्यनैमित्तिकैर्युक्तः कार्य्यैरावैरगर्हितैः। यः स्वकर्म परित्यज्य यदन्यत् कुरुते द्विजः। अज्ञानाद्यदि वा मोहात् स तेन पतितो भवेत्। दिवसस्याद्यभागे तु कृत्यं तस्योपदिश्यते। द्वितीये च तृतीये च चतुर्थे पञ्चमे तथा। षष्ठे च सप्तमे चैव अष्टमे च पृथक् पृथक्। विभागेषेषु यत्कर्म तत्प्रवक्ष्याम्यशेषतः। उषःकाले तु संप्राप्ते शौचं कृत्वा यथार्थवत्। ततः स्नानं प्रकुर्वीत दन्तधावनपूर्वकम्। अक्लिन्नमलिनः कायो नवच्छिद्रसमन्वितः। स्वस्थेन दिवा रात्रौ प्रातःस्नानं विशोधनम्। क्लिद्यन्ति हि प्रसुप्तस्य इन्द्रियाणि स्रवन्ति च। अङ्गानि समतां यान्ति उत्तमाधमैः सह। नानाखेदसमाकीर्णः श्रमनादुत्थितः पुमान्। अस्नात्वा नाचरेत् कर्म जपहोमादि किञ्चन। प्रातरुत्थाय यो विप्रः प्रातः स्नायी भवेत् सदा। समस्तजन्मजं पापं त्रिभिर्वर्षैर्व्यपोहति। उषस्युषसि यत् स्नानं सन्ध्यायामुदिते रवौ। प्राजापत्येन तत्तुल्यं महापातकनाशनम्। प्रातःस्नानं प्रशंसन्ति दृष्टादृष्टकरं हि तत्। सर्वमर्हति पूतात्मा प्रातःस्नायी जपादिकम्। स्नानादनन्तरं तावदुपस्पर्शनमुच्यते। अनेन तु विधानेन आचान्तः शुचितामियात्। प्रक्षाल्य पादौ हस्तौ च त्रिः पिबेदम्बु वीक्षितम्।

संडल्याङ्गुष्ठमूलेन हिः प्रक्षाल्याचतोऽधरम्। संहत्य तिसृभिः पूर्वमास्यमेवमुपस्पृशेत्। ततः पादौ समभ्युक्ष्य अङ्गानि ससुपस्पृशेत्। अङ्गुष्ठेन प्रदेशिन्या घ्राणं पश्चादनन्तरम्। अङ्गुष्ठानामिकाभ्यान्तु चक्षुःश्रोत्रे पुनः पुनः। कनिष्ठाङ्गुष्ठया नाभिं हृदयन्तु तलेन वै। सर्वाभिस्तु शिरः पश्चाद्बाहू चाग्रेण संस्पृशेत्। सन्ध्यायान्तु प्रभाते च मध्याह्ने च ततः पुनः। सन्ध्यां नोपासते यस्तु ब्राह्मणोऽहि विशेषतः। स जीवन्नेव शूद्रः स्यान्मृतः श्वा चैव जायते। सन्ध्याहीनोऽशुचिर्नित्यमनर्हः सर्वकर्मसु। यदन्यत् कुरुते कर्म न तस्य फलमश्नुते। सन्ध्याकर्मावसाने तु स्वयं होमोविधीयते। स्वयं होमे फलं यत्तु तदन्येन न जायते। ऋत्विक् पुत्रोगुरुर्भ्राता भागिनेयोऽथ विट्पतिः। एभिरेव हुतं यत्तु तद्धुतं स्वयमेव हि। देवकार्यं ततः कृत्वा गुरुमङ्गलवीक्षणम्। देवकार्याणि पूर्वाह्णे मनुष्याणाञ्च मध्यमे। पितृणामपराह्णे च कार्याण्येतानि यत्नतः। पौर्वाह्णिकन्तु यत् कर्म यदि तत् सायमाचरेत्। न तस्य फलमाप्नोति ब्रह्मघ्नीमैथुनं यथा। दिवसस्याद्यभागे तु सर्वमेतद्विधीयते। द्वितीये च तथा भागे वेदाभ्यासोविधीयते। वेदाभ्यासो हि विप्राणां परमं तप उच्यते। ब्रह्मयज्ञः स विज्ञेयः षडङ्गसहितस्तु सः। वेदस्वीकरणं पूर्वं विचारोऽभ्यसनं जपः। ततोदानञ्च शिष्येभ्यो वेदाभ्यासो हि षड्विधः। समित्पुष्पकुशादीनां स कालः समुदाहृतः। ततोऽथे चैव भागे तु पोष्यवर्गार्थसाधनम्। पिता माता गुरुर्भ्राता पत्नी दीनाः समाश्रिताः। अभ्यागतोऽतिथिश्चान्यः पोष्यवर्ग उदाहृतः। ज्ञातिर्बन्धुजनः क्षीणस्तथाऽनाथः समाश्रितः। अन्येऽप्यधनयुक्ताश्च पोष्यवर्ग उदाहृतः। भरणं पोष्यवर्गस्य प्रशस्तं स्वर्गसाधनम्। नरकं पीडने चास्य तस्मादत्नेन तं भरेत्। सार्वभौतिकमन्नाद्यं कर्त्तव्यन्तु विशेषतः। ज्ञानविद्भ्यः प्रदातव्यमन्यथा नरकं व्रजेत्। स जीवति य एवैकोऽन्नमिच्छोपजीव्यते। जीवन्मोक्षतकाश्चान्ये य आत्मम्भरयो नराः। बहूर्णं जीव्यते कश्चित् कुटुम्बार्थे तथा परः। आत्मार्थेऽन्यो न शक्नोति स्वोदरेणापि दुःखितः। दीनानाथविशिष्टेभ्योदातव्यं भूतिमिच्छता। अदत्तदानाज्जायन्ते परभाग्योपजीविनः। यद्ददाति विशिष्टेभ्यो यज्जुहोति दिने दिने। तत्तु वित्तमहं मन्ये शेषं कस्यापि रक्षति। चतुर्थे च तथा भागे स्नानार्थं सदमाचरेत्। तिलपुष्पकुशादीनि स्नानाङ्गानि मे जले। नित्यं नैमित्तिकं काम्यं त्रिविधं स्नानमुच्यते। तेषां मध्ये तु यन्नित्यं तत्पुनर्भिद्यते त्रिधा। मलापकर्षणं पश्चान्मन्त्रवत्तु जले कृतम्। सन्ध्यास्नानस्तभाभ्याञ्च स्नानभेदा प्रकीर्त्तिताः। मार्जनं जलमध्ये तु प्राणायामोयतस्ततः। उपस्थानं ततः पश्चात् सावित्र्या जप उच्यते। सविता देवता यस्या सकर्मस्वधिधा स्थितः। विश्वामित्र ऋषिश्छन्दो गायत्री सा विशिष्यते। पञ्चमे च तथाभागे संविभागो यथार्हतः। पितृदेवमनुष्याणां कीटानाञ्चोपदिश्यते। देवैश्चैव मनुष्यैश्च तिर्यग्भिश्चोपजीव्यते। सदस्यः प्रत्यहं यस्मात्तस्माद्वेश्माग्नी गृही। त्रयाणामाश्रमाणान्तु गृहस्थो योनिरुच्यते। तेनैव सीदमानेन सीदन्तीहेतरे त्रयः। मूलप्राणो भवेत् स्कन्दः स्कन्दाच्छाखाः समुद्गताः। मूलेनैव विनष्टेन सर्वमेतद्विनश्यति। तस्मात् सर्वप्रयत्नेन रक्षितव्यो गृहाग्नी। राज्ञा चान्यैस्त्रिभिः पूज्यो माननीयश्च सर्वदा। गृहस्थोऽपि क्रियायुक्तो न गृहेण गृहाग्नी। न चैव पुत्रदारेण स्वकर्मपरिवर्जितः। अस्नात्वा चाप्यकृत्वा चाजप्त्वाऽदत्त्वा च मानवः। देवादीनाञ्च ऋणी भूत्वा नरकं प्रतिपद्यते। एक एव हि भुङ्क्ते ऽन्नमपरोऽन्नेन भुज्यते। न भुज्यते सः एवैको यो भुङ्क्ते ऽन्नं ससाधिकम्। विभागशीलो यो नित्यं क्षमायुक्तोदवापरः। देवतातिथिभक्तश्च गृहस्थः स तु धार्मिकः। दया लज्जा क्षमा चक्षा प्रज्ञा योगः कृतज्ञता। एते यस्य गुणाः सन्ति स गृही सुख उच्यते। संविभागं ततः कृत्वा गृहस्थः शेषभुग्भवेत्। भुक्त्वा तु सुखमास्थाय तदन्नं परिणामयेत्। इतिहासपुराणाद्यैः षष्ठञ्च सप्तमं नयेत्। अष्टमे लोकयात्रां तु बहिः सन्ध्यां ततः पुनः। होमो भोजनकञ्चैव यज्ञान्यद्गृहकृत्यकम्। कृत्वा चैवं ततः पश्चात् स्वाध्यायं किञ्चिदाचरेत्। प्रदोषपश्चिमौ यामौ वेदाभ्यासेन तौ नयेत्। यामद्वयशयानो हि ब्रह्मभूयाय कल्पते। नैमित्तिकानि काम्यानि निपतन्ति यथा यथा। तथा तथैव कार्याणि न कालस्तु विधीयते। अक्षिप्तेव प्रयुञ्जानो क्षिप्तेव तु लीयते। तस्मात् सर्वप्रयत्नेन कर्त्तव्यं सुखमिच्छता। सर्वेषु मध्यमौ यामौ हुतशेषं हविश्च यत्। भुञ्जानश्च शयानश्च ब्राह्मणो नावसीदति।

"कलौ विशेषमत्र गृहस्थकर्त्तव्यरूपमादिकं बृहत्पराशरेणोक्तं ऋषिभिरनुक्तत्वात् प्रसङ्गादिहोच्यते यथा शङ्खः

"अतःपरं गृहस्थस्य कर्माचारं कलौ युगे। धर्मसाधारणं साक्षाच्चतुर्वर्णे क्रमागतम्। युष्माकं सम्यक्तत्राग्रे पाराशरप्रचोदितम्। षट्कर्मसहितोविप्रः ऋषिवृत्तिं समाश्रयेत्। हीनाङ्गं व्याधिसंयुक्तं प्राणहीनञ्च दुर्बलम्। चतुर्युक्तं क्षपितं चालमनड्वाहं न वाहयेत्। स्थिराङ्गं नीरुजं तृप्तं शान्तं वृषभं विवर्जितम्। अक्षतं सबलप्राणमनड्वाहं तु वाहयेत्। वाहयेद्दिवसस्यार्द्धं पश्चात् स्नानं समाचरेत्। कृषिवैनं ऋषिं कुर्याद्वृत्त्या धेनुसमन्वितः। वन्धनं पालनं रक्षां द्विजः कुर्याद्गवां सदा। वह्नाच्च यत्नतो रक्षा वर्द्धने ते यथाक्रमम्। न दूरे तासु मोक्तव्या चरणाय कदाचन। दूरे गावश्चरन्त्यो वै न भवन्ति शुभावहाः। प्रातरेव हि दोग्धव्या दुहाः सायं तथा गृही। दोग्ध्रुर्विपर्यये नैव वर्द्धने ताः कदाचन। अनादेयतृणं जग्ध्वा स्वन्यत्तुदिन पयः। तुष्टिजद्देवतादीनां पुष्ट्या गावः कथञ्च ताः। यस्याः शिरसि ब्रह्मास्ते स्कन्धदेशे शिवः स्मृतः। पृष्ठे विष्णुस्तथा तस्यौ सुतयश्चरणेषु तु। या अन्या देवताः काश्चित्तस्त्रालोमसु ताः स्थिताः। सर्वदेवमयी गौस्तु तथेच्छन्नृषिसत्तमः। हरति स्पर्शनात्पापं पयसा पोषयन्ति याः। पावयन्ति दिवं दत्ताः पुण्या गावः कथञ्च ताः। यत्फाल्गुनभूमेषु उद्धताः पांसुसंस्पृशः। क्षीणयेत् पुरुषस्यैनो वन्द्या गावः कथञ्च ताः। शल्यभूतं हि यस्यास्तु पीतं पुनाति पातकम्। किमुच्यं हि तस्या गोरिति पाराशरोऽब्रवीत्। गौरवध्या न दोग्धव्या न चैव गर्भसन्निनी। प्रस्रुता च दशाहार्वाग्दोग्धा चेन्नरकं व्रजेत्। दुर्बला व्याधिसंयुक्ता पुष्टिता या हिवत्समूः। सा साधुभिर्न दोग्धव्या वर्षिभिः सुखमीप्सुभिः। कृशाल्ने पुष्टिता गावः कृशाल्ने बहुवत्सिकाः। कृशाल्ने चलचित्ता स्त्री कृशाल्ने बन्धुविग्रहः। एकत्र पृथिवी सर्वा सशैलवनकानना। तथा गौर्ह्यधसी साक्षादेकत्रोभयतोसुखी। यथोक्तविधिना चैता वर्द्धिः पाल्यास्तु पूजिताः। पालयेत्पूजयेत्ताः स प्रेत्येह च मोदते। दक्षिणाभिमुखा गाव उत्तराभिमुखा अपि। वन्धनीयास्तथैतास्तु न च प्राक्पश्चिमाभुखाः। गोष्ठे वाजिशालायां सतीक्ष्णं लोहदात्रकम्। स्थाप्यं तु सर्वदा तस्यां गवि लूप्रविमोक्षणात्। गावो देवाः सदा रक्ष्याः पोष्याः पाल्याश्च सर्वदा। ताडयन्ति च ये पापा ये चाकर्षन्ति ता नराः। नरके पच्यन्ते ऽक्षानि त्रासेन च प्रपीडिताः। सपशुचर्मदण्डेन स्पृष्ट तासां निवर्त्तनम्। गच्छ गच्छेति तां ब्रूयात् मा मा भैरिति वारयेत्। संस्पृशन् गां नमस्कृत्य कुर्यात्तान्तु प्रदक्षिणम्। प्रदक्षिणीकृता तेन सप्तद्वीपा वसुन्धरा। तृणोदकादिसंयुक्तं यः प्रदद्याद्गवाङ्किकम्। सोऽश्वमेधसमं पुण्यं लभते नात्र संशयः। पृथिव्यां यानि तीर्थानि सप्तद्वीपे सरांसि च। गवां शृङ्गोदकस्नाने कलां नार्हन्ति षोडशीम्। कृतस्तेयं हि पापानि येषां गृहमलङ्कृतम्। सततं वालवत्साभिर्गोभिः स्त्रीभिरिव स्वयम्। ब्राह्मणाश्चैव गावश्च कुलमेकं द्विधा कृतम्। तिष्ठन्त्येकत्र मन्त्राग्नि हविरेकत्र तिष्ठति। गोभिर्यज्ञाः प्रवर्त्तन्ते गोभिर्देवाः प्रतिष्ठिताः। गोभिर्वेदाः सषड्ङ्गपदाः क्रमात्। सौरभेयास्तु तत्रापे पृष्ठतोऽग्रश्च ताः स्थिताः। वसन्ति हृदये नित्यमासां मध्ये वसन्ति ये। ते पुण्यपुरुषाः लोकानां नाकेऽपि दुर्लभाश्च ते। शृङ्गमूले स्थितो ब्रह्मा शृङ्गमूले तु केशवः। शृङ्गाग्रे शङ्करं विद्यात्सर्वदेवाः प्रतिष्ठिताः। शृङ्गाग्रे सर्वतीर्थानि स्थावराणि चराणि च। सर्वे देवाः स्थिता देहे सर्वदेवमयी हि गौः। ललाटाग्रे स्थिता देवी नासामध्ये तु शङ्खिनी। कम्बलाश्वतरौ नागौ तत्कर्णौ तौ व्यवस्थितौ। स्थितौ तस्याश्च सौरभ्याश्चक्षुषोः शशिभास्करौ। दन्तेषु वसवश्चाष्टौ जिह्वायां वरुणः स्थितः। सरस्वती च शृङ्गारे यमश्चौ च मुखस्थितौ। ऋषयो रोमकूपेषु प्रस्रावे जाह्नवीजलम्। कालिन्दी गोमये तस्या अपरा देवता स्मृता। अष्टविंशतिदेवानां कोष्ठा लोमसु ताः स्थिताः। उदरे गार्हपत्योऽग्निर्हृदये दक्षिणस्तथा। मुखे चाहवनीयस्तु चात्रसाध्यस्तु कुक्षिषु। एवं यो वर्त्तते गोषु ताडने क्रोधवर्जितः। मन्वन्तरं श्रियमाप्नोति स्वर्गलोके महीयते। कृत्वं तस्या न लङ्घेत पूतिगन्धं न वर्जयेत्। यावत्प्रसवति तद्गन्धं तावत्पुण्यं प्रवर्द्धते। यो गां पयस्विनीं दद्यात्तरुणीं वत्ससंयुताम्। शिवस्यायतनं दत्तं दत्तस्तेन तु विष्टपम्। उद्धा गौ र्वैधसा छिन्ना तस्य हुत्पादनाय च। तैरुत्पादितशस्त्रेण सर्वमेतद्धि धार्यते। यश्चैतान् पालयेत्

यत्नाद्दर्वैर्व यत्नतः। जगन्ति तेन सर्वाणि साक्षात् स्युः पालितानि च। यावद्गोपालने पुण्यं सक्रं पूर्वमनीषिभिः। उच्छोऽपि पालने तेषां फलं दशगुणं भवेत्। जगदेतद्धृतं सर्वमनड्वद्भिश्चराचरम्। इयं रैक्षावता रक्ष्यः पालनीयस्तु सर्वदा। धर्मोऽयं भूतले साक्षाद्ब्रह्मणा हितकारिणा। त्रैलोक्यं धारयायालम्बानाच्च प्रस्रवते। अनादेयानि घासानि विध्वंसति सकामतः। भ्रमति भूतले दूरसुत्तमाङ्गो न पूजयेत्। उत्पादयन्ति शस्यानि मर्दयन्ति वहन्ति च। स्थानयन्ति दवीयस्यसङ्क्षोवा कोऽधिको भुवि। स्वल्पेन दूराच्च वहन्ति भारं द्राक्षादि किञ्चिच्च खादयन्ति। स्वीयेन जीवेन परस्य जीवं रक्षन्ति पुष्णन्ति विवर्द्धयन्ति। पुण्यास्तु गावो वसुधातलेऽमी विश्वत्रयोपृष्ठगमैभारम्। भारः पृथिव्या दशताडिताया एकस्य चोक्षोऽपि साधुवाचः। एकेन दत्तेन इषेण येन दत्ता भवेयुर्ह्यग सौरभेयाः। माहेश्वरीयं धरणी समाना तस्माद्दशात् पूजितमस्ति नान्यत्। उत्पाद्य शस्यानि तृणञ्चरन्ति तदेव भूयः सकलं वहन्ति। न भारखिन्नाः प्रवदन्ति किञ्चिदक्षोऽहमाद्यार्यति जीवलोकः। तृतीयेऽह्नि चतुर्थे वा यदेवोक्षाऽऽढ्योभवेत्। तदा नस्या तु भेत्तव्या नैव प्राग्दुर्बलस्य च। नासाबेधनकीलन्तु खादिरं वाथ वैणवम्। द्वादशाङ्गुलकल्पार्यलज्जैस्त्रीणि समानि वा। शलाका द्विजानां इषमोक्षवानां तां याम्यदिग्द्वारवर्तीं विदध्यात्। सौम्या कक्षद्वारवर्तीं सुशोभानेयां अभिक्रन् घृतधारानथ। गावो इषो वा वृषभस्तिनो वा अन्योऽपि सर्वे पशवो द्विजेन्द्राः। याम्यां सखा दिङ्मुखसुत्तरादिङ्मुखांशकास्ते खलु बन्धनीयाः। शलाप्रवेशे इषमोपशूनां राजापि यत्नादयकक्षराणाम्। होमञ्च सम्पार्चिधि शास्त्रयुक्तं कुर्याद्विधिज्ञो द्विजपूजनञ्च। लाङ्गलं संप्रवक्ष्यामि यत्काष्ठं यत्प्रमाणतः। हलीशायास्तयामानं प्रतोदस्य युगस्य च। चत्वारिंशत्तथाचाष्टाङ्गुलानि कुहः क्रतः। अथार्द्धमङ्गुलैर्भक्तं हलीशावेधतश्च यः। षोडशैव तु तस्याधः षड्विंशतिस्तथोपरि। वेधस्तथा च कर्त्तव्यः प्रमाणेन षडङ्गुलः। अष्टाङ्गुलसरस्तस्य वेधाद्ध्वं प्रकल्पयेत्। पीवा दशाङ्गुला चोर्द्धं हस्त्याकृती ततः कृतः। अङ्गुलैश्चाष्टभिस्तत् स्याद्वेधः स्यात् प्रतिहारकः। तस्याधस्ताद्भवेत्वारि स वेधश्चतुरङ्गुलः। सार्द्धत्रैः शुभः कार्यस्ततोऽधस्त्र्यङ्गुलो भवेत्। पश्चाङ्गुलसरस्तस्याः शीरस्येति विभाजनम्। पृथुत्वं शिरसोधार्यं हस्ततलप्रमाणकम्। अङ्गुलानि तथा चाष्टौ उरसः पृथुता स्मृता। बन्धाङ्गुष्टिः प्रतोदारी षट्त्रिंशदङ्गुला भवेत्। सुतीक्ष्णलोहपाशस्य सङ्गादामादिदारुजत्। न शीरं शीरवृक्षस्य न बिल्वपिचुमर्दयोः। इत्यादीनां हि कुर्याणो न नन्दति चिरं गृही। प्राज्ञला सप्रहस्ता तु हलीशा विदुषां मता। तस्या वेधः सवर्णायाः कार्यो नवविवक्षिभिः। प्रजाक्षयोर्न तत्कर्त्तुः कीर्तिर्नौ तौ प्रकीर्तितौ। प्रमादतस्तु ताः कुर्वन् सशस्त्रो नरकं व्रजेत् गृही। नीचोऽहमानेन तज्ज्ञास्तां प्रवदन्ति हि। चतुर्हस्तं युगं कार्यं स्कन्धस्थानेऽर्धचन्द्रवत्। मेषशृङ्गाः कदम्बस्य शालाधन्यतमस्य च। सम्या वेधाङ्गिः कार्या दशाङ्गुलप्रमाणिका। तन्नाने च प्रवालो च तदन्तरदशाङ्गुलम्। प्रतोदोविंशमयस्त्रिभिर्न्यूनश्च चतुःकरः। तदग्रे तु प्रकर्त्तव्यं यवाकारं तु शोडवत्। हीनातिरिक्तं कर्त्तव्यं नैव किञ्चित्प्रमाणतः। कुर्यादनड्वान् दैन्याद्दैन्यात् नरकं व्रजेत्। यथाभीष्टं यथा शोभं वाहकस्य प्रमाणतः। भूमेश्च कर्षणायालं तज्ज्ञाः सर्वं वदन्ति हि। योजनं तु हलस्याथ प्रवक्ष्यामि यथा तथा। शोभनचलसंयुक्ते पुण्येऽह्नि तद्विधीयते। यत्र दिने तु वृध्येत तत्र कार्यं विजानता। यत्र कृत्यं हितं चापि पुण्यं वा मनसि स्मरेत्। तत्र विद्वान् द्विजश्रेष्टः पुण्येऽह्नि तद्धि कारयेत्। माहश्राद्धं द्विजः कृत्वा यथोक्तविधिना गृही। द्रव्यकालानुसारेण कुर्वतो धर्मतः क्रतिम्। प्रोक्षिखनं मण्डलं पुष्पधूपदीपैः समर्चयेत्। इन्द्राय च तथाग्नेयां मरुद्भ्यश्च यथा द्विजः। कुर्याद्धृतिं विद्वान् उदकानाद्यवाय च। तथा कुमार्यै सीतायै अनुमत्यै तथा बलिम्। नमः स्वाहेति मन्त्रेण कामयेदात्मनः शुभम्। दधिमन्धाक्षतैः पुष्पैः शमीपत्रैः सिलैस्तथा। संस्पृश्य सीरफालाग्रे हेम्ना वा रजतेन वा। घृतेन मधुसर्पिर्भ्यां कुर्याच्चैव प्रदक्षिणम्। अथोक्षणो मण्डलं कुर्यात् कृत्वा सीरप्रवाहणम्। पुष्पं लाङ्गलकल्याणं कल्याणाय नमोऽस्त्विति। सीतायाः स्थापनं कुर्यात् पाराशरमृषिं स्मरेत्। सीतां युञ्जत इत्याद्यैर्मन्त्रैः सीरं प्रवाहयेत्। दधिदूर्वाक्षतैः पुष्पैः शमीपत्रैश्च पुण्यदैः। सीतां पूज्य ततो भक्त्योरुक्षभ्यैर्विशाखकैः। सप्त धान्यानि चादाय प्रोक्ष्य पूर्वोक्तको

फली। तानि दत्त्वा खलक्षेत्रे किरन् भूमौ क्रमेद्विजः। न यवैर्न तिलैर्हीनं द्विजः कुर्याच्च कर्षणम्। तद्धि-हीनन्तु कुर्वाणं न प्रशंसन्ति देवताः। तिलमात्रच्युतं लोकं दक्षिणेशाम्पतेर्दिशि। तेन ह्रियन्ति पितरो यावन्न तिलविक्रयः। न विक्रीय तिलान् यस्तु तर्पयेल्लघिदेवताः। विमुच्य पितरस्तस्य प्रयान्ति तिलैः सह। उत्पाटनं यवस्तम्बपत्रेभ्यो भूतले पतत्। पयोदधिघृतादीस्तु तर्पयेल्लघिदेवताः। देवपर्जन्यभूसीरयोगात् क्रियः प्रजायते। व्यापारात् पुरुषस्यापि तस्मात्तल्लोद्यतो भवेत्। शालीन् मुद्गणकापांसं वार्ताकप्रभृतीनि च। वापयेल्लघिबीजानि सर्ववापी न सीदति। चन्द्रक्षये पतिर्विप्रो यो युनक्ति हयान् क्वचित्। तत्सङ्ग दशवर्षाणि त्यजन्ति पितरो हि तम्। चन्द्रक्षये द्विजो विद्वान् यो भुङ्क्ते तु परान्नम्। भोक्तुर्मासार्जितं पुण्यं न भवेदशनस्य तत्। चन्द्रार्कयोस्तु संयोगे कुर्याद्यः स्त्रीनिषेवणम्। रेतोभोजिनस्तस्य षण्मासं पितरः स्थिताः। चन्द्रक्षये च यः कुर्याच्छर-स्तरुनिकृन्तनम्। तत्पर्णसङ्गतया तस्य भवन्ति व्रणकृत्यकाः। वनस्पतिगते सोमे योऽध्वानं व्रजेच्छरः। प्रभ्रष्टद्विजकर्माणं तं त्यजन्त्यमरादयः। वासांसीन्दुप-क्षाग्रे यो रजकस्यामतिः क्षिपेत्। पिबन्ति पितरस्तस्य मासं वस्त्रजलन्तु तत्। सोमक्षये द्विजो याति तत्कामस्तु ऋतागमम्। तदेव पितृशापाग्निदग्धो नरकमाविशेत्। अष्टमी कामभोगेन ग्रही तैलोपभोगतः। कृष्णस्तु दन्त-काष्ठेन छिन्नस्यासप्रमं कुलम्। चन्द्राग्नीतौ पुरुषस्तु देवादद्यादमत्या यदि दन्तकाष्ठम्। सुराधिराजः सङ्क-तस्तु तेन घातः कृतः स्यात्पितृदेवतानाम्। तस्माच्च विप्राणानि गावश्चैव हयास्तथा। चरयाय विसृज्यन्ते आगताद्भिषि भोजयेत्। य उत्पाद्येह शस्यानि सर्वाणि हरणचारिणः। जगत्सर्वं हृतं यैस्तु पूज्यन्ते किन्न ते हयाः। येनकेन प्रदत्तेन दत्तं गोदशकम्भवेत्। यदूपेण स्थितो धर्मः पूज्यन्ते किन्न ते हयाः। पाल्याद्धि यत्फलन्तत्ते वाहनीया यथाविधि। स याति नरकं घोरं यो वाहयत्यपालयन्। नाधिकाङ्गो न हीनाङ्गः पुम्भि-राङ्गो न दूषितः। वाहनीयो हि युद्धेषु वाहयन् क्षयमाप्नुयात्। वर्जनीयाश्चदुग्धा गावो वै दोहने नरैः। पाल्या वै यत्नतः सर्वे पालयन् शुभमाप्नुयात्। अत्राधियेतान् हयमान् ससर्ज परमेश्वरः। अत्रे नाध्यायते सर्वं त्रैलोक्यं सचराचरम्। अग्निर्ज्वलति चात्राथ वाति चात्राय मारुतः। स्टङ्गणाति चात्रासां सूर्यो रस-मत्राय रश्मिभिः। अन्नं प्राणो बलं चात्रमन्नाज्जी-वितमुच्यते। अन्नं सर्वस्य चाधारः सर्वमन्ने प्रतिष्ठि-तम्। सुरादीनां हि सर्वेषामन्नं बीजं परं स्थितम्। तस्मादन्नात्परं तत्त्वं न भूतं न भविष्यति। द्यौः पुमा-न्खरयी नारी अम्भोबीजन्दिवच्युतम्। दुग्धाग्नीतोय-संयोगादन्नादीनां हि सम्भवः। आपोमूलं हि सर्वस्य सर्वमप्तु प्रतिष्ठितम्। आपोऽक्षतरसो ह्याप आपः शुक्रं बलं मद्यः। सर्वस्य बीजमापो वै सर्वमद्भिः समाहृतम्। सद्य आप्यायना ह्यापः आपो ह्यक्षतरा-ह्यतः। क्षिप्तिकालं विनाऽन्नाद्यैर्जीवन्ति मनुजादयः। न जीवन्ति विनाप्यद्भिस्तस्मादापोऽमृतं स्मृतम्। दत्तानि चाद्भिरेतस्यां किं न दत्तं क्षितौ भवेत्। तथाक्षेन प्रद-त्तेन सर्वं दत्तं भवेदिह। अतोऽन्नाद्यार्थभावेन कर्त्तव्यं कर्षणं द्विजैः। यत्नोक्तेन विधानेन वास्तुकादिप्रयो-जनम्। सीते! सौम्ये! कुमारि! त्वं देवि! देवा-र्चिते! शिवे। सदृक्षता च यथासिद्धा तथा मे सिद्धिदा भव। सकृत्सृनोर्विना नाम्ना सीतायाः स्थापनं विना। विनाप्यच्छोरक्षणार्थं सर्वं हरति राक्षसः। वापने लवने क्षेत्रे खले गन्धीप्रवाहणे। एष एव विधिर्ज्ञेयो धान्यानाञ्च प्रवेशने। देवालयतडागोद्याननिपानस्थानगो व्रजम्। सीमाग्रस्थानभूमिञ्च इक्षुक्षायाक्षितिं तथा। भूमिं निखातयूपाञ्च शयनस्थानमेव च। अन्यामपि हि चावाह्यां न कर्षेत् क्षणिकत् धराम्। शोभनां वाहवेद्भूमिं वर्षाभ्रकरकीदृताम्। वाहवेन्ग्रामसत्त्व न नदीप्लवनं तथा। यद्यसौ वाहवेल्लोभात्तद्वाहापि हि मानवः। क्षीयते सोऽचिरात्पापात् सपुत्रपशुबा-न्धवः। नरकं घोरतामिस्रं पापीयान् याति चैव सः। योऽपकृत्य परकीयां क्षणिकाङ्क्षयेद्धराम्। स भूमिस्थेन पापेन ह्यानन्नरकं व्रजेत्। न दूरे वाहयेत् क्षेत्रं नचैवात्यन्तिके तथा। वाहयेन्न पथि क्षेत्रं वाहयन्दुःख-भाग्भवेत्। क्षेत्रेक्षेत्रे क्षतिं कुर्यात् वाहको नाव-लोकयेत्। न लङ्घयेत्पशुर्यांच्च नातीयाद्याच्च शू-करः। बन्धश्च यत्नतः कार्यो खगादित्रासनाय च। अत्राप्युपद्रवं राजतस्करादिसमुद्भवम्। संरक्षेत्सर्वतो यत्नाद्यात् स्वल्पात्यये करात्। क्षणिकज्ञानवस्त्वेवं मत्वा धर्मं क्रमेद्धुवम्। अनवद्यां शुभां स्निग्धां जलाव-गाहनक्षमाम्। स्निग्धां हि वाहयेद्भूमिं यत्र विक्षवते

जलम् । वाङ्मेत्तु जलाभ्यर्थे अपुष्पैरुदकस्थजैः । शारदसङ्कैःस्थाने कलम्बादि वपेद्बुधः । अर्थाप्रुतासु कार्पासं तदन्यत्र तु शैमनम् । वसन्तग्रीष्मकालीय मप्सु स्निग्धेषु तद्विदः । केदारेषु तथा शालीन् जलोपान्तेषु चेक्षुकान् । इलाकशाकमूलानि कन्दानि च जलान्तिके । हृष्टिविभ्रान्तपानीयक्षेत्रेषु च यवादिकान् । तोयमांस मरुरांश्च खल्वान् खलकुलत्थया । समस्निग्धेषु चोप्यानि भूमिजीवान् विजानता । तिला बहुविधाश्चोप्या ऋतसीशणमेव च । मृदम्बुतो जगत्सर्वं यापयेत्कृष्णिकृच्छरः । सम्यग्लेङ्गरतः सर्वान् गोब्राह्मणादीन् स्वयङ्कृषी । चिन्तयेत्सर्वमात्मानं स्वयमेव कृषिं व्रजेत् । प्रथमं कृषिवाणिज्यं द्वितीयं योनिपोषणम् । तृतीयं विक्रयं, वक्रं चतुर्थं राजसेवनम् । नखैर्विलिखने यस्या न्यूर्दोषं मनीषिणः । तस्याः सीरविदारेण किञ्च पापं चितेर्भवेत् । तृणैकच्छेदमात्रेण प्रोच्यते क्षय आयुषः । असङ्ख्यकन्दनिर्यासदसङ्ख्यातसंवेदयम् । यदघं मत्स्यबधानां तथा सङ्घर्षिणामपि । अंहः कुक्कुटिकानाञ्च तदेव कृषिजीविनाम् । बधकानाञ्च यत्पापं यत्पापं शूगयोरपि । कदर्याणाञ्च यत्पापं तत्पापं कृषिजीविनाम् । वर्णानाञ्च सङ्कस्थानां कृषिहत्तुप्रपजीविनाम् । तदेनसो विशुद्ध्यर्थं प्राह सत्यवतीपतिः । द्वादशी नवमी वापि सप्तमः पञ्चमोऽपि वा । धान्यभागः प्रदातव्यो देहिनः क्षेत्रिणो ध्रुवम् । चक्षाक्षादूतभूमौ च विशां वैक्षेत्रभूमभवेत् । एकैकांशापकर्षः स्याद्यावद्दशमसप्तमौ । स्वामेशस्य त्वपक्षापि वर्णिभिः कृषिजीविभिः ॥ स स भागः प्रदातव्यो यतस्तौ कृषिभागिनौ । व्यूढौ च सर्वभावानां देयोऽंशः स्याच्चतुर्दशः । एकैकांशापकर्षस्तु यावद्दशमसप्तमौ । ब्राह्मणस्तु कृषिं कुर्वन्नाक्षेदिच्छया धराम् । न किञ्चित्कस्यचिद्दद्यात्स सर्वस्य प्रभुर्यतः । ब्रह्मा वै ब्राह्मणानां स्यात्प्रभुस्वस्रुजदादितः । तद्रक्षणाय बाहुभ्यामसृजत् क्षत्रियानपि । पशुपाल्याशनोत्पत्त्यै जस्थाञ्च तथा विशः । द्विजदासाय पणाय पद्भ्यां शूद्रमकल्पयत् । यत्किञ्चिज्जगती यत्र भूमेरुच्च गजादिकम् । स्वभावेनेह विप्राणां ब्रह्मा स्वयमकल्पयत् । ब्राह्मणश्चैव राजा च द्वावप्येतौ धृतव्रतौ । न तयोरन्तरं किञ्चित्प्रजा धर्मेण रक्षतः । तस्माच्च ब्राह्मणो दद्यात् कृषीणो धर्मतः कृषिम् । स्वामेशस्य त्वपक्षापि किञ्चिन्न्यूनसमो बलिम् । अथान्यत्सम्प्रवक्ष्यामि कृषिकच्छ्रविकारणम् । संयुक्तः कर्षकोयेन स्वर्गलोकमवाप्नुयात् । सर्वसत्वोपकाराय सर्वत्र कृषकक्षरः । कुर्यात् कृषिं प्रयत्नेन सर्वसत्वोपजीव्यकृत् । सर्वस्य स्थितिकारणाच्च देवर्षितृभिः पुनः । मनुष्याणान्तु पोषाय कृषिं कुर्यात् कृषीवलः । वयांसि चान्यसत्वानि क्षुत्तृष्णापीडितान् द्विजान् । विमोच्य सर्वतापेभ्यः स्वर्गलोकमवाप्नुयात् । चतुर्दिक्षु खले कुर्यात् प्राच्यामतिथिनाहतिम् । सैकद्वारपिधानाञ्च पिदध्याच्चैव सर्वतः । खरोष्ट्राजोरणांस्तत्र विशतस्तु निवारयेत् । शूकरश्वगवादिकाकोलूककपोतकान् । त्रिसन्ध्यं मोक्षणं कुर्यात् दानीयाम्बुक्षणाम्बुभिः । रक्षा च भक्षना कुर्याज्जलधाराभिरक्षणम् । त्रिसन्ध्यमर्चयेद्गीतां पराशरसुतं स्मरन् । प्रेतभूतादिनामानि न वदेच्च तदग्रतः । स्तुतिकाष्टहरणन्तत्र कर्त्तव्यं परिरक्षणम् । हरन्त्यरक्षितं यस्मात् रक्षांसि सर्वमेव हि । प्रशस्तं दिनपूर्वाह्णे नापराह्णे न सन्ध्ययोः । धान्योत्थानं सदा कुर्याद्गीतापूजनपूर्वकम् । यजेत खलमित्राभिः खलेरोत्थितएव हि । भक्त्या सर्वं प्रदत्तं हि तत्समस्तमिहाक्षयम् । खलयज्ञ दक्षिणेया ब्रह्मणा निर्मिता पुरा । भागधेयमयीं कृत्वा तां सङ्कल्पोद्भवां भाविकाम् । शतक्रत्वादयो देवाः पितरः सोमपादयः । सनकादिमनुष्याश्च ये चान्ये दक्षिणाशनाः। तानुद्दिश्य च विप्रेभ्यो दद्याच्च प्रथमं कृषी । विवाहे खलयज्ञे च संक्रान्तौ यज्ञकर्मणि च । पुत्रे जाते व्यतीपाते दत्तं भवति चाक्षयम् । अन्येषामर्थिनां पश्चात्काकानां पुनः पुनः । दीनानामथनाथानां कृमिनां कृशरीरिणाम् । क्षीणान्ववधिरादीनां सर्वेषामपि दीयते । वर्णानां पतितानाञ्च शुद्धशूद्रान्नमर्पयेत् । चाण्डालानाञ्च पाकानां प्रीत्यान्नुद्धावचाददत् । ये केचिदागतास्तत्र पूज्यास्ते विधिवद्द्विजाः । लोकपालैः सौरिभिः सर्वैः वर्णिभिर्ब्रह्मभिः । दत्त्वा स्वस्तिवाचा क्रमेणाथ विसर्जयेत् । तत् कृत्वा स्वगृहं गच्छेच्छ्राद्धमभ्युदयं चरेत् । शरद्धेमन्तवसन्तनाम्नैः आद्यमाचरेत् । नाक्षत्राश्नन्नदश्नीयादन्नं सदयमश्नुते । कृत्वा सत्याद्य धान्यानि खलयज्ञं समाप्य च । सर्वसत्वहिते युक्त स्तस्मात्त सुखी भवेत् । कृषेरन्यतमोधर्मो न भवेत् कृषितोऽन्यतः । न सुखं कृषितोऽन्यत्र यदि धर्मेण कर्षति । अवस्त्रत्वं निरन्नत्वं कृषितो नैव जायते । अनातिथ्यञ्च दुष्टत्वं गोभतो न कदाचन । निर्धनत्वव-

नातिभूषये । नापि परिवदे श्वश्रूं सर्वदा परिवन्दिता । अवधानेन सुभगे ! नित्योत्थिततयैव च । भर्तारो वशगा मम श्वश्रूश्शुश्रूषयैव च । नित्यमार्यामहं कुर्वी वीरसूं सत्यवादिनीम् । स्वयं परिचराम्येतां पानाच्छादनभोजनैः । नैतामतिशये जातु वस्त्रभूषणभोजनैः । नाहं परिवदे वाचं तां पृथां पृथिवीसमाम् । अष्टावस्ये ब्राह्मणानां सहस्राणि स नित्यदा । भुञ्जते रुक्मपात्रेषु युधिष्ठिरनिवेशने । अष्टाशीतिसहस्राणि स्नातका गृहमेधिनः । त्रिंशद्दासीक एकैको यान् बिभर्त्ति युधिष्ठिरः । दशान्यानि सहस्राणि येषामन्नं सुसंस्कृतम् । क्षियते रुक्मपात्रीभिर्यतीनामूर्ध्वरेतसाम् । तान् सर्वान्सपरीवारेण ब्राह्मणान् ब्रह्मवादिनः । यथाहं पूजयामि स्म पानाच्छादनभोजनैः । शतं दासीसहस्राणि कौन्तेयस्य महात्मनः । कम्बुकेयूरधारिण्यो निष्ककण्ठ्यः स्वलङ्कृताः । महार्हमाल्याभरणाः सुवस्त्रायन्दनोचिताः । मणीन् क्षेम च विभ्रत्यो नृत्यगीतविशारदाः । तासां नाम च रूपञ्च भोजनाच्छादनानि च । सर्वासामेव वेदाहं कर्म चैव कृताकृतम् । शतं दासीसहस्राणि कुलीनस्य धीमतः । पात्रीहस्ता दिवारात्रमतिथीन् भोजयन्त्युत । शतमश्वसहस्राणि दश नागायुतानि च । युधिष्ठिरस्यानुयात्रमिन्द्रप्रस्थनिवासिनः । एतदासीत्तदा राज्ञो यन्मां पर्यपालयत् । येषां संख्यां विधिञ्चैव प्रदिशामि शृणोमि च । अन्नःपुराणां सर्वेषां भृत्यानाञ्चैव सर्वशः । आगोपालाविपालेभ्यः सर्वं वेद कृताकृतम् । सर्वं रात्तः सत्तदयमायञ्च व्ययमेव च । एकाहं वेद्मि कल्याणि ! पाण्डवानां यशस्विनि ! । मयि सर्वं समासक्तं कुटुम्बं भरतर्षभाः । उपासनारताः सर्वे घटन्ति स्म वरानने ! । तमहं भारमासक्तमप्रधृष्यं दुरात्मभिः । सुखं सर्वं परित्यज्य रात्रिन्दिवानि घटामि वै । अक्षय्यं वरुणस्यैव निधिपूर्णमिवोदधिम् । एकाहं वेद्मि कोपं वै पतीनां धर्मचारिणाम् । अनिशायां निशायाञ्च सहायाः क्षुत्पिपासयोः । आराधयन्त्याः कौरव्यांस्तुल्या रात्रिरहश्च मे । प्रथमं प्रतिबुध्यामि चरमं संविशामि च । नित्यकालमहं सत्ये ! एतत् संवेशनं मम । एतज्ज्ञानाच्चहं कर्तुं भर्तुः संवेशनं महत् । असत्स्त्रीणां समाचारं नाहं कुर्याञ्च कामये । तच्छ्रुत्वा धर्मसहितं व्याहृतं कृष्णया तदा । उवाच सत्या सत्राजित्यं पाञ्चालीं धर्मचारिणीम् । अभिपद्यस्व पाञ्चालि ! यास्यसीति । शमस्व मे । कामकारः स्त्रीणां हि सोपहासं प्रभाषितम्" २२२अ०।

"द्रौपद्युवाच । इमन्तु ते मार्गमपेतमोहं वक्ष्यामि चित्तग्रहणाय भर्तुः । त्वञ्चित् यथावत् सखि ! वर्त्तमाना भर्तारमाराधयितासि कामिनीभ्यः । नैतादृशं दैवतमस्ति सत्ये ! सर्वेषु लोकेषु सदेवकेषु । यथा पतिस्त्वह्यि सर्वकामा लभ्याः प्रसादात् कुपितश्च हन्यात् । तस्मादयत्नं विविधाश्च भोगाः शय्यासनान्युत्तमदर्शनानि । वस्त्राणि माल्यानि तथैव गन्धाः स्वर्गश्च लोको विपुला च कीर्त्तिः । सुखं सुखेनेह न जातु लभ्यं दुःखेन साध्वी लभते सुखानि । सा कृष्णमाराधय सौहृदेन प्रेम्णा च नित्यं प्रतिकर्मणा च । तथाऽऽसनैश्चारुभिरप्रमाल्यैर्दाक्षिण्ययोगैर्विविधैश्च गन्धैः । अस्याः प्रियोऽस्मीति यथा विदित्वा त्वामेव संक्ष्यति तद्विधत्स्व । श्रुत्वा स्वरं द्वारगतस्य भर्तुः प्रत्युत्थिता तिष्ठ गृहस्य मध्ये । इहा प्रविष्टं त्वरितासनेन पाद्येन चैनं प्रतिपूजयस्व । संप्रेषितायाश्च चैव दास्यास्तत्याय सर्वं स्वयमेव कार्य्यम् । जानातु कृष्णस्तव भावमेतं सर्वात्मना मां भजतीति सत्ये ! । त्वत्सन्निधौ यत् कथयेत् पतिस्ते यद्यप्यगुह्यं परिरक्षितव्यम् । काचित् सपत्नी तव वासुदेवं प्रत्यादिशेत्ते न भवेद्विरागः । प्रियांश्च रक्षांश्च हितांश्च भर्तुर्ज्ञात्वा भोजयेथा विविधैरुपायैः । द्वेष्यैरपत्यैरहितैश्च तस्य मिथ्यञ्च नित्यं कुहकोद्यतैश्च । मदं प्रमादं पुरुषेषु हित्वा संयच्छ भावं प्रतिपद्य सौम्यम् । प्रद्युम्नशाम्बावपि ते कुमारौ नोपासितव्यौ रहिते कदाचित् । महाकुलीनाभिरपापिकाभिः स्त्रीभिः सतीभिस्तव सख्यमस्तु । चण्डाच्च शौण्डाच्च महानसाच्च चोराच्च दुष्टाप्रलाच्च वर्ज्यात्राः । एतद्वयस्यं भगदैवतञ्च स्वर्ग्यं तथा यत्तनिवर्हणञ्च । महार्हमाल्याभरणाङ्गरागा भर्तारमाराधय पुण्यगन्धा" २२३अ०।

"गृहिणी सचिवो रहः सखी प्रियशिष्या ललिते कलाविधौ" रघुः "न गृहं गृहमित्याहुर्गृहिणी गृहमुच्यते" उत्त० स्मृतिः "प्रायेण गृहिणीनेत्राः कन्याहेषु कुटुम्बिनः" कुमा० "शुश्रूषस्व गुरून् कुरु प्रियसखीवृत्तिं सपत्नीजने भर्तुर्विप्रकृतापि रोषणतया मास्म प्रतीपं गमः । भूयिष्ठं भव दक्षिणा परिजने भोगेष्वनुत्सेकिनी यान्त्येवं गृहिणीपदं युवतयो वामाः कुलस्याधयः" शकु० "ज्वालागताभ्यो ऽधिगृहं गृहिणीभ्यः" माघः ।

जलम्। वाहयेत्तु जलाभ्यर्थी व्युप्तसेकसमन्वैः। शारदसङ्कैःस्थाने कलम्बादि वपेद्बुधी। अर्धांशुतास्तु कार्पासं तदन्यत्र तु हैमनम्। वसन्तग्रीष्मकालीय मप्सु स्निग्धेषु तद्विदः। क्षेदारेषु तथा शालीन् जलोपान्तेषु चेक्षुकान्। इलाकशाकमूलानि कन्दानि च जलान्तिके। दृष्टिविभ्रान्तपानीयक्षेत्रेषु च यवादिकान्। तोयमांसं मरुरांश्च खल्वान् खलकलनवा। समस्निग्धेषु क्षोण्यानि भूमिजीवान् विजानता। तिला बहुविधाक्षोथा अतसीशणमेव च। सदम्बुतो जगत्सर्वं वापयेत्कृषिकृन्नरः। सम्यग्क्षेत्रतः सर्वान् गोब्राह्मणादीन् स्वयङ्गृही। चिन्तयेत्सर्वमात्मानं स्वयमेव कृषिं व्रजेत्। प्रथमं कृषिवाणिज्यं द्वितीयं योनिपोषणम्। तृतीयं विक्रयं, वक्रं चतुर्थं राजसेवनम्। नखैर्विलिखने यस्या ब्रूयुर्दोषं मनीषिणः। तस्याः सीरविदारेण किल्ल पापं चितेर्भवेत्। तृणैकच्छेदमात्रेण प्रोच्यते क्षय आयुषः। असङ्ख्यकन्दनिर्यासदसङ्ख्यातसंवेदयम्। यदघं मत्स्यबधानां तथा सङ्घर्षिणामपि। अंहः कुक्कुटिकानाञ्च तदेव कृषिजीविनाम्। बधकानाञ्च यत्पापं यत्पापं शूगयोरपि। कदर्याणाञ्च यत्पापं तत्पापं कृषिजीविनाम्। वर्णानाञ्च स्वकस्थानां कृषिदत्तुप्रजीविनाम्। तदेनसो विशुद्ध्यर्थं प्राह सत्यवतीपतिः। द्वादशो नवमो वापि षष्ठमः पञ्चमोऽपि वा। धान्यभागः प्रदातव्यो देहिनः क्षेत्रिणो ध्रुवम्। क्षत्रक्षात्तदूतभूमौ च विशां वैक्षेत्रभुग्भवेत्। एकैकांशापकर्षः स्याद्यावद्दशमसप्तमौ। यामेशस्य नृपस्यापि वर्षिभिः कृषिजीविभिः॥ स स भागः प्रदातव्यो यतस्तौ कृषिभागिनौ। व्यूढौ च सर्वभावानां देयोऽंशः स्याच्चतुर्दशः। एकैकांशापकर्षस्तु यावद्दशमसप्तमौ। ब्राह्मणस्तु कृषिं कुर्वन्नाहयेदिक्ष्वया धराम्। न किञ्चित्कस्यचिद्दद्यात्स सर्वस्य प्रभुर्यतः। ब्रह्मा वै ब्राह्मणानां स्यात्प्रभुस्वयम्भुजदादितः। तद्रक्षणाय बाहुभ्यामसृजत् क्षत्रियानपि। पशुपाल्यागनोत्पन्नै जरूथ्याञ्च तथा विशः। द्विजदासाय पथ्याय पद्भ्यां शूद्रमकल्पयत्। यत्किञ्चिज्जगतो यत्र भूमेरुच्च गजादिकम्। स्वभावेनेह विप्राणां ब्रह्मा स्वयमकल्पयत्। ब्राह्मणश्चैव राजा च द्वावप्येतौ धृतव्रतौ। न तयोरन्तरं किञ्चित्प्रजा धर्मेण रक्षयेत्। तस्माच्च ब्राह्मणो दद्यात् कुर्वाणो धर्मतः कृषिम्। यामेशस्य नृपस्यापि किञ्चिन्नितमसौ बलिम्। अथान्यत्सम्प्रवक्ष्यामि कृषिकर्तृविकारणम्। संगृह्णः कर्षकोऽत्र स्वर्गलोकमवाप्नुयात्। सर्वसत्वोपकाराय सर्वत्र कृषिकरः। कुर्यात् कृषिं प्रयत्नेन सर्वसत्वोपजीव्यकृत्। सर्वस्य स्थितिकारणात्स देवपितृभिः पुनः। मनुष्यान्नु पोषाय कृषिं कुर्यात् कृषीवलः। वयांसि चान्यसत्वानि क्षुत्तृष्णापीडितान् द्विजान्। विमोच्य सर्वतापेभ्यः स्वर्गलोकमवाप्नुयात्। चतुर्दिक्षु खले कुर्यात् प्राच्यामतिथिनाहतिम्। सैकद्वारविधानाच्च विदध्याच्चैव सर्वतः। खरोष्ट्राजोरणांस्तत्र विशतस्तु निवारयेत्। शूकरग्रहगालादिकाकोलूककपोतकान्। त्रिसन्ध्यं मोक्षणं कुर्यात् दानीयाम्बुप्रपाम्बुभिः। रक्षा च भक्षणा कुर्याज्जलधाराभिरक्षणम्। त्रिसन्ध्यमर्चयेल्लोकान् पराशरमृषिं स्मरन्। प्रेतभूतादिनामानि न वदेच्च तदग्रतः। सूतिकाम्लदुवस्तत्र कर्त्तव्यं परिरक्षणम्। हरन्त्यरक्षितं यस्मात् रक्षांसि सर्वमेव हि। प्रशस्तं दिनपूर्वाह्णे नापराह्णे न सन्ध्ययोः। धान्योत्थानं सदा कुर्याल्लोकापूजनपूर्वकम्। यजेत खलभिक्षाभिः खलेरोहिणएव हि। भक्त्या सर्वं प्रदत्तं हि तत्समस्तमिहाक्षयम्। खलयज्ञ दक्षिणैषा ब्रह्मणा निर्मिता पुरा। भागधेयमयीं कृत्वा तां सृष्ट्वन्त्वोह मालिकाम्। शतक्रत्वादयो देवाः पितरः सोमपादयः। सनकादिमनुष्याश्च ये चान्ये दक्षिणाशनाः। तानुद्दिश्य च विप्रेभ्यो दद्याच्च प्रथमं फलम्। विवाहे खलयज्ञे च संक्रान्तौ ग्रहणेषु च। पुत्रे जाते व्यतीपाते दत्तं भवति चाक्षयम्। अन्येषामर्थिनां पश्चात्काकाद्यां पुनः पुनः। दीनानाथव्यङ्गानां कृमिनां कृशरीरिणाम्। क्लीवान्धबधिरादीनां सर्वेषामेव दीयते। वर्णानां पतितानाञ्च दुःखभूतानि तर्पयेत्। चाण्डालानाथ पाकानां प्रीत्याल्पाल्पं ददत्। ये केचिदागतास्तत्र पृच्छास्ते विधिवद्द्विजाः। लोकपः सीरिभिः सर्वैः वर्षिभिर्गृहमेधिभिः। दत्त्वा स्वन्नतया वाचा क्रमेणाथ विसर्जयेत्। तत् कृत्वा स्वगृहं गच्छेच्छादमभ्युदयं चरेत्। शरद्धेमन्तवसन्तनवान्नैः चाद्यमाचरेत्। नाकृत्वाऽन्नदशीयादन्नमतदमश्नुते। कृत्वा सत्याद्य धान्यानि खलयज्ञं समाप्य च। सर्वसत्वहिते युक्त रहसस्तु सुखी भवेत्। क्षेत्रेऽन्यतोधर्मो न भवेत् कृषितोऽन्यतः। न सुखं कृषितोऽन्यत्र यदि धर्मेण कर्षति। अवस्त्वं निरन्नत्वं कृषितो नैव जायते। अनातिथ्यञ्च दुष्टत्वं गोमतो न कदाचन। निर्धनत्वम-

नातिभूष्ये । नापि परिवदे श्वश्रूं सर्वदा परिवन्दिता । अवधानेन सुभगे ! नित्योत्थिततयैव च । भर्तारो वशगा मह्यं गुरुशुश्रूषयैव च । नित्यमार्यामहं कुर्वी वीरसूं सत्यवादिनीम् । स्वयं परिचरास्येतां पानाच्छादनभोजनैः । नैतामतिशये जातु वस्त्रभूषणभोजनैः । नाहं परिवदे वाचं तां पृथां पृथिवीसमाम् । अष्टावस्ये ब्राह्मणानां सहस्राणि स्म नित्यदा । भुञ्जते रुक्मपात्रेषु युधिष्ठिरनिवेशने । अष्टाशीतिसहस्राणि स्नातका गृहमेधिनः । त्रिंशद्दासीक एकैको यान् बिभर्त्ति युधिष्ठिरः । दशान्यानि सहस्राणि येषामन्नं सुसंस्कृतम् । क्षियते रुक्मपात्रीभिर्यतीनामूर्ध्वरेतसाम् । तान् सर्वान् सहस्रेण ब्राह्मणान् ब्रह्मवादिनः । यथार्हं पूजयामि स्म पानाच्छादनभोजनैः । शतं दासीसहस्राणि कौन्तेयस्य महात्मनः । कम्बुकेयूरधारिण्यो निष्ककण्ठ्यः स्वलङ्कृताः । महार्हमाल्याभरणाः सुवस्त्रोत्तरवन्दनोचिताः । मणीन् क्षेम च बिभ्रत्यो नित्यगीतविशारदाः । तासां नाम च रूपञ्च भोजनाच्छादनानि च । सर्वासामेव वेदाहं कर्म चैव कृताकृतम् । शतं दासीसहस्राणि कुन्तीपुत्रस्य धीमतः । पात्रीहस्ता दिवारात्रमतिथीन् भोजयन्त्युत । शतमन्यसहस्राणि दश नागायुतानि च । युधिष्ठिरस्यानुयात्रमिन्द्रप्रस्थनिवासिनः । एतदासीत्तदा राज्ञो यन्मर्त्यैरप्यपालयत् । येषां संख्यां विधिञ्चैव प्रदिशामि ग्रहणेमि च । अन्तःपुराणां सर्वेषां भक्तानाञ्चैव सर्वशः । आगोपालाविपालेभ्यः सर्वं वेद कृताकृतम् । सर्वं रात्तः ससदयमायञ्च व्ययमेव च । एकाहं वेद्मि कल्याणि ! पाण्डवानां यशस्विनि ! । मयि सर्वं समासक्तं कुटुम्बं भरतर्षभाः । उपासनरताः सर्वे घटन्ति स्म वरानने ! । तमहं भारसाधनमप्रध्यं दुरात्मभिः । सुखं सर्वं परित्यज्य रात्रिन्दिवानि घटामि वै । अक्षय्यं वस्वक्षयञ्चैव निधिपूर्णमिवोदधिम् । एकाहं वेद्मि कोषं वै पतीनां धर्मचारिणाम् । अनिशायां निशायाञ्च सहायाः क्षुत्पिपासयोः । आराधयन्त्याः कौरव्यांस्तुल्या रात्रिरहश्च मे । प्रथमं प्रतिबुध्यामि चरमं संविशामि च । नित्यकालमहं सत्ये ! एतत् संवं मम । एतज्ज्ञानात्यहं कर्तुं भर्तुः संवशनं महत् । असत्स्त्रीणां समाचारं नाहं कुर्यांञ्च कामये । तच्छ्रुत्वा धर्मसहितं व्याहृतं कृष्णया तदा । उवाच सत्या सत्रज्ञ पाञ्चालीं धर्मचारिणीम् । अभिपद्यस्व पाञ्चालि ! यास्यसीति । शमस्व मे । कामकारः स्त्रीणां हि सोपहासं प्रभाषितम्" २२२ऊ०।

"द्रौपद्युवाच । इमन्तु ते मार्गमपेतमोहं वक्ष्यामि चित्तग्रहणाय भर्तुः । यस्मिन् यथावत् सखि ! वर्त्तमाना भर्तारमाराधयितुं क्षमासि कामिनीभ्यः । नैतादृशं दैवतमस्ति सत्ये ! सर्वेषु लोकेषु सदेवकेषु । यथा पतिस्तस्य हि सर्वकामा लभ्याः प्रसादात् कुपितस्य हन्यात् । तस्मादपत्यं विविधाश्च भोगाः शय्यासनान्युत्तमदर्शनानि । वस्त्राणि माल्यानि तथैव गन्धाः स्वर्गश्च लोको विपुला च कीर्त्तिः । सुखं सुखेनेह न जातु लभ्यं दुःखेन साध्वी लभते सुखानि । सा कृष्णमाराधय सौहृदेन प्रेम्णा च नित्यं प्रतिकर्मणा च । तथाऽऽसनैश्चारुभिरग्र्यमाल्यैर्दाक्षिण्ययोगैर्विविधैश्च गन्धैः । अस्याः प्रियोऽस्मीति यथा विदित्वा त्वामेव संक्षिप्यति तद्विधत्स्व । श्रुत्वा स्वरं द्वारगतस्य भर्तुः प्रत्युत्थिता तिष्ठ गृहस्य मध्ये । इहा प्रविष्टं त्वरितासनेन पाद्येन चैनं प्रतिपूजयस्व । संप्रेषितायामथ चैव दास्यामुत्थाय सर्वं स्वयमेव कार्य्यम् । जानातु कृष्णस्य भावमेतं सर्वात्मना मां भजतीति सत्ये ! । त्वत्सन्निधौ यत् कथयेत् पतिस्ते यद्यप्यगुह्यं परिरक्षितव्यम् । काचित् सपत्नी तव वासुदेवं प्रत्यादिशेत्ते न भवेद्विरागः । प्रियांश्च रक्षांश्च हितांश्च भर्तुस्तान् भोजयेथा विविधैरुपायैः । द्वेष्यैरपत्यैरहितैश्च तस्य भिद्यस्व नित्यं कुहकोद्यतैश्च । मदं प्रमादं पुरुषेषु हित्वा संयच्छ भावं प्रतिसन्दधासि । प्रद्युम्नशाम्बावपि ते कुमारौ नोपासितव्यौ रहिते कदाचित् । महाकुलीनाभिरपापिकाभिः स्त्रीभिः सतीभिस्तव सख्यमस्तु । चण्डाच्च शौण्डाच्च महानसाच्च चौराच्च दुष्टाद्यपनाच्च वर्ज्याः । एतद्ध्रुवस्य भगदैवतस्य स्वर्ग्यं तथा शत्रुनिबर्हणञ्च । महार्हमाल्याभरणाङ्गरागा भर्तारमाराधय पुण्यगन्धा" २२३ऊ० ।

"गृहिणी सचिवो रहः सखी प्रियशिष्या ललिते कलाविधौ" रघुः "न गृहं गृहमित्याहुर्गृहिणी गृहमुच्यते" उ० त० स्मृतिः "प्रायेण गृहिणीनेत्राः कन्यार्थेषु कुटुम्बिनः" कुमा० "शुश्रूषस्व गुरून् कुरु प्रियसखीवृत्तिं सपत्नीजने भर्तुर्विप्रकृतापि रोषणतया मास्म प्रतीपं गमः । भूयिष्ठं भव दक्षिणा परिजने भोगेष्वनुत्सेकिनी यान्त्येवं गृहिणीपदं युवतयो वामाः कुलस्याधयः" शकु० "ज्वालागताश्चोऽधिगृहं गृहिण्यः" माघः ।

गृहीत त्रि॰ ग्रह–कर्मणि क्त। १धीकृते॰ २ज्ञाते, ३आप्ते ४धृते च। "गृहीतवत्तु दुग्धवनीयवेगा" कुमा॰। "गृहीत इव केशेषु मृत्युना धर्ममाचरेत्" मोतिगा॰ "पत्नी गृहीतव्रता" वेणी॰ भावे क्त। ५यज्ञपात्रादौ न॰ ततः तत्करोतमनेन इच्छादि॰इनि। गृहीतिन् क्रतयज्ञपात्रे त्रि॰ स्त्रियां ङीप्।

गृहीतगर्भा स्त्री गृहीतो गर्भो यया। गर्भधार्यां तल्लक्षणादि गर्भवतीशब्दे २५५५पृ॰ उक्तम्। [च ङेमच॰।

गृहीतदिक् त्रि॰गृहीता दिक् येन। १पलायिते २तिरोहिते

गृह्णु त्रि॰ग्रह–क्नु। यद्गृहीतरि "दद्रु भोजो यो गृह्णवे ददात्यन्नकामाय चरते कृशाय" ऋ॰ १०।११७।२

गृहेरुह पु॰ गृहे रोहति रुह–क–अलुक् ७त॰। गृहजातवृक्षे स चाप्रशस्तः यथाह भा॰ आनु॰ १२७अ॰ "भिन्नभाण्डस्य खट्वाञ्च कुक्कुटं शुनकं तथा। अप्रशस्तानि सर्वाणि यश्च वृक्षो गृहेरुहः"

गृहेनर्दिन् पु॰ गृहे एव नर्दति न युद्धे नर्द–इनि पाक्षे-समितादिस॰। कापुरुषे रणभीरौ गृहे आस्फालयितरि।

गृहेश पु॰ ६त॰। १गृहस्वामिनि गृहेश्वरादयोऽप्यत्र "अर्थैश्चेत्किन् स्थाने गृहेश्वराधिपतिश्चेद्वा" हलायु॰ ५।३७। २राशीश्वरे च।

गृहोलिका स्त्री गृहे वलते वल–चलने कुन् बा॰सम्प्र॰। जेष्ठभ्रां गृहगोधिकायाम् हेमच॰।

गृह्य पु॰ ग्रह–यदाश्चैरीत्यादिना क्यप्। गृहासन्ने १खने २खने च पक्षरादिवन्मध्येन परतन्त्रीकृतत्वात् तेषां तथात्वम्। ३गृहे भवद्वारे, न॰ ४अर्थैरिधि ५आयते, ६खपचीरे पक्षे च त्रि॰मेदि॰। "गृह्यगृह्यावचने विपश्चितः" किरा॰ "अगृह्यां गीतकामत्वाद्वेणुगृह्यामनिन्दिताम्" भट्टिः। गृहे भवः यत् ७गृह्यभवे, वस्तुनि त्रि॰। ष्ठगृह्यनिमित्तेऽग्नौ हुतसंस्कर्मणि च "उक्तानि वैतानिकानि गृह्याणि वक्ष्यामः" आश्व॰ गृ॰१।१२। गृह्यनिमित्तोऽग्निः गृह्यः। तत्र भवानि कर्माण्यपि तथा-त्वया गृह्याण्युच्यन्ते। गृह्यशब्दो भार्यायां शालायाञ्च वर्त्तते। यथा "अगृहो गृह्यमागतः" इत्यत्र हि पूर्वो गृह्यशब्दो भार्यावचनः उत्तरस्तु शालावचनः येषाञ्च भार्यासंयोगादुत्पन्नाग्नौ हूयानि कर्माणि प्रवर्त्तन्ते तेषामयं गृह्यशब्दो भार्यावचनः। येषान्तु दायविभागकालेऽग्निरुत्पद्यते तेषां शालावचनः। "भार्यादरग्निदायादिर्वा तस्मिन् गृह्याणि" इति गोतमसूत्रात्" नारा॰ "तेऽस्य गृह्याणि कर्माणि कुर्युर्वैतानिकानि च।" वैश्वदेवस्य सिद्धस्य गृह्येऽग्नौ विधिपूर्वकम्। अग्निहोत्रं समादाय गृह्याग्निपरिचारकम्" इति च मनुः। तदस्यास्ति साध्यतया अच्। १०वेदादितत्कर्मप्रयोगशास्त्रे गोभिलसूत्रादौ ग्रन्थभेदे च। गृह्यमग्निमधिकृत्य ग्रन्थभेदेन गृह्य-कारादय गोभिलाश्वलायनकात्यायनादयोऽतिविख्याताः। ११नगरवाह्यस्थे ग्रामे स्त्री टाप् मेदि॰। स्वार्थे क। गृह्यक तत्रैवार्थे। संज्ञायां कन्। गृह्यासक्ते पक्षि-न्यादौ अमरः।

गृ विज्ञापने चुरा॰ आत्म॰सक॰ सेट्। गारयते अजीगरत्।

गृ शब्दे क्र्यादि॰पर॰पा॰ सक॰ सेट्। गृणाति अगारीत् जगार जगरतुः। गीर्यते गीर्णः। गीः।

अनु+संसनविषयहर्षाङ्गव्यापारस्वप्नोत्साहने तद्योगे पूर्वव्यापारस्य कर्त्ता संप्रदानसंज्ञो भवति यथा अध्वर्युः होत्रे अनुगृणाति होता प्रवर्त्तं संसति तमध्वर्युः प्रोत्साहयतीत्यर्थः सि॰कौ॰

प्रति+अनुगृणातिवत् अर्थादि अस्यापूर्वप्रयोगो नास्ति इति "अवादृपः" पा॰ सूत्रे भाष्यकार आह स्म

गृ निगरणे तु॰ पर॰ सक॰ सेट्। अस्य वा रस्य लत्वम् गिरति गिलति अगारीत् अगालीत् जगार (ल)। जगरतुः। गीर्वते गीर्णः गीर्णिः गिरः गिरिः

अव+नीचैःकथने आत्म॰ अवगिरते नीचैः कथयतीत्यर्थः।

उद्+वमने। "रोमन्थः उद्गोर्थं चर्वणम्" सि॰कौ॰ "अनु-द्गोर्णसुरायुधम्" कुमा॰।

सम्+प्रतिज्ञायाम् आत्म॰। संगिरते प्रतिजानीते इत्यर्थः। "वसूनि देशांश्च निवर्त्तयिष्यन् राज्ञः ऋषः संगिरमाण एव" भट्टिः।

गेद् गतौ भ्वा॰ आत्म॰सक॰ सेट्। गेदते अगेदिष्ट अजीगेदत। जिगेदे। उदित्। गेदित्वा गेत्वा।

गेन्दु(न्दु)क पु॰ गन्दतीति गद–ड गः उन्दुरिव स्वार्थे कन्। गन्दुके वस्त्रनिर्मिते गोलाकारे क्रीडनके। पृषो॰ वा डत्वे गेण्डुकश्च तत्रार्थे। पृषो॰ गेन्दू (न्दु) कोऽपि दीर्घमध्यः। तत्रार्थे जटाधरः।

गेय त्रि॰गै–कर्त्तरि नि॰ यत्। १गायके "गेयो गायकः साम्नाम्" त्रि॰कौ॰ कर्मणि यत्। २गातव्ये त्रि॰ "अरण्ये गेयं साम" भावे यत्। ३गीतौ न॰ "गेये क्वेन विनीत वाम्" रघुः। "वर्षैः कतिपयैरेव वयितस्य खरैरव। अनन्ता पाण्डुमयस्येह गेयस्येव विचिन्तता" भट्टः

गेव सेवने भ्वा०आ०सक०सेट्। गेवते अगेविष्ट। अदित् अजिगेवत। जिगेवे। [जिगेषे अदित् अजिगेषत्। गेष्णुः।

गेष अन्वेषणे भ्वा० आत्म० सक० सेट्। गेषते अगेषिष्ट।

गेष्णु पु० गेष–ग्वा० न। १पर्वणि यन्नौ (गाँठि) २अवयवभेदे "तस्यर्क् च साम च गेष्णौ" छा०उ० "तस्य ऋक् च साम च गेष्णौ पृथिव्यादुल्लक्षणे पर्वणी" भा० "तस्य यद्रूपमसीत्य तद्रूपं यौ गेष्णौ तावस्य गेष्णौ" छा०उ०

गेष्णु त्रि० गै–इष्णुच्। गायने त्रि०कौ०

गेह न० गेहे गर्हेशो गन्धर्वो वा दैहः दैप्सितो यत्र। गृहे। "जामयोयानि गेहानि" "एतान्यपि सतां गेहे नोच्छिद्यन्ते कदाचन" मनुः। "श्रुत्वा गेहं भटिति यमुना मङ्गुरङ्गं जगाम" पदाङ्कदूतः "गेहदाहेऽग्नये" ज्ञानवते पुरोडाशः "काम्या०औ०२५।४।२६। "यजमानस्य निवासगृहदाहेऽग्निगृहदाहे वा ज्ञानवद्भ्यामग्निसहितेभ्य पुरोडाशः निर्वाप्य इत्यर्थः" कर्कः।

स्वामिभेदादिना गेहानां नामभेदा हेमचन्द्रेण दर्शिता यथा

"प्रासादो देवभूपानां हर्म्यन्तु धनिनां गृहम्। मठाद्य सन्न्यासस्थाः क्षुद्रशास्त्रप्रतिवेशिनः। पर्णशालोटजश्चैव विहारो जिनसद्मनि। गर्भागारे प्रवरको वासौकः शयनाश्रयम्। भाण्डागारं तु कोष्ठः स्याच्छ्रद्धशाला शिरो गृहम्। कुप्यशाला तु सन्धानी कायमानो हरीतकिः। कोष्ठीयन्तु हविर्गेहं प्राग्वंशः प्राग् हविर्गृहात्। आग्नेयं शालिगृहमास्थानगृहमिन्द्रकम्। तैलिशाला यन्त्रगृहमरिष्टं सूतिकागृहम्। सूदशाला रसवती पाकस्थानं महानसम्। हस्तिशाला तु चतुरं वाजिशाला तु मन्दुरा। सन्दानिनी तु गोशाला चित्रशाला तु जालिनी। कुम्भशाला पाकपुटी तन्तुशाला तु मर्त्तिका। सापितशाला वपनी शिल्पा खरकुटी च सा। आवेशनं शिल्पिशाला सत्रशाला प्रतिश्रयः। आश्रमस्तु मुनिस्थानमुपवृत्तस्त्वनिकाश्रयः। प्रपा पानीयशाला स्याद्धङ्गा तु मदिरागृहम्। पक्वः प्रवरावासो धोषस्त्वाभीरपल्लिका। पण्यशाला निषद्याट्टो हट्टा विपणि रापणः। वेश्याश्रयः पुर वेशो मण्डपस्तु जनाश्रयः"। ततोऽस्यर्थे इनि। गेहिन् मतुप् मस्य वः। गेहवत् गृहस्वामिनि स्त्रियां ङीप्। गेहं गेहकञ् साध्यतयाऽस्त्यस्याः इनि ङीप्। भार्यायाम् "मद्गेहिन्याः प्रिय इति सखे! चेतसा कातरेण" मेघ०।

गेहेस्त्रेडिन् त्रि० गेहे एव स्त्रेडते स्त्रेड–इनि पाले० स०। स्वकार्यासक्ते युद्धादावनासक्ते कापुरुषे। युक्तारोहादित्वात् अस्य आद्युदात्तता।

गेहेदाहिन् त्रि० गेहे दहति दह–इनि पाले०स०। कापुरुषे एवं गेहेविजितिन् गेहेव्याड गेहेमेहिन् गेहेदग्ध गेहेष्ट इत्यपि पाले०स०। कापुरुषे आद्युदात्तता च

गेहेशूर पु० स्वगृहएव शूरः पाले समितादि स०। कापुरुषे युक्तारोहा० आद्युदात्तता [अमरः।

गेहोपवन न० गेहसमीपस्थमुपवनम्। गृहसन्निकृष्टोपवने

गेह्य त्रि०गेहे भवः गेहाय हितं वा यत्। १गेहभवे २गेहहिते च। "यक्ष्मे धायुरदधा मर्त्यायाभक्तं चिद्भजते गेह्यम्" ऋ० ३।३०।७

गै गाने भ्वा०पर०सक०अनिट्। गायति। अगासीत्। जगौ जगतुः। गीयते गेयं गानं गीता गीतः गीतिः। गायकः गायनः गाथा गातुम्। गापयति जिगीषति। "यशोऽपि तावत् प्रभवामि गातुम्" नैष० "गेये केन विनीतं वाम्"? रघुः। "तत्र च गाथा गायन्ति साम्ना परमवल्गुना" भा०व० १७८१ "गीतज्ञो यदि गीतेन नाप्नोति परमं पदम्" याज्ञ० "जयोदारथं वाङ्गोगोपायामास किञ्चिदानम्" रघुः।

अनु+पश्चाद्गाने। अनुगायति "काचिदञ्चितपञ्चमरागम्" अभि+आभिमुख्येन समन्ताच्च गाने "राजधानीषु राज्ञां च समाजेष्वभ्यगायताम्" रामा० बा०

अव+निन्दने अवगीतम्।

उत्+उच्चैर्गाने। "उद्गास्यतामिच्छति किन्नराणाम्" कुमा०। "उद्गीयमानं वनदेवताभिः" रघुः।

उप+समीपगाने। "शिष्यप्रशिष्यैरुपगीयमानमवेहि तन्मण्डनमिश्रधाम" शङ्करदिग्विजयः। आधिक्येन गाने च "निष्टप्ततप्तैरुपगीयमानात्" भाग०[गमेश्चापि" मनुः।

नि+निश्चयेन गाने। "तथा च श्रुतयो ब्रह्मयोनिगीताश्च

परि+सर्वतो गाने। "तस्य कर्माण्युदाराणि परिगीतानि सूरिभिः" भाग०।१।१७ "ऋषिभिः परिगीतानि छन्दोभिश्च पृथक् पृथक्" गीता

प्र+प्रकर्षेण गाने। "यावत् कीर्त्तिर्मनुष्यस्य पृथक् लोके प्रगीयते" भा०उद्यो० ११८४

वि+निन्दने। "खलया न विगीयते ऋषैः "विगीयसे(क्षेतक!) मत्प्रवदेहदाहिना" नैष० विविधगाने च। [गायकैः।

सम्+सम्यग्गाने। "सङ्गीयमानसत्कीर्त्तिः सङ्गीभिः सुर-

गैर त्रि० गिरौ भवः यत्। १पर्वतभवे स्त्रियां ङीप्। सा च (विष्णाक्रान्ता) २लाक्षाद्रौ ङीत्वं रत्नमा० (गेरिमाटि) ३उपधातुभेदे न० शब्दार्थचि०।

गैरकंबूल न० नीलकण्ठताजकोक्ते वर्षलग्नकालिक यदुयोगभेदे तल्लक्षणादि तत्रोक्तं यथा

"यस्याधिकारः खर्चादि शुभोऽशाऽशुभोऽपि वा। केनापि दग्धमूर्त्तिश्च स शून्याध्वग इष्यते। तस्मात्कार्य्येऽर्थयोरित्थशाले शून्याध्वगः शशी। उक्तादिपदशून्यत्वा न्नेत्थशालोऽस्ति केनचित्। यद्यन्यर्क्षं प्रविश्यैषः स्वभोऽस्येत्थशालवान्। गैरकंबूलमेतत्तु पदोनेनाशुभं स्मृतम्। उदा०। त्रिपसे सुखमिति प्रश्ने सिंहलग्नं रविः क्रिये। षष्ठांशैः, सुखपः कुम्भे भौमोऽंशैः रविभिस्तयोः। इत्थशालोऽस्ति तत्रेन्दुः कन्यायां चरमेऽंशके। खर्चादिपदहीनस्य नेत्थशालोऽस्ति केनचित्। खर्चोक्तेन शशिनाऽन्यर्क्षस्थेनेत्थशालवत्। गैरकंबूलमन्येन सक्तायाल्लाभदायकम्"। पृथो० गैरकंबूलमयत्न

गैरायण पुंस्त्री गिरेर्गोत्रापत्यम् अश्वा० फक्। गिरिगोत्रापत्ये।

गैरिक न०गिरौ भवम् ठञ्। (गेरिमाटि)उपधातुभेदे तद्गुणादि भावप्र० उक्तं यथा। "गैरिकं रक्तधातुश्च गैरेयं गिरिजं तथा। सुवर्णगैरिकं स्वल्पं ततो रक्ततरं स्निग्धं तत्। गैरिकहितं स्निग्धं मधुरं तुवरं स्थिरम्। चक्षुष्यं दाहपित्तास्रकफक्षिकाविषापहम्" [राजनि०।

गैरिकाक्त पु० गैरिकमिवाक्ति पुष्पमस्य। जलमधुके वृक्षे।

गैरेय न० गिरौ भवम् ढक्। शिलाजतुनि अमरः। (गेरिमाटी) ख्याते उपधातुभेदे भावप्र०।

गो पुंस्त्री गच्छत्यनेन गम-करणे डो। १खनामख्याते पशुभेदे दुग्धस्य दानसाधनत्वात् स्त्रीगव्याच्च दानद्वारा स्वर्गगतिसाधनत्वाच्च तथात्वम्। गतिसाधनतया तस्य तथार्थत्वयोगेन यौगिकत्वेऽपि योगरूढत्वम्। एतेन दर्पणकृता "व्युत्पत्तिलभ्यस्य शब्दार्थत्वे गौः शेते इत्यत्रापि लक्षणा स्यात् "गमेर्डोः" इति व्युत्पादितस्य गोशब्दस्य शयनकालेऽपि प्रयोगात्" इति यदुक्तं तत् यामादिकमेव गमेर्डोः इत्यूणादिप्रत्ययस्य कर्तृवाचकत्वानियमात् "ताभ्यामन्यत्रोणादयः पा०सूत्रे ऊणादीनां कर्मादानसंप्रदानभिन्नार्थत्वनियमात् अत्र करणार्थकडोप्रत्ययेन व्युत्पादितस्य गोशब्दस्य शयनकालेऽपि गतिसाधनस्वरूपयोग्यवाचकत्वात् रूढ्युपधायकत्वनियमे यानाशयनादीनामपि गतिशयनादिविगमकाले तच्छब्दवाच्यतानुपपत्तेः। गच्छते त्रायते अनेन करणे, शीघ्रं गच्छति कर्त्तरि वा डो। २रश्मौ किरणे तस्य शीघ्रगामित्वात् चाक्षुषज्ञानहेतुत्वाच्च तथात्वम् सूर्यादिकिरणसंपर्कं विना चाक्षुषज्ञानासम्भवात् रश्मेर्ज्ञानसाधनत्वात् तथात्वम्। ३वज्रे ४क्षीरके तस्यापि कठिनद्रव्येऽपि गतिमत्त्वात् तथात्वम्। कर्मणि डो। ५स्वर्गे कर्मभिर्गम्यमानत्वात् तस्य तथात्वम् मेदि०। ६चन्द्रे विद्वः कर्मभिस्तल्लोकगमनात्तस्य तथात्वम् ७सूर्ये ८गोमेधयज्ञे भानुदीक्षितः। सूर्यस्य शीघ्रगतिकत्वात् अर्चिरादिअधिष्ठातृतया क्षातिवाहिकत्वात् तथात्वम्। "संवत्सरादादित्यमादित्याच्चन्द्रमसम्" छा०उ०। क्षातिवाहिकशब्दे ६५१पृ०द्रष्टव्यम् ९औषधनामौषधे राजनि०। तस्य गोनामकत्वात् तथात्वम्। करणे डो। १०नेत्रे स्त्री तस्य चाक्षुषज्ञानसाधनत्वात् तथात्वम्। कर्त्तरि डो। ११वाणे स्त्री तस्य शीघ्रगतिकत्वात् तथात्वम्। कर्मणि डो। १२दिशि स्त्री दिशां प्रकाशनकाले गम्यमानत्वात्तथात्वम्। १३वाचि स्त्री तस्याः ज्ञानहेतुत्वात् तथात्वम्। आधारेडो। १४भुवि स्त्री तस्याः गमनाधारत्वात् तथात्वम् १५जले च स्त्रीव०व० केचित् तस्य निम्नगतित्वात् १६पशुमात्रे अमरः १७मातरि १८लोमनि भानुदीक्षितः। १९इन्द्रियाणि २०नवसंख्यायाम् गोर्भूमेर्नवखण्डात्मकत्वात् आकाशे सदागतिमद्द्रव्याणां नवत्वाद्वा तत्संख्यासाम्यात् तथात्वम्। २१पुंलक्ष्मभार्यायां गविजातयशब्दे २५६६ पृ०द्रष्टव्यम्। ज्ञानहेतुत्वात् २२इन्द्रिये गोचरः। पदान्तस्थितस्योपसर्जनस्य समा०हस्वः गीतगुः सङ्गतगुः। अस्य उत्तरपदस्थत्वे तत्पुरुषे पचि समा०। पुंसि परमगवः स्त्रियां पित्त्वात् ङीप् दुग्धगवी गोः पुरीषं मयट्। गोमय (गोबर) ख्याते पदार्थे न० गौर्विद्यतेऽस्य इनि गोमिन्। मतुप्। गोमत् गोविशिष्टे गोस्वामिनि च त्रि० स्त्रियां ङीप्। गोःस्थाने गोश्च् गोगोष्ठ गोस्थाने न० गोमांसगुणा भावप्र०उक्ता यथा "गोमांसं तु गुरु स्निग्धं पित्तश्लेष्मविवर्द्धनम्। दृंहणं वातहृत् बल्यमपथ्यं पीनसप्रभुत्। गोरिदं यत् "व्यन्योषि प्रत्यये" पा० अवादेशः। गव्य गोदुग्धादौ भावप्र० तद्गुणाद्युक्तं यथा

"गव्यं दुग्धं विशेषेण मधुरं रसपाकयोः। शीतलं स्नेहबृत् स्निग्धं वातपित्तास्रनाशनम्। दोषधातुबल-

स्रोतःकिञ्चित्कफोदरं गुरु। जरासमस्तरोगाणां शालिरुत् सेविनां सदा"। चोरवर्गशब्दे २२७७ पृ० विवृतिः। गव्यदधिगुणाः भावप्र०उक्ता यथा

"गव्यं दधि विशेषेण स्वाद्वम्ल रुचिप्रदम्। पवित्रं दीपनं हृद्यं पुष्टिकृत् पवनापहम्। उक्तं दध्नामशेषाणां मध्ये गव्यं गुणाधिकम्"

"तक्रवर्गीतगुणाः" तक्रोक्ता यथा

"नवनीतं स्निग्धं गव्यं हृद्यं वर्णबलाग्निकृत्। संग्राहि वातपित्तासृक्कृच्छ्रार्शोऽतिसारहृत्। तद्वितं बालवृद्धे विशेषादक्षतं शिशोः"

तद्घृतगुणाः भावप्र० उक्ता यथा

"गव्यं घृतं विशेषेण चक्षुष्यं हृद्यमग्निकृत्। स्वादुपाकरसं शीतं वातपित्तकफापहम्। मेधाबलवयस्कान्योजस्तेजोवृद्धिकरं परम्। अलक्ष्मीपापरक्षोघ्नं वयसः स्थापकं गुरु। बल्यं पवित्रमायुष्यं सुमङ्गल्यं रसायनम्। सुगन्धं रोचनं चारु सर्वाज्येषु गुणाधिकम्"।

तन्मूत्रगुणा भावप्र० उक्ता यथा

"गोमूत्रं कटु तीक्ष्णोष्णं क्षारं तिक्तं कषायकम्। लघ्वग्निदीपनं मेध्यं पित्तश्लेष्मकफवातहृत्। प्लीहगुल्मोदरानाह कण्डूकुष्ठक्षतक्षयरोगजित्। किलासमदवातामवस्तिरुक् कृमिनाशनम्। कासश्वासापहं शोथकामलापाण्डुरोगहृत्। कण्डूकिलासमदप्लीहकुष्ठार्शोरोगान् गुल्मातिसारभगन्दरमूत्ररोधान्। कासं सकृच्छ्रजठरक्रिमिपाण्डुरोगात् गोमूत्रमेकमपि पीतमपाकरोति। सर्वेष्वपि च मूत्रेषु गोमूत्रं गुणतोऽधिकम्। अतोऽविशेषात् कथने मूत्रं गोमूत्रमुच्यते। प्लीहोदरघ्नं कासगोयकृत्प्लीहापहम्। प्लीहगुल्मजलजातकामलापाण्डुरोगहृत्। कषायं तिक्तमोष्णञ्च पुरस्तात् कथितं गुणैः"।

तत्र गौरध्याम् "पङ्के गौरिव सीदति" भा०वि० १६। "यथा गौर्गवि चाफला" मनुः "गोप्लवत् विहितः कल्पः" प्रा०त० चिन्ता० धृतिः "पञ्चगवीगुल्मेषु चाजागरीत्" मल्लि० "प्रेतोद्भूतपतङ्गशृङ्गगवयोष्ट्रैयङ्गवीनं रसात्" नैष० नेत्रादिषु "गोमध्यमध्ये! सुरगोधरे! हे सद्गुणगोभूषणकिङ्करीष्याम्। मादेन गोध्वक्षिखरेषु मत्ता रटन्ति गोकर्णगरीरभाजः" चोरः। "गामाप्तसारां रघुरप्यवेक्ष्य" रघुः "चित्रावरोधाङ्गनसत्यवेन गाम्" माघः। क्तिादौ यत्। गव्य गौरिव क्तादौ भुवि पदानि गोशब्दस्य अतिपरे परूपं गोऽयं प्रकृतिवद्भावश्च गो अयं अग्निपरे वा अवङ् गवाग्नम्। अश्वशब्दे परे गवाश्वादिः इन्द्र एकवद्भावः। गवाश्वम्। [वैद्यक०

गोकण्ठ पु० गोः पृथिव्याः कण्ठ इव। (गोखुरी) क्षुपभेदे

गोकण्टक पु०न० गोः भूमेः कण्टक इव। १विकङ्कतवृक्षे (वरुचि) राजनि०। २गोः खुरे च मेदि०३ततस्ये स्फुटे ४विषमोद्भूते हेमच०।

गोकर्ण पु० गौर्नेव कर्णौ यस्य। १सर्पे, "ऋत्यन्ति गोकर्णशरीरभाजः" इति चौरः। गोरिव कर्णौ यस्य। २अश्वतरे, ३रक्षोभेदे, ४गणदेवताभेदे, ५धनाभिकायुतविल्वताडुमाने, भेदे ६तीर्थभेदे च मेदि०। ७रुद्रभेदे। "गजेन्द्रकर्ण! गोकर्ण! पाशिकर्ण! नमोऽस्तुते" भा०शा० २८६ अ० "अश्वावलम्ब गोकर्ण" आगमः "गोकर्णो भद्रकर्णी स्यात्" देवीगीता "ततोऽभिव्रज्य भगवान् केशवांस्तु त्रिगर्त्तकान्। गोकर्णाख्यं शिवक्षेत्रं सान्निध्यं यत्र धूर्जटेः"। भाग० टकारोक्ते शिवलिङ्गभेदे च "गोकर्णभारभूतेशौ तत्कर्णौ परिकीर्त्तितौ" काशीख० ३१अ०।

गोकर्णी स्त्री गोः कर्ण इव पत्रमस्याः गौरा० ङीष्। भूमौ-लतायाम् अमरः। [अणोप्रकृत्वात् न ह्रस्वः। गवादौ

गोका स्त्री गौरेव स्वार्थे क।१"केशः"पा०सूत्रे पूर्णकारेण

गोकामुख पु० भारतवर्षस्थे पर्वतभेदे "भारतेऽस्मिन् वर्षे सरिच्छैलाः सन्ति बहवः। मलयमङ्गलप्रस्थ इत्यु-क्रमे "गोको गोकामुखश्च इन्द्रकीलः कामगिरिरिति चान्येच शतसहस्रशः शैलाः" भाग० ५।१६।५।१७श्लो०

गोकिराटिका स्त्री गां वाचं किरति छ-क तथा ततो टित्वात् ङीप्-एयुल्। सारिकायाम् खगभेदे हेमच०।

गोकिराटा स्त्री गोकिरा वाणीकिरा ततो अटति अट अच् गौरा० ङीष्। सारिकायाम् राजनि०।

गोकि(कील) पु०गोः पृथिव्याः कील इव। १मूषले २वृक्षे च शब्दार०। पृषो० ह्रस्वमध्यः तत्रार्थे हेमच०।

गोकुल न० कुत०। १गोसमूहे "यामानु वा यद्गोकुलान्" भा०व०१७।७८। गवां कुलमत्र। २गोष्ठे "गोकुले कन्दु-माद्य यां तैलयन्त्रे जुवल्लयोः। अधीमांसानि गौरीणि स्त्रीषु बालातुरेषु च" त्रि०त०धृता०। मथुरापुर्याः पूर्व-दक्षिणस्थे यमुनापारवर्त्तिनि व्रजाख्ये श्रीनन्दगोप वासस्थाने च "कालेन व्रजता तात! गोकुले रामकेशवौ" जातुर्व्यां सह शब्दिन्यां रिङ्गमाणौ विजह्रतुः" भाग० १०स्क०। गोऽभिज्ञोऽस्त्र अण् तत्र वसति ख। पित्रा-

दिक्रमेण तद्वासिजनेषु आर्षे प्रयोगे क्वचित् एकार्थेऽपि लुक्। "लोकं विकृष्टमुनयोऽपि लोकलं च" भा० २।८।१२ "गोकुलं गोकुलवासिजनम्" श्रीधरः

गोकुलिक त्रि०गोर्नेलस्य कुलः संख्यानमत्व। १केकरे। गवि पङ्गुस्थगव्यां कुलिकः जडत्व। २पङ्गुस्थगव्युपेचडे च मेदि०।

गोक्षत न०३त०। १गोमये २गवा चरिते त्रि०।

गोक्षोडक पुंस्त्री गवि क्षोड इव कायति के-क। सुश्रुतोक्ते प्रतदखगभेदे कपोतादिगणे "कृसिङ्गगोक्षोडकेत्याद्या "प्रतदाः" इत्युक्तं सुश्रुतेन।

गोक्षा स्त्री गां भूमिं खनत्यनया खन-ड। नखे पाठान्तरे क्रोडादिषु पाठात् स्वार्थेऽण्युपसर्जने न ङीष्

गोक्षु(क्षु)र पु०गोः पृथिव्याः क्षु(क्षु)र इव। स्वनामख्याते क्षुपभेदे। तत्पर्यायगुणाद्युक्तं भावप्र०

"गोक्षुरः क्षुरकोऽपि स्यात् त्रिकण्टः स्वादुकण्टकः। गोकण्टको गोक्षुरको वनशृङ्गाट इत्यपि। मूलं कषाय दंष्ट्रा च तथा स्यादिक्षुगन्धिका। गोक्षुरः शीतलः स्वादुर्बलकृद् वस्तिशोधनः। मधुरो दीपनो हृद्यः पुष्टिदश्चाश्मरीहरः। प्रमेहश्वासकासार्शःकृच्छ्रहृद्रोगवातनुत्"।

स च लघुपञ्चमूलान्तर्गतोदशमूलान्तर्गतश्च यथाह तत्रैव "शालपर्णी पृश्निपर्णी वार्त्ताकी कण्टकारिका। गोक्षुरः पञ्चभिश्चैतैः कनिष्ठं पञ्चमूलकम्। पञ्चमूलं लघु स्वादु बल्यग्निवातनाशनम्। नात्युष्णं दीपनं हृद्यं वाहि ज्वर श्वासाश्मरीप्रणुत्" "उभाभ्यां पञ्चमूलाभ्यां दशमूलमिदं कृतम्। दशमूलं त्रिदोषघ्नं श्वासकासशिरोरुजः। तन्द्राशोथज्वरानाहपार्श्वपीडाऽरुचीर्हरेत्।"

गोक्षुरिः इकारान्तोऽपि तत्रार्थे शब्दर०पृषो०साधु।

गोगोयुग न०गवोर्द्वित्वम् गो+द्वित्वे गोयुगच्। गवोर्द्वित्वे।

गोगोष्ठ न० गोः स्थानम् गो+स्थाने गोष्ठच्। गवां स्थाने।

गोगोष्टि स्त्री गौर्गोष्टिः जाता समासे परनिपातः। सकृत्प्रस्तायां गवि स्त्रि०को०।

गोग्रन्थि पु० गोर्ग्रन्थिः। १करीषे। गोर्ग्रन्थिर्यत्र। २गोस्थाने। ३गोर्ग्रन्थिरिव। गोग्रन्थिकोषधौ मेदि०।

गोघ्न त्रि० गां हन्ति हन-क ६त०। गोहन्तरि। तद्व्रतं मनुना दर्शितं यथा

"उपपातकसंयुक्तोगोघ्नोमासं यवान् पिबेत्। क्षत्रवधोवैश्यहोऽर्द्धमासं चर्मणा तेन संवृतः। चतुर्थकालमश्नीयाद्-

यावत्स्यात् शुद्धिरुत्तमा। गोमूत्रेण चरेत् स्नानं द्वौ मासौ नियतेन्द्रियः। दिवानुगच्छेत्तागारं निशम्भूमिं रजः पिबेत्। शुश्रूषित्वा नमस्कृत्वा रात्रौ वीरासनं वसेत्। तिष्ठन्तीमनुतिष्ठेत्तु व्रजन्तीमप्यनुव्रजेत्। आसीनासु तथासीनोनियतोवीतमत्सरः। आतुरामभिशस्तां च चौरव्याघ्रादिभिर्भयैः। पतितां पङ्कमग्नां वा सर्वोपायैर्विमोचयेत्। उष्णे वर्षति शीते वा मारुते वाति वा भृशम्। न कुर्वीतात्मनस्त्राणं गोरक्षन्वै कदाचन। आत्मनो यदि वान्येषां दृष्टे चैवं स्खलेऽथवा। भक्षयन्तीं न कथयेत् पिबन्तं चैव वत्सकम्। ऋतेन विधिना यस्तु गोघ्नोगामनुगच्छति। स गोहत्याव्रतं पार्थ त्रिभिर्मासैर्व्यपोहति। इमंमेकादशं गाश्च दद्यात् सुचरितव्रतः। अविद्यमाने सर्वस्वं वेदविद्भ्योनिवेदयेत्। "गोघ्नवत् विहितः कल्पश्चान्द्रायणमथापि वा" प्रा०त० स्मृतिः। गोर्हन्यतेऽस्मै सम्प्रदाने क। २अतिथिभेदे तस्यागमने हि मधुपर्कार्थं गोहननं विहितम् "महोक्षं वा महाजं वा श्रोत्रियाय प्रकल्पयेत्" इति स्मृतेः कलौ तु तन्निषेधः "मधुपर्के पशोर्वधः" इत्यादिश्रुतेः। "गोघ्नवत् विहितः कल्पश्चान्द्रायणमथापि वा" प्रा०त० स्मृतिः। गोर्हन्यतेऽस्मै सम्प्रदाने क। २अतिथिभेदे तस्यागमने हि मधुपर्कार्थं गोहननं विहितम् "महोक्षं वा महाजं वा श्रोत्रियाय प्रकल्पयेत्" इति स्मृतेः कलौ तु तन्निषेधः "मधुपर्के पशोर्वधः" इत्यादिश्रुतेः। "गोघ्नवत् विहितः कल्पश्चान्द्रायणमथापि वा" प्रा०त० स्मृतिः। गोर्हन्यतेऽस्मै सम्प्रदाने क। २अतिथिभेदे तस्यागमने हि मधुपर्कार्थं गोहननं विहितम् "महोक्षं वा महाजं वा श्रोत्रियाय प्रकल्पयेत्" इति स्मृतेः कलौ तु तन्निषेधः "मधुपर्के पशोर्वधः" इत्यादिश्रुतेः।

गोघृत न०गोः पृथिव्या इतमिव तस्य पोषकत्वात्। १इष्टिजले त्रिका०। ६त०। २गव्ये घृते च

गोचन्दन न०गोशीर्षाख्ये चन्दनम् श०त०। गोशीर्षाख्ये चन्दने "गोचन्दनामोक्षनिकामधुकमाक्षिकं मधु। सुवर्णमिति संयोगः पेयः सौभाग्यमिच्छता" हेमतः

गोचर पु० गावः इन्द्रियाणि चरन्त्यस्मिन् नि०अच्। १इन्द्रियवेद्ये रूपरसादौ विषये। एकैकेन्द्रियविषयाश्च शब्दादयस्तत्र श्रोत्रस्य शब्दो विषयः, एवं त्वचः स्पर्शः, नेत्रस्य रूपम्, जिह्वाया रसः, घ्राणस्य गन्धः। २ज्ञानमात्रविषयेऽपि "सदसत्संशयगोचरोदरी" नैष० "अवाङ्मनसगोचरम्" वेदा०सा० गोचरत्वं ज्ञाननिरूपिता विषयता सा च स्वरूपसम्बन्धविशेषः। कर्त्तरि अच्। ३भूमिचरे त्रि०। गावश्चरन्त्यस्मिन् अच्। ४गवां प्रचारस्थानादौ, "उपारताः पक्षिमृगाश्चगोचरात्" किरा० ५गन्तव्यदेशे "इन्द्रियाणि हयानाहुर्विषयांस्तेषु गोचरान्" कठोप० ६देशमात्रे, "ज्ञानमस्ति समस्तस्य जन्तोर्विषयगोचरे" देवीभा० ७गवां व्योमगतिमतां यष्ट्याद्यां चरः भावे अच्। गतिभेदे च "गोचरे वा विलम्बे वा वै यष्ट्यारिष्टसूचकाः" ज्यो० तन्निमित्ततया-

स्थस्य यत्। ज्योतिषोक्ते जन्मराश्यर्धधिकेषु तत्तत् स्थानेषु दृक्सूर्यादियहगमननिमित्तशुभाशुभनिरूपणे। ज्योतिषोक्त गोचरशुद्धशुद्धी वामवेध दक्षिणवेधादिकं च सु॰चि॰ गो॰धा॰ उक्तम् यथा

"सूर्यो रसान्त्ये खयुगेऽग्निनन्दे शिवाग्नयोर्भौमगती तमश्च। रसाब्धयोर्नाभगरे गुणान्त्ये, चन्द्रोऽम्बराब्धौ गुणनन्दयोश्च (१)। खाभाष्टमे चाद्यगरे रसान्त्ये नगद्वये, शोडिशरेऽब्धिरन्ध्रे। रसाब्धयोर्नाभविधौ खनागे लाभव्यये, देवगुरुः शराब्धौ (२)। द्वयन्त्ये नवाग्ने द्विगुणे शिवाग्नौ, शुक्रः कुनागे हिमगेऽग्निरूपे। वेदाम्बरे पक्षनिधौ गजेषौ नन्देशयोर्भौतुरगे शिवाग्नौ (३)। क्रमाच्छुभो विद्ध इति यदैः स्वात्पितुः सुतस्यात्र न वेधमाहुः। दृष्टोऽपि खेटो विपरीतवेधाच्छुभो द्विकोणे शुभदः सितेज्ञः (४)। खजन्मराशेरिह वेधमाहुरन्ये यदाधिष्ठितराशितः सः। हिमाद्रिविन्ध्यान्तर एव वेधो न सर्वदेशेष्विति काश्यपोक्तिः (५)। जन्मर्क्षं निधनं यदे जनिभतो घातः, क्षितिः शीर्ष्यधा चिन्ता कौक्ष्यकलत्रदौस्थ्यसुतयः क्षुर्मानभाशः सुखम्। लाभोपाय इति क्रमात्सदशुभध्वस्थे जगः खर्षगोदानं शान्तिरथोयदं त्वशुभदं नो वीक्षमाहुः परे (६)। पापान्तःपापयुक् द्यूने पापाच्चन्द्रः शुभोऽप्यसत्। शुभांशे चाधिमित्रांशे गुरुदृष्टोऽशुभोऽपि सत् (७)। सितासितादौ सदृक्षे चन्द्रे पक्षौ शुभाशुभौ। व्यत्यासे चाशुभौ मोक्षौ सदृक्षेऽजवलं त्विदम् (८)। वज्रं शुक्रेऽजे सुसक्ता,प्रवालं भौमे,ऽजौ गोमेदमार्कौ सुनीलम्। केतौ वैदूर्यं, गुरौ पुष्पकं च्ये पाषिः, प्राड्माणिक्यमर्के तु मध्ये (९)। माणिक्यसक्ताफलविद्रुमाणि नास्कृतं पुष्पकवज्रनीलम्। गोमेदवैदूर्यकमर्कतः सूरब्राब्धयोश्चस्य सदे सुवर्णम् (१०)। धार्यं राज्ञावर्क्षं राहुकेत्वोरौर्ध्यं शुक्रेन्दोश्च, सक्ता गुरोस्तु। लोहं मन्दस्यारभान्वोः प्रवालं ताराजन्मर्क्षान्तिराहुक्षितः स्यात्" (११)। मू॰ चि॰।

"अथ गोचरफलं व्याख्यायते तत्र जन्मराशितः प्रोक्तनिषिद्धस्थानस्थितेदानीन्तनग्रहवशेन शुभाशुभनिरूपणं गोचर उच्यते तत्र यद्यपां गोचरफलं शुभाशुभरूपनपजातिकाद्वयेनेन्द्रवज्रया चोपजातिका पूर्वार्द्धेन चाह सूर्यो रसान्त्ये इत्यादौ सर्वोद्दयोविभाग्यैकवद्भवतीति समाहारद्वन्द्व एकवचनान्तः। शिवाग्नयो-रित्यादावितरेतरयोगद्वन्द्वः खाम्बराब्धित्यादिषु त्वनन्यभागमशासनमिति नुमभावोध्येयः एवं सर्वत्र व्याख्येयम्। अत्र चतुर्थश्लोकेनान्वयः खजन्मराशेरिति षष्ठश्लोकस्य पदमत्राध्याहार्यम्। तत्र सूर्योपदः खजन्मराशेः रसान्त्ये क्रमाच्छुभो विद्धश्च स्यात्। सूर्यः खजन्मराशेः षडाशाद्यदि षष्ठस्याने तदा शुभम् अतः जन्मराशेर्द्वादशस्थानस्थितार्केदन्ये यदाः क्षुत्तदा विद्धः शुभोऽप्यशुभफलदाता अत्र शनैश्चरस्य सूर्यसमत्वान्नेह पौनरुक्त्यं कार्यं यतः पितृजनकस्य सुतसम्बन्धिनं वेधं नाहुः सुतस्यापि पितृसम्बन्धिवेधं नाहुः। तथा खयुगे जन्मराशेर्दशमे सूर्यः शुभषष्ठस्थानस्थितार्केदन्ये यदाः शनिवर्जितास्तु क्षुत्तदा विद्ध इत्येवं श्लोकत्रयं सम्यगव्याख्येयम्। तथा खग्निनन्दे तृतीयनवमयोः, शिवाग्नयोरेकादशपञ्चमयोः सूर्यः क्रमाच्छुभो विद्धश्च ज्ञेयः उक्तञ्च नारदेन "शुभोऽर्कौ जन्मतस्त्र्यायदशषष्ठस्तु विध्यते। जन्मतो नवपञ्चाभ्यु व्ययगैर्व्यर्कभिक्षदा"। अथ भौमेति। भौमगती तमो राहुश्चैते यदाः खजन्मराशितः रसाब्धयोः षष्ठसप्तमस्थानयोः क्रमाच्छुभा विद्धाश्चेत्यर्थः परन्तु शनेः सूर्यवेधो नास्तीत्युक्तमेवेति। यदाह वसिष्ठः "त्रिषडेकादशस्थितो धराहृतो रिष्फधर्मसुतसंस्थैः। दिनकरतनयोऽपि शुभो न विद्धते खेचरैर्विशोष्यकरमिति"। "शनिवद्राहुकेतू"इति वचनाद्राहोरप्यत्र वमेवैष विचारः। राहोरपलक्षणत्वात्केतोरपि उक्तञ्च भार्गवेण च "राहुकेतुफलं सर्वं मन्दवत्कथितं बुधैः। वेधोऽपि तद्वदेवो क्तोवामवेधस्तथैव च।" अथ चन्द्र इति जन्मराशितः खाम्बराब्धौ दशमचतुर्थयोः, गुणनन्दयोस्तृतीयनवमयोः(१) खाभाष्टमे एकादशाष्टमयोः, आद्यगरे प्रथमषष्ठमयोः, रसान्त्ये षष्ठद्वादशस्थानयोः नगद्वये सप्तमद्वितीययोः स्थानयोश्चन्द्रः क्रमात्शुद्धः विद्धश्च ज्ञेयः चन्द्रस्य वृषवेधो नास्ति। उक्तञ्च नारदेन "विध्यते जन्मतोनेन्दुर्दूनाद्याद्यारिखस्थिषु। खेष्टान्त्याम्बुधर्मस्थैर्विबुधैर्जन्मतः शुभः" इति। अथ क्ष इति जन्मराशेः द्विगरे द्विषड्भयोः खब्धिराभे चतुर्थतृतीययोः, रसाब्धयोः षष्ठनवमयोः, नागविधौ अष्टमप्रथमयोः, खनागे दशमाष्टमयोः, लाभव्यये एकादशद्वादशयोः स्थानयोर्बुधः क्रमाच्छुभो विद्धश्च ज्ञेयः। परं तत्र चन्द्रवेधो नास्ति यदाह नारदः "क्षः खाब्ध्यर्यदस्थायेषु जन्मतश्चैव विध्यते। सुतत्र्यद्वाद्यमान्त्यसंस्थैरिन्दुजः शुभः" इति अथ देवगुरु-

रिति जन्मराशितः शराद्यौ पञ्चमचतुर्थयोः, (२) द्वयन्ये द्वितीयद्वादशस्थानयोः, नवमे नवमदशमयोः स्थानयोः द्विगुणे द्वितीयतृतीययोः शिवाग्नौ एकादशतृतीययोः। देवगुरुर्बृहस्पतिः क्रमाच्छुभो विद्वच्च ज्ञेयः उक्तञ्च नारदेन "जन्मतः खायगोऽब्द्रिध्नस्थाद्दशजन्मगैः जन्मराशेर्गुरुः श्रेष्ठो यद्यैर्वेदि न विध्यते" इति। अथ शुक्र इति जन्मराशेः कुजाग्ने प्रथमाष्टमयोः, द्विगुणे द्वितीयसप्तमयोः, वह्निरूपे तृतीयषष्ठमयोः, वेदाम्बरे चतुर्थदशमयोः, पञ्चनिधौ पञ्चमनवमयोः, गजेषौ अष्टमपञ्चमयोः, नन्देशयोर्नवमदशमयोः, भानुरसे द्वादशषष्ठयोः, शिवाग्नौ एकादशतृतीययोः स्थानयोः, (३) शुक्रः क्रमाच्छुभो विद्वच्च ज्ञेयः यदाह नारदः "जन्मभादासुताष्टाङ्गान्यावेष्टितो न विध्यते। भार्गवो मल्लुसप्राद्यखाङ्गेशायारिपुत्रगैरिति" खासुतेत्यभिविधायाङ्कः सङ्गतेनाम्राभिविधिरिति तेन प्रथमद्वितीयतृतीयचतुर्थषष्ठमानां षष्ठाष्टमित्यर्थः। इदमत्राकूतं योयो यष्ठः रसनग्रहत्यादौ प्राक्पठितेषु स्थानेषु विद्यमानः स स यष्ठः शुभदः शुभस्थानव्यतिरिक्तास्थितस्थानेषु विद्यमानः स स यष्ठोऽशुभफलदाता अंतएवाह श्रीपतिः "सर्वे लाभस्थस्थिताश्च अरिपुष्कैः कुजार्की त्रिषट्। प्राप्तौ साद्यखमन्मथारिषु शशी खास्तारिवर्जं भृगुः। धीधर्मांशधनेषु वाक्पतिरिति खाष्टाम्बुखस्थो बुधः श्रेष्ठो जन्मसहाद्रि गोचरविधौ विद्वो न चेत् खादृयष्ठैरिति"। अर्थादेवानुक्तस्थानेष्वशुभः स स यष्ठः। अत्र यष्ठाणां विच्छिन्नभिन्न स्थानफलानि विधिरत्रे। तत्र रवेः। "स्थानं जन्मनि नाशवेद्दिनकरः कुर्यात्, द्वितीये भयं, दुश्चिक्ये श्रियमातनोति छिचुके मानक्षयं यच्छति। दैन्यं पञ्चमगः करोति रिपुहा षष्ठेऽर्थहा सप्तमे पीडामष्टमगः करोति परुषां कान्तिक्षयं धर्मगः। कर्मभिद्विजनकस्तु कर्म॰गोवित्तलाभप्रदायी॥र्भसंस्थितः। द्रव्यनाशजनितां सहापदं यच्छति व्यय॥गतो दिवाकरः' चन्द्रस्य-जन्मन्यन्दिगति छिमणु,र्वित्तनाशं द्वितीये ददात् द्रव्यं सहजश्भवने कुचिरोगं चतुर्थे। कार्यं नाशं तनयसहगोवित्तलाभं च षष्ठे द्यूने॰ द्रव्यं युवतिसञ्चितं स्यु॰संस्थोऽपमृत्युम्। स्वपभयं कुरुते नवमः शशी दशमधामगतस्तु महत् सुखम्। विविधमाय॥गतः कुरुते धनं व्यय॥गतस्तु रुजं धनसंक्षयम्"

कुजस्य-"प्रथमाष्टगः क्षौणीसुतः करोत्यरिजं भयं क्षपयति धनं वित्तस्थाने तृतीयगतोऽर्थदः। अरिभवगतः पातालेऽर्थान् क्षिणोति हि पञ्चमो रिपुहृत्सहजगतः कुर्याद्वित्तं रुजं मदनेऽस्थितः। जननितो निधनस्थः शत्रुबाधां धराजो दिशति नवमसंस्थः कायपीडामतीव। सुखमपि दशमस्थो लाभ॥गो भूरिलाभं॥व्ययभवनगतोऽसौ व्याध्यनर्थार्दनाद्यान्"

बुधस्य-"बुधः प्रथमगोभयं दिशति वस्वर्थे धनेऽर्थं रिपुभयान्वितं सहजःगस्तुर्येऽर्थदः। अनिर्वृतिकरो भवेत्तनयसगोऽरिहृगः स्थानदः करोति मदनेऽस्थितो-बहुविधां शरीरव्यथाम्। अष्टमे शशिसुते धनहृद्धर्मेहगस्तु सहतीं तनुपीडाम्। कर्म॰गः सुखमथाय॥गतोऽर्थं द्वादशे भवति वित्तविनाशः।

गुरोः-"भयं जन्मन्यार्योजनयति धन२स्थोऽर्थमतुलं तृतीयेऽङ्गक्लेशं दिशति च चतुर्थेऽर्थविलयम्। सुखं पुत्रसुस्थाने रुजमपि च कुर्यादरिहृगृक्षे गुरुर्जूने॰ प्रजां धननिचयनाशं च निधनेऽ। धर्मेहगतो धनहृद्विकरः स्यात्प्रीतिकरो दशमेऽमरपूज्यः। स्थानधनानि ददाति स चाये॥ द्वादशगस्तनुमानसपीडाम्"

भृगोः। "जन्मन्यतिक्षयकरो भृगुजोऽर्थदोऽर्थे २दुश्चिक्य॰गः सुखकरोधनदश्चतुर्थे। स्यात्पुत्रदस्तनयसगोऽरिहृगतोऽरिहृद्धि शोकप्रदो मदने॰गोनिधनेऽर्थदायी। जनयति विविधाम्बराणि धर्मेऽ न सुखकरो दशमस्थितस्तु शुक्रः। धननिचयकरः स लाभ॥संस्थो व्यय॥ऽभवनेऽपि धनागमं करोति"

शनेः। "वित्तस्थं रुगाग्निं दिनकरतनयो जन्मराशिं प्रपन्नो वित्तक्लेशं द्वितीये धनकरणखलं वित्तलाभं तृतीये। पातालेऽशत्रुवृद्धिं सुतभवनगतः पुत्रभत्यर्थनाशं षष्ठे स्थानेऽर्थलाभं जनयति मदने॰ दोषसंघातमार्किः। शरीरपीडां निधनेऽ च धर्मेऽ धनक्षयं कर्मणि॰ दौर्मनस्यम्। व्यपात्य॥गो वित्तमनर्थमन्ये॥र शनिर्ददातीत्यवदद्दृषिश्रः"

राहोः केतोश्च-"राहुर्जन्मगतो भयं च कलहं सौभाग्यमानक्षयं वित्तस्थंगमहासुखं स्वपभयं चार्थक्षयं यच्छति। सन्तापं कलहं च वित्तमधिकं शीघ्रं विनाशं क्षणात् केतुस्तत्फलमेव राशिषु वदेच्चन्द्रे गणादयः"।

एतच्छुभाशुभरूपायष्टा ऋक्षसन्थिगताश्चया राशिसन्थिगता एष्टराशेः फलं ददति वक्ष्यिष्यते प्राग्राशेरित्याह कमलासनः "ऋक्षसन्थिगताः

खेटाः राशिसन्धिगता यहाः। एष्वराशेः फलं दद्युर्वक्री तद्विपरीतगतिरिति" राशियहयं नक्षत्रस्थाप्युपलक्षणम्। वसिष्ठोऽपि "भवनान्नृगताधिष्ण्यगताश्च गगनचराः। दद्युः परभवनफलं प्राग्भवनफलं च वक्रिता यत्र" इति। अस्यार्थः अर्कं नक्षत्रं तस्य सन्धिः एकस्मादिर्गत्वापरत्र संक्रमणं सन्धिरेव राशिसन्धिश्च। तत्र सन्धिज्ञानम्। "देवद्यद्दुर्क्षयोऽष्टौ नाड्योऽङ्काः खत्रयाः क्रमात्। यद्वाः संक्रमणेऽर्कादेः प्रायोऽर्केक्षातिनिन्दिताः" इति विवाहप्रकरणे वक्ष्यति यन्थकृत्। संक्रमणकाल एव सन्धिकालः सर्वेषां यहाणाम् "यष्टिन्नविम्बं यहभुक्तिभक्त" मित्यादिना भास्करेणोक्तत्वात्। तदेतदभिप्रेत्य संक्रान्तिप्रकरणे सप्रपञ्चं निरूपितं तत एवावधार्यम्। तत्र सूर्यादियहाः देवद्यद्दुर्क्षतिथ्युक्तघटिकोपलक्षिते नक्षत्रान्ते राश्यन्ते वा स्थिता जिगमिषितस्य नक्षत्रस्य राशेर्वा फलं प्रयच्छन्ति वक्रिणस्तु पूर्वोक्तलक्षणोपलक्षिते नक्षत्रादौ राश्यादौ वा स्थिता भुक्तस्य नक्षत्रस्य राशेर्वा फलं ददति। तत्र भौमाद्याः यहाः वक्रातिचारयोः प्राप्तिफलं कियन्ति दिनानि प्रयच्छन्तीत्याह वसिष्ठः "दशदिनं यद्दिनं त्रिपञ्चमतिचारवक्रयोर्दद्युः। भौमाद्याः षड्दिनं प्राप्तिफलं च षड्ड मासांश्चेति" भौमाद्याः क्रमात्। यावता कालेन राशिं जङ्घति ततोऽल्पेन न्यूनाधिकभावेन स चारः यदा चारसमये राशिं जङ्घति सोऽतिचारः, वक्रं प्रसिद्धमेव। अथ वामवेधं शुक्रपक्षे चन्द्रबलं चोपजात्युत्तरार्द्धेनाह। दुष्टोऽपि स्वजन्मराशेः सकाशादनिष्टस्थानस्थितोऽपि खेटो विपरीतवेधात् वामवेधाच्छुभः शुभफलदाता। अयमर्थः त्रेषु षष्ठदशमस्त्रीयैकादशेषु स्थितः सूर्यः शुभफलदाता तद्भिन्नस्थितौ स्थानान्यशुभान्येव तत्र द्वादशचतुर्थनवमपञ्चमास्थेऽनिष्टस्थानेषु स्थितः सूर्यस्तदैवानिष्टफलदः स्याद्यदा प्राक् पठितैः क्रमेण षष्ठादिस्थानस्थितैः शनिवर्जितैः षड्भिर्विद्धः यदा तु विद्धस्तदा शुभफलदोऽपि षष्ठादिस्थाने शुभदो नैव स्यात्। अन्येषु स्थानेषु प्रथमद्वितीयसप्तमेषु स्थितः सूर्योऽनिष्टफलद एव। एवं चन्द्रबुधयोः षड्डेव विद्धस्थानानीतिक्रमवेधवामवेधौ स्याताम्। भौमस्य तु त्रीण्येव शुभानीतरारण्यशुद्धान्येव तत्र नवपञ्चमद्वादशस्थानस्थितभौमस्याशुभस्य क्रमेण षष्ठैकादशवीर्यस्थानस्थैरेभिर्वेधेन शुभत्वमेव। अन्येऽशुभस्थानस्थितेऽशुभएव भौमः। एवं शनिराहुकेतवोऽप्येयाः गुरोरप्येवमेव। तत्र तु प्रथमषष्ठस्थानस्थो गुरुरशुभ एव। शुक्रस्य तु नवस्थानानां शुभत्वात्तदुक्तिरिक्तानि त्रीणि पञ्चसप्तमदशमस्थानान्यशुभानि तेषामेव क्रमेण द्वादशद्वितीयचतुर्थस्थानस्थषड्जनितवामवेधेन शुभत्वमेव। अन्येषां तूत्तरपठितत्वात् स्थानानां शुभत्वादेव न वामवेधविचारार्हत्वमिति परिच्छिद्योक्तं यदाह कश्यपः "अपि विद्धो यहः कश्चित् ददाति शुभं फलम्। वामवेधविधानेन त्वशुभोऽपि शुभप्रदः। अतस्तद्दुर्विधं मूढं विचार्यासत् फलं वदेत्" इति। वसिष्ठोऽपि "वेधसमन्वित खचराणां प्रतिगन्नृसत्फलं किञ्चित्। अव्यत्ययवेधविधानादपि शुभाशुभप्रदाः सततमिति" व्यत्ययवेधो वामवेधः। द्विकोण इति। सिते शुक्लपक्षे ऽजचन्द्रो द्विकोणे द्वितीयनवमपञ्चमस्थानेषु स्थितः शुभदः अत्रापि क्रमेण षष्ठाष्टमचतुर्थस्थानस्थितैर्बुधवर्जितैर्यहैर्नवविद्धः इत्यपि ध्येयं उक्तं च नारदेन "शुक्लपक्षे शुभचन्द्रो द्वितीयनवपञ्चगैः। रिपुस्थस्थम्बुसंस्थैर्न विद्धो हि गतेचरैरिति" यदि विध्यते तदाऽशुभफलद एव (४) अथ द्विविधवेधे अतद्वयसप्तजात्याह खजन्मेति। इह द्विविधवेधविधावन्ये नारदादयः। खजन्मराशेः सकाशाद्द्विविधं वेधं क्रमिकं वामिकं चाहुः। तथा चोभयत्रापि नारदेन जन्मत इत्युक्तम्। अथ कश्यपादिमतमुच्यते। स पुनर्द्विविधोऽपि वेधोयहाधिष्ठितराशितो ज्ञेयः यथा सूर्यो जन्मराशेः सकाशात् षष्ठस्थितः शुभः स सूर्यःस्वाक्रान्तराशितो द्वादशस्थानस्थितैः शनिवर्जितैर्यहैर्न विद्धः तथा सूर्यो जन्मराशिद्वादशस्थोऽपि ज्ञेयः सः सूर्यःस्वाक्रान्तराशिषष्ठस्थितैः शनिवर्जितैर्यहैर्विद्धश्चेत्तदा शुभफलद इत्यर्थः। अयमेवैष द्विविधवेधस्य देशविशेषविषयत्वमुच्यते। हिमाद्रिविन्ध्यनामानौ पर्वतौ प्रहे यविशेषावस्थिता प्रसिद्धौ तयोरन्तरालवर्त्तिन्येव देशे स द्विविधोऽपि वेधोज्ञेयः न सर्वदेशेषु हिमाद्रिविन्ध्यान्तराल बहिर्भूतसर्वदेशेषु द्विविधोऽपि वेधदोषो नास्तीति कश्यपस्य मुनेरुक्तिर्वचनम्। जन्मनक्षत्रादौ स्थानभेदे यहफलमाह जन्मार्क्ष इत्यादि। "यच्चन्द्रलग्नतो राज्यर्क्षगते चन्द्रभास्करौ। तज्जातानां भवेत्पीडा ये नराः शान्तिवर्जिताः।" मार्गवीये विशेषोऽपि "यस्य राज्यस्य नक्षत्रे स्वर्भानुरुपरज्यते। राज्यभङ्गं सङ्कटाग्नं मरणं चात्र निर्दिशेदिति" राज्यस्य नक्षत्रे अभिषेकनक्षत्रे यदा

कदाचिद्राहुभुज्यमाननक्षत्रसप्तरागनक्षत्रे चैकमेव तदा-
यं सन्दिग्धफलनिर्देशः यदा तु नक्षत्रभेदस्तदोपर-
ज्यमाननक्षत्रेऽप्येव फलनिर्देशः एवं राशिभेदेऽपरज्य-
मानराशिभेदेऽप्येवम् । यतोऽत्रोक्ते राश्योर्दिग्देश-
कालावस्थादिभेदात् ग्रहयत्वमेव नास्ति । तदुक्तं
सिद्धान्तशिरोमणौ "दिग्देशकालावस्थादिभेदाच्च
ग्राह्यादिकोराहुरिति ब्रुवन्ति"। एतदुपपत्तिमांस्तैरेव स्व-
दौरेव निरूपिता चिरन्तनैश्च तोडरानन्दे राहुचार-
विभागे प्रपञ्चिता परन्तु राहुसाहित्यं विना ग्रह-
यानयनस्य शरसंस्कृतिमाश्रित्य स्वस्वानयनविशिष्टस्यानु-
करत्वादिति सार्द्धिलविपक्षत्वैव राहोरपरत्वमुच्यते।
अतएवोक्तं वराहेण "तस्मिन् काले सान्निध्यमस्य
तेनोपचर्यते राहुः । यान्योत्तरा शशिगतिर्गणिते हृ-
पचर्यते तेनेति"। अथ जन्मादिराशिफलमुच्यते जनिभ-
त इति । पञ्चम्यादिषु जन्मराशेरारभ्य द्वादशसु राशिषु
ग्रहयुते सति क्रमादनुक्रमेण घातादिफलं भवति यथा
जन्मराशौ ग्रहयुते सति घातः शरीरपीडा, द्वितीय-
राशौ सतिः द्रव्यनाशः, तृतीयराशौ चौर्यभ्योः, चतु-
र्थराशौ शरीरपीडा, पञ्चमराशौ चिन्ता पुत्रादीनां, षष्ठे
राशौ सौख्यं, सप्तमराशौ कलत्रदौख्यं स्त्रीमरणं, अष्ट-
माशौ मृत्युर्मरणं, नवमराशौ मानभङ्गः, दशमराशौ
सुखम्, एकादशराशौ लाभः, द्वादशराशौ मृत्युः घा-
तन इति केचित् द्रव्यस्थेत्यपरे, इदं च फलं ग्रहमात्रस्य-
र्यन्तमनुक्रमेण ध्येयं तदुत्तरं हि ग्रहयानान्तरसम्भावनात्
यथोक्तं दैवज्ञमनोहरे "घातं हानिमथ श्रियं जननिभा-
दुध्वंसं च चिन्तां क्रमात् सौख्यं दारवियोजनं च
कुरुते व्याधिं च मानक्षयम् । सिद्धिं लाभमपायमर्कय-
शिनोः षण्मासमध्ये ग्रहः इति" क्वचित्तु "स्थानान्त्र
एवं शुभमध्यमाधमाः" इत्युक्तम् । दैवज्ञमनोहरे
"यासात्तृतीयोऽष्टमगश्चतुर्थस्तथायसंस्थः शुभदः स-
राशिः । नवांशधीसप्तमगश्च विद्धिः पृष्ठो द्विषट्को
दशमाद्यसंस्थः" इति अत्र वाक्ये यासराशितोऽग्रतोक्ता
"त्रिषड्दशायोपगतं नराणां शुभप्रदं स्याद्ग्रहयुक्तं
रवीन्दोः । द्विसप्तनन्देषु च मध्यमं स्याच्छेषेष्वनिष्टं
सुतयो वदन्तीति" अत्रावध्यपेक्षायां स्वजन्मराशे-
रित्याख्यातार्थमेव । अथाशुभस्फुटग्रहयुतयोरनुक्रम-
माह तदशुभेति तत्र सूर्यचन्द्रयोर्ग्रहस्य सम्बन्धि
यदशुभं दुष्फलत्वं तस्य ध्वंसे नाशाय जपः स्वर्णगो-
दानं जपो गायत्र्यादीनां मन्त्राणां स्वर्णं प्रसिद्धं गौः-
प्रसिद्धा भूमिर्वा उपलक्षणत्वादन्येषां रूप्यादीनां यथा
शक्त्या दानं कार्यमिति शेषः उक्तं च दैवज्ञमनोहरे
"सुवर्णनिर्मितं नाम सतिलं ताम्रभाजनम् । सदक्षिणं
सवस्त्रं च श्रोत्रियाय निवेदयेत् । सौवर्णं राजतं
वापि बिम्बं कृत्वा स्वशक्तितः । भवेदग्रहतल्लेशः
छिद्रे विप्राय कल्पयेत् । दानमन्त्रश्च । तमोमय !
महाभीम ! सोमसूर्यविमर्दन !। हेमनाग ! प्रदानेन
मम शान्तिप्रदो भव"। स्कन्दपुराणे मोदानं भूमिदानं च
स्वर्णदानं विशेषतः । ग्रहयुक्तं क्षणनाशाय दैवज्ञाय
निवेदयेत्" । किंचात्र देशविशेषः पात्रविशेषो
द्रव्यविशेषश्च नापेक्ष्य इत्याह व्यासः "सर्वं ब्रह्मसमं
लोकं सर्वं ब्रह्मसमा द्विजाः । सर्वभूमिः कुरुक्षेत्रं
ग्रहणे चन्द्रसूर्ययोरिति"। तत्र स्नानदानादिकं कस्मिन्
काले कर्त्तव्यमित्याह "ग्रस्यमाने भवेत् स्नानं ग्रस्ते होमो
विधीयते । मुच्यमाने भवेद्दानं सङ्गे स्नानं विधीयत"इति
तस्मिन् काले जपादिकमपि विधेयम् "सूर्येन्दुग्रहणं या-
वत्तावत् कुर्वीज्जपादिकमिति"शिवरहस्योक्तेः आदिशब्दात्
सुरार्चनमपि अत्र जन्मनक्षत्रजन्मराशयोर्ग्रहणशान्ति-
माह वशिष्ठः "यस्यैव जन्मनक्षत्रे ग्रस्यते शशिभास्करौ
तस्य व्याधिभयं घोरं जन्मराशौ धनक्षयः । द्रव्यमन्त्रवि-
धानेन तस्य दोषापनुत्तये । उपरागस्नानविधिं सम्यक्त्व ग्रे
समासतः । मण्डलं चतुरस्रं तु गोमयेन विलेपयेत् ।
ग्रहस्नेशानदिग्भागे वर्णकैः समलङ्कृते । स्थापयेच्छङ्कर-
कुम्भांस्तत्र तान् सागरात्मकान् । सर्ववेदात्मकान् कृत्वा
सर्वतीर्थात्मकान् शुभान् । पञ्चगव्यान्वितभ्राजिष्णुकैः सर्वपावनैः" । इत्युपक्रमे
"तिलहोमं व्याहृतिभिः सहस्रमष्टसंयुतम् । एवं कृत्वा
प्रयत्नेन स्नानकर्म समाचरेत् । चामन्त्र्य नवभिर्मन्त्रैः
कुम्भान् संकल्पपूर्वकान् । एतानेव ततो मन्त्रान् वर्णयेच्चैव
संलिखेत् । कर्त्तः शिरसि तं बद्ध्वा वाग्भिर्वेदमन्त्रकैः ।
सुमन्त्रितैः कुम्भजलैः स्नाप्यं नीराजयेत्ततः । दद्याच्छक्त्यै
विप्रेभ्यः शुक्लमाल्याम्बरः शुचिः । क्षत्रियभ्यो दक्षिणां
दद्याच्छिल्पिभ्यश्च शक्तितः । योऽसौ वज्रधरो देव आदि-
त्यानां प्रभुर्मतः । सहस्रनयनस्तस्मात्पापपीडां व्यपोहतु ।
यः कर्मसाक्षी लोकानां धर्मो महिषवाहनः । यमस्तस्मा-
त्परागस्य पापपीडां व्यपोहतु । रक्षोगणाधिपः

साक्षात् प्रलयानलसन्निभः। चन्द्रस्य यामैकायस्य रक्तःपीडां व्यपोहतु १। नागपाशधरो देवः सदा मकरवाहनः। वरुणोऽम्बुपतिश्चान्द्रयक्ष्मपीडां व्यपोहतु२। प्राणरूपो हि लोकानां वायुः कृष्णमृगप्रियः। वायुश्चन्द्रोपरागस्य पीडनं मे व्यपोहतु३। योऽसौ निधिपतिर्देवः खड्गशूलगदाधरः। चन्द्रोपरागकलुषां पीडां चापि व्यपोहतु४। योऽसावीन्दुधरो रुद्रःपिनाकी हव्यवाहनः। चन्द्रोपरागपीडाञ्च नाशयेत् सङ्कटं तथा। ७ त्रैलोक्ये यानि भूतानि चराणि स्थावराणि च। ब्रह्मविष्णुकयुक्तानि तानि पापं दहन्तु मे८। आमन्त्रणोक्ते खनोक्ताख्येत एव च मन्त्रकाः। अर्चयित्वा पितॄन् देवान् गोभूरत्नाम्बरादिभिः। अनेन विधिना यस्तु यक्ष्मस्नानं समाचरेत्। तद्गात्र यक्ष्मपीडा स्यादानन्दधनसञ्चयः। परमां सिद्धिमाप्नोति पुनरावृत्तिदुर्लभम्। सूर्यग्रहेऽप्येवमेव सूर्यनाम्ना विधीयते।" अत्र यद्यपि जन्मराशौ धनक्षय इत्युक्तं तत्र च दोषाल्पत्वात् प्रतिग्रहादानशान्त्यपकर्त्तव्यता प्रतीयते तथापि प्राग्विलिखितश्लोकवचःसु विरुद्धफलाभिधानादेवास्य जन्मराशावपि यक्ष्मे शान्तिर्विधेया। उभयाभिधानेन शान्त्यभिधानात् उक्तं च मत्स्यपुराणे "यस्य राशिं समाश्रित्य भवेद्यक्ष्मसम्भवः। तस्य शान्तिं प्रवक्ष्यामि सन्तोषविधानतः"। इति यतो जन्मनक्षत्र जन्मराशिव्यतिरिक्ते विरुद्धे यक्ष्मे शान्तिर्न विधेया वचनाभावात् किन्तु स्वविभवरूपं दानादिरूपं विधेयमिति तात्पर्यार्थः। सूर्यग्रहेऽप्येवमेवेति योऽसौ वज्रधरो देव आदित्यानां प्रभुर्मतः। सहस्रनयनः सूर्ययक्ष्मपीडां व्यपोहतु" इत्युक्तदिशा चन्द्रपदस्थाने सूर्यपदं पूर्वमन्त्रश्लोकेषु प्रयोज्यमित्यर्थः। अयेदं यक्ष्मं स्नानविशेषारिष्टजनकमित्युक्तं तच्च यक्ष्मं न द्रष्टव्यमित्याह नो वीक्ष्यमिति उक्तं च "जन्मर्क्षं जन्मनक्षत्रं निधनं वधतारा सप्तमी। अत्र दृष्ट इति पदश्रवणात् दृष्टस्थानावस्थितो राहुर्दृष्टः पुंसोरिष्टजनकः यदा तु मेषाद्यावरुणेन यक्ष्मध्यावस्थित्या वा चक्षुष्मतोऽपि पुंसो राहुदर्शनाभावस्तदाऽरिष्टं नास्ति एवं चान्यस्य यत्र कुत्राप्यवस्थितस्य यक्ष्माद्यरिष्टनन्तुमशक्नुवतो ब्रह्मातरादेः सर्वारिष्ट स्नानादि वा नास्ति इति तेषामाशयः। यत्रेदं चिन्त्यते किमिदं यक्ष्मं दृष्टमेव स्नानाद्यधिकारसम्पादकम् ? उत मेषाद्यावरुणे नादृष्टमपि ? कुतः सन्देहः ? उभयथा वचनोपलम्भेनवा हि दृष्टवसिष्ठः "सर्वेषामेव वर्णानां सूतकं राहुदर्शने। सचेलं तु भवेत् स्नानं सूतकान्नं विवर्जयेदिति"। भट्टभिन्नाते "सर्वेषामेव वर्णानां सूतकं राहुदर्शने। स्नात्वा कर्माणि कुर्वीत सूतमन्नं विवर्जयेदिति"। सूतं पक्वं सूनं पाके "पा०दृति निपातनात् यद्यपि तस्मिन् सूते "चीरक्विशोरेवेति" भट्टभाष्यकृतोक्तं तथापि भट्टाक्तनिप्रयोगादन्यस्मिन्नपि द्रव्ये ओदनादौ पाकसामान्याद्वृत्तिः। विष्णुः "राहुदर्शनदत्तं हि श्राद्धमाचन्द्रतारकमिति"। यातातपः "स्नानं दानतपः श्राद्धमनन्तं राहुदर्शने" इति एवमादीनि वचांसि दर्शनपदसहितान्युपलभ्यन्ते अन्यत्रापि वसिष्ठः "यक्ष्मे संक्रमे वापि न स्नायाद्यदि मानवः। सप्तजन्मनि कुष्ठी स्याद्दुःखभागी च जायते" इति लिङ्गपुराणेऽपि "चन्द्रसूर्ययक्ष्मे स्नायात् सूतके सूतकेऽपि च। अस्नायी सप्तमाप्नोति स्नायी पापं न विन्दतीति" एवमादीनि दर्शनपदानाक्रान्तानि वचांस्युपलभ्यन्ते। तत्र दर्शनवादिन आहुः दर्शनपदानाक्रान्तेषु वचःसु यक्ष्मस्य निमित्तत्वं प्रतिपाद्यते। "यक्ष्मे संक्रमे वापीति" निमित्तसप्तम्युपलम्भात्। ज्ञातमेव च यक्ष्मं स्नानदानादिकं प्रति निमित्तं भवति तज्ज्ञानमेवाचार्या च राहुदर्शनपदोपेतवचनालोचनेन चाक्षुषज्ञानस्यैव निमित्तत्वं यतश्चाक्षुष एव स्नाने दर्शनसख्यं ज्योतिःशास्त्रीयस्नाने तु लक्षणासङ्गतिः। एवं सति मेषावरुणयक्ष्मदिवसजातचन्द्रयक्ष्मणं रात्रिभवेषु सूर्ययक्ष्मेषु न स्नानदानादावधिकारः तस्माद्यक्ष्मं दृष्ट्वा स्नानदानादिकं विधेयमित्यर्थः समञ्जसो भवति, नैतत्सङ्गच्छते यतो वचनेषु राहुदर्शनयक्ष्मपदयोः समानार्थकता नास्ति कथम् "अहश्चरूपाः कालस्य मूर्तयो भगणाश्रिताः। शीघ्रमन्दोच्चपाताख्या ग्रहाणां गतिहेतवः।" इति सूर्यसिद्धान्ते चन्द्रादिग्रहपातानामदृश्यत्वोक्त्या पातो राहुश्च पर्यायः। उक्तञ्च तत्रैव "दक्षिणोत्तरयोरेव पातो राहुश्चरंक्षगा। विक्षिप्यन्ते च विक्षेपचन्द्रादीनामपक्रमादिति" केशवार्केणाप्युक्तम् "पर्यायेण तु राहुपातयोर्नामनी विदुषुरेव तान्त्रिकाः इति। यतो राहुदर्शनमेव गणनकुशलायमानम्। नन्वेवं यक्ष्मे सूर्यचन्द्रयोश्चादृश्यो राहुर्दृश्यत एव अतएव "राहुग्रस्ते निशाकरे" इत्यादि पुराणोक्तिः साधीयसीति चेन्न

"भानोर्भाङ्गै मही च्छाया तत्तुल्येऽर्कसमेऽपि वा। यशाङ्कपाते यद्दृश्यं क्रियद्वागधिकोनके" इत्युपक्रम्य "आदको भास्करस्येन्दुरधःस्थो घनवद्भवेत्। भूच्छायां प्राङ्मुखश्चन्द्रो विशत्यस्य भवेदसाविति"। अतो भूच्छायाऽस्य चन्द्रस्य आदको भवेदित्यर्थः इति सूर्यसिद्धान्ते स्पष्ट एव आद्यच्छादकभावोऽभिहितः पुराणेन सह विरोध परिहारस्तु "दिग्देशकालावरणादिभेदान्न आदको राहुरिति ब्रुवन्ति। यन्मानिनः केवलगोलविद्यां स्वसंहितावेदपुराणवाक्यमिति" पूर्वपक्षं विधाय "राहुः कृष्णमण्डलमः शशाङ्कं शशाङ्कगच्छादयतिनबिम्बम्। तमोमयः शम्भुवरप्रदानात् सर्वागमानामविरुद्धमेतदिति" भास्कराचार्यैरेवोक्तः "तस्मिन् काले सान्निध्यमस्य तेनोपचर्यते राहुरिति" वराहेण चोक्तम् तस्माद्राहुदर्शनं तु नास्त्येव भवन्मते दर्शनं चाक्षुषमेवोच्यते नान्यत् एवं सति राहोर्दर्शनं राहुदर्शनमिति तत्पुरुषोऽनुपपन्नः। यदि तु समीपलक्षकदर्शनशब्दमङ्गीकृत्य तदर्थः क्रियते। तदापि यस्य स्वरूपमेवानुपपन्नं तस्य समीपे तु सुतरामिति बालैरप्येतदुच्यते। तस्माद्दर्शनशब्देनोपरागो लक्ष्यते राहुदर्शनं राहूपरागस्तस्मिन् राहुदर्शने इति। अयमर्थः। राहुर्नाम पातः तस्य सम्बन्धेन दर्शनस्योपरागः इति। न च राहुरेव लक्षणयोपरागपरस्य दर्शनमिति पूर्वपक्षाभिमतार्थसिद्धिरिति वाच्यं लक्षणया त्वर्थान्तरान्तरासम्भवे सति वक्तव्या। "अत्यन्तादर्शनं राहोस्तथा चात्यन्तदर्शने। प्रजापीड़ा विनिर्देश्या व्याधिदुर्भिक्षतस्करैरिति" विष्णुधर्मोत्तरादिवाक्येषु पदान्तरासन्निधानाद्राहुदर्शनेनोपरागो लक्ष्यते। इदं च राहोः पातनामकपदार्थं प्रति हेत्वर्थान्तरमस्तीत्यतो राहुदर्शनसूर्यग्रहणयोः समानार्थकता नास्तीत्येवं सिद्धमिति। प्राग्युक्तानां सर्ववचसां सूर्यग्रहे छायादित्येव वाक्यार्थः फलितो भवति। किञ्च सूर्यग्रहे चाक्षुषमेव दर्शनं निमित्तं विवक्षितं चेत्तदा "नेत्रेतोद्यन्नभादित्यं नास्तं यान्तं कथञ्चन। नोपरक्तं न वारिस्थं न मध्ये नभसोगतम्" इत्युपरक्तसूर्यदर्शननिषेधो नोपपद्येत तस्मात् निषेधः सूर्योपरागदर्शन एव न चन्द्रोपराग इति चेन्न "नाशुची राहुतारकाम्" इत्यत्र राहुनामसूर्यग्रहविचन्द्रोपरागग्रहणविषयकोपसंहारस्य युक्तत्वात् अशुचे रजस्वलापतितादेर्ग्रहणं तु दोषाधिक्यसूचनार्थं यथा श्राद्धे कुलीनानां श्राद्धान्नानामन्यत्रोक्ते अन्येषां निषिद्धत्वादेव कुत्सनेऽपि श्राद्धान्नामनन्यत्रोक्ते सिद्धे पुनर्निषेधो दोषाधिक्यार्थमेव। "भास्करालोकनाक्षीलपरिवादादि वर्जयेदिति" स्मृतिवाक्यस्य तूद्यदस्तगास्यादित्यदर्शनपरतया व्याख्यानस्य युक्तत्वात्। केचित्तु दर्शनादर्शनविषयकयोर्विधीस्तुल्यबलत्वात्सङ्कुचद्वृत्त्या छायादिति व्याचक्षुः तच्चिन्त्यं "जन्मसम्प्राप्तरिष्टाक्षेत्यादिना सामान्यतो निषिद्धस्योपरक्तदर्शनस्य पुनर्निषेधात् प्रागुक्तादिशा राहुदर्शनपदस्य राहूपरागलक्षकत्वेन तुल्यबलत्वाभावाच्च तस्माद्उपरक्तयोः सूर्यचन्द्रमसोर्यस्य कस्यापि दर्शननिषेधसत्त्वात् ग्रहणे स्नानदानादावुक्तेतरज्ञानं च ज्योतिःशास्त्रैकदेशगणितपरम्परेभ्यो बुद्ध्वा तस्मिन् काले स्नानदानादि विधेयमिति सिद्धान्तः। अतएव मेघाद्याछन्नेऽप्युपरागे स्नानादिकं विधेयमेव नतु गणितपरम्पराधीनस्योपरागज्ञानमेव चेत् स्नानादिप्रयोजकं तदा रात्रौ सूर्यग्रहणस्य जायमानत्वात्तदापि स्नानादिकं स्यात्। सत्यमेवैतत् वचनात्तथा न क्रियते। तदुक्तं निगमे "सूर्यग्रहो यदा रात्रौ दिवा चन्द्रग्रहो यदि। तत्र स्नानं न कुर्वीत दद्याद्दानं न च क्वचिदिति"। अतएव ताहशे ग्रहणे दुष्टेऽपि दौष्ट्यं नास्तीत्यपि सूच्यते। न चैतद्भागे प्रतिषेधादित्यधिकरणेन पृथिव्यामस्मिन्नेतव्यो नान्तरिक्षे न दिवीत्युदाहृतवाक्यवच्छिष्टानुवाद इति वाच्यं विधिशेषत्वाभावात् यथा पृथिव्यामस्मिन्नेतव्य इति न निषेध विधिरस्ति तत्र नान्तरिक्षे न दिवीति दृष्टान्तो निषेध विधेः शेषस्तथात्र सूर्यग्रहो यदा रात्रावित्यत्र तद्वाक्यस्य विधेः शेष इति। किञ्चैवं ह्युक्तत्व मतेऽनर्थकमेव वाक्यं स्यान्नचैतदुचितम् अतएवाह जाबालिः "संक्रान्तेः पुण्यकालस्तु षोडशोभयतः कलाः। चन्द्रसूर्योपरागे तु यावद्दर्शनगोचरः" इति। यस्मात्तावन्मानपर्यन्तं दर्शनगोचरत्वात्तावान् कालः पुण्यकालो भवतीति माधवो व्याचख्यौ तदुक्तं विश्वरूपनिबन्धे "दिवा चन्द्रग्रहो रात्रौ सूर्यपर्व न पुण्यदम्। सन्धिस्थं पुण्यवत्तत्रैवं यावद्दर्शनगोचरः" इति। अन्ये तु मेघाद्यछन्नेऽपि तदानीं चोपरागे गणितागतस्थितिघटिकाः पुण्यकाल इत्याहुः। दर्शने त्वेवंविधे निर्णये भुजङ्गत्वादुपरिस्थितत्वमेव विवक्षितं तदाह वसिष्ठः स्वसिद्धान्ते "सूर्यस्यादर्शनं रात्रिर्दिनं तद्दर्शनात्मकम्। भुजङ्गत्वादुपरि च स्थितोऽर्को दर्शनं गतमिति" अर्क इत्युपलक्षणं चन्द्रादिग्रहनक्षत्राणाम्। व्याकाशप्रदेशःसमन्ताद्भूसंलग्न इव यत्र भाति स प्रदेशो भुजगङ्-

वाच्यः अतएव विष्णुधर्मोत्तरे "अहोरात्रं न भोक्तव्यं सूर्यचन्द्रमसो यदा। सृष्टिं दृष्ट्वा तु भोक्तव्यं स्नानं कृत्वा ततः परमिति। "यस्मात्ते श्रुतः "यस्मात्तौ वास्तमनं तु रवीन्दू प्राप्नुतो यदि। तयोः परेद्युरुदये स्नात्वाभ्यर्च्य हरेश्वरः" इत्यनयोर्वाक्ययोर्दर्शनोदयग्रहौ भुक्तहोपरिस्थितत्वोपलक्षकौ अन्यथा मेघाद्यावरणेन परदिवसेऽपि दर्शनाभावे उपवासः प्रसज्येत तथा च सूर्यकाले यद्दर्शं दृष्ट्वा स्नानं विहितं तत्रान्तरा मेघावरणात् सूर्यचन्द्रयोर्दर्शनाभावो दिवसद्वयं त्रयं वा स्यात्तत्राप्युपवासप्रसङ्गः। न च सर्वे शिष्टास्तथाऽऽचरन्ति। तस्माद्दर्शनार्थमभ्युपेत्य शास्त्रीयज्ञानपरतैव व्याख्या कर्त्तव्या। तस्मां च सत्यां पूर्वोक्तरीत्या च मेघानाद्यतेष्वपरागे तमहरेव प्रशस्तचक्षुषा अन्येन च मन्तुमयङ्कुर्वद्भिर्ज्ञातृभिश्च स्नानदानादिकं विधेयमिति फलितोऽर्थः। अतएव भागवते रविग्रहे कुरुक्षेत्रे स्नानार्थं मिलितानां पाण्डवीयलोकानां मध्ये धृतराष्ट्रोऽपि परिगणित इति विशिष्टाचारोऽस्ति। एवं च सत्यरिष्टजनकत्वाभावेऽपि ग्रहणदर्शननिषेधः किं पुनररिष्टजनकत्वे। तस्माच्छास्त्रं सप्राङ्नेत्यादिषद्यं निर्मूलत्वाद्युक्तासङ्गत्वाच्चोपेक्ष्यं प्रत्यक्षोपलभ्यमानवसिष्ठमत्स्यपुराणादिवाक्येषु दर्शनपदाभावाच्च। अतएव मूले परे इति यदं प्रयुक्तम्। शान्तिस्तु दर्शनाभावेऽपि विधातुचिता यतोऽरिष्टयोगानां चरूपसतामेवारिष्टजनकत्वमस्ति अन्यथा ग्रहवेधस्नोत्पातादिसूचितारिष्टनिवृत्तिहेतुः शान्तिर्दर्शनाभावे न विधीयेत इत्यलमतिपल्लवितेन (६)। पी० धा०। अधिकसुपरागशब्दे १२८५ पृ० द्रष्टव्यम्। "अथ चन्द्रबले विशेषमनुष्टुभाह पापान्तः इति शुभोऽपि शुभफलदोऽपि चन्द्रः पापान्तःपापयुग् द्यूने पापद्वयमध्यवर्ती पापयुक्तः पापद्यूने सप्तमस्थाने वर्त्तमानश्चेत् स्यात्तदा अशुभ एव यदात्वशुभोऽप्यशुभफलदातापि चन्द्रः शुभांशे सौम्यग्रहनवांशे स्यादथवाऽधिमित्रस्य नवांशे स्यात्तथा गुरुणा बृहस्पतिना दृष्टः सन् शुभफलदाता भवेत् यदाह राजमार्त्तण्डः "पापग्रहेण संयुक्तः पापजामित्रसंस्थितः। पापद्वयमध्यगतः शुभोऽप्यशुभदः शशी। अनिष्टस्थानसंस्थोऽपि भवेच्छुभकरः शशी। सौम्यभागाधिमित्रांशे गुरुणा वापि वीक्षित" इति (७)। अथ चन्द्रबलस्य विधानान्तरमनुष्टुभाह। सितेति सितादौ शुक्लपक्षप्रतिपदि समीचीने चन्द्रे सति सम्पूर्णः शुक्लपक्षः शुभः अस्तितादौ कृष्णपक्षप्रतिपदि दुष्टे चन्द्रे सति सम्पूर्णः कृष्णपक्षः शुभः व्यत्यासे च पूर्वोक्तादर्शद्वैपरीत्ये द्वावपि पक्षावनिष्टौ यदा शुक्लपक्षप्रतिपदि चन्द्रोदृष्टश्चेत्तदा सकलशुक्लपक्षोऽनिष्टः। यदा कृष्णपक्षप्रतिपदि चन्द्रः शुभश्चेत्तदा सम्पूर्णः कृष्णपक्षोऽनिष्टः इति उक्तञ्च रत्नमालायां "पक्षस्यपक्षादिगते हिमांशौ शुभे शुभं पक्षसदाहरन्ति। सितेतरादावशुभे च पक्षाविन्दावनिष्टौ भवतोऽन्यथा तौ "कश्यपोऽपि शुक्लादीन्दुः शुभो यस्य तत्पक्षस्य शोभनः। कृष्णादीन्दौ त्वशुभदे शुभस्तद्व्यत्ययेऽन्यथेति "इदमेतादृशमजस्रं चन्द्रबलं तु सङ्कटे विवाहयात्रावश्यकर्त्तव्ये तात्कालिकचन्द्रबलाभावे याचितान्यथेत्यर्थः (८)। अथ ग्रहाणां दौष्ट्यपरिहारपूर्वकं तुष्टिसम्पादनार्थं नवरत्नसमुदायधारणं शान्तिश्च वज्रं शुक्रे इति। अर्कोक्तां सुवर्णमुद्रिकां कृत्वा तत्र दशभागे वर्तुलाकारे नवधा विभक्ते प्राग्दिक्क्रमेण नवरत्नानि इदं निधेयानि तत्र प्राग्गति पञ्चम्यन्तमव्ययं पञ्चमी चेयं स्वरूपेऽपि अतः प्राग्दिग्दिक्षु इत्ययमर्थो जातः तत्र शुक्रप्रीतये पूर्वस्यां दिशि वज्रं हीरकं निधेयम्। एवं चन्द्रप्रीत्यर्थं शोभनमुक्ताफलमाग्नेय्यां, भौमप्रीत्यर्थं प्रवालं दक्षिणस्याम् अर्कौ राहुप्रीत्यर्थं गोमेदं नैर्ऋत्याम्। शनौ शनिप्रीतये शोभननीलं पश्चिमायाम्। केतुप्रीतये वैदूर्यं वायव्याम्। गुरुप्रीतये पुष्परागम् उत्तरस्याम्। बुधप्रीतये पाचिः मारकतम् ऐशान्यां सूर्यप्रीतये माणिक्यं मध्यमकोष्ठे इति (९)।

अथ सति द्रव्यसामर्थ्ये नवरत्नसमुदायधारणस्य शक्यत्वात्तदङ्गे दानोमसति द्रव्यसामर्थ्ये यदुपक्रमत दौष्ट्यं तदुपशमरत्नधारणमिन्द्रवज्रवाह माणिक्येति। सूर्यप्रीत्यर्थं माणिक्यं धार्यम्। एवं चन्द्रस्य मुक्ताफलम्। भौमस्य विद्रुमम्। बुधस्य मारकतं गारुडं पाचिः। गुरोः पुष्परागः। शुक्रस्य वज्रम्। शनेर्नीलं राहोर्गोमेदं (तस्य निया इति) कात्यक्तमाधवाद्यः केतोर्वैदूर्यमित्येवमर्कतोऽर्कादीनां यद्दशानां रत्नानि धार्याणि स्युः। तत्र यदुपक्रमत दौष्ट्यं तस्य यद्दशस्य तद्रत्नं धार्यमित्यर्थः यदाह कश्यपः सूर्यादीनां च संतुष्ट्यै माणिक्यं मौक्तिकं तथा। सुविद्रुमं मरकतं पुष्परागं च वज्रकम्। नीलगोमेदवैदूर्यं धार्यं खलदृढक्रमात्", अथोक्तस्य सूत्रे सूर्यमित्यपिशब्देन सम्बन्धः(१०) अथ महामूल्यरत्नधारणे यस्य सामर्थ्याभावस्तदर्थमल्प-

मूल्यानि रत्नानि तारावलं च शनिन्याह धार्यमिति। अथो शुक्रस्य बुधस्य सदे सन्तोषार्थं सुवर्णं यथाशक्ति धार्यम्। राहुकेत्वोः प्रीत्यै राजावर्त्तकं मणिविशेषोधार्यः एवं शुक्रचोसुद्धौ रौप्यं, गुरोसुद्धौ सुक्ता। मन्दस्य शनेसुद्धौ लोहम्। आरभान्वोर्मङ्गलसूर्ययोः प्रीत्यै प्रवालं धार्यम्। उक्तं च श्रीपतिना "धार्यं तुष्ट्यै विदुषं भौमभान्वोरथ शुक्रचोश्च हेमेन्दुजस्य। सक्षारलौहं सुरराजमन्त्रिणो राजावर्त्तः कीर्त्तित शेषयोर्वेति" सुरैः सुरगुरोः। शेषयोः राहुकेत्वोः। दीपिकाकारस्तु औषधीमूलानि धार्याण्याह "मूलं धार्यं त्रिशूल्याः रविवारे विशुष्के, चोरिकामूलमिन्दौ, जिह्वाहेर्भूमिपुत्रे, रजनिकरसुते दृढदारोर्मूलम्। भार्गवे जीवेऽथ शुक्रे भवति शुभकरं सिंहपुच्छस्य मूलं, विल्वोत्थं चार्कपुत्रे, तमसि मलयजं, केतदोर्वेऽश्वगन्धमिति" त्रिशूली विल्वः चोरिका चिरिण्टी जिह्वाहिर्नागजिह्वा दृढदारुर्विदारी। भार्गी प्रसिद्धा। सिंहपुच्छं (बाघोट चरिवारेति) मध्यदेशभाषया प्रसिद्धम्। मलयजं चन्दनम्। अश्वगन्धं प्रसिद्धम्। एतदोषधीमूलधारणं सर्वथा रत्नधारणाशक्तौ वेदितव्यम्" पी० धा० गोचरप्रसङ्गात् तारावलादिकमाह तत्रैव

तारेति। यद्दिने तारावलमस्ति वा नवेति विचारस्थिकीर्षितसद्दिने या तारा सा जन्मर्क्षात् जन्मनक्षत्रात् त्रिराद्यत्तितः पुनराद्यत्तित्रयेण गणनीया स्यात्। त्रिरिति "द्वित्रिचतुर्भ्यः सुजिति" पा० सुजन्तमव्ययम्। स्वजन्मनक्षत्राद्दिनभनक्षत्रे गणिते नवभिर्भक्ते तिस्र आद्यत्तयोभवन्त्रवगिष्टतारायाः शुभमशुभं वाच्यमिति फलितोऽर्थः॥।

"जन्माख्यसम्पद्विपदः क्षेमप्रत्यरिसाधकाः। वधमैत्राति मैत्राःक्षुक्षारा नामसङ्कफलाः १२ ॥ मृत्यौ स्वर्णतिलान् विपद्यपि गुडं, शार्कं त्रिजन्मस्वथो दद्यात्प्रत्यरितारकासु लवणं, सर्वोविपत्प्रत्यरिः। मृत्युक्षादिमपर्यये न शुभदोऽन्यैषां द्वितीयेंशका नादिमान्त्रतृतीयका अथ शुभाः सर्वे तृतीये क्षुताः १३ ॥ यदि ६० घ्नं गतभभुक्तघटीयुक्तं युगाश्चतम्। शराब्धि ४५ हृल्लब्धतोऽर्क१२शेषेऽवस्थाः क्रियाद्विधोः १४ ॥ प्रवासनाशौ मरणञ्चवध क्षाक्षारतिक्रीडितसुप्तभुक्ताः। ज्वराख्यकम्पस्थिरता अवस्था भेषात् क्रमाच्चामसङ्कफलाः स्युः १५। लाजाकुछवलाप्रियङ्गुधनसिद्धार्थैर्निगादारुभिः पुङ्खालोप्रयुतैर्जलैर्निगदितं स्नानं यद्वोत्थाधक्षुत्। धेनुः कम्बुरथो हयश्च कनकश्चोताम्बरक्षोटकः श्वेतो गौरसिता, मङ्गासिरज इत्येता रवेर्दक्षिणाः १६। सूर्यारसौम्यास्कुजितोऽज्जनागसप्राद्विषस्त्रिवरस्त्रिनाडीः। तमोयमेज्याश्चिरसाश्विमासान् गलव्यराशेः फलदाः पुरस्तात् १७। दृष्टे योगे क्षेम, चन्द्रे च शङ्खं, धान्यं तिथ्यर्धं, तिथौ तण्डुलांश्च। वारे रत्नं भे च गां, क्षेम नाड्यां, दद्यात्तिथ्वंत्यत्रे च तारासु राजा १८। राश्यादिगौ रविकुजौ फलदौ, सितेज्यौ मध्ये, सदा शशिसुत चरमेऽजमन्दौ। अध्यात्र वह्निभयसन्ततिवस्त्रसौख्यदुःखानि माघि जनिभे रविवासरादौ" १९ मु०चि०।

अथ शेषक्रमेण सकलास्तारासंज्ञा अनुष्टुभाह। जन्माख्येति। स्पष्टार्थमिदमद्यम्। यदाह नारदः "जन्म सम्पद्विपत् क्षेमं प्रत्यरिः साधको वधः। मित्रमत्यरमित्रन्तु जन्मभाच्च पुनः पुनरिति"। एवं तारा गणनीया इति शेषः। तत्र तृतीयापञ्चमीसप्तम्यस्तारा निधिद्धाः अनिष्टफलत्वश्रवणात्। अर्थादन्याः समीचीनाः समीचीनफलत्वश्रवणात्। उक्तञ्च "जन्मतारा द्वितीया च षष्ठी चैव चतुर्थिका। अष्टमी नवमी चैव षट्च तारा शुभावहाः" इति। जन्मनक्षत्रन्तु कार्यविशेषे गृहीतं प्रतिषिद्धञ्च तद्वाक्ये निर्णेष्यते। तदिदन्तारावलं कृष्णपक्षविषयं न तूभयपक्षसाधारणम्। तदाह नारदः "कृष्णे बलवती तारा शुक्लपक्षे बली शशीति"। युक्तञ्चैतत् यतो ऽत्रार्थवादो रत्नमालायाम् "न खलु बलपक्षे शीतरश्मेः प्रभावः, कथितमिह हि तारावीर्यमार्यैः प्रधानम्। अतिविकलशरीरे प्रेयसि प्रोषिते वा प्रभवति खलु कर्तुं सर्वकार्याणि योषा। शुक्ले पक्षे शीतरश्मिर्बली यात्र प्राधान्यं तारकायास्तु तत्र। शक्त्या युक्ते विद्यमानेऽपि काले न खातव्यं योषितः क्वापि दृष्टमिति" १२ अथावशुक्लकल्पे दुष्टतारापाश्चकारद्वयेन परिहारं शार्दूलविक्रीडितेनाह "मृत्यौ स्वर्णतिलानिति। मृत्यौ सप्तम्यां वधतारायां स्वर्णतिलान् यथाशक्ति सुवर्णयुक्तान् तिलान् ब्राह्मणाय दद्यात्। विपद्यपि विपत्तारायां तृतीयतारायाङ्गुडमिश्रविकारन्दद्यात्। त्रिजन्मसु तिसृषु जन्मतारासु शार्कमर्कसिद्धं लवणादि दद्यात्। अथो प्रत्यरितारकासु पञ्चम्यान्तारायां लवणन्दद्यात्। तदाह नारदः "जन्मत्रिपञ्चसप्ताख्या ताराऽनिष्टफलप्रदा। अनिष्टपरिहारार्थं दद्याद्दानन्द्विजातये। शार्कं

गुडञ्च लवणं सतिलं काञ्चनं क्रमादिति" अत्र सतिलमिति विशेष्यं काञ्चनपदस्य न लवणपदस्य तेन वधतारायां सतिलं काञ्चनन्देयम्। उक्तञ्च दीपिकायाम् "प्रत्यरौ लवणन्दद्याच्छाकन्दद्यान्निजन्मनि। विपत्तारे गुडन्दद्यात्क्षिपने तिलकाञ्चनमिति" अथ द्वितीयः परिहार उच्यते। तत्रादिमपर्यये प्रथमाद्यत्तौ विपत्प्रत्यरिरिक्त्यु च तृतीयापञ्चभीसप्तम्यस्ताराः सर्वा अपि सामान्यतः षष्टिघटिकात्मिका अपि न शुभदाः स्युः अथ द्वितीये पर्याये द्वितीयाद्यत्तौ विपत्प्रत्यरिरिक्त्यूनामादिप्रान्त्यतृतीयका अंशा न शुभदाः विपत्तारायां प्रथमविंशतिघटिकास्त्राज्याः। इतरा चत्वारिंशच्छुभाः। प्रत्यरितारायां मध्यमा विंशतिघटिकास्त्याज्यास्तदुभयतो विंशतिर्विंशतिर्घटिकाः शुभाः। वधतारायामहिमा विंशतिर्घटिकास्त्याज्या आद्याश्चत्वारिंशच्छुभा इति नवीना व्याकुर्वते। जीर्णांस्तंशशब्देन नक्षत्रचतुर्थांशमाहुः। तथासति आदिप्रान्त्यतृतीयकाश्चरणाः क्रमेण निषिद्धाः इतरे शुभाः। अथ तृतीये पर्याये तृतीयाद्यत्तौ विपत्प्रत्यरिरिक्त्यूनवर्त्तते सर्वे षष्टिघटिकात्मका अपि शुभाः शोभनफलदाः स्मृताः। तथा च जगन्मोहने गुरुरित्युक्त्वा पठितं "पर्याये प्रथमे वज्र्यौ विपत्प्रत्यरिनैधनाः। द्वितीये त्र्यंशका वज्र्यास्तृतीये त्वखिलाः शुभाः" द्वितीये पर्याये त्र्यंशकानाह सएव। "अद्यांशोविपदि त्याज्यः प्रत्यरौ चरमोऽशुभः। वधे त्याज्यस्तृतीयोंऽशः शेषा अंशास्तु शोभनाः" इति। अत्रांशो नक्षत्रचतुर्थांश उच्यते। किमत्र प्रमाणमिति चेत् उच्यते। "जन्मर्क्षादृशमङ्कभे सङ्क्रान्तर्क्षन्तु षोडशम्। अष्टादशं साष्टदायं त्रयोविंशं विनाशनम्। मानसं पञ्चविंशर्क्षं नाचरेच्छुभमेषु तु" इति नारदोक्तं वैनाशिकाख्यत्रयोविंशभस्य दुष्टत्वम्। तदपवादमाह व्यवनः "वैनाशिकाख्ये नक्षत्रे अष्टाशीत्यंशकं विना। शेषांशाः शुभदा शेयाजन्मनीन्दुमतांशकाः।" इति। अत्र वैनाशिकं प्रत्यरिसंज्ञनक्षत्रस्य चरमांशस्यानिष्टता प्राप्ता साष्टाशीत्यंशकं विनेत्यनेन व्याध्यते इत्यत एकत्र दृष्टः शास्त्रार्थोऽपरत्रापि विनियुज्यत इति न्यायादत्रापि सैव व्याख्येति न नवीनमतङ्ग्राह्योऽप्रमाणकत्वात् १२। अथ चन्द्रावस्थावक्ष्यति तत्रधनोपायमनुष्टुभाह षष्टिघ्नमिति। अत्र चन्द्रस्य राशौ राशौ द्वादश अवस्थाः सन्ति यदाह नारदः "चन्द्रस्य द्वादशावस्था राशौ राशौ यथाक्रमात्। यात्रोद्वाहादिके कार्ये संज्ञा तत्फलप्रदा" तत्राश्विनीभारभ्य गतभानि षष्ट्या गुणानि वर्त्तमान नक्षत्रभुक्तघटीयुक्तानि कार्याणि। तानि पुनर्नवतिभिराहतानि शराब्धि ४५ हृत् पञ्चचत्वारिंशता भाज्यानि। यल्लब्धमागतं गतावस्थास्ताः शेषं वर्त्तमानावस्था तत्र लब्धाङ्कस्यापि द्वादशाधिक्ये द्वादशभिर्भागे प्रवासाद्यवस्था चन्द्रस्य गताः स्युः। ता अवस्था मेषराशेः पुंसः प्रवासादिसंज्ञा इवराशिस्थे चन्द्रे नष्टादिसंज्ञाः स्युः। एवं मिथुनादिदशराशिषु स्त्रीनष्टादिसंज्ञावस्थाः क्रमेण भवन्तीत्यर्थः। यदाह नारदः "षष्टिघ्नं चन्द्रनक्षत्रं तत्कालघटिकान्वितम्। वेदघ्नमिषु ४५ वेदाप्तमवस्था भानुः१२भाजिताः।" इति। अत्रोपपत्तिः एकैकस्मिन् राशौ द्वादशद्वादशावस्थाः सन्ति, सामान्यतो नक्षत्रभोगः षष्टिघटिकात्मक इत्येवं सति राशिभोगघटिकाः पञ्चत्रिंशदधिकशतं भवन्ति। तत्र त्रैराशिकं यद्येताभि१३५घंटीभिर्द्वादशावस्था लभ्यन्ते तदेष्टघटीभिः किमिति तत्रैकः कल्प्यः गुणनायां विकारानापत्तेर्द्वादशानामयमङ्को १२भाजको ज्ञाता१२ अत्रानयोर्युग्मभाजकयोस्त्रिभिरपवर्त्ते गुणकश्चत्वारः ४ भाजकः पञ्चचत्वारिंशत् ४५ तत्कालघटीयोगस्तु न्यायप्राप्त एव। तथा द्वादशभागोऽपि तदाधिक्यस्य निष्प्रयोजनत्वात् अत्रेदमवधार्यम् यद्यपि नक्षत्राणां घटीन्यूनाधिकभावः सम्भवति तथापि षष्टिघटिकात्मकेन व्यवहारः कार्यः। विद्यमाननक्षत्रं भुक्तं तु स्वभोगं ज्ञात्वा षष्टिघटिकात्मकं कृत्वा तत्र योज्यम्। यथा यदि स्वभोगेन षष्टिघटिका लभ्यन्ते तदेष्टघटीभिः किमिति त्रैराशिकेनेष्टघटीनां षष्टिर्गुणको नक्षत्रभोगो भाजक इति १४। अथ द्वादशावस्थानामानि सफलान्युपजात्याह प्रवासनाथेति। अष्टार्धमिदं पद्यम्। उक्तञ्च कश्यपेन "प्रवासनष्टा च मृता जया क्षया रतिर्दया। सुप्ता भुक्ता स्थिरा कम्पा हसितेतिनामसंज्ञिभा" इति। छदा। "षड्भिर्दादिभ्योऽङ्" पा०अङ् ततष्टाप् १५। अथ सङ्कायां वैद्यतपरिष्कारार्थं सौषधजलस्नानं दधिभाव शार्दूलविक्रीडितेनाह। राजाकुलमिति। राजा भवनशालयः इति केचित् वस्तुतस्तु ओषधीसाहचर्याद्राजशब्देन लज्जावती गृह्यते। कुवं प्रसिद्धम्। वला "वरि याग इति" काव्यकुञ्जभाषायामाहुः। प्रियङ्गुः

राजः। बनो सुरा, सिद्धार्थाः सर्षपाः (शिरसा) इति मङ्गराद्वाः (सरिषा) इति कान्यकुब्जाः। निशे हरिद्राद्वयं दारु देवदारुः पङ्खा शरपुङ्खा। लोध्रं प्रसिद्धं एतैरौषधैर्युतानि गन्धादिजलानि तैः स्नात्वा स्नानं दुष्टग्रहसूचितारिष्टनाशकं स्यात्। उक्तञ्च दीपिकायाम् "सिद्धार्थलोध्ररजनीद्वयसर्षपाढ्यं कामव्लकं सफलिनी सवचा च मांसी। स्नानं कुरु ग्रहगणप्रशमाय नित्यं सर्वे रविप्रभृतयः सुखदीभवन्ति।" दैवज्ञमनोहरेऽपि "सप्रियङ्गुरजनीद्वयमांसी कुष्ठलाजसितसर्षपखण्डैः। वारिभिः सकुवचैः सकलोध्रैः स्नानमत्र निखिलग्रहपीड़ाभिति" वारिभिस्तीर्थोदकैः रत्नमालायां तु प्रत्येकं ग्रहाणामौषधभेदस्नानमुक्तं यथा।

रवेः—"मनःशिलैलासुरदारुकुङ्कुमैरुशीरवट्टीमधुपद्मकान्वितैः। सताम्रपुष्पैर्विधृते स्थिते रवौ शुभावहं स्नानमुदाहृतं बुधैः"।

चन्द्रस्य—"पङ्कगव्यगजदानविमिश्रैः शङ्खशुक्तिकुसुदस्फटिकैश्च। शीतरश्मिजलतर्पणकल्पं स्नानमेतदुदितं ऋषतीनाम्"।

कुजस्य—"बिल्वचन्दनवलारुणपुष्पैर्हिङ्गुकल्पफलिनीवटुकैश्च। स्नानमङ्गिरस इष्ट मांसियुताभिर्भौमदोषविनिवारणमाहुः"।

बुधस्य—"गोमयाक्षतफलैः सखरोजैः क्षौद्रशुक्तिनवमूलफेनभिः। स्नानमुक्तमिदमत्र भूभृतां बोधनाशुभविनाशनं बुधैः"।

गुरोः—"मालतीकुसुमयुक्तसर्षपैः पल्लवैश्च मदयन्तिकोद्भवैः। क्षिप्रमम्बु मधुकेन च स्फुटं वैजतं गुरुकृतं विनिर्हन्ति"।

शुक्रस्य—"एलया च शिलया समन्वितैर्वारिभिः सफलमूलकुङ्कुमैः। स्नानतो भृगुसुतोपपादितं दुःखमेति विलयं न संशयः"।

शनेः—"असिततिलाङ्कनलोध्रवलाभिः शतकुसुमाधनलाजयुताभिः। रविसुते कथितं विधमस्थे दुरितदुदाहरणं मुनिसत्तमैः"।

राहुकेत्वोः—"लोध्रगर्भतिलपल्लवसङ्गस्त्रिदानमृगनाभियोगैः। स्नानमार्त्तिमिह हन्ति राहोः साजमूलमिदमेव च केतोः"। राहुकथितद्रव्यमजमूलसहितं केत्वर्थं स्यात्। अतएवोक्तं दीपिकायाम् "ग्रहोक्तमौषधस्नानं ग्रहविम्बसुरार्चनम्। ग्रहानुद्दिश्य होमो वा ग्रहाणां प्रीतिमिच्छता" तत्र ग्रहपूजाहोमौ वशिष्ठसंहितायां भट्टता प्रवन्धेनोक्तौ तौ तत एवावगन्तव्यौ इत्यलमतिविस्तरेण। अथ रवेरिति। रविमारभ्य दक्षिणा उच्यन्ते। तत्र सूर्यप्रीत्यर्थं धेनुर्गौः। चन्द्रप्रीत्यर्थं कम्बु शङ्खः। कम्बु इति नपुंसकलिङ्गम् पृथक्पदम् "शङ्खः स्यात्कम्बुरस्त्रियाम्" इत्यमरोक्तेः। मङ्गलप्रीत्यर्थमरुण वारको वृषः। बुधप्रीत्यर्थं कनकं सुवर्णम्। गुरुप्रीत्यर्थं पीताम्बरं तच्च यथाविभवं कार्पासं कौशेयं च। शुक्रप्रीत्यर्थं श्वेतो घोटकः। शनिप्रीत्यर्थमसिता श्यामवर्णा गौः। राहुप्रीत्यर्थं मङ्गाऽसिबैडूर्यमौक्तिकखड्गः। केतुप्रीत्यर्थमजः छागो दक्षिणेत्यर्थः। यदाह वसिष्ठः "धेनुं शङ्खं रक्तवस्त्रं हेम पीताम्बरद्वयम्। श्वेताश्वं कृष्णधेनुञ्च कृष्णलोहमजं क्रमात्। सर्वेषां वा समीक्ष्य दातव्या दक्षिणा ततः। आचार्याय ज्यायोभ्यो ब्राह्मणेभ्योऽथ यच्छितः" इति। अत्र प्रत्येकं दानमन्त्राक्षरवैयोक्ताः ग्रन्थभूयस्त्वभयान्न लिख्यन्ते। "एवं यः कुरुते सम्यक् ग्रहयज्ञं ग्रयोत्तमः। सर्वान् कामानवाप्नोति शुभस्नानफलं लभेत्" ग्रयोत्तम इत्युपलक्षणम्। तेन यः कश्चिदृग्यज्ञोपि कुर्यात् तस्य च विभवाहरूपाणि ग्रहदानानि प्रोक्तानि कैश्चित् यथा।

रवेः—"कौसुम्भवस्त्रं गुडहेमताम्रमाणिक्यगोधूमसुवर्णवस्त्रम्। सवत्सगोदानमतिप्रशीतं दुष्टाय सूर्याय महरिकाय"।

चन्द्रस्य—"शतकलसं सितवस्त्रं दधिशङ्खे चैव मौक्तिकसुवर्णे। रजतञ्च सन्मदद्यात्चन्द्रारिदोषशमनाय"।

कुजस्य—"प्रवालगोधूमसङ्गरिकाश्च ह्यथ ताम्रः करवीरपुष्पम्। आरक्तवस्त्रं गुडहेमताम्रं दुष्टाय भौमाय सचन्दनं हि"।

बुधस्य—"श्रीखं वस्त्रं सद्दानं बुधाय रत्नं पाची दासिका हेमसर्पिः। कांस्यं दन्तः कुञ्जरश्चाथ मेधो रौप्यं सर्वं पुष्पजात्यादिकञ्च।

गुरोः—"अम्बः सुवर्णं शुकपीतवस्त्रं सपीतधान्यं लवणं सपुष्पम्। सगर्करं तद्गजनीप्रयुक्तं दुष्टाय शान्त्यै गुरवे प्रदेयम्" रजनी हरिद्रा।

शुक्रस्य—"चित्रवस्त्रमपि दानवार्चिते दुष्टगे सुनिवरैः परिगीतम्। तण्डुलं घृतसुवर्णरूपकं वस्त्रकं परिमलो घवलोऽश्वः"।

शनेः—"नीलकं महिषं कृष्णं वस्त्रं लोहं सदक्षिणम्। दद्याच्च दक्षिणायुक्तं शनिदोषाग्रशान्तये"।

राहोः—"राहोर्दानं तुरंगेभो गोमेदं लोहकम्बलौ। सुवर्णं नागरूप्यञ्च सतिलं ताम्रभाजनम्"

केतोः—"केतौ वैदूर्यमसलं तैलं मृगमदस्तथा। जर्णातिलाश्च संयुक्ता दद्यात् क्लेशापशान्तये"।

अन्यच्च संक्षिप्तार्णवदीपे "भानुस्ताम्बूलदानादपहरति नखां वैद्यतं वासरोत्थं" सोमः श्रीखण्डदानादवनिसुतवरो भोजनात् पुष्पदानात्। सौम्यः शङ्खस्य मन्त्रो हरिहर नमनात् भार्गवः शुभ्रवस्त्रैस्तैलस्नानात् प्रभाते दिनकरतनयौ ब्रह्मनत्या परौ चेति"। ब्रह्मा ब्राह्मणः। परौ राहुकेतू १६। अथ सूर्यादयो यद्दा गन्तव्यराशेः प्राक् कियद्भिर्दिनैः फलं दद्युरित्थे तदुपजात्याह सूर्यारसौम्येति। सूर्यादयो यद्दा गन्तव्यराशेर्जिगमिषितराशेः पुरस्तात् पूर्वमेवैतत्संख्यकदिवसघटीमासान् यत्र "कालाध्वनोरत्यन्तसंयोगे" इति पाञ्चमिकी ततो नैरन्तर्येण तावन्तं कालं फलदाः स्युः तद्यथा। सूर्यो गन्तव्यराशेः प्राक् सप्तदशान् पञ्च दिवसान् फलदः। एवमारो भौमोऽष्ट दिवसान् पूर्वं फलदः, बुधः सप्त दिवसान्, शुक्रोऽपि सप्त दिवसान्, विधुचन्द्रः अग्निनाडीषष्टिकालयमेव प्राक् फलदः, राहुर्गन्तव्यराशेः प्राक् त्रिमासं फलदः एवं शनिः षण्मासान्। गुरुर्द्विमासान् पूर्वं फलद इत्यर्थः। उक्तञ्च "सूर्यः पञ्चदिनं शशी त्रिघटिकं भौमोऽष्ट वै वासरान् सप्ताहानि भवेद्गुः ससोमतनयो, मासद्वयं वै गुरुः। षण्मासान् पुरतोऽपि सूर्यतनयो राहुश्च मासत्रयं, केतुश्चैव ददाति भावि सकलं गन्तव्यराशेः फलमिति"। जगन्मोहने त्वेवमुक्तम् "आदित्यादिग्रहा दद्युर्लग्ने वा गोचरेऽपि वा। सप्तविंशति २७ भागोर्द्धं परराशिफलं खल्विति १७। अथ प्रसङ्गादावश्यकमङ्गलयात्राकर्त्तव्येषु सत्सु तिथ्यादिविषयकदुष्टयोगसद्भावे तद्दोषनिवारणार्थं दानं शालिन्याह। दुष्टे इति। दुष्टे व्यतीपातादिरूपे योगे सति क्षेम सुवर्णं यथाशक्ति राजा दद्यात्। च पुनश्चन्द्रे दुष्टे विद्धितान्यस्थानस्थिते शङ्खं दद्यात्। तिथ्यर्द्धे करणे भद्राख्ये दुष्टे धान्यं दद्यात्। तिथौ दुष्टे चतुर्थ्यादिरूपे तण्डुलान् दद्यात्। वारे दुष्टे ऽनुपचयरूपे रत्नं प्रवालशङ्खादि दद्यात्। भे राशौ दुष्टे क्रूरग्रहाधिष्ठितत्वादिदोषसहिते सति गां दद्यात्। नाड्यां घटिकायां दुर्मुहूर्त्तादिना दुष्टायां सत्यां क्षेम सुवर्णं दद्यात् च पुनस्तारासु दुष्टासु विषद्मत्यरिवधरूपासु सिन्धूत्थं लवणं दद्यात्। पूर्वं दुष्टतारासु प्रत्येकं विशिष्य दानमुक्तमिदानीं तदशक्तौ लवणमेव देयमिति पुनरुक्तिपरिहारः। उक्तञ्च दीपिकायाम् "योगस्य क्षेम, करणस्य च धान्यमिन्दोः शङ्खञ्च, तण्डुलमथो तिथिवारयोश्च। तारावलाय लवणान्यथ गां च राशेर्दद्याद्विजाय कनकं शुचि नाडिकायामिति" १८ अथात्र गोचरप्रसङ्गात् सूर्यादयो यद्दाः राशूलरगताः सन्तः कदा शुभाशुभफलदातारो भवन्ति तद्दा चान्द्रमासाधिकरणकरविवासरादौ स्वजन्मनक्षत्रप्रवेशे सति फलविशेषं च वसन्ततिलकाष्टकेनाह राश्यादिगाविति। रविकुजौ सूर्यमङ्गलौ राश्यादिगौ राशि प्रथमदशांशमध्यस्थितौ सन्तौ फलदौ निखिलफलदातारौ। अवशिष्टांशेष्वीषदीषत् फलदौ। एवं शिते-ज्यौ शुक्रबृहस्पती मध्ये मध्यगतांशदशके निखिलफलदातारावन्यत्रेषदीषत्। शशिसुतो बुधः सदा त्रिंशदंशेषु निखिलफलदाता। अजमन्दौ चन्द्रशनैश्चरौ चरमदशके निखिलफलदातारावन्यत्रेषदीषत्। उक्तञ्च वसिष्ठेन "भवनादिगतौ फलदौ रविभौमौ मध्यगौ च गुरुशुक्रौ। अन्त्यगतौ शशिरविजौ सदैव फलदः शशाङ्कसुतः"। वराहेणापि "दिनकरदुहितरौ प्रवेशकाले गुरुभृगुजौ भवनस्य मध्ययातौ। रविसुतशशिनौ विनिर्गमस्थौ शशितनयः फलदस्तु सर्वकालमिति" रुधिरो भौमः। अध्वेति। यस्मिन् मासे स्वीयजन्मनक्षत्रप्रवेशे सूर्यादिवाराश्रेत् स्युः तदा तस्मिन् मासेऽध्वादीनि फलानि वाच्यानि तद्यथा। रविवारे जन्मनक्षत्रप्रवेशे सति तस्मिन् मासे अध्वा मार्गोऽटनमिति यावत्, फलं तस्य पुंसो भवेत्। एवं चन्द्रवारे जन्मनक्षत्रप्रवेशे अन्नं भक्ष्यं तत्प्राप्तिः स्यादित्यर्थः। एवं भौमवारे वस्त्रभयं भवेत्। बुधवारे सन्धिः। सतां सभीचीना धर्मयुक्ता बुद्धिर्भवेत्। गुरुवारे वस्त्रप्राप्तिर्भवेत्। भृगुवारे सौख्यं भवेत्। शनिवारे दुःखप्राप्तिः स्यादित्यर्थः। उक्तञ्च ज्योतिषरत्नसंग्रहे वामनेन "अध्वा भोजनमग्निभीः सुमतिता वस्त्रं सुखं चान्नकं मासे मासि फलं भवेज्जननभे सूर्यादिवारे स्थिते" इति अथ "मासाख्या च तिथयस्तिथिनांशुमानादिति" भास्कराचार्यवाक्याच्चान्द्रः शुक्लप्रतिपदादि दर्शान्तो मासो ग्राह्य इति शिवम्" १९ धी॰धा॰। अष्टवर्गशुभालाभ एव गोचरशुद्धेर्गौणता तन्मानम् अष्टवर्गशब्दे ५२२ पृ॰उक्तम्

**गोचर्म्मन्** न॰ ६त॰। १गवां चर्मणि, गोचर्म च सम्प्रदाने आसनतया विहितम् यथाह समयाचारतन्त्रे २पटले "मेषासनं तु वश्यार्थमाकृष्टौ व्याघ्रचर्म च। शान्तौ मृगाजिनं प्रस्तं मोक्षार्थं व्याघ्रचर्म च। गोचर्म सम्प्रदाने देवि! मोक्षदे वाजिचर्म च"। "सम्प्रदत्तेन दण्डेन त्रिंशद्दण्डैर्निवर्त्तनम्। दश तान्येव गोचर्म ब्राह्मणेभ्यो ददाति यः" इति २दण्डस्यत्युक्ते "दशदण्डेन वंशेन दशवंशान् समन्ततः। पञ्च चाभ्यधिकान् दद्यादेतद्गोचर्म चोच्यते" इति २वशिष्ठोक्ते च भूमानभेदे "अपि गोचर्म्ममात्रेण भूमिदानेन पूयते" भा॰ आनु॰ ६२अ॰।

**गोचर्म्मवसन** पु॰ गोचर्म वसनमस्य। महादेवे "गोप्रालिर्गोपतिर्गोभो गोचर्मवसनो हरः" भा॰आनु॰ १७अ॰ शिवसहस्रनामोक्तौ

**गोचारक** त्रि॰ गां चारयति चरादौ चर–णिच्–ण्वुल्। गोरक्षके (राखाल)

**गोचारिन्** त्रि॰ गौरिव चरति चर–णिनि। तपस्विभेदे "गोचारिणोऽद्याश्मकुट्टादनोलूखलिकास्तथा। मरीचिपाः फेनपाश्च तथैव मृगचारिणः" भा॰आनु॰ १४अ॰

**गोची** स्त्री गामञ्चति अनुच–क्विप् ङीप् नलोपे अञ्चोपः। गवाचीशब्दार्थे १मत्स्यभेदे। गाः शिवस्तुतिरूपाः वाचः अञ्चति अनुच+क्विप् ङीप्। २हिमालयपत्न्यां शब्दार्थचि॰

**गोच्छाल** पु॰गां भूमिमाच्छादयति छद–णिच्–अण् पृषो॰। भूकदम्बे (चाकुलिया)। रत्नमाला

**गोज** पु॰ "ऋषायां ऋषसंसर्गात् प्रमादादृगूढजातकः। सोऽपि चत्रिय एव स्यादभिषेके च वर्जितः। अभिषेकं विना चायं गोज इत्यभिधीयते। सर्वं च राजवत्तस्य गम्यते पदवन्दनम्" इत्युशनोक्ते सङ्कीर्णजातिभेदे अस्य राजशब्देन समासे राजदन्तादित्वात् पूर्वनिपातः हस्वे एकवद्भावश्च। "गोदुग्धप्रभवं किं वा छागदुग्धसमुद्भवम्। भवेत् गोजं त्रिदोषघ्नं रोचनं बलवर्द्धनम्। वह्निदीप्तिकरं ह्यं सद्यस्तृप्तिकरं लघु। अतीसारेऽग्निमान्द्ये च ज्वरे जीर्णे प्रशस्यते"। भावप्र॰ उक्तलक्षणके २गोछागदुग्धविकारभेदे न॰। ३गोजातमात्रे त्रि॰। गोक्षोणिकाशब्दे स्त्री राजनि॰।

**गोजर** पु॰ गोषु मध्ये जरः जीर्णः। दृढबलीवर्दे "नाड्रियन्ते यथापूर्वं कीनाशा इव गोजरम्" भाग॰२।३०। १४। "गोजरं दृढबलीवर्दम्" श्रीधरः।

**गोजल** न॰गवि जातं जलम्। गोमूत्रे राजनि॰।

**गोजा** त्रि॰ गवि पृथिव्यां व्रीह्यादिरूपेण जायते विट्–आत्वम्। व्रीह्यादिषु। ऋ॰४।४०।५।सदा॰। २गोक्षोणिकाशब्दे राजनि॰। ३क्षुरभ्यां जाते च

**गोजागरिक** न॰ गवि स्वर्गे जागरः अप्रमत्तताऽस्यास्य ठन्। १मङ्गले मङ्गलस्य स्वर्गसाधनाय सदोद्यततया तथात्वम्। गवि भूमौ जागरिकः प्रहरीव अस्यरूपकरणात्। २करणकारकशब्दे। गोषु व्रीह्यादिषु जागरोऽस्यास्य ठन्। ३भक्ष्यकारके त्रि॰शब्दार्थचि॰

**गोजात** पु॰ गवि जातः। १गोनामकपुत्रस्यपत्नीजाते २क्षुरभीजाते ततादौ ३स्वर्गजाते त्रि॰ "नूषस्तु नोदिव्याः पार्थिवासो गोजाता उत ये यज्ञियासः"। ऋ॰७.३५।५

**गोजापर्णी** स्त्री गोजाः दुग्धफेन इव शुभ्रत्वात् पर्णमस्य गौरा॰ङीष्। दुग्धफेनाकृतिशब्दे राजनि॰।

**गोजित्** पु॰ गां भूमिं जयति जि–क्विप्। ऋषे बलेन पृथिवीजयित्वात्तस्य तथात्वम्। ऋ॰१।१०६।१। ८।५८।१०

**गोजिह्वा** स्त्री गोर्जिह्वेव। (गोजिवा) लताभेदे। स्वार्थे क। तत्रैवार्थे अमरः। "गोजिह्वा गोजिका गोजी दार्विका खरपर्णिनी। गोजिह्वा वातला शीता पाचिनी कफपित्तनुत्। हृद्या प्रमेहकासास्रव्रणज्वरहरी लघुः। कोमला तुवरी तिक्ता स्वादुपाकरसा स्मृता" भावप्र॰ तद्गुणा उक्ताः।

**गोजि(जी)** स्त्री गोजिह्वा पृषो॰। गोजिह्वाख्ये लतामेदे भावप्र॰ वा ङीष्। "गोजी च पिटा सह तालपत्रा" "सक्तुद्रुफेनशाकगोजीकाकोदुम्बरिकाः" इति च सुश्रुतः

**गोजिरा** स्त्री गौर्भूमिः तज्जगत्यादि जीर्यतेऽनया ज–क ६त॰। शस्यादिजारिकायाम् "गोजिरया रंहमाणः पुरस्तात्" ऋ०६। ११०।२ [ब्रह्मांसगुडके भरतः

**गोड** पु॰ गोषड्+पृषो॰। (गौड) इति ख्याते नाम्नि प्रदे-

**गोडिम्ब** पु॰ गोर्भूमेर्डिम्ब इव। ऋगालजम्बुकं शब्दार्थचि॰।

**गोडुम्बा** स्त्री गां भूमिं डुम्बति अर्दति डुबि–क पृ॰। (गोसुक) १गवादन्यां (तरमुज) २धीर्घडुम्बे पु॰ मेदि॰। स्वार्थे क। गोडुम्बिका गवादन्याम् रत्नमाला

**गोणी** स्त्री गुण–चङ् नि॰ गुणः गोण+स्वार्थेऽण् ङीप्। धान्याधारे (गुण) ख्याते १आवपनपात्रे २छिद्रयुक्ते, ३शाकटे, ४हिन्दूपौल्लके मानभेदे, ५द्रोणीपरिमाणे च। "गोणी त्वावपनं चेत्" ज्ञानपदा॰ पा॰ सू॰ वि॰कौ॰। तस्य हिन्दूपौल्लकता भावप्र॰ उक्ता यथा

"सूर्णाभ्यान्तु भवेद्द्रोणी वाहो गोणी च सा स्मृता। द्रोणीचतुष्टयं खारी कथिता तत्त्वबुद्धिभिः। चतुःसहस्रपलिका षष्ठ्यत्यधिका च सा। पलानां द्विसहस्रन्तु भार एकः प्रकीर्त्तितः। तुला पलशतं ज्ञेयं सर्व्वत्रैष निश्चयः। माषटङ्कार्द्धविल्वानि कुडवः प्रस्थ माढकम्। राशिर्गोणी खारिकेति यथोत्तरचतुर्गुणम्"। पञ्चभिः सप्तभिर्वा गोणीभिः क्रीतः तद्धितार्थे द्विगौ परिमाणात् ठञ्। "द्विगोर्लुगनपत्ये" पा० तस्य लुकि चपवर्जनस्त्रीप्रत्ययस्य लुक्। ततः "दृङगोणाः" पा०दृत् पञ्चगोणि सप्तगोणि पञ्चगोण्यादिक्रीते पटादौ त्रि०। क्षुद्रा गोणी ह्रस्वत्वात् ङीष्। गोणीतरी क्षुद्रगोण्याम्।

[च श्रुतहति त्रि० मेदिनिः।

गोऽण्ड पु०गोरण्ड इव। १नीचजातिभेदे (गेंड) २हडनाभौ

गोण्डाकरी स्त्री रागभेदे "गोण्डाकरीरागेण रूपकतालेन गीयते" गीतगो०।

गोतम पु०गोभिस्तमोध्वंसं यस्य प्रषो०। १सुनिभेदे तन्नामनिरुक्तिः भा० शान्तु० ६१ अ०यथा "गोतमोऽयं ततोऽभूमोटमस्तो मम दर्शनात्। गोभिस्तमोमम ध्वस्तं जातमात्रस्य देहतः। विद्धि मां गोतमं ब्रह्मन् यातुधानि! निबोध मे" इति। स च श्वेतवराहकल्पे ब्रह्मणो मानसः पुत्रः यथाह वायु०गया०२अ० "ब्रह्मा संभृतसंभारो मानसा स्वत्विजोऽसृजत्" इत्युपक्रमे "सुकपालं गोतमञ्च तथा वेदशिरोव्रतम्"। इति। स च गोत्रप्रवर्त्तकः गोत्रशब्दे दृश्यम्। गोतमस्यापत्यम् अण्यञ्। गौतम तद्वंश्ये प्रवरप्रवर्त्तके ऋषिभेदे बहुषु तस्य लुक् गोतमाः। गौतमशब्देऽधिकं वक्ष्यते आर्षशब्दे ८२७पृ०७दा० दृश्यम्। गोतमवंशप्राधान्यकरसगोत्रोत्पन्ना दश तद्भेदाख्यानञ्चैव दृश्यताम्। अतिशयेन गौः जडत्वात् तमप्। २अतिजडे पुंस्त्री। "सुखाय यः शिक्षात्राय शास्त्रमूचे सचेतसाम्। गोतमं तमवेतैव यथा वेद्य तथैव सः" मैत्र० चार्वाकोक्तिः। तस्य चान्वीक्षिकीविद्याप्रकाशकत्वमत्पादशब्दे ४३पृ० दृश्यम् तच्छब्दे एव तच्छास्त्रप्रतिपाद्याद्य ज्ञम्। तस्य छात्रः गौतम गोतमच्छात्रे सौरा० ङीष्। गोतमी तद्भार्य्यायां अहल्यायाम् स्त्री

गोतमान्वय पु० गोतमोऽन्वयो वंशप्रवर्त्तको यस्य। शाक्यमुनौ मायादेवीसुते त्रेम०।

गोतमस्तोम पु० गोतमेन दृष्टः स्तोमः। १सूक्तभेदे "अथ प्रातर्गोतमस्य चतुरुत्तरस्तोमो भवति तस्य चतस्रषु बहिष्पवमानमष्टाक्षराण्यनुष्टुभः, द्वादशसु माध्यन्दिनः पवमानः, षोडशसु पृष्ठानि, विंशत्यामार्भवः पवमानः, चतुर्विंशत्यामग्निष्टोम साम" शत०ब्रा०१४।५।१।१

दानशीलप्रजाकामनया कर्त्तव्ये एकाहसाध्ये २यज्ञभेदे च "गोस्तोमेन य इच्छेत् दानकामा मे प्रजा स्यादितिः" आश्व० श्रौ० ६।५।१४ तद्विधानं तत्रैवोक्तम् दृश्यम्।

गोतमीपुत्र पु० [त०। गोतमस्या अरुन्धत्याः पुत्रे शतानन्दे

गोतल्लज पु० प्रशस्तः गौः "प्रशंसावचनैश्च" पा०गूर्वनि०। प्रशस्ते गवि स्त्रियामपि पुंस्त्वमेव नियतलिङ्गत्वात् अमरः। गोषु मध्ये तल्लज इति शब्दक०व्युत्पत्तिकल्पनं प्रामादकमेव पाणिनीयसूत्रे कर्मधारये तद्विधानात्

गोतीर्थ न० गवा कृतं तीर्थम्। १गोक्षे "बलिनिवेद्यो गोतीर्थे रेवत्यै प्रयतात्मना" सुश्रु०२तीर्थभेदे च। "तस्यां त्रितस्यो धनसोमनोच पृथोरथाग्नेरसितस्य वायोः। तीर्थं सदामस्य गवां गुहस्य यच्छ्राद्धदेवस्य स आसिषेवे" भाग० २।२।२। त्रितादीनामेकादश तीर्थानि तत्तच्छब्दा प्रसिद्धानि" श्रीधरः

गोतीर्थक पु० "पार्श्वांगतेन शस्त्रेण छेदो गोतीर्थको भवेत्" सुश्रुतोक्ते छेदभेदे "आधौ तत्र बहुच्छिद्रे भिषजा वैद्यविजानता। अर्द्धलाङ्गलिकश्छेदः कार्यो लाङ्गलिकोऽपि वा। सर्वतोभद्रको वापि कार्यो गोतीर्थकोऽपि च" सुश्रुते तत्प्रयोगे निमित्तसूत्रम्।

गोत्र पु० गां भूमिं त्रायते त्रैङ् पालने क। १पर्व्वते तस्य विच्छिन्नरूपेण पृथिव्या धारकत्वात् तथात्वम् गोत्रमित्। गूयते शब्द्यतेऽनेन गूङ् शब्दे करणे ष्ट्रन् गूधृपचीत्यादिना त्रो वा। २आख्यायां नामनि तया शब्द्यमानत्वात्तस्यात्तथात्वम् गोत्रस्खलनम्। ३सम्भावनीयबोधे ४ज्ञानने ५क्षेत्रे ६मार्गे च मेदि०। ७क्षत्रे हेमच०। ८संघे ९हडौ शब्दच०। १०वित्ते धने विश्वः ११सुनिभेदस्यापत्यादिवंशे न०। गोत्रकाराश्चाष्टौ सुप्रसिद्धाः यथाह नि० शि० यौधायनः

"विश्वामित्रोजमदग्निर्भरद्वाजोऽथ गोतमः। अत्रिर्वसिष्ठः कश्यप इत्येते सप्त ऋषयः सप्तानामृषीणामगस्त्याष्टमानां यदपत्यं तद्गोत्रमिति" मनुस्तु सप्ताह यथा "जमदग्निर्भरद्वाजो विश्वामित्रोऽथगोतमः। अत्रिर्वसिष्ठकाश्यपौ गोत्रा सप्तयो गोत्रकारिणः। एतेषां यान्यपत्यानि तानि गोत्राणि मन्यते" एतदुपलक्षणमन्येषामपि दर्शनात्। तथा च धर्म्मप्रदीपे गोत्राणि तु चतुर्विंशतिरित्याह तथा च

इङ्गमतः "शाण्डिल्यः कश्यपश्चैव वात्स्यः सावर्णकस्तथा। भरद्वाजो गोतमश्च सौकालीनस्तथापरः। कुत्समध्यान्विश्वश्च कृष्णात्रेयवशिष्ठकौ। विश्वामित्रः कृशिकश्च कौशिकश्च तथापरः। धृतकौशिकमौद्गल्यौ आलम्बायनः; पराशरः। सौपायनस्तथाऽत्रिश्च वासुकीरोहितस्तथा वैयाघ्रपद्यकश्चैव जामदग्न्यस्तथापरः। चतुर्विंशति गोत्राणां कथिता पूर्व्वपण्डितैः"। "सौकालीनक-मौद्गल्यौ पराशरदृक्षस्रती। काश्यनो विष्णुकौशिक्यौ कात्यायनात्रेयकाश्यकाः। कृष्णात्रेयः साङ्कृतिश्च कौण्डिल्यो गर्गसंज्ञकः। आङ्गिरस इति ख्यातः अनावृकाख्यसंज्ञितः। नव्यजैमिनिदाक्ष्याः शाण्डिल्यो वत्सएव च। सावर्णशैलब्रानवैयाघ्रपद्या धृतकौशिकः। अत्रिः काश्यायनश्चैव वासुकिर्गोतमस्तथा। शुनकः सौपायनश्च शुनको गोत्रकारिणः। एतेषां शान्यपत्यानि तानि गोत्राणि मन्यते"। सर्व्वेऽपिचत्वारिंशद्गोत्रकाराः। "अपत्यं पौत्रप्रभृति गोत्रम्" पा०१२७८ पौत्रप्रभृतौ अपत्यत्वेन विवक्षिते वंशे न०तत्रायमाशयः—प्रवराध्यायप्रसिद्धं लोके गोत्रमिह तु तदप्रसिद्धस्यापि संज्ञार्थमिदम् पौत्रादेरप्यपत्यत्वाव्यभिचारादपत्यपदस्यापत्यत्वेन विवक्षितसिद्धेः तेन पौत्रादेरप्यत्वेन विवक्षायामेव गोत्रत्वम्। पौत्रापत्यशब्दयोः सम्बन्धिकतया यदीयपौत्रादि तं प्रत्येव तस्य गोत्रत्वम् इति। अस्य प्रयोजनं तु "एकोगोत्रे" पा०नियमार्थं तथाहि गोत्रे एक एवापत्यप्रत्ययः स्यात्। उपगोर्गोत्रापत्यम् उपगवः। गार्ग्यः। नाडायनः। "गोत्रे खञ्कोञ संख्यानां प्रत्ययानाम्परम्परा। यद्वा स्वद्यूनसंख्येभ्यो ऽनिष्टोत्पत्तिः प्रदर्श्यते। अपत्यम्पितुरेव स्यात्ततः प्राचामपीति च। मतभेदेन तद्ग्रन्थे स्थलमेतत्तयोत्तरम्" सि०कौ० अयमर्थः पितुरेवापत्यमिति पक्षे हि उपगोरपत्यं तृतीये वाच्ये औपगवादि स्यात्। चतुर्थे त्वजीवज्जीवे श्रुतवंशेत्र औपगवः फक्। इत्यभिज्ञकोः परम्परायां मूलाच्छततमे गोत्रे एकोनशतप्रत्ययाः स्युः। पितामहादीनामपीति सख्यपक्षे तु तृतीये वाच्ये उपगोरपत्ये इष्टे सिद्धेऽपि अपत्यादिष्वपि स्यात् चतुर्थे फगिति ततः फगिजाः परम्परायां शततमे गोत्रे ऽनवतिरनिष्टप्रत्ययाः स्युः। अतो नियमार्थमिदं स्थलम्"। इति गोत्रापत्ये अनेकप्रत्ययाः पा०विस्तृता विस्तरभयान्नोक्ताः। गोत्रान्तरे जातस्यापि दानादितो गोत्रान्तरत्वं स्मृतिविहितं यथा "गोत्ररिक्थे जनयितुर्न भजेत् दत्त्रिमः सुतः। गोत्ररिक्थानुगः पिण्डोव्यपैति ददतः स्वधा" मनुः। अयमाशयः दानात् जनयितुः स्वत्वे निवृत्ते द्वादशविधपुत्रान्तर्गतत्वेन दत्तादीनां पुत्रनिधित्वेन विधानात् विधानेन संस्कारादिना च यद्गोत्रः पुत्रत्वे तद्गोत्रत्वम्। दत्तकन्यायान्तु वचनादेव पितृगोत्रापहारेण पतिगोत्रप्राप्तिः तथा च उ०त०व्यवस्थापितं यथा

"तदानीं गोत्रापहारमाह बधूहारीतः। "ऋगोत्राद्भ्रश्यते नारी विवाहात् सप्तमे पदे। पतिगोत्रेण कर्त्तव्या तस्याः पिण्डोदकक्रिया"। याज्ञिय-वचनादपि पितृगोत्रापहारमाह व्याडविवेके दृश्यते। "याज्ञिय-वचनिका मन्त्राः पितृगोत्रापहारकाः। भर्त्तुर्गोत्रेण नारीणां देयं पिण्डोदकं ततः"। यत्तु सपिण्डनस्य गोत्रापहारित्वप्रतिपादकवचनम्। "संस्थितायान्तु भार्यायां सपिण्डीकरणादिकम्। पैतृकं भजते गोत्रमूर्द्धन्तु पतिपैतृकम्" इति कात्यायनीयं तत् श्राद्धान्तरीयं ज्ञेयव्यवहाराभावात्। अतएव "अनुमन्त्रिता गुरुं गोत्रेणाभिवादयेत" इति गोभिलोक्तं सप्तपदीगमनानन्तरं पत्युरभिवादनं तत् पतिगोत्रेण कर्त्तव्यमिति भट्टनारायणैरुक्तम् एतेन पितृगोत्रेणेति सरलाभवदेवभट्टाभ्यामुक्तं हेयम्। श्राद्धे गोत्रोल्लेखे विशेषः श्रा०त०प्रचेताः "गोत्रसम्बन्धनामानि पितृणां परिकल्पयन्"। सामगानां श्राद्धादिकर्म्मभेदे तस्य विभक्तिविशेषान्तताह तत्रैव गोभिलः "गोत्रं स्वरान्तं सर्वत्र गोत्रस्थाश्यकर्म्मणि। गोत्रस्तु तर्पणे प्रोक्त एवं कर्त्ता न संशयः" शाखिभेदेन प्रेततर्पणे तु विशेषः ब्रह्मपु० उक्तः। "अमुकामुकगोत्रस्तु प्रेतस्तृप्यत्विदं जलम्"। "स्नात्वा सचेलमाचम्य सिक्थे युग्दकं जले। गोत्रनामानुवादादि तर्पयामीति चोत्तरम्" छन्दोगविषयं गोभिलवाक्यम् "विपन्नगोत्रं दयितेन सङ्गिता" किरा० "स्कुटिन्द्रनाद्य मयि गोत्रभिदा" माघ०। "गोत्रेषु स्खलितम्भुवङ्गनाः" रघुः। "स्वरसि स्वर! मेखलासुरैस्त गोत्रस्खलितेषु बन्धनम्" कुमा०। "गोत्रभिदोऽप्यमर्षण" रघुः। गोत्रं करोति ञ—णिनि। गोत्रकारिन् गोत्रप्रवर्त्तके ऋषिभेदे। "सप्तैते गोत्रकारिणः" औषा०। दृक् गोत्रकर्त्तृ तत्रार्थे "तपस्विनो ब्रह्मविदो गोत्रकर्त्तार एव च" भा०शान्ति०४अ०। गां भूमिं दृष्ट्वा त्रायते त्रै—क। १२मेघे निघ०। गोत्रभिच्छब्दे दृश्यम्।

**गोत्रकीला** स्त्री गोत्रः पर्वतः कील इव विघ्नकरत्वात् यस्याः। पृथिव्यां ङीप च०

**गोत्रज** पुंस्त्री गोत्रे समाने वंशे जायते जन–ड। एकगोत्रोत्पन्ने "तत्सुतो गोत्रजो बन्धुः" याज्ञ०। यद्यपि गोत्रोत्पन्नमात्रेऽस्य प्रवृत्तिस्तथापि अशौचप्रकरणे "दशाहेन सपिण्डास्तु शुध्यन्ति प्रेतसूतके। त्रिरात्रेण सकुल्यास्तु स्नात्वा शुध्यन्ति गोत्रजाः" व्यासवाक्ये गोत्रजपदं पारिभाषिकं यद्वाह वृद्धमनुः "सपिण्डता तु पुरुषे सप्तमे विनिवर्त्तते। समानोदकभावस्तु निवर्त्तेताचतुर्दशात्। जन्मनाम्नां स्मृतेरेके तत्परं गोत्रजा-मताः" इति "गोत्रजा निकृत्तसमानोदकभावाः शु०त०रघु०। वस्तुतः गोत्रजपदस्य गोत्रोत्पन्नमात्रार्थकत्वेऽपि सामान्यविशेषन्यायेन सपिण्डादेर्विशेषणत्वोक्तेस्तद्विषयत्वम् अत एव "तत्सुतो गोत्रजोबन्धुरित्यत्र याज्ञ०वचने गोत्रजपदेन पितामहादेर्ग्रहणमिति तद्व्याख्याने च मिता० "गोत्रजाः सपिण्डाः पितामहादयः समानगोत्राः" इत्युक्तम्।

**गोत्रभाग** पु० गोत्राणामेकगोत्रजातानां भागः। गोत्रजातानां परस्परविभागे "गोत्रसाधारणं त्यक्त्वा देशान्यदेशं समाश्रितः। तद्वंशप्रसूतागतस्यांशः प्रदातव्यो न संशयः। तृतीयः पञ्चमश्चैव सप्तमोवापि यो भवेत्। जन्मनामपरिज्ञाने लभेतांशं क्रमागतम्। यं परम्परया मौलाः सामन्ताः स्वामिनं विदुः। तदन्वयस्य गतस्य दातव्या गोत्रजैर्धनी। भुञ्जिरन्पुरुषौ सिध्येदपरेषां न संशयः। अनिवृत्ते सपिण्डत्वे सकुल्यानां न सिध्यति। अस्वामिना तु यद्भुक्तं स्वदेहेत्यापणादिकम्। सुहृद्बन्धुसकुल्यस्य न तद्भोगेन क्षीयते। विवाह्यश्रोत्रियैर्भुक्तं राज्ञामात्यैस्तथैव च। सुदीर्घेणापि कालेन तेषां सिद्ध्यति तत्तु न" वृद्धस्मृतिः गोत्र साधारणं द्रव्यमिति शेषः विवाह्यो जामाता

**गोत्रभिद्** पु० गोत्रं पर्वतं मेघं वा भिनत्ति भिद–क्विप्। इन्द्रे इन्द्रस्य वज्रस्य मेघभेदनात् पर्वतपक्षच्छेदनाद्वा तथात्वम्। "पुरन्दरो गोत्रभिद्वाक्षुरायात्" यजु० २०।२८ गोर्भूमिमिच्छन्ती वृष्ट्या त्रायन्ते गोत्रा मेघाः तान् वृष्ट्यर्थं भिनत्ति गोत्रान् गिरीन् वा भिनत्ति" वेददी०। तस्य गिरिपक्षभेदनकथा पौराणिकी अनुसन्धेया। यथा "ततोऽन्ये जातपक्षा विष्णोश्चैव तु मायया। प्रस्थिता भेदितुं शक्रा यत्नपूर्वं निवेशिताः। तत्स्थानमसुराणान्तु ज्ञात्वादित्यं जलार्णवे। प्रतीच्यां पर्वताः सर्वे निममज्जुर्यथा गजाः। तत्रासुरेभ्यः शंसन्ते आधिपत्यं सुराश्रयम्। तच्छ्रुत्वैवासुराः सर्वे चक्रुरुद्योगमुत्तमम्" इत्युपक्रमे "धरणान्तु गिरीन् स्वाश्च स्वेषु स्वानेषु गोः पतिः। चिच्छेद पविना पक्षान् सर्वेषां भुवि चारिणाम्। एकः सपक्षो मैनाकः सुरैस्तत्समये कृतः" अग्नि पु०। "पक्षच्छेदोद्यतं शक्रं शिलावर्षीव पर्वतः" इति तदनुसारेण रघौ वर्णितम्। गोत्रं नाम भिनत्ति। २नामभेदके एकनामोच्चारणकाले अन्यनामोच्चारके च। "तदयुक्तमङ्ग तव विश्वसृजा न कृतं यदीक्षणमकृत्तयम्। प्रकटीकृता जगति येन खलु स्फुटमिन्द्रताद्य मयि गोत्रभिदा" माघः। "गोत्रभिदा पर्वतभिदा नामभेदिना च" मल्लि०।

**गोत्रवृत्त** पु०गोत्रभवो नगजातो वृक्षः। षत्वनडुहौ भावप०।

**गोत्रस्खलन** न०गोत्रे नामनि स्खलनम्। अन्यस्य नामग्रहणाशया अन्यस्य नामग्रहणरूपे रागहेतुके स्खलने। "जगाद गोत्रस्खलनेऽपि कारणम्" (नलम्) नैष०। "गोत्रस्खलने भ्रान्तिं मानिनि! जानीहि केवलां भद्रम्। आख्यानतोविशेषप्रतिपत्तिः पाणिनीय इव" उद्भटः। भावे क्त "गोत्रस्खलितमध्यत्र न० "उत गोत्रस्खलितेषु बन्धनम्" कुमा० [स्त्रादिभ्योषणेत्र–क। २भूमौ अमरः।

**गोत्रा** स्त्री गवां समूहः त्र। १गोसमूहे गां त्रायते ग्र-

**गोत्रादि** पु० "तिङोगोत्रादीनि कुत्सनाभीक्ष्ण्ययोः" पा० तिङन्तात् परस्य अनुदात्तत्वनिमित्ते यत्प्रत्यये तदुणत्वे पा०ग०सूत्रे उक्तो यथा "गोत्र ब्रुव प्रवचन प्रहसन प्रकथन प्रत्यायन प्रपञ्च प्राय न्याय प्रवचन विचक्षण व्यवचक्षण स्वाध्याय भूयिष्ठ वाचाम्"।

**गोत्व** न० गोर्भावः त्व। गोशब्दप्रवृत्तिनिमित्ते गवेतरावृत्तौ सकलगोव्यक्तिस्थे जातिभेदे। तल्लक्षणन्तु गवेतरावृत्तित्वे सति सकलगोव्यक्तिवृत्तित्वम्। सत्ताद्रव्यत्वादिजातेः सकलगोव्यक्तिवृत्तित्वात् तद्वारणाय सत्यन्तम् विशेषणं गगनादेर्गवेतरावृत्तित्वात् विशेष्यदलम्। वृत्तिताद्यत्र समवायेन यात्तां तेन गवेतरघटादौ कालिकसम्बन्धेन गोत्वस्य सत्त्वेऽपि नासम्भवः न वा गवेतरासमवेतस्य गगनादेः कालिकेन सकलगोव्यक्तिवृत्तित्वादतिव्याप्तिः। तस्याश्च जातेः गोपदप्रवृत्तिनिमित्तत्वशक्तं काव्य० प्र० वाक्यपदीये "गौः शब्देषु न गौर्नाम्यगौः गोत्वाभिसम्बन्धात्तु गौः" यतो गोत्वसम्बन्धादेव गोर्गोपद-

वाच्यता अतो गोत्वस्य गोपदप्रवृत्तिनिमित्तत्वम्। तदुव्यङ्ग्यत्वं गलकम्बलादिमत्त्वरूपाकारभेदः संस्थानविशेषस्यैव जातिव्यङ्ग्यत्वात्। तत्र गोपदं गोत्वे शक्तं व्यक्तेर्भानमनुमानात् तुल्यवित्तिवेद्यत्वाद्देति मीमांसकास्मन्यन्ते अनुमानञ्च सास्नावेत्यादौ गोत्वानयनमिति शाब्दबोधात् परम् गोत्वकर्मकानयनं गोकर्मकानयनं विनाऽनुपपन्नमिति व्यतिरेकव्याप्तियहाधीनम्। गोत्वविशिष्टे शक्तिमिति तु नैयायिकाः व्यक्तिमात्रस्य शक्यत्वे व्यक्तीनामानन्त्यात् व्यभिचारः। अतद्व्यावृत्तिरूपोऽपोहो वा गोपदशक्य इति तु बौद्धाः

**गोद** पु० गां नेत्रं दायति शोधयति दै—क। १मस्तकस्थे मस्तिष्के हेम० मस्तिष्कस्य नेत्रप्रकाशहेतुत्वात् तथात्वम्। गां ददाति दा—क। २गोदातरि त्रि०। "अक्षदस्तु स्त्रियं पुत्रां गोदोव्रह्मस्व पिटपम्" मनुः। गोदावर्य्या समीपस्थे देशभेदे पु० ततः चतुरर्थ्यां ञ्य। गोदः तद्देशादूरभवादौ त्रि० जनपदे तु वरणा०तस्य लुप्। गोदो जनपदः "विशेषणानाङ्गाजातेः" पा०। लुबर्थस्य विशेषणानामपि तद्विशेष्यवचने न तु जातेः। गोदौ रमणीयौ" त्रि०कौ०

**गोदत्र** न० गोर्दं त्रायते त्रै—क। मस्तिष्करक्षके सकटादौ

**गोदन्त** न०गोर्दन्त इवावयवोऽस्य ६त०। हरितालेराजनि०

**गोदा** स्त्री गां स्वर्गं ददाति दानेन दा—क। गोदावरीनद्याम् हेम०। "नेटोऽच गोदोत्तरतच यावत्" स०चि०।

**गोदान** न० गावो केशान्लोमानि वा दीयन्ते खण्डशोऽत्र। आधारे ल्युट् १केशान्तास्ये द्विजाति संस्कारभेदे केशान्त शब्दे २२५०पृ०दृश्यम्। "अथास्य गोदानविधेरनन्तरम्" स्मृतिः। तत्र "एवेन गोदानम्" आश्व०गृ०१।१८।१। इत्यादिसूत्रजा तेन निरूपितम्। "चूडोपनयनगोदानविवाहाः" आश्व०गृ०। गवि पृथिव्यां दीयते निधीयते स्वापकाले दा—कर्म्मणि ल्युट्। २दक्षिणकर्णसमीपस्थे शिरःप्रदेशे। "अपरेण दक्षिणाग्निम् दक्षिणं गोदानमुन्दति" कात्या० श्रौ० ५।२।१४। "दक्षिणं गोदानं वितार्य्यौनन्नीमाभ्यां" कात्या० श्रौ० ७।२।१८। "खपद्भिर्गवि पृथिव्यां दीयते इति गोदानं शिरसोदक्षिणं प्रदेशं वितार्य्य कङ्कतादिना तत्स्थाने केशान् विजटान् कृत्वा उन्दति क्लेदयति अद्भिराई करोति इमामापः इत्यादि मन्त्रेण" कर्कः। ६त०। गोः सुरभ्या दानस्य वा २दाने। गोप्रशंसापूर्वकं तद्दानप्रकारो हेमाद्रि०दा० उक्तो यथा भविष्यत् पुराणे। ब्रह्मोवाच "आदित्यदुहिता गौर्हि पृथ्वीयं परिकीर्त्तिता। अस्या अर्थे सर्वलोकानामुत्पत्ति कृतसिद्धये। ब्राह्मणाश्चैव गावश्च कुलमेकं द्विधा कृतम्। एकत्र मन्त्रास्तिष्ठन्ति हविरेकत्र तिष्ठति। गोभ्यो यज्ञाः प्रवर्त्तन्ते गोभ्योदेवाः समुत्थिताः। गोभ्यो वेदाः समुद्दीर्णाः सषड्ङ्गपदक्रमाः। षड्ङ्गमूलं गवां नित्यं ब्रह्मविष्णू समाश्रितौ। षड्ङ्गाग्रे सर्वतीर्थानि स्थावराणि चराणि च। शिरोमध्ये महादेवः सर्वभूतमयः स्थितः। ललाटाग्रे स्थिता देवी नासावंशे च षण्मुखः। कम्बलाश्वतरौ नागौ नासापुटसुपाश्रितौ। कर्णयोरश्विनौ देवौ चक्षुषोः शशिभास्करौ। दन्तेषु मरुतः सर्वे जिह्वायां वरुणः स्थितः। सरस्वती च ङुङ्कारे यमयक्षौ च मस्तकयोः। सन्ध्याद्वयं तयोरग्र्यां श्रीवामिन्द्रः समाश्रितः। रक्षांसि कक्षदेशे तु साध्याश्चोरसि संस्थिताः। चतुष्पात् सकलो धर्मः स्वयं जङ्घासु संस्थितः। खुरमध्ये तु गन्धर्वाः खुराग्रेषु च पन्नगाः। खुराणां पश्चिमाग्रेषु गणाश्चाप्सरसां स्थिताः। रुद्राश्चैकादश पृष्ठे वसवः सर्वसन्धिषु। श्रोणीतटस्थाः पितरः सोमोऽङ्गेषु समाश्रितः। आदित्यरश्मयोवाले पिण्डीभूता व्यवस्थिताः। साध्याङ्गेषु च गोमूत्रे गोमये यमुना स्थिता। क्षीरे सरस्वती देवी नर्म्मदा दधिसंस्थिता। घृताशनः स्वयं सर्पिर्ब्रह्मणानां गुरुः परः। अष्टाविंशतिदेवानां कोष्ठोरोमसु संस्थिताः। उदरे पृथिवी श्रेया सशैलवनकानना। चत्वारः सागराः पूर्णा गवाङ्गे तु पयोधराः। एतद्धि कथितं सर्वं यथा गोषु प्रतिष्ठितम्। जगद्धै देवगार्दूल! स देवासुरमानवम्"। स्कन्दपुराणे "तृणानि खादन्ति वसनाप्रदाने पिबन्ति तोयान्यपरिग्रहाणि। दुहन्ति वाहन्ति धुनन्ति धान्यं गवां रसैर्जीवति जीवलोकः। तृप्तास्तु गावः शमयन्ति पापं दत्तासु गावस्त्रिदिवञ्चयन्ति। संरक्षितास्तोषयन्ति वित्तं गोभिर्न तुल्यं धनमस्ति किञ्चित्। शस्यं समश्नाति ददाति नित्यं पापक्षतिं मित्रविवर्द्धनं च। स एव चार्थैः परिभुज्यते च गोभिर्न तुल्यं धनमस्ति किञ्चित्। तृणानि शुष्काणि वने चरित्वा पीत्वापि तोयान्यस्तं स्रवन्ति। यद्गोमयाद्याश्च पुनन्ति लोकान् गोभिर्न तुल्यं धनमस्ति किञ्चित्"। हारीतः "बहुक्षीराय यो गा वै ब्राह्मणायोपपादयेत्। उत्तारयेत्स आत्मानं सप्त सप्त कुलानि च"।

देवलः "सुशीलां लक्षणवतीं युवतीं वत्सयुतां। बहुदुग्धवतीं स्निग्धां धेनुं दद्याद्विचक्षणः"। वेदव्यासः "यथाशक्तिक्रयं कृत्वा गाः क्रीत्वा संप्रयच्छति। आत्मविक्रयतुल्यास्ताः शाश्वतीः दृढकौशिकः"। तथा संख्यामेवर्जयित्वा तु यो वै गाः सम्प्रयच्छति। यावतीः स्पर्शयेद्गावः स तावत् फलमश्नुते"। तावदिति पूर्वोक्तं तावद्गोरोमसंख्यितं संवत्सरं स्वर्गफलमित्यर्थः। "यो वै द्यूते धनं जित्वा क्रीत्वा गाः संप्रयच्छति। स दिव्यमयुतं शाक्रवर्षाणां फलमश्नुते"। 'अनजाताः, क्रयग्रानलब्धाः पणक्रीता निर्जिताद्यौकजाश्च। लक्ष्मोत्कृष्टाः पोषणाभ्यागताश्च हारैरेतैर्गोविशेषाः प्रशस्ताः"। अनजाता गर्भिणश्च इति भारतपदप्रकाशकारः। क्रयग्रलब्धाः यथामूल्यक्रयप्राप्ताः ग्रानलब्धाः प्रतिग्रहलब्धाः पणक्रीताः भक्तिलब्धाः निर्जिता युद्धादिना, ओकजाः स्वगृहजाताः, लक्ष्मोत्कृष्टाः पोषणाभ्यागता व्याधिव्याध्यादिलक्ष्माक्रान्ताः सत्यः स्वामिना याच्ययाः स्वयं च पोषणं कृत्वा लब्धाः। "कृशा दुष्टा दुर्बला व्याधिता च न दातव्या या च मूल्यैरदत्तैः। क्लेशैर्विप्रं या फलैः संयुनक्ति तस्या वीर्याशफलाद्यापि लोकाः"। मूल्यैरदत्तैः स्वीकृतेति शेषः। तथा। "न क्रयां पापवत्सां वा बन्ध्यां रोगान्वितां तथा। न व्यङ्गामपरिश्रान्तां दद्याद्गां ब्राह्मणाय वै। योदद्याच्चोपयुक्तार्थां जीर्णाश्चेतृश निष्फलाम्। तस्मः संप्रविशेद्दाता द्विजं क्लेशेन योजयन्"। ब्रह्मपुराणे "पीतोदकां जग्धतृणां दुग्धचोषां निरिन्द्रियाम्। जग्धतामङ्गहीनाञ्च सदृशवत्सां महाशनाम्। क्षेत्रबाजपरीवास्यिक्रयादां सन्धिनीं खलाम्। पुटधेनुं यमनस्थस्त्रियं व्रणयितस्तनीम्। न दद्याद्ब्राह्मणेभ्यश्च छदोषं दुष्टमनसा"। पीतोदकां जग्धतृणामिति, दृढत्वोपलक्षणपरम्। दुग्धचोषां, स्वकीयस्तनपायिनीं, महाशनाम् बहुभक्षां, पुटधेनुं बाल्यावस्थैव या गर्भिणी। विश्वामित्रः "नैकवृद्धाञ्च निःवृद्धां स्फुटिताचीं चलत्खुराम्। न दद्यात् स्तनहीनैव गां शुभामेव दापयेत्"। महाभारते "अम्बरीषोगवां दत्त्वा ब्राह्मणेभ्यो प्रतापवान्। अवुदानि दशैकञ्च सराष्ट्रोऽभ्यपतद्दिवम्। दत्त्वा शतसहस्रन्तु गवां राजा प्रसेनजित्। सवत्सानां महातेजा गतोलोकानतुत्तमान्"। तथा। "प्रासादा यत्र सौवर्णाः शय्या रत्नोज्ज्वलास्तथा। वराश्चाप्सरसो यत्र तत्र गच्छन्ति गोप्रदाः। गोप्रदोनरकञ्चैति पयः पीत्वाम्बुजेक्षणम्। विमानेनार्कवर्णेन दिवि राजन्! विराजते। तस्यास्त्वेताः सुशोभाढ्यः शतशोवरयोषितः। रमयन्ति विमानस्थं दिव्याभरणभूषिताः। वेणूनां वल्गुकीनाञ्च नूपुराणाञ्च निःस्वनैः। हारेण हरिणाक्षीणां सुप्तः सन् प्रतिबुध्यते। यावन्ति रोमाणि भवन्ति धेन्वास्तावन्ति वर्षाणि महीयते सः। स्वर्गाद्भ्रुतश्चापि ततस्तु लोके कुले सत्तृप्यति गोमतां सः"। विष्णुः "गोप्रदानेन स्वर्गमाप्नोति दशधेनुप्रदोगोलोकं शतप्रदश्च ब्रह्मलोकम्"। जाबालः "होमार्थमग्निहोत्रस्य योगान्द्यादयाचिताम्। निर्वित्तपूर्वां पृथिवी तेन दत्ता न संशयः"। याज्ञवल्क्यः "यथाकथञ्चिद्दत्त्वा गां धेनुं वाऽधेनुमेव वा। अरोगामपरिक्लिष्टां दाता स्वर्गे महीयते"। अङ्गिराः "गौरेकस्यैव दातव्या श्रोत्रियस्य विशेषतः। सा हि तारयते पूर्वान् सप्त सप्त च सप्त च"। नन्दिपुराणे "अपात्रे सा तु गौर्दत्ता दातारञ्चरकं नयेत्। कुत्सैकविंशत्या युक्तं ग्रहीतारञ्च तारयेत्। विधिना च यदा दत्ता पात्रे धेनुः सदक्षिणा। तदा तारयते जन्तून् कुलानामयुतैः शतैः। पात्रलक्षाण्यधिकां सख्याः सुदृढाग्निहोत्रिणः। देवताश्च तथा सख्या गोदानं श्रेतदुत्तमम्"। महाभारते "ब्रह्मस्वाने सीदति चातिमात्रम् कर्म्यार्थं च क्षेमहेतोः प्रकल्पाम्। पुत्रार्थं वा बालसंरक्षणे वा धेनुन्दद्यादेष कालो विधिष्टः" प्रकल्पां सोमयागे। तथा "न वधार्थं प्रदातव्या न क्रीणाने न नास्तिके। गोजीवे न च दातव्या तथा गौः पुरुषर्षभ!"। क्रीणाने क्रयार्थकः। आत्रेयः "सीदते बहुभक्षाय श्रोत्रियायाऽक्षितान्वये। अतिथिप्रियाय दानाय देया धेनुर्गुडान्विता। अकुलीनाय मूर्खाय क्रुद्धाय पिशुनाय च। हव्यकव्यव्ययेताय गौर्न देया कथञ्चन"। अथ दानविधिः। विश्वामित्रः "प्राङ्मुखीं गामयस्याथ सवत्सानां सुपूजिताम्। पुण्यदेशे तु दाता वै स्नातो वस्त्रशिखो भवेत्। उदङ्मुखस्तु विप्रः स्यात्पात्रलक्षणलक्षितः। आच्छाद्यपात्रं करे कृत्वा कनकेन समन्वितम्। निक्षिप्य पुच्छं तस्यिंस्तु एतदिग्धं प्रमृज्य च। सतिलं विप्रपाणिन्तु प्रागग्रन्तु निधापयेत्। सतिलं सकुशञ्चापि गृहीत्वा दानमाचरेत्। अनेनैव तु मन्त्रेण पात्रहस्ते जलं क्षि-

येत् । यज्ञसाधनभूता या विश्वस्याधारधारिणी । विश्वरूपः परो देवः प्रीयतामनया गवा । अनुव्रज्य तु तां धेनुं ब्राह्मणेन समन्विताम् । गोमतीन्तु ततो विद्यां जपेत प्रयतः शुचिः । वह्निग्राह वासुदेवं प्रीयतामिति चानघ !। पात्रं मनसि सञ्चिन्त्य तोयमप्सु विनिक्षिपेत् । जलशायी ब्रह्मपिता पद्मनाभः सनातनः । अनन्तभोगशयनः प्रीयतां परमः पिता" । गोमतीमाह यमः "गावः सुरभयोनित्यं गावोगुग्गुलगन्धिकाः । गावः प्रतिष्ठा भूतानां गावः स्वस्त्ययनं महत् । अन्नमेव परं गावो देवानां हविरुत्तमम् । पावनं सर्वभूतानां रक्षन्ति च वहन्ति च । हविषा मन्त्रपूतेन तर्पयन्त्रमरान्दिवि । अग्नीषोमस्विष्टकृतां गावो होमप्रतिष्ठिकाः । सर्वेषामेव भूतानां गावः शरणमुत्तमम् । गावः पवित्रं परमं गावो मङ्गलमुत्तमम् । गावः सर्वस्य लोकस्य मातरोधन्याः शुभावहाः । नमोगोभ्यः श्रीमतीभ्यः सौरभेयीभ्य एव च । नमो ब्रह्मसुताभ्यश्च पवित्राभ्यो नमो नमः । ब्राह्मणाश्चैव गावश्च कुलमेकं द्विधा कृतम् । एकत्र मन्त्रास्तिष्ठन्ति हविरेकत्र तिष्ठति" । अन्यापि गोमती, महाभारतोक्ता तिलधेनुदाने दर्शिता । "ततश्चानयोर्विकल्पात्तुल्यानमिति । सर्वगोदानसाधारणं मन्त्रमाह वशिष्ठः । "घृतक्षीरप्रदा गावो घृतयोन्यो घृतोद्भवाः । घृतनद्यो घृतावर्त्ता मे सन्तु सदा गृहे । घृतं मे हृदये नित्यं घृतं नाभ्यां प्रतिष्ठितम् । घृतं मे सर्वतश्चैव घृतं मे मनसि स्थितम् । गावोममाग्रतोनित्यं गावः पृष्ठतः एव च । गावोमे सर्वतश्चैव गवां मध्ये वसाम्यहम्" । "इत्याचम्य जपन् सायं प्रातश्च पुरुषः सदा । यदह्ना कुरुते पापं तस्मात् स परिमुच्यते" । दक्षिणा चास्य सुवर्णम् यदाह वशिष्ठः "सुवर्णं दक्षिणामाहुर्गोप्रदाने मनीषिणः । सुवर्णं परमं ह्यायुर्दक्षिणार्थं न संशयः । गोप्रदानन्तारयते सप्त पूर्वान् नरांस्तथा । सुवर्णं दक्षिणां दत्त्वा तावद्भिर्मुच्यते । सुवर्णं परमं दानं सुवर्णं दक्षिणा परा । सुवर्णं पावनं प्राहुः परिमाणं परन्तथा" अत्र सुवर्णशब्दस्य हिरण्यपर्य्यायत्वे यथाश्रुतानुष्ठानम् । अपरे त्वाहुः सकृदुच्चरितसुवर्णशब्दावगतपरिमाणार्थपरित्यागानुपपत्तेः सुवर्णशब्दस्य प्राक्तरित्यादिक्रियाकर्मभूततया द्वितीयान्तत्वेन लिङ्गविशेषनिर्द्धारणाच्च परिमाणार्थतैव न्याय्येति । एवं च सत्यनियतानुष्ठानप्रसङ्गभङ्गः तथा परिमाणपरत्वेऽप्येतदपि समञ्जसं स्यात्" । वर्णभेदेन गोदानफलादि तत्रोक्तं यथा

"कृष्णाङ्कान्ददते यस्तु षट्क्ष्मां खलङ्कृताम् । घण्टामालाकुलां कृत्वा पुष्पैश्चैवाप्यलङ्कृताम् । विधिवच्च द्विजातिभ्यो यमलोकं न पश्यति । आयुरारोग्यमैश्वर्यं दाता कामांश्च मानवान् । श्वेताङ्कान्ददते यस्तु दिव्यरत्नैरलङ्कृताम् । घण्टामालाकुलां कृत्वा पुष्पैश्चैवाप्यलङ्कृताम् । सुखे भूयः प्रदातव्यो घृतेनाप्लुत्य पूरयेत् । सुवर्णशृङ्गाभरणा तथा रौप्यखुरा शुभा । षट्क्ष्मा शुभा चैव दातव्या ध्यानयोगिने । यस्तु ददाच्च गां क्षेत्रां तस्य पुण्यफलं शृणु । जन्मप्रभृति यत् पापं मातृकं पैतृकं च यत् । कृतोद्वहस्य धूर्त्तस्य तत्क्षणा देव नश्यति । गान्ददानीह इत्येव वाचा पूयेत सर्वशः । पिता पितामहश्चैव तथैव प्रपितामहः । नरकस्थाः प्रमुच्यन्ते सोमलोकं व्रजन्ति ते । गौरीं चैव प्रयच्छेत्तु यस्तु गां वै नरः शुचिः । अक्षीरालोपितश्चैव कृतगौरीनरः सदा । सुवर्णशृङ्गीं रौप्यखुरां सुक्ताताम्रभूषिताम् । घण्टामालाकुलां चैव वस्त्रपुष्पैरलङ्कृताम् । कृतपञ्चास्तरेत् प्राज्ञो सुखे घृतं प्रदापयेत् । भक्ष्यभोज्यान्नपानेन ब्राह्मणान् भोजयेत् पुमान् । गान्ददानीह इत्येव वाचा पूयेत सर्वशः । मातृकं पैतृकं चैव यज्ञान्यदुष्कृतं भवेत् । पापञ्च तस्य तत् सर्वं दहत्यग्निरिवेन्धनम् । वर्षकोटिसहस्राणि पुमान् स दिवि मोदते । दासीदासैरलङ्कारैस्तूयते सर्वजन्तुभिः । अरोगश्चैव लावेत तेजस्वी च भवेन्नरः । नीलवर्णाञ्च गान्दद्याद्दोग्ध्रीं शीलगुणान्विताम् । सुवर्णशृङ्गीं रौप्यखुरां सुक्ताताम्रभूषिताम् । षट्क्ष्मां शुभां सौम्यां घण्टादामैरलङ्कृताम् । पञ्चरङ्गेण सूत्रेण गलवेष्टनशोभिताम् । रुद्रस्य प्रमुखे देया विष्णोश्च ब्राह्मणस्य च । गां ददानीह इत्येव वाचा पूयेत सर्वशः । पिता पितामहश्चैव तथैव प्रपितामहः । नरकस्थाः प्रमुच्यन्ते नीलां गां ददते तु यः । वर्षकोटिसहस्राणि लोके तिष्ठति वारुणे । दधिक्षीरवहा नद्यो वर्त्तन्ते सर्वतः सदा । घृतशैलाः प्रपद्यन्ते नवनीतस्य पर्वताः । अक्षिभागी बहुधनो दुर्भद्रञ्च न पश्यति" ।

सवर्णवत्ससहितायाः कपिलादिकायागोदानविधिस्तत्रैव महाभारते ।

"समानवत्सां कपिलां धेनुं दत्त्वा पयस्विनीम् ।

सुव्रतां वस्त्रसम्पन्नां ब्रह्मलोके महीयते"। समानवत्सां समानवर्णवत्साम्। "रोहिणीं तुल्यवत्सां च धेनुं दद्यात्पयस्विनीम्। सुव्रतां वस्त्रसंवीतां इन्द्रलोके महीयते। समानवत्सां शबलां धेनुं दत्त्वा पयस्विनीम्। सुव्रतां वस्त्रसंवीतां सोमलोके महीयते"। शबलां कर्बुराम्। "समानवत्सां कृष्णान्तु धेनुं दत्त्वा पयस्विनीम्। सुव्रतां वस्त्रसंवीतामग्निलोके महीयते। वातरेणुसवर्णान्तु सवत्सां कामदोहनाम्। प्रदाय वस्त्रसंवीतां वायुलोके महीयते। समानवत्सां धूम्रान्तु धेनुं दत्त्वा पयस्विनीम्। सुव्रतां वस्त्रसंयुक्तां यमलोके महीयते। श्यामां हेमसवर्णान्तु सवत्सां कामदोहनाम्। प्रदाय वस्त्रसंवीतां वारुणं लोकमश्नुते। श्यामा, गौः। कामदोहनां अनायासदोहाम्। "स्थिरवत्सां पिङ्गाक्षीं सवत्सां कामदोहनाम्। प्रदाय वस्त्रसंवीतां कौबेरं लोकमाप्नुयात्"। पलालधूमवर्णान्तु सवत्सां कामदोहनाम्। प्रदाय वस्त्रसंवीतां पितृलोके महीयते। सवत्सां घीवरीन्दत्त्वा सितकण्ठीमलङ्कृताम्। वैश्यदेवसमस्थाने श्रेष्ठं प्रपद्यते। सितकण्ठीं कृष्णगलाम्। "समानवत्सां गौरीन्तु धेनुन्दत्त्वा पयस्विनीम्। सुव्रतां वस्त्रसंवीतां वरुणं लोकमश्नुते। सुव्रता सुखदोग्ध्री। "पाण्डुकम्बलवर्णान्तु सवत्सां कामदोहनाम्। प्रदाय वस्त्रसंवीतां साध्यानां लोकमश्नुते। वत्सोपपन्नाङ्गीन्तु सर्व्वरत्नसमन्विताम्। गन्धर्वाप्सरसां लोकान् दत्त्वा प्राप्नोति मानवः। गोप्रदानरतोयाति भित्त्वा जलदसञ्चयान्। विमानेनार्कवर्णेन दिवि राजन्! विराजते। तद्वारवेशाः सुश्रोण्यः सहस्रं वरयोषितः। रमयन्ति नरश्रेष्ठं गोप्रदानरतङ्करम्"।

देवतोद्देशेन गोदानविधिस्तत्रैव विष्णुपुराणे

"देवदक्षिणदिग्भागे धेनुः कार्य्या उदङ्मुखी। प्राङ्मुखं वत्सकं कृत्वा ब्राह्मणं च उदङ्मुखम्। प्राङ्मुखो यजमानस्तु पूजयेद्ब्राह्मणं ततः। कोऽदादिति च मन्त्रेण प्रतीयाद्ब्राह्मणः स्वयम्"। देवोऽत्र महेश्वरः। "एवंविधानतो दत्त्वा याति दाता शिवालयम्। तत्र भुक्त्वाक्षयान् भोगानन्ते ब्रह्मेति शाश्वतम्"। देवीपुराणे "नीलां वा यदि वा श्वेतां पाटलां कपिलामपि। सदृग्वां वत्सलाङ्गैव दुग्धदोहां सुगात्रिणीम्"। "आदाय विधिवद्देवीं पूजयेच्छुभपङ्कजैः। धूपन्तु पञ्चनिर्य्यासन्तुरुष्कागुरुचन्दनम्। दत्त्वा तु मन्त्रपूर्व्वन्तु नैवेद्यमुपकल्पयेत्। पायसं घृतसंयुक्तं शालयेश्च तथा तु ताम्। द्विजाय शिवभक्ताय सवत्साङ्गां निवेदयेत्। सङ्क्षेपवस्त्रकांस्यान्तु महापुण्यमवाप्नुयात्। यावत्तद्रोमसंख्यानं तावद्वर्ष्याः पुरं वसेत्। इहैव गतपापोऽसौ जायते नृपसत्तम!।" विष्णुधर्म्मे "मान्धाता उवाच। ब्रह्मणः प्रीणनार्थाय केशवस्य शिवस्य च। यानि दानानि देयानि तान्मे ब्रूहि द्विजोत्तम!। येन चैव विधानेन दानं पुंसः सुखावहम्। ऐहिकामुष्मिकाप्नोति करोति न विहन्यते। वसिष्ठ उवाच। गोदानमादौ वक्ष्यामि प्रत्यक्षक्रमयोगतः। येन चैव विधानेन धेनुं नाधिकविस्तरम्। पुण्यन्दिनमथासाद्य स्नात्वाऽऽतर्थ्यं पितृंस्तथा। कृतोपवासः सम्प्राप्य पञ्चगव्यं नरेश्वर!। घृतक्षीराभिषेकञ्च कृत्वा विष्णोः शिवस्य च। तमभ्यर्च्च्य यथान्यायं पुष्पादिभिरनुक्रमात्। उदङ्मुखीं प्राङ्मुखीं वा सृष्टिं कृत्वा पयस्विनीम्"। सृष्टिः सकृत्प्रसूतेत्यर्थः। "सवत्सां वस्त्रसंवीतां सितयज्ञोपवीतिनीम्। स्वर्णशृङ्गीं रौप्यखुरां सुवर्णोपरिसंस्थितान्। शक्तितोदक्षिणायुक्तां ब्राह्मणाय निवेदयेत्। गावो ममाग्रतः सन्तु गावो मे सन्तु पृष्ठतः। गावो मे हृदये सन्तु गवां मध्ये वसाम्यहम्। प्रदक्षिणं ततः कृत्वा धेनुं द्विजवरञ्च तम्। इमां नः प्रतिगृह्णीष्व धेनुर्दत्ता मया तव। स मे पापापनोदाय गोविन्दः प्रीयतामिति"। वह्निपुराणे तु अयमधिको मन्त्रः। "या धेनुः काञ्चनपलाक्षीदत्तेवां गोतमस्य च। साभिकामफला देवी इह लोके परत्र चेति। एवमुच्चार्य्य तं विप्रं गोविन्दं रूप! कल्पयेत्। अनुव्रजेत्तु गच्छन्तं पदान्यष्टौ नराधिप!। अनेन विधिना धेनुं यो विप्राय प्रयच्छति। सर्वकाममसङ्कल्पा विष्णुलोकं स गच्छति। सप्तावरान् सप्तपरानात्मानञ्चैव मानवः। सप्तजन्मकृतात् पापान्मोचयत्यवनीपते!। पदेपदेऽश्वमेधस्य गोसवस्य च मानवः। फलमाप्नोति राजेन्द्र दत्वैवञ्चागौ हरिः। सर्वकामदुघा सम्यक् सर्वकालेषु पार्थिव!। भवत्यो पापहरा यावदिन्द्राश्चतुर्दश। सर्वेषामेव पापानां कृतानामविजानता। प्रायश्चित्तमिदं प्रोक्तमृतामेपदं हितम्। सर्वेषामेव देवानामेकजन्मानुगं फलम्। स्फाटकक्षितिगौरीणां सप्तजन्मानुगं फलम्। ब्राह्मणैः क्षत्रियैर्वैश्यैः शूद्रैश्चान्यैश्च मानवैः। लोकाः कामदुघाः प्राप्ता दत्त्वैतद्विधिना नृप!। गोभ्योऽ-

धिकं ऋणति गापरमस्ति किञ्चिद्दानम् पवित्रमिति ब्राह्मविदोवदन्ति । ताः सम्यदः सरसदश्च समीहमानैर्देवा सदैव विविधा हुलपङ्क्तेभ्यः ।"

"अतः परन्तु गोदानं कीर्त्तयिष्यामि तेऽनघ ! । गावोऽधिकास्तपश्चिभ्यो यस्मात् सर्वेभ्य एव च । तस्मान्महेश्वरो देवस्तपस्वाभिः सङ्गास्थितः । ब्रह्मलोके वसन्त्येताः सोमेन सह भारत ! । यान्तां ब्रह्मर्षयः सिद्धाः प्रार्थयन्ति परां गतिम् । पवसा हविषा दुग्धा शक्रता चाथ चर्मणा । ऋषिभिर्ये परिवन्ति ब्रह्मकैर्वालखैश्च भारत ! । तासां प्रीतास्तपो दानात् सदैताः कर्म कुर्वते । न वर्षविघ्नं वापि दुःखमासां भवत्युत । ब्राह्मणैः रक्षिता यान्ति तस्मात् पारमकं पदम् । एकं गोब्राह्मणं तस्मात् प्रवदन्ति मनीषिणः । रन्तिदेवस्य यज्ञे ताः पशुत्वेनोपकल्पिताः । ततश्चर्मण्वती राजन् ! गोचर्मभ्यः प्रवर्त्तिता । पशुत्वाच्च विनिर्मुक्ताः प्रदानायोपकल्पिताः । ता इमा विप्रमुख्येभ्यो यो ददाति महीपते ! । निस्तरेदापदं क्षिप्रं विषमस्थोऽपि पार्थिव ! । गवां सङ्क्रन्दः श्रेष्ठं नरकं न प्रपद्यते । सर्वत्र विजयस्तापि भवते मनुजाधिप ! । श्रुतं वै गवां क्षीरमित्याह त्रिदशाधिपः । तस्माद्ददाति यो धेनुमग्र्यं स प्रयच्छति । अग्नीनामग्र्यं स्रोतस्तौर्य्यं वेदविदो विदुः । तस्माद्ददाति यो धेनुं स तौर्य्यं सम्प्रयच्छति । स्वर्गो वा मूर्त्तिमानेष, वृषभं यो गवां पतिम् । विप्रे गुणयुते दद्यात् स वै स्वर्गं महीयते । प्राणा वै प्राणिनामेते प्रोच्यन्ते भरतर्षभ ! । तस्माद्ददाति यो धेनुं प्राणानेष प्रयच्छति । गावः शरण्या भूतानामिति वेदविदो विदुः । तस्माद्ददाति यो धेनुं शरण्यं स प्रयच्छति । न वधार्थं प्रदातव्या न क्रीनाशे न नास्तिके । नोञ्छीविने न दातव्या तथा गौर्भरतर्षभ ! । ददत् स तादृशानां वै नरो गां पापकर्मणाम् । श्रुत्वं नरकं यातीत्येवमाङ्गिरसोमनीषिणः । न क्रयां नापवक्त्रां वा वन्ध्यां रोगान्वितां तथा । न व्यङ्गां न परिश्रान्तां दद्याद्गां ब्राह्मणाय च । इमगोसङ्क्रन्दो हि शक्रेण सह मोदते । अत्र्यात् सवते लोकान्नरः शतसङ्क्रन्दः ॥ भा०अनु० ६६ अ०

**गोदारण** न० गां भूमिं दारयति द–णिच्–ल्यु । १ब्राह्मणे अमरः । २कृष्णाजिने हेमच० ।

**गोदावरी** गां स्वर्गं ददाति स्वानात् दा–ल्यु ङीप् रङ्गादेशः । स्वनामख्याते नदीभेदे सा च नदी दक्षिणस्तु दण्डकारण्यसमीपस्था यथाह "सप्तकल्प शरभङ्गं स दण्डकारण्यमाश्रितः । नदीं गोदावरीं रम्यामाश्रित्य न्यवसत्सदा" भा०व०२७३ अ० । "ततो गोदावरीं गत्वा नित्यं सिद्धनिषेवितम् । गवामयमवाप्नोति वाजपेयफलमसमम् भा०व०८५ अ० । "गङ्गे ! च यमुने ! चैव गोदावरि ! सरस्वति ! । नर्म्मदे ! सिन्धु ! कावेरि ! जलेऽस्मिन् सन्निधिं कुरु" । जले तीर्थावाहनमन्त्रः ।

**गोदुग्ध** न० ६त० । गोः क्षीरे । भावप्र० तद्गुणा उक्तास्तच्च वाक्यं गोशब्दे दर्शितम् । वर्णभेदेन गोदुग्धस्य गुणास्तत्रैव "कृष्णाया गोर्भवं दुग्धं वातघ्नि गुणाधिकम् । पीताया हरते पित्तं तथा वातहरं भवेत् । शुक्लं गुरु शुक्लाया रक्तायास्तापि वातजित् । बालवत्सकविवत्सानां गवां दुग्धं त्रिदोषजित् । वक्ष्यमिणास्त्रिदोषघ्नं तर्पणं बलकृत् पयः । जाङ्गलानूपशैलेषु चरन्तीनां यथोत्तरम् । पयो गुरुतरं स्नेहो यथाक्रमं प्रवर्त्तते । खल्वभक्षणाज्जातं क्षीरं गुरु कफप्रदम् । तच्च बल्यं परं हृद्यं स्वस्थानां सुखदायकम् । पलाशक्षारकापोतीबीजजं रोगिणो हितम्" राजनि० तु "गवां प्रसूतसि क्षीरं गुरु विष्टम्भि दुर्जरम् । तस्माद्यदुदिते सूर्ये यामं यामार्द्धमेव वा । सप्तरात्रं पयोपाद्यं तत्पथ्यं दीपनं लघु । विपरीतमबालवत्सानां पयो दोषलमीरितम् । शस्तं वत्सैकवर्षायाधवलीकृष्णयोरपि" दक्षादा मासपर्य्यंता अर्द्धमुष्णं च या भवेत् । तासां गवां हितं क्षीरं मृतं वाऽमृतमेव वा । गवां सितानां वातघ्नं कृष्णानां पित्तनाशनम् । स्नेहघ्नं रक्तवर्णानां क्षीरं स्निग्धं कपिलापयः" राजनि० ।

**गोदुग्धदा** स्त्री गोर्दुग्धं ददाति सम्पादयति दा–क । धेनुकायां राजनि० । तस्याभोजनाद्गोर्दुग्धदर्शनस्यासाधुत्वम् ।

**गोदुह** त्रि०गां दोग्धि दुह–क्विप् ६त० । १गोदोहके(दोयाके) "चिरं निदध्यौ दुहतः स गोदुहः" माघः । २गोपे च "धेनोश्चाकं सुखदमुषं गोदुहां देहमेतत्" उद्धवदू० दुह–क । गोदुहोऽत्यत्र पु० ।

**गोदोह** पु० भावे घञ् । ६त० । "१गोर्दोहने ।" "रुद्रायतने भूमौ गोदोहात् कोटिहोमाच्च" इ०स० २६ अ० । कर्मणि घञ् । "अकर्मकधातुभियोगे देशः कालो भावो गन्तव्योऽध्वा च कर्मसंज्ञ इति वाच्यम्" वार्त्ति० अस्यार्थः

मासमासे गोदोहमासे इत्यादौ सर्वत्राकर्मकधातूनां व्याप्तिगर्भितस्वार्थपरतायां तात्पर्यपाठकमिदं वार्त्तिकं यथाह हरिः

"कालभावाध्वदेशानामन्तर्भूतक्रियान्वैः। सर्वैरकर्मकैर्योगे कर्मत्वमुपजायते। अतस्तैः कर्मभिर्युक्तो धातुर्द्रव्यैरकर्मकः। तस्य कर्मणि भावे च निमित्तत्वाय कल्पते" इति। अस्यायं भावः मासमासे गोदोहमासे इत्यादौ धातोरेव सम्बन्धपूर्वकासनादौ आसनादिकरणस्य सम्बन्धे वा निरूढलक्षणया ज्ञापकमेतद्वार्त्तिकम्। तत्र धातोरादार्थलक्षणायां प्रधानक्रियाया अकर्मकत्वात् इडादिषु पाठाभावाच्च गौणकर्मणि लकारासम्भवेन भाव एव लकारस्तेन मासमास्यत इत्येव प्रयोगः। द्वितीयार्थलक्षणायान्तु प्रधानक्रियायाः सकर्मकतया कालादेश्च तत्कर्मत्वेन मुख्यकर्मण्येव लकारस्तेन मास आस्यते गोदोह आस्यते इति प्रयोग इति विवेकः। अत्र लक्षेत्यभिधानात् क्तद्योगे न तेभ्यः षष्ठीति द्योतितमिति मनोरमायां स्थितम्। २गोदुग्धे च "स्त्री गोदोहोद्भवं दुग्धम्" अमरः। आधारे घञ्। ३गोदहनकाले च तत्कालश्च मुहूर्त्ताष्टमभागात्मकः यथाह या॰त॰ विष्णुः "ततो गोदोहमात्रं वै कालं तिष्ठेत् सदाङ्गणे। अतिथिपतयेत्यर्थाय तदूर्द्धं वा यथेच्छया" गोदोहनकालश्च मुहूर्त्ताष्टमभागात्मकः "आचम्य च ततः कुर्यात् प्राप्तो द्वारावलोकनम्। मुहूर्त्तस्याष्टमं भागमहोरात्रोदितिथिर्भवेत्" मार्क॰ पु॰ एकवाक्यत्वात्" या॰ त॰ रघु॰।

गोदोहन न॰ भावे ल्युट् ६त॰। १गोदोहने। आधारे ल्युट्। २गोदोहनकाले। "न लक्ष्यतेऽवस्थानमपि गोदोहनं क्वचित्" भाग॰१।१८।१७। आधारे ल्युट् ङीप्। गोदोहनी गोदोहनाधारपात्रे गायत्र्यां स्त्री जटाधरः।

गोद्रव पु॰ द्रवति द्रु-अच् ६त॰। गोमूत्रे राजनि॰।

गोधन न॰ गवां धनं समूहः। १गोसमूहे गौरेव धनमस्य। २गोरूपधनवति त्रि॰। गौरेव धनम्। ३गोरूपे धने न॰। "अद्यैव किं चिरेण स्व व्रजामः सह गोधनैः" हरिवं॰ ६६अ॰ "गोधनेषु प्रतोलीषु वरद्वारमुखेषु च। अदृश्यं संस्कारदोषेषु पश्यितास्तत्र शोभनाः" भा॰वि॰४७अ॰ धन-रत्ने भावे अच् गोर्धनस्य रत्न इव रत्नोऽस्य। ४स्थूलाम्रवृक्षे पु॰ शब्दर॰ हरिव॰ मूलं द्रष्टव्यम्।

गोधर पु॰ गां पृथिवीं विघ्नाभावतया धरति धर-अच्। महीधरे पर्वते शब्दार्थचि॰

गोधर्म्म पु॰ गोरिव धर्मः। मैथुनेऽविचारकृपे गोसदृशे धर्मे "गोधर्मं सौरभेयाश्च सोऽधीत्य निखिलं मुनिः (दुर्व्वासाः) भा॰आ॰१॰४अ॰ सतध्यशब्दे १०७५पृ॰ द्रष्टव्यम्।

गोधा स्त्री गुध्यते वेष्ट्यते बाह्वादिरनया करणे घञ्। धनुर्गुणाघातवारणाय प्रकोष्ठे १बध्यमाने चर्मणि। "बद्धगोधाङ्गुलित्रवान्" भा॰ व॰ १७अ॰ "गोधाङ्गिष्टभुजा शाखैरभूद्भोमा रणाटवी" माघः। "ततश्चटचटाशब्दो गोधाघातादभूत्तयोः" भा॰ द्रो॰ १२८अ॰। कर्त्तरि अच्। (गोसाप) इति ख्याते २सर्पभेदे स्त्री अमरः "स्त्रीविषं शल्लकं गोधां खड्गकूर्मशशांस्त्यजा। भक्ष्यान् पञ्चनखेष्वेतानुष्ट्रांश्चैकतोदतः" मनुना तन्मांसं पञ्चनखेषु भक्ष्यतयाऽभिहितम्। तन्मांसपाकगुणादि भावप्र॰उक्तं यथा "गोधाङ्गोष्णजलैर्भृर्यः क्षालितां खण्डशः कृताम्। स्निग्धाञ्च तक्रतोयाभ्यां क्षालितां शुष्कखण्डिताम्। तलवेद् वेसवाराख्यैः प्रलेपो वा विधानतः। विपाके मधुरा गोधा वातपित्तप्रणाशिनी। कषाया कटुका शीता कफघ्नी बलवर्द्धिनी।" सा तु स्थलजजलभेदाद्द्विधा। स्वार्थे क। अत्रैवार्थे। गोधायाः अपत्यम् वा ढक्। गौधेर पत्ये युवा॰ ढक्। गौधेय उदीचा॰ मते यञ्। गौधार तदपत्ये द्वंस्त्री ढकि स्त्रीत्वे ङीप् इति भेदः।

गोधापदी स्त्री गोधाया इव पादो मूलमस्याः खार्श्वादित्वात् जातित्वाद्वा ङीषि पक्षावः। (गोयालिया) लताभेदे। स्वार्थे क। अत्रैवार्थे रत्नमाला।

गोधायस् त्रि॰ गां दधाति धा-बा॰ असुन् ६त॰। गोधारके "गोधायसं वि धनसैरदर्दः" ऋ॰१॰६६।७।

गोधावीणाका स्त्री गोधायाश्चर्मणा नद्धा वीणा तुम्बा सा कन्। तुम्बगोधाचर्मनद्धवीणायाम्। "गोधावीणाका काण्डवीणाश्च पल्योवादयन्त्युपगायन्ति" काव्या॰ औ॰ १।१।७

गोधास्कन्ध पु॰ गोधेव स्कन्धोऽस्य। विट्खदिरे। राजनि॰

गोधि पु॰ गौर्नेत्रं धीयते यस्मिन् आधारे इन्। १ललाटे अमरः गुध-इन्। २गोधायां सर्पभेदे शब्दचि॰ गोधि-स्वार्थे क, गोधेव क अत इत्वं वा। गोधिका (गोसाप) गोधायाम् अमरः।

गोधिकापुत्र पु॰६त॰। १गोधाशावके सर्पात् गोधायास्तत्पुत्रे (सोना गोसाप) इति ख्याते २सर्पभेदे द्वंस्त्री शब्दार्थचि॰

गोधिनी स्त्री गुध–णिनि । दृढ़तीभेदे राजनि०।

गोधूम पु० गुध–वा० उम । गोधूमे शब्दच० ।

गोधूम त्रि० गुध–ऊम । १नागरङ्गे २त्रीव्रीहिभेदे च (गोहुम) च मेदिनिः तद्भेदादि भावप्र०उक्तं यथा"गोधूमः धूम-नोऽपि स्यात् त्रिविधः स च कीर्त्तितः । महागोधूम इत्याख्यः पश्चाद्देशात् समागतः । मधूली तु ततः क्षिद्रिदला सा मध्यदेशजा । निःशूको दीर्घगोधूमः कविन्दीसखाभिधः । गोधूमो मधुरः शीतो वातपित्त-हरो गुरुः । कफशुक्रप्रदो बल्यः स्निग्धः सन्धानकृत्-सरः । जीवनो दृंहणो वर्ण्यो रुच्यो वीर्यस्थिरत्वकृत् । कफप्रदः नवीनो न च पुराणः पुराणयवगोधूम क्षौद्रजाङ्गलमूल्यभुगिति" वाग्भटेन यवसन्ने स्तुतत्वात् । मधूली शीतला स्निग्धा पित्तघ्नी मधुरा लघुः । शुक्ला दृंहणी पथ्या तद्वन्दीसखा स्मृता" तस्य जलाशब्दे २।८।पृ० पाकविशेषो दृश्यः ।

गोधूमक पुंस्त्री गोधूम इव कं शिरोऽस्य । राजिमत् सर्प-भेदे अहिशब्दे ५८। पृ० सुश्रुतवाक्यं दृश्यम् ।

गोधूमचूर्ण दृत० । (मयदा) इति ख्याते पदार्थे "शुष्कगो-धूमचूर्णेन किञ्चित् पृष्टां तु रोटिकाम्" भाव०प्र० । जला-शब्दे दृश्यम् ।

गोधूमसम्भव न० सम्भवत्यस्मात् सम्+भू–अपादाने अप् गोधूमः सम्भवोऽस्य । सौवीरे काञ्जिकभेदे राजनि० ।

गोधूमसार पु०दृत० । (गोहमेरपाको) इति ख्याते गोधूमस्य सारांशे तत्करणप्रकारः पाकराजेश्वरे "निस्तुषान् गोधूमान्दृषत्ले कण्डयित्वा सायङ्काले स्निग्धादिपात्रे जले मग्नं कृत्वा परदिने प्रभातसमये उपरिस्थं जलं क्रमेण दूरीकृत्याऽधःस्थं सारभागे शुष्कं कृत्वा पात्रान्तरे स्थापयेदिति" । [गोधोमिकायां राजनि० ।

गोधूमी स्त्री गां धूमयति धूम+णिच्–अण् गौरा० ङीष् ।

गोधूलि स्त्री गवां खुरोत्थितो धूलिरत्र काले । गवां प्रचार-देशात् स्वगृहागमनकाले गोखुरोद्भूतधूलियुक्ते समयभेदे स च कालो यथा "सन्ध्यातपारुणितपश्चिमदिग्विभागे व्योम्नि स्फुरद्विरलतारकसन्निवेशे । रङ्गे गवां खुरपुटो-द्गलितैरजोभिर्गोधूलिरेव कथितो मुनिभिर्न योगः" पी० धा० धृतवाक्योक्तः उपयमशब्दे १२७५।७६पृ० अस्य विहितत्वं यथा"तिथ्यादिषु निषिद्धेषु चन्द्रताराविलोमतः । अथवा गोधूलियोगं वा स्वीकृत्य गमनं चरेत् । प्राच्या-मुदीच्यां प्रतीच्याञ्च गोधूलिं वर्जयेन्नृपः । दक्षिणे चाभि-जिद्वैश्वत्तरे च निशां तथा" । ज्यो० त० वराहः गोरजस शब्दोऽत्रैव उपयमशब्दे २५७५।७६पृ० उदा० ।

गोधेनु स्त्री गौर्धेनुः जात्या समासे परनिपातः । दुग्धवत्यां सवत्सायां गवि

गोधेर त्रि० गुध–एरच् । गोप्ररि जटादिकोषः

गोध्र पु० गां भूमिं धरति धृ–मूलवि० क । महीधरे पर्वते

गोनन्दी स्त्री गवि जले नन्दति नन्द–अच् गौरा०ङीष् । १सारसपक्षिणि हारा० स्कन्दस्य २गणभेदे पु० "प्रियक-श्चैव नन्दश्च गोनन्दश्च प्रतापवान्" भा०शल्य०४६अ० ।

गोनर्द पु० गवि जले नर्दति नर्द–अच् । १सारसपक्षिणि मेदि० गवा जलेन नर्दति । २कैवर्त्तीमुस्तके न० मेदि० । गवा वाचा नर्दते अच् । ३देशभेदे पु० स च भूर्भविभागे भ०स० १४ अ०दक्षियज्ञागतैः "अथ दक्षियेन जङ्घा" इत्युपक्रमे "दशपुरगोनर्दकैरलाः" । सोऽभिजनोऽस्य अण् । गौनर्द तद्देशवासिनि बहुषु अर्थो लुक् । तद्देशवासिषु ब० व० । गोनर्दनीचम्भूद्वान् वेदेहां-स्तानदः स्मृयति" ह०स० ६अ० ।

"तस्राजेऽपि अण् । गौनर्द तत्रृषे "काश्मीरराजो गोनर्दोदरदाधिपतिर्नृपः" काश्मीर राजो गोनर्दः करूणाधिपतिस्तथा" हरि०६१अ० बहुषु तस्य लुप् । गवि द्वषे नर्दते नर्द–अच् । ४महादेवे पु० "गोनर्दो गोप्रभावश्च गोवृषेश्वरवाहनः" भा०श्रा०२८६अ० । दक्षकृत शिवस्तुतौ । गोनर्द देशे भवः "एङ् प्राचां देशे" पा० दृद्धसंज्ञत्वात् ढक् । गोनर्दीय तद्देशभवे त्रि०प्राचोऽन्यमते अण् । गौनर्द तत्रार्थे त्रि० ।

गोनर्दीय पु० गोनर्द देशे भवः एकादित्वेन दृद्धसंज्ञत्वात् छ । पतञ्जलिमुनौ हेमच० । तस्य गोनर्ददेशोद्भवकथा दृद्धत् कथायां दृश्या सरकोपोद्घातेऽस्माभि दिङ्मात्रसूचा ।

गोन(ना)स पु०स्त्री०गोरिव नासा अस्य वा नसादेशः । मण्डलि सर्पभेदे (गोखुराकार) अमरः स्त्रियां जातित्वात् ङीष् । दीर्घमध्य इति हेमचन्द्रः । अहिशब्दे ६।८पृ०सुश्रुतवाक्यं दृश्यम् । गोनसस्तुदाकरोऽस्यास्या अच् गौरा० ङीष् । २ओषधिभेदे स्त्री । सुश्रुते तद्वृक्षवर्गादि तत्र १५६१ पृ० उक्तम् । दीर्घमध्यश्च शैक्रान्तमध्यो हेमच० । [मिनि च ।

गोनाथ पु० दृत० । १वृषे राजनि० । २भूमिनाथे ३गोस्वा-

गोनाथ पु० गां नयति नी–अण् । १गोपे शब्दार्थचि० । "तद्यथा गोनाथोऽश्वनाथः पुरुषनाथः" इति बृ०उप० । "गोनाथः गोपालकः" भा० ।

**गोनिष्यन्द** पु० गोर्निष्यन्दते निस्यन्द-अच् ६त०। गोमूत्रे राजनि०। तस्य गोतोनिष्यन्दमानत्वात्तथात्वम्।

**गोप** पु०स्त्री० गां-भूमिं वा पाति रक्षति पा-क। (गोयाला) १जातिभेदे स्त्रियां ङीप्। "व्याधांच्छाकुनिकान्" गोपान् मनुः। "मणिबन्धां तन्तुवायात् गोपजातेच्च सम्भवः" पराशरः "शूद्रो गोपनापितौ" इत्युक्तेः तस्य शूद्रत्वम् २ग्रामाधिकृते ३भूरक्षके च पु०। ४गोत्राध्यक्षे च मेदि०। गोरक्षकभावे च। "गोपः क्षीरभृतोवस्तु स दुग्धाहृयतो वराम्। गोग्रास्यतृणते भृत्यः सा स्यात्पाल्येऽभृते भृतिः" मनुः। "नन्द-गोपगृहे जाता यशोदा गर्भसम्भवा" देवी भा०। "गोपवधूटी इक्षुरक्षौराय" भाषां० "तद्दनं तापसानित्यं गोपाय वनचारिणः" भा० व० १२ अ०।

गोपयति गुप-अच्। रक्षके। "सर्वे देवाभुवनस्याध्य गोपाः" भा०आनु० १० अ०। कर्म्मणिकर्म्मणि गुपगोपे गुप-अच्। भूगोपादि तत्तद्धस्तु पालके। "दिव्यास्त्र-विद्भ्रातेजाः कर्णो वैकर्तनो वृषः। सेनागोपस्य कस्य" भा० कर्ण० ८ अ०। "गृहगोपे वृकोदरे" भा० आ० २०अ०। स्त्रियां ष्वनत्वात् ङीप्। सम्बन्धो० गौरा०ङीष पा०। "ग्राहि गोप्योजगुर्यशान्" रघुः। ७ उपकारके त्रि० शब्दर०। गां जलं पिबौ पा-क। ८ बोले शब्दार्थचि०।

**गोपक** त्रि०गोप वा स्वार्थे क गुप-ण्वुल्। १गोपे २वञ्चपामाध्यक्षे। रक्षके टाप् स्त्रियां ङीप्। ततः शिवा० अपत्ये अण्। गौपिक गोपिकापत्ये पु०स्त्री।

**गोपकन्या** स्त्री गोपस्य कन्येव प्रियतया। १शारिवोषधौ राजनि०। ६त०। गोपजातिकन्यायां च "वल्लवीगोपकन्याश्च रात्रौ संकाल्य कालवित्" नाम दामोदरेखेवं गोपकन्यासुदाहृतम्" हरिव०७७ अ०

**गोपकर्कटिका** स्त्री गोपप्रिया कर्कटिका शाक० त०। (राखालशसा) ख्याते वृक्षे राजनि०।

**गोपघोण्टा** स्त्री० गोपप्रिया घोण्टा या०त०। "वदरीसदृशाकारो वृक्षः सूक्ष्मफलो भवेत्। खटव्यामेव सा घोण्टा गोपघोण्टेति कीर्त्तिता" शब्दर० उक्ते १वृक्षे। २कण्टिकोलौ, रत्नमा०। विकङ्कतवृक्षे (वैंचो) राजनि०।

**गोपति** पु० ६त०। गवां पशूनां पत्यौ १शिवे, २वृषे, (सांड) "रक्षसां वधमापन्नं सिंहनादमिव गोपतिम्" रामा०। मुनिपतौ २वृषे ४श्रीकृष्णे, किरणपतौ ५सूर्य्ये, ६सर्म-पतौ शक्रे, मेदिनिः। ७कृष्णनामौषधौ राजनि०। "गोपालिर्गोपतिर्गोप्तो गोचर्म्मवसनो हरः" भा०आनु० १७अ०शिवसहस्रनामोक्तौ। "उत्तरो गोपतिर्गोप्ता" विष्णुस० "गवां पालनात् गोपवेशधारणात् गौर्भक्षीतस्वाः पालनाद्वा गोपतिः" भा० "सिंहेन निहतं गोष्ठे गोः सवत्सेव गोपतिम्" कि०४।२२। गोस्वामिनि च चारा०। "ध्रुवा अस्मिन् गोपतौ स्यात बह्वीः" यजु०८।१। "गोपतौ गवां गत्वावस्थिन् यजमाने" वेददी०। सूर्य्यस्य किरणपतित्वात् तथात्वम् "मार्त्तण्डो गोपतिः श्रीमान् जगच्चक्षुः प्रतापवान्"। आदित्यहृदयम् "तपसाराध्य वरदं देवं गोपतिमीश्वरम्" भा० आ० १७२ अ० सूर्य्यकन्यातपतीविवाहोक्तौ" इत्यसुरभेदे "गोपतिस्थानकेतुश्च निहतौ शार्ङ्गधन्वना" हरिव० १६१ अ०।

तस्य भावः त्व-गोपतित्व पत्यन्तत्वात् यत्। गोपस्य गोपतिभावे न० "येनांशेन हृता गावः कण्वरूपेण मघवना। स तेनांशेन जगतीं गत्वा गोपत्वमेष्यति" हरिव० ६६ अ०।

**गोपथ** पु० अथर्ववेदीयब्राह्मणभेदे।

**गोप(ष्प)पद** न० गोः पदं पदस्थानयोग्यस्थानम्। "गोष्पदं सेवितासेवितप्रमाणेषु पा० उक्तार्थे सुट्पक्षे। गवामसेविते वनादौ। १गोसेविते गोर्गतिगोचरे स्थाने २गोष्पदमात्रप्रमाणे क्षेत्रे न० तद्विज्ञार्थे न रूट्। ३गोचरणे।

**गोपदज्ञ** पु० गोपदं गोचरणन्यासयोग्यं स्थानं तदाकारं वा जानाति ज्ञा-क। सुवाकढङ्के तस्य गोचरणन्यासयोग्यस्थानस्थत्वात् तदाकार मूलकाकढत्वाद्वा तथात्वम्।

**गोपन** न० गुप-गोपने रक्षणे भावे ल्युट्। १अपह्नवे ज्ञातस्य कर्मणोऽपकारणे २रक्षणे च "सैन्येन महता युक्तं भरद्वाजस्य गोपने" भा० द्रो० ५३अ०। "ज्ञात्वा महाधारणे गोपने च" भा० आनु० २६ अ०। चु०गुप-दीप्तौ भावे ल्युट्। २दीप्तौ। गुप-रक्षणत्वयोः भावे ल्युट्। ४रक्षणेवाम् इत्याकृतिगणत्वे च। चु०गुप दीप्तौ भावे सच् गोपना ६दीप्तौ स्त्री।

**गोपनीय** त्रि० गुप-गोपने रक्षणे वा कर्म्मणि अनीयर्। १अपकार्य्ये २रक्षणीये च। "गोपनीयमिदं दुःखमिति मे निश्चिता मतिः" भा० शान्ति० १६६ अ०। "गोपनीयं प्रयत्नेन न वाच्यं यस्य कस्यचित्" तन्त्रसा०

**गोपव(व)धू** स्त्री ६त० गोपस्य वधूरिव प्रियत्वात्।

१शारिवोषधौ भावप्र० २गोपजातिस्त्रियां "गोपवधूटी दुकूलचौराय" भाषा०। "प्रकृतिमगमन् किल यस्य गोपवध्वः" भाग०१।८।३८। अत्र सकुटः वधूशब्दस्य वर्म्मवादित्वमाङ्क्ष वध्नात्यविद्ययेति बन्धधातोरूप्रत्ययेन निष्पन्नत्वादिति। वस्तुतः ऊप्रत्ययस्याकित्त्वाच्चलोपाभावप्रसङ्गः। किन्तु "वहोधश्च" इत्या० ऊप्रत्यये धत्वान्तादेशेन सिद्धसेन व्याख्यस्वादित्यमेव ज्यायः।

**गोपभद्र** न० गोपे भद्रमिव। १शालूके शब्दर० गोपे भद्रा। २काश्मीरीवृक्षेस्त्री राजनि०। संज्ञायां कन्। ३गम्भारीवृक्षे रत्नमाला शालूकादीनां गोपप्रियत्वात् तथात्वम्।

**गोपरस** पु० गां जलं पिबति पा-क गोपः रसोऽस्य। बौले शब्दरत्ना०।

**गोपराष्ट्र** पु० ब०व०गोपप्रधानाः राष्ट्राः शा०त०। भारतवर्षस्थे आभीरप्रधाने जनपदभेदे। "अत ऊर्द्धं जनपदान्निबोध गदतो मम" इत्युपक्रमे "अश्मकाः पांसुराष्ट्राश्च गोपराष्ट्राः करीतयः" भा० आ० ८अ०।

**गोपरिचर्य्या** स्त्री ६त०। गोसेवायां तत् प्रकारो हेमा०दा० उक्तस्नानादौ ब्रह्मपुराणे

"वन्दनीयाश्च पूज्याश्च गावः सेव्यास्तु नित्यशः। तथा। "गवाङ्गोत्रे स्थितानान्तु यः करोति प्रदक्षिणम्। प्रदक्षिणीकृतं तेन जगत् सदसदात्मकम्।" विष्णुः "गावः पवित्रा माङ्गल्या गवि लोकाः प्रतिष्ठिताः। गावो वितन्वते यज्ञान् गावः सर्वौषधूदनाः। गोमूत्रं गोमयं क्षीरं दधि च रोचना। षडङ्गमेतत्परमं माङ्गल्यं सर्वदा गवाम्। षडङ्गोदकं गवां पुण्यं सर्वौषधिनिषूदनम्। गवां कण्डूयनञ्चैव सर्वकल्मषनाशनम्। गवां ग्रासप्रदानेन स्वर्गलोके महीयते।" पद्मपुराणे "सदा गावः प्रणम्यास्तु मन्त्रेणानेन पार्थिव!। नमो गोभ्यः श्रीमतीभ्यः सौरभेयीभ्य एव च। नमो ब्रह्मसुताभ्यश्च भूयो भूयो नमो नमः। मन्त्रस्य स्मरणादेव गोदानफलमाप्नुयात्"। आदित्यपुराणे "लवणं च यथाशक्त्या गवां ये वै ददन्ति च। तेषां पुण्यकृतां लोका, गवां लोकं व्रजन्ति ते। योज्यं भक्त्या किञ्चिदप्राश्य दद्याद्गोभ्यो नित्यं गोव्रती सत्यवादी। ग्रासो वृद्धो गोसहस्रस्य पुण्यं संवत्सरेणाप्नुयाद्भक्तिशीलः"। देवीपुराणे "गोपालको गवां गोष्ठे यस्तु धूमं न कारयेत्। मक्षिकाकीटनरके मक्षिकाभिः स भक्ष्यते। कृतघ्नसान्तु गां यस्तु दग्ध्वा पिबते नरः। वाहिताऽस्थाधिरं तिष्ठेत् क्षुधार्त्तो वै नराधमः"। महाभारते "गोकुलस्य तृषार्त्तस्य जलान्ते वसुधाधिप!। उत्पादयति यो विघ्नं तमाहुर्ब्रह्मघातकम्। ज्ञात्वा गवार्थे प्रस्थं शीत-वात-क्षमं महत्। आसप्तमन्तारयति कुलं भरतसत्तम!"। ब्रह्मपुराणे "सदोषा गौर्गृहे ज्ञाता परिपाल्या सदा स्वयम्। दुःशीलोऽपि द्विजः पूज्यो न तु शूद्रः सुसंयतः। अनाथानां गवां यत्नात्कार्य्यस्तु शिशिरे भटः। पुण्यार्थं यत्र दीयन्ते तृण-तोये-क्षनानि च"। हारीतः "द्वौ मासौ पाययेद्वत्सं तृतीये हिस्तनं दुहेत्। चतुर्थे विस्तनञ्चैव यथान्यायं यथा बलम्"। ब्रह्मपुराणे "आषाढामाश्वयुङ्माञ्च पौष्यां माघ्यां च सर्वदा। न दुह्यादगवां क्षीरं सर्वं वत्साय निक्षिपेत्। न धर्षयान्नाक्षवेद्यैव न गां मारेण पीडयेत्। युगादिषु युगान्तेषु षडशीतिमुखेषु च। दक्षिणोत्तरगे सूर्ये तथा विषुवतोर्द्वयोः। संक्रान्तिषु च सर्वासु ग्रहणे चन्द्रसूर्ययोः। पञ्चदश्यामतीतायां द्वादश्यामष्टमीषु च। उपचारो गवां कार्यो माघि मासि यथाक्रमम्। लवणञ्च तु चत्वारि पलान्यष्टौ घृतस्य च। परकीयस्य दुग्धस्य तथा देयानि षोडश। द्वात्रिंशत् शीतलस्यापि जलस्य च पलानि च। क्षादौ विचार्य पयसः परिमाणं बलं रुचिं। आकल्पिकन्तु दातव्यं पुण्यार्थन्तु गवाङ्गिकम्। प्रभाते लवणं यत्र दीयते च ततो जलम्। ततस्तृणानि भोक्तव्यं घोषणं मांसवर्जितम्। निशि दीपः सतन्त्रीको दिव्या पौराणिकी कथा। एवं कृते गृहं पूर्णं रत्नैर्दत्त्वा भवेत् फलम्। गोप्रदानात्तु यत्पुण्यं गवां संरक्षणाद्भवेत्। मनुष्यैस्तृणतोयादौगवः पाल्याः प्रयत्नतः। देवाः पूज्याश्च गोप्याश्च प्रतिपाल्याश्च सर्वदा"। तथा "तृणोदकाद्येषु वनेषु मत्ताः क्रीडन्तु गावः सहिताः सवत्साः। क्षीरं प्रसन्नन्तु सुखं स्वपन्तु शीतातपव्याधिभयैर्विमुक्ताः। इमं मन्त्रं स शुद्धात्मा जपेन्नित्यं समाहितः। गच्छन् तिष्ठन् जपन् जिघ्रन् भुञ्जन् क्रीडन् सुतृप्तजन्। महाभयेषु सर्वेषु समेषु विषमेषु च। प्रयाणकाले च तथा श्रोतव्यमभयप्रदम्"। तथा "ग्रासग्रासादिकं देयं निशि दीपः सभास्वरः। इतिहासपुराणानां व्याख्यानं गोपवीक्षणम्। अनसूयैर्वैष्णवाश्च परिचर्या यथाक्रमम्। ताडनाक्रोशखेदाश्च स्वप्नेऽपि न कदाचन। तासां मूत्रपुरीषे तु नोद्वेगः

क्रियते क्वचित् । शोधनीयश्च गोवाटः शुष्कचारादिकैः सदा ग्रीष्मे दध्वाकुलं वेश्म शीते तप्तं विकर्दमम् । वर्षासु चाथ शिशिरे सुखोष्णं वातवर्जितम् । उच्छिष्टं मूत्रविट्श्लेष्ममलं जह्याच्च तत्र च । रजस्वला न प्रवेशया नान्त्यजातिर्न पुंश्चली । न लङ्घयेद्वत्सतरीं न क्रीडेद्गोवत्सचित्रधौ । न गन्तव्यं गवां मध्ये सोपानत्कैः सपादुकैः । दन्तधावनयानेन सवितानैः कदाचन । दक्षिणोत्तरगैः प्रङ्मैर्गन्तव्यञ्च पदातिभिः । गावः क्षुधातुराः पाल्याः श्रद्धया पितृमातृवत् । गिरिप्रपातसिंहर्क्षगीतातपभयातुराः । महाकोलाहले घोरे दुर्दिने देशविप्लवे । गवां तृणानि देयानि शीतलं च तथा जलम्" । विष्णुधर्मोत्तरे "पुष्कर उवाच गवां हि पालनं राज्ञा कर्त्तव्यं ह्यनुनन्दन ! । गावः पवित्रा माङ्गल्या गोषु लोकाः प्रतिष्ठिताः । गावो वितन्वते यज्ञं गावो विश्वस्य मातरः । गव्यकूलं परं तासामलक्ष्मीतापनं परम् । तद्धि मेध्यं प्रयत्नेन तत्र लक्ष्मीः प्रतिष्ठिता । उद्वेगश्च न गन्तव्यः गव्यकूले विजानता । गवां मूत्रपुरीषे तु जीवनाद्यं न संत्यजेत् । गोरजः परमं पुण्यमलक्ष्मीविघ्ननाशनम् । गवां कण्डूयनञ्चैव सर्वकल्मषनाशनम् । गवां ह्रदोदकं राम ! जाह्नवीजलसन्निभम् । गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकम् । पवित्रं परमं ह्येतं स्नाने पाने च भार्गव ! । रक्षाघ्नमेतत्पञ्चाख्यं कल्मषदुःस्वप्ननाशनम् । रोचना च तथा धन्या रक्षोगदगरापहा । यस्तु कल्यं सुखत्याय सुखमाज्ये निरीक्षते । तस्याऽलक्ष्मीः क्षयं याति वर्द्धते न च किल्बिषम् । गवां ग्रासप्रदानेन पुण्यं सुमहदश्नुते । यावतीः शक्नुयाद्गास्तु सुखं धारयितुं गृहे । धारयेत्तावतीर्नित्यं क्षुधार्त्तांस्ता न धारयेत् । दुःखिता धेनवो यत्र वसन्ति द्विजमन्दिरे । नरकं समवाप्नोति नात्र कार्या विचारणा । दत्त्वा परगवे ग्रासं पुण्यं सुमहदश्नुते । शिशिरं सकलं कालं ग्रासं परगवे तथा । दत्त्वा स्वर्गमवाप्नोति संवत्सरशतानि षट् । क्षयभक्षं नरो दत्त्वा नित्यमेव तथा गवाम् । समाप्तेन लभते नाकलोकं समायुतम् । सायं प्रातर्मनुष्याणामशनं वेदनिर्मितम् । तथैकमशनं दत्त्वा गवां नित्यमतन्द्रितः । द्वितीयं यः समश्नाति तेन संवत्सराश्नरः । गवां लोकमवाप्नोति यावन्मन्वन्तरं द्विज ! । भीतत्राणं गवां कृत्वा गृहे पुरुषसत्तम ! । गवां प्रपाये पानीयं कृत्वा पुरुषसत्तम ! । वाजपेयं लोकमाप्नोति क्रीडत्यप्सरसां गणैः । गवां पानप्रदातॄणां वस्तु विघ्नं समाचरेत् । ब्रह्महत्या कृता तेन घोरा भवति भार्गव ! । परां तृप्तिं नचाप्नोति यत्र तत्राभिजायते । गवां प्रचारभूमिन्तु वाहयित्वा हलादिना । नरकं महदाप्नोति यावदिन्द्राश्चतुर्दश । सिंहव्याघ्रभयत्रस्तां पङ्कलग्नां जले गताम् । गां समुद्धृत्य नरः स्वर्गे कल्पभोगानुपाश्नुते । गवां लवणदानेन रूपवानभिजायते । सौभाग्यं महदाप्नोति लावण्यञ्च द्विजोत्तम ! । औषधञ्च तथा दत्त्वा विरोगस्त्वभिजायते । औषधं लवणं तोयमाहारञ्च प्रयच्छति । तासाञ्चैवरूपाणानीनां सिद्धो वने । यास्तृणञ्च हरो हन्यान्न पापस्तत्र किल्बिषी । गोवधेन नरो याति नरकानेकविंशतिम् । तस्मात्सर्वप्रयत्नेन कार्यं तासान्तु पालनम् । विक्रयाच्च गवां राम ! नरकं प्रतिपद्यते । तासान्तु कीर्त्तनादेव नरः पापात् प्रमुच्यते । तासां संस्पर्शनं धन्यं सर्वकल्मषनाशनम् । दानेन च तथा तासां कृच्छ्रान्यपि सुसंहरेत् । उदक्यास्तिकादोषो नैव तत्र स्पृष्टे भवेत् । भूमिदोषस्तथान्योऽपि यत्रैका वसते च गौः । गवां निःश्वासवातेन परा शान्तिर्गृहे भवेत् । गोराजनं तत्परमं सर्वस्थानेषु कीर्त्तितं । गवां संस्पर्शनाद्राम ! कल्मषं क्षयते नृणाम् । गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकम् । एकरात्रोपवासञ्च सदाकमपि शोधयेत् । पृषत् च प्रत्ययाभ्यस्तमिति सान्तपनं स्मृतम् । सर्वकामप्रदं राम ! सर्वाशुभविनाशनम् । कृत्वातिकृच्छ्रं यत्नेन दिवसानेकविंशतिम् । निर्भक्षाक्षेण चीर्णेन मुच्यन्ति पुरुषोत्तमाः । ब्रह्मकूर्चं पिबेन्मूत्रं त्र्यहमुष्णं घृतं पिबेत् । त्र्यहमुष्णं पयः पीत्वा वायुभक्षः परं त्र्यहम् । तप्तकृच्छ्रमिदं प्रोक्तं सर्वाशुभविनाशनम् । शीतकृच्छ्रमथैवेदं क्रमाच्चीर्णैः प्रकीर्त्तितः । सर्वाशुभविनाशाय निर्मितो ब्रह्मणा स्वयम् । गोमूत्रेणाचरेत् स्नानं दत्तं कुर्याच्च गोरजैः । उत्थितास्तिष्ठतस्तिष्ठेदुपविष्टासु च स्थितः । भुञ्जन्त्यां नाश्नीयादपीतासु च नो पिबेत् । तासां चैवाऽनुगः कार्यं भयार्त्तांश्च समुद्धरेत् । आत्मानमपि सन्त्यज्य गोव्रतं तत् प्रकीर्त्तितम् । सर्वपापप्रशमनं सर्वदेवेन भार्गव ! । व्रतेनानेन पूर्वेण गोलोकं पुरुषोऽव्रजेत् । अभीष्टमथवा राम ! यावदिन्द्राश्चतुर्दश । गवा-

माहारनिर्हृज्ञानन्नन् प्रतिदिनं यवान्। मासेन तदवाप्नोति यत्किञ्चिन्मनसेच्छति। गोमतीञ्च तथा विद्यां सायं प्रातस्तथा जपेत्। गोलोकमाप्नोति नरोनात्र कार्या विचारणा। उपर्युपरि सर्वेषां गवां लोकः प्रकीर्त्तितः। निवसन्ति सदा यत्र गावस्त्वाकाशगा दिवि। विमानेषु विचित्रेषु हृतेष्वप्सरसाङ्गणैः। किङ्किणीजालचित्रेषु वीणासु रचनादिषु। सदा कामफला नद्यः क्षीरपायसकर्दमाः। शीतलामलपानीयाः सुवर्णसिकताश्चया। पुष्करिण्यः शुभास्तत्र वैदूर्यकमलोत्पलाः। मानसी च तथा सिद्धिस्तत्र लोके सनातनम्। तन्तु लोकं नरा यान्ति गवां भक्त्या न संशयः। गोमतीं कीर्त्तयिष्यामि सर्वपापप्रणाशिनीम्। तान्तु मे गदतो विप्र! शृणुष्व कुसमाहितः। गावः सुरभयो नित्यं गावो गुग्गुलुगन्धिकाः। गावः प्रतिष्ठा भूतानां गावः स्वस्त्ययनं परम्। अन्नमेव परं गावो देवानां हविरुत्तमम्। पावनं सर्वदेवानां वहन्ति च वहन्ति च। हविषा सन्तर्पतेन तर्पयन्त्यमरान् दिवि। ऋषीणामग्निहोत्रेषु गावो होमनियोजिताः। सर्वेषामेव भूतानां गावः शरणमुत्तमम्। गावः पवित्रं परमं गावो मङ्गलमुत्तमम्। गावः स्वर्गस्य सोपानं गावोधन्याः सनातनाः। नमो गोभ्यः श्रीमतीभ्यः सौरभेयीभ्य एव च। नमो ब्रह्मसुताभ्यश्च पवित्राभ्यो नमो नमः। ब्राह्मणाश्चैव गावश्च कुलमेकं द्विधा कृतम्। एकत्र मन्त्रास्तिष्ठन्ति हविरेकत्र तिष्ठति। देवब्राह्मणगोसाधुसाध्वीभिः सकलं जगत्। धार्य्यते वै सदा तस्मात् सर्वं पूज्यतमा मताः। यत्र तीर्थे सदा गावः पिबन्ति सलिलं जलम्। उत्तरन्त्यथ वा यत्र, स्थिता तत्र सरस्वती। गवां हि तीर्थे वसतीह गङ्गा पुष्टिस्तथासां रजसि प्रसिद्धा। लक्ष्मीः करीषे प्रणतौ च धर्मस्तासां प्रणामं सततञ्च कुर्यात्"। भविष्यत्पुराणे "ब्रह्मोवाच गामालभ्य नमस्कृत्य कुर्यादासु प्रदक्षिणम्। प्रदक्षिणी कृता तेन सप्तद्वीपा वसुन्धरा। गवां खुरोद्धतरजोदृष्टिपातेन सत्तम!। पापं प्रणश्यते यस्मात्तस्मात्पश्येत्तु ताः। कृतस्नञ्च भवेत्पापं स्पृष्टं यस्य विभूषितम्। सततं बालवत्साभिरर्जुनीभिरलङ्कृतम्। यावन्तीर्धानि मेदिन्यामासन्नुर्वरासि च। गवां खुरोद्धतरजःस्नानकल्पां नार्हन्ति षोडशीम्। गवामस्थि न स्पृष्टेन स्नते गन्धं न वेदयेत्। यावदाघ्राति तद्गन्धं तावत् पुण्येन युज्यते। गवां कण्डूयनं धन्यं गोप्रदानफलप्रदम्। तुल्यं गोशतदानस्य भयरोगादिपापनम्। लवणोदकादिसंयुक्तं यः प्रदद्याद्गवाह्निकम्। क्षणिकाशतदानस्य फलं विद्यान्न संशयः। पद्मभूते! शिवे! पुण्ये! पवित्रे! सुखसम्भवे!। प्रतीच्छेदं मया दत्तं सौरभेयि! नमोऽस्तु ते। बहुना च किमुक्तेन गावः पाल्याः प्रयत्नतः। गावोदेवास्तथा रक्ष्याः पूज्या आद्याश्च सर्वशः। गां वै ये ताडयन्तीह सर्वलोकस्य मातरम्। ते यान्ति रौरवं नाम नरकं नात्र संशयः। ताडवेद्यस्तु वै मोहात् यो वा कश्चिदराधमः। स गच्छेन्नरकं घोरं सम्पोडकमिति श्रुतिः। छायानीं हन्तुकामो यः सौरभेयीं विभावरीम्। क्षम मातरिति ब्रूयात् स याति परमं पदम्"। वराहपुराणे 'यमउवाच गावः पवित्रं मङ्गल्या देवानामपि देवता। यस्ताः शुश्रूषते भक्त्या स पापेभ्यः प्रमुच्यते। यावच्चीर्णं कृतं पापं तत्क्षणादेव नश्यति। चाङ्गुलेनोद्धृतं तोयं मूर्ध्नां स्पृशति यो नरः। शरत्तु शुचिजातेभ्यः स पापेभ्यः प्रमुच्यते। प्रस्रवे यो गवां स्नायात् रोहिण्यां मानवो भुवि। सर्वपापकृतान् दोषान् दहत्याशु न संशयः। धेनोस्तनाद्विनिष्क्रान्तां धारां क्षीरस्य यो नरः। शिरसा प्रतिगृह्णीयात्स पापेभ्यः प्रमुच्यते"। आधिकं ऋषिशब्दे २२०१।२ पृ० दर्शिते वृहत्पराशरवाक्ये द्रष्टव्यम्।

**गोपवन** न० गोपप्रधानं वनं मा० त०। गोपभूयिष्ठे वने तत्र भवः विदा० अञ्। गौपवन तत्र भवे त्रि० "सङ्कच्छेमसङ्खेयमवालेयमकाङ्क्षेयमगौर्ध्वेयमवासरख्यमगौपवनम्" कात्या० १०।२।२१ सोऽभिजनोऽस्य विदा० अञ्। गौपवन पित्रादिक्रमेण तत्र वासिजने तस्य गोत्रापत्यम् अनद्यानलर्थे विदा० अञ्। तद्गोत्रापत्ये बहुषु तस्य लुक्। गोपवना गोपवनस्यपुरुषापत्येषु।

**गोपवनादि** बहुत्वे गोत्रप्रत्ययस्य लुग्निमित्ते शब्दगणे स च गणः पा० ग० उक्तो यथा।

गोपवन शिशु विन्दु भाजन अश्वावतान श्यामाक श्यामक शत्रापर्ण विदाद्यन्तर्गणोऽयम्। गोपवन शिशु विन्दु भोगक भाजन शमिक अश्वावतान शत्रामाक शत्रामक शत्रावलि शत्रापर्ण हरितादिव।

हरित किन्दास वशाख अर्कलूष वध्योग विष्णु हड प्रतिबोध रथीतर रथन्तर। गविष्ठिर निषाद शवर

अलस मठर मडाक मृपाक मृद पुनर्भू पुत्र दुहित ननान्दृ परस्त्री परशु च"।

गोपवल्ली स्त्री गां पाति पा–क कर्म०। १भूवलतायां राजनि०। २ग्रामालतायां (ग्रामाघास)। शब्दर०।

गोपस् त्रि०गुप–असुन् आर्द्धधातुकत्वाद्दाऽऽद्यभावः। १गोप्तरि २रक्षितरि। "स जगार भुवनस्य गोपतां कापेयं माभिपद्यस्व" छा०उ० 'गोपाः रक्षिता' भाष्यम्। अस्य गोपायशब्दोदाहरणतया कस्यचिदुक्तिः श्यामादिकी। गोपूर्व्व ककिवन्नपधातुसिद्धगोपायशब्दस्य पोषणकर्त्तृत्वेन तत्र भुवनस्येतिकर्म्मयोनन्वयापत्तेः आयपक्षे गोपायस् गोप्तरि त्रि०।

गोपा स्त्री गां पाति पा–क टाप्। १ग्रामालतायाम् शब्दरत्ना०। गां पाति पा–क्विप्। २गोरक्षके च। "गोपा विश्वपावत्" ऋग्वे०

गोपाध्यक्ष पु० ६त०। गोरक्षकपतौ "गोपाध्यक्षो भयत्रस्तो रथमास्थाय सत्वरः" भा० वि० ३५ अ०।

गोपानसी स्त्री० गवां किरणानां पानं गोपायं गोपानं तत् स्यति सो–क गौरा० ङीष्। कुड्येषु आदनार्थं बद्धे १वक्रकाष्ठे (सदनी) २वस्त्रनाधारे पटलाधारे वंशपञ्जरे च अमरः। "गोपानसीषु क्षणमास्थितानाम्" माघः। ["गोपायकानां भुवनत्रयस्य" किरा०।

गोपायक त्रि० गोपयति गुप–आय+ण्वुल्। रक्षके

गोपायन न० गुप–आय–भावे ल्युट्। १गोपने "गोपायनं प्रकुरुते जगतः सार्वलौकिकम्" हरिवं० ४ अ०। कर्त्तरि ल्यु। २रक्षके। "गोपानां बहुसाहस्रैर्बलैर्गोपायनैर्वृतः" भा० भी० ७अ०।

गोपायित त्रि० गुप–आय–कर्मणि क्त। १रक्षिते अमरः। भावे क्त। २अतीतगोपने न०।

गोपाल पु० गां भूमिं पशुभेदं वा पालयति पालि–अण् उप०स०। १ऋषे २गोरक्षके च। "क्षत्रियात् शूद्रकन्यायां सुतप्रश्नस्तु यः स्मृतः। स गोपाल इति ज्ञेयो भोज्योविप्रैर्न संशयः" पराशरोक्ते ३सङ्कीर्णजातिभेदे। "आर्द्धिकः कुलमित्रञ्च गोपालोदासनापितौ। एते शूद्रेषु भोज्यान्ना यश्चात्मानं निवेदयेत्" मनुना तस्य भोज्यान्नतोक्ता। नन्दनन्दने ४ विष्णोरवतारभेदे तद्रूपञ्च पद्मपु०पाताल ख० "त्वामहं द्रष्टुमिच्छामि चक्षुर्भ्यां मधुसूदन!"। श्रीकृष्णं प्रति व्यासप्रार्थने भगवदुक्ति व्यासवाक्ये यथा "पश्चाद्य दर्शयिष्यामि स्वरूपं वेदगोपितम्। ततोऽपश्यमहं भूप! बालं बालाम्बुदप्रभम्। गोपकन्याशतं गोपं हसन्तं गोपबालकैः। कदम्बमूलमासीनं पीतवासः समुज्ज्वलम्। वनं वृन्दावनं नाम नवपल्लवमण्डितम्। कोकिलभ्रमरारावसनोभवमनोहरम्। नदीमपश्यं कालिन्दीमिन्दीवरदलप्रभाम्। गोवर्द्धनं तथाऽपश्यं कृष्णवामकरोद्धृतम्। महेन्द्रदर्पनाशाय गोगोपालसुखावहम्। इहा विष्टो ह्यहं सर्व्वभूयभूयम्। गोपालमबलासङ्गसुदितं वेणुवादिनम्।

तस्य ध्यानमन्त्रयन्त्रादिकं तन्त्रसारे दृश्यम्।

गोपालक पु० गां पालयति पालि–ण्वुल् ह्रस्व०। १गोरक्षके २भूमिरक्षके च ३शिवे त्रिका० गोपाल+स्वार्थे क। उत्कार्थे ४नन्दनन्दने।

गोपालकक्षा स्त्री गोपालप्रधाना कक्षा। भारतवर्षस्थे प्राच्ये देशभेदे "अत ऊर्द्धं जनपदाञ्छिबोध गदतो मम" इत्युपक्रमे "कक्षा गोपालकक्षाश्च जाङ्गलाः कुरुवर्वराः"। भा० भी०९अ०। तस्य राजनि अण्। गौपालकक्षः तद्रूपे बहुत्वे तस्य लुक्। गोपालकक्षास्तद्रूपेषु "ततो गोपालकक्षांश्च सोत्तरानपि कोसलान्। मल्लानामधिपश्चैव पार्थिवोऽभ्यजयत् प्रभुः" (भीमः) भा० स०२९अ०। भीमप्राच्यविजयोक्तौ।

गोपालकर्कटी स्त्री। गोपालस्य गोरक्षकस्य प्रिया कर्कटी। राजनि०। क्षुद्रकर्कट्याम् (राखालशसा)।

गोपालतापनीय न० गोपालस्तापनीय ईय्यो यत्र। उपनिषद्भेदे उपनिषच्छब्दे १२२२ पृ० दृश्यम्। गोपालतापनमयत्र न०।

गोपालधानी त्रि० गोपालोधीयतेऽत्र धा–आधारे ल्युट् ङीप् ह्रस्व०। गोष्ठे। तस्य पुलासेन समासे राजद० पूर्वनि० समाहारैकत्वं च गोपालधानीपुलासम्।

गोपालव पु० गोपालं तद्धर्मं वाति वा–क उप० स०। गोपतिधर्मयुक्ते आयुधजीविनि राजन्यभेदे। तस्य ब्राह्मणत्वे आयुधजीवित्वेऽपि स्वार्थे न अञ्। "अब्राह्मणेति किं गोपालवाः" सि० कौ०।

गोपालि पु० गां वृषभं पालयति पालि–इन्। "शिवे "गोपालिर्गोपतिर्गोप्ता" भा० अनु० १७ अ० शिवसहस्रनामोक्तौ २प्रवरभेदे प्रवराध्यायः।

गोपालिका स्त्री गोपालस्य पत्नी पालकालत्वात् न ङीष् टापि जात रूपम्। १आभीरपत्न्याम् २आरिवोल्घौ च शब्दार्थचि०। गवां रक्षणात्तच्छास्त्रत्वात्तम् २कीटभेदे हेमच०।

गोपाली स्त्री गोपालस्तदादरोऽस्यास्त्व ङीष्। गौरा० ङीष्। १गोपालकर्कश्याम् राजनि०। गोपालस्य पत्नी ङीष्। २गोपपत्न्याम्। गां पालयति पाल–ण्यु ङीष् सुगुध०। ३गोपालविलग्नां ४कुमारानुचरे मातृभेदे च "यज्ञजाता च गोपाली वृहद्म्बालिका तथा" भा० श० ४७ अ०।

गोपाष्टमी स्त्री गोपप्रियाष्टमी। कार्त्तिकस्य शुक्लाष्टम्याम्। "शुक्लाष्टमी कार्त्तिके तु स्मृता गोपाष्टमी बुधैः। तद्दिने वासुदेवोऽभूत् गोपः पूर्वं स वत्सपः। तत्र कृत्यात् गवां पूजां गोप्यास्तं गोपदक्षिणम्। गवानुगमनं कार्यं सर्वान् कामानभीप्सता" कूर्मपु०।

गोपिका स्त्री गोपायति गुप–ण्वुल्। १गोपालविलग्नाम् गोप्येव स्वार्थे क ह्रस्वः। २गोपपत्न्याम्। [ त्रिका०।

गोपित्त न० गोः पित्तमिव। गोरोचनाख्ये गन्धद्रव्यभेदे

गोपिन् स्त्री गोपायति गुप–णिनि। १रक्षितरि स्त्रियां ङीप् सा च २ग्रामाङ्गतायाम् शब्दच०। व्युत्पत्तिवेन गोपी इष्टन् टिलोपः। गोपिष्ठ गोप्तृतमे त्रि०। "कामचारस्य वा कामगायं गोपिष्ठो गोपायादिति वा" शत० ब्रा० २।२।१।२ "गोपिष्ठः गोपायितृतमः" भाष्यम्।

गोपित्र त्रि० गुप–इत्रच्। गोप्तरि ततश्चतुरर्थ्यां यञ्। गौपित्रेय गुपित्रनिर्दृत्तादौ त्रि०।

गोपी स्त्री गोपजातिः स्त्री जातौ ङीष्। १गोपजातिस्त्रियाम्। इन्द्रावनस्थगोप्यश्च श्रुतिदेवसुनिकन्याश्चरूपा यथा पद्मपु० पाता० "गोप्यस्तु श्रुतयो ज्ञेयाः ऋचिका गोपकन्यकाः। देवकन्याश्च राजेन्द्र! न मानुष्यः कथञ्चन"। तत्र चेडा राधाचन्द्रावलीविशाखाललितादयः। मूलम् उज्ज्वलमणौ दृश्यम्। "दृष्ट्वेमं दर्शयन्त्यस्माकँवं गोप्योविचेतसः" भाग० १०।२।१२। स्कं० प्रभा० ख० तु चन्द्ररूपकलाश्च कलारूपता तासासंज्ञा यथा। "ततो गोप्यो महादेवि! चाद्यायाः षोड़श स्मृताः। तासां नामानि ते वक्ष्ये तानि श्लोकमनाः शृणु। अग्निनी चन्द्रिका कान्ता कृष्टा श्याना सशोदया। औषधी नन्दनी शोका सुपर्णा विमलाऽमृतया। शुभदा शोभना पुष्टा हंससंज्ञाः कलाः क्रमात्। हंसएव मनः क्षयाः परमात्मा जनार्दनः। तस्यैताः शक्तयो देवि! षोड़शैव प्रकीर्त्तिताः चन्द्र रूपी ततः कृष्णः कलारूपास्तु ताः स्मृताः संपूर्णं मण्डला तासां मालिनी षोड़शी कला। प्रतिपत्तिथि मारभ्य विहरत्वासु चन्द्रमाः। षोडशैव कला यासु गोपीरूपा वरानने! एकैकशस्ताः संभिन्नाः सहस्रेण पृथक् पृथक्"। गोपायति गुप–अच् गौरा० ङीष्। २रक्षिकायां स्त्रियाम् "गीतानि गोप्याः कलमं सुगव्रजः" माघः। स्वार्थे क। गोपिका तत्रार्थे "सङ्गासमालोकवति स्म गोपिका" माघः।

गोपीगीता स्त्री भाग० १०स्क० उक्तायां गोपीभिः कृतकृष्णस्तुतौ सा च "जयति तेऽधिकं जन्मना व्रजेत्याद्यैकत्रिंशत्तमाध्यायस्था।

गोपीजनवल्लभ पु० गोप्येव जनस्तस्य वल्लभः। श्रीकृष्णे "गोपीजनवल्लभाय स्वाहा" तन्त्रसारे तन्मन्त्रः। गोपीभर्त्रादयोऽत्र "गोपीभर्तुर्विरहविधुरा काचिदिन्दीवराक्षी" पदाङ्कदूतम्।

गोपीत पु० स्त्री गौर्गौरीचनेव पीतः। खञ्जनभेदे। इ० स० ४५ अ० "पीतो गोपीत इति क्षेत्रकरः खञ्जनोदृष्टः" तस्य दर्शने क्षेत्रकारितोक्ता।

गोपीथ न० पा–भावे थक्–"गोपीथेत्यादि" पा०नि० गोः सोमस्य पीथः। सोमपाने। "प्रति त्वं चारुमध्वरं गोपीथाय प्रहूयसे" ऋ०१।१६।१। "गोपीथाय सोमपानाय" भा०। गावः पिबन्त्यस्मिन् आधारे थक्। २तीर्थे गोर्जलावतरणे सोपाने तीर्थस्य जलावतरणसोपानत्वात्तथात्वम्। "गोपीथं तीर्थमाख्यातम्" उणादि इ०। गुप–भावे थक् नि०। ३रक्षणे पु० "गोपीथाय जगत्सृष्टेः काले स्वच्छाच्युतात्मकः" भाग० ४।२२।५०। "जगत्सृष्टेर्गोपीथाय रक्षणाय" श्रीधरः। "व्रजातशत्रुः प्रतनां गोपीथाय मधुद्विषः" भाग० १।१०।२६। "गोपीथाय रक्षणाय" श्रीधरः। गोपीथाय हितं यत्। गोपीथ्य तत्र हिते त्रि० "अस्तिम इत्था गोपीथ्याय हि दधाथ तत् पुरूरवो यशोजः" ऋ० १०।९५।११।

गोपुच्छ पु० गोः पुच्छ इव पुच्छो यस्य। १गोलाङ्गूलाख्ये वानरे हेमच० "सर्ववानरगोपुच्छा यमृक्षाद्या भजन्ति वै" (यं स्तुत्यीयम्) भा०व० २८।अ०। "गोपुच्छैर्हरिभिर्वृतैर्नखकुलैर्नाभिभिर्दंष्टितम्" (आत्मसम्) भाग० २।२।।४२। "गोपुच्छशालाङ्गकमर्कटाश्च" भाग० ८।२।।७। गोपुच्छाकारत्वात् २हारभेदे अमरः। ३तृ०। ३गं लाङ्गूले न०। "गोपुच्छस्थे वल्मीकगेऽथ वा दर्शनं भुजङ्गस्य" इ० स० ९५ अ०। ततः शर्करा० स्वार्थे अण्। गोपुच्छ तत्रार्थे त्रि०।

गोपुटा स्त्री गोरिव पुटमस्याः। स्थूलैलायाम् राजनि०।

गोपुटिका न० गोः शिवस्य पुटिकं पुटयुक्तं मस्तकम्। शिवस्य मस्तके त्रिका०।

गोपुर न० पुर–अयगमने क गवां पुरम्, गवा जवेन पूर्य्यते पृ–बजर्थे क वा। १पुरद्वारे २श्रेष्ठद्वारे अमरः। तत्र गवामप्यगमनात्तथात्वम्। २कैवर्त्तीतस्तके मेदि० तस्य जवेन पूरणात्तथात्वम् "गुप्तवप्रचयप्रस्थैर्गोपुरैर्नन्दनोपमैः" भा०आ०२०६०श्लो०। "गोपुराट्टालकोपेतं चतुर्द्वारं दुरासदम्" भा०व० १७३अ०। "पुरगोपुरं प्रति ससैन्यसागरम्" माघः। "पीडा पुरस्यैव च गोपुरस्थे" (शुनि) वृ० स० ८६ अ०।

गोपुरक पु० पुर–क वृत० गोपुर+स्वार्थे के। १गवां पुरके त्रिका० २गोपुरशब्दार्थे च गां भूमिं विपर्त्ति पृ–क संज्ञायां कन्। ३कुन्दूरकवृक्षे राजनि०।

गोपुरीष न० वृत०। गोमये राजनि०।

गोपेन्द्र पु० गोप इन्द्र इव। १श्रीकृष्णे हेमच०। "गोपेन्द्रस्यानुजे ज्येष्ठे नन्दगोपकुलोद्भवे" भा० भी० २२अ०। वृत०। २गोपेश्वरे नन्दे च गोपेश्वरादयोऽत्र।

गोपेय्य पु० वृत०। १नन्दबोधे "गोपेयं परितः परे" सुग्ध० २शाक्यमुनौ त्रिका०।

गोप्रव्य त्रि० गुप–कर्मणि तव्य वा व्यायभावः। १व्यप्रकाश्ये २रक्षणीये च "घोरज्ञानपदार्थैव गोप्रव्याक्षे यथा सुखम्" भा० क० ६५ अ०। इट्पक्षे गोपितव्य व्यायपक्षे गोपायितव्य तत्रार्थे त्रि०।

गोप्तृ पु०गुप–तृच्। रक्षके। "तस्मै सभ्याःसभार्य्याय गोप्त्रे गुप्तमेन्द्रियाः" रघुः। "तस्यार्थे सर्वभूतानां गोप्तारं धर्म्यमात्मजम्"। "भुज्यते ब्रह्मक्षत्रायाः गोप्ता गोत्राह्मणस्य च" मनुः २संवरके च। ३विष्णौ पु०"उत्तरो गोपतिर्गोप्ता" विष्णुस०"सकलभूतपालनात् गोप्ता" भा०। "गोक्षितो गोपतिर्गोप्ता" विष्णुस०। "स्वात्मानं स्वमायया गोपायति संरक्षति गोप्ता" भा०। स्त्रियां ङीप्। "गुप्तातिगुप्तगोप्त्री त्वम्" देवीजपसमापनमन्त्रः। इट्पक्षे गोपितृ व्यायपक्षे गोपायितृ तत्रार्थे त्रि० स्त्रियां ङीप्।

गोप्य त्रि० गुप–कर्मणि यत्। १रक्षणीये २गोपनीये व्यवकाशनीये च। "आयुर्वित्तं गृहच्छिद्रं मन्त्रमैथुनभेषजम्। तपोदानापमानं च नव गोप्यानि यत्नतः" कामोक्त०। ३दाक्षीपुत्रे पु० मेदि०।

गोप्यादित्य पु० प्रभासतीर्थस्थे गोपीरक्षापितरविमूर्त्तिभेदे तत्कथा स्क० प्रभा० ख० यथा

"ततोगच्छेन्महादेवि! गोप्यादित्यमनुत्तमम्। भूतेशाद्दक्षिणे भागे धनुर्भिस्त्रिप्रमाणतः। वलातिबलदैत्यानां दक्षिणाग्नेर्व्यवस्थितम्। धनुषां दशके देवि! संस्थितं पापनाशनम्। तस्योत्पत्तिं प्रवक्ष्यामि महापापहरां शुभाम्" इत्युपक्रमे "अथ तत्र कृतान् ज्ञात्वा प्रासादान् यादवैः पृथक्। तेतो गोप्योऽपि ताः सर्वाः सहस्राणि च षोडश। क्षणमात्राय भावेन स्थापयाञ्चक्रिरे रविम् ऋषिभिर्नारदाद्यैस्तु तथा क्षेत्रनिवासिभिः तत् प्रतिष्ठापयामासुः प्रतिष्ठाविधिना रविम्। प्रतिष्ठिते ततः सूर्य्ये ददुर्दानानि भूरिशः। ततः क्षेत्र निवासिभ्यस्तीर्थं देवरतेषु वै। ततस्ते ऋषयः सर्वे सन्तुष्टा हृष्टमानसाः। चक्रुर्नाम रवेस्तत्र गोप्यादित्येति विश्रुतम्"।

गोप्याधि पु० कर्म्म०। आधिभेदे आधिशब्दे ७।१ पृ० दृश्यम्। "गोप्याधिभोगे नेा हानिः" याज्ञ०।

गोप्रकाण्ड न० प्रशस्तो गौः (जातिः) "प्रशंसावचनैश्च" पा० नित्यस० परनि०। श्रेष्ठे गवि अमरः। नियतलिङ्गत्वात् क्लीवत्वमेव "प्रकाण्डस्तुततल्लजौ" अमरोक्तेः। शब्दक० पुंस्त्वोक्तिस्तिन्त्या। यदपि तत्र गोषु मध्ये प्रकाण्ड इत्युक्तं तदपि ग्रामादिकं "प्रशंसावचनैश्चेति सूत्रस्य कर्म्मधारयसमासमात्रविषयत्वात्।

गोप्रचार पु० प्रचरत्यस्मिन् प्र+चर–आधारे घञ् वृत०। १गोचारणस्थाने। "यामेच्छया गोचारो भूमिराजवशेन वा" याज्ञ० "गवादीनां चारणाय कियानपि भूभागोऽवश्यः कल्पनीयः" मिता०। स्कन्दपु० प्रभा० खण्डोक्ते २तीर्थभेदे। "गोप्रचारकथा पुण्या गोपीनां हारकागमः" हरिवं० तत्प्रतिपाद्योक्तौ।

गोप्रतार पु० गवां प्रतारः प्रतरणमुल्लङ्घनं संमर्दोऽत्र। रामस्य वैकुण्ठगमनकाले तदनुगामिनां पुरवासिनां गोप्रतरणवत्सम्मर्दयुते सरयूस्थे १तीर्थ भेदे। "गोप्रतारं ततो गच्छेत् सरय्वास्तीर्थमुत्तमम्। यत्र रामो गतः स्वर्गं सर्व्यवलवाहनः। देवं त्वद्वा महाराज! तस्य तीर्थस्य तेजसा। रामस्य च प्रसादेन व्यवसायाच्च भारत!। तस्मिंस्तीर्थे नरः स्नात्वा गोप्रतारे नराधिप!। सर्वपापविशुद्धात्मा स्वर्गलोके महीयते" भा०व०८४अ०। "ऋदोरप्" पा०अप्। गोप्रतरोऽप्यत्र "यद्गोप्रतरकल्लोऽभूत् संमर्दश्चात्र मज्जताम्। अतस्तदाख्यया तीर्थं पावनं भुवि प्रथते" रघुः। अत्रापि दीर्घमध्यता इत्यन्ये।

गवा हृष्येन प्रतारो गमनमस्य। २शिवे पु०। "गोनर्दो गोप्रतारश्च गोहरेश्वरवाहनः" भा० शान्तु० २८६ अ०। शिवसहस्रनामोक्तौ। रूप् ह्रत०। ३गोःप्रतारे पु० अनुपदम् उक्तं रघुवाक्यम् उदा०।

**गोप्रवेश** पु०ह्रत०। १गोवेनादितो षट्प्रवेशे "गोप्रवेशसमवेक्षतोदधोयाति कृष्णपरुरेव वा पुरः" ह०स० २५ अ०। आधारे घञ्। २तत्काले। स च कालः सूर्य्यास्तसमयात् प्राक्कालः तथा च वर्षितम् रघौ "सञ्चारपूतानि दिगन्तराणि कृत्वा दिनान्ते निलयाय गन्तुम्। प्रचक्रमे पल्लवरागताम्रा प्रभा पतङ्गस्य मुनेश्च धेनुः"।

**गोफणा** स्त्री शब्दोक्ते व्रणबन्धनभेदे तत्र कोषदामेत्याद्युपक्रमे "वितानगोफणा पट्टाङ्गी चेति चतुर्दश बन्धविशेषास्तेषां नामभिराकृतयः प्रायेण व्याख्याताः" सुश्रुतः "चिबुकनासौष्ठांसबस्तिषु गोफणाम्"। (निदध्यात्) सुश्रुत०।

**गोबाल** पु० ह्रत०। १गोकेशे २तल्लोमनि च स च सीमाज्ञानाय भूमौ निधेयः यथाह मनुः "अङ्गुलोऽस्थीनि गोबालांस्तुषान् भस्म कपालिकाः। करीषमिष्टकाङ्गार शर्करा वालुकास्तथा। यानि चैवं प्रकाराणि कालाद्भूमिर्न भक्षयेत्। तानि सर्वाणि सीमायामप्रकाशानि कारयेत्"। गोबाल इव बालोऽस्याः "पाककर्णेत्यादि" पा० ङीप्। ओषधिभेदे स्त्री सि० कौ०।

**गोभण्डीर** पु०स्त्री भट–भाषणे वा ईरन् गवि जले भण्डीरः। जलकुक्कुभखगे त्रिका०। स्त्रियां जातित्वात् ङीप्। [अस्य चात्मजः" हरिवं० ३२ अ०।

**गोभानु** पु० दुर्वंशरूपपौत्रे "दुर्वसोस्तु सुतो वह्निर्गोभानुस्तनयस्त्रयः" भा० ९।२३।२९।

**गोभिल** पु० छन्दोपदशकारके ऋषिभेदे।

**गोभृत्** पु० गां भूमिं बिभर्त्ति भृ-क्विप् ह्रत०। पर्वते "नादेन गोभृच्छिखरेषु सक्ताः स्खलन्ति गोकर्णगरीर भक्षाः" चौरः। तेन निर्वृत्तम् सङ्घा०अञ्। गौभृत पर्वतनिर्वृत्ते त्रि० स्त्रियां ङीप्। [अनुगोभत् न।

**गोम** लेपने चुद० चुरा० उभ० सक० सेट्। गोमयति-ते

**गोमक्षिका** स्त्री गोः क्लेशदायिका मक्षिका। (डांस) ख्याते मक्षिकाभेदे शब्दर०।

**गोमघ** त्रि०गां मंक्षति ददाति मघि–अच् छन्दसि निलोपः ह्रस्व वध ह्रत०। गोदातरि। "कदा गोमघा हवनानि गच्छाः, ऋ० ६।२५।२ "मंक्षतेर्दानार्थस्य रूपमुत्तरपदम्" भा० "स गोमघा जरित्रे" ६।२५।४। "गोमघा गोदात्रीं"भा०"अश्वामघा गोमघा वा इत्येव" ऋ०७।७१।१।

**गोमण्डल** न० ह्रत०। १गोसमूहे २भूमण्डले। "मग्नां च तोयापदि दुस्तरायां गोमण्डलस्योद्धरणं चकार" भाग०। ३किरणसंघे च।

**गोमत्** त्रि० गौरस्त्यस्य मतुप्। १गोस्वामिनि २गोयुक्ते च "इन्द्र! गोमन्निहायाहि" यजु०२६।४ "गावः स्तुतिरूपा वाचः किरणा वा विद्यन्तेऽस्य गोमान्" वेददी० स्त्रियां ङीप्। सा च १नदीभेदे स्त्री "गोमतीं धूतपापां च गण्डकीञ्च महानदीम्" भा० भी० ८अ०। स्कन्दपु० प्रभा० तन्माहात्म्यम् "गोमत्युत्पत्तिकथनं तस्यां स्नानादिजं फलम्। चक्रतीर्थस्य माहात्म्यं गोमत्युदधिसङ्गमः" ह्रस्कन्दा० तत्खण्डप्रतिपाद्ये। अत्र उदधिसङ्गम इत्युक्तेः "गङ्गा सरस्वती पुण्या यमुना च "महानदी। गोदावरी गोमती च नदी तापी च नर्म्मदा" इत्युपक्रमे "नद्यः ससङ्गसंयोगात् सर्वाः पुण्याः शुभावहाः" प्रभा० खण्डोक्तेश्च सा ससङ्गा कन्या तु गोमती काशीतोऽनतिदूरे उत्तरस्यां गङ्गासङ्गता यथाह" भा० व० ८४ अ० यथा "गोमतीगङ्गयोर्यत्र सङ्गमे लोकविश्रुते। अग्निष्टोममवाप्नोति कुलञ्चैव समुद्धरेत्" गोमतीस्नान फलं तत्रैव "रामतीर्थे नरः स्नात्वा गोमत्यां कुरुनन्दन! अश्वमेधमवाप्नोति पुनाति च कुलं नरः। शतसाहस्रकं तीर्थं तत्रैव भरतर्षभ!। तत्रोपस्पर्शनं कृत्वा नियतो नियताशनः। गोसहस्रफलं पुण्यं प्राप्नोति भरतर्षभ!" गौः गोपदमाधिक्येन विद्यतेऽस्यां विद्यायां मतुप् ङीप्। ५विद्याभेदे सा च गोदानशब्दे २६९९४पृ०दर्शिता अन्या तिलधेनुशब्दे वक्ष्यते "गोमत्या विद्यया धेनुं तिलानामभिमन्त्र्य च" भा०शान्तु०७८अ०। "पञ्चगव्येन गोमती मासैकेन शुध्यति। गोमतीं च जपेद्विद्यां गवां गोष्ठे च संवसेत्" प्राता०। गोमत्यां भवः यक्तायां अण्। गौमत तत्रभवे त्रि० स्त्रियां ङीप्। गोमत्या अदूरभवो देशः अण्। गौमत तत्सन्निहृष्ट देशादौ त्रि० स्त्रियां ङीप्। बहुत्वे तस्य वरणा० लुप्। गोमत्यः। उक्तगोमच्छब्दस्य सर्वनामस्थाने नुम् गोमान् गोमन्तावित्यादि रूपम्। गोमानिवाचरति गोमत्+क्विप् गोमतीति ततः क्विप् गोमत्। ४गोस्वामिहल्ले अत्र सर्वनामस्थाने धातुत्वात् न नुम्। गोमत् गोमतौ इत्येव। षष्ठीतत्पुरुषे गोमतीशब्दस्य "वैदेहि बन्धोर्हृदयं विदद्रे" इत्यत्रेव "ङ्याप्पोः संज्ञाछन्दसोः"

या० आर्धे प्रत्यये वा ह्रस्वः । "सा खतेव महाखार्क्षं फुल्लं गोमतितीरजम्" भा० वि० २७ अ० । न तु ह्रस्वान्तं शब्दान्तरम् केषाञ्चित् तथा कल्पनं तु प्रामादिकम् । गौरादित्वे ङीष् ( भागाङ् ) ख्यातायां ६ भूमौ "भोजनं यत्र तत्रापि शयनं हट्टमन्दिरे । मरणं गोमतीतीरे" उद्भटः ।

गोमतल्लिका स्त्री प्रशस्ता गौः (जातिः) "प्रशंसावचनैश्च" पा० नित्यम० परनि० । प्रशस्ते गवि पुंस्त्वेपि स्त्रीत्वमेव । "प्रशंसावचनैश्चेति" पा०सूत्रे वचनग्रहणं रूढमात्रशब्दपरिग्रहार्थं तेन ये यौगिकाः प्रशस्तगोभनादयः ये च विशेषवचनाः शुचिसाध्वादयः ये च यौगरूढा सिंहोमाणवक इत्यादौ प्रशंसां बोधयन्ति ते सर्वे व्युदस्ता" मनो० । प्रशंसावचनरूढशब्दादामरे पठिता यथा "मतल्लिका मचर्चिका प्रकाण्ड रूढतल्लजौ । प्रशस्तवाचकान्यन्यः शुभावहो विधिः" । गोमचर्चिकाशब्दार्थे स्त्री ।

गोमत न० गवां मतम् । गव्यूतौ शब्दार्थ० ।

गोमत्स्य पु० गौरिव स्थूलोमत्स्यः । शब्दतोक्ते नादेये मत्स्यभेदे । "तत्र नादेयाः रोहितपाठीनपाटलाराजीवबर्ष्मिगोमत्स्यलक्ष्यमत्स्यगुल्लारभूरुषसहस्रदंष्ट्राप्रभृतयः"

गोमय क्लि० गां दुग्धं मथ्नाति मथ-अच् ह्रस्व० । गोदुग्धे गोपे । ततः चतुरर्थ्यां कृतद्धि० ठक् । गौमयिक तद्विकारादौ त्रि० ।

गोमन्त पु० सह्यपर्वतविवरस्थे पर्वतभेदे । "ततश्चुतताः गमिष्यामः सह्यस्य विवरं गिरेः । गोमन्तमिति विख्यातं नैकवृक्षविभूषितम्" हरिवं० ६६ अ० । तद्वर्णनञ्च "एवं वयं जरासन्धाद्भीताः क्षत्रियाः । सामर्थ्यतः सम्बन्धाद्गोमन्तं रुरुधाश्रिताः । त्रियोजनायतं सप्तविस्तीर्णं योजनादधि । योजनान्ते शतद्वारं वीर विप्रकृतोरणम्" भा० स० १३ अ० ।

"तद्गच्छ कृष्ण ! शैलेन्द्रं गोमन्तं तु नगोत्तमम्" तत्रैव । जरासन्धेन तत्र कृष्णयुद्धकथा तत्पर्वतदाहकथा च हरिवं० ६६ अ० ६७ अ० । "मथुरापूर्वाद्रिं हिमवद्गोमन्तचित्रकूटस्थाः" बृ० सं० १६ अ० ।

गोमन्द पु० पर्वतभेदे । "क्रौञ्चद्वीपे महाक्रौञ्चो गिरीरत्नाकरः । सम्भूयते महाराज ! चातुर्वर्ण्येन नित्यदा । गोमन्दः पर्वतो राजन् ! सुमहान् सर्वधातुकः । यत्र नित्यं निवसति श्रीमान् कमललोचनः" भा० भी० १२ अ० ।

गोमय पुंन० गोः पुरीषं गो+मयट् अर्द्धर्चा० । (गोबर) १गोः पुरीषे तद्गुणादिगोशब्दे २६८।४० दृश्यम् । "अश्नन् जीर्णदेहाया बन्ध्यायाश्च विशेषतः । रोगार्तायाः प्रसूतायाः न गोर्गोमयमाहरेत्" शब्दार्थचि० स्मृतिः । गोमयस्य श्वेतताकारणम् ।

"शतं वर्षं सहस्राणां तपस्तप्तं सुदुष्करम् । गोभिः पूर्वं विसृष्टाभिर्गच्छेम श्वेततामिति । ऋषीणां पुरीषस्नानेन जनः पूतेत सर्वदा । शक्रता च पवित्रार्थं कुर्वीरन् देव मानुषाः । तान्यो वरं ददौ ब्रह्मा तपसोऽन्ते स्वयं प्रभुः । एवं भवत्विति विभुर्गोकांस्तारयतेति च" । तत्र कृच्छ्रा वासो यथा गोलच्छीसंवादे "अवश्यं मानना कार्या तपसामिर्यशस्विनि ! । शक्रक्षेत्रे निवसतं पुण्यमेतद्धि नः शुभे ! । श्रीरुवाच । दिष्ट्या प्रसादो युष्माभिः कृतो मेऽनुग्रहात्मकः । एवं भवतु भद्रं वः पूजिताश्मि सुखप्रदाः !" इति भा० शा० दानधर्मे उक्तम् । "गोमयं यमुना साक्षात् गोमूत्रं च सरस्वती" काशीख० । "गोमयाच्च शुचिर्गो जायते" शास्त्रकारप्रवादः "सुधाकृता गोमयगोसुखानि" माघः । "शुचिं देशं विविक्तं च गोमयेनोपलेपयेत्" मनुः । २तदात्मके त्रि० स्त्रियां ङीप् ।

गोमयच्छत्र न० गोमये तदाधारस्थाने छत्रमिव । शिलीन्ध्रे (जातिवा) । त्रि० स्वार्थे ङीप् स्वार्थे क । गोमयच्छत्रिकापि तत्रार्थे स्त्री हारा० ।

गोमयप्रिय न० गोमयं प्रियमस्य साधनत्वात् । भूतृणे शिलीन्ध्रे रत्नमाला ।

गोमयोत्था स्त्री गोमयादुत्तिष्ठति उद्+स्था-क टाप् । (गुबरियापोका) कीटभेदे हेमच० ।

गोमयोद्भव त्रि० गोमयादुद्भवति उद्+भू-अच् । १गोमयजाते २खारगुग्गुले (सोदाल) वृक्षे च पु० शब्दर० ।

गोमहिषदा स्त्री कुमारानुचरे मातृभेदे । "शृणु मातृगणान् राजन् ! कुमारानुचरानिमान्" इत्युपक्रमे "पयोदा गोमहिषदा गोविशाखी च भारत !" भा० श० ४७ अ० ।

गोमांस न० क्लि० । गवां मांसे तद्गुणादि गोशब्दे २६८।४० उक्तं "गोमांसभक्षणे मासोपवासं चरेत्" स्मृतेः तच्चाज्ञानतः, ज्ञानतस्तद्भक्षणे चान्द्रायणं यथाह शातातपः "अगम्यागमने चैव मद्यगोमांसभक्षणे । एतत्रै चान्द्रा-

यणं कृत्वाऽदौ गत्वा सस्नङ्गराम्" विष्णुना तु द्विजातीनां तत्र पुनरुपनयनमुक्तं यथा "विड्वराह श्यामकुक्कुटनरगोमांसभक्षणे सर्वेषामेव द्विजातीनां प्रायश्चित्तान्ते भूयः संस्कारं कुर्यात् ।"

**गोमातृ** स्त्री ङीप्तृ० । गवां मातरि सुरभौ कश्यपपत्नीभेदे । "गोमातरः सुशीलाद्याश्चत्व सन्ति शिवप्रियाः" काशीख० २अ० ।

**गोमायु** पु० स्त्री गां विक्रान्तां वाचं मिनोति मा–उण् । १शृगाले, अमरः "अनु ङ्कुरुते वनध्वनिं नहि गोमायुरुतानि केशरी" किरा० । "पांशुपर्णे दिशां दाहे गोमायुविरुते तथा" मनुः । तन्मूत्रादिभक्षणनिषेधमाह मनुः "विड्वराहनरोष्ट्राखुगोमायोः कपिकाकयोः । प्राश्य मूत्रपरीषाणि द्विजश्चान्द्रायणं चरेत् ।" तन्मूत्रादिगुणागुणफलं तु० स० उक्तं यथा "अभिः शृगालाः सङ्गाः फलेन विशेष एषां गिरिरे मदाग्निः । ङ्कङ्कुरुते परतश्च टाटा पूर्णः खरोऽन्ये कथिताः प्रदीप्ताः । लोमाशिकायाः खलु कङ्कशब्दः पूर्णः स्वभावप्रभवः स तस्याः । वेऽन्ये खराक्ते प्रकृतेरपेताः सर्वे च दीप्ता इति सम्प्रदिष्टाः । पूर्वोदीच्योः शिवा शस्ता शाला सर्वत्र पूजिता । धूमिताभिमुखी क्षिप्ति खरदीप्ता दिगीश्वरान् । सर्वदिक्शुभा दीप्ता विशेषेणाङ्गशोभना । पुरे सैन्ये प्रपन्या च कृष्णोन्मुखी शिवा । याक्षीत्यग्निभयं शास्ति टाटेति स्तवेदिका । धिग्धिग् दुष्कृतमाचष्टे सञ्चाला देशनाशिनी । नैव दारुणतामेति सञ्चालायाः प्रपद्यते । ककाद्यनलपत्तस्या वक्त्रं लालास्रभावतः । अन्यप्रतिस्तता याम्या सोद्वन्धस्तवशंसिनी । वारुणानुरुता सैव शंसते सलिले स्तुतिम् । अक्षोभः श्रवणं चेटं धनप्राप्तिः प्रियागमः । क्षोभप्रधानभेदेन वाक्यानां च सम्पदाम् । फलमासप्रमाणेतदप्राप्तं परतो स्तम् । याम्यायां तद्विपर्यस्तं फलं षट्पञ्चमाहते । या रोमाणु मनुष्याणां शकृन्मूत्रं च वाजिनाम् । रावात् त्रासं च जनयेत्सा शिवा न शिवप्रदा । भौमं गता प्रतिस्तते नरद्विरदवाजिनाम् । या शिवा सा शिवं सैन्ये पुरे वा सम्प्रयच्छति । भेभे इति शिवा भयङ्करी भो भो व्यापदमादिशेच्च सा । स्तवस्य निवेदनी फिफो ङङ्क चालक्षिता शिवा स्वरे । शाला त्वक्षात् परमं स्वनी टाटासदीर्णमिति वाक्षशाना । टे टे च पूर्वं परतश्च वे वे तस्याः स्वरुदितभवं स्तं तत् । उच्चैर्घोरं पूर्णसङ्घार्यं पूर्वं पश्चात् क्रोशत् क्रोष्टुकशब्दानुरूपम् । या सा खेमं प्राह वित्तस्य चाप्तिं संयोगं वा प्रोषितेन प्रियेण" । स्तुतादिफलं शब्दे वक्ष्यमाणं तत्तुल्यफलमेतस्त्रेत्यतिदिष्टम् । २गन्धर्वभेदे जटाधरः । "बहुभिः सह गन्धर्वैः प्रागायत च तस्करः" इत्युपक्रमे "गोमायुः सूर्यवर्चाश्च सोमवर्चाश्च सप्रभः" हरिवं० २६ अ० ।

**गोमायुभक्ष** पु० गोमायुं भक्षयति भक्ष–अण् उप० स० । नीचजातिभेदे अर्कपुत्रस्येत्युपक्रमे "गोमायुभक्षशूलिक बोक्काणाश्वखविकलाङ्गाः" ह०स० १६ अ० तस्य शनि विभागे उक्तिः ।

**गोमिन्** त्रि० गौरस्यास्य मिनि । १गोस्वामिनि अमरः स्त्रियां ङीप् । "यदन्यगोषु वृषभो वत्सानां जनयेच्छतम् । गोमिनामेव ते वत्सा गोवं स्कन्दितमार्षभम्" मनुः । २उपासके ३शृगाले पु० मेदि० । ४बहुभिच्छुगिन्यौ पु० त्रिका० । शालाशब्दे परे समासे शालप्रादि० । "शालप्रादयः शालायाम्" पा० अस्य उदात्तता ।

**गोमीन** पु० स्त्री गौरिव स्त्यूनो मीनः । गोमत्स्याख्ये मीनभेदे "न दद्यात् तिक्तकमठं पशुशल्कितमेव च । गोमीनं चक्रमकुलं वडालराजवं तथा" मत्स्यसूक्तम् ।

**गोसुख** पु० गोर्मुखमिव सुखमस्य । १नक्रे २यन्त्रभेदे च हेमच० । ३मातलिपुत्रे "बहुगोमातले स्वसु तव पुत्रस्य गोसुखः" भा०क०६६अ० । ४वाद्यभेदे ५कुटिलाकारे लेपने च न० मेदि० वाद्यभेदे पुंस्त्वमपि यथा "आडम्बरान् गोसुखांश्च डिण्डिमांश्च महास्वनान्" भा०श०४७अ० । "मृदङ्गाभेरीगोमुखाः पणवानकगोमुखाः" भा० द्रो० ८२ अ० । "पणवानकगोमुखाः सहसैवाभ्यहन्यन्त" गीता । लेपनञ्च तदाकारेण भित्तौ लेपनम् "सुधाङ्गनागोमयगोमुखानि" माघः । ६तदाकारे सन्धिभेदे (सुरङ्ग) तन्त्रोक्ते जपमालाकारयन्त्राय षट्त्रस्त्रादिभिन्ने स्त्रनामख्याते ७पदार्थे न० । तस्य लक्षणं सुखमालात० उक्तं यथा ।

"चतुर्दिशाङ्गुलमितं षट्त्रस्त्रादिसमन्वितम् । निर्माय दाङ्गुलिमुखं ग्रीवायां षड्दशाङ्गुलम् । शेषं गोमुखवन्मध्ये सर्वतन्त्रेषु गोपितम् । तन्मुखे स्थापयेन्मालां ग्रीवामध्यगते करे । प्रजपेद्विधिना सुप्तां वर्णमालाधिकं फिये । निधाय गोमुखे मालां गोपयेन्मार्जारवत्" (गोमुख) ख्याते ८नदीभेदे स्त्री गोमु-

आकारत्वात् टिड्डिमादित्वात् ङीषि गङ्गापतनगुहायां स्त्री ङीष्।

गोमूत्र न० ६त०। (चोना) इति ख्याते गोर्मूत्रे गोशब्दे २६८१ पृ० तदुपयोगादुक्तम्। "शुद्धिर्विधानतश्चार्या गोमूत्रेणोदकेन वा।" "गोमूत्रमग्निवर्णं वा पिबेदुदकमेव वा" "गोमूत्रेण चरेत् स्नानं द्वौ मासौ नियतेन्द्रियः" मनुः।

गोमूत्रिका स्त्री गोर्मूत्रस्येव गतिरस्यत्र ठन्। चित्रालङ्कारभेदे तल्लक्षणमलङ्कारशब्दे २६२ पृ० दृश्यम्। सा च पादार्द्धश्लोकविपरीतभेदाच्चतुर्विधा। दिङ्मात्रमुदाह्रियते"

प्र। ह। क्ते। वि। क। वा। हा। नं। वा। धा। ने। व्या। वि। पा। दि। भिः। आह। प्रे। वि। का। स। हा। नं। यु। धा। षा। व्या। वि। पा। धि। भिः। माघे १६ स० ४६ श्लोके तल्लक्षणान्तरं मल्लिनाथोक्तं यथा "वर्णानामेकरूपत्वं यत्रैकान्तरमद्वयोः। गोमूत्रिकेति तत् प्राहुर्दुर्ग्रहं तद्विदो विदुः"।

षोडशकोष्ठके षड्भिर्भुजे द्वयं द्वयं क्रमेण विलिख्य एकान्तरविनिवेशेन याचने श्लोकनिष्पत्तिरिति तदुद्धारः। गोमूत्रप्रकारः प्रकारे स्यूला० कन् टाप्। अत इत्त्वम्। गोमूत्रतुल्ये वक्रसरलप्रचारादौ। "गोमूत्रिकाप्रचारेण" दशकु० "गोमूत्रतुल्यवक्रसरलप्रचारेण" (ताम्बुड्) ख्याते ४लक्षणभेदे स्त्री राजनि०।

गोसृग पु०स्त्री गवाकृतिर्मृगः। गवये तस्य गवाकृतित्वात् तथात्वम्। "अश्वस्तूपरो गोसृगस्त्रे प्राजापत्याः" यजु० २४।। स्त्रियां जातित्वात् ङीष्।

गोमेद पु०गौरिव मेद्यति मिद-अच्। १मणिभेदे २द्वीपभेदे तन्नामनिरुक्तिर्यथा "गोमेदे गोपतिर्नाम राजाभूद्गोसवोद्यतः। याज्ञोऽभूदृषिकल्पानामौतथ्यानां मनोः कुले। स तेषु क्रियमाणेषु ऋत्विक्षु ऋत्विजं गुरुम्। वव्रे, तं गोतमः कोपादशपत् सोऽगमत् क्षयम्। यज्ञवाटेऽस्य तामाशां दग्धाः कोपाग्निना मुनेः। तच्चेदसा मरीच्यादा गोमेदः स ततोऽभवदिति" युक्तिकल्पतरुः। २शुक्लद्वीपस्थे वर्षाचलभेदे तद्वर्षोपक्रमे" मर्यादाकारकाख्यो तथाख्ये वर्षपर्वताः। सप्तैव तेषां नामानीत्यभिधाय "गोमेदश्चैव चन्द्रश्च नारदो दुन्दुभिस्वना। वैभ्राजकश्च सप्तमः" विष्णु पु०। स्वार्थे क। मणिभेदे तस्य परीक्षादियुक्तिकल्पतरावुक्तं यथा "स्निग्धाभये वा स्निग्धौ वा गोमेदमणिसम्भवः। स्वच्छकान्तिर्गुरुः स्निग्धो वर्णाढ्यो दीप्तिमानपि। बलवः पिङ्गरो धन्यो गोमेद इति कीर्त्तितः। चतुर्णां जातिभेदस्तु गोमेदेऽपि प्रकाश्यते। ब्राह्मणः शुक्लवर्णः स्यात् क्षत्रियो रक्त उच्यते। वैश्यजातिस्तु शुद्धस्त्वनील उच्यते। छाया चतुर्विधा श्वेता रक्ता पीताऽसिता तथा। गुरुप्रभाद्यः सितवर्णरूपः स्निग्धो मृदुर्वांतिमलापहारी। स्वच्छस्तु गोमेदमणिर्मलोऽयं करोति कर्त्तीं धनधान्यवह्निम्। लघुर्विरूपोऽतिखरोऽन्यमानः स्त्रीरोगनिघ्नो मलिनः खरोऽपि। करोति गोमेदमणिर्विनाशं सम्पत्तिभोगे बलवीर्यराशेः। ये दोषा हीरके श्वेताश्चे गोमेदमणावपि। परीक्षा वक्ष्यतः कार्या शाखे वा रत्नकोविदैः॥ स्फटिकेनैव कुर्वन्ति गोमेदप्रतिरूपकम्। शुक्लस्य गोमेदमणेस्तु मूल्यं सुवर्णतो द्वैगुण्यमाचक्षते के। अन्ये तथा विद्रुमतुल्यमूल्यं तथा परे चामरतुल्यमाहुः। चतुर्विधानामेषान्तु धारणं परिकल्पितम्"। अथ जलकालुष्यशोधकः यथाह सुश्रुतः "तत्र (जले) सप्त कालुष्यप्रसाधनानि भवन्ति तद्यथा कतकगोमेदकविसपद्मिसैवालमृणालवल्कानि सङ्क्षामणीयेति"। स्वार्थे क। द्वीपभेदे। "शाकं ततः शाल्मलमत्र कौशं क्रौञ्चं च गोमेदकपुष्करे च। द्वयेऽर्द्धवेलारत्नरसेकजन्मे सप्तद्वयेऽहीन्यहदाहरन्ति" सि० शि०।

गोमेदसन्निभ पु० गोमेदेन तुल्यः निभस०। दुग्धपाषाणे राजनि०।

गोमेध पु० मेध-घञे आधारे घञ् ६त०। गोसवाख्ये यज्ञभेदे गोसवशब्दे विवृतिः "गवां मेधमवाप्नोति अप्सरोभिश्च मोदते" भा० आनु० १०६ अ०।

गोऽम्भस् न० ६त०। गोमूत्रे राजनि०।

गोयज्ञ पु० गवा कृतो यज्ञः। १गोसवयज्ञे तच्छब्दे विवृतिः। गा उद्दिश्य यज्ञः। श्रीकृष्णेन गोपानां हितार्थं इन्द्रयजने प्रवर्त्तिते गोवर्द्धनगिरियज्ञसंज्ञिते गवां मङ्गलसत्कारके २व्यापारभेदे तत्कथा हरिवं० ७२ अ०।

"शरद्येवं सुखस्थायां प्राप्तायां प्राहुषः क्षये। नीलचन्द्रार्कवर्णैश्च रचितं वक्रभिर्घनैः। क्वचित् प्रवालेन्द्रनभइन्द्रचापघनोपमम्। भवनाकारविटपं लताधरमसंस्कृतम्। विशालमूलविततं पवनाभोगधारिणम्। अचेष्टामोगिरिं देवं गाश्चैव समवेक्षतः। सावर्तसैर्वधाराश्च वर्षोघीश्च दंशितैः। वराटाभिश्च मुक्ताभिः पुष्पैः शारदिकैस्तथा। शिवाय गावः पूजन्तां

गिरियज्ञः प्रवर्त्तताम्। पूज्यतां त्रिदशैः शक्रो गिरियज्ञाभिरिज्यताम्। गोयज्ञं कारयिष्यामि बलादेव न संशयः"। एवं श्रीकृष्णोक्ते गोपवाक्यं यथा "यत्त्वया ऽभिहितं वाक्यं गिरियज्ञं प्रति प्रभो। कालकृत्रियं शक्रो वेलामिव महोदधेः। स्थितः शक्रमहत्त्वात् श्रीमान् गिरिमहत्त्वम्। वयमप्येतोऽद्य गोपानां गवां हेतोः प्रवर्त्तताम्। भाजनान्युपकल्प्यन्तां पयसः पेशलानि च। कुम्भाश्च विनिवेश्यन्तां स्नपनेषु शोभनाः। पूर्य्यन्तां पयसा मद्यो द्रोण्यश्च विपुलायताः। भक्ष्यं भोज्यञ्च पेयञ्च तत्पर्य्याप्तमीयताम्। भाजनानि च मांसञ्च व्यञ्जनौदनमेव च। विरात्रञ्चैव सन्दोहः सर्व्वोपस्करसंहताम्। विशङ्कन्ताञ्च पशवो भोक्ष्यामो ये महिषादयः। प्रवर्त्तताञ्च यज्ञोऽयं सर्व्वोपस्करसङ्कुलः। आनन्दजननो घोषे महान् स्फीतगोकुलः। तूर्य्यप्रणादघोषैश्च कृष्णभाषाञ्च गर्ज्जितैः। कृष्णस्यैव वचोनां गोपानां हर्षवर्द्धनः। दधिह्रदः परावर्त्तः [पयःकुल्यासमाकुलः। [मांसराशिमहाकूप्राग्यः प्रकाशौदनपर्व्वतः। संप्रावर्त्तत यज्ञः स गिरेर्गोभिः समाकुलः। हृष्टगोपगणाकीर्णो गोपनारीमनोहरः। अथाधिरूढतपर्व्वन्ते पर्य्याप्ते यज्ञसंविधौ। यज्ञं गिरेस्त्रिधौ चक्रुर्गोपा द्विजैः सह। यजमानो तदन्नन्तु तत्पयो दधि चोत्तमम्। मांसञ्च भावया कृष्णो गिरिर्भूत्वा समश्नुते। तर्पिताश्चापि विप्राग्र्यास्तृप्ताः सम्पूर्णभोजनाः। उत्तस्थुः प्रीतमनसः स्वस्ति वाच्य यथासुखम्। भुक्त्वा चावस्थये कृष्णः पयः पीत्वा च कामतः। संदग्धोऽक्षोति दिव्येन रूपेण प्रजहास वै। तं गोपाः पर्वताकारं दिव्यस्रगनुलेपनम्। गिरिमूर्द्धि स्थितं दृष्ट्वा कृष्णं जग्मुः प्रधानतः। भगवानपि तेनैव रूपेणाच्छादितः प्रभुः। सह तैः प्रणतो गोपैर्वयन्दात्मानमात्मना। तमूचुर्विस्मिता गोपा देवं गिरिवरे स्थितम्। भगवंस्त्वदधे भुक्ता दासाः किं कुर्म? किङ्कराः। स उवाच ततो गोपान् गिरिप्रभवया गिरा। यद्य प्रीतिर्यदि वो मय्यस्ति वो दया। अहं वः प्रथमो देवः सर्वकामकरः शुभः। मम प्रभावात् गवाढ्यतान्युपभोक्ष्यथ। शिवञ्च वो भविष्यामि मद्भक्तानां वने वने। रंस्येऽहं सह युष्माभिर्यत्र दिवि गतस्त्वया। ये चेमे प्रथिता गोपा नन्दगोपपुरोगमाः। एषां प्रीतः प्रयच्छामि गोपानां विपुलं धनम्। पर्य्याप्नुवन्तु क्षिप्रं मां गावो वत्ससमाकुलाः। एवं मम परा प्रीतिर्भविष्यति न संशयः" ७४ अ०।

**गोयान** न० गवा क्रुष्टं यानम्। गवाक्रुष्टे याने (शगड) "गोयानेनागतस्तुष्टः पादाभ्यां शुभचेष्टितः" हरिवं० गोयाने मैथुननिषेधमाह मनुः "मैथुनन्तु समासेव्य पुंसि योषिति वा द्विजः। गोयानेऽप्सु दिवा चैव सवासाः स्नानमाचरेत्"।

**गोयूति** स्त्री "गोर्यूतौ छन्दसि" पा०अध्वपरिमाणे वार्त्ति० छन्दोध्वपरिमाणभिन्ने न वान्तादेशः। गोर्यूतौ।

**गोरक्त** पु० गां रक्षति सेवनात् रक्ष-क्त उप० स० (चाकुलिया) इक्षुभेदे रत्नागरङ्गे भेदे। इक्षुमतीनदीभेदे हेम०। इगोपालके त्रि०। भावे घञ्। ५गोरक्षणे च। "क्षयिगोरक्षमास्थाय जीवेद्देवस्व जीविकाम्" मनुः।

**गोरक्षक** त्रि० गां रक्षति रक्ष-ण्वुल् इत्व०। (राखाल) गोपालके "गोरक्षकान् वाणिजकान् तथा कारुकुशीलवान्। प्रेष्यान् वार्द्धुषिकांश्चैव विप्रान् शूद्रवदाचरेत्" मनुः।

**गोरक्षकर्कटी** स्त्री कर्म०। क्षुद्रकर्कट्याम् (राखालकाकुड) भावप्र०। [२मेषशृङ्गे च जटा०।

**गोरक्षजम्बू** स्त्री गोरक्षे गोमे जम्बूरिव। १गोस्तनफले

**गोरक्षतण्डुलो** स्त्री गोरक्षः तण्डुलो बीजं यस्याः। (गोरक्षचाकुलिया) क्षुपभेदे रत्नमाला।

**गोरक्षतुण्डी** स्त्री गोरक्षी तुण्डी। कुम्भाकारतुम्बुरामराजनि०

**गोरक्षदुग्धा** स्त्री गोरक्षं गोपोषकं दुग्धं यस्याः सोऽस्याः। मालवप्रसिद्धे क्षुपभेदे गोरक्षीक्षुपे राजनि०।

**गोरक्षी** स्त्री० गां रक्षति रक्ष-ण्वुल् ङीप् सुन्व०। मालवप्रसिद्धे क्षुपभेदे राजनि०। [भेदि०।

**गोरङ्गु** पु०स्त्री गवा वाचा रङ्गुरिव। पक्षिभेदे लम्बके

**गोरट** पु० गवि रटति रट-अच्। दुग्धदिरे राजनि० तस्य गोः गोप्रणाय रटनात् तथात्वम्।

**गोरण** न० गुर-भावे ल्युट्। उत्क्षेपणे उद्यमे अमरः।

**गोरथ** पु०मगधदेशस्थे पर्वतभेदे। "अतीत्य गङ्गां शोणञ्च त्वयसे प्राङ्मुखाश्रमात्। कुञ्जरीरुद्धा जम्बुमौगधं क्षेत्रमच्युताः। ते शब्दोधनकीर्णमम्बुमन्तं शुभद्रुमम्। गोरथं गिरिमासाद्य ददृशुर्मौगधं (जरासन्धपुरम्) पुरम्"। भा० स० १९ अ०।

**गोरस** पु०क्लीत०। १गोर्दुग्धे २दधि ३तक्रे च हेम०। "आ-

यानां मांसपरमं मध्यानां गोरसोत्तरम्। तैलोत्तरं दरिद्राणां भोजनं भरतर्षभ!" भा०उ०३३अ०। "शालाः शालीक्षुगोरसैः" भा० आश्व० ८५ अ०। गोरसानुपभुञ्जान उपभोगांश्च भारत!"। भा० व० २३८ अ०। "अन्नं पर्य्युषितं भोज्यं क्षेद्राक्षं चिरसंस्थितम्। अक्षेद्रा अपि गोधूमयवगोरसविक्रियाः" याज्ञ० अक्षेद्रस्य चिरस्थितस्य तद्विकारस्य भोज्यतामाह। "हरिद्रा गोरसो धान्यं पुनः पाकेन शुध्यति" स्मृतिः। ४शाक्यरसे च "क्षीरसा गोरसं विना" उज्ज्वटः।

गोरसज न० गोरसात् दध्नो जायते जन-ड ६त०। तक्रे राजनि०।

गोराज पु० ह्रत० टच् समा०। श्वेतवर्णे शब्दर०।

गोराटिका गोरिव रटति रट+ण्वुल्। शारिकापक्षिणि राजनि०। अच् गौरा० ङीष्। गोराटीत्यपि तत्रैव हेमच०।

गोरिका स्त्री गोराटिका पृषो०। शारिकाख्ये राजनि०।

गोरुत न०ह्रत० १गवां शब्दे तद्भुतशुभाशुभफलं गवेङ्गितशब्दे २५६७ पृ० उक्तम्। गोरुतं तच्छब्दः स्तुतिगोचरत्वेन अस्यास्य अच्। गोरवश्चवणयोर्म्ये २क्रोशद्वयाक्रान्ते देशे हेमच०।

गोरूप न० ह्रत०। १गोः रूपे "जुगोप गोरूपधरामिवोर्वीम्" रघुः। गोः रूपमिव रूपमस्य। २महादेवे पु०। "गारूपश्च महादेवो हस्त्यश्वोष्ट्रखराकृतिः" भा० शान्तु० १४ अ०। [राजनि०।

गोरोच न० गवा किरणेन रोचते रोच-अच्। हरितालेगोरोचना स्त्री गोभ्यो जाता रोचना हरिद्रा। स्वनामख्याते गन्धद्रव्ये भावप्र०।

"गोरोचना त्रिधा त्रिज्ञा वश्या सङ्कलकालिदा। विप्राऽलक्ष्मीयशोन्नादगर्भस्रावच्छताऽऽहृता" भावप्र०। "गोरोचनापत्रविभङ्गरम्याः" "गोरोचनालेपनिताल गोरैः" कुमा०। सा च अन्यत्रेक्षनद्रव्यं "गोरोचनालक्तककुङ्कुमेन" तन्त्रसारोक्तेः। [अमरः।

गोर्द न० गुर। अदादित्वात् नि०। मस्तिष्के मस्तकस्थे घृते

गोल पु० गुड-अच् डस्य लः। १सर्ववर्त्तुले २मदनवृक्षे रत्नमा०। ३जारात् जाते विधवायाः सुते धरणी। ४गोले जटाधरः। गोलः विगतयाऽस्यस्य अच्। खगोलभूगोलज्ञापके भास्करीये गोलाध्यायाख्ये ५ग्रन्थे च।

"तं तां च ग्रन्थिपत्र गोलममलं बालावबोधं ब्रुवे। मध्याद्यं दुःसदां वदत्र गणितं तस्योपपत्तिं विना प्रौढिं प्रौढसभासु नैति गणको निःसंशयो न क्षयम्। भोज्यं यथा सर्वरसं विनाज्यं राज्यं यथा राजविवर्जितं च। सभा न भातीव खलैर्विहीना गोलानभिज्ञो गणकस्तथात्"। "गोलः स्यात् खेलविशेष एव प्राज्ञैरतः स्यादृगणितेन गम्यः" सि० शि० उक्ते ६खेलभेदे ७मण्डले न० मेदि० ८ज्योतिषोक्तेऽयोगभेदे पु०। "यद्राशामेकस्मिन् यदि भवति भस्यां निवसतिसदा गोलोयोगः, मलयपदमिन्दोऽपि लभते। भवेल्लोको रक्तः, परिहरति पुत्रञ्च जननी रुषाणां नाशः स्यात् ज्वलति वसुधा शुष्यति नदी" ग्रन्थकौस्तुभे "सप्त यदा यदैकस्यां गोलयोगस्तदा भवेत्। दुर्भिक्षं राष्ट्रपीड़ा च तस्मिन् काले न्यूनयः" मयूरचित्रकम्। "एकादिसप्तयोपेतैरक्षान् योगान् विहायसंख्याख्यान्। गोलयुक्शूलकेदार पाशदामाख्यवीथाः स्युः। दुःखितदरिद्रयातुकलहिकर दुःशील पशुपनिपुत्राणाम्। जन्म क्रमेण दुःखिनः परभाग्यैः सर्व एवैते" दीपिका।

गोलक पु०गुड-स्वुल् डस्य लः। १मणिके अलिञ्जरे (जाला) २गुड़े च हेमच०। ३गन्धरसे रत्नमाला ४कलाये (मटर) ख्याते शब्दच० तस्य गोलाकृतित्वात् तथात्वम्। गोल+स्वार्थे क। ५गोलशब्दार्थे ६पिण्डे च "तेजसां गोलकः सूर्य्यः यद्यर्थाल्यन्तु गोलकाः। प्रभावन्तोऽपि दृश्यन्ते सूर्य्यरश्मिप्रदीपिताः" स्फु०सि०। ७गोलोके न० "यद्रूपं गोलकं धाम तद्रूपं नास्ति मामके" तन्त्रसा०। जारजगोलकस्य संस्कारार्हता कृच्छ्रशब्दे २०८७ पृ० उक्ता। ८इन्द्रियाधिष्ठानभेदे न०। चक्षुर्गोलकम्।

गोलक्षण न० ह्रत०। गोः शुभाशुभसूचके चिह्नभेदे ह० मं०तल्लक्षणाद्युक्तं यथा

"पराशरः प्राह हरहिताय गोलक्षणं यत् क्रियते ततोऽयम्। मया समासः शुभलक्षणानां सर्वांस्तथाप्यागमतो ऽभिधास्ये। सास्नाविलम्बोन्नतपृष्ठकूर्म्म नयनाश्च न शुभदा गावः। प्रलम्बशिफटविषाणाः करटाः खरसदृशवर्णाः। दशसप्तचतुर्दन्तैः प्रलम्ब सुखानना विनतपृष्ठाः। सुखस्थूलश्रोणी यवमध्या दारितखुराश्च। श्यावातिदीर्घजङ्घा गुल्फैरतिततनुभिरतिहृद्भिर्वा। अतिकृदाः क्रमहीना नेष्टा हीनाधिकाङ्गयश्च। हृष्यभोज्यैर्वं स्वजातिलक्ष-

दृश्यः सिरातनकोड़ः। स्थूलसिराचितमस्तकस्थिरस्थानं मेहते यश्च। मार्जारवत्तः कपिलः करटो वा न शुभदो द्विजस्येष्टः। कृष्णोऽतानुजिह्वः श्वसनो यूथस्य घातकरः। स्थूलशल्लकपिश्चङ्गः सितोदरः कृष्णसारवर्णश्च। सदृक्षजातोऽपि ताम्रो यूथविनाशकृद्दृश्यः। श्यामकपुष्पचिताङ्गो भल्लातकसन्निभो विड़ालाक्षः। विप्राणामपि न शुभं करोति दृश्यः परिष्टहीतः। ये चोद्धरन्ति पादान् पश्चादिव योजिताः कृशग्रीवाः। कातरनयना हीनाश्च पृष्ठतस्ते न भारसहाः। सदृसंहतताम्रोष्ठास्तनुस्निग्धताम्रतालुजिह्वाश्च। तनुत्वक्श्रवणा सुकृष्णयः सदृजङ्घाश्च। ताम्रसंहतखुरा व्यूढोरस्का दृढस्कन्धवृक्काः। स्निग्धश्लक्ष्णतनुत्वग्रोमाणस्ताम्रतनुग्रहाः। तनुभ्रूश्मश्रुबालधयो रक्तान्तविलोचना मदोच्छ्वासाः। सिंहस्कन्धास्तन्वङ्गा कम्बलाः पूजिताः शुभदाः। वामावर्तैर्वामे दक्षिणपार्श्वे च दक्षिणावर्तैः। शुभदा भवन्प्रनडुहो जङ्घाभिश्चैवकनिभाभिः। वैदूर्यसन्निकाशदृङ्नेत्राः स्थूलदेहवर्मोष्ठाः। पार्ष्णिभिरस्फुटिताभिः ग्रस्ताः सर्वेऽपि भारवहाः। प्राणोद्वेगे शवलो मार्जारसवः सितश्च दक्षिणतः। कमलोत्पलनालाभः सुबालधिर्वाजितुल्यजवः। लम्बैर्दृग्भिर्मेषोदरश्च सङ्क्षिप्तवङ्क्षणक्रोड़ः। श्रेयो भाराध्वसहो जवेऽश्वतुल्यश्च शस्तफलः। सितवर्णः पिङ्गलसाम्बविषाणेक्षणो मदावङ्कः। हंसोनाम शुभफलो यूथस्य विवर्धनः प्रोक्तः। भूस्मश्रुबालधिरताम्रवङ्क्षणो रक्तदृक् ककुद्मी च। कलमाक्ष्य स्वामिनमचिरात् कुरुते पतिं नष्टभ्राः। यो वा सितैकचरणो यवेष्टवर्णश्च सोऽपि शस्तफलः। मिश्रफलोऽपि ख्यातो यदि नैकान्तप्रशस्तोऽस्ति" ६।३०।

**गोलक्तिका** स्त्री गवि भूमौ लक्तिकेव। वनचरपशुस्त्रीभेदे "रोहित् कस्तृणाची गोलक्तिका तेऽप्सरसाम्" यजु० २४।३७। "रोहित् कस्तृणाची, कृष्णतृणाची, वनचरी गोलक्तिकापि" वेददी०। [तदपत्ये पु० स्त्री।

**गोलन्द** पु० ऋषिभेदे तस्यापत्यं गर्गा० यञ्। गौलन्द्य

**गोलयन्त्र** न० ष० त० उक्ते यन्त्रभेदे।

"वृत्तपत्तगरविचिह्नं क्षितिजे धृत्वा कुजेन संसक्ते। नाड़ीवृत्ते विन्दुं कृत्वा धृत्वाथ जलसमं क्षितिजम्। रविचिह्नस्य च्छाया पतति कुमध्ये यथा तथा विद्धते। तद्गोले कुजविन्दोर्मध्ये नाड्यो द्युजाताः स्युः"। "यथोक्तविधिना खगोलान्तर्भगोलं बद्ध्वा तत्र क्रान्तिवृत्ते मेषादेरारभ्य रविभुक्तं राशिभागाद्यं दत्वा तत्र तच्चिह्नं तदपक्रान्तग-रविचिह्नं सुच्यते। भगोलं चालयित्वा-रविचिह्नं क्षितिजे धार्य्यम्। तथा कृते सति क्षितिजं प्राच्यां विषुवन्मण्डले यत्र लग्नं तत्र घटिकया विन्दुः कार्य्यः। ततः क्षितिजवृत्तं जलसमं यथा भवति तथा गोलदन्तं स्थिरं कृत्वा भगोलस्थया चाल्यो यथा रविचिह्नस्य च्छाया भूगर्भे पतति। तथा कृते सति विषुवद्वृत्ते क्षितिजविन्दोर्मध्ये यावत्यो घटिका स्तावत्यस्तस्मिन् काले दिनगता ज्ञेयाः। कृपक्रवृत्ते मेषादेरारभ्य प्राक् क्षितिजपर्य्यन्तं यद्राशिभागाद्यं तल्लग्नं ज्ञेयम्" प्रभिताक्षरा।

**गोलवर्ण** न० मवे देयं परिभितं लवणम्। यावद्गवे लवणं दीयते तावन्मिते लवणे। "गोधलवणयोः" पा० प्रमाणे गम्ये एतयोः परतः पूर्वं ततपुरुषे प्रकृतिस्वरता।

**गोला** स्त्री गां वसुभूमिम् आधारत्वेन लाति ला-क। १गोदावरीनद्याम्। गां वाचं लाति।२सख्यां,३कुनद्याम्। गां दीप्तिं जलं वा लाति। ४पलाङ्गने, ५मणिजे० ६मण्डले, ७बालक्रीडनके ८दुर्गाभेदे च मेदि०।

**गोलाच** पु० ऋषिभेदे तस्य गोलापत्यम् अश्वा० फञ्। गौलाचायण तद्गोलापत्ये पु० स्त्री।

**गोलाङ्गूल** पु० स्त्री गोलाङ्गूलमिव लाङ्गूलमस्य। १वानरभेदे त्रिका० सच कश्यपपत्न्याः क्रोधायाः कन्यायांहरिनाम्न्यां जातः यथाह भा० आ० ६६ अ० "तव क्रोधवशा नारीः प्रजज्ञे क्रोधसम्भवा। मृगी च मृगमन्दा च हरी भद्रमदा अपि" इत्युपक्रमे "हर्य्याञ्च हरयोऽपत्यं वानराश्च तरस्विनः। गोलाङ्गूलांश्च भल्लं ते हर्य्याः पुत्रान् प्रचक्षते"। २कृष्णवानरे राजनि०। तल्लक्षणञ्च काशी ख० २अ०। "गोलाङ्गूला रक्तमुखा नीलाङ्गा यूथनायकाः।"

**गोलाध्याय** पु० गोलस्वरूपादिप्रतिपादके भास्करीये ग्रन्थभेदे।

**गोलाम** पु० गां भूमिं लासयति प्रकाशयति लस-णिच् अण् उप० स०। शिलीन्ध्रे त्रिका०।

**गोलिङ्ग** पु० गोभिर्लिङ्गते लिङ्ग-अच्प्रत्ययेन क। १लक्षिकायां २वशटापाटलौ (वशटापारुलि) च जटा०। [पारुलि] अमरः।

**गोलीढ** पु० गोभिर्लिह्यते लिह-क्त। वशटापाटलौ (वशटा-

**गोलोक** पु० वैकुण्ठोर्द्ध्वे स्थानभेदे तत्स्थानमानादि ब्रह्मवै० पु० उक्तं यथा

"निराधारश्च वैकुण्ठो ब्रह्माण्डानां परोवरः। तत्परस्यापि गोलोकः पञ्चाशत्कोटियोजनात्। ऊर्द्धं निराश्रयस्यापि रत्नसारविनिर्म्मितः। सप्तद्वारः सप्तसारः परिखासप्तसंयुतः। लक्षप्राकारयुक्तश्च नद्या विरजया युतः। वेष्टितो रत्नशैलेन शतशृङ्गेण चारुणा। योजनायुतमानञ्च यस्यैकं शृङ्गसञ्चलम्। शतकोटियोजनञ्च शैलउच्छ्रित एव च। दैर्घ्यं तस्य शतगुणं प्रस्थे च लक्षयोजनम्। योजनायुत विस्तीर्णस्तावैव रासमण्डलः। अमूल्यरत्ननिर्म्माणो वर्त्तुलश्चन्द्रबिम्बवत्। पारिजातवनेनैव पुष्पितेन च वेष्टितः। कल्पवृक्षसहस्रेण पुष्पोद्यानगतेन च। नानाविधैः पुष्पवृक्षैः पुष्पितेन च चारुणा। त्रिकोटि रत्नाभरणैर्गोपीभिश्चैव रक्षितः। रत्नप्रदीपयुक्तश्च रत्नतल्पसमन्वितः। नानाभोगसमायुक्तो मधुपापीशतैर्वृतः। पीतूषपायीयुक्तश्च कामभोगसमन्वितः। गोलोकस्यस्य संख्यानं वर्णनं वा विचारदः। न कोपि वेद विद्वान् वा वेदविद्वान् ब्रजेश्वर!"।

**गोलोमिका** स्त्री गोः लोमेव लोमास्य ङीप् ततः स्वार्थे के अणो ह्रस्वः। (पाशुरी) (गोधूमा) इति च ख्यातायां धान्यस्त्रियाम्। २क्रोष्टुकपुच्छायाञ्च। राजनि०।

**गोलोमी** स्त्री गोर्लोमेव लोम लोमसदृशं दलादिकमस्या ङीप्। १श्वेतदूर्व्वायाम्। गोलोमेव जाता अण् ङीप्। २बचायाम्। गवा वाचा लोभयति अतिशूलयति लोभन्+नामधातु-अच् गौरा० ङीप्। ३वेश्यायां हेमच०। ४गोलोमिकावृक्षे राजनि०।

**गोव्रतस** पु० ६त०। गवां व्रतमिव तद्व्रमवादगोव्रतम् व्रत शब्दे दृश्यम्। [(नेकडेवाव) राजनि०।

**गोव्रतसादिन्** पु० गोव्रतमस्यस्ति अद-णिनि६त०। इके

**गोवन्दनी** स्त्री गवि भूमौ वन्द्यते वन्द-कर्म्मणि ल्युट् ङीप्। १प्रियङ्गौ,अमरः २पीतदण्डोत्पले रत्नमाला।

**गोवर** न० गोषु म्रियते ड-बा०अ। "गोव्रजगोखुरक्षुण्णशुष्कचूर्णितगोमयम्। गोवरं तत्समाख्यातं वरिष्ठं रसशोधने" भावप्र० उक्ते शुष्कगोमयचूर्णे (गेटा)

**गोवर्द्धन** न० धव-णिच् भावे ल्युट् ६त०। १गवां वर्द्धने। करणे ल्युट्। २गिरियज्ञभेदे तत्प्रकारो गोवज्ञशब्दे दृश्यः धव-णिच्-कर्त्तरि ल्यु ६त०। ३वृन्दावनस्थे पर्व्वतभेदे पु० तस्य पूजाकालो हरिभक्तिविलासे १६वि० उक्ते यथा "प्रातर्गोवर्द्धनं पूज्य द्यूतञ्चैव समाचरेत्। भूष्णीद्यास्तथा गावः पूज्याश्च दोहवाहनाः। श्रीकृष्णदासपर्य्यायं श्रीगोवर्द्धनभूधरः। शुक्लप्रतिपदि प्रातः कार्त्तिकेऽन्नकूटोत्सव वैष्णवैः"। "प्रातर्गोवर्द्धनं पूज्य रात्रौ जागरणं चरेत्" इति क्वचित् पाठः। तस्मात्तदिदं कर्म गोवर्द्धनप्राधान्येन गोप्राधान्येन च ख्यातमप्येकमेव ज्ञेयम्। तत्र दिननिर्णयमाह देवलः "प्रतिपद्दर्शसंयोगे क्रीडनैस्तु गवां मतम्। परविद्धान्तु यः कुर्य्यात् पुत्रदारधनक्षयः"। निर्णयामृतधृतं पुराणान्तरवचनम् "या कृष्णः प्रतिपत्पुरिश्चा तत्र गाः पूजयेन्नृप!। पूजामात्रेण वर्द्धन्ते प्रजा गावो मही पते!। ततः प्रातर्गोवर्द्धनं पूज्येति पूर्वोक्तातत्पर्य्यके द्वितीयासर्गंस्तु सर्वथा निषिद्धः तद्यथा "नन्दायां दर्शने रत्नावलिदानदशासु च। भद्रायां गोकुलक्रीड़ा देवनाशाय जायते"। पुराणसमुच्चये तु सम्पाविलचन्द्रोदयो द्वितीयासंयोग एव निषिध्यते "गवां क्रीडा दिने यत्र रात्रौ दृश्येत चन्द्रमाः। सोभोराजा पशून् हन्ति सुरभी पूजकांस्तथा"। तदुदयसम्भावनञ्च निर्णयामृते निर्णीतं यथा "प्रतिपद्यापराह्णिकलिमुहूर्त्तव्याप्तिन्यां द्वितीयायां चन्द्रदर्शनं सम्भाव्यते तदुक्तमन्नाधानविषये ब्रह्मपातातपेन" द्वितीया त्रिमुहूर्त्ता चेत् प्रतिपद्यापराह्णिकी। अन्याधानकृतर्द्धग्रां परतः सोमदर्शनादिति"। अपराह्णश्च पञ्चधा विभक्तस्तृतीयभागः। ततश्च यत्र प्रतिपदि पराह्णलिमुहूर्त्तव्यापिनी द्वितीया तत्र चन्द्रदर्शनसम्भावनमिति। अन्यदा तूत्तरैव प्रतिपत्तत्र ग्राह्येति तथैवोक्तं पुराणसमुच्चये "वर्द्धमानतिथौ नन्दा यदा सार्द्धत्रियामिका। द्वितीया द्वद्धिगामित्वादुत्तरा तत्र चोच्यते"। किञ्च। यदा पूर्णप्रतिपत् परत्र निष्क्रामति तदाप्युत्तरैव कार्य्या यथोक्तं भविष्योत्तरे "यदा द्वादशभिर्भागैर्भोगो द्वद्धो मलिम्लुचः। तथैवाक्रोशलद्धा तिथिः भोक्तो मलिम्लुचः। यथा मलिम्लुचः पूर्वस्याज्योत्स्नाश्च तथा परः। त्याज्या तिथिस्तथा पूर्वा ग्राह्या चैव तथोत्तरेति" निर्णयामृतधृतम् किन्तु वह्निपुराणेन पूर्वैव सन्तु शब्द्यते। तद्दलादि देवलादिवचनाभासगतमस्तीति। अथ गोवर्द्धनपूजाविधिः। तत्रैव भाद्रे "मथुरायास्तथान्तत्र ज्ञत्वा गोवर्द्धनं गिरिम्। गोमयेन महास्थूलं तत्र पूज्यो गिरिर्यथा। मथुरायां तथा साक्षात् ज्ञत्वा चैव प्रदक्षिणम्। वैष्णवं धाम संप्राप्य

मोदते हरिसन्निधौ"। पूजामन्त्रः। "गोवर्द्धन! धराधार! गोकुलत्राणकारक!। विष्णुबाहुकृतोच्छ्रायो गवां कोटिप्रदो भव" गोपूजामन्त्रः स्कान्दे तत्रैव "लक्ष्मीर्या लोकपालानां धेनुरूपेण संस्थिता। घृतं वहति यज्ञार्थं यमपाशं व्यपोहतु। अग्नयः सन्तु मे गावो गावो मे सन्तु पृष्ठतः। गावो मे पार्श्वतः सन्तु गवां मध्ये वसाम्यहम्"। अथ तत्र गोक्रीड़ा तत्रैव "क्रोधापवेष्टावपेक्षेषु गोमक्षिकाद्यादिकं ततः। दृष्ट्वा तत्पर्णपक्षेपैरुक्षिप्रत्युक्षिवादनात्"। पाद्मे च तत्रैव "मक्षिकाष्टेक्षया भूपा क्रीडनं वारणक्षया"। तत्माहात्म्यञ्च तत्रैव "एवं गोवर्द्धनो गाश्च पूजनीया विधानतः। गोवर्द्धनसखोरस्यः कृष्णस्नेहप्रकारकः"। "गोवर्द्धनस्याकृतिरन्वकारि" माघः।

गोवर्द्धनधर पुं० गोवर्द्धनं वृन्दावनस्थपर्वतभेदं धरति धर-अच् ६त०। श्रीकृष्णे नन्दनन्दने तस्य तद्धारणकथा हरि० ७५ अ० यथा

"गवां तत् क्रदनं श्रुत्वा दुर्दिनागमजं महत्। गोपांश्चा सन्निधानात् कृष्णः कोपं समादधे। स चिन्तयित्वा संरब्धो दृष्टोपायो मघेति च। आत्मानमात्मना बाह्यमिद्धे चिक्षेप वेगवत्। अथाहमिमसुत्पाट्य सकाननवनं गिरिम्। कल्पयेयं गवां स्थानं वर्षत्राणाय दुर्द्धरम्। अयं धृतो मया शैलः पृथ्वीपृष्ठमिवापरम्। त्राप्स्यन्ते सर्व्वा गावो महच्चास्य भविष्यति। एवं सञ्चिन्तयित्वा तु कृष्णः सत्यपराक्रमः। बाहोर्वेगं दर्शयिष्यन् समीपे तं महीधरम्। दोर्भ्यांसत्पाटयामास कृष्णो गिरिरिवापरः। स धृतः सङ्गतो मेघैर्गिरिः सव्येन पाणिना। स्टङ्भावङ्कृतत्राण स्टङ्काकारेण वर्ष्मणा"। "धृतं गोवर्द्धनं दृष्ट्वा परित्राताश्च गोकुलम्। कृष्णस्य दर्शनं शक्रो रोचयामास विस्मितः" हरि० ७६ अ०।

गोवर्द्धनधारिन् पुं० गोवर्द्धनं नगं धारयति धारि-णिनि। नन्दनन्दने श्रीकृष्णे। [ वन्ध्यायां गवि।

गोवन्ध्या स्त्री वन्ध्या गौः जाता समासे परनि०।

गोवाट पुं० ६त०। गोशालायां गोष्ठे "सार्मलहारगोवाटं मध्ये गोस्थानसङ्कुलम्" हरिव० ६१। "गोवाटेषु च ये दत्ताः परिदत्तार्मलेषु च। सर्व्वे गोष्ठाग्निषु गताः चयमक्षयवर्चसः हरिव० ६५ अ०।

गोवास पुं० वस आधारे घञ्। ६त०। गवां वासस्थाने गोष्ठे "निवेशनमथा जग्मुर्जरासन्धस्य धीमतः। गोवासमिव दीप्तास्यः सिंहा हैमवता यथा" भा० स० २० अ०।

गोवासदासन पुं० प्राच्ये देशभेदे तत्र भवः "एङ् प्राचां देशे" पा० एङादेर्ढञ्संज्ञत्वात् ढ। गोवासदासनीय तत्र भवे त्रि० तद्राजे पुं० "गोवासदासनीयानां वशातीनाञ्च भारत!। प्राच्यानां वाटधानानां भोजानाञ्चाभिमानिनाम्" भा० व० २३ अ०।

गोवासन पुं० गां वासयति यस-णिच्-ल्यु ६त०। गवां वासयितरि ब्राह्मणभेदे। "गोवासना ब्राह्मणाश्च दासनीवाश्च सर्व्वतः। प्रीयन्तां ते महाराज। धर्म्मराजो महाबलः" भा० स० ५ अ०।

गोविकर्त्त पुं० गां विकृन्तति वि+कृत-अच् उप० स०। १गोघातके २कर्षके हालिके च। "रौद्रोयज्ञमानस्याचार्यगोविकर्त्तृसदृक्षेभ्यो गवेधुकाम्" काद्या० श्रौ० १५।३।१२। अवकृन्तां गां भूमिं विकृन्तति गोविकर्त्तः कर्षुकः गोहिंसको व्याधो वा। "अचार्यापस्य सदृक्षेभ्यो गोविकर्त्तस्य च गवेधुकां सचात्व" शत० ब्रा० ५।३।१।१०। "गोविकर्त्तः सूनयासहायभूतो गोहिंसको व्याधः" भा०।

गोविकर्त्तृ पुं० त्रि० गां विकृन्तति वि+कृत-अच् ६त०। पाकार्थं गोघातके। "आरालिको गोविकर्त्ता सूपकर्त्ता नियोधकः। आसं युधिष्ठिरस्याहम्" भा० वि० २अ०। "नियोधकः बाहुयुद्धकारी।

गोवितत पुं० गावो विततां यत्र। गोभूयिष्ठे अश्वमेधयज्ञे "वाजयामास तं क्रतुं विधिवद्भूरिदक्षिणम्। श्रीमान् गोवितत नाम वाजिमेधमवाप सः" भा० आ० ७४ अ०। गोवितोऽत्र। "गोवितेन शतानीकः" शत० ब्रा० १३।५।४।६। "आदाय सङ्गा दशमाश्वमेध शतानीको गोवितेन" शत० ब्रा० १३।५।४।२। "गोवितो नाम यज्ञमाणस्तोमविशेषोऽश्वमेधः" भा०। तत्स्तोमभेदाः। "चतुर्विंशा पवमानाः, त्रिवृदग्न्यावर्त्त चतुश्चत्वारिंशाः पवमाना एकविंशान्याज्यानि त्रिणवान्युक्थान्येकविंशानि पृष्ठानि षट्त्रिंशाः पवमानाश्चयस्त्रिंशमभ्यावर्त्तमग्निष्टोमसामादेकविंशान्युक्थान्येकविंशः षोडशी पञ्चदशी रात्रित्रिवृच्चन्त्रिः" ता० ब्रा० उक्ताः।

गोविदांपति पुं० गां वेदवाणीं विदन्ति गोविदः वेदज्ञास्तेषां पतिः ६त०। परमेश्वरे "यानरुद्रः सुरानन्दो गोविन्दो गोविदांपतिः" विष्णुस०।

**गोविन्द** पु० गां वेदमयीं वाचीं गां भुवं धेनुं स्वर्गं वा विन्दति "गवादिषु संज्ञायाम्" पा०अ, ६त०। विष्णौ वराहरूपेण भुव ऐश्वर्यं प्राप्तेः इन्द्रे च स्वर्गस्य निवेदनात् मत्स्यरूपेण वेदस्योद्धारत्वात् गोभिर्वेदान्तवाक्यैः विद्यते इति वा तस्य तथात्वम् "गोभिरेव यतो वेद्यो गोविन्दः समुदाहृतः" विष्णु सहस्र० भाष्यधृतवाक्यम्" "नष्टां तु धरणीं पूर्व्वमविन्दत् यत् सुरागताम्। गोविन्द इति तेनाहं वेदवाणीभिरिड्यतः" भा०शा०३४४अ०। "गौरेषा भवतो वाणी ताञ्च वेदयते भवान्। गोविन्दस्तु ततोदेवमुनिभिः कथ्यते भवान्।" तद्भाष्यधृतहरिवंशवाक्यम्। "अहं किलेन्द्रो देवानां त्वं गवामिन्द्रतां गतः। गोविन्द इति लोकास्त्वां स्तोष्यन्ति भुवि शाश्वतम्" हरिव०७६ अ०। गोभिश्च गोविन्दस्याभिषेककथा हरिव० ७६ अ० यथा "ततः शक्रस्तु तान् दृष्ट्वा घटान् दिव्यपयोधरान्। अभिषेकेण गोविन्दं योजयामास योगवित्। इद्राभिषेच्यमानं च गावस्तम् सहयूथपैः। स्तनैः प्रस्रवसंयुक्तैः सिषिचुः क्षणमव्ययम्।" अभिषिक्तं तु तं गोभिः शक्रो गोविन्दमव्ययम्" इति च।

**गोविन्दद्वादशी** स्त्री गोविन्दप्रिया द्वादशी। फाल्गुन शुक्लद्वादश्याम् तत्स्वरूपविधानादि ब्रह्म पु० यथा "फाल्गुनामलपक्षे तु पुष्यर्क्षे द्वादशी यदि। गोविन्द द्वादशी नाम महापातकनाशिनी। तस्यामुपोष्य विधिवन्नरः संचीर्णकल्मषः। प्राप्नोत्यनुत्तमां सिद्धिं पुनरावृत्तिदुर्लभामिति"। "आमर्दकी द्वादशीति लोके ख्यातेयमेव हि। यत्र आमर्दकीपूजा व्रतमस्यां विशेषतः"। तदुक्तं ब्राह्मे पापनाशिनीमाहात्म्ये प्रसङ्गे "फाल्गुने तु विशेषेण विशेषः कथितो नृप! आमर्दकाव्रतं पुण्यं विष्णुलोकप्रदं नृणाम्"। प्रभास खण्डे च देवीमहेश संवादे "फाल्गुनस्य सिते पक्षे एकादश्यामुपोषितः। स्नात्वा नद्यां तडागे वा वाप्यां कूपे स्थितेऽपि वा। गत्वा गिरौ वने वापि यत्र वा प्राप्यते शिवा। क्षीरोदे मथ्यमाने तु यदा हृद्यः समुत्थितः। आमर्दकैव दैत्यानां तेन साऽऽमर्दकी स्मृता। शिवा लक्ष्मीः स्मृतो हृद्यः सेव्यते सुरसत्तमैः। देवैर्ब्रह्मादिभिः सैव्यो विष्णुः स्मृतः। तत्र मत्वा हरिः पूज्यो हृद्यमूलेऽथ वा शिवा। पूजया पुष्पैः शुभैरात्रौ कार्य्यं जागरणं हरेः। करकं जलपूर्णन्तु कर्त्तव्यं पात्रसंयुतम्। हविष्यान्नन्तु कर्त्तव्यं दीपः कार्य्यो विधानतः। एवं जागरणं कार्य्यं कथाश्रवणतत्परैः। मुच्यन्ते देहिनः पापैः कल्पितैः कायसम्भवैः। देहान्ते च नराः सर्वे पूज्यन्ते हरिमन्दिरे"।

**गोविष** स्त्री ६त०। गोमये अमरः।

**गोविषाण** न० ६त०। गोः शृङ्गे (सिग्) "व्यनर्थकं मनायुष्यं गोविषाणस्य भक्षणम्। दन्ताश्च परिहृष्यन्ते रसश्च न च लभ्यते" भा० शा० १४० अ०। "नैपालं वा गोविषाणोद्भवं वा" सुश्रुतः। गोविषाणं साधनतयाऽस्त्यस्य ठन्। गोविषाणिक गोविषाणनिर्मिते वाद्यभेदे पु०। "षट्शतान् भर्भरांश्चैव शतकांश्च गोविषाणिकान्" भा० शल्य० ४७ अ०।

**गोविष्ठा** स्त्री ६त०। गोमये राजनि०।

**गोवीथि** स्त्री गगनस्थे नक्षत्रभेदसमूहरूपे मार्गभेदे। "नागगजैरावतहयभगोजरङ्गवृषगाजदहनाख्याः। अश्विन्याद्याः कैश्चित्त्रिभाः क्रमादीरिताः कथिताः"। "पैतामहात् त्रिभात्सिसो गोवीथ्याभिख्यः पौष्णं हे चापि भद्रपदे" बृ०स० ९अ०।

**गोवीर्य्य** न० ६त०। गवां वीर्य्ये "भूतावनिचितायां तु दशमं भागमाप्नुयुः। लाभगोवीर्य्यशस्यानां वाणिग् गोपक्षणीवलाः" नारद स०।

**गोवृन्द** न० ६त०। गोसमूहे हला०।

**गोवृन्दारक** न० गौर्वृन्दारकमिव उपमितसमासे व्याघ्रादेराकृतिगणत्वेन सिद्धेऽपि "वृन्दारकनागकुञ्जरैः पूज्यमानम्" पा० सामान्यप्रयोगेऽपि अस्य समासार्थं पुनर्ग्रहणमिति सि० कौ०। श्रेष्ठे गवि।

**गोवृष** पु० गवि वर्षति रेतः वृष—क। श्रेष्ठे वृषे। "मणिः स्वल इव प्रोतो नक्षोत इव गोवृषः" भा० व० ३०अ०। "गोवृषं वत्सकं वापि यथेच्छं विनिवेदयेत्" आन्त० भविष्यपु०। गोवृषं श्रेष्ठवृषम्" रत्नाकरः। "भगवान् गोवृषध्वजः" भा०अनु०८४अ०। "याम्यानां गोवृषस्यासि भवां लोकप्रपूजितः" भा० आनु० १४अ०। "वृषाणामथ शार्दूलं गोवृषन्तु गवामपि" हरिवंशे०४अ०। गौश्च वृषश्च तौ साहचर्य्यान्नाम्यत्व अच्। सामान्यविशेषद्योतके गोवलीवर्दन्यायेऽप्यत्र

**गोव्याघ्र** न० गौश्च व्याघ्रश्च सदाविरोधित्वात् समाहा०द्व०। गोव्याघ्रसमाहारे।

**गोव्याधिन** पु०गोत्रप्रवर्त्तके ऋषिभेदे प्रवराध्याये मूलं दृश्यम्

**गोव्रज** पु० ६त०। गोसमूहे। गावोव्रजन्त्यत्र व्रज—आधारे

क। २गोगतिस्थाने २गोष्ठे च पु० "न मूत्रं पथि कुर्वीत न भस्मनि न गोव्रजे" "नाधीयीत श्मशानान्ते ग्रामान्ते गोव्रजेऽपि वा"। "क्षतवाप्नो निवसेद् ग्रामान्ते गोव्रजेऽपि वा" मनुः।

**गोव्रत** न० गोहत्यानिमित्तं गोषु व्रतम्। १गोहत्यानिमित्ते गोषु व्रतभेदे तच्च व्रतं विष्णुनोक्तं यथा।

"मासमेकं क्षतवापनो गवानुगमनं कुर्यात् आसीनास्वासीत स्थितासु स्थितः स्यात् अवसन्नासूदरेत् भवेभ्यश्च रक्षेत् तासां शीतादिबाधमक्षत्वा नात्मनः कुर्यात् गोमूत्रेण स्नायात् गौरसेन वर्त्तेत एतद् गोव्रतं गोवधे कुर्यात्" पराशरस्तु सापवादं तत्र विशेषमाह "गवां संरक्षणार्थाय न दुष्येद्गोवधव्रजेः। तद्बन्धनं न तं विद्यात् कामाकामकृतन्तथा। अङ्गुष्ठमात्रस्थूलोवा बाहुमात्रः प्रमाणतः। आर्द्रेषु सफलाश्च दण्डरत्यभिधीयते। दण्डादूर्द्धं यदन्येन प्रहरेद्वा निपातयेत्। प्रायश्चित्तं चरेत् प्रोक्तं द्विगुणं गोव्रतञ्चरेत्। रोधबन्धनयोक्त्राणि घातनञ्च चतुर्विधम्। एकपादञ्चरेद्रोधे द्विपादं बन्धने चरेत्। गोक्त्रेषु पादहीनं स्याच्चरेत् सर्वं निपातने। गोचारे च सस्थे वापि दुर्गेष्वपि समेष्वपि। नदीष्वपि समुद्रेषु खातेष्वथ च दरीमुखे। दग्धदेशे स्थिताः गावस्तन्मनाद्रोध उच्यते। गोक्त्रदामकडोरैश्च वराटाभरणभूषणैः। सस्थे वापि वने वापि वद्धा स्याद्गौर्हता यदि। तदेव बन्धनं विद्यात् कामाकामकृतञ्च तत्। सङ्खेटे शकटे पङ्क्तौ भारे वा पीडितानरैः। गोपतिर्मुच्यमाप्नोति गोक्त्रो भवति तद्वधः। मत्तः प्रमत्तउन्मत्तश्चेतनोवाप्यचेतनः। कामाकामकृतक्रोधाद्दण्डैर्हन्यादधोमलैः। प्रहृता वा मृता वापि तद्धि हेतुर्निपातने। मूर्च्छितः पतितोवापि दग्धेनाभिहतः स तु। उत्थितस्तु यदा गच्छेत् पञ्चसप्तदशैव वा (पदानि)। यासं वा यदि गृह्णीयात्तोयं वापि पिबेद् यदि। पूर्वव्याध्युपसृष्टश्चेत् प्रायश्चित्तं न विद्यते। पिण्डस्थे पादमेकन्तु द्वौ पादौ गर्भसंस्थिते। पादोनं व्रतमुद्दिष्टं कृत्वा गर्भमचेतनम्। पादेऽङ्गरोमवपनं द्विपादे श्मश्रुमुण्डोऽपि च। त्रिपादे तु शिखावर्जं सशिखन्तु निपातने। पादे वस्त्रयुगञ्चैव द्विपादे कांस्यभाजनम्। पादोने गोद्वयं दद्यात्तुर्यं गोद्वयं स्वयम्। निष्पन्नसर्वगात्रन्तु दृश्यते वा सचेतनम्। अङ्गप्रत्यङ्गसम्भङ्गे द्विगुणं गोव्रतं चरेत्। पाषाणेनैव दण्डेन गावोयेनाभिघातिताः। अङ्गभङ्गे चरेत् पादं द्वौ पादौ तैन पातने। लाङ्गूले छत्रपादन्तु द्वौ पादावस्थिभङ्गने। त्रिपादञ्चैव कर्णं तु चरेत् सर्वं निपातने। श्रृङ्गभङ्गेऽस्थिभङ्गे च कटिभङ्गे तथैव च। यदि जीवति षण्मासान् प्रायश्चित्तं न विद्यते। व्रणभङ्गे च कर्त्तव्यः स्नेहाभ्यङ्गस्तु पाणिना। यवसक्षापहर्त्तव्योयावद्दुर्बलोभवेत्। यावत्सम्पूर्णसर्वाङ्गस्तावत्तं पोषयेद्गुरुः। गामेवं ब्राह्मणस्याप्ये नमस्कृत्य विसर्जयेत्। यदासम्पूर्णसर्वाङ्गोहीनदेहोभवेत्तदा। गोघातकस्य तस्यार्द्धं प्रायश्चित्तं विनिर्दिशेत्। काष्ठलोष्टकपाषाणैः शस्त्रेणोपकृतो बलात्। व्यापादयति यो गान्तु तस्य शुद्धिं विनिर्दिशेत्। चरेत् सान्तपनं काष्ठे, प्राजापत्यन्तु लोष्टके। तप्तकृच्छ्रन्तु पाषाणे शस्त्रे चैवातिकृच्छ्रकम्। पञ्च सान्तपने गावः प्राजापत्ये तथा त्रयः। तप्तकृच्छ्रे भवन्त्यष्टावतिकृच्छ्रे त्रयोदश। प्रमापणे प्राणभृतां दद्यात्तत्प्रतिरूपकम्। तस्यानुरूपं मूल्यं वा दद्यादित्यब्रवीन्मनुः। अन्यत्राङ्कनलक्ष्मभ्यां वाहने दाहने तथा। सायं संयमनार्थन्तु न दुष्येद्गोवधव्रजेः। अतिदाहेऽतिवाहे च नासिकाभेदने तथा। नदीपर्वतसञ्चारे प्रायश्चित्तं विनिर्दिशेत्। अतिदाहे चरेत् पादं द्वौ पादौ वाहने चरेत्। नासिके पादहीनन्तु चरेत् सर्वं निपातने। दहनाच्च विपद्येत अवरोधेवापि यन्त्रितः। उक्तं पराशरेणैव श्लोकपादं यथाविधि। रोधबन्धनयोक्त्राच्च भारः प्रहरणं तथा। दुर्गप्रतरयोक्त्राच्च निमित्तानि वधस्य षट्। बन्धपाशसुप्राङ्गोच्यिते यदि गोपशुः। भवने तस्य नाशस्य पापे क्रच्छ्रार्द्धमर्हति। न नारिकेलैर्नैच शाणवालैर्नैचापि मौञ्जैर्नैच वल्लत्वङ्मयैः। एतैस्तु गावोन निबन्धनीवाबद्धा तु तिष्ठेत् परशुं स्पृष्ट्वोत्था। कृशैः काशैश्च बभ्रीयाद्दोषशुं दक्षिणासुखम्। पाशसम्माग्निदग्धेषु प्रायश्चित्तं न विद्यते। यदि तत्र भवेत् मृत्युः प्रायश्चित्तं कथं भवेत्? अपित्वा पावनीं देवीं सच्यते तत्र किल्बिषात्। प्रेरयन् कूपवापीषु दुष्कृच्छ्रेषु पातयन्। गवाश्नेषु विक्रीणंस्ततः प्राप्नोति गोवधम्। आराधितस्तु यः कश्चिद्विप्रकोपादथा भवेत्। श्रवणं हृदयं भिन्नं मर्म्मोवा कूपमङ्गदे। कूपादुत्क्रमणे चैव मर्म्मोवा शीर्षपादयोः। स एवं म्रियते, तत्र त्रीन् पादांस्तु समाचरेत्। कूपस्थाने तटीबन्धे नदीबन्धे प्रपासु च। पानीयेषु विषन्नानां प्राय-

चित्तं न विद्यते। कूपखाते तटीखाते दीर्घखाते तथैव च। अन्येषु धर्मखातेषु प्रायश्चित्तं न विद्यते। वेश्मद्वार निवासेषु योनरः खातमिच्छति। स्वकार्य्यं स्वकृखातेषु प्रायश्चित्तं विनिर्दिशेत्। निशि वन्यनिरुद्धेषु सर्पव्याघ्र-कृतेषु च। अग्निविद्युद्विषघ्नानां प्रायश्चित्तं न विद्यते। यामघाते शरौघेण वेश्मबन्धनिपातने। अतिदृष्टिकृतानाञ्च प्रायश्चित्तं न विद्यते। संग्रामे प्रकृतानाञ्च ये दग्धा वेश्मकेषु च। दावाग्नौ यामघाते वा प्रायश्चित्तं न विद्यते। यन्त्रिता गौचिकित्सार्थं मूढगर्भविमोचने। यत्ने कृते विपद्येत प्रायश्चित्तं न विद्यते। व्यापन्नानां बन्धनाच्च बन्धने रोधनेऽपि वा। भिषग्मिथ्योपचारे च प्रायश्चित्तं विनिर्दिशेत्। गोदुष्टानां विपत्तौ च यावन्तः प्रेक्षकाजनाः। न वारयन्ति तां तेषां सर्वेषां पातकं भवेत्। एकोहतोयैर्बहुभिः समस्तैर्न ज्ञायते कस्य हतोऽभिघातात्। दिव्येन तेषामुपलभ्य हन्ता निर्वर्त्तनीयोन्दपसन्नियुक्तैः। एका चेद्बहुभिः कापि दैवाद्व्यापादिता भवेत्। पादं पादञ्च हत्वायाचरेयुस्ते पृथक् पृथक्। हतेषु रुधिरं दग्ध्वा व्याधिग्रस्तः क्रमोभवेत्। नाना भवति दुष्टेषु एवमन्येषणं भवेत्। मनुना चैवमेकेन सर्वशास्त्राणि जानता। प्रायश्चित्तन्तु तेनोक्तं गोषु चान्द्रायणं चरेत्। केशानां रक्षणार्थाय द्विगुणं गोव्रतं चरेत्। द्विगुणे व्रतशब्दादिष्टे दक्षिणा द्विगुणा भवेत्। राजा वा राजपुत्रोवा ब्राह्मणोवा बहुश्रुतः। अकृत्वा वपनं तस्य प्रायश्चित्तं विनिर्दिशेत्। यस्य न द्विगुणं दानं केशेषु परिरक्षितः। तत्पापं तस्य तिष्ठेत वक्ता च नरकं व्रजेत्। यत्किञ्चित् क्रियते पापं सर्वं केशेषु तिष्ठति। सर्वान् केशान् समुद्धृत्य छेदयेदङ्गुलित्रयम्। एवं नारीकुमारीणां शिरसोमुण्डनं स्मृतम्। न स्त्रियाः केशवपनं न दूरे शयनासनम्। न च गोष्ठे वसेद्रात्रौ न दिवा गामनुव्रजेत्। नदीषु सङ्गमे चैव अरण्येषु विशेषतः। न स्त्रीणामजिनं वा सोव्रतमेवं समाचरेत्। विप्रस्त्री स्नानमित्युक्तं सुराणामर्चनं तथा। बन्धुमध्ये व्रतं तासां कृच्छ्रचान्द्रायणादिकम्। मुण्डेषु नियतं तिष्ठ च्चिनियममाचरेत्। इह लोकावधं कृत्वा प्रख्यादयितुमिच्छति। स याति नरकं घोरं कालसूत्रमसंशयम्। विप्रकोनरकात्तस्मान्मर्त्तलोके प्रजायते। क्लीबोदुःखी च कुष्ठी च सप्त जन्मानि वै नरः। तस्मात् प्रकाशयेत् पापं स्वधर्मं सततं चरेत्। स्त्रीबालमूढगोविप्रेक्षतिकोपं विवर्जयेत्"। अधिकं गोहत्याशब्दे दृश्यम्। गोक्षितं व्रतम्। २गोसेवारूपे व्रते गोशब्दे तत्परिचर्य्याप्रकरणे उदा०तत्प्रकारश्च तत्र दृश्यः।

**गोशकृत्** न० ६त०। गोमये जटा०। "एतकृच्छ्रं हुमनसो गोशकृन्मृत्तिकाः कुशान्। पयोघृतं वाऽऽमरणाद्गोमतङ्ग-समेव वा" मनुः।

**गोशर्य्य** त्रि० गृ–कर्त्तरि वा० यत् गौः शर्य्या शीर्षा यस्य। शीर्षगौ शर्यौ" "याभिर्गौशर्य्यमावतम्" ऋ० ८।८२०। "गोशर्य्याः शयुः" भा०।

**गोशाल(ला)** स्त्री न०। गवां शाला "विभाषा सेनेत्यादिना" वा ङीवता। गवां शालायाम्। तत्रजातः एकादित्वेन प्राग्वतीये इञ्संज्ञत्वाच्छ, अन्यत्र अण्, तस्य स्थाना-न्नगोशालेत्यादि पा० लुक्। गोशाल तत्र जाते त्रि०। स्त्रीत्वपक्षे तु न लुक्। गोशालीय गोशाल वा तत्र-जाते त्रि० इति भेदः।

**गोशीर्ष** पु० गोः शीर्षमिव शीर्षं यस्य। १ऋषभपर्व्वते तस्य गोशीर्षाकारशृङ्गत्वात् तथात्वम्। स आकरत्वेनास्त्यस्य अच्। २चन्दनभेदे। गोशीर्षादुत्पत्तिकथा रामा० कि० का०४३।स० २८।४०श्लो०। "तत्र देवमतिक्रम्य महान्ऋषभ संस्थितिः। सर्व्वरत्नमयः श्रीमान्ऋषभो नाम पर्व्वतः। गोशीर्षकं पद्मकं च हरिश्यामं च चन्दनम्। दिव्य-मुत्पद्यते तत्र तच्चैवाग्निसमप्रभम्"। तदाकारे ३वस्तु-भेदे च "अयोयुग्मैर्भिन्दिपालैर्गोशीर्षैर्लुखलैरपि" भा० द्रो० १७६ अ०। क्लीव०। ४गोसमूहे न०।

**गोशीर्षक** पु० गोः शीर्षमिव कायति कै–क। १द्रोणी पुष्पीवृक्षे रत्नमा० स्वार्थे क। २चन्दनभेदे गोशीर्ष-शब्दे उदा०।

**गोशृङ्ग** पु० गोः शृङ्गमिव शृङ्गमस्य। ऋषिभेदे "हिमवद्-वनमध्यस्थो गोशृङ्ग ऋषिसत्तमः" "गोशृङ्गस्य ऋषेस्तत्र दृश्यते तथाश्रमम्" स्क० पु० प्रभा० खं०। २दक्षिण-देशस्थे पर्व्वतभेदे च। "तथैव मलदेशोऽपि प्रययौ दक्षिणां दिशम्" इत्युपक्रमे "निषादभूमिं गोशृङ्गं पर्व्वतप्रवरं तथा। तरसैवाजयच्छ्रीमान्" भा० स० १०अ०। क्लीव०। ३गोविषाणे न०। तदाकारोऽस्यास्य अच्। ४वर्षवरक्षे पु० राजनि०।

**गोश्रुति** पु० व्याघ्रपदगोत्रापत्ये ऋषिभेदे "तद्वैतत् सत्य-कामोजाबालो गोश्रुतये वैयाघ्रपद्यायोवाच" छा० उ०।

**गोश्व** पु० द्वि० व०। इतरेत० द्व० परपदम् "गवाश्वप्रभृतीनि च" पा० "यद्गोश्वादीनि तथैव साधूनि स्युः" सि०

कौ०। पक्षे नैकवद्भावः न क्रीवता च। गवि अधे च। पक्षे एकवद्भावः अवङ् च। तत्रार्थे न०।

गोष(स)खि पु०गौः सखाऽस्य वेदे वा षत्वम्। १गोसखायके "स्तोता मे गोषखा स्यात्" ऋ० ८।१४।१। "यस्मिन्निन्द्रः सोमं पिबति गोसखायम्" ऋ० ५।३७।४। इत० अच् समा० न षत्वम्। २गोः सखावे

गोषड्गव न० गवां षट्कम् गो+षड्गवच्। गोषट्के एवं त्रागण्ड्रवादयस्त्रागादिषट्के न०।

गोषणि(सनि) त्रि० गां सनोति ददाति सन-दाने इन् सवनादिषु पाठात् न नित्यं षत्वम् किन्तु पूर्वपदात् वा षत्वम्। १गोदातरि "यस्ते अद्रिसनिर्मनोयोगोसनिरस्त्र" यजु० ८।१२। पक्षे षत्वम्। "गोषणिं धियमद्रिं वाजसातये" ऋ० ६।५३।१०।

गोषद् त्रि०गवि वाचि सीदन्ति सद-क्विप् पूर्वपदात् षत्वम्। स्वनडुहाङ्के। गोषदिति शब्दोऽध्यायेऽनुवाके वा गोषदा० वुन्। गोषदक गोषच्छब्दयुक्ते अध्याये अनुवाके च ए०। अच्। गोषद तत्रार्थे त्रि०।

गोषदादि पु० अध्यायानुवाकयोः "गोषदादिभ्यो वुन्" पा० मत्वर्थे वुनुप्रत्यय निमित्ते शब्दगणे। स च गणः पा०ग० सू० उक्तो यथा गोषद् इत्येत्या मातरिश्वन् देवस्त्वा देवीरापः अपान्नपात् सरस्वती देवीधियः रक्षोऽघ युङ्क्ष्व अच्छिन्न प्रभूत प्रहूर्त्त कृशानु गोषद"।

गोषन् त्रि० गां सनोति सन-क्विप् इत० "सनोतेरनः" पा० नान्तस्य नित्यषत्वनिषेधेऽपि पूर्वपदात् वा षत्वम्। गोदातरि "शंसामि गोषणो नपात्" ऋ० ४।३२।२२।

गोषा त्रि० गां सनोति सन-विट् डा। सनोतेरनः" पा० षत्वम्। गोदातरि "गोषा इन्द्रोऽश्वसामसि" त्रि० कौ० धृता श्रुतिः "इत्था यत्पाणौ सह्निनस्य शर्मन् दिविष्ठा पार्ये गोषतमाः" ऋ० ६।२३।५। अत्र "वरूथेत्यादि" पा० सू० गोषाशब्दस्य तमपि परे ह्रस्वः।

गोषा(सा)ति स्त्री सो-भावे-क्तिन् अतियूतीत्यादिना नि०, सन-भावे क्तिन् डा वा इत० षत्वम्। १गोलाभे २गोदाने च "गोषाता यस्य ते गिरः" ऋ० ८।८४।७। "गोषातौ गवां लाभे" भा० सप्तम्या डाच् एव सुत्तरत्व। गवां सातिर्यौऽस्य। ३लब्धगो लब्धपशुके त्रि० "यत्र गोषाता क्षयिन्तेषु खादिषु" ऋ० १०।१८।१। गोषातौ लब्धपशुके" भा०।

गोषादी स्त्री गां सादयति सद-णिच्-अण् उ० स० षत्वं गौरा० ङीष्। पक्षिभेदे। "गोषादी देवानां पत्नीभ्यः" यजु० २४।२४।

गोषेधा स्त्री गोरिव सेध उत्सेधोऽस्याः पूर्वपदात् षत्वम्। दुर्लक्षणायां स्त्रियाम्। "विश्वपदीं इषदतीं गोषेधां विधमासत" अथ० १।१८४। [ जुगोष्टे।

गोष्ट संघाते भ्वा० आत्म० अक० सेट्। गोष्टते अगोष्टिष्ट।

गोष्टोम पु० गोसंज्ञः स्तोमोऽत्र। उक्थसंस्थे बहुमन्त्रात्मके १स्तोमभेदे। २तदुपलक्षिते एकाहसाध्ये यागभेदे च "स एतान् स्तोमानपश्यत् ज्योतिर्गौरायुरितीमे वै लोका एते स्तोमा अयमेव ज्योतिरयमध्यर्धो गौरसावुत्तम आयुः" ता० ब्रा० ४।१।७।

"स पूर्वोक्तः प्रजापतिः एतान् स्तोमान् स्तोमशब्देन त्रिवृदादिस्तोमवन्त्यहानि लक्ष्यन्ते। तानि ज्योतिर्गौरायुरिति एतन्नामकान्यपश्यत्। तत्र ज्योतिरग्निष्टोमसंस्थः, गौरायुर्यत्रे उक्थसंस्थे० ज्योतिष्ट्र्यं स्तोमकृद्भिः। त्रिवृद्वर्हिष्यवमानं पञ्चदशान्याज्यानि पञ्चदशो माध्यन्दिनः पवमानः सप्तदशानि पृष्ठ्यानि सप्तदश आर्भव एकविंशोग्निष्टोमसामेति। अथ गोष्टोमस्त्र, पञ्चदशोवर्हिष्यवमानः त्रिवृदाज्यानि सप्तदशमाध्यन्दिनं सवनमेकविंशं तृतीयसवनम्। अथायुष्टोमस्त्र त्रिवृद्वर्हिष्यवमानं पञ्चदशान्याज्यानि सप्तदशमाध्यन्दिनं सवनमेकविंशं तृतीयसवनमिति। एते उक्ताः स्तोमा इमे लोका वै भूरादिकाः खलु, कः कतमोलोक इति बुभुत्सायामाह अयमेव लोकोज्योतिः, अयमध्यर्धोऽन्तरिक्षलोको वै असावुत्तमस्तृतीयः स्वर्लोक आयुः, स्तोमत्रयस्त्र लोकत्रयेण सह संख्यासाम्यात् तच्छब्दना एतैः त्रिभिः स्तोमैः साधनैस्त्रीन् लोकान् प्राजनयदिति श्रेयःप्रयैतान् विधत्ते" भा०।

"यदेते स्तोमा भवन्तीमानेव लोकान् प्रजनयन्त्येषु लोकेषु प्रतितिष्ठन्ति" ता० ब्रा० ८। "यदेषोऽतिरात्रो भवतीति वाक्यशेषदेतत्पर्वं व्याख्येयम्। अभिप्लवषडहस्योत्तरं त्रिरहं विधातुमाह" भा० "स एत त्रिरहं पुनः प्रायुङ्क्त तेन षड्हेन षट्क्रतून् प्राजनयत्" ता०ब्रा०६। "स प्रजापतिरेतं पूर्वोक्तं त्रिरहं पुनः प्रयुक्तवान्। गौरायुर्ज्योतिरिति क्रमोऽत्रावगन्तव्यः। तथा चापस्तम्बः "ज्योतिष्टोममग्निष्टोमं रथन्तरसामानङ्गासुक्थं बृहत्सामानमायुष्टोमसुक्थं रथन्तरसामानं ज्योतिष्टोमं बृहत्सामानमिति। तेन षड्हेन षट् क्रतून् वसन्ता-

दीन् प्राजनयत् स्तुतवान्। यथार्थवादानुगुण्याय पूर्व्वविच्छिन्नेन तत्प्रहेण संयुज्य इमसुत्तरं तत्प्रहं विधत्ते" भा०। "तदेष षडहो भवति ऋतूनेव प्रजनयन्ति ऋतुषु प्रतितिष्ठन्ति" ता० ब्रा० १०।

गोष्ठ न० गावस्तिष्ठन्त्यत्र घञर्थे क धत्वम्। गवां स्थाने अमरः। "गोष्ठेषु गोष्ठीलतमस्खलासनान्" माघः। गोष्ठी बहुजनाः कर्त्तृतयास्त्यस्य अच्। २गोष्ठीकर्त्तव्ये श्राद्धभेदे न० "पित्र्ये खदितमित्येव वाच्यं गोष्ठे तु सुस्तुतम्" मनुः "गोष्ठे गोष्ठीश्राद्धे "गोघ्नं शुक्लपक्षमष्टमम्" इति विष्णुमित्येव द्वादशविधश्राद्धगणनायां गोष्ठश्राद्धस्य विधानात्" कुल्लू०।

गोष्ठपति पु० ६त०। गोः स्थानाध्यक्षे अमरः।

गोष्ठस्थ पु० गोष्ठे स्था अचतुरेत्यादि अच् समा०। १गोष्ठस्थे मुनि तत्तुल्ये परहिंसके खण्डे स्थित्वा २परब्रह्मरि च त्रिका०। षष्ठीसमासे तु न अच् समा०। गोष्ठस्था इत्येव

गोष्ठागार न० ६त०। गोष्ठस्य सभाया बहुजनस्थानस्यागारम्। बहुजनागारे गृहे क्षीरा०।

गोष्ठाध्यक्ष पु० ६०। गोष्ठपतौ।

गोष्ठान न० गोः स्थानं वेदे पूर्वपदात् धत्वम्। १गवां स्थाने गोष्ठे। "व्रजं गच्छ गोष्ठानम्" यजु० १।२५। लोके तु गोस्थानमित्येव। "गोष्ठं गोस्थानकम्" अमरः।

गोष्ठा(ष्ठा)ष्टमी स्त्री "कार्त्तिके शुक्लपक्षे तु स्मृता गोष्ठा(ष्ठा)ष्टमी बुधैः। तद्दिने वासुदेवोऽभूत् गोपः पूर्वन्तु वत्सपः" इत्युक्तायामष्टम्याम् गोपाष्टमीशब्दे दृश्यम्।

गोष्ठि स्त्री गावो वाग्विशेषास्तिष्ठन्त्यत्र स्था-बा० कि ६त० धत्वम्। १गोष्ठीशब्दार्थे २परस्परसंलापे च। "आलस्यं मदमोहौ च चापलं गोष्ठिरेव च। स्तब्धता चाभिमानित्वं तथाऽत्यागित्वमेव च। एते वै सप्त दोषाः स्युः सदा विद्यार्थिनां मताः" भा० उ० ३९३ श्लो०।

गोष्ठी स्त्री गावोऽनेकावाचस्तिष्ठन्ति अत्र स्था-घञर्थे क। ६त० अम्बाम्बेति धत्वम्" गौरा० ङीष्। १सभायां परिषदि। "तत्र गोष्ठीषु रथ्यासु सिद्धव्रजितेषु च। भा० वि० ६। २परस्परालापे "गोष्ठीसुखमनुभवन्तिष्ठन्ति" हितो०। ३गोष्ठवर्गे च"। "विषं गोष्ठी दरिद्रस्य" चाणक्यः। ४समूहे गोष्ठशब्दे उदा०। सभायाम् अस्य पुंस्त्वमपि। "सहस्रशस्तान् पर्वतसन्निरोधान् गोष्ठान् इरीषां गिरिसेतुमालाः। भा० व० १७७ अ०।

गोष्ठीपति पु० ६त० १बहुगोष्ठवर्गपालके २सभापतौ च।

गोष्ठेच्ये ड़िन् पु० गोष्ठे स्थेडते क्विप-स्थे खिनि पात्वे सभि० नि०। प्रगल्भे। युक्तारोह्या० आद्युदात्तताच्च। एवं गोष्ठेगल्भ गोष्ठेपटु गोष्ठेपण्डितः गोष्ठेशूरः गोष्ठेविजित इत्येतेऽपि पात्वे समिता नि०। सभाप्रगल्भे सभाकुशले। पूर्ववत् आद्युदात्तताचैषाम्।

गोष्ठेशय पु० गोष्ठे गोस्थाने शेते शी-अच् अलुक् स०। गोव्रतार्थं गोष्ठशयनकारके। "पञ्चगव्यं पिबेत् गोघ्नो मासमासीत संयतः। गोष्ठेशयो गोऽनुगामी गोप्रदानेन शुध्यति" याज्ञ०।

गोष्ठ्य त्रि० गोष्ठे भवः यत्। १गोष्ठे भवे। २रुद्रभेदे पु०। "नमोव्रज्याय च गोष्ठ्याय च" यजु० १६।४४।

गोष्पद न० गोः पदम्, गावः पद्यते यस्मिन् देशे वा "गोष्पदं सेवितासेवितप्रमाणेषु" पा० सेवितादौ घुट्। गोः पदज्ञाते १गर्त्ते, २गोपदप्रमाणे च। ३गोभिः सेवितदेशे ४तदुपेविते वनादौ च। "बाहुभ्यां सागरं तीर्त्वा लङ्घितुं गोष्पदं क्षुधु" रामा०सु०६८स०। "भीमद्रोणार्ण्णवं तीर्त्वा कर्णपातालं (वडवानलं) समाश्रितम्। मा निमज्जस्व समगः शल्यमासाद्य गोष्पदम्" भा० श० ७अ०। ५प्रभासक्षेत्रस्थे तीर्थभेदे। तत्स्थानादि स्क०पु० प्रभा०"इयं सरस्वती पुण्या सर्वदैव हि विद्यते। पञ्चस्रोताः प्रभासे तु दुष्प्रापा त्रिदशैरपि। तस्या यत्पञ्चमं स्रोतो न्यङ्मुखाच्छटानि च। तस्य मध्ये स्थितं तीर्थं गोष्पदेति च विश्रुतम्" "यानिनां सङ्गिदं तीर्थमाद्या रुद्र गया स्मृता। तदाख्यं गोष्पदं नाम कलौ ख्यातं धरातले। यदा क्षीरोदमथनात् प्रसृता लोकमातरः। तदा देवि! समस्तास्तु ता गतास्तीर्थसन्निधौ। पदं तत्र निमग्नं च नन्दिन्याश्च शिलातले। शिलां खुराङ्कितां दृष्ट्वा जानुदेशाङ्कितां तथा "इक्षुपक्षमे देवानु प्रति नन्दिनीवाक्यम्। "इदं मम पदं देवाः! शिलासंस्थं विराजते। गगनाङ्कस्थभूमिस्थं चन्द्रबिम्बमिवापरम्। अद्य प्रभृति भो देवा! स्वर्लोके सचराचरे। गोष्पदं नाम विख्यातं लोके ख्यातिं गमिष्यति"।

गोस पु० गां जलं स्यति सो-क। १दोले २उष्णकाले ३विभाते मेदि०।

गोसङ्ग पु० गाः संचष्टे सम्+चक्ष-अच्। गोपे। अमरः। "गोसङ्ग आसं कुरुसङ्गवानाम्"। "तेषां गोसङ्ग आसं वै सन्निपातेति मां विदुः" इति च भा० वि० १०अ०।

**गोसत्र** पु० गोभिः कृतं सत्रम्। गवामयनाख्ये सत्रभेदे "गावो वा एतत् सत्रमासत" ता०ब्रा० ४,१,१, गवामयन शब्दे विवृतिः।

**गोसदृश** पुंस्त्री गोः सदृशः। गोतुल्ये गवये हेमा०। २जात्यादिना गोतुल्ये त्रि०। गोसदृशादेवोऽपि तत्रार्थे।

**गोसनि** पु० गां सनोति सन-इण् ह्रस्व० पूर्वपदात् वा षत्वे प्राप्ते सवना० न षत्वम्। गोदातरि गोषणिशब्दे उदा० दृश्यम्। "गोसनिं वाचमुदेयम्" ऋ०१।२०।१०।

**गोसम्प्रदाय** त्रि० गां सम्प्रददाति सम्+प्र+दा-"आतोऽनुपसर्गे" पा० अनुपसर्गदित्युक्तेः न कः किन्तु ष्यञ्। गोसंप्रदातरि।

**गोसम्भवा** स्त्री गोरिव सम्भवो लोमादिरूपाकारो यस्याः। १केतदूर्णायां राजनि०। २गोजाते त्रि०।

**गोसर्ग** पु० गवःसृज्यतेऽत्र काले सृज-घाधारे घञ्। गवां वनगमाय मोचन काले सूर्य्येण किरणानां त्यागकाले १प्रातःकाले "गोसर्गे चार्द्धरात्रे च तथा मध्यन्दिनेषु च" स्मृ०। [स्थाते गोधाख्ये जन्तौ।

**गोसर्प** पुंस्त्री गोरिव चतुश्चरणत्वात् सर्पः। (गोसाप)

**गोसव** पु० गौः सूयते हिंस्यतेऽत्र सू-हिंसायाम् आधारे अप् पूर्वपदात् वा न षत्वम्। गोसत्राख्ये यज्ञभेदे "खर्जिता गोसवेन वा" हेमा० दा० त्रिकाण्ड०। तत्कर्त्तव्यता च काल्या० श्रौ० १२,११,२ सूत्रादौ उक्ता यथा "अथमगोसवौ" १सू० "अथभोगोसवश्च क्रतू भवतः" कर्कः "पूर्वो राज्ञः" २सू० "पूर्वः अथमसंज्ञको राज्ञः" कर्कः "दक्षिणा अथमसङ्ख्यं द्वादशं वा शतम्" ५सू० "विकल्पेन अथमसंज्ञक अथभाणां सङ्ख्यं, द्वादशाधिकं शतं वा" (दक्षिणा) कर्कः। "उक्थ्यो गोसवोऽयुत दक्षिणः" ६सू०। गोसवसंज्ञः क्रतुरुक्थसंस्थो भवति अयुतदक्षिणश्च' कर्कः। "वैश्यस्तोम इत्येके" ७सू० मन्यन्ते। "सर्वेषामित्यपरे" ८सू०। सराजानो विशो यं पुरस्कुर्वीरन् स एतेन यजेत" ९सू०। "राज्ञा सहिता विशः प्रजाः सर्वे पुरुषा यं पुरस्कुर्वीरन् सख्यत्वेनाङ्गीकुर्वीरन् स गोसवेन यजेत"। "आस्थश्छिलेऽभिषिच्यते" १०सू०। "प्रतिदुराहवनीयस्य दक्षिणतः" १सू०। "स्थितः आगान्तुकत्वादन्ते। आहवनीयात् दक्षिणस्यां स्थण्डिले उपविष्टो यजमानः प्रतिदुराधारोक्तेन द्रुग्घेनाभिषिच्यते "संस्थपतिरित्येनं ब्रूयुः "गोसवयाजिन' जनाः" कर्कः। "वैश्यस्तोम दक्षिणाभिक्रो मरुत्स्तोमोगणयज्ञो भ्रातृणां सखीनां वा १२सू०। वैश्यस्तोमदक्षिणायां यानि लिङ्गानि तान्यत्रापि भवन्ति" कर्कः। गां स्वर्गं सुनोति अच् षत्वम् "दातुः स्वर्गदातरि" "तिलोऽपि सोमदैवत्यो गोप्रदो देवनिर्म्मितः" तिलदानमन्त्रः।

**गोशगस्** पु० गवि जले शगति शग-घा० असच् उत०। वोले रायमुकुटः।

**गोसहस्र** न० गवां सहस्रं दातव्यतया यत्र। तुलापुरुषादिदोऽयमहादानान्तर्गते पञ्चमे महादानभेदे "अथातः संप्रवक्ष्यामि महादानानुकीर्त्तनम्"। "यत्तत् षोडशधा प्रोक्तं वासुदेवेन भूतले" इति चोपक्रम्य "कल्पपादपदानञ्च गोसहस्रं च पञ्चमम्" इत्युक्त्वा तद्दानप्रकारः हेमा० दा० मत्स्य पु० उक्तो यथा

"मत्स्य उवाच। अथातः संप्रवक्ष्यामि महादानमनुत्तमम्। गोसहस्रप्रदानाख्यं सर्वपापहरं परम्। पुण्यं तिथिमथासाद्य युगमन्वन्तरादिकम्। पयोव्रतस्थिरात्रं स्यादेकरात्रमथापि वा। लोकेशावाहनं कुर्यात् तुलापुरुषदानवत्। पुण्याहवाचनं कुर्याद्धोमः कार्य्यस्तथैव च। ऋत्विग्भण्डपसंस्कारभूषणाच्छादनादिकम्। इदं लक्षण संयुक्तं वेदिमध्ये ऽधिवासयेत्। गोसहस्राद्विनिष्कृष्य गवां दशकमेव"। पयोव्रतस्थिरात्रमिति दानदिनात् पूर्वं त्रिरात्रं पयोव्रतः स्यादित्यर्थः, अवादिशब्देन देशकाल-ब्रह्मिश्राद्ध-शिवादिपूजा-युग्मब्राह्मणवरण-मधुपर्कदान-कृष्णवेदिवितान-चक्रलेखनपताकादीनि मत्स्यपुराणोक्ततुलापुरुषदाने विस्तृतानि स्मर्त्तव्यानि। इदं लक्षण संयुक्तं, इदंलक्षणानि, "उन्नतस्तम्बकुटम् उज्ज्वलायत कम्बलम्" इत्यादीनि इदोक्तप्रकरणे मत्स्यपुराणोक्तान्येव वेदितव्यानि, गोसहस्राद्विनिष्कृष्येति दशोत्तरगोसहस्रादिति वेदितव्यम्, अत्र दशाधिकगोसहस्रविनियोगदर्शनात्। यद्यपि गवां दशकमित्यत्र गोशब्दो नोतिः तथापि उत्तरत्र "ऋत्विग्भ्यो धेनुमेकैकां दशकाद्विनिवेदयेदिति" धेनुसंबन्धात्, पुराणान्तरे "गोसहस्राद्विनिष्कृष्य सवत्सं दशकं गवामिति" श्रवणाच्च धेनुदशकमेवाधिवासनीयम्। इतरत्र पुनर्गौरवस्य धेनुरूपत्वादरः। "गोसहस्रं वस्त्रैः कुर्याद्धेमस्रग्भिर्विभूषितम्। सुवर्णशृङ्गाभरणं रौप्यपादसमन्वितम्। ततः प्रवेश्य दशकं वस्त्रमाल्यैस्तु पूजयेत्। सुवर्ण-वस्त्रि कायुक्तं ताम्रदोहनिकान्वितम्। सुवर्णतिलकोपेतं हेमपट्टैरलङ्कृतम्। कौशेयवस्त्रसंवीतं माल्यगन्ध-

चमन्वितम्। हेमरत्नयुतैः शृङ्गैश्चामरैश्चापि शोभितम्। पादुकोपानच्छत्रभाजनासनसंयुतम्। "दशसौवर्णिके शृङ्गे, खराः, पञ्चपलास्तथा"। पञ्चाशत्पलमितोदोहनकः अन्यत्र तथाभिधानात् वशिष्ठादौ सुवर्णशब्दोऽत्र षोडशमाषपरिमितहिरण्यवचनः, सकृदुच्चरितसुवर्णशब्दावगतपरिमाणपरित्यागानुपपत्तेः। पादुके काष्ठमय्यौ, चर्मजते उपानहाविति भेदः। "गवां दशकमध्ये स्यात् काञ्चनो नन्दिकेश्वरः। कौशेयवस्त्रसंवीतो नानाभरणभूषितः। लवणद्रोणशिखरे-माल्येक्षुफलसंयुतः। कुर्यात् पलशतादूर्द्धं सर्वमेतदशेषतः। शक्तितः फलसाहस्रमितरं यावदेव तु। गोयते वै दशांशेन सर्वमेतत् प्रकल्पयेत्"। लवणद्रोणशिखरे, लवणद्रोणोपरीत्यर्थः। नन्दिकेश्वरलक्षणं ललितविजयात् "ऊर्द्धस्थितो द्विभुजः सौम्यास्योनन्दिकेश्वरः। वामे तु न्यूनभद्रे चाक्षमालासमन्वितः" इति ऊर्द्ध इति, अधयानानुपविष्ट इत्यर्थः। पलशतादूर्द्धं पलसहस्रमितरं यावदिति, साभरणनन्दिकेश्वरविषयमेतत् आनल्यात्। गोयते वै दशांशेनेति गोयते देवे सामेकामेकञ्च हयभं वेदिमध्येऽधिवासयेत्। पलशतादूर्द्धं पलशतत्रयं यावदिति साभरणनन्दिकेश्वररचनादिकं कुर्यादित्यर्थः। "पुण्यं कालमवाप्याद्य गीतिमङ्गलनिःस्वनैः। सर्वौषध्युदकस्नानस्नापितो वेदिपुङ्गवैः। इमसुद्धारयेन्मन्त्रं स्टचीतकुसुमाञ्जलिः"। अत्रापि पूर्ववत् पूर्वेद्युरधिवासनं विधाय द्वितीयदिवसे ब्राह्मणवाचनानन्तरमग्निकुण्डेषु ऋत्विगुपवेशनादिपूर्णाहुतिपर्य्यन्तं कर्मशेषं गुरुः समापयेत्। ततः पुण्यकालम् आत्मानुकूललग्नसङ्क्रान्तिलक्षणमासाद्य कृतसभीपस्थितकलशोदकेन ब्राह्मणैः स्नापितः शुक्लमाल्याम्बरधरो यजमानो वक्ष्यमाणमन्त्रानुदीरयेत्। "नमो वो विश्वमूर्त्तिभ्यो विश्वमात्रेभ्य एव च। लोकाधिवासिनीभ्यश्च रोहिणीभ्यो नमो नमः। गवामङ्गेषु तिष्ठन्ति भुवनान्येकविंशतिः। ब्रह्माद्यस्तथा देवा रोहिणयः पान्तु मातरः। गावो मे अग्रतः सन्तु गावो मे सन्तु पृष्ठतः। गावः शिरसि मे नित्यं गवां मध्ये वसाम्यहम्। यस्मात् त्वं हयरूपेण धर्म एव सनातनः। अष्टमूर्त्तेरधिष्ठानमतः पाहि सनातनः। इत्यामन्त्र्य च वो दद्याद्गुरवे नन्दिकेश्वरम्। सर्वोपकरणोपेतं गोयुगञ्च विचक्षणः। ऋत्विग्भ्यो धेनुमेकैकां दशकाद्विनिवेदयेत्। गवां च शतमर्द्धैकं तदर्द्धं चाथ विंशतिम्"। दश पञ्चाशद्वा दद्यादन्येभ्यश्चादनुज्ञया"। दानवाक्यमत्र तत्तत्पुरश्चरणहेतव्यम्, एते च शतप्रभृति पञ्चपर्य्यन्ता विकल्पा ऋत्विग्विभवाः तदानन्त्यात्, ततश्चायमर्थः सिद्धो भवति गोदशकमध्यान्नन्दिकेश्वरयुतं गोयुगं गुरवे प्रतिपाद्य शेषाणामष्टानाङ्गवामेकैकामेकैकञ्च ऋत्विजे दद्यात्, तथा गोसहस्रमध्यात् शतद्वयं गुरवे प्रदाय एकैकं शतमृत्विग्भ्यो दद्यात्, अथ वा शतं गुरवे पञ्चाशतं पञ्चशतमृत्विग्भ्यः, अथ वा चत्वारिंशतं गुरवे विंशतिं विंशतिमृत्विग्भ्यः। विंशतिं, वा गुरवे दश दशर्त्विग्भ्यः, दश वा गुरवे पञ्च पञ्चर्त्विग्भ्यो दद्यात् शेषा गास्तदनुज्ञया अन्येभ्योऽपि दद्यात्। दक्षिणाङ्गात् पूर्ववदेव दद्यात् अनुक्तदक्षिणासु सुवर्णं दक्षिणेति वचनात् यथाशक्ति सुवर्णं वा। ततः पूर्ववदेव पुण्याहवाचन-देवतापूजन-विसर्जनादि कुर्यात्। "नैका बहुभ्यो दातव्या यतो दोषकरी भवेत्। बहुभ्यश्चैकस्य दातव्या श्रीमतारोग्यवृद्धये। पयोव्रतः पुनश्चैवैकाहं गोसहस्रदः"। इदञ्च पयोव्रतानुष्ठानं, शक्त्यपेक्षम् "अशक्तौ नक्तमिष्यते" इति वचनात्। "आयुष्यं ह्यनुवाह्यापि महादानानुकीर्त्तनम्। तद्दिनं ब्रह्मचारी स्यादादीप्तेद्विपुलां श्रियम्"। आथर्वणगोपथब्राह्मणे "अथातो गोसहस्रविधिर्गौश्च उदकान्ते शुचौ देशे प्राङ्मिश्रमुपसमाधाय अन्वाहार्यञ्च जुहुयात्, आ गावस्तृप्तेभ्यो जुहुयात्, महाव्रीहीणामैन्द्रञ्चरुं सौम्यञ्च सहस्रं तस्याः पयसि श्रपयित्वा गाव इति, एवमुभय इत्येतेन जुहुयात् पश्चादग्नेः शीर्षोदकपूर्णकलशमवस्थाप्याज्यसंयोगोष्टेनेति दश गाः स्नापयेत् स्वरमाणोऽन्याः समभ्युक्ष्य सहस्रं, तस्याः स्नानोदकेनेममिन्द्रं वर्द्धय क्षत्रियं म इति, राजानमभिषिञ्चेमा आप इति, षड्भिर्यथोक्तमन्त्रैरभ्यञ्जनान्तमनुलेपनं कृत्वा सहस्रतमीं प्रथमामलंकृत्य गावो भगवतीस्तत्त्वायतीस्तत्त्वायसादिति च पर्य्यासयेत् प्रियमधनन्दत्त्वा द्विषन्मन्त्र इति सहस्रतमीमालभ्य जपेत् यया गायः पतिना सवत्सेति मन्त्रेणानेनार्घं दत्त्वा सहस्रतमीं पुनरुप संस्पृश्य भूमिष्ठा प्रतिष्ठन्त्यस्मिति जपेत् सहस्रं, तस्याः पृष्ठतो व्रजन् सर्वाः प्रदक्षिणीकृत्य नमस्कृत्य स्वस्ति वाच्य ब्राह्मणेभ्यो निवेद्य दश गा दक्षिणाः कर्त्रे सहस्रतमीं वस्त्रयुग्मञ्च तदपि। सप्तजन्मार्जितं पापं पुरुषैः सप्तभिः कृतम्। तत्क्षणात् विधिनानेन नाशयेद्योग्रदोनरः। सर्वेषामिह दानानां फलं यत् परिकीर्त्तितम्।

तद्वाप्नोति विप्रेभ्यो गोसहस्रप्रदोनरः। अश्वमेधं दशगुणं गोसहस्रवन्तु यः। दद्यान्नोत्तराय दत्त्वाऽऽहः पितरस्तर्पयन्ति हि। तस्मादनेन विधिना गोसहस्रन्तु दोनरः। प्रदद्यात् स विष्णुरात्मा याति तत् परमं पदमिति"। मत्स्यपुराणे "अनेन विधिना यस्तु गोसहस्रप्रदोभवेत्। सर्वपापविनिर्मुक्तः सिद्धचारणसेवितः। विमानेनार्कवर्णेन किङ्किणीजालमालिना। सर्वैर्यां लोकपालानां लोके संपूज्यते सुरैः। प्रतिमन्वन्तरं तिष्ठेद्राजराजो भवेत् पुनः। अश्वमेधशतं कुर्वाञ्छिवध्यानपरायणः। वैष्णवं लोकमास्थाय ततो मुच्येत बन्धनात्। पितरश्चाभिनन्दन्ति गोसहस्रप्रदं शुभम्। अपि स्मात्र कुलेऽस्माकं पुत्रोदौहित्र एव च। गोसहस्रप्रदो भूत्वा नरकादुद्धरिष्यति। स यस्तत्कर्मकरो वा स्यादपि दृष्टा तथैव च। संसारसागरादस्मादस्मान् समुद्धरिष्यति। इति पठति य एतद्गो-सहस्रप्रदानं शृणुयाच्चापि नरेन्द्रापि पश्येत्। अनुभवति सुखं वा वाच्यमानो निकामम् प्रहृतकलुषदेहः सोऽपि यातीन्द्रलोकम्"।

अन्यपुराणोक्तसद्विधिस्तत्रैव दृश्यः। इत०। २गवां सहस्रे च। गोसहस्रं तद्दानफलं विद्यतेऽत्र अच्। गौरा० ङीप्। ३सोमवारयुतायाम् ४मङ्गलवारयुतायां वा। अमाख्यायाम् स्त्री। जाह्नवीस्नाने तस्यास्तथाफलजनकत्वमुक्तं ति० त० व्यासेन "अमायाञ्चां भवेद्वारो यदि भूमिसुतस्य च। गोसहस्रफलं दद्यात् स्नानमात्रेण जाह्नवी। सिनीवाली कुहूर्वापि यदि सोमदिने भवेत्। गोसहस्रफलं दद्यात् स्नानं यन्नौनिना कृतम्"।

**गोसाद** त्रि० गां सादयति सद-णिच् अण् उप० स०। गोचालके गोसारथौ "गौः सदसादिसारथिषु" पा० पूर्वपदप्रकृतिस्वरः।

**गोसादिन्** त्रि० गां सादयति सद-णिच्-णिनि इत०। गोसारथौ। गोसादवत् पूर्वपदे प्रकृतिस्वरः।

**गोसारथि** पु० इत०। गोचालके सारथौ गोसादवत् पूर्वपदे प्रकृतिस्वरः।

**गोस्तन** पु०गोः स्तन इव गुच्छो यस्य। १चतुर्दष्टिकहारे अमरः। इत०। २गोःस्तने च "करीरपनसास्थि गोस्तनाकाराणि" "शुद्धं गोस्तनाकारं सर्वभूतगुणोद्भवम्" सुश्रु०।

**गोस्तना(नी)** स्त्री गोः स्तनइव फलमस्याः स्वाङ्गत्वात् वा ङीप्। १कपिलद्राक्षायामस्यर टाबन्तः गोः स्तनाइव स्तना अस्याः ङीप्। २कुमारानुचरमातृभेदे। "शृणु मातृगणान् राजन्! कुमारानुचरानिमान्" इत्युपक्रमे" प्रभावती विशालाक्षी पालिता गोस्तनी तथा" भा० श० ४७अ०।

**गोस्तोम** पु० गोनामकः स्तोमः पूर्वपदात् वा षत्वाभावः। एकाहसाध्ये अग्निष्टोमाङ्गे यज्ञभेदे। "गोस्तोमभूमिस्तोमवत्सप्तिसवानाम्" आश्व० श्रौ० ८।५।२। "गोस्तोमो भूमिस्तोमोवनस्पतिसव इति त्रयः एकाहाः कर्त्तव्याः" नारा० ह०। गोष्टोमशब्दे विवृतिः।

**गोस्थान** न० इत०। गोष्ठे अमरः "मध्ये गोस्थानसङ्कुलम्" हरिवं० ६१अ०। स्वार्थे क। तत्रार्थे।

**गोस्वामिन्** इत०। गवां स्वामिनि। "तावत् भूयो वा गोस्वामिने दत्त्वा" कात्या० श्रौ०। १५।६।१२। "गोस्वाम्यनुमते भृत्यः सा स्यात् पालेऽभृते भृतिः" मनुः। "प्राजापत्यं चरेत् कृच्छ्रं गोस्वामी व्रतमुत्तमम्" पराशरः। गवामिन्द्रियाणां स्वामी। २जितेन्द्रिये यतीनामुपाधिभेदे। देवदेवगोस्वामी रूपगोस्वामी।

**गोह** पु० गुह्यतेऽत्र गुह-घञ् वा० ऊत्वाभावः। गेहे "अद्रिर्मौशिजस्य गोहे" ऋ० ४,२१,६। "गुहा यदीमौशिजस्य गोहे" ७ "विदद् गौरस्य गवयस्य गोहे" ८ "गोहे स्टहे" भाष्यम्। तस्यादूरभवोदेशः सुधाला० अण्। गौह गेहादूरभवे त्रि० स्त्रियां ङीप्।

**गोहत्या** स्त्री इत०। गोहनने। प्रायश्चित्तयोगफलकव्यापारोहननम् यथाह वह्निपु० "स्यात् प्रायश्चित्तयोगफलकव्यापारोहननं स्मृतम्। रागात् द्वेषात् प्रमादाद्वा स्मृतः परत एव वा"। हत्यायां ज्ञानाज्ञानकृतत्वं च प्रा० त० व्यरूपि यथा

"अथ ज्ञानकृतादिनिरूपणम्। तत्र गोवधस्य बुद्धिपूर्वकत्वं तदा भवति, यदि गां ज्ञात्वा एतां हनिष्यामीति इच्छया हन्ति, तदा कामनाहारैव ज्ञानस्य प्रवृत्तिप्रयोजकत्वात्, तदभावे त्वबुद्धिपूर्वकत्वम्। अतएव प्रवृत्तिप्रयोजकज्ञानस्य कामनाव्यभिचाराभावादेव 'ऋत्विजस्तु चतुरः कुर्यात् गोवधे बुद्धिपूर्वके। अन्यथा च इयं कार्य्यम्, इति विश्वामित्रवचने ज्ञानाज्ञानाभ्यां वैविध्यसङ्गम् अन्यत्र कामाकामाभ्यामित्युक्तम् यथा हरिस्मृतिः "कामाकामकृतं त्वेवं सङ्कल्पाद्यं द्विधा मतम्। पुरुषामेक्षया चैव निष्कृतिर्द्विविधा स्मृता"। इत्यत्र गवयादिवधेण गोगोवधस्तत्र वधस्य न ज्ञानकृतत्वं गोत्वेनाज्ञानात्। गोत्वेन गां जानन्नप्यन्योहेयशक्तिप्रहारादिना यदि हन्ति

तदापि न ज्ञानजतत्वं तद्विषयकज्ञननेच्छाऽपहाराभावात्"। तत्र साक्षात् परम्पराजतव्यापारभेदः मिता० उक्तो यथा "साक्षात्कर्तृ निमित्तेनोक्त भेदस्तेनैव दर्शितः "पाषाणै-र्मुद्गरैर्वापि शस्त्रेणान्येन वा बलात्। निपातयन्ति ये-गास्तु जतत्वं कुर्वन्ति तेऽपि ते। तथैव वाष्फजङ्घांसपार्श्व-शीर्षादिमोटनैरिति"। एतद्ज्ञानजते। पाषाणमु-द्गरादिभिर्जङ्घादिमोटनादिना वा ये गां निपातयन्ति। ते साक्षाद्ज्ञानरूपेणैव जतत्वं प्रायश्चित्तम्। ये तु व्यव-हित रोधबन्धादिव्यापारयोगिनस्ते निमित्तेन रूपेण न जतत्वज्ञानसम्बन्धः किन्तु तदव्यवहितेन पादद्विपादा-दिभिरिति तत्तावरोधादीनां व्यवहितव्यापारत्वाविशे-षेऽपि वचनात् क्वचित्पादः क्वचिद्द्विपादः पादोनं क्वचिदिति" युक्तम्।

तस्याः शोधकं प्रायश्चित्तं स्वामिभेदाद्भिन्नं प्रा०त० उक्तं यथा तत्र ब्राह्मणस्वामिकस्य गोर्वधे मानवं प्रायश्चित्तं तच्च गोघ्नशब्दे दर्शितं तत्र सप्तदश धेनवः तन्मूल्यं वा। क्षत्रियस्वामिकस्य गोर्वधे देवलोक्तं तच्च तत्रैवोक्तं यथा "गोघ्नः षण्मासान् तच्चर्मणा परिवृतो गोप्यासाङ्कारो गोव्रती यवाग्वा गोभिरभिसञ्चरन् विमुच्यते"। गोप्यासा-ङ्कारो गोप्यासाङ्कर्ता "कर्मण्यण्" इति साधुः। षण्मास-यावकभक्षणं द्वादशप्राजापत्यतुल्यं दक्षिणा च विशेषानुप-देशाद् यथाशक्ति देयेति। एतज्ज्ञानादज्ञानात्तदर्द्धं स्त्रीशूद्रबालवृद्धानामर्द्धम् एकखोभयपरत्वे पादः। वैश्यसम्बन्धिनो गोर्वधे तु शातातपः "पञ्चगव्येन गोघातो मासिकेन विशुध्यति। गोमतीञ्च जपेद्विद्वां गवां गोष्ठे च संवसेत्"। पञ्चगव्यमाह शातातपः "गोमूत्रं द्विगुणं, सूत्रं सर्पिर्विद्यात्तुरगुणम्। क्षीर-मष्टगुणञ्चैव पञ्चगव्ये तथा दधि" तथाऽष्टगुणम्। यमः "आकृष्य प्रणवेनैव उत्थाप्य प्रणवेन च। प्रणवेन समा-लोड्य प्रणवेनैव तत्पिबेत्"। उत्थाप्य निष्पीड्य। "मन्त्राज्ञाने मिताक्षरायां षट्त्रिंशन्मतम् "जपहोमादि यत्किञ्चित् जक्ष्योक्तं सम्यवेद्य चेत्। सर्वं व्याहृतिभिः कुर्यात् गायत्र्या प्रणवेन च"। गवां गोत्व इति अव-याकृष्णत्ववत् नात्कालिकगोसत्त्वावबोधाय। गोमती जपसहितमेकपञ्चगव्यपानं प्राजापत्यपञ्चकतुल्यम्। एत-द्ज्ञानजते ज्ञानजते तु द्वैगुण्यम्। स्त्रीशूद्रबालवृद्धा-नामर्द्धम् एकखोभयधर्मपरत्वे पादः।

शूद्रसम्बन्धिनोगोर्वधे तु विश्वामित्रः "जङ्घांस्तु चतुरः कृच्छ्रान् गोवधे तु द्विपूर्वके। अमत्या च हयं कार्यं तदर्द्धं वाच्य-तरयोः। स्त्रीशूद्रयोरेवमेतद्वधे चैव न संशयः"। जङ्घा-न् प्राजापत्यानि। तच्चतुष्टयाशक्तौ चतस्रोधेनवः द्वादश कार्षापणा वा। एतज्ज्ञानजते अज्ञाने तदर्द्धं स्त्रीशूद्रबाल-वृद्धानामर्द्धम्। एकखोभयधर्मपरत्वे पादः। प्रा०त०रघु०। स्वामिजतविशेषस्तु प्रायश्चित्तविवेकानुसाराद्बुद्धः।

गर्भिण्यादौ तु विशेषमाह हरीतः "गर्भिणीं कपिलां दोग्ध्रीं क्षीरधेनुञ्च सुव्रताम्। रोधादिना घातयित्वा द्विगुणं गोव्रतञ्चरेत्"। गर्भिणीवधे तु विशेषमाह हरीतः "गवां निपतने चैव गर्भनाशोयदा भवेत्। एकैकत्र चरेत् कृच्छ्रं यथापूर्वं तथा परम्"। कृच्छ्रपदं व्रतपरम् द्विगुणं गोव्रतमित्येकवाक्यत्वात् "पादस्तु-पञ्चमासे तु द्वौ पादौ गालवस्मृते। पादोनं व्रतमाचष्टे कृत्वा गर्भमचेतनम्। अङ्गप्रत्यङ्गसम्पन्ने गर्भे चेतःसम-न्विते। द्विगुणं गोव्रतं कुर्यात् प्रायश्चित्तं विशुद्धये"। मध्यमवचनं भवदेवेन व्याख्यातम् यथा "यदि कशाघाता-घातेन गौर्जीवति गर्भमात्रपातो भवति तदोत्पन्नगर्भमात्र-पाते यथोक्तप्रायश्चित्तपादाचरणम्। गालवव्यवोत्पत्तौ प्रायश्चित्तपादद्वयं सकलगात्रसम्पत्तौ चैतन्याभावे प्रायश्चि-त्तपादत्रयम्। यथोक्तचैतन्ययुक्तगर्भघाते कृच्छ्रमेव प्रायश्चि-त्तमूहनीयम्"। मिताक्षरायान्तु गर्भोपीवधे यदा गर्भोऽपि निकृतोभवति तदा प्रतिनिमित्तं नैमित्तिकमावर्त्तत इति न्यायादविशेषेण द्विगुणव्रतप्राप्तौ षट्त्रिंशन्मते विशेषोक्तेः 'पादउत्पन्नमात्रे तु द्वौ पादौ हतौ गते। पादोनं व्रतमद्दिष्टं कृत्वा गर्भमचेतनम्। अङ्गप्रत्यङ्गसम्पन्ने गर्भे चेतःसमन्विते। द्विगुणं गोव्रतं कुर्यादेषा गोघ्नस्य निष्कृतिः"। दोग्ध्रीं बहुक्षीराम्। हरीतः "अतिवृद्धामतिजरामतिबालाञ्च रोगिणीम्। हत्वा पूर्व-विधानेन चरेदर्द्धं व्रतं द्विजः"। पूर्वविधानेन मन्वादुक्त-त्रैमासिकादिना अतिवृद्धा तृणच्छेदनासमर्था अतिजरा क्रमत्वेन दोहनवाहनायोग्या अतिबाला वर्षपर्य्यन्तं बाला तदतिक्रान्ता द्विवर्षीवा। तथा च हरदत्तकरः 'वर्षमात्रा तु बाला स्यादतिबाला द्विवार्षिकी। अतः-परन्तु सा गौः स्यात्तरुणी दन्तजन्मनि"। अतएव वक्ष्यते द्विपादस्तु द्विहायने' इति संवर्त्तः। 'व्यापन्नानां बहुनाञ्च बन्धने रोधनेऽपिवा। भिण्डिमध्योपचारे च द्विगुणं गोव्रतञ्चरेत्। एकप्रयत्ने निष्पन्ने बहूनां गवां वधे प्रायश्चित्तगौरवमुक्तं न तु तन्मता पापभेदाभावात्

एकप्रयत्नजन्यत्वेनैकमेव गुरुतरं पापमिति प्रायश्चित्तमपि तथा। बहूनामित्येकाधिकपरम्। तद्विवक्षायामपि गोघवधे प्रयत्नभेदेऽपि विशेषवचनाभावात् प्रायश्चित्तद्वैगुण्यं युक्तम्। अपिशब्दात् स्टहदाहादिना। क्रमशस्ते तु प्रायश्चित्ताशक्तिः। यथोपपातकानुद्दिष्टौ यमः "गोघ्नश्चद्विक्षितः कल्पचान्द्रायणमथापि वा। अभ्यासे तु तयोर्भूयस्तः शुद्धिमवाप्नुयात्"। तयोर्गोवधतदन्योपपातकयोः। संवर्तोपलम्भौ "एका चेद्वृद्धिभिः क्वापि दैवाद्व्यापादिता भवेत्। पादं पादञ्च कृत्वायाचरेयुस्ते पृथक् पृथक्"। कृत्वाया यत्र यद्विहितं व्रतं तत्र तस्यैव पादं प्रत्येकं कुर्युः। एकेत्युपलक्षणम्। अतोबहुभिर्हतयोर्बहूनाञ्च हनने प्रतिपुरुषं पादद्वयं त्रयं वा कल्पनीयमिति मिताक्षरा। वस्तुतस्तु एकाधिकानामेकैकपुरुषस्यैकप्रयत्नजन्यवधे "व्यापन्नानां बहूनामिति" पूर्वोक्तवचनात् एकैकपुरुषस्य द्विपादं प्रायश्चित्तम् प्रयत्नभेदे तु गोघ्नवदित्यनेन तन्त्रतायां अभावात् प्रत्येकं प्रतिपुरुषं द्विपादाद्यक्तिरिति। एतच्चाकामतोवधे द्रष्टव्यम् दैवादिति विशेषोपादानात् कामकृते तु बहूनामपि प्रत्येकं कृत्स्नदोषसम्बन्धात् पूर्णप्रायश्चित्तं युक्तं सन्निपात्य फलमिव प्रतिपुरुषं कृत्स्नव्यापारसमवायात्। "एकं घ्नतां बहूनाञ्च यथोक्तान्द्विगुणोदमः" इति प्रत्येकं दण्डद्वैगुण्यदर्शनाच्चेति मिताक्षरा। वस्तुतस्तु सर्वत्र पापे "स्यात्त्वकामकृते यत्तु द्विगुणं बुद्धिपूर्वके" इत्यक्षिरोचनेनाप्यानात् ज्ञाने द्वैगुण्यप्रदर्शनादत्रापि ज्ञाने द्विपादएव युक्तः। सत्ये तु "सप्तदशावराञ्छुद्धिकामाः सत्त्वमपासीरन्निति" श्रवणात्तथेति। एकं घ्नतामिति परवचनन्तु गोवधातिरिक्तविषयम् गोवधे एका चेदित्युपदेशेन दण्डवत् प्रायश्चित्तानि भवन्तीत्यतिदेशानवसरात्। तदवसरत्वं प्रत्येकं पूर्णप्रायश्चित्तद्वैगुण्यं स्यात् न पूर्णप्रायश्चित्तमात्रम् अतएव प्रायश्चित्तविवेके "एकं घ्नतां बहूनामिति" मनुवचने उक्तम्। बहुभिरित्युपादानात् द्वाभ्यां हनने तु प्रत्येकं सम्पूर्णप्रायश्चित्तम्।

अथैकहायनादिगोवधप्रायश्चित्तम् हरिप्रेताः "एकवर्षं गवि हते कृच्छ्रपादो विधीयते। अबुद्धिपूर्वे पुंसः स्यात् द्विपादस्तु द्विहायने। त्रिहायणे त्रिपादः स्यात् प्राजापत्यमतःपरम्"। इदमपि प्रायश्चित्तलाघवेन अबुद्धिपूर्वकाधमशूद्रस्वामिकवधविषयमिति प्रायश्चित्तविवेकः। तेन यत् स्वामिकवधे यत् प्रायश्चित्तं तस्यैव तत् पादादिक्रमूहनीयमतएवातिवाजामित्यत्र तथैवोक्तम्। अतःपरं चतुर्हायणे एकर्षभः। बुद्धिपूर्वे एतदेव द्विगुणमित्यर्थः" प्रा० त० रघुः।

अपालननिमित्तगोवधप्रायश्चित्तम् प्रा० त० उक्तं यथा पराशरः "गोतानिलहता चैव उल्बनस्थतापि वा। शून्यागाराद्युपेक्षायां प्राजापत्यं विनिर्दिशेत्। अपालनात् प्रणष्येत्तु गौश्चरन्ती कथञ्चन। जलौघपल्वले मग्ना नागविद्युद्धतापि वा। श्वभ्रे वा पतिताऽकस्मात् श्वापदैर्वापि भक्षिता। प्राजापत्यं चरेत् कृच्छ्रं गोस्वामी व्रतकुत्तमम्। सशिखं वपनं कार्यं त्रिमध्यमवगाहनम्। शृङ्गैर्वापि खुरैर्युक्तं लाङ्गूलश्रवणादिभिः। आर्द्रमेव हि तद्वर्म परिधाय स गां व्रजेत्। गोष्ठां मध्ये वसेद्रात्रौ दिवा तासिः समं व्रजेत्। ब्राह्मणस्य विशेषेण तथा राजन्यवैश्ययोः। प्रायश्चित्ते ततश्चैव कुर्याद्ब्राह्मणभोजनम्। अनड्वत्सहितां गाञ्च दद्याद्विप्राय दक्षिणाम्"। अत्र गोस्वामीत्यभिधानात् उत्सृष्टवृषभवत्सतरीषु स्वत्वाभावादपालननिमित्तकवधे तदुत्सृष्टदोषोनास्तीति प्रतीयते। तत्स्वत्वाभावेनान्येषां स्वाध्यमानमौपादानिकस्वत्वं निराकरोति कल्पतरुष्टतत्रत्यपुराणम् "अथ दत्ते वृषोत्सर्गे दाता वक्रोक्तिभिः पदैः। ब्राह्मणानाह, यत् किञ्चित् मयोत्सृष्टन्तु निर्जने। तत् कश्चिदन्योन मयेदृशाभाव्यञ्च यथाक्रमम्। न वाह्यं न च तत्क्षीरं पातव्यं केनचित् क्वचित्"। वक्रोक्तिभिः काकूक्तिभिः स्वाम्यभावेनोत्सृष्टवृषोः पालननियमाभावाद्वान्यादिभक्षणे मोच्यत्वमाह याज्ञवल्क्यः "मङ्क्षोत्सृष्टवृषभवः क्षतिकागन्तुकादयः। पालोपेताश्च ते मोक्ष्या दैवराजपरिप्लुताः"। मङ्क्षोत्सृष्टनिर्वीर्यः मङ्क्षावलीवर्दः। उत्सृष्टवृषभवः देवतोद्देशेन पित्रादिनिमित्तकोद्देशेन वा चक्राद्यङ्कितास्त्यक्तवृषभवः। क्षतिका व्रणिर्गतदशाद्याः। आगन्तुका ग्रामान्तरादागताः। आदिशब्दात् उज्जनशोक्ताश्च यथा "अदण्ड्या कृषिणोऽश्वाश्च प्रजायाश्चा हि ते स्मृताः। अदण्ड्याः काणकुण्ठाश्च वृषभाः क्षतलक्षणाः" कुण्ठः खञ्जः। अत्र काणकुण्ठशब्दाभ्यामल्पत्वाद्यक्तम् उच्यते। वृषभःक्षतलक्षणाः प्राग्मुक्तोत्सृष्टवृषभः एते सपाला विपाला वा सर्वथा मोक्ष्याः तथा च मनुः "अनिर्दशाहां गां स्तेता वृषान् देवपशूंश्चया। सपालान् वा विपालान् वा व्यदण्ड्यान् मनुरब्रवीत्"। एतद्विज्ञानां वेषाञ्च पालोऽस्ति

तेऽपि गोघ्याः । अर्थात्तत्र पालोदण्डनीयः । दैवराजपरिप्लुताः गजादिद्रावणात् सेनादिदर्शनाद्वा पलायिताः पशवो यदि खेते चरन्ति तदा न दोष इत्यर्थः ।

अन्यकालान्तरसत्त्वे तु मनुः "दिवा वक्तव्यता पाले रात्रौ स्वामिनि तद्गृहे । योगक्षेमेऽन्यथा चेत्तु पालोवक्तव्यतामियात्" । "दिवा पशूनां पालरक्षत्वेऽपि योगक्षेमविषये दोषे जाते पालकस्य गर्हणीयता रात्रौ पुनः पालप्रत्यर्पितानां स्वामिनां दोषः । अन्यथा यदि रात्रावपि पालरक्षागता भवन्ति तदा दोषे उत्पन्ने पाल एव गर्हणीयतां प्राप्नोति" इति कुल्लूकभट्टः । स्मृतिसागरे हरदत्तमिश्राः "अनागतस्य चानेता यामस्य च रक्षकः । रात्रावपि यदान्योऽस्ति तदा स्वामी न दोषभाक्" । ननु दण्डप्रकरणोक्तमनुवचनं प्रायश्चित्ते कथमिति चेन्न । "दण्डवत् प्रायश्चित्तानि भवन्तीति" श्रुतेः तथा व्यवहाराच्च । एवञ्च "यत्रापवर्त्तते युग्यं वैगुण्यं प्राजकस्य च । तत्र स्वामी भवेद्दण्ड्यो हिंसायां द्विगतं दमः" इति मनुवचने "यत्र सारथेरकौशलात् यानमन्यथा गच्छति तत्र हिंसायामसुधिचितसारथिनियोगात् स्वामी द्विगतं दण्डं दाप्यः स्यादिति" कुल्लूकभट्टव्याख्यानदर्शनात् अयोग्यपालकसमर्पणे स्वामिनो दोषात्तस्यैव प्रायश्चित्तमुक्तम् । 'यावत् यस्यं विनश्येत्तु क्षेत्री तावत् फलं लभेत् । पालस्तोऽश्च गोस्वामी पूर्वोक्तं दण्डमर्हति" याज्ञवल्क्यवचने गवादिदोषेण यावत् यस्यं विनश्यति तावदेव पालकात् प्राप्यं पालकाभावे पालकस्थाद्यः स्वामी पूर्वोक्तं दण्डादिमर्हतीति दर्शनाच्च । गोवधप्रायश्चित्ते पालकदुष्टभावे स्वामिना द्रव्यं दत्त्वा प्रायश्चित्तं कारयितव्यं कर्त्तव्यं वा । स्वेच्छापालके स्वयं कर्त्तव्यम् । सशिखवपनमित्यत्र नैमित्तिकेन सशिखवपनेन "सदा बह्वशिखेन तु" इत्यस्य "गायत्र्या तु शिखां बद्ध्वा नैर्ऋत्यां ब्रह्मरन्ध्रतः । जुटिकान्तु ततोबद्ध्वा ततः कर्म समाचरेत्" इति ब्रह्मपुराणोक्तस्य च नित्यस्य बाधेन दोषाय फलश्रवणेन सोमस्य बाधवत् गोदोहेन चमसस्य बाधवच्च । "सशिखं वपनं कार्यमाह्निकात् ब्रह्मचारिणा। इति कात्यायनकृतकल्पोपरिशिष्टेऽप्येवम् । एतदेकसूत्रितमूलकत्वात् तद्गृतपारस्करीये पर्वुप्रभिरसमिति सूत्रेऽपि तथैवार्थः तद्भाष्यकृता हरिस्वामिनापि परिसर्वतोभावेनोप्रभिरसं छिन्नतभिरसमिति व्याख्यातम् । न च "एते लूनशिखास्तस्य दशनैरचिरोद्गतैः । कृशाः काशा विराजन्ते वटवः सामगा इव" इति विष्णुपुराणीये सामगा इति विशेषणाच्छ्मश्रूणां लूनशिखत्वमिति वाच्यं प्रागुक्तवचनात् सर्वेषां सशिखवपनप्राप्तेः विध्यन्तरकल्पनापत्तेश्च । तृणसागरवोरौपम्यन्तु हरिणसुखहेतुत्वेनाभ्युक्तं तयोः सुखहेतुत्वञ्च भक्षत्वेन गाथकत्वेनेति शेषः । एवं प्राचीनावीतित्वादिना "सदोपवीतिना भाव्यम्" इत्यस्यापि बाध इति प्रसङ्गादुक्तम् । ब्राह्मणस्य विशेषेणेति ब्राह्मणस्य गवानुगमनं सख्यम् । एतेनापालनकृतगोवधे प्रजापत्यं करणीयमिति यत्तैत्तिरीयैर्व्यतापि प्रजापत्यतुल्येति पण्डितसर्व्वस्वे कृष्णायुधः । दृष्टभो गौश्च दक्षिणा । ब्राह्मणभोजनं विशेषयति यज्ञपार्श्वः "गर्भाधानादिकल्पेषु ब्राह्मणान् भोजयेद्बुधः" । प्राजापत्यद्वयाङ्गत्वे धेनुद्वयं तदङ्गत्वे षट् कार्षापणाः । एवञ्च दृष्टमूल्यं पञ्च कार्षापणाः गोमूल्यमेकः कार्षापणः । मूलपाणिप्रभृतिभिस्तु इतिकर्त्तव्यतायां विशेषे नादृतः । एतच्च शूद्रस्वामिकेतरवधविषयम् शूद्रस्वामिकस्यानाथाद्याद्वधे यत्किञ्चिद्दक्षिणाकल्पस्य निबन्धृभिर्व्यवस्थापित्वेनापालनकृतवधे तदधिकस्यायुक्तत्वात् वरं तत्तुल्यं कल्पद्वयं युक्तमित्यलम् । अतएव एतद्विषयएव स्मृतिसागरसारे हरदत्तमिश्राः 'अरक्षिते तु क्रूपादौ हते व्याघ्रादिभक्षिते । व्रतार्द्धमाचरेत् स्वामी रक्षिते नास्ति दूषणम्" । व्रतार्द्धं कामकृतव्रतार्द्धं नास्ति दूषणमिति यदि प्रमत्ता गौर्निवारयन्तं पालमतिक्रम्य गर्त्तकान्तारादौ क्षियते तदा नेत्यर्थः । अन्यत्र सत्येव पालके सम्यक्पालनाभावेन कूपादौ पातादौ भक्षणे प्रायश्चित्तमाह विष्णुः 'पल्वलौषधकव्याघ्रव्यापदादिनिपातने । कूपोदुम्बरसर्पादौ हते पादोनमाचरेत् । अपालने तु कृच्छ्रं स्यात् शून्यागाराशुपक्षये" । पादोनं प्राजापत्यमेव उत्तरवचने कृच्छ्रश्रवणात् । तथा "पादव्याप्राप्तके देवोयत्सु स्वामिन्यरक्षिते" । अप्राप्तके अप्राप्तदशावस्थे शिक्षायणपर्य्यन्ते इति यावत् । एवम्भूते वत्सेऽरक्षिते कूपपातादिना हते सति स्वामिना प्राजापत्यपादः करणीयः । अत्र पादमात्रप्रायश्चित्तत्वात् बालत्वादिना नातुल्यदुः । ततश्चाप्राप्तदशावस्थवत्सायाजननिमित्तकवधजन्यपापक्षयकाम इति प्रयोज्यम्"

अतिदेशिकी गोहत्या बहुविधा यथा "साविलुप्रवाच। विप्रहत्याञ्च गोहत्यां किंविधामतिदेशिकीम् । क

वा न्यूनामगम्या वा को वा सन्ध्याविहीनकः। एतेषां लक्षणं सर्वं वद वेदविदांवर!। यम उवाच, गामाकारं प्रकुर्वन्तं पिबन्तं यो निवारयेत्। याति गोविप्रयोर्मध्ये गोहत्याञ्च लभेत्तु सः। दग्धैर्गोन्नाडयत् मूढो यो विप्रो हृषवाहकः। दिने दिने गवां हत्यां लभते नात्र संशयः। ददाति गोभ्य उच्छिष्टं भोजयेद्दुहृषवाहकम्। भोजयेद्दुहृषवाहञ्च स गोहत्यां लभेद्ध्रुवम्। हृषलीपतिं याजयेद्योभुङ्क्तेऽन्नं तस्य यो नरः। गोहत्याशतकं सोऽपि लभते नात्र संशयः। पादं ददाति वक्षो यो गाञ्च पादेन ताड़येत्। स्टष्टं विशेद्धौताङ्घ्रिः स्नात्वा गोवधमालभेत्। यो भुङ्क्ते स्निग्धपादेन शेते स्निग्धाङ्घ्रिरेव च। सूर्य्योदये च हिर्भोजी स गोहत्यां लभेत् ध्रुवम्। अवीराञ्चन्न योभुङ्क्ते योनिजीवी च ब्राह्मणः। यस्त्रिसन्ध्याविहीनश्च स गोहत्यां लभेद्ध्रुवम्। पितृं च पर्वकाले च तिथिकाले च देवताः। न सेवतेऽतिथिं योहि स गोहत्यां लभेत्ध्रुवम्। स्वभर्त्तरि च कृष्णे वा भेदबुद्धिं करोति या। कटूक्त्या ताड़येत् कान्तं सा गोहत्यां लभेद्ध्रुवम्। गोमार्गखनन कृत्वा ददाति शस्यमेव च। तड़ागे च तद्वृद्धिं वा स गोहत्यां लभेद् ध्रुवम्। प्रायश्चित्तं गोवधस्य यः करोति व्यतिक्रमः। अर्थलोभादज्ञानं स गोहत्यां लभेत्ध्रुवम्। राजके दैवके यत्नात् गोस्वामी गां न पालयेत्। दुःखं ददाति यो मूढो गोहत्यां लभते ध्रुवम्। प्राणिनं लङ्घयेत् यो हि देवाङ्गासनं जलम्। नैवेद्यं पुष्पमस्त्रञ्च स गोहत्यां लभेद् ध्रुवम्। अश्वत्थास्तीति यो वादी मिथ्यावादी प्रतारकः। देवद्वेषी गुरुद्वेषी स गोहत्यां लभेत्ध्रुवम्। देवतायतिमां इष्ट्वा गुरुं वा ब्राह्मणं सति!। न सम्भाषेत् यो हि स गोहत्यां लभेत्ध्रुवम्। न ददात्याशिषं कोपात् प्रणताय च यो द्विजः। विद्यार्थिने च विद्यान्तु स गोहत्यां लभेत्ध्रुवम्" ब्रह्म वै० पु० प्रकृतिख०, ३७अ०। "कृष्णमोधकरो विप्रो गोवधस्य व्रतं चरेत्" प्रा० त० उक्तेः कृष्णमोधोऽपि व्याघ्रेणिकः गोवधः।

**गोहन्** त्रि० गां हन्ति हन-विच् ६त०। १गोहन्तरि मेघस्य जलभेदके २इन्द्रे पु०। "आ रे गोहा नृहा वधोवः" ऋ० ७।५६।१७। "गोहा गवां मेघस्थसलिलानां भेदकः" भा०।

**गोहन** त्रि० गुह-संवरणे ल्युट् अत्वाभावश्छान्दसः। संवरके "समाने अहन् त्रिरवद्य गोहनाः" ऋ० १।२४।२ "गुह संवरणे नन्द्यादित्वात् ल्युः" अदुपधाया गोहः" पा० प्राप्तस्य ऊत्वस्याभावश्छान्दसः" भा०।

**गोहमुख** पु० भारतवर्षस्थे पर्वतभेदे। भागवतोक्तगोकामुख पर्वतस्य विष्णु० गोहमुखेति नाम। गोकामुखशब्दे दृश्यम्। [इत्ते तिका०।

**गोहरितकी** स्त्री गोः हरितकीव हितकारित्वात्। विल्व-

**गोहल** न० हल-विलेखे क्विप् तं लाति ला-क गोर्हलः। गोमये हारा०।

**गोहालिया** स्त्री गवां हाले विलेखे साधु वा० घ। (गोयालिया) ख्याते लताभेदे "पीतं गोयालियामूलं तिलदध्याज्यसंयुतम्। निवर्त्तमूलं कथितं प्रवर्त्तयति शङ्कर!" इति गारुड़े १९०अ०।

**गोहित** पु० गवां हितं यस्मात् ५त०। १विल्वे, २गोपालतायाञ्च। ३गोहितकारके त्रि०। ४विष्णौ पु० "गोहितो गोपतिर्गोप्ता" विष्णुस० "गोभ्यो हितो गोहितः, गोभूमेर्भारावतारणेच्छया शरीरग्रहणं कुर्वन् गोहितोवा" भाष्यम्। [मूले हेमच०।

**गोहिर** न० गुह-बा०इरच् गुणो० ऊत्वाभावः। पाद-

**गोहा** त्रि० गुह-क्व यद्यत ऊत्वमेव ऊत्वस्य नियमनात् नोत्वम्। १गुहेर्त्र २ऊत्वप्रकाश्ये ३संवरणीये च।

**गौकक्ष** पुंस्त्री गोकक्षर्षेर्गोत्रापत्यं गर्गा० यञ्। गोकक्षर्षिगोत्रापत्ये। तस्य छात्रः कण्वा० अञ् यलोपः। गौकक्ष तच्छात्रे गौकक्षस्यापत्यं तिका० फिञ्। गौकक्ष्यायनि तदपत्ये पुंस्त्री। स्त्रियां क्रौड्यादि० घ्रञ्। गौकक्षा गोकक्षगोत्रस्त्रियाम्। बहुत्वे "यञञोश्च" पा० यञो लुक्। गोकक्षास्त्रोत्रापत्येषु।

**गौमायुलव** त्रि० गुग्गुलौ भवः अण्। गुग्गुलुभवे धूपादौ स्त्रियां गार्ङ्गरवा० ङीष्।

**गौक्ष्य** पु० गोक्ष्याः स्त्रिमात्रवयस्यायाः अपत्यम् ढक्यि प्राग्वा० यत्। स्त्रिमात्रवयस्के मैनाके शब्दार्थचि०।

**गौक्षिक** पु० गुक्षा तुलाभानभेदः तदुपकरणं शीलमस्य ठक्। तत्संस्कारे त्रिका०।

**गौड़** पु० "बङ्गदेशं समारभ्य भुवनेशान्तगं शिवे!। गौड़-देशः समाख्यातः सर्वविद्याविशारदः" स्कन्दपु० उक्ते १देशे २तद्देशस्थे जने ब०व०। "सारस्वताः कान्यकुब्जा गौड़मैथिलकोत्कलाः। पञ्च गौड़ा इति ख्याता विन्ध्यप्रयोत्तरवासिनः" स्कन्दपु० इत्युक्तेषु विन्ध्यप्र-

र्व्यतोत्तरभागवासिषु ब्राह्मणभेदेषु च। स्वार्थे क तत्रार्थे। "अथ पूर्व्वस्याम्" इत्युपक्रमे "उदयगिरि भद्रगौडकपौण्ड्रोत्कलकाशिमेकलाम्बष्ठाः" इ०स०१४अ० भूर्व्विभागे पूर्व्वस्थदेशोक्तौ। "अस्ति गौडविषये कौशाम्बी नाम नगरी" हितो०। "गौडेराष्ट्रमनुत्तमं निरूपमा तत्रापि राढा पुरी" प्रबोधच० "सर्व्वे सिंहगुरुर्वर्ज्यः कलिङ्गे गोडगुर्जरे" सुद्ध० चि०। गुडस्य विकारः अण्। ४गुडविकारे खण्डासवादौ त्रि० "गुडस्य तप्तमद्यस्य पीत्वा गौडं सुरासवम्" भा० द० ४४अ०। "नानास्वादरसानाञ्च खाण्डवानां तथैव च। भोजनानि सुपूर्णानि गौडानि च सहस्रशः" रामा० बा० ६३ सो०। "गौडमस्तमनस्तं वा पानकं गुरु मूलजम्" सुश्रुतः। ५मदिराभेदे स्त्री "गौडी पैष्टी तथा माध्वी विज्ञेया त्रिविधा सुरा। यथैवैका तथा सर्व्वा न पातव्या द्विजोत्तमैः" मनुः। "गौडीं माध्वीं सुरां पैष्टीं पीत्वा विप्रः समाचरेत्। तप्तकृच्छ्रं पराकं च चान्द्रायणमनुक्रमात्" इत्यादिस्मृतिः। ६काव्यरीतिभेदे स्त्री "पदसंघटना रीति रङ्गसंस्थाविशेषवत्। उपकर्त्री रसादीनां सा पुनः स्यात्चतुर्व्विधा। वैदर्भी चाथ गौडी च पाञ्चाली लाटिका तथा" विश्व० "ओजःप्रकाशकैर्दीर्घैर्बन्धैराडम्बरः पुनः। समासबहुला गौडी" सा० द० तल्लक्षणञ्च यथा "चण्डद्रुजम्भमतचण्डगदाभिघात-संचूर्णितोरुयुगलस्य सुयोधनस्य। स्यानावनद्धघनशोणितशोणपाणिरुत्तंसयिष्यति कचांस्तव देवि! भीमः" वेणीसं०। एषा च गौडजनप्रियत्वात् गौडैः प्रयुज्यमानत्वाच्च गौडीसंज्ञां लभते। गौड+ङ। गौडीया अत्रार्थे। "बहुतरसमासयुक्तामहाप्राणाक्षरा च गौडीया। रीतिरुदात्तप्रायसन्धिमपरतन्त्राऽस्ताभवाक्या च" पुरुषोत्तमः। ७रागिणीभेदे स्त्री संगीतदा०। पुरशब्दे परे समासे अस्य "अरिष्टगौड़पूर्व्वम्" पा० अलोदाक्तता। गौड़पुरम्।

गौड़पाद पुं० माण्डुक्योपनिषदि तदर्थकश्लोककारके वेदान्तिषण्डितभेदे। ते च "वन्दे गौड़पदं प्रपन्नविबुधप्रीत्यै भवध्वान्तभित्-पद्मस्तं तैजसः" इत्यादयः "दुर्ग्रहं मतिगम्भीरमजं साम्यं विशारदम्। बुद्ध्वा पदसनाभात्वं नमस्कुर्म्मो यथाबलम्" इत्यन्ताः शतं श्लोकाः।

गौड़वास्तुक पुं० "तदेव च दृढ़तरं रक्तं चेत् गौड़वास्तुकम्" इत्युक्तलक्षणे वास्तुकभेदे। (चिल्लीशाक)राजनि०।

गौड़िक त्रि० गुडे साधु गुड़ा० ठक्। १दक्षौ। गौड़ः गुड़विकारः साधनतयाऽस्यास्य ठन्। २गुडविकारसाध्ये भक्ष्यभेदे। "दृढ़्हा गौड़िका भक्ष्या गुरवोऽनिलनाशनाः" "मधुमांसोपदंशं वा पिबेद्वाप्यथ गौड़िकम्" इति च सुश्रु०

गौण त्रि० गुणमधिकृत्य प्रवृत्ता गौणी तत आगतः अण्। १सादृश्यलक्षणलक्षसम्बन्धरूपया गौण्या लक्षणया प्रवृत्ते शब्दे "गौणश्चेत्तत्रशब्दात्" मी० सू०। २असत्ये च। "यद्वाऽऽग्नेयादिक्रियासाध्यस्य कालस्याग्नेयत्वादिवत्। गौणकालत्वमिच्छन्ति केचित् प्राक्तनकर्म्मणि" उद्वा०त० हरिहरपद्धतिः। "एवमागामिवागौण्य सुख्य कालादवस्तनः। स्वकालादुत्तरो गौणः कालः सर्व्वस्य कर्म्मणः" छन्दोग०। "तदा गौणमनन्तस्य नामानन्तेति विश्रुतम्" भा० आ० १८२ अ०। "बहूनि मम नामानि कीर्त्तितानि महर्षिभिः। गौणानि तत्र नामानि कर्म्मजानि च कानि चित्" ३४३ अ०। स्त्रियां ङीप्। "गौण्यसत्त्वे" मी० सू०। (गौणीत्वत्पत्तिः) गुणं सादृश्यमधिकृत्य प्रवृत्ता अण् ङीप्। २सादृश्यमूलकलक्षणाभेदे स्त्री। "सादृश्यात्तु मता गौण्यस्त्रयोविंशतिभेदिताः" सा०द०। "सादृश्येतरसम्बन्धेऽपि हि तत्रैर्गौणत्वमिच्छन्ति। "अभिधेयाविनाभूतप्रतीतिर्लक्षणोच्यते। लक्ष्यमाणगुणैर्योगाद् हि तत्रैरिष्टा तु गौणता" काव्य प्र०।

गुणोऽप्रधानमेव स्वार्थे प्रज्ञा० अण्। ४अप्रधाने कर्म्मादौ। "गौणे कर्म्मणि दुह्यादेः प्रधाने नीहृकृष्वहाम्" व्या० का०। गौणस्य भावः ष्यञ् गौण्य न०, त्व गौणत्व न०, तल् गौणता स्त्री० अप्रधानत्वे "गवाद्यादेः स्वोऽन्यो गौण्येऽनीयसः" सुश्रु०। "इष्टैरिष्टा तु गौणता" काव्यप्र० गौणत्वञ्च प्रसिद्धवस्तुभेदस्यैव यथाह भा०भा० "प्रसिद्धवस्तुभेदस्य गौणत्वमुख्यत्वप्रसिद्धेः। यस्य हि प्रसिद्धो वस्तुभेदः यथा केशरादिमानाकृतिविशेषोऽन्वयव्यतिरेकाभ्यां सिंहशब्दप्रत्ययभाङ्मुख्योऽन्यः प्रसिद्धः। ततश्चान्यःपुरुषः प्रायिकैः क्रौर्य्यशौर्य्यादिभिः सिंहगुणैः सम्बन्धः प्रसिद्धः तस्य पुरुषे सिंहशब्दप्रत्ययौ गौणौ भवतः नाप्रसिद्धवस्तुभेदस्य"।

गौणचान्द्र पुं०। "चान्द्रोऽपि द्विविधः प्रोक्तो गौणमुख्यप्रभेदतः। गौणः कृष्णपतिपदः पौर्णमास्यन्तदेशितः" शब्दर० उक्ते कृष्णपदादिपौर्णमास्यन्ते चान्द्रे मासे अब्व्यवस्था नि० शि० उक्ता यथा

त्रिकाण्डशेषश्च "चान्द्रोऽपि शुक्लपक्षादिः कृष्णादिर्वेति च द्विधा" इत्युक्त्वा देशभेदेन तद्व्यवस्थामाह "कृष्णपक्षादिकं मासं नाङ्गीकुर्वन्ति केचन। येऽपीच्छन्ति न तेषान्तु देशे विन्ध्यस्य दक्षिणे" इति विन्ध्यस्य दक्षिणे कृष्णादिनिषेधाद् उत्तरतोऽयोरभ्यनुज्ञा गम्यते तत्रापि शुक्लादिर्लक्ष्यः कृष्णादिर्गौणः शास्त्रेषु चैत्रशुक्लप्रतिपद्येव चान्द्रसंवत्सरारम्भोक्तेः तदुक्तं दीपिकायां "चान्द्रो ऽब्दोमधुशुक्लप्रतिपदारभ्यः" इति न हि ये कृष्णादिं मन्यन्ते तेषां वत्सरारम्भोभिद्यते अतः शुक्लादिर्लक्ष्यः कृष्णादिना मलमासावरुद्धत्वाच्च चान्द्रस्य सर्वत्रशुद्धभोगेन नाक्षयमासः। सावनादीनां व्यवस्थोक्ता ज्योतिषादौ ब्रह्मसिद्धान्ते "अमावास्यापरिच्छिन्नोमासः स्याद्ब्राह्मणस्य तु। संक्रान्तिपौर्णमासीभ्यां तथैव रविचन्द्रयोः"। अत्र ब्राह्मणादीनां यत्र कर्मविशेषे वचनान्तरेण "वसन्ते ब्राह्मणोऽग्निमादधीत" इत्यादिवाक्यात् उक्तस्यैव दर्शान्तत्वमात्रं नियम्यते न तु सर्वकर्मसु दर्शान्तएवेति इच्छादार्धसौमरेयादिनिधननियमवद्विधिशाबल्यात् त्रैवर्णिकानां सर्वकर्मसु मासविशेषविधेः सावनादीनां शूद्रानुलोमादिपरत्वापत्तेश्चेति गुरुचरणाः। ज्योतिर्गर्गः "सौरमासो विवाहादौ यज्ञादौ सावनः स्मृतः। आब्दिके पित्र्यकार्ये च चान्द्रोमासः प्रशस्यते"। ऋष्यशृङ्गः "विवाहव्रतयज्ञेषु सौरं मासमचक्षते। पार्वणे श्राद्धकाश्राद्धे चान्द्रमित्यन्यावृद्धिके" मन्वन्तरे "एकोद्दिष्टविवाहादौ प्रवासादौ सौरसावनौ।" ज्योतिर्गर्गः "आयुर्दायविभागश्च प्रायश्चित्तक्रिया तथा। सावनेनैव कर्त्तव्या शास्त्रज्ञां चाप्युपासना" विष्णुधर्मे "नक्षत्रसंज्ञान्यनानि चन्द्रोमासेन कुर्याद्भगणात्मकेनेति" ब्राह्मे "तिथिलग्ने च कृष्णादिं व्रते शुक्लादिमेव च। विवाहादौच सौरादिं मासं लग्ने विनिर्दिशेत्"

**गौणिक** त्रि॰ गुणे रूपादौ साधु कथा॰ ठक्। २गुणसाधने। गुणं वेत्ति तत्प्रतिपादकं ग्रन्थमधीते वा उक्था॰ ठक्। वसना॰ ठक् वा। ३गुणवेत्तरि ४तद्ग्रन्थपाठके च त्रि॰ गुणैः सत्त्वादिभिः निर्वृत्तः ठञ्। सत्त्वादिनिर्वृत्ते ५पदार्थे स्त्रियां ङीप्। तत्र गुणभेदेन गतिभेदो मनुना दर्शितो यथा

"देव यांस्तु गुणेनैषां संसारान् प्रतिपद्यते। तान् समासेन वक्ष्यामि सर्वस्यास्य यथाक्रमम्। देवत्वं सात्विका यान्ति मनुष्यत्वञ्च राजसाः। तिर्यक्त्वं तामसा नित्यमित्येषा त्रिविधा गतिः। त्रिविधा त्रिविधैषा तु विज्ञेया गौणिकी गतिः। अधमा मध्यमाऽग्र्या च कर्मविद्याविशेषतः। स्थावरा कृमिकीटाश्च मत्स्याः सर्पाः सकच्छपाः। पशवश्च मृगाश्चैव जघन्या तामसी गतिः। हस्तिनश्च तुरङ्गाश्च शूद्रा म्लेच्छाश्च गर्हिताः। सिंहा व्याघ्रा वराहाश्च मध्यमा तामसी गतिः। चारणाश्च सुपर्णाश्च पुरुषाश्चैव दाम्भिकाः। रक्षांसि च पिशाचाश्च तामसीषूत्तमा गतिः। मल्ला मल्लानटाश्चैव पुरुषाः शस्त्रवृत्तयः। द्यूतपानप्रसक्ताश्च जघन्या राजसी गतिः। राजानः क्षत्रियाश्चैव राज्ञश्चैव पुरोहिताः। वादयुद्धप्रधानाश्च मध्यमा राजसी गतिः। गन्धर्वा गुह्यका यक्षा विबुधानुचराश्च ये। तथैवाप्सरसः सर्वा राजसीषूत्तमा गतिः। तापसा यतयो विप्रा ये च वैमानिका गणाः। नक्षत्राणि च दैत्याश्च प्रथमा सात्विकी गतिः। यज्वान ऋषयो देवा वेदा ज्योतींषि वत्सराः। पितरश्चैव साध्याश्च द्वितीया सात्विकी गतिः। ब्रह्मा विश्व सृजोधर्मो महानव्यक्तमेव च। उत्तमां सात्विकीमेतां गतिमाहुर्मनीषिणः। एष सर्वः समुद्दिष्टस्त्रिप्रकारस्य कर्मणः। त्रिविधस्त्रिविधः क्षुण्णः संसारः सार्वभौमिकः"। गुणएव अकृत्या॰ स्वार्थे ठक्। ५गुणशब्दार्थे पु॰

**गौतम** पु॰ गोतमस्यापत्यं गोत्रापत्यम् अण्। १गोतमर्षिगोत्रापत्ये २भरद्वाजसुतौ पु॰। स च वैवस्वते मन्वन्तरे सप्तर्षिमध्यवर्त्ती यथाह हरिवं॰ ७अ॰ "अत्रिर्वसिष्ठोभगवान् कश्यपश्च महाऋषिः। गौतमश्च भरद्वाजो विश्वामित्रस्तथैव च। तथैव पुत्रो भगवान्रुचीकस्य महात्मनः। सप्तमो जमदग्निश्च ऋषयः साम्प्रता दिवि" शतानन्दपिता अहल्यापतिश्च गौतमस्तनोभिज्ञ एव। तत्कथा च" रा॰ बा॰ ४८।४९अ॰ "गौतमस्याश्रमं चेह' पूर्वमासीन्महात्मनः इत्यादौ दृश्या अहल्यापुत्रे ३शतानन्दे "गौतमश्च शतानन्दः" वीरच॰। गौतमगोत्रस्य भरद्वतोऽपत्ये ४ऋषाचार्ये ५तस्य भगिन्यां द्रोणपत्न्यां कृप्यां स्त्री ङीप्। "ऋषः कृतः स वै तस्मात् गौतमी च कृपी मता। एते भारद्वताः प्रोक्ता एते ते गौतमाः स्मृताः" हरिवं ३२अ॰। ऋषशब्दे २१८२पृ॰ विवृतिः। "तत आसाद्य तरसा दारुणं गौतमीसुतम्" (अश्वत्थामानम्) भाग॰ १।७।४७श्लो॰। ६मायादेवीसुते शाक्यमुनौ अमरः। एकतादीनां मुनीनां ७पितरि। "आसन् पूर्वयुगे राजन्! मनोर्भ्रातरस्त्रयः। एकतश्च द्वितश्चैव त्रितश्चादित्यसन्निभाः" इत्युपक्रमे "तेषाञ्च

तपसा प्रीतो नियमेन दमेन च। अभवद्गौतमोनित्यं पिता धर्मरतः सदा" भा० श० ३७अ०। दक्षकन्यायां स्त्री भेदि० "गौतमीं कंसभवदां यशोदानन्दवर्द्धिनीम्" हरिवं० १७अ०। ६राक्षसभेदे स्त्री शब्दर०। तस्येदमित्यण् ङीप्। १०गोदावरीनद्यां स्त्री गौरा०ङीप्। "गौतमक्षाघनाशिनी" इति गोदावरीस्नानमन्यस्मिन्नदीस्नानाशाय तस्यास्तत्सेवितत्वाद्दा तथात्वम्" "ताम्राख्या वेत्रवती पर्णाशा गौतमी तु सा। गोदावरी च वेणा च" भा० आ० १६५अ०। ११गोरोचनायाञ्च स्त्री राजनि०। १२गाक्षसुनिप्रणीतविद्यायाम् १३गौतमप्रणीतायां षोड़शपदार्थविद्यायाञ्च स्त्री। "अधीत्य गौतमीं विद्यां शृगालत्वमवाप्नुयात्। पुराणान्तरे तद्विद्याध्ययननिषेधः।

गौतमगङ्गा स्त्री गौतमाय तदवनाशाय सम्भवतीति अण्। गौतमगङ्गायां गोदावरीनद्याम् राजनि०।

ब्रह्मपु० गौतमं प्रति तत्स्वकवाक्यम्। "इयन्तु गौतमी पुत्र! यत्र क्वापि समाश्रया। सर्वेषां सर्वदा नृणां स्नानान्मुक्तिं प्रदास्यति। क्वचित् काले पुण्यतमं किञ्चित्तीर्थं सुसङ्गमे। सर्वेषां सर्वदा तीर्थं गौतमी नात्र संशयः। इयं माहेश्वरी गङ्गा गौतमी वैष्णवीति च। ब्राह्मी गोदावरी नन्दा सुनन्दा कामदायिनी। ब्रह्मतेजःसमानीता सर्वपापप्रणाशिनी" "एवमेषाऽपि ते प्रोक्ता गङ्गाख्याता महामते!। माहेश्वरी वैष्णवी च सैव ब्राह्मी च पावनी। भागीरथी देवनदी त्रिभवस्त्रिसरास्रया। महेश्वरजटाभारैरेवं द्वैविध्यमागतम्। विन्ध्यस्य दक्षिणे गङ्गा गौतमी सा निगद्यते। उत्तरे सापि विन्ध्यस्य भागीरथ्यभिधीयते"

गौत्तम पु० गच्छतीति गं गात्रत्तायति उद्+तम-अच् स्वार्थे अण्। स्थावरविषभेदे हेमच०। [सम्बन्धिनि।

गौदन्त्येय त्रि० गोदन्तस्येदम् शुभ्रा० ढक्। गोदन्तचन्दन

गौदानिक त्रि० गोदानं कर्म्मास्य ब्रह्मचर्य्यस्य महानाम्न्यादिभ्यः षष्ठ्यर्थे उपसंख्यानम्" वार्त्ति० ठक्। १गोदानाख्यब्रह्मचर्य्य सम्बन्धिनि। गोदाने उक्तं ठक्। २गोदानोक्ते कर्म्मणि। "उपरि समिधं हुत्वा गामस्य ब्राह्मणेभ्यः प्रदाय गौदानिकं कर्म्म कुर्वीत" आश्व० गृ० २।८।६। "ततो गौदानोक्तं कर्म्मोपापि कुर्यात्" मारा० उक्तिः। [गौधेरोऽप्यत्र गोधाशब्दे दृश्यम्।

गौधार पु० गोधायाः अपत्यम् अण्। गोधापुत्रे। गौधेयः

गौधूम त्रि० गोधूमस्य विकारः विद्या० अण्। गोधूमविकारे रोटिकादौ स्त्रियां ङीप्। "गौधूमं चणकं भवति" श त० ब्रा० ५।२।१।६। "उत्कीर्णं समाधौ गोधूमचणकः" कात्या० श्रौ० १४।१।२२। "गोधूमपिष्टमयचणको भवतीत्यर्थः। [भवनयोग्ये क्षेत्रे।

गौधूमीन न० गोधूमस्य भवनं क्षेत्रम् गोधूम-खञ्। गोधूम

गौधेरकार्याणि पुंस्त्री गोधेरस्यापत्यं याकिना० फिञ् कुक्च। गौधेरापत्ये। पक्षे अत इञ् न कुक्। गौधेरि तदपत्ये पुंस्त्री।

गौनर्द्द त्रि० गोनर्द्ददेशे भवः प्राचोभिन्नमते एकादित्वेऽपि इञ्त्वाभावात् न ञ्, किन्तु अण्। १गोनर्द्ददेशभवे २पातञ्जलमुनौ पु०

गौपत्य न० गोपतिर्भावः पत्यन्तत्वात् यक्। गोपतिभावे गोस्वामित्वे। "विशऋ्यूर्ज्जां मा विश गौपत्येन" यजु० २।२२। "रायस्पोषं गौपत्यम्" ४१।५८।

गौपवन पु० गोपवनशब्दे व्युत्पत्तिः। ऋषिभेदे स च मधुकाण्डस्य वंशस्योक्तनिभेदः "अथ वंशः पौतिमाष्यात् गौपवनात् गौपवनः" ब्र०उ० ४।६।१।

गौपिक पु० स्त्री गोपिकाया अपत्यम् ढकोवाधकः शिवा० अण्। गोपिकाऽपत्ये स्त्रियां ङीप्।

गौपिलेय त्रि० गोपिल+चतुरर्थ्यां सख्या० ढक् गोपिल निर्द्दत्तादौ। [सङ्घे।

गौपुच्छ त्रि० गोपुच्छमिव शर्करा० इवार्थे अण्। गोपुच्छ-

गौपुच्छिक त्रि० गोपुच्छेन क्रीतम् ठञ्। १गोपुच्छक्रीते। गोपुच्छेन तरति ठञ्। २गोपुच्छेन तारके च।

गौप्तेय पु० स्त्री गुप्ता वैश्यजातिस्त्री तस्या अपत्यम् शुभ्रा० ढक् तद्व्यभिकाणोऽपवादः। गुप्तायाः अपत्ये।

गौभूत त्रि० गोभूता निर्द्दत्तं सङ्घा० अण्। गोभूता निर्द्दत्ते

गौमत त्रि० गोमद्यां भवः पलद्या० अण्। गोमतीनदीभवे मत्स्यादौ।

गौमतायन पु० स्त्री गोमद्यां भवादि वा० फञ्। गोमती भवादौ। ततः अरीहणा०चतुरर्थ्यां वुञ्। गौमतायनक० तन्निर्द्दत्तादौ त्रि०। [निर्द्दत्तादौ।

गौमयिक त्रि० गोमयेन निर्द्दत्तादि कुशदा० ठञ्। गोमय

गौमायन पु०स्त्री गोमिनीगोत्रापत्यम् अश्वा०फञ् टिलोपः। गोस्वामिगोत्रापत्ये।

गौर पु० गुड्-गतौ र नि० ढक्किः गुर-घञ् प्रज्ञाद्यण् वा। १चन्द्रे २श्वेतवर्णभेदे भेदि० ३धवक्षे राजनि० ४पीतवर्णे ५श्वेतवर्णे ६अरुणवर्णे च पु० ७तद्विशिष्टे त्रि०

स्त्रियां गौरा०ङीष्। ८श्रीचैतन्यदेवे महाप्रभौ वनमा-लसंहिता। ९पद्मकेशरे मे०मेदि० १०स्वर्णे ११कङ्कुमे च मे० राजनि०। तत्र श्वेतवर्णयुक्ते "कैलासगौर वृष-मारूढोः" रघुः पीतवर्णार्थे "गोरोचना पनितान्त गौरे" कुमा० अरुणवर्णार्थे "कीर्णैः पिष्टातकोधैः क्षत दिवसमुखैः कुङ्कुमचोदगौरैः" रत्नाव०"तरुणादित्यगौरैश्च शरगौरैश्च वानरैः" रामा० कि०२०।स०। "नितान्तगौ-र्यो हृतकङ्कुमेच्छलम्" किरा० १२परिमाणभेदे यथोक्तं याज्ञ०" जालरन्ध्रसमरीचिस्थं त्रसरेणुरजः स्मृतम्। ते ऽष्टौ लिक्षा च तास्तिस्रो राजसर्षप उच्यते। गौरस्तु ते त्रयः षट् च यवोमध्यस्तु ते त्रयः" इति। १३रूपभेदे पु० स्त्री "गौरजो महिषः कृष्णः शूकरो गवयो रुरुः। द्विशफाः पशवश्चैते अविरुष्ट्रश्च सत्तम!। खरोऽश्वोऽतरो गौरः शरभश्चमरी तथा। एते चैकशफाः प्रोक्ताः!" भाग० ३।१०।२२। अ०। "महोरगाश्च भवतो विद्रवन्ति सगौरकृष्णाः शरभा-श्चमर्यः" भाग० ८।२।१६अ०। १४विशुद्धे त्रि० मेदि०। "कडारा०कर्मधारयेऽस्य वा पूर्वनिपातः गौरपटःपटगौरः।

**गौरत्व** न० गोरस्य भावः कर्म्म वा ष्यञ्। वैश्यकर्म्मभेदे पाशुपाल्ये। "कृषिगौरक्ष्यवाणिज्यं वैश्यकर्म्म स्वभाव-जम्" गीता।

**गौरग्रीव** पु० गौरी ग्रीवास्य। १देशभेदे २तद्देशवासिनि च तस्यापत्यम् तस्येदं वा रैवतकाद्य गौरग्रीव्य। ३तदपत्ये पुंस्त्री ४तत्सम्बन्धिनि त्रि० गौरग्रीवदेशस्य इ०स०।४अ० कूर्मविभागे मध्यभागे उक्तः। "गौरग्रीवो-हैहिकगुडाद्यस्य पाञ्चालाः"।

**गौरचन्द्र** पु० चैतन्यदेवे महाप्रभौ "कृष्णचैतन्यो गौराङ्गो गौरचन्द्रः शचीसुतः। प्रभुर्गौरो गौरहरि र्नामानि भक्तिदानि मे" वनमालसंहिता एतस्य दृढतरप्रमाणत्वं संप्रदायविदो न मन्यन्ते।

**गौरजोरक** पु० कर्म०। श्वेतजोरके। राजनि०।

**गौरतित्तिरि** पुंस्त्री श्वेततित्तिरिभेदे। "तित्तिरिः सर्व-दोषघ्नो ग्राही वर्णप्रसादनः। स्निग्धाम्लमानिलहरो विशेषात् गौरतित्तिरिः" सुश्रुते तन्मांसगुणोक्तिः [राजनि०]

**गौरत्वच्** पु० गौरी त्वक् यस्य। इक्षुदीक्षके (जियापुति)

**गौरपुष्ठ** पु० यमसभासदृक्षरूपभेदे। "इन्द्रद्युम्नो भीमजातु गौरपुष्ठो नकोगयः" भा०स० अ० मयसभावर्णने।

**गौरमुख** पु० गौरं विशुद्धं मुखमस्य। शमीकौ; शिष्ये १मुनिभेदे तेन हि शिष्येण स्वपुत्रस्यक्षिणापदृत्तान्तं शमीकर्षिः परिक्षिते न्यवेदयत् ततृकथा भा०आ०४२अ०। "एवमादिश्य शिष्यं स प्रेषयामास सुव्रतः। परिक्षिते स्वपतये दत्तापत्यो महातपाः। संदिश्य कृशलप्रश्नं कार्य्यवृत्तान्तमेव च। शिष्यं गौरमुखं नाम शीलवन्तं समाहितम्। सोऽभिगम्य ततः शीघ्रं नरेन्द्रं कुरुवर्द्धनम्। विवेश भवनं राज्ञः पूर्वं द्वाःस्थैर्निवेदितः। पूजितस्तु नरेन्द्रेण द्विजो गौरमुखस्तदा। आचख्यौ च परिश्रान्तो राज्ञे सर्व्वमशेषतः। शमीकवचनं घोरं यथोक्तं मन्त्रिसन्निधौ। गौरमुख उवाच। शमीकोनाम राजेन्द्र! विषये वर्त्तते तव। ऋषिः परमधर्मात्मा दान्तः शान्तो महातपाः""तस्य त्वया नरव्याघ्र! सर्पः प्राणैर्वियोजितः। अवसक्तो धनुष्कोट्या स्कन्धे मौनान्वितस्य च। ज्ञात्वा-स्य तत्कर्म पुत्रस्तस्य न चक्षमे। तेन शप्तोऽसि राजेन्द्र! पितुरज्ञातमद्य वै। तक्षकः सप्तरात्रेण मृत्युस्त्वां भविष्यति। तत्र रक्षां कुरुष्वेति पुनः पुनरथाब्रवीत्। तदन्यथा न शक्यञ्च कर्त्तुं केनचिदप्युत। न हि शक्नोमि तं वक्तुं पुत्रं कोपसमन्वितम्। ततोऽहं प्रेषितस्तेन तव राजन्! हितार्थिना"। गौरं शुक्लं मुखमस्य। श्वेत-मुखाढ्ये त्रि० स्त्रियां स्वाङ्गत्वात् वा ङीष्।

**गौरमृग** पु० स्त्री निजकर्म०। गौरवर्णे मृगभेदे स्त्रियां ङीष्। "क्रोष्टा मायोरिन्द्रस्य गौरमृगः" यजु० २४।२।

**गौरव** न० गुरोर्भावः कर्म्म वा गुरुत्वा० वा अण्। १गुरुत्वे २तत्कर्म्मणि च। "तथापि यन्मयापि ते गुरुरित्यक्ति गौरवम्" माघः। "तामगौरवभेदेन" "मार्यस्य गौर-वमाचितेषु" कुमा०। "सहस्रं तु पितॄन् माता गौरवेणातिरिच्यते" मनुः। गौरवं साधनतयास्त्यस्त्र अच्। ३गौरवहेतुके अभ्युत्थाने हेम०। गुरोरिदम् अण्। ४गुरुसम्बन्धिनि त्रि०। "मध्यमया भगीनेन गुरो-र्गौरवत्सरः" वसिष्ठसिद्धान्तः।

**गौरवाहन** पु० श्वेतवाहने रूपभेदे। कुन्तिभोजो महा-तेजाः पार्थिवो गौरवाहनः" भा० स० २२अ०।

**गौरवित** त्रि० गौरवं जातमस्य तारा० इतच्। पूज्ये। "गौरवितक्रियाहेतुर्भक्तिः" शब्दच० मथुरानाथः।

**गौरशाक** पु० गौरः शाकोऽस्य। मधुकभेदे जटा०।

**गौरशिरस्** त्रि० गौरं शिरोऽस्य अतिशुद्धत्वात्। १शुक्ल-वर्णकेशयुक्ते २मुनिभेदे पु०। "शङ्खश्च लिखितश्चैव तथा गौरशिरा मुनिः" भा० स० ७अ० इन्द्रसभ्योक्तौ। स च

राजनीतिशास्त्रप्रणेता यथाह" भा० शा० ५८अ०। "विशालाक्षश्च भगवान् काव्यश्चैव महातपाः। सह-स्राक्षो महेन्द्रश्च तथा प्राचेतसो मनुः। भारद्वाजश्च भगवांस्तथा गौरशिरा मुनिः। राजशास्त्रप्रणेतारो ब्रह्मण्या ब्रह्मवादिनः"

गौरसर्षप पु०कर्म०। १श्वेतसर्षपे (सितसरिषा) रत्नमाला। तद्गुणा भावप्र० उक्ता यथा "गौरस्तु सर्षपः प्राज्ञैः सिद्धार्थ इति कथ्यते। सर्षपस्तु रसे पाके कटुःस्निग्धः सतिक्तकः। तीक्ष्णोष्णः कफशमनो रक्तपित्ताग्निवर्द्धनः। रक्तोष्णरोगजेत् कण्डूं कुष्ठकोष्ठकृमिप्रहान्। यथारक्त-स्तथा गौरः किन्तु गौरोवरोमतः"। स च शौमशोधकः यथाह मनुः "श्वीफलैरंशुपट्टानां शौमाणां गौरसर्षपैः" द्रव्यशुद्धौ। "सगौरसर्षपैः शौमम्" गौरसर्षप-कल्केन साध्येन साधितश्च च" याज्ञ०। २राजसर्षपत्व-यमिते परिमाणे च। "त्रसरेणवोऽष्टौ विज्ञेया लिक्षैका परिमाणतः। ता राजसर्षपास्तिस्रस्ते त्रयो गौर-सर्षपः" मनुः।

गौरसुवर्ण पु० गौरः श्वेतः सुवर्णोऽस्य। चित्रकूट-प्रसिद्धे पत्रशाकभेदे "गौरसुवर्णं शिशिरं कफपित्त-ज्वरप्रणुत्। दाहारुचिभ्रान्तिरक्तश्रमहृत् पथ्यमेव च" राजनि० तद्गुणा उक्ताः।

गौरा स्त्री गौर+गौरादिगणे वर्णवाचिनएव गौरशब्दस्य पाठात् विशुद्धार्थपरत्वे टाप्। विशुद्धायाम् स्त्रियाम् हिरूपकोषः। तदर्थपरतायामेव टाबन्तता वर्णवरत्वे तु ङीषन्तेत्याकारे स्थितम्।

गौराङ्ग पु०गौरं श्वेतं पीतं वाऽङ्गमस्य। १विष्णौ "श्वेतोरक्त-स्तथा पीत इदानीं कृष्णतां गतः" भाग०१०स्क० तस्य युगावतारे श्वेताङ्गत्वात् पीताङ्गत्वाच्च तथात्वम्। गौर विशुद्धमङ्गमस्य। विशुद्धाङ्गियुक्ते नन्दनन्दने २श्री कृष्णे च "गौराङ्गं गौरदोराङ्गं पठेत् स्तोत्रं कृताञ्जलिः। नन्दगोपसुतं चैव नमस्यामि गदाग्रजम्" ब्रह्म यामलम्। "गौराङ्गो नादगम्भीरः स्वनामास्तुतलाञ्छनः" कृष्णयामलम्। ३नवद्वीपस्थशचीसुते इति वैष्णवाः। ते हि तत् परतयैव यामलवाक्यद्वयं व्याचक्षुः ४गौर-वर्णदेहके त्रि०स्त्रियां ङीष्। गौराङ्गताहेतुरौषधस्तद्धं गरु० पु० १६४ अ० यथा "कृष्णाखदिरसारस्तु सगोमूत्रश्च तत्त्वचः। जलपिष्टा हरिद्रा च सिद्धा सन्दानवेन हि। साहिषेण घृतेनैव लेपिता हन्य-भ्यङ्ग! अथवा उद्वर्त्तनं कृत्वादङ्गगौरत्वसाधनम्"।

गौराजाजी स्त्री कर्म०। श्वेतजीरके राजनि०।

गौरादि पु० "पिदृगौरादिभ्यश्च" पा० उक्ते ङीषन्निमित्ते शब्दगणभेदे स च गणः पा० ग० सू० उक्तोयथा "गौर मत्स्य मनुष्य मृङ्ग पिङ्गल हय गवय सृक्वय कृष्ण पृट तृण द्रुण द्रोण हरिण कारण पटर उणक आमलक कुवल बिल्व पदर कर्कर तर्कार शर्कार पुष्कर शिखण्ड सनद शष्कखण्ड सनन्द सुषम सुख अखिन्द गडुल पाण्डुश आढक आनन्द आवल सुपाट आपङ्क्ति शब्कुल सर्म सूर्प सूच यूप यूष स्रुप मेघ वल्लक धातक सल्लक सालक मालत साल्वक वेतस इष अतस उभय भृङ्ग मङ्ग मठ छेद भेद भेत् तच्चत् अनड्वह अनड्वाह एषण (करणे) देह देहल आकादन गवादन तेजन रजन लवण औदृगा-हमानि गौतम पारक अयस्कूण भौरिकि भौलिकि भौलिङ्गि यान मेघ आलम्बि आलजि आलम्बि आलम्बि केवाल आपक आरट नट टोट नोट मूलाट शातन पोतन पातन पानठ आक्षरण अधिकरण अधिकार आय-व्ययाय प्रत्यवरोहिन् रोचन सुमङ्गल (संज्ञायाम्) अखुर सुन्दर मण्डल मन्थर मङ्गल पट पिण्ड षण्ड उर्द गुर्द शम क्षद आर्द क्षुद पाण्ड भाण्ड कोद्राण्ड कदर कन्दर कदल तरुण तलुन कल्माष क्षुद्र मक्षु सोम सौधर्म रोहिणी (नक्षत्रे) रेवती (नक्षत्रे) विमल निष्कल पुष्कल कद्री (स्रोणिवचने)। पिप्प-ल्यादयश्च। पिप्पली हरितकी कोशातकी शमी वरी अरी पृथिवी कोद्री मातामही पितामही आजतिगणः"। गौरशब्दस्य तोयधभिन्नवर्णवाचित्वेऽपि प्रातिपदिक-स्वरेणोत्सर्गतः कृष्णेतिपदन्योदात्ततया अन्यतो ङीषि-त्यस्याप्रवृत्तेर्गणे पाठः।

"उषाद् द्व्रजजिनमगौरादयः" पा० उषात् परस्य द्व्रज-नादेरन्योदात्तायां पर्युदस्ते शब्दगणे स च गणः पा० ग० उक्तो यथा "गौर तैष तैल लेट लोट दिष्ट्या कृष्ण कन्या स्वध कल्पाद।" उषगौरः

गौरार्द्रक न० नित्यकर्म०। स्वार्थरविषभेदे हेमच०।

गौरावस्कन्दिन् पु० सुरोरिदं गौरवं गुरुपत्नीरूपं कलत्रं तदास्कन्दति या + स्कन्द–णिनि वेदे पृषो० वर्णविप-र्ययः। अकृत्याजारे शक्रे इन्द्रागच्छेत्युपक्रमे "गौर-वास्कन्दिनकृत्यार्थं जारेति" शत० ब्रा० ३।३।४।१८।

गौराश्व पु० गौरोऽश्वोऽस्य । १नृपभेदे । "अलर्कः कक्षसेनश्च मदो गौराश्व एव च" भा०स० ८ अ० । यमसभ्योक्तौ २श्वेतवाहने श्वेताश्वे अर्जुने च ।

गौरास्य पुंस्त्री गौरमास्यं यस्य । गौरमुखे कृष्णदेहे वानरभेदे राजनि० । स्त्रियां जातित्वेऽपि योपधत्वात् न ङीप् किन्तु टाप् ।

गौराद्धिक पुंस्त्री गौरः शुभ्रः ऋद्धिः कर्म० संज्ञायां कन् । सुश्रुतोक्ते निर्विषे सर्पभेदे "गौराद्धिकदर्वीमुख" इति सुश्रु० ऋद्धिशब्दे दृश्यम् ।

गौरि पु० गौरस्यापत्यम् इञ् । आङ्गिरसे ऋषिभेदे "गौरेराङ्गिरसस्य साम" श्रुतिः ।

गौरिक त्रि० गौरवर्णोऽस्त्यस्य ठन् । १श्वेतवर्णयुक्ते २श्वेतसर्षपे पु० "यवाङ्गौरिकोन्मिश्रैः पादलेपः प्रशस्यते" सुश्रुतः ।

गौरिमत् त्रि० गौरीं मन्यते मन+क्विप् ङ्तः ङ्याप्पोरिति संज्ञायां हस्वः । १गौरीनामयुक्ते गौरीतीर्थे तत्रस्थे २नदीभेदे स्त्री गार्ङ्गर० ङीन् । (भोगवत् गौरीमत्) संज्ञायाम् तद्धितलुगुक्तेः संज्ञायामेव ङीन् अन्यत्र ङीप् ।

गौरिल पु० गौरवर्णोऽस्त्यस्य बा० इलच् । १सिद्धार्थे श्वेतसर्षपे २लौहचूर्णे च मेदि० ।

गौरिवीति पु० गौर्यां वेदवाचि वीतिः विशेषगतिरस्य "ङ्याप्पोरिति" संज्ञायां हस्वः । ऋक्षिसुनिपुत्रे ऋषिभेदे । "गौरवीतिः शाक्त्यः शतमिवाह" शत० ब्रा० १२।८।३।७। "सोमसामा गौरवीतेरवर्द्धनः" ऋ० ५।१८।१। गौरिवीते रेतत्साम कस्य मन्त्रदृष्टुः" भा० । गौरिवीतिना दृष्टं साम अण् । गौरिवीत तद्दृष्टे सामभेदे "तृतीयसवनाद्विष्णोः त्रिपिबिष्टवतोषु गौरिवीतेन" कात्या० श्रौ० २५।१३।६। "गौरिवीतं नाम सामभेदस्तेन स्तुवीरन्" कर्कः ।

गौरिशृङ्ग पु० गौर्या इव शृङ्गमिव शृङ्गं यस्य बच् समा० हस्वः सुधामा० अत्वम् । गौरीतुल्यशृङ्गयुक्ते ।

गौरी स्त्री गौर+गौरा० ङीप् । १गौरवर्णायां स्त्रियाम् "कपोलभित्तीरिव कोद्रगौरीः" माघः । २हिमाचलसुतायां कालीनाम्न्यां मेनकाकन्यायां तस्याः प्राक् कृष्णवर्णत्वेन जातित्वेऽपि पश्चात् पीताङ्गत्वात् तथात्वं कालिकापुराणशब्दे २०।५ पृ० ४५ अ० तन्मूलं दृश्यम् । पुराणान्तरे "योगाग्निदग्धदेहा सा पुनर्जाता हिमालये । शङ्खेन्दु कुन्दधवला ततो गौरीति सा स्मृता:" इत्युक्तम् तच्च कल्पान्तरविषयम् । "अष्टवर्षा भवेद्गौरी नववर्षा तु रोहिणी" स्मृत्युक्तायां ३अष्टवर्षायां स्त्रियाम् । ४हरिद्रायां ५दारुहरिद्रायाम् ६गोरोचनायां ७वरुणपत्न्यां च । ८प्रियङ्गुवृक्षे ९पृथिव्यां १०नदीभेदे च मेदि० "क्षेमे प्रसेनजिद्भार्यायां गौरीं नाम पतिव्रताम् । अभिशप्ता तु सा भर्त्रा नदी वै वाङ्कदाऽभवत्" हरिवं० १२ अ० ११उक्तायां सूर्यवंश्यप्रसेनजिद्भार्यायाम् तस्याएव वाङ्कदानदीरूपत्वोक्तेः नदीविशेषः वाङ्कदानदीपर इति बोध्यम् । १३बुद्धशक्तिभेदे हेम० । १४मल्लिकायां १५श्वेतदूर्वायां १६मल्लिकायां १७तुलस्यां १८सुवर्णकदल्याम् १९आकाशमांस्यां च राजनि० । सर्वांसाङ्गासां शुभ्रपीतरक्तविशुद्धपत्रपुष्पादियुक्तत्वात्तथात्वम् २०रागिणीभेदे संगीतदामो० । २०वाचि निघण्टुः । "गौरीर्मिमाय सलिलानि तक्षत्येकपदी द्विपदी सा चतुष्पदी । अष्टापदी नवपदी बभूवुषी सहस्राक्षरा परमे व्योमन्" ऋ० ।।१६४।४०। "गौरी मेरशृङ्गशोभा शब्दब्रह्मात्मिका च वाक् मिमाय । मिमतिः प्रतिष्ठार्थे धातुः । प्रतिष्ठितानि घटादिद्रव्याणि तन्वती तत्तद्व्याचकत्वेन निष्पादयन्ती । एकपदी अव्याकृतत्वेनैकप्रतिष्ठानैकरूपावाक्प्रकृतिः । द्विपदी सुप्तिङ् भेदेन पदद्वयवती । चतुष्पदी नामाख्यातोपसर्गनिपातभेदेन । अष्टापदी आमन्त्रितसहितसुप्तिङभिरष्टभेदेनाष्टापदी । नवपदी नवसु पदेषु भवन्ती बभूवुषी पश्चाद्वक्तृविधाभिव्यक्तिरूपेयुषी परमे व्योमन् उत्कृष्टे हृदयाकाशे मूलाधारे सहस्राक्षरानेकाकारेण व्याप्ताऽनेकध्वनिप्रकारा भवतीत्यर्थः" भा० । निरु० ।।।४। व्याख्यानं दृश्यम् । गौरीरिति सुलोपाभावश्छान्दसः । "सोमो गौरी अधिश्रितः" ऋ० ८।१।।१२।२। गौरी गौर्याम् मध्यमायां वाचि" भा० "सुपां सुलुक्" पा० सप्तम्या लुक् । "ईदूतौ च सप्तम्यर्थे" पा० तस्य ह्रस्वसंज्ञत्वात् न यणादेशः, भा० । २दीप्तिमत्यां स्त्रियां निरु० । "गौरी रोचते ज्वलतिकर्म्मणः । अथ पीतोवा गौरोवर्णः एतस्मादेव प्रशस्तो भवति तस्या एषा भवति" "गौरीर्मिमाय सलिलानि" श्रुति मधिकृत्य उक्तनिरुक्तिः । पार्वतीरूपा गौरी च माघशुक्लचतुर्थ्यां पूजा यथाह तिथ्यविष्योत्त० पु० माघशुक्लमधिकृत्य "चतुर्थी वरदा नाम तस्यां गौरी सुपूजिता । सौभाग्यमतुलं कुर्यात्"

गौरीकान्त पु० ६त० महादेवे गौरीनाथादयोऽप्यत्र ।

गौरीगुरु पु० ६त० । पार्वतीपितरि हिमालये "गौरीगुरोर्म-

ङरमाविवेष" रघुः "अखिलमिदमसद्यं गौरीगुरोः" किरा० गौरीपित्रादयोऽण्यत्र ।

गौरोज न०गौर्यारजसेा जायते जन–ड। १अभ्रके राजनि० अस्यतत्रज्ञे २११ पृ० डच्यम् । २कार्त्तिकेये पु० ।

गौरोतक्रम् न० गौर्या निर्मितं तक्रम् । "लवणं मरिचं विश्वं जीरं नारङ्गजं त्वचम् । एलाचूर्णान्वितं तक्रं भूषवेत् तर्पिङ्गुना । गौर्यैदं विहितं तक्रं सर्वदोषनिवर्हणम्" शब्दार्थचि० उक्ते तक्रभेदे

गौरीपट्ट पु० गौर्याः पट्टमिव स्थानम् । शिवलिङ्गस्थे गौर्याः पूजास्थाने शिवलिङ्गशब्दे विवृतिः०

गौरीपुत्र पु०ष्टत०। कार्त्तिकेये गौरीतनयादयोऽप्यत्र [राजनि०

गौरीपुष्प पु० गौरो हरिद्रेव पीतं पुष्पमस्य । प्रियङ्गुवृक्षे

गौरीमन्त्र पु० तन्त्रसारोक्ते गौर्या मन्त्रभेदे तस्योद्धारश्च "ह्रीं गौरि! रुद्रदयिते ! योगेश्वरि ! सवर्म (ङँ) फट् । द्विठान्तः षोडशवर्णोऽयं मन्त्रः सद्भिरुदीरितः"

गौरीललित न० गौरी हरिद्रेव ललितम् पीतवर्णत्वात् । हरितालेे राजनि० ।

गौरीशिखर न० गौर्यांस्तपःस्थानं शिखरम् । स्वनामख्याते पर्वतभेदशृङ्गरूपे तीर्थभेदे "प्रजासु पश्चात् प्रथितं तदाख्यया जगाम गौरी शिखरं शिखण्डिमत्" कुमा०

गौरीसुत पु० ष्टत० । १अष्टवर्षोढाजतनये शब्दार्थचि० । २कार्त्तिकेे च । [ ठक् । गुरुपत्नीगामिनि ।

गौरुतल्पिक पु० गुरुतल्पं गुरुपत्नीं गच्छति परदारा०

गौलक्षणिक त्रि० गालक्षणं वेत्ति तदुपजीवमधीते वा "विद्यालक्षणकल्पान्ताच्चार्त्ति० ठक् । १गोलक्षणवेत्तरि २तदुपजीव्याध्येतरि च ।

गौलन्द्य पुंस्त्री गालन्दगोत्रापत्यं गर्गा० यञ् । गोलन्दिगोत्रापत्ये स्त्रियां जातित्वात् ङीप् यलोपः । गोलन्दी तदपत्यस्त्रियाम् । गौलन्द्यश्च क्षत्राः कण्वा० अण् यलोपः । गौलन्द्यास्तच्छात्रेषु ।

गौलाङ्गायन पुंस्त्री गोलाङ्गस्य गोत्रापत्यम् यस्का० फञ् । गोलाङ्गेर्गोत्रापत्ये स्त्रियां जातित्वात् ङीप् ।

गौलिक पु०गुडे साधु ठक् डस्य लः । खण्डकडङ्गे राजनि०

गौलोमन त्रि० गोलोमेव शर्करा० अण् । गोलोमसदृशे स्त्रियां ङीप् ।

गौल्मिक पु० गुल्मे रक्षणार्थस्थानभेदे नियुक्तः ठक् । गुल्मरूपरक्षणार्थस्थाननियुक्ते यामिके सेनाभेदे "तथैव गुल्मे संप्रेक्ष्य सयानान् मध्यगौल्मिकान्" "द्वाःस्थाश्च द्वारपाश्च द्वाःस्थास्तथा गुल्मानि गौल्मिकाः" भा०शा० ८अ० [राजनि० ।

गौल्व न० गुडस्य भावः यञ् डस्य लः । माधुर्ये मद्यरसे

गौशतिक त्रि० गोशतमस्यास्ति "एकगोपूर्वात्" पा० शतसहस्रादित्वपक्षपक्ष ठञ् । गोशतस्वामिनि स्त्रियां ङीप् ।

गौष्ठ त्रि० गोष्ठां भवः यत्वद्या० अण् । गोष्ठभवे स्त्रियां ङीप् । स्वार्थे अण् ङीप् गोष्ठीत्यपि गोष्ठ्याम् । तच्छब्दस्यैव यत्वद्यादिषु पाठ इत्यन्ये ।

गौष्ठीन न० पूर्वं भूतं गोष्ठं खञ् । भूतपूर्वगोष्ठे । "तान्तु वाच्य स गौष्ठीने वने स्त्रीपुंसभीषणे" भट्टिः

गौसहस्रिक त्रि० गोसहस्रमस्यस्य गौशतिकवत् ठञ् । गोसहस्रस्वामिनि ।

गौहलव्य पुंस्त्री गुहलोर्गोत्रेगोत्रापत्यम् गर्गा०यञ् । गुहलुगोत्रापत्ये स्त्रियां ङीप् लोहितना० स्वार्थे फक्वः । गौहलव्यायनी ।

ग्धि स्त्री ग्रद–क्तिन् वेदे धसादेशः उपधालोपश्च तस्य जश्त्वविधौ न स्थानिवत्त्वम् । भक्षणे । "सग्धिश्च मे" सि० कौ० धृता श्रुतिः ।

ग्ना स्त्री गम–बा० ना डित्व । स्त्रीभावे "ग्नास्त्वा क्लन्नप्रसोऽतन्वत पयित्नो वयन्" ता०ब्रा०१।८।६। "गच्छन्ति पुंमासएना इति ग्नाः स्त्रियः" भा० "मेना ग्ना इति स्त्रीणां स्त्रियस्त्यायतेरपत्यपथकर्म्मणः । मेना मानयत्येनाम् । ग्ना गच्छन्त्येनाः" निरु० । २देवपत्न्याम् । "आ ग्ना अग्न इहावसे होत्राम्" ऋ०१।२२।१०। ग्ना देवपत्नी भा० । ग्ना अस्त्रग्य मतुप मस्य वः । ग्नावत् सपत्नीके । "अभि यज्ञं गृणीहि नो ग्नावो नेष्टः" ऋ० १।१५।३। "मतुवसोरः" संबुद्धौ विसर्गः भा० । ३वाचि निघ० । "तव ग्नावो मित्रमहः सजात्यम्" ऋ० २।१।५। ग्ना स्तुतिवाचस्ताः सन्तीति मतुप् । "छन्दांसि वै ग्नाः इति श्रुतेः ४वेदे च वेदस्य वाग्विशेषत्वात्तथात्वम् । "नराशंसो ग्नास्पतिर्नो अव्याः" ऋ० २ ३८।१० ग्नास्पतिर्देवपत्नीनां पतिश्छन्दसां पतिर्वा" भा० "ग्नास्पतिरित्यत्र वा० सुट् । सान्तं वा शब्दान्तरम् अतएव निघण्टौ ग्नाः इति विसर्गान्तं पठितम् ।

ग्मा स्त्री गम्यतेऽत्र गम–बा० डा । पृथिव्यां निघ० ।

ग्रथ कुटिलीकरणे स्वार्थे० इदित् सक० सेट् । ग्रन्थते अग्रन्थिष्ट अग्रन्थत् ।

ग्रथन न० ग्रन्थ–बा० ल्यु नलोपः । (गाँथा) । ग्रन्थने

"दोषस्थिरत्वात् ग्रथनाच्च" सुश्रुतः। "ग्रथनञ्च विदर्भेषु संपुटोरोधनं तथा। योगः पञ्चव इत्येते विन्यासाः षट्सु कर्म्मसु"। "मन्त्रेणालिरितान् कृत्वा साध्यवर्णान् यथाविधि। ग्रथनं तद्विजानीयात् प्रशस्तं शान्तिकर्म्मणि" २तत्त्वसारोक्ते "मन्त्रेणालिरितसाध्यवर्णविन्यासभेदे च।

**ग्रथित** त्रि॰ ग्रन्थ-संदर्भे क्त नलोपः। सूत्रादिना कृतसन्दर्भे माल्यादौ "पर्य्याप्तपुष्पितास्फलवतस्पर्शाः" प्रयो॰। "ग्रथितैः रत्नपत्रोत्तरीयम्" "कुसुमैर्ग्रथितामपार्थिवैः" (सजम्) रघुः। "तच्छ्लोककूटमद्यापि ग्रथितं सुहृदं सुने" भा॰ग्रा॰ १ग्र॰। "वर्षैः कतिपयैरेव ग्रथितस्य स्वरैरिव" माघः। २क्रान्ते शङ्किते च मेदि॰।

**ग्रथिन्** त्रि॰ग्रन्थ-घा॰इनि किच्च नलोपः। जल्पके। "ग्रक्रन्नन् ग्रथिनो मध्रवाचः" ऋ॰ ७।६।३। "ग्रथिनो जल्पकान्" भा॰।

**ग्रथुन** पु॰ ग्रन्थ-बा॰ नङ्। स्तवके। "ग्रलाटु नीलमित्युक्तं ग्रथुः स्तवक उच्यते। कपर्दिकाभितः केशाः मूर्द्धि पश्चात् कपर्दिका" भट्टनारायणधृतवाक्यम् "पश्चात् पतिरवस्थाय युग्मनमौड्डुम्बरं ग्रलाटुग्रथुमावभ्राति" गोभिलभट्टम्।

**ग्रन्थ** संदर्भे वा चु॰उभ॰पक्षे क्या॰ प॰सक॰सेट्। ग्रन्थयति-ते ग्रन्थयति ग्रजग्रन्थत् ग्रग्रन्थीत्। ग्रन्थयामास बभूव चकार चक्रे। ग्रजग्रन्थ ग्रजग्रथतुः-ग्रजग्रन्थुः। ग्रजग्रन्थिव ग्रजग्रन्थिव इत्येके। ग्रस्य कविकल्पद्रुमे पा॰ गणे च परस्मैपदिष्वेव क्रैयादिकस्य पाठः। णिचि तु उभयपदिता। भारद्वाजीयास्तु पठन्ति "ग्रन्थग्रन्थिग्रन्थिभ्यः ग्रात्मनेपदाकर्म्मकाणामात्मनेपदेष्वुपसंख्यानम्" ग्रन्थि ग्रन्थ्योरार्द्धधातुकत्वात् णिजभावपक्षे यङ्लुगन्तः। ग्रन्थति ग्रन्थम्। ग्रन्थति मेखलान्देवदत्तः। ग्रन्थते ग्रन्थः। ग्रग्रन्थिष्ट। ग्रन्थते। ग्रग्रन्थिष्ट। इति भारद्वाजीयमते ग्रात्म॰। तेनोभयपदता। सि॰कौ॰पक्षे भ्वा॰दित्वमपि तेन ग्रन्थति इत्यादि क्रैयादिकयोस्तु ग्रग्रन्थीत्। ग्रग्रन्थीत् सि॰कौ॰। एतच्च कर्म्म कर्त्तरि न तु कर्त्तरि इत्यन्ये

उद्+उत्क्षेप्य यजने। "केशपक्षान् उदग्रन्थ्रेतरान्" ग्राश्व॰श्रौ॰१०।८।८ "ग्रताग्रतानोदुग्रथितैः स केशैः" रघुः। "माल्यानि तस्योदुग्रथितानि पट्टैः" भा॰ व॰ ११२ ग्र॰ "कर्म्मायत्तं फलं पुंसां ग्रथितन्तूदग्रथयन्ति सन्तः" भाग॰ ४।२२।३७।

**ग्रन्थ** पु॰ ग्रन्थ-सन्दर्भे भावे घञ्। १ग्रुम्फने। कर्म्मणि घञ्। २शास्त्रे "ग्रन्थग्रन्थिरिह क्वचित् क्वचिदपि न्यासि प्रयत्नान्मया" नैष॰। "ग्रन्थग्रन्थिं तदा चित्रं सुनिर्गूढं कुटङ्गलाः" भा॰ ग्रा॰ १ग्र॰। ३धने ४ह्रस्वलिंगवइर्णमितानुष्टुप् छन्दस्के श्लोके हेम॰।

**ग्रन्थकार** स्त्री ग्रन्थं करोति ग्रण् उप॰स॰। ग्रन्थकारके (शाकल्यम्) "तस्माद्ध भगवांस्तूष्णीं ग्रन्थकारो भविष्यति" भा॰ ग्रानु॰ ३८५ ग्र॰। ङ-क्विप् कृत॰। ग्रन्थङ्कृद॰ ग्रच्। "ग्रन्थङ्कृल्लोकविख्यातो भविताखिलरामरः" भा॰ ग्रानु॰ १४ग्र॰। "ग्रन्थारम्भे विघ्नविघाताय समुचितेष्ट देवतां ग्रन्थकृत् परामृशति" काव्यप्र॰। क्तच्। ग्रन्थकर्त्तृ ष्वुन् ग्रन्थकारक ग्रन्थार्थे त्रि॰। ङीप्। ग्रन्थकुटी स्त्री ग्रन्थस्य कुटीव। लेखस्थाने लिका॰।

**ग्रन्थन** न॰ ग्रन्थ-भावे ल्युट्। (गाँठा) सन्दर्भे ग्रुम्फने हेमच॰। चु॰ ग्रन्थ-युच्। ग्रन्थनाऽग्रन्थल स्त्री।

**ग्रन्थसन्धि** पु॰ कृत॰। ग्रन्थस्य सन्धौ। तन्त्रोक्तानि च कतिचित् लिका॰पठितानि। "सर्गो वर्गः परिच्छेदोद्घाताध्यायाङ्कसंग्रहाः। उच्छ्वासः परिवर्त्तश्च पटलः काण्डमस्त्रियाम्। स्थानं प्रकरणं पर्य्यायिकस्तु ग्रन्थसन्धयः"। उपक्रमे गुत्सादीयुक्तेः ग्रन्यदपि ग्रन्थसन्धिनाम भवतीति स्थितम्। तेन कुसुमाञ्जलौ स्तवकः, काव्यप्र॰उल्लासः,। वेदे प्रपाठकब्राह्मणानुवाकादयः।

**ग्रन्थि** पु॰ ग्रन्थ-संदर्भे भावे करणादौ वा यथायथं सर्व्वधातुभ्य, इन् नित्स्वरः, "खनिकद्यज्यसीत्यादिना इर्वा स्वरे भेदः। १वंशादिपर्व्वणि (गाँट) ग्रमरः। २काण्डसन्धौ ३भद्रमुस्तायाम् ४स्थितावनद्धां ५पिण्डाकारौ राजनि॰। ६ग्रन्थने ७रोगभेदे मेदि॰। ८माया पाशे "भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्व्वसंशयाः" तैत्ति॰ उप॰। ग्रणि-कौटिल्ये भावे इन्। ऽकौटिल्ये। कर्त्तरि इन्। १०ग्रन्थिपर्व्वाङ्के मेदि॰। रोगभेद निदानादि सुश्रुते दर्शितं यथा "ग्रथातो ग्रन्थ्यपच्यर्बुदगलगण्डानां निदानं व्याख्यास्यामः। वातादयो मांसमसृक्प्रदुष्टाः सन्दूष्य भेदय कफानुविद्धम्। इत्युक्तं यैश्चित्तन्तु शोफं कुर्व्वन्त्यतोऽग्रन्थिरिति प्रदिष्टः। ग्रायस्यते ग्रयते ग्रति तोदं प्रत्यस्यते क्षत्यत एति भेदम्। क्षणोऽस्यदुर्व्वस्तिरिवातनश्च भिन्नः सुवेद्यानिलजोऽरुमच्छम्। दन्दह्यते धूयति चातिमात्रं पाच्यते पच्यत इतीव चापि। रक्तः सपीतोऽथ वापि पित्ताद्भिन्नः सुवेदुष्णमतीव चारुम्। शीतो

विस्फोटस्फरजोऽतिकण्डुः पाषाणवत्संघननोपपद्यः। विरामिदद्विव कफप्रकोपाद्भिन्नः स्रवेच्छुक्लघनञ्च पूयम्। शरीरदद्विचयदद्विहानिः स्निग्धोमहानल्परुजोऽतिकण्डुः। मेदःक्षतो मक्षति चातिभिन्ने पिण्याकसर्पिःप्रतिमन्तु मेदः। व्यायामजातैरवसन्न तैस्तैराच्छिद्य वायुर्हि शिरावितानम्। अंपोह्य सङ्घोच्य विशोष्य वापि ग्रन्थिं करोत्युन्नतमाशु दृत्तम्। ग्रन्थिः स्थिराजः स तु कृच्छ्रसाध्यो भवेद्यदि स्यात्सरुजश्चलश्च। अरुक् सवर्णश्चलोमहांश्च मर्मोत्थितश्चापि विवर्जनीयः"

ग्रन्थिक न० ग्रन्थिरिव+अयति–कै–क यन्थ+अस्त्यर्थे ठन् वा। १पिप्पलीमूले २ग्रन्थिपर्णे ३गुग्गुलौ ४करीरे वंशे ५दैवज्ञे ६मरुदेशाख्ये पाषण्डे च पु० मेदि०।

ग्रन्थित त्रि० ग्रथि–क्त। गुम्फिते अमरः।

ग्रन्थिदला स्त्री ग्रन्थिर्दलेऽस्याः। भल्लातके राजनि०।

ग्रन्थिदूर्वा स्त्री ग्रन्थिप्रधाना दूर्वा शा० त०। (गाँठदूर्वा) दूर्वाभेदे राजनि०।

ग्रन्थिन् त्रि० ग्रन्थस्तदर्थो वा श्रेयतयाऽस्त्यस्य १ग्रन्थयिनि वा ग्रन्थार्थवेत्तरि २ग्रन्थयुक्ते तद्विशिष्टे ३ग्रन्थनकर्त्तरि च। अन्नेभ्योग्रन्थिनः श्रेष्ठा ग्रन्थिभ्यो धारिणोवराः मनुः। "ग्रन्थो भवति पण्डितः" सर्वत्र स्त्रियां ङीप्। "शुभ्र आपिण्डे चक्षुर्न ग्रन्थिनी चरणम्" ऋ०१०।८५।६। ग्रन्थिनी ग्रन्थवती संदर्भवती" भा०। [राजनि०।

ग्रन्थिपत्र पु० ग्रन्थिमध्यानं पत्रमस्य। चोरकनाम गन्धद्रव्ये

ग्रन्थिपर्ण न० ग्रन्थौ पर्णान्यस्य ग्रन्थीनि ग्रन्थयुतानि वा पर्णान्यस्य। (गाठिवाला) १वृक्षभेदे अमरः। "ग्रन्थिपर्णं तिक्तशीतं कटूष्णं दीपनं लघु। कफदाहविषश्वासकण्डूदौर्गन्ध्यनाशनम्" भावप्र०। २चोरनामगन्धद्रव्ये राजनि० ३जतुकालतायां स्त्री राजनि० ४गरुडदूर्वायां स्त्री राजनि० गौरा० ङीप्।

ग्रन्थिफल पु० ग्रन्थि ग्रन्थियुक्तं फलमस्य। १कपित्थवृक्षे २मदनवृक्षे ३शाकरुक्षवृक्षे च राजनि०।

ग्रन्थिबन्धन न० ६त०। (गाठबाँधा) पुस्तकादौ १दृढबन्धनार्थे बन्धनभेदे २जन्मतिथौ गोरोचनायुतस्त्रबन्धने च। "गुडदुग्धतिलानद्यात् जन्मग्रन्थेश्च बन्धनम्। गुग्गुलुनिम्बसिद्धार्थदूर्वागोरोचनायुतम्" ज्योतिर्नि०।

ग्रन्थिव(ब)र्हिन् पु० ग्रन्थिं बर्हति बर्ह–क्तौ ग्रन्थिं बर्हति बर्ह–बधे णिनि। ग्रन्थिपर्णवृक्षे शब्दर०

ग्रन्थिभेद पु० ग्रन्थिं वस्त्रादिग्रन्थिं भिनत्ति भिद–कर्त्तरि घञ्। (गाँठकाटा) चौरभेदे "अङ्गुलिं ग्रन्थिभेदस्य छेदयेत् प्रथमे यदे। द्वितीये हस्तचरणौ ततीये वध मर्हति" मनुः "उत्तमैकग्रन्थिभेदौ करसंदंशहीनकौ। कार्यौ द्वितीयापराधे करपादैकहीनकौ" याज्ञ०

ग्रन्थिमत् त्रि० ग्रन्थिरस्यास्त्य मतुप्। १ग्रन्थियुक्ते (गांठयुक्ते) स्त्रियां ङीप् "ग्रन्थित्वं ग्रन्थिमतीं दधाना" कुमा० (हाडयोडा) २अस्थिसंहारिवृक्षे पु०भावप्र०

ग्रन्थिमत्फल पु०ग्रन्थिमत् फलमस्य। नक्तमालवृक्षे (मान्दार) इति ख्याते वृक्षे राजनि०।

ग्रन्थिमूल न० ग्रन्थि गुल्मवत् मूलं यस्य। १मद्गुनेराजनि० २भल्लातदूर्वायां स्त्री टाप् राजनि०।

ग्रन्थिल त्रि० ग्रन्थिर्विद्यतेऽस्य सिध्मा० लच्। ग्रन्थियुक्ते मेदि० २पिप्पलीमूले न०राजनि०। ३शार्ङ्गे न०शब्दच० ४विकङ्कतवृक्षे (वइचि)५करीरवृक्षे च अमरः। ६तगरवृक्षे ७छिन्नायां८पिण्डालौ ९चोरनामगन्धद्रव्ये १०विकङ्कटवृक्षे च राजनि०। भद्रवल्लायां ११भल्लातदूर्वायां १२गरुडदूर्वायाञ्च स्त्री राजनि०। [त्रिका०

ग्रन्थिहर पु०ग्रन्थिं हरति हर–अच्। अमलवेतसे मन्थिनि

ग्रन्थीक न० ग्रन्थिक+पृषो०। पिप्पलीमूले हि०को०

ग्र(ग्ल)प्स पु० ग्रस्+पृषो० हिंसारूपम्। स्रवके। "अथाग्रे दुग्धेन शालाटुग्र(ग्ल)प्सेन, सीमन्तं व्यू हति" शाङ्ख० श्रौ० १।१४।४। ग्र(ग्ल)प्सः स्रवक उच्यते" नारा०।

ग्रस भक्षणे भ्वा० आत्म० सक० सेट्। ग्रसते अग्रसिष्ट जग्रसे। उदित् ग्रसित्वा ग्रस्त्वा। ग्रस्तः। "हिमांशुमाशु ग्रसते तमृदिग्नः स्फुटं फलंमाघः"समङ्गानामपि यासं ग्रसे ग्रस्तं यदृच्छया" भा० शा० १७६ अ०। "य इमां पृथिवीं कृत्स्नां संक्षिप्य ग्रसते पुनः" भा०व० २६ श्लो०। "राहुग्रस्ते निशाकरे" भा० व० २६६७ श्लो०। ग्रासः। ग्रसनम्; किप् धातुत्वाच्च दोषः यत् ग्रसौ ग्रस इति।

ग्रस भक्षणे वा चुरा०उभ०पक्षे भ्वा०पर०सक० सेट्। ग्रासयति–ते ग्रसति अजिग्रसत्–त अग्रासीत् अग्रसीत्। ग्रासयाम् बभूव ग्रास चकार चक्रे। ग्रसितः। "न च प्रापितमन्येन ग्रसेदर्थं कथञ्चन" मनुः।

ग्रसन न० ग्रस–भावे ल्युट्। १भक्षणे "ग्रसनादजगरः शरीरमाणहरो न विधात्" सुश्रु०। २राहुचन्द्रसूर्ययोरपरागे च। ३ग० ५ अ० उक्ते ग्रहांशादि

श्यासे च । उपरागशब्दे विवृतिः । ४असुरभेदे पु० "इहा तदस्त्रमाहात्म्यं सेनानीर्ग्रसनोऽसुरः" । "तमग्रस्यं जगतान्नजयं चक्रं ववात ग्रसनस्य कण्ठे" । "द्विधा तु कृत्वा ग्रसनस्य कण्ठं तद्रक्तधारारुणघोरनाभि" इति च मत्स्यपु० ।

ग्रसिष्ठ त्रि० अतिशयेन ग्रसिता ग्रसितृ+इष्ठन् तृचोलोपे इटोऽसिद्धिः । ग्रसितृतमे "भोगमानशादिदु ग्रसिष्ठ ओ ग्रधीरजीगः" ऋ०१।१६३।७। "ग्रसिष्ठः ग्रसितृतमः" भा०

ग्रसिष्णु त्रि०ग्रस–इष्णुच् । १ग्रसनशीले "अत्ता चराचर ग्रहणात्" शा० सू० न्यायात् २परब्रह्मणि च । "भूतभर्त्तृ च तज्ज्ञेयं ग्रसिष्णु प्रभविष्णु च" गीता ।

ग्रस्त त्रि०ग्रस–कर्मणि क्त उदित्त्वात् क्त्वेट्कत्वेन इडभावः । १भक्षिते लुप्तवर्णपदे २ग्रसंपूर्त्तोच्चारितशब्दे न० अमरः ।

ग्रस्तृ त्रि०ग्रस+तृच् आर्षे इडभावः । भक्षके । "सिंहिकासुषुवे राहुम्" "ग्रस्तारं चैव चन्द्रस्य सूर्यस्य च महाप्रभम्" हरिवं०२२६ अ० ।

ग्रस्तास्त पु० ग्रस्त एवास्तः । अदृष्टभोक्षे ग्रासोत्तरमस्तगते सूर्ये चन्द्रे च । उपरागशब्दे ११।५ पृ० विवृतिः ।

ग्रस्तोदय पु० ग्रस्तस्य उदयः । ग्रासोत्तरं रविचन्द्रयोरुदये "ग्रस्तास्तादौ विशेषमाह गुरुः "ग्रस्तास्ते त्रिदिनं पूर्वं पश्चात् ग्रस्तोदये तथा । खण्डग्रासे च त्रिदिनं निःशेषे सप्त सप्त चेति" । कश्यपस्तु "ग्रस्तोदये परे दोषो ग्रस्तास्तेऽर्वाक् शशीनयोः । द्युनिशाङ्गैकभयं तत् खण्डाखण्डव्यवस्थया" इत्याह ।

ग्रस्य त्रि० ग्रस–कर्मणि वा० यत् । अदनीये "यच्छक्यं ग्रसितुं ग्रस्यं ग्रस्तं प्रत्यसेच्च यत्" भा०उ०३३अ० । यास्य तत्रार्थे त्रि० ।

ग्रह हस्तव्यापारभेदे स्वीकारे ज्ञाने च क्रया० उभ०सक०सेट् । गृह्णाति गृह्णीते । गृह्णीयात् गृह्णीत । गृह्णातु गृह्णाम् । अगृह्णात् अगृह्णीत । अगृहीत् अनिटि इटो दीर्घः । अगृहीष्टाम् । अगृहीष्ट । जगृह जगृहतुः जगृहिथ जगृहिव । जगृहे जगृहिषे । ग्रहीता गृह्णात् ग्रहीषीष्ट गृहीषीष्यति ते । गृहीतव्यः गृहणीयम् ग्राह्यम् पदास्त्रैरिपक्षेषु गृह्यम् । छन्दसि प्रतिगृह्यम् अधिगृह्यम् लोके तु प्रतिग्राह्यम् अधिग्राह्यम् । जनचरेऽप्यग्राहः । ज्योतिषि अच् ग्रहः । गृहीतः गृहीतिः । गृहणम् अप् गृहः । उद्ग्राहः सदौ संग्राहः सङ्घे संग्रहः । गृहीतम् । गृहीत्वा प्रतिगृह्य । ज्ञाने "हंसं तनौ सन्निहितं चरन्तं सनेर्जनोऽत्तारिव स्विकायाम् । ग्रहीतुकामादरिणाशयेन" नैष० । "गृह्णाति चक्षुः सम्बन्धादालोकोद्भूतरूपयोः" भाषा० हस्तव्यापारे "गृहाण ग्रस्तं यदि सर्ग एष ते" "तौ जगृहतुः पादान् राजा राज्ञी च मागधी" रघुः । "दश गृहान् गृह्णाति" श्रुतिः स्वीकारश्च स्वत्वापादनव्यापारः सेवनादिना आयत्तीकरणञ्च तत्राद्ये "तत्र किञ्चिन्न गृह्णीयात् प्राणैः कण्ठगतैरपि" प्रा०त० गङ्गामा० द्वितीये "शरद्वौदं न गृह्णीयात् गृह्णीयात् मार्गपैषयोः" नीतिः कर्मणि ग्रहृते अगृह्राहि अगृह्राहिषाताम् अगृह्रीषाताम् । अगृह्राहिष्यते अग्रहीष्यते । णिच् ग्राहयति ते अजीगृहत् त । सन् जिघृक्षति ते । यङ् जरीगृह्यते । यङ्लुक् जरी(रि)गृहीति जर्गर्हीति जरी(रि)गर्द्धि जर्गर्द्धि मुग्ध०" सि०कौ०जागृहीति जागृदि । ज्ञानसामान्यार्थत्वे णिचि प्रयोज्यस्य कर्मत्वं "शिष्यं वेदं ग्राहयतीति । गुरुत्वमात्रार्थकत्वेऽपि कर्मत्वम् मुग्धबो० "अजीगृहत्त जनको धनुस्तत्" भट्टिः । "अयाचितारं न हि देवदेवमद्रिः सुतां ग्राहयितुं शशाक" कुमा०अन्यमते भक्षनीयत्वेन विवाह्यत्वेन च बोधयामासेत्यर्थकत्वात् नानुपपत्तिः । मुग्धबो० द्विकर्मकमध्ये पाठात् "जग्राह यज्ञनोभोज्यम्" उदा० वा०मते न द्विकर्मकतेति भेदः । वेदे हस्य भकारः । "इमामगृभ्णन् रसनामृतस्य"श्रुतिः । आर्षेऽपि क्वचित् हस्य भः गृभीतशब्दे उदा० ।

अति+अतिक्रम्य वर्त्तने "अतिग्रहाव्यथनक्षेपेष्वकर्त्तरि तृतीयायाः"पा० "अतिक्रम्य गृह्णोऽतिगृह्णः चारित्यतोऽतिगृह्णते चारित्रेणान्यानतिक्रम्य वर्त्तते इत्यर्थः" सि० कौ० "तएतानतिग्राह्यान् दृष्ट्वोत्तानत्यगृह्णत" शत०ब्रा० ४।५।४।२

अनु+आनुकूल्यकरणे "वयमप्यनुगृह्णीमोद्विधा कृत्वा वरूथिनीम्" भा० वि० ६६६श्लो० ।

सम्+अनु+बन्धनादिना आनुकूल्ये "अवसज्य किरीटं स केशान् समनुगृह्य च । उदतिष्ठज्जरासन्धः" भा०स०८६५श्लो०।

अप+सन्ततधारातोविच्छिद्य पृथक्कृत्य गृहणे "अपगृह्य पुनरिन्द्रियाणि" कात्या० श्रौ० ६।६।२ "अपगृह्य सन्ततधारातोविच्छिद्य पृथक्कृत्वा पुनस्तस्या एव धारायां गृह्णाति" कर्कः अपसारणे च "अथैकं

हस्तमपगृह्णाति" शत०ब्रा० १।८।३।१६। "उभौ हस्तौ अपगृह्योपासीते" २।५।२।४० रोधने च। "स (अग्नः) ते विप्रः सह वज्रेण बाहुमपमृष्टक्रुत्तपसा जातमन्युः" भा०आश्व० ६अ०

अपि+पिधाने "यत्तैतत् कर्णावपिगृह्य निनदमिव" छा०उ० "अपगृह्य पिधाय" भा० "तस्मात् कर्णं पिहदैवतं हि तदपिगृह्यम्" शत०ब्रा०३।८।१।५। आच्छादने च "तस्मात् कल्पमानपि गृह्णीत" शत०ब्रा०४।१।३।८

अभि+आभिमुख्येन ग्रहणे "अम्बालिका च बलवदभिगृह्य चखड्वर्मणा परिघेतुमात्मनोभवनमानीता" दशकु०

अव+परिरोधे नियमे च "मन्दोऽपि नाम न महानवगृह्य साध्यः" माघः "देवनीयं शंसति पदाव्यग्रहम्" तैत्ति० "इष्टिर्यैः तद्विघातेऽव्यग्रहावग्रहौ सभौ" अमरः "रावणावग्रहक्लान्तमिति वागस्तेन सः"। "इष्टिभवति ग्रस्तानामवग्रहविशेषिणाम्" रघुः।

वि+अव+अवनतौ अक०। "तत्रैव कपालम् व्यवगृहीतानामिव भवति व्यवगृहीतानेव हि द्यौः" शत०ब्रा०७।५।१।२ "व्यवगृहीतानां विविधमवगृहीतोऽवनतः अन्योवस्तु" भा०

आ+आभिमुख्येनाकर्षणे "आ त एता वचोयुजा हरी मदाय सुप्रया" ऋ० ८।४५।१६ "आगृभाय अक्षदभिमुखं यातं हस्ताभ्यामाकर्षतेत्यर्थः" भा०। निर्बन्धे "चलेऽपि काकस्य पदार्पणागृहः" नैष०।

आ+सम्+आभिमुख्येन संग्रहे "आ तू न इन्द्र शुमन्तं चित्रं ग्राभं संगृभाय" ऋ० ८।८।१। आसंगृभाय आभिमुख्येन संगृह्याण" भा०

उद्+ऊर्द्ध विस्पष्टं दाने "वाजस्य मा प्रसव उद्ग्राभेणोद ग्रभीत्" यजु०१७।६३। ऊर्द्धं विस्पष्टं दानम् उद्ग्रहः" वेददी० "उद्गृह्णते स्वाङ्गुलीकृताय स्वाहा" २२।२६। उद्धृत्य उत्क्षिप्य ग्रहणे "ग्रक्षं योऽस्याग्रसदप्रकीत्" भट्टिः।

उद+ग्रह+क्विप्। उद्ग्राहि—उपन्यासे "उद्ग्राहितसुपन्यस्तम्" वैजयन्ती "विग्रेणविदुग्रः ग्राह्यं वक्तवोद्ग्राहयते मया" माघः। "मोक्षिग्रहः सुनीतानि" भट्टिः

उप+उद+स्नाने। "तस्य हि सुखसुपोद्गृह्य वाच" छा०उ० "सुखं द्वारं विद्यायादाने दीर्घसुपोद्गृह्य जानन्नित्यर्थः" भा०

उप+सामीप्येन ग्रहणे "दशापवित्रसुपगृह्य शिंकरोति" शत० ब्रा० ३।२।२।१३ अवष्टम्भे च "तेजो या अङ्गेभूयस्ता एतदायुस्तपगृह्याकाशमभितपति" छा० उ० "तद्वा एतत्तेजो वायुस्तपगृह्यावष्टभ्य स्वात्मना निस्तीक्ष्णत्व वायुमाकाशमभिव्याप्नुवत्तपति" भा०

नि+बलेन निरोधे प्रतिकूलकरणेन नियमने च। "स वै प्रविशमानस्तु शूद्रेणान्धेन रक्षिणा। निगृहीतो बलाद्धारि सोऽवातिष्ठत पार्थिवः" भा०व० १३६अ०। "निगृहीतः कन्धरायां शिशुना दृढमुष्टिना" हरिव० २०अ०। "तस्मात् यस्य महाबाहो निगृहीतानि सर्वशः। इन्द्रियाणीन्द्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता" गीता "अनियग्रहाच्चेन्द्रियाणां नरः पतनमृच्छति" वात्स०

प्रति+नि+प्रतिरूपतया गृह्णे "आदित्यपात्रेण द्रोणकलसात् प्रतिनिगृह्णीते" शत०ब्रा० ४।३।५।६

वि+नि+विशेषेण निग्रहे "शिरःसु विनिगृह्णीतान् योधयामास पाण्डवः" भा० आ० १२८ अ०

निस्+निःशेषेण ग्रहणे नियहे च "शक्रस्त्वमिति यो दैत्यैर्निष्टंगृहीतः किलाभवत्" भा०आनु०१६६८श्लो०

परि+परितोग्रहणे "बाहुना परिजग्राह दक्षिणेन शिरोधराम्" भा०आ०६३२श्लो०। "ज्ञानेन परिगृह्य तान्" मनुः। स्वीकारे च "कस्य गुप्तः परिग्रहः" भा० आ० गन्धर्वं प्रति अर्जुनोक्तिः

प्र+प्रकर्षेण ग्रहणे। "प्रगृहीतश्च योऽभ्यात्मनिगृहीतश्च कारणैः" भा०वि० १२श्लो०। सन्धिकार्यनिषेधाय विशिष्य गृह्णे "प्रष्टहृं पदम्" पा० प्रगृह्यशब्दे दृश्यम्।

प्रति+दत्तवस्तुनोग्रहणे "सप्त वित्तागमाः धर्म्यादायोलाभ क्रयो जयः। विभागः संप्रयोगश्च सत्प्रतिग्रह एव च" स्मृतिः "याजनाध्यापनप्रतिग्रहैर्ब्राह्मणो धनमर्जयेत्" स्मृतिः अदत्तार्थस्यग्रहणस्वीकार एव प्रतिग्रहो मुख्यः अन्यत्र भाक्तः। "तोरे प्रतिगृह्यस्याज्यस्याघ्नो धर्मस्य विक्रयः" "तत्र न प्रतिगृह्णीयात् प्राणैः कण्ठगतैरपि" भा० त० गङ्गाभा०। "प्रतिगृह्यादपाङ्क्तः सन्तुष्टो येन केनचित्" भा०त० "अभिपद्य च बाहुभ्यां प्रत्यगृह्णादमर्षितः भा० व० ४४१ श्लो०। प्रतिरूपतया ग्रहणादिगृह्णे च "तथैव पाण्डवो भीमे दिव्यमस्त्रमुदीरयन्। प्रत्यग्रहीत्तादवेमात्रा" भा० वि० ६० अ०। स्वीकारमात्रे "प्रतिगृहीतं प्रणयिप्रियत्वात्" कुमा० "अमोघाः प्रतिगृह्णन्तावर्षानुपदमाशिषः" रघुः।

वि+विरोधे रोधने। "सन्दधीत न चानार्यं विगृह्णीयान्न बन्धुभिः" भा० आ०७०अ० "विगृह्य शत्रून् कौन्तेय!

ज्ञेयः चितिपतिस्तदा" भा० आश्व० ६५अ०। विशेषेण ग्रहणे "न विगृह्णाति वैषम्यम्" भाग०३।२२।२।४ श्लो०। "अविग्रहा गतादिस्था यथा यामादिकर्मभिः" हरिः विशेषेणग्रहः अवयवीभावः। विग्रहो देहः। "रक्तप्रसाधितभुवः शतविग्रहाश्च" वेणी षड्विधवृत्तिस्फुटीकरणवचनभेदे "इत्यर्थविवरणं विग्रहः" सि०कौ० "सप्रश्रया वियहस्यया" शब्दर० उ०।

सम्+सङ्घे नानास्थानपठितस्य एकत्र समावेशार्थे संदर्भभेदे "संग्रहेऽल्पसुपागते" वाक्यपदीयम्। सङ्कोचने "संगृह्णती कौशिकस्तरीयम्" भा०व० १५६।२श्लो० एकत्रीकरणे "संगृह्य तत्समैरङ्गैर्निर्भमे स्त्रियमुत्तमाम्" ८५५६ श्लो० सम्यक्ग्रहणे "औषधानि च सर्वाणि मूलानि च फलानि च। चतुर्विधांश्च वैद्यान् वै संगृह्णीयाद्विशेषतः" भा०शा० २६५४ श्लो०। सङ्घातः सङ्घे द्रव्यसंग्रहः" सि०कौ०

ग्रह आदाने वा चुरा० उभ० पक्षे भा० पर० सक० वेट्। गृह्णयति ते ग्रहति। अजिग्रहत्-त अग्रहीत् अग्राक्षीत्।

ग्रह पुं०गृह्-अच्। १नवत्व सूर्यादिषु। २बालारिष्टकारेषु स्कन्दग्रहादिषु भावे घञ्। ३अनुग्रहे, ४निर्बन्धे, "अवश्यमध्येवनवग्रहग्रहा" नैष० ५ आदाने गृहणे, ६रणोद्यमे, ७मलबन्धे ८चन्द्रसूर्ययोर्ग्रसे च "तदा सम्भाव्यते ग्रहः इति ज्योतिषम् "एकरात्रं परित्यज्य कुर्यात् यात्रियहं ग्रहे" ज्योति० सूर्यादयश्च

"सूर्यचन्द्रोमङ्गलश्च बुधश्चापि बृहस्पतिः। शुक्रः शनैश्चरो राहुः केतुश्चेति नव ग्रहाः"। एषां गतिभेदाः खगगतिशब्दे २४१२पृ०दर्शिताः। राहुकेत्वोर्यथा ग्रहत्वं पी०धा० व्यवस्थापितं तच्च केतुशब्दे २२२४ पृ०उक्तम्। भा०ति० १पटले "लोकानदीन् स्वरान् धातून् सनीन् द्वीपान् ग्रहानपि। समिधः सप्तसंख्याताः सप्तजिह्वा हविर्भुजः" इत्यनेन गृह्णां यत् सप्तत्वमुक्तं तत् वराहमताभिप्रायेण। तच्च ३११पृ० उपरागशब्दे अस्मताभिप्रायेण गृह्णां नवत्वं ६पटले भा०ति०उक्तं यथा "नवग्रहाः ससूत्पन्ना भवरत्नेश्वरा ग्रहाः। अर्केन्दुरक्तशुक्लभूमसुमन्दाङ्गिकेतवः। माणिक्यं मौक्तिकं चारु विद्रुमं मारकं पुनः। पुष्परागं जसदृक्वं नीलं गोमेदकं शुभम्। वैदूर्यं नव रत्नानि"।

स्कन्दग्रहादीनां नवानां लक्षणविभागः सुश्रुते उक्तोयथा "अथातो नवग्रहाजातिविज्ञानीयमध्यायं व्याख्यास्यामः॥ बालग्रहाणां विज्ञानं साधनञ्चाग्रतस्ततः। उत्पत्तिं कारणञ्चैव सुश्रुतैकमनाः शृणु॥ स्कन्दग्रहस्तु प्रथमः स्कन्दापस्मार एव च। शकुनी रेवती चैव पूतना चाम्बपूतना॥ पूतना शीतनामा च तथैव मुखमण्डिकाः। नवमो नैगमेयश्च यः पितृग्रहसंज्ञितः॥ बालीमालोः प्राक्प्रदिष्टाचाराच्चौचभटान्मङ्गलाचारहीनान्। त्रस्तान् क्षुद्रांस्त्रस्तितान् क्रन्दितान् वा पूजाहेतोर्हिंस्रुरेते कुमारान्॥ ऐश्वर्यस्थाः न शक्या विज्ञातो देहं द्रष्टुं मानुषैर्विग्रहरूपाः। आप्तं वाक्यं तस्मादेषामिधास्ये लिङ्गान्येषां यानि देहे भवन्ति॥ नूनाक्षः शतजन्मगन्धिकः स्तनद्विट् वक्त्रास्रो शतचलितैकपक्ष्मनेत्रः। उद्विग्नः सुललितचञ्चरत्यरोदी स्कन्दार्त्तो भवति च गाढसृष्टविर्द्धोः॥ निःसंज्ञो भवति पुनर्भवेत्समंज्ञः संरब्धः करचरणैश्च क्षपतीव। विण्मूत्रे सृजति विनद्य जृम्भमाणः फेनञ्च प्रसृजति तत्सखाभिषङ्गः॥ सस्राङ्गो भयचकितो विहङ्गगन्धिः संस्रावित्रणपरिपीड़ितः समन्तात्। स्फोटैश्च प्रततततुः सदारुपाकैर्विच्छेदो भवति शिशुः ततः शकुन्याः॥ रक्तास्रो हरितमलोऽतिपाण्डुदेहः श्यावो वा ज्वरसुखपाकवेदनार्त्तः। रेवत्या व्यथिततनुश्च कर्णनासं स्रुद्राति ध्रुवमभिपीड़ितः कुमारः॥ सस्राङ्गः स्रपिति सुखं दिवा न रात्रौ विड्भिन्नं सृजति च काकतुल्यगन्धिः। ऊर्द्धार्त्तो क्षुवितततनूरुहः कुमार क्षुष्णालुर्भवति च पूतनागृहीतः॥ यो हेडि स्तनमतिसारकासहिक्काछर्दीभिर्व्यथितशिरोभिरर्द्यमानः। दुर्वर्णैः सततमधःशयोऽस्रगन्धिस्तं ब्रूयुर्वरभिषजोऽम्बपूतनार्त्तम्॥ उद्विग्नो भृशमतिवेपते प्रदध्यात् संलीनः स्वपिति च यस्य चान्वकूजः। विस्राङ्गो भृशमतिसार्यते च यस्तं जानीयाद्विषमिह शीतपूतनार्त्तम्॥ स्थानाक्षः शुक्लचिरपाणिपादवक्त्रो वक्त्राग्नी कलुषशिराहतोदरो यः। सोद्वेगो भवति च मूत्रतुल्यगन्धिः स ज्ञेयः शिशुरथ वक्त्रमण्डिकार्त्तः॥ यः फेनं वमति विनश्यते च मध्ये सोद्वेगं विलपति चोर्द्धमीक्षमाणः। ज्वर्य्यते प्रततमधो वसासगन्धिर्विट्सङ्गो भवति हि नैगमेयजुष्टः॥ प्रस्तब्धो यः स्तनदेषी सुप्यते चाविगन्धुड्डः। तं बालं नचिराद्वन्ति गृह्णः सव्यूषनक्षणः॥ विपरीतमतःसाध्यं चिकित्सेदचिरार्दितम्। गृहे पुरा-

कृविणाभ्यञ्च बालं शुचौ शुचिः ॥ सर्षपान् प्रकिरेत्तेषां तैलैर्दीपञ्च कारयेत्। सदासन्निहितस्यापि जुह्वयाद्घृतव्याहुतम् ॥ सर्वगन्धौषधीबीजैर्गन्धमाल्यैरलङ्कृतम्। अग्नये ह्रस्तिकाभ्यश्च स्वाहा स्वाहेति संस्मरन् ॥ नमः स्कन्दाय देवाय गृहाधिपतये नमः। शिरसा त्वाभिवन्देऽहं प्रतिगृह्णीष्व मे बलिम् ॥ निरुजो निर्विकारश्च शिशुर्मे जायतां ध्रुवम्"॥

सोत्पत्तिकमन्ययहभेदा भा०व०२२८अ०उक्ताः यथा

"यावत् षोड़श वर्षाणि भवन्ति तरुणाः प्रजाः। प्रबाधत मनुष्याणां तावद्रूपैः पृथग्विधैः। यहञ्च वः प्रदास्यामि रौद्रमात्मानमव्ययम्। परमं तेन सहिताः सुखं वत्स्यथ पूजिताः। मार्कण्डेय उवाच। ततः शरीरात् स्कन्दस्य पुरुषः पावकप्रभः। भोक्तुं प्रजाः स मत्तानां निष्पपात महाबलः। अपतत् सहसा भूमौ विसङ्कोऽथ क्षुधार्दितः। स्कन्देन सोऽभ्यनुज्ञातो रौद्ररूपोऽभवद्ग्रहः। स्कन्दापस्मारमित्याहुर्यं हं तं द्विजसत्तमाः॥ विनता तु महारौद्रः कथ्यते शकुनीयहः। पूतनां राक्षसीं प्राहुस्तं विद्यात् पूतनायहम्। कटा दारुणरूपेण घोररूपा निशाचरी। पिशाची दारुणाकारा कथ्यते शीतपूतना। गर्भान् सा मानुषीणान्तु हरते घोरदर्शना। अदितिं रेवतीं प्राहुर्गृहस्तस्यास्तु रैवतः। सोऽपि बालान्महाघोरो बाधते वै महाग्रहः। दैत्यानां या दितिर्माता तामाहुर्ग्रहसम्भिदाम्। अत्यर्थं शिशुमांसेन संप्रहृष्टा दुरासदा। कुमाराश्च कुमार्यश्च ये प्रोक्ताः स्कन्दसम्भवाः। तेऽपि गर्भभुजः सर्वे कौरव्य! सुमहाग्रहाः। तासामेव तु पत्नीनां पतयस्ते प्रकीर्त्तिताः। अप्रायमाना गृह्णन्ति बालकान् रौद्रकर्म्मिणः। मयां माता तु या प्राज्ञैः कथ्यते सुरभिर्नृप!। शकुनिस्तामधारूढ़ो ग्रहं भुङ्क्ते शिशून् भुवि। संरमा नाम या माता शुनां देवी जनाधिप!। सापि गर्भान् समादत्ते मानुषीणां सदैव हि। पादपानाञ्च या माता करञ्जनिलया हि सा। वरदा सा हि सौम्या च नित्यं भूतानुकम्पिनी। करञ्जे तां नमस्यन्ति तस्मात् पुत्रार्थिनो नराः। इमे तवादशान्ये वै यहा मांसमधुप्रियाः। द्विपञ्चरात्रं(१०)तिष्ठन्ति सततं स्तुतिकागृहे। कद्रुः स्कन्दवपुर्भूत्वा गर्भिणीं प्रविशत्यथ। भुङ्क्ते सा तत्र तं गर्भं सा तु नागं प्रसूयते। गन्धर्वाणाञ्च या माता सा गर्भं गृह्य गच्छति। ततो विलीनगर्भा सा मानुषी भुवि दृश्यते। या जनित्री त्वप्सरसां गर्भमाहुः प्रगृह्य सा। उपविष्टं ततो गर्भं कथयन्ति मनीषिणः। लोहितस्योदरेः कन्या धात्री स्कन्दस्य सा स्मृता। लोहितायनिरित्येवं कदम्बे सा हि पूज्यते। पुरुषेषु यथा रुद्रस्तथार्य्या प्रमदास्वपि। आर्य्या माता कुमारस्य पृथक्कामार्थमिष्यते। एवमेते कुमाराणां मया प्रोक्ता महाग्रहाः। यावत् षोड़श वर्षाणि तावन्नास्ते शिवास्ततः। ये च मातृगणाः प्रोक्ताः पुरुषाश्चैव ये ग्रहाः। सर्वे स्कन्दग्रहा नाम श्रेया नित्यं शरीरिभिः। तेषां प्रशमनं कार्य्यं स्नानं धूपमथाञ्जनम्। बलिकर्म्मोपहारश्च स्कन्दस्येज्या विशेषतः। एवमभ्यर्चिताः सर्वे प्रयच्छन्ति शुभं नृणाम्। आयुर्वीर्यञ्च राजेन्द्र! सम्यक्पूजानमस्कृताः। अर्हन्ति षोडशाहार्द्धे भवन्ति ग्रहा नृणाम्। तानहं संप्रवक्ष्यामि नमस्कृत्य महेश्वरम्। यः पश्यति नरो देवान् जागृहा शयितोऽपि वा। उन्मादयति स तु क्षिप्रं तन्तु देवगृहं विदुः। आसीनश्च शयानश्च यः पश्यति नरः पितॄन्। उन्मादयति स तु क्षिप्रं स श्रेयस्तु पितृग्रहः। अवमन्यति यः सिद्धान् क्रुद्धाश्चापि शपन्ति यम्। उन्मादयति स तु क्षिप्रं श्रेयः सिद्धग्रहस्तु सः। उपाघ्राति च यो गन्धानुसांचापि पृथग्विधान्। उन्मादयति स तु क्षिप्रं स श्रेयो राक्षसग्रहः। गन्धर्वाश्चापि यं विद्याः संविशन्ति नरं भुवि। उन्मादयति स तु क्षिप्रं ग्रहो गान्धर्व एव सः। अधिरोहन्ति यं नित्यं पिशाचाः पुरुषं प्रति। उन्मादयति स तु क्षिप्रं ग्रहः पैशाच एव सः। आविशन्ति च यं यक्षाः पुरुषं कालपर्य्यये। उन्मादयति स तु क्षिप्रं श्रेयो यक्षग्रहस्तु सः। यस्य दोषैः प्रकुपितं चित्तं हरति देहिनः। उन्मादयति स तु क्षिप्रं साधनं तस्य शाश्वतः। वैकृत्याच्च भयाच्चैव घोराणां चापि दर्शनात्। उन्मादयति स तु क्षिप्रं सान्त्वं तस्य तु साधनम्। कश्चिद् क्रीडितुकामो वै भोक्तुकामस्तथाऽपरः। अभिकामस्तथैवान्यदित्येष त्रिविधो ग्रहः। यावत् सप्तितवर्षाणि भवन्त्येते ग्रहा नृणाम्। अतःपरं देहिनान्तु ग्रहस्त्यक्तो भवेज्ज्वरः। अप्रकोपेन्द्रियं दान्तं शुचिं नित्यमतन्द्रितम्। आस्तिकं गुरुचारज्ञ वर्ज्जयन्ति सदा ग्रहाः। इत्येते ग्रहोद्देशो मानुषाणां प्रकीर्त्तितः। न स्पृशन्ति ग्रहा भक्तान्नरान्देवे महेश्वरे"।

मवग्रहस्यादिकं गृह्यशब्दे वक्ष्यते। गृह्यकर्मादिभागं तद्भागादिशब्दे तत्तद्गृह्यकर्मशब्दे उक्तं वक्ष्यमाणञ्च द्रष्टव्यम्। "उद्वाह्यं गृह्यपक्षे" निः० श्रीरामतर्कालङ्कारे "गृह्यैस्ततः पञ्चभरुद्वहेत्यैः" रघुः। गृह्यमृतेऽनेन करणे ष्यञ्। हेमाद्रिगृह्यशास्त्रे "दश गृह्यान् गृह्णाति" "षट्कं समाहि" इतिः सामादिग्रहणसाधनपात्रनामानि च ग्रामदेव भिन्नानि नानि "दश क्षीरगृह्यान् गृह्णाति" इत्यादौ श्रुतग्रा० दर्शितानि। एवं यागभेदे षड्भेदाः तत्रोक्ता द्रव्याः। षट्कृतेऽनेन करणे ड्यप्। १०ग्राह्यादृष्टे ग्राह्यादीनां गृह्यत्वम् इ०उ०उक्तं यथा "आत्मन्वत्ग्रहाति श्रोवाच कति ग्रहाः कत्यतिग्रहाः? इति अष्टौ ग्रहा अष्टावतिग्रहा इति ते तेऽष्टौ ग्रहा अष्टावतिग्रहाः कतमे ते? इति। प्राणो वै ग्रहः सोऽपानेनातिग्राहेण गृहीतोऽपानेन हि गन्धं जिघ्रति। वाग् वै ग्रहः स नाम्नातिग्राहेण गृहीतो वाचा हि नामान्यभिवदति। जिह्वा वै ग्रहः स रसेनातिग्राहेण गृह्णाति जिह्वया हि रसान्विजानाति। चक्षुर्वै ग्रहः स रूपेणातिग्राहेण गृहीतश्चक्षुषा हि रूपाणि पश्यति। श्रोत्रं वै ग्रहः स शब्देनातिग्राहेण गृहीतः। श्रोत्रेण हि शब्दाञ्छृणोति। मनो वै ग्रहः स कामेनातिग्राहेण गृहीतो मनसा हि कामान् कामयते। हस्तौ वै ग्रहः स कर्मणातिग्राहेण गृहीतो हस्ताभ्यां हि कर्म करोति। त्वग्वै ग्रहः स स्पर्शेनातिग्राहेण गृहीतस्त्वचा हि स्पर्शान् वेदयत इत्येतेऽष्टौ ग्रहा अष्टावतिग्रहाः" इ०उ०।

"ये तेऽष्टौ ग्रहा अभिहिताः कतमे ते नियमेन ग्रहीतव्या इति तदाह। प्राणो वै ग्रहः प्राण इति ब्राह्मणमुच्यते। प्रकरणाद्वायुसहितः सोऽपानेनेति गन्धेनेत्येतदपानसहचरत्वादपानो गन्ध उच्यते। अपानोपगृहीतं हि गन्धम् घ्राणेन सर्वोलोको जिघ्रति। तदेतदुच्यते अपानेन हि गन्धान् जिघ्रतीति। वाग्वै ग्रहो वाचा हृद्याकाशपरिच्छिन्नया आत्मकविषयास्पदया सत्याऽनृताऽसत्यमेधाभद्रादिवचनेषु व्याप्तया गृहीतो लोकोऽपगृहीतः तेन वाक् ग्रहः स नाम्नातिग्राहेण गृह्णीतः स वाग्राह्यो ग्रहो नाम्ना वक्तव्येन विषयेणातिग्राहेणातिग्राहेणेति देयं खाद्यं, नाम वक्तव्यार्थं हि पाद्। तेन व्यक्तव्येनार्थेन प्रयुक्ता वाक् तेन यथोक्तेन तेन तत्कार्यं कृत्वा नैव तृप्ता भोक्ष्यः। अतो नाम्नातिग्राहेण गृहीता वागित्युच्यते वक्तव्यसङ्गेन हि प्रवृत्ता सर्वानर्थान् वृणीते। समानमन्यदृतं त्वक्पर्यन्ता अष्टौ ग्रहाः स्वर्गपर्यन्ताय एतेऽष्टावतिग्रहा इति" भा०।

गृहकज्जल पु० गृहेषु कज्जल इव। राहौ विक्रा०।

गृहकुमारख पु० गृह्णाति ग्रह-अच् कुत्सायां कारोऽन्तादेशश्च अच् कुत्सा०। नराणामग्रहावेशे कुत्सायां कारे रुद्रभेदे। "डाकिनी शाकिनी भूतेता वेताल राक्षसाः। गृहग्राहखेटाद्या बालकर्षिणिहृद्गृहाः। सर्वे प्रशमयत्याशु शिवतोयञ्जनेक्षणात्" का० ख० ३३अ०। अत्र ग्रह इति भिन्नं पदमन्यत्

गृहगणित न० गृह्णां तद्वारीनां गणितं गणनं यत्र। ज्योतिश्चक्रज्योतिषालगते तन्त्रभेदे खात्मभेदे "ज्योतिः शास्त्रमतैकभेदविषयं स्कन्धत्रयाधिष्ठितम्" इत्युपक्रमे "स्कन्धेऽस्मिन् गणितेन यत्र ग्रहगतस्तन्त्राभिधानं त्वसौ" इ० स० १अ०। "गृहगणितहोरासंहिताहोरा गन्थवेत्ता। तत्र गृहगणिते पोलिशरोमकवासिष्ठसौरपैतामहेषु पञ्चसिद्धान्तेषु सिद्धान्तेषु" इत्यनेन तत्रैव तद्भेदा उक्ताः। तत्प्रतिपाद्यविषयाश्च गणकशब्दे दर्शितताकाये उक्तप्रायाः। सौरागमतिपाद्यविषयाश्च सि०शि० संगृहीता यथा। मध्यमाधिकारः कालज्ञानम् भगोलः यन्त्रकथनोपकरणम्। गृहकथा ग्रहयुद्धम् अधिमासादिस्फुटीकरणम्। त्रिप्रश्नाधिकारः। पर्वसंभवः चन्द्रग्रहणम् सूर्यग्रहणम् गृहणयुक्त्या गृहोदयास्तनिरूपणम्। ग्रहयुतिः भग्रहयुतिः पातादिकारः। एषां च विशेषस्तत्तच्छब्दे उक्तोपपद्यते च।

ग्रहगोचर पु० द्वत०। गृह्णां जन्मराशितःस्थानभेदेन शुभाशुभसूचके गतिभेदे। गोचरशब्दे उक्तप्रायोऽपि विशेषोऽत्र लिख्यते यथा ह०सं०१०अ०। तत्र वे श्लोकावृत्तच्छन्दस्कालङ्कारादि तत्र भङ्गीञ्च द्रष्टव्यम्

"भावेन गोचरो व्यस्तादेतत्तत्फलानि वक्ष्यामि। नानाहृतैस्तदो दुरवगमत्वं चलत्वाद्वाः। माण्डव्यगिरं श्रुत्वा न मतीया रोचतेऽथवा नैवम्। साध्वी यथा न पुंसां प्रिया यथा स्वाजवनवयस्या।

सूर्यः षट्त्रिंशत्स्थितस्त्रिंशद्गतसप्ताग्रगश्चन्द्रमा जीवः सप्तनवद्विपञ्चभगतो वक्राकृतौ षट्त्रिगौ। सौम्यः षड्द्विचतुर्दशाष्टभगतः सर्वेऽप्युपान्त्ये शुभाः शुक्रः सप्तनवद्वयष्टचतुःकृतः प्राङ्मुखपश्चात्कृतः

रवेः—जन्मलग्नाद्दशमेऽर्के क्षयपति विभवान् कोढरोगाश्व-दाता चिरभ्रमं द्वितीये दिशति च न दुखं चक्षुषोर्दयुजं च। स्थानभ्रष्टिं तनोते धनविनिचयदाकल्पहारि-कृता रोगाश्रये चतुर्थे जनयति च रुजः खण्डरा भोगविघ्नम्। षोढाः स्युः षष्ठभस्थे सवितरि बहुशो रोगारिजनिताः षष्ठेऽर्के क्षीणि रोगान् क्षपयति च रिपूच्छेदांश्च तुदति। अष्टाने सप्तमस्थो जठरगद-भयं दैन्यं च कुरुते रुजकरो चाष्टमस्थे भवति सुर-दत्ता न खापि वनिता। रवावायद्वैन्यं रुगति नवमे चित्तचेष्टाविरोधो जयं याते व्योम्नि दशमसंस्थे कर्मसिद्धिं क्रमेण। जयं स्थानं मानं विभवमपि चैकादशे रोगनाशं, सुखानां चेष्टा भवति सफला द्वादशे नेतरेषाम्।

विधोः—अर्धो जन्मन्यष्टमतनयसंस्थाक्षदकरो द्वितीये मानार्थैः स्खलयति सचिवैश्च भवति। तृतीये वस्त्रान्नो-धनविनिचयसौख्यानि लभते चतुर्थेऽविश्रान्तः शिख-रिणिभुजङ्गेन सहजः। दैन्यं व्याधिं शुचमपि मनौ षष्ठसंस्थे मानस्खिन्नं सप्तमे चित्तं जनयति दुखं मधुरोगचयं च। यानं भूमिं शयनमशनं सप्तमे चित्तमानं मन्दा-क्रान्ते फाल्गुनि क्षितिसुतौ चाष्टमे मौनिनं कुरुः। नवमगृहगा बन्धोर्नाशमोदररोगकृत्पवभवते चाष्टाक्षं चि-त्तविकरः शशी। उपचयसुहृत्सौख्यागारे मोदसुपाल्यो दशमचरितान्द्धानन्ये करोति हि सख्यात्।

कुजस्य—कुजेऽभवतः प्रथमे, द्वितीये नरेन्द्रपीडा कलहा-दिदोषैः। भवं च पितामहरोगचोरैरुपेन्द्रवज्रप्रतिमोऽपि यः स्यात्। तृतीयगैरेकमारकेभ्यो भौमः सहजात् फलमादधाति। प्रदीप्तिवार्ता धनभोगहानि धात्वा-करास्त्रैः क्षितिपराच्च। भवति धरणिजे चतुर्थगे ज्वरजठरगदाद्भुतुरः। कुपुरुषजनिताच्च सङ्कमात् प्रव-भ्रमं च करोति चाशुभम्। रिपुभदरुजोपभयानि पञ्चमे तनयकृताच्च शुचो मङ्गीशुते। द्यूनरपि नाशं चिरं भवेत् स्थिरा गिरिसि कमेरिव मानती कला। रिपु-भयकलहैर्वियोजितः स जनकविद्विषतामकारणः। रिपु-भयमगते मङ्गीशुते क्षितिपरवज्रविकारकीर्यते। कलह-कलङ्कक्षितिसुतजठररोगकृत् सप्तमे चरणुचजङ्घ्रतः क्षितिपतिकृतमानोऽष्टमे। कुजे नवमसंस्थिते परिभवार्द्ध-मामादि भवितिचितगतिर्भवत्यवलदेहवातकृद्भैः। दश-मगृहगते महीजे विविधवनाद्रिपान्थगे जयद। जनपदपरिस्थितच भुङ्क्ते धनमिव षट्चरणः कुसु-मितागमम्। नानाव्यथैर्दीदशे मङ्गीशुते मनाक्षतेऽ-नर्थकतैव मानवः। स्त्रीजोपचितैव स नेत्रवेदनैर्दीऽ-धीन्द्रशाखिजनेन गर्हितः।

बुधस्य—दृष्टाक्षिपिशुनादितभेदैर्बन्धनैः सबलहैव दुगस्थः। जन्मगे शशिसुते यदि गच्छत् स्वल्पोऽपि कुगणं न भजेति। परिभवो धनगते धनक्षयिः सहजगे शशिसुते सुहृदाप्तिः। व्ययतिगश्च भवशङ्कितचित्तो दुःखदं व्रजति दुष्टरतैः स्वैः। चतुर्थगे खजनबन्धुसुहृद्भो धनागमो भवति च भीतरहिते। सुतस्थिते तनयजन्मविगृह्यो निर्दिशते न च रुचिरामपि स्त्रियम्। सौम्याख्ये दिवस-यमध्वगतं च षष्ठे वैरणं जलकमलीव मनसे शुः। सप्तस्थे सुतजयवस्त्रवित्तलाभा नैपुणं भवति अति-प्रहर्षणीयम्। विघ्नकरो नवमः शशिसूनुः कर्मगतो रिपुहा धनदश्च। सामर्द्ध भवनं च विक्षते तद्वृद्धौ च कृषास्तरणं च। धनधुतनोषितभिन्नभाजनाग्निसुहित्सु क्षितिकिरणपत्रे कामगे सदशाकः। रिपुपरिभव-रोगैः पीडितो द्वादशस्थे न सहति परिभोक्तुं मालिनीभोगसौख्यम्।

गुरोः—जीव जन्मन्यष्टमतनयगो स्थानभ्रष्टो बन्धुजनद्वे-षुतः। प्राप्यार्थांस्तान् व्ययिरपि कुरुते कल्पाख्ये भ्रमरविलसितम्। स्थानभ्रंशात् कार्यवशतश्च तृतीये-ऽनेकैः क्लेशैर्बन्धुजनोत्थैश्च चतुर्थे। जीवे भूमिं पी-डितचित्तश्च सिन्धुश्चैव गृहे नापि वने सत्तमसूरे। जनयति च तनयधनसुखगतः परजनसुभगतकरि-तुरगसुखान्। सकलकपुरन्दरद्युतिसदनस्थः सचिवगुण-निकरस्तदपि विबुधगुरुः। न सखीवदनं निरीक्ष्यवक्त्रं न भवनं मिथिलीकिलकादितम्। करिण इव सुतभाव-विचिलितं रिपुमते मनःक्षुब्धं गुरौ। त्रिदशगुरुः शयनं रतिभोगं धनसयनं कुसुमान्नपानान्। जन-यति सुतसरसिरुहेतो कलितवदां च गिरं प्रियां च। बन्धुं व्याधिं चाष्टमे शोकदुखं मार्ग-क्षयं सख्युदुखांश्च रोगान्। नैपुणाद्या दशकर्मसि-द्धिं धर्मं जीवः मालिनीनां च लाभम्। स्थानक्षय-धनहा दशमक्षतप्रदो भवति लाभगो गुरुः। द्वादशे-ऽध्वनि विलोमदुःखदान् याति यद्यपि नरो रथोद्धतः।

शुक्रस्य—प्रथमगृहगो भृगुसुतः क्षोपकरश्चैः सुरभिमनो-भ्रमजनकैश्च मालिनीरूपकथम्। शयनगृहगमनसुतस्थ चाङ्गकृते भवदखिलिनीदुखसरोजदृष्टरथताम्।

शुक्रे द्वितीयगृहगे प्रकटार्थवाक्यभूषाकलत्रसुतबन्धुहितान्वयोद्यः। संवेगने कृतधरत्रविभूषितश्च कामं वसत्यतिबलद्युतनूनजाड्यः। आज्ञाधमानाखदभूषित स्वगतत्वयात् दैवगुरुस्तुतोऽसौ। धत्ते चतुर्थेऽथ सुहृत्समाजं रुद्रेन्द्राज्ञवीतमां च यक्षिम्। जनयति शुक्रः पद्मसखो गुरुपरितोषं बन्धुजनाप्तिम्। श्रुतधनलब्धि मित्रसुखात्वात् अनर्जितत्वं चारिबलेषु। षष्ठो रुजः परिभवरोगभाग्दः स्त्रीहेतुकं जनयति सप्तमोऽशुभम्। यातोऽष्टमं भवनपरिच्छदप्रदो लक्ष्मीवतीसुपनयति स्त्रियं च सः। भवने तु धर्मवनिताऽऽत्मजम् भ्रुजोर्यवस्त्रनिचयं भवेत्। दशमेऽवमानकलहाद्विभवात् प्रमिताक्षरागमपि वदन् लभते। उपान्त्यगो भगः सुतः सुहृद्धनाद्यगच्छेदः। धनाक्षरागमोऽन्यगे स्थिरस्तु नाक्षरागमः।

शनेः—प्रथमे रविजे विषयच्छिदुरः स्वजनैर्विधुतः कृतबन्धुवधः। परदेशसुपैत्यदुःखभुग्नो विस्खार्थदुतोऽटक दीनसुखः। चारवशाद्द्वितीयगृहगे दिनकरतनये क्रूरखलापवर्जिततनुर्विभवमदवलः। अन्यसुधैः कृतं यदसुखं तदपि खलु भवत्यिव वंशपतनपतितं न दुष्ट न च चिरम्। सुखसुते ततीयगृहगे धनानि लभते दासपरिच्छदोऽमहिषाश्वकङ्कखरखरान्। सप्तविभूतिसौख्यमतं गदव्यु परमं मोहरुपि प्रथाख्यधि रिपुंश्च वीरचरितैः। चतुर्थं गृहं खूर्यजेऽभ्युपेते सुहृद्विभवार्थं दभिर्विमुक्तः। भवत्यस्य सर्वत्र चाशाधुदष्टं भुजङ्गप्रयातानुकारं च चित्तम्। सुतधनपरिक्षोणः पद्मस्थे प्रचुरकलहयुक्तश्चार्कपुत्रे। विनिहतरिपुरोगः षष्ठगते पितरि च बलिनाढ्यं श्रीपटोऽस्म्। मरणव्यध्वानं स्वप्ने चाष्टमे च क्षीणः स्त्रीपुत्रैः सर्वजे दीनचेष्टः। तदर्मस्थे वैरद्वेषोगबन्धैर्नीचैर्युक्तिर्द्वेष्टदेवीक्षितादयः। कर्मप्राप्तिर्मनोऽधिपत्यं विद्याकीर्त्तीः परिक्षायिश्च सौरे। तैलाद्यं लाभे परदोषाक्षिलाभान्त्ये प्राप्तोऽपि शोकोभिमाक्षाम्। यदि कालमपेक्ष्य च पात्रं शुभकृद्दद्याच्छनैश्चरः। न मधौ दुष्कृतं कृदये च विद्युज्जठरि मेघपिताः। रक्तैः पुष्पैर्गन्धैताद्यैः कनकदधत्तकुसुमैर्दशकरभूसुतौ भक्त्या पुष्पाविन्दुभिन्ना सितकुसुमरजतमधुरैः सितैश्च मद्यैः। लवणद्रव्यैः शौरिः शौक्ष्यो मंधरजततिलकङ्कुसुमैर्दुःखपरीतैर्दुःखैः प्रीतैः पीडा न खाद्यादि यतति यदि वा भुजङ्गविज्रम्भितम्। शनेरेतामस्यभद्दमप विद्युद्वपुजया। शनिजप नयमदानदमैः सुजनाभिमाक्षसमनेसया। रविसौमौ पूर्वौ शशिकौरा कवयतोऽन्यगो रामेः। सदसद्बलस्य मार्गाख्युगोबोधासंस्थम्। चादो दाहज् सौख्यः पद्मादपि तादृशो भवति। उच्चगेमांत्राणां मणवत्सलाभयोगो वा। आर्याणामपि कुरुते विनाशनन्तुर्दुविभवसंस्थः। गण इव षष्ठे दृष्टश्च सर्वसुतां गतो भवति। आयुमनिरीक्षितः शुभकृत्तो बलिना बलवान् आयुःक्षयपदत्व शुभस्थितयोपगतः। आयुशुभावपि सकृत्वयोर्जातः समतासु दृढमपि गीतं च खलु नर्दटकं च यथा। नीचेरिभेऽस्ते चरिदृश्य सौ दृश्या यत्परकीर्तितम्। पुरतोऽस्त्रयोः भाग्यस्थाः सविलासदृष्टाक्षिनरीक्षणम्। क्रूरसुतोर्कपुत्रसमबन्धुकृतश्चन्दतः समतुयाति। यथाक्रन्दमार्यागीतिर्वैताकीर्यं च मागधो गाथाढ्यम्। सौरोऽर्करश्मिरागात् सविकारो लक्ष्यादिरधिकतरम्। पित्तादाचरति यथा पथ्यातां न तु तथाऽऽमाम्। याहशेन गृहयोनुदुःक्लान्तादृग्भवेत्तोऽपि। मनोहरिसमायोगाकार इव यक्षस्य। षष्ठं सर्वपादेषु सप्तमं द्विचतुर्थयोः। सहस्रोकावरं सहस्रयुतां याति दुःस्थितैः। प्रकाशं च भुवं च कृतवाहो व्यवस्थितः। स याति गुरुतां लोके यदा रुः सुस्थिता गृहाः। प्रारब्धसुस्थिरैर्नृपैस्तु कर्मा क्रियाविद्भवेदुधैः। विनिहन्ति तदेव कर्म तात् वैताकीयमिवायथाक्रतम्। सौख्यिमवेक्ष्य यो गृहस्थः काले प्रक्रमणं करोति राजा। अणुरपि स पौरुषेय इक्षोपक्रन्दिकस्य याति पारम्। अत्र सप्तगोचरफलमध्ये राशीनां फलानुकीर्तनं पक्षसमाभिप्रायेणेति बोद्धम्। अत्र विशेषः ज्योत्स्नाकृता यथा "गोचरपीडाध्यायेऽपि राशिभिन्नैः शुभग्रहैर्दृष्टः। पीडां न करोति तदा पापैरेवं विपर्यासः। गोचरापवादः। "दिनकरहरिरी प्रवेशकाले गुरुभृगुजौ भावसंस्थ मध्यगतौ। रविसुतशशिनौ त्रिकर्मसंस्थौ रविसुतयः फलदस्तु सर्वकालम्"। राशिभिन्नभावफलम्। "सप्तमे पञ्चमाद्यस्थचन्द्रः सर्वत्र शोभनः। शुक्लपक्षे द्वितीयस्तु पद्मोनवमसंस्थया। वितथनिष्फलकीर्त्यादिकान्दन्दैरागार्त्ता व्ययदुःखनवमस्थोऽपीदृशानाशयतेषाम्। सहजतनिधनगदेत् सत्यु पलार्थगोऽपि प्रचुरशुभफलः स्यात्

वामवेधेन गुहः"। वामवेधश्च दृग्गणितैक्यमेतीति वक्ष्यमाणवचनाच्चैकार्थत्वाद्वोद्धव्यम्। "उपचयकरगुणः सव्यः शुक्रे च शुभमिच्छतां सौम्यमध्यस्थितोयो। सप्तिवशिष्टगुणः कारकर्क्षेऽपि चेन्द्रजयधनसुखदाता तत्पक्षर्क्षान्यथा तु"। सव्यम उक्तलक्षणवक्रचारी। उपचयकरश्च पञ्चाङ्गैर्वा कर्तव्योऽक्षम्। "भानां यथा रुक्मारुक्तरेण पञ्चाङ्गकाणां यदि वा प्रयाङ्गः। शुभग्रहाणां शुभदः प्रयाणे याम्येन यातोन शुभः प्रयाङ्गः। योवस्य दशमगृक्षगः स तस्य पक्षो भवति दिवसेन। सर्वेऽङ्गनूनातिरिक्तभोगाः कार्यक्षेषु यावत्न कास्थिताः। जन्मकालवशगाश्च तु कारकाः कर्मगास्तु तेषां विशेषतः। सितपक्षादौ चन्द्रे शुभे शुभं पक्ष मशुभमशुभे च। कृष्णे गोचरसुखदेन शुभः पक्षः शुभोऽतोऽन्यः"। श्रीपतिरप्याह। "शुक्लपक्षे प्रतिपदि चन्द्रे जिने शिवं पक्षम्। कृष्णे प्रतिपदि तारासुतौ शुभं विदुः पक्षम्"। सूर्यसिद्धान्तेऽपि

"भार्कक्षेऽथ पुरारामम् "द्रव्ये गंडेषु भक्षेषु कृष्णपक्षे तनौषु च। भार्क्षवेऽस्तु गृहे दुष्टभयं पुत्रवतां क्वचित्। आत्मन्यत्यक्षपक्षानां सर्वत्रैवातिपापिनाम्। न कुलापि शुभा पक्षा नराणां जायते भयम्"।

**ग्रहगति** स्त्री हृत०। ग्रहाणां ग्रहर्क्षं भोगभ्रमभेदे। तत्र खगगति शब्दे २४१४ पृ० ग्रहगतिभेदात्तत् कारणादिकं च दर्शितम्। तत्र गृहाणां सायनदिनगतिसाधनं सि०शि० उक्तं तच्च खगोलशब्दे २४३२पृ० उक्तावसरेऽपि विशेषोऽत्रोच्यते। तत्र गृहाणां दिनगतिसाधनं सि०शि० उक्तं यथा

"मन्दोनितादृग्गणात् फलानि यानि तत्कलाः। भवन्ति मध्यमाः क्रमाद्भगदां द्युभुक्तयः। सका गतिस्तु योजनैर्नभःसदां सदा भवेत्। फलादिकल्पनावशान्मृदुहृता च सा खगा" सि०शि०।

"फलोपपत्तिस्तैराशिकेन। पूर्वं गतिर्योजनात्मिका ग्रहाणां तुल्येत्युक्ता। इदानीमतुल्या। सा फलादिकल्पनावशात्। इदानीमतुल्यत्वे कारणमाह"मिता०

"फलाः सर्वे अपि दिवसदां चक्रकलाप्राप्तिलाभा इतो लब्धो नवनि मन्दति शुभैक्यत्वेन शिघ्राः। तस्मादेते शशिभृगुजादित्यभौमेज्यमन्दा मन्दाक्रान्ता इव गणधरा ह्यानि यान्तः क्रमेण" सि०शि०।

"यतः सर्वे अपि फलाद्यङ्क२१६००। लिप्ताधिरेवाप्तिलाभाः अतो मन्दति इते मन्दयो शिघ्राः स्युः। मन्दनि लब्धयः। तद्यथा चन्द्रस्या सौम्यस्या लब्धः। तस्मादेका कला षड्दशभिर्दीनैर्भवेत। शनेः कला सौरिस्या सा मन्दगो। तस्मादेका कला योजनानां षड्भिः मन्दैरेकसप्तत्योनै ५८२६ र्भवति। योजनं चतुःक्रोशश्च। अतश्चन्द्रात् सकाशादूर्ध्वंस्था बुधशुक्रादयः क्रमेण मन्दाक्रान्ता मन्दमन्द इव भान्ति। मन्दाक्रान्ताछन्दोऽपि सूचितम्" प्रमिता०। स्फुटगतिमाह

"द्वित्रारसूटलवान्तरं खादु गतः स्फुटा तत्समयान्तराले। कोटी फलघ्नी खदृक्केन्द्रभुक्तिक्षिप्तोद्धृता कर्किखगादिकेन्द्रे। तत्र युतोना खदृगष्टभुक्तिसातात्कालिकी केन्द्रपरिस्फुटा स्यात्। खमीपतिध्यानखमीपचालनं विधोस्तु तत्कालवशेन युज्यते। दूरक्षचालनमाद्यया यतः प्रतिक्षणं सा न समा मतक्षतः" सि०शि०

अद्यतनस्फुटस्फुटयोरहर्दिवसयोर्दिनार्द्धजयोर्वा कालिकयोर्यदन्तरं तत्कर्किं सा स्फुटा गतिः। अद्यतनात् स्फुटे न्यूने वक्रा मतर्ह्येवा। तत्समयान्तराले इति। तत्र कालस्य मध्यदिनया मध्या गृह्यमाणयित्वं युज्यत इति। इयं किल स्फुटा गतिः। अथ स्फुटा तात्कालिकी कथ्यते। तद्भगणना चन्द्रगतिः। अन्येषां ग्रहाणां गृहगतिरेव केन्द्रगतिः। स्फुटकेन्द्रकोटिफलं कृत्वा तेन केन्द्रगतिर्गुणा लिप्तया भाज्या लब्धेन कर्कादिकेन्द्रे षड्गतिर्युक्ता कार्या। मृगादौ तु रहिता कार्या। एवं तात्कालिकी मन्दपरिस्फुटा स्यात्। तात्कालिकात्र भुक्त्या चन्द्रस्य विशिष्टं प्रयोजनम् तदाह। खमीपतिध्यानखमीपचालनमिति। यत्कालिकचन्द्रभुक्त्यात् कालाद्गतो वा भव्यो वा यदासन्नस्थित्यनुसारेण तात्कालिकात्र भुक्त्या गतिसाधनं कर्तुं युज्यते। तथा खमीपचालनं च। यदा तु दूरतरस्थित्यनो दूरचालनं वा चन्द्रस्य तदाद्यया स्थूलया कर्तुं युज्यते स्थूलकालत्वात्। यतश्चन्द्रगतिर्भेदक्षात् प्रतिक्षणं समा न भवति। अतस्तदर्थमयं विशेषोऽभिहितः। अथ गतिफलवासना। अद्यतनस्फुटस्फुटयोरन्तरं गतिः। अत एव गृहफलयोरन्तरं गतिफलं भवितुमर्हति। अथ लब्धानयनम्। अद्यतनस्फुटकेन्द्रयोरन्तरं केन्द्रगतिः। भुजज्याकरणे चक्रांश्यखण्डं तेन सा गुणा खरन्ध्रदृक्२२५भाज्या। तत्र तावत् तात्कालिकोऽयंखण्ड-

करणायानुपातः। यदि त्रिज्यातुल्यया कोटिज्यया भोग्यखण्डं ग्रहहृद्गतुल्यं लभ्यते तदेष्टया किमित्यनुपातेन कोटिज्यायाः ग्रहहृद्गा २२५ गुणश्चिज्या हरः। फलं तात्कालिकं स्फुटभोग्यखण्डं तेन केन्द्रगतिर्गुणनीया ग्रहहृद्भक्ता। अत्र ग्रहहृद्गमितयोर्गुणकभाजकयोस्तुल्यत्वाच्छागे हते केन्द्रगतेः कोटिज्या गुणश्चिज्या हरः स्यात्। फलमद्यतनकेन्द्रदोर्ज्ययोरन्तरं भवति। तत्फलकरणार्थं स्वपरिधिना गुण्यं भागै २६० भाज्यम्। पूर्वं किल गुणकः कोटिज्या सा यावत् परिधिना गुण्यते भागै २६० हियते तावत् कोटिफलं जायेत इत्युपपन्नं कोटौ फलभूयो ह्रस्वकेन्द्रभुक्तिरित्यादि। एवमद्यतनचक्रलग्नगृहफलयोरन्तरं तद्गतेः फलं कर्कादिकेन्द्रे ग्रहर्णफलस्यापचीयमानत्वात् तुलादौ धनफलस्योपचीयमानत्वाद्धनम्। मकरादौ तु धनफलस्यापचीयमानत्वान्मेषादावृणफलस्योपचीयमानत्वादृणमित्युपपन्नम्" ग्रहिता०।

**ग्रहगन्ध** पु० ६त०। गृह्यमाणे वक्ष्यमाणे स्वर्णादुद्देशेन देये रक्तचन्दनादौ।

**ग्रहचिन्तक** पु० ग्रहान् शुभाशुभदायकतया चिन्तयति चिन्ति-ण्वुल् ६त०। दैवज्ञे सांवत्सरिके। "वक्तव्यमिष्टं जगतोऽशुभं वा शास्त्रोपदेशाद्ग्रहचिन्तकेन" ह० स० २४अ०।

**ग्रहण** न० गृह्-भावे ल्युट्। १स्वीकारे २ज्ञाने। ३आदरे ४उपरागे चन्द्रसूर्ययोः राहुणा ग्रसने करणे ल्युट्। ५करे मेदि०। ६इन्द्रिये राजनि०। ७शब्दे जटा०। तत्र करस्य ग्रहणसाधनत्वात् इन्द्रियाणां शब्दस्य च ज्ञानसाधनत्वात् तथात्वम्। उपरागस्य यथा राहुकृतत्वं तथा उपरागशब्दे १२।१४ उक्तम्।

"चक्षुषा दर्शनं राहोर्यत्तद्गृह्णसञ्ज्ञते" संवत्सर प्रदीपः। तत्रातुरस्यापि स्नानमाह "आदित्यकिरणैः पूतं पुनः पूतञ्च वह्निना। जलं, व्याध्यातुरः स्नायात् ग्रहणेऽभ्युक्षणादिना" व्यासः। तत्र सर्वजनस्य श्राद्धतुल्यतामाह व्यासः "सर्वं भूमिसमं दानं सर्वं व्यासमया द्विजाः। सर्वं गङ्गासमं तोयं ग्रहणे नात्र संशयः"। तत्र श्राद्धस्यावश्यकतामाह शाता०। "सर्वैरेवापि कर्त्तव्यं श्राद्धं वै राहुदर्शने। अकुर्वाणस्तु तत् श्राद्धं पङ्के गौरिव सीदति"। तत्तामाश्रित्य श्राद्धमाह प्रचेताः "आपद्यनग्नौ तीर्थे च चन्द्रसूर्यग्रहे तथा। श्राद्धं द्विजैः कार्यं गृह्येण तु सदैव हि"। श्राद्धेऽपि विशेषो योगिनीतन्त्रे "निरग्नेरामश्राद्धे तु अन्नं न ज्ञानवेत् क्वचित्। हव्यौ तु ज्ञानवेदन्नं संक्रमे ग्रहणेषु च"। ग्रहणश्राद्धादिकं मलमासेऽपि कार्यं यथाह कालमा० स्मृतिः "चन्द्रसूर्यग्रहे स्नानं श्राद्धदानजपादिकम्। कार्य्याणि मलमासेऽपि नित्यं नैमित्तिकं तथा"। तत्र दीक्षायां नैव कालादिशुद्ध्यपेक्षा "सप्तर्क्षैर्ऋक्षविधुयासे तन्तुदामनपर्वणोः। मन्त्रदीक्षां प्रकुर्वीतो मासर्क्षादीन् न शोधयेत्" सारसंग्रहः। तत्र वारभेदे गुणाधिक्यम् "चन्द्रग्रहश्चन्द्रवारे रवौ सूर्यग्रहस्तथा। चूडामणिरयं योगस्तत्रानन्तफलं स्मृतम्। अन्यस्माद्ग्रहणात् कोटिगुणमत्र फलं लभेत्" गरु०पु०। अत्र पुरश्चरणप्रकारः "अथ वाग्यप्रकारेण पुरश्चरणमिष्यते। ग्रहणेऽर्कस्य चेन्दोर्वा शुचिः पूर्वमुपोषितः। नद्यां सप्तद्वयामिश्रां नाभिनाभोदके स्थितः। यद्वा पुण्योदके स्नात्वा शुचिः पूर्वमुपोषितः। ग्रहणादि विमोक्षान्तं जपेन्मन्त्रं समाहितः। अनन्तरं दशांशेन क्रमाद्धोमादिकं चरेत्। तदन्ते महतीं पूजां कुर्याद्ब्राह्मणतर्पणम्। ततो मन्त्रप्रसिद्ध्यर्थं गुरुं संपूज्य तोषयेत्। एवञ्च मन्त्रसिद्धिः स्याद्देवता च प्रसीदति"। तिं०त० पुरश्चरणच०। तत्र स्नानस्यावश्यकतामाह हरिहरभक्तिः "संक्रमे ग्रहणे चैव न स्नायाद्यस्तु मानवः। सप्तजन्मसु कुष्ठी स्याद्दरिद्रः सप्तजन्मसु। सप्तजन्मसु कुष्ठी स्याद्दुःखभागी च सर्वदा" अत्राशौचेऽपि साङ्गस्नानमात्रं कार्यं यथाह स्मृतिः। "सूतके मृतके चैव न दोषो राहुदर्शने। स्नानमात्रन्तु कर्त्तव्यं दानश्राद्धविवर्जितम्"। अत्र मृताशौचं नास्ति यथोक्तम् "चन्द्रसूर्यग्रहे चैव मृतानां पिण्डकर्मणि। महातीर्थे तु संप्राप्ते मृतदोषो न विद्यते" भविष्यपु०।

तत्र स्नाने "भार्य्यात्वसंपादकं ग्रहणं विवाहः" उद्वा०त० रघुः "स्वतएव सतां परार्थता ग्रहणानां हि यथा यथार्थता" नैष०। दाने "पात्रियग्रहणिकाः मन्त्रा नियतं दारलक्षणम्" उ० त० स्मृतिः। "आचारधूमग्रहणात् बभूव" रघुः "स बाष्पशतसङ्ख्यस्य सर्व्वस्य ग्रहणं रवेः" हरिवं०४६अ०। अर्थवदग्रहणेनानर्थकस्य" "अनिमित्तमनुग्रहणान्न्यर्थवता चानर्थकेन तदलविधिं प्रयोजयन्ति" व्या० परिभाषा।

**ग्रहणक** न०स्वार्थेऽनेन ग्रह-करणे ल्युट् ततः स्वार्थे क। याज्ञिके शस्त्रे। "हस्तादीनामपि ग्रहणकशास्त्रवत्वात्

ग्रहत्वं स्यात्" सि० कौ०। शब्देन्दुशेखरे तु ग्रहणकेत्यत्र ग्राहकेति पाठः।

ग्रह(णि)णी स्त्री ग्रह्णाति रोगिणोदेहम् ग्रह-अनि वा ङीप्। १पित्तधराख्ये कलाभेदे २तदाश्रिते रोगभेदे ग्रवाहिकायां च तद्रोगस्थाननिदानादयुक्ते हुश्रुते यथा

"दुष्यति ग्रहणी जन्तोरग्निसादनहेतुभिः। अतिसारे निवृत्तेऽपि मन्दाग्नेरहिताशिनः। भूयः सन्दूषितो वह्निर्ग्रहणीमभिदूषयेत्। तस्मात्कार्यः परीहारस्तीसारे विरिक्तवत्। यावच्च प्रकृतिस्थः स्याद्दोषतः प्राग्यतस्तथा। अष्टौ पित्तधरा नाम या कला परिकीर्त्तिता। पक्वामाशयमध्यस्था ग्रहणी सा प्रकीर्त्तिता। ग्रहण्यां बलमग्निर्हि स चापि ग्रहणोश्रितः। तस्मात्तं दूषिते पक्वौ ग्रहणी भस्मदुष्यति। एकशः सर्वशश्चैव दोषैरत्यर्थमूर्च्छितैः। सा दुष्टा बह्वशोभुक्तमाममेव विसृजति। पक्वं वा सरुजं पूति सङ्कीर्णं सङ्कटद्रवम्। ग्रहणीरोगमाङ्गत्तमायुर्वेदविदो जनाः। तस्योत्पत्तौ विदाहाम्लसदनालस्यहृत्कण्ठमाः। बलक्षयोऽरुचिः कासः कर्णक्ष्वेडान्त्रकूजनम्। अच्छ जाते भवेच्छ्लानुः स्नूनपादकरः क्षयः। पर्व्वरुग्लोम्नहृद्दिच्छरारोचकदाहवान्। उद्गिरेच्छ्वसतिश्लाम्लोद्धूमामगन्धिकम्। प्रसेकसुखवैरस्यतमकारुचिपीडितः। वाताच्छ्लाधिकैः पायुहृत्पार्श्वोदरमस्तकैः। पित्तात्सदाहैर्मुरुभिः कफात्स्निग्धैश्चिरक्षयैः। दोषवर्त्मनखेस्तद्वद्दिष्मूत्रनयनाननैः। क्षुत्पाण्डूदरगुल्मार्शःप्लीहाग्न्यादी च मानवः"।

"नानाविधद्रव्यचौरो जायते ग्रहणीयुतः" गाता०। तस्याः कर्मभेदविपाकतोक्ता। तस्या महारोगत्वमदाह्यशब्दे उक्तम् "दह्यश्च ग्रहणीरोगो नाम्नष्टीत्वा निवर्त्तते" वैद्य०।

ग्रहणीहर न० ग्रहणीं हरति हृ-अच्। १लवङ्गे शब्दच० २ग्रहणीहारके औषधादौ त्रि०।

ग्रहदक्षिणा पु० ग्रहाणां ग्रहोद्देशेन देया दक्षिणा। ग्रहोद्देशेन ग्रहयज्ञे देयधेन्वादिदक्षिणायाम् ग्रहयज्ञशब्दे विवृतिः।

ग्रहदान पु०क्ली० ग्रहोद्देशेन तदशुभशान्त्यै दानम्। ग्रहाशुभनिवारणार्थं देवे द्रव्यभेदे गोचरशब्दे ग्रहगोचरशब्दे ग्रहविप्रशब्दे च तद्विवृतिः।

ग्रहदृष्टि स्त्री। ६त०। ग्रहाणां स्वस्थानापेक्षया स्थानभेदेषु दर्शनभेदे सा च ज्योतिषतत्त्वे तट्टीकायां चोक्ता यथा "त्रिदशत्रिकोणचतुरस्रसप्तमगतान्यवलोकयति चरणाभिहन्ति। रविजामरेज्यरुधिराः परे च ये क्रमशो भवन्ति किल वीक्षणेऽधिकाः" ज्योत्स्ना०। "यस्मिन् स्थाने खेटाः स्थितास्तस्मात्त्रिदशादीनि स्थानानि चरणाभिहन्ति पादहृष्ट्यावलोकयति खेटो यस्मिन् राशौ व्यवस्थितः तस्माद्यस्तृतीयगः खेटो दशमगतश्च तौ तृतीयदशमराशी च पादेन चतुर्भागदृष्ट्यावलोकयति एवं त्रिकोणस्थौ नवपञ्चमस्थानगतावर्द्धदृष्ट्या, चतुरस्रेऽष्टमचतुर्थे अष्टमचतुर्थस्थानस्थौ पादहीनदृष्ट्या सप्तमे खेटं परिपूर्णदृष्ट्या। चरणाभिहन्ति इत्यत्राभिशब्दो वीप्सां द्योतयति चरणचरणदृष्ट्या पादपाददृष्टेत्यर्थः। यावत्पाददृष्ट्या पश्यन्ति तावत् फलं प्रयच्छन्ति तथा च खेलजातके "दशमतृतीये नवमपञ्चमे चतुर्थाष्टमे फलं च। पश्यन्ति पाददृष्ट्या फलानि चैवं प्रयच्छन्ति"। अर्थादेव खेटा उक्तस्थानानि पश्यन्तीति तथा च सारावल्याम् "सर्व्वं पश्यति सदा खगाश्चरणदृष्टिनः सर्व्वं। त्रिदशत्रिकोणचतुरस्रसप्तमगतान् फलं क्रमेणैव। पूर्णं पश्यति रविजस्तृतीयदशमे त्रिकोणमपि जीवः। चतुरस्रं भूमिसुतः सितार्कबुधदृष्टिमकराः फलं च"। तथा यवनेश्वरः" द्वौ पञ्चमौ ११।१२। अष्टमथ द्वितीयं संस्थानराशेः परिहृत्य राशिम्। शेषान् खगः पश्यति सर्वकालमिष्टेषु चैषां विहिता दृगिष्टा। जामित्रभे दृष्टिफलं समस्तं स्वपादहीनं चतुरस्रयोश्च। त्रिकोणयोर्दृष्टिफलार्द्धमाहुर्दृग्विच्युतसंज्ञे दशमे च पादम्"। रविजामरेज्यरुधिरा इति। त्रिदेत्यागमसूचने चरणाभिहन्ति इत्यनुवर्त्तते एते रविजादयश्चरणाभिहन्तिः पादोपचयाद्दीक्षणे दर्शने क्रमशोऽधिकफलप्रदा भवन्ति रविजः सौरिः स दर्शने पादफलप्रदः, अमरेज्यो बृहस्पतिर्द्वफलप्रदः रुधिरोऽङ्गारकः स पादहीनफलप्रदः। अपरेऽर्कचन्द्रबुधशुक्रास्तु वीक्षणे समफलप्रदाः। एतच्चार्गलं ग्रहाणां दृष्टिफलम्। स्थानबलादेतेषां यथार्थं दृष्टिफलमुक्तम् एवमेके व्याचक्षते। अपरे तु आहुः स्थानफलमेतत् तेन त्रिदशादिस्थानगतान् ग्रहराशीन् पश्यन्तो रविजादयो दर्शनेऽधिकफलप्रदा भवन्ति तद्यथा तृतीयदशमस्थान् ग्रहान् राशीन् वा शनैश्चरः पश्यन्नन्येभ्यो ग्रहेभ्योऽधिकफलप्रदो भवति परिपूर्णं पश्यतीत्यर्थः। एवं त्रिकोणस्थान् जीवः, चतुरस्रगान् भौमः, सप्तमस्थान् परे सूर्यचन्द्रबुधशुक्राः। एतच्च बहुतराचार्याणां मतम्। तथा च भगवान

गर्गः "दुश्चिक्यदशमान् सौरिश्चिकोणस्थान् दृङ्-स्मृतिः। चतुर्थाष्टमगान् भौमः शेषाः सप्तमसंस्थितान्। भवन्ति वीक्षणे नित्यसप्ताधिकफलाः खगाः"। भट्टो-त्पलस्तु राहोर्दृक्त्वाभावेन न तस्य दृष्टिमुक्ता। ज्यो० त० अन्यखेटदृष्टिः तद्दृष्टिरुक्ता यथा "दशमे च तृतीये च पाददृष्टिरुदाहृता। अर्द्धदृष्टिश्च नवमे पञ्चमे परिकीर्त्तिता। चतुर्थे सप्तमे चैव पादोना परिकीर्त्तिता। सप्तमे परिपूर्णा च फलमेवं प्रकल्पयेत्। तृतीयदशमावार्किः पश्यन् पूर्णफलप्रदः। त्रिकोणगान् गुरुश्चैव चतुर्थाष्टमगान् कुजः। सुतसप्तमनवान्त्ये पूर्ण-दृष्टिः ज्ञसुरारेर्युगलदशमराशौ दृष्टिपादलयार्द्धैः४५। सङ्गरिपुचतुर्थेष्वष्टमे चार्द्धदृष्टिः २०स्थितिभवनसुपान्त्यं नैव दृश्यं हि राहोः"।

सर्वकर्मोपयोगिनैसर्गिकग्रहदृष्टिचक्रम्।

| स्थान | र | च | मं | बु | ब्र | शु | श | रा |
|---|---|---|---|---|---|---|---|---|
| १ | ० | ० | ० | ० | ० | ० | ० | ० |
| २ | ० | ० | ० | ० | ० | ० | ० | ४५ |
| ३ | १५ | १५ | १५ | १५ | १५ | १५ | ६० | २० |
| ४ | ४५ | ४५ | ६० | ४५ | ४५ | ४५ | ४५ | ३० |
| ५ | ३० | ३० | ३० | ३० | ६० | ३० | ३० | ६० |
| ६ | ० | ० | ० | ० | ० | ० | ० | ३० |
| ७ | ६० | ६० | ६० | ६० | ६० | ६० | ६० | ६० |
| ८ | ४५ | ४५ | ६० | ४५ | ४५ | ४५ | ४५ | ३० |
| ९ | ३० | ३० | ३० | ३० | ६० | ३० | ३० | ६० |
| १० | १५ | १५ | १५ | १५ | १५ | १५ | ६० | ४५ |
| ११ | ० | ० | ० | ० | ० | ० | ० | ० |
| १२ | ० | ० | ० | ० | ० | ० | ० | ६० |

तात्कालिकदृष्टिस्तु दृष्टदृश्यग्रहयोर्द्दृक्खेटरागयोर्वा अनुपदं यक्ष्यमाणजातोक्तवत् कल्पनीया

दृश्यांस्तु विशेषः तत्र एकादिशेषे ये ध्रुवा उक्ता अत्र न तथा किन्तु दर्शितचक्रानुसारेण खगभेदे ध्रुवाः कल्पनीया इति। नैसर्गिकतात्कालिकमिलादिकं तु अरिशब्दे २२५५पृ० उक्तम्। तदनुसारेण मिलादिदृष्टिरुक्ता नीलकण्ठताजके तु वर्षप्रवेशफलोपयोगिनी अन्यविधैव दृष्टिरुक्ता यथा "दृष्टिः खाद्यवपञ्चमे बलवती प्रत्यक्षतः क्षेत्रदा पादोना४५खिलकार्यसाधनकरी मेलापकाख्योच्यते। युग्मक्षेत्रकरी तृतीयभवने कार्यस्य संसिद्धिदा त्र्यंशोना ४०क्षयिता तृतीयभवने षड्भाग।०दृष्टिर्भवे११। दृष्टिः पादमिता१५ चतुर्थदशमे युग्मारिभावा स्मृताऽन्योन्यं सप्तमभे तथैकभवने प्रत्यक्षवैराऽखिला६०। दृष्टं दृक्तुलितयं श्रुताक्षयमिदं कार्यस्य विध्वंसनं संख्यादिकलिप्तदं दश दृशौ स्युर्द्वादशांशान्तरे।

वर्षप्रवेशोपयोगिग्रहदृष्टिचक्रम्।

| स्थान | र | च | मं | बु | ब्र | शु | श | |
|---|---|---|---|---|---|---|---|---|
| १ | ६० | ६० | ६० | ६० | ६० | ६० | ६० | प्रत्यक्षवैरा |
| २ | ० | ० | ० | ० | ० | ० | ० | |
| ३ | ४० | ४० | ४० | ४० | ४० | ४० | ४० | युग्मक्षेत्रा |
| ४ | १५ | १५ | १५ | १५ | १५ | १५ | १५ | युग्मारिः |
| ५ | ४५ | ४५ | ४५ | ४५ | ४५ | ४५ | ४५ | प्रत्यक्षमिला |
| ६ | ० | ० | ० | ० | ० | ० | ० | |
| ७ | ६० | ६० | ६० | ६० | ६० | ६० | ६० | प्रत्यक्षवैरा |
| ८ | ० | ० | ० | ० | ० | ० | ० | |
| ९ | ४५ | ४५ | ४५ | ४५ | ४५ | ४५ | ४५ | प्रत्यक्षक्षेत्रा |
| १० | १५ | १५ | १५ | १५ | १५ | १५ | १५ | युग्मारिः |
| ११ | १० | १० | १० | १० | १० | १० | १० | युग्ममिला |
| १२ | ० | ० | ० | ० | ० | ० | ० | |

तात्कालिकस्फुट दृष्टिस्तु

"अपास्य पञ्च निजदृश्यखेटादेकादिशेषे ध्रुवलिप्तिकाः स्युः। शून्यं खवेदास्त्रियोऽब्धिवेदाः खं धृतिरभ्रं शरजेदसंख्या। तिथ्यभ्रचन्द्राब्धिवदभ्रतर्काः शेषांशयातैष्यविशेषघातात्। लब्धैः खराभैरधिकोगतैष्ये स्वर्णं ध्रुवैताः स्फुटदृष्टिलिप्ताः" नी०ता०उक्तया दिशा ज्ञानेया।

**ग्रहदेवता** स्त्री ६त०। सूर्यादिग्रहाणामधिष्ठातृरुद्रादिदेवभेदे सा च यक्षयक्षशब्दे ३७५२ग्रा गृहाधिदेवतादयोऽत्र। [वक्ष्यमाणे युगयुगप्रभृतौ धूपे।

**ग्रहधूप** पु० गृहाणां गृहोद्देशेन धूपः। गृहयक्षशब्दे

**ग्रहनायक** पु०६त०। १सूर्ये २अर्कवृक्षे ३गणे च शब्दरत्ना०

**ग्रहनाश** पु० ग्रहं मलत्वं नाशयति नश-णिच्-ल्युण् उप० स०। शाकवृक्षे (क्षतियान्) शब्दर०।

**ग्रहनाशन** पु० ग्रहं मलत्वं नाशयति नश-णिच्-ल्यु शाकवृक्षे रत्नमा०।

**ग्रहनेमि** पु०ग्रहाणां ग्रहकक्षाणां नेमिरिव। चन्द्रे शब्दच० तस्य च ग्रहकक्षाधःस्थितत्वेन नेमितुल्यत्वात् तथात्वम्।

**ग्रहपति** पु० ६त०। १सूर्ये २अर्कवृक्षे अमरः। ३चन्द्रे च। "तस्य विक्षीर्य्यते राज्यं ज्योत्स्नाः ग्रहपतेरिव" भा० आ० १६८ अ०।

ग्रहपुष्प पु० ग्रहं पुष्णाति खकरैः पुष-क। सूर्य्ये हेम० तस्य च तथात्वं खगोलशब्दे पृ० दृश्यम्।

ग्रहप्रत्यधिदैवत न० ६त०। ग्रहाणां देवतानां देवतासु अग्न्यादिषु ग्रहयज्ञशब्दे २४३५ पृ० दृश्यम्।

ग्रहबल न० ६त०। ग्रहाणां बलभेदे तानि च बृहज्जातके तद्व्याख्याने भट्टोत्पलेन चोक्तानि यथा

"खोच्चसुहृत्स्वत्रिकोणनवांशैः स्थानबलं खस्थदृशोर्गते च। दिनु बुधार्किरवी रविभौमौ सूर्यसुतः सितशीतकरौ च। उदगयने रविशीतमयूखौ वक्रसमागमगाः परिशेषाः। विपुलकरा युधि चोत्तरसंस्थार्क्षेदित वीर्ययुताः परिकल्प्याः। निशिशशिकुजसौराः सर्वदा शोऽच्छि चान्ये बलबलसितगताः खुः क्रूरसौम्याः क्रमेण। द्व्ययनदिवसहोरामासवर्षैः कालवीर्यं शुक्रबुधगुरुचराद्याद्वदितो वीर्यवन्तः" बृहज्जा०। "अत्र ग्रहाणां चतुर्विधं स्थानदिक्चेष्टाकालाख्यं बलम्। तत्र तावत् स्थानदिग्बलं दोषकेनाह "खोच्चसुहृदिति खगृहर्क्षं प्रत्येकमभिसंबध्यते तत्र खोच्चे स्थितो गृहो बलवान् भवति, तात्कालिकस्य सुहृदो मित्रस्य क्षेत्रे स्थितो बलवानेव स्वत्रिकोणे आत्मीयमूलत्रिकोणे स्थितः, स्वनवांशे स्थितः, स्वसृहे स्वराशावुपगतः प्राप्तो बलवानेव, एतेषामन्यतमे व्यवस्थितो गृहः स्थानबलयुक्तो भवति। तत्रार्कस्य सिंहः स्वत्रिकोणम् तदेव स्वर्क्षं क्षेत्रम्। चन्द्रस्य वृष उच्चः स एव त्रिकोणम्, भौमस्य मेषः त्रिकोणम् तदेव स्वक्षेत्रं, बुधस्य कन्या उच्चः सैव मूल त्रिकोणं स्वक्षेत्रं च। गुरोः धन्वी त्रिकोणं, तदेव स्वक्षेत्रम् सौरेः कुम्भस्त्रिकोणम् तदेव स्वक्षेत्रम्। शुक्रस्य तुला त्रिकोणं तदेव स्वक्षेत्रम् एतेषामाचार्येण विशेषेणोक्तः अस्माभिरन्यद्दोर शास्त्रादानीय शिष्यप्रतिबोधेन लिख्यते तथा च सारावल्याम् "त्रिंशतिरंशाः सिंहे त्रिकोणमपरे स्वभवनमर्क्षम्। उच्चं भागत्रितयं वृष इन्दोः स्यात्त्रिकोणमपरेऽंशाः। द्वादशभागा मेषे त्रिकोणमपरे स्वभन्तु भौमस्य। उच्चफलं कन्यायां बुधस्य तद्भांशकैः सदा चिन्त्यम्। परतस्त्रिकोणजातः पञ्चभिरंशैः स्वराशिजं परतः। दशभागा जीवस्य त्रिकोणफलं स्वभं परं चापे। शुक्रस्य तु त्रिंशेऽंशास्त्रिकोणमपरे घटे स्वराशिश्च। कुम्भे त्रिकोणजनिते रविजस्य रवेर्दशा सिंहे" एतदार्याचतुष्टयम्। दिनु बुधार्किरवाविद्यादि। प्राच्याद्यासु चतसृषु दिक्षु क्रमाद्बुधादयो बलिनो भवन्ति तत्र पूर्वस्यां बुधार्किरवी बलिनौ भवतः लग्नस्थावित्यर्थः दक्षिणस्यां रविभौमौ सूर्यांङ्गारकौ दशमस्थावित्यर्थः पश्चिमायां सूर्यसुतः शनिः सप्तमस्थ इत्यर्थः। उत्तरस्यां सितशीतकरौ शुक्रचन्द्रौ चतुर्थस्थावित्यर्थः। यो ग्रहो यत्र बली स तत्राद्यलग्नस्था नस्थो विबलो भवति मध्येऽनुपात ऊन इति सर्वत्रेयं परिभाषा ग्रहाणामुच्चनीचप्रविभागे राशीनां दिग्बल प्रविभागेऽपि, तथा च यवनेश्वरः "सूर्येन्द्वौ पूर्वविल मनसंस्थौ नभसलस्थौ च दिवाकरारौ। सौरोऽस्तगः शुक्रनिशाकरौ तु तुर्ये स्थितौ तौ सबलौ भवेतामिति"। अन्यबले ग्रहाणाम् अन्तरेऽनुपात एव युक्तः। एतद्ग्रहाणां दिग्बलमुच्यते। अधुना चेष्टाबलं दोषकेनाह उदगयने इति मकरादिराशिषट्कमुत्तरमयनं कर्कटादिराशिषट्कं दक्षिणमयनमिति उदगयने उत्तरायणे रविशीतमयूखौ सूर्यचन्द्रमसौ बलिनौ भवतः। परिशेषाः भौमबुधगुरुसितसौराः वक्रगाः विपरीतगतयो बलिनो भवन्ति तथा समागमगाश्चन्द्रेण संहिताः बलिन एव चन्द्रेण संयोगो ग्रहाणां समागमशब्दवाच्यः रविणा सहास्तमयो भौमादीनां परस्परं युद्धम् उक्तञ्चाचार्यविष्णुचन्द्रेण "दिवसकरेणास्तमयः समागमः शीतरश्मिसहितानाम्। कुजतादीनां युद्धम् निगद्यतेऽन्योन्ययुक्तानामिति" विपुलकरा इति विपुलाः करा येषां ते विपुलकराः विस्तीर्णरश्मयो बलिनो भवन्ति शीघ्रकेन्द्रे द्वितीयतृतीयपदस्थे ग्रहस्य विपुलकरत्वं प्रायः सम्भवति वक्रासन्नत्वात् युधि संग्रामे चोत्तरसंस्था बलिन एव कुजतादीनां युद्धमित्युक्तम्। तत्र यः उत्तरदिग्भागसंस्थितो जयी स च बलवान् उत्तरसंस्थत्वमत्रोपलक्षणार्थम्। यश्चेजयी स एव बलवान् तत्रैतल्लक्षणम् "दक्षिणदिक्स्थः प्रथमो वेषपुरग्राम्य सन्निकृष्टतनुः। अधिरूढो विकृतोनिःप्रभो विवर्णश्च यः। स जितः उक्तविपरीतलक्षणसम्पन्नो जयगतो विनिर्दिष्टः। विपुलः स्निग्धोद्योतिमान् दक्षिणदिक्स्थोऽपि जय उक्तः" इति एतच्चुक्रस्य प्रायः सम्भवति यस्मात्तु लिखाचार्यः "सर्वे जयिन उदक्स्था दक्षिणदिक्स्थो जयी शुक्रः" इति। एतच्चेष्टाबलम् एषामन्यतमेन संयुक्तश्चेष्टाबलसंयुक्तो भवति। अधुना ग्रहाणां कालबलं नैसर्गिकबलं च मालिन्याह निशीति शशिकुजसौराश्चन्द्र भौमशनयः निशि रात्रौ वीर्यवन्तो बलिनः। शोभनः

सर्वदा सर्वस्मिन् काले निशि दिने च बली। अन्ये परे रविशुक्रसिता व्यहि दिने बलिनः। क्रूराः पापाः प्रायुक्ताः बहुपक्षे, क्षणाच्चेऽपि क्रूरो बलवान् भवति यवनेश्वरः "मासे तु शुक्ले प्रतिपत्प्रहत्ते पूर्वं शशी-मध्यबली दशाहे। भौमो द्वितीयेऽल्पबलस्तृतीये सौम्यस्तु दृष्टो बलवान् सदैवेति" तिथिगताः शुक्लपक्षे स्थिताः सौम्याः बलिनः। हायनेति ये अयने प्रमाणं यस्य हायनं तत्तु वर्षं स्ववर्षं स्वात्मीयवर्षं, यो गृहो यत्र वर्षेऽधि-पतिः स तत्र बलवान् स्वदिवसे स्वात्मीयवासरे स्वहो-रायां कालहोरायाम्। तथा स्वमासे यस्मिन् मासे योऽधिपतिः स तत्र बली हायनदिवसहोरामासानां ये स्वधिपतयस्तैर्गृहैः कालबलोपेतैरुपलक्षणीयम्। ते कालबलोपेता इत्यर्थः केचिद्धायनदिवसहोरामास-पैरिति पठन्ति अन्ये स्वदिवसमहोरामासपैरिति पठन्ति य एवामपरः पाठः एतेषु कालेषु सर्वे एव बलिनो भवन्ति एतत् गृहाणां कालवीर्यम्। एतेनाभ्यन्तरेण संयुक्तः कालबलसम्पन्नो भवति। शुक्रबुधगुरवाद्या इति शादयो वर्णाः आद्या येषाम् ते शकाराद्याः शनैश्चरः सर्वेभ्यो बलहीनः कुकाराद्यः कुजः भौमः शनैश्चराद्बलवान्। बुकाराद्यो बुधः स भौमाद्बलवान् गुकाराद्यो गुरुः स-बुधाद्बली, शुकाराद्यः शुक्रः स जीवाद्बली चकाराद्यश्चन्द्रः स शुक्राद्बली रकाराद्यो रविः स चन्द्राद्बलीति। एत-द्बलानां नैसर्गिकबलम्। यथादेवानेन खल्पजातके उक्तम् "मन्दारसौम्यशुक्रपतिसितचन्द्रार्का यथोत्तरं बलिनः। नैसर्गिकबलमेतद्बलसाम्ये स्यादधिकचिन्तेति"। यदा ग्रहाणां गृहयोर्वा बलसाम्यं भवति तदा बलाधि-क्यम् स्वधिकवीर्यवतां ज्ञेयेत। यत्राचार्येण चतुःप्रका-रस्य फलं नोक्तं तद्ग्रन्थान्तराद्विलिख्यते तथा च सारावल्याम् "उच्चबलेन समेतः परां विभूतिं खगः प्रसाधयति। स्वत्रिकोणबलतः पुंसां साचिव्यं बलपतित्वं वा। स्वर्क्ष-बलेन च सहितः प्रसादितबलधान्यसंपदाक्रान्तम्। मित्र-बलसंयुक्तो जनयति कीर्त्यान्वितं पुरुषम्। तेजस्विनमति सुखिनं सुस्थिरविभवं रूपाढ्यं लब्धधनम्। स्वनवांशक-बलयुक्तः करोति पुरुषं प्रसिद्धं च"। सूक्ष्मजातकेचोक्तम् "बलवान्मित्रस्वपतिः स्वांशकेचोचितः शुभैश्चापि। चन्द्रसितौ स्त्रीजेऽन्ये पुरुषजेतोपगाः शेषाः" इति तत्र शुभ-दृष्टादिफलं तावत् "शुभदर्शनबलसहितः पुरुषं कुर्याद्धनान्वितं ख्यातम्। शुभगं प्रधानमखिलं सुरूपदेहं च सौम्यं च। पुंस्त्रीभवनबलेन च करोति जनपूजितं कलाकुश-लम्। पुरुषं प्रसन्नचित्तं कलं परलोकभीतञ्च आशा-बलसमवेतो भवति खदिग् नभश्चरः पुरुषम्। न या वस्त्रविभूषणवाहनसौख्यान्वितं कुरुते। क्वचिद्राज्यं क्वचित्पज्यां क्वचिद्द्रव्यं क्वचिद्यशः। ददाति विहगचिह्नं चेष्टावीर्यसमन्वितः। भक्षिणस्तु सहवीर्याः शुभा राज्य-प्रदाः खगाः। पापा व्यसनदाः पुंसां कुर्वन्ति च हृयाटनम्। स्वस्थं शरीरसमागमसुखमाहवजयबलेन विदधाति। शुभमतुलं विहगेन्द्रो राज्यं च विनिर्जितारातिः। रात्रिदिवाबलपर्वैर्भूगजलाभेन शौर्यपरिवृद्धा। भवि-भवति शत्रुपक्षं भुङ्क्ते लक्ष्मीं नभश्चरैः पुरुषः। द्विगुणं द्विगुणं ददुर्वर्षाधिपमासदिवसहोरेशाः। कुर्युर्बुद्धा सौख्यं स्वदशासु धनं च कीर्त्तिञ्च। पक्षबलाद्विपुलाभं वराम्बरक्षत्रिसम्पदं दद्युः। स्त्रीजनकभूमिलाभं कीर्त्तिञ्च यशाद्बलतराम्। सकलबलभारभरिता निर्मलकर-जालभासुराः सततम्। राज्यं खगा विदध्युः सौख्यञ्च मनोरथातीतम्। आचारसौख्यशुभगौचयुताः शुक्र-पाखेऽर्चनः कृतविदो द्विजदेवभक्ताः। सद्वस्त्रमाल्यजन-भूषणसंप्रियाश्च सौम्यगृहैर्बलयुतैः पुरुषा भवन्ति। शुभाः कुकर्मनिरता निजकार्यनिष्ठाः पापान्विताः सकलहाव तमोऽभिभूताः। क्रूराः शठा वधरता मलिनाः कृतघ्नाः पापगृहैर्बलयुतैः पिशुनाः कुरूपाः। पुंराशिषु गृहेन्द्रै-र्वीराः संग्रामकाङ्क्षिणो बलिनः। निःस्नेहाः सुकठोराः क्रूरा मूर्खाश्च जायन्ते। युवतिभवनस्थितेषु च खदवः संग्रामशौरयः पुरुषाः। जलकुसुमवस्त्रनिरताः सौम्याः कलैः सुसंयुक्ताः इति "एतत्सर्वं सुगमम्" भट्टोत्पलः। ताजकोक्तबलञ्च षड्वर्गीशब्दे द्वादशहादशवर्गी-शब्दे च वक्ष्यते। [होरेशेन देवे गुडोदनादौ द्रव्ये।

ग्रहबलि पुं० चतुर्थ्यर्थे तत्पु०। गृहयज्ञे यज्ञसाधने गृ-ग्रहभक्ति स्त्री० तत्पु०। गृहाणां विभागरूपे देवपुरुषद्रव्यादि भेदे सा च वृ०सं० १६अ० उक्ता यथा

ऋचेः—"प्राङ्नर्मदार्धशोणोड्रपुण्ड्राः कलिङ्गपार्श्वीकाः। शकयवनभगवशवरप्राग्ज्योतिषचीनकाम्बोजाः। मेक-लकिरातटविका बहिरन्तःशैलजाः पुलिन्दाश्च। द्रवि-डानां प्रागर्धं दक्षिणकूलं च यमुनायाः। चम्बोदुम्बर-कौशाम्बिचेदिविन्ध्याटवीकलिङ्गाश्च। पुण्ड्रा गोलाङ्गूल-श्चीपर्वतवर्द्धमानाश्च। इक्षुमतो यत्र तस्करपारतकान्ता-रगोपवीजानाम्। द्रुमधान्यकटुकतरुकनकदहनविषसम-

रणूराणाम्। भेषजभिषक्कुचतुष्पदक्षत्रियकरन्दपक्षिंसुवा-चिचौराणाम्। व्याधारक्षयशोयुततीक्ष्णानां भास्करः क्षामो"।

विशोः—"गिरिसलिलदुर्गकोसलमरुकच्छसरहरोमकतुषा-राः। वनवासितङ्कणकलस्तोरराज्यमहार्णवद्वीपाः। मधुरसकटुमफलसलिलवपमधिशङ्खमौक्तिकालानाम्। शालियवौषधिगोधूमसोमपाक्रन्दविप्राणाम्। सितसुभगतुरगरतिकरयुवतिचमूनाथभोज्यवस्त्राणाम्। ऋक्षनिशाचरकर्षकयत्तविदां चाधिपचन्द्रः"।

कुजस्य—"गोधस्य नर्मदाया भीमरथायाश्च पश्चिमार्द्धस्थाः। निर्विन्ध्या वेत्रवती क्षिप्रा गोदावरी वेणा। मन्दाकिनी पयोष्णी महानदी सिन्धुमालतीपाराः। उत्तरपाण्ड्रमलेन्द्राद्रिविन्ध्यमलयोपगाश्चोक्षाः। द्रविडविदेहान्ध्राश्मकमाषापुरकोङ्कणाः समं लिखिताः। कलिङ्गवेरलदण्डकक्रान्तिपुरमुक्षसङ्कराः। नासिक्यगोवर्द्धनविराटविन्ध्याद्रिपार्श्वगा देशाः। ये च पिबन्ति सुतोदां नार्मदीं ये चापि गोमतीसलिलम्। नागरकल्पिकरपारतङ्कताग्नाजीविशस्त्रवार्त्तानाम्। व्याटविकदुर्गकर्वटवधबन्धसंग्रावलिप्तानाम्। नरपतिकुमारकुञ्जरदाम्निकखड्गाभिघातप्रगुणानाम्। रक्तफलकुसुमविद्रुमचम्पकगुडमदातीक्ष्णानाम्। कोशभवनाग्निहोत्रिकधात्वाकरशाक्यभिक्षुचौराणाम्। षडदोषवैरवह्न्यग्निनां च वसुधासुतोऽधिपतिः"।

बुधस्य—"कौङ्कित्थः सिन्धुनदः सरयूर्गोरिका रथाङ्गा च। शङ्काकोशिकाद्याः सरितो वैदेहकाम्बोजाः। मथुरायाः पूर्वार्द्धं हिमवद्गोमन्तचित्रकूटस्थाः। सौराष्ट्रसेतुजलमार्गपल्लविलपर्वतान्त्रयिणः। उदपानयन्त्रनागार्यवेश्यमणिरागगन्धयुक्तिविदः आलेख्यशब्दगणितप्रसाधकायुध्यशिल्पज्ञाः। चरपुरुषकृष्णकलीवकशिशुकविशठशकाभिचाररताः। द्यूतनपुंसकहास्यज्ञभूतत्वेन्द्रजालज्ञाः। आरक्षकनटनर्तकधूर्ततैलक्षेत्रीजतिज्ञानि। व्रतचारिरसायनकुशलवेसराश्चन्द्रपुत्रस्य"।

गुरोः—"सिन्धुनदपूर्वभागो मथुरापश्चार्द्धभरतसौधीराः। कुरुपटोदीच्यविपाशासरिच्छतद्रूरमठसाल्वाः। त्रैगर्तपौरवाम्बष्ठसारताग्राटधानयौधेयाः। सारस्वतार्जुनायनमत्स्यार्द्धपामराङ्गाश्च। कुरुक्षेत्रपुरोहितभूपसन्निभाकल्पपौष्टिकाश्चाः। कारुणसत्यशौचव्रततविद्यादानधर्मयुताः शौरसहाधनशब्दार्थवेदविद्वदभिचारनीतिज्ञाः। मत्तेश्वरोपकरणं छत्रध्वजचामरार्द्यं च। शैवेयकमांसीतगरकुङ्कुमसैन्धवानि वल्लीजम्। मधुररसमधूच्छिष्टानि चोरकर्षेति जीवस्य"।

भृगोः—"तक्षशिलामार्तिकावतवक्षगिरिगान्धारपुष्कलावतकाः। प्रस्थलमालवकैकयदाशार्णौशीनराः शिबयः। ये च पिबन्ति वितस्तामिरावतीं चन्द्रभागसरितं च। रथरत्नाकरकुञ्जरतुरगमहामात्यधनयुक्ताः। सुरभिकुसुमानुलेपनमणिवस्त्रविभूषणाम्बुरुहगन्धाः। वरतरुणयुवतिकामोपकरणसृष्टात्मसधुरभुजः। उद्यानसलिलकायकयशःसुखोदार्यरूपसम्पन्नाः। विहदमालवधिगजनघटलक्षिलाखजास्त्रकलाः। कौशेयपट्टकम्बलपत्तौर्णिकरोध्रपत्रचोचानि। जातीफलागुरुवचाषिप्पल्यश्चन्दनं च भृगोः"।

शनेः—"व्यानर्त्तार्बुदपुष्करसौराष्ट्राभीरसूद्रैरवतकाः। नद्यायश्चिन्देशे सरस्वती पश्चिमो देशः। कुरुभूमिजाः प्रमाणं विदिशा वेदस्मृतीमहीतटजाः। खलमलिननीचतैलिकविहीनसत्त्वोपहतपुंस्त्वाः। बन्धनशाकुनिकाशुचिकैवर्त्तविरूपदण्डसौकरिकाः। मद्यपुच्छस्खलितव्रतशवरपुलिन्दाधर्मपरिहीनाः। कटुतिक्तरसायनविधवयोषितो भुजगतस्करमक्षिप्रः। खरकरभचक्रवाकुलनिम्नावाचार्कपुत्रस्य"।

राहोः—"गिरिशिखरकन्दरदरीविनिविष्टा म्लेच्छजातयः शूद्राः। गोमायुभल्लभूषिकयोक्षाश्वा सुखविक्लवाङ्गाः। कुलपांसनचिंसलतन्त्रचौरनिःसत्त्वगोचदानाश्च। खरश्वरनियुद्धवित्तीव्ररोषगर्भाशया नीचाः। उपहतदाक्षिकराजसनिद्राबद्धलाश्च जन्तवः सर्वे। धर्मेण च सन्त्यक्ता मायतिलाचार्कशशिपुत्रैः"।

केतोः—"गिरिदुर्गपङ्कवर्त्मतरुषण्डोलावगाधमरुचोनाः। प्रत्यन्तधर्मिमलेच्छव्यवसायपराक्रमोपेताः। परदारविवादरताः परस्परप्रतिहता मदोद्विग्नाः। मूर्खौधार्मिकविजिगीषवश्च केतोः समाख्याताः"।

"उदयसमये यः स्निग्धांशुर्मेचान् प्रकृतिस्थितो यदि च न कृतो निर्घातोल्कारजोपहतमर्दनैः। स्वभवनगतः स्रोत्रप्राप्तः शुभग्रहवीक्षितः स भवति शिवस्तेषां येषां प्रभुः परिकीर्त्तितः। अभिहितविपरीतलक्षणैः क्षयमुपगच्छति तत्परिपन्थः। डमरभयगदातुरा जना नरपतयश्च भवन्ति दुःखिताः। यदि न रिपुकृतं भयं क्षणाद्वा क्षुतकृतं नियमादमात्यजं वा। भवति जनपदस्य वाप्यदक्षा गमनमपूर्वपुराद्विनिष्क्रमासु"।

ग्रहभीतिजित् पु० गृहभीतिं जयति जि–क्विप् ६त० । (चिङ्गानाम) गन्धद्रव्ये राजनि० ।

ग्रहभोजन न० ६त० । गृह्याणां देवे बलिरूपे गुडौदनादि द्रव्ये गृह्यशब्दे विद्वतिः ।

ग्रहमण्डल न० ६त० । १ग्रहसमूहे । ग्रहोद्देशेन पूजा मण्डलम् । तत्पूजार्थे अष्टपद्माकारे २स्थानभेदे च ग्रह-यज्ञशब्दे विद्वतिः ।

ग्रहमेल न० गृह्यादेस्मतिचन्द्राधितराशियोर्मेलम् । विवाहे विचारणीये कन्यातराशियग्रहयोर्मेले । उप-यमशब्दे विद्वतिः ।

ग्रहयज्ञ पु० गृह्याणां तदुद्देशेन यज्ञः । शान्तिपुष्ट्याद्यर्थं गृह्योद्देशेन क्रियमाणे यज्ञभेदे तदारम्भकालादिकम् संज्ञा० त० उक्तं यथा

दीपिकायाम् "शुभयज्ञार्कवारेषु मृदुचित्रध्रुवेषु च । शुभराशिविलग्नेषु शुभं शान्तिकपौष्टिकम्" । मृदुगणः चित्रानुराधामृगशिरोरेवत्यः । चित्रगणोऽश्वगणः पु-ष्याश्विहस्ताः । ध्रुवगणोरोहिण्युत्तरात्रयम् । "गोचरे वा विलग्ने वा ये ग्रहारिष्टसूचकाः । पूजयेत्तान् प्रय-त्नेन पूजिताः स्युः शुभावहाः" गोचरे स्वराश्यमेचया यदा कदापि । विलग्ने जन्मलग्ने सूचकान तु रिष्टका-रकाः । तेन दुष्टग्रहसूचनीयदोषोपशमनं फलम् । मत्स्यपुराणे "यज्ञवानन्दसज्ञानयज्ञोद्वाहादिमङ्गले । मातरः प्रथमं पूज्याः पितरस्तदनन्तरम् । ततो माता-महाद्याश्च विश्वेदेवास्तथैव च" । नान्दीमुखे वारादि-दोषोनास्ति । "नान्दीमुखे पितृश्राद्धे संक्रान्त्यां ग्रह-ग्रहणे" । अत्र सूत्रस्थाध्यधिकारः "आर्त्तः शूद्रः समा-चरेदिति" वचनात् यस्य आर्त्तत्वेन प्रतिनिधिनाधा-रम्भः कर्त्तव्यः "श्रौतं कर्म स्वयं कुर्यादन्योऽपि आर्त्तमाचरेत् । अग्नौ श्रौतमग्न्यः कुर्यादाचारम-ग्नतः" इति मातातपीयात् । अनन्त उपक्रमात् परतः । तत्प्रकारः मत्स्य पु० ९२ अ० उक्तो यथा

"श्रीकामः शान्तिकामोवा ग्रहयज्ञं समारभेत् । ब्रह्मायुःपुष्टिकामो वा तथैवाभिचरन् पुनः । येन प्र-ह्मन् ! विधानेन तन्मे निगदतः शृणु । सर्वमाख्या-तुकाम्य संक्षिप्य ग्रन्थविस्तरम् । ग्रहयज्ञं प्रवक्ष्यामि पुराणश्रुतिनोदिताम् । पुण्येऽहनि विप्रकथिते कृत्वा आ-भ्युदयवाचनम् । ग्रहान् यजादिदेवांश्च स्वाप्य होमं समारभेत् । गृह्ययज्ञस्त्रिधा प्रोक्तः पुराणश्रुतिकोविदैः। प्रथमोऽयुतहोमः स्याल्लक्षहोमस्ततः परम् । तृतीयः कोटिहोमस्तु सर्वकामफलप्रदः । अयुतेनाङ्गतोनाङ्ग नवग्रहमखः स्मृतः । तस्य तावद्विधिं वक्ष्ये पुराणश्रुति भाषितम् ।

यज्ञवेदिः—"मर्तस्योत्तरपूर्वेण वितस्तिद्वयविस्तृताम् । य-ज्ञद्वयायतां वेदिं वितस्त्युच्छ्रयसंस्थिताम् । संस्थापनाय देवानामुत्तरासदनुत्तमाम् । अग्निप्रणयनं कृत्वा तस्यामावाहयेत् सुरान् । देवतानां ततः स्थाप्या विंश-तिर्हादशाधिका१२ । सूर्यः सोमसुता भौमो बुधजीव-सितार्कजाः । राहुः केतुरिति प्रोक्ता ग्रहा लोक-हितावहाः" ।

ग्रहदेवस्थानम्—"मध्ये तु भास्करं विद्याद्रोहितं दक्षि-णेन तु । उत्तरेण गुरुं विद्याद्बुधं पूर्वोत्तरेण तु । पूर्वेण भार्गवं विद्यात् सोमं दक्षिणपूर्वके । पश्चिमेन शनिं विद्याद्राहुं पश्चिमदक्षिणे । पश्चिमोत्तरतः केतुं" स्थापयेच्छुक्लतण्डुलैः" ।

अधिदेवता—"भास्करस्येश्वरं विद्याद्गौरीमाशु शशिनस्तथा । स्कन्दमङ्गारकस्यापि बुधस्य च तथा हरिम् । ब्रह्मा-णञ्च गुरोर्विद्याच्छुक्रस्यापि शचीपतिम् । शनैश्चरस्य तु यमं राहोः कालं तथैव च । केतोश्चित्रगुप्तञ्च सर्वेषामधिदेवताः" ।

प्रत्यधिदेवता—"अग्निरापः क्षितिर्विष्णुरिन्द्र ऐन्द्री च देवताः । प्रजापतिश्च सर्पाश्च ब्रह्मा प्रत्यधिदेवताः" ।

ग्रहलोकपालाः—"विनायकं तथा दुर्गां वायुमाकाशमेव च । आवाहयेद्व्याहृतिभिस्तथैवाश्विकुमारकौ" ।

ग्रहवर्णः—"शंखरेन्द्रुसमादित्यसङ्गारकसमन्वितम् । सो-मशुक्रौ तथा श्वेतौ बुधजीवौ च पिङ्गलौ (पीतौ) । मन्दराहू तथा कृष्णौ धूम्रं (चित्रम्) केतुगणं विदुः" ।

गृह्यवर्णानि देयानि वासांसि कुसुमानि च । धूपा-मोदोऽत्र सुरभिरुपरिष्टाद्वितानकम् । शोभनं स्थापयेत्-प्राज्ञः फलपुष्पसमन्वितम् ।

ग्रहबलिः—गुडौदनं रवेर्दद्यात्सोमाय घृतपायसम् । अङ्गारकाय संयावं बुधाय घोरघटिकम् । दध्योदनञ्च जीवाय, शुक्राय च घृतौदनम् । शनैश्चराय क्षसरमाज-मांसञ्च राहवे । तिलौदनञ्च केतुभ्यः सर्वभक्ष्यैरथार्चयेत्" । "प्रागुत्तरेण तस्माच्च दध्यक्षतविभूषितम् । चूतपल्लवसंछन्नं फलवस्त्रयुगान्वितम् । प्रस्थरत्नसमायुक्तं पञ्चभक्ष्यसमन्वितम् । स्थापयेदत्र कुम्भं वरुणं तत्र विन्यसेत् । गङ्गाद्या-

सरितः सर्वाः समुद्राश्च सरांसि च। गजाश्वरथ्यावल्मीकसङ्गमाद्गोकुलात्। मदमानीय विप्रेन्द्र! सर्वौषधिजलान्वितम्। स्नानार्थं विन्यसेत्तत्र यजमानस्य धर्मवित्। सर्वे समुद्राः सरितः सरांसि च नदास्तथा। यान्तु यजमानस्य दुरितक्षयकारकाः। एवमावाह्य देवानमरान् मुनिसत्तम!। होमं समारभेत् सर्षिर्यवव्रीहितिलादिना"।

षड्ऋत्विक्—"अर्कः पलाशखदिरावपामार्गोऽथ पिप्पलः। औदुम्बरः शमी दूर्वा कुशाश्च समिधः क्रमात्"।

एकैकस्याष्टशतमष्टाविंशतिरेव वा। होतव्या मधुसर्पिभ्यां दध्ना चैव समन्विताः। प्रादेशमात्रा समिधाः सवल्काः सुपलाशिनीः, समिधः कल्पयेत् प्राज्ञः सर्वकर्मसु सर्वदा। देवानामप सर्वेषामसुरांश्च परमार्थवित्। स्वेन स्वेनैव मन्त्रेण होतव्याः समिधः पृथक्। होतव्यं च घृताभ्यक्तं चरुभक्ष्यादिकं पुनः। मन्त्रैर्दशाहुतीर्हुत्वा होमं(अयुतम्)व्याहृतिभिस्ततः। उदङ्मुखाः प्राङ्मुखा वा कुर्युर्ब्राह्मणपङ्क्तयः। मन्त्रवन्तश्च कर्तव्याश्चरवः प्रतिदैवतम्। हुत्वा च तांश्चरून् सम्यक् ततो होमं समाचरेत्"।

षड्ग्रहमन्त्राः—"आ कृष्णेनेति सूर्याय होमः कार्यो द्विजन्मना। आप्यायस्वेति सोमाय मन्त्रेण जुहुयात् पुनः। अग्निर्मूर्धा दिवो मन्त्र इति भौमाय कीर्तयेत्। अग्ने! विवस्वदुषस इति सोमसुताय वै। इदम्यते! परिदीया रथेनेति गुरोर्मतः। शुक्रन्ते अन्यदिति च शुक्रस्यापि निगद्यते। शन्नोदेवीति शनैश्चरायेति पुनः शन्नो देवीति होमयेत्। कया नश्चित्र आभुव इति राहोरुदाहृतः। केतुं कृण्वन्निति ब्रूयात् केतुनामपि मन्त्रवित्"।

अधिदेवतामन्त्राः—"आ वो राजेति रुद्रस्य बलिहोमं समाचरेत्। आपोऽहिष्ठेत्युमायास्तु खोनेति स्वामिनस्तथा। विष्णोरिदं विष्णु रिति तमीमेति स्वयम्भुवः। इन्द्रमिद्देवतातये इन्द्राय जुहुयात्ततः। तथा यमस्य चायं सोरिति होमः प्रकीर्तितः। कालस्य ब्रह्मजज्ञानमिति मन्त्रः प्रशस्यते। चित्रगुप्तस्य चाप्यातमिति मन्त्रविदो विदुः"।

प्रत्यधिदेवतामन्त्राः—"अग्निं दूतं वृणीमह इति ब्रह्मेरुदाहृतः। उदुत्तमं वरुणमित्यपां मन्त्रः प्रकीर्तितः। भूमेर्मातरिति प्रोक्तो वेदेषु पठ्यते। सहस्रशीर्षा पुरुष इति विष्णोरुदाहृतः। इन्द्राग्नीन्द्रो मरुत्वत इति ब्रह्मस्य गद्यते। उत्तानपर्णे सुभगे इति देव्याः समाचरेत्। प्रजापतेः पुनर्होमः प्रजापते इति स्मृतः। नमोऽस्तु सर्पेभ्य इति सर्पाणां मन्त्र उच्यते। एष ब्रह्मा व ऋत्विज इति ब्रह्मण्युदाहृतः"।

लोकपालमन्त्राः—"विनायकस्य चात्र इति मन्त्रो बुधैः स्मृतः। जातवेदसे सुनवामेति दुर्गामन्त्र उच्यते। आदित्यपत्नेस्य रेतस आकाशस्य उदाहृतः। प्रा(क्रा)णाग्निपुरुषीणाञ्च वायोर्मन्त्रः प्रकीर्तितः। एषो उषा अपूर्व्येति अग्नेर्मन्त्र उच्यते"।

पूर्णाहुतिञ्च मूर्द्धानं दिव इत्यभिघातयेत्। अथाभिषेकमन्त्रेण वाद्यमङ्गलगीतकैः। पूर्णकुम्भेन तेनैव होमान्ते प्रागुदङ्मुखम्। अध्वर्युवरयेद्विप्रान् ! वेदसङ्गदामभूषितैः। यजमानस्य कर्त्तव्यं चतुर्भिः स्वपनं द्विजैः।

अभिषेकमन्त्रः—"सुरास्त्वामभिषिञ्चन्तु ब्रह्मविष्णुमहेश्वराः। वासुदेवो जगन्नाथस्तथा सङ्कर्षणो विभुः। प्रद्युम्नश्चानिरुद्धश्च भवन्तु विजयाय ते। आखण्डलोऽग्निर्भगवान् यमो वै निर्ऋतिस्तथा। वरुणः पवनश्चैव धनाध्यक्षस्तथा शिवः। ब्रह्मणा सहितः शेषो दिक्पालास्त्वामवन्तु ते। कीर्तिर्लक्ष्मीर्धृतिर्मेधा पुष्टिः श्रद्धा क्रिया मतिः। बुद्धिर्लज्जा वपुः शान्तिस्तुष्टिः कान्तिश्च मातरः। एतास्त्वामभिषिञ्चन्तु धर्मपत्न्यः समागताः। आदित्यश्चन्द्रमा भौमो बुधजीवौ सितोऽर्कजः। ग्रहास्त्वामभिषिञ्चन्तु राहुः केतुश्च तर्पिताः। देवदानवगन्धर्वा यक्षराक्षसपन्नगाः। ऋषयोमुनयो गावो देवमातर एव च। देवपत्न्यो द्रुमा नागा दैत्याश्चाप्सरसाङ्गणाः। अस्त्राणि सर्वशस्त्राणि राजानो वाहनानि च। औषधानि च रत्नानि कालस्यावयवाश्च ये। सरितः सागराः शैलास्तीर्थानि जलदा नदाः। एते त्वामभिषिञ्चन्तु सर्वकामार्थसिद्धये"।

ततः शुक्लाम्बरधरः शुक्लगन्धानुलेपनः। सर्वौषधैः सर्वगन्धैः स्थापितो द्विजपङ्क्तयैः। यजमानः सपत्नीकः ऋत्विजः सुसमाहितान्। दक्षिणाभिः प्रयत्नेन पूजयेद्गतविस्मयः"।

षड्दक्षिणाः—"सूर्याय कपिलां धेनुं रक्तं दद्यात्तथेन्दवे। रक्तं धुरन्धरं दद्याद्भौमाय च कृष्णिनम्। बुधाय जातरूपन्तु गुरवे पीतवाससी। श्वेताश्वदैत्यगुरवे कृष्णाङ्गार्कसूनवे। आयसं राहवे दद्यात् केतुश्चन्द्रागसत्तमम्। सुवर्णेन समा कार्या यजमानेन दक्षिणा। सर्वेषामथ वा गावो दातव्या हेमभूषिताः। सुवर्णमथ वा

दद्याद्गुरवे येन तुष्यति । स्वमन्त्रेणैव दातव्याः सर्वाः सर्वत्र दक्षिणाः" ।

द्रव्यदानमन्त्राः तत्र कपिलायाः–"कपिले ! सर्वभूतानां पूजनीयासि रोहिणी ! । सर्वदेवमयी यस्मादतः शान्तिं प्रयच्छ मे" ।

शङ्खस्य–"पुण्यस्त्वं शङ्ख ! पुण्यानां मङ्गलानाञ्च मङ्गलम् । विष्णुना विधृतश्चासि ततः शान्तिं प्रयच्छ मे ।

दृषस्य–"धर्मस्त्वं वृषरूपेण जगदानन्दकारक ! । अष्टमूर्त्तेरधिष्ठानमतः शान्तिं प्रयच्छ मे" ।

हेम्नः–"हिरण्यगर्भगर्भस्त्वं हेम ! बीजं विभावसोः । अनन्तपुण्यफलदमतः शान्तिं प्रयच्छ मे" ।

पीतवस्त्रस्य–"पीतवस्त्रयुगं यस्माद्दानदेवस्य वल्लभम् । प्रदानात्तस्य मे विष्णो ! शान्तिं प्रयच्छ मे" ।

चन्दनस्य–"विष्णुस्वभावरूपेण यस्मादमृतसम्भवः । चन्द्रार्कवह्नेर्नित्यमतः शान्तिं प्रयच्छ मे" ।

धेनोः–"यस्मात्त्वं पृथिवी सर्वा धेनुः केशवसन्निभा । सर्वपापहरा नित्यमतः शान्तिं प्रयच्छ मे" ।

वृषभस्य–"यस्मादाद्यस्य कर्म्मोक्षि तवाधीनानि सर्वदा । ब्राह्मणाद्यायुधादीनि तस्माच्छान्तिं प्रयच्छ मे" ।

छागस्य–"यस्मात्त्वं सर्वयज्ञानामङ्गत्वेन व्यवस्थितः । यानं विभावसोर्नित्यमतः शान्तिं प्रयच्छ मे" ।

गोः–गवामङ्गेषु तिष्ठन्ति भुवनानि चतुर्दश । यस्मात्तस्माच्छिवे मे स्यादिह लोके परत्र च" ।

शय्यायाः–"यस्मादस्यां शयनं केशवस्य च सर्वदा । शय्या ममास्त्वभूयाऽस्तु दत्ता जन्मनि जन्मनि" ।

रत्नानाम्–"यथा रत्नेषु सर्वेषु सर्वे देवाः प्रतिष्ठिताः । तथा रत्नानि यच्छन्तु रत्नदानेन मे सुराः" ।

भूमेः–"यथा भूमिप्रदानस्य फलाद्भवति पीवरीम् । दानान्यन्यानि मे शान्तिर्भूमिदानाद्भवत्विह" ।

"एवं संपूजयेद्भक्त्या वित्तशाठ्येन वर्जितः । रत्नकाञ्चनवस्त्रैर्धूपमाल्यानुलेपनैः । अनेन विधिना यस्तु ग्रहपूजां समाचरेत् । सर्वान् कामानवाप्नोति प्रेत्य स्वर्गे महीयते । यस्तु पीडाकरो नित्यमल्पवित्तस्य वा ग्रहः । तद्व यत्नेन संपूज्य शेषानर्च्चयेद् बुधः । ग्रहा गावो नरेन्द्राश्च ब्राह्मणाश्च विशेषतः । पूजिताः पूजयन्त्येते निर्दहन्त्यवमानिताः । यथा वाग्रहाराणां कवचं वारणं भवेत् । तद्वद्दैवोपघातानां शान्तिर्भवति वारणम् । तस्मात्र दक्षिणाहीनं कर्त्तव्यं भूतिमिच्छता । संपूर्णया दक्षिणया यस्माद्देवोऽपि तुष्यति । सदैवायुतहोमोऽयं नवग्रहमखे स्थितः । विवाहोत्सवयज्ञेषु प्रतिष्ठादिषु कर्म्मसु । निर्व्विघ्नार्थं मुनिश्रेष्ठ ! तथोद्दीप्तादिकेषु च । कथितोऽयुतहोमोऽयं लक्षहोममतः शृणु" ।

लक्षहोमः–"सर्वकामाप्तये यस्माल्लक्षहोमं विदुर्बुधाः । पितॄणां वल्लभं साधाल्लक्षिलक्षिफलप्रदम् । यष्टतारावलं दृष्ट्वा लग्नं वा ब्राह्मणवाचनम्" ।

मण्डपः–"गृहस्योत्तरपूर्वेण मण्डपं कारयेद् बुधः । स्नानावतनभूमौ वा चतुरस्रसुदक्प्लवम् । दशहस्तमथाष्टौ वा हस्तात् कुर्य्यादिधानतः । प्रागुदक्प्लवनाभूमिं कारयेद् यत्नतो बुधः । प्रागुत्तरं समाश्रित्य प्रदेशं मण्डपस्य तु । शोभनं कारयेत् कुण्डं यथावल्लक्षणान्वितम् । चतुरस्रं समन्तात् सुयोनिवक्त्रं समेखलम् । चतुरङ्गुलविस्तारा मेखला तद्वदुच्छ्रिता । प्रागुदक्प्लवना कार्या सर्वतः समवस्थिता । मान्त्यर्थं सर्वलोकानां नवग्रहमखः स्मृतः । मानहीनाधिकं कुण्डमनेकभयदायकम् । यस्मात्तस्मात् सुसम्पूर्णं शान्तिकुण्डं विधीयते" ।

विस्तरभयात् कोटिहोमोक्तः तत्रैवाध्यायशेषे द्रष्टव्यः । अत्र याज्ञवल्क्येन यज्ञाङ्गानां मन्त्रान्तरमुक्तं यथा "आ कृष्णेन, इमन्देवा, अग्निर्मूर्द्धा दिवः ककुत्। उद्बुध्यस्वेति च ऋचो यथासंख्यं प्रकीर्त्तिताः । इन्द्रस्यतेः व्यतिदर्य,सावैशात्परिप्लुतः । शन्नोदेवीरभिष्टये, आग्नाते हुङ्कृतिभाक्तथा" ।

विधानपा० विष्णुधर्म्मोत्तरवाक्यादन्ये मन्त्रा उक्ताः केचिद्विशालिकाख्ये विधानमालादौ चापरे मन्त्रा उक्ता एवं विप्रतिपत्तौ शाखिभेदाद्व्यवस्था । शाखिभेदान्मन्त्रभेदाच्च मतक्रतुजादानादिपक्षतो द्रष्टव्याः । तत्प्रतीकानि च विवरणपत्रे वक्तव्यानि तानि च तत्र द्रष्टव्यानि । क्वचित् मत्स्यपुराणवाक्यान्मन्त्रभेदस्तु शाखिभेदात् व्यवस्थाप्यः ।

तत्र ग्रहयज्ञे ग्रहाणां पूजनाय स्फटिकादिमूर्त्तिकरणं तदभावे घटे लेखनं तदभावे मण्डले वर्त्तुलाद्याकारलेखनं वा कृत्वा पूजादिकं कार्यं यथाह याज्ञ० [य०

"सूर्यः सोमो महीपुत्रः सोमपुत्रो बृहस्पतिः । शुक्रः शनैश्चरो राहुः केतवेति ग्रहाः स्मृताः" याज्ञ०। "एते सूर्य्यादयो नव ग्रहाः पूज्या रत्नजं किं कृत्वेत्याह" सिता० "ताम्रकात् स्फाटिकाद्वृत्तचन्दनात् स्वर्णकाद्भवौ ।

रजतादयस्तः सीसात्कांस्यात् कार्या ग्रहाः क्रमात्। स्वर्णैर्वा पटे लेख्या गन्धैर्मण्डलकेषु वा" यात्र०। "सूर्यादीनां मूर्त्तयस्ताम्रादिभिर्यथाक्रमङ्कार्यास्तदभावे स्वर्णकैः पटे लेख्या मण्डलेषु वा गन्धैरक्तचन्दनादिभिर्यथावर्णं लेख्या इत्यन्वयः। द्विभुजत्वादिविशेषस्तु मत्स्यपुराणोक्तो द्रष्टव्यः तद्यथा "पद्मासनः पद्मकरः पद्मगर्भसमद्युतिः। सप्ताश्वरथसंस्थोऽपि द्विभुजः स्यात् सदा रविः। श्वेतः श्वेताम्बरधरो दशाश्वः श्वेतभूषणः। गदापाणिर्द्विबाहुश्च कर्त्तव्यो वरदः शशी। रक्तमाल्याम्बरधरः शक्तिशूलगदाधरः। चतुर्भुजो मेषगमो वरदः स्याद्धरासुतः। पीतमाल्याम्बरधरः कर्णिकारसमद्युतिः। खड्गचर्मगदापाणिः सिंहस्थो वरदो बुधः। देवदैत्यगुरू तद्वत् पीतश्वेतौ चतुर्भुजौ। दक्षिणौ वरदौ कार्य्यौ साक्षसूत्रकमण्डलू। इन्द्रनीलद्युतिः शूली वरदो मन्दगस्तनः। बाणधनुर्धरः कृष्णो दिव्यरथस्थितः सदा। करालवदनः खड्गचर्मशूली वरप्रदः। नीलः सिंहासनस्थश्च राहुरत्र प्रशस्यते। धूम्रा द्विबाहवः सर्वे गदिनो विकृताननाः। गृध्रासनगता नित्यं केतवः स्युर्वरप्रदाः। सर्वे किरीटिनः कार्या ग्रहा लोकहितावहाः। स्वायुधैरुच्छ्रिताः सर्वे शतमष्टोत्तरं सदेति"।

"यथावर्णं प्रदेयानि वासांसि कुसुमानि च। गन्धाश्च बलयश्चैव धूपोदेयश्च गुग्गुलुः। कर्त्तव्या मन्त्रवन्तश्च चरवः प्रतिदैवतम्" यात्र०। "यथावर्णं यस्य यस्य योवर्णस्तदर्णानि वस्त्रगन्धपुष्पाणि देयानि" मिता०।

मण्डले ग्रहलेखनाकारस्तु

"वर्त्तुलो भास्करः कार्योऽश्रश्चन्द्रो निशाकरः। चतुरश्रः कुजक्षिप्रकोणस्तु बुधचापाकृतिस्तथा। पद्माकृतिः गुरुः कार्यश्चतुःकोणस्तु भार्गवः। सर्पाकृतिः शनिः कार्यो राहुस्तु मकराकृतिः। खड्गाकृतिस्तथा केतुः कार्यो मण्डलपूजने" शान्तिदीपिकोक्तेः।

अत्र ध्यानं मत्स्यपुराणोक्तमपि यत्र यागतत्रोक्तं मण्डले मानभेदयोस्तत्र तन्मन्त्रस्याद्यनुसुधं ध्यानं प्रदर्श्यते।

सूर्यस्य "खड्गियं काश्यपं रक्तं कार्त्तिकं द्वादशाङ्गुलम्। पद्मद्वयान्वितं पूर्वोदग्दक्षिणं सप्ताश्वबाहुकम्। शिवाधिदैवतं सूर्यं वह्निप्रत्यधिदैवतम्"।

सोमस्य "साङ्गं वैश्यप्रभात्रेयं हस्तमात्रं सिताम्बरम्। श्वेतं द्विबाहुं वरदं दक्षिणं सगदेतरम्। दशाश्वं श्वेतपद्मस्थं विचिन्योमाधिदैवतम्। जलप्रत्यधिदैवञ्च सोमस्याङ्गानि चेत् तथा"।

मङ्गलस्य "आवन्त्यं क्षत्रियं रक्तं मेषस्थं चतुरङ्गुलम्। शक्तिमाल्यवसनं भारद्वाजं चतुर्भुजम्। दक्षिणोर्द्ध्वक्रमाच्छक्तिवराभयगदाकरम्। आदित्याभिरुचं देवं तद्वदेव समाचरेत्। स्कन्दाधिदैवतं ध्यायेत् क्षितिप्रत्यधिदैवतम्"।

बुधस्य "मागधं द्वाङ्गुलात्रेयं वैश्यं पीतं चतुर्भुजम्। वामोर्द्ध्वक्रमतश्चर्मगदावरदपाणिनम्। खड्गियं सिंहगं सौम्यं पीतवस्त्रं तथाचरेत्। नारायणाधिदैवञ्च विष्णुप्रत्यधिदैवतम्"।

बृहस्पतेः "द्विजमाङ्गिरसं पीतं सैन्धवञ्च षडङ्गुलम्। ध्यात्वा पीताम्बरं जीवं हृत्पद्मस्थं चतुर्भुजम्। दक्षोर्द्ध्वादिवरदकरकादण्डमाचरेत्। ब्रह्माधिदैवं खड्गियं शिवेन्द्रप्रत्यधिदैवतम्"।

शुक्रस्य "शुक्रं भोजकटं विप्रं भार्गवञ्च नवाङ्गुलम्। पद्मस्थमाचरेत् खड्गियं श्वेतं चतुर्भुजम्। सदाक्षवरकरकादण्डहस्तं सिताम्बरम्। शक्राधिदैवतं ध्यायेत् शचीप्रत्यधिदैवतम्"।

शनेः "सौराष्ट्रं काश्यपं शूद्रं खड्गियं चतुरङ्गुलम्। कृष्णं कृष्णाम्बरं रथगतं सौरिं चतुर्भुजम्। तद्वदाक्षवरशूलधनुर्हस्तं समाचरेत्। यमाधिदैवतं प्रजापतिप्रत्यधिदैवतम्"।

राहोः "राहुं मलयजं शूद्रं पैठीनं द्वादशाङ्गुलम्। कृष्णं कृष्णाम्बरं सिंहासनं ध्यात्वा तथाचरेत्। चतुर्बाहुं खड्गवरशूलचर्मकरन्यसा। कालाधिदैवं खड्गियं सर्पप्रत्यधिदैवतम्"।

केतूनाम् "कौशद्वीपं केतुगणं जैमिनीयं षडङ्गुलम्। धूम्रं रथगतं शूद्रमाचरेद्विकृताननम्। खड्गियं धूम्रवसनं वरदं गदिनं तथा। चित्रगुप्ताधिदैवञ्च ब्रह्मप्रत्यधिदैवतम्"।

अत्र चन्द्रस्य साङ्गत्वं राहोर्मलयजत्वं केतोः कौशद्वीपत्वञ्च पुराणान्तरानुसारेण यज्ञभाषाजन्माभूम्यादिबोधकवचनेन विरोधभिया विकल्प आश्रयणीयः स चाचारभेदात् "व्यवस्थित इति बोध्यम्। एवं चाङ्गेऽपि विकल्पः। मत्स्यतन्त्रादानादिपद्धतौ एतेषां मध्ये केषाञ्चिदन्यथाङ्गत्वस्य दर्शितत्वाच्च"।

अधिदेवादीनां ध्यानञ्च विष्णुधर्मोत्तरे।

शिवस्य "पञ्चवक्त्रो दशभुजः प्रतिवक्त्रं त्रिलोचनः। कपाल-शूलखट्वाङ्गी चन्द्रमौलिः सदाशिवः"।

उमायाः "अक्षसूत्रं च कमलं दर्पणं च कमण्डलुम्। उमा बिभर्त्ति हस्तेषु पूजिता त्रिदशैरपि"।

स्कन्दस्य "कुमारः षण्मुखः कार्य्यः शिखण्डकविभूषणः। रक्तरत्नाम्बरोदेवो मयूरवरवाहनः। कुक्कुटश्च तथा घण्टा तस्य दक्षिणहस्तयोः। पताका वैजयन्ताख्या शक्तिः कार्य्या च वामयोः"।

विष्णोः "विष्णुः कौमोदकीपद्मशङ्खचक्रधरः क्रमात्। प्रदक्षिणं दक्षिणाधःकरादारभ्य नित्यशः"।

ब्रह्मणः "पद्मासनस्थो जटिलो ब्रह्मा कार्य्यश्चतुर्भुजः। अक्षमालां स्रुवं बिभ्रत् पुस्तकं च कमण्डलुम्। वामः कृष्णाजिनं तस्य पार्श्वे हंसस्तथैव च"।

शक्रस्य "चतुर्दन्तगजारूढो वज्री कुलिशभृत्करः। शचीपतिः प्रकर्त्तव्यो नानाभरणभूषितः"।

यमस्य "दैगक्षीनीलयमः कार्य्योदण्डहस्तोविजानता। रक्त दृक् पाशहस्तश्च महामहिषवाहनः"।

कालस्य "कालः करालवदनो नीलाङ्गश्च विभीषणः। पाशहस्तोदण्डहस्तः कार्य्यो दृष्टिकरोमवान्"।

चित्रगुप्तस्य "लेखीचित्रवेशः खाकारः द्विभुजः सौम्यदर्शनः। दक्षिणे लेखनीं चित्रगुप्तो वामेऽस्य पत्रकम्। पिङ्गल-श्मश्रुकेशान्तः पीनाङ्गश्चतरोऽरुणः"। "पिङ्गाक्षश्चित्रतयोऽरुणः" इति वा पाठः।

ग्रहाधिदेवानां तत्राग्नेः "कागस्थः साक्षसूत्रोऽग्निः सप्तार्चिः शक्तिधारकः। चिह्नितं चमरेणास्य करमन्त्रं प्रकल्पयेत्"।

जलस्य "आपः स्त्रीरूपधारिण्यः श्वेता मकरवाहनाः। दधानाः पाशकलशौ रत्नाभरणभूषिताः"।

क्षितेः "शुक्लवर्णा घटी कार्या दिव्याभरणभूषिताः। चतुर्भुजा सौम्यवपुश्चण्डांशुसदृशाम्बरा। रत्नपात्रं सस्यपात्रं पात्रमौषधिसंयुतम्। पद्मं करे च कर्त्तव्यं भुवो यादवनन्दन!। दिग्गजानां चतुर्णां सा कार्या गृहगता तथा"। विष्णोरिन्द्रस्य च लक्षणमुक्तम्।

अप्सराः "वामे अप्साः करे कार्या सौम्यसन्तानमञ्जरी। वरदा मण्डिता कार्या द्विभुजा च तथा शची"।

प्रजापतेः "यज्ञोपवीती हंसस्थ एकवक्त्रश्चतुर्भुजः। अक्षं स्रुचं स्रुवं बिभ्रत् कुण्डिकाञ्च प्रजापतिः"। अक्षं अक्षमालाम्। कुण्डिकां कमण्डलुम्।

सर्पाणाम् "अक्षसूत्रधराः सर्पाः कुण्डिकापुच्छभूषणाः। एकभोगास्त्रिभोगा वा सर्वे कार्य्याश्च भीषणाः"।

ब्रह्मलक्षणं प्रागुक्तम्।

अथ विनायकादिपञ्चलोकपाललक्षणानि विष्णुधर्मोत्तरे

विनायकस्य "चतुर्भुजस्त्रिनेत्रश्च कर्त्तव्योऽत्र गजाननः। नागयज्ञोपवीतश्च शशाङ्कतमशेखरः। दण्डं दक्षकरे दद्याद् द्वितीये चाक्षसूत्रकम्। तृतीये परशुं दद्याच्चतुर्थे मोदकं तथा"।

दुर्गायाः "शक्तिं वामे तथा शूलं खड्गं चक्रं च दक्षिणे। चन्द्रबिम्बमधो वामे खेटमूर्द्धे कपालकम्। शुक्लं टङ्कं च बिभ्राणा सिंहारूढोरुदिग्भुजा। एषा देवी समुद्दिष्टा दुर्गा दुर्गार्त्तिहारिणी"

वायोः "धावद्धरिणपृष्ठस्थो ध्वजधारी समीरणः। वरदानकरो धूम्रवर्णः कार्यो विजानता"।

आकाशस्य "नीलोत्पलाभं गगनं तद्वर्णाम्बरधारि च। चन्द्रार्कहस्तं कर्त्तव्यं द्विभुजं सौम्यखण्डवत्"।

अश्विनोः "पीतपद्मसवर्णौ तौ पद्मपत्रसमाम्बरौ। द्विभुजौ देवभिषजौ कर्त्तव्यौ रूपसंयुतौ। तयोरोषधयः कार्या दिव्या दक्षिणहस्तयोः। वामयोः पुस्तके कार्ये दर्शनीया सथाद्रिजाः (खगाः)। एकस्य दक्षिणे पार्श्वे वामे चान्यस्य यादव!। नारीयुगं प्रकर्त्तव्यं सरूपं चारुदर्शनम्"

यक्षाणां वर्णगोत्रादिसूचकध्यानानि यागतत्त्वोक्तानि पूर्वदर्शितान्येव

विनायकादीनां मण्डले स्थापनस्थानमुक्तं रुद्रकल्पे विष्णुधर्म्यथा

"राहुमन्ददिनेशानासुत्तरस्यां यथाक्रमम्। गणेयदुर्गा वायुश्च, राहुकेत्वोश्च दक्षिणे। आकाशमग्निनौ चेति यच्च तान् स्थापयेत् द्विजः"।

धूपादौ विशेषः हेमाद्रौ स्क०पु० "रवेः कुन्दुरुकं धूपं अग्निस्तु गुग्गुलं तथा। भौमे सर्जरसं चैव अगुरुञ्च बुधे तथा। पिण्डं गुरवे दद्यात् शुक्रे विल्वागुरु स्मृतम्। गुग्गुलुर्भन्दचारे तु लाक्षा राहोश्च केतवे"। कुन्दुरुकं शल्लकीनिर्यासः विल्वागुरु विल्वफलनिर्यासमिश्रितमगुरु। गन्धभेदास्तत्रैव "दिवाकरकुजाभ्यां तु दापयेद्रक्तचन्दनम्। चन्द्रे गन्धं भार्गवे च सितचूर्णं प्रदापयेत्। कुङ्कुमेन च संयुक्तं चन्दनं जीवसौम्ययोः। अगुरु चापि कस्तूरी राहुकेत्वर्कजेषु च"।

विधानमालादौ अन्यविधा गन्धधूपाः धूपभेदाश्चोक्ताः

च विवरषण्डे द्रष्टव्याः तत्र जीवस्य चतुःसमगन्ध उक्तः स च "कलूटिकाया द्वौ भागौ चत्वारश्चन्दनस्य तु। कङ्कुमस्य त्रयश्चैव शशिनश्च चतुःसमम्" इत्युक्तः गुरोर्दशाङ्गुलपत्रोक्तः स च "हेमाद्रौ व्रतखण्डे" षड्भागकृतं हिगुणो गुडश्च लाक्षात्रयं पञ्च नखस्य भागाः हरीतकी सर्जरसः समांशौ भ गैकमेकं लिखेत् शिलाजम्। धनस्य चत्वारि गुरस्य चैकोधूपोदशाङ्गः-कथितो मुनीन्द्रैः" रत्नानि तु षड्गशब्दे भारदा० ह्रप० उक्तानि द्रष्टव्यानि। "अभावे सितपुष्पाणि चन्दनं च विलेपनम्। एतेषां गुग्गुलुर्धूपो नैवेद्यं घृतपायसम्"।

ग्रहमण्डललेखनप्रकारः—उभयतो हस्तमिते ग्रह-वेदिमध्यस्थले पूर्वपश्चिमागादितो दक्षिणोत्तरागाच्च चतुरोरेखाः कुर्यात् तथा करणे अष्टाङ्गुलदीर्घविस्तारणि समान्तराणि नव खण्डानि सम्पद्यन्ते तत्र विवरषण्डे वक्ष्यमाणमानकं सूर्यादीनां वर्तुलाकारं कुर्यात्। खण्डमण्डले च स्व स्व स्थापनम् स्वस्वामिऽधिदेवानां स्वदक्षिणे प्रत्यधिदेवानां सूर्याभिमुखतया सर्वेषां स्थापनम् विनायकादिस्थापनञ्च प्रागुक्तस्थानेष्विति विवेकः।

होमे समिद्धेदनसंख्यादिकं विधानपारि० स्कन्दपु० "प्रादेशमात्रा अर्कस्य समिधश्चार्कसम्भवाः। दधिमध्याज्यसंयुक्ताः प्रतिदेवञ्च होमयेत्। पालाशीश्चैव सोमाय। खादिरीमङ्गिरसाय च। अपामार्गीं बुधायेति आश्वत्थीं च बृहस्पतेः। औदुम्बरीञ्च शुक्राय मन्दाय च शमीमयीः। दूर्वाङ्कुराहुतीः कुर्यात् कोतोर्होमसमन्वितः ततः परम्"। समिद्धनखं चिन्तामणौ "समिधां लक्षणं वक्ष्ये संख्या तासां तथैव च। विशीर्णा विदला ह्रस्वा वक्राः सशुषिरा क्षताः। अतिस्थूलातिदीर्घाश्च समिधः कार्यनाशिकाः। विशीर्णाऽऽयुःक्षयकरी विदला पत्रनाशिनी। शुषिरा व्याधिजननी क्षता च रिपुवर्द्धिनी। दीर्घा विदेशगमनी स्थूला चात्मविनाशिनी। अक्षया शुभदास्थूला सार्द्रा च सुपशुप्रदा। प्रादेशाद्धाधिका न्यूना समित् स्यात् सर्वकर्मणि"। अथार्कादीनां फलं होमसंख्या च तत्रैव दर्शितं यथा "अर्को नाशयति व्याधिं पलाशः सर्वकामदः। खदिरश्चार्थलाभाय अपामार्गः सुदर्शनः। अश्वत्थः सर्वकामाय भाग्यायौदुम्बरस्तथा। शमी शमयते पापं दूर्वाऽऽयुर्वर्द्धनी। कुशात् धर्मार्थकामानां रक्षणं रक्षसां विदुः। अष्टोत्तरन्तु साहस्रं शतमष्टाधिकं तु वा। अष्टाविंशतिमष्टौ वा एकैकस्य तु होमयेत्। देवानामपि सर्वेषामयं परमार्थवित्। खेन खेनैव मन्त्रेण होतव्याः समिधः पृथक्। होतव्यं च घृताक्तं चरुभक्तादिकं पुनः। मन्त्रैर्द्वादशभिर्द्वाद्वोभोव्याहृतिभिस्ततः" अयुतादिहोम प्रक्रमात् व्याहृतिभिरयुतादिहोमः।

ग्रहाणां जन्मभूम्यादिस्थानावयवकथनमाह स्कन्दपु० "जन्मभूमौत्रमग्नित्र वर्षस्थाने सुखानि च। योऽज्ञात्वा कुरुते शान्तिं ग्रहास्तस्यावमानिताः" अतः शान्तिकाले तेषां जन्मभूम्यादिस्थानमपेक्षितं तच्च विशेषेण ध्याने दर्शितमपि प्रपञ्चार्थमिहोच्यते। तत्र रव्यादीनां जन्मभूम्यादयो यथा तत्रैव

जन्मभूः—"उत्पन्नोऽर्कः कलिङ्गेषु यमुनायाञ्च चन्द्रमाः। अङ्गारकस्त्ववन्त्यां वै मगधेषु हिमांशुजः। सैन्धवेषु गुरुर्जातः शुक्रो भोजकटे तथा। शनैश्चरश्च सौराष्ट्रे राहुर्बर्बरके पुरे। अनर्चेदां तथा केतुरित्येता जन्मभूमयः। यस्य यस्य च यद्गोत्रं तत्तं वक्ष्याम्यतः परम्"।

गोत्रम्—"आदित्यः काश्यपे गोत्रे आत्रेयश्चन्द्रमा भवेत्। भारद्वाजो भवेद्भौमस्तथात्रेयश्च सोमजः। शक्रपुत्रोऽङ्गिरोगोत्रः शुक्रोवै भार्गवस्तथा। शनिः काश्यप एवायं राहुः पैठिनसिस्तथा। केतवो जैमिनीयाश्च गोत्रान्येतानि क्रमात्"।

ग्रहवर्णः—"आदित्ये कपिलो नाम पिङ्गलः सोम उच्यते। धूमकेतुसमो भौमे जाठरोऽग्निर्बुधे स्मृतः। गुरौ चैव शिखी नाम शुक्रे भवति काटकः। शनैश्चरे महातेजा राहुकेत्वोर्धूतायनः" इति। इत्येवं होमकाले तत्तदग्निनाम कृत्वा जुहुयात्।

अथैषां वर्णः स च द्विधा विप्रादिजातिरूपभेदात् तत्र रूपे तत्रैव "भास्करोङ्गारकौ रक्तौ शुक्रौ शुक्रनिशाकरौ। सोमपुत्रो गुरुश्चैव तामसौ पीतकौ स्मृतौ। कृष्णः शनैश्चरस्तद्वत् राहुश्चित्राय केतवः"। विप्रादिवर्णेषु। "ब्राह्मणौ शुक्रवागीशौ क्षत्रियौ भौमभास्करौ। चन्द्रो वैश्यो बुधः, शूद्रावन्दोराहुश्च केतवः"।

स्थानं तत्रैव "मध्ये तु भास्करं विद्याच्छशिनं पूर्वदक्षिणे। दक्षिणे लोहितं विद्याद् बुधं पूर्वोत्तरेण तु। उत्तरे तु गुरुं विद्यात् पूर्वतो भार्गवं न्यसेत्। पश्चिमेन शनिं विद्याद्राहुं दक्षिणपश्चिमे। पश्चिमोत्तरतः केतुः स्थाप्या वै शुक्लतण्डुलैः इति"।

सुखं स्कान्दे "शुक्रार्कौ प्राङ्मुखौ ज्ञेयौ गुरुश्चौ तादृदङ्मुखौ। प्रत्यङ्मुखः शनिः सोमः शेषा दक्षिणतोमुखाः"। अत्र प्राङ्मुखौ ऊर्ध्वदृष्टी, उदङ्मुखौ वामदृष्टी, प्रत्यङ्मुखोऽधोदृष्टिः, दक्षिणतोमुखा दक्षिणदृष्टय इति व्याख्येयम् "आदित्याभिमुखाः सर्वे दृष्ट्वनेन सर्वेषां सूर्याभिमुखत्वोक्तेः इति विधानपारिजातादयः। "वर्णरूपगुणैर्युक्तान् व्याहृत्याग्राहयेत्तु तानिति" स्कान्दोक्तेरावाहनसमयेऽपि वर्णभूम्यादिकीर्त्तनपूर्व्वकमावाहनं कार्य्यमेवमग्रेऽपि होमकाले तथाकरणमिति बोध्यम् "चित्रान्नं च "अजाक्षीरेण संसिद्धा यवाश्च तिलतण्डुलाः। अजाकर्षश्च रक्तेन रक्तचित्रान्नसंज्ञिताः" दीपिकोक्तम् प्रयोगो मत्कृततत्तुलादानादिपद्धतौ द्रष्टव्यः।

सूर्य्यादिग्रहाणां जन्मभूम्यादिसूचकविवरणपत्रम्।

| जन्मभूम्यादि | सूर्य्यस्य | चन्द्रस्य | भौमस्य | बुधस्य | जीवस्य | शुक्रस्य | शनेः | राहोः | केतोः |
|---|---|---|---|---|---|---|---|---|---|
| जन्मभूमिः | कलिङ्गः | यमुना | अवन्तिः | मगधः | सैन्धवः | भोजकटः | सौराष्ट्रः | बर्ब्बरकः | अन्तर्वेदी |
| गोत्रम् | कश्यपः | अत्रिः | भरद्वाजः | अत्रिः | आङ्गिरसः | भृगुः | कश्यपः | पैठिनसिः | जैमिनिः |
| ऋषिः | कपिलः | पिङ्गलः | धूमकेतुः | जाठरः | शिखी | स्फाटकः | महातेजाः | हुताशनः | हुताशनः |
| विप्रादिवर्णः | क्षत्रियः | वैश्यः | क्षत्रियः | वैश्यः | विप्रः | विप्रः | शूद्रः | शूद्रः | शूद्रः |
| रूपात्मकवर्णः | रक्तः | शुक्लः | रक्तः | पीतः | पीतः | शुक्लः | कृष्णः | कृष्णः | चित्रम् |
| मण्डले स्थानम् | मध्यम् | पूर्वदक्षिणः | दक्षिणः | पूर्वोत्तरः | उत्तरः | पूर्वः | पश्चिमः | दक्षिणपश्चिमः | पश्चिमोत्तरः |
| मुखम् (सर्वे सूर्याभिमुखाः) | ऊर्ध्वदृष्टिः | अधोदृष्टिः | दक्षिणदृष्टिः | वामदृष्टिः | वामदृष्टिः | ऊर्ध्वदृष्टिः | अधोदृष्टिः | दक्षिणदृष्टिः | दक्षिणदृष्टिः |
| मण्डले आकारः | वर्त्तुलः | अर्द्धचन्द्रः | त्रिकोणः | चापः | पद्मम् | चतुष्कोणः | सर्पः | मकरः | खड्गः |
| उभयतोदाक्षिण नवकोष्ठेषु तन्त्रानम् | ४।व्या० १२प० | ८व्या० २४प० | ४।व्या० १२प० | २।व्या० ६प० | ४व्या० १२प० | ३व्या० ९प० | ४व्या० १२प० | ४व्या० १२प० | ६व्या० १८प० |
| वाहनम् | सप्ताश्वरथः | दशाश्वरथः | मेषः | सिंहः | हंसौ | वृषः | गजः | सिंहः | गजः |
| धातुः | ताम्रम् | स्फटिकम् | श्वेतचन्दनम् | स्वर्णम् | स्वर्णम् | रजतम् | लौहम् | सीसम् | कांस्यम् |
| गन्धभेदाद्विधा | रक्तचन्दनम् | श्वेतचन्दनम् | रक्तचन्दनम् | कुङ्कुमम् | कुङ्कुमम् | श्वेतचन्दनम् | कस्तूरी | कस्तूरी | कस्तूरी |
| मतान्तरे | तत् | तत् | तत् | तत् | चतुःसमम् | तत् | सा | कृष्णागुरु | सा |
| पुष्पभेदाः | करवीरम् | कुसुमं | जवा | चम्पकम् | पद्मम् | जातिः | मल्लिका | कुन्दम् | मल्लिका |
| धूपभेदाः | गुग्गुलुः | एलाकर्पूरसर्जरसाः यवधूपः | पीतागुरुः ऋषिवृक्षम् | दशाङ्गम् | सिन्धुजम् | सावधिः | पद्मकाष्ठम् | वंशधूपः | मधुमिश्रगुडत्वचम् |
| मतान्तरे | कुन्दरुक्षम् | एलात्वचम् | सर्जरसः | पीतागुरु | सिन्धुजम् | विल्वागुरु | गुग्गुलुः | लाक्षा | लाक्षा |
| फलम् | द्राक्षा | इक्षुः | पूगम् | नागरङ्गम् | जम्बीरम् | बीजपूरम् | जातिफलम् | नारिकेलम् | दाडिमम् |
| वस्त्रम् | रक्तम् | श्वेतम् | रक्तम् | पीतम् | पीतम् | श्वेतम् | कृष्णम् | कृष्णम् | चित्रम् |
| रत्नानि | माणिक्यम् | सङ्खः | प्रवालम् | गारुत्मतम् | पुष्परागम् | हीरकम् | नीलकम् | गोमेदकम् | वैदूर्य्यम् |
| बलिभेदाः | गुडौदनः | एलापायसम् | यावकम् | क्षीरपिष्टकम् | दध्योदनः | एलौदनः | क्षसरम् | आलभांसम् | चित्रान्नम् |
| समिधः | अर्कः | पलाशः | खदिरः | अपामार्गः | अश्वत्थः | उदुम्बरः | शमी | दूर्वात्रयम् | कुशत्रयम् |
| दक्षिणा | कपिलावेनुः | शङ्खः | रक्तवस्त्रः | स्वर्णम् | पीतवस्त्रं | श्वेताश्वः | कृष्णधेनुः | खड्गः | छागः |
| जपसङ्ख्या | ६००० | १०००० | ७००० | १७००० | १९००० | २०००० | १८००० | १८००० | ७००० |
| अधिदेवता | शिवः | उमा | स्कन्दः | नारायणः | ब्रह्मा | शक्रः | यमः | कालः | चित्रगुप्तः |
| प्रत्यधिदेवता | अग्निः | जलम् | क्षितिः | विष्णुः | इन्द्रः | अग्निः | प्रजापतिः | सर्पः | ब्रह्मा |

वेदभेदे ग्रहादीनां मन्त्रभेदा हेमाद्रावुक्ताः प्रतीकतो दर्शयन्ते

| ग्रहादीनाम् | ऋग्वेदिनः | यजुर्वेदिनः | सामवेदिनः | अथर्ववेदिनः |
|---|---|---|---|---|
| रवेः | आ कृष्णेन रजसा | आ कृष्णेन रजसा | इदु त्यं जातवेदसम् | विभासहिं सहस्रानम् |
| चन्द्रस्य | आप्यायस्व समेतु | इमं देवा असपत्नम् | सन्ने पयांसि सन्तु | शकधूमं नक्षत्राणि |
| भौमस्य | अग्निर्मूर्द्धा दिवः | अग्निर्मूर्द्धा दिवः | अग्निर्मूर्द्धा दिवः | त्वया मन्यो ! सरथम् |
| बुधस्य | अग्ने ! विधतद् | उदुबुध्यस्वाग्ने ! | अग्ने ! विधतत् | यद्राजानो विभजन्तः |
| गुरोः | हरसते ! परिदीया | हरसते ! अतियदर्य्यः | हरसते ! परिदीया | हरसतिनः परिपातु |
| शुक्रस्य | शुक्रं ते अन्यत् | अच्छात्परिस्रुतः | शुक्रं ते अन्यत् | हिरण्यवर्णाः शुचयः |
| शनेः | समस्मिन्निभिः | अन्नोदेवीरभीष्टये | अन्नोदेवीरभीष्टये | सहस्रबाहुः पुरुषः |
| राहोः | कया नश्चित्रः | काण्वात् काण्वात् | कया नश्चित्रः | दिव्यं चित्रतथाः |
| केतोः | केतुं कृण्वन्नकेतवे | केतुं कृण्वन्नकेतवे | केतुं कृण्वन्नकेतवे | यस्ते पृथुःस्तनयित्नुः |
| सूर्याधिदेवरुद्रोः | आ घोराजानम् | त्रियम्बकम् | आ घोराजानम् | मानोविदत् विव्याधिनः |
| चन्द्राधिदेवोमायाः | गौरीर्मिमाय | श्रीश्च ते लक्ष्मीश्च | आपोऽद्या | आपोऽद्या |
| कुजाधिदेवस्कन्दस्य | कुमारं माता | यदक्रन्दः प्रथमम् | स्योना पृथिवि ! | अग्निरिव मन्यो ! त्विषितः |
| बुधाधिदेवविष्णोः | इदं विष्णुर्विचक्रमे | विष्णोरराटमसि | इदं विष्णुर्विचक्रमे | म तद्विष्णुः स्तवते |
| जीवाधिदेवब्रह्मणः | त्वमित् सप्रथाः | आ ब्रह्मन् ब्राह्मणः | त्वमित् सप्रथाः | ब्रह्म जज्ञानम् |
| शुक्राधिदेवेन्द्रस्य | इन्द्रं वो विश्वतः | सजोषा इन्द्र ! | इन्द्रमित् देवतातये | इन्द्रेमं प्रतरम् |
| शन्यधिदेवयमस्य | यमाय सोमं सुनुत | यमाय त्वाङ्गिरस्वते | अयं गौः पृश्निः | यः प्रथमं व्यतमासत् |
| राह्वधिदेवकालस्य | ब्रह्म जज्ञानम् | काश्यिरसि सत्तस्य | ब्रह्म जज्ञानम् | रोहितः कालो अभवत् |
| केत्वधिदेवचित्रगुप्तस्य | उशोवाजं हि | चित्रावसो ! स्वस्ति | चित्र इच्छिशोः | आत्तात् यदनात्तात् |
| सूर्यप्रत्यधिदेवाग्नेः | अग्निं दूतं वृणीमहे | अग्निं दूतं पुरोदधे | अग्निं दूतं वृणीमहे | समास्त्वाग्ने ! ऋतवः । |
| चन्द्रप्रत्यधिदेवजलस्य | आपृच्छ मे सोमः | आपोऽद्या | उदुत्तमं वरुण ! | अन्नोदेवीरभीष्टये |
| भौमप्रत्यधिदेवक्षितेः | स्योना पृथिवि ! | स्योना पृथिवि ! | पृथिव्यन्तरिक्षम् | भूमे ! मातर्निधेहि |
| बुधप्रत्यधिदेवहरेः | सहस्रशीर्षा पुरुषः | इदं विष्णुर्विचक्रमे | सहस्रशीर्षा पुरुषः | इदं विष्णुर्विचक्रमे |
| जीवप्रत्यधिदेवेन्द्रस्य | इन्द्राबेन्दो ! मरुत्वते | इन्द्र आसां नेता | इन्द्राबेन्दो ! | इन्द्र ! श्रुधस्य प्रवक्ता |
| शुक्रप्रत्यधिदेवशच्याः | उत्तानपर्णे ! सुभगे ! | अदितिर्द्यौरदितिः | एकाष्टका तपसो | प्रेतं पादौ प्रस्फुरतम् |
| शनिप्रत्यधिदेवप्रजापतेः | प्रजापते ! न त्वदेतान्यन्यः | प्रजापते ! न त्वदेतान्यन्यः | प्रजापते ! न त्वदेतान्यन्यः | नक्तं जातास्त्रोषधे ! |
| राहुप्रत्यधिदेवसर्पाणाम् | आयं गौःपृश्निः | नमोऽस्तु सर्पेभ्यः | तवेदिन्द्रा वयम् | शेरभक शेरभ ! |
| केतुप्रत्यधिदेवब्रह्मणः | ब्रह्म जज्ञानम् | ब्रह्म जज्ञानम् | एष ब्रह्मा य ऋत्विजः | ये दिशामन्तर्देशेभ्यः |
| विनायकस्य | आ तू न इन्द्र ! | गणानां त्वा गणपतिम् | आ तू न इन्द्र ! | निर्ऋत्यां जनानाम् |
| दुर्गायाः | जातवेदसे सुनवाम | अम्बे ! अम्बिके ! | इमं सोममर्हते | शृतनाजितं सहमानम् |
| वायोः | क्राणाशिशुर्महीनाम् | वायो ! ये ते सहस्रिणः | क्राणा शिशुर्महीनाम् | अन्तरीक्षे वायवे |
| आकाशस्य | आदित् प्रत्नस्य | इतं इतपायवः | आदित् प्रत्नस्य | आस्वतः पचतो विद्धि |
| अश्विनोः | एतो उषा अपूर्व्या | या वां कशा | एतो उषा अपूर्व्या | मं चेन्नया यो अश्विना |

एते च मन्त्राः ऋग्वेदस्य याद्दशस्थानस्यास्तद्विशेषसंचितं तुलादानादिपद्धतौ ७५—७८ पत्रेषु स्वरूपतो दर्शिताश्चतएवावधेयाः । एते च मन्त्राः शुक्लयजुर्वेदे याद्दशस्थानस्यास्तद्विशेषसंचितं तुलादानादिपद्धतौ १०६—११० पत्रेषु स्वरूपतोदर्शिताः । एते च मन्त्राः सामवेदस्य याद्दशस्थानस्यास्तद्विशेषानुसारेण तुलादानादि पद्धतौ १२७—१३० पत्रेषु स्वरूपतोदर्शिताः । एते च मन्त्राः अथर्ववेदे याद्दशस्थानस्यास्तद्विशेषानुसारेण तुलादानादिपद्धतौ १४८—१५२ पत्रेषु स्वरूपतोदर्शिताः ।

ग्रहयुति पु० ६त०। ग्रहाणामेकराश्यादिस्थितिभेदेन भूतलस्थानां कल्पनीययोगभेदे तद्विशेषः सूर्य०सि० उक्तो यथा "तारा ग्रहाणामन्योन्यं स्थितं युद्धसमागमौ। समानमः ग्रहाङ्केन सूर्येणास्तमनं सह" सू०सि० "तारा ग्रहाणां भौमादिपञ्चग्रहाणां परस्परं योगे युद्ध समागमौ वक्ष्यमाणलक्षणभिन्नौ स्तः। चन्द्रेण सह पञ्चतारान्यतमस्य योगः समागमसञ्ज्ञः। सूर्येण सह पञ्चतारााणामन्यतमस्य चन्द्रस्य वा योगस्तदस्तमनं पूर्वास्तङ्गतत्वम् न त्वस्तमात्रम् युद्धभावे प्रागपरकाले तस्य सत्त्वात्। अथ युतेर्गतैष्यत्वं सार्धश्लोकेनाह" रङ्गना० "शीघ्रे मन्दाधिकेऽतीतः संयोगो भवितान्यथा। द्वयोः प्राग्यायिनोरेवं वक्रिणोस्तु विपर्ययात्। प्राग्यायिन्यधिकेऽतीतो वक्रिण्येष्यः समागमः" सू०सि०।

"यथोर्यं द्वयोर्योगोऽभिमतस्तयोर्यं द्वयोर्मध्ये यः शीघ्रगतिर्यं च स्वल्पिन् मन्दाधिके मन्दगतिय च्छादधिके सति तयोः संयोगोयुतिसञ्ज्ञोऽतीतः पूर्वं जात इत्यर्थः। अन्यथा मन्दगतिय च्छे शीघ्रगतिग च्छादधिके सतीत्यर्थः। तयोर्योगो भविता एष्यः। एवमुक्तं गतैष्यत्वम् द्वयोर्यं च्छयोः प्राग्यायिनोः पूर्व्यं गतिकयोर्भवति। वक्रिणोर्वक्रगतियच्छयोर्विपर्ययादुक्तवैपरीत्यात्। तकाराद्गतैष्यो योगो भवति। शीघ्रगतियच्छे मन्दगतिग च्छादधिके एष्यः संयोगो, मन्दगतिग च्छे शीघ्रगतिग च्छादधिके गतः संयोग इत्यर्थः। अथैकस्य वक्रत्वे आह। प्राग्यायिनीति। द्वयोर्मध्ये एकतरस्मिन् वक्रिणि सति तदा वक्रगतिग च्छात् पूर्वगतिग च्छेऽधिके सति गतो यातः। यदा तु पूर्वगतिग च्छाद्वक्रगतिग च्छेऽधिके सति समागमो योगस्तदा एष्यः स्यात्। अत्रोपपत्तिः। पूर्वगत्योर्यं द्वयोर्मध्ये शीघ्रगत्याधिक्येऽप्ये योगासम्भवात् पूर्वं योगो जातः। मन्दगत्याधिक्येऽप्ये शीघ्रगत्या न्यूनत्वादप्ये योगो भविष्यति। वक्रिणोस्तु शीघ्रगत्याधिक्येऽप्ये तत्र्यूनत्वेन योगसम्भवादेष्यो योगो मन्दगत्याधिक्येऽप्ये शीघ्रगत्योत्तरोत्तरं न्यूनत्वसम्भवेनाप्ये योगासम्भवाद्गतो योगः। अथ वक्रगतियच्छात् पूर्वगतियच्छेऽधिके उत्तरोत्तरं योगासम्भवाद्गतो योगः। पूर्वगतियच्छाद्वक्रगतियच्छेऽधिके वक्रगतियच्छस्य न्यूनत्वेनाप्ये योगसम्भवादेष्यः संयोग इति। अथ युतिकाले तच्छ्रयग्रहयोरानयनं युतिकालस्य गतैष्यदिनाद्यानयनं च सार्धश्लोकत्रयेणाह" रङ्गना०।

"ग्रहान्तरकलाः स्वस्वभुक्तिविश्लेषसाहताः। भुक्त्यन्तरेण विभजेदृणयोर्भविलोमयोः। द्वयोर्वक्रिणि चैकस्मिन् भुक्तियोगेन भाजयेत्। लब्धं विश्लेषिकं शीघ्रे गते, देये भविष्यति। विपर्ययाद्वक्रगत्योरेकस्मिंस्तु धनव्ययौ। समश्लिष्टौ भवेतां तौ यदा भगणसंस्थितौ। विवरं तद्दृढ्य दिनादि फलमिष्यते" सू०सि०।

"युतिसम्बन्धिनोर्यं द्वयोरभीष्टकालिकयोरन्तरस्य कलाः पृथक् स्वस्वगतिकलाभिर्गुणिताः(कर्मभूताः)द्वयोर्यं द्वयोरन्तुल्यभविलोमयोर्मार्गगयोर्वक्रगयोर्वैक्यार्थः। स्फुटगत्यन्तरेण भगणको भजेत्। विशेषमाह। वक्रिणीति व्याख्यानन्तरं द्वयोर्मध्य एकतरे वक्रिणि सति तयोर्गतियोगेन भजेत्। फलं कलादि स्वं स्वं गते योगे सति यच्छयोर्मार्गगयोः शीघ्रं, भविष्यति-एष्ये योगे सति तयोर्देयं योज्यम्। द्वयोर्वक्रगत्योः स्वं स्वं फलं विपर्ययादुक्तवैपरीत्यात् कार्यम्। गते योगे योज्यम्। एष्ये योगे हीनमित्यर्थः। द्वयोर्मध्य एकतरे तुकाराद्वक्रिणि सति तयोर्यं द्वयोर्वक्रमार्गगयोः स्वस्वकलात्मकफलाद्धनव्ययौ युतहीनौ कार्यौ। तथाहि। गतयोगे मार्गगच्छे स्वफलं हीनं, वक्रिणि यच्छे योज्यम्। एष्ये योगे वक्रगच्छे शोध्यम्। मार्गगच्छे योज्यमिति। एवं कृते तौ युतिसम्बन्धिनौ गच्छौ भगणसंस्थौ भगणे राश्यधिष्ठितचक्रे संस्थितिर्यस्यौ राश्याद्यात्मकौ समश्लिष्टौ समकलौ स्तः। श्लिष्टपदस्य भगणावयवोपलक्षणत्वेन समौ स इत्यर्थः। अथ युतिकालज्ञानमाह विवरमिति। अभीष्टकालिकयोर्युतिसम्बन्धिनोर्यं द्वयोरन्तरं कलात्मकं तदेव समकलोपयुक्तफलज्ञानार्थं यथा गतियुक्तमन्तरं गतियोगेन गत्यन्तरेण भक्तं तथेत्यर्थः। तेन लब्धेन भक्ता फलं दिनादिकं गतैष्ययुतिपदादभीष्टकालाद्गतैष्यमुच्यते। तत्समये तद्युतिकाले तौ गच्छौ समौ स्त इत्यर्थः। उपपत्तिः। यदि गत्यन्तरेण गतिकलाभेदा गच्छान्तरकलाभिः का? इति फले गतयुतौ गच्छयोः शोध्ये। एष्ययुतौ योज्ये। द्वयोर्वक्रत्वे गत्यन्तरभक्तफले गतयुतौ गच्छयोर्योज्ये। एष्ययुतौ शोध्ये वक्रगच्छोत्तरोत्तरं न्यूनत्वात्। अथैको वक्री तदा तयोरन्तरं लब्धं गतियोगेनोपचितम्। यतो गतियोगक्षेपागतं फलं गतयोगे मार्गगच्छे हीनं, पूर्वं तस्य न्यूनत्वात्। वक्रगच्छे योज्यम् पूर्वं तस्याधिकत्वात्। एष्ययोगे मार्गगच्छे योज्यम् उत्तरोत्तरमधिकत्वात्। वक्रगच्छे शोध्यम् तस्याग्रे न्यूनत्वात्। यदि गतियोगेन गत्यन्तरेण वा

दिनमेकं लभ्यते तदाल्पकलाभिः किम् ? इत्यनुपातेन गतैष्यदिनाद्यवगमः" रङ्गना०

ग्रहयुद्ध न० ६त०। गृहाभासपर्यु परिस्थितानां किरण संस्पर्शादना युद्धभेदे तद्भेदादिकं सू० सि० उक्तं यथा

"उक्तेषं तारकास्पर्शाद्भेदे भेदः प्रकीर्त्यते। युद्धमंशुविमर्दाख्यमंशुयोगे परस्परम्। अंशादूनेऽपसव्याख्यं युद्धनेकोऽत्र भेदगुः। समागमोंऽशादधिके भवतश्चेद्बलान्वितौ" सू०सि०।

"सौम्यादिपञ्चतारायां मध्ये द्वयोर्युतौ तारकास्पर्शाहिम्बनेम्योः स्पर्शमात्रादुक्तं सव्यं युद्धं वदन्ति युतिभेदज्ञाः। इदं तु द्वयोर्भानैक्यखण्डतुल्यव्यास्योत्तरान्तरे। भेदे सकलभेदे भेदो भेदसज्ञो युद्धावान्तरभेदो युद्धभेदतत्त्वज्ञैः कथ्यते। अयं भेदो भानैक्यखण्डादूने द्वयोर्व्यासोत्तरान्तरे। अत्र भास्कराचार्यैस्तु "भानैक्यार्धाद्युत्तरविवरेऽल्पे भवेद्भेदयोगः कार्यं सूर्यग्रहवदखिलं लम्बनाद्यं स्फुटार्थम्। कलुषोऽधःस्थः सुधांशुस्तदुपरिगत एतो लम्बनादिप्रसङ्गैः किं त्वर्कोदये लग्नं गृह्यतिसमये कल्पितार्काच्च साध्यम्। प्राग्वत् तल्लग्नेन गृह्यतिसमयः संस्कृतः प्रस्फुटः स्यात्। खेटौ तौ दृष्टियोग्यौ गृह्यतिसमये कार्यमेवं तदैव। व्यासोदक्स्थद्युचरविवरं भेदयोगे स व्यासो ज्ञेयः सूर्याङ्गवति च यतः प्रोक्तगुः सा गरागा। मद्भाक्रान्तोऽल्पजुरपि तदाधःस्थितः स्यात् तदेन्द्वर्कं सर्शो भोगोऽपरदिशि तदा पारिलेख्येऽपसव्यः" इति विशेषोऽभिहितः। भगवता तु सूक्ष्मबिम्बयोराकाशे दूरतो विविक्तदर्शनासम्भवाद्ग्रहयुत्यर्थप्रयासादुपेक्षितमिति ध्येयम्। युतावस्योन्यं किरणयोगे सति व्यंशुमर्दाख्यं किरणसङ्घट्टनसञ्ज्ञं युद्धं स्यात्। द्वयोर्व्यासोत्तरान्तरे ऽल्पात् षष्टिकलात्मकैकभागादूनेऽधिके सव्यपसव्यसञ्ज्ञं युद्धं भवति। अत्र विशेषमाह। एक इति। अव्यपसव्ययुद्धे एको द्वयोरन्यतरोऽपुरप्रबिम्बः स्यात् तदापसव्यं युद्धं व्याख्यं स्यादन्यथा सव्यं युद्धं स्यात्। एषां चतुर्णां फलम्। "अपसव्ये भवं ब्रूयात् संग्रामं रश्मिसङ्घजे। सेनानेऽमात्यभोगा स्याद्भेदने तु धनक्षयः" इति भार्गवीयोक्तं ध्येयम्। युद्धभेदाख्या समागमनमाह समागम इति। द्वयोर्व्यासोत्तरान्तरे षष्टिकलात्मकैकभागादधिके सति समागमो योगो भवति। अत्रापि विशेषमाह भवत इति। युतिविषयौ गृह्यौ बलान्वितौ बलेन—"स्नानादिवस्तुचिन्तात्र व्यर्थं बलेनापि न यद्यतः। प्रग्रहवेऽप्यापथश्चिन् स्वौल्यसौक्ष्म्यबलं यतम्" इति ब्रह्मसिद्धान्तवचनात् स्थूलसमखगतयान्वितौ युक्तौ स्थूलबिम्बौ समाविष्यर्थः। चेत् स्यातां समागमलग्नयोर्व्यक्तः स्यात्। अन्यथा त्वव्यक्तः समागमः। "द्वावपि मयूखयुक्तौ विपुलौ स्निग्धौ समागमे भवतः। अल्पान्योऽन्यं प्रीतिविपरीतावात्मपक्षघ्नौ। युद्धं समागमो वा यद्व्यक्तं तु लक्षणैर्भवतः। भवि भूतानामपि तथा फलमव्यक्तं विनिर्दिष्टम्" इत्युक्तेः। "भेदोक्तेर्खांशुसम्पर्दो अपसव्यसञ्ज्ञापरः। ततो योगो भवेदेषामेकांशकसमापनात्" इति काश्यपोक्तेश्च सर्वं निरवद्यम्। अथ युद्धे पराजितस्य ग्रहस्य लक्षणमाह "रङ्गना० "अपसव्ये जितो युद्धे पिञ्जितोऽपुरदीप्तिमान्। रूक्षो विवर्णो विध्वस्तो विजिता दक्षिणाश्रितः" सू०सि०।

"द्वयोर्मध्ये यस्तदितरेण विध्वस्तो हतः स विजितः पराजिता ज्ञेयः। हतस्य लक्षणमाह अपसव्ये इति। अपसव्ये युद्धे यो जितो जयलक्षणैर्विवर्जितः। एतेनोक्तेर्खादन्ये सङ्घाफलं न पराजितस्य फलमिति सूचितम्। पिञ्जित आपाण्डुरादिरूप्य इति यावत्। अपुरितरग्रहबिम्बादल्पबिम्बः। अदीप्तिमान् प्रभारहितः। रूक्षोऽस्निग्धः विवर्णः वर्णेन स्वकीयेन स्वाभाविकेन रहित इत्यर्थः। दक्षिणाश्रित इतरगृहापेक्षया दक्षिणदिशि स्थितः। "श्यामो वा व्यपगतरश्मिवान् रश्मिमण्डलो वा रूक्षो वा व्यपगतरश्मिवान् क्षयो वा। आक्रान्तो विनिपतितः कृतापसव्यो विज्ञेयो हत इति सङ्गो गृहेषु" इति भार्गवीयोक्तेः। अथ श्लोकोत्तरार्धेन जयिनो गृहस्य लक्षणमाह रङ्गना०

"दृढबिम्बो दीप्तिमान् स्थूलोजयी व्याख्येऽपि वेत्ति वली" सू० सि० "इतरगृहापेक्षयोत्तरदिक्स्थः दीप्तिमान् प्रभायुक्तः स्थूल इतरग्रहबिम्बापेक्षया पृथुबिम्बः। जयी जययुक्तः स्यात्। अयोत्तरदक्षिणदिक्स्थत्वक्रमेण जयपराजयौ न स इत्याह व्याख्य इति। दक्षिणदिशि यो गृहो बली दीप्तिमान् पृथुबिम्बो भवति स जयी। अपिशब्द उत्तरदिशासमुच्चायकः। तथा च जयपराजयलक्षणयोर्दिक्स्थानमनुपयुक्तमिति भावः। अथ युद्धे विशेषमाह रङ्गना० "व्यासार्धाधुभौ दीप्तौ भवतश्चेत् समागमः। स्थूलौ द्वावपि विध्वस्तौ भवेतां कूटविग्रहौ" सू०सि०। "उभौ द्वौ व्यासार्धैकभागान्तरगतान्तरितौ। अपिशब्दाद्युत्तरदक्षिणाक्रान्तौ। दीप्तौ प्रभायुक्तौ चेत् स्यातां तदा बलान्विता-

विति समागमलक्षणैकदेशसद्भावात् समागमाख्यं युद्धम्। द्वावपि ग्रहौ खस्थौ क्षुब्धबिम्बौ विध्वस्तौ द्वावपि पराजयलक्षणाक्रान्तौ स्यातां तदा क्रमेण क्षुब्धविमृदसञ्ज्ञकौ युद्धभेदौ स्याताम्। अधोऽस्तगतः शुक्रस्य जयलक्षणाक्रान्तत्वमुक्तमिति यदत् समागमः ग्रहाङ्केनेति प्राक् प्रतिज्ञातसमागमे उक्तप्रकारसंतिदिशति" रङ्ग०।

"उदक्स्थो दक्षिणस्थो वा भार्गवः प्रायशो जयी। ग्रहाङ्केनैवमेतेषां कुर्यात् संयोगसाधनम्" सू०सि०।

"इतरगृहामेत्तयोदक्स्थो दक्षिणदिक्स्थो वोभयदिगीत्यर्थः। शुक्रः प्रायश उल्लंगतो जयलक्षणाक्रान्तत्वेन जयी। कदाचित् पराजयलक्षणाक्रान्तो भवतीति तात्पर्यार्थः। एतेषां भौमादिपञ्चतारागणां चन्द्रेण सह संयोगसाधनं युतिसाधनमेवोक्तरीत्या गणकः कुर्यात्। अत्र विशेषार्थकम्। "अयनस्था स्फुटो ज्ञेयो विक्षेपः शीतगोर्युतौ" इत्यर्थं क्वचित् पुस्तके ह्रगग्रहेण सर्वत्रेति लिखितत्वात्तदुपेक्षितम् अधिकारस्थापर्णश्लोकत्वापत्तेश्च। यतदुक्तम्-न्यूयोगे नतिसंस्कारनिषेधश्च सिद्धेस्तत्रायुक्तत्वमिति तदनुक्तौ सूर्यगृहणोक्तरीत्या साधारणत्वेन सर्वत्र तद्विशेषोक्तेरवश्यंवक्तेरिति ध्येयम्। नन्वेषां गृहाणां दूरान्तरेण सदाधोधरान्तरसद्भावात् परस्परं योगासम्भवेन कथं युतिः सङ्गतेत्यत आह" रङ्ग०।

"भावाभावाय लोकानां कल्पनेयं प्रदर्शिता। स्वमार्गगाः प्रयान्त्येते दूरमन्योन्यमाश्रिताः" सू०सि०।

"एते ग्रहाः स्वमार्गगाः स्वस्वकक्षास्था अन्योन्यमाश्रिता युतिकालऊर्ध्वाधरान्तराभावेन संयुक्ताः सन्तः प्रयान्ति गच्छन्ति इति दूरं दूरान्तरेण दर्शनादिव गृहयुतिकल्पना कल्पनामात्रिकाऽवास्तवा प्रदर्शिता पूर्वोक्तगृन्थेन कथिता। नन्ववस्तुभूता किमर्थमुक्तेत्यतः प्रयोजनमाह भावाभावायेति। लोकानां भूस्थप्राणिनां भावः शुभफलमभावोऽशुभफलं तत्र शुभाशुभफलादेर्भावावस्तुभूतापि युतिरुक्तेति भावः" रङ्ग०।

युद्धभेदास्तत्फलविशेषाः समागमजयादिफलभेदांश्च सू० सं० १७अ० उक्ता यथा

"युद्धं यथा यदा वा भविष्यदादिश्यते त्रिकालज्ञैः। तद्विज्ञाने करणं मया कृतं सूर्यसिद्धान्तात्। विवृति चरतां ग्रहाणामुपर्युपर्यात्ममार्गसंस्थानाम्। अतिदूरान्दृश्यत्वे समतामिव सम्भवतानाम्। आयत्तक्रमयोगाद्भेदो ज्ञेयो खांशुमदोषसंज्ञैः। युद्धं चतुःप्रकारं पराशरादैर्मुनिभिरुक्तम्। भेदे दृष्टिविनाशो भेदः सुहृदां महाकृतानां च। उल्लेखे शस्त्रभयं मन्त्रिविरोधः प्रियान्यत्वम्। अंशुविरोधे युद्धानि भूभृतां शस्त्रक्षुद्भयमर्दाः। युद्धे चाप्यपसव्ये भवन्ति युद्धानि भूपानाम्। रविराक्रन्दो मध्ये पौरः पूर्वेऽपरे स्थितो यायी। पौरा बुधगुरुसितजा निम्नं शीतांशुराक्रन्दः। केतुकुजराहुशुक्रा यायिन एते हता ग्रहा हन्युः। आक्रन्दयायिपौरान् जयिनो जयदाः स्ववर्गस्थ। पौरे पौरेण हते पौराः पौरान् स्वपान् विनिघ्नन्ति। एवं यायाक्रन्दौ नागरयायिगृहावेव। दक्षिणदिक्स्थः परुषो वेपथुरग्राह्य संश्लक्ष्णोऽणुः। अधिगूढो विकृतो निष्प्रभो विवर्णश्च यः स जितः। उक्त विपरीतलक्षणसम्पन्नो जयगतो विनिर्दिष्टः। विपुल स्निग्धो द्युतिमान् दक्षिणदिक्स्थोऽपि जययुक्तः। द्वावपि मयूखशुक्लौ विपुलौ स्निग्धौ समागमे भवतः। तत्रान्योऽन्यप्रीतिर्विपरीतावात्मपक्षगौ। युद्धं समागमो वा यदाश्रयौ तु लक्षणं भवतः। भुवि भूभृतामपि तथा फलमभ्रं विनिर्देक्ष्यम्"।

कुजजयस्य "गुरुणा जितेऽवनिसुते वाङ्मोका यायिनोऽग्निवार्ताश्च। शशिजेन शूरसेना: कलिङ्गसाल्वाश्च पीड्यन्ते। सौरेणारे विजिते जयन्ति पौराः प्रजाश्च सीदन्ति। कोशागारस्त्रैक्षत्रियतापाश्च शुक्रजिते"।

बुधजयस्य "भौमेन हते शशिजे दक्षसरित्तापसाश्मकनरेन्द्राः। उत्तरदिक्स्थाः क्रतुदीक्षिताश्च भग्नाधमायान्ति। गुरुणा बुधे तु विजिते स्वेच्छगूढचौराधयुक्तपौरजनाः। सैंहर्क्षपार्वतीयाः पीड्यन्ते कम्पते च मही। रविजेन बुधे ध्वस्ते नाविकयोधाजसधनगर्भिणः। शुक्रेण जितेऽम्बिकोपः सस्याम्बुदयायिविध्वंसः"।

जीवजयस्य "जीवे शुक्राभिहते कुलूतगान्धारकैकया सङ्घाः। साल्वा वत्सा वङ्गा गावः सस्यानि नश्यन्ति। भौमेन हते जीवे मध्यो देशो नरेश्वरा गावः। सौरेण चार्जुनायनवसातिवौधेयशिविविप्राः। शशितनयेनापि जिते हतस्तौ स्वेच्छसत्यशस्थतः। उपयान्ति मध्यदेशश्च संक्षयं यच्च भक्तिफलम्"।

शुक्रजयस्य "शुक्रे हतस्तिष्ठते यायी श्वेतो विनाशमुपयाति। ब्रह्मक्षत्रविरोधः सस्यं च न वासवस्यजति। कोशलकलिङ्गवङ्गा वत्सा मत्स्याश्च मध्यदेशयुताः। महतीं व्रजन्ति पीडां षण्डसकाः शूरसे-

नाश। कुजविजिते ऋतुतनये बलमुख्यवधो नरेन्द्रसंग्रामाः। सौम्येन पार्वतीयाः क्षीरविनाशोऽल्पदृष्टिश्च। रविजेन सिते विजिते गणसङ्ख्याः शस्त्रजीविनः क्षत्रम्। जलजाश्च निपीड्यन्ते सामान्यं भक्षिफलमन्यत्"।

अनिजस्य "असिते सिते न निहतेऽर्घेऽङ्गिरश्चिविहगमानिनां पीडा। सितिजेन टङ्कणाभ्रोड्रकाश्विवाह्लीकदेशानाम्। सौम्येन पराभूते भन्देऽङ्गवङ्गमत्स्यविहगपशुनागाः। सन्नाथन्ते गुरुणा स्त्रीवङ्गा महिषकमकाश्च"।

अथ विशेषोऽभिहितो हतानां कुजज्ञवागीशसितासितानाम्। फलं तु वाच्यं गृहभक्षितोऽन्यद् यथा तथा दृष्टि हताः स्वभक्षोः"।

"नीचस्थितेऽरिष्टहगेऽथ पराजिते वा जीवे सहगौ व्रतविधौ स्फुटिकर्क्षहीनः" ज्यो० त०। उपयमशब्दे तत्कालस्य वर्ज्यतोक्तिर्यथा। षड्विधषड्पक्षविधदोषोऽत्र, तत्र च चन्द्रसान्यखेटैः समागमे विशेषः न युद्धम् इत्युक्तं ज्यो० सं० १८ अ० यथा

"भानां यथाऽन्त्यवसुतत्रेण यातो गृहाणां यदि वा शशाङ्कः। प्रदक्षिणं तच्छुभक्षत्रराणां वाम्येन यातो न शिवः शशाङ्कः। चन्द्रमा यदि कुजात् प्रयात्युदक् पार्वतीयवलशालिनां जयः। क्षत्रियाः प्रमुदिताः स्त्रयाविनो भूरिधान्यसुदिता वसुन्धरा। उत्तरतः स्फुटतरं शशाङ्कः पौरजवाय सुभिक्षकरश्च। सख्यं कृते जयकाङ्क्षिं कोशक्षयं च नराधिपतीनाम्। दक्षस्फुटेरुत्तरगे शशाङ्के पौरद्विजक्षत्रियपण्डितानाम्। धर्मस्य देवस्य च मध्यमस्य वृद्धिः सुभिक्षं सुदिताः प्रजाश्च। भार्गवस्य यदि याम्यदक् शशी कोशयुक्तगजवाजिवृद्धिदः। यायिनां च विजयो धनुष्मतां सङ्गसम्यदपि चोत्तमा तदा। रविजस्य शशी प्रदक्षिणं कुर्याद्वेत्पुरभूभृतां जयः। शकवाह्लिकसिन्धुपह्लवा सुदग्रा यवनैः समन्विताः। येषामुदग् गच्छति भक्षकाणां प्रावेषरश्मिर्निरुपद्रवश्च। तद्व्यत्ययैरेतरभक्षिदेशान् पुष्णाति याम्येन निहन्ति तानि। शशिनि फलसदृक्षे यदुपक्षयोपदिष्टं भवति तदपक्षये सर्वमेव प्रतीपम्। इति शशिसमवायः कीर्तितो भगृहाणां न खलु भवति युद्धं साकमिन्दोर्यदृक्षैः"।

ग्रहयुद्धभ न० गृहयोर्युद्धं यत्र तादृशं भम्। गृहयुद्धाधिकरणे नक्षत्रे उपमयशब्दे उदा०।

ग्रहवर्षादिफल न० हृत०। ग्रहवर्षादिगृहस्वामिकवर्षमासफलभेदे। उत्त०। ग्रहयोधकशास्त्रे च तच्च द० सं० २० अध्यायात्मकं यथा

रवेः—"सर्वत्र भूरिरजसस्फुटता वनानि दैवाद्विनष्टविषुदंष्ट्रिसमाहतानि। स्कन्दन्ति नैव च पयः प्रभुं सवन्तो रुग्भेषजानि न तथातिबलान्वितानि। ताम्रं तपत्यदितजः शिशिरेऽपि काले नात्यम्बुदा जलसुचो ज्वलसत्प्रकाशाः। नष्टप्रभूतगणशीतकरं नभश्च सीदन्ति नागफलानि सगोकुलानि। हस्त्यश्वपत्तिमदसङ्गबलैरुपेता वाणासनासिसुखातिशयाश्चरन्ति। म्लेच्छो नृपा युधि नृपानुचरैश्च देशान् संवत्सरे दिनकरस्य दिनेऽथ मासे"।

विधोः—"आम्रं नभः प्रचलिताचलसन्निकाशैर्व्याप्तान्यनिष्ठसलिलैः पयोदैः। गां परयद्भिरखिलाभिलताभिरद्भिरुत्कण्ठकेन गुरुणा ध्वनितेन चाशाः। तोयानि पद्मकुसुदोत्पलपल्वलीव फुल्लद्रुमाण्यपवनान्यलतादितानि। गावः प्रभूतपयसो नयनाभिरामा रामा रतैरविरतं रमयन्ति रामान्। गोधूमशालियवधान्यसमेचुवाढा भूः पाल्यते नृपतिभिर्नगराकराद्या। चित्रद्विजा ह्रदवरेष्टिविघुष्टनादा संवत्सरे शिशिरगोरभिसञ्चरन्ते"।

कुजस्य—"वातोद्धतस्फुरति वह्निरतिप्रचण्डो गृहान् वनानि नगराणि च सन्दिधक्षुः। क्ष्वेलेति दक्षुगणपातहता रटन्ति निःस्रोतसा विषयवो भुवि सर्वसङ्घाः। अम्बुक्षता वियति संहतसूतयोऽपि सुह्लन्ति न क्वचिदपः प्रचुरं पयोदाः। सौम्यं प्रजातमपि शोणमुपैति शस्यं निष्पन्नमप्यविनयादपरे हरन्ति। भूपा न सत्यनिपालनसक्तचित्ताः स्फोटोत्फणप्रचुरता भुजगप्रकोपः। एवंविधैरुपहता भवति प्रजेयं संवत्सरे ज्वलिततस्य विपद्यसङ्घा"।

बुधस्य—"मायेन्द्रजालकुहकाकरनागराणां गान्धर्वशिल्पगणितास्त्रविदां च हर्षः। स्निग्धोष्मया स्फुटतयो ह्यतुतर्पणानि दिव्यानि दिव्यजननानि परस्परस्यः। वार्त्ता जगत्रयितयाऽधिकला त्रयी च सम्यक् चरत्यपि मनोरिव दण्डनीतिः। अध्यक्षरं स्वनिनिविष्टधियोऽत्र केचित् व्याख्योक्षिपीषु च परं स्वमीक्षमाणाः। हास्यद्रुतकविजनप्रसवानां युक्तिप्रसेतुजलपर्वतवासिनां च। हार्दं करोति कुमतामुदनः खलेऽस्मिन् सस्ये ज्वरा प्रचुरतां भुवि चौषधीनाम्"।

गुरोः—"ध्वनिसञ्चरितो ध्वरे द्रुमाणां विपुलो यज्ञसुखं मनांसि निन्दन्। विचरन्त्यनिशं द्विजोत्तमानां

हृदयानन्दकरो ऽध्वरांशभाजाम्। क्षितिरक्षनसक्षयवह्नि-नेकहिपत्यवधनोरुभोकृलाक्षा। क्षितिपैरभिपालनम-हद्भा द्युचरस्यर्धजना तदा विभाति। विविधैर्विबुधव्रतैः पयोदैर्हृतभूमिं पयसाभितर्पयद्भिः। सुरराजगुरोः शुभे ऽब्द वर्षे वहसस्या क्षितिरत्नमर्द्धियुक्ता"।

भोगः—"शालीक्षुमद्यपि धरा धरणीधराभधाराधरोज्झित-पयःपरिपूर्णवपा। श्रीमद्सरोरुहतताम्बुतडागकीर्णा योषेव भाद्यभिनवाभरणोज्ज्वलाङ्गी। क्षत्रं क्षितौ क्षपितभूरिबलारिपक्षम् उद्दृप्तनैकजयशङ्कविरावितायम्। संहृष्टशिष्टजनदुष्टविनष्टगर्वं गां पालयन्यवनिपा नगराकराढ्याम्। प्रेमीयते मधु मधौ सह कामिनीभिर्जे-गीयते श्रवणहारि सवेणुवीणम्। भोभुज्यते ऽतिथि-सङ्घाखजनैः सहाद्रम् अब्दे सितस्य मदनस्य जयावबोधः"।

अनेः—"उद्भूतदस्युगणभूरिरणाकुलानि राष्ट्राण्यनेकपशु-वित्तविनाशितानि। रोरूयमाणहतबन्धुजनैर्जनैश्च रो-गोत्तप्तमानसकलानि बुभुक्षया च। वातोद्धताम्बुधरव-र्जितमल्परिक्षम् आरुग्णनैकविटपं च धरातलं, द्यौः। नष्टार्कचन्द्रकिरणातिरजोऽवनद्धा, तोयाशयाश्च विजलाः सरितोऽपि तद्वत्। जातानि कुत्रचिदतोयतया विनाशम् अच्छानि पुष्टिमपरापि जलोचितानि। सस्यानि मन्द-मभिवर्धति दत्तगन्धौ वर्षे दिवाकरसुतस्य सदा प्रदत्ते"।

"अक्षुरपटुमयूखो नीचगो ऽन्यैर्जितो वा न सकलफल-दाता पुष्टदोऽतो ऽन्यथा यः। यदशुभमशुभेऽब्दे भाखजं तस्य दृष्टिः शुभफलमपि चैवं याम्यमन्योऽन्यतायाम्"।

ग्रहवक्रि पु० ६त०। ग्रहयद्धे ग्रहोद्देशेन क्षेमाऽधिकरणे वक्रिभेदे स च ग्रहयुद्धशब्दे २७३२पृ० दर्शितः।

ग्रहविप्र पु० ६त०। ग्रहोद्देशकदानपरिणेन पतिते विप्रभेदे (देवज्ञ) "तस्य ग्रहदानोद्देशता च ग्रहयामले दृष्टव्ये उक्ता यथा

"तुलादानञ्च यो दद्याद् ग्रहविप्राय सुन्दरि। आपन्नुत्तो भवेत् सोऽपि भुवि संमोदते सुखम्। सुवर्णस्य तुलां दद्याद् ग्रहविप्राय यः प्रिये!। तस्य तुष्टः सुरगुरु-र्बुद्धिं करोति सः। यस्तु रौप्यतुलादानं दद्यात् ग्रह-द्विजाय च। सन्तुष्टस्तस्य शुक्रः सन् स सहजेद्दीर्घजीवितम्। ग्रहद्विजाय यो दद्यात्तुलां ताम्रस्य पार्वति!। सन्तुष्टो मङ्गलस्तस्य दीर्घायुर्वपुषं करोति हि। यो दद्याद् ग्रहविप्राय त्रिपुलस्य तुलां प्रिये!। तस्य तुष्टो बुधः कुर्यादायुः-पुष्टिं सुगौरवम्। ग्रहविप्राय सीसस्य तुलां यस्तु प्रयच्छति। प्रीतः शनैश्चरस्तस्य विपुलायुः प्रयच्छति। सीसकस्य तुलां दद्याद् ग्रहविप्राय यः प्रिये!। तस्या-शु राहुः सुप्रीतः सौभाग्यायुःप्रयच्छति। यः कर्पूर-तुलां दद्याद् ग्रहविप्राय सुन्दरि! सन्तुष्टो भगवान् केतु-स्तस्यायुर्वर्द्धयेत् सुखम्। तुलां तार्क्ष्यस्य यो दद्याद् ग्रहविप्राय सुन्दरि!। आदित्यस्तस्य स प्रीतो दीर्घायुः परियच्छति। ग्रहविप्राय यो दद्याद् तुलां कांस्यस्य सुन्दरि!। सन्तुष्टस्तस्य राजीवोविभूत्यायुःप्रयच्छति"।

ग्रहशृङ्गाटक न० ष० सं० २०व० उक्ते ग्रहयोगभेदे यथा "यस्यां दिशि दृश्यते विशति तारापद्मा रविं सर्वे। भवति भयं दिशि तस्यामायुधकोपक्षुधातङ्कैः। चक्र-धनुःशृङ्गाटकदण्डपरशुशक्तिसंस्थानाः। क्षुद्दृष्टिकरा लोके सुखराय च मानवेन्द्राणाम्। यस्मिन् खांशे दृश्या गृह्यमाणा दिनकरे दिनान्तगते। तत्रान्यो भवति नृपः परचक्रोपद्रवश्च महान्। यस्मिन्नृक्षे कुर्युः समागमं तज्ज्ञानान् गृह्य हन्युः। अविभेदाः परस्परमनलम-यूखाः शिवास्तेषाम्। गृहसंवर्तसमागमसङ्घोऽसमाज-सन्निपाताख्याः। कोणस्थैस्तेषामभिधाने लक्षणं सफलम्। एकत्र चत्वारः सह पौरैर्वायिनो ऽथ वा पञ्च। संवर्तो नाम भवेच्छिखिराड्युतः स सङ्घोऽः। पौरः पौरसमेतो वायी सह वायिना समाजाख्यः। यमजीवसङ्गमे ऽन्यो यद्यागच्छेत्तदा कोणः। उदितः पञ्चादेकः प्राक् चान्यो यदि स सन्निपाताख्यः। अवि-ज्ञततनवः स्निग्धा विपुलाय समागमे घनाः। सर्वो तु संवर्तसमागमाख्यो सङ्घोऽकोणो भवतो प्रजानाम्। समाजसङ्घः सुसमः प्रदिष्टो वैरप्रकोपः खलु सन्निपाते"

ग्रहसमागम पु० ६त०। चन्द्रेण सह भौमादिपञ्चग्रह-योगभेदे। ग्रहयुतिशब्दे गृह्यशृङ्गाटकशब्दे च विवृतिः

ग्रहादि पु० पा० उक्ते कर्तरि णिनिप्रत्ययनिमित्ते धातु-गणभेदे स च गणः णिन्प्रत्यया पा० गं० उक्तो यथा ग्राही उत्साही उद्वाही उद्वासी स्वामी भर्त्ता संभर्त्ता (रक्षणपोषणे भृ) निरजो निर्याचो निर्याची निर्याचो (याचृञ्याक्रुञ्जवदसां प्रतिषिद्धानाम्) अयाचो अव्याचारी असंव्याचारी अव्राजी अपादी अपासी (अच: अचित्तकर्तृकाणाम्) अकारो अहारो अविनायी विनायी विनायो (अभिभावी भूते) अपराधी उपरोधी परिभवी परिभावी इति गृहादिराकृतिगणः"

ग्रहाधार पु० ६त०। ध्रुवनक्षत्रे ; तस्य तथात्वञ्च खगोलशब्दे पृ० २४१८।२० दर्शितम् अन्यत्राप्यदोऽत्र।

ग्रहाधिकरण न० ग्रहस्य ग्रात्वविशेषस्यैकत्वाविवक्षायात्तापकमधिकरणम्। न्यायरूपे षड्ङ्गे अधिकरणभेदे तच्च जै० ३अ० १पादे दर्शितं संक्षेपतस्तत उद्धृत्य तत्त्वबोधिन्यामुक्तं यथा

"सोमयागे श्रूयते "दशापवित्रेण ग्रहं संमार्ष्टीति" दशापवित्रं वासःखण्डं ग्रहः सोमरसादिहविःपात्रविशेषः तत्र एकस्यैव मार्ज्जनश्रुत एकत्वाविवक्षया सर्वेषामिति संशये "पशुना रुद्रं यजेत" इत्यत्रैव एकवचनादेकत्वविवक्षया एकस्यैव मार्ज्जनं न सर्वेषां तथा च सू० "एकत्वं युक्तमेकस्य श्रुतिसंयोगादिति, प्राप्ते ब्रूमः। ग्रहाणां यागोपकरणतया प्राप्तानामनेन मार्जन संस्कारोविधीयते तत्र ग्रहमिति द्वितीयया एकस्योद्देश्यत्वं फलवत्त्वञ्च बोध्यते प्रधानं ग्रहं प्रति मार्ज्जनं गुणः "प्रतिप्रधानं गुण आवर्त्तनीयः". इति न्यायेन सर्वेषां मार्जनं प्राप्तम् उद्देश्यगतनैकत्वमविवक्षितं न च ग्रहत्वजातिर्मार्ज्जनेन संस्कार्या इति तदाश्रयैकमार्जनेन सर्वे संस्कृता भवन्ति, जातेः सर्ववृत्तित्वादित्येकत्वविवक्षायामपि सर्वमार्ज्जनसिद्धिरिति वाच्यं जातेरमूर्त्तत्वात् अपूर्वसाधनत्वाच्च तल्लक्षितानां द्रव्याणामपूर्वसाधनतया संमार्गात् तदुक्तम् "उद्देश्यं लक्षणं जातिर्यद्द्रव्यं लक्ष्यते तया। तस्याङ्गमेव संस्कारः सर्वस्येति विनिश्चयः"। नचैकत्वं नोद्देश्यगतम् अपि तु एकत्वं संस्कार्ज्जनस्योक्तं विधेयमिति वाच्यं "ग्रहं संमृज्यात् सचैकः कार्य्य इति वाक्यभेदापत्तेः एकत्वस्य सर्वग्रहेषु सिद्धत्वेन विधानासम्भवात् स्वसमानाधिकरणकर्म्मतानिरूपकमार्ज्जनसजातीयकर्मतासमानाधिकरणान्योन्याभावप्रतियोगितानवच्छेदकैकत्वरूपविशिष्टमेकत्वं विधेयं तथा सति सर्वमार्जनासिद्धिः अतएव एकत्वविशिष्टग्रहस्य मार्जनं विधीयते एकत्वं ग्रहत्वञ्च सर्वेषु वर्त्तत इति एकत्वविवक्षायामपि सर्वमार्जनसिद्धिरित्यपि परास्तं ताद्रूप्यैकत्वस्याव्यावर्त्तकत्वात् विशिष्टैकत्वविवक्षायाञ्च उक्तदोषादिति साम्प्रदायिकाः। अत्रेदमवधेयम् एकत्वविवक्षायामपि सर्वमार्जनसिद्धिः तथाहि एकत्वविवक्षायां प्रत्येकमेव मार्जनं न तु मिलितानामेकं मार्जनं तत्रापि साहित्ये बहुवचनं निर्दिश्यते। तथादेकवचननिर्द्देशात् प्रतिप्रधानं गुणाद्वृत्तिन्यायात् प्रत्येकं सर्वेषां मार्जनमिति। इत्थञ्च स्वसमानाधिकरणकर्मतानिरूपकमार्जननिरूपितकर्मतासमानाधिकरणान्योन्याभावप्रतियोगितानवच्छेदकैकत्वरूपविशिष्टैकत्वमेव विवक्षितं स्यात्। अविवक्षितत्वसिद्धान्तस्तु एकस्यैव मार्जनं न सर्वेषामिति प्राप्तस्य स्वसमानाधिकरणेत्यादिपूर्व्वपक्षोक्तस्य सामान्यतो मार्जनघटितैकत्वस्य विवक्षादाय। न चैवं ग्रहं संमार्ष्टीति वाक्यात् कथं सर्वेषां मार्जनबोधः ग्रहत्वेनोपस्थितस्यैव ग्रहस्य मार्जनबोधनादिति वाच्यम् उद्देश्यविधेयभेदेन भिन्नानामेव वाक्यानां तत्रैवोच्चारणात् प्रतिप्रधानं गुणाद्वृत्तिन्यायात् सर्वमार्जनसिद्धौ वाक्यभेदकल्पनागौरवस्याप्रामाणिकत्वात् अतएव भावार्थदीपिकायां कृष्णयजुःस्वयंवरीयषड्वधारणव्याख्याने "न चैवं वाक्यभेदः अनूद्यविधेयभेदेन विभिन्नानामेव वाक्यानां सङ्ग्रहयोगात् ग्रहं संमार्ष्टीतिवदिति" इदान्तीकृतं श्रीधरस्वामिचरणैः"।

ग्रहाधीन पु० ६त०। सूर्य्ये ग्रहाध्यायादयोऽत्र।

ग्रहामय पु० ग्रहकृत आमयः। ग्रहावेशे स्कन्दग्रहाद्यावेशे राजनि०।

ग्रहावमर्द्दन पु० ग्रहौ चन्द्रसूर्य्यौ अवमृद्नाति अव+मृद-ल्यु। १राहौ। चन्द्रसूर्य्यावमर्द्दनमिति तदुपाख्यानविष्णुकृतस्य तथात्वम्। भावे ल्युट् ३त०। २ग्रहयोः परस्परयुद्धे च। "ग्रहावमर्द्दने चैव पुण्यस्नानं समाचरेत्" इ० सं० ४८अ०।

ग्रहाशिन् पु० ग्रहं स्कन्दग्रहदोषमश्नाति नाशयति अद+अश-णिनि। ग्रहनाशकारके शङ्करे।

ग्रहाह्वय पु० ग्रहं ग्रहदोषमाह्वयति नाशाय आकारयति आ+ह्वे-अ। भूताङ्कुशे राजनि०। तस्य ग्रहदोषनाशनेऽङ्कुशतुल्यत्वात्तथात्वम्।

ग्रहिल त्रि० ग्रहोऽस्यास्य काशा० इलच्। निर्बन्धयुक्ते। निर्बन्धश्च कोपादनुरागातिशयाच्च भवति तत्र "कोपमूल निर्बन्धयुक्ते। "न निशाऽखिलयाऽपि वापिका प्रससाद ग्रहिलेव मानिनी" नैष०। अनुरागाधीननिर्बन्धयुक्ते "प्रसाधनग्रहिलैरलाभिः रसादीनां व्यङ्ग्यत्वसूक्तम्" सा०द०।

गृहीत त्रि० ग्रह-क्त इटोदीर्घः। १ग्रहणकर्त्तरि २ग्रहणयोग्ये च। "विषयाणां ग्रहीतृणि मनः सङ्गेन्द्रियाणि च" मनुः। "ग्रहीता यदि नष्टः स्यात् क्रुद्धस्त्वार्थं क्षतोऽथवा" मनुः।

ग्रह्य पु० यज्ञः हविःपात्रभेदएव स्वार्थे यत्। हविःपात्र रूपे यज्ञिये पात्रभेदे। "आज्याकोऽसि शुक्रस्ते ग्रह्यो विधितस्त्वा" यजु० ४।२४। "ग्रहएव ग्रह्यः शुक्रपदमैन्द्र वायवादिग्रहपात्रासपलक्षणम्" वेददी०।

ग्राभ पु० ग्रह-भ वेदे हस्य भः। ग्राहके। "ग्रा तू न इन्द्र! शुनलं शिप्रं ग्राभं संगृभाय" ऋ० ८।८।११। "ग्राभं ग्राहकम्" भा०।

ग्राम पु० ग्रस-मन् आदन्तादेशः। "विप्राय विप्रभृत्याय यत्र चैव वसन्ति हि। स तु ग्राम इति प्रोक्तः शूद्राणां वास एव वा इति" "तथा शूद्रजनप्रायाः कुसस्कृतक्षणीवलाः। क्षेत्रोपयोगसमध्ये वसतिर्ग्रामसंज्ञिका" इतिचोक्तलक्षणे विप्रादीनां वासस्थाने, "धनुः शतं परिखातोयात् क्षेत्रान्तरं भवेत्" याज्ञ०। "ग्रामेष्वात्मविरुद्धेषु" रघुः। "त्यजेदेकं कुलस्यार्थे ग्रामस्यार्थे कुलं त्यजेत्। ग्रामं जनपदस्यार्थे आत्मार्थे पृथिवीं त्यजेत्" हितोप० "यथा कुटुम्बिनः सर्व्वेऽर्थकीभूता भवन्ति हि। तथा स्वराणां सन्दोहो ग्राम इत्यभिधीयते" इत्युक्ते २स्वरसंघभेदे, "षड्जग्रामो भवेदादौ मध्यमग्रामएव च। गान्धारग्राम इत्येतत् ग्रामत्रयमुदाहृतम्" "नन्द्यावर्त्तोऽथ जीमूतः सुभद्रो ग्रामजातयः। षड्जमध्यमगान्धारजातीनां जन्महेतवः" मल्लिनाथधृतवाक्यम् तेषान्तु सप्तस्वरविशेषयोगात् एकविंशतिमूर्च्छनाहेतुत्वं यथोक्तं तत्रैव "क्रमात् स्वराणां सप्तानामारोहावरोहणम्। सा मूर्च्छनोच्यते ग्रामस्था एताः सप्त सप्त च"। "ग्रामत्रयेऽपि प्रत्येकं सप्त सप्त मूर्च्छनादत्वं एकविंशतिमूर्च्छना भवन्तीति" मल्लि०। अधिकं संगीतदामोदरे द्रष्टव्यम्। "स्फुटीभवद्ग्रामविशेषमूर्च्छनाम्" माघः। किञ्चिच्छब्दपूर्वकैः २तदर्थसंघाते च यथा शब्दग्रामः अर्थग्राम इत्यादि। "शब्दाकरकरग्रामः" कविकल्पद्रुमः। ४जनपदे च "यस्यास्तः प्रदिशि यस्य गावो यस्य ग्रामा यस्य विश्वे रयासः" ऋ० २।१२।७। "ग्रसने ऽत्र ग्रामाजनपदाः" भा०। स्वार्थे क, तेष्वर्थे "दीयन्तां ग्रामकाः केचित्" भा० उद्यो० १४६६ श्लो०। खल्स्वार्थे टी ततः स्वार्थे क ग्रामटिका खल्ग्रामे स्त्री "खर्गं ग्रामटिकाविलुण्ठनडवोच्छूनैः किमेभिर्भुजैः" मा० द०। ५ग्रामवासि कर्मकादिजने ६ग्रामसङ्घे संहते ग्रामस्येदमण्। ७तत्सम्बन्धिनि त्र्याम्यधर्म्मे च।

ग्रामकाम त्रि० ग्रामं स्वकोयत्वेन कामयते कम-णिच् ण्वुल् उप० स०। ग्रामसम्बन्धितया ग्रामस्य कामुके। "यथाग्वा ग्रामकामः" काल्या० श्रौ० ४।१५।२२। "उपहूतो ग्रामकामस्य" २२।८।७। "दीर्घव्याधिग्रामकामप्रजाकामपशुकामानां वा" २२।६।१७।

ग्रामकुक्कुट पुंस्त्री ७त०। ग्राम्ये कुक्कुटभेदे "कलविङ्कं ढुवं हंसं चक्राङ्गं ग्रामकुक्कुटम्" "ढुवाकं पिङ्गराङ्गं च कलुनं ग्रामकुक्कुटम्। पलाण्डुं लशुनं चैव मत्वा जग्ध्वा पतेद् द्विजः" इति मनुना तन्मांसभक्षणं निषिद्धम् स्त्रियां जातित्वात् ङीष्।

ग्रामकुमार त्रि० ग्रामेषु मध्ये कुमारः सुन्दरः। ग्रामसुन्दरे। तस्य भावः मनोज्ञा० वुञ्। ग्रामकुमारक तद्भावे न०।

ग्रामकुलाल पु० ग्रामे कुलालः। ग्राम्ये कुलाले कुम्भकारे "ग्रामः शिल्पिनि" पा० अस्य वा प्रकृतिस्वरता ग्राम शब्दश्च आद्युदात्तः। एवं ग्रामनापितादिषु वा आद्युदात्तता। ततः मनोज्ञा० भावे वुञ्। ग्रामकुलालक तद्भावे न० [ ङीप्। स्त्रियां जातित्वात् ङीष्।

ग्रामकूट पुंस्त्री ग्रामस्य कूट इव वञ्चनाप्रधानत्वात्। शूद्रे

ग्रामक्रोड पुंस्त्री ग्रामे क्रोड़ः। ग्राम्यशूकरे स्त्रियां जातित्वात् ङीष्। "स दोर्भ्यां धेनुसृक्कण्यं ग्रामक्रोडीं इधुक्षति" काशीख० २६ अ०। ग्रामशूकरादयोऽत्र पुंस्त्री०।

ग्रामगट्टा त्रि० ग्रह-बाहुलकात् कपए ६त०। ग्रामवासे स्त्रियां टाप् सा च ग्रामवासेनार्थायाम्। [तथात्वम्।

ग्रामगेय न० ग्रामे गेयम्। सामभेदे तस्य ग्रामे गेयत्वात्

ग्रामगोदुह् पु० ७त०। ग्राम्ये गोपे "ग्रामः शिल्पिनि" पा० वा अस्य प्रकृतिस्वरत्वे प्राप्ते युक्तारोकत्वा० आद्युदात्तता।

ग्रामघात पु० ६त०। ग्रामस्य द्रव्यहरणेन हननप्राये व्यापारे। "ग्रामघाते हिताभङ्गे पथि मोषाभिदर्शने। शक्तितोनाभिधावन्तो निर्वाहाः सपरिच्छदाः" मनुः। "ग्रामघाते ग्रामलुण्ठने" कुल्लू०। २ग्रामहत्याजनहननेच। "हगोऽसङ्घग्रामघातमाचष्टे" इ० सं० ३०अ०। "एकस्थाने स्वन्दीग्रः सप्ताहाद् ग्रामघातजत्" ८६अ०।

ग्रामघातिन् पुंस्त्री ग्रामार्थं तत्स्थलोकभक्षणार्थं हन्ति हन्-णिनि। ग्रामस्थलोकपोषणार्थं पशुघातके। "ग्रामघाती च कौन्तेय! मांसस्य परिविक्रयी" भा० आ० २४ अ० प्रायश्चित्तीयोपाख्याने।

ग्रामघोषिन् पु० ग्रामे जपके घोषोऽस्यास्ति इनि। संज्ञन्दने

न्द्रे। "संक्रन्दनः प्रवदोष्णुग्रेषः प्रवेदङ्गङ्गडधा ग्रामघोषी" ऋ० ५।२०।६। इङ्गुरं इषकेष शब्दमानत्वात्तस्य तथात्वम्।

ग्रामचर्य्या स्त्री ६त०। ग्राम्यधर्म्मे स्त्रीसम्भोगे "सर्व्वशो वर्जयेद्ग्रामचर्य्याम्" याज्ञ०श्रौ० १२।८।१। सविधर्म्मोक्तौ "ग्रामचर्य्या स्त्रीसम्भोगः" नारा०इ०।

ग्रामज त्रि० ग्रामे जायते जन-ड। ग्राम्ये धान्यादौ।

ग्रामजनिष्यावी स्त्री कर्म्म०। नखनिष्याव्यां धान्यभेदे राजनि०।

ग्रामजात त्रि० ग्रामे जायते जन-कर्त्तरि क्त। ग्राम्ये धान्यादौ "न ग्रामजातान्यात्तीऽपि मूलानि च फलानि च" मनुः वानप्रस्थधर्म्मोक्तौ। "ग्रामजातानि यत्काल कृतभागे जातान्यपि फलादीनि न भक्षयेत्" कुल्लू०।

ग्रामजाल न०। ग्रामसमूहे चक्रगच्छार्थे त्रिका०।

ग्रामजित् त्रि० ग्रामं संहतं जयति विश्लेषणेन, जि-क्विप्। संघाभकस्य वस्तुनः विश्लेषयितरि। "निधुत्वनो ग्रामजितो यथा नरः" ऋ० ५।५४।८।

ग्रामणी त्रि० ग्रामं समूहं नयति प्रेरयति स्वस्वकार्य्येषु नी-क्विप् वत्वम्। १प्रधाने २ग्रामाध्यक्षे ३नापिते पु० मेदि०। "ग्रामणीभ्योऽन्नं सुरां सुरामेभ्यः" कौषीत० ब्रा०। ग्रामं ग्रामधर्म्मं नयति। ४भोगिके क्षेम० ग्रामेण मैथुनव्यापारेण नयति कालम्। बहुजनभोग्यायां स्त्रियां ५वेश्यायां ६नीलिकायां च स्त्री क्षेमच०। ७विष्णौ पु० "ग्रामणीर्ग्रामणीः श्रीमान्" विष्णुस०। "भूतग्रामस्य नेतृत्वात् ग्रामणीः भा०। ग्रामाणां इदम् तत्रभि० अण्। ग्रामण तत्सम्बन्धिनि त्रि०। ग्रामणीरिवाचरति क्यच् ग्रामणीयते। ततः कर्त्तरि अच् ग्रामणीय तत्तुल्ये त्रि० "सिनृधुकूलाञ्चितावे च ग्रामणीयमहावलाः" भा० स० ३१अ०।

ग्रामणीय न० ग्रामणस्यः भावः त्व वेदे प्रभो०। आधिपत्ये। "एषोऽन्नं श्रियै धारयाय राज्ञस्य वा ग्रामणीयाय" शत० ब्रा० ८।६।२।१। [तञ्जितरि।

ग्रामतक्ष पु० ६त० टच् समा०। बहूनां साधारणे काष्ठ

ग्रामता स्त्री ग्रामाणां समूहः तल्। ग्रामसमूहे "तस्मादेतं ग्राम्यो ग्रामता बहुविद्याताः" ऐत० ३।४४।

ग्रामधर्म्म पु० ग्रामे भवः अण् ग्रामो धर्म्मः। ग्राम्यधर्म्मे मैथुने शब्दार्थचि० तस्य स्त्रीपुंधर्म्मत्वात्तथात्वम्।

ग्रामपाल पु० ग्रामं पालयति पालि-अण् उप० स०। ग्रामरक्षके १वैद्यभेदे २ग्रामाध्यक्षे च।

ग्रामपुत्र पु० ग्रामस्य ग्रामस्थबहुजनस्य पुत्र इव पाल्यत्वात्। बहूनां पाल्यतया पुत्रतुल्ये। ततोमनोज्ञा० भावे वुञ्। ग्रामपुत्रक तद्भावे न०।

ग्रामप्रेष्य पु० ६त०। बहूनां प्रेष्ये। ततः मनोज्ञा० भावे वुञ्। ग्रामप्रेष्यक तद्भावे न० ग्रामप्रेष्यस्य चाडेऽपात्तोक्ता यथा "दुष्टलोपतिः पिशुनोनर्त्तनश्च ग्रामप्रेष्यो यश्च भवेत् विकर्म्मा" भा०शा०६५अ०। "प्रेष्यो ग्रामस्य राज्ञश्च कृतसौ शूद्रावदनकः" मनुः।

ग्रामभृत पु० ग्रामेण तत्स्थसमूहेन भृतः प्रेष्यः। बहुजनभरणीये। स च ब्राह्मणः यथाह पाता० "ब्रह्मणास्तु षट् प्रोक्ता ऋषिणा तत्त्वदर्शिना। आद्यो राजभृतस्तेषां द्वितीयः क्रयविक्रयी। तृतीयो बहुयाज्यः स्यात् चतुर्थो ग्रामयाजकः। पञ्चमस्तु भृतस्तेषां ग्रामस्य नगरस्य च। अनागतां तु यः पूर्वां सादित्यां चैव पश्चिमाम्। नोपासीत द्विजः सन्ध्यां स शूद्रोब्राह्मणः स्मृतः"।

ग्राममद्गुरिका स्त्री ग्रामस्य प्रिया मद्गुरिका। ग्रामस्य मद्गुरिकेव वा (सिङ्गी) १मत्स्यभेदे २ग्रामयुक्ते च मेदि०।

ग्राममुख पु० ग्रामो ग्रामस्थजनो मुखमिवास्य। इन्द्रे त्रिका० तस्य ग्रामजननिष्पाद्यत्वात्तन्मुखत्वम्।

ग्राममृग पु० ६त०। कुक्कुरे हारा०। कुक्कुरस्य ग्रामे मृगतुल्यत्वात्तथात्वम् स्त्रियां जातित्वात् ङीप्।

ग्रामयाजक पु० ६त०। ग्रामस्य नानावर्णानां याजके अपकृष्टविप्रे। ग्रामश्चतयज्ञे इज्यम्। "गुरौ चान्तेवसे ग्रामे कृतघ्ने ग्रामयाजके" भा० व० १९९अ०। ग्रामात्रोक्तौ।

ग्रामयाजिन् पु० ग्रामान् ग्रामस्थनानावर्णान् याजयति यज-णिच्-णिनि। ग्रामयाजके। "नाश्नीयतते ब्रह्मे ग्रामयाजिकृते तथा" मनुः अभोज्यान्नोक्तौ।

ग्राम(मे)वास पु० ७त० वा अलुक्स०। ग्रामे स्थितौ

ग्राम(मे)वासिन् त्रि० ग्रामे वसति वस-णिनि वा अलुक्स०। ग्रामे स्थायिनि स्त्रियां ङीप्।

ग्रामषण्ढ पु० ग्रामे ग्रामधर्म्मे षण्ढः। ग्राम्यधर्म्मरहिते क्लीबे। ततः मनोज्ञा० भावे वुञ्। ग्रामषण्ढक तद्भावे न०

ग्रामस्थ त्रि० ग्रामे तिष्ठति स्था-क। ग्रामवासिनि

ग्रामहासक पु० ग्रामं हासयति हस-णिच्-ण्वुल्। भङ्गिनीपतौ शब्दच०।

ग्रामाधान न० ग्रामस्य ग्रामपोषणार्थमाधीयते आ+धा-ल्युट्। सीतायाम् हलायुधः।

ग्रामान्त न० ६त०। ग्रामसमीपे उपशल्ये "नाधीयीतश्मशानान्ते ग्रामान्ते गोव्रजेऽपि वा" "क्षतवापनो निषसेत् ग्रामान्ते गोव्रजेऽपि वा" मनुः। ग्रामान्ते भवः छत्वाच्छः। यामान्तीय ग्रामसमीपभवे त्रि० "पचि चेत्ते परिक्षते ग्रामान्तीयेऽथ वा पुनः" मनुः।

ग्रामिक पु० ग्रामे तद्रक्षणे नियुक्तः ठञ्। ग्रामरक्षणाय नियुक्ते ग्रामाध्यक्षे "ग्रामे दोषान् समुत्पन्नान् ग्रामिकः शनकैः स्वयम्। शंसेत् ग्रामदशेशाय दशेशो विंशतीशिने" मनुः। "यानि राजप्रदेयानि प्रत्यहं ग्रामवासिभिः। अन्नपानेन्धनादीनि ग्रामिकस्तान्यवाप्नुयात्" मनुना तद्वृत्तिरुक्ता। "ग्रामेयान् गुणदोषांश्च ग्रामिकः प्रतिभावदेत्" "यानि ग्राम्याणि भोज्यानि ग्रामिकस्तान्युपाश्नीयात्" भा०शा० ८७अ०। तस्य भावः पुरोहि० ष्यञ्। ग्रामिक्य तद्भावे न०।

ग्रामिन् त्रि० ग्रामः स्वामित्वेन आधारत्वेन वाऽस्त्यस्य इनि। १ग्रामस्वामिनि २ग्रामवासिनि च। ३ग्राम्यधर्मयुक्ते मैथुनयुक्ते च। आसुरी मेढ्रमवौंगृह्यार्ष्यवाये ग्रामिणां रतिः" भाग० ४।२६।१४। स्त्रियां ङीप्। सा च ४नीलीवृक्षे स्त्री जटा०।

ग्रामीण पुंस्त्री ग्रामे भवः खञ्। १कुक्कुरे, २काके, मेदि० ३ग्राम्यशूकरे च राजनि०। ४ग्रामीद्भवे त्रि०। "ग्रामीणस्य प्रथमतः पशुप्रतोगवयादिकम्" भाषा०। ग्रामीणवध्वस्तमलक्षिता जनः" माघः। ५नीलिकोषधौ, मेदि० ६पालङ्क्यशाके च स्त्री राजनि०।

ग्रामीय त्रि० ग्रामे भवः बा०ढक्। १ग्रामभवे "ग्रामेयान् गुणदोषांश्च" मनुः। २वेश्यायां स्त्री

ग्रामीयक त्रि० ग्रामे भवः कन्प्रा० ढकञ्। ग्रामभवे। "ग्रामेयककुलानाञ्च समक्षं सीम्नि साक्षिणः" मनुः। अत्र ग्रामधिकेति पाठः लिपिकरप्रमादात्।

ग्रामेय पु०६त०। ग्रामपतौ ग्रामाध्यक्षे ग्रामेश्वरादयोऽप्यत्र।

ग्राम्य त्रि० ग्राम-भवार्थे-या यत्। १ग्रामभवे ऋषकादौ "अल्पव्ययेन सुन्दरि! ग्राम्यजनो मिष्टमश्नाति" ह०र०। २मूढे ३प्राकृते। ४मैथुने च "व्यवायो ग्राम्यधर्मश्च" अमरः। प्राकृते "ग्राम्यानपभ्रंशान् कविर्यं पिपासतः" माघः। मूढे "ग्राम्यभावमपहातुमिच्छवः" माघः। ५स्त्रीकारे ६रतबन्धे ७अश्लीलादिवचने अश्लीले क्वालिकादिप्रसिद्धार्थे च न० शब्दार्थचि०। टकाव्यदोषभेदे पु०। स च शब्दगतोऽर्थगतश्च तत्र शब्दगतः सा० द०। शब्ददोषविभागे "दुःश्रव्यत्वविधाक्लीबानुचितार्थाग्राम्यक्लृप्ताः। ग्राम्योऽप्रतीतसन्दिग्धनेयार्थनिहतार्थताः" इत्यादिना शब्ददोषान् विभज्य "कटिस्ते हरते मनः" इत्युदाहृतम् "अयुष्टदुष्कृमग्राम्यव्याहृताक्लीबकष्टताः" इत्यादिनाऽर्थदोषान् विभज्य च "स्वयि हि त्वं समीपे मे स्वयिस्थेवाधुना प्रिय!" इत्यर्थस्य ग्राम्यत्वमुदाहृतम्। "ग्राम्या मिथुनतुलाक्षी चापालिघटा निशासु मेषवृषौ च" ज्यो०वक्रेषु हसदामिथुनादिराशिषु १०रात्रौ मेषवृषराशयोश्च पु०। ११पशुभेदे पुंस्त्री०। यथाह पैठीनसिः "ग्राम्यारण्याश्वतर्यश्च गौरविरजोऽश्वोऽश्वतरो गर्दभो मनुष्येति सप्त ग्राम्याः पशवः, महिषवानरऋक्षसरीसृपरुरुपृषतसृगाश्चेति सप्तारण्याः"। "अश्वाश्वतरगोखरोष्ट्रवस्तोरभ्रमेदःपुच्छक प्रभृतयो ग्राम्याः इति सुश्रुतोक्ते १२पशुभेदे पुंस्त्री० "ग्राम्या वातहराः सर्वे हृद्याः कफपित्तलाः। मधुरा रसपाकाभ्यां दीपना बलवर्द्धनाः" सुश्रु०। १३ओषधिभेदे स्त्री। "तिलमाषव्रीहियवाः प्रियङ्गवो गोधूमाश्चेति सप्त ग्राम्या ओषधयः" तैत्ति०। ओषधि शब्दे १५६४ पृ० दृश्यम्।

ग्राम्यकन्द पु० कर्म०। कन्दभेदे (गामेर योच) रत्नमा०

ग्राम्यकर्कटी स्त्री कर्म०। कृष्माण्डे त्रिका०।

ग्राम्यकर्म्मन् न० ग्राम्यस्य प्राकृतस्य क्वालिकादेः कर्म। मैथुने व्यवाये। "ग्राम्यकर्म चैव विसृतकालावधिः" भाग० ५।१४।२।

ग्राम्यकुङ्कुम न० कर्म०। कुसुम्भे त्रिका०।

ग्राम्यधर्म्म पु० ग्राम्यस्य प्राकृतस्य क्वालिकादेः धर्मः। व्यवाये मैथुने अमरः। "प्रमत्तोग्राम्यधर्मेषु" भा०व० ४८ अ०। "प्रमत्तं ग्राम्यधर्मेषु" २८० अ०। स अस्त्यस्य इनि ग्राम्यधर्म्मिन् मैथुनरते त्रि०। "शूद्रादायोगवस्त्रापि वैश्यायां ग्राम्यधर्मिणः" भा०अनु०४८अ०। [दर्शिताः।

ग्राम्यपशु पु० कर्म०। पशुभेदेषु ते च पशवः ग्राम्यशब्दे

ग्राम्यमदगुरिका स्त्री कर्म०। झङ्गीमत्स्ये क्षारा०।

ग्राम्यसृग पुंस्त्री कुक्कुरे जटा० स्त्रियां ङीप्।

ग्राम्यवल्लभा स्त्री ६त०। १पालङ्क्यशाके (पालङ्) राजनि० क्वालिकादिग्राम्यप्रियत्वात्तस्य तथात्वम्। २वेश्यायाञ्च

ग्राम्यवादिन् त्रि० ग्राम्यं वदति णिनि। ग्राम्यशब्दवादके क्वालिकादौ। "यः परस्मात् ग्राम्यवादी तस्य मट्टहाद् व्रीहीनाहरेत्" तैत्ति० २।२।।२।

ग्राम्यशूकर पुंस्त्री कर्म०। विड्वराहे स्त्रियां ङीष्।
ग्राम्या स्त्री ग्रामे भवा यत्। १तन्त्रस्यां शब्दार्थचि० २नीलीक्षुपे ३निघण्टौ च राजनि०।
ग्राम्यायणि पुंस्त्री०ग्राम्यस्यापत्यम् तिका० फिञ्। ग्राम्यस्य ग्रामतादेरपत्ये। स्त्रियां इदनत्वात् वा ङीष्।
ग्राम्याश्व पु० कर्म०। मर्दने त्रिका० स्त्रियां जातित्वेऽपि अजा० टाप्।
ग्रावग्राभ पु० ग्रावाणमभिषवरणपाषाणं स्तुत्वा गृह्णाति ग्रह–ण कृञ्च भः उप०स०। ग्रावस्तुति ऋत्विग्भेदे। "अग्निमिन्धो ग्रावग्राभ उत शंसा सुविप्रः" ऋ० १।१६२।५। "ग्रावग्राभः ग्रावाणः स्तुत्वा गृह्णातीति ग्रावस्तुत्" भा०।
ग्रावन् पु० गृणते गृ–ड गृः ग्रावनति वन–संभक्तौ विच् कर्म०। १प्रस्तरे, २पर्वते, अमरः ३मेघे विश्वः। ४जड़े त्रि० शब्दर०। "श्रोता ग्रावाणोविदुषो न यज्ञम्" यजु० ६।२६। "अद्रिं ग्रावाणं अर्जरा निर्झरौवाः" माधवः। "ग्रावस्तु संस्तवेऽधिनिदधाति सवं वै सोमोविषोग्रावाणः" शत० ब्रा० ३।८।३।३।
ग्रावरोहक पु० ग्रावणि रोहति रुह–ण्वुल् ७त०। अश्वबन्धाङ्गे रत्नमा०।
ग्रावस्तुत् पु० ग्रावाणं स्तौति स्तु–क्विप् ६त०। होतुः सहाय ऋत्विग्भेदे अध्वावाक्यङ्गे ८।५ पृ० विहतिः। तुक्। ग्रावस्तोतायत्र। तत्रेदम् ग्रावस्तोत्रिय अण् ग्रावस्तोत्र तत्सम्बन्धिनि त्रि० ग्रावस्तोत्राय हितम् छ। ग्रावस्तोत्रीय तत्सम्बन्धिनि त्रि० "प्रस्तोता ब्राह्मणाच्छंसि ग्रावस्तोत्रीये" कात्या० श्रौ० २४।४।४५।
ग्रावहस्त पु० ग्रावा अभिषवसाधनं पाषाणोहस्ते अस्य। अभिषवसाधनपाषाणयुक्तहस्ते ग्रावस्तुति ऋत्विग्भेदे। "ग्रावहस्तासो अध्वरे" ऋ० १।१५।७।
ग्रावायण पु० प्रवरभेदे हेमा० ब्र० ख० प्रवराध्याये दृश्यम्
ग्रास पु० गृह्यते गृह–कर्मणि घञ्। सकलपरमाणोर्व्यावहारादौ तन्मानञ्च "कुक्कुटाण्डप्रमाणञ्च यावान् वा प्रविशेन्मुखम्। एतं ग्रासं विजानीयात् शुद्ध्यर्थं कायशोधनम्" पराशरः। "यावतो गृह्यते ग्रासान् हव्यकव्येष्वमन्त्रवित्। तावतो गृह्यते प्रेत्य लोहशङ्कूंस्त्रयोदश" "यामादाकृत्य वाग्योवादशौ ग्रासान् वने वसन्" "ऐकैकं ग्रासमश्नीयात् त्रयाणि त्रीणि पूर्ववत्" इति च मनुः। "सार्द्धं द्वाविंशतिर्ग्रासाःप्रातः षड्विंशतिः स्मृताः। अवाचिते चतुर्विंशः परब्रह्मगतं स्मृतम्" पराशरः। प्रायश्चित्ते ग्रासभोजनस्य परिमाणमुक्तं यथा० त० "भोजनस्य रागप्राप्तत्वात् नापाप्तापकोविधिः। सचाहरहः सन्ध्यामुपासीत इत्येवं रूपः। नापि तङ्गुणसंस्कारापेक्षत्वेन स्वार्थेऽपूर्वत्वकल्पको नियमविधिः। स च तत्तत्तिथौ तत्तद्ग्रासान् भुञ्जीतेत्येवं रूपः। तथा च "स्मरन्ति क्रियमाणे च यत्रावश्यं क्रियां क्वचित्। नीयते नियमः सोऽत्र व्रतावभिमतो यथा"। तथात्रे च पिप्पलादादापि भोजनं प्रसज्यते हविष्याद्भोजनव्रतादापि उपवासाभाव एव सम्पद्येत तद्गुणसंस्कारकालेनेवान्यभक्षणेऽपि न दोषःस्यात्। तस्मादुक्तं "श्रुतार्थेन परित्यागादद्भुतार्थस्य कल्पनात्। प्राप्तस्य बाधादित्येवं परिसंख्या त्रिदोषिका" इत्युक्तं स्वार्थहान्यर्थान्तरकल्पनरागप्राप्तबाधरूपदोषत्रयदुष्टापि अन्ययोगव्यवच्छेदफलिका परिसंख्यैव युक्ता, सा च इति भोजने तत्तत्तिथौ तत्तद् ग्रासानेव भुञ्जीत नान्यदित्येवं रूपा तस्मात्तदतिरिक्तभोजनाभावपरत्वेन उपवासेऽपि दोषाभावः। तदुक्तं भट्टपादैः "अन्यार्थं चूह्यमाणा च यान्यार्थप्रतिषेधिका। परिसंख्या तु सा ज्ञेया यत्र प्राप्तिर्निवर्त्यते" अन्यथा प्राजापत्यव्रतेऽपि "ब्रह्मभ्यादयाचितमिति" "अयाचितन्तु मध्याह्ने चतुर्विंशन्तु शुद्धये" इति ब्रह्मपुराणोक्तायाचितस्याभावे व्रतलोपापत्तिः स्यात्"॥
१प्रक्षणे आद्यच्छादकयोः २कर्मणि। "आदर्शोभास्करस्येन्दुरन्धःस्थेनावदृश्यते। मूच्छायां प्राङ्मुखश्चन्द्रो विशस्यस्य भवेद्ग्रसः" इत्युपक्रम्य "यद्यात्मनधिकेतस्मिन् सकलं न्यूनमन्यथा। योगार्द्धादधिकेनाप्यधिकेऽपि ग्रासलक्षणः" इति। "स्फुटनिष्पत्तिकाले तु मध्यग्रहणमादिशेत्। स्थित्यर्द्धनाडिकाहीने ग्रासोमोक्षस्तु संयुते" सू०सि० "स्पष्टतिथ्यन्तकाले तकारात् ततुल्यौपरकालनिराशः। मध्यग्रहणं ग्रासोपपत्तसमाप्तिं कथयेत्। मध्यग्रहणसम्बन्धेन मध्यसूर्यचन्द्रानीतमध्यतिथ्यन्ते तत्सम्भव इति कस्यचिद् भ्रमनिहारार्थम् स्फुटेति। स्थित्यर्द्धघटिकाभिरूने तिथ्यन्ते ग्रासः स्पर्शः। संयुते स्थित्यर्धघटीभिर्युते तिथ्यन्ते काले मोक्षः। तकारः स्पर्शमोक्षस्थित्यर्धाभ्यां स्पर्शमोक्षकालावितिविषयव्यवस्थार्थकः। अत्रोपपत्तिः। तिथ्यन्तकाले आद्यच्छादकयोः पूर्वापरान्तरालाभावाद्योगे सकलग्रासौ यावान् भवति

ततः पूर्वाह्णकालयोर्न्यून एवातोऽत्र मध्यग्रहण-कालः" रघुना०।

ग्रासशल्य न० ग्रासे शल्यम्। ग्रासस्थिते मत्स्यादिकण्टक-रूपे शल्ये तदुद्धारोपायः सुश्रुते दर्शितोयथा "ग्रासशल्ये तु कण्ठासक्ते निःशङ्कमनवरुद्धस्थले सुदि-नाभिहन्यात् क्षेत्रं मद्यं पानीयं वा पाययेत्"।

ग्राह पु० ग्रह–जलचरे घ। (हाँगोर) ख्याते जलचरभेदे अमरः "बहिमज्जज्जगदिदं गम्भीरे कालसागरे। जरा-मृत्युमहाग्राहे न कश्चिदवबुध्यते" भा० शा० २८ अ०। "जग्राहाजगरो घोरोभुजयोरुभयोर्बलात्" भा० व० १७८अ० "ग्रस्यादु ग्राहाद्विमुच्यते" मनुः। भावे घञ्। २ज्ञाने ३आग्रहे निर्बन्धे च। "मूढग्राहेणात्मनोयत् पीडया क्रियते तपः" गीता। "मूढग्राहेण अविवेकजतेन दुराग्राहेण" श्रीधरः। ४आदाने ५स्वीकारे जलचरभिन्नेऽपि कर्त्तरि वेदे च। ६गृहीतरि त्रि० "अध्वर्युं यजमानं वा ग्राहो विन्दति" शत०ब्रा० ३।५।२।२५। कर्त्तरि कर्मणि उपपदे अण्। तत्तत्कर्म ग्राहके "पार्ष्णिग्राहस्तु पृष्ठतः" अमरः। "कृष्ण ग्राह कृष्णं दाधः" यजु०।

ग्राहक पु० ग्रह–ण्वुल्। १शेफनपक्षिणि २विषवैद्ये च। ३गृहीतरि त्रि०। ग्रह–णिच्–ण्वुल्। ४आपके त्रिन्द्रियादौ "ग्राहकैर्हृते चौरो लोप्त्रेणाव पदेन वा" याज्ञ० "यथास्वं ग्राहकाणां शब्दादीनामि-मानि तु। इन्द्रियाणि सदा देही धारयन्निव तिष्ठते" भा० वन० २।०अ०। ५सिनावरणाके राजनि०।

ग्राहिन् पु० अस्त्यर्थे–णिनि। १कपित्थे शब्दच०। २मलबन्ध-कारके, (धारक) त्रि० वैद्यकम्। "कषायानुरसं ग्राहि स्निग्धं मेधाबलावहम्" भावप्र० दाडिमफलगुणोक्तौ। ३ग्राहके, "व्यालग्राही यथा व्यालान् बलादुद्धरते बिलात्" रामायणे०। "पक्षवग्राहि पार्ष्णित्वम्" उज्ज्वलः। स्त्रियां ङीप्। सा च ४प्रतिकूलायाम्। "मा स्म भगृहिणी भीरु! "भङ्क्ते ग्राहिणी प्रतिकूला" जयम०। ५क्षुद्र-दुरालभायां स्त्री राजनि०। ६ताम्रमूलाहये (चीरइ) रत्नमाला तयोर्मलबन्धकारित्वात्तथात्वम्। [राजनि०।

ग्राहिफल पु० ग्राहि मलबन्धकं फलं यस्य। कपित्थवृक्षे।

ग्राहुक त्रि० ग्रह–ण्वा० उकञ्। ग्रहणशीले "उदावर्त्तः प्रजा ग्राहुकः स्यात्" तैत्ति० ६।४।।।।

ग्राह्य त्रि० ग्रह–ण्यत्। १गृहीतुचिते, २गृहणयोग्ये, ३उपादेये, ४स्वीकार्ये, ५ज्ञेये च। "ग्राह्यं द्विजातिभि र्गृह्यं धर्म्यं यत्तोपरुध्यते" मनुः। "ग्राह्यं किल संग्रहे ग्राहकम् विविधमायुधम्" भा०द्रो०।१२ अ०। "याचितानृतं याह्यमपि दुष्कृतकर्म्मणः" स्मृतिः "विषादप्यमृतं ग्राह्यम्" मनुः। "चक्षुर्ग्राह्यं भवे-द्रूपम्" भाषा०। ६प्रतिबध्यज्ञाने प्रकारीभूतधर्म्मे यथा हृदोवह्न्यभाववानिति ज्ञानस्य प्रतिबध्यं हृदो वह्निमानितिज्ञानं तत्र प्रकारीभूतो वह्निः।

ग्रीवा स्त्री गिरत्यनया गॄ–वनिप् नि०। कन्धरायाम् "ग्रीवाभङ्गाभिरामं मुहुरनुपतति स्यन्दने दत्तदृष्टिः" शक०। तन्नामादिकमुक्तं सुश्रुते यथा "चतुरङ्गुलानि मेढ्रनवदनान्तरनासाकर्णललाटग्रीवो-च्छ्रायदन्तरासि। द्वादशाङ्गुलानि भगविस्तारमेढ्र-ननाभिहृदयग्रीवास्तनान्तरमुखायामसन्धिबन्धप्रकोष्ठस्रो-त्यानि। चतुर्विंशतिविस्तारपरिणाहं सुखग्रीवम्" सुश्रु०। "ग्रीवागृसंसक्तयुगं सुरङ्गैः" माघः। "पाद-योर्हीढिकायाञ्च ग्रीवायां हृदयेषु च" मनुः। "प्राग्-ग्रीवस्तरलोम" आश्व०श्रौ० १।१४।२। "इदमहं रक्षसां ग्रीवा अपि कृन्तामि" यजु० ५।२२। दृग्रीवः कम्बु-ग्रीवः इत्यादि। [तद्धीतापत्ये पुंस्त्री स्त्रियां ङीष्।

ग्रीवाक्ष पु० ऋषिभेदे तस्य गोत्रापत्यं शिवा०अण्। गौवाक्ष

ग्रीवाघण्टा स्त्री ७त०। ग्रीवास्थितघण्टायां त्रिका०।

ग्रीवाबिल्ल न० ६त०। ग्रीवान्तर्गते गर्त्तभेदे त्रिका०।

ग्रीविन् पुंस्त्री० दीर्घा ग्रीवाऽस्यास्य वा० इनि टिलोपः। १उष्ट्रे जटाधरः स्त्रियां ङीप्। २दीर्घग्रीवायुक्ते त्रि०।

ग्रीष्म पु० गृणते रसान् गॄ–मनिन्। ज्यैष्ठाषाढ़मास-द्वयात्मके १ऋतुभेदे। "ग्रीष्मे तीव्रकरोभानुर्न हेमन्ते तथाविधः" सूर्य्यसि०। "विकर्त्तुमिच्छोर्वनितासखस्य तस्याम्बुधि ग्रीष्मसखे बभूव" रघुः। "अनेन विधिना आद्यं त्रिरब्दन्तेन निर्वपेत्। ऐन्द्राग्नग्रीष्मवर्षासु-पाशुबन्धिकमन्वहम्" "ग्रीष्मे पशुतपासु स्यात् वर्षासु भवकाग्निकः" मनुः। स्वार्थे अण्। ग्रैष्म तत्रार्थे तस्ये-दमण्। तत्सम्बन्धिनि त्रि० "शुक्रञ्च शुचिर्यत्प्राग्रहणं" यजु०१।६। "ग्रैष्मौ गृष्मसम्बन्धिनौ ऋतू ऋतुवयवौ" वेददी०। ज्योतिषे यथा चान्द्रनाक्षत्रकता तथर्क्ष-शब्दे १४१७ पृ० दर्शिता। सौरत्वं तु ज्योतिर्गणि-तमालोपयोगित्वेन ज्योतिषे व्यवह्रियते तदपि तत्रैव शब्दे दर्शितम्। सुश्रुतोक्तग्रीष्मगुणादिकं ऋतुशब्दे दर्शितम्।

ग्रीष्मे सूर्यकिरणस्य तीव्रत्वे कारणम् सू०वि०उक्तं यथा "मेषादौ देवभागस्थे देवानां याति दर्शनम्। असुराणां तुलादौ तु सूर्यसङ्गमसङ्गुरः" सू०।

"जम्बुद्वीपलवणसमुद्रसन्धौ परिधिवृत्तं भूगोलमध्ये तत्सम्बन्धे खाकाशे वृत्तं विषुवद्वृत्तं तत्र क्रान्तिवृत्तं षड्भान्तरेण स्थानद्वये लग्नं तत्रैवप्रवहवायुना विषुवद्वृत्तमार्गे भ्रमति मेषस्थानात् ककर्यादिस्थानं विषुवद्वृत्तात्तदर्विंशत्यंशान्तर उत्तरतः, मकरादिस्थानं विषुवद्वृत्तात्तदर्विंशत्यंशान्तरे दक्षिणतः, तत् स्वस्थाने प्रवहवायुना भ्रमति। एवं क्रान्तिवृत्तप्रदेशाः स्वस्वस्थाने प्रवहवायुना भ्रमन्ति। तत्र मेषादौ देवभागस्थः "जम्बुद्वीपं च देवानां देवासुरविभागञ्चेति" पूर्वोक्तेः। तत्सम्बद्धा मेषादिकन्यान्ता राशय उत्तरगोलः। तत्रस्थः सूर्यो मेषादौ मेषादिदेशे देवानां मेरोरुत्तरायणवर्तिनां दर्शनं षण्मासानन्तरं प्रथमदर्शनं याति गच्छति प्राप्नोतीत्यर्थः विषुवद्वृत्तस्य तत्क्षितिजत्वात्। एवं दैत्यानां मेरोर्दक्षिणायनवर्तिनामित्यसुराणामित्युक्तेर्नवोक्तम्। तद्भागसङ्गुरो दैत्यभागे सप्तद्वादिदक्षिणविभागस्थस्तुलादिमीनान्ता राशयो दक्षिणगोलस्तत्र सङ्गुरो गमनं यस्येत्येतादृशः सूर्यस्तुलादिप्रदेशे तत्करादर्शनानन्तरं प्रथमदर्शनं प्राप्नोतीत्यर्थः तेषामपि विषुवद्वृत्तक्षितिजत्वात्। अथ प्रसङ्गाद्ग्रीष्मे तीव्रकरः इत्याद्यर्धोक्तप्रश्नोत्तरमाह" रङ्गना०।

"अत्यासन्नतया तेन ग्रीष्मे तीव्रकरो रविः। देवभागेऽसुराणां तु हेमन्ते मन्दताऽन्यथा" सू० वि०।

"तेन—उत्तरदक्षिणगोलयोः सूर्यस्योत्तरदक्षिणसञ्चाररूपकारणेनेत्यर्थः। देवभागे जम्बुद्वीपे अत्यासन्नतया सूर्यस्यात्यन्तनिकटस्त्वेन ग्रीष्मे ग्रीष्मर्तौ सूर्यस्य तेजोगोलकस्य किरणाकीर्णता अत्युष्णाः, असुराणां देवभाग इत्यस्यापसन्नतया भाग इत्यस्य समन्वयाद्दैत्यानां भागे सप्तद्वादिदक्षिणप्रदेशे हेमन्ते हेमन्तर्तौ तुकारात् अन्यथा सूर्यस्य दूरस्त्वेन मन्दता किरणानामत्युष्णताभावः। देवभागे हेमन्तर्तौ करानां मन्दता। अतएव तत्र शीताधिक्यं च। तथाच देवभागे दक्षिणगोले सूर्यस्य दूरस्थत्वमुत्तरगोले निकटस्थत्वं मध्याह्ने नतांशानां क्रमेणाधिकात्वादिति भावः" र० ना०।

२तत्कालभवे जन्मनि पु० ३तद्वति त्रि० मेदि०

ग्रीष्मजा स्त्री ग्रीष्मे जायते जन—ड। (बोया जाता) १जवखाम् २नवमल्लिकायाञ्च मन्द्च०। ३ग्रीष्मजातमात्रे त्रि०

ग्रीष्मधान्य न० ग्रीष्मे जातं तत्कालभवं धान्यम्। धान्यभेदे (धोरो) "ग्रीष्मधान्यजननोऽत्र राक्षसः" ह०स०८अ०। वर्षभेदफलोक्तौ [राजनि०।

ग्रीष्मपुष्पी स्त्री ग्रीष्मे पुष्पं यस्याः ङीप्। करञ्जपुष्पवृक्षे।

ग्रीष्मभवा स्त्री ग्रीष्मे भवति भू—अच्। १नवमल्लिकायाम् रत्नमाला। २ग्रीष्मजातमात्रे त्रि०। [स्वार्थे क तत्रार्थे।

ग्रीष्मसुन्दर पु० ७त०। (गिमा) शाकभेदे। राजनि०।

ग्रीष्महास न० ग्रीष्मे हासोविकाशोऽस्य। इन्द्रतरौ। (वृद्धिरस्तता) तस्य वियति ग्रीष्मे वर्द्धीयमानत्वात् इन्द्रतरुतत्त्वात्तथात्वम्।

ग्रीष्मी स्त्री ग्रीष्मः कालः कारणत्वेनास्त्यस्य अच् गौरा० ङीष्। नवमल्लिकायां राजनि०।

ग्रीष्मोद्भवा स्त्री ग्रीष्मे काले उद्भवति उद्+भू—अच्। १नवमल्लिकायां राजनि० २ग्रीष्मजातमात्रे त्रि०।

ग्रुच चौर्य्ये गतौ च भ्वा० पर०सक० सेट्। ग्रोचति इरित् अग्रुचत् अग्रोचीत्। जुग्रोच। उदित् ग्रुचित्वा० अङ्। क्ङो वेट्कत्वात् निङाभां नेट् ग्रुक्षः।

ग्रैव त्रि० ग्रीवायां भवः शरीरावयवत्वात् यति प्राप्ते "ग्रीवाभ्योऽण् च" पा० अण्। ग्रीवाभवे "नाखसत् करिणां ग्रैवं त्रिपदीच्छेदिनामपि" रघुः।

ग्रैवेय त्रि० ग्रीवायां भवः "ग्रीवाभ्योऽण् च" पा० त्वात् ढञ्। ग्रीवाभवे "सरलासक्तमातङ्गग्रैवेयस्फुरितत्विषाम्" रघुः।

ग्रैवेयक न० ग्रीवायां वहः अलङ्कारः "कुलकुक्षिग्रीवाभ्यः श्वास्यलङ्कारेषु" पा० ठक्ञ्। ग्रीवावहे अलङ्कारभेदे (कण्ठी) "अयाकं सखि! वाससी न रुचिरे ग्रैवेयकं नोज्ज्वलम्" मा० द०।

ग्रैव्य त्रि० ग्रीवायां भवः वेदे यञ्। ग्रीवाभवे। "यन्न-वायाः सन्ततिः संयन्ति ग्रैव्या आम" ऋ० ६।२५।२।

ग्रैष्मी स्त्री ग्रीष्मे ऋतौ भवः पक्षे ऋतुत्वण् ङीप्। १नवमल्लिकायाम् विका०२ग्रीष्मर्तुसम्बन्धिनि त्रि० ग्रीष्म ऋषा तस्येदम् तत्सा० अण्। ३ऋषसम्बन्धिनि त्रि० उभयतः स्त्रियां ङीप्।

ग्रैष्मक त्रि० ग्रीष्मे ऋतौ भवः "ग्रीष्मवसन्ताभ्यामन्यतरस्याम्" पा० पक्षे वुञ्। ग्रीष्मर्तुभवे "ग्रैष्मकधान्यं कुरुते समर्घसमयोपयोग्यञ्च" ह०स०४अ० "कुरुते पुष्पाणि च ग्रैष्मकम्" ह०। उभयत्र ग्रैष्मिकमित्यपपाठः भवार्थे ठञोऽविधानात् तदधीते वेदेत्यधिकारे एव वसन्ता० ठञो विधानात् भवार्थे वुञोविधानाच्च।

ग्लौक्निक त्रि॰ ग्लौक्यधर्म्मं वेद तत्प्रतिपादकग्रन्थमधीते वा वसला॰ ठञ्। १ग्लौक्यधर्म्मवेत्तरि २तद्ग्रन्थाध्यायिनि च

ग्लपन न॰ ग्लै–णिच् ल्युट्। ग्लानिकरणे "तद्वै शब्दालाघवग्लपनरूक्षणविचारणकरम्" सुश्रुतः। कर्त्तरि ल्यु। २ग्लानिकारके त्रि॰।

ग्लस भक्षणे भ्वा॰ आत्म॰ सक॰ सेट्। ग्लसते अग्लसिष्ट। अग्लसे। उदित् ग्लसित्वा-ग्लस्ता। ग्लस्तः।

ग्लस्त त्रि॰ ग्लस–क्त क्त्वोवेट्कत्वात् नेट्। भक्षिते अमरः

ग्लह आदाने वा चुरा॰ उभ॰ पक्षे भ्वा॰ सक॰ वेट्। ग्लाहयति ते ग्लहति अजिग्लहत् त अग्लहीत् अग्लाहीत्। णिचोऽभावे घाटा। घाटः इत्यादि आदानं च द्यूतक्रीड़ार्थं पणादानम्। "तदेषां ग्लहमानानां ध्रुवौ जयपराजयौ" भा॰ क॰ ८७ अ॰। "दुर्य्योधनो ग्लहते पाण्डवेन" भा॰ व॰ ६१अ॰ "शकुने! त्वन्न दिव्यामो-ग्लहमानाः परस्परम्" भा॰ स॰ ५६ अ॰। सर्व्वत्र आर्षम् आत्मनेपदम्। "इमाञ्चेत् पूर्वं कितवोऽग्लहीष्यत्" भा॰ स॰ ६६ अ॰।

ग्लह पु॰ गृह–गुह–वा अजेर्गुक्वः" पा॰ कर्मणि नि॰। देवनविषये पणरूपे गृह्यते वस्तुनि (छड़)(बाजि) ख्याते पदार्थे "व्यात्युक्षीमभिसरणगृह्यमदीव्यत्" माघः। "अक्षगृह्यः सोऽभिभवेत् परं नः" भा॰ स॰ ५८अ॰। "महाधनं गृह्यं त्वेकं ब्रूहि मे भरतर्षभ!" ७४ अ॰ सभिकस्य द्यूतविषये गृह्यविभागभेदः यथा॰ दर्शितो यथा "गृह्ये शतिकडङ्गेषु सभिकः पञ्चकम् शतम्। स्वङ्गोवात् धूर्त्तकितवादितरात् दशकं शतम्"।

ग्लान त्रि॰ ग्लै–कर्त्तरि क्त। १रोगादिना क्षीणदेहादौ दीने अमरः। भावे क्त। २दैन्ये न॰

ग्लानि स्त्री ग्लै–भावे नि। १दौर्ब्बल्ये २स्वकार्य्यालसतायाम् हेम॰। "स्वकर्म्मस्वनिवर्त्तित्वे मनस ग्लानिरुच्यते" मनुः। "रत्नावासमनस्तापक्षुत्पिपासादिसम्भवा। ग्लानिर्निष्प्राणता कर्म्मकार्श्यान्तुत्साहतादिकृत्" सा॰द॰ उक्ते ३व्यभिचारिगुणभेदे यथा "किसलयमिव सद्यः पल्वनाद्विप्रलूनं हृदयकुसुमशोषी दारुणो दीर्घशोकः। ग्लपयति परिपाण्डु श्यामलक्ष्याः शरीरं शरदिव घर्मः केतकीपत्रगर्भम्" सा॰ द॰।

ग्लाव पु॰ दक्षयज्ञविरोधपक्षे ह्यास्यायणे ऋषिभेदे। "अथातः शौव उद्दीच्य साङ्ग वकोदाल्भ्यो ग्लावो वा मैत्रेयः स्वाध्यायस्तदुवाच" छा॰ उप॰।

ग्लाविन् त्रि॰ ग्लै वा॰विनि। अक्षूते "पणादीषाय ग्लाविनम्" यजु॰ ३०।१७। "ग्लाविनमक्षूतम्" वेददी॰।

ग्लास्नु त्रि॰ ग्लै–स्नु। ग्लानियुक्ते अमरः। "वसन् माल्यवति ग्लास्नूरामोजिष्णुरधृष्णुवत्" भट्टिः।

ग्लुच चौर्य्ये गतौ च भ्वा॰ पर॰ सक॰ सेट्। ग्लोचति इरित् अग्लुचत्-अग्लोचीत्। जुगोच उदित् क्त्वा वेट्। ग्लुचित्वा ग्लुक्त्वा क्त्वो वेट्कत्वात् ग्लुक्तः। "बहूनाम-ग्लुचत् प्राणानगोचीच्च रघे यशः" भट्टिः।

ग्लुचुक पु॰ ऋषिभेदे तस्य गोत्रापत्यम् "प्राचामवृद्धात् फिन् बह्वचम्" पा॰ फिन्। ग्लुचुकायनि तद्गोत्रापत्ये पुंस्त्री॰ स्त्रियां वा ङीप्। ग्लुचुकयनिर्भिक्षिः सेव्योऽस्य "गोत्रचरणाभ्यो बह्वचम्" पा॰ वुञ्। ग्लौचुकायनक तत्सेवके त्रि॰।

ग्लुञ्च चौर्य्ये गतौ च भ्वा॰ पर॰सक॰ सेट्। ग्लुञ्चति इरित् अग्लुञ्चत् अग्लुञ्चीत् जुग्लुञ्च। जुग्लुञ्च(ञ्च) वान्। उदित् ग्लुञ्चित्वा ग्लुक्त्वा। क्त्वो वेट्कात् ग्लुक्तः।

ग्लेप दैन्ये अक॰ गतौ चाले च सक॰ भ्वा॰ आ॰ सेट्। गुलेपते अगुलेपिष्ट जिग्लेपे उदित् अजिगुलेपत् त।

ग्लेव सेवने भ्वा॰ आ॰ सक॰ सेट्। गेलते अगुलेविष्ट। जिगुलेवे उदित् अजिगुलेवत् त।

ग्लेष्म अव्यक्ते भ्वा॰ आ॰ सक॰ सेट्। गुलेष्मते अगुलेष्मिष्ट जिगुलेष्मे। ऋदित्। अजिगुलेष्मत्।

ग्लै क्लमे हर्षक्षये च भ्वा॰ पर॰ अक॰ अनिट्। गुलायति अगुलासीत्। जगौ जगुलथुः-जगुलाथ। गुलानिः गुलास्नुः। गुलानः। गुलेयम्। णिचि गुलपयति ते अजिगुलपत् त। गुलानिशब्दे उदा॰। "मनो गुलपयते तीव्रम् विषं गन्धेन सर्वशः" भा॰ आनु॰ ४६।४३ श्लो॰। "गुलपयति यथा शमाङ्कम् न तथा हि कुसुदतीं दिवसः" शक॰। "पतङ्गैर्गुलपितावयम्" भट्टिः। "बालस्य लक्ष्मीं गुलपयन्निन्दोः" कुमा॰। "यत्त्वं वैराणि कोपञ्च सदृदण्डमजिगुलपः" भट्टिः।

ग्लौ पु॰ "गुलहभ्यां डौः" उणा॰ ग्लै–डौ। १चन्द्रे तस्य प्रतिमासं क्षयापक्षे क्षीयमाणत्वात्तथात्वम् तद्वाचकनामके २कर्पूरे च अमरः। "ग्लपेट् कविगुणैश्च रिपौ हते गुलैश्चपेट् सुरारातौ मृते च सर्व्वे" मुग्ध॰ चि॰। ३हृदयनाम्नि च "गुलैर्गुलुम्बान् शिरसि स्रवन्तीः" यजु॰ २५।८। "गुलयन्ति आस्यन्ति गुलो हृदयनाम" वेददी॰।

इति वाचस्पत्ये शकारादि शब्दार्थनिरूपणम्।

## घ

**घ** घकारस्योच्चारणं स्थानं जिह्वामूलं "जिह्वामूले तु घः प्रोक्तः" शिक्षोक्तेः "अकुहविसर्जनीयानां कण्ठः" इत्युक्तिस्तु जिह्वामूलरूपकण्ठपरा। अस्योच्चारणे आभ्यन्तरः प्रयत्नः स्पर्शः जिह्वामूलस्पर्शनेन तदुच्चारणात् अतएवास्य स्पर्शवर्णत्वम्। बाह्यप्रयत्नास्तु घोषनादसंवार महाप्राणाः शि०कौ०मूलं द्रष्टव्यम्। तस्य तन्त्रे वाचकशब्दा उक्ता यथा

"घः खड्गी दुर्धुरा मरुत्ती सुखीशक्तिपुरान्तकः।
वायुः शिवोत्तमः सत्यकिङ्किणी घोरनादकः। मरीचिर्वरुणो मेघा कालरूपी च दाम्भिकः। लम्बोदरी ज्वालमाला नन्देयो हननं ध्वनिः। त्रैलोक्यविद्या संकर्त्ता कामाख्या मनवा मता" वर्णोद्धारतन्त्रम्

अस्य ध्येयरूपं यथा "मालतीपुष्पवर्णाभां षड्भुजां रक्तलोचनाम्। शुक्लाम्बरपरीधानां शुक्लमाल्यविभूषिताम्। सदा क्षीरसखीं रम्यां लोचनत्रयराजिताम्। एवं ध्यात्वा घकारन्तु तन्मन्त्रं दशधा जपेत्"। अस्य मातृकान्यासे दक्षिणकराङ्गुलीषु न्यसता।

**घ** पु० घट-बा० ड। १घटायां २वर्णशब्दे च मेदि०।

**घकार** पु० घ-स्वरूपे कार। घस्वरूपे वर्णे "एवं ध्यात्वा घकारन्तु" वर्णोद्धारत०। [जघन्य।

**घघ्न** हसने भ्वा० पर० अक० सेट्। घघ्नति अघघ्नीत्।

**घट** चेष्टायां भ्वा० आत्म० अक० सेट् चटादि। घटते अघटिष्ट अघटे घटमानः। णित् अङ् घटा। "घटस्व परया बलया सह त्वमपि सायकात्" भा० व० १५८। श्लो०। "कदाचित् तस्य दृढस्य घटमानस्य यत्नतः" १०४७२श्लो०। "प्रागेव मरणात्तस्माद् राज्यायैव घटामहे" १२८। श्लो०। "अङ्कुरेण समं योद्धुमघटिष्ट नराधमः" भट्टिः। णिच् योजने सक० नित्यात् ह्रस्वः घटयति। अजीघटत् त "अनेन भैमीं घटयिष्यतीति-षेः" नैष०। "अन्यथा घटयिष्यामि" भक०। "इत्थं नारीर्घटयितुमलं कामिनिः काममाराः" माघः।

उद्+घटि-आवरणनिवारणे निरावरणकरणे। "द्वारे पुरस्योद्घटिनापिधाने" कुमा०।

प्र+प्रारम्भे "ततः प्रजघटे युद्धम्" भट्टिः।

वि+विघटने अक० "ततोविजघटे सैन्यैः" भट्टिः। "कार्यं सङ्घटितं क्वापि मध्ये विजघटे यतः" हितो०। "विघटितास्तृष्णालताप्रत्ययः" प्रबो०। णिच्-वियोजने सक० विघटयति ते।

सम्+ सम्यक्सङ्गमे संयोगे अक०। संघटते संयुज्यते इत्यर्थः णिच् संयोजने सक० संघटयति-संयोजयतीत्यर्थः।

**घट** हिंसे सक० संघाते अक० चु० उभ० सेट्। घाटयति-ते अजीघटत्-त। घाटा।

उद्+निरावरणे उद्घाटयति द्वारम् "उद्घाटिनी कुञ्चिका" मुग्धबो०। "उन्मादः स्वयमुद्घाटितेऽपि पिहिते स्वयं कृतविनाशः" द०स० ५२अ०।

**घट** दानौ वा चु० उभ० पक्षे भ्वा० पर० अक० सेट्। घाटयति ते घटति। अजीघटत्-त अघाटीत् अघटीत्।

**घट** शब्दकरणे चुरा० उभ० अक० सेट् इदित्। घण्टयति-ते अजघण्टत् त। घण्टा निघण्टुः।

**घट** पु० घटते अच्। कलशीवादिमति पृथुबुध्नोदराकृतियुक्ते पदार्थे अमरः कुम्भतुल्यनिचुलताहेतुत्वात् प्राणायामभेदे २कुम्भके। ३कक्षिकुम्भ च मेदि०। "कुम्भस्तु द्रोणविंशतिः" कात्यायनोक्ते द्रोणविंशतिपरिमाणे इति शब्दर०। तच्चिन्त्यम् कुम्भशब्दस्यैव तदर्थे परिभाषितत्वात् तदर्थकशब्दमात्रस्य तत्परिभाषितत्वाच्च। वैद्यकोक्तद्रोणपरिमाणार्थकतापि तत्रोक्ता चिन्त्या तत्र कुम्भशब्दस्यैव परिभाषितत्वात्। ४कुम्भराशौ "हरिः कीटघटेन च" ज्यो० त० पताकीवेधे

**घटक** त्रि० घटयति घट-णिच्-ण्वुल्। १योजके। तद्भेदाः "धारकोभावकश्चैव योजकश्चांशकस्तथा। दूषकः शातकश्चैव षड्डेते घटकाः स्मृताः" इत्युक्ताः। "घटकं प्राञ्चं देवि! स्वर्गेषु यत्नतस्त्यजेत्" महिम्नमहिनीतत्तस्मात् स्मृतोक्ता। योजकश्च वरकन्ययोर्विवाहे योजकः, वस्तुमात्रयोर्योजकश्चेति द्विधा।

२स्वविषयताध्यापकविषयतानिरूपिते "यः स्वार्थघटकार्थस्य स्वार्थान्वितिबोधने। अनुकूलोवक्तृप्रौढिः सतयोरवधादिमः" शब्दशक्ति०। "साध्याभावाधिकरणत्वं च साध्यवत्तायत्तविरोधितावच्छेदकसम्बन्धेनेति साध्याभावप्रतियोगित्वञ्च साध्यतावच्छेदकसम्बन्धेन इति च नव्यनैया०। तस्य भावः त्व घटकत्वम् स्वनिरूपितस्वव्यापकत्वोभयसम्बन्धेन विषयतानिरूपितत्वे। भवति च वह्न्यभावे वह्निघटकत्वम् वह्न्यभावज्ञानीयविषयतायां वह्निविषयताव्याप्यत्वात्।

घटकर्पर पु० विक्रमादित्यसभ्ये नवरत्नान्तर्गते कविभेदे। "धन्वन्तरिःक्षपणकोऽमरसिंहशङ्कुर्वेतालभट्टघटकर्परकालिदासाः। ख्यातो वराहमिहिरो नृपतेः सभायां रत्नानि वै वररुचि र्नव विक्रमस्य" ज्योतिर्विदाभरणम्। तत्कृतकाव्यञ्च नीतिसाराख्यं तन्नाम्ना प्रसिद्धमस्ति। तच्च "गिरौ कलापी गगने पयोदाः" इत्यादिकं "यथा करोतु नीतिज्ञो व्यवसायमितस्ततः। फलं पुनस्तदेव स्याद् यद्विधेर्मनसि स्थितम्" इत्यन्तम्। इत०। २भग्नघटावयवभेदे (खापरा) "तस्मै पक्वेषसदकं घटकर्परेण" नीतिसारः "घटकर्परतीक्ष्णाग्रैः" पञ्चत०।

घटकार त्रि० घटं करोति कृ-अण् उप० स०। कुम्भकारे (कुमार) शिल्पिभेदे "घटकारपरोहितावदन्नाः" ह०स० १६अ०। एवुल्। घटकारकोऽप्यत्र।

घटकृत् त्रि०घटं करोति कृ-क्विप्। कुम्भकारके "विहदमात्यबणिग्जनघटकृच्छिल्पान्त्यजास्त्रिफलाः" ह०स० १६अ०।

घटग्रह त्रि० घटं गृह्णाति कर्मण्यण्युपपदेऽपि न अण् किन्तु "ग्रहिज्यावयिव्यधिवष्टिविचतिवृश्चतिपृच्छतिभृज्जतिषु क्ङिति च" वार्ति० अनुद्यमने क्यप्। कुम्भग्राहके। उद्यमने तु अण्। घटग्राह तत्रार्थे त्रि०

घटज पु० घटात् जायते जन-ड। कुम्भसम्भवे अगस्त्येऽर्णौ। कुम्भयोनिशब्दे २११७ पृ० दृश्यम्। "किं बहूक्तेन घटज! काशी प्राप्याप तेन वै" काशीख०१०अ०। घटजातादयोऽप्यत्र। [अच् क्षुद्रः। कुट्टिन्यां स्त्रियाम्।

घटदासी स्त्री घटयति नायकौ परस्परं योजयति घटि-

घटन न०घटि+ल्युट्। योजने संमेलने "अघटनघटना घटीयसी मायां"वेदा०। "तत्रैव तत्प्रमयसा घटनाय योग्यम्"विभा०।

घटना स्त्री चु०घट-युच्। १संहतकरणे, २योजने ३मेलने, ४करिण्यां समूहे च अमरः। "वाच्यं स्वदनिजपराक्रमघटनामात्मोक्ष कालविज्ञः" ह० स० ५।३अ०। "प्रियजनघटनामासु दुःशीलतां च" ह० स० ५२अ०।

घटराज पु० घटेन योजनेन राजते राज-अच्। कुम्भकारा० कपालहययोजनात्तस्य जातत्वात्तथात्वम्।

घटपर्य्यसन न० ह्रत०। प्रायश्चित्ते पराङ्मुखस्य पतितस्य त्यागार्थं जीवतएव तस्य प्रेतकार्य्यांगं च ज्ञातिभिः क्रियमाणे दाक्षाः पादेन कुम्भस्य निरुदकत्वकरणे तत्प्रक्रिया मनुना दर्शितो यथा

"पतिस्त्रोदकं कार्यं सपिण्डैर्बान्धवैर्बहिः। निन्दितेऽहनि सायाह्ने ज्ञातृत्विग्गुरुसन्निधौ। दासी घटमपां पूर्णं पर्य्यस्येत् प्रेतवत् पदा। अहोरात्रमुपासीरन्नशौचं बान्धवैः सह। निवर्त्तेरंश्च तस्मात्तु सम्भाष्यसहासने। दायाद्यस्य प्रदानञ्च यात्रा चैव हि लौकिकी। ज्येष्ठता च निवर्त्तेत ज्येष्ठावाप्यञ्च यद्धनम्। ज्येष्ठांशं प्राप्नुयाच्चास्य यवीयान् गुणतोऽधिकः" "पतितस्येति। महापातकिनो जीवतएव प्रेतस्योदकक्रिया वक्ष्यमाणरीत्या सपिण्डैः समानोदकैश्च यामाद्बहिर्गत्वा ज्ञातृत्विग्गुरुसन्निधाने रिक्तायां नवस्यादौ तिथौ दिनान्ते कर्त्तव्या। दासीति। सपिण्डसमानोदकप्रयुक्ता दासी उदकपूर्णं घटं प्रेतवदिति दक्षिणाभिमुखीभूय पादेन क्षिपेत् यथा स निरुदको भवति तदनु ते सपिण्डाः समानोदकैः सहाहोरात्रमशौचमाचरेयुः। निवर्त्तेरन्निति। तस्मात् पतितात् सपिण्डादीनां सम्भाषणमेकासनोपवेशनं च तस्मै रिक्थदानं संवत्सरिकादौ निमन्त्रणादिरूपो लोकव्यवहारः एतानि निवर्त्तेरन्। ज्येष्ठेति। ज्येष्ठस्य यत् खल्वुत्थानादिकं कार्यं तत्तस्य न कार्यं ज्येष्ठभ्यं च तस्य विंशोद्धारादिकं धनं न देयं यद्यपि रिक्थप्रदानप्रतिषेधादेवाप्युद्धारप्रतिषेधः सिद्धः तथापि यवीयसस्तत्प्राप्त्यर्थमनूद्यते तस्यैव ज्येष्ठस्य सम्बन्धि धनं सोद्धारांशं तदनुजो गुणाधिको लभते" कुल्लू०।

विस्तरस्तु मिताक्षरायामुक्तोयथा

"यस्तोदित्यादेतच्चिकीर्षति तस्य किं कार्यमित्याह "दासीकुम्भं बहिर्ग्रामाच्छिनवेरन् स्ववान्धवाः। पतितस्य बहिः कुर्युः सर्वकार्येषु चैव तम्" या०। "जीवतएव पतितस्य स्वज्ञातयोबान्धवाः माद्यश्चाद्य ते सर्वे सन्निपत्य दासी प्रेक्षा तया सपिण्डादिभिरयाऽऽनीतं कुम्भमपाम्पूर्णं ग्रामाद्बहिर्निनयेयुः। एतच्चतुर्थादिरिक्तातिथिपक्षः पञ्चमे भागे गुर्वादिसन्निधौ कार्यम् "पतितस्योदकक्रियां सपिण्डैर्बान्धवैःसह। निन्दितेऽहनि सायाह्ने ज्ञातृत्विग्गुरुसन्निधाविति" मनुस्मरणात्। अथ वा दास्येव सपिण्डादिभयुक्ता निनयेत् यथाह मनुः "दासी घटमपाम्पूर्णम्पर्यस्येत् प्रेतवत्तदा। अहोरात्रमुपासीरन्नशौचं बान्धवैः सहेति"। प्रेतवदिति दक्षिणाभुखापसव्यत्वयोः प्राप्त्यर्थम्। तच्च निनयनमुदकपिण्डदानादिप्रेतक्रियोत्तरकालं द्रष्टव्यम्। "तस्य विद्यागुरुयोनिसम्बन्धांश्च सन्निपात्य सर्वाण्युदकादीनि प्रेतकर्म्माणि कुर्युः पालङ्कास्य विपरिधिश्चेद्युदाहः कर्म्मकरोवापचारात्पात्रमानीय दासी घटं पूरयित्वा दक्षिणामुखी पदा विपर्व-

स्वेदनदलसदकङ्करोति सामग्राहान्तं सर्वं त्वाचमेरन् प्राचीनावीतिनोसक्तशिखा विद्यागुरवो योनिसम्बन्धाच्च बीजैरङ्गपतनस्पृश्य ग्रामसम्बन्धिभ्युरिति" गौतमस्मरणात्। अथवा त्यागोवादि बन्धुभिः प्रेर्यमाणोऽपि प्रायश्चित्तं न करोति तदा द्रष्टव्यः "तस्य गुरोर्बान्धवानां राज्ञश्च समक्षन्दोषानभिख्याप्यानुभाष्य पुनः पुनराचारं लभस्वेति स यद्येवमप्यनवस्थितमतिः स्यात्ततोऽस्य पात्रं विपर्यस्येदिति" शङ्खस्मरणात्। ततस्तं सम्बोदकस्पर्शितं सर्वकार्येषु सम्भाषणसङ्गासनादिषु बहिःकुर्युर्वर्जयेयुः। तथा च मनुः "निर्वर्त्तेरंस्ततस्तस्य सम्भाषणसङ्गासने। दायाद्यस्य प्रदानञ्च यात्रा चैव हि लौकिकी"। यदि स्वेदादिना सम्भाषणङ्करोति तदा प्रायश्चित्तं कार्यम्। "अत ऊर्द्धमेनेन सह सम्भाष्य तिस्रोरात्रं जपन् हविष्यान्नमज्ञानपूर्वं ज्ञानपूर्वं त्रिरात्रमिति"। घटनिनयनादयोऽत्र।

**घटप्रक्षेप** न० तृ०। "ऋतप्रायश्चित्तेन सह पुण्यजलाशये स्नानोत्तरं सपिण्डसमीपे पुण्यद्रव्यपूर्णघटस्थापवर्जने तद्विधिः भिता० दर्शितो यथा

"यदा तु बन्धुत्यागादन्यथा वा ज्ञातैरन्यः प्रायश्चित्तं कुर्यात्तदा किं कार्यमित्याह "चरितव्रत आयाते त्रिनवेरन्नवं घटम्। जुगुप्सेरन्न चाप्येनं संवसेयुश्च सर्वशः"या०। "ऋतप्रायश्चित्ते बन्धुसमीपमुनरायाते तत्सपिण्डाद्यास्तेन सहिता नवमनुपहतं घटमुदकपूर्णं निनयेयुः। एतच्च निनयनं पुण्यह्रदादिस्नानोत्तरकालं द्रष्टव्यम्। "प्रायश्चित्ते तु चरिते पूर्णकुम्भमपां नवम्। तेनैव सार्द्धमाप्लेयुः स्नात्वा पुण्यजलाशये" इति मनुस्मरणात्। गौतमेन तु विशेष उक्तः "यस्तु प्रायश्चित्तेन शुध्येत्तस्मिंश्छुद्धे ज्ञातकुम्भमयस्यात् पुण्यतमाद्ददात्यूरयित्वा स्वयंशीर्यो वा तं एनमप्युपस्पर्शयेयुरथास्मै तत्प्रानन्दं शुचिसम्मतिमद्भ्य जयेत् ज्ञाना द्यौः शान्ता पृथिवी शान्तं शिवमन्तरिक्षं शोरोचनस्मिह मद्भ्यः शीर्षे तैर्यङ्भिः पावमानीभिरद्भ्यस्तीभिः कूष्माण्डैश्चाज्यं जुह्वयाद्विरण्यं दद्याद्गवाचार्याय यस्य तु प्रायश्चित्तं स मृतः शुध्येदेतदेव शान्त्युदकं सर्वेष्वपपातकेष्विति तत एनद्धृतप्रायश्चित्तं नैव कुर्यादेवमुक्त्वा सर्वकार्येषु क्रयविक्रयादिषु तेन सह संव्यवहरेयुः"। "अकृतव्रत चरितव्रतविधौ विशेषमाह "घटेऽपवर्जिते प्रातिसभ्यस्थो वयसं गवाम्। प्रदद्याद् प्रथमं गोभिः सतृक्षतस्य हि सतृक्षिया" या० मिताक्ष० अत्रेदं बोध्यम् घटेऽपवर्जिते इत्यादि याज्ञ० वचनस्य प्रायश्चित्ते तु चरिते इत्यादि मनुवचनस्य च प्रकरणात् घटप्रक्षेपस्य पतितविषयकत्वावधारणे "खशिरसा वयसमादाय गोभ्योदद्यात्" इति शातातपवचनस्य गोप्रासमात्रदानप्रतिपादकत्वेन तस्य सर्वप्रायश्चित्तशेषत्वेनावधारणेऽपि "एवं शातातपयाज्ञवल्क्यवचनैकवाक्यतया वक्ष्यमाणमनुवचनद्वयमपि सामान्यप्रायश्चित्तोत्तरकर्त्तव्यतापरं न तु प्रकरणादकृतप्रतिपन्नमात्रपरं तस्मादकृतप्रतिपन्नमात्रपरतया यत् कुल्लूक भट्टव्याख्यानं तत्प्रदर्शनमात्रम् एवं घटापवर्जनमपि न पतितमात्रविषयम् यथाह मनुः "उपवासक्लमं तं तु गोव्रजात् पुनरागतम्। प्रष्टव्यं परिपृच्छेयुः साध्वं सौम्येच्छसीति किम्। सत्यसङ्गा तु विप्रेषु विकिरेत् यवसं गवाम्"। इत्यनेन प्रा० त० यद् घटापवर्जनस्यापि सर्वप्रायश्चित्तशेषतया व्यवस्थापितम् तच्चिन्त्यम् दर्शितशातातपवाक्ये "उपवासक्लमित्यादिमनुवाक्ये च घटापवर्जनस्यानुक्तेः पतितविषये च प्रागुक्तमनुयाज्ञवल्क्यवाक्ययोर्घटापवर्जनस्योक्तेः उभयस्यैकविषयत्वाभावात् ततश्च सर्वप्रायश्चित्ते केवलं गोप्रासदानमात्रं शेषकर्त्तव्यं पतितप्रायश्चित्ते तु घटापवर्जनरूपविशेषकार्यसहितगोप्रासदानमिति विषयविवेकसम्भवे मनुयाज्ञवल्क्यवचनसङ्कोचस्यायुक्तत्वात् किञ्च शातातपवचनस्य गोप्रासदानविषयत्वेन व्यवस्थेऽपि याज्ञवल्क्यवाक्ये "घटेऽपवर्जिते इत्यनेन प्राप्तपतितविषयकघटापवर्जनमनूद्य गोप्रासमात्रविधायकत्वात् न सामान्यपरत्वं यद्विषये घटापवर्जनं विहितं तद्विषयेऽपि गोप्रासदानाधिक्यविधानार्थं तस्य प्रवृत्तेः घटापवर्जनं तु पतितविषयकं प्रकरणादवगम्यते। किञ्च पतितविषये दासीपदा घटप्रक्षेपपूर्वकं निरुदकघटकरणं घटपर्य्यसनशब्दे सम्बादिवाक्येन दर्शितम् तदुत्तरमेव मनुयाज्ञवल्क्याभ्यां घटापवर्जनं विहितमिति तस्य तद्विषयकत्वौचित्यात् न तु तत्सङ्कोचः इति। वस्तुतस्तु घटपर्य्यसनशब्दे दर्शितगौतमवाक्ये "एतदेव शान्त्युदकं सर्वेष्वपपातकेषु" इत्युक्तेः शान्त्युदकस्यैकस्य सर्वोपपातकप्रायश्चित्तशेषत्वावधारणात् शान्त्युदकस्यैकस्य च पूर्णघटनिनयनपूर्वकत्वौचित्येन सर्वोपपातकप्रायश्चित्ते शान्त्युदकस्थानीयं घटनिनयनं कार्यमिति सुधीभिर्भाव्यमिति। घटापवर्जनघटनिनयनादयोऽत्र।

घटसम्भव पु० सम्भवत्यस्मात् सम्+भू–अपादाने अप् घटः सम्भवोऽस्य। कुम्भसम्भवे अगस्त्ये घटोद्भवादयोऽप्यत्र

घटसम्भव पु०ष०त०। दक्षिणस्थे जनपदभेदे "अथापरे जनपदा दक्षिणा भरतर्षभ!" इत्युपक्रमे "मूषकास्तनवालाश्च समीपा घटसम्भवाः" अश्वु०खण्डनिर्माणे भा०भी०६अ०।

घटा स्त्री घट–भावे अङ्। १सङ्घाते "यदगारघटाढ्य कुट्टिम-खदिन्दूपलतुन्दिलाभया" नैष०। २घटनायां ३गोष्ठ्यां ४सभायाञ्च मेदि०। ५करिण्यां युद्धादावेकत्र संघाते अमरः "आयामवद्भिः करिणां घटाशतैः" माघः। ६घटने योजने च अच्। ७तत्रार्थे पु०।

घटाटोप पु० घटया आटोपः। आडम्बरे।

घटाभ पु० हिरण्यकशिपुसेनापतौ असुरभेदे। "तत्रासीनं महाबाहुं हिरण्यकशिपुं प्रभुम्। उपासन्ति" इत्युपक्रमे "घटाभोविघटाभश्च संह्लादश्चेन्द्रतापनः" हरिवं० २३२ अ०। कुम्भाकारत्वात्तस्य तथात्वम्।

घटाल त्रि० घटा घटनाऽस्यास्य निन्दिता सिद्धा०। "जटाघटाकटाकाशाः क्षेपे" ग०सू० अच्। निन्दितघटनायुक्ते। [राजनि०।

घटालाबू स्त्री घटश्चासावलाबूः। कुम्भतुम्बीग्राम् (गोलालाउ)

घटिक न० घटेन तरति तरतीत्यधिकारे "नौद्व्यचतुष्" पा० ठन्। घटेन नद्यादितारिणि।

घटिका स्त्री "गुर्वक्षराण्यनुदितं च षड्भा पलं पलानां घटिका दिनैका" इति ज्योतिर्विदाभरणोक्ते १षष्टिपलात्मके दण्डरूपे काले। घटयति चिन्तितकार्यं करणाय घट-णिच्-ण्वुल्। २दण्डद्वयरूपे मुहूर्त्तांशके काले। अल्पो घटः ङीष् ततः स्वार्थे क। ३स्वल्पे घटे। द्वयर्थे कन्। ४नितम्बे न०गन्धद्व०। "चतस्रो घटिकाः प्रातरुषोदय उच्यते। यतीनां स्नानकालोऽयं गङ्गाम्भःसदृशः स्मृतः। त्रियामा रजनी प्राज्ञैस्तच्चतुर्थांशतो दिवा। नाडीनां तदृभे सन्ध्ये दिवसाद्यलसंज्ञिते" कालमा० ब्रह्मवै०। "अतोऽपरास्तु स्नानादौ घटिकैका यदा भवेत्। उदये सा तिथिर्ग्राह्या श्राद्धादावस्तगामिनी" विष्णुधर्म्मो०। "स्यात् घटिका मुहूर्त्तः श्राद्धयोग्यकालानुरोधादिति पक्षते ब्रह्मवै० घटिकादण्डरूपा परवचने नाडीनामाद्यलचतुष्टयमित्यनुरोधात्" ति० त० रघु०। "त्रिंशत् कलार्द्धं घटिका षष्टिः स्यात् नाडिके द्वे ते मुहूर्त्तोदिनञ्च" सि० शि० "आर्द्धं भचक्रभ्रमस्य षष्टिभागः घटिका" प्रसिता०।

घटिघट पु० घण्टा घटते घट–अच् संज्ञायात् ह्रस्वः। महादेवे तस्य कालरूपेण घटीवत् स्थितत्वात् तथात्वम्। "नमोऽघटाय घण्टाय नमो घटिघटाय च" हरिवं० २७८ अ० शिवस्तुतौ।

घटित त्रि० घट-णिच्-क्त। १योजिते रचिते २स्वविषयतान्याश्रयविषयतानिरूपिते भवति च वह्न्यभावः वह्नि-घटितः वह्न्यभावविषयतायां वह्निविषयताश्रयत्वात् "प्रतियोगिवैयधिकरण्यघटितव्यापकतायां निवेशः" व्युत्पत्तिवादे गदाधरः। तस्य भावः त्व घटितत्व तद्भावे न०। विशिष्टान्तराघटितत्वं विशिष्टद्वयाघटितत्वम् इति च सामान्यनिरुक्तौ गदाधरः।

घटिन् पु०घट+सदाकारो अस्त्यस्य इनि १कुम्भराशौ "मत्स्यौ घटी स्वर्भितुं सगदं सवीणम्" उद्भो० त०। तस्य कुम्भाकारत्वात् शिरसि तदुक्तत्वाच्च तथात्वम् २कुम्भयुक्ते त्रि० स्त्रियां ङीप्।

घटिन्धम त्रि० घटीं धमति धम-खश् मुम् नुमच। मुखमारुतेन घटीवादके। [धायके।

घटिन्धय त्रि० घटीं धयति धेट–खश् मुम् नुमच। कुम्भ-

घटिल त्रि० घटोऽस्त्यस्य पिच्छा० इलच्। कुम्भयुक्ते।

घटी स्त्री घटः कालमानज्ञापकः सच्छिद्रः कुम्भः ज्ञापकतयाऽस्त्यस्याम् अच् गौरा० ङीष्। १दण्डात्मके काले। "गुर्व्वक्षरैः खेन्दुमितैरसुभिः। षड्भिः पलं तैर्घटिका खषड्भिः। स्याद्वा घटीष्टिरहः खरामैः" सि० शि०। अल्पार्थे ङीष्। २क्षुद्रे कुम्भे।

घटीकार स्त्री घटीं करोति अण्। कुम्भकारे शिल्पिभेदे।

घटीग्रह त्रि० घटीं गृह्णाति ग्रह–अतद्धनने घटग्रहवत् अच्। घटीग्राहके उद्यमेन तु अण्। घटीग्राह तदर्थे त्रि०।

घटीयन्त्र न० घट्याः दण्डरूपकालस्य ज्ञापकं यन्त्रम्। कालमानज्ञापके यन्त्रभेदे। (घडि) तच्च यन्त्रं नानाविधं सू० सि० रङ्गनाथबोर्दर्शितं तत्र दिवसे कालज्ञानस्य ग्रहनक्षत्रादियन्त्रैकसाध्यत्वसङ्गा घटीयन्त्रादिकं तु अकृत्रिमतज्ज्ञानसाधनमिति घटीयन्त्रादिकमेवात्रतत्रोक्तं प्रदर्श्यते यथा

"अथ घटीयन्त्रादिभिश्चमत्कारियन्त्रैर्वा सर्वोपजीव्यं कालं सुखं साधयेदिति कालसाधनमुपसंहरति"

"तोययन्त्रकपालाद्यैर्मयूरनरयानरैः। वंशत्वरेणुभिश्चैव सम्यक् कालं प्रसाधयेत्" सू०सि०।

"जलयन्त्रं तत् कपालं च कपालाख्यं जलयन्त्रं यच्चमार्थं

तदाद्यं प्रथमं येषां तैर्यन्त्रैर्वालुकायन्त्रप्रभृतिभिः सा-मेल्यघटीयन्त्रैर्मयूरनरयानरैः। मयूराख्यं स्वयंवहयन्त्रं निरपेक्षं नरयन्त्रं शङ्कुराख्यं छायायन्त्रं पूर्वोद्दिष्टं वानरयन्त्रं स्वयंवहं निरपेक्षमेतैः शुल्बरेणुगर्भैः सूत्र-सहिता रेखयो धूलयो गर्भे मध्ये येषां तैः सूत्रप्रोताः घटिसङ्ख्याका सच्छिद्रिता मयूरोदरस्था सकाशाद् घटिका-न्तरेण स्रत एव निःसरन्तीति लोकप्रसिद्धा ताडयैर्यन्त्रै-रित्यर्थः। यद्वा सूत्राकारेण रेखयः सिकतांशा गर्भे उदरे यस्यैतादृशं यन्त्रं वालुकायन्त्रं प्रसिद्धम्। तेन सच्छिद्रैर्मयूरादियन्त्रैर्मयूराद्युक्तयन्त्रैर्वालुकायन्त्रेण चेति सिद्धोऽर्थः। चकारस्तोययन्त्रकपालाद्यैरित्यनेन समु-च्चयार्थकः। कालं दिनगतादिकं सम्यक् सूक्ष्मं प्रसा-धयेत्। प्रकर्षेण सूक्ष्मत्वे नातिसूक्ष्मत्वे नेत्यर्थः। जानी-यादित्यर्थः। ननु मयूरादिस्वयंवहयन्त्राणि कथं साध्या-नीत्यतस्तत्साधनप्रकारा बहवो दुर्गमाश्च सन्तीत्याह"रत्ना० "पारदाराम्बुसूत्राणि शुल्बतैलजलानि च। बीजानि पांसवस्तेषु प्रयोगास्तेऽपि दुर्लभाः"सू०। "तेषु मयूरादि-यन्त्रेषु स्वयंवहार्थमेते प्रयोगाः प्रकर्षेण योज्याः। प्र-कर्षस्तु यावदभिमतसिद्धेः। एते च दुरवगाह आह। पार-दाराम्बुसूत्राणीति। पारदयुक्ता धाराः। तथा च सि-द्धान्तशिरोमणौ "लघुकाष्ठगतमचक्रे समसुषिरारा: समा-न्तरा नेम्याम्। छिद्रिहका योज्याः सुषिरसप्तार्धे पृथक् तासाम्। रसपूर्णे तच्चक्रं ह्याधाराच्छ्वसितं स्वयंभ्र-मति"। (१) इति। अम्बु जलस्य प्रयोगः। सूत्राणि सूत्रसाधनप्रयोगः। शुल्बं ताम्रम्। तैलजलानि तैलयुक्तजलस्य प्रयोगः। चकारात् तयोः पृथक् प्रयो-गोऽपि। तथा च सिद्धान्तशिरोमणौ "उत्कोर्ये नेमि(२) मथवा परितो मदनेन संलग्नम्। तदुपरि ताम्रदलाद्यं कृत्वा सुषिरे रसं क्षिपेत् तावत्। यावद्भसैकपार्श्वं क्षि-प्तजलं नाम्भसो याति। छिद्रितच्छिद्रं तदतश्चक्रं भ्र-मति स्वयं जलाढ्यम्।(२) ताम्रादिमयस्याद्युपरूपनच-स्य न्यूनपूर्णस्य। एकं कुण्डजलान्तर्द्विनीयमयं यथो-क्तं च बर्हिः। युगपन्मुक्तं चेत् कं नलेन कुण्डाद्बहिः पतति। नेम्यां बद्धा घटिकाचक्रं भ्रमयन्नवत् तथा धार्यम्। नलकमध्युत्तलितं पतति यथा तद्घटीमध्ये। भ्रमति ततस्तत् सततं पूर्णघटीभिः समाहृतम्। चक्र-च्युतं स्वसदृक् कुण्डे याति प्रत्यहिकया"इति। बीजानि केवलं तद्बीजप्रयोगाः। पांसवो धूलिप्रयोगास्तैर्युक्ताः। ऋषिशब्दात् प्रयोगेषु सुगमतरा रचयेः। दुर्लभाः साधा-रणजनैः मनुष्यैः कर्तुमशक्या इत्यर्थः। अन्यथा प्रतिगृहं स्वयंवहानां प्राचुर्यापत्तेः। इयं स्वयंवहविद्या सप्त-द्वान्निर्वासिजनैः फिरङ्गाख्यैः सम्यगभ्यस्तेति। कु-कुकविद्यात्वादत्र विस्तारानुद्योग इति रंगेशः। अथ कपालाख्यं जलयन्त्रमाह"रङ्गन०।"ताम्रपात्रमधश्छिद्रं-न्यस्तं कुण्डेऽम्भस्यम्भसि। घटिर्मज्जत्यहोरात्रे स्फुटं यन्त्रं कपालकम्" सू० "यत् ताम्रघटितं पात्रमधश्छिद्रमधोभागे छिद्रं यस्य तत्। अम्भस्यम्भसि निर्मलं जलं विद्यते यस्मिन् तादृशे कुण्डे कुण्डाकारे न्यस्तं धारितं सदहो-रात्रे नाक्षत्राहोरात्रे घटिः घटिकारमेव न न्यूनाधिकं मज्जति अधश्छिद्रमार्गेण जलागमनेन जलपूर्णतया निमग्नं भवति। तत् कपालकं कपालमेव कपालकं घटखण्डानां कपालपदवाच्यत्वात् घटाधस्तनार्धाकारं यन्त्रं घटीयन्त्रं स्फुटं सूक्ष्मम् तद्घटनं तु। "शुल्बस्य दिग्भिर्विरचितं पत्रैर्यत् षड्भुजोच्चं हिगुणायतास्रम्। तदम्भसा घटिपलैः प्रपूर्यं पात्रं घटार्धप्रतिमं घटी स्यात्। सर्वत्रसमापत्रयनिर्मिता या छेम्नः शलाका चतुरङ्गुला स्यात्। विद्धं तया प्राक्तनमत्र पात्रं प्रपूर्यते नाडिकयाभ्युभिस्तत्" इति व्यक्तम्। भगवता तु सूक्ष्मसूक्ष्मम्। अथ शङ्कुयन्त्रं दिवैव कालज्ञानार्थं नान्यदेत्याह" रङ्गन० "नरयन्त्रं तथा साधु दिवा च विमले रवौ। छायासंसाधनैः प्रोक्तं कालसाधनसत्तमम्" सू०वि०। रङ्गनाथ धनर्षि०शि०वाक्यानि प्रभ० व्याख्यातानि यथा लघुदार्ब्यादि (१) यन्त्रिकीलरचिते लघुदारुमये भ्रम-मिते चक्रे धाराः। किंविशिष्टाः। समप्रमाणाः समसुषिराः समतौल्याः समान्तरा नेम्यां योज्याः। तावद्यावत्तदेकत एव सर्वाः छिद्रिहका योज्याः। ततस्ता-सामाराणां सुषिरेषु पारदसहिता रेखा यथा सुषिरार्धमेव पूर्णं भवति। ततो छिद्रितारायं तच्चक्रमयस्कारशाख-वद्ध्वाधारस्थं स्वयं भ्रमति। अत्र युक्तिः। यन्त्रै-कभागे रसो धारामूलं प्रविशति। अन्यभागे धारायं धावति। तेनाकृष्टं तत् स्वयं भ्रमतीति" प्रभ०। उत्कीर्ये"त्यादि "(२)अन्यनेमिं भ्रमयन्त्रेण समन्ताडुत्कीर्य ह्यङ्गुलमात्रं सुषिरस्य रेखो विस्तारश्च यथा भवति तत-स्तस्य सुषिरस्योपरि ताम्रपत्रादिकं मदनादिना संलग्नं कार्यम्। तदपि चक्रं ह्याधाराच्छ्वसितं कृत्वोपरि नेम्यां ताम्रदलं बद्धा सुषिरे रसप्लावत् रेखो यावत्

सुषिरस्याधोभागो रसेन सङ्गितः। पुनरेकपार्श्वे जलं प्रक्षिपेत्। तेन जलेन द्रवोऽपि रसो गुरुत्वात् परतः सारयितुं न शक्यते। अतो सुद्रितच्छिद्रं तच्चक्रं जलेनाक्रष्टं स्वयं भ्रमतीति" प्रभि०।

ताम्रादिमयस्थेत्यादि (३) "ताम्रादिधातुमयस्याढकस्योपरि यत्कीलकस्य नलस्य जलपूर्णस्यैकमयं जलभाण्डेऽन्यदयं बहिरधोमुखं चैकहेलया यदि विमुच्यते तदा भाण्डजलं सकलमपि नलेन बहिः चरति। तद्यथा छिद्रकलसस्य कमलिनीनलस्य जलपूर्णभाण्डे विन्यस्य जलपूर्णसुषिरस्यैकमयं भाण्डादुबहिरधोमुखं द्रुतं यदि ध्रियते तदा भाण्डजलं सकलमपि नलेन बहिर्याति। इदं कुक्कुटनाडीयन्त्रमिति सिद्धिनां चरमेखलिनां च प्रसिद्धम्। अनेन बहवश्चमत्काराः सिद्ध्यन्ति। अथ चक्रनेम्यां घटीर्बद्ध्वा जलयन्त्रवत् द्वाधाराद्यसंस्थितं तथा निवेशयेद्यथा नलकप्रच्युतजलं तस्य घटीमुखे पतति। एवं पूर्णघटीभिराकृष्टं तद्भ्रमत् केन निवार्यते। अथ चक्रचुतस्योदकस्याधःप्रणालिकया कृष्णगमने कृते कृष्णे पुनर्जलप्रक्षेपनैरन्तर्येण भ्रमि०।

विष्णुपु० अन्यथा तन्निर्माणप्रकार उक्तो यथा

"नाडिका तु प्रमाणेन कला दश च पञ्च च। उन्मानेनाम्भसः सा तु पलान्यर्द्धत्रयोदश। हैममाषैः कृतच्छिद्रा चतुर्भिश्चतुरङ्गुलैः। मागधेन प्रमाणेन जलप्रस्थस्तु संस्कृतः" विष्णु० पु०।

'उन्मस उन्मानेन उन्मीयतेऽनेनेत्युन्मानं पात्रम्। सार्द्धेन योगे त्रयोदश सार्द्धद्वादशेत्यर्थः। उन्मानरूपेण घटितानि सार्द्धद्वादशपलानि सा नाडिका सार्द्धद्वादशपलताम्रनिर्मितपात्रेण सा नाडिका ज्ञातव्येत्यर्थः। किं प्रमाणं तत् पात्रं कार्यं तदाह। सार्द्धद्वादशपलजलेन हि मागधदेशप्रस्थः पूर्यते तत्प्रमाणं पात्रं कार्यम् इत्यर्थात् सिद्धम्। ननु तथापि पात्रेण कथं नाडिकाज्ञानं क्रियापरिच्छेद्यत्वात् कालस्येत्याशङ्क्य क्रियासिद्धये प्रस्थादि विशिनष्टि हैमेति। माषः पञ्चगुञ्जः। हैमो माषैश्चतुर्भिश्चतुरङ्गुलेन शलाकारूपेण रचितैः कृतच्छिद्रा। एतदुक्तं भवति। सार्द्धद्वादशपलताम्रमयं मागधप्रस्थसंमितमूर्ध्वावतं पात्रं चतुर्भिश्चतुरङ्गुलहैममाषशलाकया कृताधश्छिद्रं जले स्थापितं तेन छिद्रेण यावता कालेन पूर्यते तावान् कालो नाडिकेति।

तथाच शुक्रः "द्वादशार्द्धपलोन्मानं चतुर्भिश्चतुरङ्गुलैः। स्वर्णमाषैः कृतच्छिद्रं यावत् प्रस्थजलप्लुतमिति"। श्रीधरव्याख्या। इत०। ङ्यूषोः संज्ञायां ह्रस्वः। घटियन्त्रमथात्र "ततः संसारचक्रेऽस्मिन् भ्राम्यते घटियन्त्रवत्" मार्क०पु०। वह्या कूपात् उद्धारणार्थं यन्त्रम्। ३कूपात् कूपोद्धारणार्थे यन्त्रभेदे। घटीयुक्तं यन्त्रं घटीयन्त्रं तच्च घटीयुक्तजलोद्धारणयन्त्रं पश्चिमदेशे प्रसिद्धम्। (जलतोलार कल)। "कमलपत्रपुटघटितघटीयन्त्रकाणि" काद०।

घटोत्कच पु० भीमेन हिडिम्बायास्तत्पुत्रे राक्षसभेदे तदुत्पत्तिकथा भा० आ० हिडिम्बवधप० १५५अ० यथा

"बिभ्रती परमं रूपं रमयामास पाण्डवम्। रमयन्ती तथा भीमं तत्र तत्र मनोजवा। प्रजज्ञे राक्षसी पुत्रं भीमसेनान्महाबलम्। विरूपाक्षं महावक्त्रं महाकर्णं विभीषणम्। भीमनादं श्रुताश्वोष्ठं तीक्ष्णदंष्ट्रं महास्वनम्। महेष्वासं महावीर्यं महासत्त्वं महाभुजम्। महाजवं महाकायं महामायमरिन्दमम्। दीर्घबाहुं महोरस्कं विकटोद्वृत्तमस्तकम्। अनासुरं मासुरजं भीमवेगं महाबलम्। यः पिशाचानतीत्यान्यान् बभूवातीव राक्षसान्। बालोऽपि यौवनं प्राप्तो मानुषेषु विशाम्यते!। सर्वास्त्रेषु परं वीरः प्रकर्षगमद्बली। सद्यो हि गर्भान् राक्षसो लभते प्रसवन्ति च। कामरूपधराश्चैव भवन्ति बहुरूपिकाः। प्रणम्य विकचः पादावब्रूच्छात् स पितुस्तदा। मातुश्च परमेष्वासौ च नामास्य चक्रतुः। घटो ह्यास्योत्कच इति माता तं प्रत्यभाषत। अग्रजौ तेन नामास्य घटोत्कच इति स्म ह। अनुरक्तश्च तानासीत् पाण्डवान् स घटोत्कचः। तेषाञ्च दयितो नित्यमात्मभूतो बभूव ह। संवासमसमो जीर्णे दत्त्वाभाष्य ततस्तु तान्। हिडिम्बा समयं कृत्वा स्वां गतिं प्रत्यपद्यत। कृतकाल उपस्थास्ये पितुरिति घटोत्कचः। आमन्त्र्य रक्षसां श्रेष्ठः प्रतस्थे चोत्तरां दिशम्। स हि स्फुटो मघवता शक्तिहेतोर्महात्मना। कर्णस्याप्रतिवीर्यस्य प्रतियोद्धा महारथः"।

स च द्रोणप० घटोत्कचवधप० इन्द्रदत्तशक्त्या कर्णेन निहतः। तत्कथा तत्र १८० अ० द्रष्टव्या यथा

"ततोऽब्रुवन् कुरवः सर्व एव कर्णं दृष्ट्वा घोररूपाञ्च मायाम्। शक्त्या रक्षो जहि कर्णाद्य तूर्णं नश्यन्त्येते कुरवो भार्गवास्त्रैः। करिष्यतः किञ्च नो भीमपार्थौ

तपत्समेनं जहि पापं निशीथे। यो नः संग्रामाद्घोररूपादहिरच्चेत् स नः पार्थान् सबलान् योधयेत। तस्मादेनं राक्षसं घोररूपं जहि शक्त्या वै दत्तया वासवेन। मा कौरवाः सर्व्व एवेन्द्रकल्पा रात्रियुद्धे कर्ण! नेयुः क्षयोधाः। स वध्यमानो रक्षसा वै निशीथे ह्वा राजं स्त्रासमानं बलञ्च। मत्वा श्रुत्वा निनदं कौरवाणां मतिं दध्रे शक्तिमोक्षाय कर्णः। स वै क्रुद्धः सिंह इवात्यमर्षी नामर्षयत् प्रतिघातं रणे तम्। शक्तिं घोरां वैजयन्तीसञ्ज्ञां समादद्दे तस्य वधं चिकीर्षन्। यासौ राजन्! निहिता वर्षपूगान् वधायाजौ सत्यता फाल्गुनस्य। यां वै प्रादात् स्वतपुत्राय शक्रः शक्तिं घोरां कृष्णाभ्यां निनाय। तां वै शक्तिं लेलिहानां प्रदीप्तां घायैर्युक्तामन्तकस्येव रात्रिम्। सत्यो: स्वसारं ज्वलितामिवोल्कां वैकर्त्तनः प्राक्षिणोद्राक्षसाय। तामुत्तमां घरकायावहन्तीं ह्वा सौतेर्व्याहुसंस्थां ज्वलन्तीम्। भीतं रक्षो विप्रदुद्राव राजन्! त्रुत्वात्मानं विस्फुरत्तुल्यप्रमाणम्। ह्वा शक्तिं कर्णबाहूत्तरस्थां नेदुर्भूतान्यन्तरीक्षे नरेन्द्र!। बभूवातास्तुमुलाश्चापि राजन्! सनिर्घाता घाशनिर्गां जगाम। सा तां मायां भस्म कृत्वा ज्वलन्ती भित्त्वा घाढं हृदयं राक्षसस्य। अर्हन् ययौ दीप्यमाना निशायां नक्षत्राणामन्तराण्याविशन्ती। युक्ता चित्रैर्विविधैः शस्त्रपूगैर्दिव्यैर्घोरो मानुषैराक्षसैश्च। तदद्यादान् विविधान् भैरवांश्च प्राणानिष्टांस्तत्राजितः शक्रशक्त्या। इदञ्चान्यच्चित्रमाश्चर्य्यरूपं चकारासौ कर्म्म शत्रुक्षयाय। तस्मिन् काले शक्तिनिर्भिन्नमर्म्मा बभौ राजन्! शैलमेघप्रकाशः। ततोऽन्तरीक्षादपतद्गतासुः स राक्षसेन्द्रो भुवि भिन्नदेहः। अयाक्शिरास्तथगात्रो विजिह्मो घटोत्कचो मङ्कदास्याव रूपम्। स तद्रूपं भैरवं भीमकर्म्मा भीमं ह्वा भैमसेनिः प्रपात। हतोऽप्येवं तव सैन्यैकदेशमपोथयत् स्वेन देहेन राजन्!"। [प्रथतयोथ्यत।

घटोत्कचान्तक पु० ६त०। कर्ण त्रिका०। घटोत्कचारि-

घटोदर पु० घट इव उदरमस्य। व्यञ्जनभेदे। "घटोदरो महापार्श्वः प्रथमः पिठरस्तथा" हरिवं० २१२अ०। किरणकशिपुसेनापत्यौ। स च परुषसख्यः यथाह भा० स० ६अ०। घटोदर इत्यादि समानम्।

घट्ट चालने भ्वा० आत्म० सक० सेट्। वट्टते अघट्टिष्ट। अघट्टे। घट्टित; घट्टनम्।

घट्ट चालने चुरा० उभ० सक० सेट्। घट्टयति-ते अघट्टयत्-त। घट्टित "विघट्टितानां सरकट्टमाणाम्" कुमा०। "नदीयमातङ्गघटाविघट्टितैः" "अस्खली चलशफरीविघट्टितघट्टनाद्रः" माघः। परिस्फुरन्नीलनिचयघट्टितोरवः" किरा०। "रथद्विराघट्टनया नभस्वतः माघः"।

घट्ट पु० घट्यतेऽत्र घञ्। १स्नानावावतरणस्थाने (घाट) २शुल्कग्रहणस्थाने (घाटि) "घट्टादिदेये शुल्कोऽस्त्री" अमरः। भावे घञ्। ३चालने। अमरः।

घट्टकुटीप्रभात न०घट्टस्था कुटी तत्र प्रभातमिव। न्यायभेदे शुल्कदानभिया विपणेन रात्रौ पलायमानस्य चौरबणिजः घट्टस्थकुटीसमीपे प्रभाते यथा अभीष्टसिद्ध्यभावः एवं विपणेन धावमानस्य तद्दोषतादवस्थ्यरूपो हि न्यायभेदसाधर्म्यभूतः "तदिदं घट्टकुटीप्रभातदृष्टान्तमनुहरति"। खण्डनखण्डखाद्यम्।

घट्टगा स्त्री नदीभेदे। राजनि०।

घट्टजीविन् पु० घट्टं तरिकरशुल्कस्थानं नद्यवतरणस्थाने देयं शुल्कं वा जीवति जीव-णिनि। (पाटुनि) नौकातारके वर्णसङ्करजातिभेदे स च "वैश्यावां रजकाज्जातः" विवादभङ्गार्णवसेतुः

घट्टना स्त्री चु० घट्ट-युच्। १चालने "रथद्विराघट्टनया नभस्वतः" माघः। २वृत्तौ च हेमच०। भा० घट्ट-ल्युट्। ३चालने न०। "दृढच्छिलानिष्ठुरकण्टघट्टनात्" माघः। "कम्पवतो महाद्वानुरुपादपघट्टनैः" हरिवं०२७०अ०। "शुष्कपर्णघट्ट दण्डघट्टनात्" रघुः।

घट्टित त्रि० घट्ट-कर्मणि क्त १निर्मिते, २चालिते, चित्रपटादेरञ्जनार्थम् अञ्जपूर्ण लिप्ते वसनादौ (कलप दिया घोंटा)। शब्दार्थचि०।

घण दीप्तौ तना० उभ० अक० सेट्। घणोति घणुते। अघाणीत्-अघणीत् अघणिष्ट जघाण जघणे। उदित् घणित्वा-घणट्टा। क्ङीट्कत्वात् निषा त्वनिट् घणट्टः।

घणट्ट त्रि० घण-क्त उदित्त्वेन नेट्। १दीप्ते २स्वनाभख्याते व्यञ्जनभेदे पु०।

घणटक पु०घणट्ट+संज्ञायां कन्। (घटकाष) क्षुपभेदे राजनि०

घणटकर्ण पु० घणटोदीप्तः कर्ण इव पत्रमस्य। (घटकाष) क्षुपभेदे राजव०।

घण्टा स्त्री चु० घटि-शब्दकरणे अच्। कांस्यनिर्मिते वाद्यभेदे। "घण्टां वा परशुं वापि वामतः सन्निवेशयेत्" दुर्गाध्यानम्। तन्निर्माणप्रकारमाकाशे स्कान्दे ब्रह्मनारदसंवादे "स्नानार्हं लक्षियाकाले घण्टानादं

करोति यः। पुरतो वासुदेवस्य तस्य पुण्यफलं शृणु। वर्षकोटिसहस्राणि वर्षकोटिशतानि च। वसते देवलोके तु अप्सरोगणसेवितः। सर्ववाद्यमयी घण्टा केशवस्य सदा प्रिया। वादनाद्भवते पुण्यं यज्ञकोटिसमुद्भवम्। वादित्रनिनदैस्तुर्यगीतमङ्गलनिस्वनैः। यः स्नापयति गोविन्दं जीवन्मुक्तो भवेद्धि सः। वादित्राणामभावे तु पूजाकाले हि सर्वदा। घण्टाशब्दो नरैः कार्यः सर्ववाद्यमयी यतः। सर्ववाद्यमयी घण्टा देवदेवस्य वल्लभा। तस्मात् सर्वप्रयत्नेन घण्टानादन्तु कारयेत्। मन्वन्तरसहस्राणि मन्वन्तरशतानि च। घण्टानादेन देवेशः प्रीतो भवति केशवः"। विष्णुधर्म्मोत्तरे श्रीभगवत्प्रह्लादसंवादे "शृणु दैत्येन्द्र! यच्छामि घण्टामाहात्म्यमुत्तमम्। प्रह्लाद! त्वत्समो नास्ति मद्भक्तो भुवनत्रये। मम नामाङ्किता घण्टा पुरतो मम तिष्ठति। अर्च्चिता वैष्णवश्रेष्ठे तत्र मां विद्धि दैत्यज!। वैनतेयाङ्किता घण्टां सुदर्शनयुतां यदि। ममाग्रे स्थापयेद्यस्तु देहे तस्य वसाम्यहम्। यस्तु वादयते घण्टां वैनतेयेन चिह्नितम्। धूपे नीराजने स्नाने पूजाकाले विशेषतः। ममाग्रे प्रह्लाद वत्स! प्रत्यहं लभते फलम्। मघायुतं गोऽयुतञ्च चान्द्रायणशतोद्भवम्। विधिना ज्ञानतः पूजा सफला जायते नृणाम्। घण्टानादेन तुष्टोऽहं प्रयच्छामि स्वकं पदम्। नागारिचिह्नितां घण्टां रथाङ्केन समन्विताम्। वादनात् कुरुते नाशं जन्मसप्तभवस्य च। गरुडेनाङ्कितां घण्टां दद्याद्यः प्रह्लाद सदा। प्रीतिं करोमि दैत्येन्द्र! लक्ष्मीं प्राप्य यथाधनः। दद्याद्धृतं यथा देयाः प्रीतिं कुर्व्वन्त्यहर्निशम्। तथैव च तथा प्रीतिं घण्टाशिखरमास्थिते। स्वकरेण प्रकुर्व्वन्ति घण्टानादं सुभक्तितः। मदीयार्च्चनकाले तु फलं कौञ्चैन्द्रवं कलौ"। अन्यत्र च "घण्टादण्डस्य शिखरे सचक्रं स्थापयेत्तु यः। गरुडं वै प्रियं विष्णोः स्थापितं भुवनत्रयम्। सचक्रघण्टानादन्तु शृणुकाले शृणोति यः। पापकोटियुतस्यापि नश्यन्ति यमकिङ्कराः। सर्व्वे दोषाः प्रलीयन्ते घण्टानादे कृते हरेः। देवतानां मुनीन्द्राणां पितृणाञ्चोत्सवो भवेत्। अभावे वैनतेयस्य चक्रस्यापि न संशयः। घण्टानादेन भक्तानां प्रसादं कुरुते हरिः। गृहे यस्य भवेच्चित्रं घण्टा नागारिसंयुता। न सर्पाणां तत्र भयं नाग्निविद्युत्समुद्भवम्। यस्य घण्टा गृहे नास्ति भद्रञ्च पुरतो हरेः। कथं भागवतं नाम गीयते तस्य देहिनः" "अतो भगवतः प्रीत्यै घण्टा श्रीगरुडान्विता। सं योज्या वैष्णवै र्यत्नाच्चक्रेणोपरिसंस्थिता। स्नाने शङ्खादिवाद्यन्तु नामसंकीर्त्तनं हरेः। गीतं मङ्गलं पुराणादिपठनञ्च प्रशस्यते" हरिभक्तिविलासः। सर्व्वदेवपूजने धूपदीपदानोत्तरं वामहस्तेन घण्टावादनं तन्त्रसारे उक्तं यथा

"धूपभाजनमस्त्रेण (फट्) प्रोक्षाभ्यर्च्च हृदादिना (नमः)। अस्त्रेण पूजितां घण्टां वादयन् गुरुगुरुं दहेत्"। श्यामादौ तु तन्त्रान्तरविशेषः तन्त्रसारे उक्तः "तथा जयध्वनिमन्त्रेमातः स्वाहेत्यूर्द्ध्वं च। अभ्यर्च्च वादयेद् घण्टामस्त्रेण धूपयेत्ततः" गौतमोक्तं "उत्तोल्य हृदिपर्य्यन्तं घण्टां वामदिशि स्थिताम्। वादयन् वामहस्तेन दक्षहस्तेन चार्चयेत्"। एवं नीराजनेऽपि। २घण्टापाटलिवृक्षे शब्दर०। ३अतिबलायां ४नागबलायां च राजनि०। [हुजे शब्दर०।

**घण्टाक** पु० घण्टेव कायति प्रकाशते कै-क। घण्टापाटलि

**घण्टाकर्ण** पु० शिवानुचरभेदे (घेँटु) ख्याते "घण्टाकर्णोगणः श्रीमान् शिवस्यातीव वल्लभः" शिवपु०। मीनसंक्रान्तौ तस्य पूज्यतामाह कालविलासधृतौ "चैत्रे मासि च संपूज्यो घण्टाकर्णो घटात्मकः। आरोग्याय सुखीमूले संक्रान्त्यां तत्र कारयेत्"। पूजामन्त्रः। "घण्टाकर्ण! महावीर! सर्व्वव्याधिविनाशन!। विस्फोटकभये प्राप्ते रक्ष रक्ष महाबल!" तिं तं०। २काशीस्थे हृदभेदे। "इदञ्च चित्रघण्टेशी घण्टाकर्णस्त्वयं हृदः" काशी० ३३अ०।

**घण्टाताड** पु० घण्टां कालज्ञापकघण्टां ताडयति ताडि-अण् उप० स०। १कालज्ञापकघण्टावादके (घण्टापाँड़े) "मैत्रेयकन्तु वैदेहो माधुकं संप्रक्षयते। नृनृ प्रथंसत्यज्ञ खं यो घण्टाताडोऽस्थादये" मनूक्ते २सङ्कीर्णजातिभेदे च

**घण्टानाद** पु० ६त०। १घण्टाशब्दे। घण्टाया नाद इव नादोऽस्य। २कुबेरमन्त्रिभेदे शब्दार्थचि०।

**घण्टापथ** पु० घण्टानां घण्टादिवाद्यानां घण्टायुक्तरथादीनां वा पन्थाः ६त० अच् समा०। सङ्कटि १राजपथे "दशधन्वन्तरो राजमार्गो घण्टापथः स्मृतः" कौटिल्यः।

**घण्टापाटलि** पु० घण्टते शब्दते घण्ट-कर्मणि ट टस्य नेत्वम् नि० घत्वं षट-गतौ णच् पाटलं काति खा-बा० कि कर्म०। (घण्टापाडलि) वृक्षभेदे अमरः।

घण्टारवा स्त्री घण्टेवारौति आ+रु-अच्। (वनशण) द्रुमभेदे अमरः यस्य फलं पक्वं सत् घण्टेवारौति

घण्टालो स्त्री घण्टां तच्छब्दमलति अल-अण् ङीप्। १कोषातक्याम्। ६त०। २घण्टाशब्दे च। राजनि०।

घण्टावीज पु० घण्टेव बीजमस्य। जयपालवृक्षे। राजनि०

घण्टाशब्द पु० घण्टायाः शब्दइव शब्दोयस्य। १कांस्ये हेमच०। ६त०। २तच्छब्दे

घण्टिका स्त्री क्षुद्रा घण्टा स्वार्थे कन्। क्षुद्रघण्टायां तत्तुल्याकारत्वात् २तालुस्थजिह्वायाञ्च (आलजिव) हेमच०।

घण्टिनीबीज न० घण्टाऽस्त्रस्याःतदाकारफलत्वात् इनि ङीप् घण्टिन्याः वराटावृक्षाया बीजम्। जयपाले राजनि०।

घण्टु पु०घट्टि-उन्। १गजघण्टायां २प्रतापे च उणादिकोषः

घण्टेश्वर पु० भङ्गलपले ब्रह्मदातरि देवभेदे "भङ्गलस्य प्रिया मेधा तस्यां घण्टेश्वरोमहान्। ब्रह्मदाता च तेजस्वी विष्णुतुल्यो बभूव ह" ब्रह्मवै०।

घण्ड पु० घण-ड० ड तस्य नेत्वम्। भ्रमरे संक्षिप्तसारः।

घतन त्रि० हन्ति हन-हनेर्युं आद्यन्तयोर्घत्वतत्वे" उणा० युन्। मारके उज्ज्वलद० ब्रवार्थे घातनेति पाठोऽयुक्तः

घन पु० हन-मूर्त्तौ अप् घनादेशश्च। १मेघे २मुस्तके ३समूहे ४दार्ढ्ये ५विस्तारे च ६लौहमुद्गरे मेदि० ७शरीरे ८कफे ९अभ्रके राजनि०। "समस्तिघातश्च घनः प्रदिष्टः" इति १०लोलाख्यशुक्ले समाहृतव्यवसे। ११निविडे सान्द्रे त्रि० अमरः १२ दृढ़े त्रि० मेदि०। १३पूर्णे १४सम्पुटे त्रि० शब्दर०। १५करतालादिवाद्यभेदे १६मध्यम ऋत्वे च न० अमरः। १७लौहे न० हेमच० १८त्वचे न० राजनि०। तत्र मेघस्योत्पत्तिभेदादिकं पुराणसर्वस्वे ब्रह्माण्डपु० उक्तं यथा

"सूर्य्यः किरणजालेन वायुयुक्तेन सर्व्वतः। जगतो जलमादत्ते क्षुत्क्षाम द्विजसत्तमाः!। आदित्यभूतं भूतेभ्यः सोमं संक्रमते जलम्। नाडीभिर्वायुयुक्ताभिर्लोकाधारः प्रवर्त्तते। यत् सोमाद्भवते शुक्लं तदभ्रेष्वतिष्ठते। मेघाद्भाभिघातेन विद्युज्जनि जलं भुवि। एवं प्रकरणेनैव पतते चासजलात्मकम्। न नाशमुदकस्यास्ति तदेव परिवर्त्तते। सन्धारणार्थं भूतानां मायैषा विष्णुनिर्मिता। अनया मायया व्याप्तं त्रैलोक्यं सचराचरम्। विश्वेशो लोकभृद्देवः सहस्रांशुः प्रजापतिः। धाता क्षुत्सृष्ट लोकस्य प्रभविष्णुर्दिवाकरः। सार्व्वलौकिकमम्भोत्र क्षुत् लोको नभसोरसः। एवं भूतं जगत् सर्व्वमेतत्सूर्य्य प्रकीर्त्तितम्। सूर्य्यादुष्णं निक्षरति सोमाच्छीतं प्रवर्त्तते। शीतोष्णवीर्य्यौ द्वावेतौ युक्त्या पाचयतो जगत्। सोमाक्षतोद्भवा मङ्गा पवित्रा विमलोदका। भद्राकोमपुरोगाश्च महानद्यो द्विजोत्तमाः!। सर्व्वभूतशरीरेषु यास्रावोऽपक्षतात्मनि। तेषु सन्दह्यमानेषु जङ्गमस्थावरेषु च। पूर्य्यन्ते सर्व्वभूतेभ्यो निष्क्रामन्तीह सर्व्वशः। तेन चाम्भांसि जायन्ते स्थानमभ्रमयं स्मृतम्। तेजोऽर्कः सर्व्वभूतेभ्य आदत्ते रश्मिभिर्जलम्। सप्तद्वाहायुसंयोगाद्रश्मयः प्रवहन्त्यपः। ततस्तृतीये काले परिक्षीणो दिवाकरः। नियच्छत्यपोमेघेभ्यः शुक्लकृष्णैर्गभस्तिभिः। अभ्रस्थाः प्रपतन्त्यापो वायुना समुदीरिताः। सर्व्वभूतहिताधाय रसभूताः समन्ततः। ततो वर्षति षण्मासान् सर्व्वभूत विवृद्धये। वायव्यं स्तनितञ्चैव विद्युदग्निसमुद्भवा। मेहनाच्च भिदेर्धातोर्मेघत्वं व्युत्पद्यत्युत। न भ्रमन्ति यतश्चाभ्रमभ्रं ततो विदुः। मेघानां पुनरुत्पत्तौ त्रिविधा योनिरुच्यते। अग्निजा ब्रह्मजा चैव पद्मजा च पृथग्विधाः। त्रिधा घनाः समाख्याताश्चेषां वक्ष्यामि सम्भवम्। आग्नेयाः क्षुच्छ्वासाः सोमात्तेषां धूमात् प्रवर्त्तनम्। शीतदुर्दिनवाता ये स्वयुक्तास्ते व्यवस्थिताः। सह्याच्च वराहाच्च मलयात्कृष्णपिङ्गाः। भूत्वा धरणिमध्येत्य रमन्ति विचरन्ति च। जीमूता नाम ते मेघा ये तेभ्यो जीवसम्भवाः। विद्युदग्निविहीनाश्च जलधारावलम्बिनः। सका मेघा महाकाया आयुक्तस्य यशानुगाः। क्रोशमात्राच्च वर्षन्ति क्रोशार्द्धादपि वा पुनः। पर्वताग्रनितम्बेषु वर्षन्ति शङ्करेषु च। पद्माकागर्भदाश्चैव याज्ञाका गर्भधारिणः। ब्रह्मजाश्चैव ये मेघा ब्रह्मनिश्वाससम्भवाः। ते च विद्युदग्नयोपेताः स्तनयित्नुनिस्वनाः। तेषु शब्दप्रणादेन भूमेःस्वाङ्गरुहोद्भवैः। वायुवाक्षाभिधिक्तेषु वायुर्यौवनमश्नुते। तेषियं प्राकृताक्षाता भूतानां जीवितोद्भवा। जीमूता नाम ते मेघा ये तेभ्यो जीवसम्भवाः। द्वितीयं प्रवहं वायुं मेघाक्षे तु समाश्रिताः। दृतो योजनमात्राच्च षड्भिर्द्वादपि वा च ते। दृष्टिधर्मो हृषा तेषां धाराऽऽसारः प्रकीर्त्तितः। पुष्करावर्त्तका नाम ये मेघाः पद्मसम्भवाः। संयोगाद्वायुनोक्तिप्ताः पर्वतानां महौजसाम्। कानगानां च लोकानां सर्व्वेषां शिवमिच्छताम्। पुष्करा नाम ते मेघा उच्यन्ते ऽमृत-

सराः। पुष्करावर्त्तकाख्येन कारणेनेह सङ्गिताः। नानारूपधराश्चैव मङ्गाधोरवनाश्च ये। कल्पान्तदृष्टेः स्रष्टारः संवर्त्ताग्नेर्नियामकाः। वर्षन्ति ते युगान्तेषु तृतीयाख्ये प्रकीर्त्तिताः। अनेकरूपसंस्थानाः पुरस्तो मङ्गीतनम्। वायुं परिवहं ते स्युः स्थिताः कल्पान्तसाधकाः। योऽण्डस्य च विभिन्नस्य प्राकृतस्याभवत्तदा। यस्मात् ब्रह्मा ससृजुपद्मचतुर्वक्त्रः स्वयम्भुवः। तस्यैवास्यकृपालानि सर्वमेघाः प्रवर्त्तिताः। तेषामाद्यायनं धूमः सर्वेषामविशेषतः। तेषां श्रेष्ठस्तु पर्जन्य चत्वारश्चैव दिग्गजाः। गजानां पर्वतानाञ्च मेघानां भोगिभिः सह। कुलमेकं पृथक् भूतं योनिस्त्वेकं जलं स्मृतम्। पर्जन्यो दिग्गजाश्चैव हेमन्ते शीतसम्भवाः। तुषारवृष्टिं वर्षन्ति हिमं सस्यविदह्यते"।

वायुविशेषकृतएव घनभेदो भा॰शा॰३३०अ॰ दर्शितो यथा "प्रेरयत्यभ्रसंघातान् धूमजांश्चोष्मजांश्च यः। प्रथमः प्रथमे मार्गे प्रवहो नाम योऽनिलः। अम्बरे स्तेऽम्भस्येत्य तडिद्द्योतसद्युतिः। आवहो नाम संभाति द्वितीयः स्वनयोनदन्। उदयं ज्योतिषां यस्तु सोमादीनां करोति यः। अन्तर्देशेषु चोदानं यं वदन्ति मनीषिणः। ऊर्ध्वतुर्यः समुद्रेभ्यो वायुर्धारयते जलम्। उद्गृह्यादत्ते चापो जीमूतेभ्योऽम्बरेऽनिलः। योऽद्भिः संयोज्य जीमूतान् पर्जन्याय प्रयच्छति। उद्वहो नाम वंहिष्ठ स्तृतीयः स सदागतिः। समुत्थमाना बहुधा येन नीताः पृथग्घनाः। वर्षमोक्षतारम्भास्ते भवन्ति घनाघनाः। संहता येन चाविद्धा भवन्ति नदता नदाः। रक्षणार्थाय सम्भूताः मेघत्वमुपयान्ति च। योऽसौ वहति भूतानां विमानानि विहायसा। चतुर्थः संवहो नाम वायुः स गिरिमर्दनः। येन वेगवता रुग्णा रूक्षेणारुजता नगान्। वायुना सहिता मेघा स्ते भवन्ति बलाहकाः। दारुणोत्पातसङ्घारो नभसः सनयित्नुमान्। पञ्चमः स महावेगो विवहो नाम मारुतः। यस्मिन् पारिप्लवा दिव्या बहुलप्रापोविहायसा। पुण्यच्छायाघनच्छाया स्तोयं विस्रम्य तिष्ठति"।

समविघातत्वेत्यादेरयमर्थः समसंख्यानां त्रयाणां घातः यद्यप्यत्र समयोर्द्वयोर्घातेन वर्गरूपेण तन्मूलस्य समत्वं नास्ति तथापि समशब्देन सदृशघातद्विघातत्वेन समत्वं बोध्यं यथा १घनः १। द्वाभ्यां द्वयोर्गुणने ४चत्वारः तेषां द्वाभ्यां गुणनेन ८। एवं त्रयाणां त्रिभिर्गुणने ६नव तेषां पुनस्त्रिभिर्गुणने २७। एवं क्रमेण वारद्वयं समसमहिघातरूपवर्गगुणनात् घनरूपत्वं जायते तत्रैकादीनां दशपर्य्यन्तानां घनसंख्याः सुबोधाय प्रदर्श्यन्ते यथा

१।२।३।४।५।६।७।८।९।१०
१।८।२७।६४।१२५।२१६।३४३।५१२ ७२९।१०००

अस्य प्रकारान्तरं स्याद्योघनोन्यस्त्रेत्यादि लीलावत्यां दृश्यं विस्तरभयान्नोक्तम्।

"जटासुक्षां विषर्य्यस्य घनमाहुर्मनीषिणः" इत्युक्ते ऋग्वेदपाठभेदे ऋग्वेदशब्दे १४०९।१।१२ पृ॰ विवृतिः तत्र स्तनयित्नुः प्रचण्डघनगर्जितप्रतिरुतानुकारी (रवः) शब्दः "वेणी०।" "जघनेन घनेन सा" "लौहोद्गनघनस्वनाः" भट्टिः। लौहशब्दे "प्रतिजघान घनैरिव मुष्टिभिः" किरा०। मेघे "प्राहुर्घनमिव घनकेशजालाम्" काद०। "रजनीतिमिरावगुण्ठिते पुरमार्गे घनशब्दविह्वलाः" कुमा० "असम्भवद्घनरसा शतह्रदोपरिवेषिता" उद्भटः। घनश्यामः। मूर्त्तौ-काठिन्ये "हारं तमोघनप्रख्यम्" भट्टिः। "तमसोघनो मूर्त्तिः काठिन्यम् तेन मूर्त्तिमत्तमःसमम्" जयम०। [त्रिका०।

**घनकफ** पु॰ घनस्य मेघस्य कफ इव। मेघोपले करके।

**घनकाल** पु॰ घनप्रधानः कालः। वर्षर्त्तौ शब्दच०।

**घनगोलक** पु॰ घनेन मूर्त्त्या गोल इव कायति कै-क। संश्लिष्टस्वर्णरजते हेमच०। [चि०।

**घनच्छद** पु॰ घना निविडाश्छदा यस्य। शिखौ। शब्दार्ण

**घनजम्बाल** पु॰ कर्म०। सान्द्रजम्बाले चुलुके (घनसेओयाला) त्रिका०। [दीर्घौ च शब्दर०।

**घनज्वाला** स्त्री घनस्य ज्वालेव। १वह्नाम्नौ। हेत०। २मेघ-

**घनताल** पुंस्त्री॰ घनतायां निविडतायाम् व्याप्तौ पर्य्याप्नोति व्याप्-अच्। १सारङ्गवृक्षे स्त्रियां जातित्वात् ङीप्। कर्म्म०। २वाद्यादितालभेदे।

**घनतोल** पुंस्त्री॰ घनं मेघं तोलयति ऊर्द्धं नयति आकाशेन तुल-उन्मानौ अण् उप॰ स॰। घातके वृक्षे तदारोपेण हि मेघोत्थानमनुभूयते इति तस्य तथात्वम्। स्त्रियां जातित्वात् ङीष्।

**घनत्वच** पु॰ घना निविडा त्वक् यस्य। शिखौ शब्दार्थचि॰।

**घनद्रुम** पु॰ कर्म०। विल्वशटकहिन्ते राजनि०।

**घननाभि** पु॰ घनस्य मेघस्य नाभिरिव योनित्वात्। धूमे शब्दर॰ धूमस्य मेघयोनित्वात् तथात्वम् मेघस्य धूमयोनित्वं च घनशब्दे २७८६पृ॰ दर्शितम्।

**घनपत्र** पु॰ घनानि पत्राण्यस्य । १पुनर्णवावाम् राजनि॰ । २घनच्छदे त्रिषौ च ।

**घनपदवी** स्त्री ६त॰ । आकाशे शब्दार्थचि॰ । तस्य मेघाधारतया तत्सञ्चारस्थानतया च तथात्वम् । "क्रामद्भिर्घनपदवीमनेकसंख्यैः" किरा॰ ।

**घनपल्लव** पु॰घना निविड़ाः पल्लवा अस्य । शोभाञ्जने जटा॰।

**घनपाषण्ड** पुंस्त्री घनेन मेघध्वनिना पाषण्ड इव उन्मत्तत्वात् । मयूरे शब्दमा॰ । स्त्रियां जातित्वात् ङीष् ।

**घनफल** पु॰ घनानि निविड़ानि फलान्यस्य । विकङ्कटवृक्षे राजनि॰ तत्फलानां निविड़तया जायमानत्वात्तथात्वम् ।

**घनमूल** न॰ घनस्य समत्रिघातस्य मूलमाद्यम् । यस्य समाङ्कस्यत्रयघातस्य घनरूपता तादृशे अङ्के । एकाद्यङ्कानां घनमूलादि प्रदर्श्यते

१।८।२७।६४।१२५।२१६।३४३।५१२।७२९।१०००

१।२। ३। ४। ५। ६। ७। ८। ९। १०

तस्य मूलानयनं लीला॰ उक्तं यथा

"अथ घनमूले करणसूत्रं इत्तद्वयम्। "आद्यं घनस्थानमवाधाने हे पुनस्तद्वान्त्याद्धनतो विशोध्य। घनं पृथक्स्थं, पदमस्य छित्वा त्रिघ्ना तदाद्यं विभजेत् फलन्तु। पंक्त्यां न्यसेत्, ततश्चतिमन्त्यनिघ्नीं त्रिघ्नीं त्यजेत्तत्प्रथमात्, फलस्य। घनं तदाद्याद्घनमूलमेवं षड्भिर्भेदैरमतः पुनश्च"

स्वार्थः यस्य घनमूलं ज्ञातुं तस्यादौ स्थानं घनस्थानं स्यात् घनशोधनस्थानमित्यर्थः । अथ हे स्थाने अधने तद्व्यतिरिक्ते तथा पुनः घनस्थानम् अधने हे इति पुनःपुनरित्यर्थैः। अन्त्यात्घनतः स्थानात्घनं विशोध्य तस्य घनस्य घनं पृथक्स्थं स्याथ तस्य पदस्य छित्वा त्रिघ्ना तदाद्यम् अधनस्थानं विभजेत्। फलं तु पूर्व्वमूलपङ्क्त्यां न्यसेत्। तस्य फलस्य छतिम् अन्त्यनिघ्नीं षड्भिस्त्यक्त्वा व्यतिरिक्त पूर्वछतिनिघ्नीमित्यर्थः। त्रिघ्नीञ्च तत्प्रथमादाद्यघनस्थानात् त्यजेत्। तदाद्यात्घनस्थानात्फलघनं त्यजेत्। एवं पुनः तद्यथा अस्य षड्भात्मकपदस्य छित्वा त्रिघ्ना तदाद्यं विभजेत्। फलन्तु पङ्क्त्यां न्यसेत्। ततश्चतिम् अन्त्यनिघ्नीं त्रिघ्नीं तत्प्रथमात् त्यजेत्। तदाद्यात् फलस्य घनं त्यजेदिति। एवंछते या षड्भिर्भवेत् तद् घनमूलं भवति"। "अङ्कस्य वामामतिः" इत्युक्तेः वामस्थिताङ्कस्यान्त्यं दक्षिणस्थस्य चाद्यत्वमिति सर्व्वत्र ज्ञेयम्। घनपदमत्र। "घनपदञ्च ततोऽपि घनात् परे। यदि घनेऽस्ति घना भवतोमतिः" लीला॰ । घनं मूलमस्य । २मोरटवृक्षे पु॰ राजनि॰ ।

**घनरस** पु॰ घनस्य मेघस्य सुखकस्य वा रसो निष्यन्दः । १जले । २कर्पूरे च कर्म॰ । ३चान्द्ररसे । घनोरसोऽस्य । ४मोस्तुपर्णां ५मोरटवृक्षे च मेदि॰ । ६निविड़रसके त्रि॰ । जले तु न॰ रत्नको॰ । [किरा॰ ।

**घनवर्त्मन्** न॰ ६त॰ । आकाशे "घनवर्त्म सङ्कसयेव कुर्वन्"

**घनवल्लिका** स्त्री घना निविड़ा वल्ली यस्याः कप् हुस्वः । १अस्तसञ्चारतायाम् । घनस्य वल्लीव २विद्युति राजनि॰

**घनवल्ली** स्त्री घनस्य मेघस्य वल्लीव । १विद्युति २अस्तसञ्चारतायाम् राजनि॰ । [६त॰ । २मेघवाते ।

**घनवात** पु॰ घनो निविड़ोवातोऽत्र । १नरकभेदे हेमच॰ ।

**घनवास** पु॰ घनोवासो मध्योऽस्य । कुशाग्रके शब्दा॰ ।

**घनवाहन** पु॰ घन इव शुभ्रं वाहनमस्य । १शिवे । घनो मेघो वाहनमस्य । २इन्द्रे च हेमच॰ ।

**घनवीथि** स्त्री घनानां वीथिः । आकाशे । "घनवीथिवीथि भवतीर्णवतः" माघः ।

**घनश्याम** पु॰ घनः मेघइव श्यामः । निविड़कृष्णवर्णे । "अये राम घनश्याम ! चुम्बामि सखपङ्कजम् । यदि जीवामि शोकेन पुनर्द्रक्ष्यामि ते सखम्" महानाटकम् । "घनश्यामकचैर्विन्यस्तस्फुरन्मकरकुण्डलम् । क्षेमाम्बरं घनश्यामं श्रीवत्सं श्रीनिकेतनम्" भाग॰ श्रीकृष्णरूपोक्तौ ।

**घनसार** पु॰ घनस्य सुखकस्य सारः । १कर्पूरभेदे १७२३ पृ॰ विद्वतिः । "शरदिन्दुकुन्दघनसारनीहारहारेत्यादि" दशकुमा॰ । घनोनिविड़ः सारोऽस्य । २दक्षिणावर्त्तसारदे मेदि॰ । ३उत्तमभेदे ४जले च धरणी । ६त॰ । ५मेघे च वारिदे ।

**घनस्कन्ध** पु॰ घनः स्कन्धो यस्य । कोशाम्रवृक्षे राजनि॰ ।

**घनस्वन** पु॰६त॰ । १मेघध्वनौ । घनेन तज्जन्येन स्वनु अनिति अन-अच् ३त॰ । २तस्तुकीयशाके राजनि॰ ।

**घनहस्त** पु॰ घनः समत्रिघातसितोहस्तोऽत्र । दीर्घविस्तारोर्द्धेषु १हस्तमाने २मागधप्रस्थकारिकायां च "हस्तोन्नितैरिसृतिदैर्घ्यविस्तृतैर्वेदाहतशास्त्रं घनहस्तसंज्ञम् । धान्यादिके तद्घनहस्तमानं शास्त्रोदिता मागधप्रस्थकारिका सा" लीला॰ ।

**घना** स्त्री घन+अस्त्यर्थे अच् । १माषपर्णां २रुद्रजटायाञ्च राजनि॰ तयोर्निविड़पत्रत्वात् तथात्वम् । ३निविड़तायां स्त्रियाम् । "यदीवसीमपि घनाम्" (राजम्) माघः ।

**घनाकर** पु० ६त०। घनानामाकरः घनान् आकिरति आ+कृ–अच् वा। वर्षाकाले शब्दरत्ना०।

**घनागम** पु० आगम्यतेऽत्र आ+गम–आधारे घञ्। घनानां मेघानामागमः ६त०। वर्षाकाले "घनागमे राजपथे हि पिच्छिले" नैष०। भावे घञ् ६त०। २मेघागमने च।

**घनाघन** पु० हन–अच् नि०। १रन्ध्रे २वर्षुकमेघे मत्ते धातुके ३मञ्जे, अमरः ४अन्योन्यहनने पु०। ५निरन्तरधातुके त्रि० हेमच०। "ततोऽब्जुनं भिन्नकटेन हन्निना घनाघनेनानिलतुल्यवर्च्चसा" भा० क० १८अ०। वर्षुकमेघश्च भा० शा० ३२०अ० दर्शितो यथा "वसुश्लाघा बहुधा येन नीताः पृथक्पृथाः। वर्षमोघ इतारम्भास्ते भवन्ति घनाघनाः" "असञ्जह्रावुनाधिप्रे यथा खस्थो घनाघनः" हरि० ८७। ७काकमाच्यां स्त्री

**घनात्यय** पु० घनानामत्ययोयत्र। शरत्काले हेमच०। "वार्तिकानां घनात्यये"सुश्रु०। ६त०। २घनातिक्रमे पु०। घनव्यपायोऽत्र। "घनव्यपायेन गभस्तिमानिव" रघुः

**घनामय** पु० घनो दृढ़ः आमयो यस्मात् ५त०। खञ्जूरवृक्षे त्रिका०।

**घनामल** पु० घनोऽमलः विशेषणस०। वास्तूकशाके त्रिका०

**घनाम्बय** पु० ६त०। व्याकाशे हेमच०।

**घनोदधि** पु० घन उदधिरत्र। नरकभेदे हेमच०।

**घनोपल** पु० ६त०। करके (शिल) हेमच०।

**घस्व** गतौ भ्वा० पर० सक०सेट्। घस्वति अघस्वीत्। जघस्व

**घर** पु० हन्यते गम्यतेऽतिथिभिः हन–"हनेरन् घच्च" उणा० नलोपश्च। मट्टे दशपादीवृत्तिः।

**घरट्ट** पु० घ–सेके विच् घरं सेकमट्टते घट्ट–अतिक्रमे अण् उप० स०। (याँता) प्रसिद्धे शस्त्रपेषणयन्त्रे "अतिघट्ट-पथे घरट्टजातम्" नैष०। [मतुप्प्रभेदे शब्दर०।

**घर्घट** पु०घ–विच् घरं सेकाय घटते घट अच्। (आङ्गारा)

**घर्घर** पु० घर्घ अनुकरणशब्दं राति रा–क। १घरट्टजादिध्वनिभेदे। २तद्युक्ते त्रि० "कलहाच्च घनात् यदुत्थिताद्धनाद्यञ्जति घनेस्वरः" नैष०। ३पर्व्वतहारे ४हारे ५उलूके ६नदभेदे च पु० मेदि०। ६ध्वनिमात्रे ७व्याख्ये हेमच०। घर्घरनदश्च कुरुदेशान्तर्गतः विन्ध्याद्रेर्निर्गतः शब्दायां शङ्खतः चम्पानगरीतोऽनतिदूरपूर्व्वस्थः। (घाघर) लोकप्रसिद्धः दन्तुदृश्यशब्दायां स्त्री। "घर्घरा क्षुद्रघण्टी स्यात्" मल्लि० घृतवाक्यम्। "चत्वारश्चूडाः कृकवर्घरारवैः" माघः। घर्घरेति शब्दानुकरणम् तथा ध्वनिभेदः। तादृशध्वनिभेदएव घर्घरेति मल्लि०। ६वीणाभेदे मेदि०। घर्घर+अस्त्यर्थे अच्। घर्घर नदशब्दतायां १०शङ्खायां स्त्री वा गौरा० ङीष्। घर्घरस्वनाश्यत्र। "घृणावती घृणिनिधिर्घर्घरी घृकनादिनी। घृकृणापिङ्गरतनुर्घर्घरा घर्घरस्वना" काशीख० २८अ० शङ्खनामोक्तौ। स्वार्थे क नदभेदे पु०। "शोणे घर्घरके जलं तु रुचिदं सन्तापशोषापहम्। पथ्यं वह्निकरम् तथा तु बलदं चीणाङ्गदाह्लिप्रदम्" राजनि०।

**घर्घरिका** स्त्री घर्घरोऽस्त्यस्याः ठन्। १क्षुद्रघण्टिकायां २नदीभेदे ३वादित्रभाण्डे ४व्यटधान्ये हेमच०। ५वाद्यभेदे विश्वः।

**घर्घरित** न० घर्घरं करोति णिच्–भावे क्त। शूकरजातीय ध्वनिभेदे। "निगद्यते घर्घरितं स्वखेदं जविष्णु मायामयशूकरस्य" भाग० ३।१३।२५।

**घर्घुर्घा** स्त्री घ—विच् घुर–ध्वनौ क्विप् तौ हन्ति हन–ड नि० हस्य घः। (घुरघुरिया) कीटभेदे यमकीटे रत्नमा०

**घर्ज** गतौ भ्वा० पर० सक० सेट्। घर्जति अघर्जीत्। जघर्ज

**घर्म्म** पु० घरति अङ्गात् घ–सेके (चरणे) कर्त्तरि मक् नि० गुणः। १अङ्गनिष्यन्दे स्वेदे अमरः। घरत्यङ्गमनेन करणे मक्। २आतपे ३ग्रीष्मकाले तयोः अङ्गस्वेदसाधनत्वात्तथात्वम्। ४आतपयुक्ते दिवसे निघ०। घर्म्मश्च आतपादिव खरविकारसत्त्वादपि भवति यथाह वाग्भ० "विकाराः रुक्षसम्भूता सात्विकाः परिकीर्त्तिताः। सत्वमात्रोद्भवत्वात्ते भिन्ना अप्यनुभावतः। तस्माः स्वेदोऽथ रोमाञ्चः स्वरभङ्गोऽथ वेपथुः। वैवर्ण्यमश्रु प्रलय इत्यष्टौ सात्विकाः स्मृताः" इति विभज्य "बहुर्जलोद्भवः स्वेदो रतिधर्म्मश्रमादिभिरिति" सकारणं स्वेदोक्तितः ५यज्ञे निघ०। "पितृभिर्धर्म्मसद्भिः" ऋ० १०।१५।८। "धर्मसद्भिः यज्ञसदादिभिः" भा०। वै० घ–दीर्घो मक्। वैदिकप्रयोगे ह्रस्वदीर्घे त्रि० घर्मस्वरूपशब्दे उदा०। ७रसे "मधुनः सारघस्य घर्मं पात वसवः" यजु० ३८।६। "घर्मं रसम्" वेददी० दीर्घादि निघण्टौ दुग्धे पु० तस्य गोःचरणात्तथात्वम्। "घर्माय दीर्घ" यजु० ३८।२। हे वत्स! घर्माय घर्मार्थं दीर्घ देहि पयः क्षीरं मा सर्व्वं पासीत्यर्थः" वेददी०। "रज्जुसंदानमादाय" काशी० स्त्री० २६।४।१। "सन्दानम् घर्मधुगवन्ननार्थाय पाशवती रज्जुः'कर्कः। "उपयमन्यामाविशति घर्म्मम्"

कात्या०श्रौ० २६।६।१७। "घर्म्यं घर्मसंबन्धि तन्नाध्यस्थितमाज्यप्लवमन्यां स्रुचि जुहोति" कर्कः परीक्षाभ्यां घर्म्मसत्पादा स्रुक्करस्रोपर्य्यधोमुखं करोतीत्यर्थः" भं०भ्या०-घर्मसम्बन्धि घृतप्लवमन्यामाज्यस्थालिस्थां स्रुचि जुहोति पूर्वं स्रुक्स्थम् नीतमनुना घर्मस्थं स्रुचि नयतीत्यर्थः" यजु० २८।१६। वेददी०। तत्र निदाघकाले "निःश्वासहार्य्यं सुकुमारजनाय घर्मः प्रियादेशमिवोपदेष्टुम्" रघुः। जलार्थि "स घर्मजं रुधानु घनघर्मविगलदुरुगण्डमण्डलः" माघः।

घर्म्मचर्चिका स्त्री घर्मजता चर्चिकेव। (घामाचि) इति ख्याते घर्मविचर्चिकायाम्। "स्वेदवाहोनि दुष्यन्ति क्लेदशोकश्रमैस्तथा। ततः स्वेदः प्रवर्त्तेत दौर्गन्ध्यं घर्मचर्चिका। राजिकाक्षतिरुषोत्था यतो घर्मविचर्चिका" इति प्रयोगाहतम्। घर्मविचर्चिकाशब्द।

घर्म्मदीधिति पु० घर्म्मोदीधितौ यस्य। सूर्य्ये "यः सोम इव घर्म्मदीधितिः" रघुः। घर्म्मद्युति घर्म्मभानु घर्म्मरश्मिप्रभृतयोऽप्यत्र "घर्म्मद्युतेरिह दुहः पटलेन धाम्नाम्" किरा०। "या घर्म्मभानोरपि शीतलैः" माघः। "लोकालोकव्याहतो घर्म्मरश्मिः" भावः।

घर्म्मदुह् स्त्री घर्म्मं दुग्धं दोग्धि दुह-क्विप् ह्रस्वः। दुग्धदुहायां धेन्वाम् "घर्म्मधुग्भ्याले चादोहे च" कात्या० श्रौ० २५।६।२। घर्म्मदुहाशब्द। "घर्म्मदुहाया दोहनप्रदेशे" तत्रस्थे कर्के।

घर्म्मपावन् घर्म्मम्पाति पिबति वा-कनिप्। जलपायिनि पितृगणभेदे। "स्वाहा पितृभ्य ऊर्जे वर्षिभ्यो घर्म्मपावभ्यः" यजु० २८।१५।

घर्म्मसद् पु० घर्म्मे यज्ञे सीदति सद-क्विप्। यज्ञसदादिषु पितृषु। पर्व्वैः पितृभिर्घर्म्मसद्भिः" ऋ० १०।१५।८।१०। "घर्म्मसद्भः यज्ञसदादिभिः" भा०।

घर्म्मसुभ पु० घर्म्मं सुभ्नाति सुभ-क्विप्। वायौ। प्रचारेण घर्म्मनाशात्तस्य तथात्वम्। "घर्मसुभे (भारताय) दिव्या वृष्टे यज्वने" ऋ० ५।५४।११।

घर्म्मस्वरस् पु० जिघर्त्ति वै० इ-चरणे दीप्तौ मक् नि०। घर्म्माः दीप्ताः स्वृ-असुन् स्वरसोऽस्याम्। दीप्तध्वनौ। "घर्म्मस्वरसोनद्यो अप ब्रुवन्" ऋट० ४।५५।६ "घर्म्मस्वरसोदीप्तध्वनयः" भा०।

घर्म्मस्वेद पु० घर्मोदीप्तः चरन् वा स्वेदो, घर्मे यज्ञे स्वेदो गतिर्वाऽस्य। १दीप्तगमने २चरत्स्वेदजले ३यज्ञे मन्तरि च "ब्रह्मणस्पतिर्द्वेषिभिर्वराहैर्घर्मस्वेदेभिर्द्रविणं व्यानट्" ऋ० १०।६७।७। घर्मस्वेदेभिः दीप्तागमनैर्वहा चरदुदकैः अथवा घर्मो यज्ञः तं प्रति गन्तृभिः" भा०।

घर्म्मान्त पु० घर्मस्य ऊष्मणोऽन्तोयत्र। वर्षाकाले राजनि०। "घर्मान्ते तोयदोर्म्मिभिः" हरिवं० १७७अ०।

घर्म्मान्तकामुकी स्त्री ७त० बलाकायाम् राजनि०। वर्षाकाले एव तस्याः कामयमानत्वात् तथात्वम्।

घर्षण न० घृष-भावे ल्युट्। (घषा) व्यापारभेदे।

घर्षणाल पु० घर्षणायालति अल+पर्य्याप्तौ अच्। शिलापुत्रे (लोढा) त्रिका०। [त्रिका०।

घर्षणी स्त्री घृष्यतेऽसौ कर्मणि ल्युट् ङीप्। हरिद्रायां घल्ल न० घोल+पृषो०। तक्रे घोले शब्दच०।

घस(स) चरणे भ्वा० आत्म० सक० सेट् इदित्। घंस(स)ते अघसि(सि)ष्ट। जघंसे(से)

घस भक्षणे भ्वा० पर० सक० अनिट्। घसति। खुदित् अघसत्। जघास जघसतुः जघसिव जघस्व। घस्तः वेदे ग्विः लोके, घस्तिः।

घसि पु० घस-भावे इन्। भक्षणे हेमच०।

घस्मर त्रि० घस-घरच्। भक्षणशीले। "सुराध्वरे घस्मरजित्वरेण" भट्टिः। "घस्मरा नष्टशौचाश्च प्रायः क्षत्रमुपाश्नुयुः" भा० क० ४० अ०। कौशिकपुत्राणां गर्गशिष्याणां गुरुगवीमांसभक्षणात् व्याधत्वमादियोनिमाप्तानां सप्तानां मध्ये कृमभेदे "शुभेन कर्मणा तेन जाता जातिस्मरा मृगाः। त्रासात्तुत्पाद्य संविग्ना रण्ये कालञ्जरे गिरौ। उन्मुखोन्निद्यविलसत्साध्वसक्षोभविह्वलाः। पश्यन्तो घस्मरोनादी नामतस्तेऽभवन्मृगाः" हरिवं० २१अ०।

घस्र पु० घसत्यन्धकारं घस-रक्। १दिवसे अमरः। २रात्रौ त्रि० मेदि० रुद्रडुसे न त्रिका०।

घा स्त्री हन-घा०ड ह्रस्व घच। १काञ्जिकायां २घाते च मेदि०।

घाट पु० घुट-घञ्। योवायाः प्रवाहागे अवटौ (घाड़) शब्दर०। तद्वत्यर्थे स्त्री टाप् अमरः। "दोषास्तु दुष्टाशय एव मन्यां संपीड्य घाटां सुखजाः सतीव्राम्" सुश्रु०। २रुढे ४गवादिप्रचारस्थानभेदे "घाटाः किं बहवोऽतरभिज्ञाः सर्व्वतोव्रजे" हरिवं० २२१अ०। घाटा अस्त्यस्य अर्श०अच्। ५घाटायुक्ते त्रि०।

घाटाल पु० घाटा+सिध्मा० अस्त्यर्थे लच्। सुश्रुतोक्ते सान्निपातिकविद्रधिरोगलक्षणभेदे "नानारूपरुजास्रावो घाटालोविषमोमहान्। विषमं पच्यते वापि विद्रधिः सान्निपातिकः" सुश्रुतः। घाटालस्य तद्वादृश्यता-

रस्थानवत् गम्भीरतायुक्तत्वात् तद्दृढोन्नतानतत्वेन च तथात्वम् ।

घाटिका स्त्री घाटा स्वार्थे क । घाटायाम् शब्दच० ।

घाण्टिक पु० घण्टया चरति ठक् । "रात्रां प्रबोधसमये घण्टाभिस्तास्तु घाण्टिकाः" इत्युक्तलक्षणे रात्रां प्रबोधनाय घण्टां वादयित्वा १स्तुतिपाठके २घण्टावादके त्रि०अमरः । अस्य घाटिकशब्दव्यमरटीकायां भरतः पपाठ । घण्टा तदाकारं पुष्पमस्त्यस्य ठन् । १धूस्तुरे शब्दरा० तस्य तदाकारकुसुमत्वात्तथात्वम् "पुष्पे घाण्टिकधोधिकयवनबधिकक्षितवकुसुमानि" । "उपतापं यान्ति च घाण्टिका विभेदच भिलाषाम् । हृ०स०१०अ० । शपथवचनेन ३व्यवहारिणि" प्रा० वि० । "राजपौरुषिके विप्रे घाण्टिके परिचारके" । दैवपैत्र्ययोः अपालोक्तौ तस्याभोज्यान्नतामाह यमः "राज्ञश्चं करते तेजः" इत्युपक्रमे "षण्ढस्य तथान्नं गौण्डस्य घाण्टिकस्य तथैव च । इतरे ये त्वभोज्यान्नास्तेषामन्नं विवर्जयेत् । अन्नं द्वादशरात्रं वा तप्तकृच्छ्रमथापि वा" । "घाण्टिकोदिव्यवाचकः" प्रा० वि० ।

घात पु० हन-घञ् । १प्रहारे, २मारणे, ३ पूरणे, सुखने च । "चरेत् व्रतमहत्वाऽपि घातार्थेषु समागतः" याज्ञ० । "पतन्ति हिरदा भूमौ वज्रघातादिवाचलाः" भा० आ० १४८अ० । "समुद्घातः कृतिरुच्यतेऽथ" जैमि० । करणे घञ् । ४वाणे मेदि० । चतुरङ्गक्रीडायां वध्यादिबलानां स्थानविशेषेषु ५अन्यबलनाशागमे तदपसारणेन तत्स्थाने तदाक्रमे । चतुरङ्गशब्दे दृश्यम् । अन्नतारामेधया हृनिधनाख्ये सप्तमश्रोडशपञ्चविंशतितमनक्षत्रे च ।

घातक त्रि० घातयति हन-ण्वुल् । हननकर्त्तरि । "अनुमन्ता विशसिता निहन्ता क्रयविक्रयी । संस्कर्त्ता चोपहर्त्ता च खादकश्चेति घातकाः" मनुः । अत्र खादकस्यापि घातकत्वोक्तं मिताक्षरायां तु कर्त्तृप्रयोजकादीनां घातकत्वं समर्थितं यथा

"हननिरयं प्राणवियोगकरे व्यापारे रूढः । यद्व्यापारसमनन्तरङ्गान्तरे वा कार्यान्तरनिरपेक्षः प्राणवियोगो भवति स प्राङ्मुखं हतवानिति ब्रह्महा" ।

"तथाशब्दः प्रकारवचनोऽनुमन्ताकप्रयोजकादिकर्त्तृसंग्रहार्थः । अनुमन्ताकस्य यः पचयमानमभिलषत्परस्वत् परेभ्यश्च हन्तारमरिरक्षन् हन्तुर्हिंसामनुपजनयन्नुपकरोति स उच्यते । अतएव मनुना अनुमन्ताकस्य हिंसाफलसम्बन्धो दर्शितः "बहूनामेककार्याणां सर्वेषामुग्रधारिणाम् । यत्तैकोघातयेत्तत्र सर्वे ते घातकाः स्मृताः" इति । तथा प्रयोजकादीनामप्यापस्तम्बेन फलसम्बन्ध उक्तः "प्रयोजयिताऽनुमन्ता कर्त्ता चेति स्वर्गनरकफलेषु कर्म्मसु योभूय आरभते तच्चित् फलविशेषः" इति । तत्राप्रवृत्तस्य प्रवर्त्तकः प्रयोजकः स च त्रिप्रकारः । आप्तापविताऽभ्यर्थ्यमान उपदेष्टेति । तत्राप्तापविता नाम स्वयमुद्यतः मद्यौषधमूलादिकं यः प्रेषयति मदीयमभिलष्यतीति स उच्यते । अभ्यर्थ्यमानस्तु यः स्वयमसमर्थः प्राधनादिना मारयितुं व्यापादयेति समर्थं प्रवर्त्तयति सोऽभिधीयते । अनयोश्च स्वार्थसिद्ध्यर्थमेव प्रयोक्तृत्वम् । उपदेष्टा पुनः त्वं शत्रुमित्रं व्यापादयेति धर्म्मोद्घाटनाद्युपदेशपुरःसरमेरयन् कथ्यते । तत्र च प्रयोज्यगतमेव फलमिति नैषामोदः । अनुमन्ता तु प्रवृत्तस्य प्रवर्त्तकः स च द्विप्रकारः क्वचित् स्वार्थसिद्ध्यर्थं मनुजानाति क्वचित्परार्थमिति । नन्वनुमननस्य कथं हिंसाहेतुत्वं न तावत् प्राणवियोगोत्पादनेन, तस्य साक्षात्कर्तृव्यापारजन्यत्वात् नापि प्रयोजकस्येव साक्षात् कर्तृप्रवृत्त्युत्पादनद्वारेण, प्रवृत्तस्य प्रवर्त्तकत्वात् । न च साधु त्वया व्यवसितमिति प्रवृत्तमेवानुमन्यत इति शङ्कनीयम् । ताडनस्यानुमननस्य हिंसाजन्यहेतुत्वाद्व्यर्थत्वाच्च । उच्यते यत्र हि राजादिपारतन्त्र्यात् स्वयं मनसा प्रवृत्तोऽपि प्रवृत्तिविच्छेदादागामिदण्डभयाद्वा निषिद्धप्रयत्नो राजाद्यनुमतिमपेक्षते तत्रानुमतिर्हन्तुः प्रवृत्तिसमुद्बोधयन्ती हिंसाफलजन्मति हेतुतां प्रतिपद्यते । तथा योऽपि भर्त्सनेन ताडनधनापहारादिना परान् कोपयति सोऽपि मरणहेतुभूतमन्युत्पादनद्वारेण हिंसाहेतुर्भवत्येव । अतएव विष्णुनोक्तम् "आक्रुष्टस्ताडितोवापि धनैर्वापि वियोजितः । यस्तद्दिग्धं त्यजेत् प्राणांस्तमाहुर्ब्रह्मघातकम्" । तथा "प्रातिभिलक्षतार्थं हृद्वरचेलार्थमेव च । यस्तद्दिग्धं त्यजेत् प्राणांस्तमाहुर्ब्रह्मघातकमिति" । न च क्षतेष्वयाक्रोशनादिषु कस्यचिन्मन्युत्पत्तिदर्शनादकारण्यमेति शङ्कनीयम् पुरुषस्वभाववैचित्र्यात् येऽल्पतरेष्वपि निमित्तेन जातमन्यवोभवन्ति तेष्वभिचार इति नाकारणता । एतेषामनुमन्ताकप्रयोजकादीनां मन्त्रौषधिप्रयोगादिव्यवधानापेक्षया व्यापारगतगुरुलाघवापेक्षया च फलगुरुलाघवात् प्रायश्चित्तगुरुलाघवस्योद्भ-

व्यम् "वो भूय आरभते तच्चिनु फलविशेषः" इति वचनात्तथाऽनुमन्तुरपि तावत् स्वयमेव हिंसायां प्रवृत्तत्वेन स्वतन्त्रकर्तृत्वे सत्यपि साक्षात्प्राणवियोगफलकखड्गप्रहारादिव्यापारयोगित्वाभावेन साक्षात्कर्तृत्वं नास्तीति हिंसारूपकर्मत्वाभावादल्पफलत्वमल्पप्रायश्चित्तं च, प्रयोजकस्य तु स्वतन्त्रकर्तृप्रवृत्तिजनकत्वेन व्यवहितत्वात्ततोऽल्पफलत्वं, प्रयोजकादीनां मध्ये परार्थं प्रवृत्तेरुपदेष्टुरल्पफलत्वम्। ननु प्रयोजकस्य दूरस्थत्वानीयत्वात् प्रयोज्यस्य न फलसम्बन्धो युक्तः यदि परप्रयुक्त्या प्रवर्त्तमानस्यापि फलसम्बन्धस्तर्हि स्वपतितडागखनिदग्धस्तेनानामपि मूल्येन प्रवर्त्तमानानां स्वर्गादिफलप्राप्तिप्रसङ्गः। उच्यते। "शस्त्रफलस्वयोक्तरीति" न्यायेनाधिकारिकर्तृगतफलजनका देवकुलतडागनिर्माणादयः। न च स्वपतितडागखनित्रादयो देवकुलतडागादिकरणादिव्यधिकारिणोऽस्वर्गकामित्वात्। अत एव पुनः परप्रयुक्त्या प्रवर्त्तमानानामपि हिंसायामधिकारित्वाद्भवत्येव तद्व्यतिक्रमनिबन्धनो दोषः। अनुमन्तुस्तु प्रयोजकादप्यल्पफलत्वमप्रयोजकव्यापाराद्बहिरङ्गत्वाच्छुत्वाच्च अनुमननस्य, निमित्तकर्तुः पुनराक्रोशकादेः प्रवृत्तिहेतुभूतमन्युजनकत्वेन व्यवहितत्वान्मरणानुसन्धानं विना प्रवृत्तत्वाच्चानुमन्तुः सकाशादल्पफलत्वम्। ननु यदि व्यवहितस्यापि कारणत्वन्तर्हि मातापित्रोरपि पुत्रोत्पादनद्वारेण हननकर्तृत्वं प्रसङ्गः। उच्यते नहि पूर्वभावित्वमात्रेण कारणत्वम् अकारणस्यापि तथा भावित्वापत्तेः। यत् खलु स्वरूपातिरिक्तकार्योत्पत्त्यनुगुणव्यापारयोगि भवति तद्धि कारणं, "यदि रथन्तरसामा सोमः स्यादैन्द्रवायवाग्रान् ग्रहान् गृह्णीयादिति" रथन्तरसामैव क्रतोरैन्द्रवायवाग्रग्रहार्थं, न हि तत्र सोमयागः स्वरूपेण कारणं व्यभिचारात्। न च पित्रोस्ताडगविधकारणत्वस्य योगित्वमिति मातिप्रसङ्गः। अनेनैव न्यायेन धर्मान्वितेन निर्मितकूपवाप्यादौ प्रमादपतितब्राह्मणादि मरणे खानयितुर्दोषाभावः। न हि कूपोऽनेन खानितः अतोऽस्मान्मारणं व्यापादयामीत्येवं कूपखननिमित्तव्यापादनं यथाऽऽक्रोशादौ अतः कूपकर्तुरपि कारणत्वमेव न पुनर्हिंसाहेतुत्वमिति मातापितृतुल्यमेव। तथा क्वचिदल्पेऽपि हिंसानिमित्तताबोधित्वे परोपकारार्थं सङ्कटौ वचनादोषाभावः यथाह संवर्त्तः "बन्धने मोक्षिकित्सार्थं गूढगर्भविमोचने। यत्ने कृते-विपत्तिश्चेत् प्रायश्चित्तं न विद्यते। औषधं स्नेहमाहारान्ददद्गो ब्राह्मणादिषु। दीयमाने विपत्तिः स्याच्च स पापेन लिप्यते। दाहच्छेदसिराभेदप्रयत्नैरुपकर्षताम्। प्राणसन्त्राणसिद्ध्यर्थं, प्रायश्चित्तं न विद्यते" इति। एतच्चदानं निदानं निपुणमभिधृत्विषयम्। इतरत्र "भिषग्मिथ्या चरन् दाण्डः" इत्यत्र दोषो दर्शितः। यत्र तु मन्युनिमित्ताक्रोशनादिकमकुर्वतोऽपि नाम स्टङ्कीत्योन्मादादिनात्मानं व्यापादयति तत्रापि न दोषः। "अकारणं तु यः कश्चित् द्विजः प्राणान् परित्यजेत्। तस्यैव तत्र दोषः स्याद्यत यस्परिकीर्त्तयेदिति" स्मरणात्। तथा यत्राप्याक्रोशकादिजनितमन्युरात्मानं खड्गादिना प्रहृत्य मरणादर्वागाक्रोशनादिकृता धनदानादिना सन्तोषितो यदि जनसमक्षमक्षैः श्रावयति नात्माक्रोशकस्यापराध इति तत्रापि वचनान्न दोषः। यथाह विष्णुः "उद्दिश्य कुपितो हत्वा तोषितः श्रावयेत्पुनः। तस्मिन्मृते न दोषोऽस्ति द्वयोरुच्छ्रावणे कृते" इति। एतेषान्तु प्रयोजकादीनां दोषगुरुलघुभावपर्यालोचनया प्रायश्चित्तविशेषं वक्ष्यामः" मिता०।

प्राय० वि० तस्य षड्विधत्वसङ्ख्या यथा

"प्राणवियोगफलकव्यापारोबोधः तन्निष्पादकत्वञ्च साक्षात् परम्परोदासीनं स्मृतिकारपरिगणितं वधित्वम् अतो नेषुकारादिव्यतिव्याप्तिः तच्च षड्विधं स्मृतिस्मरणात् कर्त्ता प्रयोजकोऽनुमन्ता अनुग्राहको निमित्ती चेति यथा व्यपदिश्यते "प्रयोजयिता अनुमन्ता कर्त्ता चैति सर्वे स्वर्गनरकफलभोक्तारो योभूय आरभते तच्चिनुफले विशेषः"। अनुग्राहकमाह याज्ञवल्क्यः "चरेद्व्रतमथवापि घातार्थं चेत् समागतः" तथा मनुः "यज्ञनामैककार्य्याणां सर्वेषां शस्त्रधारिणाम्। यज्ञेऽवधो वधस्तस्मात्तत्र वधो न हिंसायाम्। यज्ञेऽनर्थकं हिंसा नियतं सर्वजन्तुषु। एतां हि विद्यां तां वेदे चाहुः कर्मसु कौशिकम्। तेषां यज्ञे वधो यज्ञे प्रोक्षणेन स विप्रोनिधनं गतः। सरस्वतीप्रतिस्रोतः शस्त्रेण पापशुद्धये"। सच द्विविधः। एकोवध्यप्रतिरोधकः अन्यः खल्पप्रवर्त्तकः। निमित्तिनमाह विष्णुः "अन्यायेन स्टङ्कीतखो न्यायमर्थयते तु यः। यद्दिश्य त्यजेत् प्राणांस्तमाहुर्ब्रह्मघातकम्"। अत्र नरान्तरव्यापार व्यवधानेन वधनिष्पादकः कर्त्ता, यः कर्त्तारं कारयति स प्रयोजकः सोऽपि द्विविधः। एकःस्वयोऽप्रवृत्तमेव यदर्थं चेतनादिना वधार्थं प्रवर्त्तयति

अपरः स्वतःप्रवृत्तमेव मन्त्रोपांशूपदेशादिना प्रोत्साहयति। अनुमतिदाता अनुमन्ता अनुमतिश्च द्विविधा। एका यद्विरोधाङ्गनं न सम्भवति तस्य विरोधिनोभया निरोधः कर्त्तव्यइति युक्तिरनुमतिः। अपरा एवं कुर्वीतिवचने शक्तस्याप्रतिषेधः। अतएव कात्यायनः "स्वद्रव्यं दीयमानन्तु यत् स्वामी न निवारयेत्। ऋत्विभिर्वा परैर्वापि दत्तं तेनैव तद्भवेत्"दत्तमिति दातुमनुमतमित्यर्थः। तथा "प्रार्थ्यमानोऽर्थिना यत्न योऽर्थी न विघातितः। दानकालेऽथवा तूष्णीं स्थितः सोऽर्थोऽनुमोदितः"। अत्राप्रतिषेध एवानुमतिरुक्ता। अतएव "परवचनमप्रतिषिद्धमनुमतं भवतीति" न्यायविदः। बध्यस्य पलायनादिरोधकोऽनुपाङ्गः। उद्देश्यत्वे सति हन्तुर्मन्यूत्पादको निमित्तं। तत्र प्रयोजकस्य कर्त्तृप्रयुक्तिद्वारेण बधकारकत्वम् अनुमन्तुश्च हन्तुर्निर्भयत्वेन दृढतरप्रहारोत्पत्तिद्वारेण, अनुपाङ्गस्य पलायनाद्यसम्भवेन हननीयस्थैर्य्यं कुर्वतः प्रहारसहकोत्पत्तिद्वारेण कारणत्वं, निमित्तिनो हन्तृमन्यूत्पादनद्वारेण इति प्रयोजकादीनां च चतुर्णां व्यवहितहनन कारणानाम् व्यापारप्रकारभेदाद्भेदः। अतः पञ्चविधं बधित्वम्" ॥

ततोऽजिकनमतं प्रदर्श्य दूषयित्वा स्वमतं तेन दर्शितं यथा "तस्माच्चेतनान्तरव्यापाराव्यवधानेन स्वार्थनिष्पादकचेतनः कर्त्ता, कर्म्मकरणादिकारकचक्रप्रयोक्ता वा कर्त्तेति सामान्येन कर्त्तृलक्षणं। यत्र पदातिद्वारा प्राणहरणं क्रियते तत्र न पदातेः करणत्वं हननकर्म्मणि कर्त्तृव्यापारव्याप्यत्वाभावात् न वा तस्याव्यवधायकत्वं प्रमाणाभावात् खड्गस्य तु व्यवधायकत्वेऽपि न दोषः तस्य चेतनत्वाभावात् न वा तस्य व्यवधायकत्वं हन्तृव्यापारे हन्तुः साक्षादेव कारणत्वात् द्वैधीभावफलनिष्पत्तौ खड्गव्यापारस्य सहकारितामात्रम् अतएवाश्वेन पदातिना च राज्ञा सङ्गरतीति सत्यपि चेतनान्तरव्यापारे तस्य सहकारितामात्रं न तु व्यवधायकत्वं स्वव्यापारे राज्ञः साक्षात्कारणत्वात् एवञ्च यजमानस्य स्वव्यापारे याग देवतोद्देशेन द्रव्यत्यागलक्षणे साक्षात्कारणत्वमेव प्रोक्षणादौ च तदङ्गे ऋत्विगादिव्यापारः, सतोऽपि साधारणद्रव्यत्यागात् सप्तदशानामेव कर्त्तृत्वम् एकस्य त्रदसम्भवात् यागव्यतिरिक्तकर्म्मणि प्रत्येकं सप्तदशानां कर्म्मव्यवस्था। अथ वा "स्वर्गकामोयजेत" "सप्तदशावराऽङ्गिकामाः सवसुपाशीरन्निति" वेदे कामिनां कर्त्तृत्वावगतेस्तदनुपपत्त्या ऋत्विग्व्यापारान्तर्भावो न व्यवधायकः आग्नेयादिकरणत्वानुपपत्तिकल्पितोत्पत्त्यपूर्व्वमिव। न चेदृक्तथा, कर्त्तृत्वे प्रमाणाभावात् तस्मात् पूर्व्वोक्तकर्त्तृलक्षणाक्रान्तत्वादस्मतःप्रवृत्तपदातिप्रेरको न बधकर्त्ता किन्तु प्रयोजक एव। अनुपाङ्गोऽपि न कर्त्ता कर्त्तृलक्षणाव्याप्यत्वात् सर्व्वे तु विशेष उक्त एव। पाञ्चिकमरणानुमन्तृत्वान्निमित्तिनोऽनुमन्तृत्वमयुक्तम् एवं प्रयोजकस्यानुमन्तृत्वापत्तेः अतो मन्यूत्पादनद्वारा योनिमित्तत्वात् स निमित्तीत्यनुमन्तृतः प्रकारान्तरएवायं प्रयोजकादिवत् अतो यथा कथञ्चिन्निमित्ततामात्रेण यदि निमित्तबधः तदा मातापित्रो रिपुकारस्यापि निमित्तत्वं स्यादिति निरस्तं, नन्वस्त्यपि मन्यूत्पादने, न निमित्तत्वं यथा बध्यस्य बधकर्मन्यूत्पादकस्य, नन्वनुत्पादितमन्युः कश्चित् कस्यापि व्यापादयति, अस्त्यपि मन्यूत्पादे निमित्तत्वं यथा मरणाभिसन्धानेन कूपे विषप्रक्षेप्तुर्नहि तस्य कर्त्तृत्वं सम्भवति नरान्तरविषभक्षणव्यापारव्यवधानात् अतस्तत्रापि कर्त्तृत्वमस्तीति भवदेवमतं निरस्तं सत्यं कर्त्रादिचतुष्टयविलक्षणो वाचनिकनिषिद्धनिमित्तभावएव निमित्तीति निमित्तिलक्षणं नेषुकारस्य बध्यस्य वा निमित्तभावो निषिद्धः अभक्ष्याद्यदातुश्च निषिद्ध एव। अहितमाहारादिकं मरणफलकं हितनिषेधेन क्रियमाणं न पापहेतुरिति वदता अहितं मरणफलकमहितबुद्ध्या क्रियमाणं पापहेतुरिति दर्शितं निमित्तबधापवादकवचनेन, एतच्च वक्ष्यते एवं यत्राभिसन्धानं नास्ति हेत्वन्तरव्यवस्थापितं विषं खादित्वा कश्चिन्म्रियते तत्र न बधित्वम् एवं व्याघ्रादिमारणार्थक्षतवन्नादावन्यस्य मरणे न बधित्वम् एवं कूपखातादावपि। मरणाभिसन्धाने तु तत्रास्त्येव। तथा यः कश्चित् संशयस्थाने प्रस्थाप्यते बलवती च मरणाशङ्का भवति तत्र प्रस्थापितोयदि म्रियते तत्र बधित्वं, पाञ्चिकमरणाभिसन्धानात् अतएवेतरनिमित्तिनो विषप्रक्षेप्तुर्बध्यत्वम् तथा च याज्ञवल्क्यः "क्षुद्रुग्व्रतं गुरुः कुर्य्यात् म्रियेत क्षिप्तो यदि"। बौधायनः "गुरुः प्रयुक्तो म्रियते गुरुस्त्रीन् क्षुद्व्रतं चरेत्"। उपकाराचरणेन बधनिमित्तौ निमित्तबधापवादमाह संवर्त्तः "औषधं क्षेममाहारं ददद्गोब्राह्मणेषु च। प्राणिनां प्राणरक्षार्थं प्रायश्चित्तं न विद्यते। यत्नवे गोचिकित्सायां मूढगर्भविमोचने।

यत्ने कृते विपत्तिः स्यात् प्रायश्चित्तं न विद्यते। भ्रूणगर्भो ऽन्नमृतगर्भः। तथा "दारुच्छेदशिराभेदप्रयत्नैरपकुर्व्वताम्। द्विजानां गोक्षितार्थेषु प्रायश्चित्तं न विद्यते"। याज्ञवल्क्यः "क्रियमाणोपकारे तु कृते विप्रे न पातकम्। विषाढे गोदयाशास्त्रे भेषजाग्निक्रियासु च"। विशेष माकाङ्क्षिराः "औषधे तु न दोषोऽस्ति स्वेच्छया पिबते यदि। अन्यथा दीयमाने तु प्रायश्चित्तं न संशयः"। मन्यूत्पादने निमित्तबधमाह हारीतः "गोभूहिरण्यहरणे स्त्रीसम्बन्धकृतेऽपि च। यस्य द्विष्य त्यजेत् प्राणांस्तमाहुर्ब्रह्मघातकम्" विष्णुः "अन्यायेन गृहीतस्तु न्यायमर्थयते तु यः। यस्य द्विष्य त्यजेत् प्राणांस्तमाहुर्ब्रह्मघातकम्"। तथा हारीतेन नाम्ना पठितानि वचनानि "ज्ञातिमित्रकलत्रार्थं सुहृत्क्षेत्रार्थमेव च। यस्य द्विष्य त्यजेत् प्राणांस्तमाहुर्ब्रह्मघातकम्। गोभूहिरण्यहरणे स्त्रीणां क्षेत्रस्य च। यस्य द्विष्य त्यजेत् प्राणांस्तमाहुर्ब्रह्मघातकम्। गुर्व्वर्थं पितृमातृत्वमात्मार्थमथ वा पुनः। यस्य द्विष्य त्यजेत् प्राणांस्तमाहुर्ब्रह्मघातकम्" षट्त्रिंशन्मतमिति कृत्वा पठितम् "आक्रोशितस्ताडितो वा धनैर्वा परिपीडितः। यस्य द्विष्य त्यजेत् प्राणांस्तमाहुर्ब्रह्मघातकम्"। अत्रोद्विग्नेति सर्वत्र कीर्त्तनात् उद्वेगाभावे निमित्ततामात्रेण बधित्वं नास्ति, अर्थादिहरणाक्रोशनताडनादीनां मन्युकारणानुपपत्तेस्तेषामभावे धनाद्यर्थं हठादाक्रोशनादिना ये म्रियन्ते तत्र कीर्त्तनमात्रेण निमित्तबधोनास्ति तथा च पठन्ति "असम्बन्धेन यः कश्चित् द्विजः प्राणान् परित्यजेत्। तस्यैव तद्भवेत् पापं न तु यं परिकीर्त्तयेत्"। असम्बन्धेनेति वाक्कृतादिसकलापराधसम्बन्धाभावपरम्। यच्च "सम्बन्धेन विना देव! शुष्कवादेन कोपितः"। इति भविष्यपुराणवचनं वार्षिकप्रायश्चित्तविधायकम् तत् वाक्कृतेतरापराधसम्बन्धाभावपरं "शुष्कवादेन कोपितः" इत्यभिधानात्। यत्र यत्राक्रोशनादौ पश्चात्कृतेनापराधः तत्रापि न बधः। यथा हारीतः "आक्रुष्टस्तु यदाऽऽक्रोशं ताडितः प्रतिताडयन्। हत्वाततायिनञ्चैव नापराधो भवेन्नरः" शास्त्रविहिततादनादौ कृते यत्र म्रियादिभियते तत्रापि बधो नास्त्येव यथा भविष्यपुराणे "पत्नीः शिष्यसुता भार्य्या शासितव्ये ह्यनागसि। न शक्या तत्र दोषेण लिप्यते देवसत्तम!"। अशास्त्रीय ताडनादौ भवत्येव यथा मनुः "पुत्रः शिष्यस्तथा भार्य्या दासी दासस्तु पञ्चमः। प्राप्तापराधास्ताड्याः स्यूरज्ज्वा वेणुदलेन वा। अन्यत्तात्तु प्रहर्त्तव्यं नोत्तमाङ्गे कदाचन। अतोऽन्यथा तु प्रहरंश्चौरस्यापोति किल्बिषम्"। एवञ्च विहितदण्डाचरणे शास्त्रीयकरणप्रहणे क्रियमाणे यदि म्रियते तदापि बधोनास्त्येव दण्डादिशास्त्रविधिविरोधाच्चिषेधाप्रवृत्तेः। सोमविक्रयणे तु रागादेव प्रवृत्तिसम्भवान्न विरोधः। आततायिबधापवादमाह हारीतः "नाततायिवधे हन्ता किल्बिषं प्राप्नुयात् क्वचित्। विनाग्निमथायान्तं घातयन्नापराध्नुयात्" किल्बिषाभावः प्रायश्चित्तनिषेधार्थः। अपराधाभावोदण्डनिषेधार्थः। यतः "सर्व्वत एवात्मानं गोपायीत इति श्रुतिमूलमिदम् अतः पलायनादिनापि आत्मरक्षणाभावे दृढं दोषोद्वयम्। कात्यायनः "आततायिनमायान्तमपि वेदान्तपारगम्। जिघांसन्तं जिघांसीयान्न तेन ब्रह्महा भवेत्"। जिघांसीयन् हन्यात् गच्छेदित्यर्थः। देवलः "उद्यम्य शस्त्रमायान्तं भ्रूणमप्याततायिनम्। निहत्य भ्रूणहा न स्यादहत्वा भ्रूणहा भवेत्"। भ्रूणो ब्राह्मणविशेषः दोषदर्शनं नियमार्थम्। मनुर्विष्णुः "गुरुं वा बालवृद्धौ वा ब्राह्मणं वा बहुश्रुतम्। आततायिनमायान्तं हन्यादेवाविचारयन्"। एवकारो नियमार्थः "तथा नाततायिवधे दोषोहन्तुर्भवति कश्चन। प्रकाशं वाऽप्रकाशं वा मन्युस्तन्मन्युमृच्छति" यस्माद्धन्तुर्मन्युर्हन्यमानं मन्युं नाशयति न पुनः पुरुषोहन्ति हन्यते वेति हननविधेरनुवादः। "आततायिनमाह वशिष्ठः" "अग्निदोगरदश्चैव शस्त्रपाणिर्धनापहः। क्षेत्रदारापहारी च षडेते आततायिनः" विष्णुः कात्यायनौ "उद्यताग्निविषाग्निञ्च शापोद्यतकरं तथा। आथर्वणेन हन्तारं विद्युन्नञ्चैव राजसु। भार्य्यातिक्रमिणञ्चैव विद्यात् सप्ततातायिनः। यशोहरन्तरान्यानाहुर्धर्म्मार्थविहारकान्"। विशेषमाह कात्यायनः "अनाचारितपूर्व्वोयस्त्वपराधे प्रवर्त्तते। प्राणहिंसापकारे च प्रहृत्याततायिता" अनाचारितोऽनभ्यस्तः। एतेन पूर्व्वकृतापकारस्य मारणोद्यतस्य नाततायिता तेन प्रत्यपकारिबधे दोष एव। ननु आततायिनोरपि गोब्राह्मणयोर्हनने दोषमाह सुमन्तुः "आततायिवधे न दोषोऽन्यत्र गोब्राह्मणात् यदा हन्यात् तदा प्रायश्चित्तं कुर्य्यात्"। तथा भविष्ये "विद्यानमपि गोविप्रं न हन्याद्वै कदाचन" इति अतः पूर्व्ववचनविरोधः तत्र व्य-

स्यामाह कात्यायनः "आततायिनि चोत्कृष्टे तपःस्वाध्यायलक्षतः । वधस्तत्र तु नैव स्यात् पापे हीने वधोऽस्तुः"। जन्मपदेन जातिः कुलञ्चोच्यते । तेन हन्तव्यपेक्षया तपोविद्याजातिकुलैरुत्कृष्टोनाततायी वध्यएव । अतएव भगवद्गीतायामाह "पापमेवाश्रयेदस्मान् हत्वैतानाततायिनः" इति एतान् भीष्मादीन् अत्यन्तोत्कृष्टगुणानित्यर्थः । एवञ्च आततायिनश्चाहनने फलमप्याह हरिः स्मृतिः "आततायिनमुत्कृष्टं हतस्वाध्यायसंयुतम् । यो न हन्याद्वधप्राप्तं सोऽश्वमेधफलं लभेत्" यद्यपि "गुरुं वृद्धश्रुतं हन्यात्" इति श्रूयते तथापि गुरोः सकाशात् कुलविद्यातपोभिः श्रेष्ठ्याद्युत्कर्षसम्भवात् एवं वृद्धश्रुतादपि । एवमधमवर्णोत्तमवर्णौ न वध्यः । पूर्वकृतापराधविषयं वा सुमन्तुवचनम् । गौरातताय्यपि न वध्यः "नखिनां शृङ्गिणां चैव दंष्ट्रिणामाततायिनाम् । हस्त्यश्वानां तथान्येषां वधे हन्ता न दोषभाग्" इति कात्यायनवचनं गोव्यतिरिक्तशृङ्गिविषयम् विशेषमाह कात्यायनः "उद्यतानान्तु पापानां हन्तुर्दोषो न विद्यते । निहत्तासु यदारम्भादुपहन्यन्न वधः स्मृतः"। तन्त्रोक्ते प्राह्यमन्त्रसाधकयोः शुभाशुभज्ञापके राशिचक्रस्थे साधकराश्यपेक्षया साध्यराशेर्द्वादशाष्टचतुःसंख्यान्विते कोष्ठेऽवस्थाने । चक्रशब्दे च राशिचक्रं वक्ष्यते तत्र विहितः "वङ्गिरुद्रहतयस्तु षोडशा द्वादशाष्टचतुरस्तु घातकाः" एतच्च विष्णुविषयम् रामार्चनचन्द्रिकाधृतत्वात्" हरिनन्दः ।

**घातन** न० हन-हन्यर्थत्वात् स्वार्थे णिच्-भावे ल्युट् । १मारणे हनने २यत्नार्थपञ्चालम्भने शब्दार्थ० । घातयति कर्त्तरि ल्यु । २मारके त्रि० हन्तरौणादिके युनि तु घतन इत्येव घतनशब्दे विहितः । शब्दकल्पद्रुमे घतनेत्यत्र लिपिकरप्रमादकृतघातनशब्ददर्शनात् त्रि० को० सम्मतत्वेन घातनशब्दकल्पनं ग्रामादिकमेव "हन्तेर्युच्चाद्यनयोर्घत्वतत्वे" उषा० ५।४२। घतनस्यैव सिद्धेः दीर्घत्वे निमित्ताभावात् । चुरा०हन्तेस्तु घाप्रत्ययस्वरूपने घत्वतत्वविधानानर्थक्यप्रसङ्गात् । एवं सहित पुस्तके "घातनो मारकः" इति दीर्घपाठोऽपि प्रमादकृतएव

**घातवार** पु० राशिविशेषजातस्याशुभसूचके वारभेदे यथा "नक्षे भौमो गोकरिस्त्रीषु मन्दश्चन्द्रोदये ऽर्कोऽजभे घ्नश्च कर्के । शुक्रः कोदण्डाब्जिमीनेषु, कुम्भे यूके जीवो घातवारा न शस्ताः" शब्दार्थचि० ज्यो० वाक्यम् ।

**घातस्थान** न० ६त० । शस्त्रघाते शब्दार्थचिन्तामणिः ।

**घाति** पु० हन-इण् । पक्षिबन्धने संक्षिप्तसारे उणादिवृत्तिः ।

**घातिन्** त्रि० हन-ताच्छील्यार्थे णिनि । हननकरणशीले । स्त्रियां ङीप् ।

**घातिपक्षिन्** पुंस्त्री०कर्म० । श्येनखगे हारा० स्त्रियां ङीप् ।

**घातुक** त्रि० हन-उकञ् । १हिंसके २क्रूरे च अमरः ।

**घात्य** त्रि० हन-ण्यत् । १वध्ये २वधार्हे ३शुश्रूषणीये च ।

**घार** पु० घृ-सेके घञ् । सेचने ।

**घारि** न० छन्दोविशेषे । "रं विधाय लं निधाय धारि नाम छन्दसेरिते" । यथा "राम राम राम राम । सारमेतदेव नाम" । शब्दार्थ चि० ।

**घार्तिक** त्रि० पु० घृतेन निर्वृत्तः ठञ् । घृतप्रचुरे छिद्रबहुले (घिचोड़) पक्वान्नभेदे हेमच० । घृतपूरशब्दे दृश्यम् । "तृतीयस्य घार्त्तिकं ददाति स ब्रह्महा "छिद्रेष्वनर्था बहुलीभवन्ति" पञ्चत० ।

**घार्त्तेय** त्रि० घृतायाः अपत्यम् द्व्यचकत्वात् ढक् । १दीप्तायाः अपत्ये ततः यौधेया० स्वार्थे अञ् । तत्रार्थे स्त्रियां शार्ङ्गरवा० ङीन् । २तद्राजे च तस्य च यौधेया० तद्राजस्य स्त्रियां न लुक् । घार्त्तेयी । तत्र घार्त्तेयी इति तत्र पाठान्तरम् ।

**घास** पु० घस--कर्मणि घञ् । गवादीनां भक्ष्ये तृणभेदे अमरः । "घासषष्टिं परगवे दद्यात् संवत्सरं तु यः" भा० आनु० ६८अ० । "घासं दद्यात् परगवे" प्रा०त० २भक्षद्रव्यमात्रे च "अश्वायेव तिष्ठते घासमग्रे" यजु० ११।७५। "घासं समिद्भूषम्" वेददी० । "कर्षितं व्याधितं क्लिष्टपानीयमघासकम् । परिश्रान्तं च मन्दञ्च प्रहर्त्तव्यमरैर्बलम्" भा० आ० १४३अ० ।

**घासकुन्द** पु० घासार्थः कुन्दः । घासार्थकुन्दे तत्प्रचुरस्थाने ततः कुत्सिता० चतुरर्थ्यां ठक् । घासकुन्दिक तत्सम्बन्धिकुत्सितदेशादौ त्रि० ।

**घासि** पु० घस वा०--इण् । १अग्नौ त्रिका० कर्मणि इण् । २भक्ष्ये तृणादौ त्रि० उज्ज्वलदत्तः "यच्च पपौ यच्च घासिं जघान" ऋ०१।१६२।१४। "घासिमदनीयम्" भा० ।

**घिण** अदृश्ये भ्वा०आ०सक० सेट् इदित् । घिण्वते अघिण्विष्ट जिघिण्वे ।

**घु** ध्वनौ भ्वा० आत्म० अक०अनिट् । घवते अघोष्ट । जुघुवे ।

**घु** पु० घु-ध्वनौ वा० डु । १ध्वनौ जटाधरः । अत्र ध्वनिः वनस्पोतस्य (घुघु) ख्यातस्य ध्वनिः । नैष० वाक्ये व्याख्यं

भविष्यति "दाधाघ्वदाप् पा०" इत्यादिना दाधारूपे परिभाषिते धातुद्वये च। "यास्वेताः स्वेच्छया संज्ञाः क्रियन्ते ऽधुभादयः। कथं तु तासां साधुत्वं ? नैव ताः साधवोमताः" इत्याशङ्क्य "अनपभ्रंशकरूपत्वं नाम्नामप्रयुक्तता। असाधूनां प्रयोगे वा प्रत्यवायोऽपि नो तथा" इति हरिणा तत्तानपभ्रंशत्वेन साधुत्वमुक्तं संज्ञाकरणफलं तु स्वशास्त्रे तया व्यवहारः यथा "उपसर्गात् घोः किः" पा०। "दाधीघ्वदाप्" भट्टिः। "स्वर्यौ गुरू" सुग्ध० परिभाषिते धातुसंज्ञे च।

घुट आवर्त्तने (घाँटा) भ्वा० आत्म० सक० सेट्। घोटते बृदित् अघुटत् जुघुटे। [जुघोट।

घुट प्रतिघाते तु० कुटा० पर० सक० सेट्। घुटति अघुटीत्

घुट पु० कु० घुट-अच्। चरणपश्चौ गुल्फे हेम०। ततः स्वार्थे क, घुट-स्वुल् वा। घुटक अत्रैवार्थे पु०।

घुटि (टी) स्त्री कुटा० घुट-इन् वा ङीप्। गुल्फे द्विरूपको०।

घुटिक पु० घुट+अस्त्यर्थे ठन्। गुल्फे हेमच०। तत्रार्थे स्त्री टाप् अमरः। [जुघोड।

घुड व्याप्तौ तु० कु० पर० सक० सेट्। घुडति अघुडीत्

घुण भ्रमणे भ्वा० आ० अक० सेट्। घोणते अघोणिष्ट। जुघुणे।

घुण भ्रमणे तु० प० अक० सेट्। घुणति अघोणीत् जुघोण।

घुण अदने भ्वा० आ० इदित् सक० सेट्। घुणते अघुणिष्ट जुघुणे।

घुण पु० घुण-क। खनामख्याते काष्ठभक्षके कीटभेदे। "घुणोपहतकाष्ठेषु मलनाशोशुभावहः सुखेधेभ्रस्य" सुश्रुतः। "भस्म भस्मघुनुर्घुणैरुपहृतम्" भट्टिमा०।

घुणप्रिया स्त्री ६त०। उदुम्बरपलङ्के शब्दार्थचि०।

घुणवल्लभा स्त्री ६त०। अतिविषायां भावप्र०।

घुणाक्षर न० घुणखातमक्षरम्। घुणाख्यकृमिणा काष्ठच्छेदनद्वारेण अवज्ञानिष्पादिते ऽवर्णाकारलेखाभेदे। तत्र लक्षणतयाऽस्यास्य कच्। तत्तुल्ये अनुद्देशेनापि सिद्धिदर्शिनिसिद्धरूपे ऽन्यार्थभेदे पु० "सङ्ख्यावमरैर्नीरामलम्भे हि घुणाक्षरम्" राजत०। अवैद्यशीविनां सिद्धिः स्यात् घुणाक्षरवत् क्वचित्" रत्नाव०।

घुणि त्रि० घुण-इन्। भ्रान्ते "सं वा अरिष्यते घुणिर्वांस-विष्यति" शत० ब्रा० ११।४।२।१४। [तत्रैवार्थे। हेमच०।

घुरट पु० घुट-क नि० सुम्। गुल्फे शब्दमाला। स्वार्थे क।

घुरिटक न० घुरट+स्वार्थे कन्। गुल्फाकारवत्स्थे वनस्थे करीरे (काण्डा) शब्दच०।

घुरुड पुंस्त्री घुर-ड तस्य नेत्वम्। भ्रमरे उणादिको०।

घुम् अ० घुर-बा० डुम्। अव्यक्तशब्दे चादावाकृतिगणस्थः।

घुर ध्वनौ भीमभवने च तु० पर० अक० सेट्। घुरति अघोरीत्। जुघोर। "अघोरीद्भङ्गाघोरम्"। "जुघुरे चातिभैरवम्" भट्टिः। भावे नङ्। घोरम्।

घुर त्रि० घुर-क। ध्वनिभेदकारके। प्रकारे तस्य द्वित्वम्। घुरघुर घुरप्रकारे घोषाशब्दे कादः उदा०।

घु(रि)रो स्त्री घुर-बा० कि वा ङीप्। शूकरतुण्डे "कः कः कुत्र न घुघुरायितघुरीघोरोत्तुकः शूकरः" सा०द०।

घुर्घुर पु० घुरिव्यक्तं घुरति घुर-क। (घुरघुरिका) यमकीटे त्रिका०। शूकरशब्दे च। घुर्घुर इवाचरति क्यङ्। घुर्घुरायते। "कासश्वासजलायामः कण्ठे घुर्घुरायते" वैद्यकम्। "कः कः कुत्र न घुघुरायितघुरीघोरोत्तुकः शूकरः" सा०द०।

घुर्घुरक पु० घुर्घुर इव कायति के-क। शुक्तीनां दर्वीकरविशेषद्वयभेदे। "दर्वीकरविशेष इत्युपक्रमे "खरावसादौ घुर्घुरको जलतेत्यादि" सुश्रु०।

घुर्घुरिका स्त्री घुर्घुरोवराहध्वनिरस्यास्याः ठन्। तमकका-शोपद्रवे रुग्भेदे (गला चड़कड़े) "तृट्श्वेदमधुप्रायः कण्ठघुर्घुरिकान्वितः। विशेषाद्दृष्टिनाशे तास्ये च्छ्वासः स्यात् तमकोमतः" सुश्रु०।

घुर्घुरी स्त्री घुर्घुरः शूकरशब्दोऽस्त्यस्य अच् गौरा० ङीष्। जलजन्तुभेदे रत्नकिरायाम्" त्रिका०।

घुलच्च पु० घुर-क्विप् तमश्नुते अश्नुच-अच् उप० स० रस्य लः। (गडगडे) गवेधुकाधान्ये रत्नमाला।

घुलघुलारव पुंस्त्री घुलघुलिव्यक्तमवारौति आ+रु-अच्। पारावतभेदे राजनि०।

घुष कान्तौ अक० क्षतौ इ० भ्वा० आत्म० सेट् इदित्। घुंषते अघुंषिष्ट जुघुंषे सान्तोऽयमित्यन्ये वृहच्चम्।

घुष बधे भ्वा० पर० सक० सेट्। घोषति घुरित् अघुषत् अघोषीत्। जुघोष। घोषः। घुषितः।

घुष खतौ आविष्करणे च चा घु० उभ० पक्षे भ्वा० पर० सक० सेट्। घोषयति ते घोषति अजूघुषत् त घुरित्

स्थुषत् अघोषीत्। जुघोषाम् बभूव आस चकार चक्रे। जुघोष खिजभावे घुषितः—घुष्टः। घोषः घोषणा। घोषणम्। "इति स द्रुपदो राजा स्वयंवरमघोषयत्" भा० आ० १८५ अ०। "सुहृदां प्रियमाख्यातुं घोषयन्तु च ते जयम्" भा० वि० ३४ अ०। "जयमघोषयदस्य तु केवलम्" रघुः। आविष्करणञ्च सर्वजनस्तुतिघोष्यशब्दकरणम्। (ठेडरापेटा)

आ+सम्यक् घोषणे। "आघोषयत् भूमिपतिः शमस्तम्" भट्टिः। सततक्रन्दने इत्यन्ये। [ह्वि० स०१८ अ०।

उद्+अर्थं आविष्करणे। "उद्घुष्टजयशब्दविरावितासाः"

घु(ष्ट)षित त्रि० घुष—क्त वा ष्टुत्व। ध्वनिते रवभावे। घुष्ट इत्यपि तत्र उद्गशब्देन प्रकटिताभिप्राये २वाक्यादौ न०।

घुष्टान्न न० घुष्टं को भोक्तोच्छिष्टं देवमन्नम्। कोभोक्तोच्छिष्टा सत्यादौ दोषमानेऽन्ने तत्राभोज्यतामाह मनुः "गवा घ्रातमवधूतं घुष्टान्नञ्च विशेषतः। गणान्नं गणिकान्नं च विदुषा च जुगुप्सितम्"।

घुसृण न० घुस्रि(सि)—बा० ल्यनक् पृषो० नलोपः घुसृणःसम्बन्धोऽस्य सत्व। कुङ्कुमे त्रिका०। "घुसृणैर्यल जलाशयोदरे" इति नैषधम्।

घुसृणापिञ्जरतनु स्त्री घुसृणमिव घुसृणेन वा आपिञ्जरा तनुरस्याः। गङ्गायां "घुसृणापिञ्जरतनुर्घर्घरी घर्घरस्वना" काशी० २९ अ० गङ्गानामोक्तौ

घूक पुस्त्री० घू इत्यव्यक्तं कायति कै—क। उलूके पेचके। हेमच०। स्त्रियां जातित्वात् ङीष्।

घूकनादिनी स्त्री घूक इव नदति नद—णिनि ङीष्। गङ्गायाम् "घर्घरा घूकनादिनी" काशी० २९ अ०। गङ्गानामोक्तौ।

घूकारि पुंस्त्री० ६त०। काके हेमच०। तस्य पेचकवैरित्वं लोकसिद्धम्। स्त्रियां जातित्वात् वा ङीष्।

घूकावास पु० ६त०। आखोटवृक्षे राजनि०। तस्य निशि उल्लूकमाखायुतत्वेन कोटरतुल्यत्वात् दिवाभीरोरुल्लूकाभ्यकाराद्युतत्वेनावासस्थानत्वात्तथात्वम्।

घूर हिंसायां सक० क्रीर्णतायाम् चक० दि० आत्म० सेट्। घूर्यते अघूरिष्ट। जुघूरे ईदित्। घूर्णः। ध्वनौ च "जुघूरेणातिसैरवम्" भट्टौ दीर्घमध्यं पठित्वा तस्य ध्वन्यर्थकतां भरत आह।

घूर्ण भ्रमणे चक० दृ० उभ० सेट्। घूर्णति ते। अघूर्णीत् अघूर्णिष्ट। जुघूर्णे जुघूर्णे। "गुरुभारसमाक्रान्तवाजिनञ्च जुघूर्ण च" रामा० कि०। "केचिदाश्रित सख्या भयात् केचिदघूर्णिषु" "अघूर्णिष्टां ततो ज्ञात्वा तावश्विन्यतासुतौ" इति च भट्टिः। घूर्णितः घूर्णितवान्। "ततोरथो घूर्णितवान् नरेन्द्र!" भा० क० ९० अ०। "कादम्बरीमदविघूर्णितलोचनस्य युक्तं हि शाङ्कलभृतः पतनं पृथिव्याम्" चक्रटः। "भो इक्षाः पर्वतस्थाः बलकुसुमयुता वायुना घूर्ण्यमाना" सङ्गानाः वायुनेति हेतौ तृतीया सत्यकारपाठे गत्यन्तात् कर्मणि शानच् कर्तरि तृतीयेति भेदः। णिचि घूर्णयति ते अजुघूर्णत् त। "नयनान्यरुणानि घूर्णयन्" कुमा०। "घूर्णयन् मदिराक्षादमदपाटलितद्युतीं" माघः। कर्मणि घूर्ण्यते अघूर्णि। घूर्ण्यमानः। "वायुना घूर्ण्यमानाः" सङ्गानाः पाठान्तरम्।

घूर्ण पु० घूर्णयति अच्। (सिमा) १शाकभेदे पीलुवृक्षे शब्दच०। २भ्रान्ते त्रि०। भावे घञ्। ३भ्रमणे। घूर्ण—णिच्—अच्। ४घूर्णिकारके रोगभेदे

घूर्णन न० घूर्ण—भावे ल्युट्। १भ्रमणे चक्राकारावर्त्ते। हेमच०। युच्। घूर्णनाप्यत्र स्त्री "घूर्णनागात्रपतनभ्रमणादर्शनादिह" सा० द०।

घूर्णायमान त्रि० घूर्णः भ्रान्त इवाचरति क्यङ्—चानश् वा क्यङ् कर्तरि शानच्। भ्रम्यमाणे। "इन्द्राद्यैरखिलार्थसाधनपरैः संस्तूयमानं मुहुः पीतोन्मत्तफलात्तुलाचलतया घूर्णायमानेक्षणम्" इति कलापधातुव्याख्यासारः।

घूर्णि पु० घूर्ण—भावे इन्। भ्रमणे हेमच०।

घूर्णित त्रि० घूर्ण—णिच् कर्मणि क्त। १भ्रमिते। कर्तरि क्त। २भ्रान्ते प्रचलायिते अमरः। घूर्णधातौ उदा०।

घूर्णिका स्त्री शुक्राचार्यकन्यादेवयानीसखीभेदे। "गते तु नाहुषे तस्मिन् देवयान्यघनिन्दिता। उवाच शोकसन्तप्ता घूर्णिकामागतां पुरः। देवयान्युवाच। त्वरितं घूर्णिके! मह्यं शीघ्रमाचक्ष्व मे पितुः। नेदानीं सख्यमेष्यामि नगरं वृषपर्वणः। वैशम्पायन उवाच। सा तत्र त्वरितं गत्वा घूर्णिकाऽसुरसन्निधिम्। दृष्ट्वा काव्यं सुताचेष्टं सर्वमाविष्टचेतना" भा० आ० ७८ अ०।

घृ क्षेके भ्वा० पर० सक० अनिट्। घरति अघार्षीत्। अघार

घृ क्षेके क्षादने च चु० उभ० सक० सेट्। घारयति ते अजीघरत् त। घारयां बभूव आस चकार चक्रे। धारितः। आ+यमन्तात्क्षेके आधारः। तच्चक्रे ६२५ ङ्यक्षम्। "प्रणीत घृतदाज्याभिघारणोरा" वीरच०।

घृ भासे अक० सेके सक० जु० पर० अनिट्। जिघर्त्ति अघार्षीत्। अयं वैदिकः। घर्मः (दीप्तः)।

घृङ् अव्य० अव्यक्तशब्दे। "घृङिङति पपात" इत्युपक्रमे तद्यदघृङिङत्यपतत्तस्मादृषभः" शत० ब्रा० १४।१।१।१०।

घृण दीप्तौ तना० उभ० कक० सेट्। घर्णोति घृणोति घर्णुते घृणुते अवर्णीत् अघर्णिष्ट जघर्ण जघृणे घृणा। उदित्। वर्णित्वा घृण्वा। क्ङौ वेट्कत्वात् निष्ठा क्तनिट्। घृणः। वेदे गणव्यत्ययोऽपि "आ यो घृणे न ततधाणो अजरः" ऋ० ६।१३।५। "आघृणे आदीप्यते" भा०।

घृष घृक्षणे भ्वा० आत्म० सक० सेट् उदित्। घृक्षते अघृक्षिष्ट। जघृक्षे।

घृण पु०घृष-दीप्तौ क। १दिवसे निघ०। २दीप्ते ३उष्णे च। "अङ्गा गं भानुना गं हिमा गं घृणेन क्वट्" १०।३७। १०। "घृणेन उष्णेन" भा०। "घृणाच्च भीषा अद्रिवः क्वट्" १।१३१६। "घृणात् दीप्तात्" भा०।

घृणा स्त्री घृ-सेके नक्। १कारुण्ये-दयायां कारुण्येन हि हृदयं सिक्तमिवार्द्रं भवतीति तस्य तथात्वम्। "मन्दमस्यन्निषुक्तां घृणया सुनिरेय वः" किरा०। "इत्यङ्कते मतघृणः किमयं विधत्ताम्" रघुः २जुगुप्सायां निन्दायाञ्च अमरः "तां विलोक्य वनितावधे घृणाम्" "प्राणजीवत घृणा ततो मही" इति च रघुः। "अधारि पद्मेषु तदङ्घ्रिणा घृणा" नैष०।

घृणालु त्रि० घृणा+वा० आलुच्। क्षमायुक्ते "निष्पादितस्य कार्त्स्न्येन भगवद्भिर्घृणालुभिः" भाग० ४।२२।४१।

घृणावत् त्रि० घृणा+अस्त्यर्थे मतुप् मस्य वः। क्षमायुक्ते स्त्रियां ङीप्। सा च २गङ्गायाम् घृणिनिधिशब्दे उदा०।

घृणावास पु० ६त०। १क्षमाखण्डे त्रिका०। २क्षमायुक्ते च

घृणि पु० घृ-नि नि० गुणाभावः। १किरणे, २ज्वालायाम्, अमरः। ३तरङ्गे, ४सूर्य्ये ५जले न० मेदि० ६दीप्ते त्रि० "तस्य त्वक्त्वसभावस्य घृणेर्भावनौकसः" भाग० ७।१।६। घृणेर्दीप्तस्य

घृणिनिधि पु० निधीयते अस्मिन् नि+धा आधारे कि ६त०। १सूर्य्ये २गङ्गायाञ्च "घृणावती घृणिनिधिः" काशीख० गङ्गानामोक्तौ।

घृणीवत् त्रि०घृणिरस्त्यस्य मतुप् वा०वेदे न मस्य वः दीप्तः। दीप्तिमति। "घृणीवाँ चेतति त्मना" ऋ० १०।१०६।३। "घृणीवान् दीप्तिमान्" भा०।

घृत क्लीं० घृ-सेके क्त। अर्द्धचौदि दुग्धभवे "सर्पिर्विलीनमाज्यं तु घनीभूतं घृतं भवेत्" उक्ते घनीभूते १आज्ये घृत गुणभेदादि भावप्र० उक्तं यथा "घृतमाज्यं हविः सर्पिः कथ्यते तद्गुणा अथ। घृतं रसायनं स्वादु चक्षुष्यं वह्निदीपनम्। शीतं वीर्य्ये विशालक्ष्मी पापपित्तानिलापहम्। अल्पाभिष्यन्दि कान्त्योजस्को जो लावण्यबुद्धिकृत्। स्वरकृतिकरं मेध्यमायुष्यं बलकृद्गुरु। उदावर्त्तज्वरोन्मादमूलानाहव्रणान् हरेत्। स्निग्धं कफकरं रक्तःक्षयपीसर्परक्तनुत्।

गव्यस्य घृतस्य गुणाः गव्यं घृतं विशेषेणेत्यादि भावप्र० वाक्यम् २५८२ पृ० उक्तम् घृतभेदगुणा भावप्र०उक्तायथा

माहिषस्य गुणाः। "माहिषन्तु घृतं स्वादु पित्तरक्तानिलापहम्। शीतलं श्लेष्मलं हृद्यं गुरु स्वादु विपच्यते"।

आजस्य गुणाः "आजमाज्यङ्गरोत्तम्भि चक्षुष्यं बलवर्द्धनम्। कासे श्वासे क्षये चापि हितं पाके भवेत्कटु"।

अथ औष्ट्रघृतम् "औष्ट्रं कटु हृतं पाके शोथक्रिमिविषापहम्। दीपनं कफवातघ्नं कुष्ठगुल्मोदरापहम्"।

अथ आविकघृतम् "पाके लघ्वाविकं सर्पिः सर्वरोगविनाशनम्। हृद्यं करोति चास्थीनामङ्गरीणकरापहम्। चक्षुष्यमग्निबुद्धिकरं वातदोषनिवारणम्"।

अथ नारीघृतम्। "कफेऽनिले योनिदोषे पित्ते रक्ते च तद्धितम्। चक्षुष्यमाज्यं स्त्रीणां वा सर्पिः स्वादम्लतोपमम्"।

अथाश्वघृतम् "हृद्यं करोति देहाग्नेर्लघु पाके विषापहम्। तर्पणं नेत्ररोगघ्नं दाहतृड्वडवाघृतम्"।

दुग्धघृतस्य गुणाः "घृतं दुग्धभवं याहि शीतलं नेत्ररोगहृत्। निहन्ति पित्तदाहास्रमदमूर्च्छाभ्रमानिलान्"।

अथ छागलदधिजघृतगुणाः "हविर्छागलदुग्धोत्थं तच्छागैयङ्गवीनकम्। छैयङ्गवीनं चक्षुष्यं दीपनं रुचिकृत्परम्। बलकृद्वृंहणं हृद्यं विशेषाज्ज्वरनाशनम्"।

पुराणघृतस्य गुणाः "वर्षाद्ध्वं भवेदाज्यं पुराणं तत्त्रिदोषनुत्। मूर्च्छाकृच्छविषोन्मादापस्मारतिमिरापहम्। यथा यथाऽखिलं सर्पिः पुराणमधिकं भवेत्। तथा तथा गुणैः स्वैः स्वैरधिकं तदुदाहृतम्"।

अथ नूतनस्य घृतस्य विषयाः "योजयेच्चयमेवाज्यं भोजने तर्पणे शमे। बलस्थे पावकेऽरोगे कामलानेत्ररोगयोः"।

घृतप्रयोगस्याविषयाः "राजयक्ष्मणि बाले च वृद्धे श्लेष्मजते गदे। रोगे साग्नि विसूच्याञ्च विबन्धे च मदात्यये। ज्वरे च दहने मन्दे न सर्पिर्वै मन्यते"।

अस्य गव्यादिघृतभेदात्तद्गुणादिकं च सुश्रुतेनोक्तं यथा "घृतन्तु सौम्यं शीतवीर्यं मृदु मधुरमल्पाभिष्यन्दि श्लेष्मरक्तदाहतौक्ष्ण्यादापस्मारशूलज्वरानाहवातपित्तप्रशमनमग्निदीपनं स्मृतिमतिमेधाकान्तिस्वरबलवर्णसौकुमार्यौजसोजोबलकरमायुष्यं हृद्यं मेध्यं वयःस्थापनं गुरु चक्षुष्यं सौम्याभिवर्द्धनं वाग्मार्दवक्षीणप्रशमनं विषहरं रक्षोघ्नञ्च। विपाके मधुरं शीतं वातपित्तविषापहम्। चक्षुष्यमग्र्यं बल्यञ्च गव्यं सर्पिर्गुणोत्तरम्। आजं घृतं दीपनीयं चक्षुष्यं बलवर्द्धनम्। कासे श्वासे क्षये चापि पथ्यं पाके च तद्गुरु। मधुरं रक्तपित्तघ्नं गुरु पाके कफापहम्। वातपित्तप्रशमनं सुशीतं माहिषं घृतम्। औष्ट्रं कटुरसं पाके शोफक्रिमिविषापहम्। दीपनं कफवातघ्नं कुष्ठगुल्मोदरापहम्। पाके लघ्याविकं सर्पिर्न च पित्तप्रकोपणे। कफेऽनिले योनिदोषे शोषे कृमौ च तद्धितम्। पाके मधुरतीक्ष्णञ्च कषायं कफनाशनम्। दीपनं बह्वमूत्रञ्च विद्यादैकशफं घृतम्। चक्षुष्यमग्र्यं स्त्रीषान्तु सर्पिः स्यादमृतोपमम्। दृष्टिं करोति देहाग्न्योर्लघुपाकं विषापहम्। कषायं बह्वविण्मूत्रं तिक्तमग्निकरम् लघु। इन्ति कारेषवं सर्पिः कफकृच्छ्रविषक्रिमीन्। क्षीरघृतं पुनः संयाहि रक्तपित्तश्रममूर्च्छाप्रशमनं नेत्ररोगहितञ्च।

सर्पिर्मण्डस्तु मधुरः सरोयोनिश्लोत्तिशिरसां शूलघ्नो वह्निनस्यादिपुरणेष्वुपदिश्यते। सर्पिः पुराणं सरं कटुविपाकं त्रिदोषापहं मूर्च्छामेद उन्मादोदरज्वरगरशोफापस्मारयोनिश्लोत्तिशिरःशूलघ्नं दीपनं वह्निनस्यादिपुरणेष्वुपदिश्यते। भवन्ति चात्र।

पुराणं तिमिरश्वासपीनसज्वरकासनुत्। मूर्च्छाकुष्ठविषोन्मादयक्ष्मापस्मारनाशनम्। एकादशशतञ्चैव वत्सरादुषितं घृतम्। रक्षोघ्नं कृष्णसर्पिः स्यात्परन्तु महाघृतम्। मेध्यं महाघृतं भूतैः कफघं पवनाधिकैः। बल्यं पवित्रं मेध्यञ्च विशेषात्तिमिरापहम्। सर्वभूतहरञ्चैव घृतमेतत्प्रशस्यते"। "उपगन्धं पुराणं स्यादूनवर्षस्थितं घृतम्। लाक्षारसनिभं शीतं प्रपुराणमतः परम्" राजवल्लभः। तस्य गुरुत्वमाह वैद्यके "अजाद्दशगुणं चूर्णं चूर्णाद्दशगुणं पयः। पयसोऽष्टगुणं मांसं मांसादष्टगुणं घृतम्" पक्वघृतस्य वर्णान्तरवीर्यतामाह "घृतमवद्दात् परं पक्वं हीनवीर्यत्वमाप्नुयात्" राजव०। "घृतं कांस्ये दशाहिकम्" इत्युक्तघृतस्याभक्ष्यता। "तेजोवै घृतमिति" श्रुत्वा वाक्यशेषे घृतप्रशंसनात् "अक्षाः शर्करा उपदधाति" इत्यादौ घृतेनैवाञ्जनम् न तैलेनेति मीमांसायां स्थितम्। घृतघटितौषधस्य षण्मासपर्य्यन्तं वीर्य्यत्वं वैद्यके उक्तम्। पक्वघृतादि नानाविधं चक्रदत्तादौ उक्तं विस्तरभयान्नोक्तम्। "घृतं घृतपावानः पिबत वसां वसापावानः" यजु० ६।१८। घृ-दीप्तौ कर्त्तरि-क्त। २दीप्ते ३सेचके च त्रि० शब्दर०। अस्य घृतादित्वात् ओत्वादीत्तता। ४जले न० शब्दार्थचि०।

**घृतकरञ्ज** पु० घृतमिव घनीभूतनिर्यासकत्वात् करञ्जः। (चिराकरमचा) करञ्जभेदे राजनि०।

**घृतकुमारी** स्त्री घृतमिव कुमारी सुन्दरी। घृततुल्य निर्य्यासे स्वनामख्याते गुल्मभेदे शब्दरत्ना० स्वार्थे क। घृतकुमारिकाप्यत्र स्त्री भावप्र० कुमारीशब्दे दृश्यम्।

**घृतकुल्या** स्त्री घृतपूरिता कुल्या। घृतपरिप्लुतमरिति।

**घृतकेश** पु० घृतोदीप्तः केश इव ज्वाला यस्य। वह्नौ "जज्ञोनपात् घृतकेशमीमहे" ऋ० ८।६०।२।

**घृतकौशिक** पु०घृतोदीप्तः कौशिकः। १गोत्रभेदे २तद्गोत्रान्वितप्रवरभेदे च "घृतकौशिकगोत्रस्य कुशिककौशिकघृतकौशिकाः प्रवराः" उ० त० रघु०। "स च यजुर्वेदीयब्राह्मणान्तरतः "घृतकौशिकाः घृतकौशिकः" शत० ब्रा० १४।५।५।२१। तथा तत्रैव १४।७।२।२७।

**घृतच्युता** स्त्री घृतं च्युतं यस्याः। कुशद्वीपस्थे नदीभेदे। कुशशब्दे २१४५ पृ० दृश्यम्। [त्रिका०।

**घृतदीधिति** पु०घृतेन घृता दीप्ता वा दीधितिरस्य। अग्नौ

**घृतधारा** स्त्री घृतं घृततुल्यं जलं धारयति धारि-अच् उप० स०। पश्चिमदेशस्थे नदीभेदे। "शुभामतिरसाङ्खैव घृतधारेति विश्रुताम्। वराहः सरितं पुण्यां प्रतीच्यामकरोत् प्रभुः" हरिवं० २२५ अ०। ६त०। २घृतस्रावियज्ञसन्तौ च।

**घृतनिर्षिज्** त्रि० घृतं दीप्तं निर्षिक् रूपं यस्य। १दीप्तरूपे। "दीदायानिध्मो घृतनिर्षिगप्सु" ऋ० २।३५।४। निर्षिगिति रूपनाम दीप्तरूपः" भा०। "जुहामो अद्य घृतनिर्षिजोगुः" ऋ० ४।३५।२। "घृतनिर्षिजो मित्रद्रव्येण दीप्तरूपाः" भा०। घृतं निर्षेनेक्ति निर्+निज-क्विप् ६त०। तापनद्वारा विलापनेन २घृतशोधके वह्नौ। "शोचिष्केशो घृतनिर्षिक् पावकः" ३।१७।१। "घृतनिर्षिक् घृतस्य तापनद्वारा विलापनेन शोधकः" भा०।

घृतप पु० ब०व० घृतमाज्यं पिबन्ति+पा–क उप० स०। आज्यपाखे पितृगणभेदे। "घृतपाः सोमपाः स्वधा वैश्वानरसरीचिपाः" भा० शा० १६६अ०। २घृतपान कर्त्तरि त्रि०।

घृतपदी स्त्री घृतं पादे संस्थितं यस्या पाद्भावः स्वाङ्गत्वात् ङीपि पद्भावः। इडादेवताभेदे। शत० ब्रा० इडा ब्राह्मणे १।८।१।२६। तन्निरुक्तिर्दर्शिता यथा "मानवी घृतपदीति मनुर्वैतामग्रे ऽजनयत तस्मादाह मानवीति घृतपदीति यदेवास्यै घृतं पादे समतिष्ठत तस्मादाह घृतपदीति"। तद्ब्राह्मणोद्घाते "इडाया मानवी-मिडादेवतां वक्तुं मानवी घृतपदीमैलावरुत्वीत्येतानि च निगदपदानि व्याख्यायन्ते" भा०। घृताः दीप्ताः पादा यस्याः प्राग्वत् पाद्भावादि। २सरस्वत्यामिडादेव्याञ्च। "इविपीडा देवी घृतपदी जुषन्त" ऋ० १०।७०।८। इडेतन्नामिका देवी सरस्वती घृतपदी दीप्तपदी-मेता" भा०। [राजनि०।

घृतपर्णक पु० घृतमिव स्वादु पर्णमस्य कप्। घृतकरञ्जे

घृतपीत त्रि० घृतं पीतं येन याचिता० वा परनिपातः। घृतपानकर्त्तरि पचे पीतघृत इत्यपि तत्रार्थे त्रि०।

घृतपूर पु० घृतेन पूर्य्यते पूरि–कर्म्मणि अच्। पकान्नभेदे तस्य प्रचुरघृतेन पक्वत्वात्तथात्वम् तत्पाकप्रकारादि शब्दार्थ चि०। "मर्दितां सर्पिता चीरनालिकेरघृतादिभिः। अवगाल्य घृते पक्वा घृतपूरोऽयमुच्यते। घृतपूरो गुरुर्बृंह्यः कफकृद्रक्तमांसदः। रक्तपित्तहरोरुह्यः स्वादुः पित्तहरोऽग्निदः। अपि च "क्षीरेण मर्दितं चूर्णं गोधूमानां सुगा लितम्। विस्रार्द्धं सर्पिषा पाच्यं कटाहेऽथ सिता न्वितम्। घृतपूरोऽयमुद्दिष्टः कर्पूरमरिचान्वितः"। नारिकेलजस्तु "सर्पिता मर्दितां क्षीरे नारिकेलसिता-र्द्रकैः। अवगाल्य घृते पाच्यो घृतपूरोऽपरः स्मृतः"। दुग्धजोऽपि "पाकपिण्डीकृतं क्षीरं शर्करा चूर्णमिश्रि-तम्। एतत्पूरविनिर्माणकारवेत् खल्लसर्पिषि"। क्षारिमयोऽपि "शुद्धाक्षोपिष्टं दुग्धन्तु क्षाथितं वस्त्रगा-लितम्। खण्डयुक्तं घृते पक्वं घृतपूरो भवेदयम्"। क्षेरेयजोऽपि "क्षेरेचूर्णं निःक्षिप्य पाकपिण्डीकृतं पयः। निर्माणं घृतपूराणां शर्करासहितं भवेत्"। आत्रेयमतः "पक्वान्नस्य घृते तप्ते रसस्यैलविमिश्रितः। गुडशर्करया योज्यो घृतपूरो यहूच्यया। क्षीरभाव्यं क्षरूपं हि खण्डं चूर्णं ततः स्मृतम्। योजिते यो विशेषोऽत्र तदाख्यावर्षसंज्ञितः। घृतपूरो गुरुर्बृंह्यो हृद्यः पित्तानिलापहः। सद्यः प्राणप्रदोवल्यः शुक्र-ओजोऽग्निदीपनः। मद्भाटकसुखानामप्येवं स्वादु घृत-पूरकः। विचार्य्य वस्तुसंयोगं तद्गुणानपि चाहरेदिति"।

घृतपूर्णक पु० घृतं पूर्णमस्य कप्। करञ्जभेदवृक्षे त्रिका० घृतपूर्णकरञ्जकोऽत्र भावप्र० करञ्जशब्दे १६८८पृ० दृश्यम्।

घृतपृष्ठ पु० घृतं दीप्तं पृष्ठमस्य। क्रौञ्चद्वीपपतौ प्रियव्रत पुत्रे राजभेदे। क्रौञ्चशब्दे २२४१पृ० विवृतिः।

घृतप्रतीक पु० घृतं प्रतीकं सर्त्तं यस्य। अग्नौ। तस्य उत्तरवेद्याम्माज्याधारेणोद्दीपनात् तथात्वम् "घृतप्रतीको घृतयोनिः" यजु० ३३।७।

घृतप्रयस् पु० घृतं तत्सहितं प्रयोऽन्नं यस्य। यज्ञे "घृत-प्रयाः सधमादे मधूनाम्" ऋ० ३।४२।३। "घृतप्रयाः घृतसहितानि प्रयांसि अन्नरूपाणि हवींषि यस्य" भा०।

घृतप्रसक्त पु० प्र+सद–क्त त स०। घृतेन प्रसक्ते यज्ञे। "घृत प्रसक्तो असुरः सुशेवः" ऋ० ५।४१।१।

घृतमण्ड पु० ६त०। घृतसारे। गलितघृतस्याधःस्थे सारांशभेदे (जमादानाम्नि) "ततः स घृतमण्डेन हृद्येनेन्द्रियबोधिना"। "भुञ्जन्वन्यं घृतमण्डेन यद्दी-सधुकसिद्धेन तैलेन वानुवासयेत्" सुश्रु०। सर्पिर्मण्डो-ऽप्यत्र घृतशब्दे तद्गुणाः सुश्रुतोक्ता दर्शिता। घृत-मण्डोऽस्यस्याः अच्। १काकोल्यां स्त्री शब्दच०।

घृतमण्डलिका स्त्री घृतमण्डं तदाकारनिर्यासं लाति ला–क संज्ञायां कन् अत इत्त्वम्। हंसपदीवृक्षे राजनि०

घृतलेखनी स्त्री घृतं लिख्यतेऽनया लिख–करणे ल्युट् ङीप्। दारुमये घृतलेखनपात्रीभेदे हेमच०।

घृतवती स्त्री हि०व०। घृतसदृक्त्वेन कार्य्यत्वेन वा-कारस्याम् मतुप् मस्य वः ङीप्। द्यावापृथिव्योः निघ०। "अद्भ्यः पृथिवी" इति श्रुतेर्भूमेर्जलहेतुक-त्वात् तथात्वम् दिवश्च उदकहेतुत्वात् तथात्वम्। २घृताक्त-युक्ते ३घृतपदयुक्ते च त्रि० स्त्रियां ङीप्। "तैलं प्रति-निधिं कुर्य्यात् घृतार्थे याचितो यदि। प्रलब्धे तदा भूयात् क्षोता घृतवतीमिति" त्रि० त० यज्ञपार्श्वः।

घृतवर पु० घृतं वरमस्य। घृतपूरे पकान्नभेदे हेमच०। तस्य घृतप्रचुरत्वात्तथात्वम्।

घृतस्थला स्त्री घृतसदृकं स्थलमुत्पत्तिस्थानं यस्याः घृतं दीप्तं स्थलं निलयस्थलं यस्या वा। अप्सरोभेदे। अप्-

सरसां हि जलोद्भवत्वं भाग० ८।७।६। समुद्रमन्थने उक्तं यथा "ततश्चाप्सरसो जाता निष्ककण्ठ्यः सुवाससः" तासां मध्ये अद्धाः प्रशस्तनितम्बस्थलत्वात् तथात्वम्। "घृतस्थला घृताची च विश्वाची चोर्वशी तथा" हरिवं० २२६ अ०।

घृतस्पृश् त्रि० घृतं स्पृशति स्पृश-क्विन्। घृतस्पर्शिनि क्विन्नन्तत्वात् स्वादौ क्वः। घृतस्क् घृतस्पृग्भ्यामित्यादि

घृताची स्त्री घृतसदृशं कारणतयाऽञ्चति अन्च-क्विप् नलोपे स्त्रियां ङीप् पूर्वाणोदीर्घश्च। अप्सरोभेदे तस्या अद्भ्योजातत्वात् तथात्वम्। घृतस्थलाशब्दे दृश्यम्। सा च पौरवरौद्राश्वरूपस्य परिप्लवे दश पुत्रात् कन्याश्च दश सुषुवे यथा हरिवं० २।अ०।

"रौद्राश्वस्य घृताच्यां वै दशाप्सरसि सूनवः। ऋचेयुः प्रथमस्तेषां ऋक्षेयुस्तदनन्तरम्। कक्षेयुः स्थण्डिलेयुश्च सन्नतेयुस्तथैव च। दशार्णेयुर्जलेयुश्च स्थलेयुश्च महाबलः। वनेयुश्चोपनेयुश्च पुत्रिकाश्च दश स्त्रियः। रुद्रा भद्रा च भद्रा च मलदा मलहा तथा। स्थलदा चैव राजेन्द्र! मलदा सरसाऽपि च। तथा गोचपला च स्त्री रत्नकूटा च ता दश"।

२रात्रौ निश० तस्याः सोमरश्मिजादिशिशिरजलमूयस्त्वात् तथात्वम्। घृतमाज्यमश्नुते प्राप्नोति। श्वृतप्राप्नरि त्रि० स्त्रियां ङीप्। "घृताच्यसि जुहूर्नाम्ना" यजु०२।६। ४उदकयुक्ते त्रि० स्त्रियां ङीप्। दैं वह्नि स्तुत्यं घृताचीः" ऋ०७।६०।२ "घृताचीः उदकवत्यः" भा०। घृतं दीप्तं रूपमश्नुते। ५दीप्तरूपवति त्रि० स्त्रियां ङीप् पूर्ववत् सर्वम्। "स विश्वाचीरभिचष्टे घृताचीः" ऋ०१०।१३६।२। "घृताचीर्दीप्तरूपवतीः" भा०।

घृताचीगर्भसम्भवा स्त्री घृताच्या गर्भ इव सम्भवति सम्+भू-अच्। स्थूलकेशायाम् राजनि०। घृताच्या गर्भे सम्भवोऽस्य। २ऋतेयुभेदे पौरवे रूपभेदे पु० इतत्कन्यायां स्त्री घृताचीशब्दे विवृतिः।

घृतादि पु० घृतमादिर्यस्य "घृतादीनाञ्च" सानुनासिकाद्यार्धधातुकस्यौत्तानिमित्ते शब्दगणे स च आकृतिगणः" त्रि० कौ०।

घृतान्न पु० घृतमाज्यमन्नमदनीयं यस्य। हविर्भुजि वह्नौ। "तपर्मूर्धा घृतान्नः पावकः" ऋ० ७।३।१। २घृतभोजिनि त्रि० घृतेन मिश्रितमन्नम्। ३घृतमिश्रिते अन्ने न०।

घृतार्चिस् पु० घृतेनार्चिर्यस्य घृतं दीप्तमर्चिर्यस्य वा। वह्नौ। "घृतार्चिः प्रीतिमांस्तापि प्रजज्वाल दिधक्षया" भा० आ० ५८ अ०।

घृतावनि स्त्री घृतस्रावितिरिव। यूपकर्षे हेमच०।

घृताव्रध् त्रि० घृतसदृशं वर्द्धतेऽनया क्विप् दीर्घः ह्रस्तः। उदकवर्द्धके "घृतेन द्यावापृथिवी अभिक्षते घृतश्चिया घृतपृचा घृताहवा" ऋ०६।७०।४। उदकवर्द्धके द्यावापृथिव्यावित्यर्थः औस्थाने आच्।।

घृतासुति पु० घृतसदृशं हविरूपमासुवति या+सु-क्विप् हविर्संपादकयोर्भित्रावरुणयोः "ता (मित्रावरुणौ) सम्राजा घृतासुती यज्ञे यज्ञ उपस्तुता" ऋ०१।१३६।६। औस्थाने आच्। घृतमासुतिरत्रं यस्य। घृताच्योः इन्द्राविष्णोः। (इन्द्राविष्णू) "घृतासुती हविषं दत्तमस्मे" ऋ० ६।६८।६। अस्मे अस्मभ्यम्।

घृताहवन पु० घृतेनाहूयतेऽस्मिन् आ+हु-आधारे ल्युट् जुहोतेरविवक्षितकर्मकत्वे नाकर्मकत्वात् घृतस्य करणत्वमेव "हृतीया च होश्छन्दसि" पा० कर्मणि न तृतीया किन्तु "कर्तृकरणयोस्तृतीया" पा० करणे तृतीया श्रुत०। घृतेनाहवनाधिकरणे यज्ञौ। "घृताहवन! दीदिवः प्रति ष्म रिषतो दहः। अग्ने! त्वं रक्षस्विनः" ऋ०१।१२५। घृतावहन!। अग्ने!" भा०।

घृताहुति स्त्री घृतेनाहुतिः "तृतीया च होश्छन्दसि" पा० कर्मणि तृतीया जुहोतेरविवक्षितकर्मकत्वेनाकर्मकत्वात् करणे तृतीया वा श्रुत०। घृतेनाहुतौ। "यद्यज्ञेषु घृताहुतिभिः। यत्सामसु मध्वाहुतिभिः" आश्व० श्रौ० १।३।२।

घृताङ्क पु० घृतं तद्गन्धमाङ्कयते लक्ष्यते निर्यासेन आ+अङ्क-क उप० स०। घृतकुमारगन्धनिर्यासके सरलद्रुमे त्रिका०।

घृतिन् त्रि० घृतमाज्यमस्यदं वा प्राशस्त्येनास्त्यस्य इनि। १प्रशस्ताज्यके २प्रशस्तजलके च स्त्रियां ङीप्। "पयस्विनीं घृतिनीमन्नदारास्" (गङ्गाम्) भा० आनु० २६ अ०।

घृतेयु पु० पौरवे रौद्राश्वरूपपुत्रभेदे ऋतेयुशब्दे दृश्यम् तत्र ऋतेयुरित्यत्र घृतेयुरिति विष्णुपु० पाठः

घृतेल्ली स्त्री घृते स्नेहद्रव्ये इलति गच्छति इल-अच् गौरा० ङीष्। तैलपायिकायां (तेलापोका) हेमच०।

घृतोद पु० घृतमिव स्वादु उदकमस्य उदकस्योदः। कुशद्वीपावरके समुद्रभेदे घृतोदश्चादयोऽप्यत्र कुशशब्दे २।४२ पृ० दृश्यम्।

घृतौदन पु० घृतेन मिश्रः ओदनः। "भक्ष्येण मिश्रणे" पा०३त०। आज्यमिश्रिते ओदने। "दध्योदनं च जीवाय शुक्राय च घृतौदनम्" यज्ञपरिकथने सं० त०।

घृत्समद पु०घृत्समद+पृषो०। ऋषिभेदे विष्णुपुत्तत्सापाठः।

घृष संघर्षे भ्वादौसक० पर० सेट्। घर्षोमर्दनम् (घषा) व्यापारभेदः संमर्दो वा घर्षति अघर्षीत् अघर्ष। घर्षणं घर्षः। उदित् घर्षित्वा घृष्ट्वा। क्त्वो सेट्कत्वात् निष्ठा त्वनिट् घृष्टः। घर्षित इति प्रयोगस्तु तारका० दृतजनाः। "धातुजं क्षुजते रेणुं वायुवेगेन घर्षितम्" (शैवराजः) रामा० ३।७६अ०।

घृष्ट त्रि० घृष-कर्त्तरि क्त। मर्दिते कृतघर्षणे "घृष्टरसाङ्गनं नार्याः चोरेण" स्मृतु०। "द्रौपद्या नतु मत्स्य राजभवने घृष्टं न किं चन्दनम्" पञ्चतन्त्रम्। २गन्धभेदे "घृष्टोमलयजोगन्धः सरलश्च नमेरुणा। अगुरुप्रभृतिर्यापि यस्य पङ्कः प्रदीयते। घृष्टः संघृष्टगन्धोऽयं द्वितीयः परिकीर्त्तितः" इति शब्दार्थचि० धृतवाक्यम्।

घृष्टि पुंस्त्री घृष-कर्त्तरि क्तिच्। १शूकरे मेदि० स्त्रियां वा ङीप्। (चामरच्यालु) २वाराह्याम् अमरः। ३क्षपराजितायाम् स्त्री मेदि०। भावे क्तिन् घर्षणे (घसा) ४व्यापारभेदे ५सङ्घर्षाद्यात्मे स्त्री मेदि०। क्तिन्नन्तत्वात् न ङीप् [कृत्तिवा)। रत्नमा०।

घृष्टिला स्त्री घृष्टिं लाति ला-क। घृष्टयपस्थाम्। (चा-

घृष्वि पुंस्त्री घर्षति भूमिं तुण्डेन घृष-क्विन् कृविघृष्वि इत्यौणादि उ०नि०न वलोपः। १वराहे २घर्षणशीले त्रि०। "मदन्ति वीरा विदथेषु घृष्वयः" ऋ० १।८५।१। "प्रवः सहांसि घृष्वये"।।२७।४। "घृष्वये शत्रुघर्षणशीलाय" भा०। "क्रीडन्ति क्रोडा विदथेषु घृष्वयः" ।।१६६।२। एवं सर्वत्र घृक्षिशब्दस्य इदन्तत्वेन प्रयोगदर्शनात् क्विनप्रत्ययान्तत्वेन निष्पन्नत्वात् ऋक्षिवरादि इति सि०कौ० उक्तेऽपि शब्दक० घृक्षिशब्दस्य नान्तत्वकल्पनं भ्रमादिकमेव। स्त्रियां वा ङीप्।

घेक्कुलिका स्त्री (घेँचु) ख्याते क्रौञ्चादने हृद्ये रत्नमाला।

घोङ्ग पुंस्त्री पक्षिभेदे शब्दच० स्त्रियां ङीप्।

घोट(क) पु० घुट-अच् एवुल् वा। अश्वे। तस्य भुविवेष्टनाकारेण चेष्टनात्तथात्वम्। स्त्रियां जातित्वात् ङीप्। "घोटी घोरा विकृतविकृतं तु हेवहीनं हसन्ती" काव्यं। तत्रचकारादि अश्वशब्दे ४६८पृ० दृश्यम्" भा०।

घोटकमुख पु० घोटकस्य मुखमिव मुखमस्य। किन्नरभेदे २प्रवरर्षिभेदे च हेमा० ब्र० प्रवराध्याये दृश्यम्।

घोटकारि पु० ६त०। महिषे शब्दार्थ चि०। तस्य यथाऽश्वैरं तथा उपमशब्दे १२५० पृ० उक्तम् स्त्रियां वा ङीप्। २हयारिवृक्षे करवीरे च। हयारिशब्दे दृश्यम्।

घोटिका स्त्री घुट्-एवुल् टापि अत इत्त्वम्। कर्कशाम् राजनि०।

घोणा स्त्री घुण-अच्। १अवनासिकायां, २नासामात्रे च अमरः। "अवनिरोधस्फोतरोष्णुरघुरघरावमाघघोरघोणेन" काद०। "गौरः प्रलम्बोज्झुचारुघोणः" भा० आ० १८६ अ०। अस्य क्रोडादित्वात् स्वाङ्गत्वेऽपि न ङीप् दीर्घघोणा स्त्री।

घोणिन् पुंस्त्री दीर्घा घोणाऽस्त्यस्य व्रीह्या० इनि। शूकरे अमरः स्त्रियां ङीप्।

घोण्टा स्त्री घुण-वाट तस्य नेत्त्वम्। वदरीभेदे (सेओलाकुल) २पृश्निपर्ण्यां च मेदि। [हेमच०।

घोण(न)स पु० गोनस+पृषो०। तिलतुषे गोनसे सर्पभेदे

घोर न० घुर-अच्। १विषे राजनि० २भयानके त्रि० हेम०। घोराशब्दे उदा०। "शिवाघोरस्वनां पश्चात्" रघुः। "घोरेऽस्मिन् भूतसंसारे" मनुः। "घोररावां महारौद्रीम्" कालीध्यानम्। ३शिवे पु० "घोराय घोररूपाय घोरघोरतराय च" भा०शा०२८६अ० शिवस्तोत्रे। "नमोघोरेभ्यः पितरोघोराः" यजु० २।३२।

घोरक पु० ब०। देशभेदे। "काश्मीरश्च कुमारश्च घोरका हंसकायनाः" भा० स० ५१अ०।

घोरघुष्य न० घोरं घुष्यतेऽत्र घुष-कर्मणि क्यप्। कांस्ये राजनि०। घोरं घुष्टं यस्य घोरघुष्टमित्यपि तत्र पाठः। तत्रार्थे राजनि०।

घोरघोरतर पु० घोर+प्रकारे द्वित्वम् ततः तरप्। १शिवे घोरशब्दे दृश्यम् २अत्यन्तघोरे त्रि०।

घोरदर्शन पुंस्त्री घोरं दृश्यतेऽसौ दृश-कर्मणि ल्युट्। १उलूके राजनि० स्त्रियां जातित्वात् ङीप्। २भयानके त्रि०। "वीक्षाङ्के महावाक्षसाहनं घोरदर्शनम्" भा० सो० १अ०।

घोररासन पुंस्त्री घोरं रासनं शब्दोऽस्य। १शृगाले शब्दर०। स्त्रियां जातित्वात् ङीप्। २घोरशब्दयुक्ते त्रि०।

घोररासिन् पुंस्त्री० घोरं रसति रस-णिनि। १शृगाले हेमच०। स्त्रियां ङीप्। २घोरशब्दकारिणि त्रि०

घोररूप पु० घोरस्वरूपं रूपमस्य ।महादेवे। घोरशब्दे ३१५म्। २त्रयरूपे त्रि०।

घोरवाशन पुंस्त्री० घोरं वाशते वाश-ल्यु। १मृगाके शब्दर० स्त्रियां जातित्वात् ङीष्। २भयानकशब्दकारिणि तिर्यग्जातिभेदे त्रि०।

घोरवाशित् पुंस्त्री० घोरं वाशते वाश-णिनि। १मृगाके हेमच० २भयानकशब्दकारिणि पक्षि मृगादौ च स्त्रियां ङीप्।

घोरा स्त्री घुर-क्च्। १देवताडोलतायां, राजनि० भयानकायां स्त्रियां त्रिका०। "२करालवदनां घोराम्" कालीध्यानम्। ३रात्रौ, ४सांख्योक्तायां राजस्यां मनोवृत्तौ शब्दार्थचि० ज्योतिषोक्ते "रवाद्युग्रभे संक्रमे भास्करस्य भवेद्घोरवार्त्तीव्रकं" २।१०। ११।२०।२५। संक्रमकरणवले ५रविसंक्रान्तिभेदे च। संक्रमशब्दे विवृतिः

घोल पुंन० घुड-कर्म्मणि घञ् डस्य लः। १तक्रे मथितदधि। "तनु सस्नेहमजलं मथितं घोलमुच्यते" भरतः। "सशरं निर्जलं घोलं वातपित्तहरं स्मृतम्। मस्तुना रहितं गाढं दधि शुभ्रतरे पटे। क्षीरसैन्धवसंमिश्रं घोलं बलतरं स्मृतम्। क्षीरसैन्धवसंयुक्तं घोलं पाताम्रभाजनम्। ऋतौसारे च मन्देऽग्नौ हितं रूक्षं बलप्रदम्" शब्दार्थचि० वैद्यकम्। "छिङ्गुजीरयुतं घोलं सैन्धवेन च संयुतम्। भवेदतीव वातघ्नमग्नीतीक्षारकृत् परम्। रुचिदं पुष्टिदं बल्यं वह्निशूलविनाशनम्। मूत्रकृच्छ्रे तु सगुडं पाण्डुरोगे सचित्रकम्। भावप्रद्रव्यभेदयुतस्य तस्य गुणादिकमुक्तम्।

घोलज न० घोलात् जायते जन-ड। घोलजाते एतादौ।

घोलवटक पु० घोलमिश्रितो वटकः। वटकभेदे "विश्लोषोलवटको विदाही पवनापहः" मदनपालनि०।

घोलि(ली) घुड-इन् डस्य वा ङीप्। पक्षिशाकभेदे राजनि०

घोष ए० घुष-आधारे घञ्। १आभीरपल्ल्यां तत्रां गोभिर्नादात् तथात्वम् कर्त्तरि घञ्। २गोपाले ३शब्दे न० मेदि० ४मशके त्रिका०। भावे घञ्। ५ध्वनौ हेमचन्द्रे "स्वयं यशः स्वयं+कृपौ विसर्गः सरएव च। एते रामानुपदाना ऋषोषाय विदधते। कण्ठस्थे तु घोषाः स्युः" त्रिलोक्ते ७वर्णोच्चारणप्रयत्नभेदे। ८घोषलतायाम् स्त्री शब्दार्थचि० "न च छन्दावने कार्य्यो गवां घोषः कदाचन" हरिवं० २२८।३३। शब्दे "दुमन्तं घोषं विजयाय कृण्महे" ऋ० १०।८४।४। "तत्र भुक्त्वा पुनःक्षिप्त्वा तूर्य्यघोषैः मङ्गलैः" भट्टिः। गोपे "हैयङ्गवीनमादाय घोषद्वानुपस्थितान्" रघुः। घुमा० घुञ्। घोषक आभीरपल्लीभवे त्रि०।

घोषक पु० घोष+स्वार्थे क। धामार्गवे घोषातकीलतायाम् अमरः। [श्वेतघोषातकीलतायामेदे रत्नमा०।

घोषकाकृति पु० घोषकस्य लताभेदस्याकृतिरिवाकृतिरस्य।

घोषण न० घुष-भावे ल्युट्। १ध्वनौ णिच्-भावे ल्युट्। उच्चैःशब्देन ज्ञापने २व्यापारभेदे (डेंडरा पेटा)। "वीर्यविक्रमशौर्य्याणां घोषणं सङ्गितं भवेत्" रामा० सुन्द० ५८अ०। युच्। घोषणाऽप्यत्र स्त्री। "राजा सर्व्वत्र षटहशब्देन घोषणामाज्ञापयामास" पञ्चत०। "दिग्विजृम्भितकाकुत्स्थयौवराज्यजयघोषणाः" रघुः।

घोषयित्नु पुंस्त्री० घुष-णिच् वा० स्नुच्। १ज्ञापके २कोकिले। ३वन्दिनि त्रि० शब्दरत्ना०।

घोषवत् त्रि० घोषः ध्वनिः वर्णभेदोच्चारणे बाह्यप्रयत्नोऽस्यास्य मतुप् मस्य वः। १घोषरूपबाह्यप्रयत्नयुक्ते गकारादिवर्णभेदे। "सर्व्वे स्वरावसानो घोषवन्तः वर्गाद्याः" ऋ० ४ "घोषवदाद्यन्तरन्तस्थमभिनिष्ठानान्तं ह्रस्वं चतुरक्षरं वा" आश्व०श्रौ०१।१५।६। "वर्गेप्रथमद्वितीयवर्णा अघोषवन्तः शिष्टाः घोषवन्तः। तदादौ यस्य ततत्तथोक्तं अन्तमध्येऽन्तःस्थायरत्नवायस्य तत् तथोक्तम्। अभिनिष्ठानो विसर्गः अन्ते यस्य तत् अक्षरं स्वरः। अकारादयो द्वादश स्वराः शिष्टं व्यञ्जनम् अपरिमित व्यञ्जनः। चतुरक्षरं वा। तत्र ह्रस्वरे भद्रः देवः भवः। चतुरक्षरे भवनाथः नागदेवः रुद्रदत्तः नारा० "आदौ घोषवदक्षरं यरलवान् मध्ये पुनःस्थापवेदन्ते दीर्घविसर्जनीय रहितं नाम पदत्वात् कृतम्" गर्गः। शक्तिभेदात् ऽविसर्गालता व्यवस्थाया। २ध्वनियुक्ते च। "एवं यज्ञ मतुलं घोषं घोषवांस्त्वं बलाहकः" भा० आ० २५अ०। स्त्रियां ङीप्। सा च ३लोकायां ख्यातायां ४लतायां हेमच०।

घोषा स्त्री घुष्यते शब्दयते ऋग्भिरियं कर्म्मणि घञ्। १शतपुष्पायां, मधुरिकायां, (मौरि) मेदि० २ककटशृङ्ग्यां, राजनि०। ३कोशातक्यां च शब्दार्थचि०। [घोषालतायां रत्नमा०।

घोषातकी स्त्री कोशातकी+पृषो०। कोशातकीलतायां श्वेत

घोषादि पु० "घोषादिषु च" पा० परस्थितेषु पूर्व्वपदस्थाद्युदात्तानिमित्तेषु शब्देषु स च मत्वः घोष कट वसुल छुद वदरी पिङ्गल पिङ्ग माला रत्ना शाला कूटशालनकी अश्वत्थ तृण शिल्पी शुनि मेखा।"

घोर पु० घोरस्वरैरपत्यम् अण्। कश्यगोत्रप्रवरे ऋषिभेदे। "कश्यानामाङ्गिरसानामोढ एवेति घोरस्य चैके ब्रुवतेऽवत्सव्याजमीढमाङ्गिरसघोरकाश्येति" आ० श्रौ० १२।३।१

घ्रंस पु० घ्रस्यते रसा अस्मिन् घस–आधारे घञ् पृषो०। दिवसे निघ०। "यो अर्के घ्रंस उत वा य अध्वनि" ऋ० ५।३४।२। इमास्मचमधिक्षय निरु० ६।१०। उक्तं यथा घ्रंस इत्यहर्नाम यद्घस्रन्तेऽस्मिन् रसाः" इति। अहस्तुल्ये २दीप्ते त्रि०"परि घ्रंसो भवेना वां वयो गात्" ऋ० ७।६८।४। घ्रसं दीप्तम्" भा०। इमास्मचमधिक्षय निरुक्ते तु घ्रंसमहरिति व्याख्यातम्। पृषो० अन्त्य, लोपे घ्रंस् अयत्न। "न घ्रंसताय न दिप्सो जघान" अथ० ७।१८।२।

घ्रस घृस्वत् धातुरिति केचित्।

घ्रा गन्धपरिणे अक० घ्राणजग्रन्थे सक० भ्वा०प० अनिट्। जिघ्रति अघ्रात् अघ्रासीत् अघ्रातास् अघ्रासिष्टाम्। जघ्रौ जघ्रिव जघ्राथ। घ्राता घ्रेयात् घ्रायात्। कर्म्मणि भावे वा घ्रायते अघ्रायि "अघ्रायि वान् गन्धपरः सुगन्धः" भट्टिः। "घ्राङ्भिर्वं जिघ्रति षड्गुणेशः" भाग० ११।३।६। नासिकया गन्धज्ञानमिच्छ (सोऽ) परिणम्। उपसर्गपूर्वकस्यतदुपसर्गद्योत्यार्थयुक्ते परिणे। घ्रेयः घ्रातं–घ्राणम् घ्रातिः

घ्राण न० घ्रा–करणे ल्युट्। १नासिकेन्द्रिये। तस्य मतभेदेन भौतिकादिता इन्द्रियशब्दे ६५४०पृ० दर्शिता। "इन्द्रियं घ्राणलक्षणम्" भाषा० तस्य पार्थिवत्वे प्रमाणं त्रि० सु० दर्शितं यथा

"घ्राणेन्द्रियं पार्थिवं रूपादिषु मध्ये गन्धस्यैव व्यञ्जकत्वात् कुङ्कुमगन्धादिव्यञ्जकवत्वत् न च दृष्टान्ते स्वकीयरूपादिव्यञ्जकत्वादसिद्धिरिति वाच्यं परकीयरूपाद्यव्यञ्जकत्वस्य तदर्थत्वात् न च नवशरावगन्धव्यञ्जकजलेन नैकान्तमिति वाच्यं तस्य सद्भुरसाभिव्यञ्जकत्वात् यद्वा परकीयेति न देयं, वायूपनीतसुरभिभागस्य दृष्टान्तत्वसम्भवात् न च घ्राणेन्द्रियसन्निकर्षस्य गन्धमात्रव्यञ्जकत्वात् तत्र व्यभिचार इति वाच्यं द्रव्यत्वे सति इति विशेषणात्"। कर्म्मणि ल्युट् वा तस्य नः। २कृतघ्राणे त्रि० घ्रातोऽस्मिन्। भावे ल्युट्। (सोऽ) ३व्यापारे न० घ्राणेन सूकरो हन्ति पचवातेन कुक्कुटः" मनुः। तस्याधिष्ठातारावश्विनौ।

घ्राणज न० घ्राणे जायते करणाधारत्वविवक्षया "सप्तम्यां जनेर्डः" पा० जन–ड ७त०। नासिकेन्द्रियजाते प्रत्यक्षभेदे "घ्राणजादिभेदेन प्रत्यक्षं षड्विधं मतम्" भाषा० तच्च प्रत्यक्षं गन्धादेर्यथाह तत्रैव "घ्राणस्य गोचरो गन्धो गन्धत्वादिरपि स्मृतः"। "घ्राणयाख्योभवेद्गन्धो घ्राणस्यैवोपकारकः" इति च

घ्राणतर्पण पु० घ्राणमिन्द्रियं तर्पयति। सुगन्धे अमरः।

घ्राणदुःखदा स्त्री घ्राणस्य दुःखं ददाति दा–क। छिक्कन्यां (हाँचि) भावप्र०।

घ्राणश्रवस् पु० घ्राणमिव श्रवः कर्णोऽस्य। कार्त्तिकेय सैन्यभेदे। "घ्राणश्रवाः प्रतिस्कन्धः काहनाशोजवन्धरः" भा० आनु०४६अ० कुमारसैनिकोक्तौ

घ्राति स्त्री घ्रायते अनया घ्रा–करणे क्तिन्। १नासिकायां शब्दच०। भावे क्तिन्। २घ्राणे (सोङ्घा) व्यापारे स्त्री "ब्राह्मणस्य रजः ज्ञात्वा घ्रातिरप्येयमद्ययोः" मनुः।

इति वाचस्पत्ये घकारादिशब्दार्थनिरूपणम्।

## ङ

ङकारः व्यञ्जनवर्णभेदः कवर्गपञ्चमः तदुच्चारणस्थानं कण्ठमूलं नासिका च "जिह्वामूले तु कुः शोफ्रः" इति "अमोऽनुनासिका ङञौ" इति च शिक्षोक्तेः तदुच्चारणे आभ्यन्तरप्रयत्नाः कण्ठमूले जिह्वामूलस्पर्शः। बाह्यप्रयत्नाः संवारनादघोषाल्पप्राणाः। माहकान्यासेऽस्य दक्षकराङ्गुल्यग्रेषु न्यसता। तस्य तन्त्रे वाचकशब्दा वर्णोद्धारतन्त्रे उक्ता यथा "ङः शङ्खो भैरवश्चण्डो विन्दूत्तंसः शिवः प्रियः। एकोरुद्रोदक्षनखः खर्परोविषयस्मृहः। कान्तिः खेटाङ्गधीरोद्दिशाक्षा ज्वालिनी वियत्। मन्त्रयन्त्रिव मदनो विघ्नेशो ज्ञानदायकः। एकनेत्रो महानन्दो दुर्द्धरश्चन्द्रमा मतिः। शिवश्चलो नीलकण्ठः कालेशी चमसांशुकौ"। कामधेनुतन्त्रे तस्य ध्येय रूपमुक्तं यथा। "ङकारं परमेशानि। स्वयं परमकुण्डलीम्। सर्वदेवमयं वर्णं त्रिगुणं लोललोचने!। यजुर्वेदमयं वर्णं ङकारं प्रणमाम्यहम्" "नकार-

जायतुस्वारपञ्चमौ भिलिषातुषु" कामधेनौ भवत्न सर्वधातुषु वर्गपञ्चमवर्णस्य नकारजत्वोक्तेः ङकारस्य तत्र नकारजत्वम् तेन चङ्क-क्विपि जन् इत्यादिरूपम्। तस्य काव्यादौ प्रथमनिर्देशफलं यथा "ङः खः गोपय लक्ष्मीं वितरति विद्यो ङलथा चः खलं कः" इ॰र॰ टी॰ इत्युक्तेरपवर्गः। [एकाक्षरकोषः। ङु पृ॰ कु॰ बा॰ ड। १विष्णौ २विषयसृष्टायां मेदि॰ ३भैरवे ङु ध्वनौ भा॰ आत्म॰ अक॰ अनिट्। ङते अङविट। ङुङुवे। सनि ङुङूषते।

इति वाचस्पत्ये ङकारादिशब्दार्थनिरूपणम्।

## च

चकारः व्यञ्जनवर्णभेदः चवर्गस्याद्यः तस्योच्चारणस्थानं तालु "इचुयशानां तालु" सि॰कौ॰ उक्तेः तस्योच्चारणे आभ्यन्तरप्रयत्नः तालुनि जिह्वामध्यस्पर्शः बाह्यविवारसंवाल्पप्राणा बाह्यप्रयत्नाः। मातृकान्यासे वामबाहुमूलेऽस्य न्यसता। अस्य वाचकशब्दाः वर्णोद्धारतन्त्रे उक्ता यथा।"चः पुष्कलो हलो वाणी चामरशक्तिः सुदर्शनः। चर्म खड्गधरो भीमो महिषाचारलक्षवः। एकरुद्रो रुचिः कूर्मश्चासखण्डा दीर्घबाहुकः। वामबाहुमूलं माया चतुर्भूशिखरूपिणी। दयितस्य त्रिनेत्रस्य लक्ष्मीरूपत्रीवलोचनः। चन्द्रं चन्द्रमा देवश्चेतनो हरिको बुधः। देवी कोटिसुखस्थात्मा कुमारी पूर्वकालुनी। अनङ्गमेखला वायुर्मोदिनी च सुलावणी"। तस्य ध्येयरूपं यथा "चवर्णं शृणु सुश्रोणि! चतुर्वर्गप्रदायकम्। कुण्डलीसहितं देवि! स्वयं परमकुण्डलीम्। सततं कुण्डलीयुक्तं पञ्चप्राणमयं सदा। पञ्चप्राणमयं वर्णं पञ्चप्राणात्मकं सदा। त्रिशक्तिसहितं वर्णं त्रिबिन्दुसहितं प्रिये!" कामधेनुतन्त्रम् काव्यतन्त्रादौ प्रयोगे सुखदायकता ज्ञातव्ये तन्त्रचूडामणिम्।

च अव्य॰वि-चण-घा बा॰ड। १पादपूरणे २पदान्तरद्योतने ३अवधारणे मेदि॰ ४हेतौ त्रिका॰। पादपूरणार्थस्य निरर्थकतैव। "निरर्थकं चादि पादपूरणैकप्रयोजनम्" चन्द्रालोकः "समुच्चये ऽन्वाचये ऽतरेतरयोगे ऽवधारणे च" अमरः। "चार्थे द्वन्द्वः" पा॰ सि॰कौ॰ व्याख्यातं यथा

"समुच्चयान्वाचयेतरेतरयोगसमाहाराश्चार्थाः। परस्पर (१) निरपेक्षाणामनेकस्य (२) एकस्मिन् (३) अन्वयः समुच्चयः। अन्यतरस्यानुषङ्गिक (४) त्वेऽन्वाचयः। मिलितानां (५) अन्वय इतरेतरयोगः। समूहः (६) समाहारः। तत्रेश्वरं गुरुञ्च भजस्वेति समुच्चये भिक्षामट गाञ्चानयेत्यन्वाचये च न समासोऽसामर्थ्यात् (७)। धवखदिरौ। संज्ञापरिभाषम्"।

व्याख्यातं चैतदस्माभिः सरलायाम्।

(१) "परस्परनिरपेक्षस्येति एकस्य क्रियान्वयोत्तरमपरस्याकाङ्क्षा तदन्वय इति न तयोः परस्पराकाङ्क्षा। (२) अनेकस्येति तेनैकस्य सापेक्षत्वेऽपि न दोष उभयोरन्वयाभावात्। समुच्चये चशब्देन समभिव्याहृतपदार्थोत्तरसापेक्षत्वं बोध्यते तदसमभिव्याहारे तु न। अतएवात्रैक एव चशब्दः प्रयुज्यते तेन यच्छब्दोत्तरं चशब्दसम्बन्धेन समभिव्याहृतक्रियादावन्वये इतरसापेक्षत्वं नत्वन्यत्रेति बोध्यम्। (३)एकस्मिन् एकधर्मावच्छिन्ने इत्यर्थः अन्वय इत्यस्य यत्रेत्यादिसमाप्तेन यत्रैवमन्वयस्तत्र समुच्चयबलादर्थादिति भावः। न त्वन्वयएव समुच्चय इति भणितव्यम्। अन्वयश्च विशेष्यतया विशेषणतया वा तत्राद्यं चैत्रो गच्छति पचति चेत्यादौ क्रियासमुच्चये, अन्यम् ईश्वरं गुरुञ्च भजस्वेत्यादौ द्रव्यसमुच्चये। (४) आनुषङ्गिकत्वमनुद्देश्यत्वमन्यतरस्य प्राधान्यञ्च तत्सम्बन्धिक्रियायां स्वयमकर्तृव्यापारूपं तथाच समभिव्याहृतक्रियादिगतमानुषङ्गिकत्वव्याप्यत्वमन्वाचयचकारार्थः। (५) मिलितानामिति परस्परापेक्षाणामवयवभेदकसमूहरूपाणामित्यर्थः। अन्वय इत्यस्यैकधर्मावच्छिन्नेत्यन्वयइत्यर्थः। तेन नीवातोः संयोगजनकव्यापारजनकव्यापारबोधकतया द्विकर्मकत्वेन अजां ग्रामं नयतीत्यादौ अजाग्रामयोरुभयोरपि धात्वर्थक्रियायामन्वयेन तत्र न चकारयोगो नापि समासः तयोरेकस्य संयोगेऽपरस्य संयोगानुकूलव्यापारेऽन्वयादेकतात्पर्यवाभावात्। अतएव यत्रानेकचकारप्रयोगः, यत्रैवमन्वयश्च तत्रेतरेतरयोगसाहश्यसमूहस्य चार्थ इत्यर्थः। (६) अवयवावयवभेदसमूहस्य प्रतीत्या प्रत्येकावयवधर्मिधर्म एव समु-

त्तिनिमित्तं समाहारे तु द्वित्वत्रित्वादिनैव समूहस्य भानात् समूहत्वनैव प्रवृत्तिनिमित्तमिति विशेषः। एवञ्च उभयत्रैव समूहस्य बोधः। (७) असामर्थ्यादिति एकार्थीभावाभावादित्यर्थः। तथाहि बहुव्रीहिघटकपदानां क्रमोद्यत्नभावेनैव इन्द्रघटकपदानां चार्थोत्तभावेनैव एकार्थीभाव आवश्यकः "समर्थः पदविधिरिति" पा० परिभाषितत्वात् चार्थे इन्द्रस्त्वुक्तश्च। नचेतरेतरान्वये परस्परनिरपेक्षाणामेकार्थीभावः सम्भवति येन समुच्चयान्वाचयावेकार्थीभावेऽन्तर्भूतौ स्याताम्। ततश्चेतरेतरयोगे समाहारे च साकाङ्क्षत्वं सत्त्वादेकार्थीभावस्तयोरभावाच्च तत्रेति बोध्यम्। इयांस्तु विशेष इतरेतरयोगे साकाङ्क्षत्वं विशेषणं द्रव्यं विशेष्यं, समाहारे तु साकाङ्क्षत्वं प्रधानं द्रव्यं विशेषणमिति यथा चानयोर्बोधवैलक्षण्यं तथाकरे दृश्यम्"। पञ्चानां चात्र पुनरुपादानं यथा "मूर्खोऽपि शोभते तावत् सभायां वस्त्रवेष्टितः। तावच्च शोभते मूर्खो यावत् किञ्चित् न भाषते" हितो०। इतरेतरयोगित्वे १०विनियोगे च शब्दार्थचि०। तत्र तुल्ययोगितालङ्कारस्य चेन द्योतनात्तस्य तदर्थकता यथा "सङ्कुचन्ति सरोजानि खैरिणो वदनानि च" चन्द्रा०। एवं दीपकालङ्कारद्योतकताऽपि २६६पृ० दृश्या। "सनी च प्रयोगिणि प्रकृतिश्च निष्ठना" माघः। चकारहयप्रयोगे क्वचिदविलम्बयोगितायाः क्वचित्तुल्ययोगितायाश्च प्राधान्यस्य चावबोधनम् यथा "इतोरिता मत्तरथेन तेन क्षुब्धा च क्षुब्धा च यमाय भैमी" भै०। "कला च सा कान्तिमती कलावतस्त्वमस्य लोकस्य च नेत्र कौमुदी" कुमा०। निदर्शनान्तरं चात्र शब्दार्थे तस्य प्रयोगे लिङ्गम्।

**च** इ० चीयते शुक्लश्च किरणैः शुक्लं परधर्मं वा चिनोति वा चि-ड। १चन्द्रे २कर्पूरे ३चौरे ४चक्रवाके ५चर्मणि च मेदि०। ६निर्दोषे ७दुर्जने च त्रि० शब्दरत्ना०।

**चक** भक्षणे हौ० पर०अक० सेट् इदित्। अचक्षीत् अचक्षत्। चचक्ष।

**चक** प्रतिघाते दर्शने च भ्वा० आ० अक० सेट्। चकते अचकिष्ट चचके। मित्रे चकयति। प्रतिघातः भवेच्छुष्कोऽनिष्टसूचया मनसादिप्रतिरोधः। "व्याधानुद्धारचकिता हरिणीव वभूव सा" रघुः। "दौवारिकश्चकितेश्वरः" रघुः। चदृ-अप्रतिघाते। "यं चकितानमनुचित्तय उच्चकन्नि" आग० ६।१७।३६। उच्चकन्नि अप्रतिहतानि भवन्ति

**चक्ष** दीप्तौ अदा० जक्षा० पर० अक० सेट्। चकक्षि अचकक्षीत्। चकक्षाम्-बभूव आस चकार। अदित्। अचचकक्षत्। "चकासति च मांसादासक्षा रक्षेषु जायति"। "चकासां चक्रुरुत्तस्थुः" "शोकादभूवैरपि मूकसाङ्कार नागेन्द्रस्थाचमिश्रैः" भट्टिः। "चकासतं चारु चमूरुचर्मणा" माघः।

**चकित** न० चक-भावे क्त। १भये २सम्भ्रमे च। "कृतोऽपि दयितस्यार्थे चकितं भयसम्भ्रमः" मा० द० उक्ते श्लोकार्थे सात्त्विकालङ्कारभेदे यथा "लक्ष्मी चलभ्रकरीविघट्टितोरूर्वीभोरुरतिशयमाप विभ्रमस्य। चुम्बति प्रसभमकृते विनाऽपि हेतोर्दीर्घाभिः किल गति कारणे तरुणः "सचकितसस्मितवक्त्रारिजश्रीः"। "भयचकितमाहवे निजस्" माघः। "भः समभनगा यस्यां साहस्त्रिदृढ़ चकिता" ह० र० उक्ते २छन्दोभेदे स्त्री। कर्त्तरि क्त। ४अङ्किते ५भीते च त्रि०।

**चकोर** पु० चक-तृप्तौ ओरत्। खनामख्याते-पक्षिभेदे "कोकप्रीतिचकोरयारसपटुः"सरारिः। "इमां किमाशामवसे न चक्षुषी चिरं चकोरस्य भवन्मुखैक्षिणी" नैष०। "इतश्चकोराक्षि! विलोकयेति" रघुः। स्वार्थे क तत्रार्थे अमरः। "तन्मांसगुणा राजनि० उक्ता यथा "चाटकं शीतलं रूक्ष्यं दृष्यं कफपित्तनाशनम्। तद्वच्चकोरजं मांसं दृष्यञ्च बलपुष्टिदम्'।

**चक्क** आर्त्तौ चुरा०उभ०सक०सेट्। चक्कयति ते अचचक्कत् त।

**चक्र** पु० क्रियतेऽनेन कृ-चक्रार्थे क नि० हित्वम्। १चक्रवाके पक्षिणि, (चका) अमरः २रथाङ्गे, (चाका) ३सैन्ये, ४समुदाये, ५राष्ट्रे, ६दम्भभेदे, ७कुम्भकारोपकरणे, "कलसे निजहेतुदण्डजः किल चक्रभ्रमिकारितागुणः" नैषधम्। ८व्यूहभेदे। ९व्यूहभेदे, १०जलावर्त्ते, मेदि० ११ग्रामजाले, त्रिका० १२तगरपुष्पे, १३सैनिकयन्त्रे तन्त्रोक्तेषुमूलाधारादिषु स्थितेषु षट्सु १४पद्मेषु, १५सर्वतोभद्रादिषु, १६देवार्चनयन्त्रेषु "श्रीचक्रमेतदुदितं परदेवतायाः" तन्त्रसा। मन्त्रदोषोपशमिषु १७अक्षमादिषु, १८वर्णेष्टदिचक्रेषु, "मङ्क्षे भैरवीचक्रे सर्व वर्णाद्विजोत्तमाः इति" तन्त्रम्। १९अलङ्कारोक्ते काव्यबन्धविशेषे च न०। अलङ्कारभेदे २६०पृ० दृश्यम् अङ्कैर्चेदित्यादि द्विलिङ्कत्वेऽपि लक्ष्यभेदेनैवास्य लिङ्गभेदनियमः। तत्र लक्ष्यभेदलक्षणं हेमाद्रौ परि० लक्षणसङ्ग्रहे "चोद्यमेकं चतुर्वेदे जगदस्मिं प्रति शुक्र उवाच। तच्च यथाप्रश्नमुदितमाकं निगोद तत्तोत्तममध्यमाधमभेदेन

चक्रं त्रिविधं भवति। चत्वष्टाभिरारैरुत्तमं, षडारं मध्यमं चतुर्भिरारैः सम्यङ्मध्यमं भवति। तत्र श्लोकः। अष्टारमुत्तमं चक्रं षडारं मध्यमं भवेत्। लघ्वयं चतुरारं स्यादिति चक्रं भवेत्त्रिधा। द्वादशपलमुत्तमनेकादशपलं मध्यमं दशपलमधमं चेति बालानाम्। अबालानां षष्ट्यधिकशतपलमुत्तमं चत्वारिंशत्पलं मध्यमं त्रिंशत्पलं कनिष्ठमिति। तथाऽष्टाङ्गुलमुत्तमं सप्ताङ्गुलं मध्यममधमं षडङ्गुलं भवति बालानाम्, अबालानान्तु षोडशाङ्गुलमुत्तमं चतुर्दशाङ्गुलं मध्यममधमं द्वादशाङ्गुलं भवति। तत्र श्लोकौ। द्वादशैकादशदशपलानि क्रमशः त्रिशोः। अबालस्य द्विरष्टौ स्युर्दिशप्त द्वादशापि च। बालानां त्रिविधं चक्रमष्टसप्तषडङ्गुलम। षोडशाङ्गुलमन्येषां द्विहीने मध्यमाधमे। त्रिविधं चतुर्दशाङ्गुलमाद्यं द्विहीनं मध्यमं कनिष्ठं चेति। तत्र लघ्वङ्गुला सैक्ष्यायसमयी प्रथमा नेमिः। सार्द्धद्व्यङ्गुला मध्यमा नेमिर्द्व्यङ्गुला तु कनिष्ठा नेमिःस्यात् मध्यसपरिमण्डला नेमिभिर्विहीनाभिःस्यात् मणिरत्नाङ्कृता स्थूलमूला-या नेमिः सा चक्रे पूजिता भवति। तत्र सैक्ष्यं त्रिस्त्रिभिर्विचित्रमनेकविधसंस्थानमतिमनोहरं चक्रं कर्त्तव्यमत्रर्षे सुधारचक्रं कुर्वीत"।

विष्णुचक्रलक्षणन्तु हरिभ० ४वि०। "द्वादशारन्तु षट्कोणं वलयत्रयसंयुतम्। चक्रं स्याद्दक्षिणावर्त्तः शङ्खश्चश्रीहरेः स्मृतः"

तन्मोक्षं भैरवीचक्रं च तत्त्वचक्रेण प्रसिद्धम् तत्र च निष्कामाणामधिकारः रुद्रयामलोक्ते चक्रपञ्चके तु सकामानाम् यथाऽऽ चक्रं पञ्चविधं प्रोक्तं तन्त्रे तु रुद्रयामले। विधिना पूजिते चक्रे सौख्यमोक्षफलं लभेत्। महाचक्रं राजचक्रं दिव्यचक्रं तथाऽपरम्। वीरचक्रम् चतुश्चक्रं पशुचक्रञ्च पञ्चमम्। राजचक्रं राज्यदं स्यान्महाचक्रं तु मोक्षदम्। देवत्वदं देवचक्रं वीरचक्रं तु सिद्धिदम्। पशुचक्रं तु दारिद्र्यशोकदुःखामयप्रदम्। काष्टेऽग्र दक्षिणाहीने सर्वचक्रन्तु निष्फलम्। सकामाश्चैव निष्कामाद्विविधाभुवि मानवाः। क्षुद्राशयाः कामिनो ये तेषामत्राधिकारिता। ब्रह्मज्ञानाय तु प्रोक्तं भैरवीचक्रमुत्तमम्। ब्रह्मज्ञानयुतानां तु तत्त्वचक्रेऽधिकारिता।" महानिर्व्वाणे च "नात्राधिकारः सर्वेषां ब्रह्मज्ञानं साधकान् विना। परब्रह्मोपासकाये ब्रह्मज्ञा ब्रह्मतत्पराः। शुद्धान्तःकरणाः शान्ताः सर्व-प्राणिहिते रताः। निर्विकारा निरिच्छाश्च दयाशीलाद्दृढव्रताः। सत्यसङ्कल्पका आकुलाचरणाधिकारिणः। ब्रह्मभावेन तत्त्वज्ञा ये पश्यन्ति चराचरम्। तेषां तत्त्वविदां पुंसां तत्त्वचक्रेऽधिकारिता। सर्वब्रह्ममयो भावश्चक्रेऽस्मिन् तत्त्वसंज्ञके। येषामुपपद्यते देवि! त एव तत्त्वचक्रिणः"। अत्र सर्वत्र चक्रारोहे साधकैरुपवेशनात् चक्रत्वम्। चक्रानुष्ठानञ्च श्यामारहस्यादौ द्रष्टव्यम्। योगोपयोगितया देहस्थमूलाधारादिचक्रनिरूपणाय दण्डादिनाडीनिवेशनोक्तिपूर्व्विका चक्रभेदोक्तिः तन्त्रसारे "गौतम उवाच। देवर्षे! योगयुक्तानां योगानुभवदर्शक!। सांख्ययोगविशेषज्ञ। कर्म्मयोगविभेदक! विना योगं न सिध्येत्तु कुण्डलीचक्रमः प्रभो!। मूलपद्मे कुण्डलिनी यावच्चिद्भाविता प्रभो!। तावत् किञ्चिन्न सिध्येत मन्त्रयन्त्रार्च्चनादिकम्। जागर्त्ति यदि सा देवी षड्भिः पुण्यसञ्चयैः। तदा प्रसादमायान्ति मन्त्रयन्त्रार्च्चनादयः। शिवबद्धिश्वरेलोके षड्ऐश्वर्य्यसमन्वितः। योगयोगाङ्गवेत्तृणां श्रेष्ठस्त्वमसिहिरण्यसा। सिद्धे मन्त्रे परावाप्तिरिति शास्त्रेषु निर्णयः। तस्मात् कार्य्यं परं योगं कथयस्व सुनीश्वर!। कथात्मा येन विहरेत् स्वर्गे मर्त्ये रसातले। जीवन्मुक्तश्च देहान्ते निर्व्वाणपदमाप्नुयात्। नारद उवाच। कथयामि तव स्नेहाद्योगयोग्योऽसि गौतम!। संसारोत्तरणे युक्तियोगशब्देन कथ्यते। ऐक्यं जीवात्मनोराहुर्योगं योगविशारदाः। तत्र स्नेहात् समाख्यास्ये योगविघ्नकराख्यिने। कामक्रोधलोभमोहमदमात्सर्य्यसंज्ञकाः। योगाङ्गैरेभिर्निर्ज्जित्य योगिनोयोगमाप्नुयुः। यमनियमासनप्राणायामौ ततः परम्। प्रत्याहारं धारणाख्यं ध्यानं सार्द्धं समाधिना। योगाङ्गान्याहुरेतानि योगिनां योगसाधने"। "यमादयस्तु। "अहिंसा सत्यमस्तेयं ब्रह्मचर्य्यं दयाऽऽर्जवम्। क्षमा धृतिर्म्मिताहारः शौचञ्चेति यमा दश। तपः सन्तोषमास्तिक्यं दानं देवस्य पूजनम्। सिद्धान्तश्रवणञ्चैव ह्रीर्मतिश्च जपोव्रतम्। दशैते नियमाः प्रोक्ता योगशास्त्रविशारदैः" आसनानि प्रोक्तानि। "दृढयाकर्यदेहायुं वाञ्छं षोडशमात्रया। धारयेत् पूरितं योगी चतुःषष्ट्या तु मात्रया। सुषुम्णा मध्यगं सम्यगृहात्रिंशन्मात्रया शनैः। नाड्या पिङ्गलया चैव रेचयेद्योगवित्तमः। प्राणायाममिमन्याहुर्योगशास्त्रविशारदाः। भूयो भूयः क्रमात्तस्य व्यत्यासेन क्रमाद्धरेत्। मात्राद्यधिक्रमेणैव

सम्यग्ह्रादश षोडश । जपध्यानादिभिर्युक्तं सगर्भं तं विदुर्बुधाः । तदेतं निगर्भन्तु प्राणायामस्मरं विदुः । क्रमाद्भ्यस्यतः पुंसो देहखेदोऽधमः । मध्यमः कम्पसंयुक्तो भूमित्यागः परोमतः । उत्तमस्य गुणावाप्तिर्व्योमचारीवनमभिधीयते । इन्द्रियाणां विचरतां विषयेषु निवर्त्तनम् । बलादाहरणं तेभ्यः प्रत्याहारोऽभिधीयते । भ्रूकुटयुलूफजानूरुसीमनीलिङ्गनाभिषु । हृद्ग्रीवाकण्ठदेशे तु सन्धिकायां तथा नसि । भ्रूमध्ये मस्तके मूर्द्ध्नि द्वादशान्ते यथाविधि । धारणं प्राणमरुतो धारणेति निगद्यते । समाहितेन मनसा चैतन्यान्तरवर्त्तिना । आत्मन्यभीष्टदेवानां ध्यानं ध्यानमिहोच्यते । समत्वभावनां नित्यं जीवात्मपरमात्मनोः । समाधिमाहुर्मुनयः प्रोक्तमष्टाङ्गलक्षणम् । इत्यादि कथितं विप्र ! कामादिषट्कनाशनम् । इदानीं कथयिष्येऽहं मन्त्रयोगमनुत्तमम् । विद्धि शरीरमित्युक्तं पञ्चभूतात्मकं सुते ! । चन्द्रसूर्याग्नि तेजोभिर्वह्निकारूपकम् । तिस्रः कोट्यस्तदर्द्धेन शरीरे नाड्योमताः । तासु मुख्या दश प्रोक्तास्तासु तिस्रोऽधःस्थिताः । प्रधाना मेरुदण्डेऽत्र सूर्य्याग्नि चन्द्ररूपिणी । शक्तिरूपा सा च नाड़ी साक्षादद्भुतविग्रहा । दक्षिणे पिङ्गलाख्या तु पुंरूपा सूर्य्यविग्रहा । दाडिमीकुसुमप्रख्या विभाता त्रिगुणैः सुता । मेरुमध्यस्थिता या तु मूलस्था ब्रह्मविग्रहा । सर्वतेजोमयी सा तु सुषुम्णा वह्निरूपिणी । तन्मध्ये चित्रिताख्या ब्रह्मतत्त्वादिरूपिणी शुभा । सर्वदेवमयी सा तु योगिनां हृदयङ्गमा । विसर्गाद्विन्दुपर्य्यन्तं व्याप्य तिष्ठति तत्त्वतः । मूलाधारे त्रिकोणाख्ये इच्छाज्ञानक्रियात्मके । मध्ये स्वयम्भूलिङ्गन्तु कोटिसूर्य्यसमप्रभम् । तद्वेष्टे कामबीजन्तु कर्पूरामोदमादकम् । तद्वेष्टे शिखाकारा कुण्डली ब्रह्मविग्रहा । तद्वाह्ये हेमवर्णाभं शतवर्णं चतुर्दलम् । हृत्तु हेममयं पद्मं तत्र विभावयेत् । तद्वेष्टे ऽग्निसमप्रख्यं षड्दलं क्षीरसन्निभम् । वादिडान्तषड्वर्णैः युक्ताधिष्ठानसंज्ञकम् । मूलमाधारषट्कानां मूलाधारं ततो विदुः । स्वयम्भूलिङ्गं परं लिङ्गं स्वाधिष्ठानं ततो विदुः । तद्वेष्टे नाभिदेशे तु मणिपूरं सहाप्रभम् । मेघाभं विद्युतामञ्च वह्नितेजोमयन्नाभः । मणिवद्विलसत् तत् पद्मं मणिपूरं तदोच्यते । दशभिश्च दलैर्युक्तं डादिफान्ताक्षरान्वितम् । शिवेनाधिष्ठितं पद्मं विश्वलोकैककारणम् । तद्वेष्टे नाभ्यधःस्थञ्च हृदादिजठरान्तिकम् । कादिठान्ताक्षरैरर्कैः रुपलैव समधिष्ठितम् । तन्मध्ये वाणलिङ्गन्तु सूर्य्यायुतसमप्रभम् । शब्दब्रह्ममयं शब्दोऽनाहतस्तत्र लक्ष्यते । तेनाहताख्यं पद्मं तन्मुनिभिः परिकीर्त्तितम् । आनन्दसदनं तत्तु इश्वराधिष्ठितं परम् । तद्वेष्टन्तु विशुद्धाख्यं षोड़शदल पङ्कजम् । स्वरैः षोडशभिर्युक्तं धूम्रवर्णं महाप्रभम् । विशुद्धिं तनुते यस्माच्छीघ्रं हंसावलोकनात् । विशुद्धं पद्ममाख्यातमाकाशाख्यं महाप्रभम् । आज्ञाचक्रन्तद्वेष्टे तु आत्मनाधिष्ठितं परम् । आज्ञासंक्रमणन्तत्र गुरोराज्ञेति कीर्त्तितम् । द्विदलं हकसंयुक्तं बोधनन्तु तद्वेष्टनः । एवन्तु शिवचक्राणि प्रोक्तानि तव सुव्रत ! । सहस्रारान्तुजं विन्दुस्थानं तद्वेष्टमीरितम् । इत्येतत् कथितं सर्व्वं योगमार्गमनुत्तमम् ।

दीक्षणीयतन्त्रोक्तमन्त्राणां साधकस्य शुभाशुभदायकता विचाराङ्गचक्राणि तन्त्रसारे दर्शितानि यथा

"अनुकूलं मन्त्रं सद्गोयात्तथाच "स्वतारराशिकोष्ठानामनुकूलान् भजेन्नानून्" । तारा राशीतन्त्रे "तारा चक्रं राशिचक्रं नामचक्रं तथैव च । तत्र चेत् सयुतो मन्त्रो नान्य चक्रं विचारयेत्" । इति तु प्रधानतया बोद्धव्यम् । "अरिमन्त्रं न सद्गोयादनुकूलञ्च तथैव च" । इत्यादिदर्शनात् ततश्च चक्रविचारस्यावश्यकत्वात् प्रथमं तन्निरूप्यते । तत्र विडिसारस्थते "ऋषिछन्दोदेवताक्षाणां प्रसादप्रथमस्य च । सर्षिच्छन्दोदेवतानां सिद्धादीन्नैव शोधयेत् । स्वप्नलब्धे स्त्रिया दत्ते मालामन्त्रे च मन्त्रवरे । वैदिकेषु च सर्व्वेषु सिद्धादीन्नैव शोधयेत् । एकाक्षरस्य मन्त्रस्य मालामन्त्रस्य पार्व्वति ! । वैदिकस्य च मन्त्रस्य सिद्धादीन्नैव शोधयेत्" । मालामन्त्रो यथा वाराहीतन्त्रे "विंशत्यर्णाधिका मन्त्रा मालामन्त्राः प्रकीर्त्तिताः । नपुंसकस्य मन्त्रस्य सिद्धादीन्नैव शोधयेत् । हंसस्याष्टाक्षरस्यापि तथा षड्वाक्षरस्य च । एकाक्षरादिबीजस्य सिद्धादीन्नैव शोधयेत्" चाष्टखातन्त्रे "काली तारा महाविद्या षोड़शी भुवनेश्वरी । भैरवी छिन्नमस्ता च विद्या धूमवती तथा । बगला सिद्धविद्या च मातङ्गी कमलात्मिका । एता दश महाविद्याः सिद्धा विद्याः प्रकीर्त्तिताः । नात्र सिद्धाद्यपेक्षास्ति नक्षत्रादिविचारणा । नामादि शोधनं नास्ति न चाग्न्यादिदूषणम् । सिद्धविद्या तथा नात्र युग्मसेवापरिश्रमः । नास्ति किञ्चन्नाहेदि ! दुःख साध्यं कथञ्चन" । मालिनीविजये "काली तारा महाविद्या त्वरिता छिन्नमस्तका । बाग्वादिनी चाष्टमूर्त्ती

तथा प्रस्वङ्गिरा मता। कामाख्यावासिनी बाला मातङ्गी वैनवासिनी। इत्याद्याः सकला विद्याः कलौ पूर्णफलप्रदाः। सिद्धविद्यास्तथा नात्र युगसेवापरिश्रमः। तथा चैता महाविद्याः कलिदोषैर्न बाधिताः" इत्यादि वचनादेषु विचारो नास्ति। वस्तुतस्तु इदन्तु प्रशंसापरम् सर्व्वत्र विचारस्यावश्यकत्वम्। दुरदृष्टवशात् कदाचिद्दैवि मन्त्रश्च स्वप्नादौ प्राप्ता तत्तद्दोषश्च दृष्टादिति तु साम्प्रदायिकाः। तत्रादौ

कुलाकुलचक्रम् तच्च तत्तच्छब्दे २।३४ पृ० दर्शितम्।

राशिचक्रम् आगमकल्पद्रुमे "रेखाष्टकं पूर्व्वपरेण कुर्य्यात्तत्राध्वतो याम्यकुबेरभेदात्। एकैकमीशाननिर्ऋताचरे तु छुताशवायोर्विलिखेत्ततोऽष्टौ। वेदाग्निवह्नि-युगलत्रयाब्धिसंख्यात् पञ्चेषुबाणशरपञ्चचतुष्टयार्णात्। मेषादितः प्रविलिखेत् सकलांस्तु वर्णान् कन्यागतान् प्रविलिखेदथ शादिवर्णान्"। सङ्केतान्तरं शारदायाम् "बालं गौरं खुरं शोणं शमी शोभेति राशिषु। क्रमशोभेदिता वर्णाः कन्यायां शादयः स्मृताः"। अ आ इ ई मेषः। उ ऊ ऋ ॠ वृषः। ऌ ॡ ए ऐ मिथुनम्। ओ औ कर्कटः। अं अः अथ सङ्केतचक्रम् कन्याः कन्यका। कवर्गस्तुला। चवर्गो वृश्चिकः। टवर्गो धनुः। तवर्गो मकरः। पवर्गः कुम्भः। यवर्गो मीनः। स्वराणीनामनुकूलं मन्त्रं भजेत् "स्वतारराशिकोष्ठानामनुकूलान् भजेन्मनून्" इति वचनात्। "राशीनां शुभता ज्ञेया त्यजेच्चैव ऋतिं व्यय्म्। स्वराशेर्मन्त्रराशिस्तु गणनीयं विचक्षणैः"। यदा तु स्वराशेरज्ञानम् तदा साधकनामाक्षरसम्बन्धिनं राशिं सङ्गृह्य गणयेत्। "साध्यनामाक्षरराशिस्तु गणयेत् साधकाक्षरादिति" रामार्च्चनचन्द्रिकाधृतवचनात्। नारायणीये च "अज्ञाते राशिनाम्नि नामाद्यक्षर राशितः" इति। रामार्च्चनचन्द्रिकायाम्" "एकपञ्चनवान्त्यवाः स्मृताः द्वौ च षट् च दशमास्तु वैश्यकाः। वह्नि-रुद्रगुणस्तु शैवकाः द्वादशाष्टचतुरस्तु घातकाः"। चतुरस्तु घातका इति विष्णुविषयं रामार्च्चनचन्द्रिकाधृतत्वात्। शक्तादौ तु एवं वर्জनीयम्"षडाष्टमद्वादशानि वर्জनीयानि यत्नतः" इति वचनात्। तन्त्रान्तरे "स्वस्वं धनं भ्रातृधन्यं पुत्रामित्रधनक्रमम्। मरणं धर्म्मकर्म्मायव्यया द्वादश राशयः। अन्योऽतिक्रे गधनकोधनदग्ध धनक्षमेत्। भ्राता रत्नाकरो बन्धुर्धनं स्वदः सुतः। शत्रुर्मायाय, सम्पत्तैव कलत्रं भवति ध्रुवम्। मरणं मरणायैव, धर्म्मोधर्म्मायं कल्पते। कर्म्मणि खल्पसिद्धिः स्यादायोऽतिशीघ्रदस्तथा। लाभालाभौ व्ययः कुर्य्यादेषाक्रमविचारणा। नामानुरूपमेतेषां शुभाशुभफलं दिशेत्। वैष्णवे तु शत्रुस्थाने बन्धुरिति पाठः। तथाच तन्त्रराजे "तेन मन्त्रादिवर्णेन नाम्नाद्याक्षरेण च। गणयेद्यदि षडं वाष्टमं द्वादशन्तु वा। रिपुमन्त्राद्यवर्णः स्यात्तेन तस्याहितं भवेत्।"

अष्टवर्गचक्रम्—अष्टवर्गशब्दे १२२ पृ० तच्चक्रम्।

नक्षत्रचक्रम्—भैरवीतन्त्रे "ऊर्द्ध्वगा दश रेखाःस्युस्तिर्य्यगे खाश्चतस्रकाः। सप्तविंशतिकोष्ठानि भेषु वर्णाँल्लिखेद्यथा। नक्षत्राक्षरनिर्णयः। अ आ अश्विनी देवगणः। इ ईभरणी मानुषः। उ ऊकृत्तिका राक्षसः। ऋ ॠ खलु रोहिणी मानुषः। ऌ ॡ मृगशिरोदेवः। ए ऐ आर्द्रा मानुषः। ओ औ पुनर्वसू देवः। कः पुष्योदेवः। खगघङ्ङाश्लेषा राक्षसः। चछ मघा राक्षसः। च पूर्वफल्गुनी मानुषः। ज झ उत्तरफाल्गुनी मानुषः। ञ टहस्ता देवः। ठ ढ चित्रा राक्षसः। ड स्वाती देवः। ढ ण विशाखा राक्षसः। त थद अनुराधा देवः। ध न्येष्ठा राक्षसः। प फ ब भ्रा राक्षसः। म पूर्वाषाढा मानुषः। य उत्तरषाढा मानुषः। र ऋषणा देवः। ल ॡ धनिष्ठा राक्षसः। व शतभिषा राक्षसः। श ष स पूर्वभाद्रपदा मानुषः। ह क्ष त्र उत्तरभाद्रपदा मानुषः। ज्ञं त्रः त्र रेवती देवः। निबन्धे "प्राप्य चोभात् पटुः प्राप्यं रुद्रस्तद्रिरुरुःकरम्। लोकलोपपटुः प्रायः खलौ योभेषु भेदिताः। वर्णाः क्रमात् स्वरान्तौ तु रेवत्यं-शगतौ तदा। ऋत्यव्यञ्जनसंख्यात्र प्राप्ता वर्णादिवर्णतः"। तथा च विष्णुतन्त्रे "उत्तराद्दक्षिणा यान्तु रेखां कुर्य्याच्चतुष्टयीम्। दश रेखाः पश्चिमाद्याः कर्त्तव्या वरवर्णिनि!। अश्विन्यादिक्रमेणैव विलिखेत्तारकाः पुनः। वक्ष्यमाणविधानेन तत्तद्धे वर्णकान् लिखेत्। अकारादिककारान्तानुच्चिन्द्वग्निवेदकान्। भूनेत्र नेत्र-चन्द्रांश्च क्षे शायां स्वरौ प्रिये!। द्विभूनेत्रनेत्रयुग्मानि खेन्दु नेत्राग्निचन्द्रकान्। मघादिद्वे शायर्क्षन्तं द्वितीयं नवतारकम्। वह्निभूनेन्दुचन्द्रांश्च खेन्दु नेत्रवह्निकान्। भेदेन भेदितान् वर्णान् रेवत्यन्ययुगे क्रमात्। पञ्चैव तत्र-ग्निरूपावनिभुजङ्गयुगायुग्मभूयुग्मवसाद्युग्मैकद्विरूपा-नक्षत्रविधिधिभूद्रे कपक्षाग्निवेदाः। वर्णाः क्रमात् स्वरान्तौ तु रेवत्यं शगतावुभौ। तथा च निबन्धे "पूर्वोत्तरा-

लय स्त्रैव भरण्याद्यौ च रोहिणी। इमानि मानुषाण्याहु-र्नक्षत्राणि मनीषिणः। ऊर्ध्वाग्रतर्भिषामूलधनिष्ठाश्लेष कृत्तिकाः। चित्रामघाविशाखाः स्युः सारा राक्षसदेवताः। अश्विनी रेवती पुष्यः स्वाती हस्तपुनर्वसू। अनुराधा मृगशिरःश्रवणा देवतारकाः। तथाच "खजातौ परमा योनिर्मध्यमा भिन्नजातिषु। रक्षोमानुषयोर्नाशोवैरं दानवदेवयोः। जन्मसम्पत्तिपत्क्षेमं प्रत्वरिः साधकोबधः। मित्रं परममित्रञ्च जन्मादीनि पुनः पुनः। जन्मत्रतीयपञ्चमसप्तमानि नक्षत्राणि वर्ज्यानि। तथा च "रसाष्टनवभद्राणि युगयुग्मगतान्यपि। इतराणि न भद्राणि" इत्यादि। खनक्षत्रादेव नक्षत्रं गणनीयम्। खनक्षत्रज्ञाने खनामाद्यक्षरसम्बन्धिनक्षत्रादेव नक्षत्रं गणनीयमिति। प्रादक्षिण्येन गणयेत् साधकाद्याक्षरात् सुधीः"।

ऋक्षचक्रम्—तत्र ऋक्षचक्रशब्दे ३८ पृ० दृश्यम्

ऋडसचक्रम्—गोपालविषयम् ऋडसशब्दे ३७पृ० उक्तम्

ऋषिधनिचक्रम्—ऋषिधनिचक्रशब्दे १४२८ पृ० दृश्यम्

अन्यान्यपि तदुपयोगीनि चक्राणि रुद्रयामले दृश्यानि। स्वरोदयसम्मतानि नरपतिजयचर्य्योक्तानि "स्वरचक्राणि चक्राणि भूवलानि बलानि च" इत्यादिना षड्भेदोपक्रमे उक्तानि २० स्वरचक्राणि सर्वतो भद्रादीनि ८४ चक्राणि च क्रमशः प्रदर्शयन्ते। तत्र षडङ्गेषु प्रथमाङ्गे स्वरचक्राणि विंशतिसंख्यादौ

१ मात्रास्वरचक्रम्—"अथातः संप्रवक्ष्यामि प्रोक्ता ये ब्रह्मयामले। मात्रादिभेदभिन्नानां स्वराणां षोड़शोदयात्। मातृकायां पुरा प्रोक्ताः स्वराः षोड़शसंख्यया। तेषां द्वावन्तिमौ त्याज्यौ चत्वारश्च नपुंसकाः। दश शेषाः स्वरा-स्तेषामाद्याःस्वादेकैकं द्विके द्विके। शेषास्तत्र स्वरा आद्या हस्वाः पञ्च स्वरोदये। लाभालाभं सुखं दुःखं जीवितं मरणं तथा। जयः पराजयो वेति सर्वं ज्ञेयं स्वरोदये। स्वरादि मातृकोच्चारोमातृव्याप्तं जगत्त्रयम्। तस्मात् स्वरोद्भवं सर्वं त्रैलोक्यं सचराचरम्। स्वरवेत्ता स्थितस्तेन देवश्चो देवतांशकः। अकारादिस्वराःपञ्च ब्रह्माद्याः पञ्च देवताः। निवृत्त्याद्याः कलाः पञ्च इच्छाद्यं शक्तिपञ्चकम्। भावाद्या मन्त्रभेदाश्च धराद्यं भूतपञ्चकम्। शब्दादि-विषयास्ते च कामवाणा इतीरिताः। पिण्डं पदं तथा रूपं हस्वादीतं निरञ्जनम्। स्वरभेदस्थितं ज्ञानं ध्यायते सुरतः सदा। अकारादिस्वराः पञ्च तेषामष्टौ-भिदास्वरः। मात्रा वर्णौ यदो जीव राशिर्भं पिण्ड योगकम्। "प्रथमो भाषते येन येनाक्रमति मन्दितः। नामाद्यवर्णे या मात्रा मात्रास्वरः स हि स्मृतः"।

२ वर्णस्वरचक्रम्—"कादिहान्तान् लिखेद्वर्णान् स्वराधोऽन्त्यविलोमतः। तिर्यक्षड्भिक्रमेणैव पञ्चविंशत्प्रकोष्ठके। नरनामादिमोवर्णो यस्मात् स्वरादधः स्थितः। स स्वर स्तस्य वर्णस्य वर्णस्वर इहोच्यते। वर्णौ यत्रौ स्वरौ चैव जयो चेति परस्परम्। शत्रौ तुल्यबलौ भिन्नस्वरस्या-धःस्थितावपि। न प्रोक्ता ङ ञ्यवर्णा नामादौ सन्ति ते न हि। चेदुभयन्ति तदा शेषा गजडाश्चे यथा-क्रमम्। वर्णानि यस्य नामानि नरस्य स्युः क्रमक्रम। तस्य पश्चादुभवं नाम यात्रां स्वरविचारदेः। यदि नाम्नि भवेद्वर्णः संयुक्ताक्षरसञ्चयः। यात्रासस्यादिमो-वर्ण इत्युक्तं ब्रह्मयामले।"

३ षड्स्वरचक्रम्—"अस्वरोमेषसिंहालि, इः कन्याहृन्-कर्कटाः। उस्वरे च धनुर्मीनौ एस्वरे तु तुलाहयौ। ओस्वरे मृगकुम्भौ च राशीशास्तु षड्स्वराः। स्वराधः स्थापयेत् खेटान् राशेर्यो यस्य नायकः। भौमशुक्र-सूर्यचन्द्रार्किबुधगुरुकारमन्त्रिणः। सौरिः सौरिस्तथा जीवो मेषादीनामधीश्वराः"।

४ जीवस्वरचक्रम्—"षोड़शाक्षरोऽत्रावर्गः स्यात् कादिवर्गास्तु षड्वकाः। चतुर्वर्णौ यशो वर्णौ संख्यावर्णे प्रकीर्तिताः। नाम्नि वर्णाः स्वरायाद्यावर्गाणां वर्णसंख्यया। पिण्डिता: षड्भिर्भक्ताः शेषं जीवस्वरं विदुः

५ राशिस्वरचक्रम्—"मेषहृषकारे च मिथुनाद्याः षडृक्षकाः। मिथुनांशत्रयञ्चैवमिकारे सिंहकर्कटौ। कन्या-तुले उकारे च वृश्चिकाद्यास्त्रयोंऽशकाः। एकारे वृश्चिक-स्यांशाः षट् चापे षट् मृगादिमाः। ओंशास्त्रयोमृगस्यान्याः कुम्भमीनौ तथौस्वरे। एवं राशिस्वराः प्रोक्ता नवांशक-क्रमोदिताः

६ कचस्वरचक्रम्—"अकारे सप्तदृक्षाणि रेवत्यादिक्रमेण च। पञ्च पञ्च इकारादावेवञ्चस्वरोदये"

७ पिण्डस्वरचक्रम्—"नाम्नि वर्णस्वरात् संख्यातस्य मात्रा स्वरात्तथा। पिण्डे भरहृते शेषे पिण्डस्वरइहोच्यते"

८ योगस्वरचक्रम्—"मात्रादिस्वरभेदेन स्वरानुत्पाद्य नामतः। योगे भरहृते शेषे योगस्वर इहोच्यते"

९ द्वादशवार्षिकस्वरचक्रम्—"प्रोक्ता नैसर्गिकाद्यौ मात्रा-द्या नामजाःस्वराः। एतेषामुदयान् पञ्चे द्वादशाब्दादिषु

क्रमात्। प्रभवादिक्रमेणैव अकारादिस्वरास्त्रया। वर्षेद्वादशभिर्मानमेकैकस्य स्वरोदये। उदयोद्वादशाब्दानां प्रत्येकं द्वादशाब्दिकः। अस्मान्नरोदयोवर्षमासमेकं दिनद्वयम्। नाडिकाः ४२ प्रोक्ता अष्टत्रिंशत्पलानि च"

१० वार्षिकस्वरचक्रम्—प्रभावाद्यब्दमेकैकमुदयास्वरादिकः। द्वादशाब्दस्य वर्षाणां तद्भुक्तिर्वार्षिके स्वरे"

११ अयनस्वरचक्रम्—"अस्वरोदक्षिणे स्वामी दक्षस्वरोत्तरायणे। वर्षभुक्तिर्द्वयमानेन भोगः षण्मासिकस्वरे"।

१२ ऋतुस्वरचक्रम्—"अकारादिस्वराः पञ्च वसन्तादिक्रमोदयाः। एकैकस्मिन् स्वरे प्रोक्तोद्विषष्टिदिनोदयः। षड्दिनानि रदाश्च नाडयो वह्निवेदश्च पलानि च। अन्तरोदयमानं स्याद् ऋतुनाम्नि स्वरोदये" इति

१३ मासस्वरचक्रम्—"नभस्यमार्गवैशाखेष्वस्वरस्योदयोभवेत्। आश्विनश्चावणाषाढेष्विकारो नायकः स्मृतः। उकारश्चैत्रपौषे स्यादेकारो ज्यैष्ठकार्त्तिके। ओकारश्चोदयं याति माघफाल्गुनमासयोः। द्वे दिने त्रयोऽब्धयो४२ नाडयश्चाष्टत्रिंशत् पलानि च। अन्तरोदयउक्तोऽसाविति मासस्वरोदये"

१४ पक्षस्वरचक्रम्—"अस्वरः कृष्णपक्षेशः शुक्लपक्षेश ईश्वरः। पक्षात्मिकान्तरा भुक्तिर्मासभुक्त्यर्द्धमानतः"

१५ तिथिस्वरचक्रम्—"अकारादिक्रमाच्चास्य नन्दादितिथि पञ्चकम्। नन्दा भद्रा जया रिक्ता पूर्णा च कथिताः क्रमात्। दिनस्वरोदयोनित्यं स्वस्तिथ्यादि जायते। एकैकस्य स्वरस्य स्युर्घटी पञ्च पलानि भैः२७। अस्मान्नरोदयः प्रोक्तोदिनस्वरस्य सूरिभिः"

१६ घटीस्वरचक्रम्—"घटीस्वरो घटीपञ्च पलानि सप्तविंशतिः। एवं घटीस्वरोयाति दिनस्वरघटीस्वरः। अस्मान्नरोदयः प्रोक्तोघटिकार्द्धप्रमाणतः"

१७ तिथियार्क्षादिस्वरचक्रम्—"द्वादशाब्दादिनाड्यन्ताः स्वस्थानाच्च स्वकालतः। उदयन्ते पुनस्ते च ते चैकादशधा स्वराः। वर्षमासदिनानाडीपलानि च यथाक्रमम्। कालमानं मया प्रोक्तं पञ्चधात्र स्वरोदये। द्वादशाब्दस्वरादीनां भुक्तं पलमवन्तु यत्। तद्भक्तं च स्वभोगेन लब्धभेषादिकं भवेत्। लब्धभुक्तस्वरा ज्ञेयाः शेषश्चैवोदिताः स्वराः। अस्मिन् षड्यादिभक्ते च भुक्तं स्याद्दिनाः स्वरः। उदितस्य स्वरस्य स्युर्भोगस्वरवशेन ताः। पञ्च बालादिकावस्थाः स्वस्वकालप्रमाणतः"।

(यो यस्य कालभोगो तस्य कालगतान्तरम्। पिण्डितं भुक्तिसंभक्तं लब्धाङ्केन गतोदयः। शेषस्वरोदयोज्ञेयः स्वस्य संख्याहृते ततः। पञ्चावस्थाः स्वरूपेण ज्ञेयं तस्य बलाबलम्। उदयास्तस्वरौ यत्र नामाद्यक्षरजक्षरात्। तत्र बालादयोऽवस्था भवन्त्येकादिसंख्यया। नामस्वरोदयोबालः कुमारश्च द्वितीयकः। तत्तृतीयोयुवा तुर्यो वृद्धोऽन्त्यस्तु पञ्चमः) अन्यान्तरेऽधिक पाठः। आद्योबालः कुमारश्च युवा वृद्धो मृतिस्तथा। निजावस्थास्वरूपेण फलदा नात्र संशय। क्रियाभाकरोबालः कुमारस्त्वर्थलाभदः। सर्वसिद्धिं युवा दत्ते वृद्धे हानिर्मृतिं क्षयः। यात्रायुद्धे विवादे च नष्टदृष्टे रुजान्विते। बालस्वरोभवेद्दुष्टोविवाहादिशुभे शुभः। सर्वेषु शुभकार्येषु यात्राकाले तथैव च। कुमारः कुरुते सिद्धिं संग्रामे सर्वतोजयम्। शुभाशुभेषु कार्येषु मन्त्रयन्त्रादिसाधने। सर्वसिद्धिं युवा दत्ते यात्रायुद्धे विशेषतः। दाने देवार्चने दीक्षागूढमन्त्रप्रकल्पने। वृद्धस्वरो भवेद्भव्योरणे भङ्गो भयं गमे। विवाहादिशुभं सर्वं संग्रामादशुभं तथा। न कर्त्तव्यं बुधैः किञ्चिज्ज्ञाते स्वल्पस्वरोदये। मृतोबाल स्तथा वृद्धः कुमारस्तरुणस्वरः। यथोत्तरबलाः सर्वे ज्ञातव्याः स्वरवेदिभिः। योयस्य पञ्चमे स्थाने स स्वरो स्वल्पदायकः। तृतीये तु भवेत् वृद्धिः शेषामध्यफलप्रदाः। स्वल्पहीनस्वरे नाम्नि जयोनाम्नि स्वराधिके। समनाम्नि भवेत् साम्यं सन्धिर्जयपराजयौ। एकमात्रो द्विमात्रश्च त्रिचतुःपञ्चमात्रकाः। यथोत्तरबलाः सर्वे ज्ञातव्याः स्वरपारगैः। एकमात्रः कवर्गश्च किवर्गश्च द्विमात्रकः। कुस्तृतीयस्तु तुर्यः के, कोवर्गः पञ्चमात्रकः। आद्ये स्वरे भवेत् साम्यं द्वितीयोऽर्द्धफलप्रदः। तृतीये तु फलं पूर्णं तुर्ये बन्धपरम्परा। मृतोऽर्द्धत्यु स्वरे प्राप्ते यूनि प्राप्ते स्वकीयके। तत्काले प्रारभेद्युद्धं विजयो भवति ध्रुवम्। तत्काले मासिकोयाद्योदिने वर्णस्वरस्त्रया। पक्षे षड्स्वरोज्ञेयो मासे जीवस्वरोदयः। ऋतौ राक्षसकोयाद्याः षण्मासे पिण्डग्रसम्भवः। अब्दे पिण्डस्वरोज्ञेयो योगो द्वादशवार्षिके। सर्वकाले बली वर्णः सर्वव्यापी न संशयः। तस्मात्सर्वप्रयत्नेन वर्णे बीजं बलाबलम्। यथा पद प्रविष्टपदे प्रविष्टं यथा हि नद्याः खलु सागरेषु। यथा स्वरेर्द्वेगतयश्च देवास्तथा स्वरा वर्णफलोदयाःस्युः। साधनं मन्त्रयन्त्रस्य यात्रायोगश्च सर्वदा। अतोऽखानि कार्याणि मात्रास्वरबले कुरु। वर्णस्वरबले सर्वं कर्त्तव्यं

च शुभाशुभम्। सिद्धिदं सर्व्वकार्य्येषु युद्धकाले विशेषतः। मारणं मोहनं स्तम्भविद्वेषोच्चाटनं तथा विवादं विषहं घातं कुर्य्यात् यद्दक्षरोदये। यान पानादिकं सर्व्वं वस्त्रालङ्कारभूषणम्। विद्यारम्भं विवाहञ्च कुर्य्याज्जीवस्वरोदये। प्रासादारामकर्म्माणि देवता-स्थापनार्चनम्। राजाभिषेचनं यात्रा प्रवेशो बीजवापनम्। स्त्रीविवाहश्च दीक्षा च कर्त्तव्या राशिके स्वरे। शान्तिकं पौष्टिकं यात्रा प्रवेशोबीजवापनम्। स्त्रीविवाह-स्तथा सेवा कर्त्तव्या भस्वरोदये। शत्रूणां देशभङ्गश्च कोटयुद्धं च वेष्टनम्। सेनाध्यक्षस्तथा मन्त्री कर्त्तव्यः पिण्डकोदये। योगेन साधयेद्योगं देहस्थं ज्ञान-सम्भवम्। आग्नेयं शाम्भवं चैव शाक्तेयञ्च तृतीयकम्। तिथिवारञ्च नक्षत्रं पृथक् पृथक् प्रभाषितम्। यत्तदेकत्र संमेल्य कुर्य्याद्वर्णस्वरोदये। सस्वरो वर्णतोयत्र तत्तस्याधःस्थितं कुरु। यस्य नामादिमं वर्णं तिथि-वारर्क्षसञ्चयम्। तद्दिनं वर्जयेत्तस्य क्षानिरुत्थुकरं यतः। अनेन स्वरयोगेन शत्रूणां मारणादिकम्। मन्त्र-यन्त्रक्रियाश्चेमं साधयेत्तद्दिने बुधः। तत् बालादयो-ऽवस्थाभानुसंख्याभवन्ति हि। उदयन्ते क्रमेणैव स्वस्वभुक्तिप्रमाणतः। घटिकाख्ये दिने पक्षे मासे ऋत्ययने तथा। वर्षे द्वादशवर्षे च अवस्था जायते स्वरे। भपञ्चानि घटीपञ्च सपादार्द्धं दिनद्वयम्। षड्दं पञ्चमासं च वर्षैकं भुज्यते क्रमात्। भुक्तस्वरप्रमाणं च पिण्डसूर्य्यं भोगभाजितम्। गतावस्था गताङ्केन शेषास्तत्कालजा मताः। मूका १च बाला२ शिशु३ क्षानिका४ च कुमारिका५ यौवन६ राज्यदा७ च। क्लेशाद८ च मोचा९ ज्वरिता१० प्रवासा११ मृता१२ च बालस्वरजा अवस्था। स्वस्था१ शुभा२ मोहन३ हर्ष४ दद्रि५ मैत्रोदया६ शान्तिकरी७ सदर्षा८। मदा९ सभा१० शान्तियुणोदया११ च माङ्गल्यदा१२ द्वादशधा कुमारे। उद्धाह१ धैर्य्योद्यजया २।३।४। च बाला५ माङ्गल्य-युक्ता६ च सकाम७ पुष्टी८। सुखा९ च सिद्धिदा१० धनेश्वरी११ च शान्ताभिधा१२ द्वादशधा युवास्थे। वैकल्य१ मोषा२ च तथा च मोचा३ च्युतेन्द्रिया४ दुःखित५ रात्रि६ निद्रा७। दुद्रिप्रभङ्गाद८ च तपा९ च खिन्ना१० जरा११ मृता१२ द्वादश दुर्दशा च। जिह्मा१ च बन्धा२ रिपुघातकारी३ शोका४ मही५ ज्वालन६ दुष्टदा७ च। व्रणाङ्कितात्र भेदकरी९ च दाहा१० स्वल्पः११ क्षया१२ द्वादश स्वल्पजा दशाः। एवं पंक्ति-रवस्थाः स्युरवस्थापञ्चके सदा। तासु सर्वासु विज्ञेयं स्वनामसदृशं फलम्। अवस्था फलम्।

१८ तात्कालिकदिनस्वरचक्रम्—"तिथ्यादायुदयं याति अकारादिर्घटीस्वरः। बालस्वरादिकं प्रश्ने फलं तस्य यदास्यदृक्। तिथिभुक्तघटीसंख्यां कृत्वा पञ्चमर्त्तैः ततः। अवशिष्ट१२७हृते शेषे स्वरस्तत्कालसम्भवः। तिथि-भुक्तघटी या स्याद्दृङ्न्यूनाधिकभाजिता। शेषे तिथि-स्वरात् प्रोक्तस्तत्कालजघटीस्वरः। शेषं हृद्वा१ हृतं षष्ट्या भाजयेज्ज्ञानरोदयः। वर्षं तस्तु फलं वाच्यं शेषे तत्कालजस्वरः। तिथिभुक्तघटीसंख्या विंशघ्ना नवखेन्दुना१०८ हृता घटीस्वरः शेषे तत्र स्यादनरो-दयः। यद्दिग्वह्नि हृतः प्रश्नः फलं तस्य प्रजायते। यत्र नोद्विग्नते किञ्चित् तत्र प्रश्नः शुभाशुभम्। बालोदये यदा पृच्छा लाभार्थे स्वल्पलाभदा। राजार्थे चिररोगस्य गमे क्षानिः क्षयो रणे। कुमारोदयवेलायां लाभोभवति पुष्क-लः। राजानाशोजयो युद्धे यात्रा सर्व्वत्र सिद्धिदा। युवोदये लभेद्राज्यं क्लेशच्छेदश्च तत्क्षणात्। संग्रामे शत्रुहना च यात्रा च सफलाभवेत्। हद्रोदये न लाभः स्यात् क्लेशिनां क्लेशवर्द्धनम्। संग्रामे भङ्गमायाति यात्रायां न निवर्त्तते। मृतोदये यदा दूतः पृच्छति स्वप्रयोजनम्। तत् सर्वं स्वल्पदं ज्ञेयं युद्धे स्वल्पञ्च भङ्गदः। ओज-स्वराः पुमांसः स्युः स्त्रियो युग्मस्वरान् विदुः। स्वस्व-स्वरोदये जाते पुंसां स्त्रीणां बलं भवेत्। बलिनःस्युस्तदा तेभ्यो बली स्वस्व स्वरोदये। गर्भार्थे पुंस्वरे पुत्रः कन्या कन्यास्वरोदये। युग्मे युग्मं, क्षयो नष्टे मातुर्गर्भ्यञ्च संक्रमे। द्युनाडीस्वरयोः पुंसोः पुंयुग्मं, स्त्रीयुगं स्त्रियोः। तयोस्तु पुंस्त्रियोः पुंस्त्रीयुग्मं गर्भे विनि-र्दिशेत्। तिथिनाडीस्वरे साम्ये पुंस्त्रीस्त्री प्रजायते। असाम्ये तिथिनाडीस्थे गर्भे साम्यं न विद्यते"।

"तत्तज्जन्मनि विशेषः। "जन्मार्क्षे जन्मपादस्थर्क्षे योऽक्षरजस्व-रः। तेनाक्षरेण विज्ञेयःस्वभावः प्राणिनामिह। चपलः कातरोऽर्क्षः क्षपणश्चाजितेन्द्रियः। असत्यवङ्भाषी च जाते बालस्वरोदये। व्यवसायी कलाभिज्ञः स्त्रीरतः सुभगः सदा। दीर्घायुर्विभवी शूरः कुमारोदयसम्भवः। सर्वलक्षणसम्पूर्णोराजा भवति धार्मिकः। सर्वकाल-जयी युद्धे जातो युवोदये शुभः। स्त्रीजितो धार्मिकः कामी विवेकी स्थिरसाहसः। सत्यवादी सदाचारः

ष्मान् इडोदयोद्भवः। क्रोधी समत्सरः क्रूरोनिःकामोविकलेन्द्रियः। सर्वकार्य्यालसो दुष्टोजन्म यस्य मृतोदये जातस्य शुभाशुभनिर्णयः। "ककारादिदकारान्ताः पञ्च हृस्वाः स्वरास्तथा। बलिनः स्युः सिते पक्षे शेषाः सर्वे सितेतरे। एकस्वरः पृथक् वर्णोबोधयोरुभयोरर्थदः। तत्र पञ्चबलं यात्रां शुक्लकृष्णविभेदतः। एकपञ्चाक्षरैरेक स्वरबोधयोर्द्वयोः। शुक्ले गौरः परः कृष्णे युद्धे जयति निश्चितम्। यस्मिन्नेव स्वरे कृष्णो गौरोवा सुभटोयदि। स्वरासन्नाक्षरे हृस्वोदीर्घोदूराक्षरे जयी। प्रमाणनाम वर्णैक्यं युद्धकारकयोर्यदि। तत्र युद्धे बलं देयं यायिस्थायिविभेदतः। बोधयोः सर्वभेदैक्ये स्वरे यूनि कुमारके। यायी जयी तथा स्थायी बालवद्धानिमस्वरे। आद्यान्तिमे स्वरयोवर्णौ द्वौ द्वौ शेषकयोर्मतौ। एवं तिथिस्वरे ज्ञेया वर्णसंख्या तिथिस्वरे। वर्णतिथ्यादितिथ्याख्या जन्मक्षानिर्मृतिस्तथा। श्रीर्जन्म नीरुजा क्षानौ मृतौ स्यात्सुमहान् संशयः। यदुक्तं वामले तन्त्रे ज्ञातं गुरुप्रसादतः। स्वराद्दिनफलं वक्ष्येपुंसां कर्मप्रकाशकम्। योगपिण्डं चराख्यान् जीवखेटाऽक्षरस्वरान्। उत्पाद्य नामतस्तौ मात्रान्तान् स्थापयेत् क्रमात्। तत्राधःस्थाद्विखेद्यादौ द्वादशाब्दादिकालजान्। स्वभोगेन समायुक्तान् भोग वैकादशांशकः। यथोत्तरबलाः सर्वे तथा कालबलात्पुनः। कालोदयबलाद्यापि ज्ञातव्याः स्वरवेदिभिः। अकारादिस्वराधःस्था संख्याः वेदप्रमाणिकाः। विन्यस्य चक्रयोगेन तेन विंशोपकामताः। योगात् द्वादशवर्षाः स्युरवस्था पिण्डतोब्दके। भस्वरादयने ज्ञेया राशिस्वराद्धस्वरे। जीवात् भास्वरेऽवस्था यक्षात्पञ्चस्वरे तथा। वर्षाद्दिनस्वरे ज्ञेया मात्रास्वरात्घटीस्वरे। द्वादशाब्दादिकः कालोयत्राऽकारादिकस्वरे। स्थितस्तत्र शुभो न स्यात् पञ्चावस्थाशुभोऽपि च। स्वरौ हृद्धानिमौ दुष्टौ बालपूर्णदलं तथा। शेषं सार्द्धदयं भव्यमिति ज्ञेयं शुभाशुभम्। बालवद्धानिमादुष्टाः, शुभौ युवकुमारकौ। उत्पाद्यौ क्रमयोगेण योद्धुरद्धौ शुभाशुभौ। यो यत्र वर्त्तते कालो द्वादशाब्दादिसम्भवः। अकारादिस्वरस्थाने योगादि फलनिर्णयः। योगाद् द्वादशवर्षं च पिण्डाद्दर्षं च सायनम्। भाद्धजीवतोमासं यक्षात् षष्ट्योऽहरात् दिनम्। योगादिस्वरयोगेन द्वादशाब्दादिकः क्रमात्। यावदुत्पाद्यते राशिस्तावत् ज्ञेयं शुभाशुभम्।" (अङ्कसंख्याधिक्यत्वेन तद्दिने तस्य तत्फलम्। द्वादशवार्षिकाद्या ये स्थानरोदयसंस्थिताः। ते शुभाश्चैकतः स्थाप्यास्त्वशुभास्त्वन्यतः पृथक्। वेदवेदाङ्गनेत्राणि वेदसंख्या क्रमेण च। शुभाशुभस्वरूपस्य राशियुग्मस्य मध्यतः। एकस्मात्पतिते शेषे ज्ञेयं तद्दिनजं फलम्। विंशत्या ताडिते शेषे चतुःषष्टिविभाजिते। लब्धा विंशोपकास्तत्र शुभाशुभप्रकाशकाः। योगे स्वकर्म्मतः, पिण्डे शरीराङ्के हृद्धज्ञानात्। राशौ स्वकुलतो, जीवे स्ववित्ताद्, यक्षतो रिपोः। वर्षे स्वस्वामिनो ज्ञेयो, मात्रायां स्त्रीजनात् फलम्। एवं ज्ञात्वा वदेद्विद्वान्दिने फलशुभाशुभम्)" । अन्यान्तरेऽधिकपाठः

१९ दिक्चक्रम्—"पूर्वस्मिन्नस्वरः स्वामी इस्वरो दक्षिणे तथा। उस्वरः पश्चिमे ज्ञेयः एकौस्ये मध्य ओस्वरः। यस्यां दिशुदयं याति स्वरस्तत्पञ्चमीं दिशम्। वर्जयेत् सर्वकार्य्येषु यात्राकाले विशेषतः। गच्छतः पृष्ठकस्थाशु स्वरस्यासन्नितां दिशम्। क्षानिर्मृत्युभयं रोगो जायते नात्र संशयः

२० देहजस्वरचक्रम्—"अथान्यत् संप्रवक्ष्यामि शरीरस्थं स्वरोदयम्। हंसचारस्वरूपेण येन ज्ञानं त्रिकालजम्। कुण्डलिनी महाशक्तिर्नाभिस्थाऽहिस्वरूपिणी। ततोदयोर्द्वगा नाड्योदश चाधोगतास्ततः। हे हे तिर्य्यग्गते नाड्यौ चतुर्विंशतिसंख्यया। कुण्डलिन्यां महाशक्तौ मूलमार्गे भवन्त्यमूः। तास्थः सूक्ष्मसुखा नाड्यः शरीरस्थानिपोधिकाः। सप्त शतानि जायन्ते सप्तोत्तराणि संख्यया। प्रधाना दश नाड्यस्तु दशवायुप्रवाहिकाः। नामानि नाड़िकानाञ्च वातानाञ्च वदाम्यहम्। इड़ा पिङ्गला सुषुम्णा गान्धारी हस्तिजिह्विका। पूषा यशाऽलंबुषा च कुहूः शङ्खिनिका तथा। प्राणोऽपानःसमानोदानव्यानौ तथैव च। नागः कूर्मः कृकरश्च देवदत्तो धनञ्जयः। प्रकटो वायुसञ्चारो लक्ष्यते देहमध्यगः। पिङ्गलेड़ासुषुम्णाभिर्ब्रह्मांडीभिस्त्रिसृभिर्युधैः। (अष्टाङ्गुले वैदेहद्धि रनिलश्चतुरङ्गुलः। दिवाकराङ्गुला पृथ्वी सलिलं षोड़शाङ्गुलम्। नीलवर्णो भवेद्वायूरक्तवर्णोऽतानलः। पीतवर्णस्तु माहेयः शुक्लवर्णस्तु वारुणः। चापाकारो भवेद्वायुस्त्रिकोणो यज्ञिरुच्यते। चतुरस्रस्तु माहेयो वर्त्तुलो वारुणःस्मृतः। कटुस्वादुर्भवेद्वायुस्तीक्ष्णस्वादोऽनलोभवेत्। कषायकस्तु माहेयो मधुरो वारुणोमतः) अधिकपाठः। "इड़ानाड्यौस्थितश्चन्द्रः पिङ्गला

भानुवाहिनी। सुषुम्णा शम्भुरूपेण शम्भुर्हंसस्वरूपकः। हकारो निर्गमे प्रोक्तः सकारस्तु प्रवेशकः। हकारः शम्भुरूपेण सकारः शक्तिरुच्यते। शक्तिरूपस्थितश्चन्द्रो वामनाडीप्रवाहकः। दक्षनाडीप्रवाहे तु शम्भुरूपी दिवाकरः। एकैकस्य कलाः पञ्च क्रमेणैवोदयन्ति ताः। पृथिव्यापस्तथा तेजो वायुराकाशमेव च। मध्ये पृथ्वी जघनाप ऊर्द्धं वहति चानलः। तिर्य्यग्वायुप्रवाहश्च नभोवहति संक्रमे। चतुर्विंशं नभःप्रोक्तं सर्व्वशास्त्रेषु भाषितम्। अपां स्थाने स्थितं वस्तु पृथिव्यास्तत्तरं गतम्। तेजसा पूर्वगं वस्तु त्वाकाशे दक्षिणं गतम्। त्रिंशद्दिनावधिः पृथ्वी सलिलं पञ्चसंख्यकम्। एकविंशद्दिनं तेजोवायुः पञ्चदिनं स्मृतम्। पर्यन्तं तु व्योम्नि स्यात् प्रत्नशास्त्रेषु सम्मतम्। दूतोक्तवर्णसंख्याङ्कोद्दिगुणोभज्यते त्रिभिः। यद्येकं द्वितयं चेष्टं मृतोवै मरणं भवेत्। लग्नं तिथिसमायुक्तं नक्षत्रं तत्रयान्वितम्। पञ्चभिस्तु हरेद्भागं शेषाङ्के तत्त्वमुच्यते। पृथ्व्यापौ चोत्तमौ प्रोक्तौ तेजसे सर्वसिद्धयः। वायौ च निष्फलं ज्ञेयमाकाशे मरणं ध्रुवम्। पृथ्व्यादेकैकतत्त्वस्याप्येकैकघटिकोदयः। अहोरात्रस्य मध्ये स्वाक्षेन द्वादशसङ्क्रमाः। आदौ चन्द्रः सिते पक्षे भास्करस्तु सितेतरे। प्रतिपदादिदिनान्येवं त्रीणि त्रीणि क्रमोदयौ। चन्द्रोदये यदा सूर्यचन्द्रः सूर्योदये यदा। अशुभं हानिरङ्गैर्गः शुभं सर्वं निजोदये। शशाङ्कं चारयेद्वामौ दिवा चार्यो दिवाकरः। इत्यभ्यासरतोनित्यं स योगी नात्र संशयः। यात्रादाने विवाहे च वस्त्रालङ्कारभूषणे। शुभकर्मणि सन्धौ च प्रवेशे च शशी शुभः। विग्रहे द्यूतयुद्धेषु स्नानभोजनमैथुने। व्यवहारे भये भङ्गे भानुनाडी प्रशस्यते। दूरयुद्धे जयी चन्द्रः समासन्ने दिवाकरः। वहन्नाडीपदेनैव जेता यात्राऽतिसिद्धिदा। पृथ्वीजले शुभे तत्त्वे तेजो मिश्रफलोदयम्। हानिस्तत्क्षरौ पुंसामुभयौ व्योममारुतौ। योद्धृवहति प्रश्ने मूर्खे च प्रथमोजयी। रिक्तसंस्थे द्वितीयस्तु जयो भवति नान्यथा। युद्धकाले यदा चन्द्रः स्थायी जयति निश्चितम्। यदा सूर्यप्रवाहश्च यायी च विजयी तदा। पार्थिवे सघनं युद्धं सन्धिर्भवति वारुणे। विजयोवह्नितत्त्वेन वायौ भङ्गो क्षतिस्तु खे। पूर्णनाडीगते पृष्ठे शून्यमग्रे तदग्रतः। शून्यस्थाने क्षते शत्रुर्विनते नात्र संशयः। पूर्वोत्तरदिगोचन्द्रे भानौ पश्चिमयाम्ययोः। स्थितस्तत्र जयी युद्धे स्थायी यायी क्रमेण च। वामनाड्युदये चन्द्रः कर्त्तव्योयामसंस्थः। सूर्यवाहे तथा सूर्यः पृष्ठदक्षिणयोर्जयी। शयने वा प्रसङ्गे वा युवत्यालिङ्गनेऽपि वा। यः सूर्येण पिबेच्चन्द्रं स भवेन्मकरध्वजः। जीवेन रक्षते जीवो जीवो जीवस्य दीयते। जीवस्थानगतो जीवोवाला जीवानवश्यगा। रात्रिदिवयामवेलायां प्रसुप्ते कामिनीजने। ब्रह्मजीवं पिबेद्यस्तु बालाजीवहरोनरः। अष्टाक्षरं जपित्वा तु तस्मिन् चन्द्रे रते सति। तत्क्षणे दीयते चन्द्रोमोहमायाति कामिनी। शिव आलिङ्गते शक्त्या प्रसङ्गे यत्नतोयदि। तत्क्षणे पाययेच्चन्द्रं मोहमायाति कामिनी। चन्द्रचारी विधं हन्ति सूर्यो वालां वधं नयेत्। सुषुम्णायां भवेन्मोक्ष एकोदेवस्त्रिधा स्थितः। भुक्तमात्रे च मन्दाग्नौ स्त्रीणां वश्यार्थकर्मणि। शयनं सूर्यवाहेन कर्त्तव्यं सर्वदा बुधैः। बाले शोके विषार्त्ते च त्वरिते मूर्छितेऽपि च। सज्ञानस्यापि बोधार्थं चन्द्रचारं प्रवाहयेत्। ऊर्द्धं वामायतो दूतोन्यायोवामपथोदये। पृष्ठे दत्ते तथाऽधस्तात् सूर्यवाहगमोमतः। पूर्णनाडीगतो दूतो यत् पृच्छति शुभाशुभम्। तत् सर्वं सिद्धिदं ज्ञेयं शून्ये शून्यं न संशयः। पृथिव्यादिहितत्त्वेन दिनमासाब्दके फलम्। शोभनञ्च तथा दुष्टं व्योममारुतवह्निभिः। श्वासप्रवेशकाले तु दूतोवाच्छति जल्पितम्। सर्वतः सिद्धिमायाति निर्गमे नास्तिसुन्दरम्। सूर्ये च विषमान् वर्णान् समवर्णान् निशाकरे। वाहस्थो भाषते दूतस्तदा लाभोऽन्यथा न हि। गर्भप्रश्ने यदा दूतः पूर्वे पुत्रः प्रजायते। शून्ये कन्यायुगे युग्मं गर्भपातश्च संक्रमे। मारणं मोहनं स्तम्भं विद्वेषोच्चाटनं वशम्। प्रेरणाकर्षणं क्षोभं भानुनाड्युदये कुरु। शान्तिकं पौष्टिकं क्षेमं दिव्यौषधिरसायनम्। योगाभ्यासादिकर्माणि कर्त्तव्यानि निशाकरे। चन्द्रसूर्यस्वराभ्यासं ये कुर्वन्ति सदा नराः। अतीतानागतज्ञानं तेषां हस्तगतं सदा"

इति स्वरोदये स्वरचक्रनिर्णायकं प्रथमाङ्गम्।

सर्वचक्रोपयोगि बालादिचक्रं ज्ञो० त० दर्शितं यथा "ऋवर्णञ्च ऋषर्णञ्च ऋक्षा कोष्ठेषु पञ्चसु। अकारादयः स्वरा लेख्या एकैकस्मिन् द्विकं द्विकम्। कादिहान्तान् त्रिखेऽर्णान् स्वराधोऽधोऽभिलिखान्। तिर्य्यक्पङ्क्तिक्रमेणैव पञ्चत्रिंशत्प्रकोष्ठके। अकारादिक्रमात् न्यस्य नन्दादितिथिपञ्चकम्। अर्कभृजौ विष्णुरौद्रौ च गुरुः शुक्रः

शनिस्तथा। वाराः कोष्ठेष्वधो लेख्या अक्षरे सप्त भानि च। पञ्च पञ्च टकारादौ रेवत्यादिक्रमेण च। प्रश्नप्रो बुध्यते येन येनागच्छति ऋक्षितः। तस्य नाम्नस्तादिवर्णौघत्व तिष्ठेत्तरस्य च। तस्मात्तस्मात् कुमारस्य युवा वृद्धोऽस्तिः क्रमात्। किञ्चिल्लाभकरोबालः कुमारस्त्वर्थलाभदः। सर्वसिद्धिं युवा धत्ते वृद्धे हानिर्मृते जयः। यदि नास्ति भवेद्वर्णः संयुक्ताक्षरलक्षणः। याह्यस्तस्यादिमोवर्णः इत्युक्तं ब्रह्मयामले। तिथिवारर्क्षभेदेन प्रत्येकं बलवादितः। नामवर्णादितो ज्ञेयं फलं पुंसां दिने दिने। तिथ्यादिमेलनवशात् फलं ज्ञेयं शुभाशुभम्। युवत्वे शुभं पूर्णे अशुभञ्च स्तित्वे। अन्यत्राप्येवमुक्तं स्यात् शङ्करेण शुभाशुभम्।"

बालादेरेव नामान्तराणि क्रमेण जन्मकर्माधानविपत्क्षेमाभिधानराशि पञ्चस्वरायत्ते उक्तानि तत्र च तिथिसंख्याभेदेनाङ्कभेदाच्चोक्ताः। ८१।८७।९३।९९।१०५।

द्वितीयभङ्गः ८४ चक्रात्मकं स्वरोदये उक्तं तेषां नामोद्देशः अङ्कशब्दे ७३पृ०दर्शितः तत्रादौ एकाशीतिपदं

१ सर्वतोभद्रचक्रम्—"अथातः संप्रवक्ष्यामि चक्रं त्रैलोक्यदीपनम्। विख्यातं सर्वतोभद्रं सदाप्रत्ययकारकम्। ऊर्द्धगा दश विन्यस्य तिर्य्यगेखास्तथा दश। एकाशीतिपदं चक्रं जायते नात्र संशयः। अकारादिस्वराः कोष्ठेष्वीशादौ विदिशि क्रमात्। ऋद्धिमार्गेण दातव्याः षोडशैव चतुर्थभम्। ऋक्षिकादीनि धिष्ण्यानि पूर्वाशादौलिखेत्ततः। सप्त सप्त क्रमेणैव अष्टाविंशतिसंख्यया। अवकहडा दिशि प्राच्यां मटपरता दक्षिणे देयाः। नयभजखाच वारुण्यां गशदचलाद्योत्तरस्यां स्युः। तयस्वयोऽथाद्यास्तु ईशादिक्रमतोबुधैः। राशयो द्वादशस्थाप्या मेषाद्या दक्षमार्गतः। शेषेषु कोष्ठकेष्वेवं नन्दादितिथिपञ्चकम्। वाराणां सप्तकं लेख्यं भौमाद्यं तत्तिथिक्रमात्। भौमादित्यौ तु नन्दायां भद्रायां शोमशोमजौ। जयायां देवपूज्यश्च रिक्तायां भृगुजं लिखेत्। पूर्णायाञ्च शनिः प्रोक्तो यत्रवेधं विलोकयेत्। ग्रन्थर्क्षराङ्केत्वाराः क्रूरा शेषाः शुभाग्रहाः। क्रूरयुक्तो बुधः क्रूरः क्षीणचन्द्रस्तथैव च। इत्येष सर्वतोभद्रस्तावः कथितोमया। यस्मिन्नृक्षे स्थितः खेटस्तत्तोवेधत्रयं भवेत्। यद्यद्दृष्टिवशेनात्र पामदक्षिणसंस्थे। भुक्तं भोग्यं तथाक्रान्तं विद्धं क्रूरग्रहेण भम्। शुभाशुभेषु कार्य्येषु वर्जनीयं प्रयत्नतः। वक्रगे दक्षिणा दृष्टिर्वामा दृष्टिश्च शीघ्रगे। संशुद्धौ मध्यचारे च ज्ञेया भौमादिपञ्चके। सूर्य्ययुक्ता ग्रहाः शीघ्रास्तथा चार्के द्वितीयगे। समास्तृतीयगे ज्ञेया मन्दा भानौ चतुर्थगे। वक्राः स्युः पञ्चषेऽर्के स्तिवक्रा नगाष्टगे। नवमे दशमे भानौ जायते सहजा गतिः। द्वादशैकादशे सूर्य्ये लघने शीघ्रतां पुनः। रविस्थित्यंशकलिप्तशावधेः संख्याश्च कल्प्यते। न तु राश्यन्तरस्थत्वात् द्वितीयादिनिरूपणम्। राहुकेतू सदा वक्रौ शीघ्रगौ चन्द्रभास्करौ। गतेरेकस्वभावत्वादेषां दृष्टित्रयं सदा। क्रूरा वक्रा महाक्रूराः सौम्या वक्रा महाशुभाः। स्युः सहजाः स्वभावस्थाः सौम्याः क्रूराश्च शीघ्रगाः। ऋक्षसन्धिगताः खेटा राशिसन्धिगतास्तथा। एवराशेः फलं दद्युर्वक्रे तु विपरीतगम्। षडङ्काः षण्ठाश्चैव षफटस्थभजास्तथा। एतत्त्रिकं त्रिकं विद्धं विद्धैः कपभदैः क्रमात्। षडङ्का रौद्रगे वेधे षण्ठाश्चस्तगे यहे। षफटाःपूर्वाषाढायां षभजा भाद्र उत्तरे। बवौ शसौ खयौ चैव जयौ घनौ परस्परम्। एकेन हि हयं विद्धं शुभाशुभयहव्यधे। अवर्णादिस्वरह्रस्वे त्वेकवेधात् हवोर्व्यधः। युग्मवर्णाक्रे वेधे अनुस्वारविसर्गयोः"। (अकारादियुग्मवर्णात्मकवेधवदनुस्वारविसर्गयोरेकवेधादुभयवेधइत्यर्थः)। "कोणस्थधिष्ण्यत्रयीमध्ये अन्त्यादिपादगे यहे। अकारादिचतुष्के तु वेधः पूर्णतिथौ तथा। एकादिक्रूरवेधेन फलं पुंसां प्रजायते। उद्वेगश्च भयं हानिर्व्याधिर्मृत्युः क्रमेण च। ऋक्षे भमोऽक्षरे हानिः स्वरे व्याधिर्भयं तिथौ। राशौ विद्धे महाविघ्नः पञ्चविद्धेन जीवति। एकवेधे भयं युद्धे युग्मवेधे धनक्षयः। त्रिवेधे तु भवेद्भङ्गो मृत्युर्वेधे चतुष्टये"। (दृष्टित्रये उदाहरणम् "भरणस्थकारद्वयं नन्दां भद्रां तुलाञ्च तम्। विशाखां वृश्चिकं विध्येद्दृष्ट्या आग्नेयसंस्थितः। उदाहरणान्तरम् "यं युग्मसौम्यं कन्यां रफं स्वातीमुकारकम्। अश्विनीं रोहिणीमृगेऽभिजिद्भमेवं परेऽपि) ज्ञात्वा दुष्टफलाः क्रूरास्तथा सौम्याः शुभप्रदाः। क्रूरयुक्ताःपुनः सौम्याज्ञेयाः क्रूरफलप्रदाः। अर्कवेधे मनस्तापोद्व्यङ्गानिष्ट भूमृते। रोगपीड़ाकरः सौरीराहुकेतू च विद्धगौ। चन्द्रे मिश्रफलं पुंसां रतिलाभश्च भार्गवे। बुधवेधे भवेत् प्रज्ञा जीवः सर्वशुभप्रदः। स्वक्षेत्रस्थे बलं पूर्णं प्रादोनं मित्रभे यहे। चक्रं समष्टके प्रोक्तं प्रादं अष्टसष्टके

स्थिते। एतच्च सौम्यक्रूराणां बलं स्थानवशात् समम्। एतदेव फलं विद्धि सौम्ये क्रूरे विपर्ययात्। स्थानवेधसमायोगात् यत्संख्यं जायते बलम्। तत्संख्यं वेध्यवक्तॄनां फलं ज्ञेयं शुभाशुभम्। यद्राः सौम्यास्तथा क्रूराः वक्राः शीघ्रोच्चनीचगाः। स्थानञ्च वेध्यमित्येवं बलं ज्ञात्वा फलं वदेत्। वक्रयुक्ते फलं द्विगुणं त्रिगुणं खोडुसंस्थिते। स्वभावजं फलं शीघ्रे नीचस्थेऽर्द्धफलोदयः। तिथिराश्यंशनक्षत्रं विद्धं क्रूरग्रहेण यत्। सर्व्वेषु शुभकार्य्येषु वर्ज्जयेत्तत् प्रयत्नतः। न मन्दति विवाहे च यात्रायां न निवर्त्तते। न रोगात्मच्यते रोगी वेधवेलाबलोद्यमः। रोगकाले भवेद्वेधः क्रूरखेचरसम्भवः। यक्रगत्या, भवेच्छ्रुतः शीघ्रे चाप्यरुजान्वितः। वेधस्थाने रवौ भङ्गो दुर्गे खण्डितः (भङ्गः) प्रजायते। ऋक्षविद्धेषजं तत्र योधानाञ्च तत्र वै"। (ऋक्षैरयोद्धा)। "यत्र पूर्व्वादिकाष्ठायां ह्यराशयादिगो रविः। सा दिगस्तमिता ज्ञेया शेषास्तिस्रः सदोदिताः। ईशानस्थाः स्वराः प्राच्यां ज्ञेया आग्नेयगा यमे। नैर्ऋतस्थाश्च वारुण्यां, वायव्यां सौम्यगा मताः। नक्षत्राणि स्वरा वर्णा राशयस्तिथयोदिशः। ते सर्व्वेऽस्तमिता ज्ञेया यत्र भानुस्तिमासिकः। नक्षत्रेऽस्ते रुजा, वर्णे हानिः, शोकः स्वरेऽस्तगे। राशौ विघ्न, स्तिथौ भीतिः, यद्वाऽस्ते मरणं भवेत्। यात्रा युद्धं विवादश्च द्वारं प्रासादकर्म्मणोः। न कर्त्तव्यं शुभं चान्यदस्ताशाभिमुखं नरैः। अस्ताशायां स्थितं यस्य नाम्नः प्रथममक्षरम्। स चार्त्तः सर्व्वकार्येषु ज्ञेयो दैवहतो नरः। चारौ कोटे तथा युद्धे चातुरङ्गे महाबले। व्रजेदस्तंगतान् योद्धा यदोच्छेद्विजयं रणे। नक्षत्रेऽभ्युदिते दृष्टि, वर्णे लाभः, स्वरे सुखम्। राशौ जय, स्तिथौ तेजः पदाप्तिः पक्षकोदये। ऋक्षकाले भवेद्विद्धं यल्लग्नं क्रूरखेचरैः। तद्दुष्टं, शोभनं सौम्यै, र्मिश्रैर्मिश्रफलं भवेत्। यद्वैनं विद्धं यल्लग्नं फलं लग्नस्वभावतः। ज्ञातव्यं देविकेन्द्रेण भाषितं यज्ञरादिकम्। (शीर्षोदये सौम्यविलग्नवर्गे लग्नेऽपि वा सौम्ययुते शुभं स्यात्। अतोऽन्यथात्वे तु तदन्यथात्वं, मिश्रं मिश्रैरधिकं बलाढ्यैः। केन्द्रोपगानवमपञ्चमगाश्च सौम्याः केन्द्राष्टषड्जसगुभास्त्रिषडायसंस्थाः। सर्व्वार्थसाधनकराः परिपृच्छतां स्युरेभिर्व्विपर्य्ययगतैस्तु विपर्य्ययः स्यात्। लग्नाधिनाथोयदि केन्द्रगः स्यात् तन्मित्रमेतस्य च केन्द्रगं वा। व्ययाष्टकेन्द्रागयषड्गाय यापा अन्यत्र याता यदि तच्छुभं स्यात्। आद्योलग्नाधिपः कार्य्ये लग्ने कार्य्याधिपोयदि। लग्नपः कार्य्यपञ्चापि लग्ने यदि तृतीयकः। चतुर्थः कार्य्यगौ स्यातां यदि लग्नपकार्य्यपौ। कार्य्यसिद्धिस्तदा ज्ञेया मित्रक्षेदधिकं फलम्। एवं दृष्टियशाल्लग्नं फलं तद्वच्चतुष्टयम्। पृच्छनाड़ीस्थितो दूतोयत् पृच्छति शुभाशुभम्। तत् सर्व्वं सिद्धिमाप्नोति शून्ये शून्यं समीरये। आदौ न्यूनगतः पृच्छेत् पश्चात् पूर्णां विभेद् यदि। तदा सर्व्वार्थसिद्धिः स्यात् वामे वामं न संशयः। श्वासप्रवेशकाले चेद् दूतोजल्पति वाञ्छितम्। तस्यार्थसिद्धिमाप्नोति निर्गमे नास्ति सुन्दरम्। ऊर्द्ध वामास्थतोदूतोज्ञेयो वामपथस्थितः। पृष्टे दत्ते तथाधस्ताद्वचाद्यौ गतोमतः। यात्रादानविवाहेषु वस्त्रालङ्कारभूषणे। शुभे कर्म्मणि सर्व्वत्र प्रवेशे वाममः शुभः। कलह द्यूतयुद्धेषु स्नानभोजनमैथुने। व्यवहारे भये भङ्गे दक्षनाड़ी प्रशस्यते)। अन्यप्रकरणोक्तं केतत् ज्यो० त० प्रक्षिप्तम्। "क्रूरैरुभयतोविद्धा यस्यान्तरतिथिस्वराः। राशिधिष्ण्यञ्च पञ्चापि तस्य स्वल्पं न संशयः। मण्डलं नगरं ग्रामोदुर्गं देवालयं पुरम्। क्रूरैरुभयतोवेधे विनश्यन्ति न संशयः। कृत्तिकायां तथा पुष्ये रेवत्याञ्च पुनर्व्वसौ। वेधे सति क्रमाद्वेधो वर्णेषु ब्राह्मणादिषु। पूर्व्वाग्नेयं तथाग्नेयं ब्राह्मणानां प्रकीर्त्तितम्। उत्तरान्तिमं पुष्यं क्षत्रियाणां विनिर्द्दिशेत्। पौष्णं मैत्रं तथा चैव प्राजापत्यं विशाम्पतेः। आदित्यमश्विनीं ऋक्षं शूद्राणामभिजित्तथा। विद्धैरेभिर्हि जातीनां कारुकाणां च वेधके। तौक्ष्ण्यं भारुड़ं रसोधान्यं गजाश्वादिचतुष्पदाः। सर्व्वं सत्कार्यतां याति यावत् क्रूरोव्यधे स्थितः। क्रूरवेधसमायोगे यस्योपग्रहसम्भवः। तस्य स्वल्पं सन्देहोरोगाद्यापि रणेऽपि वा। सर्व्वभात् पञ्चमं विघ्नं ज्ञेयं विद्वज्जनाभिधम्। न्यूनद्वादशमं प्रोक्तं सन्धिपातश्चतुर्दशम्। केतुरष्टादशं प्रोक्तमुल्का स्यादेकविंशतिः। द्वाविंशतितमं कम्पस्त्रयोविंशच्च वज्रकम्। निर्घातश्च चतुर्विंशस्तथा अष्टाउपग्रहाः। प्रस्थाने विघ्नदाः प्रोक्ताः सर्व्वकार्येषु सर्व्वदा। प्रसङ्गादत्र

१ षड्नाड़ीचक्रं नवनाड़ीचक्रञ्चोक्तं यथा "जन्मभं कर्म्म आधानं विनाशः साप्तदायिकम्। सांघातिकमिदं विघ्नं षट्कं ह्यार्जनीनकम्। जातिदेशाभिधैश्चैव नव विघ्नानि

भूपतेः। वेधं ज्ञात्वा फलं ब्रूहि सौम्यैः क्रूरैः शुभाशुभम्। जन्मभं जन्मनक्षत्रं दशभं कर्मसंज्ञकम्। एकोनविंशमाधानं त्रयोविंशं विनाशकम्। अष्टादशञ्च नक्षत्रं साम्रदायिकसंज्ञकम्। सांघातिकञ्च विज्ञेयं त्रिंशांत्र जोड्शमेव हि। षट्त्रिंशद्दे राजजातेर्जातिनाम खनामभम्। देशभं देशनामर्क्षं राज्यभं चाभिषेकभम्। मृत्युः स्याज्जन्मभे विद्धे कर्मभे क्लेश एव च। आधानर्क्षे प्रवासः स्यात् विनाशे बन्धुविग्रहः। साम्रदायिकभे रिष्टं हानिः सांघातिके तथा। जातिभे कुलनाशः स्यात् वक्षनक्षाभिषेकभे। देशर्क्षे देशभङ्गः स्यात् क्रूरैरेवं शुभैः शुभम्। उपग्रहसमायोगे मृत्युर्भवति नान्यथा। भवं भङ्गश्च घातश्च मृत्युर्भङ्गयुता मृतिः। क्रूरैरेकादिपञ्चानैर्बुधि वेधे फलं भवेत्। तिथिं धिष्ण्यं स्वरं राशिं वारञ्चैव तु पञ्चमम्। यद्विद्धे वेधवेद्धन्द्रसद्विद्धे स्यात् शुभाशुभम्। तिथ्यादिपञ्चके विद्धे चन्द्रयोगोयदा भवेत्। उक्तं फलं तदा वाच्यं तद्विद्धे यद्दसम्भवम्।

अथार्धं संग्रवक्ष्यामि यदुक्तं चादिजामले। एकागीति पदे चक्रे यद्भेदाच्छुभाशुभम्। देशः कालस्ततः पश्चमिति त्रीण्यर्धनिर्णये। चिन्तनीयानि विद्वांसि सर्वकालं विचक्षणैः। देशोऽत्र मण्डलं स्थानमिति देशस्त्रिधोच्यते। वर्षमासदिनं चेति त्रिधा कालोऽपि कथ्यते। धातुर्मूलं च जीवश्च इति पञ्चं त्रिधा मतम्। अथ त्रिकत्रयस्थास्तु वक्ष्यामि खाभिखेचरान्। देशेशा राजमन्देज्या मण्डलस्वामिनः पुनः। केतुस्तुर्यस्थिताः स्थाननाथाचन्द्रारचन्द्रजाः। वर्षेशा राजकेत्वार्किजीवा भासाधिपाः पुनः। भौमार्कत्रिस्थिता ज्ञेयाश्चन्द्रः स्यात् दिवसाधिपः। धात्वीशाः सौरिपातारा, जीवेशास्त्वेन्दुसूरयः। मूलेशाः केतुशुक्रार्का इति पञ्चाधिपाश्चहाः। पुंग्रहा राजकेत्वर्कजीवभूमिसुता मताः। स्त्रीग्रहौ शुक्रशशिनौ सौरिसौम्यौ नपुंसकौ। सितेनदू सितवर्णौ रक्तौ भौमभास्करौ। पीतेज्यौ त्रिगुरू ज्ञेयौ नानाधाः केतुतमोऽर्कजाः। यद्वेधकोऽधिकोऽधोर्धः स्यादुदये च बलाधिकः। देशादीनां स एवैकः स्वामी खेटस्तदा मतः। खस्थे वक्रतुङ्गे स्यादुदये च बलाधिकः। वक्रोदये खड्यूने च पूर्णवीर्यो ग्रहो भवेत्। तदग्रहणे खेटे बलं त्रैराशिकात् मतम्। उच्चांशस्थे बलं पूर्णं नीचांशस्थे दलं बलम्। त्रैराशिकवशात्त्वेवमन्तरे तु बलं बुधैः। एवं देशादिनाथा ये ग्रहवेधे व्यवस्थिताः। सुहृदः शत्रवोमध्याश्चिन्तनीयाः प्रयत्नतः। स्वमित्रसमशत्रूणां विध्यन् देशादिकं क्रमात्। शुभग्रहः शुभं दत्ते चतुस्त्रिद्व्येकपादकैः। दृष्टं दुष्टग्रहः कुर्यादेकद्वित्रिचतुःपदैः। विद्धं पूर्णदृशा पश्यन् तत्पादेन फलं ग्रहः। अविद्धं त्वन्यथा ज्ञेयं फलं दृष्ट्यनुमानतः। वर्षादिखररार्शीनां मेषाद्ये राशिमण्डले। ग्रहदृष्टिवशात् सर्वं विद्धं वर्षादिकं मतम्। स्वरवर्णः स्वचक्रोक्तस्थितिवेधाच्च पीडयेत्। तिथिवर्णेषु यो राशिस्तद्दृष्टिः स्यात्तिथीक्षणात्। शुभो वा शुभोवापि शुद्धे विध्यत्तिथिं ग्रहः। सर्वं निजफलं दत्ते कृष्णे पक्षे तु तद्वलम्। खेटकैकैकांशके ज्ञेया पूर्णा दृष्टिः सदा बुधैः। दृष्टिहीने पुनर्वेधे न स्यात् किञ्चित् शुभाशुभम्। इत्येवं दृष्टिभेदेन निर्दिष्टं सकलं फलम्। वर्षादिपञ्चके विद्धे ग्रहो दत्ते शुभाशुभम्। सौम्यः पूर्णदृशा पश्यन् विद्धं वर्षादिपञ्चकम्। फलं विंशोपकाः पञ्च क्रूरस्य चतुरोदिशेत्। वर्षादिपञ्चके यावत् स्थानवेधे च तावती। दृष्टिस्तदनुमानेन वाच्या विंशोपका बुधैः। एवं विंशोपका वेद्ये सम्भवन्ति शुभाशुभाः। अन्योन्यं शोधयेत्तेषां शेषात् ज्ञेयं शुभाशुभम्। देशध्वंसः प्रजापीडा नृपविग्रहतस्तथा। यत्र दृष्टिस्तु तत्र स्याद् दुर्भिक्षं मण्डले तथा। वर्त्तमानार्धविंशांशाः कल्प्या विंशोपका इह। ते क्रमात् वर्त्तमानार्धे देयाः पाप्याः शुभाशुभाः। अकालेऽपि फलं पुष्पं इक्षूणां यत्र जायते। स्वजातिभांसभुक्तिश्च दुर्भिक्षं तत्र रौरवम्। परचक्रागमोयत्र विग्रहश्च स्वराज्यके। कृतोर्विपर्ययो यत्र दुर्भिक्षं मण्डले भवेत्। भूमिकम्पोरजःपातोरुग्रहदृष्टिश्च जायते। देशे सर्वसुखोपेते वेधादेतद्वदेत्बुधः। दीपो यथा स्वहस्थानात्सदुद्योतयति सर्वतः। तद्वेदं सर्वतोभद्रं चक्रं ज्ञानप्रकाशकम्"।

२ शतपदचक्रम्—"चक्रं शतपदं वक्ष्ये ऋक्षांशाक्षरसम्भवम्। नामादिवर्णतोऽत्रैव अक्षराख्यं शकारतः। तिर्यगूर्द्धगता रेखा रुद्रसंख्यालिखेद्बुधः। जायते कोष्ठकानाञ्च शतैकं १०० नात्र संशयः। न्यस्येदवकहडादि रौद्रादिविदिशि क्रमात्। (अ पकह ड़ा रैशान्यां म ट प र ता ऋरिति चाग्नेय्याम्। न य भ ज ख्वा नैर्ऋत्यां ग श द च लावायव्याम्) पञ्च पञ्च क्रमेणैव विंशवर्णान् नियोजयेत्। पञ्चस्वरसमायोगे

एकैकं पञ्चधा कुर्यात्। (अवर्गाद्याक्षरयोत्तेषाः सम्बन्धाचर युतस्तथा। सजातीयैक्यमास्थाय पञ्चस्वरविनिर्णयः। ऋदृलृतोरव्यकारेण शेन सस्य परिग्रहः) अधिक पा०। "कुर्यात् कुपभुदुस्थाने त्रीणि त्रीणक्षराणि च। कुषडन्त्रो भवेत् स्तम्भे रौद्रे त्रीशानगोचरे। पुषष्ठो भवेत् स्तम्भे वह्नौ चाग्नेयसंज्ञके। भुधफढोभवेत् स्तम्भे पूर्वाषाढे च नैर्ऋते। दुबभडो भवेत् स्तम्भे वायव्ये भाद्रउत्तरे। एवं स्तम्भचतुष्कञ्च ज्ञातव्यं स्वरवेदिभिः। धिष्ण्यानि कृत्तिकादीनि प्रत्येकं चतुरक्षरैः। साभिजित्यंशकाः सप्त शतैकं द्वादशाधिकम्। यद्यांशककोत्पन्नः क्रूरः सौम्योऽपि वा यदा। ततस्तं वेधयेत् तिर्यक् पुंसोनामादिमाक्षरम्। सौम्यैर्विद्धं शुभं ज्ञेयमशुभं पापखेचरैः। मिश्रैर्मिश्रफलं तत्र निर्वेधे न शुभाशुभम्। यदृक्षं सर्वतोभद्रे यत्रोपग्रहवेधतः। शुभाशुभफलं सर्वं तदृक्षापि विचिन्तयेत्"। (पञ्च स्वराः अ इ उ ए ओकारास्तैर्योगे धिष्ण्यानि नक्षत्राणि। अ त्र चतुर्भिर्वर्णैरेकं नक्षत्रं यथा। अ इ उए शब्दो यविषु। ४। वेवोकुकि। ५। कुषडन्त्र। ६। केकोकृहि। ७। छुछेचोड। ८। डिडुडेडो। ९। मभिसुमे। १०। मोटटिटु। ११ टेटोपधि। १२। पुषष्ठ १३। मेपोररि। १४। रुरेरोत। १५। तितुतेतो। १६। ननिनुने। १७। नोयवियु। १८। वेयोभभि। १९। भुधफढ। २०। मेभोजजि। २१। जुजेजोख। (अभिजित्)०। खिखुखेखो। २२। गगिगुगे। २३। गोशशिशु। २४। शेशोददि। २५। दुचभज। २६। देदोचचि। २७। चूचेचोल। १। लिलुलेलो। २। ऋॄलृयुक्तः ककारयुक्तेन ज्ञेयः। ह्रस्वेन दीर्घोज्ञेयः। नालव्यशकारेण दन्त्यसकारोज्ञेयः)।

ऋक्षचक्रम्—"अष्टाविंशोद्भवा रेखा अष्टाविंशतितिर्यगगाः। ऋक्षचक्रं भवत्येवं यदुक्तं चादिजामले। कृत्तिकादीनि भान्यत्र पादाक्षरक्रमेण च। साभिजित्नि न्यसेत् सर्वाण्यष्टाविंशतिसंख्यया। यो यत्रो यत्र ऋक्षांशे तं तत्रैव न्यसेद्बुधः। वेधयेत् संमुखं वर्णं शुभो वाप्यशुभोऽपि वा। आद्यांशेन चतुर्थांशं चतुर्थांशेन चादिमम्। द्वितीयेन तृतीयं तु तृतीयेन द्वितीयकम्। यस्य नामाक्षरं विद्वन्मंशचक्रे यदेव तु। क्रूरैः रिष्टं, शुभैर्लाभमित्यादौ सौख्यं ध्रुवं न संशयः। क्रूरोभयस्थिते वेधे ह्यल्पविद्धं शुभाशुभैः। शुभोभयगते वेधे व्याधिपीड़ा च बन्धनम्। वैधव्यञ्च विवाहे तु यात्राकाले महाभयम्। रोगे ह्यल्परुषे भङ्गः क्रूरवेधे न संशयः। अदृश्यः सागरानद्यो देशग्रामपुराणि च। क्रूरवेधे विनश्यन्ति नात्र कार्या विचारणा। चन्द्रस्यर्क्षांशको विद्धो भवेद्यत्रापरग्रहैः। तन्नाम तद्दिनं वर्ज्यं सर्वदा शुभकर्मणि"

ऋक्षलयचक्रम्—आदौ चक्रं समालिख्य ऋक्षलयसमन्वितम्। अश्विन्यादीनि लेख्यानि सप्तविंशतिमानि च। अश्विन्याद्यं मघाद्यञ्च मूलाद्यञ्च क्रमेण च। उत्तरे पूर्वके याम्ये चैतच्चक्रत्रयं मतम्। प्रतीचीमध्यरेखायामीशानानलं क्रमाधिपः। आग्नेयान्तं नराधीशस्तन्मध्ये च गजाधिपः। अश्वाध्यक्षा गजाध्यक्षोनराध्यक्षः क्रमेण च। एषां ऋक्षविभागेन ज्ञातव्यं हि शुभाशुभम्। अन्येषां भूभृताक्षञ्च यत्र ऋक्षे व्यवस्थितम्। तच्छत्रं तस्य भूपस्य शुभाशुभफलप्रदम्। यत्र ऋक्षे स्थितः सौरिर्भङ्गं तस्य विनिर्दिशेत्। फलञ्च चामरादीनां प्रत्येकं च वदाम्यहम्। चामरं कलसं वीणा ऋक्षं दण्डं पतद्ग्रहम्। आसनं कीलकं रज्जुर्ध्वजं भेदा प्रकीर्त्तिताः। चामरे ऽक्षतता वायोरनाहृष्टिश्च जायते। दुर्भिक्षं च भवेद्घोरं प्रजापीड़ा न संशयः। कलसस्थे ऽभवेद्युद्धं रक्षे भङ्गो महद्भयम्। वातपातादिकं सर्वं जायते नात्र संशयः। वीणासंस्थे ऽर्कभुक्ते पक्षरात्रौ विनश्यति। चलचित्तो भवेद्राजा भयभीता च मेदिनी। यदाऽक्षच्छत्रगे सौरिर्ऋक्षे ४ दण्डे ५ पतद्ग्रहे ७। तदा तस्य भवेद्भङ्गस्तत्क्षणापि न संशयः। आसनस्थ भवेद्राज्ञ आसनस्थे ७ शनैश्चरे। युवराजक्षयः कीलेऽ वध्यनं रज्जुसंस्थितेऽ। सौम्ययुक्तोऽतिचारस्थः शनिरुक्तफलो न हि। वक्रगः क्रूरयुक्तश्च सर्वं क्रूरं करोति सः। शनिराहुकुजादित्यायदाजीवेन्दुसंयुताः। उत्तराधीशराज्यस्य निश्चितं ऋक्षभङ्गदाः। क्रूरर्क्षत्रयं चैव बुधचन्द्रेण संयुतम्। पूर्वऋक्षविनाशाय कथितं पूर्वसूरिभिः। एवं पापचतुष्कं च यदा शुक्रेन्दुसंयुतम्। दक्षिणाधिपतेर्ऋक्षविनाशो भाषितो बुधैः। एवमन्येषु राज्येषु यत्र यस्य च सम्भवः। उपग्रहसमावेशाच्छक्षभङ्गं विनिर्दिशेत्। यथा दुष्टफलः सौरिस्तथा सौम्यफलोबुधः। भौमशौ शुक्रराहू च रविचन्द्रौ बलेसमौ। यथा क्षानिकराः क्रूरास्तथा सौम्याः शुभप्रदाः। क्रूरयुक्तो भवेत् क्रूरश्चन्द्रः सौम्ययुतः शुभः। सौम्यक्रूरा यदा ऋक्षे अष्टावेकत्र संस्थिताः। ऋक्षभङ्गो भवे-

तस्य परचक्रागमेन च। नृपनामर्क्षगोराष्ट्रः केतुर्वा यस्य संस्थितः। क्षयभङ्गोभवेत्तस्य विषदानेन भूपतेः। मृगयां साहसं यातां दुष्टाश्वगजवाहनम्। विषदञ्च क्षयेद्राजा क्षयस्थैः क्रूरखेचरैः। एवं ज्ञात्वा सदा राजा करोति यद्दशान्तिकम्। यदुक्तं यामले तन्त्रे तेन शान्तिर्भविष्यति" इति

५. सिंहासनचक्रम्(३)—"अथातः संप्रवक्ष्यामि चक्रं सिंहासनत्रयम्। येन विज्ञातमात्रेण क्रियते राज्यनिर्णयः। सप्तविंशतिनक्षत्रैर्वेकैकन्तु नवात्मकम्। अश्विनीमघमूलाद्यं पञ्चनाड़ीविभेदितम्। अश्विन्याद्युत्तरे भागे मघाद्यं पूर्वतः स्थितम्। मूलाद्यं दक्षिणे भागे ज्ञातव्यं नृपतित्रयम्। इतरेषु च राज्येषु नृपनामर्क्षतोवदेत्। शुभाशुभमिदम् सर्वं यस्य यत्र शनिः स्थितः। नाड़िकापञ्चभेदेन एकैकस्याऽऽसनं भवेत्। आधारमासनं पट्टं सिंहं सिंहासनं तथा। आधारादिफलं सर्वमेकैकस्य वदाम्यहम्। यद्वेध वशाज्ज्ञेयं सौम्यैः क्रूरैः शुभाशुभम्। नृपस्याऽऽधारनामर्क्षे यदा षड्भिर्वेधनम्। पराधीनगतं राज्यं कुरुते नात्र संशयः। आसनस्थेन ऋक्षेण नीतियुक्तो भवेन्नृपः। प्रधानपुरुषादेशो प्रजाशान्तिकरो भवेत्। षड्ऋक्षे यदा राजा चोपविष्टो यदासने। पूर्वराजस्थितेस्तुल्यं चिरं पालयते महीम्। सिंहरूपी भवेद्राजा सिंहऋक्षासने स्थितः। संग्रामस्य प्रियोनित्यमसाध्यो मन्त्रिणः सदा। सिंहासनगते ऋक्षे तेजस्वी भीषणाकृतिः। चलचित्तो महाक्रोधी प्रजापीड़ाकरोनृपः। तत्कालेन्दुगते ऋक्षे क्रूरनिर्वेधनाड़िके। शुभावस्थे शुभलग्ने संस्थायी नृप आसने। दैवज्ञे च समायोगे उपविष्टो यदासने। उच्छिद्य शत्रुसंघातमेकच्छत्रं करोति सः। क्रूरयुक्त गतनाड्यासुपविष्टो यदासने। वन्धनं भूमिनाशञ्च तथा स्वल्पः प्रजायते। आधारादिफलं तत्र क्रूरैरेव शुभैः शुभम्। आधारऋक्षगः सौरिरनाड़ष्टिं करोति सः। दुर्भिक्षं रौरवं घोरं प्रजास्वल्पः प्रजायते। आसनस्थो यदा सौरिर्युद्धे भङ्गप्रदोभवेत्। अथ वा व्याधिपीड़ा च मानदुःखञ्च जायते। षड्ऋक्षे यदा सौरिः षड्रात्री विनश्यति। प्रियो वाथ कुमारो वा मन्त्रिवर्गस्तथोऽपि वा। सिंहे सिंहासने वाथ यदि तिष्ठति सूर्यजः। तदा स्वल्पं सन्देहो यदि शक्रसमोनृपः। शत्रुर्क्षराड्भमारूढा यदा चन्द्रेण संयुताः। यस्यासनगता एते तदा तस्य क्षयङ्कराः। क्रूरयुक्तोऽतिवक्रश्च क्रूरनाड़ीगतोऽपि वा। आसने चन्द्रयोगेन कालरूपी शनैश्चरः। एवं शुभफलं दद्याद्देवमन्त्री न संशयः। करोति विपुलं राज्यं यस्यासनगतो गुरुः"

६. कूर्मचक्रम्(५)—"कूर्मचक्रं प्रवक्ष्यामि यदुक्तं कौशलागमे। येन विज्ञातमात्रेण ज्ञायते देशनिर्णयः। यस्य यद्भैक देशस्था देवाखिलिंशकोटयः। स मेरुः पृथिवीमध्ये दृश्यते दृश्यते न तु। तादृशाः पर्वताश्चाष्टौ सागरा द्वीप दिग्गजाः। सर्वे तु विष्टता भूम्या साश्रता येन तं शृणु। दंष्ट्रायां सा वराहेण विष्टता सचराचरा। सुस्थाखनतोयस्य शोभते वृत्तिका यथा। दैत्यशोऽपि महाकायो वराहः शेषमस्तके। तस्य चूड़ामणेरूर्द्धं शोभते भगकोपमः। एवंविधः स शेषोऽपि कुण्डलीभूय संस्थितः। कूर्मपृष्ठैक भागेन विस्तृतन्तुरिवाबभौ। वपुःस्थाश्च शिरः पुच्छनखाङ्गुष्ठ प्रभृतीनि च। मानेन तस्य कूर्मस्य कथयामि प्रयत्नतः। शङ्खोः शतसहस्राणि योजनानि वपुः स्थितम्। तदर्द्धेन भवेत् पुच्छं पुच्छार्द्धेन तु कुक्षिकम्। ग्रीवाऽस्याऽयुतकोटीभिर्मस्तकं सप्तकोटिभिः। नेत्रयोरन्तरं तस्य कोटिरेका प्रजायते। सुखं कोटिद्वयं तस्य द्विगुणेन च पादयोः। अङ्गुलीनां नखाग्रे तु योजनायुतसंख्यया। एवं कूर्म प्रमाणन्तु कथितं चादियामले। तस्योपरिस्थिता चेयं सप्तद्वीपवती मही। कूर्माकारं लिखेच्चक्रं सर्वावयवसंयुतम्। पूर्वभागे मुखं तस्य पुच्छं पश्चिमगण्डले। पूर्वापरं लिखेद्वेधं वेधयोत्तरदक्षिणे। दैशानराक्षसे वेधं वेधमाग्नेय मारुते। नाभिशीर्षचतुःपादकुक्षिपुच्छेषु संस्थिते। तारात्रयाङ्किते क्षक्षिन् सौरिं यत्नेन चिन्तयेत्। अधिके भक्षिके तत्र पादार्द्धेषु भगखण्डकम्। चतुर्विंशति संख्याः स्युस्तांश्च क्षन्ति शनिः क्रमात्। अश्विन्याद्युत्तरे भागे मघाद्यं पूर्वतः स्थितम्। मूलं च दक्षिणे भागे ज्ञातव्यं नृपतित्रयम्। व्यापकस्यक्षराशिस्थे चन्द्रे मन्दोविशेद्यदा। यद्यदृक्षिण्यपादार्द्धं च तत्र दोषा भवन्त्यमी। अतिदृष्टिरनाड़ष्टिर्मूषिकाः शलभाः शुकाः। स्वचक्रं परचक्रञ्च सप्तैताः ईतयः स्मृताः। कृत्तिका रोहिणी सौम्यं (५) कूर्मनाभीगतं त्रयम्। साकेता मिथिला चम्पा कौशाम्बी कौशिकी तथा। अवन्तिश्चैव गया विन्ध्यमन्वर्वेदी च मेकला। कान्यकुब्जं प्रयागञ्च मध्यदेशो विनश्यति। रौद्रस्य नर्क्षं पुच्छः कूर्मस्य च शिरःस्थितम्। सगौड़ोत्कलिबन्ध्यञ्च पञ्चराटञ्च कामरूः। वरेन्द्री च तथा चेदी मगधश्च तथैव च। सूरसेनो वने-

वासः पूर्वदेशोविनश्यति । अश्वेषा च मघापूर्वफाल्गुन्याग्नेयगोचरे । अङ्गवङ्गौ कलिङ्गश्च पूर्वजाश्चैव कोशलाः । डाहलोजयकृन्ना च तथैव सुलक्षिका । उड्डीयानं वराटश्च अग्निदेशो विनश्यति । उत्तरा हस्तचित्रा च दक्षिणं कुक्षिमाश्रिताः । दर्दुरश्च महेन्द्रश्च वनवासश्च सिंहलः । तापी भीमरथी लङ्का त्रिकूटं मलयस्तथा । श्रीपर्वतः किष्किन्धा इति नक्षत्रति दक्षिणः । स्वातौ विशाखा मैत्रं च कूर्मनैर्ऋत्यगोचरे । नासिक्यं च सुराष्ट्रं चोत्तरमालवकं तथा । वाह्लीकं च प्रकाशश्च भद्रुकक्षश्च कोङ्कणम् । खेटापुरं च सौटेरं देशा नक्षन्ति चेदृशाः । जेष्ठा मूलं तथाषाढा पुच्छे कूर्मस्य संस्थिताः । पारावतं मरुकच्छमवन्ती पूर्वमालवः । पारावतवर्बरद्वीपं सौराष्ट्रं सैन्धवं तथा । जनस्थानं विनश्यन्ति स्त्रीराज्यं पुच्छपीडने । उत्तरादित्रिकक्षाणि पादे वायव्यगोचरे । गुर्ज्जरं तङ्गणश्चैव मरुदेशं सरस्वतीम् । जालन्धरं वराटं च वालुकोदधिसंयुतम् । मेरुपृष्ठं विनश्यन्ति ये चान्ये कोणसंस्थिताः । शतभिषादित्रयश्चैव उत्तरं कुक्षिमाश्रितम् । नेपालं कीरकाश्मीरगङ्गनं खुरसानकम् । माथुरं ब्रह्मदेशश्च खसकेदारमण्डले । क्षिमाक्षया विनश्यन्ति ये देशाश्चोत्तराश्रयाः । रेवती चाश्विनी याम्यं२ पादे त्रीशूलगोचरे । गङ्गाद्वारं कुरुक्षेत्रं श्रीकण्ठं हस्तिनापुरम् । अश्वपक्षैकपादाश्च गजकर्णस्तथैव च । विनश्यन्ति च ते सर्वे देशा स्त्रीज्ञानगोचरे । सौरिःस्वदेशगोयत्र तत्र यत्नेन चिन्तयेत् । परदेशस्थितः कुर्याद्दियक्षेष्टिं यशोयतेः । यत्रस्थः पीडयेत्तत्र वेधस्थाने तथैव च । देशनामर्क्षयः सौरिर्भङ्गदो नात्र संशयः। १पृथ्वीकूर्मं समालेख्य ऋक्षादि यमान्तकम् । देशादिस्वस्वऋक्षादि वक्त्रे कूर्मचतुष्टयम् । पूर्ववद्भक्रमालिख्य देशनामर्क्षपूर्वकम् । २देशकूर्मो भवेत्तत्र यत्र सौरिश्चयन्तथा । नगरे ३नागरस्थं ऋक्षं लेख्यं तु पूर्ववत् । सौरिस्थाने भवेद्दुष्टं वेधस्थाने तथैव च । ४क्षेत्रजे क्षेत्रभान्यत्र ऋक्षं कूर्मे यथास्थितम् । सौरिस्थाने तथा वेधे जायतेऽत्र महद्भयम् । ५दृष्टकूर्मं समालिख्य गृहद्वारसमस्थितम् । स्वाभ्यर्क्षपूर्वकं ऋक्षं ततोयोज्यं शुभाशुभम् । ६कूर्ममध्यस्थितः सौरिः शोकसन्तापदायकः । द्वारे विघ्नप्रदोज्ञेयः पार्श्वके वह्निदायकः । ज्ञेयो मृत्युप्रदो याम्ये राक्षसे राजसाह्वयम् । वारुणे शुभदोज्ञेयो वायव्ये भूमिदायकः । अर्थलाभप्रदः सौम्ये धान्ये सर्वसिद्धिदः । सौरिर्वलाधिकोदृष्टः स्वल्पवीर्य्यः शुभावहः । समकालं पीडयेद्यत् भानुजः कूर्मपञ्चकम् । तत्र स्थाने महायुद्धं जायते नात्र संशयः । दृष्टस्थाने गते चन्द्रे कर्त्तव्यन्तत् शान्तिकम् । यदुक्तं यामले तन्त्रे सर्वविघ्नविनाशकम् । यन्देशञ्चैव पश्यन्ति राजभौमशनैश्चराः । परचक्रभयं चाग्निर्दुर्भिक्षन्तत्र दारुणम् । कूर्मचक्रं महाचक्रं कथितञ्चादियामले । त्रिकालविषयज्ञानं प्राणिस्थं येन जायते" ।

तन्त्रोक्ते मन्त्रयन्त्रतत्साधनोपयोगिकूर्मचक्रे तु कूर्मचक्रशब्दे दृष्टे उक्ते तत्र द्रष्टव्ये ।"

७ षट्चक्रम्—"पद्माकारं लिखेच्चक्रमष्टपत्रं सुशोभनम् । कोष्ठकं नवमं मध्ये पद्मचक्रं प्रजायते । कृत्तिकादीनि भान्यत्र त्रीणि त्रीणि यथाक्रमम् । मध्यकोष्ठादि रुद्रान्तं सप्तविंशतिसंख्यया । नव खण्डा धरा सा च नवभागेषु संस्थिता । यत्र खण्डे स्थितः सौरिः खण्डं तच्च विनश्यति"

८ फणीश्वरचक्रम्—"कृत्तिकाद्यं लिखेच्चक्रं सर्पाकारं फणीश्वरम् । सप्तनाड़ीसमायुक्तं सौरिवेधं विलोकयेत् । नाड्यैकैकसमायोगे जम्बूद्वीपादि गण्यते । सप्त द्वीपाः क्रमेणैव पीड्यन्ते सौरिपीडया । जम्बूप्लक्षस्तथा शाकः कुशः क्रौञ्चश्च शाल्मलिः । सप्तमः पुष्करद्वीपः पीड्यन्ते सौरिपीडया" । कालानलचक्राणि सप्त

९ राहुकालानलचक्रम्—(१)"अथातः संप्रवक्ष्यामि प्रोक्ता या ब्रह्मयामले । राहुकालाननी यात्रा सदाप्रत्ययकारणम् । यद्योगवशाद्यात्रा ज्योतिःशास्त्रे प्रभाषिता । या सा शुभेषु कार्य्येषु फलदा न तु संशयः । यस्य छायाप्रभावेण ग्रस्यते शशिभास्करौ । तस्य राहोः प्रभावञ्च वक्ष्येऽहं रणकर्म्मणि । केचित् मूर्खा वदन्त्येवं यद्योराहुरकारणम् । यतो वर्षे दिने लग्ने व्याधिपत्यं न दृश्यते । व्याधिपत्ये स्थिताये च वर्षे मासे दिवानिशोः । ते चाधिकारिणोज्ञेया राहु राजाभिधीयते । वेदागमपुराणेषु विख्यातो राहुखेचरः । तस्य माहात्म्यमज्ञात्वा मिथ्या जल्पति खल्पधीः । दुष्टारिष्टेषु सर्वेषु जातकादिषु मन्यते । सदाप्रत्ययदो राहुः स कथं स्यादकारणम् । भ्रमँश्च कालरूपेण संहारेण महीतले । खयङ्कादृश्या रौद्रोज्ञेयो राहुर्न संशयः । यद्या यामभयाद् यस्य सृष्टिमार्गे भ्रमन्ति च । तस्य नामात्मकं वक्ष्ये मुखं पुच्छं क्रमेण च । राहुरुवाचः

पातः स्वर्भानुः सिंहिकासुतः। दैत्यच्छाया शिरोवक्त्रं यद्वारिच्च विधुन्तुदः। पुच्छं केतुः शिखी सर्पो गुदं मुखं घटोमतम्। उत्पातो विषगर्भश्च धूम्रकालः यहान्तकः। ऋक्षाधारगतोराहुः सर्परूपेण संस्थितः। तस्य चक्रं प्रवक्ष्यामि राहुकालानलाख्यकम्। ग्रहाकासप्तकं चक्रं भीशादौ ऋक्षिकादिकम्। साभिजित् सर्वभालिख्य अष्टाविंशतितारकाः। यत्र ऋक्षस्थितोराहुर्वदनं तदुविनिर्दिशेत्। सुखात् पञ्चदशे ऋक्षे पुच्छं तस्य व्यवस्थितम्। एकोत्तरशतं ख्याताः जायन्ते तत्र केतवः। व्याप्नुवन्ति जगत्सर्वं सहस्रार्कसमत्विषः। राहुभुक्तानि ऋक्षाणि जीवपक्षे त्रयोदश। त्रयोदशापि भोगाढ्यानि मृतपक्षः प्रकीर्त्तितः। मृतपक्षे मुखस्थस्य गुदं जीवाङ्गमध्यगम्। एवमङ्गद्वयं राहोर्ज्ञातव्यं स्मरवेदिभिः। जीवपक्षे क्षपानाथे मृतपक्षे रवौ स्थिते। तस्मिन् काले शुभा यात्रा विपरीता तु हानिदा। चन्द्रादित्यौ यदा युक्तौ जीवपक्षव्यवस्थितौ। तत्र क्षेमं जयो लाभो यात्राकाले न संशयः। मृतपक्षे यदा काले संस्थितौ चन्द्रभास्करौ। तदा हानिर्भयं भङ्गोमृत्युर्यात्राफलं मतम्। जीवपक्षस्थिते चन्द्रे कार्य्यं स्यादमृतोपमम्। मृतपक्षे मृतं ज्ञेयं यतश्चन्द्रबलात् बलम्" तत्राङ्गभेदेन फलभेद उक्तस्तत्

राहुषडङ्गविभागचक्रम्—"यतः षडङ्गभेदेन राहुचक्रं वदाम्यहम्। मुखं हृदुदरं गुह्यं पुच्छं मस्तकमेव च। मुखैकं हृदये सप्त षडृक्षाणि तथोदरे। ऋक्षैकं गुह्यगं तस्य षट् पुच्छे

"मुखादङ्गनामभेदः सप्तमस्तके मुखाद्यङ्गस्य नामानि फलं चास्य वदाम्यहम्। यथोत्तरं क्रमेणैव चन्द्रार्कभ्रमणेन च। यत्र ऋक्षे स्थितो राहुस्तस्याभिधानमीरितम्। गिलितं कर्त्तरी जिह्वा चन्द्राङ्गं वदनं तथा। राहुधिष्ण्याप्ततः सप्त भुक्तधिष्ण्यानि यानि च। तानि सम्पुटसंज्ञानि कामाङ्गं हृदयन्तथा। हृदयाख्ये स्थिताख्याश्च तारका रससंख्यया। कामाङ्गं जठरं जीवं सम्पुटोदरसंज्ञकम्। ततःपरोयस्तु नक्षत्रमेकं पञ्चदशं सुखात्। गुदसद्गिलितं गुह्यं केतुचन्द्राङ्गकर्त्तरी। गुदधिष्ण्याप्ततोयानि धिष्ण्यानि रससंख्यया। पुच्छं स्यात्कूर्मवज्राङ्गपुटिमल्लुलसैव च। शेषाणि सप्त भान्यत्र मध्यस्थान्यस्य पुच्छयोः। कपालं मस्तकं ग्रीवं रुद्राङ्गं भोगिमण्डलम्। स्थिररूपी स्थितोभानुश्चरूपश्च चन्द्रमाः। ऋक्षैकैकशोऽङ्गानां योगषट्कं वदाम्यहम्।

सुखादियोगषट्कम्—"राहुवक्त्रे स्थिते सूर्य्ये चन्द्रे हृदयसंस्थिते। यायिनो विजयस्तत्र स्थायिनो भङ्ग आहवे। सुखाग्रसंस्थिते सूर्य्ये चन्द्रे चोदरगे तथा। अत्र यायी जयेद्युद्धे खेलया नात्र संशयः। भास्करे गिलिताङ्गस्थे चन्द्रे वज्राङ्गसंस्थिते। स्थायी भङ्गमवाप्नोति यायी जयति सत्वतः। राहुऋक्षस्थितो भानुश्चन्द्रे पुच्छाङ्गसंस्थिते। स्थायिनोविजयोयुद्धे यायिनो मृत्युमादिशेत्। राहुजिह्वां गते सूर्य्ये चन्द्रे रुद्राङ्गसंस्थिते। बलावर्तो भवेत्तत्र सैन्ययोरुभयोरपि। राहुऋक्षस्थितोभानुश्चन्द्रस्तत्रैव संस्थितः। न कश्चिज्जयमाप्नोति सैन्ययोरुभयोःक्षयः"।

हृदयादियोगषट्कम्। "हृदयस्थे दिवानाथे जठरस्थे निशाकरे। निर्द्दिष्टः स्थायिनोमृत्युर्यायी जयति निश्चयः। हृदयस्थो यदा भानुः यशाङ्गोगुदमाश्रितः। खेलया जयते यायी स्थायी च म्रियते रणे। कामाङ्गके दिवानाथे पुच्छषट्के निशाकरे। स्थायिनो विजयस्तत्र यायिनश्च पराजयः। सम्पुटस्थो यदादित्यो रुद्राङ्गे चन्द्रमा स्थितः। यायी च भङ्गमायाति किञ्चित्स्थायी जयी रणे। कामाङ्गं याति चेत् भानुश्चन्द्रे राहुसंस्थिते। संग्रामे विजयी यायी, स्थायिनो भङ्गमादिशेत्। हृदयाङ्गे यदा युक्तौ चन्द्रादित्यौ व्यवस्थितौ। देवानपि जयेत् यायी किंपुनर्मानवं बलम्"।

उदरादियोगषट्कम्—"उदरस्थे दिवानाथे निशानाथे गुदस्थिते। समयुद्धं भवेत्तत्र किञ्चित् यायी जयी रणे। सम्पुटस्थो यदा भानुः पुच्छे भवति चन्द्रमाः। यायिभङ्गो, जयः स्थात्तत्र काले न संशयः। कामाङ्गगः सहस्रांशुर्मस्तकस्थो निशाकरः। यात्रिकोभङ्गमायाति स्थाने वासी जयी रणे। भानुरुदरगोयत्र निशेशोराहुपङ्गगः। विवादी क्रीयते तत्र स्थायी जयति नान्यथा। खर्भानोरुदरे भानुर्हृदये तारकाधिपः। अनायासेन संग्रामे यायिनो जयमादिशेत्। उदराङ्गे यदा युक्तौ चन्द्रादित्यौ व्यवस्थितौ। तदा सन्धिर्न सन्देहः सैन्ययोरुभयोरपि"।

गुदादियोगषट्कम्—"केतुधिष्ण्ये स्थिते सूर्य्ये चन्द्रे वज्राङ्गसंस्थिते। यायिभङ्गो, जयी स्थायी भाषितं ब्रह्मयामले। गुदे तीक्ष्णांशुसंयुक्ते कपालस्थे निशाकरे। यायी च भज्यते तत्र स्थायी जयति नान्यथा। गुदऋक्षस्थितः सूर्य्योराहुऋक्षस्थितः शशी। महाहवं भवेद् घोरं किञ्चित् स्थायी जयी रणे। भानुरुद्गिलिते ऋक्षे ग्रसत्

संपूर्ते यदि। यायिनो विजयस्तत्र स्थायिनो भङ्गमादिशेत्। युद्धे वर्त्तते भानुर्ज्जठरे रोहिणीपतिः। दग्ध्वित्वा रिपोः सैन्यं यातास्येति निजालयम्। युद्धे दिनकरो यत्र तत्रैव यामिनीकरः। समयुद्धं भवेत्तत्र किञ्चिदागन्तुको जयी"।

वज्राङ्कयोगषट्कम्—"सूर्य्याङ्कस्थः सङ्क्षांशुर्ज्जङ्घायां शीतगुः स्थितः। यायिनोविजयं विद्यात् स्थायिनश्च पराजयम्। पुच्छजेस्थितो भानुः स्कन्धजेत्रे तु चन्द्रमाः। यायिनो मृत्युरायाति जयलाभौ च स्थायिनः। पुच्छषट्के यदादित्यः कामाङ्के चन्द्रमाः स्थितः। यायी विजीयते तत्र शक्रतुल्योऽपि वैरिभिः। कुंभमासी स्थितोवज्रे जठरस्थे सुधाकरे। आदत्तेऽरिश्रियं सर्वां जित्वा यायी रणाङ्गणे। भास्करे राहुपुच्छस्थे सगाङ्के युद्धमाश्रिते। समयुद्धं भवेत् तत्र किञ्चित् यायी जयी रणे। सूर्य्याचन्द्रमसौ यत्र वज्राङ्के यदि संस्थितौ। सैन्ययोरुभयोस्तत्र वधो भवति निश्चितम्"।

कपालादियोगषट्कम्—"रुद्राङ्कस्थे दिवानाथे राहुजिह्वाङ्गः शशी। स्थायिनस्तु जयस्तत्र भङ्गो भवति यायिनः। राहुगीर्णस्थिते मित्रे शशाङ्के हृदि संस्थिते। विना युद्धेन मृत्युर्यायी सर्वांमरिश्रियम्। कपाल संस्थितः सूर्य्यः सम्पुटस्थो यदा शशी। यायिना जीयते तत्र स्थायिनो भङ्गमादिशेत्। मस्तकस्थे दिवानाथे धिष्ण्यनाथे गुदस्थिते। यायिनो विजयो युद्धे स्थायिनस्तु पराजयः। राहुगीर्णगतोभानुः पुच्छस्थे तु निशाकरे। अन्योऽन्यं विग्रहं घोरं युद्धं भवति दारुणम्। दिनेशो राहुरुद्राङ्के चन्द्रस्तत्रैव सङ्गतः। विनाशं कोषराज्यस्य यायिनो मृत्युमादिशेत्।"

राहुदशाङ्कविभागचक्रम्—"मूलवादीनि चाङ्गानि जिह्वास्थानि क्रमेण च। दशसंख्यान्यहं वक्ष्ये राहुचक्रस्य मध्यतः। पुष्पितं फलितं चैव निःफलं भ्रष्टितं गुदम्। राजसन्नामसं हृद्यं मृतं जिह्वा क्रमेण च। पुष्पिते त्रीणि धिष्ण्यानि क्षेमलाभकराणि च। शत्रुभङ्गो भवेद्युद्धे यात्रा मासेन लाभदा। ततश्चत्वारि धिष्ण्यानि पक्षैकेण फलन्ति च। गजवाजिधनं देशं यायी तु लभते ध्रुवम्। त्रयफलेषु त्रिधिष्ण्येषु यत्नमास्थैर्यायिनं प्रति। मन्त्रिं सेवां तथा देशं स्थायी यत्नति निश्चितम्। फलं प्राप्नोति वर्षेण भ्रष्टितैव शितारकैः। वृक्षस्थपलमित्यादि देशकोषपरिग्रहैः। गुदैकेन भ्रष्टं लक्ष्मीः षड्भिनी प्रियवादिनी। रूपयौवनसम्पन्ना मासयुग्मेन लभ्यते। विग्रहस्य भवेद्दृढ्यिर्युद्धे भङ्गस्तथैवच। रोगपीड़ा भवेद्वर्षं राजसाख्यैस्तितारकैः। वृक्षस्थपलमित्यादि देशकोषपरिग्रहाः। षड्भिर्मासैर्विनश्यन्ति यायिनस्तामसत्रये। तामसाग्रे चतुष्के तु तारकाहृद्वसंज्ञकाः। सर्व्वनाशकराः प्रोक्ता मासैकेन न संशयः। ततस्त्रीणि शुभानि राजसत्रयदानि च। आर्द्रोवातस्य गुल्मस्य पक्षैकेण फलन्ति च। युद्धे भङ्गोभङ्गभीतिर्द्रव्यनाशः कुलक्षयः। सद्यो मृत्युं लभेद्यायी राहुवक्त्रे सुनिश्चितम्।" इति दशाङ्कफलम्।

"युद्धकाले यदा शीघ्रं यात्रायोगो न लभ्यते। उत्पाद्यते तदा शीघ्रं तत्कालेन्दुदिवाकरौ। दृष्टनाड्योश्चताधिष्ण्यैः षष्टिभागाग्रशेषके। अश्विन्यादीन्दुभुक्तेन युतस्तत्कालचन्द्रमाः। यथा चन्द्रस्तथा सूर्य्यः कर्त्तव्यश्चैककालिकः। अहोरात्रस्य मध्ये तौ विभ्रान्तौ धिष्ण्यमण्डले। स्थिरचक्रे पुरा प्रोक्तं चन्द्रादित्यफलं मया। चरचक्रेऽप्यनेनैव प्रकारेण फलमाप्नुयेत्। सर्व्वेषु शुभकार्य्येषु यात्राकाले विशेषतः। सर्व्वकाले शुभश्चन्द्रोन्नेयो हृदि गुदोदरे। पुच्छषट्के कपालस्थे शशाङ्के राहुवक्त्रगे। बन्धनं क्षानि सूर्य्यश्च सर्वकार्येषु जायते। हृदि गुदोदरे चन्द्रे विवाहे नन्दति ध्रुवम्। नैःस्वं वैधव्यविद्वेषौ मुखे पुच्छे तु मस्तके। पुष्पिते फलिते गुह्ये प्रश्नकाले शशी शुभः। अफले भ्रष्टिते मध्ये मृत्युः शेषाङ्गगे विधौ। जङ्घे तु खेचरं चक्रमधोभूचरमुच्यते। उभयोः सन्निपातेन राहुकालानलं मतम्"।

१० सूर्य्यकालानलचक्रम्—"ऊर्द्धगास्त्रिस्रः शूलाग्यास्ति स्रस्तिर्यक् च संस्थिताः। द्वे द्वे नाड्यौ स्थिते कोण मङ्गयुग्मं तथैकया। मध्ये त्रिशूलदण्डाधो भानुभाद्यं भमण्डलम्। साभिजिच्च प्रदातव्यं सव्यमार्गेण सर्व्वदा। मघाद्यष्टके जयोलाभः पक्षषट्के तथा पुनः। मङ्गयुग्मे रुजाभङ्गो मृत्युः शूलत्रये स्फुटम्। नामस्थं स्थितं यत्र शेषं तत्र शुभाशुभम्। अधोगतैश्च नक्षत्रैरूर्द्धगोबन्धबन्धनम्। विवाहे विग्रहे युद्धे रोगार्त्तौ गमने तथा। सूर्य्यकालानलं चक्रं ज्ञातव्यं च प्रयत्नतः।" (रोगे च कृजनक्षत्रं दिन ऋक्षन्तु युद्धके। प्रयाणे क्षत्तिका लेख्या चन्द्रार्कस्य दीयते)। क्वचित् अधिकपाठः

११ चन्द्रकालानलचक्रम्—"चन्द्रकालानलं चक्रं व्योमाकारं लिखेद्बुधः। चतुर्दिक्षु त्रिशूलानि मध्ये भिन्नानि चार-

वेत्। पूर्वत्रिशूलमध्यस्थं दिनऋक्षादि लेखयेत्। सव्यमार्गेण दातव्या अष्टाविंशतितारकाः। त्रिशूले च बहिर्मध्ये मध्ये बहिस्त्रिशूलके। त्रिशूले चक्रबाह्ये च चक्रमध्ये तथैव च। नामऋक्षं स्थितं यत्र तत्र ज्ञेयं शुभाशुभम्। त्रिशूले च भवेन्मृत्युर्भव्यञ्च बहिरष्टकम्। लाभः क्षेमं जयः प्रज्ञा चन्द्रगेमं न संशयः। वर्ज्जनीयं प्रयत्नेन प्रथमाष्टत्रिपञ्चकम्। कृत्तं द्वात्रिंशकं चात्र कालरूपं न संशयः। लाभालाभौ सुखं दुःखं जय चैव पराजयः। चन्द्रकालानलं चक्रं ज्ञात्वा संशयवर्ज्जितम्"।

१२ घोरकालानलचक्रम्—"शलाकासप्तकं चक्रं लिखित्वा चन्द्रभादितः। त्रिषु त्रिषु च कक्षेषु नव सूर्यादयोग्रहाः। यदृक्षे नामनक्षत्रं युद्धकारस्य जायते। फलन्तस्य प्रवक्ष्यामि एकैकस्य यथाक्रमम्। भानुना शोकसन्तापः शशाङ्कः क्षेमलाभदः। भूसुतो मृत्युमाधत्ते बुधेबुद्धिः प्रजायते। जीवे लाभः, शुभं शुक्रे, सूर्यपुत्रे महद्भयम्। राहुणा घातपातश्च केतौ सल्पं न संशयः। यात्राजन्मविवाहेषु संग्रामे विग्रहेऽपि वा। घोरकालानलं चक्रं ज्ञात्वा कर्म समारभेत्"।

१३ गूढकालानलचक्रम्—"सप्तरेखोद्भवं चक्रं चन्द्रभाद्यं भमण्डलम्। लिखित्वा कल्पयेच्चक्रं षड्भं जयकाङ्क्षिभिः। दिनर्क्षादृगवस्थते चक्रे गूढसम्पुटकर्त्तरी। दण्डः कपालं वज्राङ्गं ज्ञातव्यं सूरवेदिभिः। यत्र ऋक्षे स्थितचन्द्रस्तत्रादौ त्रीणि गूढकम्। सम्पुटे नव भान्यत्र कर्त्तरी च ततस्त्रिभिः। दण्डे धिष्ण्यानि च त्रीणि कपाले धिष्ण्यसप्तकम्। वज्राङ्गे त्रीणि धिष्ण्यानि षडङ्गं स्रोत निर्णयः। यदृक्षे नामनक्षत्रं युद्धकारस्य जायते। तत्रोग्रशुभाशुभं तस्य गूढकालानले स्थितम्। गूढसंस्थे विभ्रमो, युद्धे जयो भवति सम्पुटे। कर्त्तर्यां सङ्गतं युद्धं, दण्डे भङ्गो न संशयः। कपालस्थ भवेन्मृत्युर्वज्रे तस्य महद्भयम्। गूढकालानलं चक्रं भाषितं ब्रह्मजामले"।

१४ शशिसूर्यकालानलचक्रम्—"द्वादशारं लिखेच्चक्रं मेषादि द्वादशान्वितम्। क्षेत्रयुग्मञ्च तत्रैव विख्यातं रविचन्द्रयोः। सिंहाद्यं मकरान्तञ्च भानुक्षेत्रमुदाहृतम्। कृत्तिकादिकर्क पर्यन्तं चन्द्रक्षेत्रं न संशयः। चन्द्रक्षेत्रगते सूर्ये चन्द्रस्तत्रैव संस्थितः। यायिनो विजयोयुद्धे स्थायिनो भङ्गमादिशेत्। सूर्यक्षेत्रे गते चन्द्रे सूर्यस्तत्रैव संस्थितः। यायी भङ्गमवाप्नोति स्थायिनो विजयो भवेत्। सूर्ये सूर्यांशसंयुक्ते चन्द्रे चन्द्रांशसंगते। तदा काले भवेद्दृष्टिर्युद्धं तस्य विपर्यये। सूर्यक्षेत्रगते चन्द्रे चन्द्रक्षेत्रगते रवौ। महायुद्धं प्रवर्त्तेत संहारः सैन्ययोर्द्वयोः। यात्रायां युद्धकाले च चक्रमेतद्विलोकयेत्"। अत्र विशेषः। "एकेन क्रूरवेधेन विद्धो भवति चन्द्रमाः। स्वल्पं युद्धं तदा काले जायते नात्र संशयः। द्वाभ्यां वापि त्रिभिर्वापि पापैर्विद्धो यदा शशी। तदा युद्धं महाघोरं सैन्ययोरुभयोरपि। वक्रैः पृष्ठे भवेद्युद्धमग्रे चैवातिचारिभिः। मध्यगत्या भवेन्मध्ये पापैः सौम्यैस्तु तत् न हि। ऊर्द्धदृष्टौ भवेद्युद्धं मध्यदृष्टौ तु मध्यमे। अधोदृष्टावधस्ताच्च केकरे पार्श्वतो भवेत्। शनिराहुकुजादित्यास्त्वेकरेखागता यदि। चन्द्रेण संयुतास्ते च तदा पात चतुष्टयम्। शनिना चन्द्रयुक्तेन जीववेधगतेन च। तदा दृष्टिर्भवेद्भूनं वर्षोपलमधोच्छ्रितम्। भौमेनाग्निर्भवेत् पातो राहुणा चौरपातकृत्। भानुना चण्डवातश्च सर्वैः सर्वं भवन्ति च। शुक्रेण जलपातोऽपि पांशुपातः शशाङ्कजे। गुरुणा वह्निकापातः दिग्दाहः केतुना भवेत्"।

१५ संघट्टचक्रम्—"अश्विन्यादि लिखेत् चक्रं सप्तविंशति तारकम्। त्रिकोणं नवभिर्वेधैः कर्त्तव्यस्तिर्य्यगाकृति। अश्विनीरेवतीवेधो वेधश्चाश्विनिऋक्षयोः। मघापौष्णे मघाश्लेषे अश्लेषामूलयोस्तथा। एवं संघट्टचक्रं च कार्य्यमृक्षगता यदाः। भूपनामर्क्षसंघट्टे युद्धं भवति नान्यथा। निर्वेधे सौम्यवेधे च युद्धं नास्ति न संशयः। क्रूरवेधे भवेद्युद्धं तत्काले घोरदर्शनम्। युद्धकाङ्क्षी भवेद्राजा यस्य भं क्रूरवेधितम्। युद्धहेतौ भवेत् सौम्ये तथा वेधविवर्जिते। सौम्यक्रूरविभागेन मिश्रमिश्रं क्रमेण च। वक्रातिचारगत्या च युद्धं स्वल्पञ्च नास्ति च"।

१६ कुलाकुलचक्रम्(२)—"द्वितीया दशमी षष्ठी कुलाकुलसदाहृतम्। विषमा अकुलाः सर्वाः शेषाश्च तिथयः कुलाः। १ रविचन्द्रौ गुरुः सौरिश्चत्वारोऽप्यकुलागताः। भौमशुक्रौ कुलाख्यौ च बुधवारः कुलाकुलः२। याद्यार्क्षिजिन्मूलं कुलाकुलसदीरितम्। कुलानि समधिष्ण्यानि शेषाण्यकुलानि च३। तिथौ वारे च नक्षत्रे अकुले यायिनो जयः। कुलाख्ये स्थायिनोमूलं सन्धिर्वैव कुलाकुले"।

१७ क्रमचक्रम्(२)—"क्रमाकारं लिखेच्चक्रं तिर्य्यग्रेखाप्रभेदितम्। तस्य चोर्द्ध्वमधोलेख्यमेकैकान्तरभं क्रमात्। भानुभाद्यं न्यसेत्तत्र रिक्तां पूर्णामिति क्रमात्। एवं राशिक्रमाच्चक्रेष्वारिक्ता पूर्णा इति क्रमात्२। रिक्ते रिक्ता भवद्यात्रा पूर्णे यात्रा शुभावहा। इति यात्रा फलं ज्ञेयं क्रमचक्रद्वये स्थितम्"।

१८ प्रस्तारचक्रम्—"त्रयोदशोर्द्ध्वमारेखा दश रेखाश्च तिर्य्यगाः। भवेयुः कोष्ठकास्तत्र षडुत्तरशतोत्तरम्। मेषाद्या राशयोलेख्यास्तिर्य्यक् प्रथमषट्क्रमेषु। नवांशराशयश्चाधो नवधा सर्व्वराशिषु। कवर्गाद्यवधा लेख्यं कोष्ठके प्रथमाष्टके। द्वितीये सप्तमे चाद्या एवं टाद्यास्तिषष्ठके। यशवर्गौ चतुर्थे च अवर्गः पञ्चमे तथा। नवद्वादशके ताद्याः शेषे पाद्याः द्विकोष्ठके। चतुरश्चरसंयोगात् अश्विन्यादिक्रमेण च। ज्ञेया नवांशका वर्गा मेषादिराशिमण्डले। भौमं शुक्रं बुधं चन्द्रं भानुं सौम्यं सितं कुजम्। गुरुं सौरिं शनिं जीवं विद्धयात् कोष्ठकोपरि। कोष्ठाश्चरगतो ज्ञेय इन्दुस्तत्कालसम्भवः। तदधीनं फलं सर्व्वं लाभालाभजयादिकम्। दिनऋक्षमतानाड्यः सप्तविंशति ताडिताः। षष्टिभक्ते भवेदंशं तत्कालेन्दुगतं स्फुटम्। इष्टनाड्योऽतताधिष्ण्यैः षष्टिभागाप्तशेषके। अश्विन्यादीन्दुभुक्तेन युक्तस्तत्कालचन्द्रमाः। क्रूरखेटाश्चरे चन्द्रे न शुभं सर्व्वकर्म्मसु। शुभखेटे शुभं चैव प्रस्तारे चन्द्रनिर्णयः। नाडीफलौ यशौ वर्गौ अवर्गौद्युफलोदयः। कुःपक्षेषु च मासेषु ऋतौ च तोऽयनोदयः। जन्मकाले विवाहे च याने जन्मनि सङ्करे। यशाङ्कस्य फलं चेष्टं स्वरशास्त्रेषु निश्चितम्। अंशकेनांशकं गुण्यं ध्रुवयुक्तं हृतं पुनः। चतुःस्थासनयः (७,७,७,७), खर्खाः १२ सप्त७ रन्ध्र ९ गुणेश्वराः५३। मासाः१२ शैलाः७ इना१२ स्तत्वा२४ राशीनां च ध्रुवादमे। गुणाः३ शैलाः ७ युगाः ४ पञ्च सप्त षड्ढाद्रयो ७ युगाः४। नागाद वाणा ५ रसाद् भूताः५ मेषादेरंशका इमे। नन्दस्य योऽंशकोदेवि! तस्य स्वामी च यो ग्रहः। तद्ग्रहात् कालविज्ञानमुदितांशकसंख्यया। खर्खेऽयनं चक्षचन्द्रे दिनान्धारे तथा बुधे। ऋतवश्च, गुरौ मासाः, शुक्रे पक्षाः प्रकीर्त्तितः। खर्यपक्षे समा देवि! सर्व्वदैवविधिः स्मृतः"।

१९ तम्बरचक्रे ग्रहचक्रम्—"प्रस्तारे द्वादशारे च ऋक्षाचरक्रमेण च। नवांशराशिमार्गेण चक्रं भवति तम्बरम्। यत्र मेषादिराशिस्थस्तत्कालेन्दुः प्रजायते। यद्गृहदृष्टिभात् सर्व्वं ज्ञेयं तत्र शुभाशुभम्। त्रिदशे पञ्चमे धर्मे चतुर्थाष्टमसप्तमे। पाददृष्ट्या निरीक्षन्ते ग्रहाश्चन्द्रं तथा फलम्। अर्द्धदृष्टौ च भौमार्कौ केकरौ बुधभार्गवौ। समदृष्टौ च जीवेन्दू शनिराहू त्वधोमुखौ। मेषो वृषो मृगः कन्या कर्कमीनतुलाश्रया। आदित्यादिग्रहेष्वेषु नीचं तु तस्य सप्तमम्। परमोच्चा दिशोः० रामाः२ अष्टाविंशतियोन्दिवाः १५।५। सप्तविंशास्तथा विंशः खर्क्षादीनां तथांशकाः। परमोच्चात् परं नीचमर्द्धचक्रांशसंख्यया। नीचस्थानात् क्रमेणोच्च उच्चोऽस्तावत्र खेचरः। उच्चान्नीचाच्च यत्तुर्य्यं समस्थानं तदुच्यते। उच्चनीच समस्थाने चन्द्रं ज्ञात्वा फलं वदेत्। उच्चस्थानस्थितं चन्द्रं भौमादित्यौ प्रपश्यतः। समस्थाने च गुर्विन्दू नीचस्थं राहुखर्व्यजौ। बुधशुक्रौ त्रिकोणे च चन्द्रं तत्कालसम्भवम्। अन्यतस्थं न पश्यन्ति जात्वा इव खेचराः। सौम्यदृष्टिस्थिते चन्द्रे सर्वं सौख्यं प्रजायते। क्रूरदृष्टिगतं पुंसां मृत्युर्हानिमहद्भयम्। एवं शुभयुते चन्द्रे सर्वं सौम्यं प्रजायते। क्रूरैः क्रूरफलं तत्र मिश्रैर्मिश्रं न संशयः। रक्तं पीतं सितं कृष्णं चन्द्रे वर्णचतुष्टयम्। ज्ञातव्यञ्च प्रयत्नेन प्रश्नकाले सदा बुधैः। रविभौमः सितः सौम्योगुरुः सौरिः शशी तमः। वर्गशाश्च अवर्गादौ यद्राशेर्या विचक्षणैः। ज्ञातं रविकुजौ रक्तौ पीतौ जीवबुधौ यदा। शशिशुक्रौ सितौ वर्णौ कृष्णत्वं राहुमन्दयोः। यद्वर्णं वर्गगचन्द्रस्तस्य स्वामी च यो ग्रहः। तस्य वर्णेन वर्णत्वं यशाङ्कस्य प्रजायते। रक्ते चन्द्रे भवेद्युद्धं कृष्णे मृत्युर्न संशयः। पीते शुभं विजानीयात्सिते शुभतरं फलम्"।

२० तम्बुरचक्रम्—"द्वादशारं लिखेच्चक्रं नाडिकैका त्रिधा पुनः। पञ्चमे पञ्चमे स्थाने तिर्य्यग्रेखे तथा कुरु। अष्टोत्तरशतं चैव नाडीसंख्या प्रजायते। ऋक्षराशेस्य चक्रस्य नाडिकासु विन्यसेत्। क्रूरवेधाश्चरे चन्द्रो यदा तत्कालसम्भवः। तदा तस्य फलं वक्ष्ये विवाहादौ शुभाशुभम्। विवाहे क्रूरवेधेन वैधव्यं च विशीलता। यात्रायाञ्च भवेद्धानिर्मृत्युर्भोगहरद्वये। क्रूराः सर्वे हानिकराश्चन्द्राः सौम्याः शुभप्रदाः। द्वयादिवेधो भवेद्यस्य तस्य मृत्युर्न संशयः। तत्कालेन्दुफलं सर्व

यद्वक्त्रं चादिजामत्रे । गोपितं तन्त्रशास्त्रेषु मया चात्र प्रकाशितम्" । अङ्कशब्दे ७३२पृ० चक्रनामोद्देशे चरमित्यशुद्धम् । ह्रस्वरमिति शुद्धम् एवमन्यत्राप्यशुद्धस्थात् दर्शितचक्रनामानुसारेण तत्र शुद्धता बोध्या

२१ भूचरखेचरचक्रम्—"अधःस्थं भूचरं चक्रमूर्द्धस्थं खेचरं तथा । चरस्थिरविभागेन स्थायी यायी फलं क्रमात् । मेषादिद्वादशारे च वामभागेन भूचरम् । तस्योर्द्धं खेचरं चक्रं दक्षभागेन सर्वदा । ये यद्विराशु मार्गस्था भूचके ते व्यवस्थिताः । सूर्यमार्गेण ये लग्नाः खेचराः खेचरस्थिताः । भूचके संस्थितैः पापैः खेचके सौम्यखेचरैः । स्थायिवायिबलं ज्ञेयं क्रमात् सूरविचक्षणैः । सौम्याश्च भूचरे चक्रे क्रूराः खेचरगा यदि । संहारोजायते तत्र सैन्ययोरुभयोरपि । भूचरस्थापहा यत्र ह्यन्ते च शुभाशुभाः । यायी संहारमायाति-स्थायी सार्द्धजये जयी । खेचरे खेचराः सर्वे सौम्याः पापगतायदा । स्थायिनो बलसंवर्त्तो यायी जयति सत्वतः । भूचरे खेचरे सर्वे यदा मिश्रा शुभाशुभाः । तदा मिश्रं फलं वाच्यं स्थायिनो यायिनोऽपि वा" ।

२१ पद्मचक्रम्—"अश्विन्यादीनि भिषाणि षड्रिपुयुक्त्या लिखेद्बुधः । नाडीनाञ्च त्रये वेधः सर्पाकारः पदाख्यके । क्रूरवेधस्थिता नाडी तद्भिषेणैव युते दिने । यात्रा युद्धं न कर्त्तव्यं पद्मचक्रे स्थिरं फलम्" ।

२२ नाडीचक्रम्(१)—आर्द्रादिकं लिखेच्चक्रं नगान्तञ्च त्रिनाडिकम् । भुजङ्गसदृशाकारं मध्ये मूलं प्रतिष्ठितम् । यद्दिने चैकनाडीस्थाश्चन्द्रनामर्क्षभास्कराः । तद्दिनं वर्जयेत्तस्य विवाहे विग्रहे रणे ।" ।एकनाडीगते भौमे रविजीवसमन्विते । यदा चन्द्रेण संयुक्ते तदा चौथी परिश्रुता । अर्द्धनाडीगतो वायु र्मध्यनाड्यां समोभवेत् । अधोनाड्यां भवेत्तद्वि रेतद्दृष्टेस्तु लक्षणम्२ विवाहाद्यत्रिनाड़ीचक्रम्—"अश्विन्यादि लिखेच्चक्रं सर्पाकारं त्रिनाडीकम् । तत्र वेधवशात् ज्ञेयं विवाहादि शुभाशुभम् । आद्यनाडीगनक्षत्रात्तिस्रश्चिरौद्र पुनोत्तराः७।१२। ह्रस्वेन्द्रमूलवारुणः पूर्वभाद्रपदस्तथा। याम्यः सौम्योऽ गुरुर्ज्ञेयो नि:।चिता मित्रं।७ जलाङ्कयम् २०। धनिष्ठा चोत्तरा भाद्रा मध्यनाड़ीव्यवस्थिताः । कृत्तिका रोहिणी सार्पः मघाश्वातीविशाखकम् । उत्तरा श्रवणं सौम्यं२७ पृष्ठनाड़ीव्यवस्थिताः । वेधनाड्यृक्षमश्विन्यादि-यत्रं च द्वितीयकम् । याम्यादि तुर्यं तुर्यं च कृत्तिकादि द्विकं द्विकम् । एवं निरीक्ष्य वोद्वाह्यं कन्यामन्त्रे गुरौ स्वरे । पक्षस्त्रीक्षामित्रेषु देशे ग्रामे पुरे गृहे । एकनाड़ीस्थऋक्षाणि यदा स्युर्वरकन्ययोः । तदा वेधं विजानीयादृगुर्वादिषु तथैव च । प्रकटं यस्य जन्मर्क्षं तस्य जन्मर्क्षतोवदेत् । प्रनष्टं जन्मभं यस्य तस्य नामर्क्षतो वदेत् । द्वयोर्ज्जन्मभयोर्वेधो द्वयोर्नाम र्क्षयोस्तथा । जन्मनामर्क्षयोर्वेधो न कर्त्तव्यः कदाचन । एकनाड़ीस्थिता दृष्टा भर्तुर्वैव कुलाङ्गना । तस्मान्नाड़ीव्यधोवीक्ष्य विवाहे शुभमिच्छता । आद्यनाड़ी व्यधे भर्त्ता मध्यनाड़ीव्यधे हयम् । पृष्ठनाड़ीव्यधे कन्या म्रियते नात्र संशयः । समासन्ने व्यधे शीघ्रं दूरवेधे चिरेण तु । व्यधान्तरप्रमानेन वर्षे रिष्टं प्रजायते । एकर्क्षं जायते यत्र विवाहे वरकन्ययोः । मूलवेधो भवेत्तत्र महादुष्टफलप्रदः । एकनाड़ीस्थिता यत्र गुरुर्मन्त्रश्च देवताः । तत्र द्वेषं रुजं मृत्युं क्रमेण फलमादिशेत् । प्रभुःपक्षाङ्गना मित्रं देशो ग्रामः पुरं गृहम् । एक नाड़ीगता भव्या न भव्या वेधवर्जिताः । क्रूर यक्षगता नाड्यो यस्य जन्मर्क्षसम्भवाः । तस्य मृत्युं सन्देहो वातायुद्धे भयं भवेत् । ह्रादिक्रूरव्यधो यस्य चक्रे चैव त्रिनाड़िके । हानिर्विघ्नं भयं क्लेशोजायते बधबन्धनम् । एवं सौम्यव्यधो यस्य जन्मभिषाग्रे प्रजायते । जयो लाभः सुखं तस्य जायते नात्र संशयः । शुभपापयहैर्विद्धा यस्य जन्मर्क्षनाड़िका । तस्य मिश्रं फलं वाच्यं नाड़ीचक्रे स्वरञ्चकैः" २ ।

"एतच्चक्रं समालिख्य अश्विन्याद्यं हि षड्लिखेत् । वेधो द्वादशनाड़ीभिः कर्त्तव्यः पद्मगाकृतिः । आद्यं-शेन चतुर्थांशं चतुर्थांशेन चादिमम् । द्वितीयेन तृतीयस्य तृतीयेन द्वितीयकम् । एवं चांशव्यधोवेधं जायते वरकन्ययोः । तेषां मृत्युं सन्देहः शेषांशाः सुख-दुःखदाः । गुरुमन्त्राश्च देवाश्च स्वस्थाने च शुभोदयाः । अन्यांशकगतामव्या ज्ञातव्या स्वरवेदिभिः । एवं जानाति यश्चक्रं चक्रराजं त्रिनाडिकम् । तस्य पाणितले ज्ञानं सर्व्वदैव प्रतिष्ठितम्" ३ ।

२१ कालचक्रम्—"नवोर्द्ध गानि भिषाग्राणि नव तिर्य्यग्गतानि च । अधोगतानि भिषाग्राणि नव चैव विनिर्द्दिशेत् । चतुर्व्वाङ्कोक्रतो वेधो मध्यऋक्षत्रयोज्झितः । सर्पाकारश्च तच्चक्रं कालचक्रं प्रजायते । त्रीणि मध्यगतान्यत्र तानि कालसुखानि च । कोष्ठस्थिते च ये भिषाग्रे ते च

दंष्ट्रे इयं मतम्। दिनर्क्षादितः कृत्वा नामर्क्षं यत्र संस्थितम्। सुखदंष्ट्रागतो ह्यल्पः शुभमन्यत्र संस्थिते। ज्वरिते नष्टदग्धे च विवाहे विग्रहे रणे। काल दंष्ट्राख्यं नाम यस्य तस्य भद्रत्रयम्"।

२४ सूर्यर्क्षचक्रम्—"सप्तविंशतिभान्यत्र षड्क्रियुक्तानि क्रमेण च। तत्रत्रे तत्रत्रे चैव ऋक्षचक्रं त्रिनाडिकम्। यत्र ऋक्षे स्थितो भानुस्तदादि गणयेद्बुधः। नामर्क्षं च स्थितं यत्र ज्ञेयं तत्र शुभाशुभम्। कुर्यान्मृत्युं च रोगञ्च नाडीवेधं गतो रणात्। वर्ज्जयेत् सर्वकार्येषु युद्धकाले विशेषतः। निर्ऋर्क्षचक्रमध्यस्थं यस्य नाम प्रजायते। सिद्धन्ति तस्य कार्याणि संग्रामे विजयो भवेत्"।

२५ चन्द्रर्क्षचक्रम्—"सूर्यर्क्षचक्रे यदुक्तं च शुभाशुभम्। चन्द्रादौ तत्फलं चक्रे ज्ञेयं सर्वं ऋक्षचक्रे।"

२६ कविचक्रम्—"हीनसैन्यः सदा स्थायी यायी सैन्याधिकः सदा। बलस्य बलोपायं वक्ष्येऽहं कविसङ्करे। प्रयाणे चोत्प्रयाणे वा निशीथे मृगयाक्षते। शोकार्त्ते व्यसनप्राप्ते हतसैन्ये विनायके। अष्टधा कविकालस्तु कथितो दुर्बले नृपे। इत्थं कुर्वन् परान् युद्धे जयतीह न संशयः। चतुरस्रं त्रिनाड्रीकम् कविचक्रं लिखेद्बुधः। प्रवेशे निर्गमे भानि स्थानविष्णादि विन्यसेत्। यत्र नामार्क्षिते स्थाने शत्रुसैन्यं व्यवस्थितम्। तत्र चक्रम् समालेख्यं सेनाध्यक्षर्क्षपूर्वकम्। तीक्ष्णं तीक्ष्णं प्रवेशे च ईशादौ विदिशि क्रमात्। निर्गमे तूर्ध्वतूर्ध्वौ च पूर्वादिक्रमेण च। सौम्याः क्रूरा यथायत्र प्रवेशे निर्गमे स्थिताः। वक्रातिचारगास्तत्र ज्ञात्वा कविरणं कुरु। ओजपत्स्थिते चन्द्रे कुजर्क्षं प्रवेशके। यानं कविरणे प्रोक्तं ज्ञात्वा प्रवेशनिर्गमौ। उदितेऽस्तखरो यस्य यत्र जन्मेन्दुसम्भवः। तद्दिने ते भटाः सर्वे वर्जनीयाः कदा रणे। क्रूरे क्षीणे प्रवेशर्क्षं यत्र तत्र विशेद्रणे। वक्रस्थे निर्गमे सौम्ये तद्दिशि निर्गमं कुरु। प्रवेशर्क्षं प्रवेशं च निर्गमे निर्गमे कुरु। भूबलं पृष्ठतः कृत्वा प्रोक्तः कविरणे जयः।"

२७ खलचक्रम्—"चतुरस्रं चतुर्द्वारं खलचक्रं लिखेद्बुधः। नन्दाद्यास्तिथयोन्यस्ताः पूर्वद्वारक्रमेण च। पूर्वादिचतुष्के तु सप्त सप्त क्रमेण तु। कृत्तिकादि लिखेन्मध्ये खले भान्यष्टविंशतिम्। शनिचन्द्रौ कुज सौम्यौ भानुशुक्रौ गुरुस्तिथिः। मध्ये बहिर्गतादेया ऋणस्वं दिशां क्रमैः। यद्दिने यद्दिशि शुक्ले तिथिधिष्ण्यादिनाधिपाः। प्रवेशः खलकद्वारे कर्त्तव्यो न सर्वदा। खलकाभ्यन्तरे कालः शनिसूर्यैऽष्टमक्षकैः। बुधशुक्रेन्दुभिर्बाह्ये यायी स्थायी क्रमाज्ज्ञयी। खलके मध्यनक्षत्रे यो ग्रहो यत्र संस्थितः। तत्र स्थाने गते चन्द्रे फलं वक्ष्ये शुभाशुभम्। सूर्यस्थाने स्थिते शूरे ह्यल्पचन्द्रसमाश्रिते। भौमस्थाने महाक्रोधी बुधस्थाने भद्रत्रयम्। गुरुस्थाने स्थितः स्याच्छुभङ्गमायाति भार्गवे। शनिस्थे सत्वरं युद्धं राज्ञस्थे मरणं ध्रुवम्। वक्रस्थाने भवेद्युद्धं शीघ्रस्थाने च धावति। समचारगते स्थायी क्षीणेन्दुस्थे च मोहनम्। क्रूरदृष्ट जयो युद्धे, सौम्यदृष्टे पराजयः। क्रूरे च संमुखे ह्यल्पजयः सौम्ययुते स्थिते। योधयोः पृष्ठगाः क्रूरा उभयोर्म्मृत्युकारकाः। सौम्याः सन्धिप्रदा युद्धे मिश्रा मिश्रफलप्रदाः।"

२८ कोटचक्रम्(८)—"अथातः संप्रवक्ष्यामि कोटयुद्धस्य निर्णयम्। अल्पारिः कुरुते यत्र भूरिसैन्यपराभवम्। यस्मात्प्रबलादेव राज्यं कुर्वन्ति भूतले। विग्रहं चतुराशायां सामान्यैः शत्रुभिःसह। विषमं दुर्गमं घोरं चक्रं भीरुभयावहम्। कपिशीर्षञ्च शोभाढ्यं रौद्राकृतकमण्डितम्। प्रतोली यत्र कालाख्यं परिखा कालरूपिणी। रणभङ्गलताटोपः ठिङ्कनीयन्त्रमण्डितम्। सुसंसर्ङ्गरैः प्राशैःकुन्तखड्गैर्धनुःशरैः। संयुतैः सुभटैः शूरैरिति दुर्गं समादिशेत्। दुर्गस्थो दुर्गमः शत्रुरसाध्यो येन सिध्यति। कोटचक्रं प्रवक्ष्यामि विशदादृष्टया मतम्। प्रथमं कृष्णवर्णं कोटं जलकोटं द्वितीयकम्। तृतीयं श्यामकोटञ्च चतुर्थं गिरिसङ्करम्। पञ्चमं पर्वतारोहं षष्ठकोटञ्च डामरम्। सप्तमं वक्रभूमिस्थं विषमाख्यं तथाष्टमम्। कृष्णवर्णे साधयेत् खण्डिर्जलस्थे जलमोचणम्। श्यामदुर्गेऽग्निदानञ्च प्रवेशो गह्वरस्य च। पर्वते स्थानभेदेन भूबलं डामरे रणे। चक्रास्थे कपियोगेन विषमे स्थापियाविता। अतिवर्णं कालवर्णञ्चक्रावर्त्तं च डामरम्। नानावर्त्तञ्च पद्माङ्कं यन्त्रभेदञ्च शाम्बरम्। एतद्धामाष्टकं ज्ञेयं दुर्गाष्टकक्रमेण च। यस्य वर्णस्य योभद्रः स वर्णस्तस्य भद्रदः। य गरुडः क मार्जारः च सिंहः ट मुनीश्वरः। त सर्पः प आखुश्च य गजः श अजपतः। दुर्गवर्णस्य ये भद्रा वर्ज्याश्चङ्गाजा नराः।

तद्वर्ग्यासु रेखे त्याज्या न कर्त्तव्या गडाधिपाः स्वयमेव पञ्चमे स्थाने खण्डिभङ्गश्च जायते। अवर्गाद्यष्टकं ज्ञेयं पूर्वाद्यष्टदिगां क्रमात्। कोटचक्रं लिखेदादौ चतुरस्रं त्रिनाडिकम्। कृत्तिकादीनि भान्यत्र साभिजित्नि न्यसेद्बुधः। बहिः कोटे च मध्ये च मध्ये दुर्गं बहिर्बहिः। प्रवेशो निर्गमस्तत्र ज्ञातव्यः खरवेदिभिः। दैशात् प्रवेशधिष्ण्यानि मध्यात् प्राचीविनिर्गमः। बहिर्द्वादश भान्यत्र प्राकारे तारकाष्टकम्। दुर्गमध्ये तथा चाष्टौ तन्मध्ये सप्तसप्तकम्। कृत्तिका पुष्यसार्पञ्च मघास्वातीविशाखकम्। अनुराधाभिजित् कर्णौ धनिष्ठाश्चियमाङ्गयम्। आर्द्रां पुनर्वसु भाग्यं चित्रा ज्येष्ठा तथोत्तरा॥२। शतभं रेवती चैवं प्राकारे तारकाष्टकम्। अगस्त्यौदीच्यराङ्गस्तमूलमाषाढपूर्वकम्। पूर्वोत्तरा तथा भाद्रा मध्ये ताराष्टकं तथा। प्राच्यां रौद्रं यमे हस्तं पूर्वाषाढा च पश्चिमे। कौबेर्यां सप्तरा भाद्रा ह्येतत्सप्तचतुष्टयम्। कृत्तिकाद्यं मघाद्यञ्च मैत्राद्यं वासवादिकम्। त्रीणि त्रीणि प्रवेशे च द्वादशानि निर्गमे। कृत्तिकादिरयं न्यासः सुबोधार्थैः प्रदर्शितः। दुर्गभादुगणना चात्र यत्नैर्ज्ञेयं ततः फलम्। दुर्गनामस्थितो वर्गोयद्दर्गोद्वारितः स्फुटम्। तदाद्यादिलिखेच्चक्रं क्रमात् खरविचक्षणैः। चतुरस्रं१ वृत्तं २दीर्घं३ त्रिकोणं४ वृत्तदीर्घकम्५। अर्द्धचन्द्रं६ तथा ज्ञेयं गोस्तनं७ धनुराकृतिः८। चतुरस्रे यथा न्यासो भूमिभागक्रमेण च। प्रवेशे निर्गमे हस्ति तथा वृत्तादिसप्तके। दुर्गे भित्तिविभागेन दातव्यं धिष्ण्यमण्डलम्। तत्र स्थैः खेचरैः सर्वैः फलं वाच्यं यथोदितम्। बाह्यभे मध्यभे वापि यत्स्थाः क्रूरखेचराः। तत्र स्थाने कृतं यत्नं हन्ति दुर्गं ससैनिकम्। बुधशुक्रेन्दुजोवाथ सदा सौम्या यहा मताः। अन्यैर्राहुकेत्वारा मताः क्रूरा बुधैरिमे। त्रिप्रकारो यहे चारो वक्रः शीघ्रः समोमतः। उच्चनीचसमास्ते च त्रिधा चक्रे भ्रमन्ति च। अर्द्धं चाधः समास्त्यर्द्धमष्टभेदश्चतुर्विधः। स्वके मित्रे समे शत्रौ चतुर्द्धा च यहे यहः। सूर्यशुक्रा उदीर्यन्ते शीघ्राश्चार्के द्वितीयगे। समास्तृतीयगे यान्ति मन्दगत्या चतुर्थगे। वक्रः स्यात् पञ्चषड्के त्वतिवक्रोऽष्टसप्तमे। नवमे दशमे भानौ जायते कुटिला गतिः। शीघ्रगश्च भवन्नुक्ते द्वादशैकादशे तथा। राहुर्वक्रः सदा ज्ञेयो रवीन्दू शीघ्रगौ तथा। शीघ्रोऽतिचारगत्वा च समश्च सप्तमन्द्यगा। वक्रातिवक्रकौटिल्यगत्या वक्रयहोमतः। क्रूरोऽतिक्रूरतां याति सौम्यावात्यतिसौम्यताम्। वक्रचारे सप्तत्पञ्चे शीघ्रे तूक्तविपर्ययः। मेषो वृषोऽथमिथुनः कन्या कर्कोऽथ सिंहतुलास्तथा। रव्यादीनां क्रमादुक्तं नीचं यत्तस्य सप्तमम्। उच्चाद्योच्चञ्च यत्तुर्य्यं समस्थानं तदुच्यते। उच्चस्थं मध्यमं नीचं वक्रे यत् व्यवस्थितम्। अर्द्धदृष्टी च भौमार्कौ केकरौ बुधभागवौ। समदृष्टी च जीवेन्दू शनिराज्ञ त्रयोदशौ। सकृदोक्तेन्दुभौमेज्या एवं शुक्रस्य भास्तजाः। अन्योन्यं वैरिणोऽन्ते राहोः सर्वे च शत्रवः। स्वोच्चस्थे वर्त्तं पूर्णं पादोनं मित्रभे यहे। अर्द्धं समगृहे ज्ञेयं पादं शत्रुगृहस्थिते। क्रूरोगर्भे पुरं हन्ति प्राकारे खण्डिकारकः। बहिःस्थो वेष्टके सैन्ये स्वल्पदो नात्र संशयः। क्रूरागर्भे, शुभा बाह्ये निर्घातन्ते पुरान्तकाः। सौम्या मध्ये बहिः क्रूरा असाध्यं दुर्गमुच्यते। क्रूरचतुष्टयं मध्ये प्राकारे सौम्यखेचराः। भेदोभङ्गो भवेत्तत्र विना युद्धेन स्फुटते। प्राकारे संस्थिताः क्रूरामध्ये सौम्याग्रहा यदि। दुर्गभङ्गे सप्तत्पञ्चे भङ्गमायाति वेष्टकः। मध्ये नाडीस्थिताः सौम्याः क्रूरा बहिरवस्थिताः। सैन्यावर्त्तोबहिः शत्रोर्विना युद्धेन जायते। प्राकारे पुरमध्ये च यदा क्रूरा व्यवस्थिताः। सौम्या बाह्ये तदा दुर्गमयत्नेनापि सिद्धति। सौम्या मध्ये च कोटे च बाह्ये पापग्रहो यदि। देवैर्ब्रह्मादिभिर्दुर्गं रथारूढे न स्फुटते। प्राकारबाह्यगाः क्रूराः सौम्या मध्यगता यदि। युद्धे प्राकारखण्डित्व पुरभङ्गो न जायते। सौम्या बाह्ये तथा कोटे मध्ये क्रूरग्रहाःस्थिताः। स्वयं दुर्गं प्रयच्छन्ति वेष्टकस्य गडाधिपाः। बाह्याभ्यन्तरगाः क्रूराः प्राकारे शोभना यहाः। रिपुपक्षः क्षयं याति विनायुद्धेन निर्घातम्। प्राकारस्था यहाः क्रूरावहिर्मध्ये शुभाःस्थिताः। समयुद्धं भवेत्तत्र खण्डिःपातो दिने दिने। बाह्याभ्यन्तरगता यस्य यहाः सौम्याः शुभान्विताः। भवेयुस्तस्य कोटस्य न नाशस्तु कदाचन। यदि साक्षादहं (शिवः) तत्र युध्यमानोरणेऽब्विके!! तथापि न भयं विद्यादिति सत्यं च नान्यथा। सौम्याः क्रूराग्रहाश्चाष्टौ मध्ये प्राकारबाह्यगाः। एकस्या यत्र कुर्वन्ति सङ्ग्रामं तत्र दारुणम्। गजाश्वरथभूपालैः सामन्तैर्म्लेच्छखेचरैः। तत्राध्यक्षभटाग्रे उभयोः सैन्ययोः क्षयः। बाह्ये शत्रुप्रवेशर्क्षे

संग्रामं चारभेद्यदा। तदा सिध्यति तत् दुर्गं न करोतीह विस्मितम्। कोटस्थैस्तु मतोयोद्धा शस्त्रहस्तो महाबलः। शस्त्रं त्यक्त्वा ब्रवीत्येवं धर्म्ममार्गं ददस्व मे। निर्गमेषु च चक्रेषु संग्रामं यदि चारभेत्। नैव सिध्यति तद्दुर्गं कोटस्थश्च जयावहः। बाह्यनाडयां स्थिता ये च ग्रहाः पापान्विता यदा। मध्ये शुभान्विता ये च तत्र भङ्गो न जायते। गडाधीशाः स्मृताः सौम्या वेष्टाधीशाश्च पापकाः। क्षेत्रयुग्मे स्थिता ये च ज्ञातव्याश्च प्रयत्नतः। गडाधीशो भवेच्चन्द्रो वेष्टाधीशश्च भास्करः। चन्द्रसूर्यविभागेन ज्ञातव्यं च बलाबलम्। अंशाधीशोभवेच्चन्द्रात्राराधीशोहि भास्करः। चन्द्रसूर्यगतिं ज्ञात्वा पक्षाहेयं तु कारयेत्। वेष्टाधीशो भवेन्मध्ये गडाधीशो हि बाह्यगः। स्वयं दुर्गं प्रवक्ष्यामि वेष्टकस्य गडाधिपाः। चापकूर्मगदाशक्तखड्गशूलैर्महाभटैः। अभङ्गयोर्द्वयो राज्ञोः सेन्यावर्त्तो हि जायते। वाह्निनो रक्षवाह्निनो दुस्तराः प्रेतसङ्कुलाः। वसाशूकपङ्कलिप्ताङ्गा अन्त्रमालावशुण्ठिताः। श्येनकाकशिवाग्रेनशाकिनीप्रेतराक्षसाः। वेतालखेचरा भूताः पिशाचाः स्वेच्छयाहताः। दैवज्ञश्च महाघोरं तत्काले जायते ध्रुवम्। न कश्चिद्विजयी युद्धे ह्यं याति यमालयम्। समसंख्याः शुभाः क्रूराः बहिर्मध्ये यदा स्थिताः। तदा सन्धिं विजानीयात् सैन्ययोरुभयोरपि। क्रूरैर्भङ्गोजयः सौम्यैर्मिश्रैर्मिश्रं फलं मतम्। विचार्य्य युद्धं कर्त्तव्यं कोटचक्रे स्वरोदये। प्रवेशधिष्ण्यगे चन्द्रे जीवशुक्रौ संस्थिते। निशि कविरणं दुर्गे कर्त्तव्यं बाह्यसैन्यकैः। निर्गमर्क्षसंस्थिते चन्द्रे दुर्गाभ्यन्तरगैर्नृपैः। कर्त्तव्यं कवियुद्धं तु रात्रौ सुप्ते बहिर्जने। प्रवेशनिर्गमायुक्तौ सैन्ययोरुभयोर्द्विगि। कवौ कोटे जयोयुद्धे विपरीते पराजयः। क्रूरोवक्री प्रवेशर्क्षे पुरमध्यगतो यदा। तदा कोटविनाशाय कोटस्थो बाह्यभूपतेः। प्रवेशे बाह्यगैर्वक्रैः क्रूरैः स्वसैन्यविग्रहः। दुर्भिक्षं सस्यभङ्गश्च बहिःसैन्यस्य जायते। निर्गमर्क्षे बहिःस्थे च क्रूरोवक्रं करोति चेत्। प्राकारस्य भवेद्भङ्गः प्राकारस्थे पुरस्य च। पुरभे निर्गमे वक्राः कथञ्चित् क्रूरखेचराः। दुर्गं रुद्धा तदा काले दुःसह्यः प्रपलायते। यथा क्रूरैस्तथा सौम्यैः फलं याद्यं विपर्य्यये। मिश्रैर्मिश्रं विजानीयात् कोटचक्रे न संशयः। उक्तग्रहैः समायोगो न चान्यैर्न बलोज्झितैः। न भास्करकरोच्छिन्नैर्न खेचरपराजितैः। दुर्गसैन्यं तथा तुल्ये प्राकारे मध्यभागतः। नीचस्थं वेष्टकं सैन्यं ज्ञातव्यं स्वरवेदिभिः। कोटं कोटाधिपौ नीचौ निम्नौ भौमभास्करौ। समस्थौ च पुरं सर्वसुखस्थौ निष्फलौ च तौ। प्राकारवेष्टकान् चन्द्रावुच्चस्थौ राहुसूर्य्यौ। प्राकारस्थौ बहिःसैन्यं नीचस्थौ निःफलौ चतौ। समदृष्ट्या गुरुचन्द्रौ पश्यतः सर्वतः सदा। तिर्य्यक्स्थानं बुधशुक्रौ फलदौ नात्र संशयः। ऊर्द्धदृष्टिग्रहैः कुर्य्यात् दृङ्नीचस्तम्बवाहनम्। समे च साधवेत् खड्गिरन्ध्रपातमधोमुखे। दुर्गमध्यस्थिते सूर्ये जलशोषः प्रजायते। चन्द्रे भङ्गः, कुजे दाहो, बुधे बुद्धिबलान्नरः। वाक्पतौ दुर्गमध्यस्थे सुभिक्षं प्रचुरं जलम्। चलचित्तानराः शुक्रे, स्यात्कुरोगो शनैश्चरे। दुर्गमध्ये स्थिते राहौ भेदोभङ्गो महद्भयम्। केतौ मध्यगते तत्र विघ्नदानं गडाधिपे। इत्यसक्तं फलं मध्ये एवं बाह्यस्थितैर्ग्रहैः। उपग्रह समायोगादत्यन्तं प्राणसंशयः। अकारादिस्वराः पञ्च पूर्वाद्याशाचतुष्टये। मध्येऽन्त्यं सव्यमालिख्य वज्रस्थाने च खड्गिका। दुर्गनाम्नः स्वरोयस्य बालो वास्तमितोऽपि वा। तद्दिने प्रारभेद्युद्धं दुर्गं सिद्धति नान्यथा। वज्रागलविधानं च कर्त्तव्यं दुर्गरक्षणे। भङ्गने यमराजाख्यं यदुक्तं चादिजामले। शुक्रोबुधोगुरुर्मन्दो राहुर्मन्दः सितोबुधः। चन्द्रः सूर्यः शनिः सौम्यो वैशाखात् कोटपालकाः"।

२९ गजचक्रम्—"अथातः संप्रवक्ष्यामि चक्रं मातङ्गनामकम्। येन विज्ञातमात्रेण यात्रायुद्धे जयोभवेत्। गजाकारं लिखेच्चक्रं सर्वावयवसंयुतम्। अष्टाविंशति भान्यत्र देयानि सृष्टिमार्गतः। मुखे शुण्डाग्र नेत्रे च कर्णे शीर्षाङ्घ्रिपुच्छके। द्विकं द्विकञ्च दातव्यं पृष्ठोदरे चतुश्चतुः। द्विरदनामभान्यादौ वदनाङ्गणते बुधैः। यत्र धिष्ण्ये स्थितः सौरिर्ऋक्षं तत्र शुभाशुभम्। मुखशुण्डाग्रनेत्रे च सौरिभं मस्तकोदरे। युद्धकाले भनेद्यस्य जयस्तस्य न संशयः। पादे पृष्ठे च पुच्छे च कर्णसंस्थे शनैश्चरे। स्वल्पभङ्गो रणे तस्य ऐरावतसमोयदि। एतेषां दुष्टभानाञ्च यत्काले संस्थितः शनिः। तत्काले पट्टबन्धश्च वर्जनीयः प्रयत्नतः। पृथिव्या भूषणं मेरुः पर्व्वतां भूषणं शमी। नराणां भूषणं विद्या सैन्यानां भूषणं गजः। शरतोमरचक्राद्यैर्गजस्कन्धस्थनरान्।

तत्क्षणात् स्वर्गमायान्ति तस्मात् स्वर्गोपमागजाः। नास्ति हस्तिसमोयोद्धा नास्तिहस्तिसमः सखा। नास्ति हस्तिसमोबन्धुर्नास्ति हस्तिसमोरिपुः"।

३० अश्वचक्रम्—"अश्वाकारं लिखेच्चक्रमश्वधिष्ण्यादितारकाः। वदनात् स्कन्धगा देया अष्टाविंशतिसंख्यया। सव्याक्षिकर्णशीर्षेषु पुच्छाङ्घ्री युग्मसंख्यया। पञ्च पञ्चोदरे पृष्ठे सौरिर्यत्र फलं ततः। सव्याच्छ्रुदरशीर्षेषु यदा सौरिर्व्यवस्थितः। युद्धकाले तदा तस्य जयो भवति नान्यथा। कर्णपुच्छाङ्घ्रिपृष्ठस्थे अश्वचक्रे ऋक्षनन्दने। विभ्रमं भङ्गं हानिञ्च करोत्यश्वो महाहवे। एतत्स्थाने स्थितः सौरिर्यदा काले क्षयञ्च। पङ्गुबन्धे गमे युद्धे वर्त्तयेत्तं क्षयं नृपः। देशान्तरस्थितास्तस्य रिपवः सन्ति शङ्किताः। तुरङ्गायस्य भूपस्य विचरन्ति महीतले। मेदिनी तस्य यस्यादा इति वाक्यं विनिश्चितम्। सर्व्वाःश्रियो न राजन्ते विनाऽश्वेन महीभुजाम्"।

३१ रथचक्रम्—"आदौ चक्रं समालिख्य रथाकारं सुशोभनम्। रथाग्रे त्रिशिखूलानि रथचक्रं त्रिदण्डकम्। भानुभं मध्यशूलाग्रे ततः स्वर्क्षगतानि च। त्रीणि त्रीणि लिखेदेवं सप्तविंशतिसंख्यया। नक्षत्राधिकनक्षत्रं यत्र तत्र शुभाशुभम्। अङ्के मृत्युर्ज्जयचक्रे रथे सन्धिः सदण्डके"।

३२ व्यूहचक्रम्—"अष्टारं वर्त्तुलाकारं व्यूहचक्रं विनाडिकम्। दण्डचतुष्टयं बाह्ये कर्त्तव्यञ्च चतुर्हिशम्। पूर्व्वदण्डायतोन्यस्य दिनभादां भमण्डलम्। प्रवेशे निर्गमे चैव त्रीणि त्रीणि प्रदक्षिणे। अग्निसंज्ञाष्टकं मध्ये तद्बाह्ये भादसंज्ञकम्। तृतीयं राक्षसंज्ञं च क्रमेत दण्डचतुष्टये। चन्द्रर्क्षे विजयोलाभः सूर्य्यर्क्षे मध्यमं फलम्। राक्षधिष्ण्याष्टके विघ्नं मृत्युः केतुचतुष्टये। एवमुक्तं चतुःस्थाने यद्दिने यस्य नामभम्। तद्दिने तत् फलं तस्य सर्वकार्य्येषु सर्व्वदा"।

३३ कुलचक्रम्—"कुलाकारं लिखेच्चक्रं तीक्ष्णदण्डसमन्वितम्। दिनभादि समारभ्य कर्त्तव्यं नवकत्रयम्। राजभं नवके यत्र तत्र वक्ष्ये शुभाशुभम्। तीक्ष्णे मृत्युर्ज्जयोदण्डे श्रेष्ठधिष्ण्ये समं रयम्"।

३४ खड्गचक्रम्—"खड्गचक्रं समालिख्य नवभेदसमन्वितम्। योधधिष्ण्यात् समारभ्य त्रीणि त्रीणि लिखेद्बुधः। सर्वं वज्रं तथा रुष्टिं पाशिकां वज्रधारिके। खड्गं तीक्ष्णं विजानीयान् नवाङ्कानि विधानतः। यवादौ यत्र वज्रान्ते जायन्ते क्रूरखेचराः। मृत्युभङ्गो भवेदादौ सौम्यैस्तोभो जयस्तथा। खड्गे धाराह्वये तीक्ष्णं क्रूरैर्जयति सङ्गरे। सौम्यैस्तथा भवेद्भङ्गो मिश्रैर्मिश्रफलं मतम्"।

३५ क्षुरिकाचक्रम्। "यथा खड्गं तथा विद्याच्छुरिका चक्रनिर्णयम्। क्रूरसौम्यविभागेन योधधिष्ण्यादि विन्यसेत्"।

३६ चापचक्रम्—"चापचक्रं समालेख्य गुणबाणसमन्वितम्। अग्निनक्षत्रतोभानि त्रीणि त्रीणि समालिखेत्। त्रीणि बाणस्य मूले तु मध्ये मूर्द्धि क्रमात्तथा। चापमूलस्य मध्योर्द्धे त्रीणि त्रीणि तथा पुनः। गुणे तु त्रीणि त्रीण्येव योधनक्षत्रतः फलम्। शरमूले भवेन्मृत्युर्मध्ये व्याधिः फले जयः। गुणमध्ये भवेद् भङ्गश्चापमध्ये धनक्षयः। चापोर्द्धे विजयोत्रेयो, गुणोर्द्धे लाभसंयुतः। चापाधो विग्रहो मृत्युर्गुणाधोऽपि तथा फलम्। शरयुक्ते नेष्टं विशेषेण तु नान्यथा। सौम्ययोगे जयोलाभश्चापचक्रे समादिशेत्। शुभपापसमायोगे बलाधिक्ये बलं स्फुटम्"।

३७ शनिचक्रम्—"शनिचक्रं नराकारं लिखित्वा सौरिभादितः। नामधिष्ण्यं भवेद्यत्र क्षेयं तत्र शुभाशुभम्। सखेकेन्द्रचतुस्तुर्य्यं षट्पादे तुर्य्यं वामके। हृदि पञ्च तुर्यं शीर्षे नेत्रयुग्मे द्विकं द्विकम्। कान्यासे दक्षदोर्लाभः भमोऽङ्घ्रौ वामदोरुजम्। हृदि चौर्यस्तके राज्यं नेत्रे सौख्यं सुतिर्मृदे। जन्माष्टद्वादशे तुर्य्ये यदा विघ्नकरः शनिः। तदा सौख्यं वपुस्थं चेत् हृत्शीर्षे नेत्रदक्षदोः। दशतीयैकादशे षष्ठे यदा सौख्यकरः शनिः। तदा विघ्नं शरीरं चेत् वक्त्राङ्घ्रिगुह्यवामदोः। यस्य पीड़ाकरः सौरिस्तस्य चक्रमिदं स्फुटम्। लिखित्वा कृष्णवर्णेन तैलमध्ये निधेद्बुधः। निःक्षिप्य भूमिमध्यस्थं कृष्णपुष्पैः समर्चयेत्। तुष्टिं याति न सन्देहः पीड़ां हृत्वा शनैश्चरः"।

३८ सेवाचक्रम्—"सेवाचक्रं शीर्षे सप्त पृष्ठे सप्त तथोदरे। पादयोः सप्त कक्षाणि साभिजित्यत्र विन्यसेत्। स्वामिभादृक्षभं मुख्यं, भृत्यभात् स्वामिभं तथा। निष्फलं पादपृष्ठस्थे फलदं मस्तकोदरे"।

३९ नरचक्रम्—"नरचक्रं समालिख्य अष्टावयवसंयुतम्। येन विज्ञातमात्रेण क्रियते घातनिर्णयः। दक्षैकं मस्तके

त्रीणि हस्ते पादे चतुष्टयम्। हृदि पञ्च त्रिकं कण्ठे सप्ताभिजित् तत्र विन्यसेत्। ज्ञात्वा बोधमादौ तु सुख-मस्तकवामके। हस्तपादोदरे कण्ठे दक्षहस्ताङ्घ्रि गण्डते। यत्राङ्के भानुभौमार्किराहुबोधिष्णुसंस्थिताः। तत्र घातं विजानीयात् चन्द्रयोगे विशेषतः। यद्-भुक्तिप्रमाणेन नवांशक्रमेण च। प्रहारोजायते तत्र चक्रे द्विगुणसंख्यया। निजभे चार्द्धघातं च पादोनं मित्रभे यदे। उदासीने भवेत् सर्वं द्विगुणं शत्रुक्षेत्रगे। एकोऽप्यनेकघातं च करोति भूबलोज्झितः। भूबले च यदा खेटाः स्थिताघातं न कुर्वते। यत्र यत्र स्थिते घातो यत्रयत्रस्थितेन हि। तत्फलं कथयिष्यामि गूढभूमिवशात्पुनः। क्रूराघातं न कुर्वन्ति पृष्ठदक्षिणगा रणे। सम्मुखावामगा क्षेत्रे योधाङ्के घातकारकाः। दक्षिणाङ्के गताः क्रूराः सौम्यावामाङ्गसंस्थिताः। शिर-श्छेदे सस्तत्पक्षे भटं धावति सम्मुखम्। यस्य वामाङ्गगाः क्रूराः सौम्या यस्य च दक्षिणे। तस्य भङ्गे रणे नूनं यदि शूरो महाभटः"।

४० डिम्भचक्रम्—"डिम्भचक्रे न्यसेद्भानि भानुभात् त्रीणि मस्तके। सुखे त्रीणि हृयं स्कन्धे एकैकं बाहुहस्तयोः। पञ्चहृन्नाभिगुह्यैकं षट्जान्वेकैकपादयोः। विलेख्य-स्थं नक्षत्रात् जन्मभं तत्र चिन्तयेत्। शीर्षस्थे ज्वलना-भस्य वक्त्रे मिष्टान्नभोजनम्। स्कन्धेऽग्नी च, बाहुभ्यां स्थानभ्रष्टोमवेश्वरः पाणिभ्यां तस्करोलक्ष्मी र्हृदाख्यायुश्च नाभिगे। गुह्येऽग्नी, भगो, जानौ, लोकजीवी च पादयोः"।

४१ पक्षिचक्रम्—"चक्षुर्मस्तककण्ठे च हृदुदराङ्घ्रिपक्षयोः। त्रीणि त्रीणि क्रमेणैव ग्रहिभाद्विन्यसेद्बुधः। चक्षुष्ये नासभे स्कन्धौ, शीर्षे कण्ठोदरे हृदि। विजयः खे मलाभश्च भङ्गदं पादपक्षयोः"।

४२ वर्गचक्रम्—"अगरुडःक माजारश्चः सिंहः टः शुनी-सुतः। तःसर्पः प व्याघ्रुश्च गजः यश्च जातुधः। वर्गाङ्काः क्रमशो-क्षेया वैनतेयाद्यजानकाः। पूर्वादिक्रमशो ज्ञेयं वर्गो-परिदिगष्टकम्। नाम्नि मालाक्षराः षष्ठ्या वर्गाङ्कोमेत संख्यया। प्रत्येकं स्थापयेत्तत्र पिण्डं कृत्वाष्टभिर्भजेत्। शेषसंख्यो ध्वजोधूम्रः सिंहः३ श्वा४ वृष५रास भौ६। गजो७ऽधाङ्गः क्रमेणैवमायाताद्यौ भवन्ति च। धाङ्क्षरासभोद्वाघो गजः सिंहोध्वजोऽनघः। यथो-त्तरवलाः सर्वे ज्ञातव्याः स्वरवेदिभिः। ग्रामे योधे पुरे देशे सैन्यनारोत्सवेषु च। बलिनग्रावे भवेल्लाभो लाभोबलवर्जिते"।

४३ आयचक्रम्—"ध्वजोधूम्रोऽथ सिंहश्वा सौरभेयः खरो गजः। ध्वाङ्क्षवेति क्रमेणैव आयाष्टकदिगष्टके। प्रतिपदाद्वितीयादौ तिथिभुक्तिप्रमाणतः। अहो-रात्रे ततः सर्वेषामभुक्त्वा भ्रमन्ति च। इन्द्रस्थाने महा-लाभ आग्नेय्यां मरणं ध्रुवम्। दक्षिणे विजयः सौख्यं नैर्ऋत्यां बन्धनं क्षतिः। वारुण्यां सर्वलाभश्च वायव्यां हानिकारकम्। उत्तरे धनधान्यं च ऐशान्यां निःफलं मतम्। अतीतं गोखरिध्वाङ्क्षौ वर्त्तमानं ध्वजेऽनले। अनागतं परं विद्यात् धूम्र कुक्कुट हस्तिभिः। इष्टे ध्वजे समीपस्थं, दूरस्थः गजसिं-हयोः। श्वाने खरे च मार्गस्थो निःफलं धूम्रधाङ्क्षयोः। ऐन्द्राग्नेयो मूलचित्रा धातेर्द्धक्षिणनैर्ऋतौ। वारु-ण्यां धातुचित्रा च जीवचित्रोत्तरे शिवे"। आया-वर्गाष्टके ज्ञेया दिगष्टकक्रमेण च। क्षोदये मृत्युदं ज्ञेयं सर्वकार्येषु सर्वदा"।

४४ विरिञ्चिचक्रम्—"अथातः संप्रवक्ष्यामि सद्यःप्रत्ययकारकम्। चक्रं विरिञ्चिविख्यातं यत्सूरैरपि दुर्गमम्। कृत्तिका चोत्तरा फाल्गुन्युत्तराषाढभादितः। षड्भि युक्त्या नक्षत्राणि क्रमेण नवकत्रयम्। वेधोऽपि तिर्य-गस्तत्र कर्त्तव्यो नवकत्रये। क्रूरसौम्यैर्यथैवेह ज्ञेयं तत्र शुभाशुभम्। जन्मस्थस्यदुविपत्क्षेमं प्रत्यरिः साधको वधः। मित्रातिमित्रगात्कारानव भेदा भवन्ति च। जन्मत्रयस्य वेधेन मृत्युः क्रूरयहैर्भवेत्। जयो-लाभः शुभैस्तत् मिश्रैर्मिश्रफलं मतम्। सौम्योदः शुभतारास्यस्तत्तारारामावेधकः। दुष्टास्यो दुष्टभाधत्ते क्रूरे तच्चाद्विपर्ययः। जन्मत्रये स्थितः सौरिः क्षेमाये-राड्भूमिजौ। मित्रातिमित्रगे सूर्ये जायते बधबन्धनम्। जन्मत्रये यदा मन्दौ क्षेमाये बुधभार्गवौ। मित्रातिमित्रगे चन्द्रे जयलाभसुखानि च। त्रिपञ्चसप्तगाः रोगोत् मित्तिर्यदा तदा। चिरं रोगे क्षतिस्तासु क्रूरविद्धासु जायते"।

४५ सप्तशलाकचक्रम्—"तिर्यगूर्द्धं गतारेखा सप्तसप्त न्यसेद्बुधः। कृत्तिकादीनि भान्यत्र साभिजित्नि क्रमेण च। भुक्तं भोग्यं तथाऽऽक्रान्तं विद्धं पापयहेण भम्। शुभा-शुभेषु कार्येषु वर्ज्जनीयं प्रयत्नतः। यस्याभिधान

मक्षतं विद्धं क्रूरयुक्तेन च। देशग्रामं पुरं सैन्यं नरो-नारी विनश्यति"। अधिकसुपथमशब्दे १२६३पृ०दृश्यम्।

४६ पञ्चशलाकचक्रम्—"तिर्यगूर्द्धगताः पञ्च हे हे रेखे च कोणयोः। दैशकोणायरेखायां क्षत्रिकां विलिखेद्बुधः। विशाखाक्षत्रिकावेधो भरणीवानुराधया। धनिष्ठा सार्पयोर्वेधो मघाश्वयुग्योस्तथा। शुभाशुभैर्यदैर्विद्धं विवाहे परिवर्जयेत्। यदि विद्धं महादुष्टं क्रूरवेधे-महद्भयम्"। अधिकसुपथमशब्दे १२६३पृ० दृश्यम्।

४७ चन्द्रचक्रम्—वर्केन्दुसदृशं चक्रं तिथिशूलसमन्वितम्। मध्ये द्वादश भान्यत्र षट् पृष्ठे नव शूलके। मध्ये शूलस्य मध्यस्थं ग्रभभंडचमादितः। सव्येन गण्यते चक्रं यावद्दृयोधस्य नामभम्। शूलं मृत्युर्भयं मध्ये, पृष्ठे भद्रो महाहवे। चतुरङ्के कवौ कोटे हन्ये युद्धे विशेषतः"।

४८ भास्करचक्रम्—"रेखात्रयं त्रिशूलाग्रं तिर्यग्रेखा-द्वयन्वितम्। एकैकाः कोणगास्तत्र मध्याधोभानुभादितः। अधस्तये भवेन्मृत्युयुतभिः कोणगैः शुभम्। द्वादश मध्ये संयोज्या नवधांशैव दाहकाः।"

४९ प्रथममातृकाचक्रम्—"षोडशोर्द्धगतारेखाः पञ्च रेखाश्च तिर्यगाः। कोष्ठकानां भवेद् यष्टिर्मात्राक्षरयोजना। पृथिव्यादिविलोमार्चान् लिखेत् प्रतिपदादिकान्। तदधो मातृकालेख्या ङञणान्यक्षरोज्झितान्। संयुक्ता नामवर्णाढ्यान् मात्राभेदेन संयुतान्। सन्धिभि(७)स्तु रेखाङ्गं यावत् ज्ञेयं शुभाशुभ। मात्राधिके भवेल्लाभो मात्राहीने पराजयः। मातृकायाः प्रभेदोऽयं तस्मात् ज्ञेयः प्रयत्नतः"।

५० द्वितीयमातृकाचक्रम्—"द्वादशोर्द्धगता रेखाः पञ्च रेखाश्च तिर्यगाः। मातृकाप्रस्तरे तत्र षण्ढान्यक्षर-वर्जितान्। कोष्ठकाधोलिखेदङ्कान् षट् युग्मं लिखेदयम्। षड्द्वयमष्टकं त्रीणि नवकैकं तथैव च। नाम वर्णस्य या संख्या मात्रासंख्या तथैव च। विलिखेता नवभिर्भक्ता जयोमात्राधिके रणे।"

५१ तृतीयमातृकाचक्रम्—"भानुभार्गवखद्दोर्वसतिष्यद्विरसदिग्गजाः। नवाङ्कास्तदधः स्थाप्याः षड्स्वरकखादितः। ङञणोना हकारान्ता नवधा कोष्ठकक्रमैः। नाममात्राक्षराङ्कैक्यमग्रगेऽधिके जयः"।

"भवाग्न्यादित्यदोर्वसतिविवेदाद्रिदिग्गजान्। वसुनन्दान्नङ्कान् लिख्य षण्ढकोज्झितमातृकाम्। पुन्नामवर्णमात्राणां मङ्कयोगेऽन्यशेषके। मात्राधिके जयो युद्धे मात्राहीने पराजयः" पाठान्तरम्।

५२ विजयचक्रम्—"अथ सारतरं वक्ष्ये वम्मटाचार्य्यभाषितम्। जयपराजयौ येन नामोच्चारणतः स्फुटम्। सन्नालग्नप्रभेदेन शोभाशोभक्रमेण च। प्रवेशनिर्ग-मास्यां च चक्रं जयपराजयम्।"

५३ श्येनचक्रम्—"श्येनचक्रं समालिख्य पक्षिरूपं सुशोभनम्। चक्षुर्ये भानुभं कृत्वा अष्टाविंशतिभं लिखेत्। वृत्तैकं चक्षुकोटिस्थं शीर्षे नेत्रे त्रिकं त्रिकम्। पादे पृष्ठे चतुष्कं च उदरे नव भानि च। नाम कार्यं स्थितं यत्र फलं तस्य वदाम्यहम्। चक्षुर्ये वधब-न्धाय नामवर्णं च यदा भवेत्। नामः शीर्षोदरे नेत्रे-ऽशुभं स्यात् पादपृष्ठयोः।"

५४ तोरणचक्रम्—"नाडीचतुष्टयं चक्रं लिखित्वा तो-रणाकृति। रूपभाद्विन्यसेत् भानि प्रवेशे निर्गमे तथा। स्तम्भमूले स्थितान्यष्टौ सिंहद्वारे तथाष्टकम्। मालाया-मष्टकं चैव चतुर्धिष्ण्यानि तोरणे। निर्गमे चन्द्रमा यत्र प्रवेशे यत्र भास्करः। तत्र काले शुभा यात्रा विपरीता च हानिदा। चन्द्रःप्रवेशकक्षस्थो नि-र्गमस्थो दिवाकरः। बधबन्धनदा यात्रा प्रवेशे तत्र शोभना। चन्द्रादित्यौ प्रवेशर्क्षे अथ वा निर्गमे स्थितौ। मिश्रं फलं भवेत्तत्र प्रवेशे वाऽथ निर्गमे। क्रूरयुक्तयुतचन्द्रः प्रवेशे वाऽथ निर्गमे। तद्दिने भूभुजां चैव निषिद्धा राजपट्टिका। शुभग्रहयुते चन्द्रेऽसिंहद्वार-मवस्थिते। प्रवेशः पट्टबन्धश्च भूभुजां शोभनः स्मृतः। स्तम्भे सौरिर्यदा क्वापि सिंहे स्वचक्रविग्रहः। माला-स्थिते बलं राज्ञः तोरणे सर्वसिद्धिदः"।

५५ अक्षिचक्रम्—"अक्षिचक्रं प्रवक्ष्यामि यथा सर्वत्र भाषितम्। द्रव्यं शस्यं तथा शून्यं येन जानन्ति साधकाः। निधिसिद्धिर्वसैकस्थः सम्भ्रान्तो यत्र भूतले। तत्रचक्रमिदं ख्यातं स्थानद्वारसमन्वितम्। ऊर्द्ध रेखा-ष्टकं लेख्यं तिर्यक् पञ्च तथैव च। अक्षिचक्रं भवत्येव अष्टाविंशतिकोष्ठकम्। अक्षिगता च नक्षत्रे तत्-काले यत्र चन्द्रमाः। द्रव्यं शस्यं भवेत्तत्र चन्द्र भास्करसंक्रमे। तत् पौष्णाश्विन्यार्द्रकृत्तिकामघ-भाग्यकम्। उत्तराफाल्गुनी लेख्यं पूर्वषड्क्त्रां भसं-चक्रम्। अक्षिर्वुध्नाजपादर्क्षं शतभं ब्राह्मसर्पभम्। पुष्यं हस्तं समालेख्यं द्वितीयषड्क्तिसंस्थितम्। विधिं

विष्णुं धनिष्ठाख्यं सौम्यं रौद्रं पुनर्वसुम्। चित्रभं च तृतीयायां षड्भौ वै विष्णुसप्तकम्। विश्वभं तोयभं मूलं ज्येष्ठां चैत्रविशाखके। स्वातीं षड्भ्यां चतुर्थ्यां च लत्वाथ प्रविलोकयेत्। एवं प्रजायते चक्रे प्रकारः पद्मगर्भितिः। द्वारसन्धे मघायाश्चे द्वारस्था ऋक्षिका ततः। अश्विन्यादित्रिनक्षत्रञ्च आर्द्रादिषट्कं तथा। रेवती पूर्वभाद्रेन्दोः पूर्वाषाढचतुष्टयम्। शेषाणि भानुभान्यत्र भोक्तानि सर्वसंख्यया। शशाङ्के चन्द्रभे द्रव्यं शल्यं भवति सूर्यभे। उदयादिगतानाड्यो भस्थाप्ताप्तशेषके। दिनेन्दुभुक्तयुक्तोऽसौ भवेत् तत्कालचन्द्रभाः। यद्भैर्भुक्तानि विष्णूनि खखभैर्गुणयेत्ततः। भुक्तपादकलायोज्झाः षष्ट्या भानं ततोऽहरेत्। लब्धस्य त्रिगता भागो यष्ट्याः स्युः शशिपूर्वकाः। अश्विन्यादीन्दुभुक्तानि भानि यष्टिहतानि च। स्वभुक्त भोडीसंयुक्तं द्विघ्नं नन्दहृतं लिखा। दिनेन्दुभुक्तभागादि जायन्ते चेष्टकालिकाः। चन्द्रवत् साधयेत् सूर्यं सूर्यभं चेष्टकालिकम्। पश्चात् विलोकयेत् सौ च सूर्यभे चास्यमे स्थितौ। चन्द्रर्क्षे च यदाऽर्केन्दू तदासि निधितं निधिः। भानुभर्क्षगतौ द्वौ च तदा शल्यं न संशयः। स्वस्य भे हितयं शेयं नास्ति विद्विद्विषय्यभे। स्थितं न लभ्यते द्रव्यं चन्द्रे क्रूरयुताश्रिते। पुष्टे चन्द्रे भवेत्पुष्टः क्षीणे चन्द्रेऽल्पको निधिः। यद्भदृष्टिवशात् कोऽपि विज्ञेयो नवधा बुधैः। नवांशकानुमानेन भूमानं तस्य कल्पयेत्। कालमानेन तत्संख्यां धातुज्ञानं निरीक्षणैः। हैमं तारं च ताम्रं च रत्नं कांस्यायसं क्रमात्। चन्द्रे नागं विजानीयाद् भास्करादियदेक्षिते। त्रिभैर्त्रिभं भवेद्द्रव्यं शून्यं दृष्टिवियर्जिते। सर्वयुक्षेक्षिते चन्द्रे निर्दिष्टोऽसौ महानिधिः। हैमं तारञ्च ताम्रारं पाषाणं रत्नमयायसम्। खवेदिष्टक्षे चन्द्रे द्रव्यभाग्यं प्रजायते। भुक्तराश्यंशमानेन भूमानं कायिकैः करैः। नीचे निम्नः, परे नीचे जलस्थोऽसौ महानिधिः। खोऽस्थे ऊर्ध्वं द्रव्यं नवांशकक्रमेण च। कोष्ठत्रयं परित्यज्य लेखा मेषादयः क्रमात्। प्रश्नलग्नाधिपोयत्र तत्र द्रव्यं विनिर्दिशेत्। परभोक्षे परे तुङ्गे मित्रस्वस्वर्क्षसंक्रमे। चन्द्रांशभुक्तिमानेन द्रव्यसंख्याभिधीयते। अश्वाद्यश्वगुणा ऋक्षैः षड्भक्तैः तु वसुक्रमात्। अधिष्ठितं भवेत् द्रव्यं यत्र चन्द्रो यदान्वितः। तदधिष्ठायकोक्षेयो भास्करादियदृक्क्रमात्। यद्धं सख्यपद्धं चैव चेचपालं च मारुकाम्। दीपेशं भीषणं रुद्रं दत्तं नागं विदुः क्रमात्। यद्धे होमः प्रकर्तव्यो सख्ये नायराधो बलिः। चेटपाले सुरामांसं मारुकायां मद्यबलिः। दीपेशे दीपिकापूजा भीषणे भीषणार्चनम्। रुद्रे च रुद्रियोजाप्योयद्धे यक्षादिशान्तयः। नागे नाग यक्षाःपूज्या गणनाधेन संयुताः। लक्ष्मीधरादितन्त्राणि सर्वकार्येषु पूजयेत्। निर्वक्त्रैकमध्ये च समाप्तो यत्र भूतले। तत्र चक्रं लिखेद्धीमान् द्रव्यशल्यस्य निर्णयम्। एवं क्रतविधाने तु असाध्यो निधिराप्यते। निधिं प्राप्य नरा लोके वन्दनीया न संशयः"।

५६ चन्द्रयङ्कोच्चतिचक्रम्—"मीनमेषोदयचन्द्रः स्थितं दक्षिणोत्तरा। उत्तरोत्तरयोगेषु समत्वं दृक्कुम्भयोः। विष्वरं स्यात् समे चन्द्रे दुर्भिक्षं दक्षिणोच्यते। दैतिरोगं भयं मूले सुभिक्षं त्वुत्तरोच्यते"।

५७ जीवचक्रम्—"शीर्षे राज्यं चतुर्भिर्भवति खलु करे दक्षिणे श्रीश्चतुर्भिः पीड़ां षड्भिः पदस्थैर्दैतिरपि च भवेद्दामहस्ते चतुर्भिः। कण्ठे चैकेन भूतिर्मदनशरभितैश्चक्षि प्रीतिलाभः स्याद्वेत्स्वैस्त्रिभिर्नैरपि वपमसुखं याक्पतेचक्रमेतत्"।

५८ लाङ्गलचक्रम्—"लाङ्गलं दक्षिणकायुक्तं योलद्वयसमन्वितम्। दक्षिणकादि लिखेद्भानि दिनेशाक्रान्तभादितः। दक्षिणकाङ्गलयुक्तानां द्विद्विस्थाने त्रिकं त्रिकम्। योलयोः षड्कं सव्यगणना चक्रलाङ्गले। दण्डस्थे च नवं स्थानियुग्मस्थे स्वामिनो भयम्। लक्ष्मीलाङ्गलयोलस्थे क्षेत्रारम्भो दिनर्क्षगे"। "त्रिकं त्रिकं त्रिकं षड्भं त्रिकं षड्भं द्विकं द्विकम्। अशुभानि शुभानि स्युश्चक्रे लाङ्गल संज्ञके" क्वचिदधिकः पाठः।

५९ बीजोग्निचक्रम्—"खूर्यं भादरयं स्थाप्यं त्रिभाडेक्रान्तनारं क्रमात्। पूर्वे त्रीणि गले त्रीणि भानि द्वादश चोदरे। पुच्छे तुर्यं वह्निः षड्भं दिनभाद्यं फलं वदेत्। वदने पुष्कलं विद्याद्बलकेऽङ्गारकस्तथा। उदरे धान्यहानिश्च पुच्छे धान्यक्षयोभवेत्। दैतिरोगभयं बाहौ चक्रे बीजोग्निसम्भवे"।

६० हयचक्रम्—"हयचक्रं हयाकारं सवीर्यवयसंयुतम्। लिखित्वा विन्यसेद्भानि हयनामर्क्षपूर्वकम्। मुखाच्छिरसि गीवेषु पृष्ठपुच्छे द्विकं द्विकम्। त्रीणि पृष्ठे द्विकं

पृष्ठे द्विर्द्विः पादोदरे न्यसेत् । कृत्तिकाद्वीजोन्निपारम्भादिदिनचक्रम् । यत्राङ्के संस्थितचन्द्रस्तस्य वक्त्रे शुभाशुभम् । कान्तास्थे च सुखानि लोचनगते कर्णे च भिक्षाटनम्, शीर्षे स्यात् स्वांतरत्र मस्तकयुगे स्कन्धे स्थिते शोभनम् । पृष्ठे राजभयं च पृच्छभगते पादे भ्रमं कृत्सुखमेवं चन्द्रभजं फलं प्रकटितं चक्रे दृशाखेऽ र्कणाम्" ।

६१ सप्तनाडीचक्रम्—"अथातः संप्रवक्ष्यामि यच्चक्रं सप्तनाडिकम् । येन विज्ञातमात्रेण दृष्टिं जानन्ति साधकाः । कृत्तिकादि लिखेन्नक्षत्राणि साभिजित्नि क्रमेण च । सप्तनाडीष्वधस्तात्र कर्तव्यः पद्मगाकृतिः । तारांचतुष्कवेधेन नाडेरेकैका प्रजायते । तासां नामान्यहं वक्ष्ये तथा चैव फलानि च । कृत्तिका च विशाखा च मैत्राख्यं भरणी तथा । उद्दांख्या शनि नाडी स्याच्चण्डनाडयभिधा मता । रोहिणी स्वाति ज्येष्ठाश्वि द्वितीया नाडिका मता । आदित्यप्रभवा नाडी वायुनाडी तथैव च । सौम्यं चित्रा तथा मूलं पौष्णर्क्षं च चतुष्टयम् । तृतीयाङ्गारका नाडी दहनाख्या तथैव च । रौद्रं हस्तं तथा पूर्वाषाढमाद्रोत्तरा तथा । चतुर्थी जीवनाडी स्यात् सौम्या नाडी प्रकीर्तिता । पुनर्वसूत्तराफाल्गुन्युत्तराषाढतारका । पूर्वभाद्रच शुक्राख्या पञ्चमी नीरनाडिका । पुष्यर्क्षं फाल्गुनी पूर्वा साभिजिच्छततारका । षष्ठी नाडी च विज्ञेया वुधाख्या जलनाडिका । अश्लेषर्क्षं मघा कर्णो धनिष्ठार्धं तथैव च । अस्ततारा हि चन्द्रस्य सप्त नाड्यः प्रकीर्तिताः । मध्यमार्गे स्थिताः सौम्या नाडी तस्याश्च दुष्टतः । सौम्यवाम्यगतं क्षेयं नाडिकानां त्रिकं त्रिकम् । क्रूरा याम्यगता नाड्यः सौम्याः सौम्यदिशाश्रिताः । मध्यनाडी च मध्यस्था सदारूपफल प्रदा । एकनाडीगता ह्याद्या यदाः क्रूराः शुभावहि । ततोनाडीफलं वाच्यं शुभं वा यदिवाऽशुभम् । यदाः कुर्युश्च हायातं गताचरुडाख्यनाडिकाम् । वायुनाडीं गतावायुं दहन्त्यापि दाहकाः । सौम्यनाडीगता मध्या नीरस्था मेघवाहकाः । जलायां दृष्टिदा चन्द्र नाडिकाऽन्यनिदृष्टदा । एकोऽप्येतत्फलं दत्ते स्वनाडी संस्थितो यदः । भूतुतः सर्वनाडीषु धत्ते नाडीभवं फलम् । प्रावृट्काले समायाते रौद्रदृष्टगते रवौ । नाडीवेधसमायोगे जलयोगं वदाम्यहम् । यत्र नाडी स्थितचन्द्रस्तत्रस्थाः खेचरा यदि । क्रूरसौम्यैर्विमिश्रैश्च तद्दिने दृष्टिरुत्तमा । एवमष्टांगसंयोगो जायते यदि खेचरैः । तत्र काले महादृष्टिर्यावत् तस्यांगके शशी । केवलैः सौम्यपापैर्वा यद्भेर्विद्धो यदा शशी । तदा तु तज्जपानीयं दुर्दिनं तु भवेद्ध्रुवम् । यस्य यस्य नाडीस्थचन्द्रमास्तद्यद्भेण च । दृष्टो युक्तः करोत्यम्भो यदि चीक्षोन जायते । पीयूषनाडी गचन्द्रस्तत्र खेटाः शुभाशुभाः । त्रिचतुःपञ्चपानीयं दिनान्यं कलिसप्तकम् । एवं जलाख्यनाडीस्थे चन्द्रे मिश्रयदृक्षान्विते । दिनार्धं दिवसं पञ्च दिनानि जायते जलम् । नीरनाड्यस्थिते चन्द्रे तत्रस्थैः पूर्ववद्यदैः । यामं दिनार्धकं त्रीणि दिनानि जायते जलम् । अमृतादित्रये यत्र भवन्ति सर्वखेचराः । तत्र दृष्टिः क्रमाज्ज्ञेया दृष्यकैरसवासरान् । सौम्यनाडीगताः सर्वे दृष्टिदास्ते दिनत्रयम् । शेषनाड्यां महावात दुष्टदृष्टिप्रदा यदाः । निर्जला जलदानाड्यो भवेद्योगे शुभाधिके । क्रूराधिकसमायोगे जलदा ह्यम्बुवाहिका । एकनाडीसमारूढौ चन्द्रभोधरणीसुतौ । यदि तत्र भवेच्छीघ्रदा वारिमयी मही । यामप्रनाडीगताः क्रूरा अनावृष्टिप्रसूचकाः । शुभयुक्ता जलाख्यास्थाः सोऽतिवृष्टिप्रदायकाः । बुधशुक्रौ यदैकत्र गुरुणा च समन्वितौ । चन्द्रयोगे तदा काले जायते वृष्टिरुत्तमा । जलयोगसमायाते यदा चन्द्रसितौ ग्रहौ । क्रूरैर्दृष्टौ युतौ वापि तदा मेघोऽल्पवृष्टिदः । उदयास्त मिते मार्गे चक्रे युक्ते च संक्रमे । जलनाडीगताः खेटा महावृष्टिप्रदामताः" । "ग्रावृषि शीतकरो भृगुपुत्रात् सप्तमराशिगतः शुभदृष्टः । स्वर्क्षगताच्चपञ्चमगोवा सप्तमगश्च जलागमनाय" । क्वचित् पाठान्तरम् ।

६२ संवत्सरचक्रम्—"चक्रं सांवत्सरं वक्ष्ये यदुक्तं सौम्यवागमे । येन विज्ञायते सम्यग्वर्षे वर्षे शुभाशुभम् । द्वादशारं लिखेच्चक्रं तत्र मेषादिराशयः । संख्यायाः क्रमयोगेण शोभनान्ताः सव्यमार्गगाः । तत्र चक्रे समालेख्या मेषादिराशिमार्गगाः । प्रभवाद्यब्दमेकैकं वृष्टिपञ्चप्रवर्तनैः । एकराशौ स्थितो यत्र वक्त्रेवर्त्तमानकः । तद्राशिस्थं फलं वीक्ष्य यत्किञ्चित् वार्षिकं मतम् । चैत्रे या प्रतिपच्छुक्ला तस्याः काले प्रवेशयेत् । एतद्विलोकवेक्षं कालज्ञानविनिश्चिये । तत्र सप्त यदास्तस्य राशौ यो यत्र संस्थितः । वर्षे राशौ विच्छिन्नाः रेखास्थानगता यदाः । उपचयेषु गता, क्रूराः सौम्या

स्निग्धान्यवर्जिताः। यद्रेखाप्रदात्तेवा मित्रमध्यस्थिता यद्दाः। खर्ज्जे छिन्नं फलं दत्ते स्त्रीवे भिन्नं तथैव च। फलार्द्धं शत्रुगेहस्थो नीचस्थो निष्फलोयद्दः। एवं रेखाप्रभावेण वर्षविंशोपका मताः। ज्ञातव्यादिशि केन्द्रेण वर्षे वर्षे यथाक्रमतः। एवं वर्षफलं प्रोक्तं चैत्रमासाद्यवासरात्। आषाढे कार्त्तिकेऽप्येवं जलं धान्यं विचिन्तयेत्। ननु देशे पुरे ग्रामे फलं भिन्नं प्रदृश्यते। तस्मात् तत्कारणं वाच्यं येन जानन्ति साधकाः। देशादिराशिनाथस्य यो रेखादायको यद्दः। मित्रोदासीन शत्रुत्वे फलं भिन्नं करोति सः। मित्रं छिन्नं फलं दत्ते समः साम्यं करोति च। शत्रुः सर्वहरोज्ञेयः सर्वदा कालचिन्तकैः। एवं विचार्य कर्त्तव्या काल विंशोपकावुधैः। तथा धानीयधान्यानां स्वकाले च विचिन्तयेत्"।

६२ स्थानचक्रम्—"स्थानचक्रं प्रवक्ष्यामि यदुक्तं ब्रह्मटामले। येन विज्ञायते सम्यक् स्थाने स्थाने शुभाशुभम्। स्थानपीड़ाप्रभावेण राज्ञां पीड़ा प्रजायते। तस्मादपीडिते स्थाने स्थातव्यं सर्वदा बुधैः। स्थाननामोद्भवं राशिं कृत्वादौ द्वादशारके। राशिमण्डलकं न्यस्य वाममार्गेण संस्थितम्। तत्र नवग्रहा स्थाप्याः मासचन्द्रः स्वराशिगे। तेषां विलोकनं वीक्ष्य स्थानराशिगतायया। दशैकादशगे पादं द्विपादं व्योमवस्त्रगे॥०॥४। त्रिकोणेऽष्टमे त्वर्द्धं मूर्त्तिस्थे ॥७। पूर्णं पश्यन्ति खेचराः। शत्रुक्षं राहुकेत्वाराः पञ्च क्रूरा यहा मताः। शेषं चतुष्टयं सौम्यं मासेन्दुरपि पञ्चमः। एवं पञ्च यहाः क्रूराः पञ्च सौम्यास्तथैव च। तेषां शुभाशुभम् दृष्टिं ज्ञात्वा स्थानबलं वदेत्। एकैकग्रहजा दृष्टिः पूर्णपादचतुष्टयम्। पञ्चमे त्वापकैस्तेषां पादानां विंशतिर्भवेत्। तत्र विंशोपकाग्नेया सौम्यक्रूरस्वोद्भवाः। एवं प्रसाधयेद्दृष्टिं युग्मं मानं शुभाशुभम्। बली स्त्रीजोनिता शेषा जायते हक्शुभाशुभा। ते च विंशोपकास्तस्य स्थानस्य बलनिर्णये। एवं देशे पुरे ग्रामे बलं यत्र शुभाधिकम्। तत्र स्थाने स्थितोराजा दुष्टारिष्टैर्न पीड्यते। स्थानबलप्रभावेण स्ववलस्य बलोदयः। शत्रुसैन्यं क्षयं याति यावत्स्थाने शुभे स्थितः। एतानि सर्वचक्राणि ज्ञात्वा युद्धं समारभेत्। जयेदिह न सन्देहः शक्रतुल्योऽपि भूभुजि"। ऐतेषां विषये स्थाकले ऽपि चक्रान्तरचक्रसंस्थाने न चतुरशीतिसंख्यापूरणम्।

अङ्कशब्दे ७१ पृ० दर्शितानि "तथाचान्तरचक्रं च ग्रहचक्रं तथैव च। स्वचक्रं वातचक्रञ्च चक्राङ्केषु चतुष्टयम्" गर्गोक्तानि च चत्वारि चतुष्टयचक्राणि ज्योतिषमध्ये चान्तरादिचक्राणि यानि तत्र चान्तरचक्रं द्र० सं० ८७५० उक्तं यथा

"ऐन्द्र्यां दिशि ग्रामाद्यां विस्तरन्यूनसंस्थितागमं वक्ष्ये। शकुनिः पूजालाभं मणिरत्नद्रव्यसम्प्राप्तिम्। तदनन्तरदिशि कनकागमो भवेद्वाञ्छितार्थसिद्धिश्च। आयुर्धनपुत्रफलागमस्तृतीये भवेद्भागे। स्त्रिग्धद्विजस्य सन्दर्शनं चतुर्थे तथाऽऽश्रितानां च। कोषेऽनुजोविभिन्नुपदर्शनं कनकलोष्ठाप्तिः। याम्ये स्याद्यं नृपपुत्रदर्शनं सिद्धिरभिमतस्याप्तिः। परतः स्त्रीधर्म्माप्तिः सर्वप्रयत्नलब्धिरथोक्ता। कोणाच्चतुर्थखण्डे लब्धिर्व्ययश्च पूर्वनष्टस्य। यद्वा तद्वा फलमपि यात्रायां प्राप्नुयाद्यात्रा। यात्रार्थिद्विः प्रथमदक्षिणेन शिखिमक्षिकृकुटाप्तिश्च। याम्यार्द्धितीयभागे चारणसङ्घः शुभं प्रीतिः। ऊर्ध्वं सिद्धिः कैवर्त्तसङ्घो मीनतिन्तिरादाप्तिः। प्रव्रजितदर्शनं तत्परे च पक्वान्नफललब्धिः। नैर्ऋत्यां स्त्रीलाभस्तुरगाभरणदूतलेखाप्तिः। परतोऽस्य चर्मतन्त्रिस्त्रिदर्शनं चर्म्मभयलब्धिः। वानरभिक्षुश्रमणावलोकनं नैर्ऋतीतृतीयांशे। फलकुसुमदन्तघटितागमश्च कोणाच्चतुर्थांशे। वारुणामर्षवज्ञातरत्नवैदूर्य्यमणिमयप्राप्तिः। परतोऽतः शवरव्याधचौरसङ्घः पिशितलब्धिः। परतोऽपि दर्शनं पातरोगिणां चन्दनागुरुप्राप्तिः। आयुर्धनपुत्रकलत्रसिद्धिसमागमश्चोर्ध्वम्। वायव्ये फेनकचामरौर्णिकाप्तिः समेति कार्यस्थः। स्त्रीमयलाभो ऽन्यस्मिन् वैतालिकक्षिप्तभाण्डानाम्। वायव्यादुत्तरेऽस्मिन् समागमो धनप्राप्तिः। यक्षाग्न्याप्तिरतः परमिष्टसुहृत्समागमश्च। दधितण्डुलाजानां लब्धिरुदग्दर्शनं च विप्रस्य। यद्यग्न्याप्तिरनलस्तुपमक्षति साधवाङ्क्ष। वैश्यावटुदासस्त्रीसमागमः परे शुक्लपुष्पफललब्धिः। अतः परं शिवचरस्य दर्शनं वस्त्रसम्प्राप्तिः। ऐशान्यां देवकोपसङ्गो धान्यरत्नपशुलब्धिः। प्राक् प्रथमे वस्त्राप्तिः समागमश्चापि बन्धकी। रजकेन समायोगो जलद्रव्यागमश्च परतोऽतः। कस्तूपजीविसमाजश्चारुदर्शनं सिद्धिलब्धिश्च। द्वात्रिंशत् प्रविभक्तं दिक्चक्रं वास्तुवर्त्तनेऽभ्युक्तम्। अरनाभिसदृशैरन्तः फलानि नवधा विकल्पानि। नाभिस्थे बन्धुसुहृत्समागमस्तुष्टिरुत्तमा भवति। प्राग्वक्त्र

पट्टवस्त्रागमस्तत्र नृपतिसंयोगः । याम्येऽब्धे कौलिक-तत्पारिकर्मोद्भूतसंयोगः । लब्धिश्च तत्कृतानां द्रव्या-णामनुलब्धिर्वा । नेमीभागं बुद्धा नाभीभागं च दक्षिणे वोदरः । धार्मिकजनसंयोगस्तत्र भवेद्धर्मलाभश्च । उलाक्रीडकवाणालिकागमो नैर्ऋते सप्तदिष्टः । द्यूतभस्त्र चात्र लब्धिर्मांकुलत्वाद्भयगं च । अपरस्यां दिशि यो ऽरस्तत्रासक्तिः क्षीवलैर्भवति । सासृद्द्रव्यसुरारकाचफल-मद्यलब्धिश्च । भारवहतच्चभिक्षुकसन्दर्शनमपि च वायु-दिक्संस्थे । तिलकक्षुद्रमस्य लब्धिः सनागपुन्नागकुसु-मस्य । कौबेर्यां दिशि शकुनः शान्तायां वित्तलाभमा-ख्याति । भागवतेन समागममाचष्टे पीतवस्त्रैश्च । ऐशाने व्रतयुक्तवनितासन्दर्शनं सप्तपयाति । लब्धिश्च परिज्ञेया लक्षायोवस्त्रधरादीनाम् । याम्येऽष्टांशे प-ञ्चाह्निष्टत्रिसप्ताष्टमेषु मध्यफला । सौम्येन च द्वितीये श्रेष्ठेऽतिशोभना यात्रा । अभ्यन्तरे तु नाभ्यां शुभफलदा भवति षट्सु चारेषु । वायव्यानैर्ऋतयोरुभयोः क्षेमा-वहा यात्रा । शान्तासु दिक्षु फलमिदमुक्तं दीप्तासतो ऽभिधास्यामि । ऐन्द्र्यां भयं नरेन्द्रात् समागमश्चैव शत्रूणाम् । तदनन्तरदिशि नाशः कनकस्य भयं सुवर्णका-राणाम् । अर्धत्रयस्तृतीये कनकः शस्त्रप्रकोपश्च । अग्निभयं च चतुर्थे भयमाग्नेये च भवति चौरेभ्यः । कोषादपि द्वितीये धनक्षयो नृपसुतविनाशः । प्रम-दागर्भविनाशस्तृतीयभागे भवेच्चतुर्थे च । हैरण्यकका-रकयोः प्रध्वंसः शस्त्रकोपश्च । अथ पञ्चमे नृपभयं नारीसुतदर्शनं च वक्तव्यम् । षष्ठे तु भयं क्षेयं गन्ध-र्वाणां सङ्गीतानाम् । धीवरशाकुनिकानां सप्तमभागे भयं भवति दीप्ते । भोजनविघात उक्तो निर्वन्त्रिभयं च तत्परतः । कनकनैर्ऋतभागे रक्षसावो ऽथ शस्त्र-कोपश्च । अपराह्णे चर्मकृतं विनश्यति चर्मकारभयम् । तदनन्तरे परिव्राट्श्रमणभयं तत्परे स्वजनभयम् । वृष्टिभयं वारुणां शतस्कराणां भयं परतः । वायुभ-ये विनाशः परे परे शस्त्रसुरावारुणीनाम् । कोणे पुस्तक-नाशः परे विषमेण वायुभयम् । परतो वित्तविनाशो मित्रैः सह विग्रहश्च वित्तेयः । तत्पाशस्त्रे ऽथवधो भयमपि च पुरोधसः प्रोक्तम् । गोपुरशस्त्रक्षयातो-वृद्धे परे सार्थघातधननाशौ । याम्ये च शुभं ब्राह्म-द्विजदासगणिकानाम् । ऐशानस्याग्नेये चित्राम्बरचित्र-वस्त्रभयं प्रोक्तम् । ऐशाने स्त्रीभयं दुष्टगमनमुत्तमस्त्री-णाम् । प्रोक्तश्चैवाग्नेये दुःखोत्पत्तिः स्त्रिया विनाशश्च । भयमूर्ध्वे रज्जकानां विज्ञेयं काञ्चिकानां च । हस्त्या-रोहभयं स्याद् हिरद्विनाशश्च मण्डलसमाप्तौ । अभ्य-न्तरे तु दीप्ते पत्तीसरणं ध्रुवं पूर्वे । शस्त्रानलप्रकोपा-वाग्नेये वाजिसरणशिल्पिभयम् । याम्ये धर्मविनाशः परे ग्रन्थवस्त्रान्दोलवधाः । अपरे तु कर्मिणां भय-मथ कोणे चानिले खरोष्ट्रवधः । अत्रैव मनुष्याणां विसूचिकाविषभयं भवति । उद्गर्दविग्रहपीडा दिग्दै-घ्यां तु चित्तसन्तापः । यामोषगोपपीडा तत्र च नान्या तथात्मवधः" ।

२रुगचक्रं द्र०स० ६२अ० यथा

"सीमागता वन्यमृगा रुवन्तः स्थिता व्रजन्तो ऽथ समा-पतन्तः । सम्मत्सतीतैव्यभयानि दीप्ताः कुर्वन्ति शून्यं परितो भ्रमन्तः । ते याम्यसत्त्वैरनुयाज्यमाना भयाय रोधाय भवन्ति वन्यैः । द्वाभ्यामपि प्रत्यनुवर्णिताभ्यो पन्दिग्दहायैव मृतौ भवन्ति । वन्ये सत्त्वे द्वारसंस्थे पुरस्य रोधो वाचः सम्भविष्टे विनाशः । मृते मृगे, स्याद्भयं संस्थिते च गेहं याते बन्धनं सम्प्रदिष्टम् ।"

३ रुचक्रं द० स० ८६ अ०

"चतुरगकरिकुम्भप्रर्यागमक्षीरवृक्षेष्टकासङ्घ वल्मीक आ-सनोलूखलानि ध्वजं चामरं शाद्वलं पुष्पितं वा प्रदेशं यदा श्वापदप्राप्तो याति यातुस्तदा कार्यसिद्धिर्भवेदार्द्रे गोमये सिद्धभोज्यागमः शुष्कसस्यूलखे गोष्टिकामोदकावा-प्तिरेवाथ वा । अथ विप्रतरुकण्टकीकाष्ठपाषाणशुष्कद्रुमा-स्थिशस्त्रानानि शत्रुप्रावल्यात्तथा यायिनो ऽप्येवरो ऽनिष्टमाख्याति शस्त्राकुलादिमाक्रान्यभुक्तान्यभि-ज्ञानि वा मूषयतृकन्यकादोषदृङ् भुज्यमानानि चेद् दृष्टं तद्दृष्टिघातात्तथा स्यादपानशफलं गेषु सस्यूलखे वर्षजः सङ्करः । गमनसुखसुपानहं सस्यष्टशोपतिष्ठेद्यदा स्यात्तदा सिद्धये मांसपूपौदने ऽर्थोन्निरार्द्रेण चास्त्रा शुभं सान्नपूजातेन शुष्केण चास्त्रा ऽष्टकीतेन सद्भुः प्रधानोलूखलेनाभिघातो ऽथ पुंसः शिरोहस्तपादादि-वस्त्रे भुवो लाभमो वस्त्रचौरादिभिर्व्यापदः केचिदाहुः सवस्त्रे शुभम् । प्रविशति तु दृष्टं सशुष्कार्द्रवस्त्रे प्रधानस्य तस्मिन् वधः सङ्कुलाक्षीणवस्त्रीवरादि वा बन्ध-नं चोपसृष्टोपतिष्ठेद्यदा स्यात्तदा बन्धनं वेढि पादौ विधु-नुत सकर्णावुपर्यांक्रमंश्चापि विज्ञाय यातुर्विरोधे विरोध-सत्वा स्याद्भङ्गखण्डूयने स्यात् खपंक्षोर्ध्वपादः सदा दो-

वक्त्र । सूर्योदये ऽर्कोभिसखो विरौति यामस्य मध्ये यदि सारमेयः । एको यदा वा बहवः समेताः शंसन्ति देशाधिपमन्यमाशु । सूर्योन्मुखः श्वा ऽनलदिक्स्थितश्च चोरानलत्रासकरोऽचिरेण । मध्याह्नकाले ऽनलसंज्ञुशंसी सशोणितः स्यात्कलहो ऽपराह्णे । रवेन्दिनेशाभिसखो ऽस्तकाले क्षतीवलानां भयमाशु धत्ते । प्रदोषकालेऽनिलदिङ्मुखस्तु धत्ते भयं मारुततस्करोत्थम् । उदङ्मुखश्चापि निशार्धकाले विप्लव्यां गोहरणं च शंसि । निशावसाने शिवदिङ्मुखश्च कन्याभिदूषानलगर्भपातान् । उच्चैःस्वराः सुस्थचकूटसंस्थाः प्रासादवेश्मोत्तमसंस्थिता वा । वर्षासु दृष्टिं कथयन्ति नीत्रामनग्नत्व मृत्युं दहनं रुजश्च । प्राड्मुखेऽवग्रहे ऽम्भो ऽवगाहत्र प्रत्यङ्मुखे रेचकैवाप्यभीक्ष्णम् । आधुन्वतो वा पिबतश्च तोयं दृष्टिं कुर्वन्त्यन्तरे द्वादशाहात् । द्वारे शिरो न्यस्य बहिः शरीरं रोरूयते श्वा सदृशिर्यौ विलोक्य । रोगप्रदः स्यादथ मन्दिरान्तर्बहिर्मुखः शंसति बन्धकीं ताम् । कुड्यमुत्किरति वेश्मनो यदा तत्र खानकभयं भवेत्तदा । गोमुत्किरति गोभयं वदेद्धानग्नत्वमपि धान्यभूमिषु । एकेनाक्षा सारमेया दीनदृष्टिर्मन्दाहारो दुःखमुत्तङ्कृत्य । गोभिः सार्धं क्रीडमानः सुमित्रं क्षेमारोग्यं चाभिधत्ते सुदं च । वामं जिह्रेत्यात्तु वित्तागमाय स्त्रीभिः सार्कं विग्रहो दक्षिणं चेत् । ऊरुं वामं चेन्न वार्धापभोगाः सव्यं जिह्रेद्दक्षिणं वैरिबोधः । पादौ जिह्रेद्यायिनश्चेदयात्रां प्राहा वाग्निं वाञ्छितां निष्फलत्व । स्थानस्थश्चोपानहौ चेद्विजिह्रेत् क्षिप्रं यात्रां सारमेयः करोति । उभयोरपि जिह्रतोर्ह वाङ्मोर्विप्लवो रिपुचोरसम्प्रयोगः । अथ गोपायति भक्षति स्वभक्षान् मांसास्थीनि च शीघ्रमग्निकोपः । ग्रामे भक्षित्वा च बहिः श्मशाने भक्षन्ति चेदुत्तमर्णविनाशः । वियासतस्त्वभिसखो विरौति यदा तदा वा निरुणद्धि यात्राम् । उकारवर्णेन रुते ऽर्थसिद्धिरोकारवर्णेन च वाममार्गे । आद्येऽमोकाररुतेन विद्यान् निषेधकर्मण्यरुतेन पश्चात् । खड्गेति चोच्चैश्च सुदुर्मुखेति रुवन्ति दक्षैरिव ताड्यमानाः । श्वानो ऽभिधावन्ति च भक्षणेषु ते शून्यतां सत्त्वभयं च कुर्युः । प्रकाश्य दन्तान् यदि लेढि कुक्षिणी तदाऽशनं भिक्षुभक्षन्ति तद्विदः । यदाननं चावलिहेच्च कुक्षिणी प्रकल्पभोज्येऽपि तदाऽविघ्नकृत् । यामस्य मध्ये यदि वा पुरस्य भक्षन्ति संघत्य सुदुर्मुखेति । ते क्षेमारोग्यानि तदीश्वरस्य चारणसंस्थो मृगयर्क्षचिन्तयः । दक्षोपमे क्रोशति तोयपातः स्यादिन्द्रकीले सचिवस्य पीडा । वायोर्गृहे शस्त्रभयं गृहान्तः पीडा पुरस्यैव च गोपुरस्थाः । भयं च शय्यासु तदीश्वराणां याने भयन्तो भयदाश्च पश्चात् । अथापसव्या जनसन्निवेशे भयं भयन्तः कथयन्त्यरीणाम् ।

४अनिलचक्रञ्च अनिलशब्दे १६६पृ०दर्शितम्। व्यूहस्यात्र चक्राकारः स च द्रोणेनाभिमन्युवधपर्व्वणि कृतः। "चक्रव्यूहो महाराज! द्रव्याचार्य्येणाभिकल्पितः" भा० द्रो०२४अ०। इत्यादिनोक्तः। तन्त्ररूपचक्राणि तन्त्रशब्दे वक्ष्यन्ते। तत्र राष्ट्रे "स्वचक्रं परचक्रञ्च" इति कथने एतद्वृद्धये अनुपदं दर्शितवाक्ये। समूहे "भूरेखयो नभसि नद्दृश्यतोदचक्रम्" माघः। "दिक्चक्रमाक्रामति" रघुः। सुदर्शनाख्ये राष्ट्रे च। "अविचालितचारुचक्रयोरनुरागादुपमूढयोः श्रिया" माघः। "न चक्रमस्याक्रमताधिकन्धरम्" माघः। चक्रवाके। "तव तन्वि! कुचावेतौ नियतं चक्रवर्त्तिनौ" उद्भटः। कुम्भकारचक्रे चक्रवाके च। "कलसे निजहेतुदण्डजः किमु चक्रभ्रमिकारितागुणः। स तदुच्चकुचौ भवन् प्रभाभरचक्रभ्रमिमातनोति यत्" नैष०। राशिचक्रे "त्रिंशत्कलो युगे भानां चक्रं प्राक्प्रविलम्बते" सूर्य्यसि०। "रवेश्चक्रभोगोऽर्कार्थं प्रदिष्टम्" सि० शि०। २० मण्डलाकारे रेखाविन्यासभेदे "चक्रे सचक्रनिभचङ्क्रमणच्छलेन" "वितत्य वाल्यामयचक्र चङ्क्रमान्" नैष०। "शालयामशिलाचक्रम् गोमतीचक्रम्" एकद्वारे चतुश्चक्रं वनमालाविभूषितम्" शालग्रामशब्दे दृश्यम्।

चक्रक पु० चक्रमिव कायति कै-क। तर्कभेदे। तल्लक्षणं स्वापेक्षणीयापेक्षितसापेक्षत्वनिबन्धनः प्रबन्धश्चक्रकः" तर्के जगदीशः। अपेक्षा च द्वयोः उत्पत्तौ स्थितौ च। अन्योन्याश्रयशब्दे दर्शिते आपादके जन्यपदमन्तर्भाव्योदाहरणम्। अपेक्षा चात्र साक्षात्परम्परासाधारणी ग्राह्या" तर्के जगदीशः। तत्र द्वयोः एतद्घटज्ञानं यद्येतद्घटज्ञानजन्यज्ञानजन्यज्ञानजन्यं स्यात् तदा एतद्घटज्ञानजन्यज्ञानजन्यज्ञानभिन्नं स्यात्। उत्पत्तौ घटोऽयं यद्येतद्घटजन्यजन्यजन्यः स्यात् तदा एतद्घटजन्यजन्यभिन्नः स्यात्। स्थितौ घटोऽयं यद्येतद्घटदृष्टिर्न स्यात् तदात्वेनोपलभ्येतेति। २१अक्षभेदे पु० चक्रस्य गोला-

पत्यम् ऋषा० फञ्। चाक्रायण चक्रगोत्रापत्ये पुंस्त्री "उपमन्तिर्हे चाक्रायणः" छा०उ०। कुण्डलकलितनगण-मिह सुलभं गन्धकुसुमरसविरचितवलयम्। चक्रसुरग-पतिवरपरिगणितं षोडशकलमतिसुललितमथितम्" इत्युक्तलक्षणे २२ छन्दोभेदे चक्राकारे २३ दङ्गुरोगे चक्रमर्दः। २४मनस्तत्त्वे चक्रगदाधरशब्दे उदा०। गिरिनद्या० ततः परं नदीनितम्बशब्दस्थनस्य वा णत्वम्।

**चक्रकारक** न० चक्रं चक्राकाररेखां करोति कृ-ण्वुल् ह्रस्वः। १नखे शब्दार्थचि०। तस्य नारीकुचयोः चक्राकाररेखाकरणात् तथात्वम् २व्याघ्रनखाख्ये गन्धद्रव्ये अमरः। [(चाकुलिया) शब्दच०।

**चक्रकुल्या** स्त्री चक्रस्य तदाकारस्य कुल्येव। १चित्रपर्णाम्

**चक्रगज** पु० चक्रे चक्राकारे दङ्गुरोगे गजइव मर्दकत्वात्। चक्रमर्दे हचे (दादमर्दनहचे) राजनि०।

**चक्रगण्डु** पु० चक्रमिव गण्डुः। (गालवालिआ)ख्याते उपधानभेदे हेमच०।

**चक्रगदाधर** पु० "मनस्तत्त्वात्मकं चक्रं बुद्धितत्त्वात्मिकां गदाम्। धारयन् लोकरक्षार्थं शुभ्रचक्रगदाधरः" विष्णुसं० भाष्यधृतवाक्योक्ते परमेश्वरे

**चक्रगुच्छ** पु० चक्रमिव गुच्छोऽस्य। न्यग्रोधहचे शब्दच०।

**चक्रचर** त्रि० चक्रेण संचरणशरति चर-ट। संचीभूय चारिणि गजविहगादौ। "तथा नागाः सुपर्णाश्च सिद्धाश्चक्रचराश्चये" भा० व० ८२१४ श्लो०।

**चक्रचारिन्** पु० चक्रेण चरति णिनि। रथे। "विधिरेकं चक्रचारिणं किल निर्मित्सति भास्वरं रथम्" नैष०।

**चक्रजीवक** पु०चक्रेण कुम्भसाधनचक्रेण जीवति जीव-ण्वुल् हृत०। कुम्भकारे हेमच०।

**चक्रतीर्थ** न०चक्रेण सुदर्शनेन खननेन कृतं तीर्थम्। प्रभास क्षेत्रस्थे वैष्णवे तीर्थभेदे तत्कथा स्क० प्रभा०

"तस्य सीमां प्रवक्ष्यामि विष्णुक्षेत्रस्य भामिनि!। पूर्वे-यमेश्वरं यावत् श्रीसोमेशस्तु पश्चिमे। उत्तरे तु विशालाक्षी दक्षिणे सरितां पतिः" इत्युपक्रमे "चक्रतीर्थे नरः स्नात्वा सोपवासोजितेन्द्रियः। द्वादश्यां कार्त्तिके मासि-दद्यात् विप्रेषु काञ्चनम्। विष्णुं संपूज्य विधिना मुच्यते सर्वपातकैः। देव्युवाच चक्रतीर्थं कथं नाम त्वया प्रोक्तं वृषध्वज!। कृतं तिष्ठति तत्तीर्थं किंप्रभावं वदस्व मे। ईश्वर उवाच। पुरा देवासुरे युद्धे हत्वा दैत्यान् जनार्दनः। चक्रं प्रक्षालयामास तत्तु वै रक्तरञ्जितम्। अष्ट कोटीस्तु तीर्थानि तत्रानीय स्वयं हरिः। तीर्थे प्रकल्पयामास शुद्धिं कृत्वा सुदर्शने। तीर्थस्य चक्रे नामापि चक्रतीर्थमिति स्मृतम्। अष्टायुतानि तीर्थानामष्टौ कोट्यस्तथैव च। तत्र सन्ति महादेवि। चक्रतीर्थे न संशयः। यस्तत्र कुरुते स्नानमेकचित्तो नरोत्तमः। सर्वतीर्थाभिषेकस्य स प्राप्नोत्यखिलं फलम्। तीर्थानामष्टकोट्यस्तु निवसन्ति वरानने!। एकादश्यां विशेषेण चन्द्रसूर्यग्रहे तथा। तत्र स्नात्वा महादेवि! यत्र-कोटिफलं लभेत्। तस्य कल्पेषु नामानि ब्रह्मणे कथयाम्यहम्। कोटितीर्थं पूर्वकल्पे श्रीनिधानं द्वितीयके। तृतीये व्रतधारं च चक्रतीर्थं चतुर्थके। एवं ते कल्पनामानि कृतीतान्यखिलानि ते। कथितान्येवमन्यानि श्रेयानि विबुधैः क्रमात्। तत्र यद्दीयते दानं तस्य संख्या न विद्यते। अर्द्धक्रोशप्रमाणञ्च विष्णुक्षेत्रं प्रकीर्त्तितम्। ब्रह्महत्यापहरणं सत्यमेतन्मयोदितम्। मासोपवासी तत्क्षेत्रमग्निहोत्री पतिव्रता। स्वाध्यायी यज्ञयाजी च तपश्चान्द्रायणादिकम्। तिलोदकं च पितृणां श्राद्धञ्च विधिपूर्वकम्। एकरात्रं त्रिरात्रं वा कृच्छ्रसान्तपनं तथा। मासोपवासी तत्रैव अन्यद्वा पुण्यकर्म्म कृत्। दैत्यारिक्षेत्रमासाद्य यत्किञ्चित् कुरुते नरः। अक्षयं तत्तु कोटिगुणं पुण्यं भूयान्न संशयः। सुदर्शने वरे तीर्थे गोदानं तत्र दापयेत्। सम्यक्स्नात्वा फलप्रेप्सुः सर्वपापविशुद्धये। चाण्डालः श्वपचोवापि तिर्यग्योनिगतस्तथा। तस्मिन् तीर्थे श्रुतः सम्यक् आप्नुतं लोकमाप्नुयात्। इति संक्षेपतः प्रोक्तं चक्रतीर्थमहद्भवम्। भाद्राक्षं सर्वपापघ्नं सर्वकामफलप्रदम्"।

**चक्रतैल** न० चक्रस्य तत्फलस्य तैलम्। चक्रमर्दफलजाते तैले। "चक्रतैलेन चाभ्यङ्ग्य सञ्चूर्णेन चूर्णयेत्"। "कृत्वा स्नेहेन नेत्रेण चक्रतैलेन तर्पयेत्" सुश्रुतः।

**चक्रदंष्ट्र** पुंस्त्री चक्रमिव दंष्ट्रास्य। शूकरे राजनि०।

**चक्रदत्त** न० चक्रपाणिना निर्म्मिते वैद्यकशास्त्रभेदे

**चक्रदन्ती** पु० चक्रमिव फलरूपदन्तोऽस्याः। दन्तीहचे राजनि०।

**चक्रदन्तीबीज** न० हृत०। जयपालबीजे राजनि०।

**चक्रदेव** पु० यादवे नृपभेदे। "अष्टादश सहस्राणि भ्रातॄणां सन्ति नः कुले। आहुकस्य शतं पुत्रा एकैकस्मिंदशावरः। चारुदेष्णः सह भ्राता चक्रदेवश्च सात्यकिः। अक्रूरश्च रौहिणेयश्च" भा० स० १३अ०। कृष्णोक्तिः।

चक्रद्वार पु० चक्रमिव द्वारमस्य। पर्व्वतभेदे। "द्रोणश्च शत शृङ्गश्च चक्रद्वारश्च पर्व्वतः" भा० शा० ३२२ अ०।

चक्रधनुस् पु० सूर्य्याज्जाते कपिलाख्ये ऋषिभेदे। "ऋतु चक्रधनुर्नाम सूर्य्याज्जातोमहान्ऋषिः। विदुर्यं कपिलं देवं वेनार्त्ताः सगरात्मजाः" भा० उ० १०८ अ०।

चक्रधर पु० चक्रं मनस्तत्त्वं सुदर्शाख्यमस्त्रं वा धरति-धृ-अच्। १चक्रधारिणि विष्णौ २श्यामयाजिनि च मेदि०। "अचक्रमे चक्रधरप्रभावः" रघुः। ३चक्राकारधारकमात्रे ऋषादौ "यजन्ते क्रतुभिर्दैयास्तथा चक्रधराऋषयः" भा० व० ८५ अ०।

चक्रधर्म्मन् पु० विद्याधरभेदे। "विद्याधराधिपश्चैव चक्रधर्म्मा महानुजैः। उपाचरति तत्रस्थं धनानामीश्वरं प्रभुम्" भा० स० १० अ०।

चक्रधारण न० चक्रं धार्य्यतेऽनेन धारि-करणे ल्युट्। रथावयवभेदे अजनामौ शब्दार्थ०।

चक्रधारा स्त्री ६त०। चक्रक्षाग्रे शब्दार्थ०।

चक्रनख पु० चक्रमिव नखोऽस्यास्य अच्। व्याघ्रनखे गन्धद्रव्यभेदे राजनि०।

चक्रन(ण)दी स्त्री चक्रप्रधाना विष्णुचक्राविर्भवस्थानं नदी गिरिनद्या० वा ङीत्वम्। गण्डकीनद्याम्। "यत्राश्रमपदान्युभयतो नाभिर्भशङ्कैश्चक्र(ण)नदी नाम सरित्प्रवरा सर्वतःपवित्रीकरोति" भाग० ५।७,११। "चक्रनदी गण्डकी" श्रीधरः।

चक्रनाभि पु० ६त०। चक्रस्य नाभौ। "यावत्यस्तु सिराः काये सम्भवन्ति शरीरिणाम्। नाभ्यां सर्वा निबद्धास्ताः प्रतन्वन्ति समन्ततः। नाभिस्थाः प्राणिनां प्राणाः प्राणास्त्राभिर्व्युपाश्रिता। सिराभिराहता नाभिश्चक्रनाभिरिवारकैः" सुश्रुतः।

चक्रनामन् पु० चक्रात् मक्षिकात्रकात् नाम यस्य। १मात्रिक भातौ ङीषन्च०। तस्य मक्षिकापटलजातत्वात् तथात्वम् २चक्रनामनामके चञ्चुवाके च।

चक्रनायक पु० चक्रं तदाकारं नयति नी-ण्वुल् ६त०। व्याघ्रनखे गन्धद्रव्यभेदे राजनि०।

चक्रपट्टाट पु० चक्रः चक्राकारो दद्रुरोगः पट्टमिव तत्राटति भ्रमति अच् ७त०। चक्रभईरोगे दद्रुघ्ने शब्दर०।

चक्रपद न० "चक्रपदमिह मननमुक्तम्" ह०र० टी० अष्टे नवोदशाक्षरपादे छन्दोभेदे। [६त०] आरम्भे वैद्यकम्।

चक्रपरिव्याध पु० चक्रं दद्रुरोगं परिविध्यति परि+व्यध-घञ्

चक्रपर्णी स्त्री चक्रमिव पर्णमस्या ङीष्। वृश्चिकपर्य्याम् शब्दच०

चक्रपाणि पु० चक्रं पाणावस्य प्रहरणार्थत्वात् सप्तम्याः परनि० अ० बहु०। विष्णौ। "निघ्नन्निमित्तान् समरे चक्रपाणिरिवासुरान्" भा० भी० ४८ अ०। "प्रायेण निष्क्रामति चक्रपाणौ" माघः।

चक्रपाणिदत्त पु० चक्रदत्ताख्यवैद्यकग्रन्थकारके विद्वद्भेदे।

चक्रपाद पु० चक्रं पादइव यस्य। रथे खञ्जयपक्षिः।

चक्रपाल पु० चक्रं पालयति पालि+अण्। सेनापतौ चक्ररक्षके योधभेदे। चक्ररक्षशब्दे दृश्यम्।

चक्रपुष्करिणी चक्रेण खननात् विष्णुना कृता पुष्करिणी। काशीस्थे मणिकर्णिकाख्ये पुष्करिणीभेदरूपे तीर्थे तत्कथा काशीख० २६ अ० यथा

"खनित्वा तत्र चक्रेण रम्यां पुष्करिणीं हरिः। निजाङ्गस्वेदसन्दोहसलिलेनामपूरयत्। समाः सहस्रं पद्माभस्तपश्चक्रेऽतिदुष्करः। चक्रपुष्करिणीतीर्थे तत्र स्थाणुसमाकृतिः" इत्युपक्रमे "त्वदीयचरणाम्भोजमकरन्दमधुव्रतकः। मद्देतोऽमरो भ्रान्तिं विहायास्त्वाशु निश्चलः। त्वदीयस्यास्य तपसो मध्येऽपचयदर्शनाएँ। यन्मया लोचितो मौलिरक्षिभ्यक्षणभूयशः। तदान्दोलनतः कर्णात् पपात मणिकर्णिका। मणिभिः खचिता रम्या ततोऽस्तु मणिकर्णिका। चक्रपुष्करिणीतीर्थं पुरा ख्यातमिदं शुभम्। त्वया चक्रेण खननात् शङ्खचक्रगदाधर!। मम कर्णात् पपातेयं यदा च मणिकर्णिका। ततः प्रभृति लोकेऽत्र ख्यातास्तु मणिकर्णिका"। "अस्मिंस्तीर्थवरे शम्भो! मणिध्वनभूषणे। सन्ध्यां स्नानं जपं होमं वेदाध्ययनसत्तमम्। तर्पणं पिण्डदानञ्च देवतानाञ्च पूजनम्। गोभूतिलहिरण्यानि दीपाच्छाम्बरभूषणम्। कन्यादानं प्रयत्नेन सप्ततन्तूननेकशः। व्रतोत्सर्गं ह्रदोत्सर्गं लिङ्गादिस्थापनं तथा। करोति यो महाप्राज्ञो ज्ञात्वायुः क्षणभङ्गुरम्। विपत्तिं विपुलाञ्चापि सम्पत्तिमतिभङ्गुराम्। अक्षया सुक्रियैकाऽस्तु विपाकस्तस्य कर्म्मणः। अन्यच्चापि शुभं कर्म्म यद्दत्तं श्रद्धया श्रुतम्। विनाशघातमीशान! त्यक्त्वा प्रायोपवेशनम्। नैःश्रेयसाः श्रियो हेतुरस्तु जगदीश्वर!। नातुयोक्ति नाख्याति लत्वा कालान्तरेऽपि यत्। तदिहाक्षयमेवास्तु तस्मेव! त्व दनुग्रहात्। तव प्रसादात्तस्मेव! सर्वमक्षयमस्तु तत्। यदस्ति यद् भविष्यच्च यद्भूतञ्च सदाशिव!। तस्मादेतच्च सर्वस्मात् श्रेयस्तु शुभोदयम्। यथा सदाशिव!

स्ततो न किञ्चिदधिकं शिव !। तथाऽऽनन्दवनादस्मात् किञ्चनास्त्यधिकं क्वचित्। विना सांख्येन योगेन विना स्वात्मावलोकनम्। विना व्रततपोदानैः श्रेयोऽस्तु प्राणिनामिह"। [ अस्यभेदे तिका०।

**चक्रफल** न० चक्रमिव फलमस्य यस्य। चक्राकाराफलयुक्ते

**चक्रबन्धु** पु०ई०। सूर्य्ये हेमच०। चक्रबान्धवादयोऽप्यत्र।

**चक्रभृत्** पु० चक्रं बिभर्त्ति भृ-क्विप् ई०। १सुदर्शनधरे विष्णौ २चक्रास्त्रधारिणि च

**चक्रभेदिनी** स्त्री चक्रौ चक्रवाकौ भिनत्ति वियोजयति भिद्-णिनि ङीप्। रात्रौ तिका० रात्रौ हि तयोर्वियोगात्तथात्वम्।

**चक्रभोग** पु० चक्रस्य राशिचक्रस्य भोगः। "यत्स्थानमारभ्य चलितो ग्रहः पुनस्तत्स्थानमायाति स चक्रभोगः परिवर्त्त संज्ञः" इति सू०सि०टी०रङ्गनाथोक्ते ग्रहाणां राशि चक्रभोगे "तेषान्तु परिवर्त्तेन पौष्णान्ते भगणः स्मृतः" इति सू० सि० टीकायां दृश्यम्।

**चक्रभ्रम** पु० चक्रमिव भ्रमति भ्रम-अच्। कुन्दाख्ये शिल्पिनां यन्त्रभेदे शब्दार्थचि०। ल्युट् चक्रभ्रमिरप्यत्र। भावे ल्युट्। चक्रभ्रमणे चक्रवाकभ्रान्तौ च "किंनु चक्रभ्रमिकारिता गुणः" नैष०।

**चक्रमण्डलिन्** पुंस्त्री० चक्रमिव मण्डलोऽस्यास्य इनि। अजगरसर्पे हेम० स्त्रियां ङीप्। [ भा०मौ०४अ०।

**चक्रमन्द** पु० नागभेदे। "तथा नागौ चक्रमन्दातिषण्डौ"

**चक्रमर्द** पु० चक्रं चक्राकारं दद्रुरोगं मृद्नाति मृद्-अण् उप० स० (दादमर्दन) वृक्षभेदे राजनि०। ण्वुल्। चक्रमर्दकोऽप्यत्र अमरः। "चक्रमर्दोलघुः स्वादुरूक्षः पित्तानिलापहः। हृद्यो हिमः कफश्वासकृमिदद्रुक्रिमीन् हरेत्। फलन्त्वस्य तत्फलं कुष्ठकण्डूदद्रुविषानिलान्। गुल्मकासक्लमिश्वासनाशनं कटुकं स्मृतम्" भावप्र०।

**चक्रमुख** पुंस्त्री चक्रमिव वृत्तं मुखमस्य। शूकरे हारा० स्त्रियां जातित्वात् ङीप्।

**चक्रमुद्रा** स्त्री "दक्षौ तु संमुखौ कृत्वा संलग्नौ सुप्रसारितौ। कनिष्ठाङ्गुष्ठकौ लग्नौ सद्वैधा चक्रसंज्ञिका" तन्त्रसारोक्ते देवपूजनाङ्गमुद्राभेदे।

**चक्रमुषल** पु० चक्रं सुषलञ्च साधनतया अत्राऽस्ति अच्। चक्रसुषलनिष्पाद्ये युद्धभेदे "तत चक्रं हलञ्चैव गदां कौमोदकीमथा। सौनन्दं मुषलञ्चैव वैष्णवान्यायुधानि च। दर्शयिष्यन्ति संग्रामे पाण्डवानि च महीक्षिताम्। रथिरं कालयुक्तानां वपुभिः कालसन्निभैः। स चक्रमुषलो नाम संग्रामः कृष्ण! विश्रुतः। दैवतैरिह निर्दिष्टः कालः स्यादेष संस्थितः" हरि०६६अ०। चक्रेण निर्वृत्तम् अण्। चाक्र तद्विहिते युद्धे "चाक्रं मौषलमिदेवं संग्रामं रथवित्तमाः। कथयिष्यन्ति लोकेऽस्मिन् ये भरिष्यन्ति पार्थिवाः" हरि० १०अ०।

**चक्रयान** न० चक्रयुक्तं यानम्। चक्रयुक्ते याने रथादौ। "अस्त्री पुंस्य(म्य)रथक्रयाणं न समराय यत्" अमरः।

**चक्ररक्ष** पु० चक्रं रक्षति अण् उप० स०। युद्धे सेनापतिचक्ररक्षके योधभेदे। "भाद्रेयौ चक्ररक्षौ तु फाल्गुनश्च तदाऽकरोत्" भा०आ०१३८अ०। "यमौ च चक्ररक्षौ ते भवितारौ महाबलौ" भा० वि० २३अ०। "चक्ररक्षश्च शूरोवै मदिराक्षोऽतिविश्रुतः" २३अ०। स्वुल् चक्ररक्षकोऽप्यत्र। [ जातित्वात् ङीप्।

**चक्ररद** पुंस्त्री चक्रमिव दन्तोरदोऽस्य। शूकरे तिका० स्त्रियां

**चक्रलक्षणा** स्त्री चक्रे मण्डलाकारकृते लक्षणं प्रतीकार साधनरूपं चिह्नमस्य। गुडूच्याम् रत्नमा०।

**चक्रलताम्र** पु० चक्र-तृप्तौ करणे रक् चक्रः तृप्तिसाधनं लताम्रः। हृद्वरसालवृक्षे राजनि० [ फलाभेदे अमरः।

**चक्रला** स्त्री चक्रं दद्रुरोगं लाति ला-क। उच्चटायाम्

**चक्रलिप्सा** स्त्री इत०। राशिचक्रस्य कलारूपे भागभेदे कलाच २१६०० मिताः। तथाहि द्वादशराश्यात्मकचक्रस्य एकैकराशेस्त्रिंशांशात्मकत्वात् ३६० अंशात्मकं राशिचक्रम् अंशच ६० कलामितः तदङ्कस्य षष्ट्या गुणने २१६०० कलाभवन्ति इति कलापर्य्यायलिप्तानां तावन्मितत्वम्।

**चक्रवत्** त्रि० चक्रमस्यास्य मतुप् मस्य वः। १चक्रास्त्रयुक्ते स्त्रियां ङीप्। २तैलिके च। "सुनाचक्रध्वजवतां वेशेनैव च जीवताम्" मनुः। "सुनावान् पशुमारणपूर्व्वकमांसविक्रयजीवी। चक्रवान् बीजवधविक्रयजीवी तैलिकः ध्वजवान् मद्यविक्रयजीवी शौण्डिकः" कुल्लूकः। चक्रं तदाकारोऽस्यास्य। चक्राकारसदृशाकारयुक्ते २पर्व्वतभेदे पु०। "तत्रैव चक्रसदृशं चक्रवत्तं महाचलम्। सङ्कटं विपुलं भगवान् संन्यवेशयत्" हरिवं० २२५अ०।

**चक्रवर्त्तिन्** पु० चक्रे भूमण्डले, वर्त्तितुं, चक्रं सैन्यचक्रं वा सर्व्वभूमौ वर्त्तयितुं शीलमस्य इत-इत्-णिच्-णिनि। १समुद्रपर्य्यन्तक्षितेरधीश्वरे, अमरः २वासुदेवांशके राजनि०। ३जटुकायां शब्दार्थचि० ५जटामांसाम् ४अलक्तके च स्त्री ङीप् राजनि०। ५जटामांस-

गन्धद्रव्ये स्त्री अमरः चक्र इव वर्त्तते। चक्रवाकतुल्येति॰ "तव तन्वि ! कुचावेतौ नियतं चक्रवर्त्तिनौ। आसमुद्रक्षितीशोऽपि भवान् यत्र करग्रहः" उद्भटः। "यत्रचक्रवर्त्तित्वमवाप वीरः स्वैः कर्म्मभिः शक्रसमप्रभावः" हरिवं॰१।४अ॰। "इन्द्रैर्गजानां गिरिचक्रवर्त्ती" कुमा॰। "जन्म यस्य पुरोर्वंशे युक्तरूपमिदं तव। पुत्रमेवं गुणोपेतं चक्रवर्त्तिनमाप्नुहि" शकु॰। "विद्याधरराज्यमिव चक्रवर्त्तिनरवाहनोचितम्" काद॰।

चक्रवाक पु॰स्त्री॰ चक्रशब्देन उच्यते वच-परिभाषणे कर्मणि घञ् न्यङ्क्वा॰ कुत्वम्। खनामख्याते खगे अमरः। "परस्पराक्रन्दिनि चक्रवाकयोः पुरोवियुक्ते मिथुने कृपावती" कुमा॰। स्त्रियां जातित्वात् ङीष्। "वरुणाय चक्रवाकीम्" यजु॰ २४।२२। "सरिदपरतटान्नादागता चक्रवाकी" माघः। "दूरीभूते मयि सहचरे चक्रवाकीमिवैकाम्" मेघ॰।

चक्रवाकवती स्त्री चक्रवाकाः भूम्ना सन्त्यत्र मतुप् मस्य वः ङीप् व्यजिरा॰ संज्ञायामपि न दीर्घः। वङ्गचक्रवाकयुक्ते नदीभेदे।

चक्रवाट पु॰ चक्रस्येव वाटोऽत्र वट-वेष्टने घञ्। १क्रियारोढे कर्म्मारम्भे २पर्य्यन्ते ३शिखातरौ च मेदि॰।

चक्रवाड(ल) पु॰चक्रमिव वाडते वेष्टयति वाड-अच् वा डस्य लः चक्रमिव वलते वल वा॰ण लस्य वा डः। १लोकालोकपर्व्वते। २मण्डले न॰अमरः। लोकालोकपर्व्वतस्य भूमण्डलवेष्टनाकारेण स्थितत्वात् तथात्वम्। ३मण्डलाकारेण वर्त्तिनि समूहमात्रे च "किरीटहाराङ्गदचक्रवाडैर्विभूषिताङ्गाः पृथुबाहवस्ते" भा॰ आ॰ १८७अ॰। "एवं स कृष्णो गोपीनां चक्रवालैरलङ्कृतः" हरिवं॰ ७७अ॰। वलधातोर्वाडधातोर्वा अनःस्यादिलेन वर्म्यादित्वाभावात् वस्य शब्दस्य वर्म्यमध्यत्वकल्पनं ग्रामादिकमेव।

चक्रवात पु॰ चक्रमिव वातः। (घुर्णी)। भ्रमिवायौ वात्यायाम्। "दैत्योनाम्ना हयावर्त्तः कंसस्यैवः प्रचोदितः। चक्रवातस्वरूपेण जहारासीनमर्भकम्" भाग॰ ७।१८श्लो॰

चक्रवृद्धि स्त्री चक्रमिव वृद्धिः। "वृद्धेरपि पुनर्वृद्धिश्चक्रवृद्धिरुदाहृता" इति नारदोक्ते १वृद्धिभेदे। तल्लक्षणादिप्रकारः मनुना दर्शितो यथा "नातिसांवत्सरीं वृद्धिं नवाददीत कुसीदवित्। चक्रवृद्धिः कालवृद्धिः कारिता कायिका च या। ऋणं दातुमशक्तोयः कर्त्तुमिच्छेत् पुनः क्रियाम्। स दत्त्वा निर्जितां वृद्धिं करणं परिवर्त्तयेत्। अदर्शयित्वा तत्रैव स्थिरणं परिवर्त्तयेत्। यावतो सम्भवेद् वृद्धिस्तावतीं दातुमर्हति"। "मासेकस्त्रिंशदाख्यो मासवृद्धे मासवृद्धे वा गते तस्य वृद्धिः विगण्य्य एकदा दातव्येत्येवं विधि नियमपूर्व्वकवृद्धिग्रहणमुत्तमर्णः संवत्सरपर्य्यन्तं कुर्य्यात् नातिक्रान्ते संवत्सरे वृद्धिं स्थापयेत् न च शास्त्रोक्तधर्म्यवृद्धिकक्रियताद्यधिकां स्थापयेत्। अधर्म्यत्वबोधनार्थो निषेधः। चक्रवृद्ध्यादिचतुर्य्यो चाशास्त्रीयां न स्थापयेत्। तासां स्वरूपमाह वृद्धस्मृतिः "कायिका कायसंयुक्ता मासमाहुश्च कालिका। वृद्धेर्द्विगुणवृद्धिः कारिता ऋणिना कृता"। तत्र चक्रवृद्धिः स्वरूपेणैव गर्हिता। कालवृद्धिस्तु द्विगुणाधिकग्रहणेन। कायिका चातिवाहदोहादिना। कारिता ऋणिकेन या आपत्काल एव उत्तमर्णपीड़या कृता। चतस्रोऽपि वृद्धीरशास्त्रीया न स्थापयेत्। तथा च वृद्धस्मृतिः "भागो यद्गुणवृद्धिं चक्रवृद्धिश्च स्थाप्यते। पूर्णे च सोदयं पश्चात् वार्द्धुष्यं तद्विगर्हितम्"। कात्यायनः "ऋणिकेन कृता वृद्धिरधिका सम्यक्कल्पिता। आपत्कालकृता नित्यं दातव्या कारिता तथा। अन्यथा कारिता वृद्धिर्न दातव्या कथञ्चन"। ऋणं दातुमिति। अधमर्णो धनदानासामर्थ्यात् यदि पुनर्लेख्यादिक्रियां कर्त्तुमिच्छेत् स निर्ज्जितां उक्तमार्गेण सत्यतया आत्मसात् कृतां वृद्धिं दत्त्वा करणं लेख्यं पुनः कुर्य्यात्। अदर्शयित्वेति। यदि देवगत्या वृद्धिस्थिरणमपि समग्रं दातुं न शक्नोति तदा तद् स्थापयित्वैव तत्रैव पुनः क्रियमाणे लेख्यादौ वृद्धिस्थिरणादिशेषमारोपयेत्। यत्प्रमाणं चक्रवृद्धिधनं तदानीं सम्भवति तदातुमर्हति" कुल्लू॰।

चक्रमस्यास्त्यत्र चक्रं चक्रवच्चक्रटादि तद्विशिष्टा वृद्धिः। २शकटादिभाटकरूपलाभे च। "चक्रवृद्धिं समारूढो देशकालव्यवस्थितः। अतिक्रामन् देशकालौ न तत्फलमवाप्नुयात्" मनुः। "चक्रवृद्धिमिति। चक्रवृद्धिशब्देनात्र चक्रवच्छकटादिभाटकरूपा वृद्धिरभिमता चक्रवृद्धिमाश्रित उत्तमर्णो देशकालव्यवस्थितः। यदि वाराणसीपर्य्यन्तं लवणादि शकटेन पठामि तदा समेष्यद्दिनं दातव्यमिति देशव्यवस्थितिः। यदि मासं यावद्वहामि तदा समेष्यद्दिनं दातव्यमिति कालव्यवस्थितिः एवमभ्युपगतदेशकालौ नियमस्थौ दैवादपूरयन् शकटादिनाऽवहन् लाभरूपफलं सकलं न प्राप्नोति" कुल्लू॰।

चक्रव्यूह पु० चक्राकारः व्यूहः। चक्राकारे सेनासन्निवेशभेदे चक्रशब्दे दृश्यम्।

चक्रशल्या स्त्री चक्रमिव शल्यमस्य। श्वेतगुञ्जायां राजनि०

चक्रश्रेणी स्त्री चक्राणां श्रेणिरत्र ङीप्। अलङ्कारभेदे रत्नमाला तस्याःफलानां चक्राकारत्वरूपतया जातित्वा त्तथात्वम्। [ २चक्रवाके अमरः।

चक्रसंज्ञ न० चक्रस्य संज्ञा संज्ञास्य। १वङ्गे धातुभेदे हेमच०

चक्रसंवर पु० चक्रमिन्द्रियचक्रं संवृणोति वृ+अच्। बुद्धभेदे त्रिका०।

चक्रसक्थ त्रि० चक्रमिव सक्थि अस्य अच् पचः षित्त्वेन नित्यमन्तोदात्तता "सक्थ्यक्ष्णश्चक्रान्नात्" पा० चक्रान्नप्रतिषेधात् न विभाषयाऽन्तोदात्तता। चक्रतुल्यसक्थियुक्ते।

चक्रसाङ्क्य पुंस्त्री० चक्रेण समाना आङ्का यस्य। चक्रवाके "चकोरान् वानरान् हंसान् सारसान् चक्रसाङ्क्यान्" भा० आनु० ५४अ०। जातित्वेऽपि योषधत्वात् स्त्रियां टाप्।

चक्रहस्त पु० चक्रं हस्तेऽस्य। १चक्रपाणौ विष्णौ २चक्रधारिमात्रे त्रि०। [ङ्प्राङ्च राजनि०।

चक्रा स्त्री चक्र-टाप्। १नागरङ्गायां, २कर्कटशृङ्ग्यां

चक्रांग पु० चक्रस्य राशिचक्रस्यांशः। राशिचक्रस्य २६०० षष्ट्युत्तरशतत्रयात्मके भागे।

चक्रा(की)ङ्गी स्त्री चक्राकारेणाकृतिरङ्गेऽवा अक-गतौ अकिङ् गतौ अच् गौरा० ङीष्। हंसायां शब्दरत्ना०।

चक्राङ्ग पु० चक्रमिवाङ्गं चक्रमिवाङ्गं यस्य। १हंसे। स्त्रियां जातित्वात् ङीष्। चक्रमङ्गमस्य। २रथे अमरः। "इदमूचुश्च चक्राङ्गा वचः काकं विहङ्गमाः" भा० कर्ण० ४१अ० हंसकाकोक्ते। ३चक्रवाके "कलविङ्कं ध्रुवं हंसं चक्राङ्गं ग्रामकुक्कुटम्" मनुः अभक्ष्यमांसोक्तौ। हंसस्य पृथगुपादानादस्य चक्रवाकार्थता। [लतायां रत्नमाला।

चक्राङ्गा स्त्री चक्रमिवाङ्गमस्त्रायाः अच्। सुदर्शनायां

चक्राङ्गी स्त्री चक्रमिव चक्रं हस्तिकरमङ्गं यस्याः ङीप्। १कटुरोहिण्याम् मेदि०। २हंसायां शब्दर०। ३हिज्जलोचिकायां त्रिका०। ४मक्षिकायां ५हस्तिपर्ण्यां च राजनि०। ६कर्कटशृङ्ग्यां रत्नमा०।

चक्राट पु० चक्रं चक्राकारमटति अट-अण् उप० स०। १विष्णवेद्ये २चक्रे ३दीनारे परिमाणभेदे च मेदि०।

चक्राधिवासिन् पु० चक्रं हस्तिकरमधिवासयति अधि+वासि णिनि। हस्तिकरसौरभयुक्ते नागरङ्गवृक्षे(नारेङ्गानेबु)त्रिका०।

चक्रायुध पु० चक्रमायुधमस्य। १विष्णौ "चक्रायुधेन चक्रेण पिबतोऽस्रमोजसा। शिरस्त्रिचक्रम्" भा०आ०१६२अ०। २चक्रास्त्रधारिमात्रे चक्रप्रहरणादयोऽप्यत्र।

चक्रावर्त्त पु० चक्रमेवावर्त्तः। घूर्णने हेमच०।

चक्राङ्क पु० चक्रेति आङ्का यस्य। १चक्रमर्दे राजनि०। २चक्रवाके च।

चक्रि त्रि० कृ-कि इत्वम्। करणशीले "चक्रिं विश्वानि चक्रये" ऋ० ११६१२। विश्वानीत्यत्र क्रियोगे षष्ठी निषेधात् कर्म्मणि द्वितीया। [राजनि०।

चक्रिका स्त्री चक्रं तदाकारोऽस्यस्याः ठन्। जानुनि

चक्रिन् पु० चक्रमस्त्यस्य इनि। १विष्णौ २ग्रामजालिके ३चक्रवाके ४सर्पे पुंस्त्री०। ५कुलाले ६क्षुद्रचक्रे त्रि० मेदि०। ७अजे पुंस्त्री० ८तैलिके शब्दर०। चक्रं राष्ट्रचक्रं स्वत्वेनास्त्यस्य इनि। ९चक्रवर्त्तिनि हेमच०। १०चक्रमर्दे तस्य तदाकारपत्रत्वात्। ११तिलिङ्गे १२व्याजनखे पु० १३काके १४गर्दभे च पुंस्त्री० राजनि०। तयोश्चक्रवद्भ्रमणवत्त्वात्तथात्वम्। १५चक्रयुक्ते त्रि० सर्व्वत्र स्त्रियां ङीप्। १६चक्रयुक्तरथाद्यारूढे त्रि०। "चक्रिणोदग्मीस्यस्" मनुः। "चक्रिणः चक्रयुक्तरथाद्यारूढस्य" कुल्लू०। "वैश्यायां शूद्रतश्चौराज्जातश्चक्री स उच्यते" उशनसोक्ते १७संकीर्णजातिभेदे पुंस्त्री०। "पदं मरुन्द्रालयचारु चक्रिणः" माघः। विष्णोश्च मनस्त्वात्मकचक्रस्य लोकरक्षार्थं सुदर्शनचक्रस्य वा धारणात् तथात्वम्। अतएव "अरौद्रः कुण्डली चक्री" "शङ्खचक्रधरो विष्णुः" इत्यादौ चक्रीशब्दस्य द्विधा प्रयोगः अवयवार्थभेदाभ्यामिति बोध्यम्।

चक्रीवत् पुंस्त्री० चक्रं तद्भ्रमणमस्त्यस्य मतुप् आसन्दीवदित्वा० पा० नि०। १गर्दभे अमरः। "चक्रीवदङ्गरुद्ध्वरुचो विसस्रुः" माघः। २राजभेदे पु० स्त्रि०कौ०। वैदिकप्रयोगे ३चक्रयुक्तमात्रे च। "सदोऽविधानानि चक्रीवन्ति" कात्या० श्रौ० २४।२१।१०। सदोऽविधानानग्नीध्राणि चक्रीवन्ति" २४।५।२६। स्त्रियां सर्व्वत्र ङीप्

चक्रु त्रि० कृ-कु इत्वञ्च। कर्त्तरि उज्ज्वलद०।

चक्रेश्वरी स्त्री ६त०। १जिनानां विद्याभेदे २राष्ट्रेश्वरे पु०।

चक्रोपजीविन् त्रि० चक्रं तैलनिष्पीडनयन्त्ररूपजीवति उप जीव-णिनि। तैलिके।

चच कथने त्यागे च चदा० आत्म०सक०सेट्। चष्टे। अचख्यत् अचख्यत त्यागे तु समुच्चिष्ट चस्रौ चस्रे चच्चे। भाव्यते अचक्षासोत् अचक्षास्त। चक्रौ चक्रे।

अनु+यथादृष्टं "परावतीं मातरमन्वचष्ट" ऋ० ४।१८।३।
अभि+आभिमुख्येन दर्शने "कदा चिकित्वो अभिचक्षसे नः" ऋ० ५।३।६।
अव+अधोदर्शने। "सुपर्णोऽवचक्षत क्ष्मां सोमः" ऋ०९।७१।६।
आ+आख्याने। "विचक्षणः प्रस्तुतमाचचक्षे। "स रावणश्छद्मतां ताभ्यां वचसाचष्ट मैथिलीम्" रघुः। [२।४।४।२।
अनु+आ+अन्वाख्याने "एतमेव तदन्वाचक्षते" शत० ब्रा०
अभि+आ+आभिमुख्येनाख्याने। "अभ्याचष्टानुरागामुरेरभ्योभूतेन चक्षुषा" भाग० १।६।११। "अभ्याचष्टुं प्रचक्रमे" ८।५।१४। [शत० ब्रा० ३।३।३।४।
उद्+आ+उदाहरणे "तस्मादध्वर्युरेव गोर्वीर्याण्युदाचष्टे"
प्रति+आ+प्रत्याख्याने निराकरणे "गुरुप्रतीति कृत्वाऽहं प्रत्याचक्षे न दोषतः" भा० आ०७७अ०।
वि+आ+व्याख्याने विवरणे। "व्याचक्षाणस्य तु मे निदिध्यासस्व" शत० ब्रा० १४।५।४।४।
सम्+आ+सम्यगाख्याने। "तत्सत्यं नः समाचक्ष्व" भाग०१।४।२। [परिचक्षते" मनुः।
परि+परितः कथने विख्यातौ "वेदप्रदानादाचार्यं पितरं प्र+प्रकर्षेण कथने विख्यातौ। "तं देवनिर्मितं देशं ब्रह्मावर्त्तं प्रचक्षते" मनुः "दहति प्रेतमिति प्रचक्षते" रघुः।
प्रति+प्रत्युत्तरोक्तौ प्रतिरूपोक्तौ च "यदा तु सर्व्वभूतेषु दारुण्यग्निमिव स्थितम्। प्रतिचक्षीत मां लोकः" भाग०३।६।३।
वि+विशेषेण कथने विख्यातौ "विद्वं विचक्षते धीराः योगराद्धेन चक्षुषा" भाग० ३।११।१७। विचक्षणः।
सम्+सम्यक्कथने। "मेरोरन्यतरे पार्श्वे पूर्व्वं संचक्ष सञ्जय!" भा० भी०७अ०।

चक्षण न०चक्ष-ल्युट् न ख्यादेशः। १अनुग्रहेण दर्शने "कृष्णस्य चक्षणम्" ऋ० १।१०५।६। "चक्षणमदुग्धदर्शनम्" भा०। २कथने च। करणे ल्युट्। ३अपदंशे मद्यपानादिरोचके (चाकना) द्रव्यभेदे हेमच०।

चक्षणि त्रि० चक्ष-अनि। प्रकाशके। "स नो विभावा चक्षणिर्नमस्यः" ऋ०६।४।२। [२उपाध्याये उणादिकोषः।

चक्षस् पु० चक्ष-असि न ख्यादेशः। १हरिणस्तौ त्रिका०।

चक्षःश्रवस् पुंस्त्री० चक्षुषा शृणोति शु-असुन्, चक्षुरेव श्रवः कर्णौ यस्य वा। सर्पे अमरः। "यदस्तदाकर्णिफलाद्गुणीवितं दधोद्यं नस्तदवीचि चाफलम्। इति स्म चक्षुःश्रवसां प्रिया नसे स्रुवन्ति निन्दन्ति क्षुदा तदाक्षनः" नैष०।

चक्षुर्मल न० ६त०। (पिचुटि) नेत्रमले शब्दार्थचि०।

चक्षुर्वर्द्धनिका स्त्री शाकद्वीपस्थे नदीभेदे। "महानदी च कौरव्य! तथा मणिजला नदी। चक्षुर्वर्द्धनिका चैव नदी भरतसत्तम!" भा०भी० ११अ०। [रत्नमा०।

चक्षुर्वर्द्धन न०चक्षुसञ्ज्ञोर्तिवर्द्धति वर्द्ध-ल्यु। १मेषशृङ्गीवृक्षे

चक्षुर्विषय पु० ६त०। १चक्षुर्ग्राह्ये रूपादौ। स च भाषा०उक्तो यथा "उद्भूतरूपं नयनस्य गोचरो द्रव्याणि तद्वन्ति पृथक्त्वसंख्ये। विभागसंयोगपरापरत्वे स्नेहं द्रव्यत्वं परिमाणयुक्तम्। क्रियां जातिं योग्यवृत्तिं समवायञ्च तादृशम्। यद्गृह्यति चक्षुः, रूपवदादालोकोद्भूतरूपयोः"। २नेत्रप्रचारस्थाने च "गुरोस्तु चक्षुर्विषये न यथेष्टासनो भवेत्" मनुः।

चक्षुर्हन् त्रि० चक्षुषा हन्ति हन-क्विप् ३त०। दृष्टिमात्रेण घातिनि "सर्पस्पर्शसमाः केचित्तथान्ये मकरस्वराः। विभाव्य घातिनः केचित्तथा चक्षुर्हणोऽपरे" भा०आनु० ३६अ०। "त्वां ते चक्षुर्हणं प्राप्य दग्धा घोरेण चक्षुषा" भा०भी० १२२अ०।

चक्षुष्मत् त्रि० प्रशस्तं चक्षुरस्यास्य मतुप्। प्रशस्तनेत्रयुक्ते "चक्षुष्मता तु शास्त्रेण सुपरीक्ष्यार्थदर्शिना" रघुः।

चक्षुष्य त्रि० चक्षुषे हितः यत्। १चक्षुर्हिते २प्रियदर्शने जटा०। ३केतकवृक्षे ४पुण्डरीकवृक्षे पु० मेदि० ५योगाङ्गनद्धे पु० राजनि० ६रसाञ्जने हेमच०। ७सौवीराञ्जने ८खर्परीवृक्षे ९मयूरशिखरोके च न० राजनि०। "शीतेन शिरसः स्नानं चक्षुष्यमिति निर्दिशेत्" सुश्रु०। "चक्षुष्यः स्रुतो भवति य एवं वेद" छा० उ०। चक्षुषि भवः शरीरावयवत्वात् यत्। १०नेत्रजाते त्रि०। "चक्षुष्यः खलु महतां परैरलङ्घ्यः" माघः। "चक्षुष्यः अञ्जिः प्रियश्च। "प्रियेऽञ्जिः स्त्री चक्षुष्य" इति विश्वः" मल्लि०।

चक्षुस् न० चक्ष-धातुनामनेकार्थत्वात् दर्शने करणे असि। १नेत्रे तच्च चाक्षुषज्ञानसाधनमिन्द्रियभेदः अक्षिशब्दे ४५ पृ० दृश्यम् तस्य तैजसत्वं सङ्गा० समर्थितं यथा "चक्षुस्तैजसं परकीयस्वर्गाद्यव्यञ्जकत्वे सति परकीयरूपव्यञ्जकत्वात् प्रदीपवत् प्रदीपस्य स्वीयस्वर्गव्यञ्जकत्वादाद्यं परकीयेति घटादेः स्वीयरूपव्यञ्जकत्वात् व्यभिचारवारणाय द्वितीयं परकीयेति वाच्यं अथवा प्रभावद्दृष्टान्तत्व सम्भवादाद्यं परकीयं न देयम्" चक्षुःसन्निकर्षे नयात्यवारणाय द्रव्यत्वे सतीति वाच्यम्"। चक्षुषोऽधिष्ठातृदेवः

सूर्यः। "दिवातार्कं प्रचेतोद्वीत्यादि" भा०ति०उक्तेः। २तेजसि च। सूर्यश्चक्षुषे" ताण्ड० ब्रा०। चक्षुषे तेजसे" भा०।

**चक्षुषा** स्त्री चक्षुषे हिता यत्। १शुभगायां स्त्रियां २कुलत्थिकायां मेदि०। ३अजशृङ्ग्राम् ४घनकुलत्थिकायाञ्च राजनि०।

**चक्षूराग** पु० चक्षोरागः रक्तता। १नेत्ररक्ततायां चक्षुषः तदाकर्षकः रागः अनुरागः। २नेत्राकर्षके अनुरागे "चक्षूरागः कोकिलेषु (न परकलत्रेषु)" काद०।

**चक्षूरोग** पु० ६त०। नेत्ररोगे नेत्रावयवविभागः सुश्रुतोक्तः अक्षिशब्दे ४५ पृ०दर्शितः। तत्र निदानादि सुश्रुते उक्तं "उष्णाभितप्तस्य जलप्रवेशाद्रूक्षणात् सप्रविपर्य्ययाच्च। प्रसक्तसंरोदनशोककोपक्लेशाभिघातादतिमैथुनाच्च। शुक्लारनालाम्लकुलत्थमाषनिषेवणाद्वेगविनिग्रहाच्च। स्वेदाद्रजोधूमनिषेवणाच्च ऊर्द्ध्वविघाताद्दमनातियोगात्। वाष्पग्रहात्सूक्ष्मनिरीक्षणाच्च नेत्रे विकारान् जनयन्ति दोषाः। वाताद्दश तथा१० पित्तात् कफाच्चैव त्रयोदश। रक्तात् षोडश विज्ञेया सर्वजाः पञ्चविंशतिः। तथा बाह्यौ पुनर्द्वौ च रोगाः षट्सप्ततिः स्मृताः। कृताधिमन्थोऽनिमिषो दृष्टिसंम्मीलिका च या। यच्च वातेरितं वर्त्म न ते सिध्यन्ति वातजाः। याप्योऽथ तन्मयः काचः साध्याः स्युः सान्यमारुताः। शुक्लाक्षिपाकाधीमन्थस्यन्दमारुतपर्य्ययाः। असाध्योत्सन्नजालो यो जलस्रावश्च पैत्तिकः। परिस्रावी च नीलश्च याप्यः काचोऽथ तन्मयः। अभिष्यन्दोऽधिमन्थोऽन्ध्याधुषितं शुक्तिकाह्वया। दृष्टिः पित्तविदग्धा च पोथकी लगणश्च यः। असाध्यः कफजस्रावो याप्यः काचोऽथ तन्मयः। अभिष्यन्दोऽधिमन्थश्च बलासग्रथितश्च यत्। दृष्टिः श्लेष्मविदग्धा च पोथकी लगणश्च यः। क्लिमिग्रन्थिपरिक्लिन्नवर्त्मशुक्लार्म्मपिष्टकाः। श्लेष्मोपनाहः साध्यस्तु कथिताः श्लेष्मजेषु तु। रक्तस्रावोऽजकाजातं शोणितार्शोऽवलम्बितम्। शुक्रं न साध्यं काचश्च याप्यसञ्ज्ञः प्रकीर्त्तितः। मन्थस्यन्दौ क्लिष्टवर्त्मकर्शौत्पातौ तथैव च। सिराजालावबद्धाक्षी सिराजालञ्च यत् स्मृतम्। पर्वण्यवाञ्चणं शुक्लं शोणिताभ्यञ्जनश्च यः। एते साध्या विकारेषु रक्तजेषु भवन्ति हि। पूयस्रावो नाकुलाख्यश्चिरपाकात्ययोऽलजी। असाध्याः सर्वजा याप्याः काचः कोपश्च पक्ष्मणः। वर्त्मावबन्धो यो व्याधिः सिरासु पिडका च या। प्रस्तार्यर्म्मोधिमांसार्म्मसाख्यर्म्मोत्क्लिन्नी च या। पूयालसकार्बुदञ्च श्यावकर्दमवर्त्मनी। तथार्शोवर्त्म शुक्लार्मः शर्करावर्त्म यच्च वै। सशोफस्राव्यशोफश्च पाको बहलवर्त्म च। क्लिष्टवर्त्म कृम्भीका विसवर्त्म च सिध्यति। सनिमित्तो ऽनिमित्तश्च द्वावसाध्यौ तु वाहजौ। षट्सप्ततिविकाराणामेषा संग्रहकीर्त्तना। नव सन्ध्याश्रयास्तेषु वर्त्मजास्त्वेकविंशतिः। शुक्लभागे दशैकश्च चत्वारः कृष्णभागजाः। सर्व्वाश्रयाः सप्तदश दृष्टिजा द्वादशैव तु। वाहजौ द्वौ समाख्यातौ रोगौ परमदारुणौ। भूय एतान् प्रवक्ष्यामि सङ्क्षेपरुचिकाङ्क्षितैः"।

"अथातः सन्धिगतरोगविज्ञानीयमध्यायं व्याख्यास्यामः। पूयालसः१ शोफनाहः२ स्रावः ३।४।५।६ पर्वणिकालजौ ७।८। क्लिष्टन्यिवर्त्म विज्ञेया रोगाः सन्धिगता नव। पक्वः शोफः सन्धिजः संस्रवेद्यः सान्द्रं पूयं पूति पूयालसः१ सः। ग्रन्थिर्नाम्नो दृष्टिसन्धावपाकः कण्डूप्रायो नीरुजस्तूपनाहः२। गत्वा सन्धीनसृगार्गेण दोषाः कुर्युः स्रावान् स्रन्थिहीनान् स्वलिङ्गान्। तान् वै स्रावान् नेत्रनाडीमथैके तस्या लिङ्गं कीर्त्तयिष्ये चतुर्द्धा। पाकः सन्धौ संस्रवेद्यश्च पूयं पूयास्रावो२ नैकरूपः प्रदिष्टः। श्वेतं सान्द्रं पिच्छिलं यः स्रवेच्च श्लेष्मास्रावो नीरुजः स प्रदिष्टः। रक्तास्रावः३ शोणितोत्थः सरक्तं कोष्णं नाल्पं संस्रवेन्नातिसान्द्रम्। पीताभासं नीलसृग्जं जलाभं पित्तस्रावं४ संस्रवेत् सन्धिमध्यात्। ताम्रा तन्वी दाहशूलोपपन्ना रक्तात्तेया पर्वणी७ दुष्टशोफा जाता सन्धौ कृष्णशुक्ले ऽलजी८ ख्यातलिङ्गे व्याख्यापिता पूर्वलिङ्गैः। क्लिमिग्रन्थिवर्त्मनः पक्ष्मणश्च कण्डूं कुर्युः क्लमयः९ सन्धिजाताः। नानारूपा वर्त्मशुक्लस्य सन्धौ चरन्तोऽनर्त्तनं दूषयन्ति।" "अथातोवर्त्मगतरोगविज्ञानीयमध्यायं व्याख्यास्यामः। पृथग्दोषाः समस्ताश्च यदा वर्त्मव्यपाश्रयाः। सिरा व्याप्यावतिष्ठन्ते वर्त्मस्वधिकमूर्च्छिताः। विवर्द्धयं मांसं रक्तञ्च तदा वर्त्मव्यपाश्रयान्। विकारान् जनयन्त्याशु तानतस्तान्निबोधत। उत्क्लिन्नग्रन्थिः कृम्भीका२ पोथकी३ वर्त्मशर्करा४। तथार्शोवर्त्म५ शुक्लार्शस्तथैवाञ्जननामिका७। बहलवर्त्म८ यद्यपि व्याधिर्वर्त्मावबन्धकः९। क्लिष्टकर्दमवर्त्मौ१० श्यामवर्त्म११ तथैव च। प्रक्लिन्न१२ मपरि-

क्लिष्टं१२ वर्त्म१३ पातहृतं१५तु यत्। अर्बुदं१६ निमिष१७पि शोणितार्श१८च यत् कृतम्। लगणो१९ विसनामा२० च पक्ष्मकोप२१स्तथैव च। एकविंशतिरित्येते विकारा वर्त्मसंश्रयाः। नामभिस्तै समुद्दिष्टा लक्षणैस्तान् प्रचक्षते। पिडकास्वन्तरस्रस्वी बाह्याधोवर्त्मसंश्रया। चित्तेयोत्सङ्गिनी१ नाम तद्वत्पिडकान्विता। कृम्मीकबीजप्रतिमाः पिडकाः पक्ष्मवर्त्मनोः। आध्मायन्ते तु भिन्ना याः कृम्मीकपिडकासु ताः२। कण्डूस्रावान्विता शुक्लैरक्तसर्षपसन्निभाः। पिडकाश्च क्षुजावन्तः पोथकि३ इति संज्ञिताः। पिडकाभिः समाक्षुद्राभिर्नाभिरभिसंवृता। पिडका या खरा स्थूला सा ज्ञेया वर्त्मशर्करा४। क्षुद्राः खराश्च वर्त्मस्थास्तद्वत्तौ वर्त्म५ कीर्त्यते। दीर्घोऽङ्कुरः खरः स्तब्धो दारुणो वर्त्म सम्भवः। व्याधिरेष समाख्यातः शुष्कार्श६ इति संज्ञितः। दाहरुजावती ताम्रा पिडका वर्त्मसम्भवा। स्निग्धा मन्दरुजा क्षुद्रा ज्ञेया सा श्लेष्मनामिका७। वर्त्मोष्मचो यते यस्य पिडकाभिः समन्ततः। सवर्णाभिः समाभिश्च विद्याद्दृढवर्त्म८ तत्। कण्डूमताक्षतोदेन वर्त्मशोफेन यो नरः। न समं लादयेदक्षि भवेद्वम्यः९ स वर्त्मनः। स्वल्पस्रवेदनं ताम्रं यद्वर्त्म समेव च। अरुणाभ्रं भवेद्रक्तं क्लिष्टवर्त्म१० तदादिशेत्। क्लिष्टं पुनः पित्तयुक्तं विद्धेच्छोणितं यदा। तदा क्लिन्नत्वमाप्नुवन्ति वर्त्मकर्दमम्११। यद्वर्त्म बाह्यतोऽन्तश्च श्यावं स्तब्धं सवेदनम्। दाहकण्डूपरिक्लेदि श्यामवर्त्मेति१२ तन्मतम्। अरुजं बाह्यतः स्तब्धमन्तः क्लिष्टं सवर्त्मपि। कण्डूनिस्तोदभूयिष्ठं क्लिष्टवर्त्म१३ तदुच्यते। यस्य धौतानि धौतानि सम्बध्नन्ति पुनः पुनः। वर्त्मान्यपरिपक्वानि विद्यात्क्लिन्नवर्त्म१४ तत्। विसक्तसन्निविष्टं वर्त्म यच्च निमीलयते। एतद्घातहृतं१५ विद्यात् सरुजं यदि वाऽरुजम्। वर्त्मान्तरस्थं विषमं ग्रन्थिभूतमवेदनम्। विद्येयमर्बुदं१६ पुंसां सरक्तमवलम्बितम्। निमेषप्रभृतिं सिरा वायुः प्रविश्य वर्त्मसंश्रयाः। चालयेदतिवर्त्मानि निमेष१७ स गदो मतः। छिन्नाच्छिन्ना विवर्त्मान्ते वर्त्मस्था स्रवतोऽङ्कुराः। दाहकण्डूरुजोपेतास्तेऽर्शः शोणितसम्भवाः१८। अपाकः कठिनः स्थूलो ग्रन्थिर्वर्त्म भवो ह्यरुजः। सकण्डूः पिच्छिलः कोलप्रमाणो लगणस्तु१९ सः। शूनं यद्वर्त्म बहुभिः सूक्ष्मैश्छिद्रैः समन्वितम्। विसमं लर्जकं इव विसवर्त्मेति२०तन्मतम्। पक्ष्माश्रयगता दोषा-

स्तीक्ष्णाग्राणि खराणि च। निर्वर्तयन्ति पक्ष्माणि तैर्ज्ञुष्टत्वाच्च दूयते। उत्पाटितैः पुनः शान्तिः पक्ष्मभिर्योपजायते। वातातपानलद्वेषी पक्ष्मकोपः२१ स उच्यते।"

शुक्लभागरोगभेदास्तु११ वर्त्मन् शब्दे २७६४पृ० सुश्रुतोक्ता दर्शिताः तत्रत्यं ततः शेषन्तु यथा

"श्लाष्मभैत्यभिपठितं खरं प्रपाण्डु५। श्यावाः क्षुः पिशितनिभास्तु विन्दवो ये शुक्लिर्वा सितनयने स शुक्लसंज्ञः६। एको यः शशरुधिरोपमः सुविन्दः शुक्लस्थो भवति तमर्बुदं७ वदन्ति। उत्सन्नः सलिलनिभोऽथ पिष्टशुक्लो विन्दुर्यः स भवति पिष्टकः८ सुदुस्तः। जालाभः कठिनसिरो महान् स रक्तः सस्रावः क्षत इव जालसंज्ञितस्तु। शुक्लस्थाः सितपिडकाः सिराततो याता विद्यादसितसमीपजाः सिराजाः१०। कांस्याभो भवति सिराततः सिते यो विन्दुर्वा स तु सिरजो बलासकाख्यः११।"

कृष्णभागतरोगास्तु तत्रोक्ताः४ कृष्णगतशब्दे २२१२पृ० दर्शिताः। सर्वगतरोगास्तु५ तत्रोक्ता यथा

"अथातः सर्वगतरोगविज्ञानीयमध्यायं व्याख्यास्यामः। स्यन्दास्तु४ चत्वार इहोपदिष्टास्तावन्त एवेह तथाधिमन्थाः४। शोफान्वितो५ऽशोफयुत१७श्च पाकाविति ह्येवमेते दश समुद्दिष्टाः। तत्राधिमन्थो११ऽनिलपर्ययात्१२च शुष्काक्षिपाको ऽनुगत एव वातः१४। दृष्ट्वाचाक्ष्णाध्युषिता१५ सिराक्षाक्षुत्यातदर्शोवपि१६ सर्वभागाः। प्रायेण सर्वे नयनाश्रयास्ते भवन्त्यभिष्यन्दनिमित्तमूलाः। तस्मादभिष्यन्दसदीर्घमाक्षुरुपाचरेदाशु हिताय धीमान्। निस्तोदनं तस्मनरोमहर्षस्तुर्षारुग्भिरोऽभितापाः। विशुष्कभावाः शिशिराक्षुता च वाताभिपन्ने नयने भवन्ति१। दाहप्रपाकौ शिशिराभिनन्दा धूमायनं वाष्पसमुच्छ्रयश्च। उष्णाक्षुता पीतकनेत्रता च पित्ताभिपन्ने नयने भवन्ति२। उष्णाभिनन्दा गुरुताक्षिशोफः कण्डूपदेहौ सिततातिगैत्यम्। स्रावो बहुः पिच्छिल एव चापि कफाभिपन्ने नयने भवन्ति३। ताम्राक्षुता लोहितनेत्रता च रात्र्यां तमस्यातिलोहितत्वम्। पित्तस्य लिङ्गानि च यानि तानि रक्ताभिपन्ने नयने भवन्ति४। द्वन्द्वैरतैरभिष्यन्दैर्नराणामक्रियावताम्। तावन्त्यधिमन्थाः स्युर्नयने तीव्रवेदनाः। उत्पाट्यत इवात्यर्थं नेत्रं निर्भिद्यते तथा। शिरोऽर्द्धन्तु तं विद्यादधिमन्थं खलक्षणैः। नेत्रमुत्पाट्यत इव मथ्यतेऽक्षिवच्च यत्। सङ्कुर्यतोदनिर्भेद-

मांससंरब्धमाविलम् । कृच्छ्रनास्रोदनाध्मानवेपथुव्यथनैर्युतम् । शिरस्योर्द्ध्वं येन स्यादधिमन्थः स मारुतात्५ । रक्तराजिचितं स्रावि वह्निनेवावदह्यते । यकृत्पिण्डोपमं दाहि क्षारेणाक्तमिव क्षतम् । प्रपक्वोच्छून-वर्त्मान्तमस्रेदं पीतदर्शनम् । मूर्च्छाशिरोदाहयुतं पित्तेनाध्यधिमन्थितम्६ । शोफवद्व्याप्तिसंरब्धं स्रावकण्डूसमन्वितम् । शैत्यगौरवपैच्छिल्यदुःखार्द्रत्वान्वितम् । रूपं पश्यति दुःखेन पांशुपूर्णमिवाविलम् । नासाघ्राणशिरोदुःखयुतं श्लेष्माधिमन्थितम्७ । बन्धुजीवप्रतीकाशं ताम्यति स्वर्णनाशनम् । रक्तास्रावं सनिस्तोदं पश्यत्यस्मिन्निभा दिशः । रक्तमस्मारिष्टवच्च कृष्णभागच्च लक्ष्यते । यद्दीप्तं रक्तपर्यन्तं तद्रक्तेनाधिमन्थितम्८ । स्तब्धाद्दृष्टिं सप्तरात्रात्सकोथोऽधीमन्थोऽसृक्समुद्भवः पञ्चरात्रात् । षड्रात्राद्वा मारुतोत्थो निष्ठ्यूतान्त्र्याख्यारात्यैत्तिकः सद्यएव । कण्डूपदेहास्रयुतः पक्वोदुम्बरसन्निभः । दाहसंहर्षताम्रत्वशोफनिस्तोदगौरवैः । जुष्टो रुग्भः सवेदास्रसुप्तशीताम्बुपिच्छिलम् । संरम्भी पच्यते यच्च नेत्रपाकः स शोफजः९ ॥ शोफहीनानि लिङ्गानि नेत्रपाके त्वशोफजे१० । अन्तःसिराणां स्रवनः स्थितो दृष्टिं प्रतिक्षिपन् ॥ कृताधिमन्थं११ जनयेत्तमसाध्यं विदुर्बुधाः । पक्ष्मद्वयाक्षिभ्रुवमाश्रितस्तु यस्मान्निलः सञ्चरति प्रदुष्टः । पर्यायशश्चापि रुजः करोति तं वातपर्यायं-१२मुदाहरन्ति ॥ यत्कूजितं दारुणरूक्षवर्त्म विलोडने वाविलदर्शनं यत् । मुहुर्मुहुर्यत्प्रतिबोधने च शुष्काक्षिपाकोपहतं १३ तदक्षि ॥ यस्यापटूकर्णशिरोरुजस्तो मन्यागतो वाप्यनिलोऽन्यतो वा । कुर्याद्रुजोऽतिभ्रुविलोचने वा तमन्यतोवात१४मुदाहरन्ति ॥ खड्गेन भुक्तेन विदाहिना वा सञ्जायते सर्वत एव नेत्रम् । शोफान्वितं लोहितकं सनीलैरेतादृगस्रक्षाध्युषितं१५ वदन्ति ॥ सवेदना वापि सवेदना वा यस्माच्चिराज्ञो हि भवन्ति ताम्राः । सुप्तैर्विरज्यन्ति च ताः समन्ताद्व्याधिः सिरोत्पात१६ इति प्रदिष्टः ॥ मन्थानुसिरोत्पातउमेचितस्तु जायेत रोगस्तु सिराप्रहर्षः१७ । ताम्राक्षमस्रं स्रवति प्रगाढं तथा न शक्नोत्यभिवीक्षितुञ्च ॥ यथातो दृष्टिगतरोग-विज्ञानीयमध्यायं व्याख्यास्यामः ॥ मसूरदलमात्रान्तु पञ्चभूतप्रसादजाम् । खद्योतविस्फुलिङ्गाभां सिद्धां तेजोभिरव्ययैः ॥ आवृतां पटलेनाक्ष्णोर्बाह्येन विवराकृतिम् । शीतसात्म्यां दृशां दृष्टिमाहुर्नयनचिन्तकाः ॥ रोगांस्तदाश्रयान् घोरान् षट् च षट् च प्रचक्षते । पटलानुप्रविष्टस्य तिमिरस्य च लक्षणम् ॥ सिराभिरभिसम्प्राप्य विसृष्टोऽभ्यन्तरे भृशम् । प्रथमे पटले दोषो यस्य दृष्टौ व्यवस्थितः ॥ अव्यक्तानि स रूपाणि सर्वाण्येव प्रपश्यति । दृष्टिभ्रंशं विजानति द्वितीयं पटलं गते ॥ मक्षिकान् मशकान् केशान् जालकानि च पश्यति । मण्डलानि पताकाश्च मरीचीः कुण्डलानि च ॥ परिप्लवांश्च विविधान् वर्षमभ्रं तमांसि वा । दूरस्थान्यपि रूपाणि मन्यते च समीपतः ॥ समीपस्थानि दूरे च दृष्टेर्गोचरविभ्रमात् । यत्नवानपि चात्यर्थं सूचीपाशं न पश्यति ॥ अर्द्धं पश्यति नाधस्तात्तृतीयं पटलं गते । महान्त्यपि च रूपाणि च्छादितानीव वाससा ॥ कर्णनासाक्षियुक्तानि विपरीतानि वीक्षते । यथादोषञ्च रज्यते दृष्टिर्दोषे बलीयसि ॥ अधःस्थिते समीपस्थं दूरस्थञ्चोपरिस्थिते । पार्श्वस्थिते तथा दोषे पार्श्वस्थानि न पश्यति ॥ समन्ततः स्थिते दोषे सङ्कुलानीव पश्यति । दृष्टिमध्यगते दोषे स एकं मन्यते द्विधा ॥ द्विधास्थिते त्रिधा पश्येद्बहुधा चानवस्थिते । तिमिराख्यः स वै दोषस्तर्षपटलसन्निभः ॥ रूपाद्वि सर्वतो दृष्टिं लिङ्गनाशः स उच्यते । तस्मिन्नपि तमोभूते नातिरूढे महागदे ॥ चन्द्रादित्यौ ग्रहनक्षत्रान्तरिक्षे च विद्युतः । निर्मलानि च तेजांसि भ्राजिष्णूनि च पश्यति ॥ स एव लिङ्गनाशस्तु नीलिकाकाचसंज्ञितः । तत्र वातेन चाक्ष्णि भ्रमन्तीव स पश्यति ॥ आविलान्यरुणाभानि व्याविद्धानि च मानवः । पित्तेनादित्यखद्योतशक्रचापतडिद्युतान् ॥ शिखिवर्हविचित्राणि नीलरूपाणि पश्यति । गौरचामरगौराणि श्वेताभ्रप्रतिमानि च ॥ पश्येद्-रूक्ष्माख्यमर्थं व्यभ्रे चैवाभ्रसंभवम् । सलिलप्लावितानीव परिजाह्यानि मानवः ॥ तथा रक्तेन रक्तानि तमांसि विविधानि च । कफेन पश्येद्रूपाणि स्निग्धानि च सितानि च । स्फुरितप्रावरूपाणि धूमधूम्राणि चेक्षते ॥ सन्निपातेन चित्राणि विद्युतानीव पश्यति । बहुधा वा द्विधा वापि सर्वाण्येव समन्ततः । हीनाधिकाक्रान्तत्वञ्च वा ज्योतींष्यपि च पश्यति ॥ चित्तं कुर्यात्-परिस्रावि मूर्च्छितं रक्ततेजसा । पीता दिशस्तथोद्यन्तमादित्यमिव पश्यति ॥ विकीर्यमाणान् खद्योतैर्हरितांस्तेजोभिरेव च । वक्ष्यामि षड्विधैरागैर्लिङ्गनाशमतः परम् ॥ रागोऽरुणो मारुतजः प्रदिष्टः पित्तात्

परिस्राव्यथवापि नीलः। कफात् सितः शोणितजस्तु रक्तः समस्तदोषोऽथ विचित्ररूपः॥ रक्तजं मण्डलं दृष्टौ स्यूतकाचारुणप्रभम्। परिस्रावितं रोगे स्रावस्रावयानीलञ्च मण्डलम्॥ दोषक्षयात् कदाचित् स्रात्स्वयं तत्र च दर्शनम्॥ अरुणं मण्डलं वाताच्छ्यावं परुषत्वया। पित्तान्मण्डलमानीलं कांस्याभं पीतमेव वा॥ श्लेष्मणा धवलं स्निग्धं शङ्खकुन्देन्दुपाण्डुरम्। चलत्पद्मपलाशस्थः शुक्लबिन्दुरिवाम्बुसः॥ स्पन्दमाने च नयने मण्डलं तद्विसर्पति। प्रवालपद्मपत्राभं मण्डलं शोणितात्मकम्॥ दृष्टिरागो भवेच्छ्लेष्मो स्निग्धरागे त्रिदोषजे। यथास्वदोषलिङ्गानि सर्वेष्वेव भवन्ति हि॥ षड् लिङ्गनाशाःषड्डिमे च रोगा दृङ्मात्रयाः षड् च षडेव चक्षुः। तथा नरः पित्तविदग्धदृष्टिः कफेन चान्यश्च स्वयं धूमदर्शी॥ यो हृस्वजाड्योऽनवलान्यताम्र च गम्भीरसंज्ञाङ् च तथैव दृष्टिः॥ पित्तेन दुष्टेन गतेन दृष्टिं पीता भवेद्यस्य नरस्य दृष्टिः। पीतानि रूपाणि च मन्यते यः स मानवः पित्तविदग्धदृष्टिः॥ प्राप्ते दृतीयं पटलन्तु दोषे दिवा न पश्येच्चिरि वीक्षते च। तथा नरः श्लेष्मविदग्धदृष्टिः स्तान्येव शुक्लानि हि मन्यते तु॥ त्रिषु स्थितोऽक्ष्णः पटलेषु दोषो नक्तान्ध्यमापादयति प्रसह्य। दिवा स सम्यक्तुष्टहीतदृष्टिर्वीक्षेत रूपाणि कफाल्पभावात्॥ शोकज्वरायासशिरोभितापैरभ्याहता यस्य नरस्य दृष्टिः। सधूमकान् पश्यति सर्वभावांस्तं धूमदर्शीति वदन्ति रोगम्॥ स हृस्वजाड्योऽदिवसेषु जन्तूञ्जाङ्खानि रूपाणि च यो न पश्येत्। रात्रौ स शीतातुष्टहीतदृष्टिः पित्तात्मभावादपि तानि पश्येत्॥ विद्योतते येन नरस्य दृष्टिर्दोषाभिपन्ना नकुलस्य यद्वत्। चित्राणि रूपाणि दिवा स पश्येत् स वै विकारो नकुलान्ध्यसंज्ञः। दृष्टिर्विरूपा रसनोपहता सङ्कुच्यते ऽभ्यन्तरतश्च याति॥ रुजावगाढा च तमश्चिरोगं गम्भीरिकेति प्रवदन्ति तज्ज्ञाः। वाह्यौ पुनर्हावि हस्यदृष्टौ निमित्ततश्चाप्यनिमित्ततश्च॥ निमित्ततस्तत्र शिरोऽभितापाज्ज्ञेयस्त्वभिष्यन्दनिदर्शनेन च। सुरर्षिगन्धर्वमहोरगाणां सन्दर्शनेनापि च भासुराणाम्॥ छन्येत दृष्टिर्मनुजस्य यस्य स लिङ्गनाशस्तनिमित्तसंज्ञः। तत्राक्षि विस्रष्टमिवावभाति वैदूर्यवर्णा विमला च दृष्टिः। विदीर्यते शीर्यति क्षीयते वा नष्टामशीघातकृता च दृष्टिः। दृश्येते नयनगता मक्षाविकाराः सङ्घाताः पृथग्विड् षड् च सम्प्रतिश्च। एतेषां पृथग्विड् विस्तरेण सर्वं वक्ष्येऽङ्गं तदनु चिकित्सितञ्च तावत्" ॥ [चक्षुष।

चक्ष धातने स्वादि०पर०सक०सेट्। चक्ष्णोति अचक्षीत् अचाक्षीत्

चङ्कुर पु० सौ० चकि-भ्वादौ कर्तरि करणादौ-उरच्। १रथे २दृष्टे च मेदि०। ३यानमात्रे न० त्रिका०।

चङ्क्रमण न० क्रम+यङ्लुट् ल्युट् यङोलुक्। १अतिवेगेन गमने २पुनः पुनर्गमने च। तस्य गुणमाह सुश्रुतः "यत्तु चङ्क्रमणं नीतिदेहपीडाकरं भवेत्। तदायुर्बलमेधाग्नि प्रदमिन्द्रियबोधनम्"। "श्रमानिलहरं हर्षं प्रहृनिद्राक्षतिप्रदम्" "अनारोग्यमनायुष्यं चक्षुषोरुपघातकृत्। पादाभ्यामनुपानद्भ्यां सदा चङ्क्रमणं नृणाम्" इति च सुश्रुतः। रोगभेदे तन्निषेधः सुश्रुते दर्शितो यथा अन्तर्द्यु पक्रमे "वर्ज्यं वेदितमुद्वृत्तो अन्नादियानं व्यायामं मैथुनं वेगनिग्रहम्। अत्यशनं चङ्क्रमणमुपवासं गुरूणि च"। "स्थानासनं चङ्क्रमणं यानयानाभिघातम्। व्रणवान्न निषेवेत"। "तत्र स्निग्धस्विन्नवान्तविरिक्तास्थापितानुवासितशिरोविद्धैः परिहर्तव्यानि क्रोधायासमैथुनदिवास्वप्नव्यायामयानोत्थानासनचङ्क्रमणशीतातपविस्रंसात्यजीर्णान्यवलाभात् मासमेके मन्यन्ते"।

चङ्क त्रि० चीयते ची० वा० ड चमङ्कं यस्य शक०। (चाङ्का) ख्याते १सुस्थे २शोभने ३दक्षे च मेदि०।

चचर त्रि० चर-अच् वा० द्वित्वम्। चरणशीले "पतरेव चचरा चन्द्र निर्णिक्" ऋ० १०।१०६।८। चचरा संचलौ भा० औस्थाने आच्।

चचेण्डा स्त्री चम् उपचीयमानं प्रकारे द्वित्वम् उपचीयमान प्रकारेण खण्डयित्वा फलमस्य पृषो०। (टिचिड़ा) ख्याते क्षुद्रफले पटोल सदृशे लताभेदे वैद्य०।

चञ्च पु० चनच-अच्। पञ्चाङ्गुले मानभेदे शब्दार्थचि०।

चञ्चत्पुट पु० "ताले चञ्चत्पुटे श्रेयं गुरुद्वन्द्वं लघुप्लुतम्" संगीतदा० उक्ते तालभेदे।

चञ्चरिन् पुंस्त्री० चर-यङोलुक् वा० उत्त्वाभावः णिनि। भ्रमरे। "करी वरीभरीति चेत् दिशं मरीमरीतिकाम्। स्थिरी चरीकरीति चेत् न चञ्चरीति चञ्चरी" उज्ज्वटः" स्त्रियां ङीप्। [भ्रमरे त्रिका०।

चञ्चरीक पुंस्त्री० चर-ऋफरीकादि० ईकन् नि० द्वित्वम्।

चञ्चरीकावली स्त्री "यमौ रौ विख्याता चञ्चरीकावली गः" छ० र० टी० उक्ते त्रयोदशाक्षरपादके वर्णवृत्तभेदे।

चञ्चल पु० चन्च–अलच् चञ्चं गतिं लाति ला–क वा। १कामुके, २वायौ शब्दार्थ०। ३चपले, ४अस्थिरे च त्रि० अमरः। ५विद्युति, ६लक्ष्म्याञ्च स्त्री मेदि०। पिप्पल्यां शब्दच०। "चञ्चलचूड़ं चपलैर्वेतसकुलैः केलि परम्"। (ऋषिम्) ऋग्वेदभा०। "नागजिह्वेव चञ्चला" भा० क० ७७अ०।

चञ्चा स्त्री चन्च–अच्। नलनिर्म्मिते कटभेदे (चाँच) मेदि०। चञ्चेवेति इवार्थे कन् "लुब् मनुष्ये" इति तस्य लुप्। तृणमयपुरुषे लुपिच्यक्तिरूपत्वात् स्त्री

चञ्चु पु० चन्च–उन्। १एरण्डवृक्षे मेदि० २स्थगे शब्दर०। ३रक्तैरण्डे ४क्षुद्रवृक्षभेदे राजनि०। ५नाडीव्रणाके शब्दार्थचि० (चेचुनाड़ी) ख्याते ६पत्रशाकभेदे स्त्री भावप्र०। "चिञ्चुचञ्चुचि क्षुद्रौ च दीर्घपत्रा सतिक्तिका। चञ्चुः शीता सरा रूक्षा स्वादी दोषत्रयापहा। धातुपुष्टिकरी बल्या मेध्या पित्तिकिका स्मृता"। ७पक्षिणामोष्ठे स्त्री वा ङीप्। "खगचञ्चुपुटश्रोणीपूरणे तव कः श्रमः" चातका०। "करयत्नखदन्तुरालरे व्यालिखद्वक्त्र पुटेरपचारो" "तुण्डे तण्डुक शुण्डपण्डितः पटुचञ्चू पुटकोटिकुट्टनैः" इति च नैष०। स्वार्थे क। पक्षिणामोष्ठे स्त्री।

चञ्चुपत्र पु० चञ्चुरिव पत्रमस्य। चञ्चुशाके राजनि०।

चञ्चुभृत् पुंस्त्री० चञ्चुं बिभर्त्ति भृ–क्विप्। पक्षिणि त्रिका०

चञ्चुमत् पुंस्त्री चञ्चुरस्त्यस्य मतुप्। पक्षिणि हारा० स्त्रियां ङीप्।

चञ्चुर पु० चन्च–उरच्। १पत्रशाकभेदे चञ्चुनामके शाके राजनि०। २दक्षे त्रि० "पुराणैः पुण्यचञ्चुरैः" भा० आ०१०४७अ०। "विज्ञातास्त्रिलशास्त्रार्थो लौकिकाचारचञ्चुरः" काशी० १०अ०।

च(चु)ञ्चुल पु० विश्वामित्रपुत्रभेदे। "विश्वामित्रस्य च सुता इत्युपक्रमे "उदुम्बरान्नभिष्णातास्तारकायणचच(चु)ञ्चुलाः" हरि० २७अ०। [शाकभेदे।

चञ्चुशाक न० चञ्चुनामकं चञ्चुसदृशं वा शाकमस्य।

चञ्चूचि पुंस्त्री० चञ्चुः स्रुचिरिव यस्य। कारण्डवपक्षिणि स्त्रीत्वपक्षे वा ङीप्। वा कप्। अतएव।

चट भेदे भ्वा० पर० सक०सेट्। चटति अचटीत्–अचाटीत्। चचाट। चटुः चाटुः।

चुट वधे भेदे च चु०उभ०सक०सेट्। चाटयति ते अचीचटत् त उट्+भेदने वधे उच्चाटने स्थानान्तरायणे च। "उच्चाटनीयः करतालिकानाम्" नैष०। उच्चाटनम्।

चटक पुंस्त्री० चटति भिनत्ति धान्यादिकम् चट–कुन्। १कलविङ्के (चड़ुई) अमरः जातित्वेऽपि स्त्रियामजादित्वात् टाप् न तु ङीप्। स्वार्थे क। चटककोऽप्यत्र। स्त्रियां जातित्वेऽपि टापि त्रिषका० निम्नं न अत इत्त्वम्। तत्कांसगुणादि भावप्र० उक्तं यथा "चटकः कलविङ्कः स्यात् कुलिङ्गः कालकण्ठकः। कुलिङ्गः शीतलः स्निग्धः स्वादुः शुक्रकफप्रदः। सन्निपातहरो श्यामचटकश्चातिशुक्रलः"। २पिप्पलीमूले न० अमरटीका। ३श्यामाख्ये स्त्री राजनि०। चटका+स्वार्थे क। अतो वेत्त्वम् चटकका चटकिका" सि० कौ०। चटकस्य चटकाया वा अपत्यं पुमान् अण् ऐरक्। चाटकैर चटकापत्ये पुंसि। स्त्रियान्तु अणो लुक्। चटका चटकयोः स्त्र्यपत्ये स्त्री।

चटकामुख न० चटकाया मुखमिव मुखमस्य। अस्त्रभेदे, "क्षुरप्रैश्चटकामुखैः" भा० क० ४० अ०। [हेमच०।

चटकाशिरम् पु० चटकायाः शिर इव। पिप्पलीमूले।

चटचटाय चट–भेदने अच् प्रकारे द्वित्वम्। चटचटम् चटचटेत्यव्यक्तं शब्दं वा करोतिश्रुशा० चूर्णे वा क्यङ् नामधातुः आत्म० अक० सेट्। चटचटायते अचटचटायिष्ट। "ज्वलनभुक्तेन चाग्नेन भृशं चटचटायते" सुश्रु०। "चामरतिलसिद्धार्थकादीन् निरन्तरं चटचटायितान्" दशकु०। क्विप् यङ्लोपाङ्लोपौ। चटचट। तादृशशब्दकरणे "ततश्चटचटाशब्दः प्रादुरासीत् महारणे"। [हला०।

चटिका स्त्री चट–वा०इकन्। १पिप्पलीमूले २चटकायां

चटिकाशिरम् न० चटिकायाः शिर इव। पिप्पलीमूले अमरः। "सर्वे सान्ना अदन्तोऽभुः" इत्युक्तेः प्रभो० चटिकाशिरोऽप्यत्र भरतः।

चटु पु० चट–डन्। १प्रियवाक्ये, २प्रतिनामासनभेदे, ३उदरे च मेदि०। प्रियवाक्ये न० संज्ञि०। "जायां निजस्त्रीचटुलालसानाम्" माघः।

चटुल त्रि० चट–उलच्। १चञ्चले, चपले हेमच०। २विद्युति स्त्री जटाधरः। "मदेन किञ्चिच्चटुलालसानां" "आयसमैक्षत जनचटुलायपादम्" चञ्चूपदृष्टचटुलाक्षिपतत्रिकायाऽन्ये" माघः। "त्रासातिमात्रचटुलैः स्मरतः सुनेत्रैः" रघुः।

चटूक्षोल त्रि० चटौ उल्लोलः। १चाटुकारलोले २चञ्चले त्रिका० ३सुन्दरे उणादिको० कुचञ्चले हारा०।

चड कोपे भ्वा॰आत्म॰अक॰सेट् इदित्। चण्डते अचण्डिष्ट। चचण्डे। चण्डः चण्डी [ चण्डत् त।

चड कोपे चुरा॰उभ॰अक॰सेट् इदित्। चण्डयति ते अच-

चण शब्दे भ्वा॰पर॰सक॰सेट्। चणति अचाणीत्–अचणीत् चचाण चेणतुः।

चण गतौ हिंसे च भ्वा॰पर॰सक॰ सेट् वा घटा॰ मित्। चणति अचाणीत्–अचणीत्। चचाण चेणतुः चण-यति ते–चाणयति ते।

चण दाने भ्वा॰ पर॰ अक॰ सेट् घटा॰। चणति अचणीत्-अचाणीत्। चणयति। चचाण चेणतुः। चणकः।

चण् अव्य॰ चण्–किप्। चेदर्थे अस्य णित्त्वम्। ससञ्ज्ञा-दौ तु अनुबन्ध एव चशब्द इति मनोरमा

चण पु॰ चण–अच्। चणके शस्यभेदे (छोला) राजनि॰।

चणक पु॰ चण–दाने कु॰। १शस्यभेदे (बुट)(छोला) अमरः २मुनिभेदे च तस्य गोत्रापत्यं गर्गा॰यञ् चाणक्यः।"चणकः शीतलोरूक्षः पित्तरक्तकफापहः। लघुः कषायो विष्टम्भी वातलो ज्वरनाशनः। सचाङ्गारेण सम्भृष्टस्तैलभृष्टश्च तद्गुणः। आर्द्रभृष्टो बलकरो रोचनश्च प्रकीर्त्तितः। शुष्कभृष्टोऽतिरूक्षः स्याद्वातकृत्प्रकोपनः। स्निग्धः पित्तकफं हन्यात् सूपः क्षोभकरोऽहितः। आर्द्रोऽतिकोमलो रूक्षः रक्तपित्तहरो हिमः"। हरिताई चणकरन्धनन्तु। "सुहरित हरिमन्थः क्षोदभिन्नो नखाग्रैः प्रथमरुदक-सिक्तो वेसवारेण सिद्धः। लवणमरिचयुक्तात् तैलसिक्तु-प्रसिक्तः शिखरयति विभोक्तुर्जाठरं मन्दवह्निम्। क्षोभा-भिधायकफलं परिस्रुत्य गुडं तप्ते हते सुललितकथितो-ष्णाभ्याम्। संसाधितम् सुरभितं शुचिरासटेन जिह्वा-तले क्षिपति नित्यमतिप्रकामम्"शब्दार्थचि॰धृतवैद्यकम्।

तस्य शाकगुणपाकादि तत्रैव दर्शितं यथा "रूक्षं चणकशाकं स्याद् दुर्जरं कफवातकृत्। अस्रं विष्टम्भ-जनकं पित्तरुग्लशोथकृत्। सकृत्तु चाणकं शाकमस्र-तक्रेण साधितम्। सक्षिकुलवणे तप्ते भर्जितं रामठा-न्वितम्। क्षारास्रभावसङ्गात्तच्चणकमवाताः सम्मर्दिता परिणमन्त्यचिरात्तेषां दोषाः। संचूर्णिताः कटुकतैलयुतैः सुपक्वैर्भक्ष्यैः सक्षिकुचणकैः परिदत्तपाषाः।"

चणकरोटिका स्त्री चणकचूर्णनिर्म्मिता रोटिका। "चा-णक्या रोटिका रूक्षा क्षोभपित्तासृतृट् गुरुः। विष्ट-म्भिनी न चक्षया" शब्दार्थचि॰ धृतवैद्यकोक्ते चण-करोटिकारूपे भक्ष्यभेदे

चणकात्मज पु॰ ६त॰। चाणक्ये वात्स्यायने मुनौ हेमच॰

चणकाम्ल न॰ चणकजातमम्लम्। चणकक्षारे तच्चाक-यकेन निष्पादिते क्षारभेदे "चणकाम्लकमत्यम्लं दीपनं दन्तहर्षणम्। लवणानुरसं रूच्यं शूलाजीर्णविबन्ध-हृत्" भावप्र॰। [ शब्दार्थचि॰।

चणकाम्लवारि न॰ ६त॰। चणकस्यचणकपत्रशिशिरजले

चणद्रुम पु॰ चणस्यचणकस्य द्रुमः। क्षुद्रगोक्षुरे राजनि॰।

चणपत्री स्त्री चणस्य चणकस्य पत्रमिव पत्रमस्याः ङीप्। रुदन्तीक्षुपे राजनि॰

चणिका स्त्री चणति रसं चण–दाने बा॰ कुन् चण इव इवार्थे कन् वा। गोदुग्धायाम् तृणभेदे राजनि॰

चण्ड न॰ चडि–कोपे अच् चण–दाने चस–अदने वा॰ ड तस्य नेत्त्वम्। १तीक्ष्णे शब्दर॰। २तिन्तिडीवृक्षे यमकि-ङ्करे ३दैत्यभेदे च पु॰ मेदि॰। "चण्डसण्डौ महा-सुरौ" देवीमा॰। ४अत्यन्तकोपने त्रि॰ अमरः ५तीव्रता-युक्ते त्रि॰शब्दर॰। "अथैकघेनोरपराधचण्डात्" रघुः। "चण्डप्राहवतीं श्रीमान्" भा॰ आ॰ १७७अ॰। अच्चा॰ पाठात् स्त्रियां वा ङीप्। चण्डी चण्डा। तस्य भावः तल् चण्डता स्त्री त्व चण्डत्व न॰ इमनिच् चण्डिमन् पु॰ तीव्रत्वे। "भाव्यतपिण्डितचण्डिमा" वीरच॰। ततः शिवा॰ अपत्ये अण् चाण्ड तदपत्ये पुंस्त्री स्त्रियां ङीप्

चण्डकौशिक पु॰ १ऋषिभेदे "अथ काम्बोजतः पुत्रं गौत-मस्य महात्मनः। शुश्राव तपसि श्रान्तसुदारं चण्ड-कौशिकम्" भा॰स॰१६अ॰। चण्ड कौशिको वर्णत्वेन ऽस्यत्र अच्। २स्वनामख्याते नाटकभेदे न॰।

चण्डतुण्डक पु॰ गरुडात्मजभेदे "सुवर्णचूडो नागाशो दारुणश्चण्डतुण्डकः" भा॰ उ॰ १००अ॰ गरुडात्मजोक्तौ

चण्डनायिका स्त्री दुर्गानायिकाभेदे। एवं चण्डवती च-ण्डोग्रा अपि दुर्गानायिकाभेदे।

चण्डबल पु॰ वानरभेदे "बलं चण्डबलाख्यञ्च वज्रबाहुञ्च वानरम्" भा॰ व॰ २८६अ॰।

चण्डभार्गव पु॰ च्यवनवंश्ये ऋषिभेदे। "तत्र होता बभूवाथ ब्राह्मणश्चण्डभार्गवः। च्यवनस्यान्वये ख्यातोविप्रो वेदविदां वरः" भा॰ आ॰ ५३अ॰। सर्पसत्रे होतृत्वयुक्तो

चण्डमुण्डा स्त्री चण्डश्च मुण्डश्च पात्रत्वेनास्त्यस्याः अच्। चामुण्डायां हेमच॰। चामुण्डाशब्दे दृश्यम्।

चण्डमुण्डी स्त्री स्थानभेदे "चण्डमुण्डीमहास्थाने दक्षिणी परमेश्वरी" तन्त्र॰।

चण्डरुद्रिका स्त्री चण्डोरुद्रोवेद्यत्वेनास्त्यस्याः ठन्। विद्याभेदे शब्दरत्ना०।

चण्डवृष्टिप्र(यात)ताप पु० "यदिह नयुगलं ततः सप्तरेफासदा चण्डवृष्टिप्र(यातो) पाताभवेद्दण्डकः" छ० र० उक्ते दण्डकभेदे।

चण्डशक्ति पु० चण्डा शक्तिरस्य। बलिसैन्यस्यदैत्यभेदे। "शुम्भनिशुम्भचण्डशक्तिश्च कृतनेत्रः शिखिध्वजः" हरि०२४अ०

चण्डा स्त्री चडि–अच् चन–टाप् वा ड तस्य नेत्वं वा टाप्। १दुर्गानायिकाभेदे। उग्रचण्डा प्रचण्डा च चण्डोग्रा चण्डनायिका। चण्डा चण्डवती चण्डनायिकाप्यति चण्डिका" देवीपु०। जिनानां २शासनदेवताभेदे हेम०। ३चोरनामगन्धद्रव्ये अमरः ४शङ्खपुष्पीक्षुभेदे मेदि०। ५लिङ्गिनीलतायां ६कपिकच्छ्वाम् ७आखुपर्ण्यां ८सर्षेतदूवींयां च राजनि०। ९नदीभेदे शब्दर०। एतासांचण्डवीर्य्यत्वात् तथात्वम्। १०कोपनायां स्त्रियां च स्त्री

चण्डांशु पु० चण्डाःतीव्रा अंशवो यस्य। सूर्य्ये अमरः। चण्डदीधितिचण्डभानुप्रभृतयोऽत्र।

चण्डात पु० चण्डमतति अत–अण्। करवीरे अमरः।

चण्डातक पु० न० चण्डां कोपनामतति अत–ण्वुल्। वरस्त्रीणामर्द्धरूपर्य्यन्ते वस्त्रे अमरः अस्य पुंस्त्वमप्येके

चण्डाल पु० चडि–आलच्। १स्वनामख्याते जातिभेदे, शूद्रेण ब्राह्मणात्सत्यादिते सङ्कीर्णवर्णे "शूद्रादायोगवः क्षत्ता चण्डालश्चाधमोमतः" मनुना वैश्यक्षत्रविप्राङ्गनासु शूद्राज्जातानां क्रमेण आयोगवादिसंज्ञा कृता। ततः जातित्वात् स्त्रियां ङीषि प्राप्ते शार्ङ्गरवा० ङीन् स्मरे भेदः। "चण्डालान्त्यस्त्रियो गत्वा भुक्त्वा च प्रतिगृह्य च। पतत्यज्ञानतोविप्रः ज्ञानात् साम्यन्तु गच्छति" स्मृतिः। चण्डालस्पृष्टजलस्य अपेयशब्दे २५४ पृ० तदन्नभक्षणस्य अभक्ष्यशब्दे २७४पृ०तत्स्पर्शस्य अस्पर्श्यशब्दे ५७० पृ० तद्दृष्टद्रव्यग्रहणस्य च निषेधः अपाङ्क्तेयशब्दे ६७ पृ० उक्तः। "अथ रात्र्यां व्यतीतायां तस्यां राजा बभूव ह। चण्डालदर्शनो राम! सद्य एव दुरात्मनिः। नीलशोताम्बरधरो रक्ताम्बरकृतोत्तरः। संरब्धताम्रनेत्राक्षः कराली कृष्णपिङ्गलः। कृष्णचर्मनिवासी च लौहाभरणभूषितः" तस्य स्वरूपादिकं रामा० उक्तम्। तत्कर्म्मादि मनूक्तं यथा "चण्डालश्वपचानान्तु बहिर्ग्रामात् प्रतिश्रयः। अपपात्राच कर्त्तव्या धनमेषां श्वगर्दभम्। वासांसि मृतचेलानि भिन्नभाण्डेषु भोजनम्। कार्ष्णायसमलङ्कारः परिव्रज्या च नित्यशः। न तैः समयमन्विच्छेत् पुरुषो धर्ममाचरन्। व्यवहारो मिथस्तेषां विवाहः सदृशैः सह। अन्नमेषां पराधीनं देयं स्याद्भिन्न भाजने। रात्रौ न विचरेयुस्ते ग्रामेषु नगरेषु च। दिवा चरेयुः कार्य्यार्थं चिह्निता राजशासनैः। अबान्धवं शवहरं निर्हरेयुरिति स्थितिः। वध्यांश्च हन्युः सततं यथाशास्त्रं नृपाज्ञया। वध्यवासांसि गृह्णीयुः शस्त्राभरणानि च।" २क्रूरकर्म्मणि त्रि०। "कर्म्म चण्डालयोगोत्थं मम पापक्षयं कुरु" स्मरणसङ्कीर्त्तनमन्त्रम्

चण्डालकन्द पु०चण्डालप्रियः कन्दः शाक०। कन्दभेदे राजनि

चण्डालवल्लकी स्त्री ङीष्। वीणाभेदे कण्ठोले अमरः।

चण्डालिका स्त्री चण्डालःभक्षकत्वेन वाहकत्वेनवास्त्यस्याः ठन्। १चण्डालवीणायां २ओषधिभेदे च। चण्डमर्कति अल–ण्वुल्। ३उमायां स्त्री मेदि०।

चण्डि स्त्री चडि–कोपे इन्। दुर्गायां भरतः

चण्डिकघण्टा पु० चण्डस्तीक्ष्णस्वनोऽस्त्यस्याः ठन् चण्डिका तीक्ष्णस्वना घण्टा यस्य। शिवे। "नमश्चण्डिकघण्टाय घण्टाय घण्टधारिणे" भा० शा० २८६अ० शिवस्तुतौ

चण्डिका स्त्री चण्डी स्वार्थे क चडि कोपे ण्वुल् वा। दुर्गायाम् अमरः।

चण्डिल पु० चडि–कोपे इलच् चण्ड+अस्त्यर्थे इलच् वा। १नापिते २वास्तुकशाके हेम० नापितस्य तीक्ष्णास्त्रवत्त्वात् वास्तुकस्य तीक्ष्णवीर्य्यवत्त्वाच्च तथात्वम्। ३नदीभेदे स्त्री उणादिको०

चण्डी स्त्री चण्ड–वनो० वा ङीष्। १दुर्गायां सप्तशती व्याख्यायां गुप्तवत्यां तु तन्नामनिरुक्त्यादिरुक्तं यथा "प्रसादो निष्फलो यस्य क्रोधोऽपि च निरर्थकः। न तं भर्त्तारमिच्छन्ति वस्त्रं पतितमिव स्त्रियः" इत्यादिना भक्तभयजनकत्वेनैव कोपस्य साफल्योक्तेस्तादृश एव कोपे चडिधातोर्ल्लक्ष्यतया प्रवृत्तेस्तदादेव "नमस्ते रुद्र मन्यव" इत्यादिना प्रथमं मन्यव एव नमस्कार दर्शनात् "भीषास्माद्वातः पवते भीषोदेति सूर्य्यः भीषास्मादग्निश्चेन्द्रश्च मृत्युर्धावति पञ्चमः" इत्यादिरुक्त्या वाय्वादि भयजनककोपस्यापि परब्रह्मलिङ्गत्वमक्षतमेव ऋतएव "महद्भयं वज्रमुद्यतमिति श्रुतौ वज्रपदेन ब्रह्मोच्यते नायुध विशेषो भयजनकत्वलिङ्गादिति चोक्तसुत्तरमीमांसायाम्। "कम्पनादिलधिकरच। तस्माच्छन्दात्पुंयोगलक्षणे ङीषि चण्डीति पदनिष्पत्तिः। तत्स्वरूपं चोक्तं रत्नत्रयपरीक्षायाम्

दीक्षितैः "नित्यं निर्दोषगन्धं निरतिशयसुखं ब्रह्मचैतन्य मेकं धर्मोऽधर्मीति भेदद्वितयमिति पृथगुभूय माया-वशेन। धर्मस्तत्वानुभूतिः सकलविषयिणी सर्वकार्यानुकूला शक्तिश्चेच्छादिरूपा भवति गुणगणाश्रयस्त्वेक एव। कर्तृत्वं तत्र धर्मी कलयति जगतां पञ्चसृष्ट्यादि कृत्ये धर्मः पुंरूपमाप्य सकलजगदुपादानभावं बिभर्त्ति। स्त्रीरूपं प्राप्य दिव्या भवति च महिषी स्वाश्रयस्यादि कर्त्तुः प्रोक्तौ धर्मप्रभेदावपि निगमविदां धर्मिवत् ब्रह्मकोटी दृति॥" इत्यादिसिद्धे उत्पत्तिप्रकरणे द्वादशे सर्गे सृष्ट्यारम्भकालिकं ब्रह्मसत्तामात्रं प्रकृत्य "तदात्मनि स्वयं लिङ्गिन्येवतामिव गच्छति। अष्टधीतात्मकं संविदहं-मर्शनपूर्वकम्। भाविनामार्थकलनैः किञ्चिदूहितरूपकम्। आकाशादणु शुद्धं च सर्वस्मिन् भाति बोधनम्। ततः सा परमा सत्ता सचेतश्चेतनोन्मुखी। चिन्मात्रयोन्या भवति किञ्चिल्लभ्यतया तदा। घनसंवेदना पश्चाद्भाविजीवादिनामिका। सन्मात्रवात्तकलना यदोज्झति परं पद-मित्यादि"। तट्टीकायामपि सन्मात्रस्य ब्रह्मणः "स ऐक्षत लोकान्नु सृजै" इति श्रुतिसिद्धमीक्षणभावं दर्शयति तदि-ति लिखितः। अष्टधीतात्मकम् अहङ्काराध्यासरहि-तम्। अतएव संविन्मात्रेणाहन्ताविमर्शः। सर्वस्मिन्नपि सृज्यविषये भाविनामरूपानुसन्धानांशेऽपि किञ्चिदेव संपृक्तमिव। अतएवाकाशादप्यल्पत्वेन न तु घनम्। अतएव च शुद्धमेव घनमालिन्याभावाद्ब्रह्मैव। चेत्यनां गच्छन्नीव सती सचेतश्चेतना ऐक्षणदक्तृप्रभिव्यक्तचैतन्यं तदनुसुखी तत्प्रधाना सती किञ्चिल्लभ्यतया वाक्प्रवृत्ति विषय धर्म्मलाभेन तदा चिन्मात्रयोन्या भवतीत्यर्थः। प-श्चात्तु सैव वृत्तिचिराद्वृत्या घनीभूता सम्यगेवात्तकलना सूक्ष्मप्रपञ्चात्मभावलक्षणपरिच्छेदयाङ्किनी सती परं पदमपरिच्छिन्नभूमानन्दात्मभावं यदा विस्मरति तदा-ङ्किरण्यगर्भाख्यसमष्टिजीवादिनामिका भवतीत्याह। घनेति। ऐदंशेक्षणाद्यात्मिका चण्डी चिदादि नामकसमष्टिवृत्तिरूपधर्म्मात्मकशुद्धब्रह्माभिज्ञानां ज्ञाने-च्छाक्रियाणां तिसृणां व्यष्टीनां महासरस्वतीमहा-कालीमहालक्ष्मीरितिप्रवृत्तिनिमित्तवैलक्षण्येन नाम-रूपालराणि तादृशनामरूपविशिष्टदेवतात्रयसम-ष्टित्व प्रवृत्तिनिमित्तीकृत्य धर्म्मे चण्डिकेति व्यव-हारः। एवं व्यष्टीनां वामाज्येष्ठारौद्रीति पञ्चम्नीमध्य ग्रन्थैश्वरीति ब्रह्मा विष्णुः रुद्र इति रूपभेदेन समष्टे-रपि अम्बिका शाला परेत्यादि संज्ञा अनन्ताः तन्त्रान्तरादवगन्तव्याः द्वितीयसप्तशत्यादेवैषा तुरीयेति शक्ति निर्दिश्यते आचार्यभगवत्पादैरप्युक्तं "गिरा-माद्यैर्वीं दृष्टिभिष्टिभिर्भागमविदो हरेः पत्नीं पद्मां हरसहचरीमद्रितनयाम्। तुरीया कापि त्वं दुरधिगमनिःसीममहिमा महामाये! विश्वस्याभवसि परब्रह्ममहिषीति"। २हिंसायां २कोपनायाञ्च मेदिनी। "मङ्किकाचण्डले चण्डि!" सा० द० "नयु-गसयुगगुरुभिः किल चण्डी" वृत्त० र० उक्ते ४छन्दो-भेदे उपचारात् दुर्गासप्तशत्यात्मग्रन्थवेदके मार्कण्डे-यपुराणान्तर्गते सप्तशतीनामान्वाख्याते ५स्तवभेदे। तत्पाठप्रकारादि यथा वाराहीतं० "अर्गलं कीलक-ञ्चादौ पठित्वा कवचं पठेत्। ततो वेत् सप्तशतीं पश्चात् क्रम एष शिवोदितः। अर्गलं दुरितं हन्ति कीलकं फलदं तथा। कवचं रक्षतेच्चित्यं चण्डिका लितयं तथा" तिथितं० मत्स्यसू०। "जप्त्वा च प्रणवं चादौ स्तोत्रं वा संहितां पठेत्। अन्ते च प्रणवं दद्यादित्यु वाचादिपूरुषः। सर्वत्र पाठे विज्ञेयो ह्यन्यथा विफलं भवेत्। शुद्धेनाऽनन्यचित्तेन पठितव्यं प्रयत्नतः। न कार्य्यासक्तमनसा कार्य्यं स्तोत्रस्य वाचनम्। आधारे स्थापयित्वा तु पुस्तकं वाचयेत् सुधीः। हस्तसंस्थापना-देव यस्मादल्पफलं लभेत्। स्वयञ्च लिखितं यत्तु कृतिना लिखितं न यत्। अन्यब्राह्मणेन लिखितं तद्यपि विफलं भवेत्। ऋषिच्छन्दादिकं न्यस्य पठेत् स्तोत्रं विचक्षणः। स्तोत्रे न दृश्यते यत्र प्रणवन्यासमाचरेत्। सङ्कलिते स्तोत्रपाठे संख्यां कृत्वा पठेत् सुधीः। अध्यायं प्राप्य विरमेन्नतु मध्ये कदाचन। कृते विरामे मध्ये तु अध्यायादिं पठेत्ततः" तत्रैव भविष्यपु०। "ब्राह्मणं वा-चकं विद्यान्नान्यवर्णजमादरात्। श्रुत्वान्यवर्णजाद्राजन्! वाचकात्परकं व्रजेत्। देवाग्नीमग्रतः कृत्वा ब्राह्मणानां विशेषतः। यन्थिञ्च शिथिलं कृत्वाद्वाचकः कुरुनन्दन!। पुनर्बध्नीत तत्स्थानं न शक्ता धारयेत् क्वचित्। विस्मृतम-द्भुतं ज्ञानं खट्वाजरपदत्यजा। कलस्वरसमायुक्तं रस-भावसमन्वितम्। बुध्यमानः सदर्थं वै ग्रन्थार्थं कृतलक्षणो नृप!। ब्राह्मणादिषु सर्वेषु ग्रन्थार्थज्ञार्पयन्निव। य एवं वाचयेद्ब्रह्मन्! स विप्रो व्यास उच्यते। सप्तस्वरसमायुक्तं काले काले विराम्यते!। प्रदर्शयन् रसान् सर्वान् वाचये-द्वाचको नृप!। तस्य फलं यथा "चण्डीपाठ-

फलं देवि! शृणुष्व गदतो मम। एकाहुत्तादिपाठानां यथावत् कथयामि ते। संकल्पपूर्वं संपूज्य न्यस्याङ्गेषु मनून् सकृत्। पाठाङ्गलिप्रदानाद्धि सिद्धिमाप्नोति मानवः। उपसर्गस्य शान्त्यर्थं त्रिराहुत्तं पठेन्नरः। यद्वोपशान्त्यै कर्त्तव्यं पञ्चाहुत्तं वरानने!। महाभये समुत्पन्ने सप्ताहुत्तं समुच्चरेत्। नवाहुत्ता भवेच्छान्तिर्वाजपेयफलं लभेत्। राजवश्याय भूत्यै च रुद्राहुत्तसदीरयेत्। अर्काहुत्या कार्यसिद्धिर्वैरहानिश्च जायते। मन्त्राहुत्ता रिपुर्वशमुत्सवा स्त्री वशमाप्नुयात्। सौख्यं पञ्चदशाहुत्ता श्रियमाप्नोति मानवः। कलाहुत्ता पुत्रपौत्रधनधान्यागमं विदुः। रात्रौ भीतिविमोक्षाय वैरस्योच्चाटनाय च। कुर्यात् सप्तदशाहुत्तं तथाष्टादशकं प्रिये!। महाव्रणविमोक्षाय त्रिंशाहुत्तं पठेत् सुधीः। षड्विंशावर्त्तनात्तु भवेद्बन्धविमोक्षणम्। सङ्कटे समनुप्राप्ते दुश्चिकित्स्यामये तथा। जातिध्वंसे कुलोच्छेदे आयुषो नाश आगते। वैरिदुष्टौ व्याधिदुष्टौ धननाशे तथा क्षये। तथैव त्रिविधोत्पाते तथा चैवातिपातके। कुर्याद्वै यत्नात् शताहुत्तं ततः सम्पद्यते शुभम्। श्रियोद्वृद्धिः शताहुत्ताद्राज्यवृद्धिस्तथापरे। मनसा चिन्तितं देवि! सिध्येदष्टोत्तराच्छतात्। शताश्वमेधयज्ञानां फलमाप्नोति सुव्रते!। सङ्ख्यावर्त्तनात् लक्ष्मीराहुणोति स्वयं स्थिरा। भुक्त्वा मनोरथान् कामान् नरोमोक्षमवाप्नुयात्। यथाश्वमेधः क्रतुराट् देवानाञ्च यथा हरिः। स्तवानामपि सर्वेषां तथा सप्तशतीस्तवः। अथ वा बहुनोक्तेन किमेतेन वरानने!। चण्ड्याः शताहुत्तपाठात् सर्वाः सिद्ध्यन्ति सिद्धयः" तिथित०मत्स्यसूक्तादि "सकामैः संपुटो जाप्यो निष्कामैः संपुटं विना। शतमादौ शतञ्चान्ते संपुटोऽयमुदाहृतः" इत्याद्युक्तेः कामनाभेदेन नवार्णं (ऐं ह्रीं क्लीं चामुण्डायै विच्चे) मन्त्रादिभिरस्या संपुटता, अनया वा नवार्णस्य संपुटता कार्येति मतद्वयं तत्र शुम्भस्था सप्तशतीस्तोत्रेण नवार्णस्य संपुटेनोक्ता यथाह डामरतन्त्रे "मार्कण्डेय पुराणोक्तं नित्यं चण्डीस्तवं पठन्। पुटितं मूलमन्त्रस्य जपेन्नाप्नोतिवाञ्छितमिति"। पुटितमिति पाठक्रियाविशेषणम्। पुटितत्वं संपुटाकारता। तथा च स्तवोयथा मूलमन्त्रजपस्य संपुटाकारोभवति तथा पठनान्मूलजपस्य यद्वाञ्छितमफलन्तत्सिध्यतीत्यर्थः। ततश्चण्डीयर्ग्वादिन्यासपूर्वकञ्चरित्रत्रयम्पठित्वा मध्ये स्वसङ्कल्पितसंख्यानुसारेण सप्तशादिसंख्याकं नवार्णञ्जपित्वा पुनश्चण्डीस्तवं पूर्ववत्पठेत्। परन्तत्तदन्ते पुनर्मूलमष्टोत्तरशतमात्रं जप्त्वाऽऽत्मनिवेदनादिकं कुर्यात्। अयं च जपोऽङ्गभूतेन प्रधानसंख्यायासमुपयुज्यते इति विशेषः। तदप्युक्तं तत्रैव चरित्रत्रयस्य ऋष्यादीनुक्त्वा "एवं संस्मृत्य ऋष्यादीन्यत्वा पूर्वोक्तमार्गतः। सार्धसप्तशतीस्तवं सप्तपदाचरम्। समाप्तौ तु महालक्ष्मीं ध्यात्वा कृत्वा षडङ्गकम्। जपेदष्टशतं मूलं देवतायै निवेदयेदित्यादि"। केचित्तु मूलमन्त्रजपेन पुटितं चण्डीस्तवं पठन्ति प्रथम श्लोकं योजयन्त्वरमश्लोके पुनर्विधानं संख्यामात्रपरमिति मन्यमानाः सप्तशतीस्तोत्रस्यैव मूलेन संपुटीकारोविधीयतइत्यङ्गाङ्गीभावविपरीतमिच्छन्ति। तदयुक्तं "बहुषु तन्त्रेषु नवार्णं प्रक्षिप्य तत्प्रकरणे सप्तशतीपाठविधानेन नवार्णजपस्य प्राकरणिकत्वेनान्याङ्गत्वायोगात्। तत्रविद्यमानायाऽपि स्तोत्रे फलश्रुतेः प्रयोजकफलश्रुतेः "बलमेवर्त्तुनामवरुन्धे" इत्यस्यादावविवक्षितार्थकत्वात्। मरीचिकल्पे "रात्रिसूक्तं जपेदादौ मध्ये चण्डीस्तवम्पठेत्। प्रान्ते तु जपनीयं वै देवीसूक्तमिति क्रमः। एवं संपुटितं स्तोत्रं पूर्वोक्तफलदायकम्" इत्यनेन वैदिकसूक्तद्वयेन संपुटितताया: सप्तशत्या विधानाच्च। सच स्तवः मार्कण्डेयपुराणस्थत्रिसप्तत्यध्यायोत्तरं षड्शीतितमाध्यायान्तमभिव्याप्तः। "सावर्णिः सूर्यतनयः" इत्यारभ्य सावर्णिर्भविता मनुरित्यन्तस्त्रयोदशभिरध्यायैः परिच्छिन्नः श्लोकसमूहात्मको मालामन्त्रत्वेन प्रसिद्धः। अस्य सप्तशतीत्वव्यवहारस्तु न श्लोकसंख्यया तेषां षट्शतोत्तोऽपि न्यूनत्वात्। नापि कवचादित्रयरहस्यत्रययोर्मेलनेन, संख्याधिक्यापत्तेः। "जपेत् सप्तशतीं चण्डीं कृत्वा तु कवचं पुरः" इत्यनेन कवचस्य सप्तशत्याः पृथङ्निर्देशाच्च। तस्माच्चण्डे एकमन्त्रात्मकस्यापि मालामन्त्रस्य होमाङ्गत्वेन संपुटार्थत्वेन च सप्तशतधा विभजनात् शतरुद्रियस्येवैकानेकमन्त्रात्मकत्वे विरोधाभावात्तथा व्यवहारोपपत्तिः। एतच्चोत्तमत्वन्तु तन्त्रान्तरे "यथाश्वमेधः क्रतुषु देवानाञ्च यथा हरिः। स्तवानामपि सर्वेषान्तथा सप्तशतीस्तवः"। तत्रापि कलावतिप्रशस्तः "कलौ चण्डीविनायकावितिवचनात्। वाराहीतन्त्रे सर्वेषां स्तोत्राणां परशुरामशापसङ्गा तद्विरहितानि कतिचिद्दर्शितानि "भीष्मपर्वणि या गीता सा प्रशस्ता कलौ युगे। विष्णोर्नाम

सङ्ख्याख्यं महाभारतमध्यगम् । चण्ड्राः सप्तशतीस्तोत्रं तथा नामसङ्कलम्" इत्यादिना "भार्गवाख्येन रामेण शप्तान्यन्यानि कारणात्" इत्यन्तेन । यद्यपि तन्त्रान्तरेऽस्यापि स्तोत्रस्य शिवशापः कीलनं चेति सिद्धिनिरोधकावुक्तौ तथापि तत्रैव शापोद्धारोत्कीलनयोः कर्मविशेषयोस्तदङ्गत्वेन सत्कारूपविधानात्तदकरणे सिद्धिविरोधेन तदावश्यकत्वपरौ नार्थवादौ । तत्र शापोद्धारो यथा त्रयोदशप्रथमौ, द्वादशद्वितीयौ, एकादशतृतीयौ, दशमचतुर्थौ, नवमपञ्चमौ, अष्टमषष्ठौ, अध्यायौ पठित्वा सप्तममध्यायं हिः पठेदित्याकारकः प्रयोगः । उत्कीलनं यथा । आदौ मध्यमचरितं पठित्वा ततः प्रथमचरित्रमतस्तृतीयचरितंपठेदित्याकारकः । "अन्त्याद्यार्कद्विरुद्वह्निदिगब्ध्यद्रीन्दिभर्तवः । अष्टोऽष्ट इति वर्णानां शापोद्धारे मनोः क्रमः । उत्कीलने चरित्राणां मध्याद्यान्त्यमिति क्रमः" । अष्टोनवमः दृषः षष्ठमः दृभोऽष्टमः । "ददाति प्रतिगृह्णाति नान्यथैषा प्रसिद्ध्यति" इति विहितं दानप्रतिग्रहनामकमस्तोत्रोत्कीलनं तु कीलकाध्यायव्याख्यावसरे विशदीकरिष्यते । एवं सम्प्रदायसिद्धस्य नियमस्य प्रसरो ज्ञेयः । स्तोत्रपूर्वोत्तरभागपाठाभावे नैष्फल्यादिवचनानि शक्तिसङ्गमतन्त्रे द्रष्टव्यानि । "ऋष्यादिच्छन्दोदेवतादि पठेत् स्तोत्रे समाहितः । यत्र स्तोत्रे न दृश्येत प्रणवन्यासमाचरेत्" । डामरे "सप्तशत्याश्चरित्रे तु प्रथमे पद्मभूर्ऋषिः । छन्दो गायत्र्युदितं महाकाली तु देवता । वाग्बीजं पावकस्तत्त्वं धर्मार्थे विनियोजनम् । मध्यमस्य चरित्रस्य ऋषिर्विष्णुरुदाहृतः । उष्णिक्छन्दो महालक्ष्मीर्देवता बीजमम्बिका । वायुस्तत्त्वं भवेत्तत्र मोक्षार्थे विनियोजनम् । उत्तरस्य चरित्रस्य ऋषिः शङ्कर ईरितः । त्रिष्टुप् छन्दो देवताश्च महापूर्वा सरस्वती । कामोबीजं रविस्तत्त्वं कामार्थे विनियोजनम् । ह्रीं चण्डिकायै व्यस्तेन समस्तेन षडङ्गकौ । वाग्ऐं अम्बिका ह्रीं कामः क्लीं इति नवार्णप्रथमबीजत्रयम् ध्यानादिकं नवार्णवत् । अस्य पुरश्चरणस्वरूपं मरीचिकल्पे "कृष्णाष्टमीं समारभ्य यावत्कृष्णचतुर्दशीम्। द्वैत्रैकोत्तरमाजाप्यं पूर्वसंपुटितन्तु तत्। एवं देवि ! मया प्रोक्तः पौरश्चरणिकः क्रमः । तदन्ते हवनं कुर्यात्प्रतिश्लोकेन पायसम् । रात्रिसूक्तं प्रतिऋचं तथा देव्याश्च सूक्तकम् । कृत्वान्ते प्रजपेत्स्तोत्रमादौ पूजादिकं सुते !" इति । पूर्वाभ्यां पूर्वोक्ताभ्यां रात्रिसूक्तदेवीसूक्ताभ्यां संपुटितम् । प्रतिश्लोकेनेति मन्त्रविभागोपलक्षणम् कात्यायन्यादितन्त्रोक्तसप्तशतीविभागपरत्वस्य हवनादिविधिं प्रति वाक्यशेषत्वेन तैरेव वेद्यपदार्थनिर्णयावश्यम्भावात् "यच्च दुःखेनेत्यादेः स्वतन्त्रस्यास्यामिहोत्रादिविधिशेषत्वेन स्वीकारेण स्वर्गपदार्थनिर्णयस्य वैदिकसंमतत्वात् । होम संख्या तु स्तोत्रस्य त्रिरावृत्तिरूपेति ह्यूहाः । रात्रिसूक्तदेवीसूक्ते च ऋग्वेदशाकलसंहितायां प्रसिद्धे तस्यैवानेन जपे क्रमप्रक्रमः संपुटाकारो निर्दिश्यते । तच्छब्दस्य पूर्वपरामर्शित्वात् । तस्य श्लोकपूरणमात्रार्थत्वे तु द्वाभ्यामपि सूक्ताभ्यां त्रिरावृत्तसप्तशतीश्लोकोत्तरमेव एकैकमानुसारेण होमः । "सिद्धेश्वरीं जगद्धात्रीम्"

कण्ठपाठीकृत्य पुस्तकं विनैव तु स्रताञ्जलितया पठनसूत्तम मिति द्रष्टव्यम् । अत्र सङ्ख्यशब्देन द्वात्रिंशदक्षरात्मकस्यैकैकानुष्टुप्कल्पनेन तादृगानुष्टुपछन्दः सङ्ख्यं ज्ञेयमिति स्पष्टम् शक्तिसङ्गमतन्त्रराजे "द्वात्रिंशता स्वरैर्युक्त एकोपनृष्टो निगद्यते । सएव गदितः श्लोक स्तारानेत्रसमुद्भवः" इत्यादिना । तेन गद्यात्मकमालामन्त्रेष्वयम् नियमस्य प्रसरो ज्ञेयः । स्तोत्रपूर्वोत्तरभागपाठाभावे नैष्फल्यादिवचनानि शक्तिसङ्गमएव द्रष्टव्यानि ।"ऋष्यादिच्छन्दोदेवतादि पठेत् स्तोत्रे समाहितः । यत्र स्तोत्रे न दृश्येत प्रणवन्यासमाचरेत्" । डामरे "सप्तशत्याश्चरित्रे तु प्रथमे पद्मभूर्ऋषिः । छन्दो गायत्र्युदितं महाकाली तु देवता । वाग्बीजं पावकस्तत्त्वं धर्मार्थे विनियोजनम् । मध्यमस्य चरित्रस्य ऋषिर्विष्णुरुदाहृतः । उष्णिक्छन्दो महालक्ष्मीर्देवता बीजमम्बिका । वायुस्तत्त्वं भवेत्तत्र मोक्षार्थे विनियोजनम् । उत्तरस्य चरित्रस्य ऋषिः शङ्कर ईरितः । त्रिष्टुप् छन्दो देवताश्च महापूर्वा सरस्वती । कामोबीजं रविस्तत्त्वं कामार्थे विनियोजनम् । ह्रीं चण्डिकायै व्यस्तेन समस्तेन षडङ्गकौ । वाग्ऐं अम्बिका ह्रीं कामः क्लीं इति नवार्णप्रथमबीजत्रयम् ध्यानादिकं नवार्णवत् । अस्य पुरश्चरणस्वरूपं मरीचिकल्पे "कृष्णाष्टमीं समारभ्य यावत्कृष्णचतुर्दशीम्। द्वैत्रैकोत्तरमाजाप्यं पूर्वसंपुटितन्तु तत्। एवं देवि ! मया प्रोक्तः पौरश्चरणिकः क्रमः । तदन्ते हवनं कुर्यात्प्रतिश्लोकेन पायसम् । रात्रिसूक्तं प्रतिऋचं तथा देव्याश्च सूक्तकम् । कृत्वान्ते प्रजपेत्स्तोत्रमादौ पूजादिकं सुते !" इति । पूर्वाभ्यां पूर्वोक्ताभ्यां रात्रिसूक्तदेवीसूक्ताभ्यां संपुटितम् । प्रतिश्लोकेनेति मन्त्रविभागोपलक्षणम् कात्यायन्यादितन्त्रोक्तसप्तशतीविभागपरत्वस्य हवनादिविधिं प्रति वाक्यशेषत्वेन तैरेव वेद्यपदार्थनिर्णयावश्यम्भावात् "यच्च दुःखेनेत्यादेः स्वतन्त्रस्यास्यामिहोत्रादिविधिशेषत्वेन स्वीकारेण स्वर्गपदार्थनिर्णयस्य वैदिकसंमतत्वात् । होम संख्या तु स्तोत्रस्य त्रिरावृत्तिरूपेति ह्यूहाः । रात्रिसूक्तदेवीसूक्ते च ऋग्वेदशाकलसंहितायां प्रसिद्धे तस्यैवानेन जपे क्रमप्रक्रमः संपुटाकारो निर्दिश्यते । तच्छब्दस्य पूर्वपरामर्शित्वात् । तस्य श्लोकपूरणमात्रार्थत्वे तु द्वाभ्यामपि सूक्ताभ्यां त्रिरावृत्तसप्तशतीश्लोकोत्तरमेव एकैकमानुसारेण होमः । "सिद्धेश्वरीं जगद्धात्रीम्"

इति स्तवोरात्रिसूक्तम्। "नमो देव्यै महादेव्यै" इति स्तवो देवीसूक्तमिति क्वचित्। तन्न। प्रतिश्लोकेन प्रतिऋचमिति प्रतिनियतनिर्देशविरोधात्। ऋक्सूक्तादिशब्दानां वैदिकमन्त्रेष्वेव रूढ्या प्रसिद्धेः। सप्तशतसूक्तमित्यादिकाचित्कतान्त्रिकव्यवहारस्य केवलयौगिकत्वेनोपपत्तेः। तेन ऋक्पदस्य श्लोके लक्षणेत्यपि साहसमात्रम्। सप्तदशमनोध्यानादिविधौ हरिहरान्तरपदयोः प्रतिनियतनिर्देशबलादेव लक्षणाव्यवस्थाया इव प्रकृते ऋक्प्राया एव मन्त्रेत्यवस्थादार्ढ्यस्य कैमुतिकन्यायेनैव सिद्धेः। यदि त्वेवमालोच्यते "विश्वेश्वर्यादिकं सूक्तं दृष्टं यद्ब्रह्मणा पुरा। स्तुतये योगनिद्रायाः मम देव्याः पुरन्दर!। महिषाणकरी सूक्तं सर्वसिद्धिप्रदत्यथा। देव्या यथादिकं दिव्यं दृष्टं दैवैः महर्षिभिः। देवि! प्रपन्नार्तिहरे प्रसीदेत्यादिकं तथा। नारायणीस्तुतिर्नाम सूक्तं परमशोभनम्। सर्वत्राप्तुतये दृष्टं ब्रह्मादयैः सकलैः सुरैः। नमो देव्यादिकं सूक्तं सर्वकामफलप्रदमिति" विशकलितवेषेण पाञ्चरात्रलक्ष्मीतन्त्रे व्यवहारदर्शनादेतेषां श्लोकानामपौरुषेयसिद्धान्तत्वाच्च सूक्तशब्दव्यवहारो युज्यत एवेति, तदा कात्यायनीतन्त्रमते विश्वेश्वरीमिति श्लोकात् पूर्वं ब्रह्मोवाचेत्यस्य पाठाभावात्तदुत्तरमेव तत्पाठाच्च त्वं स्वाहेत्यारभ्यैव श्लोकारम्भः तस्य च योगनिद्राकरारात्रिदेवतात्वान्मरीचितन्त्रे रात्रिसूक्तपदेन निर्देश इति समाधेयम्। परन्तु तत्तन्त्रमनुसरता विश्वेश्वरीमिति श्लोकाङ्गीकारदशायां न श्लोतव्यम्। श्लोकान्तिम श्लोकस्य द्वधा विभागोऽपि न कार्यः। देवीसूक्तेऽपि त्रेधा विभागोऽङ्गीकारे न विशेषः प्रधानविधिशेषस्याङ्गविधावन्वयेन प्रतिऋचमिति पदे लक्षणाकल्पने मानाभावादित्यवधेयम्। क्रोडतन्त्रे "प्रतेऽकावर्त्तनं देवि! त्वन्मेधेन संमितम्। शिरादत्त्या जयेत्कामान् पञ्चादत्त्या रिपून् जयेत्"। काम्ये तु प्रयोगे विशेषः। कात्यायनीतन्त्रे "एकाद्यत्रादिपाठानां प्रतेऽकं पठतां सदाम्। सङ्कल्पपूर्वं संपूज्य न्यस्याङ्गेषु मनून् सकृत्। पञ्चाङ्गुलिप्रदानेन फलं प्राप्नोति मानवः"। बलिश्च ब्राह्मणादिभेदेन व्यवस्थयोक्तः कालिकापुराणे विशेषः द्रष्टव्यः। तत्रागकानामपि तत्रैव "कूष्माण्डमिक्षुदण्डश्च मद्यमासवमेव च। एते बलिसमाः प्रोक्तास्त्रयो ह्यागसमाः सदा"। ह्यागसमाः पञ्चविंशतिवर्षावधिदण्डजनकाः "अज्ञानाद्विकलानां रुधिरैः पञ्चविंशतिवार्षिकीम्। तद्विमाप्नोति परमां शार्दूलरुधिरैस्त्रयेति" तत्रैवोक्तेः। वस्तुतस्तु "न हिंस्या दिति" निषेधस्य संकोचमन्तरेणैव ह्यागसमानदण्डसम्भवे ह्यागबलिर्ब्राह्मणैर्न कार्यएव। एवं मद्यासवे अपि न देये। "वरं प्राणाः प्रयान्तु ब्राह्मणो नार्घमेत्सुरामिति" "ब्राह्मणो मदिरां दत्त्वा ब्राह्मण्यादेव हीयते" इति च दृढब्रह्मन्तन्त्रवचनात्। अतएव तत्प्रतिनिधिरपि कालिकापुराणे स्मर्यते "अवश्यं विकृतं यत्र मद्यं तत्र द्विजः पुनः। नारिकेलजलङ्कार्ये, तार्ये चैवेक्षुजेन्नघु"। कात्यायनीतन्त्रे "उपसर्गोपशान्त्यर्थं शिराहुतिं पठेन्नरः। यद्दोषोपशान्त्यर्थं पञ्चाहुतिं वारभने!। महाभये समुत्पन्ने सप्ताहुतिसदीरयेत्" इत्यादिना फलभेदेन संख्याभेदाननेकाहुतीरुपसंहृतम् "अथ वा बहुनोक्तेन किमन्येन वरानने!। चण्डिकाः शताहुतिपाठात्सर्वाः सिध्यन्ति सिद्धयः" इति। इतोऽप्यधिकाः सप्तशतसंख्यादयोऽत्र द्रष्टव्याः। हरमौरीतन्त्रे "श्रीकामः पुत्रकामो वा सृष्टिमार्गक्रमेण तु। जपेच्चण्डादिमारभ्य शुम्भदैत्यवधावधि। आदिमारभ्य प्रजपेत्पञ्चाङ्गं समापयेत्। शान्त्यादिकामः सर्वत्र स्थितिमार्गक्रमेण तु। सावर्णिः सूर्यतनयः सावर्णिर्भविता मनुः। सृष्टे चान्तमारभ्य पठादादि समापयेत्"। इत्यादिकस्य कामनाभेदेन पाठवैचित्र्यस्य कतिपयश्लोकमात्रपाठेन तत्तत्प्रयोगवैचित्र्यस्य च विस्तरो डामरादितन्त्रस्योपबृंहणान्तरेभ्य एवावगन्तव्यः। केरलास्तु एकैकस्मिन्दिवसे एकैकमेव चरितं पठेदिति दिनत्रयेणैकावृत्तिरित्येकः पक्षः। "चन्द्राग्निभूवेदकरेन्दुदस्रसङ्ख्याकानध्यायान् क्रमेण दिनभेदेन पठेदिति सप्तभिर्दिनैरेका द्वत्तिरित्यन्यः पक्षः इत्याहुः। अत्र द्वितीयमेव पक्षं पाठोऽयंहिप्रकारः। इति सप्तार्चयां संपद्धन बहुवस्तदनुयायिनोऽनुतिष्ठन्ति क्वचित्तपयश्चवर्गैरिङ्गभिषिञ्चान्यैरन्यैरङ्गैः नेत्रे न्यूनं क्षेयं तथा स्वरे केवले क्वचिते" इति प्रसिद्धपरिभाष्या यकारयकारककारा एकस्मिन् ठवरेफा द्वयो र्द्विगन्द्वयतुर्थ संकेतित इति। तत्मूलतन्त्राणि न एव जानन्ति। सन्त्यपि तानि तन्त्रवचनानि एकदिनैकाहत्यशक्तपराणि। अस्ति हि तादृशोऽप्यस्य प्रयोगः कात्यायनीतन्त्रे मन्त्रविभजनान्ते" होमे स्वाहाबिल्वा एते पूजायां तु नमोऽन्तिमाः। तर्पणे तर्पया-

व्यला जङ्घीयाबुर्धैमताः" इति वचनात् सप्तशत-ब्राह्मणभोजने प्रतिब्राह्मणैकैकमन्त्रेण कारुडानुसमयेन षोडशोपचाराणां पदार्थानुसमयेन वा पञ्चोपचाराणां वा कर्त्तुमशक्यतया स्वेच्छया ध्यायभेदेन वाऽनेक दिनसाध्यैकप्रयोगप्रसङ्गे उक्तवचनैर्विभजननियमो विधीयत इति। अत्र स्वयं पठितुमसमर्थस्य वा प्रभोर्वा ब्राह्मणद्वारापि प्रयोग इष्टः। तत्पक्षे दक्षिणा नियमस्तन्त्रेषु "पञ्चस्वर्णा शताद्यैः पञ्चाद्यैस्तु तत्त्रयम्। पञ्चाद्यैः स्वर्णमेकं त्रिराद्यैस्तदर्धकम्। एवाद्यौ पादमेकं दद्याद्वा शक्तितो बुधः" इति गुप्त-वती। पाठे इतिवधशब्दौ न पाठ्यौ अध्यायान्ते विधा-नपारिजाते स्थितम्।

नन्दादिशक्तिभेदाम्बामर्थादिबीजभेदाच्च अन्यत्रोक्ता द्रष्टव्याः। चण्ड्राः श्लोमाङ्कत्वेन संपुटार्थत्वेन च सप्तशतमन्त्रवि-भागः कात्यायनीतन्त्रे दर्शितः गुप्तवत्यां च तद्व्याख्या-ख्यानपूर्वकं मन्त्रविभागे विशेषं युक्त्या निर्णीय संपद्य-श्लोकैर्यथा निर्णीतं तथात्र प्रदर्श्यते। तत्र एकाध्यायात्मक प्रथम चरितस्य मन्त्रविभागसूचकास्तत्त्वाः श्लोका यथा "मार्कण्डेय उवाचेति मन्त्रः प्राथमिकोमतः। सावर्णादा नुनिवराभ्यमाना श्लोकाद्दश। सोऽचिन्तयत् तदा तस्ये त्यर्धश्लोकात्मकोमनुः। मत्पूर्व्वैरित्युपक्रम्य सप्त श्लोका न्यपात्निमाः। अत्र वैश्यः, समाध्याद्याःसंस्थितान्तास्ततस्त्रयः। किं नु तेषां कथं ते किम् इत्यर्धश्लोकौ मनू। राजोवाच ततोयैस्तेत्यर्धश्लोकमन्त्रकौ। मार्कण्डेय उवाच तस्तौ समाधिः श्लोकार्धमन्त्रकौ। वैश्योक्तिरेवमित्याद्या वस्तुत्वात्तास्ततस्त्रयः। तेषां श्रुते करोमीति द्वावर्द्धश्लोकमन्त्रकौ। श्रुत्वा तु तावितिश्लोको राजोक्तिर्भगवन्निति। दुःखावेति च मन्त्रौ द्वावर्धश्लोकात्मकौ मतौ। ममत्याद्याम्बुदतान्ताश्चत्वारोऽत्र ऋषेर्वचः। ज्ञानमस्तीत्युपक्रम्य उक्तवेऽन्तास्ततोदश। सा विद्येति च संसारेत्यर्धश्लोक कौ मनू। राजोक्तिर्भगवन् केति श्लोको यत्तदिति द्वयम्। अर्द्धश्लोकात्मकस्तृप्तिर्नित्यवेति तथापि तत्। द्वावर्धश्लोक-मन्त्रौ स्तो देवानां कार्यमादितः। तेजसः प्रभवस्त्वन्ता श्लोकाः षड् ब्रह्मणोऽत्र वाक्। त्वं स्वाहा त्वं स्वधेत्याद्याः श्लोकमन्त्रास्त्रयोदश। प्रबोधं चेति बोधश्चेत्यर्धश्लोका-त्मकौ मनू। ऋषिरेवं स्तुतेत्यादि विघ्नं श्लोकपञ्चकम्। नावधीत्युक्तवन्तावित्यर्द्धश्लोकमुद्वयम्। भगवांश्च भवेतां किमन्ये नेत्यर्धयुग्मकम्। ऋषिवाक्यं वञ्चिताभ्यामित्येकः श्लोकमन्त्रकः। आवां जह्यीत्यर्धमृषिरुवेति श्लोक-योर्युगम्। इत्यष्टसप्ततिश्लोकैश्चरध्यायत्रयमात्मनः। प्रथ-मस्य चरितस्य सर्वे मन्त्राश्चतुःशतम्:१०४। तेषूवाचा द्वितामन्त्राद्येकद्वेकत्रिपञ्चभिः। सकृच्छतत्रयभगद्वैश्च ब्रह्मन्दशर्षिभिः। चतुर्दश स्युः श्लोकार्धाश्चतुर्विंशतिरीरिताः। अवशिष्टास्तु षट्षष्टिःश्लोकमन्त्रा इति स्थितिः"। अध्यायत्रयात्मकस्य द्वितीयचरितस्य मन्त्रविभागसूचका स्तत्त्वाः संग्रहश्लोका यथा

"ऋषिर्विभागदृष्टिः स्युः श्लोकादेवासुरादयः। एवं द्वितीयकेऽध्याये मन्त्रा एकोन सप्ततिः६९। ऋषिर्निरूप्य-मानाद्याः पञ्चत्रिंशच्च मन्त्रकाः। देव्युक्तिर्गर्जे गर्जेति श्लोक एक ऋषेर्वचः। पञ्च श्लोका इति चत्वारिंश-त्तमे४४ तृतीयके। ऋषिः शक्रादयः श्लोकाः षड्विंशति रथर्षिवाक्। श्लोकद्वयमथो देवी श्लोकार्धं त्रियतामिति। देवा ऊचुस्त्रयः श्लोका भगवत्या कृतादिकाः। इदुक्त्वेऽन्तत् प्रपन्ना त्वमित्यर्धश्लोककोमनुः। ऋषेर्वचस्त्रयःश्लोकीत्य-ध्याये तु चतुर्थके। मन्त्राद्विचत्वारिंशत्४२ सुरथाय त्रियात्मनः। मध्यमस्य चरितस्य पञ्चपञ्चाशदुत्तराः। शतं१५५ मन्त्रा स्तेषु देव्या वचसीह ऋषेषु षट्। देव-नामेकमर्धं हे अन्ये श्लोका इति स्थितिः"।

नवाध्यायात्मकस्य तृतीयचरितस्य मन्त्रविभागसूचकाः तत्त्वाः संग्रह श्लोका यथा

"अर्थर्षि वाक्पुरागुह्येत्यादयः श्लोकासु षट्। देवा-ऊचुर्नमोदेव्या इत्यादिश्लोकपञ्चकम्। ततःश्लोकैकविंशत्या प्रतिश्लोकं त्रिशक्तिभः। विभागादनुषङ्गाभ्यां त्रिषष्ट्या कृतयो यथा। मन्त्राक्षरात्मकार्थभेदान्नमस्कृत्या इति त्रयः। मन्त्राः पूर्वोत्तरौ शेषौ या देव्यर्धं नमोनमः। तेषामाद्य-त्रयोर्योज्यो प्रतिमन्त्रकृमेण तौ। तेन पर्य्यवसानं स्या-देकैकोमन्त्र ईदृशः। या देवीत्यर्धसङ्ख्यार्थं नमस्तस्यै नमोनमः। इत्युच्चरेत् त्रिपाद्गायत्र्या त्वर्धमन्त्रिका। एते पूर्वार्धतुर्यार्द्धत्रयोगोत्था एकविंशतिः। भवन्ति वि-ष्णुमायादिभान्यन्यपदगर्भिताः। प्रथमा विष्णुमायोक्ता द्वितीया चेतना ततः। बुद्धिर्निद्रा क्षुधा छाया शक्तिस्तृष्णा तथाष्टमी। जातिर्लज्जातिरथो लज्जा शान्तिः श्रद्धा-चयोदशी। कान्तिर्लक्ष्मीस्तथोद्धृतिः स्मृतिरूपेण संस्थिता। दया तुष्टिस्तथामातृ भ्रान्तिरित्येकविंशतिः। स्वस्थानद्वयगा त्रिः प्रोक्ता स्त्रिपञ्चिर्मनवः कृताः। इन्द्रियाण्यासितिश्लोक एकमन्त्रस्तदुत्तरः। चिति-

रूपेण येत्येष प्राग्वत् मन्त्रत्रयात्मकः। स्तुता सुरै रिति श्लोकाष्टमिरेवं सप्तादशार्धर्चि र्निगद्येति मनुत्रयम्। दूतोक्तिर्देवि! दैत्येति नव श्लोका ऋषेर्वचः। इत्युक्त्वा सा तदेत्येकः श्लोको देवीवचस्ततः। मत्सकाशमिति श्लोकचतुष्कमथ दूतवाक्। अवलिप्तेति चत्वारः श्लोका देव्यास्ततोवचः। एवमेतदिति द्वाविंश्येकोनत्रिंशदुत्तरम्। शतं १२९ मन्त्राः पञ्चमे षट्सप्तति७६ श्लोकमखिलते। अथर्षिरित्याकर्ण्येति चतुःश्लोकी ऋषेर्वचः। तेनाभ्युद्यत इति श्लोक त्रयं देवीवचस्ततः। दैत्येश्वरेत्येकोऽथ ऋषिरित्युक्त इत्यमी। द्वादशेति मताः षष्ठे चतुर्विंशतिमन्त्रकाः२४। अथर्षिराक् मयाभग्ना इत्याद्यास्तप्राडग्रनिशतिः २१। ऋषिस्ताविद्युभाविति सप्तमे सप्तविंशतिः२७। अथर्षिर्वाणी जगदे चेत्यारभ्याभिजघान तम्। इत्यन्तः पञ्च पञ्चाशच्छ्लोकामन्त्रास्ततः परम्। सुखेन काली जगदे इत्यर्धश्लोकमन्त्रकः। ततोऽस्ताविति षट् श्लोकास्त्रिषष्टिरेत्यमष्टमे६३। राजा विचित्रमित्यादि श्लोक द्वयमथो ऋषिः। चकार कोपमित्याद्याः सप्तविंश दुदीरिताः। इत्येकचत्वारिंशत्४१ स्युर्नवमाध्यायमन्त्रकाः। ऋषिर्निशुम्भं निहतमिति द्वाविंशिकावचः। ऐकैकेति द्वयं देवी तत एकोऽहमित्यृषिः। ततः प्रवृद्धे युद्धमिति श्लोकास्त्रयोदश। तत्रापि सा निराधारेत्यर्धश्लोकात्मकोमनुः। नियुद्धं खे तदा दैत्य इत्याद्या मनवोनव। इत्येवं दशमेऽध्याये द्वात्रिंशन् मनवोमताः३२। ऋषेर्दैत्याहते तत्रेत्याद्यास्त्रिंशच्चतुर्युता३४। देवीवाग् वरदेत्येको देवाः सर्वेति चैककः। देवी वैवस्वतेत्यष्टावथ शाकम्भरी मनुः। अर्धश्लोकात्मकः पञ्चाच्छ्लोकास्तत्रैव चेति षट्। एवमेकादशे मन्त्राः पञ्चपञ्चाशदीरिताः५५। देवीवागेभिरित्याद्याः श्लोका अष्टादशोदिताः। सर्वं ममैतदित्यर्धं पञ्चाद्याः श्लोकका दश। ऋषेर्वचनमित्युक्त्वेत्याद्याः श्लोकास्तत्रयः। निशुम्भे चेत्यर्धमनुरेवं भगवतीति षट्। इत्येकचत्वारिंशत्४१ स्युर्द्वादशाध्यायमन्त्रकाः। ऋषिरेतत्त इत्यर्धश्लोको मन्त्रस्ततस्त्रयः। एवंप्रभावा सेत्याद्या मार्कण्डेय उवाच ह। इति तस्येति षट् श्लोका देवी यदिति चैककः। मार्कण्डेय उवाचाथ ततो वव्रे मनुद्वयम्। देव्युवाच ततः स्वैरश्लोकैरिति षण्मताः। अर्धश्लोकात्मका मन्त्रा मार्कण्डेयवचस्ततः। इति दत्त्वा तयोरेवं देव्यावरमिति द्वयम्। द्विर्दशकलितन्यायादष्टत्रं स्याच्चतुष्टयम्। इत्येवमेकोनत्रिंशन्२९मनवः स्युस्त्रयोदश। अत्रापरे नवार्धानि केचिदेकादशाभ्यधुः। न तत् कात्यायनीतन्त्रजल्पितं किन्तु कल्पितम्। इत्युत्तरचरित्रेऽस्मिन्नध्यायत्रितयात्मनि। सम्भूय मन्त्रसंख्यैकचत्वारिंशच्चतुःशतो४११। अर्धश्लोकात्मका मन्त्रा सेषु द्वादश कीर्तिताः। त्रिपाद् मन्त्रास्तु षट्षष्टिर्द्वौ श्लोकौ पुनरुक्तकौ। श्लोका अपुनरुक्तास्तु त्रिशती सप्तविंशतिः १२७। राजैको देवदूतोक्ती द्वे द्वे देव्युक्तयोदश। मार्कण्डेयोक्तवस्त्रिसप्तऋषिवाक्यानि षोडश। इत्युद्वाचाङ्कितामन्त्रास्ततस्त्रिंशदिति ३० स्थितिः। अथसर्वं मिलितास्तदध्यायेषु त्रयोदशसु। पञ्च शतानि श्लोका अष्टसप्ततियुतानि५७८। तेष्वन्यौ श्लोकौ द्विपुनौ भवतस्त्रेधा द्वाविंशतिर्भागः। एकोनविंशतेव द्वेधा ते पञ्चषष्टिरतिरिक्ताः। ब्रह्मा भगवान्नन्तोवैशम्पो देवा ऋषो मार्कण्डुसुतः। देव्युपचर्यैकैकद्विद्वित्रिचतुः शरार्कऋचमिताः। इति सप्ताधिकपञ्चाशदुवाच पदाङ्किता अमी अधिकाः। द्वाविंशतिशतमेषां श्लोकैर्योगेन मन्त्रसप्तशती। इति विभजनमुदितं प्रतिमन्त्रं कात्यायनीतन्त्रे। तस्मादेतत् प्रकृतिकमपूर्णमन्त्रेषु यामलप्रभृति। एकमन्त्रक्षिप्तान्मन्त्रः पुनरुक्तोऽर्धमन्त्रकः। उवाचाङ्कितइत्येवं मन्त्रः प्रोक्तोऽत्र पञ्चधा। मन्त्रपिण्डः श्लोकपिण्डो ऽध्यायपिण्ड इति त्रिधा।" शुम्भवती

नागोजीभट्टकृतविभागस्त्वन्याद्दशः विस्तरभयान्नोक्तः उभयोश्च युक्तायुक्तत्वमुभयग्रन्थदर्शनेन सुधीभिर्विचिन्त्यम्।

तदयं संक्षेपः।

| अध्यायः | श्लोकः | श्लोकात्मा | अर्द्धश्लोकात्मा | त्रिपाद् | उवाचाङ्कितः | मन्त्रः |
|---|---|---|---|---|---|---|
| १च० | १ | ७८ | ६६ | २४ | ० | १४ | १०४ |
| २ | ६८ | ६८ | ० | ० | १ | ६९ |
| ३ | ४१ | ४१ | ० | ० | २ | ४३ |
| ४ | २६ | २५ | २ | ० | ५ | ४२ |
| २च०१ | १४५ | १४३ | २ | ० | ९ | १५५ |
| ५ | ७६ | ५४ | ० | ६६ | ९ | १२९ |
| ६ | २० | २० | ० | ० | ४ | २४ |
| ७ | २५ | २५ | ० | ० | २ | २७ |
| ८ | ६१॥ | ६१ | १ | ० | १ | ६२ |

| अध्यायः | श्लोकः | श्लोकाः | अर्द्धश्लोकाः | त्रिपाद् | उवाचाङ्कितः | मन्त्रः |
|---|---|---|---|---|---|---|
| ८ | ३८ | ३८ | • | • | २ | ४१ |
| १० | २७॥ | २७ | १ | ० | ४ | ३२ |
| ११ | ५०॥ | ५० | १ | ० | ४ | ५५ |
| १२ | ३८ | ३७ | २ | ० | २ | ४१ |
| १३ | १७॥ | १४ | ७ | ० | ६ | पुनरुक्त१२८ |
| ३च० ८ | ३५५ | ३२७ | १२ | ६६ | २४ | पुनरुक्त२४४१ |
| समष्टिः | १ ५७८ | ५३७ | ३८ | ६६ | ५७ | पुनरुक्त२ ७०० |

अस्ति रहस्यमतिगुह्यं मार्कण्डेय प्रा० प्राधानिकादिरहस्ये "राजोवाच। भगवन्नवतारा मे चण्डिकायास्त्वयोदिताः। एतेषां प्रकृतिम्ब्रह्मन्! प्रधानं वक्तुमर्हसि। आराध्यं यन्मया देव्याः स्वरूपं येन च द्विज!। विधिना! ब्रूहि सकलं यथावत् प्रणतस्य मे। ऋषिरु०"इदं रहस्यं परममनाख्येयं प्रचक्षते। भक्तोऽसीति न मे किञ्चित्तवाख्यं नराधिप!। सर्वस्याद्या महालक्ष्मीस्त्रिगुणा परमेश्वरी। लक्ष्यालक्ष्यस्वरूपा सा व्याप्य कृत्स्नं व्यवस्थिता। मातुलिङ्गगदां खेटं पानपात्रं च बिभ्रती। नागं लिङ्गं च योनिञ्च बिभ्रती रूप मूर्धनि। तप्तकाञ्चनवर्णाभा तप्तकाञ्चनभूषणा। शून्यं तदखिलं स्वेन पूरयामास तेजसा। शून्यं तदखिलं लोकं विलोक्य परमेश्वरी। बभार रूपमपरमसमा केवलेन हि। सा भिन्नाञ्जनसंकाशा दंष्ट्रोद्भासितवानना। विशालनेत्रना नारी बभूव तनुमध्यमा। खड्गपात्रशिरःखेटैरलङ्कृतचतुर्भुजा। कबन्धहारं शिरसा बिभ्राणा हि शिरःस्रजम्। तामुवाच महालक्ष्मीस्तामसीं प्रमदोत्तमाम्। ददामि तव नामानि यानि कर्माणि तानि ते। महामाया महाकाली महामारी क्षुधा तथा। निद्रा तृष्णा चैकवीरा कालरात्रिर्दुरत्यया। इमानि तव नामानि प्रतिपाद्यानि कर्मभिः। एभिः कर्माणि ते ज्ञात्वा योऽधीते सोऽश्नुते सुखम्। तामित्युक्त्वा महालक्ष्मीः स्वरूपमपरन्नृप। सत्वाख्येनातिगुह्येन गुणेनेन्दुप्रभन्दधौ। अक्षमालाङ्कुशधरा वीणापुस्तकधारिणी। सा बभूव वरा नारी नामान्यस्यै च सा ददौ। महाविद्या महावाणी भारती वाक्सरस्वती। आर्या ब्राह्मी महाधेनुर्वेदगर्भा सुरेश्वरी। अथोवाच महालक्ष्मीर्महाकालीं सरस्वतीम्। युवां जनयतान्देव्यौ मिथुने स्वानुरूपतः। इत्युक्ता ते महालक्ष्मीः ससर्ज मिथुनं स्वयम्। हिरण्यगर्भौ रुचिरौ स्त्रीपुंसौ कमलासनौ। ब्रह्मन्विधे विरिञ्चेति धातरित्याह तं वरम्। श्रीःपद्मे कमले लक्ष्मीत्याह-माता श्रियञ्च ताम्। महाकाली भारती च मिथुने सृजति स्म ह। एतयोरपि रूपाणि नामानि च वदामि ते। नीलकण्ठं रक्तबाहुं श्वेताङ्गं चन्द्रशेखरम्। जनयामास पुरुषं महाकाली सितां स्त्रियम्। स रुद्रः शङ्करः स्थाणुः कपर्दी च त्रिलोचनः। त्रयी विद्या कामधेनुः भाषाक्षरराक्षरा। सरस्वती स्त्रियङ्गौरी कृष्णं च पुरुषं नृपः। जनयामास नामानि तयोरपि वदामि ते। विष्णुः कृष्णो हृषीकेशो वासुदेवो जनार्दनः। उमा गौरी सती चण्डी सुन्दरी सुभगा शिवा। एवं युवतयः सर्वाः पुरुषत्वं प्रपेदिरे। चक्षुष्मन्तोऽनुपश्यन्ति नेतरेऽतद्विदो जनाः। ब्रह्मणे प्रददौ पत्नीं महालक्ष्मीर्नृप त्रयीम्। रुद्राय गौरीं वरदां वासुदेवाय च श्रियम्। सरया सह सम्भूय विरिञ्चोऽण्डमजीजनत्। विभेद भगवान्रुद्रस्तौर्यां सह वीर्यवान्। अण्डमध्ये प्रधानादि कार्यजातमभून्नृप!। महाभूतात्मकं सर्वं जगत्स्थावरजङ्गमम्। पुपोष पालयामास तं लक्ष्म्या सह केशवः। महालक्ष्मीरेवमजा राजन्! सर्वेश्वरेश्वरी। निराकारा च साकारा सैव नानाभिधानभृत्। नामान्तरैर्निरूप्यैषा नाम्ना नान्येन केनचित्" इत्यु०।

"ऋषिरुवाच। त्रिगुणा तामसी देवी सात्विकी या त्रिधोदिता। सा सर्वा चण्डिका दुर्गा भद्रा भगवतीर्यते। योगनिद्रा हरेरुक्ता महाकाली तमोगुणा। मधुकैटभनाशार्थं यान्तुष्टावाम्बुजासनः। दशवक्त्रा दशभुजा दशपादाञ्जनप्रभा। विशालया राजमाना त्रिंशल्लोचनमालया। सुरद्विषदंष्ट्राढ्या भीम रूपापि भूमिप!। रूपसौभाग्यकान्तीनां सा प्रतिष्ठा महाश्रियाम्। खड्गबाणगदाशूलचक्रशङ्खभुशुण्डिभृत्। परिघं कार्मुकं शीर्षं निशोतद्रुधिरे दधौ। एषा सा वैष्णवी माया महाकाली दुरत्यया। आराधिता वशीकुर्यात्पूजाकर्तुश्चराचरम्। सर्वदेवशरीरेभ्यो याऽऽविर्भूताऽमितप्रभा। त्रिगुणा सा महालक्ष्मीः साक्षान्महिषमर्दिनी। श्वेतानना नीलभुजा सुश्वेतस्तनमण्डला। रक्तमध्या रक्तपादा नीलजङ्घोरुरुन्नदा। सुचित्र जघना चित्रमाल्याम्बरविभूषणा। चित्रानुलेपना कान्ति रूपसौभाग्यशालिनी। अष्टादशभुजा पूज्या सा सहस्र भुजा सती। आयुधान्यत्र वक्ष्यन्ते दक्षिणाधःकर-

क्रमात् । अक्षमाला च कमलं वाणोऽसिः कुलिशङ्गदा ।
चक्रं त्रिशूलं परशुः शङ्खोघण्टा च पाशकः । शक्तिर्दण्डश्चर्म चापं पानपात्रं कमण्डलुः । अलङ्कृत भुजामेभिरायुधैः कमलासनाम् । सर्वदेवमयीमीशां महालक्ष्मीमिमां नृप ! । पूजयेत्सर्वदेवानां खलोकानां प्रभुर्भवेत् । गौरीदेहात्समद्भूता या सत्त्वैकगुणाश्रया । साक्षात्सरस्वती प्रोक्ता शुम्भासुरनिबर्हिणी । दधौ चाष्टभुजा बाणशूले मूलचक्रशङ्खं । घण्टां लाङ्गलञ्च कार्मुकं वसुधाधिप ! । एषा संपूजिता भक्त्या सर्वज्ञत्वं प्रयच्छति । निशुम्भमथिनी देवी शुम्भासुरनिबर्हिणी । इत्युक्तानि स्वरूपाणि मूर्त्तीनामव पार्थिव ! स्वरूपाणि जगन्मातुः, शृणुगर्भां निशामय । महालक्ष्मीर्यदा पूज्या महाकाली सरस्वती । दक्षिणोत्तरयोः पूज्ये पृथग्तो मिथुनत्रयम् । विरिञ्चिः स्वरया मध्ये रुद्रोगौर्या च दक्षिणे । वामे लक्ष्म्या हृषीकेश इत्येवन्देवतात्रयम् । अष्टादशभुजा मध्ये वामे चास्या दशानना । दक्षिणेऽष्टभुजा लक्ष्मीर्महती तां समर्चयेत् । अष्टादशभुजा चैषा यदा पूज्या नराधिप ! । दशानना चाष्टभुजा दक्षिणोत्तरयोस्तदा । कालस्यत्व च संपूज्यौ सर्वारिष्ट प्रशान्तये । यदा चाष्टभुजा पूज्या शुम्भासुरनिबर्हिणी । नवास्याः शक्तयः पूज्यास्तदा रुद्रविनायकौ । नमो देव्या इति स्तोत्रैर्महालक्ष्मीं समर्चयेत् । अवतारत्रयार्चायां स्तोत्रमन्त्रास्तदाश्रयाः । अष्टादशभुजा चैषा पूज्या महिषमर्द्दिनी । महालक्ष्मीर्महाकाली महती च सरस्वती । ईश्वरी पुण्यपापानां सर्वलोकमहेश्वरी । महिषान्तकरी येन पूजितासौ जगत्प्रभुः । पूजयेज्जगतां धात्रीं चण्डिकामक्षवत्सलाम् । अर्घ्यादिभिरलङ्कारैर्गन्धपुष्पैस्तथोत्तमैः । धूपैर्दीपैः सनैवेद्यैः नानाभक्ष्य समन्वितैः । रुधिराक्तेन बलिना मांसेन सुरया नृप ! । सुरभिणा क्षतीयेन चन्दनेन सुगन्धिना । सकर्पूरैश्च ताम्बूलैर्भक्तिभावसमन्वितैः । वामभागेऽग्रतो देव्याः छिन्नशीर्षं महासुरम् । पूजयेन्महिषं येन गतं सायुज्यमीशया । दक्षिणे पुरतः सिंहमतुलं धर्म्ममीश्वरम् । ततः कृताञ्जलिर्भूत्वा स्तुवीत चरितैरिभिः । एकेन वा मध्यमेन नैकेनेतरयोरपि । चरितार्द्धं तु न जपेज्जपन् छिद्रमवाप्नुयात् । स्तोत्रमन्त्रैस्तुवीतेमां यदि वा जगदम्बिकाम् । प्रदक्षिणनमस्कारं कृत्वा मूर्ध्नि कृताञ्जलिः । क्षमापयेज्जगद्धात्रीं मुहुर्मुहुरतन्द्रितः । प्रतिश्लोकन्तु जुहुयात्पायसं तिलसर्पिषा । जुहुयात्स्तोत्र मन्त्रैर्वा चण्डिकायै शुभं हविः । नमोनमः पदैर्देवीं पूजयेत् सुसमाहितः । प्रयतः प्राञ्जलिः प्रह्वः प्राणानारोप्य चात्मनि । सुचिरम्भावयेदीशां चण्डिकान्तन्मयो भवेत् । एवं यः पूजयेद्भक्त्या प्रत्यहं परमेश्वरीम् । भुक्त्वा भोगान्यथाकामं देवीसायुज्यमाप्नुयात् । योन पूजयते नित्यं चण्डिकां भक्तवत्सलाम् । भक्षीकृत्याश्च पुरुषान् निर्दहेत्परमेश्वरी । तस्मात्त्वं जय भूपाल ! सर्वलोकमहेश्वरीम् । यथोक्तेन विधानेन चण्डिकां सुखमाप्स्यसि" ॥ इ० ।

"ऋषिरुवाच । नन्दा भगवती नाम या भविष्यति नन्दजा । संस्तुता पूजिता ध्याता वशीकुर्य्याज्जगत्त्रयम् । कनकोत्तमकान्तिः सा सुकान्तिकनकाम्बरा । देवी कनकदामाढ्या कनकोत्तमभूषणा । कमलाङ्कुशपाशाब्जैरलङ्कृतचतुर्भुजा । इन्दिरा कमला लक्ष्मीः साधीरुक्ताम्बुजासना ॥ या रक्तदन्तिका नाम देवी प्रोक्ता मयानघा । तस्याः स्वरूपं वक्ष्यामि शृणु सर्वभयापहम् । रक्ताम्बरा रक्तवर्णा रक्तसर्वाङ्गभूषणा । रक्तायुधा रक्तनेत्रा रक्तकेशातिभीषणा । रक्ततीक्ष्ण नखा रक्तदशना रक्त दन्तिका । पतिं नारीवानुरक्ता देवी भक्तं भजेज्जनम् । वसुधाभवितस्वा सा सुमेरुयुगल स्तनी । दीर्घौ लम्बावतिस्थूलौ तावतीव मनोहरौ । कर्कशावतिकान्तौ तौ सर्वानन्दपयोनिधी । भक्तान् सम्प्रायवेद्देवी सर्वकामदुघौ स्तनौ । खड्गपात्रं च सुसलं लाङ्गलञ्च बिभर्त्ति सा । आख्याता रक्तचामुण्डा देवी योगेश्वरीतिसा । अनया व्याप्तमखिलं जगत्स्थावरजङ्गमम् । इमां यः पूजयेद्भक्त्या स व्याप्नोति चराचरम् । अधीते य इमं नित्यं रक्तदन्तीवपुस्तवम् । तं सा परिचरेद्देवी पतिस्त्रियमिवाङ्गना ॥ शाकम्भरीं नीलवर्णां नीलोत्पलविभूषणा । गम्भीरनाभित्रिवली विभूषिततनूदरी । सुकर्कशसमोत्तुङ्गवृत्तपीनघनस्तनी । सुपौ शिलीमुखैः पूर्णं कमलं कमलालया । पुष्पपल्लवमूलादिफलादिशाकसञ्चयान् । काम्यानन्नरसैर्युक्तं क्षुत्तृण्मृत्युजरापहम् । कार्मुकञ्च स्फुरत्कान्तिबिभर्त्ति परमेश्वरी । शाकम्भरी शताक्षी सा तृतीयेव दुर्गाऽभिकीर्त्तिता । शाकम्भरीं स्तुवन्ध्यायन् जपन्संपूजयन्नमन् । अक्षय्यमश्नुते शीघ्रमन्नपानादि सर्वदा । भीमाऽपि नीलवर्णा सा दंष्ट्रादशनभास्वरा ।

विशाललोचना नारी वृत्तपीनघनस्तनी। चन्द्रहासं च डमरुं शरं पात्रञ्च बिभ्रती। एकवीरा कालरात्रिः सैवोक्ता कामदा स्तुता५। तेजोमण्डलदुर्धर्षा भ्रामरी६ चित्रकान्निभृत्। चित्रमत्यरपाणिः सा महामारीति गीयते६। इत्येतामूर्त्तयोदेव्या व्याख्याता वसुधाधिप!। जगन्मातृचण्डिकायाः कीर्त्तिताः कामधेनवः। इदं रहस्यं परमं न वाच्यं कस्यचित्त्वया। व्याख्यानं दिव्यमूर्त्तीनामधीष्वावहितः स्वयम्। देव्याध्यानं मया प्रोक्तं गुह्यात्गुह्यतरम्महत्। तस्मात्सर्वप्रयत्नेन सर्वकाम फलप्रदम्। १६ अ०।

अतचण्डीविधानं मन्त्रमहोदधौ १८ तरङ्गे नवार्ण प्रयोगानन्तरं प्रतिपादितं यथा

"अतचण्डीविधानन्तु प्रवक्ष्ये प्रीतये नृणाम्। नृपोपद्रवकापन्ने दुर्भिक्षे भूमिकम्पने। व्यतिदृष्टावनादृष्टौ परचक्रभये क्षये। सर्व्वे विघ्ना विनश्यन्ति अतचण्डीविधौ कृते। रोगाणां वैरिणां नाशो धनपुत्र समृद्धयः। शङ्करस्य भवान्या वा प्रासादनिकटे शुभम्। मण्डपं द्वारवेद्याढ्यं कुर्य्यात् सध्वजतोरणम्। तत्र कुण्डं प्रकुर्वीत प्रतीच्यां मध्यतोऽपि वा। स्नात्वा नित्यं कृतिं कृत्वा इष्णुयाद्दृश बाडवान्। जितेन्द्रियान् सदाचारान् कुलीनान् सत्यवादिनः। व्युत्पन्नांश्चण्डिकापाठरताञ्छ्राद्धादयावतः। मधुपर्कविधानेन वस्त्रस्वर्णादिदानतः। जपार्थमासनं मात्रां दद्यात्तेभ्योऽपि भोजनम्। ते हविष्यान्नमश्नन्तो मन्त्रार्थगतमानसाः। भूमौ शयानाः प्रत्येकं जपेयुश्चण्डिकास्तवम्। मार्कण्डेयपुराणोक्तं दशकृत्वः सचेतसः। नवार्णं चण्डिकामन्त्रं जपेयुश्चायुतं पृथक्। यजमानः पूजयेच्च कन्यानां नवकं शुभम्। द्विवर्षाद्यादशाब्दान्ताः कुमारीः परिपूजयेत्। नाधिकाङ्गीं न हीनाङ्गीं कुष्ठिनीञ्च व्रणान्विताम्। अन्धां काणां जेकराञ्च कुरूपां रोगयुक्तनुम्। दासीजातां रोगयुक्तां दुष्टां कन्यां न पूजयेत्। विप्रां सर्व्वेप्सितसिद्ध्यै यशसे क्षत्रियोद्भवाम्। वैश्यजां धनलाभाय पुत्राप्त्यै शूद्रजां यजेत्। द्विवर्षा सा कुमार्युक्ता त्रिमूर्त्तिर्धारिनत्रिका। चतुरब्दा तु कल्याणी पञ्चवर्षा तु रोहिणी। षडब्दा कालिका प्रोक्ता चण्डिका सप्तहायनी। अष्टवर्षा शाम्भवी स्याद्दुर्गा च नवहायनी। सुभद्रा दशवर्षोक्ता ता मन्त्रैः परिपूजयेत्। एकाब्दायाः प्रौढभावो रुद्राब्दा तु विवर्जिता। तासामावाहने मन्त्रः प्रोच्यते शङ्करोदितः। मन्त्राक्षरमयीं लक्ष्मीं मातृणां रूपधारिणीम्। नवदुर्गात्मिकां साक्षात् कन्यामावाहयाम्यहम्। कुमारिकादि कन्यानां पूजामन्त्रान् ब्रुवेऽधुना। जगत्पूज्ये! जगद्वन्द्ये! सर्व्वशक्तिस्वरूपिणि। पूजां गृहाण कौमारि!। जगन्मातर्नमोऽस्तु ते। त्रिपुरां त्रिपुराधारां त्रिवर्गज्ञानरूपिणीम्। त्रैलोक्यवन्दितां देवीं त्रिमूर्त्तिं पूजयाम्यहम्। कालात्मिकां कलातीतां कारुण्यहृदयां शिवाम्। कल्याणजननीं देवीं कल्याणीं पूजयाम्यहम्। ऋद्धिमादिगुणाधारामकाराद्यक्षरात्मिकाम्। अनन्तशक्तिकां लक्ष्मीं रोहिणीं पूजयाम्यहम्। कामचारां शुभां कान्तां कालचक्रस्वरूपिणीम्। कामदां करुणोदारां कालिकां पूजयाम्यहम्। चण्डवीरां चण्डमायां चण्डमुण्डप्रभञ्जनीम्। पूजयामि महादेवीं चण्डिकां चण्डविक्रमाम्। सदानन्दकरीं शान्तां सर्व्वदेवनमस्कृताम्। सर्व्वभूतात्मिकां देवीं शाम्भवीं पूजयाम्यहम्। दुर्गमे दुस्तरे कार्य्ये भवार्णवविनाशिनीम्। पूजयामि सदा भक्त्या दुर्गां दुर्गार्त्तिनाशिनीम्। सुन्दरीं स्वर्णवर्णाभां सुखसौभाग्यदायिनीम्। सुभद्रजननीं देवीं सुभद्रां पूजयाम्यहम्। एतैर्मन्त्रैः पुराणोक्तैस्तां तां कन्यां प्रपूजयेत्। गन्धैः पुष्पैर्धूपभोज्यैर्वस्त्रैराभरणैरपि। वेद्यां विरचिते रम्ये सर्व्वतो भद्रमण्डले। घटं संस्थाप्य विधिवत्तत्रावाह्यार्च्चयेच्छिवाम्। तदग्रे कन्यकाश्चापि पूजयेद्ब्राह्मणानपि। उपचारैस्तु विविधैः पूर्व्वोक्तावरणान्यपि। एवं चतुर्दिनं कृत्वा पञ्चमे होममाचरेत्। पायसाज्यैस्तिलमध्वक्षौद्रसाकलैरपि। मातुलाङ्गैरिक्षुखण्डैर्नारिकेलैः पुरैस्तिलैः। जातिफलैराम्रफलैरन्यैर्मधुरवस्तुभिः। सप्तशत्या दशावृत्त्या प्रतिश्लोकं हुतञ्चरेत्। अयुतञ्च नवार्णेन स्थापितेऽग्नौ विधानतः। कृत्वाऽऽवरणदेवानां होमं तन्नामभिस्ततः। कृत्वा पूर्णाहुतिं सम्यग्देवमग्निं विसृज्य च। अभिषिञ्चेच्च यष्टारं विप्रैः कलसोदकैः। निष्कं सुवर्णमथ वा प्रत्येकं दक्षिणां दिशेत्। भोजयेच्च शतं विप्रान् भक्ष्यभोज्यैः पृथग्विधैः। तेभ्योऽपि दक्षिणान्दत्त्वा गृह्णीयादाशिषः शतः। एवं कृते जगद्धत्यं सर्व्वंनश्यन्त्यु पद्रवाः। राज्यं धनं यशः पुत्राश्चिरमन्यं लभेत सः"।

सङ्क्षेपचण्डीविधानं तत्रैव १८ तरङ्गे

"एतद्दशगुणं कुर्याज्जपखण्डीसाङ्गसिद्धिकं विधिम्। विद्यावतः सदाचारान् ब्राह्मणान् इगुणाच्छतम्। प्रत्येकं चण्डिकापाठान् विदध्युक्ते दिशा॰ मितान्। अयुतं प्रजपेयुक्ते प्रत्येकं च नवार्णकम्। पूर्व्वोक्ताः कन्यकाः पूज्याः पूर्व्वमन्त्रैः शतं शुभाः। दशाहमेवं संपाद्य होमं कुर्य्युः प्रयत्नतः। सप्तशत्याः शताङ्क्या प्रतिश्लोकं विधानतः। लक्षसंख्यं नवार्णेन पूर्व्वोक्तैर्द्रव्यसञ्चयैः। होमेभ्यो दक्षिणान्दत्त्वा पूर्व्वोक्तान् भोजयेद्द्विजान्। सहस्रसंमितान् साधून् देव्याराधनतत्परान्। एवं सहस्रसंख्याके कृते चण्डीविधौ नृणाम्। सिध्यत्यभीप्सितं सर्वं दुःखौघश्च विनश्यति। मारीदुर्भिक्षरोगाद्या नश्यन्ति व्यसनोच्चयाः। नेमं विधिं वदेद्दुष्टे खले चौरे गुरुद्रुहि। साधौ जितेन्द्रिये दान्ते वदेद्विधिमिमं परम्। एवं सा चण्डिका तुष्टा वक्तृ श्रोतृ च रक्षति"।

चण्डीनवाक्षरविधानं तत्रैव उत्तरखण्डे

"अथोनवाक्षरमन्त्रं वक्ष्ये चण्डीप्रसत्तये। वाङ्माया मदनो दीर्घलक्ष्मीसान्द्रा श्रुतीन्दुयुक्। डायै सदक्जलं कूर्म्मद्वयं भिराष्टोग्रसंयुतम्। (ऐँ ह्रीं क्रीं चामुण्डायै विच्चे) नवाक्षरोऽस्य ऋष्यो ब्रह्मविष्णुमहेश्वराः। छन्दांस्युक्तानि सृष्टिस्थितिसंहृतिकर्तृशक्तयः देव्यः प्रोक्ता महापूर्व्वा काली लक्ष्मीः सरस्वती। नन्दाशाकम्भरी भीमाः शक्तयोऽस्य मनोः स्मृताः। स्याद्रक्तदन्तिकादुर्गा भ्रामर्य्यो बीजसञ्चयः। अग्निवायुभगासक्तत्वन्मस्तकं वेदतत्त्वयोदितम्। सर्व्वाभीष्टप्रसिद्ध्यर्थं विनियोगउदाहृतः। ऋष्यादिन्यासदैवतानि शिरोमुखहृदि न्यसेत्। शक्तिबीजानि स्तनयोस्तत्त्वानि हृदये पुनः। एकेनैकेन चैकेन चतुर्भिर्युगलेन च। समस्तेन च मन्त्रेण कुर्य्यादङ्गानि षट् सुधीः। ततएकादश न्यासान् कुर्य्यात्तेषफलप्रदान्। अथमोमातृकान्यासः कार्य्यः पूर्व्वोक्तमार्गतः। कृतेन येन देवस्य सारूप्यं याति मानवः। अथ द्वितीयं कुर्व्वीत न्यासं सारस्वताभिधम्। बीजत्रयन्तु मन्त्राद्यं तारादि हृदयान्तिकम्। क्रमादङ्गुलिषु न्यस्येत् कनिष्ठाद्यासु सन्धिषु। करयोर्मध्यतः पृष्ठे मणिबन्धे च कूर्परे। हृदयादिषडङ्गेषु विन्यसेत् जातिसंयुतम्। अस्मिन् सारस्वतेन्यासे कृते जाड्यं विनश्यति। ततस्तृतीयं कुर्व्वीत न्यासं मातृगणान्वितम्। मायाबीजादिका ब्राह्मी पूर्व्वतः पातु मां सदा। माहेश्वरी तथाग्नेय्यां कौमारी दक्षिणेऽवतु। वैष्णवी पातु नैर्ऋत्यां वाराही पश्चिमेऽवतु। इन्द्राणी वायुकोणे च चामुण्डा चोत्तरेऽवतु। ऐशानेतु महालक्ष्मीरूर्द्धं व्योमेश्वरी तथा। सप्तद्वीपेश्वरी भूमौ रक्षेत्पातालेश्वरी तले। कृतेऽस्मिन् कृते न्यासे त्रैलोक्यविजयी भवेत्। न्यासं चतुर्थं कुर्व्वीत नन्दजादिसमन्वितम्। नन्दजा पातु पूर्व्वाङ्गे कमलाङ्कुशधारिणी। खड्गपात्रकरा पातु दक्षिणे रक्तदन्तिका। पृष्ठे शाकम्भरी पातु पुष्पपल्लवसंयुता। धनुर्बाणकरा दुर्गा वामे पातु सदैव माम्। शिरःपात्रकरा भीमा मस्तकाङ्घ्रिरवधि। पादादि मस्तकं यावद्भ्रामरी चित्रकान्विता। तुर्य्यं न्यासं नरः कुर्वन् जराव्याधिं व्यपोहति। अथ कुर्वीत ब्रह्माद्यं न्यासं पञ्चमसुत्तमम्। पादादिनाभिपर्य्यन्तं ब्रह्मा पातु सनातनः। नाभेर्विशुद्धिपर्य्यन्तं पातु नित्यं जनार्द्दनः। विशुद्धेर्ब्रह्मरन्ध्रान्तं पातु रुद्रस्त्रिलोचनः। हंसः पातु पदद्वन्द्वं वैनतेयः करद्वयम्। चक्षुषी हयभः पातु सर्वाङ्गानि गजाननः। परापरौ देहभागौ पात्वानन्दमयोहरिः। कृतेऽस्मिन् पञ्चमे न्यासे सर्वान् कामानवाप्नुयात्। षष्ठं न्यासं ततः कुर्य्यान्महालक्ष्म्यादिसंयुतम्। मध्यं पातु महालक्ष्मीरष्टादशभुजान्विता। ऊर्द्धं सरस्वती पातु भुजैरष्टाभिरूर्जिता। अधः पातु महाकाली दशबाहुसमन्विता। सिंहोऽस्त्रं हृदयं पातु मम हंसोऽक्षियुग्मकम्। महिषं दिव्यमारूढोवमः पातु पदद्वयम्। महेशश्चण्डिकायुक्तः सर्वाङ्गानि ममावतु। षष्ठेऽस्मिन् विहिते न्यासे सद्गतिं प्राप्नुयान्नरः। मूलाक्षरन्यासरूपं न्यासं कुर्वीत सप्तमम्। ब्रह्मरन्ध्रे नेत्रयुगे श्रुत्योर्नासिकयोर्मुखे। पार्श्वौ मूलमनोर्वर्णांस्ताराद्यान्नभसान्वितान्। विन्यसेत् सप्तमे न्यासे कृते रोगक्षयोभवेत्। पायुतो ब्रह्मरन्ध्रान्तं पुनस्तमेव विन्यसेत्। कृतेऽस्मिन्सप्तमे न्यासे सर्वदुःखं विनश्यति। कुर्वीत नवमं न्यासं मन्त्रव्याप्तस्वरूपकम्। मस्तकाङ्घ्रिणं यावच्चरणान्मस्तकावधि। पुरोदक्षे पृष्ठदेशे वामभागे ऽथो न्यसेत्। मूलमन्त्रं कृतेन्यासो नवमो देवताप्रियः। ततः कुर्वीत दशमं षडङ्गन्यासमुत्तमम्। मूलमन्त्रं जातियुक्तं (दीर्घस्वरयुक्तम्) हृदयादिषु विन्यसेत्। कृतेऽस्मिन् दशमे न्यासे त्रैलोक्यं वशगं भवेत्। दशन्यासोक्तफलदं कुर्य्यादेकादशं ततः। खड्गिनी शूलिनीत्यादि (१अ०६१-६५) पठित्वा श्लोकपञ्चकम्। आद्यं (ऐँ) क्षणतरं बीजं ध्यात्वा सर्वाङ्गके न्यसेत्।

न्यूखेन पाहि नो देवीत्यादि (४अ०२३–२६) श्लोक-चतुष्टयम्। पठित्वा सूर्यसदृशं द्वितीयं (क्लीँ) सर्वतो-न्यसेत्। सर्वस्वरूपे सर्वेशे इत्यादि (११अ०२३–२७) श्लोकपञ्चकम्। पठित्वा स्फटिकाभासं तृतीयं (क्लौँ) खतनौ न्यसेत्। ततः षडङ्गं कुर्वीत विभक्तैर्मूलवर्णकैः। एकैकेनैकेन चैकेन चतुर्भिर्युगलेन च। समस्तेन च मन्त्रेण कुर्यादङ्गानि षट् सुधीः। शिखायां नेत्रयोः कुक्षोनसोर्वक्त्रे गुदे न्यसेत्। मन्त्रवर्णान् समस्तेन व्यापकं त्वटशरेत्। खड्गं चक्रगदेषुचापपरिघान् शूलं भुशुण्डीं शिरः शङ्खं सन्दधतीं करैस्त्रिनयनां सर्वाङ्गभूषाश्रितम्। नीलाश्मद्युतिमास्यपाददशकां सेवे महाकालिकां यामस्तौत् शयिते हरौ कमलजोहन्तुं मधुकैटभौ। अक्षस्रक्परशू गदेषुकुलिशं पद्मं धनुः कुण्डिकां दण्डं शक्तिमसिञ्च चर्म जलजं घण्टां सुरा-भाजनम्। शूलं पाशसुदर्शने च दधतीं हस्तैः प्रवाल प्रभां सेवे सैरिभमर्दिनीमिह महालक्ष्मीं सरोजस्थि-ताम्। घण्टाशूलहलानि शङ्खमुसले चक्रं धनुः सायकं हस्ताब्जैर्दधतीं घनान्तविलसच्छीतांशुतुल्य प्रभाम्। गौरीदेहसमुद्भवां त्रिजगतामाधारभूतां महापूर्वामत्र सरस्वतीमनुभजे शुम्भादिदैत्यार्दिनीम्। एवं ध्यात्वा जपेल्लक्षचतुष्कं तद्दशांशतः। पायसान्नेन जुहुयात् पूजिते वेमरेतसि। जयादिशक्तिभिर्युक्ते पीठे देवीं यजेत्ततः। तत्त्व२५पत्राष्टदलपद्मे षट्कोणाष्टदला-न्विते। त्रिकोणमध्ये संपूज्य ध्यात्वा तां मूलमन्त्रतः। पूर्वकोणे विधातारं स्वशक्त्या सह पूजयेत्। विष्णुं श्रिया च नैर्ऋत्ये, वायव्ये उमया शिवम्। उदग्दक्षिणयोः सिंहं महिषञ्च क्रमाद्यजेत्। षट्कोणेषु च पूर्वादौ नन्दजां रक्तदन्तिकाम्। शाकम्भरीं तथा दुर्गां भीमाञ्च भ्रामरीं यजेत्। रविन्दुनामवर्णाद्यास्तारादाद्यं नमोऽन्तिमाः। नन्दजाद्या यजेच्छक्तीर्वह्निमाया अपी-दृशीः। अष्टपत्रेषु ब्रह्माणी पूज्या माहेश्वरी परा। कौमारी वैष्णवी चाथ वाराही नारसिंह्यपि। पा-शादेन्द्री च चामुण्डा तथा तत्त्व २५ देवेशिमाः। विष्णुमाया चेतना च बुद्धिर्निद्रा क्षुधा ततः। छाया शक्तिः परा तृष्णा शान्तिर्जातिश्च लज्जया। शान्तिः श्रद्धा कान्तिलक्ष्मौ धृतिर्वृत्तिः स्मृतिः स्मृतिः। दया तुष्टिस्ततः पुष्टिर्मातृ भ्रान्तिरिति क्रमात्। बहिर्भूपद्मकोणेषु गणेशः क्षेत्रपालकः। वटुकश्चापि योगिन्यः पूज्या इन्द्रादिका अपि। एवं सिद्धे मनौ मन्त्री भजेत् सौभाग्यभाजनम्। मार्कण्डेयपुराणोक्तं नित्यं चण्डीस्तवं पठन्। दुरितं मूलमन्त्रेण जपन्नाप्नोति वाञ्छितम्। आश्विनस्य सिते पक्षे आरभ्याग्नितिथिं सुधीः। अष्टम्यन्तं जपेल्लक्षं दशांशं होममाचरेत्। मन्त्रज्ञं पूजयेद्देवीं पठेत् सप्तशतीमपि। विधानाराध्य मन्त्री स्वमिष्टार्थं लभतेऽचिरात्। सप्तशत्याश्चरित्रे तु प्रथमे पद्मभूर्मुनिः। छन्दो गायत्र्युदितं महाकाली तु देवता। वाग्बीजं (ऐँ) पावकस्त्वं धर्मार्थे विनियो-जनम्। मध्यमे च चरित्रे तु मुनिर्विष्णुरुदाहृतः। उ-ष्णिक्छन्दो महालक्ष्मीर्देवता बीजमद्रिजा(क्लीँ)। वायु-स्त्वं धनप्राप्त्रै विनियोग उदाहृतः। उत्तरस्य चरित्रस्य ऋषिः शङ्कर ईरितः। त्रिष्टुप्छन्दो देवता च महा-पूर्वा सरस्वती। कामबीजं (क्लौँ) रविस्त्वं कामाप्त्रै विनियोजनम्। एवं संकल्प्य ऋष्यादीन् ध्यात्वा पूर्वोक्त मार्गतः। सार्धसप्तति पठेच्चण्डीस्तवं स्वदपदाचरम्। समाप्तौ तु महालक्ष्मीं ध्यात्वा कृत्वा षडङ्गकम्। जपे-दष्टशतं१०८ मूलं देवतायै निवेदयेत्। एवं यः कुरुते सोऽत्र नावसीदति जातुचित्। चण्डिकां प्रभजन्मर्त्यो-धनैर्धान्यैर्यशश्चयैः। पुत्रैः पौत्रैरुचाऽरोग्यैर्युक्तो जीवेद्वत्सरः समाः"।

निर्णयसि० २परि० शतचण्डीविधौ विशेष उक्तो यथा रुद्रयामले "शतचण्डीविधानञ्च प्रोच्यमानं शृणुष्व तत्। सर्वोपद्रव्यनाशार्थं शतचण्डीं समारभेत्। षोडशस्रक्सम संयुक्तं मण्डपं पद्मवोज्ज्वलम्। वसुकोणयुतां वेदीं मध्ये कुर्यात्त्रिभागतः। पञ्चैकचितां रम्यासुच्छ्राये हस्तसम्मिताम्। पञ्चवर्णरजोभिश्च कुर्यान्मण्डलकं शुभम्। पञ्चवर्णवितानञ्च किङ्किणीजालमण्डितम्। आचार्येण समं विप्रान् वरयेद्दश सुव्रतान्। ऐशान्यां स्थापयेत्कुम्भं पूर्वोक्तविधिनाचरेत्। वास्तुयागञ्च प्रकर्तव्यं कुण्डं लक्षणलक्षितम्। मूर्तिं देव्याः प्रकुर्वीत सुवर्णस्य पलेन वै। तदर्धेन तदर्धेन तदर्धेन महामते!। अष्टादशभुजा-न्देवीं कुर्याद्वाष्टकरामपि। षट्कूटयुगमध्यान्देवीं मध्ये निधापयेत्। देवीं संपूज्य विधिवज्जपं कुर्युर्दश द्विजाः। शतमादौ शतञ्चान्ते जपेन्मन्त्रं नवार्णकम्। चण्डीं सप्तशतीमध्ये संपुटोऽयमुदाहृतः। एकं द्वे त्रीणि च-त्वारि जपेद्दिनचतुष्टयम्। रूपाणि क्रमशस्तद्वत् पूज-नादिकमाचरेत्। पञ्चमे दिवसे प्रातर्होमं कुर्याद्विधा-

मतः। गुडचीम्बायसन्दूर्वान्तिकान् गुलान् यवानपि। चण्डीपाठस्य होमन्तु प्रतिश्लोकन्दशांशतः। होमं कुर्याद्दृक्षादिभ्यः समिदाज्यचरून् क्रमात्। हुत्वा पूर्णाहुतिन्दद्यात्तृविप्रेभ्यो दक्षिणां क्रमात्। कपिलाङ्गां नीलमणिं श्वेताश्वं ध्वजचामरे। अभिषेकन्ततः कुर्युर्यजमानस्य ऋत्विजः। एवङ्कृतेऽमरेशान! सर्वसिद्धिः प्रजायते"। "सहस्रचण्डीं विधिवच्छृणु विष्णो महामते!। राज्यभ्रंशे महोत्पाते जनमारे महाभये। गजमारेऽश्वमारे च परचक्रभये तथा। दृतग्रादिविधे दुःखे ज्वरोगादिजे भये। सहस्रचण्डिकापाठं कुर्याद्वा कारयेत्तथा। आपत्कासु शतञ्जप्त्वा विंशद्वाह्मण मण्डपः। भोज्याः सहस्रं विप्रेन्द्रा गोशतं दक्षिणान्दिशेत्। गुरवे द्विगुणन्देयं शय्यादानन्तथैव च। सप्तधान्यं च भूदानं श्वेताश्वं च मनोहरम्। पञ्चनिष्कमिता मूर्तिः कर्त्तव्या वाऽर्धमानतः। अष्टादशभुजा देवी सर्वायुधविभूषिता। अयुतावृत्तं दातव्यं सहस्रं प्रतग्रहस्मभो!। शतं वा नियताहारः पयःपानेन वर्त्तयेत्। एवं यश्चण्डिकापाठं सहस्रं तु समाचरेत्। तस्य स्यात्कार्यसिद्धिस्तु नात्र कार्या विचारणेति"। एतद्ग्रहयं यद्यपि महानिबन्धेषु नास्ति तथापि प्रचरद्रूपत्वादुक्तमिति दिक्। वाराहीतन्त्रे "सङ्कटे समनुप्राप्ते दुर्भिक्षग्रामये तथा। जातिभ्रंशे कुलोच्छेदेऽप्यायुषो नाश आगते। वैरिद्वौ व्याधिदुर्दौ धननाशे तथाऽऽहवे। तथैव त्रिविधोत्पाते तथा चैवातिपातके। कुर्याद्दण्डप्राःशतादृत्तिन्ततः सम्पद्यते शुभम्। श्वेतोदृद्धिः शताद्दत्ताद्राज्यवृद्धिस्तथा परा। मनसा चिन्तितन्देवि! सिध्येदशोत्तराच्छतात्। सहस्रावर्त्तनाद्यज्ञोराद्धयोति स्वं स्थिरा। भुक्ता मनोरथान् कामान्नरो मोक्षमवाप्नुयात्। चण्डप्राः शताद्दत्तपाठाद्यवैः सिध्यन्ति सिद्धयः"। २काल्या भैरवभेदे पु०। "असिताङ्गोरुरुचण्ड उन्मत्तः क्रोधनस्तथा" तन्त्रसा०। ग्रामावरणाष्टभैरवोक्तौ। संज्ञायां कन्। चण्डिका सप्तवर्णायां कुमार्याम् अत्रैव शब्दे मन्त्रमहोदधिवाक्यम् दृश्यम्। [राजनि०।

**चण्डीकुसुम** पु० चण्डीप्रियं कुसुमं यस्य। रक्तकरवीरवृक्षे।

**चण्ड(ण्डी)शी** पु० रुद्रगणभेदे "चण्डे(ण्डी)शः पूषणं देवं भगं नन्दीश्वरोऽग्रहीत्" भाग०४।६।१६। हृतः। २शिवे पु० चण्डीश्वरोऽयत्र त्रिभुवनगुरोर्धाम चण्डीश्वरस्य"भेद०

**चण्डु** पु० चडि-उनु। उन्दुरे मूषिके शब्दच०।

**चण्डेश्वर** पु० चण्ड ईश्वरः। रक्ततनौ शिवमूर्त्तिभेदे "चण्डेश्वरं रक्ततनुं त्रिनेत्रम्" तन्त्रसारः।

**चण्डोग्रशूलपाणि** पु० शिवमूर्त्तिभेदे। "चण्डोग्रशूलपाणेश्च मन्त्रः सर्वार्थसाधकः"तन्त्रसारे तन्मन्त्रः उक्तः।

**चत** याचने भ्वा० उभ० द्वि० सेट्। चतति ते एदित् अचतीत्। अचतिष्ट। चचात चेते। निरुक्तौ अयं गत्यर्थतयोक्तः। "गुहा चतन्तमृग्मिजो नमोभिः" ऋ० १०। ४६।२। "चतन्तं चततिर्गतिकर्म्मा" निरु० भा०। अस्य वैदिकेऽनिट्त्वम् चत्तः। "चत्तो इतश्चत्तामुतः" ऋ० १०।१५५।२। "दूरे चत्तायच्छनत्सङ्कसनम्" ऋ० १।१२२। ६। याचनस्य हिंसायां हन्तेरस्य हिंसार्थत्वमपि। "तं व इन्द्रं चतिनमस्य" ऋ० ६।१६।४। "चतिनं नाशकमिति" भा०। वा० इनि।

**चतुःकूटा** स्त्री श्रीविद्यामन्त्रभेदे तन्त्रसारे तत्स्वरूपं दृश्यम् "चतुःकूटा महाविद्या शङ्करेण प्रपूजिता" तन्त्रसा०।

**चतुःपञ्च** त्रि० चत्वारः पञ्च वा वार्थे बहु० डच्। चतुःसंख्यके पञ्चसंख्यके वा। "अजानतामिवान्योन्यं चतुःपञ्चावशेषिताः" भाग० १।१५।२३। वा रस्य लत्वे चतुष्पञ्चेत्यत्र।

**चतुःपञ्चाशत्** त्रि० चतुरधिका पञ्चाशत्। (चौवाच) १चतुरधिकपञ्चाशत्संख्यायां २तत्संख्यान्विते च "पशुपुरोडाशोऽविंशद्वृहःपञ्चाशत्" शत० ब्रा० ६।२।२।३७। ततः पूरणार्थे डट्। चतुःपञ्चाश तत्संख्यापूरणे त्रि० स्त्रियां ङीप्। वा रस्य लत्वे चतुष्पञ्चाश इत्यत्र।

**चतुःपत्री** स्त्री चत्वारि चत्वारि पत्राण्यस्याः। क्षुद्रपाषाणभेदे राजनि०। वा रस्य लत्वे चतुष्पत्रीत्यत्र

**चतुःपर्णी** स्त्री चत्वारि चत्वारि प्रतिपर्णं पर्णान्यस्याः। क्षुद्राश्विकायाम् (आमरुल्) । राजनि०। वा रस्य लत्वे चतुष्पर्णीत्यत्र।

**चतुःपुण्ड्र** पु० चत्वारि पुण्ड्राणीवास्य। भिण्डाङ्के राजनि०। वा रस्य लत्वे चतुष्पुण्ड्र इत्यत्र।

**चतुःफला** स्त्री चतुर्धा विभक्तं फलमस्याः। नागबलायाम् राजनि०। वा रस्य लत्वे चतुष्फलाप्यत्र।

**चतुःशाल** न० चतसृणां शालानां समाहारः। अन्योन्याभिमुखशालाचतुष्टये "एकयाभे चतुःशाले दुर्भिक्षे राष्ट्रविप्लवे। पतिना नीयमानायाः पुरः शुक्लो न दुष्यति ज्यो० त०। वा रस्य विसर्गलत्वे चतुश्शालेत्यत्र। ङीषि वा ङीप् चतुः(श्)शालीत्यत्र स्त्री।

चतुःषष्टि स्त्री चतुरधिका षष्टिः।(चौषट्टि)।चतुरधिकषष्टिसंख्यायां २तत्संख्यान्विते च। वा रस्य विसर्गश्चत्वे। ततः पूरणे डट्। चतुःषष्ट तत्संख्यापूरणे त्रि॰ स्त्रियां ङीप्।

चतुःषष्टिकला स्त्री चतुःषष्टिमिता कला। उपविद्याभेदे तासां कलाशब्दे श्रीधरदृष्टवाक्ये दर्शिताः। खिलशुक्रनीतिशास्त्रे तु २च॰ अन्यविधा उक्ता यथा

"पृथक् पृथक् तु विद्यानां लक्षणं संप्रकाशितम्। कलानां न पृथग् लक्ष्म नाम चास्तीह केवलम्। पृथक् पृथक् क्रिया चात्र कलाभेदस्तु जायते। यां यां कलां समाश्रिता, तन्नाम्ना जातिरुच्यते। हावभावादि संयुक्तं नर्त्तनं १ च कला स्मृता। अनेकवाद्यविज्ञतौ ज्ञानं तद्वादने २ कला। वस्त्रालङ्कारसंधानं ३ स्त्रीपूनोश्च कला मता। अनेकरूपाविर्भावकृतिज्ञानं ४ कला स्मृता। शय्यास्तरणसंयोगे पुष्पादिग्रथनं ५ कला। द्यूताद्यनेकक्रीड़ाभिरञ्जनं ६ तु कला स्मृता। अनेकासन संधाने रतिज्ञानं ७ कला स्मृता। कलासप्तकमेतद्धि गान्धर्वं समुदाहृतम्। मकरन्दासवादीनां मद्यादीनां कृतिः ८ कला। शुद्धशस्त्रकृतौ ज्ञाने शिराव्रणव्यधः ९ कला। क्षीनादिरसंयोगे उद्धादिसंपाचनं १० कला। दृढादिग्रसवारोपपालनादिकृतिः ११ कला। पाषाणधात्वादिदृत्तिसम्भस्त्र करणं १२ कला। यावद्दिचुविकाराणां कृतिज्ञानं १३ कला स्मृता। धात्वोषधीनां संयोगक्रियाज्ञानं १४ कला स्मृता। धातुसाङ्कर्य्यपार्थक्यकरणं १५ च कला स्मृता। संयोगपूर्वविज्ञानं १६ धात्वादीनां कला स्मृता। द्वारनिष्क्रासन ज्ञानं १७ कलासंज्ञं तु तत् स्मृतम्। कलादशकमेतत्तु ज्ञा युर्वेदागमेषु च। शस्त्रसन्धानविक्षेपः १८ पदादिन्यासतः कला। सन्ध्याघाताकृष्टिभेदैर्मल्लयुद्धं १९ कलास्मृता। कलाऽभिलक्षिते देशे यन्त्राद्यस्त्रनिपातनम् २०। वाद्यसंकेततोव्यूहरचनादि २१ कला स्मृता। गजाश्वरथयुद्धानां तु युद्धसंयोजनं २२ कला। कलाषष्टकमेतद्धि धनुर्वेदागमस्थितम्। विविधासनसद्मादिदेवतातोषणं २३ कला। सारथ्यञ्च गजाश्वादेर्गतिशिक्षा २४ कला स्मृता। मृत्तिकाकाष्ठपाषाणधातुभाण्डादिसत्क्रिया २५।२६।२७।२८। पृथक् कला चतस्रं तु चित्रोद्याने खनिः २९ कला। तडागवापीप्रासादसमभूमिक्रिया ३० कला। यन्त्राद्यनेकवस्त्राणां वाणाद्यानां कृतिः ३१ कला। क्षीनमध्यादिसंयोग वर्णादेरञ्जनं ३२ कला। जलवाय्वग्निसंयोगनिरोधादिक्रिया ३३ कला। नौकारथादियानानां कृतिज्ञानं ३४ कला स्मृता। सूत्रादिरज्जुकरणे विज्ञानं ३५ तु कला स्मृता। अनेकतन्तुसंयोगैः पटबन्धः ३६ कला स्मृता। वेधादिसदसज्ज्ञानं ३७ रत्नानां तु कला स्मृता। खर्वादीनां तु यावत्प्रविज्ञानं ३८ च कला स्मृता। कृत्रिमस्वर्णरत्नादिक्रियाज्ञानं ३९ कला स्मृता। स्वर्णाद्यलङ्कारकृतिः ४० कला वेषादिसत्कृतिः ४०। मार्द्दवादिक्रियाज्ञानं ४१ चर्म्मणां तु कला मता। पशुचर्म्माङ्गनिर्हारक्रियाज्ञानं ४२ कला स्मृता। दुग्धदोहादिविज्ञानं ४३ एतान् तु कला स्मृता। सीवने कञ्चुकादीनां विज्ञानं ४४ तु कला स्मृता। वाह्यादिभिश्च तरणं ४५ कलासंज्ञं जले स्मृतम्। मार्जने स्पृहभाण्डादेर्विज्ञानं ४६ तु कला मता। वस्त्र सम्मार्जनं ४७ चैव क्षुरकर्म्म ४८ कले द्वयोः। तिलमांसादिस्नेहानां कला निष्कासनं ४९ मता। सीराद्याकर्षणे ज्ञानं ५० दृढाद्यारोहणे ५१ कला। मनोऽनुकूलसेवायाः कृतिज्ञानं ५२ कला मता। वेणुदलादि पात्राणां कृतिज्ञानं ५३ कला मता। काचपात्रादि करणविज्ञानं ५४ तु कला मता। संसेचनं ५५ संहरणं ५६ जलानां तु कला स्मृता। लोहाभिसारशस्त्रास्त्रकृतिज्ञानं ५७ कला मता। गजाश्वदमोष्ट्राणां पत्त्रानादिक्रिया ५८ कला। शिशोः संरक्षणे ज्ञानं५९ धारणे ६० क्रीड़ने ६१ तथा। सुयुक्ताडनज्ञानं६२ मपराधिजने तथा। नानादेशीयवर्णानां सुसम्यग्लेखनं ६३ कला। ताम्बूलरक्तादिकृतिविज्ञानं ६४ तु कला स्मृता। आदाने आशुकारित्वं प्रतिदानेचिरक्रिया। कलासु द्वौ गुणौ ज्ञेयौ सर्व्वासूक्तौ मनीषिभिः। चतुःषष्टिः कलाज्ञेताः कैश्चेषु निदर्शिताः। यां यां कलामाश्रितोयस्तांतां कुर्य्यात् स एव हि"। "चतुःषष्टिकलाविद्या रैश्वरीप्रीतिवर्द्धनम्" गायत्रीकवचम्। वा रस्य विसर्गश्चत्वे चतुष्षष्टिकलाश्चत्र

चतुःसप्तति स्त्री चतुरधिका सप्ततिः। (चौहत्तर) १चतुरधिकसप्ततिसंख्यायां २तत्संख्यान्विते च ततः पूरणे डट्। चतुःसप्त तत्पूरणे त्रि॰ स्त्रियां ङीप्। वा रस्य विसर्गश्चत्वम्।

चतुःसम न॰ चत्वारि समानि यत्र। "लवङ्गं जीरकं पथ्या यमानी च चतुःसमम्" वैद्यकोक्ते लवङ्गादिचतुर्द्रव्यात्मके

औषधभेदे, गन्धार्दचि० वैद्यके तद्गुणा उक्ता यथा "लवङ्गं जीरकं पथ्या यमानी च चतुःसमम्। आमशूलविबन्धघ्नं पाचनं भेदि गोपतत्" । "कस्तूरिकायाद्वौ भागौ चत्वारश्चन्दनस्य तु। कङ्कुमस्य त्रयश्चैव शशिनश्च चतुःसमम्" इत्युक्तेषु २मिश्रितेषु तत्तत्परिमाणान्वितकस्तूरीचन्दनकङ्कुमकर्पूरेषु च। या रूढ विसर्गसत्वे चतुष्कमप्यत्र भवति।

**चतुर्** त्रि० व० व० चत–उरन्। १चतुःसंख्यायाम्, २चतुःसंख्यान्विते च। "चत्वारोवयस्त्विजः स भगवान् कर्म्मोपदेष्टा हरिः" वेणी०। स्त्रियां गौरे सख्ये च चतस्रादेशः। "तासामाद्याचतस्रस्तु निन्दितैकादशी च या" मनुः। प्रियचतसा अतिचतसा। नञा सुना विना च समासे बहु० अच् समा०। अचतुरः सुचतुरः विचतुरः। अव्ययीभावे टच् समा० उपचतुरम्। अयवे तयप् चतुष्टय। चतुःसंख्यायां तदन्विते च त्रि० स्त्रियां ङीप् "चरितार्थाच्चतुष्टयी" कुमा०। "ततोवारे कृच् "रात्समूह" पा० सजीपे। चतुर् २चतुर्वारे अव्य०। तदर्थे चतुस् इति शब्दकल्पनं प्रामादिकम्। °चतुरवत्तः कात्या० श्रौ०। "चतुर्नमो अष्टकृत्वो भवाय" अथ० ११।२।८। "चतुरुपसृजते" तै० ब्रा० २।६।७।३। चतुष्टार्थे च "मूढमैथुनधर्म्मे च काले काले च संयतम्। अप्रमादमनालस्यं चतुः शिक्षेत वायसात्" इति चाणक्यः।

**चतुर** पु०चत–उरच्। १वक्रगतौ २कस्तिशालायाञ्च हेमच०। ३कार्य्यदक्षे ४आलस्यहीने ५निपुणे च त्रि०। ६नायकभेदे पु०तत्कथनं रसमञ्जर्य्याम् °वाक्चेष्टाव्यङ्ग्यसमागमचतुरः। तत्र वचनव्यङ्ग्यसमागमो यथा "तमोजटाले हरिदन्तराले काले निशायास्तव निर्गतायाः। तटे नदीनां निकटे वनानां घटेत शातोदरि! कः सहायः")। चेष्टाव्यङ्ग्यसमागमो यथा "कान्ते कनकजम्बीरं करे कमपि कुर्व्वति। अपारनिधले भानौ बिन्दुमिन्दुसखी ददौ"। तं वीक्ष्य लीलाचतुरामनङ्गः "नव प्रियं यत्चतुराववोकिनः" कुमा०। "न पुनरेति गतं चतुरं वयः"। "मृगया जहार चतुरेव कामिनी" रघुः। चतुर्+मर्म० अच्। ६चतुर्विंशिष्टे त्रि०।

**चतुरंगा** स्त्री वर्णवृत्तभेदे "हिजवरकर्णा विहरसवर्णा भवति यदा सा किल चतुरंगा" छन्दोम०।

**चतुरङ्ग** पु० "श्रुतङ्गं श्रुतङ्गं तथा प्राले गुरुर्भवेत्। हाविंशदक्षरैर्युक्तः सङ्गारे चतुरङ्गमः" इति संगी०दा० उक्ते रूपकभेदे।

**चतुरङ्ग** न०चत्वारि अङ्गानि यस्य। १हस्त्यश्वरथपदातिरूपाङ्गचतुष्टययुते सैन्ये। "प्रयातेऽस्मिन्नरव्याघ्र! बलेन महताऽतः। क्रमेण चतुरङ्गेण यत्नेन जितकाशिना" भा०व०२० अ०। रक्तहरितपीतश्यामवर्णानि चत्वारि बलवर्णानि क्रीड़ासाधनान्यङ्गान्यस्य। (चतुरङ्गो) २क्रीड़ाभेदे। तत्क्रीड़ाप्रकारः ति०त०व्यासयुधिष्ठिरसंवादे "युधिष्ठिर उवाच। अष्टकोष्ठाञ्च या क्रीड़ा तां मे ब्रूहि तपोधन!। प्रकर्षेणैव मे नाथ! चतुराजी यथा भवेत्। व्यास उवाच। अष्टौ कोष्ठान् समालिख्य प्रदक्षिणक्रमेण तु। अरूपं पूर्वतः कृत्वा दक्षिणे हरितं बलम्। पार्थ! पश्चिमतः पीतमुत्तरे श्यामलं बलम्। राज्ञोवामे गजं कुर्य्यात् तस्मादग्रे ततस्तरिम्। कुर्य्यात् कौन्तेय! पुरतो युद्धे पत्तिचतुष्टयम्। कोणे नौकाद्वितीयेऽश्वस्तृतीये च गजोवसेत्। हरीवे च वसेद्राजा वटिकाः पुरतः स्थिताः। पञ्चकेन वटी राजा, चतुष्केणैव कुञ्जरः। त्रिकेणैव चलत्यश्वः पार्थ! नौका द्वयेन तु। कोष्ठमेकं विलङ्घ्याथ सर्वतोयाति भूपतिः। अयुतेव वटी याति बलं ह्यन्यत्कोणगम्। यथेष्टं कुञ्जरोयाति चतुर्दिक्षु महीपते!। तिर्य्यक्तुरङ्गमो याति लङ्घयित्वा त्रिकोष्ठकम्। कोणकोष्ठद्वयं लङ्घ्य व्रजेन्नैका युधिष्ठिर। सिंहासनं चतुराजी रूपाग्रेऽष्टौ षट्पदम्। काकाख्यं ह्यष्टकोष्ठौका नौकाकृष्टप्रकारकम्। धातोधाते वटी नौका बलं हन्ति युधिष्ठिर!। राजा गजोऽश्वयोपि लङ्घ्या घातम् निहन्ति च। अत्यन्तं खबलं रक्षेत् स्वराज बलमुत्तमम्। अल्पस्य रक्षया पार्थ! हन्तव्यं बलमुत्तमम्"। नौकायाश्चत्वारि पदानि अश्वस्याष्टौ पदानि इत्याधिक्यमत्र। "मतङ्गजस्य गर्वेण राजा क्रीड़ति निर्भरम्। तस्मात् सर्वबलं दत्त्वा रक्ष कौन्तेय! कुञ्जरम्। सिंहासनं चतुराजी यदग्रस्थानतो भवेत्। सर्वसैन्यैर्गजैर्व्यापि रक्षितव्योमहीपतिः। अन्यराजपदे गत्वा यदा धातो युधिष्ठिर। तदा सिंहासनं तस्य भक्ष्यते रूपमुत्तमम्। राजा च रूपतिं हत्वा कुर्य्यात् सिंहासनं यदा। द्विगुणं वाहयेत् पश्चमन्यदैकगुणं भवेत्"। द्विगुणं पणं दातव्यत्वेन प्रापयेत्। "भित्वसिंहासनं पार्थ! यदारोहति भूपतिः। तदा सिंहासनं नाम सर्वं भवति तद्बलम्। यदा सिंहासनं कर्त्तुं राजा यत-

यदाश्रितः। तदा घातेऽपि हन्तव्यो बलेनापि सुरक्षितः। विद्यमाने रथे यत्र सकीवे च रथत्रयम्। प्राप्नोति तु यदा तस्य चतुराजी तदा भवेत्। रथेषैव रथं हत्वा चतुराजो यदा भवेत्। द्विगुणं वाहवेत् पश्चमन्यथैकगुणं भवेत्। स्वपदस्थं यदा राजा राजानं हन्ति पार्थिव !। चतुरङ्गे तदा भूप ! वाहवेच्च चतुर्गुणम्। यदा सिंहासने काले चतुराजी समुत्थिता। चतुराजी भवत्यत्र नतु सिंहासनं रथ !"। अत्रेदं बीजम् उभयथा जवेऽपि परसिंहासनाधिकारात् पारराजत्वे शौर्य्यादिकानिष्कृष्टकत्वदर्शनात् क्रीडायामपि तथा कल्पते। "राजहयं यदा हन्ति चात्मनोरात्रि संस्थिते। परेण संहृतचैको बलेनाथपराह्णते। राजहयं यदा हन्ति न स्यादन्यकरे परः। तदा राजा हि राजानं घातेऽपि तं हनिष्यति। रथाक्षेपो यदा राजा गमिष्यति युधिष्ठिर !। घाताघाते पि हन्तव्यो राजा तत्र न रक्षकः। कोष्ठे राजपदं त्यक्त्वा वटिकान्तं यदा व्रजेत्। वटी च षट्पदं नाम तदा कोष्ठबलं नवेत्। यदा तस्य भवेत् पार्थ ! चतुराजी च षट्पदम्। तदापि च चतुराजी भवत्येव न संशयः। पदातेः षट्पदे विद्धे राज्ञा वा हस्तिना तथा। षट्पदं न भवेत्तस्य अवश्यं ग्रहणं पार्थिव !। सप्तमे कोष्ठके यत् स्याद्वटिका दशमेन वै। तदान्योन्यञ्च हन्तव्यं सुखाय दुर्बलं बलम्। त्रिवटीकस्य कौन्तेय ! युद्धस्य कदाचन। षट्पदं न भवत्येव इति गोतमभाषितम्। नौकैका वटिका यस्य विद्यते खेलने यदि। गाढ़ावटीति विख्याता पदं तस्य न दुष्यति"। पदं राजपदं कोष्ठपदञ्च। "हस्ते रङ्गे बलं नास्ति काककाष्ठं तदा भवेत्। यदन्ति राजसाः सर्वे तस्य शत्रौ जयाजयौ। प्रोत्थिते पञ्चमे रात्रि स्थते वाद्यञ्च षट्पदे। अशौचं स्यात्तदा हन्ति चलित्वा चालितं बलम्। द्विराडत्रागते तस्मात् हन्यात् परबलं जयी। पार्थ ! सिंहासने काले काककाष्ठं यदा भवेत्। सिंहासनं भवत्येव काककाष्ठं न भण्यते। उपरिष्टाच्च यत्स्थानं तस्योपरि चतुष्टये। नौकाचतुष्टयं यत्र क्रियते तस्य नौकवा। नौकाचतुष्टयं तस्य हस्तनौकेति भण्यते। न कुर्य्यादेकदा राजन् ! गजस्याभिमुखं गजम्। यदि कुर्वीत धर्म्मज्ञः पापपक्षो भविष्यति। स्थानाभावे यदा पार्थ ! हस्तिनं हस्तिसंस्थम्। करिष्यति तदा राजन् ! इति गोतमभाषितम्। प्राप्ते गजद्वये राजन्। हन्तव्योवामतोगजः"। इति चतुरङ्गक्रीड़नम्।

**चतुरङ्गिन्** त्रि॰ चत्वारि अङ्गानि हस्त्यश्वरथपदातयः भूम्ना सन्त्यस्य इनि। बाहुल्येन हस्त्यश्वादिसेनाङ्गचतुष्टययुक्ते। "चालयन् वसुधां चेमां बलेन चतुरङ्गिणा" भा॰ आ॰ ६४अ॰। स्त्रियां ङीप्। "प्रेषयिष्ये तवार्थाय वाहिनीं चतुरङ्गिणीम्" ७३अ॰।

**चतुरङ्गुला** स्त्री चतसृणामङ्गुलयः प्रमाणमस्य बहुव्रीहः अच् समा॰। १आरग्वधे (सोन्दाल)। अमरः। २चतुरङ्गुलमिते त्रि॰। "स चतुरङ्गुलमेवोभयतोऽन्तं उपगूहति" शत॰ ब्रा॰ १॰।२।२।१। "तच्चाखाद्य समा दीर्घाः प्रादेशाश्चतुरङ्गुलाः" आ॰ त॰ छन्दोप॰।

**चतुरस्र** न॰ चतसृणामस्रयाणां समाहारः पात्रा॰ न स्त्रीत्वम्। "अस्रवेतसदलाम्लदलाम्बीरनिम्बुकैः। चतुरस्रं हि, पञ्चास्रं बीजपूरयुतं भवेत्" भावप्र॰ उक्ते अस्रवेतसादिचतुष्के।

**चतुरशीति** स्त्री चतुरधिका अशीतिः। (चौरासी) १चतुरधिकाशीतिसंख्यायां २तत्संख्यान्विते च। पूरणे डट्। चतुरशीत तत्संख्यापूरणे त्रि॰ स्त्रियां ङीप्।

**चतुरश्र** त्रि॰ चतस्रोऽश्रयः कोणा अस्य नि॰ अच्। १चतुष्कोणे पा॰ तालव्यमध्यस्यैव निपातनम्। दलमध्यत्वे चतुरश्रित्येव स्यात्। अस्य दन्त्यमध्यत्वं शब्दकल्पद्रुमोक्तं चिन्त्यम् सुप्रातसुश्वेति" पा॰ ५।४।१ सू॰ तालमध्यस्यैव ग्रहणात् "चतुरश्रं त्रिकोणं वा वर्त्तुलं चार्द्धचन्द्रकम्। कर्त्तव्यमातुपूर्व्येण ब्राह्मणादिषु मण्डलम्" बौधा॰। २ब्रह्मसन्ताने केतुभेदे पु॰ "चतुरश्रा ब्रह्मसन्तानाः" हरिवं॰ ११अ॰। केतुशब्दे दृश्यम्। ३अन्यूनानतिरिक्ते त्रि॰। "बभूव तस्याश्चतुरश्रशोभि" कुमा॰। "चतस्रोऽश्रयोऽस्य तच्चतुरश्रमन्यूनानतिरिक्तम्" मल्लि॰।

**चतुरात्मन्** पु॰ चतुरं निपुणम् आत्मा मनोऽस्य चत्वारोवा ब्रह्मादय आत्मानोयस्य, चतस्रोविभूतय आत्मानोऽस्य वा। परमेश्वरे विष्णौ। "चतुरात्मा चतुर्व्यूहः" "चतुरात्मा चतुर्भावश्चतुर्वेदविदेकपात्" इति च विष्णुस॰। "रागद्वेषादिरहितत्वाच्चतुरं मनोऽस्येति मनोबुद्धिरहङ्कारश्चित्तं चतुष्टयमात्मा अस्येति वा चतुरात्मा। "ब्रह्मा दक्षादयः कालरूपैवाखिलजन्तवः। विभूतयो हरेरेता जगतः सृष्टिहेतवः। विष्णुर्मन्वादयः कालः सर्वभूतानि च द्विज !। स्थितेर्निमित्तभूतस्य विष्णोरेता

विभूतयः। रुद्रः कालान्तकाद्याश्च समस्तार्थैव जन्तवः। चतुर्धा प्रलयायैता जनार्दनविभूतयः" विष्णुपु०। उभयविधव्युत्पत्त्या द्विधानामकत्वात् विष्णुस० द्विरुक्तिः

**चतुरानन** पु० चत्वारि आननान्यस्य। चतुर्मुखे वेधसि अमरः। "तस्यां स चाम्भोरुहकर्णिकायामवस्थितो लोकमपश्यमानः। परिक्रमन् व्योम्नि विवृत्ततेत्रश्चत्वारि लेभेऽनुदिशं मुखानि" भाग० ३।८।।८। उक्तेरस्य तथात्वम्। "इतस्ततापश्यतानि यदेच्छया वितर तानि सहे चतुरानन!" उद्भटः

**चतुराश्रम** न० चतुर्णामाश्रमाणां समाहारः। "चत्वार-आश्रमा ब्रह्मचारिग्टहस्थवानप्रस्थपरिव्राजकाः" वसिष्ठोक्तेषु ब्रह्मचार्यादिषु। तेषां विशेषधर्म्मा उक्तस्थले द्रष्टव्याः। तेषां साधारणधर्म्मा मनुनोक्ता यथा "चतुर्भिरपि चैवैतैर्नित्यमाश्रमिभिर्द्विजैः। दशलक्षणको-धर्म्मः सेवितव्यः प्रयत्नतः। धृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः। धीर्विद्या सत्यमक्रोधो दशकं धर्म्मलक्षणम्। दश लक्षणानि धर्म्मस्य ये विप्राः समधीयते। अधीत्य चानुवर्त्तन्ते ते यान्ति परमाङ्गतिम्। दशलक्षणकं धर्म्ममनुतिष्ठन् समाहितः। वेदान्तं विधिवच्छ्रुत्वा संन्यसेदनृणोद्विजः"।

तस्य भावः ष्यञ्, स्वार्थे वा ष्यञ्। चातुराश्रम्य तद्धर्म्मे चतुर्णामाश्रमेषु च न०। "चातुराश्रम्यधर्म्मांश्च वेदधर्म्मांश्च पार्थिवः" भा० शा० ६५ अ०।

**चतुरुषण** न० चतुर्णामूषणानां समाहारः। पिप्पलीमूल-सहिते शुण्ठीपिप्पलीमरिचरूपे त्रिकटौ। "त्रुट्य-ष्णं सकणामूलं कथितं चतुरूषणम्। व्योषस्थेव गुणाः प्रोक्ता अधिकाश्चतुरूषणे" भावप्र०।

**चतुर्गति** स्त्री चतुर्णां वर्णाश्रमाणां यथोक्तकारिणां गतिः। १परमेश्वरे। "चतुर्भूर्त्तिश्चतुर्बाहुश्चतुर्व्यूहश्चतुर्गतिः" विष्णुसं०। चतुर्भिर्गतिरस्य। २उक्तरूपे पु०स्त्री ङीषपि च०।

**चतुर्जातक** न० चतुर्णां जातकानां सुरन्दराणां सुरभीणां समाहारः। त्वगेलापत्रकनागकेशरेषु तदुपक्रम्य "एतच्च रोचनं रूक्षं तीक्ष्णोष्णं सुखगन्धवृत्। लघु पित्ताग्नि-लदुवर्द्धं कफवातविषापहम्" भावप्र०। "त्रिकटु चतु-र्जातकक्रमुकं रूमिघ्नं खादेत्" सुश्रुतः।

**चतुर्ण(न)वति** स्त्री चतुर्भिरधिका नवतिः पूर्व्वपदाद् वा चत्वम्। (चौरानब्दु) १चतुरधिकनवतिसंख्यायां २तत्संख्येये च। चतुर्ण(न)वत्यधिकानि त्रीणि शतानि" कात्या० श्रौ० १६।८।२३। पूरणे डट्। चतुर्ण(न)वत तत्संख्यापूरणे त्रि० स्त्रियां ङीप्।

**चतुर्थ** त्रि० चतुर्णां पूरणः डट् थुक् च। चतुःसंख्या पूरणे स्त्रियां ङीप् सा च चन्द्रस्य २चतुर्थकलायाः ह्रासवृद्धिरूपायां तिथौ" चतुर्थ्यामुदितश्चन्द्रो नेक्षितव्यः कदाचन" ति० त० पुरा०। ३व्याकरणपरिभाषिते ङे-भ्याम्भ्यस्रूपे विभक्तिभेदे "सम्प्रदाने चतुर्थी" पा० "धृतिस्नेहे न प्रयुक्तत्वात् गोनामसु तथाष्टमं" छन्दोगप०। चतुर्थीमिति शेषः शुक्लकृष्णपक्षयोश्चतुर्थ्यां उभयदिनप्राप्तौ कस्या ग्राह्यता तन्निर्णयः कालमा० चतुर्थीप्र० यथा "अथ चतुर्थी निर्णीयते। सा च युग्मवाक्यात् पर-विद्धा पूज्या। न च शुक्लपक्षे तथात्वेऽपि कृष्णपक्षे पूर्वैव स्यादिति शङ्कनीयम् युग्मवाक्यस्य पञ्चदशसाधा-रणत्वात्। "चतुर्दश्या च पूर्णिमेत्यत्र शुक्लपक्षविषयत्वे लिङ्गमिति चेत् तस्यैकस्य युग्मस्य शुक्लपक्षविषयत्वेऽपि "प्रतिपदाद्यमावास्या" इत्यनेन पञ्चदशसंख्यिना युग्मेन साहचर्यादितरेषामपि पञ्चदशसंख्यित्वं किं न स्यात्। एवं तर्हि साहचर्ययोर्द्वयोरपि परस्परकलहादनिर्णय इति चेत् न कारणान्तरेण निर्णेतव्यत्वात्। तर्हि चतुर्दशीपूर्णिमायुग्मयोरेकपञ्चवर्त्तितिथिद्वयाक्रान्तत्वात् द्वि-तीयादियुग्मैः सदृशं प्रतिपदामावास्यायुग्मन्तु भिन्नपञ्चदशवर्त्तितिथिद्वयरूपत्वाद्विलक्षणम्। अतः पू-र्णिमायुग्मसाहचर्य्येणैव निर्णय इति चेन्नैवम् श्रुत्या साहचर्य्यस्य बाध्यमानत्वात्। द्वितीयादिशब्दो सङ्ख्यया इत्या पञ्चदशवर्त्तिनस्तिथीन् ब्रूते। सोऽयं श्रुति लिङ्गादिषु षट्सु प्रथमं प्रमाणं साहचर्यन्तु सन्निधिः। स च स्थानावान्तरभेदत्वात्प्रथमं प्रमाणम्। तच्च प्रथमा-दल्पदुर्बलं सोऽयमर्थः पूर्वमीमांसायां तृतीयाध्याये श्रुतिलिङ्गादिसूत्रे भट्टता प्रबन्धेन प्रपञ्चितः जै० सूत्र-स्थैतत् "श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानां समवाये पारदौर्बल्यमर्थविप्रकर्षादिति"। इत्थमेव च श्रुतिसन्नि-ध्योर्विरोधसद्भ्योत्तरमीमांसायां गुणोपसंहारे विचा-रितम्। तथा हि ताण्डिशाखायां श्रूयते "ओमि-त्येतदक्षरमुद्गीथमुपासीतेति"। अस्यायमर्थः। पञ्चभक्ति-युक्तस्य साम्न उद्गीथाख्या भक्तिः कश्चिदवयवः तद्भावय-वकृताऽऽगकाले गायति। गीयमानं तदुद्गीथं ऋत्वो-द्गाता ताण्डिशाखागतोपनिषद्विहितैरनेकैर्गुणैरुपासी-तेति ते च गुणास्ताण्डिशाखायामेव विहिताः। उद्गी-

चभक्तिस्तु ताण्डिशार्ङ्गजैमिनीयतलवकारादिषु सर्वासु सामशाखासु पठिता। तत्र यदिदं ताण्डिशाखोक्तगुणानामुपासनं तत्किं ताण्डिशाखागत एवोद्गीथविशेषे अवतिष्ठते किं वा सर्वशाखागत उद्गीथसामान्ये सञ्चरतीति संशयः। तत्र सन्निधिवशादुद्गीथविशेषेऽवतिष्ठत इति पूर्वः पक्षः। उद्गीथशब्दो मुख्यया वृत्त्योद्गीथसामान्यं ब्रूते। न च सन्निधिना पञ्चमप्रमाणेन प्रथमप्रमाणस्य श्रुतेः सङ्कोचो युक्तः। तस्मादुपासनसङ्गीथसामान्ये संचरतीति राद्धान्तः। अनेन न्यायेन प्रकृतेऽपि साङ्गचर्याख्येन सन्निधिना द्वितीयादिश्रुतेः सङ्कोचायोगाद्युग्मादि शास्त्रं पञ्चदयविषयं द्रष्टव्यम्। यदि चतुर्दशीपूर्णिमयोः कृष्णपक्षविषयत्वं न सम्भाव्यते तर्हि तत्रैव शुक्लपक्षविषयत्वमस्तु। तथा प्रतिपद्युग्मपि गत्यन्तराभावात्पञ्चदयसम्बन्धिविषयम् एवं व्यवस्थितौ सत्यां युग्मशास्त्रेण पञ्चदयेऽपि चतुर्थी परविद्धैव प्राप्नोति। ननु वचनान्तरेण चतुर्थीहयस्य व्यवस्था प्रतीयते। तथा च मार्कण्डेयपुराणे "शुक्लपक्षे तिथिर्यात्रा यस्यामभ्युदितोरविः। कृष्णपक्षे तिथिर्यात्रा यस्यामस्तमितोरविरिति"। अत्र च वक्तव्यं किमिदं शुक्लादिवाक्यं युग्मादिशास्त्रनियमद्वारा एकवाक्यतया तिथीनां व्यवस्थापकमुत स्वातन्त्र्येण। यदि नियमद्वारा तर्हि युग्माग्नीत्यादियुग्मे पूर्वतिथीनामुत्तरविद्धानामप्यूह्यत्वेन "शुक्लपक्षे तिथिर्यात्रा यस्यामभ्युदितोरविः" इत्येतत्पूर्वार्द्धमविरोधि उत्तरार्द्धन्तु विरोधि। तथा तेष्वेव युग्मेषु चरमतिथीनां पूर्वविद्धानां पूज्यत्वेन "कृष्णपक्षे तिथिर्यात्रा यस्यामस्तमितोरविः" इत्युत्तरार्द्धमविरोधि। पूर्वार्द्धन्तु विरोधि। तथा दर्शप्रतिपद्युग्मे कृष्णपक्षगतस्य दर्शस्योदये पूज्यत्वं शुक्लपक्षगतायाः प्रतिपदोऽस्तमये पूज्यत्वं तथा सति तत्रोभयत्र विरोधः स्पष्टतरः। तस्मान्न युग्मादिशास्त्रमनेन नियन्तुं शक्यम्। नापि स्वातन्त्र्येण तिथीनां व्यवस्थापकम् तत्र युग्मादिशास्त्रविरोधस्यापरिहार्यत्वात्। अविरोधेन तु शुक्लादिवाक्यस्य दशम्यादिविषयत्वमतिपत्प्रकरणे प्रपञ्चादुदाहृतम्। तस्माच्छुक्लकृष्णयोरपि पक्षयोर्युग्मादिशास्त्राच्चतुर्थी परविद्धा याह्या। उद्वहन्तिस्तोऽपि "एकादशी तथा षष्ठी अमावास्या चतुर्थिका। उपोष्याः परसंयुक्ताः पराः पूर्वेण संयुताः" इति। ननु परविद्धोपवासः क्वचित् प्रतिषिध्यते। "द्वितीया पञ्चमी मेघाद्दशमी च त्रयोदशी। चतुर्दशी चोपवासे क्षन्युः पूर्वोत्तरे तिथी" इति। अयमर्थः। पञ्चमी वेधेन पूर्वाह्णव्याप्तिरहितोत्तराङ्गं षष्ठीं तिथिमुपवासविषये क्षपति अतः पञ्चमीविद्धायां चतुर्थ्यामुपवास इति। नैष दोषः व्रतभेदेन व्यवस्थोपपत्तेः सन्ति हि चतुर्थ्यामिन्द्रदेवताविषयाणि बहूनि व्रतानि। तत्र विष्णुधर्मोत्तरोक्ते चतुर्मूर्तिव्रते मूर्तिचतुष्टयोपेतो विष्णुर्देवता। स्कन्दपुराणोक्ते अङ्गारकचतुर्थीव्रते भौमो देवता कूर्मपुराणोक्ते यमव्रते यमोदेवता। सौरपुराणादिप्रोक्तेषु दूर्वागणपत्यादिव्रतेषु विनायको देवता कूर्मपुराणप्रोक्ते नागचतुर्थीव्रते शेषशङ्खपालादयः सर्पादेवता। तत्र विनायकनागव्यतिरिक्तानां व्रते परेद्युरुपवासः प्राप्नोति तादृशे विषये पञ्चमीवेधनिषेधो व्यवस्थापनीयः। तथा पूर्वविद्धाप्रशंसा च तत्रिष्वेव विषये द्रष्टव्या। अतएव ब्रह्मवैवर्ते पूर्वोत्तरविद्धयोर्विधिनिषेधौ स्मर्येते "चतुर्थी संयुता कार्या तृतीया, च चतुर्थिका। तृतीयया युता, नैव पञ्चम्या कारयेत्क्वचिदिति"। तथा तत्रैव पूर्वविद्धा प्रशस्यते "चतुर्थी संयुता या च सा तृतीया फलप्रदा। चतुर्थी तु तृतीया या महापुण्यफलप्रदेति"। तस्माच्च विनायकव्रतविषयत्वं तत्रैव सूचितम् "कर्त्तव्या व्रतिभिर्नित्यं गणनाथस्ततोऽपरेति" स्कन्दपुराणेऽपि "विनायकव्रते कार्या सर्वमासेषु षण्मुख!। चतुर्थी तु जयायुक्ता गणनाथस्ततोऽपरेति"। विनायकव्रतानुष्ठाने चतुर्थ्या मध्याह्नव्यापित्वं मुख्यं प्रयोजकम्। तदाह बृहस्पतिः "चतुर्थी गणनाथस्य मातृविद्धा प्रशस्यते। मध्याह्नव्यापिनी चेत् स्यात्परतश्चेत्परेऽहनीति"। (विनायकस्य माता दुर्गातत्तिथिस्तृतीया तया विद्धा) यदा पूर्वेद्युर्मध्याह्नव्यापिनी भवति तदा मुख्यप्रयोजकस्य विद्यमानत्वान्मातृविद्धत्वगुणसद्भावाच्च सा याह्या तादृशे विषये परेद्युः सत्या अपि मध्याह्नव्यापित्वाभावात्। अतएव प्रशस्यत इत्युक्तम्। परेद्युरेव यदा मध्याह्नव्यापिनी तदा मातृविद्धत्वगुणाभावेऽपि प्रधानप्रयोजकानुसारेण परविद्धैव याह्या। तथा च स्मृत्यन्तरम् "मातृविद्धा प्रशस्ता स्याच्चतुर्थी गणनायके। मध्याह्नेऽपरतश्चेत् स्यात्तागविद्धा प्रशस्यते" इति। ननु बहुषु वचनेषु पूर्वविद्धाया गणनाथमनोरथकत्वश्रुतम्। अतः पूर्वविद्धत्वस्यैव मुख्यप्रयोजकता युक्ता। मैवम्। मध्याह्न

व्याप्तित्वस्यैवं वैयर्थ्यप्रसङ्गात्। अवश्यं हि तदा-मध्याह्नव्यापित्वं प्रसङ्गाद्भवति। अतस्तद्विधानं व्यर्थं व्यावर्त्याभावात्। अथोच्येत पक्षान्तरेऽप्यनेकवचन विहितस्य पूर्वविद्धत्वस्य वैयर्थ्यनदवस्थम् मध्याह्न व्यापित्वेनैव तद्विधेयादिति तत्र यदा तिथिक्षय वशादुभयत्र मध्याह्नव्याप्तिर्नास्ति यदा चोभयत्र क्षत्-क्षमध्याह्नव्यापित्वं तदेकदेशव्यापित्वं वा समानन्तत्र सर्वत्र मध्याह्नव्याप्त्या निर्णयाभावे सति पूर्वविद्धत्वेनैव निर्णेतव्यत्वात्। एवं तर्हि सावकाशनिरवकाशयो निरवकाशम्बलीय इति न्यायेन मध्याह्नव्यापित्वस्य नि-रवकाशतया प्राबल्यमित्येव वक्तव्यन्तु सूक्ष्मतयेति चेत्। सूक्ष्मत्वस्यापि सम्भवात् तिथिनिर्णये कर्म-कालव्याप्तिशास्त्रस्य सूक्ष्मत्वाच्च प्रकरणस्य प्रारम्भे दर्शितम्। कर्मकालश्च विनायकव्रतस्य मध्याह्नः। "प्रातःशुक्लतिलैः स्नात्वा मध्याह्ने पूजयेद्गणेति" तत्कल्पे विधानात्। अतोसूक्ष्मत्वादपि मध्याह्नव्यापित्वं प्रबल-मिति। नन्वु कस्माच्चित्कृतौ पूर्वविद्धत्वेन मध्याह्न व्यापित्वबाध उपलभ्यते। "जया च यदि सम्पूर्णा चतुर्थी हुयते यदि। जया सैव हि कर्त्तव्या नागविद्धा न कारये दिति" स्मरणात्। नैवम्। अस्य वचनस्य दिनद्वये मध्याह्न स्पर्शाभावविषयत्वेनाप्युपपत्तेः। तथाहि पूर्वदिने विनायकव्रतप्रयोजके मध्याह्ने जया सम्पूर्णा, परेद्यु-र्मुहूर्त्तत्रयचयवशान्मध्याह्नादर्वागेव चतुर्थी समाप्ता-तदा दिनद्वये कर्मकाले याह्नतिथेश्चतुर्थ्या अभावा द्विनायकव्रते किन्दिनमुपादेयमिति वीप्सायां पूर्वदिनं विधातुं परदिनं प्रतिषेधति। अथोच्येत। "जया च यदि सम्पूर्णा" इत्यनेन कर्मकालरूपमध्याह्नसमाप्तिपर्य-न्तत्वन्न विवक्षितम् किन्तर्ह्यस्तमयपर्यन्तत्वमिति। एवं तर्हि पूर्वविद्धतैव नास्ति वेधिकायाः पूर्वतिथेः सम्पूर्णत्वे सति वेध्यायाश्चतुर्थ्या अनवकाशत्वात्। अथ मा भूत्पू-र्वविद्धत्वं तथापि मध्याह्नव्यापिन्यां जयायां विद्ध-तायां परेद्युर्मध्याह्नव्यापित्वं बाध्यत इति चेत्। नैवम्। न खलूत्तरदिनहेयत्वे मध्याह्नव्यापित्वं कारणतयोपन्य-स्यते किन्तु नागविद्धत्वम्। अतो नागविद्धत्वनिन्दायां वचनस्य तात्पर्यम् न चतुर्थीरहितजयाविधाने। अन्यथा चतुर्थीनिन्दायामपि तात्पर्यं प्रसज्येत। नच तदुक्तम्। नहि वरघाताय कन्याहङ्कार्यन्ति। वचनच्छाया तु कैतवकन्यावेनाभिधत्ते यदिशब्दप्रयोगात्। यद्यपि जया सम्पूर्णा तथापि नागविद्धा हेया। किमुत जया युक्तायाश्चतुर्थ्यां सम्भवन्त्यामिति हि वचनव्यक्तिः। मध्याह्नव्याप्तावियती भक्तिः कुतस्त्वेति चेत्। चतु-र्थीरहितायां शुद्धतृतीयायामपि कृतो भक्तिरिति समानः पर्यनुयोगः। वचनबलादिहोत्तरमप्यकमपि। वचनयोः परस्परकलहे पूर्वोक्ताभ्यां सूक्ष्मत्वनिर-वकाशत्वाभ्यामध्याह्नवचनमेवातिप्रबलं सिद्धिविना-यकव्रते तस्य प्रतिपदोक्तत्वादपि प्रबलत्वम्। जया-वचनन्तु गौर्यादिव्रते चरितार्थम्। तच्च व्रतं भविष्यत्पु-राणेऽभिहितम् "विनायकं समभ्यर्च्य चतुर्थ्यां यदुन-न्दन!। सर्वविघ्नविनिर्मुक्तः कार्य्यसिद्धिमवाप्नुयात्" इत्यभिधायानन्तरमिदं पठ्यते "निद्रां रतिं श्रियं भद्रां कीर्त्तिं मेधां सरस्वतीम्। प्रज्ञां तुष्टिं तथा-कान्तिं तत्रैवाहनि पूजयेत्। विद्याकामो विशेषेण पूजयेच्च सरस्वतीमिति"। लिङ्गपुराणेऽपि "चतुर्थ्यान्तु गणेशस्य गौर्याश्चैव विधानतः। पूजां कृत्वा लभेद्विद्यां सौभाग्यञ्च नरः क्रमादिति"। नारदीयपुराणेऽपि "माघशुक्लचतुर्थ्यान्तु गौरीमाराधयेद्बुधः। चतुर्थी वरदा नाम गौरी तत्र सुपूजितेति"। अतो यथोत्तरीत्या विनायकव्रते मध्याह्नव्यापित्वेनैव निर्णयः। गौरीव्रते तु जयावचनन्द्रष्टव्यम्। तत्र यदा दिनद्वयेऽप्यहोरात्रे मध्याह्नैकदेशव्यापिनी तदा पूर्वदिने तन्मुहूर्त्तत्रयस्येति तदेवोपादेयम्। उत्तरदिने तन्मुहूर्त्तस्य किन्मुहूर्त्तत्रयगुणेन तदुपादेयं? किं वा मातृविद्धत्वगुणेन पूर्वमुपादेयमिति? संशये पूर्वमिति ब्रूमः। परस्य नागविद्धत्वदोषोपेतत्वात् पूर्वस्य च तदभावात्। एतदेवाभिप्रेत्य स्कन्दपुराणे पठ्यते "ज्यैष्ठे च वटसावित्री तथानङ्गत्रयोदशी। विनायकचतुर्थी च कर्त्तव्या संयुता तिथिरिति"। विना-यकव्रतवन्नागव्रतेऽपि चतुर्थी मध्याह्नव्यापिनी ग्राह्या। नागव्रतञ्च कूर्मपुराणे दर्शितम्। "तिथौ युगाह्नयायाञ्च समुपोष्य यथाविधि। शङ्खपालादिनागानां श्रेयस्य च महात्मनः। पूजा कार्या पुष्पगन्धक्षीराद्यायतनपूर्वकम्। विषाणि तस्य नश्यन्ति न च तान् घ्नन्ति पन्नगाः" इति। युगाह्नया चतुर्थी। मध्याह्नव्यापित्वञ्च देवलेनोक्तम् "युगमध्यन्दिने यत्र तत्रोपोष्य फणीश्वरान्। क्षीरेणा-द्याथ पञ्चम्यां पूजयेत्पूर्ववत्ततः। विषाणि तस्य नश्यन्ति न तान् हिंसन्ति पन्नगाः" इति विनायकचतुर्थीनागचतु-र्थ्योरियान्विशेषः। एकभक्तन्यायेन मध्याह्नव्याप्तेः क्रोडा-

भेदे सति यदा परेद्युरेव मध्याह्नव्याप्तिस्तदा विनायक चतुर्थी परा। इतरेषु तु पञ्चसु भेदेषु जयायोगस्य प्रशस्तत्वात् पूर्वेद्युरेव सा भवति। यदा तु पूर्वेद्युरेव मध्याह्नव्यापिनी तदा नागचतुर्थी पूर्वा। इतरेषु तु पञ्चसु भेदेषु पञ्चमीयोगस्य प्रशस्तत्वात् उत्तरा भवति। तत्प्रागस्यस्तु पूजयेदिति वचनादवसीयते"।

**चतुर्थक** पु० चतुर्थेऽह्नि भवोरोगः कन्। "दिनत्रयमतिक्रम्य यः स्यात् सहि चतुर्थकः" इति वैद्यकोक्ते विषमज्वरभेदे।

**चतुर्थकाल** पु० चतुर्थः कालःभोजनकालः। "सुनिभिर्दिरशनं प्रोक्तं विप्राणां सर्व्वदर्शिनां नित्यम्। अह्नि च तमस्विन्याम्" कल्पोपरिशिष्टेन दिने भोजनद्वयस्य विधानेन तृतीयभोजनकालोत्तरे सार्द्धदिनात्मके भोजनकाले। "चतुर्थकालमश्नीयादनारम्भवयं मितम्" मनुः।

**चतुर्थभक्त** न० चतुर्थे चतुर्थकाले भक्तं यत्र। सार्द्धदिनात्मके भक्तकाले। "चतुर्थभक्तपर्व वैश्ये शूद्रे विधीयते" भा० आनु० १०६ अ०।

**चतुर्थभाज्** पु० चतुर्थमंशं भाग्याहेः भजते करूपेण भज—क्विप्। आपदि चतुर्थभागरूपकरग्राहिणि नृपे। "चतुर्थमाददानोऽपि क्षत्रियोभागमापदि। प्रजाः रक्षन् परं शक्त्या किल्बिषात् प्रतिमुच्यते" मनुः। "चतुर्थभाङ् महाराज! भोज इन्द्रसखो बली" भा० स० १६ अ०।

**चतुर्थांश** पु० कर्म्म०। १चतुर्भागैकभागे "चतुर्थांशोऽत्र धर्म्मस्य रक्षिता लभते फलम्" हरिवंशे १७० अ०। चतुर्थांशोऽस्य। २चतुर्थांशस्वामिनि त्रि०। "सर्वेषामर्द्धिनो मुख्यास्तदर्द्धेनार्द्धिनोऽपरे। तृतीयिनस्तृतीयांशाश्चतुर्थांशाश्च पादिनः" मनुः दक्षिणार्द्धगोशतविभागोक्तौ। तुरीयांशादयोऽप्यत्र। "औरसे पुनरुत्पन्ने तुरीयांशहराः सुताः" कात्या० श्रा०।

**चतुर्थिका** स्त्री। पलपरिमाणे वैद्यकपरिभाषा तस्य चतुःकर्षात्मकत्वात्तथात्वम्।

**चतुर्थीकर्म्म** पु० विवाहादनन्तरं चतुर्थ्यां तिथौ कर्त्तव्ये कर्म्मभेदे। "अथातश्चतुर्थीकर्म्म" गोभिलः "विवाहनिष्पत्त्यनन्तरं चतुर्थ्यां तिथौ वक्ष्यमाणं कर्म्म वर्त्तिष्यते" रं० त० रघुनन्दनः।

**चतुर्दंष्ट्र** पु० चतस्रोदंष्ट्रा यस्य। स्कन्दस्य सैनिकभेदे। "चतुर्दंष्ट्रोऽष्टजिह्वश्च मेघनादः पृथुश्रवाः" भा० श० ४६ अ० स्कन्दसैनिकोक्तौ। २बलिसैन्यभेदे। "अष्टदंष्ट्रश्चतुर्दंष्ट्रो मेघनादो जलन्धमः" हरिव० २४० अ० बलिसैन्योक्तौ। ३परमेश्वरे च।

**चतुर्दंष्ट्रभुज** पु० चतुर्भुजः" विष्णुस०। "चतस्रोदंष्ट्रा यस्य चतुर्दंष्ट्रोऽष्टसिंहविग्रहः साङ्गग्राह्या महत्तं दंष्ट्रा इत्युच्यते चतस्रोदंष्ट्राः महत्ताणि अस्य "चत्वारि शृङ्गा द्वे शीर्षे" इत्यादिश्रुतेः" भा०।

**चतुर्दन्त** पु० चत्वारो दन्ता अस्य। ऐरावते इन्द्रगजे हेमच०। "चतुर्दन्तगजारूढो वज्री कुलिशहस्तकरः" विष्णुध० इन्द्रध्यानम्। चत्वारोदन्ता अस्य गवादेः संख्यापूर्व्वकत्वात् वयसि दन्तादेशः। चतुर्दत् चतुर्दन्तोपलक्षितवयोविशिष्टे गवादौ स्त्रियां ङीप्।

**चतुर्दशन्** पु० ब० व०। चतुरधिकादश। (चौदह) १चतुरधिकदशसंख्यायां २तत्संख्येये च। ततः पूरणे डट्। चतुर्दश तत्संख्यापूरणे त्रि० स्त्रियां ङीप्। सा च चन्द्रस्य चतुर्दशकलाया ह्रासवृद्धिरूपक्रियारूपायां तिथौ। "चतुर्दश्यष्टमी चैव अमावास्या च पूर्णिमा" इति त० पु०।

उभयपक्षयोस्तस्या उभयदिनसत्त्वे कर्म्मभेदे कस्या ग्राह्यता तन्निर्णयः कालमा० चतुर्दशीप्रक० यथा

"अथ चतुर्दशी निर्णीयते। अत्रापि शुक्लकृष्णपक्षभेदेन व्यवस्था भवति। तत्र युग्मशास्त्रेण शुक्लचतुर्दशी परविद्धा ग्राह्या। तथा व्यासोऽपि "शुक्ला चतुर्दशी ग्राह्या परविद्धा सदा व्रते" इति। पूर्वविद्धाप्रतिषेध उत्तरविद्धा विधिश्चेत्थमेवाभिप्रेत्योक्तः राघवे पक्षते "सदा कार्या तयोद्दश्या न तु युक्ता चतुर्दशी। पौर्णमासीयुता सा स्याच्चतुर्दश्या च पूर्णिमेति"। नारदीयेऽपि "तृतीयैकादशी ग्राह्या शुक्लपक्षे चतुर्दशी। पूर्वविद्धा न कर्त्तव्या कर्त्तव्या परसंयुतेति"। यत्तु भाद्रशुक्लचतुर्दश्यामनन्तव्रतमित्यभिप्रेत्योत्तरेऽभिहितम् तत्र पूर्वविद्धा परविद्धा वा मध्याह्नव्यापिनी ग्राह्येति केचिदाहुः। निबन्धस्तु तत्र प्रमाणत्वेनोदाहरन्ति। "मध्याह्ने भोज्यवेलायां स सप्तीर्य सरित्तटे। ददर्श शीला सा स्त्रीणां समूहं रक्तवाससाम्। चतुर्दश्यामर्चयन्तमनन्तं प्रेम्णा देवं पृथक् पृथगिति"। "अत्र मध्याह्ने भोज्यवेलायामित्यनेन मध्याह्नस्य कर्मकालत्वं प्रतीयते। अतस्तद्व्यापिनी तिथिर्ग्राह्या। नैतत्सारम्। यदा विनायकव्रते "मध्याह्ने पूजयेदिति मध्याह्नः कर्मकालत्वेन विहितः। नात्र तथा विधिरस्ति। उदाहृतं तु निबन्धवादगतत्वान्न स्वातन्त्र्येण कस्यचिदर्थस्य प्रमापकं किन्तु सति प्रमाणान्तरे तस्योपोद्बलकं भवति। नचात्र प्रमाणान्तरमस्माभिः। अतोऽ

मध्याह्नः कर्मकालः। तथा सति द्वौदयिकी याह्येति वचनेन युग्मशास्त्रादिभिरोदयव्यापिनी याह्या। सा च तिथ्यन्तरवृद्धिमूह्यतेति सख्यः कल्पः, हिसङ्ख्येत्यनुकल्पः एवं सति शिष्टाचारोपनुष्टद्दीतो भवति। चैत्रश्रावण चतुर्दश्यौ शुक्लपक्षे अपि रात्रियोगिन्यौ याह्येति। तथा च बौधायनः "मधोः श्रावणमासस्य शुक्ला या तु चतुर्दशी। सा रात्रिव्यापिनी याह्या परा पूर्वाङ्ग गामिनीति"। परा मासान्तवर्त्तिनी शुक्लचतुर्दशी। कृष्णा चतुर्दशी तु पूर्वविद्धैव याह्या। तथा चापस्तम्बः "कृष्णपक्षेऽष्टमी चैव कृष्णपक्षे चतुर्दशी। पूर्वविद्धा तु कर्त्तव्या परविद्धा न कर्हिचिदिति"। अपराह्णव्यापित्वे तु शुक्लचतुर्दश्यपि पूर्वविद्धा याह्या तथा च स्कन्दपुराणे "चतुर्दशी च कर्त्तव्या त्रयोदश्या युता विभो!। मम भक्तैरहोरात्रे! भवेद्या चापराह्णिकी। दर्शविद्धा न कर्त्तव्या राकाविद्धा कदाचनेति"। अत्र मम भक्तैरित्यीश्वरोक्तिलिङ्गाच्छिवचतुर्दशीविषयत्वं द्रष्टव्यम्। तदेवं व्रतान्तरेषु चतुर्दशी निर्णीता। अथ शिवरात्रिव्रतं निर्णीयते। तत्रेदमुच्यते। किमयं शिवरात्रिशब्दः रूढः?। किं वा यौगिकः?। उत लाक्षणिकः?। अथ वा योगरूढ?इति। किन्तावत्प्राप्तम्। रूढइति। तिथिविशेषे शिवरात्रिशब्दस्य संज्ञारूपेण स्मरणात्। तथा च स्क० नागरखण्डे "माघमासस्य शेषे या प्रथमा कालेगुणस्य च। कृष्णे चतुर्दशी सा तु शिवरात्रिः प्रकीर्त्तितेति"। कालिके "माघमासेऽसिते पक्षे विद्यते या चतुर्दशी। तद्रात्रिः शिवरात्रिः स्यात्सर्वपुण्यशुभावहेति"। यद्यप्यत्र शिवस्य रात्रिः शिवरात्रिरित्यवयवार्थः प्रतीयते तथापि योगात् रूढेर्बलवत्त्वाद्योगोऽत्र न याह्यः। प्रावल्यञ्चास्य कर्णादिशब्देष्वगम्यते। अवयवस्य कर्णं इत्यवयवार्थप्रतीतावपि तत्सम्बन्धेन रूढ्या उत्तरविशेषवाचित्वस्वीकारात्। ननु काकदन्तपरीक्षान्यायोऽयं विचारः। यद्ययं शिवरात्रिशब्दोरूढः यदि वा यौगिकः उभयथाप्यनुष्ठाने विशेषाभावात्। मैवम्। अस्त्येव महान्विशेषः। यौगिकत्वे शिवसम्बन्धिव्रतजातं सर्वं यस्यां रात्रावनुष्ठीयते सा सर्वशिवरात्रिः स्यात्। माघमासादिपदञ्च तदानीमुपलक्षणं भवेत्। रूढि पक्षे तु माघमासादेर्विशेषणत्वात् तद्विशिष्टाया एकस्याएव तिथेः शिवरात्रित्वम्। अतः कर्त्तव्यएव विचारः। तत्राहीनन्यायेन रूढिमेवाद्रियामहे। तस्य च न्यायस्य संप्राहकावेतौ श्लोकौ भवतः "अहीनस्य द्वादशेति प्रकृतौ विकृताविव। न हीन इति योगेन प्रकृतौ तद्विकल्प्यताम्। शीघ्रधीहेतुतो रूढेरहीने विकृताविदम्। उत्कृष्यतां द्वादशत्वं साङ्गात् प्रकृतकर्मणः"। अयमर्थः ज्योतिष्टोमे श्रूयते "तिस्रएव साङ्गस्योपसदोद्वादशाहीनस्य यज्ञस्य सवीर्यत्वायेति"। अङ्गा सह वर्तत इति साङ्गः। एकदिननिष्पाद्योज्योतिष्टोमः। तस्य प्राचीनेषु त्रिषु दिनेष्वङ्गत्वेनानुष्ठेया इमा उपसच्छब्दवाच्याः। तासिस्र उपसदो विधाय पुनरहीनशब्दवाच्यस्य कर्मणो द्वादशोपसदो विधीयन्ते। तत्र संशयः। किमिदं द्वादशोपसत्त्वं द्विरात्रादावहीनप्रकृतिभूते साङ्गशब्दवाच्ये प्रकृतेर्ज्योतिष्टोमे निविशते? आहोस्विदहीनशब्दवाच्ये विकृतिरूपे द्विरात्रादावुत्कृष्यते? इति। तदर्थमिदमिदन्न्यते। अहीनशब्दो यौगिको रूढोवेति। तत्र न हीन इति व्युत्पत्तेर्विस्पष्टं प्रतिभासाद्यौगिकएवायम्। तदयञ्च प्रकृतावुपपन्नः। साङ्गप्रधानस्य सर्वस्य साक्षाद्वाचकशब्दैरेवोपदिष्टत्वेन हीनत्वाभावाद्विकृतौ तु विशेषएव वाचकशब्दैरुपदिश्यते। इतरत्त्वर्थमतिदेशात् प्राप्यते। अत उक्तिसङ्कोचात् विकृतेर्हीनत्वम्। एवञ्च सत्यहीनशब्दस्य ज्योतिष्टोमे प्रवृत्तिसम्भवात्तत्प्रकरणानुपक्षयाच्च तत्रैव द्वादशत्वं निविशते। न च पूर्वोक्तयुक्तिविच्छित्तेन लिङ्गेन बाधः शङ्कनीयः वाक्ययोः समानबलत्वेन व्रीहियववद्विकल्पोपपत्तेः। तस्माद्ज्योतिष्टोमएव द्वादशत्वविधिरिति प्राप्ते ब्रूमः। विकृतिरूपे द्विरात्रादाविदं द्वादशत्वं विधीयते। कुतः अहीनशब्दस्य श्रौतप्रयोगवाङ्मात्रेण तत्रैव रूढत्वात्। रूढिश्च शीघ्रबुद्धिहेतुत्वेन योगाद्बलीयसी, योगे त्ववयवार्थं प्रथमतो निश्चित्य पश्चात्तदायार्थो निश्चेतव्य इति विलम्बः। न चात्र प्रकरणविरोधः शङ्कनीयः बलीयसा वाक्येन प्रकरणस्य बाधितत्वात्। तस्मादिदं द्वादशत्वं प्रकृतज्योतिष्टोमादुत्कृष्यत्र विकृतिषु द्विरात्रादिषु निवेशनीयमिति। अत्र यथा रूढोऽहीनशब्दस्तथा शिवरात्रिशब्दोऽपि रूढ इति प्रथमः पक्षः। अपर आह। यौगिकएवायं शिवरात्रिशब्दः। कुतः शिवसम्बन्धमुपजीव्य तच्छब्दस्य प्रवृत्तत्वात्। तथा च स्कन्दपुराणे "माघस्य कृष्णपक्षे या तिथिर्यैव चतुर्दशी। शिवरात्रिस्तु सा ख्याता सर्वपापविनाशिनी"। "तस्य रात्रिः समाख्याता शिवरात्रिः शिवप्रिया। तस्यां सर्वेषु कि-

क्षेषु सदा संक्रमते हरः। यानि कानि च लिङ्गानि चराणि स्थावराणि च। तेषु संक्रमते देवि! तस्यां रात्रौ यतोहरः। शिवरात्रिस्ततः प्रोक्ता तेन सा हरवल्लभेति"। शिवरहस्ये "तत्प्रीत्यर्थं देवर्षे! माघकृष्णचतुर्दशी। शिवरात्रिः समाख्याता त्रिषु लोकेषु विश्रुता" इति स्क० अवन्तिखण्डे "माघफाल्गुनयोर्मध्ये असिता या चतुर्दशी। शिवरात्रिस्तु सा ख्याता सर्वपापनिषूदनी"। तस्माच्छिवसम्बन्धिनी रात्रिः शिवरात्रिरिति यौगिकोऽर्थः प्रोक्षणीन्यायेन गृहीतव्यः। तस्य च न्यायस्य संग्राहकावेतौ श्लोकौ "संस्कारजातियोगेषु कं ब्रूते प्रोक्षणीरिति। संस्कारं सार्वभौमत्वाज्जातिसङ्केतनोक्षितः। अन्योन्याश्रयतो नाद्यो न जातिः कल्प्रत्ययोक्षितः। यौगिकः कृत्प्रत्ययत्वात्कृत्प्रत्ययकरणे स्थिता" अयमर्थः। दर्शपूर्णमासाङ्गतया श्रूयते "प्रोक्षणीरासादयतीति"। तत्र संशयः। किमयं प्रोक्षणीशब्दोऽभिमन्त्रणासादनोदकसंस्कारं ब्रूते?। किं वा जलावान्तरजातिविशेषम्? आहोस्वित् प्रोक्षणे पात्रास्थाभिरिति योगम्?। तत्र संस्कारं ब्रूत इति तावत्प्राप्तश्रुतः? सार्वभौमत्वात्। सर्वेषु हि संस्कारविधिवाक्यादिप्रदेशेषु प्रोक्षणीशब्दः श्रूयते। "प्रोक्षणीरासादयेत्प्रावर्हिरूपसादयेति" प्रैषवाक्यप्रयोगः। "प्रोक्षणीरासादयतीति" विधिवाक्ये। एवमभिमन्त्रणादिवाक्येष्वपि द्रष्टव्यानि तस्मात्संस्कारं ब्रूतदत्रैकः पक्षः। जातिं ब्रूत इति पक्षान्तरम्। लोके हि जलक्रीडासु प्रोक्षणीभिरुद्धेजिताः स्म इत्युदकजातौ प्रयोगो दृश्यते। तत्र न तावत्संस्कारं ब्रूत इत्याद्यः पक्ष उपपद्यते। कुतः? अन्योन्याश्रयत्वात्। नापि जातिं ब्रूत इति द्वितीयः पक्षोयुक्तः उदकजातौ प्रोक्षणीशब्दप्रयोगे व्यवहारे पूर्वमकृत्प्रत्ययेनातः परं शक्तेः कल्पनीयत्वप्रसङ्गात्। न च लोकेऽपि शक्तिः कल्पनीया व्याकरणेनैव कृत्प्रत्ययात् व्याकरणे हि उक्ष सेचन इत्यस्माद्धातोः करणे ल्युट्प्रत्ययेन शब्दो व्युत्पादितः। तथा सति प्रवर्त्तेनोच्यते अनेनेति योगेन सेचनसाधनमुदकादिकं सर्वं प्रोक्षणशब्दवाच्यं सम्पद्यते। प्रकृते तु स्त्रीशब्दवाच्यानामपां सेचनसाधनत्वात् तद्वचनस्य प्रोक्षणशब्दस्य ङीष्प्रत्ययान्तत्वेन प्रोक्षणीरितिद्वितीयावच्छब्दवचनान्तः शब्दोनिष्पद्यते। नन्वङ्गीनाधिकरणे रूढेः प्राबल्यमुक्तम्। प्रोक्षणाधिकरणे च योगस्य प्राबल्यमुच्यते। अतः परस्परविरोधः। नैवम् सङ्ख्यात्मिका हि रूढिर्योगमपहरतीति। न च प्रोक्षणीशब्दे रूढिर्लभ्यते। द्रव्यव्यवहारेण जातावव्युत्पादितत्वात्। अङ्गीनशब्दोऽपि द्विरात्रादिषु न द्रव्येव्युत्पादित इतिचेत् न। व्याकरणे व्युत्पादितत्वात्। "अङ्गः खः क्रतौ" इत्यनेन वारुरुचेन वार्त्तिकेनाङ्गशब्दात् स्वप्रत्ययस्तस्मान्नञ्नेनादेशं कृत्वा क्रतुविषयतया व्युत्पादितो अङ्गीनशब्दः। नन्वेवं सति चटकुटीप्रभातन्यायस्यव प्रसङ्गेन यतोऽङ्गीनशब्दे योगस्परिहर्त्तुकामेन भवता व्याकरणमुपजीव्य योगे पर्यवसानं कृतम्। नायन्दोषः। पूर्वपक्षिणोऽभिमते समासलक्षणे योगे पर्यवसानस्यानभिधानात्। न च नञ्समासोऽपि व्याकरणेषु व्युत्पादित इति शङ्कनीयम्। नञ्समासस्वीकारे सति "अयस्तोवाएव" इत्यादाविवाऽङ्गीनशब्दस्याद्युदात्तत्वप्रसङ्गात् मध्योदात्तोक्षय्यं शब्द आम्नायते। तस्मात्पक्षद्वये योगसाध्येऽपि समासरूपे योगस्यैवपक्षाभिमतं निराकृत्य श्रौतरूढिः सिद्धान्तिना समाश्रिता। तामेव रूढिं प्रकटयितुं वररुचिना वार्त्तिकं कृतम् यतः सत्यपि प्रकृतिप्रत्ययविभागे यौगिकत्वं न शङ्कितुं शक्यते। तथा गोत्वजातौ रूढ़स्यापि गो शब्दस्यौणादिकसूत्रेषु "गमेर्डोः" इति प्रकृतिप्रत्ययविभागङ्कृत्वा गच्छतीति गौरिति व्युत्पत्तिः प्रदर्शिता। तद्वदत्राप्यवगन्तव्यम्। प्रोक्षणीशब्दे तु न रूढिज्ञापनाय किञ्चित्सूत्रं सूत्रन्तं विद्यतमस्ति। किन्तर्हि सर्वधातुसाधारणेनावयवार्थव्युत्पादकेन ल्युट्प्रत्ययेन व्युत्पादितत्वात्। यौगिक एवायं प्रोक्षणीशब्दः। तस्मात्प्रोक्षणीशब्दावच्छिन्नरात्रिशब्दो यौगिक इति द्वितीयः पक्षः। अन्ये तु पुनर्मन्यन्ते। लाक्षणिकोऽयं शिवरात्रिशब्दः। तिथिवाचकेन शब्देन तत्तिथौ क्रियमाणस्य व्रतविशेषस्य लक्ष्यमाणत्वात्। अतएवेशानसंहितायामुक्तम् "शिवरात्रिव्रतन्नाम सर्वपाप प्रणाशनम्। आचाण्डालमनुष्याणां भुक्तिमुक्ति प्रदायकम्। अर्द्धरात्रादधोर्ध्वं युक्ता यत्र चतुर्दशी। तत्तिथावेव कुर्वीत शिवरात्रिव्रतं व्रती। शिवरात्रिव्रतङ्कार्यं भूतान्वितमहानिशि। शिवरात्रिव्रतन्ह्येव करिष्ये शिवसन्निधौ। निर्विघ्नं कुरु मे देव। भक्तस्याद्य! महेश्वरेति"। नारदीयसंहितायाम् "अर्द्धरात्रयुतायत्र माघकृष्णचतुर्दशी। शिवरात्रिव्रतं तत्र कुर्याज्जागरणं तथेति"। पद्मपुराणेऽपि "अर्द्धरात्रादधः

र्द्धे यदि युक्ता चतुर्दशी। तस्यामेव कुर्वीत शिवरात्रिव्रतं स्त्री" स्कन्दपुराणे "शिवरात्रिव्रतन्त्वेव ! कथञ्च मह्येश्वरेति"। नच कालवाचकस्य शब्दस्य लक्षकत्वमदृष्टचरमिति वक्तव्यम्। कालवाचकाभ्याममावास्यापौर्णमासीशब्दाभ्यां यागलयरूपयोरिष्टयोः साक्षात्सम्बन्धिन्योरुपलक्षितत्वात्। अतएव श्रूयते "यएवंविद्वान् पौर्णमासीं यजते य एवं विद्वानमावास्यां यजते" इति। श्रुतिष्वपि सर्वत्र तिथिवाचकैः शब्दैस्तत्सम्बन्धिनो व्रतविशेषा लक्ष्यन्ते। स्कन्दपुराणे "जन्माष्टमी नैव कृता कदाचित्कलायुतं पच्यते रौरवेऽविति"। अत्रापि लक्षणोऽपि "एकादशीन्तु कुर्वीत चीयते द्वादशी यदेति" एवमन्यत्रापि दृष्टव्यम्। तस्माल्लाक्षणिकोऽयं शिवरात्रिशब्द इति तृतीयः पक्षः। अथ सिद्धान्तं ब्रूमः। योगरूढ्यवायं शिवरात्रिशब्दः। योगोहितीयमक्षोपन्यासेन दर्शितः। रूढिश्च प्रथमोपन्यासेन। तत्रैकस्य स्वीकारे सत्यन्यविषयं शास्त्रमदनुपपन्नकदाहृतो न्यायश्च बाध्येत। नच यौगिकत्वे सति शिवव्रतोपेतेषु त्रयोदश्यादितिथ्यन्तरेषु शिवरात्रित्वं प्रसज्येतेतिवाच्यम्। तत्रातिप्रसङ्गस्य रूढ्या निवारणात्। यथा पङ्कजशब्दे पङ्काज्जायत इति योगं स्वीकृत्य भेकादिष्वति प्रसङ्गो रूढिस्वीकारेण निवार्यते। तद्वदत्रापि योग रूढतायां न कोऽप्यतिप्रसङ्गः। नच सत्ये सम्भवति लक्षणाश्रयणमुचितम्। सत्योच्येत। लक्षणाया अभावे व्रतविषयत्वञ्च स्यादिति। तन्न। बहुव्रीहि स्वीकारे योगेनैव तल्लिङ्गेः। शिवस्य प्रिया रात्रिर्यस्मिन्व्रतेऽङ्गत्वेन विहिता तद्व्रतं शिवरात्राख्यं तस्मात्रि र्मन्थ्यन्यायेनात्र योगरूढः शिवरात्रिशब्दः। तस्मात्र व्यवस्थ संग्राहकः श्लोकः"निर्मन्थ्यो यौगिको योगरूढो वा योगभाजनात्। यौगिकोऽचिरजाते ज्मौ नियते यौगरूढिभाक्"। अस्यायमर्थः। दृष्टकाचवने श्रूयते "निर्मन्थ्ये नेष्टकाः पचन्तीति"। तत्र संशयः। किमयं निर्मन्थ्यशब्दो यौगिकः? किं वा योगरूढः? इति। निःशेषेण मथ्यत इति योगस्य प्रतीयमानत्वात्प्रोक्षणीन्यायेन योग इति पूर्वःपक्षः। अत्र द्वावग्नी विद्येते चिरनिर्मन्थितोऽचिरनिर्मन्थितश्च। चयनसत्रयोर्यो निर्मथ्य तस्मात्सप्ताहाद्यूर्ध्वकालन्यारभ्याय योऽग्निर्निर्मथ्यते सोऽचिरनिर्मन्थितः। तेनेष्टकाः पच्यन्ते तस्यैव पुरुषसंस्कारत्वात्। अतश्च मन्थनस्यान्द्वितयसाधारण्येऽप्यचिरनिर्मन्थितमग्निं नियन्तुं रूढिराश्रयणीया। यथा वा नवनीतशब्दस्य नयनीतजन्यत्वयोगस्य चिराचिरयोरुभयोः साधारण्येऽपि नूतनएव क्षीरे नवनीतशब्दो लोके प्रसिद्धेर्नियम्यते तद्वदत्राप्यवगन्तव्यम्। तथा च सति प्रतीयमानयोगस्यापरिहृतत्वान्नियत्यै रूढिस्वीकाराच्च योगरूढोऽयं निर्मन्थ्य इति राद्धान्तः। अनेनैव न्यायेन शिवरात्रिशब्देऽपि योगरूढिराश्रीयते। तत्र शिवस्य रात्रिः शिवरात्रिरिति तत्पुरुषसमासेन योगेन प्रवर्त्तमानः शब्दोरूढ्या माघकृष्णचतुर्दशीरूपे कालविशेषे नियम्यते। शिवस्य रात्रिर्यस्मिन् व्रते इति बहुव्रीहि समासेन योगेन प्रवृत्तः शब्दोरूढ्याव्रतविशेषे नियम्यते। तच्च शिवरात्रिव्रतमेकदाशीजयन्तीव्रतवत्तं योगरूढत्र न्यायेन नित्यत्वाभ्यन्तेत्युभयविधम्। तत्र नित्यत्वमकरणे पुरुषवायत्वीप्सानित्यनित्यत्वशब्दैरवगन्तव्यम्। तत्राकरणे पुरुषवायत्वः स्कन्दपुराणे पठ्यते "परात्परतरञ्चास्ति शिवरात्रिः परात्परम्। न पूजयति भक्तेभ्यं रुद्रन्त्रिभुवनेश्वरम्। जन्तुर्जन्मसहस्रेषु भ्रमते नात्र संशयः"। वीप्सापि तत्र पठिता "वर्षेवर्षे महादेवि ! नरोनारी पतिव्रता। शिवरात्रौ महादेवङ्कामन्नक्त्वा पूजयेदिति"। नित्यनित्यशब्दौ च तत्रैव "माघ कृष्णचतुर्दश्यां यः शिवं शंसितव्रतः। सस्तुः पूजयेन्नित्यं स लभेदीप्सितम्फल मिति"। "अथो यदि वा शुक्लेव्रतं चीयते क्वियानपि। मेरुमन्दरतुल्यञ्च त्रीशैलोविन्ध्य एव च। चलन्त्येते कदाचिद्वै नियतं हि शिवव्रतमिति"। काम्यत्वञ्च फलश्रवणादवगन्तव्यम्। तच्च स्कन्दपुराणे "शिवञ्च पूजयित्वा योजागर्त्तिं च चतुर्दशीम्। मातुः पयोधररसञ्च पिबेत्र कदाचन। यदीच्छेद्दाक्षितान् भोगान् दिवि देवमनोरमान्। आगमोक्तविधिं कृत्वा प्राप्नोति परमम्पदम्। मम भक्तस्ततो देवि ! शिवरात्रिसुपोषकः। गणत्वमच्यन्दिव्यमक्षयं शिवशासनम्। सर्वान्भुक्त्वा महाभोगान्मृतो भूयोन जायते" इति। काम्यव्रतस्यैवानसंज्ञितायां वर्षसंख्यापठ्यते "एवमेतद्व्रतङ्कृत्वा प्रतिसंवत्सरं व्रती। द्वादशाब्दिकमेतत्स्याच्चतुर्विंशाब्दिकन्तु वा। सर्वान् कामानवाप्नोति प्रेत्य चेह च मानवः" इति। नित्यकामरूपस्याश्व व्रतस्य सर्वाधिकारित्वमीशानसंज्ञितायामुक्तम् "शिवरात्रिव्रतञ्चाम सर्वपापप्रणाशनम्। आचाण्डाल मनुष्याणां भुक्तिमुक्तिप्रदायकमिति"। अधिकारिणि

यमाः स्कन्दपुराणे दर्शिताः "माघमासे तु कृष्णा या-कालानादौ चतुर्दशी। सा च पुण्या तिथिर्ज्ञेया सर्व-पातकनाशिनी। अहिंसा सत्यमक्रोधो ब्रह्मचर्यं दया क्षमा। ज्ञानात्मा क्रोधहीनश्च तपस्वी ज्ञानलक्षकः। तस्मै देवमिदन्देवि! गुरुपादानुगोयदि। अन्यथा योददातीदं स तदा नरकं व्रजेदिति"। उक्ताधिकारिणा तुल्यं व्रतस्वरूपं विविधम् "उपवासो जागरणं-पूजा च। तदुक्तं नागरखण्डे "उपवासप्रभावेण बलादपि च जागरात्। शिवरात्रौ तथा तस्य शिवस्यापि च पूजया। अश्नुतेऽनुभवते भोगान् शिवसायुज्य मानुयादिति"। स्क० सह्यखण्डे "सर्वज्ञ लिङ्गमभ्यर्च्य सोपवासः सजागरः। अजानन्नपि निष्पापो निष्पादो गणतां गतः"। अत्रेदञ्चिन्त्यते किमेता उपवासजागर पूजा व्रतस्य स्वरूपे स्वेच्छया विकल्पन्ते ?। उत समुच्चिताएवेति ?। तत्र विकल्पन्ते इति तावत्प्राप्तम्। कुतः। एकैकस्येतरनिरपेक्षतया विधानात्। तथाहि स्कन्द-पुराणे केवलोपवासविधिः पठ्यते "अथखण्डित व्रतोयोहि शिवरात्रिमुपोषयेत्। सर्वान् कामानवाप्नोति शिवेन सह मोदत इति"। तथा केवलजागरणं पठ्यते "कश्चित्पुण्यविशेषेण व्रतहीनोऽपि यः पुमान्। जागरङ्कुरुते तत्र स रुद्रसमतां व्रजेत्"। तथा केवलपूजा प-ठ्यते "यःपूजयति भक्त्या मामनेकफलतां व्रजेदिति"। तस्मादुपवासादयस्त्रयोऽपि विकल्पन्ते। यदि नागर-खण्डसह्यखण्डयोः समुच्चयविधिरुच्यते। तर्हि-प्रत्येकं वा समुदायोवा यथेष्टमनुष्ठीयतामिति प्राप्ते-ऽभिधीयते। वैश्वानरविद्योपासनन्यायेन समुदाय एवात्रा नुष्ठेयः। तत्र च न्यायस्य संग्राहकावेतौ श्लोकौ "वैश्वानरमुपास्तेऽत्र प्रत्येकं समुदायतः। विकल्पः समु-दायो वा नियतोद्विविधाद्विधेः। विकल्प इति चेन्नैवं समुदायप्रतीतितः। अवयव्यनुवादेन प्रत्येकोक्त्यु-पपत्तितः" इति। अयमर्थः। छन्दोगैराम्नायते "वैश्वानरमुपास्ते इति। द्युलोकादिअवयवाकाशोदक पृथिवीरूपैः षड्भिरवयवैरुपेतोऽवयवी सर्वात्मको विराट् पुरुषो वैश्वानरशब्दवाच्यः। तत्र संशयः। किं द्यु-लोकाद्यवयवा अवयवी च प्रत्येकं विकल्पेनोपास्याः ? उतावयव्येव नियमेनोपास्यः ? इति। विकल्प इति तावत् प्राप्तम् कुतः द्विविधस्य विधेः श्रूयमाण-त्वात्। प्राचीनशालसत्ययज्ञेन्द्रद्युम्नजनबुडिलाश्वक नामभिः षड्भिर्ऋषिभिः क्रमेण द्युलोकादयः षड् वयवाः प्रत्येकमुपासिताः। तद्वत्तात्तिरीयकेषु वाक्येषु श्रूयमाणावयवानां प्रत्येकमुपास्तिविधयो नियमाश्च फलसहिता उपलभ्यन्ते। पुनश्चान्ते षड्भ्यस्तेभ्यो महर्षिभ्योऽश्वपती राजा समुदायोपासिमवोचत। अतो-द्विविधविधित्वेन यथेच्छं विकल्प इति प्राप्ते ब्रूमः। समुदायएवात्र नियमेनोपासितव्यः कुतः प्रस्तुत-त्वात्। अवयवोपास्तिवाक्यान्यवयव्युपासनुवादरूपत्वेना-प्युपपद्यन्ते। तस्मात्समुदाय उपास्य इति राद्धान्तः। अनेन न्यायेन प्रकृतेऽप्युपवासादीनामन्यतमानां समुदायस्यैव व्रतरूपत्वम्। ननु क्वचिदुपवासादित्रयं विधाय पुनः प्रत्यान्तररूपेणोपवासव्यतिरिक्तं द्वयं पठ्यते। "अथवा शिवरात्रिञ्च पूजाजागरणमेवेदिति"। नायन्दोषः। अत्र वैयधिकरण्योपक्रमभेदाग्रहविषयत्वोपपत्तेः। अत्र व्रते विहितान्वयानां परस्परमङ्गाङ्गिभावबोधकप्रमाणा-भावादाग्नेयादिषद्यागवत्प्रत्येककालसम्बन्धविधानात्फल-विधानाच्च समं प्राधान्यन्द्रष्टव्यम्। अस्यैवोपोद्बलकं लिङ्गमभिधीयते। लुब्धकस्य भद्राजन्म प्राप्नवतो दुर्वाससा सह संवादे पठ्यते "कृष्णपक्षे चतुर्दश्याम् कञ्चिन्नृगमाप्नवान्। अत्रापि प्राचरत्तार्थं सुधा-स्रोतोऽतिशोभनम्" इत्युपक्रम्य "भक्तःकोटिप्रकृतान्येव विल्वपत्राणि मानद!। पतितानि महाराज! शम्भोः शिरसि भूतले। तत्रैव तस्थौ राजेन्द्र! सर्वरात्रमतन्द्रितः। रात्रिशेषं स्थितोव्याधः क्षुत्क्षामहरिणाभिधः। प्रभाते विमले जाते दृष्ट्वा तत्रैव शङ्करम्। विल्वपत्रैरनल्पेश्च! कन्दमूलैश्च पारितः" इति। एतच्चित्रं यथोक्ततिथिविशेषेऽस्य इदं विचार्यते। किं व्रतान्तरेविधायात्राप्युदयात्सायमेव आदर्तव्यः ? किं वा प्रदोषवेधः ? आहोस्विच्चिशीथ वेध ? इति। तत्र पूर्वेद्युरुदये त्रयोदशीवेधः परेद्युरस्त मये दशवेध इत्युदयास्तमये वेधोयुक्तः तस्य व्रतान्तरेषु क्रूप्रत्वात् क्रूप्रस्य च कलग्राह्यत्वात्। नैवम्। समान्याद्विशेषस्य बलीयस्त्वात्। समानरूपोऽप्यु दयास्तमयवेधः सर्वतिथिषु समानत्वात् विशेषरूपौ प्रदोषनिशीथवेधौ कृष्णचतुर्दशीविशेषे तिथिविशेषे शिवरात्राख्यं व्रतविशेषमपेक्ष्य प्रवृत्तत्वात्। एतदे-वाभिप्रेत्य ईशानसंहितायामुक्तम्। "उदयेऽन्विताः कृष्णा राज्ञाः क्वचिदस्तमयेऽन्विताः। व्रतिभिस्तिथयो यस्माद्भजन्ति व्रतसिद्धमिति"। अस्मिंश्च व्रते प्रदोष

वेधोयायुपुराणे दर्शितः "त्रयोदश्यागते सूर्ये चतस्रश्चेव नाडिषु। भूतविद्धा तु या तत्र शिवरात्रिव्रतङ्करेदिति"। ऋत्यन्तरेऽपि "प्रदोषव्यापिनी ग्राह्या शिवरात्रिचतुर्दशी। रात्रौ जागरणं यस्मात्तस्मात्सा सप्रदोषवेदिति"। कामिके "आदित्यास्तमये काले अस्तिचेद्या चतुर्दशी। तद्रात्रिः शिवरात्रिः स्यात्सम्भवे दुत्तमोत्तमेति"। निशीथवेधो नारदीयसंहितायां दर्शितः। "अर्द्धरात्रयुता यत्र माघकृष्णचतुर्दशी। शिवरात्रिव्रतन्तत्र कोऽश्नमेधफलं लभेदिति"। ऋत्यन्तरेऽपि "भवेद्यत्र त्रयोदश्यां भूतव्याप्ता महानिशा। शिवरात्रिव्रतन्तत्र कुर्याज्जागरणन्तथेति"। ईशानसंहितायाम् "माघकृष्णचतुर्दश्यामादिदेवोमहानिशि। शिवलिङ्गतयोद्भूतः कोटिसूर्यसमप्रभः। तत्कालव्यापिनी ग्राह्या शिवरात्रिव्रते तिथिः। अर्द्धरात्रादधोर्ध्वं युक्ता यत्र चतुर्दशी। तस्यामेव कुर्वीत शिवरात्रिव्रतं वुधी। नार्द्धरात्रादधोर्ध्वं युक्ता यत्तु चतुर्दशी। नैव तत्तु व्रतङ्कुर्यादायुरैश्वर्यहानि हेति"। "व्याप्तार्द्धरात्रं यस्यान्तु लभ्यते या चतुर्दशी। तस्यामेव व्रतङ्कार्यं मत्प्रसादार्थिभिर्नरैः। पूर्वेद्युर्वा परेद्युर्वा महानिशि चतुर्दशी। व्याप्ता सा हन्यते यस्मात्तस्मात्कुर्यात्व्रतन्नरः। विद्धाविभौवकाले तु व्याप्ताग्राह्या चतुर्दशी। तद्ध्वंधोन्विता भूता सा कार्या व्रतिभिःसदा। मम प्रियकरी ह्येषा माघकृष्णचतुर्दशी। महानिशान्विताग्राह्या तत्र कुर्यादिदं व्रतमिति"। एवं सति पूर्वेद्युरेव यत्र प्रदोषनिशीथोभयव्याप्तिस्तत्र व्रतमाचरणीयम्। पूर्वेद्युरेवोभयव्याप्तौ स्कन्दपुराणे पठ्यते। "त्रयोदशी यदा हेलि! दिनभुक्तिमभाषतः। जागरे शिवरात्रिःस्यात्त्रिषु पूर्वा चतुर्दशी। दिनभुक्तिरसम्भवः। परेद्युरेवोभयव्याप्तौ कामिके पठ्यते "निशाह्वये चतुर्दश्यां पूर्वा ग्राह्या परा शुभेति"। दिनद्वयेऽप्युभयव्याप्तिस्तु न सम्भाव्यते यामद्वयद्वयाभावात्। दिनद्वयेऽप्युभयव्याप्त्यभावोऽपि न सम्भाव्यते यामद्वयत्रयस्याभावात्। एकैकस्मिन् दिनएकैकव्याप्तौ तु कथमिति चेत्। सा चेत्थं प्रसज्यते। पूर्वेद्युर्निशीथव्याप्तिः परेद्युः प्रदोषव्याप्तिरिति। तत्रैकव्याप्तेर्दिनद्वये समानत्वेऽपि जयायोगस्य प्रशस्तत्वाद्वयोगस्य निन्दितत्वाच्च पूर्वेद्युरेवोपवासः। जयायोगप्राशस्त्यज्ञानेकवचनैराद्दतत्वादवगम्यते। तथा च स्कन्दपुराणे पठ्यते "कृष्णाष्टमी स्कन्दषष्ठी शिवरात्रिचतुर्दशी। एताः पूर्वयुताः कार्याःसिध्यन्ते पारणम्भवेत्"। "जन्माष्टमी रोहिणी च शिवरात्रिस्तथैव च। पूर्वविद्धैव कर्त्तव्या तिथिभाग्ने च पारणम्"। "आवणी दुर्गनवमी तथा दुर्वाष्टमी च या। पूर्वविद्धा तु कर्त्तव्या शिवरात्रिर्वलेर्दिनमिति"। "जयन्ती शिवरात्रिश्च कार्त्ये भद्राजयान्विते" इति। नागरखण्डे "माघफाल्गुनयोर्मध्ये असिता या चतुर्दशी। अनङ्गेन समायुक्ता कर्त्तव्या सा सदा तिथिरिति" पद्मपुराणे "अर्द्धरात्रात् पुरस्ताच्चेज्जयायोगो यदा भवेत्। पूर्वविद्धैव कर्त्तव्या शिवरात्रिः शिवप्रियैरिति"। ब्रह्मवैवर्त्ते "रुद्रव्रतेषु सर्वेषु कर्त्तव्या संसखी तिथिः। अन्येषु व्रतकल्पेषु परयुक्तासुपावसेदिति"। दर्शयोगनिन्दा च स्कन्दपुराणे दर्शिता "महतामपि पापानां हता वै निःऋतिः पुरा। न हता कुर्वतां पुंसां कुहूयुक्तां तिथिं शिवामिति"। अन्यान्यपि यानि कानिचिद्दर्शयोगनिन्दावचनानि तत्र तत्र तात्पर्यतो व्याख्यानानि। तानि सर्वाण्यत्रापि विषये योजनीयानि। यदा पूर्वेद्युर्निशीथादूर्द्धं प्रवृत्ता चतुर्दशी, परेद्युः क्षयवशात्तु निशीथादर्वागेव समाप्ता तदा पूर्वेद्युः प्रदोषनिशीथव्याप्त्योरुभयोरप्यसम्भवात्परेद्युः प्रदोषव्याप्तेरेकस्याः सद्भावाच्च परविद्धैव ग्राह्या। एतदेवाभिप्रेत्योक्तम् "माघासिते भूतदिनं कदाचिदुपैति योगं यदि षड्दशस्या। जयाप्रयुक्तां न तु जातु कुर्यात्त्रिवस्वरात्रिं प्रियकृत्त्रिवस्वेति"। यदा पूर्वेद्युः प्रदोषादूर्ध्वं प्रवृत्ता चतुर्दशी, परेद्युः क्षयवशात्तुप्रदोषादर्वागेव समाप्ता तदा परेद्युर्व्याप्तिद्वयाभावात्पूर्वेद्युर्निशीथव्याप्तेः सद्भावाज्जयायोगाच्च पूर्वेद्युरेवोपवासः। अत्रायं विवेकः सम्पद्यते। दिनद्वये निशीथव्याप्तौ तदव्याप्तौ च प्रदोषव्याप्तिर्नियामिका। तथा दिनद्वयेऽपि प्रदोषव्याप्तौ तदव्याप्तौ च निशीथव्याप्तिर्नियामिका। एकैकस्मिन् दिन एकैकव्याप्तौ जयायोगो नियामक इति। अस्य शिवरात्रिव्रतस्याहोरात्रसाध्यत्वेनाहनि रात्रौ च सम्बन्धे साधारणे सति कथमेकस्मिन्नपेक्ष्य प्रदोषनिशीथयोरेव कुतः शास्त्राणां पक्षपात इति चेत्। रात्रेरत्र प्रधानत्वादिति ब्रूमः। तत्प्राधान्येन चोपपत्तिः स्कन्दपुराणे पठ्यते "निशि भ्रमन्ति भूतानि शक्तयः शूलभृद्यतः। अतस्तस्यां त्रयोदश्यां सत्यां तत्पूजनम्भवेदिति"। तस्मात्त्रयोदश्यामिति व्यधिकरणे सप्तम्यौ। तथा

चायमर्थः सम्पद्यते । त्रयोदशीनिशीथे तस्यां चतुर्दश्यां विद्यमानायां शिवपूजनमभ्यर्हितमिति । नागरखण्डेऽपि "माघमासस्य कृष्णायां चतुर्दश्यां सुरेश्वर ! । अहं वाख्यामि भूपृष्ठे रात्रौ नैव दिवा कलौ । लिङ्गेषु च समस्तेषु चरेषु स्थावरेषु च । संक्रमिष्यास्यसन्दिग्धं वर्षपापविशुद्धये । रात्रौ तस्यां हि मे पूजां यः करिष्यति मानवः । मन्त्रैरेतैः सुरश्रेष्ठ ! विपापः स भविष्यतीति" । सा च शिवरात्रिचतुर्दशी त्रिधा भवति । एकतिथ्यात्मिका तिथिद्वयात्मिका तिथित्रयात्मिका चेति । तत्र सूर्य्योदयमारभ्य प्रवृत्ता परदिनोदयपर्य्यन्तैकतिथ्यात्मिका । सा वेधदोषाभावात् प्रशस्ता । तिथिद्वयात्मकत्वं च द्वेधा भवति । जयायोगेन दर्शयोगे न च । तत्र योगद्वयमेकैकस्मिन्विषये प्रशस्तम् । स च विषयविशेषः पूर्वमेवोदाहृतः । तिथित्रयात्मकत्वन्त्वतिप्रशस्तम् । एतदेवाभिप्रेत्य पुराणे पठ्यते "त्रयोदशीकलार्धेका मध्ये चैव चतुर्दशी । अन्ते चैव निशीथाली त्रिस्पृश्यां शिवमर्चयेत्" । यथा त्रिस्पृशी प्रशस्ता तथा वारविशेषेण योगविशेषेण च प्रशस्ता भवति । तथा च स्कन्दपुराणे पठ्यते "माघकृष्णचतुर्दश्यां रविवारो यदा भवेत् । भौमोवाथ भवेद्देवि ! कर्त्तव्यं व्रतमुत्तमम् । शिवयोगस्य योगे वै तद्व्रतेदुत्तमोत्तमम् । शिवरात्रिव्रतन्त्वेतत्सर्वव्रतेदुत्तमोत्तममिति" । ननु यदा पूर्वविद्धायासुपवासस्तदा परेद्युः किं तिथ्यन्ते पारणमवति किं वा तिथिमध्ये । शास्त्रन्तु पक्षद्वयेऽपि समानम् । तत्र तिथ्यन्तपारणवचनानि पूर्वमुदाहृतानि "तिथिमध्यपारणवचनन्तु स्कन्दपुराणे पठ्यते "उपोष्यं चतुर्दश्यां चतुर्दश्यान्तु पारणम् । कृतैः सुकृतलक्षैश्च लभ्यते वाजपेयवा न वा । ब्रह्मा स्वयं चतुर्वक्त्रैः पञ्चवक्त्रैस्तथाच्युतम् । सिक्थे सिक्थे फलन्तस्य शक्तौ वक्तुं न पार्वति ! । ब्रह्माण्डोदरमध्ये तु यानि तीर्थानि सन्ति वै । संस्थितानि भवन्तीह भूतायां पारणे कृते" । "तिथीनामेव सर्वासामुपवासव्रतादिषु । तिथ्यन्ते पारणङ्कुर्य्यादिना शिव चतुर्दशीमिति" । बाढम् । अस्ति हि द्विविधं शास्त्रं तच्च द्विविधस्य शास्त्रस्य प्रतिपत्प्रकरणोक्तन्यायेन व्यवस्था द्रष्टव्या । यदा यामत्रयादर्वागेव चतुर्दशी परिसमाप्यते । तदा तिथ्यन्ते पारणम् । यदा तु चतुर्दशी यामत्रयमतिक्रामति तदा चतुर्दशीमध्ये पूर्वाह्णे पारणङ्कुर्य्यात्" । तिथितत्त्वे अन्यथोक्तं गौडसाम्प्रदायिकत्वान्नोक्तम् ।

चतुर्दशोदया स्त्री । २चतुर्दशायुक्ते त्रि० । "अधीतिबोधाचरणप्रचारणैर्दशाश्चतस्रः प्रणयन्सु साधिभिः । चतुर्दशत्वं कृतवान् कृतः ? स्वयं न वेद्मि विद्यास्तु चतुर्दशस्वयम्" नैष० । प्रकारे धाच् । चतुर्दशधा चतुर्दश प्रकारे अव्य० । नान्तत्वात् पूरणे डटि प्राप्ते असंख्यादेरिति पर्य्युदासेऽपि क्वचिदर्थे मट् । चतुर्दशम चतुर्दश पूरणे त्रि० । "मनुर्वा इन्द्रसावर्णिश्चतुर्दशम इत्यपि" भाग० ८।१३।५।

चतुर्दशभुवन न० समा० द्विगुः पात्रादि न ङीप् स्त्रीत्वे । भूलोकादिषु चतुर्दशसु लोकेषु । "भूर्लोकाख्यो दक्षिणो व्यूचदेशात् तस्मात् सौम्योऽयं भुवः स्वश्च मेरुः । तस्याः पृष्ठे खे महः स्थाज्जनोऽतोऽनल्पानल्पैः स्थानैस्तपः सत्यमन्यः" "सि० शि० भुवनकोशे भूलोकादि सप्तकथनम् "अवनेरधस्तात् सप्त भूविवरा एकैकशो योजनायुतान्तरेणायामविस्तारेणोपक्लृप्ताः । अतलं वितलं सुतलं तलातलं महातलं रसातलं पातालमिति" भाग० ५।२४।१। श्लोके अतलादिसप्तकथनम् तद्विवरणं तत्तदध्याये द्रष्टव्यम् । भूलोकादिविवरणं काशीख० २३अ० । "यादगस्य हि यत् किञ्चिद्वस्त्वस्ति धरणीतले । तद्भूलोक इति ख्यातं साब्धिद्वीपाद्रिकाननम् । भूर्लोकाच्च भुवर्लोक आम्नातः सप्तदाहृतः । आदित्यादाध्रुवं विप्र ! स्वर्लोक इति गीयते । महर्लोकः स्थितेरूर्द्धमेककोटिप्रमाणतः । कोटिद्वयोत्तरः ख्यातो जनो भूर्लोकयोजनैः । चतुःकोटिप्रमाणस्तु तपोलोकोऽति भूतलात् । उपरिष्टात् स्थितेरष्टौ कोटयः सत्यमीरितम्" ।

योगिनां तनुमध्ये ध्येयानि स्थानभेदे चतुर्दश भुवनादीनि योगस्वरोदये उक्तानि यथा ।

"ब्रह्माण्डे सन्ति ये खण्डाः पिण्डमध्येऽपि संस्थिताः । तलं पादाङ्गुलतले तस्योपरि तलातलम् । महातलं गुल्फमध्ये गुल्फोपरि रसातलम् । सुतलं जङ्घयोर्मध्ये वितलं जानुमध्यगम् । ऊर्वोर्मध्ये तलं प्रोक्तं सप्तपातालमीरितम् । तलातलस्थातलञ्च महातलरसातलम् । सप्तपातालमेतत्तु सुतलं वितलं तलम् । इदानीं पिण्डमध्येतु सप्तलोकं शृणु प्रिये ! । मूलाधारे तु भूर्लोको लिङ्गाग्रे तु भुवस्ततः । स्वर्लोको लिङ्गमूले तु मेरुमूले महस्तथा । मेरुच्छिद्रे जनोलोको मेरुनाड्यां तपस्तथा । कण्ठे सत्यलोकस्तु इति लोकाः पृथक् पृथक् ।

भूर्भुवःस्वर्महर्जनश्चैव तपस्तथा। सप्तमःसत्यलोकस्तु सप्त लोका इति स्मृताः। सप्तलोकेषु पातालान्येषु वनानि चतुर्दश। अथ ब्रह्माण्डमध्यस्थाश्चत्वारो लोकपालकाः। पिण्डमध्ये तु तान् ज्ञात्वा सर्वसिद्धीश्वरोभवेत्। इन्द्रो-ब्रह्मा विष्णुरीशश्चत्वारश्चात्रदेवताः। मूलाधारे चतुःपत्रे गजारूढो महानिति। सृष्टिकर्त्ता च तत्रैव स्वाधिष्ठाने महान् हरिः। मणिपूरे रूपसाधिरुद्रसिद्धीश्वरो-महान्। तालुद्वारे तालुमध्ये ललाटे वक्षःकण्ठके। भ्रूकुटिकाकपाले च लम्बिकाब्रह्मरन्ध्रके। नवचक्र-मूर्द्धचक्रं ह लिङ्गेत्येकविंशतिः। ब्रह्माण्डानि वसन्ती ति ज्ञातव्यानि प्रयत्नतः। सप्त द्वीपानि कथ्यन्ते ऽधुना-तानि शृणु प्रिये!। जम्बुद्वीपन्तु मध्यायां शाकद्वीपन्तु मध्यमे। शाल्मलीद्वीपः शिरोमध्ये मांसमध्ये कुशस्तथा। त्वचि क्रौञ्चोलोममध्ये गोमेदद्वीप ईरितः। नखमध्ये तथा श्वेतः सप्तद्वीपा वसुन्धरा। जम्बुःशाकस्तथा शा-ल्मःकुशःक्रौञ्चश्च गोमयः। श्वेतः सप्तेति खण्डानि सप्तखण्डैर्वसुन्धरा। सप्तान्येतानि रूपाणि देहमध्ये स्थितानि च। सप्तह्रदाःसप्त कथ्यन्ते पिण्डमध्ये व्यवस्थिताः। लवणेक्षुसुरासर्पिर्दधिदुग्धजलात्मकाः। लवणः खेदमध्ये तु इक्षुरक्ते मधु त्वचि। सर्पिर्मेदोवसा-मध्ये दधिक्षीरं ललाटके। वीर्यमध्ये ज्वलतोयञ्च यः पादे कूर्मः स्थितोमहान्। इदानीन्तु नवद्वारे नवखण्डा-नि संशृणु। पादादौ भारतं खण्डं काश्मीरं त्रिकमस्तके। द्विजखण्डमेकपादं खण्डं यज्ञे समस्तकम्। कैवर्तगर्तगान्धारं नवखण्डमिति स्थितम्। इदानीं पर्वताश्चैव कथ्यन्ते शृणु यत्नतः। मेरुदण्डे सुमेरुस्तु पीठमध्ये हिमालयः। वामस्कन्धे तथा दक्षे मलयोमन्द-राचलः। विन्ध्यस्तु दक्षिणे कर्णे वामे मैनाक ईश्वरि!। ललाटे मध्यदेशे तु श्रीशैलः परमेश्वरि!। तथा ब्रह्मकपा-लस्थः कैलाशःपर्वतोमहान्। सुमेरुर्हिमवान् विन्ध्यो मलयो-मन्दरस्तथा। श्रीशैलः मैनाकश्चेति कैलाशोऽष्टौ च पर्वताः। अपरे पर्वताःसर्वे भ्रूकुटीमध्यवासिनः। शरीरे नव-नाड्यस्था नर्म्मदा च महेश्वरि!। इडायां यमुना देवि! पिङ्गलायां सरस्वती। सुषुम्णायां वहेद्गङ्गा चान्याऽ न्यासु च नाडिषु। गङ्गासरस्वतीगोदानर्म्मदायमुना-तथा। कावेरी चन्द्रभागा च वितस्ता च इरावती। द्विसप्तनिसृतेष्वेषु नदीनदपरिच्छदः। इत्यसतोदेहमध्ये ब्रह्माण्डानि सप्तविंशतिः। वेगाश्च रागयश्चैव यज्ञाश्च तिथ-यस्तथा। ऋतवोमीनमणी वास्तूनं स्थापनं तथा। सर्वाङ्गेषुच देवेशि! समस्तब्रह्मखण्डकम्। त्रयस्त्रिंशत्-कोटयस्तु निवसन्ति च देवताः। तथा पीठानि सर्वाणि देहमध्ये स्थितानि च। हृदये व्योममध्ये तु अनन्ताद्या-स्तु वासुकिः। उदरे व्योममध्ये तु परे नागा व सन्ति हि। गन्धर्वकिन्नराःशूरा विद्याधराप्सरादयः। अनेकतीर्थ-वर्णाश्च गुह्यकाश्च वसन्ति हि। अनन्तसिद्धये वुद्ध्या पूका-शेवर्त्तते हृदि। मेरुश्च मण्डलं क्षेत्रमनुपाते तथैव च। चन्द्रार्कौ नेत्रयोर्म्मध्ये भ्रूकुलोमसु साक्षिणः। लक्षयु-ल्मादिकञ्चापि विश्वरूपंकरेततः। समग्रदर्शनान्मुक्तः स्वर्गभोगञ्च सत्सुखम्। तदेतच्छ्रुत्वा याति रोगशोक-विवर्ज्जिताम्"।

**चतुर्दशविद्या** स्त्री ब० व० संज्ञात्वात् कर्म्म०। वेदादिषु चतुर्दशसु विद्यासु। तासु "विद्याश्चतुर्दश प्रोक्ताः क्रमेण तु यथास्थिति। षड़ङ्गमिश्रितावेदा धर्म्मशास्त्रं पुराणकम्। मीमांसातर्कमपि च एता विद्याश्चतुर्दश" नन्दि पु०। "पुराणन्यायमीमांसाधर्म्मशास्त्राङ्गमिश्रिताः। वेदाः स्थानानि विद्यानां धर्म्मस्य च चतुर्दश" या० स्मृतौ विद्यास्थानत्वोक्तेस्तासां तथात्वम्।

**चतुर्दशाङ्ग** न० चतुर्दश अङ्गान्यस्य। "चिरज्वरे वात-कफोल्वणे वा त्रिदोषजे वा दशमूलमिश्रः। किरात-तिक्तादिगणः प्रयोज्यः शुद्धार्थिना वा त्रिफला विमिश्रः" चक्रदत्तोक्ते पाचनभेदे।

**चतुर्दिग्** न० चतसृणां दिशानां समाहारः असंज्ञात्वात् द्विगुः। चतसृषु दिक्षु। दिक्शब्देन समासे चतुर्दिश् इत्येव। संज्ञात्वे तु कर्म्मधा०। प्राच्यादिषु चतसृषु दिक्षु ब० व०। "शिवाभिर्घोररावाभिश्चतुर्दिक्षु समन्वि-ताम्" कालीध्यानम्।

**चतुर्दोल** पुं न० (चण्डोल) इति (चन्दोल) इति ख्याते "राज्ञोयद् द्विपदं यानं विशेषाख्यमलं विदुः। चतुर्भि-रूह्यते यत्तु चतुर्दोलं तदुच्यते" उक्ते चतुर्भिर्वाहो यानविशेषे। प्रसङ्गाच्चतुर्दोलाष्टदोलनवचमेदादिकं भोज-देवोक्तं प्रदर्श्यते। "चतुर्भिर्वाहकैर्दण्डैः षड्भिः कुम्भैः सुसंस्थितैः। सम्भारैरभिरूढितं चतुर्दोलमनु-त्तमम्। तद्भेदा अवकल्याणवीरसिंहा यथाक्रमम्। चतुर्विधानां भूपानां चतुर्दोलाः प्रकाशिताः। त्रिहस्त-सम्मितायामो द्विहस्तपरिधाहवान्। हस्तद्वयोन्नतः प्रोक्तश्चतुर्दोलोऽवयाख्यया। चतुर्हस्तायतोयस्तु सार्द्धहस्त-

स्तु विस्तृतौ। चतुर्हौनः समाख्यातः कल्याणस्तावदुच्छ्रितः। पञ्चहस्तायतोयस्तु त्रिहस्तपरिणाहवान्। तावदेवोच्छ्रितोवीरश्चतुर्हौन उदाहृतः। आयामपरिणाहाभ्यां चतुर्हस्तमितोहि यः। चतुर्हौनोच्छ्रयं सिंहस्तदर्धेनोच्छ्रितः शुभः। सर्वोऽयं द्विविधः प्रोक्तः सच्छदिश्चापि निश्छदिः। आद्यः समरवर्गासु परः केलिघनात्यये। सर्वेषामेव कायानां दण्डः स्याद्दशवारणः। चन्दनेनैव घटना सर्वेषामुपयुज्यते। लोमजं सर्वरत्नेषु कनकं सर्वधातुषु। कुम्भश्च पद्मकोशश्च शिरित्येतत् यथाक्रमम्। त्रैदेशानां महीन्द्राणां चतुर्दोलेषु विन्यसेत्। दर्पणं चार्द्धचन्द्रश्च हंसः केकी शुकीगजः। अश्वः सिंहश्च तस्याग्रे आदित्यादिदशोत्तरान्"। मणिनियमस्तु दण्डवत्। "रक्तः शुक्लश्च पीतश्च कृष्णश्चित्रस्तथाऽरुणः। नीलः कपिल इत्युक्तः पताकानान्तु सङ्ग्रहः। चतुर्दोलः सपताकः शुभवानिति कीर्त्यते। शुक्लास्त्रकैर्दण्डभिर्युक्तः स्याद्राजकेशानाम्। चामरदण्डैर्दण्डभिर्दिग्जयिनां चतुर्दोलः। चामरच्छत्र पुच्छत्रैः सर्वोपरि परिन्यसेत्। यात्रासिद्धिरयं नाम्ना चतुर्दोलो महीभुजाम्। सच्छदिरहितो निश्छदिरुक्तश्चतुर्दोलः"। मानं पूर्ववत्। "स पुनर्द्विविधः प्रोक्तः सध्वजश्चाध निर्ध्वजः। ध्वजान् षड्वत्र न्यसेत्ति षड्वर्गविजयैषिणः। तेषां मानन्तु चत्वारः स्वाभिहस्तैकसम्मिताः। कोणेषु पश्चादग्रेषु हस्तार्द्धमितौ ध्वजौ। सुवर्णं रजतं युग्मं त्रिविधानां महीभुजाम्। मणिचामरकुम्भानां खड्गादीनां विनिश्चयः। चतुर्दोलध्वजोराज्ञां विज्ञेयो नवदण्डवत्। निर्ध्वजे तु चतुर्दोले मानमन्यविधं शृणु। आयामपरिणाहाभ्यां चतुर्हस्तमितोहि यः। विजयोनाम विज्ञातश्चतुर्दोलोमहीभुजाम्। विजयो मङ्गलो भव्योवितत्रयेकैकहीनतः। त्रिविधानां महीन्द्राणां यानत्वयमुदाहृतम्। अष्टाभिरुह्यते यस्तु अष्टदोलमुदाहृतम्। सोपानहितयत्नात्त विज्ञेयं शिल्पि निर्मितम्"। भोजस्तु। "अष्टाभिर्वाहकैर्दण्डैः षड्भिस्तु दशभिर्घटैः। सप्तभिस्तु दशभिर्हस्तैर्यमष्टदोलं महीभुजाम्। तद्भेदाजयकल्याणवीरसिंहा यथाक्रमम्। चतुर्विधानां भूपानामष्टदोलाः प्रकीर्त्तिताः। षड्भिर्हस्तैर्मितायामः परिणाहे चतुर्भुजः। चतुर्हस्तोच्छ्रितो राज्ञामष्टदोलं जयं विदुः। आयामपरिणाहाभ्यां पञ्चहस्तमितोहि यः। कल्याणाख्योऽष्टदोलोऽयं चतुर्हस्तमितोच्छ्रितिः। सप्तहस्तायतः कार्यो विस्तरे पञ्चहस्तकः। पञ्चहस्तोच्छ्रितो वीरश्चाष्टदोलो महीभुजाम्। आयामपरिणाहाभ्यामष्टहस्तमितोहि यः। सिंहनामाष्टदोलोऽयं विज्ञेयः षड्भुजोच्छ्रितः। सर्वोऽयं द्विविधः प्रोक्तः सच्छदिश्चापि निश्छदिः। कायस्य घटादीनां मणीनां चामरस्य च। चतुर्दोलषडश्रे योनियमोऽन्योऽपि सूरिभिः। पूर्ववच्चिन्हदेर्घानं ध्वजमानमिहोच्यते। दशध्वजास्तेषु चाष्टौ स्वाभिहस्तहयोच्छ्रताः। पश्चादग्रे ध्वजौ राज्ञश्चतुर्हस्तमितौ मतौ। मणिचामरपद्मानां निर्णयो निम्नताक्रवत्। निर्ध्वजश्चाष्टदोलोयः शिविकेति स गद्यते। मणिकुम्भसुखादीनां नियमो नवदण्डवत्"। "एवं द्वादश षोड़श विंशति दोलादिकाः कार्याः। मानं सार्द्धद्विगुणितं सार्द्धत्रिगुणितं युक्तमेतेषाम्। विंशतिदोलात् परतो भोजमते सम्भवेद्यानम्। यानं षड्भुजयोज्यं षड्गुणमेतज्जगाद वै व्यासः"। भविष्योत्तरेऽपि "यदुक्तं हैपदं यानं तेन मानेन योजयेत्। स्वयानं कुरुते दिव्यं स चिरं सुखमश्नुते। स्वयोगयुक्तयानस्थो भोगमाप्नोति मानवः। परयौगिकयानस्थः क्लेशमाप्नोति दुष्कलम्। योदस्माद्यथाऽज्ञानाद्यानं प्रकुरुतेऽन्यथा। तस्यैतानि विनश्यन्ति आयुर्विद्यायशोधनम्। प्रधानं यानमाश्रित्य नियमोऽयं समाश्रितः। नाप्रधाने नियमोऽस्ति तद्विद्वन्तु मनोऽन्यता"।

**चतुर्हार** न० चत्वारि हाराणामस्य। १चतुर्लते षट्भेदे। समाहारद्विगुः। २चतुर्षु हारेषु न०। "मरुडपं कारयेत्तत्र चतुर्हारसमन्वितम्" हेमाद्रौ गरुडदानप्रकरणे।

**चतुर्धा** अव्य० चतुःप्रकारम् धाच्। चतुःप्रकारे। "ततश्च शेषं प्रविभज्य शीघ्रमर्द्धं चतुर्धा मम चालनञ्च" भा० आ० १६२ अ०। "द्विधा विधाय चैकैकं चतुर्धा प्रथमं पुनः। स्वस्वेतरहितीयांशैर्योजनात् पञ्च पञ्च ते" पञ्चदशी

**चतुर्बाहु** पु० चत्वारोबाहवोऽस्य। १विष्णौ "पीतवासाश्चतुर्बाहुः पद्मचक्रगदाधरः" भाग० ८।१७।२। २चतुर्भुजयुक्तमात्रे त्रि०। ३चतुष्कोणे क्षेत्रे च न०।

**चतुर्भद्र** न० चतुर्णां धर्म्मार्थकाममोक्षाख्यानां भद्राणां समाहारः। १धर्म्मार्थकाममोक्षेषु अमरः। चत्वारि भद्राण्यस्य। २तद्युक्ते त्रि०। "स चेन्मारु सञ्जय! चतुर्भद्रतरस्त्वया" भा० भी० द्रो० अभिम० ब्रु० प० षोड़शराजिके बहुत्वः प्रयुक्तम्।

**चतुर्भाव** पु० चतुर्णां भावः उत्पत्त्यपादानम्। विष्णौ परमेश्वरे "चतुरात्मा चतुर्भावश्चतुर्वेदविदेकपात्" विष्णुस०। "धर्मार्थकाममोक्षाख्यपुरुषार्थचतुष्टयं भवत्युत्पद्यतेऽस्मादिति चतुर्भावः" भा०।

**चतुर्भुज** पु० चत्वारो भुजा यस्य। १विष्णौ "चतुरात्मा चतुर्व्यूहश्चतुर्दंष्ट्रश्चतुर्भुजः" विष्णुस०। २तदवतारे वासुदेवे नन्दनन्दने च "तेनैव रूपेण चतुर्भुजेन सहस्रबाहो! भव विश्वमूर्त्ते!" गीता। "तमद्भुतं बालकमम्बुजेक्षणं चतुर्भुजं शङ्खगदाद्युदायुधम्" भाग० १०। ६।८। स्त्री० ३चतुर्बाहुयुक्ते त्रि०। "सुकेशीं चतुर्भुजाम्" श्यामाध्यानम्। "सवास आसीद्पुषा चतुर्भुजः" (शिशुपालः) माघः। ४चतुष्कोणे क्षेत्रे न०। भुनक्ति भुज-क चतुर्णां धर्मार्थकामानां भुजः। ५धर्मार्थकाममोक्षभाजने त्रि०।

**चतुर्मुख** पु० चत्वारि मुखान्यस्य। १चतुरानने वेधसि चतुराननशब्दे दृश्यम्। "चतुर्वर्गफलं ज्ञानं कालावस्थाचतुर्युगम्। चतुर्वर्णमयोलोकस्ततः सर्वं चतुर्मुखात्" मनुः। २चतुर्द्वारे गृहे न०। चतुर्णां मुखानां समाहारः ङीप्। ३चतुर्षु मुखेषु स्त्री। "चतुर्भिर्मुखैः समीरिताः" कुमा०। "चतुर्भिर्मुखैः समीरिताः वाक्ये उत्तरपदद्विगुः। समाहारे चतुर्मुखी स्यात्। ४औषधभेदे पु० तल्लक्षणं वैद्यके यथा

"रसगन्धकलौहाभ्रं समं सूताद्धि हेम च। सर्वं खल्वतले क्षिप्त्वा कन्यारसविमर्दितम्। एरण्डपत्रैरावेष्ट्य धान्यराशौ दिनत्रयम्। संस्थाप्य तत उद्धृत्य ज्वरोगेषु योजयेत्। एतद्रसायनवरं त्रिफलामधुसंयुतम्। तदाघान्निवलं खादेत् वलीपलितनाशनम्। क्षयमेकादशविधं कासं पञ्चविधं तथा। कुष्ठमष्टादशविधं पाण्डुरोगान् प्रमेहकान्। शूलं श्वासञ्च हिक्काञ्च मन्दाग्निं चास्रपित्तकम्। व्रणान् सर्वान्नाखवातविसर्पं विद्रधिं तथा। अपस्मारमपस्मारान् सर्वरोगांश्च खगामयान्। क्रमेण सेवितं हन्ति दृष्ट्वा निद्राग्निनिर्दया। पौष्टिकं बलदमायुष्यं पुत्रप्रसवकारणम्। चतुर्मुखेण देवेन कृष्णात्रेय स्मृतम्"। चतुर्मुखप्रकाशितत्वादस्य चतुर्मुखत्वम्।

**चतुर्मूर्त्ति** पु० चतस्रोमूर्त्तयोऽस्य। १परमेश्वरे तस्य विराट्सूत्रात्माव्याकृततुरीयमूर्त्तिकत्वात् तथात्वम्। "चतुर्मूर्त्तिश्चतुर्बाहुश्चतुर्व्यूहश्चतुर्गतिः" विष्णुस०। चतस्रो मूर्त्तयः विराट्सूत्रात्माव्याकृततुरीयात्मानोऽस्य" शाङ्करभाष्यम्।

**चतुर्युग** न० चतुर्णां युगानां समाहारः पात्रादि०न ङीप्-स्त्रीत्वे। सप्तसप्ततिसङ्ख्यापरकल्पिरूपेषु चतुर्षु युगेषु "तद्वादशसहस्राणि चतुर्युगमुदाहृतम्। सूर्य्यादयो ग्रहास्तेन द्विसागरैरयुताहतैः ४३२०००० । सन्ध्यासन्ध्यांशसहितं विज्ञेयं तच्चतुर्युगम्" सू० सि०।

**चतुर्वक्त्र** पु० चत्वारि वक्त्राण्यस्य। चतुरानने चतुर्वदनादयोऽप्यत्र।

**चतुर्वय** पु० चत्वारोवयाः शाखा अवयवा यस्य। चमसभेदे। "एकं वि चक्र चमसं चतुर्वयम्" ऋ० ४।३६।४। वयाः शाखाः चतःशाखं चतुरवयवम्" भा०।

**चतुर्वर्ग** पु० द्वन्द्व०। धर्मार्थकाममोक्षसमुदाये "चतुर्वर्गफलं ज्ञानं कालावस्थाचतुर्युगम्" मनुः।

**चतुर्वर्गचिन्तामणि** पु० हेमाद्रिकृते स्मृतिनिबन्धभेदे "यः पूर्वं चारुचिन्तामणिमभितनुषं मन्दराद्रिः समुद्रम् निर्मथ्य प्रायशोऽर्थं वितरति वलुशः प्रार्थनादर्थमेव। समुत्थाप्योच्च सर्वस्मृतिनिगमपुराणेतिहासाम्बुराशीन् हेमाद्रिः स्वर्द्वयेव प्रकटयति चतुर्वर्गचिन्तामणिं सः। "खण्डानि चास्मिन् व्रतदानतीर्थमोक्षाभिधानि क्रमशो भवन्ति। यत्पञ्चमं तत्परिशेषखण्डमस्खलितो यत्र विभाति धर्म्मः" हेमाद्रि ब्र०ख०। "चतुरेष चतुर्वर्गचिन्तामणिविचिन्त्यया। हेमाद्रिर्वीपदेवेन सुकृताफलमर्पितम्" सुकृताफलम्।

**चतुर्वर्ण** पु० ब०व० चत्वारोवर्णाः संज्ञात्वात् न समा० द्वि० कर्म्म०। ब्राह्मणक्षत्रियवैश्यशूद्रेषु चतुर्षु वर्णेषु। "चतुर्वर्णमयोलोकस्ततः सर्वं चतुर्मुखात्" मनुः। स्वार्थे भावे वा ष्यञ् चातुवर्ण्यं चतुर्षु वर्णेषु तद्भावे च न०। "चातुर्वर्ण्यं मया सृष्टं गुणकर्मविभागशः" गीता०

**चतुर्वर्णादि** पु० स्वार्थे ष्यञ्प्रत्ययनिमित्ते का० वार्त्तिकोक्ते शब्दगणे। "चतुर्वर्णादीनां स्वार्थे उपसंख्यानम्" का० वार्त्ति०। स च गणः "चतुर्वर्ण चतुराश्रम सर्वविद्य त्रिलोक त्रिस्वर षड्गुण सेना कनत्कर सन्निधि समीप उपमा सुख तदर्थ इतिह मधिक" चतुर्वर्णादिः।

**चतुर्विंशति** स्त्री चतुर्भिरधिका विंशतिः। (चब्विश) १चतुरधिकविंशतिसंख्यायां २तत्संख्येये च। पूरणे ङट्। चतुर्विंश तत्संख्यापूरणे त्रि० स्त्रियां ङीप्।

**चतुर्विंशतिक** त्रि० चतुरधिका विंशति र्यत्र कप्। १चतुर्विंशतिसंख्यायुक्ते। २सांख्योक्ते प्राकृतिके गणे पु०

"पञ्चभिः पञ्चभिः ब्रह्म चतुर्भिर्दशभिस्तथा। एतच्चतुर्विंशतिकं गण्यं प्रधानिकं विदुः। महाभूतानि पञ्चैव भूरापोऽग्निर्मरुन्नभः। तन्मात्राणि च तावन्ति गन्धादीनि मतानि वै। इन्द्रियाणि दश श्रोत्रं त्वग्दृग्रसननासिकाः। वाक्करौ चरणौ मेढ्रं पायु र्दशम उच्यते। मनोबुद्धिरहङ्कारश्चित्तमित्यन्तराकृतम्। चतुर्धा लक्ष्यते मनोऽत्र्या लक्षणरूपया" भाग०२।२६।१४। तादृगगण्यश्च "प्रकृतेर्महान् महतोऽहङ्कारस्तस्मात् गणश्च षोडशकः। तस्मादपि षोडशकात् पञ्चभ्यः पञ्च भूतानि" सा० का० उक्तः।

**चतुर्विंशतिमूर्त्ति** स्त्री कर्म०। विष्णोर्देहभेदेनचक्रादि विन्यासभेदेन चतुर्विंशतिसंख्यके मूर्त्तिभेदे तन्मूर्त्ति लक्षणं तद्भेदेन विष्णोर्नामभेदाश्च अग्निपु० उक्ताः यथा "ऋषभः १केशवः पद्मगदाखड्गचक्रधरः। २नारायणः शङ्खपद्मगदाचक्री पद्मत्विषम्। ततो गदी ३माधवोऽरिशङ्खपद्मी नमामि तम्। चक्रकौमोदकीपद्मशङ्खी ४गोविन्द उर्जितः। मेघाभः श्रीगदी पद्मी शङ्खी विष्णु५श्च चक्रधृक्। चक्रशङ्खाब्जगदिनं ६मधुसूदनमानमे। भक्त्या त्रिविक्रमः ७पद्मी गदी शङ्खी च चक्र्यपि। शङ्खचक्रगदापद्मी वामनः ८ पातु मां सदा। सस्मितः श्रीधरः ९ पद्मी चक्री गदी च शङ्ख्यपि। हृषीकेशो१० गदाचक्री पद्मी शङ्खी च पातु नः। वरदः पद्मनाभ११स्तु शङ्खाब्जारिगदाधरः। दामोदरः १२ पद्मशङ्खगदाचक्री नमामि तम्। रथेऽङ्गदी शङ्खचक्री वासुदेवो१३ऽब्जहस्तगत्। सङ्कर्षणो १४ गदी शङ्खी पद्मी चक्री च पातु नः। चक्री शङ्खगदी पातु प्रद्युम्नः १५पद्महस्तः प्रभुः। अनिरुद्ध१६श्चक्रगदी शङ्खी पद्मी च पातु नः। पुरेऽर्ध्यजशङ्खाढ्याः श्रीगदी पुरुषोत्तमः१७। अधोक्षजः१८ पद्मगदी चक्री शङ्खी च पातु नः। देवो नृसिंह१९ श्चक्राब्जगदाशङ्खी नमामि तम्। अच्युतः२० श्रीगदी पद्मी चक्री शङ्खी च पातु नः। वामरूपी शङ्खगदी उपेन्द्र२१ श्चक्रपद्मभृत्। जनार्दनः२२ पद्मचक्री शङ्खधारी गदाधरः। शङ्खी चक्री च पद्मी च हरिः२३ कौमोदकीधरः। कृष्णः२४ शङ्खी, गदी पद्मी चक्री मे मुक्तिसस्मितः। स्यादिमूर्त्तिर्वासुदेवस्तस्मात् सङ्कर्षणोऽभवत्। सङ्कर्षणाच्च प्रद्युम्नः प्रद्युम्नादनिरुद्धकः। केशवादि प्रभेदेन एकैकस्य त्रिधा क्रमात्। द्वादशाक्षरकं स्तोत्रं चतुर्विंशतिमूर्त्तिमत्। यः पठेच्छृणुयाद्वापि निर्मलः स्वर्गमाप्नुयात्"।

चतुर्विंशतिमूर्त्तीनां दक्षहस्तोर्द्ध्वादिक्रमन्यासभेदेन नामभेदविवृतिः।

| मूर्त्तिनाम | दक्षोर्द्ध | दक्षाधः | वामोर्द्ध | वामाधः |
|---|---|---|---|---|
| १केशवस्य | १पद्मम् | १शङ्खः | १चक्रम् | १गदा |
| २नारायणस्य | १शङ्खः | १पद्मम् | १गदा | १चक्रम् |
| ३ माधवस्य | १गदा | १चक्रम् | १शङ्खः | १पद्मम् |
| ४ गोविन्दस्य | १चक्रम् | १गदा | १पद्मम् | १शङ्खः |
| ५ विष्णोः | २गदा | २पद्मम् | २शङ्खः | २चक्रम् |
| ६ मधुसूदनस्य | २चक्रम् | २शङ्खः | २पद्मम् | २गदा |
| ७ त्रिविक्रमस्य | २पद्मम् | २गदा | ३शङ्खः | ३चक्रम् |
| ८ वामनस्य | २शङ्खः | २चक्रम् | २गदा | पद्मम् |
| ९ श्रीधरस्य | ३पद्मम् | ३चक्रम् | ३गदा | ३शङ्खः |
| १० हृषीकेशस्य | ३गदा | ४चक्रम् | ३पद्मम् | ३शङ्खः |
| ११ पद्मनाभस्य | ३शङ्खः | ३पद्मम् | २चक्रम् | ३गदा |
| १२ दामोदरस्य | ४पद्मम् | ३शङ्खः | ४गदा | ४चक्रम् |
| १३ वासुदेवस्य | ४गदा | ४शङ्खः | ३चक्रम् | ३पद्मम् |
| १४ सङ्कर्षणस्य | ५गदा | ५शङ्खः | ४पद्मम् | ५चक्रम् |
| १५ प्रद्युम्नस्य | ३चक्रम् | ६शङ्खः | ५गदा | ४पद्मम् |
| १६ अनिरुद्धस्य | ४चक्रम् | ३गदा | ४शङ्खः | ५पद्मम् |
| १७ पुरुषोत्तमस्य | ५चक्रम् | ४पद्मम् | ५शङ्खः | ४गदा |
| १८ अधोक्षजस्य | ५पद्मम् | ४गदा | ४चक्रम् | ४शङ्खः |
| १९ नृसिंहस्य | ६चक्रम् | ५पद्मम् | ६गदा | ५शङ्खः |
| २० अच्युतस्य | ६गदा | ६पद्मम् | ५चक्रम् | ६शङ्खः |
| २१ उपेन्द्रस्य | ४शङ्खः | ५गदा | ६चक्रम् | ६पद्मम् |
| २२ जनार्द्दनस्य | ६पद्मम् | ५चक्रम् | ६शङ्खः | ५गदा |
| २३ हरेः | ५शङ्खः | ६चक्रम् | ५पद्मम् | ६गदा |
| २४ कृष्णस्य | ६शङ्खः | ६गदा | ६पद्मम् | ६चक्रम् |

हेमाद्रिव्र० ख० सहितपुस्तके ११४४० चतुर्विंशतिमूर्त्तीनां ध्यानवाक्यत्वेन यन्मुद्रितं तत्र केशवमूर्त्तिं विहाय त्रयोविंशतिमूर्त्तीनां ध्यानानि सन्ति तत्र चरमे "विष्णुर्विमूर्त्तिं यः" इत्यत्र "कृष्णोविमूर्त्तिं यं" इत्येव भवितुमुचितम् विष्णोः पूर्व्वसङ्कीर्त्तनात् कृष्णस्यानुक्तत्वात्। तथा वासुदेवादीनां त्रयोविंशतिमूर्त्तीनामेव मूर्त्तिज्ञापकाः सार्द्धैकादशश्लोकाः सन्ति केशवमूर्त्तिज्ञापकश्लोकपद्यं पतितम्। तच्च संकर्त्तुः प्रमादवशात् एवं मूर्त्तिभेदश्चतुर्विंशत्येवमपि इति सुधीभिर्विचिन्त्यम्।

चतुर्मुखेषु चतुरस्रविन्यासभेदाच्चतुर्विधमितिसंख्याकाएव मूर्त्तिभेदा भवन्ति। "स्थानान्तमेकादिचयाद्गुणाताः संख्याविभेदाः" लीला० उक्तदिशा १।२।३।४। २संख्या इति तद्वृत्तौ उक्तम्।

**चतुर्विद्या** स्त्री चतस्रः विद्या संज्ञात्वात् कर्म्म०। ऋग्यजुःसामाथर्वाख्यासु विद्यासु। चतस्रोवेदरूपा विद्याश्च। २चतुर्वेदाभिज्ञे। ततः स्वार्थे चतुर्वर्णा० ष्यञ् चतुर्विद्यिका० उभयपदवृद्धिः। चातुर्विद्य चतुर्वेदाभिज्ञे

**चतुर्विध** त्रि० चतस्रो विधा अस्य। चतुःप्रकारे "एष वोऽभिहितो धर्म्मोब्राह्मणस्य चतुर्विधः"। "पारुष्यमनृतं चैव पैशुन्यञ्चापि सर्वशः। असम्बन्धप्रलापश्च वाङ्मयं स्याच्चतुर्विधम्" इति च मनुः। चतुर्विधशरीराणि (जरायुजाण्डजस्वेदजोद्भिज्जाख्यानि) भुक्त्वा सङ्गा सहस्रशः। मुक्तात्मानवोभूत्वा ज्ञानी चेन्मोक्षमाप्नुयात्" भगवद्गीतायाम्।

**चतुर्बीज** न० समाहारद्विगुः। मेथिकाचन्द्रशूरस्य कणा जाजी यवानिका। एतच्चतुष्टयं युक्तं चतुर्बीजमितिस्मृतम्" भावप्र० उक्ते बीजचतुष्टये। "तच्चूर्णं भक्षितं नित्यं निहन्ति पवनामयान्। अजीर्णं शूलमाध्मानं पार्श्वशूलं कटिव्यथाम्" भावप्र० तद्गुणा उक्ताः।

**चतुर्वेद** पु० चत्वारोवेदाः प्रतिपाद्यत्वेन अस्य, चतुरो वेदान् वेत्ति अधीते वा विद्–अण् उप० स० वा। १परमेश्वरे "चतुर्वेदश्चतुर्होत्रश्चतुरात्मा सनातनः" हरिव०२२८अ०। २चतुर्वेदाभिज्ञे च। ततः स्वार्थे अण्। चतुर्वेदश्चोभय पदवृद्धिः। चातुर्वैद्य तदर्थे पु०।

**चतुर्वेदविद्** पु० चतुरो वेदान् वेत्ति विद्–क्विप् तुक्०। १विष्णौ "चतुरात्मा चतुर्भावश्चतुर्वेदविदेकपात्" विष्णुस०। २चतुर्वेदाभिज्ञमात्रे च।

**चतुर्व्यूह** पु० चत्वारो व्यूहा अस्य। १विष्णौ "चतुर्व्यूहश्चतुर्गतिः" विष्णुस०। "शरीरपुरुषः, अन्दः पुरुषोवेद पुरुषो महापुरुषः इति बहुचोपनिषदुक्तात्मत्वारोव्यूहा अस्येति चतुर्व्यूहः" भा०। "चतुरात्मा चतुर्व्यूहः" विष्णुस०। "वृष्ट्यादिकार्य्यार्थं चत्वारोव्यूहा विभागा वासुदेवसङ्कर्षणप्रद्युम्नानिरुद्धसंज्ञा मूर्त्तयो यस्य सः" भाष्यम्। उभयविधव्युत्पत्तियोगात्तु द्विनामतया द्विधा प्रयोगः। तथा। "व्यूहात्मानमुद्दिश्य वासुदेवादिमूर्त्तिभिः। वृष्ट्यादीन् प्रकरोत्येष विश्वात्मा जनार्द्दनः" इति विष्णुपु०। मार्कण्डेयपुराणे च "मूलकारणं वासुदेवाख्यं व्यूहसञ्ज्ञकम् "द्वितीया पृथिवीं मूर्द्ध्नी शेषाख्या धारयत्यधः। तामसी सा समाख्याता तिर्य्यक्त्वे समुपाश्रिता। तृतीया कर्म्म कुरुते प्रजापालन तत्परा। सत्वोद्रिक्ता तु सा ज्ञेया धर्मसंस्थान कारिणी। चतुर्थी जगमध्यस्था शेते पन्नगतल्पगा। राजस्यासद्गुणः सर्गं सा करोति सदैव हि"। सांख्ये २मोक्षशास्त्रे। तत्र हि हेयं ज्ञानं हेयहेतुः ज्ञानोपायश्चेति चत्वारोव्यूहाः प्रतिपाद्याःसन्ति। तत्र त्रिविधं दुःखं हेयम्। तदत्यन्तनिवृत्तिर्ज्ञानम्। प्रकृतिपुरुषसंयोगद्वारा चाविवेको हेयहेतुः। विवेकख्यातिस्तु ज्ञानोपाय इति। ३चिकित्साशास्त्रे च न०। तत्र च रोग आरोग्यं रोगनिदानं भैषज्यमिति चत्वारोव्यूहा उक्ताः इति तस्य तथात्वम्।

**चतुर्हायन(ण)** त्रि० चत्वारोहायना अस्य। चतुर्वर्षोद्भवे जन्तौ वयोवाचित्वे स्त्रियां ङीप् चत्वञ्च। वयोऽन्यत्व न ङीप् चत्वं वा। चतुर्हायना शाला।

**चतुर्होत्र** पु० कर्म्म०। चतुर्वेदोक्तहोमचतुष्टयकारिषु होतृषु "चतुर्होतार आप्रियश्चातुर्मास्यानि नीविदः" अथ० ११।७।१८। चतुर्होतृणां कर्म्म अण्। चातुर्होत्र तत्कृतकर्म्मणि। "चतुर्भुजश्चतुर्मूर्त्तिश्चातुर्होत्रप्रवर्त्तकः" हरिव० ३७८ अ०।

**चतुर्होत्र** पु० चत्वारि होत्राणि होमा प्रोक्तार्था अस्य। १विष्णौ परमेश्वरे। चतुर्वेदश्चतुर्होत्रश्चतुरात्मा सनातनः" हरिवं० २२८अ०।

**चतुर्होत्रक** न० चत्वारि होत्राणि यत्र कर्म्मणि कप्। चतुर्होत्रविधायके चतुर्वेदे "त्रय्या चतुर्होत्रकविद्यया च" भाग० ७।१।२८।

**चतुल** त्रि० चत–उलच्। स्वापयितरि संक्षिप्तसा०।

**चतुश्चक्र** न० रुद्रयामलोक्ते दीक्षाङ्गे मन्त्रशुद्धिज्ञापके चक्रभेदे यथा "चतुश्चक्रं प्रवक्ष्यामि शृणु पार्वतीवल्लभ!। वामदक्षिणयोगेन रेखापञ्चकमालिखेत्। पूर्वपश्चिमभेदेन पञ्च रेखाः समालिखेत्। चतुष्कोष्ठे दक्षभागे चतुष्कोष्ठे च मन्त्रवित्। तदधश्च चतुष्कोष्ठे तद्वामस्थे चतुर्गृहे। प्रलिखेत् क्रमशश्चाद्यो चतुर्मन्दिरमध्यगे। स्निग्धञ्च शीतलं जत्रं सिद्धञ्चापि ततः परम्। चकारञ्च उकारञ्च खमोकारं ततः परम्। स्निग्धस्वमिति वर्णं च शीतलस्थं शृणु प्रभो!। चकारञ्च उकारञ्च खमोकारं ततः परम्। तदधोऽग्रगेऽस्थं वर्णं शृणु महाप्रभो!!

रकारञ्च ऋकारञ्च एतमोङ्कारतः परम्। सिद्धगेहस्थितं वर्णं शृणु सर्वसुखप्रदम्। ऐकारञ्च ॠकारञ्च औकारञ्च ततः परम्। दक्षे चतुर्गेहस्थितान् वर्णान् तव वदामि तान्। आह्लादं चापि प्रत्ययं सुखञ्च शुद्धमित्यपि। एतत्कोष्ठस्थितान् सर्वान् शुभाशुभफलप्रदान्। ककारञ्च खकारञ्च गकारञ्च घकारकम्। आह्लादस्यमिति मोक्षं प्राप्तिमात्रेण सिद्धिदम्। प्रत्ययस्थं ङकारञ्च चकारं चचमित्यपि। सुखप्रस्थं हि छकारञ्च टकारं ठठमित्यपि। शुद्धस्थञ्च ढकारञ्च णकारं ततमित्यपि। तदधःस्थं चतुर्गेहं लौकिकं सन्धिकं तथा। मानसिकं राजसिकं चतुर्गेहस्थितं त्विमम्। लौकिकस्थं थकारञ्च दकारं च धकारकम्। सात्विकस्थं पकारञ्च फकारञ्च बकारकम्। मानसिकस्थं भृणु भो बकारं च फकारकम्। तदाग्नेयचतुर्गेहं शृणु षड्वानन! प्रभो!। क्षुद्रं क्षिप्रञ्च क्षिप्रञ्च दुष्टमन्दं प्रकीर्त्तितम्। एतद्गेहस्थितान् वर्णमात्रान् सञ्जाति योनरः। वर्जयित्वा क्षुद्रमन्दं क्षिप्रं क्षिप्रञ्च दुष्टकम्। ऐन्द्रिके सिद्धिमाप्नोति परे सङ्क्रिमवाप्नुयात्। यद्यभाग्यवशात् क्षुद्रादिषु गेहेषु लभ्यते। तदा मन्त्रं शोधयेत् वै क्षुद्रसञ्चितकीर्त्तितैः। वर्हितैर्दीपजालस्यैरशुभं भूतशुद्धये। भूतलिप्या पुटीकृत्य जप्त्वा सिद्धिं ततो लभेत्। न तु वा वर्जयेत् गेहं चतुष्कं वर्णवेष्टितम्। क्षुद्रगेहस्थितं वर्णं शृणुष्व षड्वकानन। बकारञ्च भकारञ्च ततोऽन्यष्टगेहसंस्थितम्। अकारञ्च सकारञ्च क्षिप्रगेहस्थितं द्वयम्। धकारञ्च चकारञ्च क्षिप्रगेहस्थितं द्वयम्। दुष्टगेहस्थितं नाथ! सकारं गगनं तथा। निजस्वभावसञ्जातं यत्तन्मन्त्रं समुपाश्रयेत्"।

**चतुश्चत्वारिंशत्** स्त्री चतुरधिका चत्वारिंशत्। (चोयालिस) १चतुरधिकचत्वारिंशत्संख्यायां २तत्संख्यान्विते च। पूरणे डट्। चतुश्चत्वारिंश तत्संख्यापूरणे त्रि० स्त्रियां ङीप्।

**चतुश्शृङ्ग** पु० चत्वारि शृङ्गाण्यस्य। १कुशद्वीपस्य वर्षपर्वते "अस्तु चतुश्शृङ्गः कपिलाचित्रकूटोदेवानीकर्ज्जरोसा ऋषिभिः" भाग०५।२०।१९ श्लो०। २परमेश्वरे च। "चत्वारि शृङ्गा त्रयो अस्य पादा द्वे शीर्षे" इत्यादि श्रुतौ तस्य चतुश्शृङ्गत्वोक्तेस्तथात्वम्। ३शब्दशास्त्रे च तस्य नामाख्यातनिपातोपसर्गरूपचतुर्विधार्थबोधकत्वात् तथात्वम्।

**चतुष्क** न० चतुरवयवं चत्वारोऽवयवाश्चास्य वा कन्। १चतुःसंख्यायां २तदन्विते च "एकं द्विकं त्रिकं चैव चतुष्कं पञ्चकं तथा। नामार्थाः इति सर्वेऽमी पञ्चाः शास्त्रे व्यवस्थिताः" हरिः। "एतत् कटतमं विद्यात् चतुष्कं कामजे गणे" द्विकन्त्रिकञ्चतुष्कञ्च पञ्चकञ्च शतं समम्" इति च मनुः। ३चतुस्समो मनुष्यभेदे "चतुष्कपुष्पप्रकरावकीर्णयोः" "नार्य्यश्चतुष्कामभिरूपं व्यनैषुः" इति च कुमा०। "नारीमनांसीव चतुष्कमन्तः" रघुः। ४मयकार्य्यां (मयारि) ५पुष्करिणीभेदे च स्त्री ङीप् भेदि०। ६वटभेदे न० शब्दार्थ०।

**चतुष्कर्णी** स्त्री चत्वारः कर्णा यस्या ङीप्। १कुमारानुचरमातृभेदे "चुरकर्णी चतुष्कर्णी कर्णप्रावरणा तथा" भा० श० ४७अ० कुमारानुचरमातृशब्दोक्तौ। चत्वारः कर्णाः श्रवणसाधनं यत्र। २द्वाभ्यां क्रियमाणे मन्त्रे पु० "षट्कर्णोभिद्यते मन्त्रश्चतुष्कर्णः स्थिरोभवेत्" पञ्चत०।

**चतुष्कल** पु० चतस्रः कलाः मात्रायत्र। आर्य्यादिषु चतुर्मात्रायुते गणभेदे "त्रेया सर्वान्तमध्यादिगुरवोऽत्र चतुष्कलाः। गणाश्चतुर्दशैतेषु पञ्चार्य्यादिषु संस्थिताः" छन्दः०।

**चतुष्कोण** त्रि० चत्वारः कोणा अत्र। १चतुरस्रे तदाकारे २क्षेत्रभेदे न०।

**चतुष्टय** त्रि० चत्वारोऽवयवा विधा अस्य तयप्। १चतुर्विधभागवति चतुष्के। स्त्रियां ङीप् "ब्रह्मक्षत्रियविशूद्राणां चरितार्थौ चतुष्टयी" कुमारः। "तदेषु सर्वमेष्वेतत्प्रयुञ्जीत चतुष्टयम्" मनुः। "चतुष्टयमर्थदेहादिदण्डम्"। चतुर्णामवयवः तयप्। २चतुःसंख्यायाम् "युक्तं मणिस्तम्भचतुष्टयेन" कुमा०। "कोष्ठं चतुष्टयं श्रेयम्" नीलं०ता० उक्तेषु २अग्नचतुर्थसप्तमदशमस्थानेषु न०।

**चतुष्टोम** पु० चतुरुत्तरः स्तोमः त्रिवृत्पञ्चदशसप्तदशैकविंशानां समूहः मध्यपदलोपी स०। चतुरुत्तरस्तोमे "त्रिवृत्तोऽष्टाचत्वारिंशः धर्म्मः चतुष्टोमः" यजु० १४।२३। चतुर्हिंषु स्तूयमानत्वात् २वायौ च। "अथ चतुष्टोम स्तोमस्य तदुपदधाति तद्यत्तदाह धर्म्मेमिति प्रतिष्ठा वै धर्म्मः प्रतिष्ठा चतुष्टोमोऽथो वायुर्वाव धर्म्मः चतुष्टोमः स आभिश्चतसृभिर्दिग्भिः स्तुते वायुर्वै सर्वेषां भूतानां प्रतिष्ठा तदेतद्भूतमुपदधातीति" शत० ब्रा० ८।४।१।२६। ३स्तोमभेदे। "समीचीर्दिशः स्तुताश्चतुष्टोमः स्तोमः" यजु० १४।२५। "चतुष्टोमेन स्तोमेन समीचीः समीच्यादिशः स्तुताः" वेददी०।

चतुष्पञ्चाशत् स्त्री चतुरधिका पञ्चाशत्। (चौयान्न) १चतुरुत्तरपञ्चाशत्संख्यायां २तत्संख्येऽर्थे च। ततः पूरणे डट्। चतुष्पञ्चाश तत्संख्यापूरणे त्रि० स्त्रियां ङीप्।

चतुष्पत्री स्त्री चत्वारि चत्वारि पत्राण्यस्याः जातित्वात् ङीप्। १हनिषण्णके (हनुनि) शाकभेदे "चाङ्गेरी सदृशः पत्रैश्चतुर्भिश्च प्रकीर्तितः। शाकोऽजलान्विते देशे चतुष्पत्रीति चोच्यते" शब्दार्थचि०। २क्षुद्रपाषाणभेदिनि च राजनि०।

चतुष्पद पु० चत्वारः पन्थानः ब्रह्मचर्य्यादयः आश्रमा यस्य ब० समा०। १ब्राह्मणे अमरः ब्राह्मणानां हि "एष वोऽभिहितो धर्म्मो ब्राह्मणस्य चतुर्विधः" मनुना चातुराश्रम्यस्य उक्तत्वात् तथात्वम्। चतुर्णां पथां समाहारः अच्। २चतुर्ष्वर्थे (चौमाथा) पथि।

चतुष्पथनिकेता स्त्री चतुष्पथे निकेतोऽस्याः। कुमारानुचर मातृभेदे "चतुष्पथनिकेता च गोकर्णा महिषानना" भा० श० ४७अ० कुमारानुचरमातृगणोक्तौ।

चतुष्पथरता स्त्री ७त०। कुमारानुचरमातृभेदे। "चतुष्पथरता चैव भूतितीर्थाऽन्यगोचरा" भा० श०४७अ०।

चतुष्पद् पुंस्त्री चत्वारि पदानि चरणा अस्य। १चतुरवयवे गवादौ जन्तौ स्त्रियां जातित्वात् ङीप्। २तिर्य्यङ्रूपे भ्रुवकरणभेदे न०। करणशब्दे १६८०पृ०स्त०सि० वाक्ये दृश्यम्। अस्य शब्दक० पुंस्त्वोक्तिः सौरागमविरुद्धा। "मृगधनुराद्यान्यार्द्धं हयाजसिंहाश्चतुरश्राः" ज्यो० त० उक्तेषु १मकराद्यार्द्धधनुरन्त्यार्द्धमेषवृषसिंहराशिषु पु०। स्त्रीणां ४करणभेदे न० हेमच०।

चतुष्पदवक्रोक्त न० ६त०। ड० स० उक्ते चतुष्पदजन्तुप्रसवादिविकारे यथा

"परयोनावभिगमनं भवति तिरश्चामसाधु धेनूनाम्। उच्चाण्डो वान्योऽन्यं पिबन्ति या वा खुरभिन्नम्। मासत्रयेण विद्यात् तस्मिन्निःसंशयं परागमनम्। तत्प्रतिघातायैतौ श्लोकौ गर्गेण निर्दिष्टौ। त्यागो विवासनं दानं तत्तस्यास्तु शुभं भवेत्। तर्पयेद्ब्राह्मणां वाऽस्य जपहोमांश्च कारयेत्। स्थालीपाकेन धातारं पशुना च पुरोहितः। प्राजापत्येन मन्त्रेण यजेद्वडवं दक्षिणम्" ४६अ०।

चतुष्पदी स्त्री चत्वारः पादा अस्याः अन्यलोपः समा० वा ङीप् पादः पद्यावयः। १पद्ये "पद्यं चतुष्पदी तच्च वृत्तं जातिरिति द्विधा" छन्दोम०। २प्राकृतभाषादिप्रसिद्धे (चौपाया) छन्दोभेदे ३चतुश्चरणे स्त्रीपशौ च अत्यल्पिङ्गे चतुष्पादिवेव।

चतुष्पर्णी स्त्री चत्वारि चत्वारि पत्रे पर्णान्यस्याः ङीष्। (हनुनी) शाकभेदे। राजनि०।

चतुष्पाटी स्त्री चतस्रोदिशः पाठयति पाठि-अच् उप०स०। नद्यां शब्दमाला

चतुष्पाठी स्त्री चतुर्णां वेदानां पाठोऽत्र गौरा० ङीष्। छात्राणामध्ययनमण्डपे (चौपाडी) स्थले।

चतुष्पाणि पु०चत्वारः पाणयोऽस्य। १विष्णौ हारा० २चतुर्बाहुयुक्तमात्रे त्रि०।

चतुष्पाद् त्रि० चत्वारः पादा अस्य अन्यलोपः समा०। चतुरवयवयुक्ते गवादौ स्त्रियां ङीप् पादः पद्यावयः चतुष्पदीशब्देव। समासान्तविधेरनित्यत्वात् अन्यलोपाभावे चतुष्पादोऽपि तत्रार्थे "भिन्नचिह्नचतुष्पादं विषमं परिकीर्त्तितम्" छन्दोम०।

चतुस्तन स्त्री चत्वारः स्तना अस्याः वा न ङीष्। सुरभौ गवि। "तस्यै स्तनानुन्नयति। अधस्तात् स्तनानुन्नयति सा चतुस्तना भवति चतुस्तना हि गौः" शत० ब्रा० ६।५।१।८।२। भक्ष्यादौ च पक्षे ङीषि चतुस्तनीत्यपि।

चतुस्त्रिंशत् स्त्री चतुरधिका त्रिंशत्। (चौतिश) १चतुरधिकत्रिंशत्संख्यायां २तत्संख्येऽर्थे च। पूरणे डट्। चतुस्त्रिंश तत्संख्यापूरणे त्रि० स्त्रियां ङीप्।

चतुस्त्रिंशत्तातक पु० बुद्धभेदे हेमच०।

चतुस्सन पु० ब० व० चतुर्णां धर्म्मार्थकाममोक्षाणां सनः दाता सन-दाने अच् ६त० चत्वारः सनेतिशब्दा नास्ति वेषां वा। १सनकसनत्कुमारसनन्दसनातनेतिनामकेषु चतुर्षु ब्रह्मपुत्रेषु ऋषिषु तद्ब्राह्मां सनादित्वेन तथात्वम्। २तदवतारधारिणि चतुर्वर्गदातरि वा ३विष्णौ पु० "तप्तं तपो विविधलोकसिसृक्षया मे आदौ सनात्सनतपसः स चतुःसनोऽभूत्" भाग० २।७।६।

चतुस्सूत्रि पु० चतस्रः सूत्रयः कोणादिपूपा अस्य। चतुर्दिग्वच्छिन्ने। "चतुःसूत्रिनाभिर्वृत्तः" यजु० २८।२०। "चतस्रः सूत्रयः कोणा दिग्पूपावस्य सः" वेददी०। "चतुःसूत्रिरेष क्रूपो भवति" शत० ब्रा० ६।३।२।६।

चतूराजी स्त्री चतसृणां राज्ञां समाहारः टच् समा०। चतुरङ्क क्रीडायां क्रीडाभेदे चतुरङ्कशब्दे २८६३पृ० दृश्यम्।

चतूरात्र न०चतसृणां रात्रीणां समाहारः चतसृभिः रात्रिभिर्निर्वृत्तः अण् तस्य लुक् वा अच् समा० "संख्यापूर्वं

रात्रमिति"पा० क्लीवत्वम् । ३चतसृषु रात्रिषु २तत्साध्ये क्रतुभेदे च । "चतूरात्रम्" कात्या०श्रौ० १८।१।१४।"अयं क्रतुर्भवतीति शेषः"कर्कः । चतूरात्रादिवधिकम्"कात्या० श्रौ० २२।१।७। "सहस्रमधिकं दक्षिणा" कर्कः ।

चत्वर न० चत-क्वरच् । १स्वस्तिके होमार्थं कृतसंस्कृत भूभागे २रङ्गाङ्गिरङ्गने (उठान) (चातास) इति च ख्याते ३स्थाने अमरः "रङ्गानां रङ्गवास्तूनि काण्यं नां त्रिकचत्वराः" हरिः ३।३अ० । ४नानाजनस्थानानां वासस्थाने "सन्हि श्वेऽचित्वरे प्रतिवसति" सच्छ० । "न चत्वरे निशि तिष्ठेत् निगूढः" भा० उ० ३६अ० । (चोतारा) ५ख्याते स्थाने "चत्वरान् राजमार्गांश्च समानन्तःपुराणि वः" हरिवं० ३।६अ० । ६चतसृणां रथ्यानां सङ्गमे शब्दार्थचि० । "अन्तरथासु सर्वासु चत्वरेषु च कौरव !" भा० व० ३५अ० ।

चत्वरवासिनी स्त्री चत्वरे वस्तुं शीलमस्याः वस-णिनि ङीप् । कुमारानुचरमातृभेदे । "अजामिका निर्मुटिका रामा चत्वरवासिनी"भा०४७अ० ।

चत्वारिंशत् स्त्री चतस्रोदशतयः परिमाणमस्याः ।"षड्क्रिविंशतित्रिंशद्चत्वारिंशत्" इत्यादि" पा० नि० । (चालिश) १संख्यायां २तत्संख्येये च । ततः पूरणे तमप् । चत्वारिंशत्तम तत्संख्यापूरणे त्रि० स्त्रियां ङीप् ।

चत्वाल पु० चत-वालञ् संज्ञापूर्वकत्वेन द्वे रनित्यत्वात् न द्वित्वं । चात्वाले १होमकुण्डे २दर्भे च मेदि० ।

चद् याचने भ्वा० द्विक० उभ० सेट् । चदति ते एदित् अचदीत् अचदिष्टाम् । चचाद चेदतुः चेदे ।

चद आह्लादे दीप्तौ च भ्वा० अक० प० सेट् इदित् । चन्दति अचन्दीत् चचन्द चचन्दतुः । चन्द्रः ।

चन्द्र पुंस्त्री चद-किरच् । १कस्तिनि २भुजगे च स्त्रियां जातित्वात् ङीष् । ३चन्द्रे ४कर्पूरे च पु० संक्षिप्तसा० ।

चन हिंसे भ्वा० प० सक० सेट् । चनति अचनीत्-अचानीत् चचान चेनतुः । मित् णिचि चनयति ते ।

चन शब्दे तु० प्र० अक० सेट् । चनति अचा (च) नीत् चचान चेनतुः । णिचि चानयति ।

चन अव्य० चन-शब्दे अच् । असाकल्ये "असाकल्ये तु चिच्चन" इत्यमरः । सदृशार्थकचशब्देन नञः समास इत्यन्ये "युवोरिदापश्चन प्र मिनन्ति व्रतं वाम्" ऋ०२।२४। १२। "चनेत्ये तत्पदद्वयसदृशः । ऐकपद्यं त्वध्यापक साम्प्रदायिकम् । २नेत्यर्थे "पूर्वीश्चन प्रसितयस्तरन्ति" ऋ० ७।३२।१३। "चनेति सदृशो नेत्यर्थे" भा० । ३अप्यर्थे "स्वश्चनेदन्धतस्य प्रयोता" ऋ० ७।८६।६। "स्वश्चन स्वोऽपि" भा० । "मह्निम्न एषां पितरश्चनेशिरे" ऋ० १०।५६।४। पितरश्चन पितरोऽपि" यत्तु सायणो० "किमःक्वाऽलाक्षिणौ" विभक्त्यन्ताद् किमः चिच्चनप्रत्ययौ विहितौ तच्चिन्त्यम् अव्ययेन असाकल्यार्थेन वा चनशब्देन गतार्थत्वात् कदाचन कयश्चनेत्यादौ कदापि कचनपीत्यर्थलाभात् न प्रत्ययान्तरकल्पनम् । प्राक्तप्रयोगे किमोऽभावेऽपि प्रयोगदर्शनात् किम इत्यस्य प्रायिकत्वकल्पनेऽपि चनप्रत्यये परे पूर्वसुपः लोपापत्तेश्च । तन्नते चित्त्वेन प्रत्ययस्याव्ययसंज्ञकत्वात् तयोश्चित्त्वाभावेनानव्ययत्वापत्तेः स्वरवैलक्षण्यानुपपत्तेश्च

चनस् न० चाय् पूजादौ "चायतेरन्ने हुश्च" उणा० असुन् चात् तुट् । १भक्ष्ये उज्ज्व० । "चनो धाः सहसो यहो" ऋ० १।२६।१०। "चनोदधिष्व यजतोत सोमम्" निरुक्तोक्तस्तुतिः ।

चनसित न० च न शब्दे अच् चनः सित अवसानमस्य । ब्राह्मणस्यापत्यजातभेदे । "नाध्यजनाम्नाऽऽ चक्षीत चनसितेत्यङ्कता सह । सम्प्रयमाणो ब्रूयाद्विचक्षणेतीतरैरिति" कर्कोद्धृतमनुवाक्यम् ।

"जागर्त्त्वेतां रात्रिं क्रीते राजनि द्वितीयां रात्र्यां द्वितीयां चनसितं विचक्षणमिति" नामधेयान्तेषु दधाति चनसितेति ब्राह्मणं, विचक्षणेति राजन्यवैश्यौ" "विचक्षणचनसितवतीं वाचम्" कात्या० श्रौ० ७।५।७। "विचक्षणशब्दवतीं चनसितशब्दवतीं च वाचं ब्राह्मणादिनामधेयभूतां वाचीं वदेत्" कर्कः ।

चनस्य चनोऽभिच्छति क्यच् नामधातुः अच् इच्छायां पर० अक० सेट् । चनस्यति अचनस्यीत् । "पुरुभुजा चनस्यतम्" ऋ० १।२।१।

चनिष्ठ त्रि० चनोऽस्य उपचारात् तद्वान् ततः अतिशये इष्ठन् डिद्वद्भावे टिलोपः । अन्नवत्तमे "अग्ने वो अस्तु सुमतिश्चनिष्ठा" ऋ०७।५७।४। "चनिष्ठा अन्नवत्तमा" भा० ।

चन्द पु० चदि आह्लादने स्वनात् अच् । १चन्द्रे २कर्पूरे च शब्दार्थर० ।

चन्द(न्द्र)क पु० चन्द(न्द्र)इव कायति शुभत्वात् के-क । (चाँदा) मत्स्यभेदे "चन्द(न्द्र)कोरुचिरत् वल्गुवानभिधान्नदपि" राजवल्लभः ।

चन्दन पु०न० चदि-ल्यनात् ल्यु । स्वनामख्याते मलयाच-

सञ्जे ह्लविशेषे तद्भेदगुणादिकं भावप्र० उक्तं यथा श्वेतखण्डं चन्दनं न स्त्री भद्रश्रीस्तैलपर्णिकः। गन्धसारो मलयजस्तथा चन्द्रद्युतिश्च सः। स्यादे तिक्तं कषे पीतं छेदे रक्तं तनौ सितम्। यन्थिकोटरसंयुक्तं चन्दनं श्वेतमुच्यते। चन्दनं शीतलं रूक्षं तिक्तमाह्लादनं लघु। भ्रमशोषविषच्छर्द्यग्न्यपित्तास्रदाहजित्। अथ पीतचन्दनम् (कलम्बक)। "काश्मीयकन्तु काश्मीयं पीताभं हरिचन्दनम्। हरिप्रियं कालसारं तथा कालानुसार्यपि। काश्मीयकं रक्तगुणं विशेषाद्व्रणनाशनम्"। अथ रक्तचन्दनम् "रक्तचन्दनमाख्यातं रक्ताङ्गं चुद्रचन्दनम्। तिक्तपूर्णं रक्तसारं तत्प्रवालफलं स्मृतम्। रक्तं शीतं गुरु स्वादु छर्दितृष्णास्रपित्तजित्। तिक्तं नेत्रहितं हृद्यं ज्वरव्रणविषापहम्। तत्र पुंसि "सत्यसंश्रयसुखोऽपि दूष्यते क्षणसर्पिगुनेव चन्दनः" शक्तु०। क्लीबे "विना मलयमन्यत्र चन्दनं न विवर्द्धते" पञ्चत०। "ततः क्षतार्द्धिकाः सर्व्वे दिव्यचन्दनभूषिताः" भा० स० ५७अ०। "चन्द्रचन्दनरोलम्बस्वताङ्गीपनं मतम्" भा०द० तस्य अङ्गारोद्दीपकत्वगुणम्। २रक्तचन्दने न० मेदि० ३वानरभेदे पु० हेम०। ४शारिवोषधौ स्त्री राजनि०। (मधुखाली) नगरीसमीपस्थे ५नदीभेदे च स्त्री।

**चन्दनगिरि** पु० चन्दनस्रोतपत्तिस्थानं गिरिः। मलयाचले

**चन्दनगोपी** स्त्री चन्दनमपि गोपायति गुप-ल्यु ङीप्। शारिवाभेदे राजनि०।

**चन्दनधेनु** स्त्री पतिपुत्रवत्या मृतायाः नार्याः उद्देशेन पुत्रदातव्यायां चन्दनाङ्कितधेनौ। तद्विधिमाह रत्नाकरे देवलः "जीवद्भर्त्तृका तु या नारी पुत्रिणी म्रियते यदि। सवत्सामङ्कितां धेनुमाचार्य्याय प्रदापयेत्। पतिपुत्रवती नारी म्रियते यावतस्तयोः। ह्रदं नचोत् स्रजेत् पुत्रः पिता यावच्च जीवति"। तथा कर्म्मोपदेशिन्यां ब्राह्मणसर्व्वस्वे च फलायुधधृतानि वचनानि स्मृतिः "पतिपुत्रवती नारी म्रियते भर्त्तुरग्रतः। चन्दनेनाङ्कितां "धेनुं तस्याःस्वर्गाय कल्पयेत्"। तथा जातूकर्णः धेनुं चन्दनमालिप्य यो दद्यान्मातृहेतवे। यदि पापसमेतां वा तथापि स्वर्गमाप्नुयात्"। तथा वशिष्ठः "न युक्तश्च ह्रदोत्सर्गः पिता यावत् तु जीवति। चन्दनेनाङ्कितां धेनुमाचार्य्याय प्रदापयेत्"। "चतुर्हस्तो भवेद्वृषो यत्र ह्लसमुद्भवः। वत्सश्च सोमनः स्यूतः कर्त्तव्यो धेनुमौलिकः। विल्वस्य वकुलस्यैव कलौ यूपः प्रशस्यते। अभावे वारुणेनापि यूपं कुर्य्याद्विधानतः"। "तरुणीरूपसम्पन्ना सुशीला च पयस्विनी। न्यायार्ज्जिता गृहे ज्ञाता देया सा श्रोत्रियाय गौः। नदीतीरे वने गोष्ठे देवतायतनेषु च। ब्रीह्यिक्षेत्रे कृषक्षेत्रे राजद्वारे चतुष्पथे"। एषु वचनेषु ह्रदोत्सर्गनिषेधचन्दनधेनूत्सर्गविध्योर्युगपदुपसंहारदर्शनात् ह्रदोत्सर्गस्थाने प्रधानतया चन्दनधेनूत्सर्गः प्रतीयते अतोऽस्य ह्रदोत्सर्गकार्य्यकारित्वात् तत्फलहेतुत्वं लभ्यते। "एकोद्दिष्टं न कुर्व्वीत न्यासिनाङ्क्वैव सर्व्वदा। अकृत्वैकादशे प्राप्ते पार्व्वणं तु विधीयते" इति श्राद्धविवेकधृतोशनोवचने त्रिदण्डसन्न्यासिनाम् एकोद्दिष्टनिषेधपार्व्वणविध्योर्युगपदुपसंहारात् एकोद्दिष्टस्थाने पार्व्वणमिव। यद्वा पतिपुत्रवतीरूपप्रेतविशेषाधिकृतह्रदं न चोत् स्रजेदिति निषेधचन्दनधेनूत्सर्गविधिभ्यां प्रेतमात्राधिकृतसामान्यह्रदोत्सर्गविध्यवगतफलभावनाकरणीभूतह्रदकर्मकत्वागमनूद्य तत्कर्मीभूतह्रदमपहाय तत्स्थाने धेनुमात्रगुणविधिर्बाधादवगम्यते। पशुयागे सामान्यविध्यवगतापःप्रणयणीयाधिकरणचमसस्थाने "गोदोहेनापः प्रणयेदिति" विशेषविधिना गोदोहगुणविधिवत्। "नालाभेऽपि प्रजेच्छिनीम्। ह्रदोद्यादशीं तत्र त्रयोदश्यान्तु पारणम्" इत्यत्र एकादशीरूपनिमित्तस्थाने द्वादशीमात्रगुणविधिवच्च। अन्यथा धेनूत्सर्गस्य पृथक्कर्मत्वे फलभावनातत्करणनियोज्यानां पृथक्कल्पने गौरवं स्यात्। उक्तविधिनिषेधयोरुपसंहारवैयर्थ्यञ्च स्यात्। ततश्च कारणैक्यात् फलैक्यमिति। चन्दनधेनूत्सर्गेऽपि प्रेतत्व विमुक्तिपूर्वकस्वर्गप्राप्तिः फलम्। एवं कपिलोक्तमन्त्रस्य पापध्वगमस्वर्गप्रार्थनायामपि तथैव तात्पर्य्यम्। तथा जातूकर्णवचनस्थपापस्वर्गपदयोरपि तथैव तात्पर्य्यं बोध्यम्। भूतार्थानां विधिशेषित्वमेव जैमिन्युक्तं प्रामाण्येन प्रकृते सिद्धे विधिशेषित्वे लाघवात् "पापिष्ठमपि शुद्धेन शुद्धं पापक्षयादपि वेति" कात्यायनवचनस्थ पापपदस्य प्रेतत्व एव तात्पर्य्यदर्शनाच्च। अत्र यद्यपि पतिपुत्रवतीत्यत्र पतिपुत्रवत्त्वस्य विशेषणीभूतकर्त्तव्यत्वे मरणानन्वयित्वेन न विशेषणत्वं किन्तूपलक्षणत्वमेव ततश्च काकवन्ध्यो देवदत्तश्च मृत्वा इतिवत् कादाचित्कतद्रहितादावपि पतिपुत्रवतीति प्रयोग उपपद्यते। तथापि

"अपतत्सयोः" "भर्तुरग्रतः" इत्याभ्यां मरणकालिकी पति पुत्रवत्ताऽवगम्यते गवां गोष्ठे इतिवत्। अथ वा पराङ्गान्वयेन धेनूत्सर्गकालिकीति। यच्च "अपुष्पिता सुता काचित् तस्या धेनुर्विगर्हिता" इति कपिलवचने अपुष्पितायाः पुत्रकर्तृकधेनूत्सर्गनिषेधस्याप्रसक्ततया सपत्नीपुत्रकर्तृकधेनूत्सर्गनिषेधप्राप्तौ तद्दृष्ट्या पतिपुत्रवतीत्वस्य सपत्नीपुत्रवतीपरत्वम् अवश्यं वाच्यम्। तदेकगाढ्यतया पुत्रिणीत्वादावपि तथात्वमिति वाच्यम्। अपुष्पितेति कपिलार्षस्य प्रसक्ति पूर्वकत्वार्थं पतिपुत्रवदुक्तस्य रजस्वाया धेनूत्सर्ग निषेधार्थत्वात् गर्भायां सत्यां रजचायाः बीजाभावात्। प्रतियोगिवत् ध्वंसप्रागभावयोरपि अत्यन्ताभावविरोधित्वमते तु अजातपुष्पस्त्रीपरत्वं वा भवतु तथात्वेऽपि "तस्या धेनुर्विगर्हितेति" अप्रसक्तार्थापि अपुष्पिता धेनुदाननिन्दा स्तुतिपरा। यथा हरेरुत्थाने "पौष्णे शेषेण किन्नेन प्रतिपद्य योनिमि" त्यप्रसक्तापि निन्दा एकादश्यादिपौर्णमास्यन्तपक्षके शेषत्वनपादयोमविधि स्तुतिपरा यथा वा वेदगाने "यो गिरा गिरेति ब्रूयात् स आत्मानमपि गिरेत्" इत्यप्रसक्तनिन्दा "ऐरं कृत्वा अवगिरेदिति विधेः स्तुतिपरा। अतएव उक्तं शारदाभाष्ये "न हि निन्दा निन्द्यं निन्दितुं प्रवर्त्तते अपि तर्हि तरत् स्तोतुमिति"। स्तुतौ हि अप्रसिद्ध गुणदोषारोपो न दोषाय। नचात्र काम्यस्यैव कार्त्तिक्यादिद्वयोत्सर्गस्य स्थाने धेनुदानं विधीयते इति वाच्यम्। तत्रात्यपरत्वे मानाभावात्। प्रत्युत म्रियत इति वर्त्तमानार्थकविभक्त्या वर्त्तमानसामीप्येनाचिरप्रमीतोपस्थितेश्च। ये तु "ब्रह्मणामेकपत्नीनामेका चेत् पुत्रिणी भवेत्। सर्वांस्तारयते पुत्रेण प्राह पुत्रवतोमनुरिति" मनुना पुत्रवतीत्वाभिधानादेव पतिपुत्रवतीत्वस्य सपत्नीपुत्रवती प्रतीयते इति ब्रुवते तेऽतीव भ्रान्ताः। पुत्रवतीतिपदस्याव्युत्पन्नतया मतुपा पतिपदस्यान्वये तदस्वत्वापत्तेः। ननु द्वयतुल्यवयो वर्षोद्वयः स्यादूनिचा द्विजाः। द्वयोत्सर्गे तया पुंसां स्त्रीणां स्त्रीणोर्विशिष्यते" इति भविष्यसंवादाद्धेनुदानमिदं पतिपुत्रवत्या द्वयोत्सर्गे दक्षिणादानस्य विशेषरूपम्, न तु प्रधानकर्मान्तरं गौरवात्। न च दक्षिणाया अङ्गत्वेन फलासङ्गतिः। "यस्य पर्णमयी जुहूर्भवति न स पापश्लोकं शृणोतीति" वत्तदुपपत्तेरिति चेत् न द्वयोत्सर्गदक्षिणातन्त्रान्तर्गत धेनुदानस्य प्रकरणान्तरान्तर्भावेन प्रकरणान्तरन्यायतः प्रधानत्वसिद्धेः द्वयोत्सर्गस्थानीयत्वे नानुवर्त्तमान शिष्टाचारात्। धेनुदानयुगनद्धद्वयोत्सर्गनिषेधानामङ्गत्वेः कपिलपञ्चरात्रे चन्दनधेनुदानस्यापीति कर्त्तव्यतायां द्वयरूपदक्षिणादावविधानाच्च। यथा कपिल उवाच "अतःपरं प्रवक्ष्यामि धेनुदानमनुत्तमम्। पतिपुत्रवती नारी म्रियते भर्तुरग्रतः। चन्दनेनाङ्कितां धेनुमाचार्याय निवेदयेत्"। तथा-"जीवद्भर्त्री तु या नारी पुत्रिणी म्रियते यदि। सवत्सामङ्कितां धेनुमाचार्याय निवेदयेत्। साध्वी पतिव्रता नारी म्रियते यापतत्सयोः। इयं नैवोत्सृजेत् पुत्रः पिता यावत् तु जीवति। मृतपुत्रा च या नारी संत्यक्ता तु या भवेत्। तस्या धेनुर्न दातव्या द्वयोत्सर्गो विधीयते। "अपुष्पिता सुता काचित्तस्या धेनुर्विगर्हिता। दद्याद्धेनुं सुतो ज्येष्ठः कनिष्ठो द्वयमुत्सृजेत्। द्वयोः सोदरयोरेको भवेत् ज्येष्ठः प्रधानतः। त्रयाणां द्वौ सुतौ ज्येष्ठौ, चतुर्णां त्रयः स्मृताः। पञ्चानां सोदराणान्तु त्रयोज्येष्ठाः प्रकीर्त्तिताः। ज्येष्ठेनैव तु कर्त्तव्यं धेनुदानं विधानतः। हेममङ्गीं खुरैरूप्यैः सुशीलां वस्त्रसंवृताम्। कांस्योदरीं ताम्रमुखां घण्टाचामरभूषिताम्। प्रवालशालिकां दद्यात् कर्णयोरुभयोरपि। चन्दनेनाङ्कितां धेनुमाचार्याय निवेदयेत्। सर्वां लोकमवाप्नोति दिवि देवैश्च मोदते। चन्दनेनाङ्कितां धेनुं दत्त्वा-प्यक्षेत् सुरालयम्। तावत्तिष्ठति स्वर्लोके यावदाभूत संप्लवम्। अतोत्सर्गो द्वयस्यात्र वत्सतत्वं न्वितस्य च। द्वयोत्सर्ग विधानेन कर्त्तव्यं सर्वकर्म च। मान लोकेति मन्त्रेण दद्यो द्वयोऽज्यसीति च। धेनोश्च सक्थिदेशे तु त्रिशूलाङ्कं समालिखेत्। वामभागे त्रिशूलं दक्षे चक्रं समालिखेत्। तत्रान्यद्वर्णवैचित्र्यमाचार्यैस्तु विधानवित्। ततो वै संलिखेच्चक्रं ब्रह्मरूपं प्रमाणकम्। मूलं ब्रह्मशिलं कार्यं दक्षे वामे यथाविधि। पूर्वाभिमुखीं धेनुं यजमानोत्तराननः। मन्त्रवादि क्रमेणैव प्रतिमन्त्रैः प्रपूजयेत्"।

"एवंविधिष्टां तां धेनुं दत्त्वा तर्पणमारभेत्। पुच्छं गृहीत्वा पित्रादीन् वर्षोत्सर्गविधानतः। ऐशान्यां चालयेत् किञ्चित् आचार्यायं च दक्षिणाम्। द्वयमङ्गं ततो दद्यादाचार्यायं गुणान्वितम्। पूजयेत् ब्राह्मणांश्चैव

वस्त्रमाल्यादिभिस्ततः। कांस्यपात्रं वस्त्रयुग्मं सुवर्णञ्च विशेषतः। आचार्याय प्रदातव्यं ब्रह्मणे कनकन्तथा। आगतान् पूजयेद्भक्त्या यथाशक्ति विधानतः। दीनान्धकृपणादींश्च अन्नाद्यैः परिपोषयेत्"। पुलस्त्यवचने पाठाधिक्यं यथा

"एकादशाहे प्रेतायाः प्रथमासे चाविदले तथा। त्रिपक्षे मासिके वापि दद्याद् गां चन्द्रनाङ्कितां" तथा वराहपुराणम् "अयने विषुवेऽष्टम्यां युगाद्यापूर्णिमासु च। दर्शे मन्वन्तरे चैव धेनुं दद्यात् सुपूजिताम्"। ननु "आद्यश्राद्धे त्रिपक्षे च" इत्यादिना आद्यश्राद्धकर्त्तव्यनित्यवृषोत्सर्गकालस्य परपरकालो गौणः। न वा सर्वे सुख्याः कालाःस्युः। तत्र नाद्यः त्रिपक्षादौ शिष्टाचारविरोधात्। नापि द्वितीयः त्रिपक्षादौ नित्यत्वबोधकाभावात्। वस्तुतः आद्यश्राद्धे वृषोत्सर्गस्य नित्यत्वं त्रिपक्षादौ काम्यत्वम्। आद्यश्राद्धपदम् अघौचान्तद्वितीयदिनपरम् "अघौचान्तात् द्वितीयेऽह्नीत्याद्येकवाक्यत्वात्। अत्र च आद्यश्राद्धस्य विभक्तपतितत्वेन एकादश्यादौ क्रियमाणत्वे वृषोत्सर्गमपि न कुर्यात्। आद्यश्राद्धदिने वृषोत्सर्गाकरणे त्रिपक्षाद्यान्यतमकालेऽपि वृषोत्सर्गस्यावश्यप्रेतत्वपरीक्षारकत्वेन तस्य पुनः संवत्सरसाध्यसकृत्कृतस्य नित्यत्वं कल्प्यम्। एवं धेनुदानस्यापि। अतएव पूर्णे संवत्सरे मलमासपातेऽपि प्रागुक्तत्वेन कार्य्यमेव इति नवीनाजगुः। एककर्त्तृकानेकवृषोत्सर्गोऽपि शिष्टाचाराद्येकदिनेऽपि। तथा हि स्वर्गलोकगमनकत्वश्रुतेः काम्यत्वेन 'यो भूय श्चारभते तन्तिं फले विशेषः' इति न्यायादविरोधः। ननु नैमित्तिकत्वात् कथमावृत्तिः "सकृत् कृते कर्मणि शास्त्रार्थः" इति न्यायात् नचैकस्य क्रियाद्वयमिति वचनात्। अत्रायं विशेषः काम्यनैमित्तिकं फलविशेषार्थं भूयः कार्य्यं, नैमित्तिकमात्रं तु सकृदेव। किञ्च। संक्रान्त्यादिनिमित्तकत्वाद्वर्षमपि पुनः पुनः स्यात्। नैवं तत्र पितृतृप्तिरूपप्रधानफलस्य श्रुत्येन चरितार्थत्वात्। अतोक्तानि सर्वाण्येतानि वचनानि तिर्य्यगधिकरणन्यायमूलानि तथा हि तिर्य्यगधिकरणे तिर्य्यक्षूपङ्कुलत्राणैर्यदेवतानामनधिकार इति यागमात्रे उक्तम्। तत्र हेतवः तिरश्चां विशिष्टान्तःकरणविरहात् लत्राणैर्याम् अन्ववधिरूपकारामवेक्षणश्रवणोच्चारणविरहात् साङ्गयागासामर्थ्यं हेत्वां यथा यागानधिकारकाद्दत्र "सपितः पितृकर्त्तृके षु अधिकारो न विद्यते" इति अन्त्येष्टिपरिशिष्टे अग्न्याधानाद्यनङ्गत्वादुक्ता "जीवत्पितृकस्तानन्यांश्चेतर" इति कात्यायनसूत्रे च जीवत्पितृकस्य पितृतर्पणनिषेधात् वृषोत्सर्गं तदङ्गभूततत्पुच्छगन्धितोदकतर्पणविरहात् साङ्गकरणासामर्थ्यात् वृषोत्सर्गेऽनधिकारः। अतएव द्वैतनिर्णयेऽपि स्त्रियाः करणीभूतकृष्णबाधेन यागवद् वृषोत्सर्गस्य बाध उक्तो वाचस्पतिभिश्च। धेनुदानाङ्गतर्पणे तु प्रधानाधिकारश्रुतेः जीवत्पितृकाधिकृतविशेषविधानाच्चाधिकार एवाभ्युदयिकश्राद्धवत् जन्ममासोपनयनाङ्गसग्रिसवपनवच्च। अवन्तु सामान्यशास्त्रोपजीवित्वेन निषेधः पर्य्युदास एव। स यदि पतिपुत्रवतीभिन्नाया वृषोत्सर्गं कुर्यात् तत्संबन्धात्तदा पूर्वभागवैयर्थ्यं स्यात्। यदि पतिपुत्रवत्या जीवत्पितृकपुत्रभिन्नो वृषोत्सर्गं कुर्यादिति विशिष्टरूपस्यापि पतिपुत्रवत्वाच्चदुभयरहितायाश्च जीवत्पितृकपौत्रादिना वृषोत्सर्गः स्यात्। स चायुक्तएव प्रागुक्तवचनन्यायविरोधात्। तस्मात् समुदायवचनसार्थक्याय पतिपुत्रवतीभिन्नाया वृषोत्सर्गं कुर्यात्। तथा जीवत्पितृकभिन्नो वृषोत्सर्गं कुर्यात् इति वचनन्यायसंवादाद्दाक्यद्वयमेवं सिद्ध्यति प्रमाणवद्वैरक्यस्य सर्वैरङ्गीकृतत्वात् दर्शपौर्णमासयोः षट्प्रधानापूर्ववत्। अथ योक्तदेवलादिवचने "ज्येष्ठेनैव तु कर्त्तव्यं धेनुदानं विधानतः" इत्यत्रकापित्रादिसकलवचनपर्य्यालोचनया कनिष्ठपुत्रवतीभिन्नपतिपुत्रवतीतरजनस्य कापित्रपतिप्रसूतकनिष्ठपुत्रभिन्नजीवत्पितृकादन्यो जनो वृषोत्सर्गं कुर्यात् इति सामान्यत एव वृषोत्सर्गविधिः। तथा पतिपुत्रवत्या ज्येष्ठपुत्रएव चन्द्रनाङ्कितधेनुसत्सृज्येति विधिश्च सिद्ध्यति। ततश्च पतिपुत्रवत्याः कनिष्ठपुत्रसत्त्वएव तदन्यस्यतत्पितृकेवा वृषोत्सर्गः कार्य्यः। कनिष्ठपुत्राभावे तु न केनापि। एवं पत्न्यादिना न चन्द्रनधेनुदानमिति। प्रतिप्रसूतकनिष्ठान्यजीवत्पितृकेण न कस्यापि वृषोत्सर्गः कार्य्य इत्यपि च पर्य्यवसितम्। वस्तुतस्तु पतिपुत्रवत्या वृषोत्सर्गनिषेधे तत्पुत्रस्य जीवत्पितृकत्वेनानधिकार एव हेतुः न तु स्त्रियाः पतिमत्त्वं पुत्रवत्त्वं वा मृतपुत्रेत्यादिप्रागुक्तकापित्रवचने पतिमत्त्वे कनिष्ठपुत्रसत्त्वे च वृषोत्सर्गावगतेः तत्पुत्रस्य पितुः सत्त्व एवानधिकारोक्त्या तन्मरणे वृषोत्सर्गावगमाच्च। न वा तदुभयसत्त्वं मिलितमुक्त-

न्यायावगतस्य तत्पुत्रस्य जीवत्पितृकत्वहेतोरेव ताद्दश निषेधप्राप्तेः पतिपुत्रसत्त्वयोर्निषेधैक्यहेतुत्वकल्पना नौचित्यात् तयोर्वाचनिकहेतुत्वे तु अदृष्टकल्पनाया अनाय्यत्वात् सिद्धजीवत्पितृकनिषेधप्रयुक्तया पतिपुत्रवत्या निषेधोपपत्तौ अधिकनिषेधकल्पने गौरवाच्च। यत्तु जीवत्पितृकवर्षोत्सर्गनिषेधे पतिपुत्रवत्याः वृषोत्सर्गसंस्कारः सोऽपि तस्याः पुत्रानधिकारमात्रप्रयुक्तसिद्धवृषोत्सर्गाभावभागित्वानुवादः पूर्ववाक्यावगतधेनुदानस्य वृषोत्सर्गस्थानीयत्वज्ञापनार्थ एवेति प्रागपि निरूपितम्। ततश्चोक्तवचने तिर्यगधिकरणन्यायप्राप्तं जीवत्पितृकस्य वृषोत्सर्गकर्तृत्वाभावमनूद्य सपतिकाया वृषोत्सर्गस्थाने चन्दनाङ्कितधेनूत्सर्ग एव विधीयते। एतेन वृषोत्सर्गकर्त्तरि कपिलप्रतिपत्तिरुक्तसपतिकावृषोत्सर्गकृतिमत्कनिष्ठपुत्राभ्यजीवत्पितृकेतरत्वविशेषणं सपतिकाया वृषोत्सर्गस्थाने ज्येष्ठपुत्रस्यैव चन्दनाङ्कितधेनूत्सर्गमात्रेण लभ्यते। अतोजीवत्पितृकेण काम्यवृषोत्सर्गः पतिते प्रव्रजिते वा पितरि जीवति पितामहादिवृषोत्सर्गश्च न कार्यः। एवं सपतिकाया अपि पुत्रस्य कर्मायोग्यत्वे असत्त्वे वा पत्या कन्यादिना वा वृषोत्सर्गः कार्य एवेति स्थितम्। इदन्तु रत्नाकरकल्पतरुधृता चार्यचूडामणिविद्याभूषणगुरुकुरुमल्लदेवभट्टाचार्यप्रभृतीनामपि सम्मतं तेषां पृथक् पृथक् पद्धतिरपि प्रसिद्धास्ति। क्वचिद्ग्रंथे क्वापि भट्टाचार्यस्यापि समग्रं पद्धतिर्दृश्यते। अत एवात्र विशेषादर्शिनामनाचारोऽनाचार एव। अत्र भविष्योक्तप्रकारस्तु वैकल्पिकएव "स्मृतिशास्त्रे विकल्पो हि आकाङ्क्षापूरणे सतीति"जैमिन्युक्तेः। तत्तत्पूजाहोमाद्यङ्गेषु विशेषमन्वोक्तेः। कपिलकल्पेन वृषोत्सर्गधर्मातिदेशेन विशेषोक्तेरिराशाच्च" नव्यराचस्पतिमतम्। रघुनन्दनमते तु चन्दनधेनोः काम्यत्वमात्रत्वात् वृषोत्सर्गं विहाय केवलं चन्दनधेनुदानं न शास्त्रसिद्धं काम्येन नित्यबाधायोगात् सति सामर्थ्ये उभयकर्त्तव्यतार्थं वृषोत्सर्गनिन्दा चन्दनधेनुदानस्तुतिपरा। रघुनन्दनकृततत्पद्धतिस्त्वेऽपि तस्य काम्यस्यैव विधानार्थत्वम् इति साम्प्रदायिकाः

**चन्दनपुष्प** न॰ चन्दनमिव सुगन्धि पुष्पमस्य। बकुले राजनि॰

**चन्दनमय** त्रि॰ चन्दनात्मकः मयट्। चन्दनवृक्षनिर्म्मिते पर्य्यङ्कादौ "यः सर्वः श्रीपर्णः पर्य्यङ्को निर्म्मितः स फलदाता" इत्युपक्रमे "चन्दनमयोरिष्टो धर्म्मयशोदीर्घजीवितकृत्" इ॰स॰७६अ॰ तत्प्रयपर्य्यङ्कस्य फलमुक्तम्।

**चन्दनशारिवा** स्त्री चन्दनइव सुगन्धिः शारिवा। शारिवाभेदे राजनि॰। [इत॰। २धृष्टचन्दनसारे च।

**चन्दनसार** पु॰ चन्दनेव सारोऽस्य। १वज्रसारे राजनि॰

**चन्दनाचल** पु॰ चन्दनस्याकरोऽचलः। मलयाचले राजनि॰। चन्दनाद्रिप्रभृतयोऽत्र।

**चन्दनादि** पु॰ "चन्दनञ्च तथोशीरं कर्पूरोगन्धवाकुची। एलाकर्पूरगोक्षाश्च सप्तैते चन्दनादयः" इति वैद्यकोक्ते पित्तोपशमने द्रव्यसप्तके।

**चन्दनाद्य** न॰ "चन्दनाद्यं नखं वार्थं यष्टिशैलेयपद्मकम्। मञ्जिष्ठा सरलं दारु शल्लकोशीरकेशरम्। पत्रं तैलं सुरा मांसी कक्कोलं वनिताम्बुदम्। हरिद्रे शारिवे तिक्ता लवङ्गागुरुकट्टमम्। त्वपेणुनलिकटुभिस्तैलं मस्तु चतुर्गुणम्। आचारसमं सिद्धं यक्ष्मग्नं बलवर्णकृत्। अपस्मारज्वरोन्मादक्षयाऽलक्ष्मीविनाशनम्। आयुःपुष्टिकरं चैव वशीकरणमुत्तमम्" चक्रदत्तोक्ते तैलभेदे।

**चन्दनीया** स्त्री चन्द्रप्रतेऽनया वा॰ करणे अनीयर्। गोरोचनायाम् राजनि॰। [पु॰ भेदि॰।

**चन्दिर** पुंस्त्री॰ चदि-किरच्। १गजे स्त्रियां ङीष्। २चन्द्रे

**चन्द्र** पु॰ चदि-आह्लादे रक्-रक्। व्योमस्थे जलमये मण्डलाकारे (चाँद) ख्याते पदार्थे। तन्मण्डलमानादि इन्दुशब्दे ६५६।५६ पृ॰उक्तम्। स च षड्भेदः तदधिष्ठातृदेवादि षड्यत्नशब्दे २७५७ पृ॰ दर्शितम्। अधिकमिन्दुशब्दे ६२० पृष्ठादौ द्रष्टव्यम्। तस्योत्पत्तिः अत्रिजशब्दे १११पृ॰उक्तम्। तद्गणादि हरिवंशे भागवते च द्रष्टव्यम्। चन्द्रस्य दिग्बलवर्णादिज्ञानाय सर्वग्रहाणां दिग्बलादुच्यते तत्र ज्योः त॰

"रक्तश्यामोभास्करोगौररिन्दुर्नीलुश्चाङ्गारकस्तगौरोमहीजः। दूर्वाश्यामोज्ञोगुरुर्गौरवर्णः श्यामः शुक्रोभास्करिः कृष्णदेहः"। "सूर्यः शुक्रः क्षमासुतः सैंहिकेयः शनिः शशी। सौम्यस्त्विदृशमन्त्री च प्राच्यादिदिग्धीश्वराः"। "प्राच्यां सौम्यसुराचार्यौ याम्यां भास्करभूमिजौ। प्रत्यक् सौरिरुदीच्यान्तु सितेन्दू दिग्बलान्वितौ"। "भौमार्कजीवाः पुरुषाः क्षीणौ सोमजभानुजौ। स्त्रीसंज्ञौ भार्गवचन्द्रौ द्वौ तत्पतित्वात्तथोच्यते"। "चन्द्रार्कजीवाश्चसितौ कुजार्कौ यथाक्रमं

सत्वरजस्तमांसि"। "कटुलवणतिक्तमिश्रितमधुराम्लौ च कषायकोऽर्कतः"। "ब्राह्मणे शुक्रवाणौ क्षत्रिये भौमभास्करौ। चन्द्रोवैश्ये बुधः शूद्रे पतिर्मन्दोऽन्त्यजे जने"। "ऋग्वेदाधिपतिर्जीवो यजुर्वेदाधिपः सितः। सामवेदाधिपो भौमः शशिजोऽथर्ववेदराट्"। "मधुपिङ्गलदृक्चतुरश्रतनुः पित्तप्रकृतिः सवितानुपचयः। तनुदृक्ततनुर्बहुवातकफःप्राज्ञशशी मृदुवाक् शुभदृक्। भूमिजसदृग्वपुर्मूर्तिरुदारः पैत्तिकः सुचपलः क्षतमध्यः। स्निग्धदृक् ततहासरुचिर्दृक्पित्तमारुतकफप्रकृतिश्च। दृक्ततनुः पिङ्गलमूर्द्धजेक्षणोऽहस्पतिः श्लेष्मपतिः कफात्मकः। भृगुः सुखी कान्तवपुः सुलोचनः कफानिलात्माऽसितवक्रमूर्द्धजः। मन्दोऽलसः कपिलदृक् क्षतदीर्घगात्रः स्थूलोऽङ्गिजः परुषोमकचोऽनिलात्मा" "मित्राणि सूर्याच्चन्द्रभौमजीवाः सूर्येन्दु जौ सूर्यशशाङ्गजीवाः। आदित्यशुक्रौ रविचन्द्रभौमा बुधार्कजौ चन्द्रजभार्गवौ च। "सितासितौ चन्द्रबुधौ न कश्चित् बुधः शशी सौम्यसितौ रवीन्दू। रवीन्दुभौमा रवितस्समित्रा मित्राविशेषस्तु समः प्रदिष्टः। बुधः कुजेज्यासुरसिद्धकेतवः, शुक्रार्कजौ, भौमसुरेज्यमन्दाः। शनिः, कुजेज्यौ सुरराजमन्त्री रव्यादिनोऽमी समसंज्ञिताः स्युः"। तद्वारफलादिकम् ह०स० उक्तम् तत्र इन्दुशब्दे ८२१।२२ पृ० द्रष्टम् "चन्द्रादूनः शशी पापः" समयान्नतम्। चन्द्रिजातसोमस्य चन्द्रलोकप्राप्तिकथा काशीख० १४अ०। "पिता सोमस्य भो विप्र! ब्रह्मर्षिर्भगवानत्रिः। ब्रह्मणोमानसात् पूर्वं प्रजासर्गं विधित्सतः। अनुत्तरं नाम तपो येन तप्तं हि तत् पुरा। त्रीणि वर्षसहस्राणि दिव्यानीति हि नौ श्रुतम्। ऊर्ध्वमाचक्रमे तस्य रेतः सोमत्वमीयिवः। नेत्राभ्यां तस्य सुस्राव दशधा द्योतयद्दिशः। तं गर्भविधिना हृत्वा दश देव्यो दधुस्ततः। समेत्य धारयामासुर्नैव ताः समशक्नुवन्। यदा न धारणे शक्तास्तस्य गर्भस्य ता दिशः। ततस्ताभिः सृजः सोमोनिष्पपात वसुन्धराम्। पतितं सोममालोक्य ब्रह्मा लोकपितामहः। रथमारोपयामास लोकानां हितकाम्यया। स तेन रथमुख्येन सागरान्तां वसुन्धराम्। द्विः सप्तकृत्वो ह्युद्धिश्चकारावे प्रदक्षिणम्। तस्य यत् स्रावितन्तेजः पृथिवीमन्वपद्यत। तेनौषध्यः समुद्भूता याभिः सन्धार्यते जगत्। स तेजस्वी भगवान् ब्रह्मणा वर्द्धितः स्वयम्। तपस्तेपे महाभाग! पद्मानां दशतोदश। अतिसक्तं समासाद्य चेलं परमपावनम्। संस्थाप्य त्रिदृशश्रेष्ठं चन्द्रेशाख्यं स्वनामतः। बीजोषधीनां तोयानां राजाऽभूद्द्विजजन्मनाम्। प्रसादाद्देवदेवस्य विश्वेशस्य पिनाकिनः। तत्र कृष्णं विधावेकमस्रतोदमिति श्रुतम्। यस्यास्रपानस्नानाभ्यां नरोऽज्ञानात् प्रमुच्यते। तुष्टेन देवदेवेन स्वमौलौ योषितः सदा। आदाय तत्कलामेकां जगत्सञ्जीवनीं पराम्। पद्माद्भुतेन यत्नोऽपि सासान्ते चयमाप च। आप्यायतेऽसौ कलया पुनरेव नवा शशी। स तत् प्राप्य महद्राज्यं सोमः सोमवतां वरः। राजसूयं समाजह्रे सहस्रशतदक्षिणम्। दक्षिणामददत् सोम स्त्रिलोकानिति नौ श्रुतम्। तेभ्यो ब्रह्मर्षिसङ्घेभ्यः सदस्येभ्यश्च भोद्विज!। हिरण्यगर्भो ब्रह्मात्रिर्भृगुर्वसिष्ठोऽभवत्। सदस्योऽभूद्धरिस्तत्र यज्ञभिर्भुनिभिर्वृतः। तं सिनी च कुहूश्चैव द्युतिः पुष्टिः प्रभा वसुः। कीर्त्तिर्धृतिश्च लक्ष्मीश्च नव देव्यः सिषेविरे। उमया सहितं रुद्रं सन्ध्याध्वरकर्मणा। प्राप सोमरतिं ख्यातिं दत्तां सोमेन शम्भुना। तत्रैव तप्तवान् सोमस्तपः परमदुष्करम्। तत्रैव राजसूयञ्च चक्रे चन्द्रेश्वराग्रतः। तत्रैव ब्राह्मणैः प्रीतैरित्युक्तोऽसौ कलानिधिः। सोमोऽस्माकं ब्राह्मणानां राजा त्रैलोक्यदक्षिणः। तत्रैव देवदेवस्य विलोचनपदक्षतः। शम्भुना प्रीतमनसा त्रैलोक्याह्लादहेतवे। त्वं ममापि परा मूर्त्तिरित्युक्तस्तपोबलात्! जगत्तोदर्यं प्राप्य भविष्यति सुखोदयम्। त्वत्पीयूषमयैर्हृद्यैः स्रुतमेतच्चराचरम्! भानुतापपरीतञ्च परां म्लानिं विहास्यति"।

"इति दत्त्वा वरान् शम्भुस्तत्रैव चन्द्रमसे द्विज!। अन्तर्हितो महेशानस्तस्मिन् वेधेश्वरे पुरे। तदारभ्य च लोकेऽस्मिन् द्विजराजाऽधिपोऽभवत्"। तस्य मासमध्ये दक्षशापात् क्षयवद्धौ पाद्मे स्वर्गखण्डे उक्ते यथा "अश्विन्याद्यास्तु दक्षस्य उपयेमे सुता विधुः। रोहिण्यां सैव सततं वल्लभेमा रराम ह। ऊढा तदितरास्तातु तप्ताः पितरमब्रुवन्। अस्माकं कामदस्तात! जामाता तव रोहिणीम्। रमत्येव सततं तेन तप्ता वयं पितः!। तत् श्रुत्वा चाप्रियं दक्षः सोममाह मजस्व भोः। प्रेम्णा समेन सर्वासु त्वं दुहितृष्मम मानद!। अन्यथा ते ह्यहोनैव सोमः सप्रेम रोहिणीम्। तदैव रमयामास सुता दक्षश्चकोप ह। शशाप तेन भविता यक्ष्मीणोऽन्यथा क्षयः। यक्ष्मणा च परिग्रस्तो भव त्वं क्षीणरेतकः।

अथ त्वमिते तस्मिन् सर्व्वाशाः सहिताः स्त्रियः। पितरं शरणं प्राप्ताः क्षीयते नः पतिः पितः!। न वयं तेन वर्त्तामो विना सुखनिराकृताः। उवाच दक्ष स्ताः सर्व्वा शापो मे नान्यथा भवेत्। मासमध्ये पञ्चमेकं वर्द्धतां स क्रमेण वै। क्षयं क्रमेण प्राप्नोतु पञ्चमेकं व्यवस्थया। एवं शापं वरञ्चैव लेभे तस्य व्यवस्थया। तथैव राजते व्योम्नि क्षयवृद्धी दधद्विधुः"। ज्योतिषोक्ततत्कारणन्तु एन्टशब्दे ६२२ पृ० दर्शितम्। २आह्लादजनकद्रव्यमात्रे त्रिका०। ३कर्पूरे ४स्वर्णे ५जले ६कास्यिल्ले पु० मेदि०। ७द्वीपभेदे शब्दमा०। ८विसर्गवर्णे तन्त्रसंकेतः चदि-दीप्तौ रक्। ९कमनीये त्रि० १०मधुर पिच्छे मेचके क्लेमच०। ११गोणसक्षापक्षे व्याडिः। अन्यपदलोपे १२चन्द्रगुप्ते रूपे च। "क्रूरग्रहः सकेतुः चन्द्रमसंपर्क्षमण्डलमिदानीम्" सुद्रारा०। "चन्द्रं गता पद्मगुणाश्च भुञ्जते" कुमा०। "वधूजनचन्द्रमधक्कार" माघः। "चन्द्रचन्दनरोलम्बरताद्युद्दीपनं मतम्" मा० द० तस्य शृङ्गाररसोद्दीपकत्वसङ्गम्। स्वर्णे "चन्द्ररथः "होता मनुद्रः शत्रुयच्चन्द्ररथः" ऋ०१।१३१।१२।१३द्वीरजे। चन्द्राधिष्ठातृके १४मृगशिरोनक्षत्रे १५एकाङ्के च।

चन्द्रक पु० चन्द्र इव कायति कै-क। मयूरपुच्छस्थे चन्द्राकारे १पदार्थे अमरः। २नखे शब्दच० ३मत्स्यभेदे (चाँदा) राजनि०। "चन्द्रकस्वनभिद्यन्दी मधुरो बलवर्द्धनः" राजनि० तद्युक्ताऽऽख्याः। स्वार्थे क। ४चन्द्रशब्दार्थे जले पतितस्य चन्द्रांशस्य चन्द्राकारे ५मण्डले च "यां चन्द्रकैर्मेदुजलस्य सङ्गतैर्नीताम्" माघः। ६सितमरिचे न० राजनि० ७शिग्रुवीजे न० शब्दार्थचि० चन्द्रकोजातोऽस्य तारका० इतच्। चन्द्रकित जातचन्द्रके त्रि०।

चन्द्रकला स्त्री इत०। चन्द्रमण्डलस्य षोडशभागैकभागे तासां नामानि कलाशब्दे १७८४पृ० दर्शितानि तिथिभेदे स्त्रीणां देहांशभेदे स्थितानां तासां नामभेदाश्च कामशास्त्रे उक्ता यथा

"पुषा यशा सुमनसा रतिः प्रीतिस्तथा धृतिः। ऋद्धिः सौख्या मरीचिश्च तथा चैवांशुमालिनी। अङ्गिरा शशिनी चेति कलाः सम्पूर्णमण्डलौ। तडिच्चैवामृता चेति कलाः सोमस्य षोडश"।

चन्द्रकवत् पुंस्त्री चन्द्रकोऽस्यास्य मतुप् मस्य वः। मयूरे "प्रावृड्वत् सपदि चन्द्रकवान् द्रुमाद्यात्" माघः। स्त्रियां ङीप्।

चन्द्रकाटुकि पु० प्रवरभेदे क्षेमा० ब्र० ख० मूलं द्रष्टव्यम्।

चन्द्रकान्त पु० चन्द्रः कान्तोऽभीष्टो यस्य। स्वनामख्याते १मणिभेदे तद्दर्शने हि तस्य जलस्रावात् तत्कान्तत्वम्। २कैरवे, ३श्रीखण्डचन्दने च न०। ४रात्रौ, ५ज्योत्स्नायां, स्त्री मेदि० ६चन्द्रकोशायां, चन्द्रपत्न्यां स्त्री क्षेमच०। "चन्द्रकान्तोद्भवं वारि पित्तघ्नं विमलं स्मृतम्" सुश्रु०। "सायं शशाङ्किरणाहृतचन्द्रकान्तः" "इह तस्यामल वपुरिदं चन्द्रकान्तानुसारि" अमरः०। "चन्द्रकान्ताभिधा रौ तौ विरामः खराष्टौ" छ० र० टी० उक्ते षष्ठदशाक्षरपादके ७वृत्तभेदे स्त्री। "दलक्षणाकल चन्द्रकेतुराजधान्यां स्त्री चन्द्रकेतुशब्दे द्रष्टव्यम्।

चन्द्रकान्ति न० चन्द्रस्येव कान्तिरस्य शुक्लत्वात्। १रजते रूप्ये, हेत०। तद्गुणादि भावप्र० उक्तं यथा

"त्रिपुरस्य वधार्थाय निर्दहद्भिर्विलोचनैः। निरीक्षयामास शिवः क्रोधेन परिपूरितः। ऊष्मिस्तत्क्षणमपतत्तस्यैकस्माद्विलोचनात्। ततोरुद्रः समभवद्वैश्वानर इव ज्वलन्। द्वितीयादपतद्यस्तद्विन्दुस्तु वामकात्। तस्माद्रजतसत्यत्वसत्कर्म्मसु योजयेत्। क्षत्रियस्य भवेत्तद्धि वङ्गादिरसयोगतः। रूपन्तु रजतं तारचन्द्रकान्ति सितप्रभम्। गुरुस्निग्धं मृदु श्वेतं दाहे छेदे घनचयम्। वर्णाढ्यं चन्द्रवत् स्वच्छं रूपं नवगुणं शुभम्। कठिनं क्षतिमं रूक्षं रक्तं पीतं दलं लघु। दाहच्छेदघनैर्नष्टं रूप्यं दुष्टं प्रकीर्त्तितम्। रूप्यं शीतं कषायाम्लं स्वादु पाकरसं सरम्। वयसः स्थापनं स्निग्धं लेखनं वातपित्तजित्। प्रमेहादिकरोमांस नाशयत्यचिरादुध्रुवम्। तारं मेरी रस करोति तारं विद्धं वनं वलं यक्ष्मति शुक्लनाशम्। वीर्य्यं बलं हन्ति तनोत्य पुष्टिं महाशदान् शोषयति क्षयुक्तम्"। चन्द्रस्य २दीप्तौ [ स्त्रियां ङीप्।

चन्द्रकिन् पु० स्त्री चन्द्रकोऽस्यास्य इनि। मयूरे त्रिका०

चन्द्रकुण्ड पुंन० इत०। कामरूपस्थे चन्द्रलते कुण्डभेदे चन्द्रकुण्डशब्दे द्रष्टव्यम्।

चन्द्रकूट पु०कामरूपस्थे पर्व्वतभेदे तत्कथा कालिका०८१अ० "पूर्व्वं वायुगिरेः शैलचन्द्रकूट इति स्मृतः। त्रिकोणाकारसङ्काशस्तदूर्द्धे चन्द्रमण्डलम्। द्वितीयवर्गसाद्यन्तु विन्दुभ्यामलङ्कृतम्। चन्द्रबीजमिति प्रोक्तं तेन चन्द्रं प्रपूजयेत्। यद्यपि प्रतिदर्शे तु पर्व्वतं तं निशापतिः। प्रदक्षिणीकरोत्येव दयमीरश्मिभिः

र्युतः। तस्यैव पूर्व्वभागे तु सोमकुण्डाह्वयं सरः। तत्र स्नात्वा च पीत्वा च नरः कैवल्यमश्नुते। स्वर्गोदभवत्तवन्द्रः कामाख्यासेवने यदा। तदा तद्भ्रिसंघात निःसृतास्तोयराशयः। तैस्तोयैर्व्वामवः कुण्डमकरोदिन्द्रचन्द्रयोः। मध्ये पुण्यतमस्थाने स्वयं ब्रह्म शिलोपरि। चन्द्ररश्मिसमुद्भूत! चन्द्रकुण्डमहोदधेः। सुधास्रवण! साह्लाद! त्वं चन्द्र! कलुषं हर। इत्यनेन तु मन्त्रेण स्नातस्तत्र चन्द्रमायसि। चन्द्रकूटं समारुह्य पूजयेद्देवमुत्तमं नरः। अविच्छिन्ना सन्ततिस्तु सुकान्ता तस्य जायते। परत्र चन्द्रभवनं भित्त्वा याति परं पदम्। तीरे तु चन्द्रकूटस्य नन्दनो नाम वै गिरिः। तस्मिन् वसति शक्रस्तु कामाख्यासेवने रतः। स्वयम्भुवं समासाद्य सर्व्वदेवेश्वरो हरिः। सेवितुं त्रिदशेशानीं सततं वर्त्तते नरः। चन्द्रकूटस्य तु गिरेर्नन्दनस्य तथा गिरेः। प्रतिदर्शं तथा चन्द्रः पूर्द्धक्षयति निधा। चन्द्रकुण्डजले स्नात्वा समारुह्याथ नन्दनम्। आराध्य शक्रं लोकेशं महाफलमवाप्नुयात्"।

**चन्द्रकूप** पु० चन्द्रस्यतः कूपः। काशीस्थे कूपभेदे। "चन्द्रकूपजले स्नात्वा जयाह्न नियमं व्रती" काशीख० १०अ०।

**चन्द्रकेतु** पु० भारतप्रसिद्धे १सौवलानुचरे सैन्यभेदे "शत्रुञ्जयं चन्द्रकेतुं महासेनं सुवर्च्चसम्। सूर्य्यभासञ्च पञ्चैतान् कृत्वा व्यूहं सौबलम्" भा० द्रो० ४८अ०। २सत्यवाहनजभेदे। तस्य देशभेदे राज्याभिषेककथा रामा० उ० १२सः "इमौ कुमारौ सौमित्रे! तव धर्म्मविशारदौ। अङ्गदचन्द्रकेतुश्च राज्यार्थे दृढविक्रमौ। इमौ राज्येऽभिषेक्ष्यामि देशः साधु विधीयताम्। रमणीयोऽङ्गदावासो रमेतां यत्र धन्विनौ। न राष्ट्रां यत्र पीड़ा स्यात्राशश्चाप्यां विनाशनम्। स देशो दृश्यतां सौम्य नापराध्यामहे वयम्। तथोक्तवति रामे तु भरतः प्रत्युवाच ह। स्वयं कारुपथो देशो रमणीयो निरामयः। निवेश्यतां तत्र पुरमङ्गदस्य महात्मनः। चन्द्रकेतोः सुरुचिरं चन्द्रकान्तं निरामयम्। तद्राज्यं भरतेनोक्तं प्रतिजग्राह राघवः। तच्च त्वा वशे देशमङ्गदस्य न्यवेशयत्। अङ्गदीया पुरी रम्याथाङ्गदस्य निवेशिता। रमणीया सुगुप्ता च रामेणाक्लिष्टकर्म्मणा। चन्द्रकेतोश्च मल्लस्य मल्लभूम्यां निवेशिता। चन्द्रकान्तेति विख्याता दिव्या स्वर्गपुरी यथा। ततोरामः परां प्रीतिं लक्ष्मणो भरतस्तदा। यथुर्द्वे दुराधर्षावभिषेकञ्च चक्रिरे। अभिषिच्य कुमारौ द्वौ प्रस्थाप्य सुसमाहितौ। अङ्गदं पश्चिमां भूमिं चन्द्रकेतुमुदङ्मुखम्। अङ्गदस्यापि सौमित्रिर्लक्षणोत्तुजगाम ह। चन्द्रकेतोस्तु भरतः पार्ष्णिग्राहो बभूव ह"। [श्रमावास्यायाम् मेदि०।

**चन्द्रचय** पु० चीयतेऽस्मिन् चि-आधारे अच्। हृत०।

**चन्द्रगिरि** पु० चन्द्रकूटाख्ये पर्व्वतभेदे

**चन्द्रगुप्त** पु० मौर्य्यवंश्ये राजभेदे तद्राज्याभिषेककथा दुष्टत्वकथायां विस्तरतो दृश्या। "नव नन्दान् द्विजः कश्चित् प्रपन्नानुद्धरिष्यति। तेषामभावे जगतीं मौर्य्या भोक्ष्यन्ति वै कलौ। सएव चन्द्रगुप्तं वै द्विजो राज्येऽभिषेक्ष्यति" भाग० १२।१।७। श्रो०। "द्विजः कश्चित् चाणक्यः" श्रीधर० "ततोऽपि द्विसहस्रेषु दशाधिकशततये। भविष्यं नन्दराज्यञ्च चाणक्योयान् हनिष्यतीति" स्कन्दपुराणैकवाक्यत्वात् तत्रायता।

**चन्द्रगृह** न० हृत०। कर्कराशौ। चन्द्रमन्दिरादयोऽप्यत्र

**चन्द्रगोल** पु० चन्द्रस्य गोलः। गोलाकारे चन्द्रमण्डले

**चन्द्रगोलस्थ** पु० ब०व०। चन्द्रगोले तिष्ठन्ति स्था-क। चन्द्रलोकस्थेषु स्वधाभोजिषु पितृलोकेषु त्रिका०। "विषूवद्भागे पितरोवसन्ति" सू०सि०उक्ते स्वां तथात्वम्।

**चन्द्रगोलिका** स्त्री चन्द्रगोलः साधनत्वेनास्त्यस्य ठन्। ज्योतिष्कायां हेम०।

**चन्द्रचञ्चल** पु० चन्द्र इव चञ्चलः। (खलिसा) १मत्स्यभेदे जटा०। (चाँदा) २मत्स्ये स्त्री शब्दर०।

**चन्द्रचार** पु० चन्द्रस्य चारः गतिभेदः। चन्द्रमण्डलस्य राशिविशेषे गतौ तत्फलम् इन्दुशब्दे ८२१पृ० उक्तम्

**चन्द्रचूड** पु० चन्द्रः चूडायाम् यस्य। चन्द्रशेखरे शिवे।

**चन्द्रज** पु० चन्द्रात्जायते जन-ड। बुधे चन्द्रजातादयोऽत्र। इन्दुजशब्दे ८२४पृ० दृश्यम्। "रौद्रादीनि मघान्यृक्षाण्यृक्षे चन्द्रजे प्रजापीड़ा" बृ०स०७।३।

**चन्द्रतापन** पु० दानवभेदे। "श्वेतगीर्थचन्द्रकुतुचन्द्रतापनः" हरिवं० २४०अ० दानवोक्तौ

**चन्द्रदार** पु० ब० व० हृत०। अश्विन्यादिषु १दक्षकन्यासु चन्द्रकलत्रेषु २तत्सामनक्षत्रेषु च।

**चन्द्रदेव** पु० भारतप्रसिद्धे कुरुदलस्थे नृपभेदे "शत्रुञ्जयं क्षिणत्तांसम् (कर्णम्) इत्युपक्रमे" "शत्रुसेनचन्द्रदेवोमित्रदेवः सुतञ्जयः" "शत्रुञ्जयञ्च विंशत्या चन्द्रदेवं तथाष्टभिः" इति च भा० क० २७अ०।

**चन्द्रद्युति** पु० चन्द्रस्य द्युतिरिव द्युतिरस्य। चन्दने

भावप्र० चतुर्दशशब्दे दृश्यम् ६त०। २चतुर्दश प्रकाशे स्त्री

**चन्द्रनाभ** पु० चन्द्रोनाभौ यस्य संज्ञायाम् अच्। भारतप्रसिद्धे दानवभेदे। "सूर्यनाभश्च विक्रान्तश्चन्द्रनाभश्च भारत!" हरिवं० ३२४अ० दानवोक्तौ।

**चन्द्रनामन्** पु० चन्द्रस्य नामान्येव नामान्यस्य। कर्पूरे शब्दार्थचि०। चतुर्दशसंज्ञचतुर्दाङ्कवादयोऽप्यत्र

**चन्द्रपाद** पु० ६त०। चन्द्रकिरणे। "नियमितपरिखेदा तस्करश्चन्द्रपादैः" कुमा०। चन्द्रचरणादयोऽप्यत्र।

**चन्द्रपुत्र** पु० ६त०। बुधे चन्द्रनन्दनादयोऽप्यत्र।

**चन्द्रपुष्पा** स्त्री चन्द्र इव श्वेतं पुष्पमस्याः। श्वेतकण्टकार्य्याम् राजनि०।

**चन्द्रप्रभ** पु० चन्द्रस्य प्रभेव प्रभाऽस्य। १जैनभेदे हेम०। "क्षमिरिपुदहनव्योमत्रिफलाभरदारुचव्यभूनिम्बम्। भागधिमूलं सुस्तं सप्तदिवाभाश्चिकञ्चैव। लवणक्षार निशायुगकुसुम्भुरगजकरणातिविषाः। कर्षांशकान्येव समानि कुर्य्यात् पलाष्टकक्वाथजलोविदध्यात्। निष्पलपञ्चकस्य पुरस्य धीमान् पलद्वयं गौडरजस्तथैव। सितात्रिकं पलमत्र संग्राह्यमिदमुत्तमं त्रिसुन्धियुक्तम्। चन्द्रप्रभेयं गुटिका प्रयोक्ता चार्शांसि निर्यातयते प्रवेव। भगन्दरं पाण्डुरकामलाञ्च निर्नष्टवह्नेः कुरुते च दीप्तिम्। क्षत्यामयान् पित्तकफानिलोत्थान् नाडीगते मर्म्मगतव्रणे च। यन्मूत्रकृच्छ्रे विदरिराजयक्ष्मशोर्मे हे भगाख्ये प्रवले च योज्या। शुक्रक्षये चाश्मरिमूत्रकृच्छ्रे शुक्रप्रवाहेऽप्युदरामये च। भक्षस्य पूर्व्वं सततं प्रयोज्या तक्रानुपानं त्वथ मस्तुपानम्। आजोरसो जाङ्गलजो रसो वा पयोऽथ वा शीतजलानुपानम्। बलेन नागस्तुरगोजवेन दृष्ट्वा सुपर्णः प्रवणे वराङ्गः। बलीपलितनिर्मुक्तो वृद्धोऽपि तरुणायते। न पानभोज्ये परिहार्य्यमस्ति न शीतवातातपमैथुनेषु। शम्भुं समभ्यर्च्य कृतप्रसादेनाप्ता वटी चन्द्रप्रभः प्रासादादिति" रसबोधोक्ते गुटिकाभेदे स्त्री चक्रदत्तोक्ते श्वर्त्तिभेदे स्त्री तत्प्रकारो यथा "त्रिफलाकृष्णटाण्डत्वक्कासीसमवसोरजः। नीलोत्पलं विडङ्गानि फेनश्च सरितां पतेः। आजेन पयसा पिष्ट्वा भावयेत्ताम्रभाजने। सप्तरात्रं स्थितं भूयः पिष्ट्वा क्षीरेण वर्त्तयेत्। एषा दृष्टिप्रदा वर्त्तिरन्धस्याभिन्नचक्षुषः। चन्दनत्रिफलापूगपलाग्रतरुरोचिषैः। जलपिष्टैस्त्रियं वर्त्तिरक्षेर्तिमिरापहा। निशाद्वयाभयामांसीकृष्णतृष्णाविचूर्णिता। सर्वनेत्रामयान् हन्यादेतत् सौगतमञ्जनम्। द्योतपलाभयाकुष्ठताक्ष्यैर्वर्त्तिः कृता हरेत्॥ अर्बुदं पटलं काचं तिमिरास्राङ्गुनिस्तुतिम्। त्रूप्यर्क्षं त्रिफलावक्त्रसैन्धवालमनःशिलाः। क्षौद्रोपदेहकरञ्जी वर्त्तिः शस्ता कफापहा। एकगुणा भागधिका द्विगुणा च हरीतकी। सलिलापिष्टा वर्त्तिरियं नयनसुखार्म्मतिमिरपटलकाचाश्रुहरी। अञ्जनं श्वेतमरिचं पिप्पली मधुयष्टिका। विभीतकस्य मध्यन्तु शङ्खनाभिर्मनःशिला। एतानि समभागानि अजाक्षीरेण पेषयेत्। छायाशुष्कां कृतां वर्त्तिं नेत्रेषु च प्रयोजयेत्। अर्बुदं पटलं काचं तिमिरं रक्तराजिकाम्। अधिमांसं मलञ्चैव यश्च रात्रौ न पश्यति। वर्त्तिश्चन्द्रप्रभा नाम जातान्ध्यमपि शोधयेत्।"

**चन्द्रबाला** स्त्री चन्द्रस्य कर्पूरस्य बालेव तल्लगन्वितात्। १स्थूलैलायाम् राजनि०। अन्यत्स्थलमध्य दृश्यम्। २औषधभेदे ६त०। ३ज्योत्स्नायां ४चन्द्रपत्न्याञ्च।

**चन्द्रभस्मन्** न० चन्द्र इव शुभ्रं भस्म। कर्पूरे शब्दार्थचि०।

**चन्द्रभाग** पु० चन्द्रस्य भागोऽत्र। १पर्व्वतभेदे तत्र जातायाँ २नद्यां स्त्री। तयोः कथा कालि०पु० २०।२२अ० यथा "ऋषय ऊचुः। "चन्द्रभागा कथं सिन्धुस्तोत्पन्ना महागिरौ। कोटकेसरसंज्ञेन्द्र! इक्ष्वाकोश्चरितं वदम्। कथं स पर्व्वतश्चेक्षुचन्द्रभागाह्वयोऽभवत्। चन्द्रभागाह्वया कस्माच्चन्दी जाता ह्यधोदका। एतन्नः श्रोतुभावानां जायते कौतुकं महत्। माहात्म्यं चन्द्रभागायाः कासारस्य गिरेस्तदा। मार्कण्डेय उवाच। शृणुतां चन्द्रभागाया उत्पत्तिर्द्विजसत्तमाः!। युष्माभिश्चन्द्रभागस्य माहात्म्यं नाम कारणम्। क्षिप्तदुर्गिरिसंसक्तगतयोजनविस्तृतः। योजनत्रिंशतोच्छ्रायः कुन्देन्दुधवलोगिरिः। तस्मिन् गिरौ पुरा वेधाश्चन्द्रं शुद्धं सुधानिधिम्। विभज्य कल्पयामास देवार्थं स पितामहः। पितृभ्यश्च तथा तस्य तिथिद्वित्रियात्मकम्। कल्पयामास जगतां स्थिताय कमलासनः। विभक्तश्चन्द्रमा यस्मात् तस्मिन् पर्व्वतसत्तमे। ततो देवाश्चन्द्रभागं नाम्नाचक्रुः पुरा गिरिम्" कालि० पु० २०।२२अ०।

"मार्कण्डेय उवाच। "यत्र देवसभा भूता सानौ तस्य महागिरेः। तत्र जाता देवनदी शीताख्या वचनाद्विधेः। स्नापयित्वा यदा चन्द्रं शीतातोयैर्मनोहरैः। चन्द्रं

पपुर्ब्रह्मवाक्यात् सर्वे ते त्रिदिवौकसः। तदा सोतासत्वं चन्द्रस्नानयोगाच्च सामृतम्। भूत्वा निपतितं तस्मिन् हरहृल्लोहितसंज्ञके। तद्विद्वद्भं तदा तोयम् तस्मिन् सरसि निर्मलम्। तद्दृष्ट्वा स्वयं ब्रह्मा विद्वद्भं साधु मज्जलम्। तद्दर्शनाज्जलात्तस्मादुत्थिता कन्यकोत्तमा। चन्द्रभागेति तन्नाम विधिचक्रे स्वयं ततः। भार्यार्थे सागरस्यान्तु जयार्थं ब्रह्मसम्मते। तत्रैवाधिष्ठितं तोयं गदायेण निशापतिः। निर्भिद्य पश्चिमे पार्श्वे गिरिं तत्तु प्रवाहते। तत्सामृतजलं पित्वा हरहृल्लोहितसंज्ञकम्। कासारं सागरं जातं चन्द्रभागा नदी तु सा। सागरोऽपि तदा भार्यां चन्द्रभागां महानदीम्। तेन तोयप्रवाहेण निनाय भवनं स्वकम्। एवं तस्मिन् समुत्पन्ना चन्द्रभागाह्वया नदी। चन्द्रभागे महापुण्ये पुण्यैर्गङ्गासमा सदा"।

चन्द्रभूति न० चन्द्रस्येव भूतिः कान्तिरस्य। रजते राजनि० तस्य चन्द्रतुल्यकान्तिमत्त्वात् तथात्वम्। [ हेमच०।

चन्द्रमणि पु० चन्द्रप्रियोमणिः शाक० त०। चन्द्रकान्तमणौ

चन्द्रमण्डल न० ६त०। गोलाकारे बिम्बे चन्द्रस्य तन्नामादि इन्दुशब्दे ८१२ पृ० दृश्यम्।

चन्द्रमल्ली स्त्री चन्द्र इव मल्ली। वटपद्यां शब्दच०।

चन्द्रमस् पु० चन्द्रमाह्लादं मिमीते मि-असुन् मादेशः चन्द्रं कर्पूरं माति तुलयति मा-असुन् वा। १चन्द्रे २कर्पूरे च अमरः। "सितासितौ चन्द्रमसोन कथित्"ज्यो०त०। "राजैव हस्ती भूत्वा चन्द्रमसं भक्षयति"श्रुतिः। "क्रूरग्रहः सकेतुश्चन्द्रमसं पूर्णमण्डलमिदानीम्" सद्वारा०। तत्रेदमित्यण् चान्द्रमस तत्सम्बन्धिनि "तिथिश्चान्द्रमसं दिनम्" स्मृ० शि०। स्त्रियां ङीप्। "पद्माश्रिता चान्द्रमसीमभिख्याम्" कुमा०।

चन्द्रमा स्त्री चन्द्रेण मीयते मा-घञर्थे क। नदीभेदे। "कौशिकी मिश्रपा शोणं वाहुदामव चन्द्रमाम्" भा० भी० ६अ० भारतवर्ष नदीकथने।

चन्द्रमौलि पु० चन्द्रो मौलावस्य। महादेवे इन्दुमौलि शब्दे ८२६ पृ० दृश्यम्। "चन्द्रमौलिः सदाशिवः" विष्णुधर्मो०।

चन्द्ररसा स्त्री चन्द्र इवाह्लादको रसोऽस्याः। भारतवर्षस्थे नदीभेदे। "चन्द्ररसा ताम्रपर्णीत्यादि" भाग०५।१९।१८। नद्युक्तौ "तत्रचन्द्ररसा ताम्रपर्णादयः" भाग०४।२।३१।

चन्द्ररेखा स्त्री ६त०। चन्द्रस्य मण्डलस्थचक्ररेखाभेदे २अप्सरोभेदे च "चन्द्ररेखा तिलोत्तमा" कालीख०८अ०। ३वाक्यचोदतायाम् राजनि०। ४चन्द्रशेखरसङ्ज्ञायां चन्द्रशेखरशब्दे दृश्यम्। "नसरयुगलैश्चन्द्ररेखर्क्षलोकैः" ह० र० टी० उक्ते ५छन्दोभेदे च

चन्द्ररेणु पु० चन्द्रस्याह्लादकोरेणुरत्र। काव्यचौरे त्रिका०।

चन्द्रला स्त्री कर्णाटदेशख्याते १देवीभेदे २तत्स्थाने च शब्दार्थचि०

चन्द्रलेखा स्त्री चन्द्रं तत्कान्तिं लिखति लिख-अण् उप० स०। (झाकुच्) ख्याते १लताभेदे राजनि०। ६त०। २चन्द्ररेखायाम्। "सौमोयौ चेद्भवेतां सप्ताष्टकैश्चन्द्रलेखा"छन्दोम० उक्ते षड्दशाक्षरपादके २छन्दोभेदे च।

चन्द्रलोहक चन्द्र इव शुभ्रं लोहकं धातुद्रव्यम्। रजतधातौ राजनि०।

चन्द्रवंश पु० ६त०। चन्द्रस्य सनानादिपरम्परायां स च हरिवं २१अध्यायादौ उक्तः। तत्र भवः यत्। चन्द्रवंश्य तद्वंशोद्भवे त्रि०। [ द्वादशाक्षरपादके छन्दोभेदे।

चन्द्रवर्त्तन् न० चन्द्रवर्त्म निदगदन्ति वनभसैः ह० र० उक्ते

चन्द्रवल्लरी स्त्री ६त०। सोमलतायाम् भरतः।

चन्द्रवल्ली स्त्री चन्द्र इव वल्ली सुधातुल्यमधुस्रावित्वात्। १माधवीलतायाम् राजनि०। २सोमलतायां च।

चन्द्रविन्दु पु० चन्द्रः अर्द्धचन्द्रयुक्तोविन्दुः। अर्द्धचन्द्राकारोपरिगतविन्दुरूपसन्निवेशरूपे वर्णभेदे।

चन्द्रविहङ्गम पुंस्त्री चन्द्र इव अर्द्धाङ्के शुभ्रः विहङ्गमः। (शङ्खचिल)पक्षिणि खगे त्रिका०। स्त्रियां जातित्वात् ङीष्

चन्द्रव्रत न० चन्द्रस्य चन्द्रलोकप्राप्तये व्रतम् नियमः। चान्द्रायणसंज्ञके व्रते। चान्द्रायणशब्दे दृश्यम्।

चन्द्रशाला स्त्री चन्द्रः शालेवाधारो यस्याः। १ज्योत्स्नायाम् त्रिका०। चन्द्र इव शाला उच्छ्रितत्वात्। २प्रासादोपरिस्थे गृहे (चिलेघर) हारा०। "विपद्गतः शुभ्रकचन्द्रशालाः" रघुः। "गृहराजः श्वेतशुक्लिचन्द्रशाला भवेद्यदा" "बहुरुचिरचन्द्रशाला षड्भिः पञ्चभौमश्च" ह० सं० ५६अ०। ततः स्वार्थे क। चन्द्रशालिका १घटयां त्रिका०।

चन्द्रशिला स्त्री चन्द्रप्रिया शिला शाक०मध्यप०स०। चन्द्रकान्ते प्रस्तरभेदे। "प्रह्लादिता चन्द्रशिलेव तूर्णम्" भट्टिः।

चन्द्रशु(सु)र पु० चन्द्रे तच्छैत्यिके रोगे शु(सु)र इव। चादसुर) (झाउ) इति च ख्याते वृक्षभेदे तत्फले न०" भावप्र०। "चन्द्रशु(सु)रं क्षितं क्षिकावातश्लेष्मातिसारिणाम्"। तद्गुणा उक्ताः

चन्द्रशेखर पु० चन्द्रः चन्द्रकला शेखरेऽस्य । १महादेवे इन्द्रभच्छब्दे ८३५ पृ० दृश्यम् । "रुद्रस्तुपाक्षभवत चन्द्रशेखरः" कुमा० । चन्द्रयुक्तः शेखरोऽस्य । २पर्व्वतभेदे । ३पौष्यनृपपुत्रे करवीरपुराधीशे नृपभेदे कालिका पु० ४६ अ० तत्कथा यथा

"ततः पुत्रार्थिनं भूपं प्रसन्नो दृषभध्वजः । प्रह्लादत्तफलं तस्मै ददौ तत्वेदं तमुवाच ह । ईश्वर उवाच । इदं फलं प्रह्लादत्तं विभज्य नृपते ! त्रिधा । भोजयैताः स्वजायास्त्वं प्रहृष्टः सुस्थमानसः । ततः प्रहृष्टे भवत एतासु ऋतुसङ्गमे ॥ आधास्यन्ति च गर्भांस्तु भार्य्यास्ते युगपद्नृप ! । काले प्राप्ते च युगपत् प्रसवो योषितां तव । भविष्यति नृपश्रेष्ठ ! तदेवं त्वं करिष्यसि । एकस्या जठरे शीघ्रं भार्य्यायास्ते भविष्यति । अपरस्यास्तथा कुक्षौ मध्यभागो भविष्यति । अधोनाभ्यास्तु यो भागः सोऽपरस्यां भविष्यति । ततः खण्डत्रयं भूप ! यथास्थानं पृथक् पृथक् । योजयिष्यसि पश्चात्ते पुत्र एको भविष्यति । तस्य शीर्षं चन्द्ररेखा सहजा संभविष्यति । तेनैव नाम्ना सा ख्यातिं गमिष्यति च भूपते ! ।" इत्युपक्रमे "इत्युक्त्वा स महादेवस्तासां गर्भान् स्वयं तदा । संस्कर्तुं जाह्नवीतोयमात्मनः शिरसो न्यधात् । ततःफले स्वयं देवः प्रविवेश वृषध्वजः । तत्क्षणात् तत्फलं भूतं त्रिभागं स्वयमेव ह । पौष्यस्तत्फलमादाय मुदितः सह भार्य्यया । प्रययौ मन्दिरं हृष्टोत्थानुत्थाप्य वृषध्वजम् । ततः समुचिते काले प्राप्ते तासु भवितम् । तत् फलं नृपशार्दूलात् गर्भाधायाश्चितास्तुभाः । सम्भूवं गर्भकाले तु गर्भेभ्यः समजायत । खण्डत्रयं पृथक् राजा यथा गर्भेषु भाषितम् । तच्च खण्डत्रयं पौष्यो यथास्थानं नियोज्य च । एकं पिण्डं चकारासु तत्र पुत्रो व्यजायत । तस्य शीर्षे तदा राजन् सहजेन्दुकला शुभा । विरराज यथा स्वच्छा शरत्काले कला विधोः । तं सर्वलक्षणोपेतं पौष्यरक्षं सुनायिकम् । विशालशीर्षं विशालाक्षं दीर्घायतभुजं तदा । दृष्ट्वा पौष्यो मुदं भार्य्याभिस्तिसृभिः सह संसदम् । लेभे दरिद्रः सत्कोषं प्राप्येव विपुलं ततः । तस्य ग्रामाकरोद्राजा ब्राह्मणैः स्वैः पुरोहितैः । चन्द्रशेखर इत्येवं ज्ञात्वा चन्द्रं सदा समः । वहये स महाभागः प्रत्यहं चाम्बरोच । वह्नाभिरिव तेजस्वी शरदीव निशाकरः । एवं तिसृणामम्बानां गर्भे जातो बलोत्तरः । ऋतस्नप्रस्वकनामाऽभूत् प्रथितो लोकदेवयोः" इत्युपक्रमे "सर्व्वां क्षितिं वशे चक्रेऽमात्यैः स चन्द्रशेखरः । सार्वभौमो नृपोभूत्वा राजभिः परिसेवितः । अमरैरिव देवेन्द्रो विजहार शिवा युतः । एवं पौष्यसुतो भूत्वा त्र्यम्बकः प्राप्य निर्वृतिम् । ब्रह्मावर्त्तान्तरे रम्ये करवीराह्वये पुरे । इक्षुनदीनदीतीरे राजा भूत्वा समोदत" । "अनविंशतिवर्षाणि सिद्धिदश्चन्द्रशेखरः । कथितः केन्दुके ताले भवेत् ग्रहकारवीरयोः" संगी० दा० उक्ते ४भुवकभेदे । ५चट्टलदेशस्थमहापीठे हतस्थे भैरवभेदे "चट्टले दक्षबाहुर्मे भैरवश्चन्द्रशेखरः । सर्व्वरूपा भगवती भवानी तत्र देवता" । "विशेषतः कलियुगे वसामि चन्द्रशेखरे" तन्त्रचूडामणिः । [ स्त्री शब्दच० ।

चन्द्रसम्भव पु० चन्द्रः सम्भवोऽस्य । १बुधे । २चन्द्रहैलायाम्

चन्द्रसेन पु० चन्द्रा आह्लादिका सेनाऽस्य । भारतप्रसिद्धे वसुद्रसेनपुत्रे राजभेदे "वसुद्रसेनपुत्रश्च चन्द्रसेनः प्रतापवान्" भा० आ० १८६अ० । "जघान च (द्रोणिः) द्रुपदस्य चन्द्रसेनञ्च मानिनम्" भा० द्रो० १५६अ० । "वसुद्रसेनं निर्जित्य चन्द्रसेनञ्च पार्थिवम्" भा० स० २९अ० । भीमप्राचीविजये ।

चन्द्रहन् पु० चन्द्रं हतवान् हन-क्विप् । १दानवभेदे राहौ "एकाचन्द्रहा राहुः संहारो ग्रहनक्षतम्" हरिवं० ४२अ० । श्वेतगौरश्चन्द्रहृत्चन्द्रहा चन्द्रतापनः २४०ह० ।

चन्द्रहनु पु० चन्द्र इव हनुरस्य । दानवभेदे चन्द्रहन् शब्दे उदा० ।

चन्द्रहन्तृ पु० चन्द्रं हन्ति हन-तृच् हृत० । असुरभेदे भारतयुद्धकाले सएव गुनकन्दपरूपेण प्रादुर्भूतः । यथाह भा० आ० सम्भ० ६७अ० । "चन्द्रहन्तेति वक्ष्यन्ते कीर्त्तितः प्रवरोऽसुरः । गुनकोनाम राजर्षिः स बभूव नराधिपः" "चन्द्रहन्ता क्रोधहन्ता क्रोधवर्द्धन एव च" हरिवं० ४२अ० । दानवकथने

चन्द्रहास पु० चन्द्रवत् हासः प्रभाऽस्य, चन्द्रं हसति सितत्वात् हस-अच् वा । १खड्गे २रावणखड्गे च मेदि० । ३रौप्ये न० राजनि० । ४गुडूच्यां स्त्री राजनि० ।

चन्द्रा स्त्री चदि-आह्लादे रक् । १एलायां २वितानेचन्द्रातपे च शब्दरत्ना० ३गुडूच्यां शब्दार्थच० ।

चन्द्रांशु पु० चन्द्रस्यांशुरिवाह्लादकोऽंशुरस्य । १विष्णौ परमेश्वरे "अङ्गः सटाचरोमन्यचन्द्रांशुभास्करद्युतिः" विष्णुस० । "संसारतापनिर्लांशुतापतापितचेतसां पु-

न्द्रांशुरिवाह्लादकत्वात्" भा० । ६त० । २चन्द्रस्य किरणे च ।

चन्द्रातप पु० चन्द्रस्य आतो मनं ततः याति या–क । (चाँदोया) १वितानेचन्द्रस्य आतप इव किरणः । २ज्योत्स्नायाम् हेम० । "चन्द्रातपमिव रसतासुपेतम्" काद० । [तनयादर्योऽत्र ।

चन्द्रालज पु० ६त० । वुधे इनुडजग्रब्दे दृश्यम् । चन्द्र-

चन्द्रानन पु० चन्द्र इवाननमस्य । कार्त्तिकेये "अमोघस्कन्द षो रौद्रः शिवचन्द्राननस्तथा" भा० व० २२१ अ० । कार्त्तिकेयनामोक्तौ । २चन्द्र तुल्यवदने त्रि० ।

चन्द्रार्द्ध पु० ६त० । चन्द्रस्य कलारूपे भागे तुल्यभागार्द्ध परत्वे अर्द्धचन्द्र इत्येव ख्यात् । "भुजासक्तेन शुशुभे गजदन्तेन केशवः । चन्द्रार्द्धविम्बसंसक्तो यथैकशिखरो गिरिः" हरिवं० ८७अ० । "मोक्षयत्वम्बुजाक्षोऽन्दं चन्द्रार्द्धचूडे ! प्रभवति स महाघोरवाग्बन्धसंसे !" श्यामास्तवः ।

चन्द्रालोक पु० श्रीयुषवर्मकविकृते अलङ्कारग्रन्थभेदे । "चन्द्रालोकमसं स्वयं वितनुते श्रीयुषवर्मः कविः" इति इति तदारम्भवाक्यम् ।

चन्द्रावली स्त्री वृन्दावनस्थे गोपीभेदे । "राधाचन्द्रावली-सख्याः गोप्ता नित्यं प्रिया प्रजे । कृष्णचित्तसौन्दर्य वैदग्ध्यादिगुणाश्रयाः" उज्ज्वलमणिः । [ राजनि० ।

चन्द्रास्पदा स्त्री चन्द्र आस्पदं यस्याः । कर्कटशृङ्ग्राम् ।

चन्द्रिका स्त्री चन्द्रोऽस्यस्याः आश्रयत्वेन ठन् चदि–दीप्तौ रक् ततः स्वार्थे क वा । १ज्योत्स्नायाम् अमरः । २स्थूलैलायां(चाँदा) । ३मत्स्यभेदे ४चन्द्रभासानद्याञ्च शब्दर० । ५कर्पूरकोटालतायां ६कस्तिकायाम् । ७श्वेतकण्टकार्य्यां ८मेथिकायां ९स्थूलैलायां राजनि० । १०चन्द्रस्मरे भावप्र० । "मेघमुक्तविशदां स चन्द्रिकाम्" रघुः । "नवचन्द्रिका-कुसुमकीर्णतमः" माघः । "न कस्य कुरुते चित्तभ्रमं चन्द्रिका" सा० द० । चन्द्रि चन्द्रयुक्तं कं शिरोऽस्य ११शिवे पु० । "चन्द्रिकानुग्रभावेन कृता दत्तकचन्द्रिका" १२ज्योत्स्नाया इव आह्लादिकायां स्त्रियां स्त्री स्मृति-चन्द्रिका अलङ्कारचन्द्रिका इत्यादि ।

चन्द्रिकाद्राव पु० चन्द्रिकया द्रावोनिष्यन्दो यस्य । चन्द्र-कान्तमणौ राजनि० ।

चन्द्रिकापायिन् पुंस्त्री चन्द्रिकां पिबति पा–णिनि । चकोरपक्षिणि शब्दार्थचि० स्त्रियां ङीप् ।

चन्द्रिकाम्बुज न० चन्द्रिकेव शुभ्रमम्बुजम् । सितोत्पले राजनि० ।

चन्द्रिन् त्रि० चन्द्रोऽस्यस्य इनि । १चन्द्रयुक्ते "चन्द्रि-कानुग्रभावेण कृता दत्तकचन्द्रिका" २शुक्लवर्णयुक्ते च "चन्द्री यजति प्रचेताः" यजु० २०।२७। "चन्द्री सुवर्णमयः" वेददीपः । [२शालूके च मेदि० ।

चन्द्रिल पु० चन्द्र+वा० अस्यर्थे इलच् । १शिवे । २नापिते

चन्द्री स्त्री चदि–रक् गौरा० ङीष् । वाकुच्याम् राजनि० ।

चन्द्रेश्वर पु० चन्द्रसेविते काशीस्थे शिवमूर्त्तिभेदे चन्द्रशब्दे दृश्यम् । चन्द्रेशोऽप्यत्र लिङ्गपरत्वे न०

चन्द्रेष्टा स्त्री चन्द्र इष्टोयस्याः निशायाः वा षत्वनिपातः । उत्पलिन्याम् राजनि० ।

चन्द्रोदकुण्ड पु० चन्द्रेणतप्तदकं यत्र वा उदादेशः कर्म० । काशीस्थे कुण्डरूपे तीर्थभेदे "तथा चन्द्रोदकुण्डे च स्नात्वान्यानि पूर्व्वजाः" काशीख० १४ अ० ।

चन्द्रोदय पु० चन्द्रस्योदयः । विधोः प्राथमिकदर्शनयोग्य-स्थानेषु १प्रकाशे दिनेषु तिथिविशेषभेदस्थित्या तत्तिथिकृत्यं परिभाषितविशेषे ३६ वि० यथा

"प्रतिपद्यापराह्णिकत्रिमुहूर्त्तव्यापिन्यां द्वितीयायां चन्द्र दर्शनं सम्भाव्यते । तदुक्तमन्यत्राधानविषये उक्त-ज्ञातानयेन । "द्वितीया त्रिमुहूर्त्ता चेत् प्रतिपद्यापराह्णिकी । अन्यत्राधानं चतुर्थ्यां परतः सोमदर्शनादिति अपराह्णश्च षड्धा विभक्तस्याऽष्टमो भागः । ततश्च यत्र प्रतिपदि अपराह्णे त्रिमुहूर्त्तव्यापिनी द्वितीया तत्र चन्द्रदर्शनसम्भावनमिति"

सुखबोधोक्ते २औषधभेदे तत्पाकप्रकारो यथा सुखबोधे "पलं सदुग्धार्द्धदलं रसेन्द्रं पलाष्टकं षोडश गन्धकस्य । श्रोत्रैः सुजाषांसभवैः प्रसूनैः सर्वं विमर्द्याथ कुमारि-काद्भिः । तत्काचकुम्भे निहितं सुगाढे सदुकर्पटे सप्तदिवसत्रयञ्च । पचेत् क्रमाग्नौ सिकताक्षयन्त्रे ततोरजः पल्लवरागरम्यम् । निष्टङ्क चैतस्य पलं पलानि चत्वारि कर्पूररजस्तथैव । जातीफलं षोडशमिन्दु पुष्पं कस्तूरिकाया दश शाण एकः । चन्द्रोदयोऽयं कथितस्तु नाथो भुक्तोऽक्षिवह्नीदलमध्यवर्त्ती । मदोन्म-दानां प्रमदाशतानां गर्वापहत्वं त्वयतत्करोऽसे । एतं घनीभूतमतीव दुग्धं सदूनि मांसानि समस्तकानि । साधारणिष्टानि भवन्ति पथ्यान्यानन्दायोन्यपराणि चात्र । वलीपलितनाशनस्तनुकृतां वयःस्तम्भनः समस्त-

मदखण्डनः प्रचुररोगपञ्चानन:। मटङ्केषु रसराड्यं भवति यस्य चन्द्रोदयः सपञ्चशरदर्पितो मृगदृशां भवेद्दुर्लभः"। २चक्रदत्तोक्ते वर्त्तिभेदे स्त्री तत्प्रकारो यथा "हरीतकी वचाकुष्ठं पिप्पली मरिचानि च। विभीतकस्य मज्जा च शङ्खनाभिर्मनःशिला। सर्वमेतत् समं कृत्वा छागीक्षीरेण मेषयेत्। नाशयेत्तिमिरं कण्डूं पटलान्यर्बुदानि च। अधिकानि च मांसानि यश्च रात्रौ न पश्यति। अपि दिवापिकं पुंस्त्वं साधयेत्तेन साधयेत्। वर्त्तिश्चन्द्रोदया नाम नृणां दृष्टिप्रसादनी"।

चन्द्रोपल पु० चन्द्रप्रियः उपलः। चन्द्रकान्तमणौ हेमच० चन्द्रकिरणसंपर्कात् तस्य क्षरणात् तत्प्रियत्वम्।

चन्द्रौरस पु०ह्रस्व०। १वृषे "श्रौं न्यौ ल्रौ चेदिह भवति च चन्द्रौरसः" ह० र० टीकोक्ते चतुर्दशाक्षरपादके २वर्णवृत्तभेदे च

चप चूर्णीकरणे चु० उभ० सक० सेट् घटा०। चपयति-ते अचीचपत्-त। चिघातोरेव स्वार्थे णिचि तङ्प्रत्ययान्ये।

चप सान्त्वने भ्वा० पर० सक० सेट्। चपति अचापीत्-अचपीत्। णिचि चापयति।

चप गतौ पु०उभ०सक०सेट् इदित्। अम्पयति ते अचचम्पत्त

चपट पु० चपेट+पृषो०। (चड) चपेटे अमरटीका।

चपल न० चुप-मन्दायां गतौ कल उपधोकारस्याकारः। १शीघ्रे मेदि० २चञ्चले त्रि० हेमच०। ३पारदे ४मत्स्ये ५चातके ६प्रस्तरभेदे च पु० मेदि०। ७ज्वरे पु० राजनि०। ८तरले चञ्चले च त्रि० मेदि०। ९दोषमनिश्चित्य कर्मकारिणि त्रि०अम०। १०विकले त्रि० शब्दर०। ११लक्ष्म्यां स्त्री "निलयः श्रियः सततमेतदिति प्रथितं यदेव जलजन्मतया। दिवसात्ययात्तदपि सङ्गमहो चपलाजनं प्रति न चोद्यमदः" माघः। १२विद्युति १३ऊर्ध्वलक्ष्यां १४पिप्पल्याञ्च स्त्री मेदि०। १५जिह्वायां स्त्री शब्दच०। १६विजयायां १७मदिरायां स्त्री राजनि०। "नीचि नियतमिह यज्जपलो नियतः स्फुटं नभसि निम्नगासुतः" माघः "शैशवाच्चपलमध्यशोभत" रघुः। "न प्राणिपादचपलो न नेत्रचपलोऽनुजः" मनुः। औरुढा० ७त०। नेत्रचपलः। पादचपलः। श्वेखा० कृतादिभिः अभूततद्भावार्थे समासः। चपलकृतःचपलभूतः। विस्पष्टा० गुणवचनशब्दे परे तत्पुरुषे अस्य प्रकृतिस्वरत्वात् अन्तोदात्तता। चपलकटुकम्। प्रियादि०तस्मिन् परे पूर्वस्य न पुंवत्। प्रकाशमाना चपला विद्युत् यस्य प्रकाशमानाचपस्य इत्यादि। चपलस्य भावः ष्यञ् चापल्य न० त्व चपलत्व न० अनवस्थितत्वे "सहजचापलदोषसमुद्धतः" माघः। "मा चापल्यायेति गणात् न्यवेधीत्" कुमा०। "उभयार्द्धयोर्जकारो द्वितीयतृतीयौ गमध्यगौ यस्याः। चपलेति नाम तस्याः प्रकीर्त्तितं नागराजेन" ह० र० उक्ते आर्याविशेषे। टाप्। वृत्तभेदे स्त्री। स्वार्थे क। चञ्चले त्रि०। सुप्० अभूततद्भावार्थे क्यङ्। चपलायते अचपलावित्

चपलता स्त्री चपल-तल्। चाञ्चल्ये सा०द० उक्ते व्यभिचारिगुणभेदे। "सधृतिचपलतात्मलानिचिन्तावितर्काः" व्यभिचारिण उद्दिश्य "मातृसर्यङ्हेरागादेश्चापल्यमनवस्थितिः। तत्र भर्तृसनपारुष्यस्वच्छन्दाचरणादयः" इति लक्षित्वा "अन्यासु तावदुपभोगसहासु भद्र! लोलं विनोदय मनः सुमनोलतासु। सद्यःसजातरजसं कालिकामकाले व्यर्थं कदर्थयसि किं नवमालिकायाः" सा० द० उदाहृतम्।

चपलाङ्ग पु० चपलमङ्गमस्य। शिशुमारे जलजन्तुभेदे। हारा०। [र० उक्ते छन्दोभेदे।

चपलावक्त्रा न० "चपलावक्त्रमयुजोर्नकारखेत् पयोराशेः" ह०

चपेट पु० चप-घञर्थे क चपाय सान्त्वनाय एटति गच्छति एट-क। विस्तृताङ्गुलिके हस्ते (चापड़) स्त्रीत्वमीष्यते "खण्डिकोपाध्यायः शिष्याय चपेटां ददातीति" भाष्यप्रयोगात्। स्वार्थे क। अत्रैवार्थे अमरः।

चपेटी स्त्री भाद्रशुक्लषष्ठ्याम्। "प्रस्फुट्या हादशे मासि सम्पूज्यापत्यवत्सरे। सुते जाते तथा षष्ठ्यां प्रतीहादश रूपिणी। वैशाखे चान्द्रमी षष्ठी ज्यैष्ठे चारण्यसंज्ञिता। आषाढ़े कार्ष्मी श्रेया श्रावणे लुण्डनी मता। भाद्रे चपेटी विख्याता दुर्गाख्याश्वयुजे तथा। नाद्याख्या कार्त्तिके मासि मार्गे मूलकरूपिणी। पौषे मासफलरूपा च शीतला तपसि स्मृता। गोरूपिणी फाल्गुने च चैत्रेऽशोका प्रकीर्त्तिता,, स्कन्द० पु०

चप्य त्रि० चप-यत्वर्णान्तत्वात् कर्म्मणि यत्। उदमीवे। "चप्यं भवत्यन्नाद्यस्यावरुद्ध्यै" शत० ब्रा० १२.७।२।१२ "चप्यं न पायुभिरक्षम्" यजु० १६। ८८।

चम अदने भ्वा० प० सक० सेट्। चमति आचामति। विचमति। आचमीत् चचाम चेमतुः। उदित् चमित्वा चान्त्वा। आचान्तः। आचमनम् आचमनीयम्। "आचान्तः पुनराचामेत्" स्मृतिः। "मनाग् मन्योऽपि नाचामसि" प्रबोधच०। "चचाम मधु माध्वीकम्"

भट्टिः। णिचि चामयति। "इमां किमाचामयसे न चक्षुषी" नैष०।

**चम** भक्षे स्वादि० पैदिकः प० सक० सेट्। चम्नोति उदित् चमित्वा चान्त्वा। कविकल्पद्रुमे "कुक्षिवां गच्छ गत्वां चम् नृचम् जम् जिघ्र झम" इति वाक्ये "परोऽनुबन्धः पूर्वेषाम्" इति तत्कोक्तेः सर्वेषामुदित्त्वं तेन शब्दकल्पद्रुमे स्वादिगणीयस्य उदित्त्वादुक्तिः प्रामादिकी

**चमत्कार** पु०चमदित्यव्यक्तं क्रियते क-भावे घञ्। लोकातीतवस्तु दृष्ट्वा चित्तस्य आनन्दहेतौ १प्रकाशे विस्मये, "लोकोत्तरचमत्कारप्राणदश्च प्रमातृभिः"। "चमत्कारश्च चित्तविस्तारस्वरूपो विस्मयापरपर्य्यायः" सा० द०। "रसे सारश्चमत्कारः सर्वत्राप्यनुभूयते तद्भूतधर्म्मदत्त्वाद्यम्। "चमत्कारश्च लोकातीतार्थकत्वेन किमेतदितिज्ञान धाराजननेन चित्तवृत्तेः दीर्घविस्तारः। दृष्टहेतुभ्योऽस्माद्विलक्षणत्वज्ञानेन हेत्वन्तरानुसन्धानाय मनसोव्यापारभेद एव चित्तविस्तार इत्यन्ये। सुखविशेष एव चमत्कार इत्यपरे। चमत्कारत्वञ्च आह्लादगतो जातिविशेषः यथाह रसगङ्गाधरे "रमणीयार्थप्रतिपादकः शब्दः काव्यं रमणीयता च लोकोत्तराह्लादजनकज्ञानगोचरता लोकोत्तरत्वञ्च आह्लादगतचमत्कारत्वापरपर्य्यायोऽनुभवसाक्षिकोजातिविशेषः"इति। "इत्थं च चमत्कारजनकभावनाविषयार्थप्रतिपादक शब्दत्वं वत्प्रतिपाद्यार्थविषयकभावनात्वं चमत्कार जनकतावच्छेदकं तत्त्वं, स्वविशिष्टजनकतावच्छेदकार्थ प्रतिपादकतासंसर्गेण चमत्कारत्ववत्त्वमेव वा काव्यत्वमिति फलितम्" इति च। कर्त्तरि घञ्। २अपसारणे त्रिका०।

**चमर** पुंस्त्री चम-अरच्। १महिषाक्रतौ मृगभेदे, यस्य पुच्छेन चामराख्यं व्यजनं भवति, स्त्रियां जातित्वात् ङीष्। "कुर्वन्ति बालव्यजनेचमर्य्यः" "बालप्रियत्वं शिथिलं चमर्य्याः" कुमा०। "स्फुरति चानुवनं चमरीचयः" माघः। २दैत्यभेदे पु०। ३चमरबालजाते चामरे न०।

**चमरपुच्छ** पुंस्त्री चमरस्य पुच्छमिव पुच्छमस्य। (केकड़े) विशेषे १पशुभेदे। राजनि०। ङीप्। २चामरे न०

**चमरिक** पु० चमरमिव केशरोऽस्यस्य ठन्। कोविदारवृक्षे रत्नकाञ्चनारे वृक्षे अमरः

**चमरी** स्त्री चमरजातिस्त्री ङीष् चमरमिवाकारोऽस्यस्या अच् गौरा० ङीष् वा। १चमरजातिस्त्रियां चमरशब्दे उदा०। २मक्षिकायां मेदि०।

**चमस** पुंन० अर्त्तिचादि० चमत्यस्मिन् चम-असच्। १पलाशादिकाष्ठजाते यज्ञियपात्रभेदे तल्लक्षणभेदादिकं यज्ञपार्श्वे उक्तं यथा

"चमसानां तु वक्ष्यामि दारुजाः खुचतुरङ्गुलाः। तत्रैकस्तु भवेत्स्कन्धो विस्तारचतुरङ्गुलः। विकङ्कतमयाः सप्तावाग्विलाघवसाः कृताः। अन्येभ्यो वापि वा कार्य्यास्तेषां दण्डेषु लक्षणम्। होतुर्मस्तक एव स्याद्ब्रह्मणश्चतुरस्रकः। उद्गातृणां च तत्रिभिः स्कन्धाजमानः पृष्टः कृतः। प्रशास्तुरवतः स्यादुत्तरो ब्रह्मणश्चिनः। पोतुरग्रे विशाखौ स्याग्नेष्टुः स्याद्विष्टकृतकः। अच्छावाकस्य राज्ञश्च आग्नीध्रस्य मयूखकः। इत्येते चमसाः प्रोक्ता ऋत्विजां यज्ञकर्म्मणि। पलाशाद्या वटाद्यन्यतमाद्या चमसाः कृताः" कात्या० श्रौ० १।२।३६। सूत्रभाष्ये कर्कः "स च चमसश्चतुरश्रो द्वादशाङ्गुल दीर्घश्चतुरङ्गुलखातः सहस्रश्च भवति परिशिष्टात् सूत्रकारप्रत्यक्षाच्च। चमसवत्खुवेऽपीति खुवस्य चतुरस्रतां विधातुं चमसवदित्येव चमसस्य सिद्धां चतुरस्रतामाह" कात्या० श्रौ० २।३।१। "चमसवद्विशेषात्" शारी० सू०। "अर्वाग्बिलश्चमस" इति तद्ब्राह्मणप्रतीकतः। स्त्रीत्वमपि मेदि०। २सोमपानपात्रभेदे च। कर्म्मणि अच्। ३पर्पटे पिटकभेदे ४जङ्घाडके च पु० "चूर्णं यच्चुक्कमाषाणां चमसो सोऽभिधीयते" भावप्र० उक्ते (घूमसी) ख्याते ५माषचूर्णे च स्त्री गौरा० ङीष्।

**चमसिन्** पु०चमस+अस्त्यर्थे इनि। चमसयुक्ते स्त्रियां ङीप् ततः नडा० अपत्ये फक्। चामसायन तदपत्ये पुंस्त्री०

**चमसोद्भेद** पु० भारतप्रसिद्धे प्रभासान्तिकस्थे तीर्थभेदे। "ततस्तु चमसोद्भेदमच्युतस्थगमद्बली। चमसोद्भेद इत्येवं यं जनाः कथयन्त्युत" भा० शल्य० ३६अ०। "एष वै चमसोद्भेदो यत्राजग्मुः सरस्वती। यत्रैनामभ्यवर्त्तन्त सर्व्वाः पुण्याः सप्तस्रोतसः" भा०व० १३०अ०। चमसोद्भेदमयत्र न०"आत्मानं सरितश्चैव सरांसि च नराधिप!। चमसोद्भेदं विप्राक्षत्रापि कथयन्त्युत" ८८अ०। "स्नात्वा तु चमसोद्भेदे अग्निष्टोमफलं लभेत्" ८२अ०।

**चमीकर** पु० क्षतस्वराभिधे स्वर्णोत्पत्तिस्थाने शब्दार्थचि० यदोगात् स्वर्णं चामीकरमित्युच्यते।

**चमू** स्त्री चम-ऊ। सेनाभाते (गजाः ७२६, रथाः ७२६ अश्वाः २१८७, पदात्यः ३६४५), एतत्संख्याभेदान्विते सैन्यभेदे च अमरः। "अक्षौहिणीशब्दे ४६४० दृश्यम्।

"रज्ञाङ्गेनोनवशश्चिश्चता वाहनीनां चमूनाम्" भेद० । आधारे ज । २चमूसे स्त्री "द्रप्सा मधुमतीः"ऋ० १। १४।४। "चमूष्टः चमसादिपात्रेषु अवस्थिताः" भा० । ४द्यावापृथिव्योः द्वि० व० निघ०

**चमूचर** पु० चमूषु चरति चर-ट । २सैनिके शब्दार्थचि० ।

**चमूनाथ** पु० ६त० । सैन्याध्यक्षे "युवतिचमूनाथभोज्यवक्षोजाम्" इ० सं० १६च० । चमूपत्यादयोऽप्यत्र ।

**चमूरु** पुंस्त्री चम-ऊरु० ऊर पृषो० यत ऊत्वम् । मृगभेदे । "चकाशतं चारुचमूरुचर्म्मणा" माघः । "इदमूरुयुगं न चमूरुदृशः" प्रसन्नरा० ।

**चमूहर** पु० चमुं दैत्यसैन्यं हरति हृ-अच् । महादेवे "चमूहरः सुरेणव व्योमारिः शङ्करोभवः" भा० आनु० ६३च० शिवसाम्बौ । [पुंस्त्रादौ न० ।

**चम्प** पु० तुं चपि-अच् । १कोविदारवृक्षे शब्दमाला २तत्-

**चम्पक** पु० चपि-ण्वुल् । (चाँपा) प्रसिद्धपुष्पप्रधाने १वृक्षभेदे अमरः । "चम्पकः कटुकस्तिक्तः कषायो मधुरोल्बणः । विषव्रणहरः कृच्छ्रकफवाता क्षपित्तहृत्" भावप्र०तद्गुणा उक्ताः । २तत्पुष्पादौ न० "व्यालोकयच्चम्पकोरुवावलीः" नैष० । "उद्भिन्नपुष्पचनचम्पकपिङ्गभासा" माघः । ३पनसफलैकभागभेदे (चाँपी) ख्याते पदार्थे (चाँपाकला) प्रसिद्धे ४कदलीभेदे पु०तत्फले न० राजनि० । "चम्पकं वातपित्तघ्नं गुरु वीर्य्यकरं तथा । अतिशीतं रसे पाके मधुरं कथितं बुधैः" भावप्र०तद्गुणा उक्ताः । ५साङ्ख्यमतसिद्धे सिद्धिभेदे "न्यायेन स्वयं परीक्षितमर्थं तावन्न श्रद्दधते यावद्गुरुशिष्यसब्रह्मचारिभिः सह न संवादते अतः सहृदां गुरुशिष्यसब्रह्मचारिणां संवादकानां प्राप्तिः सहृत्प्राप्तिः सा सिद्धिरित्यर्थे" सांख्यसूत्रम् ।

**चम्पकचतुर्दशी** स्त्री ज्यैष्ठशुक्लचतुर्दश्याम् ज्यैष्ठमासे इत्युक्तमासे "चतुर्दश्यां च शुक्लायां चम्पकैः पूजयेत् शिवम् । अयुतैर्वा सहस्रैर्वा शतैर्वा परमेश्वरि ! । पायसञ्च बलिं दद्यात् ततो नक्तं चरेद्व्रती । वृषस्थे ऽर्के विशेषेण न भूयो जायते क्षिति । विभक्तैश्चम्पकैश्चैव सहस्रं कुङ्कुमाक्षिभि । जयपट्टं प्रदत्त्वा तु लिङ्गे क्षत्वा प्रदक्षिणम् यानि च । चम्पकचतुर्दशी ख्याता पूजयेद्वै सदाशिवम् । दशजन्मकृतं पापमर्द्धनादेव नश्यति" मत्स्यसू० ४५ प० ।

**चम्पकमाला** स्त्री चम्पकपुष्पनिर्मिता माला ६त० । १चम्पकपुष्पमालायाम् । २चम्पकपुष्पाकारे स्त्रीणां कण्ठाभरण-भेदे । (चापकलि) शब्दार्थ० । "भौ सगयुक्तौ चम्पकमाला" छ०र० उक्ते दशाक्षरपादके १वर्णवृत्तभेदे चम्पकमालेत्यत्र "रुक्मवतीयम्" इत्यपि पाठः ।

**चम्पकरम्भा** स्त्री चम्पकोपपदा रम्भा श० त० । (चाँपाकला) कदलीभेदे राजनि० ।

**चम्पकारण्य** न० चम्पकप्रधानमरण्यम् । भारतप्रसिद्धे तीर्थभेदे "ततो गच्छेत राजेन्द्र ! चम्पकारण्यमुत्तमम् । तत्रोष्य रजनीमेकां गोसहस्रफलं लभेत्" भा० व० ८४च० । [उष्] । पनसे (काँटाल) शब्दार्थचि० ।

**चम्पकालु** पु० चम्पकेन पनसावयवभेदेन अलति अल-उण् ।

**चम्पकावती** पु० चम्पक+अस्त्यर्थे मतुप् मस्य वः संज्ञायां दीर्घः । चम्पायुर्य्यां कर्णराजधान्याम् (भागलपुर) ख्याते पुरीभेदे शब्दरत्ना० ।

**चम्पकुन्द** पु० चम्पश्चासौ कुन्दते कुदि-अच् । (चाँदकुँड़ा) वृक्षभेदे राजनि० । [६त० । पनसे त्रिका० ।

**चम्पकोष** पु० चम्पकैरुष्यते अत्र वस-घञर्थे आधारे क

**चम्पा** स्त्री चम्प-अच् । कर्णपुर्य्यामङ्गदेशस्थे १पुरीभेदे । (चाँपाट) ख्याते तच्चिटस्थे २नदीभेदे ३पनसावयवभेदे (चाँपि) शब्दार्थचि० [शब्दे ७८५ पृ० उदाहृतम् ।

**चम्पाधिप** पु० ६त० । कर्णे तस्य तद्राज्यकरणा अङ्गाधिपः

**चम्पापुरी** स्त्री चम्पानाम्निका पुरी । अङ्गदेशस्थे कर्णराजधान्याम् । चम्पानगर्य्यादयोऽप्यत्र ।

**चम्पालु** पु० चम्पया अलति अल-उण् । पनसे शब्दरत्ना० ।

**चम्पावती** स्त्री चम्पा अङ्गदेशस्थः नदीभेदः अस्त्यस्याः मतुप् मस्य वः । चम्पापुर्य्याम् शब्दरत्ना० ।

**चम्पू** स्त्री चपि-ऊ । "गद्यपद्यमयी वाणी चम्पूरित्यभिधीयते" इत्युक्ते काव्यभेदे जटा० ।

**चम्पेय** पु० ६त० । कर्णे त्रिका० । [वासिषु च०व०

**चम्पोपलक्षित** पु० ३त० । १अङ्गदेशे हेमच० २तद्देश-

**चय** गतौ भ्वा०पर०सक०सेट् । चयति अचयीत् । चचय

**चस्रिय्** त्रि० चमूषु चमसेषु द्रव्यति गच्छति द्रव-क्रिप् वेदे नि० वस्य रः । चमसस्थे । "तस्य चस्रियोऽश्वो न" ऋ० १।५६।१। "चमूषु चमसेषु द्रवः वर्त्तमानः" भा० पृषो० दीर्घः चस्रोपि द्रव्यमात्रार्थे । "चस्रीणो न शरदः पाञ्चजन्याः" ऋ० १।१००।१२।

**चय** गतौ भ्वा० आ० सक० सेट् । चयते अचयिष्ट चेये ।

**चय** पु० चि-भावकर्म्मादौ अच् । १समूहे । २वप्रे ३प्राकार मूलबन्धने । यद्उपरि प्राकारो निरूप्यते प्राकारमूलस्थित्

वैदिकेति यावत्। तथा चार्थशास्त्रम्। "खातखड्डत स्तदा वप्रं कारयेद् तस्योपरि प्राकारमिति"। पगार इति गौड़भाषा। ४परिखोड्डतमृत्तूपे। तत्र प्रमूढे "स्फुरति चातुवनं चमरीचयः"। "निलयेषु नक्तमसिताञ्जनाञ्चयैः" "चयस्त्रिगमित्यवधारितं पुरः" इति च माघः। वप्रे "चयाट्टालकशोभिना" भा०व०१६०अ०। ५अभ्यादेचयने संस्कारभेदे। "यत्तांच चयानलान्" हरिवं० ४१अ०। ६५भ्यादेः समाहरणे ७पीठे मेदि०। चये कृचयः आकर्षा० कन्। चयक चयनकृत्वे त्रि०।

चयन न० चि-भावे ल्युट्। १५भ्यादेः समाहरणे २अभ्यादेः संस्कारभेदे च। चयनप्रकारः कातीयादौ दृश्यः "स यथा कामयेत तथा कुर्यादिति अचयनस्य तथाचयनस्येति" शत०ब्रा०८।५।२।१। चीयतेऽनेन करणे ल्युट्। संस्कारसाधने श्यूपादौ च। "येन भागीरथी गङ्गा चयनैः काञ्चनैश्चिता" भा० द्रो० ५१अ०।

चर गतौ भ्वा० पर० सक० सेट्। चरति अचारीत्। चचार चेरुः। "दिवा चरेयुः कार्यार्थं चिह्नितारात्र आत्मनैः" मनुः। "चेरुः खरदृषदो" भट्टिः "हंसं तनौ सन्निहितं चरन्तम्" नैष०। चरः चारः चरणम् अवितं चरित्रम्। चरन् संचूर्यते "ततश्चूर्यमाणाक्षौ" भट्टिः। यङ्लुकि चंचूरीति चंचूर्त्ति।

अति+अतिक्रम्य गमने "अतिचेरुश्चक्रात्मा युयुधुश्च परस्परम्" भाग० ३।१७।१४। "अयोगतश्चात्यचरत् योगं दिवि निशाकरः" हरिवं० २३६अ०। "पुत्राः पितृनत्यचरन्नार्थचात्यचरन् पतीन्" भा० शा० ८२८७श्लो०। अतिचारशब्दोक्तेऽर्थे अतिचारशब्दे ६६६४ दृश्यम्।

वि+अति व्यतिक्रमे "त्वामहं न व्यतिचरे मनसाऽपि कदाचन" रामा० ल० १०१। [ ३।८।१।८।

अधि+आधिक्येन चरणे। "वासुपरिष्टादधिचरन्ति" शत०

अनु+अनुगमने पश्चाद्गमने साहश्यकरणे। अनुचरः।

अप+अपकारे अनिष्टसम्पादने। "योयज्ञे ग्रामपचरेत् न माचक्षीत वै द्विजः" भा०शा० ६५८६। "पितृदेवर्षिभृत्यानां न चापचरिता मया" मार्क० पु०।

अभि+आभिमुख्येन चरणे अतिक्रमे अभिचारे च "पतिं या नाभिचरति मनोवाग्देहसंयता" मनुः "यथैवाहं नाभिचरे कदाचित्" भा० वि० ४५७ अ०। अनिष्टसम्पादने "श्येनेनाभिचरन् यजेत" श्रुतिः। अभिचारश्च मारणोच्चाटनादीनि षट्कर्माणि "प्रति तमभिचर योऽस्मान् द्वेष्टि" कथ० २।१।१।३। अभिचारशब्दे दृश्यम्।

वि+अभि+विशेषेण अतिक्रमे। यस्य यथाशास्त्रमुचितं तस्य तदतिक्रमे। "उस्राणां व्यभिचरतीव सप्तसप्तौ" किरा०। "व्यभिचचार न तावकरोऽनलः" नैष०। हेतोः साध्याभाववद्वृत्तित्वं, साध्यस्य च हेतुसमानाधिकरणाभावप्रतियोगित्वं व्यभिचारः। "न तावद्व्यभिचरितत्वं तद्धि न साध्याभाववद्वृत्तित्वम्" अनुमानचिन्ता०। स्त्रीणाञ्च पतिनतिक्रम अन्यपुंसि गमनं व्यभिचारः।

अव+समन्तात् चरणे। "कषायं अवचारितम्"। "कफवातज्वरं हन्याच्छीघ्रं क्षारेऽवचारितम्" "प्रमार्जनं धावनञ्च वीक्ष्य वीक्ष्यावचारयेत्" "दूर्वां पुनर्वाञ्चैव क्षेमे साध्ववचारयेत्" इति च सुश्रु०।

आ+अनुष्ठाने। "प्रस्थितायां प्रतिष्ठेयां स्थितायां स्थितिमाचरेः" रघुः। "यद्यदाचरति श्रेष्ठः" गीता। प्रतिपालनादिना ग्रहणीकरणे च "संग्राप्ते षोडशे वर्षे पुत्रं मित्रवदाचरेत्" चाण०।

अधि+आ+आधिक्येनाचरणे "शय्यासनेऽध्याचरिते श्रेयसा न समाविशेत्" मनुः।

अनु+आ+अनुगमने तुल्यरूपानुष्ठाने "क्षौद्र तत्कर्म राजवैनाभिरन्वाचरेत् प्रमान्" भाग० ४।५।७।

सम्-उद्+आ सम्यगाचरणे। "बालानपि च मार्गस्थान् सान्त्वेन समुदाचरेत्" भा० शा० ३३अ०।

उप+आ+उपासने। "उपाचरति तत्रस्थ धनानामीश्वरम् प्रभुम्" भा० स० १०अ०।

सम्+आ+सम्यगाचारे। "त्वया पापानि घोराणि समाचीर्णानि पाण्डुषु" भा० क० २१अ०। उपधातदृश्यम्। "उच्छिष्टान्ननिषेकञ्च दूरादेव समाचरेत्" मनुः।

उद्+उल्लङ्घ्य गतौ सक० आत्म०। धर्म्ममुल्लङ्घ्य "धर्म्ममुल्लङ्घ्य गच्छतीति" सि० कौ०। उपरिष्टाद्गतौ सक० प०। वाक्य उच्चरति "उपरिष्टाद्व्रजति" सि० कौ०। "सौदामनीमुच्चरन्तीं यथैव" भा० व० ११२अ०। "श्येनोदुद्रुद्रुचरत्" भट्टिः "दिव्यस्त्र्यध्वनिरुदचरत् व्यश्रुवानोदिगन्तान्" रघुः। कण्ठताल्वाद्यभिघातेन उत्पादने "सकलश्चरितः शब्दः सकलं गमयतीति न्यायः। "अन्यदा जगति राम दुर्लभं शब्द उच्चरित एव मामतात्" रघुः।

वि+उद्+विशेषेण उत्पितौ। "यथाऽग्नेः क्षुद्राविस्फुलिङ्गा व्युच्चरन्ति" शत० ब्रा० ४।५।१।२१।

सम्+उद्+सम्यगुत्पितौ। "समुच्चरन्त्यस्मादापः" निरु०६।११

उप+उपासने "गिरिमुपचचार प्रब्रूहं सा त्वेवेशी" कुमा०। अन्यथास्थितस्य वस्तुनोऽन्यथात्वप्रतिपादनरूपे शब्दादिव्यापारभेदे उपचारश्च लक्षणा ऊह्यं वा। "यथा लोके स्वशक्तिषु योधेषु वर्तमानौ जयपराजयौ राज्ञि उपचर्येते" सा० द०। "तेनोपचर्यते राष्ट्रः"। "याम्योत्तरा ग्रहगतिर्गणितेऽप्युपचर्यते तेन" ह० स० ५।१५।

दुस्+दुष्टाचरणे। "कामक्रुद्ध्यद्दृदया भर्त्तारं दुश्चरन्ति याः" रामा० आर० २।२५।

निस्+निर्गमने "इतश्चेतश्च निश्चेरुर्हृष्टाः सर्वे युयुत्सवः" हरिव० २२अ०। "यतोयतोनिश्चरति मनश्चञ्चलमस्थिरम्" गीता।

परि+परितोगमने "कङ्का श्येनास्तथा गृध्रा नीचैः परिचरन्ति च" रामा० उ० १६।११। परितः सेवने "गात्रसंवाहनैश्चैव श्रमापनयनैस्तथा। शक्रः सर्वेषु कालेषु दितिं परिचचार ह" रामा० बा० ४६ अ० ११। "आर्द्रं छित्त्वा कुठारेण निम्बं परिचरेत्तु यः" रा० अयो० ३५।१४। परिचर्या परिचारकः।

प्र+प्रकाशेन गतौ। "प्राणः प्राणीयत ततः पुनश्च प्रचचार ह" भा०आश्व०२३अ०। प्रकर्षेण चरणे च। "यैः कर्मभिः प्रचरितैः शुश्रूषन्ते द्विजातयः" मनुः। प्रचारः।

सम्+प्र+सम्यग् प्रकाशके। "अद्य प्रश्नति चैवेह लोके संप्रचरिष्यति" भा० आनु० ८६अ०।

वि+विशेषेण गतौ "विचरन्ति महीपाला यावार्थं विजिगीषवः" रामा० आर० २२।७। "ततोद्यौषिमैहावीर्थः पार्थस्य विचरिष्यतः" भा० वि० ५८अ०। "रात्रौ न विचरेयुस्ते ग्रामेषु नगरेषु च" "इन्द्रियाणां विचरतां विषयेष्वपहारिषु" मनुः। वि+दृ चर पर्य्यालोचनया निर्णये। "आयतिं सर्वकार्याणां तदात्वञ्च विचारयेत्" मनुः। "मित्रामित्रं विचारयेत्" भा० या० ३८२६। "विचारदक्षचारदृगव्यवर्त्तत" "भवितः न विचारचारु चेत्" नैष०।

सम्+सम्यग्गतौ "नैव याताः प्रतायन्ते न मेघाः सञ्चरन्ति च" हरिव० १०७५८। "ग्रामेषञ्च सञ्चरतां धनानाम्" कुमा० "सञ्चारोरतिमन्दिरावधि" रतिमञ्जरी करणविभक्तिसहकारे श्याम०। "रथेन सञ्चरते" सि० कौ०। "पङ्क्त्यां रूपः सञ्चरमाण एव" नैष०।

**चर** संशये असंशये च चुरा० उभ० सक० सेट्। चारयति ते अचीचरत् त विचारयति विचारयते विचारितः

**चर** पु० चर–कु। स्वपरराष्ट्रवृत्तान्तज्ञानार्थं राजनियोगेन इतस्ततो भ्रमणकर्त्तरि चारे १ग्रन्थिभे, अमरः २कपर्दके, राजनि०। ज्योतिषोक्तेषु ३मेषकर्कटतुलामकरराशिषु ४स्वातिपुनर्वसुश्रवणादित्यिकरूपे नक्षत्रभेदे ५भौमवारे ६अवद्यूतभेदे। ७चले अनवस्थिते त्रि०मेदि०। ८खञ्जनखगे पुंस्त्री शब्दमा०। चरलक्षणादिकञ्च युक्तिकल्पतरौ "दिवस्तानिव तेजोभिर्भस्तानिव वेगतः। राजा चरैर्जगत् सर्वं पश्यत्यालोकसन्ततैः। तर्कैकचक्षुः स्मृतिमान् स्वीयभावप्रकाशकः। क्लेशायाससहो दक्षः सर्वत्र भयवर्जितः। सुभाषी राजसु तथा कार्य्याणां प्रतिपत्तिमान्। स्वपोनिश्चिन्याचारेण परराष्ट्रं विचक्षणः। कालज्ञो मन्त्रकुशलान् सांवत्सरचिकित्सकान्। तथान्यानपि युञ्जीत समर्थान् शुद्धचेतसः। ऋक्षुद्रांश्च तथाऽलुब्धान् दक्षार्थान् तथ्यभाषिणः। पाषण्डिव्यालपादीन् परराष्ट्रे नियोजयेत्। स्वदेशपरदेशज्ञान् शुचीन्नान् सुविचक्षणान्। वार्त्ताकर्म्माण् बहूंश्चैव चराणां विनियोजयेत्। नैकस्य वचने राजा चारस्य प्रत्ययं व्रजेत्। द्वयोः संवादमाज्ञाय यदृयुक्तं कार्य्यमारभेत्। तस्माद्राजा प्रयुञ्जीत चरान् बहुविधान् बहून्। नीरेतोवामनाः कुब्जास्त्रिधा वै च कारवः। भिक्षुकश्च चारणा दासो मालाकार्य्यः कलाविदः। अन्तःपुरगतां वार्त्तां निर्हरेयुरलक्षिताम्। प्रकाशश्चाप्रकाशश्च चरस्तु द्विविधो मतः। अप्रकाशोऽप्रसृष्टिः प्रकाशो दूतसंज्ञकः"। "शत्रुप्रजाभ्यसूयन्तं विज्ञातं कुशलाय वै। ते शुद्धचाराः कर्त्तव्याः यथार्थश्रुतबोधकाः" शुक्रनीतिसा०। "चरस्थिरद्व्यात्मकनामधेयामेषादयोऽमी क्रमशस्त्रिधा स्युः" ज्यो०त०। "वातादित्यचरित्रयं चरगणः" ज्यो० त० १५।१२।२२।२३।२४ संख्यकनक्षत्राणि चराणि। "येऽनेन लङ्कोदयकालिकास्ते देशान्तरेण स्वपुरोदये स्युः। देशान्तरं प्राग्गपरं तथान्यद् याम्योत्तरं नगरसंज्ञकञ्च" सि०शि०। "यदुदयान्तरकर्मणा लङ्कायामौदयिका यदा जातास्ते देशान्तरकर्मणा स्वपुरौदयिकाः स्युः। तच्च देशान्तरं द्विविधम्। एकं पूर्वापरमन्यद्याम्योत्तरम्। तच्चरसंज्ञकञ्च" ग्रहि० उक्ते याम्योत्तरादौ देशान्तरे। चरानयनप्रकारादि सू० सि०र० नारदाभ्यां दर्शितं यथा

"अथ दिनरात्रिमानज्ञानार्थं चरानयनं विवक्षुः प्रथमं तदुपयुक्तां स्पष्टक्रान्तिमाह" र० ना०

"विक्षेपापक्रमैक्ये क्रान्तिर्विक्षेपसंयुता। दिग्भेदे वियुता स्पष्टा भास्करस्य यथागता" सू०

"यस्य यद्दस्य स्पष्टक्रान्तिरभीष्टा तस्य यद्दस्यायनांशसंस्कृतस्य भुजज्यातः परमापक्रमज्ये त्यादिना क्रान्तिरयनांशसंस्कृतस्पष्टगोलादिका ज्ञेया। तस्य विक्षेपोऽपि पूर्वोक्तप्रकारेण पातोनगोलादिको ज्ञेयः। गोलस्तु मेषादिषट्कस्योत्तरस्तुलादिषट्कं दक्षिणः। अथ चरक्रान्त्योरेकदिक्त्वेन क्रान्तिः कलाद्या कलात्मकविक्षेपेण युता तयोर्दिग्भन्नत्वे क्रान्तिर्विक्षेपेण वियुतान्तरिता शेषदिक्का स्पष्टा क्रान्तिः स्यात्। ननु सूर्यस्य विक्षेपाभावात् कथं स्पष्टा क्रान्तिर्ज्ञेयेत्यत आह भास्करस्येति। सूर्यस्य यथागता पूर्वागता क्रान्तिरेव स्पष्टा क्रान्तिः। अत्रोपपत्तिः। विषुवद्वृत्तादुपरिविम्बकेन्द्रपर्यन्तं याम्योत्तरं वान्तरं स्पष्टक्रान्तिरिति तयोरेकदिक्त्वे तद्योगस्तत्क्रमान्तरं, भिन्नदिक्त्वे तदन्तरमितमन्तरमिति। अत्र चरस्य क्रान्तिसंस्कारयोग्यत्वसम्पादिका क्रिया लोकक्रमभयात् स्वल्पान्तरत्वाद्धोपेक्षिता भगवता कृपावता। अन्यथा चरस्य ध्रुवाभिमुखत्वे भगवदुक्तमायनदृक्कर्म कथमप्याहृतं स्यादित्यलम्। अथ दिनरात्रिमानज्ञानार्थमहोरात्रासून् साधयति" र० ना०।

"यद्दोदयप्राणहृता स्वस्वाष्टकोद्धृता गतिः। चक्रासवो लब्धयुताः स्वाहोरात्रासवः स्मृताः" सू०।

"यद्दस्य वेऽयनांशसंस्कृतराशेर्वक्ष्यमाणनिरक्षोदयासवस्तैर्गुणिता निजस्वोदगतिः कलाद्यष्टादशशतभक्ता फलेन युतायक्रासवः षष्टिघटिकानामसवः षट्शतयुतैकविंशतिसङ्खयिताः खखयदस्राहोरात्रासवः कालतत्त्वज्ञैः स्मृताः। अत्रोपपत्तिः। यद्दः पूर्वगत्या सन्नितः प्रयत्नेन गतिभोगकालेन भचक्रपरिवर्तानन्तरमुदेत्यतो भचक्रपरिवर्तकालः षष्टिघटिकासमितो यद्दगतिकलासम्बन्धात्मककालेनाधिको यद्दाहोरात्रमसात्मकं नाक्षत्रप्रमाणेन भवति। तत्रैकराशिकलाभिर्यदि यद्दसम्बन्धराश्युदयप्राणास्तदा गतिकलाभिः कस्येत्यनुपातेन गत्यसव इत्युपपन्नं यद्दोदयेत्यादि। अनेनैव लौकेन यद्दाणामुदयान्तरकर्मापीत्युक्तं भगवता। तथाहि। अनुपातानीतमध्ययद्दाणां नियताहोरात्रमानान्तरकाले यद्दाणां सन्निधिः रविमध्यगत्यस्फुटानां प्रतिरात्रौ भिन्नत्वेन मध्यमसूर्याहोरात्रमानस्य नियतत्वाभावादस्फुटराशिकावगतयद्दा अनियतमध्याकाहोरात्रकालान्तरेणार्धरात्रे यत्संस्कारेण भवन्ति तदेवोदयान्तरं तत्साधनं भगवता स्वल्पान्तरत्वादुपेक्षितम्। अन्यथा गतिकलास्फुटानां सकाशमेत्य गतिकलानामसवो भगवदुक्ताः सङ्गच्छन्ते उदयान्तरस्य गतिकलासुभेदोत्पन्नत्वात्। अथ चरोपयुक्तां क्रान्तिज्यां दोर्ज्यां चाह" र० ना०।

"क्रान्तेः क्रमोत्क्रमज्ये द्वे कृत्वा तत्रोत्क्रमज्यया। हीना त्रिज्या दिनव्यासदलं तद्दक्षिणोत्तरम्" सू०।

"स्पष्टक्रान्तेः क्रमोत्क्रमज्ये क्रमज्योत्क्रमज्ये द्वे अपि प्रसाध्य तत्र तन्मध्ये क्रान्त्युत्क्रमज्यया त्रिज्या हीना दिनव्यासदलमहोरात्रवृत्तस्य व्यासार्धं दोर्ज्याख्यः। तद्दिनव्यासार्धं दक्षिणोत्तरं दक्षिणगोले उत्तरगोले च स्यात् क्रान्तेर्गोलद्वयेऽपि सत्त्वात्। अपरा क्रान्तिर्जैव। अत्रोपपत्तिः। क्रान्त्यंशानां क्रमज्या क्रान्तिज्या भुजो विषुवद्वृत्तानुकाराग्रमहोरात्रवृत्तान्त्यभयगोले तदुभयतस्तद्व्यासार्धं दोर्ज्या कोटिस्त्रिज्या कर्णं इति गोले प्रत्यक्षम्। त्रिज्याग्रवृत्त उन्मण्डले याम्योत्तरवृत्ते वा प्रत्यक्षम्। तत्र भुजकर्णयोर्वर्गान्तरपदं कोटिरिति क्रान्तिज्यावर्गान्नात्रिज्यावर्गान्मूलं दोर्ज्या। तत्रापि भुजोत्क्रमज्यया हीना त्रिज्या कोटिक्रमज्या स्यादिति वृत्ते प्रत्यक्षदर्शनात् क्रान्त्युत्क्रमज्ययोना त्रिज्या दोर्ज्या स्यादिति लाघवेन वर्गमूलनिरासेनोक्तं भगवता क्रान्तेरित्यादि। अथ चरानयनपूर्वकदिनरात्रिमानसाधनं श्लोकत्रयेणाह" र० ना०।

"क्रान्तिज्या विषुवच्छाया त्रिज्या द्वादशोद्धृता। त्रिज्यागुणाहोरात्रार्धकर्णाप्ता चरजासवः।
तत्कार्मुकस्पष्टक्रान्तौ धनर्णानी पृथक्स्थिते। स्वाहोरात्रचतुर्भागे दिनरात्रिदले स्फुटे।
याम्यक्रान्तौ विपर्यस्ते द्विगुणे तु दिनक्षये। विक्षेपयुक्तोनितया क्रान्त्या भानामपि स्फुटे" सू०।

"क्रान्तिज्या विषुवच्छायानीतमध्याह्ने द्वादशाङ्गुलशङ्कोर्ज्यया गुण्या द्वादशभक्ता फलं कुज्या स्यात्। सा त्रिज्यया गुणिताहोरात्रार्धकर्णाप्राहोरात्रवृत्तस्यार्धकर्णेन व्यासदलेन दोर्ज्यया भक्ता फलं चरजा ज्या चरजेत्यर्थः। अस्माच्चरज्याया धनुरसवश्चरासवो भवन्ति। स्वाहोरात्रचतुर्भागे स्वस्वचरसम्बन्धिनो यद्दस्य प्रागुक्ताहोरात्रासवस्तेषां चतुर्थांशे पृथक्स्थिते स्यानद्वयस्थे उक्त-

रक्रान्तौ सत्यां चरासवः धनर्णानी युतर्णानौ कार्यौ तौ क्रमेण दिनरात्रिदले दिनार्धरात्रार्धे कालविच्छित्तिरूपे। दक्षिणक्रान्तौ सत्यां विपर्यस्ते दिनरात्रिदले यत्र क्षीणं तद्दिनार्धं, यत्र युतं तद्रात्र्यर्धमित्यर्थः। तकारात् ते दिनरात्र्यर्धे द्विगुणे दिनक्षपे दिनमानरात्रिमाने यदुक्तं स्याः। उक्तरीत्या नक्षत्राणामपि दिनरात्रिमाने साध्ये इत्याह। विक्षेपेत्यादि। नक्षत्रध्रुवयोरामानीतयोर्या क्रान्त्या नक्षत्रविक्षेपैक्यभिन्नदिक्क्रमेण युक्तयान्तरितयोरुन्नतकारेण सिद्धया स्वके नक्षत्रदिनरात्रिमाने साध्ये इत्यर्थः। अत्रोपपत्तिः। द्वादशाङ्गुलशङ्कुः कोटिः फलभा भुजोऽक्षकर्णः कर्णः, क्रान्तिजया कोटिः, कुज्या भुजोऽस्या कर्ण इत्यक्षज्ञेलहृदयं प्रसिद्धम्। तत्र यदि द्वादशकोटौ फलभा भुजः, तदाक्रान्तिजयाकोटौ को भुज इत्यनुपातेन कुज्या। तत्स्वरूपं तु निरक्षदेशक्षितिजस्वदेशक्षितिजान्तरालस्थिताहोरात्रवृत्तप्रदेशस्य द्युज्याप्रमाणेन जेयति त्रिज्याप्रमाणेन तज्ज्या चरज्येति द्युज्याप्रमाणेन कुज्या त्रिज्याप्रमाणेन केत्यनुपातेन चरज्या तद्वृत्तचरासवोऽहोरात्रवृत्तखण्डप्रदेशे निरक्षक्षितिजान्तराल उत्तरगोले स्वक्षितिजस्य निरक्षक्षितिजादधःस्थत्वान्निरक्षक्षितिजयाम्योत्तरवृत्तान्तरालेऽहोरात्रवृत्तचतुर्थांशत्वादहोरात्रचतुर्थांशे चरासवो युता दिनार्धं क्षीणा रात्र्यर्धं दक्षिणगोले स्वक्षितिजस्य निरक्षक्षितिजादूर्ध्वस्थत्वाद्धीना दिनार्धं, युता रात्र्यर्धमित्युपपन्नं सर्वं क्रान्तिजेत्यादि"।

तत्र ग्रन्थौ। "राजन्यक्रान्युपायैरेकार्थानि चरैस्तव" भाचः। "तेषां दत्तं परिक्षयेत् सम्यग्राद्धेषु तच्चरैः" मनुः। चले "तस्य सर्वाणि भूतानि स्थावराणि चराणि च "देवैश्चैव जगत्सर्वं चरं स्थास्नुपूर्वशः" मनुः। क्षपि कर्मण्यनुप्रपदे "चरेष्टः" पा० ट चरणकर्त्तरि त्रि०। भूचरः खचरः। "शठोमिथ्याविनीतश्च बकव्रतचरोद्विजः" मनुः। मेषादौ "चरलग्ने चरांशे वा स्थापनं च विलग्नकम्" ति० त०। स्वार्थे अण्। चार ग्रन्थौ

चरक पुं० चरत्येव स्वार्थे क संज्ञायां कन् वा। १चरे दूतभेदे। २आयुर्वेदकारकमुनिभेदे पु०। "देवाकर्ण्य मुखतेन चरकस्योक्तेन जानेऽखिलं स्वादस्या नलदं विना न दलने तापस्य कोऽपि क्षमः" नैष०। मन्त्रिवैद्योरेकरूपोक्तौ। चरकनामनिरुक्तिः आयुर्वेदशब्दे ७८० पृ० दर्शिता। ३तत्कृते ग्रन्थे च भावप्रका० तत्र च ग्रन्थे स्तवस्थानं निदानस्थानं विमानस्थानं शारीरस्थानम् इन्द्रियस्थानं चिकित्सितस्थानं कल्पस्थानं सिद्धिस्थानम् इत्यष्टौ स्थानानि। ४वर्षटे राजनि०। ५चक्रकरे हेमचौ शब्दार्थचि०।

चरकाल पु० "निरक्षदेशक्षितिजाख्यवृत्तमध्यखण्डं तन्मध्यरेखान्तरदेशे। स्वे स्वे कुजेऽर्कस्य यस्तद्भोऽक्षार्धमक्षौदयोस्तु मध्ये" सि० शि०। "आदौ स्वदेशेऽथ निरक्षदेशे सूर्योदयोऽस्तमयोऽन्यथातः। ऋणं घटोऽक्षोदयदे स्वमस्ते फलं चरोत्थं रविसौम्ययोर्हे। याम्ये विलोमं खलु तत्र यस्मादुन्मण्डलं स्वक्षितिजादधस्तात्। नाड्याङ्गवादुत्तरयाम्यभागौ बोध्यस्तयोरुत्तरयाम्ययोर्हौ" सि० शि० उक्ते दिनमानज्ञानोपाये कालभेदे।

चरगृह न० चरूपं गृहम्। मेषकर्कतुलामकरूपेषु राशिषु। चरगेऽहादयोऽत्र। [ जातित्वात् ङीष्।

चरट पुंस्त्री चर-वा० अटच्। खञ्जनखगे शब्दमा० स्त्रियां

चरण पु० चर-करणे ल्युट्। १देहावयवभेदे पादे "सुरद्विधातोश्चरणौ भुवस्तले" माघः "द्वितीये द्वस्तचरणौ तृतीये वयमर्हति" मनुः। २वेदैकदेशे शाखाप्रपर्याये "गोत्रं च चरणैः सह" महाभाष्यका०। चरणव्यूहः। ३यज्ञकीटेः किरणे। ४श्लोकानां चतुर्थभागे पादे च। "प्रथमाद्धिसमोयस्य तृतीयश्चरणोभवेत्" छन्दोम०। "५चतुर्थभागमात्रे। "पश्यन्ति खेटाचरणाभिहद्धितः" ज्योति०। ६एक देशमात्रे "ज्योतिश्चरणाभिधानात्" भा० मू०। भावे ल्युट्। ७अनुष्ठाने "बहुत्वा मैक्षचरणम्" "तपसश्चरणैर्घोरैः" मनुः। "रमणीयचरणा अभ्यासोह रमणीयां योनिमापद्येरन्" श्रुतिः चरणशब्दस्य आचारार्थकत्वेऽपि कर्ममात्रपरत्वसूत्रं भा० सू० भा०। तच्छब्दार्थशब्दे १८६ पृ० उक्तम् चरण+चतुरर्थां लक्षा० स। चरणस्य तद्विदर्थत्वादौ त्रि०

चरणग्रन्थि पु० ६त०। गुल्फे हेमच०।

चरणपर्व्वन् न० ६त०। गुल्फे त्रिका०।

चरणव्यूह पु० चरणानां वेदशाखानां व्यूहोऽत्र। वेदशाखाविभाजके ग्रन्थभेदे।

चरणायुध पुंस्त्री० चरण आयुधं यस्य। कुक्कुटे अमरः "आकर्ण्य सञ्चरति रतं चरणायुधानाम्" माघ० द०। स्त्रियां जातित्वात् ङीष्।

चरणि पु० चर-अनि। मनुष्ये त्रि "सुविज्ञानं च शास्त्रं चरणीनाम्" ऋ०८।२४।२१। "चरणीनां मनुष्याणाम्" भा०।

**चरणिल** त्रि० चरणेन निर्वृत्तादि काणादि० चतुरर्थ्याम् इलच्। चरणनिर्वृत्तादौ [ हेमच०।

**चरणिष्ट** स्त्री चिरणिष्ट+पृषो०। चिरिण्टायां लतायाम्

**चरत्र** पु० चरत्र इव शाखा० यत्। चरत्रवृक्षे पा०।

**चरत्र** चरत्र-गतौ कण्ड्वा० सक० पर० सेट्। चरत्रति अचरत्रीत्। चरत्रगतौ इति पाठान्तरम्

**चरत्रु** त्रि० क०चरत्र-उण् "चरत्रशीले "चलुर्न यन्थिलौ चरत्रुः" भट्ट० १०।८५।६ "चरत्रुश्चरणशीला" भा०।

**चरथ** त्रि० चर-गतौ अथ। जङ्गमे। "स्यातुचरथमङ्गून-ब्यूर्खौ" भट्ट० ११६८।। "चरथं जङ्गमम्" भा०।

**चरभ** न० कर्म०। मेषकर्कट तुलामकररात्रिषु चरराशिषु चरलग्नादयोऽभवन्।

**चरम** त्रि० चर-अमच्। १अन्ते २पश्चिमे ३शेषभवे "अत्र-वीत् क्रियतामेषा सुतानां चरमा क्रिया" भा० वि० २४अ०। चरमश्छाम्भृत्। अस्ति सर्वनामत्वात् वा जसः शीभावः चरमे चरमाः। ४अन्ते न०। "उक्तिष्टेत् प्रथमं चैव चरमं चैव संविशेत्" मनुः।

**चरमच्छाम्भृत** पु० कर्म०। अस्ताचले पश्चिमस्थे अचले। अमरः चरमाचलचरमगिर्यादयोऽप्यत्र।

**चरम्य** त्रि० चरमे स्थितः उदन्तत्वात् यत्। चरमस्थिते तद्ध्वा-दौ त्रि० कौ०।

**चराचर** त्रि० चर-अच् नि०। १जङ्गमे। २आकाशे धरणिः। चराचरस्य समाहारद्व०। ३स्थावर-जङ्गमरूपे जगति न० मेदि०। "त्वया विष्णुजगते विश्वं जगदेतच्चराचरम्" देवीभा०। "एवं स जायत् स्वप्नाभ्यामिदं विश्वं चराचरम्" मनुः। इतरेतरद्व०। ४चरे अचरे च त्रि०। "सर्वे भावाचराचराः" रामा० कि० ४२।४४ श्लो०

**चरि** पु० चर इन्। पक्षौ उणादिकोषः।

**चरित** त्रि०चर-कर्मणि क्त। १अनुष्ठिते। भावे क्त। २च रित्रे ३स्वभावे। "सर्वं खलस्य चरितं मत्कृतः करीति" हितो० "उत्तरं रामचरितं ततः प्रभोतं प्रयोज्यते"। उत्तररामच०। वीरचरितम्। चरतोऽशब्दे प्रथमादिचरि-तादि बहुव्रत्यः उदा०। "वाग्देवताचरितचित्रितचि-त्तसद्मा" गीतगो० कर्मणि क्त। ४गते ५प्राप्ते ६ज्ञाते च।

**चरितार्थ** त्रि० चरितः ज्ञातः प्राप्तोऽर्थः प्रयोजनं येन। १ज्ञातार्थे ज्ञातप्रयोजने २प्राप्तफले सफले।

"बिभ्रत् कृतसंस्कारा चरितार्थेव भारती" "रामरावणयो-र्युद्धं चरितार्थमिवाभवत्" इति च रघुः "प्रवृत्तिरासी च्छात्रानां चरितार्था चतुष्टयी" "आत्मानमत्र चरि-तार्थपदैर्वचोभिः" इति च कुमा० "अन्योन्याभावतो-नास्य चरितार्थत्वमुच्यते" भाषा०।

**चरित्र** न० चर-इत्र। १अनुष्ठाने २व्रतकर्म्माद्यनुष्ठाने ३स्वभावे ४चेष्टिते ५लोकादौ च शब्दरत्ना०। इतिनि-ष्ठान्ते स्त्री शब्दर०।

"एतद्देशप्रसूतानां सकाशादग्रजन्मनाम्। स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः" "स्वां प्रकृतिं चरित्रं च कुलमात्मानमेव" मनुः। "चरितव्यव्र-तम्" याज्ञ०। स्वार्थे अण्। चारित्र तत्रार्थे न०" पृषो० दीर्घः चरीत्रमस्त्र न० शब्दरत्ना०।

**चरिष्णु** त्रि० चर-इष्णुच्। चरणशीले "यदाणुमात्रिको भूत्वा बीजं स्थास्नु चरिष्णु च" मनुः।

**चरु** पु० चरति क्षोभादिकमस्मात् भीमा० अपादाने चर-उन्। हव्याद्ये क्षोभार्थं पाच्याद्ये, "अनवसावितानल-रूक्षपाकौदनश्चरुरिति वाह्निकाः। चरन्त्यापोऽत्र आधारे उन्। २मेघे निघ०। ३चरुपाकपात्रे भाण्डे विश्वः चरुलक्षणमुक्तं कर्म्मप्रदीपे

"खशाखोक्तः प्रसुस्निग्धो ह्रदग्धोऽकठिनः शुभः। न चातिमिश्रितः पाच्यो न चरुः स्याच्च चारुः" चरुपाक-प्रकारः कातीये ४।१।५। स्वभाष्यप्रयोदर्शितो यथा "अपरेण गार्हपत्यं चरुमपूपं स्रुचं वा तूष्णीं स्रुक्षीत्वोत्तरेण दक्षिणाग्निमवक्रान्ति तिष्ठन्" ५सू०। "गार्हपत्यादपरस्यां दिशि अपूपं चरुं चरु-स्थालीम् तूष्णीं मन्त्रस्याविधानाल्लौकिकवाग्व्यवहार्य वर्जम् व्रीहीन्प्रोक्षणेन सक्षिणा प्राचीनावीती दक्षिणा-सक्थोऽध्वर्युर्गृह्णीयात् अथ वा अपूपं स्रुचम् एवं स्रुक्षीत्वा दक्षिणाग्नेरुत्तरतो गार्हपत्यस्य पुरस्ताद्दक्षि-णाभिसक्थिष्ठवक्रामति अथ शाखान्तराद्दक्षिणाग्ने-रुत्तरत उदगग्रीवं कृष्णाजिनमास्तीर्य तत्रोलूखलं निधाय तस्मिन् व्रीहीणां प्रक्षेपं कृत्वा मुसलमादाय दक्षिणाभिसक्थिष्ठवक्रमनं क्रमेण व्रीहीणां करोति ततः सूर्पमादायोलूखलाद्व्रीहीन् निष्काश्य निष्पवनेन तुषान्निष्काशयेत्" कर्कः "सकृत् फलीकरोति" हेम० "लोके तस्य पुनःपुनः क्रियमाणत्वात् सकृदित्युच्यते, कर्कः "सारतण्डुलमपूपं अपवित्रत्वाभिधायीह्यस्य मेक्षणेन जुहोत्यन्यत्र इति सोमार्येति च" ७सू० "इमामेव चरु

चारतण्डुलमीषत्स्विन्नतण्डुलम् अपूर्णं यथा स्यात्तेन चरुणा स्थाल्याः पूरणं न भवति तथा अपचित्वा आसादितेनाज्येनाभिघार्य्य दक्षिणत उद्गास्य दक्षिणाग्नेः पूर्वभागेणापदक्षिणमुत्तरत आनीय स्रुव्यं कृत्वा तिस्रः समिध आधायोपविश्य प्राङ्मुखो मेक्षणेन चरुं जुहोति" कर्कः।

शाखान्तरे चरुपाकप्रकारो भवदेवभट्टपादौ ज्ञेयः। "यवमयश्चरुर्भवति" श्रुतिः। "श्यामकगावेधुकनीवारयवमयः" तै० स० "चरुर्वै देवानामन्नमोदनो हि चरुः" शत० ब्रा० ४।४।२।१। "ये पूषो चरुं कुर्व्वन्ति प्रपिष्टानामेव कुर्व्वन्ति यथा दन्तकाष्ठैवम्" १।७।४।७। "यद्यदन्तकः पूषा पैष्टमत्ति सदा चरुम्। अग्नीन्द्रेश्वरसाधर्म्यात्तण्डुलोऽत्र विधीयते" छन्दो०। "हेमपात्रगतं दोर्भ्यां आदधानः पयश्चरुम्" "स तेजो वैष्णवं पत्न्योः विभेजे चरुसंज्ञितम्" "चरोरर्द्धं भागाभ्यां तामयोजयताश्विभे" इति च रघुः।

**चरुचेलिन्** चरुश्चेलमिवास्यास्य इनि। महादेवे। "चरुचेली मिलीमिली" भा० श० २८६ अ० शिवनामोक्तौ

**चरुत्रण** पु० चरोर्व्रण इव। चित्राप्पे (चिताइपिटा) त्रिका०।

**चरुस्थाली** स्त्री ६त०। चरुपाकार्थस्थाल्यां "तिर्य्यग्गर्भसमिन्मात्रा दृढा नातिदृढन्मुखी। मृण्मय्यौडम्बरी वापि चरुस्थाली प्रशस्यते" कर्म्मप्रदीपे तल्लक्षणमुक्तम्।

**चर्च** अध्ययने चुरा० उभ० सक० सेट्। चर्चयति-ते अचचर्चत्-त्। चर्चितः चर्चा।

**चर्च** उक्तौ भक्षणे च तु०पर०सक०सेट्। चर्चति अचर्चीत्। उक्तिरत्र विचारार्थपरिभाषणम्।

**चर्चरी** स्त्री चर्च-वा० अरन् गौरा० ङीष्। १गीतिभेदे। २अन्तर्जल्पे ३करध्वनौ च। "चर्चरी गीतिभेदे च कोलाहितकरशब्दयोः" रुद्रः। ४हर्षक्रीड़ायां सुभूतिः। ५कार्पटिकानां सादरवचने ६तौर्यत्रिके ७असत्समयक्रीड़ायाम् ८चर्मण्याम्। ९साटोपवाक्ये शब्दार्थचि० १०वर्णोद्यत्तविशेषे। यथा "हारयुक्तसुवर्णवल्लकयाधिगङ्गविराजिता पादनूपुरसङ्गता सुपयोधरद्वयभूषिता। शोभिता वलयेन पिङ्गलपन्नगाधिपवर्णिता चर्चरी तरुणीव चेतसि चाकशीति सुसङ्गता" "अनन्तरे चर्चरी" "जलहर! संहर एह कोवमइ आणत्तओ, अविरल धारा सारोकलदिसासुइओ। ए! मञ्जि पुहवि भमन्ते जइ पिअ पेक्खिहिसि, तवेव जं जु करीहिसि, तंतु सहीहिसि" "अनन्तरे चर्चरी "गन्धग्गाहव्य-मइअरगीएहिं वज्जन्तेहिं परङ्ग अदूरेहिम्। पसरिअ-पवणुवेल्लिअ-पल्लव-सिअरु सुलसिअ-विविहपआरेहिं णच्चइ कप्पअरु" इति च विक्रमोर्व०।

स्वार्थे क। चर्चरिकाप्यत्रार्थे

**चर्चरीक** पु० चर्च-ईकन् फर्फरी० नि०। १महाकालभैरवे २केशविन्यासे ३शाके च मेदि०।

**चर्चस्** पु० चर्च-असुन्। १निधिभेदे त्रिका० निधिशब्दे दृश्यम्

**चर्चा** स्त्री चर्च-अच्। १दुर्गायाम्। चु० चर्च-भावे अङ्। २विचारणायां ३चिन्तायां ४चार्चिक्ये चन्दनादिना देहलेपने च मेदि०। स्वार्थे क। चर्चिका तेऽधीयेषु चर्चां वेत्ति तत्परं ग्रन्थं वाऽधीते उक्त्या० ठक्। चार्चिक विचारणाभिज्ञे तत्परग्रन्थाध्येतरि च त्रि०

**चर्चि** स्त्री चर्च-भावे इन्। विचारणायाम् "इहे चर्चावतिरिच्येते एकया गौरतिरिक्तः एकयायूनः" तै० ब्रा० १।२।२।२।

**चर्चिक्य** न० चार्चिक्य पृषो० हुखः। चार्चिक्ये हेम०

**चर्चित** त्रि० चर्च-कर्म्मणि क्त। १चन्दनादिना कृतलेपे देहादौ। "पयोधराश्चन्दनपङ्कचर्चिताः" ऋतुस०। "भुजं चन्दनचर्चितम्" भा० स० २३७१ श्लो०। भावे क्त २तथालेपने न०।

**चर्च्य** त्रि० चृत-कर्म्मणि यत्। छननीये।

**चर्पट** पु० सौ० चृप-दीप्तौ अटन्। १स्फारे २विपुले ३चमेटे ४भर्पटे च मेदि०। ५भाद्रशुक्लषष्ठ्यां चपेटायाम् स्त्री शब्दार्थचि०। ६पिष्टकभेदे पौल्यां स्त्री गौरा० ङीष्। त्रिका०। [वीत्। चर्व्व।

**चर्व्व** गतौ भक्षणे च भ्वा० पर० सक० सेट्। चर्वति अच-

**चर्भट** पु० चर-क्विप् भट-अच् कर्म्मधा०। १इर्वारौ कर्कट्यां स्त्रियां गौरा० ङीष् २हर्षक्रीड़ायां ३साटोपवाक्ये ४चर्चायाञ्च हेम०।

**चर्म्म** न० चर्म्म साधनतया अस्त्यस्य अच् टिलोपः। चर्म्मनिर्म्मिते फलके (ढाल) भरतः।

**चर्म्मकषा(सा)** स्त्री चर्म्म कष(स)ति कष-अच्। पश्चिमदेशप्रसिद्धे गन्धद्रव्यभेदे (चामरकषा) २सम्प्रसारितायां चर्म्मकसायाञ्च भरतः

**चर्म्मकार** त्रि० चर्म्म तन्निर्म्मितं पादुकादि करोति कृ-अण् उप० स०। १पादुकादिकारके "चाण्डाल्यां तीव-

राज्ञातचर्म्मकार इति स्मृतः" पराशरोक्ते २सङ्कीर्ण-जातिभेदे पुंस्त्री स्त्रियां जातित्वात् ङीष्। "चर्म्म-कारस्य द्वौ पुत्रौ गण्डकोवाद्यपूरकः"। "मनुना तु वैदेह्यां निषादाज्जातस्य कारावरास्यचर्म्मकारसंज्ञोक्ता यथा "कारावरो निषादात्तु चर्म्मकारः प्रसूयते" उत्तरत्र वैदेह्यामेवेत्युक्तेः अत्रापि तस्यामेवेत्यन्वयः। उश-नसा तु "मूताद्विप्रस्तायां स्तोवेणुक उच्यते। रथायामेव तस्यैव जातोयश्चर्म्मकारकः" इत्युक्तम्। एवञ्च मुनित्रयप्रामाण्यात् त्रिविधैव चर्म्मकारजातिः। "छिन्नस्तानां चर्म्म कार्य्यम्" मनुना तेषां वृत्तिरुक्ता। चर्म्म करोति क्विप् चर्म्मकृदत्र। ण्वुल् चर्म्मकारक तत्रार्थे [ पदौ मेदि० २चर्म्मकारजातिस्त्रियां च

**चर्म्मकारी** स्त्री चर्म्म किरति कृ-अण्। १चर्म्मकषायामो-

**चर्म्मकील** पु० चर्म्मणि कील इव। शुक्लजाते रोगभेदे (फ़ारिश) ख्याते रोगे "व्यानो रुष्टोत्वा श्लेष्माणम्। करोत्यधस्त्वचो बहिः। कीलोपसंस्थिरखरं चर्म्म-कीलन्तु तद्विदुः। वातेन तोदपारुष्यं पित्तादसित-रक्तता। श्लेष्मणा स्निग्धता तस्य ग्रथितत्वमवर्णता" माधवक० तच्चिदानाद्युक्तम्। "चर्मकीलं जतुमणिं मसकान् तिलकालकान्। उत्कृत्य शस्त्रेण दहेत् क्षाराग्निभ्यामथेतरः" भावप्र०। [पत्रायां हेमच०

**चर्म्मचटका** स्त्री चर्मणा चटकेव। (चामचिका) अजिन

**चर्म्मचठी** स्त्री चर्म्म चटति भिनत्ति चट-भेदे अच् गौरा० ङीष्। (चामचिका) अजिनपत्रायां शब्दरत्ना०। स्वार्थे क। चर्म्मचटिकायत्र। [ रोगे राजनि०।

**चर्म्मचित्रक** न० चर्म्म चित्रयति चित्र-ण्वुल्। श्वेतकुष-

**चर्म्मज** न० चर्म्मणि जायते जन-ड। १रोमणि। २रुधिरे च राजनि०।

**चर्म्मण्य** त्रि० चर्म्मणि भवः शरीरावयवत्वात् यत्। चर्म-भवे। "श्लेष्मणा चर्म्मण्यं वान्यद्वा विद्धिष्टं संश्लेष-येत्" ऐत० ब्रा० ५।१२।

**चर्म्मण्वती** स्त्री चर्म्मन्+अस्त्यर्थे मतुप् मस्य वः संज्ञायां व्यासन्दीवदित्यादिना नि०। नदीभेदे। सा च रन्ति देवस्य यज्ञोपकल्पितगोराशिचर्म्मत उत्पन्ना यथाह "महानदी चर्म्मराशेरुत्क्लेदात् स्रुस्रुवे यतः। ततश्च मण्वतीत्येवं विख्याता सा महानदी" भा० शा०२८अ०। "रन्तिदेवस्य यज्ञे ताः पशुत्वेनोपकल्पिताः। अतश्चर्म-ण्वती राजन्! गोचर्मभ्यः प्रवर्त्तिता" भा०अनु०६६अ०

चर्म्मदक्षिणफलत्वोक्तिर्भा० व० ८२अ० तन्माहात्म्यं यथा "चर्म्मण्वतीं समासाद्य नियतो नियताशनः। रन्तिदेवाश्वमेधस्य फलमेवं लभेत्"। अतस्तस्या दक्षिणदेशस्थत्वम्। अस-प्राचां तु चर्म्मवत् इत्येव। चर्म्मयुक्ते त्रि० स्त्रियां ङीष्। [राजनि०।

**चर्म्मतरङ्ग** पु० चर्म्मणि तरङ्ग इव। जरया पलिते वली।

**चर्म्मतिल** त्रि० चर्म्मणि तिला अस्य। चर्म्मोपरिजात कृष्णतिलके (तिल) युक्तदेहादौ [ हेम०।

**चर्म्मदण्ड** पु० चर्म्मणा कृतोदण्डः। कषायाम् (कोड़ा)

**चर्म्मदल** न० चर्म्म दलयति दल-अच्। खल्लकृतभेदे। "शुष्केन कण्डूव्यथनौषधोपशान्तेषु तच्चर्म्मदलं वदन्ति" सुश्रुतः। "चर्म्मदलाजगल्लीमृगकाधिष्ठाना" सुश्रुतः।

**चर्म्मदूषिका** स्त्री चर्म्म दूषयति दूषि-ण्वुल्। कोठरोगे राजनि०।

**चर्म्मद्रुम** पु० चर्म्म चर्म्मकारवल्कलं तत्प्रधानोद्रुमः। भूर्ज-वृक्षे राजनि०। तस्य चर्म्मकारवल्कलत्वात् तथात्वम्।

**चर्म्मन्** न०चर-मनिन्। १देहावरिकायां त्वचि, २इन्द्रियभेदे येन स्पर्शं उपलभ्यते तस्मिन् ३फलके (ढाल) च। "त्वगिन्द्रियन्तु वायवीयं यथाह "देहव्यापि त्वगिन्द्रियम्" भाषा०। तस्य तथात्वं सि० मु० समर्थितं यथा "शरीर व्यापकं स्पर्शग्राहकमिन्द्रियं तच्च वायवीयं रूपादिषु मध्ये स्पर्शस्यैव व्यञ्जकत्वात् अङ्गसङ्गिसलिलैत्यव्यञ्जक व्यजनवातवत्"। मनसा त्वग्योगोज्ञानसामान्ये कारणं यथाह तत्रैव "त्वचोयोगो मनसा ज्ञानकारणम्" "त्वङ्मनःसंयोगो ज्ञानसामान्ये कारणमित्यर्थः किं तत्र प्रमाणं सुषुप्तिकाले त्वचं त्यक्त्वा पुरीततीति वर्त्तमानेन मनसा ज्ञानाजननमिति। ननु सुषुप्तिकाले किं ज्ञानं भविष्यति अनुभवरूपं स्मरणरूपं वा। नाद्यः अनुभव-सामग्र्याभावात्तथाहि चाक्षुषादिप्रत्यक्षे चक्षुरादिना सह मनःसंयोगस्य हेतुत्वात् तदभावादेव न चाक्षुषादि-प्रत्यक्षं, ज्ञानादेरभावादेव न मानसप्रत्यक्षं, ज्ञानाद्यभावे च नात्मनोऽपि प्रत्यक्षमिति। व्याप्तिज्ञानाभावात् नानु-मितिः, साक्ष्यज्ञानाभावात् नोपमितिः, पदज्ञानाभावात् न शाब्दबोधः, इत्यनुभवसामग्र्यभावात् नानुभवः। तदुबोधकाभावाच्च न स्मरणम्। नैवं सुषुप्तिप्राक्कालोत्-पन्नेक्षादिव्यक्तेस्तत्सम्बन्धेनात्मनश्च प्रत्यक्षप्रसङ्गात् तदती-न्द्रियत्वे मानाभावात् सुषुप्तिप्राक्काले निर्विकल्पमेव ज्ञायत

दृश्यत्वापि प्रमाणाभावात्। अथ ज्ञानजन्ये त्वङ्मनः संयोगस्य यदि कारणत्वं तदा रासनत्वाद्युपादिप्रत्यक्षजन्ये स्पार्शनप्रत्यक्षं स्यात् विषयेन्द्रियसंयोगस्य विषयत्वकसंयोगस्य च तदा सत्त्वात् परस्परप्रतिबन्धादेकमपि वा न स्यादिति। अत्र केचित् पूर्व्वोक्तयुक्त्या त्वङ्मनोयोगस्य हेतुत्वे सिद्धे चाक्षुषादिसामग्र्याः स्पार्शनादिप्रतिबन्धकत्वमनुभवानुरोधात् कल्प्यते इति। अन्ये तु सुश्रुतानुरोधात् चर्म्ममनःसंयोगस्य ज्ञानहेतुत्वं कल्प्यं चाक्षुषादिप्रत्यक्षजन्ये त्वचि मनःसंयोगाभावात्र स्पार्शनप्रत्यक्षमिति वदन्ति। चर्म्म त्वचोभेद इति तु रूक्षम्। त्वचश्च सप्तविधा यथाह सुश्रुतः "तत्र खल्वेवमष्टानां शुक्रशोणितसम्भिपद्यमानानां शरीरस्येव सप्तत्वचो भवन्ति। तासां प्रथमाऽवभासिनी नाम या सर्व्ववर्णानवभासयति षड्विधाञ्च छायां प्रकाशयति सा व्रीहेरष्टादशभागप्रमाणा सिध्मपद्मकण्टकाधिष्ठाना, द्वितीया लोहिता नाम षोडशभागप्रमाणा तिलकालकन्यङ्क्व्यङ्गाधिष्ठाना, तृतीया श्वेता नाम द्वादशभागप्रमाणा चर्म्मदलाजगल्लीमशकाधिष्ठाना, चतुर्थी ताम्रा नामाष्टभागप्रमाणा विविधकिलासकुष्ठाधिष्ठाना, पञ्चमी वेदिनी नाम व्रीहिपञ्चभागप्रमाणा कुष्ठविसर्पाधिष्ठाना, षष्ठी रोहिणी नाम व्रीहिप्रमाणा सन्धिप्रपच्यर्बुदग्रन्थ्यपचीमेदगण्डाधिष्ठाना, सप्तमी मांसधरा नाम व्रीहिद्वयप्रमाणा भगन्दरविद्रध्यर्शोऽधिष्ठाना" यदेतत्प्रमाणं निर्दिष्टं तन्मांसलेष्वपकाशयेषु न ललाटसूक्ष्मास्थ्यादिषु। यतो वक्ष्यमाणेषु व्रीहिद्वयेनाङ्गुलोदरप्रमाणमवगाढं विध्येदिति"।

कल्पद्रुमधृतिर्युक्तिकल्पतरौ यथा

"शरीरावरकं यत्तत् चर्म्म इत्यभिधीयते। तत्पुनर्द्विविधं कार्य्यं चर्म्म सम्भवभेदतः। शरीरावरकत्वञ्च लघुता दृढता तथा। दुर्भेद्यतेति कथितचर्म्मणां गुणसंग्रहः। सितोरक्तस्तथा पीतः कृष्ण इत्यभिशब्दितः। ब्रह्मादिजातिभेदेन चर्म्मणां वर्ण निर्णयः। चित्रवर्णस्तु सर्व्वेषां सर्व्वदैवोपपद्यते" इति भोजदेवः।

चर्म्मनालिका स्त्री चर्म्मनिर्म्मिता नालिकेव। कण्डायां ताड्यां (कोड़ा) शब्दार्थचि०।

चर्म्मपट्टिका स्त्री चर्म्मनिर्म्मिता पट्टिका। (चामाटी) चर्म्ममयपट्टिकायाम् शब्दार्थचि०। [नपत्रायां जटा०।

चर्म्मपत्रा स्त्री चर्म्मैव पत्रं पक्षोऽस्याः। (चामचिड़ा) वल्लि-

चर्म्मपादुका स्त्री चर्म्ममयी पादुका। चर्म्मनिर्म्मितपादत्राणे। "ततो ब्रह्मचारी अनेन मन्त्रेण चर्म्मपादुके पादयोर्निदध्यात्" भवदेवः। [ भवपालभेदे (कृषा) मेदि०।

चर्म्मपुट(क) पु० चर्म्ममयं पुटमस्य वा कप्। इतिसंज्ञके चर्म्म-

चर्म्मप्रभेदिका स्त्री चर्म्म प्रभिनत्ति प्र+भिद-ण्वुल् टाप् अत इत्वम् ह्रस्वः। चर्म्मवेधनेऽस्त्रभेदे अमरः

चर्म्मप्रसेविका स्त्री चर्म्मणा प्रसीव्यते प्र+सिव-बा० कर्म्मणि-वुन् टाप् अत इत्वम्। भस्त्रायाम् अग्निसन्दीपनार्थं चर्म्ममये वस्त्रभेदे अमरः।

चर्म्मभण्डल पु० ब० व०। देशभेदे "अपरान्ताः परान्ताश्च पञ्चवाश्चर्म्मभण्डलाः" भा० भी० ६अ० देशोक्तौ।

चर्म्मभय त्रि० चर्म्मणोविकारः मयट्। चर्म्मनिर्म्मिते पात्रादौ स्त्रियां ङीप्। "द्वीपिचर्म्मावनद्धैव व्याघ्रचर्म्मभयैरपि" भा० भी० ४६अ०। "यथा काष्ठमयो हस्ती यथा चर्म्मयो मृगः" मनुः।

चर्म्मभण्डा स्त्री चासण्डा+पृषो०। दुर्गायां हेमच०।

चर्म्ममुद्रा स्त्री "वामहस्तं तथा तिर्य्यक् कृत्वा चैव प्रसार्य्य च। आकुञ्चिताङ्गुलोः कुर्य्यात् चर्म्ममुद्रेयमीरिता" तन्त्रसारोक्ते देवपूजाङ्गे मुद्राभेदे।

चर्म्मिक त्रि० चर्म्ममये कवचादौ भवति अभ्यस्यति वा-क। चर्म्ममयकवचादौ कृताभ्यासे। "कृतवर्म्मिका अभितोजनाः" ऋ० ८।५।३८। "वाध्येभ्यश्चर्म्मिकम्" यजु० ३०। १५। पुरुषभेदे देवभेदोक्तौ नाकभ्यपुरुषभेदोक्तौ।

चर्म्मयष्टि स्त्री चर्म्ममयी यष्टिरिव। चर्म्मदेशाड्यां (कोड़ा)। शब्दार्थचि०।

चर्म्मरङ्गा स्त्री चर्म्मणे रङ्गोऽस्याः। १आवर्त्तकीलतायां विमाण्डग्राम् राजनि०। २देशभेदे पु० स च देशः ह०म० कूर्म्मविभागे १४अ० पश्चिमोत्तरदिशि उक्तः। "दिशि पश्चिमोत्तरस्याम्" इत्युपक्रमे "गुरुहामरुक्कच्चर्म्मरङ्गाख्याः"।

चर्म्मरी स्त्री चर्म-राति रा-क गौरा० ङीष्। स्थावरविषान्तर्गते फलविषे लताभेदे। "कुसुदतीरेणुकाकरम्भकर्कोटकरेणुकखदीरकचर्म्मरीलूपक्रमे फलविषाः" सुश्रु०।

चर्म्मरु पु० चर्म्म-राति रा-बा० कु। चर्म्मकारे त्रिका०।

चर्म्मवत् त्रि० चर्म्मन्+अस्त्यर्थे मतुप् मस्य वः असंज्ञात्वात् न णि०। १चर्म्मयुक्ते स्त्रियां ङीप्। "लोहचर्म्मवती चापि सास्निः सगुडखट्विका" भा० व० १५अ०। २शुक्रशोणितजभेदे पु०। "गलोगण्डाद्यो ह्यमलचर्म्मवानार्जवः शुचिः। मृदेते बलसम्पन्ना निर्व्यथुर्मृदुतो बलात्" इत्युप-

क्रमे "चरण्यमाणाश्चे सर्वे सुवलक्षात्मजारये" भा० भी० ६१अ० इत्युक्तम् ।

**चर्म्मवसन** पु० चर्म गजासुरचर्म वसनमस्य । कृत्तिवाससि शिवे कृत्तिवासश्शब्दे २।८८ पृ० दृश्यम् ।

**चर्म्मवृक्ष** पु० चर्मप्रधानः चर्मतुल्यवल्कप्रधानोवृक्षः । भूर्जवृक्षे । "खर्जूरा न्यरिकेलाश्च चर्मवृक्षो हरितकी" हरिवं० । २।अ० ।

**चर्म्मसम्भवा** स्त्री चर्मणि त्वचि सम्भवति सम्+भू-अच् । स्थूलैलायां क्षुद्रा० । तत्फलस्य त्वङ्मध्ये सम्भवात्तस्या-स्तथात्वम् ।

**चर्म्मसार** पु० चर्मणः सारः । रसे राजनि० । भुक्ताद्यादेः रसस्य त्वङ्मध्ये जायमानत्वात् तस्य तथात्वम् ।

**चर्म्माम्बस्** पु० चर्मणोऽम्बः । चर्मान्तरस्थे रसे राजनि० । भुक्ताद्यादिरसस्य चर्माभ्यन्तरस्थत्वात्तस्य तथात्वम् ।

**चर्म्मार** पु० चर्म शिल्पसाधनतया अर्हति अर्ह-अण् । उप० स० । चर्मकारे जटा० ।

**चर्म्मावकर्त्तिन्** पु० चर्म अवकृन्तति स्वशिल्पनिर्वाहाय अव+कृती छेदे णिनि । चर्मकारे । तदन्नभक्षणं मनुना निषिद्धं यथा "आयुः सुवर्णकाराणां यशश्चर्मावकर्त्तिनाम्" ।

**चर्म्मिक** त्रि० चर्म चर्ममयं फलकं (ढाल) । युद्धसाधनतया-स्यास्य प्रौढ्या० वा ठन् । चर्ममयफलकेन योद्धरि (ढालो) तस्य भावः कर्म वा तुरोहिता० यक् । चार्मिक्य तद्भावे न० ।

**चर्म्मिन्** त्रि० चर्म देहावरकं (ढाल) फलकं वा अस्त्रञ्च वा इनि ठिलोपः । चर्मयुक्ते (ढालि) ख्याते चर्मिके । "नागे नागे दश रथा शतमश्वा रथे रथे । अश्वेऽश्वे दश धानुष्का धानुष्के दश चर्मिणः" भा० भी० २० अ० । चर्माणि वल्कलान्यस्यां सन्ति वा इनि । २भूर्जवृक्षे अमरः । ३कदल्यां ४भल्लरीटे च पु० शब्दर० ।

**चर्य्या** स्त्री चर-"परिचर्य्यापरिसर्य्येत्यादि" भा० परोक्षा-विच्छातः भावे क्यप् । १आचारभावे "वनवासस्य शूरस्य मम चर्य्या हि रोचते" रामा० अ० २८।५। २गतौ "चर्य्यायां क्रियतामृक्षम्" भा० आ० ६१७ श्लो० । ३ब्रह्मचर्य्यस्थितौ परिव्राजकादीनां व्रतानुष्ठाने नियमा परित्यागे । "गदमदचरेत्यादि" पा० कर्मणि यत् । ४अनुष्ठेये आचरणीये त्रि० "यत्तिंशदाब्दिकं चर्य्यं गुरौ त्रैवेदिकं व्रतम्" मनुः भावे यत् । ५अवश्यचरणे न० ।

**चर्व** भक्षणे दलैचूर्णने (चिबान) वा चुरा० उभ० पक्षे भा० पर० सक० सेट् । चर्वयति-ते चर्वति अचचर्वत्-त अचर्वीत् चर्वयां बभूव आस चक्रे चचर्व । चर्वणं चर्वणा चर्वितः । रसास्वादव्यापारे चर्वणशब्दे दृश्यम् ।

**चर्व्वण** न० चर्व-भावे ल्युट् । १दलैचूर्णने (चिबान) २रसा-स्वादव्यापारभेदे च सा० द० । युच् चर्वणाप्यत्र स्त्री । "प्रमाणं चर्वणैवात्र स्वाभिन्ने विदुषां मतम्" चर्वणाऽऽ-स्वादनम् । तच्च "स्वादः काव्यार्थसम्भेदादात्मानन्दसङ्गतः । "निष्पत्तौ चर्वणस्यास्य निष्पत्तिरुपचारतः" "यद्यपि रसाभिन्नतया चर्वणस्यापि न कार्य्यत्वं तथापि तस्य का-दाचित्कतया उपचरितेन कार्य्यत्वेन कार्य्यत्वमुपचर्य्यते" इति च सा० द० ।

**चर्व्वा** स्त्री चर्व-कर्त्तरि क्वन् । १चर्वणे २तत्प्रकारे शब्दार्थचि० ।

**चर्व्वित** त्रि० चर्व-कर्मणि क्त । १भक्षिते दलैचूर्णिते २स्वादिते च ।

**चर्व्वितपात्र** न० ६त० । चर्वितस्य ताम्बूलादेस्त्राणार्थम् पात्रम् (पिकदानी) ख्याते पतद्ग्रहे । "ताम्बूलं दर्पणं पानपात्रं चर्वितपात्रकम्" मत्स्यपु० पा० ख० ।

**चर्व्य** त्रि० चर्व-कर्मणि ण्यत् यत् वा । दलैचूर्णनीये भक्ष्यभेदे आहारशब्दे ८६६ पृ० भावप्रका०वाक्यम् यथा "भोज्यं भक्ष्यं तथा चर्व्यं गुरु विद्यात् यथोत्तरम् । चर्व्यं च पिष्टकचणकादि" । "षट्कोटिं ब्राह्मणानाञ्च भोजया-मास नित्यशः । चूष्यपेयलेह्यचर्व्यैरतिहृद्यं दिने दिने" ब्र० वै० पु० ।

**चर्षणि** पु० कृष-अनि "आदेच्च" उणा० । मनुष्ये निघ० । "यएकश्चर्षणीनां वसूनाम्" ऋ० १।७।६ "अथ मूको माहका पत्नी तयोश्चर्षणयः सुताः। यत्र वै मानुषी जाति र्ब्रह्मणा चोपकल्पिता" भाग० ६।६।२१ श्लोकः, तद्व्या-ख्यायां चर्षणयः कृताकृतज्ञानवन्तः" श्रीधरः । विचर्षणि विश्वचर्षणीत्यादिना निपातितो चर्षतेः पश्यतिकर्मणः कृत्वेन तथार्थत्वम् । अस्यायमभिप्रायः "कृषेरादेश्च चः" उणा० २।१०१ सूत्रे उज्ज्वलदत्तेन "आदेश्च चः" इति पठित्वा चर्षणिः वन्यकीत्युदाहृतम् । अतश्चर्षणिनिष्प-त्तिर्निघण्टुप्रोक्तचर्षधातोरेव । सि०कौ० तु "आदेश्च चः" इति पाठात् कृषधातोरेव तच्छब्दनिष्पत्तिरिति भेदः । तयोर्मूलयोरुक्तत्वे सुधीभिर्भाव्ये । ऋदित्कारान्तत्वात् स्त्रियां वा ङीप् । २पुंवल्यां स्त्री "सचर्षणीनासदगाद्बृहस्पतिः" "सलन्" भाग० १०।२८।३ वाक्यस्य चर्षणीनां पुंवल्यीनाम्

द्रव्यपरत्वं युक्तम्। मनुष्यजातिपरत्वे स्त्रियां वा ङीप्। "इदमुक्ता चर्मणोष्टता" स्मृ० ८।६०।५। चर्मणोष्टताऽसुरक्षननद्वारेण मनुष्यजातिधारकवज्रेण" भा०

**चल** गतौ भ्वा०पर० सक० सेट्। चलति अचालीत्। चचाल। चेलतुः। चलन् चलितः ज्वलादि० घञ्। चालः पचा०चलः। "क्षणेन निकृते चैद्ये चचाल च वसुन्धरा" भा० स० ४४अ०। "चलत्येकेन पादेन तिष्ठत्येकेन बुद्धिमान्" चाण०। "तिलमात्रमपि चलितुं न शक्नोति" पञ्चत०। आर्षे आत्म०। "न धर्माच्चलते बुद्धिर्धर्मराजस्य धीमतः" भा०स० ७८अ०। णिचि। चलयति चालयति। "चालयन् वसुधां भेमां बलेन चतुरङ्गिणा" भा० आ० ६६अ० कर्मणि अक० सिच्। चलयति ते। अचीचलत् "चलयन् भूकरुच्चलवालकान्" रघुः "तां प्राविशत् कपिश्रान्त-स्तरूनचलयन् भनैः" भट्टिः। "यूनां मनश्चलयति प्रसभं नभस्वान्" ऋ० स० गत्यर्थस्य न मित्त्वम् "मिज्वले" इति कविकल्पद्रुमे कर्मार्थएव तस्य मित्त्वोक्तेः "आचालयेयुः शैलांस्ते क्रुद्धाभिन्युर्महीतले" हरिव० ५४अ०। "पर्वतानाञ्च शिखराण्याचालयति वेगवान्" भा० आ० १५४अ०।

उद्+ऊर्द्ध गमने उत्क्रम्य गतौ "पुप्लोज्वलितपट्पदम्" रघुः उत्प्लाव गतौ च। "उज्वलितः प्रयाताम्" रघुः।

वि+विशेषेण चलने। "व्यचालीदम्भसां पतिः" भट्टिः।

**चल** विलासे तु० प० अ० सेट्। चलति अचालीत् चचाल।

**चल** स्तुतौ पोऽग्रे चु० सक० उभ० सेट्। चालयति ते अचीचलत्।

**चल** त्रि० चल वा पचा० अच्। १तरले, चञ्चले, २कम्पयुक्ते अमरः। ३परमेश्वरे पु०। "धृताशीरचलश्चलः" विष्णु स०। "न स्वरूपान्न सामर्थ्यान्न च ज्ञानादिकात् गुणात्। चलनं विद्यते यस्मादचलः कीर्त्तितोऽच्युतः" स्मृतेः। वायुरूपेण चलतीति चलः" भा०। कर्म्मार्थकचलतेः स्वार्थे णिचि भावे अच्। ४कम्पने भेदि०। "मिज्वले" कविकल्प०। चलनं च रजसः कार्य्यं यथाह सा० का० "सत्वं लघु प्रकाशकमिष्टमुपष्टम्भकं चलञ्च रजः"।

"सत्वतमसी स्वयमक्रियतया स्वस्वकार्य्यप्रवृत्तिं प्रत्यवरीदली रजसोपष्टभ्येते अवसादात् प्रच्याव्य स्वकार्य्ये ते उत्साहं प्रयत्नं कार्य्येते। तदिदमुक्तमुपष्टम्भकम् इति। कर्म्मादिस्थत उक्तं चलमिति। तदनेन रजसः प्रवृत्त्यर्थत्वं दर्शितम्। रजस्तु चलत् प्रतिस्वैगुण्यं चालयदुगुरुत्वाऽऽवृणता च तमसा तत्र तत्र प्रवृत्ति-प्रतिबन्धेन क्वचिदेव प्रवर्त्तयते"। सा०त०कौ०।

"औनौ भौ चेच्चलमिदमुदितं युगैर्नवभिः खरैः" छ० र० उक्ते अष्टादशाक्षरपादके ५वर्षवृत्तभेदे न०

"स वृत्तचूलचलकाकपक्षकैः" रघुः। "यथाम्भसा प्रचलता तरवोऽपि चला इव" भाग० ७।१।२३। "न खलु प्रेम चलं सुहृज्जने" "प्रायश्चलं गौरवमाश्रितेषु" कुमा०

**चलकेतु** पु० कर्म्म०। केतुभेदे स च "अपरस्यां चलकेतुः शिखया यास्यापयाहुलोच्छ्रितया। गच्छेत् यथा यथोदक् तथा तथा दैर्घ्यमायाति" बृ० स० ११अ०। उल्काः

**चलचक्षु** पुंस्त्री चला चक्षुरस्य। चकोरपक्षिणि हेम०।

**चलत्पूर्णिमा** स्त्री चलन्ती पूर्णिमा तदुपलक्षितः चन्द्र इव। (चाँदा) चन्द्रकमीने त्रिका०।

**चलदङ्ग** पुंस्त्री चलन्ति अङ्गान्यस्य। (चेङ्चा) मत्स्यभेदे राजनि०। वा कप्। चलदङ्गक तत्रार्थे जटा०।

**चलदल** पु० चलानि चञ्चलानि दलान्यस्य। अश्वत्थवृक्षे अमरः। चलपत्रादयोऽप्यत्र। "अङ्गेन (स्त्रीचिह्न-भेदेन) केनापि विजेतुमस्त्रा गवेष्यते किं? चलपत्र-पत्रम्। न चेद्विशेषादितरस्त्रदेभ्यस्तस्मात्तु कस्मात्तु कृतोभयेन" नैष०। तस्य कम्पयुक्तपत्रता तर्षिणा।

**चलन** न० चल-भावे ल्युट्। १कम्पे २गतौ च। कर्त्तरि ल्यु। ३कम्पयुक्ते त्रि० मेदि०। ४वरिषे पुंस्त्री जटा० जातित्वात् स्त्रियां ङीप्। करणे ल्युट्। ५चरणे हेमच०।

**चलनक** न० चलन+संज्ञायां कन्। चरणतलके हेमच०।

**चलनी** स्त्री चलत्यत्र चल-आधारे ल्युट् ङीप्। १गजबन्धन्यां वाद्यभाण्डे २चर्म्मण्याञ्च (चाचरा) वस्त्रभेदे हेमच०।

**चलसंक्रान्ति** स्त्री कर्म्म०। अयनांशचलनभेदात् तत्तद्राशिविशेषांशे रव्यादेः प्रभातद्युसञ्चारे अयन संक्रान्ति-शब्दे ३२८पृ० विवृतिः। [द्रव्यभेदे च रत्नमा०।

**चला** स्त्री चल-अच्। १लक्ष्म्यां मेदि० २सिन्धुके गन्ध-

**चलाचल** त्रि० चल-अच् नि०। १चञ्चले अमरः २काके पुंस्त्री राजनि० स्त्रियां जातित्वात् ङीप्। "चलाचलै-रुत्पदमाहृताः खुरैः" माघः। "जन्मिनोऽस्य स्थितिं विद्मो नलिनीव चलाचलाम्" किरा०।

**चलातङ्क** पु० चलस्य चलनस्यातङ्कोभयमत्र। वातामय भेदे राजनि०।

चलित त्रि॰ चल–कर्त्तरि क्त। १कम्पिते अमरः। २गते "चलितदुर्वलपक्षपरिग्रहः" "चलितः पुरः पतिसमेतमात्मजम्" माघः। २प्राप्ते ३ज्ञाते च त्रि॰। भावे क्त। ४चलने ५गतौ च न॰।

चलु पु॰ चल–उनु। गण्डूपे हेमच॰। [मेदि॰।

चलुक पु॰ चलुना भीयते कन्। १प्रस्तौ २भाण्डभेदे च

चलेषु पु॰ चलो लक्ष्यमाप्नु इषुर्यस्य। लक्ष्यमाप्नुवाणके मन्दधानुष्के। अत्र "उदराश्वेषु चेषे" पा॰ इषु शब्दे परे चेषे पूर्व्वपूर्व्वपदस्यान्तोदात्तताविधानात् पूर्व्वपदमन्तोदात्तम्।

चवर्ग पु॰च+प्रातिशाख्योक्तः वर्गप्रत्ययः इत॰ वा। तालुस्थानोच्चरितानां अष्टवर्णानां वर्गे (च छ ज झ ञ) वर्णेषु। ततः "वर्गान्ताच्चः" पा॰ छ। चवर्गेण तदर्थभूते त्रि॰।

चवल पु॰ चर्व–बा॰ अलच् पृषो॰। राजमाषे कलायभेदे शब्दार्थचि॰। [ङीप्। तत्रार्थे शब्दर॰

चवि स्त्री चर्व–इन् पृषो॰। चव्ये (चइ) शब्दर॰। वा

चविका स्त्री चवि+स्वार्थे क। चव्ये अस्य स्त्रीत्वमाह रुद्रः "कटुष्णा चविका लघ्वी रोचनी दीपनी मता। जन्तूत्कासकासशूलरोगविमर्द्दिनी" राजनि॰। "भेदिनी कफनाशिनी" इत्यधिकं राजवल्लभेनोक्तम्।

चव्य न॰ चर्व–कर्म्मणि यत् पृषो॰। १चविकायाम् तस्य स्त्रीत्वमाह भरतः। स्वार्थे क चव्यिका तत्रार्थे राजनि॰। सा च २चव्यायां मेदि॰। [राजनि॰।

चव्यजा स्त्री चव्यमिव जायते जन–ड। गजपिप्पल्याम्

चव्यफल न॰ चव्यमिव फलति फल–अच्। गजपिप्पल्याम् राजनि॰।

चव्यादि न॰ "चव्यं त्रिकटुकं पाठा चीरं कृमुम्बुरुणि च। यमानी पिप्पलीमूलसुभे च चित्रकैन्ववे। चित्रकं विल्वमभयां पिप्पा सर्पिर्विषाचयेत्। ग्रहण्यातातुलौ-ल्यार्थं जाते दग्धे चतुर्गुणे। प्रवाहिकां गुदभ्रंशं मूल-शूलं परिस्रवम्। गुदवङ्क्षणशूलञ्च हन्तमेतद्व्यपोहति" चक्रदत्तोक्ते हन्तभेदे।

चष भक्षे भ्वा॰ उभ॰ सक॰ सेट्। चषति ते अचषीत् अचाषीत् अचषिष्ट चचाष चेष्टुः चेषे।

चष वधे भ्वा॰ प॰ सक॰ सेट्। चषति अचि–(चा)षीत्।

चषक पु॰न॰ चष–करणे कन् अर्द्धर्चादि। १मद्यपानपात्रे अमरः। तल्लक्षणादिकं युक्तिकल्पतरावुक्तम् यथा "यत् पानपात्रं भूपानां तज्ज्ञेयं चषकं बुधैः। काचकं राजतं चैव स्फाटिकं काचमेव च। इत्तं स्वराष्टदिक्कं च चतुर्णां पृथिवीभुजाम्। इत्यन्यसम्मतं तेषां निर्णयः पाठसम्मतः। खसप्तसम्मितं रत्नैश्चतुर्णां सम-न्वितम्। मार्त्तिकं वाथ फालं वा सर्वेषामुपयुज्यते। काञ्चनं धातुजं प्रैक्षं जाङ्गलादिमहीभुजाम्। यद-न्यत्तोयपानादिपात्रं पृथ्वीभुजां भवेत्। एवं तत्रापि नियम इति भोजस्य सम्मतः" "आननैः परिपूर्णं चष-कान्तः" माघः। कर्म्मणि क्नु। २मद्यनि, ३मद्यभेदे च न॰ मेदि॰ [च त्रि॰ कौ॰।

चर्षति पु॰ चष–भक्षे वधे वा भावे अति। १भक्षे २वधे

चषाल पु॰न॰ चष–आलच् अर्द्धर्चादि। यूपकटके यज्ञिय-पशुबन्धनार्थे यूपमध्यदेशे वलयाकारे काष्ठमये लौह-मये वा पदार्थे अमरः। तल्लक्षणादिकन्तु का॰ श्रौ॰ ६।१।२८। सूत्रादौ

"अथाङ्गपार्श्वं पृथमात्तमष्टास्रि मध्यसंन्दर्शितम्" २८सू॰ "यूप परिवासनानन्तरं यदवशिष्टं पृथक्कृतमयम् ततद्वया-लं कर्त्तव्यम् प्रसारिताङ्गुलिः शाखिरामखिवन्धनात् पृथक् इत्युच्यते चषालमिति संज्ञा सं व्यवहारार्था "आ चषाले-त्यात्" इत्यादौ। अष्टास्रि अष्टकोणम् तदपि तच्चेनाष्ट-कोणं कुर्य्यात् तच्चैव। उलूखलवन्मध्ये संकुचितम्" कर्कः। "अर्द्धमग्रे प्रतिसञ्जति" २९सू॰ "तदङ्गपार्श्वं यूपस्याग्रे अर्द्धं प्रतिसञ्जति अतएवोर्द्धप्रतिमोक्तविधानाद्यूपस्य तथा वेधः कार्यः। प्रतिसञ्जतीति वचनाच्च चूड़ाग्रो यूपः चषालं च सशुषिरमिति गम्यत इति हरिस्वामिनः तथा चाश्वापसम्बः "मूलतोऽतदक्षपरम् अष्टास्रिरतु पूर्वोऽग्रतोऽग्रीयान् प्रस्तावाष्टास्रिरिति" कर्कः "ह्रस्वं ह्रस्वं वा तद्भोतिक्रान्तं यूपस्य" ३० सू॰ "यूपस्य यूपाग्रस्य ह्रस्वं ह्रस्वं वा चषालं तद्भोति-क्रान्तं चषालच्छिद्रावेधादतिक्रान्तं भवति अतिक्रम्योर्द्धं निःसृतं भवति तथा चषालस्योर्द्धं प्रवयणं कर्त्तव्यम् यथा चषालो यूपाग्रादधो ह्रस्वे ह्रस्वे वा तिष्ठ-तीत्यर्थः" कर्कः "भूयसातुत्तिताङ्गुलीयकम्" माघः

चह कत्थने (प्रतारणे) भ्वा॰ पर॰ सक॰ सेट्। चहति अचहीत्। चचाह चेहतुः।

चह कत्थने (प्रतारणे) अद॰ चुरा॰ उभ॰ सक॰ सेट्। चहयति–ते अचचहत् त। चहयां बभूव आस–चकार चक्रे।

चक्ष कत्थने प्रतारणे चुरा० उभ० सक० सेट् चटा० चक्षयति ते अचीचक्षत्-त ।

चाक्षचक्य न० चक्ष-अच् चक्षः प्रकारे द्वित्वं चक्षचक्षस्य भावः ष्यञ् । उज्ज्वलतायाम् । "नहि लोकसिद्धसामग्यो प्रातिभासिकरजतोत्पादिका किन्तु विलक्षणैव । तथाहि । काचादिदोषदूषितलोचनस्य पुरोवर्त्तिद्रव्यसंयोगादिदमाकारा चाक्षचक्याकारा च काचिदन्तःकरणवृत्तिरुदेतीति" "चाक्षचक्यसंदर्शनसमुद्भूतरजतत्वसंस्कारप्रबोधेना" इति च वेदान्त० प० । पृथो० । चाक्षचिक्यमप्यत्र शब्दार्थचि० ।

चाक्षचिक्या स्त्री चक्ष-यञ् चाक्षं दीप्तिं चिनोति चि-क्विप् तत्रास्ती चीयते चि-वा० ड । श्वेतवृक्षायां रत्नमा० ।

चाक्ष त्रि० चक्षेण निर्वृत्तम् अण् । चक्षुर्निर्वृत्ते "चाक्षमौपलमित्येवं संग्रामं रथवृत्तयः" हरिवं० १०० अ० ।

चाक्षवर्म्मण पु० चक्षुवर्म्मणोऽपत्यम् अण् न टिलोपः । चक्षुवर्म्मणोऽपत्ये व्याकरणाचार्यभेदे । "कपश्चाक्षवर्मणस्य" उषा० २।१।२३सू० । "इञश्च चाक्षवर्मणस्य" पा० ६।१।१३ सू० । [ढञ् । चक्षुवाकसमीपादौ ।

चाक्षवाकेय त्रि० चक्षुवाकस्यादूरदेशादि चतुरर्थ्यां ढक्या०

चाक्षायण पु० चक्षुषेर्गोत्रापत्यम् अश्वादि० फक् । चक्षुषेर्गोत्रापत्ये उपस्थिते चाक्षवच्च रथ्यपामे प्रद्राघ आस" आ० उ० ।

चाक्षिक त्रि० चक्षेण समूहेन वस्त्रभेदेन चक्षुयुक्तशकटेन वा चरति ठक् । संघीभूय मिलित्वा स्तुतिपाठके चारिष्टके अमरः "पिशुनान्तेतिनां चैव तथा चाक्षिकबन्दिनाम्" याज्ञ० । "चाक्षिको घोषयामास पुरुषो मृष्टकुण्डलः" हरिवं० १५९ अ० । २वैद्यकारे हेमच० ३शाकटिके (गाड़ोयान) ख्याते च शब्दार्थचि० "भिक्षुकांश्चाक्षिकांश्चैव स्त्रीयोन्मत्तान् कुयोजयान् । दाक्षान् कुर्याच्चरन्नेडो दोषाय ते सुरन्धया" भा० शा० ६९ अ० । [ढञ् । चक्षुर्निर्वृत्तादौ ।

चाक्षेय त्रि० चक्षेण निर्वृत्तादि चक्ष+संज्ञा० चतुरर्थ्यां

चाक्षुष न० चक्षुषा गृह्यते चक्षुस्+यत्प्रिकोऽण् । चक्षुर्ग्राह्ये रूपादौ २तद्वति त्रि० । तद्ग्राह्यविषयत्वञ्च चक्षुर्विषयशब्दे २८४२ पृ० दृश्यम् । चक्षुषा निर्वृत्तः अण् । १प्रत्यक्षे न० । तज्ज्ञाने चक्षुषः करणत्वेऽपि विषयभेदेन तस्य व्यापारभेदा भाषा० उक्ता यथा "द्रव्यसङ्गस्तु संयोगात् संयुक्तसमवायतः । द्रव्येषु समवेतानां तथा तत्समवायतः । तत्रापि समवेतानां शब्दस्य समवायतः । तद्वृत्तीनां समवेतसमवायेन तु सङ्गः" । द्रव्यचाक्षुषं प्रति चक्षुःसंयोगोव्यापारः । द्रव्यसमवेतचाक्षुषं प्रति चक्षुःसंयुक्तसमवायः । द्रव्यसमवेतसमवेतचाक्षुषं प्रति चक्षुःसंयुक्तसमवेतसमवायः" । चक्षुषोऽपत्यम् । चक्षुर्नामकस्य रिपुञ्जयस्य पुत्रे षष्ठे मनुभेदे तत्कथा यथा "चक्षुषा ब्रह्मदीक्षित्रां वीरिण्यां स रिपुञ्जयः । वीरण्यस्तात्मजायान्तु चक्षुर्मनुमजीजनत् । मनुर्वै राजकन्यायां नड्वलायां स चाक्षुषः । जनयामास तनयान्दश न्यूरानकसमान् । ऊरुः पूरुः शतद्युम्नस्तपस्वी सत्यवाक् कविः । अग्निष्टुदतिरात्रश्च सुद्युम्नश्चापराजितः । अभिमन्युस्तु दशमो नड्वला यामजायत" मत्स्यपु० ४अ० । "षष्ठं ते सम्प्रवक्ष्यामि तन्निबोध नराधिप !। ऋतुर्ह्यभो विवस्वांश्च सुधामा विरजास्तथा । अतिनामा सहिष्णुश्च सप्तैते तु महर्षयः । चाक्षुषस्यान्तरे तात ! मनोर्ह्येते सुता नव । आद्याः प्रभूता ऋचवः पृथुकाश्च दिवौकसः । तेषां नाम महाराज ! पञ्च देवगणाः स्मृताः । ऋषेरङ्गिरसः पुत्रा महात्मानो महौजसः । नाडवेया महाराज ! दश पुत्रास्तु विश्रुताः । ऊरुप्रभृतयो राजन् ! षष्ठं मन्वन्तरं स्मृतम्" हरि० ७अ० ।

चाक्ष त्रि० चक्ष-वा० स्वार्थे अण् । द्रष्टरि "चाक्षो यदाचं भरते मती" ऋ० २।२४।८। "चाक्षुषः सर्वस्य द्रष्टा" भा० ।

चाङ्क पु० चीयते चि-ड चमङ्कमस्य । १चाङ्केर्यां राजनि० । चमङ्कं तदवयवो दन्तोऽस्यात् । दन्तपटुत्वे शब्दार्थचि० ।

चाङ्केरी स्त्री चाङ्कं दन्तपटुत्वमीरयति ईर-अण् उपसं० गौरा०ङीष् । अश्वलोमिकायाम् (अमरटा) अमरः । "चाङ्केरी दीपनी रुच्या लघ्वी कफवातनुत् । पित्तलाम्ला यकृत्प्लीहगुल्मातीसारनाशिनी" भावप्र० ।

चाङ्केरीघृत न० चक्रदत्तोक्ते चाङ्केरीपक्के घृतभेदे तत्पाकविधिर्यथा "नागरं पिप्पलीमूलं चित्रकं हस्तिपिप्पली । वदंष्ट्रा पिप्पली धान्यं बिल्वं पाठा यमानिका । चाङ्केरीसरसे सर्पिः कल्कैरेतैर्विपाचितम् । चतुर्गुणेन दध्ना च तद्घृतं कफवातनुत् । अर्शांसि यकृदोषं मूलरुग्वं प्रवाहिकाम् । गुदभ्रंशार्त्तिमानाहं घृतमेतद् व्यपोहति" चक्रदत्तः

चाट पु० चुं० चट–भेदे अच्। आदौ विश्वासजन्याद्य पश्चात् धनापहर्त्तरि चौरे "चाटचारखदासेषु दत्तं भवति निष्फलम्" स्मृतिः। "चाटतस्करदुर्वृत्तमहासाहसिकादिभिः। पीड्यमानाः प्रजारक्षात् कायस्थैश्च विशेषतः" याज्ञ०। "चाटाः प्रतारकाः विश्वास्य ये परधनमपहरन्ति" मिताक्षरा

चाटपुट पु० "गुरुर्लघु प्लुतश्चैव भवेच्चाटपुटाभिधः" सङ्गीतदामोदरोक्ते तालभेदे।

चाटु पु०न० चट–उण्। १प्रियवाक्ये २मिथ्याप्रियवाक्ये (खोसामदेरकथा) च। "कुर्वन् चाटुसहस्राणि अव्यक्तकलया गिरा" हरिवं०२०। "नो चाटुश्लथं क्षतं न च दृशा क्षारोऽलिके वीक्षितः" मा० द०। स्वार्थे क। अल्पार्थे "विश्रब्धचाटुकशतानि रतान्तरेषु" मा० द०

चाटुकार त्रि० चाटुं करोति। हेत्वादौ प्राप्तस्य टस्यापवादेन "न शब्दश्लोकेत्यादिना" पा० अण्। सतत चाटुवाक्यकर्त्तरि। "चाटुकारमपि प्राणनाथं रोषादपास्य वा" मा० द०।

चाटुपटु पु० ७त०। भण्डे (भाँड़) क्षारा०।

चाटु(टू)लोल त्रि० चाटुषु लोलः (उल्लोलः। (खोसामदे) चाटुकारे क्षारा०।

चाटुवटु पु० ७त०। विदूषके क्रीड़ासहचरे भण्डे।

चाटूक्ति स्त्री ६त०। प्रियकथने। चाटुवाक्यस्योक्तिश्चेति। २सेवायाम् क्षारा०। [क्यङ्यासे।

चाणक पुंस्त्री चाणक्यस्य क्षत्रः अण् यलोपः। चाणचाणकीन न० चणकस्य भवनं क्षेत्रं खञ्। चणकोत्पत्तियोग्यक्षेत्रे।

चाणक्य पु० चणकस्य सनेर्गोत्रापत्यम् गर्गा० यञ्। १वात्स्यायने चन्द्रगुप्तमन्त्रिणि कौटिल्ये "नव नन्दा भविष्यन्ति चाणक्योवान् क्षनिष्यति" विष्णुपु०। चन्द्रगुप्तशब्दे दृश्यम् सहि नन्दवंशोत्खातेन मौर्य्यं चन्द्रगुप्तं राज्येऽभिषिक्तवान्। दृश्यतां कथायां तद्विवृतिः। चाणक्येन प्रोक्तम् अण्। तत्प्रोक्तग्रन्थे २नीतिशास्त्रभेदे च। "चाणक्यं सारसंग्रहम्" चाणक्यम्। चणक+स्वार्थे यञ्। ३चणकशब्दार्थे।

चाणक्यमूलक न० चणक एव चाणक्यम् तदिव मूलमस्य। (चणकमूली) ख्याते मूलकभेदे। शब्दार्थचि०

चाणू(नू)र पु० कंसानुचरे मल्लयुद्धाभिज्ञेऽसुरभेदे। "नागं कुवलयापीड़ं चाणू(नू)रं मुष्टिकं तथा" हरिव०४२अ०। "वराङ्गे किशोरे मतौ दानवस्तम्भौ। मल्लौ रङ्गगतौ तत्र यातौ चाणू(नू)रमुष्टिकौ" हरिवं०५५अ०। अस्य दन्त्यनकारमध्यतेति केचित्।

चाणू(नू)रसूदन पु० चाणू(नू)रं सूदयति सूद–ल्यु। वासुदेवे कृष्णे तद्वधकथा हरिवं० ८७अ०।

"ततः क्रोधाभिताम्राक्षः कंसः परमकोपनः। चाणू(नू)रमादिशद्युद्धे कृष्णस्य समरावलम्" इत्युपक्रमे "दोर्भ्यामानम्य कृष्णस्तु चाणू(नू)रं पूर्णजीवितम्। प्राहरन्मुष्टिना मूर्द्धि वज्रस्पर्शत्व जानुना। निःसृते शोणितरुधिरे तस्य नेत्रे सवन्धने। तापनीये यथा चण्टे कक्षोपरि विलम्बिते। पपात स तरङ्गस्य मध्ये निःसृतलोचनः। चाणू(नू)रो विगतप्राणो जीवितान्ते महीतले"। चाणू(नू)रमर्दनादयोऽप्यत्र।

चाण्ड पुंस्त्री चण्डस्यापत्यं शिवा० अण्। १चण्डस्यापत्ये। चण्डस्य भावो युवा० अण्। २चण्डतायाम् न०।

चाण्डाल पुंस्त्री चण्डाल एव स्वार्थे अण्। चण्डालशब्दार्थे अमरः। स्त्रियां जातित्वात् ङीष्।

चाण्डालकि पु० स्त्री चाण्डालस्यापत्यम् इञ् "व्यासवरुडनिषादचाण्डालेत्यादि" पा० यकञ्। चण्डालापत्ये।

चाण्डालिका स्त्री चण्डालेन निर्दृत्ता ठक्। वीणाभेदे अमरः। चण्डालेन कृता कृत्रा० अण्। २चण्डालकृतवस्तुमात्रे त्रि०

चाण्डालिकाश्रम न० भारतप्रसिद्धे तीर्थभेदे "कोकामुखे विगाह्याथ गत्वा चाण्डालिकाश्रमे" भा०आनु०२५अ०।

चाण्डाली स्त्री चाण्डमाक्रामति आ+क्रम–क गौरा० ङीष्। १लिङ्गिनीलतायां राजनि० जातौ ङीष्। २चाण्डालजातिस्त्रियाञ्च।

चातक पुंस्त्री चत–याचने कर्त्तरि ण्वुल्। सारङ्गे खनामख्याते खगभेदे स्त्रियां जातित्वात् ङीष्। अयञ्च पक्षी लक्षणेषु शस्यते पठितः। "लक्षणा विकिराश्चेत्युक्त्वा "मधुराः कषाया दोषशमनाश्चेति" सामान्यतस्तद्गुणाश्चोक्ताः। "स्वगयन्त्यमूः शमितचातकार्त्तस्वराः" माघः। "किं चातकः फलमपेक्ष्य नवाम्बुपातम्" उद्भटः।

चातकानन्दन पु०चातकमानन्दयति आ+नन्द–णिच्–ल्यु। १वर्षाकाले राजनि०। २मेघे। वृष्टिजलपानस्य चातकप्रतत्वेन मेघस्य तथात्वम्।

चातकाष्टक न० काव्यभेदे काव्यसंग्रहे दृश्यम्।

चातन न० चत–णिच्–ल्युट्। १अर्दने २पीड़ने च।

चातुर त्रि० चतुर एव स्वार्थे अण्। १चतुरे २नियन्तरि ३नेत्रगोचरे मेदि०। चतुर्भिरञ्जते शैवि०ऽण्। "चतुरश्वयुक्ते २रथकटे न० सि० कौ०

चातुरङ्ग न० चतुर्भिरङ्गैर्निर्म्मायते अण्। १क्रीड़ाभेदे २उपधानभेदे (गालवालिश) पु० मेदि०।

चातुरर्थिक पु० चतुर्षु अर्थेषु विहितः ठक्। "तदस्मिन्नधीति देशे तत्रास्मि" ०४।२।६७। "तेन निर्वृत्तम्" ६८। "तस्य निवासः" ६९। "अदूरभवश्च" ७० पा० सूत्रचतुष्कोक्तार्थेषु विहिते प्रत्ययभेदे। "जनपदे लुप्" पा०। जनपदे वाच्ये चातुरर्थिकस्य लुप् स्यात्" सि० कौ०।

चातुराश्रमिक त्रि० चतुर्षु आश्रमेषु विहितः ठक्। ब्रह्मचर्य्याद्याश्रमविहिते धर्मे। "चातुर्विद्यं यथावर्णं चातुराश्रमिकान् परम्। तानहं संप्रवक्ष्यामि शाश्वतान् लोकभावनान्" भा० आ० २५ अ०।

चातुराश्रम्य न० चत्वार आश्रमाः संघातात् कर्म्म० ततः ब्राह्मणा० स्वार्थे ष्यञ्। ब्रह्मचारिगृहस्थवानप्रस्थभिक्षुकरूपेषु आश्रमेषु "चातुर्विद्यं चातुर्होत्रं चातुराश्रम्यमेव च" भा० शा० ३६ अ०।

चातुरिक पु० चातुरीं वेत्ति ठक्। सारथौ जटाधरः।

चातुरी स्त्री चतुरस्य भावः ष्यञ् स्त्रियां ङीष्यलोपौ। चतुरतायां "तद्भटचातुरीतुरी" नैष०

चातुर्जातक न० चतुर्जातकएव स्वार्थेऽण्। गुडत्वगेलानागकेशररूपे गन्धचतुष्टये राजनि०।

चातुर्दंश्य न० चतुर्दश्यां दृश्यते शैषिकोऽण्। १रक्षसि सि० कौ०। चतुर्दश्यां भवः सन्धिवेला० अण्। २चतुर्दशीभवे त्रि०

चातुर्दशिक पु० चतुर्दश्याम् अनध्यायेऽधीते ठक्। चतुर्दशमध्येतरि। "शिष्यं हन्ति चतुर्दशी" मनुना तस्या अनध्यायतोक्तेस्तथात्वम्।

चातुर्भद्र न० चतुर्भद्रमेव स्वार्थे अण्। नागरातिविषाभद्रामुस्तागुडूचीरूपे द्रव्यचतुष्टये राजनि०।

चातु(र्थि)र्थिक पु० चतुर्थे चत्वर्थेऽह्नि भवः ठक् वुञ् वा। चतुर्थचतुर्थदिनजाते ज्वरभेदे "चातुर्थ(र्थि)कोज्वरोरुद्रो ह्यन्ये चैव ज्वरास्ततः। जम्बूफलं हरिद्रा च सर्षपश्चैव च कट्फलम्। सर्व्वज्वराणां धूपोऽयं हरचातुर्थ(र्थि)कस्य च" गारुडे १८७अ०।

चातुर्वर्ण्य न० चत्वारो वर्णाएव चतुर्वर्णा० स्वार्थे ष्यञ्। ब्राह्मणादिषु चतुर्षु वर्णेषु "चातुर्वर्ण्यं मया सृष्टं गुणकर्म्मविभागशः गीता।

चातुर्भद्रावलेह पु० चतुर्भिर्भद्रैर्निर्वृत्तः अण् कर्म्म०। "कट्फलं पौष्करं मुस्ता शुण्ठी क्वाथ्य च मधुना सह। कासश्वासज्वरहरः श्रेष्ठो लेहः कफानलः" चक्रदत्तोक्ते अवलेहभेदे।

चातुर्भौतिक त्रि० चतुर्भिः पृथिव्यप्तेजोवायुभिर्निर्वृत्तः ठक् अनुग०द्विपदादिः। चतुर्भिर्भूते निर्वृत्तादिते देहादौ नैयायिकादिमते आकाशस्यारम्भकत्वाभावात् चार्वाकमते आकाशस्याभावात् भौतिकानां चतुर्भूतारब्धता। वेदान्त्यादिमते देहस्य पाञ्चभौतिकत्वमिति भेदः। यद्यपि मनुष्यदेहस्य पार्थिवत्वं नैयायिकैरङ्गीकृतं तथापि अन्यभूतानां तत्रोपष्टम्भकत्वात् चातुर्भौतिकत्वम् इति विवेकः।

चातुर्महाराजिक पु० चत्वारो महाराजिकाः स्वाकार त्वेनास्त्यस्य प्रज्ञा० अण्। परमेश्वरे "महाराजिक चातुर्महाराजिक" भा० शा० ३४० अ० नारदस्तवविष्णुस्तुतौ। महाराजिकानां च चतुःसंख्यकगन्धर्वदेवतात्वात् तस्य तदात्मकत्वेन तथात्वम्।

चातुर्मास त्रि० चतुर्षु मासेषु भवः अवयवायाम् अण्। चतुर्षु मासेषु भवे। २स्त्रियां शौर्षमासानां च स्त्री ङीप्। संघातात्तु यज्ञे खः। चातुर्मास्य इत्येव तत्रार्थे दृश्यम्

चातुर्मासिक त्रि० चतुरो मासान् व्याप्य ब्रह्मचर्य्यमस्य ठक्। चतुर्मासव्यापकब्रह्मचर्य्ययुक्ते कर्म्मणि। यज्ञे तु "चतुर्मासान् खोयज्ञे" वार्त्ति० यत्र चातुर्मास्य इत्येव।

चातुर्मास्य त्रि० चतुर्षु मासेषु भवोयज्ञः "चतुर्मासान् खोयज्ञे" वार्त्ति० यत्र। चतुर्मासमाध्ये यज्ञभेदे। चातुर्मास्ये च चत्वारि पर्व्वाणि वैश्वदेववरुणप्रघासशाकमेधसुनासीरीयसंज्ञानि। तत्कर्त्तव्यप्रयोगादि का० श्रौ० ५अध्यायादौ दृश्यम्। तदारम्भकालश्च फाल्गुनीपूर्णिमोत्तरं प्रतिपदि तत्रोक्तः। २वार्षिकचातुर्मासकर्त्तव्ये व्रते च यथाह वराहपु० "आषाढशुक्लद्वादश्यां शौर्षमासाश्रमापि वा। चातुर्मासव्रतारम्भं कुर्य्यात् कर्कटसंक्रमे। अभावे तु तत्रार्केऽपि सन्त्रेच नियमं व्रती। कार्त्तिके शुक्लद्वादश्यां विधिवत् तत् समापयेत्। चतुर्द्वीपि हि तत्पुण्यं चातुर्मास्यं व्रतं नरः। कार्त्तिक्यां शुक्लपक्षे तु द्वादश्यां तत्समापयेत्"। मात्स्ये "चतुरो वार्षिकान् मासान् देवस्योत्थापनावधि। मधुस्वरोभवेन्नित्यं नरो गुड़

विवर्जनात्। तैलस्य वर्जनादेव सुन्दराङ्गः प्रजायते। कटुतैलपरित्यागात् शत्रुनाशः प्रजायते। लभते सन्ततिं दीर्घां स्थालीपाकमभक्षयन्। सदा सुखिः सदा योगी मधुमांसस्य वर्जनात्। निराधिर्नीरुगोजस्वी विष्णुभक्तश्च जायते। एकान्तरोपवासेन विष्णु लोकमवाप्नुयात्। धारणाग्नखलोम्नाञ्च गङ्गास्नानं दिने दिने। ताम्बूलवर्जनाद्भोगी रक्तकण्ठश्च जायते। घृत त्यागात् सुलावण्यं सर्वस्निग्धवपुर्भवेत्। फलत्यागेन मतिमान् वह्निपुत्रश्च जायते। नमोनारायणायेति नत्वाऽनशनजं फलम्। पादाभिवन्दनाद्विष्णोर्भेदुगोदानजं फलम्। एवमादिव्रतैः पार्थ! तुष्टिमायाति केशवः। "ग्रामे वा यतिमधिकृत्य काठकमट्टप्रम्। "एकरात्रं वसेत् ग्रामे नगरे पञ्चरात्रकम्। वर्षाभ्योऽन्यत्र वर्षासु मासांश्च चतुरो वसेत्"। एतदशक्तविषयम्। "अर्द्धं वार्षिकाभ्यां मासाभ्यां नैकस्थानवासी" इति शङ्खोक्तेः। "चातुर्मास्यगते या (द्वितीया) तु" तिथितत्त्व अनध्यायोक्तौ

**चातुर्मास्यद्वितीया** स्त्री "आषाढे फाल्गुनोर्जेषे या द्वितीया विधुप्रिये। चातुर्मास्यद्वितीयास्ताः प्रवदन्ति मनीषिणः" इति स्मृत्युक्ते आषाढादिद्वितीयाचतुष्के

**चातुर्य्य** न० चतुरस्य भावः ष्यञ्। चतुरतायां दक्षतायाम् "चातुर्य्यं सदृशमनोभवया रतेषु" मा० द० "संभोगस्ते च चातुर्य्यैर्हावभावमनोहरैः" भा० आ० २९०५।

**चातुर्वर्ण्य** न० चत्वारो ब्राह्मणादयोवर्णा एव स्वार्थे ष्यञ्। ब्राह्मणादिषु चतुर्षु १वर्णेषु "चातुवर्ण्यं मया सृष्टमिति" गीता। भावे—ष्यञ्। २चतुर्वर्णधर्म्मे। वर्णभेदेन धर्म्मभेदाः शङ्खेन दर्शिताः यथा।

"चातुर्वर्ण्यहिताथाय शङ्खः शास्त्रमथाकरोत्। यजनं याजनं दानं तथैवाध्यापनक्रियाम्। प्रतिपद्यध्ययनं विप्रः कर्माणि कारयेत्। दानमध्ययनञ्चैव यजनञ्च यथाविधि। क्षत्रियस्य तु वैश्यस्य कर्मेदं परिकीर्त्तितम्। क्षत्रियस्य विशेषेण प्रजानां परिपालनम्। कृषिगोरक्षवाणिज्यं वैश्यस्य परिकीर्त्तितम्। शूद्रस्य द्विजशुश्रूषा सर्वशिल्पानि चाप्यथ। क्षमा सत्यं दमः शौचं सर्वेषामविशेषतः। ब्राह्मणः क्षत्रियो वैश्य स्त्रयोवर्णा द्विजातयः। तेषां जन्म द्वितीयन्तु विज्ञेयं मौञ्जिबन्धनम्। आचार्य्यस्तु पिता मोक्षः सावित्री जननी तथा। ब्रह्मक्षत्रविशाञ्चैव मौञ्जीबन्धनजन्मनि। विप्राः शूद्रसमास्तावद्विज्ञेयास्तु विचक्षणैः। यावद्वेदे न जायन्ते द्विजास्ते या सु तत्परम्"। "ब्राह्मणः क्षत्रियोवैश्यः शूद्रश्चेति वर्णाश्चत्वारः। तेषामाद्यास्त्रिजातयः। तेषां त्रिवेदाद्यः श्रुतिमानान्नो मन्त्रवत् क्रियासमूहः। तेषाञ्च धर्माः, ब्राह्मणस्याध्यापनं क्षत्रियस्य प्रजारक्षणता वैश्यस्य पशुपालनं शूद्रस्य द्विजातिशुश्रूषा। द्विजानां यजनाध्ययने। अथैतेषां वृत्तयः ब्राह्मणस्य याजनप्रतिग्रहौ, क्षत्रियस्य क्षितिरक्षणं, कृषिगोरक्षवाणिज्यकुसीदयोनिपोषणानि वैश्यस्य, शूद्रस्य सर्वशिल्पानि। आपद्यनन्तरा वृत्तिः" विष्णुसं०।

**चातुर्होतिक** पु० चतुर्होतृप्रतिपादकग्रन्थस्य व्याख्यानः ऋदत्वात् ठक्। चतुर्होतृप्रतिपादकग्रन्थव्याख्याने। चतुर्होतृणां कर्म्म ण्यण्। चातुर्होत्र चतुर्णां होतृणां कर्मणि। चतुर्होतृशब्दे उदा०।

**चातुष्टय** पु०चतुष्टयं कलापस्त्रत्वर्त्तिं वेत्ति अधीते वा अण्। "सूत्राच्च कोपधात्" पा० कोपधात् प्रत्ययस्य लुकोविधानात् अस्य च कोपधत्वाभावात् न लुक्। चतुष्टय इत्यभिन्ने

**चातुष्प्राश्य** न० चतुर्भिरध्यर्युब्रह्मादिभिर्ऋत्विग्भिः प्राश्यम् ततः स्वार्थेऽण्। चतुर्भिर्ऋत्विजां भोजनपर्य्याप्ते ओदने। "चातुष्प्राश्यमोदनं पचन्ति" शत०ब्रा०२।१।४।४। "दर्शपौर्णमासानीजानोदक्षिणाग्निपक्वं चातुष्प्राश्यं ब्राह्मणान् भोजयेत्" का० श्रौ० ४।६।१०।

**चात्र** न० चाय—करणे ष्ट्रन्। अग्निमन्थनयन्त्रावयवभेदे। अग्न्युद्वारशब्दे ६२ पृष्ठे दृश्यम्। तत्र च पृष्ठे चत्रमिति पाठः प्राचीनसंहितापाठानुसारेण प्रमादात् संहितः सर्व्वत्र चात्रमित्येव पाठः साधुः का० श्रौ० ४।८।२६ स्थलभाष्ये तत्स्वरूपादिकम् कर्क आह।

"अग्ने पुरस्तात् प्रत्यङ्मुखे स्थिते मन्थनं कुर्यात्। तत्र च प्रथममधरारणिमुत्तारयां निधाय उत्तरारण्या ईशानदिग्भागादष्टाङ्गुलदीर्घं द्व्यङ्गुलविपुलं प्रमन्थं छित्त्वा तस्य मूलं चात्रवृक्षे प्रवेश्य अधरारण्या मूलादष्टाङ्गुलं त्यक्त्वा अग्राच्च द्वादशाङ्गुलं त्यक्त्वा तदन्तराले अङ्गुलचतुष्टयपरिमिते पूर्वारण्यग्रे मन्थानं कृत्वा चात्रवृक्षप्रोतस्य प्रमन्थस्याग्रं तत्र निधाय चात्राग्रकीलकाग्रयोरुपर्य्युदगग्रामौदीचीं निधाय मन्थं चारयित्वा चात्रं नेत्रेण प्रदक्षिणं त्रिर्वेष्टयित्वा तथा मन्थनं कुर्यात् यथा जातोऽग्निः प्राच्यां पतति तत्र यजमानः प्राङ्मुखो मन्त्रधारणं करोति पत्नी चात्रं

नेनैव लिखेदवित्वा मन्थनं करोति तथा शाखान्तरादध्वर्युं च तथाऽध्वर्युः प्रत्यङ्मुखोऽभिमन्थतीति"। चात्रं च खादिरं द्वादशाङ्गुलदीर्घं वर्तुलम् अग्रे चोडुम्बरीयुक्तम् मूले प्रमन्थाग्रप्रवयनार्थगर्तयुक्तम् मूलेऽग्रे च षोडशाङ्गुलया संयुक्तं कार्यम्"। "औदीची च खादिरी द्वादशाङ्गुलदीर्घा चतुरङ्गुलविपुलाधोभागे समा चात्रायस्थितकीलकोपरिस्थापनार्थं षोडशाङ्गुलया उपरिभागे वर्तुला च कार्या। नेत्रं च गोवालसमस्थूलं वितस्तिमात्रं कार्यम्। केचित् प्रमन्थाग्रेण मन्थनि, अपरे तु मूलेन"

चात्वाल पु० चत-वालच्। १यज्ञकुण्डे २दर्भे ३उत्तानेऽवटे च विश्वः ४उत्तरवेद्यङ्गे ऋत्विग्भेदे ५तत्प्रमितावटे च "चात्वालोत्करावन्तरेण सञ्चरः" का०श्रौ० १।२।३२। "चात्वालञ्च उत्करञ्च चात्वालोत्करौ तौ अन्तरेण तयोरन्तरालेन सर्वेषां विहितकार्याणां संचरः गमनागमनमार्गोभवति। अयं च सोत्तरवेदिकेषु वरुणप्रघासमहाहविःपशुसोमेषु ज्ञेयः चात्वालसाम्येन उक्तात् सोत्तरवेदिकेषु सर्वेष्वनेनैव मार्गेण गमनागमने कार्ये"कर्कः। "तच्चात्वालं परिलिखति सा चात्वालस्य मात्रा मात्रास्ति यत्रैव स्वं मनसा मन्येतावेणोत्करं तच्चात्वालं परिलिखेत्" शत० ब्रा० ३।५।१।२६। "सा चात्वालस्य मात्रा यैषोत्तरवेदेरुक्ता सैवेतदर्थः चात्वालखननोत्पन्नस्यैव स्वदोत्तरवेदिकरणात्" भा०।

"चात्वालं चात्वालवत्तु" आश्व० श्रौ० १।१।६। "चात्वालोनामावटः पशुसोमादिष्वग्नि येषु उत्तरवेद्यर्थं यत्र खनत् चात्वाल्लियते तद्वत्तु" ना० रा० उक्तेः उत्तरावेद्यर्थखदाकरणजातावटएव चात्वाल इति गम्यते।

चानराट न० चनराटखेदम् अण्। चनराटदेशाख्याने तस्मिन्शब्दे परे दिक्शब्दा अन्तोदात्ताः। "पूर्वं चानराटम्" सि० कौ०।

चान्द्रनिक त्रि० चन्द्रेण सम्पद्यते ठक्। चन्द्रेण क्रीतशोभे "वसुचान्द्रनिकं यस्य कार्षापेटनिकं सुखम्" भट्टिः।

चान्द्र त्रि० चन्द्रखेदम् अण्। १चन्द्रसम्बन्धिनि दिनमासादौ २तन्नामके च। "अर्काद्विनिःसृतः प्राचीं वहत्यात्मकरः शशी। तच्चान्द्रमानमंशैस्तु ज्ञेया द्वादशभिस्तिथिः" सू० सि०

"सूर्यात् समागमं लब्ध्वा विनिःसृतः पृथग्भूतः संचन्द्रोंऽशरूपः प्रतिदिनं यत् यत्कलाप्रमितं प्राचीं पूर्वां दिशं गच्छति तत् प्रतिदिनं चान्द्रमानं तत्तु सत्यलरांशमितम्। ननु सौरदिनं सूर्यांशेन यथा भवति तथैतद्रूपैर्भागैः कियद्भिः पूर्णं चान्द्रं दिनं भवतीत्यत आह। अंशैरिति। भागैस्तुकारात् सूर्यचन्द्रान्तरोत्पन्नैरंशैस्तद्रूपत्वात्। द्वादशभिर्द्वादशसङ्ख्याकैस्तिथिर्ज्ञेया। एकं चान्द्रदिनं ज्ञेयमित्यर्थः। एतदुक्तं भवति सूर्यचन्द्रयोगाच्चान्द्रदिनप्रवृत्तेः पुनर्योगे मासमासाप्तेर्भगणान्तरेण चान्द्रो मासस्तिंशद्भिश्चान्द्रदिनात्मकः। अतस्तिंशद्भिर्दिनैर्यदि भगणांशान्तरं तदैकेन किमिति। द्वादशभागैरेकं चान्द्रदिनम्। "दर्शः सूर्येन्दुसङ्गमः" इत्यभिधानाद्दर्शादधिकमासस्य त्रिंशत्तिथ्यात्मकत्वात् तिथिश्चान्द्रदिनरूपेति। अथ चान्द्रव्यवहारमाह" र०न०"तिथिः करणसंज्ञकः शौरं सर्वक्रियासाधनं। व्रतोपवासयात्राणां क्रिया चान्द्रेण सिद्धति" सू० सि०।

"तिथिः प्रतिपदाद्या करणं बवादिकसंज्ञको दिवाक्तः शौरं चौलकर्म। एतदाद्याः सर्वक्रिया व्रतबन्धाद्युत्सवरूपा व्रतोपवासयात्राणां नियमोपवासगमनानां क्रिया करणम्। तथा सत्तृतीयार्थकः। चान्द्रमानेन सिद्धयते अङ्गीक्रियते। अथ चान्द्रं मासं प्रसङ्गात् पिण्डमानं चाह" र०ना०।

"त्रिंशता तिथिभिर्मासश्चान्द्रः पित्र्यस्तदहः स्मृतम्" स्मृ०सि० "कालेन येनेति पुनः शशीनं क्रामन् भचक्रं विवरेण गत्या। मासः स चान्द्रोऽङ्कयमाः क्रमाः पूर्णेंदवः। २८।२१।५०। स्मृतुदिनप्रमाणम्" सि०शि० "दर्शान्ते किल शशी रविणा युक्तो भवति। ततोऽहर्वपि पूर्वतो गच्छतः। तयोः शशी शीघ्रगत्वात् प्रत्यहं सत्यलरेणाग्रतो याति। एवं गच्छंश्चक्रकला २१६०० तुल्यलरं यदाग्रतो याति तदा रविणा योगमेति। तयोः कालयोरन्तरालं चन्द्रमासः। तत्प्रमाणमनुपातेन। चन्द्रार्कयोर्मध्यगती आदौ सम्यक् सावयवे कृत्वा यदि सत्यलरेणैकं कुदिनं लभ्यते तदा चक्रकलात्मकेनान्तरेण कियतीत्यनुपातेन चान्द्रमासे कुदिनानि लभ्यन्ते। २८।२१।५०"। प्रमिता०। अधिकं पौषचान्द्रशब्दे २७३५ पृ० दृश्यम्। आपस्तम्बः "चन्द्रमाः कृष्णपक्षान्ते सूर्येण सह युज्यते। सन्निकर्षादारभ्य सन्निकर्षावधिः परम्। चन्द्रार्कयोः रवेर्भासश्चान्द्र इत्यभिधीयते" विष्णुस०। २चान्द्रायणव्रते न०। "चान्द्रं कृच्छ्रं तदर्द्धं च ब्रह्मचर्यविधां विधिः" प्रा० त०। 'चान्द्रं

चान्द्रायणम्" रघु०। २चन्द्रज्ञानमस्यौ पु० ऐमच०। ४चन्द्रसम्बन्धिमासे त्रि० स्त्रियां ङीप् "गुरुकावप्रानुगां बिभ्रत् चान्द्रीमभिनभः श्रियम्" माघः। सा च ५श्वेतकण्टकार्या राजनि०। ६आर्द्रके न० राजनि०। ७मृगशीर्षनक्षत्रे न० तस्य तद्देवताकत्वाच्छ्रेष्ठत्वात्तथात्वम् [ राजनि०। ३८७ पृ० उक्तम्

**चान्द्रक** न० चान्द्रमार्द्रकमिव कायति कै-क। शुष्कशाक

**चान्द्रपुर** पु० १पूर्व्वदेशस्थे देशभेदे १तद्देशवासिषु ब० व०। स च देशः "अथ पूर्व्वस्याम्" इत्युपक्रमे "चान्द्रपुराः सूर्पकर्णाश्च" बृ० सं० १४अ० कूर्म्मविभागे उक्तः।

**चन्द्रभागा** स्त्री चान्द्रो भागोऽंशोऽस्याम्। चन्द्रभागानद्याम् चन्द्रभागाशब्दे ३७३८ पृष्ठे दृश्यम्

**चान्द्रमस** त्रि० चन्द्रमसदृदम् अण्। १चन्द्रसम्बन्धिनि दिनमासादौ। "तिथिश्चान्द्रमसं दिनम्" ति० त० सूर्य्यसिद्धान्तीयवाक्यत्वेन पठितम्। २मृगशिरोनक्षत्रे न० तस्य तद्देवकत्वात्तथात्वम्। ३चन्द्रसम्बन्धिमासे त्रि० स्त्रियां ङीप् "लक्ष्मीदया चान्द्रमसीव लेखा"। "पद्माश्रिता चान्द्रमसीमभिख्याम्" कुमा०। "सुरद्विषच्चान्द्रमसी तथैव" रघुः।

**चान्द्रमसायनि** पु० चन्द्रमसोऽपत्यम् तिका० फिञ्। बुधपुत्रे हला०। पृषो०। चान्द्रमसायनोऽप्यत्र।

**चान्द्रमास** पु० कर्म्म०। चन्द्रसम्बन्धिमासे चान्द्रशब्दे ३७३म

**चान्द्रव्रतिक** पु० चान्द्रव्रतंत्र चान्द्रायणं वा व्रतमस्यास्य ठन्। १चन्द्रव्रतव्रताचारिणि त्रये। "परिपूर्णं यथा चन्द्रं दृष्ट्वा हृष्यन्ति मानवाः। तथा प्रकृतयो यस्मिन् स चान्द्रव्रतिको नृपः" मनुः। २चान्द्रायणव्रताचारिणि च

**चान्द्रायण** न० अन्द्रक्षायनमिवायनमत्र पूर्वपदात् संज्ञायां णत्वम्। संज्ञायां दीर्घः स्वार्थेऽण् वा। व्रतभेदे तद्भेदादिकं मिता० उक्तं यथा। "तिथिदृष्ट्या चरेत्पिण्डान् शुक्ले शिखण्डसंमितान्। एकैकं ह्रासयेत् कृष्णे, पिण्डश्चान्द्रायणश्चरेत्" या०। "चान्द्रायणाख्यकर्म्म कुर्व्वन्मयूराण्डप्रमितान् पिण्डान् शुक्ले आपूर्य्यमाणपक्षे तिथिवृद्ध्या चरेद्भक्षयेत् यथा प्रतिपदमारभ्य तिथिषु तिथिषु चन्द्रकलानामेकैकशोऽभिवृद्धौ मासे। तद्वत्पिण्डान् प्रतिपद्येको द्वितीयायां द्वावित्येवमेकैकशोवर्द्धयन् भक्षयेद् यावत्पौर्णमासी ततः पञ्चदशीं पञ्चदश ग्रासान् भुक्त्वा ततः कृष्णपक्षे प्रतिपदि, चतुर्दश द्वितीयायां त्रयोदशेत्येवमेकैकशो ग्रासान् ह्रासयन्नमावास्यायां चतुर्दशीं। ततश्चतुर्दशग्रासेकं ग्रासं पक्षित्वेन्दुक्षयेऽर्थादुपवसेत्। तथा च वसिष्ठः। "एकैकं वर्द्धयेत्पिण्डं शुक्लपक्षे च ह्रासयेत्। इन्दुक्षये न भुञ्जीत एष चान्द्रायणो विधिरिति"। चन्द्रक्षायनमिवायनं चरणं यस्मिन् कर्म्मणि ह्रासवृद्धिभ्यां तच्चान्द्रायणम् संज्ञायान्दीर्घः (यत्पक्ष) इदञ्च यवमध्यत्वान्नयोरधीयो मध्ये स्थीयत इति यवमध्यमिति कथ्यते। एतदेव व्रतं यदा कृष्णपक्षप्रतिपदि प्रकृत्य पूर्व्वोक्तक्रमेणानुष्ठीयते तदा पिपीलिकामध्यमिव क्षुद्रसत्त्वमवतीति पिपीलिकातनुमध्यमिति कथ्यते तथाहि। पूर्व्वोक्तक्रमेण कृष्णप्रतिपदि चतुर्दश ग्रासानभुक्त्वैकैकग्रासापचयेन चतुर्दशीं यावद्भुञ्जीत ततश्चतुर्दशग्रासेकं ग्रासं पक्षित्वामावास्यां ग्रासमपीत्वा शुक्लप्रतिपद्येकमेव ग्रासमाश्नीयात्तत एकैकोपचयभोजनेन पञ्चदशे निर्व्वर्त्त्यमाने पौर्णमास्यामेकदशग्रासाः सम्पद्यन्त इति युक्तैव पिपीलिकामध्यता। तथाच वसिष्ठः। "मासस्य कृष्णपक्षादौ ग्रासानश्नन्नतन्द्रितः। ग्रासापचयभोजी सन् पक्षयोर्द्वं समापयेत्। तथैव शुक्लपक्षादौ ग्रासमश्नीत चापरम्। ग्रासोपचयभोजी सन् पक्षयोर्द्वं समापयेदिति" यदा त्वेकस्मिन् पक्षे तिथिवृद्धिह्रासवशात् षोडश दिनानि भवन्ति पञ्चदश वा तदा ग्रासानामपि वृद्धिह्रासौ वेदितव्यौ "तिथिवृद्ध्या पिण्डांश्चरेदिति नियमात्। गौतमेन त्वत्र विशेषो दर्शितः "अथातश्चान्द्रायणस्योक्तोविधिः। कृष्णे ह्रासनं व्रतयुरेत्। शुक्लेऽपचयेत्। आप्यायस्व" (ऋ०१।९१।१६) "सन्ते पयांसि (१७) नयोनवः" (ऋ० १०।८५।१९) इति चैताभिस्त्रयोदशभिर्ऋग्भिः कृष्णप्रतिपदमारभ्य क्रमेणैकैकस्या ऋचः प्रतिमन्त्रं मनसा नमःस्वाहेति वा सर्वान् एतैरेव ग्रासानश्नीयात् ग्रासमाषमात्राधिकारेण चरुभैक्षसक्तुकणयावकपयोदधिघृतमूलफलोदकानि क्रमेणोत्तरोत्तरमश्नानि पौर्णमास्यां पञ्चदश ग्रासान् भुक्त्वैकैकापचयेनापरपक्षमश्नीयात्। अमावास्यायामुपोष्यैकेनोपचयेन पूर्वपक्षं विपरीतमेकेषाम् एष चान्द्रायणो मासः" इति। अत्र

यासप्रमाणमाह्याविकारेणेति यदुक्तन्हारीताभिप्रायम् तेषां शिखण्डपरिमितपञ्चदशग्रासभोजनाशक्तेः। क्षीरादिद्रवहविषां शिखण्डपरिमितत्वन्तु पर्णपुटिकादिना सम्पादनीयम्। तथा कुक्कुटाण्डाद्यामलकादीनि तु ग्रासपरिमाणानि कृत्वानरोक्तानि शक्तविषयाणि शिखण्डपरिमाणाङ्गुष्ठवात्तेषां, यत्तु नरत्नं "शोभूतास्यौषमासी सुपवसेदिति चतुर्दशग्रासुपवासमभिधाय पौषमाघाभ्यञ्च दश ग्रासान् भुङ्क्ते त्यादिना द्वात्रिंशद्ग्रासात्मकत्वं चान्द्रायणस्योक्तम् तत्पक्षान्तरप्रदर्शनार्थम् न सार्वत्रिकम्। योगीश्वरादिवचनानुरोधेन त्रिंशद्ग्रासात्मकस्य दर्शितत्वात्। यद्येवंविधिकं स्यात्तदा नैरन्तर्येण संवत्सरे चान्द्रायणानुष्ठानानुपपत्तिः स्यात् चन्द्रगत्यनुवर्त्तनानुपपत्तिश्च। चान्द्रायणान्तरमाह" मिता०। "यथा कथञ्चित्पिण्डानाङ्कृत्वारिंशच्छतद्वयम्। मासेनैवोपभुञ्जीत चान्द्रायणमथापरम्" या०। "पिण्डानाङ्कृत्वारिंशदधिकं शतद्वयं मासेन भुञ्जीत यथाकथञ्चित्प्रतिदिनं मध्याह्ने ऽष्टौ ग्रासान् तथा नक्तन्दिवसयोश्चतुरश्चतुरो वा। अथवैकस्मिंश्चतुरोऽपरस्मिन् द्वादश वा तथैकरात्रसपोष्यापरस्मिन् षोड़श वेत्यादि प्रकाराणामन्यतमेन शक्त्यपेक्षया भुञ्जीतेत्येतत्पौर्णमासान्तरायणद्वयादपरं चान्द्रायणम्। अतस्तयोर्नायं ग्रासंख्यानियमः। किन्तु तत्र पञ्चविंशत्यधिकशतद्वयसंख्यैव। मनुना चैते प्रकारा दर्शिताः "अष्टावष्टौ समश्नीयात्पिण्डान्मध्यन्दिने स्थिते। नियतात्मा हविष्यस्य यतिचान्द्रायणञ्चरन्। चतुरः प्रातरश्नीयात्पिण्डान्विप्रः समाहितः। चतुरोऽस्तमिते सूर्य्ये शिशुचान्द्रायणञ्चरन्। यथाकथञ्चित्पिण्डानान्त्रिंशोऽशीतीः समाहितः। मासेनाश्नन् हविष्यस्य चन्द्रस्यैति सलोकताम्" इति। "तथा चत्वारिंशच्छतद्वयान्नसंख्यकयाससम्पाद्यस्यापि संपूर्त्तार्थमपरमुच्यते। यथाह यमः "त्रींस्त्रीन् पिण्डान् समश्नीयान्नियतात्मा दृढ़व्रतः। हविष्यान्नस्य वै मासस्यपिचान्द्रायणं कृतमिति"। एतु च यतिचान्द्रायणप्रकृतिम् न चन्द्रगत्यनुसरणमपेक्षितमतस्त्रिंशद्दिनात्मकमासेन नैरन्तर्येण चान्द्रायणानुष्ठाने यदि कथञ्चित्तिथिह्रासवशेन पञ्चम्यादिष्वारम्भो भवति तथापि न दोषः। यदपि सौमायनाख्यं मासव्रतं मार्कण्डेयेनोक्तम् "गोक्षीरं सप्तरात्रन्तु पिबेत् स्नानचतुष्टयात्। स्नानत्रयात्सप्तरात्रं सप्तरात्रं स्नानद्वयात्। स्नानेनैकेन षट्रात्रं त्रिरात्रं वायुभुग्भवेत्। एतत्सौमायनं नाम व्रतङ्कृच्छ्रशतादिति"। तदपि चान्द्रायणधर्म्मकमेव। हारीतेनापि "अथातश्चान्द्रायणं मनुक्रमिष्यामः इत्यादिना येतिकर्त्तव्यताकञ्चान्द्रायणमभिधाय "एवं सौमायनमित्यतिदेशस्याभिधानात्। यत्तु नरेण कृष्णचतुर्थीमारभ्य शुक्लादशीपर्य्यन्तं सौमायनमुक्तम् "चतुर्थीमतिचतुःस्नानेन त्रिरात्रं त्रिस्नानेन त्रिरात्रं, द्विस्नानेन त्रिरात्रमेकस्नानेन त्रिरात्रमेवमेकस्नानप्रभृति पुनश्चतुःस्नानान्ते याते सोम! चतुर्थीं तनूनपा नः पाहि तस्यै स्वाहा याते सोम! पञ्चमी पञ्चमीत्येवं यथार्थास्तिथिसोमाएकमाप्नुवन्ताभ्यः पूतचन्द्रमसःसामान्यतां समानलोकतां सायुज्यञ्च गच्छतीति"। चतुर्विंशतिदिनात्मकसौमायनमभिधितन्तदशक्तविषयम्" मिता०।

प्रायश्चित्तविवेकेऽत्र विशेषोऽभिहितो यथा "तत्र मनुः। "एकैकं ह्रासयेत् पिण्डं कृष्णे, शुक्ले च वर्द्धयेत्। उपस्पृशंस्त्रिषवणमेतच्चान्द्रायणं स्मृतम्। एवमेव विधिं कृत्स्नमाचरेद्यवमध्यमे। शुक्लपक्षादिनियतश्चरेच्चान्द्रायणं व्रतम्। अष्टावष्टौ समश्नीयात् पिण्डान्मध्यन्दिने स्थिते। नियतात्मा हविष्याशी यतिचान्द्रायणं चरन्। चतुरः प्रातरश्नीयात् पिण्डान् विप्रः समाहितः। चतुरोऽस्तमिते सूर्य्ये शिशुचान्द्रायणं स्मृतम्। यथा कथञ्चित्पिण्डानां तिस्रोऽशीतीः समाहितः। मासेनाश्नन् हविष्यस्य चन्द्रस्यैति सलोकताम्" एतत्पञ्चविधं चान्द्रायणं पिपीलिकातनुमध्यं यवमध्यं यतिचान्द्रायणं सर्व्वतोमुखं शिशुसाङ्गञ्च। तथाच जाबालः। पिपीलिकं यवमध्यं यतिचान्द्रायणन्तथा। चान्द्रायणं तथा त्रेयं चतुर्थं सर्व्वतोमुखम्। पञ्चमं शिशुसाङ्गञ्च तुल्यं पुण्यफलोदयम्"। कृष्णप्रतिपदमारभ्य मासमेकं यदा क्रियते तदा पिपीलिकमध्यं भवति। शुक्लप्रतिपदारम्भे यवमध्यम्। उभयत्रामावास्यायामभोजनम्। कृष्णप्रतिपदि चतुर्दशग्रासभोजनारम्भे ह्रासक्रमेण चतुर्दश्यामेकोग्रासः अमावास्यायामभोजनमेव प्राप्नोति। तथाच वसिष्ठः "मासस्य कृष्णपक्षादौ यासान्द्यावृतुर्दश"। नन्वेवं क्रमेण पञ्चविंशत्युत्तरं यासशतद्वयं स्यात्। न चत्वारिंशदग्रासाधिकशतद्वयं तच्च यास्कवचनेनोक्तम् "यथा कथञ्चित्पिण्डानां चत्वारिंशच्छतद्वयम्"। इति "यथा कथञ्चित्पिण्डानां तिस्रोऽशीतीः समाहितः" इति मनुनाप्युक्तम्। उच्यते। संवत्सरे पौषमाघामावास्यायां वा पञ्चदशग्रासभोजनेन संख्यापूरणसम्भवात्। अथ वा पञ्चदशादिकमेवेदं व्रतं न तु नि-

पदादिकं चतुर्दश्यामेव व्रतसङ्कल्पः यथाह गौतमः "पौर्णमासीं पञ्चदश यासान् भुक्त्वा एकैकापचयेनापरपक्षमश्नीयात् अमावास्यायामुपोष्य एकैकोपचयेन पूर्वपक्षं विपरीतमेकेषाम्" । शङ्खलिखितौ "अमावास्यां व्रतोपवसनं यवमध्यम् । अमावास्यायां पञ्चदश पिण्डान्भुञ्जीयात्" । उपायनमारम्भः । युक्तश्चैदम् "अमावास्यामुपोष्य पञ्चदशकलात्मकस्य चन्द्रमसः सूर्यं प्रविष्टत्वात् अत एकैककलानिर्गमस्य प्रतिपदादिषु दर्शनयोग्यत्वात् । जाबालः "एकैकं वर्द्धयेत्पिण्डं शुक्ले कृष्णे च ह्रासयेत् । अमावास्यां न भुञ्जीत यवमध्यं चरन् द्विजः । एकैकं ह्रासयेत् पिण्डं कृष्णे, शुक्ले च वर्द्धयेत् । पौर्णमासीं न भुञ्जीत पिपीलिकतनुमध्यमम्" । अत्र कल्पतरव्याख्यानम् "एकैकं ह्रासयेदिति कृष्णप्रतिपदि पञ्चदश यासानारभ्य एकैकापचयेनामावास्यायामेकोयासः तदनन्तरं शुक्लप्रतिपदि द्वौ यासावेवं दर्शनयोग्यत्वेन चतुर्दश्यां पञ्चदश यासाः सम्पद्यन्ते पौर्णमास्यां चोपवासइति पिपीलिकतनुमध्यं चान्द्रायणम् । एवं यवमध्ये शुक्लप्रतिपदि एकोयासः एवमेकैकोपचयने पूर्णिमायां पञ्चदश यासाः कृष्णप्रतिपदि चतुर्दश यासा एवमेकैकापचयेन अमावास्यायामुपवासः" । अथ चान्द्रायणमाह यमः "त्रींस्त्रीन् पिण्डान् समश्नीयादियतात्मा दृढव्रतः । हविष्यान्नस्य वै मासमथ चान्द्रायणं स्मृतम्" । अत्र चत्वारिंशच्छतद्वयसंख्या नास्ति । यासपरिमाणमाह पराशरः । "कुक्कुटाण्डप्रमाणन्तु यावान् वा प्रविशेन्मुखम् । एतं यासं विजानीयाच्छुद्ध्यर्थं कायशोधनम्" । सकलचान्द्रायण एव चतुर्दशग्रासोपवासं कृत्वा अपरदिने पञ्चदशग्रां संयमः कार्यः तत्फलमाह । बौधायनः । "शुक्लाञ्चैव चतुर्दशीमुपवसेत् कृष्णां चतुर्दशीं वा क्षौरस्नानुनखरोमाणि वापयित्वा" इत्यभिधाय तिथिनक्षत्रादिहोमं प्रत्यहमुक्तवान् विस्तरभयान्न लिखितम्" ।

"एकमाघ्रा विषापोविषाघ्मा सर्वमेनोऽत्ति द्वितीयमाघ्रा सपूर्वान् दशापरानात्मानञ्चैकविंशं पङ्क्तिञ्च पुनाति संवत्सरञ्चाघ्रा चन्द्रमसः सलोकतामाप्नोतीति" गौतमः । एवञ्च सर्वविधचान्द्रायणे चान्द्रस्य चन्द्रसम्बन्धिनो लोकस्यावनं यस्मादिति व्युत्पत्तिरित्यवधेयम् । अस्य पुंस्त्वमपि "एष चान्द्रायणोविधिः" प्रायुक्तस्मृतेः अत्र तस्येदमित्यर्थेऽपि तत्र चान्द्रायणशब्दस्य तत्सम्बन्धिवाचकत्वात् पुंस्त्वमित्यन्ये । चान्द्रायणव्रतावशत्तौ तत्प्रत्याम्नायधेनुमूल्यादुक्तं प्रा० वि० आपस्तम्बः "कापालिकाद्यभोक्तॄणां तद्वारीगामिनां नृणां । ज्ञानात् कृच्छ्राद्यदृष्टमज्ञानादैन्दवद्वयम्" तथा रजकाद्यन्त्यजाधिकारे यमः "भुक्त्वा चैषां स्त्रियो गत्वा पीत्वापः प्रतिगृह्य च । कृच्छ्राद्यमाचरेज्ज्ञानादज्ञानादैन्दवद्वयम्" । ज्ञानतः कृच्छ्राद्यं लिंगदेहसुदानसमानं विधायाज्ञाने तदर्द्धं चान्द्रायणद्वयं विदधाति । तेन चान्द्रायणद्वये पञ्चदश धेनवः अर्द्धदेकस्मिंश्चान्द्रायणे सार्द्धसप्तधेनवः । यत्तैकमेव चान्द्रायणं तत्रार्द्धधेनोरसम्भवाद्धेनुषट्कं देयम् । शिशुचान्द्रायणे तु पादोन धेनुचतुष्टयम् । यतोऽत्र प्रात्यहिकाष्टग्रासपरिमाणेन मासैकेन चत्वारिंशदुत्तरग्रासशतद्वयेन द्वात्रिंशदुत्कृष्टस्य स्थूलेति व्यवस्थया सार्द्धसप्तदिनभोजनं पर्य्यवस्यति सार्द्धद्वात्रिंशतिरुपवासाःपर्य्यवस्यन्ति । अतः सङ्कलनया पादोनप्राजापत्यचतुष्टयं स्यात् । यद्यपि यवमध्यपिपीलिकतनुमध्यचान्द्रायणयोरत्रैतावन्त एव ग्रासास्तथापि वचनात् लुप्तदिवसोपवासैः क्वचिन्नियमाच्च सार्द्धसप्त धेनवः । अत्र तु तदभावान्न्यायाच्च पादोनधेनुचतुष्टयमेव । एवं यतिचान्द्रायणसर्व्वतोमुखचान्द्रायणपिपीलिकाचान्द्रायणेषु बोध्यम्" प्रा० वि० ।

मिताक्षरायां विशेष उक्तो यथा

"चान्द्रायणविषयभूतेषु पुनरुपपातकेषु प्राजापत्यत्रयं तदशक्तस्य प्रत्याम्नायस्तावानेव । यत्पुनश्चतुर्विंशतिमतेऽभिहितम् "अष्टौ चान्द्रायणे देयाः प्रत्याम्नाय विधौ सदेति" तदतिधनिनः पिपीलिकामध्यादिचान्द्रायणप्रत्याम्नायविषयम् । मासातिकृच्छ्रविषयभूते पुनरुपपातके सार्द्धसप्तप्राजापत्याः प्रत्याम्नायाश्च धेन्वादयस्तावन्त एव । यच्च चान्द्रायणस्यापि तत्रैव प्रत्याम्नानमुक्तम् । "चान्द्रायणं मृगारेष्टिः पवित्रेष्टिस्तथैव चा मित्रविन्दापशुश्चैव कृच्छ्रप्रायश्चित्तयज्ञा । नित्यनैमित्तिकानाञ्च काम्यानाञ्चैव कर्मणाम् । दृष्टीनाम्यज्ञवन्धानामभावे चरवःस्मृताः" इति । तदपि चान्द्रायणाशक्तस्य । यत्तु कृच्छ्रप्रायश्चित्तयज्ञेति कृच्छ्राष्टकप्रत्याम्नातम् । तदतिजठरमूर्खविषयम् । "चान्द्रायणस्थितिभिः कृच्छ्रैरिति दर्शितत्वादित्यलमतिप्रपञ्चेन ।" ऐन्द्वादयो ऽत्र ।

चान्द्रायणिक त्रि० चान्द्रायणमावर्त्तयति ठञ् । चान्द्रायणव्रतानुष्ठायिनि राजनि० ।

चान्द्री स्त्री चन्द्रस्येयम् अण्। १चन्द्रपत्न्यां २ज्योत्स्नायाञ्च। तत्तुल्यगुणत्वात् श्वेतकण्टकार्य्याञ्च राजनि०। ४चन्द्रसम्बन्धिन्यां स्त्रियां चान्द्रशब्दे उदा०।

चाप पु० चपस्य वंशभेदस्य विकारः अण्। १धनुषि, अमरः नेणवधिके२नवमे राशौ च "इक्षुगुल्माहते चापैरसिचर्मायुधैः स्खले" मनुः। "स चापसत्त्वस्य विवृद्धमत्सरः" रघुः। "कषायमसितचापः पक्ष्मशादूलचक्षणः" भा० वि० ४२अ०। २इक्षुक्षेत्रार्द्धे "दलीकृतं चक्षुरुशन्ति चापम् कोदण्डखण्डं खलु तूर्यगोलम्" सि० शि०। अग्राभेदेन चापभेदा नयवं च लोला० दर्शितः तत्र वाकं चेत्रशब्दे २४०४ दर्शितम्। [ मन्दार्थ चि०।

चापपट पु० चापवत्पावयवत्वेन पटः पत्रमस्य। विषालतायाम्।

चापल्य न० चपलस्य भावः कर्म्म वा ष्यञ्। अविमृश्यकारितारूपे प्रयोजनं विनाऽपि पाण्यादेश्चालनरूपे वा १चपलकर्म्मणि चपलशब्दे उदा० "मात्सर्य्यहेतुरागादेश्चापल्यं त्वनवस्थितिः" सा०द० २उद्धतत्वे नवस्थाने च। ष्यञ्। चापल्यमप्यत्र।

चापिन् पु० चापोऽस्यास्त्र इनि। १धनुर्द्धारिणि योधभेदे। २गिरौ पु०। "त्वं गदी त्वं शरी चापी खड्गी भल्लेरी तथा" भा०शा०२८६अ०। दक्षक्रतशिवस्तुतौ २धनुराशौ च। "चापी नरोऽञ्जनो मकरोऽगाश्वः" जटा०त०

चाफट्टि पुंस्त्री चफट्टर्षेरपत्यम् इञ्। चफट्टर्षेरपत्ये स्त्रियां ङीप्। यूनि—तौल्वला० फक् तस्य न लुक्। चाफट्टायनि यूनि तदपत्ये स्त्रियां ङीप्।

चामर पुंन० चमर्य्याः विकारः तत्पुच्छनिर्म्मितत्वात्। चमरीपुच्छतद्व्यजने अमरः। चामरलक्षणादिकन्तु युक्तिकल्पतरौ यथा

"अथ चामरोद्देशः। "हंसहयोद्भवः शुक्लः सुवर्णवलिभूषितः। क्षीरेणालङ्कृतो राज्ञां भव्यमानसुखप्रदः। बलेश्चामरदैत्यस्य आयामत्वं प्रकाशितम्। भव्यो भद्रोजयः श्रीलः सुखः सिद्धबलः स्थिरः। वितस्ये कैलसंछद्मा दिनेशादिदिशां भुवाम्। सौवर्णं राजतं युग्मं त्रैदेशानां महीभुजाम्। योजयेदिति निखिल वलिकल्पनकर्म्मणि। स्वलजं जाङ्गलोराजा ऋनूपो जलजं वहेत्। क्षीरञ्च पद्मरागश्च वैदूर्य्यं नीलएव च। मणिर्वलिषु योज्यो ब्रह्मादीनां यथाक्रमम्। शुक्लो रक्तोऽथ पीतश्च नानावर्णो यथाक्रमम्। चामरो राजकेशस्य न सामान्यस्य भूपतेः। न भव्यमानतो नूनं चामरं शुभमावहेत्"। अथ चामरपरीक्षा। "स्वलजं जलजं चेति चामरं द्विविधं विदुः। मेरौ हिमालये विन्ध्ये कैलासे मलये तथा। उदयेऽस्तगिरौ चैव गन्धमादनपर्व्वते। एवमेतेषु शैलेषु यावमर्य्यो भवन्ति हि। तासां बालस्य जायेत चामरेत्यभिधा भुवि। आपीताः कनकाद्रिजा हिमगिरेः शुभ्रा मता विन्ध्यजाः कैलासादसिताः सिता मलयजाः शुक्लास्तथा पिङ्गलाः। आरक्ता उदयोद्भवाश्चमरजा श्यामीलशुक्लत्विषः कृष्णाः केचन गन्धमादनभवाः पाण्डुत्विषश्चामराः। अन्येषु प्रायशः कृष्णाश्चामराः सम्भवन्ति हि। ब्रह्मक्षत्रियविट्शूद्रजातय स्त्रायद्यद्विधाः। चमर्य्यः पर्व्वतोद्भूता यत्रापूर्वं गुणावहाः। दीर्घबालाः सुलघवः स्निग्धाङ्गाश्चापि कोमलाः। विरलाः सतुपर्वाणश्चमर्य्यो ब्रह्मजातयः। विना संस्कार मभ्यासां चामरं विमलं भवेत्। दीर्घबालाः सुगुरवः क्षत्रियासु भृशं घनाः। विज्ञेया स्थूलपर्वाणश्चमर्य्यो वैश्यजातयः। संस्कारे चाप्यसंस्कारे न स्वभावं त्यजेदिदम्। खर्ब्बबालाः सुलघवः कोमलाङ्गाः भृशं घनाः। चमर्य्यः सतुपर्वाणो विज्ञेयाः शूद्रजातयः। संस्कारेणापि मलिनमासां चामरमिष्यते। दीर्घता लघुता चैव स्वच्छता घनता तथा। गुणाश्चत्वार इत्येते चामराणां प्रकीर्त्तिताः। खर्वता गुरुता चैव वैवर्ण्यं मलिनाङ्गता। दोषाश्चत्वार इत्येते चामराणां प्रकीर्त्तिताः। दीर्घं दीर्घायुराप्नोति लघौ भीतिविनाशनम्। स्वच्छेस्वाजनकीर्त्तिभ्यां घने स्युः स्थिरसम्पदः। खर्वे खर्वायुरुद्दिष्टं गुरुर्गुरुभयप्रदः। विरले रोगशोकाभ्यां मलिने स्वल्पमादिशेत्"। इति स्वलजम्। अथ जलजम्। "लवणेक्षुसुरासर्पिर्दधितोयण्योऽब्धिषु। यथोत्तरं गुणोत्कर्षावमर्य्यः सप्त सप्तसु। पुच्छानि तासां कृत्तानि जन्तुभिर्भेकरादिभिः। कदाचिदुपलभ्यन्ते तत्तीरे पुण्यशालिभिः। लवणाब्धिसमुद्भूतं पीतं गुरु तथा लघु। वङ्गे स्निग्धञ्च बालत्वे किञ्चित् चटचटायते। इक्षुसिन्धुभवं ताम्रं चामरं विमलं लघु। मक्षिका मशकाश्चैव तस्मिन् व्यजति चामरे। सुराब्धिजातं कलुषं कर्व्बूरं पुरुकर्कशम्। तद्वच्चैव माद्यन्ति यपि दृष्ट्वा मतङ्गजाः। सर्पिःसिन्धुभवं स्निग्धं श्वेतापीतं घनं लघु। वायुरोगाः प्रशाम्यन्ति तस्य वीजनवायुना। जल-

सिन्धूद्भवं पाण्डु दीर्घं लघु घनं महत्। अस्य वातेन नश्येत्तु तृष्णामूर्च्छामदोभ्रमः। नारिष्टं न भयं तस्य यस्येदं चामरं गृहे। क्षीरोदसम्भवं श्वेतं दीर्घं लघु घनं महत्। अस्य चामरवातस्य विज्ञेयो गुण विस्तरः। नाल्पेन तपसा लभ्यो देवानामपि जायते। छिद्यतेऽभ्यन्तरे सिन्धोर्गौः सम्पत्तिलोलुपैः। एषां पूर्ववदुद्देश्यं जातिदोषगुणादिकम्। खलजे जलजे चैव भाव्यमेतद्विशेषणम्। खलजं तृणदर्भञ्च हि दाहे मिश्रमिषायते। जलजं वह्निदर्भञ्च महान्तं धूमसुद्गिरेत्। चामराणां समुद्दिष्टलिङ्गेयं लक्षणहयम्। एवं विभर्त्ति यो धत्ते स राजा सुख मश्नुते। जलजं चामरं राजा यो धत्ते जाङ्गलेश्वरः। तस्याचिरात् कुलं वीर्यं लक्ष्मीरायुश्च नश्यति। अनूपाधीश्वरो राजा यो वहेत् खलजं तथा। तस्य तानि विनश्यन्ति लक्ष्मीरायुर्यशो बलम्। नालं वर्गद्वये तेषां विधेयं गिलिना क्रमात्। संस्कारो वालुकायन्त्रे मक्षरसलिलादिभिः। तदुष्णसलिलक्षारात् क्षतिमत्वं विपद्यते"।

"सचामारे देवमसेविष्टाताम्" कुमा०। "गच्छन्तश्च-लितचामरचारुमत्वम्" माघः। "शशिप्रभं खलमुभे च चामरे" रघुः। अस्य स्त्रीत्वमपि वा ङीप्। तत्रार्हे भरतः।

**चामरग्राह** त्रि० चामरं गृह्णाति ग्रह-अण् उप० स०। चामरेण वीजनकर्त्तरि स्त्रियां टाप् सुग्वबोधमते अण् ङीप् इति भेदः। ततः रेवत्या० अपत्ये ठक्। चामरग्राहिक तदपत्ये पुंस्त्री। णिनि चामरग्राहिन् तत्रार्हे त्रि० स्त्रियां ङीप्।

**चामरपुष्प(क)** पु० चामरमिव पुष्पमस्य। १क्रमुके, २काशे, ३केतके ४आम्रे च मेदि० एषां चामरतुल्यपुष्पत्वात् तथात्वम्। वा कप्। तत्रार्हे जटा०।

**चामरिन्** पुंस्त्री चामरमिव केशरोऽस्यास्य इनि। १घोटके जटाध०। २चामरयुक्तमात्रे त्रि० स्त्रियां ङीप्।

**चामीकर** न० चमीकरे खर्णाकरभेदे भवम् अण्। १स्वर्णे २धूलूरे च अमरः। "जगतीरिह स्फुरितचार चामीकराः" माघः। तस्य विकारः अण्। ३स्वर्णमये त्रि० "सगद्द्यचामीकरकिङ्किणीकः" कुमा०। अस्योत्पत्त्यादिकं कनकशब्दे १६४४ पृ० उक्तम्।

**चामुण्डा** स्त्री "यक्षाङ्गडं च सगडञ्च गृहीत्वा त्वत्पुरागता। चामुण्डेति ततोलोके ख्याता देवी भविष्यसि" देवीभा० निरुक्तनामके देवीभेदे। २परब्रह्मणः समष्टिरूपशक्तिभेदे ३ब्रह्मविद्यायाञ्च गुप्तवती। तत्र (ऐँ ह्रीँ क्लीँ चामुण्डायै विच्चे) इति चण्डिकानवार्णार्थनिरूपणे उक्तं यथा।

"निर्धूतनिखिलध्वान्ते! नित्यशुद्धे। परात्परे!। अखण्ड ब्रह्मविद्यायै चिदानन्दरूपिणि!। अनुसन्दधाने नित्यं यथं त्वां हृदयाम्बुजे। इत्थं विज्ञापयत्येषा या कल्याणी नवाक्षरी। अस्या महिमलेशोऽपि गदितुं केन शक्यते। बहूनां जन्मनामन्ते प्राप्यते भाग्यगौरवात्। एतमर्थं गुरोर्लब्ध्वा तत्पदे दत्त्वा च दक्षिणाम्। आशिषञ्च परां लब्ध्वा मन्त्रसिद्धिमवाप्नुयादित्यादि"। अस्य प्रथमश्लोके संदुद्विनयं ततश्चतुर्थ्यन्तनतः पुनः संदुद्विनयमिति सप्तभिः पदैः क्रमेण मन्त्रे सप्तधा परिच्छेदः। पदानां तत्तद्भक्त्यन्तता तत्तदर्थोक्तेति कथितं तदुत्तरपदार्द्धेनाकाङ्क्षितपदानामध्याहार उक्तः। इतरत्सुगमम्। सच्चिदानन्दाद्वैकपरब्रह्मधर्म्मत्वादुदेवशक्तेरपि तिरूपत्वम्। तत्र चिद्रूपा महासरस्वती वाग्बीजेन (ऐँ) सम्बोध्यते। ज्ञानेनैवाज्ञाननाशात् निर्धूतनिखिलध्वान्तपदेन तद्विवरणम् युक्तमेव। नित्यत्वं त्रिकालाबाध्यत्वम्। अतएव शुद्धत्वं कल्पितविषयादिप्रपञ्चविरासाधिष्ठानत्वम्। एतेन सद्रूपात्मकलक्ष्मीरूपस्य कृष्णेखया (ह्रीँ) सम्बोधनमिति व्याख्यातम्। पर उत्कृष्टः सर्वानुभवसंवेद्य आनन्द एव तस्यैव पुरुषार्थत्वात्। "आत्मनः कामाय सर्वं प्रियं भवतीति" श्रुत्या तदितरेषामपि तदर्थत्वेनानन्दस्यैव सर्वं शेषितया परत्वात्। स च सानुशानन्दमारभ्योत्तरोत्तरं शतगुणाधिक्येन श्रुतौ बह्वधोवर्णितः "तैषु परमानन्दी य एको ब्रह्मण आनन्द" इति परमावधित्वेनाम्नातश्च परात्परः "स्वात्मानन्दलवीभूतब्रह्माद्यानन्दसन्ततिः" इति पुराणं च तेन आनन्दप्रधानमहाकालीस्वरूपस्य कामबीजेन (क्लीँ) सम्बोधनमुक्तम्। चामुण्डागब्दो हि मोक्षकारणीभूतनिर्विकल्पकवृत्तिविशेषपरः तादर्थ्ये चतुर्थी चमूं सेनां विषयादिसमूहरूपामुण्डाति खण्डयति रैक्ष्याच्छाति आदत्ते स्वात्मसाक्षात्कारेण नाशयतीति व्युत्पत्तेः। पृषोदरादित्वात्पूर्वसाधु" इत्याहुः। "मया तवात्रोपहृतौ चण्डमुण्डौ महासुरौ" इति पद्ये द्विवचनयोः स्वारस्येन तूलमूलभेदेनाज्ञानहयपरत्वम् "यक्षाङ्गडं च सगडञ्च गृहीत्वा त्वत्पुरागता।

चामुण्डेति ततो लोके ख्याता देवी भविष्यतीति" पदेऽपि तुलभूलाविद्यापरताऽवसेया इति रहस्यम्। विच्चे इति। वित् च, इ, इति पदत्रयात्मकं बीजक्रमेणोक्तानाङ्चित्सदानन्दानां वाचकं सम्बुध्यन्तं अस्त्री दै इत्यस्य हृस्वे इ इति हे आनन्दमयब्रह्ममहिषि इत्यर्थः। चित्पदं ज्ञानपरब्रह्मसिद्धमेव चकारोऽपि नपुंसकः सन् सत्यपर इति योज्यम् अनुसन्धाङ्इत्यादिः शेषः। इत्यञ्च महासरस्वत्यादिरूपेण चिदादिरूपे! चण्डिके त्वाम्बुजविद्याप्राप्त्यर्थं वयं सर्वदा ध्यायेम इतिमन्त्रार्थः फलितः। तस्यायं सङ्कुचः "महासरस्वति चिते! महालक्ष्मि! सदाम्बिके!। महाकालघनानन्दरूपे! तत्त्वज्ञानप्रसिद्धये। अनुसन्धाङ्हे चण्डि! वयन्त्वां हृदयाम्बुजे" इति। यद्यपि श्रीमत्येव बीजस्याङ्लक्ष्म्याःप्रसिद्धम्। न हृल्लेखा (ह्रीँ)। तथापि हकारणकारयोरूष्मवर्णत्वेन साजात्याद्भातीव भेदः। अतएव "श्रीश्च ते लक्ष्मीश्च ते पत्न्याविति" श्रुतौ शाखान्तरे श्रीपदस्थाने ह्रीपदपाठः। एवं कामबीज एव लकारस्य स्थाने रेफयोजनेन कालीबीजता रलयोरान्त्यस्थत्वेनैक्याद्भात्यन्तभेदः। तन्त्रान्तरेषु तु कालीसरस्वत्योर्बाह्यविकभेदमभिप्रेत्य बीजयोर्वैपरीत्यव्यवहारोऽपि द्रष्टव्य इति द्रष्टव्यम्। अयं चार्थः प्राचीनैर्वर्णितप्राय एव सम्यक्परिष्कृत्योक्तः। वस्तुतस्तु लक्षणविरोधस्य छान्दसत्वेन पृषोदरादिपाठकल्पनया च समाधानस्याविवादादन्योऽपि प्रकारः सुवचः। चक्ष अदने इति धातोः उण् चाक्षरदनीयः पदार्थः स च ब्रह्मातिरिक्तः सर्वोऽपि "अत्ता चराचरग्रहणात्" इत्यधिकरणे तथा निर्णयात् तण्डापयति उद्दण्डापयति न विषयीकुरुते ब्रह्मपात्रविषयिणीति यावत्। अथवा चकार एकाक्षरनिघण्टुरीत्या चन्द्रवाचक आह्लाद प्रकाशगुणयोगादिह ज्ञानपर आनन्दपरो वा सन् ब्रह्मैव वक्ति। तत् क्षासमन्ताद्भण्डयतीति चाक्षण्डा। अखण्डनं नामाधारापेक्षया न्यूनसत्ताकवस्तुनिरासः शिरश्चर्मापेक्षया न्यूनसत्तावतामेव केशानां वपने प्रयोगात्। गौड़पादीयभाष्ये तु शरीरराहित्यलक्षणम् अखण्डनं सखण्डकोपनिषदि प्रोक्तं अथवा। चानाम्बुजानां सुखानां वा खण्डमिव श्रीपर्णमिव स्थिता सर्वोत्तमा चरमवृत्तिरूपा ब्रह्मविद्येति यावत्। अथ चण्डिकारूपदेवतापरएव चामुण्डाशब्दः। अत एव मन्त्रान्ते बह्निजाया योजनेन होमे चामुण्डाया इदमित्येव त्यागो विधिशब्दश्च मन्त्रत्वे इत्यधिकरणन्यायसिद्धो युज्यते। चतुर्थी वलाच्च नमःशब्दस्यैवाध्याहारः। बीजत्रयमव्ययरूपं चतुर्थ्यन्तमेव व्यष्टिदेवतात्रयवाचकमभेदद्योतकं तद्विशेषणम् विच्चे इत्यव्ययखण्डमव्ययं स्वरादेरानिगणत्वात्। मन्त्रश्च षट्खण्डशो न्यासप्रकरणेऽस्य युगलस्य विभजनं विनैव न्यासविधानात्। भगमालिनी नित्यामन्त्रादिषु बहुषु तस्य प्रयोगसत्त्वेन तत्रोक्तार्थरीत्या निर्वाहाभावाच्च ततश्च हे अम्ब बन्धनकरणोद्भूतामिमां रज्जुं ग्रन्थिविसर्जनादिना मोचयेति। स्त्री सम्बोध्यकमोक्षप्रार्थनारूपो विशिष्टस्तदर्थः। यद्यपि दक्षिणामूर्तिसंहितायां भगमालिनीमन्त्रस्य देवतागणनावसरे "अमीषां चैव विज्ञाश्च तथैवैं क्लिन्नदेवताभिति" पाठाद्विज्ञानाभिका काचिद्देवतेत्यालोच्यते तदापि परिकरालङ्कारेण सामिप्रायं चामुण्डाविशेषणम्"।

**चाम्पिला** स्त्री चपि-भावे अङ् चम्पैव चाम्पा ततः अस्त्यर्थे इलच्। चम्पानद्याम् त्रिका०।

**चाम्पेय** न० चम्पावां नद्यां अम्बुनद्यां भवं ढक्। १स्वर्णे २धुस्तूरे च अमरः। ३चम्पके ४नागकेशरे च पु०किञ्जल्के न० स्वार्थे क तत्रार्थे राजनि०। तत्र स्वर्णे मणिमाणिक्यचाम्पेयवस्त्रकुलेभाश्वगोधनम्" कामी० ख० २४अ०। ५चम्पायां भवे त्रि०। ६विश्वामित्रात्मजभेदे पु० "अवाचिनौचिकश्चैव चाम्पेयोज्जयनौ तथा" भा० आ० ४अ०। विश्वामित्रात्मजौ।

**चाय** निशाने (च.चुषस्थाने) पूजने च सक० उभ० सेट्। चायति ते आचायीत् अचासीत् अचायिष्ट अचाक्षदित्। अचचायत् त। "तं पर्व्वतीया प्रमदाश्चाविरे" माघः। "अनाद्यनन्तं महतः परं ध्रुवं निचाय्य तं मृत्युमुखात् प्रमुच्यते" कठोप०। यङि चेकीयते। चायधिभावः। अपचितिः अपचितः।

**चाय** त्रि०चयस्य विकारः तालाद्यच्। चयमये स्त्रियां ङीप्।

**चायनीय** त्रि० चाय-कर्म्मणि अनीयर्। पूजनीये "उपस्तुत्यमा मराक्षभ्यम्" इत्यस्मादुचि चित्रशब्दनिरुक्तौ चित्रं चायनीयं महनीयमिति" निरुक्तकारः १२।६।

**चायमान** पु० चयमानस्य राज्ञोऽपत्यम् शिवा० अण्। १चयमानसुतापत्ये। "अभ्यावर्त्ती चायमानो दृशाति" ऋ० ६।२८।८। "चायमानश्चयमानस्य सूनुः" भा०। चाय-शानच्। २पूजयति ३पश्यति च त्रि०

चायु त्रि० चाय-उण्। पूजके। "यज्ञेषु यत्र चायवः" ऋ० २।२३।४। "चायवः पूजकाः" भा०।

चार पु० चरण्व ण्व्। १प्रणिधौ गुप्तचरे "चारैश्चानेकसंस्थानैः पीतमादा यशमानयेत्" "तस्करप्रतिषेधार्थं चारैश्चाप्यनुचारयेत्" उपस्थाप्यादृश्यांश्चैव चारान् सम्यग्विधाय च"—इति च मनुः। २प्रियालवृक्षे (पियाल) मेदि० ३कारागारे हेम० चर-भावे घञ् ४गतौ गोप्रचारः पदचारः "चारोदयाः प्रशस्ताः ऋषभमचादित्यमूलहस्तेषु" बृ० स० ६अ० "भगणार्धेनान्तरितो रविश्चाति कथं नियतचारः" ५अ०। कार्य्यभेदे दूतप्रतियोगादिकं कालिकापु० ८५अ० घञ्र्थे यथा। "ऋद्धिर्गजं वाणिज्यं बल्यानां करसाधनम्। आदानं सैन्यकरयोर्बन्धनं गजवाजिनोः। भूम्यश्वगजरक्षाश्च भोजनं सततं जनैः। प्रजानां चारसेतूनां बन्धनं चेति चाष्टकम्। एतदष्टसु वर्गेषु चारान् सम्यक् प्रयोजयेत्। कार्य्याकार्य्यविभागाय चाष्ट वर्गाधिकारिणाम्। चतुरो चारान् नियुञ्जीयादष्ट वर्गेषु पार्थिवः। दशसन्येषु युञ्जीत क्रमशः शृणु तानि मे। स्वामी सचिवराष्ट्राणि मित्रं कोशो बलं तथा। दुर्गन्तु सप्तमं ज्ञेयं राज्याङ्गं गुरुभाषितम्। दुर्गयुक्तं चतुर्वर्गे चारं तत्रापि योजयेत्। तस्मादिमानि शेषाणि पञ्च चारपदानि तु। गुह्यानन्येषु पुत्रेषु कृत्यपादौ महानसे। शत्रूदासीनयोश्चैव बलाबलविनिश्चये। आदौ दशसु चैतेषु चारान् राजा प्रयोजयेत्। न यत् प्रकाशं जानीयात् तत्तु चारैर्निरूपयेत्। निरूप्य तत्प्रतीकारमथवापि विचक्षणः। यथानियोगमेतेषां यो यो यत्रान्यथा चरेत्। ज्ञात्वा तत्र स्वयं चारैर्दण्डयेद्वा नियोजयेत्। चारांस्तु मन्त्रिणा सार्द्धं रहस्ये संस्थितो नृपः। पृच्छेत्तदानीं मेव साधयेत्। स्वपक्षे चाथ शत्रूणां ये तु चारा महानसे। नियुक्तांस्तान् मध्यरात्रे पृच्छेत् यद्यपि मन्त्रिणि। एतान् चारान् स्वयं पश्येत् नृपतिर्मन्त्रिणा विना। अन्यांश्च मन्त्रिणा सार्द्धं निरूप्य पुनरेव हि। एकवेगधरश्चारो नैको मोत्साहवर्जितः। संस्तुतो नहि सर्वत्र नातिदीर्घो न वामनः। सततं न दिवाचारी न रोगी नाप्यबुद्धिमान्। न चित्तविभवे हीनो न भार्य्यापुत्रवर्जितः। कार्य्यचारो नृपतिना गुह्यतत्त्वविनिश्चये। अनेकवेगयत्नज्ञं भार्य्यापुत्रैर्युतम्। बहुदेशगतोभिज्ञं पराभिप्रायवेदकम्। दृढ़ भक्तं प्रकुर्वीत चारं शास्त्रमताश्रयम्। अधितिष्ठेत् स्वयं राजा कृषिमात्मसमैस्तथा। वणिक्पथे च दुर्गादौ तेषु शास्त्रान्नियोजयेत्। अन्तःपुरे पितृस्थानान् धीरान् वृद्धान् नियोजयेत्। षण्ढान् षण्ढान् तथा वृद्धान् स्त्रियो या वृद्धितत्पराः। गुह्यान्तर्हारि युञ्जीयात् स्त्रियो बुद्धिमतीर्धियः"। चरेण चरणेन निर्वृत्तम् ण्व्। ५कृत्रिमविषे-न० हेमच०।

चारक त्रि० चारयति चर-णिच्-ण्वुल्। गवादीनां हरणादिषु गमयितरि १पशुपालके मेदि० चार-स्वार्थे क। २बन्धे ३गतौ च। ४प्रियालवृक्षे राजनि०। ५कारागारे। हेम०। "निगृहीतचरणा चारके निरोद्धव्या" दशकु०।

चारकीय त्रि० चरकाय हितम् छ। चरकहिते।

चारचक्षुस् पु० चारश्चक्षुरस्य। नृपे। "यस्मात् पश्यन्ति दूरस्थाः सर्वानर्थाञ्चराधिपाः। चारेण तस्माद्युञ्जते राजानश्चारचक्षुषः,, रामा० २। ३७। "प्रकाशांश्चाप्रकाशांश्च चारचक्षुर्भवीपतिः" मनुः "गावः पश्यन्ति गन्धेन वेदैः पश्यन्ति च द्विजाः। चारैः पश्यन्ति राजानश्चतुर्भ्यामितरे जनाः" नीतिसा०। "स्वप्नसङ्कल्पकार्य्यावलोकने चारचक्षूंषि क्षितिपालानामिति" नीतिवाक्यामृतम्।

चारटिका स्त्री चर-णिच् शकादि० अट् संज्ञायां कन् अतइत्त्वम्। नदीनामगम्यदृश्ये राजनि०।

चारटी स्त्री चर-णिच्-शकादि० अटन् गौरा० ङीष्। १पद्मचारिण्यां वृक्षे अमरः। २भूम्यामलक्यां राजनि०।

चारण पु० चारयति कीर्त्तिं चर-णिच्-ल्यु। कीर्त्तिसञ्चारके नटे अमरः। "चाटचारणदासेषु दत्तं भवति निष्फलम्" स्मृतिः। "गन्धर्वाणां ततो लोकः परतः शतयोजनात्। देवानां गायनास्ते च चारणाः स्तुतिपाठकाः" पद्म० पु० स्व० ख०। [राजपथे हेम०।

चारपथ पु० चारार्थः बहुजनगम्यः पन्थाः ऋक् समा०।

चारभट पु० चारे बुद्धिसञ्चारे भटः। धीरे हेम०।

चारमिक त्रि० चरममधीते वसन्ता० ठक्। अन्त्यसमाम्नायार्थनाध्यायिनि। [भजे वायौ त्रिका०।

चारवायु पु० चारेण रवेरुदग्गतिभेदेन ज्ञतोवायुः। निदाघे।

चारायण पुंस्त्री चरस्य गोत्रापत्यम् नडा० फक्। चरगोत्रापत्ये। तेषां छात्रः अण् "छन्दोगाः" पा० ङ।

चारायणीय तच्छास्त्रे । चारायणेभ्य आगतः वुञ् । चारायणक तत आगते त्रि० ।

**चारिणी** स्त्री चर–णिनि ङीप् । करणीछन्दे राजनि० ।

**चारित्र** न० चर–"चरेर्वृत्ते" उषा० णित्रन् चरित्रमेव स्वार्थे अण् वा । १चरित्रे २स्वभावे हेम० । ३कुलक्रमागताचारे शब्दार्थचि० । "चारित्रं येन नो लोके दूषितं दूषितात्मना" हरिव० १७० । ४तिन्तिडीवृक्षे स्त्री शब्दरत्ना० ५मरुत्वतनयपुत्रभेदे पु० "मरुत्वतो मरुत्वत्यो देवानजनयत् सुतान्" इत्युपक्रमे "नक्षत्रं चाक्षुतिश्चैव चारित्रं ब्रह्मपद्मगम्" हरिव० २०४ अ० ।

**चारित्र** न० चरित्रमेव स्वार्थे अण् । चरित्रशब्दार्थे ।

**चारिन्** त्रि० चर–णिनि । सञ्चारकारिणि गन्तरि "सङ्क्रमाय निशि गूढचारिणम्" रघुः "प्राणापानौ समौ कृत्वा नासाभ्यन्तरचारिणौ" गीता स्त्रियां ङीप् स्वैरचारिणी ।

**चारी** स्त्री चारो गतिभेदोऽस्त्रियां अच् गौरा० ङीष् । गतिभेदयुक्तनृत्यक्रीडायां सङ्गी० दा० तद्भेदलक्षणादिकन्तु यथा

"न हि चारीं विना नृत्ते नृत्यस्याङ्गं प्रवर्त्तते । रङ्गादिरसानान्तु भावोद्दीपनकारिकाम् । माधुर्य्योद्धर्त्तना नृत्ते चारी चारुगतिर्मता" । अन्यत्तु "एकपादप्रचारो यः सा चारी न निगद्यते । पादयोश्चारणं यत्र सा चारीति निगद्यते । करणानां समायोगः खण्डकः परिकीर्त्तितः । त्रिभिः खण्डैश्चतुर्भिर्वा मण्डलं सप्तदाहृतम् । समनखा नूपुरविद्धा तिर्य्यङ्मुखी सरला च । कातरा च कुवीरा च विक्षिप्ता रथचक्रिका । पार्ष्णिरेचितका तलदर्शिनी गजहस्तिका । पराङ्मुखतला चारुताडिताग्रेङ्गमण्डला । सम्भ्रमक्रीडनिका सूचालासिका चारुरोचिका । तलोद्वृत्ता सञ्चरिता स्फुरिकापि तथैव च । लक्ष्मिजङ्घा सङ्कुटिता स्खादयैव मदालसा । उत्कुञ्चिता तिर्य्यगूर्द्धं कुञ्चिता चापकुञ्चिता । षड्विंशतिर्भौमचार्य्य इत्याख्याता मनीषिभिः" । अन्ये तु । "सम पादस्थिता विद्धा शकटास्यार्द्धकापि च । विच्याधा ताडिताऽऽ विद्धा एकैका क्रीड़िता तथा । अरट्टता छन्दिता च जनिता स्खन्दिता तथा । स्खन्दितावत् समतली समोत्सारितचट्टिता । उच्छन्दिता च विज्ञेया चार्य्यः षोड़श भूमिगाः । इति भूमिचारी । आकाश चारी यथा "चारीञ्चाकाशगा वक्ष्ये विक्षेपा त्वधरी तथा । अक्ष्णि ताड़िता भ्रमरी पुरःक्षेपा च रुचिका । अपक्षेपा जङ्घावर्त्ता विद्धा च हरिणप्लुता "जक्षजङ्घान्दोलिता च जङ्घाजङ्घालिका तथा । विद्युत्क्रान्ता भ्रमरिका दण्डपार्श्वेति षोड़श" । अन्ये तु । "विष्क्रान्तातिक्रान्ताऽपक्रान्ता च पार्श्वक्रान्तिका । अर्द्धजानुर्दोलपादोद्वृत्ता नूपुरपादिका । भुजङ्गभ्रांसिका चिप्राऽऽविद्धा ताला च रुचिका । विद्युत्क्रान्ता भ्रमरिका दण्डपादा तथैव च । आकाशचारिका एताः षोड़शैव निरूपिताः" । एताश्चैव भूमिचारीभ्यस्तरभेदोऽस्ति । "तिर्य्यक्चारी ऊर्द्धचारी अधश्चारी इति ता जानीयाः । "तैलाभ्यक्तेन गात्रेण लब्धाहारो जितश्रमः । स्तम्भे वा भित्तिदेशे वा प्रथमं ताः प्रयोजयेत् । रूक्षाहारं तथाभुक्त्वा भुक्त्वा तां न समाचरेत् । रङ्गे पादस्य विन्यासश्चारी सैवाभिधीयते । रङ्गादिरसानान्तु भवेद्दीपनकारणम् । माधुर्य्यं भूयसा रङ्गे हृद्यतालत्रयान्विताः । नियतार्द्धविशेषाणां चारी सञ्चरतो भवेत्" स० दामो० ।

**चारु** पु० चरति चित्ते–उण् । १हृद्यस्तौ २मनोहरे त्रि० मेदि० "चकाशतं चारुचमूरुचर्म्मणा" "ऊर्द्धप्रसारित सुराधिपचापचारु" माघः । गुणवचनत्वेन स्त्रियां वा ङीप् चार्व्यौ चारुः । ३कुङ्कुमे न० शब्दार्थचि० । ४रुक्मिणीतनयभेदे पु० "चारुगर्भश्चारु दमनम् ।

**चारुक** पु० चारु+संज्ञायां कन् । गरबीजरूपे क्षुद्रधान्यभेदे भावप्र० तद्गुणा उक्ता यथा "चारुकः गरबीजं स्यात् कथ्यते तद्गुणा अथ । चारुको मधुरो रूक्षो रक्तपित्तकफापहः । शीतलो लघुरुष्णश्च कषायो वातकोपनः" । [यास् राजनि० ।

**चारुकेशरा** स्त्री चारुणि केशराण्यस्याः । नागरमुस्ता-

**चारुगर्भ** पु० श्रीकृष्णस्य रुक्मिणीगर्भजाते तनयभेदे यथा "तस्याम् (रुक्मिण्याम्) उत्पादयामास पुत्रान् दश महारथान् । चारुदेष्णं सुदेष्णञ्च प्रद्युम्नञ्च महाबलम् । सुषेणं चारुगुप्तञ्च चारुबाहुञ्च वीर्य्यवान् । चारुविन्दं सुचारुञ्च भद्रचारुन्तथैव च । चारुञ्च बलिनां श्रेष्ठं सुतां चारुमतीं तथा" हरिव० ११८अ० । चारुगुप्तादयोऽप्यत्रोक्ताः तत्पुत्रभेदे ।

**चारुचित्र** पु० धृतराष्ट्रपुत्रभेदे "चित्रोपचित्रौ चित्राक्षचारुचित्रः शरासनः" भा० आ० ११७अ० ।

**चारुधारा** स्त्री चारुं चारुतां धारयति धारि–अण् चार्व्यौ धाराऽस्या वा । इन्द्रपत्न्यां शच्याम् त्रिका० ।

**चारुनेत्र** त्रि० चारु मनोहरं नेत्रमस्य । १सुलोचने

२हरिणे पुंस्त्री त्रिका०। ३अप्सरोभेदे स्त्री "चारु-नेत्रा एताची च मेनका पुञ्जिकास्थली" काशीख० १०अ०।

**चारुपर्णी** स्त्री० चारूणि पर्णान्यस्याः ङीप्। (गन्धभादाल) प्रसारिण्याम् राजनि०।

**चारुपुट** पु० चारु-पुटमस्य। तालभेदे संगीतदा०।

**चारुफला** स्त्री चारु फलमस्याः। द्राक्षायाम् राजनि०।

**चारुयशस्** पु० श्रीकृष्णपुत्रभेदे "त्वया द्वादश वर्षाणि व्रती भूतेन शुध्यता। आराध्य पशुभर्त्तारं रुक्मिण्यां जनिताः सुताः। चारुदेष्णः सुचारुश्च चारुवेषी यशोधरः। चारुश्रवा चारुयशाः प्रद्युम्नः शम्भुरेव च। यथा ते जनिताः पुत्रा रुक्मिण्यां चारुविक्रमाः" भा० अनु० १४अ०। चारुगर्भशब्दात्तुक्ताः अलोपाच्च चारुश्रवस् इत्यादयोऽपि तत्पुत्रभेदे।

**चारुलोचन** त्रि० चारु लोचनमस्य। १सुन्दरनेत्रयुक्ते २हरिणे पुंस्त्री० स्त्रियां जातित्वात् ङीष् भाद्यर्थत्वेऽपि।

**चारुवक्त्र** त्रि० चारु वक्त्रमस्य। १सुमुखे २कुमारानुचरभेदे पु० "श्वेतवक्त्रः सुवक्त्रश्च चारुवक्त्रश्च पाण्डुरः" भा० श० ४६अ० कुमारानुचरोक्तौ

**चारुवर्द्धना** स्त्री चारुं वार्त्तां वर्द्धयति वृध-णिच्-ल्यु। १नार्म्यां राजनि०। २मनोहरतावर्द्धकमात्रे त्रि०।

**चारुव्रता** स्त्री चारु व्रतमस्याः। १मासोपवासिन्यां स्त्रियां त्रिका० २ताडशव्रततयुक्ते पुरुषे पु०।

**चारुशिला** स्त्री शिल्पकर्म्म०। १मणिमात्रे त्रिका०। कर्म्मधा०। २मनोहरशिलामात्रे स्त्री "शुक्लश्लक्ष्णचारुशिलोपवेशम्" भट्टिः।

**चारुशीर्ष** त्रि० चारु शीर्षमस्य। १मनोज्ञमस्तके २शत्रुसखे बालम्बायने पु०। "चारुशीर्षस्तु तं प्राह शत्रुघ्नस्य दयितः सखा। बालम्बायन इत्येव विश्रुतः करुणात्मकः" भा० अनु० १८अ०। स च बालम्बैरपत्यम्।

**चारुहासिन्** त्रि० चारु हसति हस-णिनि। १मनोहरहासिनि स्त्रियां ङीप्। सा च "अयुग्भवा चारुहासिनी" ह० र० उक्ते ३वर्त्ताडीयभेदे छन्दसि।

**चार्चिक्य** न० चर्च्च-भावे ष्यञ् चर्चिकैव स्वार्थे ष्यञ्। चन्दनादिना गात्रलेपने अमरः। [ लेपिते रथे।

**चार्म्म** पु० चर्म्मणा परिवृतो रथः अण्। चर्म्मणा सर्व्वतो

**चार्म्मण** न० चर्मणां समूहः अण। चर्मसमुदाये।

**चार्म्मिक** त्रि० चर्म्मणा निर्वृत्तः ठक्। चर्म्मनिर्म्मिते भाण्डादौ। "चर्म्मचार्म्मिकभाण्डेषु" मनुः। ततः पुरोहिता० भावे यक्। चार्म्मिक्य तद्भावे न०।

**चार्म्मिकायणि** पुंस्त्री चर्म्मिणोऽपत्यम् वाकिना०फिञ् कुक् नलोपश्च। चर्म्मिणो (ढाली) नामकयोधस्यापत्ये।

**चार्म्मिण** न० चर्म्मिणां समूहः अण्। चर्म्मिणां समूहे।

**चार्व्वाक** पु० चारुः लोकसम्मतोवाकोवाक्यं यस्य पृषो०। बृहस्पतिशिष्ये लोकायते नास्तिकभेदे तन्मतसिद्धपदार्थादि सर्व्वद० सं० दर्शितं यथा।

"अथ कथं परमेश्वरस्य निःश्रेयसपदत्वमभिधीयते बृहस्पतिमतानुसारिणा नास्तिकशिरोमणिना चार्वाकेण दूरोत्सारितत्वात्। दुरुच्छेदं हि चार्वाकस्य चेष्टितम्। प्रायेण सर्व्वप्राणिनस्तावत् "यावज्जीवं सुखं जीवेन्नास्ति मृत्योरगोचरः। भस्मीभूतस्य देहस्य पुनरागमनं कुतः" इति लोकगाथामनुरुध्यमाना नीतिकामशास्त्रानुसारेणार्थकामावेव पुरुषार्थौ मन्यमानाः पारलौकिकसर्व्वमपह्नुवानाश्चार्वाकमतमनुवर्त्तमाना एवानुभूयन्ते। अत एव तस्य चार्वाकमतस्य लोकायतमित्यन्वर्थमपरं नामधेयम्। तत्र पृथिव्यादीनि भूतानि चत्वारि तत्त्वानि तेभ्य एव देहाकारपरिणतेभ्यः किण्वादिभ्यो मदशक्तिवत् चैतन्यमुपजायते, तेषु विनष्टेषु सत्सु स्वयं विनश्यति। "तदिह विज्ञानघन एवैतेभ्यो भूतेभ्यः समुत्थाय तान्येवानुविनश्यति न प्रेत्य संज्ञास्तीति"। तत्र चैतन्यविशिष्टदेह एवात्मा देहातिरिक्त आत्मनि प्रमाणाभावात् प्रत्यक्षैकप्रमाणवादितया अनुमानादेरनङ्गीकारेण प्रामाण्याभावात्। अङ्गनालिङ्गनादिजन्यं सुखमेव पुरुषार्थः। न चास्य दुःखसंभिन्नतया पुरुषार्थत्वमेव नास्तीति मन्तव्यम् अवर्जनीयतया प्राप्तस्य दुःखस्य परिहारेण सुखमात्रस्यैव भोक्तव्यत्वात्। तद्यथा मत्स्यार्थी सशल्कान् सकण्टकान् मत्स्यानुपादत्ते स यावदादेयं तावदादाय निवर्त्तते। यथा वा धान्यार्थी सपलालानि धान्यान्याहरति यावदादेयं तावदादाय निवर्त्तते। तस्माद्दुःखभयान्नानुकूलवेदनीयं सुखं त्यक्तुमुचितम्। न हि मृगाः सन्तीति ज्ञात्वा नोप्यन्ते। न हि भिक्षुकाः सन्तीति स्थाल्यो नाधिश्रीयन्ते। यदि कश्चिद् भीरुष्टं सुखं त्यजेत् तर्हि स पशुवन्मूर्खो भवेत्। तदुक्तम् "त्याज्यं सुखं विषयसङ्गमजन्म पुंसां दुःखोपसृष्टमिति मूर्खविचारणैषा। क्रीत्वा तुषेण हि सितोत्तमतण्डुलान्नान् को नाम भोक्तुमवकोपहितान् हितार्थी"। ननु पारलौकिकसुखाभावे बहुवित्तव्ययशरीरायाससाध्ये अग्निहोत्रादौ

विद्याहङ्काराः कथं प्रवर्त्तिष्यन्ते इति चेत् तदपि न प्रमाणकोटिं प्रवेष्टुमीष्टे अन्तव्याघातपुनरुक्तदोषैर्दूषिततया वैदिकग्रन्थैरेव धूर्त्तवकैः परस्परं कर्म्मकाण्डप्रामाण्यवादिभिर्ज्ञानकाण्डस्य ज्ञानकाण्डप्रामाण्यवादिभिश्च कर्म्मकाण्डस्य प्रतिक्षिप्तत्वेन तथा धूर्त्तप्रलापमात्रत्वेन अग्निहोत्रादेर्जीविकामात्रप्रयोजनत्वात् तथा चाभाणकः "अग्निहोत्रं त्रयो वेदास्त्रिदण्डं भस्मगुण्ठनम्। बुद्धिपौरुषहीनानां जीविकेति बृहस्पतिः" ॥ अत एव कण्टकादिजन्यं दुःखमेव नरकं लोकसिद्धो राजा परमेश्वरः देहोच्छेदो मोक्षः। देहात्मवादे च अहोऽहं स्थूलोऽहमित्यादिसामानाधिकरण्योपपत्तिः। मम शरीरमिति व्यवहारो राहोः शिर इत्यादिवदौपचारिकः। तदेतत् सर्व्वं समञ्जसम्। "अत्र चत्वारि भूतानि भूमिर्वायर्व्वनलोनिलाः। चतुर्भ्यः खलु भूतेभ्यश्चैतन्यमुपजायते। किण्वादिभ्यः समेतेभ्यो द्रव्येभ्यो मदशक्तिवत्॥ अहं स्थूलः अहोऽस्मीति सामानाधिकरण्यतः। देहः स्थौल्यादियोगाच्च स एवात्मा न चापरः॥ मम देहोऽयमित्युक्तिः सम्भवेदौपचारिकीति॥ स्यादेतत् स्यादेव मनोरथा यदनुमानादेः प्रामाण्यं न स्यात् अस्ति च प्रामाण्यं कथमन्यथा धूमोपलम्भानन्तरं धूमध्वजे मेद्यावतां प्रवृत्तिरुपपद्येत। नदीस्रोते फलानि सन्तीति वचनश्रवणसमनन्तरं फलार्थिनां नदीतीरे प्रवृत्तिरिति। तदेतन्मनोराज्यविजृम्भणम्। व्याप्तिपक्षधर्म्मतादीनि हि किञ्चिद् गमकमभ्युपगतमनुमानप्रामाण्यवादिभिः व्याप्तिश्चोभयविधोपाधिविधुरः सम्बन्धः स च सत्तया चक्षुरादिवद्बाह्यभावं भजते किन्तु ज्ञाततया। कः खलु ज्ञानोपायो भवेत्। न तावत् प्रत्यक्षं तच्च बाह्यमानन्तरं वाऽभिमतम्। न प्रथमः तस्य सम्प्रयुक्तविषयज्ञानजनकत्वेन भवति (वर्त्तमाने) प्रसरसम्बन्धेऽपि भूतभविष्यत्तोऽसदकस्मत्वेन सर्व्वोपसंहारवत्या व्याप्तेर्दुर्ज्ञानत्वात्। न च व्याप्तिज्ञानं सामान्यगोचरमिति मन्तव्यं व्यक्तेरविनाभावाभावप्रसङ्गात्। नापि चरमः अन्तःकरणस्य बहिरिन्द्रियतन्त्रत्वेन बाह्येऽर्थे स्वातन्त्र्येण प्रवृत्त्यनुपपत्तेः। तदुक्तम् "चक्षुरादयुक्तविषयं परतन्त्रं बहिर्मनः इति। नाप्यनुमानं व्याप्तिज्ञानोपायः तत्र तस्याप्येवमिति अनवस्थादौस्थ्य प्रसङ्गात्। नापि शब्दस्तदुपायः कार्य्यादमतानुसारेणानुमानप्रामाण्यात् अनन्यथाभावे वा द्रष्टव्यव्यवहारूढस्यैव शक्त्यवगतिसापेक्षतया प्रागुक्तदूषणजङ्गालत्वात् धूमध्वजयोरविनाभावोऽस्तीति वचनमात्रे मन्वादिष्वपि विश्वासाभावाच्च। अनुपदिष्टाविनाभावस्य पुरुषस्यार्थान्तरदर्शनेनार्थान्तरानुमित्यभावे स्वार्थानुमानकथाया कथायोग्यत्वप्रसङ्गाच्च। उपमानादिकन्तु दूरापास्तं तेषां संज्ञासंज्ञिसम्बन्धादिबोधकत्वेनौपाधिकसम्बन्धबोधकत्वा सम्भवात्। किञ्च उपाध्यभावेऽपि दुरवगमः उपाधीनां प्रत्यक्षत्वनियमात्सम्बन्धेन पुत्वज्ञानाभावस्य पुत्वज्ञत्वेऽपि अपुत्वज्ञानाभावस्यापुत्वज्ञतया अनुमानाद्यपेक्षायास्तस्य दुष्पनतिवृत्तेः। अपि च साधनाव्यापकत्वे सति साध्यसमव्याप्तिरिति तल्लक्षणं कथोकर्त्तव्यम्। तदुक्तम् "अव्याप्त्यसाधनो यः साध्यसमव्याप्तिरुच्यते स उपाधिरिति" शब्देऽनित्यत्वे साध्ये सकर्त्तृकत्वं घटत्वसम्बन्धतां च व्यावर्त्तयितुमुपात्तान्यत्र क्रमतो विशेषणानि त्रीणि। तस्मादिदमनवद्यं समासमेत्यादिनोक्तमाचार्य्येण इति। तत्र विध्यध्यवसायपूर्व्वकत्वान्निषेधाध्यवसायस्योपाधिज्ञाने जाते तदभावविशिष्टसम्बन्धरूपं व्याप्तिज्ञानं व्याप्तिज्ञानाधीनं चोपाधिज्ञानमिति परस्पराश्रयवज्रप्रहारदोषोऽवश्य मेपायते; तस्मादविनाभावस्य दुर्बोधतया नानुमानाद्यवकाशः। धूमादिज्ञानानन्तरमग्न्यादिज्ञाने प्रवृत्तिः प्रत्यक्षमूलतया भ्रान्त्या वा युज्यते। क्वचित् फलवत्तया सम्मतस्य मणिमन्त्रौषधादिवत् यादृच्छिकः। अतस्तत्साध्यमदृष्टादिकमपि नास्ति। नन्वदृष्टानिष्टौ जगद्वैचित्र्यमाकस्मिकं स्यादिति चेत् न तद्वत् स्वभावादेव तदुपपत्तेः। तदुक्तम् "अग्निरुष्णो जलं शीतं शीतस्पर्शस्तथानिलः। केनेदं चित्रितं तस्मात् स्वभावात्तद्व्यवस्थितिरिति"। तदेतत् सर्व्वं दुरुक्तिमात्रमाधुक्तम्। "न स्वर्गो नापवर्गो वा नैवात्मा पारलौकिकः। नैव वर्णाश्रमादीनां क्रियाश्च फलदायिकाः। अग्निहोत्रं त्रयो वेदास्त्रिदण्डं भस्मगुण्ठनम्। बुद्धिपौरुषहीनानां जीविका धातृनिर्म्मिता। पशुश्चेन्निहतः स्वर्गं ज्योतिष्टोमे गमिष्यति। स्वपिता यजमानेन तत्र कस्मान्न हिंस्यते। मृतानामपि जन्तूनां श्राद्धं चेत्तृप्तिकारणम्। गच्छतामिह जन्तूनां व्यर्थं पाथेयकल्पनम्। स्वर्गस्थिता यदा तृप्तिं गच्छेयुस्तत्र दानतः। प्रासादस्योपरिस्थानामत्र कस्मान्न दीयते?। यावज्जीवेत् सुखं जीवेदृणं कृत्वा घृतं पिबेत्। भस्मीभूतस्य देहस्य पुनरागमनं कुतः। यदि गच्छेत् परं लोकं देहादेष विनिर्गतः। कस्माद्भूयो न चायाति? बन्धुस्नेहसमाकुलः। ततश्च जीवनोपायो ब्राह्मणैर्विहितस्त्विह।

मृतानां प्रेतकार्य्याणि न त्वन्यद्विद्यते क्वचित्। त्रयो वेदस्य कर्त्तारो भण्डधूर्त्तनिशाचराः। जर्फरीतुर्फरीत्यादि पण्डितानां वचः श्रुतम्। अश्वस्यात्र हि विघ्नस्तु पद्भ्यामुक्तं प्रकीर्त्तितम्। भण्डैस्तुहत परस्त्वेव याहत्र जातं प्रकीर्त्तितम्। मांसानां खादनं तद्वन्निशाचरसमीरितमिति"। तस्माद्वृथा प्राणिनामनुपकारं चार्व्वाकेन तस्माच्चवक्षीयमिति रमणीयम्"। मैत्रेये च तन्मतं भङ्क्त्वा दर्शितं यथा

"यावोन्मज्जनवद्दुःखफलेऽपि श्रुतिसत्कृता। का श्रद्धा तत्र धीदृक्षाः! कामाध्वा यत् त्विषीकृतः। केनापि योधिसत्त्वेन जातं सत्त्वेन हेतुना। यद्देहमर्मभेदाय जगदे जगदस्थिरम्। अग्निहोत्रं त्रयीतन्त्रं त्रिदण्डं भस्मगुण्ठनम्। प्रज्ञापौरुषनिःस्वानां जीवो जल्पति जीविकाः। गृह्यिं गृहपतीगृह्यो पितोः पित्रोर्यदेवतः। तदबलकृताद्दोषाद्दोषा जातिरसि का। आत्मनीवर्मसंसर्गेन्न कः सङ्क्रान्तिपातकः। मात्राति स्वाति स्वा मोहात् कामयामभिदं जगत्। दैवैप्रया रचितो नारीर्धिक् कुलस्त्रितिदाम्बिकात्। खरान्मत्ताविवेशेऽपि तया नरमरज्जतः। परदारनिवृत्तिर्वा सोऽयं स्वयमनाहतः। अकृत्याकेलिकोलेन दम्भो दम्भोलिपाणिना। सुरतस्य-मतौ पीयूषस्यनां त्यजत द्विजाः!। देवां वः पत्युरत्युच्चैर्गुरुदारप्रहे पदः। पापात्तापा, सदः प्रथात्, परासोः स्वरिति श्रुतिः। वैपरीत्यं ध्रुवं साक्षात्तदाख्यात बलावले। सन्देहेऽप्यन्यदेहाग्नेर्विवर्ज्यं हुजिनं यदि। त्यजत श्रोत्रियाः! सर्वं हिंसादूषणसंशयात्। यज्ञिवेदिविदां वन्द्यः स व्यासोऽपि जजल्प वः। रामाया जानकामायाः प्रश्रया फलधारणा। सुप्तते यः कथं श्रद्धा सुरते च कथं न सा?। तत्कर्म पुरुषः कुर्याद्येनान्ते सुखमेधते। बलात् कृत्त पापानि सन्तु तान्यकृतानि वः। सर्व्यान् बलकृतानर्थानकृतान् मनुरब्रवीत्। स्वागमार्थैऽपि माऽक्षिं त्वस्त्रीर्धिका! विचिकित्सितवः। तं तमाचरतामन्दं स्वच्छन्दं यं यमिच्छथ। श्रुतिस्मृत्यर्थबोधेषु कैकमत्यं भजाधियाम्। व्याख्या कृद्विबलापेक्षा सा नोपेक्षा सुखोन्मुखी। यज्ञिवस्तीति धीर्दैक्षे तद्वाक्षे यः किमेनसा। क्वापि किन्तु फलं न स्यादाप्तेति परमाज्ञिके। मृतः स्मरति कर्म्माणि मृते कर्मफलोदयः। अन्यभुक्तं स्मृते तत्प्रियत्वं धूर्त्त वार्त्तया! एकं सन्दिग्धबोधावत्तं भावि तत्रेदजन्मनि। हेतुमाङ्गः स्वमन्त्रादीनसाङ्गानन्यथा विदुः। जनेन जानताकीर्तिं कार्यं नायं त्वमिष्यसौ। त्याज्यते याज्यते चान्यदक्षो मुखाऽतिधूर्त्तया। एकस्य विघ्नपातेन तामेऽनन्ते निमज्जतः। कः श्रौतस्मार्तनो भीरो! भरः स्याद् दुरितैन ते। किन्ते हन्माहृतात् पुण्यात् तन्मात्रे हि फलत्यदः। त्याज्यं तनूमूर्ध्वन्यस्य त्याज्यमेवाग्रजो यदि। इत्यानीय इत्यावादान् विधुनय वधूरतु। तवापि तादृशस्यैव का चिरं जगवञ्चना। कुरुध्वं कामदेयात्मां ब्रह्माद्यैरभ्यलङ्कृताम्। वेदोऽपि देवकीयात्मा तत्मात्मा काधिकार्हया। प्रलापमपि वेदस्य भागं मन्यध्वमेव चेत्। जैनाभाव्येन दुःखाच्च विधीनपि तवेच्छय। स्मृतिं बहुत्य विच्छिन्नाः। प्रच्छिन्नां ब्रूथ च स्वयम्। मीमांसा मांसलप्रज्ञा! स्वां यूपद्विपदायिनीम्। को हि वेदस्मृतिभिन्न वा लोक इत्याह या श्रुतिः। सम्भाषणादसं लोकं लोकः प्रत्येतु वा कथम्। धर्म्माधर्म्मौ मनुर्ज्ञात्वा त्यक्त्वार्जनवर्जनौ। व्याजान्मद्यकृदद्यार्थौ अदधाधि सुधा बुधैः। व्यासस्यैव गिरा तस्मिन् श्रद्धावन्तो स्व बान्धिकाः। मत्स्यस्याप्युपदेश्यान् यः लोभत्स्यानपि भाषताम्। पण्डितः पाण्डवानां स व्याघाटपटुः कविः। निनिन्द तेषु निन्दत्तु स्तुवत्सु स्तुतवान् किम्?। न भ्रातः किञ्च देव्यां स व्यासः कामात् समासजत्। दासीरतस्तदासीद्यन्माता तत्राप्यदेशि किम्?। देवैर्हि खैः कृता पत्न्याः पत्न्या देवां तदाहतौ। गां नतैः किं न तैर्व्यक्तं ततोऽप्यात्माऽधरीकृतः। साधु कासकता सक्ता शास्त्रस्तम्भैर्मखोन्मुखैः। सारङ्गलोचनासारां दिवं प्रेत्यापि लिप्सुभिः। उभयी प्रकृतिः काये सक्ते दिति सनेमतम्। अपवर्गे तृतीयेति भणतः पाणिनेरपि। विश्वस्यु परि दानाय जना खनितमज्जनाः। विश्वहायापतः पश्चाद्गत्वरोरुभविभ्रमम्। कः शमः क्रियतां प्राज्ञाः! प्रीयाप्रीतौ परिश्रमः। भक्षीभूतस्य भूतस्य पुनरागमनं क्षमः। एनसानेन तिर्यक्त्वादित्यादिः का विभीषिका। राजिसोऽपि हि राजेव खैः सुखी सुखहेतुभिः। कृतान्तेहिवि दोष्यन्ति दैत्या दैत्यारिणा रणे। तवापि तेन युद्धेन्ना कृता व्यपि तथैव ते। खलु ब्रह्म च संसारे सक्तौ तु ब्रह्म केवलम्। इति स्वोक्तिसिक्तक्रुच्छ्रिंदग्धौ वेदवादिनाम्। सत्त्वे यः शिक्षात्वाय शास्त्रमूचे सचेतसाम्। मोतमं तमवेतैव यथा वित्थ तथैव सः। दारा हरिहरादीनां तन्मन्मनसो भयम्। किं न सन्ति पुनः सन्ति कारा-

गारे मनोभुवः । देवखेटसि सर्वत्रः करुणाभागवन्ध्यवाक् । तत्किं वाग्व्यवसायेन कृतार्थयति मार्थिनः । भविनां भावयन् दुःखं स्वकर्मजमपीश्वरः । स्वादवारख वैरी नः कारणादपरे परे । तर्कोप्रतिष्ठया साम्यादन्योन्यस्य व्यतिघ्नताम् । नामामार्थं मतानां स्यात् केषां सत्तिपक्षवत् । अक्रोधं जिघ्यन्त्यन्धान् क्रोधना ये तपोधनाः । निर्द्वेषास्ते घनायैव धातुगादोपदेशिनः । किं वित्तं दत्त तुष्टेयमदातरि कृरिप्रिया । दत्त्वा सर्वं धनं सुगधो बन्धनं खल्वदान् बलिः । दोग्धा द्रोग्धा च सर्वोऽयं धनिनस्तेषा जनः । विद्वच्च क्षोभसंक्षोभमेकद्वा यदुदासते । दैन्यस्यायुष्यमस्तैन्यमभक्ष्यं कृचिद्वचना । स्वाच्छन्द्यस्वच्छतानन्दकन्दलीकन्दमेकम्" २दुर्योधनसखे राक्षसभेदे चार्वाकवधपर्वशब्दे विद्वतिः

**चार्वाकवधपर्वन्** न० मा० शान्तिपर्वान्तर्गते अवान्तरपर्वभेदे तद्वधकथा च तत्र १८अ० यथा ।

"निःशब्दे च स्थिते तत्र ततो विप्रजने पुनः । राजानं ब्राह्मणच्छद्मा चार्वाको राक्षसोऽभ्यगात् । तत्र दुर्योधनसखो भिक्षुरूपेण संवृतः । शास्त्रः शिखी त्रिदण्डी च छत्री विगतसाध्वसः । इतः सर्वैस्तथा विप्रैराशीर्वादविचक्षणैः । परःसहस्रैः राजेन्द्र ! तपोनियमसंश्रितैः । स दृष्टः पापमार्गस्थः पाखण्डानां महात्मनाम् । अनामन्त्र्यैव तान् विप्रांस्तस्थाच महीपतिम् । चार्वाक उवाच । इमे ब्राह्मणा आसुर्वं समारोप्य वचोभयि । धिगमवन्तं कृत्स्नपतिं ज्ञातिघातिनमस्तु वै । किं तेन स्वाहि कौन्तेय ! कृत्वेमं ज्ञातिसङ्कटम् । घातयित्वा गुरूंश्चैव स्वर्गं श्रेयो न जीवितम् । इति ते द्विजाः श्रुत्वा तस्य दुष्टस्य रक्षसः । विव्यधुश्च क्रुधुश्चैव तस्य वाक्यप्रचोदिताः । ततस्ते ब्राह्मणाः सर्वे स च राजा युधिष्ठिरः । प्रोक्षिताः परमोहिन्नास्तूष्णीं आसन् विशाम्पते ! । युधिष्ठिर उवाच । प्रसीदन्तु भवन्तो मे प्रपन्नस्याभियाचतः । प्रत्यासन्नव्यसनिनं न मां धिक्कर्तुमर्हथ । वैशम्पायन उवाच । ततो राजन् ! ब्राह्मणास्ते सर्वएव विशाम्पते ! । ऊचुर्नैतदोदनाकं क्षीरस्तु तव पार्थिव ! । अदुष्टैव मनोज्ञान स्वतस्तु ज्ञानचक्षुषा । ब्राह्मणा वेदविद्वांसस्तपोभिर्विमलीकृताः । ब्राह्मणा ऊचुः । यत्र दुर्योधनसखा चार्वाको नाम राक्षसः । परिव्राजकरूपेण स्थितं तस्य चिकीर्षितं । न वयं त्रूम धर्मज्ञ श्रोतुं ते मनसीदृशम् । उपतिष्ठतु कल्याणं भवन्तं ब्राह्मणैः सह । वैशम्पायन उवाच । ततस्ते ब्राह्मणाःसर्वे ब्रह्मारेः क्रोधमूर्च्छिताः । निर्भर्त्सयन्तः शुचयो निजघ्नुः पांसराक्षसम्" । हरिवंशस्थे शान्तिपर्वणि एतत्पर्व दृश्यते किन्तु भा० आदिपर्वणि उपरिचरवसुराख्याने स्त्रीपर्वान्तर्गतपर्वोक्तौ "चार्वाकस्य वधः पर्व रक्षसो ब्रह्मरूपिणः । आभिषेचनिकं पर्व धर्मराजस्य चोत्तमः । प्रविभागो ब्रह्मणाच्च पर्वोक्तं तदनन्तरम् । शान्तिपर्व ततोयत्र राजधर्मानुशासनम्" । इत्यनेन ब्रह्मविभागपर्वणस्त्र स्त्रीपर्वत्वेन तत्रोक्तिः । तच्च पर्व हरिवंशस्थे शान्तिपर्वणि ३४अध्यायपर्वनाम । अतस्तत्पर्वान्तर्गतमेव स्त्रीपर्वान्तर्गतमुच्यते अन्यथा प्रतिज्ञाविरोधःस्यात् यदि च स्त्रीपर्वणि सप्तविंशतिरध्याया एव आश्रमोपक्रमणिकाध्याये प्रतिज्ञाताः प्रतिज्ञाताश्च शान्तिपर्वणि २१८ अध्यायाः हरिवंशस्थे च स्त्रीपर्वणि २७अध्यायाएव दृश्यन्ते हरिवंशस्थे शान्तिपर्वणि च ३४अध्याये ब्रह्मविभागो दृश्यते इत्यध्यायाधिक्यं तथापि शान्तिपर्वणि २१८अध्यायानामेव पञ्चाध्यत्वेन प्रतिज्ञातत्वात् संवृतनुस्त्रे च २१७ अध्यायानां दर्शनात् अध्यायाधिक्यस्य लिपिकरप्रमादकृतत्वेन स्त्रीपर्वण्यपि सप्तविंशतिसंख्याधिक्यस्य लिपिकरप्रमादकृतत्वस्यापि वक्तुं शक्यत्वात् । वस्तुतस्तु उपरिचरणिकाध्याये चार्वाकस्य वधः पर्व इत्यतः पूर्वमेव "शान्तिपर्व ततः प्रोक्तम् इत्यादि पद्यं मूलग्रन्थे स्थितम् । लिपिकरप्रमादात् उत्तरत्र हरिवंशस्थे च कल्पयितुमुचितम् अतस्तस्य शान्तिपर्वान्तर्गतत्वेऽपि न विरोधः । अध्यायस्याधिक्यस्य तु लिपिकरप्रमादकृतत्वमेव न्याय्यः । अतएव उपरिचरणिकायां स्त्रीपर्वप्रतिपाद्यविषयकथने "तोयकर्णेषि चरत्ये राज्ञासद्वद दार्णिके । गदोत्पत्तस्य चाख्यानं वर्णेन पृथयाजनः" इत्यनेन स्त्रीपर्वत्वोक्तिः सङ्गच्छते ।

**चार्वाक** (त) पु० चार् आकृनि चा+कृन्—"दारावाकृनोऽण् अन्तश्च टः संज्ञायाम्, चारौ वा" वार्त्ति० अण् वा टान्तादेशः । छन्दराजभेदे खगभेदे

**चार्वादि** पु० अञ्चः परतः अनोदात्तसार्वधातुके या० म० स्वरोक्ते यङ्गणे उच्च गणः "चार, साधु शौर्याद्य अनुकूलेऽय वदान्य (अकर्मात्) वर्त्तमान वर्धमान स्वरमाण (क्रियमाण क्रीयमाण रोचमान शोभमानाः)संज्ञाश्च । विचारः (सदने) अवसादने । सदृपति सदृपतिक् ।

(राजाङ्कोऽच्छदृचि)"। "अलोडेषुचार्च्चादय" भा० अचाङ्कः।

चार्च्चो स्त्री चार+गुणवचनत्वात् स्त्रियां ङीष्। १चारतृणावां स्त्रियां २लोलुप्तायाम् ३वल्लौ ४कुवेरपत्न्याम् च मेदि० ५दीप्तौ शब्दर०।

चाल पु० चल–घ। ऊर्दिग १पटले अनामख्याते कटाच्छादने अर्चादौ त्रिका०भावे घञ्। २चलने पु० चल–णिच् भावे अच्। ३चालने पु०। [गत्रे पु० त्रिका०।

चालक त्रि० चल+ण्वुल्। १स्थानान्तरप्रापके २कम्पयितरि ३मद्यपात्रे

चालन न० चल–णिच्–भावे ल्युट्। १स्थानान्तरनयने २कम्पने च। "मोक्षं ज्ञानरक्षाङ्गो पर्वतस्य च चालनम्" ना०शो०८अ०। करणे ल्युट् ३चालन्यां न०। "युद्धक्षिद्र समोपेतं चालनं तितउः स्मृतः" इति कर्म्मपुदीपः।

चालनी स्त्री चल–णिच् करणे ल्युट्। तण्डुलादेः क्षुद्रांशापसारणार्थे वंशखण्डादिनिर्म्मिते पात्रभेदे तितउौ (चालुनी) अमरः।

चाष पुंस्त्री चष–भक्षणे ज्ञार्थे घञ्–कुत्व। १नीलकण्ठे खगे अमरः स्त्रियां जातित्वात् ङीष्। "केयूरमण्डलीनां प्रभासङ्गामेन क्वचिद्विकीर्य्यमाणचापः" काद०। "अशोकश्च विशोकश्च नन्दनः पुष्पनन्दनः। हेमदण्डो मणिग्रीवः चक्षिश्चापराजितः। अष्टौ चापस्य नामानि चापं यो वेद वेद सः पठेत्। अथ सिद्धिर्भवेत्तस्य मिदमुक्तं वराकृने!" इति पठन्ति। "मार्जारनकुलौ कृत्वा चापं मण्डूकमेव च। घृतोलूककाकांश्च शुष्कस्थाग्रतः चरेत्" मतना तद्वधे शुष्कस्थाग्रतश्चरणम् वाक्यात् तस्य पूर्वदिगादिभेदेन स्थित्या शुभाशुभम् द०स० दृष्ट० उक्तं यथा। "चापस्थलकपुरुषाकृतिरष्टाभिश्चरणैरुदग्रैः"। "धन्या मकुलचापौ च खरटः पापदोऽधमः"। "शकुन प्रथमे भागे चापवच्छकुनाकुटाः"॥ तस्य स्थितौ युवराजभयसूचकं तत्रैव ३१अ० यथा "कृष्णादर्भाङ्कितकपोतकाकबर्हैः स्थितैर्भवेद्भयमिह भर्तृ कलत्र। चापेन चापि युवराजभयं वदन्ति नेत्रो विलोचनभयं निपतन् करोति"। "कृष्णवाक् श्रोत्रलोकशुकशिखितपलाषहारीतैः। कुररचकोरखञ्जनशारिकाभिरुपाराषतश्रीकैः" ४८अ०।

चाम पु० चम–हिंसायाम् घञ्–अच् धूलो०। १हरिणभेदे २चामरगे पुंस्त्री मेदि० स्त्रियां जातित्वात् ङीष्।

चि आदाने देनादाने विभागपूर्व्वकादाने च उभ० द्विक० आ० अनिट्। चिनोति चिनुते। चिनोत् चिनु। अचैषीत् अचेट्। चिकाय चिचाय चिक्ये चिच्ये। कर्म्मणि चीयते अचायि। चिकीर्षति ते चिचीर्षति ते। चयनीयम् चेतव्यम् चेयम्। चित्वन् चित्वान्। चितः चितिः। काषः चायः चयनम्। अग्निचित् चित्वा अग्निम् चिनि चाययति चापयति। [स्वादिवत्

चि चयने विभागपूर्व्वकादाने भ्वा० उभ०अनिट्। चयति ते

चि चयने विभागपूर्व्वकादाने वा० चु० उभ० पक्षे भ्वा० द्विक० अनिट् वा चटादि। चाययतिते चापयतिते चपयति इत्येके अचीचयत् त अचीचपत्। "इदितो वा इति धिन्विकृण्व्योर्ज्जादेरिति" भाष्योक्तेरस्य द्विकर्म्मकत्वम् "अचैषुर्वानरोत्तमाः" भट्टिः। "चिचीषन्योध्वरपात्रजातम्" भट्टिः "अनरीक्षे नाग्निचेतव्य" श्रुतिः। "राजहंस! तव सैव शुभ्रता चीयते न च न चापचीयते" काव्यप०।

अधि+आधिक्येन चयने। "यत्र तपस्तेतस्तादेवाध्यचीयतैतस्मिन्नध्यचीयत" शत० ब्रा० १०।४।

अव+पराजयने "वा मूलात् शाखाभिरनुचितः" ऐतरे०ब्रा० अप+हीनतासम्पादने सक०। "यस्मादुरपचीयते" भा० प० १२७८। कर्म्मकर्त्तरि प्रयोगः।

अव+अधःस्थित्वा चयने। "फलान्यवचिनोद्वृक्षम्" रघु०। अव+आ सम्यगाचयने "पुष्पाण्यवाचिनोतीम्" भा०व०१३१५ आ+सम्यक् चयने। "कर्म्मण्याचिनुतेऽ मलम्" भाग० ४। २६।७८। "आचिक्षाते च भूयोऽपि राघवौ तेन पत्रगैः" भा० व० १२ आप्नौ च "कचाचितौ विद्युदिवाभ्रनीलौ" किरा०

उत+आ अभ्याचये अभ्याचयशब्दे दृश्यम्

समु+आ+समाहारे "यदा ह वाघवां राशिः समाभग्धे समाचितः" भा० व० २१०४। [भट्टिः।

उद् ऊर्द्धचयने उत्तोलनादाने "उच्चिक्षिपुः पुष्पफलं वनानि"

अभि+उद्+सञ्चये अभ्युच्चयशब्दे दृश्यम्

समु+उद्+सञ्चये समाहारे सक० एकजातीयक्रियान्वयादौ "अपिः पदार्थसंभावनाक्षान्तिसमुच्चयेषु" मुग्ध० "अपिशब्देन संयोगाभावादिः समुच्चीयते" काव्यप्र०।

उप+उद्यमे अक० यद्यर्हणे सक०। यानि धर्म्मे उपाद्यान्युपचिन्वन्ति वेधसः" कै०सि०१।१।७।२। "अथ मौक्षिमतस्ते-न्द्रोर्विशदैर्दशनांशुभिः। उपचिन्वन् प्रभां तन्वीम्" कुमा०।

नि+निश्चयेन चयने सञ्चये च "रसः सरैर्मे निचितः" भा० ७।१४। "खदेये निचिता दोषा अन्यस्मात् कोप-

भागताः" सुश्रुतः "त्रयः परार्धे क्षियन्ति साधिष्ठः प्रतिभू कुलम्। चत्वारस्तूपधीयन्ते विप्र आद्यो वणिङ् न्यपः" मनुः

परि+परिचये पुनः पुनरनुशीलने। "चरणारविन्दस्य ध्यानपरिचितभक्तियोगः" भाग० ५।७।१। "सङ्गाजातं चिरपरिचितं त्याजितो दैवगत्या" मेघः। "हेतुः परिचयस्तैर्यं वक्तुं घनिकैव सा" माघः।

प्र+प्रकर्षेण चयने समाहारे च षक० "कणिकारान् प्रचिन्वती" भा० आ० ७७

वि+विशेषेण चयने। "पुष्पं पुष्पं विचिन्वीत मूलच्छेदं न कारयेत्। मालाकार इवारामे न यथाङ्गारकारकः" भा० उ० ११११श्लो०

सम्+ सम्यक् चयने समाहारे "संचिन्वन्ति सदा युक्ता जातरूपस्य मौक्तिकम्" हरिव०५२१६

चिकित वि० जु० चि-ज्ञाने कर्मणि क्त "छन्दस्युभयथा" पा० निशायाः सावधातुकसंज्ञायां श्रप् जुहोत्यादित्वात् तस्य लुः द्वित्वम्, कित-ज्ञाने यङ् लुक् पचाद्यच्। संज्ञापूर्वकत्वात् अभ्यासगुणाभावः इति माधवः। १ज्ञाते २अतिशयज्ञातरि च "त्वं सोम! प्रचिकितो मनीषा" ऋ० १।९१।१। अस्य भाष्ये उक्ता व्युत्पत्तिर्यथा। २ऋषिभेदे। तस्यापत्यम् इञ् इजन्तत्वात् यूनि फक्। चैकितायन तस्य यून्यपत्ये पुंस्त्री। "त्रयोऽग्नीधीये कुशला बभूवुः शिलकः शालावत्यश्चैकितायनोदालकाश्च" छा० उ०।

चिकितान त्रि०कित-ज्ञाने कानच्। १अभिज्ञे "तपोवसो! चिकितानो अचित्तान्" ऋ० १।१८।२। "चिकितानः कर्माभिज्ञः" भा०। २ऋषिभेदे पु०। तस्यापत्यमर्षं ततः यूनि वा० ढक्। चैकितानेय तस्य यून्यपत्ये। "तद्यापि ब्रह्मदत्तश्चैकितानेयो राजानं भक्षयन्नुवाच" छ०उ०।

चिकितु त्रि० कित-ज्ञाने उनु वेदे द्वित्वम्। अभिज्ञे "अचेत्यग्निश्चिकितुर्हव्यवाट्सुमद्रथः" ऋ० ८।५६।५।

चिकित्वन् त्रि०कित-ज्ञाने क्वनिप् वेदे नि०द्वित्वम्। ज्ञातरि। "चैतेन धर्मेणाचरते सुधामन्धर्म्म! तुभ्यं चिकित्वना" ऋ० ८।६०।८।

चिकित्वित् त्रि० कित-ज्ञाने वा० क्विति वेदे नि० द्वित्वम्। अभिज्ञे "यवयद्वेषसं त्वा चिकित्वित्सूक्तशावरि" ऋ० ४।५२।४। "चिकित्विन् मनसं त्वा देवं मर्तास ऊतये" ऋ० ५।२२।३।

चिकित्सक पु० कित-रोगापनयने आर्धे सन्-ण्वुल्। रोगापनयनकर्त्तरि वैद्ये अमरः। "पूर्वं चिकित्सकशास्त्रम्" मनुः। तद्यत्तदादि चिकित्साशब्दे दृश्यम्

चिकित्सा स्त्री कित-आर्धे सन्-भावे च। रोगप्रतीकारे रोगनिवारणोपाये अमरः। अस्य चतुष्पभेदाङ्गादिकम् भावप्र० उक्तं यथा

"या क्रिया व्याधिहरणी सा चिकित्सा निगद्यते। दोषधातुमलानां वा साम्यकृत् सैव रोगहृत्"। क्रियाया कर्म व्याधिर्हन्यतेऽनयेति व्याधिहरणी "करणाधिकरणयोश्चेति" पा० ल्युट् तथाच। "याभिः क्रियाभिर्जायन्ते शरीरे धातवः समाः। सा चिकित्सा विकाराणां कर्म तद्भिषजां स्मृतम्"। "या क्षुद्दोषं शमयति नान्यं व्याधिं करोति च। सा क्रिया न तु या व्याधिं हरत्यन्यमुदीरयेत्"। क्रियायाः चिकित्सा। तथा चामरसिंहः "आरम्भो निष्कृतिः शिक्षा प्रक्रमः समधारणम्। उपायः कर्म चेष्टा च चिकित्सा च नवक्रिया इति। अथ चिकित्साविधयुपदेशः। "जातमात्रचिकित्साग्रः आत्रेयोऽग्नेरिवाभवत्। यद्भिषक्तु विभैस्तुल्यः स्वल्पोऽपि विकरोत्यसौ। रोगमादौ परीक्षेत ततोऽनन्तरमौषधम्। ततः कर्म भिषक् पश्चात् ज्ञानपूर्वं समाचरेत्"। अयं भावः भिषक् आदौ रोगं परीक्षेत विचारयेत्। ततः पश्चाद्रोगौषधविचारानन्तरं ज्ञानपूर्वं सावधानो न त्वज्ञाय कर्म चिकित्साभौषधदानादिरूपां समाचरेदित्यर्थः। रोगाज्ञानेन चिकित्साकरणे दोषमाह

"यस्तु रोगमविज्ञाय कर्माण्यारभते भिषक्। अप्यौषधविधानज्ञस्तस्य सिद्धिर्यदृच्छया"। स्वैरितया सिद्धिर्भवति नापि भवतीत्यर्थः। अन्यच्च

"भेषजं केवलं कर्तुं यो जानाति न भामयम्। वैद्यकर्म स चेत् कुर्यादूषधमर्हति राजतः"।

रोगज्ञाने भेषजाज्ञाने दोषमाह।

"यस्तु केवलरोगज्ञो भेषजेष्वविचक्षणः। तं वैद्यं प्राप्य रोगी खाद्यात् नौर्नाविकं विना"। नाविकं कर्णधारं विना यथा नौः सङ्कटे पतति तथा स रोगीत्यर्थः। अन्यच्च

"यस्तु केवलशास्त्रज्ञः क्रियास्वकुशलो भिषक्। स शस्त्राहरं प्राप्य यथा भीरुरिवाहवम्"।

रोगौषधयोर्ज्ञाने गुणमाह।

"यस्तु रोगविशेषज्ञः सर्वभैषज्यकोविदः। देशकालविभा-

गच्छतश्च सिद्धिर्न संशयः। आदावन्ते रुजां ज्ञाने प्रयतेत चिकित्सकः। भेषजानां विधानेन ततः कुर्याच्चिकित्सितम्"। चिकित्सितमित्यत्र भावे क्तः।
"विकाराणामकृत्स्नज्ञो न जिह्रीयात् कदाचन। न हि सर्वविकाराणां नामतोऽस्ति ध्रुवा स्थितिः"।
न जिह्रीयात् न लज्जेत। ध्रुवा नियता। "नास्ति रोगो विना दोषैर्यस्मात्तस्माच्चिकित्सकः। अनुक्तमपि दोषाणां लिङ्गैर्व्याधिमुपाचरेत्। येन कुर्वन्त्यसाध्यानां चिकित्सां ते भिषग्वराः। अतो वैद्यैः श्रमः कार्य्यः साध्यासाध्य परीक्षणे"। रोगज्ञानोपायो ऽग्रे वक्ष्यते। "शीते शीत प्रतीकारस्तप्ते तृष्णनिवारणम्। ज्ञात्वा कुर्यात् क्रियां प्राप्तां क्रियाकालं न चापयेत्। अप्राप्ते वा क्रियाकाले प्राप्ते वा न क्रिया कृता। क्रिया हीनातिरिक्ता च साध्येऽपि न सिद्ध्यति"। अयमर्थः। काले चिकित्साऽवसरे अप्राप्तेऽनागते। या क्रिया चिकित्सा। यथा ज्वरे जीर्णतामप्राप्ते तरुणएव कषायदानक्रिया न सिद्ध्यति। या च क्रिया चिकित्सावसरे प्राप्ते न कृता अर्थात् पश्चात् कृता। यथा दाहे कथञ्चिज्ज्ञाते पश्चाच्छीतलानुलेपनादिक्रिया। तथा हीनातिरिक्ता च क्रिया साध्येऽपि न सिद्ध्यति। अतिरिक्तां हीनां च क्रियां वर्ज्ययन्नाह। "विकारेऽल्पे महत् कर्म क्रिया लघ्वी गरीयसि। इयमेतदकौशल्यं कौशल्यं युक्तकर्मता। क्रियायास्तु गुणाभावे क्रियामन्यां प्रयोजयेत्। पूर्वस्यां शान्तवेगायां न क्रियासङ्करोहितः"। भिन्नरूपाभिस्तु क्रियाभिः साङ्कर्य्यमपि न दोषाय। यतस्याह "क्रियाभिस्तुल्यरूपाभिर्न क्रियासङ्करो हितः। ताभिस्तु भिन्नरूपाभिः साङ्कर्य्यं नैव दुष्यति"। अतएवोक्तम् "लङ्घनं वालुकास्वेदो नस्यं निष्ठीवनं तथा। अवलेहोऽञ्जनञ्चापि प्राक् प्रयोज्यं त्रिदोषजे"। ज्वर इति शेषः। "नचैकान्तेन निर्दिष्टे शास्त्रे निविशते बुधः। स्वयमत्र भिषजा तर्कणीयं चिकित्सता"। यतस्याह "उत्पद्यते च सावस्था दोषकालबलस्मृतिः। यस्य कार्यमकार्यं स्यात् कर्म कार्यं विवर्जितम्"। विवर्जितं कर्म कर्त्तव्यं भवतीत्यर्थः। अथ चिकित्सायां फलमाह। "क्वचिद्दर्पः क्वचिन्मैत्री क्वचिद्धर्म्मः क्वचिद्यशः। कर्म्माभ्यासः क्वचित्येति चिकित्सा नास्ति निःफला। आयुर्वेदोदितां युक्तिं कुर्व्वाणा विहितां च ये। पुण्यायुर्द्धिसंयुक्ता निरोगाश्च भवन्ति ते। नैव कुर्वीत लोभेन चिकित्सां पुण्यविक्रियाम्। ऐश्वर्याणां बहुमतां सिद्धेरार्थन्तु दत्तवे। चिकित्सितं शरीरं यो न निष्क्रीणाति दुर्म्मतिः। स यत्करोति सुकृतं सर्वं तद्विफलं श्रुते। न देशो मनुजैर्हीनो न मनुष्या निरामयाः। ततः सर्वत्र वैद्यानां सृष्टिरा एव दत्तये"। अथ चिकित्साया अङ्गानि। "रोगी दूतो भिषग्दीर्घमायुर्द्रव्यं क्रियेवक्तः। सदौषधं चिकित्सायाम् इत्यङ्गानि बुधा जगुः"। तत्र रोगिणो लक्षणमाह। "रोगी यस्मात्ति रोगी स स चिकित्स्यस्तु यादृशः। यादृशश्चाचिकित्स्योऽपि वक्ष्यमाणो निगद्यताम्"। तत्र चिकित्स्यः। "निजप्रकृतिवर्णाभ्यां युक्तः सत्वेन चक्षुषा। चिकित्स्यो भिषजां रोगी वैद्यभक्तो जितेन्द्रियः"। सत्वं व्यसनाभ्युदयक्रियादिष्वविप्लुतताकरं तेन युक्तः। चक्षुषा चक्षुरुपलक्षितेन। ततोऽन्येनापीन्द्रियेण चिकित्स्यः रोगानुमोचयितव्यः। अन्यच्च "आयुष्मान् सत्ववान् साध्यो द्रव्यवान् भिषवानपि। चिकित्स्यो भिषजा रोगी वैद्यवाक्यकृदास्तिकः"। आयुर्वेदोऽस्तीति मतिर्यस्य आस्तिकः। अथाचिकित्स्यः "चण्डः साहसिको भीरुः कृतघ्नो व्यय एव च। शोकाकुलो क्रमूर्खश्च विहीनः करणैश्च यः। वैरी वैद्यविदग्धश्च श्रद्धाहीनश्च गर्हितः। भिषजामविधेयाश्चानुपक्रम्या भिषग्विधाः। एतानुपाचरन्वैद्यो बहून् दोषानवाप्नुयात्" चण्डोऽत्यन्त क्रोधशीलः। कृतघ्नो वैद्यकृतोपकारलोपकः। व्ययो व्याकुलः। विहीनः करणैश्च यः निजेन्द्रियशक्तिरहितः। वैरी न चिकित्स्यः कदाचिद्रोगोद्रेके अपवादभयात्। वैद्यविदग्धो वैद्यधूर्त्तः। तथा च सुश्रुतः। "स न सिध्यति वैद्यास्तु यत्रे यस्य न पूज्यते"। श्रद्धितो वैद्यविश्वासरहितः। भिषजामविधेयाः वैद्यवचनाविधायिनः। भिषग्विधाः वैद्यतुल्याः एते नोपक्रम्याः न चिकित्स्याः। अथ दूतस्य लक्षणम्। "यश्चिकित्सकमानेतुं याति, दूतः स कथ्यते। स च यादृक् समुचितस्तादृगत्र निगद्यते। दूताःसुजातयो व्यङ्गाः पटवो निर्मलाम्बराः। सुखिनोऽश्वरथारूढाः शुभपुष्पफलैर्युताः। सजातयः सुचेष्टाश्च सजीवदृशि सङ्गताः। भिषजां समवे प्राप्ता रोगिणः सुखहेतवे"। सजातयः रोगिसमानजातयः। "यस्यां प्राणमरुद्याति सा नाड़ी जीवसंज्ञिता"। अथ दूतस्य यात्रायां शकुनविचारः। "वैद्याह्वानाय दूतस्य

गच्छतो रोगिणः क्षते। न शुभं सौम्यशकुनं प्रदीप्तस्तु सुखावहः"। प्रदीप्तोऽग्निः। दूतो रोगी च रिक्तहस्तो वैद्यं न पश्येत्। तथाच "रिक्तहस्तो न पश्येत्तु राजानं भिषजं गुरुमिति"। अथ वैद्यस्य लक्षणम्। "चिकित्सां कुरुते वस्तु स चिकित्सक उच्यते। स च याहक् समीचीनलक्षणोऽपि निगद्यते। तत्त्वाधिगतशास्त्रार्थो दृष्टकर्मा स्वयङ्कृतो। लघुहस्तः शुचिः शूरः सद्योऽपस्करभेषजः। प्रत्युत्पन्नमतिर्धीमान् व्यवसायो प्रियंवदः। सत्यधर्मपरो यश्च वैद्य ईदृक् प्रशस्यते"। दृष्टकर्मा दृष्टं परेण कृता चिकित्सा येन सः स्वयङ्कृती स्वयं चिचिकित्साकृतवान्। लघुहस्तः क्षिप्रहस्तः। अथ भिषग्वैद्यः। "कृच्छ्रेषु कर्कशस्त्रो यामीषः स्वयमागतः। पञ्च वद्या न पूज्यन्ते धन्वन्तरिसमा यदि। कर्कशः अप्रियवादी सद्यः सान्निधानः। यामीषः व्यवहारचतुरः। अथ वैद्यस्य कर्माह। "व्याधेस्तत्त्वपरिज्ञानं वेदनायाश्च निग्रहः। एतद्वैद्यस्य वैद्यत्वं न वैद्यः प्रभुरायुषः"। अस्यायमर्थः व्याधेः सम्यक्परिचयो व्यथाशान्तिकरणं वैद्यस्य कर्म तत वैद्य आयुषः प्रभुरित्यर्थः। अपरे त्वेवं व्याचक्षते व्याधेस्तत्त्वतः परिचयो वेदनाया शान्तिकरश्च। एतदेव वैद्यस्य वैद्यत्वं किन्तु वैद्य आयुषः प्रभुः आगन्तु मृत्युशतहरणात्। तथा च सुश्रुते धन्वन्तरिः "एकोत्तरं मृत्युशतमयत्नाधः प्रचक्षते। तत्रैकः कालसंयुक्तः शेषास्त्वागन्तवः स्मृताः"। अयमर्थः अयत्नाधः अयत्नसाध्यत्वेनाचर्यतुल्याः मृत्युमेकोत्तरं शतं प्रचक्षते। तत्रैको मृत्युः कालसंयुक्तः। काल आयुषोऽन्ते शरीरिणामवश्यं संभवी। सर्वैरुपायैर्निवारयितुमशक्यः। स ब्रह्मादीनायुषोऽन्ते संहरति। यत आह विष्णुपुराणे कार्त्तवीर्यं प्रति भद्रदेवः "समायुर्यस्य ते कालः कृतः पुत्र!। रसायनमिति"। तेन कालेन संयुक्तः। संहाराय नियुक्तः सोऽवश्यं भावी शेषाः शतं मृत्यवः आगन्तवः आगन्तुरूपहेतुजन्यानः कार्यकारणयोरभेदोपचारात्। आगन्तवो हेतवः यथा। "विषमशनमजीर्णोऽत्यन्तभोजनञ्च दुर्दैशजलपानम्। तवाऽतिबलवैरिव्याघ्रवनमहिषमत्तमातङ्गादिभिर्युद्धम्। दन्तशूकेन क्रीडनमत्युच्चवृक्षारोहणम् बाहुभ्याम् महानदीप्लवनमेकाकिनो रात्रौ दुर्गे मार्गे गमनम् इत्यादि। आगन्तुहेतुजा मृत्यवो दुर्निमित्ता भाविभावनवलवत्त्वादायुषि सत्यपि मारयन्ति। यथा तैलवर्त्तिवह्निषु विद्यमानेषु वायुर्दीपं नाशयति। तथाच "यथा सत्यपि तैलादौ दीपं निर्वापयेन्मरुत्। एवमायुष्यहीनेऽपि हिंसन्त्यागन्तवस्त्वमूः"। किन्तु आगन्तुनिमित्तानि निवारयितुञ्च शक्यन्ते। यत आह सुश्रुते धन्वन्तरिः "दोषागन्तुनिमित्तेभ्यः रसमन्वविचारदौ। रक्षेतां सततं नित्यं यद्वाद्यौ पुरुषितौ"। वैद्यमन्त्रिणौ सततं नित्यं यद्वाद्रक्षेताम्। कुतः दोषागन्तुनिमित्तेभ्यः दोषा निमित्ताहारविहार दूषिता वातपित्तकफरोगोत्पादकाः। आगन्तवः निमित्ता विहारा अतिबलैरिवविषमादयः ते निमित्तानि देशकालेभ्यः सकाशात्। वैद्यपुरोहितौ कथं स्यातां यतं निवारयितुं शक्तौ तत्राह। यतसौ रसमन्वविचारदौ प्रथमं वैद्येन दिनचर्यारात्रिचर्यर्तुचर्याहाराविहाराभ्यां वातपित्तकफधातुसमानेव रक्षति ततो रसमत्वाद्वैद्यं तद्वचनादिभिर्मिथ्याहारविहारदूषितदोषजनितान् विकारानृत्युहेतून् पङ्क्तति। मन्त्री च बहुबुद्धिदानेन मृत्युहेतुभ्यो निमित्तविहारेभ्यो सततं निवारयति। तत आगन्तु मृत्यूनो निवारयितुं शक्या मत्यवश्यम्भाविनः। अथायुर्विचारः। "भिषगादौ परीक्षेत रूपमायुः प्रयत्नतः। मृत आयुषि विज्ञाते चिकित्सा सफला भवेत्"। स च त्रिधा "आसुरी मानुषी दैवी चिकित्सा सा त्रिधा मता। द्रुत (पारद) प्रधाना दैवी स्यात् छेदभेदादिका ऽऽसुरी। मानुषी मद्रसा ज्ञेया अपद्रोसादिसत्क्रिया। कलौ चाल्पबले लोके मानुषी तत्र पूजिता" वैद्यकम्।

**चिकित्सित** त्रि॰ कित-स्वार्थे सन् कर्मणि क्त। १ज्ञातरोगप्रतीकारे। भावे क्त। २चिकित्सायां न॰ अमरः। "सूतानामश्वसारथ्यमश्वानां चिकित्सितम्" मनुना अश्वज्ञानां चिकित्सितवृत्तिरुक्ता। चिकित्सा ज्ञाताऽस्य मत्वर्था॰ इतच्। ३ज्ञातचिकित्से त्रि॰। ४वृद्धभिदे पु॰ तस्यापत्यं गर्गा॰ यञ्। चैकित्सित्य तदपत्ये पुंस्त्री स्त्रियां ङीप् यञोपत्य चैकित्सिती।

**चिकित्स्य** त्रि॰ कित-स्वार्थे सन् कर्मणि यत्। प्रतीकार्ये चिकित्सशब्दे उदा०। "लोकियन्तु परक्षेत्रे चिकित्स्यः" भा॰। भेषजैः स चिकित्स्यः स्यात् य उन्मार्गेण गच्छति" भा॰ शा॰ १३अ॰। "अन्योऽचिकित्स्यरोगार्त्तो मर्त्तुकामो निरंशकः" भा॰।

चिक्किन त्रि॰ निनता नासिका इनच् "पिटिञ्चिकचि च" वार्ति॰ इनच् प्रकृतेश्च चिक्कादेशः। निनतनासिके (खाँदा)

चिक्किल पु॰ चि–वा॰ इलच् कुक् च। पङ्के हेम॰।

चिकीर्षक त्रि॰ कृ–सन–ण्वुल्। कर्त्तुमिच्छौ अत्र ण्वुलो-लित्त्वात् "क्ङिति" पा॰ प्रत्ययात् पूर्व्वस्योदात्तता। अत्र "न पदान्तद्विर्वचनवरेयलोपस्वरेत्यादि" पा॰। करोतेः सवन्नात् ण्वुल् ततोलोपः स च क्ङितीति क्वरे कर्त्तव्ये न स्थानिवत्। इति मनोरमोक्तेः क्वरे कर्त्तव्ये यङ्लोपस्य न स्थानिवत्त्वम्।

चिकीर्ष्य त्रि॰ कर्त्तुमेव्यम् कृ–सन् कर्म्मणि यत्। कर्त्तु-मेव्ये अत्र यतस्त्वित्त्वात् "तित्स्वरितम्" पा॰स्वरितस्वरः

चिकुर पु॰ चि इलच्यक्षं शब्दं कुरति कुर–क। १केशे, अमरः "चिकुरप्रकराः जयन्ति ते" नैष॰ २दृक्षभेदे, ३पर्व्वते, ४सरीसृपे च। ५चपले, तरले, ६चञ्चले च त्रि॰ मेदिनी। चपलत्व दोष्मनिचित्य वध-बन्धनादिकारी। अत्र सर्पः सर्पभेदः सुसुखपिता यथाह" भा॰ उ॰ १०२अ॰ "ऐरावतकुले जातः सुसुखोनाम नागराट्। कार्य्यकस्य मतः पौत्रो दौहित्रो वासनस्य च। एतस्य हि पिता नागचिकुरो-नाम मातले!। नचिराद्दैनतेयेन पञ्चत्वमुपपादितः। ततो ब्रवीत् प्रीतमना मातलिर्नारदं वचः। एष मे रुचितस्तात। जामाता भुजगोत्तमः। क्रियतामस्य यत्नो हि प्रीतिमानस्मत्रेन वै। अस्मै नागाय वै दातुं प्रियां दुहितरं सुने!"। कथार्थकात् अस्मात् समूहार्थे यञ् प्राग्वत् स्त्रियां ङीप्। चिकुरपञ्च चिकुरवाय चि-कुरस्य केशसमूहे पु॰। चिकुर+अतो विच् कर्म्मणि ल। चिकुरित चञ्चलीकृते त्रि॰। "आरुक्षचिकुरितेक्षणाम्" काद॰।

चिकूर पु॰ चिकुर+पृषो॰। केशे शब्दभेदप्रकाशः।

चिक्क धोडने चु॰ उभ॰ सक॰ सेट्। चिक्कयति ते अचि-चिक्कत् त। [ ख्याम्। (कुँ ढो) त्रिका॰

चिक्क पु॰चिक् इलच्यक्षेन शब्देन कायति कै–क। क्षु क्षुन्द-

चिक्कण पु॰ चिक्क–क्विप् चिक् तं कणति कण–शब्दे अच्। १गुणाकृक्षे। २तत्फले न॰ राजनि॰। ३मसृणे स्निग्धे (चिकण) त्रि॰। शब्दमा॰ ४चिक्कणगुणवत्त्वात् उत्तमायां गवि स्त्री। अमरः "कठिनश्चिक्कणः श्लक्ष्णः पिच्छिलो मृदु दारुणः" भा॰ शा॰ १८४अ॰। गौरा॰ ङीप्। पृश्निपर्ण्यां हरीतक्यां॰ तत्फले च स्त्री राजनि॰। अस्य कन्यान्ते तत्पुरुषे स्त्रीत्वेऽपि चिक्कणा॰ आद्युदात्तता च चिक्कणकन्यम्।

चिक्कस पु॰ चिक्क–असच्। यवचूर्णे हेमच॰।

चिक्का स्त्री चिक्क–अच्। १पृश्निपर्ण्यां राजनि॰। २तत्फलेऽपि स्त्री

चिक्कि र पु॰ चिक्क–वा इरच्। मूषिकभेदे। उन्दुरशब्दे ११८८पृ॰ दृश्यम्। "आलनः पुत्रकः क्रव्योच्छिरश्चिक्कि-रथा" सुश्रुत॰।

चिक्किद त्रि॰क्विद–यङ् नुक् अच् नि॰। अतिशयक्लेदयुक्ते।

चिक्कुट पु॰ चिक्कुड+पृषो॰। मत्स्यभेदे हारा॰। "चिक्कुट-स्तु गुरुर्वाही मधुरो बलवर्द्धनः। मेदःपित्तास्र नाशी तु दृष्ट्योरोचनस्तृतथा। कफवातकरो ह्येवः" राजव॰। अस्यार्थे ङीप्। (चुणाचिङ्ड़ी) चुद्र-चिङ्गटे "चिङ्गटी मधुरा रुक्षा कफवातविनाशिनी गुर्वी क्लेष्मकरी ह्येवा" राजव॰।

चिक्कुड पु॰ चिक्किल्यक्षशब्देन गम्यते भक्ष्यते गल भक्षे-कर्म्मणि घञर्थे संज्ञायाम् क अस्य डः। (चिङ्ड़ी) मत्स्यभेदे शब्दमाला

चिक्किण्ड पु॰ चि–वा॰ इण्डच् चुक् च। फलप्रधाने वृक्षे भावप्र॰। "चिक्किण्डो वातपित्तघ्नः पथ्यो बलरुचिप्रदः। शोथिषोऽतिक्षितोक्तेयः पटोलात् किञ्चिदूनकः" तद्गुणा उक्ताः।

चिच्चिटिङ्ग पु॰ चीयते चि–कर्म्मणि किप् चिदग्निः तत्र चिटिं प्रेरयन् गच्छति गम–ड पृषो॰ सुम्। कीट-भेदे कीटशब्दे २०५८पृ॰ सुश्रुतवाक्यं दृश्यम्।

चिच्छक्ति चिदेव शक्तिः। चैतन्ये संक्षेप्यारीरकम् "चिच्छक्तिः परमेश्वरस्य विमला चैतन्यमेवोच्यते"। "चिच्छक्तिरस्ति परमात्मनि तेन सोऽपि व्यक्तो जगत्सु विदितोभवल्लक्षकर्त्ता। कोऽन्यस्तया विरचितः प्रभ-वत्यसञ्चिन् कर्त्तुं विकर्त्तुमपि सञ्चलितं क्षमश्चेत्" देवीभागवतम्। "मायाक्षदस्य चिच्छक्त्या चैतन्यं स्थितमात्मनि" भाग॰ १।७।२४।

चिच्छायापत्ति स्त्री चिति ब्रह्मादेः, बुद्ध्यादौ वा चितेः छाया प्रतिबिम्बः तस्या आपत्तिः। सांख्यमते १चिति बुद्ध्यादेः प्रतिबिम्बप्राप्तौ वेदान्तिमते २बुद्ध्यादौ चितः प्रतिबिम्बनप्राप्तौ च। चिप्रतिबिम्बस्वीकारस्य सोप-पत्तिकः "अन्तःकरणस्य तदुज्ज्वलितत्वाल्लोहवदग्नि-तात्त्वम्" सां॰ सू॰ भाष्ये समर्थितत्वञ्च वाक्यं १६५। ८६पृ॰ उक्तम् ततः ग्रेप्रन्तु "ननु प्रतिबिम्बहेतुतया

संयोगविशेषावश्यकत्वे प्रतिविम्बकल्पना व्यर्था प्रतिविम्बकार्य्यस्यार्थज्ञानादेः संयोगविशेषादेव सम्भवादिति। नैवम्। बुद्धौ चैतन्यप्रतिविम्बस्य चैतन्यदर्शनार्थं कल्प्यते दर्पणे मुखप्रतिविम्बवत्। अन्यथा कर्मकर्तृविरोधेन स्वस्य साक्षात् स्वदर्शनानुपपत्तेः। अयमेव च चित्प्रतिविम्बो बुद्धौ चिच्छायापत्तिरिति चैतन्याध्यास इति चिदावेश इति चोच्यते। यत्र चैतन्ये बुद्धेः प्रतिविम्बः स चारूढ़विषयैः सह बुद्धेर्भानार्थमिष्यते। अर्थाकारतयैवार्थयज्ञणस्य बुद्धेरन्यत्र स्वले दृष्टत्वेन तां विना संयोगविशेषमात्रेणार्थभानस्य पुरुषेऽप्यनौचित्यात् अर्थाकारस्यैवार्थयज्ञणशब्दार्थत्वाच्चेति। स चार्थाकारः पुरुषे परिणामो न सम्भवतीत्यर्थात् प्रतिविम्बरूप एव पर्य्यवस्यतीति दिक्। स चायमन्योऽन्यप्रतिविम्बो योगभाष्ये व्यासदेवैः सिद्धान्तितः। "चितिशक्तिरपरिणामिन्यप्रतिसंक्रमा च परिणामिन्यर्थे प्रतिसंक्रान्तेव तद्वृत्तिमनुपतति तस्माच्च प्राप्तचैतन्योपग्रहरूपाया बुद्धिवृत्तेरनुकारिमात्रतया बुद्धिवृत्तिविशिष्टा हि ज्ञानवृत्तिरित्याख्यायते" इत्यादिना।

अन्तःकरणस्यैकत्वेऽपि वृत्तिभेदाद्भेदः सां० प्र० भाष्ये समर्थितस्तद्ग्रन्थश्च अन्तःकरणशब्दे १६५५ पृ० उक्तम्

चिच्चिल्ल पु० १देशभेदे २तद्वासिषु ब० व०। मेलकैस्तैः पुरैश्चैव चिच्चिल्लैश्च समन्वितः" भा०भी० ८८अ०।

चिच्चा स्त्री चिमिति व्यक्तं शब्दं चिनोति चि-ड। १तिन्तिडीवृक्षे अमरः। तत्फले अण् इत्यत्रोक्तत्वात् स्त्रियामपि व्यक्तिवचनत्वात् स्त्री। स्वार्थे क। २शुङ्गायां चिच्चिकाभ्यत्र गौरा० ङीष्। चिञ्चीत्यत्र केचित्

चिच्चिड पु० चिमिति व्यक्तशब्देन चिडति चिड-घञ्। चिच्चिण्डटत्ते भावप्र०। चिच्चिण्ड इत्यत्र चिच्चिड इति पाठः क्वचित्तु चिच्चिण्डशब्दोल्लेखः

चिच्चाटक पु० चिच्चेवाटति चट-ण्वुल्। (चँचको) वृक्षभेदे रत्नमा०। चिच्चोटक इत्यपि पाठः तत्रार्थे ग्रहो०

चिच्चास्त्र न०चिच्चेवास्त्रम्। अस्त्रशास्त्रे! (आमरुल) राजनि०।

चिच्चासार पु० चिच्चाया इव सारोऽस्य। अस्त्रशास्त्रे (आमरुल) राजनि०। [चिचेट-चेटः चेटी।

चिट ग्रन्थने भ्वा० पर० सक० सेट्। चेटति अचेटीत्।

चिट ग्रन्थने चु०उभ० सक० सेट्। चेटयति ते अचीचिटत् त

चिटी स्त्री चिट-क गौरा० ङीष्। चण्डालवेशधारिण्यां योगिन्याम् तन्मन्त्रप्रयोगः तन्त्रसारे उक्तो यथा। "तारं चिटिद्वयं ब्रूयाच्चण्डालि च ततः परम्। मद्दादां ततो ब्रूयादसुकं मे ततः परम्। वशमानय ठ-द्वन्द्वं चिटिमन्त्र उदाहृतः (ओं चिटि! चिटि! महाचण्डालि असुकं मे वशमानाय स्वाहा) सप्तभिर्दिवसैर्भूपान् वशयेद्विधिना जनः"। विधिं चाह। "विलिख्य ताम्रपत्रे तं साध्यनाम्नाधिगर्भितम्। निःक्षिप्य क्षीरसंसिक्ते जले तत्काययेन्निशि। वश्यो भवति साध्योऽस्य मात्र कार्य्या विचारणा। ताम्रपत्रे लिखित्वैनं भद्रकालीष्टके खनेत्। वश्याय सर्वजन्तूनां प्रयोगोऽयमुदाहृतः"।

चित ज्ञाने भ्वा०पर० सक० सेट्। चेतति अचेतीत्। चिचेत देदित् चित्तः। "य इन्द्र। सोमपातमोमदः शविष्ठ चेतति" ऋ० ८।१२।१। "एवं तेऽचेतिषुः सर्व्वे" भट्टिः। "ऋतानीदस्य कर्त्वा चेतन्ते दस्युतर्हणाम्" ऋ० ६।४७।२। अ० वेदे पदव्यत्ययः। चेतः चेतनः चित्। "ऋमरहितमचेतनूनीरजीकारितच्छाम्" भट्टिः।

चित ज्ञाने चु० आत्म०सक०सेट्। चेतयति ते अचीचितत् त चेतना चेतितः। "पूर्व्वं चेतयते जन्तुरिन्द्रियैर्विषयान् पृथक्" भा० शा० ६८६० "किन्नु सुप्तोऽस्मि जागर्मि चेतयामि न चेतये" भा० स्वर्गा० २अ० "राक्षसश्चेतयन्ति न" भट्टिः। अस्य अदन्तत्वमपि। तस्य चितयतीत्यादिरूपम् "इन्द्र न यज्ञैश्चितयन्त आयवः" ऋ० १।१३१।२

चित ऋतौ चु० उभ० सक० सेट् इदित्। चिन्तयति ते अचिचिन्तत् त चिन्तितः चिन्तनम् चिन्तनाचिन्ता। "यद्यहं नैषधादन्यं मनसापि न चिन्तये" भा० व० ६३अ० "तस्मादस्य वधं राजा मनसाऽपि न चिन्तयेत्" मनुः।

चित् स्त्री चित-संज्ञायां भावे क्विप्। १ज्ञाने चेतनायाम् अमरः। २चैतन्ये। "सच्चिदानन्दविग्रहम्" वे० सा० ३चित्तवृत्तिभेदे। "चिदसि मनासि धीरसि" यजु० ४।१६। "अचेतनदेहादिसंघातस्य चेतनत्वं संपादयन्ती यावद्वस्तु निर्विकल्पकरूपं सामान्यज्ञानं जनयन्ती वृत्तिश्चित्तं तदेवात्र चिदित्युच्यते" वेदी० ४निर्विशेषस्फुरणमात्रे चेतने सतएव प्रकाश्यमाने ब्रह्मणि "निर्विकल्पकं सर्वावभासकं ज्ञानं प्रत्यगात्मस्वरूपं चिदिति" व्याख्याकारः "चिदिङ्गाक्षीति चिन्मात्रमिदं चिन्मयमेव च। चित्त्वं चिदङ्गमेते च लोकाश्चिदिति भावयेत्" वेदान्तप०। चिद्रूपः

चिद्घनः "चिन्मयस्याद्वितीयस्य निष्कलस्याशरीरिणः। उपासकानां सिद्ध्यर्थं ब्रह्मणो रूपकल्पना"। "तस्मिंश्चिदर्पणे स्वारे समसा वस्तुदृष्टयः। प्रभासाः प्रतिबिम्बन्ति सरसीव चलद्भुमाः" योगवासिष्ठः


चिनोति चि-कर्त्तरि क्विप्। ५चयनकर्त्तरि त्रि॰ अग्निचित्। कर्म्मणि क्विप्। ६चयने। ७असाकल्ये अव्य॰ अमरः। कश्चित् कथञ्चित् जातुचित्। ८अव्यक्षानुकरणे च अव्य॰ चित्कारः "नहि करिणि दृष्टे चित्कारेण तमनुमिमतेऽनुमातारः" वाचस्पतिमिश्रः। सुखबोधे विभक्त्यन्तात् किमः चिच्चनौ प्रत्ययौ विहितौ इतिभेदः। तच्चिन्त्यं चनशब्दे तद्वेतरूपः जातुचित् इत्यादिप्रयोगासिद्धिश्च तस्य किमः प्रकृतिकत्वाभावात्।

चित त्रि॰ चि-कर्म्मणि क्त। १ज्ञाने मेदि॰ २ज्ञातचयने "अवचितबलिपुष्पा वेदिसम्मार्गदत्ता" कुमा॰। ३सञ्चिते ४सम्भादिते च "तद्यथेह कर्म्मचितो लोकः क्षीयते एवमेवामुत्र पुण्यचितः क्षीयते" श्रुतिः ५यवदाङ्गाधारचूल्लीभेदे स्त्री अमरः। "प्रक्षिपताङ्गुलियाचितां चिताम्" कुमा॰ "वद वामोरु! चिताधिरोहणम्" रघुः "त्वया न पठिता चण्डी मया नापि चिकित्सितम्। अकस्माज्जगरोपान्ते कथं धूमायते चिता" हास्यार्णवः। "चितामेरहङ्काराज्यम्" भा॰ व॰ २१३अ॰। "सगोत्रजैर्मृतीत्वा तु चितामारोप्यते शवः। अधोमुखो दक्षिणादिक्चरणस्तु प्रमाणितः। उत्तानदेहा नारी तु सपिण्डैरपि बन्धुभिः। चाण्डालाग्नेरमेध्याग्नेः सूतिकाग्नेश्च कर्हिचित्। पतिताग्नेश्चिताग्नेश्च न शिष्टैर्हुतं क्वचित्" शुद्धितत्त्वं। अधिकं चितिशब्दे द्रष्टव्यम्। मन्त्रसाधनाङ्गचिता लक्षणं तन्त्रसारे उक्तं यथा "असंस्कृता चिता प्राह्या न तु संस्कारसंस्कृता। चाण्डालादिषु संप्राप्ता केवलं शीघ्रसिद्धिदा"। चितासाधनप्रकारः वीरतन्त्रे 'अष्टम्यान्तु चतुर्दश्यां प्रहयोरुभयोरपि। कृष्णपक्षे विशेषेण साधवेद्वीरसाधनम्। तत्साद्धंप्रहरे याते च सुरसुन्दरि!। शवं वापि चितां वापि नीत्वा गत्वा यथासुखम्। साधवेत् खण्डितं मन्त्री मन्त्रध्यानपरायणः। भयं नैव तु कर्त्तव्यं भयमन्त्र विवर्जयेत्। चतुर्दिग्गं न वीक्षेत मन्त्रमेव समभ्यसेत्"। तत्र पूजाद्रव्यम् "सामिधाज्यं गुडं छागं सुराभाषसपिष्टकम्। नानाफलञ्च नैवेद्यं खण्डकल्लोऽसाधितम्। चितास्थानं समानीय शुद्धाद्भिः शस्त्रपाणिभिः। समानगुणसम्भवैः साधवेत् वीतभीः स्वयम्"। [ त्रिका॰।

चिताचूडक न॰ चितैव चूडकं चूलकम् यस्य ब॰। चितायां

चिति स्त्री चि+आधारे क्तिन्। १चितायाम् तत्करणदेशादिः का॰ औ॰ २५।७।१५। सूत्रोक्तो यथा "वितानं साधयित्वा समे वह्वलङ्कृतेऽन्तराग्नौ चितिं चिनोति"१५सू॰ वितानसाधनमग्नीनां यथादेशस्थापनं कृत्वा समे दग्धबहुले देशेऽन्तराग्नौ काष्ठैः चितिं चिनोति" कर्कः "पूर्वतरम् उद्धृत्य चीरिणीः पुरुषाकृतीः" १६सू॰ "पुरुषाकृतानां यासामोषधीनाम् ताउद्धृत्य" देव॰ "चीरयुक्ताः पुरुषाकृतीः पुरुषनाम्नीः पुंलिङ्गशब्दाभिधेयाः यवाद्याः" कर्कः। "विशाखाधरादङ्गमन्वाधृत्रि पर्वाध्यखण्डाय" १७सू॰ "उद्धृत्येति वर्त्तते विशाखा दूर्वा शरोलुञ्चः धृत्रिपर्णी माषपर्णी अध्यखण्डा ठण्ठ॰ शिका" देव॰ "अङ्गगन्धा यासन्धिः धृत्रिपर्णी लक्ष्मणेत्य परे अध्यखण्डा च ब्रह्मसाखूकीति निगमे" कर्कः "चितिवच्च" कात्या॰ श्रौ॰ २१।२।२१ "देशो भवति तद्बहुत्वयुक्त इत्यर्थः। स चितिवत् श्रुतस्य दाक्षार्थं याडयैः काष्ठैश्चितिर्विहिता ताडये देशे" कर्कः। भावे क्तिन्। २समूहे मेदि॰। अग्न्यादेः श्चयने संस्कारभेदे। अग्निचयनप्रकारः शत॰ ब्रा॰ ७।१।१।१। "गार्हपत्यं चेष्यन् पलाशशाखा व्युदूहति अवस्थति स्मैतद् गार्हपत्यं चिनोति इत्यादिके" विस्तरेणोक्तः। चीयतेऽस्याम् आधारे क्तिन् अग्निचयनाधारे ४इष्टकाभेदे तासासुपधानादि संस्काराः शत॰ ब्रा॰ ८।१।१।१। "प्राणभृत उपदधाति। प्राणा वै प्राणभृतः प्राणानेवैतदुपदधाति ताः प्रथमायां चितावुपदधाति" "एषोऽग्नेर्यत् प्रथमा चितिः पुरस्तात्तत् प्राणानुपादधाति तस्मादिमे पुरस्तात् प्राणाः इत्यादिके उक्ता दृश्या"। "प्रथमोत्तमयोः पादमात्रीरतिरिक्ताः" कात्या॰ श्रौ॰ १७।७।२८। "प्रथमोत्तमयोश्चित्योरतिरिक्ता या पादमात्री भवति तातोऽतिरिक्ता चेति" कर्कः प्रथमापञ्चम्योः अतिरिक्ता या अहत्य इष्टकास्ताः पादमात्रीरुपदधाति" स॰व्या॰। ५कुड्यस्येष्टकादीनां समूहविशेषे। इष्टकामानेन चितिमानज्ञानोपयोगिव्यवहारः चितिवद्व्यवहारः। स च लौगा॰ दर्शितो यथा चितौ करणत्वं सार्द्धहस्तम्। "दक्षहस्तेन सुषितं चितेः किल क्षेत्रसम्भवफलं घनं भवेत्। इष्टिकाघनकृते घने चितेरिष्टिकापरिमितिश्च लभ्यते। इष्टकोच्छ्रयचतुर्दशांशितेः स्युः शराश्च दशदां चितेरपि।

उदाहरणम्। बलादभ्यङ्गः दैर्घ्यं विस्तारो बाहुल्यम्। उच्छ्रितिरभ्यङ्गः। उच्छ्रितिरभ्यङ्गेन वासामिष्टिकाखातितौ किल। बहिस्तृतिः पञ्चकराष्टहस्तं दैर्घ्यं च यस्यां त्रिकरोच्छ्रितिश्च। तस्यां चितौ किं फलमिष्टिकानां सङ्ख्या च का ब्रूहि कति खराश्च। न्यासः।




दृष्टिकायाः घनहस्तमानं१/६३चितेः क्षेत्रफलम् ४०। उच्छ्रयेण गुणितं चितेर्घनफलम् १२०। लब्धा दृष्टिका सङ्ख्या २५६०। खरसङ्ख्या २४। एवं पाषाणचयेऽपि। "चितेः कपि" पा० कपि परे दीर्घः एकचितीकः "पशुचितिकोऽग्निः" इत्यादौ छन्दसि न दीर्घः। चाय–दीर्घो क्विन् चिभावः। ६चैतन्ये स्वयंप्रकाशे चिच्छब्दार्थे स्त्री "आश्रयत्वविषयत्वरागिनी निर्विशेषचितिरेव केवला" "संक्षे पशारी०। ७दुर्गायाम्। "चितिश्चैतन्यमाधारा चेतना वा चितिः स्मृता। महान् व्याप्य स्थिता सर्वान् महा वा प्रकृतिर्मता" देवीभाग०पु० ३५ अ०।

चितिका स्त्री० चितिरिव कायति कै–क। १कटिच्छल्लायाम् शब्दर०। चिति+स्वार्थे क। २चितिशब्दार्थे चिता+स्वार्थे क यतस्त्वम्। ३चितायाम्।

चित्कण पु० त्रि० चिदित्यव्यक्तशब्दं कणति कण–अच्। चित्शब्दकारके। क्षीवकन्यशब्दे परे तत्पुरुषे चित्र आदि० आद्युदात्तता। चित्कणकन्यम्।

चि(ची)त्कार पु० चित्+कृ–भावे घञ् पृषो० वा दीर्घः। चिदित्यव्यक्तशब्दकरणे। "न हि करिष्यि इदे चि(ची)त्कारेण तमनुमिमतेऽनुमातारः" वाचस्पतिमिश्रः। "स विधीदति चित्कारात् ताडितो गर्दभो यथा" हितो०।

चित्त न० चिती–ज्ञाने वा० करणे क्त। १अन्तःकरणभेदे "मनोबुद्धिरहङ्कारश्चित्तं करणमान्तरम्। संशयोनिश्चयोगर्वः स्मरणं विषया इमे" वेदा०प०। तस्य च करणस्य क्रमभेदेनानुसन्धानात्मकवृत्तिभेदः। चिच्छब्दे दृश्यम्। २अन्तःकरणमात्रे अमरः "योगश्चित्तवृत्तिनिरोधः" पात० सू०। "अनस्य चित्तेन मनो वशात्मना" मैत्र०। "चन्द्रश्चतुर्धा च बुद्ध्याद्युतैः क्रमाच्चित्तमनोबुद्ध्यहङ्कारचित्ताभिधानैरिन्द्रियचतुष्कैश्च क्रमात् संशयनिश्चयाहङ्कार्यचैत्यांश्च सर्वानेतान् खलु विद्यानुभवतः" वे० सा० उक्तेः अन्तराधिष्ठाता चन्द्रः। कर्म्मणि कर्त्तरि वा क्त। इष्टादौ ३आतरि च। चित्तं च सांख्यमते त्रिगुणप्रकृतिकार्य्यम्। तदेतत्योगसूत्रभाष्यादौ दर्शितम्। "योगश्चित्तवृत्तिनिरोधः" पात० १।२।सू०

"चित्तं हि प्रख्याप्रवृत्तिस्थितीलत्वात् त्रिगुणम्। प्रख्यारूपं हि चित्तं सत्त्वम्। रजस्तमोभ्यां संसृष्टम् ऐश्वर्य्यविषयप्रियं भवति। तदेव तमसानुविद्धमधर्म्माज्ञानावैराग्यानैश्वर्य्योपगं भवति। तदेव पृथग्भावावरणं सर्व्वतः प्रद्योतमानमनुविद्धं रजोमात्रया धर्म्मज्ञानवैराग्यैश्वर्य्योपगं भवति तदेव रजोलेशमलापेतं शुद्धरूपप्रतिष्ठं सत्त्वपुरुषान्यताख्यातिमात्रं धर्म्ममेघाख्यमोपग्रं भवति। तत्परं प्रसङ्ख्यानमित्याचक्षते ध्यायिनः। चित्तस्थितिरपरिणामित्वप्रतिसङ्क्रमा दर्शितविषया गुणा ज्ञानान्ता च सत्त्वगुणात्मिका चेयम्। अतो विपरीता विवेकख्यातिरित्यतस्तां विरक्तं चित्तमात्मापि ख्यातिं निरुणद्धि। तदवस्थं चित्तं संस्कारोपगं भवति। स निर्बीजः समाधिः, न तत्र किञ्चित् सम्प्रज्ञायतेऽत्यन्तमसम्प्रज्ञातः द्विविधः स योगश्चित्तवृत्तिनिरोधः इति भा०। "कृतः पुनरेकस्य चित्तादिभूमिसम्बन्धः किमर्थं चैवमस्य चित्तस्य वृत्तयोनिरोद्धव्या इत्यागङ्क्य प्रथमं तावदवस्थासम्बन्धमेवैतस्योपन्यस्यति। चित्तं क्षीति। प्रख्याशीलत्वात् सत्त्वगुणम्। प्रवृत्तिशीलत्वाद्रजोगुणम् स्थितिशीलत्वात् तमोगुणम्। प्रख्याप्रवृत्तिस्थितिलक्षणार्थं तेजोऽम्बोऽपि वात्विकाः प्रसादलाघवप्रीतयादयः सूच्यन्ते। प्रवृत्त्या च परितापशोकादयो राजसाः। स्थितिः प्रवृत्तिविरोधी तमोवृत्तिधर्म्मः स्थितिस्वभावाद् गौरवावरणदैन्यादय उपलक्ष्यन्ते। एतदुक्तं भवति एकमपि चित्तं त्रिगुणनिर्म्मिततया गुणानाञ्च वैषम्येण परस्परविभर्दैवैचित्र्यादिचित्तपरिणामं प्रदनेकावस्थमुपपद्यत इति। चित्तादा एव चित्तस्य भूमयः यथासम्भवमवस्थाभेदेनेतरत्रता दर्शयति। प्रख्यारूपं हीति चित्तरूपेण परिणतं सत्त्वं चित्तसत्त्वं, तदेवं प्रख्यारूपतया सत्त्वप्राधान्यं चित्तस्य दर्शितम्। तत्र चित्ते सत्त्वात् किञ्चिदूने

रजस्तमसी यदा मिथःसमे भवतः तदैश्वर्यं च विषयाश्च शब्दादयस्तान्येव प्रियाणि यस्य तत्तथोक्तं सत्त्वप्राधान्यात् खलु चित्तं तत्त्वे प्रविधितत्सदपि तत्त्वस्य तमसा विक्षिप्ततयादधिमात्रिकमेव तत्त्वमभिमन्यमानं तत्प्रविधित्सति प्रविधत्ते च चयम् अथ रजसा क्षिप्यमाणम्। तस्माच्चलत्वस्थिति तत् प्रियमात्रं भवति। यच्छब्दादिषु पुनरस्य वरसंज्ञाकृतो प्रेम्णा निरूढ एव। तदनेन विक्षिप्तं चित्तसत्त्वम् क्षिप्तं दर्शयन् मूढमपि सूचयति तदेव तमसेति। यदा हि तमो रजो विजित्य प्रवृत्तं तदा चित्तसत्त्वावरकतमःसंस्कारयोरभावात् रजस्तमस्वगितं चित्तमधर्मादुपगच्छति। अज्ञानञ्च विपर्ययज्ञानसमावेशात्तयाज्ञानञ्च निद्राज्ञानसंस्कृतम्। ततश्च मूढावस्थापि सूचितेति। अनैश्वर्यं सर्वत्रैवाक्षीणत्वात्। अधर्मादिष्वाद्ये चित्तं भवतीत्यर्थः। यदा तु तदेव चित्तसत्त्वमाविर्भूतसत्त्वमपगततमःषट्कं सरजस्कं भवति तदा धर्मज्ञानवैराग्यैश्वर्याण्युपगच्छतीत्याह प्रवीणेत्यादि। क्षीणक्लेशतयैव चावरणं प्रक्षीणं यस्य तत्तथोक्तम्। अतएव सर्वतो विशेषाविशेषलिङ्गमात्रालिङ्गेषु प्रद्योतमानं नचापि न धर्मादैश्वर्यादि च कल्पते प्रवृत्त्यभावादित्यत आह। अतुविद्धं रजोमात्रया रजसः प्रवर्त्तकत्वादस्ति धर्मादिरित्यर्थः। तदनेन संप्रज्ञातसमाधिसम्पन्नयोर्मधुमतिकप्रज्ञाज्योतिषोर्धर्माधमयोर्योगिनोचित्तसत्त्वं संसृष्टीतम् संप्रज्ञातिक्रान्तभावनीयस्य ध्यायिनश्चतुर्थी चित्तस्थावस्थामाह तदेव चित्तं रजोलेशान्नादयेतम् अतएव स्वरूपप्रतिष्ठमभ्यासवैराग्यपुटपाकप्रबन्धविधूतरजस्तमोमलस्य हि बुद्धिसत्त्वस्य स्वरूपप्रतिष्ठस्य विषयेन्द्रियपुरुषाकृतस्थानवस्थिताधिकारतया च कार्यकारित्वो विवेकख्यातिः परं कार्यमवशिष्यत इत्याह सत्त्वपुरुषान्यताख्यातिमात्रं चित्तं धर्ममेघध्यानोपमं भवति। धर्ममेघश्च वक्ष्यते। अतएव योगिजनप्रसिद्धिमाह तदिति। सत्त्वपुरुषान्यताख्यातिमात्रं चित्तं धर्ममेघपर्यन्तं परं प्रसंख्यानमिति आचक्षते ध्यायिनः। चित्तस्याभाव्याधिकरण्यं च धर्मधर्मिणोरभेदविवक्षया द्रष्टव्यम्। विवेकख्यातेर्हानहेतुं चितिशक्तेरोपादानहेतुं निरोधसमाधिमवतारयितुं चितिशक्तेः साधुतामसाधुतां च विवेकख्यातेर्दर्शयति चितिशक्तिरित्यादि। सुखदुःखमोहात्मकत्वमनुद्भिः। सुखमोहावपि विवेकिनं दुःखाकुरुतः। अतो दुःखबद्धेयौ तथाचातिदुन्दरमश्नुवत् दुनोति। तेन तदपि ज्ञेयमेव विवेकिनः। सेयमविद्धिरन्तश्च चितिशक्तौ पुरुषे न सा दृष्टुं शक्ता दर्शनाच्च चेति। नन्वेवं सुखदुःखमोहात्मकशब्दादीन् स्वयं चेतयमाना तदाकारापन्ना कथं विशुद्धा तदाकारपरिस्पन्दपरिवर्जने च कुर्वती कथमनन्तेत्यत उक्तं दर्शितविषयेति। दर्शितो विषयः शब्दादिर्यस्यै सा तथोक्ता। भवेदेतदेवं यदि बुद्धिवच्चितिशक्तिर्विषयाकारतामापद्येत। किन्तु बुद्धिरेव विषयाकारेण परिणता सती स्वतदाकारायै चितिशक्तये विषयमादर्शयति ततः पुरुषश्चेतयत इत्युच्यते। ननु विषयाकारां बुद्धिमानारूढायाश्चितिशक्तेः कथं विषयवेदनं विषयारोहे वा कथं न तदाकारापत्तिरिति अतः उक्तम् अप्रतिसंक्रमेति। प्रतिसंक्रमः सञ्चारः स चितेर्नास्तीत्यर्थः। स एव कुतोऽस्यां भास्तीत्यत उक्तम् स्वपरिणामिनीति। न चितेश्चिद्विधोऽपि धर्माधर्मोऽस्यास्तस्याः परिणामोऽस्ति येन त्रितयरूपेण परिणता सती बुद्धिसंयोगेन परिणमेत। चितिशक्तेरसंक्रान्तायाऽपि विषयसंवेदनसंपादयिष्यते। तच्चिद्धं चितिशक्तिः शोभनेति, विवेकख्यातिस्तु बुद्धिसत्त्वात्मिका अशोभनेत्युक्तम्। अतश्चितिशक्तेर्विपरीतेति। यदा च विवेकख्यातिरपि हेया तदा कैव कथा दृश्यन्तराणां दोषबद्धत्वानामिति भावः। ततश्चैतोनिरोधसमाधेरवतारो युक्तो दृश्याहेयत्वस्यामिति। ज्ञानप्रसादमात्रेण हि परेण वैराग्येण विवेकख्यातिमपि निरुणद्धीत्यर्थः। अथ निरुद्धाऽशेषवृत्ति चित्तं कीदृशमित्यतस्याह तदवस्थमित्यादि। स निरोधः अवस्था यस्य तत्तथोक्तम्। निरोधस्य स्वरूपमाह स निर्बीज इति। क्लेशसंहतिकर्माशयो जात्यायुर्भोगोवोज्यं तस्माद्विगतः निर्बीजः अत एव योगिजनप्रसिद्धानन्यसंप्रज्ञातादर्शयति। न तत्रेति। उपसंहरति। द्विविधः स योगश्चित्तवृत्तिनिरोध इति विवरणम्।

"तदवस्थे चेतसि विषयाभावाद् बुद्धिबोधात्मा पुरुषः किंस्वभाव?" इति—भा०

"तदा द्रष्टुः स्वरूपेऽवस्थानम्" २।२०।

"स्वरूपप्रतिष्ठा तदानीं चितिशक्तिर्यथा कैवल्ये व्युत्थानचित्ते तु सति तथापि भवती न तथा" भा०।

"संप्रज्ञातरूपमवतारयितुं चोदयति। तदवस्थे चेतसीति

किमाचेपे तत्तदाकारपरिणतबुद्धिबोधात्मा स्वयं पुरुषः सदानुभूयते न तु बुद्धिबोधरहितोऽतोऽस्य पुरुषस्य बुद्धिबोधस्वभावः सवितुरिव प्रकाशः। नच संस्कारशेषे चेतसि सोऽस्ति, न च स्वभावमपहाय भावो वस्तुमर्हति इति भावः। स्यादेतत् संस्कारशेषामपि बुद्धिं कस्मात् पुरुषो न बुध्यते ? इत्यत आह विषयाभावादिति। न बुद्धिमात्रं पुरुषस्य विषयोऽपि तु पुरुषार्थवती बुद्धिः। विवेकख्यातिविषयभोगो च पुरुषार्थौ तौ च निरुद्धावस्थायां न स्त इति सिद्धो विषयाभाव इत्यर्थः। सूत्रेण परिहरति "तदा द्रष्टुः स्वरूपेऽवस्थानम्" सू०। "स्वरूप इत्यारोपितम् शान्तघोरमूढस्वरूपं निवर्त्तयति पुरुषस्य हि चैतन्यं स्वरूपमनौपाधिकम् नतु बुद्धिबोधः शान्तादिरूप औपाधिको हि सः स्फटिकस्येव स्वभावतः स्वच्छधवलस्य अपाकृसुमसन्निधानोपाधिरुपिमा नचोपाधिनिवृत्तावुपस्थितनिवृत्तिरतिप्रसङ्गादिति भावः। स्वरूपस्य चाभेदेऽपि भेदं विकल्प्य अधिकरणभाव उक्त इति। अयमेवार्थोभाष्यकृता द्योत्यते। स्वरूपप्रतिष्ठेति। तदानीं निरोधावस्थायां न व्युत्थानावस्थायामिति भावः। स्यादेतत् व्युत्थानावस्थायामप्रतिष्ठिता, स्वरूपे चितिशक्तिः, निरोधावस्थायां प्रतिष्ठिन्ती परिणामिनी स्यात् व्युत्थाने वा स्वरूपप्रतिष्ठाने सति व्युत्थान निरोधयोरविशेष इत्यत आह व्युत्थानचित्ते स्थिति न जातु कूटस्थनित्या चितिशक्तिः स्वरूपात् च्यवते। तेन वंध्या निरोधे तथैव व्युत्थानेऽपि। न खलु शुक्तिकायाः प्रमाणविपर्ययज्ञानगोचरत्वेऽपि स्वरूपोदयव्ययौ भवतः प्रतिपत्ता त्वतद्भूतमपि तथात्वेनाभिमन्यते। निरोधसमाधिमपेक्ष्य सम्प्रज्ञातोऽपि व्युत्थानमेवेति विवरणम्। "कथन्तर्हि दर्शितविषयत्वात्"—भा०

"वृत्तिसारूप्यमितरत्र" ३सू०

"व्युत्थाने याः चित्तवृत्तयः तद्विशिष्टवृत्तिः पुरुषः। तथा च सूत्रं "एकमेव दर्शनं" "ख्यातिरेव दर्शनमिति" "चित्तम् अयस्कान्तमणिकल्पं सन्निधिमात्रोपकारि दृश्यत्वेन स्वं भवति पुरुषस्य स्वामिनः। तस्माच्चित्तवृत्तिबोधे पुरुषस्यानादिसम्बन्धोहेतुः" भाष्यम्।

"स्वस्वान्तरमवतारयितुं पृच्छति कथन्तर्हि इति। यदि भवति न तथा केन तर्हि प्रकारेण प्रकाशत इत्यर्थः। हेतुपदमध्याहृत्य सूत्रं पठति। दर्शितविषयत्वात्। वृत्तिसारूप्यमितरत्र। इतरत्र व्युत्थाने याश्चित्तवृत्तयः शान्तघोरमूढास्ता एव विशिष्टा अस्मिन्नाकृतयो यस्य पुरुषस्य स तथोक्तः सारूप्यमित्यत्र सप्तम्यर्थे एकवचनार्थः। एतदुक्तं भवति अपाकृसुमस्फटिकयोरिव बुद्धिपुरुषयोः सन्निधानादभेदप्रथे बुद्धिवृत्तीः पुरुषे समारोप्य शान्तोऽस्मि दुःखितोऽस्मि मूढोऽस्मीति अध्यवस्यति। यथा मलिने दर्पणतले प्रतिबिम्बितं मुखं मलिनतामारोप्य शोचत्यात्मानं मलिनोऽस्मीति। यद्यपि पुरुषसमारोपोऽपि शब्दादिविज्ञानवत् बुद्धिवृत्तिः यद्यपि च प्राकृतत्वेनाचिद्रूपतयानुभाव्यत्वेऽपि बुद्धेः पुरुषत्वमापादयन् पुरुषवृत्तिरिवानुभव इवावभासते। तथाचायमविपर्ययोऽयात्मा विपर्ययवानिवाऽभोक्तापि भोक्तेव विवेकख्यातिरहितोऽपि तत्सहित इवाविवेकख्यातेः प्रकाशते। एतच्च चितेरप्रतिसंक्रमायास्तदाकारापत्तौ स्वबुद्धिसंवेदनमित्यत्र सत्पुरुषयोरत्यन्तासङ्कीर्णयोः प्रत्ययाविशेषोभोग इत्यत्र चोपपादयिष्यते। एतच्च मतान्तरेऽपि सिद्धमित्याह तथा चेति। पञ्चशिखाचार्यस्य सूत्रम् "एकमेव दर्शनमिति"। ननु कथमेकं दर्शनं यावता बुद्धेः शब्दादिविषया विवेकविषया च वृत्तिः प्राकृततया जडत्वेनानुभाव्या, दर्शनं ततोऽन्यत् पुरुषस्य, चैतन्यमनुभवो दर्शनमित्यत्र कथं "ख्यातिरेव दर्शनमिति" उदयव्ययधर्मिणीं वृत्तिं ख्यातिं लौकिकीमभिप्रेत्यैतदुक्तमेवेति चैकमेव चैतन्यन्तु पुरुषस्य स्वभावो न ख्यातिः। तत्तु न लोकप्रत्यक्षगोचरोऽपि त्वागमानुमानगोचर इत्यर्थः। तदनेन व्युत्थानावस्थायां मूलकारणमविद्यां दर्शयता तद्धेतुकसंयोगो भोगहेतुः स्वस्वामिभावोऽपि सूचित इति तदुपपादयद्भाह। चित्तं स्वं भवति। पुरुषस्य स्वामिन इति सम्बन्धः। ननु चित्तजनितोपकारं भजमानो हि चेतनश्चित्तस्वेशिता न चास्य तज्जनितोपकारसम्भवस्तदसम्बन्धादतदुपकार्यत्वात् तत्संयोगतदुपकारभागित्वे परिणामप्रसङ्गादित्यत आह अयस्कान्तमणिकल्पं सन्निधिमात्रोपकारि दृश्यत्वेनेति। न पुरुषसंयुक्तं चित्तमपितु तत्सन्निहितं सन्निधिश्च पुरुषस्य न देशतः कालतो वा तदसंयोगात् किन्तु योग्यतालक्षणोऽस्ति च पुरुषस्य भोक्तृशक्तिश्चित्तस्य भोग्यशक्तिः। तदुक्तम् दृश्यत्वेनेति। शब्दाद्याकारपरिणतस्य भोग्यत्वेनेत्यर्थः। भोगश्च यद्यपि शब्दाद्याकारवृत्तिश्चित्तस्य धर्म्मस्तथापि चित्तचैतन्ययोरभेदसमारोपाद्वृत्तिसारूप्यात् पुरुषस्येत्युक्तम्। तस्माच्चितेनासंयोगेऽपि तज्जनितोपकारभागिता

पुरुषस्यापरिणामिता चेति विद्मः। ननु स्वस्वामिसम्बन्धो भोगहेतुरविद्यानिमित्तोऽविद्या तु किन्निमित्ता न खलु निर्निमित्तं कार्यमुत्पद्यते। यथाऽऽहुः "स्वप्नादिवदविद्यायाः प्रवृत्तिः कस्य किंकृता" इति शङ्कासमुपसंहारव्याजेनोद्धरति। तस्मात् चित्तवृत्तिबोधे शान्तघोरमूढाकारचित्तवृत्त्युपभोगे चानाद्यविद्यानिमित्तत्वादनादिसंयोगः हेतुः अविद्यावासनयोश्च बीजाङ्कुरवदनादिरिति भावः" विवरणम्।

चित्तः करणयूहे १८५५ पृ० अधिकसूत्रम्।

कैवल्यपादे च ज्ञानज्ञेययोर्भेदव्यवस्थापनेन तद्विशेष उक्तो यथा "कृतार्थं प्रतीदमन्यासाधारणम्" भा०

"वस्तुसाम्ये चित्तभेदात्तयोर्विभक्तः पन्थाः" सू०।

"बहुचित्तावलम्बनीभूतमेकं वस्तु साधारणं तत् खलु नैकचित्तपरिकल्पितं नाप्यनेकचित्तपरिकल्पं किन्तु स्वप्रतिष्ठितं कथं? वस्तुसाम्ये चित्तभेदात्, धर्मादिमेयं चित्तस्य वस्तुसाम्येऽपि सुखज्ञानं भवति, अधर्मादिमेयं ततएव दुःखज्ञानम्, अविद्यामेयं ततएव मूढज्ञानं सम्यग्दर्शनामेयं ततएव माध्यस्थ्यज्ञानमिति। कस्य तच्चित्तेन परिकल्पितं? नचान्यचित्तपरिकल्पितेनार्थेनान्यस्य चित्तोपरागो युक्तः तस्माद्वस्तुज्ञानयोर्ग्राह्यग्रहणभेदभिन्नयोर्विभक्तः पन्था नयोः सङ्करगन्धोऽप्यस्तीति साङ्ख्यपक्षे पुनर्वस्तुत्रिगुणं चलञ्च गुणवृत्तमिति धर्मादिनिमित्तापेक्षचित्तैरभिसंबध्यते निमित्तानुरूपश्च प्रत्ययस्योत्पद्यमानस्य तेन तेनात्मना हेतुर्भवति। केचिदाहुर्ज्ञानसङ्घभूरेवार्थो भोग्यत्वात् सुखादिवदिति तत्र तया द्वारा साधारणत्वं धावमानाः पूर्वोत्तरेषु क्षणेषु वस्तुरूपमेवापद्यते" भा० तदेवमतूत्रां भाष्यकृद्भिज्ञानातिरिक्तस्यापने युक्तिशङ्कां कौत्सीं युक्तिमवतारयति कृतार्थं तदिति। वस्तुसाम्ये इति यज्ज्ञानात्मे यस्यैकत्वं तत्ततोऽत्यन्तं भिद्यते यथा चैतस्य ज्ञानमेकं भिन्नेभ्यो देवदत्तविष्णुमित्रमैत्रप्रत्ययेभ्यो भिद्यते ज्ञाननानात्वेऽपि चार्थो न भिद्यते इति भवति विज्ञानेभ्योऽन्यः अभेदश्चार्थस्य ज्ञानभेदेऽपि प्रमातृणां परस्परप्रतिसन्धानादवसीयते। अस्ति हि रक्तद्विष्टविमूढमध्यस्थानामेकस्यां योषिति प्रतीयमानायां प्रतिसन्धानं या त्वया दृश्यते सैव मयापीति। तस्माद्वस्तुसाम्ये चित्तभेदात् ज्ञानभेदात्तयोरर्थज्ञानयोर्विभक्तः पन्थाः स्वरूपभेदोपायः सुखज्ञानं कान्तायाः कान्तस्य सपत्नीनां दुःखज्ञानं तामविन्दतो विषादः। स्यादेतत् यत्रैकस्य चित्तेन परिकल्पितं कामिनीलक्षणोऽर्थः तेनैवान्येषामपि चित्तमुपरज्यते इति साधारणमुपपद्यते इत्यत आह नचान्येति तथा सत्येकस्मिन्नीलज्ञानवति सर्व एव नीलज्ञानवन्तः स्युरिति नन्वर्थवादिनामप्येकोऽर्थः कथं सुखादिभेदाद्विज्ञानहेतुर्न स्यादविशेषात् कारणात् कार्यभेदोयुक्त इत्यत आह साङ्ख्यपक्ष इति एकस्यैव बाह्यस्य वस्तुनस्त्रैगुण्यपरिणामस्य त्रैरूप्यमुपपन्नम्।

एवमपि सर्वेषामविशेषेण सुखदुःखमोहात्मकं विज्ञानं स्यादित्यत आह धर्मादिनिमित्तापेक्षं रजःसहितं सत्त्वं धर्मापेक्षं सुखज्ञानं जनयति। एवमधर्मापेक्षं रजो दुःखं, तमस्तु तथाभूतं मूढज्ञानम्। सत्त्वमेव तु विगतरजस्कं विद्यामेयं माध्यस्थ्यज्ञानमिति ते च धर्मादयो न सर्वे सर्वत्र पुरुषे सन्ति। किन्तु क्वचित् क्वचिदिति अभ्युपपत्त्या व्यवस्थेति। अत्र केचिदाहुः ग्राह्यग्रहणभूरेवार्थो भोग्यत्वात् सुखादिवदिति एतदुक्तं भवति भवत्यर्थो ज्ञानात् व्यतिरिक्तः तथाह्यसौ जडत्वात् न ज्ञानमन्तरेण शक्यः प्रतिपत्तुं ज्ञानेन तु भासनीयः तथाच ज्ञानसमवेतोऽसि नान्यदा प्रमाणाभावादिति तदेतन्मतं तावत् दूषयति भाष्यकारः तत्र तया द्वारेति वस्तु खलु सर्वचित्तसाधारणमनेकक्षणपरम्परोह्यमानं परिणामात्मकमनुभूयते लौकिकपरीक्षकैः तच्चेद्विज्ञानेन सह भवेत् नूनमेवंविधमेव चेद्दृश्यशेषोपरि कोऽयमनुरोधः येन सोऽपि नापह्नूयेतेत्यर्थः" विव०।

"नचैकचित्ततन्त्रं वस्तुप्रदप्रमाणकं तदा किं स्यात्" सू०।

"एकचित्ततन्त्रं चेद्वस्तु स्यात्तदा चित्ते व्यये निरुद्धे वा स्वरूपमेव तेनापरामृष्टमन्यस्याविषयीभूतमप्रमाणकमस्मृतीतस्वभावकं केनचित्तदानीं किं तत्स्यात्? सम्बध्यमानं वा पुनश्चित्तेन कुत उत्पद्येत ये चास्यानुपस्थिताभागास्ते चास्य न स्युरेवं नास्ति घृतमित्युदरमपि न स्पृशेत तस्मात् स्वतन्त्रोऽर्थः सर्वपुरुषसाधारणः स्वतन्त्राणि च चित्तानि प्रतिपुरुषं प्रवर्त्तन्ते तयोः सम्बन्धादुपलब्धिः पुरुषस्य भोग इति" भा०।

"आ वा भूदुभयस्यापह्नवोज्ञानसङ्घभूरेवास्त्वर्थः तत्राह्य नचैकं किं स्यात् यद्धि घटयाद्रि चित्तं तद् यदा घटद्रव्यव्यपतया न घटे वर्त्तते तद् वा विवेकविषयमासीत् तदेव च निरोधं समापद्यते तदा घटज्ञानस्य वा विवेकज्ञानभेदमात्रं जीवनस्तन्त्राधानस्य एव स्यादित्याह एकचित्तेति किं तत् स्यात् न स्यादित्यर्थः। संपश्यज्ञानञ्च चित्तेन तद्

वस्तु विवेकोवा घटो वा कुत उत्पद्यते नियतकारणान्वय व्यतिरेकानुविधायिभावानि हि कार्याणि न स्वकारणमतिवर्त्य कारणान्तराद्भवितुमीशते, मा भूदकारणत्वे तेषां कादाचित्कत्वव्याघातः न च तज्ज्ञानकारणत्वमेव तत्कारणत्वमिति युक्तम्। आगामोदकस्य उपार्ज्जितमोदकस्य वोपयुज्यमानस्य रसवीर्य्यविपाकादिसाम्य प्रसङ्गात् तस्मात् साधूक्तं सम्बध्यमानं वा पुनश्चित्तेनेति। अपि च योयोऽवांगभागः स सर्वोसाध्यपरभागव्याप्तः ज्ञानाधीने सद्भावे तज्ज्ञाननुभूयमानत्वात्साध्यपरभागो न स इतिव्यापकाभावादवांगभागोऽपि न स्यात् इत्यवांभावात् कुतो ज्ञानसहभूर्थ इत्याह। ये चास्येति अनुपस्थिता अज्ञाताः, उपसंहरति तस्मादिति सुगमं शेषम्" विवरणम्।

"तदुपरागापेक्षित्वाच्चित्तस्य वस्तु ज्ञाताज्ञातम्" सू०।

"अयस्कान्तमणिकल्पा विषयाः। अयःसधर्मकं चित्तमभिसम्बध्योपरञ्जयन्ति येन च विषयेणोपरक्तं चित्तं स विषयोज्ञातस्ततोऽन्यः पुनरज्ञातोवस्तुनोज्ञाताज्ञातस्वरूपत्वात् परिणामि चित्तम्" भा०।

"स्यादेतत् अर्थवेत् स्वतन्त्रः स च जड़स्वभाव इति न कदाचित् प्रकाशेत प्रकाशने वा जड़त्वमप्यस्यापगतमिति भावोऽप्यपगच्छेत् न जातु स्वभावमपह्राय भावोवर्त्तितुमर्हति न चेन्द्रियाद्याधेयो जड़स्वभावस्यार्थस्य धर्म्मःप्रकाश इति साम्प्रतम्। अर्थधर्म्मत्वे नीलत्वादिवत् सर्वत्ररूपसाधारण्य इत्येकः शास्त्रार्थश्च इति सर्वएव विद्वांसः प्रसज्येरन् न जात्वसकविदस्ति। न चातीतानागतयोः धर्म्मं प्रत्युत्पन्नयुक्तः तस्मात् स्वतन्त्रोऽर्थउपलम्भविषय इति मनोरथमात्रमेतदित्यत आह तदुपरागेति। जड़स्वभावोऽप्यर्थं इन्द्रियप्रणालिकया चित्तमुपरञ्जयति तदेवंभूतं चित्तदर्पणसंक्रान्तप्रतिबिम्बा चितिशक्तिश्चित्तधर्मोपरक्तं चेतयमानार्थमनुभवति नत्वर्थं किञ्चित् प्राकाशादिकमाधत्ते नाप्यसंबद्धा चित्तेन, तत् प्रतिबिम्बसंक्रान्तेरुक्तत्वादिति। यद्यपि च सर्वमतत्वाच्चित्तस्य चेन्द्रियस्य चाहङ्कारिकस्य विषये नास्ति सम्बन्धः तथापि यत्र शरीरे दत्तिमच्चित्तं तेन सह सम्बन्धो विषयाणामित्ययस्कान्तमणिकल्प इत्युक्तम् अयःसधर्मकं चित्तमिति। इन्द्रियप्रणालिकयाभिसंबध्योपरञ्जयन्ति अतएव चित्तं परिणामीत्याह वस्तुन इति" विव०।

"अस्तु तदेव चित्तं विषयस्तस्य सदाऽपरिणामित्वात्" भा०।

"सदा ज्ञाताश्चित्तवृत्तयस्तत्प्रभोः पुरुषस्यापरिणामित्वात्" सू०।

"यदि चित्तवत् प्रभुरपि पुरुषः परिणमेत् ततस्तद्विषया चित्तवृत्तयः शब्दादिविषयवत् ज्ञाताज्ञाताः स्युः सदा ज्ञातास्तु मनसस्तत्प्रभोः पुरुषस्यापरिणामित्वमनुमापयति" भा०।

"तदेवं चित्तव्यतिरेकेणार्थमवस्थाप्य तेभ्यः परिणतिधर्मकेभ्यो व्यतिरिक्तमात्मानमादर्शयितुं तद्धर्म्मानपरिणामित्वमस्य वक्तुं प्रपञ्चयित्वा सूत्रं पठति "यस्तु तदेव चित्तं विषयस्तस्य सदाऽपरिणामित्वात्"। चिन्मूर्त्तिश्चिन्मात्रैकाग्रतावस्थितं चित्तमादिरोधात् सर्वदा पुरुषेणानुभूयते दृत्तिमत् तत् कस्य हेतोः ? यतः पुरुषोऽपरिणामी परिणामित्वे चित्तवत् पुरुषोऽपि ज्ञाताज्ञातविषयो भवेत्। ज्ञातविषय एव त्वयं तस्मादपरिणामी ततश्च परिणामिभ्योऽतिरिच्यते इति तदेतदाह यदि चित्तवदिति। सदा ज्ञातत्वं तु मनसः सदावृत्तिकस्य तस्य यः प्रभुः स्वामी भोक्तेति यावत् तस्य प्रभोः पुरुषस्यापरिणामित्वमनुमापयति तथाचापरिणामिनस्तस्य परिणामिनश्चित्तात् पुरुषस्य भेद इति भावः" विव०।

"स्यादयञ्चाचित्तमेव स्वाभासं विषयाभासञ्च वैभेविकाद्यां चित्तात्मवादिनाञ्च भविष्यत्यग्निवत्" भा०।

"न तत्स्वाभासं दृश्यत्वात्" सू०।

"यथेतराणीन्द्रियाणि शब्दादयश्च दृश्यत्वान्न स्वाभासानि तथा मनोऽपि प्रत्येतव्यम्। न चाग्निरत्र दृष्टान्तः नह्यग्निरात्मरूपमप्रकाशं प्रकाशयति। प्रकाश्यार्थं प्रकाश्यप्रकाशकसंयोगे दृष्टः न च स्वरूपमात्रेऽस्ति संयोगः किन्तु स्वाभासं चित्तमित्यप्याह्यमेव कस्यचिदिति ग्रन्थार्थः। तदुक्तं स्वात्मप्रतिरूपमाकाशमित्यप्रतिरूपित्वर्थः स्वबुद्धिप्रचारप्रतिसंवेदनात् सत्त्वानां प्रवृत्तिर्दृश्यते। प्रकुतोऽहमीतोऽहमत्र मे रागोऽत्र मे क्रोध इत्येतत् स्वबुद्धेरन्यत्रे न युक्तमिति" भा०।

"अत्र वैनाशिकस्तत्यापयति स्यादयञ्चेति अयमर्थः स्यादेतदेवं यदि चित्तमात्मनो विषयः स्यात् अपि तु स्वप्रकाशने तत् विषयाभासं पूर्वचित्तं प्रतीत्य सदुत्पन्नं सत्कृतः पुरुषस्य सदा ज्ञानविषयत्वं कृतस्मरं वाऽपरिणामतया परिणामिनश्चित्ताद्भेद इति भवेदेतदेवं यदि स्वसंवेदनं चित्तं स्यात्यत्वेतदस्ति तद्धि परिणामितया नीलादिवदनुभवस्यायम्। यच्चानुभव-

ख्याप्यं न तत् स्वाभासं भवितुमर्हति स्वात्मनि क्रियाविरोधात् नहि तदेव क्रिया च कर्म च कारकञ्च न हि पाकः पच्यते क्रिदा वा क्रिद्यते पुरुषस्त्वपरिणामी नानुभवकर्मेति नास्मिन् स्वयंप्रकाशता न युज्यते अपराधीनप्रकाशता च स्वयंप्रकाशता नानुभवकर्मता तस्मात् दृश्यत्वात् दर्शनकर्म चित्तं न स्वाभासम् आत्मप्रकाशप्रतिविम्बितस्यैव चित्तस्य तावद्वृत्तिविषयाः प्रकाशन्त इति भावः। ननु दृश्योऽग्निः स्वं प्रकाशव न हि यथा घटादयोऽग्निना व्यङ्ग्यन्ते एवमग्निरन्यनरेणेत्यत आह। तथाग्निरनेति कस्मात्? न हीति मा भाग्निरन्यनरात् प्रकाशिष्ट विज्ञानात् तु प्रकाशत इति न स्वं प्रकाशत इति न व्यभिचार इत्यर्थः। प्रकाशाद्व्यवच्छिनत्ति। क्रियाकृप्तः प्रकाश इति यावत् एतदुक्तं भवति या या क्रिया सा सा सर्वा स्वर्टकरणकर्मसम्बन्धेन दृष्टा यथा पाको दृष्टस्तैलाग्नितण्डुलसम्बन्धेन तथा प्रकाशोऽपि क्रियेति तयापि तया भवितव्यं सम्बन्धश्च भेदाश्रयो नाभेदे सम्भवति इत्यर्थः। किञ्च स्वाभासं चित्तमित्यप्याहुरेव कस्यचिदिति शब्दार्थः। स्यादेतत् मा भूत् स्वार्थं चित्तं न हि यङ्कृष्णस्य कारणस्याव्यापकस्य च निवृत्तौ चित्तनिवृत्तिः इत्यत आह स्वबुद्धीति बुद्धिश्चित्तं प्रचारा व्यापाराः सत्वाः प्राणिनश्चित्तस्य वृत्तिभेदाः क्रोधलोभादयः स्वार्थेषु च सह प्रत्यात्मसनुभूयमानाश्चित्तस्याप्याहुतां विघटयन्तीत्यर्थः। स्वबुद्धिप्रचारप्रतिसंवेदनमेव विशदयति क्रुद्धोऽहमिति" विवरणम्।

"एकसमये च भयानवधारणम्" ।सू०।

"न चैकस्मिन् क्षणे स्वपररूपावधारणं युक्तं चक्षुरादिनां यद् भवनं सैव क्रिया तदेव च कारकमित्यक्षुण्णमः"। भा०।

"स्वाभासं विषयाभासं चित्तमिति ब्रुवाणो न तावत् वेनैव व्यापरेणात्मानमवधारयति तेनैव विषयमपीति वक्तुमर्हति नह्यविलक्षणो व्यापारः कार्यभेदाय कल्पते, तस्माद्व्यापारभेदोऽङ्गीकर्त्तव्यः न च वैनाशिकानामुत्पत्तिभेदादिरिक्तः कश्चिद् व्यापारः न चैकस्मादेवोत्पत्तेरविलक्षणायाः कार्यवैलक्षण्यसम्भवः तस्माच्चक्षुरादित्वप्रसङ्गात्। न चैकस्योत्पत्तिद्वयसम्भवः तस्माद्दर्शनस्य च ज्ञानरूपस्य चावधारणं नैकस्मिन् समये इति तदेतद्भाष्ये नोच्यते न चैकस्मिन् क्षणे इति तथाचोक्तं वैनाशिकैः "भूतिर्यैषा क्रिया सैव कारकं सैव चोच्यते" इति तस्माद्दृश्यत्वमेतच्चित्तस्य सदातनं स्वाभासत्वमुपनयत् द्रष्टारञ्च द्रष्टुरपरिणामित्वं च दर्शयतीति सिद्धम्" विवरणम्।

"चित्तान्तरे दृश्ये बुद्धिबुद्धेरतिप्रसङ्गः स्मृतिसङ्करश्च" सू०।

"स्मान्नतिः स्मरसनिरुद्धं चित्तं चित्तान्तरेण समनन्तरेण स्पृश्यत" इति। अथ चित्तं चेच्चित्तान्तरेण स्पृश्येत बुद्धिः केन स्पृश्यते साध्यन्तया साध्यन्तयेत्यतिप्रसङ्गः स्मृतिसङ्करश्च यावन्तोबुद्धिवृत्तीनामनुभवास्तावन्तः स्मृतयः प्राप्नुवन्ति तत्सङ्करात्तेऽस्मरत्वनवधारणञ्च स्यादित्येवं बुद्धिप्रतिसंवेदिनं पुरुषमपश्यद्भिः वैनाशिकैः सर्वमेवाकृष्टीकृतं, ते तु भोक्तृस्वरूपं यत्र कुत्रचन कल्पयन्तो न न्यायेन संगच्छन्ते। केचित् सत्यमालम्बमपि परिकल्पयन्ति स सत्वो य एतान् स्कन्धान् निक्षिप्यान्यांश्च प्रतिसन्दधातीत्युक्ता ततएव पुनस्स्कन्धान् तथा स्कन्धानां पुनर्निर्वेदाय विरागायानुत्पादाय प्रशान्तये गुरोरन्तिके ब्रह्मचर्यं चरित्वाक्षीणत्वं उक्ता सत्वस्य पुनः सत्त्वमेवापद्यते "साङ्ख्ययोगादयस्तु प्रवादाः स्वयन्तेन पुरुषमेव स्वामिनं चित्तस्य भोक्तारमुपयन्तीति" भा०।

"पुनर्वैनाशिकमुत्थापयति। स्यान्मतिः मा भूत् दृश्यत्वेन स्वसंवेदनम् एवमप्यात्मा न सिध्यति। स्वसन्तानवर्त्तिना चरमचित्तक्षणेन स्मरसनिरुद्धस्मरणकचित्तक्षणपरामर्शादित्यर्थः। समञ्च तज्ज्ञानत्वेनानन्तरञ्च यत्रवस्थितत्वेन समनन्तरं तेन। चित्तवृत्तयश्च। बुद्धिरिति चित्तमित्यर्थः नास्मरीता चरमा बुद्धिः पूर्वं बुद्धियङ्कृष्णसमर्थां ज्ञानवद्बुद्धा संबद्धा पूर्वां बुद्धिबुद्धा भवितुमर्हति। नह्यस्मरीतदृष्टो दृष्टेनसमगन्तुमर्हति तस्मादनवस्थेति विज्ञानवेदनसंस्कारूपसंस्काराः स्कन्धाः। साङ्ख्ययोगादयः प्रवादाः साङ्ख्याश्च योगाश्च तएवादयो येषां वैशेषिकादिप्रवादानान्ते साङ्ख्ययोगादयः प्रवादाः सुगमन्यत्" विवरणम्।

"कथं ?" भा० "चितेरप्रतिसंक्रमायास्तदाकारापत्तौ स्वबुद्धिसंवेदनम्" सू०।

"अपरिणामिनी हि भोक्तृशक्तिरप्रतिसंक्रमा च परिणामिन्यर्थे प्रतिसंक्रान्तेव तद्वृत्तिमनुपतति तस्माच्च प्राप्तचैतन्योपयङ्कृष्टया बुद्धिवृत्तेरनुकारिणात्मतया बुद्धिवृत्तिविशिष्टा हि ज्ञानवृत्तिराख्यायते तथाचोक्तं "न पाशानं न च विवरं गिरीणां नैवान्धकारं कुहयो नोदधीनाम्। गुहा यस्यां निहितं ब्रह्म शाश्वतं बुद्धिवृत्तिविशिष्टं कवयो वेदयन्ते इति" भा०।

"स्यादेतत् यदि चित्तं न स्वाभासं नापि चित्तान्तरवेद्यं स्वात्मनापि कथं भोक्ष्यते चित्तं? न खल्वात्मन स्वयंप्रकाशस्याप्यस्ति काचित् क्रिया न तामन्तरेण कर्त्ता न चास्यबुद्धिचित्तेन कर्मणा तस्य भोक्ता अतिप्रसङ्गादित्याशयवान् पृच्छति कथमिति। सूत्रे चोत्तरमाह चितेरिति। यत् तदोचत् दृक्तिसारूप्यमितरत्रेति तदितः सप्तम्यन्तचित्तेः स्वबुद्धिसंवेदनं बुद्धेस्तदाकारापत्तौ चितिप्रतिबिम्बाधारतया तद्रूपतापत्तौ सत्यां यथाहि चन्द्रमसः क्रियामन्तरेणापि संक्रान्तचन्द्रप्रतिबिम्बममलं जलमचलं चलमिव चन्द्रमसमवभासयति एवं विनापि चितिव्यापारम् उपसंक्रान्तचितिप्रतिबिम्बं चित्तं स्वगतया क्रियया क्रियावतीमसङ्गतामपि सङ्गतां चितिशक्तिमवभासयत् भोग्यभावमापादयत् भोक्तृभावमापादयति तस्मा इति सूत्रार्थः भाष्यमप्येतदर्थमसङ्गतम् तत्र व्याख्यातम् इति न व्याख्यातमत्र बुद्धिदृश्यविशिष्टत्वे ज्ञानदृश्ये रागमसदाहरति तथाचोक्तं न पातालमिति शाश्वतस्य शिवस्य ब्रह्मणो विशुद्धस्वभावस्य चितिच्छायापन्नां मनोवृत्तिमेव चितिच्छायापन्नत्वाच्चितेरव्यतिरिक्तां गुहां वेदयन्ते तस्यामेव गुहायां तद् गुह्यं ब्रह्म तदवनयितुं स्वंप्रकाश मनापरत्वमनुपसर्गं प्रद्योतते परमदेवस्य भगवत इति तदेवं दृश्यत्वेन चित्तस्य परिणामिन स्वदतिरिक्तः पुमान परिणतिधर्म्मोप्यनुपादितः" विव०।

"अथ चैतदभ्युपगम्यते" भा०।

"दृष्टदृश्योपरक्तं चित्तं सर्वार्थम्" सू०।

"मनोहि मन्तव्येनार्थेनोपरक्तं तत् स्वयञ्च विषयत्वाद्विषयिणा पुरुषेणात्मीयया दृश्यताभिसम्बद्धं तदेतच्चित्तमेव दृष्टदृश्योपरक्तं विषयविषयिनिर्भासं चेतनाचेतनस्वरूपापन्नं विषयात्मकमप्यविषयात्मकमिवाचेतनं चेतनमिव स्फटिकमणिकल्पं सर्वार्थमित्युच्यते। तदनेन चित्तसारूप्येण भ्रान्ताः केचित्तदेव चेतनमित्याहुः अपरे चित्तमात्रमेवेदं सर्वं, नास्ति खल्वयं गवादिघटादिश्च सकारणो लोक इति, अनुकम्पनीयास्ते कस्मात् ? अस्ति हि तेषां भ्रान्तिबीजं सर्वरूपाकारनिर्भासं चित्तमिति समाधिप्रज्ञायां प्रज्ञेयोऽर्थः प्रतिबिम्बीभूतस्वस्वालम्बनीभूतत्वादन्यः स चेदर्थश्चित्तमात्रं स्यात् कथं प्रज्ञयैव प्रज्ञारूपमवधार्येत तस्मात् प्रतिबिम्बीभूतोऽर्थः प्रज्ञायां येनावधार्यते स पुरुष इति एवं यद्गृहीतृग्रहणग्राह्यस्वरूपचित्तभेदात्त्रयमप्येतत्तज्जातितः प्रविभज्यते ते सम्यग्दर्शिनस्तैरधिगतः पुरुषः" वेदव्यासभाष्यम्

"संप्रति लोकप्रत्यक्षमत्र प्रमाणयति। अत चैतदिति अवश्यं चैतदित्यर्थः। दृष्टित्वादि यथा हि नीलाद्युपरक्तं चित्तं नीलाद्यर्थं प्रत्यक्षेणैवावस्थापयति एवं दृष्टृच्छायापत्त्या तदुपरक्तं चित्तं द्रष्टारमपि प्रत्यक्षेणावस्थापयति अस्ति हि ह्याकारं ज्ञानं नीलमहं संजानेमि" इति तस्मात् ज्ञेयवत् ज्ञातापि प्रत्यक्षसिद्धोऽपि न विच्छायस्थापितो यथा जले चन्द्रमसो बिम्बं नत्वेतावता तदप्रत्यक्षं न चास्य जलगतत्वे तदप्रमाणमिति चन्द्ररूपेण प्रमाणं भवितुमर्हति तद्वच्चित्ते प्रतिबिम्बितत्वया चैतन्यगोचरापि चित्तवृत्तिर्न चैतन्यागोचरेति तदिदं सर्वार्थत्वं चित्तस्येति तदेतदाह मनोहीति न केवलः तदाकारापन्नो मन्तव्येनार्थेनोपरक्तं मनः अपितु स्वयं चेति चकारो भिन्नक्रमः पुरुषेणेत्यस्यानन्तरं द्रष्टव्यः तच्छायापत्तिः पुरुषस्य दृष्टिः दृश्यञ्च चैतन्यच्छायापत्तिश्चित्तस्य वैनाशिकैरभ्युपेतव्या कथमन्यथा चित्ते चैतन्यमेते आरोपयाञ्चभूवुरित्याह तदनेनेति केचिद्वैनाशिका बाह्यार्थवादिनः। अपरे विज्ञानमात्रवादिनः। ननु यदि चित्तमेव दृश्याकारं दृश्याकारं चानुभूयते कुत्र चित्तादभिन्नमेव स्व दृष्टृदृश्यौ यथाहुः। "अभिन्नो ऽपि हि बुद्ध्यात्मा विपर्य्यासितदर्शनैः। ग्राह्यग्राहकसंवित्तिभेदवानिव लक्ष्यते" इति तत्कथमेतेऽनुकम्पनीया इत्यत आह। समाधिप्रज्ञायामिति ते खलूक्ताभिरुपपत्तिभिश्चित्तातिरिक्तं पुरुषमभ्युपगमयाञ्चक्रुर्योगोपदेशेन समाधिप्रज्ञायामात्मगोचरायामवतार्य्य बोधयितव्याः। तदुयथा समाधिप्रज्ञायां प्रज्ञेयोऽर्थः आत्मप्रतिबिम्बीभूतोऽन्यः कस्मात् ? तस्यात्मनः आलम्बनीभूतत्वात् अथ चित्तादभिन्नमेव कस्मान्नालम्बनं भवतीति यदि युक्तिबोधितापि वैजात्याद्वेत् तत्र हेतुमाह स चेदात्मरूपोऽर्थः चित्तमात्रं स्यात् न तु ततो व्यतिरिक्तः ततः कथं प्रज्ञयैव प्रज्ञारूपमवधार्येत स्वात्मनि क्रियाविरोधात्। उपसंहरति तस्मादिति। समीचीनोपदेशेनानुकम्पिता भवन्तीति आह। एवमेतदिति जातितः स्वभावतः इत्यर्थः" वि०।

"इतश्चैतत्—तदसङ्ख्येयवासनाभिश्चित्रमपि परार्थं संहत्यकारित्वात्" सू०।

"तदेतच्चित्तमसङ्ख्येयाभिर्वासनाभिरेव चित्रीकृतमपि परार्थं परस्य भोगापवर्गार्थं न स्वार्थं संहत्यकारित्वाद्-

दृष्टवत् संकल्पकारित्वा चित्तेन न स्वार्थेन भवितव्यं न सुखचित्तं सुखार्थं न ज्ञानं ज्ञानार्थमभवन्मोक्षे तत् परार्थं सत्त्व भोगेनापवर्गेण चार्थेनार्थवान् पुरुषः स एव परो, न परः सामान्यमात्रम् यत्तु किञ्चित्परं सामान्यमात्रं स्वरूपेणोदाहरेदैनायिकस्तत् सर्वं संकल्पकारित्वात् परार्थमेव स्यात्। यस्मात्तौ परोविशेषः स न संकल्पकारी पुरुष इति" भा०।

"चित्तातिरिक्तात्मसद्भावे हेत्वन्तरमपतारयति इतश्चेति। यद्यपसङ्गेवाः कर्मवासनाः सुखवासनाश्च चित्तमेवाधिशेरते न तु पुरुषं, तथाच वासनाधीना विपाकाश्चित्तमाश्रयतया चित्तस्य भोक्तृतामावहन्ति। भोक्तुरर्थे च भोग्यमिति सर्वं चित्तार्थं प्राप्तं तथापि तच्चित्तमसङ्ख्येयवासनाविचित्रमपि परार्थं, कस्मात्? संकल्पकारित्वादिति स्वार्थः। व्याचष्टे तदेदिति। स्यादेतच्चित्तं संकल्पापि करिष्यति स्वार्थञ्च भविष्यति कः खलु विरोध इति यदि कश्चित् ब्रूयात् तं प्रत्याह। संकल्पकारित्वेति सुखचित्तमिति भोगमुपलक्षयति तेन दुःखचित्तमपि द्रष्टव्यं ज्ञानमित्यपवर्गं वक्ष्यः। एतदुक्तं भवति सुखदुःखचित्ते प्रतिकूलानुकूलात्मके नात्मनि सम्भवतः स्वात्मनि वृत्तिविरोधात् न चान्योऽपि संकल्पकारी साक्षात् परम्परया वा सुखदुःखे विदधानस्तात्पर्यमनुकूलनीयः प्रतिकूलनीयो वा तस्मादयं साक्षात् परम्परया वा न सुखदुःखयोर्व्याप्रियते स एवायमनुकूलनीयः प्रतिकूलनीयो वा, स च नित्योदासीनः पुरुषः एवमवगच्छते येन ज्ञानेन तस्मात्र श्वेतनत्वात् स्वात्मनि च वृत्तिविरोधाच्च ज्ञानार्थत्वं न चान्यविषयादस्मादपवर्गसम्भवो विदेहप्रकृतिलयानामपवर्गासम्भवात् तस्मात्तज्ज्ञानमपि पुरुषार्थमेव न तत् स्वार्थं संहतपरार्थत्वे चानवस्थाप्रसङ्गात्संहतपरार्थसिद्धिरिति" विव०।

"विशेषदर्शिनस्तात्मभावभावनानिवृत्तिः" सू०।

"यथा प्राङ्मि दृष्टादृष्टहेतुरूपोद्भेदेन तद्बीजसत्तानुभीयते तथा मोक्षभागीयत्वेन यस्य रोमहर्षाश्रुपातौ दृश्येते तस्यापि विशेषदर्शनबीजमपवर्गभागीयं कर्माभिनिर्वर्तितमित्यनुमीयते तस्मात्तत्त्वभावभावना स्वाभाविकी प्रवर्त्तते यस्माभावादिदमुक्तं स्वभावसङ्गा दोषादु येषां पूर्वपक्षे रुचिर्भवत्यरुचिश्च निर्णये भवति। तत्तात्मभावभावना कोऽहमासं कथमहमासं किं स्विदिदं? कथं? स्विदिदं के भविष्यामः कथं भविष्यामः? इति। सा तु विशेषदर्शिनो निवर्त्तते कुतः चित्तस्यैवैष विचित्रः परिणामः पुरुषस्तत्त्वाभविद्यावां शुद्धचित्तधर्मैरपरामृष्ट इति ततोऽप्यात्मभावभावना कुशलस्य निवर्त्तत इति" भा०।

"तदेवं कैवल्यमूलबीजममलमात्मदर्शनसङ्गा तदुपदेशाधिकृतं पुरुषमनधिकृतपुरुषान्तराद्व्याख्याप्तमाह। विशेषेत्यादि यस्मात्तमावे भावनापि तस्माष्टाङ्गयोगोपदेशाद्यतस्ततो युञ्जानस्य तत्परिपाकात् चित्तसत्वपुरुषयोर्विशेषदर्शनादात्मभावभावना निवर्त्तते। यस्मात्तमावभावनैव नास्ति नास्तिकस्य, तस्योपदेशानधिकृतस्यापरिनिश्चितात्मतत्परलोकभावस्य नोपदेशो न विशेषदर्शनं नात्मभावभावनानिवृत्तिरिति स्वार्थः नन्वात्मभावभावनायाः चित्तवृत्तित्वात्। कुतोऽवगमः? इत्यत आह यथा प्राङ्मीति प्राग्भवीयं तत्त्वदर्शनबीजमपवर्गभागीयं यत्कर्माष्टाङ्गयोगानुष्ठानं तदेकदेशानुष्ठानं वा तदभिनिर्वर्त्तितमस्तीत्यनुमीयते तस्य चात्मभावभावनाऽवश्यमेव स्वाभाविकी वस्त्वभ्यासं विनापि प्रवर्त्तते अनधिकारिणमाश्रित्य वचनेन दर्शयति यस्माभावादिदमिति पूर्वपक्षो नास्ति कर्मफलं, परलोकिनोऽभावात् परलोकाभाव इति तत्र रुचिः, अरुचिश्च निर्णये पञ्चविंशतितत्त्वविषये। आत्मभावभावना प्राग्व्याख्याता। विशेषदर्शिनः परामर्शमाह चित्तस्यैवेति तस्य विशेषदर्शनकुशलस्यात्मभावभावना विनिवर्त्तते इति" विवरणम्।

चित्तस्य च बाह्येन्द्रियव्यापारं विना बाह्यार्थेषु सामर्थ्यं, सुखभेदेन विकारभेदाच्च पञ्चदशप्रकारता यथा "मनोदशेन्द्रियाध्यक्षं कृत्पञ्चप्रयोजकं स्मृतम्। तच्चान्तःकरणं बाह्येष्वस्वातन्त्र्याद्विनेन्द्रियैः। अक्षेष्वर्पितेष्वेतद्गुणदोषविचारजम्। सत्त्वं रजस्तमश्चास्य गुणा विक्रियते हि तैः। वैराग्यं शान्तिरौदार्यं मित्राद्याः सत्त्वसम्भवाः। कामक्रोधौ लोभमदाविर्ष्याद्या रजसोत्थिताः। आलस्यभ्रान्तितन्द्राद्या विकारास्तमसोत्थिताः। सात्विकैः पुण्यनिष्पत्तिः पापोत्पत्तिश्च राजसैः। तामसैर्नोभयं किन्तु द्वयायुःक्षपणं भवेत्"। पातञ्जलमते तस्य दृश्यस्य पञ्चविधाख्यातिं स्वरूपादिकं समाधिपादे स्वत्रभाष्य विवरणादौ दर्शितं तच्च लिष्टाशब्दे २२४४ पृ० दर्शितम्

**चित्तज** पु० चित्ते जायते जन-ड। मनोभवे कामदेवे चित्तजन्मनृचित्तयोनिप्रभृतयोऽत्र "चित्तयोनिरभवत् पुनर्भवः" रघुः।

चित्तज्ञ त्रि० चित्तं चित्तवृत्तिं जानाति ज्ञा–क। आशयाभिज्ञे। "कलाकौशलसत्साङ्गो भक्तिचित्तज्ञता कृता" सा० द०। [न्यूनत्वे दोषे।

चित्तदोष पु० ६त०। चित्तस्य विषयाप्रवणत्वासामर्थ्यरूपे

चित्तनदी स्त्री चित्तवृत्तिरूपा नदी। पुण्यपापरूपोभय स्रोतोवाहिन्याम् चित्तवृत्तौ तत्र "विवेकनिम्ना कैवल्य प्राग्भारा पुण्यवाहिनी। अविवेकनिम्ना संसार-प्राग्भारा पापवाहिनी" इति भेदः।

चित्तपरिकर्म्मन् न० ६त०। पातञ्जलोक्ते चित्तप्रसादनाख्ये मैत्र्यादिभावनाभेदे चित्तप्रसादनशब्दे दृश्यम्

चित्तप्रसन्नता स्त्री ६त०। हर्षे हेम०।

चित्तप्रसादन न० चित्तस्य प्रसादनं प्रसन्नताकरणम्। पातञ्जलोक्ते चित्तप्रसन्नतासम्पादके मैत्र्यादिभावनाजन्ये चित्तसंस्कारभेदे मैत्र्यादिभावनानां च तथात्वं पात० सूत्रभाष्यादावुक्तं यथा

"यस्य चित्तस्यावस्थितस्येदं शास्त्रेण परिकर्म निर्दिश्यते, तत्कथं ?— भा०

"मैत्रीकरुणामुदितोपेक्षाणां सुखदुःखपुण्यापुण्यविषयाणां भावनातश्चित्तप्रसादनम्" सू०।

"तत्र सर्व्वप्राणिषु सुखसम्भोगापन्नेषु मैत्रीं भावयेत्, दुःखितेषु करुणाम्, पुण्यात्मकेषु मुदिताम्। अपुण्यशीलेषूपेक्षाम्।—एवमस्य भावयतः शुक्लोधर्म्मउपजायते—ततश्चित्तं प्रसीदति प्रसन्नमेकाग्र्यं स्थितिपदं लभते" भा०। "अपरिकर्म्भितमनसोऽस्यादिमतः समाधितदुपायसम्पत्त्युत्पादात् चित्तप्रसादनोपायानस्यादिविरोधिनः प्रतिपादयितुमुपक्रमते यस्य चित्तस्यावस्थितस्येदमिति। मैत्रीकरुणेत्यादि प्रसादनानस्य। सुखितेषु मैत्री सौख्यार्हं भावयत ईर्ष्याकालुष्यं निवर्त्तते चित्तस्य। दुःखितेषु च करुणामात्मनीव परस्मिन् दुःखप्रहाणेच्छां भावयतः परापकारचिकीर्षाकालुष्यं चेतसोनिवर्त्तते। पुण्यशीलेषु प्राणिषु मुदितां हर्षं भावयतः असूयाकालुष्यं चेतसो निवर्त्तते। अपुण्यशीलेषु चोपेक्षां माध्यस्थ्यं भावयतोऽमर्षकालुष्यं चेतसोनिवर्त्तते। ततश्चास्य राजसतामसधर्म्मनिवृत्तौ सात्विकः शुक्लोधर्म उपजायते। ततोत्कर्षसमन्वितः समभवति। इति निरोधपक्षे तस्य प्रसादस्याभाव्याच्चित्तं प्रसीदति प्रसन्नञ्च पञ्चमाद्येभ्य उपायेभ्यः एकाग्र्यं स्थितिपदं लभते। अस्तां तुनैत्र्यादिभावनायां न ते उपायाः स्थैर्यं कल्पन्ते" विव०।

करणे ल्युट् ङीप्। चित्तप्रसादनी मैत्र्यादिभावनायाम्। "तत् पृथिवु चित्तप्रसादनीयतो मैत्र्यादि भावनाः" वीरच०। [दयोऽप्यत्र।

चित्तभू पु० चित्ते भवति भू–क्विप् ७त०। कामे चित्तभवा-

चित्तभूमि स्त्री चित्तस्य भूमिरवस्था। पातञ्जलप्रसिद्धे चित्तस्यावस्थाभेदे तद्भूमयश्च नानाविधाः तत्र चित्तशब्दे दर्शिता क्षिप्तमूढविक्षिप्तैकाग्र्यनिरुद्धाः। मधुमत्य ज्योतिष्मती विशोका संस्कारशेषा च समाधिभूमयस्तान्यासाद्यचित्तविक्षेपशब्दे वक्ष्यन्ते च दृश्याः। साधनपादे च सूत्रभाष्यादौ सप्तान्या अप्युक्ताः यथा "सप्तधा प्रान्तभूमिः प्रज्ञा" सू०।

"तस्येति। प्रत्युदितख्यातेः प्रत्यस्तमयः सप्तधेति अयुक्तप्रत्ययलोपागमाच्चित्तस्य प्रत्ययान्तरानुत्पादे सति सप्तप्रकारैव प्रज्ञा विवेकिनो भवति। तद् यथा परिज्ञातं हेयं, नास्य पुनः परिज्ञेयमस्ति क्षीणा हेयहेतवो न पुनरेतेषु क्षेतव्यमस्ति, साक्षात्कृतं निरोधसमाधिना ज्ञानम्। भावितो विवेकख्यातिरूपोहानोपायस्तस्य चतस्रश्च कार्य्यविप्लुतिः प्रज्ञायाः। चित्तविप्लुतिस्तु त्रयी चरिताधिकारा बुद्धियुक्ता गिरिशिखरकूटच्युतादव पाषाणोनिरवस्थानाः स्वकारणे प्रलयमिच्छन्ताः सह तेनास्तं गच्छन्ति। न चैषां विलीनानां पुनरुत्पत्तेः प्रयोजनाभावादिति एतस्मादवस्थायां गुणसम्बन्धातीतस्वरूपमात्रज्योतिरमलः केवली पुरुष इत्येतां सप्तविधं प्रान्तभूमिप्रज्ञामनुपश्यन् पुरुषः कुशलइत्याख्यायते पतितप्रसवेऽपि चित्तस्य तस्माः कुशल इत्येव भवति गुणातीतत्वादिति स्थिता भवति विवेकख्यातिर्हानोपायः इति" भा०। "विवेकख्यातिनिष्ठायाः स्वरूपमाह सूत्रेण तस्येत्यादि। व्याचष्टे तस्येति प्रत्युदितख्यातेर्वैशारद्यनिष्ठस्य प्रत्याम्नायः परामर्शः अयमित्येवापरं चित्तसत्त्वस्य तदेव भक्तं तस्यापगमात् चित्तस्य प्रत्ययान्तरानुत्पादे तामसराजसव्युत्थानप्रत्ययानुत्पादे निर्विप्लवविवेकख्यातिनिष्ठामापन्नस्य सप्तप्रकारैव प्रज्ञा विवेकिनो भवति विषयभेदात् प्रज्ञाभेदः। पक्वक्लेशो यासां भूमीनामवस्थानां तास्तयोक्ता यतः परं नास्ति संप्रकर्षः प्राप्ता भूमयः यस्याः प्रज्ञाया विवेकख्यातेः सा तथोक्ता ता एव सप्त प्रकाराः प्रज्ञाभूमीरुदाहरति तदुक्तेति। तत्र पुरुषप्रयत्ननिष्पाद्यासु चतसृषु भूमिषु प्रथमामुदाहरति परिज्ञातं हेयं यावत् किल प्राधानिकं तत्कार्य्यं परिज्ञानतापसं-

स्कारैर्गुणवृत्तिविरोधात् दुःखमेवेति, क्षेयं तत्परिज्ञातम्। प्रान्तां दर्शयति नास्य पुनः किञ्चिदपरिज्ञेयमस्ति। द्वितीयामाह हीना इति। प्रान्ततामाह न पुनरिति। तृतीयामाह सात्यन्तिकं पुरुषस्येव निरतं यथा संप्रज्ञातावस्थायामेव निरोधसमाधिसाध्यं ज्ञानं न पुनरस्मात् परं निर्वेतव्यमस्तीति शेषः। चतुर्थीमाह भावितो निष्पादितः विवेकख्यातिरूपोहानोपायः, नास्याः परं भावनीयमस्ति इति शेषः। एषा चतुष्टयी कार्यावसक्तिः, समाप्तिकार्यतया प्रयत्ननिष्पाद्या दर्शिता। क्वचित् पाठः कार्यविसक्तिरिति कार्यान्तरेषु विसक्तिः पृक्तया इत्यर्थः। प्रयत्ननिष्पाद्यात्तस्मात् तदनिष्पादनीयामप्रयत्नसाध्यां चित्तविसक्तिमाह चित्तविसक्तिस्तु त्रयी इति। प्रथमामाह चरिताधिकारा बुद्धिजतभोगापवर्गकार्येत्यर्थः। द्वितीयामाह गुणादिति प्रान्ततामाह न चेयमिति। तृतीयामाह एतस्यामवस्थायामिति एतस्यामवस्थायां जीवन्नेव पुरुषः कृतकृत्योऽस्त इत्युच्यते चरमदेहत्वादित्याह एतमिति। अनौपचारिकं मुक्तमाह प्रतिपुरुषे प्रधानत्वेऽपि चित्तस्य मुक्तः कृतश्च इत्येव भवति गुणानीतत्वादिति" विवरणम्। चित्तमेव भूमिः क्षेत्रम्। २चित्तरूपक्षेत्रे तस्मिंश्च मैत्रीकरुणादिरूपैः संस्कारैः संस्कृते समाधिलाभः इति योगाशास्त्रे प्रसिद्धम्।

**चित्तविक्षेप** पु० ६त०। पात० स्वभावाद्यात्मकेषु योगान्तरायभूतेषु व्याध्यादिषु नवसु। ते च यथा "व्याधिस्त्यानसंशयप्रमादालस्याऽविरतिभ्रान्तिदर्शनाऽलब्धभूमिकत्वाऽनवस्थितत्वानि चित्तविक्षेपास्तेऽन्तरायाः" सू०। "अथ केऽन्तरायाः? ये चित्तस्य विक्षेपकाः के पुनस्ते? कियन्तोवेति? भवन्ति नवान्तरायाश्चित्तविक्षेपाः सहैते चित्तवृत्तिभिः, सतीष्वमीषु न भवन्ति पूर्वोक्ताश्चित्तवृत्तयः। व्याधिर्धातुरसकरणवैषम्यम्। स्त्यानम् अकर्मण्यता चित्तस्य। संशयः उभयकोटिस्पृग्विज्ञानं स्यादिदमेवं, नैवं स्यादिति। प्रमादः समाधिसाधनानामभावनम्। आलस्यं—कायस्य चित्तस्य च गुरुत्वादप्रवृत्तिः। अविरतिः—चित्तस्य विषयसंप्रयोगात्मा गर्द्धः। भ्रान्तिदर्शनं विपर्ययज्ञानम्। अलब्धभूमिकत्वं समाधिभूमेरलाभः। अनवस्थितत्वं—प्राप्तायां भूमौ चित्तस्याप्रतिष्ठा। समाधिप्रतिलम्भे हि सति तदवस्थितं स्यादिति सते चित्तविक्षेपाः नव योगमला योगप्रतिपक्षा योगान्तराया इत्यभिधीयन्ते" भरतविवेदव्याख्य भाष्यम्। "पृच्छति—अथ के इति। सामान्योत्तरं—ये इति। विशेषसंख्यं पृच्छति—के इति। उत्तरं—व्याधीत्यादिसूत्रम्। अन्तरायाः नव, एतानिचित्तसत्त्वयोर्योगान्तरायाः = योगविरोधिनश्चित्तस्य विक्षेपकाः। चित्तं चैतेभ्यो व्याध्यादयोयोगाद्विक्षिपन्ति अपनयन्तीति विक्षेपाः। योगप्रतिपक्षत्वे हेतुमाह,—सहैत इति। संशयस्यानिदर्शने तावद्वृत्तितया वृत्तिनिरोधप्रतिपक्षौ, नेऽपि न वृत्तयोव्याधिप्रभृतयस्तेऽपि वृत्तिसाहचर्य्यात्तत्प्रतिपक्षा इत्यर्थः। पदार्थान् व्याचष्टे,—व्याधिरिति। धातवोवातपित्तश्लेष्माणः शरीरधारणात्, तेषां तनूकरणोपचयविषमसमीकरणपरिणामविशेषोरसः करणानीन्द्रियाणि तेषां वैषम्यं न्यूनाधिकभावः। अकर्मण्यता कर्मानर्हता। संशय उभयकोटिस्पृग्विज्ञानं सत्यपत्रूपप्रतिष्ठत्वेन संशयविपर्ययोरभेदे उभयकोटिस्पर्शित्वरूपाऽवान्तरविशेषविवक्षयात्र भेदेनोपन्यासः। अभावनमकरणं तत्साधनप्रयत्न इति यावत्। कायस्य गुरुत्वं कफादिना, चित्तस्य गुरुत्वं तमसा। गर्द्धः तृष्णा। मधुमत्यादयः समाधिभूमयः, लब्धभूमेर्यदि तावतैव कृतकृत्यमन्यस्य समाधिर्भवेत्तस्मात्तस्या अपि भूमेरपायः स्यात्। यस्मात् समाधिप्रतिलम्भे तदवस्थितं स्यात्तस्मात्तत्र प्रयतितव्यमिति" विवरणम्।

**चित्तविद्** पु० चित्तमात्मत्वेन वेत्ति विद्-क्विप्। बौद्धभेदे। आशयाभिज्ञे त्रि० [उन्मादरोगे हेमच०।

**चित्तविप्लव** पु० चित्तस्य विप्लवोऽनवस्थानं यस्मात् ५व०।

**चित्तविभ्रम** पु० चित्तस्य विभ्रमो विशेषेण भ्रमणमनवस्थानं यस्मात् ५व०। उन्मादरोगे अमरः। "अहोचित्तविकारोऽयं श्रद्धा मे चित्तविभ्रमः" भा० स्त्री० २अ०

**चित्तल** पुंक्ली चित्ते लाति मनोहरत्वात् ला-क। खगभेदे। "अस्थितितिलोद्भवतैलविपक्वं लवणयुतं नवशिक्रुरसाप्लुतम्। त्रिकटुकयुक्तनिशार्द्रकमिश्रं वहुगुणचित्तल मांसमनर्घम्। रसे पाके च मधुरं रक्तपित्तविनाशनम्" शब्दार्थचि० धृतवाक्यम्।

**चित्तवृत्ति** स्त्री ६त०। चित्तस्य विषयाकारपरिणामभेदे "योगश्चित्तवृत्तिनिरोधः" पा०। तद्भेदाश्च पञ्चधा क्लिष्टाशब्दे १२४४पृ० उक्ताः।

**चित्तसमुन्नति** स्त्री सम्+उद् नम-क्तिन् ६त०। १चित्तस्य सम्यगुन्नमने तद्धेतौ २गर्वे अमरः।

चित्तहारिन् त्रि॰चित्तं हरति हृ-णिनि। मनोहरे स्त्रियां ङीप् अत्। चित्तहार ष्यञ्। चित्तहारक तत्रार्थे ताच्छील्ये ट। चित्तहर मनोहरयशीले त्रि॰ स्त्रियां ङीप्। [एकविषये स्थिरचित्ततायाम् अमरः।

चित्ताभोग पु॰ सम्यग् भोग आभोग एकविषयता ६त॰।

चित्ति स्त्री चित-क्तिन् ज्ञाने भावे क्तिन्। १प्रज्ञायाम् "उदु त्या विश्वे देवा अग्ने! भवन्तु चित्तिभिः" यजु॰ १२२। २चिन्तने च "चित्तिं जुहोमि मनसा घृतेन" १७।७८। "चितिं चिन्तनम्" वेददी॰। ३कर्म्मणि। "सा चितिर्भिन्नविकार, इति ऋचमधिकृत्य "चितिभिः कर्म्मभिः" निरु॰ उक्तम् कर्त्तरि क्विप्। ४ज्ञापयितरि ५ज्ञापके च त्रि॰ "चित्तिरपां दधे विश्वायुः" ऋ॰ १।६७।५। "चित्तिश्चेतयिता ज्ञापयिता वा" भा॰। भावे क्तिन्। ६ख्यातौ स्त्री। "चितिं दक्षस्य सुभगत्वमग्ने" ऋ॰ २। २१।६। चितिं ख्यातिम् भा॰। [क्षेमच॰।

चित्तोन्नति स्त्री ६त॰। १चित्तस्योन्नतौ तद्धेतुत्वात् २गर्व्वे

चित्पति पु॰ ६त॰। चितः ज्ञानस्य पतिः। मनोभिमानिनि जीवे। अस्य "न भूवाक्चिदित्यादि" पा॰ न पूर्वपद प्रकृतिस्वरः। "चित्पतिर्मा पुनातु" यजु॰ ४।४।

चित्य न॰ चि-क्यप्। १चितायां यवदाहचूल्याम् त्रिका॰ स्तोत्रं तत्रार्थे अमरः। २चयनीये त्रि॰। भावे क्यप्। ३चयने स्त्री

चित्र चर्चिके-लेखे चञ्चुते च चट॰ चु॰ उभ॰ सक॰ सेट्। चित्रयति ते अचिचित्रत् त। चित्रितः चित्रः।

चित्र न॰ चित्र-भावे अच् चि-ष्ट्रन् वा। १तिलके। २आलेख्ये ३अद्भुते ४कर्व्बुरवर्णे ५तद्युक्ते त्रि॰ मेदि॰। ६आकाशे ७कुष्ठभेदे हेम॰। ८यमभेदे पु॰ "इकोदराय चित्राय" यमतर्पणमन्त्रः। ९एरण्डवृक्षे १०अशोकवृक्षे ११चित्रकवृक्षे राजनि॰ १२चित्रगुप्ते चित्रगुप्तशब्दे दृश्यम् १३शब्दालङ्कारभेदे न॰ अलङ्कारशब्दे २६॰पृ॰ दृश्यम्। "चित्रसंज्ञमीरितं प्रभाधिकापदद्वयम्" ह॰ र॰ उक्ते १५शोड़शाक्षरपादके छन्दोभेदे। "निधर्मचित्रोच्चल-कुक्षपक्षका" "चित्रं चकार यदमर्द्दपुलावितेन" "रुचिरचित्रतनूरुहमालिभिः" इति च माघः।

चित्रक न॰ चित्रमिव कायति कै-क चित्र-स्वार्थे क वा। १तिलके मेदि॰ चित्रेण कायति कै-क। २व्याघ्रे ३व्याघ्र-भेदे (चितावाघ)। पुंस्त्री क्षेमच॰ स्त्रियां जातित्वात् ङीप्। (चिरात)ख्याते ४ओषधिभेदे पु॰ "चित्रकः कटुकः पाके वह्निकृत् पाचनो लघुः। रूक्षोष्णो यकृत्प्लीहगुल्मार्शःकृमिकासजित्। वातश्लेष्महरो प्राही वातार्शः-श्लेष्मपित्तकृत्। चित्रितं चैत्रकं शाकं कासमर्हितमर्हितम्। तन्नतैले सवाह्लीके पाचितं तक्रसंस्कृतम्" भावप्र॰ तद्गुणादि। चित्र-कन् वा। ५चित्रवरे त्रि॰ ६शूरे ७अङ्गानाञ्च शब्दार्थचि॰ ८एरण्डवृक्षे पु॰ अमरः।

चित्रकण्ठ पु॰चित्रः कण्ठोऽस्य। १पारावते २तद्भेदे वनकपोते च (घुघु)। जटाधरः। स्त्रियां जातित्वात् ङीप्।

चित्रकगुटिका स्त्री चक्रदत्तोक्ते गुटिकाभेदे यथा "चित्रकः पिप्पलीमूलं द्वौ क्षारौ लवणानि च। व्योष-क्षिड्म्बजमोदाश्च चव्यञ्चैकत्र चूर्णयेत्। गुटिका मातुलुङ्गस्य दाड़िमाम्बुरसेन वा। कृत्वा विपाचयेद्दृव्यं दीपयत्यग्नि चानलम्। सौवर्चलं सैन्धवञ्च विड़-मौद्भिदमेव च। सामुद्रञ्च समं पञ्च लवणान्यत्र योजयेत्"।

चित्रकदृत न॰ "चित्रककाथकल्काभ्यां यकृत्प्लीह्न शुभं कृविः। गुल्मशोफोदरश्लीहशूलार्शोघ्नं दीपनं परम्" इति चक्रदत्तोक्ते घृतभेदे।

चित्रकतैल न॰ "चित्रकं चविकं दीप्यं निदिग्धिकाकरञ्ज-बीजलवणार्कैः। गोमूत्रयुक्तं सिद्धं तैलं भागार्धसंयुक्तम्" चक्रदत्तोक्ते तैलभेदे

चित्रकम्बल पु॰ कर्म्म॰। कम्बलभेदे। (गालिचा)

चित्रकर त्रि॰ चित्रं लेखभेदम् आश्चर्य्यं वा करोति ताच्छील्यादौ ट। लेखादौ १चित्रशिल्पकरे। विश्व-कर्म्मणः शूद्रागर्भजाते वर्णसंकरभेदे २रङ्गाजीवे पुंस्त्री अमरः।

चित्रकर्म्मन् त्रि॰ चित्रं कर्म्मास्य। १चित्रकरे २आश्चर्य्य-कारके च ३तन्निमिते पु॰ शब्दच॰। ६त॰। ४चित्र-लेखक्रियायाञ्च क्लीबे न॰।

चित्रकहरीतकी स्त्री चित्रकमया हरीतकी। चक्रदत्तोक्ते औषधभेदे "चित्रकक्षामलक्याश्च गुडूच्या दशमूलजम्। शतं शतं रसं दत्त्वा पक्त्वा चूर्णीकृतं गुडात्। शतं पचेत् घनीभूते पक्वं क्षौद्रात्तु विंशतेः। व्योषत्रिजातयोः चारात् पलार्द्धं मरिचस्य च। पृथ्वार्द्धं मधुनोदत्त्वा यथाग्नि यदादत-न्मितः। दद्वेऽग्नेः जयं कासं श्वासं पीनसं दुस्तरं क्रिमीन्। गुल्मोदावर्त्तदुर्नामशोथान् हन्ति रसायनम्"।

चित्रकाय पु॰ चित्रः कायोऽस्य। १व्याघ्रे क्षेमच॰ (चिता-बाघ) २व्याघ्रभेदे राजनि॰।

चित्रकार त्रि॰ चित्रं करोति कृ–अण् उप॰स॰। १चित्रकर्म्मकारके। "स्वपतेरपि मान्त्रिक्यां चित्रकारोऽभ्यजायत" पराशरोक्ते २सङ्कीर्णजातिभेदे पु॰ स्त्री॰।

चित्रकुण्डल पु॰ धृतराष्ट्रपुत्रभेदे। "चित्रवाणचित्रवर्म्मा सुवर्म्मा दुर्विमोचनः। अयोबाहुर्महाबाहुश्चित्राङ्गश्चित्रकुण्डलः" भा॰आ॰११७अ०। चित्रबाण, चित्रवर्म्मन् चित्रमण्डल चित्राङ्ग तत्पुत्रभेदे। तत्राध्याये दृश्यम्।

चित्रकूट पु॰ चित्रं कूटं यस्मात्। पर्व्वतभेदे स च पर्वतः प्रयागस्योत्तरनिकटस्थभरद्वाजाश्रमात् अर्द्धतृतीययोजनादूरिणतस्तिष्ठति यथा रामा॰ अयोध्याकाण्डे ८२अ॰ भरतं प्रति भरद्वाजवाक्यम् "भरतार्द्धतृतीयेषु योजनेष्वजने वने। चित्रकूटो गिरिस्तात रम्यनिर्झरकाननः। उत्तरं पार्श्वमासाद्य तस्य मन्दाकिनी नदी। पुष्पितद्रुमसंछन्ना रम्यपुष्पितकानना। अनन्तरं ततस्तरितचित्रकूटं च पर्वतम्। तयोः पर्णकुटीं तात! तत्र तौ वसतोध्रुवम्"! "ददर्श चित्रकूटस्थं सरामं सहलक्ष्मणम्। तापसानामलङ्कारं धारयन्तं धनुर्व्वरम्" भा॰व॰२७६अ०। "ततो गिरिवरश्रेष्ठे चित्रकूटे विशाम्पते!" ८५अ०। "मधुरायाः पूर्वार्धे क्षिप्तवद्गोमन्तचित्रकूटस्थाः" ह॰ व॰ १६अ०। "चित्रकूटवनस्थस्य कविता खर्गतिर्गुरोः"। "इन्द्रः कनकशृङ्गानिव चित्रकूटः" इति च रघुः।

चित्रकृत् त्रि॰ चित्रं करोति कृ–क्विप्। १चित्रलेखकारके २आश्चर्य्यकारके च। ३चित्रकरे पु॰ स्त्री॰ ङीप्। तिनिशवृक्षे पु॰ अमरः। तस्य भावः त्व। चित्रकृत्त्व चित्रकारित्वे अङ्गत्वे च हेमच॰।

चित्रकेतु पु॰ १गरुड़पुत्रभेदे। "शुकश्चित्रकेतुश्च चित्रवर्हिसुधाजनः" भा॰ उद्यो॰ ६६अ०। गरुड़पुत्रौ। २लक्ष्मणपुत्रभेदे "अङ्गदचित्रकेतुश्च लक्ष्मणस्यात्मजौ स्मृतौ" भाग॰ ६।११।७। वसिष्ठस्य ऊर्जायां जाते ३पुत्रभेदे "ऊर्ज्जायां जज्ञिरे पुत्रा वसिष्ठस्य परन्तप!। चित्रकेतुप्रधानास्ते सप्त सप्तर्षयोऽभवन्। चित्रकेतुः सुरोचिश्च विरजा मित्र एव च। उल्बणो वसुभृद्यानो द्युमान् शक्त्यादयोऽपरे" भाग॰ ४।१।२२।२४। "देवभागस्य कन्यायां चित्रकेतुबृहद्भानौ" भाग॰११।२४।२। उक्ते ४यदुवंशे देवभागपुत्रभेदे। ५शूरसेनभूपभेदे "आसीद्राजा सार्व्वभौमः शूरसेनेषु वै नृप!। चित्रकेतुरिति ख्यातोयस्याशीत् कामधुङ्महो" भाग॰६।१४।६। तस्मै च पुत्रशोकतप्ताय नारदः तत्त्वज्ञानार्थं वासुदेवमन्त्रादिकमुपदिष्टवान् तत्कथा ततः परेऽध्यायत्रये दृश्या। ६चित्रपताके त्रि॰। [ख्याते कीटभेदे २ब्दे स्त्रियां गौरा॰।

चित्रकोण पु॰ चित्रःकोणोऽस्य। १अञ्जनिकायाम् (अञ्जनी)

चित्रगन्ध न॰ चित्रो गन्धोऽस्य। १हरितालेराजनि॰। २आश्चर्य्यगन्धयुक्ते त्रि॰।

चित्रगत त्रि॰ चित्रे गतः। १लेख्यलिखिते चित्रार्पिते "गुरुभाते रक्षेऽतीव पटे चित्रगते इव" भा॰ भी॰ ४४अ०।

चित्रगुप्त पु॰यमभेदे "चित्रगुप्ताय वै नमः" यमतर्पणमन्त्रः। कायस्थशब्दे १८२२४॰ तदुत्पत्त्यादिकं दृश्यम्। यमनियुक्तस्यैव तस्य यातनाधिकारित्वं भा॰ शु॰ भा॰ व्यवस्थापितं यथा

"ननु विरुद्धमिदं यमयातना यातनाः पापकर्म्मणोऽन्तु भवन्तीति, यावता तेषु रौरवादिषु अन्ये चित्रगुप्तादयो नानाधिकारिणः खर्य्यन्ते इति, नेत्याह" भा॰। "तत्रापि च तद्व्यापारादविरोधः" भा॰शु॰ "तेष्वपि सप्तसु नरकेषु तस्यैव यमस्याधिकारित्वव्यापाराभ्युपगमादविरोधः। यमप्रयुक्ता एव हि ते चित्रगुप्तादयोऽधिकारिणः खर्य्यन्ते"।

तस्य च संयमन्यां पापिनां प्रबोधनप्रकारः पुराणसप्तमे शिवधर्म्मोत्तरे उक्तो यथा

"निर्भर्त्सयति चात्यर्थं यमस्तान् पापकर्म्मिणः। चित्रगुप्तश्च भगवान् धर्म्मवाक्यैः प्रबोधयेत्। भो भो दुष्कृतकर्म्माणः! परद्रव्यापहारिणः!। गर्व्विता रूपवीर्य्यैश्चैः परदारविमर्द्दकाः!। यत् स्वयं क्रियते कर्म तत् स्वयं भुज्यते पुनः। तत् किमात्मप्रतापार्थं भवद्भिः दुष्कृतं कृतम्। इदानीं किं प्रतप्यध्वं पीड्यमानाः स्वकर्म्मभिः। भुङ्क्ष्वं स्वानि कर्म्माणि नात्र दोषोऽस्ति कश्चित्। एते ते पृथिवीपालाः संप्राप्ता मत्समीपतः। स्वकीयैः कर्म्मभिर्घोरैः दुष्कृत्या बलदर्पिताः। भो भो नृपा! दुराचाराः! प्रजाविध्वंसकारिणः!। अल्पकालस्य राज्यस्य कृते किं दुष्कृतं कृतम्? राज्यलोभेन मोहेन बलादन्यायतः प्रजाः। विध्वंसिताः फलं तस्य भुङ्क्ष्वमधुना नृपाः!। क्व तद्राज्यं कलत्रं च यदर्थमशुभं कृतम्। तत्सर्वं संपरित्यज्य यूयमेकाकिनः स्थिताः। यथाऽमलतलं लभ्यं येन स्वदृष्टिगताः प्रजाः। यमदूतैस्ताड्यमाना अधुना कीदृशं भवेत्"। अस्य यमलेखकृतकथा स्क॰पु॰प्रभा॰ यथा "एवन्तु सुव्रतस्यास्य चित्रस्य विमलात्मनः। तथा हृष्टः

सहस्रांशुः कालेन महता विभुः। अब्रवीद्वत्स! भद्रं ते वरं वरय सुव्रत!! सोऽब्रवीद्दुर्यदि मे तुष्टो भगवां स्तीक्ष्णदीधिते!! प्रौढ़त्वं सर्वकार्येषु जायतां सन्मतिः सखा। तत् तथेति प्रतिज्ञातं सूर्य्येण वरवर्णिनि!। ततः सर्वज्ञतां प्राप्तश्चित्रोमित्रकुलोद्भवः। तं ज्ञात्वा धर्म्मराजस्तु बुद्ध्या परमया युतः। चिन्तयामास मेधावी लेखकोऽयं भवेदिति। ज्ञाता मे सर्वसिद्धिश्च निर्दोषा च परा भवेत्। एवं चिन्तयतस्तस्य धर्म्मराजस्य भामिनि!। अस्मितीर्थं गतश्चित्रः स्नानार्थं सरसामसि। स तत्र प्रविशन्नेव नीतस्तु यमकिङ्करैः। सशरीरो महादेवि! यमादेशपरायणैः। स चित्रगुप्तनामाभूत् विश्वचारित्र लेखकः। चित्रादिखेति नामास्य ततो लोके वरानने!। सप्तम्यां नियताहारोयस्तं पूजयते नरः। सप्त जन्मानि दारिद्र्यं न दुःखं तस्य जायते"।

**चित्रघण्टा** स्त्री चित्रा घण्टाऽस्याः। काशीस्थे देवीभेदे "विघ्ने! विघे! विघ्नभुजे। नमोऽस्तु ते श्रीचित्रघण्टे! विकटे सुदर्शिके!" काशी० ५अ०।

**चित्रघण्टेशी** स्त्री काशीस्थे देवीभेदे। "दक्षञ्च चित्रघण्टेशी घण्टाकर्णह्रदं हृदः" काशीख० २२अ०।

**चित्रचाप** पु० धृतराष्ट्रसुतभेदे "अयोबाहुर्महाबाहुश्चित्रचापस्तथैव च" भा० आ० ६७अ०।

**चित्रजल्प** पु० उज्ज्वलमधुरे वाक्यभेदे तल्लक्षणभेदादिकं तत्रोक्तं यथा

"प्रेम्णश्च सुहृदा लोके गूढरोषाभिजल्पितः। मूरिभावमयोजल्पो यत्नीव्रोत्कण्ठतान्वितः। चित्रजल्पो दशाक्रोऽयं पृजल्पः परिजल्पितम्। विजल्पो व्यलसंजल्पावजल्पोऽभिजल्पितम्। आजल्पः प्रतिजल्पश्च सुजल्पश्चेति कीर्त्तिताः। एष भ्रमरगीताख्योदयमे प्रकटीकृतः। अर्थसङ्ग्रहभावैश्चित्रीचमत्कृतिसुद्वहन्। अपि चेद्विजल्पोऽयं मनाक् तदपि कथ्यते। तत्र पृजल्पः १। अक्षरेर्व्यञ्जनद्युजा यो ऽवधीरणसङ्गया। प्रेयसा कौशलोद्गारः पृजल्पः स तु कीर्त्यते। यथा मधुप! कितवबन्धो! मा स्पृशाङ्घ्रिं सपत्न्याः कुचविलुलितमालाकुङ्कुमश्मश्रुभिर्नः। बहुत मधुपतिसन्नाधिनीनां प्रसादं यदुसदसि विडम्बं यस्य दूतस्त्वमीदृक्। १। अथ परिजल्पितम् २। प्रभोर्भिदैवताशाठ्यचापलाद्युपसादनात्। क्वचिच्छ्रुतावन्निर्भङ्गया स्यात् परिजल्पितम् २। यथा सकृदधरसुधां स्वां मोहिनीं पाययित्वा सुमनस इव सद्यो दुस्त्यजेऽस्मान् भवादृक्। परिचरति कथं तत् पादपद्मं तु पद्मा अपि बत हृतचेता ह्युत्तमश्लोकजल्पैः २। अथ विजल्पः ३। "व्यक्तयाऽऽकूतया गूढमानसङ्गान्तरालया। अथ द्विधि कटाक्षोक्तिर्विजल्पो विदुषां मतः ३। यथा किमिह बत षडङ्घ्रे! गायसि त्वं यदूनामधिपतिमसकृन्नो यत्पुराख्यम्। विजयसखसखीनां गीयतां तत्प्रसङ्गः क्षपितकुचरुजस्ते कल्पयन्तीष्टमिष्टाः। ३। अथोज्जल्पः ४। हरेः कृष्णताख्यानं सर्वं गर्भितवेर्ण्यया। सास्रयत्र तदाक्षेपो धीरैरुज्जल्पउच्यते ४। यथा दिवि भुवि च रसायां काः स्त्रियस्तद्दुरापाः कपटरुचिरहासभ्रूविजृम्भस्य याः स्युः। चरणरजउपास्ते यस्य भूतिर्वयं का अपि च कृपयपृच्छे ह्युत्तमश्लोकशब्दैः। ४। अथ संजल्पः ५। सोक्तिरुद्धया गर्हणया कयाप्याक्षेपसङ्गया। तस्मात्तत्तत्तादृक्किः संजल्पः कथितो बुधैः ५। यथा विसृज शिरसि पादं वेद्म्यहं चाटुकारैरनुनयविदुषस्तेऽभ्येत्य दौत्यैर्मुकुन्दात्। सखत इह विसृष्टापत्यवित्तान्यलोका व्यसृजदकृतचेताः किन्नु सन्धेयमस्मिन् ५। अथ अवजल्पः ६। हरौ काठिन्यकाभित्वधौर्त्त्यादावक्रप्रयोगयुता। यत्र सेर्ष्यं भिवेवोक्ता सोऽवजल्पः सतां मतः ६। यथा खगपुरिव कपीन्द्र विवृधे सुधर्मां स्त्रियमकृतविरूपां स्त्रीजितः कामयानाम्। बलिमपि बलिमत्त्वा वेष्टयद्वाङ्घ्रयुगलदलमहितसख्यैर्न्यजत्तत्कथार्थः ६। अथाभिजल्पितम्७ भङ्ग्या त्वागौचितं तस्य खगानामपि खेदनात्। यत्र सानुनयं प्रोक्तं तद्भवेदभिजल्पितम्। यथा बद्धचरितलीला कर्णपीयूषविप्रुट् सकृददनविधूतद्वन्द्वधर्मा विनष्टाः। सपदि सुहृदकुटुम्बं दीनमुत्सृज्य दीरा बहव इव विहङ्गा भिक्षुचर्यां चरन्ति। ७। अथ आजल्पः ८। जैह्म्यं तस्यार्त्तिदत्वञ्च निर्वेदादात्म कीर्त्तनम्। भङ्ग्यान्यसुखदत्वञ्च स आजल्प उदीरितः। यथा वयमृतमिव जिह्मं व्याहृतं श्रद्दधानाः कुलिकरुतमिवाज्ञाः कालवध्वो हरिण्यः। ददृगुरसकृदेतत्तन्नखस्पर्शतीव्रस्मररुजउपमन्त्रिन्! भण्यतामन्यवार्त्ता। ८। अथ प्रतिजल्पः ९। दुरुक्तजल्पभावेऽस्मिन् प्राप्तिर्नार्हेत्यसङ्गतम्। दूतसंभाषणेनोक्तं यत्र स प्रतिजल्पकः। प्रियसख! पुन-

रागाः प्रेषिता प्रेषिताः किं वैरव किमतुरन्धे मानिनी-योऽसि मेऽङ्ग। नयसि कथमिहाक्षिन् दुस्त्यज इव-प्रार्थं सततरुचि सौम्य! श्रीवधूः साकमास्ते। ६। अथ सुजनुपः १०। यत्नार्जनात् समाम्नीर्यं सदैन्यं सह चापलम्। योत्कण्ठ्य हरिः पृष्टः स सुजनुपो निगद्यते। यथा—अपि वत मधुपुर्यामार्य पुत्रोऽधुनास्ते स्मरति स पितृगेहान् सौम्य! बन्धूंश्च गोपान्। कचिदपि स कथां नः किङ्करीणां रटन्तीं भुजमगुरुसुगन्धं मूर्ध्न्यधास्यत् कदा नु" १०।

**चित्रतण्डुल** न० चित्रस्तण्डुलोऽस्य। विड्डे रत्नभाषा। तत्रार्थे स्त्री अमरः।

**चित्रत्वच्** पु० चित्रा त्वक् यस्य। भूर्जवृक्षे। राजनि०।

**चित्रदण्डक** पु० चित्रोदण्डःकाण्डो यस्य कप्। (ओल) शूरणे रत्नमाला।

**चित्रदीप** पु० पद्मदशीप्रकरणान्तर्गते दीपभेदे "यथा चित्रपटे दृष्टमवस्थानां चतुष्टयम्। परमात्मनि विश्वेयं तथावस्थाचतुष्टयम्। यथा धौतो घट्टितश्च लाञ्छितो रञ्जितः पटः। चिदनर्थांसिसृक्षायि विराड़ा त्मा तथेष्यते। स्रष्टः शुभ्रोऽत्र धौतः स्याद्घट्टितो ऽस्त्र-विक्षेपनात्। मलाकारैर्लाञ्छितः स्यात् रञ्जितो वर्ण पूरणात्। स्रष्टचिदन्तर्यामी तु मायावी सूक्ष्मरूपितः। स्थूलात्मा स्थूलरूपेण विराडित्युच्यते परः। ब्रह्मा-द्यास्तम्बपर्यन्ताः प्राणिनोऽत्र जडा अपि। उत्तमा-धममावेन दर्शने पटचित्रवत्। चित्रार्पितमनु-ष्याणां वस्त्राभासाः पृथक् पृथक्। चित्राधारेण वस्त्रेण सदृशा इव कल्पिताः। पृथक् पृथक् चिदाभासा चैतन्याध्यस्तदेहिनाम्। कल्पान्तजीवनात्मानोवस्त्रधा संसरन्त्यमी। वस्त्राभासा स्थितान् वर्णान् यद्वदाधार वस्त्रगान्। विदन्त्यन्तस्तथा जीवं संसारं चिद्गतं विदुः" इत्युपक्रमे। "जगच्चित्रं स्वचैतन्ये पटे चित्रमि-वार्पितम्। मायया तदुपच्छैव चैतन्यम् परिचिन्त्यताम्। चित्रदीपमिमं नित्यं ये तु संदधते बुधाः। पश्यन्तोऽपि जगच्चित्रं ते तत्रान्ति न पूर्ववत्" पद्मदशी।

**चित्रदेवी** स्त्री चित्रं दीव्यति दिव-अच् गौरा० ङीष्। १मरेन्द्रवारुण्यां राजनि०। २कुमारानुचरभेदे पु० "तरश्च तारश्च चित्रदेवश्च वीर्यवान्" भा० शल्य० ४६अ०। कुमारानुचरोक्तौ

**चित्रधर्मन्** पु० भारतप्रसिद्धे नृपभेदे "विरूपाक्षस्तु दैत्येय चित्रयोधी महासुरः। चित्रधर्मेति विख्यातः चिता-वासीत् स पार्थिवः" भा० आ० ६७अ०।

**चित्रनेत्रा** स्त्री चित्रं नेत्रं यस्याः। शारिकायां हारा०।

**चित्रपक्ष** पुंस्त्री चित्रौ पक्षावस्य। तित्तिरिपक्षिणि जटा धरः। स्त्रियां ङीष्। "चित्रपक्षः कङ्कहरः वातघ्नो मक्षीप्रणुत्" भावप्र० तन्नामगुणा उक्ताः।

**चित्रपट** पु० कर्म०। (छिट) प्रथमे १वस्त्रे शब्दार्थ-चि०। २चित्राधारपटे पु० चित्रदीपशब्दे उदा० "निः-शेषं हस्तिसैन्यं तु स्थितं चित्रपटे यथा" हरिवं० २१७अ०।

**चित्रपत्र** पु० चित्रं पत्रं पक्षोऽस्य। चित्रपक्षे खगमात्रे "चित्रपत्रमकुनिनीडद्योतितेत्यादि" काद०।

**चित्रपत्रिका** स्त्री चित्रं पत्रं पर्णं यस्याः कप् कापि अतरत्त्वम्। १चित्रपर्णीडम्बे रत्नमाला २द्रोणपुष्प्यां राजनि० कबभावे गौरा०ङीष्। चित्रपत्री जलपिप्पल्यां स्त्री राजनि०।

**चित्रपथा** स्त्री प्रभासतीर्थस्थचित्रानद्याम् तत्कथा स्क० पु० प्रभा० यथा

"ततोगच्छेन्महादेवि! नदीं चित्रपथां शुभाम्। ब्रह्म कुण्डसमीपस्थां चित्रादित्यस्य मध्यतः। यदा चित्र-स्तु संनीतो यमदूतैः सुरप्रिये!! सशरीरः महाप्राज्ञो यमादेशपरावशैः। एवं ज्ञात्वा तु तत्रस्था भगिनी तस्य दुःखिता। चित्रा, नदी ततोभूत्वा तथा तस्य महात्मनः। प्रविष्टा सागरे देवि! स्वस्थिप्रन्नीव बान्धवम्। तत-श्चित्रपथानाम तस्याश्चक्रुर्द्विजातयः। एवं तत्र सरित्-पथा सा नदी वरवर्णिनि!। तस्यां स्नात्वा नरोयस्तु चित्रादित्यं प्रपश्यति। स याति परमं स्थानं यत्र देवो दिवाकरः। स्वस्थिन् कलियुगे देवि! अन्तर्धानं गता नदी। प्राप्तकालेऽथ दृश्यते दुर्लभं तत्र दर्शनम्। स्नानं दानं विशेषेण सर्वपातकनाशनम्। भक्तोवाप्यथ वाऽभक्तो रात्रौ वा यदि वा दिवा। पर्वकालेऽथवाऽकाले पवि-त्रोऽथ वाऽशुचिः। यदैव दृश्यते तत्र नदी चित्रपथा प्रिये!। प्रभासं दर्शनं तस्या न कालस्तत्र कारणम्। दृष्ट्वा नदीं महादेवि! पितरः स्वर्गसंस्थिताः। गायन्ति तत्र वाल्हन्ति नृत्यन्ति च हसन्ति च। अस्माकं वंशजः कश्चित् श्राद्धमत्र करिष्यति। यावत् कल्पं तथास्माकं प्रीतिमत्पादयिष्यति। एवं ज्ञात्वा नरस्तत्र स्नानं श्राद्धञ्च कारयेत्। सर्वपापविनाशार्थं पितॄणां प्रीतये तथा।

इत्येतत् कथितं देवि ! यथा चित्रपदा नदी । प्रभास-क्षेत्रमासाद्य संस्थिता पापनाशिनी" ।

**चित्रपदा** स्त्री चित्रं पदं स्थानमिवास्थानं यस्याः । १गोधालतायां शब्दमा० चतुरक्षरपादके २छन्दोभेदे च । तल्लक्षणं "चित्रपदा यदि भौ गौ" छन्दोम० । आर्यायां पदं शब्दभेदोऽत्र । ३चित्रपदयुक्ते वाक्यादौ त्रि० । "वल्गु चित्रपदं हृद्यं यात्रसेनी तथा वचः" भा० व० २१अ० । "सम्प्रयदा भगवाः परतो गुरुरत्नगतो बहुकोलितदेव ! चित्रपदेति तदा युधि विक्रमतो धृतवैरिधराधिपकेश ! । सा कथिताधिकमङ्गल ! पिङ्गलनागपरेण दयाभिनिवेश ! गौड़कुलोज्वल ! धारय चेतसि हे यशवल्ल ! नरेश !" छत्तरश्लोके २छन्दोभेदे च

**चित्रपर्णी** स्त्री चित्राणि पर्णान्यस्याः ! (चाकलिया) ख्याते वृश्चिपत्र्यां अमरः । २जलपिप्पल्यां ३द्रोणपुष्प्यां च राजनि० । ४मञ्जिष्ठायां रत्नमाला । स्वार्थे क । चित्रपर्णिका चित्रपर्णीभेदे रत्नमाला ।

**चित्रपादा** स्त्री चित्रौ पादौ यस्याः । शारिकायां हारा० ।

**चित्रपिच्छक** पुंस्त्री चित्रं पिच्छमस्य । मयूरे राजनि० स्त्रियां ङीष् ।

**चित्रपुङ्ख** पु० चित्रः पुङ्खोऽस्य । शरभेदे राजनि० ।

**चित्रपुष्पी** स्त्री चित्राणि पुष्पाण्यस्याः ङीष् । अम्बष्ठालतायां राजनि० । [पक्षी स्त्रियां ङीष् ।

**चित्रपृष्ठ** पुंस्त्री० चित्रं पृष्ठमस्य । कलविङ्कपक्षिणि । हारा०

**चित्रफल** पु० चित्रं फलं फलकमिवाकारोऽस्यास्य अच् । (चितल) मत्स्ये राजनि० । स्वार्थे क । चित्रफलक तत्रार्थे ।

**चित्रफला** स्त्री चित्रं फलं यस्याः अजा० टाप् । १चिर्भटायां २स्रुगेरायां ३विडङ्ग्यां ४मङ्केन्द्रवारुण्यां ५वार्ताक्यां ६कण्ठकार्यां च राजनि० । एतासां चित्रफलत्वात्तथात्वम् ।

**चित्रबर्ह** पुंस्त्री चित्रा बर्हा यस्य । १मयूरे स्त्रियां जातित्वात् ङीष् । "काकेनेमांश्चित्रबर्हान् शार्दूलान् क्रोष्टुकेन च । क्रौञ्चीञ्च पाण्डवान् राजन् ! मा मज्जीः शोकसागरे" भा०स०६०अ० । २गरुड़ात्मजभेदे । "सुरुचश्चित्रकेतुश्च चित्रबर्हस्तथाऽनघः" भा० उ० १००अ० । गरुड़ात्मजोक्तौ । [६७अ० । तत्पुत्रोक्तौ ।

**चित्रबाहु** पु० धृतराष्ट्रपुत्रभेदे । चित्रबाहुश्चित्रवर्मा" भा०

**चित्रभानु** पु० चित्राभानवो यस्य । १अग्नौ २सूर्ये, ३चित्रकण्डे, ४अर्जुनेऽपि च मेदिनिः । ५भैरवे शब्दरत्ना० । तत्पर्या० "दुग्धैः शिरोभिश्च भृशं चित्रभानुं प्रमेदिरे" भा० आ० ५२अ० सर्पसत्रे । "किन्नामे मानवाः सर्वे दह्यन्ते चित्रभानुना" भा०मा० २२६अ० । ६अश्विनीकुमारयोः हि० व० । तयोश्चित्रभानुसूर्यजातत्वात् तथात्वम् "प्रभूवंगापूर्वजौ चित्रभानू" भा० आ० ६०अ० अश्विनोःसुतौ । प्रभवादिषष्टिवर्षेषु ७भोड़शे वर्षे "चणका मुद्गमाषाश्च अन्यच्च हिदलं प्रिये ! । मङ्गार्यं जायते सर्वं चित्रभानौ वरानने !" । "श्रेष्ठं चतुर्थञ्च (तौताश्च) युगञ्च पूर्वं यश्चित्रभानुं कथयन्ति वर्षम्" ह० स० ८अ० ।

**चित्रभेषजा** स्त्री चित्रमाश्चर्यं भेषजं यस्याः ५त० । काकोदुम्बरिकायाम् राजनि० ।

**चित्रमण्डल** पुंस्त्री० चित्रं मण्डलमस्य । मण्डलिनि सर्पभेदे सुश्रुतः अहिशब्दे ५८१पृ० दृश्यम् ।

**चित्रमृग** पु० चित्रवर्णोमृगः । धृते मृगभेदे शब्दार्थचिन्ता० । "वयं माषान्छागमांसेन पार्षतेन च सम्प्लवे" मनुव्या० "धृतचित्रमृगः" कुल्लू० ।

**चित्रमेखल** पुंस्त्री चित्रा मेखलाऽस्य । मयूरे त्रिका० ।

**चित्रयोधिन्** त्रि० चित्रं युध्यति युध-णिनि । १आश्चर्य युद्धकारके स्त्रियां ङीष् । "यदा द्रोणोविविधानस्त्रमार्गान् निदर्शयन् समरे चित्रयोधी" भा० द्रो० १अ० । "विरूपाक्षश्च दैतेयश्चित्रयोधी महासुरः" भा० द्रो० ६७अ० । २अर्जुने तन्नामनामके २अर्जुनवृक्षे पु० राजनि० ।

**चित्ररथ** पु० चित्रोरथोऽस्य । १स्वर्गे २गन्धर्वभेदे च मेदि० । स च गन्धर्वः कश्यपात् मुनिनाम्न्यां दनुकन्यायां बभूव यथाह "श्रीशोयसेनौ चेद्युपक्रमे "भीमश्चित्ररथश्चैव विख्यातः सर्वविद्वषी" इत्युपक्रमे "इत्येते देवगन्धर्वा मौनेयाः परिकीर्त्तिताः" भा० आ० ६५अ० । इत्युक्तम् स च अङ्गारपर्णनाम्ना अर्जुनेन च तस्य दग्धरथत्वात् दग्धरथनाम्ना बभूव यथाह भा० आ० १७०अ० । "गन्धर्व उवाच, "जितोऽहं पूर्वकं नाम सङ्ग्राम्यङ्गारपर्णतास् । न च शक्ष्ये बलेनाद्य नाम्नाद्य जनमेजय ! । शाश्वतं ब्रह्मवर्चस्त्वमोघोऽहं दिव्यास्त्रधारिणम् । गान्धर्व्यां मायवेच्छामि संयोजयितुमर्जुन ! । यस्मान्मिमा विचित्रोऽयं दग्धोमे रथ उत्तमः । सोऽहं चित्ररथो भूत्वा नाम्ना दग्धरथोऽभवम्" ।

"गन्धर्वाणां चित्ररथः" गीता। "सागराणां नदीनाञ्च मेघानां वर्षितस्य च। गन्धर्वाणामधिपतिं चक्रे चित्ररथं विभुः" हरिव० ३अ०। तस्य गन्धर्वाधिपत्यं तथात्वम्। २नदीभेदे स्त्री १उपद्वोः पुत्रे पु० चैत्ररथिशब्दे दृश्यम्। चित्ररथमधिकृत्य कृतो ग्रन्थः अण्। चैत्ररथ भारतस्यादिपर्वान्तर्गतेऽवान्तरपर्वणि। तच्च पर्व आदिपर्वणि १६५ अवधि १८२ अध्यायपर्यन्तम्।

**चित्ररश्मि** त्रि० चित्रा रश्मयोऽस्य। १नानावर्णरश्मियुक्ते २मरुद्गणभेदे पुं हरिव० २०३अ० "अग्निश्चक्षुर्विद्युतिः सावित्रं मित्रमेवच। अमरं मरुदृष्टिञ्च सङ्कयञ्च महाभुजम्। विरजञ्चैव शुक्रञ्च विश्वावसुविभावसू। अश्मनक्षत्रिरश्मिञ्च तथा निष्कुषितं रुचम्। नक्षत्रक्षाडतिञ्चैव चारित्रं ब्रह्मपद्मगम्। इक्षतञ्च इक्षदृग्रं तथैव परतापनम्। महत्तती तथा यज्ञे एतं वै मरुतां गणम्"।

**चित्ररेफ** पु० शाकद्वीपाधिपस्य प्रैयव्रतस्य मेधातिथेः १पुत्रभेदे तन्नामके तत्पत्ये २वर्षभेदे च। शाकद्वीपोपक्रमे "तस्यापि प्रैयव्रत एवाधिपतिः आत्मा मेधातिथिः। सोऽपि विभज्य सप्त वर्षाणि पुत्रनामाङ्कितेषु स्वात्मजान् पुरोजवमनोजव पवमान धुम्रानीक चित्ररेफ बहुरूप विश्वाधार संज्ञान् निधाप्याधिपतीन् स्वयं भगवत्यनन्तरावेशितमतिरुपोवनं प्रविवेश" भाग० ५।२।१८।

**चित्रल** पु० चित्रमावर्त्यं जाति चा-क। १कर्बूरवर्णे २तद्वति त्रि० शब्दरत्ना०। ३गोरचीडचे स्त्री राजनि०।

**चित्रलता** स्त्री० चित्रकर्म०। मञ्जिष्ठायां राजनि०।

**चित्रलेखनी** स्त्री चित्रं लिख्यतेऽनया लिख ल्युट् करणे ङीप्। (तूली) कूच्याम्। उज्ज्वलद०।

**चित्रलेखा** स्त्री चित्रं लेखयति लिख-अण् उप०स०। १बाणासुरमन्त्रिणः कुम्भाण्डस्य कन्यायाम् २अप्सरोभेदे च। तस्याश्च चित्रलेखनदक्षता हरिव० १७६अ० वर्णिता यथा "अथावाचमं श्रुत्वा रामा वाक्यमिदं पुनः। उवाच रुदतीञ्चैव कुम्भाण्डतनया सखी। कृशना ते विद्याऽसि। सर्वथा सन्धिविग्रहे। अप्सरा चित्रलेखा वै क्षिप्रं विद्याधरां सखि!। अस्याः सर्वमशेषं वै त्रैलोक्यं विदितं सदा। एवमुक्ता तदैवोषा हर्षेणागतविस्मया। तामप्सरसमानाय्य चित्रलेखां सखीं प्रियाम्। कृताञ्जलिपुटा दीना उषा वचनमब्रवीत्। परमं श्रृणु मे वाक्यं यत्त्वां वक्ष्यामि भाविनि!। भर्त्तारं यदि मेऽद्य त्वं नानयिष्यसि मत्प्रियम्। कान्तं पद्मपलाशाक्षं मत्तमातङ्गविक्रमम्। त्वय्यस्यं प्रियान् प्राणांस्ततः कमललोचने!। चित्रलेखाऽब्रवीद्वाक्यमुषां हर्षवती शनैः। नैषोऽर्थः शक्यतेऽस्माभिर्वेत्तुं भाविनि! सुव्रते!। न कुलेन न वर्णेन न शीलेन न रूपतः। न देवत्व विज्ञातः सहि चोरो मया सखि!। किन्तु शक्यं यथा कर्त्तुं बुद्धिपूर्वं मया सखि!। प्राप्नुहि श्रृणु मे वाक्यं यथाकाममवाप्स्यसि। देवदानवयक्षाणां गन्धर्वोरगरक्षसाम्। ये विशिष्टाः प्रभावेण रूपेणाभिजनेन च। यथाप्रधानतः सर्व्वानालिखिष्याम्यहं सखि!। मनुष्यलोके ये चापि प्रवरा लोकविश्रुताः। सप्तरात्रेण ते भीरु। दर्शयिष्यामि तानहम्। ततो विज्ञाय पतिं भर्त्तारं प्रतिलप्स्यसे। सा चित्रलेखया प्रोक्ता उषा हितचिकीर्षया। क्रियतामेवमित्याह चित्रलेखां सखीं प्रियाम्। ततः कृशनकस्तस्यादायालेख्यं समन्ततः। दत्त्वोक्ता सप्तरात्रेण कृत्वा लेख्यगतांस्तु तान्। चित्रपट्टगतान् सख्यानानयामास शोभना। ततः प्रस्तीर्य्य पटं सा चित्रलेखा स्वयंकृतम्। उषायै दर्शयामास सखीनाञ्च विशेषतः"। "ततस्तु देव्या रूपेण चित्रलेखा वराप्सराः" तत्राध्यायादौ। भाग० १०।६२ अ०। कुम्भाण्डकन्यया चित्रलेखयैव तथा चित्रं लिखितमित्युक्तं यथा "बाणस्य मन्त्री कुम्भाण्डचित्रलेखा च तत्सुता। सख्युपृष्टात् सखीभूयं कौतूहलसमन्विता" इत्युपक्रमे। "चित्रलेखोवाच अयनं तेऽपकर्षामि त्रिलोक्यां यदि भाव्यते। तमानेष्ये नरं यस्ते मनोहर्त्ता तमादिश। इत्युक्ता देवगन्धर्वसिद्धचारणपन्नगान्। दैत्यविद्याधरान् यक्षान् शूरमानकदुन्दुभिम्। व्यलिखत् रामकृष्णौ च प्रद्युम्नं वीक्ष्य लज्जिता। व्यनिक्तं विलिखितं वीक्ष्यैवाऽऽह वाङ्मधोच्छिया। सोऽसावसाविति प्राह स्वयमाना मधोपते!। चित्रलेखा तमाघ्राय यौवनं कृष्णयोगिनी। ययौ विहायसा राजन्! द्वारकां कृष्णपालिताम्" "मन्दाक्रान्ता नपरलघुयुता चित्रलेखा" छन्दोम० उक्ते १चतुर्दशाक्षरपादके "रुद्राश्वैर्भ्ननततमकैः कीर्त्तिता चित्रलेखेयम्" ह० र०टी०उक्ते च ४छन्दोभेदे। "सजा भजगा गु दिक्षरैर्भवति चित्रलेखा" ह०र०टी० उक्ते ५छन्दोभेदे। ६व्रजाङ्गनाभेदे। "गङ्गे ऽसङ्गिन् जगति सुगङ्गां सारूपं यदासीदाऽऽख्येदं व्रजयुवतिसभा वेधसा

सा व्यधावि । मैतादृक् चेत् कथमुदधिसुतामन्तरेणाच्युतस्य प्रीतं तस्यां नयनयुगमभूत् चित्रलेखाद्भुतायाम्" उज्ज्वलमणिः कर्म्म० । ७चित्रायां रेखायाम् स्त्री रत्नरौरेखात् ह्रस्वः । ७चित्रस्य लेखने पु० । "जगाऽनिरुद्धसमागममिव, चित्रलेखादर्शितविचित्रसकलभुवनाकारम् । (राजकुलम्) काद० । [ जटाधरः ।

चित्रलोचना स्त्री चित्रं लोचनमस्याः । शारिकाखगे

चित्रवदात्त पु० चित्रवद् या समन्तात् अवति या+अत-अच् । पाठीनमत्स्ये (वोयादत्त) जटाधरः ।

चित्रवर्म्मन् पु०१धृतराष्ट्रपुत्रभेदे "चित्रवाक्चित्रवर्म्मा" भा० आ० ६७अ० । चित्रं वर्म्मोस्य । २चित्रकवचयुक्ते त्रि० ।

चित्रवल्लिका पु० वल्लीव कायति के-क पृषो० ह्रस्वः कर्म्म० । पाठीनमत्स्ये हेमच० ।

चित्रवल्ली स्त्री० नित्यकर्म्म० । १सुमेरौ २महेन्द्रवारुण्यां च राजनि० कर्म्म० । ३चित्रायां लतायाम् ।

चित्रवहा स्त्री चित्रं वहति वह-अच् । भारतप्रसिद्धे नदीभेदे "करीषिणीं चित्रवहां चित्रसेनां निरुन्धगाम्" भा०भी० ६अ० । नानानद्युक्तौ "ऋष्विकुल्या तथा मेध्या नदी चित्रवहा तथा" भा० आनु०१६५अ० तीर्थोक्तौ ।

चित्रवाण पु० १धृतराष्ट्रपुत्रभेदे "चित्रवाणचित्रवर्म्मा सुवर्म्मा दुर्विमोचनः" भा० आ० ११०अ० । २चित्रशरयुक्ते त्रि०

चित्रवाहन पु० मणिपूरेश्वरे नागभेदे । "मणिपूरेश्वरं राजन् ! धर्म्मज्ञं चित्रवाहनम्" भा०आ० २१५अ० ।

चित्रवीर्य्य पु० चित्रमाश्चर्य्यं वीर्य्यमस्य । रक्तैरण्डे । राजनि० ।

चित्रवेगिक पु० चित्रवेगोऽस्यास्य ठन् । नागभेदे "वराहको वीरणकः सुचित्रश्चित्रवेगिकः" भा० आ० ६७अ० । नागोक्तौ ।

चित्रशाला स्त्री चित्रलेखननिर्म्माणार्थायां शाला । चित्रलेखननिर्म्माणार्थायाम् शालायाम्, जालिन्यास् डीप् हेम० ।

चित्रशिखण्डिज पु० चित्रशिखण्डिनोऽङ्गिरसो जायते जन-ड । ह्रस्वस्तौ अमरः । चित्रशिखण्डिप्रसूतादयोऽप्यत्र ।

चित्रशिखण्डिन् पु०चित्रः शिखण्डः अस्यास्य इनि । "मरीचिरङ्गिरा अत्रिः पुलस्त्यः पुलहः क्रतुः । वसिष्ठश्चेति सप्तैते ब्रह्मणा चित्रशिखण्डिनः" इत्युक्तेषु सप्तसु मुनिषु अमरः । "ये हि ते ऋषयःख्याताः सप्त चित्रशिखण्डिनः । तैर्यैकमतिभिर्भूत्वा यत्प्रोक्तं शास्त्रमुत्तमम्" । "मरीचिरत्र्यङ्गिरसौ पुलस्त्यः पुलहः क्रतुः । वसिष्ठश्च महातेजास्ते हि चित्रशिखण्डिनः । सप्त ब्रह्मसुतो ह्येतास्तथा स्वायम्भुवो ह्यृषिः । एताभिर्धार्य्यते लोकास्तास्यः शास्त्रं विनिःसृतम्" भा० शा० २२७अ० ।

चित्राङ्गिरस् पु० चित्रं शिरोऽस्य । १गन्धर्वभेदे "मङ्कानुति चित्रशिरा जघायुरनवस्तया" हरिवं० २६१अ० गन्धर्वभेदोक्तौ । २मूत्रपुरीषविषे सत्त्वभेदे सुश्रु० "चित्रशिरः सरावकृष्णतदारुकारिमेदकशारिकाकुक्षासुखसन्दृश विगर्हिता मूत्रपुरीषविषाः" सुश्रुतः ।

चित्रशीर्षक पु० चित्रं शीर्षमस्य कप् । कीटभेदे सुश्रुतः । कीटशब्दे २०५८पृ० दृश्यम् ।

चित्रसर्प पु० नित्यकर्म्म० । मातुधानसर्पे शब्दर० ।

चित्रसेन पु० धृतराष्ट्रपुत्रभेदे "तेषां धृतराष्ट्रस्य पुत्राणां चत्वारः प्रधाना बभूवुः । दुर्योधनो दुःशासनोविकर्णश्चित्रसेनश्चेति" भा०आ० ८५अ० । २गन्धर्वभेदे । चित्रसेनश्च गीतोपयुक्तया चित्ररथोऽपि च । एते चान्ये च गन्धर्वा धनेश्वरमुपासते" भा० स० १०अ० । ततस्ते खेचराः सर्वे चित्रसेने न्यवेदयत् । गन्धर्वराजस्तान् सर्वानब्रवीत् कौरवान् प्रति" भा० व० २४०अ० । अर्जुनेन तत्पराजयकथा तत्रैव दृश्यम् । "क्रुद्धोगन्धर्वराजानं चित्रसेनमरिन्दमम् । विजिग्ये तरसा संख्ये सेनां प्राच्य सुदुर्जयाम्" भा० वि० ४८अ० । चित्रगुप्रादिलिखितयानगते सर्व्वलोकपितामहे ब्रह्मपादजचित्रभेदे कायस्थशब्दे १८३२पृ० दृश्यम् । ५नदीभेदे स्त्री चित्रवहाशब्दे दृश्यम् ।

चित्रहस्त पु० चित्र आश्चर्य्योहस्तः हस्तक्रिया यस्य । मल्लयुद्धाद्युपहस्तक्रियाभेदे "चित्रहस्तादिकं कृत्वा कक्षावस्त्रं च चक्रतुः" भा० स० २२अ० । भीमजरासन्धयोर्मल्लयुद्धवर्णने ।

चित्रा स्त्री चित्र-अच् । १मूषिकपर्ण्यां २गोदुग्धायां ३सुभद्रायां ४दन्तिकायां ५मायायां ६सर्षपभेदे ७नदीभेदे च मेदि० । ८चित्रगुप्तस्य भगिन्यां सा च नदी भूत्वा चित्रा एवा नदी जाता सैव चित्रा नदी । चित्रपद्माशब्दे दृश्यम् ९अप्सरोभेदे हेमच० । १०ब्रह्मजातभेदे उज्ज्वलमणिः । "परमप्रेष्ठमध्ये तु लसिता सविशाखिका । सचित्रा चन्द्रकलता तद्बिम्बेदुलेखिका । रक्तदेवी सुदेवी । चेल्लटी सर्वगुणाः स्त्रियां" "चित्रानाथ यद्भन्दोऽस्मिन् शुक्लयोमाक्षतो यौ" इ० टी० उक्ते षड्दशाक्षरपादके वर्णवृत्तभेदे । राशिचक्रस्थे १२नक्षत्रभेदे । सा च

राशिचक्रस्य १७३।२० अवधि १८६।४० पर्य्यन्तं ११।२० अंशात्मिका तत्स्वरूपादिकम् अङ्कशब्दे ४६७पृ० उक्तम्। "त्रिमनिसैऽक्योर्योगे चित्राचन्द्रमसोरिव" रघुः। चित्रानामके चन्द्रकलत्रे १२दक्षकन्याभेदे च। १३कृशरोगे १५श्वेतदूर्वायां १६मक्षिकायां राजनि०। चित्रायां जाता अण् "चित्रारोहिणी श्रविष्ठारोहिणीभ्यः स्त्रियामुपसंख्यानम्" वार्त्ति० जातार्थेऽण् लुक्। १७चित्राजातायां स्त्रियां स्त्रीभिश्चैत्रनामकैः स्त्रीभिश्च सह चैत्रैः इत्येव।

**चित्राक्ष** त्रि० चित्रमक्षि यस्य बच् समा०। चित्रनेत्रयुक्ते स्त्रियां प्रित्वात् ङीप्। सा च २शारिकाख्ये विहा० १क्षत्तराष्ट्रपुत्रभेदे पु० "चित्रोपचित्रौ चित्राक्षश्चारुचित्राङ्गदश्च" भा०आ० ६७अ०।

**चित्राक्षुप** पु० नित्यक० प्रथो० द्रोणपुत्रार्थे चि०।

**चित्राङ्ग** पु० १क्षत्तराष्ट्रपुत्रभेदे। "अथोवाङ्गमहावाङ्गचित्राङ्गचित्रकुण्डलः" भा०११७अ० तत्पुत्रोक्तौ। २चित्राङ्गयुक्तभावे त्रि०। ३रक्तचित्रके ४सर्पभेदे ५चित्रके (चिते) राजनि०। चित्रमङ्गं यस्मात्। ६हरितालके ७मक्षिकायां ८हरिद्रुवे च न० राजनि०।

**चित्राङ्गद** पु० शान्तनोः सत्यवत्यां जाते पुत्रभेदे। "भीष्मः खलु पितुः प्रियचिकीर्षया सत्यवतीं मातरमदर्शयत् यामाङ्गन्धकालीमिति तस्यां पूर्व्वं कानीनो गर्भः पराशराद् द्वैपायनोऽभवत्। तस्यामेव शान्तनोरन्यौ द्वौ पुत्रौ बभूवतुः। विचित्रवीर्य्यश्चित्राङ्गदश्च तयोरप्राप्तयौवन एव चित्राङ्गदो गन्धर्वैश्च हतः विचित्रवीर्य्यस्तु राजासीत्" भा० आ० ६५अ०।

ब्रह्मपादजचित्रगुप्तादिलिखितयान्तर्गते अधोलोकविचारके २क्षत्तृभेदे च। कायस्थभेदे चित्राङ्गदसपत्नस्य "कलेर्दश सहस्राणि नागलोकेश्वरोभव। ततस्त्रिलोकनाथ स्वमिन्द्रतुल्योभविष्यसि" इति प्रति तं ब्राह्मणशापश्रुता। "तत आनन्दमनसा मतश्चित्राङ्गदश्रुतम्" इत्युक्तम् आचार निर्णयतन्त्रे। ४गन्धर्वभेदे। हरिवं० १०अ० दृश्यम्। ५अप्सरोभेदे स्त्री। "अलम्बूषा कृताची च चित्रा चित्राङ्गदा रुचिः" भा० आनु० १६०। मणिपूरेश्वरचित्रवाहनस्य कन्यायाम् २अर्जुनकलत्रभेदे च स्त्री "अभिगम्य महाबाहुरभ्यगच्छन्मणीपतिम्। मणिपूरेश्वरं राजन्! धर्म्मज्ञं चित्रवाहनम्। तस्य चित्राङ्गदा नाम दुहिता चारुदर्शना। तां ददर्श पुरे तस्मिन् विचरन्तीं यदृच्छया। दृष्ट्वा च तां वरारोहां चकमे चैत्रवाहिनीम्" भा० आ० १२५अ० "चित्राङ्गदा वरारोहानपराध्यति किञ्चन" भा० आश्व० ८१अ०

**चित्राङ्गद** क्लु स्त्री चित्राङ्गदं क्लुते क्लु-किप् तत०। सत्यवत्यां शान्तनुकलत्रभेदे राजनि०।

**चित्राटीर** पु० चित्रां नक्षत्रमटति चित्रं वा अटति अट-घा० ईरच्। १चन्द्रे २धनिष्ठाकर्षे शिवानुचरभेदे ३वह्निज्वालाङ्कितभाले च मेदि०।

**चित्रादित्य** पु० चित्रस्य चित्रगुप्तस्य आदित्यः तत्पूजितत्वात्। प्रभासतीर्थस्थे चित्रगुप्तस्थापिते आदित्यमूर्त्तिभेदे चित्रपथशब्दे दृश्यम्।

**चित्रान्न** न० नित्यकर्म्म०। चित्रौदने "दध्योदनं क्वचिद्यूषं मांसं चित्रान्नमेव च" याज्ञ० तल्लक्षणन्तु "अजाक्षीरेण संस्विन्ना यवाश्च तिलतण्डुलाः। अजाकर्षस्य रक्तेन रक्तान्नं चित्रसंज्ञितः" दीपिकोक्तम्।

**चित्रापूप** पु० नित्यकर्म्म०। पिष्टकभेदे विहा०।

**चित्रामघा** स्त्री० अघसि निघण्टुः। [ राजनि०।

**चित्रायस** न० कर्म्म० अच् समा०। तीक्ष्णलौहे (इस्पात)।

**चित्रायुध** त्रि० चित्रमायुधान्यस्य। १आश्चर्य्यायुधयुक्ते २क्षत्तराष्ट्रपुत्रभेदे पु० "चित्रायुधो निषङ्गी च पाशी दण्डधरस्तथा" भा० आ० ११७आ०। "कार्य्यं चित्रान्नराचित्रा चित्रायुधसदावहम्" भा० द्रो० २२अ०। कर्म्म०। आश्चर्य्यायुधे न० चित्रायुधैरचितम्" भा० स० १६अ०। [ चित्रलिखितपुत्तलिकादौ।

**चित्रारम्भ** पु० आरभ्यते आ+रभ कर्म्मणि घञ् ७त०।

**चित्रार्पितारम्भ** त्रि० चित्रेऽर्पित आरम्भोऽस्य। चित्रलिखिते "तच्चासनात् काननमेव सर्वं चित्रार्पितारम्भमिवावतस्थे" कुमा०।

**चित्रावसु** पु० चित्राणि विविधानि चन्द्राकर्क्षाणि वसूनि यस्यां वसु ब-पु० दीर्घः। रात्रौ "रात्रिर्वै चित्रावसुः सा चित्राणि संदधा वसतीति" शत० ब्रा० २।३।४।१२। "चित्राणि यदनचत्वादीनि" भा०। "चित्रावसो! स्वस्ति ते पारमशीय" यजु० ३।।८।

**चित्रिक** पु० चैत्रिक+पृषो०। चैत्रमासे शङ्करव्रा० चित्रा स्वार्थे क। चित्राशब्दे स्त्री।

**चित्रिन्** त्रि० चित्र-णिनि चित्र+अस्यर्थे इनि वा। १आश्चर्य्यकारके २चित्रयुक्ते च। स्त्रियां ङीप्। "अग्निश्चिद्यासि तन्तिजिरा चित्रिणीष्वा" ऋ० ४।२२।२।

"चित्रिणीषु चित्रकर्मयुक्तासु" भा०। २नायिकाभेदे स्त्री रतिमञ्जरी। "भवति रतिरसज्ञा नातिदीर्घा न खर्वा तिलकुसुम सुनासा स्निग्धदेहोत्पलाक्षी। कठिनघनकुचाढ्या सुन्दरी सा सुशीला सकलगुणविचित्रा चित्रिणी चित्रवक्त्रा। पद्मिनी चित्रिणी चैव शङ्खिनी हस्तिनी तथा। शशो मृगो हयोऽन्त्यश्च स्त्रीपुंसोर्जातिलक्षणम्। शशके पद्मिनी तुष्टा चित्रिणी रमते मृगम्। हयभे शङ्खिनी तुष्टा हस्तिनी रमते हयम्। पद्मिनी पद्मगन्धा च मीनगन्धा च चित्रिणी। शङ्खिनी क्षारगन्धा च मन्दगन्धा च हस्तिनी"।

चित्रेभ पु० ६त०। १चन्द्रे शब्दच०। २चित्रेश्वरशिवलिङ्गे न०

चित्रेश्वर न० प्रभासक्षेत्रस्थे चित्रगुप्तस्थापिते शिवलिङ्गभेदे यथा "ततो गच्छेत्प्रहादेवि! चित्रेश्वरमनुत्तमम्। धनुषां सप्तके तस्य स्थितमाग्नेयदक्षिणे। लिङ्गं महाप्रभावं हि सर्वपातकनाशनम्। तत्र चित्रेश्वरं पूज्य नरकात् न मनेद्भयम्। यत्तदस्थिगतं पापं चित्रोमार्जयति प्रिये! तस्मात् सर्वप्रयत्नेन चित्रेशं पूजयेत् सदा। तस्मात् पापयुतोवापि नरकं नैव पश्यति"।

चित्रोक्ति स्त्री चित्रा आश्चर्यकरी उक्तिः। आकाशवाण्यां क्रिका०। २चित्रकथने च।

चित्रोपला स्त्री ६त०। चित्र उपलोयस्याम्। १नदीभेदे। "चित्रोपलां चित्रपर्णां मञ्जुलाम् मञ्जुवाहिनीम्" भा० स्त्रीप० ६अ०। नदीकथने। इयं चित्रोत्पलेति पुरुषोत्तमतत्त्वे उक्ता। "नदी तत्र महापुण्या विष्णुपादविनिर्गता। चित्रोत्पलेति विख्याता सर्वपापहरा शुभा" "चित्रोत्पला महानदी" रघुनन्दनः।

चित्रौदन पु० नित्यकर्म०। क्षेत्रविशिष्टे चित्रान्ने चरुशब्दे तत्त्वदृष्टम्। "चित्रौदनञ्च क्षेत्रेभ्यः सर्वमन्नैः समन्वितं" संक्षा० त०।

चित्र्य त्रि० चित्र-कर्मणि यत्। पूज्ये "सूर्य्यमा मन्योदिवि चित्र्यं रथम्" ऋ०५।६३।७। "चित्र्यं पूज्यम्" भा०।

चिद् अव्य०। चित्+टुप्रो०। १असाकल्ये विच्छब्दार्थे। तस्य असाकल्यार्थत्वेऽपि "अथ निपाता उच्चावचेष्वर्थेषु निपतन्त्युपमार्थेऽपि" निरुक्तोक्तेः अव्ययानामनेकार्थत्वात् वा २उपमायाम्। "दधि चिदित्युपमार्थे" निरु०। ३निन्दायाम् "कुत्साप्यां चिदाङ्रेदिति कृतचिते" निरु०। "चनचिदिवगोत्रादितद्धितार्थेऽतेषु गतेः" पा० षट्स्य परेषु तिङन्तं नानुदात्तम्। देवः पचति चित् सि० कौ० "किंचित्तं च चिदुत्तरम्" पा०। "अविद्यमानपूर्वं चिदुत्तरं यत् किंचित्तं तदयुक्तं तिङन्तं नानुदात्तम्"। "विमलाग्रन्तं डतरडतमान्तकिमोरूपं किंचित्तम्" सि० कौ०।

चिदाकाश पु० न०। चिद् आकाशमिव निर्लेपत्वात् सर्व्वाधारत्वाच्च। आकाशवन्निर्लेपे शुद्धे ब्रह्मणि।

चिदात्मन् पु० चित् चैतन्यमात्मा स्वरूपमस्य। चैतन्यस्वरूपे परात्मनि प्रत्यगात्मनि परपुरुषे। "एतद्रूपं भगवतोऽरूपस्य चिदात्मनः" भाग० १।२।२६। श्लोकः

चिदाभास पु० चित आभासः प्रतिबिम्बः। बुद्धावात्म प्रतिबिम्बे जीवे "बुद्धिवृत्तिचिदाभासाविति वेदान्तका०। चित्प्रदीपशब्दे दृश्यम्। [श्चन्द्रदयालौ क्षेमच०।

चिद्रूप पु० चिदेव रूपमस्य। १आत्मनि, २स्फूर्त्तिमति च।

चिन्तन न० चिति-भावे ल्युट्। अनुध्याने "परद्रव्येष्वभिध्यानं मनसाऽनिष्टचिन्तनम्" मनुः। युच्। चिन्तायत् स्त्री।

चिन्ता स्त्री चिति-भावे अ। १अनुध्याने सा० द० उक्ते २व्यभिचारिगुणभेदे च तत्र "सदृतिचपलतास्त्रानिचिन्ता वितर्कौः" व्यभिचारिणो विभज्य "ध्यानं चिन्ता हितानाप्तेः शून्यतात्रासतापकृत्" सा० द० उक्तिः तस्याः। "चिन्ता ज्वरो मनुष्याणां वस्त्राणामातपो ज्वरः" चाणक्यम्। "चिन्तापरिमेयाञ्च प्रलयान्तानुपाश्रिताः" गीता। "धर्मक्रियात्मचिन्ता च सात्विकं गुणलक्षणम्" मनुः। ४दर्शनसंभोगभावनाभेदे रसमञ्जo।

चिन्तामणि पु० चिन्तायां सर्वकामदोमणिः ष० त०। चिन्तितार्थप्रदे मणिभेदे। "चिन्तामणीनुदारांश्च चिन्तिते सर्वकामदान्" हरिवं० १५२अ०। "सामर्थ्यं सम्पादितवाञ्छितार्थचिन्तामणिः स्यान्न कथं हनूमान्" भट्टिः। २सर्वकामदे परमेश्वरे च "आयुरारोग्यमैश्वर्यञ्च भोगांश्चैवानुषङ्गिकान्। ददाति ध्यायतां नित्यम् सर्वकामप्रदो हरिः" इत्युक्तेस्तस्य तथात्वम्। ३मन्त्रविशेषे "सकृज्जप्तानगो भौमो माग्यस्थश्च हरिस्मृतिः! चिन्तामणिसमाख्योऽयं यातुः संकल्पपूरकः" ज्यो० उक्ते ४यात्रायोगभेदे ५तुङ्गवेदे त्रिका०। ६स्वर्णमाषौ "यथा चिन्तामणिं स्पृष्ट्वा लौहं काञ्चनतां व्रजेत्"। पद्मोत्त०ख० कपिलस्पर्शप्रादुर्भूते तदीयचिन्तामणिहारकगणदैत्यनायके ७गणेशभेदे तत्कथा "गणं कृत्वा महावीर्यं चिन्तामणिस्त्वया-

ऽऽङ्कृतः चिन्तामणिरिति ख्यातं तव नाम भविष्यति। यच्चिन्तामणिं नाथ! त्वमेव स्वीकुरु प्रभो"!। "मुनिना कपिलेनासौ प्रार्थितोऽभिजिताऽपि च। मणिचिन्तामणिञ्चृत्वा गुरुभे स विनायकः। चिन्तामणिरिति ख्यातिस्ततोऽपि परमां ययौ। कपिलस्य गृहे जातः कपिलाख्यामतो ययौ" स्कं० पु० गणपतिकल्पे

**चिन्तामणिविनायक** पु० काशीस्थे गणपतिमूर्तिभेदे "चतुर्थावरणे कार्य्या भक्तविघ्नविनायकाः। दृष्ट्या दृष्टेन्दोर्मिः सप्तमयौ विनायकाः" इत्युपक्रमे "क्षेत्रस्य दक्षिणदिग्भागे चिन्तामणिविनायकः। भक्तचिन्तामणिः साक्षात् चिन्तितार्थसमर्पकः" काशी० ५० अ०।

**चिन्ताविश्मन्** न० ६त०। यन्त्रणागृहे।

**चिन्ति** पु० चिति-इन्। देवभेदे तस्य सुराष्ट्रेण सह इन्द्रे कार्त्तवीर्यवधे० पूर्वमदग्रक्रतिस्वरः चिन्तिसुराष्ट्राः।

**चिन्तिडी** स्त्री तिन्तिडी+पृषो०। तिन्तिडीवृक्षे हिङ्कोल०।

**चिन्तित** त्रि० चिति-कर्म्मणि क्त। चिन्ताकर्म्मणि "सख्या सुखं सप्तपद्यासु चिन्तितानि" हिरा०। कर्त्तरि क्त। २चिन्तायुक्ते ३तद्भावभिन्नायां स्त्रियां स्त्री। भावे क्त। ४चिन्तायाम् न०।

**चिन्तिति** स्त्री० चिति-क्तिन् वा० दट् चिनोतेश्च। चिन्तायाम् [तिका०। अमरटी०।

**चिन्तिया** स्त्री० चिन्ता+स्वार्थे या० ष। चिन्तायां

**चिन्त्य** त्रि० चिति-कर्म्मणि यत्। चिन्तनीये "जीवे जीवे च भावेषु चिन्त्योऽसि भगवन्! मया" गीता। "यं हि सर्वधर्म्माणां धर्म्मं चिन्तयतोऽमतः" भा०आनु० ४४अ०।

**चिन्त्यद्योत** पु० चिन्त्यः द्योतते द्युत-अच्। देवभेदे। "गणा देवानामृभवः सोमपाश्च लोकाः सुधामास्तुषिता अकल्पाः। याभाधुरा गन्धर्वा इडिपाश्च ताश्च विद्धाश्च मनोविदश्च। सुखाश्च निर्माणरताश्च देवाः स्वर्भानवा दर्शमा याज्ञियाश्च। चिन्त्यद्योता ये च देवेषु सख्याते चाध्यात्मादेवताराजभीड्याः। सुपर्णगन्धर्वपिशाचदानवा यक्षास्तथाचारणपन्नगाश्च" भा०अनु०१अ०।

**चिपिट** पु० चि-पिटच् किच्च। (चिड़ा) ख्याते क्षुद्रजे क्षेमच०। तत्प्रकारप्रकारादि भावप्र० उक्तं यथा "शालयः सतुषा यावद्भ्रष्टा अस्फुटितास्ततः। कृष्टिताविपिटाः प्रोक्तास्ते खलाः पृथुका अपि। शालयो यवनालाद्याविपिटा पृथिवर्द्धनाः"। अस्य भक्ष्याभक्ष्यत्वं यथा "हि: शिग्रुमद्यं पृथुकं गुडं देयमेवंप्रकारे। नाग्नमांसं विप्राणां भोजने च निवेदने। अभक्ष्यं तत् यतीनाञ्च विधवाब्रह्मचारिणाम्" ब्रह्मवै० पु०। "नासिकाया नते दनच् पिटच् किरुचि च" पा० वार्त्ति० पिटच् प्रकृतेश्चिः। २नतनासिकायां (चांदा) स्त्रियां ङीप् (चेपटा) ३ख्याते पदार्थे "करतलपीडनचिपिटीकृतबदरपुटेन" काद०। "उन्नतो भांसलोऽङ्गुष्ठो वर्त्तुलोऽतुलभोगदः। वक्रोऽल्पश्च चिपिटः सुखसौभाग्यमङ्गकः। चिपिटीभिर्भवेद्धानी" इति काशी० ख० ३७। "भाले अङ्गुष्ठानिपीडनेन ५नेत्रसाकुलतायाम्। "अस्ति द्विचन्द्रसतिरस्कि ललाटे नेत्रं स्थानी हलकचिपिटीकरणादिरादिः" नैष०। "ललाटचिपिटीकरणं नेत्रस्याकुलीकरणम्" मल्लि०। अङ्गुष्ठा हि नेत्रप्राणनिपीडने एकपदार्थस्य द्विधा भावं लोकप्रसिद्धम्। ६गुरुष्ठाशिनीवृक्षे स्त्री राजनि०। पृषो० चिपटोऽपि पृथुके हेमच०। स्वार्थे क। चिपिटक पृथुके अमरः।

**चिपिटनासिक** पु० चिपिटा नासिका यत्। १देवभेदे च च देवाः "ऊरुतः कैलासाः" इत्युपक्रमे "क्रोधैरचिपिट नासिकदासेरकवाटधामाः" इ०स० १४०अ० कूर्म्मविभागे उत्तरखण्डस्थाः। सोऽग्निजनोऽस्य वधः तद्राजाधो वा वक्तव्ये लुक्। २तद्देशवासिषु ३तद्भेदेषु च ब० व०।

**चिपुट** पु० चिपिट+पृषो०। पृथुके अमरः।

**चिप्प** पु० "नखसंसर्गजिघांसायां वातेन" च देशीनाम। करोति दाहपाकौ च तं व्याधिं चिप्पिकादिशेत्" भाव० उक्ते नखरोगभेदे। (अकुल खाड़ा)

**चि(ल्लि)प्पिका** पु० रात्रिचरजन्तुभेदे "लोभाशिकाचिल्लिका चि(ल्लि)प्पिकाख्यौ वल्गुल्युलूकौ शमकश्च रात्रौ" ह० स० ८८अ०। "सर्वे खलोलूकमचारिणः खुटैश्च नर्णाय कपालदा वा" तस्य दिवाचारेऽनिष्टफलसूचकम् "नानाविधानि विचरन्ति हि चि(ल्लि)प्पिकायाकाशाः शुभः कुलुकुलु न शुभास्तु श्रेयः" ह० स० ८८अ०।

**चिप्प** पु० खनुतोक्ते ऋषिभेदे ऋषिशब्दे दृश्यम्।

**चिमि** पु० चि-बा० मिक्। १मुकुलने अमरटीका०। २पटुकञ्चुके (पाटशाक) शब्दमाला। स्वार्थे क ततार्थे।

**चिर** न० चि-रक्। १दीर्घकाले २तद्वति नि पदार्थे त्रि०। लघादौ (ls) त्रिजले गणे शब्दार्थचि० "दीर्घसूत्री चिरक्रियः" अमरः। चिरजीवी चिरकारी चिरकालादि।

**चिरकारिन्** त्रि० चिरेण करोति कृ-णिनि। १चिरेण कर्म कर्त्तरि दीर्घसूत्रे। २गौतमस्य पुत्रभेदे पु०।

"चिरकारी महाप्राज्ञो गौतमस्त्वभवत् सुतः। चिरेण सर्वकार्याणि विहन्त्यार्यान् प्रपद्यते। चिरं सञ्चिनयन्नर्थांश्चिरं जायत् चिरं स्वपन्। चिरं कार्याभिपत्तिञ्च चिरकारी तपोच्यते" भा० शा० २६७अ०। तस्य चिरकारितायाः फलं तत्राध्याये वक्ष्यते। स्वार्थे क, चिरःकारः क्रियाऽस्त्रस्य उन् वा। चिरकारिकोऽप्यत्र तत्रैवोदा०

चिरकाल पु० कर्म०। दीर्घकाले। [क्रियाकारके अमरः।

चिरक्रिय त्रि० चिरा क्रिया यस्य। दीर्घसूत्रे विलम्बेन

चिरजात त्रि० चिरं दीर्घकालं जातः। दीर्घकालजाते। इन्द्रद्युम्नशब्दे ६४५४० उक्ते भा० व० वाक्ये उदा०

चिरजीवक पु० चिरं जीवति जीव-ण्वुल्। १जीवकवृक्षे। जटाधरः। २चिरजीवनयुते त्रि०

चिरजीविका स्त्री कर्म०। दीर्घकालवृत्तौ "दृष्टीश्च वित्तं चिरजीविकाञ्च कठ० उ०

चिरजीविन् त्रि० चिरं जीवति जीव-णिनि। १दीर्घकालजीवनयुक्ते २विष्णौ ३काके च पु० मेदि० ४जीवकवृक्षे ५प्रजालक्षलिङ्गे पु० राजनि०। ६मार्कण्डेये "अश्वत्थामा बलिर्व्यासो हनुमांश्च विभीषणः। कृपः परशुरामश्च सप्तैते चिरजीविनः" ति० त० उक्तेषु ७अश्वत्थामादिषु "चिरजीवी यथा त्वं भोः" ति० त०। मार्कण्डेयपूजामन्त्रः। अयं राज्ञोऽभूवैव वृक्षस्य चिरजीविनः" (दशरथस्य) रामा० अयो० १।३६। श्लोकः। [दार्घे।

चिरञ्जीविन् पु० चिरं जीवति जीव-णिनि। चिरजीविपक्षिभेदे

चिरघटी स्त्री चिरेण घटति पिण्डग्रहात् भर्त्रगेहम् घट-अच् ङीष्। १यौवनवत्यां पितृगेहस्थायां स्त्रियाम्। अमरः २युवत्यां रुद्रः। [शब्दरत्ना०।

चिरतिक्त पु० चिरतिक्तो रसो यत्र। (चिरायता) भूनिम्बे

चिरत्न त्रि० चिरे भवः चिर+त्न। चिरन्तने पुरातने जटा०।

चिरन्तन त्रि० चिरम्+भवार्थे ख्युन् तुट् च। पुरातने अमरः। "स्वङ्गस्तदन्ते सुनिभासने सुनिचिरन्तनसावटभिन्यवीविशत्" माघः। स्त्रियां ङीप्।

चिरपाकिन् पु० चिरेण पाकोऽस्त्रस्य दुर्जरत्वात् इनि। कपित्थे राजनि०।

चिरपुष्प पु० चिराणि पुष्पाण्यस्य। बकुलवृक्षे राजनि०।

चिरम् अव्य० चि-बा० रमक्। बहुकालार्थे हेम०। "चिरं चकोरस्य भवन्मुखस्य श्री" नैष०। "ततः प्रजानां चिरमात्मना धृताम्"। "विलम्बभावे चिरमस्य तस्थुषः" रघुः। एषु क्रियाविशेषणत्वात् चिरशब्दात् द्वितीयेत्यपि भवितुमर्हति। चिरन्तनः चिरञ्जीवन इत्यादौ वात्र उदा०

चिरभीचिन् पु० चिरेण भेक्षति भिक्ष-णिनि। दीर्घकालेन प्रस्थापकारिणि गर्हायां क्षेमच०।

चिरभृष्ट पुंस्त्री० चिरं भृष्यति भृज-क्त। चिल्लिकायां। तस्य दीर्घकालराशत्वात्वम्।

चिरराव न० चिरा रात्रिः योगविभागात् कच् समा०। दीर्घकाले "चिरराबोषिता क्षेत्रे ब्राह्मणस्य निवेशने" भा० आ० १६८अ०। "चिरराबेऽपि तं कर्म तद्भवान् कर्तुमर्हति" भा० उ० ६३अ०।

चिरराबाय अव्य० चिररात्रमयते अय-अण् उप० स०। दीर्घकाले। "हविर्यद्धि चिरराबाय तद्दानन्याय कल्पते" मनुः "शक्यते दुस्त्यजोऽर्थो चिरराबाय जीवितम्" भा० व० १३१अ०।

चिरलोक पु० चिरः चिरकालस्थायी लोकोयेषाम्। प्राग्पपितृलोकेषु पितृषु "स एकः पितृणां चिरलोकलोकानामानन्दः" तैत्ति० उ०। "चिरकालस्थायी लोको येषां पितृणां चिरलोकाः पितरः" भा०।

चिरविल्व पु० चिरं विलति विल-भेदने व। करञ्जवृक्षे अमरः। "चिरविल्वयुतं पुण्यं पनसार्जुनसंकुलम्। भा० श० ५५अ०। [अमरः। स्वार्थे क अत्रार्थे

चिरसूता स्त्री चिरं सूता। बहुकालप्रसवत्वात् गवादौ।

चिरस्थ त्रि० चिरं तिष्ठति स्था-क। १चिरस्थायिनि २नाटके पु० त्रिका०। स्था-णिनि। चिरस्थायिन् दीर्घकालस्थायिनि त्रि० स्त्रियां ङीप्।

चिरस्य अव्य० चिरमस्यते अस-यत् यक०। दीर्घकाले। अमरः। "चिरस्य दृष्टेव सतोत्थितेव" कुमा०।

चिराटिका स्त्री चिरमटति अट-ण्वुल् कापि अतइत्त्वम्। १तपुनर्नवायां रत्नमा०। २चटिकालतायाञ्च (पातादी) वैद्यकम्। "गोमूत्रगुडस्य पुरातनस्य यद्वायसस्यानि चिराटिकायाः" वैद्यकम्।

चिरात् अव्य० चिरमतति अत-किप्। १दीर्घकाले, "चिराहारैः समागतम्" रामा० ४।२७।१७। "तस्य चिरान्मृतापत्येन शुगकार्षी निवर्हतः" हितो०। २गरुडे पु० त्रिका०। ३चिरतिक्ते (चिरायते) शब्दर०।

चिराय अव्य० चिरमयते अर्च-अण्। चिरकाले दीर्घकाले। "चिराय यदि ते सौम्य! चिरमस्मि न दुःखितः" भा० आ० २६७अ०। "चिराय नाम्नः प्रथमाभिधेयं

ताम्"। "अभीष्टमासाद्य चिराय कालः" माघः।
चिरायुस् पु०चिरमायुर्यस्य। १देवे। २चिरञ्जीविनि त्रि० त्रिका० "लब्धदौर्हृदा च धीर्यत्वं चिरायुषं च पुत्रं जनयति" सुश्रुतः। [अचिरायीत्। वैदिकोऽयम्।
चिरि चिरे स्वादि० पर० सक० सेट्। चिरिणोति
चिरि पु० चि-बा० रिक्। शुकखगे त्रिका०। स्वार्थे क। तत्रार्थे हेमच०।
चिरिण्टी स्त्री चिरण्टी+पृषो०। खदाखिन्यां पितृगेहस्थायां कन्यायाम् अमरे रिमध्यपाठान्तरम्।
चिरिविल्व पु० चिरविल्व+पृषो०। करञ्जकट्वे भावप्र०।
चिरु न० चीयते चि-बा० रुक्। बालसन्तौ शब्दच०।
चिरे अव्य० चिरमेति इ-विच्। दीर्घकाले। "चिराय चिररात्राय चिरस्याद्याचिरार्थकाः" अमरटीकायाम् आद्यशब्देन चिरे चिरेण चिरात् इति व्याख्याने" भानुजदीक्षितः।
चिरेण अव्य० चिर+बा० एनप्। दीर्घकाले "निद्रां चिरेण नयनाभिसुखो बभूव" रघुः। "चिरेण मित्रं बध्नीयात् चिरेण च कृतं त्यजेत्। चिरेण च कृतं मित्रं चिरं धारयमर्कटि" भा० शा० २६७अ०। [क्षेम०।
चिर्भटी स्त्री चिरेण भटति भट-अच् गौ०ङीष् पृषो०। कर्कट्याम्
चिर्भिट पु० चिर्भटी+पृषो०। १कर्कटीभेदे गोरक्षकर्कटयाम् (गोमुख) राजनि०। क्ले न० "चिर्भिटं मधुरं रूक्षं गुरु पित्तकफापहम्। अल्पास्थि पाकि विष्टम्भि पक्वं तत्त्वम्ल पित्तलम्" भावप्र० तत्फलगुणोक्तिः। [चिचेल।
चिल वासे आच्छादने तु०पर०अक० सेट्। चिलति अचैलीत्।
चिल(लि)मीलिका स्त्री चिरं मिलति मीलति वा खुल्। स्वनः १करटीभेदे २खद्योते ३विद्युति च मेदि०।
चिलिचिम पु० चिल-इन् चिलिं वासं चिनोति चि-मक्। (जेलेगुड़गुडिया) मत्स्यभेदे अमरः। अस्य पृषो० चिलिचोम चिलीचिम चिलीचिमि चिलीचीम चेलिचोम चेलिम चिल्लिम चिलीचीमि इति रूपान्तराणि। (चेङ्ग) ख्याते मत्स्ये भरतः।
चिलमीनक पु० चिल-क कर्म० संज्ञायां कन्। (जेङ्गो) मत्स्ये भरतः। [अचिल्लीत्। चिचिल्ल।
चिल्ल वैचित्ल्ये भावत्वतौ च भ्वा० पर० अक० सेट्। चिल्लति
चिल्ल पु० चिल्ल-अच्। १पक्षिभेदे (चिल) अमरः। क्लिन्न+पृषो०। २क्लिन्ने त्रि० मेदि०।
चिल्लक पुंस्त्री चिल्ल इव कायति शब्दायते कै-क। झिल्लिकायां शब्दरत्ना० चिल्ल+स्वार्थे क चिल्लशब्दार्थे पु०। "खरोष्ट्रमहिषा व्याघ्रा। सिंहा ऋक्षरचिल्लकाः" भा० द्रो० अ०।
चिल्लभक्षा स्त्री इत०। रुद्रजटायां शब्दच०।
चिल्लाभ पु० चिल्ल इव प्रसन्नहारित्वादाभाति आ+भा-क। मन्थिभेदके चौरे त्रिका०।
चिल्लि पु० चिल्ल-इन्। भ्रूमध्ये शब्दार्थचि०। स्वार्थे क तत्रार्थे। "ललितचरकेतनशरासनानतां चिल्लिकाल ताम्" काद०
चिल्ली स्त्री चिल्ल-बा० ङी। क्षुद्रवास्तुकशाके राजनि०। "तण्डुलीयकोपोदकाम्लवेतसचिल्लीपालङ्क्यावास्तूकप्रभृतीनि। क्षुद्रं मूत्रपुरीषाणि सक्षारमधुराणि च। मन्दवातकफान्याहुः रक्तपित्तहराणि च। कटुर्विपाके क्रमिहृन्मेधाग्निबलवर्द्धनः। सक्षारः सर्वदोषघ्नो वास्तूको रोचकः सरः। चिल्ली वास्तूकवत् ज्ञेया पाकाम्ला तण्डुलीयवत्" सुश्रु०। २झिल्लिकायां शब्दर०। स्वार्थे क। चिल्लिकाप्यत्र।
चिवि स्त्री चीव-इण् पृषो०। शिवुके जटाधरः।
चिविट पु० चिपिट+पृषो०। चिपिटे त्रिका०।
चिविल्लिका स्त्री रक्तदलायां क्षुद्रक्षुपभेदे राजनि०।
चिवु(क) न० चीव-संवरणे उ पृषो० ह्रस्वः। ओष्ठाधोभागे अमरः। "वक्त्रं तालूदरं शीर्षं चिबुके गलशुण्डिके" यादव०। स्वार्थे क तत्रैवार्थे। २सुचकुन्दवृक्षे पु० राजनि०।
चिश्रा अव्य० इषुशब्दविशेषानुकरणे। "चिश्रा क्षणोति समनावमत्यं" ऋ० ६।७५।५। चिश्रेति शब्दानुकरणे इषुपक्षियमाणेषुधिचिश्रेशब्दं करोति" भा०।
चिक्कण त्रि० चिक्कण+पृषो०। चिक्कणे "आदिचिक्कणादीनाम्" पा० अस्य क्लीवकव्यशब्दे परे आद्युदात्तता। चिक्कणकव्यम् सि० कौ०।
चिक्कणादि पु० क्लीवकव्यशब्दे परे आद्युदात्तज्ञापनिमित्ते शब्दगणे स च गणः पा० म० स्तूपे उक्तो यथा "चिक्कण मड्डर मड्डुर वेतुल पटत्क वैडालिकर्ण वैडालिकर्षि कुक्कुट चिक्कण चिक्कण चिक्कणादिः।
चिक्कुर पु० चिक्कर+पृषो०। चिक्करे शब्दार्थचिन्तामणिः।
चिक्क लक्षणे अ० चु० उभ०सक० सेट्। चिक्कयति ते अचिचिक्कत् त। सौत्रोऽयमिति दुर्गाः।
चिक्क न० चिक्क-अच्, चक्क-न, उपधाया ह्रस्वत्वम् वा।

लघादिके (ड) १लिङ्गे गणे शब्दार्थचि० । २लक्षणे च "चक्रे प्रजाः स्वाः सनिमेषचिह्नाः" "स्वनामचिह्नं निच-खान सायकम्" रघुः ।

**चिह्नकारिन्** त्रि० चिह्नं करोति कृ-णिनि । १चिह्नकर्तरि २चोरदर्शने विशः स्त्रियां ङीप् ।

**चिह्नधारिन्** त्रि० चिह्नं धारयति धारि-णिनि । १चिह्न-युक्ते स्त्रियां ङीप् सा च २शङ्खमालतायां शब्दच० ।

**चिह्नित** त्रि० चिह्न-कर्मणि क्त । १अङ्किते २लाञ्छिते । "दिवा चरेयुः कार्यार्थं चिह्नितास्तु राजशासनैः" मनुः ।

**चिह्न** पु० चिह्न+पृषो० (गान्धारी) पर्वतप्रसिद्धे वृक्षभेदे शब्दार्थचि० । स्वार्थे क । वृत्तार्थे "चिह्नकोषातकि-डारी शोभनोभानुपत्रिका । आम्बेयी चिह्नवृक्षस्य फलं मधुरनिष्पुटम्" भावप्र० ।

**चीक** अर्शसि वा चु० उभ० पक्षे भ्वा० पर० सक०सेट् । चीकयति ते चीकति अचीचिकत् त अचीकीत् ।

**चीचीकुटि** अव्य० शारिकादिशब्दानुकरणे "चीचीकूटीति वाचस्ते सारिका इव्यिवेश्मसु" भा० मौ० २अ० । "चीचीकूटीति वाचस्ते त्वामद्य न वदोमि किम्" हरिव० २०अ० । [राजनि० ।

**चीडा** स्त्री चिड-पृषो० । खनामख्याते गन्धद्रव्ये ।

**चीन** पु० चि-नक् पृषो०दीर्घः । "काश्मीरं त समारभ्य कामरूपान्तु पश्चिमे । मोटान्तदेशोदेविषि । मानसेशाच्च दक्षिणे । मानसेशाद्दक्षपूर्वे चीनदेशः प्रकीर्तितः" भक्ति सङ्गमतन्त्रोक्ते १देशभेदे । सोऽभिजनोऽस्य अण् तद्राजा-णो वा वञ्छे लुक् । २तद्देशवासिषु तच्छब्देषु च ब० व० । "वाजिनां च सहस्राणि चीनदेशोद्भवानि च" भा० उ० २७अ० । अत्रत्य देशः ङ० सं० १४अ० कूर्मविभागे ऐशान्यांशजः । ऐशान्यामित्यपक्षे "वङ्गराजकिरात चीनकौलिन्दाः" "यवनाचीनकाम्बोजा दारुणा-श्चेच्छजातयः" भा० भी० ८अ० जनपदोक्तौ । तद्देश स्थाच्च क्रियालोपात् शनैर्ह्रस्वत्वं गताः यथाह भट्टः "शनकैस्तु क्रियालोपादिमाः क्षत्रियजातयः । वृषलत्वं गता लोके ब्राह्मणादर्शनेन च । पौण्ड्रकाश्चोड्रद्रविडाः काम्बोजाः यवनाः शकाः । पारदाः पह्लवाचीनाः किरा-ताहरदाः खशाः" । ४तद्देशजे वस्त्रभेदे च "कालीटीचीन चीनक्षतवसनदशान्दोलनस्यन्दमन्दः" उद्भटः । ५व्रीहिभेदे शब्दरत्नावल्यां ५२३पृ०३कल्पे । "चीनकः कङ्गुभेदो-ऽस्ति स चेयः कङ्गुवद्गुणैः" भावप्र० । ६रूप्ये ७लवणभेदे च मेदि० । ८पलाण्डौ न० त्रिका० । ९चीनदेशे न० रत्न-माला तन्त्रोक्ते १०तद्देशवासिजनानामाचारभेदे पु० । पृथो० अस्य बहुत्वमपि यदन्ति । ११चीनकर्पूरे राजनि० ।

**चीनकर्पूर** पु० चीनोपपदः कर्पूरः । कर्पूरभेदे राजनि० ।

**चीनज** न० चीने तद्देशे जायते जन-ड । १चीनजातौषधे राजनि० । २चीनजातमात्रे त्रि० ।

**चीनपिष्ट** न० चीनस्य सीसकस्य पिष्टं चूर्णं इव० । (चीनेर सिन्दुर) १सिन्दूरभेदे हेमच० । चीनं पिष्ट-मिव । २सीसके राजनि० ।

**चीनवङ्ग** न० चीनभवं वङ्गम् । सीसके राजनि० ।

**चीनांशुक** न० कर्म० । चीनाख्ये पट्टवस्त्रभेदे "चीनांशु-कमेतुलाग्रम्" कुमा० । "चीनांशुकमिव केतोः प्रतिवातलीनम्" शकुं० ।

**चीनाक** पु० चीनं तदाकार म अति अक-अण् । (चीनिया) कर्पूरभेदे । "चीनाकसंज्ञः कर्पूरःकफवातकरः स्मृतः । कृष्णश्चिविलकरस्तथा सिन्दूरसम एव च" भावप्र० ।

**चीनार्कर्कटी** स्त्री चीनमिव स्वादुः कर्कटी पृषो० दीर्घः । १राजकर्कट्यां चिल्लूटाख्यकर्कटीभेदे राजनि० ।

**चीभ** अर्शसां भ्वा०आत्म० सक० सेट् । चीभते अचीभिष्ट । चिचीभे क्वचित् अचिचीभत् त ।

**चीर** न० चि-करन् दीर्घश्च । १वस्त्रखण्डे भेदि० । (कानि) "चीराणि किं पथि न सन्ति दिशन्ति भिक्षाम्" भा-निग० । २वल्कले च अमरः । ३लोध्रे ४वस्त्रभेदे ५रेखा लक्षणभेदे मेदि० । ६वस्त्रमात्रे ७चूडायां ८सीसके हेमच० । ९लिपिभेदे १०वल्कले च शब्दार्थचि० "तं कदा-चित् तपस्यन्तमार्द्रचीरजटाधरम्" भा० व० १८७अ० । "केशचीरपरिच्छदाः" कुमा० । [स्वार्थे क । चीरशब्दार्थे

**चीरक** न० चीर+संज्ञायां कन् । विचारलेखने विशः ।

**चीरपत्रिका** स्त्री चीरमिव पत्रमस्याः कप् यत इत्वम् । चञ्चुशाके राजनि० ।

**चीरपर्ण** पु० चीरमिव पर्णमस्य । भावटवृक्षे राजनि० ।

**चीरनिवसन** पु० चीरं निवसनं वस्त्रं यस्य । "ऐशान्या-मित्यपक्षे "चीरवचीरनिवसनजिनवेलवल्कलाजिनवासाः" भ० सं० १४ अ० १देशभेदे २तद्देशवासिषु शतृ ऐषु ब० व० । ३चीरधारिणि त्रि० [कपिशाः" भट्टः ।

**चीरवि** पु० । पक्षिभेदे "धारयेदपि चिल्लाय चापचीरवि

**चीरि** स्त्री चि-रा० कि दीर्घश्च । १नेत्रांशुके शब्दरत्ना० । २शिल्पिकायां इक्षुयष्टिकायां शब्दार्थचि०

चोरिका स्त्री चोरीति कायति कै–क। भिक्षिकायां हेमच०।

चोरिणी स्त्री वैवस्वतमनोस्तपस्यास्थानसमीपस्थे बदरीवेष्टस्थे नदीभेदे। "ऊर्द्ध बाहुर्विशालायां बदर्यां स (वैवस्वतः) नदाधिपः। इत्युपक्रमे "तं कदाचित् तपस्यन्तमाईचीर जटाधरम्। चीरिणीतीरमागम्य मत्स्यो वचनमब्रवीत्" भा० व० १८७अ०। [पालङ्कप्रशाके भावप्र०।

चोरितच्छदा स्त्री चोरवदाचरितः छदो दलं यस्याः।

चोरीवाक पु० चोरीतिशब्दोवाकः वाचकोऽस्य। कीटभेदे "चोरिवाकस्तु लवणं बलाका शकुनिर्दधि" मनुना लवणहरणकर्म्मविपाके तद्योनिरुक्ता" "स्त्रियो वस्त्रं स्त्रा रक्षन्तु चोरी लवणहारकः" याज्ञ० ऐक्यवाक्यात् अस्य चोरीसमानधर्मकताऽवसेया।

चोरुक स्त्री चोरि–रौति–रुगन्दे वा० क। १भिल्लिकायां शब्दार्थचि०। सा साडगेप्रनास्यस्य अच्। २फल-प्रधानवृक्षभेदे न०।

चोर्ण त्रि० चर नक् पृषो० अत इत्वम्। १क्षते २शीर्णिते, ३खण्डिते "चोर्णव्रतानपि सदा क्षतघ्नसंज्ञितानिमान्" याज्ञ०। ४विदारिते च। [स्वक्षे च मेदि०।

चोर्णपर्ण त्रि० चोर्णं विदारितं पर्णमस्य। १खर्जूरवृक्षे २नि-

चोलिका स्त्री चीति शब्दं लाति ला–क टापि अत इत्वम् चोरिका+रस्य लोवा। भिल्लिकायां शब्दरत्ना०।

चोल्लक पु०चीदिति शब्दं लक्षति लक्ष–अच् पृषो०। भिल्लि-कायां शब्दर०।

चोव यत्नणे संहतौ च भ्वा० उभ० सक० सेट्। चोवति ते अचीचोवीत् अचोविष्ट। चिचोव चिचोवे अदित्। अंचि-चोवत् त।

चोय दीप्तौ चुरा०उभ०सक०सेट्। चोवयति ते अचीचिवत् त

चोवर न० चि–वरच् नि० दीर्घः चीव–अच् वा। भिक्षु प्रावरणे उज्ज्वलद० "कौपिनाच्छादनं यावत्तावदिच्छेच्च चीवरम्" भा० आ० ६१अ०। "प्रेतचीवरवसा स्वनो-यया" रघुः। "पुच्छभाण्डचीवराण्डिङ्" पा० चीव-रादर्जने परिधाने च" वार्त्ति० चीवराणि अर्जयति परिधत्ते वा संचीवरयते भिक्षुः क्विप् को०। [त्रिका०।

चोवरिन् पु० चीवरमस्त्यस्य इनि। १भिक्षुके बुद्धभिक्षुके

चुक्क पीड़ने चु० उभ०सक० सेट्। चुक्कयति ते अचुचुक्कत् त।

चुक्कार पु० चुक्क–भावे–अच् चुक्कं पीड़नमाराति ददाति आ+रा–क। सिंहनादे त्रिका०।

चुक्क न० चक-रक् अत उत्वञ्च। १अम्लरसे २अम्लवेतसे पु० विश्वः २शाकभेदे, (चुकापालङ्क) ३शुक्लभेदे च शब्दार्थचि०। "चुक्रमम्लरसण्यञ्च दीपनं पाचनं परम्। शूलगुल्मविबन्धामवातश्लेष्महरम् परम्। वह्निदण्डाख्यवैरस्यकृत् पीड़ावह्निमान्द्यकृत्" भावप्र०। ४काञ्जिकभेदे। ६रसाम्ले ७अम्लवानविशेषे शब्दार्थचि० "यन्म्लस्वादि शुचौ भाण्डे सगुड़ं चौद्रकाञ्जिकम्। धान्यराशौ चिरात्स्थं शुक्लं चुक्रं तदुच्यते। द्विगुणं गुड़पक्वारनालमम्लचुक्रमादिशेत्" वैद्यकपरिभाषा। ततः डड़ा भावे इमनिच्। चुक्रिमन् अम्लत्वे पु०। स्वार्थे क संज्ञायां वा कन्। चुक्रक तत्रार्थे। (चुकपालङ्क) शाके न०।

चुक्रफल न० चुक्रं फलति फल–अच्। इक्षाम्ले राजनि०।

चुक्रवास्तुक न० चुक्रं वास्तुकमिव। (चुकपालङ्क) शाकभेदे राजनि०। [राजनि०।

चुक्रविधक न० चुक्रमिव विध्यति विध–ण्वुल्। काञ्जिकभेदे

चुक्रा स्त्री चक-रक् अत उत्वम्। १चाङ्गेर्याम् (आमरुल) भेदि०। २तिन्तिड्यां शब्दर०। स्वार्थे क चुक्रिका। अम्ल लोणिकायाम् (आमरुल) अमरः।

चुक्राम्ल न० चुक्रमिवाम्लम्। १इक्षाम्ले (चुकापालङ्क) २शाके ३अम्ललोणिकायां (आमरुल) स्त्री राजनि०।

चुक्री स्त्री चुक्र+गौरा० ङीष्। चाङ्गेर्याम् "चुक्री लघ्व-तरा स्वादी वातघ्नी कफपित्तकृत्। रूक्षा लघुतरा पाके ह्लनाकेनातिरोचनी" भावप्र०।

चुच्चा स्त्री चच वधे वा० स पृषो०। १हिंसायां चुच्चा गोलमस्त्रा० ष। चौच्च हिंसागीते त्रि०। "शिलाकीर्णं स्वयं शुभ्रं नीलाञ्जनसमोदकम्। लताविताननंसञ्छन्नं चौच्च(ख्ड)खण्डमित्यभिधीयते। अश्मादिभिरख-ण्डं यत् चु(ख्ड)चेति च परे जगुः। तल्लघुसदकं चौ-(ख्ड)च्चं मुनिभिःसमुदाहृतम्" भावप्र० लघु जलाधारभेदे। सुश्रुतेन तज्जलस्य चौरष्टसंज्ञोक्ता अचौ-चसलिलचालित योनिम्" इति सुश्रुते निदानस्थाने चोचेति पाठास्तु लिपिकरप्रमादकृतः भावप्र० बङ्गीय पुस्तकेषु चौखण्डमिति पाठः युक्तएव त्रिकाण्डे चुच्चा-शब्दस्य उपकूपजलाशयार्थकत्वात् तल्लघुजलस्यैव चौखण्ड-संज्ञौचित्यात्

चुचु(चू)क पु० न० चुचु इत्यव्यक्तशब्दं कायति यीयमानं कै–क। १कुचस्थाग्रे अमरः तत्र चूचुकमिति। दीर्घ-

दयमिति भरतः पृथो०। २दक्षिणदेशभेदे २तद्देशवासिषु "गुर्जराः पुलिन्दाः शबराश्चुचुका मद्रकैः सह" भा० भी० २०७अ०। [(सुपुणि) त्रिका०।

चुच्चू पु० चु० चूचू बा० उ पृथो०। स्तनिपस्यके शाकभेदे

चुचुपा पु० १देशभेदे २तद्देशवासिषु ब० व०। अन्ध्रपुलिन्दचुचुपा रेणुपास्तथा" भा० उ० ११८अ०।

चुचुक पु० चुच्+कुक+पृषो०। कुचाग्रे "चुचुको ना कुचस्याग्रमिति रत्नकोषात् पुंस्त्वम्।

चु(चू)च्यू पु० शाकभेदे। "चुच्चूपतिका तरुणीजीवन्ती विम्बीतिकानन्दीभल्लातकच्छगलान्त्री स दक्षादनीफल्गुशालमलीशेलु वनस्पतिप्रसवशणकर्कुटारकोविदार प्रभृतीनि। कषायस्वादुतिक्तानि रक्तपित्तहराणि च। कफघ्नान्यनिलं कृम्युं संग्राहीणि लघूनि च। त्रयः पाके च जन्तुघ्नः पित्तिलोष्णगिनां हितः। कषाय मधुरो याही चु(च्यू)च्यूस्तेषां त्रिदोषहा। "सतीनोवास्तुक चुच्चु(च्यु)चिल्लीमूलकपोतिकाः। मण्डूकपर्णी जीवन्ती शाकवर्गे प्रशस्यते" सुश्रु०। "चुच्चू(च्यू) प्रभृतीनां नोष्णासवः" सुश्रुते तस्यानुपानसङ्गम्।

चुच्य स्नाने मन्थने पीड़ने सुरादिसन्धाने च भ्वा० पर० सक० चुच्यति अचुच्यीत् इदित् चुक्नः।

चुञ्चु पु० १छन्दस्यां हारा०। "चुञ्चुर्मद्गुश्च वैदेह वन्दिस्त्रियोर्ब्राह्मणेन जातौ बौधायनोक्ते २सङ्कीर्णजातिभेदे। "मेदान्ध्रचुञ्चुमद्गूनामारण्यपशुहिंसनम्" मनुना तद्वृत्तिरुक्ता। [तत्रार्थे हारा०।

चुञ्चुरी(त्री) स्त्री तिन्तिडीबीजदात्रे त्रिका०। वा रस्य लः

चुञ्चुल पु० गोत्रप्रवर्तके विश्वामित्रपुत्रभेदे "औदुम्बरान्धभिख्याताम्तारकावणचुञ्चुलाः" हरिव०२७अ०।

चुट अल्पीभावे भ्वा० पर० अक० सेट्। चोटति अचोटीत् चुचोट। [टीत्। चुचुटतुः।

चुट अल्पीभावे भ्वा० पर० अक० सेट् इदित्। चुटति अचुटीत्।

चुट छेदने चुरा० उभ० सक० सेट् इदित्। चुटयति-ते अचूचुटत्-त।

चुट छेदने वा चु० उभ० पक्षे तुदा० कुटा० पर० सक० सेट्। चोटयति-ते अचूचुटत्-त पक्षे चुटति अचुटीत् चुचोट।

चुट्ट अल्पीभावे चुरा० उभ० अक० सेट्। चुट्टयति-ते अचुचुट्टत्-त। [अचुचुटत्-त।

चुड छेदने चुरा० उभ० सक० सेट् इदित्। चुण्डयति-ते अचुण्डीत्।

चुड अल्पीभावे भ्वा० पर० अक० सेट् इदित्। चुण्डति अचुण्डीत्।

चुड्ड(ट्ट) क्रीडे च भ्वा० पर० सक० सेट्। चुड्डति अचुड्डीत्। क्विपि दीर्घस्य चुट् डीर्घस्य चुड्

चुण छेदने तु० कु० पर० सक० सेट्। चुणति अचुणीत् चुचोण।

चुण्डा स्त्री चुड्+अच्+टाप्। कूपे त्रिका०। गौरा० ङीप्। उपकूपस्थजलाशये। तत्र भवः अण्। चौण्ड तत्स्थजले सुश्रुतः। चुचाशब्दे ऽस्यार्थः।

चुत चरणे भ्वा० प० अक० सेट्। चोतति इरित् अचुतत् अचोतीत् चुचोत [शब्दरत्ना०।

चुत पु० चोतति शोणितमस्मात् वा० चञर्थे क। गुदद्वारे

चुद् नोदने चु० उ० सक० सेट्। चोदयति-ते अचूचुदत्-त चोदितः चोदना। "क्रियो योनः प्रचोदयात्" "चोदनालक्षणोऽर्थोधर्मः" जैमि०।

चुद्दी स्त्री चुद्-बा० की। कुट्टिन्यां हेमच०।

चुप मन्दगतौ भ्वा० पर० सक० सेट्। चोपति अचोपीत् चुचोप। "किं खित् खप्रङ् न मिमीते किं खिच्छायन्न चोपति" भा० व० १३१अ० अष्टावक्रं प्रति प्रश्नः।

चुपनीका स्त्री चुप-बा० अनङ् ततः स्वार्थे ईकक्। अग्निचयनार्थे इष्टकाभेदे "इष्टका चुपनीका" नैत्ति० ४।४।५।१।

चुप्य त्रि० चुप-ण्यप्। १अनैगलरि गोत्रप्रवर्त्तके २ऋषिभेदे पु०तस्य गोत्रापत्यम् अश्वा० फञ्। चौप्यायन तद्गोत्रापत्ये पुंस्त्री०।

चुम्ब चुम्बने रसनसंयोगभेदे वा चु० उभ० पक्षे भ्वा० पर० सक० सेट् इदित्। चुम्बयति-ते चुम्बति अचुचुम्बत् त अचुम्बीत् चुचुम्ब। "मूर्क्षोऽपरां चुम्बति" भा० द० "प्रियास्यं किं पुरुषश्चुम्बं" कुमा०। "दशनच्छद एव चुम्बियितव्यः" दशकुमा०।

चुबुक त्रिबुक+पृषो० चुबि उकक् पृषो० नलोपो वा। त्रिबुकार्थे "औदम्बरं मेषावरणदशमाषादग्रं चुबुकदृग्वा" आपस्तम्बसूत्रम्।

चुरू पु० चुर्+ऊ नि०। कूपे उल्लाघदत्तः।

चुलुकि पु० ऋग्वेदप्रसिद्धे असुरभेदे "धुनी चुलुरी वा कृ क्षिप्रम्" ऋ० ६।२०।१२। "धूनिश्च चुलुरिश्चेत्तेषामाकावसुरौ" भा०।

चुम्ब पु० चुबि-भावे घञ् अच् वा। १चुम्बने भावे घ।

२ चुम्बने स्त्री "खेदोऽस्य चुम्बा प्रथमाऽभियोगः" "चुम्बाविरामे वदनं प्रमार्ष्टि" ह० म० ७८अ०।

चुम्बक पु० चुम्बति लौल्यम् चुबि-ण्वुल्। स्वनामख्याते क्षयरोगे मणिभेदे "चुम्बको लेखनः शीतोमेदोदोषविषापहः" भावप्र०। २घटस्रोतस्यवलम्बने शब्दान्तरैकदेशे। ४चुम्बनकर्त्तरि ५काकुके ६चुम्बनपरे ७धूर्त्ते च त्रि० शब्दार्थचि०।

चुम्बन न० चुबि-भावे ल्युट्। सुखसंयोगविशेषे। "समाश्लिष्टाः समाश्लेषैश्चुम्बिताश्चुम्बनैरपि। दष्टाश्च दशनैः कान्तं दासीकुर्वन्ति योषितः" सा० द०। चुम्बनस्थानमाह कामशास्त्रे "मुखे स्तने ललाटे च कण्ठे च नेत्रयोरपि। अधरे कर्णयोश्चैव कक्षोरुभगमूर्द्धसु। चुम्बनस्थानमित्युक्तम् विशेषं कामुकैरिह"। चुं० चबि-भावे ल्युट्। चुम्बनाख्ये स्त्री

चुर स्तेये (परद्रव्यापहरणे) वा चु० उभ० पक्षे भा० पर० सक० सेट्। चोरयति-ते चोरति अचूचुरत्-त अचोरीत् "यद्यस्मिं चोरयेत् स्वहात्" याज्ञ०। "अचूचुरत् चन्द्रसमोऽभिरामताम्" माघः।

चुर त्रि० चुर-क। चौर्य्यकर्त्तरि [अचुरत्। चुरण चौर्य्ये कण्ड्वा० पर० सक० सेट्।। चुरणति

चुरा स्त्री चुर-घा० भावे अ। चौर्य्ये शब्दरत्ना०। चुराशीलमस्य कत्वा० ण। चौर चुराशीले त्रि०।

चुरि(री) स्त्री चुर घा०किं वा ङीष्। उपकूपे कूपसमीपस्थे जलाधारे हेम०।

चुरुचुर पु० त्रि० चुर-क चुर-क कर्म्म०। पिशुने अस्य कर्णे उपपदे पात्रसमि० स०। कर्णेचुरुचुर कर्णेपिशुने युक्तारो आद्युदात्तताऽस्य। [त पा०

चुल समुच्छ्राये वाचुरा०उभ०सक०सेट्। चोलयति-ते अचूचुलत्

चुल त्रि० चुर-क रस्य लः। चोरे ततः चतुरर्थां ब्रह्मा० य च। चुल्य तच्चर्चकादौ त्रि०।

चुलका स्त्री नदीभेदे "कावेरीं चुलकां चापि वेणां शतबलामपि" भा० भी० ६अ०। नद्युक्तौ

चुलुक पु० चुल-उकक्। १प्रस्तरे २निविडपङ्के, ३भाण्डभेदे च त्रिका० ४स्नानमात्रमज्जनयोग्ये जले न० हेमच०। "काश्यासुत्तरवाहिन्या एकेन चुलुकेन तत्" काशी० २८अ०। ६गोत्रप्रवर्त्तके ऋषिभेदे पु० ततः गर्गा० गोत्रे यञ्। चौलक्य चुलुकगोत्रापत्ये पुंस्त्री०। स्त्रियां ङीष् यलोपश्च चौलुकी।

चुलुकिन् पु० चुलुक+अस्त्यर्थे इनि। शिशुमाराकारे मत्स्यभेदे शब्दरत्ना०। चुलुकशालिनि त्रि०स्त्रियां ङीप्।

चुलु(लृप)म्प लौल्ये भा० पर० अक० सेट्। चुलुम्पति अचुलुम्पीत् "अम्भोघेर्नालिकेरीरसमिव चुलुकैरञ्चुलुम्पन्त्यपो ये" महावी०। अस्य नोपधत्वे क्विपि चुलुत् नोपधत्वे चुलुम्। [२काम्यां स्त्री त्रिका०।

चुलुम्प पु० चुलुम्प-भावे घञ्। १बाललालने जटा०।

चुलुम्पिन् पु० चुलुम्प-णिनि। शिशुमाराकृतिमत्स्ये शब्दर०।

चुल्ल भाव क्रतौ भा० पर० अक० सेट्। चुल्लति अचुल्लीत् चुचुल्ल। [२तद्युक्ते जने त्रि० मेदि०।

चुल्ल न० क्लिन्नस्य चुलादेशः लच्प्रत्ययः। १क्लिन्नेलके

चुल्लकी स्त्री० चुल्ल-स्वार्थे कन् गौरा० ङीष्। शिशुमारे कुम्भीरभेदे मेदि०।

चुल्ली(ल्लि) स्त्री चुल्ल-इन् वा ङीप्। चुल्ल-वा०लिक् वा। पाकार्थमग्निस्थापनस्थाने (चुला) अमरः। "चुल्ली चिरं रोदिति" उद्भटः। "पञ्चसूना गृहस्थस्य चुल्ली पेषण्युपस्करः" मनुः। अच्। चुल्लाख्यात्। दीर्घान्तः चितायां मेदि०

चुष्ट पुंन० चु-क्त वा० ष्टुत्व। १वृक्षे मांसपिण्डभेदे २क्षालीभवेमांसे च शब्दार्थचि०। यत्समफलालर्गते (भूमि) इति ख्याते पदार्थे भरतः।

चूचूक न० चूयते चूष-वा० ऊकः पृषो० षस्य चः। कुचाग्रे भरतः २चूषणशक्तिरहिते त्रि० "पायसोक्षि समापद्माधाखाद्यामूकचूचूकाः" भा० आश्व० ३६ अ०।

चूडक पु० चूडास्त्यस्य वा० कन्। कूपे त्रिका०।

चूडा स्त्री चुल-घञ् चुल-सञ्ज्ञायां घञ् इत्वं वा। १मयूरशिखायां २शिरोमध्यस्थशिखामात्रे, क्षुटिकायाम् अमरः। ३वस्त्रभ्यां ४बाल्यभूषणे, मेदि०। ५कूपे हेमच०। ६कूपे त्रिका०। ७संस्कारभेदे तद्विधिस्तनचूलादि शब्द० पी० धा० उक्तं यथा।

"चूडा वर्षात्तृतीयात् प्रभवति विषमेऽब्दार्करिक्षाद्यषडीपर्वोनाहे विचैत्रोदग्ययनसमये चेन्दुशुक्रेज्यकानाम्। वारे, सम्मांशयोर्वाखमनिधनतनौ नैधवे शुद्धियुक्ते भाक्तोपेतैर्विभैर्ऋदुचरलघुभैरायषट्त्रिस्थपापैः (१) क्षीणचन्द्रकुजसौरिभास्करैर्ऋत्युशक्षतिषडुताम्बराः। स्युः क्रमेण बुधजीवभार्गवैः केन्द्रगैश्च शुभभिष्टतारया (२) षण्मासाधिके मातृ गर्भे चौलं शिशोर्न सत्। षड्वर्षाधिकस्येष्टं गर्भिण्यामपि मातरि। (३)

तारादौष्ट्रेऽब्दे त्रिकोणोद्वहने वा चौरं सत् स्यात्तौ स्वमित्रस्ववर्गे। सौम्ये मेऽब्दे शोभने दुष्टतारा शस्ता त्रेया चौरयात्रादिकृत्ये (४)। ऋतुमत्याः स्तनिकायाः स्तनोत्थौलादि नाचरेत्। ज्येष्ठापत्यस्य न ज्यैष्ठे कैश्चिन्मार्गेऽपि नेष्यते" (५)। सङ्ग्रहचिन्तामणिः "चूडा वर्षादिति। तृतीयाद्यर्षादिति ल्यब्लोपे पञ्चमी। तेन गर्भाधानकालाज्जन्मकालाद्वा तृतीये विषमे वर्षे पञ्चमे सप्तमे वा चूडाकरणं प्रभवति कृतं सच्छुभोदर्कं भवतीत्यर्थः। यदाह वसिष्ठः "तृतीये पञ्चमेऽब्दे वा स्वकुलाचारतोऽथितम्। चौलं शिष्टानां यत्नेन स्वस्योक्तविधानतः। आधानतोऽजन्मतो वा सप्तमावृद्धेऽपि कारयेत्"। स्वकुलाचारत इत्यनेन येषां कुले पार्थक्येन चूडाकरणं तत्र सङ्ग्रहचिचारः। येषामुपनीत्वा सहैव्यत इति पक्षस्तेषामुपनयनसङ्ग्रहेण सिद्धित्वान्न पृथक् सङ्ग्रहचिचारानुल्लेखः। अतएवोक्तं याज्ञवल्क्येन "चूडा कार्या यथाकुलमिति"। मनुना प्रथमवर्षे उक्तम्। "चूडाकर्म द्विजातीनां सर्वेषामेव धर्मतः। प्रथमेऽब्दे तृतीये वा कर्त्तव्यं श्रुतिचोदनात्" एवं वक्ष्यमाणोक्तौ यथाष्टकं व्यवस्था द्रष्टव्या। स्वष्टके विशेषकालानुक्तौ तु समबलत्वाद्वैषां विकल्पः। विशेषमाह गुरुः "तृतीयेऽब्दे त्रिशोगर्भाज्जन्मतो वा विशेषतः। पञ्चमे सप्तमे वापि स्त्रियाः पुंसोऽथवा समम्। अष्टेति अष्टमी चर्क्षाः द्वादशी रिक्ताः प्रसिद्धाः आद्या प्रतिपत् षष्ठी प्रसिद्धा पर्वाणि अष्टमीचतुर्दशीपूर्णिमामावास्यासंक्रान्तयः। एतैरूने रहितेऽहनि। अत्र तत्पुरुषसमासे "राजाहःसखिभ्यष्टजिति" पा० टच् "न ऋक्षेति" इति टिलोपः। अष्टम्यादितिवीक्ष्यक्त्वा शेषासु तिथिषु चूडा स्यादित्यर्थः। यदाह गुरुः "द्वादशीं चाष्टमीं रिक्तां षष्ठीं प्रतिपदन्तथा। हित्वा शेषासु तिथिषु चौरकर्म शुभावहम्" कश्यपः "पञ्चपर्वतिथिं रिक्तां त्यक्त्वान्यदिवसे शुभमिति"। अतएवाह वसिष्ठः "पञ्चमी सप्तमी चैव दशम्येकादशी तथा। त्रयोदशी तृतीया च क्षुरकर्म शुभावहा" इति। चकारादुद्वितीयाऽपि। नन्दा सप्तमी त्रयोदश्योर्गणत्रयत्वात्कथं तयोर्ग्रहणम्, यदाह गुरुः "विद्यारम्भोव्रतादेशः चौरञ्चैव विशेषतः। गणत्रये न कर्त्तव्यं यदीच्छेद्दीर्घजीवितमिति" चेत् उच्यते वैदिकं सफलनक्षौलमित्युच्यते तद्विषयको विधिः। अवैदिकं सफलं सफलं यत् चौरमुच्यते क्षुरकर्म चौरमिति सामान्यव्युत्पत्तेरतस्तद्विषयको निषेध इति वयं ब्रूमः। अन्ये देशाचारतो व्यवस्थामाहुस्तदयुक्तं विरोधाभावात्। विशेषेति। चैत्ररहिते उत्तरायणे चूडा स्यात्। शुभाशुभप्रकरणाभिहितो जन्ममासनिषेधोऽत्रापि ध्येयः। तदाह राजमार्त्तण्डः "उत्तरवर्त्मनि सवितरि चूडाकरणं जगुर्बुधा अवनाः। चैत्रं हित्वा पापग्रहदिवसं जन्ममासञ्च"। तथा चन्द्रगुरुशुक्रोदयकानां वारे लग्नांशयोर्वेति सौम्यग्रहवारे सौम्यग्रहाणां लग्ने कर्कमिथुनहयकन्यातुलाधनुर्मीनानामन्यतमे लग्ने तेषामेव च नवांशे चूडा स्यात्। "चन्द्रगुरुशुक्राणां वारलग्नांशकेषु चेति" काश्यपोक्तेः। विशेषमाह पराशरः "सितेज्यसौम्यवारेषु क्षौरं पञ्चहये हितम्। इन्दुवारः सिते पक्षे वाराः शेषा न शोभनाः"। प्रयोगपारिजाते पापवाराणामप्यपवादः पठितः "पापग्रहाणां वारेऽपि विप्राणां तु शुभो रविः। क्षत्रियाणां तु भूसुतबुधेष्टशुद्धाणां शनिः शुभः।" इति। तथा ऋक्षभनिधनतनौ भं लग्नं राशिश्च स्वस्य भे स्वभे स्वाभ्यां निधनमष्टमलग्नं तच्च विद्यते यस्मिन् तनौ स्वजन्मजन्मलग्नराशिभ्यामष्टमलग्नरहिते लग्ने चूडा स्यादित्यर्थः। तथा निधनेऽष्टमस्थाने शुद्धि युक्ते शुद्धिः शुक्रव्यतिरिक्तसर्वग्रहराहित्यं तद्युक्ते सति चूडा स्यात्। उक्तञ्च कश्यपेन "निधने शुद्धि संयुक्ते लग्नराशौ न निधने" इति। पराशरः "अष्टस्था ग्रहाःसर्वे नेष्टाः शुक्रविवर्जिताः। शुक्रश्च निधने चौरे सर्वसंपत्करः शिशोरिति"। शाक्रोपेतैरिति। शाक्रोपेतैर्ज्येष्टायुक्तैर्विधैर्वैधृतिव्यतीपातैश्च दुश्चरलग्नभिन्नैर्द्वादशभिर्लग्नैरुपलक्षिते काले चूडा स्यात्। यदाह वसिष्ठः "अदितिहितये पौष्णहितये श्रवणत्रये। हस्तत्रितये शाक्रे सैन्द्रे चौलमीरितम्"। कश्यपोऽपि "दाक्षेन्दितिपुष्येन्द्रभेषु हस्तत्रयेऽपि च। विष्णुत्रये च पौष्णे चौलकर्म शुभप्रदमिति" ऋक्षविहितनक्षत्रेषु जन्मनक्षत्रत्र्यस्थत्वमित्याह कश्यपः "नवान्नप्राशने चौले व्रतबन्धेऽभिषेचने। शुभदञ्जन्मनक्षत्रत्रयशुभं त्वन्यकर्म्मणीति" नारदादिवाक्यान्यत्रप्राशनेऽभिहितानि अत्र केचित् जन्मनक्षत्रपदन्नारायणं ज्ञेयमित्याहुः तथाचोक्तं लल्लेन "हित्वैकं जन्मर्क्षं तारे जन्म वर्जिते शुभदे। उद्वाहे चोपनये यात्रायामन्नभोजने क्षुरे कार्ये" इति। तत्र अवैदिकक्षुरविषयकत्वात् "जन्म

र्कर्मनक्षत्रे" इति गुरुवचनमपि तद्विषयमेव वैदिक क्षुरपरत्वैतत्कल्पादिवाक्यमिति समञ्जसम्। अथ लग्नबलमाह। आवेति। एकादशषष्ठतृतीयस्थानस्थितैः पापग्रहैरेवोपलक्षिते काले चूडा स्यात्। "लग्नात्त्र्यारिगे चन्द्रे पापैरायारिसंस्थितैः" इति काश्यपोक्तेः"। (१)

शीर्षेति। तथा शीर्षचन्द्रः। कुजो मङ्गलः सौरिः शनिः भास्करः सूर्यः एतैः केन्द्रस्थैः क्रमेण यथासङ्ख्यं स्युः मरणं, शस्त्रक्षतिः शस्त्रानुक्षतिः, पङ्गुता खञ्जता ज्वरः प्रसिद्धः एतानि फलानि स्युर्भवेयुः। बुधजीव भार्गवैस्तु केन्द्रस्थैः शुभङ्कल्याणकारि फलं चूडाकर्तुः स्यात् तदुक्तं रत्नमालायां "चौरकर्मणि सकलविधिना चौलमाहुर्मुनीन्द्राः केन्द्रं यातैर्युक्तशुभैस्तत्र सूर्ये ज्वरःस्यात्। शस्त्रात्राणो धरक्षितनये पङ्गुता चार्किपुत्रे शीतज्योतिष्यपचिततनौ निश्चितं नाशमेति"। केन्द्रज्योतिरिक्तस्थानफलमपि तत्रैव "धनव्ययतिकोणगैरसङ्कैर्महितावपि। क्षुरक्रिया न शोभना शुभैस्तु पुष्टिकारिणीति" ततो तु शुक्र एव शस्तो नान्ये शुभग्रहाः प्राग्उक्तपराशरवाक्यस्वरसात्। क्षुरक्रिया चौलम् दृष्टतारयेति च पुनरिष्टतारया गोचरप्रकरणोक्तया शुभफलदतारया चूडा स्यात्। उक्तञ्च राजमार्तण्डेन "रविशुद्धौ मृदुकरणं रविगुरुशुद्धौ व्रतोद्वाहौ। क्षौरन्नारायणशुद्धौ शेषचन्द्राश्रितं कर्मेति"। ज्योतिर्निबन्धे "विवाहे सविता, शस्तोव्रतबन्धे बृहस्पतिः। क्षौरे ताराविशुद्धिश्च, शेषे चन्द्रबलम्बलमिति"। चौलप्रयोजनमाह वसिष्ठः "सर्वेषामेव वर्णानां चूडाकर्मविधिः स्मृतः। केशमूलं पिता क्षेयः, केशाग्रं जननी तथा। चौलेनैवायुषोवृद्धिश्चौलेनैवायुषः क्षयः। तस्माच्चौलं प्रयत्नेन कारयेद्बुद्धिमान्नरः" व्यवहारनिबन्धे चौलारम्भे विशेषमाह श्रीपतिः "केशवमानर्त्तपुरं पाटलिपुत्रम्युरीमहिच्छत्राम्। दिति मदितिञ्च स्मरतां क्षौरविधौ भवति कल्याणमिति"। यत्तुकैश्चिदुक्तम् "चन्द्रशुद्धिर्यत्र नास्ति ताराबाद्य विशेषतः। अक्षौरभेऽपि कर्त्तव्यं वारेश बुधसोमयोः" इति तत्सामान्यक्षौरविषयम् (२)। पीयूषधारा

अथ सगर्भायां स्वमातरि सत्यां शिशोश्चौलार्थमाह मनुष्टमाह। पञ्चेति चौलाधिकारिणः शिशोर्मातुर्गर्भे पञ्चमासेभ्योऽधिके सति चौलं न सत् शुभ फलदातृ नैव स्यात्। अतः पञ्चमासेभ्यः पूर्वंश्चौलङ्कृतं सच्छुभफलमित्यर्थः तदुक्तं स्मृतिपरिशिष्टे "चूडाकर्म न कर्त्तव्यं यस्य मातास्ति गर्भिणी। करोति यदि मन्दात्मा तदा गर्भस्य नाशनम्। पितुर्मृतिं वदन्त्येके चतुरब्दोत्तरे स्फुटम्" इति। वसिष्ठः "पुत्र चूडाक्रतौ माता गर्भिणी यदि वा भवेत्। विपद्यते गुरुश्चैव दम्पती शिशुरुद्वतः। गर्भे मातुः कुमारस्य न कुर्याज्जौलकर्म च। पञ्चमासादधः कुर्यादतऊर्ध्वं न कारयेत्" इति। अस्यापवादमाह। पञ्चेति पञ्चवर्षाधिकस्योल्लङ्घितपञ्चमवर्षस्य शिशोर्मातरि गर्भिण्यामपि सत्यां पञ्चमासादध ऊर्ध्वं विहितकाले चौलमिष्टफल्याणकारि भवेत्। अतो बालो यावत्पञ्चवर्षो न भवति तावत्तर्यन्नं निषेध इत्यर्थः। तदाह नारदः "स्वनोमातरि गर्भिण्यां चूडाकर्म न कारयेत्। पञ्चमाब्दात् प्रागधोर्ध्वं गर्भिण्यामपि कारयेत्"। यदा त्वपनयनेन सह चौलङ्किर्तितं तदा विशेषमाह ज्योतिर्नारदः "सङ्गोपनीता कुर्याच्चेत्तदा दोषो न विद्यते" इति। अत्र तु पञ्चवर्षाणां न्यूनाधिकभावो नाशङ्कितः सर्वापवादकत्वादस्य। एवं पार्थक्येन मौञ्जीरपि सगर्भायां संस्कार्यमातरि सत्यां न भवति। तदुक्तम् "स्वनोमातरि गर्भिण्यां मौञ्जी चूडे न कारयेत्। गते तु पञ्चमे मासे गर्भादीनां स्मृतिर्भवेत् (२)।

अथ चौले तारावलमाह यत्रकथित्युक्तं तत्र दृष्टायां तारायां सत्यामपवादं शङ्कित्वाह तारादौष्ट्र्ये इति। ताराणां दुष्टत्वं गोचरप्रकरणेऽभिहितं तत्तत एवावधार्यम्। तस्मात्तारादौष्ट्र्ये सत्यपि क्षौरञ्चौलं सच्छोभनं स्यात्। कस्मिन् सति? अजे चन्द्रे त्रिकोणगे नवपञ्चमस्थानस्थिते, अथ वोक्षुगे द्यूनराशिस्थे। अथ वा सौम्यानां बुधगुरुशुक्राणां वर्गे षड्वर्गे अथ वा स्वर्क्षे षड्वर्गे सति। उक्तञ्च ज्योतिस्तत्त्वे "सौम्यसुहृद्भिरुदवर्गे चन्द्रे तद्वर्गे त्रिकोणगे वापि। क्षौरादिकोपकरणे तारादोषो न दोषाय"। आदिशब्देन वास्तु। "विपत्तारे गुडं दद्यात्"इत्यादयोऽपि तारादौष्ट्र्यापवादाः प्राग्उक्तास्तेऽप्यत्रोह्याः। अथ शुभतारायामुक्तमाह सौम्ये भे विहिते नक्षत्रे सति अजे शोभने चन्द्रे गोचरोक्ताष्टस्थानस्थे सति दुष्टताराऽसमीचीनतारापि चेत् स्यात्तदा क्षौरयात्रादि मङ्गलकृत्येषु शस्ताऽतिप्रशस्ता निखिलदोषापवादिका स्यादित्यर्थः। तदप्युक्तं ज्योतिस्तत्त्वे "ऋक्षन्द्रग्रन्थितो रिक्ता चन्द्राष्टमगतापि।

तत्सर्वं नाशवेत्तारा षट्पञ्च नवमी तथा। जन्माख्य-द्वादशी तारा न शुभा नापि निन्दितेति। (४) पी॰धा॰ "अथ चौलादिकृत्ये कालविशेषनिषेधमाह व्रत भट्टा इति। व्रतः स्त्रीधर्मः स यस्या अस्तीति व्रतवती तस्यास्तथा सूतिकाया जातापत्यायाः सूनोः पुत्रस्योपलक्षणत्वात्कन्याया वा चौलोपनयनविवाहा-द्युक्तवत्त्यमाणकृत्यं नाचरेत् न कारयेत्। उक्तं च प्रचेतसा "यस्य माङ्गलिकं कृत्यन्तस्य माता रजस्वला। वैधव्यं जायते तत्र वनार्योः पाणिपीडने"। पाणिपीडने वैधव्यमन्यत्र मृत्युरित्यर्थः। सूतिकाया अपि कर्मानर्हकाल उल्लोविष्णुसूतौ। "सूतिकाम्युत्त वर्तीं विंशतिरात्रेण कर्माणि कारयेत् मासेन स्त्री-जननीमिति"।

अतएव सूतिकाया उक्तकालपर्य्यन्तं कर्मानर्हत्वात्तदपत्य-स्यापि मङ्गलकृत्ये निषेधः। ज्येष्ठेति ज्येष्ठापत्यस्याद्य-गर्भस्य पुत्रस्य कन्याया वा व्रतवन्त्वविवाहादि शुभकृत्यं ज्येष्ठमासे न भवति उक्तञ्च रत्नमालायाम् "आद्यगर्भ-दुहितुः सुतस्य वा ज्येष्ठमासि न च जातु मङ्गलमिति" केचिदिति। मार्गेऽपि मार्गशीर्षमासेऽपि केचिदाचार्यैः-राद्यगर्भसुतकन्ययोर्मङ्गलकृत्यं नेष्यते तदाह वाल्मीकः "मार्गे मासि तथा ज्येष्ठे विवाहं चौलमेव च। ज्येष्ठपुत्र दुहितोश्च न कुर्वीत व्रतं तथा"। भरद्वाजोऽपि "मार्ग-शीर्षे तथा ज्येष्ठे चौरं परिणयं व्रतम्। आद्यपुत्र-दुहितोश्च यत्नतः परिवर्जयेत्"। अस्मादेव ज्ञापकात् द्वितीयादिगर्भपुत्रदुहितोर्जैष्ठे मार्गशीर्षे च न मङ्ग-लकृत्यानां निषेधः किं तु विधिरिति प्रतिभाति" पी॰ धा॰।

चूड़ामणि पु॰ चूडास्थितोमणिः ष॰ त॰। १शिरःस्थे रत्ने अमरः। "चूडामणीकृतविभुवलयीकृतवासुकिः" सि॰ कौ॰। "चूडामणिभिरुद्घृष्टपादपीठं मरीचिताम्" रघुः। चूडायां मणिरिवास्य। २काकमाचिकाफले मेदि॰। ३परमविशेषे यथा भारते। "सूर्य्यपर्वः सूर्य्यवारे सोमे सोमपर्वसमा। चूडामणिरयं योगस्तत्रानन्तं फलं स्मृतम्। अन्यस्मात् पर्वणात् कोटिगुणमत्र फलं लभेत्"

चूड़ास्थ न॰ चूडायामवस्थानम्। दण्डाभ्यां राजनि॰।

चूड़ार वि॰ चूडामस्यति क्र–अण्। चूडागते ततः। प्रगद्या॰ चतुरर्थ्यां अत्र। चौडार्थं तद्विहितादौ वि॰।

चूड़ारक वि॰ चूडामस्यति क्र–ण्वुच्, चूडा+वा॰ आरक वा। १चूडायुक्ते २कर्णिभेदे पु॰ तस्य गोत्रापत्यम् इञ्। चौडारकि तद्गोत्रापत्ये पुंस्त्री। बहुत्वे तु इञो लुक्। चूडारकाः तद्गोत्रापत्येषु ब॰व॰।

चूड़ारत्न न॰ चूडाया रत्नम्। चूडामणौ हेमच॰।

चूड़ाल वि॰ चूडा अस्यास्त्य प्राणिस्थत्वात् ल। चूड़ायुक्ते "चूडालाः कर्णिकालाश्च पट्टाश्च पिठरोदराः" भा॰ सौ॰ ७अ॰। २मस्तके न॰ शब्दरत्ना॰। ३उड्डीशतृणे स्त्री अमरः ४वेतगुडूच्यां ५नागरङ्गलतायां च राजनि॰।

चूड़ावत् वि॰ चूडा अस्त्यर्थे पक्षे वती॰ मतुप् मस्य वः। चूडाविशिष्टे पक्षे इनि। चूडिन् तत्रार्थे पुरोहिता-दिगणे चूडिक इति निर्देशात् पक्षे ठनपि। चूडिक उक्तार्थे। ततः पुरोहिता॰ भावादौ यक्। चौडिक्य चूडाविशिष्टत्वे न॰। [चूषत् त।

चूष सङ्कोचे चुरा॰ उभ॰ सक॰ सेट्। चूषयति ते अचु-

चूत पु॰ चूष–क्त चोषति रसम् चुष–क्त वा पृषो॰। १आम्रे, अमरः "नवचूतप्रसवोन्मिश्रमिति" "चूताङ्कु-रास्वादकषायकण्ठः"। "सहचरमधुरैस्तस्यास्तचूता-ङ्कुरास्वैः कुमारः। चूष–क्त पृषो॰। २गुदद्वारे न॰। स्वार्थे क। चूतक आम्रे क्षुपे च।

चूर दाहे दिवा॰ आत्म॰ सक॰ सेट्। चूर्यते अचूरिष्ट। चुचूरे दैदित् चूर्णः। [दग्धम्।

चूरु पु॰ चूर–उण्। ऋषिभेदे स्तुत॰ ऋषिशब्दे २१८४पृ॰

चूर्ण पेषे चु॰ उभ॰ सक॰ सेट्। चूर्णयति-ते अचु॰ चूर्णित न। चूर्णः चूर्णितः

चूर्ण न॰ चूर्ण–कर्म्मणि अच्। १पेषणजाते चोदे (मयदा) प्रभृतौ राजनि॰ "अक्षादष्टगुणं चूर्णं चूर्णादष्टगुणं पयः" वैद्य॰। तल्लक्षणञ्च भावप्र॰ "अक्षलगुल्कं तद्द्रव्यं सुपिष्टं वस्त्रगालितम्। तत् स्याच्चूर्णं रजः-चोदस्तन्नाम्ना कर्षसम्मिता। चूर्णं गुडः समो देयः शर्करा-द्विगुणा मता। चूर्णं तु भर्जितं स्निग्धं देयं नो-तृक्षदक्षद्रवेत्। स्निग्धेचूर्णं द्रवैः सर्वैर्हतादैर्द्विगुणो-न्मितैः। पिबेच्चतुर्गुणैरेव चूर्णमालोडितं द्रवैः। चूर्णावलेहगुटिका कल्कानामनुपानकम्। पित्तवात कफार्तश्च स्निग्धे कफसमाक्षरेदिति" (आवीर) २क्षाते। चोदे "अक्षकेषु चमूरेषुचूर्णप्रतिनिधीकृतः" रघुः। ४धूलौ तन्त्रोक्तोपकरणे ५चारे (चूण) मेदि॰। "चूर्ण-मानीयतां शुभ्रं पूर्णचन्द्रनिभानने!। पर्याप्तं स्वर्णवर्णानि सीदन्त्याकर्णलोचने" उद्भटः। भावे अच् ६पेषणे पु॰

चूर्णक न० चूर्ण+स्वार्थे क। १चूर्णने २चूर्णशब्दार्थे १पद्यभेदे न० तल्लक्षणादिकं छन्दो०उक्तं यथा "अपादः पदसन्तानोगद्यं तत्तु त्रिधा मतम्। चूर्णकोत्कलिकाप्रायवृत्तगन्धिभेदतः" "अक्षरोराचरं स्वल्पसमासं चूर्णकं विदुः। तत्तु वैदर्भीरीतिस्थं गद्यं हृद्यतरम् भवेत्" ३स्त्री (ज्ञात) पु० त्रिका०।

चूर्णकार त्रि० चूर्णं करोति कृ-अण् उप० स०। पेषणकारके। (चूण) इति पदार्थनिष्पादके (चूनारी) इति ख्याते २सङ्कीर्णजातिभेदे पुंस्त्री०। स च नटकन्यायां पुरुषात्कायस्थात् इत्याह पराशरः।

चूर्णकुन्तल पु० चूर्ण्यते इति चूर्णः कर्म०। शिरःस्थे क्षुद्रकेशे अलके अमरः। [ख्याते कर्करे हारा०।

चूर्णखण्ड न० चूर्णस्य तदर्थं खण्डम्। (काँकरघुटिङ्)

चूर्णपारद पु० चूर्णं पारदस्य एकदेशिस०। पारदक्षेत्रभूते चूर्णरूपे क्षिङ्गुले राजनि०। [शाके राजनि०।

चूर्णशाकाङ्ग पु० चूर्ण इव शाकः अङ्गो यस्य। गौरसुवर्णे

चूर्णादि न० अप्राणिषष्ठ्यन्तात् परस्यस्य आद्युदात्ततानिमित्ते शब्दगणे स च पा० ग० सू० उक्तो यथा "चूर्ण करिष करिष शाकिन शाकट द्राक्षा तूस कुन्दम दलप चमसी चक्षन चौल। "चूर्णादीनामप्राणिषष्ठ्याः" पा०। तत्र चूर्णम्।

चूर्णि(र्णी) स्त्री अग्रेग्रविदुषां तर्कं चूर्णयति चूर्ण-इन्। पतञ्जलिकृते महाभाष्ये "चूर्णिभागुरिवाभटाः" व्या० का०। २कपर्दकयते त्रि० को० १कार्षापणे पुराण परिमितकपर्दके "अशीत्युत्तरपरिमितधेनुशतं देयं तदशतौ चत्वारिंशत्पुराणोत्तरचूर्णीशतपञ्चकम्" भा० वि०। भावे क्त्रि। ४चूर्णने स्त्री वा ङीप्।

चूर्णिदासी स्त्री चूर्णौ चूर्णने नियुक्ता दासी या० त०। पेषणनियुक्तायां दास्यां शब्दार्थचि०।

चूर्णिका स्त्री चूर्णचूर्णनमस्त्यस्याः ठन्। सक्तुषु शब्दार्थचि०

चूर्णिकृत् पु० चूर्णिं महाभाष्यं करोति कृ-क्विप्। महाभाष्यकारके पतञ्जलिमुनौ। [सि० कौ०।

चूर्णिन् त्रि० चूर्णैः संसृष्टः इनि। चूर्णसंसृष्टे अप्पादौ

चूर्त्ति स्त्री चर-भावे क्तिन् वृत उत्त्वम्। चरणे

चूल पु० चुल-क पृषो० दीर्घः। केशे अमरः। "सकलेशाय चूलिनः" लिङ्गपु०। "शिखिनं चूलिनञ्चैव तप्तकुण्डलभूषणम्" हरिवं० ४५ अ०। "गृहीतचूलको विप्रोच्छेषेण रजकादिना" मनुः।

चूला स्त्री चूडा+टस्य लः। मस्तकोपरिस्थिते चन्द्रशालायां (चिलेघर) शब्दार्थचि० २चूडायाञ्च। तस्या इदम् अण्। चौल चूडासम्बन्धिनि संस्कारभेदे चूडाशब्दे दृश्यम्।

चूलिक न० उतश्चटसमितायाम् (लुचि) शब्दार्थ०।

चूलिका स्त्री चुल-सञ्ज्ञायां ण्वुल् पृषो० दीर्घः। १हस्तिकर्णमूले, २नाटकाङ्गभेदे च "अर्थोपक्षेपकाः पञ्च विष्कम्भकप्रवेशकौ। चूलिकाङ्कावतारोऽथ स्यादङ्कमुखमित्यपि" सा० द०। अर्थोपक्षेप नाटकाङ्गानि विभज्य "अन्तर्जवनिकासंस्थैः सूचनार्थस्य सूचिका" इति सूचितम्। यथा वीरचरिते चतुर्थाङ्कादौ "भो भो वैमानिकाः प्रवर्त्तन्तां रङ्गमङ्गलानीत्यादि" रामेण परशुरामोक्तितः इति नेपथ्ये पात्रैः सूचितम्। "अंशुलताजालजटिलचूलिकानाम्" काद०।

चूष पाने (चोषा) भ्वा० पर० सक० सेट्। चूषति। अचूषीत्। चुचूष। चूषणम्

चूषा स्त्री चूष्यते पीयते पृष्ठमांसेनाऽऽढ्यतां नीयते चूष-घञर्थे क। १श्लिष्टमध्यपञ्चनरज्वाम् कक्षायाम् अमरः भावे अङ्। २चूषणे स्त्री

चूष्य त्रि० चूष-कर्म्मणि यत्। जिह्वौष्ठाभ्यां, संयोगभेदेन पेये आहारशब्दे चर्व्यशब्दे च दृश्यम्। "प्राप्तिर्भक्ष्यभोज्यलेह्यपेयचूष्याभ्यवहार्य्याणाम्" भा० श० १६१अ०।

चृत हिंसे यन्त्रणे च तुदा० सक० सेट्। चृतति अचर्तीत् चचर्त्त। चर्त्तिष्यति चर्तिष्यति।

चृत(प) संदीपने वा चु० उभ० पक्षे भ्वा० पर० सक० सेट्। चर्त्त(र्प)यति-ते। अचीचृत(प)त्-त अचचर्त्त(र्प)त् त। पक्षे चर्त्त(र्प)ति अचर्त्तीत्(र्पीत्)त्।

चेकित त्रि० कित-यङ् लुकि अच्। १क्षतिशयवासज्ञानाभ्यां युक्ते। २ऋषिभेदे पुं तस्य गोत्रापत्यं गर्गा० यञ्। चैकित्य तद्गोत्रापत्ये पुंस्त्री०।

चेकितान त्रि० कित-यङ्लुकि ताच्छील्ये चानश्। १अत्यन्तज्ञानयुक्ते २महादेवे पु० "रुद्रमीशानमुग्रमं जिष्णुं गम्भुं कपर्द्दिनम्। चेकितानं परं योनिं तिग्मतो मक्षतस्य च" भा० द्रो० २०१अ०। ३रूपभेदे। "वृष्टद्युम्नश्चेकितानः काशीराजश्च वीर्य्यवान्" गीता।

चेट(ड) पु० चिट-परस्मैप्ये अच् वा टस्य डः। १दासे हेमच० स्त्रियाम् उभयत्र ङीप्। २दास्याम्। स्वुल् चेटक १दासे अमरः। उपपतिनायके ३सम्बोधने रसम०। स्त्रियां चेटि(डि)का। "सङ्कारस्य

सहाया विटचेटविदूषकाद्याः स्युः"। "उत्तमाः पीठमर्दाद्याः मध्यौ विटविदूषकौ तथा। शकारचेटाद्या अधमाः परिकीर्त्तिता" सा० द०। "ताम्बूलाक्तं दशनमसक्तं दर्शयन्तीह चेटी" सा० द०।

चेत् अव्य०चित–विच्। १यद्यर्थे २पक्षान्तरे, अमरः ३छलसन्देहेऽपि सन्दिग्धतया कथने च शब्दार्थचि०। "सत्यं चेत् गुरुवाक्यमेव पितरोदेवाश्च चेत् योगिनी प्रीता चेत् परदेवता च यदि चेत् वेदाः प्रमाणं हि चेत्। शास्त्रीयं यदि दर्शनं भवति चेदात्माप्यमोघास्ति चेत् स्वातन्त्र्या अपि कौलिकाश्च यदि चेत् स्यान्मे जयः सर्व्वदा" तन्त्रम्। "चेत्कण्ठके पणफरे तु पक्षाः समसा" नील० या०। अधिकं (चेद्) शब्दे द्रष्टव्यम्

चेतकी स्त्री चेतयति उन्मीलयति बुद्धिबलेन्द्रियाणि चित–णिच्–ण्वुल् गौरा० ङीष्। १हरीतक्याम् अमरः। तस्या उत्पत्तिभेदादिकं भावप्र० उक्तं यथा "पपात विन्दुर्भैदिन्यां शक्रस्य पिबतोऽमृतम्। ततो दिव्या समुत्पन्ना सप्तजातिर्हरीतकी। हरीतक्यभया पथ्या कायस्था पूतनाऽमृता। हेमवत्यव्यथा चापि चेतकी श्रेयसी शिवा। वयस्था विजया चापि जीवन्ती रोहिणीति च। विजया रोहिणी चैव पूतना चामृताऽभया। जीवन्ती चेति पथ्याया विज्ञेयाः सप्त जातयः। अलावुवृत्ता विजया १वृत्ता सा रोहिणी २स्मृता। ३पूतनाऽस्थिमती स्वल्पा कथिता मांसलाऽमृता४। पञ्चरेखाऽभया ५प्रोक्ता जीवन्ती स्वर्णवर्णिनी६। त्रिरेखा चेतकी७ ज्ञेया सप्तानामियमाकृतिः। विजया सर्व्वरोगेषु रोहिणी व्रणरोहिणी। प्रलेपे पूतना योज्या शोधनार्थेऽमृता हिता। व्याधिरोगेऽभया श्रेष्ठा जीवन्ती सर्व्वरोगहृत्। चूर्णार्थे चेतकी श्रेष्ठा यथायोगं प्रयोजयेत्। चेतकी द्विविधा प्रोक्ता श्वेता कृष्णा च वर्णतः। षड्रसोपयुक्ता शुक्ला, लवणा त्वेकाङ्गुला स्मृता। काचिदास्वादमात्रेण काचिद् गन्धेन भेदयेत्। काचित् स्पर्शेन दृष्ट्वान्या चतुर्द्धा भेदयेद्भिषक्। चेतकी पादपच्छायामुपसर्पन्ति ये नराः। भिद्यन्ते तत्क्षणादेव पशुपक्षिमृगादयः। चेतकी तु हृता हस्ते यावत्तिष्ठति देहिनः। तावद्विमुच्यते रोगैस्तु प्रभावाद्भास्वतः संशयः। न कार्य्यं सुकुमाराणां बालानां भेषजद्वयम्। चेतकी परमा श्रेष्ठा हिता सुखविरेचनी। सप्तानामपि जातीनां प्रधानं विजया स्मृता। सुखप्रयोगा सुलभा सर्व्वरोगेषु शस्यते। हरीतकी पञ्चरसा लवणा तु वरा परम्। रूक्षोष्णा दीपनी मेध्या स्वादुपाका रसायनी। चक्षुष्या लघुरायुष्या हृद्या चानुलोमिनी। श्वासकासप्रमेहार्शःकृमिशोथोदरक्लमान्। वैस्वर्य्यपीनसोरोगविबन्धविषमज्वरान्। गुल्माध्मानव्यथाच्छर्दिहिक्काकण्डूहृदामयान्। कामलां मूत्रसादांश्च श्लीपदानञ्च यत्नतः। अश्मरीं मूत्रकृच्छ्रञ्च मूत्राघातञ्च नाशयेत्। स्वादुतिक्तकषायत्वात्पित्तश्लेष्महरा तु सा। कटुतिक्तकषायत्वाद्वातश्लेष्महरा शिवा। पित्तश्लेष्मकटुकाम्लत्वाद्वातहरञ्च कथं शिवा। प्रभावाद्दोषहन्तृत्वं सिद्धं यत्तत् प्रकाश्यते! हेतुभिः शिष्यबोधार्थं न पूर्वं क्रियतेऽधुना। कर्म्मान्यत्वं गुणैः साम्यं दृष्टमात्रमभेदतः। यतस्ततो नेति चिन्त्यं धात्रीलकुचयोर्यथा। पथ्याया मज्जनि स्वादुः स्नायुमूले व्यवस्थितः। ततो तिक्तस्त्वचि कटुरस्यनिष्ठुरो रसः। नवा स्निग्धा घनाढ्या गुर्व्वी चिप्रा च यामसि। निमज्जेत् सा प्रशस्ता च कथितातिगुणप्रदा। नवादि गुणयुक्तत्वं तथैकत्र द्विकर्षता। हरीतक्याः फले यत्र इयं तच्छ्रेष्ठमुच्यते। चर्विता वर्द्धयत्यग्निं पेषिता मलशोधिनी। क्षिप्ता संयोजिनी पथ्या भृष्टा प्रोक्ता विदोषहृत्। उन्मीलिनी बुद्धिबलेन्द्रियाणां निर्म्मूलिनी पित्तकफानिलानाम्। विध्वंसिनी मूत्रशकृन्मलानां हरीतकी स्यात् सह भोजनेन। अन्नपानकृतान् दोषान् वातपित्तकफोद्भवान्। हरीतकी हरत्याशु भुक्तस्य परियोजिता। लवणेन कफं हन्ति पित्तं हन्ति सशर्करा। घृतेन वातजान् रोगान् सर्व्वरोगान् गुडान्विता। सिन्धूत्थशर्करायुक्तौकषामधुगुडैः क्रमात्। वर्षादिष्वभया प्राश्या रसायनगुणैषिणा। अध्वातिखिन्नो बलवर्जितश्च रूक्षः क्षयी लङ्घनकर्शितश्च। पित्ताधिको गर्भवती च नारी विसूचिकाश्लीपभयान्न खादेत्"। तस्याः फलम् अण् हरीतक्याः तस्य लुप् लुपि व्यक्तिवचनत्वम्। २ततृफलेऽपि स्त्री। ३जातिपुष्पे राजनि०।

चेतन पु० चित–ल्यु। १आत्मनि जीवे २परमेश्वरे ३मनुष्ये राजनि०। ४प्राणिमात्रे अमरः। ५प्राणयुक्ते त्रि०मेदि०। "उन्मादश्चापरिच्छेदश्चेतनानाचेतनेषु" च सा० द०। "चेतनं पुष्करं कोशैः क्षुधाद्यातैः समन्ततः" हरिवं० ६७अ०। तस्य भावः ष्यञ् चैतन्य न०। त्व चेतनत्व न० तल् चेतनता स्त्री चेतनायाम् "शरीरस्य न चैतन्यम्" भाषा० "चैतन्यमात्मनोविद्यात्" श्रुतिः।

चेतनकृ पु० चेतनं करोति कृ-ड गौ० ङीष्। हरीतक्याम् राजनि०।

चेतना स्त्री पु० चित-युच्। १बुद्धौ २ज्ञाने ३चैतन्ये चिति स्वरूपज्ञानव्यञ्जिकायां प्रमाणासाधारणकारणिकायां ४चित्तवृत्तौ "चेतनानामधिष्ठानं मनोदेहश्च सेन्द्रियः। केशलोमनखाद्यान्तमूलद्रव्यगुणैर्विना" शब्दार्थचि० धृत-वाक्ये केशादिव्यतिरिक्तस्यैव देहस्य चेतनाव्यञ्जकत्व-मुक्तम्। गर्भस्थस्य सप्तमे मासि चैतन्ययोगः यथाह याज्ञ० "मनश्चैतन्ययुक्तोऽसौ नाडीस्नायुसिरायुतः। सप्तमे, चाष्टमे चैव त्वङ्मांसकृतिमानपि" असौ पूर्व्वोक्तो गर्भः सप्तमे मासि मनसा चेतनया च युक्तः" मिता०। "निमेषचेतना यत्र चादानं पाञ्चभौतिकम्" याज्ञ० "यस्तु चेतनाधातुर्मन इत्यभिधीयते" भा० व० २०६ अ०। [जनि०। २ज्ञेये त्रि०।

चेतनीया स्त्री चेतनायै हिता छ। १अश्विनाभौषधे रा-

चेतस् न० चित-करणे असुन्। १चित्ते अमरः "चेतो नलं कामयते मदीयम्" "चेतोजन्मशरप्रसूनमधुभिर्व्योमिश्रतामाश्रयत्" नैष० "गच्छति पुरः शरीरं धावति पश्चादसंस्थितं चेतः" शक०। २चित्तवृत्तौ निघ०। चित्तवृत्तेः संख्यमते पौरुषेयबोधकरणत्वात् तथात्वम्। ३कर्त्तरि असुन्। ४ज्ञातरि त्रि०। भावेऽसुन्। ५चैतन्ये ६प्रज्ञायाम् न०।

चेतिष्ठ त्रि० अतिशयेन चेतयिता द्रष्टृ इष्ठोलोपे तत्रि-मित्तकेटो निवृत्तिः खिलोपश्च। अतिशयचेतयितरि "ऋत्वा चेतिष्ठो विशामसुर्भृत्" ऋ० १।६५।५। "चे-तिष्ठोऽतिशयेन चेतयिता" भा०। "वसुश्चेतिष्ठो वसुधा-तमश्च" यजु० २७।५।

चेतोंऽशु पु० चेतसश्चैतन्यस्यांशुरिव जीवे रवेरिव चिदात्म-कस्य पुरुषस्य चेतोरूपा जलार्कसमाः प्राज्ञतैजस-विश्वभेदेन देवतिर्य्यगादिदेहभेदेषु विभाज्यमाना इति वेदान्तप्रकरणोक्तेरस्य तथात्वम्

चेतोजन्मन् पु० चेतसि जन्मास्य। मनोभवे कन्दर्पे "चेतो-जन्मशरप्रसूनमधुभिर्व्योमिश्रतामाश्रयत्" नैष०। चेतो-भवादयोऽप्यत्र।

चेतोमत् त्रि० चेतस्+अस्यर्थे मतुप् वा० न मस्य वः। १चेतोयुक्ते २चैतन्ययुक्ते। "चेतोमन्ति च सामानि धनुर्वेदश्च भारत!" भा० व०।

चेतोमुख पु० चेतोमुखं द्वारं यस्य। चैतन्यदीप्तेऽज्ञानवृत्ति

प्रधाने प्राज्ञे" "आनन्दभुक् चेतोमुखः प्राज्ञः" इति श्रुतिः। चेतसो मुखत्वञ्च चेतःकारणाज्ञानवृत्ति-मुखत्वात्।

चेत्तृ त्रि० चित-अन्तर्भूतण्यर्थे तृच् ईत्वे नि० दीर्घभावः। ज्ञापयितरि। "स चेत्ता देवता पदम्" ऋ० १।२२।५। "चेता ज्ञापयिता" भा० प्रक्रियया उक्तरूपैव

चेत्य त्रि० चित-कर्म्मणि ण्यत्। ज्ञेये। "तं त्वाता चरणे चेत्यः" ऋ० ६।११।५। "चेत्येन हृदयं चैत्यः चेतसः प्राविशद् यदा" भाग० ३।२६।५अ०।

चेदि पु० देशभेदे सोऽभिजनोऽस्य चणः, तद्राजाणश्च बहुत्वे लुक्। २तद्देशवासिषु ३तद्भूमेषु च ब० व०। "चेदि-मत्स्यकरूषाश्च भोजाः सिन्धुकलिन्दकाः" भा० भी० ६अ० जनपदोक्तौ। स च देशः शुक्तिमतीनदीतीरस्थः उपरिचरशब्दे १२०पृ०। दशग्रम्। चेदि+स्वार्थे क। चेदिदेशे ह० सं० १४अ० कूर्म्मविभागे अत्र पूर्व्वस्था-मित्युपक्रमे "शौक्तिकविदर्भवत्सान्ध्र चेदिकाशेर्द्ध-करूषाश्च"।

चेदिपति पु० ६त०। १उपरिचरनामके वसुभेदे उपरि-चरशब्दे ११६पृ० दृश्यम्। २दमघोषसुते शिशुपाले च। "एवं तेषु निवृत्तेषु क्षत्रियेषु समन्ततः। चेदी-नामधिपोऽधावत् बलवानन्तकोपमः। दमघोषसुतो वीरः शिशुपालो महीपतिः" भा० आ० १८७अ०। चेदि-पादयोऽप्यत्र "वसुपूर्णां च वसुधां वस चेदिषु चेदिप!" भा० अ० १०६अ०।

चेदिराज् पु० चेदिषु राजते राज-क्विप्। चेदिपतौ १उपरिचरवसौ २शिशुपाले च त्रिका०। "मा चेदि यदसावेको जेतव्यश्चेदिराडिति" माघः।

चेदिराज पु० चेदीनां राजा टच् समा०। उपरिचरराख्ये वसौ। तस्य भूमिविवरगतिकथादि भा० शा० ३३६अ०। "अजेन यष्टव्यमिति प्राहुर्वै द्विजोत्तमाः। स च छागोऽप्यजोत्तेयो नान्यः पशुरिति स्थितिः। ऋषय ऊचुः। बीजैर्यज्ञेषु यष्टव्यमिति वै वैदिकी श्रुतिः। अजसंज्ञानि बीजानि छागं नो हन्तुमर्हथ। नैष धर्मः सतां देवा! यत्र वध्येत वै पशुः। इदं क्रतुशतं चेदं कथं वध्येत वै पशुः। भीष्म उवाच। तेषां संवदतामेव-मृषीणामृषिभिः सह। मार्गागतो नृपश्चेदिं देवं प्राप्तवानू वसुः। अन्तरीक्षचरः श्रीमान् समग्रबल-वाहनः। तं दृष्ट्वा सहसा यान्तं वसुं ते खान्तरीक्षगम्।

ऊचुर्हि जातवोदेवानेष ऋेत्यृति संशयम्। यज्ञा दान यतिः श्रेष्ठः सर्व्वभूतहितप्रियः। कथं स्विदन्यथा ब्रूया-देष वाक्यं महान् वसुः। एवं ते संविदं ज्ञत्वा विबुधा ऋषयस्तदा। ऊपृच्छन् सहसाभ्येत्य वसुं राजान मन्निकात्। भो राजन्! केन यष्टव्यमजेनाहोस्विदौ-षधैः। एतं न संशयं छिन्धि प्रमाणं नो भवान्मतः। स तान् ज्ञताञ्जलिर्भूत्वा परिपप्रच्छ वै वसुः। कस्य वैको-मतः कामोऽत्र सर्व्वं द्विजोत्तमाः!। ऋषय ऊचुः। धान्यैर्यष्टव्यमित्येव पशोऽस्माकं नराधिप!। देवानान्तु पशुः पक्षो मतो राजन्! वदस्व नः। भीष्म उवाच। देवानान्तु मतं ज्ञात्वा वसुना पक्षसंश्रयात्। छागेना-जेन यष्टव्यमेवमुक्तं वचस्तदा। कुपितास्ते ततः सर्वे मुनयः सूर्य्यवर्च्चसः। ऊचुर्वसुं विमानस्थं देवपक्षार्थ वादिनम्। नरपक्षो गृहीतस्ते यस्मात्तस्माद्दिवः पत। अद्य प्रभृति ते राजन्नाकाशे विहता गतिः। अक्ष-ज्ञायाभिघातेन महीं भित्त्वा प्रवेक्ष्यसि। ततस्तस्मि-न्मुहूर्त्तेऽथ राजोपरिचरस्तदा। अधो वै सम्बभूवाशु-भूमेर्विवरगो नृपः। ऋतिस्त्वेनं न विजहौ तदा तारायणाज्ञया। देवास्तु सहिताः सर्व्वे वसोः शाप विमोक्षणे। चिन्तयामासुरव्यग्राः शुक्लतं हि नृपस्य तत्। अनेनाक्षतशुक्लते राज्ञा शापः प्राप्तो महात्मना। अस्य प्रतिप्रियं कार्य्यं सहितैर्नो दिवौकसाम्। इति बुद्ध्या व्यवस्यन्तु गत्वा निश्चयमीश्वराः। ऊचुः संहृष्टमनसो राजोपरिचरन्तदा। ब्रह्मण्यदेवभक्तस्त्वं सुरासुर-सुरर्षिभिः। कामं स तव तुष्टात्मा कुर्य्यात्कामवि-मोक्षणम्। मानना तु द्विजातीनां कर्त्तव्या वै महा-त्मनाम्। अवश्यं तपसा तेषां फलितव्यं नृपोत्तम!। यतस्त्वं सहसा भूप आकाशाद्भूमिंगतस्तु। एकस्त्व-मपहं तुभ्यं दत्तो वै नृपसत्तम!। यावत्त्वं शापदोषेण कालमाप्स्यसि वै नृप!। भूमेर्विवरगो भूत्वा तावत्त्वं कालमाप्स्यसि। यज्ञेषु सुव्रतं विप्रैर्व्वसोर्द्वारं समा-श्रितैः। प्राप्स्यसेऽक्षदनुध्यानान्ना च त्वां ग्लानि-रस्यृत। न क्षुत्पिपासे राजेन्द्र! भूमेस्तिष्ठे भवि-ष्यतः। वसोर्द्वारमभिप्रीतस्त्वत्तेजसाप्यायितेन च। स देवोऽक्षदरात् प्रीतो ब्रह्मलोकं हि नेष्यति"।

चेदी(दी) स्त्री रागिणीभेदे हला०।

चेय त्रि० चि-कर्म्मणि यत्। १चेतव्ये चयनीये २आधानाङ्ग संस्कारसंस्कार्य्ये यज्ञे च "अग्निचेयो बहुभिर्वाजि यज्ञैः" मा०शा०२८१अ०। २चेतुं योग्ये। दृक्षचेयम् बहुशचेयं पुष्पम्। [भगं वसुत्वे" ऋ० ८।६१।७।

चेरु पु० चि-बा० रु। चयनशीले "त्वं ह्येहि चेरवे विदा

चेल्ल लौल्ये अक०गतौ सक०भ्वा०प०सेट्। चेलति अचेलीत् चिचेल्ल अदित् अचिचेलत् त।

चेल न० चिल-आच्छादने कर्म्मणि घञ्। १वस्त्रे। चेल-लौ ल्ये अच्। २अधमे न० अमरः। "चेलचर्म्मोविपाल-ञ्च त्रिरात्रं स्यादभोजनम्" मनुना तस्य स्मरणे त्रिरात्रोपवासोविहितः "मा ज्ञातिचेलं भुवि कस्यचिद्भूः" भट्टिः ज्ञातिचेलमित्यत्र "कृत्सितानि कुत्सनैः" पा० समासे परनिपातः। "चेलखेटकटुकाण्डं गर्हायाम्" पा० निन्दायां चेलादीनाम् आद्युदात्तता। पुत्रचेलमिवचेलशब्देन पुत्रस्य निन्दा गम्यते सि०कौ० "घरूपचेलड्रवेल्वादि पा० चेलडादीनि इस्तिविषये कृत्सनवाचीनि" सि० कौ० तेषु परेषु ङ्यन्तस्य ह्रस्वः यचादिषु टित्करणसामर्थ्यात् ङीप् "ब्राह्मणिचेली" सि० कौ०। "चेले क्नोपेः" पा० अक्षिनृ उपपदे क्नोपे-र्यञन् चेलक्नोपम्।

चेलगङ्गा स्त्री चेलमिव गङ्गा। गोकर्णसमीपस्थे नदीभेदे। "गोकर्णोपरिदातु भ्रंशितः स महासुरः। पपात चेलगङ्गायाः पुलिने सह कन्यया" हरिव० १४८अ०। "गङ्गा सरस्वती चैव चेलगङ्गा च निम्नगा" १२६अ०

चेलान पु०चेल-बा० आनच्। फलप्रधाने लताभेदे (फेलन) रत्नमा०।

चेलाल पु० चेलमिवालति अल-अच्। लतापनसे त्रिका०।

चे(चै)लायक पु० चेलं तत्स्थयूकामत्ति अद-एवुल्। प्रेतभेदे। "चे(चै)लायकस्तु भवति मूढो धर्म्मात् स्वकात् च्युतः" मनुः। "चेलः कीटभेदस्तद्भक्षकः प्रेतो भवति" गोविन्दराजः। "चेलसम्बन्धिनी यूका चैल-कस्तद्भक्षकः" इति कुल्लूकभट्टः।

चेलिका स्त्री चेल-एवुल्। पट्टवसने (चेलिर कापड़) "सेयं कृष्णस्य वनिता पीतशाटीपरिच्छदा। रक्तचेलिकया बद्धा शातकुम्भनिभस्तनी" पद्मपु०।

चेलुक पु० चेल-उक। बुद्धभिक्षुशिष्ये त्रिका०।

चेल्ल चालने गतौ च भ्वा० पर० सक० सेट्। चेलुति अचेल्लीत् चिचेल्लु ऋदित् अचिचेलुत् त।

चेष्ट ईहायां भ्वा० आ० सक० सेट्। चेष्टते अचेष्टिष्ट। चिचेष्टे। अचचेष्टत् अचिचेष्टत् त। चेष्टितः चेष्टा चेष्ट-

मानः। "गङ्गायां हि न शक्नोमि इङ्कत्वाचेष्टितं चिरम्" भट्टिः "रक्षचेष्टितभूमिषु" रघुः। "आस्ते शेते चेष्टतेऽतिष्ठति परिधावति" भाग० ५।२६। "यदा स देवो जागर्त्ति तदेदं चेष्टते जगत्" मनुः। "चेष्टनस्यगमनेऽनिलम्" मनुः। "तद्वेव विहितं वन्ध्यं तथा चेष्टयितुर्यशे" भा० शा० २३५०।

चेष्टक त्रि० चेष्ट-ण्वुल्। १चेष्टान्विते। २रतिबन्धभेदे पु०। "पादमेकं हृदि न्यस्य इतरेणैव चेष्टयेत्। कान्ताक्रोडे स्थिता नारी बन्धोऽयं चेष्टकोमतः" रतिदीपिका।

चेष्टा स्त्री चेष्ट-अङ्। "आत्मजन्या भवेदिच्छा इच्छाजन्या भवेत् कृतिः। कृतिजन्या भवेच्चेष्टा चेष्टाजन्या भवेत्क्रिया" इत्युक्ते कृतिजन्ये क्रियासाधने कायिके व्यापारे। "चेष्टावदन्त्यावयवित्वं शरीरत्वम्" सि०कौ०। "बाह्यैर्विभावयेच्चित्तं भावैरन्तर्गतं नृणाम्। स्वरवर्णेङ्गिताकारैर्वचुषा चेष्टितेन च। आकारैरिङ्गितैर्गत्या चेष्टया भाषितेन च। नेत्रवक्त्रविकारैश्च गृह्यतेऽन्तर्गतं मनः" मनुः "चेष्टा इक्षास्फालनादि" कुल्लू०। "चेष्टाभोजन वाग्योधे नेत्रादिप्रतिभेदने" वाच०। "वायोस्तु स्पर्शनं चेष्टां व्यूहनं रोदनमेव च" याज्ञवल्क्येन तस्य वायुकार्य्यत्वमुक्तम्।

चेष्टानाथ पु० चेष्टायानागोऽत्र। प्रलयकाले राजनि०।

चेष्टाबल न० ज्योतिषोक्ते षड्बलानां बलभेदे तच्च इङ्कज्ञा० उक्तं यथा

"उदगयने रविशीतमयूखौ वक्रसमागमगाः परिशेषाः। विपुलकरा युधि चोत्तरसंस्थाचेष्टितवीर्ययुताः परिकल्प्याः" इ० ज्ञा०।

"अधुना चेष्टाबलं दोधकेनाह उदगयने इति मकरादि राशिषट्कमुत्तरमयनं कर्कटादिषट्कं दक्षिणमयनमिति। उदगयने उत्तरायणे रविशीतमयूखौ सूर्य्यचन्द्रमसौ बलिनौ भवतः। परिशेषाः भौमबुधगुरुसितसौराः वक्रगाः विपरीतगतयो बलिनो भवन्ति तथा समागमगाश्चन्द्रेण सहिताः बलिन एव चन्द्रेण संयोगोपगृहाणां समागमश्चन्द्रवाच्यः रविणा सहास्तमयो भौमादीनां परस्परं युद्धम्। उक्तञ्चाचार्य्यविष्णुचन्द्रेण "दिवसकरेणास्तमयः समागमः शीतरश्मिसहितानाम्। कुजतादीनां युद्धम् निगदतेऽन्योन्ययुक्तानामिति" विपुलकराइति विपुलाः करा येषां ते विपुलकराः विकीर्णरश्मयो बलिनो भवन्ति शीघ्रकेन्द्रे द्वितीयतृतीयपदस्थे ग्रहस्य विपुलकरत्वं प्रायः संभवति वक्रासन्नत्वात् युधि संग्रामे चोत्तरसंस्था बलिन एव। कुजतादीनां युद्धमित्युक्तम् तत्र यः उत्तरदिग्भागसंस्थितो जयी स च बलवान् उत्तरसंस्थत्वमत्रोपलक्षणार्थम्। यस्तेजस्वी स एव बलवान्। तत्रैतल्लक्षणम् "दक्षिणदिक्स्थः परश्चेषपुरप्राप्त सन्निकृष्टतनुः। अधिरूढोविकृतोनिःप्रभो विवर्णश्च यः स जितः। उक्तविपरीतलक्षणसम्पन्नो जयगतो विनिर्दिष्टः। विपुलः स्निग्धोद्युतिमान् दक्षिणदिक्स्थोऽपि जययुक्तः" इति एतच्चुक्रस्य प्रायः सम्भवति यस्मात्सुभिक्षाचार्य्यः "सूर्ये जयिन उदक्स्था दक्षिणदिक्स्थो जयी शुक्रः" इति एतच्चेष्टाबलम्। एषामन्यतमेन संयुक्तश्चेष्टाबलसंयुक्तो भवति" भट्टोत्पलः।

चेष्टित त्रि० चेष्ट-कर्त्तरि क्त। १चेष्टायुक्ते। भावे क्त २गतौ ३कायादिव्यापारे च न० मेदि० चेष्टाशब्दे उदा०।

चैकितत्र पुंस्त्री चेकितस्य गोत्रापत्यम्। गर्गा० यञ्। चैकितर्षेर्गोत्रापत्ये तस्य छात्रः कण्वा० अण् यलोपः। चैकित तच्छात्रे।

चैकित्सितत्र पुंस्त्री चिकित्सितर्षेरपत्यम् गर्गा० यञ्। चिकित्सितर्षेरपत्ये ततः कण्वा० छात्रे अण्। चैकित्सित। तच्छात्रे। [स्त्रियां अणन्तत्वात् ङीप्।

चैकीर्षित त्रि० चिकीर्षित एव प्रज्ञा० अण्। चिकीर्षिते

चैटयत त्रि० चेट इव यतते यत-अच् ततः स्वार्थे अण्। चेटसदृशयत्नशीले तत्सापत्यं स्त्रिका० फिञ्। चैटयायनि तदपत्ये पुंस्त्री। स्त्रियां क्रोड्या० ग्रञ्। चैटयत्या। चैटयतानां विषयः भौरिक्या० विधन्। चैटयतविध तद्विषये न०।

चैतन्य न० चेतन एव, चेतनस्य भावो वा ष्यञ्। वेदान्तिमते चित्स्वरूपे १परमात्मनि न्यायादिमते २आत्मधर्म्मे चेतनायाम्। "चैतन्यमात्मनोविद्याच्च विभेति कुतश्चन" श्रुतिः वेदान्तिमते राहोः शिर इतिवद् अभेदे षष्ठी, अन्यमते भेदे। "शरीरस्य न चैतन्यं स्यतेषु व्यभिचारतः" भाषा० ३प्रकृतौ भेदि०। "प्रकृतिश्च दृष्टान्तानुपरोधात्" भा० सू० चैतन्यस्य जगत्प्रकृतित्वाङ्गीकारेण तथात्वम्। "चैतन्यं परमाणूनां प्रधानस्यापि नेष्यते। ज्ञानक्रिये जगत्कर्त्तृ दृश्यते चेतनाश्रये" वेदान्तका०। चेतन एव स्वार्थे ष्यञ्। ३शरीरभञ्जाते

कलौ कृष्णावतारभेदे अनन्तसंहिता। तस्या न प्रामाणिकत्वमिति स्मार्त्ततुयायिनः। वैष्णवास्तु तन्मूलतयैव चैतन्यदेवस्य कृष्णावतारत्वमिच्छन्ति। यदं तु तस्याः प्रामाणिकत्वे संवादिमूलपत्यान्तरस्यादर्शनात् उदासीना इत्यतः न किञ्चित् ब्रूमहे। यदि चासौ अवतारः यदि वा न, तथापि तस्य वैष्णवसम्प्रदायगुरुत्वात् पूज्यत्वं मन्यामहे चैतन्यचन्द्रोदयः चैतन्यचरितामृतं चैतन्यभागवतम् इत्यादयो ग्रन्थाः तन्माहात्म्यावेदका वैष्णवसम्प्रदायप्रसिद्धाः सन्ति। [दिकं दृश्यम्।

चैतन्यभैरवी स्त्री तन्त्रसारोक्ते भैरवीभेदे तत्र तन्मन्त्रा-

चैत्त न० चित्तस्येदम् अण्। चित्तसम्बन्धिनि ज्ञानादौ। "चन्द्रचक्षुःश्रवाङ्गराज्ञुतैः क्रमाच्चियन्त्रितेन मनोबुद्ध्यहङ्कारचित्ताख्येनान्तरिन्द्रियचतुष्केण क्रमात् संशयनिश्चयाहङ्कार्यचैत्तांश्च सर्व्वानेतान् स्थूलविषयाननुभवतः" वेदान्तसा०। २चित्ताभिमानिके चेतनभेदे "चेत्येन हृदयं चैत्तः चेतनः प्राविशद्यदा। विराट् तदैव पुरुषः सम्भिन्नादुदतिष्ठत" भाग०।३।२६।५६। बौद्धमते विज्ञानस्कन्धातिरिक्ते ४स्कन्धभाजे। तैस्तु चित्तं चैत्तमिति द्विविधस्यैव पदार्थस्याङ्गीकारेण विज्ञानातिरिक्तस्य चैतत्वात्। बुद्धशब्दे तद्भेदो दृश्यः।

चैत्य न० चित्याया इदमण्। १आयतने अमरः। २शुष्करहिते सचित्ये अचित्ये वा यज्ञायतने भरतः। ३देवायतनमात्रे ४देवकुले (देउल) च। ५बुद्धे ६बिल्वे ७वृक्षभेदे मेदि०। ८श्यामादिप्रसिद्धमहावृक्षे। ९देवावासे १०जिनतरौ पु० मेदि०। "सेतुवल्मीकनिम्नास्थिचैत्यादौरुपलक्षिता। चैत्यश्मशानसीमासु पुण्यस्थाने सुरालये" याज्ञ०। "चैत्ये भयं यच्छतम्" ह० स० ५१अ०। "चैत्यस्थाने स्थितं वृक्षे फलवन्तमिव द्विजाः" भा० अनु० १६६अ०। चैत्ये भवः अण् चैत्यस्थे देवभेदे चैत्यमुखभेदे शब्दे दृश्यम्।

चैत्यक पु० चैत्य इव कायति कै-क। अश्वत्थवृक्षे त्रिका०। गिरिव्रजपुरवेष्टकपञ्चगिरिमध्ये २पर्वतभेदे "वैहारो विपुलः शैलो वराहो वृषभस्तथा। तथा ऋषिगिरिश्चात्र! शुभाश्चैत्यकपञ्चमाः। एते पञ्च महाशैलाः पर्वताः शीतलद्रुमाः। रक्षणीयाभिसंकल्प्य संवृताङ्गा गिरिव्रजम्"। "मागधानान्तु रुचिरं चैत्यकान्तरमाप्नुयात्" "भङ्गा भेरीतलं तेऽपि चैत्यप्रकारमाद्रवन्"। "मागधानां सुरुचिरं चैत्यकानं समाद्रवन्"। "चैत्यकस्य गिरेः शृङ्गं भित्त्वा किञ्चिच्छ्रमेण" भा०स०२०अ०।

चैत्यगृह न० चैत्यस्य समीपे गृहम्। चतुष्पथस्थे चैत्यसन्निहिते गृहे शब्दार्थचि०।

चैत्यतरु पु० कर्म०। यामादौ १प्रसिद्धवृक्षे २अश्वत्थवृक्षे रत्नमाला। चैत्यवृक्षादयोऽत्र। "चैत्यतरौ सा पतिता सत्कृतपीडां करोत्युलूका" वृ० स० २३अ०। "चैत्यद्रुमश्मशानेषु" मनुः। [त्रिका०।

चैत्यमुख पु० चैत्यस्य देवकुलस्येव मुखमस्य। कमण्डलौ

चैत्ययज्ञ पु० आह्न० गृह्योक्ते यज्ञभेदे तस्य विधानादि यथा "चैत्ययज्ञे प्राक् खिरकृतचैत्याय बलिं हरेत्" सू०। चैत्ये भवाचैत्याः। शङ्करः पशुपतिः आर्यां ज्येष्ठा इत्येवमादयः। यदि कस्मैचिद्देवतायै प्रतिगृह्णाति यदि आत्मनोऽभिप्रेतं वस्तु लब्धं ततस्त्वा मह्यमाज्येन स्थालीपाकेन पशुना वा यक्ष्यामीति ततोलब्धे वस्तुनि तस्य तेन यागं कुर्यात् स चैत्ययज्ञः। तत्र खिरकृतः प्राक् चैत्याय बलिं हरेत् नमस्कारान्तेन नामधेयेन पुनश्चैत्यस्य यक्षणं प्रत्यक्षकरणार्थम्। तेन चैत्यायतने एवोपलेपनादि कुर्यात्" ना० ह०। "यद्यु वै विदेशस्थं पलाशदूतेन यत्र वेच्छा वनस्पते इत्येतयर्चा द्वौ पिण्डौ कृत्वा वीवधेऽभ्याधाय दूताय प्रयच्छेदिमन्नक्षौ बलिं हरेति चैनं ब्रूयादयं तथमिति यो दूताय" सू०। "यदि विदेशस्थं चैत्यं यजेत् तदा पलाशदूतेन बलिं हरेत्। पलाशेन दूतं वीवधञ्च कुर्यात्। यत्र वेच्छेत्यृचा द्वौ पिण्डौ कृत्वा वीवधेऽभ्याधाय दूताय प्रयच्छेत्। तयोरेकं पिण्डं निर्दिश्य दूतं वदति इमं तस्यै बलिं हरेति। अपरं दूताय प्रयच्छति अयं तथमिति। एतयर्चेति वचनम् अन्यत्र पादयक्षणेऽपि क्वचित् सूक्तं भवतीत्येव मर्थम्। तेन "आत्वाहार्षमन्तरेधीति ऋषभं मा समानानामिति" च सूक्तं सिद्धम्। अन्ये पुनरभ्यासार्थं मन्यन्ते पिण्डकरणे वीवधाभ्याधाने दूताय प्रदानेऽपि ना० ह०। "प्रति भयं चेदन्तरा शस्त्रमपि किञ्चित्" सू०। "कर्तुश्चैत्यस्य च मध्ये भयमस्ति चेत् शस्त्रमपि किञ्चित् दद्यात् दूताय" ना० ह०। "नाव्या चेत् नद्यन्तरा प्लवरूपमपि किञ्चिदनेन तरितव्यमिति" सू०। "उभयोर्मध्ये यदि नावा तार्या नदी स्यात् तदा प्लवरूपमपि किञ्चित् दद्यात् अनेनेति मन्त्रेण" ना०ह०। "धन्वन्तरियज्ञे ब्राह्मणभक्ति चान्तरा इरो-

क्षितायाये बलिं हरेत्" स्मृ०। "यदि धन्वन्तरि चैत्यो भवति तदा ब्रह्मणस्मिं चान्तरा पुरोहिताय बलिं हरेत् पुरोहिताय नम इति ततो धन्वन्तरये नम इति। धन्वन्तरौ विदेशस्थे स्वयं विशेषः धन्वन्तरेश्च पुरोहितस्य चैकः पिण्डः द्वितीयो दूतस्य"। ना० ह०।

**चैत्यविहार** पु० चैत्यस्येव विहारोऽत्र। जिनगृहे हेम०।

**चैत्र** न० चित्र-ष्ट्रण् चित्रमेव स्वार्थे अण् वा। १देवकुले (देउल) २स्वनामख्याते मेदि० ३शुद्धभिक्षुके पु० ४वर्षाचलभेदे पु० त्रिका० कुलपर्व्वतशब्दे २।२।१६ दर्शिते विष्णुपु०वाक्ये "गोमेदश्चैव चन्द्रश्चेत्यत्र चैत्र इति पाठान्तरदर्शनात् त्रिकाण्डोक्तिः समञ्जसा। चित्रायां भवः अण्। बुधस्य कलत्रभेदचित्रायोगभवे ५बुधपुत्रभेदे पु० ब्रह्मवै० पा० अ०। चित्रानक्षत्रयुक्ता पौर्णमासी अण् ङीप् चैत्री-साऽस्मिन् मासे पुनरण्। चित्रानक्षत्रयुक्तपौर्णमासी युक्ते तदुपलक्षिते वा ६चान्द्रे मासि वार्हस्पत्ये ७वर्षभेदे दक्षयज्ञभूते अर्द्धमासे मीनस्थरवियुते ९सौरचैत्रे च कार्त्तिकशब्दे १६४८पृ० दृश्यम्। चित्रायां भवः अण्। १०चित्रानक्षत्रजाते त्रि० स्त्रियान्तु तस्याद्यो लुक्। चित्रा चित्राजातायां स्त्रियां स्त्री चित्राशब्दे दृश्यम्। स्वार्थे क तत्रार्थे शब्दरत्ना०। "फाल्गुनं वाथ चैत्रं वा मासं प्रति यथाबलम्" मनुः। "मीनादिस्थो रविर्यैत्र-मासस्यः प्रथमक्षणे। भवेत् तेऽब्दे चान्द्रमासाश्चैत्राद्या द्वादशः स्मृताः" व्यासः "चैत्रे मदोन्मादिनी" उद्वाह०त०।

**चैत्ररथ** न० चित्ररथेन गन्धर्वेण निर्वृत्तम् अण्। १कुबेर-स्योद्याने अमरः। "वभौ वल्गुजनाकीर्णं वनं चैत्ररथं यथा" हरिव० २२४अ०। "एकोयवौ चैत्ररथप्रदेशान्" रघुः २सूनिभेदे पु० "व्याविक्षितमभिष्यन्नं तथा चैत्ररथं सुनिम्" भा० आ० ६३अ०। चैत्ररथेः शशबिन्दोरपत्यम् स्त्री अण् ङीप्। ११शशबिन्दोःसुतायां स्त्री "भान्धात-र्युवनाश्वस्य त्रिलोकीविजयी सुतः। तस्य चैत्ररथी भार्य्या शशबिन्दोःसुताऽभवत्" हरिव०१२अ०। चित्ररथं गन्धर्व-मधिकृत्य कृतोपन्यः अण्। १२भारतपर्व्वान्तर्गतेऽवान्तर-पर्वभेदे न० चित्ररथशब्दे दृश्यम्। "तथा चैत्ररथं देव्याः पाञ्चाल्याश्च स्वयंवरम्" भा० आ० १०अ० अवान्तरपर्वोक्तौ।

**चैत्ररथि** पु० चित्ररथस्य उपबर्हुपुत्रस्यापत्यम् अण्। उपबर्हुपुत्र चित्ररथस्यापत्ये शशबिन्दौ नृपे "ततः प्रभृतिभिक्षून् वै उपबर्हुःसोऽप्रमाल्लजम्। जज्ञे चित्ररथस्तस्य पुत्रः कम्बलबर्हिषः। आसीत् चैत्ररथिर्वीरो यज्वा विपुल दक्षिणः। शशबिन्दुः परं दत्तं राजर्षीणां समन्वितः" हरिव० २७अ०।

**चैत्ररथ्य** न० चैत्ररथमेव स्वार्थे ष्यञ्। चैत्ररथवने "मानसे चैत्ररथ्ये च स रेमे रामया रतः" भाग०३।२।२८अ०।

**चैत्रमख** पु० चैत्रे कर्त्तव्यो मख इव महोत्सवः। चैत्रमासे मदनत्रयोदश्यादिकर्त्तव्ये वसन्तोत्सवे हेमच०।

**चैत्रायण** पुंस्त्री चित्रस्य गोत्रापत्यम् नडा०फक्। १चित्रस्य गोत्रापत्ये। चित्रेण निर्वृत्तादि प्रज्ञा० फक्। २चित्र-निर्वृत्तादौ त्रि०।

**चैत्रावली** स्त्री चैत्रे आवलिः सम्यक् बलिरत्र ङीप्। चैत्रपौर्णमास्यां त्रिका०। "चैत्रावल्याः परे ऽपि वा" ति० त०। "चैत्रावली मदनत्रयोदश्यीत्यपरे तस्यामेव मदनपूजाविधानात्तस्याश्चैत्रत्वात्।

**चैत्रिक** पु० चित्रानक्षत्रयुक्ता पौर्णमासी साऽस्मिन् मासे पचे ठक्। चैत्रमासे अमरः।

**चैत्रिन्** पु० चैत्री विद्यतेऽस्मिन् वीक्षा० इनि। चैत्रमासे राजनि०। तत्र चैत्रिरित्यपि तत्र वा० इञ्।

**चैत्री** स्त्री चित्रानक्षत्रयुक्ता पौर्णमासी अण् ङीप्। चित्रानक्षत्रयुक्तायां पौर्णमास्यां सा हि चैत्रमासे एव भवति योग्यत्वात् कार्त्तिकशब्दे १६४८ पृ० दृश्यम् "चैत्र्यां हि पौर्णमास्यां तु तव दीक्षा भविष्यति" भा० आश्व० ७२अ०। "चैत्र्यां वा मार्गशीर्ष्यां वा सेना-योगः प्रशस्यते" भा० या० १००अ०।

**चैदिक** पुं त्रि० चेदिदेशे भवः काश्या० ठञ् ञिठ् वा दृद्दित्। चेदिदेशभवे स्त्रियां तु ठञि ङीप् ञिठि-टाप्।

**चैद्य** पु० चेदीनां जनपदानां राजा यञ्। १शिशुपाले। "कृष्णस्य चैद्यं प्रति" "त्वया विप्रकृतश्चैद्यः" माघः।

**चैन्तित** पुंस्त्री० चिन्तितायाः तन्नामिकायाः स्त्रिया अपत्यम् "अश्वघ्राभ्यो नदीमानुषीभ्यस्तन्नामिकाभ्यः" पा० अण्। चिन्तितानामिकायाः स्त्रिया अपत्ये। चिन्तायुक्तायाः स्त्रिया अपत्ये तु ठक्। चैन्तिक इत्येव।

**चैल** त्रि० चेलस्येदम् अण् १वस्त्रसम्बन्धिनि स्वार्थे अण्। २चेले वस्त्रे चे(चै)लाशकशब्दे दृश्यम्। "चैलकम्बल-क्षौमाणि विचित्राणि महान्ति च" भा० आ० १२८अ०। "प्रदीप्तमिव चैलान्तं कक्षं देशं न सन्त्रजेत्" भा० श० २८६अ०।

**चैलकि** पु० चेलकस्यैरपत्यम् इञ्। जीवलनामर्षौ "तद-

क्षोवाच जीवलचैलकिः" शत० ब्रा० २।३।१।३४। चैलकश्चित्र "चैलक उन्माद शाण्डिल्यायन" इति शत० ब्रा० १०।४।५।२०। शाण्डिल्यगोत्रे उक्तः।

चैलधाव त्रि० चैलं वस्त्रं धावति शुद्धिं धाव-शुद्धौ क्वण् उप० स०। वस्त्रक्षालके रजके (धोबा) "चैलधावसुराजीविसूचोपपतिवेश्मनाम्" याज्ञ० तदन्नभोजनं निषिद्धम्।

चोक्कुटि पु० गोत्रप्रवरभेदे हेमा० प्रवरा०।

चोक्ष पु० १स्वभावसिद्धशुचिषु वनप्रदेशेषु। "अवकाशेषु चोक्षेषु नदीतीरेषु चैव हि" मनुष्या० कुल्लू०। तत्र भवं यत्। चौक्ष तत्रभवे उदके "अचौक्षसलिलक्षालितयोनिम्" सुश्रुतः। "शुचौ देशे च चोक्षःस्यात्" त्रिका० उक्ते २देशे। "अङ्गावनो दृशावनश्चोक्षाश्चोक्षजनप्रियाः" भा० अनु० १४४अ०।

चोक्ष न० चुक्ष-बा० क्ष। १वल्कले २चर्मणि धरणिः। प्रशस्तं चोक्षमस्यास्ति अच्। ३वृक्षपत्रे पु० अमरः ४गुडूच्यां च शब्दार्थ०। स्वार्थे क। तत्रार्थे "दद्याच्चात्रापिप्पलीमूलतण्डुलीयकवराङ्गचोचकेत्यादि" सुश्रु०।

चोड पु० चुल-संज्ञायां अच् लस्य डः। १प्रावरणे २देशभेदे ब० व० भेदि०। चोलशब्दे दृश्यम्।

चोडी स्त्री चुल-अच् गौरा०ङीष् लस्य डः। शाक्यां हेमच०।

चोद पु० चोदयति चुद-कर्त्तरि घञ्। अश्वादेः प्रेरके १कशादौ। "अधने चोद एषां वि सक्थानि नरो वसुः" ऋ०४।६१।३। "चोदः प्रेरिका कशा अरापकाष्ठविशेषो वा" २प्रेरकमात्रे त्रि० "चोदः कविसुख्यात् जातमेवितः" ऋ० १।१४३।७। "चोदः प्रेरकः" भा०।

चोदक पु० चुद-ण्वुल्। १प्रवर्त्तके विधिवाक्ये "वर्त्तमानोपदेशाच्चोदनाशब्दात्सत्यर्थाभावात्तवैचेति वचनाच्चिदंशात् कर्मचोदकः" कात्या० श्रौ० १।१०।१। "अग्नीदग्नीनित्यादिः कर्मचोदकः कर्मविधायकः विधिवाक्यमित्यर्थः न तु मन्त्रः। कुतः वर्त्तमानोपदेशात् एवमादयो वर्त्तमानमर्थमनुशेरत्येन यत उपदिशन्ति अग्निविहरणं कर्त्तव्यं कारणं च कर्त्तव्यमित्येवमुपदिश्यते किं च चोदनाशब्दात् अपि च एषु प्रेषेषु चोदनाशब्दो विधिशब्दोऽस्ति विधौ हि लोट् श्रूयते। लोट् चेति" या०। लोटो मध्यमपुरुषवचनानि चैतानि विहर आहरणीहि आसादयेत्यादीनि तस्मादपि कर्मचोदका एते" कुल्लू०। २प्रेरकमात्रे त्रि०

चोदन न० चुद-भावे ल्युट्। १प्रवर्त्तने चोदनाशब्दार्थे। "प्रथमेऽह्नि हतोवे वा कर्त्तव्यं श्रुतिचोदनात्" मनुः। २प्रेरणमात्रे च "कार्य्यकारणसन्देहे भवत्यन्योन्यचोदनात्" भा० अनु० १अ०। कर्त्तरि ल्यु। ३चोदके त्रि०। "अपिप्रयं चोदना वा मिमाना" यजु० २६।७। "चोदना चोदनानि कर्माणि" वेददी०।

चोदना स्त्री चु० चुद-युच्। "चोदना चोपदेशश्च विधिश्चैकार्थवाचिनः" इति भट्टोक्ते प्रवर्त्तनावाक्ये "चोदनालक्षणोऽर्थो धर्मः" इति मीमांसासूत्रम्। २प्रेरणार्थात्। ३प्रवर्त्तनायाञ्च। चोद्यतेऽनया करणे वा०युच् ४प्रवृत्तिहेतौ च "ज्ञानं ज्ञेयं परिज्ञाता त्रिविधा कर्म्मचोदना" गीता। "ज्ञानमिष्टसाधनमिति बोधः, ज्ञेयमिष्टसाधनं कर्म्म। परिज्ञाता एतज्ज्ञानाश्रयः, कर्म्मचोदना कर्म्म चोद्यते प्रवर्त्त्यतेऽनया चोदना ज्ञानादित्रितयं प्रवृत्तिहेतुरित्यर्थः" श्रीधरः। ५अज्ञातार्थज्ञापके शब्दभाले—"चोदनाप्रवृत्तिभेदाच्च" "या हि चोदना धर्म्मस्य लक्षणं सा स्वविषये नियुञ्जानैव पुरुषमवबोधयति ब्रह्मचोदना तु पुरुषमवबोधयन्त्येव केवलम्, अवबोधस्य चोदनाजन्यत्वात् न पुरुषोऽवबोधे नियुज्यते यथाऽऽम्नायसन्निकर्षेणार्थावबोधे तद्वत्" शा० सू० शाङ्करभाष्यम्। "अज्ञातज्ञापकः शब्दः चोदना तस्याः प्रवृत्तिर्बोधकत्वं तद्वैचक्षण्याच्च जिज्ञास्य भेद इत्यर्थः। संयद्वाक्यं विदणोति या क्षीति लक्षणं प्रमाणं "स्वर्गकामोयजेत" इत्यादि वाक्यं हि स्वविषये धर्मे यागादिके स्वर्गभावनारूपे फलहेतुयागादि गोचरनियोगे वा क्षितसाधने यागादौ वा, पुरुषं प्रवर्त्तयदेवावबोधयति "अहमात्मा ब्रह्म" इत्यादि वाक्यं तु पुरुषं केवलमप्रवृत्तं ब्रह्म बोधयत्येव न प्रवर्त्तयति विषयाभावात् नन्ववबोध एव विषयोऽस्तु तत्राह न पुरुष इति ब्रह्मचोदनया पुरुषोऽवबोधे न प्रवर्त्तते इत्यत्र हेतुं पूर्ववाक्येनाह अवबोधस्येति। स्वजन्यज्ञाने स्वयं प्रमाणं न प्रवर्त्तकमित्यत्र दृष्टान्तमाह यथेति मानादेव बोधस्य जातत्वात् जाते च तस्मिन् विध्ययोगात् न वाक्यार्थज्ञाने पुरुषप्रवृत्तिः। तथाच प्रवर्त्तकमानमेयो धर्मः, उदासीनमानमेयं ब्रह्मेति" रत्नप्रभा। लोगाक्षिभास्करेणापि "वेदप्रतिपाद्यप्रयोजनवदर्थो धर्मः" इति धर्मलक्षणसूत्रे "चोदनालक्षणोऽर्थो धर्मः" जै० सूत्रस्थचोदनापदस्य वेदमात्रपरत्वं सूरीकृतम्। तल्लक्षणे चार्थपदस्य दृश्यमाणपरत्वेन

सिद्धे रक्षाभावात् ब्रह्मणः सङ्घत्वेन द्रव्यमात्रत्वाभावात् वेदप्रतिपाद्यत्वेऽपि नातिव्याप्तिरिति बोध्यम्। ५चोदनाविषये यागादिप्रयत्ने च। "एकं वा संयोगरूपचोदनाऽख्याऽविशेषात्" जै० सू०। "कर्मैक्यप्रतिपादका संयोगरूपचोदनासंज्ञारूपाः पदार्थास्तेषामविशेषादैक्यम्। "तत्र चोदना प्रवर्त्तकः शब्दः चोदितप्रयत्नो वा" रत्नप्रभा। [ङः। कन्दुके त्रिका०।

चोदनागुड पु० चोदनया नोदनया गुड्यते गुड-क रस्य लः।

चोद्य न० चुद-ण्यत्। १प्रश्ने २पूर्वपक्षे च अमरः। ताभ्यां हि उत्तरदानाय प्रवर्त्तनात् तयोस्तथात्वम्। "चोद्यं वा परिहारो वा क्रियतां ह्येतभाषया। यद्येतभाषया चोद्यं नास्ति नापि तदुत्तरम्" वेदान्तका०। २आक्षेपे च "वपनाजनं प्रति न चोद्यमदः" माघः। "चोद्यं चोदनीयम् कथमित्याक्षेपम्" मल्लि० "सत्यं ध्यानं समाधानं चोद्यं वैराग्यमेव च" भा० उ० ४२अ०। ४अद्भुते ५प्रेरणार्हे त्रि०। "नित्योत्थिता गुरुकर्म्मस्वचोद्याः" भा० अनु० १०२अ०।

चोपन न० चुप-ल्युट्। १मन्दगमने, २तूष्णीम्भवने, ३मौने च।

चोर पु० चुर-अच्। १स्तेयकर्त्तरि परद्रव्यापहारके शब्दर० २अन्यद्रव्यभेदे, हेमच० ३कृष्णगवाञ्च छन्दोगचन्द्रः। ब्राह्मणा० कर्म्मणि ष्यञ्। चौर्य्य तत्कर्म्मणि परद्रव्यापहरणे। "सा च द्रव्यवता कृतस्य धनं द्यूतेन चौर्य्येण वा चौर्य्यद्यूतपरिग्रहोऽपि भवतो नष्टस्य काऽन्या गतिः" उद्भटः। चोरस्य भावः मनोज्ञा० वुञ्। चौरिका चोरभावे स्त्री। ४कविभेदे पु० कविरमरः कविरमरः कवी चोरमयूरकौ" उद्भटः। तत्कृतयन्थश्च चोरपञ्चाशिका"। तत्र चौर्य्यपदार्थो निरूपितः प्रदर्श्यते। परमात्मस्वत्वपदद्रव्यहरणमेव चौर्य्यं तेन साधारणधनापहारे न चौर्य्यम्। यथाह दायभागे "य एव हि परस्वेदमिति विशेषं जानानः परस्वे स्वत्वहेतुमन्तरेणैव स्वत्वमारोपयति स स्तेन इति लोकप्रसिद्धोऽर्थः न चात्रेदं परकीयम् इदं वा ममेति विवेक्तुं शक्नोति द्रव्यस्वाविभक्तत्वात्। यथा यदेव हि ममेदमिति विशेषं जानानः परस्वत्वापन्ने स्वामी त्यजति, परत्व विशेषेणेदं ममेति स्वत्वं प्रक्षेति तत्रैव दाननिष्पत्तिः। न च साधारणधने तथा सम्भवतीति साधारणधनमदेयमुक्तं तथा स्तेयमपि नैतन्मम धनं परस्वेदमिति जानत एव भवतीति न साधारणधनापहारे स्तेयनिष्पत्तिः"। "परद्रव्यहरणं स्तेयमिति परशब्दात् स्वामीयत्वव्यवच्छेदेनैव परकीयत्वस्यावगमात् साधारणासाधारणयोरसाधारणस्यैव शीघ्रप्रतीतेः। चोरचौर्य्यभेदलक्षणदण्डभेदादिकं च वीरमित्रोदये दर्शितं यथा।

"मनुः स्वाम्याद्यसं स्वन्वयवत् प्रसभकर्म यत् कृतम्। निरन्वयमनिर्वेद्यं स्तेयं कृत्वापह्नुयते च यदिति" कल्पायमर्थः। अन्वयवद्द्रव्यरक्षकराजाद्यध्यक्षादिसमक्षं बलावष्टम्भेन यत्परधनापहरणादिकं क्रियते तत् साहसम्। स्तेयं पुनर्निरन्वयं स्वाम्याद्यसमक्षं यद्वञ्चयित्वा परधनाद्यपहरणं तदुच्यते। यच्च राजाद्यध्यक्षादि समक्षमपह्नुत्य न मयेदं कृतमिति भयाद्विह्नूयते तदपि स्तेयमिति। अतएव नारदः "उपायैर्विविधैरेषां छलयित्वाऽपकर्षणम्। सुप्रमत्तप्रमत्तेभ्यः स्तेयमाहुर्मनीषिण" इति॥ एषामिश्रे तत् क्षुद्रादिनिर्देशान्तान्याह स एव "सङ्ग्रामाङ्गनसङ्घास्थिदारुचर्मतृणादि यत्। प्रमीधान्यं कृताच्चैव क्षुद्रं द्रव्यसदाहृतम्। वासः कौशेयवर्ज्यञ्च गोवर्जं पशवस्तथा। हिरण्यवर्ज्यं लोहञ्च मध्यं दीक्षितवादि च। हिरण्यरत्नकौशेयस्त्रीपुङ्गोराजवाजिनः। देवब्राह्मणराज्ञाञ्च वित्तेयन्द्रव्यसत्तमम्" इति"। बलात्कारकृतमपहरणं साहसान्तर्गतं स्तेयमित्याह स एव "तस्यैव भेदः स्तेयः स्याद्विशेषस्तत्र तूच्यते। आधिः साहसमाक्रम्य स्तेयमाधिक्यतेन तु" इति। तस्यैव साहसस्यैव। आधिः पीडा धनापहरणादिद्वारा आक्रम्य प्रसह्य परस्य क्रियमाणः क्लेशः साहसरूपं स्तेयम्। छलेन क्रियमाण आधिः केवलस्तेयमित्यर्थः। तस्करज्ञानोपायमाह याज्ञवल्क्यः "याजकैर्ज्ञायते चौरो लोप्त्रेणाथ पदेन वा। पूर्वकर्मापराधी च तथा चाशुद्धवासकः। अन्योऽपि सदृशो याज्ञा ज्ञातिनामादिनिश्चयैः। द्यूतस्त्रीपानसक्ताश्च शुल्कभिन्नस्वरास्तथा। परद्रव्यस्पृहाणाञ्च शूद्रकाः मूढचारिणः। निरायाः व्ययवन्तश्च विनष्टद्रव्यविक्रयाः" इति। याजकैराजपुरुषैर्लोप्त्रेणापहृतभाजनादिना, अशुद्धवासः अप्रज्ञातस्थानवासी। ज्ञातिनिश्चयो नाहं मूढदत्वेवंरूपः। नामनिश्चयो नाहं डित्थ इत्येवंरूपः। आदिग्रहणात् स्वदेशग्रामकुलाद्युपलापेन च लक्षिता याज्ञाः। द्यूतप्रसङ्गान्नाद्यपानादिव्यतिप्रसक्ताः तथा कुतोऽपि त्वमिति चोरयाज्ञिभिः दृष्टो यदि शुल्कस्वरोभिन्नस्वरो

वा भवति। वञ्चकवचनात् स्निग्धललाटादीनां ग्रहणम्। तथा ये निष्कारणद्विषदस्य द्रव्यं किं वास्य गृह्णन्तियेवं पृच्छन्ति ये चाकारणेनात्मानङ्कुटयित्वा चरन्ति। ये चायाभावेऽपि वञ्चव्यवहारिणः। ये च विनष्टद्रव्याणाङ्क्षीर्णवस्त्रभिन्नभाजनादीनामनिर्ज्ञातस्वामिकानां विक्रयकारिणः, ते सर्वेऽपि चौर्यसम्भावनया याचेत्यर्थः। एवंविधलिङ्गयुक्तान् पुरुषान् गृह्णीयात्ते चौरा भवन्ति नवेति सम्यक् परीक्षेत न तावन्मात्रेण निश्चिनुयात् अचौरस्यापि लिङ्गसम्बन्धसम्भवात्। अतएव नारदः "अन्यङ्गस्तात्परिभ्रष्टसकामादुत्थितश्च यः। चोरेण वा परिक्षिप्तं चोपकं यत्नात् परीक्षयेत्। असत्याः सत्यसङ्काशाः सत्याश्चासत्यसंनिभाः। दृश्यन्ते विविधा भावास्तस्माद्युक्तं परीक्षणमिति"। स्तेयस्य त्रैविध्यमाह स एव "तदपि त्रिविधं ज्ञेयं द्रव्यापेक्षमनीषिभिः। क्षुद्रमध्योत्तमानां तु द्रव्याणामपकर्षणादिति"। चौरस्य द्वैविध्यमाह बृहस्पतिः "प्रकाशाप्रकाशाश्च तस्करा द्विविधाः स्मृताः। प्रच्छन्नासामर्थ्यभावाभिः प्रभिद्यन्ते सहस्रधेति"। प्रकाशतस्करानाह स एव। "नैगमा वैद्यकितवाः सभ्योल्लोचकवञ्चकाः। दैवोत्पादविदो भद्राः शिल्पज्ञाः प्रतिरूपकाः। अक्रियाकारिणश्चैव मध्यस्थाः कूटसाक्षिणः। प्रकाशतस्करा ह्येते तथा कुहकजीविनः" इति प्रतिरूपकाः प्रतिरूपकराः। अतएव नारदः "प्रकाशवञ्चकास्तत्र कूटमानतुलान्विताः। उल्लोचकाः सोपधिका वञ्चकाः परयोषितः। प्रतिरूपकराश्चैव सङ्कुलादेशवृत्तयः। इत्येवमादयो ज्ञेयाः प्रकाशतस्करा भुवीति"। नैगमादिव्याजेन ये परद्रव्यापहारकास्ते नैगमाद्याः। अप्रकाशतस्करस्वरूपभेदानाह व्यासः "साधनाङ्गान्विता रात्रौ विचरत्यविभाविताः। अविज्ञातनिवासाश्च ज्ञेयाः प्रच्छन्नतस्कराः। उत्क्षेपकः सन्धिभेत्ता पान्थसन्ध्यन्धिभेदकः। स्त्रीपुङ्क्षौ च पशुस्तेयी चौरो नवविधः स्मृतः" इति। रात्राविति प्रायिकम् चरणादौ दिवापि सम्भवात्। उत्क्षेपकः धनिनामनवधानतां निश्चित्य तत्समीपस्थं धनमुत्क्षिप्य याहकः। सन्धिभेत्ता गृहयोः सन्धौ स्थित्वा तत्सन्धिच्छित्तिभेत्ता। पान्थसन्धिकान्तारादौ पथिकानामन्नपानाद्यपहारकः। सन्धिभेदकः परिणामीयादियाचितं धनं यद्गृह्णं तद्गृह्यन्धिमोचक इति। प्रकाशतस्कराणां दण्डमाह स एव "स्त्रीपुंसौ वञ्चयन्नीह मङ्कुलादेशवृत्तयः। गृह्णन्ति ब्रह्मणा चर्यं मनाक्स्वार्थविहिंसिनः। नैगमाद्या भूरिधना दण्ड्या दोषानुरूपतः। यथा तेन नियच्छन्ति तिष्ठन्ति सख्ये तथेति"। दोषानुरूपतो दण्ड्या नतु धनानुरूपत इत्यभिप्रायः। केषाञ्चित् प्रकाशतस्कराणां दण्डमाह बृहस्पतिः "प्रच्छाद्य दोषं व्याभिश्च पुनः संस्कृत्य विक्रयी। मूल्यं तद्विगुणं दाप्यो वणिग् दण्डं च तत्समम्। अज्ञातौषधिमन्त्रस्तु यश्च व्याधेरतत्त्ववित्। रोगिभ्योऽर्थं समादत्ते स दण्ड्यश्चोरवद्भिषक्। कूटाक्षदेविनः क्षुद्रा राजलभ्यहराश्च ये। गणका वञ्चकाश्चैव दण्ड्यास्ते कितवाः स्मृताः। अन्यायवादिनः सभ्यास्तथोल्लोचजीविनः। विश्वस्तवञ्चकाश्चैव निर्वास्याः सर्वएव ते। ज्योतिर्ज्ञानलयोत्पातमविदित्वा तु ये नृणाम्। आयव्ययर्णलोभेन विनेयास्ते प्रयत्नतः। दण्डाजिनादिभिर्युक्तमात्मानं दर्शयन्ति ये। हिंसन्ति ब्रह्मणा नृणां वध्यास्ते राजपूरुषैः। अल्पमूल्यञ्च संस्कृत्य नयन्ति बहुमूल्यताम्। स्त्रीबालकान् वञ्चयन्ति दण्ड्यास्तेऽर्थानुसारतः। क्षेमरत्नप्रवालाद्यान् क्रत्रिमान् कुर्वते तु ये। क्रेतुर्मूल्यं प्रदाप्यास्ते राज्ञा तद्विगुणं दमम्। मध्यस्थं वञ्चयन्त्येकं क्षेत्रलोभादिना यदा। साक्षिणश्चान्यथा ब्रूयुर्दाप्यास्ते द्विगुणन्दममिति"। राजलभ्यः करविशेषः। मनुरपि "सर्वकण्टकपापिष्ठं क्षेमकारन्तु पार्थिवः। प्रसह्य मन्त्रये क्षेदयेल्लवशः क्षुरैरिति।" विष्णुरपि "द्यूते च कूटाक्षदेविनां करच्छेदः" इति। अप्रकाशतस्कराणां दण्डमाह स एव "उत्क्षेपकस्य सन्दंशश्छेत्तव्यो राजपुरुषैः"। सदंशोऽत्र करः तथा च याज्ञवल्क्यः "उत्क्षेपकग्रन्थिभेदौ करसन्दंशहीनकौ। कार्यौ द्वितीयापराधे करपादैकहीनकाविति"। अङ्गुलतर्जन्योर्ग्रन्थिमोचने बाधकत्वमत्वेनात्र सन्दंशशब्देन तयोर्ग्रहणम्। प्रथमापराधे तौ क्रमेण पाणि सन्दंशाभावबन्धौ कर्त्तव्यौ, द्वितीयापराधे उभावप्येकपाणिपादाभावावेतौ कर्त्तव्यावित्यर्थः। सन्धिभेत्तॄणां दण्डमाह मनुः "सन्धिन्निक्त्वा तु ये चौर्यं रात्रौ कुर्वन्ति तस्कराः। तेषां छित्त्वा नृपो हस्तौ तीक्ष्णशूले निवेशयेदिति"। तानिति शेषः। बृहस्पतिरपि "सन्धिच्छेदकृतो ज्ञात्वा शूलमारोहयेत् प्रभुरिति"। आरोहयेत् आरोपयेदित्यर्थः। पान्थसन्धि दण्डमाह स एव "तथा

पान्यसुवं हृत्वा गले बद्धावलम्बेदिति"। पान्यसुवं पथिलुण्ठकम्। यन्थिभेदकस्य दण्डमाह मनुः "अङ्गुष्ठौ यन्थिभेदस्य छेदयेत् प्रथमे यहे। द्वितीये हस्तचरणौ तृतीये वधमर्हतीति"। अङ्गुष्ठौ तर्जन्यङ्गुष्ठौ। द्वितीये हस्तस्य चरणस्य च छेदः तृतीये वध इत्यर्थः। अतएव नारद आह" "प्रथमे यन्थिभेदानामङ्गुष्ठहस्तयोर्वधः" इति। स्त्रीहर्त्तुर्दण्डमाह व्यासः "स्त्रीहर्त्ता लोहशयने दग्धव्यो वै कटाग्निनेति"। पुंहर्त्तुर्दण्डमाह स एव "नरहर्त्तुर्हस्तपादौ छित्त्वा स्थाप्यस्तृणप्लवे" इति। गोहर्त्तुर्दण्डमाह बृहस्पतिः "गोहर्त्तुर्नासिकां छित्त्वा वहाम्यसि निमज्जयेदिति"। नारदः "सर्वस्वं हरतो नारीं, कन्यां तु हरतो वधः। वाजिवारणलोहानां चाददीत बृहस्पतिरिति"। सर्वस्वमित्यनुषङ्गः। पशुहर्त्तुर्दण्डमाह व्यासः" "पशुहर्त्तुस्त्वर्द्धपादं तीक्ष्णशस्त्रेण कर्त्तयेदिति"। पशुहर्त्ता पञ्चनखादेव दण्डनीय इत्याह नारदः "मङ्गापशून् स्तेनयतो दण्डस्तत्तमसाहसम्। मध्यमपशून् पुंस्तु क्षुद्रपशून् तथा क्षुतः इति। क्षुत इति पशौ। वन्द्योपस्करादीनां दण्डमाह याज्ञवल्क्यः "वन्द्यिपस्करांस्तथा वाजिकुञ्जराणां च हारिणः। प्रसह्यघातिनश्चैव शूलमारोपयेन्नृपः"इति। अङ्गच्छेदादयः उत्तमसाहसत्वाद् ब्राह्मणव्यतिरिक्तेषूत्तमद्रव्यापहारविषयाः "साहसेषु य एवोक्तास्तेषु दण्डोमनीषिभिः। स एव दण्डः स्तेयेऽपि द्रव्येषु विज्ञातुरुक्तमादिति" नारदेनोत्तमसाहससंज्ञोत्तमद्रव्यविषयत्वेन व्यवस्थापनात्तेन क्षुद्रमध्यमद्रव्याचेपकादीनां तदनुरूपो न करच्छेदादिः। तस्करस्यापहृतं धनमनतिस्वामिने दापयित्वा दण्डः कर्त्तव्य इत्याह याज्ञवल्क्यः "चौरं प्रदाप्यापहृतं घातयेद्विविधैर्वधैरिति" धान्यादपहरणे दण्डमाह मनुः "धान्यं दशभ्यः कुम्भेभ्यो हरतोऽभ्यधिकं वधः। शेषे त्वेकादशगुणं दाप्यस्तस्य च तद्धनमिति"। कुम्भो विंशतिप्रस्थाः शेषे दशकुम्भाधिकाक्षुद्रे, तस्य धान्यस्वामिनः। रत्नहरणे दण्डमाह स एव "मुख्यानाञ्चैव रत्नानां हरणे वधमर्हतीति"। स एव "सुवर्णरजतादीनामुत्तमानाञ्च वाससाम्। पञ्चाशतस्त्वधिके हस्ताच्छेदनमिष्यते। शेषे त्वेकादशगुणं मूल्याद्दण्डं प्रकल्पयेत्। पुरुषाणां कुलीनानामारीणाञ्च विशेषतः"इति। अत्र सुवर्णादीनां संख्या कर्णमित्याद्युक्तः इह इति मदनरत्ने। अतोऽङ्गच्छेदादिदण्डो ब्राह्मणव्यतिरिक्तविषयः "सचिह्नं ब्राह्मणं कृत्वा खराद्याहिप्रवासयेदिति" याज्ञवल्क्यस्मरणात्। चिह्नं ललाटे श्वपदाकाराङ्कनम्। तथा च मनुः "गुरुतल्पे भगः कार्य्यः सुरापाने सुराध्वजः। स्तेये च श्वपदं कार्य्यं ब्राह्मणस्य शिरः पुमानिति"। एतच्च प्रायश्चित्तकर्त्तृणां दण्डोत्तरकालं न तु प्रायश्चित्तं चिकीर्षताम्। "प्रायश्चित्तञ्च कुर्वाणाः सर्वे वर्णा यथोदितम्। नाङ्कयेद्राज्ञा ललाटे तु दाप्यस्तत्सहसाहसमिति" मनुस्मरणात्। जात्यादिभेदेन च दण्डतारतम्यमाह स एव "अष्टापाद्यन्तु शूद्रस्य स्तेये भवति किल्बिषम्। षोडशैव तु वैश्यस्य द्वात्रिंशत् क्षत्रियस्य तु। ब्राह्मणस्य चतुःषष्टिः पूर्णं वापि शतम्भवेत्। द्विगुणा वा चतुःषष्टिस्तद्दोषगुणवेदिनः" इति। यस्मिन्नपराधे यो दण्ड उक्तः स शूद्रकर्त्तृके तस्मिन्नष्टगुणः दापनीयः वैश्यकर्त्तृके षोडशगुणः, क्षत्रियकर्त्तृके द्वात्रिंशद्गुणः। ब्राह्मणकर्त्तृके चतुःषष्टिगुणः शतगुणो वा अष्टाविंशत्युत्तरशतगुणोवेत्यर्थः। माषान्यूनमूल्यानां क्षुद्राणां मूल्यात् षड्गुणोदण्ड इत्याह नारदः "काष्ठभाण्डतृणादीनां क्षणमवानान्यैव च। वेणुवैणवभाण्डानां तथा स्नाय्वस्थिचर्म्मणाम्। शाकानामार्द्रमूलानां हरणे फलमूलयोः। गोरसेक्षुविकाराणां तथा लवणतैलयोः। पक्वान्नानां कृतान्नानां मत्स्यानामौषधस्य च। सर्वेषामल्पमूल्यानां मूल्यात्षड्गुणो दमः" इति। यत्पुनः क्षुद्रद्रव्यविषये द्विगुणदण्डप्रतिपादकं मनुवचनम् "क्षुद्रकाण्डेक्षुकिण्वानां गोमयस्य गुडस्य च। दधः क्षीरस्य तक्रस्य पानीयस्य तृणस्य च। वेणुवैणवभाण्डानां लवणानान्यैव च। क्षणमवानां च हरणे स्वदोभक्षण एव च। अजानां पक्षिणाञ्चैव लवणस्य दृतस्य च। मांसस्य मधुनश्चैव यच्चान्यत् पशुसम्भवम्। अन्नस्याम्बुवसादीनां मद्यानामोदनस्य च। पक्वान्नानाञ्च सर्वेषां तन्मूल्याद्द्विगुणोदमः" इति। तदल्पप्रयोजनविषयम्। पान्थादीनामल्पप्रयोजनद्रव्यापहरणे न दण्डः यथाह स एव "द्विजोऽध्वगः क्षीणवृत्तिर्हरेद्विप्रस्य वै धनम्। खादन्नः परक्षेत्राच्च दण्डं दातुमर्हति। चणक व्रीहिगोधूमयवानां क्षुद्रसाधयोः। अनिषिद्धैर्यं हीतव्या सृष्टिरेका पथि स्थितैः। तथैव सप्तमे भक्ते भक्तानि षडनश्नता। अश्वस्तनविधानेन हर्त्तव्यं हीनकर्म्मणः" इति। न केवलं चौरस्यैव दण्डः किन्त्वचौरस्यापि

चौरोपकारिणः इत्याह याज्ञवल्क्यः "भक्तावकाशान्युदकभक्तोपकरणव्ययात्। दत्त्वा चौरस्य वा हन्तुर्जानतो दम उत्तम" इति। भक्तम् अशनम्। अवकाशो-निवासस्थानम्। अग्निश्चौरस्य शीतापनोदनाद्यर्थः। उदकन्धितस्य। मन्त्रः चौर्यप्रकारोपदेशः, उपकरणं चौर्यसाधनम्। व्ययः अपहारार्थन्देशान्तरङ्कृतः पाथेयम्। एतानि चौरस्य हन्तुर्वा ज्ञात्वं जानन्नपि यः प्रयच्छति तस्योत्तमसाहसोदण्ड इत्यर्थः। काल्यायनोऽपि "चौराणां भक्तदा ये स्युस्तथाग्न्युदकदायिनः। दातारश्चैव भाण्डानां प्रतिग्राहिण एव च। समदण्डाः स्मृता ह्येते ये च प्रच्छादयन्ति तानिति"। चौरोपेक्षाकारिणं प्रत्याह नारदः "भक्षाश्च ये उपेक्षन्ते तेऽपि तद्दोषभागिनः। उत्क्रोशताञ्जनानान्नदृष्ट्वियमाणे धने तथा। श्रुत्वा ये नाभिधावन्ति तेऽपि तद्दोषभागिनः" इति। द्रव्यभेदेन चौर्ये प्रायश्चित्तं प्रायश्चित्तशब्दे दर्शितम्। तत्कर्म्मविपाकश्च कर्म्मविपाकशब्दे १७४२पृ० दर्शितः।

चोरक पु० चोरः स्वनामख्यातश्चासौ क इव कायति कै-क। १गन्धिपर्णशब्दे रत्नमाला। स च "शैलेयकमांसीतगरकुष्ठ-रसैलेयानि वल्लीजम्। मधुररसमधूच्छिष्टानि चोरक-चेति जीवस्य" सु० सू० १६अ० जीवभक्तौ उक्तः

चोरघात पु० चोरं हन्ति हन-अण्। रात्रां हस्तिभेदे शब्दार्थ०।

चोरपुष्पी स्त्री चोर इव पुष्पमस्याः रात्रिविकाशित्वात्। गङ्गिन्याम्। स्वार्थे क अत इत्त्वम्। चोरपुष्पिका-अत्र अमरः। [नासायाम्" शब्दार्थचि०।

चोरस्नायु पु० चोरस्य गन्धद्रव्यभेदस्य स्नायुरिव। काक-जोरा स्त्री चोरतुल्यं रात्रिविकाशित्वेन पुष्पमस्यस्याः अर्श० अच्। गङ्गपुष्पिकायाम् शब्दार्थचि०।

चो(चौ)रिका स्त्री चोरस्य भावः मनोज्ञा० वुञ् ठन् वा। चौर्य्ये रायमुकुटः।

चोल पु० चुल समुच्छ्राये कर्म्मणि घञ्। १स्त्रीणां कञ्चुके २स्नानपटीने वस्त्रे ३कूर्पासके।(चोला)इति ख्याते पुंसां वस्त्रभेदे। "द्रविडस्तद्भयोर्मध्ये चोलदेशः प्रकीर्त्तितः। तस्य-कर्णाश्च ते प्रोक्तास्तद्देशे दोऽवान्तरो भवेत्" इत्युक्ते ४देशे "अपरे जनपदा दक्षिणेन" इत्युपक्रमे "कौङ्कणकास्तदा चोलाः कोङ्कणा मालधानकाः" भा० भी० ६अ०। जनपदोक्तौ। सच देशः अधुना (ताञ्जोर) इति ख्यातः। स च ह०स०१३अ० कूर्म्मविभागे दक्षिणस्यामुक्तो यथा अथ दक्षिणेन" इत्युपक्रमे "कर्णाटमहाटविचित्रकूट-नासिक्यकोङ्गगिरिचोलाः"। तस्य राजाऽण्, सोऽभिजनोऽस्य वा अण्। चौल तद्भूमे तद्देशवासिनि च। बहुत्वे तस्य लुक्। चोलाः १तद्देशवासिषु २तद्भूमेषु च ब०व०। तद्भूपाश्च बहिवा अपि स्वेच्छतामाप्ताः काम्बोजशब्दे १८०६पृ० दृश्यम्। ७चीनदेशस्यक्षुद्रभेदे शब्दार्थचि०।

चोलक पु० चोल इव कायति कै-क। १वाणवारे कवचे २वस्त्रखण्डे च शब्दर०।

चोलकिन् पु० चोलकमिवास्त्यस्य इनि। १करीरे (बाँशेर-कोंड़)। २नागरङ्गे मेदि० ३क्षिप्तपर्णयि हारा०।

चोरगणेश पु० कर्म्म०। करञ्जिद्रुवतां जातिनां जपफल द्वारके तन्त्रोक्ते गणेशभेदे।

चोलखण्डुक पु०चोलस्यखण्डुक इव शक०। शिरोवेष्टे शिका०

चोलन न० चोलदुवाचरति क्विप् ततः कर्त्तरि ल्यु। १नागरङ्गे २करीरे ३क्षिप्तपर्णयि च शब्दार्थचि०।

चोली स० चुल-घञ् गौरा० ङीष्। स्त्रीणां १कञ्चुकाख्ये आम्रपटीने वस्त्रे (चोला) इतिख्याते पुंसां २वस्त्रभेदे च शब्दार्थचि० [ शब्दार्थचि०।

चोलीखण्डुक पु० चोलश्चासौ खण्डुक इव। शिरोवेष्टे उष्णीषे

चोष्य पु०चोषते चः स चासावुपोदाहश्चेति। पार्श्वस्थेनाग्नि-नेव जनिते सन्तापभेदे। "हृच्छूलपीडनयुतं पवनेन, पित्तात्तृड्दाहचोषवच्छूलं सकफप्रवेकम्" "चोषः पार्श्व-स्थिताग्निनेव सन्तापः" भावप्र०।

चोष्य न०चूष-यत् पृषो० गुणः। चूष्ये चूषणीये। "पञ्चा-स्यद्यं चतुर्विधम्" गीताख्यायां "प्राणिभिर्भुज्यते भक्ष्यं भोज्यं लेह्यं चूष्यं चेति चतुर्विधमन्नं पचामि। तत्र यद्दन्तैरवखण्डावखण्डय भक्ष्यते अपूपादि तद्भक्ष्यं, यत्तु केवलं जिह्वया विलोड्य निगीर्य्यते पायसादि तद्भोज्यम्। यच्चिङ्गायां निःक्षिप्य, रसास्वादेन निगीर्य्यते द्रवीभूतं गुडादि तल्लेह्यम्। यत्तु दंष्ट्राभिर्नि-ष्पीड्य रसं निगीर्य्यावशिष्टं त्यज्यते इक्षुदण्डादि तच्चू-ष्यमिति चतुर्विधस्य भेदः" श्रीधरः। अत्र क्वचित्पुस्तके चूष्यभित्यत्र चोष्यभितिपाठदर्शनात् चोष्यशब्दकल्प-ना केषाञ्चित् ग्रामादिकी अनार्षवाक्ये पृषो० कल्प-नाया अयुक्तत्वात्। किन्तु "भोजनीयानि पेयानि भक्ष्याणि विविधानि च। लेह्यान्यस्तकल्पानि चो-ष्याणि च तथाऽर्जुन" भा० आ० १७१अ०। अत्रार्थे-

स्यात् पृथो० कल्पना युक्तैव। एवं "भक्ष्यं भोज्यञ्च पेयञ्च चोष्यं लेह्यं तथैव च" हरिव० १४५ अ०।

चोस्क पु० १हवोत्तमे शब्दार्थचि०। २सिन्धुवारे (सोंदाल) रत्ने च त्रिका०।

चोड(ल) न० चूडा प्रयोजनमस्य चूडा० अः वा डस्य लः। चूडाकर्म्मणि चूडाशब्दे २८५७ पृ० दृश्यम् "गर्भैश्चौमैर्जातकर्म्म चौडमौञ्जीनिबन्धनैः" मनुः। चूडैव स्वार्थे अण्। चूडायाम्" "वेल्लिहाभैमेहानागैः कृतचौडमभिलहन्" भा० व० १७अ०।

चौडि पुंस्त्री चूडाया इदम् वाह्वा० इञ्। चूडासम्बन्धिनि स्त्रियां वा० ङीप्।

चौरछ(ड्र) न० जलभेदे चुच्छशब्दे पृ० २८५५ दृश्यम्।

चौदायनि पु० स्त्रीत्वप्रवर्त्तके प्रवराध्यायप्रसिद्धे ऋषिभेदे

चौपयत पु० चुप-अच् चोपः सन् यतते यत-अच् ततः स्वार्थे अण्। ऋषिभेदे तस्यापत्यम् तिका० फिञ्। चौपयतायनि तदपत्ये स्त्रियां तु क्रौड्या० फक्। चौपयत्या। चौपयतानां विषयः भौरि० विषञ्। चौपयतविष तद्विषये न०। गोत्रापत्ये अश्वा० फक् चौपयतायन तद्गोत्रापत्ये पुंस्त्री

चौपैया स्त्री मात्राछत्तभेदे तल्लक्षणं यथा "चौपैयाछत्तं त्रिंशन्मात्रं फणिपतिविद्वन्नभणितं कुरु सम्प्रतुरङ्गममति हृदयङ्गम मन्त्रगुरुसुपनीतम्। यदि दशवसुरविभिश्छन्दोविद्भिः क्रियते यतिरिहिरामम् सपदि लवसमवेन्दुपतिः कवये वितरति संसदि कामम्"।

चौर पु० चुरा शीलमस्य चूड़ा० अः चोरएव अण् वा। प्रच्छन्नपरद्रव्याहारके अमरः। "सुवर्णं चौरः कौनख्यं सुरापः शतावदनताम्" मनुः २कविभेदे कवी चौरमयूरकौ" उद्भटः तत्कृतत्वन्यचौरपञ्चाशिका।

चौरपुष्पीषधि स्त्री चौरपुष्पिकानामोषधौ मेदि०।

चौरिकाक पु० काकभेदे "लवणं चौरयित्वा तु चौरिकाकः प्रजायते" भा० अनु० १११ अ०।

चौलि(डि) पु० चौलस्यापत्यम् इञ्। प्रवराध्यायप्रसिद्धे ऋषिभेदे।

चौलुक्य पुंस्त्री चुलुकस्य गोत्रापत्यं गर्गा० यञ्। चुलुकर्षिगोत्रापत्ये तस्य छात्रः कण्वा० अण् यलोपः। चौलुक चौलुक्यच्छात्रे।

च्यवन पु० च्यु-ल्यु। भार्गवे ऋषिभेदे तस्य नामनिरुक्तिः भा० आ० ६ अ० दर्शिता यथा।

"भृगोः सुदयिता भार्य्या पुलोमोत्यभिविश्रुता। तस्यां समभवद्गर्भो भृगुवीर्य्यसमुद्भवः। ऋषिन् गर्भेऽथ सम्भूते पुलोमाया भृगूद्वहात्। समये समशीलिन्यां धर्मपत्न्यां यशस्विनः। अभिप्रेकाय निष्क्रान्ते भृगौ धर्मभृतां वरे। आश्रमं तस्य रक्षोऽथ पुलोमाऽभ्याजगाम ह। तं प्रविश्याश्रमं दृष्ट्वा भृगोर्भार्य्यामनिन्दिताम्। रूपेण समाविष्टो विचेताः समपद्यत। ५ अ० इत्युपक्रमे "अग्नेरथ वचः श्रुत्वा तद्रक्षः प्रजहार ताम्। ब्रह्मन्! वराहरूपेण मनोमारुतरंहसा। ततः स गर्भो निवसन् कुक्षौ भृगुकुलोद्वहः। रोषात् मातुश्च्युतः कुक्षेरुदरेण समोऽभवत्। तं दृष्ट्वा मातुरुदराच्च्युतमादित्यवर्च्चसम्। तद्रक्षो भस्मसाद्भूतं पपात परिसृत्य ताम्। सा तमादाय सुश्रोणी ससार भृगुनन्दनम्। च्यवनं भार्गवं पुत्रं पुलोमा दुःखमूर्च्छिता" ६ अ०। २चरणयुक्ते त्रि० "यस्तु न च्यवते नित्यं यशसा वर्चसा श्रिया। अग्निर्नित्यच्यवनो नाम" भा० व० २।८ अ०। भावे ल्युट्। ३चरणे न० दुग्धच्यवनः।

च्यवनप्राश पु० च्यवनेन प्राश्यते प्र+अश० कर्मणि घञ्। चक्रदत्तोक्ते औषधभेदे यथा

"बिल्वाग्निमन्थश्योनाकाश्मर्य्यः पाटली बला। पर्णत्वक्षः पिप्पल्यः वृदंष्ट्रा इक्षुगोक्षुरम्। ऋद्धी तामलकी द्राक्षा जीवन्ती पुष्करा गुरु। अभया सारिवा ऋद्धिर्जीवकर्षभकौ शठी। सस्यं पुनर्नवा मेदा सूक्ष्मैलोत्पलचन्दने। विदारी क्षीरमूलानि काकोली काकनासिका। एषां पलोन्मितान् भागान् शतान्यामलकस्य च। पञ्च दद्यात् तदैकध्यं जलद्रोणे विपाचयेत्। क्वाथ्य शतरसान्येतान्यौषधान्यथ तं रसम्। तच्चामलकसङ्ख्य निष्कुलं तैलसर्पिषोः। पलद्वादशके भृष्टा दत्त्वा चार्द्धतुलां भिषक्। मत्स्यण्डिकायाः पूतायाः लेहवत् साधु साधयेत्। षट्पलं मधुनश्चात्र सिद्धशीते प्रदापयेत्। चतुष्पलं तु गव्याया पिप्पल्या द्विपलस्तथा। पलमेकं निदध्याच्च त्वगेलापत्रकेशरात्। इत्ययं च्यवनप्राशः परमस्तो रसायनः। कासश्वासस्वरघ्नश्च विशेषोपदिश्यते। क्षीणक्षतानां वृद्धानां बालानाञ्चाङ्गवर्द्धनम्। स्वरक्षयसरोरोगं हृद्रोगं वातशोणितम्। पिपासां मूत्रशुक्रस्थान् दोषांश्चैवापकर्षति। अस्य मात्रां प्रयुञ्जीत चोपरुन्ध्यान्न भोजनम्। अस्य प्रयोगाच्च्यवनः वृद्धोऽभूत् पुनर्युवा। मेधां स्मृतिं कान्तिमनामयत्वं

वपुःप्रकर्षं बलमिन्द्रियाणाम्। स्त्रीषु प्रहर्षं परमग्निवृद्धिं वर्णप्रसादं पवनानुलोम्यम्। रसायनस्यास्य नरः प्रयोगाल्लभेत जीर्णोऽपि कुटीप्रवेशात्। जराकृतं पूर्वमपास्य रूपं बिभर्त्ति रूपं नवयौवनानाम्। सिता मसूरिशुङ्गाऽऽभे धात्र्याश्च स्वरु भर्जनम्। चतुर्भागजले प्रायो द्रव्यं गतरसं भवेत्।"

च्यवान पु० च्यवन+पृषो० दीर्घः। च्यवनर्षौ "प्रसङ्गन्न द्रापिमिव च्यवानात्" ऋ०१।११६।१२०। "च्यवानात् च्यवनाद्ऋषेः" भा० "युवं च्यवानमश्विना जरन्तं पुनर्युवानं चक्रथुः शचीभिः" ऋ०१।११७।१३। "हे अश्विनौ युवं युवां शचीभिराकूतैर्नैपुण्यलक्षणैः कर्मभिः जरन्तं जीर्णं च्यवानमेतत्संज्ञमृषिं युवानं पुनर्यौवनोपेतं चक्रथुः" भा० "च्यवानऋषिर्भवति स्तोतॄणां च्यवानमित्यस्य निगमा भवन्ति" इति निरु० ४।१९

च्यावन त्रि० च्यु-णिच्-ल्यु। च्युतिकारके "इत्यूचुर्यावनो जेता हन्ता ब्रह्मद्विषां हरः" भा० कर्ण० २४अ०। भावे ल्युट्। २च्युतिसम्पादने "यदिदं च्यावनं स्थानात् प्रतिष्ठाञ्च मतक्रतोः" हरिवं० २८ अ०।

च्यु गतौ भ्वा० आत्म० सक० अनिट्। च्यवते अचुच्योट। चुच्युवे। च्युतः। च्युतिः "वस्तु न च्यवते नित्यम् यशसा वर्चसा श्रिया" भा०व० २१८ अ०। "अद्य ते कतिचिद्रात्र्यश्च्युतस्यार्थक्रियक्षमः" रा० अयो० ७२।५। "न च्यवेयं स्वधर्म्मात्" भा०व० २८६ अ०। "अचुच्योट सत्यानृत्यपतिच्युतायः" "च्युतागनायाः फलवद्विभूत्या" भट्टिः उपसर्गपूर्वकस्य तत्तदुपसर्गद्योतार्थयुक्तगतौ।

च्यु सहने सक० हसने अक० चु० उभ० सेट्। चव्यावयति अचिच्यवत् त। चु(चि)च्यावयिषति

च्युत क्षरणे भ्वा० पर० अक० सेट्। चच्योतति इरित् अचच्युत अचच्योतीत्। चुच्योत। च्युतः। "इदं शोणित मस्थ्यं संप्रहारेऽच्युततनोः" इदं कवचमच्योतीत्" इति च भट्टिः। [च्युतः। चच्युतोपलः।

च्युत त्रि० च्यु-क्त च्युत--क वा। १गते २क्षरिते च। अच्युति स्त्री च्यु-भावे क्तिन्। १गतौ "सत्यात् च्यु तिः क्षत्रियस्य न धर्मेषु प्रशस्यते" भा० आ०१०३अ०। "कुर्य्यां हरस्यापि पिनाकपाणेर्धैर्य्यच्युतिं के मम धन्विनोऽन्ये" कुमा०। च्यु भावे क्तिन्। २क्षरणे। मदच्युतिः। च्योतति शोणितमस्मात् अपादाने कि। ४गुदद्वारे शब्दार्थचि०।

च्युप पु० च्यवन्ते भाषन्तेऽनेन धातूनामनेकार्थत्वात् च्यु-भाषणे प किच्च। वक्त्रे उज्ज्व०। पात्रादुपधत्वात् पुंस्त्वम्।

च्युस हानौ हसने चु० उभ० अक० सेट्। चोस्यति ते अचुच्युसत् त।

च्यूत पु० चूत+पृषो०। आम्रवृक्षे शब्दर० पाठान्तरम्।

च्योत्न न० च्यु-मतौ करणे ल्युट्। १वस्त्रे त्रिका०। कर्त्तरि ल्युट्। २गन्तरि २अखण्डने-२द्योणपुष्पजनने" त्रि०कौ०।

इति वाचस्पत्ये चकारादिशब्दार्थनिरूपणम्।

---

## २८८७पृ० चयशब्दपरिशिष्टम्।

भावप्र० उक्ते दोषवृद्ध्यादौ "कालस्वभावोऽयमाहारादिवशात् पुनः। चयादीन् यान्ति सद्योऽपि दोषाः काले विशेषतः। चयकोपशमाः पूर्व्वाह्णे वसन्तस्य निजं, मध्याह्ने ग्रीष्मस्य, अपराह्णे प्रावृषः, प्रदोषे वार्षिकम् शरदमर्द्धरात्रे प्रत्यूषसि हेमन्तस्योपलक्षयेत्। एवमहोरात्रमपि वर्षाभिव शीतोष्णवर्षादोषोपचयप्रकोपोपशमान् जानीयादिति। सुश्रुतः। चयकोपशमा दोषा विहाराहारसेवनैः। समानैर्व्वान्यकालेऽपि विपरीतैः विपर्य्ययम्। समानैः तुल्यैः चयादिहेतुभिरिति यावत्। विपर्य्ययं कालेऽपि वैपरीत्यं बोध्यम्। चयलक्षणमाह सुश्रुतः। स्वस्थानस्थस्य दोषस्य वृद्धिः स्वाच्छाच कोष्ठता। पीतावभासता वह्निमन्दता चाङ्गगौरवम्। आलस्यङ्क्लमश्चेति त हेतुश्च चयलक्षणम्। सङ्क्षयोपगता दोषा लभन्ते नोत्तरां गतिम्। ते तूत्तरासु गतिषु भवन्ति बलवत्तराः"।

## २८७२ पृ० चोरगणेशशब्दपरिशिष्टम् ।

चोरगणेशमन्त्रादिकस्तु गणेशविमर्शिन्याम् "चक्षुर्द्वयं तथा कर्णद्वयं नासापुटद्वयम्। मुखं नाभिं लिङ्गमूलं गुदस्थानं तथैव च। मनोहारं भ्रुवोर्मध्ये दशैव द्वारसंज्ञिताः। अङ्कुशं प्रथमं बीजं हृदये दशधा जपेत्। प्रजपान्ते ततो मातः! कपाटं निःक्षिपेत्ततः। कर्णयोश्च तथा कूर्चं कार्श्यं नासापुटे ततः। मुखे श्रीं द्विविधं बीजं नाभौ वार्श्यं ततो जपेत्। हसौ बीजं लिङ्गमूलेवं गुदे परिकीर्त्तितम्। ह्रींकारञ्च भ्रुवोर्मध्ये मनःस्थाने तथैव च। एतदेकादशं बीजं प्रतिहारे कपाटवत्। चोरगणेशमन्त्रं जप्त्वा कर्म-मात्रं न कुर्यात्। यदि कुर्यात्तदादोष उक्तो वर्ण-विनाशतन्त्रे। "गणेश उवाच। अधुनाहं प्रवक्ष्यामि चोरमन्त्रमतः शृणु। चोरमन्त्रपरिज्ञानं विना हे ब्राह्मणेश्वरि!। पुराणं प्रपठेद्यस्तु स एव मूर्त्तिमान् कलिः। परजन्मनि पापिष्ठः स भवेच्चौरकुक्कुरः। शिव-पूजा विष्णुपूजा शक्तिपूजा तथैवच। सर्वपूजासु यत्तेजो स्फुरते गणपः स्वयम्। पञ्चाशद्गणदेवानां ज्योतींषि सुनिशुङ्गवा!। प्रतिहारपथे गत्वा प्रतिपद्मेषु जृम्भते। स्फुरन्ति जपतेजांसि प्रतिपद्मेषु संस्थिताः। जपपूजा सु यत्तेजस्तत्र चौरो गणाधिपः। तस्माच्चौरप्ररोधार्थं चौरमन्त्रं जपेद्यः। ततस्तु पूजयेद्धीमान् यस्य या इष्टदेवताः। ततः फलमवाप्नोति ब्रह्मादित्रिदिवौकसः। चौरमन्त्रं भद्रामन्त्रं पञ्चाशद्गणतोषणम्। चौर-मन्त्रं विना भद्रे! शान्तिस्वस्त्ययनं कुतः। कर्णद्वयं तथा चक्षुर्द्वयं नासा मुखं ततः। नाभिस्थाने लिङ्ग-मूले गुदस्थाने तथैव च। मनोहारं भ्रुवोर्मध्यं दशैकं द्वारमीरितम्। प्रतिहारे न्यसेन्मन्त्रं चौराख्यं ब्राह्मणे-श्वरि!। चौरमन्त्रञ्च भद्रे! प्रतिहारे कपाटवत्। रहस्यं ते प्रवक्ष्यामि पञ्चाशद्गणतोषणम्। अङ्कुशं प्रथमं बीजं प्रथमे दशधा जपेत्। प्रजप्य सुभगे! मातः। कपाटं निःक्षिपेत्ततः। अन्यथा अङ्कुशैर्दोषैः कपाटं भेदिरे गणाः। चन्द्रिकान्तर्गतानित्यं शङ्कुरं वरसुन्दरम्। चन्द्रिकासु समासीनः शिखिनी वह्निमा गुणः। चन्द्रविद्यात्मिका नित्या गणेशपरिपूजिता। ह्रीं ह्रीं बीजद्वयमिति विन्यसेद्वयनद्वये। कर्णयोश्च तथा ह्रीं ह्रीं ह्रूँ ह्रूँ नासाद्वये तथा। मुखे श्रीं द्विविधं बीजं नाभौ क्लीं सुभगेश्वरि!। हसौ बीजं लिङ्गमूले गुदे वं परिकीर्त्तितम्। ङकारञ्च भ्रुवोर्मध्ये मन-स्थाने तथैव च। एतदेकादशद्वारे चौरमन्त्राणि विन्यसेत्। दशधा चौरमन्त्रञ्च एकधा वापि बीजकम्। अनेनैव जपेनापि प्रतिहारे कपाटकम्"। जपकालोऽपि तथैव। "शृणु चापि प्रवक्ष्यामि मन्त्रस्य जपनिर्णयम्। प्रातःकाले च शय्यायां सुखासीनः स्वदेहके। पूर्ववन्मा-तृकान्यासं विन्यसेन्मातृकास्वले। तथा एकादशद्वारे चौरमन्त्राणि विन्यसेत्। दशधा चौरमन्त्रञ्च एकधा वापि संजपेत्। चौरमन्त्रजपात् दुष्टिर्गणेशस्य तदा भवेत्। यमस्य नाधिकारोऽपि चौरमन्त्रजपात् प्रिये!। सर्वमन्त्रजपात्तेजः सर्वशास्त्र समुपस्थितम्। तत्तेजो स्फुरणे शक्तिर्गणेशस्य नचैव हि" चोरगणेशोऽत्र। अयञ्चशब्द उत्कृष्टे चोरशब्दात् परं बोध्यः तत्र च कर लिङ्गेत्यत्र करणस्थिङ्गेति शुद्धम् करणं च नेत्रादि। लिङ्गं द्वारानावरणम्।

---

## छ

छकारो व्यञ्जनवर्णभेदः स्पर्शसंज्ञस्तस्योच्चारणस्थानं तालु आभ्यन्तरप्रयत्नः जिह्वामध्येन तालुस्पर्शः। बाह्य-प्रयत्नाः विवारश्वासाऽघोषा अल्पप्राणश्च। मातृका-न्यासेऽस्य वामकूर्परे न्यासः। तन्त्रमते अस्य वाचक-शब्दाः। "छस्छन्दं सुषुम्णा च पशुः पशुपति-र्भितिः। निर्भेदं तरलं वह्निर्भूतमाता विलासिनी। एकनेत्रश्च डमली द्विरिरा वामकूर्परः। गोकर्णो ला-ङ्गली रामः कालमाता सदाशिवः। माता निशाचरः पायुर्विद्युतः स्थितिशब्दकः" वर्णाभिधानम्। "मातृका वर्णोत्पत्तिकायास्तस्या ध्यानमुक्तं वर्णोद्धारतन्त्रे "ध्यानमस्याः प्रवक्ष्यामि द्विभुजां त्रिनेत्रनाम्। पीताम्बरधरां नित्यं वरदां भक्तवत्सलाम्। एवं ध्यात्वा छकारन्तु तन्मन्त्रं दशधा जपेत्"। काव्येऽस्य प्रथमनिर्देशफलं द० र० टी० उक्तं यथा "कः खोगो यच्च कर्त्री वितरति विषयोऽस्याश्च सुखं छः प्रीतिं जोमित्रलाभमित्यादि"।

छ पु० छकारवर्णे। छो-घञर्थे भावे क। छेदने स्त्री

कर्म्मणि यञर्थे क। २निर्म्माले त्रि० मेदि०। ३यज्ञे न० शब्दार्थचि०। छद्–घञ् भावे ड। ५छादने।

छग पुंस्त्री छं रोमभिश्छादनं गच्छति गम–ड। अजे छागे हेमच०। स्त्रियां जातित्वात् ङीष्।

छगण पुंन०। छाय वस्त्रेश्छादनाय गण्यते गण–कर्म्मणि अच्। करीषे हेमच०

छगल पुंस्त्री छो–कलच् गुक् ह्रस्वश्च। १छागे स्त्रियां जातित्वात् ङीष्। २नीलवस्त्रे न०। ३छद्दारकवृक्षे पु० हेमच०। ४छगलप्रधानदेशे पु० सोऽभिजनोऽस्य तस्य शिला० अञ्। ५तद्देशवासिनि त्रि०। ६सनिपत्नीभेदे स्त्री आगली ७ऋषिभेदे पु०। ततो बाह्वा० अपत्ये एञ्। आगलि तदपत्ये पुंस्त्री। आलेये तु अण्। आगल आलेये आगलापत्ये। तद्भिन्ने आगल्या अपत्ये च ढक्। आगलेय ऋषिभेदे सच स्मृतिकर्त्ता।

छगलक पुंस्त्री छगल+स्वार्थे क। छागे अमरः।

छगलण्ड पु० दक्षिणदेशे सप्तद्रविडीषु पञ्चखण्डादेश्याःस्थाने शब्दार्थचि०।

छगलाङ्घ्रि(न्त्री) स्त्री छगलस्येवान्त्रम् अङ्घ्रिर्मूलं वा यस्याः अदन्तात् गौरा० ङीष्। १छद्दारकौषधे अमरः २वृक्षे शब्दर०। स्वार्थे क। अत्रैवार्थे।

छगलिन् पु० ऋषिभेदे। स च कलाप्यग्नेवासी। "हरिद्रुश्छगली तुम्बुरुरलपञ्चत्वारः कलाप्यग्नेवासिनः" मनो० तत्र कलाप्यग्नेवासित्वात् अणि प्राप्ते विशेषविधिना तेन प्रोक्तमधीयते इत्यर्थे ढिनुक्। आगलेयिन् तद्छात्रेषु ब० व०।

छच्छिका स्त्री "छच्छिका सरहीनं स्यादल्पा प्रचुरवारिका। छच्छिका शीतला लघ्वी पित्तश्लेष्महरी। वातनुत् कफजित् सा तु दीपनी लवणान्विता" इत्युक्ते तक्रभेदे। भावप्र०। सरहीनं दधीति शेषः।

छटा स्त्री छो–अटन् किच्च। १दीप्तौ, २परम्परायाञ्च शब्दार्थचि० "यस्याश्चलद्धारिधिधारिवीचिच्छटोच्छलच्छङ्कुलाकुलेन" "शङ्खच्छटाभिश्चपनेन बिभ्रता" माघः। "स्वच्छन्दोच्छलदच्छकच्छकुहरच्छातेतरास्वच्छटा" काव्यप्र०। "कोरेन्दीवरदामसुन्दरवपुस्तस्याः कटाच्छच्छटा" मा० द०।

छटाफल पु० छटेव परम्परान्वितं फलं यस्य। गुवाके। त्रिका०।

छाटभा स्त्री छटया दीप्त्या भाति भा–क। विद्युति हारा०।

छत्त पु० छद–णिच् क्त ह्रस्वः अर्द्धर्चा०। छत्राकारपत्रे (छातारिया) १तृणभेदे रत्नमाला। २छातपत्रे न०। मेदि०। ३छत्तिच्छत्रायां (छत्ता) छत्ते स्त्री। ४भक्ष्ये राजनि०। तत्र छातपत्रशब्दे ६३६८ पृष्ठे उच्छ्रायशब्दे १२८० पृष्ठे च विवृतिः। "रथाश्वं हस्तिनं छत्रं धनं धान्यं पशून् स्त्रियः"। "अभ्यङ्गमञ्जनञ्छत्रा रूपानच्छत्रधारणम्" मनुः। यमिप्रभं छत्रसुखे च चामरे" रघुः। ५आवरणमात्रे च। छत्रं गुरोर्वेणुशलाकादिनं शीलं यस्य छत्रा० च। छात्र शिष्ये।

छत्रक पु० छत्रमिव कायति कै–क। (राङ्गाकुलेखादः) १छत्रे, २मत्स्यरङ्गे पक्षिणि च रत्नमाला। स्वार्थे क ३छत्रे न०। ४रैक्षरस्यदृक्षभेदे शब्दार्थचि०।

छत्रगुप्त पु० छत्रमिव गुप्तोऽस्य। गुरुडवृक्षे राजनि०।

छत्रध(धा)र पु० छत्रं धरति धारयति वा अच् अण् वा। छायाकरणाय नियुक्ते दासभेदे तत्र अणन्तस्य "अधिनियुक्ते" पा० पूर्वपदमादुदात्तम्।

छत्रपत्र पु० छत्रमिव पत्रमस्य। १स्थलपद्मे, रत्नमाला २भूर्जपत्रवृक्षे च त्रिका०।

छत्रपुष्प(क)पु० छत्रमिव पुष्पमस्य वा कप्। तिलकवृक्षे शब्दार्थचि०। [खातन्त्रेऽपि च मेदि०।

छत्रभङ्ग पु० छत्रस्य भङ्गो यत्र। १छत्रनाशे २वैधव्ये २व्य-

छत्रा स्त्री छद–त्रप् टाप्। (भौरि)१छत्रे मेदि० २छत्तिच्छत्रे (छत्ता) ३कक्षुम्भुरौ (धनिया) ४शिलीन्ध्रे च मेदि०। ५मल्लिकायां राजनि०।

छत्राक न० छत्रा छत्तिच्छत्रेव कायति कै–क। १शिलीन्ध्रे "छत्राकं विड्वराहश्च" मनुः। "पलाण्डुं विड्वराहञ्च छत्राकं ग्रामकुक्कुटम्" याज्ञ०। २आम्रवृक्षे पु० राजनि० गौरा० ङीष्। ३राज्ञायां स्त्री अमरः।

छत्रातिच्छत्र पु० छत्रमतिक्रम्य छत्रमावरणमस्यास्य अच्। छत्राकारे जलोद्भवे सुगन्धिद्रव्यभेदे शब्दरत्ना०।

छत्रादि पु० "छत्रादिभ्योणः" पा० शीलार्थे अप्रत्ययनिमित्ते पा० ग० सू० उक्ते गणभेदे स च गणो यथा छत्र शिला प्ररोह स्था बुभुक्षा क्षुरा तितिक्षा उपस्थान ऋषि कर्मन् विद्यधा तपस् सत्य अव्रत विभिक्षा विभिक्षा भक्षा उदस्थान प्ररोहश्च विद्या क्षुधा मन्त्र" काशः चौर इत्यादि राजनि०।

छत्राधान्य न० छत्रा धान्यमिव। क्षुद्रक्षुरौ धान्याके

छत्रिका स्त्री छत्रं तदाकारं पद्मं वाऽस्त्यस्य ठन्। १मिलीन्ध्रे भेदजे शाकभेदे हारा० तस्या उत्पत्तिस्थानादिकं भावप्र० उक्तं यथा
"छत्रं संस्वेदजं शाकं भूमिच्छत्रं मिलीन्ध्रकम्। क्षिति क्षोभयकाष्ठेषु इन्द्राद्यैः तदुद्भवेत्। सर्वे संस्वेदजाः शाकादोषलाः चिच्छलाश्च ते। गुरवश्चर्दिनीहारज्वरश्लेष्मामयप्रदाः। श्वेतगुच्छस्थलीकाश्च शशोमयसमप्रभाः। नातिदोषकराश्चेषु शेषाश्छेदोविगर्हिताः"। २छत्रविशिष्टे त्रि० ततः पुरोहिता० भावे यक्। छात्रिक्य छत्रयुक्तत्वे न०

छत्रिन् त्रि० छत्रमस्त्यस्य। १जातपत्रयुक्ते। "छत्रिणो गच्छन्ति" सा० द०। "वर्षातपे च छत्री दण्डी राजटवीषु च" भावप्र० "मौञ्जी यज्ञोपवीती च छत्री दण्डाजिनी तथा" (वामनः) हरिवं० २६२अ०। २भार्गवे पु० शब्दरत्ना० [स्त्रि० ङीप्

छत्वर पु० छद-क्वरच् नि० दस्य तः। १वटे २कङ्के च

छद संवृतौ चद०चु०उभ०सक०सेट्। छदयति ते अचिच्छदत् त

छद् संवृतौ वा चु० पक्षे भ्वा० उभ० सक० सेट्। छादयति ते छदति ते अचिच्छदत् त अच्छादीत्-अच्छदीत् अच्छदिष्ट। अर्ज्जने बलाधाने जीवने चायं मित्। छदयति ते इति भेदः। छन्न-छादितः। ये छन्नाः छदः। "अग्निमन्नञ्छादयसि" ऋग्० ६,१.१४, "अन्नं छादयेदाच्छन्नं" काल्या० श्रौ० ४,६.१, "छादयन्ति च जालेन" भा० आ० १२८३अ०। उपसर्गपूर्वकस्य तत्तदुपसर्गद्योत्यार्थयुक्तसंवरणे "आच्छाद्य चार्चयित्वा च" मनुः।

छद संवृतौ चु० उभ० सक० सेट् इदित् पाणि०। छन्दयति ते अचिच्छन्दत् त। छन्दः।

छद पु० छद-पुंसि संज्ञायां घः हस्वः। १हस्त्यादिपत्रे २खगपत्रे अमरः ३वन्यिपर्णहत्ते ४तमालहत्ते च मेदि० "छत्रां विन्दुसरोरत्नैर्मयेन स्फाटिकच्छदाम्" (नलिनीम्) भा० स० ४६अ०। "निम्बपुष्पफलाक्षत्व प्रादपाः हरितच्छदाः" भा० व० ८६अ०

छदन न० छद-ल्युट्। १पत्रे, २पत्रे मेदिनिः (त्रेजघात) ३वस्त्रे राजनि०। भावे ल्युट्। ४पिधाने न०। "विमलस्फाटिकाभानि पाण्डुरच्छदनानि" हरिवं० २१६अ०। "विमलस्फाटिकाभानि पाण्डुरच्छदनैर्हिजैः" भा० व० १५८अ०।

छदपत्र पु० छदार्थं पत्रमस्य। भूर्जपत्रे रत्नमाला।

छदि स्त्री छद-क्विप्। छर्दिषि वटवे (वमने) अमरः "छर्दिः स्त्रियाम्" भा० उक्तेरिदन्तताऽस्य।

छदिस् न० छद-इसि। पटवे साम्नां स्तोत्रे रायसकृटः। "इन्द्रस्य छदिरसि" यजु० ४।२८,२ पटवे निघण्टुः

छद्मतापस पु० छद्मना छलेन तापसः। लोकप्रतारणार्थं तापसताख्यापनाय तापसलिङ्गधारिणि तत्कर्मानुष्ठायिनि वैडालव्रतिके शब्दार्थचि०

छद्मन् न० छाद्यते स्वरूपमनेन छद-मनिन्। १कपटे २छले। ३स्वरूपाच्छादने मेदि०। "जगाद वदनच्छद्मपद्मपर्य्यन्तपातिना" माघः। "छद्मना चरितं च तत्" मनुः "शकांश्च यवनांश्चैव शत्रयच्छद्मपूर्वकम्" भा० स० २८अ०

छद्मिका स्त्री छद्म स्वार्थे ह्रस्वेत्वाभ्यां इनि सत्तायां कन्। गुडूच्यां राजनि०।

छद्मिन् त्रि० छद्म स्वार्थे ह्रस्वेत्वाभ्यां इनि। छद्मयुक्ते "ब्राह्मणच्छद्मिने देवलोके गत्वा परां गतिम्" भा० व० २६६अ०। "वाङ्कवच्छद्मिनं नलम्" ७७अ०। स्त्रियां ङीप्।

छन्द पु० छदि-संवरणे धातोरनेकार्थत्वात् इह इच्छायाम् अच्। १अभिलाषे, २वशतायाम्, "स्वच्छन्दोच्छलदच्छकुक्षरच्छातेतराम्बुच्छटा" काव्यप्र०। ३विषभेदे च अमरः ४विषे शब्दच०। ५रक्षसि त्रि० अमरटीका। "छन्दानुवर्त्तिदुःसाधाः सुहृदोविमनीकृताः" माघः। "वरदानात् पितुः कामं छन्दस्त्यु रसि प्रभो!" भा० आ० ५०अ०।

छन्दक त्रि० छन्दयति संवृणोति रक्षति छदि-ण्वुल्। १रक्षके २वासुदेवे पु०। "वासुदेव! सदा च्छन्दक! हरिकृष्ण! हरिमेध! सहायत्व"। भा० आ० १३०अ० नारदकृतनारायणस्तवे।

छन्दःपक्षी पु० छन्दांसि वेदविहितकर्म्माणि पक्षीणीव यस्य। मायामये संसारे। "छन्दांसि यस्य पर्णानि यस्तं वेद स वेदवित्" गीता छन्दांसि छादनात् तत्त्ववस्तुप्रावरणात् संसारबन्धनादीनि कर्म्माणि ऋग्यजुःसामवेदविहितानि पक्षीणीव यस्य यथा छन्दस्य छादनार्थानि रक्षणार्थानि च पक्षीणि एवं धर्म्माधर्म्मोपार्ज्जनेन कर्म्मभिः संसार इचोरच्यते इति तस्य तथात्वम्।

छन्दश्चिति स्त्री इत० छन्दसां समूहे। तत्र छन्दोभेदे एकादिगुरुस्थानाय करणसूत्रं लीला० उक्तं यथा "छन्दश्चित्यादौ करणसूत्रं श्लोकत्रयम् "एकाद्योत्तरवृद्धा व्यस्ता भाज्याः क्रमस्थितैः। परः पूर्वेण सङ्गु-

षड्भिस्त्यरस्त्यरेण च ॥ एकद्वित्र्यादिभेदाः स्युरिदं साधारणं मतम् । छन्दश्चित्युत्तरे छन्दस्युपयोगोऽस्य तद्विदाम् ॥ मृषावक्त्रभेदादौ खण्डमेरौ च शिल्पके । वैद्यके रसभेदोक्ते तन्नोक्तं विस्तृतेर्भयात् । तत्र छन्दश्चित्युत्तरे किञ्चिदुदाहरणम् । "प्रस्तारे मित्र ! गायत्र्याः स्युः पादे व्यक्षयः कति । एकादिगुरवश्चात्र कथ्यतां तत्पृथक् पृथक् । दृष्ट हि षडक्षरगायत्रीचरणः अतः षडन्तानां एकाद्येकोत्तराङ्काणां व्यस्तानां क्रम स्थानाच्च न्यासः

६ ५ ४ ३ २ १

१ २ ३ ४ ५ ६

६ १५ २० १५ ६ १ यथोक्तकरणेन लब्धाः एकगुरुव्यक्षयः । ६ । द्विगुरवः । १५ । त्रिगुरवः । २० । चतुर्गुरवः । १५ । पञ्चगुरवः । ६ । षड्गुरवः । १ । तथैका सर्वलघुः । १ । एवमासामेकं पादव्यक्षिमितिः । ६४ । एवञ्चतुरक्षराच्चरसङ्ख्यकानङ्कान् यथोक्तं विन्यस्य एकादिगुरुभेदानानीय तान् सैकानेकोक्त्या जाता गायत्रीछन्दव्यक्षिसङ्ख्या । १६७७७२१६ । एवमुक्त्याद्युत्कृतिपर्यन्तं छन्दसां व्यक्षिमितिर्ज्ञातव्या" ।

अधिकं प्रस्तारशब्दे मर्कटीजालशब्दे मेरुशब्दे पताकाशब्दे च दृश्यम् ।

**छन्दस्** न० छन्दयति आह्लादयति । १वेदे भावे अच्प्रत्ययेन । २स्वैराचारे २अभिलाषे च मेदि० । ३कपटे । नियताक्षरवर्णमात्रादिसन्निवेशवशात् ५चतुरक्षरत्वादौ पद्ये । लौकिकतत्तद्भेदाश्च छन्दोरत्नाकरादौ सलक्षणा उक्ताः ते तत्तच्छब्दे उक्ता वक्ष्यन्ते । वैदिकच्छन्दांसि तु सर्वानुक्रमिकायां कात्यायनेन दर्शितानि यथा

"अथ छन्दांसि गायत्र्युष्णिगनुष्टुब्बृहतीपङ्क्तित्रिष्टुब्जगत्यतिजगतीशक्वर्यतिशक्वरीधृत्यतिधृतयः कृतिप्रकृत्याकृतिविकृतिसंकृत्यतिकृत्युत्कृतयः चतुर्विंशत्यक्षरादीनि चतुरुत्तराणि । जनाधिदेवैनैकेन निचृद्भूरिजौ द्वाभ्यां विराट्स्वराजौ । पादप्रथमार्धं तु चैषमंयोगैकाक्षरीभावान् व्यूह्येत् । आद्ये तु सप्तवर्णे पादविशेषात् संज्ञाविशेषाज्ञानमात्रेण एवोदाहरिष्यामो विराड्रूपा विराट्स्थानाश्च बृहत्या अपि त्रिष्टुभ एवेत्युद्देशः । तत्र दशैकादशद्वादशाक्षराणां वैराजत्रैष्टुभजागता इति संज्ञा अनादेशेऽष्टाक्षराः पादाश्चतुष्पादाश्चैः । प्रथमं छन्दस्त्रिपदा गायत्री । पङ्क्तयश्च स्युः षट्कश्चैकश्चतुर्थश्चतुष्को वा पदपङ्क्तिः । षट्सप्तैकादशा उष्णिग्गर्भाः । स्युः सप्तकाः पाद निचृन्मध्यसः षट्कश्चेदनिचृद्वक्षश्चेद्यवमध्या । यस्यास्तु षट्सप्तकाष्टकाः सा वर्धमाना विपरीता प्रतिष्ठा । द्वौ षट्कौ सप्तकश्चेति त्रुस्तीयधी ।१

द्वितीयस्त्रिष्टुक् त्रिपदान्यो द्वादशकः । आद्यश्चेत् पुरउष्णिङ् मध्यमश्चेत्ककुप् । त्रैष्टुभजागतचतुष्काः ककुम्न्यङ्कुगिरैकादशिनोः परः षट्कस्तनुशिरा मध्ये चेत्पिपीलिकमध्याद्यपङ्क्तक्षयोऽष्टका अनुष्टुब्गर्भा । चतुःसप्तकोष्णिगेव ।२

तृतीयमनुष्टुप् । पञ्चपञ्चकाः षट्कश्चैको महापदपङ्क्तिः । जागतयष्टकश्च क्षतिः । मध्ये चेदष्टकः पिपीलिकमध्या । नवकयोर्मध्ये जागतः काविराट् । नववैराजक्षयोदशैनैष्टरूपा । दशकाक्षयो विराड्रैकादशका वा ।३

चतुर्थं बृहती तृतीयो द्वादशकः । आद्यश्चेत् पुरस्ताद्बृहती । द्वितीयश्चेत्प्रङ्कुसारिण्युरोबृहती स्कन्धग्रीवी वा । अन्त्यश्चेदुपरिष्टाद्बृहती । अष्टिनोर्मध्ये दशकौ विष्टारबृहती । त्रिजागतोर्ध्वबृहती । त्रयोदशिनोर्मध्येऽष्टकः पिपीलिकमध्या । नवकाष्टकैका दशाष्टिनो विषमपदा । चतुर्नवका बृहत्यैव ।४

पञ्चमं पङ्क्तिः पञ्चपदा । अथ चतुष्पदा विराड्दशकाः । अयुजौ जागतौ सतोबृहती युजौ चेद्विपरीताऽद्यौ चेत् प्रस्तारपङ्क्तिरन्त्यौ चेदास्तारपङ्क्तिराद्यन्त्यौ चेत् संस्तारपङ्क्तिर्मध्यमौ चेद्विष्टार पङ्क्तिः ।५

षष्ठं त्रिष्टुप् त्रैष्टुभपदा । द्वौ तु जागतौ यस्याः सा जागते जगती त्रैष्टुभे त्रिष्टुप् । वैराजौ जागतौ चाभिसारिणी । नवकौ वैराजस्त्रैष्टुभश्च द्वौ वा वैराजौ नवकस्त्रैष्टुभश्च विराट्स्थानैकादशिनक्षयोऽष्टकश्च विराड्रूपा । द्वादशिनक्षयोऽष्टकश्च ज्योतिष्मती । यतोऽष्टकस्ततोज्योतिः । चत्वारोऽष्टका जागतश्च महाबृहती । मध्येजागतश्चेद्यवमध्या आद्यौ दशकावष्टकाक्षयः षड्गुत्तरा विराट् पूर्वा वा ।७

सप्तमं जगती जागतपदा । अष्टिनक्षयः स्यौ च द्वौ महासतोबृहती । अष्टकौ सप्तकः षट्को दशको नवकश्च षडष्टका वा महापङ्क्तिः" ।

तत् प्रतिपाद्यग्रन्थस्य वेदाङ्गत्वं यथोक्तं शिक्षाग्रन्थे

२१।७। "छन्दःपादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते। शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम्। तस्मात् साङ्गमधीत्यैव ब्रह्मलोके महीयते" इति।

छन्दोग्रन्थस्य वेदोपयोगिता ऋग्वेदभाष्ये दर्शिता यथा छन्दोग्रन्थोऽप्युपयुज्यते छन्दोविशेषाणां तत्र तत्र विहितत्वात्। "तस्मात् सप्त चतुरुत्तराणि छन्दांसि प्रातरनुवाकेऽनूच्यन्ते" इति ब्राह्मणम्। गायत्र्युष्णिगनुष्टुब्बृहतीपङ्क्तित्रिष्टुब्जगतीछन्दांसि सप्त छन्दांसि। चतुर्विंशत्यक्षरा गायत्री। ततोऽपि चतुर्भिरक्षरैरधिकाष्टाविंशत्यक्षरोष्णिक्। एवमुत्तरोत्तराधिका अनुष्टुबादयोऽवगन्तव्याः। तथान्यत्रापि श्रूयते। "गायत्रीभिर्ब्राह्मणस्य दध्यात्, त्रिष्टुब्भीराजन्यस्य, जगतीभिर्वैश्यस्येति"। तत्र भगणयगणादिसाध्यो गायत्र्यादिविवेकश्छन्दोग्रन्थमन्तरेण न सुविज्ञेयः। किञ्च "यो ह वा अविदितार्षेयच्छन्दोदैवतब्राह्मणेन मन्त्रेण याजयति वाऽध्यापयति वा स्थाणुं वर्च्छति। गर्त्तं वा पद्यते। प्र वा मीयते पापीयान् भवति तस्मादेतानि मन्त्रे मन्त्रे विद्यादिति" श्रूयते। तस्मान्नावहेदनाय छन्दोग्रन्थ उपयुज्यते।

ऋक्सामभेदे "छन्दांसि जज्ञिरे तस्मात् यजुस्तस्मादजायत" श्रुतिः छन्दोगः।

छन्दोऽधीते "श्रोत्रियंश्छन्दोऽधीते" पा० अण् वा श्रोत्रियत्रादेशः। श्रोत्रिय छन्दोऽध्येतरि पत्रे अण्मात्रम्। छान्दस तत्रार्थे "श्रोत्रियच्छान्दसौ समौ" अमरः। छन्दसा दृष्ट्या निर्म्मितम् यत्। छन्दस दृष्ट्वा निर्म्मिते त्रि०। छन्दसो व्याख्यानो ग्रन्थः यत् ऋण् वा। छन्दस छान्दस वेदव्याख्यानग्रन्थे। तत्र गायत्र्यादौ छन्दसि "सप्त छन्दांसि क्रतुमेकं तन्वन्ति" भा० व० १३४अ०। "गायत्री छन्दसामहम्" गीता। "छन्दोभिरच्छादयत् यदेभिरच्छादयत् तच्छन्दसां छन्दस्त्वम्" छा० उ०। वेदे "छन्दसि बहुलम्" पा०। "युक्तश्छन्दांस्यधीयत" मनुः "छिरण्यगर्भो भगवान् यस्य छन्दसा स्तुतः" हरिवं० २२६अ०। "आशीरूहोचिताभाद्याः प्रणवश्छन्दसामिव" रघुः। दृष्ट्यायाम् छन्दसः। छन्दस इदम् अण्। छान्दस वेदसम्बन्धिनि त्रि० सर्वच्छन्दसि समार्द्धसमविषमभेदादिज्ञानाय क्षीरा० उक्तं यथा

"समादिज्ञानाय करणसूत्रं सार्द्धार्या। पादाक्षरमितगच्छे युग्मवर्गफलयुते द्विगुणे॥ समवृत्तानां सङ्ख्या तद्वर्गोपवर्गवर्गश्च। स्वस्वपदोनौ स्तोमौ समानाञ्च विषमाणाम्॥ उदाहरणम्। समानामर्द्धतुल्यानां विषमार्द्धां पृथक् पृथक्। वृत्तानां यद् मे सङ्ख्यामनुष्टुप्छन्दसि द्रुतम्॥ न्यासः। उत्तरगुणः। २। गच्छः। ८। लब्धाः समवृत्तानां सङ्ख्याः। २५६। तथार्द्धसमानाम्। ६५२८०। विषमाणाञ्च। ४२८४९०१७६०। "अक्षरोद्यस्य चत्वारस्तुल्यलक्षणलक्षिताः। तच्छन्दः शास्त्रतत्त्वज्ञाः समवृत्तं प्रचक्षते॥ प्रथमाद्धृसमोयस्य तृतीयचरणोभवेत्। द्वितीयस्तुर्यवद्वृत्तं तदर्द्धसमञ्च्यते॥ यस्य पादचतुष्केऽपि लक्ष्म भिन्नं परस्परम्। तदाहुर्विषमं वृत्तं छन्दःशास्त्रविशारदाः"॥

छन्दस्तुभ् पु० छन्दसा पक्षेण स्तुभ्नाति स्तुभ-क्विप्। गरुडाग्रजेऽरुणे तस्य तत्कथा "पितामह उवाच। एष लोकविनाशाय रविरुद्यन्तुदयतः। यज्ञस्यैष हि लोकान् स भस्मराशीकरिष्यति। तस्य प्रतिविधानञ्च विहितं पूर्वमेव हि। कश्यपस्य सुतोऽमानरुणेत्यभिविश्रुतः। महाकायो महातेजाः स स्थास्यति पुरोरवेः। करिष्यति च सारथ्यं तेजसाग्नेरिवाग्रतः। लोकानां रक्षणं चैवं स्थाणोश्च दिवौकसाम्। प्रमतिश्चाच। ततः पितामहात्प्राप्य सर्वं चक्रे तदारुणः। उदितश्चैव सवितापारुणेन समाहृतः" भा० आ० २४अ०।

छन्दु त्रि० छदि-उण्। उपच्छन्दयितरि। "कथा छन्दुर्भवति कथ्यतः" ऋ० १८५।४।४। "छन्दु रुपच्छन्दयिता" भा०।

छन्दोग पु० छन्दः सामवेदं गायति गै-क। "सामवेदस्य" "यत्नेन भोजयेत् श्राद्धे यद्यृचं वेदपारगम्। शाखान्तगमथाध्वर्युं छन्दोगन्तु समाप्निकम्" मनुः। "छन्दोगैर्विविधैः पृथक्" गीता। छन्दोगपरिशिष्टम्।

छन्दोदेव पु० ब्राह्मण्यां नापितेन जाते मतङ्गनामके चण्डालभेदे तपस्यया इन्द्रदत्तवरेण छन्दोदेवनामतां प्राप्ते स्त्रीणां पूज्ये देवभेदे तत्कथा भा० शान्तु० २७अ०। "ब्राह्मण्यां दुष्टतेन त्वं भक्तायां नापितेन हि। जातस्त्वमसि चण्डालो ब्राह्मण्यं तेन तेऽनघ" २७अ० इत्युपक्रमे तेन निर्विद्य तपश्चरन् तं प्रति इन्द्रस्य वरदानादि "नूनं दैवं न शक्यं हि पौरुषेणातिवर्त्तितुम्। तदर्थं यत्नवानेवं न मे विप्रतिं विभो!। एवं सते तु धर्म्मज्ञ। दातुमर्हसि मे वरम्। यदि तेऽहमनुग्राह्यः छिन्धि हा

सुव्रतं मम । वैशम्पायन उवाच। इत्योक्तेति तदा प्राह ततस्तं बलहन्ता । चोदितस्तु महेन्द्रेण मतङ्गः प्राह वीदितम्। यथा कामविहारी स्यां कामरूपी विहङ्गमः। ब्रह्मचर्याविरोधेन पूजाञ्च प्राप्नुयामहम् । यथा मम त्वया कीर्त्तिर्भवेच्चापि पुरन्दर!। कर्त्तुमर्हसि तद्देव ! शिरसा त्वां प्रसादये । शक्र उवाच । छन्दोदेव इति ख्यातः स्त्रीणां पूज्यो भविष्यसि । कीर्त्तिश्च तेऽतुला वत्स ! त्रिषु लोकेषु यास्यति । एवं तस्मै वरं दत्त्वा वासवोऽन्तरधीयत । प्राणांस्त्यक्त्वा मतङ्गोऽपि संप्राप्तः स्थानमुत्तमम्" भा०अनु० २९अ० ।

छन्दोभाषा स्त्री छन्दसा भाषा । १छन्दसा कथने ततोभवे तद्व्याख्याने ग्रन्थेऽर्थे ऋमयनादि० अण् । छान्दोभाष तत्रभवे तद्व्याख्याने ग्रन्थेच । २उपाङ्गाख्यभेदे "उपाङ्गानि शृणु प्रभो !" इत्युपक्रमे "प्रतिपदमनुपदं छन्दोभाषासमन्वितम् । मीमांसान्यायतर्काश्च उपाङ्गं परिकीर्त्तितम्" हेमा० दा० ख० देवीपु० ।

छन्दोम पु०त्रिसूत्रे अहीने यागभेदे "त्रयस्त्राः पञ्च गर्गवैद छन्दोमान्वष्टुपराकाः" कात्या० श्रौ० २३।२।८। त्रयस्त्रास्त्रिष्टुभः पञ्च अहीनाः "हितीये त्रिष्टतोऽतिरात्राःसर्वे राज्यकामस्य" ६।१०। सू० । "त्रिष्टतस्त्रिष्टतस्तोमयुक्ताः अतिरात्राः (सर्वे गर्गादयः) पञ्च राज्यकामस्य क्रतवो भवन्ति" कर्कः ।

छन्दोमदशाह पु० दशाहसाध्ये यागभेदे "छन्दोमदशाहः पशुकामस्य" कात्या० श्रौ० । २३।५।२८। छन्दोमदशाह इति संज्ञा स पशुकामस्य भवति"कर्कः। तत्राहान्याह । "पृष्ठ्यषडहश्चात्यारश्छन्दोमाः" २९सू० । "चतुर्थे दशरात्रे पृष्ठ्यषडहस्य चादूर्द्धं द्वादशाहिकाश्चत्वारश्छन्दोमा भवन्ति तत्र पूर्वं षडहद्वयन्तरपृष्ठाःपञ्चाहाः ततश्चत्वारश्छन्दोमाः ततोदशमोविश्वजिदतिरात्रः" स० व्या० ।

छन्दोमान न० क्लीव० । छन्दसां माने ततो भवे व्याख्याने च ऋमयनादि० अण् । छान्दोमान तत्र भवे तद्व्याख्याने च ।

छन्दोविचिति स्त्री क्लीव० । छन्दसां गायत्र्यादीनां १ग्रन्थदाहे । छन्दसां विचितिर्विचयोऽत्र । छन्दःशास्त्रे च । "छन्दोविचितिरित्येवं षडङ्गोवेदउच्यते" ततः ऋमयनादि० भवे व्याख्याने चार्थे अण् । छान्दोविचित तद्भवे तद्व्याख्याने च ।

छन्न त्रि० छद्-क्त नि० । १आच्छादिते । २निर्ज्ञाते २रहसि न० "छन्नेऽपि सप्तरोपु यत्न" माघः । पक्षे-छादित तत्रार्थे त्रि० ।

छप गतौ वा चुरा० उभ० पक्षे भ्वा० पर० सक० सेट् इदित् । छप्यति ते छप्पति अचच्छप्यत् त अच्छप्पीत् । चच्छप्य ।

छम भक्षणे भ्वा० पर० सक० सेट् । छमति अच्छमीत् । इदित् छमित्वा-छान्त्वा छान्तः । छमण्डः [दिकोषः ।

छमण्ड पु० छम-अण्डच् । मातापितृविहीने (छाँड) उपा-

छर्द् वमने चुरा० उभ० सक० सेट् । छर्दयति ते अचच्छर्दत् त । छर्दितः । छर्दिः ।

छर्द न०छर्द-भावे अच् । वमने हेम० । क्लीवत्वमभिधानात् ।

छर्दन न० छर्द-भावे ल्युट् । १वमने । हेमच० । "छर्दनं दध्युदश्विद्भ्रामच वा तरुभ्रामयुना" सुश्रु० । कर्त्तरि ल्यु । २वमनकर्त्तरि त्रि० । ३अलर्कपुराणसे पु० । हेतौ णिच्-ल्यु । ४निम्बवृक्षे पु०हेमच० ५मदनवृक्षे भावप्र० ।

छर्दापनिका स्त्री छर्दं वमनमापयति आपि-ल्यु स्वार्थे क अत इत्त्वम् । कर्कश्याम् राजनि० ।

छर्दि स्त्री छर्दयति छर्द-हेतौ णिच्-इन् । वमनरोगे तन्निदानादि च सुश्रुते उक्तं यथा ।

"अथातश्छर्दिप्रतिषेधमध्यायं व्याख्यास्यामः । अतिद्रवैरतिस्निग्धैरतिदुर्जरभोजनैरपि । अकाले चातिमात्रैश्च तथा ऽस्वास्थ्यकरैश्च भोजनैः। अजात्ययोर्हि मादजीर्णा-त्कृमिदोषतः। नार्याश्चापन्नसत्वायाश्चतथाऽतिदुःखशयनतः । बीभत्सैर्हेतुभिश्चान्यैर्दुष्टैस्तूक्तैर्जितो बलात् । आदयस्थानं वेगैरर्हयच्छरीरभञ्जनैः । निरुच्यते छर्दिरिति दोषो वक्त्रं प्रधावितः । दोषानुदीरयन् स्वास्थानुदानो व्यानसङ्गतः। आर्द्रमाशयमुत्क्रम्य भृशं विस्वास्थ्यकरैर्बलम् । हृत्कण्ठोद्धारयेद्यो च प्रसेको मुखपस्तुतः । हेषोऽन्नपाने च भृशं वमीनां पूर्वलक्षणम्। पक्वछर्दयेत् फेनिलमल्पमल्पं मूत्राछर्दितोऽभ्यर्हितपार्श्वशूलः । त्रासः सघोषं वक्त्रशः कषायं जीर्णे ऽधिकं साऽनिलजा वमिस्तु। योऽन्नं भृशं वा कटुतिक्तवक्त्रः पीतं सरक्तं छरितं यमेद्वा । सदाहचोषज्वरवक्त्रशोषमूर्च्छान्विता पित्तनिमित्तजा सा । यो छर्दरोमा मधुरं प्रसूते शुक्लं स्निग्धं सान्द्रकफानुविद्धम् । श्वभक्तरूपं गौरवसादयुक्तोवमेद्भृशं सा कफजोपजा स्यात् । सर्व्वाणि रूपाणि भवन्ति यस्यां सा सर्व्वदोषप्रभवा मता तु । बीभत्सजा दौर्हृदजाऽऽमजा च याऽसात्म्यतोवा क्रमिजा च या हि। सा षड्भी ताञ्च विभागवेषु दोषोक्तवेषैव यथोक्तमादौ ।

आमाशयोत्क्लेशभवात् सर्व्वोत्पत्तौ छर्द्दितमेव तासु। मूर्च्छाभ्रमवच्छर्दा क्रमिजा च विशेषतः। क्रमिच्छर्दीगतुल्येन लक्षणेन च लक्षिता। चोषस्योपद्रवैर्युक्तां ह्राद्धत्पार्श्वां सतन्द्रिकाम्। छर्दिं प्रसक्तां कृमयो नारभेत चिकित्सितम्। वमीषु बद्धदोषासु छर्दनं हितमुच्यते। विरेचनं वा कुर्व्वीत यथादोषोच्छ्रयं भिषक्। संसर्गोद्यानुपूर्व्वेण यथास्वं भेषजाय तान्। लघूनि परिशुष्काणि सात्म्यान्यन्नानि वाऽऽचरेत्। यथास्वञ्च कषायाणि ज्वरघ्नानि प्रयोजयेत्"।

"कासः श्वासो ज्वरो हिक्का तृष्णा वैचित्त्यमेव च। छर्दीगमनकर्त्तृणि ज्ञेयान्यष्टौ रुपद्रवाः" इति माधवकरः। वा ङीप्। तत्रार्थे "आमाशयोत्क्लेशभवा हि सर्व्वोच्छर्दीर्मता बहुलमेव तस्मात्" सुश्रुतः।

**छर्दिका** स्त्री छर्द्द-णिच् ण्वुल्। १उत्क्लेशिकायां, २विष्णुक्रान्तायाञ्च। भावार्थे ण्वुल्। ३वमने। राजनि०। स्वार्थे क पृषो० छर्दीकाशब्दे च शब्दच०।

**छर्दिकारिपु** स्त्री ष० त०। १चुद्रैलायाम्। २छर्दिनाशके

**छर्दिघ्न** पु० छर्दिं हन्ति-हन-टक्। १निम्बभेदे। २छर्दिनाशके त्रि० रत्नमाला स्त्रियां ङीप्।

**छर्दिस्** स्त्री छर्द्द-भावे इसि। १वमने, २कर्त्तरि इसि। ३वमिरोगे ३उद्गारे च। छर्द्द-कर्म्मणि इसि। ४मद्ये निघ०। "यातं छर्दिष्पा उत नः परस्याः" ऋ०८।६।११। "छर्दिरिति मद्यनाम तस्य पातारः" भा०। "अग्निष्टाभिपातं महया स्वस्त्या छर्दिषा" यजु० १२।१८। "छर्दिषा मद्येन" वेददी०। छृद-दीप्तौ इसि। ४तेजसि "वायुष्टाभिपातं महया स्वस्त्या छर्दिषा" यजु० १४।१२। "छर्दिषा तेजोविशेषेण" वेददी०।

**छल** न० छल-अच्। १स्वरूपाच्छादने २व्याजे ३यथार्थगूहने ४कूटयुद्धादिना तन्नाम्न्यौदायाद्यहरणे ५प्राप्ते हेत्वापभ्रंशे न्यायमतसिद्धे वाक्यान्तरेण प्रयुक्तस्य वादुःप्रयुक्तस्यार्थान्तरकल्पनया प्रतिवादिना दत्ते ७दूषणभेदे तल्लक्षणभेदादिकं गौ० सू० दर्शितम्। यथा "विद्यानोऽर्थविकल्पोपपत्त्या छलम्। १। तत् त्रिविधं वाक्छलं सामान्यछलमुपचारच्छलञ्चेति। २। अविशेषाभिहितेऽर्थे वक्तुरभिप्रायादर्थान्तरकल्पना वाक्छलम्। ३। सम्भवतो ऽर्थस्यातिसामान्ययोगादसम्भूतार्थकल्पना सामान्यच्छलम्। ४। धर्मविकल्पनिर्देशोऽर्थसद्भावप्रतिषेध उपचारच्छलम्। ५। वाक्छलमेवोपचारच्छलं तदविशेषात्। ६। न तदर्थान्तरभावात्। ७। अविशेषे वा किञ्चित्साधर्म्यादेकच्छलप्रसङ्गः। ८। गौ० सू० "क्रमप्राप्तं छलं लक्षयति। अर्थस्य वादाभिमतस्य यो विकल्पो विरुद्धः कल्पो अर्थान्तरकल्पनेति यावत् तदुपपत्त्या युक्तिविशेषेण यो वचनस्य वादुःक्तस्य विघातो दूषणं तच्छलमित्यर्थः वक्तृतात्पर्य्याविषयार्थकल्पनेन दूषणाभिधानमिति फलितं तात्पर्य्याविषयत्वं विशेष्ये विशेषणे संसर्गे वा यथा नेपालादागतोऽयं नवकम्बलवत्त्वादित्यत्र नवसङ्ख्यापरत्वकल्पनयाऽसिद्ध्यभिधानं, प्रमेयं धर्मत्वादित्यत्र पुरुषार्थकल्पनया भागासिद्ध्यभिधानम् वह्निमान् धूमादित्यत्र धूमावयवे व्यभिचाराभिधानम्।। ह० लक्षितं छलं विभजते। २। तत्र वाक्छलं लक्षयति। यत्र शब्दार्थहेवे सम्भवति एकार्थनिर्णायकविशेषाभावादनभिप्रेतशब्दार्थकल्पनेन दूषणाभिधानं तद्वाक्छलं, लक्षयन्तु शब्दात् एकार्थशब्दबोधतात्पर्य्यकशब्दस्य शब्दार्थान्तरतात्पर्य्यकत्वकल्पनया दूषणाभिधानं यथा नेपालादागतोऽयं नवकम्बलवत्त्वादित्युक्ते कुतोऽस्य नवसङ्ख्यकाः कम्बला इति एवं गौर्विषाणीत्युक्ते कुतोगजस्य शृङ्गं श्वेतोधावतीति श्वेतरूपवदभिधावेत्योक्ते श्वेतो न धावतीत्यभिधानमित्यादिकमुदाहृतम्॥ ३ ह०। सामान्यछलं लक्षयति। सामान्यविशिष्टस्य शब्दार्थाभिप्रायेणोक्तस्य अतिसामान्ययोगादसम्भवदर्थकत्वकल्पनया दूषणाभिधानं सामान्यच्छलम्। यथा ब्राह्मणोऽयं विद्याचरणसम्पन्न इत्युक्ते ब्राह्मणत्वेन विद्याचरणसम्पदं साधयतीति कल्पयित्वा परो वदति कुतो ब्राह्मणत्वेन विद्याचरणसम्पद्वाक्ये व्यभिचारात्॥ ४ ह०। उपचारच्छलं लक्षयति। धर्मशब्दस्यार्थेन विकल्पो विधिः कल्पः शक्तिलक्षणान्यतररूपस्तया शक्तिलक्षणयोरेकतरत्वेन प्रयुक्ते शब्दे तदपरत्वेन यः प्रतिषेधः स उपचारच्छलं यथा मञ्चाः क्रोशन्ति नीडो घट इत्यादौ मञ्चस्था एव क्रोशन्ति न तु मञ्चाः एवं घटस्थ कथं नीलरूपाभेदः। एवम् क्षणे नित्य इति शक्त्या प्रयुक्ते असकृत्पादुत्पन्नत्वं कथं नित्य इति प्रतिषेधोऽप्युपचारच्छलम् वादाभिप्रेतार्थस्यादूषणेन छलस्यासदुत्तरत्वम्। न च शिष्टलाक्षणिकप्रयोगादादिनैवापराधः स्यादिति वाच्यं तत्तदर्थबोधकतया प्रसिद्धस्य शब्दस्य प्रयोगे वादिनोऽनपराधात् अन्यथा पर्वतोवह्निमानित्युक्ते पर्वतोऽयं कथमवह्निमानित्यादिदूषणेनानुमानादुच्छेदः स्यात्॥ ५ ह०। प्रसङ्गाच्छलं

परीक्षितुं पूर्वपक्षयति । शब्दस्यार्थान्तरकल्पनाऽविशेषाद्वाक्छलमेवोपचारच्छलं स्यादिति हित्वमेव न तु नित्वमिति शङ्कार्थः ॥ ६ इ० ॥ समाधत्ते । उपचारच्छलस्य वाक्छलाभेदो न, तयोरर्थान्तरभावात् भिन्नत्वात् भिन्नतया प्रमाणसिद्धत्वादिति फलितार्थः। पूर्वोक्तभेदकधर्म्मेण भेदसम्भवेऽपि यत्किञ्चिद्धर्म्मेणाभेदे सामान्यधर्म्मेणाभेदस्य सर्व्वत्र सम्भवाद्विभागः कुत्रापि न स्यादिति । ७ इ० । विपक्षे बाधकमभिप्रेत्याह यत्किञ्चिद्धर्म्मादविशेषे किञ्चिद्धर्म्मान्छलत्वादिरूपाच्छलस्यैक्यं स्याच्च तु त्वदभिमतं द्वित्वमयोगीति भावः" ॥ ८ इत्तिः

"व्याघ्रिप्रकेतुकृशसेन्यगजच्छलेन" माघः । "धर्म्मेण व्यवहारेण छलेनाचरितेन च । प्रयुक्तं साधयेदर्थं पञ्चमेन बलेन च" मनुः । "भुवनहितच्छलेन यस्" भट्टिः "अध्यारुरोहेव रजश्छलेन" रघुः । "छलं निरस्य भूतेन व्यवहारान्नयेन्नृपः" याज्ञ० । "भूतं तत्त्वार्थसम्बद्धं प्रमादाभिहितं छलम्" नारदोक्ते ऽप्रमादाभिहिते च ऽछलकारिणि त्रि० । स्वार्थे क । तत्रार्थे "आपास्यां (मधुकैटभाभ्याम्)ह्रियते विश्वं रजसा तमसा तथा । रजस्तमोमयावावां यतीनां दुःखलक्षणौ। छलकौ धर्म्मशीलानां दुस्तरौ सर्व्वदेहिनाम्" हरिवं२०अ० । १०नाटकप्रभेदख्यीख्याङ्गभेदे न० "वीथ्यामेको भवेदङ्कः" इत्युपक्रमे "अस्याश्चत्वोदाहृतानि निर्दिशन्ति मनीषिणः । उद्घात्यकावलगितेत्यादिना विभज्य सा० द० लक्षितं यथा "प्रियाभेरप्रियैर्वाक्यैर्विलोभ्य छलना छलम् "यथा वेणुं भीमार्জ্জুनौ" "कर्त्तौ द्यूतच्छलानां जतुमयशरणोद्दीपनः सोऽभिमानी राजा दुःशासनादेर्युवतिजगतश्चाङ्गराजश्च मित्रम् । कृष्णाकेशोत्तरीयव्यपनयनपटुः पाण्डवा यस्य दासाः क्वासौ ? दुर्योधनोऽसौ कथयत न कृपा द्रष्टुमभ्यागतौ स्वः" ।

छल नामधातुः छल+ज्ञतौ-णिच् सक० सेट् । छलयति "छलयति विक्रमणे बलिमद्भुत वामनः" गीतगो० "द्यूतं छलयतामग्रे" गीता ।

छलन न० छल+ज्ञतौ णिच्-भावे ल्युट् । १प्रतारणे "यथापरं यथायोगं न च स्यात् छलनं पुनः" भा० भी० १अ० । ङीप् । २वञ्चनायां स्त्री शब्दार्थचि० । "छलना छलम्" सा०द० ।

छलिक न० नाटकभेदे अलङ्कारशब्दे १९२पृ० उक्ते दृश्य काव्यभेदे दृश्यम् । "देवि ! अस्मिंस्तायाः कृतिं चतुष्पदीम् छलिकं दुष्प्रयोज्यमुदाहरन्ति" मालविका० ।

छलित छल+नामधा० कर्म्मणि क्त । १प्रतारिते "छलितरामं नाटकम् । भावे क्त । २प्रतारणे न० ।

छली स्त्री छद-क्विप् तां ज्ञाति ला-क गौरा०ङीष् । १वल्कले (छाल) शब्दरत्ना० २त्वचायाम् ३शल्लकौ च । मेदि० ला-डा० कि । छल्लिरपि तत्रार्थे ।

छवि (वी) स्त्री छवति असारं छिनत्ति तमो वा छो-वि-किच्च वा ङीप् । १शोभायां २कान्तौ च अमरः । "आपाण्डुरमुखच्छविः" रघुः । "आपाण्डुरीभूतमुखच्छवीनाम् कुमा० ।

छष वधे भ्वा० उभ० सक० सेट् । छषति ते अच्छा(च्छ)षीत् अच्छषिष्ट । चच्छाष चच्छषे । [वि० ।

छा पु० छो-क्विप् । १पारदे एकाक्षरको० २छेदनकर्त्तरि

छाग पुंस्त्री छो-गन् खनामख्याते पशुभेदे अमरः । जातित्वात् स्त्रियां ङीष् । २पुरोडाशे न० शब्दार्थचि० । छागया दुग्धम् अण् । २छाग्या दुग्धे न० छागस्येदमण् । ३छागसम्बन्धिनि त्रि० स्त्रियां ङीप् । छागस्य लक्षणादिकं ह० सं० दर्शितं यथा

"छागशुभाशुभलक्षणमभिधास्ये नवदशाष्टदन्तास्ते । धन्याः स्याप्या वेश्मनि सन्त्याज्याः सप्तदन्ता ये । दक्षिणपार्श्वे प्रथमं लम्बितं शुक्लस्य शुभफलं भवति । कृष्णनिभकृष्णलोहितवर्णानां श्वेतमपि शुभदम् । स्तनवदवलम्बते यः कण्ठेऽजानां मणिः स विज्ञेयः । एकमणिः शुभफलदस्तथा द्विमणयो ये । सर्व्वाः सर्वे शुभदाः सर्व्वसिताः सर्व्वकृष्णहेयाश्च । सर्व्वांसिताः सितार्धा धन्याः कपिलार्धकृष्णाश्च । विचरति यूथस्याग्रे प्रथमं चाम्भोऽवगाहते योऽजः । स शुभः सितमूर्धा वा मूर्धनि वा टिल्लिका यस्य । स पृथुककण्टशिरा वा तिलपिष्टनिभश्च नाक्षदृक् यस्याः । कृष्णचरणः सितो वा कृष्णो वा श्वेतचरणो यः । यः कृष्णाग्रुः श्वेतो मध्ये कृष्णेन भवति पट्टेन । यो वा चरति सगर्व्वं मन्दं च स शोभनच्छागः । स्फुटग्रथितोरुस्कन्धो यो वा प्राक्पाश्चरोऽपरे नीचः । स भवति शुभकृच्छागः श्लोकशास्त्रे गर्गोक्तः । कुट्टकः कुटिलश्चैव जटिलो वामनस्तथा । ते चत्वारः त्रियः पुत्रा नाक्षत्रीके वसन्ति ते । अग्राग्रस्थाः खरतुल्यनादाः प्रदीप्तदृक्षाः कुनखा विवर्णाः। निकृतकर्णौ द्विपमस्तकाश्च

भवन्ति ये चाश्वितताक्षुज्जिह्वाः । वर्णैः प्रशस्तैर्मिश्रिता युक्ता सुखाश्च ये ताम्रविलोचनाश्च । ते पूजिता देवस्तु मानवानां सौख्यानि कुर्वन्ति यशः श्रियं च" । बलौ तस्य शुभाशुभत्वं युक्तिकल्पतरौ दर्शितं यथा "तेषां शुभाय निर्दिष्टं पशुरस्तुत्सवं बलौ । ये कृष्णाः शुचयश्छागाः पशवोऽन्ये तथैव च । देवजातिभिरुत्सृष्टास्ते सर्वार्थोपसिद्धये । ये पीता हरिता वापि नरजातेरुदीरिताः । ये शुक्लाश्च महान्तो वा रक्तो जातेः शुभप्रदाः । यो लोहादय वाऽज्ञानाद्बलिमन्यं प्रयच्छति । वध एव फलं तस्य नान्यत् किञ्चित् फलं भवेदिति" । तन्मांसगुणा भावप्र० उक्ता यथा "छागलो वर्करश्छागो वस्तोऽजः शेलकः स्तुभः । अजा छागी स्तुभा चापि शेलिका च गलस्तनी । छागमांसं लघु स्निग्धं स्वादुपाकं त्रिदोषनुत् । नातिशीतमदाग्नि स्यात् स्वादु पीनसनाशनम् । परं बस्तकरं रूक्षं हंसं वीर्यविवर्द्धनम् । अजाया अप्रसूतायाः मांसं पीनसनाशनम् । शुष्ककासेऽरुचौ शोषे हितमग्नेश्च दीपनम् । अजातस्य बालस्य मांसं लघुतरं स्मृतम् । छर्दिं ज्वरहरं श्रेष्ठं सुखदं बलदं भृशम् । मांसं निष्कुपितायाश्च (खासि) छागस्य कफकृद्गुरु । क्षोतःशुद्धिकरं बल्यं मांसदं वातपित्तनुत् । शुष्कस्य पातलं रूक्षं तथा व्याधिश्रितस्य च । अर्द्धजलविकारघ्नं छागतुल्यं रुचिप्रदम् ।" तद्दुग्धादिगुणास्तत्रोक्ता यथा "छागं कषायं मधुरं शीतं स्याद्वि पयो लघु । रक्तपित्तातिसारघ्नं क्षयकासज्वरापहम् । अजानां लघुकायत्वाच्छागानाद्व्यनिषेधणात् । नात्यम्लपाकाद् व्यायामात् सर्वव्याधिहरं पयः । आजं दध्युत्तमं स्याद्वि लघु दोषत्रयापहम् । भवते श्वासकासार्शःक्षयकासेषु दीपनम् । तद्दु एतद्गुणा एतच्छब्दे २७८८ पृ० दृश्याः । तन्मूत्रगुणाः "गोजाविमहिषीणां तु स्त्रीणां मूत्रं प्रशस्यते । खरोष्ट्रेभनराश्वानां पुंसां मूत्रं हितं स्मृतम् ।" "अनादेशे पशुच्छागः" तिथि० त० "मातृस्वसारिश्वकौरभ्रमशाकुनच्छागवर्षभैः" याज्ञ० । "वृथामांसाच्छागमांसेन" मनुः "अनादेशे यज्ञे स एव पशुशब्दवाच्यः यथाह कात्या० श्रौ० ६ । ३।२०।"छागं मन्त्राक्षानात्" सू० । "अजं पशुमुपाकरोति होता यजमानो छागखेत्यादिषु मन्त्रेषु छागशब्दानात् तथा "अग्नीषोमाभ्यां छागस्य वपाया मेदसोऽनुब्रूहीति" यदि च छागो यागसाधनं भवति तदा स्वयं मन्त्रः संगतार्थो भवति नान्यथा । पुनः कीदृशम् । "पञ्चदम्" सू० । "पञ्चदो जातदन्त इति निगमेषूक्तम्" । "अव्यङ्गम्" सू० । विगतमङ्गं चक्षुःकर्णादिकं यस्यासौ व्यङ्गः अनूनाङ्गम् शास्त्रान्तरात्" कर्कः "वायव्यं श्वेतमालभेत"श्रुतौ छाग एवाभ्यः"छागो वा मन्त्रवर्णात्" जै०सू०तथा निर्णयात् ।

**छागण** पु० छया छादनेन गण्यते गण–कर्म्मणि अच् । छगण+स्वार्थे अण्–वा । करीषाग्नौ स्त्रियां ङी० ।

**छागभोजिन्** पु० छागं भुङ्क्ते भुज–णिनि । १वृके राजनि० । २छागमांसभक्षके त्रि० स्त्रियां ङीप् ।

**छागमय** न०छाग+मयट् । स्कन्दस्य षष्ठे वक्त्रे "षष्ठं छागमयं वक्त्रं स्कन्दस्यैवेति विद्धि तत् । षट्शिरोभ्यनरं राजन् ! नित्यं मातृगणार्चितम् । "यज्ञान्तु प्रवरं तस्य शीर्षाणामिह शब्द्यते । शक्तिं वेनाहृज्जिह्वास्य मङ्गलाख्य इति स्म ह" भा० व० २२७अ० ।

**छागमुख** पु० छागस्य मुखमिव मुखमस्य । १कुमारानुचरभेदे २कुमारे कार्त्तिकेये च तस्य षडशिरस्त्वाच्छागतुल्याकारत्वात् तथात्वम् "कुमारास्ते विशाखश्च पितृत्वे समजल्पयन् । स भूत्वा भगवान् संख्ये रथंश्छागमुखस्तदा" भा० व० २२७अ० ।

**छागमित्र** पु० छागस्य मित्रम् । देशभेदे तत्र भवः काश्या० ठक् ञिठ् वा इदित् । छागमित्रक तद्भवे त्रि० स्त्रियां ढञि ङीप् ञिठि टाप् ।

**छागरथ** पु० छागोरथोऽस्य । छागवाहने वह्नौ हेमच० ।

**छागल** पुंस्त्री छगल एव स्वार्थे अण् । १छागे पशुभेदे । छगलस्यार्षं गोत्रापत्यम् अण् । २आत्रेये ऋषिभेदे आत्रेयभिन्ने तु छागलिरित्येव छगलशब्दे दृश्यम् । स्वार्थे क । तत्रार्थे संज्ञायां कन् । "श्वेतं सुपक्वं यदीषद्रसं निःशल्यकलं छागलकं वदन्ति । मले द्विकण्टः किल तस्य पृष्ठे कण्टः सुपथ्यो रुचिदीपनप्रदः" राजनि० उक्ते ४मत्स्यभेदे

**छागलाद्यघृत** न० चक्रदत्तोक्ते छागमांसपक्के घृतभेदे यथा "छागमांसतुलां षष्ठ साधयेद्द्रोणवारिणि । पादशेषेण तेनैव घृतपस्थं विपाचयेत् । कल्किताभ्यां च मेदे द्वे जीवकर्षभकौ तथा । काकोली क्षीरकाकोलीपृथक् कर्षैः पलोन्मितैः । सर्व्वतुल्यं सिद्धे त्वस्मिन्नार्द्धं शीते तस्मिन् प्रदापयेत् । शर्करायाः पलान्यष्टौ मधुनः कुडवं क्षिपेत् । पलं पलं पिबेत् प्रातर्यच्छ्वासं हन्ति

दुर्ज्जयम्। क्षतक्षयञ्च कासञ्च पार्श्वशूलमरोचकम्। स्वरक्षयस्तोरोगं श्वासं हन्यात् सुदारुणम्"।

"तोयद्रोणद्वितये मांसं छागलस्य पलशतं पक्त्वा। जलमष्टांशं शेषं तच्छीतं विपचेद् घृतं प्रस्थम्। कल्केन जीवनीयानां कुड़वेन तु मांसमर्पिरिदम्। पित्तानिलं निहन्यात् तल्लानपि रसक्रियोजितं पीतम्। श्वासकासावुभौ यक्ष्माणं पार्श्वरुजां घोराम्। अध्वव्यायशोषं शमयति चैवापरं किञ्चित्। छागशकृद्रसमलचीरैर्दग्धा च साधितं सर्पिः। सञ्चारं यक्ष्महरं कासश्वासोपशान्तये परमम्"। भैषज्यरत्नावल्यां विशेषो यथा "छाजं चर्म्म विनिर्लोम्नं त्वक्पङ्क्तिनखादिकम्। पञ्चमूलीहयङ्गैव जलद्रोणे विपाचयेत्। तेन पादावशेषेण घृतप्रस्थं विपाचयेत्। जीवनीयैः सयष्ट्याह्वैः क्षीरञ्चैव शतावरी। छागलाद्यमिदं नाम्ना सर्ववातविकारनुत्। अर्दिते कर्णमूले च बाधिर्ये मूकमिन्मिने। जङ्घगुह्यपङ्गूनां खञ्जे स्तब्धसिकुब्जयोः। अपतानेऽपतन्त्रे च सर्पिरेतत् प्रशस्यते। पृथग्मूर्द्ध तुलां पञ्चमूलहन्नाजमांसयोः। निःक्वाथ्य सलिलद्रोणे क्वाथे पादावशेषिते"। "छागमांसतुलां स्तृष्ट्वा दशमूल्याः पलं शतम्। अश्वगन्धपलशतं वाट्यालकशतं तथा। घृताढकं पचेत्तोयैश्चतुर्भागावशेषितैः। क्षीरं स्नेहसमं दद्यात् शतावर्य्या रसं तथा। ताम्रपात्रे दृढे चैव मृनेर्ल्लघ्निना पचेत्। अस्यौषधस्य कल्कस्य प्रत्येकं शुक्तिसम्मितम्। जीवनी मधुकं द्राक्षा काकोल्यौ नीलमुत्पलम्। सुक्तं सचन्दनं राज्ञा पर्पटीहयं शारिवे। मेदे द्वे च तथा कुष्ठं जीवकर्षभकौ घटी। दार्व्वी प्रियङ्गुः त्रिफला नतं तालीशपद्मकौ। एलापत्रं वरी नागजातीकुसुम धान्यकम्। मञ्जिष्ठा दाड़िमं दारु रेणुकं शैलवालुकम्। विड़ङ्गं जीरकद्वैव पेषयित्वा विनिःक्षिपेत्। वस्त्रपूते च शीते च शर्करायास्तयसंयुतम्। निधापयेत् स्निग्धभाण्डे आर्द्रे वा भाजने शुभे। अस्यौषधस्य सिद्धस्य प्रभुं वीर्य्यमतःपरम्। देवदेवं नमस्कृत्य संपूज्य गणनायकम्। पिबेत् पाणितलं तस्य व्याधिं वीक्ष्यानुपानतः। सर्ववातविकारेषु अपस्मारे विशेषतः। उन्मादे पक्षघाते च बाधिर्ये कोष्ठनिग्रहे। कर्णरोगे शिरोरोगे बाधिर्य्ये चापतन्त्रके। भूतोन्मादे च स्तब्धस्यां वोद्धारे चाक्षिपातके। पार्श्वशूले च कुक्षूले वाताद्यार्दिते तथा। वातकण्टकहृद्रोगमूलशूले सपङ्गुले। क्रोष्टुशीर्षे तथा खञ्जे कुब्जे चाध्मानमिन्मिने। अपतानेऽन्तरायामे रक्तपित्ते तथोर्द्ध्वगे। व्यानाक्षेऽर्शोविकारेषु चातुर्थकज्वरेऽपि च। हनुग्रहे तथा शोषे क्षोभे चैवापवाहुके। दलापतानके भग्ने दाहे चाक्षेपके तथा। जीर्णज्वरे विषे कुष्ठे श्लेष्मस्तम्भे मदात्यये। आढ्यवातेऽग्निसान्द्ये च वातरक्तगदेषु च। एकाङ्गरोगिणे चैव तथा सर्वाङ्गरोगिणे। हस्तकर्म्मे शिरःकर्म्मे जिह्वाकर्म्मे जड़े श्रमे। क्षीणेन्द्रिये नष्टशुक्रे शुक्रनिःसरणे तथा। स्त्रीणां वातास्रपाते च पटले चाक्षिस्यन्दने। एकाङ्गस्यन्दने चैव सर्वाङ्गस्यन्दने तथा। नागादिजनिते वाते स्त्रीणामसाध्यिहेतुके। आभिचारिकदोषे च धनसन्नाशसम्भवे। ये वातप्रभवा रोगा ये च पित्तसमुद्भवाः। शिरोमध्यगता ये च जङ्घापार्श्वादिसंस्थिताः। साध्यसाध्यमिदं तत्र भिषग्भिश्च विशुध्यति। प्रभीक्ष्णबलमांसश्च न वर्त्मगमनक्षमः। एतैर्नानेन सिध्यन्ति वज्रसङ्कारिवाक्षरान्। निहन्ति सकलान् रोगान् इतं परमदुर्लभम्। रसायनं वह्निबलप्रदञ्च वपुःप्रकर्षं विदधाति रूपम्। दलाबलेन्द्रेण समानतेजा दीर्घायुषं पुत्रशतं करोति। स्त्रीणां शतं गच्छति वातिरेकं न याति तृप्तिं सरसः समाङ्गः। अष्टत्रिंशो पुत्रशतं करोति शतायुषं कामसमं बलिष्ठम्। महत् इतं नाम तु छागलाद्यं विनिर्मितं वातनिसूदनञ्च। शिवं शुभं रोगभयापहञ्च चकार क्षारोतसुनिर्विशिष्टः। छगालवर्हिणः पाके पुमांसं तत्र दापयेत्। मयूरी जम्बुकी छागी योग्यहीनाः स्वभावतः। भाषितं काशिराजेन छागमेव नपुंसकम्"। [काश्यप०।

छागवाहन पु० छागोवाहनमस्य। वह्नौ त्रिका०। [च्छटा"

छात त्रि० छो-क्त। १लिप्ते २दुर्बले अमरः। "छातेतरास्तु-

छात्र पु० छत्रं गुरोर्यैगुण्यावरणं शीलमस्य छत्रा० ण। १अन्तेवासिनि शिष्ये २मधुभेदे न "वरटाः कपिलाः पीताः प्रायोऽस्मिन्वतोदने। कुर्वन्ति छात्रकारं तु तच्छात्रं मधु स्मृतम्। छात्रं कपिलपीतं स्यात् पित्तिच्छर्दि भीतलं गुरु। स्वादुपाकं क्रमिघ्नं च रक्तपित्तप्रणेऽर्हति। भ्रमदग्धमोहविषहृत् तर्पणञ्च गुणाधिकम्" भावप्र०। [अल्पे मन्दे शिष्ये त्रिका०।

छात्रगरुड पु० छात्रो गरुड इव। पक्षस्य पादशब्दवेत्तरि

छात्रदर्शन न० छात्रं मधुभेद इव दृश्यते दृश-कर्म्मणि

ल्युट् । १मधुस्रवास्वादे वैयङ्गवीने शब्दच० । इत० २शिष्टस्य दर्शने च ।

छात्र्यंसक पु० छात्रो व्यंसकः मयू० परनि० । मन्दशिष्ये

छात्रि स्त्री चु०छद्–क्विन् । छादने । कर्त्तरि क्विप् । २छादके अस्य शालाशब्दे परे "छात्र्यादयः शालायाम्" पा० । आद्युदात्तता । छात्रिशाला "यद्यपि शालान्त तत्पुरुषे नपुंसकलिङ्गो भवति तदापि "तत्पुरुषे शालायां नपुंसके" पा० इत्येतत्सूत्रात् पूर्वविप्रतिषेधेनायमेव स्वरः छात्रिशालम्" सि० कौ०

छात्र्यादि पु० "छात्र्यादयः शालायाम्" पा० शालान्त तत्पुरुषे आद्युदात्तनिमित्ते शब्दगणे स च गण छात्रि मेलि भाण्डि व्याडि आस्तरि आटि गोमि" छात्रिशाला छात्रिशालम् ।

छाद् न० छादयति चु० छद्–घञ् । पटले (छात) चाल । दृतिच्छाते पदार्थे जटाधरः ।

छादन पु० चु०–छद्–ल्यु । १नीलाच्छादनवस्त्रे । भावे ल्युट् । २छादने । "छादनार्थं प्रकीर्णेच कटैच तृणसङ्कटैः" हरिवं० ६६अ० । करणे ल्युट् । ३पटे न० राजनि० । "छादने वस्त्रदारुणि" अमरनिर्देशात् कर्तरि ल्यु । ४छादके त्रि० । "कृष्णामृतां छादनमेकमोकसाम्" माघः ।

छादित त्रि० छद्–क्त "यादान्तव्यादिना पत्वे णिलोपाभावः । आच्छादिते वस्त्रे । [ढक् । वस्त्रे ।

छादिर्धेय न० छदिषे हितम् "छदिरुपधिबलेर्ढक्" पा० ।

छाद्मिक त्रि० छद्मना चरति व्यवहरति ठक् । १कापटिके कपटव्यवहारिणि "धर्मध्वजी सदा लुब्धश्छाद्मिको लोकदम्भकः" मनुः ।

छान्दड पु० ऋषिभेदे

छान्दस पु० छन्दोऽधीते वेत्ति वा पचे अण् । वेदाध्येतरि १श्रोत्रिये अमरः । छन्दसो व्याख्यानो ग्रन्थः तत्प्रभवो वा अण् । २वेदव्याख्याने ग्रन्थे ३वेदभवे च त्रि० । तस्येदम् अण् । ४वेदसम्बन्धिनि त्रि० स्त्रियां सर्व्वत्र ङीप् । "छान्दसीभिरदाराभिः श्रुतिभिः (कर्णैः) समलङ्कृतः (वराङ्गः)" हरिवं० २२३अ० । छान्दसः प्रयोगः । ततो मनोज्ञा० भावे युञ् । छान्दसिका छान्दसभावे स्त्री ।

छान्दोग्य न० छन्दोगानां धर्म्मं आम्नायः समूहो वा "चरणेभ्यो धर्म्मवति पा० छन्दोगौक्थिकेभ्योऽञ्" पा०अञ् । छन्दोगानामाम्नायभेदे उपनिषद्भेदे । उपनिषच्छब्दे १२२२पृ० दृश्यम् । तेषां २धर्म्मे ३समूहे च ।

छान्दोमिक त्रि० छन्दोमसंदम् ठक् । यज्ञभेदसम्बन्धिनि १सूक्ते २ऋचि च "छान्दोमिकं सूक्तम्" निरु० ७।२१। "ऋचो छान्दोमिके" २२।६।२२ कात्या० श्रौ०कर्कः

छाया स्त्री हो–य । १आतपाभावे २प्रतिबिम्बे ३सूर्य्यपत्नीभेदे संज्ञाप्रतिकृतौ ४कान्तौ च अमरः ५पालने ६उत्कोचे ७पङ्क्तौ मेदि० । ८कान्तायन्यां शब्दरत्ना० । ९तमसि हेमच० । तत्र आतपे "छायामिषे सानुगतां निषेव्य" कुमा० । "छायामक्षाश्रित्य सन्निवस्य" माघः "छायेव तस्यानुगतिश्च पश्चात्" नैष० । "सं रागादुपरि वितन्वतोत्तरीयम् । कान्तेन प्रतिपदवारितातपायाः । स ऊर्ध्वादपरविलासिनीसमूहाच्छायासीदधिकतरा तदा परस्याः" माघः ।


"गुहां प्रविष्टौ सुकृतस्य लोके छायातपौ ब्रह्मविदो वदन्ति" श्रुतिः संज्ञाप्रतिकृतिछायाकथा हरिवं०दअ० । "स वै विवस्वतः पूर्व्वं पत्न्यां देवः प्रजापतिः । यमञ्च यमुनां चैव यमजौ संबभूवतुः । श्यामवर्णं च तद्रूपं संज्ञा दृष्ट्वा विवस्वतः । अश्वरूपी तु सा छायां सवर्णां निर्ममे ततः । मायामयी तु सा संज्ञा तस्याश्छायासमुत्थिता । प्राङ्निधिः प्रथमा भूत्वा छाया संज्ञा नरेश्वर !। उवाच किं मया कार्य्यं कथयस्व शुचिस्मिते !। स्थितास्मि तव निर्देशे यदि मां वरवर्णिनि !। संज्ञोवाच अहं यास्यामि भद्रन्ते स्वमेव भवनं पितुः । त्वयेह भवने सङ्घ वस्तव्यं निर्व्विकारया ।

इमौ च बालकौ सङ्घ कन्या चेयं सुमध्यमा । संभाष्यास्ते न चाख्येयमिदं भगवते क्वचित् । छायोवाच । या कथयिष्यादेवि ! वा शापाश्चैव कर्हिचित् । आख्यास्यामि मतं तुभ्यं गच्छ देवि ! यथासुखम् । वैशम्पायन उवाच । समादिश्य सवर्णान्तु तथेत्युक्त्वा तया च सा । त्वष्टुः समीपमगमद्दुःखितेव तपस्विनी । पितुः समीपगा सा तु पित्रा निर्भर्त्सिता तदा । भर्तुः समीपं गच्छेति नियुक्ता च पुनः पुनः । अगच्छद्वडवा भूत्वाऽश्वाद्य रूप मनिन्दिता । कुरूनथोत्तरान् गत्वा तृणान्यत्ति चचार ह । द्वितीयावान्तु संज्ञायां संज्ञेयमिति चिन्तयन् । आदित्यो जनयामास पुत्रमात्मसमं तदा । पूर्वजस्य मनोस्तात सदृशोऽयमिति प्रभुः । मनुरेवाभवच्छ्रीमा सावर्ण इति चोच्यते । द्वितीयोयः सुतस्तस्याः स विज्ञेयः शनैश्चरः । सततं पार्थिवी तात ! यस्य पुत्रस्य वै तदा । चकाराभ्यधिकं स्नेहं तया पूर्वजेषु वै । मनुस्तस्याश्च

भक्तुं यमस्तस्या न चक्षमे ।• तां स रोषाच्च बाल्याच्च भाविनोऽर्थस्य गौरवात् । पदा मनर्जवामास छायां वैवस्वतो यमः । तं शशाप ततः क्रोधात् सावर्णजननी रुषः । चरणः पततामेष तवेति भृशदुःखिता" ।


छाया च तमोरूपद्रव्यान्तरमिति मीमांसकाः । तेन "त्वं दूरमपि गच्छन्ती हृदयं न जहासि मे । दिवा-यसानच्छायेव पुरोभूतं वनस्पतेः" भक्तु० । छाया-गतिरुक्ता सङ्गच्छते" नैयायिकास्तु तेजःसामान्या भाव एव तमश्छायादिकमङ्गीचक्रुः तत्र गत्वादिक-मौपचारिकम्" "अत्र च तेजःसामान्याभावप्रयोजकस्य छायासम्बन्धित्वम् यथा इदमस्मातपसम्बन्धप्रतिरोधात् छायासम्बन्धित्वं तथा च इदमयुक्तातपाभावः" इति बोधः "छाया बाहुल्ये" पा० । छायान्नसत्पुरुषो नपुंसकं स्यात् पूर्वपदार्थबाहुल्ये" इत्यमां छाया इचुच्छायम् सि० कौ० । कस्य बाहुल्यमित्यपेक्षायां छायायानिमि-त्तभूतावरकद्रव्यापाभेव बाहुल्यमर्थाल्लभ्यं तच्च षष्ठी तत्पुरुषे पूर्वपदार्थगतमित्याशयेन पूर्वपदार्थेत्युक्तम् । "इचुच्छायानिशादिभ्य" इत्तत्र आङ्ग्रहणेन:" सि० कौ० । "आवरकद्रव्यस्यैकत्वे तु "विभाषा सेनासुराच्छायेत्यादि" पा० वा क्लीवत्वम् कृच्छ्राया कृच्छ्रच्छायम् ।

ख्यातपाभावश्च तेजःसामान्यप्रभासञ्चारभावः तेन प्रदीप प्रभावरकपदार्थस्य प्रभानिरोधसम्बन्धित्वात् शङ्कुच्छाया नरच्छाया इत्यादि । दीपादिच्छायामानत्वानार्थो व्यव-हारःछायाव्यवहारः तत्र करणत्वं लीला०उक्तं यथा । "अथ छायाव्यवहारे करणत्वं इत्तम् । छाययोः कर्णयोरन्तरे ये तयोर्गविक्षेपभक्तारश्चाङ्गीशवः । सैक-लक्ष्येः पदघ्नस्तु कर्णान्तरं भान्तरेणोनयुक्तं दलेस्तः प्रभे । उदाहरणम् । नन्दचन्द्रैर्मितं छाययोरन्तरं कर्णयो-रन्तरं विश्वतुल्यं ययोः । ते प्रभे वक्ति बोधुक्तिमान् मेत्तथा व्यक्तमव्यक्तयुक्तं हि मन्येऽखिलम् । न्यासः





छायान्तरं । १८ । कर्णान्तरम् । १३ । अनयोर्वर्गा-न्तरेण । १८२ । भक्ता रसाङ्गीश्वः ।५७६। लब्धं २। सैक स्थाप्य । ४ । मूलम् । २ । अनेन कर्णान्तरं ।१३। गुणितं । २६ । द्विघ्नं । २६ । भान्तरेण । १८ । जनयुतं ।७। ४५ । तदर्द्धं लब्धे छाये ७/२।४५/२ तत्क्षत्योर्योगपद-मित्यादिना जाती कर्णौ २५/२।५१/२ । छायान्तरे करणत्वं इत्तार्द्धम् । शङ्कुः प्रदीपतलशङ्कुतलान्तर प्रच्छाया भवेद्विनरदीपशिखोच्चभक्तः ।

उदाहरणम् । शङ्कुप्रदीपान्तरभूस्थिहृत्वा दीपोच्छ्रितिः सार्द्धकरत्वया चेत् । शङ्कोस्तदा काङ्क्षुसम्मितस्य तत्र प्रभा स्वात्क्रियती वदाशु । न्यासः




शङ्कुः १/२ प्रदीपशङ्कुतलान्तरं २ अनयोर्घातः ३/२ विनरदीपशिखोच्चेन । ३ । भक्तोलब्धानि छायाङ्गुलानि । १२ ।अथ दीपोच्छ्रित्यानयनाय करणत्वं इत्तार्द्धम् । छायाङ्गुले तु नरदीपतलान्तरघ्ने शङ्कौ भवेन्नरयुते खलु दीपकौच्चम् ।


उदाहरणम् । प्रदीपशङ्कुन्तरभूस्थिहृत्वा छायाङ्गुलैः षोडशभिः समा चेत् । दीपोच्छ्रितिः स्वात्क्रियती वदाशु प्रदीपशङ्कुन्तरमुच्यतां मे । न्यासः




शङ्कुः । १२ । छायाङ्गुलानि । १६ । शङ्कुप्रदीपान्तर

कृताः । २ । लब्धं दीपकौद्यं कृताः ११/४ । प्रदीप शङ्कुनरभूमानानयनाय करणसूत्रं वृत्तार्धम् । विशङ्कु दीपोच्छ्रयसङ्गुणा भा शङ्कुहृता दीपनरान्तरं स्यात् । उदाहरणम् । पूर्वोक्तएव दीपोच्छ्रायः ११/४ शङ्कु कृतानि । १२ । छाया । १७ । लब्धाः शङ्कुप्रदीपा नरकृताः । २ ।

छायाप्रदीपान्तरदीपौच्चानयनाय करणसूत्रं सार्ध-वृत्तम् । छायायोरन्तरसङ्गुणा भा छायाप्रमाणान्तर हृद्भवेद्भूः । भूशङ्कुघातः प्रभया विभक्तः प्रजायते दीपशिकौच्चमेवम् । त्रैराशिकेनैव यदेतदुक्तं व्याग्रं स्वभेदैरिखेव विश्वम् । उदाहरणम् । शङ्कोर्भाकं-मिताङ्गुलस्य तमते ! हता किलाष्टाङ्गुला छायायाभि-सखे करद्वयमिते न्यस्तस्य देशे पुनः । तस्मैवार्कमिता-ङ्गुला यदि तदा छाया प्रदीपान्तरं दीपौच्चञ्च कियद्द व्यवहृतिं छायाभिधां वेत्सि चेत् । न्यासः




अत्र छायायोरन्तरशङ्कुलाग्रकं । ५२ । छाये च ।८। १२ । अनयोराद्या । ८ । इयमनेन । ५२ । गुणिता । ४१६ । छायाप्रमाणान्तरेण । ४ । भक्ता लब्धं भू-मानम् ।१०४। इदं प्रथमच्छायायादीपतलयोरन्तरमित्यर्थः। एवं द्वितीयच्छायायमानं । १५६ । भूशङ्कुघातः प्रभया विभक्तइति जातमुभयतोऽपि दीपौच्चं सममेव कृताः ६/१/२ एवमित्यत्र छायाव्यवहारे त्रैराशिककल्पनयाऽऽनयनं वर्त्तते तद्यथा । प्रथमच्छायातोद्वितीयच्छाया । । १२ । यावताधिका तावता छायावयवेन यदि छाया-न्तरतुल्या भूर्लभ्यते तदा छायया किमिति एवं पृथक् पृथक् छायाप्रदीपतलान्तरप्रमाणं लभ्यते । ततोद्वितीयं त्रैराशिकं यदि छायातुल्ये भुजे शङ्कुः कोटिस्तदा भूतुल्ये भुजे किमिति लब्धं दीपकौच्चमुभयतोऽपि तुल्यमेव । एवं षड्राशिकादिकमखिलं त्रैराशिककल्पनयैव सिद्धम् ।

"भवेत्खेव (मेचकिस्कूर्जितैव) च्छाया तयुगसयुता स्याद्-द्वादशाले यदा" इत्युक्ते जनविगल्लचरणादके १० छन्दोभेदे च ।

शङ्कुछाया हि दिग्देशकालज्ञानोपायः यथोक्तं त्रिप्रश्ना-धिकारे सूर्यसिद्धान्तरङ्गनाथाभ्याम् । तत्र च तयोर्यां दिग्देशकालानां प्रश्नाः त्रिप्रश्नाः तेषामधिकार इति त्रिप्रश्नशब्दार्थः । तत्रादौ दिग्ज्ञानमाह ।

"शिलातलेऽम्बुसंशुद्धे वज्रलेपेऽथवा समे । तत्र शङ्कु-कृतैरिष्टैः समं मण्डलमालिखेत् । तन्मध्ये स्थापये-च्छङ्कुं कल्पनाद्वादशाङ्गुलम् । तच्छायायं सूत्रेदृश्ये वृत्ते पूर्वापरार्धयोः । तत्र बिन्दू विधायोभौ वृत्ते पूर्वापराभिधौ । तन्मध्ये तिसृभिः रेखा कर्त्तव्या दक्षि-णोत्तरा । याम्योत्तरादिगोर्मध्ये तिसृभिः पूर्वपश्चिमा । दिङ्मध्यमत्स्यैः संसाध्या विदिग्लक्षदेव हि" । सू० सि० "तत्र दिक्साधनोपक्रमे प्रथमम्बुसंशुद्धे जलवत्समो-न्नते शिलाप्रदेशे । अपि वाथ वा तदभावेऽन्यत्र वज्रलेपे चत्वरादौ घृष्टमृदादिना समस्थाने कृते शङ्कुकृतैः शङ्कुस्थाङ्गुलविभागमानसूत्रकीलैरभीष्टसङ्ख्याकाङ्गुलैर्व्यासा-र्धरूपैर्वृत्तमण्डलमालिखेत् । सर्वतः केन्द्राद्वृत्तपरिधिरेखा तुल्या यथा स्यात् तथेत्यर्थः । ततस्तन्मध्ये तस्य वृत्तस्य केन्द्ररूपमध्ये कल्पनया द्वादशसङ्ख्याकाङ्गुलानि तुल्यानि यस्मिंस्तं द्वादशविभागाङ्कितमित्यर्थः । शङ्कुं समतल-मस्तकपरिधिकाष्ठदण्डं स्थापयेत् । ततः पूर्वापरार्धयो-र्दिनस्य प्रथमद्वितीयभागयोस्तच्छायायं स्थापितशङ्को-च्छायाग्रप्रदेशो मण्डलपरिधौ यस्मिन् विभागे स्पृशेत् । दिनस्य प्रथमविभागेऽनुच्चां छायामुत्पाद्य वृत्ते यत्र प्रवि-शति, दिनस्यापरार्धे छायानुच्चमुत्पाद्यार्कोक्ते यत्र निर्ग-च्छतीत्यर्थः । तत्र निर्गमनप्रवेशस्थानयोरुभौ द्वौ बिन्दू पूर्वापरसञ्ज्ञौ क्रमेण वृत्ते परिधिरेखायां कृत्वा तन्मध्ये पूर्वापरबिन्दुमध्ये तिसृभिः मत्स्यैर्न रेखा कार्या सा दक्षिणोत्तररेखा भवति। मत्स्यास्तु बिन्दु-मध्यावलम्बितेन व्यासार्धेन बिन्दुद्वयकेन्द्रकल्पनेन वृत्त-द्वयं निष्पाद्य वृत्तद्वयसंयोगाभ्यां वृत्तद्वयपरिधिविभागा-भ्यामन्तर्गतं मत्स्याकारं स्थानं भवति । तत्रैकः संयोगो वृत्तं बाह्यवृत्तभागसंस्पर्शनेन, अपरसंयोगस्तु पृष्ठ-मितरवृत्तभागद्वयसंस्पर्शनेन । मत्स्यपुच्छाभ्यामुत्थो रेखा दक्षिणोत्तररेखा । तत्र पूर्वबिन्दोः सव्यं रेखायां द-क्षिणा दिक् । पश्चिमबिन्दोः सव्यं रेखायामुत्तरा दिक् ।

अनन्तरं पूर्ववत्तं मत्स्यच सम्मार्जनीवः। शङ्कुरपि तत्स्थानाच्चिष्काश्यः इति केवला दक्षिणोत्तररेखा स्थितेति तात्पर्यम्। दक्षिणोत्तरदिशोर्मध्यस्थाने तिर्यग्गा दक्षिणोत्तररेखाभितेन व्यासार्धेन दक्षिणोत्तरस्थानाभ्यां पूर्ववत् प्रत्येकं दृत्तं विधाय पूर्ववत् सिद्धेन मत्स्येनेत्यर्थः। पूर्वपश्चिमा रेखा कार्या। तत्र पूर्वबिन्दोरासन्नं रेखायां पूर्वा, पश्चिमबिन्दोरासन्नं रेखायां पश्चिमेति मत्स्यसम्मार्जनेन केवला पूर्वापररेखापि सिद्धा। अथ रेखासंयोगस्थानादृदिक्साधनोपक्रमोक्तं पूर्वदृत्तमुल्लिखेत् तदृत्तपरिधौ यत्र रेखा लग्ना तत्र दिगिति तदृत्तमध्यस्थ दिक्चतुष्टयं दृत्ते सिद्धम्। तद्वत् यथा दक्षिणोत्तराभ्यां पूर्वापरा साधिता तत्प्रकारेणेत्यर्थः। एवकारोऽन्यप्रकारनिरासार्थकः। हि निश्चयेन। विदिशः कोणदिशो दिशां पूर्वादिसिद्धदिशां ये मध्यमत्स्या अव्यवहितदिग्द्वयान्तरोत्पन्ना लघवस्तैः संसाध्याः सम्यक्प्रकारेण साध्याः। रेखादृत्तसंयोगस्थत्वेन ज्ञेयाः। अत्रोपपत्तिः। क्षितिजपूर्वापरदृत्त संयोगौ पूर्वापरविभागस्थौ पूर्वापरदिशे तत्र पूर्वापरविभागज्ञानं सूर्योदयास्ताभ्यां तत्र क्षितिजे पूर्वापरदृत्तं कुत्र लग्नमिति ज्ञानं तु विषुवद्वृत्तक्रान्तिदृत्तसम्पातस्थसूर्यक्षोदयास्तस्थलज्ञानेन विषुवद्वृत्तस्य पूर्वापरक्षितिजदृत्तसम्पातयोः सम्बद्धत्वात्। अथान्यस्मिन् दिने सूर्यक्षोदयास्तावपांशान्तरेण याम्योत्तरे भवत इति सूर्योदयास्तस्थानाभ्यामपांशान्तरेणोत्तरयाम्ये पूर्वापरस्थानं भवतीति क्षितिजस्य महत्त्वाद्दूरत्वाच्च तद्दानेन पूर्वापरज्ञानमशक्यमतस्तत्सूत्रेण स्वाभीष्टप्रदेशे तज्ज्ञानार्थमभीष्टसमस्थले क्षितिजवृत्तं दृत्तं कृतम्। तत्रापि सूर्योदयास्तसमसूत्रेण स्थलज्ञानस्य दुःशकत्वात् छायार्थं शङ्कुः स्थाप्यः। तथापि सूर्योदये छायानन्त्याद्दृत्तपरिधौ तदग्रसंगमाभावः। परन्तु यथा यथा सूर्य ऊर्ध्वं भवति तथा तथा छायाग्रासन्नं छाया दृत्तपरिधौ यदा प्रविशति तत्स्थानात् तात्कालिको वज्रमाग्रभुजो व्यक्तोऽर्धज्याकारेण तत्स्थाने देयस्तदुत्क्रमज्या यत्र परिधिप्रदेशे लगति तत्र शङ्कुस्थानस्य पश्चिमा। छायाग्रस्य पूर्वापरसूत्राद्भुजान्तरेण याम्योत्तरपतनात् सूर्यापरदिशि छायापतनाच्च। एवं दिनापरार्धे सूर्यो यथा यथाधः सञ्चरति तथा तथा छायाग्रैः शङ्कुच्छायाग्रदृत्तपरिधौ यत्र यदा निर्गच्छति तात्कालिको वज्रमाग्रभुजो व्यक्तोऽर्धज्याकारेण तत्स्थाने देयस्तदुत्क्रमज्या यत्र परिधिप्रदेशे लगति तत्र शङ्कुस्थानस्य पूर्वा। तत्सूत्रं पूर्वापरसूत्रम्। इदं शङ्कोरुपलक्षणत्वेन ज्ञानं तथा छायोपलक्षणेनापि प्रदेशस्य पूर्वापरसूत्रज्ञानम्। तथा हि। यत्र छायाग्रं विशति तत्रापरा, छायाग्रं यतो निर्गच्छति तत्र पूर्वा। तत्रापि प्रवेशनिर्गमयोरेककालत्वासम्भवादुत्कालिकः प्रवेशस्तत्काले छायायाः पश्चिमत्वं तत्र वस्तुभूतं तत्काले निर्गमनस्य पूर्वत्वासम्भवः। एवं निर्गमकाले निर्गमस्थानस्य पूर्वत्वं वस्तुभूतं तत्काले प्रवेशस्य पश्चिमत्वासम्भवः। एककालिकविरुद्धार्थसंभवयोरेकतरं चिह्नं चाल्यं तात्कालिकभुजयोरन्तरेण तत्र पूर्वचिह्नं भुजान्तराङ्गुलैरयनदिशि चाल्यम्। पश्चिमचिह्नं वा व्यस्तायनदिशि चाल्यम्। तत्सूत्रं सूत्रमध्यदेशस्थ पूर्वापरसूत्रम्। एतन्मध्ये स्थापितशङ्कोश्छायाग्रप्रवेशनिर्गमचिह्नाभ्यां यथोक्तरीत्या भुजदानेन सिद्धपूर्वापरसूत्रेखाभिन्नत्वात्। तदुक्तं सिद्धान्तशिरोमणौ "तत्कालापमजीवयोस्तु विवराद्वाकर्णभिक्ता हतात् लम्बज्याप्रभिताङ्गुलैरयनदिग्यैन्द्रो स्फुटा चालिता" इति। तदेतद्भगवता लोकानुकम्पया सूक्ष्मान्तरत्वादेकतरबिन्दुचालनं नोक्तं सुखार्थं किञ्चित्स्थूलावेव निर्गमप्रवेशबिन्दू पूर्वापराभिधानुक्तौ। एवञ्चाभीष्टस्थानं प्रवेशनिर्गमसूत्रमध्ये यथा भवति तथानेन प्रकारेण मण्डलकेन्द्रशङ्कुस्थापनादिनाऽभीष्टप्रदेशे पूर्वापरदिशे साध्ये इति। तन्मध्ये दक्षिणोत्तररेखाबिन्दुद्वयोत्पन्नमध्यमत्स्यरेखैवेति। याम्योत्तरमध्ये पूर्वापरा रेखा तद्दृत्तमध्यमत्स्येनेति याम्योत्तरदिशोरित्यादि सम्यगुक्तम्। ननु पूर्वापरबिन्दुभ्यां मत्स्येन या दक्षिणोत्तररेखा तदग्राभ्यां मत्स्येन रेखा पूर्वापरबिन्दुसूत्रेवेति पूर्वं तथा एव बिन्दुत्वेन सिद्धत्वात् पुनः साधनं व्यर्थमन्यथा दक्षिणोत्तररेखाया अप्यसङ्गतत्वापत्तेरिति चेत् सत्यम्। दक्षिणोत्तररेखाशुद्ध्यर्थमेव पूर्वापरबिन्दुसूत्रेखायाः पुनः साधनमिति केचित्। वस्तुतस्तु दक्षिणोत्तरपूर्वापरसूत्रसम्पातरूपाभीष्टस्थानात् केन्द्रात् प्रागुक्तदृत्तस्य वज्रमाग्रयोर्योगित्वेनावश्यकत्वात् तस्य च, पूर्वापरबिन्दुसूत्रस्याधिकव्यासखण्डत्वाद्बिन्दुसूत्ररेखा मूलाग्रयोर्वर्धनीया सा तत्र दृत्ते पूर्वापररेखा भवति। तस्या बिन्दोरुपर्यधश्च वक्रत्वं कदाचित् स्यादतः प्रथममेव पूर्वापररेखासिद्ध्यर्थं बिन्दुसूत्रसिद्धमत्स्यसंस्थदृक्षगत-

रेखावा विन्दनराधिकत्वेन तदुत्पन्नमध्यरेखाया अज्ञ्याः सुतरामधिकत्वेन पुनः पूर्वापररेखासाधनं युक्ततरमिति तत्त्वम्। एवमेवाव्यवहितदिगवयवान्तरोत्पन्नलघुमत्स्यैश्चतुर्भिः सूत्रैर्दत्ते कोणदिशः। तदिदमभीष्टस्थानकेन्द्रकमण्डले दिगष्टकं सिद्धम्॥ अथ दिक्सूत्रसम्पातरूपाभीष्टस्थानात् तात्कालिकच्छायास्थानमाह" र०ना०

"चतुरश्रं बहिः कुर्यात् सूत्रैर्मध्यादिनिर्गतैः। भुजसूत्राङ्गुलैस्तत्र दत्तैरिष्टप्रभा भवेत्" सू० सि०।

"मध्यादभीष्टस्थानाद्ये रेखा सम्पातरूपाद्विनिर्गतैर्निः-सृतैरष्टदिग्रेखारूपैः। बहिर्दिक्सूत्रसम्पातकेन्द्रदत्तान्तर्बहिः। अनेनैव दत्तकरणं पूर्वमनुक्तं द्योतितम्। अन्यथा बहिरित्यस्यानुपपत्तेः। पूर्वदत्तयष्टये तु दिग्रेखासम्पातस्य मध्यत्वानुपपत्तेः। चतुरश्रं कोणरेखाधिकसूत्रकर्णदत्तसूत्रं समचतुर्भुजं कुर्यात्। यथा च तद्दर्शनम्। तत्र चतुरश्रे भुजसूत्राङ्गुलैर्दक्षमाणभुजमितसूत्रस्याङ्गुलैर्निर्गमप्रवेशकालिकैर्दत्तैः पूर्वापरसूत्रतदर्धच्छायावदृदीयमानैस्तत्र दत्ते यस्मिन् प्रदेशे भुजाग्रं तत्प्रदेशे दृष्टप्रभा निर्गमप्रवेशान्यतरकालिकच्छायाग्रसङ्गम्। प्रतीतिस्तु दिक्सूत्रसम्पातस्थशङ्कुना ज्ञेया। अत्रोपपत्तिः। लम्बमाणभुजस्य छायाग्रपूर्वापरसूत्रान्तरत्वेन प्रतिपादितत्वादिष्टच्छायाग्रसङ्गदिशा ज्ञातं सम्यक्। चतुरश्रकरणं वक्ष्यमाणाग्रसाधकप्राच्यपररेखानुकाररेखायादत्तानयनाद्दर्शितं ऋजुत्वसिद्ध्यर्थमिति। अथ पूर्वापररेखायाः सङ्गत्यानन्तरमाह" र० ना०।

"प्राक्पश्चिमाश्रिता रेखा प्रोच्यते समसञ्ज्ञकम्। उन्मण्डलं च विषुवन्मण्डलं परिकीर्त्यते" सू० सि०।

"प्राक्पश्चिमाश्रिता पूर्वपश्चिमसम्बद्धा साधिता रेखा समसञ्ज्ञा उच्यते। सैव रेखोन्मण्डलं विषुवन्मण्डलम्। चः समुच्चये। उभयसञ्ज्ञकं कथ्यते। अत्रोपपत्तिः। क्षितिजपूर्वापरवृत्तसंयोगौ पूर्वापरे तत्सूत्रं पूर्वापरसूत्रमिति। पूर्वापरवृत्तस्य भूमावूर्ध्वाधरानुकारिवृत्तत्वेनादर्शनाद्रेखाकारतयैव दर्शनाच्च पूर्वापरवृत्तमपि तत्सूत्रम्। पूर्वापरवृत्तस्य समसण्डलत्वेनाभिधानात् तद्रेखासमसण्डलसञ्ज्ञोक्ता। अथ खनिरक्षदेशक्षितिजवृत्तस्योन्मण्डलाख्यस्य तत्संयोगयोः संलग्नत्वात् तन्मध्यसूत्रत्वेन पूर्वापरसूत्रत्वस्यापि सत्त्वात् पूर्वापरसूत्रवत्तन्मण्डलसञ्ज्ञम्। एतेनान्यदेशक्षितिजसञ्ज्ञया स्वदेशक्षितिजसञ्ज्ञा सुतरां सिद्धेति पूर्वापरसूत्रस्य क्षितिजवृत्तसञ्ज्ञा द्योतिता। पूर्वापरस्थानयोः क्षितिजवृत्तस्य संलग्नत्वाद्विक्षितवृत्तस्य क्षितिजानुकारित्वाच्च। एवं निरक्षदेशपूर्वापरवृत्तं विषुवन्मण्डलाख्यं पूर्वापरस्थानयोः संलग्नमिति तन्मध्यसूत्रत्वेनापि पूर्वापरसूत्रस्य सिद्धत्वात् पूर्वापरसूत्रं विषुवन्मण्डलसञ्ज्ञं क्रान्तिवृत्तस्य ह्रस्ववृत्तस्य च चलत्वात् कादाचित्कत्वेन पूर्वापरस्थानसंलग्नत्वात् तत्सञ्ज्ञा नोक्तेति ध्येयम् अथायाग्रानयनमाह" र०ना०।

"रेखा प्राच्यपरा साध्या विषुवद्भायगा तथा। दृष्टच्छायाविषुवतोर्मध्यमध्याऽभिधीयते" सू०सि०।

"तस्मिंश्चतुरश्रे पूर्वापररेखात उत्तरभागे विषुवद्भायगाऽक्षभायप्रदेशस्याक्षभाङ्गुलान्तरितेत्यर्थः। प्राच्यपरा रेखा पूर्वापररेखानुकारा रेखा तथा सर्वतस्तुल्यान्तरेण यष्टेरिष्टच्छायापररेखाभुजान्तरेण तथाक्षभान्तरेण कार्या। अनन्तरमिष्टच्छायाविषुवतोरिष्टच्छायापररेखाक्षभापररेखयोरित्यर्थः। मध्यं चतुरश्रेऽङ्गुलाक्षसमन्तरालं सर्वतस्तुल्यम्। यथा कर्णदत्तायोच्यते। अत्रोपपत्तिः। भुजस्य कर्णदत्तायाः पलभासंस्कारेणाग्रे उक्तत्वाद्दक्षिणगोले पलभाधिकोत्तरभुजसङ्गतेन पलभोनो भुजोऽग्रेति, प्राच्यपरसूत्रादुत्तरभागेऽक्षभापररेखा भुजमध्ये भवतीति द्वयो रेखयोरन्तरभया पलभोनभुजरूपा। एवमुत्तरगोले उत्तरभुजस्य पलभाल्पत्वाद्भुजोनपलभाग्रेति पलभारेखा प्राच्यपरसूत्रादुत्तरभागस्था भुजरेखातोऽग्यान्तरेणोत्तरदिशीति द्वयो रेखयोरन्तरं भुजोनपलभारूपं कर्णदत्तायाः। एवं दक्षिणभुजस्य पलभोनाग्रात्वात् पलभायुतो भुजोऽग्रेति प्राच्यपरसूत्राद्भुजाग्रपलभापररेखयोः क्रमेण याम्योत्तरत्वात् तयोरन्तरात् पलभाभुजैक्यरूपभया, पलभायाः शङ्कुतलानुकल्पत्वात् सदोत्तरत्वं छायासम्बन्धाद्भुयुक्तम् गोले शङ्कुतलस्य दक्षिणत्वाद्भुपदार्दिशि छायासङ्गावाच्च। अतएव प्राच्यपरसूत्राद्दक्षिणभागे दक्षिणभुजवशादग्रभापररेखाकल्पने उक्तानुपपत्त्या सम्यगुत्तरभागे पूर्वापरसूत्रादिति विषुवद्भायगेत्यत्र व्याख्यातम्" अथ प्रसङ्गाज्ज्ञातच्छायातः कर्णज्ञानं तच्छुद्धिं चाह र० ना०।

"शङ्कुच्छायाकृतियुतेर्मूलं कर्णोऽस्य वर्गतः। प्रोज्झ्य शङ्कुकृतिं मूलं छाया शङ्कुविपर्ययात्" सू० सि०

"द्वादशाङ्गुलशङ्कुच्छाययोर्योगयोगात् पदं छायाकर्णः स्यात्। अथास्य शुद्धिरूपं छायासाधनमाह। अस्येति। छायाकर्णस्य वर्गात् शङ्कुवर्गं अत्रवलारिय-

दृष्टिकं शतं विशोध्य मूलं छाया। प्रकारान्तरेण छायाकर्णशुद्धिमाह। शङ्कुरिति। विपर्ययाच्छायासाधनवैपरीत्याच्छायाकर्णवर्गाच्छायावर्गं विशोध्य मूलमित्यर्थः। शङ्कुर्द्वादशाङ्गुलमितः स्यात्। अत्रोपपत्तिः। द्वादशाङ्गुलशङ्कुः कोटिरूपा भुजस्तत्कृत्योर्योगपदं कर्णं दृत्यत्र कर्णः कर्णे दृत्याद्यत्रोक्तरीत्योपपन्नम्। ननु दिक्साधनोत्तरमिष्टप्रभाकर्णसाधनं भगवता सर्वज्ञेन किमर्थमुक्तमत्रेत्यादीनां स्वतन्त्रतयोक्तत्वात्। न च विना गणितक्रमसमाप्त्यानार्थमिदं युक्तमुक्तमिति वाच्यम्। वक्ष्यमाणभुजज्ञानस्यापेक्षितत्वेन तस्याश्च भुजोपजीव्यत्वेनान्योन्याश्रयात् गणितज्ञातायाया पुनः साधनस्य व्यर्थत्वाच्च। न च भुजमूलाङ्गुलैर्दत्तैरित्यनेनेष्टच्छायायां ज्ञातमिति न, किन्त्वेतदुक्त्या दिक्सूत्रसम्पातस्थशङ्वृत्तपरिधौ छायाग्रज्ञानात् तत्पूर्वापरसूत्रान्तरे भुजसङ्गावाद्विना गणितं भुजोऽपि ज्ञात इति नान्योन्याश्रय इति वाच्यम्। तथापि भगवतः सर्वज्ञस्य निष्प्रयोजनत्वोक्तेरनुचितत्वात्। विना प्रयोजनं मन्दोक्तेरप्यभावाच्च। न हि दिक्साधनेऽग्राभुजादिकमावश्यकं येन तदुक्तिर्युक्ता। किन्तु कर्णसाधनस्य गणितोक्त्या वक्ष्यमाणकर्णसाधनतुल्यत्वेनात्र कथनमनुचितम्। न हि दिक्साधनार्थं "भाकर्णमिलाद्" इत्यादिति" सिद्धान्तशिरोमणावुक्तिवदत्र छायाकर्णं उपयुक्तो येन तदुक्तिर्युक्तेति चतुरस्रमित्यादिश्लोकचतुष्टयमन्त्येन मन्दबुद्धिना खिन्नं न भगवतोक्तमिति चेन्नावेद्म। भुजसाधनोपजीव्यायाया एतदुक्तप्रकारेण सिद्धौ दिग्ः सम्यक् सिद्धा इति दिक्साधनशुद्ध्यर्थमयमायासाधनम्। प्रकारान्तरेणापि वक्ष्यमाणत्रिज्याद्वत्तीयायया त्रिज्या लभ्यते तदानयानगतया क्षेत्यनुपातेन साधितकर्णसंवादेन शुद्ध्यर्थमार्यं कर्णसाधनं चोक्तम्। अनयायया कर्णसदा त्रिज्याद्वत्तीयायया क इति फलस्य त्रिज्यातुल्यज्ञानार्थं वा कर्णसाधनमिति केचित्। वस्तुतस्तु भगोले छायाप्रवेशनिर्गमस्थानस्थितपूर्वापरविन्दोः प्रत्येकं रेखेति रेखाद्वयं सर्वतस्तुल्यान्तरं कार्यं तेनान्तरेणान्यतरो विन्दुर्यत्रास्तौ पूर्वापरविन्दू तद्रेखाभध्यस्थानस्य पूर्वापररेखेति। तयोभयविन्दुरेखयोरन्तराङ्गुलमानं ज्ञात्वा तत्राङ्गुलविदुपरिकल्पनतः प्रत्येकरेखे प्राच्यपररेखे प्रकल्प्य तन्मध्यकेन्द्रात् पूर्ववृत्तं प्रत्येकमिति वृत्तद्वयं कुर्यात्। तत्र यस्मिन्वृत्ते यस्मात्प्राच्यपररेखास्पृष्टा कार्या ताभ्यां खखकालिकौ भुजौ खखवृत्ते देयौ तदग्रे छायापरेखे खखवृत्ते कार्ये खखप्राच्यपरसूत्रात् खखवृत्ते उत्तरभागेऽक्षभाङ्मुखान्तरेण रेखे कार्ये ततः खखवृत्ते खखतद्रेखयोरन्तरं खखवृत्ते उभयकालिककर्णवृत्तान्ये बहुत्वेन गणयितुं शक्ये तदन्तरं पूर्वविन्दोर्याम्योत्तरमन्तरं कर्णवृत्तान्तरासाधनकथनेनानीतं भुजान्तरस्य विन्दुद्वन्तरत्वात् तस्य छायान्तरत्वेन फलितत्वात्। विषुवद्दिने गोलभेदे तु भुजान्तरसम्पातयोग इति विन्दुद्वोर्याम्योत्तरसम्पातयोग इति। तेनोक्तरीत्या विन्दुछायाखण्डसूत्रं पूर्वापरसूत्रं स्फुटमित्याशयेन भगवताया निरूपिता तस्याः शुद्ध्यर्थं कर्णोऽपि साधित इति तत्त्वम्" र० ना०। अतः परं "त्रिंशत्फलघ्नो युगे भानामित्यादिः" ग्रन्थः। स च छायनशब्दे ३२६।३२७ पृ० दर्शितः। सोऽत्रानुसन्धेयः।

"स्फुटं दक्कुल्यतां गच्छेदयने विषुवद्वये। प्राक्पश्चिमं चलितं क्षीणे छायार्कात् करणागते। अन्तरांशैरधाधस्तु पश्चाच्चैक्याधिके" स्फु०सि०।

"अयने दक्षिणोत्तरायणसन्धौ विषुवद्वये गोलसन्धौ चलितं चक्रं दक्कुल्यतां दक्षिणोत्तरतां स्फुटमनायासं गच्छेत्। तत्र प्रत्यक्षतश्चलितमन्तरं दृश्यत इत्यर्थः। तथा च स्फुटादिकाले रेवतीयोगतारासम्बन्धि मेषतुलादौ कर्कमकरादौ विषुवायनग्रहणेरिदानीं वलयल, तत्सदृशे प्रत्यक्षे इति क्रान्तिवृत्तं चलितमन्यथा तदनुपपन्नेरिति भावः। ननु पूर्वतोऽपरत्र वा चलितमिति कथं ज्ञेयमित्यत आह। प्रागिति। छायार्कोद्भवदिने सूर्यस्यायनदिक्परावर्तनसदृशे प्राच्यपरसूत्रस्थत्वं वा तच्चित् दिनेऽन्यस्मिन् दिने वा मध्याह्नच्छायातो वक्ष्यमाणप्रकारेण सूर्यः साध्यस्तत्कालादित्यर्थः। अरणागते प्रागुक्तप्रकारेणानीतः स्पष्टः सूर्यस्तस्मिन्नित्यर्थः। न्यूने सति। अन्तरांशैः सूर्ययोरन्तरांशैश्चक्रं क्रान्तिवृत्तं प्राक् पूर्वस्मिन् चलितमिति ज्ञेयम्। अथ यद्यधिके सति ज्ञेयैः सूर्ययोरन्तरांशैश्चक्रमाद्यत्व परिहृत्य पश्चात् पश्चिमाभिमुखं तथा चलितमिति ज्ञेयम्। अत्रोपपत्तिः। छायातो वक्ष्यमाणप्रकारेण सूर्यो कर्णानयनव्याताङ्कितामतस्तु रेवतीयोगतारासम्बन्धिनोऽतस्तयोरन्तरमयनांशात्मकं क्रान्तिवृत्तस्य पूर्वचलने गणितागताकोच्छायार्कोऽधिको भवति। पश्चिमचलने तु न्यूनो भवतीति सत्युपपन्नम्। अथ चरादुपजीव्यां प्रभामाह" र० ना०।

एवं विषुवती छाया स्वदेशे या दिनार्धजा। "दक्षिणोत्तररेखायां सा तत्र विषुवत्प्रभा" सू० सि०।

"स्वाभीष्टदेशे एवं विषुवती चलितविषुवद्दिनसम्बद्धा रेवत्यासन्नस्थाध्युपचाराद्विषुवत्प्रभा तद्ग्रावर्तकमेवमिति। दिनार्धजा माध्याह्निकी वा यन्निता द्वादशाङ्गुलशङ्कोश्छाया दक्षिणोत्तररेखायां निरक्षोत्तरदक्षिणदेशक्रमेणोत्तरस्यां दक्षिणस्यां प्रभायाः दक्षिणोत्तररेखास्थत्वं विना मध्याह्नासम्भवात् सा तन्निता तत्र तस्मिन्नभीष्टदेशे विषुवत्प्रभाऽत्रभा भवति। एतेन द्वादशाङ्गुलशङ्कोः कोटिः पलभा भुजस्तत्क्रान्त्योर्योगपदं कर्ण इत्यत्रकर्णः कर्ण इत्यत्रचेलं वक्ष्यमाणोपयुक्तं प्रदर्शितम्। तदा सूर्यस्य विषुवद्वृत्तस्थत्वाद्विषुवत्प्रभेति सञ्ज्ञोक्ता। अथ लम्बाक्षयोरानयनमाह" र० ना०।

"शङ्कुच्छायाहते त्रिज्ये विषुवत्कर्णभाजिते। लम्बाक्षज्ये तयोर्याते लम्बाक्षौ दक्षिणौ सदा" सू० सि०।

"त्रिज्येष्टस्थानस्थे शङ्कुच्छायाहते एकत्र द्वादशगुणिता परत्र प्राग्वत्कया विषुवत्प्रभया गुणिता विषुवत्कर्णभाजितोभयत्राग्रकर्णेन भक्ता फले क्रमेण लम्बज्याक्षज्ये तयोर्ज्यं योर्धनुषी क्रमेण लम्बाक्षौ सदोभयगोले दक्षिणदिक्स्थौ भवतः। अत्रोपपत्तिः। याम्योत्तरवृत्ते निरक्षस्वदेशपूर्वापरवृत्तयोर्यदन्तरं तदक्षः। याम्योत्तरवृत्ते दक्षिणस्थितिजप्रदेशाद्विषुवद्वृत्तस्य यदन्तरं तद्भुवः। उभावूर्ध्वगोले स्वपूर्वापरवृत्ताद्दक्षिणौ तज्ज्ये अग्रलम्बज्ये भुजकोटी त्रिज्याकर्णे इत्यग्रलाग्रकर्णकर्णे द्वादशलभे कोटिभुजौ तदा त्रिज्याकर्णे कार्यित्यनुपाताभ्यां लम्बाग्रज्ये तद्धनुषी लम्बाग्राविषुवप्रभम्। अथ मध्याह्नच्छायातोऽक्षानयनं श्लोकाभ्यामाह" र० ना०

"मध्यच्छाया भुजघ्नेन गुणिता त्रिभभौर्विका। स्वकर्णाप्ता धनुर्त्रिप्रा नतासा दक्षिणे भुजे। उत्तरायोत्तरे याम्यासाः सूर्यक्रान्तिविप्रिकाः। दिग्भेदे मिश्रिताः साम्ये विश्लिष्टाचाक्षविप्रिकाः" सू० सि०।

"अभीष्टदिने माध्याह्निकी छाया भुजसञ्ज्ञा ज्ञेया। तेन भुजेन त्रिज्या गुणिता मध्याह्नच्छायाकर्णेन भक्ता फलस्य धनुःकला नता नतसञ्ज्ञासा नतकला दक्षिणे भुजे मध्याह्नच्छायाऽपभुजे प्राच्यपरस्थमध्याह्नदक्षिणदिक्स्थे सति, उत्तरदिक्षा उत्तरे भुजे दक्षिणाः। चो विषयव्यवस्थार्थकः। ता नतकलाः सूर्यक्रान्तिकलाः प्राग्वत्। दिग्भेदे स्वदिशोर्भिन्नत्वे मिश्रिताः संयुक्ताः साम्येऽभिन्नदिक्त्वे विश्लिष्टा अन्तरिताः। चो विषयव्यवस्थार्थकः। अक्षकला भवन्ति। अत्रानावश्यकभुजसञ्ज्ञया भगवतोपपत्तिरुक्ता। तथाहि। द्वादशाङ्गुलशङ्कुकोटौ मध्याह्नच्छायाकर्णे वा मध्यच्छायाभुजज्ञया स्वस्वस्तिकान्मध्याह्नकाले सूर्यस्य याम्योत्तरवृत्ते यदन्तरेण नतत्वं तां नतकलाज्ञज्ञा नतांशज्ञा मध्याह्नोनतांशज्ञाऽपभुजौ त्रिज्याकर्णे वा भुज इति मध्याह्नच्छायाकर्णे कर्णे मध्याह्नच्छाया भुजज्ञादा त्रिज्याकर्णे को भुज इत्यनुपातेन नतज्ञा नतोत्तरवृत्तकलात्मकत्वात्तत्कलाज्ञा यद्यप्यम्बा इति च्छायादिग्विपरीतदिक्षाः। अथ क्रान्त्यंशाक्षांशयोरेकदिक्त्वे योगेन नतांशा इति दक्षिणा नतकला दक्षिणक्रान्तिकलाभिर्हीना अक्षांशा भवन्ति। क्रान्त्यंशाक्षांशयोर्भिन्नदिक्त्वे ऽन्तरेण नतांशा यदि दक्षिणात्सदा क्रान्त्यूनाक्षांशस्य नतत्वादुत्तरक्रान्तियुता अक्षांशाः। यदि त्वुत्तरात्सदाक्षोनक्रान्तेर्नतत्वात्तदोत्तरक्रान्तिरक्ष इति सम्यगुपपन्नम्। अथाग्रात् पलभानयनमाह" र० ना०।

"ताभ्योऽक्षज्ञा च तद्वर्गं प्रोज्झ्य त्रिज्याहतेः पदम्। लम्बज्यार्कगुणाच्छज्ञा विषुवद्भा च लम्बया" सू० सि०।

"ताभ्योऽक्षकलाभ्योऽक्षज्ञा भवति। चः समुच्चये। अक्षज्यावर्गं त्रिज्यावर्गात् त्यक्त्वा शेषान्मूलं लम्बज्या। अनन्तरमक्षज्या द्वादशगुणा लम्बया लम्बज्यया गुणनस्य भजनसम्बन्धाद्भक्ते स्वर्णसिद्धम्। अक्षभा स्यात्। अ० त्रोपपत्तिः। अक्षकलानां याक्षज्ञा तस्मात्क्षज्यार्कवर्गं भुजत्वात् तद्वर्गोनात् त्रिज्यावर्गान्मूलं लम्बज्या कोटिः। तयाक्षज्ञा भुजज्ञादा द्वादशकोटौ को भुज इत्यनुपातेन विषुवच्छायेति। अथाक्षज्ञाने नतभागेभ्यः क्रान्तिद्वारा सूर्यसाधनं सार्धश्लोकाभ्यामाह" र० ना०।

"स्वार्कनतभागानां दिक्साम्येऽन्तरमन्यथा। दिग्भेदेऽपक्रमः शेषस्त्रिज्या हृता। परमापक्रमज्यात्रा चापं मेषादिगो रविः। कर्कादौ प्रोज्झ्य चक्रार्धात् तुलादौ मार्धसंयुतात्। मृगादौ प्रोज्झ्यभगणान्मध्याह्ने र्कः स्फुटोभवेत्" सू० सि०।

"स्वदेशार्कांशेष्टदिनीयमध्याह्नसूर्यनतांशयोर्भागानां बहुत्वाद्बहुवचनम्। एकदिक्त्वेऽन्तरमन्यदिक्त्वेऽन्यथा योगः कार्यः। शेष उक्तसंस्कारसिद्धोऽङ्कः क्रान्तिः स्यात्। तस्मात्क्रमस्य ज्या त्रिज्यया गुण्या परमक्रान्तिज्यया प्राग्वत्या भक्ता फलस्य धनुर्भागादिकं मेषादिगो मेषादि-

राशियुतयातगतोऽर्कः स्यात्। ककादित्रयेऽर्के चक्रार्धात् षड्राशित आगतार्कं त्यक्त्वा शेषं मध्याह्नकाले स्फुटोऽर्कः स्यात्। तुलादित्रितये षड्भयुतादागतार्कात् स्फुटोऽर्को ज्ञेयः। आगतोऽर्कः षड्भयुतः स्फुटोऽर्कः स्यादित्यर्थः। मकरादित्रयेऽर्कं द्वादशराशिभ्य आगतार्कं त्यक्त्वा शेषभयनांशसंस्कृतः स्फुटोऽर्कः स्यात्। करणागतज्ञानार्थं व्यस्तायनांशसंस्कृत इत्यर्थसिद्धम्। पूर्वं तत्संस्कृतत्वात् क्रान्तिः साध्येत्यर्थस्योक्तेः। अत्रोपपत्तिः। एकदिशि क्रान्त्यैक्ययोगात्तनं दक्षिणमतोऽल्पोनं क्रान्तिर्दक्षिणा। भिन्नदिशि क्रान्त्यूनाद्यो नतं दक्षिणमनेनाद्यो हीनः क्रान्तिरुत्तरा। अद्योनक्रान्तिर्नतं तूत्तरमतोऽल्पयुतं क्रान्तिरुत्तरा। अक्षाज्या क्रान्तिरर्कज्या। यदि परमक्रान्तिज्यया त्रिज्याभुजः स्यात् तदानया केतोष्टा सायनार्कभुजज्या तद्गतुः सायनार्कभुजः। भुजस्य चतुर्षु पदेषु तुल्यत्वात् प्रथमपदे मेषादित्रये सूर्यस्यैव भुजत्वाद्भुज एव सूर्यः। ककादित्रये द्वितीयपदे षड्भादूनस्यार्कस्य भुजत्वाद्भुजोनषड्भमर्कः। एवं तृतीयपदे तुलादित्रये षड्भेन हीनार्कस्य भुजत्वात् षड्भयुतो भुजोऽर्कः। चतुर्थपदे मकरादित्रये सूर्योनभगणस्य भुजत्वात् सूर्योनभगणोऽर्क इति सर्वं वैपरीत्यात् सुगमतरम्। अथागतस्फुटसूर्यस्य करणागतस्फुटतुल्यत्वज्ञानमागतस्फुटसूर्यान्मध्यमस्य करणागतमध्यमार्कतुल्यत्वेन विशेषं वक्तुं श्लोकार्धेनाह र० ना०।

"तस्मान्मसङ्गदार्कं फलं मध्यो दिवाकरः"। सू०सि०।

"तस्मादागतस्फुटसूर्यान्मान्दं फलं मन्दफलमसङ्गदनैकवारं यामं व्यस्तं संस्कृतं स्फुटसूर्योऽङ्गणानीतः स्फुटसूर्यः स्यात्। अयमर्थः। स्फुटसूर्यं मध्यं प्रकल्प्य पूर्वं मन्दोच्चात् प्रागुक्तरीत्या मन्दफलं धनऋणमानीय स्फुटसूर्यं ऋणं धनं कार्यं मध्यमसूर्यः। अस्मादपि मन्दफलं स्पष्टसूर्यं व्यस्तं संस्कृतं मध्यमोऽस्मादपि मन्दफलं स्पष्टे व्यस्तं मध्यमार्क इति यावदविशेषस्तावदसकृत् साध्योऽर्को मध्योऽङ्गणानीतो भवतीति। तदा च मध्यमार्कात् स्फुटार्कसाधनमेकवारं मन्दफलसंस्कारः स्फुटार्कान्मध्यार्कसाधने त्वनेकवारं मन्दफलव्यस्तसंस्कार इति विशेषोऽभिहितः। अत्रोपपत्तिः। मध्यमसूर्यादानीतमन्दफलेन संस्कृतो मध्यःस्फुटोऽर्को भवति। अयं वा तेनैव मन्दफलेन व्यस्तं संस्कृतो मध्यो भवति। अत्र स्फुटार्कान्मध्यार्कसाधने मध्यमज्ञानासम्भवात् तदानीतमन्दफलज्ञानमशक्यमतः स्फुटसूर्यं मध्यं प्रकल्प्यानीतमन्दफलेनाभिमतासन्नेन स्फुटोऽर्कोव्यस्तं संस्कृतो मध्यमासन्नः। अथादपि मन्दफलमभिमतासन्नमपि पूर्वज्ञात सच्छमिति यावदविशेषे मध्यार्कसाधितं मन्दफलं भवतीति निरवद्यं सर्वमुक्तम्। अथ मध्याह्ने छायाकर्णयोरानयनं विवक्षुः प्रथमं तात्कालिकनतांशज्ञानं कथयंस्तद्भुजकोटिज्ये कार्ये इत्याह" र० ना०।

"स्वाहोरात्रार्धयुतिर्दिक्साम्येऽन्तरमन्यथा। शेषं नतांशाः सूर्यस्य तद्बाहुज्या च कोटिजा" सू० सि०।

"दिक्साम्ये एकदिक्के स्वदेशाक्षांशमध्याह्नकालिकसूर्यक्रान्त्यंशयोर्योगः। अन्यथा अत उक्तादेकदिक्त्वाद्विपरीतयोर्भिन्नदिक्के इत्यर्थः अक्षांशक्रान्त्यंशयोरन्तरं कार्यं शेषं संस्कारोत्पन्नं सूर्यस्य मध्याह्ने नतांशास्तेषां नतांशानां भुजरूपाणां ज्या कोटिजा तदंशा नवतिशुद्धाः कोटिस्तत उत्पन्ना ज्या। चः समुच्चये। साध्या। अत्रोपपत्तिः। याम्योत्तरवृत्ते सूर्यस्य मध्याह्ने खस्वस्तिकादन्तरं नतांशा विषुवद्वृत्तपर्यन्तमक्षांशाः। विषुवद्वृत्तसूर्ययोरन्तरं क्रान्त्यंशाः। अतो दक्षिणक्रान्तौ क्रान्त्यैक्ययोगो नतांशा उत्तरक्रान्तौ क्रान्त्यूनाद्योऽक्षोत्क्रान्तिर्वा दक्षिणोत्तरनतांशास्तेषां ज्या ह्रस्वज्या भुजस्तत्कोटिजा महाशङ्कुः कोटिस्त्रिज्या कर्ण इति छायाक्षेत्रे तदंशानां भुजत्वात्" अथ छायाकर्णयोरानयनमाह। र०ना०।

"शङ्कुमानाङ्कुनाभ्यस्ते भुजत्रिघ्ने यथाक्रमम्। कोटिघ्नया विभज्याग्रे छायाकर्णावुदीरिते" सू० सि०।

"भुजत्रिघ्ने नतांशजात्रिघ्ने इत्यर्थः। शङ्कोः प्रमाणाङ्कुनानि द्वादश तैर्गुणिते कार्ये। उभयत्र कोटिघ्नया नतांशोननवत्यंशानां ज्ययेत्यर्थः। भक्ता लब्धे यथाक्रमं भुजज्यात्रिज्राख्यानीयफलक्रमेण मध्याह्ने छायातत्कर्णौ भवतः। अत्रोपपत्तिः। द्वादशाङ्गुलशङ्कोः कोटिरिष्टच्छायाभुजस्तत्कोर्योगपदं कर्ण इति छायाकर्णः कर्ण इति छायाक्षेत्रे। महाशङ्कुकोटौ ह्रस्वज्यात्रिज्रे भुजकर्णौ तदा द्वादशाङ्गुलशङ्कुकोटौ कोत्पत्तिपातेन मध्याह्नकाले छायातत्कर्णौ भवतः। साधकयोस्तात्कालिकत्वादित्युपपन्नम्" र० ना०।

अथ भुजसाधनं विवक्षुः प्रथममग्रा कर्णाग्रे आनयति।

"क्रान्तिज्या विषुवत्कर्णगुणाप्ता शङ्कुजीवया। लब्धाग्रा स्वेष्टकर्णघ्नी मध्यकर्णोद्धृता स्वका" सू० सि०।

सूर्यक्रान्तिज्या स्वस्वकर्णगुणिता भङ्गज्यया भङ्गहृतया क्रान्तिसदृशा ज्या तयेत्यर्थः। द्वादशभिरिति फलितम्। भक्ता फलं सूर्यच्छाया। उपलक्षणादुपरिष्टादपि। इयमया स्वाभिमतकालिकच्छायाकर्णेन गुणिता मध्यकर्णोद्धृता कर्णस्य व्यासस्य मध्यमर्धमिति मध्यकर्णोव्यासार्द्ध" त्रिज्या तयेत्यर्थः। भक्ता फलं स्वस्वकर्णाया स्यात्। स्वतोपपत्तिः। क्रान्तिज्योन्मण्डले कोटिरया क्षितिजे कर्णः कृत्वा भुज इत्यत्रक्षेत्रे द्वादशकोटावस्वस्वकर्णः कर्णस्तदा क्रान्तिज्याकोटौ क कर्ण इत्यनुपातेनाया। त्रिज्याहते इयं कर्णहते केत्यनुपातेन कर्णस्तत्तायेत्युपपन्नम्। अथ भुजानयनं श्लोकाभ्यामाह" र० ना०।

"विषुवद्भायुताकर्णया याम्ये स्यादुत्तरो भुजः। विषुवत्यां विशोध्योदग्गोले स्याद् याम्योत्तरः। विपर्ययाद्भुजो याम्यो भवेत् प्राच्यपरान्तरे। माध्याह्निको भुजो नित्यं छाया माध्याह्निकी स्मृता" सू० सि०।

"अर्कोया स्वर्कस्याभीष्टकालिककर्णोया याम्ये दक्षिणगोले विषुवद्भायुताच्छायया युक्तोत्तरदिक्को भुजःस्यात्। उत्तरगोले विषुवत्यां पलभायां कर्णोयां विशोध्य न्यूनीकृत्य शेषस्तत्तरदिक्को भुजः स्यात्। ननु कर्णोया पलभायां यदा न शुध्यति तदा कथं भुजः साध्य इत्यत आह। विपर्ययादिति। स्वस्वभां कर्णोयायां विशोध्य शेषं दक्षिणो भुजः स्यात्। ननु भुजस्य याम्यत्वमुत्तरत्वं वा कस्मादित्यत आह प्राच्यपरान्तर इति। पूर्वापरसूत्रादन्तरालप्रदेशे याम्ये उत्तरो वा भुजः स्यादित्यर्थः। ननु तथापि द्वितीयावधेरनुक्तत्वादन्तरस्याप्रसिद्धेः पूर्वापरसूत्रात् कथमन्तरं भुज इत्याशङ्क्याया उत्तरं मध्याह्नच्छायास्वरूपकथनव्याजेनाह माध्याह्निक इति मध्याह्नकालिको भुजः यदा माध्याह्निकी मध्याह्नकालिकी छायोक्ता। तथा च छायायं प्राच्यपरसूत्रादाग्नेयदक्षिणं वा यदन्तरेण व भुज इति व्यक्तीकृतम्। स्वतोपपत्तिः। भङ्गसूत्रं प्राच्यपरसूत्रादाग्नेयदक्षिणं वा यदन्तरेण स याम्योत्तरो भुजो यष्टस्य। भङ्गस्तु यष्टादवलम्बसूत्रं क्षितिजसमसूत्रावधि तत्रायं भुजः भङ्गतत्तायोः संस्कारजः। भङ्गतत्तं तु स्वाक्षोरात्मतत्स्थितोदयास्तसूत्राच्छङ्कुमूलं यदन्तरेण तद्दक्षिणम्। अथा तु पूर्वापरसूत्रादुदयास्तसूत्रावध्यन्तरमुत्तरदक्षिणगोलक्रमेणोत्तरदक्षिणा। तत्र यष्टापरदिशि भङ्गभान्तरेऽक्षाद्यत्रमिति भङ्गतलमुत्तरमयापि व्यस्तदिक्केति तत्संस्कारो भुजो गोले मत्यक्षः। स महाशङ्कोरिति यदि महाशङ्कोरयं तदा द्वादशाङ्गुलशङ्कोः क इत्यनुपातेन भुजः पूर्वापरसूत्राच्छायायावधिः। तत्र भङ्गतलाग्रे द्वादशाङ्गुलशङ्कोः साधिते तत्संस्कारेण भुजः स एव। तत्राग्रया पूर्वं साधिता भङ्गतलं तु द्वादशाङ्गुलशङ्कोः पलभा महाशङ्कुः कोटिः भङ्गतलं भुजो भूतिः कर्ण इत्यत्रक्षेत्रे द्वादशकोटौ पलभा भुजस्तदा महाशङ्कुकोटौ को भुज इत्यनुपातेन भङ्गतलमानीय महाशङ्कोरियं द्वादशाङ्गुलशङ्कोः किमित्यनुपातेन गुणहरयोस्तुल्यत्वाल्लाघवेन पलभाया एवावग्रहत्वात्। सा तूत्तरा दक्षिणगोलेऽग्राया उत्तरत्वादेकदिक्त्वेन पलभाग्रयोर्योगे उत्तरो भुजः। उत्तरगोलेऽग्राया दक्षिणत्वेन भिन्नदिक्त्वात् पलभाग्रयोरन्तरं भुजस्तत्र पलभायाः शेषस्तत्तरो भुजोऽग्रायाः शेषं दक्षिणो भुजः। मध्याह्ने छायाया भुजरूपत्वान्मध्याह्नकालिको भुजो मध्याह्नच्छायेति सर्वं युक्तम्। अथ याम्योत्तरवृत्तस्थच्छायाकर्णसंज्ञा पूर्वापरवृत्तस्थच्छायाकर्णं प्रकारद्वयेनाह" र० ना०।

"स्वाग्राजीवे विषुवच्छायाद्वादशसङ्गुणे। क्रान्तिज्याप्ते तु तौ कर्णौ समसङ्गुलगे रवौ" सू० सि०।

"स्वजाग्राजघ्ने क्रमेणाग्राभाद्वादशघ्यां गुणिते उभयत्र क्रान्तिज्यया भक्ते तत्कारात् फले, समसङ्गुलस्थेऽर्के तौ स्वस्वाग्रच्छायासम्बद्धौ कर्णौ भवत उभयत्र छायाकर्णः स्यात्। स्वतोपपत्तिः। समसत्कोपरि पूर्वापरानुकारेण यद्वृत्तं तत्समसङ्गुलसञ्ज्ञम्। तत्रस्थश्छायाकर्णानयनम्। पलभाभुजेऽग्रकर्णः कर्णस्तदा क्रान्तिज्याभुजे कः कर्ण इति समशङ्कुः क्रान्तिज्याभुजे समशङ्कुकुजयोनतद्भ्योः क्रमेण कर्णकोटित्वात्। स्वस्वाग्रशङ्कुमानाङ्गुलाभ्यस्ते इत्यादिना त्रिज्या द्वादशगुणितानेन भक्ता तत्।

"छेदं त्रिघ्नं च परिवर्त्य हरस्य शेषः कार्यो लब्धं भागहरणे गुणानाविधिश्च" इत्युक्तेः। पलभयापि गुणा क्रान्तिज्याच्छकर्णाभ्यां भक्ता। तत्र त्रिज्या द्वादशगुणिता स्वस्वकर्णभक्ता स्वस्वजैव सिद्धातो लब्धज्या पलभागुणिता क्रान्तिज्याभक्ता फलं समशङ्कुगतच्छायाकर्णः। स्वयमेव पलभाभुजे द्वादशकोटिरत्रज्याभुजे का कोटिरिति लब्धज्याग्रघ्ने पलभयोस्तुल्यत्वान्नाद्यत्रज्या द्वादशगुणा

क्रान्तिज्या भक्ता छायाकर्णः समभग्रहगतः। क्रान्तिज्यायाः यदायं कर्णः सिद्धेत्र हि सर्वदा समहत्तगतो यष्ट इति समहत्तगतयष्टेरेव कर्णः साध्यो नान्यदेति सूचनार्थं समभग्रहलग्ने रवावित्युक्तम्"।

ननु यष्टाधिष्ठिताहोरात्रपूर्वापरवृत्तसम्पातादवलम्बरूपसमभग्रहोन्मण्डले प्रत्यक्षसिद्धस्य साधनार्थं समहत्तस्यतोभावेऽपि छायाकर्णः साध्यः। समभग्रहलग्ने रवावित्युक्तिस्तु स्वाधिष्ठिताहोरात्रवृत्तपरा न त्वन्यदा न साध्योऽन्यथाऽव्यक्तत्वेन प्रकारस्यातिप्रसङ्गापत्तेः। न हि प्रकारे तद्व्यावर्तकं विशेषणं प्रसिद्धं येन नातिप्रसङ्गः। परन्तु यदा समभग्रहलेऽक्षांशाधिक्यक्रान्त्या यष्टाधिष्ठितदुरात्रवृत्तानामसम्बन्धस्तदा गोले समग्रहोरदर्शनात् तत्र कथं तत्साधनमनिवारितमित्यतः समभग्रहलग्ने रवावित्यस्य पूर्वोक्त एवार्थ इत्यभिप्रायं समभग्रहलकर्णानयनप्रकारान्तरकथनव्याजेनाह" र० ना०।

"सौम्याद्योना यदा क्रान्तिः स्यात्तदा दृग्ज्यवः। विषुवच्छायया भक्तः कर्णो मध्याग्रयोर्हृतः" सू० सि०

"यदोत्तरा क्रान्तिरक्षादल्पा स्यात् तदा दृग्ज्यवः समवृत्तस्थाक्रान्तिसाधितमध्याह्नकर्णः। न तु मध्याह्नक्रान्तिः। अल्पया गुणितो मध्याग्रया स्फुटीकृतमध्याह्नकर्णाग्रया भक्तः फलं 'समभग्रहगतयष्टिबिम्बस्य छायाकर्णः स्यात्। अत्र सौम्येत्यनेन दक्षिणक्रान्तौ तदसाधनं समभग्रहगतयष्टिबिम्बस्यादर्शनादिति स्फुटमेवम्। अन्यथाप्यल्पक्रान्तौ दक्षिणगोले समग्रहोः प्रत्यक्षत्वात् तच्छिरारम्भानुपपत्तेः। अत्रोपपत्तिः। समभग्रहलग्नवैषुवच्छायाकर्णादवसन्नभूतात् कर्णेन द्वादशाङ्गुलशङ्कुस्तदा विज्याकर्णेन क इति मध्यशङ्कुस्तात्कालिकः। द्वादशकोटावक्षभा भुजस्तदा मध्याह्नशङ्कुकोटौ क इति शङ्कुतलम्। द्वादशनाम्नात् पलभाविज्याघातो मध्यकर्णभक्त इति। अनेन भुजेन मध्यशङ्कुस्तदाऽक्षाभुजेन क इति समशङ्कुः द्वादशाप्तमध्यकर्णघातो मध्यकर्णपलभाघ्नो भक्तोऽक्षाभुजे समशङ्कुतदुत्क्रमयोः कोटिकर्णत्वात्। अस्मात् पूर्वप्रकारेण छायाकर्णानयने द्वादशनाम्नाप्तमध्यकर्णपलभाविज्याघातोऽक्षाभमध्यकर्णाभ्यां भक्त इति तुल्ययोर्मध्यकर्णभितगुणहरयोर्नाशकरणेन सिद्धम् स्वतन्त्रेणास्य निरोक्षुमशक्यत्वात्। तथापि भाज्यहरौ विज्ययाऽपवर्त्य हरस्थाने मध्यकर्णगुणितायाः विज्याग्रभक्तेति मध्यकर्णाया सिद्धातो मध्याग्रयोर्हृत इत्युक्तम्। भाज्यस्थाने तु मध्यकर्णपलभाघात इति दक्षिणगोले यष्टादर्शनान्न साधितः। उत्तरगोलेऽपि क्रान्तिरक्षाधिका तदा समभग्रहलग्नवैषुवसम्भवान्न साधितः समभग्रहलावष्टब्धांशत्वात्। अल्पक्रान्तौ तत्सम्भवात् साधितः। नन्वहिर्गोले गणितसाध्यं भानाभावादित्युपपन्नं सौम्येत्यादि। भास्कराचार्यैस्तु "भार्तखण्डः समभग्रहलं प्रविशति खलेऽप्यमे स्यात् पलात् दृग्ज्यो ह्युत्तरगोल एव स विगतु साध्या तदैवास्य भा। अग्राग्रेऽपि समास्यमण्डलमिने यः शङ्कुरुत्पद्यते नूनं सोऽपि परानुपातविधये नैवं क्वचिद्दुष्यति" इत्यनेन तत्रापि साधितः। अथ स्वाभिमतकर्णेन स्वस्वकाले भुजार्थं कर्णवृत्ताया साध्येति सूचनार्थं कर्णायासक्रमप्रकारेण पुनरपि मध्यकर्ण इति प्रागुक्तस्य स्फुटीकरणार्थं चाह" र० ना०।

"स्वक्रान्तिज्याविजीवाघ्नी स्वस्वज्याप्राग्ज्या भौक्तिका। स्वेष्टकर्णहृता भक्ता विज्ययाप्ताङ्गुलादिका" सू० सि०

"स्वाभिमतकालिकक्रान्तिज्या विज्यया गुणिता स्वस्वज्यया भक्ता फलमग्या ज्यारूपा। स्वस्वज्याकोटौ विज्या कर्णः क्रान्तिज्याकोटौ कः कर्ण इत्यनेनोपपत्तिः। उत्तरार्धं पुनरुक्तं व्याख्यातप्रायम्। यदि तु पूर्वोक्तकर्णवृत्तायानयनशङ्कौ शङ्कुजीवयेत्यस्य शङ्कोः कोटिरूपत्वात् पूर्वसाधितनतांशभुजकोटिज्ययेत्यर्थो मध्यकर्ण इत्यस्य च तात्कालिकमध्याह्नच्छायायाः कर्णस्तदा न पुनरुक्तम्। परन्त्वर्थेत्यस्य तात्कालिकमध्याह्नकालिककर्णार्थः स्वेत्यस्य च स्वाभीष्टकालिककर्णार्थो बोध्यः। एतदुपपत्तिस्तु द्वादशकोटावक्षकर्णः कर्णस्तदा क्रान्तिज्याकोटौ कः कर्ण इति स्वकालिकाया। विज्याग्रहत्ते इदं तदा तात्कालिकमध्याह्नकालिकच्छायाकर्णेन नतांशकोटिज्याभक्तद्वादशविज्याघातात्मकेन केति द्वादशविज्याघातयोर्गुणहरत्वेन तुल्ययोर्नाशादक्षकर्णगुणितक्रान्तिज्या तात्कालिकमध्याह्ननतांशकोटिज्यया भक्तेति तात्कालिकमध्याह्नच्छायाकर्णेनेयं कर्णाया तदा स्वाभीष्टकालिकच्छायाकर्णेन केति स्वकालिकी कर्णायेत्युपपन्ना। सूर्याधिष्ठिताहोरात्रवृत्तस्याम्योत्तरवृत्तोर्ध्वसम्पातस्तात्कालिकमध्याह्न परानुपातार्थं बोध्यम्। अथ कोणच्छायाकर्णसाधनार्थं कोणयष्टिदृग्ज्ये श्लोकपञ्चकेनाह" र० ना०।

"त्रिज्यावर्गार्धतोऽग्रजा वर्गोनाद्द्वादशाहृतात् । पुनर्द्वादशनिघ्नाच्च लभ्यते यत् फलं बुधैः । शङ्कुवर्गार्धसंयुक्तविषुवद्वर्गभाजितात् । तदेव करणीनाम तां पृथक् स्थापयेद्बुधः । अर्कघ्नी विषुवच्छायाऽग्रजया गुणिता तथा । भक्ता फलाख्यं तद्वर्गसंयुक्तकरणीपदम् । फलेन हीनसंयुक्तं दक्षिणोत्तरगोलयोः । याम्ययोर्विदिशोः शङ्कुरेवं याम्योत्तरे रवौ । परिभ्रमति शङ्कोस्तु शङ्कुरन्यदिशस्तु सः । तत्त्रिज्यावर्गविच्छेषान्मूलं दृग्ज्याभिधीयते" सू० सि० ।

"पूर्वप्रकारानीतैस्तात्कालिकाग्रजाया न तु कर्णायाः पूर्वं कर्णस्यैवासिद्धेः । वर्गेण हीनात् त्रिज्यावर्गार्धाद्द्वादशगुणात् पुनर्द्वितीयवारं द्वादशगुणात् । चः समुच्चये । तेन द्वादशगुणितस्य द्विधा स्थापननिरासाच्चतुश्चत्वारिंशदधिकशतगुणितादित्यर्थः । पृथक् गुणकोक्तिस्तु गुणनसुखार्थम् । शङ्कोर्द्वादशाङ्गुलात्मकस्य वर्गार्धेन द्विसप्तत्या युक्तेन पलभावर्गेण भाजिताद्धुवैर्गणितकर्तृभिर्यल्लब्धाभिधं फलं प्राप्यते तल्लब्धाभिधं करणी नामसञ्ज्ञया करणी । तां करणीं बुधो गणकः पृथगेकत्र स्थाने स्थापयेत् । ततो द्वादशगुणिता पलभाग्रजया पूर्वंस्फुटीकृतया गुणिता तथा द्विसप्ततियुतेन पलभावर्गेण भक्ता लब्धं फलसञ्ज्ञं तस्य फलस्य वर्गेण युतायाः करणया मूलं दक्षिणोत्तरगोलयोः क्रमेण फलेनोनयुतम् । एवमुक्तप्रकारेण सिद्धः शङ्कुः, शङ्कोर्गणितकर्तुः सकाशाद्दक्षिणोत्तरे सूर्ये परिभ्रमति सति तुकारः क्रमार्थे क्रमेण याम्ययोरुत्तरयोर्विदिशोराग्नेयनैर्ऋत्योरानीतवाय्व्योः कोणयोरित्यर्थः । द्वितीयतुकारः पूर्वापरदिने विभागक्रमाद्भेदत्वेन विदिशोरित्यत्रान्वेति तेन दिनपूर्वार्धे याम्येयैशान्योर्दक्षिणोत्तरक्रमेण, दिनापरार्धे नैर्ऋत्यवायव्योर्दक्षिणोत्तरक्रमेणेति फलितार्थः । स कोणसञ्ज्ञः शङ्कुः स्यात् । कोणशङ्कुत्रिज्ययोर्वर्गान्तरान्मूलं दृग्ज्येत्युच्यते" र० ना० ।

अथैतच्छायाच्छायाकर्णयोरानयनमाह ।

"स्वशङ्कुना विभज्याग्रे दक्षिजेत्र द्वादशाहते । छायाकर्णौ तु कोणेषु यथास्वं देशकालयोः" सू०सि० ।

"कोणोद्भवदृग्ज्यात्रिजेत्र द्वादशगुणे दृग्ज्याघ्नसम्बन्धिकोणशङ्कुना भक्ता लब्धे दृग्ज्यात्रिज्याक्रमेण छायाच्छायाकर्णौ स्तः । तुकारादेवं कोणेषु चतुर्षु देशकालयोः यथास्वं स्वमनतिक्रम्येति यथास्वं यथादेशं यथाकालं छायाच्छायाकर्णौ साध्यौ । अयमर्थः । कचिद्देशे चतुर्षु कोणेषु कचिच्च कोणद्वये कचिच्च दिनार्ध एव कोणद्वय इत्यादि देशकालानुरोधेन यथायोग्यमिति । अत्रोपपत्तिः प्रागुक्ता स्पष्टा च" । अथ दिक्प्रदेशसम्बन्धेन छायाकर्णावुक्त्वा कालसम्बन्धेन सार्धश्लोकाभ्यामाह" र० ना० ।

"त्रिज्योद्भवचरज्यायुक्ता याम्यायां तद्विवर्जिता । अन्या नतोत्क्रमज्योना स्वाक्षोरात्रार्धसङ्गुणा । त्रिज्याभक्ता भवेच्छेदो लम्बज्याघ्नोऽथ भाजितः । त्रिभज्यया भवेच्छङ्कुस्वदृग्गं परिशोधयेत् । त्रिज्यावर्गात् पदं दृग्ज्या छायाकर्णौ तु पूर्ववत्" । सू० सि०

"उत्तरगोले चरोत्क्रमज्या चरज्येत्यर्थः । पूर्वचरानयने चरज्यायाश्चरजेति सञ्ज्ञोक्तेः । युक्ता त्रिज्याऽन्या स्यात् । याम्यगोले तया चरज्यया ना त्रिज्याऽन्या स्यात् । नतोत्क्रमज्योना सूर्योदयाद्दिनगतघट्यो दिनशेषघट्यो वा दिनार्धान्तर्गता उन्नतसञ्ज्ञास्याभिन्नं दिनार्धं नतकाले घट्यात्मकस्वस्वाहतो विप्राक्षघ्नयमैरित्यादिविधिना, खनयो रन्ध्रयमला इत्याद्युक्तोत्क्रमज्याभिर्लङ्कोदयोत्क्रमज्या । षष्टिघटद्व्यधिकनते त षष्टिघटद्यूननतस्य क्रमज्याखण्डैः क्रमज्या तया युक्ता त्रिज्योत्क्रमज्या भवति । तया हीनेत्यर्थः । स्वाक्षोरात्रार्धसङ्गुणा । स्वस्फुटचरज्यासम्बन्धस्वाक्षोरात्रदलज्यासार्धं द्युज्या तया गुणिता त्रिज्यया भक्ता फलं छेदसञ्ज्ञं स्यात् । अथानन्तरं छेदो लम्बज्यया गुणितस्त्रिज्यया भाज्यः फलमिष्टकाले शङ्कुः स्यात् । तस्य शङ्कोर्वर्गं त्रिज्यावर्गाच्छोधयेत् । शेषस्य मूलं दृग्ज्या । अस्यां छायाकर्णौ तु पूर्ववत् । पूर्वोक्तरीत्या भवतः । अत्र छायाकर्णौ त्रिति कोणच्छायाकर्णसाधनश्लोकान्तभागस्य यङ्कणात् तच्छ्लोकोक्तरीत्याऽभीष्टशङ्कुदृग्ज्याभ्यां छायाकर्णौ साध्यावित्युक्तम् । अत्रोपपत्तिः । याम्योत्तरदक्षिणोन्मण्डलाधिष्ठितद्युरात्रदलसम्पातात् क्षितिजद्युरात्रदलसम्पातद्वयवह्नोदयास्तसूत्रक्षितिजसम्बद्धयाम्योत्तरदलसूत्रसम्पातपर्यन्तमहोरात्रदलसूत्रं त्रिज्यासदृशमन्या । सा तूत्तरगोले चरज्यायुता त्रिज्या दक्षिणगोले चरज्यायोना त्रिज्या । उन्मण्डलयाम्योत्तरसूत्रावष्टब्धाहोरात्रदलज्यासार्धं त्रिज्यात्वात् उन्मण्डलयाम्योत्तरदक्षिणक्रमेण क्षितिजाद्धोधःस्थत्वेन तद्याम्योत्तरसूत्रयोर्मध्ये चरज्यात्वाच्च ।

यद्राशेरात्रदत्ते याम्योत्तराऽहोरात्रवृत्तसम्पाता-दुभयत्र नतघट्यन्तरस्थाने तत्सूत्रं नतकालस्य सम्पूर्ण-ज्या। तन्मध्याद्ध्वं सूत्रं शरस्थं नतोत्क्रमज्या। तया हीनान्या यद्स्थानाद्ध्वोरात्रवृत्ते उदयास्तसूत्रपर्य-न्तसूत्रसूत्रं त्रिज्यानुरूपमिष्टास्या। तत्तुल्या याम्योत्त-रोर्ध्वव्यासभूतान्तर्गता सा द्युज्याप्रमाणसाधितेष्टधृतिः। द्युज्यागुणा त्रिज्याभक्ता फलं छेदः। यदि तस्मात् त्रि-ज्याकर्णे लम्बज्या कोटिस्तदेष्टधृतिकर्णे का कोटिरि-त्यनुपातेनेष्टशङ्कुः। अस्माद्भुजज्या च्छाया तत्कर्णौ उक्तरीत्या सिद्धान्नीत्युक्तमुपपन्नम्। अथ श्लोकत्रयेण छायाकर्णाभ्यां नतकालानयनमाह" र० ना०।

"अभीष्टच्छायया भक्ता त्रिज्या तत्कर्णभाजिता। दृग्-ज्या तद्दर्गसंशुद्धात् त्रिज्यावर्गाच्च यत् पदम्। शङ्कुः सप्तिभजीवाघ्नः स्वलम्बज्याविभाजितः। छेदः स त्रि-ज्यायास्थस्तः स्वाहोरात्रार्द्धभाजितः। उन्नतज्या तया हीना स्वान्त्या शेषस्य कार्मुकम्। उत्क्रमज्या-भिरेवं स्युः प्राक्पश्चार्धनतासवः"। सू० सि०

"अभीष्टकालिकच्छायया सुखिता त्रिज्या स्वहीनच्छा-यायाश्छायाकर्णेन भक्ता फलं दृग्ज्या दृग्ज्यावा वर्गेण हीनात् त्रिज्यावर्गाद्यल्लब्धं तन्मितं मूलम्। चकारोयत्त-दोर्नित्यसम्बन्धात् तच्छब्दपरः। अभीष्टशङ्कुः। स इष्टशङ्कुस्त्रिज्यया गुणितः स्वदेशीयलम्बज्यया भक्तः फलं छेदः। स छेदस्त्रिज्यया गुणितो द्युज्यया भक्त उन्नतकालस्य ज्या भवति। यद्यप्युन्नतकालो न भवति। तथानीतयोन्नतज्यया हीना स्वान्त्या स्वद्युज्यासम्बन्धचरज्यावगतान्त्या। अवशेषस्योत्-क्रमज्याभिः "खनयोरन्त्यमलाः" इत्याद्युक्तोत्क्रमज्या-पिण्डैर्धनुः। अवशेषस्य त्रिज्याधिकत्वं तु यदधिकं तस्य क्रमज्यापिण्डैर्धनुषत्पञ्चाशद्युक्तस्तत्क्रमधनुर्भवति। एवं प्रकारेण सिद्धाङ्गा दिनस्य पूर्वार्धापराधयोर्नतका-लासवो भवन्ति। अत्रोपपत्तिः। पूर्वोक्तव्यत्यासात् सुगमा। तत्र छेदस्त्रिज्यापरिणत इष्टान्त्या तया ज्यात्यासस्मृतः। अवध्युदयास्तसूत्रस्याहोरात्रवृत्तव्यास-सूत्रत्वाभावादिष्टोन्नतज्याकारेण स्वल्पान्तरत्वेन दर्शना-दुन्नतज्यत्वमुक्तम्। अत एव भास्कराचार्यैः "इष्टान्त्र-क्रमसूत्रकालभौर्वैतुल्यां प्रकल्प्य" इत्याद्युक्तम्। तद्यतुर-क्षणासन्नोन्नतकालत्वापत्त्या तया हीनेत्यादिभागस्य व्यर्थ-त्वापत्तेरिति दिक्" र० ना०।

"इति त्रिप्रश्नाधिकारः" सू० सि०।

"दिग्देशकालानां प्रतिपादनमिदं परिपूर्तिसाध्यमित्यर्थः। तत्र दिशां साधनं शिलातल इत्यादि नियतं, तत्सम्बन्धेन समकोणत्र्यस्रोत्तरगङ्कूनां साधनान्यपि दिगनर्गतान्यनि-यतानि। पलभालम्बाक्षादिसाधनं देशनिरूपणं नियत-तम्। अयाचरादिसाधनमनियतम्। कालसाधनं तद्वशाच्छायादिसाधनं च कालनिरूपणमिति विवेकः" र० ना०।

एवं शङ्कुच्छायया देशभेदेन सूक्ष्मे कालसाधने स्थिते वक्ष्यमाणच्छायायादेन कालज्ञानं स्थूलं किञ्चिद्विषय इत्यवधेयम् छायाकर्णादिकं ग्रहलाघवोक्तम्। तत्तदर्थं ग्रन्थतस्तद् विधिश्च नोक्तम्। [ब्रह्मधरे देखिए।

**छायाकर** त्रि० छायां करोति कृञ्योग ड-ट् ह्रस्वः। छायां करोति।

**छायाङ्क** पु० छाया सूर्यप्रतिबिम्बः अङ्कोऽस्य। चन्द्रे हेमच०। तस्य सूर्यकिरणप्रतिबिम्बेनैव प्रकाशः इन्दु-शब्दे ९२१४० ह० स० उक्तदिशा दर्शितः "छाया सूर्यात्मजायां छायाशब्दादयोऽपि चन्द्रे।

**छायातनय** पु० ह्रस्वः। शनैश्चरे हला०। छायाशब्दे तस्य तत् पुत्रकथा दृश्या। छायासुतादयोऽप्यत्र। "सूर्यपुत्रं सद्भावाद्धं छायागर्भसमुद्भवम्" शनिप्रणाममन्त्रः।

**छायातरु** पु० छायाप्रधानस्तरुः श० त०। "पूर्वाह्णे च परार्द्धे च तलं यस्य न सङ्गति। अत्यन्तगीतया छाया स छायातरुरुच्यते" इत्युक्ते छायाप्रधाने वृक्षे। "स्निग्धच्छायातरुषु वसतिं रामगिर्याश्रमेषु" मेघः। छायाद्रुश्चोऽप्यत्र स च नमेरुवृक्षे शब्दार्थचि०।

**छायापथ** छायायुक्तः पन्थाः। आकाशस्थे ज्योतिश्चक्रमध्य-वर्त्तिनि दक्षिणोत्तरायते तिरश्चीने आकाशस्थानभेदे। "छायापथेनेव शरत्प्रसन्नम्" रघुः।

**छायापाद** पु० छायायाः शङ्कुच्छायाया पाद इव। द्वादशाङ्गुलशङ्कोश्छायापादमाने। मासभेदे मध्याह्ने तत्-संख्याभेदः तेन च दिनमानज्ञानं चाह" ज्यो० त०

"अकौङ्गुला तु सूच्यग्रा काष्ठी हस्तसमन्विता। शङ्कु-संज्ञा भवेच्चैव तच्छायां परिकल्पयेत्। मध्याह्नहीने-रादित्ययुक्तैश्छायाङ्गुलैर्हरेत्। षट्पूरितद्विवादस्रङ्-लब्धं दण्डादिकं भवेत्। पूर्वाह्णच्छाययातीतं परा-ह्णच्छायया चैक्यकम्। शून्येकरामवाणेभदिशोरुद्राः ॥१॥ १५।८।१०।११॥ क्रमोत्क्रमैः। आषाढादिषु मासेषु छाया माध्याह्निकी मता। अयनांशसमासाल्ये द्युत्-

क्रमेणादितो दुधैः। संख्योक्तान्यदिने भागहारे दक्षोत्तरे तथा"। प्रकारान्तरन्तु, "पञ्चाद्यधिरामयुग्मेक शून्यैकयुग्मवह्नयः। चतुःपञ्चर्तवो) ५,४,३,२,१,०।१, २,३,४,५,६, भाधात् छायापादा दिनार्द्धके। अयनांशजमासान्ते विषादगणलक्रमात्। दिने दिने भागहारो मध्यच्छायापदे मतः। रूक्षुः षड्भागको व्यक्षु रङ्गुलैर्व्यङ्गुलिस्तया। सद्भुनं द्विगतं हीनं मध्यपादेश षड्गुणैः। छायापादेच मध्योनैः षड्युतैर्द्विगुणैर्हरेत्। याम्यादिप्रदार्द्धं तु लब्धा दक्षा ग्रहैष्यकाः। प्राक् पश्चिमदिनार्द्धानु शेषात् षष्टिगुणात्फलम्"। इदञ्च देशभेदविषयं स्थूलं च सूक्ष्मन्तु सू० सि० उक्तं तच्च छायाशब्दे दृश्यम्।

**छायापुरुष** पु० छायायां दृश्यः पुरुषः पुरुषाकृतिः। आकाशे दृश्ये निजच्छायानुरूपे पुरुषाकृतियुक्ते पदार्थे। तद्दर्शनोपायमाह योगप्रदीपिकायाम् ५पटले

"शिव उवाच। निरभ्रं गगनं देवि! यदा भवति निर्म्मलम्। तदा छायामुखो भूत्वा निश्चलः प्रयतो धिया। स्वच्छायाकल्पमालोक्य स्वगुरूक्तक्रमेण वै। सम्मुखं गगनं पश्येच्चिनिमेषलक्षैकधीः। गुरुस्फटिकसङ्काशः पुरुषस्तत्र दृश्यते। न दृश्यते यदा तत्र पुनस्तद्वत् परीक्षयेत्। बहुधा दर्शनेनैव साक्षात्कारो भवेत् ध्रुवम्। कस्यचित् भाग्यतो दृश्यो यदि विघ्नोऽक्षिगोचरः। भवत्येव न सन्देहो गुरुविश्वासतः शिवे!। गुरुं सम्यक् पूजयित्वा पश्येच्छायां समाहितः। तथा षण्मासपर्य्यन्तं मृत्युस्तस्य न विद्यते। शिरोहीनं यदा पश्येत् षण्मासाभ्यन्तरे क्षतिः। यदा पादौ न दृश्येते भार्य्याहानिर्न संशयः। न दृश्येते यदा पाणी भ्रातृहानिर्न संशयः। एतज्ज्ञात्वा सुधीः सम्यक् गुरूक्तीरं समाश्रयेत्। योगाभ्यासेन सततं प्राणायामेन संयुतः। यथा वा सत्समीपस्थो लब्धं मृत्युञ्जयं जपेत्। योगभुक्तो हविष्याशी यतवाग्यतमानसः। मृत्युञ्जयेच्च सन्देहो अन्यथा मृत्युमृच्छति। यदा तु मलिनं पश्येत् ज्वरपीडा भवेत्तदा। तस्य शान्तिं प्रकुर्व्वीत शिवसेवां समाहितः। रक्तवर्णं यदा पश्येद्दैन्यं भवति ध्रुवम्। मध्यच्छिद्रं यदा पश्येत् मृत्युघातो भवेत्तदा। एवं सन्दर्शनं देवि! ज्ञानवान् भवति ध्रुवम्। नारदाय पुरा प्रोक्तं मया पुरुषदर्शनम्। तत्प्रसादान्महायोगी भूत्वा लोकांश्चरत्यसौ। स्वच्छायादर्शनं देवि! कलौ पुरुषलक्षणम्। दीर्घायुः समवाप्नोति ज्ञानञ्चापि सुनिर्म्मलम्"।

**छायायन्त्र** न० छायया कालज्ञानसाधकं यन्त्रम्। कालज्ञानसाधकेषु यष्टयुदिचक्रप्रभृतिषु यन्त्रभेदे। "यष्टयुदिधनुश्चक्रैश्छायायन्त्रैरनेकधा। गुरूपदेशादिज्ञेयं कालज्ञानमतन्द्रितैः" सू० सि०।

**छायामान** पु० छायया स्वार्थप्रतिबिम्बेन मीयते मा-कर्म्मणि ल्युट्। १चन्द्रे हेमच० ६त०। २छायायाः प्रमाणे न०।

**छायामित्र** न० छायाया मित्रमिव। आतपत्रे शब्दरत्न०।

**छायामृगधर** पु० छायारूपं मृगं धरति धृ-अच्। चन्द्रे त्रिका०। छायाशशधरादयोऽप्यत्र।

**छायाविप्रतिपत्ति** स्त्री छायानां देहकालीनां तत्प्रभृतीनां विप्रतिपत्तिर्विरुद्धा प्रतिपत्तिः। सुश्रुतोक्ते नृणां मरणसूचके देहकान्त्यादीनामन्यथाभावे यथाह सुश्रुतः। "अथातश्छायाविप्रतिपत्तिमध्यायं व्याख्यास्यामः। छाया लोहितिका नीला पीतिका वापि मानवम्। अभिद्रवति यं छाया स परासुरसंशयम्। स्त्रीस्निग्धौ नश्यतो यस्य तेज ओजः स्मृतिः प्रभा। कृष्णाद्यं भजतो नो स परासुरसंशयम्। यस्याधरौष्ठः पतितः क्षिप्रमूर्द्धं तथोत्तरः। उभौ वा जाम्बवाभासौ दुर्लभं तस्य जीवितम्। आरक्ता दशना यस्य श्यावा वा स्युः पतन्ति च। खञ्जनप्रतिमा वापि तं गतायुषमादिशेत्। कृष्णा सञ्जवलिप्ता वा जिह्वा शूना च यस्य वै। कर्कशा वा भवेद्यस्य सोऽचिराद्विजहात्यसून्। कुटिला स्फुटिता वापि शुष्का वा यस्य नासिका। अवस्फूर्जति मग्ना वा न स जीवति मानवः। सङ्क्षिप्ते विप्लुते रक्ते अस्ते च लोचने। स्रातां वा प्रस्रुते यस्य स गतायुर्नरो ध्रुवम्। केशाः सीमन्तिनो यस्य संक्षिप्ते विनते भ्रुवौ। लुनन्ति चाक्षिपक्ष्माणि सोऽचिराद्याति मृत्यवे। नाकस्मात्पक्ष्मास्यं न धारयति यः शिरः। एकाग्रदृष्टिर्मूढात्मा सद्यः प्राणान् जहाति सः। बलवान् दुर्बलो वापि सम्मोहं योऽधिगच्छति। उत्प्लाव्यमानो बहुशः धीरः परिवर्जयेत् उत्तानः सर्व्वदा शेते पादौ विकुरुते च यः। विप्रसारणशीलो वा न स जीवति मानवः। शीतपादकरोच्छ्वासश्छिन्नश्वासश्च यो भवेत्। काकोच्छ्वासश्च यो मर्त्यः धीरः परिवर्जयेत्। निद्रा न क्षिद्यते यस्य यो वा जागर्त्ति सर्व्वदा। सुप्तो वा यदि वा मृत्वा श्येयः

स जानता। उत्तरौष्ठश्च यो खिद्यादुद्धारांश्च करोति यः। प्रेतैर्यो भाषते सार्द्धं प्रेतरूपं तमादिशेत्। खेभ्यः खरोमकूपेभ्यो यस्य रक्तं प्रवर्त्तते। पुरुषस्य विषार्त्तस्य सद्यो जहाति जीवितम्। वाताहीला तु हृदये यस्योर्द्धमनुधाविनी। रुजाञ्चविद्वेषकरी स परासुरसंशयम्। अनन्योपद्रवकृतः शोफः पादसमुत्थितः। पुरुषं हन्ति नारीन्तु सुखजो गुह्यजो हयम्। अतिसारो ज्वरो हिक्का छर्दिः शूनाक्षमेढ्रता। श्वासिनः कासिनो वापि यस्य तं परिवर्जयेत्। स्वेदो दाहश्च बलवान् हिक्का श्वासश्च मानवम्। बलवन्तमपि प्राणैर्वियुञ्जन्ति न संशयः। शङ्खौ वा जिह्वा भवेद्यस्य सद्यं चाक्षि निमज्जति। सुखञ्च जायते पूति यस्य तं परिवर्जयेत्। वक्त्रमापूर्य्य तेऽश्रूणां स्विद्यतश्चरणावुभौ। चक्षुश्चाकुलतां याति यमराष्ट्रं गमिष्यतः। अतिमात्रं लघूनि स्युर्गात्राणि गुरूणि च। यस्याकस्मात्स विज्ञेयो गन्ता वैवस्वतालयम्। पद्मगन्धस्त्रवसातैलदृतगन्धांश्च ये नराः। मृद्गन्धांश्च ये वान्ति गन्तारस्ते यमालयम्। यूका ललाटमायान्ति वर्त्मि नास्रन्ति वायसाः। येषां वापि रतिर्नास्ति यातारस्ते यमालयम्। ज्वरातिसारशोफाः स्युर्यस्यान्योन्यावसादिनः। प्रक्षीणबलमांसस्य नासौ शक्यचिकित्सितुम्। शोषश्च यस्य क्षुत्तृष्णे हृदयेष्टैर्हितैस्तथा। न शाम्यतोऽन्नपानैश्च तस्य मृत्युरुपस्थितः। प्रवाहिका शिरःशूलं कोष्ठशूलञ्च दारुणम्। पिपासा बलहानिश्च तस्य मृत्युरुपस्थितः। विषमेषूपचारेषु कर्म्मभिश्च पुराकृतैः। अनित्यत्वाच्च जन्तूनां जीवितं निधनं व्रजेत्। प्रेतभूतपिशाचाश्च रक्षांसि विविधानि च। मरणाभिमुखं नित्यमुपसर्पन्ति मानवम्। तानि भेषजधीर्याणि प्रतिघ्नन्ति जिघांसया। तस्मान्मोघाः क्रियाः सर्व्वा भवन्त्येव गतायुषः"।

छाल पुं० न० छा० वा० अलच् अद्धाँचा०। वल्कले।

छालिक्य पुं० छलिके रूपकभेदे भवः ष्यञ्। गानभेदे। तच्च गानं देवलोके स्थितं वासुदेवेन तत आनीय नरलोके प्रचारितं यथाह हरिवं० १३८ अ०।

"छालिक्यगानं वक्ष्ये संविधानं यदेवगान्धर्वसदाहरन्ति। जयाह वीणामथ नारदस्तु षड्ग्रामरागादिसमाधियुक्ताम्। हृल्लोपकन्तु स्वयमेव कृष्णः सुवंशघोषं नरपप्रियार्थम्। वादङ्कवाद्यानपरांश्च वाद्यान् वराप्सरास्ता जगदुः प्रतीताः। आसारितान्ते च ततः प्रतीता रम्भोर्वशीता स्वाभिनयाय तज्ज्ञा। तयाभिनीते वरगात्रयष्ट्या ततोऽरामश्च जनार्द्दनश्च। अथोर्वशी चारु विशालनेत्रा हेमा च राजन्यथ मिश्रकेशी। तिलोत्तमा चाथथ मेनका च एतास्तथान्याश्च हरिप्रियार्थम्। जगुस्तथैवाभिनयञ्च चक्रुरिष्टैश्च कामैर्मनसोऽनुकूलैः। ता वासुदेवोऽप्यनुरक्तचित्तः संवत्सरं गीतमभिनयैरुदारैः। नरेन्द्रसूनो! परितोषितेन ताम्बूलयोगेन वराप्सरोभिः। तदागताभिर्वरार्हतास्तु कृष्णोऽप्सरा मानमयास्तथैव। फलानि गन्धोत्तमवन्ति वीराच्छालिक्यगान्धर्वमथा हृतञ्च। कृष्णोक्षया च विदिवाद्देव! व्यनुग्रहार्थं भुवि मानुषाणाम्। स्थितञ्च रम्यं हरितेजसैव प्रयोजयामास स रौक्मिणेयः। छालिक्यगान्धर्वसुदारवृद्धि स्तैरेव ताम्बूलमथ प्रयुक्तम्। प्रयोजितं पञ्चभिरिन्द्रतुल्यैश्छालिक्यमिदं ततं नराणाम्। शुभावहं वृद्धिकरं प्रशस्तं मङ्गल्यमेवाथ तथा यशस्यम्। पुण्यञ्च पुष्ट्यभ्युदयावहञ्च नारायणस्येष्टसदारकीर्त्तिः। जयावहं धर्म्यसुरावहञ्च दुःस्वप्ननाशं परिकीर्त्यमानम्। करोति पापञ्च तथा विहन्ति श्रृण्वन् सुरावासगतो नरेन्द्रः। छालिक्यगन्धर्वसुदारकीर्त्तिर्मैत्रे किलैकं दिवसं सहस्रम्। चतुर्युगानां सपरेवतोऽथ ततः प्रवृत्ता सुकुमारजातिः। गान्धर्वजातिश्च तथा पराणि दोषाद्यथा दोषशतानि राजन्!। विवेद कृष्णश्च सनारदश्च प्रद्युम्नसुस्वैर्मधमैसुरूपैः। विज्ञातमेतद्धि परं यथावद्देवर्षिभावाच्च जनेषु लोके। जानन्ति छालिक्यगुणोदयानां तोयं नदीनामथ वा समुद्रे। ज्ञातुं हि शक्यं हिमवान् गिरिर्व्वा पश्यतो वा गुणतोऽथ वापि। शक्यं न छालिक्यसुते तथोक्तिस्थाने विधानान्यथ मूर्च्छनासु। षड्ग्रामरागेषु च तत्र कार्य्यं तस्यैकदेशावयवेन राजन्!। वेशाभिधानं सुकुमारजातिं निशं सुदुःखेन नराः प्रयान्ति। छालिक्यगान्धर्वगुणोदयेषु ये देवगन्धर्वमहर्षिसंघाः। निशं प्रयान्तीत्यवगच्छ बुद्ध्या छालिक्यमेवं मधुसूदनेन। भैमोत्तमानां नरदेव! दत्तं लोकस्य चानुग्रहकाम्ययैव"।

छि स्त्री छो-वा० कि। गर्हायाम् एकाक्षरकोषः।

छिक्कनी स्त्री छिक् इत्यव्यक्तं नासिकाशब्दं कनति शब्दायते कन-अच् गौरा० ङीष्। (नाकछिकनी) वृक्षभेदे "छिक्कनी कटुका रूक्षा तीक्ष्णोष्णा वह्निपित्तकृत्। वात-

रक्षङ्करी कुण्डलमिवातकफापहा" भावप्र० तद्गुणोक्तिः।

छिक्कर पु० छिक् इत्यव्यक्तं शब्दं करोति क-ट। ह० स० ८६अ० उक्ते छिक्कारे मृगभेदे "कृकुटेभरिरीवश्च शिखिकङ्कलछिक्कराः" "स्त्रीसंज्ञा भावप्रकाशपत्रीकर्ण-छिक्कराः" "छिक्करः कटपूरी च पिरीली चाक्षि दलिषाः"। [शब्दरत्ना०।

छिक्का स्त्री छिक् इत्यव्यक्तं शब्दं करोति क-ड। क्षुते।

छिक्कार पु० छिगित्यव्यक्तं शब्दं करोति क-अण्। मृगभेदे। "छिक्कारो मृगजातिः स्यात् कलवाकः कृकुटः प्रोक्तः" ह० स० ८६अ०।

छिक्किका स्त्री छिक्का क्षुतं साध्यत्वेनास्त्यस्याः वा० ठन्। छिक्कन्यां (नाकछिकनी) भावप्र०। ज्ञात तत्रार्थे।

छित त्रि० छा-क्त वा इत्। छिन्ने अमरः इदमावपत्रे

छित्ति स्त्री छिद-क्तिन्। १छेदने कर्त्तरि क्तिच्। २करञ्जवृक्षे शब्दर०।

छित्वर त्रि० छिद-क्वरप् पृ० दस्य तः। १वैरिणि, २धूर्त्ते ३छेदके च उणादिको०। स्त्रियां ङीष्।

छिद द्वैधीकरणे रुधा० उभ० सक० अनिट्। छिनत्ति छिन्ते इदित्। अच्छिदत्, अच्छेत्तीत् अच्छित्त। "न छिन्द्यान्नखलोमानि" "न छिन्द्यात् करजैर्नखम्" मनुः "अच्छिन्दन्नुत्तमाङ्गानि" भा० व० १२।६३अ०। भिदादित्वात् अङ् छिदा। "कर्म्मस्थः पचतेर्भावः कर्म्मस्थाच्च भिदादयः" इत्युक्तेः ततः कर्म्मकर्त्तरि प्रत्ययः छिद्यते कटःस्वयमेव। छिदुरः स्वयंछिन्नः।

अप+अपलप्य छेदने "एतस्मै वा एषापच्छिद्यैवैव पुनर्भवत्यपि" श्रुतेः ब्रा० ५।३।४।६। [४२० पृ० दृश्यम्।

अव+ विभागभेदे। स च दैशिकः कालिकश्च अवच्छेदशब्दे वि+अव+आवर्त्तने निरासने व्यवच्छेदः।

आ+आङपूर्व्व हरणे। (काड़ियालबोया) अपहरणे "आ-छिन्द्युरितरासु च" नारदः। "भिषतामाच्छिद्यत्ति नः" कुमा०। सम्यक्छेदे च। "आच्छेत्तुमात्मनश्छेतस्य धनुर्ज्यामपि चाक्षमे" भा० व० १६६श्लो०।

उद्+समूलनाशने। "किं वा रिपुंस्तव गुरुः स्वयमुच्छिनत्ति" रघुः "उच्छेत्तुं प्रभवति यश्च सप्तसप्तिः" शक०।

परि+इयत्तया विभागे। परिच्छेदः। "यशःपरिच्छेत्तुमियत्तयालम्" रघुः। "परिच्छिन्नप्रभावर्द्धिर्न मया न च विष्णुना" कुमा०।

वि+ विभागे भेदे च "विच्छिद्य तौ शरैर्वीरौ" हरिवं० ८५२०श्लो०। "यदङ्गं विच्छिन्नं भवति जतुसन्धानमिव तत्" शक०। [छिदः" रामा० सु० ३७।१०।

छिद् त्रि० छिद-क्विप्। छेदनकर्त्तरि। "रामस्य हृदय-

छिदक न० छिद-कन्। वज्रे उणादिको०।

छिदा स्त्री छिद-भावे भिदा० अङ्। छेदने।

छिदि स्त्री छिद्-इन् किच्च। १परशौ २वज्रे उज्ज्वल०। ३छेत्तरि त्रि०। [४करवाले च मेदि० ५अक्षौ उज्ज्वल०।

छिदिर पु० छिद-किरच्। १कुठारे २पावके, ३रज्जुभेदे,

छिदुर त्रि० छिद-कुरच्। १वैरिणि, २धूर्त्ते ३छेदके, ४छेद-नद्रव्ये च मेदि०। कर्म्मकर्त्तरि कुरच्। ५स्वयंछिन्ने त्रि०। "संलक्ष्यते न च्छिदुरोऽपि हारः" रघुः।

छिद्र भेदने अद० चुरा० उभ० सक० सेट्। छिद्रयति ते अचिच्छिद्रत् त। छिद्रितः छिद्रम्।

छिद्र न० छिद-रक् छिद्र-अच् वा। १दूषणे, २गर्त्ते, ३अव-काशे ४ज्योतिषोक्ते लग्नतोऽष्टमस्थाने। "छिद्राख्यमष्टमं स्थानम्" ज्यो० त०। "छिद्रं निवारयेत् सर्वं यत्नकर-सखानुगम्" मनुः। "छिद्रेष्वनर्था बहुलीभवन्ति" शक० "नाख्येच्छिद्रं परोविद्यात् विद्याच्छिद्रं परस्य तु" मनुः। देहे छिद्रसंख्यामाह याज्ञ० मिताक्षरयोः

"रोमणां कोटयस्तु पञ्चाशच्छतञ्च कोटय एव च। सप्त-षष्टिस्तथा लक्षाः सार्द्धाः स्वेदायनैः सह। वायवीयै-र्विगण्यन्ते विभक्ताः परमाणवः" याज्ञ०। "पूर्वोदित-शिराकेशादिसहितानां रोमणामभ्रमाणवः सूक्ष्मसूक्ष्म-तररूपा भागाः स्वेदस्रवणसुषिरैः सह चतुःपञ्चा-शत्कोटयः तथा सप्तोत्तरषष्टिलक्षाः सार्द्धाः पञ्चाशच्छत-सहिताः वायवीयैर्विभक्ताः पवनपरमाणुभिः पृथक् कृता विगण्यन्ते" मिताक्षरा। एता सूक्ष्मच्छिद्रसंख्याः स्थूलच्छिद्रसंख्या तु नव सप्तनेत्रवर्णना साहचर्यात्पायूपस्थ स्थानभेदात् तत्संख्याः तुल्यत्वेन ५नव संख्यायां च

छिद्रकर्ण त्रि० छिद्रयुक्तः कर्णोऽस्य। दुर्लक्षणरूपच्छिद्रयुक्त कर्णविशिष्टे छिद्रकर्णशब्दे दृश्यम्।

छिद्रदर्शिन् त्रि० छिद्रं पश्यति दृश-णिनि। १रन्ध्रान्वे-षिणि रिपौ। करञ्जरीकशब्दे १६२१ पृ० दर्शिते योगभेदे बाभ्रव्यपुत्रे २विप्रभेदे च "छिद्रदर्शी सुनेत्रश्च तथा बाभ्रव्यवत्सयोः। जातौ चोत्तियदायादौ वेद वेदाङ्गपारगौ" हरिवं० २३अ०। [राजनि०

छिद्रवेदेही स्त्री छिद्रप्रधाना वैदेही। गजपिप्पल्याम्

छिद्रान्तर् पु० छिद्रमन्तर्मध्ये यस्य। नखे। राजनि०।

छिद्राफल न० छिद्रं दूषणमाफलति या+फल–अच्। कपटहेतौ मायारूपे फले राजनि०।

छिद्रित त्रि० छिद्र–कर्म्मणि क्त। १क्षतवेधे विद्धे हेमच०। छिद्र+तारका० इतच्। २जातच्छिद्रे। [विश्वः।

छिद्दर त्रि० छिद्–अरच् वा दस्य नः। छिद्रशब्दार्थे

छिन्न त्रि० छिद–क्त। १क्षतच्छेदने लूने अमरः। "सच्छिन्नधन्वा विरथः" देवीभा०। २विभक्ते च "छिन्नाभमिव नश्यति" गीता। ३मन्त्रभेदे कुमारशब्दे २१६० पृ० दृश्यम्। ततः "अनत्यलगतौ क्तात्" पा० कन्। छिन्नक तत्रैव छिद्रे। "अनत्यलगतिः साकल्येन सम्बन्धाभावः प्रकृतिवाच्यया छिदाक्रियया क्तार्थस्य कर्म्मणा एकदेशप्रतीत्या साकल्येन सम्बन्धाभावो गम्यते" सि० कौ०। आगन्तुषु षट्सु व्रणेषु ३व्रणभेदे। "अनेकाकृतिरागन्तुः स भिषग्भिः पुरातनैः। समासतो लक्षणतः षड्विधः परिकीर्त्तितः। छिन्नं भिन्नं तथा विद्धं क्षतं विद्रधितमेव च। दृष्टमाङ्क्षत्वा षडं तेषां वक्ष्यामि लक्षणम्। तिरश्चीन ऋजुर्वापि यो व्रणश्चायतो भवेत्। गात्रस्य पातनं चापि छिन्नमित्युपदिश्यते"।

छिन्नकर्ण त्रि० छिन्नः कर्णोऽस्य "कर्णे लक्षणस्य" पा० पूर्वस्य दीर्घे प्राप्ते विष्टादित्वात् न दीर्घः। छिन्नकर्णरूप दुर्लक्षणयुक्ते। छिन्नकर्णकर्म्मविपाकस्तु हेमाद्रिणोक्तो यथा दृश्यः। [लतायाम्। राजनि०।

छिन्नग्रन्थिनी छिन्ना ग्रन्थिनो संज्ञायां कन्। लिपर्णिकायाम्

छिन्नद्वैध त्रि० छिन्नं द्वैधं संशयोऽस्य। वेदान्तादिश्रवण परिपाकेण निवृत्तसंशये। छिन्नसंशयादयोऽत्र

छिन्ननास त्रि० छिन्ना नासाऽस्य। द्विधा भूतनासिके तस्य रोगस्य कर्म्मविपाको हेमाद्रिणोक्तो यथा दृश्यः। [नादी) राजनि०।

छिन्नपत्री स्त्री छिन्नं पत्रं यस्याः ङीष्। अम्बष्ठायाम्। (आक-

छिन्नमस्ता स्त्री छिन्नं मस्तं यस्याः। दशमहाविद्यान्तर्गते देवीभेदे। "भैरवी छिन्नमस्ता च विद्या धूमावती तथा" तन्त्रसारः।

छिन्नरुह पु० छिन्नः सन् रोहति रुह–क। १तिलकवृक्षे राजनि० २गुडूच्याम् स्त्री अमरः ३स्वर्णकेतक्यां ४शल्लक्यां च स्त्री राजनि०।

छिन्नवेणिका स्त्री छिन्नो वेणो यस्याः संज्ञायां कन्–टापि अतइत्त्वम्। पाठायाम् (आकनादी) शब्दच०।

छिन्नश्वास पु० कर्म्म०। चुद्दश्वासशब्दे २३८३पृष्ठे दर्शित सुश्रुतवाक्योक्ते श्वासभेदे।

छिन्ना स्त्री छिद–क। १गुडूच्यां २वल्लायाञ्च विश्वः।

छिन्नोद्भवा स्त्री छिन्नाथ उद्भवति उद्+भू–अच्। गुडूच्याम् राजनि०।

छिलिहिण्ड पु० पातालगरुडहदे "छिलिहिण्डः परो ह्रदः कफघ्नः पवनापहः" भावप्र० तद्गुणोक्तिः।

छुछुका स्त्री छुछु इत्यव्यक्तशब्दं कायति कै–क पृषो०। छुछुन्दर्याम् (छुँछो) शब्दार्थचि०।

छुछुन्दर पुंस्त्री छुछु इत्यव्यक्तः शब्दोदीर्यतेऽस्मात् दृ–क्र० आदाने अप् पृषो०। (छुँछो) इति ख्याते मूषिकभेदे उन्दुरशब्दे ११८८पृ० सुश्रुतवाक्ये दृश्यम्। "छुछुन्दरेव विड्भङ्गो योवास्यश्रोत्रिजन्मृत्यम्" स्मृ०। स्त्रियां जातित्वात् ङीष्। पृषो० छुछुन्दरिरत्रत्र "मत्स्यछुछुन्दरिमत्कुणगन्धो यथा" सुश्रुतः। "छुच्छुन्दरिः शुभान् गन्धान् (हृत्वा) पलाशान्तु बर्हिणः" मनुः। "पलाशार्क शिखी हृत्वा गन्धांश्छुछुन्दरिः शुभान्" याज्ञ०।

छुच्छु स्त्री छुछुकायाम् "शिवा शृगाली रला छुच्छुः पिङ्गला मट्टगोधिका। शूकरी परपुष्टा च पुंस्कामानस्य वामतः" ह० स० ८६अ० यात्रायां तस्या वामतः शुभदत्वमुक्तम्।

छुट छेदने वा चुरा०उभ० पक्षे तु० कुटा० पर० सक० सेट्। छोटयति ते छुटति। अचुच्छुटत् त अच्छुटीत्।

छुड आदने तु० कु० पर० सक० सेट्। छुडति अच्छुडीत् चुच्छोड [च्छोड।

छुड पिधाने भ्वा० प० सक० सेट्। छोडति अच्छोडीत् चु

छुद्र न० क्षुद–रक् पृषो०। १प्रतीकारे २रक्षो च उणादिको०। [चुच्छोप।

छुप स्पर्शे तु० पर० सक० अनिट्। छुपति अच्छोपीत्

छुप पु० छुप–कर्त्तरि क, यज्ञे क वा। छुपे हुतशेषे हवे २स्पर्शने मेदि०। ३चषके त्रि० आधारे क। ४युद्धे पु० विश्वः।

छुबुक न० चुबुक+पृषो०। चुबुके ओष्ठाधरप्रदेशे। "कर्णाभ्यां छुबुकादधि" ऋ०१०।१६२।१। "छुबुकं व्यपदिशन्त्यस्यै वै प्रतिष्ठा वैश्वानरः" शत० ब्रा० १०।६।१।११।

छुर छेदे भ्वा०पर०सक० सेट्। छोरति अच्छोरीत्। चुच्छोर

छुर लेपने तु० कु० पर० सक० सेट्। छुरति अच्छुरीत्। चुच्छोर छुरितः। "छुरितमिव विदुधनैर्विचित्रैः" ह० स० २४०अ०। "कुसुमलवच्छुरितपर्य्यन्ते पर्य्यङ्कतले" दशकु०। "मनःशिलाविच्छुरिता निषेदुः" कुमा०।

क्षुरा स्त्री क्षुर-क। औषधेषनद्रव्ये सुधायां चूर्णे (कलि-चुन)ह्वारा०।

क्षुरिका स्त्री क्षुर-छेदे क स्वार्थे क टापि अत इत्वम् क्षुर-वा० क्षुन् वा। स्वनामख्याते अस्त्रभेदे।

क्षुरिकापत्री स्त्री क्षुरिकेव पत्रमस्याः ङीष्। श्वेतालतायाम् राजनि०।

क्षुरित त्रि० क्षुर-क्त। १खचिते जटाधरः। २क्लिन्ने १क्लिन्ने च त्रि० "परस्परेण क्षुरितामलच्छवी" माघः।

क्षुरी स्त्री क्षुर-क गौरा० ङीष्। क्षुरिकायाम् अभिधेनौ भरतः।

क्षुरिका स्त्री क्षुरिका+पृषो०। १क्षुरिकार्थे २वस्त्रप्रायां गवि "गोषु ब्राह्मणसंस्थासु क्षुरिकायाश्च भेदने" क्षुरिकाया वस्त्राया गोपीडनार्थं नासाभेदने" कुल्लू०

क्षुरी स्त्री क्षुरी-पृषो०। क्षुरिकायां हेम०।

क्षुद सन्दीपने वा चु० उभ० पक्षे भ्वा० पर० सक० सेट्। क्षुर्दयति ते क्षुर्दति अचिक्षुर्दत्-त अचक्षुर्दत् त अक्षुर्दीत्।

क्षुद देवने दौप्रो च अक० वमने सक० रुधा० उभ० सेट्। क्षुणत्ति क्षुन्ते क्षुत्ते। अक्षुदत् अक्षुदीत्। अक्षुद्दिष्ट क्षुर्दिष्यति-क्षुर्त्स्यति क्षुदित्वा क्षुर्दित्वा क्षुत्वा क्षुद्रः

क्षुप याचने क्षिप० शब्दे सक० वा चुरा० उभ० पक्षे भ्वा० पर० सेट्। क्षुर्पयति ते क्षुर्पति। अचिक्षुपत् त-अच क्षुर्पत् त। अक्षुर्पीत्

क्षेक पु० क्षि-वा० डेकन्। १स्पष्टवक्तरि खगपक्षादौ २नागरे विदग्धे त्रि० मेदि०। विदग्धप्रिये शब्दालङ्काररूपे २अनुप्रासभेदे अनुप्रासशब्दे १७८पृ० दृश्यम्। ४मत्तायां स्त्रियां स्त्री शब्दार्थचि०। [दृश्यम्

क्षेकापह्नुति स्त्री अर्थालङ्कारभेदे। अलङ्कारशब्दे पृ० २६८

क्षेद क्षेदने अदा० चु० उभ० सक० सेट्। क्षेदयति ते अचिक्षेदत् त।

क्षेद पु० क्षिद-भावे घञ् यच् वा। २क्षेदने "अभिघ्नाक्षेदपातानां क्रियन्ते नन्दनद्रुमाः" कुमा०। कर्त्तरि अच्। २क्षेदके, भावे "क्षेदं गुणं गुणं क्षेदमिति" लीलावती। कर्म्मणि घञ्। ३खण्डे, त्रि० "बलाहकच्छेदविभक्तरागाम्" कुमा०। "विसकिसलयच्छेदपाण्डवेवनाः" मेघः। खण्डार्थस्य तु विधिकृत्वेन स्त्रियां गौरा० ङीष्। ततोनिमर्हति उञ्। क्षैदिक नित्यक्षेदार्हे वेतसादौ।

क्षेदन न० क्षिद-भावे ल्युट्। १क्षिपाकरणे "करपाददतोभङ्गे क्षेदने कर्णनासयोः" याज्ञ०। करणे ल्युट्। २क्षेदनसाधने "नहि शस्त्रं शस्त्रविदां न शस्त्रं क्षेदनं स्मृतम्" भा० स० ५४अ०। कर्त्तरि ल्यु। ३क्षेदके त्रि०

क्षेदनीय पु०क्षेदनाय जलकासुप्यभेदनाय हित-छ। १कतकवृक्षे राजनि०। क्षिद-कर्म्मणि अनीयर्। २क्षेद्ये त्रि०

क्षेदादि पु० नित्यमर्हतीत्यर्थे ठञ्प्रत्ययनिमित्ते शब्दगणे स च गणः "क्षेद भेद द्रोह दोह नर्त्त कर्ष तीर्थ संप्रयोग विप्रयोग प्रयोग विप्रकर्ष प्रेषण संप्रश्न विप्रश्न विकर्ष प्रकर्ष (विराग विरङ्ग च)" पा०ग०सू०। क्षैदिकः

क्षेदि पु० क्षिद-इन्। १वज्रे उज्ज्व०। २क्षेत्तरि त्रि०। २वर्द्धकौ पु० धरणिः। [हेमच०।

क्षेदित त्रि० क्षेदो जातोऽस्य तारका० इतच्। क्षिप्राक्षते

क्षेद्य त्रि० क्षेत्तुं योग्यः कर्म्मणि योगप्रार्हे यत्। भेत्तुं योग्ये "शीर्षं क्षेद्यमतोऽहं स्वाम्" भट्टिः।

क्षेद्यादिरोगप्रतिषेधोपायाः सुश्रुतोक्ता यथा "अथातः क्षेद्यादिरोगप्रतिषेधं व्याख्यास्यामः। स्निग्धं भुक्तवतो ह्यस्य रुपविष्टस्य यत्नतः। संरोधयेत् नयनं भिषक्शूर्पेण वायवैः। ततः संरोधितं तूर्णं सुस्निग्धं परिवर्त्तितम्। अर्म्म यत्र बलीजातं तत्रैतच्छुगयेद्भिषक्। अपाङ्गं प्रेक्षमाणस्य पक्ष्मणेन समाश्रितः। सुचुरुग्राम्रस्य मेधावी क्षुद्रोक्षुद्रेण वा पुनः। नचोत्तापयता शिरं क्रार्य्यमभ्युद्धृतं तु तत्। शस्त्रपातभयाच्चास्य वर्त्मनी याकृष्येद्दृढम्। ततः प्रथिविलीभूतं स्निग्धैरेव विलम्बितम्। छिन्द्यान्मण्डलाग्रेण तीक्ष्णेन परिशोधयेत्। विसर्प्पं सर्वतश्चापि कृष्णाच्छुक्लाच्च मण्डलात्। नीत्वा कनीन कोपान्तं छिन्द्याद्वातिकनीनकम्। चतुर्भागस्थिते मांसे नाचि व्यापत्तिमर्च्छति। कनीनकवधादस्य नाडी चाप्युपजायते। क्षीणच्छेदात्मुनर्द्धिं शीघ्रमेवाधिगच्छति। अर्म यत्कालवद्ग्रापि तदप्युद्धार्य्य लम्बितम्। छिन्द्राद्वक्रेण शस्त्रेण वर्त्म शुक्लान्तमाश्रितम्। प्रतिसारणमङ्गेषु ततः कार्य्यमनन्तरम्। यवनालस्य चूर्णेन त्रिकटोशीरवणस्य च। स्वेदयित्वा ततः पश्चाद्भीषयात् कुशलो भिषक्। देशर्तुबलकालज्ञः स्नेहं दत्त्वा यथोचितम्। वृषवत् संविधानन्तु तस्य कुर्यादतःपरम्। त्रिरात्रादूर्द्ध्वं करस्नेहं दत्त्वा शोधनमाचरेत्। करञ्जबीजामलकसघृतैः साधितं पयः। हितमाश्योतनं स्नेहे हिरण्यः क्षौद्रसंयुतम्। मधुकोत्पलकिञ्जल्कदूर्वा-

कण्टकैश्च मर्दनम्। प्रलेपः सप्ततः पीतः क्षीरपिष्टः प्रशस्यते। लेखाञ्जनैरपहरेदर्म्मशेषं भवेदादि। अर्म्म चाल्पान्द्रिनिभद्रोहं रक्तमथापि वा। धूसरन्तु यद्यापि शुक्लवत्तदुपाचरेत्। चर्म्माभ्यन्तरं यत्तु स्नायुमांसधनावृतम्। छेद्यमेव तदर्म्म स्यात्लक्ष्णमण्डलमेव यत्। विशुद्धवर्णसङ्किष्टं क्रियाक्षमचिरतक्षमम्। छिन्नेऽर्म्मणि भवेत्तस्य व्यथावाक्षमनुपद्रवम्। सिराजाले सिरायान्तु कठिनास्राव बुद्धिमान्। उद्धिखेन्मण्डलाग्रेण वडिशेनावलम्बिताः। सिरासु पिडका जाता या न सिध्यन्ति भेषजैः। अर्म्मवन्मण्डलाग्रेण तासाञ्छेदनमिष्यते। रोगयोश्चैतयोः कार्य्यमर्म्मोक्तं प्रतिसारणम्। विधिरापि यथादोषं लेखनद्रव्यसम्भृतः। मन्थौ संस्वेद्य शस्त्रेण पर्वणीकां विचक्षणः। उत्तरे च विभागे च वडिशेनावलम्बिताम्। छिन्द्यात्ततोऽर्द्धमध्ये स्यादन्यनाडी ह्यतोऽन्यथा। प्रतिसारणमत्रापि सैन्धवक्षौद्रमिश्रितं। लेखनीयानि चूर्णानि व्याधिश्रेष्ठस्य भेषजम्। शङ्खं सस्तद्फेनञ्च मण्डूकीञ्च ससद्दलाम्। स्फटिकं कुरुविन्दञ्च प्रवालाभ्रलवङ्गधा। वैदूर्य्योपलकं सक्षारमयस्ताम्बरजांसि च। समभागानि सम्मिश्र सार्द्धं क्षौद्रेण तं। चूर्णाञ्जनं कारयित्वा भाजने मेषसङ्गजे। संस्थाप्योभयतः कालमञ्जयेत्ततं बुधः। अर्म्माणि पिडकां हन्यात्सिराजालानि तेन वै। अर्शस्तथा यच्च नाम्ना शुष्कार्शोऽर्बुदमेव च। अभ्यन्तरं वर्त्म यथा विधानं तेषु वक्ष्यते। वर्त्मोपखेद्य निर्भुज्य सूच्योत्क्षिप्य प्रयत्नतः। मण्डलाग्रेण तीक्ष्णेन मूले छिन्द्याच्छिरावरः। ततः सैन्धवकासीसक्षाराभिः प्रतिसारयेत्। स्थिते च रुधिरे वर्त्म दहेच्छस्यकशलाकया। क्षारेणावलिखेच्चापि व्याधिश्रेष्ठो भवेदादि। तीक्ष्णैरुभयतो भागैस्ततो दोषमधिच्छिमेत्। वितरेच्च यथादोषमभिष्यन्दक्रियाविधिम्। शस्त्रकर्म्मण्युपरते मासञ्च स्नायुबन्धितः"।

**छेमण्ड** पु० छमण्ड+पृषो० खत एत्वम्। मातृपितृहीने बालके (छाँड) उच्छृङ्खलः।

**छेलक** पुंस्त्री छो-कर्म्मणि बा० डेलकन्। १छागे २छाग्यां स्त्री टाप्। भावप्र० छागशब्दे दृश्यम्।

**छेलु** पु० छो-बा० डेचु। सोमराज्याम् शब्दच०

**छैदिक** त्रि० छेदं नित्यमर्हति ठञ्। नित्यछेदार्हे वेतसे पु० त्रि० कौ०।

**छो** छेदने दि० पर० सक० अनिट्। छ्यति अच्छात्-अच्छासीत्। चच्छौ। छातः-छितः। [ देखोया)।

**छोटिका** स्त्री छुट-ण्वुल्। तर्ज्जन्यङ्गुष्ठध्वनौ (तुडी-

**छोटिन्** पु० छुट-णिनि। कैवर्त्ते त्रिका०।

**छोरण** न० छुर-भावे ल्युट्। १परित्यागे त्रिका०।

**छोलङ्ग** पु० छुर-वा० अङ्गच रस्य लः। मातुलुङ्गे (टाबालेबु) शब्दरत्ना०।

**छोहारा** स्त्री द्वीपान्तरखर्जूरिकायाम्। "खजूरी गोस्तनाकारा परद्वीपादिहागता। जायते पश्चिमे देशे सा छोहारेति कीर्त्यते" भावप्र० खर्जूरशब्दे २४६८पृ० तद्गुणा दृश्याः।

**छ्यु** गतौ भ्वा० आत्म० सक० अनिट्। छ्यवते अच्छ्योष्ट योश्चङि अचि(चु)च्छ्यवत् त। योः सनि चु(चि) च्छ्यावयिषति ते।

इति वाचस्पत्ये छकारादिशब्दार्थनिरूपणम्।

## ज

जकारो व्यञ्जनवर्णभेदः स्पर्शसंज्ञस्तालव्योष्मस्थानं तालु, आभ्यन्तरप्रयत्नः जिह्वामध्यभागेन तालुस्पर्शः बाह्यप्रयत्नाश्च घोषसंवारनादाः अल्पप्राणश्च। मातृकान्यासेऽस्य वाममणिबन्धे न्यासः। तन्त्रोक्ता अस्य वाचकशब्दा यथा "जयतुरानन्दः शूली भोगी च विजया स्थिरा। बलदेवो जयो जेता धातकी सुसखी विभुः। लम्बोदरी स्मृतिः शाखा सुप्रभा कर्णिकाधरा। दीर्घबाहुरुचिर्हंसो नन्दी तेजाः सुरार्चितः। जवनो वेगितो वाममणिबन्धपदात्मकः। ब्रह्मारुद्रेश्वरो वेशी चाभोदो मदविह्वलः" वर्णोद्धारतन्त्रम्। अस्य ध्येयरूपं यथा "जकारं परमेशानि! वा स्वयं मध्यकुण्डली। शरच्चन्द्रप्रतीकाशं सदा त्रिगुणसंयुतम्। पञ्चदेवमयं वर्णं पञ्चप्राणमयं सदा। त्रिशक्ति सहितं वर्णं त्रिबिन्दुसहितं प्रिये!" कामधेनुतन्त्रम्। काव्यस्य प्रथमविन्यासफलं दुर्ग० र० टी० उक्तं "जोमित्यलाभमित्यादि"।

ज पु० जि-जन-जु-वा ड। १स्मरशुक्रे २जन्मनि ३पितरि ४जनार्दने त्रि० मेदि० ५विष्णौ ६भुक्तौ ७तेजसि ८पिशाचे च। शब्दरत्ना०। ९वेगे एकाक्षरकोषः "जो गुरुमध्यगतः" इत्युक्ते गुरुमध्ये प्राप्तयोर्लघुद्वययुक्ते छन्दःशास्त्रप्रसिद्धे (।ऽ।) त्रिवर्णे १० गणे तस्य काव्यप्रथमविन्यासे। "भुजगो-रुजं ज" इत्युक्तेः रोगःफलम् सर्पोऽस्य देवः" ११जाते त्रि० "प्रावृट्शरत्कालदिवां जे" पा० अलुक् स०। प्रावृषिजः शरदिजः कालेजः दिविजः। "विभाषा वर्षक्षरशरेत्यादि" पा०। वर्षेज वर्षज इत्यादि। "तत्पुरुष इति वक्तव्यम्" पा०। मनसिजः मनोजः सरसिजं सरोजमित्यादि। जरायुजः अण्डजः स्वेदजः उद्भिज्जः"। १२वेगिते १३जेतरि त्रि० शब्दरत्ना०। [कुसुम्भे न० मेदि०]

जकुट पु० जं जातं कुटति कुट-क। १मलयाचले २वार्त्ताकौ

जक्ष भक्षे सक० हासे अक० जक्षा० सपादि० प० सेट्। सपादित्वं स्वादावन्तर्गणसूत्रेण भक्षादेः सार्वधातुकस्य ट्वं। जक्षिति जक्षितः अभ्यस्तसंज्ञः तेन जक्षति। अजक्षीत् "उतैव स्त्रीभिः सह मोदमानो जक्षद्वते वापि भयानि पश्यन्" शत०ब्रा० १४।७।१।१४। "अन्नाद्यं कविदन्नाति जक्षत्यां सह जक्षिति" भाग० ४।२५।५७। "हविर्जक्षिति निःशङ्कोमखेषु भवानसौ" जक्षिमोऽनपराधेऽपि" भट्टिः। अक्षान्तःस्यादितां कोचित् मन्यते। "वक्ष्यतामिति वेऽभ्युक्ताश्चे वै यक्षास्तु यक्षणात्" विष्णुपु० यक्षनामनिरुक्तौ तथादर्शनात्।

जक्ष दाने भ्वा० इदित् आ०सक०सेट्। इदित्करणसामर्थ्यात् अनुपधस्यापि नुम्। जङ्क्षते अजङ्क्षिष्ट। मित्। अजङ्क्षि अजाङ्क्षि (जा) जङ्क्षम्। इदित्करणात् जङ्क्षते।

जक्षण न० जक्ष-भावे ल्युट्। भक्षणे हेमच०।

जगच्चक्षुस् पु० जगतां चक्षुरिव प्रकाशकत्वात्। सूर्ये हेमच०

जक्षादि पु० "जक्ष जाग्ट दरिद्रा च चकासिः शासिरेव च। दीधी वेवी च विप्रेदो जक्षादिः षड्कोगणः" इत्युक्ते अभ्यस्तसंज्ञे धातुपञ्चके "नाभ्यस्ताच्छतुः" पा० जक्षत् जाग्यत् इत्यादि।

जगत् पु०गम-क्विप् नि०हित्वम् तुक् च। १वायौ २जङ्गमे त्रि० मेदि०। ३विश्वे न० अमरः। ४लोके सचराचरे प्रपञ्चभूते भोगोपयोगिपरिकरसहिते मायामये संसारचक्रे यथोक्तमभियुक्तैः "न निरूपयितुं शक्या विस्पष्टं भासते च या। सा मायेतीन्द्रजालादौ लोकाः संप्रतिमेदिरे। स्पष्टं यथा जगद्देवमर्त्यं तद्विरूपणम्। मायामयं जगत् भाति बीजस्वापप्रपातवत्"। "जगद्योनिरयोनित्वं जगदन्योनिरन्यकः। जगदादिरनादित्वं जगदीशोनिरीश्वरः" कुमा०। "जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ" रघुः। "यदा स देवो जागर्त्ति तदेदं चेष्टते जगत्" मनुः। लोके "जगत्यपर्याप्तसहस्रभानुना" "युगान्तकालप्रतिसंहृतात्मनोजगन्ति यस्यां सविकाशमासत" माघः। जङ्गमे "जगतां तस्थुषश्च" सन्ध्यामन्त्रः। किबन्तत्वात् जगत् जगतौ इत्यादिरूपम् "गृधिवन्दिशुभ्यश्छ-गच्छतवच्च" पा० निपातनपक्षे जगन् जगन्तौ इत्यादिरूपमिति केचिदाहुस्तन्त्रिन्त्यम् तस्य शतृतुल्यत्वेऽपि "नाभ्यस्ताच्छतुरिति" पा० निषेधात् न नुम्। शतृतुल्यत्वयोजनं तु स्त्रियां ङीप् जगती [हेमच०।

जगत्कर्त्तृ पु० ६त०। १ईश्वरे तदभेदात् २चतुर्मुखादौ

जगच्छन्द पु० जगती छन्दोऽस्य बहु० नि० पुंवद्भावः। जगत्या छन्दसा स्तुत्ये। "स्वरोऽसि सवोऽसि जगच्छन्दाः" ता० ब्रा० १।५।१५।

जगत्पति पु० ६त०। १परमेश्वरे तदभेदात् २हरिहरादौ "यदा च तस्याधिगमे जगत्पतेः" कुमा० जगदीशादयोऽत्र। "जगदीशो निरीश्वरः" कुमा०

**जगत्प्राण** पु० जगत् प्राणित्वात् प्र+अन्–अपादाने घञ् ६त०। वायौ अमरः "जगत्प्राण ! प्राणानपहरसि किन्ने व्यवसितम्" मा० द०।

**जगत्साक्षिन्** पु० ६त०। १ईश्वरे २सूर्य्ये च हेमच०।

**जगत्सेतु** पु० जगतः सेतुरिव सर्वमर्य्यादाकारकत्वात्। परमेश्वरे जगतां सन्धारणहेतुत्वादसंभेदकरत्वाच्च वर्णाश्रमादीनां, "एष सेतुर्विधरणो लोकानामसंभेदाय" श्रुतेस्तस्य तथात्वम्। ऋलुक् समा०। जगतः सेतुरत्र "औषधं जगतः सेतुः" विष्णुस०।

**जगती** स्त्री गम–किप् "पृषद्बृहन्महज्जगच्छतवत्" पा० शब्दतुल्यत्वात् ङीप्। १भुवने। २पृथिव्यां "आर्य्यभट्टमते भूमेश्चलत्वात् गतिमत्त्वेन तथात्वम्। अन्यमते जगदाधारत्वात् तस्याप्यतथात्वमिति भेदः। ३छादयाक्षरप्रादके छन्दोभेदे छन्दःशब्दे उदाह्यम्। ४जम्बुद्वीपे हेमच०। ततोभवादौ उत्सा० अञ्। जागत जगतीभवादौ। स्त्रियां टाप्। छन्दःशब्दे उदा०।

**जगदम्बा** स्त्री ६त०। दुर्गायां स्वार्थे क। जगदम्बिकायत्र। "सृष्टिस्थितिविनाशानां विधात्री जगदम्बिका" देवीगीता। जगद्धात्रीशब्दे उदा०

**जगदादि** पु० ६त०। १परमेश्वरे। २तद्भेदाच्चतुराननादौ "जगदादिरनादिरूपम्" कुमा०

**जगदादिज** पु० हिरण्यगर्भरूपेण जगतामादौ जायते जन–ड। परमेश्वरे। "भ्राजिष्णुर्भोजनं भोक्ता सहिष्णुर्जगदादिजः" विष्णुस०।

**जगदाधारः** पु० ६त०। १वायौ शब्दच०। २जगदाश्रये काले च "कालोहि जगदाधारः" ति० त०। जगदाश्रयादयोऽप्यत्र "अन्यानां जनकः कालो जगतामाश्रयोमतः" भाषा०।

**जगदायु(युस्)** पु० जगतामायुःसाधनत्वात् आयुः पृषो० वा सलोपः। वायौ। "अहं केशरिणः चेत्ते वायुना जगदायुना" भा०व० १४७अ०। "वायुना हिपदां श्रेष्ठः कथितो जगदायुषा" भा० आ० २४०अ०।

**जगद्गुरु** पु० ६त०। १परमेश्वरे। "सहि पूर्व्वेषामपि गुरुः कालेनानवच्छेदात्" पात० सू० तस्य सर्वगुरुत्वसङ्गतम् तद्भेदात् २शिवादौ "श्रुयते स्तुतयः सर्वं मानयित्वा जगद्गुरुम्" (शिवम्) कुमा०। "मेने परार्द्धमात्मानं गुरुत्वेन जगद्गुरोः" रघुः। ३जगतामुपदेष्टरि नारदादौ। "नारदस्तु जगतोगुरुरद्यैर्विक्षयाय गगनं विचलद्भिः" नैष० जगद्गुरोगुरुः पञ्चमीत०। ४जगद्गुरौ गुरुद्रव्ये च।

**जगद्गौरी** स्त्री जगतस्तु मध्ये गौरी। मनसादेव्यां शब्दर०।

**जगद्दीप** पु० जगतोदीपइव प्रकाशकत्वात्। परमेश्वरे "तस्य भासा सर्वमिदं विभाति" श्रुतिः तद्भेदात् २शिवादौ "जगद्योनिं जगद्दीपं जयिनं जगतोगतिम्" भा० द्रो० २०१ शिवस्तवः।

**जगद्धात्र** पु० ६त०। १परमेश्वरे। दुर्गामूर्त्तिभेदे स्त्री ङीप्। तस्याः पूजाकालव्यवस्था।

निगमकल्पसारे ज्ञानसारस्वते तन्त्रे च दुर्गाकल्पे "श्रीशिव उवाच। प्रसीद जगतां मातर्ज्ञानविस्तारकारिणि !! अतएव महेशानि ! तवाहं शरणागतः। त्वया यत् कथितं पूर्वं तत्सर्वञ्च श्रुतं मया। जगद्धात्री महादुर्गा चतुर्वर्गफलप्रदा। तस्याः पूजाविधिदिनं कालस्तत्र प्रकाशितम्। तदेव कथयेशानि ! श्रोतुमिच्छामि साम्प्रतम्। श्रीदेव्युवाच। कथयामि महेशान ! सावधानावधारय। तस्याः पूजाविधिदिनं समयं भावभेदतः। कार्त्तिके शुक्लपक्षे च या दुर्गानवमी तिथिः। सा प्रशस्ता महादेव ! महादुर्गाप्रपूजने। प्रातश्च सात्विकी पूजा मध्याह्ने राजसी मता। सायाह्ने तामसी पूजा त्रिविधा परिकीर्त्तिता। जयन्त्यादिभिर्देव ! इति त्रैकालिकी मता। कथान्यत् संप्रवक्ष्यामि शृणुष्व परमेश्वर !। सप्तम्यादि नवम्यान्तं पूजाकाल इतीरितः। त्रिदिने त्रिविधा पूजा दशम्यान्तु विसर्ज्जयेत्। पूजा परेऽह्नि देवेश ! तत्रायत्र विसर्जनम्। वेधितायाः प्रकारेण तत्र पूजा प्रकीर्त्तिता। शिव उवाच, त्रिसन्ध्याव्यापिनी सा तु यदि स्यान्नवमी तिथिः। त्रिकाले त्रिविधा पूजा कथं देव्या जगन्मयि !। कथयस्व महेशानि ! इति मे संशयोहृदि। श्रीदेव्युवाच। सा प्रातर्व्यापिनी यत्र वासरे नवमी तिथिः। त्रिसन्ध्यं पूजयेत्तत्र वासरे जगदम्बिकाम्। मुहूर्त्तव्यापिनी चापि तत्र याह्या महेश्वर !। एककाले त्रिधा पूजां साधकोनैव कारयेत्"।

तत्पूजायां दशम्यां बलिदाननिषेधः तन्त्रान्तरे "श्रीपार्व्वत्युवाच। दशम्यां बलिदानन्तु निषिद्धं जगदीश्वर !। कथं त्रिकालं पूजा सा सम्भवेत् परमेश्वर !। शिव उवाच "नवमीतिथिमाश्रित्य यत्र पूजाविधिर्भवेत्। निषिद्धं बलिदानन्तु दशम्यां तत्र सुन्दरि !। नवमीदिनमाश्रित्य पूजाविधिरितीरितः। दशम्यां

वलिदानन्तु निष्फलं नात्र पार्वति"। ज्ञानार्णवतन्त्रे पूर्वं प्रकारसङ्गा "सङ्क्रान्त्यधिनी चापि प्रातर्वेद्धनवमी तिथिः। तस्मिन् पूजनं कार्य्यं त्रिसन्ध्यं वरवर्णिनि!। त्रिकालं पूजयेत्तत्र नैककाले कदाचन"। कात्यायनीतन्त्रे ७पटले। "कृष्णराश्रिगते चन्द्रे नवम्यां कार्त्तिकस्य च। उपवासेोदितो भानुर्दुर्गामाराध्य यत्नवान्। पुत्रारोग्यं बलं लेभे लोकसाक्षित्वमेव च। तां तिथिं प्राप्य मनुजः शनिभौमदिने यदि। प्रपूजयेन्महादुर्गां धर्म्मकामार्थमोक्षदाम्"। शक्तिसङ्गमतन्त्रे "कार्त्तिकस्य सिते पक्षे नवम्यां जगदीश्वरीम्। त्रिकालमेककालं वा वर्षे वर्षे प्रपूजयेत्। कृष्णमयीं प्रतिमां शक्त्या जगद्धात्र्या विधानतः। पूजयित्वा परदिने प्रतिमां तां विसर्ज्जयेत्। पुत्रपौत्रधनैश्वर्य्यं संयुताऽस्य भवेद्ध्रुवं"। तन्त्रान्तरे। "कुजवारे युगाद्यायां नवम्यान्तु जगत्प्रसूः। प्रादुर्भूता महेशानी तत्र तां परिपूजयेत्" तन्त्रान्तरे। "त्रिकालं पूजयेद्दुर्गां मूलेनैकाक्षरेण च(दुँ)। नानारत्नविधानेन गीतवाद्यपुरःसरम्। कार्त्तिकस्य सिते पक्षे नवम्यान्तु विशेषतः। कृत्वैवं साधकश्रेष्ठो लभेद्राज्यमकण्टकम्"। योगिनीतन्त्रे "कार्त्तिकेऽमलपक्षे तु नवम्यान्तु विशेषतः। उद्धृत्यान्तु जगद्धात्रीं पूजयेद्धीपमालया" आगमतत्त्वसारे "कार्त्तिकेऽमलपक्षे तु नवम्यां भौमवासरे। चाविर्भूता जगद्धात्री युगादौ दैत्यनाशिनी"। उत्तरकामाख्यातन्त्रे "कार्त्तिके शुक्लपक्षे तु त्रेतायां प्रथमेऽहनि। त्रिसन्ध्यं पूजयेद्देवीं दुर्गां सम्यक्प्रहर्षये"। कुब्जिकातन्त्रे "कार्त्तिके शुक्लपक्षे तु नवम्यां जगदम्बिकाम्। दुर्गां प्रपूजयेद्भक्त्या धर्म्मकामार्थसिद्धये। दुर्गाकल्पे विद्योत्पत्तौ "कार्त्तिके शुक्लपक्षेऽह्नि भौमवारे जगत्प्रसूः। सर्वदेवहिताय दुष्टशमनाय च। चाविरासीत् जगच्चान्त्ये युगादौ परमेश्वरी"। वृतकालविवेकधृतवचनम् "कार्त्तिकेऽमलपक्षस्य त्रेतायां नवमेऽहनि। पूजयेत्तां जगद्धात्रीं सिंहपृष्ठे निवेदधीम्"। स्मृतिः। "युगाद्या वर्षवृद्धिश्च सप्तमी पार्थतोप्रिया। रवेरुदयगोत्तमे न तत्र तिथियुग्मता"। कृत्यतत्त्वार्णवे "कार्त्तिकेऽमलपक्षे तु युगाद्या नवमी स्मृता। पूर्वाह्णसमये तत्र पूजाविधिरिहोदितः"। कृत्यतत्त्वार्णवे भविष्यपुराणम् "कार्त्तिके शुक्लपक्षे तु युगाद्या नवमी स्मृता। पूर्वाह्ण समये काष्ठालिका परदिने यदि। तत्र पूजादिकं कुर्य्यात् पिण्डनिर्वपणादते"। स्मृतिसागरे "कार्त्तिकस्य युगाद्यायामष्टम्यां वेदुषाम्"। ततश्च उक्तवचनेषु तत्तिथेर्युगादित्वेन कीर्त्तनात् तत्पूजायाश्च युगाद्यादिनकर्त्तव्यत्वेन विधानात् पूर्वापरदिनयोस्तस्याः सम्बन्धे परदिन एव कर्त्तव्यता न तु युग्मशास्त्रेण अष्टमी विद्धाया ग्राह्यता युगाद्या वर्षवृद्धिश्चेत्यादि वचनात् यत्तु "श्रावणी दौर्गनवमी दुर्गा चैव हुताशिनी। पूर्वविद्धैव कर्त्तव्येत्यादि" वचनं तत् एतद्विषय नवमीकर्त्तव्यदुर्गाव्रतपरम् तच्च व्रतं व्रतशब्दे वक्ष्यमाणं द्रष्टव्यम्। जगद्धात्रीविद्योत्पत्तिमाह कात्यायनीतन्त्रे ७६पट०। "पार्वत्युवाच। भगवन्! प्राणनाथेश! सर्वतत्त्वविशारद!। श्रुता कात्यायनीविद्यासम्भवोत्पत्तिरुत्तमा। त्रिलोचन!। महादुर्गाजगद्धात्रीविद्योत्पत्तिमथेदृशीम्। तत् सर्वं ब्रूहि भगवन्! कृपया परमेश्वर!। इति देवी प्रश्ने "श्रीशिव उवाच। शृणु पार्वति! वक्ष्यामि रहस्यं परमाद्भुतम्। यत् श्रुत्वा लभते देवि! सौभाग्यसुखसम्पत्तिम्। पुरा पुरन्दरसखाः स्वैश्वर्य्यमभिमानिनः। प्राहुः किमीश्वरोऽस्माकमतिरिक्त सुरा इति। अथ दुर्गा जगन्मातां ज्ञात्वा चैतन्यरूपिणी। एतेषां धर्म्मसेतूनामित्यादीनां नियन्त्रणम्। करिष्यामीति निश्चित्य ज्योतीरूपं दधारसा। तेषामाविर्भूद्दुर्गा जगद्धात्री जगन्मयी। कोटिसूर्य्यप्रतीकाशं चन्द्रकोटिसमप्रभाम्। ज्वलन्तं पर्वतमिव सर्वलोकभयङ्करम्। तद्दृष्ट्वा सुराः सर्वे भयमापुर्महौजसः। किमेतद्य विनिश्चेतुं शक्ताः स्मो वयं सुराः। वायुमाहूय समाज्ञप्य किमेतत् परमाद्भुतम्। विजानीहि महावीर मातरिश्वन्! दिशां पते!। ततो वायुर्द्रुतं तत्र गत स्तेजोऽन्तिकं ततः। तस्मिन्निकषपार्श्वात् प्राह तेजो मयी ततः। बलवन्! कस्त्वमायातो वीर्य्यं किञ्चास्ति वा त्वयि। आदातुं शक्यते सर्वं पृथिवीतलसम्भवम्। इति प्रत्युक्तवान् वायुः सर्वं तत्रैव तिष्ठति। आदत्स्वैतत् तृणमिति निदधौ वायवे तृणम्। वायुः सर्वप्रयत्नेन नादातुं तत्तृणोऽभवत्। ततो देवाः प्राहुरग्निं भीता उद्विग्नमानसाः। वह्ने! एतद्विजानीहि किमेतत् कर्म चाद्भुतम्। इत्युक्तो देवताबृन्दैरग्निस्तेजोऽन्तिकं गतः। अमरो जातवेदा वा तेजोवागित्युवाच तम्। स प्रोक्तवानग्निरहं सर्वदाहकशक्तिकः। दहैतत् तृणमित्युक्त स्तृणं ददौ। अग्निः सर्वप्रयत्नेन दग्धुं नैतत् तृणोऽभवत्। ततो निवृत्ते वह्निर्भूत्वा सोऽपत-

पान्वितः। एकत्रस्थाः सुराः सर्वे मन्त्रयामासुरुत्तमम्। इयमेवेश्वरी नूनं स्तोष्यामोनेश्वरावयम्। इति निश्चित्य सुधियस्तुष्टुवुः परमेश्वरीम्। प्राञ्जलैर्वचनाः सर्वे त्वमीशा नेश्वरा वयम्। ईश्वरत्वाभिमानेन यदस्माकं सुदुष्कृतम्। क्षन्तुमर्हसि तत् सर्वं जयया जगदम्बिके। तवरूपं सुगोप्यं वन्मङ्गल्यं सर्वमङ्गलम्। तदुद्दिदृक्षुं वयमिच्छामो देहि दर्शनमुत्तमम्। इत्युक्तानां सुबुद्धीनामाविरासीच्चिदाम्बरे। तेजस्वन्मूर्त्तिते तस्मिन् चमत्कारि कलेवरे। सुमेरोपरि सुखेरा सर्वालङ्कारभूषिता। चतुर्भुजा महादेवी रक्ताम्बरधरा शुभा। बालार्क सदृशी देहे नागयज्ञोपवीतिनी। त्रिनेत्रा कोटिचन्द्राभा देवर्षिगणसेविता। दर्शयामास देवानामेवं रूपं जगन्मयी। ततस्तां तुष्टुवुर्देवा जगद्धात्रीं महेश्वरीम्। वरं प्रापुः सुरगणायद्वेष्टं त्रिदशालये। तत्रैवान्तर्हिता देवी महादुर्गा जगन्मयी"। इयमेव कथा प्रायशः केनोपनिषदि स्थिता तद्भाष्यञ्च इन्द्रशब्दे ८४२ पृ० दर्शितम्। इयांस्तु विशेषः तत्र इन्द्रादिप्रबोधनाय प्रादुर्भूतया ब्रह्मशक्त्या हैमवत्या ब्रह्मभक्त्यैव इन्द्रादीनामसुरजयशक्तिरुक्ता अत्र तु शक्तिशक्तिमतोरभेदेन जगद्धात्रीरूपेणाविर्भूताया देव्या माहात्म्योक्तिरिति।

**जगद्बल** पु० जगतां बलमत्वात्। वायौ त्रिका०। तस्यैव व्यानरूपस्वदृत्तिभेदात् सर्वबलक्रियाहेतुत्वस्य भङ्ग्या छान्दोग्ये उक्तत्वात् तस्य तथात्वम् यथा "अथोयान्यन्यानि वीर्य्यवन्ति कर्म्माणि यथाग्नेर्मन्थनमाजेः सरणं दृढस्य धनुष आयमनमप्राणन्नप्यनसानि करोत्येतस्य हेतोर्व्यानमेवोद्गीथमुपासीत"। बलस्य च सर्वक्रिया हेतुत्वं छान्दोग्ये भूमविद्यायामुक्तं यथा "बलं वाव विज्ञानाद्भूयोऽपि ह शतं विज्ञानवतामेको बलवानाकम्पयते स यदा बली भवत्यथोत्थाता भवत्युत्तिष्ठन् परिचरिता भवति परिचरन्नुपसत्ता भवत्युपसीदन्द्रष्टा भवति श्रोता भवति मन्ता भवति बोद्धा भवति कर्त्ता भवति विज्ञाता भवति बलेन वै पृथिवी तिष्ठति बलेनान्तरिक्षं बलेन द्यौर्बलेन पर्वता बलेन देवमनुष्या बलेन पशवश्च वयांसि च तृणवनस्पतयः श्वापदान्याकीटपतङ्गपिपीलकं बलेन लोकस्तिष्ठति बलमुपास्स्वेति"। सर्वक्रियाणां वायुकार्य्यत्वं च श्रुतौ दर्शितं यथा "वायव्याः स्वर्गः स्वर्गेन्द्रियं सर्वचेष्टादयः सर्वशरीरस्पन्दनं लघुता च" तेन सर्वचेष्टानां वायुकार्य्यत्वोक्त्या बलस्य च तत्र हेतुत्वोक्त्या च वायोरेव बलहेतुत्वमवसीयते।

**जगद्योनि** स्त्री जगतां योनिरिवोत्पत्तिस्थानत्वात्। १परमेश्वरे तस्य जन्मादिहेतुत्वात् तथात्वम्। २शिवे ३विष्णौ ४चतुर्मुखे तु तदभेदोपचारात् "जगद्योनिरयोनिस्वम्" कुमा० ब्रह्मस्तवे। "जगद्योनिं जगद्बीजं जयिनं जगतोगतिम्" भा० मो० २०अ० शिवस्तवे। "नारायणं जगद्योनिं पुराणं पुरुषं ध्रुवम्" हरिव० १०७अ०। विष्णुस्तवे। ५पृथिव्यां शब्दच० तस्याः भूतचतुष्टयोत्पत्तिस्थानत्वात् तथात्वम्।

**जगद्धात्री** स्त्री जगन्ति दधाति धारयति दध-ञ्यच्। सर्वंधरायां मेदिन्याम् त्रिका०।

**जगद्विनाश** पु० जगतोऽखिलकर्म्मवतो विनाशोऽत्र। कल्पान्ते प्रलयकाले। प्रलये च सर्वक्रियाशून्यत्वं यथाह मनुः। "यदा स्वपिति शान्तात्मा तदा सर्वं निमीलति। तस्मिन् स्वपिति तु स्वस्थे कर्मात्मानः शरीरिणः। स्वकर्म्मभ्योनिवर्त्तन्ते मनश्च ग्लानिमृच्छति। युगपत्तु प्रलीयन्ते यदा तस्मिन् महात्मनि। तदायं सर्वभूतात्मा सुखं स्वपिति निर्वृतः। तमोऽयन्तु समाश्रित्य चिरन्तिष्ठति केवलम्। न च स्वं कुरुते कर्म तदोत्क्रामति मूर्त्तितः"।

**जगन्नु(द्रु)** पु० जगता नम्यते नम-वा० कर्म्मणि डु वा पृषो०तनोपः। १जन्मनि वैश्वानरे २वह्नौ च मेदि०। विश्वे जगद्रु इति पाठस्तत्रार्थे। तत्र जन्मोत्थेतनत्वेन जगतां नम्यमानत्वात् वह्नेस्तु सर्वैर्नम्यमानत्वात् तथात्वम्

**जगन्नाथ** पु० ६त०। १परमेश्वरे "एष सर्वेश्वरः" इत्यादिश्रुतेस्तस्य सर्वेश्वरत्वात् तथात्वम्। तद्भेदात् २विष्णौ। खर्ग०अच्। ३तदीयक्षेत्रभेदे न० तत्क्षेत्रस्य तन्नामताकारणं स्कन्दपु० उत्कलखण्डे यथा "एतत्क्षेत्रवरं चास्य वपुर्भूतं महात्मनः। स्वयम् वसुधात्मा यत्रास्ते स्वनाम्ना ख्यापितं हि तत्"। तत्स्थानसीमातीर्थभेदादि पुरुषोत्तमतत्त्वे उक्तं यथा

ब्रह्मपुराणे "पृथिव्यां भारतं वर्षं कर्म्मभूमिरुदाहृता। न खल्वन्यत्र मर्त्यानां भूमौ कर्म्म विधीयते। तत्रास्ते भारते वर्षे दक्षिणोदधिसंस्थितः। ओड्रदेश इति ख्यातः स्वर्गमोक्षप्रदायकः। सप्तद्वादशरे तीरे याव-द्विरजमण्डलम्"। तीर्थकाण्डकल्पतरौ वामनपुराणम् "उपेत्य रजनीमेकां विरजां स नदीं ययौ। स्नात्वा

वैरञ्जे तीर्थे दत्त्वा पिण्डं पितृस्तथा। दर्शनार्थं ययौ धीमानजितं पुरुषोत्तमम्। तं दृष्ट्वा पुण्डरीकाक्षमक्षरं परमं शुचिः। उपोष्य स तिलान् दत्त्वा महेन्द्र। दक्षिणं ययौ"। उपोष्य स्थित्वा। तथा "आदौ यद्वारु ह्रदते सिन्धोः पारे अपूरुषम्। तदाप्नुहि दुर्द्धनो! तेन याहि परं स्वनम्" तैत्तिरीयश्रुतिः। अस्य व्याख्या सांख्यायनभाष्ये "आदौ विप्रकृष्टे देशे वर्त्तमानं यद्वारु दारुमयं पुरुषोत्तमाख्यदेवताशरीरं ह्रदते जलस्योपरि वर्त्तते अपूरुषं निर्म्मर्यादरहितत्वेन अपूरुषं तत् आलभस्व दुर्द्धनो! हे! क्रोतः, तेन दारुमयेन देवेन उपास्यमानेन परं स्वनं वैष्णवं लोकं गच्छेत्यर्थः। अथर्ववेदेऽपि "आदौ यद्वारु ह्रदते सिन्धोर्मध्ये अपूरुषम्। तदा लभस्व दुर्द्धनो तेन याहि परं स्वनम्"। अत्रापि तथैवार्थः मध्ये तीरे। स्कन्दपुराणम् "इन्द्रद्युम्न! प्रसङ्गस्ते भक्त्या निष्कामकर्मभिः। उत्सृज्य वित्तकोटीस्तु यन्मायतनं कृतम्। भक्तेऽप्येतस्य राजेन्द्र! स्थानं न त्यज्यते मया"। ब्रह्मपुराणे "विरजे विरजा नाम ब्रह्मणा संप्रतिष्ठिता। तस्याः सन्दर्शने मर्त्यः पुनात्यासप्तमं कुलम्। स्नात्वा दृष्ट्वा तु तां देवीं भक्त्याऽऽ पूज्य प्रणम्य च। नरः स्वर्गमवाप्नोति मम लोकं स गच्छति। आस्ते वैतरणी नाम सर्वपापहरा नदी। तस्यां स्नात्वा नरश्चैव। सर्वपापैः प्रमुच्यते"। वैतरणी शब्दे द्रष्टव्यः। महाभारते "आयातभागं सर्वेभ्योभागेभ्यो भागमुत्तमम्। देवाः सङ्कल्पयामासुर्भयादुद्वस्य शाश्वतीम्। इमां गाथां सकृद्गत्वा मम लोकं स गच्छति। देवायनं तस्य पन्थाः शक्रस्यैव विराजते"। ब्रह्मपुराणे "आस्ते स्वयम्भूस्तत्रैव क्रोडरूपी हरिः स्वयम्। दृष्ट्वा प्रणम्य तं भक्त्या नरोविष्णुपुरं व्रजेत्"। तथा "विरजायां मम क्षेत्रे पिण्डदानं करोति यः। स करोत्यक्षयां तृप्तिं पितॄणां नात्र संशयः। मम क्षेत्रे वसन्त्येव! विरजे ये कलेवरम्। परित्यजन्ति पुरुषास्ते मोक्षं प्राप्नुवन्ति वै। नदी तत्र महापुण्या विन्ध्यपादविनिर्गता। चित्रोत्पलेति विख्याता सर्वपाप हरा शुभा"। चित्रोत्पला महानदी। तथा "सत्यं सत्यं पुनः सत्यं क्षेत्रं तत् परमं महत्। पुरुषाख्यं सकृद्दृष्ट्वा सागराम्भःसकल्मृतः। ब्रह्मविद्यां सकृत्स्नात्वा गर्भवासो न विद्यते"। पुरुषोत्तमक्षेत्रदर्शनसागरस्नानब्रह्मविद्याजपानां प्रत्येकं गर्भवासाजनकत्वम्। कूर्मपुराणे "तीर्थं नारायणस्यास्य स्नात्वा तु पुरुषोत्तमम्। अत्र नारायणः श्रीमानास्ते परमपूरुषः। पूजयित्वा परं विष्णुं तत्र स्नात्वा द्विजोत्तमाः!। ब्राह्मणान् भोजयित्वा तु विष्णुलोकमवाप्नुयात्"। आदकल्पतरौ वायुपुराणे "धूतपापं तथा तीर्थं सुभद्रादक्षिणस्तथा। गोकर्णोगजकर्णश्च तथा च पुरुषोत्तमः। एतेषु पितृतीर्थेषु श्राद्धमानन्त्यमश्नुते"। ब्रह्मपुराणे "चक्रं दृष्ट्वा हरेर्दूरात् प्रासादोपरिसंस्थितम्। सङ्क्षयं सुच्यते पापात् सर्वमादिति मे मतिः"। तथा "मार्कण्डेयह्रदे गत्वा स्नात्वा चोदङ्मुखः शुचिः। निमज्ज्य चीर्णं वारांश्च दमं मन्वन्तरीरयन्"। "मार्कण्डेयह्रदे स्नात्वा दृष्ट्वा तु शङ्करम्। दशानामश्वमेधानां फलं प्राप्नोति मानवः। पापैः सर्वैर्विनिर्मुक्तः शिवलोकं स गच्छति। तत्र भुक्त्वा वरान् भोगान् यावदाभूतसंप्लवम्। इह लोकं समासाद्य ततो मोक्षमवाप्नुयात्। कल्पद्वयं ततो गत्वा स्नात्वा तं त्रिःप्रदक्षिणम्। पूजयेत् परया भक्त्या मन्त्रेणानेन तं वटम्"। "भक्त्या प्रदक्षिणं कृत्वा महाकल्पवटं नरः। सङ्क्षयं सुच्यते पापात् जीर्णत्वच इवोरगः। ज्ञायां तस्य समासाद्य कल्पवृक्षस्य भो द्विजाः!। ब्रह्महत्यां नरो दद्यात् पापेष्वन्येषु का कथा। दृष्ट्वा कृष्णाङ्गसम्भूतं ब्रह्मतेजोमयं वटम्। न्यग्रोधाख्यतिनं विष्णुं प्रणिपत्य च भोद्विजाः!। राजसूयाश्वमेधाभ्यां फलं प्राप्नोति चाधिकम्। तथा स्वयंसङ्कल्प्य विष्णुलोकं स गच्छति। वैनतेयं नमस्कृत्य कृष्णस्य पुरतः स्थितम्। सर्वपापविनिर्मुक्तोविष्णुपुरं व्रजेत्। दृष्ट्वा वटं वैनतेयं यः पश्येत् पुरुषोत्तमम्। सङ्कल्पेनं सुभद्राच्च स याति परमां गतिम्। प्रविश्यायतनं विष्णोः कृत्वा तं त्रिःप्रदक्षिणम्। सङ्कल्पेनं स्वमन्त्रेण भक्त्याऽऽ पूज्य प्रसादयेत्"। "एवं प्रसाद्य चानन्तमजेयं त्रिदशार्चितम्। कैलाशशिखराकारं चन्द्रात् कान्ततराननम्। नीलवस्त्रधरं देवं फणाविकटमस्तकम्। महावलं हलधरं कृष्णस्यैकविभूषणम्। रौहिणेयं नरोभक्त्या लभेताभिमतं फलम्। सर्वपापविनिर्मुक्तोविष्णुलोकं स गच्छति। आसृतसंप्लवं यावत् भुक्त्वा तत्र सुखं नरः। पुण्यक्षयादिहागत्य प्रवरे योगिनां कुले। ब्राह्मण्यमवरोभूत्वा सर्वशास्त्रार्थपारगः। ज्ञानं तत्र समासाद्य मुक्तिं प्राप्नोति दुर्लभाम्। एवमभ्यर्च्य हलिनं ततः

कृष्णं विचक्षणः। द्वादशाक्षरमन्त्रेण पूजयेत् समाहितः"। आङ्गतसंप्लवं यावत् भूतसंप्लवं यावत् आप्रलय कालम् इति यावत् छान्दसोभकारस्य हकारः। द्वादशाक्षरमन्त्रेण को नमोभगवते वासुदेवाय इत्यनेन। "द्विषट्कवर्णमन्त्रेण भक्त्या ये पुरुषोत्तमम्। पूजयन्ति सदा धीरास्ते मोक्षं प्राप्नुवन्ति वै। तस्मात्तेनैव मन्त्रेण भक्त्या कृष्णं जगद्गुरुम्। संपूज्य गन्धमाल्याद्यैः प्रणिपत्य प्रसादयेत्" एवं प्रसाद्य देवेशं वरदं भक्तवत्सलम्। सर्वपापहरं देवं सर्वकामफलप्रदम्। श्यामदं द्विभुजं देवं पद्मपत्रायतेक्षणम्। मङ्गोरसं महाबाहुं पीतवस्त्रं शुभाननम्। शङ्खचक्रगदापाणिं सकटाङ्गदभूषणम्। सर्वलक्षणसंयुक्तं वनमालाविभूषितम्। दृष्ट्वा नरोऽञ्जलिं बद्ध्वा दण्डवत् प्रणिपत्य च। अश्वमेधसहस्राणां फलं प्राप्नोति भोद्विजाः!। यत् फलं सर्वतीर्थेषु स्नानदाने प्रकीर्त्तितम्। नरस्तत् फलमाप्नोति दृष्ट्वा कृष्णं प्रणम्य च"। अत्र यद्यपि दृष्ट्वा प्रणम्येति श्रवणात् सकृच्चितएव फलान्वयोऽन्यथा वाक्यभेदः स्यात् तथापि श्रेये दर्शनमात्र एव फलोपसंहारात् प्रत्येकं फलान्वयइति वदन्ति। ब्रह्मपुराणे "ततः पूज्य क्षमन्त्रेण सुभद्रां भक्तवत्सलाम्। प्रसादयेत्ततोविप्राः! प्रणिपत्य कृताञ्जलिः"। क्षमन्त्रेण प्रणवादिनमोन्तेन नाम्ना। यथा गारुडे "प्रणवादिनमोऽन्तेन चतुर्थ्यन्तेन सत्तमाः!। देवतायाः स्वकं नाम मूलमन्त्रः प्रकीर्त्तितः"। "एवं प्रसाद्य तां देवीं जगद्धात्रीं जगद्धिताम्। बलदेवस्य भगिनीं सुभद्रां वरदां शिवाम्। यानेन विमानेन नरोविष्णुपुरं व्रजेत्। निष्क्रम्य देवतागारात् कृतकृत्योभवेन्नरः। प्रणम्यायतनं पश्चात् व्रजेत्तत्र च भोद्विजाः!। भक्त्या दृष्ट्वा च तं देवं प्रणम्य नरकेशरिम्। मुच्यते पातकैर्घोरैः समस्तैर्नात्र संशयः"। नरकेशरिं नरकेशरिणम्। तथा 'वनमालाख्यं वासुदेवं दृष्ट्वा भक्त्या प्रणम्य च। सर्वपापविनिर्मुक्तोनरोयाति परंपदम्'। तथा "श्वेतगङ्गां नरः स्नात्वा यः पश्येत् श्वेतमाधवम्"। तथा "कृत्वा श्वेतां राजेन्द्र! श्वेतगङ्गेयमम्बु च। स्नात्वा स्वर्गं गमिष्यन्ति मद्भक्ता ये समाहिताः। यस्मिन्मां प्रतिमां लोके माधवाख्यां शशिप्रभाम्। विहाय सर्वलोकान् वै मम लोके महीयते"। तथा "श्वेतमाधवमालोक्य समीपे मद्भक्तमाधवम्। एकाग्रवज्रके सम्यं रोहितं रूपमास्थितम्। वेदानां तारणार्थाय रसातलतले स्थितम्"। तथा "आद्यावतारं रूपं माधवं मत्स्यरूपिणम्। प्रणम्य प्रयतोभूत्वा सर्वदुःखाद्विमुच्यते"। तथा "पूर्वोक्तेन तु मन्त्रेण नमस्कृत्य तु तं वटम्। दक्षिणाभिमुखोगच्छेत् धनरत्नशतत्रयम्"। धनशतत्रयम्। तथा "उप सेनं पुरा दृष्ट्वा स्वर्गद्वारेण सागरम्। गत्वाचम्य शुचिस्नात ध्यात्वा नारायणं परम्। न्यसेदष्टाक्षरं मन्त्रं पञ्चाङ्गशरीरयोः"। "सप्तम्यादिकेन नाचामेत्" तस्मात् पेयत्वस्य तैत्तिरीयश्रुताबुक्तत्वात्। "यैः स्नातः सर्वभक्षोऽग्निस्वपेयश्च महोदधिः। चयो चाप्यायितश्चन्द्रः कोन नश्येत् प्रकोप्य तान्" इति मनुनाभिहितत्वाच्च" तस्मात्सप्तम्यत्वेऽपि विधिभेदेनैव तस्य स्नृग्रता यथाह ब्रह्मपुराणम्

"एवमुक्त्वार्थं विधिवत्ततःस्नानं समाचरेत्। अन्यथा भोद्विजश्रेष्ठाः! स्नानं तत्र न गच्छते"। वनपर्वणि "अग्निश्च तेजो वडवा च देहोरेतोधाविष्णोरमृतस्य नाभिः। एवं ब्रुवन् पाण्डव! सत्यवाक्यमतोऽवगाहेत पतिं नदीनाम्। अन्यथा हि कुरुश्रेष्ठ! स्पृष्ट्वोन महोदधिः। कृशाश्वेऽपि कौन्तेय! देवयोनिरपांपतिः। देवान् पितॄंस्तथा चान्यान् सन्तर्प्यचम्य वाग्यतः" (अन्यान् ऋषीन्) ब्रह्मपु०। "स्नात्वा त्वाद्भैर्वतैर्मन्त्रैरभिषेकञ्च मार्ज्जनम्। अन्तर्जले जपेत् पश्चात् विराड्रूपमघमर्षणम्"। अद्भैर्वतैः "आपोहिष्ठा" इत्यादिभिः। अघमर्षणम् ऋतञ्च सत्यञ्चेत्यादि। "हस्तमात्रं चतुःकोणं चतुर्द्वारं सुशोभनम्। पुरं विलिख्य भो विप्राक्षीरे तस्य महोदधेः। एवं मण्डलमालिख्य पूजयेत्तत्रभोद्विजाः!। अष्टाक्षरविधानेन नारायणमजं विभुम्। ओंनमो नारायणाय" इत्यष्टाक्षरमन्त्रः। ब्रह्मपुराणे "तीर्थे चाभ्यर्च्च विधिवत् नारायणमनामयम्। रामं कृष्णं सुभद्राञ्च प्रणिपत्य च सागरम्। दशानामश्वमेधानां फलं प्राप्नोति मानवः! सर्वपापविनिर्मुक्तः सर्वदुःखविवर्जितः। कुलैकविंशसहितः विष्णुलोकञ्च गच्छति। पितॄणां ये प्रयच्छन्ति पिण्डं तत्र विधानतः। अक्षयां पितरस्तेषां तृप्तिं संप्राप्नुवन्ति वै"। तथा "कोट्यो नव नवत्यश्च तत्र तीर्थानि सन्ति वै। तस्मात् स्नानञ्च दानञ्च होमं जपसुरार्च्चनम्। यत् किञ्चित् क्रियते तत्र चाक्षयं भवति द्विजाः!। ततोगच्छेत्द्विजश्रेष्ठाः! तीर्थं यस्माङ्गसम्भवम्।

इन्द्रद्युम्नसरोनाम यत्राक्षे पावनं शुभम्। तत्र गुचिः श्रीमानात्मा मनसा हरिम्। ध्यात्वोत्थाय च जपेच्चिदं मन्त्रमुद्दीरयेत्। "एवमुच्चार्य विधिवत् स्नात्वा देवान्ऋषीन् पितॄन्। तिलोदकेन चाभ्यर्च्य मन्त्रमुच्चैश्च वाग्यतः। दत्त्वा पितॄंश्च विष्णुं च संपूज्य पुरुषोत्तमम्। दशाश्वमेधिकं सम्यक् फलं प्राप्नोति मानवः"। तथा "नाना नद्यः समुद्राश्च सप्ताहं पुरुषोत्तमे। ज्येष्ठशुक्लदशम्यादि मत्स्यं यान्ति सर्वदा। स्नानदानादिकं तत्रात् देवताप्रेक्षणादिकम्। यत् किञ्चित् क्रियते तात! तत्रिन्। कोटिगुणं भवेत्। एवं स्नात्वा पञ्चतीर्थेष्वेकादश्यामुपोषितः"। "ज्येष्ठे शुक्ल दशम्यान्तु पश्येत् श्रीपुरुषोत्तमम्। स पूर्वोक्तं फलं प्राप्य क्रीडित्वा चाच्युतालये। प्रयाति परमं स्थानं यस्मान्न विनिवर्त्तते"। तीर्थभेदेन स्नानान्तरादृत्तिमाह निगमः। "नावर्त्तयेत् पुनः कर्म्म तर्पणादिकमन्वहम्। काम्यनैमित्तिके स्नित्वा एकं श्लोकत्रयं वासरे। व्यपोह्य चाप्तमं भावमुदयादुदयत् कुत्रचित्। तिष्ठेर्युग्मेष्वयुग्मे वा यदृयदाङ्गिकमाचरेत्"। ब्रह्मपु० "मार्कण्डेयवटः कृष्णोरौहिणेयोमकोदधिः। इन्द्रद्युम्नसरश्चैव पञ्चतीर्थी विधिः स्मृतः"। मार्कण्डेयवटोमार्कण्डेयह्रदः। कृष्णोऽक्षयवटः "न्यग्रोधाख्यतिनं विष्णुमिति" पूर्वोक्तात्। वराहपुराणे "यस्मिन्ह्रदे देकपादेन कुरुक्षेत्रे नराधिप!। वर्षाणामयुतं सम्र वायुभक्षोजितेन्द्रियः। ज्येष्ठे मासि सिते पक्षे द्वादश्यान्तु विशेषतः। पुरुषोत्तममासाद्य ततोऽधिकफलं लभेत्। अग्निपुराणे "वैशाखस्य सिते पक्षे तृतीयाक्षयसंज्ञिता। तत्र मां लेपयेद्भस्मलेपनैरतिशोभनम्"। तथा "ज्येष्ठग्रामह्रदावतीर्थस्नात् पुण्यं जन्मवासरम्। तस्यां मे स्नपनं कुर्यात् महास्नानविधानतः। ज्येष्ठे प्रातस्तने काले ब्रह्मणा सहितस्तु माम्। रामं सुभद्रां संस्थाप्य मम लोकमवाप्नुयात्"। तथा "आषाढस्य सिते पक्षे द्वितीया पुष्यसंयुता। तस्यां रथे समारोप्य रामं मां भद्रया सह। यात्रोत्सवं प्रवर्त्तीय प्रीणयेच्च द्विजान् बहून्"। तथा "पुष्याभावात्तथा कार्य्या सदा सा प्रीतये मम"। स्कन्दपुराणे "फाल्गुन्यां क्रीडनं कुर्यात् दोलायां मम भूमिप!"। ब्रह्मपुराणे "उत्तरे दक्षिणे विप्रास्त्वयने पुरुषोत्तमे। दृष्ट्वा रामं सुभद्रां च विष्णुलोकं व्रजेन्नरः। नरोदोलागतं दृष्ट्वा गोविन्दं पुरुषोत्तमम्। फाल्गुन्यां संयतोभूत्वा गोविन्दस्य पुरं व्रजेत्। विषुवद्दिवसे प्राप्ते पञ्चतीर्थीविधानतः। स्नात्वा मद्गृहगतं कृष्णं दृष्ट्वा तत्राथ भोद्विजाः। नरः समस्तयज्ञानां फलं प्राप्नोति दुर्लभम्। विमुक्तः सर्वपापेभ्योविष्णुलोकञ्च गच्छति। यः पश्यति तृतीयायां कृष्णं चन्दनरूषितम्। वैशाखस्य सिते पक्षे स यात्यच्युतमन्दिरम्"। तथा "भाद्रे जन्मर्क्षे तु संप्राप्ते नक्षत्रे शक्रदैवते। पौर्णमास्यां तथा स्नानं सर्वकालं हरेर्द्विजाः। तस्मिन् काले तु ये मर्त्याः पश्यन्ति पुरुषोत्तमम्। बलभद्रं सुभद्राञ्च ते यान्ति यदभव्ययम्। तथा "स्नातः पश्यति यः कृष्णं व्रजन्तं दक्षिणामुखम्। सुखिकामस्वरूपं यान्तं ये पश्यन्ति तथास्थितम्। कृष्णं बलं सुभद्राञ्च ते यान्ति भवनं हरेः। ये पश्यन्ति तदा कृष्णं सप्ताहं मखरूपे स्थितम्। हरिं रामं सुभद्राञ्च विष्णुलोकं व्रजन्ति ते"। तथा, सम्वत्सरमुपोषित्वा मासत्रयमथापि वा। तेन जप्तं हुतं तेन तेन तप्तं तपोमहत्। स याति परमं स्थानं यत्र योगेश्वरोहरिः"। तथा "दृष्ट्वा रामं महाजैत्रयात्रां कृष्णं सह सुभद्रया। विष्णुलोकं नरो याति समस्तकुलसंयुतं"। तथा "यावन्ति कांश्चद्रोमाणानि यावत् स पुरुषोत्तमे। काशीवासयुगान्यष्टौ दिनेनैकेन लभ्यते"। मत्स्यपुराणे "कोटिजन्मकृतं पापं पुरुषोत्तमसन्निधौ। स्नात्वा स्वर्गं यशे स्नानं विष्णुमूर्त्ति महोदधौ"। ब्रह्मपुराणे "पथि श्मशाने मठमण्डपे वा रथ्याप्रदेशेऽपि च यत्र तत्र। दग्धस्यनिष्कृतिरपि यत्र तत्र संत्यज्य देहं लभते च मोक्षम्। देहं त्यजन्ति पुरुषाः ये तत्र पुरुषोत्तमे। कल्पशतं समासाद्य सङ्कल्पेनात्र संशयः। वटश्चागरयोर्मध्ये ये त्यजन्ति कलेवरम्। ते दुर्लभं परं मोक्षमाप्नुवन्ति न संशयः"। तत्रैव "तथा चैवोत्कले देशे कीर्त्तिवासा महेश्वरः। सर्वपापहरं तस्य क्षेत्रं परमदुर्लभम्। सिद्धकोटिसमायुक्तं वाराणस्या समं शुभम्। एकाम्रकेति विख्यातं तीर्थं टङ्कसमस्थितम्। तीर्थं विन्दुसरोनाम तस्मिन् क्षेत्रे द्विजोत्तमाः!। देवान्ऋषीन् मनुष्यांश्च पितॄन् सन्तर्पयेत्ततः। तिलोदकेन विधिना नाभगोत्रविधानवित्। स्नात्वैवं विधिवत्तत्र सोऽश्वमेधफलं लभेत्। पिण्डं ये संप्रयच्छन्ति पितृभ्यः सरसस्तटे। पितृणामक्षयां तृप्तिं ते कुर्व्वन्ति न संशयः। ततः शम्भोर्गृहं गच्छेद्दागत्य तः संयतेन्द्रियः। प्रविश्य पूजयेत् पूर्वं कृत्वा तत्र प्रदक्षिणम्।

आगमोक्तेन मन्त्रेण वेदोक्तेन च शङ्करम्। अदीक्षितश्च वा देवान् मूलमन्त्रेण चार्चयेत्'। तथा सर्वपापविनिर्मुक्तोऽप्ययौवनगर्वितः। कुलैकविंशसंयुक्तः शिवलोकं स गच्छति'। 'पश्चाद्देवं विरूपाक्षं देवीञ्च शारदां शिवाम्। गणचण्डं कार्त्तिकेयं गणेशं वृषभं तथा। कल्पद्रुमञ्च सावित्रीं शिवलोकं स गच्छति। एतत्क्रमेण सुनिश्चेताः। क्षेत्रं मोक्षं सुदुर्लभम्। कोशार्कक्षोदधेः क्षीरं भक्तिमुक्तिफलप्रदम्। स्नात्वैव सागरे दत्त्वा सूर्य्यार्घं प्रणम्य च। नरोवा यदि वा नारी सर्वकामफलं लभेत्। ततः सूर्य्यालयं गच्छेत् पुष्पमादाय वाग्यतः। प्रविश्य पूजयेद्भानुं कुर्य्यात्तु त्रिःप्रदक्षिणम्। दशानामश्वमेधानां फलं प्राप्नोति मानवः" स्कन्दपु० उत्कलखण्डे।

"तथा चातुर्दिनं देव्याः सिद्धाः ब्रह्मपदस्थया। समर्च्य तुष्टिदायानि देवेशं न तथान्यतः। अङ्गो तत्परमं क्षेत्रं विस्तृतं दशयोजनैः। तीर्थराजस्य सलिलादुत्थितं वालुकाचितम्। नीलाचलेन महता मध्यस्थेन विराजितम्। एकं स्तनमिव पृथ्व्याः सुदूरात् परिभावितम्"। ब्रह्माणं प्रति विष्णुवाक्यम्। "सागरस्योत्तरे तीरे महानद्यास्तु दक्षिणे। स प्रदेशः पृथिव्यां हि सर्वतीर्थफलप्रदम्। एकास्यानानाद् यावद् दक्षिणोदधितीरभूः। पदात् पदात् श्रेष्ठतमः क्रमेण परिकीर्त्तितः। सिन्धु तीरे च यो ब्रह्मन् राजते नीलपर्व्वतः। पृथिव्यां गोपितं स्थानं तव चापि सुदुर्लभम्। सुरासुराणां दुर्ज्ञेयं मायया चादितं मम। सर्वसङ्कल्परिक्तस्य क्षेत्रं तिष्ठति देवभृत्। स्नात्वा खनेन नाक्रान्तं क्षेत्रं मे पुरुषोत्तमम्। नीलाद्रेरत्तरभुवि कल्पन्ध्योधमूलतः। वारुण्यां दिशियत् कुण्डं रोहिणं नाम विश्रुतम्। तत्तीरे निवसन्तो मां पश्यन्तश्चर्मचक्षुषा। तदम्भसा धौतपापा मम सायुज्यमाप्नुयुः। व्रतेषु तीर्थेषु च यत्तदानयोः पुण्यं यदुक्तं विमलात्मनां हि। अहर्निवासाद्भवते च सर्वं निमेषमात्रात् खलु चाधमेधिकम्" "जैमिनिरुवाच। उदक्कार्त्तेः समागत्य कृतचिह्नायशोत्तमः। कारणोदक संपूर्णे तस्मिन्कुण्डे निमज्जितः। विलोक्य माधवं नीलरत्नकान्तिं कृपानिधिम्। काकदेहं समुत्सृज्य लुठमानं सुदुःखितौ। शङ्खचक्रगदापाणिस्तस्य पार्श्वे व्यवस्थितः"। यमं प्रति लक्ष्मी वाक्यम्। "पञ्चक्रोशमिदं क्षेत्रं सर्वद्वान्तर्व्यवस्थितम्। त्रिकोणं तीर्थराजस्य तट भूमौ सुनिर्म्मलम्। सुवर्णवालुकाकीर्णं नीलपर्व्वत शोभितम्। योऽसौ विश्वेश्वरो देवः साक्षाच्चारायणात्मकः। संयम्य विषयग्रामं सप्तद्वतटमास्थितः। उपासितुं जगन्नाथं चतुःषष्ठ्युत्तमैः प्रभुः। यमेश्वर इतिख्यातो यमसंयमनाशनः। यं दृष्ट्वा पूजयित्वा तु कोटि लिङ्गफलं लभेत्। सीमा प्रतीचि क्षेत्रस्य शङ्खाकारस्य मूर्द्धनि। शङ्खाग्रे नीलकण्ठः स्यादेतत् क्रोशं सुदुर्लभम्। परमं पावनं क्षेत्रं साक्षाच्चारायणस्य वै। शङ्खोत्तरभागस्तु सप्तद्रोदकसंश्रुतः। यत्सम्पर्कात् सप्तद्रोऽत्र तीर्थराजत्वमागतः। यथाऽयं भगवान् शुक्लप्रदोदधिं पर्वं गतः। तथेदं मरणात् क्षेत्रं विष्णुस्नानाद्विमुक्तिदम्। चिच्छेद ब्रह्मणः पूर्वं रुद्रः क्रोधात्तु पञ्चमम्। तच्छिरो दुस्त्यजं ब्रह्मन्। ब्रह्महत्वं परिबभ्रमे। ततस्तीर्थो यदा ब्रह्म कपालं परिसस्रवान्। कपालमोचनं तीर्थं द्वितीयावर्त्तसंस्थितम्। तस्य दक्षिणपार्श्वे तु मरणं भवमोचनम्। तृतीयावर्त्तसीमायां मुक्तिं मे विमलाङ्गनाम्। जानीहि धर्मराज! त्वं भुक्तिमुक्तिफलप्रदाम्। नाभिदेशे स्थितं ह्येतत् त्रयं कुण्डं वटो विभुः। कपालमोचनं यावद्बाहुनी प्रतिष्ठिता। मध्यं शङ्खस्य जानीयात् सुगुप्तं चक्रपाणिना। तां दृष्ट्वा प्रणमेद्वा यस्तु भोगान् सोऽश्नाति शाश्वतान्। सिन्धुराजस्य सलिलात् यावन्मूलं वटस्य वै। कीटपक्षिमनुष्याणां मरणात् मुक्तिदो मतः। अनन्तवेदीतीयं पुण्या वाञ्छन्ति लिङ्गैरपि। क्षेत्रस्थितान् हि पश्यन्ति सर्वान् चक्रायुधारिणः। कामाख्या क्षेत्रपालश्च विमलां चान्नरा स्थिता। साक्षाद्ब्रह्म स्वरूपोऽसौ नृसिंहो दक्षिणे विभोः। अनन्तवेद्या रक्षार्थं शक्तयोऽष्टौ प्रकल्पिताः। उपेत्य तपसा पूर्वमङ्गं सर्वेण भाविता। पत्न्यर्थं सा मया सृष्टा गौरी तत्राच भाविनी। सर्वसौन्दर्य्यवसतिर्वपुषोमे विनिर्मिता। तदा दृष्ट्वा मया भद्रे वचनं मे प्रियं कुरु। अनन्तवेदीं रक्ष मम परितस्त्वं स्वमूर्त्तिभिः। साऽत्र तिष्ठति मत्प्रीत्या अष्टधा दिक्षु संस्थिता। मङ्गला वटमूले तु पश्चिमे विमला तथा। शङ्खस्य पूर्वभागे तु संस्थिता सर्वमङ्गला। अट्टहासनी तथा रक्षा कुबेरदिशि संस्थिता। कालरात्रिर्दक्षिणस्यां पूर्वस्यान्तु मरीचिका। कालरात्र्यास्तथा पश्चात् चण्डरूपा व्यवस्थिता। रुद्राख्या चाष्टधा भेदं दृष्ट्वा रुद्रोऽपि शङ्करः। आत्मानमष्टधा भित्त्वा उपास्ते परमेश्वरम्। कपालमोचनं नाम क्षेत्रपालं यमेश्वरम्। मार्कण्डेयं तथेशानं विश्वेशं

नीलकण्ठकम्। वटमूले वटेशञ्च जिह्वान्यष्टौ महेशितुः। यानि दृष्ट्वा तथा स्पृष्ट्वा पूजयित्वा विमुच्यते"। तच्चैवेद्यान्नस्य चण्डालादिस्पर्शे स्थानभेदे भोज्यता। केचिदपि निबन्धृभिः तच्चैवेद्यान्नस्य चण्डालादिना स्पर्शे भोज्यतायां यदुक्तेः तन्मूलीभूतवचनानाम् मूलकत्वं निबन्धृभिरदृष्टत्वात् समूलकत्वे तत्तच्चेत्र-मध्ये एव भक्षता तथाहि "प्रविशन्तस्तु तत्क्षेत्रं सर्वैः स्पृष्टिविधूर्त्तयः। यत्रान्नपाचिका लक्ष्मीर्भोक्ता यत्र जनार्दनः। चण्डालेनापि संस्पृष्टं यद्यद्यं तत्रान्नमयजैः" ब्रह्मवैवर्त्तपुराणवचनस्य समूलत्वे तत्-तत्क्षेत्रप्रवेशमात्रेण सर्वेषाम् विष्णुमूर्त्तित्वनिर्देशेन तत्तच्चेत्र-स्थे एवान्त्यजादिस्पर्शे न दुष्टत्वं नान्यत्रो। "विष्णुक्षेत्र-गतं तद्धि निर्माल्यं पतितादयः। स्पृशन्ति चेन्न दुष्टं हि यथा विष्णुस्तथैव ते" इति यदुक्तखण्डोदवाक्यस्य समू-लत्वे विष्णुक्षेत्रगतमिति विशेषणात् तत्रैव तस्य स्पर्शदो-षराहित्यं नेतरत्र। यत्तु "चिरस्थमपि संशुष्कं नीतं वाऽदूरदेशतः। यथा तथोपयुक्तं तु सर्वपापापनोदनम्" तत्क्षेत्रवाक्यान्तरम् तत्र नीतं वाऽदूरदेशत इत्यकार प्रश्लेषः बोध्यः वा एवार्थे अदूरत एव निकटेस्थितमेव नीतं केनापि दुष्टताभिति व्याख्येयम् पूर्व्वोक्तवचनद्वयैक-वाक्यत्वात्। वैष्णवास्तु तत्र मन्यन्ते। ते हि सर्वत्र तदन्न-स्योपयोगं कुर्वन्ति। वङ्गदेशीयानां स्मार्त्तानां तु अन्य-स्थानगतस्य पावनत्वेऽपि न भक्षणाचरणम्। "शालग्रामो हरेर्मूर्त्तिर्जगन्नाथस्य भारत!। कलेर्दशसहस्रान्ते त्यक्त्वा यास्यति हरेः पदम्" ब्रह्मवै० पु०। "कलेर्दश सहस्राणि विष्णुस्तिष्ठति मेदिनीम्। तदर्द्धं जाह्नवीतोयं तदर्द्धं याम्यदेवता" इति च पठन्ति। "विमला तत्र देवः स्यात् जगन्नाथस्तु भैरवः" इति तन्त्रोक्ते तत्क्षेत्रस्थे पीठरूपके श्रीरूपभेदे पु०। भामिनीविलासरसगङ्गाधरादिग्रन्थकारके ३विद्वद्भेदे। "जगन्नाथस्यायं तुरगपतिः सप्तदशसमयः" तत्कृतगङ्गालहरी

**जगन्निवास** पु० ६त०। १परमेश्वरे तदभेदात् २विष्णौ च "जगन्निवासो वसुदेवसद्मनि" माघः। ईश्वरस्य प्रलये सर्वभूताधारत्वात् तथात्वम्।

**जगन्मङ्गल** न० जगतां मङ्गलं यस्मात्। कालीकवचभेदे "श्रीजगन्मङ्गलं नाम कवचं पूर्वसूचितम्" भैरवीत०।

**जगन्मोहिनी** स्त्री जगन्मि मोहयति मुह-णिच्-णिनि ङीप्। १महामायायां २तदभिमानिन्यां दुर्गायां च।

**जगर** पु० जागर्त्तिरुद्यमे ऽनेन जाग्र-अच् पृषो०। कवचे हेम०।

**जगल** पु० जल-ड गल-अच् कर्म्मधा०। १सुराकल्के (मेथोया) अमरः २मदनद्रुमे ३पिष्टमद्ये ४धूर्त्ते त्रि० मेदि० कवचे न० हेम०। गोमये न० रत्नमाला। तत्र सुराकल्कगुणाः भावप्र० उक्ता यथा "यावूकोऽजगलः पक्वो रूक्षस्तुवरकफशोफहृत्"।

**जग्ध** त्रि० अद-कर्म्मणि क्त। १भुक्ते अमरः भावे क्त। २भोजने न०। ["गर्हितान्नाद्ययोर्जग्धिः" स्मृतिः।

**जग्धि** स्त्री अद-क्तिन्। १भोजने, २सद्भोजने च अमरः।

**जग्मि** पु० गम-किन् द्वित्वम् १वायौ तस्य सततगतित्वात् तथात्वम्। २गन्तरित्रि० स्त्रियां वा ङीप्।

**जगुरि** त्रि० गृ-निगरणे किन् द्वित्वं वेदे उक्तम्। उद्गूर्णे। "दूरे ह्यध्वा जगुरिः पराचैः" ऋ०१०।१०८।१। २जङ्गमे च "इमास्त्वमधिरूढस्य जगुरिः जङ्ग-म्यतेः" ११।२५। निरुक्ते उक्तेस्तथात्वम्

**जघन** न० हन्ति हन-यङ् अच् पृषो०। स्त्रीणां १श्रोणिपुरोभागे, २श्रोणौ च। "श्रोणांशुकमिव पीन-स्तनजघनायाः कुलीनायाः" उद्भटः। "जघनेन घनेन वा" भट्टिः। "गङ्गायमुनयोर्मध्ये पृथि-व्या जघनं स्मृतम्। प्रयागं जघनस्थानम्" भा० व० ८५ अ०। [कुकन्दरयोः हला०।

**जघनकूपक** पु० द्वि०व० जघनस्य कूप इव कायतः कै-क।

**जघनचपला** स्त्री "प्राक्प्रतिपादितमर्द्धं प्रथने प्रथमेतरे तु चपलायाः। लक्ष्मीश्चेत सोक्ता विगुह्यधोभिर्जघनच-पला" इ० र० उक्ते मालाछन्दभेदे।

**जघनफला** स्त्री० जघने इव मध्यभागे फलमस्याः अलुक्स०। काकोडुम्बरिकायाम् अमरः।

**जघन्य** त्रि० जघनमिव शाखा० यत् जघने भवः दिगा० यत् वा। १चरमे २गर्हिते "धर्म्मार्थकामाः समयेव सेव्या-योऽन्योन्यसक्तास्तु जघन्यजघन्यः" २लक्षणयुक्ते नरे ३अल्पे ५शूद्रे च शब्दर०। "जघन्यं सेवमानास्तु संयतां वासवेदृशे। उत्तमां सेवमानस्तु जघन्योवधमर्हति" मनुः वर्म्मादि० अकर्मधारये तत्पुरुषे अत्तात् उत्तरपद-स्याद्युदात्तता। ६राजानुचरभेदे तल्लक्षणादि ६स०६ अ० उक्तं यथा "पद्मापरे वामनको जघन्यः" इत्यादिना। विभक्त्य "मालव्यसेवी तु जघन्यनामा खण्डेन्दुतुल्याश्ववरः सुगन्धिः। शुक्लैश्चसारः पिशुनः कविश्च रूक्षश्चविः

स्थूलकराङ्गुलीकः। क्रूरो घनी स्थूलमतिः प्रतीतस्ताम्रकविः स्यात् परिहासशीलः, उरोऽङ्घ्रिहस्ते जसिशक्तिपाशपरश्वधाङ्क्ष जघन्यनामा"। "जघन्यगुणवृत्तस्था अधो गच्छन्ति तामसाः" गीता।

जघन्यज पु० जघन्ये चरमे जायते जन-ड।१शूद्रे,२कनिष्ठे त्रि० मेदि०। "ततोविष्णुरजघन्यो जघन्यजः" हरिवं० ८अ०। "जघन्यजस्तुकस्य श्रुतसेनेति यः श्रुतः" भा० आ० ३अ० जघन्यप्रभवादयोऽप्यत्र। "जिह्वायाः प्राग्रुयाच्छेदं जघन्यप्रभवो हि सः" मनुः।

जघन्यभ न० कर्म्म०। "आर्द्रांश्लेषा तथा स्वातिर्जैत्रं च भरणी तथा। शततारा जघन्यानि तारासु कथितानि वै" ज्यो० उक्तेषु षट्सु नक्षत्रेषु।

जघ्नि पु० हन-किनि हित्वञ्च। हननसाधनास्त्रादौ।

जघ्नु त्रि० हन-कु हित्वञ्च। घातके उणा०।

जङ्घ्रि त्रि० गा-किनि हित्वम्। घ्राणकर्त्तरि "घ्राजन्यभि विज्ञ जङ्घ्रिः" ऋ० १। १६२ १५।

जङ्गम त्रि० गम- यङ्-अच्। सततगतियुते। "शरीरिणां स्थावरजङ्गमानाम्" कुमा० "तुल्यैः स्थावरजङ्गमैः" मनुः

जङ्गमकुटी स्त्री जङ्गमा कुटीव। स्वल्पे शिबिका०।

जङ्गमशुल्क पु० कर्म्म०। रथके पदातिसमूहे "एवंविधाद्भूपोदेशात् शुल्कैः स्थावरजङ्गमैः। तस्करप्रतिषेधार्थं चारैश्चाप्यनुचारदेत्" मनुः।

जङ्गमसिध न० क्षुद्रतोक्ते विषभेदे तत्स्थानादि तल्लक्षणं यथा "अथातो जङ्गमविषविज्ञानीयमध्यायं व्याख्यास्यामः। जङ्गमस्य विषस्योक्तान्यधिष्ठानानि षोड़श। समासेन मया यानि विकारेषु वक्ष्यते। तत्र दष्टनिःश्वासदंष्ट्रानखमूत्रपुरीषशुक्लास्रार्त्तवक्षतसन्दंशविद्धितगुदास्विपित्तसृक्त्वयानीति। तत्र दष्टनिःश्वासविषास्तु दिव्याः सर्पाः। भौमास्तु दंष्ट्राविषाः। मार्जारश्वावानरमण्डूकपाकमत्स्यगोधागन्धूकप्रचलाक (सौम्यकीटभेदः) सदृशोधिका क्रकलासचतुष्पादकीटाश्चान्ये दंष्ट्रानखविषाः। चिपिटपिङ्गटकृष्णाग्नवाधिकसर्षपवासिकतोटकवर्च्चःकीटकौण्डिल्यकाःशकृन्मूत्रविषाः। मक्षिकाः शुक्रविषाः। लूताश्च लालामूत्रपुरीषक्षतसन्दंशनखशुक्रार्त्तवविषाः। इक्षिकविच्छुरराजीवमत्स्योद्विडिङ्गाः सदृङ्नखिकायालविषाः (अनःशुक्लास्यपर्त्तिकगठकः) (फुल) इति। चिलिमिरःसरायकुर्दिशतदारुकारिमेदकारिकासक्षतसन्दंशविद्धितमूत्रपुरीषविषाः। मक्षिकाकरभजलायुका क्षतसन्दंशविषाः। विषदृष्टास्त्रिमर्षकराटकवरटीमत्स्यास्थिकेत्यस्थिविषाश्च। शकलीमत्स्यरक्तराजीवरकमत्स्याश्च पित्तविषाः। क्षुद्रक्षतखड्गोद्विडिङ्गवरटाशतपदीशुक्लवल्मिकाश्वङ्गीभ्रमराः शुक्रतुण्डविषाः। कीटसर्पदेहा गतासवः शवविषाः शेषास्तनुका क्षतसन्दंशविषेष्वेव गणयितव्याः। राज्ञोऽरिदेशे [illegible] ष्वाशुमार्गाद्यधूमक्षतनात् विषेण। संदूषयन्त्यम्भिरतिप्रदानात् विज्ञाय लिङ्गैरभिशोधयेच्च। दुष्टं जलं पिच्छिलसपगन्धि फेनान्वितं राजिभिराहतञ्च। मण्डूकमत्स्यं म्रियते विहङ्गा मत्ताश्च सानूपचरा भ्रमन्ति। सज्जन्ति ये चात्र नराश्वनागास्ते च्छर्द्दिमोहज्वरदाहशोफान्। गच्छन्ति तेषामपहृत्य दोषान् दुष्टं जलं शोधयितुं यतेत"।

जङ्घल न० गम-यङ्लुक् बा० डल। विषे त्रिका०।

जङ्घा स्त्री जंघन्यते कुटिलं गच्छति गत्यर्थकस्य हन्नेः कौटिल्ये यङ्लुकि अच् प्रत्ये०। गुल्फजान्वोरन्तराले अवयवे अमरः। "पादजङ्घयोः सन्धाने गुल्फः" "जङ्घयोः सन्धाने जानु नाम" हेम०। "चत्वार्यरत्निकास्थीनि जङ्घयोस्तावदेव च" याज्ञ०।

जङ्घाकर त्रि० जङ्घां तत्साध्यगतिं करोति कृ-"दिवादिभ्यश्लादिना" पाट०। जङ्घाकरिके धावके जङ्घाकार+स्वार्थे क। तत्रार्थे

जङ्घाकरिक त्रि० कृ-अप् करः विक्षेपः इत० ततः अस्त्यर्थे ठन्। जङ्घाचालनेनाजीविनि धावके (धावडे) अमरः।

जङ्घात्राण न० त्रायतेऽनेन त्रै-करणे ल्युट् इत०। जङ्घासन्नाहे त्रिका०।

जङ्घाप्रहत त्रि० जङ्घा तद्गतिः प्रहता यस्य निशान्तत्वात् परनि जङ्घागतिमान्द्ये मन्दगतिके। ततः अस्त्यर्थे निर्द्देशेऽर्थे ठञ्। जाङ्घाप्रहतिक तच्चिह्नेन त्रि०।

जङ्घाप्रहृत त्रि० जङ्घा प्रहृताऽस्य। प्रहृतजङ्घाव्यापारे। ततः स्वार्थेता० निर्वृत्तेऽर्थे जाङ्घाप्रहृतिक तद्विर्वृत्ते त्रि०। [ आया भवुः" भा० स० ४अ०।

जङ्घाबन्धु पु० ऋषिभेदे। "जङ्घाबन्धुश्च रैभ्यश्च कोपवेग-

जङ्घारथ पु० जङ्घा रथ इव यस्य। ऋषिभेदे। तस्य गोत्रापत्यम् इञ्। जाङ्घारथि तद्गोत्रापत्ये बहुत्वे तु यस्का० गोत्रपत्ययस्य लुक्। जङ्घारथास्तद्गोत्रापत्येषु

जङ्घारि पु० विद्याभिन्नभेदे। "भागैर्मयि क्षिरस्याद्यो जङ्घारि बाभ्रवायणिः" भा० आनु० ४अ०। विद्याभिन्नपुत्रोक्तौ।

जङ्घाल त्रि० जङ्घा वेगवती अस्त्यस्य लच्। धावके जङ्घालो विनि। "हरिणैणकरङ्क्ष्वृष्यतन्द्रजङ्घराः। राजीवश्च, तथा सृष्टौ जङ्घालाः परिकीर्त्तिता" भावप्र० उक्षेषु खगेषु पु० स्त्री। "जङ्घालाः प्रायशः सर्व्वे पित्तश्लेष्महराः स्मृताः। किञ्चिद्वातकराश्चापि लघवो बलवर्द्धनाः भावप्र० तन्मांसगुणोक्तिः।

जङ्घाशूल न० जङ्घायाः शूलमिव। जङ्घायां व्यथाकारके शूलरोगभेदे। "जङ्घाशूलरुरुस्तम्भं सप्तरात्रेण नाशयेत्" गरुडपु०।

जङ्घिल त्रि० अतिशयवेगवती जङ्घास्त्यस्य पिच्छा० इलच्। वेगवज्जङ्घाविशिष्टे धावके। [अजाज जेजतुः

जज युद्धे भ्वा०पर०अक०सेट्। जजति अजाजीत्-अजजीत्

जज युद्धे भ्वा० प० अक सेट् इदित्। अञ्जति अजञ्जीत् अजञ्ज "शृदृजयो अस्रस्यैव अञ्जती" ऋ० १।१६८।७। अस्मिन् अञ्जते

जञ्झ शब्दकरणे भ्वा० अक० सेट् निरु०। अजञ्झति अजञ्झीत्" "भरुनो अजञ्झतीरिव" ऋ० ५।५२।६। "अजञ्झतीः शब्दकारिण्यः "अजञ्झतीरापो भवन्ति शब्दकारिण्यः" निरु० ६।१६।

जञ्जि त्रि० ज्ञा-जन-वा किन् द्वित्वञ्च। ज्ञातरि २जाते च।

जञ्ज त्रि० जञ्जि-अच्। १योद्धरि भावे घञ्। २योधने। उच्छादि० अञ्जलत्वेन अन्तोदात्तता।

जञ्जन त्रि० जन-यङ् लुक्-अच्। पुनो० पुनः १पुनर्जन्मवति ततोऽभूततद्भावे च्वि भूयोऽनुप्रयोगः पुनो० यत्वदी अञ्जया भूतद्भावे "जिह्वाभिरग्निमदयन्त देवा अञ्जयाभवन्" ऋ० ८।४३।८। २ज्वलति निरु०।

जञ्जपूक त्रि० जप+यङ्-अक। अतिशय जपशीले।

जञ्जभ्यमान त्रि० जभ-यङ्-शानच्। शास्त्रविधानेन विदारितमुखे पूर्व्वमीमांसा।

जट संहतौ भ्वा० पर० अक० सेट्। जटति अजाटीत्-अजटीत्। अजाट जटतुः जटा।

जटा स्त्री जट-अच् अन-टाप्। टन् अन्त्यलोपश्च। १केशविकारे अन्योन्यसंलग्नकेशे २वृतितः ३शिखायां ४शठतायाम् अमरः। ५मूले ६शाखायां मेदि०। ७ऋषिकल्पे राजनि०। ८जटामांस्यां ९रुद्रजटायां १०शतावर्य्यां रत्नमाला० ११वेदपाठवेदे ऋग्वेदशब्दे १४।१।१२ पृ० दृश्यम्

जटाचीर पु० जटासहितं चीरं वसनमस्य। शिवे त्रिका०।

जटाजूट पु० जटानां जूटोबन्धः। जटासमूहे। (झुँटि) "जटाजूट समायुक्तामर्द्धेन्दुकृतशेखराम्" दुर्गाध्यानम् "शम्भोर्जटाजूटतटादिवापः" माघः।

जटाज्वाल पु० जटेव ज्वालाऽस्य। प्रदीपे हारा०।

जटाटङ्ग पु० जटा टङ्कइवास्य। शिवे महादेवे त्रिका०।

जटाटीर पु० जटामटति अट-ईरन्। महादेवे त्रिका०

जटाधर पु० हृत०। शिवे १महादेवे अजरः। २बुद्धभेदे त्रिका०। ३दाक्षिणात्ये देशभेदे स च देशः "क्रौञ्चद्वीपजटाधर कावेर्यौरिव्यमूलकम्" ह० स०१४अ० दक्षिणस्था सप्तः ४कोषकारभेदे च ५जटाधारके त्रि०।

जटामांसी स्त्री जटां मन्यते मन-स दीर्घश्च। सुगन्धद्रव्यभेदे। "जटामांसी भूतजटा जटिला च तपस्विनी। मांसी तिक्ता कषाया च मेध्या कान्तिबलप्रदा। स्वाद्वी स्निग्धा त्रिदोषघ्नदाहवीसर्पकृमिप्रणुत्" भावप्र०।

जटायु (स्) पु० जटां याति या-कु जटा+ऊर्णा० युच् वा जट-संहतौ अच् जटं संहतमायुरस्य वा। १सुगन्धद्रव्यभेदे, २गृध्रभेदे च मेदि० "द्वौ पुत्रौ विनतायास्तु गरुडोऽरुण एव च। तस्मात् जातोऽहमरुणात् संपातिश्च ममाग्रजः। जटायुरिति मां विद्धि श्येनीपुत्रमरिन्दम। सोऽहं राम! सहायस्ते भविष्यामि यदीच्छसि। सीतां च तात रक्षिष्ये त्वयि याते सकेसरे "जटायुषं तु प्रतिपूज्य राघवो सदा परिज्ञाय च सङ्गतोऽभवत्। पितुर्हि सख्यं सुचिरं बभूव सखित्वमात्मवान् जटायुषा संकथितं पुनः पुनः" रामा० आर० १४अ० "अथा दशरथस्यासीज्जटायुरुरुविक्रमः। सदृशराजो महावीर्यः सख्यातिर्वयस्य सोदरः। स ददर्श तदा सीतां रावणाङ्कगतां स्नुषाम्। सक्रोधोऽभ्यद्रवत् पक्षी रावणं राक्षसेश्वरम्। अथैनमब्रवीद्दृष्ट्वा तस्य सङ्ग्रामे मैथिलीम्। म्रियमाणे मयि कथं हरिष्यसि निशाचर! न हि मे मोक्ष्यसे जीवन् यदि नोत्सहसे बलम्

उक्तवैवं राजसेनेन्द्रं तं चकर्त्त नखरैर्भृशम्। पपातगण्ड प्रहारैश्च बहुशो जर्जरीकृतम्। चचार रुधिरं भूरि गिरिप्रस्रवणैरिव। स वध्यमानोऽप्रेष रामप्रिय हितेप्सिया। खड्गमादाय चिच्छेद भुजौ तस्य पतत्रिणः। निकृत्त स्टग्रराजं स भिन्नाभ्रशिखरोपमम्। जर्झराभक्रमे क्षीतां स्टङ्गीत्वाङ्गेन राजसः" भा० व० २७८ अ० तत्कथा दृश्या।

जटाल पु० जटा-अस्त्यर्थे सिद्धा० अच्। १वटवृक्षे २कङ्कुरे ३तस्करे ४गुग्गुलौ च राजनि० ५जटायुक्ते त्रि० "चोरिणः शिखिनश्चास्य जटालोर्द्ध शिरोरुहाः" हरिवं० १८२ अ०। ६जटामांसां स्त्री राजनि०।

जटावत् त्रि० जटा-अस्त्यर्थे मतुप् मस्य वः। १जटायुक्ते स्त्रियां ङीप् सा च २जटामांसां राजनि०।

जटावल्ली स्त्री जटेव वल्ली। रुद्रजटायाम् राजनि०।

जटासुर पु०जटायुक्तोऽसुरः। १असुरभेदे। स च ब्राह्मणरूपं कृत्वा वनगतयुधिष्ठिरावासे स्थित्वा भीमे वनान्तरं गते युधिष्ठिरादिलय सहितां द्रौपदीं जहार ततोऽदृश्यो भ्रात्रा भीमेन हतः। तत्कथा वनपर्वणि जटासुरवध पर्वणि दृश्या। २तदधिष्ठिते देशभेदे स च देशः बृ० स० १४अ० क्रूर्मविभागे ऐशान्यामुक्तः। "भल्लापलोलजटासुर कुनटखण्डोपकुचिकाख्याः"।

जटासुरवध पु० जटासुरस्य वधमधिकृत्य कृतो ग्रन्थः अण् आख्यायिकायां लुप् लुपि व्यक्तिवचनत्वात् पुंस्त्वम्। भारतवनपर्वान्तर्गतेऽवान्तरपर्वभेदे। "जटासुरवधः पर्व यक्षयुद्धमतः परम्" भा० आ० अ० वनपर्वणि अवान्तरपर्वोक्तौ।

जटि (टी) पु० जट-इन्। १वटवृक्षे, शब्दरत्ना० २जटायां २समूहे उणादिको० ४जटामांसां स्त्री वा ङीप् अमरः। ङीवनः ५पर्कटीवृक्षे शब्दर०।

जटिन् पु०जटा अस्त्यस्य इनि। १वृक्षे (पाकुड़) अश्वत्थवृक्षपलयुक्ते वृक्षभेदे। २जटावति त्रि०। "सुरापानापवृत्तस्त्रियं चीरवासा जटी ध्वजी" मनुः।

जटिल पुं स्त्री जटा-अस्त्यर्थे पिच्छा० इलच्। १सिंहे शब्दच० स्त्रियां जातित्वात् ङीप्। २जटायुक्ते त्रि०। "विवेश कश्चिज्जटिलस्तपोवनम्" कुमा० "मुण्डो वा जटिलो वा स्यात् अथ वा स्यात् शिखाजटः" मनुः। ३ब्रह्मचारिणि च। "जटिलस्यानधीयानं दुर्बलं कितवं तथा" मनुः। स्त्रियां टाप् ४जटावल्यां स्त्रियां। ५जटामांसां अमरः ६पिप्पल्यां मेदि०। ७वचायाम् ८जटाटायां रत्नमाला ९दमनकवृक्षे राजनि०।

जटु(डु)ल पु० जट-उलच् पृषो० टस्य डो वा। देहस्थे क्षणचिह्नभेदे पिप्पौ (जड़ुल) अमरः।

जठर पुंन०जायते जन्तुर्गर्भो यस्मिन् जन-अर-ठालादेशः। १कुक्षौ। २वह्नौ, ३कठिने च त्रि० मेदि०। ४देशभेदे "अतलञ्च जनपदान्" इत्युपक्रमे "जठराः कुकुराश्चैव सदर्णाश्च भारत!" भा० भी० ९अ०। "आस्तेऽस्याः जठरे वीर्यमविषह्यम् सुरद्विषाम्" भाग० ७।७।९। "वायुवेगसमौ वीरौ जठरौ तुरगोत्तमौ" रामा० अयो० १०७।१३। "यः कदाचित् सम्यक् पचति कदाचिदाध्मानशूलोदावर्तातिसारजठरगौरवान्नक्लमप्रवाहणानि कृत्वा स विषमः" सुश्रु०। जठरयन्त्रणा जठरव्यथा जठरामयः।

जठरनुद् पु० जठरं नुदति रेचनाय नुद-क्विप् तुट्० आरग्वधे (सोंदाल) शब्दच० तस्य सेवने हि उदरशूलानस्य तथात्वम्।

जठराग्नि पु० जठरस्थितोऽग्निः। कौचेये अन्नादिपाचके वह्नौ "अन्नरसोजठराग्निना पच्यमानोरक्ततां प्रतिपद्यते" मिताक्षरा जठराग्नलादयोऽप्यत्र "जठराग्निर्हि वायुना संयुक्तमाशयोऽन्नं पचति तत्प्रकारो योगशास्त्रे उक्तो यथा "आयुर्यं भुक्तमाहारं स वायुः कुरुते द्विधा। संप्रविश्याग्निमध्यं तु पृथक् किट्टं पृथक् मलम्। अग्नेरूर्द्धं जलं स्थाप्य तदूर्द्धञ्च जलोपरि। जलस्याधः स्वयं प्राणः स्थित्वाग्निं धमते मुहुः। वायुनाध्मायमानोऽग्निरत्यर्थं कुरुते जलम्। अन्नं तदुष्णतोयेन समन्तात् पच्यते पुनः। द्विधा भवति तत् पक्वं पृथक् किट्टं पृथग् रसम्। रसेन तेन ता नाड्यः संपूर्यन्ते क्रमेण च। प्रतर्पयन्ति सम्यक् धातवो देहं समन्ततः"।

जठरामय पु० जठरे रोगे राजनि० अतिसारशब्दे १०६पृ० दृश्यम्। जठरगदादयोऽप्यत्र। "भवति धरणि जे चतुर्थांशे ज्वरजठरगदाक्षिगुल्मवः" बृ० स०१०४अ०

जठल न० जठरं वाडवेनात्यर्थं अच् रस्य लः। जठरवदुदकाधारे "चतस्रो नावो जठलस्य जुष्टाः" ऋ० १।१८२।६। जठलस्य जठरवदुदकाधारस्य"भा०।

जड त्रि० जलति धनीभवति जल-अच् डस्य लः "[illegible]ष्टं वानिष्टं वा न वेत्ति योमोहात्। परवशग. ६ भवेदिह नाम्ना जडसंज्ञकः पुरुषः" उक्तलक्षणे १मन्दबुद्धौ २मूर्खे

श्वेदयज्ञासमर्थे "अनंगौ क्लीवपतितौ जात्यन्धबधिरौ तथा। उन्मत्तजडमूकाश्च ये च केचिदिरिन्द्रियाः" मनुः "वेदायज्ञासमर्थो जडः" इति दायभागः ४ड्डिमयप्रत्ये ड्डिमेन मन्दक्रियेऽर्थे ६मु० ६अयप्रत्ये च मेदि०। ७जले न० रा-यमुकुटः। ८सीसके न०राजनि०। ९चेतनभिन्ने अज्ञानादि समूहे वेदान्तः। तत्रते हि पदार्थौद्विधा जडोऽजडश्च तत्र जडोऽज्ञानतत्कार्य्यसंघः। अजडश्चेतनः इति भेदः। "अज्ञानादिसकलजडसमूहोऽवस्तु" वेदान्तसा० "वेदामस्ते किं वा जननि! वयसश्चैजडधियः" कालीस्तवः "नापृष्टः कस्यचिद् ब्रूयात् नचान्यायेन पृच्छतः। जानन्नपि हि मेधावी जडवत् लोक आचरेत्" मनुः। तस्य भावः ष्यञ् जाद्य न० तत्र जडता स्त्री त्व

जड़त्व न० दमनिच् जडिमन् पु० जडभावे। [ज्वलायुधः

जड़क्रिय त्रि० जड़स्य ड्डिमश्लिष्टस्येव क्रियास्य। चिरक्रिये।

जड़ता स्त्री जड़+भावे तल्। अपाटवे शीतलत्वे "उदञ्चद्रोमाञ्चं वलति जड़तामङ्गमखिलम्" मा० द० "भुजलता जड़तामवलाजनः" रघुः। "अपतिपत्तिर्जडता स्यादिष्टानिष्टदर्शनश्रुतिभिः। अनिमिषनयननिरीक्षणतृष्णीम्भावादयस्तत्र" सा०द० उक्ते व्यभिचारिगुणभेदे। ष्यञ् जाद्य त्व जड़त्व तत्रार्थे न०।

जड़भरत पु०जडोमूक इव भरतः। आङ्गिरसप्रवरऋषौ योगिभेदे सच हि पूर्व्वतरजन्मनि भरतनामा ऋषिरासीत् स च वानप्रस्थाश्रमे हरिणशिशुपालनेन तत्स्नेहवशात् मृत्युकाले तमनुस्मरन् मृगत्वमाप्तो कर्म्मक्षयात् तद्देहं त्यक्त्वा पुनः आङ्गिरसप्रवरस्य पुत्रतामासाद्य स्नेहदोषेण पुनस्तिर्य्योनिमाप्तिभयेन ज्ञानवानपि जडत्वमिव व्यञ्जयन्नासीत्। तत्कथा च भाग० ५स्क० स्थिता दिङ्मात्रमत्र प्रदर्श्यते।

"अथ कस्यचिद्द्विजवरस्याङ्गिरःप्रवरस्य शमदमतपःस्वाध्यायाध्ययनत्यागसन्तोषतितिक्षाप्रश्रयविद्यानसूयात्मज्ञानानन्दयुक्तस्वात्मसदृशसुतशीलाचाररूपौदार्य्यगुणा नव सौदार्य्या अङ्गजा बभूवुः। मिथुनञ्च यवीयस्यां भार्य्यायाम्। यस्तु तत्र पुमांस्तं परमभागवतं राजर्षिप्रवरभरतमुद्दिश्य मृगशरीरम् चरमशरीरेण विप्रत्वं गतमाहुः। तत्रापि स्वजनसङ्गच्च भगवतः कर्म्मबन्धविध्वंसनश्रवणस्मरणगुणविवरणचरणारविन्दयुगलं मनसा विदधदात्मनः प्रतीपतामाशङ्कमानो भगवदनुग्रहेणानुस्मृतस्वपूर्वजन्मावलिरात्मानमुन्मत्तजडान्धबधिरस्वरूपेण दर्शयामास लोकस्य। तस्यापि ह वा आत्मजस्य स विप्रः पुत्रस्नेहानुबद्धमना आसमावर्त्तनात् संस्कारान् यथोपदेशं विदधान उपनीतस्य च पुनः शौचाचमनादीन् कर्म्मनियमाननभिप्रेतानपि समशिक्षयत्। अनुशिष्टेन हि भाव्यं पितुः पुत्रेणेति। स चापि तदुह पितृसन्निधावेवासप्रोक्तोनमिव च करोति। छन्दांस्यध्यापयिष्यन् सह व्याहृतिभिः सप्रणवशिरस्कांपदां सावित्रीं यौन्यवसन्निकान्मासानधीयानमथसमवेतरूपं याहयामास। एवं स्वतनुज आत्मन्यनुरागावेशितचित्तः शौचाध्ययनव्रतनियमगुरुनलशुश्रूषादीपकुर्वाणकर्म्मोपनयनमभियुक्तान्यपि स्वयमनुशिष्टेन भाव्यमित्यसदाग्रहः पुत्रमनुशास्य स्वयं तावदनधिगतमनोरथः कालेनाप्रमत्तेन स्वयं यह एव प्रमत्तउपसंहृतः। अथ यवीयसी द्विजसनी स्वगर्भजातं मिथुनं सपत्न्या उपन्यस्य स्वयमनुसंस्थया पतिलोकमगात्। पितर्युपरते भ्रातर एनमतत्प्रभावविदस्वस्थां विद्यायामेव पर्य्यवसितमतयोन परविद्यायां जडमतिरिति भ्रातरनुशासननिर्बन्धाच्छ्रद्दधत्सन्।

स च प्राकृतैर्द्विपदपशुभिरुन्मत्तजड़बधिरमूकेत्यभिभाष्यमाणो यदा तदनुरूपाणि प्रभाषते कर्म्माणि च कार्य्यमाणः परेच्छया करोति। विदितो वेतनतोवा याच्ञया यदृच्छया वोपसादितमन्नं बुभुक्षितं कदन्नं वाश्नवद्धरति परं नेन्द्रियप्रीतिनिमित्तम्। नित्यनिवृत्तनिमित्त स्वसिद्धविशुद्धानुभवानन्दस्वात्मलाभाधिगमः सुखदुःखयोर्हानिनिमित्तयोरसम्भावितदेहाभिमानः। शीतोष्ण वातवर्षेषु हृषद्वापाहताङ्गः पीनसंहननाङ्गः स्वशिखलसंवेशनानुमर्दनाभ्यञ्जनरजसा मलावगुण्ठितविज्ञानाभिव्यक्तब्रह्मवर्च्चसः कृपटाहतकटिरूपवीतेनोरुमन्विष्यद्विजातिरिति ब्रह्मबन्धुरिति संज्ञयाऽतज्ज्ञजनावमतो विचचार। यदा तु परत आङ्गारहर्म्म्यं वेतनतरेच्छमानः स्वभ्रातृभिरपि केदारकर्म्मणि निरूपितस्तदपि करोति। किन्तु न समं विषमं न्यूनमधिकमिति वेद। कणपिण्याकफलीकरणकुल्माषस्थालीपुरीषादीनप्यमृतवदभ्यवहरति। अथ कदाचित् कश्चिद्दस्युपतिर्भद्रकाल्यै पुरुषपशुमालभतापत्यकामः। तस्य ह दैवविहतस्य पशोः पदवीमनुचराः परिधावन्तो निशि निशीथसमये तमसा पाहतायामनधिगतपशव आकस्मिकेन विधिना केदारान् वीरासनेन मृगयराजादिभ्यः संरक्ष-

माणमङ्गिरःप्रवरश्रुतमपश्यन्। अथ तत्रमनवद्य-लक्षणमवस्थ्य भर्तृकर्म्मनिष्पत्तिं मन्यमानावहा रज-नया चण्डिकाष्टहसपनिन्युर्मुदा विकसितवदनाः। अथ पशयस्तं स्वविधिनाभिषिच्याहतेन वाससाच्छाद्य-भूषणानुलेपस्रक्ताम्बूलादितिलकादिभिरुपस्कृतं भुञ्जन्तं धूपदीपमाल्यलाजकिसलयाङ्कुरफलोपहारोपेतया वैश-वसंस्थया महता गीतस्तुतिसदङ्गपणवघोषेण च पुरुषपशुं भद्रकाल्याः पुरत उपवेशयामासुः। अथ इषु-राजपतिः पुरुषपशोरसृगासवेन देवीं भद्रकालीं यक्ष-माणस्तदभिमन्त्रितमसिमतिकरालनिशितमुपादत्त। इति तेषां इषुलानां रजस्तमःप्रकृतीनां धनमदरजउत्-सिक्तमनसां भगवत्कलाधीरकुलं कदर्थीकृत्योत्पथेन स्वैरं विहरतां हिंसाविहाराणां कर्म्मातिदारुणं यद् ब्रह्मभूतस्य साक्षाद्ब्रह्मर्षिसुतस्य निर्वैरस्य सर्वभूतसु-हृदः सुनाभाभ्यननुमतमात्मभनं तदुपलभ्य ब्रह्मतेजसा-ऽतिदुर्विषहेण दन्दह्यमानेन वपुषा सहसोच्चचाट सैव देवी भद्रकाली। अथममर्षरोषावेशरभसविलसि-तभ्रुकुटिविटपकुटिलदंष्ट्रारुणेक्षणाटोपातिभयानकवदना हन्तुकामैवेदं महाट्टहासमतिसंरम्भेण विसृजन्ती सत उत्पत्य पापीयसां इषूणां तेनैवासिना विहृत्य-शीर्षां गलात् स्रवन्मसृगासवमत्युष्णं सह गणेन नि-पीयातिपानमदविह्वलोच्चैस्तरां स्वपार्षदैः सह जगौ ननर्त्त च विजहार च शिरःकन्दुकलीलया। एवमेव खलु महदभिचारातिक्रमः कर्तुस्त्रैनात्मने फलति। न वा एतद्विष्णुदत्त! महदद्भुतं यदसंभ्रमः स्वशिरश्छेदे आपतितेऽपि विसृजदेहाद्यात्मभावसुहृदयपत्नीनां सर्व-सत्वसुहृदात्मनां निर्वैराणां साक्षाद्भगवताऽनिमिषारि-वरायुधेनाप्रमत्तेन तैस्तैर्भावैरभिरक्ष्यमाणानां तत्पदमूल-मकुतश्चिद्भयमुपस्तृतानां भागवतपरमहंसानाम्"। इत्य० "अथ सिन्धुसौवीरपतेरहूगणस्य व्रजतस्तन्महाटवीं तत्कुलपतिना शिविकावाहपुरुषान्वेषणसमये दैवेनोप-सादितः स द्विजवरउपलब्धः। एष पीवानसंहननाङ्गो-गोखरवद्धुरं वोढुमलमिति पूर्वविदिष्टकृतैः सह सङ्कृतः प्रसमीक्ष्यतदर्हणयाह शिविकां स महानुभावः! यदा हि द्विजवरस्तेषुमात्रावलोकानुगतेन समाहिता पुरुषगतिस्तदा विषमगतां स्वशिविकां रहूगण उपधार्य पुरुषानधिवकृत आह। हे वोढारः साध्वतिक्रा-मत किमिति विषमसृजते यानमिति?। अथ त ईश्वर-वचः सोपालम्भमुपाकर्ण्य उपायाकुशलाः साध्वसाध्वसंकुलित-मनसस्तं विज्ञापयां बभूवुः। न वयं नरदेव! प्रमदा भवद्विधमानुपथाः साध्वेव वहामः। अयमधुनैव नि युक्तोऽपि नहूतं व्रजति नानेन सह योढुमहं वयं पारवा-मदति। सांसर्गिकोदोष एव नूनमेकस्यापि सर्वेषां संसर्गिणां भवितुमर्हतीति निश्चित्य निगृह्य क्षपणवचो राजा रहूगण उपासितद्वृद्धोऽपि निसर्गेण बलात्कृत रैणुदुत्तितमन्युरविसृष्टब्रह्मतेजसं जातवेदसमिव रजसा-हृतमतिराह अहो कष्टं आतर्व्यक्षसुरपरिचर्यालो दीर्घ-मध्वानमेक अहियान् सुचिरं नातिपीवानसंहननाङ्गो रजसा चोपद्रुतो भवान् सखे! नो वा परएते संवहन इति बहुविप्रलब्धोऽविद्यया विरचितद्रव्यगुणकर्म्माशये स्वचरमकलेवरेऽवस्तुनि संस्थानविशेषे अहं ममेत्यनध्या-रोपितमिथ्याप्रत्ययो ब्रह्मभूतस्तूष्णीं शिविकां पूर्ववद्-वाह। अथ पुनः स्वशिविकायां विषमगतायां प्र-कुपित उवाच रहूगणः। किमिदमरे त्वं जीवन्मृतोमां कदर्थीकृत्य भर्तुरादेशमतिचरसि। प्रमत्तस्य च ते करोमि चिकित्सां दण्डपाणिरिव जनतायाः यथा प्रकृतिं स्वां भजिष्यसीति। एवं बहुवल्गुभिभाषमाणं नरदेवाभिमानं रजसा तमसानुविद्धेन मदेन तिरस्कृता शेषभगवत्प्रियनिकेतं पण्डितमानिनं स भगवान् ब्राह्मणो ब्रह्मभूतः सर्वभूतसुहृदात्मा योगेश्वरचर्यायां नातिव्युत्पन्नमतिं स्मयमान इव विगतस्मय इदमाह। श्रीब्राह्मण उवाच। त्वयोदितं व्यक्तमविप्रलब्धं भर्तः स मे स्याद्यदि वीर! भावः। गन्तुर्यदि स्यादधिगम्यमध्वा पीवेति राशौ न विदां प्रवादः। स्थौल्यं कार्श्यं व्याधयश्चाधयश्च क्षुत्तृड्भयं कलिरिच्छा जरा च। निद्रा-रतिर्मन्युरहं मदः शुचो देहेन जातस्य हि मे न सन्ति। जीवन्मृतत्वं नियमेन राजन्नाद्यन्तवद् यद्विकृतस्य दृष्टम्। स्वस्याप्यभावो ध्रुवतो यतस्तद्व्यक्तेऽसौ-विधिक्लृप्तयोगः। विशेषबुद्धेर्विवरं मनाक् च पश्यामि यत्र व्यवहारतोऽन्यत्। क ईश्वरस्यात्र किमीशितव्य मथापि राजन्! करवाम किन्ते। उन्मत्तमत्तजडवत् स्वसंस्थां गतस्य मे वीर! चिकित्सितेन। अर्थः कियान् भयता चिकित्सितेन स्वप्रमत्तस्य च पिष्टपेषः। श्रीशुक उवाच। एतावदनुवादपरिभाषया प्रत्युदीर्य स मुनिवर उपशमशील उपरतानात्म्यनिमित्त उपभोगेन कर्म्मारब्धं व्यपनयन् राजवानमपि तथैवोवाह। स

चापि पाखण्डवेष ! सिन्धुसौवीरपतिस्तत्त्वजिज्ञासायां सम्यक्श्रद्धयाधिकाराधिकारलङ्घदयन्थिविमोचनं द्विजवच आत्मन्य बन्धयोगमन्यसम्मतं त्वरयाऽवरुह्य शिरसा तत्पादमूलमुपसृतः शमायन् विगतन्दपदेव स्वय उवाच। कस्त्वं निगूढचरसि द्विजानां विभर्षिसूत्रं कतमोऽवधूतः। कस्यासि कुत्रत्य इहापि कस्मात् क्षेमाय नश्चेदसि नोत शुक्रः। नाहं विशङ्के सुरराजवज्रान्न त्रासचूलान्न यमस्य दण्डात्। नान्यर्कसोमानिलवित्तपाग्न्यक्षेभ्यं ब्रह्मकुलावमानात्। तद् ब्रूह्यसङ्गो जडपङ्गुगूढविज्ञानवीर्योविचरस्यपारः। वर्चांसि योग यधितानि साधो! न नः क्षमन्ते मनसापि भेत्तुम्। अथ च योगेश्वरमात्मतत्त्वविदां सुनीनां प्रवरं गुरुवै! प्रष्टुं प्रवृत्तः किमिहारणं यत्पाच्छाद्धरिं ज्ञानकलावतीर्णम्। सर्वं भवान् लोकनिरीक्षणार्थमव्यक्तलिङ्गोविचरत्यपि स्वित्। योगेश्वराणां गतिमन्दुर्बुद्धिः कथं विपच्चीत ब्रह्मानुवङ्गः" १०अ०।

ततः तेन रङ्गगणेशपाय योगसङ्गा प्रारब्धावधाने सतो बभूवेति कथा तदुत्तराध्यायादौ स्थिता।

**जडा** स्त्री जड़ं करोति जड+णिच्-अच्-टाप्। १भूरुहे शिम्बाम् अमरः २भूम्यामलक्ष्याम् रत्नमा०।

**जड़िमन्** पु० जड़स्य भावः ड्रढा०इमनिच्। आड्ये। "जनित जड़िम व्याकुलं व्याहरन्तो" "दृष्टानिष्टापरिज्ञानं यत्र प्रश्नेष्वनुत्तरम्। दर्शनश्रवणाभावो जड़िमा सोऽभिधीयते" इत्युज्ज्वलमण्युक्ते अवस्थाभेदे।

**जतविल** त्रि० जतुना निर्वृत्तादि काशा० इल। जतुद्रव्य निर्वृत्तादौ १कलुकद्रव्ये २सङ्केरद्वीपने द्रव्यभेदे।

**जतु** न० जन-ड तोऽन्तादेशः। १चलके, २लाक्षायाञ्च। स्वार्थे क। तत्रार्थे मेदि०। "घृतं तैलं घृतञ्चैव जतुदारूनि चैव हि" भा० आ० १४३अ०। "अप्राप्तमधिकं यत्नं क्षिप्यते जतुकाष्ठवत्" भा०शा० २००अ०। ३चर्मचटिकायां स्त्री "सन्धिभ्यो जतुः" यजु० २४।२५। "जतुः पत्राख्याः पक्षिणीः" भेदि०। तस्य विकारः "तण्डुलजतुनोः सुक् च" पा० अण् सुक् च। जातुष तद्विकारे (कड़ चुड़ि) प्रभृतौ अमरः।

**जतुक** न० जतु इव कायति के-क। १क्षिङ्गौ भेदि०। २अनीनामगन्धद्रव्ये स्त्री भरतः। ३चर्मचटिकायां स्त्री (चामचिका) शब्दरत्ना०। ४पर्पट्यां मालवदेशप्रसिद्धलतायां स्त्रीभावप्र०"पर्पटी रङ्गना क्षया जतुका जननी जनी। जतुलक्ष्माग्निसंस्पर्शा जतुका चक्रवर्त्तिनी। पर्पटी तुवरा तिक्ता शिशिरा वर्णलङ्घनः। विषप्रणहरी कण्डूकफपित्तास्र कुष्ठनुत्" भावप्र० तद्गुणोक्तिः।

**जतुकारी** स्त्री जतुकवत् संज्ञेयमश्नुते अ+अण् उप० स० गौरा० ङीष्। जतुकालतायां राजनि०।

**जतुकृत्** स्त्री जतुवत्संज्ञेयं करोति क-क्विप् ह्रस्व०। जतुकालतायाम् अमरः।

**जतुक्षणा** स्त्री जतुरिव क्षणा। जतुकालतायाम् भावप्र०।

**जतुनी** स्त्री० जतु संज्ञेयेन तद्रूपं नयति स्वसंश्लिष्टद्रव्यम् नी-क्विप् ह्रस्व०। चर्मचटिकायां त्रिका० तस्य संज्ञेयात् द्रव्यस्य जतुवद्रूपापत्तिर्लोकसिद्धा।

**जतुपुत्रक** पु० जतुनिर्म्मितः पुत्र इव (पुत्तली)। पाषाणपुत्तिकायां तस्य जतुनिर्म्मितत्वेन तथात्वम्। काष्ठादि रचितस्य तु उपचारात् तत्रामता।

**जतुमणि** पु० "समसृत्सद्मसरजं मसृणं कफरक्तजम्। मसृजं लक्ष्म चैकेषां लक्ष्मोजतुमणिश्च सः" इति माधवकरोक्ते रोगभेदे।

**जतुमुख** पु० जतुनेव संश्लिष्टं मुखमस्य बा० स०। द्रोणिभेदे "क्षणद्रोणिघाताम्बुखजतुमुखनन्दीमुखनाराचकस्वरितकङ्कटानकपारावतकपाटलप्रभृतयो द्रोणयः" सुश्रु०।

**जतुरस** पु० ह्रस्व०। अलक्तके राजनि०।

**जतूखो** जतुः चर्मचटिका प्राणिजातित्वेऽपि वेदे निज० अड्। पक्षिभेदस्त्रियाम् "कच्चो जतूः सुपोलका ते त्रय इतरजनानाम्" यजु० २४।३६। जतूः सुपोलका एतौ पक्षिविशेषौ" वेददी०।

**जतूकर्ण्य** पु० ऋषिभेदे। तस्य गोत्रापत्यम् गर्गा० यञ्। जातूकर्ण्य तद्गोत्रापत्ये तस्य छात्रः कस्वा० अण् यलोपश्च। जातूकर्ण तच्छात्रे। जातूकर्ण्यश्च उपस्मृतिकर्त्ता यथाह हेमा० दा० अङ्गिराः "आपस्तम्बोचिकेतश्च स्कन्दोलौगाक्षिकश्यपौ। व्यासः सनत्कुमारश्च शतदुजेनकस्तथा। व्याघ्रः कालायनश्चैव जातूकर्ण्यः कपिञ्जलः। बौधायनः कणादश्च विश्वामित्रस्तथैव च। उपस्मृतिकृतश्चैतान् प्रवदन्ति मनीषिणः"। जातूकर्ण्य इत्यत्र जातूकर्ण इति पाठः लिपिकरप्रमादात् तच्छात्रस्य उपस्मृति कर्त्तृत्वमभिप्रेत्य वा तथा पाठ इत्यन्ये।

**जतूका** स्त्री जन-उलूका० नि०। १चर्मचटिकायां अमरः। २अनीनामगन्धद्रव्ये शब्दर०।

**जत्रु** न० जन-रु तोऽन्तादेशः। स्कन्धवक्षःसन्धौ "ग्रीवा मद्ध-

दशास्थि स्यात् जन्वेकैकं तथा हनु" याज्ञ० वचोऽंसयोः सन्धिः जत्रु:" भिता० "जत्रूर्जत्रुगतान् करोति च विशेषतः" सुश्रु० "जत्रुदेशे भयं वीरो व्यवासीदद्रथे तदा" भा० व० १७अ०। स्वार्थे-क तत्रार्थे शब्दरत्ना०।

जत्वश्मक न० जत्रूपमश्मकम्। शिलाजतुनि राजनि०।

जन जनने जुहो० पर० अक० सेट् घटा०। जजन्ति। अजनीत् अजानीत् घटा०। जनयति जनितः वि-अति परस्परजनने आत्म०। व्यतिजनन्ते। सार्वधातुकसंज्ञोरिट् व्यतिजनिषीष्ट व्यतिजनिषीध्वं

जन जनने दि० आ० अक० सेट् जायते अजनि अजनिष्ट। जजान जज्ञतुः ईदित्। जातः। घटा०। जनयति। उभयोरपि उपसर्गात् परयोस्तदुपसर्गद्योत्यार्थयुक्तजनने तत्र।

अति-अतिक्रम्य जनने सक०।

अधि+आधिक्येन जनने। आधिपत्येन जनने च "तैजस एव तदध्यापोजायन्ते। "ब्राह्मणोजायमानोऽपि पृथिव्यामधिजायते" मनुः।

अनु+ पश्चाज्जनने अक०। "पुत्रिकायां कृतायां च यदि पुत्रोऽनुजायते" मनुः। पश्चादुत्पत्त्या साहश्ये करणे सक०। "असौ कुमारस्तमतोऽनुजातस्त्रिविष्टपस्येव पतिं जयन्तः" रघु०।

सम्+अनु+सम्यगनुजनने सक० "पितॄन् समनुजायन्ते नरा मातरमङ्गनाः" रामा० अयो० ३५।२६।

अभि+अभिव्याप्तीकृत्य जनने सक० "भवन्ति सम्पदं दैवीमभिजातस्य भारत!"। "अज्ञानञ्चाभिजातस्य पार्थ! सम्पदं मासुरीम्" गीता। सम्यग्जनने आभिमुख्येन जनने अक० "शुचीनां श्रीमतां गेहे योगभ्रष्टोऽभिजायते" "कामात् क्रोधोऽभिजायते" गीता।

प्रति+प्रतिरूपजनने अक०। "प्रजापतिस्त्वरसि गर्भे त्वमेव प्रतिजायसे" प्रश्नो०।

वि+विशेषेण जनने विरूढजनने विकारे च "पतिना रक्षिता तस्मात् पुत्रं देवी व्यजायत" रामा० आदि० ७०अ०। गर्भमोचने सक० "यूनां मत्ता प्रथमं विजत्तृतः" ऋ० ६।६८।५। "पशुस्त्रिष्ठन् गर्भं धत्वानुप विश्व विजायते" शत० ब्रा० ७।४।१।११। "कामसाविजनितोः सम्भवेम" तै० सं० ३।५।११।५ "तस्मात् व्यजायत" रामा० बा० १।७०। "यज्ञो पुत्रं व्यजायत" वा २७।८।

जन पु० जन-अच्। १लोके "जनस्तुषाराद्रिनगपर्वताविव" माघः २मङ्गलोकादूर्द्धलोके ३असुरभेदे च जनार्द्दनः। तल्लोकप्राप्तिहेतुकथनं भृगुरङ्गतोक्त्वा "इत्थं कथां कथयतोर्भगवद्वधयोः प्रिये!। अर्द्धेन विमानं तज्जनलोकं निनाय तान्। निवसन्त्यमलायत्र मानसाः ब्रह्मणः सुताः। सनन्दनाद्या योगीन्द्रा सर्वे तेऽधूर्ध्वरेतसः। अन्ये तु योगिनोये वै कृच्छ्रब्रह्मचारिणः। सर्व्वद्वन्द्वविनिर्मुक्ताश्चो वसन्त्यत्र निर्भयाः। मङ्गलोकः क्षितेरूर्द्धमेककोटिप्रमाणतः। कोटिद्वये तु संख्यातो जनो भूलोकतोऽनैः" काशी० ख०।

जनक पु० जन-णिच्-ण्वुल्। १पितरि अमरः "शुध्येत्सुजनकक्षितिभिः" शु० त०। २उत्पादके त्रि० "जन्यानां जनकः कालो जगतामास्यथोमतः" भाग० "३उपस्मृतिकारके ऋषिभेदे जतूकर्ण्यशब्दे दृश्यम् निमिवंशजाते ४ विदेहनृपभेदे। इक्ष्वाकुवंश्यनिमिवसिष्ठयोरन्योन्यशापात् विदेहतामाप्तौ वसिष्ठस्य देहप्राप्तिरुक्ता रामा० उत्त० ५६ अ०। निमेर्जनकोत्पत्तिकथोक्ता यथा "इक्ष्वाकुर्विदेहं राजानमब्रवीत् सर्व एव ते। तत्र ते याजयामासुर्वसिष्ठादीन्मनीषिणः। तत्र देहं नरेन्द्रस्य रक्षन्ति द्विजोत्तमाः। गन्धैर्माल्यैश्च वस्त्रैश्च पौरभृत्यसमन्विताः। ततो यज्ञे समाप्ते तु भृगुस्तत्रेदमब्रवीत्। यानविघ्नमिते चेतस्तुष्टोऽस्मि तव पार्थिव!। सुमीताश्च सुराः सर्वे निमेरेतत्तदाब्रुवन्। वरं वरय राजर्षे कं ते चेतोनिरूप्यताम्। एवमुक्तः सुरैः सर्वैर्निमेरेतत्तदाब्रवीत्। नेत्रेषु सर्वभूतानां वसेयं सुरसत्तमाः!। बाढमित्येव विबुधानिमेरेतत्तदाब्रुवन्। नेत्रेषु सर्वभूतानां वायुभूतश्चरिष्यसि। त्वत्कृते निमिषिष्यन्ति चक्षूंषि पृथिवीपते!। वायुभूतेन चरता विश्रामार्थं मुहुर्मुहुः। एवमुक्त्वा तु विबुधाः सर्वे जग्मुर्यथागतम्। ऋषयोऽपि महात्मानो निमेर्देहं समाहरन्। अरण्यिन्तत्र निक्षिप्य मथनञ्चक्रुरोजसा। मन्त्रहोमैर्महात्मानः पुत्रहेतोर्निमेस्तदा। अरण्यां मथ्यमानायां प्रादुर्भूतो महातपाः। मथनान्मिथिरित्याहुर्जननाज्जनकोऽभवत्। यस्माद्विदेहात्संभूतोवैदेहस्तु ततः स्मृतः। एवं विदेहराजश्च जनकः पूर्वकोऽभवत्। मिथिनाम महातेजा स्तेनायं मैथिलोऽभवत्। इति सर्वमशेषतो मया कथितं संभवकारणन्तु सौम्य। नृपसूनुरयं यापजं द्विजस्य द्विजशापाच्च यदद्भुतं नृपस्य"।

५गन्धराष्टरपुत्रभेदे। "सेनस्तन्योऽतिसेनश्च जनको जन-

कस्ततः" हरिव० १६२अ०। "तद्वैतज्जनको वैदेहो याज्ञवल्क्यं प्रपच्छ" शत० ब्रा० ११।३। १।२। "सहस्रमेतस्यां वाचि दद्मो जनको जनक इति वै जना धावन्तीति" १४।५।१।१।

जनकतनया स्त्री जनकस्य तनयेव तत्पालयत्वात्। रामकलत्रे जनकयज्ञे वेद्यां हलाकर्षणजातायां सीतायां सा हि सत्ययुगे हरिस्मृतिसुतकृतध्वजकन्या वेदवती नामासीत् त्रेतायां सीताजातत्वात् सीतानामा बभूव रामा० उत्त० १७अ० तत्कथा यथा।

"कुशध्वजो नाम पिता ब्रह्मर्षिरमितप्रभः। हरिस्मृतिरतः श्रीमान् बृहद्या तुल्यो हरिस्मृतेः। तस्याहं कुर्वतो नित्यं वेदाभ्यासं महात्मनः। समभूता वाङ्मयी कन्या नाम्ना वेदवती स्मृता। ततो देवाः स गन्धर्वायक्षराक्षसपन्नगाः। ते चापि गत्वा पितरं वरणं रोचयन्ति मे। न च मां स पिता तेभ्यो दत्तवान् राजसेश्वर!। कारणं तद्दिष्यामि निशामय महाभुज!। पितुस्तु मम जामाता विष्णुः किल सुरेश्वरः। अभिप्रेतस्त्रिलोकेशस्तस्माद्दास्यन्न मे पिता। दातुमिच्छति तस्मै तु तच्छ्रुत्वा बलदर्पितः। शम्भुनामा ततो राजा दैत्यानां कुपितोऽभवत्। तेन रात्रौ शयानो मे पिता पापेन हिंसितः। ततो मे जननी दीना तच्छरीरं पितुर्मम। परिष्वज्य महाभागा प्रविष्टा हव्यवाहनम्। ततो मनोरथं सत्यं पितुर्नारायणं प्रति। करोमीति तमेवाहं हृदयेन समुद्वहे। इति प्रतिज्ञामारुह्य चरामि विपुलं तपः। एतत्ते सर्वमाख्यातं मया राजसुतस्य!। नारायणो मम पतिर्न त्वन्यः पुरुषोत्तमात्। आश्रये नियमं घोरं नारायणपरीप्सया। विज्ञातस्त्वं हि मे राजन्! गच्छ पौलस्त्यनन्दन!! जानामि तपसा सर्वं त्रैलोक्ये यदि वर्तते।" ततस्तां कामयमानेन रावणेन सा धर्षिता तस्मै शापं दत्त्वा समार तत्कथा

"एवमुक्त्वा तदा वेदवत्या निशाचरः। मूर्धजेषु तदा कन्यां करायेण परामृशत्। ततो वेदवती क्रुद्धा केशान् छित्त्वा स्वयं शिरः। अग्निमूर्त्वा करस्थाः केशांश्चिच्छेदाऽकरोत्। सा ज्वलन्तीव रोषेण दहन्तीव निशाचरम्। उवाचाग्निं समाधाय मरणाय कृतत्वरा। धर्षितायास्त्वयाऽनार्य! न मे जीवितमिष्यते। रक्षःसकाशात् प्रवेक्ष्यामि पश्यतस्ते हुताशनम्। यस्मात्तु धर्षिता चाहं त्वया पापात्मना वने। तस्मात्तव वधार्थं हि सम्भवत्स्याम्यहं पुनः। न हि शक्यः स्त्रिया हन्तुं पुरुषः पापनिश्चय!। शापे त्वयि मयोत्सृष्टे तपसश्च व्ययो भवेत्। यदि त्वस्ति मया किञ्चित्सुकृतं दत्तं हुतं तथा। तस्मात् त्वयोनिजा साध्वी भवेयं धर्मिणः सुता। एवमुक्त्वा प्रविष्टा सा ज्वलितं जातवेदसम्। पपात च दिवो दिव्या पुष्पवृष्टिः समन्ततः। सैषा जनकराजस्य प्रसूता तनया प्रभो!। तव भार्या महाबाहो! विष्णुस्त्वं हि सनातनः। पूर्वं क्रोधकृतः शत्रुर्यस्मात्ते निकृतस्त्वया। उपाश्रयित्वा शैलाभस्तव वीर्यमप्रमेयम्। एवमेषा महाभागा सत्यं पुनरुत्सृते पुनः। जज्ञे हरिसुखोत्सृष्टवेद्यामग्निशिखोपमा। एषा वेदवती नाम पूर्वमासीत् कृते युगे। त्रेतायुगमनुप्राप्य वधार्थं तस्य रक्षसः। उत्पन्ना मैथिलकुले जनकस्य महात्मनः"। कालिकापु० ३७अ० तस्याः पृथिव्या उत्पत्तिरुक्ता। कल्पभेदादविरोधः। जनकात्मजाजनकतनयादयोऽप्यत्र।

जनकराजकूप पु० तीर्थभेदे।

जनकसप्तरात्र पु० सप्तभिः रात्रिभिःसाध्यः अण् तस्य लुक् अच् समा० जनकेन दृष्टः सप्तरात्रः। जनकदृष्टे सप्तरात्रसाध्ये यागभेदे। "जनकसप्तरात्रकामः अभिप्लव चतुरहो विश्वजिन्नकाग्नेत ज्योतिष्टोमः" आश्व० श्रौ० १०।३।१४। "जनकसप्तरात्रसाहस्रः प्रिरुच्यते। अभिप्लव चतुरहो विश्वजिन्नकाग्नेत ज्योतिष्टोम इति" नारा० "जनक सप्तरात्रः चतुर्थो विश्वजिन्नकाग्नेतम्"। कात्या० श्रौ० २३।५।६ "चतुर्थः पार्श्वेभ्यः परो विश्वजिन्नकाग्नेतं च"।

जनकारिन् पु० जनैः कीर्यते कृ-बा० कर्मणि णिनि। अजकर्के राजनि०। [शिवलिङ्गरूपे तीर्थभेदे शिवपु०।

जनकेश्वर पु० जनकेन स्थापितः ईश्वरः। जनकस्थापिते

जनङ्गम पुंस्त्री जनेभ्योगच्छति वहिः गम-खच् मुम् च। चण्डाले स्त्रियां जातित्वात् ङीष्। "अवधीत्। जनङ्गम दुर्वृत्त यदि कृतदयो दयस्व तु। अधमशुचिपुरश्चेति प्रतिमाननान्तु नितरां न्यपोचिताम्" माघः।

जनचक्षुस् न० जनस्य चक्षुरिव। लोकचक्षुर्वत्प्रकाशके सूर्ये "सङ्क्षीभ्युदिते सूर्ये जनचक्षुषि निर्मले" हरिवं० १४२। लोकचक्षुःप्रभृतयोऽप्यत्र। "लोकचक्षुर्दिवाकरः" आदित्यहृदयम्।

जनजन्मादि पु० जनस्य जनिमतो जन्मन आदिः। परमेश्वरे। "जननो जनजन्मादिः" विष्णुस०।

जनत् पु० जन–भावे अति। जनने जनद्वच्छब्दे दृश्यम्।

जनता स्त्री जनानां समूहः तल्। जनसमूहे अमरः। "आगामिनीं स्टहिरे जनतास्तरूषाम्"। "विच्छिताङ्गिर्जनतया दधती" माघः।

जनत्रा स्त्री जनान् त्रायते त्रै–क। जङ्गमकुड्याम्"हारा०।

जनदेव पु० जनोदेव इव उपमितस०। नरदेवे नरश्रेष्ठे राजनि "जनको जनदेवस्तु मिथिलायां जनाधिपः" भा० शा० २१८अ०।

जनद्वत् पु० जनत् जननमस्त्यस्य मतुप् मस्य वः। जनन गुणयोगिनि वह्नौ "अग्नये तपस्वते जनद्वते पावकवते स्वाहा" ऐत० ब्रा० ७।८।

जनधा पु० जनं दधाति धा–किप्। जनपोषके वह्नौ स हि जनानां जठरस्थित्यादेः पाचनेन रसरक्तादि सम्पादनद्वारा पोषकः इति तस्य तथात्वम्" तैत्ति० ब्रा० ४।१।१।१।१। उदा०।

जनन न० जन–भावे ल्युट्। १उद्भवे २जन्मनि (स्वाश्रयो यनिवद्धशरीरसम्बन्धे) ३स्त्रीभावे च "यदैव पूर्वं जनने शरीरम्" कुमार०। दीक्षितस्य यज्ञादिषु ४दीक्षादिसंस्कारभेदे दीक्षारूपजन्मवत्त्वात् तथात्वम् "पुनर्वा एतस्यित्विजो गर्भं कुर्वन्ति ये दीक्षयन्तीत्यादि" श्रुतेः। "मातुरग्रे ऽधिजननं द्वितीयं मौञ्जिबन्धने। तृतीयं यज्ञदीक्षायां द्विजस्य श्रुतिचोदनादिति" मनुः। आधारे ल्युट्। ५वंशे। जन–णिच्–भावे ल्युट्। ६उत्पादने। "अन्योऽन्यशोभाजननाद् बभूव" कुमार०। कर्त्तरि ल्यु। ७उत्पादके त्रि० "सोमापूषणा जनना रयीणां जनना दिवो जनना पृथिव्याः" ऋ० २।४०।१। ८परमेश्वरे पु० "जननो जनजन्मादिः" विष्णुस०।

जननाशौच न० जनननिमित्तमशौचम्। प्रसवनिमित्ताशौचे अशौचशब्दे ३८६४ पृ० दृश्यम्।

जननि स्त्री–जन अनि। जनीनामगन्धद्रव्ये शब्दरत्ना०।

जननी स्त्री जनयति जन–णिच्–अनि जन–अपादाने अनि वा, ङीप्। १मातरि "जननीं संस्थितायान्तु समं सर्वे सहोदराः। भजेरन् मातरं रिक्थं भगिन्यश्च समांशयः" मनुः। २दयायां मेदि० ३जनीनामगन्धद्रव्ये ४चर्मचटिकायां शब्दर० ५यूथिकायां शब्दच० ६कटुकायां ७मक्षिकायाम् ८अश्वत्थवृक्षे च राजनि०। ९उत्पादकस्त्रीमात्रे "यदामस्ते क्रिं वा जनन्यै ! वयश्चकार जनिवः" काशीखण्डः "बीजप्ररोहजननीं ज्वलनः करोति" रघुः। "मांसेन स्त्रीजननी" विष्णुसू०। १०जटामांस्यां राजनि०।

जनपद पु० जनाः पदान्यत्र गच्छन्ति यत्र पद–आधारे घ। देशे। अमरः। "कुलानि जातीः श्रेणीश्च गणान् जनपदानपि" याज्ञव०। जनपदभेदाश्च भा० भी० ९अ० दर्शिता यथा

"अतऊर्द्धं जनपदान्निबोध गदतो मम। तत्रेमे कुरुपाञ्चालाः शाल्वा मात्स्येयजाङ्गलाः। शूरसेनाः पुलिन्दाश्च बोधा मालास्तथैव च। मत्स्याः कुशट्टाः कौशल्याः कुन्तयः काशिकोशलाः। चेदिमत्स्यकरूषाश्च भोजाः सिन्धुपुलिन्दकाः। उत्तमार्णा दशार्णाश्च भेकलाश्चोत्कलैः सह। पाञ्चालाः कोशलाश्चैव नैकपृष्ठा युगन्धराः। बोधा मद्राः कलिङ्गाश्च काशयोऽपरकाशयः। जठराः कुकुराश्चैव सदशार्णाश्च भारत"। कुन्तयोऽवन्तयश्चैव तथैवापरकुन्तयः। सोमन्ता मल्लकाः पाण्ड्राः विदर्भानूपवाहिकाः। अश्मकाः पांशुराष्ट्राश्च गोपराष्ट्राः करीतयः। अधिराज्यं कुशट्टाश्च मल्लराष्ट्रञ्च केरलाः। वारवाशूरापवाहाश्च पक्था वक्रातयः शकाः। विदेहा मगधाः कच्छा मलया विजयास्तथा। अङ्गा वङ्गाः कलिङ्गाश्च यक्षलोमान एव च। मल्लाः सुदेष्णाः प्रह्लादा माहिषाः शशकास्तथा। वाह्लीका वाटधानाश्च आभीराः कालतोयकाः। अपरान्ताः परान्ताश्च पल्लवाश्चर्म्मखण्डकाः। खटपीमिखराश्चैव मेरुभूताश्च मारिष ! । उपावृत्तानुपावृत्ताश्च सुराष्ट्राः केकयास्तथा। कुट्टाः परान्ता माहेयाः कच्छाः साकुटनिष्कुटाः। अन्ध्राश्च बहवो राजन्नलम्पाश्चैव च। बहिर्गिर्याङ्गमलदा मागधा मालवाभटाः। मद्धुत्तराः प्रावृषेया भार्गवाश्च जनाधिप ! । पुण्ड्रा भासाः किराताश्च सुदेष्णा वासुनास्तथा। शका निषादनिषधास्तथैवानर्त्तनैर्ऋताः। दुर्गलाः प्रतिमत्स्याश्च कुन्तलाः कुशलास्तथा। तीरग्रहाः शूरसेना ईजिकाः कन्यकास्तथाः। तिलभारा मधीराश्च मधुमन्तः सुकन्दुकाः। काश्मीराः सिन्धुसौवीरा गान्धारा दर्शकास्तथा। अभीसारा उलूताश्च शैवाला वाह्लिकास्तथा। दर्वीचरा नवाद्यार्णा वातजामरथोरगाः। बह्वयट्टाश्च कौरव्य ! सुदामानः सुमल्लिकाः। बट्टाः करीषकाः

यापि कुलिन्दोपत्यकास्तथा। यानायवो दशाः पार्श्वा रोमाणः कुशबिन्दवः। कच्छा गोपालकच्छाश्च जाङ्गलाः कुरुवर्णकाः। किराता बर्बराः सिद्धा वैदेहास्ताम्रलिप्तकाः। ओड्रा म्लेच्छाः ससैरिन्ध्राः पार्वतीयाश्च भारिष!। अथापरे जनपदा दक्षिणा भरतर्षभ!। द्रविड़ाः केरलाः प्राच्या मूषिका वनवासिकाः। कर्णाटका माहिषका विकल्पा मूषकास्तथा। झिल्लिकाः कुन्तलाश्चैव सौहृदा नलकाननाः। कोकुट्टकास्तथा चोलाः कोङ्कणा मालवा नराः। समङ्गाः कनकाश्चैव कुकुराङ्गारमारिषाः। ध्वजिन्युत्सवसंकेतास्त्रिगर्त्ताः शाल्वसेनयः। ब्यूटकाः कोरकाः प्रोष्ठा समवेगवशास्तथा। तथैव विन्ध्यमूलिकाः पुलिन्दा वल्कलैः सह। मालवा वल्लवाश्चैव तथैवापरवर्त्तकाः। कुलिन्दाः कालदाश्चैव दण्डकाः करटास्तथा। मूषकास्तनबालाश्च सनीमा घटसञ्जयाः। अलिदायाः शिवाटाश्च स्तनपाः सुनयास्तथा। ऋषिका विदर्भाः काकास्तङ्गणाः परतङ्गणाः। उत्तराश्चापरे म्लेच्छा जना भरतसत्तम!। यवनाश्च शकाश्चोजा दारुणा म्लेच्छजातयः। सह्यहूणाः कुलत्थाश्च हूणाः पारसिकैः सह। तथैव रम्यशीलास्तथा च दशमालिकाः। चत्रियोपनिवेशाश्च वैश्यशूद्रकुलानि च। शूद्राभीराश्च दरदाः काश्मीराः पशुभिः सह। खाशीकाश्वान्तचाराश्च पह्लवा गिरिगह्वराः। आत्रेयाः सभरद्वाजास्तथैव स्तनपोषकाः। द्रोषकाश्च कुलिङ्गाश्च किरातानाञ्च जातयः। तोमरा हन्यमानाश्च तथैव करभञ्जकाः। एते चान्ये जनपदाः प्राच्योदीच्यास्तथैव च"।

ह०स० १४अ० कूर्मविभागे तु तेषां मध्ये केषाञ्चित् दिग्भेदेन स्थितिर्दर्शिता ते च कूर्मविभागशब्दे पृ० उक्ता देशानां सीमादि तत्रैवशब्दे उक्तं वक्ष्यमाणञ्च केचिद्देशास्तु पु० मध्यादिदेशभेदेन उक्ता यथा

"तद्भमे कुरुपाञ्चालाः शाल्वाश्चैव सजाङ्गलाः। शूरसेना सुह्मकारा बोधकाः सपटच्चराः। मत्स्याः किराताः कुल्याश्च कुन्तयः कुलिकोपमाः। आवन्त्याश्च कुलिङ्गाश्च कोशाश्चैवान्ध्रकैः सह। मध्यदेशा जनपदाः प्रायशः परिकीर्त्तिताः। वाह्लिका वाटधानाश्च आभीराः कालतोयकाः। परन्ध्राश्चैव शूद्राश्च पह्लवाश्चाम्रखण्डिकाः। गान्धारा यवनाश्चैव सिन्धुसौवीरमद्रकाः। शका हूणाः कुलिन्दाश्च पारदा हारमूर्त्तिकाः। रामठाः कण्ठकाराश्च कैकयादेशमालिकाः। चत्रियोपनिवेशाश्च वैश्यशूद्रकुलानि च। आत्रेयोऽथ भरद्वाजः स्तम्बकास्तनपाश्च सैनिकाः सह साङ्गजैः। एते देशा उदीच्यास्तु प्राच्यान्देशान्निबोधत। अङ्गाबङ्गामदुगुरका अन्तर्गिरिबहिर्गिराः। ततः प्रवङ्गा मागधा मलया मलवर्त्तकाः। सुह्मोत्तराः प्रविजया भार्गवाङ्गेयमालवाः। प्राग्ज्योतिषाश्च पुण्ड्राश्च विदेहास्ताम्रलिप्तकाः। शाल्वमागधगोनर्दाः प्राच्या जनपदाः स्मृताः। तथाऽपरे जनपदा दक्षिणापथवासिनः। पाण्ड्राश्च केरलाश्चैव चोलाः कुल्यास्तथैव च। सेतुकाः स्तम्बकाश्चैव कुपथाचारवासिकाः। नवराष्ट्राः माहिषकाः कलिङ्गाश्चैव सर्वशः। कावेराश्च सहैलीकैराटव्याः शबरास्तथा। पुलिङ्गाविन्ध्यमूलीका वैदर्भा दण्डकैः सह। कुलीयाश्च शिरालाश्च रूपसास्तामसैःसह। तथा तैत्तिरकाश्चैव सर्वे कारस्करास्तथा। नासिक्याद्याश्च ये चान्ये ये चैवान्तरनर्मदाः। भानुकच्छाः समाहेयाः सह सारस्वतैस्तथा। काच्छीयाश्च सुराष्ट्राश्च आनर्त्ताभार्बुदैः सह। इत्येते अपरान्ताश्च हूणा ये विन्ध्यवासिनः। मालवाश्च कुरुभाश्च भेकलाद्रोत्कलैःसह। उत्तमाशाः दशार्णाश्च भोजाः किष्किन्धिकैः सह। तोषलाःकोशलाश्चैव तैपुरा वैदिकास्तथा। तुम्बुराश्चाम्बुराश्चैव षट्माश्चिधैः सह। अनूपाश्चाखिष्टकैराश्च पीनिङ्गोला अवन्तयः। एते जनपदाः ख्याता विन्ध्यपृष्ठनिवासिनः। अतो देशान् प्रवक्ष्यामि पर्वतान्त्रयिणश्च ये। निर्दारा हंसवर्णाश्च कुपथा अपथाः खशाः। कुलापावरणाश्चैव उर्णादर्भाः समुद्रकाः। त्रिगर्त्ता मण्डलाश्चैव किरातानामरैः सह"। शक्तिसङ्गमतन्त्रे देशभेदसोभाद्युक्तं यथा "देशव्यवस्था देवेशि! कथ्यते शृणु तत्परा। वैद्यनाथं समारभ्य भुवनेशान्तगं शिवे!। तावदङ्गाभिधो देशो यावायां नहि दुष्यति। रत्नाकरं समारभ्य ब्रह्मपुत्रान्तगं शिवे!। वङ्गदेशो मया प्रोक्तः सर्वसिद्धिप्रदर्शकः। जगद्धात्रात् पूर्वभागात् कृष्णातीरान्तगं शिवे!। कलिङ्गदेशः संप्रोक्तोवामभागपरायणः। कलिङ्गदेशमारभ्य यावदष्टयोजनं शिवे!। दक्षिणस्यां महेशानि! कालिङ्गः परिकीर्त्तितः; सह्याङ्गणं समारभ्य यावद्देवो जनार्द्दनः। तावत् केरलदेशः स्यात् तन्मध्ये सिद्धकेरलः। रामेश्वरात् व्यङ्कटेशात् हंसकेरलनामकः। कन्यशैलमारभ्य यावत्प्रादव्ययं

परे। तावत् सर्वेशनाम्ना तु केरलः परिकीर्त्तितः। शारदामठमारभ्य कुङ्कुमाद्रितटान्तकम्। तावत्काश्मीर देशः स्यात् पञ्चाशद्योजनान्तकः। कालेश्वरं श्वेतगिरिं त्रैपुरं नीलपर्वतम्। कामरूपाभिधो देशो गणेश गिरिमूर्द्धनि। त्रिपञ्चकं समारभ्य मध्ये चोज्जयिनी शिवे। मार्ज्जारतीर्थं राजेन्द्र! कोलापुरनिवासिनी। तावद्देशो महाराष्ट्रः कर्णाटस्वामिगोचरः। जगन्नाथाद्भागादर्वाक् श्रीभ्रमरान्तिकात्। तावदन्ध्राभिधो देशः सौराष्ट्रं शृणु सादरम्। कोङ्कणात् पश्चिमं तीर्थं सप्तद्रप्रान्तगोचरम्। त्रिङ्गलाटान्तको देवि! दशयोजनदेशतः। सौराष्ट्रदेशो देवेशि! तस्मात्तु शुल्कराभिधः। श्रीशैलन्तु समारभ्य चोलेशान्तमध्यभागतः। तैलङ्गदेशो देवेशि! ध्यानाध्ययनतत्परः। सुराम्बिकां समारभ्य मलयाद्रान्तगं शिवे!। मलयालाभिधोदेशो मन्त्रसिद्धि प्रवर्त्तकः। रामनाथं समारभ्य श्रीरङ्गान्तं किलेश्वरि!। कर्णाटदेशो देवेशि! साम्राज्यभोगदायकः। ताम्रपर्णीं समारभ्य शैलार्द्धशिखरोर्द्धतः। अवन्तीसंज्ञको देशः कालिका तत्र तिष्ठति। भद्रकाली महापूर्वे रामदुर्गाच्च पश्चिमे। श्रीविदर्भाभिधो देशो वैदर्भी तत्र तिष्ठति। शुल्कीरात् पूर्वभागे तु द्वारकातो हि दक्षिणे। मरुदेशो महेशानि! उष्ट्रोत्पत्तिपरायणः। श्रीकोङ्कणादधोभागे तापीतः पश्चिमे परे। आभीरदेशो देवेशि! विन्ध्यप्रत्यन्त व्यवस्थितः। अवन्तीतः पूर्वभागे गोदावर्य्यास्तथोत्तरे। मालवाख्यो महादेशो! धनधान्यपरायणः। द्रविड़तैलङ्गमध्ये चोलदेशः प्रकीर्त्तितः। कर्णाटाच्च ते मोक्षास्तद्वदोड्रान्तरो भवेत्। कुरुक्षेत्रात् पश्चिमे तु तथा चोत्तरभागतः। इन्द्रप्रस्थान्महेशानि! दशयोजनकद्वये। पाञ्चालदेशो देवेशि! सौन्दर्य्यगर्वभूषितः। पाञ्चालदेशमारभ्य म्लेच्छाद्रिशिखपूर्वतः। काम्बोजदेशो देवेशि! वाजिराजिपरायणः। वैदर्भदेशादूर्द्धञ्च इन्द्रप्रस्थाच्च दक्षिणे। मरुदेशात् पूर्वभागे वैराटः परिकीर्त्तितः। काम्बोजाद्दक्षभागे तु इन्द्रप्रस्थाच्च पश्चिमे। पाण्डवदेशो महेशानि! महाशूरत्व कारकः। गण्डकीतीरमारभ्य चम्पारण्यान्तकं शिवे!। विदेहभूः समाख्याता तैरभुक्ताभिधः स तु। काम्बोज देशमारभ्य महाम्लेच्छात्तु पूर्वके। वाङ्गोकदेशोदेवेशि! व्याघ्रोत्पत्तिपरायणः। तप्रकुरुडं समारभ्य रामक्षेत्रान्तकं शिवे!। किरातदेशोदेवेशि! विन्ध्यप्रत्यन्तवर्त्तिनः। करतोयां समारभ्य त्रिङ्गलाटान्तगः शिवे! सप्ततानदेशोदेवेशि! महाम्लेच्छपरायणः। त्रिङ्गुपीठं समारभ्य महेशानं महेश्वरि!। खुरसानाभिधोदेशो म्लेच्छमार्गपरायणः। तन्मध्ये चोत्तरे देवि! ऐराकः परिकीर्त्तितः। काश्मीरन्तु समारभ्य कामरूपात्तु पश्चिमे। भोटान्तदेशो देवेशि! मानसेशाच्च दक्षिणे। मानसेशादूर्द्धपूर्वे चोलदेशः प्रकीर्त्तितः। कैलासगीरं समारभ्य सरयूं परितः परे। आमरगान् महेशानि! महाचीनाभिधो भवेत्। जटेश्वरं समारभ्य योगिन्यन्तं महेश्वरि। नेपालदेशोदेवेशि! शिवलङ्कं शृणु शिवे। गणेश्वरं समारभ्य महोदध्यन्तगं शिवे!। शिवलङ्काभिधो देशः पर्वतेतिष्ठति शिवे!। वङ्गदेशं समारभ्य भुवनेशान्तगं शिवे। गौड़देशः समाख्यातः सर्वविद्याविशारदः। गोकर्णेशात् पूर्वभागे आर्य्यावर्त्तात्तु चोत्तरे। तैरभुक्तात् पश्चिमे तु महापुर्य्याच्च सर्वतः। महाकोशलदेशश्च सूर्य्यवंशपरायणः। व्यासेश्वरं समारभ्य तप्रकुरुडान्तकं शिवे!। मगधाख्यो महादेशो यात्रायां न हि दुष्यति। दक्षोत्तरक्रमेणैव क्रमात् कीकटमागधौ। चरणाद्रिं समारभ्य स्टष्टकूटान्तकः शिवे!। तावत् कीकटदेशः स्यात्तदन्तर्मागधो भवेत्। जगन्नाथप्रान्तदेशश्चोत्कलः परिकीर्त्तितः। कामगिरिं समारभ्य द्वारकान्तं महेश्वरि!। स्त्रीकुल्लाभिधो देशोङ्गणं शृणु महेश्वरि!। कामगिरेर्दक्षभागे मरुदेशात्तथोत्तरे। शूरदेशः समाख्यातः शूरास्तत्र रमन्ति च। अघाख्यं समारभ्य कोटिदेशस्य मध्यगे। सप्तद्रप्रान्तदेशो हि कोङ्कणः परिकीर्त्तितः। ब्रह्मपुत्रात् कामरूपात् मध्यभागे तु कैकयः। मागधाद्दक्षभागे तु विन्ध्यात् पश्चिमतः शिवे!। शौरसेनाभिधोदेशः सूर्य्यवंशप्रकाशकः। कुलिनापुरमारभ्य कुरुक्षेत्राच्च दक्षिणे। पाञ्चालपूर्वभागे तु कुरुदेशः प्रकीर्त्तितः। कुरुदेशात् पूर्वभागे कामाद्रेर्दक्षिणे शिवे!। सिंहलाख्यो महादेशः सर्वदेशोत्तमोत्तमः। शिवलङ्कात् पूर्वभागे कामरूपात्तथोत्तरे। पुलिन्ददेशोदेवेशि! नरनारायणः परः। गणेश्वरात् पूर्वभागे सप्तद्रादुत्तरे शिवे!। अङ्गदेशः समाख्यातः सुदेवं शृणु सादरम्। पुलिन्दादुत्तरेभागे कच्छाच्च पश्चिमे शिवे!। मल्लदेशः समाख्यातो मल्लवाङ्मल्लकारकः। वैराटपाण्डुद्वयोर्मध्ये पूर्वदक्षक्रमेण तु। मद्रदेशः समाख्यातो माद्रीह तत्र तिष्ठति। शूरसेनात् पूर्वभागे गण्डक्याः पश्चिमे! शिवे!।

कौरीरटेयो देवेशि ! सर्व्वदेशाधमाधमः । अपनीतः पश्चिमे तु वैदर्भाद्दक्षिणोत्तरे । लाटदेशः समाख्यातो वर्बरं शृणु पार्व्वति ! । मालापुरं समारभ्य सप्तम्लेच्छान्तयोत्तरे । वर्बराख्यो महादेशः शैव्यं शृणु सादरम् । लङ्काप्रदेशमारभ्य मक्कान्तं परमेश्वरि ! । शैव्याख्यो महादेशः पर्वते तिष्ठति प्रिये ! । एते षट् पञ्चाशद्देशा मया प्रोक्ता महेश्वरि ! । एतन्मध्ये ऽपि देवेशि ! देशभेदा ह्यनेकशः । कोटिशः सन्ति देवेशि ! एते सङ्ख्याः प्रकीर्त्तिताः । रेफस्यातिरहस्यञ्च गोप्यं पशुसङ्कटे । इति संक्षेपतः प्रोक्तं किमन्यत् श्रोतुमिच्छसि" ।

तत्र भवः उत्सा० अञ् । जनपदादागत अण् तस्येदम् अण् वा । जानपद तत्र भवे तत आगते तत्सम्बन्धिनि च । "नीवारपाकादिकडङ्करीयैरास्थयते जानपदैर्नकश्चित् । "देयं चौरहृतं द्रव्यं राज्ञाज्ञानपदाय तु" याज्ञ० स्त्रियां तु उक्तौ जानपदेत्यादि पा० ङीप् । इत्यादौ ङीषो नियमात् अन्यत्र जानपदा अजन्तस्य ङीपि जानपदी तत्रभवस्त्रियां पित्त्वात् आद्युदात्तता । "त्यजेदेकं कुलस्यार्थे ग्रामस्यार्थे कुलं त्यजेत् । ग्रामं जनपदस्यार्थे आत्मार्थे पृथिवीं त्यजेत्" नीतिसारः ।

जनपदिन् त्रि० जनपदाः सन्त्यस्य सत्वेन इनि । जनपदस्वामिनि । "जनपदिनां जनपदेन समानशब्दानाम्" पा० "जनपदिनां जनपदस्वामिनाम्" सि० कौ० । स्त्रियां ङीप् । [ तायां ङेमच० ।

जनप्रवाद पु० जनेषु प्रवादः ७त० । जनापवादे वचनीय

जनप्रिय पु० ६त० ।१ गोभाङ्गुनवृक्षे २धन्याके च राजनि० । ३लोकप्रियमात्रे त्रि० ।

जनभक्त पु० जनानां भक्तः भज-घञ् कर्म्मणि स । २यजमानानां कामदानेन भजनीये । "सत्यसाधो जनभक्तो जनं सङ्गः" ऋ०२।२।१।३। ३जनानां भक्तेषु च ।

जनमेजय पु० जनमेजयति एज-णिच्-खश् । १परीक्षितो ऋषतेःपुत्रे २कुरुनामभूपपुत्रभेदे च । "ततः संवरणात्पौरो तपत्यां सुषुवे कुरुम् । राजन्यं तं प्रजाः सर्व्वा धर्म्मज्ञ इति चक्रिरे । तस्य नाम्नाऽभिविख्यातं पृथिव्यां कुरुजाङ्गलम् । कुरुक्षेत्रं स तपसा पुण्यं चक्रे महातपाः । अविक्षितमभिख्यन्तं तथा चैत्ररथं सुतम् । जनमेजय च विख्यातं पुत्रांश्चास्यानुशुश्रुमः । पञ्चैतान् वाहिनी पुत्रान् व्यजायत मनस्विनी । जनमेजयस्य तनया भुवि ख्याता महाबलाः" भा०आ०९४अ० । २पुरुहूतपुत्रे च "पुरोः पुत्रो महावीर्य्यो राजासीज्जनमेजयः" हरिव० ३१अ० । तत्र परीक्षितःपुत्रो जनमेजयः सर्पसत्रे भारतं श्रुतवान् तत्कथा भा० आ० ६०अ० ।

"मन्त्रिणाञ्च वचः श्रुत्वा स राजा जनमेजयः । पर्य्यतप्यत दुःखार्त्तः प्रत्यपिंषत् करं करे । निःश्वासपरमः सद्यो बभूवाकुलितेक्षणः । सुभोचाश्रूणि च तदा नेत्राभ्यां प्रसृतानि वै । दुर्वारं शोकसन्तप्तस्य शृण्वतो वाचो यथाविधि । सङ्क्षुब्धमिव च ध्यात्वा निश्चित्य मनसा नृपः । अमर्षी मन्त्रिणः सर्व्वानिदं वचनमब्रवीत् । जनमेजय उवाच । श्रुत्वैतद्भवतां वाक्यं पितुर्मे स्वर्गतिं प्रति । निश्चितेयं मम मतिर्म्मा च तां मे निबोधत । अवन्तरञ्च मन्येऽहं तक्षकाय दुरात्मने । प्रतिकर्त्तव्यमित्येवं येन मे क्षिप्तः पिता । ऋषेर्हि सङ्क्रियोपाक्यं कृत्वा दग्ध्वा च पार्थिवम् । इयं दुरात्मता तस्य काश्यपं यो व्यवर्त्तयत् । यद्यागच्छेत् स वै विप्रो नहु जीवेत् पिता मम । परिक्षीयेत किं तस्य यदि जीवेत् स पार्थिवः । काश्यपस्य प्रसादेन मन्त्रिणां विनयेन च । स्वं तु वारितवान्मोहात् काश्यपं द्विजसत्तमम् । सञ्जिघीर्षवधिषुं प्राप्तं राजानमपराजितम् । महानतिक्रमो ह्येष तक्षकस्य दुरात्मनः । द्विजस्य योऽददद्द्रव्यं क्षत्रियस्य वधेप्सितम् । उतङ्कस्य प्रियं कर्त्तुमात्मनश्च महत् प्रियम् । भवतान्वै सर्व्वेषां गच्छाम्यपचितिं पितुः" ।

"सौतिरुवाच । एवमुक्त्वा ततः श्रीमान्मन्त्रिभिर्ज्ञातुमोदितः । आरुरोह प्रतिज्ञां स सर्पसत्राय पार्थिवः । ब्रह्मन् ! भरतशार्दूलो राजा पारीक्षितस्तदा । ऋत्विजो वसुधाधिपः । अब्रवीद्वाक्यसम्पन्नः कार्य्यसम्पत्करं वचः । यो मे पितरमात्मवन्तं तक्षकः स दुरात्मवान् । प्रतिकर्त्ता तथा तस्य तद्भवन्तो ब्रुवन्तु मे । अपि तत्कर्म्म विदितं भवतां येन पन्नगम् । तक्षकं सं प्रदीप्तेऽग्नौ प्रक्षिपेयं सबान्धवम् । यथा तेन पिता मह्यं पूर्व्वं दग्धो विषाग्निना । तथाऽहमपि तं पापं दग्धुमिच्छामि पन्नगम् । ऋत्विज ऊचुः । अस्ति राजन्नृतं सत्रं त्वदर्थं देवनिर्म्मितम् । सर्पसत्रमिति ख्यातं पुराणे परिपठ्यते । आहर्त्ता तस्य सत्रस्य त्वदन्योऽस्ति नराधिप ! । इति पौराणिकाः प्राहुरस्माकं चास्ति स क्रतुः । सौतिरुवाच । एवमुक्तः स राजर्षिर्म्मन्त्रिदग्धं हि तक्षकम् । ह्रताशनमुखे दीप्ते प्रक्षिप्तमिति सत्तम ! । ततोऽब्रवीन्मन्त्रविदस्तान्राजा ब्राह्मणादन ।

आहरिष्यामि तत् सत्रं समाराः सन्भ्रियन्तु मे" ६८अ०। "श्रुत्वा ते सर्पसत्राय दीक्षितं जनमेजयम्। अभ्यागच्छन्महर्षिर्वेहान् कृष्णद्वैपायनस्तदा"। स्कन्दपुराणे "इदं वैशम्पायनेनोक्तं पर्यपृच्छत् जनाधिपः। जनमेजय उवाच। कुरूणां पाण्डवानाञ्च भवान् प्रत्यक्षदर्शिवान्। तेषां चरितमिच्छामि कथ्यमानं त्वया द्विज!। कथं समभवद्भेदस्तेषामक्लिष्टकर्म्मणाम्। तच्च युद्धं कथं ह्येतत् भूतान्तकरणं महत्। पितामहानां सर्वेषां दैवेनाविष्टचेतसाम्। कार्त्स्न्येनैतन्ममाचक्ष्व यथावृत्तं द्विजोत्तम!। सौतिरुवाच। तस्य तद्वचनं श्रुत्वा कृष्णद्वैपायनस्तदा। शशास शिष्यमासीनं वैशम्पायनमन्तिके। व्यास उवाच। कुरूणां पाण्डवानाञ्च यथा भेदोऽभवत्पुरा। तदखिलं सर्वमाचक्ष्व यन्मत्तः श्रुतवानसि। गुरोर्वचनमाज्ञाय स तु विप्रर्षभस्तदा। आचचक्षे ततः सर्वमितिहासं पुरातनम्। राज्ञे तस्मै सदस्येभ्यः पार्थिवेभ्यश्च सर्वशः। भेदं सर्वविनाशञ्च कुरुपाण्डवयोस्तदा"। ६० अ०

"वैशम्पायन उवाच। गुरवे प्राङ्मनस्कृत्य मनोबुद्धिसमाधिभिः। संपूज्य च द्विजान् सर्वांस्तथाऽन्यान् विदुषो जनान्। महर्षेर्विश्रुतस्येह सर्वलोकेषु धीमतः। प्रवक्ष्यामि मतं कृत्स्नं व्यासस्यास्य महात्मनः। श्रोतुं पात्रञ्च राजंस्त्वं प्राप्तेमां भारतीं कथाम्। गुरोर्वक्त्रपरिध्वस्तो मनः प्रोत्साहतीव मे। शृणु राजन्! यथा भेदः कुरुपाण्डवयोरभूत्। राज्यार्थे द्यूतसम्भूतो वनवासस्तथैव च"। ६१ अ०।

"स कदाचिन्मृगयां गतः पारीक्षितो जनमेजयः कस्मिंश्चित् स्वविषये आश्रममपश्यत्" भा० आ० ३अ०। "परीक्षितस्तु दायादो धार्मिकोजनमेजयः। जनमेजयस्य दायादास्त्रय एव महारथाः। श्रुतसेनोग्रसेनश्च भीमसेनश्च नामतः"। "द्वाभ्यां तव वंशेऽस्मिन् द्वावेव च परीक्षितौ। भीमसेनान्त्रयो राजन् हौ चापि जनमेजयौ"। "कनिष्कस्य च द्वितीयस्य भीमसेनोऽभवत् सुतः।" "अभिमन्योः परीक्षितु पिता तव जनेश्वर!" भा०आ०२२अ०। "पुरञ्जयस्तपपुत्रे "जनमेजयो महाराज! पुरञ्जयसुतोऽभवत्। जनमेजयस्य राजर्षेर्महाशालोऽभ्यसूयत" हरिव० २१अ०।

**जनयति** स्त्री जन-णिच्-यां० भावे क्तिच् वेदे नि० णि० लोपाभावः। उत्पादने "जनयत्यै त्वा संयौमि" यजु०। १।२२।

**जनयित्नु** पु० जन-णिच्-इत्नु। १पितरि २उत्पादके त्रि० ३मातरि स्त्री ङीप्।

**जनरव** पु० ६त०। लोकापवादे। "परीवादस्तयो भवति वितथोवाऽपि महतां तवाप्युच्चैर्घोषो हरति मतिमानं जनरवैः" उद्भटः।

**जनराज** पु० जनेषु राजते राज-क्विप् ७त०। जनाधिपे "जनराडसि रक्षोहा" यजु० ६।२४। जनराजादयोऽत्र। [ प्रिये त्रि०।

**जनवल्लभ** पु० ६त०। १श्वेतरोहितवृक्षे राजनि० २लोक०

**जनवाद** पु० ७त०। लोकापवादे। "द्यूतं च जनवादञ्च परीवादं तथाऽनृतम्" मनुः। तत्र साधु कथा० ठक्। जानवादिक जनप्रवादसाधौ त्रि०। अनुकूल०। जने वादोऽत्र ततः साध्वर्थे कथादि० ठक्। जानेवादिक तत्साधौ त्रि०।

**जनश्रुत** त्रि०जने श्रुतः विख्यातः। १लोकविख्याते २राजभेदे पु०तस्यापत्यम् इञ्। जानश्रुति तदपत्ये पौत्रायणे "जानश्रुतिर्ह पौत्रायणः श्रद्धादेयो बहुदायी आस" छा०उ०।

**जनश्रुति** स्त्री जनेभ्यः श्रूयते श्रु-क्तिन्। सत्यासत्यसाधारणलोकप्रसिद्धायां किंवदन्त्याम् अमर०।

**जनस्** स्त्री द्वि०व०। जनयतः जन-णिच्-असुन्। सर्वभूतजनयित्र्योःद्यावापृथिव्योः। "पायुं जनसी उभे अन्तु" ऋ० २।२।४।२ २जनलोके म० "जनस्तपःसत्यनिवासिनो जनाः" भाग० ३।१२।२५।

**जनस्थान** न० दण्डकारण्ये जटाधरः। २तत्रत्यस्थानभेदे तच्च स्थानं पूर्वम् इक्ष्वाकुराजपुत्रदण्डस्य राजधानी आसीत् दण्डेन च शुक्राचार्यकन्या बलात्कारेणाक्रीत्याधर्षिता तेन कुपितेन वसिष्ठेन शप्तोदण्डस्तत्कथा रामा० उत्त० यथा "सप्तरात्रेण राजासौ सबलवाहनः। पापकर्म समाचारो वधं प्राप्स्यति दुर्मतिः। सर्वसत्त्वानि यानीह जङ्गमानि स्थिराणि च। सर्वेषां पांशुवर्षेण क्षयः क्षिप्रं भविष्यति। दण्डस्य विषयो यावत् तावत् स वनमाश्रमम्। पांशुभूत विनाकस्मात् सप्तरात्रात् भविष्यति। इत्युक्त्वा क्रोधसन्नप्तस्तदाश्रमनिवासिनम्। जनं जनपदस्थानं स्वीयतानित्यवोचत। सप्तरात्रात् मन्यसादभूतः स चापि ब्रह्मतेजसा। तस्य दण्डस्य विषयोविन्ध्यशैलस्य सानुषु। तपस्विनः स्थिता यत्र तज्जनस्थानमुच्यते" "प्राप्य चारु जनस्थानं खरादिध्वजधारिणम्" "अथो जनस्थानमपोह्य

विप्रम् रघुः। "जनस्थाने शिरस्त्रिघ्नं राक्षसस्य दुरात्मनः"। भा० ब० ४०अ० "खरेणासीत् महद्वैरं जनस्थाननिवासिना" भा० आ०२७६ अ०। २जनानां स्थाने च "जनस्थाने थानं जनबहुगतृष्णान्वितधिया" सा० द०।

जनी स्त्री जन–वा० ऊङ्। उत्पत्तौ। [ तीते।

जनातिग त्रि० जनमतीत्य गच्छति अति+गम–ड। लोका-

जनाधिनाथ पु० ६त०। लोकाधिपे राजनि०। "जनाधिनाथो न ययौ विहण्यताम्" माघः जनाधिपादयोऽप्यत्र

जनान्त पु०६त०। १जनसमीपे २जनमर्यादायाञ्च। (जेला) ख्याते १देशभेदान्विते देशभेदे धनञ्जयः।

जनान्तिक न० "त्रिपताकरेषाम्नामपवार्यान्तरा कथा। अन्योन्यामन्त्रणं यत् स्याज्जनान्ते तज्जनान्तिकम्" सा० द० उक्ते १अप्रकाशकथने नाटकेऽस्य भूरि-प्रयोगः। ६त०। २जनसमीपे च।

जनार्द्दन पु० जनैरर्द्यते याच्यते पुरुषार्थलाभाय अर्द्द-याचने कर्म्मणि ल्युट्। जनं जननर्द्दति हिनस्ति ताड़यति जनान् असुरवासिनोऽसुरभेदान् अर्द्दयति वा कर्त्तरि ल्यु। "१विष्णौ परमेश्वरे "सर्वगः सर्व-विद्भानुर्विष्वक्सेनो जनार्द्दनः" विष्णु स० २जनपीडके त्रि०। "जनावनायोद्यमिनं जनार्द्दनम् क्षये जगज्जीवनिधिं वदन् शिवम्" नैष० गयातीर्थस्थे १विष्णुमूर्त्तिभेदे तद्धर्म्मे जीवत्पुरुषेण स्वपिण्डस्य दानविधिः वायु पु० गया-माहात्म्ये यथा

"जनार्द्दनो मत्कुटे तस्य फल्गे तु पिण्डदः। आत्मनोऽथ वाम्बेयां सर्षपेनापि तिलैर्विना। जीवता दधिसंमिश्रं सर्वं ते विष्णुलोकगाः। यस्तु पिण्डो मया दत्त स्तव फल्गे जनार्द्दन!। मातृहिश्च त्वया देव! तच्छिनृ पिण्डे कृते प्रभो!। एष पिण्डो मया दत्तस्तव फल्गे जनार्द्दन! जन्मकाले गते मह्यं त्वया देयो गयाशिरे। जनार्द्दन! नमस्तुभ्यं नमस्ते पितृमोचद!। पितृमात्रे नमस्तुभ्यं नमस्ते पितृरूपिणे। गयायां पितृरूपेण स्वयमेव जनार्द्दनः। त्वां दृष्ट्वा पुण्डरीकाक्षं मुच्यते च ऋणत्रयात्"। ४शालग्रामभेदे शालग्रामशब्दे दृश्यम्। तद्भक्त्या भोजनकारे फलैः खरबीजता भोजने च जना-र्द्दनम् दृष्ट्वोक्तिः "खादन्निम्बफलादा जनार्द्दनस्य" माघः

जनाश्चन पु०जनानश्नाति अश–भोजने ल्यु। १हके राजनि०। २लोकभोजिनि त्रि०। भावे ल्युट् ६त०।३लोकभक्षणे न०।

जनाश्रय पु० जनानां लोकानामाश्रयः। भक्तपे अमरः।

जनासाह् पु०जनान् सहते सह–क्विप् पूर्वदीर्घः। लोक-सहिष्णौ "चलं जनासाडिन्द्र! तत्त्वम्" ऋ० ।।५४।११। "सहेः साढ़ः" पा० षत्वं ढत्वम्।

जनि(नी) स्त्री जन–भावे क्त्रि वा ङीष्। १उत्पत्तौ "जनिः कर्त्तुः प्रकृतिः" पा० २अभूतप्रादुर्भावे। जायते स्वयं सर्गो यामाम्, आधारे ड। २नार्याम् ।३मातरि ४स्त्रीभार्यायां च अमरः ५जायायाम्। जायते आरोग्यमनया ।६ओषधि-भेदे ७जतुकायाञ्च शब्दरत्ना०। ८जनीनामगन्तव्ये रायसङ्कटः।"उदीर्य्य मुखं कपटाज्जनीं जनः" नैष०।

जनिका स्त्री जनि(नी)+स्वार्थे क। १जनिशब्दार्थे। जन-यति जन–णिच्–ण्वुल् टाप इत्वम्। २उत्पादिकायां स्त्रियां स्त्री।

जनित त्रि० जन–णिच्–क्त। उत्पादिते "सेनाचरीभवदि भाननदानवारिवासेन यस्य जनिता दुरभीरवश्चोः" नैष०। "ज्ञातिजनजनितनामपदाम्" माघः।

जनितृ पु० जन–अन्तर्भूतण्यर्थे तृच्। १पितरि शब्दरत्ना०। २मातरि स्त्री ङीप् शब्दच०।

जनित्व पु० जन–णिच्–इत्वन्। १पितरि २मातरि स्त्री उज्ज्वल०। जन–भविष्यति इत्वन्।३जनिष्यमाणे "अदितिर्जातमदितिर्जनित्वम्" यजु० २५।२३। "जनित्वं जनिष्य-माणम्" वेददी०।

जनित्वन न० जन–भावे या० इत्वन। जनने। "जनित्वनाय मीमहे" ऋ० ८।२।४२। "जनित्वनाय जननाय" भा०।

जनिनीलिका स्त्री जन्या नीलिका।१भङ्गानीलीवृक्षे राजनि०

जनिमत् त्रि० जनिर्जन्माऽस्यास्ति मतुप्। जन्मयुक्ते स्त्रियां ङीप् वेदे मस्य वः। जायायुक्ते "अस्मदस्यमेनांसिञ्ज-निवतश्चर्के" ऋ० ५।३।२ जनिवतोजायावतः" भा०।

जनिमन् पु० जन–भावे मनिन्। जन्मनि उज्ज्व०।

जनिष्ण त्रि० जन–वा० भविष्यति–स्नु। जनिष्य-माणे "कृतएव जनिष्णोस्तु क्षयावादपरायणः" भा० भा० १६६अ०। "जातो वापि जनिष्णो वा" रामा० आर० ६६।१४।

जनेष्ट पु० ६त०। १क्षुद्ररक्षके राजनि० २जतुकायां २वह्नि-मायौषधौ ४दरिद्रायां ५जातीपुष्पवृक्षे स्त्री राजनि० ६जनाभिमते त्रि०।

जनोदाहरण न० जनैरुदाह्रियते उद्+आ+हृ–कर्म्मणि ल्युट्। यशसि धनञ्जयः।

जनौ त्रि० जनानवति अव-क्विप् अति ह्रस्वः। अमरटीकायां।

जन्तु पु० जन-तुन्। १जननशीले प्राणिनि अमरः अविद्यादोषात् देहात्माभिमानिनि २जीवे। "एतेषामेव जन्तूनां भार्य्यात्वसुपयान्ति ताः" मनुः। "ज्ञानमस्ति समस्तस्य जन्तोर्विषयगोचरे" देवीभा० "खेदजाः क्रमयः प्रोक्ता जन्तवश्च यथाक्रमम्" भा० आश्व० ११२६ श्लो०। सोमकस्य रूपस्य भार्य्यायते जायमाने पुत्रभेदे "युधिष्ठिरासीन् नृपतिः सोमको नाम धार्म्मिकः" इत्युपक्रमे "कदाचित्तस्य दृढव्रतस्य घटमानस्य यत्नतः। जन्तुर्नाम सुतस्तस्मिन् क्षीयते समजायत" इत्युक्त्वा "तस्य राज्ञ एकपुत्रत्वदुःखनिवारणाय सोमेन यज्ञे जन्तुपायां हवने हते जन्तुपूर्वकं पुत्रशतं क्षीयते तस्माजायत इत्युक्तम् भा० व० १२७। २२८अ०। जन्तूपाख्याने ह्रस्वम्। ४मनुष्ये च०व०" निघण्टुः।

जन्तुक पु० जन्तु+स्वार्थे क। जन्तुशब्दार्थे जन्तुरूपस्य गोत्रापत्यस्य इञ्। जान्तुकि तद्गोत्रापत्ये उपकादित्वात् तस्य इञो लुक् हस्वे अह्रस्वे च। जन्तुक २तद्गोत्रापत्येषु ब० व०।

जन्तुकम्बु पु० जन्तुरूपः कम्बु। क्रमिशङ्खे राजनि०।

जन्तुका स्त्री जन्तुभिः कायति प्रकाशते कै-क। १खाद्यायां, तस्याहि कीटैः प्रकाशः। २नाभीछिद्रकृमि च राजनि०।

जन्तुघ्न पु० जन्तून् क्रमीन् हन्ति हन-क। १वीजपूरे। राजनि० २प्राणिघातके त्रि०। ३विड्वृक्षे, ४छिद्रकृमिघ्ने च न०। शब्दमा० ५विड्वृक्षे स्त्री ङीप् राजनि०। [राजनि०।

जन्तुनाशन न० जन्तून् नाशयति नश-णिच्-ल्यु। छिद्रकृमि

जन्तुपादप पु० जन्तुप्रधानः पादपः। कोषाम्रवृक्षे राजनि०।

जन्तुफल पु० जन्तवः फलेऽस्य। उदुम्बरे अमरः। [वृक्षे।

जन्तुमती स्त्री जन्तवः सन्त्यस्यां बाहुलकेन मतुप् ङीप्।

जन्तुमारी स्त्री जन्तून् क्रमीन् मारयति मृ-णिच्-अण् उप०मौ०ङीप्। निम्बवृक्षे (निमकी)। राजनि०। [निघण्टौ।

जन्तुला स्त्री जन्तून् कीटान् लाति ला-क। कायफले

जन्तुहन्त्री स्त्री जन्तून् हन्ति हन-तृच् ङीप्। १विड्वृक्षे राजनि० २जन्तुनाशके त्रि०।

जन्त्य त्रि० जन-कृत्यार्थे क्यप्। जनितव्ये "यज्ञातं यच्च जन्त्यम्" ऋ० ८।८६।६। "जन्त्यम् जनितव्यम्" भा०

जन्म न० जन-भा० मनिन्। जन्मनि भरतः।

जन्मकील न० जन्मनः कील इव रौधकत्वात्। विष्णौ त्रिका०

जन्मतिथि पु० स्त्री जन्मनस्तिथिः। जन्मकालिकतिथिसज्ञा-तीयतिथौ स्त्रीत्वे वा ङीप्। तत्र जन्मानां मौण्डचान्द्रैश्चैव कर्त्तव्यता। तद्विधानादि त्रि० त० दर्शितं यथा

"तत्र चलमासे न कर्त्तव्यं चान्द्रमासीयत्वेन सावनाधत्वात्। नच तत्र सौरमासीयत्वं तथात्वे तन्मासे तन्निषेधः कदाचिदप्राप्तौ तद्दर्शं तत्प्रत्यवायापत्तेः नचेष्टापत्तिः प्रतिसंवत्सरन्निर्द्धानात् यथा ब्रह्मपुराणं गर्गश्च "सर्वेषां जन्मदिवसे ज्ञातैर्मङ्गलपार्थिवैः। गुरुदेवाग्निविप्राश्च पूजनीयाः प्रयत्नतः। स्वनक्षत्रञ्च पितरौ तथा देवः प्रजापतिः। प्रतिसंवत्सरञ्चैव कर्त्तव्यश्च महोत्सवः"। ज्ञातैर्ज्ञातिभिस्तातैः तथाच तत्तिथिमधिकृत्य 'तिलोहर्त्ती तिलस्नायी तिलहोमी तिलप्रदः। तिलभुक् तिलदापी च षट्तिली नावसीदति।' प्रजापतिर्ब्रह्मा। मङ्गलपार्थिवैः अभिप्रेतार्थसिद्धिर्मङ्गलं तद्धेतुतया गोरोचनादिकमपि मङ्गलं तेन गुग्गुल्वादिपार्थिवैरित्यर्थः। तथाच कल्पचिन्तामणौ 'गुडदुग्धतिलान्नाद्यान्नमयत्वेन वस्त्रमम्। गुग्गुलुं निम्बसिद्धार्थं दूर्वागोरोचनायुतम्। संपूज्य मातृविघ्नेशौ मङ्गलं प्रार्थयेदिदम्। चिरञ्जीवी यथा त्वं भो भविष्यामि तथा कुरु!। रूपवान् वित्तवांश्चैव श्रियायुक्तश्च सर्वदा। मार्कण्डेय! महाभाग! सप्रकल्पान्तजीवन!। आयुरिष्टार्थसिद्ध्यर्थमस्माकं वरदो भव"। स्वनक्षत्रमिति स्वनक्षत्रं अश्विन्याद्यन्मर्गतजन्मर्क्षजातीनक्षत्रं नामकरणे तथादर्शनात् वक्ष्यमाणब्रह्मपुराणोक्तप्रथवादिनक्षत्रेण नाम्नैव पूजाविधानाच्च तदभावे स्वनक्षत्राय नम इत्युक्तेरुक्तम्। पूजायामर्घ्यानन्तरं पाद्यमाह मत्स्यपुराणम् "अर्घ्यं पाद्यादिकन्तस्य मधुपर्कं प्रयोजयेत्।' पाद्यानन्तरमर्घ्यमाह भरसिंहपुराणम्। 'पाद्यं चैव ततीयेन चतुर्थ्यार्घ्यं प्रदापयेत्।' ततीयया पुरुषस्त्रीयतृतीयया ऋचा उभयक्रमदर्शनादिच्छाविकल्पः इति श्रीदत्तः। श्रीपतिव्यवहारनिर्णये 'नवाम्बरधरो भूत्वा पूजयेच्च चिरायुषम्।' तथा 'द्विभुजं जटिलं सौम्यं सुव्रतं चिरजीविनम्। मार्कण्डेयं नरो भक्त्या पूजयेत् प्रयतस्तथा; ततो दीर्घायुषं व्यासं रामं द्रौणिं कृपं बलिम्। प्रह्लादञ्च हनूमन्तं विभीषणमथार्च्चयेत्।' रामोऽत्र परशुरामः चिरञ्जीविसाङ्गत्वात् द्रौणिरश्वत्थामा। तथा 'स्वनक्षत्रं जन्मतिथिं प्राप्य सम्पूजयेद्धरः। षष्टीञ्च दधिभक्तेन वर्षे वर्षे पुनः पुनः'। 'एकैकां देवतां राम! सन्तर्प्पय यथाविधि। चतुर्थ्यन्तेन धर्म्मज्ञ! नाम्ना च प्रणवादिना। होमद्रव्यमथैकैकं

शतसंख्यन्तु होमयेत्" इति विष्णुधर्मोत्तरदर्शनात्। एवं होमे स्वाहान्तता च मन्त्रस्य "स्वाहावसाने जुह्वयात् श्रावन्तु वै मन्त्रदेवताम्" इति श्रुतेः। अयुतौ तु देवीपुराणम् "होमयज्ञादिपूजायां शतमष्टोत्तरं भवेत्। अष्टाविंशतिरष्टौ वा यथाशक्ति विधीयते"। स्कान्दे "खण्डनं नखकेशानां मैथुनाध्वानमेव च। आमिषं कलहं हिंसां वर्षेऽह्नौ विवर्जयेत्"। अध्वानम् अध्वगमनं कलहमित्यत्र सङ्करमिति क्वचित् पाठः सङ्करं युद्धम्। वर्षेऽह्नौ जन्मदिने। हेमाद्रौ मनुः "मृते जन्मनि संक्रान्तौ श्राद्धे जन्मदिने तथा। अस्पृश्यस्पर्शने चैव न स्नायादुष्णवारिणा"। जन्मनि पुत्रजन्मनि। ज्योतिषे "स्नात्वा जन्मदिने स्त्रियं परिहरन् प्राप्नोत्यभीष्टां श्रियम् मत्स्यान्भोजयतो द्विजाय ददतोऽप्यायुश्चिरं वर्द्धते। सङ्गृह्य खादति यस्तु तस्य रिपवोनार्थं प्रयान्ति ध्रुवं भुङ्क्ते यस्तु निरामिषं स हि भवेत् जन्मान्तरे पण्डितः"। दीपिकायाम् "जन्मर्क्षयुक्ता यदि जन्मभासे यस्य ध्रुवं जन्मतिथिर्भवेच्च। भवन्ति तद्वत्सरमेव यावच्चैरुच्चसम्मानसुखानि तस्य। लताम्रकुजयोर्वारे यस्य जन्मदिनं भवेत्। अरुजयोगसंप्राप्तौ विघ्नस्तस्य पदे पदे"। लताम्रकुजयोः शनिमङ्गलयोः। "तस्य सर्वौषधिस्नानं सहविप्रसुवार्चनम्। सहातुहिम होमोवा सहाणां प्रीतिमिच्छता। सौरारयोर्दिने स्नात्वा देयान्नं च तु काञ्चनम्। सुरा भांसी वचा कुष्ठं शैलेयं रजनीद्वयम्। शठीचम्पकमुस्तञ्च सर्वौषधिगणः स्मृतः"॥ सौरारयोः शनिभौमयोः। रजनीद्वयं हरिद्रादारुहरिद्रे। एषां पत्रादीनामपि ग्रहणम्। कषायावयवग्रहणमाह मत्स्यपुराणम् "एषां पत्राणि सारांणि मूलानि कुसुमानि च। एवमादीनि चान्यानि कषायाख्योगणः स्मृतः"। तत्र क्रमः। तिलोद्वर्तनं तिलयुक्तजलेन स्नानं नववस्त्रपरिधानं गुग्गुलुनिम्बधूपसर्षपदूर्वागोरोचनाक्रकजन्मपत्रिं दक्षिणपाणौ बध्नीयात्। गुरुदेवाग्निविप्राः पूजनीयाः स्वनक्षत्रमपि पूजनीयम्। अत्र च "हस्तास्वाती श्रवणा कृत्तिकेषु मृगशिरोनपुंसि स्यात्। पुंसि पुनर्वसुपुष्यौ मूलं पुंस्त्री स्त्रियः शेषाः" इत्यनेन लिङ्गनिर्णयः। जन्मभनक्षत्रादीनां गोपनमाह विष्णुधर्मोत्तरे "गोपयेज्जन्मनक्षत्रं धनसारं सदृक्षे मलम्। प्रभोरप्यपमानञ्च तस्य दुश्चरितञ्च यत्"। धनसारं धनश्रेष्ठं मलं छिद्रम्। पितरौ प्रजापतिः सूर्यो गणपतिर्मार्कण्डेयश्च पूजनीयः। 'घृतिलं गुडसंयुक्तमक्षत्रार्द्धमितं पयः। मार्कण्डेयवरं लब्धा पिबाम्यायुष्यहेतवे" इति गुडतिलदुग्धपानमन्त्रः। ततः प्रार्थनामन्त्रौ। 'चिरजीवी यथा त्वं भो भविष्यामि तथा मुने!। रूपवान् वित्तवांश्चैव श्रिया युक्तश्च सर्वदा। मार्कण्डेय! महाभाग! सप्तकल्पान्त जीवन!। आयुरिष्टार्थसिद्ध्यर्थमस्माकं वरदोभव"। ततो व्यासपरशुरामाश्वत्थामकृपवलिप्रह्लादहनूमद्विभीषणाः पूजनीयाः। षडपि। "त्रैलोक्ये यानि भूतानि स्थावराणि चराणि च। ब्रह्मविष्णुशिवैः सार्द्धं रक्षां कुर्वन्तु तानि मे"। इति मत्स्यपुराणीयं पठेत्। पिप्पलादपादपग्रहणक्रमस्तु विष्णुपुराणादुद्धेयः यथा "कृष्णोऽपि वसुदेवस्य पादौ जग्राह सत्वरः। देवक्याश्च महाबाहुर्बलदेवसहायवान्"। एवञ्च "सहस्रन्तु पितृमातृ गौरवेणातिरिच्यते" इति मनुवचने सहस्रं पितृभ्यपेक्ष्य यद्गौरवसुक्तं तत्पोष्यपरत्वाद्बोध्यम्। अतएव मनुः "मृते भर्त्तरि साध्वी स्त्री ब्रह्मचर्य्ये व्यवस्थिता"। साध्वीगर्हणीयः। अत्र वैदिकेतरमन्त्रपाठे शूद्रादेरप्यधिकारः "वेदमन्त्रवर्जम् शूद्रस्य" इति छन्दोगाह्निकाचारचिन्तामणिधृतस्मृतौ वेदेति विशेषणात्। एवञ्च पुराणमधिकृत्य "अध्येतव्यं न चान्येन ब्राह्मणं क्षत्रियं विना। श्रोतव्यमिह शूद्रेण साध्येतव्यं कदाचन" इति भविष्यपुराणवचनं पुराणमन्त्रेतरपरम्। पञ्चयज्ञस्नानश्राद्धेषु पौराणिकमन्त्राऽपि निषिद्धः। शूद्रमधिकृत्य "नमस्कारेण मन्त्रेण पञ्चयज्ञान्न हापयेत्" इति याज्ञवल्क्येन "ब्रह्मक्षत्रविशामेव मन्त्रवत् स्नानमिष्यते। तृष्णीमेव हि शूद्रस्य स नमस्कारकं मतम्" इति योगियाज्ञवल्क्येन श्राद्धमधिकृत्य "अयमेव विधिः प्रोक्तः शूद्राणां मन्त्रवर्जितः। अमन्त्रस्तु शूद्रस्य विप्रो मन्त्रेण यच्छति" इति वराहपुराणेन च नमस्कारेणेति तृष्णीमिति मन्त्रवर्जित इति चाभिधानादेतत्परं वैदिकपरञ्च शूद्राधिकारे गौतमवचनं "अनुमतोऽस्य नमस्कारो मन्त्रः" इति। अनुपनीतस्यापि शूद्रसमत्वेन श्राद्धातिरिक्तवेदपाठनिषेधमाह मनुः "नाभिव्याहारयेद्ब्रह्म स्वधानिनयनादृते। शूद्रेण हि समस्तावत् यावद्वेदे न जायते"। स्त्रीणामपि वैदिकमन्त्रनिषेधमाह ऋष्यशृङ्गतापनीयम् "स्त्रीणां प्रणवं यजुर्लक्ष्मीं स्त्रीशूद्रयोर्नेच्छन्ति सावित्रीं प्रणवं यजुर्लक्ष्मीं स्त्री शूद्रोवदि जानीयात् स्मृतोऽधोगच्छति" इति नेच्छन्तीतिपर्य्यन्तं पराशरभाष्येऽपि लिखितम्।

जन्मतिथेः प्रागुक्तब्रह्मपुराणीयत्वात् योर्णमास्यन्तमासादरः। मदङ्गपरिशिष्टम् "उपाकर्म तथोत्सर्गः प्रसवाशौचकादयः। मासद्वयं परा: कार्या वर्जयित्वा तु पैतृकम्"। खण्डाष्टकासाङ्गचर्याज्जन्मर्क्षाट्स्यां तथा दर्शनाच्च प्रसवाशौचं जन्मदिनम्। "द्वादश मासाः संवत्सरः क्वचित्त्रयोदश मासाः संवत्सरः" इति श्रुत्या वर्षे मासद्वयरूपा मासद्वयरूपा सैवात्र याह्या न तु सौरे मासि तिथिद्वयलाभान्मासद्वयजौर्भूतत्वाच्चोक्ता याह्या तिथिद्वयलाभस्य मासद्वयत्वे प्रमाणाभावात्। मासद्वयावित्यत्र मासद्वावितीहाद्रिणा धृतम्। पैतृकं सपिण्डीकरणं मलमासक्षतस्य प्रत्यब्दिकस्य तयोर्मलमासेऽपि विधानात्। ज्योतिः पराशरोऽपि "उपाकर्म तथोत्सर्गः प्रसवाशौचकादयः। मासद्वयं पराः कार्या वर्जयित्वा तु पैतृकम्"। जन्मतिथेरभावदिनलाभे तु देवीपुराणम् "युगाद्या वर्षद्वित्वं सप्तमी पार्वती प्रिया। रवेरुदयमीक्षन्ते न तत्र तिथियुग्मता। यच्छन्ति जन्मतिथिर्यदि स्यात् पूज्या तदा जन्मभसंयुतैव। असङ्गता भेन दिनद्वयेऽपि पूज्या परा या भवतोऽह यत्नात्"। भं नक्षत्रं परवचनं बृहद्राजमार्त्तण्डेऽपि। पूर्वार्द्धे तिथिनक्षत्रलाभ एवेदं सञ्जते "नक्षत्रे खण्डिते येन प्राप्तः कालस्तु कर्मणः। नक्षत्र कर्मांगत्वेन तिथिकर्म तथैव च" इति बृहस्पतिवचनात्। खण्डिते खण्डद्वययुक्ते येन नक्षत्रखण्डेन विहितकालः प्राप्तः। नक्षत्रद्वैधे तु बौधायनमार्कण्डेयौ "तन्नक्षत्रमक्षोरात्रं यस्मिन्नस्तं गतोरविः। यस्मिन्नुदेति सविता तन्नक्षत्रं दिनं स्मृतम्"। पूर्वार्द्धमक्षोरात्रसाध्योपवासस्यैकभक्तेषु "तत्रैवोपवसेद्यत्र निशीथादधोभवेत्। उपवासे यदस्तं स्यात् तद्धि नक्तैकभक्तयोः" इति स्कन्दपुराणात् निशीथादधस्त्वेन चतुर्दशपूर्वं कालत्वेन सूर्यास्तसमयकालस्यापि लाभात्। "उपोषितव्यं नक्षत्रं येनास्तं याति भास्करः। यत्र वा युज्यते राम! निशीथे शशिना सह" इति विष्णुधर्मोत्तराच्च। उपवासव्रतव्रतादीनामक्षोरात्रसाध्यता अक्षोरात्रसाध्यभोजनहवस्त्वैकतरपरित्यागसङ्कल्पितकालविशेषनियामकत्वात्। यस्मिन्नुदेतीति तु दिवसकर्त्तव्यस्नानदानादाविति बोध्यम्। पितृकार्येऽपि शुक्लकृष्णपक्षाभ्यां व्यवस्थामाह बौधायनः "सा तिथिस्तच्च नक्षत्रं यस्मिन्नभ्युदितोरविः। वर्द्धमानस्य पक्षस्य क्षीणे क्षयमयं प्रति"। क्षीणे चन्द्रस्य क्षीणत्वात् क्षयोपचये, वर्द्धमानस्य चन्द्रस्य वर्द्धमानत्वेन शुक्लपक्षस्य। कालमाधवीयोऽप्येवम्। भोजराजः "योजनूमासे चुरकर्मयात्रां कर्णस्य वेधं कुरुते च मोहात्। नूनं स रोगं धनपुत्रनाशं प्राप्नोति मूढोबधबन्धनानि। जातं दिनं दूषयते वशिष्ठश्चाष्टौ च गर्गोवयनोदशाहम्। जन्मास्यमासं किल भागुरिश्च चूडे विवाहे चुरकर्मवेधे"। एतद्विषयभेदस्तु राजमार्त्तण्डे "उक्तानि प्रतिषिद्धानि पुनः सम्प्राप्तानि च। सापेक्षनिरपेक्षाणि श्रुतिवाक्यानि कोविदैः"। सापेक्षनिरपेक्षाणि समर्थासमर्थविषयकाणि। चुरेति चुरिकर्म्म। राजमार्त्तण्डे "दैवकार्यं पितृश्राद्धे रवेरंशपरिक्षये चुरिकर्म्म न कुर्वीत जन्मभेऽपि जन्मभे"। एवञ्च चूड इति चूडाकरणे अधिकदोषाय। नाम्न्यंसु जन्ममासे विवाहमाह चीपतिव्यवहारसङ्ग्रहे "स्नानं दानं तपो विद्या सर्वमङ्गल्यवर्द्धनम्। उद्वाहश्च कुमारीणां जन्ममासे प्रशस्यते"। एवं "जन्मोदये जन्मसु तारकासु मासेऽथ वा जन्मनि जन्मभे वा। व्रतेन विप्रो नवकृत्वतोऽपि विद्याविशेषैः प्रथितः पृथिव्याम्" इति व्यासवचनेन जन्ममासे उपनयनविधानात्तद्दुष्टत्वविधानेऽपि न दोषः। उदये लग्ने भे राशौ नवकृत्वतोऽपि खल्वविद्योऽपि। अत्र जन्ममासकृत्याङ्गे सौरादरो याज्ञवल्क्यादिसाङ्गत्वात् व्यवहारोऽपि तथा। प्रतिमासे जन्मनक्षत्रकृत्यमाह विष्णुधर्म्मोत्तरम् "जन्मनक्षत्रगे सोमे शिरःस्नानेन यत्नतः। पूजा सोमस्य कर्त्तव्या नक्षत्रस्य तथात्मनः। आढ्यं कुर्यात् प्रयत्नेन वस्त्रालङ्कारभूषणैः। वाहनायुधरत्नाद्यं पूजनीयं प्रयत्नतः। सुराणामर्चनं कार्यं वैशवस्य विशेषतः"।

**जन्मद** पु० जन्म ददाति दा-क। पितरि शब्दच०।

**जन्मदिन** न० जन्मनोदिनम्। जन्मदिवसे तच्च तिथिरूपं जन्मतिथिशब्दे उदा०।

**जन्मन्** न०जन-भावे मनिन्। १उत्पत्तौ, २आद्यक्षणसम्बन्धे, ३गर्भवासतोयोनिद्वारानिःसरणे ४व्याद्यावयवे अपूर्वदेहसम्बन्धे, अपूर्वदेहादिभिरात्मनः सम्बन्धे ज्योतिषोक्ते ५जन्मनक्षत्रे, तदवधिके ६दशमे ७जन्मविशे च नक्षत्रे। तत्र मनुष्याणां जन्मप्रकारस्तु गर्भशब्दे २१४८ पृ० उक्तप्रायोऽपि अत्र विशेषः कश्चित् प्रदर्श्यते।

"ऋतौ विकाशा भवति योनिः कमलवत् सदा। गर्भाशय स्तः शुक्रं धत्ते रक्तसमन्वितम्। अन्यत्र काले सुकृता

योनिर्भवति योषिताम्। स्रष्टं शुक्रमतो योनौ नैति गर्भाशयं मनैः। ऋतावपि तु योनिस्थे ह्यातपिनकफाहता। भवेत्तदा विकारत्वं नैव तस्यां प्रजायते। ऋतुकाले यदा शुक्रं निर्दोषं योनिसंस्थितम्। तदा तद्वायुना स्रष्टं क्षीरक्षैकतां व्रजेत्। निषेकं ह्यनवं क्षीणां बीजं प्राप्तं रजस्यथ। युक्तमात्रोऽपि मरुतात् स्वर्गादपि प्रपद्यते। विसर्गकाले शुक्रस्य जीवः कारणसंहतः। श्रुत्वा प्रविशते योनिं कर्म्मभिः स्वैर्नियोजितः। तच्छुक्रशोणितमेकस्यमेकाहात् पललं भवेत्। पञ्चरात्रेण कललं बुद्बुदाकारतां व्रजेत्। बुद्बुदः सप्तरात्रेण मांसपेशी भवेत्ततः। द्विसप्ताहाद्भवेत् पेशी रक्तमांसाचिता दृढा। बीजस्यैवाङ्कुराः पेश्यः पञ्चविंशतिरात्रतः। भवन्ति मासमात्रेण पञ्चधा जायते पुनः। ग्रीवा शिरश्च कण्ठश्च पृष्ठवंश्च सोदरम्। पाणिपादं तथा पार्श्वं कटिश्चार्श्वं तथैव च। मासद्वयेन सर्वाणि क्रमशः सम्भवन्ति हि। त्रिभिर्मासैः प्रजायन्ते सर्वाङ्गाङ्कुरसम्भवः। मासैश्चतुर्भिरङ्गेभ्यः प्रजायन्ते यथाक्रमम्। स्वेदं चतुर्थे चाङ्गानां पञ्चमे पोषितोद्भवः। षष्ठे बलस्य वर्णस्य नखलोमाङ्कुरसम्भवः। दन्तपङ्क्तिक्षुधा तृष्णा जायन्ते च नखाः पुनः। कर्णयोश्च भवेच्छिद्रं प्राणनासाभ्यन्तरेण च। पायुर्मेढ्रमुपस्थञ्च नाभिश्चैवोपजायते। सन्धयो ये च गात्रेषु जायन्ते सप्तमे मासि सप्तमे। मनस्तु चेतनायुक्तं नाभीस्थायुसिरास्ततः। सप्तमे चाष्टमे चैव त्वङ्मांसं स्रुतिमानपि। सङ्गस्यङ्गसम्पूर्णः शिरःकेशसंयुतः। विभक्तावयवः स्पष्टः पुनर्मासाष्टमेन च। नवमे दशमे मासि प्रबलैः सुतिमारुतैः। निःसार्य्यते बाधद्भव जन्तुस्त्रिद्वेष सञ्चरः। मनसश्चञ्चलत्वेन यदा गर्भस्थिति भवेत्। तदा विकृतिरूपेण पापात्मा हि प्रजायते। षडङ्गयं समासाद्य यदा वहति मारुतः। तदा प्रस्फुटते पाणिपादान् षडङ्गान् कर्म्मबहिष्कृतान्। मातरञ्चोत्तरा नारी पितुः शुक्रोत्तरो नरः। उभयोर्मैथुनसाम्ये जायते वै नपुंसकम्। विषमायां तिथौ चित्रं कुर्याद् बीजन्तु कन्यकाम्। समायां पुरुषं नूनं केचिदाहुर्मनीषिणः। यामाङ्गेन भवेन्नारी दक्षिणेन सुतान् भवेत्। रक्ताधिक्ये मातृरूपं शुक्राधिक्ये तु पैतृकम्। शुक्रशोणितसंघाते वायुना च द्विधा कृते। यमौ स्यातां त्रिधा चेति चतुर्धा बहुधापि वा। ततो स्त्रीनाधिक्यङ्गजवामनकादयः। जायन्ते सर्पकुब्जाण्डा विकृताश्चाथ योनयः"। "गर्भात् कोटिगुणं दुःखं योनियन्त्रनिपीडने। संमूर्च्छां तस्य जठराज्जायमानस्य देहिनः। जायमानः पुरीषाम्बुमूत्र शुक्राविलाननः। प्राजापत्येन वातेन पीड्यमानास्थिबन्धनः। अधोमुखो वै क्रियते प्रबलैः सूतिमारुतैः। क्लेशात् निष्क्रान्तिमायाति जठरान्मातुरातुरः। ततस्तं वैष्णवी माया समाक्रामति मोहिनी। तया विमोहितात्मासौ ज्ञानभ्रंशमवाप्नुयात्। स्रष्टमात्रस्य घोरश्च ज्वरः समुपजायते। तेन ज्वरेण महता महामोहः प्रजायते। कण्टकैरिव विच्छिन्नः क्रकचैरिव दारितः। पूतिव्रणाक्षिपतितो घरण्यां कृमिको यथा। हतुभुक्षापरीताङ्गः क्वचित्तिष्ठति वा रटन्। विण्मूत्रभक्षणाद्यञ्च गतज्ञानः समाचरेत्। कण्डूयनेऽपि चाशक्तः परिवर्त्तेऽप्यनीश्वरः। स्नानपानादिकाहारमवाप्नोति परेच्छया। अशुचौ संकरे स्रुच्छकोटदंशादिभिस्तथा। भक्ष्यमाणोऽपि नैवैषां समर्थो विनिवारणे। केन कर्म्मेन ब्रह्मोऽहं कारणं किमकारणम्। किं कार्य्यं किमकार्य्यं वा किं वाच्यं किञ्च नोच्यते। कोऽधर्म्मः कश्च वै धर्म्मः कस्मिन् वा वर्त्तते कथम्। किं कर्त्तव्यमकर्त्तव्यं किं वा किं शुभदोषवत्। संमूढस्य स्रुतिभ्रंशः शीघ्रं संजायते पुनः। मतिः संजायते तूर्णं जन्तोस्तत्रैव जन्मनि। रक्तो मूढश्च लोकोयमकार्य्ये समवर्त्तते। देही देहं परित्यज्य नेन्द्रस्थानमपीच्छति। तस्मात् कीटोऽपि जन्तूनां सुमूढो जायते भृशम्। न चात्मानं विजानाति न परं न च दैवतम्। न ह्रणोति परं श्रेयः सति चक्षुषि नेक्षते। बुद्धौ सत्यां न जानाति वीक्ष्यमानो बुधैरपि। संसारे क्लिश्यते तेन रागलोभवशानुगः" सुखबोधः।

जनुस च "जायतेऽस्ति वर्द्धते विपरिणमते अपक्षीयते नश्यति" यास्कोक्तेषु षट्सु भावविकारेषु आद्यो भावविकारः। "जातस्य हि ध्रुवो मृत्युर्ध्रुवं जनुस मृतस्य च" गीता। "जनुसस्यद्विपत्तेर्मे प्रत्यरिः साधको वधः। मित्रं परममित्रञ्च विराड्त्या पुनः पुनः" उद्यो० त०। "प्राक्कं ददात् त्रिजनुसनि"। "जनुसर्क्षे निधनेऽपि च" ज्यो०त०। कर्त्तरि अनिन्। दहने सिद्ध०। आधारे अनिन्। ६जनुसस्थले १०जनुसराशौ च "जन्मनीत्थं विचिन्त्यवान्" "जनुसनीचितयुक् शुभैः" जी०क०ता०।

**जन्मप** पु० जन्म जन्मलग्नं याति या–क। १जन्मलग्नपतौ २जन्मराशिपतौ च जन्मपत्यादयोऽस्यत्र। "जन्मपः क्रूरितोऽशुभः" नी० ता०।

**जन्मभ** न० ६त०। १जन्मनक्षत्रे २जन्मलग्ने ३ जन्मराशौ च ४जन्मनक्षत्रादिसजातीये नक्षत्रादौ जन्मर्क्षादयोऽस्यत्र। "जन्मर्क्षं निधनेऽपि च" ज्यो०त०।

**जन्मभूमि** स्त्री ६त०। जन्मस्थाने। "जननी जन्मभूमिश्च स्वर्गादपि गरीयसी" उद्भटः।

"यद्यनीया वयं नूनं त्वया यादवनन्दन!। अथ वा प्राणिनस्तात! रमन्ते जन्मभूमिषु" हरिवं०१०२ अ०।

**जन्ममास** पु० ६त०। १जन्माधारमासे २तज्जातीये मासे च "न जन्ममासे न च चैत्रपौषे शौरं विवाहो न च कर्णवेधः" ज्यो०त० "जन्मर्क्षं जन्ममासे वा तारायामथ जन्मनि। जन्मलग्ने भवेद्दुष्टा धनाढ्या जन्मभोदये" चक्रेश्वरः। जन्ममासश्च यस्मिन् चान्द्रे मासे जन्म स मासः इत्येके जन्मतिथिमारभ्य त्रिंशत्तिथ्यात्मको मासो जन्ममास इति पक्षान्तरं यथाह स० चि० व्याख्यायां पी० धा० "जन्मर्क्षमासतिथयो व्यतिपातमङ्गावैधृत्यमापितृदिनानि तिथिक्षयर्क्षी। न्यूनाधिमासकुलिकप्रहरार्धपातविष्कम्भवज्रघटिकात्रयमेव वर्ज्यम्" स० चि०। जन्मर्क्षमास तिथिप्रभृतयः पदार्थाः सर्वेषु कर्मसु वर्ज्या इति द्वितीय श्लोकेनान्वयः तानू पदार्थानाह जन्मर्क्षेति यस्मिन्नक्षत्रे जन्म भवेत् तज्जन्मर्क्षं यस्मिन् मासे जन्म भवेत् स जन्ममासः यस्यां तिथौ जन्म भवेत् सा जन्मतिथिः एते वर्ज्याः यदाह वसिष्ठः "स्वजन्ममासर्क्षतिथिलग्नेषु वैनाशकाद्युत्पगणेषु भेषु। नोद्वाहयात्राभ्युदयाभिषेकी नैवाद्यगर्भद्विरदं कदाचित्"। अयं च जन्मनक्षत्रमासतिथिनिषेधः आद्यगर्भस्यैव यदाह नारदः "जन्ममासे न जन्मर्क्षे न जन्मदिवसेऽपि वा। आद्यगर्भसुतस्यापि दुहितुर्वा करग्रहः" इति अनेनाद्यगर्भव्यतिरिक्तकन्यायास्तादृशवरस्य जन्मर्क्षमासतिथिषु शुभफलत्वमुक्तं भवति अतएवाह च्यवनः "जन्मर्क्षे जन्ममासे वा तारायामथ जन्मनि। जन्मलग्ने भवेद्दुष्टा धनाढ्या पतिवल्लभा"। अथ जन्ममासलक्षणं जगन्मोहने हरिवंशः "आरभ्य जन्मदिवसं यावच्चाहर्दिनं भवेत्। स जन्ममासो विज्ञेयो गर्हितः सर्वकर्मसु" इति अस्यापि विशेषलक्षणमेव "जातं दिनं दूष्यते वसिष्ठः यज्ञैव गर्गोऽखिलमेव तद्वत्। तज्जन्ममर्क्षं किल भानुरिक्षं व्रते विवाहे गमने क्षुरे चेति"। वस्तुतस्तु यस्मिंश्चान्द्रमासे चैत्रादौ जन्मभूत् स चान्द्रमासो जन्ममासतया त्याज्य इति युक्तमुत्पश्यामः "इन्द्राग्नी यत्र ह्येते मासादिः स प्रकीर्त्तितः। अग्नीषोमौ स्थितौ मध्ये समाप्तौ पितृसोमकाविति" हारीतवचनात् "उपवासव्रतोद्वाहा यात्रा चौरोपनायनम्। तिथिवर्षादिनिखिलं चान्द्रमानेन गृह्यते" इति कश्यपोक्तेश्च। अत्र चान्द्रमासस्यैव चूड़ादौ निषेध इति स्थितम्। जन्ममासश्च जन्मतिथिमारभ्य चान्द्रपरत्वा चौरादि निषेधे सौरपरतेति म० त० रघु०। "विवाहादौ कृतः सौरः" इति तद्धृतवचनात्। आचारभेदात् देशभेदाच्च व्यवस्था। उपयमशब्दे १२४४ पृ० अधिकं द्रष्टव्यम्।

**जन्मराशि** पु० ६त०। जन्मकालिकराशिसजातीये राशौ।

**जन्मवर्त्मन्** न० ६त०। योनौ शिका०। "योनेः शरीरम्" भा०स्व० तस्याः शरीरोत्पत्तिस्थानत्वकीर्त्तनात् तथात्वम्।

**जन्मशय्या** स्त्री जन्मनिमित्तं शय्या। प्रसवार्थशय्यायाम्। "स ददर्श महात्मानं शरतल्पगतं प्रभो!। जन्मशय्यागतं वीरं कार्त्तिकेयमिव प्रभुम्" भा० भी० १२५ अ०।

**जन्मान्तर** न० अन्यत् जन्म भवू०स०। भवान्तरे परलोके। ततः गर्हा०भवार्थे छ। जन्मान्तरीय परजन्मभवे त्रि०। "जन्मान्तरीयतत्पापवतः सहस्रनामोच्चारः" शु०त०रघु०

**जन्माष्टमी** स्त्री कृष्णस्य जन्माधारोऽष्टमी। कृष्णजन्माष्टम्याम् कृष्णाष्टमी शब्दे २२२०पृ० विवृतिः। हरिभक्तिविलासमते तु तत्त्यव्रतकालव्यवस्था यथा

"जन्माष्टमी पूर्वविद्धा न कर्त्तव्या कदाचन। परविद्धा तु विप्रेन्द्र! सप्तम्या चाष्टमी त्यजेत्। सुरायां विण्मुत्रा स्पृष्टं गङ्गाम्भःकलसं यथा। विना रोहिण्या कर्त्तव्या नवमी संयुताष्टमी। सकलापि न कर्त्तव्या सप्तमी संयुताष्टमी। तस्मात् सर्वप्रयत्नेन त्याज्यमेवाशुभं बुधैः। वेधे पुण्यक्षयं याति तमः स्यूर्योदये यथा। यच्च यद्भविष्यपुराणादौ प्रोक्तं विद्धाष्टमीव्रतम्। अवैष्णवपरं तच्च ज्ञातं वा देवमायया"। [ जीवे ऋमरः।

**जन्मिन्** त्रि० जन्मास्त्यस्य श्रीत्रादि० इनि। प्राणिनि

**जन्मेजय** पु० जनमेजय+पृषो०। जनमेजयवत्पे द्वारा०।

**जन्य** त्रि०जन-"भव्यगेयेत्यादि" पा०कर्त्तरि यत्। १जायमाने। जन-णिच्-कर्म्मणि यत्। २उत्पाद्ये "जन्यानां जनकाः" भाषा०। कर्त्तरि यत्। ३जनके च मेदि०। जनौ वधूं वहति नयति वा यत्। ४नवोढाप्राप्तिमिलभल्ल-

स्निग्धेषु त्रि० मेदि० ५दृष्टे० ६परीक्षादे० ७युद्धे च न० मेदि० "तत्र जन्यं रघोर्घोरं पार्वतीयजनैरभूत्" रघुः ८देहे पु० शब्दचि०। भावे यत्। ९जनने न०। १०मातृव्यस्यायां स्त्री मेदि०। जनाय हितं यत्। ११जनहिते त्रि०। "तदाव जन्यं विक्षजन् जनाईनम्" भाग० ३।८।३ जन्यशब्दात् उत्करा० चतुरर्थ्यां क। जन्नीय तद्विदत्ते त्रि०। "याड्रीति जन्यामवदत् कुमारी" रघुः। १२प्रीतौ स्त्री हेम०। जनस्य जल्पः जन+जल्प-ऽर्थे यत्। १३जनस्य जल्पे ष०।

जन्यु पु० जन-युच् बा०-न अनादेशः। १धातरि २वह्नौ ३प्राणिनि च मेदि०। भावे युच्। जनने पु० "अस्तायाद्वितीयोऽयं जन्युर्हि मम सर्वदा" हरिवं० १२५ अ०।

जप उच्चारणे वाचि च भ्वा० पर० सक० सेट्। जपति अजापीत्-अजपीत्। जजाप जेपतुः। जप्ता। "एतदक्षरमेतां च जपन् व्याहृतिपूर्विकाम्" मनुः। "ततः सप्रणवां सव्याहृतिकां गायत्रीं जपेत्" गोभि० "जपेत् सप्रणवां मध्ये" चण्डीशब्दे दृश्यम्।

अभि+आभिमुख्येन जपे "चकार रक्षां कौशल्या मन्त्रैरभिजजाप च" रामा० अयो० २५।२०। सम्यक्कथने च उप+भेदने। (कार्यकुशलनि देशोया) "त्वत्तारं कुररीजस्तु ग्रनैः कर्णसुपाजपत्" भा० वि० २२१६ "उपजप्यानुजपेत्" मनुः "उपजापः कृतस्तेन" माघः।

जप त्रि० जप-कर्त्तरि अच्। १जपकारके। "कर्णे जपैराहितराज्यलोभा" भट्टिः। ततस्तु "त्रिगते काले जपते जपतामपि" भा० आनु० २८अ०। कारण्डवशब्दे १८६० दृश्यम्। भावे अप्। २मन्त्रादेराद्यौ चण्डीशब्दे दर्शित सप्रणव्याः ३पाठे च। तत्प्रकारो यथा तन्त्रसा० "मनः संहृत्य विषयान्मन्त्रार्थगतमानसः। न द्रुतं न विलम्बञ्च जपेन्मौखिकपङ्क्तिवत्। जपः स्याद्वचरा-दुत्तिर्मानसोपांशुवाचिकैः। धिया यदक्षरश्रेणीं वर्णस्वरपदात्मिकाम्। उच्चरेदर्थसंदृब्ध मानसः स जपः स्मृतः। जिह्वोष्ठौ चालयेत् किञ्चिद्देवतागतमानसः। किञ्चिच्छ्रवणयोग्यः स्यादुपांशुः स जपः स्मृतः। मन्त्रमुच्चारयेद्वाचा वाचिकः स जपः स्मृतः। उच्चैर्जपाद्विशिष्टः स्यादुपांशु र्दशभिर्गुणैः। जिह्वाजपः शतगुणः साहस्रो मानसः स्मृतः। जिह्वाजपः स विज्ञेयः केवलम् जिह्वया बुधैः"। तत्र वर्ज्यानि "विण्मूत्रोत्सर्गशङ्कादियुक्तः कर्म करोति च। जपार्चनादिकं सर्वमपवित्रं भवेत् प्रिये!। मलिनाम्बरकेशादिसुखदौर्गन्ध्य संयुतः। यो जपेत्तं दहत्याशु देवता गुप्तिसंस्थिता। आलस्यं जृम्भणं निद्रां क्षुतं निष्ठीवनं भयम्। नीचाङ्गस्पर्शनं कोपं जपकाले विवर्जयेत्"। देवताभेदे करमालाविशेषनियमो यथा

"तर्जनीमध्यमानामा कनिष्ठा चेन ताः क्रमात्। तिस्रोऽङ्गुल्यस्त्रिपर्वाणो मध्यमा चैकपर्विका। पर्वद्वयं मध्यमाया मेरुत्वेनोपकल्पयेत्। अनामामध्यमारभ्य कनिष्ठादित एव च। तर्जनीमूलपर्य्यन्तं दश पर्वसु संजपेत्। अनामामूलमारभ्य कनिष्ठादित एव च। तर्जनीमध्यपर्य्यन्तमष्टपर्वसु संजपेत्"। एतद्वचनन्तु अष्टोत्तरशतादिविषयम्। शक्तिविषये पुनः। "अनामिकालयं पर्व कनिष्ठादित्रिपर्विका। मध्यमायाश्च त्रितयं तर्जनीमूलपर्वणि। तर्जन्यग्रे तथा मध्ये यो जपेत् स तु पापकृत्। अनामामूलमारभ्य प्रादक्षिण्यक्रमेण च। मध्यादिमूलपर्य्यन्तमष्टपर्वसु संजपेत्"। श्रीविद्याविषये तु। "अनामामध्यमयोश्च मूलाग्रयुग्मं द्वयं द्वयम्। कनिष्ठायाश्च तर्ज्जन्याश्चैवं पर्व सुरेश्वरि!। अनामामध्यमयोश्च मेरुः स्यात् त्रितयं शुभम्। प्रदक्षिणक्रमाद्देवि! जपेत् त्रिपुरसुन्दरीम्। कनिष्ठामूलमारभ्य प्रादक्षिण्यक्रमेण च। तर्जनीमूलपर्य्यन्तमष्टपर्वसु संजपेत्। इदमपि अष्टोत्तरशतादिविषयम्। "अङ्गुलीर्न वियुञ्जीत किञ्चिदाकुञ्चिते तले। अङ्गुलीनां वियोगाच्च छिद्रे च स्रवते जपः। अङ्गुल्यग्रे च यज्जप्तं यज्जप्तं मेरुलङ्घने। पर्वसन्धिषु यज्जप्तं तत्सर्वं निष्फलं भवेत्। गणनाविधिसङ्कल्प योजयेत्तज्जपं यतः। सङ्ख्यानि राजसास्तेन गणयेत् सर्वथा बुधः। हृदये हस्तमारोप्य तिर्य्यक् कृत्वा कराङ्गुलीः। आच्छाद्य वाससा हस्तौ दक्षिणेन सदा जपेत्"। जपसंख्यासाधने द्रव्यभेदनिषेधो यथा। "नाक्षतैर्हेमपद्मैर्वा न धान्यैर्न च पुष्पकैः। न चन्दनैर्वर्त्तिकया जपसंख्याञ्च कारयेत्"। तत्र विहितद्रव्याणि "लाक्षा कुशीदसिन्दूरं गोमयञ्च करीषकम्। एभिर्नित्यं वटिकां जपसंख्यान्तु कारयेत्"। वर्णमाला जपनियमो यथा। "सबिन्दुं वर्णसञ्चार्य पश्चान्मन्त्रं जपेद्बुधः। अकारादिहकारान्तं बिन्दुयुक्तं विभाव्य च। वर्णमाला समाख्याता अनुलोमविलोमतः। पञ्चाशल्लिपिभिर्भिन्ना विहिता सर्वकर्मसु। अका-

रादिसकारान्ता वर्णमाला प्रकीर्त्तिता। आर्द्धं मेरु-सखं तत्र कल्पयेन्मुनिसत्तम!। अनया सर्वमन्त्राणां जपः सर्वसमृद्धिदः"। जपफलञ्च "जपनिष्ठो द्विज श्रेष्ठोऽखिलयज्ञफलं लभेत्। सर्वेषामेव यज्ञानां जायतेऽसौ महाफलः जपेन देवता नित्यं स्तूय-माना प्रसीदति। प्रसन्ना विपुलान् भोगान् ददात्यत्रिञ्च शाश्वतीम्। यक्षरक्षःपिशाचाश्च यहाः सर्पाश्च भीषणाः। जपन्तं नोपसर्पन्ति भयभीताः समन्ततः। यावन्तः कर्मयज्ञाः खुः प्रदिष्टानि तपांसि च। सर्वे ते जपयज्ञस्य फलां नार्हन्ति षोडशीम्। माहात्म्यं वाचिकस्यैतत् जपयज्ञस्य कीर्त्तितम्। तस्माच्छत गुणोपांशुः साहस्रो मानसः स्मृतः" तन्त्रसा०। "नोच्चैर्जपञ्च संकुर्यात् रहः कुर्यादतन्द्रितः। समाहितमना स्तूष्णीं मनसा वापि चिन्तयेत्। विधियज्ञात् जपयज्ञो विशिष्टो दशभिर्गुणैः। उपांशुः स्याच्छतगुणः साहस्रो मानसः स्मृतः। विना दर्भैस्तु यत्स्नानं यच्च दानं विनोदकम्। असंख्यातन्तु यज्जप्तं सर्वं तदफलं स्मृतम्। सङ्काफलैर्विल्वमेव रुद्राक्षैः स्फटिकेन वा। गणना सर्वथा कार्या सम्यगङ्गुलिपर्वभिः। स्फिरणरत्नमणिभिर्जप्ता शतगुणं भवेत्। सहस्रगुणमिन्द्राक्षैः पद्माक्षैरयुतं भवेत्। नियुतं वापि रुद्राक्षैर्भद्राक्षैस्तु न संशयः। प्रत्यक्षीवकजप्यस्य परिसंख्या न विद्यते। दशभिर्जन्म-जनितं शतेन च पुराकृतम्। नियुतं तु सहस्रेण गायत्र्या हन्ति दुष्कृतम्। प्राक्सुखो वर्त्तयेत् मालां सहस्रं शतमेव वा" अग्निपु०।

अथाङ्गमन्त्रचैतन्यादिकथनमावश्यकं तत्र मन्त्रचैतन्यं यथा कृष्णिकातन्त्रे पञ्चपटले। "श्रीपार्वत्युवाच। भगवन्! सर्वदेवेश! लोकानां हितकारक! चतुर्वर्गप्रदं देव! चैतन्यं मे प्रकाशय। शङ्कर उवाच। शृणु देवि! प्रवक्ष्यामि चैतन्यं परमाद्भुतम्। रहस्यं परमं पुण्यं गोपनीयं त्वया पुनः। चिच्छक्त्याध्वनितं देवि! परिणामक्रमेण तु। वर्णभावं समासाद्य निर्मलं विमलात्मकम्। षट्चक्रञ्च तथा भित्त्वा शब्दरूपं सनातनम्। नादविन्दुसमायुक्तं चैतन्यं परिकीर्त्तितम्। अथ वाग्यप्रकारेण शृणुतां पद्मलोचने!। विना येन न सिध्येत्तु जपपूजादिकिञ्चन। अनाहतस्य मध्ये तु यत्पीतं वर्णसप्तमम्। सुषुम्णा-वर्त्मना देवि! कण्ठदेशादुविनिर्गतम्। चैतन्यञ्च महेशानि! योगिनां योगरूपकम्। सहस्रारे वर्णरूपं परिणाम क्रमेण तु। वर्णिकामध्यसंस्थे तु नादविन्दुसमन्वितम्। एवं संचिन्तयेद्देवीं चैतन्यञ्च पुनः पुनः। मन्त्रचैतन्यं चिच्छक्तौ यत्पितानि महेश्वरि!। तानि सञ्चिन्तयेद्देवि! सहस्रारदले तथा। चैतन्यमन्त्ररूपा च चैतन्यानन्द-दायिनी। चैतन्यनादशक्तिश्च चैतन्यवर्णरूपकम्। मणि-पूरे सदा चिन्त्यं मन्त्राणां प्राणरूपकम्। अथवान्यप्रकारेण शृणुतां वरवर्णिनि!। कामबीजं (क्लीं) रमाबीजं (श्रीं) शक्तिबीजं (ह्रीं) सुरेश्वरि!। एतानि पूर्वसङ्केत्य मालकां तदनन्तरम्। घटितं मूलमन्त्रञ्च शतमष्टोत्तरं जपेत्। कोटिकोटिगुणञ्चैव लभते नात्र संशयः। अथवान्य प्रकारेण चैतन्यं शृणु पार्वति!। येन विज्ञातमात्रेण परमं पश्यति ध्रुवम्। सूर्यमण्डलमध्यस्थं चिन्तयेत्-मूलमन्त्रकम्। अष्टोत्तरशतं जप्यं मूलविद्यास्वरूपकम्। गुरुं सञ्चिन्तयेत्तत्र शिवरूपं सनातनम्। शक्तिञ्च चिन्तये-त्तत्र ब्रह्मरूपां सनातनीम्। एवं सञ्चिन्तयेद्देवस्तु जपेद्वा सुरसुन्दरि!। नासाध्यं तस्य लोकेऽस्मिन् क्षि-तिदेवि! करे स्थितम्। तथा प्रथमपटले "मन्त्रार्थं मन्त्र-चैतन्यं योनिमुद्रां न वेत्ति यः। न सिद्ध्यति वरारोहे! कल्पकोटिशतैरपि। शतकोटिजपेनापि तस्य विद्या न सिद्ध्यतीति"। सरस्वतीतन्त्रे "कथयामि महा-मन्त्रं मन्त्रार्थञ्च महेश्वरि!। येन विज्ञातमात्रेण सर्वसिद्धीश्वरो भवेत्। केवलं भावदुद्धा च मन्त्रार्थं प्राणवल्लभे!। केवलं ज्ञानयोगेन जीवन्मुक्तो भवेद्-ध्रुवम्। काली तारा महाविद्या षोडशी भुवनेश्वरी। भैरवी छिन्नमस्ता च विद्या धूमावती शिवे!। बगला चैव मातङ्गी कमला च प्रकीर्त्तिता। बह्वविष्णुमहे शाद्यैश्चतुर्वेदैर्नमस्कृता। भोगदा मोक्षदा देवी कोटि ब्रह्माण्डगोपिता। अस्याः परिज्ञानमात्रेण जीवन्मुक्तस्तु साधकः"। वरदातन्त्रे शतपटले "शिव उवाच। मन्त्रार्थं कथयाम्यद्य शृणुष्व परमेश्वरि!। विना येन न सि-ध्येत्तु साधनैः कोटिभिः शिवे!। आदौ प्रसादबीजस्य मन्त्रार्थं शृणु पार्वति!। शिववाची हकारस्तु औकारः स्यात् सदाशिवः। मूलं दुःखहरस्तु स्यात् तस्मात्तेन शिवं यजेत्। ह्रौं। दं दुर्गावाचकं देवि! अकारस्यापि रक्षणे। विश्वमाता नादरूपा। सर्वार्थो विन्दुरूपकः। तस्मात्तेनैव बीजेन दुर्गामाराधयेत् शिवे!। दूं। "क कालो ब्रह्म र प्रोक्तं महामायार्थकश्च रे। विश्वमाता-र्थकोनादो विन्दुर्दुःखहरार्थमः। तेनैव कालिका

देवीं पूजयेद् ।खशान्तये । क्रीम् । ककारः शिववाची-
स्यात् रेफः प्रकृतिरुच्यते । महामायार्थ ईशब्दो नादो-
विश्वप्रसूः स्मृतः । दुःखहरार्थकोबिन्दु र्भुवनां तेन
पूजयेत् ह्रीम् । महाचक्त्यर्थकः यः आद्यनार्थो
रेफ उच्यते । ईं तुष्ट्यर्थोऽपरो नादो बिन्दुर्दुःखहरा-
र्थकः । लक्ष्मीदेव्या बीजमेतत्तेन देवीं प्रपूजयेत् ।
श्रीं । सरस्वत्यर्थ ऐशब्दो बिन्दुर्दुःखहरार्थकः ।
सरस्वत्याबीजमेतत्तेन वाणीं प्रपूजयेत् । ऐं । कः काम-
देव उद्दिष्टोऽथवा ब्रह्म उच्यते । वरदूरं तुष्टिवाची
सुखदुःखप्रदत्व यम् । कामबीजार्थ उक्तस्ते तव स्नेहात्
महेश्वरि । क्लीं । क्लः शिवः कथितो देवि ! जर्भैरव इहो-
च्यते । परार्धो नादगश्चैतु बिन्दुर्दुःखहरार्थकः ।
वर्मबीजमयोह्यत्र कथितस्तव यत्नतः । हूं । गणेशार्थे
गउक्तस्ते बिन्दुर्दुःखहरार्थकः । गंबीजार्थस्तु कथितस्तव
स्नेहात् महेश्वरि !। गं । ग गणेशो व्यापकार्थो णकारस्ते
ज औमतः । दुःखहरार्थकोबिन्दु र्गणेशं तेन पूजयेत् ।
ग्लौं । ग्लौंऽसिद्धो ब्रह्म रस जर्दुन्मार्थश्च औः। दुःख
हरार्थको बिन्दुर्ब्रह्मसिद्धं तेन पूजयेत् । ह्रौं । ना-
मादिवर्णः सर्वेषां नासउक्तं स्वयम्भुवा । तेनैवार्थन्तु-
जानीयादर्थसभ्यन्तु चिन्तयेत् । यथार्थं विभक्त्यन्तं
मन्त्रार्थो चिन्तयेच्छिवे !। तत्तद्वर्णादियोगेन संक्षेपात्
कथितं त्वयि । दुर्गोनारायणवाचीसारकार्थसकारकः ।
सुकाल्यर्थरेफउक्तोऽत्र महामायार्थकश्च ईः । विश्वमातार्थ-
कोनादो बिन्दुर्दुःखहरार्थकः । वधूबीजार्थ उक्तो-
ऽत्र तव स्नेहात् महेश्वरि !। स्त्रीं । यत्र बिन्दुद्वयं
मन्त्रे एकं दुःखहरार्थकम् । अन्यत् सुखप्रदं देवि !
ज्ञात्वा चार्थं विचिन्तयेत् । यत्र बिन्दुद्वयं मन्त्रे अन्यत्
पुष्ट्यर्थकं मतम् । खाद्यामातार्थका देवी परार्धा वा प्रकी-
र्त्तिता । शक्रमाता वषट्प्रोक्ता सुरिप्रियार्थका शिरा ।
सुरार्धा फट्फट्यग्नीवे विद्धि बीजं विनिर्दिशेत् । यं-
बीजं वायुवाचि स्यात् जमैन्द्रं परिकीर्त्तितम् । अने-
काक्षरबीजे च अस्त्रबीजं स्वनामकम् । एवं ज्ञात्वा
महेशानि ! मन्त्रार्थं परिचिन्तयेत् । एकबीजद्वयं यत्र
पृथगर्थं प्रकल्पयेत् । बीजार्थं वा महेशानि ज्ञात्वा
मन्त्रं जपेद्विया । इति ते कथितो देवि मन्त्रार्थः
परमेश्वरि ! ईंबीजेनैव पुटितं मूलमन्त्रं जपेद्यदि ।
तदेव मन्त्रचैतन्यं भवत्येव सुनिश्चितम् । सरस्वतीतन्त्रे
प्रथमपटले "ईश्वर उवाच । मन्त्रार्थं परमेशानि !
सावधानावधारय । मूलाधारे मूलविद्यां भावयेदिष्ट
देवताम् । शुद्धस्फटिकसङ्काशां भावयेत् परमेश्वरीम् ।
भावयेदक्षरश्रेणीमिष्टविद्यां सनातनीम् । सङ्कर्षेद्
विभाव्यैतां पश्चाद्ध्यानपरो भवेत् । ध्यानं कृत्वा महे-
शानि ! मूलकन्दं ततः परम् । ततोजीवो महेशानि !
मनसा कमलेक्षणे !। स्वाधिष्ठानं ततोगत्वा भावयेदिष्ट
देवताम् । बन्धूकारुणसङ्काशां जपासिन्दूरसन्निभाम् ।
विभाव्य अक्षरश्रेणीं पद्ममध्यगतां पराम् । ततो जीवः
प्रसन्नात्मा पक्षिणा सह सुन्दरि !। मणिपूरं ततो गत्वा
भावयेदिष्टदेवताम् । विभाव्य अक्षरश्रेणीं पद्ममध्यगतां
पराम् । शुद्धस्फटिकसङ्काशां शिरःपद्मोपरिस्थिताम् ।
ततोजीवो महेशानि ! पक्षिणा सह पार्वति !। हृत्पद्मं
प्रययौ शीघ्रं नीरजायतलोचने !। इष्टविद्यां महेशानि!
भावयेत् कमलोपरि । विभाव्य अक्षरश्रेणीं महामरकत-
प्रभाम् । ततोजीवो वरारोहे ! विशुद्धं प्रययौ प्रिये !।
तत्पद्मगहनं गत्वा पक्षिणा सह पार्वति !। इष्टविद्यां
महेशानि ! आज्ञापद्मे परिचिन्तयेत् । पक्षिणा सह देवेशि!
खञ्जनाक्षि ! शुचिस्मिते !। इष्टविद्यां महेशानि ! आज्ञा-
द्वयब्रह्मरूपिणीम् । विभाव्य अक्षरश्रेणीं हरिद्वर्णां
वरानने !। आज्ञाचक्रे महेशानि ! षट्चक्रे ध्यानमा-
चरेत् । षट्चक्रे परमेशानि ! ध्यानं कृत्वा शुचिस्मिते !।
ध्यानेन परमेशानि ! यद्रूपं समुपस्थितम् । तदेव पर-
मेशानि ! मन्त्रार्थं विद्धि पार्वति" अथ कङ्कालादि ।
सरस्वतीतन्त्रे तृतीयपटले "तारायाः कङ्काला
देवि ! महानीलसरस्वती । पञ्चाक्षरी कालिकायोः
कङ्काला परिकीर्त्तिता । कालीकूर्चं वधूमाया फट्कारान्ता
महेश्वरि !। स्त्रिद्मावास्तु महेशानि ! कङ्कालाष्टाक्षरी
भवेत् । वज्रवैरोचनीये च अन्ते वर्म च पूरयेत् । सम्पत्-
प्रदायाः प्रथमं भैरव्याः कङ्काला भवेत् । श्रीमत्त्रिपुर-
सुन्दर्याः कङ्काला द्वादशाक्षरी । वाग्भवं प्रथमं बीजं
कामबीजमनन्तरम् । वह्निबीजं ततः पश्चात् त्रिपुरेति
ततःपरम् । भगवतीति ततः पश्चादन्ते ठद्वयरुद्धरेत् ।
अथ कामबीजस्य कङ्काला परिकीर्त्तिता । प्रासाद-
बीजं शम्भोश्च मङ्कुबीजे अक्षरम् । एकार्णो भुवनेश्वर्या
विष्णोः स्यादष्टवर्णकम् । नमोनारायणायेति मन्त्र-
वाद्यस्य कङ्काला । मातङ्ग्याः प्रथमं बीजं माया धूमा-
वतीं प्रति । वाराह्याश्च वधूबीजं सत्यप्राय निजबीजकम् ।
सरस्वत्या वाग्भवस्य अन्नदाया अनङ्गक !। अपरेषाञ्च

देवानां मन्त्रभातं प्रकीर्त्तितम् । इयन्ते कथिता देवि ! संक्षेपात् कुल्लुका मया । अज्ञात्वा कुल्लुकामेतां योजयेदधमः प्रिये ! । पञ्चत्वमाशु लभते सिद्धिर्हानिस्तु जायते । तथा जपादिकं सर्वं निष्फलं नात्र संशयः । तस्मात् सर्वप्रयत्नेन धारयेत्कूर्द्धि कुल्लुकाम्" । तथा "विप्राणां प्रणवः सेतुः क्षत्रियाणां तथैव च । वैश्यानाञ्चैव फट्कारो माया शूद्रस्य कथ्यते । अजित्वा हृदि देवेशि ! यो वै मन्त्रं समुच्चरेत् । सर्वेषामेव मन्त्राणा मधिकारो न तस्य हि । महासेतुश्च देवेशि ! सुन्दर्य्या भुवनेश्वरी । कालिकायाः स्वबीजञ्च तारायाः कूर्च्चबीजकम् । अन्यासान्तु वधूबीजं महासेतुर्वरानने ! । आदौ जप्त्वा महासेतुं जपेन्मन्त्रमनन्यधीः । धने धनेशतुल्योऽसौ वाग्वाणीश्वरोपमः । युद्धे कृतान्त सदृशो नारीणां मदनोपमः । जपकालो भवेत्तस्य सर्वः कालो न संशयः । अथ वक्ष्यामि निर्वाणं शृणुष्वावहितानघे ! । प्रणवं पूर्वमुच्चार्य्य मातृकाद्यं समुच्चरेत् । ततो मूलं महेशानि ! ततोवाग्भवमुच्चरेत् । मातृकासु समस्तासु पुनः प्रणवमुच्चरेत् । एवं पुटितमूलन्तु प्रजपेन्मणिपूरके । एवं निर्वाणमीशानि ! यो न जानाति पामरः । कल्पकोटिसहस्रेण तस्य सिद्धिर्न जायते" । अथ सुखशोधनम् । पञ्चमपटले "ईश्वर उवाच । अपरैकं प्रवक्ष्यामि सुखशोधनमुत्तमम् । यच्च ज्ञात्वा महादेवि ! जपपूजा हुता भवेत् । अशुद्धजिह्वया देवि ! योजयेत्स तु पापकृत् । तस्मात्सर्वप्रयत्नेन जिह्वाशोधनमाचरेत् । महात्रिपुरसुन्दर्य्या मुखस्य शोधनं शुभे ! । श्रीबीजं प्रणवो लक्ष्मीस्तारः श्रीः प्रणवस्तथा । इमं षड्वरं मन्त्रं सुन्दर्य्या दशधा जपेत् । शृणु सुन्दरि ! श्यामाया मुख शोधनमुत्तमम् । निजबीजत्रयं देवि ! प्रणवत्रितयं पुनः । कामत्रयं वह्निविन्दुरतिचन्द्रयुतं पृथक् । एषा नवाक्षरी विद्या मुखशोधनकारिणी । तारायाः शृणुचार्वङ्गि ! अपूर्वमुखशोधनम् । जीवनं मध्यमं लज्जां भुवनेशीं ततः प्रिये ! । त्र्यक्षरीयं महाविद्या विज्ञेया ऽमृतवर्षिणी । दुर्गायाः शृणु चार्वङ्गि ! मुखशोधनमुत्तमम् । द्वादशाक्षरमुद्धृत्य विन्दुयुक्तं त्रयं तथा । अपरैकं प्रवक्ष्यामि वगलामुखशोधनम् । वाग्भवं भुवनेशीञ्च वाग्बीजं सुरवन्दिते ! । मातङ्ग्याः शोधनं देवि ! अङ्कुशं वाग्भवन्तथा । बीजद्वाङ्कुशमेतद्धि विज्ञेयं त्र्यक्षरीयकम् । छिन्नायाश्च शोधनं देवि ! श्रीबीजं कमलानने ! । दुर्गायाः शोधनं माया वाग्बीजपुटिता भवेत् । दुर्गेस्वाहा पुनर्म्माया वाग्बीजञ्च पुनश्च वाक् । प्रणवं दानमुद्धृत्य वामकर्णविभूषितम् । पुनः प्रणवमुद्धृत्य धनदामुखशोधनम् । एवंमन्त्रं महेशानि ! धूमावत्याश्चभवेदपि । प्रणवो विन्दुमान् देवि ! पञ्चान्तकोणसंस्थितः । वेदादिगगनं वह्निमनुयुग्मन्तु चन्द्रवत् । द्व्यक्षरः परमेशानि ! । विष्णोश्च मुखशोधनम् । कन्यासां प्रणवं देवि ! बालादीनां प्रकीर्त्तितम् । स्त्रीणाञ्च शूद्रतुल्यं हि मुखशोधनमीरितम् । मुखशोधनमात्रेण जिह्वाऽमृतमयी भवेत् । अन्यथा मुखविड्युक्ता जिह्वा भवति सर्व्वदा । भक्षणैर्दूषिता जिह्वा मिथ्यावाक्येन दूषिता । कलहैर्दूषिता जिह्वा तत्कथं प्रजपेन्मनुम् । तस्मोधनमनाचर्य्य न जपेत् पामरः क्वचित् । शैवशाक्तवैष्णवादेः सर्वस्यावश्यमेव वा । अन्यथा प्रजपेन्मन्त्रं मोहेन यदि भाविनि ! । सर्वं तस्य हृथा देवि ! मन्त्रसिद्धिर्न जायते । अन्ते नरकगामी च भवेत् सोऽपि न चान्यथा । देवो यदि जपेत् मन्त्रं अकृत्वा मुखशोधनम् । तदपं तस्य देवेशि ! किं पुनर्म्मर्त्यवासिनाम्" । षष्ठपटले "ईश्वर उवाच । अथ वक्ष्यामि देवेशि ! प्राणयोगं शृणुष्व मे । विना प्राणं यथा देहः सर्वकर्मसु न क्षमः । विना प्राणं तथा मन्त्रः पुरश्चर्य्यागतैरपि । मायया पुटितोमन्त्रः सप्तधा जपतः पुनः । सप्राणो जायते देवि ! सर्वत्रायं विधिःस्मृतः । तथैव दीपनीं वक्ष्ये सर्वमन्त्रे च भाविनि ! । अन्धकारे स्थिते यद्वत् किञ्चित् प्रतिभासते । दीपनीरहितो मन्त्र स्तद्वैव परिकीर्त्तितः । वेदादिपुटितं मन्त्रं सप्तधा जपेत्पुनः । दीपनीयं समाख्याता सर्वत्र परमेश्वरि ! । वेदादिपुटितं कृत्वा प्रयत्नेन सुरेश्वरि ! । दशधा प्रजपेन्मन्त्रं सूतकद्वयशुद्धये । अथोच्यते जपस्यात्र क्रमश्च परमाद्भुतः । यं कृत्वा सिद्धिसंधानमधियोजायते नरः । नतिर्युवादिनामादौ नमो मन्त्रशिखां भजेत् । ततोऽपि मन्त्रचैतन्यं मन्त्रार्थभावना ततः । गुरुध्यानं शिरःपद्मे हृदीष्टध्यानमाचरेत् । कुल्लुकाञ्च ततः सेतुं महासेतुमनन्तरम् । निर्वाणञ्च ततो देवि ! योनिमुद्राविभावना । अङ्गन्यासं प्राणायामं जिह्वाशोधनमेव च । प्राणयोगं दीपनीञ्च शक्तीश्चभङ्गमेव च । भ्रूमध्ये वा नसोरग्रे दृष्टौ सेतुं जपेत् पुनः । सेतुमशक्तौ चभङ्गञ्च प्राणायाममिति क्रमः" । चतुर्थपटले । "कुल्लुकां मूर्द्धि संजप्य हृदि सेतुं विचिन्तयेत् । महासेतुं विशुद्धौ

च कण्ठदेशं समुद्धरेत् । मणिपूरे तु निर्वाणं महाकण्ठ-विनीमधः । स्वाधिष्ठाने कामबीजं राकिणीमूर्त्ति संस्थितम् । विचिन्त्य विधिवद्देवि ! मूलाधारान्विके शिवे ! । विशुद्धान्तं व्रजेदेवि ! विसतन्तुतनीवसीम् । वेदिस्थानं हि जीवानां मूलमन्त्राहतं मुहुः" ।

**जपन** न० जप-भावे ल्युट् । जपे । "सत्प्राप्य एव वेदान्ते वर्णते जपनं प्रति" भा० शा० १०१६ अ० ।

**जपमाला** स्त्री० जपस्य जपार्थो माला । जपसाधने मालायां तद्विधानादि अक्षमालाशब्दे ४२ पृ० उक्तप्रायमधिकमत्र प्रदर्श्यते ।

नित्यातन्त्रे नवमपटले "ईश्वर उवाच । अथ मालां समाश्रित्य मातृकावर्णरूपिणीम् । अथ सङ्ख्या-फलमयी भोगमोक्षप्रदायिनी । राजवशङ्करी सर्व-सिद्धिदा नात्र संशयः । यथा स्फटिकमयी तथा स्फटिक निर्मिता । रुद्राक्षमाला गिरिजे ! मोक्षदा च सुसिद्धिदा । प्रवालघटिता माला वश्यदा कर्मसाधिनी । मणिक्य-रचिता माला साम्राज्यफलदायिनी । मुक्ताजीवक-माला तु विद्यालक्ष्मीप्रदायिनी । पद्मबीजाक्षमाला तु महालक्ष्मीप्रदायिनी । रक्तचन्दनबीजाक्षमाला-वश्यफलप्रदा" । सङ्खमालातन्त्रे द्वितीयपटले "स्फाटिकैर्मौक्तिकाभः स्यात् रुद्राक्षैर्वह्निपुत्रदा । जीव-पुत्रैश्च धनदा शाक्षैर्भोगमोक्षदा । गुडस्फटिक-माला तु महासम्पत्प्रदा प्रिये ! । ब्रह्मज्ञानधुस्तुरैर्माला एका धूमावतीविधौ" । तथा । "मणिरत्नप्रवालैश्च हेमराजतसम्भवा । माला कार्या कुशग्रन्थ्या सर्वभोग फलप्रदा" । समयाचारतन्त्रे द्वितीयपटले "पूर्वा-म्नायादि सर्वेषां मालां शृणु यथाक्रमम् । जप्त्वा ये-नापु लभते फलं देवैश्च दुर्लभम् । अक्षमाला प्रथमतो मातृकार्णस्वरूपिणी । अथ सङ्खामयी माला रतिभोग फलदा । सर्वसिद्धिकरी माला सर्वराजवशङ्करी । प्र-वालमालावश्यार्थं सर्वकार्यफलप्रदा । मणिक्यरचिता माला साम्राज्यफलदायिनी । पद्माक्षरचिता माला यशोलक्ष्मीप्रदा सदा । सुवर्णरचिता माला सर्वकाम-फलप्रदा । रक्तचन्दनमाला च भोगदा मोक्षदा भवेत् । रुद्राक्षरचिता माला सर्वकामफलप्रदा । सर्व-मालां प्रपूज्याथ चन्दनेन विलेपिताम् । समाश्रित्य जपेन्नित्यं यथोक्तफलमाप्नुयात् । एता मालाश्च सुभगे ! षड्नायेषु पूजिताः" सुखमालातन्त्रे "ईश्वर उवाच अक्षमाला तु कथिता यत्नतो न प्रकाशिता । अक्षमा-लेति किं नाम फलं वा किं वदस्व मे । ईश्वर उवाच अक्षमाला तु देवेशि ! काम्यभेदादनेकधा । भवति शृणु तत् प्राज्ञे ! विस्तराद्वच्यते मया । अनुलोमविलोमेन क्रमेण वर्णमालया । आदिक्षान्तादिक्षान्तक्रमेण परमे-श्वरि ! । अकारं मेरुरूपञ्च लङ्घयेन्न कदाचन" । मेरु-लङ्घनदोषस्तु तत्रैव "मेरुहीना च या माला मेरु-लङ्घा च या भवेत् । अशुद्धप्रतिकाशा च सा माला नि-ष्फला भवेत् । चिन्तिथी विसतन्त्वाभा ब्रह्मनाड्योगतान्तरा । तया संग्रथिता माला सर्वकामफलप्रदा । अष्टोत्तरशतं जप्त्वा आदिक्षीवं समाचरेत् । अक्षसूत्रहृयं यत्तु तद्धि क्षीवं प्रचक्षते । वर्णानामष्टभिर्वापि काम्यभेदात् क्रमेण तु अकचटतपयशा अष्टौ वर्गाः प्रकीर्त्तिताः" । मालया-जपविशेषस्तु नित्यातन्त्रे "अक्षमालां प्रपूज्याथ चन्द-नेन सुवर्चने ! । समाश्रित्य जपेद्विद्वान् अक्षमालामनन्यधीः । योजितः सकला वश्याः सप्तद्वीपस्य पार्वति ! । ततो द्वितीयलक्षञ्च जपेद्वीरवन्दिते ! । पाताल-तलनागेन्द्रकन्या वश्या भवन्ति हि । ततो लक्षत्रयं मन्त्री ! प्रजपेत् साधकोत्तमः । देवाङ्गना भवन्त्येव वश्यास्तस्य महेश्वरि ! । महापातककोटीश्च नाश-येत् कमलेक्षणे ! अभिमानेन सौभाग्यं सौख्यं सौ-न्दर्य्यमाप्नुयात् । चतुर्लक्षं प्रजप्याथ महायोगीश्वरो भवेत् । पञ्चलक्षजपाद्देवि ! कुबेरपदवीं व्रजेत् । षड्लक्षं तु प्रजप्याथ देवपूज्यो भवेन्नरः । अणिमाद्यष्टसिद्धीनां नायको नात्र संशयः । राजानोवशमायान्ति योषितश्च विशेषतः । नवलक्षं महादेवि ! योजपेत् साधकोत्तमः । रुद्रमूर्त्तिः स्वयं साक्षात् कर्त्ता हर्त्ता न संशयः" । समया-चारतन्त्रे "उत्तराम्नाये या माला भूयः शृणु वदामि ते । अथ वर्णमयी माला सर्वोत्कृष्टा च सा मता । महाशङ्ख-मयी माला वाञ्छितार्थफलप्रदा । उदुम्बरफलस्थाश्च स्फटिकस्थाश्च शुभा मता" । योगिनीतन्त्रे पूर्वखण्डे द्वितीय पटले "ईश्वर उवाच । वर्णमाला शुभा प्रोक्ता सर्वमन्त्रप्रदीपनी । तस्याः प्रतिनिधिर्देवि ! महाशङ्ख-मयी शुभा । महाशङ्खः करे यस्य तस्य सिद्धिरदूरतः । तदभावे वीरवन्द्ये ! स्फटिकी सर्वसिद्धिदा" । मणिभेदेन फलभेदमाह मुखमालातन्त्रे "स्त्रियं श्रैश्वर्यफलदा पद्म-विल्वैस्तु मोक्षदा । चतुर्हस्तमयी मोक्षदायिनी भोगवर्द्धिनी । दशपञ्चात्मिका माला मारणोच्चाटने स्मृता । स्तम्भने मोहने

वशेत्र रोधने कर्षने तनोः। पादुकासिद्धिरुक्ते च शतसंख्या प्रकीर्तिता। अष्टोत्तरशतं कुर्यादथवा सर्वकामदम्"। योगिनीतन्त्रे "मणिसंख्या महादेवि! मालायाः कथयामि ते। पञ्चविंशतिभिर्मौक्तैः पुष्टये तु सप्तविंशतिः। त्रिंशद्भिर्धनसिद्धिः स्यात् पञ्चाशत्कन्यसिद्धये। अष्टोत्तरशतैः सर्वसिद्धिरेव महेश्वरि!। एतत्साधारणं प्रोक्तं विशेषं कामिनां वदे। शिवउवाच। दलमाला जपे कार्य्या गले धार्य्या तथा शुभा। दशनैर्यदि कर्त्तव्या संख्यादलसमा ते प्रिये!। सर्वसिद्धिप्रदा माला राजदन्तेन मेरुणा। अन्यत्रापि महेशानि! मेरुत्वेनैवमादिशेत्। नित्यं जपं करे कुर्यात्तु काम्यमवरोधनात्। काम्यमपि करे कुर्यान्मालाऽभावे प्रियंवदे!। अत्यङ्गुल्या जपं कुर्यात् अङ्गुष्ठाङ्गुलिभिर्जपेत्। अङ्गुष्ठेन विना कर्म कृतं तत्निष्फलं भवेत्"। उत्पत्तितन्त्रे प्रथमपटले "नित्यं नैमित्तिकं काम्यं करे कुर्यादिचक्षणः। करमाला महादेवि! सर्वदोषविवर्जिता। छिद्रभिन्नादिदोषोऽपि करे नास्ति कदाचन। अक्षयस्तु करोदेवि! माला भवति तादृशी। यन्त्रिः सा कुण्डलीशक्तिः पञ्चाशद्वर्णरूपिणी। अतएव महेशानि! करमाला महाफला"। योगिनीतन्त्रे "तथातथातो यत्नं मालानां तत्र शोधनम्। पूजां विधाय भक्त्या तु शुचिः पूर्वमुखोस्थितः। विजने यत्नेनुभौनी स्वयं मालान्तु साधकः। कृतनित्यक्रियः शुद्धः शुद्धचेतु च मन्त्रवित्। यथाकालं यथाकाममभ्यानीयं यतव्रतः। अन्योऽन्यसमरूपाणि मौक्तिकानि शुभानि च। कीटादिभिरदुष्टानि न जीर्णानि नवानि च। गव्यैस्तु पञ्चभिस्तानि प्रक्षाल्य च पृथक् पृथक्। पृथ्वीदेवेन्द्रपुष्पाक्षीनिर्म्मितं ग्रन्थिवर्जितम्। त्रिगुणं त्रिगुणीकृत्य षट्कृत्वमथापि वा। शुक्लं रक्तं तथा कृष्णं शान्तिवश्याभिचारके। स्वर्णं संपातयेद्विद्वान् तत्प्रक्षाल्य च पूर्ववत्। मालामेकैकमादाय स्वर्णे संपातयेत् सुधीः। मुखे मुखन्तु संयोज्य पुच्छे पुच्छन्तु योजयेत्। सोपुच्छसदृशी माला यदा सर्पाकृतिः शुभा"। सुखपुच्छनियमस्तु स्वच्छन्दभैरवे "कङ्कालसोदरं प्रोक्तं मुखं पुच्छञ्च निम्नगम्। कमलाक्षस्य सूत्रांगं सविन्दुहितयं सुखम्। सविन्दु कस्य सूत्रांगं दृढं ब्रह्मणमिति स्थितम्। एवं ज्ञात्वा सुखं पुच्छं कङ्कालाम्भोरुहाक्षयोः। तत्सजातीयमेकाक्षं मेरुत्वेना यतोन्यसेत्। एकैकं मणिमादाय ब्रह्मग्रन्थिं प्रकल्पयेत्। एकैकमालकावर्णान् यत्नादौ तु संजपेत्"। ग्रन्थिनियमस्तु स्वच्छन्दभैरवे "त्रिवृत्तिग्रन्थिनैकेन तथार्द्धेन विधीयते"। अथ वा "नवभिस्तन्तुभिश्चैव रज्जुं कृत्वोपवीतवत्। सार्द्धद्वयावर्त्तनेन ग्रन्थिं कुर्याद्यथा दृढम्"। दृढे ताभ्यामिच्छाविकल्पः। तथा "द्वादशीं वैष्णवीं माला कर्त्तव्या सोपवासतः। समुद्धृत्य विष्णुमन्त्रेण दिवाभागे प्रयत्नतः। ग्रन्थीनामपि कर्त्तव्या रात्रिन्यस्ता यथाविधि। अष्टम्यान्तु नवम्यान्तु चतुर्दश्यान्तथैव च। त्रयोदश्यान्तथा कुर्याच्छिवस्याथ सुरेश्वरि! शुभे लग्ने शुभे वारे शुभर्क्षे च शुभे तिथौ। प्रतिष्ठां कारयेन्मन्त्री स्वयं वा गुरुणापि वा। एवं निर्म्माय मालां वै शोधयेन्नुनिसत्तम!। कालिकापुराणे ब्रह्मग्रन्थियुतं कुर्यात् प्रतिबीजं यथास्थितम्। अथ वा ग्रन्थिरहितं दृढ-

सनत्कुमारीये "कार्पासस्यसूत्रं स्वयं धर्म्मकामार्थमोक्षदम्। तच्च विप्रेन्द्रकन्याभिर्निर्मितन्तु सुशोभनम्। शुक्लं रक्तं तथा कृष्णं पट्टसूत्रमथापि वा। शान्तिवश्याभिचारेषु मोक्षेऽर्थे जपेषु च। शुक्लं रक्तं तथा पीतं कृष्णं वर्णेषु च क्रमात्। सर्वेषामेव वर्णानां रक्तं सर्वेप्सितप्रदम्। त्रिगुणं त्रिगुणीकृत्य ग्रथयेत् शिल्पशास्त्रतः। एकैकं मातृकावर्णं स्मरन् मन्त्रं प्रजपन् सुधीः। मणिमादाय सूत्रेण ग्रथयेन्मध्यभागतः। ब्रह्मग्रन्थिं विधायेत्थं मेरुन्तु ग्रन्थिसंयुतम्। ग्रथयित्वा पुरोमालां तत्संस्कारं समाचरेत्। कस्यचिच्छिन्ने मूलविद्यया ग्रथयेत् तथा च एकोराकल्पे "मातृका वर्णतो ग्रन्थिं विद्यया वाथ कारयेत्"। सुवर्णादिगुणैर्वापि ग्रथयेत् साधकोत्तमः। ब्रह्मग्रन्थिं ततो दद्यात् नागपाशमथापि वा। कवचेनावगुण्ठ्यात्मानां ध्यानपरायणः। सर्वशेषे ततोमेरुं सूत्रद्वयसमन्वितम्। ग्रथयेन्नारदयोगेन बध्नीयात् साधकोत्तमः। एवं निष्पाद्य देवेशि! प्रतिष्ठाञ्च समाचरेत्"। गौतमीये "मुखे मुखन्तु संयोज्य पुच्छे पुच्छन्तु योजयेत्। सोपुच्छसदृशी माला यदा सर्पाकृतिः शुभा"। सुखपुच्छनियमस्तु स्वच्छन्दभैरवे "कङ्कालसोदरं प्रोक्तं मुखं पुच्छञ्च निम्नगम्। कमलाक्षस्य सूत्रांगं सविन्दुहितयं सुखम्। सविन्दु कस्य सूत्रांगं दृढं ब्रह्मणमिति स्थितम्। एवं ज्ञात्वा सुखं पुच्छं कङ्कालाम्भोरुहाक्षयोः। तत्सजातीयमेकाक्षं मेरुत्वेना यतोन्यसेत्। एकैकं मणिमादाय ब्रह्मग्रन्थिं प्रकल्पयेत्। एकैकमालकावर्णान् यत्नादौ तु संजपेत्"। ग्रन्थिनियमस्तु स्वच्छन्दभैरवे "त्रिवृत्तिग्रन्थिनैकेन तथार्द्धेन विधीयते"। अथ वा "नवभिस्तन्तुभिश्चैव रज्जुं कृत्वोपवीतवत्। सार्द्धद्वयावर्त्तनेन ग्रन्थिं कुर्याद्यथा दृढम्"। दृढे ताभ्यामिच्छाविकल्पः। तथा "द्वादशीं वैष्णवीं माला कर्त्तव्या सोपवासतः। समुद्धृत्य विष्णुमन्त्रेण दिवाभागे प्रयत्नतः। ग्रन्थीनामपि कर्त्तव्या रात्रिन्यस्ता यथाविधि। अष्टम्यान्तु नवम्यान्तु चतुर्दश्यान्तथैव च। त्रयोदश्यान्तथा कुर्याच्छिवस्याथ सुरेश्वरि! शुभे लग्ने शुभे वारे शुभर्क्षे च शुभे तिथौ। प्रतिष्ठां कारयेन्मन्त्री स्वयं वा गुरुणापि वा। एवं निर्म्माय मालां वै शोधयेन्नुनिसत्तम!। कालिकापुराणे ब्रह्मग्रन्थियुतं कुर्यात् प्रतिबीजं यथास्थितम्। अथ वा ग्रन्थिरहितं दृढ-

रज्जुसमन्वितम्। अश्वत्थपत्रनयकैः पद्माकारन्तु कल्पयेत्। तन्मध्ये स्थापयेन्मालां मालकां मूलमुच्चरन्। जालयेत् पङ्कजैस्तु सरोजानेन सज्जलैः"। इत्यादि। मालासंस्कारश्च नित्यतामाह रुद्रयामले "अर्पितप्रतिमालाभिर्मन्त्रं जपति यो नरः। सर्वं तद्विफलं विद्यात् कृत्वा भवति देवता"। यच्छन्दमाहेश्वरे "मध्यमायां न्यसेत् मालां ज्येष्ठेनावर्त्तयेत् सुधीः। भुक्तिमुक्तिप्रदा सैव किञ्चाथ मालकाक्रमात्। कामनाभेदे अङ्गुलीनियमो यथा "तर्ज्जन्यङ्गुष्ठयोगेन शत्रूणां नाशने जपेत्। अङ्गुष्ठमध्यमायोगात् मन्त्रसिद्धिः सुनिश्चिता। अङ्गुष्ठानामिकायोगाच्छ्रीरुच्चाटनं मतम्। ज्येष्ठाकनिष्ठायोगेन शत्रूणां त्रासनं मतम्"। "वैशम्पायनसंहितायाम् अङ्गुष्ठमध्यमानाञ्च मखेयं मध्यमागतः। तर्ज्जन्या न स्पृशेदेनां सन्निदो गणनक्रमः। जीर्णे सूत्रे पुनः सूत्रं ग्रथयित्वा शतं जपेत्। प्रमादात् पतिता च्छिन्नात् शतमष्टोत्तरं जपेत्। जपेच्छिन्नसंस्थाने जालयित्वाऽङ्गमालिकाम्"। सिद्धेऽष्टोत्तरशतजपः कार्य्यः करभवक्षित्रयोस्तुल्यत्वात् तन्नसारः।

**जपयज्ञ** पु० जपएव यज्ञः। जपरूपे यज्ञे तद्भेदादिकं हारीतेनोक्तं यथा "त्रिविधो जपयज्ञः स्यात्तस्य तत्त्वं निबोधत। वाचिकश्च उपांशुश्च मानसश्च त्रिधाकृतिः। त्रयाणामपि यज्ञानां श्रेष्ठः स्यादुत्तरोत्तरः। यदुच्चनीचोच्चरितैः शब्दैः स्पष्टपदाक्षरैः। मन्त्रमुच्चारयन् वाचा जपयज्ञः स वाचिकः। शनैरुच्चारयन् मन्त्रं किञ्चिदोष्ठौ प्रचालयेत्। किञ्चित् श्रवणयोग्यः स्यात् स उपांशुर्जपः स्मृतः। धिया पदाक्षरश्रेणया अवर्णमपदाक्षरम्। मन्त्रार्थचिन्तनाभ्यान्तु तदुक्तं मानसं स्मृतम्। जपेन देवता नित्यं स्तूयमाना प्रसीदति। प्रसन्ने विपुलान् भोगान् प्राप्नुवन्ति मनीषिणः। राक्षसाश्च पिशाचाश्च महासर्पाश्च भीषणाः। अपितान्नोपसर्पन्ति दूरादेव प्रयान्ति ते। छन्दऋष्यादि विज्ञाय जपेन्मन्त्रं समन्वितः"। "विधियज्ञाज्जपयज्ञो विशिष्टो दशभिर्गुणैः। उपांशुः स्यात् शतगुणः साहस्रो मानसः स्मृतः"। "ये पाकयज्ञाश्चत्वारो विधियज्ञसमन्विताः। सर्वे ते जपयज्ञस्य कलां नार्हन्ति षोडशीम्" मनुः "जपयज्ञप्रसिद्ध्यर्थं विद्यास्थाध्यात्मिकौ जपेत्" याज्ञ० "यज्ञानां जपयज्ञोऽस्मि" गीता।

**जपस्थान** न० ६त०। नानातन्त्रोक्ते जपसाधनस्थानभेदे। तानि च नानातन्त्रोक्तानि प्रदर्श्यन्ते।

"सारदायां द्वितीयपटले "पुण्यक्षेत्रं नदीतीरं गुहा पर्वतमस्तकम्। तीर्थप्रदेशाः सिन्धूनां सङ्गमः पावनं सरः। उद्यानानि विविक्तानि बिल्वमूलं तटं गिरेः। देवाद्यायतनं कूलं सप्तद्वस्य निजं गृहम्। साधनेषु प्रशस्तानि स्थानान्येतानि मन्त्रिणाम्। नदीतीरं पुण्यनदीतीरं सामान्यनदीतीरस्य निषिद्धत्वात्। विविक्तानि विजनानि। राघवभट्टधृतम् "प्रसङ्गसुखशिवस्थाने हृषभादिविवर्जिते। अश्वत्थबिल्वतुलसीवटपञ्चालराहते। गवां गोष्ठेऽश्वत्थमूले पुण्यक्षेत्रेषु यस्यते"। गोष्ठ इत्यनेनैव गोस्थाने लब्धे गवामिति यदुक्तं तत्तात्कालिकगोसम्बन्धप्राप्तये तेन गोसमीपे जपादिकर्म्म प्रशस्यतएव गवां समीप इत्युक्तम्। वायवीयसंहितायाम् "सूर्य्यस्थाने गुरोरिन्दोर्दीपस्य च जलस्य च। विप्राणाञ्च गवाञ्चैव सन्निधौ यस्यते जपः। यत्र वा प्रजपेत्तत्र यत्र चित्तं प्रसीदति"। सुखमालातन्त्रे तृतीयपटले च "नदीतीरे बिल्वमूले श्मशाने शून्यवेश्मनि। एकलिङ्गे पर्वते वा देवागारे चतुष्पथे। शवस्योपरिसुखे वा जले वाऽऽकण्ठपूरिते। संग्रामभूमौ योनौ वा स्थाने वा विजने वने। यत्र कुत्र स्थले रम्ये यत्र वा स्वान्मनोलयः" हरशीलतन्त्रे द्वितीयपटले "एकलिङ्गे श्मशाने वा शून्यागारे चतुष्पथे। कृत्वा वा साधयेद्धीमान् सर्वाभीष्टप्रदायिनीम्" "पञ्चक्रोशान्तरे यत्र न लिङ्गान्तरमीक्ष्यते। तद्देकलिङ्गमाख्यातं तत्र सिद्धिरनुत्तमा" इति श्यामारहस्यधृतेनैकलिङ्गं ज्ञातव्यम्। तथा "डम्बटे पर्वते वापि निर्जने वा चतुष्पथे। देवागारे देवशून्ये बिल्वमूले नदीतटे। खण्डे निर्जनेऽरण्ये तथा चाश्वत्थसन्निधौ" इत्यपि श्यामारहस्ये। निर्वाणतन्त्रे प्रथमपटले च "एकलिङ्गे श्मशाने वा शून्यागारे नदीतटे पातालभवने वापि गिरौ वा दीर्घिकातटे। शक्तिखेले महापीठे बिल्वमूले शिवालये। धात्रीवटतलेऽश्वत्थमूले चैव तरोस्तले"। पातालभवने भूमिमध्ये। समयाचारतन्त्रे द्वितीयपटलेऽपि "जपस्थानानि देवेशि! सिद्धपीठानि यानि च। सिद्धपीठे च शस्यावां खड्गा गया विशेषतः। चतुष्पथे सिद्धलिङ्गे गुरुदेवालये तथा। वटाश्वत्थबिल्वमूले रम्भाया विपिने तथा। नदीतीरे शिवागारे पुण्डापर्वतमस्तके। जपस्थानानि देवेशि!

कथितानि नगात्मजे !। शृणु देवि ! विशेषेण उत्तराम्नायहेतवे !। वेश्याभट्टे श्मशाने वा गत्वा मैथुनमाचरेत्। ततो जपादिकं देवि ! कृत्वा च लभते फलम्। अथ वा खण्डे रात्रौ भक्तिमान् सुसमाचरेत्। स प्राप्नोति फलं सर्वं चिनादिभयवर्जितः" पुरश्चरणरसोल्लासतन्त्रे चतुर्थपटले "गोष्ठं चतुष्पथञ्चैव त्रिपथञ्च वरानने !। निर्जनञ्च तथारण्यं शून्यगेहं तथैव च। पर्वतञ्च नदीतीरं तथैव दोषिकातटम्। अश्वत्थवृक्षमूले च वटवृक्षतले तथा। धात्रीवृक्षतले देवि ! तथैव बकुलस्य च। यत्र पद्मवनं भद्रे ! शुक्लं रक्तं वरानने !। द्रोणपुष्पस्य चार्वङ्गि ! यदि भाग्येन लभ्यते। अरुणादित्यसङ्काशं जपकालं परात परम्" फलविशेषस्तु राघवभट्टेनोक्तो यथा। "सहस्रे जपः समः प्रोक्तो गोष्ठे शतगुणस्तु सः। आरामे च तथारण्ये सहस्रगुण उच्यते। अयुतः पर्वते पुण्ये नद्यां लक्षगुणस्तु सः। कोटिर्देवालये प्राहुरनन्तं शिवसन्निधौ" तत्र सिद्धपीठानि कुब्जिकातन्त्रे ७म पटले। "शिव उवाच। शृणुतां सावधानेन सिद्धपीठं प्रतिव्रते !। यस्मिन् साधनमात्रेण सर्वसिद्धीश्वरो भवेत्। मायावती मधुपुरी काशी गोरक्षकारिणी। छिङ्गुला च महापीठं तथा जालन्धरं पुनः। ज्वालासङ्कीमहापीठं पीठं नगरसञ्ज्ञकम्। रामगिरिर्महापीठं तथा गोदावरी प्रिये !। नेपालं कर्णसूत्रञ्च महाकर्णं तथा प्रिये !। अयोध्यायञ्च कुरुक्षेत्रं सिंहनादं मनोरमम्। मणिपूरं त्रिपीठेशं प्रयागञ्च तपोवनम्। बदरीञ्च महापीठं अम्बिकागह्वरालकम्। त्रिसंध्यं च महापीठं गङ्गासागरसङ्गमम्। नारिकेलञ्च विरजा उड्डीयानं महेश्वरि !। कमला विमला चैव तथा माहेश्वती पुरी। वाराही त्रिपुरा चैव वाङ्मती नीलवाहिनी। गोवर्द्धनं विन्ध्यगिरिः कामरूपं कलौ युगे। चट्टाकर्णोऽक्षयग्रीवो माधवश्च सुरेश्वरि !। क्षीरग्रामं वैद्यनाथं आनीयाद्दामलोचने !। कामरूपं महापीठं सर्वकामफलप्रदम्। कलौ शीघ्रफलो देवि ! कामरूपे जपः स्मृतः" अन्यत्र जपेऽपि कामाख्यावस्त्रयोगेन फलरुक्तं तत्रैव "कामाख्यावस्त्रमादाय जपपूजाः समाचरेत्। पूर्णकामं लभेद्देवि ! सत्यं सत्यं न संशयः" तन्त्रचूड़ामणौ महापीठान्युक्तानि यथा। "ईश्वर उवाच। मातः ! परात्परे ! देवि ! सर्वज्ञानमयीश्वरि !। कथ्यतां मे सर्वपीठं शङ्खोद्धारदेवताः" देव्युवाच। "शृणु वत्स ! प्रवक्ष्यामि दयालो ! भक्तवत्सल !। यानिर्विना न सिद्ध्यन्ति जपसाधनतत्क्रियाः। एकपञ्चाशतं पीठं शङ्खोद्धारदेवताः। अङ्गप्रत्यङ्गपातेन विष्णुचक्रक्षतेन च। ममाङ्ग वपुषो देव ! स्थितायं त्वयि कथ्यते। जङ्घारम्भ्रं स्थिङ्गुलायां भैरवो भीमलोचनः। कोट्टरीशा महादेव ! त्रिगुणा सा दिगम्बरी। २करवीरे त्रिनेत्रं मे देवी महिषमर्द्दिनी। क्रोधीशो भैरवस्तत्र २सुगन्धायाञ्च नासिका देवस्त्र्यम्बकनामा च सुनन्दा तत्र देवता। ४काश्मीरे कण्ठदेशश्च त्रिसन्ध्येश्वरभैरवः। महामाया भगवती सुधातीता वरप्रदा। ५ज्वालासङ्ख्यां महाजिह्वा देव उन्मत्तभैरवः। अम्बिका सिद्धिदानाम्नी स्तनं ६ जालान्धरे मम। भीषणो भैरवस्तत्र देवी त्रिपुरमालिनी। हृत्पीठं ७वैद्यनाथे वैद्यनाथस्तु भैरवः। देवता जयदुर्गाख्या। ८नेपाले जानु मे शिव ! कपाली भैरवः श्रीमान् महामाया च देवता। ९मालवे दक्षहस्तं मे देवी दाक्षायणी हर !। अमरो भैरवस्तत्र सर्वसिद्धिप्रदायकः। १०उत्कले नाभिदेशस्तु विरजाक्षेत्रमुच्यते। विमला सा महादेवी जगन्नाथस्तु भैरवः। ११गण्डक्यां गण्डपातश्च तत्र सिद्धिर्न संशयः। तत्र सा गण्डकी चण्डी चक्रपाणिस्तु भैरवः। १२वङ्कलायां वामबाहुर्वङ्कलाख्या च देवता। भीरुको भैरवस्तत्र सर्वसिद्धिप्रदायक। १३उज्जयिन्यां कूर्परश्च माङ्गल्यः कपिलाम्बरः। भैरवः सिद्धिदःसाक्षाद्देवी मङ्गलचण्डिका। १४चट्टले दक्षबाहुर्मे भैरवश्चन्द्रशेखरः। व्यक्तरूपा भगवती भवानी तत्र देवता। विशेषतः कलियुगे वसामि चन्द्रशेखरे। १५त्रिपुरायां दक्षपादो देवी त्रिपुरसुन्दरी। भैरवस्त्रिपुरेशश्च सर्वाभीष्टप्रदायकः। १६तिस्रोतायां वामपादो ह्यामरी भैरवेश्वरः। योनिपीठं कामगिरौ १७ कामाख्या तत्र देवता। यत्रास्ते त्रिगुणातीता रक्तपाषाणरूपिणी। यत्रास्ते साधवः साक्षादुमानन्दोऽत्र भैरवः। सर्वदा विहरेद्देवी तत्र सन्निर्न संशयः। तत्र श्रीभैरवी देवी तत्र च क्षेमदेवता। प्रचण्डचण्डिका तत्र मातङ्गी त्रिपुरालिका। वगला कमला तत्र भुवनेशी सधूमिनी। एतानि नव पीठानि शंसन्ति वरभैरवाः। अङ्गुलीष्टन्दं कस्य १८प्रयागे सङ्गिता भवः।१९जयन्त्यां वामजङ्घा च जयन्ती क्रमदीश्वरः। सर्वत्र विरजा चाहं कामरूपे शृङ्खले २०गौरीशिखरमारभ्य पुनर्जन्म न विद्यते। भूतधात्री महामाया भैरवः वीरकण्टकः। युगाद्या सा म-

क्षमाया दक्षाङ्गुष्ठपदो मम। नकुलीशः कालीपीठे दक्षपादाङ्गुली मम। करतोयां समारभ्य यावद्विक्करवासिनी। शतयोजनविस्तारं त्रिकोणं सर्वसिद्धिदम्। देवा मरणमिच्छन्ति किं पुनर्मानवादयः। भुवनेशी सिद्धिरूपा किरोटस्था २१किरीटतः। देवता विमलानाम्नी संवर्तो भैरवस्तथा। २२ वाराणस्यां विशालाक्षी देवता कालभैरवः। मणिकर्णीति विख्याता कण्डलञ्च मम श्रुतेः। २३ कालाञ्जने च पृष्ठं मेऽनिमेषो भैरवस्तथा। सर्वाणि देवता तत्र, २४ कुरुक्षेत्रे च गुल्फतः। स्थाणुनाम्नी च सावित्री अङ्गमावस्तु भैरवः। २५ मणिबन्धे च गायत्री सर्वानन्दस्तु भैरवः। २६ श्रीशैले च मम ग्रीवा महालक्ष्मीस्तु देवता। भैरवः शम्बरानन्दो देशे देशे व्यवस्थितः। २७काञ्चीदेशे च जठरो भैरवो रुरुनामकः। देवता देवगर्भाख्या नितम्बः २८कालमाधवे। भैरवश्चासिताङ्गश्च देवी काली सुसिद्धिदा। हहा हहा नमस्कृत्य मनुस्तसिद्धिमवाप्नुयात्। २९ शोणाख्ये महसेनस्तु नर्मदाख्या नितम्बके। ३० रामगिरौ तथा नासा शिवानी चण्डभैरवः। ३१ वृन्दावने केशजालमुमानाम्नी च देवता। भूतेशो भैरवस्तत्र सर्वसिद्धिप्रदायकः। संहाराख्य जर्द्दने देवी नारायणी ३२ शुचौ। अधोदन्ते महारुद्रो वाराणस्यां ३३ पञ्चसागरे। ३४ करतोयातटे तल्पं शर्मे वामनभैरवः। अपर्णा देवता तत्र अङ्गरूपाकरोद्भवा। ३५ श्रीपर्वते दक्षगुल्फं तत्र श्रीसुन्दरी परा। सर्वसिद्धीश्वरी भर्त्री सुनन्दा ऽऽनन्दभैरवः। ३६कपालिनी भीमरूपा वामगुल्फविभागके। भैरवश्च महादेवः सर्वानन्दशुभप्रदः। उदरञ्च ३७ प्रभासे मे चन्द्रभागा यशस्विनी। वज्रतुण्डो भैरवस्त्रैशैले भैरवपर्वते। ३८ जयन्यान्तु महादेवी वामकर्णस्तु भैरवः। ३९चित्रकूटे भवानी देवी शिवभाख्यजले स्थले। भैरवः सर्वसिद्धीशस्तत्र सिद्धिरनुत्तमा। ४० मण्डो गोदावरीतीरे विश्वेशी विश्वभालका। दक्षपार्श्वभैरवस्तु ४१वामे गण्डेतु राकिणी। भैरवोवत्सनाभस्तु तत्र सिद्धिर्न संशयः। ४२ रत्नावल्यां दक्षस्कन्धे कुमारी भैरवः शिवः। ४३ मिथिलायां महादेवी वामस्कन्धे महोदरः। ४४ नलाहाख्यां नलापातो योगीशो भैरवस्तथा। तत्र सा कालिका देवी सर्वसिद्धिप्रदायिका। ४५ कालीघट्टे मुण्डपातः क्रोधीशो भैरवस्तथा। देवता जयदुर्गाख्या नानाभोगप्रदायिनी। ४६ वक्रेश्वरे मनःपातो वक्रनाथस्तु भैरवः। नदी पापहरा तत्र देवी महिषमर्द्दिनी। ४७ यशोरे पाणिपद्मञ्च देवता यशोरेश्वरी। चण्डश्च भैरवस्तत्र यत्र सिद्धिमवाप्नुयात्। ४८अट्टहासे ओष्ठपातो देवी सा फुल्लरा स्मृता। विश्वेशो भैरवस्तत्र सर्वाभीष्टप्रदायकः। क्षीरपातो ४९ नन्दिपुरे भैरवो नन्दिकेश्वरः। नन्दिनी सा महादेवी तत्र सिद्धिर्न संशयः। ५०लङ्कायां कुर्परञ्चैव भैरवो राक्षसेश्वरः। इन्द्राक्षी देवता तत्र इन्द्रेणोपासिता पुरा। ५१विराटदेशमध्ये तु पादाङ्गुलिनिपातनम्। भैरवश्चामृताख्यश्च देवी तत्राम्बिका स्मृता। एताख्याः कथिताः पुत्र! पीठनायाधिदेवताः। क्षेत्राधीशं विना देव! पूजयेद्यान्यदेवताम्। भैरवैर्हीयते सर्वं जपपूजादिसाधनम्। अङ्गत्वा भैरवं पीठं पीठशक्तिञ्च शङ्कर!। प्राणनाथ! न सिध्येत्तु कल्पकोटिजपादिभिः। न देयं परशिष्येभ्यो निन्दकाय दुरात्मने। शठाय क्रूरकार्याय दत्त्वा सद्यः प्रवाप्नुयात्। दद्यात् शान्ताय शिष्याय सन्तो मन्त्रार्थसिद्धये"। महानीलतन्त्रे पञ्चमपटले पीठार्च्चनं महादेवि! तत्र सिद्धिरनुत्तमा। पीठानां परमं पीठं कामरूपं महाफलम्। तत्र या क्रियते पूजा सकृदापि महेश्वरि!। विहाय सर्वपीठानि तत्र देवो वसाम्यहम्। तस्माच्चतुर्गुणं प्रोक्तं कामाख्यायोनिमण्डलम्। तेषां फलं महेशानि! वक्तुं किं शक्यते मया। तत्र कोटिगुणैः सार्द्धा माद्या वसति तारिणी। यत् पीठं ब्रह्मणा गुप्तं वक्तुं सर्वसुखावहम्। यतो देवाश्च वेदाश्च सूनयश्चैव भावजाः। सर्वेऽप्याविर्भवन्त्येते तेन गुप्तं सदा कुरु। द्विविधञ्चैव यत् पीठं गोप्तव्यं तन्महेश्वरि!। गुप्ताद्गुप्तं महापुण्यं दुरापं साधकाधमैः। व्यक्तं सर्व्वत्र देवेशि! लभ्यते कुलसुन्दरि!। पीठप्रसङ्गाद्देवेशि पीठानि शृणु भैरवि!। शृणु तानि महाप्राज्ञे! श्रेष्ठस्थानानि यानि च। सिद्धिप्रदानि साधूनां महद्भिः सेवितानि च। पुष्करञ्च गयाक्षेत्रम् अक्षयाख्यवटस्तथा। वराहपर्व्वतश्चैव तीर्थञ्चामरकण्टकम्। नर्म्मदा यमुना पिङ्गी गङ्गाद्वारं तथा प्रिये!। गङ्गासागरसङ्गञ्च कुशावर्त्तञ्च विल्वकम्। श्रीनीलपर्वतश्चैव कनखलकुजके तथा। शृङ्गतुङ्गञ्च केदारं सर्वप्रियमहावनम्। ललिता च सुगन्धा च शाकम्भरी सुरप्रियम्। कण्वतीर्थं महागङ्गा तण्डुलिकाश्रमश्च। कुमाराख्यप्रभासौ च तथा धन्या सरस्वती।

जनस्थानमिदं मे कथाश्रममतःपरम्। कौशिकी-सरयूःशोणो ज्योतिःसरःपुरःसरम्। कालोदकं प्रियं श्रीमत् प्रियसत्तरमानसम्। मतङ्गवापी सप्तार्चिर्महा-विष्णुपदं महत्। वैद्यनाथं महातीर्थं प्रियःकालाञ्जरोगिरिः। रामोच्छेदं गर्गोच्छेदं हरोच्छेदं महा-वनम्। भद्रेश्वरं महातीर्थं लक्ष्मणच्छेदमेव च। जानीहि प्रियश्रेष्ठा च कावेरी कपिलोदका। सोमेश्वरं शुक्रतीर्थं कृष्णवेत्राग्रभेदकम्। पाटला च महाबोधि-र्नगतीर्थं मदन्तिके। पुण्यं रामेश्वरं देवि! तथा मेघवनं हरेः। ऐलं वनफलञ्चैव गोवर्द्धनमजप्रियम्। हरि-चन्द्रं पुरचन्द्रं पृथूदकमपि प्रियम्। इन्द्रनीलं महानादं तथैव प्रियमैनकम्। पञ्चाप्सरं पञ्चवटी वटीपर्वटिका तथा। गङ्गाविल्वप्रसङ्गञ्च प्रियनादवटं तथा। गङ्गा-रामाचलञ्चैव तथैव कृष्णमोचनम्। गौतमेश्वरतीर्थञ्च वशिष्ठतीर्थमेव च। हारीतञ्च तथा देवि! ब्रह्मावर्त्तं शिवप्रियम्। कुशावर्त्तमभिश्रेष्ठं हंसतीर्थं तथैव च। पिण्डारकवनं ख्यातं हरिद्वारं तथैव च। तथैव बदरीतीर्थं रामतीर्थं तथैव च। जयन्ती विजयन्तञ्च सर्वकल्याणदं प्रिये!। विजया सारदातीर्थं भद्रकालेश्वरं तथा। अक्षतीर्थं सुविख्यातं तथा देवशिवप्रियम्। ओघवती नदी चैव तीर्थमक्षप्रदं तथा। आगस्त्यिकं माल-गणं करवीरपुरं तथा। सप्तगोदावरं तीर्थं सिद्धाख्यं सर्व्वमोक्षनम्। किरीटसत्तरे तीर्थं दक्षिणे तीर्थसत्त-मम्। विशालतीर्थं काल्याख्यं वनं इन्द्रावनं तथा। ज्वालामुखी क्षिप्रका च महातीर्थं गणेश्वरम्। जानीहि सर्वतीर्थानां हेतुस्थानानि सुन्दरि!। यत्र सन्निहिता नित्यं सर्वे देवा महर्षयः। पितरो योगिनश्चैव ये ये सिद्धिपरायणाः। यानि सिद्धानि कर्माणि श्रद्धाभक्ति-मतां प्रिये!। पुण्यकाले पठेत् यस्तु तत्पुण्यमक्षयं भवेत्। श्राद्धकाले पठेत् यस्तु जुह्वयाद्वापि भक्तितः। अक्षयं तद्भवेत् कव्यं पितृणां परमं सुखम्। तस्मिन् स्थाने पठेद् यस्तु सिद्धिर्भवति तत्क्षणात्। अथ वक्ष्ये महेशानि! यत्र या देवता शृणु। यत्र ते यानि नामानि कथयिष्यामि तत् शृणु। मन्मोऽहं परमानन्दे तत् कथास्तवारिधौ! पुष्करे कमलाक्षी च गयायाञ्च गयेश्वरी। अक्षया अक्षयवटेऽमरेशोऽमरकण्टके। वराह-पर्वते च त्वं वाराही धरणीप्रिया। नर्म्मदा नर्म्म-दायाञ्च कालिन्दी यमुनाजले। शिवाम्बुता च गङ्गायां अम्बा देवकिकाश्रमे। शारदा सरयूतीरे शोणे च कन-केश्वरी। अप्रकाशा सदा देवी ज्योतिर्म्मण्डिसङ्गमे। श्रीरङ्गे श्रीगिरौ चैव काली कालोदके तथा। महोदरी महातीर्थे नीला चोत्तरमानसे। मातङ्गिनी मतङ्गे च सुप्तार्चिर्विष्णुपादुके। स्वर्गदा स्वर्गमार्गे च गोदावर्य्यां गवेश्वरी। विसृष्टिश्चैव गोमत्यां विपाशायां महाबला। शतद्रुं शतरूपा च चन्द्रभागा च तत्र वै। ऐरावत्यान्तु दैनाम सिद्धिदा सिद्धतीरके। दक्षपञ्चनदे चैव दक्षिणाङ्गे प्रकीर्त्तिता। ओजसे वोर्य्यदा च त्वं सङ्गमा तीर्थसङ्गमे। वाङ्डदायामनन्ताङ्गे कुरुक्षेत्रे रथेश्वरा। तपस्विनी पुण्यतमा भारती भारताश्रमे। शुकया नैमिषारण्ये पाण्डौ च पाण्डुरानना। विशालायां विशालाक्षी सरस्वत्यां शिवात्मिका। श्रद्धा कनखले तीर्थे गुह्यवृद्धि-र्नगेश्वरी। सुवेणा सुमना गौरी मानसे च सरोवरे। नन्दापुरे महानन्दा ललिता ललितापुरे। ब्रह्मणी ब्रह्मगिरिसि महापातकनाशिनी। पूर्णिमा चेन्दुमत्यान्तु सिद्धमतिप्रिया सदा। जाह्नवीसङ्गमे दृष्टिः स्वधा च पितृतृप्तिदा। पुण्यात्मं वाङ्डदायान्तु प्रपायां पापनाशिनी। शत्रुसंहारिणी चैव घोररूपा महोदरी। स्वर्गोच्छेदे महावारिप्रवला च महावने। भद्रा च भद्र-काली च भद्रेश्वरी शिवप्रिया। भद्रेश्वरेश्वरमा विष्णु प्रिया विष्णुपदे तथा। दारुणा नर्म्मदाच्छेदे कावेर्य्यां कपिलेश्वरी। भेदिनी कृष्णवेत्रायां संभेदे शुभवासिनी। अद्रा च शुक्रतीर्थे च प्रभासे चेश्वरी तथा। महाबोधौ महाबुद्धिः पाटले पाटलेश्वरी। सुफला नागतीर्थे च नागेशी नागनन्दिता। मदन्ती च मदनी च प्रमदा च मदन्तिका। मेघस्थना मेघवासे विद्युत्सौदामनीच्छटा। रामेश्वरे महाबुद्धिर्वीरा चेलापुरे सती। प्रिया च भार्गवे दुर्गा सुवेणा सुरसुन्दरी। कात्यायनी महादेवी गोवर्द्धनेऽखिलात्मिका। शुभेश्वरी हरिश्चन्द्रे पुरचन्द्रे पुरेश्वरी। पृथूदके महावेगा मैनाकेऽखिलवर्द्धिनी। इन्द्र-नीले महाकान्ता रत्नवेगा सुशोभना। माहेश्वरी महा-नादे महातेजा महावने। प्रलयक्षरसि सारङ्गा पञ्च-वट्यां तपस्विनी। वटीशा वटिकायान्तु सर्व्ववर्णा सुर-क्षिणी। सङ्गमे विन्ध्यगङ्गायां विन्ध्ये श्रीविन्ध्यवा-सिनी। महानन्दा नन्दतटे गङ्गारामाचले शिवा। आ-म्रातके महाख्यां त्वं विसृष्टिर्ब्रह्मशोभने। कङ्कालके च चामुण्डा तन्त्रे श्रीगौतमेश्वरी। वेदमयी ब्रह्मविद्या

वाग्भवे त्वमरूपत्वं। हरिते हरिणाक्षी च ब्रह्मावर्त्ते ब्रजेश्वरी। गायत्री चैव सावित्री कुशावर्त्ते कुशप्रिया। हंसेश्वरी महातीर्थे परहंसेश्वरेश्वरी। पिण्डारकवने धन्या सुरसा सुखदायिनी। नारायणी वैष्णवी च भद्रकाहारे विसक्तिदा। श्रीविद्या बदरीतीर्थे रामतीर्थे महाधृतिः। जयन्ती च जयन्ते त्वं विजयन्ते ऽपराजिता। विजया च महाबुद्धिः शारदायाञ्च शारदा। सुभद्रे भद्रदा भद्या भद्रकालेश्वरे तथा। महाभद्रा महाकाली कायतीर्थे गणेश्वरी। वेददा वेदमाता च विदेहे वेद-मस्तके। युवत्यान्तु महाविद्या महानद्यां महोदया। चण्डा च त्रिपदे चैव लागलिङ्गे वलिप्रिया। मातृ-तीर्थे जगन्माता करवीरपुरे सती। नलिनीरङ्गिणी रामा परमा परमेश्वरी। सप्तगोदावरे तीर्थे देवर्षिरखिलेश्वरी। अयोध्यायां भवानी च जयदा जयमङ्गला। माधवी मथुरायाञ्च देवकी यादवेश्वरी। छन्दागोमेश्वरी राधा-रासछन्दावने रमा। कात्यायनी महामाया भद्रकाली कलावती। चन्द्रभागा महायोगी महायोगिन्यधीश्वरी ब्रजेश्वरी यशोदेति ब्रजे श्रीगोकुलेश्वरी। काञ्च्यां कनक-काञ्ची स्यादवन्त्यामभिपावनी। विद्या विद्यापुरे चैव विमला नीलपर्वते। रामेश्वरी सेतुबन्धे विमला पुरुषोत्तमे। विरजा यागपुर्याञ्च भद्रेऽपि भद्रकर्णिका। तमोलिप्ते तमोघ्नी च स्वाहा सागरसङ्गमे। कुलश्रीर्वैद्य-वद्विश्व माधवी माधवप्रिया। मङ्गले! मङ्गले कोटे राढे मङ्गलचण्डिका। ज्वालामुखी शिवापीठे मन्दरे भुवने-श्वरी। कालीघट्टे गुह्यकाली किरीटे च महेश्वरी। किरीटेश्वरी महादेवी सिङ्गाख्ये सिङ्गवाहिनी। साक्षी-सर्वत्र भक्तानामभक्तानां कुतोऽपि न। यद्यान्यत् सम्प्र-वक्ष्यामि सिद्धस्थानानि सुन्दरि!। सर्वपापविनाशार्थं सर्वसिद्धिप्रदं नृणाम्। निर्म्मितानि शिवेनेह सिद्ध-स्थानानि यानि च। श्रुत्वा मनसि भव्यानि प्रकाश्यान्य-धिकारिषु। अमरेशमहापीठे कुशतुङ्गारसंज्ञकः। तत्र दुर्गाह्वयं नाम चण्डिका च महेश्वरी। प्रभासे सोमनाथोऽसौ देवी च पुष्करेक्षणा। देवदेवाधिपः शम्भुर्नैमिषे च महेश्वरः। तत्र प्रज्ञा च देवी च शिवानी सिङ्गधारिणी। पुष्करे च राजगम्भिः पुर-न्ध्रता महेश्वरी। श्रीपर्वते श्रिया नाम शङ्करस्त्रिपुरा-न्तकः। मायावी शङ्करी तत्र भक्तानामखिलार्थदा। अम्बेश्वरे महास्थाने शङ्करी त्र त्रिशूलिनी। त्रिशूली शङ्करस्तत्र सर्वपापविमोचकः। श्रीशैलशिखरे तुच्छा-सुच्छाख्या परमेश्वरी। गणेशेत्वे मङ्गलाख्या शिवोवः प्रथितामहः। कुरुक्षेत्रे शिवः स्थाणुः शिवा स्थाणुश्रिया परा। दृषद्वत्यां स्वयम्भुश्च देवी स्वायम्भुवा मता। उपः कनखले प्रोक्तः शिवोग्रे शिववल्लभा। विमलेश्वरे विश्वेशम्भु विश्वाविश्वप्रिया सदा। अट्टहासे महानन्दो महानन्दा महेश्वरी। महालक्ष्मी महेन्द्रश्च पार्वती च महालका। भीमेश्वरो भीमपीठे शिवा भीमेश्वरी तथा। वज्रपादे भवो नाम भवानी भुवनेश्वरी। अट्टिकूटे महायोगा रुद्राणी परमेश्वरी। अविमुक्ते महादेवो विशालाक्षी शिवा परा। महामार्गे हरो रुद्रो महा-भागा शिवा तथा। महाबलश्च गोकर्णे शिवभद्रा च चण्डिका। भद्रकर्णे महादेवो भद्रा च कर्णिका तथा। सुपर्णाख्ये महस्राख्य उत्पला परमेश्वरी। स्थाणुसंज्ञे शिवस्था श्रीः खरस्था श्रीधरा शिवा। कमलालये महा-स्थाने कमलाख्यो महेश्वरः। कमलाक्षी महेशानी। सकलार्थप्रदायिनी। नागला तु कपर्दी च प्रभा च महेश्वरी। ऊर्द्धरेतामहारण्ये ऊर्द्धाख्या परमेश्वरी। सकोटाख्या महाकोटे शिवा च सुखकेश्वरी। मातृ-श्वरपीठे च करवीरार्च्चनेश्वरा। श्रीमद्व्याघ्रपुरे साक्षाद्वरनामा सभापतिः। शिवः सभापतिर्नाम यत्र तिष्ठति शङ्करः। आत्मानन्दसहानादपूर्णानन्दमहा-र्णवम्। तत्स्थानं यत्र देवेशं देवेशी परिपश्यति। यत्र चाशु महादेवो भक्तानां वरदो भवेत्। तत्स्थानं यत्र सर्वेशं दृष्ट्वा लोको विमुच्यते। पुण्यस्थानेषु सर्वेषु स्थान-मेतदनुत्तमम्। यदुपतृकर्म्माणि सर्वाणि अक्षयाणि भवन्ति वै। तस्मिन् महोत्तमे स्थाने शिवगङ्गाख्यम-द्भुतम्। तड़ागमस्ति तत्तीरे दक्षिणे तिष्ठतीश्वरः। तड़ागेऽस्मिन् वसन् स्नात्वा सभानाथं समीक्ष्य तु। यदो-त्तरसहस्रं तु जमेच्छुद्धो सदान्वितः। यानि ते कथिता-न्यत्र सदा तिष्ठन्ति देवताः। भवन्ति सिद्धगन्धर्वाः सिद्धयः सर्वसिद्धिदाः। यत्र दत्तं हुतं जप्तं स्नान-मक्षयपुण्यदम्। यद् यत् प्रकीर्त्तितं नाम भैरवं परिपूज्य च। प्रणवादिकृदन्तेन लभतेऽभीष्टमुत्तमम्। भोजयेद् ब्राह्मणान् योऽत्र अक्षयं फलमश्नुते। इह नानासुखं भुक्त्वा हरगौरीपुरं व्रजेत्। शोकदुःख-विनाशोऽयं करुणानिधिरीश्वरः। निर्म्मले सर्वसस्यत्वे पुण्यवेलाचि भूतले। अकाले पुण्यशुद्धानामनेकपुण्य-

साधनैः। आस्तिकानां भवेदत्र निवासः साधनं प्रति। तस्माद् यत्नेन कर्त्तव्यमत्र साधनमुत्तमैः। इदानीं शृणु चार्वङ्गि! पीठं सर्वाङ्गसुन्दरम्। यन्मालामयं पीठं ब्रूहि मे परमेश्वरि!। यत्र सिद्ध्यन्ति कार्य्याणि स्थितिस्तत्र गुरोश्च। विष्णोराराधबोधश्च तत्प्रियाया महेश्वरि!। अन्येषाञ्चैव देवानां युक्तपदनिवासिनाम्। प्रसादो हि भवत्यत्र तत्र प्रीतिरनुत्तमा"।

जपा स्त्री जप-अच् टाप्। जवाडख्ये क्षेपच०। तत्पुष्पेऽपि स्त्री। "ओड्रपुष्पं जपा चाथ लिखन्ध्रा साऽरुणासिता। जपा संध्याक्षिणी क्षेया लिखन्ध्रा कफवातजित्" भावप्र० तद्गुणोक्तिः। "बान्धूकं तेजः प्रतिनवजपापुष्परक्तं दधानः" मेघ०।

जप्य त्रि० जप-कर्म्मणि यत्। १जपनीये अधमर्णादौ। "फलदानान्तु इच्छानां क्षेदने जप्यहुतम्" मनुः। भावे यत्। २जपे। "जप्येनैव तु संसिद्ध्येत् ब्राह्मणो नात्र संशयः" मनुः।

जप्येश्वर पु० सिद्धस्थानभेदे। "जप्येश्वरे महास्थाने गुरुरी च त्रिमूर्त्तिनी। त्रिमूर्त्ती गुरुरत्रैव सर्व्वपापविमोचकः" तन्त्रचूडाम्। जपस्थानशब्दे दृश्यम्।

जबारु न०जवमान् (जरमाण)-रोहिन्+पृषो०।१जवमानरोहिणि२जरमाणरोहिणि च। "पृश्नेरपेरुप आरुपितं जबारु" ऋ० ४,५,७। "जबारु जवमानरोहि जरमाणरोहि वा"भा०। "जबारु जवमानरोहि जरमाणरोहि" निरु०। ६।७।

जबाला स्त्री सत्यकामस्यार्षेः मातरि। जबालायां भवः अण्। जाबाल सत्यकामाख्ये ऋषौ तत्कथा यथा

"सत्यकामोह जाबालो जबालां मातरमामन्त्र्याब्रह्मचर्य्यं भवति। विवत्स्यामि किं गोत्रोऽन्वहमसीति। सा हैनमुवाच नाहमेतद्वेद तात! यद्गोत्रस्त्वमसि बह्वहं चरन्ती परिचारिणी यौवने त्वामलभे साहमेतन्न वेद यद्गोत्रस्त्वमसि जबाला तु नामाहमस्मि स सत्यकाम एव जाबालो ब्रवीथा इति। स ह हारिद्रुमतं गौतममेत्योवाच ब्रह्मचर्य्यं भगवति वत्स्याम्युपेयां भगवन्तमिति। तं होवाच किं गोत्रोनुसोम्यासीति स होवाच नाहमेतद्वेद भो यद्गोत्रोऽहमस्मि मातरं सा मां प्रत्यब्रवीद्बह्वहं चरन्ती परिचारिणी यौवने त्वामलभे साहमेतन्न वेद यद्गोत्रस्त्वमसि जबाला तु नामाऽहमस्मि सत्यकामो नाम त्वमसीति सोऽहं सत्यकामो जबालोऽस्मि भोः इति। तं होवाच नैतदब्राह्मणो विवक्तुमर्हति समिधं सोम्याहरोपत्वा नेष्ये न सत्यादगाः" इति।

जभ मैथुने भ्वा० पर० सक० सेट्। जभति अजम्भीत्। जजम्भ जजम्भतुः जजभतुः। जभितः। मैथुनञ्च मैथुनेन धर्षणम्। ता इमा जभितुं पापा उपक्रामन्ति मां प्रभो!" भाग०३।२०।२७।"जभितुं मैथुनेन धर्षयितुम्"श्रीधरः।

जभ मैथुने भ्वा० पर० अक० सेट् इदित्। जम्भति धातूनामनेकार्थत्वात् भक्षणेऽपि "ता नस्त्र जम्भिपदपि" ऋ० १०।८६।४। "जम्भिषत् भक्षयतु" भा०।

जभ जृम्भे चुरा० उभ० सक० इदित्। जम्भयति ते अजजम्भत्। "जम्भयतमभितो रायतः शुनो"ऋ०१।११८२।४ "इन्द्र इकस्य जम्भया" ऋ०१।८।७।९। [जेमे।

जभ जृम्भे भ्वा०भ्वा० आत्म०सेट्। जभते अजम्भिष्ट अजम्भे

जभ भक्षे भ्वा०पर०पर० सक० सेट्। जभति अजभीत् जभित्वा जभ्य। अयञ्च धातुः नैगमे २।१४ गत्यर्थकत्वेन। १।१७ जभदिति व्यक्तत्यर्थत्वेन चोक्तः। जभिग्रहनिरुक्तौ च २।६ जभतेर्वा स्वाहुतिकर्म्मणो निर्मन्थनप्राया भवति"जभदग्निग्रहनिरुक्तौ च १।२४।"जभदग्नयः प्रजभितान्नयो वा प्रज्वलितान्नयो वा"इत्युक्तम्।

जभज त्रि० हि०व० यमज+पृषो०। यमजातयोः द्विरूपयोः।

जमदग्नि पु० जभन् प्रज्वलितोऽग्निरिव। भृगुवंश्ये ऋषिभेदे। तन्निरुक्तिः जभजातौ दर्शिता। भा०आ०८३अनु० अन्या निरुक्तिर्दर्शिता यथा "साजभद्यजजानेऽहं जीजाङ्गीह जिजाषिषि। जमदग्निरिति ख्यातमतो मां विद्धि शोभने!"। तदुत्पत्तिकथा "ऋचीकस्य महातेजा महाबीर्य्यो बाल एव गुणैर्युतः। ऋचीकस्य पुत्रस्तु जमदग्निस्ततोऽभवत्। जमदग्नेस्तु चत्वार आसन् पुत्रा महात्मनः। रामस्तेषां जघन्योऽभूदजघन्यैर्गुणैर्युतः" भा० आ० ६६ अ० अस्योत्पत्तिकथा ऋचीकशब्दे १४१४ पृ० दर्शिता। स च एतन्मन्वन्तरे सप्तर्षिसभ्यगतः यथा हरिवं० ७अ० "गौतमश्च भरद्वाजो विश्वामित्रस्तथैव च। तथैव पुत्रो भगवान्ऋचीकस्य महात्मनः। सप्तमो जमदग्निश्च ऋषयः साम्प्रतं दिवि। साध्या रुद्राश्च विश्वे च वसवो मरुतस्तथा"।

अयञ्च गोत्रकारकः तद्विवृतिः गोत्रशब्दे २७८६पृ० दृश्या। जमदग्नेरपत्यम् गर्गा० यञ्। जामदग्न्य तद-

पत्ये पु०स्त्री। बहुत्वे बहुत्वियाम् यञो लुक्। जमदग्नयः तदपत्येषु स्त्रियां तु न लुक्। जामदग्न्यःस्त्रियः।

जमन न०जम्-भावे ल्युट्। भक्षणे अमरकोषे "जेमनं लेप आहार" इत्यत्र जमनमिति पाठान्तरम्।

जम्पती पु० द्वि० व०। जाया च पतिश्च इ०जायायाः जम्। दम्पत्योः स्त्रीपुरुषयोः अमरः। पत्ये जायापती तत्रार्थे।

जम्बाल पु० जम्ब-घञ् जम्बमालाति आदत्ते आ+ला-क। १पङ्के, अमरः। २शैवाले, मेदि०। ३केतक्यां शब्दच०। "जम्बूवल्लवित्ववल्लजलवल्लम्बालवल्लालवत्" उद्भटः "चणं मौलिजलम्बालजटीलत्व ध्रुवो ययौ" काशी०ख० १६ क०।

जम्बालिनी स्त्री जम्बाल+अस्त्यर्थे इनि। नद्याम् हेमच०।

जम्बीर पु० जम-गम्भीरा० नि० ईरन् वुक् च। (जामीर नेबु) ख्याते वृक्षभेदे। "जम्बीरस्तण्डं गुर्वम्लं वातश्लेष्मविबन्धनुत्। मूलकामकफल्लेशच्छर्दिदोषाममदोषजित्। आस्यवैरस्यकृत्पोऽयक्षिमान्द्यग्लपीनुत्करेत्। खल्पजम्बीरिका तद्वत्तृष्णाच्छर्दिनिवारिणी" भावप्र०। २मरुवके, ३अर्जके, ४सिताम्लके, राजनि०घृतो० वृक्षः जम्बिर तत्रार्थे पु० शब्दर०।

जम्बु(म्बू) स्त्री जम-अदने कू नि० वुक् पृषो० वा ह्रस्वः। (जाम) १वृक्षे अमरः तस्य फलानि "तस्या जम्बोः फलरसो नदीभूय प्रवर्त्तते" विक्रमादित्यः। परिणतजम्बूफलोपभोगहृष्टाः" किरा०। दीर्घान्ते। तस्याः जम्बूः फलरसो नदी भूत्वा जलाधिपः" भा०भी०७अ० २जम्बुनामके द्वीपे च जम्बुद्वीपशब्दे दृश्यम्। जम्बूः फलम् अण् पक्षे अञ्। जाम्बव तत्फले न०। तस्या वा लुक्लुप्वा लुपि व्यक्तिवचनत्वात्। जम्बु न० जम्बू स्त्री।

जम्बुक पु० जम्बु इव कायति कै-क। (गोवाजाम) इति ख्याते १वृक्षे। २नीचे त्रि० ३श्लोनाके राजनि०। स्वार्थे क। ४जम्बुशब्दार्थे। ५शृगाले पुंस्त्री०। "मद्भाः कङ्का बलाः श्येनावायसा जम्बुकास्तथा" भा० द्रो० ६७ अ०। स्त्रियां जातित्वात् ङीप्। "मत्सममांसपरिभक्षा किं जम्बुकि! निरीक्षसे" उद्भटः। ६कुमारानुचरभेदे। "शृणु नामानि चाप्येषां देवस्य स्कन्दस्य सैनिकाः" इत्युपक्रमे "सञ्चारकः कोकनदो मद्रपत्रश्च जम्बुकः" भा० श० ४६ अ०। दीर्घमध्येऽपि तदनुचरे तत्रैवाध्याये "चासवक्त्रश्च जम्बूकः शाकवक्त्रश्च कल्पितः"।

जम्बुकेश्वर पु० तीर्थभेदे शिवपु०।

जम्बु(म्बू)खण्ड पु०जम्बुद्वीपे "मेरोस्तु पश्चिमे पार्श्वे केतुमालो महीपते!। जम्बूखण्डे च तत्रैव महाजनपदो नृप!" भा० भी० ७ अ०।

जम्बु(म्बू)खण्डविनिर्म्माण न० जम्बुखण्डस्य विनिर्म्माणं निरूपणं यत्र। भा० भीष्मपर्वान्तर्गते अवान्तरपर्वभेदे। "जम्बूखण्डविनिर्म्माणं पर्वोक्तं तदनन्तरम्" भा० आ० १अ० अवान्तरपर्वोक्तौ।

जम्बु(म्बू)द्वीप पुंन० जम्बु(म्बू)वृक्षयुक्तो द्वीपः भूमेः सप्तद्वीपान्तर्गते द्वीपभेदे। तत्सीमाविभागादि विष्णुपु० उक्तं यथा।

"जम्बुप्लक्षाह्वयौ द्वीपौ शाल्मलिश्चापरो द्विज!। कुशः क्रौञ्चस्तथाशाकः पुष्करश्चैव सप्तमः। एते द्वीपाः समुद्रैस्तु सप्त सप्तभिरावृताः। लवणेक्षुसुरासर्पिर्दधिदुग्धजलैः समम्। जम्बूद्वीपः समस्तानामेतेषां मध्यसंस्थितः। तस्यापि मेरुर्मैत्रेय! मध्ये कनकपर्वतः। चतुरशीतिसाहस्रो योजनैरस्य चोच्छ्रयः। प्रविष्टः षोडशाधस्ताद्द्वात्रिंशन्मूर्ध्नि विस्तृतः। मूले षोडशसाहस्रो विस्तारस्यास्य भूभृतः। भूपद्मस्यास्य शैलोऽसौ कर्णिकासंस्थितिः स्थितः। हिमवान् हेमकूटश्च निषधश्चास्य दक्षिणे। नीलः श्वेतश्च शृङ्गी च उत्तरे वर्षपर्वताः। लक्षप्रमाणौ द्वौ मध्यौ दशसाहस्रतस्तथा परे। सहस्रद्वितयोच्छ्रायास्तावद्विस्तारिणश्च ते! नाभिश्च प्रथमं वर्षं ततः किंपुरुषं स्मृतम्। हरिवर्षं तथैवान्यत् मेरोर्दक्षिणतो द्विज!। रम्यञ्चोत्तरं वर्षं तथैवातु हिरण्मयम्। उत्तराः कुरवश्चैव यथा वै भारतं तथा। नवसाहस्रमेकैकमेतेषां द्विजसत्तम!। इलावृतन्तु तन्मध्ये सौवर्णो मेरुरुच्छ्रितः। मेरोश्चतुर्दिशं तत्र नवसाहस्रविस्तरः। इलावृतं महाभाग! चत्वार उपपर्वताः। विष्कम्भा रचिता मेरोर्योजनायुतसंस्थिताः। पूर्वेण मन्दरो नाम दक्षिणे गन्धमादनः। विपुलः पश्चिमे भागे सुपार्श्वश्चोत्तरे कृतः। कदम्बस्तेषु जम्बुश्च पिप्पलो वट एव च। एकादशशतायामाः पादपा गिरिकेतवः। जम्बुद्वीपस्य सा जम्बूर्नामहेतुर्महासने!। महागजप्रमाणानि जम्बूफलानि वै। पतन्ति भूभृतः पृष्ठे शीर्यमाणानि सर्वतः। रसेन तेषां प्रख्याता तत्र जम्बूनदीति वै। सरित् प्रवर्त्तते सा च पीयते तन्निवासिभिः। न स्वेदो न च दौर्गन्ध्यं न जरा नेन्द्रियक्षमः। तत्-

पानसुखमनसां जनानां तत्र जायते। तोरमत्तत्र संप्राप्य सुखवायुविशोषिता। जाम्बूनदाख्यं भवति सुवर्णं सिद्धभूषणम्। भद्राश्वं पूर्वतो मेरोः केतुमालञ्च पश्चिमे। वर्षे द्वे तु मुनिश्रेष्ठ! तयोर्मूलमिलावृतम्। वनं चैत्ररथं पूर्वं दक्षिणे गन्धमादनम्। वैभ्राजं पश्चिमे तद्वदुत्तरे नन्दनं स्मृतम्। सरोऽरुणोदं महाभद्रं संचितोदं महामनस्। सरांस्येतानि चत्वारि देवभोग्यानि सर्वदा। शीतान्तवैव सुभद्रा कुरवी माल्यवांस्तथा। वैकङ्कप्रमुखा मेरोः पूर्वतः केसराचलाः। त्रिकूटःशिशिरश्चैव पतङ्गो रुचकस्तथा। निषधाद्यो दक्षिणतस्तस्य केसरपर्वताः। शिखिवासाः सवैदूर्यः कपिलो गन्धमादनः। जारुधिप्रमुखास्तद्वत् पश्चिमे केसराचलाः। मेरोरनन्तराङ्केषु जठरादिष्ववस्थिताः। गन्धकूटोऽथ कश्यपो हंसो नागस्तथापरः। कालञ्जराद्याश्च तथा उत्तरे केसराचलाः। चतुर्दशसहस्राणि योजनानां महापुरी। मेरोरुपरि सैवेय! ब्रह्मणः प्रथिता पुरी। तस्याः समन्ततश्चाष्टौ दिशासु विदिशासु च। इन्द्रादिलोकपालानां प्रख्याताः प्रवराः पुरः। विष्णुपदादुविनिष्क्रान्ता पुरयित्वेन्दुमण्डलम्। समन्ताद्ब्रह्मणः पुर्यां गङ्गा पतति वै दिवः। सा तत्र पतिता दिक्षु चतुर्धा प्रत्यपद्यत। सीता चालकनन्दा च चक्षुर्भद्रा च वै क्रमात्। पूर्वेण सैलात् सीता तु सैलं यात्यन्तरीक्षगा। ततश्च पूर्ववर्षेण भद्राश्वेनैति सार्णवम्। भद्रा तथोत्तरगिरीनुत्तरांश्च तथा कुरून्। व्यतीत्योत्तरमम्भोधिं समभ्येति महामुने!। चक्षुश्च पश्चिमगिरीनतीत्य सकलांस्ततः। पश्चिमं केतुमालाख्यं वर्षमभ्येति सार्णवम्। तथालकनन्दापि दक्षिणेनेत्य भारतम्। प्रयाति सागरं भूत्वा सप्तभेदा महामुने!। व्यानीलनिषधायामौ माल्यवद्गन्धमादनौ। तयोर्मध्ये गतो मेरुः कर्णिकाकारसंस्थितः। भारताः केतुमालाश्च भद्राश्वाः कुरवस्तथा। पद्मानि लोकपद्मस्य। मर्यादाश्चैव बाह्यतः। जठरो देवकूटश्च मर्यादापर्वतावुभौ। तौ दक्षिणोत्तरायामावानीलनिषधायतौ। मेरोः पश्चिमदिग्भागे यथा पूर्वौ तथा स्थितौ। त्रिशृङ्गो जारुधिश्चैव उत्तरे वर्षपर्वतौ। पूर्वपश्चायतावेतावर्धचान्द्रव्यवस्थितौ। इत्येते मुनिवर्योक्ता मर्यादापर्वतास्तव। जठराद्याः स्थिता मेरोर्द्वेधां द्वौ द्वौ चतुर्दिशम्। मेरोश्चतुर्दिशं ये तु प्रोक्ताः केसरपर्वताः। शीतान्ताद्या मुने! तेषामतीवेह मनोरमाः। तैलानामन्तरद्रोण्यः सिद्धचारणसेविताः। सुरम्याणि तथा तेषु काननानि पुराणि च। लक्ष्मीविष्ण्वग्निसूर्यादिदेवानां मुनिसत्तम!। तान्यायतनगर्याणि जुष्टानि वरकिन्नरैः। गन्धर्वयक्षरक्षांसि तथा दैतेयदानवाः। क्रीडन्ति तासु रम्यासु शैलद्रोणीष्वहर्निशम्। भौमाश्चैते स्मृताः स्वर्गधर्म्मिणामालया मुने!। नैतेषु पापकर्म्माणो यान्ति जन्मशतैरपि। भद्राश्वे भगवान् विष्णुराश्वो हयशिरा द्विज!। वराहः केतुमाले तु भारते कूर्मरूपधृक्। मत्स्यरूपश्च गोविन्दः कुरुवर्षे सनातनः। विश्वरूपेण सर्वत्र सर्वः सर्वेश्वरो हरिः। सर्वेषामाधारभूतोऽसौ मैत्रेयाखिलात्मकः। यानि किंपुरुषाद्यानि वर्षाण्यष्टौ महामुने। न तेषु शोकोनायासो नोद्वेगः क्षुत्त्वयादिकम्। तेषाः प्रजा निरातङ्काः सर्वदुःखविवर्जिताः। दशाद्दशयुतानां सहस्राणि स्थिरायुषः। न तेषु वर्षवर्ष्येषु भौमान्यभांसि तेषु वै। कृतत्रेतादिका नैव तेषु स्थानेषु कल्पना। सर्वेष्वेतेषु वर्षेषु सप्त सप्त कुलाचलाः। नद्यश्च शतशस्तेभ्यः प्रसृता या द्विजोत्तम!"।"पराशर उवाच। उत्तरं यत् समुद्रस्य हिमाद्रेश्चैव दक्षिणम्। वर्षं तद्भारतं नाम भारती यत्र सन्ततिः। नवयोजनसाहस्रो विस्तारोऽस्य महामुने। कर्म्मभूमिरियं स्वर्गमपवर्गञ्च गच्छताम्। महेन्द्रो मलयः सह्यः शुक्तिमान्ऋक्षपर्वतः। विन्ध्यश्च पारियात्रश्च सप्तात्र कुलपर्वताः। अतः संप्राप्यते स्वर्गो मुक्तिमस्मात् प्रयान्ति च। तिर्य्यक्त्वं नरकत्वञ्च यान्त्यतः पुरुषा मुने!। इतः स्वर्गश्च मोक्षश्च मध्यञ्चान्तश्च गम्यते। न खल्वन्यत्र मर्त्यानां कर्म्मभूमौ विधीयते। भारतस्यास्य वर्षस्य नव भेदान्निशामय। इन्द्रद्वीपः कशेरुमांस्ताम्रवर्णो गभस्तिमान्। नागद्वीपस्तथा सौम्यो गन्धर्वस्त्वथ वारुणः। अयन्तु नवमस्तेषां द्वीपः सागरसंवृतः। योजनानां सहस्रन्तु द्वीपोऽयं दक्षिणोत्तरात्। पूर्वे किराता यस्यान्ते पश्चिमे यवनाः स्थिताः। ब्राह्मणाः क्षत्रिया वैश्या मध्ये शूद्राश्च भागशः। इज्यायुद्धवणिज्याद्यैर्वर्त्तयन्तो व्यवस्थिताः। वेदस्मृतिसुखाचाराः पारियात्रोद्भवा मुने!। नर्म्मदा सुरसाद्याश्च नद्यो विन्ध्यप्रविनिर्गताः। तापीपयोष्णीनिर्विन्ध्याकावेरी प्रमुखा नदी। गोदावरीभीमरथीकृष्णवेन्नादिकास्तथा। सह्यपादोद्भवा नद्यः स्मृताः पापभयापहाः। कृतमालाताम्रपर्णीप्रमुखा मलयोद्भवाः। त्रिसामा

ऋषिकुल्याद्याः शुक्तिमत्पादसम्भवाः। शतद्रुचन्द्र-भागाद्या हिमवत्पादनिःसृताः। आसां नद्युपनद्यश्च सन्त्यन्यास्तु सहस्रशः। पक्षिमे कुरुपञ्चालमध्यदेशाद-योजनाः। पूर्वदेशादिकश्चैव कामरूपनिवासिनः। ओड्राः कलिङ्गमगधा दाक्षिणात्याश्च सर्वशः। तथापरान्ताः सौराष्ट्राः शूद्राभीरास्तथार्बुदाः। मारुका मालवाश्चैव पारियात्रनिवासिनः। सौवीराः सैन्धवाहूणाः शाल्वाः शाकलवासिनः। मद्राआमरथाम्बष्ठाः पारसीकादय-स्तथा। आसां पिबन्तः सलिलं वसन्ति सरितां सदा। चत्वारि भारते वर्षे युगान्यत्र महामुने!। कृतं त्रेता द्वापरञ्च कलिर्नान्यत्र न क्वचित्। तपस्यन्ति सुनयो जुह्वते चात्र यज्विनः। दानानि चात्र दीयन्ते पर-लोकार्थमादरात्। पुरुषैर्यज्ञपुरुषो जम्बूद्वीपे सदेज्यते। तत्रापि भारतं श्रेष्ठं जम्बूद्वीपे महामुने!। यतो हि कर्मभूरेषा ततोऽन्या भोगभूमयः। अत्र जन्मसहस्राणां सहस्रैरपि सत्तम!। कदाचिल्लभते जन्तुर्मानुष्यं पुण्यसञ्चयात्। गायन्ति देवाः किल गीतकानि धन्यास्तु ये भारतभूमिभागे। स्वर्गापवर्गास्पदहेतुभूते भवन्ति भूयः पुरुषाः सुरत्वात्। कर्माण्यसंकल्पिततत्फलानि सन्न्यस्य विष्णौ परमात्मरूपे। अवाप्य तां कर्ममहीमनन्ते तस्मिन्हि ये त्वमलाः प्रयान्ति। जानीम नैतत् क वयं विलीने स्वर्गप्रदे कर्मणि देहबन्धम्। प्राप्स्यामो धन्याः खलु ते मनुष्यावे भारते नेन्द्रियविप्र-लोपाः। नववर्षन्तु मैत्रेय! जम्बूद्वीपमिदं मया। सप्तयोजनविस्तारं संक्षेपात् कथितं तव। जम्बूद्वीपं समाहृत्य सप्तयोजनविस्तृतः। मैत्रेय! वलयाकारः स्थितः क्षारोदधिर्बहिः"।

भाग० ५। १६ अ० तद्वर्षनामनन्वोक्तम् यथा

"यो वा अयं द्वीपः कुवलयकमलाभ्यन्तरकोशोनियुत-योजनविशालः समवर्तुलो यथा पुष्करपलाशः॥ ६॥ यस्मिन्नव वर्षाणि नवयोजनसहस्रायामानि नवभि-र्मर्यादागिरिभिः सुविभक्तानि॥७॥ एषां मध्ये इलावृतं नामाभ्यन्तरवर्षं यस्य नाभ्यामवस्थितः सर्वतः सौवर्णः कुलगिरिराजो मेरुर्द्वीपायामसमुन्नाहः कर्णि-काभूतः कुवलयकमलस्य मूर्धनि द्वात्रिंशत्सहस्र-योजनविततो मूले षोडशसाहस्रं तावतान्तर्भुव्यां प्रविष्टः॥ ८॥ उत्तरोत्तरेणेलावृतं नीलः श्वेतः शृङ्ग-वानिति त्रयोरम्यहिरण्मयकुरवां मर्यादागिरयः प्रागायता उभयतः क्षारोदावधयो द्विसाहस्रपृथव एकैकशः पूर्वस्मात् पूर्वस्मादुत्तरेण दशांशाधिकांशेन दैर्घ्यं एव भवन्ति॥ ९॥ एवं दक्षिणेनेलावृतं निषधो हेमकूटो हिमालय इति प्रागायता यथा नीलादयः। अयुत-योजनोत्सेधा हरिवर्षकिंपुरुषभारतानां यथा सङ्ख्यम्॥१०॥ तथैवेलावृतमपरेण पूर्वेण च माल्यवद्-गन्धमादनावानीलनिषधायतौ द्विसाहस्रं पृथवतः केतुमालभद्राश्वयोः सीमानं विदधाते॥ ११॥ मन्दरो मेरुमन्दरः सुपार्श्वः कुमुद इत्ययुतयोजनविस्तारोच्छ्रा-मेरोश्चतुर्दिशमवष्टम्भगिरय उपकॢप्ताः॥१२॥ चतुर्षु तेषु चूतजम्बूकदम्बन्यग्रोधाश्चत्वारः पादपप्रवराः पर्वतकेतव इवाधिसहस्रयोजनोच्छ्रायास्तावद्विटपवितताः शतयोजन-परिणाहाः॥१३॥ ह्रदाश्चत्वारः पयोमधुक्षुरसमृष्टजलाः। यदुपस्पर्शिन उपदेवगणा योगैश्वर्याणि स्वाभाविकानि भरतर्षभ! धारयन्ति। देवोद्यानानि च भवन्ति चत्वारि नन्दनं चैत्ररथं वैभ्राजकं सर्वतोभद्रमिति॥१४॥ येष्वमर-परिवृढाः सह सुरललनालङ्कामयूथपतय उपदेवगणैरुप-गीयमानमहिमानः किल विहरन्ति॥१५॥ मन्दरोत्सङ्ग एकादशशतयोजनोत्तुङ्गदेवचूतगिरसो गिरिशिखरस्थूलानि फलान्यमृतकल्पानि पतन्ति॥१६॥ तेषां विशीर्यमाणा-नामतिमधुरसुरभिसुगन्धिबहुलारुणरसोदेनारुणोदा नाम नदी मन्दरगिरिशिखरान्निपतन्ती पूर्वेणेलावृतमुपप्लाव-यति॥१७॥ यदुपजोषणाद्भवान्या अनुचरीणां पुण्यजनवधू-नामवयवसंस्पर्शसुगन्धवातो दशयोजनं समन्तादनुवासयति॥ १८॥ एवं जम्बूफलानामत्युच्चनिपातविशीर्णानामनस्थिप्रा-बाधाभिभवकायनिभानां रसेन नदी जम्बू नाम नदी मेरु-मन्दरशिखरादयुतयोजनादवनितले निपतन्ती दक्षिणेनात्मानं यावदिलावृतमुपस्यन्दयति॥१९॥ तावदुभयोरपि रोधसो या मृत्तिका तद्रसेनानुविध्यमाना च वायुसंयोगविपाकेन सदामरलोकाभरणं जाम्बूनदं नाम सुवर्णं भवति॥२०॥ यदु ह वाव विबुधादयः सह युवतिभिर्मुकुटकटककटिसूत्र कुण्डलाद्याभरणरूपेण खलु धारयन्ति॥२१॥ यस्तु महा-कदम्बः सुपार्श्वपार्श्वनिरूढस्तस्य कोटरेभ्यो विनिःसृताः पञ्चायामपरिणाहाः पञ्च मधुधाराः सुपार्श्वशिखरात् पतन्त्योऽपरेणात्मानमिलावृतमनुमोदयन्ति। याश्चानुपयुञ्ज-नानां मुखनिर्वासितोभयवायुः समन्ताच्छतयोजनमनु-वासयति॥२२॥ एवं कुमुदनिरूढोयः शतवल्शो नाम वट-स्तस्य स्कन्धेभ्यो नीचीनाः पयोदधिमधुघृतगुडान्ना-

द्राम्बरशाल्मलनाभरणादयः सर्व एव कामदुघा नदाः कुसुदायात् पतन्तस्तत्तरेणेलावृतसपयोजयन्ति । यानुपजुषाणानां न कदाचिदपि प्रजानां वलीपलितक्लमस्वेददौर्गन्ध्यरजरामयापमृत्यूष्णशीतोष्णवैवर्ण्योपसर्गादयस्तापविशेषा भवन्ति । यावज्जीवं सुखं निरतिशयमेव कुरङ्गकुररकुसुम्भवैकङ्कत्रिकूटशिखरपतङ्गरुचकनिषधपतयो वासःकपिलगङ्कवैदूर्यजारुधिहंसऋषभनागकुञ्जरनीरदादयो गिरयो मेरोः कर्णिकाया इव केशरभूतास्तद्देशे परित उपक्लृप्ताः ॥ २३ ॥ जठर देवकूटौ मेरुं पूर्वेणाष्टादशयोजनसहस्रसदगायतौ द्विसहस्रपृथूनङ्कौ भवतः । एवमपरेण पवनपारियात्रौ दक्षिणेन कैलासकरवीरौ प्रागायतौ । एवमुत्तरतस्त्रिशृङ्गमकरौ अष्टाभिरेभिः परिष्कृतोऽग्निरिव परितश्चकासि काञ्चनगिरिः । मेरोर्मूर्द्धनि भगवत आत्मयोनेर्मध्यत उपक्लृप्तां पुरीमयुतयोजनसाहस्रीं समचतुरस्रां शातकौम्भीं वदन्ति ॥ २४ ॥ तामनुपरितो लोकपालानामष्टानां यथादिशं यथारूपं तुरीयमानेन पुरोऽष्टावुपक्लृप्ताः" ॥ २५ ॥ ६ अ०

"तत्र चतुर्द्धा विभज्यमाना चतुर्भिर्नामभिश्चतुर्दिशमभिस्यन्दती नदनदीपतिमेवाभिनिविशति । सीताऽलकनन्दा चक्षुर्भद्रेति ॥७॥ सीता तु ब्रह्मसदनात् केशराचलादिशिखरेभ्योऽधोधः प्रस्रवन्ती गन्धमादनमूर्द्धसु पतित्वान्तरेण भद्राश्वं वर्षं प्राच्यां दिशि क्षारसमुद्रमभिप्रविशति ॥८॥ एवं माल्यवच्छिखराच्चिप्रतन्वी तत उपरतवेगा केतुमालमभि चक्षुः प्रतीच्यां दिशि सरित्पतिं प्रविशति ॥९॥ भद्रा चोत्तरतो मेरुशिरसो निपतिता गिरिशिखराद्गिरिशिखरमतिहाय महतः महतोदवस्यन्दमाना उत्तरांस्तु कुरूनभित उदीच्यां दिशि लवणार्णवं प्रविशति ॥१०॥ तथैवालकनन्दा दक्षिणेन ब्रह्मसदनाद्बहूनि गिरिकूटानि अतिक्रम्य हेमकूटहिमकूटान्यतिरभसतरंहसा लुठन्ती भारतमभि वर्षं दक्षिणस्यां दिशि लवणजलधिमभिप्रविशति ॥११॥ अन्ये च नदानद्यश्च वर्षे वर्षे सन्ति बहवो मेर्व्यादिगिरिदुहितरः शतशः । "अन्यापि भारतमेव वर्षं कर्मक्षेत्रम् ॥१२॥ अन्यान्यष्टवर्षाणि स्वर्गिणां पुण्यशेषोपभोगस्थानानि भौमस्वर्गपदानि व्यपदिशन्ति" ॥ १३ ॥ १७ अ०

"भारतेऽस्मिन्वर्षे सरित्शैलाः सन्ति बहवः ॥ १६ ॥ मलयो मङ्गलप्रस्थो मैनाकस्त्रिकूट ऋषभः कूटकः कोल्लः सह्यो देवगिरिरृष्यमूकः श्रीशैलो वेङ्कटो महेन्द्रोवारिधारोविन्ध्यः शक्तिमानृक्षगिरिः पारियात्रोद्रोणश्चित्रकूटोगोवर्द्धनोरैवतः ककुभोनीलोगोकामुख इन्द्रकीलः कामगिरिरिति चान्ये च शतसहस्रशः शैलास्तेषां नितम्बप्रभवानदानद्यश्च सन्त्यसंख्याताः॥१७॥ एतासामपोभारत्यः प्रजा नामभिरेव पुनन्तीनामात्मानं चोपस्पृशन्ति । चन्द्रवसा ताम्रपर्णी अवटोदा कृतमाला वैहायसी कावेरी-वेण्या पयस्विनी शर्करावर्त्ताऽरुणभद्रा कृष्णवेण्या भीमरथी गोदावरी निर्विन्ध्या पयोष्णी तापी रेवा सुरसा नर्मदा चर्मण्वती अन्धः शोणश्च नदौ महानदी वेदस्मृतिः ऋषिकुल्या त्रिसामा कौशिकी मन्दाकिनी यमुना सरस्वती दृषद्वती गोमती सरयूरोधवती सप्तवती सुषमा शतद्रूचन्द्रभागा मरुद्वृधा वितस्ता असिक्न्येविपाडिति महानदाः ॥१८॥ अस्मिन्नेव वर्षे पुरुषैर्लक्षणैरभिः शुक्लशोणितकृष्णवर्णेन स्वारब्धेन कर्मणा दिव्यमानुषनारकगतयोवहन्त्र आत्मन आनुपूर्व्येण सर्वासवेव सर्वेषां विधीयन्ते । यथावर्णविधानमपवर्गश्च भवति" ॥२०॥ १६ अ०

"जम्बुद्वीपस्य च राजन्नुपद्वीपानष्टौ लोके उपदिशन्ति । सगरात्मजाताश्चान्वेषणे इमां महीं परितो निखनद्भिरुपकल्पितान् । तद्यथा स्वर्णप्रस्थश्चन्द्रशुक्ल आवर्त्तनो रमणको मन्दहरिणः पाञ्चजन्यसिंहलोलङ्केति" २०अ० अत्रस्य जनपदाश्च जनपदशब्दे उक्ता । भा० भौ० ६ अ० । जम्बुद्वीपस्य नदीभेदा उक्ता यथा ।

"आर्य्या म्लेच्छाश्च कौरव्य! तैर्मिथ्याः पुरुषा विभो ! । नदीं पिबन्ति विपुलां गङ्गां सिन्धुं सरस्वतीम् । गोदावरीं नर्मदाञ्च बाहुदां च महानदीम् । शतद्रूं चन्द्रभागाञ्च यमुनाञ्च महानदीम् । दृषद्वतीं विपाशाञ्च विपाशां स्थूलबालुकाम् । नदीं वेत्रवतीञ्चैव कृष्णवेण्याञ्च निम्नगाम् । इरावतीं वितस्ताञ्च पयोष्णीं देविकामपि । वेदस्मृतां वेदवतीं त्रिदिवामिक्षुमालवीम् । करीषिणीं चित्रवहां चित्रसेनाञ्च निम्नगाम् । गोमतीं धूतपापाञ्च मण्डकीञ्च महानदीम् । कौशिकीं निचितां कृत्यां निचितां लोहितारिणीम् । सरयूञ्च रहस्यां च शतकुम्भां तथैव च । चर्मण्वतीं चन्द्रभागां दुर्गमां सोमां दिशं तथा । इरावतीं पयोष्णीञ्च परां भीमरथीमपि । कावेरीं चुलकाञ्चापि वेणां शतबलामपि । मीवारां मच्छिताञ्चापि सुप्रयोगां जनाधिप ! । पवित्रां कुण्डलां सिन्धुं राजनीं परमालिनीम् । पूर्वाभिरामां वीराञ्च भीमामोघवतीं तथा । पलाशिनीं पापहरां महेन्द्रां पाट-

जावतीम् । करीषिणीमसिक्नीञ्च कुचीरां महानदीम् । मकरीं प्रवरां मेनां हेमां हतवतीं तथा । पुरावतीमनुष्णाञ्च शैव्यां तापीञ्च भारत ! । सदानीरामहव्याञ्च कुशधारां महानदीम् । सदाक्रान्तां शिवाञ्चैव तथा वीरवतीमपि । वास्तुं सुवास्तुं गौरीञ्च कम्पनां सहिरण्वतीम् । वरां वीरकुराञ्चापि पञ्चमीञ्च महानदीम् । रथचित्रां ज्योतिरथां विश्वामित्रां कपिञ्जलाम् । उपेन्द्रां बहुलाञ्चैव कुचीरां मधुवाहिनीम् । विनदीं पिञ्जलां वेणां हरिवेणां महानदीम् । विदिशां कृष्णवेणाञ्च ताम्राञ्च कपिलामपि । शोणं सुनामां वेदाञ्च हरिद्रां महोपमाम् । शोभाञ्च पिञ्जलाञ्चैव भारद्वाजीञ्च निम्नगाम् । कौशिकीं निम्नगां शोणां बाहुदामथ चन्द्रमाम् । दुर्गामन्त्रशिलाञ्चैव ब्रह्मबोध्यां हरिहतीम् । यवक्षामथ रोहीञ्च तथा जाम्बूनदीमपि । मनसां तमसां दार्वीं वसाञ्च वरुथामसीम् । नलां धृतिमतीञ्चैव पूर्णाशाञ्च महानदीम् । तामसीं दृषाभाञ्चैव ब्रह्ममेध्यां हरिहतीम् । एताश्चान्याश्च बहुधा महानद्यो जनाधिप ! । सदानिरामयां क्षण्णां मन्दगां मन्दवाहिनीम् । ब्रह्मणीञ्च महागौरीं दुर्गामपि च भारत ! । चित्रोपलां चित्ररथां मञ्जुलां वाहिनीं तथा । मन्दाकिनीं वैतरणीं कोशां चापि महानदीम् । शुक्तिमतीं सनिक्कांञ्च पुष्पारेणूत्कचावतीम् । कोहित्यां करतोयाञ्च तथैव हरकाङ्क्षयाम् । कुमारीमथिकुल्यांञ्च सारिषाञ्च सरस्वतीम् । मन्दाकिनीन्तु पुण्यांञ्च सर्वसङ्गांञ्च भारत ! । विश्वस्य मातरः सर्व्याः सर्व्याश्चैव महाफलाः । तथा नद्यस्तप्रकाशाः शतशोऽथ सहस्रशः । इत्येताः सरितो राजन् ! समाख्याता यथाकृति । अन्याः काश्चित् नद्यः कालिकापुराणोक्तास्तच्छब्दे २०१२ पृ० दर्शिताः । जम्बुद्वीपस्था जनपदाश्च भा०भी०७अ० उक्ताः जनपदशब्दे ३०२०पृ०दर्शिताः । कूर्म विभागशब्दे च तत्स्थानमुक्तम् । २जम्बु(म्बू)द्वीपाकारसंनिवेशयुक्ते दातव्यद्रव्यभेदे तद्विधानादि हेमा० दा० ख० ब्रह्माण्डपु०

"शृणु देवि ! महादानं जम्बु(म्बू)द्वीपाङ्गसन्तु तत् । यथाह भगवानद्य पद्मयोनिर्जनार्दनः । पुण्येऽह्नि पुण्यनक्षत्रे पुण्यकाले तु सर्वतः । विषुवत्ययनादौ च ग्रहणे चन्द्रसूर्ययोः । व्यतीपातेऽथ वा कुर्याज्जन्मर्क्षे वा विशेषतः । अष्टम्यां पञ्चदश्यां वा नित्यं वा दानमाचरेत् । पुण्यदेशेषु सर्वेषु नदीदेवालयादिषु । दानं स्वर्गे वा दातव्यं श्रद्धा वा यत्र जायते । विप्रन्तु वेदविद्वांसं गुरुं सम्पूज्य यत्नतः । भूलेपनादि यत्कार्य्यं सर्वं विप्रेण कारयेत् । विलेपयेत्सर्वभूमिं गोमयेन सवारिणा । तत्र विंशतिहस्तन्तु लेपयेत्परिमण्डलम् । लवणेनोदधिं तत्र परितः परिकल्पयेत् । प्रादेशमात्रं विस्तारादष्टद्रोणेन पार्वति ! । तत्राक्षतांश्चिकिरेत् श्वेतपुष्पैः समन्ततः । तन्मध्ये कारयेन्मेरुं धान्यभारत्रयेण वै । मेरुर्मेहाद्रीच्छ्रितस्तु मध्ये सुवर्णकल्पद्रुमसंयुतः स्यात् । पूर्वेण सत्फलवज्रयुक्तो याम्येन गोमेदकपुष्परागैः । पद्माच्च मारकतनीलरत्नैः सौम्येन वैदूर्यसरोजरागैः । श्रीखण्डखण्डैरभितः प्रवालतान्वितः शुक्तिशिलातलः स्यात् । शुक्लाम्बराच्छन्नधरावली स्यात् पूर्वेण पीतानि च दक्षिणे तु । वासांसि पश्चादथ कर्बुराणि रक्तानि चैवोत्तरतोऽथनाली । ब्रह्मा तु मध्ये कमलासनस्थश्चतुर्मुखः काञ्चननिर्मिताङ्गः । चतुर्भुजश्चारु निवेशनीयो दधत् स्रुचं चारु कमण्डलुञ्च । तथाक्षसूत्रं जपसाधनञ्च कृष्णाजिनं चोपवीतं च बिभ्रत् । गङ्गां चतुर्द्धा पतितां निधाय चतुर्दिशं चोदकपूर्णरूपाम् । रौप्याञ्छ्रेन्द्रप्रभृतीनवाष्टौ संस्थाप्य लोकाधिपतीन् क्रमेण । नानाद्विजौघानि च राजतानि स्रुगाद्य सर्वत्र निवेशनीयाः । पूर्वेण मन्दरगिरिर्यवतण्डुलाभ्याम् शुक्लाम्बरेण परितः परिवेष्टितान्तः । तुङ्गेन काञ्चनमयेन हरेण तद्वद्रौप्येण हरिन्मृगपक्षियुतो विधेयः । याम्येन गन्धमदनोऽत्र गिरिस्तु कार्य्यो मुद्गैश्च जम्बुतरुणा च हिरण्मयेन । हैमेन यत्नपतिना च विराजमानः पीताम्बरेण परितः परिवेष्टितश्च । पद्मात्तिलाचलमथोपरि कर्बुराभम् वासः सपिप्पलहिरण्मयहंसयुक्तम् । आकारयेद्विपुलमत्र सुगन्धपुष्पम् रौप्येण शक्तिघटितेन विराजमानम् । संस्थाप्य तं विपुलशैलमथोत्तरेण शैलं सुपार्श्वमपि साधुमयं सुवृत्तम् । न्यग्रोधवृक्षमपि हेममयं सपेतुम् रौप्यैश्च शक्तिघटितैश्च शुभं विधाय । मेरोश्च पुष्पाभरणञ्च कार्य्यम् हृतोदकं प्रस्रवणञ्च दिक्षु । क्षीराज्यदध्ना मधुना सरांसि प्रागादि तेषां च यथाक्रमेण । हेमादिकूटनिषधौ क्रमशश्च याम्ये सौम्ये च नीलश्वेतशृङ्गयुतौ क्रमेण । प्रादेशमात्रं परिनिःसृताश्चे प्रागायता ह्युपरि वस्त्रयुताश्च सर्वे । प्रत्येकमत्र दशनिष्कदर्पणानाम् भारेण धान्यपरिमाणमुशन्ति सन्तः । शक्त्या च रौप्यकृतपक्षियुताश्च सर्वे सौगन्धिपुष्पफलवस्त्रयुगा विधेयाः ।

श्वानीलनिषधायामौ माल्यवद्गन्धमादनौ । तेषां मध्यगतो मेरुरुत्तरो च धान्यविनिर्मितः । निषधः पारियात्रश्च मर्यादापर्वताविमौ । मेरोः पञ्चमभागेन यथा तौ गन्धमादनौ । गन्धमादनशैलोऽसौ पूर्वपश्चाद्व्यवस्थितौ । श्वेतश्चङ्खनिभौ दक्षिणोत्तरतः स्थितौ । सितान्तःप्रसृताः सर्वे दक्षिणे कुरुभादयः । शङ्खकूटादयश्चैव उत्तरे परिकीर्तिताः । तांस्त्रीन् त्रीन् मेरुशैलाश्च कृत्वा धान्यमयान् शुभान् । वज्रैरावेष्ट्य शैलेन्द्रं मेरुमन्यांश्च वेष्टयेत् । दक्षिणं भारतं वर्षं ततः किंपुरुषं स्मृतम् । हरिवर्षं ततः प्रोक्तं मेरोर्दक्षिणतस्ततः । इलावृतं ततो मेरोरुत्तरं हरिणं तथा । रम्यं हिरण्मयं तस्मात् कुरवश्चेति चोत्तराः । भद्राश्वः केतुमालश्च पूर्वपश्चिमतः स्थितौ । प्रोक्तानि नव वर्षाणि जम्बुद्वीपे तु नामतः । हिमाद्रिमध्ये देवेशं श्रियश्च विनिवेशयेत् । प्रसादाभिमुखावेतौ काञ्चनेन विनिर्मितौ । शङ्ख-चक्र-गदापाणिं पीतवाससमच्युतम् । किरीट-केयूर-धरं श्रीवत्साङ्कितवक्षसम् । पद्मासने समासीनां पद्महस्तां सुलोचनाम् । प्रसन्नवदनां देवीं तस्य दक्षिणतोन्यसेत् । कैलासमध्यतो मान्यं त्वां चैव विनिवेशयेत् । मां च शङ्करनामानं त्वां च गौरीं वरानने ! । चतुर्भुजं वृषस्थञ्च जटिलं चन्द्रमौलिनम् । खट्वाङ्गशूल-वरदाभय-हस्तञ्च मां न्यसेत् । सदृत्सङ्गगतां त्वां च दर्पणेन्दीवरान्विताम् । भद्रासने भगवन्तं हयरूपसुखं हरिम् । सौवर्णं स्थापयेद्देवं भारते कूर्मरूपिणम् । वाराहं केतुमाले वै मत्स्यं कुरुषु चोत्तरे । सौवर्णानथ वा रौप्यान् स्थापयेत्तु यथाक्रमम् । एवं जम्बूद्वयं द्वीपं कृत्वा चैव यथाविधि । अर्घपाद्यासनं स्नानं यथावत् स्थापनं क्रमात् । ब्रह्मादयस्तथा देवाः शैलाः कल्पद्रुमास्तथा । स्वनामसन्त्रैः पूजार्हा नमस्कारान्तदीपितैः । गन्ध-पुष्प-नमस्कार-धूप दीप-फलैस्तथा । तथोपहरणाद्यैश्च पूजयित्वा प्रयत्नतः । भद्राश्ववर्षे होमन्तु सर्पिषा च समाचरेत् । स्वनामसन्त्रैर्होतव्यं स्वाहाकारसमायुतैः । दशोत्तरशतं हुत्वा ब्रह्मणे मेरवे तथा । इतरेषान्तु सर्वेषामष्टोत्तरशताहुतीः । स्नानार्थं यजमानस्य पुरतः कलशत्रयम् । आढकोदरपर्यन्तं सकूर्चं वस्त्रवेष्टितम् । सन्धाः सुमनसश्चात्र कुशाग्रान्विनिवेशयेत् । वास्तु चेद्यो विधास्यन्ति तावत्तावद्भवेत्ततः । गङ्गाद्याः सरितः पुण्याः समुद्राश्च सरांसि च । आयान्तु यजमानस्य दुरितक्षयकारकाः । दत्त्वावाह्य ततस्तस्य कलशं विमलोदकम् । अभ्यर्च्य गन्धपुष्पाद्यैः स्थापयेत् प्रीतिपूर्वकम् । स्थापयेत् प्राङ्मुखं तत्र दातारं कलशोदकैः । ऋग्भिर्वरुणदेवीभिः शममानीभिरेव च । दानकाले च सम्प्राप्ते दाता नारी नरोऽथवा । स्थापितो गुरुणा तेन सार्द्धं दानं समाचरेत् । त्रिः प्रदक्षिणमाहृत्य सङ्कीर्तकुसमाञ्जलिः । प्रत्येकं पर्वतान् सर्वान् प्रणिपातपुरःसरम् । मध्यमं गुरवे दद्यादिमं मन्त्रमुदीरयेत् । कन्यकौ वा प्रदातव्यं तस्यानुज्ञामवाप्य च । यथा च भूरादिसप्तलोकास्त्वयि स्थिता भूधरराज ! नित्यम् । अमी सुरा असुरा लोकनाथा ब्रह्मादयो देवमयाश्च नित्यम् । तत्सत्यदानादहमप्यशेषैः पापैर्विमुक्तस्तु यथा भवेयम् । त्वं तथा पर्वतराज ! मह्यं कुरु प्रभो ! देववरैश्च सार्द्धम् । इतीदमुक्त्वा प्रदद्येत्तु मेरुं सकाञ्चनं राजतवस्त्रयुग्मम् । प्रत्येकमेकं द्विजपुङ्गवानाम् प्रागादि दद्यादितरान् क्रमेण । सुरासुराद्यामरतार्थलाभैः त्वया कृतं मन्दरशैल ! सत्य ! । तथा च मां रक्ष च सर्वतस्त्वं तव प्रसादाद्गिरजा यथाहम् । मन्दाद्रिमादन इतीरितभूधरेन्द्र ! वेदोदितस्य गरुडाय नमोऽस्तु तुभ्यम् । तत्सत्यदानकृतपापसमस्तदोषं छायाधिशैलवर रक्ष च मामजस्रम् । देवालयाय विपुलाय नमोऽचलाय हंसाय वेदपुरुषाय नमोऽच्युताय । युष्मत्प्रदानविकृताखिलपापराशिं हंसेन सार्द्धममराचल ! पाहि मां त्वम् । वन्दे सुपार्श्वममराचलमप्रमेयञ्चेतश्च देवसुरभिं प्रणतोऽस्मि नित्यम् । त्वद्दानभक्तिवुतसत्क्रिययाहमद्य त्वामेव यामि शरणार्थमवेहि मां त्वम् । श्रीवत्सवक्षस-मनादिमजं समस्तलोकाधिपं सकलकारणमच्युतञ्च । नारायणं शरणमेमि धराधरेन्द्रैः सार्द्धं श्रिया क्षितिधरादिभीड्यं । देवाय देवगणपूजितपादपद्मयुग्माय भक्तजनदुःखविनाशनाय । कैलासशैलनिलयाय भवाय नित्यं गौरीप्रियाय वरदाय नमः शिवाय । चक्रो त्वनादिनिधनः शरणागतं मामू भद्राश्वनामनि गतो हरिरच्युतोऽसौ । आस्ते जनार्दनवपुः सनकादियोगिपूरैरभिष्टुतपुरातनकीर्तियुक्तः । मध्ये महार्णवहिमाचलयोर्निषण्णं कूर्माकृतिं शरणमेमि भवाभवाय । पारावरं श्रयितमत्र सदा दधाति यस्तं नमामि सुरपूजितमप्रमेयम् । वाराहरूपिणमनन्तमनन्तकेतुम् क्षोभस्वरूपिणमनेकशिरोऽङ्घ्रिपादम् । वन्दे महीधरममेय-

मपारकीर्त्तिं यत्रेशमेमि शरणं हरमौलितारम्। देवस्तवोत्तरकृदप्यि नित्यमास्ते भक्त्याः सुरेन्द्रगणपूजितपादपद्मः। रत्नत्रयेण जगतां पतिरच्युतोऽसौ संसारदुःखचलितं शरणागतं माम्। उक्त्वैवमात्मभवनायनदानमन्त्रं प्रत्येकमेकं द्विजपुङ्गवानाम्। भुक्त्वा शुभानि मनसेप्सितानि यानि वासो गच्छेत् यत्र न निवर्त्तयतीह मर्त्यः। गुरवे दक्षिणां दद्यात् सुवर्णञ्चैव वाससी। वास्तोपकरणं सर्वं गुरवे विनिवेदयेत्। इत्याह भगवान् प्रीतः पार्व्वत्याः परमेश्वरः। अहमप्यनुयं सर्वं युष्माकं मुनिसत्तमाः!।"

जम्बूनदी स्त्री जम्बूफलरसजाता नदी ।।जम्बूफलरसजाते नदीभेदे जम्बूद्वीपशब्दे ३०४३ पृ० विवृतिः। २ब्रह्मलोकात् प्रवर्त्तमानासु सप्तसु नदीषु मध्ये नदीभेदे च "ब्रह्मलोकादपक्रान्ता सप्तधा प्रतिपद्यते। वक्षोक्षसारा१ नलिनी२ पावनी च सरस्वती३। जम्बूनदी४ च सीता५ च गङ्गा६ सिन्धुश्च७ सप्तमी" भा० भी० ६अ०।

जम्बूमार्ग न० पुष्करस्थे तीर्थभेदे पुष्करोपक्रमे "प्रदक्षिणमुपावृत्य जम्बूमार्गं समाविशेत्। जम्बूमार्गं समाविश्य देवर्षिपितृसेवितम्। अश्वमेधमवाप्नोति सर्व्वकामसमन्वितः। तत्रोष्य रजनीः पञ्च पूतात्मा जायते नरः। न दुर्गतिमवाप्नोति सिद्धिं प्राप्नोति वाञ्छिताम्। जम्बूमार्गादुपावृत्य गच्छेत्तण्डुलिकाश्रमम्" भा० व० ८२ अ०। "जम्बूमार्गे त्रिभिर्मासैः संयतः सुसमाहितः" भा०अनु० २५अ०। "जम्बूमार्गं गमिष्यामि जम्बूमार्गे वसाम्यहम्। एवं सङ्कल्पयानोऽपि रुद्रलोके महीयते" हरिव० १४१अ०।

जम्बूल पु० जम्बूं तद्वत्फलं लाति ला-क। १जम्बूवृक्षे २क्षेतकवृक्षे च मेदि०। "जम्बूजम्बूलवृक्षाद्यं कटुकन्दलभूषितम्" हरिवं० ६७अ०। ३वरकन्यापक्षयोः परिहासवचने न० नीलकण्ठः।

जम्बूलमालिका स्त्री ६त०। १वरकन्यापक्षयोः परिहासवचनसमूहे। "आशीर्भिर्वर्द्धयित्वा च देवर्षिः ऋषभमब्रवीत्। अनिरुद्धस्य वीर्य्याख्यो विवाहः क्रियतां विभो!। जम्बूलमालिकां द्रष्टुं श्रद्धा हि मम जायते। ततः प्रहसिताः सर्वे नारदस्य वचःश्रवात्" हरिव० १८८अ०। "जम्बूलमालिका कन्यावरयोर्हसचन्द्रिका" हारावल्युक्तार्थकतया उद्दा०त०व्याख्यानात् २तत्रार्थे च।

जम्बू(म्बु)वनज न० जम्बुवन इव जायते जन-ड ७त०। श्वेतजवापुष्पे। "पारिभद्रं पाटला च बकुलं गिरिमालिनी। तिलकं जम्बुवनजं पोतकं तगरन्त्वपि। एतानि हि प्रशस्तानि कुसुमान्यच्युतार्च्चने" वामन पु०

जम्बूवृक्ष पु० कर्म्म०। जम्बूनामके (जामगाछ) वृक्षे स च वृक्षवृक्षभेदेन द्विविधः यथाह भाव०प्र०

"फलेन्द्रा कथिता नन्दी राजजम्बूर्महाफला। तथा सुरभिपत्रा च महाजम्बूरपि स्मृता। राजजम्बूफलं स्वादु विष्टम्भि गुरु रोचनम्। क्षुद्रजम्बूः सूक्ष्मपत्रा नादेयी जलजम्बुका। जम्बूः संग्राहिणी रूक्षा कफपित्तास्रदाहजित्"।

जम्भ पु० जभ-अच्-तुम्। १दैत्यभेदे। करणे घञ्। २दन्ते कर्म्मणि घञ्। ३जम्भीरे। भावे घञ्। ४भक्षणे मेदि०। कर्म्मणि घञ्। ५युद्धे। करणे घञ्। तुण्डे हेमच०। जम्भदैत्यश्च महिषासुरपिता। स च इन्द्रात् पराजयमासाद्य महादेवं प्रसाद्य त्रैलोक्यविजयिपुत्ररूपवरप्राप्तौ सद्यो गमनात् प्रागेव नारदोपदेशात् इन्द्रेण युद्धायाहूतः स्नानच्छलेन सरोऽवगाहकाले महिषीं हत्वा तस्यां गर्भमाधाय इन्द्रेण युद्धं कृतवान् तेन निपातितश्च तत्कथा मार्क० पु० ४अ०। कालिकापु० ६१अ० तस्य रम्भेतिनामेति भेदः। अन्योऽपि तन्नामाऽसुरो विष्णुनाहतो यथोक्तं भा० व० १०२ अ०। "असुरश्च नलेषासो जम्भ इत्यभिविश्रुतः। यज्ञच्छिद्रकरक्रूरस्त्वयैव विनिपातितः" हरिं प्रति देवानामुक्तिः। ७रावणानुचरभेदे "पर्वणः पतनो जम्भः खरः क्रोधवशो हरिः। प्रहस्तश्चारुजश्चैव प्रघसश्चैवमादयः। ततोऽभिपतितां तेषामदृश्यानां दुरात्मनाम्। अनर्द्धानवधं तज्जघ्नुश्चकार स विभीषणः" भा०व० २८३ अ०। ८भक्षणे मि०कौ०। तत्र भक्षणे "इति ते कथयन्ति स्म ब्राह्मणा जम्भसाधकाः" भा०उ०६२अ०। दन्ते "इमं जम्भसुतं पिवः" ऋ० ८।६१।२। "जम्भसुतं दन्तैरभिषुतम्" भा० सुजम्भा हरितजम्भा। जभि-जृम्भायां भावे घञ्। ६जृम्भायाञ्च। "जम्भा सुहरितदृषत्सोमेभ्यः" पा० बहुव्रीहौ अनिच् समा०। सुजम्भा हरितजम्भा दृषत् जम्भो भक्षं यस्य दृषज्जम्भा सोमजम्भा। स्वार्थे क। जम्भक तत्रार्थे जभ-ण्वुल्। जम्भक भक्षके त्रि०। [जम्भिकाप्यत्र।

जम्भका स्त्री जम्भैव स्वार्थे क। जृम्भायां राजनि०। पक्षे

जम्भग पु० जम्भाय भक्षणाय गच्छति गम-ड। राक्षसभेदे। "देवा यक्षास्तथा नागा गन्धर्वाप्सरोऽसुराः। क्रूराः

वर्षाः सुपर्णाश्च तरवो जम्भगाः खगाः" तर्पणमन्त्रः ।

जम्भद्विष् पु० जम्भमसुरं द्वेष्टि द्विष-क्विप् । इन्द्रे देवताभेदे च० ।

जम्भभेदिन् पु० जम्भमसुरं भिनत्ति भिद-णिनि हुक च० । इन्द्रे अमरः जम्भरिपुप्रभृतयोऽप्यत्र । मार्क० पु० तन्मूलं दग्धम् ।

जम्भर पु० जम्भां भक्षणरुचिं राति ददाति रा-क । १जम्भीरे शब्दच० । वा रस्य नः । जम्भल १तत्रार्थे २क्षुद्रभेदे च मेदि० । ३राक्षसीभेदे स्त्री । "सप्तद्वीपोत्तरे तीरे जम्भला नाम राक्षसी । तस्याः स्मरणमात्रेण विशल्या गर्भिणी भवेत्" ज्यो० त० ।

जम्भा स्त्री जभि-जृम्भायां भावे अ । जृम्भायां राजनि० ।

जम्भारि पु० जम्भस्य भक्षस्य असुरभेदस्य वा अरिः । १वज्रे २वज्रे च विश्वः ३इन्द्रे च । "जम्भारिदन्तोज्वलः" नैष० ।

जम्भिन् पु० जभ-णिनि नुम् । १जम्भीरे शब्दच० तत्रार्थे न० ङीप च० । २जम्भासुरे त्रि० । [३मरुत्वके भरतः ।

जम्भीर पु० जभ-गम्भीरा०ईरन् नुम् च । १जम्भीरे अमरः

जम्भ्य पु० जम्भ एव स्वार्थे यत् जभ-कर्मणि यत् वा दत्ते । "यस्तद्दर्शपूर्णमासयोर्विद्यादिमाः प्रजा अदन्का आयन्ते यस्मादासां आयन्ते यस्मादासां प्रभिद्यन्ते यस्मादासां संतिष्ठन्ते यस्मादासां पुनरुत्तमे वयसि सर्व एव प्रभिद्यन्ते यस्मादधर एकाग्रे आयन्तेऽथोत्तरे यस्मादथोयांस एवाधरे प्रथीयांस उत्तरे यस्माद्ध्रा वर्षीयसी यस्मात् समा एव जम्भ्याः" शत०ब्रा०११।३।१।५। "दंष्ट्राभ्यां मस्तिष्कान् जम्भ्यैस्तस्करान्" यजु०११।७८ दत्ता जम्भ्याः जम्भावर्तिभाश्रिता जम्भ्याः" २वेददीपोक्तार्थे च ।

जय पु० जि-भावे अच् । परापेक्षया १उत्कर्षलाभे (जित शब्दोदा) २वशीकरणे इन्द्रियजयः। "मौनं सदासनजयः स्थैर्यं प्राणजयः शनैः" भाग०२२८।६। ३शत्रु पराङ्मुखीकरणे ४संग्रामादिजये । "सप्त वित्तागमा धर्म्या दायो लाभः क्रयो जयः। विभागः संप्रयोगश्च सत्प्रतिग्रह एव च" मनुना तस्य धर्म्यस्वहेतुत्वोक्तं तच्च क्षत्रियस्यैव "स्वामी सुकृच्छ्रक्रयसंविभागपरिग्रहाधिगमेषु ब्राह्मणस्याधिकं स्वं क्षत्रियस्य विजितं निर्दिष्टं वैश्यशूद्रयोरिति" गौतमस्मृतेः । "जयो रत्नाहारिण्याम्" रघुः "समदुःखसुखे कृत्वा लाभालाभौ जयाजयौ" गीता । जि-कर्त्तरि अच् । ५परमेश्वरे पु० तस्य सर्वभूतजयित्वात् तथात्वं "नयो जयः सत्यसन्धो दाशार्हः सात्वतां पतिः" विष्णुस० । ६जयन्ते इन्द्रपुत्रे असुरजयात्तस्य तथात्वम् ७युधिष्ठिरे क्रोधजयात् युद्धतन्त्रामकत्वाद्वा तस्य तथात्वम् । विराटनगरे छद्मवेशेन स्थायिनः युधिष्ठिरस्य यथा युद्धं तन्नाम तथोक्तं "जयोजयन्तो विजयो जयत्सेनो जयद्बलः। इति गुप्तानि नामानि तेषां चक्रे युधिष्ठिरः" भा०वि०५अ० । ८कन्निमन्यङन्तेऽरोगजयात्तस्य तथात्वम् ।दानवभेदे "जयो निकुम्भः कुपथश्च दानवो ररक्षुरेते दशदानवाधिपम्" हरिवं० २४२अ० । १०विश्वामित्रसुतभेदे । "मधुच्छन्दा जयश्चैव देवलश्च तथाष्टकः । कच्छपो हारितश्चैव विश्वामित्रस्य ते सुताः" २७अ० । ११सोमवंश्ये क्षत्रवृद्धपुत्रभेदे "ऐलपुत्रा बभूवुस्ते सप्त देवसुतोपमाः । दिविजाता महात्मान आयुर्धीमानमावसुः" इत्युपक्रमे "आयोः पुत्रास्तथा पञ्च सर्वे वीरा महारथाः । स्वर्भानुतनयायाञ्च प्रभायां जज्ञिरे नृप ! । नहुषः प्रथमं तत्र वृद्धशर्मा ततः परम् । रम्भो रजिरनेनाश्च त्रिषु लोकेषु विश्रुतः" इति आयुपुत्रभेदानुक्त्वा "अनेनसः सुतो राजा प्रतिक्षत्रो महायशाः । प्रतिक्षत्रसुतश्चापि क्षत्रवृद्धो नाम विश्रुतः । क्षत्रवृद्धस्य जयः पुत्रो विजयस्तस्य चात्मजः" हरिवं०२९अ० । ऐलस्योर्वशीगर्भजाते १२सुतभेदे । "ऐलस्य चोर्वशीगर्भात् षड्रामब्राह्मजा नृप ! । आयुः श्रुतायुः सत्यायू रयो रजिजयो जयः" भाग० ९।१५।१ । दशमे ब्रह्मसावर्णिमन्वन्तरे १३द्विजभेदे "दशमो ब्रह्मसावर्णिरुपश्लोकसुतो महान् । तत्सुता भूरिषेणाद्या हविष्मत्प्रमुखा द्विजाः । हविष्मान् सुकृतः सत्यो जयो मूर्त्यादया द्विजाः" भाग० ८।१३।१०। १४जनकवंश्ये मैथिले नृपभेदे । "जन्मना जनकः सोऽभूत् वैदेहस्तु विदेहजः। मिथिलो मथनाज्जातो मिथिला येन निर्मिता" इत्युपक्रमे "श्रुतस्ततो जयस्तस्माद्विजयोऽस्माद्दृतः सुतः" भाग०९।१३।१३ । सोमवंश्ये १५क्षत्रवृद्धसुते १६सङ्कृतिनृपसुते च । "कुशात् प्रतिक्षत्रवृद्धात् क्षत्रवृद्धस्तनुतो जयः ; ततः सुतः कृतस्यापि जय इत्यृषिवान् नृपः । सहदेवस्ततोऽहीनो जयत्सेनस्तु तत्सुतः । सङ्कृतिस्तस्य च जयः क्षत्रधर्मा महारथः" भाग० ९।१७।१० । अत्र जयस्य द्विधा कीर्त्तनात् तद्वंशे द्वौ जयौ ।१७क्षत्रवृद्धवंश्ये विजननन्दनरूपभेदे च० । १८विष्णुद्वारिकभेदे । जयविजयौ हि विष्णुद्वारपौ भगवद्दिदृक्षया वैकुण्ठगतान् सनात् सनकादीन् भगवद्दर्शनाय निवार्य्य वेत्रेण ताडयन्तौ तैरभिशप्तौ हिरण्याक्षाद्यसुरभावेन जातौ तत्कथा भाग० ३।१६ अ० ।

"मानसात्मसुता युक्तपूर्वजाः सनकादयः। चेरुर्विहायसा लोकान् लोकेषु विगतस्पृहाः। ते एकदा भगवतो वैकुण्ठस्यामलात्मनः। ययुर्वैकुण्ठनिलयं सर्वलोकनमस्कृतम्" इत्युपक्रमे।

"तस्मिन्नतीत्य सनयः षडसज्जयानाः कक्षाः समानवयसावथ सप्तमायाम्। देवावचक्षत सुरार्चितगन्धतीव्र मराद्र्यकेयूरकृतङ्कणकिरीटविटङ्कवेषौ। मत्तद्विरेफवनमालिकया निवीतौ विन्यस्तया सितचतुष्टयवाङ्मध्ये। वक्त्रं भ्रुवा कुटिलया स्फुटनिर्गमाभ्यां रक्तेक्षणेन च मनाग्यमं दधानौ। द्वार्येतयोर्निविविशुर्मिषतोरपृष्ठा पूर्वा यथा पुरटवज्रकपाटिकायाः। सर्वत्र तेऽविषमया सनयः स्वदृष्ट्या ये संचरन्त्यविकृता विगताभिशङ्काः। तान् वीक्ष्य बातवसनांश्चतुरः कुमारान् वृद्धान् दशार्द्धवयसो विदितात्मतत्त्वान्। वेत्रेण चास्खलनयतामदर्हणांकौ तेजो विहस्य भगवत्प्रतिकूलशीलौ। ताभ्यां मिषत्स्वनिमिषेषु निषिध्यमानाः स्वर्हत्तमा अपि हरेः प्रतिहारपाभ्याम्। ऊचुः सुहृत्तमदिदृक्षितभङ्ग ईषत्कामानुजेन सहसा त उपप्लुताक्षाः। श्रीसनय ऊचुः। कोवाङ्कैतव भगवत्परिचर्ययोच्चैस्तद्धर्मिणां निवसतां विषमस्वभावः। तस्मिन् प्रशान्तपुरुषे गतविग्रहे वां कोवात्मवत्कुहकयोः परिशङ्कनीयः। नह्यन्तरं भगवतीह समस्तकुक्षावात्मानमात्मनि नभो नभसीव धीराः। पश्यन्ति यत्र युवयोः सुरलिङ्गिनोः किं व्युत्पादितं ह्युदरभेदि भयं यतोऽस्य। यद्वा मनुष्यपरमस्य विकुण्ठभर्तुः कर्तुं प्रभुष्टमिह धीमहि मन्दधीभ्याम्। लोकानितो व्रजत मत्सरभावदृष्ट्या पापीयसस्तय हरे रिपवोऽस्य यत्र। तेषामितीरितसभावधार्यं घोरं तं ब्रह्मदण्डमनिवारणमस्त्रपूगैः। सद्यो हरेरनुचरावुरु बिभ्यतस्तत्पादग्रहावपततामतिकातरेण। भूयादघोनि भगवद्विरकारि दण्डो यो नौ हरेत सुरहेलनमप्यशेषम्। मा वोऽनुतापकलया भगवत्स्मृतिघ्नो मोहो भवेदिह तु नौ व्रजतोरधोधः। एवं तदैव भगवानरविन्दनाभः स्वानां विबुध्य सदतिक्रममार्यहृद्यः। तस्मिन् ययौ परमहंसमहामुनीनामन्वेष्यणीयचरणौ चलयन् सहश्रीः"। ततः कुमारैः भगवन्तं दृष्ट्वा कृतां तत्स्तुतिमुपवर्ण्यौक्तम्।

"इति तद्व्रतां तेषां मुनीनां योगधर्मिणाम्। प्रतिनन्द्य जगादेदं वैकुण्ठनिलयो विभुः। श्रीभगवानुवाच। एतौ तौ पार्षदौ मह्यं जयो विजय एव च। कदर्थीकृत्य मां यद्वो बह्वकातामतिक्रमम्। यज्जह्वतुर्वोर्नतो दण्डो भवद्भिर्मामनुव्रतैः। स एवानुमतोऽस्माभिर्मुनयो! देवहेलनात्"। ततः कयाशेषो यथा "श्रीभगवानुवाच। एतौ सुरेतरगतिं प्रतिपद्य सद्यः संरम्भसम्भृतसमाध्यनुबद्धयोगौ। भूयः सकाशमुपयास्यत आशु योवः शापो मयैव निमितस्तदवैत विप्राः!। श्रीब्रह्मोवाच। अथ ते मुनयोदृष्ट्वा नयमानन्दभाजनम्। वैकुण्ठं तदधिष्ठानं विकुण्ठञ्च स्वयंप्रभम्। भगवन्तं परिक्रम्य प्रणिपत्यानुमान्य च। प्रतिजग्मुः प्रमुदिताः शंसन्तो वैष्णवीं श्रियम्। भगवानप्युभावाह यातं मा भैष्टमस्तुताम्। ब्रह्मतेजःसमर्थोऽपि हन्तुं नेच्छे मतन्तु मे। मयि संरम्भयोगेन निस्तीर्य ब्रह्महेलनम्। प्रत्येष्यतं निकामं मे कालेनाल्पीयसा पुनः। द्वाःस्थावादिशद्र भगवान् विमान श्रेणिभूषणम्। सर्वातिशयमृद्धया जुष्टं स्वस्त्रियाऽऽविशत्। तौ तु गीर्वाणवर्षौ दुस्तरादृरिलोकतः। कृतश्चित्तौ ब्रह्मशापादभूतां विगतस्मयौ। तदा विकुण्ठधिष्ण्यात्तयोर्निपतमानयोः। हाहाकारो महानासीद्विमानाग्र्येषु पुत्रकाः!। तावेव सम्प्रति प्राप्तौ पार्षदप्रवरौ हरेः। दितेर्जठरनिर्विष्टं काश्यपं तेज उल्बणम्। तयोरसुरयोरद्य तेजसा यमयोर्हि वः। आक्षिप्तं तेज एतर्हि भगवांस्तद्विधित्सति"।

भाग० ३।१२ अ०—१६ अ०। जयति संसारमनेन। जि-करणे अच्। १८भारतादौ यत्यभेदे। "ब्रह्मचारिकाण्डे भविष्यपुराणम् "अष्टादश पुराणानि रामस्य चरितं तथा। विष्णुधर्मादिशास्त्राणि शिवधर्माश्च भारत!। काण्डाख्यं पञ्चमो वेदो यन्महाभारतं स्मृतम्। सौराश्च धर्मा राजेन्द्र! मानवोक्ता महीपते!। जयेति नाम एतेषां प्रवदन्ति मनीषिणः" इति "नारायणं नमस्कृत्य नरञ्चैव नरोत्तमम्। देवीं सरस्वतीञ्चैव ततो जयमुदीरयेत्" सर्वपुराणारम्भे पाद्मश्लोकः। २०दशहारे सप्ते शब्दार्थचि०। षष्टिवर्षमध्ये अष्टाविंशतितमे २१वत्सरे। तत्फलं यथा "क्षत्रियाश्च तथा वैश्याः शूद्राश्च सटनर्तकाः। पीड़िताश्चौ वरारोहे! जये सर्वे न संशयः" ज्यो०त०। जये कुशलः आकर्षा० कृत्। जयक जयकशब्दे हि०। २२कुमारानुचरनागभेदे। "प्रदद्यावस्निपुत्रस्य सङ्गापारि-

ष्टद्युम्नौ। जयं महाजयञ्चैव नागौ ज्वलनसूनवे" भा०श०४६ अ०। २२द्रुपदराजपुत्रभेदे "जयन सुरथं नाम द्रुपदस्य सुतं विभुः। पुनः शत्रुञ्जयं नाम सुरथस्यानुजं रणे। रथानीकं जयानीकं जयद्बालं निजघ्निवान्" भा० द्रो० १५६ अ०। २४अर्जुने "यदि नोत्तिष्ठति जयः पिता मे नरसत्तमः। अस्मिन्नेव रथोद्देशे गोप्तव्ये कलेवरम्" भा०आश्व० ८०अ०। मातरं प्रति वभ्रुवाहनोक्तिः। "इत्युक्त्वा सोऽब्रवीत् पुत्रं मन्त्रिपरपतिं जयः" ८अ०। २५धृतराष्ट्रपुत्रभेदे। "दुर्योधनप्रधतयो युयुत्सुः करणस्तथा। ततो दुःशासनश्चैव दुःसहश्चैव भारत!। दुर्मर्षणो विकर्णश्च चित्रसेनोविंशतिः। जयः सत्यव्रतश्चैव पुरुमित्रश्च भारत!। वैकर्णश्चो युयुत्सुश्च एकादश महारथाः" भा० आ० ६२ अ०।

जयकोलाहल पु० जयस्य कोलाहलो यस्मिन्। १पाशकक्रीड़ाभेदे शब्दच०। हेत०। २जयध्वनौ।

जयढक्का स्त्री जयसूचिका ढक्का। वाद्यभेदे।

जयतीर्थ न० तीर्थभेदे शिवपु०।

जयत्सेन पु०१विराटनगरे उद्भवेशिनि नकुले पाण्डवे। जयशब्दे दृश्यम्। जयन्ती सेनाऽस्य। २विक्रान्तसैन्यके त्रये। ३मगधेषु जयत्सेनस्तेषामासीत् स पार्थिवः। अष्टानां प्रवराणां यं कालेयानां महासुराः" भा० आ० ६७ अ०। ४पुरुवंश्ये सार्वभौमाख्यनृपपुत्रे। "अहंयातिः खलु ऋतवीर्यदुहितरमुपयेमे भानुमतीं नाम तस्यामस्य जज्ञे सार्वभौमः। सार्वभौमः खलु जित्वा जहार कैकेयीं सुनन्दां नाम तामुपयेमे तस्यामस्य जज्ञे जयत्सेनो नाम। जयत्सेनः खलु वैदर्भीं सुपयेमे सुश्रुतां नाम तस्यामस्य जज्ञे अवाचीनः" भा० आ० ८५ अ०। ५सोमवंश्ये अक्रोधनृपपुत्रे च। जयशब्दे मूलं दृश्यम्।

जयदत्त पु० इन्द्रपुत्रे जयन्ते हेमच०।

जयदुर्गा स्त्री दुर्गामूर्त्तिभेदे तन्मूर्त्तिलक्षणं तन्त्रसारे "कान्तां स्वामां कटाक्षैररिकुलभयदां मौलिबद्धेन्दुरेखां शङ्खं चक्रं कृपाणं त्रिशिखमपि (त्रिशूलम्) करैरुद्वहन्तीं त्रिनेत्राम्। सिंहस्कन्धाधिरूढां त्रिभुवनमखिलं तेजसा पूरयन्तीं ध्यायेद् दुर्गां जयाख्यां त्रिदशपरिवृतां सेवितां सिद्धिकामैः"। अस्याः मन्त्रप्रयोगादिकं तत्रैव दृश्यम्।

जयदेव पु० गीतगोविन्दकाव्यकारके केन्दुबिल्वग्रामवासिनि कविभेदे "भावं मुद्रारसारस्तनयजयदेवस्य विश्वग्वचांसि" गीतगो० [शब्दे दृश्यम्।

जयद्बल पु० विराटावासे उद्भवेशिनि पाण्डवे सहदेवे जय-

जयद्रथ पु० १पौरवे इक्ष्वाकुवंशे नृपस्य यशोदेव्यां जाते पुत्रभेदे। तदुत्पत्तिकथा "इक्ष्वाकुवंशतो वंशे राजा नाम्ना इक्ष्वाकुनाः। तस्य पत्नीद्वयञ्चासीद्वैनतेयसुते शुभे। यशोदेवी च सत्या च ताभ्यां वंशस्तु भिद्यते। जयद्रथस्तु राजेन्द्र! यशोदेव्यां व्यजायत" हरिवं० ३१अ०। सिन्धुदेशाधिपद्वद्धक्षत्रे २राजभेदे। स च धृतराष्ट्रकन्यां दुःशलामुपयेमे। स च सौवीरदेशाधिपः "जयद्रथो नाम यदि श्रुतस्ते सौवीरराजः सुभगे! स एषः" भा०व०२६४ स च द्रौपदीं हृत्वा पलायमानो विजित्य भीमेन सहदेवेन युधिष्ठिराज्ञया सकृच्च। ततो निर्वेदमासाद्य तपसा तोषितात् रुद्रतो वरं लेभे तत्कथा यथा

"जयद्रथस्तु संप्रेक्ष्य भ्रातरावुद्यतायुधौ। प्राधावत्तूर्णमव्यग्रो जीवितेप्सुः सुदुःखितः। तं भीममेनो धावन्तमवतीर्य रथाद्बली। अभिद्रुत्य निजग्राह केशपक्षे क्षमर्षणः। समुद्यम्य च तं भीमो निष्पिपेष महीतले। शिरो मुष्टीकृत्य राजानं ताडयामास चैव ह। पुनः सञ्जीवमानस्य तस्योत्पतितुमिच्छतः। पदा मूर्द्धि महाबाहुः प्राहरद्विनिपिष्यतः। तस्य जानु ददौ भीमो जघ्ने चैनमरिन्दमः। स मोहमगमद्राजा प्रहारवरपीडितः। सरोषं भीमसेनं तु वारयामास फाल्गुनः। दुःशलायाः कृते राजा यत्तदाहेति कौरवः। भीम उवाच। नायं पापसमाचारो मत्तो जीवितमर्हति। कृष्णायाश्चादनर्हायाः परिक्लेष्टा नराधमः। किन्तु शक्यं मया कर्त्तुं यद्राजा सततं स्त्रियो। त्यक्त्वा वाग्विशया बुद्ध्या सदैवास्मान् प्रबाधते। एवमुक्त्वा सटास्तस्य पञ्च चक्रे वृकोदरः। अर्द्धचन्द्रेण बाणेन शिखिदत्तवतस्ततः। विकत्थयित्वा राजानं ततः प्राह वृकोदरः। जीवितञ्चेच्छसे मूढ! क्षेत्रं मे गदतः शृणु। दासोऽस्मीति त्वया वाच्यं संसत्सु च सभासु च। एवं ते जीवितं दद्यामेष युद्धजितो विधिः। एवमस्त्विति तं राजा ब्रुवाणो जयद्रथः। प्रोवाच पुरुषव्याघ्रं भीममाहवशोभिनम्। तत एनं विचेष्टन्तं बद्ध्वा पार्श्वे वृकोदरः। रथमारोपयामास विमुखं पांशुगुण्ठितम्। ततस्तं रथमास्थाय भीमः पार्श्वानुगस्तदा। अभ्येत्याश्रममध्यस्थमभ्यगच्छद्युधिष्ठिरम्। दर्शयामास भीमस्तु तदवस्थं जयद्रथम्।

तं राजा प्राहसद्दृष्ट्वा सुव्यतामिति चाब्रवीत्। राजानमब्रवीद्भीमो द्रौपद्याः क्रियतामिति। दासभावं गतो ह्येष पाण्डूनां पापचेतनः। तमुवाच ततो ज्येष्ठो भ्राता सत्यव्रतः शुचिः। मुञ्चैनमधमाचारं प्रमाणं यदि ते वयम्। द्रौपदी चाब्रवीद्भीममभिवीक्ष्य युधिष्ठिरम्। दासोऽयं मुच्यतां राजन्स्वया पञ्चशटः कृतः। स मुक्तोऽभ्येत्य राजानमभिवाद्य युधिष्ठिरम्। ववन्दे विदुषो राजंस्तांश्च दृष्ट्वा सभासदः। तमुवाच ततो राजा धर्मपुत्रो युधिष्ठिरः। तथा जयद्रथं दृष्ट्वा मुक्तीनं सव्यसाचिना। व्रजास्मो गच्छ सुक्षोऽसि मैवं कार्षीः पुनः पुनः। स्त्रीकामश्च क्षिप्तस्त्वं क्षुद्रः क्षुद्रसहायवान्। एवंविधं हि कः कुर्यात्त्वदन्यः पुरुषाधमः। गतसत्त्वमिव ज्ञात्वा कर्त्तारमशुभस्य तम्। संप्रेक्ष्य भरतश्रेष्ठः कृपाञ्चक्रे नराधिपः। धर्मे ते बुद्धिर्मा चाधर्मे मनः कृथाः। साधुः सरथ पादातः स्वस्ति गच्छ जयद्रथ!। एवमुक्तस्तु सत्रीडस्तूष्णीं किञ्चिदवाङ्मुखः। जगाम राजा दुःखार्त्तो गङ्गाद्वाराय भारत। स देवं शरणं गत्वा विरूपाक्षमुमापतिम्। तपश्चचार विपुलं तस्मै प्रीतो ददौ वृषध्वजः। वरं स्वयं प्रयच्छद्भ्यः प्रीयमाणस्त्रिलोचनः। वरं ह्यस्मै ददौ देवः स जग्राह च तच्छुचिः। जयद्रथ उवाच। समस्तान् सरथान् पञ्च जयेयं युधि पाण्डवान्। इति राजाब्रवीद्देवं नेति देवस्तमब्रवीत्। महेश्वर उवाच। ऋजयांश्चाप्यवध्यांश्च वारयिष्यसि तान् युधि। ऋतेऽर्जुनं महाबाहुं नरं नाम सुरेश्वरम्। यदर्थं तप्ततपसं नारायणसहायकम्। अजितं सर्वलोकानां देवैरपि दुरासदम्। मया दत्तं पाशुपतम् दिव्यमप्रतिमं शरम्। जघान लोकपालेभ्यो वज्रादीन् स महाशरान्"।

"प्रधानं शस्त्रविदुषां तेन कृष्णेन रक्ष्यते। महायशाः पुण्डरीकाक्षः श्रीमानतुलविक्रमः। समानसुन्दने वीर्यमास्थाय परवीरहा। न शक्यते तेन जेतुं त्रिदशैरपि दुःसहः। कः पुनर्मानुषो भावो रणे पार्थं विजेष्यते। तमेकं वर्जयित्वा तु सर्वं योधिष्ठिरं बलम्। चतुरः पाण्डवान्राजन्! दिनैकं जेष्यसे रिपून्"। स च भारतयुद्धकाले द्रोणरचितचक्रव्यूहद्वारे स्थित्वार्जुनसुते युधिष्ठिरादीन् चतुरो भ्रातॄन् जिगाय। अभिमन्युञ्च जघान। तद्वधकुपितेनार्जुनेन शः सूर्यास्तमयात् प्रागेव त्वां हत्वा तथा त्वामहत्वा स्वयं वा मर्त्तेति प्रतिज्ञाय स निहतः तच्छिरश्च जन्मद्रथस्य तपस्यतस्तत्पितुर्वृद्धक्षत्रस्याङ्कस्थितं शरपरम्परया पातितं तेन च तस्य शिरसो भूमौ पातनेन स्वशिरः शतधाभूतं तत्कथा यथा भा० द्रो० १४३ अ०।

"एतस्मिन्नेव काले तु द्रुतं गच्छति भास्करे। अब्रवीत् पाण्डवं राजंस्त्वरमाणो जनार्दनः। एष मध्ये हतः षड्भिः पार्थ! वीरैर्महारथैः। जीवितेप्सुर्महाबाहो! भीतस्तिष्ठति सैन्धवः। एतानतिक्रम्य रणे षड्यान् पुरुषर्षभ!। न शक्याः सैन्धवो हन्तुं यत्तो निर्व्याजमर्जुन। योगमत्र विधास्यामि सूर्यस्यावरणं प्रति। अस्तं गत इति व्यक्तं प्रेक्षत्येकः स सिन्धुराट्। हर्षेण जीविताकाङ्क्षी विनाशार्थं तव प्रभो!। न गोपयिष्यति दुराचारः स ह्यात्मानं कथञ्चन। तत्र क्षिप्रं प्रहर्त्तव्यं त्वयास्य कुरुसत्तम। व्यपेक्षा नैव कर्त्तव्या गतोऽस्तमिति भास्करः। एवमस्त्विति बीभत्सुः केशवं प्रत्यभाषत। ततोऽरुजत्तमः कृष्णः सूर्यस्य वरणं प्रति। योगी योगेन संयुक्तो योगिनामीश्वरो हरिः। छन्ने तमसि कृष्णेन गतोऽस्तमिति भास्करः। त्वदीया जहृषुर्योधाः पार्थनाथाश्चराधिप!। ते प्रहृष्टा रणे राजन्नापश्यन् सैनिका रविम्। उद्घाट्य वक्त्राणि तदा स च राजा जयद्रथः। वीक्षमाणे ततस्तस्मिन् सिन्धुराजे दिवाकरम्। पुनरेवाब्रवीत् कृष्णो धनञ्जयमिदं वचः। पश्य सिन्धुपतिं वीरं प्रेक्षमाणं दिवाकरम्। भयं विपुलमुत्सृज्य त्वत्तो भरतसत्तम। अयं कालो महाबाहो! वधायास्य दुरात्मनः। इत्येवं केशवेनोक्तः पाण्डुपुत्रः प्रतापवान्। न्यवधीत्तावकं सैन्यं शरैरग्निसमप्रभैः"।

"एवं तान् व्याकुलीकृत्य त्वदीयान् स महारथान्। उज्जहार शरं घोरं पाण्डवोऽनलसन्निभम्। इन्द्राशनिसमस्पर्शं दिव्यमन्त्राभिमन्त्रितम्। सर्वभारसहं शस्त्रमस्त्रमाल्यार्चितं महत्। वज्रेणास्त्रेण संयोज्य विधिवत् कुरुनन्दनः। समादधन्महाबाहुर्गाण्डीवे क्षिप्रमर्जुनः। तस्मिन् सन्धीयमाने तु शरे ज्वलनतेजसि। अन्तरीक्षे महानादो भूतानामभवन्नृप। अब्रवीच्च पुनस्तत्र त्वरमाणो जनार्दनः। धनञ्जय! शिरश्छिन्धि सैन्धवस्य दुरात्मनः। अस्तं महीधरश्रेष्ठं यियासति दिवाकरः। श्रुत्वैतत्तु वचः कृष्णस्य

जयद्रथवधं प्रति। वृद्धक्षत्रः सैन्धवस्य पिता जगति विश्रुतः। स कालेनेह महता सैन्धवं प्राप्नवान् सुतम्। जयद्रथमभिख्यातं तच्छ्रोष्यथ तदा वृत्तम्। वनर्द्धिता पुरा वाणी मेघदुन्दुभिनिस्वना। तवात्मजो मनुष्येन्द्र! कुलशीलदमादिभिः। गुणैर्भविष्यति विभो! सदृशो वंशयोर्द्वयोः। क्षत्रियप्रवरो लोके नित्यं शूराभिसत्कृतः। शत्रुभिर्युध्यमानस्य संग्रामे त्वस्य धन्विनः। शिरश्छेत्स्यति संक्रुद्धः शत्रुरात्मक्षितौ भुवि। तच्छ्रुत्वा सिन्धुराजस्य ध्यात्वा चिरमरिन्दमः। ज्ञातीन् सर्व्वानुवाचेदं पुत्रस्नेहाभिमोदितः। संग्रामे युध्यमानस्य वहतो महतीं धुरम्। धरण्यां मम पुत्रस्य पातयिष्यति यः शिरः। तस्यापि शतधा मूर्द्धा फलिष्यति न संशयः। एवमुक्त्वा ततो राज्ये स्थापयित्वा जयद्रथम्। वृद्धक्षत्रो वनं यातस्तपोर्थं समास्थितः। स तपस्ते च तेजस्वी तपो घोरं दुरासदम्। समन्तपञ्चकाद्राज्ञादुत्क्रियाँनरकेतन!। तस्माज्जयद्रथस्य त्वं शिरश्छित्त्वा महाहवे। दिव्येनास्त्रेण रिपुहन्! घोरेणाङ्गुतकर्म्मणा। सकुण्डलं सिन्धुपतेः प्रभञ्जनसुतानुज!। उत्सङ्गे पातयाद्याशु वृद्धक्षत्रस्य भारत!। अथ त्वस्य मूर्द्धानं पातयिष्यसि भूतले। तथापि शतधा मूर्द्धा फलिष्यति न संशयः। यथा चेदं न जानीयात् स राजा तपसि स्थितः। तथा कुरु कुरुश्रेष्ठ! दिव्यमस्त्रमुपाश्रितः। न ह्यसाध्यमकार्य्यं वा विद्यते तव किञ्चन। समस्तेष्वपि लोकेषु त्रिषु वासवनन्दन!। एतच्छ्रुत्वा तु वचनं कृष्णस्य परिसंत्रिहन्। इन्द्राग्निसमस्पर्शं दिव्यमन्त्राभिमन्त्रितम्। सर्व्वभारसहं शस्त्रमस्त्रमाल्यार्च्चितं शरम्। विसस्रज्जार्जुनस्तूर्णं सैन्धवस्य वधे धृतम्। ततो धनञ्जयः श्रीमान् शरं तं भास्करत्विषम्। उज्जिहीर्षुः शिरः कायात् सैन्धवस्य महात्मनः। स पार्थभुजनिर्मुक्तः शरः श्येन इवाशुगः। छित्त्वा शिरः सिन्धुपतेरुत्पपात विहायसि। तच्छिरः सिन्धुराजस्य शरेणोर्द्ध्वमवाहयत्। दुर्द्दामस्य वधार्थाय वृद्धक्षत्रस्य च। शरैः कदम्बकीकृत्य काले तस्मिंश्च पाण्डवः। योधयामास तांश्चैव पाण्डवः शस्त्रकारयान्। ततः सुमहदाश्चर्य्यं तत्रापश्याम भारत। समन्तपञ्चकाद्राज्ञां शिरो यद्व्यहरत्ततः। एतस्मिन्नेव काले तु वृद्धक्षत्रो महीपतिः। सन्ध्यामुपास्ते तेजस्वी सन्यस्तो तव मारिष!। उपासीनस्य तस्याथ कृष्णकेशं सकुण्डलम्। सिन्धुराजस्य मूर्द्धानमङ्के समपातयत्। तस्योत्सङ्गे निपतितम् शिरस्त्वारकुण्डलम्। वृद्धक्षत्रस्य नृपतेरचिन्तमरिन्दम!। ततोभीतस्तथाचेष्टं वृद्धक्षत्रस्य भारत! उत्क्षिप्तमात्रं सहसा शिरोऽगच्छद्धरातलम्। ततश्चस्य नरेन्द्रस्य पुत्रमूर्द्धनि भूतलम्। गते तस्यापि शतधा मूर्द्धागच्छदरिन्दम! ततः सर्व्वाणि सैन्यानि विस्मयं जग्मुरुत्तमम्। वासुदेवं सवीभत्सुं प्रशशंसुर्मुहुर्मुहुः। ततो विनिहते राजन्! सिन्धुराजे किरीटिना। तमस्तद्वासुदेवेन संवृतं भरतर्षभ!। यथाज्ञातं महीपाल! तव पुत्रैः महात्मभिः। वासुदेवप्रयुक्तेयं मायेति नृपसत्तम!।"

"जयद्रथवधे राजन्! दुर्य्योधनधनञ्जयौ। सवितारं निरीक्षेते प्रौढ़ा बाला वधूरिव" वृद्धटः।

जयद्रथवध पु॰ जयद्रथस्य वधमधिकृत्य कृतो ग्रन्थः अण् तस्य आख्यायिकायां लुपि व्यक्तिवचनत्वात् पुंस्त्वम्। भारतद्रोणपर्वान्तर्गते अवान्तरपर्वभेदे तच्च द्रोणपर्वणि १४३ अध्यायपर्वणि १५३ अध्यायपर्व्वणम् "जयद्रथवधः पर्व सटोत्कचवधस्ततः" भा॰आ॰१अ॰ अवान्तरपर्वौक्तौ।

जयद्रथविमोक्षण न॰ जयद्रथस्य विमोक्षणमधिकृत्य कृतो ग्रन्थः अण् तस्य आख्यायिकायां लुपि व्यक्तिवचनत्वात् क्लीवता। भारतवनपर्वान्तर्गते अवान्तरपर्वभेदे तच्च पर्व वनपर्वणि २७ अध्यायात्मकम्। "द्रौपदीहरणं तत्र जयद्रथविमोक्षणम्" भा॰आ॰ १अ॰ अवान्तरपर्वौक्तौ।

जयधर्म्मन् पु॰ कुरुसेनानीभेदे। "कमलाक्षः परक्राथी जयधर्म्मा सुदर्शनः। एते त्वामनुयास्यन्ति पत्तीनामयुतानि षट्" भा॰ द्रो॰ १५६ अ॰।

जयध्वज पु॰ कार्त्तवीर्य्यार्জ্জুनस्य तनये आयन्त्रे वृष्णिभेदे "शूरसेनश्च शूरश्च वृष्णोश्च कृष्ण एव च। जयध्वजश्च नाम्नासीदावन्त्यो नृपतिर्महान्। कार्त्तवीर्य्यस्य तनया वीर्य्यवन्तो महाबलाः। जयध्वजस्य पुत्रस्तु तालजङ्घो महाबलः" हरिवं॰ ३४ अ॰।

जयन न॰ जि-करणे ल्युट्। १इत्यादिसङ्घाते "तुरङ्गिणो जयनयुजश्च वाजिनः" माघः। भावे ल्युट्। २जये मेदि॰।

जयनी स्त्री इन्द्रकन्यायाम् त्रिका॰।

जयन्त पु॰ जि-झ। १इन्द्रपुत्रे अमरः २शिवे ३चन्द्रे च त्रिका॰। विराटावासे ऊरुवेगिनि ४भीमे तस्य तथानुष्ठानामता जयशब्दे दृश्या। ५विष्णौ "जयन्तः सर्वविज्जयी" विष्णुस॰। ६रुद्रभेदे "अजैकपादहिर्बुध्नो विरूपाक्षोऽथ रैवतः। हरश्च बहुरूपश्च त्र्यम्बकश्च

सुरेश्वरः। सावित्रश्च जयन्तश्च पिनाकी चापराजितः" भा० श्रा० २०८ अ०। रुद्रोक्तौ "अजैकपादहिर्बुध्नो विरूपाक्षश्च रैवतः। हरश्च बहुरूपश्च त्र्यम्बकश्च सुरेश्वरः। रुद्रा एकादश प्रोक्ता जयन्तश्चापराजितः" विष्णुध० "यथा जयन्तेन शचीपुरन्दरौ" "त्रिविष्टपस्थोऽपि पतिं जयन्तः" इति च रघुः। ७तालभेदे "आदितालो जयन्तः स्यात् रुद्रैररससंयुतः। रुद्रसंख्या चरपद आयुर्द्विकरः परः" सङ्गीतदामोदरः।

जयन्ती स्त्री जि-झ गौरा० ङीष्। १दुर्गायां शक्तिभेदे "जयन्ती मङ्गला काली भद्रकाली कपालिनी। दुर्गा शिवा क्षमा धात्री स्वाहा स्वधा नमोऽस्तुते" कालिपु०। २जयन्तभगिन्यां शक्रपुत्र्यां ३पताकायां च मेदि०। ४स्वनामख्याते वृक्षभेदे सा च नवपत्रिकान्तर्गता "कदली दाड़िमी धान्यं हरिद्रा मानकं कचुः। विल्वोऽशोको जयन्ती च विज्ञेया नव पत्रिकाः" दुर्गाशब्दे पद्धतिः। तदधिष्ठात्री देवता च कार्त्तिकी मूलं तत्रैव दृश्यम्। "जयन्ती मदगन्धाढ्या तिक्ता चैव कटूष्णिका। कृमिमूत्रामजित् ख्याता कण्ठशोधनकारका। कृष्णा रसायनी तत्र सैव सर्वत्र पूज्यते" राजनि०। "तच्चाकं विषदोषघ्नं चतुष्यं मधुरं हिमम्" राजव० "जयं पुत्रत्वञ्च कुरुते जयन्तीमिति तां विदुः। रोहिणीसहिता कृष्णा भाद्रे च श्रावणेऽष्टमी। अर्द्धरात्रादधश्चोर्द्ध कलयापि यदा भवेत्। जयन्ती नाम सा प्रोक्ता सर्वपापप्रणाशिनी" ति० त० स्कान्दोक्ते ५श्रावणकृष्णाष्टमी रोहिणीयोगे कृष्णाष्टमीशब्दे २२२१ पृ०विवृतिः। "अभिजिन्नाम नक्षत्रं जयन्ती नाम शर्वरी। मुहूर्त्तोविजयो नाम यत्र जातो जनार्द्दनः" हरिवं० ६०अ० "यत्र क्षोऽगतचन्द्रो लग्नादेकादशे स्थितः। जयन्तो नाम योगोऽयं शत्रुपक्षविनाशकृत्" ज्योतिषोक्ते ६यात्रायोगविशेषे पु०। "प्रभावनीके तनवै जयन्तीः" माघः। स्वार्थे क। जयन्तिका तत्रार्थे संज्ञायां कन्। हरिद्रायां राजनि०। दुर्गासखीभेदे च। तद्भेदाश्च काशी०४७अ०दर्शिता यथा। "यथा जया च विजया यथा चैव जयन्तिका। शुभानन्दा सुनन्दा च कौशिकी च यशोर्मिला। यथा चम्पकमाला च यथा भद्रयवासिनी। कर्पूरवतिका यद्वदसृग्धारा यथा शुभा। अशोका च विशोका च यथा कमलगन्धिनी। यथा च मन्दनिःश्वासा यथा खगमदोत्तमा। यथा च कोकिलालापा यथा मयूरभाषिणी। गन्धपद्मनिधिर्यद्वदत्तकन्या यथा च सा। दृगञ्चलेङ्गितज्ञा च यथा कृतमनोरथा। मानचित्तहरा यद्वत्तथा स्त्रेणा सुलक्षणा"।

जयपत्र न० जयसूचकं पत्रम्। राज्ञा दत्ते जयसूचके पत्ररूपे राजकीयलेख्यभेदे। राजलेख्यं पत्रं च चतुर्विधं यथाह वशिष्ठः "राज्ञः स्वहस्तसंयुक्तं मुद्राचिह्नितं तथा। राजकीयं कृतं लेख्यं सर्वत्रार्थेषु साक्षिमत्। शासनं प्रथमं ज्ञेयं जयपत्रं तथाऽपरम्। आज्ञाप्रख्यापनापत्रं राजकीयं चतुर्विधम्"। जयपत्रलक्षणभेदादिकं वीरमि० दर्शितं तत्राह व्यासः

"व्यवहारान् स्वयं दृष्ट्वा श्रुत्वा वा प्राड्विवाकतः। जयपत्रन्ततो दद्यात् परित्राणाय पार्थिवः। जङ्गमं स्थावरं वेन प्रमाणेनात्मसात्कृतम्। भागाभिशापसन्दिग्धे यः सम्यग्विजयी भवेत्। तस्मै राज्ञा प्रदातव्यं जयपत्रं सुनिश्चितम्। पूर्व्वोत्तरक्रियापादं तत्प्रमाणपरीक्षणम्। निगदश्रुतिवाक्यञ्च यथासभ्यं विनिश्चितम्। एतत्सर्वं समासेन जयपत्रेऽभिलेखयेदिति"। प्रमाणस्य पृथग्ग्रहणात् क्रियापादेन प्रत्याकलितमत्र गृह्यते। परित्राणाय प्राड्न्यायस्य बोधनाय। भागेऽभिशापे वा सन्दिग्धे। विवादपदमत्रोपलक्षणम्। तेन विवादविषयो यो यत्र विवादे स तत्र लेखनीयः। जयपत्रं राजमुद्राङ्कितं कार्य्यमित्याह हरिवंशिष्टः "यथोपन्यस्तसाध्यार्थं संयुक्तं क्षोत्तरक्रियम्। सावधारणकञ्चैव जयपत्रकमुच्यते। प्राड्विवाकादिहस्ताङ्कं मुद्रितं राजमुद्रया"। अत्र च राज्ञः सभ्यानाञ्च स्वहस्तोऽभ्येक्षितः इत्याह कात्यायनः "सिद्धेनार्थेन संयोज्यो वादी सत्कारपूर्वकम्। लेख्यं स्वहस्तसंयुक्तं तस्मै दद्यात्तु पार्थिवः। सभासदश्च ये तत्र ऋत्विगाख्यविदः स्थिताः। यथा लेख्यविधौ तत्र स्वहस्तान्दद्युरेव ते"। क्वचित्प्रशस्त्याख्योऽपि जयपत्रभेद उक्तस्तेनैव "अनेन विधिना लेख्यं प्रशस्त्यारं विदुर्बुधाः। निरस्ता तु क्रिया यत्र प्रमाणेनैव वादिना। प्रशस्त्यारो भवेत्तत्र न सर्वासु विधीयते। अन्यवाद्यादिहीनेभ्य इतरेषां प्रदीयते। इत्यनुवादसंसिद्धत्वञ्च स्याज्जयपत्रकमिति।"

जयपाल पु० जयं पालयति पालि-अण् उप०स०। १विष्णौ २विष्णौ ३भूपाले च शब्दच० (जमालगोटा) ४स्वनामख्याते वृक्षभेदे। "जयपालः कटुः पाके उष्णश्चैव विरेचनः। कृमिश्लेष्मामजठरामयकृत् दीपनोमतः" राजनि०।

जयपुत्रक पु० पुत्र इव पुत्रकः जयसूचकः पुत्रकः। पायक-भेदे शब्दर०।

जयप्रिय पु० विराटस्यभ्रातृभेदे। "गजानीकः शुतानीको वीरभद्रः सुदर्शनः। शुतध्वजो बलानीको जयानीको जयप्रियः। विजयो जयत्सेनश्च जयाश्वो रथवाहनः। चन्द्रोदयः कामरूपो विराटभ्रातरः शुभाः" भा० द्रो० १५८ अ०। २कुमारानुचरभेदे स्त्री "कुहाऽस्विका निष्कुटिका वामा चत्वरवासिनी। सुमङ्गला खस्तिमती वृद्धिकामा जयप्रिया" भा० शल्य० ४७ अ०।

जयमङ्गल पु० जयेन मङ्गलमस्मात्। १राजवाजे हस्तिभेदे शब्दरत्ना०। "चतुर्विंशतिवर्षोद्भूः कथितो जयमङ्गलः। हङ्कारवीरयोरेव ताले चाँचपुटे च सः" सङ्गीतदा० उक्ते २ध्रुवकभेदे च।

जयमङ्गलरस पु० जयेन रोगजयेन मङ्गलं यस्मात् ताडशो रसः। वैद्यकोक्ते सर्वज्वरनाशके औषधभेदे। "चिङ्गूलसम्भवं सूतं गन्धकं टङ्कणं तथा। ताम्रं पञ्चं माक्षिकञ्च सैन्धवं मरिचं तथा। समं सर्वं समाकृत्य द्विगुणं स्वर्णभस्मकम्। तदर्द्धं कान्तलौहञ्च रूप्यभस्मापि तत्समम्। एतत् सर्वं विचूर्ण्याथ भावयेत् कनकद्रवैः। भृङ्गाली-दलजैश्चापि दशमूलरसेन च। किराततिक्तकाथैस्त्रिवारं भावयेत् सुधीः। भावयित्वा तु तत्काथ्यां गुञ्जाद्वयमिता वटी। अनुपानं प्रयोक्तव्यं जीरकं मधुसंयुतम्। जीर्णं ज्वरं महाघोरं चिरकालसमुद्भवम्। ज्वरमष्टविधं हन्ति साध्यासाध्यमथापि वा। पृथग्दोषांश्च विविधान् समस्तान् विषमज्वरान्। १मेदोगतं २मांसगतमस्थिश्मज्जा४गतं तथा। ५अन्त्रगतं महाघोरं हृद्यक्लिस्थञ्च विशेषतः। ७नानादोषोद्भवञ्चैव ज्वरं दशुक्रगतं तथा। निखिलं ज्वरनामानं हन्ति श्रीशिवशासनात्। जयमङ्गलनामायं रसः श्रीशिवनिर्म्मितः। बलपुष्टिकरश्चैव सर्वरोगनिवर्हणः" भैषज्यरत्नावली। अत्र द्विगुणं स्वर्णभस्मकमित्यत्र सर्वेषां समस्तानां यत्रानं ततो द्विगुणं स्वर्णमिति सख्यः कल्पः। अन्ये कामेच्छया द्विगुणमिति कल्पिताः कल्पः।

जयरात पु० कलिङ्गराजसुतभेदे। कलिङ्गसुतयुद्धोपक्रमे "जयरातरथस्याथ सङ्घः सिंह इवानदत्। जयरातमथाचिक्षेपानदत् सव्येन पाणिना" भा० द्रो० १५५ अ०।

जयवाराहतीर्थ न० तीर्थभेदे शिवपु०।

जयवाहिनी स्त्री जयस्य जयस्य वाहिनी। १शच्याम् २इन्द्राण्याम् हेमच०। "चारुधारा महेन्द्राणी चेन्द्राणी जयवाहिनीति" पाठान्तरम्। कर्म्म०। २जययुक्तसैन्ये स्त्री शब्दार्थचि०।

जयशब्द पु० जयसूचकः शब्दः शाक०त०। १जयध्वनौ। "उद्घुष्टनैकजयशब्दविराविताशाम्" हरिवं० १० अ०।

जयसिंह पु० जयपुराधीश्वरे जयसिंहकल्पद्रुमाख्यस्मृतिनिबन्धकारके नृपभेदे।

जयसेन पु० जयशुक्ला सेनाऽस्य। १मागधे नृपभेदे "शुतायुधश्च कलिङ्गो जयसेनश्च मागधः" भा० स० ४अ०। आयुष्मत्पर्वभ्रे २अहीनसुते नृपभेदे। "सहदेवस्ततोऽहीनो जयसेनस्तु तत्सुतः" भाग० ९।२२।१०।

जयस्तम्भ पु० जयसूचकः स्तम्भः। देशान्तरजयानन्तरं स्वकीर्त्तिख्यापनाय राज्ञा स्थाते जयसूचके स्तम्भे। "त्रिकूटमेव ततोऽसौ जयस्तम्भं चकार सः" "निचखान जयस्तम्भान् मङ्गलोल्लरेषु सः" रघुः।

जयस्वामिन् पु० कात्यायनकल्पसूत्रव्याख्यातृभेदे। "तत्र शिरः कर्णौ चाप्राहतौ तद्व्यतिरिक्तं सर्वं शरीरमाज्यादनीयमिति जयस्वामिनः" कात्या० श्रौ० १०।६।२ सूत्रभाष्ये कर्कः।

जया स्त्री जि-अच्। १जयन्तीवृक्षे अमरः। रोगजयात् तस्यास्तथात्वम्। २दुर्गासहचरीभेदे। जयन्तिकाशब्दे दृश्यम्। "नन्दा भद्रा जया रिक्ता पूर्णा च प्रतिपत्क्रमात्" ज्यो०उक्ते उभयपक्षीयदशतीयाष्टमीत्रयोदशीरूपे श्रुतिथिभेदे ४हरीतक्यां मेदि०। ५विजयायां (भाङ्) हेमच०। दुर्गायाम्। ७अग्निमन्थवृक्षे राजनि०। ८पताकाभेदे युक्तिकल्पतरुः। "जयः कल्याणवचन आकारो दातृवाचकः। जयं ददाति सा नित्यं सा जया परिकीर्त्तिता" ब्रह्मवै० उक्तनिरुक्तियुक्तायां दुर्गायाम्। "जया त्वं विजया चैव संग्रामे च जयप्रदा। सर्वापि विजयं देहि वरदा त्वञ्च शाश्वतम्" भा०वि०६अ० दुर्गास्तुतिः। सा च गौर्य्यादिषु षोडशसु मातृषु अन्यतमा। यथाह स्कन्दपरिशिष्टम् "गौरी पद्मा शची मेधा सावित्री विजया जया। देवसेना स्वधा स्वाहा मातरो लोकमातरः। धान्तिः पुष्टिर्धृतिस्तुष्टिरात्मदेवतया सह। आदौ विनायकः पूज्यो ह्यन्ते च कुलदेवता"।

जयादित्य पु० व्याकरणग्रन्थकारके विद्वद्भेदे।

जयानीक पु० १द्रुपदसुतभेदे जयशब्दे दृश्यम्। २विराटभ्रातृभेदे जयप्रियशब्दे दृश्यम्।

जयावती स्त्री जय-अर्शआद्यच् मतुप् मस्य वः संज्ञायां दीर्घः

ङीप्। कुमारानुचरमातृभेदे। "जयावती मालतिका ध्रुवरत्ना भयङ्करी" भा० श० ४७ अ०। कुमारानुचरमातृगणोक्तौ।

**जयावहा** स्त्री जयं रोगजयमावहति आ+वह-अच्। भद्रदन्तीवृक्षे राजनि०। [राजनि०।

**जयाश्रया** स्त्री जयमाश्रयति आ+श्रि-अच्। जरड़ीतृणे

**जयाश्वः** पु० विराटभ्रातरि जयप्रियशब्दे दृश्यम्।

**जयाह्वा** स्त्री जयमाह्वा आह्वा यस्याः। भद्रदन्तीवृक्षे राजनि०

**जयिन्** त्रि० जि-शीलार्थे इनि। जयशीले। "उद्यता जयिनि कामिनीमुखे तेन साकसमनुष्ठितं पनः" काव्यप्र० "जगति जयिनस्ते भावा नवेन्दुकलादयः" शा० द०। "पौरस्त्यानेवमाक्रामन् तांस्तान् जनपदान् जयी" रघुः स्त्रियां ङीप्।

**जयिष्णु** त्रि०जि-बा० स्नुच्। १जयशीले। "आरुरुक्षाव यथा वीरा दुरापाराजयिष्णवः" भा० द्रो० ३३ अ०।

**जयुस्** त्रि० जि-उसि। जयशीले। "वि जयुषा रथ्या यातमद्रिम्" ऋ०६।६२।७ "वि जयुषा ययथुः सान्वद्रेः" १।११७।१६ "जयुषा जयशीलेन" भा०।

**जय्य** त्रि० जेतुं शक्यः जि-यत् "ऋज्यजय्यौ" तदर्थे पा०नि०। जेतुं शक्ये अमरः। "सोऽयं मनुष्यलोकः पुत्रेणैव जय्योनान्येन कर्म्मणा" शत० ब्रा० १४।४३।२४।

**जर** पु० जॄ-भावे अप्। १जरायां वयोहानौ "द्वादशारं नहि तज्जराय वर्वर्त्ति चक्रम्" ऋ० १।१६४।११। २विनाशने च। "त्रितं जराय जुरतामदाभ्याः" ऋ०२।३४।१०। "जराय विनाशनाय" भा०।

**जरठ** त्रि० जॄ-बा० अठ। १कर्कशे कठिने २पाण्डुरूपे पु० मेदि०। ३जीर्णे त्रि०हेम० ४जरायां विश्वः। "नीरन्ध्रास्तनुमालिखन्तु जरठच्छेदानलग्नन्धयः" शा० द०। "व्यथयति जरठाः प्रकामगुर्व्वीः" माघः। ५परिणते च। "जरठकमलकन्दच्छेदगौरैर्मयूखैः" माघः।

**जरडी** स्त्री जॄ-बा अड गौरा० ङीप्। गर्गसंहितायां तृणभेदे राजनि०। "जरडी मधुरा प्रीता सारिका रुचिकारिणी। दाहरक्तदोषहृत् सा पथ्यानां दुग्धदायिनी" राजनि०।

**जरण** त्रि० जॄ-ल्यु। १जीर्णे २जीरके ३कृष्णजीरके ४सौवर्चलवणे च पु० शब्दर०। ५छिक्कनि ६कुक्कुरभेदौ न०। ७कामदेवे पु० राजनि०। ८कृष्णजीरके स्त्री राजनि०। "भद्रं जीवन्तो जरणामशीमहि" ऋ० १०।२७।६। ९जरायां स्त्री "विप्रस्य जरणामेयुषः" १०।१६।८ "प्रातर्जरेथे जरणेव कापया" १०।४०।२। स्तुत्यर्थक-जरते-युच्। १०स्तौ "वक्ता जरणा अनाजतः" ऋ०१।१४१।७। "जरणा स्तुतिः" भा०।

**जरणद्रुम** पु० नित्यक०। अश्वकर्णवृक्षे।

**जरणि** त्रि० जॄ-अनि। स्रोतरि। "अग्निं कृधी जरणिमा कृष्ण्याः" ऋ०१०।१०।१२। "जरणिमाः स्रोतृणां पूरयित्नुः"

**जरण्या** स्त्री जरणमर्हति "अन्यावस्या च्छन्दसि च" पा०यत्। जरायाम्। "युवं वन्दनं निर्ऋतिं जरण्यया" ऋ०१।११६७। "जरण्यया जरया" भा० तत्र उक्तैव व्युत्पत्तिर्दर्शिता। जरण्यतेति शब्दकल्पनं प्रामादिकमेव।

**जरण्यु** त्रि०जरणं स्तुतिमिच्छति क्यच्-उन्। स्तावनेच्छौ "ऋतस्तरण्युः कारवे जरण्युः" ऋ० १०।६१ २३ जरण्युः स्तुतिमिच्छन्" भा०।

**जरत्** त्रि० जॄ-अतृ। १जीर्णे २वृद्धे जरद्वैयाधिकः जरन्मांसकः जरद्गवः। स्त्रियां ङीप् जरती चर्ह जरती।

**जरत्कर्ण** पु०ऋषिभेदे "अग्निहृत्वं जरतः कर्णमावाग्निः" ऋ० १०।८०।३। "जरतः कर्णं जरत्कर्णनामानमृषिम्" भा०।

**जरत्कारु** पु०१मुनिभेदे तत्पत्न्यां २मनसादेव्यामास्तीकमातरि च। तत्कथा "सौतिरुवाच। एतच्छ्रुत्वा जरत्कारुर्भृशं शोकपरायणः। उवाच तान् पितॄन् दुःखाद्बाष्पसन्दिग्धया गिरा। जरत्कारुरुवाच। मम पूर्वे भवन्तो वै पितरः सपितामहाः। तद्ब्रूत यन्मया कार्य्यं भवतां प्रियकाम्यया। अयमेव जरत्कारुः किमिति भवतां सुतः। ते दण्डं धारयत मे दुष्कृतेरक्षतात्मनः। पितर ऊचुः। पुत्र! दिष्ट्यासि संप्राप्त इमं देशं यदृच्छया। किमर्थञ्च त्वया ब्रह्मन्! न कृतो दारसंग्रहः। जरत्कारुरुवाच। ममायं पितरो! नित्यं हृद्यर्थः परिवर्त्तते। ऊर्द्ध्वरेताः शरीरं वै प्रापयेयमसंशयं। न दारान् वै करिष्येऽहमिति मे भावितं मनः। एवं दृढा तु भवतः शकुनानिव जम्बुतः। मया निवर्त्तिता बुद्धिर्न्नेच्छन्त्यात् पितामहाः!। करिष्ये वः प्रियं कामं निर्वेक्ष्येऽमसंशयम्। मनाग्नौ यदृहं कन्यामुपलप्स्ये कदाचन। भविष्यति च या काचित् भैक्षवत् स्वयमुद्यता। प्रतीयहीता तामस्मि न भरेयञ्च यामहम्। एवंविधमहं कुर्य्यां निर्वेशं प्राप्नुयां यदि। अन्यथा न करिष्येऽहं सत्यमेतत् पितामहाः!। तत्र चोत्सृते जन्तुर्भवतां तारणाय वै। शाश्वताश्चाव्य-

यावदेव तिष्ठन्तु पितरो मम। सूत उवाच। एवमुक्ता तु स पितॄंश्चचार पृथिवीं मुनिः। न च स्म लभते भार्यां दह्यमानेति शौनक!। यदा निर्वेदमापन्नः पितृभिश्चोदितस्तथा। तदारण्यं स गत्वोच्चैरुक्रोश मुहुर्दुःखितः। स तत्रस्थगतः प्राह्रः पितॄणां हितकाम्यया। उवाच कन्यां याचामि तिस्रोवाचः शनैरिमाः। यानि भूतानि सन्तीह स्थावराणि चराणि च। यन्नर्हितानि वा यानि तानि मृण्वन्तु मे वचः। उग्रे तपसि वर्त्तन्तं पितरश्चोदयन्ति माम्। निर्वंशक्लेति दुःखार्त्ताः सन्तानस्य चिकीर्षया। निर्वंशायाखिलां भूमिं कन्याभैक्षं चरामि भोः। दरिद्रो दुःखशीलश्च पितृभिः सन्नियोजितः। यस्य कन्यास्ति भूतस्थ ये मयेह प्रकीर्त्तिताः। ते मे कन्यां प्रयच्छन्तु चरतः सर्वतो दिशम्। मम कन्या सनाम्नी या भैक्षवच्चोद्यता भवेत्। भरेयञ्चैव यां नाहं तां मे कन्यां प्रयच्छत। ततस्ते पन्नगा ये वै जरत्कारौ समाहिताः। तामादाय प्रहृत्तिस्ते वासुकेः प्रत्यवेदयन्। तेषां श्रुत्वा स नागेन्द्रस्तां कन्यां समलङ्कृताम्। प्रस्थापयामास तदा समीपं तस्य पन्नगैः"। भा॰आ॰ ४६ अ॰ इतः परमास्तीकशब्दे ८६२ पृ॰ दृश्यम्। "यो जरत्कारुणा जातो जरत्कारौ महायशाः" तत्रैव। [शब्दर॰।

**जरत्कारुप्रिया** स्त्री ६त॰। मनसादेव्यामास्तीकमातरि

**जरतिन्** जॄ–अतच् जरतः ततः अस्त्यर्थे इनि। जरायुक्ते ततःशुभ्रा॰अपत्ये ढक्। आरतिनेय तदपत्ये पुंस्त्री॰।

**जरद्गव** पु॰ कर्म्म॰ टच् समा॰। १वृद्धवृषे अमरः जरन् गौरिव टच्समा॰। २स्थविरे "अज्ञातकुलशीलस्य वासो देयो न कस्यचित्। माञ्जरस्य हि दोषेण हतो वृद्धो जरद्गवः" हितो॰। जरन् क्षीयमाणो गौर्धर्म्मोऽस्य। शास्त्रप्रतिपादिते क्षीयमाणे २धर्म्मरूपवृषे। "नैतस्येह यथास्माकं शश्वच्छास्त्रं जरद्गवः। अतस्तु चतुष्पदो मूर्खस्तेन पीवान् गुना सह" भा॰ अनु॰ १३ अ॰। "शास्त्रं तत्प्रतिपादितः जरन् क्षीयमाणो धर्म्मः" नीलक॰। आकाशस्थे ४वीथिभेदे स्त्री ङीप्। "नागगजैरावतवृषभगोजरद्गवमृगाजदहनाख्या" इत्युपक्रमे "जरद्गव्यां श्रवणात् त्रिभं मृगाख्या त्रिभञ्च मैत्राद्यम्" बृ॰स॰ ९अ॰।

**जरद्विप्** त्रि॰ जरतो वृद्धान् वेवेष्टि विष–क्विप् ६त॰। जरत् विप्रं जलं यस्मात्। १जीर्णशुष्कवृक्षव्यापके २जीर्णोदकके वृक्षौ। "त्वामग्ने यतिषं पूर्वम् मुशर्माणं सरसं जरद्विषम्" ऋ॰५।८।२ "जरद्विषं जरतां वृक्षाणां विषं व्यापकं जीर्णोदकं वा" भा॰। [त्रिका॰।

**जरन्त** पुंस्त्री जॄ–झच् १महिषे स्त्रियां ङीप्। २वृद्धे त्रि॰

**जरमान** पु॰ ऋषिभेदे ततो गर्गा॰ गोत्रे यञ्। जारमान्य तद्गोत्रापत्ये पुंस्त्री स्त्रियां ङीप् यञोपः। जारमानी।

**जरसान** पु॰ जॄ–असानच्। पुरुषे उज्ज्वलदत्तः।

**जरा** स्त्री जॄ–अङ् गुणः। १वयःकृतसप्तमांशादवस्थाविशेषे "कृष्णवर्त्मनि सुखानु गमयन्ती जीवनेषु लघुनव्यनुरागम्। आगता वत जरैव हिमानी सेव्यतां सुरतरङ्गिणी" उद्भटः "मदेकशुद्धा जननी जरातुरा" नैष॰ २जराहेतौ "या कृष्टमनसा नित्यं स्यानमानविचक्षणा। भर्तुः प्रीतिकरी नित्यं सा भार्य्या कीर्त्तिता जरा" ३जराधिष्ठातृदेवताभेदे। सा तु कालकन्या। यथा "कालकन्या जरा साक्षात् लोकान् नाभिनन्दति। संसारं जन्तवे मृत्युः क्षयाय जगतामिह" भागवतम्। जरातिक्रमोपायश्च दर्शिता यथा "मृत्यू रोगाः सुताश्चैव जरा तस्य च कन्यका। जरा च भ्रातृभिः सार्द्धं शश्वद्भ्रमति भूतलम्। एते चोपायवेत्तारं न गच्छन्ति च साम्प्रतम्। पलायन्ते च तं दृष्ट्वा वैनतेयमिवोरगाः। चतुर्जलस्य व्यायामः पादाभ्यङ्गस्तैलसेवनम्। कर्णे तैलं मूर्द्धि तैलं जराव्याधिविनाशनम्। वस्त्रे भ्रमणं वह्निसेवा ऽस्वप्नंकरोति यः। वातघ्नेन सेवते काले जरा तं नोपगच्छति। स्नातशीतोदकस्नायी सेवते चन्दनद्वयम्। नोपयाति जरा तस्य निदाघेऽनिलसेविनम्। प्रावृड्डुष्णोदकस्नायी घनतोयं न सेवते। समये च समाहारी जरा तं नोपगच्छति। शरद्रौद्रं न स्पृशति भ्रमणं तस्य वर्जयेत्। स्नातस्नायी समाहारी जरा तं नोपतिष्ठते। स्नातस्नायी च हेमन्ते काले वह्निं निषेवते। भुङ्क्ते नवान्नमश्नाति जरा तं नोपगच्छति। शिशिरेऽगुरुवह्निं च नवोष्णान्नञ्च सेवते। य एवोष्णोदकस्नायी जरा तं नोपगच्छति। सद्योमांसं नवान्नञ्च वालस्त्रीं क्षीरभोजनम्। एतच्च सेवते योहि जरा तं नोपगच्छति। भुङ्क्ते सदन्नं चुत्काले तृष्णायां पीयते जलम्। नित्यं भुङ्क्ते च ताम्बूलं जरा तं नोपगच्छति। दधि क्षैयङ्गवीनञ्च नवनीतं तथाशुभम्। नित्यं भुङ्क्ते संयमी यो जरा तं नैव गच्छति। शुष्कमांसं स्त्रियो वृद्धा बालार्कस्तरुणं दधि। तं सेवन्ते

जरा याति पञ्चत्वं भार्याभिः सह। रात्रौ वे दधि सेवन्ते पंचनीञ्च रजस्वलाम्। तमुपैति जरा क्षिप्रं भार्याभिः सह सुन्दरि! इतिब्रह्मवैव०ब्रह्मख०। ४राक्षसीभेदे जरासन्धशब्दे दृश्यम्। ५क्षीरिणीवृक्षे शब्दच०। ६स्तुतौ निरु०। "जरायोध! तद्विविड्ढि" ऋ०१।१७।१० इत्यस्यान्वचि निरुक्ते ४।९।२। "जरा स्तुतिर्जरतेः स्तुतिकर्मणः" इत्युक्तम्।

ऋजादौ प्रत्यये परे सख्ये गौणे च वा जराया जरस्। जरसी जरे जरया जरसा। "न ह्यस्या अपरं चन जरसा मरते पतिः" निरु०११।३८ "धृता व्रतं "इन्द्रत्वं जरसा विना" "सगरार्थं" जरसोपदिष्टम्" रघुः गौणे "गीतजन्म जरसं परं शुचिः" किरा० निर्जरसम् निर्जरम्। "अजरांसि च वस्त्राणि धारयन्ति गतक्रमाः" भा०अनु० १२३अ०। अव्ययीभावसमासे नित्यम् अच् जरस् च भा० जरायाः अभावः अजरसम्। सच जरया सजरसम्। ७निषादभेदे। "जरानामनिषादानां प्रभुः सर्वधनुष्मताम्" हरिवं० १६२ अ०। जरेति नाम येषां तेषां निषादानाम् इत्यर्थः। तत्र स्तुतौ "तासां जरां प्रमुञ्चेति"। ऋ० ३।१४०।८ "अच्छावदा तना गिरा जरायै ब्रह्मणस्पतिम्"। १।२८।१२। [ जरातुरा" नैष०।

**जरातुर** त्रि० ३त०। १जीर्णे २जरायस्ते शब्दर० "जननी

**जरापुष्ट** पु० ३त०। जरासन्धे रूपे शब्दर०।

**जराबोध** पु०जरया स्तुत्या बुध्यति बुध-अच्। स्तुत्याबोधमानाग्नौ "जराबोध तद्विविड्ढि विशे यस्मिन्नाय" ऋ० १।२७।५। "जरया स्तुत्या बोधमानाग्नेः" भा० तत्र जराबोधेत्यस्यान्वचि भवः अ। जराबोधीय जराबोधेत्यस्यान्वचि गीयमाने सामभेदे "अग्नेः युङ्क्ष्वा हियेत चेति जराबोधीयमग्निष्टोमसाम कार्य्यम्" ताण्ड्य० ४।२।१५।

**जराभीरु** पु० जरातो भीरुः ५त०। १कामदेवे हेमच०। तस्य जीर्णवयसि क्षीयमानत्वात् तथात्वम्। २जरातो भयशीले त्रि०।

**जरायणि** पु० जरायां राक्षस्यां भवं तया पाल्यत्वात् वा०ञ्फि। जरासन्धे मागधे रूपे शब्दर०।

**जरायु** पु० जरामेति ६-उण्। १गर्भावरणचर्मणि २गर्भाशये, "जरायुणा सख्ये वस्त्रे कण्ठे च कवचेवेष्टिते। वायोर्मार्गनिरोधाच्च न गर्भस्थः प्ररोदिति" सुश्रु०। "या तु चर्मावृतिः सूक्ष्मा जरायुः सा निगद्यते" देवीभाग० ३जटायौ पक्षिणि च मेदि०। ४अग्निजारवृक्षे राजनि०। ५कुमारानुचरमातृभेदे। "पक्षालिका मत्कुणिका जरायुर्ज्जर्जरानना" भा० श० ४७ अ०।

**जरायुज** त्रि० जरायौ जायते जन-ड ७त०। जरायुमध्यजाते मनुष्यादौ अमरः। जरायुजभेदाश्च मनुना दर्शिता यथा "पशवश्च मृगाश्चैव व्यालाश्चोभयतोदतः। रक्षांसि च पिशाचाश्च मनुष्याश्च जरायुजाः" "पशवः गवाद्याः मृगा हरिणाद्या व्यालाः सिंहाद्याः" कुल्लू० "त्रीण्यन्यानि भूतानां चतुर्थं नोपपद्यते। स्वेदमापस्तथाकाशं जन्म चापि चतुर्विधम्। अण्डजोद्भिज्जसंस्वेदजरायुजमथापि वा। चतुर्द्धा जन्म दृष्टेतद्भूतग्रामस्य लक्षणम्" इत्युपक्रमे "द्विपादश्चतुष्पादानि तिर्य्यग्गतियुतानि च। जरायुजानि भूतानि" भा० आनु०४२अ०। संक्षेपेणोक्ताः। "या तु चर्मावृतिः सूक्ष्मा जरायुः सा निगद्यते। शुक्रशोणितयोर्योगस्तस्मिन् संजायते यतः। तत्र गर्भो भवेद्यस्मात्तेन प्रोक्तो जरायुजः" इति देवीभाग०।

**जरासन्ध** पु० जरया राक्षस्या सन्धा देहयोजनमस्य। बृहद्रथभूपसुते मागधे रूपे तत्पोत्पत्तिकथा यथा। "राजा बृहद्रथो नाम मगधाधिपतिर्बली" इत्युपक्रमे।

"नाससाद रूपचेष्टः पुत्रं कुलविवर्द्धनम्। अथ काशीपतेः पुत्रं गौतमस्य महात्मनः। शुश्राव तपसि श्रान्तस्तदारं चण्डकौशिकम्। यदृच्छयागतं तन्तु इक्ष्वमूलफलाश्रितम्। पत्नीभ्यां सहितो राजा स च रत्नैरतोषयत्। तमब्रवीन्महर्षिः सत्यवाग्दमिनां वरः। परितुष्टोऽस्मि राजेन्द्र! वरं वरय सुव्रत!। ततः सभार्यः प्रणतस्तमुवाच बृहद्रथः। पुत्रदर्शननैराश्याद्वाष्पसंदिग्धया गिरा। राजोवाच। भगवन्नाज्यसुतस्यास्य प्रस्थितोऽहं तपोवनम्। किं वरैरल्पभाग्यस्य किं राज्येनाप्रजस्य मे। ऋषिरुवाच। एतत् श्रुत्वा मुनिर्ध्यानमगमत् क्षुभितेन्द्रियः। तस्यैव चाम्रवृक्षस्य छायायां समुपाविशत्। तस्योपविष्टस्य मुनेरुत्सङ्गे निपपात ह। खादानमशुकादष्टमेकमाम्रफलं किल। तत् प्रगृह्य मुनिश्चेदो हृदयेनाभिमन्त्र्य च। राज्ञे ददावप्रतिमं पुत्रसंप्राप्तिकारणम्। उवाच च महाप्राज्ञस्तं राजानं महामुनिः। गच्छ राजन्! कृतार्थोऽसि निवर्त्तस्व नराधिप!। एतत् श्रुत्वा मुनेर्वाक्यं शिरसा प्रणिपत्य च। मुनेः पादौ महाप्राज्ञः स रूपः स्वगृहं गतः। यथासमयमासाद्य तदा स

ततस्तमजितं जेतुं जरासन्धं वृकोदरः । संरम्भं बलिनां श्रेष्ठो जग्राह कुरुनन्दनः । भीमसेनस्ततः कृष्णमुवाच यदुनन्दनम् । बुद्धिमास्थाय विपुलां जरासन्धवधेप्सया । नायं पापो मया कृष्ण ! युद्धः स्यादतुरो धतुम् । प्राणेन यदुशार्दूल ! बद्धकक्षेण वामता । एवमुक्तस्ततः कृष्णः प्रत्युवाच वृकोदरम् । त्वरयन् पुरुषव्याघ्र ! जरासन्ध वधेप्सया । यत्ते दैवं परं सत्वं यच्च ते मातरिश्वनः । बलं भीम ! जरासन्धे दर्शयाशु तदद्य वै । एवमुक्तस्तदा भीमो जरासन्धमरिन्दमः । उत्क्षिप्य भ्रामयामास बलवान् महाबलः । भ्रामयित्वा शतगुणं जानुभ्यां भरतर्षभ ! । बभञ्ज पृष्ठं संक्षिप्य निष्पिष्य विननाद च । करे गृहीत्वा चरणं द्वेधा चक्रे महाबलः । तस्य निष्पिष्यमाणस्य पार्श्वतश्च च गर्जतः । अभवत्तुमुलो नादः सर्वप्राणिभयङ्करः । विदेहुर्मागधाः सर्वे स्त्रीणां गर्भाश्च सस्रुवुः । भीमसेनस्य नादेन जरासन्धस्य चैव ह । किं नु स्यादिमवान् भिन्नः किं नु क्षिद्दीर्यते मही । इति वै मागधा जज्ञुर्भीमसेनस्य निःस्वनात् । ततो राज्ञः कुलद्वारि प्रसुप्तमिव तं नृपम् । रात्रौ गतासुमुत्सृज्य निश्चक्रमुररिन्दमाः । जरासन्धरथं कृष्णो योजयित्वा पताकिनम् । आरोप्य भ्रातरौ चैव मोक्षयामास बान्धवान् ।"

**जरित** त्रि० जरा जातोऽस्य तारका० इतच् । १जातजरे हृद्ये मन्दपालर्षिभेदे २पक्षिणीभेदे तत्कथा

"तच्छ्रुत्वा मन्दपालस्तु वचस्तेषां दिवौकसाम् । क्व नु शीघ्रमपत्यं स्याद्वृद्धत्वं चेत्यचिन्तयत् । स चिन्तयन्नध्यगच्छत् सर्वज्ञप्रसवान् खगान् । शार्ङ्गिकां शार्ङ्गिको भूत्वा जरितां सरुपेयवान् । तस्यां पुत्रानजनयच्चतुरो ब्रह्मवादिनः । तानपास्य स तत्रैव जगाम लपितां प्रति । बालात् हुतानलगतान् सद्य माता मुनिर्वने । रक्षितुं मते महाभागे लपितां प्रति भारत ! । अपत्यस्नेहसंयुक्ता जरिता वह्निचिन्तयत्" "तेन त्यक्तान-न्याञ्छान्तशीनखगतान्वने । न जहौ पुत्रशोकार्त्ता जरिता खाण्डवे सुतान्" भा० आ० १२६ अ० ।

**जरित्र** त्रि० जॄ-तृच् । "स्तोतरि निघण्टुः "इमा ब्रह्माणि जरिता वो अर्चतु" ऋ० १।१६५।१४ "अभीषु णः सखीनामविता जरितॄणाम्" ४।३२। २जीर्णे च स्त्रियां ङीप् ।

**जरितारि** पु०१जरितायां जाते मन्दपालर्षेः ऋषेऽपुत्रे "जरितारौ कुलं क्षीणं ऋषेऽस्येन प्रतिष्ठितम्" भा०आ०२६० ।

**जरिन्** त्रि० जराऽस्त्यस्य इनि । १हृद्ये जरायुक्ते हेमच० स्त्रियां ङीप् ।

**जरिमन्** पु० जॄ-भावे इमनिच् । जरायाम् । "अभी न रूपं जरिमा मिनाति" ऋ० १।७३।१० । "अस्तमिवेत् जरिमाणं जगम्याम्" १।११६।२५ ।

**जरूथ** पु० जॄ-अथन् ।१मांसे त्रिका० । २जरणीये च । गृ-वा० अथन् पृषो० । ३परुषभाषिणि । "जरूथं स्तन्यचिरायै पुरन्धिम्" ऋ० ७।६।६ । "जरूथं परुषभाषिणं जरणीयं वा रक्षोगणम्" भा० । दृगास्रुचमधिकृत्य निरु० ६।१७ । उक्तं "जरूथं गरुथं स्तवनात्" । "विश्वा अग्ने ! दुरदारातीर्वेभिस्तपोभिरदहो जरूथम्" ऋ०७।१।७ "वेभिर्वैस्तपोभिर्जरूथं परुषशब्दकारिणं राक्षसम्" भा०

**जर्च(र्क)** अक्रौ तु० प० सक० सेट् । जर्चे (र्के)ति अजर्चीत् (र्कीत्) ! अजर्च (र्क) । [ जजर्च जर्चुः ।

**जर्ज** अक्रौ भर्त्सने च तु० प०सक० सेट् । जर्जति अजर्जीत्

**जर्जर** पु० जर्ज-वा० अर । १शैलजे २शुष्कध्वजे ३जीर्णे त्रि० मेदि० । "जर्जरं चास्य विषयं कुर्वन्ति प्रतिरूपकैः" भा० शा० ५६अ० । "लघु जर्जरं दधिनिभं हृद्यद्विषं स्वान-मपि हैमम्" इ०८अ०।२खण्डिते च "क्षत्वा पुंवत् पात-सत्रैर्भृग्भो मूर्द्धं यादृशां जर्जरा निर्झरौघाः" माघः ।

**जर्जरानना** स्त्री कुमारानुचरमातृभेदे । "पृथुवक्त्रा मधु-लिका मधुकुम्भा तथैव च । पद्मालिका मत्कुणिका जरायुर्जर्जरानना" भा० श० ४७ अ० ।

**जर्जरित** त्रि० जर्जरं करोति जर्ज+णिच्-कर्मणि क्त । १जीर्णीकृते २शकलीकृते । "कृष्णो जर्जरिताङ्गस्य कुञ्ज-रस्यार्त्तचेतसः" हरि० ८६ अ० । "जराजर्जरितं पतिम्" भा०व० १२१ अ० । [२जरातुरे च मेदि० ।

**जर्जरीक** त्रि० जर्ज-ईक फर्फरीकाο नि० । १वञ्चिच्छिद्रद्रव्ये

**जर्भ** अक्रौ भर्त्सने च तु० पर० सक० सेट् । जर्भर्ति अजर्भीत् जजर्भ । [ हेमच०

**जर्ण** पु० जॄ-नन् । १चन्द्रे २शुक्ले च मेदि० । ३जीर्णे त्रि०

**जार्त्तिक** जृ-वा०तिक । १वाङ्गीकदेशे । सोऽभिजनोऽस्य अण् वरुड जनपदे लुप् । २तद्देशवासिषु ब० ब० । "जर्तिका नाम वाङ्गीकास्तेषां इत्तं सुनिन्दितम्" भा०क०४४अ० ।

**जर्त्तिल** पु० जॄ-विच् तिलक० । १आरण्यतिले "जर्त्तिलः कथ्यते सद्भिररण्यप्रभवतिलः" शब्दार्थचि० । "जर्त्तिलै-र्जुहोति" शत० ब्रा० ६।१।१।३ । "जर्त्तिला आरण्य-तिलाः" भा० "जर्त्तिलनिभान् गवेधुकासक्तून् कला-

रूपसत्तमः। ताभ्यामेकं फलं प्रादात् पत्नीभ्यां भरतर्षभ!। ते तदार्द्धं द्विधा कृत्वा भक्षयामासतुः शुभे। भावित्वादपि चार्थस्य सत्यवाक्यतया सुतेः। तयोः समभवद्गर्भः फलप्राशनसम्भवः। ते च दृष्ट्वा स नृपतिः परां मुदमवाप ह। अथ काले महाप्राज्ञ! यथा समयमागते। प्राजायेतामुभे राजन्! शरीरशकले तदा एकाक्षिबाहुचरणे अर्द्धोदरमुखस्फिचे। दृष्ट्वा शरीरशकले प्रवेपतुरुभे भृशम्। उद्विग्ने सहसंमन्त्र्य ते भगिन्यौ तदाऽवदे। अजीवे प्राणिशकले तत्याजाते सुदुःखिते। तयोर्धात्र्यौ समंवीते ते कृत्वा गर्भसंभवे। निर्गम्यान्तःपुरद्वारात् ससृतुश्छन्नाभिजग्मतुः। ते चतुष्पथनिःक्षिप्ते जरा नामाथ राक्षसी। जग्राह मनुजव्याघ्र! मांसशोणितभोजना। कर्तुंकामा सुखवहे शकले सा तु राक्षसी। संयोजयामास तदा विधानबलनोदिता। ते समानीतमात्रे तु शकले पुरुषर्षभ!। एकमूर्तिधरो वीरः कुमारः समपद्यत। ततः सा राक्षसी राजन्! विस्मयोत्फुल्ललोचना। न शशाक ससुद्वोढुं वज्रसारमयं शिशुम्। बालसामर्थ्यतश्चैव सृष्टिं कृत्वा चास्ये निधाय सः। प्राक्रोशदतिरंरब्धः सतोय इव तोयदः। तेन शब्देन सम्भ्रान्तः सहसान्तःपुरे जनः। निर्जगाम नरव्याघ्र! राज्ञा सह परन्तप!। ते चाबले परिष्वाने पयःपूर्णपयोधरे। निराशे पुत्रलाभाय सहसैवाभ्यगच्छताम्। ते तु दृष्ट्वा तथाभूते राजानक्षेत्रसन्ततिम्। तच्च बालं प्रवलिनं चिन्तयामास राक्षसी। नाहोनि विषये राज्ञो वसन्ती पुत्रमद्विनः। बालं पुत्रमिमं हन्तुं धार्मिकस्य महात्मनः। सा तं बालमुपादाय मेघलेखेव भास्करम्। कृत्वा च मानुषं रूपमुवाच वसुधाधिपम्। राजस्नुवाच। दृष्टदृष्ट! सुतस्तेऽयं मया दत्तः प्रगृह्यताम्। तव पत्नीद्वये जातो द्विजातिवरशासनात्। धात्रीजन परित्यक्तो मयायं परिरक्षितः। कृष्ण उवाच। ततस्तो भरतश्रेष्ठ! काशिराजसुते शुभे। तं बालमभिपद्याशु प्रहर्षेरभ्यधिञ्चताम्। ततः स राजा संहृष्टः सर्वं तदुपलभ्य च। व्यसृजद्भगभौभां राक्षसीं तामराक्षसीम्। राजोवाच। का त्वं कमलगर्भाभे! मम पुत्रप्रदायिनी। काम्यया ब्रूहि कल्याणि! देवता प्रतिभासि मे।"

राक्षस्युवाच। जरा नामास्मि भद्रन्ते राक्षसी कामरूपिणी। तव वेश्मनि राजेन्द्र! पूजिता न्यवसं सुखम्। सदे सदे मनुष्याणां नित्यं तिष्ठामि राक्षसी। सदृदेवीति नाम्ना वै पुरा सृष्टा स्वयम्भुवा। दानवानां विनाशाय स्थापिता दिव्यरूपिणी। यो मां भक्त्या लिखेत् कुड्ये सपुत्रां यौवनान्विताम्। सदे तस्य भवेद्वृद्धिरन्यथा क्षयमाव्रजेत्। त्वद्गृहे तिष्ठमाना तु पूजिताहं सदा विभो!। लिखिता चैव कुड्येषु पुत्रैर्बन्धुभिरावृता। गन्धपुष्पैस्तथा धूपैर्भक्ष्यभोज्यैः सुपूजिता। साहं प्रत्युपकारार्थं चिन्तया व्यनिशं तव। तवेमे पुत्रशकले दृष्टवत्यस्मि धार्मिक!। संश्लेषिते मया दैवात् कुमारः समपद्यत। तव भागधान्महाराज! हेतुमात्रमहं त्विह। मेरुं वा खादितुं शक्ता किं पुनस्तव बालकम्। सदे सम्भूतनाम्नी त्वं मया प्रत्यर्पितस्तव। कृष्ण उवाच। एवमुक्ता तु सा राजंस्तत्रैवान्तरधीयत। स संदृश्य कुमारं तं प्रविवेश सदं नृपः। तस्य बालस्य यत् कृत्यं तच्चकार नृपस्तदा। आज्ञापयच्च राक्षस्या मगधेषु महोत्सवः। तस्य नामाकरोच्चैव पितामहसमः पिता। जरया सन्धितो यस्माज्जरासन्धो भवत्वयम्। सोऽवर्द्धत महातेजा मगधाधिपतेः सुतः। प्रभावबलसम्पन्नो ह्युताशुरिवानलः। मातापित्रोर्नन्दिकरः शुक्लपक्षे यथा शशी" भा० स० १७।१८ अ०।

**जरासन्धबध** पु० जरासन्धस्य वधमधिकृत्य कृतो ग्रन्थः अण् आख्यायिकायां तस्य लुपि व्यक्तिवचनत्वात् पुंस्त्वम्। भारतसभापर्वान्तर्गते अवान्तरपर्वभेदे तच्च पर्व सभापर्वणि १९अध्यायावधि २७अध्यायपर्यन्तम्। "जरासन्धबधः पर्व तथा दिग्विजयस्ततः" भा० आ० १ अ०

**जरासन्धजित्** पु० जरासन्धं जितवान् जि-क्विप् ६त०। भीमे पाण्डवे तज्जयकथा भा० स० २३अ०

"कार्त्तिकस्य तु मासस्य प्रहृष्टं प्रथमेऽहनि। अनाहारं दिवारात्रमविश्रान्तमवर्त्तत। तदुद्दृष्टं तु त्रयोदश्यां समवेतं महात्मनोः। चतुर्दश्यां निशायान्तु निहत्तो मागधः क्रमात्। तं राजानं तथा क्रान्तं दृष्ट्वा राजन्! जनार्दनः। उवाच भीमकर्माणं भीमं सम्बोधयन्निव। क्रान्तः शत्रुर्न कौन्तेय! लभ्यः पीडयितुं रणे। पीड्यमानो हि कार्त्स्न्येन जह्याज्जीवितमात्मनः। तस्मात्तेनैव कौन्तेय! पीड्यतां योजनाधिपः। समस्तेन युध्यस्व बाहुभ्यां भरतर्षभ!। एवमुक्तः स कृष्णेन पाण्डवः परवीरहा। जरासन्धस्य तद्वृत्तं ज्ञात्वा चक्रे मतिं वधे।

क्षीरमेके" कात्या० श्रौ० १८।१।१। कर्केण तदर्थकतया व्याख्यातम्।

जर्त्तु पु० जन–"जनेसु रच" उणा०५।४६ सू० तु रचान्तादेशः। १योनौ तस्यां देहस्य जायमानत्वात् तथात्वम्। २हस्तिनि च उणादिकोषः अत्र शब्दकल्पद्रुमे जर्तेति अकारान्तशब्दकल्पनं प्रामादिकमेव। संज्ञिप्रसारे च लिपिकरप्रमादकृतमेवाकारान्तत्वम्। [अजर्त्तीत्। अजर्त्त।

जर्स् भर्त्सने उक्तौ रवणे च भ्वा०पर० सक० सेट्। जर्सति

जर्भरि त्रि० जृभ–गात्रविनामे अरि, भ–यङ्लुक् इः पृषो० वस्य जः। १गात्रविनामकर्त्तरि २भर्त्तरि च। स्त्रियां वा ङीष्। "सृक्वेव जभरी तुर्फरी तु" ऋ० १०।१०६। ६। भाष्ये तथैव व्युत्पादितम् निरु० परि०१।५ "दमाम्रचमधिक्षत्य"द्विविधा ऋत्विजः जर्भरि भर्त्ता च हन्ता च तयान्वितौ चापि भर्त्तारौ जर्भरी भर्त्तारौ" १। दमाम्रचमधिक्षत्य चार्वाकैरुपहसितम् "त्रयोदश कर्त्तारो भरतधूर्त्तनिशाचराः जर्भरीतुर्फरीत्यादि पण्डितानां वचः कृतम्" सर्व० चार्वाकदर्शने। स्त्रियां वा ङीष्।

जर्हिल पु० जर्हिल+पृषो०। जर्त्तिले आरण्यपशुतिले राजनि०।

जल आच्छादने चुरा० उभ० सक० सेट्। जालयति ते अजीजलत् त।

जल तीक्ष्णीभवने जीवनोपयोगिक्रियायां च अक० भ्वा०पर० सेट्। जलति अजालीत् अजाल जेलतुः। ज्वलादि जलः जालः।

जल त्रि० जल–अच् डस्य लोपा। १जडे। २दर्दुरे, ३क्षीरेरे गन्धद्रव्ये, ज्योतिषोक्ते लग्नावधिके ४चतुर्थस्थाने, ५पर्वतोपाङ्गानचले च न०शब्दार्थचि०। जलञ्च पञ्चभूतान्तर्गतभूतभेदः तद्भेदगुणादिकं सुश्रुतोक्तं अम्बुशब्दे ३२८३० पृष्ठे दर्शितम् धनशब्दे २७८६ पृष्ठे च तस्य विवृतिः। "अपां शैत्यं तथा क्लेदो द्रवत्वं स्नेहसौम्यता। जिह्वाभिग्रन्थनञ्चापि भौमानां अपणं तथा। चतुर्थभागो विज्ञेयं जिह्वाख्यात्तं प्रचक्षते। अधिभूतं रसास्तत्र सोमस्तत्राधिदेवतम्" भा० आश्व०अ०। "तदङ्गनिग्रन्थजलेन लोचने" "जलाभिलाषी जलमाददानाम्" रघुः। "न तज्जलं यन्न सुचारुपङ्कजम्" भट्टिः।

"तृषितायै रोगिणेऽपि जलं देयं तथा च "पानीयं प्राणिनां प्राणास्तदायत्तं हि जीवनम्। तस्मात् सर्वास्ववस्थासु न क्वचित् वारि वार्यते। अन्नेनापि विना जन्तुः प्राणान् धारयते चिरम्। तोयाभावे पिपासार्त्तः क्षणात् प्राणैर्वियुज्यते। तृप्तितो मोहमायाति मोहात् प्राणान् विमुञ्चति। तस्माज्जलमवश्यं हि दातव्यं भेषजैः समम्" इति राजवल्लभः। "पादेन घटसत्राप्य भाजने पूरयेज्जलम्। तज्जलं मदिरातुल्यं भाण्डस्थं सुरया समम्" इति कर्मलोचनः तस्य दानमाहात्म्यं यथा। "अन्ने दत्ते नरश्रेष्ठ प्राणा दत्ता भवन्त्युत। प्राणदानाद्धि परमं न दानमिह विद्यते। अन्नं चापि प्रभवति पानीयात् कुरुसत्तम!। नीरजातेन हि विना न किञ्चित् संप्रवर्त्तते। अन्नौषध्यो महाराज! वीरुधश्च जलोद्भवाः। यतः प्राणभृतां प्राणाः सम्भवन्ति विशाम्पते!। तस्मात् पानीयदानाद्धि न परं विद्यते क्वचित्। तच्च दद्याद्वरो नित्यं यदीच्छेद्भूतिमात्मनः। धन्यं यशस्यमायुष्यं जलदानमिहोच्यते। शत्रूणाप्यधि कौन्तेय! सदा तिष्ठति तोयदः। सर्वकामानवाप्नोति कीर्त्तिञ्चैवेह शाश्वतीम्। प्रेत्य चानन्त्यमश्नाति पापेभ्यश्च प्रमुच्यते। तोयदो मत्तजव्याघ्र! स्वर्गं गत्वा महाद्युते!। अक्षयान् समवाप्नोति लोकानित्यब्रवीन् मनुः" भा० शा० दा० अ० हेमाद्रौ दा० खण्डे विशेषो दृश्यः"पानीयं प्राणिनः प्राणाः पानीयं पावनं महत्। पानीयस्य प्रदानेन तृप्तिर्भवति शाश्वती" जलदानमन्त्रः जलवर्षणशान्तये वर्षाद्यधिपराजाद्यानयनं तत्फलञ्च कृत्यतत्त्वे दर्शितं यथा

"सृष्टिमूला ऋषिः सर्व्वा सृष्टिमूलञ्च जीवनम्। तस्मादादौ प्रयत्नेन सृष्टिज्ञानं समाचरेत्। ततो वर्षस्य राजानं मन्त्रिणं मेघमेव च। आर्द्रकं सलिलञ्चापि सृष्टिज्ञानाय शोधयेत्। शार्कं त्रिगुणितं कृत्वा द्विगुणं सलिलेन (७) हरेत्। भागशिष्टो रवीज्ञेयो रवान्मन्त्री चतुर्थकः।" अथ रवादिफलम्। "चित्तलार्केण रवे सृष्टिर्दृष्टिरूपा निशापतौ। सृष्टिमन्दा सदा भौमे चन्द्रजे सृष्टिरुत्तमा। गुरौ च शोभना सृष्टिर्भार्गवे सृष्टिरुत्तमा। पृथिवी धूलिसम्पूर्णा सृष्टिहीना शनौ रवे। यस्मिन् संवत्सरे चैव अर्कौ राजा भविष्यति। अस्यक्षतिर्भवेत्तत्र नित्यं रोगश्च जायते। यस्मिंश्चन्द्रे विधूराजा अस्यपूर्णा च मेदिनी। नैरुज्यञ्च सुवृष्टिश्च सुभिक्षं क्षितिमण्डले। यस्मिंश्चन्द्रे कुजो राजा सस्यशून्या च मेदिनी। नैरुज्यं विनिवृत्तिश्च दुर्भिक्षं क्षितिमण्डले। यस्मिंश्चन्द्रजो राजा सर्वशस्या च भूर्भवेत्। धर्म्मे स्थितिर्मनःस्थैर्यं सृष्टिकारणमुत्तमम्। यस्मिंश्चन्द्रे च गुरुराजा सर्व्वा रसवती मही। रवर्षां वर्द्धन नित्यं धनधान्यादिकं

फलम्। राजा दैत्यगुरुः कुर्यात् सर्वशस्यं धरातलम्। संग्रामो वातदृष्टिश्च रोगोपद्रव एव च। मन्दा दृष्टिः यदा वातो राजा संवत्सरे शनिः। श्रावणस्य कालं त्रिगुणीकृतञ्च द्विगुणवर्षलक्षिसमन्वितञ्च। राजा च मन्त्री च जलाधिपश्च शस्याधिपः स्यान्मुनिभाजितेन। (श्रावणस्य कालं त्रिगुणीकृतञ्च पक्षेण युक्तं मुनिना हरेच्च। सूर्यादि वर्षाधिपतिश्च शेषो मन्त्री चतुर्थो भवति प्रसिद्धः।) पाठान्तरम्। यथा दृष्टिफलं प्रोक्तं वत्सरे यत्नभूपतौ। तथा दृष्टिफलं ज्ञेयं विघ्नैर्वत्सरसन्निधौ।" अथ मेघावतनम्। "श्रावणं वह्निसमायुक्तं वेदेन भागमाहरेत्। शेषं मेघं विजानीयादावर्त्तादि यथाक्रमम्। आवर्त्तश्चैव संवर्त्तः पुष्करो द्रोण एव च। चत्वारो जलदाः प्रोक्ता आवर्त्ताद्या मनीषिभिः। एकदेशेन चावर्त्ते संवर्त्ते सर्वतो जलम्। पुष्करे दुष्करं वारि द्रोणे बहुजला मही।" अथ जलादकनिर्णयः। "शतयोजनविस्तीर्णं त्रिंशद्योजनसच्छ्रितम्। आढकस्य भवेन्मानं मुनिभिः परिकीर्त्तितम्। युग्माङ्गगोभीनगते शशाङ्के रविर्यदा कर्कटकं प्रयाति। शतादकं कं हरिकार्मुकेऽर्द्धं वदन्ति कन्याङ्गगयोरगीतिम्। कुलीरकुम्भालितुलाभिधाने जलादकं शस्यवतिं वदन्ति। अनेन मानेन तु वत्सरस्य निरूप्य नीरं कृषिकर्म कार्य्यम्"। एतत्सर्वं विंशत्या हरणीयम्। सप्तद्रे दश भागांश्च षड्भागानपि पर्वते। पृथिव्यां चतुरोभागान् सदा वर्षति वासवः।" अथ पौषादिमासीयवृष्टिलक्षणम्। "सार्द्धं दिनद्वयं मानं कृत्वा पौषादिना बुधः। गणयेन्मासिकीं दृष्टिमृष्टिं वानिलक्रमात्। सौम्यवारुणयोर्दृष्टिरवृष्टिः पूर्व्ययाम्ययोः। निर्व्याते वृष्टिहानिः स्यात् सङ्कुले सङ्कुलं जलम्। एकैकं षड्दण्डेन मासस्य दिवसो मतः। पूर्वार्द्धे वासरी वृष्टिरुत्तरार्द्धे च नैशिकी। दत्त्वा दण्डे पताकान्तु वातस्यानुक्रमेण च। विज्ञेया मासिकी वृष्टिर्द्वा वातं दिवानिशम्। धूलीभिरेव ग्रथलीकृतमन्तरीक्षं विद्युच्छटाच्छुरितवारुणदिग्विभागम्। पौषे यदा भवति मासि सिते च पक्षे तोयेन तत्र सकला प्लवते धरित्री। पौषे मासि यदा वृष्टिः कृष्णवृष्टिर्वा यदा भवेत्। तदादौ सप्तमे मासि तां तिथिं प्लाव्यते मही। अथ माघादिफलम्।

माघस्य सितसप्तम्यां वृष्टिर्वा मेघदर्शनम्। तदा संवत्सरो धन्यः सर्वशस्यफलप्रदः। सप्तम्यां स्वातियोगे यदि पतति जलं माघपक्षेऽम्बरे वायुर्वा चण्डवेगः सजलजलधरो गर्ज्जितो वासरे वा। विद्युन्नाकाकुलं वा यदि भवति नभो नष्टचन्द्रार्कतारं तावद्वर्षन्ति मेघाः प्रतधरवसिते यावदाकार्त्तिकान्तम्। माघे बहुलसप्तम्यां तथैव फाल्गुनस्य च। चैत्रशुक्लतृतीयायां वैशाखे प्रथमेऽहनि। एतासु चण्डवातो वा तड़िद्वृष्टिरथापि वा। तदा स्यात् शोभना प्रावृट् भवेत् शस्यवती क्षितिः। धनुर्मकरकुम्भेषु यदा वर्षति वासवः। तदादि सप्तमे मासि वारिपूर्णा भवेन्मही।"

अथ चैत्रलक्षणम्। प्रतिपदि मधुमासे भानुवारः सितायां यदि भवति तदा स्याच्चिन्ता वृष्टिरुद्दे। अविरलपृथुधारासान्द्रवृष्टिप्रवाहैर्धरणितलमशेषं प्लाव्यते सोमवारे। अवनितनयवारे नास्ति वृष्टिर्न शस्यं कविगुरुभृगुजानां वासरे शस्यपूर्त्तिः। जलनिधिरपि शोषं याति वारेण शौरेर्भवति खलु धरित्री धूलिजालैरदृश्या। चैत्राद्यभागे सितायां भवेच्चिन्तला क्षितिः। शेषेऽपि चैव चार्द्धं च्या मध्ये बहुवर्षिणी।

अथ वैशाखलक्षणम्। प्रवाहयुक्तनद्यान्तु दण्डं न्यस्य जले निशि। वैशाखशुक्लप्रतिपत्तिथौ वृष्टिं निरूपयेत्। ओं सिद्धिरिति मन्त्रेण मन्त्रयित्वा शतत्रयम्। अङ्कयित्वा तु तं दण्डमङ्गुलस्थे जले क्षिपेत्। प्रातरुत्थाय सहसा तदङ्गन्तु निरूपयेत्। समं चैवाधिकं न्यूनं भविष्यज्जलकाङ्क्षया। गतवत्सरवद्वारि वन्या चैव समे भवेत्। हीने हीनं भवेद्वारि भवेद्वन्या च तादृशी। अङ्गाधिक्ये च द्विगुणा वृष्टिर्वन्या च जायते। इदं पराशरेणोक्तं भविष्यद्वृष्टिलक्षणम्। सूर्य्यादौ विष्णुतो जगतां विपत्तिर्मध्यं गते दिनकरे बहुशस्यहानिः। अस्तं गते दिनकरे तु तदर्द्धशस्यमैश्वर्यभोगमतुलं खलु चार्द्धरात्रौ। तदा संवत्सरो धन्यो बहुशस्यफलप्रदः।

अथ ज्यैष्ठलक्षणम्। ज्येष्ठादौ च सिते पक्षे आर्द्रादौ दशलक्षके। सजला निर्जला यानि निर्जलाः सजला इव। रेखात्रयं समुल्लिख्य ताभिस्ताश्च विवर्द्धयेत्। त्रिशूलं सर्वकोष्ठेषु पर्वतं तत्र दापयेत्। ईशानादि दक्षिणाङ्गान् संलिखेदनलादितः। येन येनाङ्गसंक्रान्ति स्तेन प्रावृट्फलं भवेत्। अतिवृष्टिः समुद्रे स्यादनावृष्टिस्तु पर्वते। कृषयोचितला वृष्टिः सुवृष्टिः शैलसन्धिषु। (मतान्तरे। रेखात्रयंसमुल्लिख्य ताडितं वेदशम्भवैः। ईशानदक्षिणे भङ्गं लिखेदनलभादितः। येन

वेनाजसंक्रान्तिलग्नेन प्राड्फलं वदेत। कश्मिन्मादौ सप्तद्रेष्वेषु नक्षत्रेषु इयं इयम्। कक्षपर्वततोरेषु एकैकं परिकीर्तितम्।") "चित्रास्वातिविशाखासु ज्येष्ठे मासि निरभ्रता। तास्वेव श्रावणे मासि यदि वर्षति, वर्षति।" अथ आषाढनक्षत्रम्। "आषाढ्यां पौर्णमास्यां सुरपतिकुम्भं वाति वातः, सुवृष्टिः, शस्यध्वंसं प्रकुर्याद्दक्षनदिशि गते, मन्दवृष्टिर्यमेन। नैर्ऋत्यां शस्यहानि, वरुणदिशि जलं, वायुना वायुकोपः, कौबेर्यां शस्यपूर्णां प्रथयति नियतं मेदिनीं, शस्यशीर्षे। आषाढस्य सिते पक्षे नवम्यां यदि वर्षति। वर्षत्येव तदा देवस्तत्राष्टौ कुतो जलम्। शुक्लाषाढीनवम्यासुदयगिरितटीनर्मलत्वं प्रयाते स्रोतं कालं विधत्ते खरतररविरश्मो मण्डलाकारलक्ष्मम्। जीमूतैर्वेष्टितोऽसौ यदि भवति रविर्मस्तमानेऽस्तशैले तावत् पर्यन्तमेव प्रवदति जलदो यावदस्तं तुलायाः।"

अथ श्रावणलक्षणम्। "रोहिण्यां श्रावणे मासि यदि वर्षति वासवः। तदा वृष्टिर्भवेत्तावद्दुर्वाबल्लीः स्थिरते क्षितिः। कर्कटे रोहिणीक्षे यदि वृष्टिर्न जायते। तदा पराशरः प्राह क्षाहा लोकस्य का गतिः। श्रावणे मासि रोहिण्यां न भवेद्वर्षं यदि। विफलारम्भसंक्लेशास्तदा स्युः कृषिजन्तवः।"

अथ भाद्रलक्षणम्। सिंहे च भौमवारे च पर्वफल्गुनि ऋक्षके। व्यतीपाते च नन्दायां तुलायां वर्षयेद्रविः।" अथ सद्योवृष्टिज्ञानम्। जलस्था जलस्रो वा निकटे जल एव वा। दृष्ट्वा पृच्छति दृष्ट्वर्थं वृष्टिः संजायते ध्रुवम्। अकस्मादम्भसादाय धावति पिपीलिका। भेकः शब्दायतेऽकस्मात्तदा वृष्टिर्भवेद्ध्रुवम्। विड्वाला नकुलाः सर्पा ये चान्ये वा बिलेशयाः। धावन्ति शरभा मत्ताः सद्यो वृष्टिर्भवेद्ध्रुवम्। कुर्वन्ति बालका मार्गे धूलीभिः सेतुबन्धनम्। मयूराश्चैव नृत्यन्ति सद्यो वृष्टिः प्रजायते। अवातवातदुष्टानां नृणामङ्गव्यथा यदि। इत्याद्यारोहणाद्येः सद्यो वर्षणलक्षणम्। पक्षयोः शोषणं रौद्रे खगानामम्बुचारिणाम्। भिन्नीरवस्तथाकाशे सद्यो वृष्टिः प्रजायते।"

अथ पङ्कसञ्चारे वृष्टिलक्षणम्। "चलत्यङ्गारके वृष्टिर्भृगौ वृष्टिः शनैश्चरे। वारिपूर्णां मही कृत्वा मघात् सञ्चरते गुरुः। पङ्काणासदृशे चाले तथा वक्रातिचारयोः। प्रायो वर्षन्ति जलदा नृपाणासद्यमेऽपि च। चित्रामध्यगते जीवे भिन्नभाण्डमिव स्रवेत्। ततः स्वातीं समासाद्य मन्दमेघान् विमुञ्चति। प्रायेणोपचितान्मेघान् स्वातिरेकाऽभ्युपोहति। अवणे जनितं वर्षं रेवत्यास्तु विमुञ्चति।"

अथ अनावृष्टिलक्षणम्। "ध्रुवे च वैष्णवे ऋक्षे मूले शुक्रे चरन् कुजः। सद्यः करोत्यनावृष्टिं क्षत्रियाणां भयाय च। कुजपृष्ठगतो भानुर्भानुपृष्ठगतः कुजः। सूर्यश्च च युतो भौमः समुद्रमपि शोषयेत्। सद्यो निष्फलयेद्दृष्टिं चित्रामध्यगतो भृगुः। अङ्गारको यदा सिंहे तदङ्गारमयी मही। स एव रविणा युक्तः समुद्रमपि शोषयेत्।"

ज्यो० त० कश्चिद्विशेष उक्तो यथा

"भुजबलभीमे' व्रजति यदि कुजः पतङ्गमार्गे घट इव भिन्नतलो जलं ददाति। अथ भवति दिवाकरायतस्थे प्रलयघनानपि शोषयत्यवश्यम्। यावन्नात्तं खलतुरगैरति धनुरधो मन्थं मीनकन्थे तावद्भिक्षापीड़ा भवति च भरणं क्षुत्पिपासादिघोरम्। उल्कीं निक्षिप्य शस्त्रा शवशिरपटलैर्नर्तयन्ते पिशाचाः यामाः शून्या भवेयुर्नरपतिरक्षिता क्षत्रिय कङ्कालमाला। वक्रं करोति रविजो धरणीसुतो वा मूलर्क्षसप्तमगरेवतिमैत्रभेषु। क्षत्रोपभङ्गपतनादि च सैनिकानां सर्वत्र लोकमरणं जलधौतदेशः। यदा च सौरिः सुरराजमन्त्रिणा समेत्य तिष्ठेत् क्वचिदृक्षभागहले। तदाऽम्बुवक्त्राम्बुकोशसेषु त्रिभागशेषां कुरुते वसुन्धराम्। तिष्ठेतां यावदेकर्क्षं वाक्पत्यवनिजौ। पदे तावत् क्षुद्रोगसंघातात् प्रजानां क्षयमादिशेत्", "आरभ्य शुक्रपतिपत्तिथिं मार्गात् चैकं गर्भनीकारैर्जलदैरिति प्राड्परीक्षणम्। यत्रक्षत्रं गतवति विधौ जायते तत्र गर्भः पश्चादस्रवतियतके १६चाक्षि तस्य प्रसूतिः"। गर्भशब्दे च २५५।२अम्बुगर्भोऽक्षतसंक्षितोक्षो दर्शितः। वर्षणसूचकनिमित्तानि ह०सं० २४ अ० उक्तानि यथा "ज्यैष्ठ्यां समतीतायां पूर्वाषाढादिसप्तदृष्टेन। शुभमशुभं वा वाच्यं परिमाणं चाम्बुसलजन्तूनाम्। कृत्तिकाविशाखं कृष्णकमधिकृत्याम्बुप्रमाणनिर्देशः। पङ्गाणत्यब्दमाढकमनेन मितुयाज्जलं पतितम्। येन धरित्रीसङ्घा जनिता वा विन्दवस्तृणाग्रेषु। दृष्टेन तेन वाच्यं परिमाणं वारिणः प्रथमम्। केचिद्याभिहतं दशयोजनमण्डलं वदन्त्यन्ये। गर्गवशिष्टपराशरमतमेतद्दादशात्र परम्। येषु च मेघेष्वभिहतं भूयस्तेषेव वर्षति प्रायः। यदि नाथा(२०)दिषु दृष्टं सर्वेषु तदा त्वनावृष्टिः।

कुम्भाग्र्य२०सौम्य१ चित्रापौष्ण२७ धनिष्ठासु षोड़श द्रोणाः। शतभिषगैन्द्र१८स्वातिषु चत्वारः क्षत्रिकासु दश। अग्नेये मघानुराधाभरणीमूलेषु दश चतुर्द्रोणाः। फल्गुन्यां पञ्च क्षतिः २५ पुनर्वसौ विंशतिद्रोणाः। ऐन्द्राग्नाख्य१६ वैष्णे२१ च विंशतिः सार्पेटभे दश त्रयधिकाः। २५ ज्येष्ठिर्वु ह्मार्यमण्य१४ वाजापत्येषु पञ्चक्षतिः २५। पञ्चदशाजे४ पथ्ये च कीर्त्तिता वारिभे दश द्वौ च। रौद्रे६ऽष्टादश कथिता द्रोणा निरूपद्रवेक्षेषु। रविरविसुतकेतुपीडिते भे चिति-तनयविधाङ्गुताहते च। भवति हि न शिवं न चापि दृष्टिः शुभसहिते निरूपद्रवे शिवं च।"

"वर्षाप्रश्ने जलवर्षणनिर्णयः तत्रैव २८ अ० यथा "वर्षाप्रश्ने सलिलनिलयं राशिमाश्रित्य चन्द्रो लग्नं यातो भवति यदि वा केन्द्रगः शुक्लपक्षे। सौम्यैर्दृष्टः प्रचुरसदकं वापरैरल्पमम्भः प्रावृट्काले क्षरति न चिराच्चन्द्रवल्लाभगोऽपि। आर्द्रं द्रव्यं स्रवति यदि वा वारि तत्सञ्जातकं वा तोयासन्नो भवति यदिवा तोयकार्योन्मुखो वा। प्रष्टा, वाच्यं सलिलमचिरादस्ति निःसंशयेन पृच्छाकाले सलिलमिति वा श्रूयते यत्र शब्दः"। अथ सद्यवृष्टिनिमित्तम्"उदयगिरिसंस्थो दुर्निरीक्ष्योऽतिदीप्त्या द्रुतकनकनिकाशः स्निग्धवैदूर्यकान्तिः। तदहनि कृतेऽम्भोलोपकाले विवस्वान् प्रतपति यदि सोमैः सङ्गतोऽतीव तीक्ष्णम्। विरसदकं गोनेत्राभं वियद्विगता दिशो लवणविकृतिः काकाण्डाभं यदा च भवेद्भमः। पवननिगमः पोऽभूयन्ते क्षणाः स्खलगामिनो रसनमस क्षत्रमण्डूकानां जलागमसूचेतवः। मार्जारो भृशमवनिं नखैर्लिखन्नो लोहानां मलनिचयः सविस्फुलिङ्गः। रथ्यायां शिशुनिचिताश्च सेतुबन्धाः सम्प्राप्तं जलमचिरात्रिवेदयन्ति। गिरयोऽञ्जनपञ्जसन्निभा यदि वा बाष्पनिरुद्धकन्दराः। कृकवाकुविलोचनोपमाः परिवेषाः शशिनश्च दृष्टयः। विनोपघातेन पिपीलिकानामण्डोपसंक्रान्तिरक्षिव्यवायः। द्रुमाधिरोहश्च भुजङ्गमानां वृष्टेर्निमित्तानि गवां प्लुतं च। तरुशिखरोपगताः कृकलासा गगनतलस्थितवृष्टिनिपाताः। यदि च गवां रविरीक्षणमूर्द्धं निपतति वारि तदा नचिरेण। नेक्षन्ति विनर्मेघं मृदाकुन्वन्ति श्वपन्तो खुरानपि। पशवः पशुवच्च कृकरा यदि चाम्भः पततीति निर्दिशेत्। यदा स्थिता मृदुपटलेषु कुर्कुरा भवन्ति वा यदि विततं द्विजोन्मुखाः। दिवा तडिद्यदि च पिनाकिदिग्भवा तदा क्षमा भवति समातिशारिखा। शुकपोतविलोचनसन्निभो मधुनभश्च यदा हिमदीधितिः। प्रतिगतौ च यदा दिवि राजते पतति वारि तदा नचिराद्दिवः। स्त नतं निशि विद्युतो दिवा, रुधिरनिभा यदि दण्डवत् स्थिताः। पवनः परतश्च शीतलो यदि सलिलस्य तदागमो भवेत्। वह्नीनां गगनतलोन्मुखाः प्रवालाः क्षायन्ते यदि जलपांशुभिर्विचक्षैः। सेवन्ते यदि च सरीसृपास्तृणाग्रासक्तो भवति तदा जलस्य पातः। मयूरशुकचाप्रचातकसमानवर्णा यदा, जपाकुसुमपङ्कजद्युतिसदृश सन्ध्याघनाः। जलोर्मिगगनक्रकचप्रवराहमीनोपमाः प्रभूतपटसञ्चया न तु चिरेण यच्छन्त्यपः। पर्वन्तेषु सुधाशशाङ्कधवला मध्येऽञ्जनाभास्त्विषः स्निग्धा नैकपुटाः क्षरज्जलकणाः सोपानविच्छेदिनः। माहेन्द्रीप्रभवाः प्रयान्त्यपरतः पाक् चाम्बुपाशोद्भवा ये ते वारिसुचरुञ्जन्ति नचिरादम्भः प्रभूतं भवि। शक्रचापपरिघप्रतिसूर्या रोहितोऽथ तडितः परिवेषाः। उद्भासमये यदि भानोरादित्येत् प्रचुरमम्बु तदाशु। यदि तित्तिरिपत्रनिभं गगनं स्तृदिताः प्रवदन्ति च पक्षिगणाः। उदयास्तमये सवितुर्दुर्निशं विसृजन्ति घना नचिरेण जलम्। यद्यौषधिरथाः सङ्गमोरसमूधरकरा रवोच्छ्रिताः। भूसमं च रसते यदाम्बुसन्क्लेदवति दृष्टिलक्षणम्। प्राहुर्धि शीतकरो भृगुपुत्रात् सप्तमराशिगतः शुभदृष्टः। सूर्यसुताच्चपञ्चमगो वा सप्तमगश्च जलागमनाय। प्रायो यदाषासदयास्तकाले समागमे मण्डलसंक्रमे च। पक्षक्षये तीक्ष्णकरायनान्ते दृष्टिर्गतेऽर्के नियमेन चार्द्राम्। समागमे पतति जलं शुक्रयोर्ग्रहयोर्युक्षितयोश्च सङ्गमे। यमारयोः पवनसुताग्रजं भयं न दृष्टयोरसहितयोश्च सङ्गमैः। अयतः प्लुतो वापि यदाः सूर्यावलम्बिनः। यदा तदा प्रकुर्वन्ति मही मेकार्णवामिव"

अथ केदाराज्जलमोचनकाल उक्तो यथा"नैरुज्यार्थं हि धान्यानां जलं भाद्रे विमोचयेत्। मूलमात्रन्तु संस्थाप्य कारयेज्जलमोक्षणम्। भाद्रे च जलसम्भूयं धान्यं विविधबाधकैः। प्रपीडितं क्षुद्राणां न धत्ते फलसत्तमम्"। ऋषिपराशरः। [द्वारा०।

जलकण्टक पु० जले कण्टक इव। १झङ्गटके २कुम्भीरे च

जलकपि पु० जले कपिरिव। शिशुमारे जलजन्तुभेदे (सोसक) द्वारा०।

जलकपोत पु० जलजातः कपोतः । जलपारावते राजनि० ।
जलकरङ्क पु० जलस्य करङ्क इवाधारः । १नारिकेले, २मेघे च । जलस्य करङ्क इव ।३पद्मे च मेदि० ।
जलकल्क पु० जलेन कल्क इव । जम्बाले हारा० ।
जलकाक पुंस्त्री० जले काक इव कृष्णत्वात् । (पानकौडी) पक्षिभेदे । राजनि० । स्त्रियां जातित्वात् ङीष् ।
जलकाङ्क्ष पुंस्त्री० जलं काङ्क्षति काङ्क्ष–अण् उप० स० । १हस्तिनि त्रिका० स्त्रियां जातित्वात् ङीष् । २जलाभिलाषिणि त्रि० । पा० स्त्रियां टाप् सुन्वबो० षण् ह्रैप् ।
जलकाङ्क्षिन् पु० जलं काङ्क्षति काङ्क्ष–णिनि । १हस्तिनि हारा० । २जलाभिलाषिणि त्रि० । स्त्रियां ङीप् ।
जलकान्तार पु० जलमेव कान्तारो दुर्गमत्वात् यस्य । वरुणे हेम च० । [ जिलाधुके त्रि० ।
जलकामुक पु० ६त० । १कुटुम्बिनीडजे राजनि० । २जलाजलकिराट पुंस्त्री० जले किराट इव । याहे (झाङ्गोर) । हारा० । स्त्रियां जातित्वात् ङीष् ।
जलकुक्कुट पुंस्त्री० जले कुक्कुट इव । (गाङ्गचिल) पक्षिभेदे हारा० । "भद्रराजैस्तथा हंसैर्दात्यूहैर्जलकुक्कुटैः" भा० व० १०८ अ० "कादम्बैश्चक्रवाकैश्च कुररैर्जलकुक्कुटैः। १५८ अ० स्त्रियां जातित्वात् ङीष् ।
जलकुक्कुभ पुंस्त्री० जले कुक्कुभ इव । कोयष्टिखगे (कोडा पाखि) हेम० स्त्रियां जातित्वात् ङीष् । [ गन्धार्थचि० ।
जलकुन्तल पु० जलस्य कुन्तलः केश इव । जलकेशे शैवाले ।
जलकुब्जक पु० जले कुब्ज इव कायति कै–क । पद्मारे शब्दार्थचि० । [ मेदि० ।
जलकूपी स्त्री० जलेन कूपीव । १कूपगर्ते २शुष्करिण्यां च
जलकूर्म्म पुंस्त्री० जले कूर्म्म इव । शिशुमारे त्रिका० । स्त्रियां जातित्वात् ङीष् ।
जलकेश पु० जलस्य केश इव । शैवाले हारा० ।
जलकेतु पु० "जलकेतुरपि पश्चात् स्निग्धं शिखया परेण चोज्झतया" बृ० स० ११ अ० उल्के केतुभेदे ।
जलक्रिया स्त्री० जलसाध्या क्रिया । पित्रादीनां तर्पणे "कालिन्द्यां विधिवत् स्नात्वा कृतपुण्यजलक्रियः" भाग० ६।१६।१४ "कृत्वा वध्वां जलक्रियां" श्रा० त० ।
जलक्रीड़ा स्त्री० ३त० । नद्यादौ सखिभिः परस्परं जलसेचनरूपक्रीड़ायाम् । "सहिताः भ्रातरः सर्वे जलक्रीड़ामवाप्नुयुः" । "ततस्ते सहिताः सर्वे जलक्रीड़ामकुर्वत" भा० आ० १२८ अ० ।
जलखग पुंस्त्री० ६त० । जलचरविहगे स्त्रियां जातित्वात् ङीष् । "चुदिनो विलासिनीनां जलखगनखविक्षतेषु रम्येषु" वृ० स० ४८ अ० ।
जलगर्भ पु० जलसूचको गर्भः । ब० सं० उक्ते मेघनिःसृतजलसूचके निमित्तभेदे गर्भशब्दे २५५१ पृ०दृष्टिः ।
जलगुल्म पु० जलस्य गुल्म इव । १जलावर्त्ते (घुरपो) २कमठे ३जलचत्वरे च (चातर जल) मेदि० ।
जलङ्गम पु० जलं गच्छति गम–ड नि० मुम् । महाकाले ओषधिभेदे राजनि० । [ भरतः ।
जलचत्वर न० जलेन चत्वरम् । (चातरजल) स्वल्पसलिलयुक्ते देशे मेदि० ।
जलचर त्रि० जले चरति चर–टक् ७त० । ग्राहादिषु जलजन्तुषु । "अशीतास्रवो मासे—चैत्रे जलचराः सर्वे" चाणक्य० । "ग्राम्येण बीजजलचरकाननस्था वह्निभयदव" बृ० स० ४अ० "गोदग्रजलचरकर्षकशिल्पिजैश्चर्य्यसम्पन्नाः" १५ अ० ।
जलचारिन् पु० जले चरति चर–णिनि ७त० । १मत्स्ये २जलचरमात्रे त्रि० स्त्रियां ङीप् । "सरांसि च मनोज्ञानि समन्तात् जलचारिभिः" भा० व० १६८ अ० ।
जलज न० जले जायते जल–ड । १पद्मे २शङ्खे च मेदि० । ३क्षारभेदे राजनि० । ४मत्स्ये पु० स्त्री० शब्दच० । ५चित्रजलदृश्ये पु० (जलवेत) ६वानीरवेते ७शैवाले च पु० राजनि० । ८कपोतौ भावप्र० ९जलजौ कर्कटमीनौ मकरान्त्यार्द्धञ्च शिवमते कुम्भः" ज्यो० उक्तेषु १०कर्कटादिराशिषु । ११जलजातमात्रे कृमीरादौ त्रि० "जलजानां पद्मानां स्थलानाञ्चैव सर्वशः" भा० स० ३अ० । "जलजैः प्राणिभिः कीर्णां" "जलजैर्भूषितां गुणैः" । "जलजैः कुसुमैर्वितां" "जलजैर्हरितोदकां" हरिवं० ६८अ० तत्र पद्मे "याचञ्चतिस्वयाचेदं प्राञ्जलिर्जलजासनम्" कुमा० । शङ्खे "निवेश्य दधौ जलजं कुमारः" "जलजाभिगदाभाजं चक्रलाञ्छितमूर्त्तिभिः" रघुः । मत्स्यादौ "न तथा बलवन्तः स्युर्जलजा वा स्थलाश्रिताः । स्वदेशे निचिता दीर्घा अन्यस्मिन् कोपमागताः" सुश्रु० । "निषेव्यमाणो जलजैश्च सर्वैः" हरिवं० २४३अ० । ११अब्जे चन्द्रे च तस्य सलिलमयत्वात् समुद्रजातत्वाद्वा तथात्वम् । [ अमरः ।
जलजन्तु पु० जलजातो जन्तुः । यादसि जलजाते प्राणिनि

जलजन्तुका स्त्री जलजन्तु+संज्ञायां कन्। जलौकायां भरतः।

जलजन्मन् न० जले जन्म यस्य। पद्मे हेमच०। "निलयः श्रियः सततमेतदिति प्रथितं यदेव जलजन्मतया" माघः।

जलजम्बूका स्त्री जलजाता जम्बूका। क्षुद्रजाम्बुनि शब्दचि०

जलजाजीव पु० जलं जलजमत्स्यवधविक्रयादिकमाजीवति आ+जीव-अण्। जलचरघातके (जेले) शब्दार्थचि०। [ क्षारा०।

जलजिह्व पु० जलं जड़ा खादे असमर्थो जिह्वाऽस्य। नक्रे

जलजीविन् पु० जलेन तज्जातमत्स्यादिना जीवति जीव-णिनि। (जेले) मत्स्योपजीविनि। "सत्वजालैर्यथा मत्स्यान् बध्नन्ति जलजीविनः" भा० शा० २०३अ०।

जलडिम्ब पु० जले डिम्ब इव। शम्बूके। (शामुक) क्षारा०

जलतण्डुलीय पु० जलजातस्तण्डुलीयः। कण्टे शाकभेदे शब्दार्थचि०।

जलतापिन् पु० जलतां स्वेदरूपस्नेहजलमयतामाप्नोति पाककाले आप+णिनि। (दक्षिण) मत्स्यभेदे शब्दर०। स्वार्थे क। जलतापिक तत्रार्थे। संज्ञायां कन्। काकमाचीवृक्षे च शब्दर०। [(दक्षिण) मत्स्यभेदे शब्दर०।

जलताल पु० जलतायै अलति पर्य्याप्नोति अल-अच्।

जलतिक्तिका स्त्री स्वल्पं तिक्ता कन् तिक्तिका जलप्रधाना तिक्तिका। शङ्खकीवृक्षे राजनि०।

जलत्रा स्त्री जलात् त्रायते त्रै-क। १वृक्षे २जङ्गमकटप्राणे क्षारा०।

जलत्रास पु० जलात् तद्दर्शनात् त्रासः, सोऽस्य वा। दंष्ट्रिणा दंशनोत्तरं जलं दृष्ट्वा त्रासे २तद्युक्ते त्रि०। "येन चापि भवेद्दष्टस्तस्य चेष्टाहतं नरः। बद्धगः प्रति कुर्वाणः क्रियाहीनो विनश्यति। दंष्ट्रिणा येन दष्टश्च तद्रूपं यदि पश्यति। अप्सु वा यदि वाऽऽदर्शे रिष्टं तस्य विनिर्दिशेत्। तस्यात्यकस्मादोऽभीक्ष्णं श्रुत्वा दृष्ट्वापि वा जलम्। जलत्रासस्तु विद्वान् रिष्टं तदपि कीर्त्तितम्। यदृष्टो वा जलत्रासी न कथञ्चन सिध्यति। प्रसुप्तोऽप्युत्थितो वापि स्वस्थोऽस्वस्थो न सिध्यति" सुश्रु०

जलद पु० जलं ददाति दा-क। १मेघे, २कर्पूरे च ३जलदातरि त्रि० मेदि०। "अनतिचिरोज्झितस्य जलदैर्न चिरस्थितवुद्बुदस्य पयसोऽनुकृतिम्"। "प्रौढध्वान' दिनमिह जलदाः" माघः "सन्देशं मे तदनु जलद! श्रोष्यसि श्रोत्रपेयम्" मेघ०।

जलदकाल पु० ६त०। वर्षाकाले "जलदकालमवोधकृतं दिशाम्" माघः।

जलदक्षय पु० जलदानां क्षयोऽत्र। १शरत्काले "सर्वाणि तनुतां यानि जलानि जलदक्षये" हरिवं० ७३अ०।

जलदङ्कुर पु० जलं दङ्कुर इव। जलरूपे दङ्कुराद्याभेदे (तान्त्रिदिया जलवाजान) "अवादयंस्ता जलदङ्कुरांश्च वाद्यानुरूपं जगुरेव हृष्टाः" हरिवं० १४८ अ०।

जलदागम पु० जलदानां मेघानामागमो यत्र। वर्षाकाले।

जलदाशन पु० जलदैरश्यते अश-भोजने कर्म्मणि ल्युट्। शालवृक्षे शब्दच०। तत्पत्राणां मेघैर्भोजनस्य लोकप्रसिद्धेस्तस्य तथात्वम्।

जलदुर्ग न० जलवेष्टितं दुर्गम्। दुर्गभेदे। दुर्गशब्दे विवृतिः।

जलदेव पु० जलं देवः अधिष्ठातृदेवता अस्य। १पूर्वाषाढानक्षत्रे तस्य जलदैवतत्वम् अङ्केपशब्दे ४६७ पृ० दृश्यम्। "मूलेऽम्बुमद्रकपतिर्जलदेवे काश्यपोमरथमेति" बृ० ११अ०। केतुग्रहाक्रान्तनक्षत्रभेदे फलोक्तौ। "दृष्टानन्दकलो वीरो दृढसौहृदश्च जलदेवे" बृ० स०१०१ अ० वैवाहिकनक्षत्रफलोक्तौ। ७त०। २जलस्थिते देवे च। जलदेवताप्यत्र "अन्वीयमानो जलदेवताभिर्निषेव्यमाणो जलजैश्च सर्वैः" हरिवं० २४३ अ०।

जलद्राक्षा स्त्री जले द्राक्षेव। शालिञ्जीशाके शब्दार्थचि०।

जलद्रोणी स्त्री जलस्य जलसेचनार्थं द्रोणीव। नौकाया जलसेचनपात्रे शब्दार्थचि०।

जलद्वीप पु० जलप्रधानो द्वीपः। द्वीपभेदे।

"गिरिभिर्वृतं च गम्यैश्च भुवनेन शुभेन च। यत्रवल्गो जलद्वीपं सम्पराज्योपशोभितम्। सुवर्णरूप्यकद्वीपं सुवर्णकरमण्डितम्। जलद्वीपमतिक्रम्य गिरिरो नाम पर्वतः। दिवं स्पृशति शृङ्गेण देवदानवसेवितः। एतेषां गिरिदुर्गेषु प्रपातेषु वनेषु च। मार्गध्वं सहिताः सर्वे रामपत्नीं यशस्विनीम्" रामा० कि० ४० अ०। क्वचित् पुस्तके यवद्वीप इति पाठः।

जलधर पु० जलं धरति धृ-अच्। १मेघे २मुस्तके च अमरः २समुद्रे हेमच०। ४तिमिगिलवृक्षे राजनि०। तस्य रसरूपजलाधिक्यात्तथात्वम् ४जलधारकमात्रे त्रि०। "नभो जलधरैर्हीनं साङ्गारक इवांशुमान्" भा० अ० १३३अ० "अयन्यञ्चि जलधर! मद्गृहालम्बाद्य काले" मेघ०।

जलधरमाला न० ६त०। १मेघपङ्क्तौ द्वादशाक्षरपादके २छन्दोभेदे च। "अध्वाष्टाभिर्जलधरमाला म्नौ म्नौ" छ०

र० "या भक्तानां कल्पिदुरितोत्तप्तानां तापच्छेदे जलधर-माला नव्या। भव्याकारा दिनकरपुरीकूले कैलिलोला क्रतुतुरव्यात् सा वः" छन्दोम०।

**जलधार** पु०जलं धारयति धारि-अण् उप०स०। १शाकद्वीपस्थे गिरिभेदे। शाकद्वीपोपक्रमे "तत्रैव पर्वता राजन्! सप्तात्र मणिभूषिताः। रत्नाकरास्तथा नद्यस्तेषां नामानि मे शृणु। अतीव गुणवत् सर्वं तत्र पुण्यं जनाधिप!। देवर्षिगन्धर्वयुतः प्रथमो मेरुरुच्यते। प्रागायतो महाराज! मलयो नाम पर्वतः। यतो मेघाः प्रवर्त्तन्ते प्रभवन्ति च सर्वशः। ततः पूर्वेण कौरव्य! जलधारो महागिरिः। यत्र नित्यसुपादत्ते वासवः परमं जलम्" भा०भी०११अ०।२जलधारके त्रि०। ३त०।२जलसन्ततौ स्त्री।

**जलधि** पु० जलं धीयतेऽत्र धा-आधारे कि उप० स०। समुद्रे "छायेव या स्वर्जलधेर्जलेषु" आत्मानमेव जलधेः प्रतिबिम्बिताङ्गः" माघः। "एकदशशतसहस्रायुतलक्षप्रयुतकोटयः क्रमशः। अर्बुदमब्जं खर्वनिखर्वमहापद्मशङ्वस्तस्मात्। जलधिश्चान्त्यं मध्यं परार्द्धमिति दशगुणोत्तराः संज्ञा" लीलावत्युक्ते २संख्याभेदे। ४ चतुःसंख्यायां च।

**जलधिगा** स्त्री जलधिं गच्छति गम-ड। १नदीमात्रे हेमच० सर्वासां नदीनां साक्षात् परम्परया समुद्रगामित्वात्तथात्वम् अतएवोक्तं "सर्वा नद्यः समुद्रगाः" इति साक्षात् समुद्रगामिन्यां २गङ्गादिनद्यां च। समुद्रगादयोऽत्र।

**जलधिज** पु० जलधौ जायते जन-ड। १चन्द्रे। २लक्ष्म्यां स्त्री त्रिका०। ३समुद्रजातमात्रे त्रि०।

**जलधेनु** स्त्री दानार्थकल्पितायां जलादिनिर्मितायां धेन्वां सा च नानाविधा तद्विधिः हेमा० दा० उक्तो यथा

"जलधेनुं प्रवक्ष्यामि प्रीयते दत्तया यया। देवदेवो हृषीकेशः सर्वगः सर्वभावनः। जलकुम्भं नरव्याघ्र! सुवर्णरजतान्वितम्। रत्नगर्भमणैस्तु पात्रैर्धान्यैः समन्वितम्। सितवस्त्रयुगच्छन्नं दूर्वापल्लवशोभितम्। कृष्णसीसुरीशोरवालकामलकैर्युतम्। प्रियङ्गुपत्रसञ्छन्नं सितवस्त्रोपवीतिनम्। सच्छत्रं सोपानत्कं च दर्भविष्टरसंस्थितम्। चतुर्भिः संयुतं भूप! तिलपात्रैश्चतुर्दिशम्। स्थापितं दधिपात्रे च हृतचौद्रघृता सखे। उपोषितः समभ्यर्च्य वासुदेवं जलेश्वरम्। पुष्पधूपोपहारैस्तु यथाविभवमादृतः। सङ्कल्प्य जलधेनुञ्च कुम्भं क्रमभिपूज्य च। पूजयेद्वस्त्रकल्पद्यं कुम्भं जलमयं बुधः। एवं संपूज्य गोविन्दं जलधेनुं सवत्सिकाम्। सितवस्त्रधरः शान्तो वीतरागोविमत्सरः। दद्यात् द्विजाय राजेन्द्र! प्रीत्यर्थं जलशायिनः। जलशायी जगद्योनिः प्रीयतां मम केशवः। इति चोच्चार्य्य भूनाथ! विप्राय प्रतिपादयेत्। अपकाङ्क्षाधिना स्थेयमहोरात्रमतः परम्" जलकुम्भमित्यादि, कुम्भोऽत्र कलसः। सुवर्णरजतयोरनियतपरिमाणतया यथाशक्ति विधानं पञ्चरत्नानि धान्यानि च परिभाषायामुक्तानि अत्र यद्यपि सामान्येनोपदेशः तथापि तत्सामान्यादितरेषु तथात्वमितिन्यायादितरधेनुपदविरुद्धधर्मानुष्ठानं वेदितव्यं ततश्च सुवर्णस्य मत्स्याकृतित्वं रजतस्य खुराकृतित्वं, तिलपात्राणां ताम्रपात्रमयत्वं, दधिपात्रस्य कांस्यपात्रमयत्वं, चानुसन्धेयं तथा धान्यानि पार्श्वद्वये, कृष्णादीनि शृङ्गदेशे, प्रियङ्गुपत्रं श्रवणे, यज्ञोपवीतं शिरःस्थाने स्थापयेत्। वत्सोऽपि चतुर्थांशेन धेनुवत् कार्य्यः। कश्चित्तु "पूजयेद्वस्त्रकं तद्वत् क्षतं हतमयं बुधः" इति पाठात् घृतजलयोर्विकल्पोऽवगम्यते, दानवाक्यन्तु पूर्ववत् दक्षिणा चात्र यथाशक्ति सुवर्णमिति। "अनेन विधिना दत्त्वा जलधेनुं नराधिप!। सर्व्वान् कामानवाप्नोति ये दिव्या ये च मानुषाः। शरीरारोग्यमाबाधोपशमः सार्वकालिकः। नृणां भवति दत्तायां जलधेन्वां न संशयः"। इति विष्णुधर्म्मोक्तो जलधेनुदानविधिः।

"भानुरुवाच। जलधेनुं प्रवक्ष्यामि प्रीयते दत्तया यया। देवदेवो मयूखेशः सर्वगः सर्वभावनः"। जलकुम्भं समानीयेत्यादि विष्णुधर्म्मतुल्यार्थं, विशेषस्तु "ततः संपूज्य चादित्यं जलधेनुं सवत्सिकाम्। दद्याद्विप्राय देवार्थे प्रीत्यर्थं मिहिरस्य तु। आदित्यः स जगद्योनिः प्रीयतां मिहिरः सदा। इति चोच्चार्य्य तां शान्तां विप्राय प्रतिपादयेत्। अनेन विधिना यस्तु जलधेनुं महासने!। सर्व्वान्कामानवाप्नोति यांश्च ध्यायति मानवः। सर्वपाप विनिर्म्मुक्तः पितरं सपितामहम्। प्रपितामहं यथा पूर्वपुरुषाणां चतुष्टयम्। आत्मानं ससुतं पौत्रं तदधस्ताच्चतुष्टयम्। तारयेत् स मुनीन्द्रेह जलधेनुप्रदो नरः। यश्च श्रद्धाति विधिवत् तस्यार्थे वंविधाः क्रमे। चतुर्दश तथा चैव ददतश्चानुमोदतः। दीयमानां प्रपश्यन्ति जलधेनुं च ये नराः। तेऽप्यशेषाघनिर्म्मुक्ताः प्रयान्ति परमां गतिम्"। इति आदित्यपुराणोक्तो जलधेनुदानविधिः। तोयधेनुरत्र।

"अगस्त्य उवाच। तोयधेनुं शृणु वत्स! यथा देवी प्रसीदति। कृत्वा तोयसंपूर्णं रम्यवस्त्रयुगान्वितम्। सप्तधान्यैर्युतं दूर्वापल्लवशोभितम्"। सप्तधान्यानि, सर्षपान्यानि। "दूर्वाञ्चतदधिशङ्खकृष्णागलकचन्दनैः। माल्यक्षतसमायुक्तं तिलपात्रैश्च संयुतम्। दधिक्षीरघृतं पात्रं विधानेनोपकल्पयेत्। वत्सकं कल्पयेत्तस्यास्तत्पुरोभयं बुधः। देवीमभ्यर्च्य विधिवत् सोपवासोऽथ नक्तवान्। देवीभक्तो प्रदद्याद्यः सर्वान् कामानवाप्नुयात्। जये! शिवदनि! देवि! देवानां भयनाशिनि! वेदमातर्धरे! दुर्गे! सर्वगे! शुभगे! नमः। अनेन वत्स! मन्त्रेण नन्दानाम्नाभिमन्त्रयेत्। देवी मे प्रीयतां नित्यं सर्वोदितफला शिवा" इति देवीपुराणोक्तो तोयधेनुदानविधिः।

**जलनकुल** पु० जले नकुल इव। ऊद्रे (धाड़िया) (उद्दिड़ाल) ख्याते जलजन्तुभेदे त्रिका०।

**जलनिधि** पु० निधीयतेऽस्मिन् नि+धा+आधारे कि उप० स०। समुद्रे अमरः। "तत्रासौ भगवान् देवः स्वपन् जलनिधौ तदा" भा० व० २७१अ०। २चतुःसंख्यायाम् "वारे शीतकरं तिथौ जलनिधिं भेऽग्निञ्च योगे द्वयम्" सतत्त्वसत्तावली "जलनिधिरशनायाः स्वामितां याति भूमेः" ह० सं० १२अ०।

**जलनिर्गम** पु०जलानां निर्गमः। १नद्यादेर्जलबहमार्गे,अधःस्थितस्य २जलस्योर्द्धगतौ, जलनिःसरणे च अमरभरतौ।

**जलनीली** स्त्री जलं नीलयति नील+कृत्करोति णिच्-अण् उप०स० गौरा ङीष्। शैवाले अमरः स्वार्थे क। जलनीलिकाप्यत्र।

**जलन्धम** पु० जलं धमति ध्मा-खश्। दानवभेदे "अष्टदंष्ट्रश्चतुर्दंष्ट्रो मेघनादो जलन्धमः" हरिवं० २४० अ०। सत्यभामायां कृष्णाज्जाते २कन्याभेदे स्त्री "अक्षिरे सत्यभामायां भानुर्भीमरथः शुभः। रोहितो दीप्तिमांश्चैव ताम्रजाश्चो जलान्धकः। भानुर्भीमरिका चैव ताम्रपक्षा जलन्धमा। चतस्रो जज्ञिरे तेषां स्वसारो गरुडध्वजात्" हरिवं०१६२ अ०।

**जलन्धर** पु०जलं धरति धा+ख सुम्। १ऋषिभेदे तस्य गोत्रापत्यं नडा०फक्। जालन्धरायण तद्गोत्रापत्ये पुंस्त्री। २असुरभेदे तदुत्पत्तिकथा पाद्मोत्तरखण्डे दृश्या। ३रोगाङ्के बन्धभेदे तल्लक्षणादिकं काशीख० ४१ अ० उक्तं यथा "बध्नाति च सिराजालमधोगामि न भोजनम्। एष जलन्धरो बन्धः कण्ठे दुःखौघनाशनः। जलन्धरे कृते बन्धे कण्ठसङ्कोचलक्षणे। न पीयूषं पतत्यग्नौ न च वायुः प्रधावति" "महासङ्घां नभोमुद्रामुड्डीयानं जलन्धरम्। मूलबन्धञ्च यो वेत्ति स योगी योगसिद्धिभाक्" तत्त्वाध्याये।

**जलपक्षिन्** पु० जलस्थितः पक्षी। जलचरखगे।

**जलपति** पु० ६त०। १वरुणे। हेमच०। तस्य जलपतित्वकथा काशीख० १२ अ० यथा

"ततस्तं तनयः पृष्ट्वा पितरं प्रणिपत्य च। जगाम तूर्णं तपसे श्रीमद्वाराणसीं पुरीम्। तत्र तप्त्वा तपो घोरं लिङ्गं संस्थाप्य शाम्भवम्। पञ्च वर्षसहस्राणि स्थितः पाषाणनिश्चलः। आविरासीन्महादेवस्तुष्टस्तु तपसा ततः। उवाच कार्ष्णिं! ब्रूहि किं ददामि वरोत्तमम्। कार्ष्णिरुवाच। यदि नाथ! प्रसन्नोऽसि भक्तानामनुकम्पन!। सर्वासामाधिपत्यं मे देहि यां यादसामपि। इति श्रुत्वा महेशानः सर्वचित्तदृगप्रभुः। अभ्यधित्तत् ततस्तञ्च वारुणे परमे पदे। रत्नानामब्धिजातानामब्दानां सरितामपि। सरसां पल्वलानाञ्च बाष्पस्रोतसां पुनः। जलाशयानां सर्वेषां प्रतीच्यां चैव वै दिशः। अधीश्वरः पाशपाणिर्भव सर्वामरप्रियः" २समुद्रे जलं पतिरस्य। ३पूर्वाषाढानक्षत्रे च जलनाथादयोऽप्यत्र।

**जलपथ** पु० जलमेव पन्थाः अच् समा०। १जलमार्गे "यादोनाथाः शिवजलपथा कर्म्मणे नौचराणाम्" रघुः। ६त०। २प्रणाल्यां जलनिर्गममार्गे च।

**जलपारावत** पुंस्त्री जले पारावत इव। जलकपोते (पानकौड़ि) पक्षिभेदे राजनि०। स्त्रियां ङीष्।

**जलपित्त** न० जलस्य पित्तमिव। १कपिले अग्नौ शब्दर० तस्य जलहेतुत्वात् तथात्वम्।

**जलपिप्पली** स्त्री जलजाता पिप्पली। (जलपिपली) पिप्पलीभेदे। "जलपिप्पल्यभिहिता शारदी शकुलादनी। मत्स्यादनी मत्स्यगन्धा लाङ्गलीत्यपि कीर्त्तिता। जलपिप्पलिका हृद्या चक्षुष्या शुक्रला लघुः। संग्राहिणी हिमा रूक्षा रक्तदोषव्रणापहा। कटुपाका रसा रूक्षा कषाया वह्निवर्द्धनी" भावप्र०।

**जलपुष्प** न० जलजातं पुष्पम्। कमलादौ।

**जलपूर** पु० ६त०। जलसमूहे। "वृन्दावनविपिने परिसर-परिगतयमुनाजलपूरे विहरति" गीत०।

जलपृष्ठजा स्त्री जलस्य पृष्ठे उपरि जायते जन–ड ७त०। शैवाले शब्दच०। [ जलदाने तर्पणे।

जलप्रदान न० प्रेतादिभ्यः जलस्य प्रदानम्। प्रेताद्युद्देशेन

जलप्रदानिक न० जलप्रदानं युद्दिश्यतानां प्रेतानामुद्देशेन जलप्रदानं प्रतिपाद्यतयाऽस्त्यस्य ठन्। भारतस्त्रीपर्वान्तर्गते अवान्तरपर्वणि तच्च स्त्रीपर्वणि प्रथमावधि १५ अध्यायपर्य्यन्तं "जलप्रदानिकं पर्व स्त्रीविलापस्ततः परम्" भा० आ० २अ०।

जलप्रपा स्त्री जलस्य जलदानार्थं प्रपा। जलदानार्थं शालायाम् (जलसत्र)। "यात्रोद्दाहजलप्रपाशिशुसंस्कारव्रतव्याहृतीः" स०चि० टी० धृतवाक्यम्।

जलप्रान्त पु० ६त०। जलसमीपस्थाने। [ अमरः।

जलप्राय न० जलं प्रायं यत्र। जलबहुले देशे अनूपदेशे

जलप्रिय पुंस्त्री ६त०। १चातकखगे शब्दर०। २मत्स्ये शब्दच० स्त्रियां जातित्वेऽपि योपधत्वात् टाप्। ३जलप्रियमात्रे त्रि०। [ जन्तुभेदे। स्त्रियां जातित्वात् ङीष्।

जलप्लव पुंस्त्री जले प्लवते प्लु–अच्। (उद्दिड़ाल) जल-

जलफल न० जलजातं फलम्। झङ्गाटके भावप्र०।

"झङ्गाटकं जलफलं त्रिकोणफलमित्यपि। झङ्गाटकं हिमं स्वादु गुरु दृष्यं कषायकम्। वाहिशुक्रानिलश्लेष्मप्रदं पित्तप्रदाहनुत्"।

जलबन्ध पु० जलं बध्नाति बन्ध–खुञ्। जलस्रोतोनिरोधके दारुशिलामये १सेतौ शब्दर०। भावे घञ् ६त०। २जलस्य बन्धे च। [विना तस्य जीवनाभावेन तथात्वम्।

जलबन्धु पु० जलं बन्धुर्यस्य। मत्स्ये शब्दर० जलं

जलबालक पु० जलं बाल इव यस्य कप्। विन्ध्यपर्वते हेम०। जलस्य बालिकेव। १विद्युति स्त्री हेम०।

जलबिम्ब पुंन० ६त०। जलस्य बुद्बुदे मध्यावकाशयुक्ते शिथिलसंयोगेन ऊर्द्ध्वाकारे तोयांशभेदे मेदि०। "जम्बूबल्वजलबिम्बबल्लजबज्जम्बालबल्वालवत्" उद्भटः।

जलबि(वि)ल्व पु० जलप्रधानो बिल्वद्रव। १कर्कटे। बिल–भेदने क। २जलचत्वरे(चातरजल)ऽल्पजलदेशे हारा०।

जलबुद्बुद न० ६त०। जलबिम्बे। "मानुष्ये कदलीस्तम्भनिःसारे सारमार्गणम्। यः करोति स वै मूढो जलबुद्बुदसन्निभे" शब्दार्थचि०धृतवाक्यम्।

जलब्राह्मी स्त्री जले ब्राह्मीव। हिलमोच्यां त्रिका०।

जलभू पु० भवत्यस्मात् भू–क्विपादाने क्विप् ६त०। १मेघे २तन्नामनामके कर्पूरे च जलं भूरुत्पत्तिस्थानमस्य। ३कच्छटे शब्दच०। ४जलाधारभूमौ स्त्री।

जलभृत् पु० जलं बिभर्त्ति भृ–क्विप् ६त०। १मेघे २तन्नामनामके कर्पूरे च ३तोयधारकमात्रे घटादौ त्रि०।

जलमक्षिका स्त्री जलजाता मक्षिका। तोयजलभौ त्रिका०

जलमण्डूक न० जलं मण्डूकमिव। मण्डूकवाद्यतुल्ये करतलेन तद्वद्ध्वनिकारके जलदर्दुरे "जग्मुर्जलानि जलमण्डूकवाद्यवत्सु" माघः। "जलमेव पाणिनो त्यापितमपरेण ताडितं मण्डूकवत् ध्वनतीति लोकप्रसिद्धम्" मल्लि०। [मल्लारङ्गविङ्गे हारा०।

जलमङ्ग पु०जले मङ्गुरिव निरन्तरमज्जनोन्मज्जनकारित्वात्।

जलमधूक पु० जलसञ्जिघटजातो मधूकः। जलान्तिकजाते मधूकभेदे मधूकके भावप्र०।

"मधुको गुडपुष्पः स्यात् मधुद्रुमो मधुस्रवः। वानप्रस्थो मधुष्ठीलो जलजोऽथ मधूलकः।" "मधूकपुष्पं मधुरं शीतलं गुरु दृंहणम्। फलं शीतं गुरु स्वादु गुरुलं वातपित्तनुत्। क्षतक्षयं हन्ति तृष्णारुदाहश्वासचतच्छयान्"।

जलमय त्रि० जलात्मकः जल+मयट्। १जलात्मके चन्द्रादौ "सलिलमये शशिनि रवेर्दीधितयः" ह०स० तस्य तथात्वसङ्गम्। २तल्लोकस्थे कर्म्मिणामग्नये देहे च। स्त्रियां ङीप्। "उभे एव चमे योदुस्तभयोर्बीजमाहितम्। सा वा शम्भोस्तदीया वा मूर्त्तिर्जलमयी मम" क्षमा० शम्भोः चित्वाद्यष्टमूर्त्तिकत्वेन तन्मूर्त्तेर्जलमयत्वम्। जलस्य ब्रह्मबीजाधारत्वं च मनुनोक्तं यथा "आप एव ससर्जादौ तासु बीजमवासृजत्"।

जलमषि पु० जलं मस्यति छिनत्ति सूक्ष्मांशतया भिनत्ति मस–इन् ६त०। १मेघे हारा०। २तन्नामनामके कर्पूरे च।

जलमार्ग पु०जलस्य तद्वाहस्य मार्गः। १पथाल्याम् (पयनाला) हेम०। जलमेव मार्गः। २जलस्थे मार्गे च (जलपथ)।

जलमार्ज्जार पुंस्त्री जलनकुले त्रिका०स्त्रियां जातित्वात् ङीष्

जलमातृका स्त्री जलस्थिता मातृका। जलस्थिते मातृकाभेदे तद्भेदाः सप्त विधानया० उक्ता यथा "मत्सी कूर्मी वराही च दर्दुरी मकरी तथा। जलूका जन्तुका चैव सप्तैता जलमातृकाः"।

जलमुच् पु० जलानि मुञ्चति मुच–क्विप्। १मेघे अमरः तन्नामनामके २कर्पूरे च। "शङ्खास्फोटा इव जलमुचस्त्वाद्दशा यत्र जालैः" मेघ०। ३जलमोचनकर्त्तरि त्रि० "नालम्बुदा जलमुचोऽचलसन्निकाशाः ह०।८।

**जलमूर्त्ति** पु० जलं मूर्त्तिरस्य। शिवे। अष्टमूर्त्तिशब्दे ५२० पृ० दृश्यम्।

**जलमूर्त्तिका** पु० जलस्य मूर्त्तिः घनीभावो यत्र कप्। करकायाम् उष्णवातसंयोगजाते घनीभूते जले शब्दच०। तस्य च तथात्वम् करकशब्दे १६८७ पृ० दृश्यम्।

**जलमोद** न०जलेन जलयोगेन मोदयति सेवितं सुद-णिच्-अच् उप० स०। उशीरे (वेणारमूल) राजनि०।

**जलयन्त्र** न० जलानासुत्क्षेपणार्थं यन्त्रम्। (फोहारा) ख्याते १धारायन्त्रे २कूपादितस्तोयोत्थापकयन्त्रभेदे "विलिप्तगात्रा जलयन्त्रहस्ताः" हरिवं० १४८ अ०। जलेन तदाकर्षणेन यन्त्रं घटीयन्त्रम्। २कालज्ञापके घटीयन्त्रभेदे घटीयन्त्रशब्दे २७८१ दृश्यम्। स्वार्थे क। तत्रार्थे "हस्तप्रसक्तैर्जलयन्त्रकैश्च प्रहृष्टरूपाः सिषिचुस्तदानीम्" हरिवं० १४८ अ०।

**जलयन्त्रगृह** न० जलयन्त्रं तन्मध्य इव स्थितम् गृहम्। चतुःपार्श्वे जलयुक्ते जलमध्ये निर्म्मितगृहे (जलटुङि) जलयन्त्रमन्दिरादयोऽप्यत्र फारा०।६त०। (फोहाराघर) २जलयन्त्रयुक्ते गृहे।

**जलयात्रा** स्त्री जलस्य तदाहरणार्थं यात्रा। शुभकर्मसम्पादनाय जलाहरणाय यात्रायाम्। तद्विधानादिकमाह वि०पा० वशिष्ठः "शान्तिकं पौष्टिकं वापि जलयात्रां विना बुधः। कुरुते यदि वा मोहात् कर्म तस्य च निष्फलम्। तडागादिप्रतिष्ठासु देवतायतनादिषु। लक्षहोमेकोटिहोमेऽयुतहोमे तथैव च। व्रतोत्सर्गमहादाने यज्ञे वा वितते शुभे"। व्रतोत्सर्गे व्रतोद्यापने इत्यर्थः। "जलयात्रां पुरा कृत्वा श्रेष्ठं कर्म समाचरेत्। अथातः संप्रवक्ष्यामि जलयात्राविधिं शुभम्। यज्ञशालामतिक्रम्य ऋत्विग्भिर्ब्राह्मणैः सह। यजमानः सपत्नीकः सुहृद्बन्धुजनैर्युतः। अश्वारूढो गजारूढो यद्वालङ्कारभूषितः। गृहीत्वोपस्करं सर्वं गन्धपुष्पाक्षतादिकम्। जलाशयमतो गच्छेद्गीतवादित्रनिस्वनैः। अगाधं च शुभं गत्वा नदीं वाथ समुद्रगाम्। सुवासिन्योऽग्रतः कार्याः सर्वालङ्कारभूषिताः। हैमराजतताम्रान् वा मृण्मयान् कलशाञ्छुभान्। गृहीत्वा गन्धपुष्पाद्यैरर्चितान् सुदृढान् नवान्। जलाशयं समासाद्य तीरे गोमयलेपिते। चतुरस्रीकृते जले तत्र स्वस्तिकमालिखेत्। यद्वैवं तण्डुलैर्वापि पद्ममष्टदलं लिखेदित्यादि"। विस्तरस्तत्र द्रष्टव्यः।

**जलयान** न० जले यायते गम्यतेऽनेन या-करणे ल्युट् ७त०। जलेगमनसाधने नौकादौ। "व्यसनार्णवमभ्येति जलयानैर्यथार्णवम्" भाग० ३।१४।१६।

**जलरङ्कु** पुंस्त्री जले रङ्कुरिव। वकपक्षिणि हेमच० स्त्रियां जातित्वात् ङीष्।

**जलरङ्कू** पु० जले रङ्कुरिव। दात्यूहखगे हारा०।

**जलरञ्ज** पुंस्त्री जले रजति रञ्ज-अच्। वकखगे हेमच० स्त्रियां जातित्वात् ङीष्।

**जलर(ल)गड** पु० जलस्य र(ल)गड इव।१जलावर्त्ते २तोयरेखौ ३भुजङ्गमे पुंस्त्री हेमच०स्त्रियां जातित्वात् ङीष् उकारयुक्तमध्यः मेदि०।

**जलरस** पु० जलप्रधानो रसोऽस्य जलजातो वा रसः। १लवणे हारा०लवणस्य जलविशेषपाकेन जातत्वात् तथात्वम्। अतएव तस्य जलमध्ये निक्षेपे स्वप्रकृतिजलरूपत्वं भवतीति लोकवेदयोः प्रसिद्धम्।६त०। २तोयस्य रसे च।

**जलराक्षसी** स्त्री जलस्थिता राक्षसी। सिंहिकानाम्न्यां छायां गृहीत्वाऽऽकर्षिण्यां लवणाम्भसि स्थितायां राक्षस्याम् "शतयोजनविस्तीर्णं निहत्य जलराक्षसीम्" भा० व० २८१अ०। सा हि हनूमता यथा हता तथा रामा० सु० १अ० उक्तम्।

"प्लवमानन्तु तं दृष्ट्वा सिंहिका नाम राक्षसी। मनसा चिन्तयामास प्रहृष्टा कामरूपिणी। अद्य दीर्घस्य कालस्य भविष्याम्यहमागिता। इदं मम महासत्त्वं चिरस्य वशमागतम्। इति संचिन्त्य मनसा छायामस्य समाक्षिपत्। छायायां गृह्यमाणायां चिन्तयामास वानरः। समाक्षिप्तोऽस्मि सहसा यद्भूतपराक्रमः। प्रतिलोमेन वातेन महानौरिव सागरे। तिर्यगूर्ध्वमधश्चैव वीक्ष्यमाणस्तदा कपिः। ददर्श स महासत्त्वस्तिष्ठन्तं लवणाम्भसि। तद्दृष्ट्वा चिन्तयामास मारुतिर्विकृताननम्। कपिराज्ञा यथाख्यातं सत्यमद्भुतदर्शनम्। छायाग्राहि महावीर्यं तदिदन्नात्र संशयः। स तां बुद्ध्यार्थतत्त्वेन सिंहिकां मतिमान् कपिः। व्यवर्धत महाकायः प्रावृषीव बलाहकः। तस्य सा कायमुद्वीक्ष्य वर्धमानं महाकपेः। वक्त्रं प्रसारयामास पातालाम्बरसन्निभम्। घनराजीव गर्जन्ती वानरं समदिद्रवत्। स ददर्श ततस्तस्या विवृतं सुमहन्मुखम्। कायमात्रञ्च मेधावी मर्माणि च महाकपिः। स तस्या विवृते वक्त्रे वज्रसंहननः कपिः। संक्षिप्य सुदृढात्मानं निपपात महाकपिः। आस्ये तस्यानिमज्ज

नन्दहरुः सिद्धचारणाः। यक्षमानं यथा चन्द्रं पूर्वं पर्वणि राहुणा। ततस्तस्या नखैस्तीक्ष्णैर्मर्माण्युत्कृत्य वानरः। उत्पपाताथ वेगेन मनःसम्पातविक्रमः"।

**जलराशि** पु० ६त०। १जलसमूहे जलानां राशिरत्व। २समुद्रे च "क्षमातलं बलजलराशिरानमे" माघः।

**जलरुह्** न० जले रोहति रुह-क्विप् ७त०। १पद्मे हेमच०। क। जलरुहमप्यत्र हेमच०। "जलं तच्छुभे छन्नं फुल्लै-र्जलरुहैस्तथा" भा०आ०१२८अ०। २तोयरोहिमात्रे त्रि०।

**जलरूप** पुंस्त्री जलस्य रूपमिव रूपमस्य शुभ्रत्वात्। १मत्करे त्रि० स्त्रियां जातित्वात् ङीष्। ६त०।२तोयस्य रूपे न०।

**जललता** स्त्री जलस्य लतेव सन्ततिमत्त्वात्। तरङ्गलेखायां [व्रणभेदे। हारा०।

**जलवरिष्ट** पु० जलप्रधानो वरिष्टः। (पानिवसल) वसन-

**जलवल्कल** पु० जलानां वल्कल इव। कुम्भिकायाम्। (पानी) हारा०।

**जलवल्ली** स्त्री जलजाता वल्ली। भल्लाटकलतायां राजनि०।

**जलवाद्य** न०जलं वाद्यमिव। पाणिताडने वाद्यतुल्यध्वनि-युक्ते जले "आकाशगङ्गाजलवाद्यतज्ज्ञाः" हरिवं० २४८अ०।

**जलवानीर** पु०जलजातो वानीरः। अम्बुवेतसे शब्दार्थचि०

**जलवायस** पुंस्त्री जले वायस इव कृष्णत्वात्। (पानि-कौड़ो) महुखगे। स्त्रियां जातित्वात् ङीष्।

**जलवास** न० जलेन वास्यते सुरभीक्रियते वासि-कर्म्मणि अच्। १उशीरे राजनि०। तस्य जलसेचनेन सौर-भोत्पादात्तथात्वम्। ७त०। २तोये वासे। "स चिन्तया-मास मुनिर्जलवासे कदाचन" भा० शा० २६२ अ०। जलं वासयति सुरभीकरोति वासि अण् उप० स०। ३विष्णुकन्दे राजनि०।

**जलवाह** पु० जलं वहति वह-अण् उप०स०। १पारिवाहे मेघे हेमच० तन्नामनायके २कर्पूरे च "साद्रिजलधिजल-वाहपथम्" किरा०। ३जलवाहकमात्रे त्रि० "जलवा-हास्तथा मेघाः वायवस्तनयित्नवः" भा० स० ७अ०।

**जलविड़ाल** पुंस्त्री जले विड़ाल इव। (उदविड़ाल) जल-नकुले हारा०। स्त्रियां जातित्वात् ङीष्।

**जलविन्दुजा** स्त्री जलविन्दुभ्यो जायते जन-ड। यावना-नीशर्कराभेदे राजनि०। २तोयविन्दुजातमात्रे त्रि०।

**जलविषुव(त्)** न० जलप्रधानं विषुवं(त्)। राशिचक्रस्थे तुलाराशिरूपे स्थानभेदे "भचक्रनाभौ विषुवद्द्वितयं विषुवद्द्वयं समसूत्रगम्" सू० सि० "भचक्रनाभौ भगोलस्य ध्रुव-द्वयाभ्यां तुल्यान्तरेण मध्यभागे विषुवद्द्वितयं विषुवद्द्वयं समसूत्रगं परस्परं व्यासखण्डान्तरितं ध्रुवमध्ये विषुवद्वृत्तस्थानात् तद्वृत्ते क्रान्तिवृत्तभागौ यौ लग्नौ तौ क्रमेण पूर्वापरौ विषुवत्संज्ञौ मेषतुलाख्यौ चेत्यर्थः" रङ्ग०। २विषुवन्तु समाख्यातं तुलामेषभयो-स्तथा" ज्यो० जले ३तत्र रवेः संक्रमे च। संक्रा-न्तिश्च चलस्थिरभेदाभ्यां द्विविधा अयनसंक्रान्तिशब्दे ३११८ दर्शिता। जलविषुवसंक्रान्तिनक्षत्रतः स्थानविशेषे स्थनक्षत्रपाते तत्फलज्ञानार्थं जलविषुवचक्रं ज्यो० उक्तं यथा। "षड्मूर्द्धि, वदने पञ्च, चत्वारि, हृदये, तथा। त्रितयं करपादेषु" पयोविषुवभक्रमात्" त्रितयं त्रितय-मिति करपादेषु द्वादश इति २७ नक्षत्राणि स्थाप्यानि तत्र स्थानभेदे फलञ्चोक्तं "मानं वैरं वस्त्रसुखलाभं भोगं लाभं जलविषुवेषु" ज्यो०। पयोविषुवादयोऽप्यत्र।

**जलवृश्चिक** पु०जले वृश्चिक इव। (चिङ्गड़ि)मत्स्ये त्रिका०।

**जलवेतस** पु०जलजातो वेतसः। अम्बुवेतसे वेतसभेदे राजनि०

**जलवैक्लव** न० विक्लवस्य भावः अण् ६त०। दुर्निमित्तसूचके नद्यादीनां जलविकारभेदे तत्फलादिकसूत्रं बृ० स० ४६अ० यथा।

"अपसर्पणं नदीनां नगरादचिरेण शुष्यतां कुरुते। शोषणशोष्याणामन्येषां वा ह्रदादीनाम्। स्नेहासृङ्-मांसवहाः सङ्कुचकलुषाः प्रतीपमाधापि। परचक्र-स्यागमनं सद्यः कथयन्ति धूमभासात्। ज्वालाधूम-कथा रुदितोत्क्रुष्टानि चैव कूपानाम्। गीतप्रजल्पि-तानि च जनभरकाय प्रदिष्टानि। तोयोत्पत्तिरखाते गन्धरसविपर्यये च तोयानाम्। सलिलाशयविक्लवो वा महद्भयं तत्र शान्तिरियम्। सलिलविकारे कुर्यात् पूजां वरुणस्य वारुणैर्मन्त्रैः। तैरेव च जपहोमं शम-मेवं पापमुपयाति"। [त्रिका०।

**जलव्यध** पु० जलं विध्यति व्यध-अच्। कङ्कबोटमत्स्ये

**जलव्याल** पु०जलस्थो व्यालो हिंस्रः(ढोड़ा)१सर्पभेदे,अमरः। स्त्रियां जातित्वात् ङीष्। क्रूरकर्म्मणि २जनौ च।

**जलशय** पु० जले शेते शी-अच् ७त०। विष्णौ हेमच० सप्तम्या वा अलुकि। जलेशयोऽप्यत्र।

**जलशयन** पु० जलं शयनमस्य। विष्णौ हेमा०।

**जलशायिन्** पु० जले सलिलजले शेते शी-णिनि। नारा-यणे। "एकार्णवेऽहिशयने योगनिद्रासुपागतः। आसी-

र्थं श्रेयसमभजत् कल्याने भगवान् प्रभुः" देवीभा०।

**जलशुक्ति** स्त्री जलस्य शुक्तिरिव। शम्बूके अमरः।

**जलशूक** न० जलस्य शूकमग्रमिव। शैवाले हेमच०। "क्षीर-गुडाजलशूकमधुरवर्गं प्रतिवापं तैलं वा पाचयित्वा स्वतुप्तं निदध्यात्" सुश्रुतः।

**जलशूकर** पु० जलस्य शूकर इव। कुम्भीरे हेमच०।

**जलसन्ध** पु० धृतराष्ट्रभेदे। "विविंशतिर्विकर्णश्च जलसन्धः सुलोचनः" भा०आ०६७०। तत्पुत्रोक्तौ।

**जलसमुद्र** पु० जलमयः समुद्रः। लवणादिषु सप्तसु समुद्रेषु श्रेयसमुद्रे "लवणजलधिरादौ दुग्धसिन्धुश्च तस्मात् दध्युपक्रमे दध्नो घृतस्य घृतस्य तस्मात् मद्यस्य च स्वाद्जलस्य चान्त्यः" सि०शि०। [ सरोभेदे।

**जलसरस** न० नित्यस० सरस्+संज्ञायाम् अच् समा०।

**जलसर्पिणी** स्त्री जले सर्पति सृप-णिनि। जलौकायाम् (जोंक) हेमच०।

**जलसूचि** स्त्री जलस्था सूचिरिव। १कङ्कतोटमत्स्ये २मत्कुणाटके ३शिशुमारे ४जलौकायां च मेदि० ५काके पुंस्त्री हेमच०।

**जलस्तम्भ** न० जलं स्तभ्यतेऽनेन स्तभ्-करणे ल्युट्। १जलस्तम्भनसाधने मन्त्रादौ। भावे ल्युट्। जलस्य २स्तम्भने च जलस्तम्भनविद्या च दुर्योधनविदिता तया ह्रैपायनह्रदजलं संस्तभ्य स सुप्राप ततकथा भा०शा०१०अ०। "एवमुक्त्वा महाराज! प्राविशत्तं महाह्रदम्। अस्तम्भयत तोयञ्च मायया मनुजाधिपः" इत्यादिका।

**जलस्था** स्त्री जले तत्समीपे तिष्ठति स्था-क।१गण्डदूर्वायां राजनि० २जलस्थितमात्रे त्रि०। [ त्रिका०।

**जलह** न०जलेन हन्यते-हन-बा०ड श्रत०। खल्लजलयन्त्रभेदे

**जलहरण** न०ष०त०। तोयस्य स्थानान्तरनयने "लघुगुरुकनियमगतभिह ऋणिपतिमतमवमतमतिसुखनिगदपदम् दशवसुभुवनैर्यतिरिह यदि भवति हि रसिकजनहृदयविहितमदम्। वसुविमलचतुष्कलगणकृतगुणिगणचरणविरामाङ्कितसगणम् क्वचिदपि गुरुसहितं भवति कविहितं छन्दः सुन्दरि! जलहरणम्" इत्युक्तजलधरे २मात्रावृत्तभेदे। [ भेदे। हेमच०।

**जलहस्तिन्** पु०जले हस्तीव ७त०। जलस्थे हस्तिरूपे जन्तु-

**जलहार** त्रि० जलं हरति हृ-अण् उप० स०। जलहारके जलवाहके (भारि) प्रभृतौ स्त्रियां टाप् पा०सुखवो०षण् ङीप्। "शिरसा धृतकुम्भाभिर्वृद्धैरन्यजनास्पदैः। यमुना तीरमार्गेण जलहारीभिराहृतम्" हरिवं० ६१ अ०। अत्र पा०गौरा० ङीष्।

**जलहारिन्** त्रि० जलं हरति हृ-णिनि। जलवाहके। स्त्रियां ङीप्। "याभिरिदं शरीरमारामं इव जलहारिणीभिः केदार इव च कुल्याभिरुपस्निह्यतेऽनुगृह्यते च" सुश्रुतः। [फेने च। त्रिका०।

**जलहास** पु० जलानां हास इव शुभ्रत्वात्। १फेने, २समुद्र-

**जलहोम** पु० जले त्रिप्रः होमः ७त०। जले त्रिप्रक्ष्ये वैश्वदेवादिहोमभेदे तद्विधिः सं०त० दर्शितो यथा "लौकिके वैदिके चैव हुतोच्छिष्टं जले क्षिपेत्। वैश्वदेवञ्च कर्त्तव्यः पञ्चसूनापसत्तये"।

**जलह्रद** पु० जलप्रचुरो ह्रदः शा० त०। जलबहुले ह्रदे जलह्रदस्येदं तत्र भवो वा शिवा० अण्। जालह्रद तत्सम्बन्धिनि तत्र भवे च त्रि० स्त्रियां ङीप्।

**जलाका** स्त्री जले आकायति प्रकाशते आ+कै-क। जलौकायां शब्दर०।

**जलाकाश** पु० जलप्रतिबिम्बितः जलावच्छिन्नो वा आकाशः शा० त०। जलप्रतिबिम्बिते २जलावच्छिन्ने वा आकाशे "जलावच्छिन्नखे नीरं यत्, तत्र प्रतिबिम्बितः। साम्बनक्षत्रआकाशो जलाकाश उदीर्य्यते" शब्दार्थचि०। नीरूपस्याकाशस्य प्रतिबिम्बासम्बन्धेन साधनक्षत्रेति विशेषणम्। एतच्च प्रतिबिम्बवादे नीरूपस्य प्रतिबिम्बासम्भवमभिप्रेत्य विवरणाचार्य्यैरवच्छिन्नवादोऽङ्गीकृतः। तन्मते जलावच्छिन्नआकाश एव जलाकाश इति भेदः। अवच्छिन्नवादशब्दे ४२० पृ० दृश्यम्।

**जलाक्षी** स्त्री जलमश्नोति व्याप्नोति कारणतया अश-अण् गौरा० ङीष्। जलपिप्पल्यां शब्दर०।

**जलाखु** पु० जले आखुरिव। जलनकुले त्रिका०।

**जलाञ्जल** न०जलमञ्जति अनुच-बा० अलच् ह्रस्व०। १शैवाले जलस्याञ्जलमिव। २स्रोतो वारिनिर्गमे (स्रोतो निर्गच्छद्वारिणि) मेदि०।

**जलाञ्जलि** पु० जलपूर्णोऽञ्जलिः। १जलपूर्णाञ्जलौ अञ्जलिपूर्णवारिणि उपचारात् २तद्दानरूपायां पितॄणां तर्पणक्रियायाम्। "कृपत्वमासाद्य कृतो जलाञ्जलिः" चाण०।

**जलाटन** पुंस्त्री जले अटति अट-ल्यु। १कङ्कपक्षिणि स्त्रियां जातित्वात् ङीप्। २जलौकायां स्त्री मेदि० तत्र गौरा० ङीष्। [ द्वारा०स्त्रियां जातित्वात् ङीष्।

**जलाष्टक** पुंस्त्री जले अटति अट-ल्युच् पृषो०। नक्रराजे

जलाण्डक न० जले अण्ड इव कायति कै-क। प्रोताधाने क्षुद्रे मत्स्याण्डसंघाते जले अण्डरिव कायति कै: क। जलाण्डुक इति पाठान्तरम् तत्रार्थे हेमच०।

जलात्मक त्रि०जलमेवात्माऽस्य कप्। १जलमये। २जलौकायां स्त्री शब्दरत्ना० कापि अत इत्त्वम्। [नामपगमे च।

जलात्यय पु०जलस्यात्ययोः यत्न। १शरत्काले ह्रत०। २जला-

जलाधार पु० ह्रत०। जलानामाधारे तडागादौ अमरः। "आकाशमेकं हि यथा घटादिषु पृथक् भवेत्। तथात्मैकोऽप्यनेकस्तु जलाधारेष्विवांशुमान्" याज्ञ०।

जलाधिदैवत पुंन० ह्रत०। १वरुणे हलायुधः लिपिकरप्रमादकृतपाठदर्शनात् पुंस्त्वोक्तिः प्रमादिकी शरवह्निक्रं इन्द्रतत्पुरुषयोः पा० तत्पुरुषे परनिक्रस्यैव विधानेन पुंक्लीवत्वस्यैवौचित्यात्। जलमधिदैवतमस्य।२पूर्वाषाढानक्षत्रे न०।

जलाधिप पु० ह्रत०। १वरुणे। "नागक्रोदयतः स्यातं विप्रचित्तेर्जलाधिपः" हरिवं०२५२अ०। जलाधीशादयोऽप्यत्र। वत्सरभेदे २जलपतौ रव्यादिग्रहे च जलशब्दे ऋषिपराशरवाक्यम् दृश्यम् वत्सरभेदेन जलाधिपतिभेदानयनं तत्फलञ्च ज्यो० त० उक्तं यथा "जीवार्कबुधमन्दारकाव्यचन्द्रमसः क्रमात्। राजा मन्त्री जलाधीशः शस्यपोऽब्दिश्चतात् शतात्"। सप्तकृतशकाङ्के एकशेषे जीवो राजा अर्को मन्त्रीबुधो जलाधिपः शनिः शस्याधिपः। द्व्यवशेषे रव्यादिः। त्र्यवशेषे बुधादिः। चतुरवशेषे मन्दादि। पञ्चावशेषे भौमादि। षड्वशेषे काव्यादि। सप्तावशेषे चन्द्रादि। मासान्यायेन पुनः जीवादीनां यत्नत्वम्।

जलान्तक पु० जलमेवान्तो भूमण्डलस्य सीमा यत्र कप्। सप्तसमुद्रान्तर्गते स्वादूदके सप्तमे तदुत्तरं द्वीपान्तराभावेन तस्य भूमण्डलस्यान्तसीमात्वम्। "लवणेक्षुसुरासर्पिर्दधिदुग्धजलान्तकाः" त्रिका०। वासुदेवस्य सत्यभामायां पत्न्यां जाते २प्लवभेदे "जज्ञिरे सत्यभामायामित्युपक्रमे "रोहितो दीप्तिमांश्चैव ताम्रजाक्षो जलान्तकः" हरिवं० १६१ अ०।

जलाम्बिका स्त्री जलस्याम्बिकेव। कूपे त्रिका०।

जलायुका स्त्री जलमायुरस्याः कप् इत्वं०। जलौकायां (जोंक) शब्दरत्ना० तद्भेदलक्षणादिकं सुश्रुते उक्तं यथा। "अथ जलायुका वक्ष्यन्ते। जलमासामायुरिति जलायुका जलमासामोक इति जलौकसः। ता द्वादश तासां सविषाः षट् तावत्य एव निर्विषाः। तत्र सविषाः कृष्णा कर्बुरा अलगर्दा इन्द्रायुधा सामुद्रिका गोचन्दना चेति। तासामञ्जनचूर्णवर्णा पृथुशिराः कृष्णा। वर्म्मभल्लावदायता स्निग्धोन्नतकुक्षिः कर्बुरा। रोमभा महापार्श्वा कृष्णसस्यालगर्दा। इन्द्रायुधवद्वर्णराजिभिश्चित्रिता इन्द्रायुधा। ईषदसितपोतिका विचित्रपुष्पावलितचित्रा सामुद्रिका। गोष्ठशयवदधोभागे द्विधाभूताकृतिरणुसुखी गोचन्दनेति। ताभिर्दष्टे पुरुषे दंशे श्वयथुरतिमात्रं कण्डूमूर्च्छा ज्वरोदाहस्तम्भदिर्मदः सदनमिति लिङ्गानि भवन्ति। तत्र महागदः पानालेपननस्यकर्मादिषूपयोज्यः। इन्द्रायुधादष्टमसाध्यमित्येताः सविषाः सचिकित्सिता व्याख्याताः। अथ निर्विषाः। कपिला पिङ्गला भद्रसुखी मूषिका पुण्डरीकसखी सावरिका चेति। तत्र मनःशिलारञ्जिताभ्यामिव पार्श्वाभ्यां पृष्ठे स्निग्धमृदवर्णा कपिला। किञ्चिद्रक्ता रक्तकाया पिङ्गाऽऽयुगा च पिङ्गला। यत्नवर्णा शीघ्रपायिनी दीर्घतीक्ष्णसुखी भद्रसुखी। मूषिकाकृतिवर्णाऽनिष्टगन्धा च मूषिका। सदृवर्णा पुण्डरीकतुल्यवक्त्रा पुण्डरीकसखी। स्निग्धा पद्मपत्रवर्णादशाङ्गुलप्रमाणा सावरिका सा च पञ्चधेत्येता अविषा व्याख्याताः। तासां यवनपार्श्वप्रसह्यपौतनादीनि क्षेत्राणि। तेषु महाशरीरा बलवत्यः शीघ्रपायिन्यो महाशना निर्विषाश्च विशेषेण भवन्ति। तत्र सविषमल्लकीटदर्दुरमूत्रपुरीषकोथजाताः कलुषेष्वम्भःसु च सविषाः। पद्मोत्पलनलिनकुसदसौगन्धिककुवलयपुण्डरीकशैवालकोथजाता विमलेष्वम्भःसु च निर्विषाः। भवति चात्र। क्षेत्रेषु विचरन्त्येताः सलिलेषु ह्रदेषु च। न च सह्यैर्ग्रहचारिण्यो न च षड्भिश्चराः सुखाः। तासां प्रयत्नसमार्द्रचर्मणान्यैर्वा प्रयोगैर्ग्रहीत्वात्। अथैनां नवे महति घटे सरसाद्गोदकपङ्कभावाप्य निदध्यात् भक्ष्यार्थे चासासुपहरेच्छैवलं वल्लूरमोदकांश्च कन्दांश्चूर्णीकृत्य भक्ष्यार्थं तस्य मोदकानि च पत्राणि। त्र्यहात्र्यहतोऽन्यज्जलं भक्षंश्च दद्यात् सप्तरात्रात्सप्तरात्राच्च घटमन्यं संक्रामयेत्। भवति चात्र। स्थूलमध्याः परिक्लिष्टाः पृथ्वोष्ठा मन्दचेष्टिताः। क्षया क्षिप्तोऽल्पपायिन्यः सविषाश्च न पूजिताः। अथ जलौकोऽवसेकसाध्यव्याधितसपवेश्य संवेश्य वा विरुच्य चास्य तमवकाशं स्निग्धोभयचूर्णैर्घट्टयेद्रजः स्यात्। स्निग्धाश्च ताः सर्षपरजनीकल्कोदकप्रदिग्धगात्रीः सलिलसरक-

मध्ये सङ्कर्त्तस्थिता विगतक्लमा स्नात्वा ताभीरोगं याहयेत्। सूक्ष्मशुक्लार्द्रपिच्छप्रोतावच्छन्नां कृत्वा सुखमपाहयुयादगृह्णत्यै क्षीरबिन्दुं वा दद्याच्छस्यपदानि वा कुर्यात यद्येवमपि न गृह्णीयात्तदान्यां याहयेत्। यदा च निविशतेऽश्वखुरपदाननं कृत्वोन्नम्य च स्कन्धं तदा जानीयाद्गृह्णातीति मत्कुणीं चार्द्रवस्त्रावच्छन्नां धारयेत्सेचयेच्च। दंशे तोदकण्डूप्रादुर्भावैर्जानीयाच्छुद्धमियमादत्तदति शुद्धमाददानामपनयेत्। अथ शोणितगन्धेन न सङ्कोचमुखसखाः सैन्धवचूर्णेनावकिरेत्। अथ पतितां तण्डुलकणडनप्रदिग्धगात्रीं तैलसक्थाभ्यक्तसक्थीं वामहस्ताङ्गुष्ठाङ्गुलीभ्यां गृहीतपुच्छां दक्षिणहस्ताङ्गुष्ठाङ्गुलिभ्यां शनैरनुलोममनुमार्जयेदासखाद्गमयेत्तावद्यावत्सम्यग्वान्तलिङ्गानीति। सम्यग् वान्ता सलिलसरकन्यक्षा भोक्तुकामा सती चरेत्। या सीदति न चेष्टते सा दुर्वान्ता तां पुनः सम्यग्वामयेत्। दुर्वान्ताया व्याधिरसाध्य इन्द्रमदो नाम भवति। अथ सुवान्तां पूर्ववच्छिद्धयात् शोणितस्य च योगायोगानवेक्ष्य अलौकोव्रणान्मधुनावघट्टयेच्छीताभिरद्भिश्च परिषेचयेद्वल्गीत वा व्रणं कषायमधुरस्निग्धशीतैश्च प्रदेहैः प्रदिग्धादिति। भवति चात्र। क्षेत्राणि सदृशं जातीः पोष्यं सावचारणम्। अलौकसाञ्च यो वेत्ति तन्त्राध्यान् स जयेद्धयान्" ।

**जलार्क** पु० जलप्रतिबिम्बितोऽर्कः। जलप्रतिबिम्बितसूर्य्ये "प्रकृतिस्थोऽपि पुरुषो नाद्यते प्राकृतैर्गुणैः। अविकारादकर्त्तृत्वात् निर्गुणत्वात् जलार्कवत्" भाग० १।२।१।

**जलार्णव** पु० जलमयः अर्णवः। अन्ये क्षाद्भूदके समुद्रे।

**जलार्द्रा** स्त्री जलेनार्द्रा। आर्द्रातालवृन्ते "धृतिलं तालवृन्तं स्यात् तद्वदुत्क्षेपणञ्च तत्। जलेनार्द्रं जलार्द्रा स्यात्" वैजः २जलार्द्रवस्त्रे न० क्षारा० ३जलेनार्द्रे च त्रि०। "घुष्यासारैः क्षपयतु भवान् व्योमगङ्गाजलार्द्रैः" मेघ०।

**जलालु** पु० जलजात आलुः श्रा०त०। (पानिया आलु) आलुकभेदे राजनि०। [आलूके राजनि०।

**जलालुक** न० जलस्यालुरिव कायति कै-क। पद्मकन्दे

**जलालुका** स्त्री जले अलति गच्छति अल-गत्यादौ बा० उक। जलौकायां भरतः। [जलौकायां भरतः।

**जलालोका** स्त्री जले आलोक्यते आ+लोक-कर्म्मणि घञ्।

**जलावर्त्त** पु० आ+वृत-णिच्-भावे अच् इत०। जलस्य स्वतो भ्रमणे जटाधरः।

**जलाशय** पु०जले तत्समीपे आशेते आ+शी-अच्। १उशीरे अमरः २नामख्याते गन्धद्रव्यभेदे राजनि०। आ+शी-आधारे अच् इत०। ३समुद्रे हेमच०। ४जलाधारे तड़ागादौ "कूपेशयैरत्र जलाशयोषिताः" माघः। "न वासोभिः सङ्गाजत्वं नाविशाते जलाशये" "तेनैव सार्द्धं प्राक्षेयुः स्नात्वा पुण्यजलाशये" मनुः। तङ्गेदादि जलाशयोत्सर्गशब्दे दृश्यम्। जलमाशय आधारो यस्य। ५मत्कुणाटके राजनि०। ६गुणडालीवृक्षे स्त्री राजनि०।

**जलाशयोत्सर्ग** पु० इत०। कूपादेर्जलाशयस्य प्रतिष्ठारूपे उत्सर्गे जलाशयोत्सर्गतत्त्वे तस्य भेदलक्षणादिकमुक्तं यथा "अथ जलाशयाः। ते च खननसाध्याश्चत्वारः। कूपवापीपुष्करिणीतड़ागरूपाः। तथाच मत्स्यपुराणम्। "एवमेव पुराणेषु तड़ागविधिरुच्यते। कूपवापीतड़ागेषु तथा पुष्करिणीषु च"। कूपोऽहारकोगर्त्तविशेषः बद्धसोपानकोऽयं वापीति हैतनिर्णयः। वस्तुतो वापीलक्षणं वक्ष्यते। पुष्करिणीतड़ागावाह वशिष्ठसंहितायाम् "चतुर्विंशाङ्गुलोत्सेधमुत्सृजेदुत्तरोत्तरः। शतधन्वन्तरश्चैव तावत् पुष्करिणी मता। एतत्पञ्चगुणः प्रोक्तस्तड़ागइति निश्चयः"। धनुर्हस्तचतुष्टयं चतुरुत्तरचतुर्गुणहस्तोत्सेधमुक्तवान् तथाच विष्णुधर्मोत्तरे प्रथमकाण्डम् "द्वादशाङ्गुलिकः प्रक्षेपश्च यतः स्मृतः। तदुक्तं धनुः प्रोक्तं क्रोशोधनुःसहस्रकः"। कात्यिने "चतुर्विंशाङ्गुलोत्सेधचतुर्भिश्च करैर्धनुः"। अथोत्सेधस्तेन खातचतुर्दिक्षु विंशतिहस्तान्यूनतायां चतुःशतहस्तान्यूनान्तरत्वेन पुष्करिणी। चतुर्दिक्षु पञ्चत्वारिंशद्धस्तान्यूनतायां सप्तहस्तितयहस्तान्यूनान्तरत्वेन तड़ागः। एतच्च जलाधारपरं नद्यपरितटपरम्। मध्यवर्त्तिमानधृतोदग्रिहः "शतेन धनुर्भिः पुष्करिणी त्रिभिः शतैर्दीर्घिका। चतुर्भिर्द्रोणः पञ्चभिस्तड़ागः। द्रोणाद्गुणा वापी" इति संहितायामन्तरपदश्रुतेरत्रापि तथायमस्यते। तेन चतुर्दिक्षु पञ्चत्रिंशद्धस्तान्यूनतायां द्वादशशतहस्तान्तरान्यूनत्वेन दीर्घिका। चतुर्दिक्षु चत्वारिंशद्धस्तान्यूनतायां षोड़शशतहस्तान्तरान्यूनत्वेन द्रोणः। चतुर्दिक्षु त्रिंशदधिकशतहस्तान्यूनतायां षोड़शसहस्रहस्तान्तरान्यूनत्वेन वापी। करोऽत्र क्रमोक्तपञ्चममध्यमाङ्गुल्यपर्य्यन्तः तथाच कल्पतरुरत्नाकरयोः "मध्यमाङ्गुलिकूपरयोर्मध्यः प्रामाणिकः करः"। तत्करणफलमाहादित्यपुराणम् "सेतुबन्धरता ये च तीर्थ-

शौचरताश्च ये। तडागकूपकर्त्तारोऽमुष्मिन्ते ते तथाभयात्"। सेतुजलधारणहेतुर्बन्धः। तीर्थशौचं षड्कूपपरिष्कारः तेन सेतुबन्धषड्कूपपरिष्कारतडागादीनां करणे प्रत्येकं षड्भवमोचनं फलम्। विष्णुः "अथ कूपकर्त्तुः स्नातृप्रदत्ते पानीये दुष्कृतार्द्धं विनश्यतीति"। तत्प्रदत्ते कूपादुत्थिते। विष्णुधर्मोत्तरे "तडागकूपकर्त्तारस्तथा कन्याप्रदायिनः। स्नानोपानहदातारस्ते नराः स्वर्गगामिनः"। तोयं विना सङ्कुचितप्राणिदेशे तु नन्दिपुराणम् "योवापीमथवा कूपं देशे तोयविवर्जिते। खानयेत् स दिवं याति बिन्दौबिन्दौ शतं समाः"। ततश्च वाप्यादिखननने प्रत्येकजलबिन्दुसम संख्यशतवर्षावच्छिन्नस्वर्गप्राप्तिः फलम्। एतत्सङ्कल्पानन्तरं वास्तुयागसङ्कल्पः कार्य्यः। विष्णुः "कूपारामतडागेषु देवतायतनेषु च। पुनः संस्कारकर्त्ता तु लभते द्विगुणं फलम्"। संस्कारविधौ तु "अजले जलसत्त्वाद्य" इति वक्ष्यमाणवचनात् जलशून्यदेशखनन एवप्रतिष्ठा नतु पङ्कोद्धारमात्रे। मत्स्यपुराणे "प्रासादभवनादीनां विशेषं विस्तराद्वद। कुर्यात् केन विधानेन कच्च वास्तुरुदाहृतः" इत्युपक्रम्य वाप्यादीनामभिधानात् आदिपदात् कूपादेर्ग्रहणम्। "प्रासादेऽप्येवमेव स्यात् कूपवापीषु यक्षते" इत्यभिधानाच्च, तेन वाप्यादिकरणेऽपि वास्तुयागः। महाकपिलपञ्चरात्रे "जलाधारप्रकारार्थञ्च यज्ञेऽस्मिन् विशेषतः। ब्रह्माद्यादितिपर्य्यन्ताः पञ्चाशत्त्रयसंयुताः। सर्वेषां कुलवास्तूनां नायकाः परिकीर्त्तिताः। असंपूज्य हि तान् सर्व्वान् प्रासादादीन्न कारयेत्। अनिष्प्रत्तिर्विनाशः स्यादुभयो धर्मधर्मिणोः"। ब्रह्माद्यादितिपर्य्यन्ता इति कल्पान्तरम्। देवीपुराणोक्ते शादिकल्पोऽवधिर्भवते। धर्मधर्मिणोस्तडागादितत्कर्त्रोः। तद्दिने तत्करणे तत्सर्गदिनेऽपि वाप्यादौ तत्करणम्। "प्रासादभवनोद्यानप्रारम्भपरिवर्त्तने। पुरवेश्मप्रवेशे च सर्वदोषापनुत्तये। इति वास्तूपशमनं कृत्वा स्वस्त्येव वेष्टयेत्। वास्तुयागमकुर्व्वाणस्तत्क्षारो भविष्यति"। इति मत्स्यपुराणवचने पुरवेश्मप्रवेशे वास्तुयागप्राप्तेः पूर्व्वोक्तवचनेन प्रासादधर्म्मातिदेशादत्रापि प्रासादप्रतिष्ठावत् वाप्यादिप्रतिष्ठादिने वास्तुयागकरणम्। तदारम्भकालो दीपिकायामुक्तो यथा "पुष्यमैत्रकरोत्तराश्विरुद्रब्रह्माम्बुपित्र्येन्दुभैः ग्रहे र्कैं शुभयोगवारतिथिषु क्रूरेक्षवीर्य्येषु च। पूर्णेन्दौ जलराशिगे दशमगे शुक्रे शुभांशोदये प्रारम्भः सकिलाशयस्य शुभदो जीवेन्द्रपुत्रोदये"। पुष्यानुराधाहस्तोत्तरात्रयाश्विनीमृगशिरोरोहिणीपूर्व्वाषाढामघास्वगशिरोभिः। मातृक्षे "चन्द्रादित्यबलं लब्ध्वा लग्नं शुभनिरीक्षितम्। लग्नोच्चायादि कर्त्तव्यमन्यत् परिवर्ज्जयेत्। अश्विनीरोहिणीमूलत्रयमैन्द्रवम्। स्वाती हस्तानुराधा च षट्छ रम्भे प्रशस्यते। वज्रव्याघातशूले च व्यतीपातातिगण्डयोः। विष्कुम्भगण्डपरिघवर्ज्जं योगेषु कारयेत्। आदित्यभौमवर्ज्जन्तु सर्वं वाराः शुभावहाः। प्रासादेऽप्येवमेव स्यात् कूपवापीषु चैव हि"। तदुत्सर्गफलम्।

"संक्षेपात्तु प्रवक्ष्यामि जलदानफलं शृणु। पुष्करिण्यादिदानेन विष्णुः प्रीयति विश्वदृक्"। जलाशयकरणार्थं भूमिदाने फलमाह चित्रगुप्तः "जलाशयार्थं यो दद्यात् वाटकं लोकमाप्नुयात्"। भूमिमिति शेषः। कालमाह मत्स्यपुराणे "शृणु राजन्! प्रवक्ष्यामि तडागादिषु यो विधिः। चैत्रे वा फाल्गुने वापि ज्यैष्ठे वा माधवे तथा। माघे वा सर्व्वदेवानां प्रतिष्ठा शुभदा भवेत्। प्राज्ञ यच्च शुभं शुक्लमतीते चोत्तरायणे। पुण्येऽह्नि विप्रकथिते लग्ने ब्राह्मणवाचनम्"। अतीते ग्रहस्ते तथा च प्रतिष्ठासप्तके "माघे च फाल्गुने चैव चैत्रवैशाखयोरपि। ज्यैष्ठाषाढकयोर्वापि ग्रहस्ते चोत्तरायणे"। पुण्येऽह्नि अष्टमचन्द्रादिशुद्धे ब्राह्मणवाचनं पुण्याहस्वस्त्यृद्धिवाचनम्। "षष्ठी च द्वितीया च तृतीया सप्तमी तथा। दशमी पौर्णमासी च तथा त्रयोदशी। स्नातु प्रतिष्ठा विधिवत् लग्ने शुभफला भवेत्"। मात्स्ये "आषाढे हे तथा मूलत्रयमैन्द्रवं च। ज्यैष्ठाश्चवरोहिण्यः पूर्वाभाद्रपदा तथा। हस्ताश्विनी रेवती च पुष्योमृगशिरस्तथा। अनुराधा तथा स्वाती प्रतिष्ठादिषु यक्षते। बुधो बृहस्पतिः शुक्रस्त्रय एते शुभावहाः। एतच्चिरीक्षितं लग्नं नक्षत्रञ्च प्रशस्यते। यक्षतारावलं लब्ध्वा यक्षपूजां विधाय च। निमित्तं सबलं ज्ञात्वा वर्जयित्वा तथाऽशुभम्। शुभयोगे शुभे लग्ने क्रूरग्रहविवर्जिते। लग्ने लग्नेशे च कुर्य्यात प्रतिष्ठादिकमुत्तमम्। अयने विषुवे नहत षड्शीतिमुखे तथा। "सुराणां स्थापनं कार्य्यं विधिदृष्टेन कर्मणा"। भविष्ये "प्रतिपच्च द्वितीया च तृतीया पञ्चमी तथा। दशमी त्रयोदशी चैव पौर्णमासी च कीर्त्तिता। सोमो बृहस्पतिश्चैव शुक्रश्चैव तथा बुधः। एते सौम्यग्रहाः

भोक्ताः प्रतिष्ठायामकर्मणि"। प्रतिष्ठाधिकारे व्यवहारमयूखयः "कृष्णपक्षे च पञ्चम्यामष्टम्यामपि यजन्ते"। दीपिकायां "पुष्याश्विनक्रभगदैवतवासवेषु सौम्यानिलेशमघरोहिण्यमूलहस्तम्। पौष्णानुराधहरिभेषु पुनर्वसौ च कार्याभिषेकतरुकूपरथप्रतिष्ठा"। वसवी धनिष्ठा दैव आर्द्रा। "आर्द्रायाञ्चैव सौम्यमिति" प्रतिष्ठासमुच्चयात्। वापीदानादीनां पूर्त्तत्वात् स्त्रीशूद्राधिकारे ज्ञातृकण्वः "वापीकूपतडागादिदेवतायतनेषु च। अन्नप्रदानमारामाःपूर्त्तं इत्यभिधीयते। अग्निहोत्रं तपः सत्यं वेदानामनुपालनम्। आतिथ्यं वैश्वदेवञ्च इष्टमित्यभिधीयते। यज्ञोपरागे यद्दानं पूर्त्तमित्यभिधीयते। इष्टापूर्त्तं द्विजातीनां धर्मः सामान्य उच्यते। अधिकारी भवेच्छूद्रः पूर्त्तधर्मे न वैदिके"। वैदिके वेदाध्ययनसाध्येऽग्निहोत्रादाविति रत्नाकरः। एवं स्त्रीणामपि पूर्त्ताधिकारः। यथा नारीत्वनुव्रतौ दक्षस्मृतिः "पितृव्यगुरुदौहित्रान् भर्तुः स्वकीयमातुलात्। पूजयेत् कन्यपुत्रांश्च दद्यानाद्यातिथीन् स्त्रियः" एतेन जलाशयोत्सर्गादौ गोरयतारयानुमन्त्रणयोर्यजमानकर्तृकोमन्त्रपाठः। तत्रामन्त्रकतया स्त्रीशूद्रयोरनधिकारेऽपि तद्दति त्यागेऽप्यनधिकारः विशेषोपदेशविरुद्धादिति हैतनिर्णयोक्तं निरस्तम्। मन्त्रपाठस्तु ब्राह्मणद्वारा "अमन्त्रस्तु स्त्रीशूद्रस्य विप्रोमन्त्रेण यच्छते" इति वराहपुराणात्। अमन्त्रस्त्रेति परिभाषया स्त्रीणामप्यधिकारः। अस्य पूर्त्तत्वाद्द्विश्राद्धमध्यादौ कर्त्तव्यम्। यथा गोभिलः "इष्टिः पूर्त्तेषु युग्मानाशयेत् प्रदक्षिणमुपचारः यवस्तिलार्थ इति"। हयशीर्षपञ्चरात्रे "वापीकूपतडागानां पश्चिमे यागमण्डपम्। कुर्यादाद्यात्रिभेषेव कन्यसं मध्यमोत्तमम्। कन्यसं दशहस्तन्तु कूपे शस्तं तथा नव। द्विषट्कं कारयेद्वाप्यां षष्करिण्यां चतुर्दश। द्विरष्टहस्तं कुर्वीत तडागमण्डपं शुभम्"। कन्यसङ्गनीयांसम्। मण्डपविधिस्तु भविष्ये "मृद्दीत्वौडुम्बरं पात्रं वारिपूर्णमदूरतः। दर्भैस्तयं सायभूक्तं फलपुष्पतिलान्वितम्। जलाशयारामकूपे मण्डपे पूर्वदिङ्मुखः साधारणे। ईशानाद्वा ऐशान्यां तज्जलं क्षिपेत्"। मत्स्यपुराणे "प्रागुदक्प्रवणे देशे तडागस्य समीपतः। चतुर्हस्तां शुभां वेदीं चतुरस्रां चतुर्मेखीम्"। कारयेदिति शेषः। तथा "ध्वजैः समवर्णैः स्युः पताकाध्वजसंवृताः"। समवर्णा वक्ष्यमाणलोकपालवर्णाः। "अश्वत्थोडुम्बरप्लक्षवटशाखासमन्वितान् च। मण्डपस्य प्रतिदिशं द्वारार्थे तानि कारयेत्"। तथा "कुलशीलसमायुक्तः स्थापकः स्याद्विजोत्तमः"। स्थापक आचार्य इति रत्नाकरः। तथा "सौवर्णौ कूर्ममकरौ राजतौ मत्स्यडुण्डुभौ। ताम्रौ कूलोरमण्डूकावायसः शिशुमारकः। एवमाद्यान् तान् सर्वानादौ चैव विन्यस्यते!। शुक्लमाल्याम्बरधरः शुक्लगन्धानुलेपनः। सर्वौषध्युदकस्नानस्नापितोवेदपुङ्गवैः। यजमानः सपत्नीकः पुत्रपौत्रसमन्वितः। पश्चिमं द्वारमाश्रित्य प्रविशेद्यागमण्डपम्। ततोमङ्गलशब्देन भेरीघोषञ्च स्वनेन च। रजसा मण्डलं कुर्यात् पञ्चवर्णेन तत्त्ववित्। षोडशारं भवेच्चक्रं पद्मगर्भं चतुर्दलम्। चतुरस्रन्तु परितोवृत्तं मध्ये सुशोभनम्। वेद्याश्चोपरि तत्कृत्वा यद्दाल्लोकपतींस्तथा। विन्यसेन्नन्वतः सर्वान् प्रतिदिक्षु विचक्षणः। ऋषादीन् स्थापयेन्मध्ये वास्तुं मन्त्रसमन्वितः" ऋषादीन्। कूर्मादीन्। "ब्रह्माणञ्च शिवं विष्णुं तत्रैव स्थापयेद्बुधः। विनायकन्तु विन्यस्य कमलासम्बिकान्वयाँ"। पूजयेदिति शेषः। मत्स्यपुराणम् "नवग्रहमखं कृत्वा ततः कर्म समारभेत्। अन्यथा फलदं पुंसां न कामं प्राप्यते क्वचित्"। ततः कर्मशेषस्तत्रैव द्रष्टव्यः।

"जलाशयोत्सर्गस्य सर्वभूतोद्देशकत्वेन प्रकृतचेतनोद्देशकत्ववदप्रकृतचेतनोद्देशकत्वासत्वमपि ततश्च कोटाद्देर्भेदमिति स्वीकारयोग्यत्वेन वेदमेयोद्देश्यगतस्वत्वाजनकत्वागरूपत्वादस्य यागत्वम्। अतएव जलाशयोत्सर्गमुपक्रम्य मत्स्यपुराणेऽपि "प्राप्नोति तदृयागबलेन भूय" इति यागत्वेनाभिहितं ततश्च तज्जलं स्वस्वत्वदूरीकरणेन नद्यादिवत् साधारणीकृतम् अतएव 'सामान्यं सर्वभूतेभ्योमया दत्तमिदं जलम्। रमन्तु सर्वभूतानि स्नानपानावगाहनैः' इति मन्त्रलिङ्गेनोपादानं विना कस्यापि स्वत्वमिति। तत्थान्ययागवदुत्तरप्रतिपत्तेरभुतत्वात् साधारणजलस्य परिग्रहमात्रेण गोतभोक्तृत्वेन दाहः स्वामित्वश्रुतेर्यजमानस्यापि तथात्वेन स्वामित्वात्तत्र स्नानादावदोषः। तथाच गोतमः 'स्वामी ऋक्थक्रयसंविभागपरिग्रहाधिगमेषु ब्राह्मणस्वार्त्विज्यं लब्धं क्षत्रियस्य विजितं निर्विष्टं वैश्यशूद्रयोः" इति परिग्रहोऽनन्यपूर्वस्य जलस्यकाष्ठादेः स्वीकार इति मिताक्षरा'।

जलाश्रय पु० जलमाश्रयोऽस्य। हस्तगुणाढ्ये राजनि० २वल्लाकायां स्त्रीत्वेऽपि स्त्री धारा०

जलाप न० जायते जल–ड जः जापोऽभिजापो यत्र । १तर्के निब० अन्येच्छानधीनेच्छाविषयत्वात् तस्य तथात्वम् । अस्यर्थे अर्श०अच् ।२तद्वति त्रि० "यो यस्ति भेषजो जलापः" ऋ०२।३३।७ "जलापः सर्वेषां सुखकरः" भा० "गतिमेधपतिं रुद्रं जलापभेषजम्" ऋ० ४६।४ । ३जले निघ० ।

जलापाह् त्रि०जलं सहते सह–क्विप्–पूर्वपददीर्घः सुपामादि० षत्वम् । जलसोढरि । सुषामादिगणे अमन्तत्वेव पाठादन्यत्र न षत्वम् । जलासाहौ । स्त्रादौ झलि तु "साढ्रेः षः" साढ्रूपत्वे षत्वम् जलाषाट् जलाषाड्भ्यामित्यादि ।

जलाष्टीला स्त्री जलेनाष्टीला । पुष्करिण्याम् त्रिका० ।

जलासुका स्त्री जलमेवासवोऽस्याः कप् ।१जलौकायाम् अमरः

जलाह्वय पु० जले आह्वयः शोभमानतया कीर्त्तनमस्य । उत्पले राजनि० । [ भरतः ।

जलिका स्त्री जलसङ्गवस्यानत्वेनास्त्यस्याः ठन् । जलौकायां

जलुका स्त्री जल–उक । जलौकायां शब्दर० ।

जलूका स्त्री जलमोको यस्याः पृषो० ।१जलौकायाम् हेमच० "न जलूकादिवत् संक्रमणमिहोपदिश्यते" तैत्ति० भा० ।

जलेचर पुंस्त्री जले चरति चर–ट वा अलुक् स० । हंसादौ स्त्रियां टित्त्वात् ङीप् । "यद्योऽहमस्मि भद्रं ते नास्मि पक्षी जलेचरः" भा० व० २१३अ० । स तमादाय कौलेयो विस्फुरन्तं जलेचरम्" भा० आ० २१अ० ।

जलेजया स्त्री जलमेति इ–क्विप् जलेति शेते शी–अच् । जलोमेतस्यानरोहिणि वृक्षभेदे शब्दर० ।

जलेज न० जले जायते जन–ड वा अलुक् स० । वारिजे १पद्मे । "उद्वासीनि जलेजानि दुनन्त्यदयितं जनम्" भट्टिः । २जले जातमात्रे त्रि० ।

जलेजात न० ७त० । १पद्मे शब्दरत्ना० २वारिजातमात्रे त्रि० ।

जलेन्द्र पु० इत० । १वरुणे २महादेवे जम्बुलाख्ये १पूर्व्वदेशे मेदि० ।

जलेन्धन पु०जलान्येवेन्धनानि यस्य । १वाडवानले वाडवानलशब्दे दृश्यम् । २सौरविद्युदादितेजसि शब्दार्थचि० ।

जलेभ पुंस्त्री जलजात इभः । जलहस्तिनि स्त्रियां जातित्वात् ङीष् । "प्रस्फुरत्तिमिजलेभजिघ्रणः" ह०१२अ०

जलेरु पु० पूरवंशे रौद्राश्वपद्मप्सूरोजाते पुत्रभेदे "रौद्राश्वस्य महेष्वासा दशाप्सरसि सूनवः" इत्यु पक्रमे "स्वरिष्ठबेयुर्वनेयुश्च जलेयुश्च महायशाः" भा० आ० ६४ अ० ।

जलेरुहा स्त्री जले रोहति–रुह–क–अलुक् स० । १कुटुम्बिनीवृक्षे राजनि० । २जलरोहिणि पद्मादौ त्रि० ।

जलेलास्त्री कुमारानुचरमातृभेदे "उत्क्राथिनी जलेला च महावेगाथ कङ्कणा" भा० स० ४७ अ० ।

जलेवाह पु० जले तोयाभ्यन्तरे वाहो गतिरस्य । (डुवारि) स्थाते जलमध्यजलेन तत्स्थपदार्थौघोत्तोलके पुरुषभेदे । "जलेवाहानथाहूय बह्वंस्तत्र न्ययोजयत् । ते कृत्वा परमं यत्नमाप्तुराभरणं न तत्" पाद्मे पा० खं० ।

जलेश पु० इत० ।१वरुणे २समुद्रे च "कालं गतिं तेऽखिलदेवतात्मनो दिशश्च कर्णौ रसनं जलेशम्" भाग० ८।७।२० विराड्रूपोक्तौ "पातयामास सेनायां जलेशस्य स दानवः" हरिवं० २५२अ० । जलेश्वरादयोऽप्यत्र । "भीमोद्भवं प्रति नले च जलेश्वरे च" नैष० । "यमकुबेरजलेश्वरवज्रिणाम्" रघुः । २वर्षभेदे जलाधिपे रव्यादौ च ।

जलेशय पु० जले शेते शी–अच् अलुक् समा० । १विष्णौ "सप्तसामोपगीतं त्वां सप्तार्णवजलेशयम्" रघुः । तस्य तथात्वं जलशायिशब्दे दृश्यम् । २जलस्थायिमात्रे त्रि० "यस्य हृत्क्षितशब्देन कूर्मोऽप्यन्तर्जलेशयः" भा० आ० २६ अ० । ३मत्स्ये पुंस्त्री त्रिका० । योषिदर्थत्वात् स्त्रियां टाप् ।

जलो(लौ)का स्त्री जलमोकोऽस्य पृषो० । (जोंक) १जलस्थे सरीसृपभेदे भरतोऽस्तं द्विधा पपाठ ।

जलोच्छ्वास पु०जलान्युच्छ्वसन्त्येभिः उद्+श्वस–घञ् ।१प्रहृतजलस्य निर्गममार्गे २परीवाहे अमरः । भावे घञ् इत० । ३अधिकजलस्य सर्वतोवहने च । (ज्यलापि) ।

जलोदर न०जलप्रधानमुदरं यस्मात् ५ब० । उदरामयरोगभेदे । "यः स्नेहपीतोऽथवास्निनो वा वान्तो विविक्तोऽथ वा निरूढः । पिबेज्जलं शीतलमाशु तस्य स्रोतांसि दुष्यन्ति हि तद्वहानि । स्नेहोपनिह्नेष्वथ वापि तेषूदकोदरम् पूर्ववदभ्युपैति । स्निग्धं महत्तत् परिवृत्तनाभिसमाततं पूर्णमिवाम्बुना च । यथा दृतिः शुष्यति कम्पते च शब्दायते चापि दकोदरन्तत् । जन्मनैवोदरं सर्वं प्रायः कृच्छ्रतमं मतम् । बलिनस्तदजातास्वम्बुयत्नः साध्यं नवोत्थितम्" माधवकरस्तद्भिदानाद्यारभ्य ।

जलोद्धतगति स्त्री "रसैर्जसजसा जलोद्धतगतिः" ह०र०उक्ते द्वादशाक्षरपादके १छन्दोभेदे । जलेन उद्धता गतिरस्य । २जलेनोद्धतगतिके त्रि० "यदीयकलितो विलोक्य विपटं कलिन्दतनया जलोद्धतगतिः" छन्दोम० ।

जलोद्भव त्रि० जले उद्भवोऽस्य । १जलजाते २गुग्गुलावाखुपे ३खपुष्पाह्वौषधभेदे स्त्री राजनि०जलसङ्गवत्वरूपात् भू अपादाने

अप्। १हिमालयस्थे देशभेदे। "ततो हिमवतः पार्श्वं समभ्येत्य जलोद्भवम्। सर्वमल्पेन कालेन देशं चक्रे वशं बली" भा० स० २८अ०। २जलजाते त्रि० "गच्छ कौन्तु समासाद्य सर्वतीर्थजलोद्भवाम्" भा०व० ८४अ०। ३लवणाक्षाम् राजनि०।

जलोद्भूत त्रि०जले उद्भूतः।१जलभवे २चुपभेदे स्त्री राजनि०

जलोरगा स्त्री जले उरगोव दीर्घत्वात् विषवत्त्वाच्च ष्टथो०। जलौकायां भारतुन्दरी।

जलौकस् स्त्री ब०व० जलमोको वसतिरासाम्। (जोंक) ख्यातायां रक्तपायाम् अमरः। अस्य बहुवचनत्वं प्रायिकम्। "जलोरगा जलौका तु जलोका च जलौकसीति" संसारावर्त्तोक्तेः। "अभिहितो जलौकसः" इति सुश्रुतोक्तेश्च।१जलस्थानके जन्तुमात्रे त्रि० "जलौकसां स सत्वानां बभूव प्रियदर्शनः" भा० अनु० ५०अ०।

जलौकस पुंस्त्री जलमोकः स्थानमस्यस्याः-अच्। जलौकायां रायमुकुटः।

जल्प वाग्विशेषे उक्तौ च भ्वा०पर०सक०सेट्। जल्पति अजल्पीत्। जजल्प तत्र कथाभेदे "मयि जल्पति कल्पनाधिनाथे रघुनाथे भवतां तदन्यथैव" इति अनुमानशिरोमणिः। कथाभासे "अनागमः प्रजानाञ्च प्रमादादिव जल्पतः" भा०स०२१ अ०। "हसते जल्पते वैरी एकपात्रे च भुञ्जते" हरिवं०२०अ० अत्र आर्षत्वात् पदव्यत्ययः, भुञ्जते इत्यत्र गणव्यत्ययश्च। अनु+कथनोत्तरकथने पश्चात् कथने तुल्यरूपकथने च "अल्पन्यायमनुजल्पति" भाग० ४।२५।१८। [ आर० १अ०। अभि+आभिमुख्येन कथने "अन्योन्यमभिजल्पन्तः" रामा० प्रति+प्रत्युत्तरकथने प्रतिरूपकथने च। "न चैवोक्ता नवाऽनुक्ता हीनतः परुषा गिरः। भारत! प्रतिजल्पन्ति सदा तुल्यमनुरूपाः" भा० स० ७०अ०।

वि+अति+अन्योन्यकथने शब्दकर्म्मकत्वात् व्यतिहारे न तङ्। व्यतिजल्पति" सि० कौ०।

जल्प पु० जल्प-भावे घञ्। १कथने। "इति स्त्रियां वस्तुविचित्रजल्पैः" भाग० १।७।१८। आर्षेऽस्य क्लीवतापि। "तूष्णींभव न ते जल्पमिदं कार्य्यं कथञ्चन" भा० आ० १२६अ० "कैकेयीं संश्रितं जल्पं नेदानीं प्रतिभाति मे" रामा०अयो०६०अ०। उभयत्र जल्पमिति पाठस्तु सम्यक्। परमतनिराकरणपूर्वकस्वमतस्थापनरूपे विजिगीषोः २कथाभेदे च। तल्लक्षणं गौतमेनोक्तं यथा "यथोक्तोपपन्नच्छलजातिनिग्रहस्थानसाधनोपालम्भो जल्पः" गौत० सू०। व्याख्यातञ्चैतत् विश्वनाथेन।

"यथोक्तेषु यदुपपन्नं तेनोपपन्न इत्यर्थः। मध्यपदलोपी समासः। तथा च प्रमाणतर्कसाधनोपालम्भः पक्षप्रतिपक्षपरिग्रह इत्यस्य योग्यतया परामर्शः अन्यथा जल्पस्य वादविशेषत्वापत्तिः प्रमाणतर्काभ्यां तदुपेक्षणाभ्यां न तु ज्ञानेऽनाहार्य्यत्वं विवक्षितम् आरोपितप्रमाणभावेनाभासेऽपि जल्पनिर्वाहात्। यद्यपि छलादिभिरुपालम्भ एव न तु साधनं तथापि साधनस्य परकीयानुमानस्योपालम्भो यत्रेत्यर्थान्न दोषः। परपक्षदूषणे सति स्वपक्षसिद्धिरित्यतः साधने तदुपयोग इत्यन्ये। उभयपक्षस्थापनावत्त्वेन च विशेषणीयमतो वितण्डायान्नातिव्याप्तिः "स प्रतिपक्षस्थापनाहीनः" इत्युत्तरसूत्रात् प्रकृते उभयपक्षस्थापनावत्त्वादेव च पञ्चावयवनियमोऽपि लभ्यत इति वदन्ति। अत्र च छलादिभिः सर्वैरुपालम्भो न विशेषेण व्याप्तिरपि तु तद्योग्यतयैव, योग्यतावच्छेदकन्तु वादभिन्नकथात्वमेव तत्र चोक्तवादत्वावच्छिन्नभेदस्तत्तद्वादभेदो वा विशेषणमिति छलेत्यादिना विजिगीषुकथात्वं बोध्यते विजिगीषुर्हि छलादिकं करोति तथाचोभयपक्षस्थापनावती विजिगीषुकथा जल्प इत्यर्थः इत्यपि वदन्ति। अत्र चायं क्रमः वादिना स्वपक्षसाधनं प्रयुज्य नायं हेत्वाभासस्तल्लक्षणायोगादिति सामान्यतो न्यायसिद्ध इत्यादि विशेषतो वा। प्रतिवादिना स्वस्याज्ञानादिनिरासाय परोक्तसम्भवादेव लाभे उच्यमानस्याज्ञाप्राप्तकालार्थान्तरनिरर्थकानामलाभे उक्तस्याज्ञाप्राप्तिनिग्रहान्तरप्रतिज्ञाविरोधप्रतिज्ञासंन्यासहेत्वन्तराविज्ञातार्थविज्ञेयमतानुज्ञान्यूनाधिकपुनरुक्तनिरनुयोज्यानुयोगापसिद्धान्तानामलाभे पर्य्यनुयोज्योपेक्षणस्य मध्यस्थोद्भाव्यत्वा देवानुपन्यासार्हतया यथासम्भवहेत्वाभासेन परोक्तं दूषयित्वा स्वपक्षं उपन्यसनीयः। ततो वादिना तृतीयकक्षाश्रितेन परोक्तमनूद्य स्वपक्षदूषणसङ्गत्यानुक्तप्राप्तोच्यमानस्याज्ञाहेत्वाभासातिरिक्तोक्तप्राप्ताज्ञाप्राप्तलाभे हेत्वाभासेन यथासम्भवं प्रतिपक्षवादिनः स्थापना दूषणीया। अन्यथा क्रमविपर्य्यासेऽप्राप्तकालं चानवसरे दूषणीयेन च निरनुयोज्यानुयोगः यथा त्वन्मते चेत् प्रतिज्ञाहानिर्विशेषयसि चेद्धेत्वन्तरमित्यादिप्रतिज्ञाहान्यादिहेत्वाभासानामुक्तप्राप्तत्वाविशेषेऽपि अर्थदोषत्वेनाप्रधानत्वाच्चरमसन्धानमिति"। उज्ज्वादि०अस्यानोदात्तता।

जल्पन त्रि० जल्प-नन्द्या० ल्यु। १कथके। भावे ल्युट्।

२कथने न० । अनिमित्तमङ्गलक्षणलक्षे दान्तुनिपातज्ञल्पना-द्यानिः"ह० सं० ४६ अ० ।

जल्पाक त्रि० जल्प–आक । १वाचाले बहुकृत्सितवादिनि अमरः। २कथकमात्रे च स्त्रियां पित्वात् ङीप् । "जल्पा-कीभिः महासीनः स्त्रीभिः प्रजविना त्वया" भट्टिः ।

जल्पित त्रि० जल्प–कर्म्मणि क्त । १कथिते अमरः भावे क्त । २कथने न० ।

जल्हु पु०दृह–बा० ड पृषो० । १अग्नौ "न पाप्रासो मनामहे नावायसो न जल्हवः" ऋ० ८।५१।११। "न जल्हवः अनम्नयः"भा० ।

जव पु० सौ० जु–भावे अप् । १वेगे । "जवेन पीठादुदतिष्ठ-दच्युतः" "जवेन कण्ठं सभयाः प्रमेदिरे" माघः । "जवेऽपि मानेऽपि च पौरुषाधिकम्" नैष० । कर्त्तरि अच् । २तद्वति त्रि० अमरः ।

जवन न०जु–भावे ल्युट् । १वेगे अमरः। "तं मन्ये मेघपुष्पस्य जवने सदृशं हृयम्"भा०वि०४५ अ०। कर्त्तरि ल्यु । २जव-युक्ते त्रि० "आरुह्य जवनानस्तान् नियन्तुसंपचक्रमे" हरिवं०११७अ०। ततः इदा०भावे इमनिच् । ३जवनिमनि अभे पु० । ४वेगयुक्ते देशभेदे पारस्यदेशे च हेमच० । सो-ऽभिजनोऽस्य अण् । ५जावन तद्देशवासिनि त्रि० बहुत्वे अणो लुक् । ६तद्देशवासिषु ब० व० । ७म्लेच्छकारीषगे दशोटकमात्रे च पुंस्त्री राजनि०।८म्लेच्छजातिभेदे यव-नजातौ पुंस्त्री स्त्रियां जातित्वात् ङीप् ।"जवनी नव-नीत कोमलाङ्गी शयनीये यदि नीयते कथञ्चित्" उद्भटः । रघुनन्दनमतेऽयं तालव्यादिः । जवनदेशभव-त्वादस्य तथात्वम् ।

जवनाल न० जवनायालति पर्य्याप्नोति अल–अच् । (जनार) फलभेदे । "जवनालं स्मृतं स्वादु शीतं वातकरं मतम् । कफपित्तविनाशि स्यात्" राजवल्लभः ।

जवनिका स्त्री सौ०जु–ल्युट्ये ल्युट् संज्ञायां कन् । (कानात) (चिक) प्रष्टतौ व्यवधायकवस्त्रादौ अमरः । "रेजु-र्जवनिकाक्षेपैः सपद्मा इव खे नगाः" हरिवं० ८६अ० । "सतां जवनिकानिकामसुखिनाम्" माघः ।

जवनी स्त्री जु–करणे ल्युट् ङीप् । (कानात) १जवनिका-यास् २ओषधिभेदे च हेमच० ।३जवनजातिस्त्रियाञ्च ।

जवस् पु० सौ० जु–असुन् । १वेगे । "आ श्येनस्य जवसा" ऋ०११८।११। "जवसा वेगेन" भा० ।

जवस न० सौ० जु–कर्म्मणि असच् । घासे शब्दरत्ना० ।

जवा स्त्री सौ० जु–अच् । १खनामख्याते क्षुद्रे अमरः। "जवा कटूष्णेन्द्रलुप्तनाशकृत् भिषजां मता । विच्छर्दिक्षुद्रोच-निका सूर्य्यारोधने स्थिता" राजव० । पाटला० पुष्पे-ऽपि स्त्री"अरुणो गरुडभ्राता जवापुष्पसमप्रभः"हरिवं० २२७ अ० । "जवाकुसुमसङ्काशं काश्यपेयं महाद्युतिम्" सूर्य्यनतिमन्त्रः । "पारिजातवनैश्चैव जवाशोक-वनैस्तथा भा० व० २२० अ० ।

जवादि न०"जवादि नीरसं स्निग्धमीषत् पिङ्गं सुगन्धिदम् । कातपे बहुलाभोदं रात्रां योग्यञ्च तन्मतम्"इत्युक्तलक्षणे सुगन्धर्म्मजाते क्लिबे गन्धद्रव्यभेदे राजनि० ।

जवाधिक पु० जवेनाधिकः । १अधिकजववयुक्ते ऽश्वे अमरः । २अधिकवेगयुक्ते त्रि० ।

जविन् त्रि० जव+अस्त्यर्थे इनि । १वेगयुक्ते हेमच० "सम-काले मिषुं क्षिप्रमानीयान्यो जवी नरः" याज्ञ० । स्त्रियां ङीप् । "अजवसो जविनीभिर्विधृवन्" ऋ० २।१५।६ ।

जविन पु० जव–बा० इनन् । कोकिलवृक्षे राजनि० ।

जवीयस् त्रि०अतिशयेन जववान् ईयसुन् वतोर्लुक् । अति-शयितवेगयुक्ते "अनेजदेकं मनसो जवीयो नैनद्देवा आप्नुवन् पूर्वमर्षत्"यजु०४०।४। स्त्रियां ङीप् । इष्ठन् जवि-ष्ठोऽप्यत्र । "ऋतस्य न्यमन्थे मनसा जविष्ठा"ऋ० ४।२।१।

जष वधे भ्वा० उभ० सक० सेट् । जषति ते अजाषीत् अज-षीत् अजषिष्ट । जजाष जेषतुः जेषे ।

जस मोक्षणे दिवा० पर० सक० सेट् । जस्यति इरित् अज-सत् अजासीत् अजसीत् अजास जेसतुः अजसम् । उदित् जसित्वा जस्त्वा । जस्तः । [ते अजीजसत् त ।

जस वधे अनादरे च चुरा० उभ० सक० सेट् । जासयति उद्+क्षिपने । एतद्योगे कर्म्मणि षष्ठी । "शिलीजसो-ऽप्यासमितुं जगद्गुरुक्षाम्" माघः । "हत्वा नाथस्य वैदेहि ! मन्योरुच्जासयात्मनः" भट्टिः ।

जस गतौ निघण्टुः भ्वा० पर० सक० सेट् । जसति अजा-(ज)सीत् । जसिस्ताडने उपक्षये च माधवः। जसुरिः ।

जस रक्षणे चु० उभ० सक० सेट् इदित् । जंसयति ते अज-जंसत् त ।

जसु पु० जस–उनु । आयुधे "यदा बलस्य पीवतो जसुम्" ऋ० १०।६८।६ । "जसुमायुधम्"भा० ।

जसुरि पु०जस–उरिन् ।१वज्रे उज्ज्वलदत्तः २व्याधिते त्रि०"वि या जानाति जसुरिम्"ऋ०५।६१।७।"जसुरिं व्यथितम्" "जसिस्ताडनकर्म्मोपक्षयकर्म्मा वा"भा०।३उपक्षययुक्ते च।

जस्वन् त्रि० जस–उपक्षये वनिप्। उपक्षयकर्त्तरि "मा स्वजने द्रुषम !" ऋ०६।४०।११। "जस्वने उपक्षयिणे" भा०।

जहक त्रि०हा–कनू हित्वञ्च। १बाले २त्यागिनि च उज्ज्वल०। २काले त्रिका० ४निर्म्मोके संक्षिप्तसा० तस्य त्याज्यत्वात् तथात्वम्। ५गात्रसङ्कोचन्यां स्त्री। "इतरजनाय जहका वैष्णवी" यजु० २४।२६। "जहका गात्रसङ्कोचनी" वेददी०।

जहत्स्वार्था स्त्री जहत् स्वार्थौयाम्। १लक्षणाभेदे, यथा आयुर्घृतम् आयुर्घृतमित्यत्र आयुःसाधनस्य बोधनात् स्वार्थस्यायुषस्त्यागात् तथात्वम्। "जहत्स्वार्थाजहत्स्वार्थे हे वृत्ती ते पुनस्त्रिधा" हरिका० वैयाकरणभूषणे तु जहति पदानि स्वार्थं यस्यामिति विग्रहो दर्शितः।

जहदजहल्लक्षणा स्त्री जहच्च अजहच्च स्वार्थौ यां तादृशी लक्षणा। वाच्यार्थैकदेशत्यागेनैकदेशग्रहणे लक्षणायाम् यथा सोऽयं देवदत्त इत्यत्र तत्कालेतत्कालरूपार्थत्यागेन केवलदेवदत्तमात्रार्थबोधनात् वाच्यार्थैकदेशग्रहणात्। एवं "तत्त्वमसि श्वेतकेतो !" छा०उ०वाक्ये विरुद्ध सर्वज्ञत्वाल्पज्ञत्वार्थत्यागेन चैतन्यमात्रबोधनात् तथात्वम्।

जहल्लक्षणा स्त्री जहत् स्वार्थौयाम् उत्तरपदलोपे कर्म्म०। जहत्स्वार्थायां लक्षणायाम्। यथा आयुर्घृतम्। लक्षणाभेदोदाहरणादिकं वेदान्तपरिभाषायां दर्शितं यथा

"प्रकारान्तरेण लक्षणा त्रिधा जहल्लक्षणा अजहल्लक्षणा जहदजहल्लक्षणा चेति तत्र शक्यार्थमनन्तर्भाव्य यदार्थान्तरस्य प्रतीतिस्तत्र जहल्लक्षणा यथा विषं भुंक्ष्वेत्यत्र स्वार्थं विहाय शत्रुमुद्दिश्य भोजननिवृत्तिर्लक्ष्यते। यत्र शक्यार्थमन्तर्भाव्यैव यदार्थान्तरप्रतीतिः तत्राजहल्लक्षणा यथा शुक्लः पट इति यत्र हि शुक्लशब्दः स्वार्थं शुक्लगुणमन्तर्भाव्यैव तद्वति द्रव्ये लक्षणया वर्त्तते। यत्र हि विशिष्टवाचकः शब्दः एकदेशं विहाय एकदेशे वर्त्तते तत्र जहदजहल्लक्षणा यथा सोऽयं देवदत्त इति यत्र हि पदद्वयवाच्ययोर्विशिष्टयोरैक्यानुपपत्त्या पदद्वयस्य विशेष्यमात्रपरत्वं यथा वा तत्त्वमसीत्यादौ तत्पदवाच्यसर्वज्ञत्वादिविशिष्टस्य त्वंपदवाच्येनान्तःकरणविशिष्टेनैक्यायोगात् ऐक्यसिद्ध्यर्थं स्वरूपे लक्षणेति साम्प्रदायिकाः। वयन्तु ब्रूमः सोऽयं देवदत्तः तत्त्वमसीत्यादौ विशिष्टवाचकानां पदानामेकदेशपरत्वेऽपि न लक्षणा शक्त्युपस्थितविशिष्टयोरभेदान्वयानुपपत्तावपि विशेष्ययोः शक्त्युपस्थितयोरेवान्वयबोधाविरोधात् यथा घटोऽनित्य इत्यत्र घटपदवाच्यैकदेशघटत्वस्यानित्यत्वान्वयोऽप्यलेऽपि योग्यघटव्यक्त्या सहानित्यत्वान्वयः। यत्र पदार्थैकदेशस्य विशेषणतयैवोपस्थितिस्तत्रैव स्वातन्त्र्येणोपस्थितये लक्षणाभ्युपगमः यथा नित्यो घट इत्यत्र घटपदाद्घटत्वस्य शक्त्या स्वातन्त्र्येणानुपस्थित्या तादृशोपस्थित्यर्थं घटपदस्य घटत्वे लक्षणा एवमेव तत्त्वमस्यादिवाक्येऽपि न लक्षणा शक्त्या स्वातन्त्र्येणोपस्थितयोस्तत्त्वंपदार्थयोरभेदान्वये बाधकाभावात्। अन्यथा गेहे घटः घटे रूपं घटमानय इत्यादौ घटत्वगेहत्वादेरभिमतान्वयबोधायोग्यतया तत्रापि घटादिपदानां विशेष्यमात्रपरत्वे लक्षणा च स्यात्। तस्मात्तत्त्वमस्यादिवाक्येषु आचार्याणां लक्षणोक्तिरभ्युपगमवादेन बोध्या। जहदजहल्लक्षणोदाहरणन्तु काकेभ्यो दधि रक्ष्यतामित्यादिकमेव। तत्र शक्यकाकत्वपरित्यागेनाशक्यदध्युपघातकत्वपुरस्कारेण काके काकशब्दप्रवृत्तेः"।

जहा स्त्री जहाति हा–बा०ड। सण्डितिकायां (सण्डिरी) शब्दच०। [हेमच०।

जहानक पु० हा–योगार्थे शानच् संज्ञायां कन्। प्रलये

जहिजोड़ अव्य० जहि जोड़ इत्युच्यते यस्यां क्रियायाम् मयूर०स०। त्यागजोड़ार्थनियोगक्रियायाम्।

जहिस्तम्भ अव्य० जहि स्तम्भ इत्युच्यते यस्यां क्रियायाम् मयू० स०। त्यागस्तम्भननियोगक्रियायाम्।

जह्नु पु० हा+उनू नि० हित्वम्। १अपत्ये "ऊतानुमङ्क आसनशयनाटनस्नानाशनादिषु सह स्नगजह्नुना" भाग० ५।८।१२। "स्नगजह्नुना स्नगापत्येन" श्रीधरः। २कुरुवंश्ये पुण्यवतोऽपत्ये राजभेदे "जह्नो सत्यवतोऽपत्यं पुण्यवांस्तनुतो जह्नुः" भाग० ९।२२।५।

जह्नु पु० भरतवंश्ये अजमीढस्यपुत्रे १ऋषभेदे। "भरतस्यान्वये चैवाजमीढो नाम पार्थिवः। तस्य पुत्रो महानासीज्जह्नुर्नाम नरेश्वरः। दुर्हृदमनुप्राप्ता गङ्गा यस्य महात्मनः" भा०अनु० ४अ०। गङ्गायास्तद्दुर्हृदत्वकथा रामा० आदि० ४३ अ०।

"ततो भगीरथो राजा ततो गङ्गा यशस्विनी। अगाम सरितां श्रेष्ठा सर्वपापप्रणाशिनी। यतो हि यजमानस्य जह्नोरद्भुतकर्म्मणः। गङ्गा संप्लावयामास यज्ञवाटं महात्मनः। तस्यावलेपनं ज्ञात्वा क्रुद्धो जह्नुश्च राघव !। अपिबत् जलं सर्वं गङ्गायाः परमाद्भुतम्। ततो देवाः सगन्धर्वा ऋषयश्च सुविस्मिताः। पूजयन्ति महात्मानं जह्नुं परमसत्तमम्। गङ्गां चापि नयन्ति स्म

दुहितृत्वे महात्मनः। ततस्तुष्टो महातेजाः श्रोत्रा-भ्यामसृजत् प्रभुः। तस्माज्जह्नुसुता गङ्गा प्रोच्यते जाह्नवीति च"। जह्नोरपत्यमण् ङीप्। जाह्नवी गङ्गा-याम्। "जाह्नवीतीरसम्भूतां मृदं मूर्ध्नी बिभर्त्ति यः" प्रा० त०। जह्नोरियं अण् वेदे पृषो० हस्वाकार-विपर्ययौ। जह्नावी जह्नुसम्बन्धिन्यां प्रजायाम्। "आ जह्नावीं सुमनसो वरान्नैः" ऋ० ।।।३६।१६। "जह्नावी जह्नोर्महर्षेः सम्बन्धिनी प्रजा" भा०।२विष्णौ च "सत्कर्त्ता सत्कृतः साधुर्जह्नुर्नारायणो नरः" विष्णुस०। "जनान् संसारादपह्नुते अपनयतीति जह्नुः जहात्य विदुषः स्वमज्ञानयति परं वदतीति वा" भा० तद्व्युत्पत्तिर्दर्शिता पृषो० साधु।

जह्नुकन्या स्त्री ६त०।१गङ्गायाम्। "जह्नोः कन्यां सगरतन-यस्वर्गसोपानपङ्क्तिम्" मेघ० "जह्ननिधिमतरूपं जह्नु-कन्यावतीर्णां" रघुः। जह्नुतनयादयोऽत्र।

जह्नुसप्तमी स्त्री वैशाखशुक्लसप्तम्याम्। "वैशाखशुक्लसप्तम्यां जह्नुना मुनिना पुरा। क्रोधात् पीता पुनस्त्यक्ता कर्ण-रन्ध्रात्तु दक्षिणात्। तस्यां समर्चयेद्देवीं गङ्गां भुवनमेख-लाम्। स्नात्वा सम्यग् विधानेन स धन्यः सुकृती नरः। तस्यां सन्तर्पयेत्तु देवान् पितॄन् मर्त्यान् यथाविधि। साक्षात् पश्यन्ति ते गङ्गास्नातकं गतपातकम्" वराहपु०।

जह्लन् न० हा-मनिन् पृषो० हित्वान्नलोपौ। उदके निघ० उदकनामसु तत्र जह्नेति पाठान्तरम्।

जा स्त्री जन-बा०ड।१मातरि २देवरपत्न्याम् एकाक्षरको०। ३जननकर्त्तरि त्रि० गवादौ उपपदे जन-विट् डा। गोजा गविजाते त्रि०।

जागत त्रि० जगती छन्दोऽस्य अण्। जगतीच्छन्दस्के मन्त्रादौ। जगत्यां भवः उत्सा०अञ्। २जगतीच्छन्दसि भवे सामभेदे न०। ३ जगत्यां पृथिव्यां भवे च त्रि०।

जागर पु० जाग्-भावे घञ् गुणः। १निद्राक्षये (जागा) अमरः "त्रयोदशसमास्तीर्णा जागरेण सुदुःखिताः" भा० क० ६६ अ०। "रात्रिजागरपरो दिवाशयः" रघुः। २अन्तःकरणस्य ज्ञातृत्ववस्तुप्रकाशात्मके ३वृत्तिभेदे।

जागरक त्रि० जाग्-स्वुल् गुणः। निद्रारहिते।

जागरण न० जाग्-भावे ल्युट्। १निद्राराहित्ये।

जागरित न० जाग्-भावे क्त गुणः। १जागरणे निद्राभावे २इन्द्रियैरर्थज्ञाने स्वप्नदर्शनहेतुकर्म्मत्वे च जागरित-मागच्छन् स्वोपाध्यन्तःकरणेन्द्रियसचिवस्तत्तदिन्द्रिय-विषयाननुभवंश्च स्थूलान् व्यवहारिकान् सर्वानुभवति यत्तावस्थायां तत् जागरितमित्युच्यते वेदान्तमतम्

जागरितस्थान पु० जागरितं स्थानमस्य। वेदान्तिमतसिद्धे वैश्वानरे आत्मनि। तत्सरूपादिकं सुखबोधनिघण्टौ तद्भाष्ये च दर्शितम्।

"जागरितस्थानो बहिःप्रज्ञः सप्ताङ्ग एकोनविंशति-मुखः स्थूलभुग्वैश्वानरः प्रथमः पादः" सुखबोध०

"जागरितं स्थानमस्येति जागरितस्थानः। बहिः स्वात्मव्यतिरिक्ते विषये प्रज्ञा यस्य स बहिःप्रज्ञो बहिर्विषयेषु प्रज्ञाऽविद्याकृताऽवभासत इत्यर्थः। तथा सप्ताङ्गान्यस्य "तस्य ह वैतस्यात्मनो वैश्वानरस्य मूर्धैव सुतेजाश्चक्षुर्विश्वरूपः प्राणः पृथग्वर्त्मात्मा सन्देहो बहुलो वस्तिरेव रयिः पृथिव्येव पादौ" अग्निहोत्रकल्पनाशेषत्वे-नाग्निर्मुखत्वेनाहवनीय उक्त इत्येवं सप्ताङ्गानि यस्य स सप्ताङ्गः। तथैकोनविंशतिर्मुखान्यस्य बुद्धीन्द्रियाणि च दश वायवश्च प्राणादयः पञ्च मनो बुद्धिरहङ्कारश्चित्त-मिति मुखानीव मुखानि तान्युपलब्धिद्वाराणीत्यर्थः। स एवं विशिष्टो वैश्वानरो यथोक्तैर्द्वारैः शब्दादीन् स्थूलान् विषयान् भुङ्क्त इति स्थूलभुक्। विश्वेषां नराणामा-नेकधा नयनाद्विश्वानरः। यद्वा विश्वासौ नरश्चेति विश्वा-नरः विश्वानर एव वैश्वानरः। सर्वपिण्डात्मानन्यत्वात् स प्रथमः पादः" भा०।

जागरितान्त पु०जागरितस्थानः तत्र विज्ञेयः। जागरित-मध्ये तत्र विज्ञेये "स्वप्नान्तं जागरितान्तश्चोभौ येनानु-पश्यति" कठोप० "स्वप्नान्तं स्वप्नमध्यं स्वप्नविज्ञेयमि-त्यर्थः। तथा जागरितान्तं जागरितमध्यं जागरितवि-ज्ञेयं चोभौ स्वप्नजागरितान्तौ येनात्मनानुपश्यति लोकः" भा०।

जागरितृ त्रि०जाग्-शीलार्थे तृच्। जागरणशीले अमरः।

जागरिन् त्रि० जाग्-शीलार्थे णिनि गुणः। जागरणशीले हेमच० स्त्रियां ङीप्।

जागरूक त्रि० जाग्-ऊक। जागरणशीले अमरः "स्वपतो जागरूकस्य याथार्थ्यं वेद कस्तव" रघुः। २सकर्त्तव्ये सावधाने अप्रमत्ते च "वर्णाश्रमावेक्षणजागरूकः" रघुः।

जागर्त्ति स्त्री जागृ-भावे क्तिन्। जागरणे रायमु०।

जागर्य्या स्त्री जागृ-भावे ण्यप् गुणः। जागरणे। ङ्य। जाग-राण्यत्र स्त्री अमरः।

जागुड पु०१देशभेदे सोऽभिजनोऽस्य अण्। २तद्देशवासिनि त्रि०

"जागुड़ान् रामठान् हृषान् क्षीराज्ञानथ तङ्कणान्" भा० । ब० प० । तत्र भवः अण् । ३तद्देशभवे त्रि० । ४कुङ्कुमे न० । "अवनिं जागुड़ङ्कुमाभितास्वाम्" माघः ।

जागृ निद्राभावे अदा० पर० अक० सेट् जक्षा० । जागर्त्ति जार्यति अजागरीत् । जागराम्-बभूव आस चकार जजागार । अस्य यपि ह्रस्वः तङ्गिच्चे त्रिति ङिति च गुणः विनृभिन्ने सर्वत्र आर्द्धधातुके गुणः । जागर्य्यते अजागरि जागरयति कर्म्मणि अजागरि अजागारि इति भेदः "कुसुमशरसज्जागरयति" उद्भटः । जागरकः । जाग्रद्विः "जागर्त्ति लोको ज्वलति प्रदीपः" उद्भटः । इन्द्रियादिना बोधे प्रबोधे च । "या निशा सर्व्वभूतानां तस्यां जागर्त्ति संयमी । यस्यां जाग्रति भूतानि सा निशा पश्यतो मुनेः" गीता । "पद्मसगवीगुल्केषु चाजागरीत्" भट्टि० ।

जागृवि पु० जागृ-किन् न गुणः । १स्वपे उज्ज्वल० तस्य स्वकार्य्येऽप्रमत्तत्वात् तथात्वम् । २अग्नौ हेम० ३जागरणशीले त्रि० "समानमञ्जन्त पर्य्येति जाग्रद्विः" ताण्ड्य० ब्रा० १।७।६ । "जाग्रद्विः जागरूकः" भा० "विभीदको जागृविर्मह्यमच्छान्" ऋ० १०।३४।१ । "अनस्य गोषा अजनिष्ट जागृविरग्निः" ऋ० ५।११।१ ।

जाग्रत् त्रि० जाग्र-शतृ । १जागरणकर्त्तरि २सावधाने अप्रमत्ते ३प्रकाशमाने च । "जाग्रत्कलङ्करवध्वंसं हसत्यते च या सुमनसामुल्लासिनी मानसे" चन्द्रालोकः । स्त्रियां ङीप् । जीवानां श्रोत्रादिभिः ४शब्दादिविषय ज्ञानावस्थाभेदे सा च त्रिधा "प्रमितिर्जागरे जाग्रद्भ्रमः स्वप्नोऽथ मूढ़ता । पानादिजन्या सुप्तिः स्यादेवं जागरणं त्रिधा" शब्दार्थचि० धृतवाक्यम् । "एवं स जाग्रत्स्वप्नाभ्यामिदं सर्वं चराचरम्" मनुः । "जाग्रत्स्वप्नः सङ्कल्पः पापः" ऋ० १०।१६४।५ । "जाग्रत्स्वप्नावस्थयोः सम्बन्धी पापः" भा० । "जाग्रत् स्वप्नसुप्तिप्रभाभरहितः प्राप्तः प्रबोधोदयः" प्रबो० । [ रायमुकुटः ।

जाग्रिया स्त्री जाग्र-भावे पक्षे यः रिङादेशः । जागरणे

जाघनी स्त्री जघनस्य समीपं शैषिकोऽण् ङीप् । १जङ्घा त्रिका० जघनस्यार्द्धं जघनैकदेशे भवः अण् ङीप् । २पुच्छकाण्डे "अथ जाघन्या पत्न्योः संयाजयन्ति जघनार्द्धं जाघनी जघनार्द्धेन योषायै प्रजाः प्रजायन्ते" शत० ब्रा० ३।८५।६ । "जाघनी बालदण्डः" भा० । "अनिष्ठु जाघनि चावद्यति" काल्या० श्रौ० ६।७।१० तत्र जाघनीशब्दस्य मतभेदेन कर्केण नानार्थतोक्ता यथा "जाघनी जघनप्रदेशे भवा पुच्छदण्ड इत्यर्थः जाघनी पशोः पुच्छमिति हरिस्वामिना । जाघनी बालदण्ड इति माधवाचार्य्यः । "जाघनी येन मशकानपनयतीति धूर्त्तस्वामिनः । जाघनी बालधिरुच्यत इति ज्ञानदीपिकाकारः । जुघार्त्तेश्चान्तुमय्यगाद्विश्वामित्रः श्वजाघनीम् । चण्डालहस्तादादाय धर्माधर्मविचक्षणः" (मनुः) इत्यत्र श्वजाघनीम् श्वपुच्छमिति ऋतिचन्द्रिकाकारो व्याख्यातवान् । जाघनी पशोः पुच्छमित्यधिकरणमालायाम् तृतीयेऽध्याये । जाघनी चैकदेशत्वादित्यधिकरणे जाघनी कटी इति पितृभूतिहरिहरौ तदयुक्तम् कटिशब्दस्य श्रोणिपर्य्यायत्वात् श्रोण्योश्च प्रागुक्तत्वादिति अतः पुच्छकाण्डमेव जाघनीशब्देनोच्यते इति । विश्वामित्रस्य जाघनीहरणकथा प्रसङ्गादुच्यते ।

"विश्वामित्रोऽथ भगवान् महर्षिरनिकेतनः । जुघापरिगतो धीमान् समन्तात् पर्य्यधावत । क्वचा दारांश्च पुत्रांश्च कस्यांचित् अनसंसदि । भक्ष्याभक्ष्यसमो भूत्वा निरग्निरनिकेतनः" इत्युपक्रमे "स ददर्श श्वमांसस्य कृतन्नौ विततां सुनिः । चण्डालस्य गृहे राजन् ! यद्यः शस्त्रहृतस्य वै । स चिन्तयामास तदा स्तैन्यं कार्य्यमितो मया । न ह्रीदानीमुपायो मे विद्यते प्राणधारणे । आपत्सु विहितं स्तैन्यं विशिष्टैर्न महीयसः । विप्रेण प्राणरक्षार्थं कर्त्तव्यमिति निश्चयः । हीनादादेयमादौ स्यात् समानात्तदनन्तरम् । असत्यपि वादद्दीत विशिष्टादपि धार्मिकात् । सोऽहमन्त्यावसायाय चरान्त्येनां प्रतिग्रहात् । न स्तैन्यदोषं पश्यामि हरिष्यामि श्वजाघनीम्" । इति निश्चित्य तां हर्त्तुं सुप्तमान्तस्य चण्डालेन सह संवादो यथा "विश्वामित्रस्तु मातङ्गमुवाच परिसान्त्वयन् । क्षुधितोऽहं गतप्राणो हरिष्यामि श्वजाघनीम् । क्षुधितः कलुषं याति नास्ति ह्रीरशनार्दितः । क्षुद्ध मां दूषयत्यत्र हरिष्यामि श्वजाघनीम् । अवसीदन्ति मे प्राणाः श्रुतिर्मे नश्यति क्षुधा । दुर्बलो नष्टसंज्ञश्च भक्ष्याभक्ष्यविवर्ज्जितः । सोऽधर्मं बुध्यमानोऽपि हरिष्यामि श्वजाघनीम् । अटन् भैक्षं न विन्दामि यदा युष्माकमालये । तदा बुद्धिः कृता पापे हरिष्यामि श्वजाघनीम्" भा० शा० १४१ अ० । कथाशेषस्तत्र द्रष्टव्यः

जाङ्गल पु० जङ्गले भवः जङ्गलप्रायो वा अण् । १वनप्राये २जङ्गलस्थपशुमांसे तत्रत्ये ३उद्देशे च शब्दार्थचि० । "अल्पोदकद्रुमो वस्तु प्रवातः प्रचुरातपः । स ज्ञेयो

जाङ्गलो देशो बहुधान्यादिसंयुतः" कुङ्कु० धृतवाक्योक्तलक्षणे ४देशभेदे पु० भावप्र० अन्यथा तल्लक्षणसङ्कं यथा "आकाशशुभ्र उच्चत्व स्वल्पपानीयपादपः। शमीकरीरविल्वार्कपीलुकर्कन्धुसङ्कुलः। हरिणैश्वर्यधृतराष्ट्र गोकर्णखरसङ्कुलः। सुखाढ्यफलवान् देशो वातलो जाङ्गलः स्मृतः"।

"बहुदकनगोऽनूपः कफमारुतरोगवान्। जाङ्गलोऽल्पाङ्गशाखी च पित्तासृङ्मारुतोत्तरः" तद्देशगुणास्तत्रोक्ता जाङ्गलानां पशूनां विशेषः तन्मांस गुणाश्च तत्रैवोक्ता यथा "हरिणैणकुरङ्गर्क्ष पृषतन्यङ्कुशंवराः। राजीवोऽपि च सक्थ्नो चेत्याद्याः जाङ्गलसंज्ञकाः। हरिणस्ताम्रवर्णः स्यादेणः कृष्णः प्रकीर्त्तितः। कुरङ्ग ईषच्छ्यावः स्यादेणतुल्याङ्गनिर्मलात्। ऋष्यो नीलाङ्गको लोके सारङ्ग इति कीर्त्तितः। पृषतस्तन्द्रबिन्दुः स्याद्धरिणात् किञ्चिदल्पकः। न्यङ्कुर्बहुविषाणोऽथ शंवरो गवयो महान्। राजीवस्तु मृगो ज्ञेयो राजिभिः परितोऽङ्कितः। यो मृगः सक्थ्नहीनः स्यात् स सक्थ्नीति निगद्यते। जाङ्गलाः प्रायशः सर्वे पित्तश्लेष्महराः स्मृताः। किञ्चिद्वातकराश्चापि लघवो बलवर्द्धनाः"। "तत्रैमे कुरुपाञ्चालाः शाल्वा मात्स्यजाङ्गलाः" भा० भी० ६अ०। ५कपिञ्जलखगे पु० स्त्री मेदि० स्त्रियां जातित्वात् ङीष्।

जाङ्गलपथिक त्रि० जङ्गलस्य पन्थाः अच् समा०। तेनाहृतं तेन गच्छति वा ठञ्। १जाङ्गलपथेनाहृते २तेन गच्छति च।

जाङ्गुच न० गम-यङ्लुक् बा० डुच् पृषो० दीर्घः। १विषे तस्य कुटिलगतित्वात् तथात्वं २जालिनीफले शब्दरत्ना०।

जाङ्गुलि पु०गम-यङ्लुक् बा०डुलि। १विषवैद्ये शब्दरत्ना०। "परीक्षितं समश्नीयात् जाङ्गुलिभिर्भिषग्वृतः" वैद्यकम्।

जाङ्गुलिक पु० जाङ्गुली विषविद्या तामधीते वेद वा तया दीव्यति वा ठञ्। विषवैद्ये अमरः। [ हेमच०।

जाङ्गुली स्त्री जाङ्गुलस्य विषस्येयम् अण्। विषविद्यायाम्

जाङ्गि त्रि० जङ्गायां भवः तस्या इदं वा वाह्वादेराकृतिगणत्वात् इञ्। १जङ्गाभवे २तत्सम्बन्धिनि च।

जाङ्गिक त्रि० जङ्गाभ्यां जीवति वेतना० ठञ्। १धावके (धाओड़े) २वहे पुंस्त्री० ३श्रीकारीवृक्षे पु०राजनि०।

जाजलि पु० ऋषिभेदे तस्य तपश्चरणकथादिकं भा०शा०२६२अ० द्रष्टव्यम् "वने वनचरः कश्चिज्जाजलिर्नाम वै द्विजः" रत्नादि। स च प्रवरप्रवर्त्तकः हेमा० ब्र० दक्षम्।

जाजिन् त्रि० जज-घोषे-ताच्छील्ये णिनि। घोषशीले। "जजौजाजाजिजिज्जाजौ" माघः।

जाञ्झा(ट)लि पु०ज(झ)ट-संघाते घञ्। तं लाति ला-वा-डि। ३वृक्षभेदे अमरः।

जाटालिका स्त्री कुमारानुचरमातृभेदे "जाटालिका कामचरी दीर्घजिह्वा बलोत्कटा" भा० शा० ४७ अ०।

जाटासुरि पु० जटासुरस्यापत्यम् इञ्। जटासुरापत्ये "जाटासुरिर्मैनसैनिं नानाशस्त्रैरवाकिरत्" भा०द्रो०१७५ अ०।

जाटिलिक पुंस्त्री जटिलिकाया अपत्यं शिवा०अण्। जटिलिकाया अपत्ये स्त्रियां ङीप्।

जाठर पु० जठरे भवः अण्। जठरस्थिते १वह्नौ "जाठरो भगवानग्निरीश्वरोऽन्नस्य पाचकः" सुश्रु०। २कुमारानुचरभेदे "विद्युताक्षो धनुर्वक्त्रो जाठरो मारुताशनः" भा० श० ४६अ०। तत्रेदमण्। ३जठरसम्बन्धिनि त्रि० स्त्रियां ङीप्। "नानाशनः स्यान्न महाशनः स्यादलोलुपः स्वादु शिरागतः स्यात्। यात्रार्थमाहारमिहाददीत तथास्य स्याज्जठरो हारगुप्तिः" भा० शा० २७० अ०।

जाठर्य्य त्रि० जठरे भवः वा० ञ्य। जठरभवे रोगादौ "एतद्वचनसमेतेन जाठर्यं न भवति सन्नोऽग्निराप्यायते" सुश्रु०।

जाडार पुंस्त्री जडस्यापत्यम् वा आरक्। जड़स्यापत्ये।

जाड्य न०जड़स्य भावः ष्यञ्। १जड़तायां २मौख्ये च हेमच०। "आलस्यमगभीर्यं जाड्यं जृम्भासितादिकृत्" सा०द०। "इदं जाड्यमिदं मौढ्यमिदमत्यद्भुतं वचः" हरिवं०३०६अ०।

जाड्यारि पु० ६त०। जम्बीरे राजनि०।

जात त्रि० जन-कर्त्तरि क्त। १उत्पन्ने २व्यक्ते च भवे क्त। ४जन्मनि ५समूहे च मेदि०। तत्र उत्पन्ने "तस्मात् कुमारं जातं तं वैश्वाग्ने प्रतिलेहयन्ति स्नातं वानुधापयन्ति" शत०ब्रा०१४ ४।२।४ "सुबीजं चैव सुक्षेत्रे जातं संपद्यते यथा" मनुः संघे "निःशेषविघ्नाक्षितकोशजातम्" रघुः। "चतुर्विधस्थूलशरीरजातम्" वेदान्तः। "सर्वेषां धनजातानामाददीतोत्तमोत्तमम्" मनुः।

जातक त्रि० जात+स्वार्थे क। १उत्पन्ने "उभौ तौ नार्हतो भागं जारजातककामजौ" मनुः। जातं जन्म तदधिकृत्य कृतो ग्रन्थः अण् संज्ञायां कन्। २होरातन्त्रे। तत्र नानाज्योतिर्विद्भिर्नानाविधं रचितं तत्र हरिदत्तजातकस्यैव क्षितिग्रामाधिकत्वात् तच्छास्त्रमतिपाद्यविषया ग्रन्थलता

२५ अध्यराहुमिश्चिरेषोक्ताः प्रदर्शग्रन्थे। "राशिप्रभेदो यहयोनिभेदो वियोनिजन्माथ निषेककालः। जन्माथ सद्योमरणं तथायुर्दशाविपाकोऽष्टकवर्गसंज्ञः। कर्मजीवो राजयोगाः खयोगाचान्द्रा योगाद्दियहाद्याश्च योगाः। प्रव्रज्यायो राशिशीलानि दृष्टिर्भावस्तस्मादाश्रयोऽथ प्रकीर्णः। नेष्टायोगा जातकं कामिनीनां निर्याणं स्याद्भङ्गजन्मद्विकाणः। अत्राध्याया विंशतिः पञ्चयुक्ता जन्मन्येतद्याति चाभिधास्ये"।

"राशिप्रभेदः प्रथमेऽध्याये। यहयोनिभेदः द्वितीये वियोनिजन्म तृतीये। निषेककालश्चतुर्थे। जन्मविधिः पञ्चमे। सद्योमरणं षष्ठे। चायुर्विभागः सप्तमे। दशाविभागोऽष्टमे। अष्टकवर्गो नवमे। कर्मजीवो दशमे। राजयोगा एकादशे। खयोगाः (नाभसयोगाः) द्वादशे। चान्द्रयोगाः सुनफाद्याचन्द्रयोगाश्चयोदशे द्वियहत्रियह-योगाश्चतुर्दशे। प्रव्रज्यायोगा पञ्चदशे। राशिशीलम् षोडशे। दृष्टिफलं सप्तदशे। भावफलमष्टादशे। आश्रय एकोनविंशतितमे। प्रकीर्णफलम् विंशतितमे। अनिष्ट-योगा एकविंशे। कामिनीनां (स्त्रीणां) जातकं द्वाविंशे। निर्याणं (मरणं) तद्विरूपणं त्रयोविंशे। नष्टजातकं चतुर्विंशे। द्रेक्काणस्वरूपादि पञ्चविंशे। एवं पञ्चयुक्ताध्या-यानांविंशतिर्जन्मनिर्जातके कथिता एतज्जातके उक्ताः।

जन्मफलं पञ्चमे उक्तं यथा

"पितुर्जातः परोक्षस्य लग्नमिन्दावपश्यति। विदेशस्थस्य चरमे मध्याद्भग्नेदिवाकरे। उदयस्थेऽपि वा मन्दे कुजे वास्तं समागते। स्थिते वानःक्षपानाथे शशाङ्क-सितशुक्रयोः। शशाङ्के पापलग्ने वा दृष्टिकेऽस्तविभागगे। शुभैः स्वावस्थितैर्जातः सर्पस्तद्दृष्टितोऽपि वा। चतुष्पद-गते भानौ शैवैर्वीर्यसमन्वितैः। द्वितनुस्थैश्च यमलौ भवतः कोशवेष्टितौ। ऋक्षसंहृद्यैर्लग्ने तत्स्थे सौरेऽथवा कुजे। राक्षसंशसदृग् गात्रं जायते नाभवेष्टितः। न लग्नमिन्दुश्च गुरुर्निरीक्षते न वा शशाङ्कं रविणा समागतम्। सपापकोऽर्केण युतोऽथवा शशी परेण जातं प्रवदन्ति निश्चयात्। क्रूरर्क्षगतावशोभनौ स्वर्क्षादृक्षान नवात्मजस्थितौ। बहुस्तु पिता विदेशगः स्वे वा राशिव-शादथो पथि। पूर्णे शशिनि स्वराशिगे सौम्ये लग्नगते शुभे सुखेशे। लग्ने जलजेऽस्तगेऽपि वा चन्द्रे योगगता प्रसूयते। व्योमोदयमाश्रगः शशी संपूर्णः समवेक्षतेऽथ वा। मेषुरणबन्धुलग्नगः स्यात् सुतिः सकिले न संशयः। उदयोडुपयोर्व्ययस्थिते शुभ्रां शपनिरीक्षते यमे। खलि-कर्कियुते विलग्नगे सारे शीतकरेक्षितेऽथटे। मन्दे-ऽजगते विलग्नगे बुधसूर्येन्दुनिरीक्षिते क्रमात्। क्रीडा-भवने सुराजये सोदरभूमिषु च प्रसूयते। लग्नगं प्रेक्ष्य कुजः शुक्रगाने रन्ध्रे सितेन्दू गुरुरम्बुहोबे। रविर्नरेन्द्रामरगोकुलेषु शिल्पालये वः प्रसवं करोति। राक्षंशसमानगोचरे मार्गे जन्मचरे स्थिरे मृदे। स्वर्क्षांश गते स्वमन्दिरे बलयोगात् फलमंशकर्क्षयोः। धारार्क-जयोस्त्रिकोणगे चन्द्रेऽस्ते च विलुप्यतेऽम्बया। दृष्टे-ऽमरराजमन्त्रिणा दीर्घायुः सुखभाक् च स स्मृतः। पापे-क्षिते तद्दिनगावुदये कुजेऽस्ते त्यक्तो विनश्यति कुजार्क जयोस्तयाये सौम्येऽपि पश्यति तथाविधनक्तमेति सौम्येतरेषु परलग्नगतोऽन्यनायुः। शिल्पाद्यगृहेषु तद्बलात्तरुगाद्यादिषु नीचगैः शुभैः। यदि नैकगतौ तु वीक्षितौ लग्नेन्दू विजने प्रसूयते। मन्दर्क्षांशे शशिनि क्षिबुके मन्ददृष्टेऽङ्गने वा तद्युतो वा तमसि शयने नीचसंस्थैश्च भूमौ। यद्यद्राशिं व्रजति हरिजं गर्भमोचस्तु तद्यत्पापैश्चन्द्रात् स्मरसुखगतैः क्लेशमाङ्गजन्याः। स्नेहः शशाङ्काद्दयाच्च वर्तिर्दीपोऽर्कयुक्तश्च वशाद्गराद्याः। हारं च तद्वास्तुनि केन्द्रसंस्थैर्यं यद्वैर्यैर्यसमन्वितैर्वा। जीर्णं संस्कृतमर्कजे क्षितिसुते दग्धं नवं शीतगौ काष्ठाद्यं न दृढं रवौ शशिसुते तच्चैकशिल्पद्रुवम्। रम्यं चित्रयुतं नवं च भृगुजे जीवे दृढं मन्दिरं चक्रस्थैश्च यथोपदेश-रचनां सामलपूर्वां वदेत्। मेषकुलीरतुलालिघटैः प्राग्-उत्तरतो गुरुसौम्यगृहेषु। पश्चिमतश्च वृषेण निवासो दक्षिण-भागकरौ सृगसिंहौ। प्राच्यादिगृहक्रियादयो हौ हौ कोणगताद्दिमूर्त्तयः। शय्यास्वपि वास्तुवद्दृदृक्त्रयादीः षट् त्रिनवान्यसंस्थितैः। चन्द्रलग्नान्तरगतैर्यदैः स्युरुप-स्तृतिकाः। वह्निरलश्च चक्रार्द्धं दशाद्यशेऽन्यथा परे। लग्ननवांशपतुल्यतनुः स्याद्दीर्ययुतश्चतुल्यतनुर्वा। चन्द्र-समेतनवांशपवर्षः कादिविलग्नविभक्तभगात्रः। कं हक् श्रोत्रनसा कफोलहनवो वक्त्रञ्च होरादयस्ते कण्ठां सकबाहुपार्श्वहृदयं क्रोडानि नाभिस्ततः। वस्तिः शिश्न-गुदे ततश्च वृषणावूरू ततो जानुनी। जङ्घाङ्घ्री ह्युभयत्र वामसुदितैर्द्वादशभागैस्त्रिधा। तत्तनुं पापयुते व्रणं शुभयुते दृष्टे च तच्चादिशेत् स्वर्क्षांशे स्थिरसंयुते च स-हजः स्यादन्यथाऽऽगन्तुकः। मन्देऽग्न्यानिलजोऽग्निशस्त्र-विषजो भौमे बुधे भूभवः सूर्ये काष्ठचतुष्पदेषु हिमगौ

भृङ्गाब्जजेऽन्यैः शुभम्। समनुपतिता यस्मिन् भागे त्रयः सबुधा यदा भवति नियमात्तस्मात्तावान्प्रिः शुभेष्वशुभेषु वा। ब्रणाङ्गदशुभः षष्ठे देहे तनोर्भसमाश्रिते तिलकमसङ्गदृष्टः सौम्यैर्युतश्च स लक्ष्मवान्" इत्य० अष्टवर्गफलसूत्रं तच्चाष्टवर्गशब्दे ६२०पृ०दर्शितम्। नाभसादियोगास्तत्तच्छब्दे वक्ष्यन्ते।

तत्रोनविंशोरिष्टाध्याये यथा

"लग्नात्पुत्रकलत्रभे शुभपतिप्राप्तेऽथ वाऽऽलोकिते चन्द्रो वा यदि सम्पदन्ति हिबुकोर्त्तीयोऽन्यथासम्भवः। पापेनोदयगे रवौ रविसुतो मीनस्थितोदारङ्गा पुत्रस्थानगतश्च पुत्रमरणं पुत्रोऽवनेर्यच्छति। व्ययषष्ठैः सितचतुरस्रसंस्थितैर्मध्यस्थिते भृगुतनयेऽथवोऽथयोः। सौम्यषष्ठैरसहितसंनिरीक्षिते जायाबन्धोदहननिपातपाशजः। लग्नाहृद्यवारिगतयोः शशितिग्मरश्म्योः बल्या सहैकनयनस्य वदन्ति जन्म। द्यूनस्थयोर्नवमपञ्चमसंस्थयोर्वा शुक्रार्कयोर्विकलदारसुतत्वं जातम्। कोणोदये भृगुतनयेऽस्तचक्रसन्धौ वन्ध्यापतिर्यदि न सुतर्क्षमिष्टयुक्तम्। पापषड्व्ययमदलग्नराशिसंस्थैः क्षीणे शशिन्यसुतकलत्रजन्मधीस्थे। असितकुजयोर्वर्गेऽस्तस्थे सिते तदवेक्षिते परवृक्षतिगस्तौ चेत् सेन्दू क्षिया सह पुंचलः। भृगुजशशिनोरस्तेऽभार्यो नरोविसुतोऽपि वा परिक्षततनूनष्टस्त्रीर्ष्टौ शुभैः प्रमदापतौ। वंशच्छेत्ता खमदसुखगैश्चन्द्रदैत्येज्यपापैः शिखी लग्ने शशिसुतयुते केन्द्रसंस्थार्किदृष्टे। दाक्षां जातोदितिसुतगुरौ रिपुफगे चौरभागे नीचेऽर्केन्द्वोर्भदमगतयोर्दृष्टयोः सूर्यजेन। पापाऽऽलोकितयोः सितावनिजयोरस्तस्थयोर्वाध्यरुकेन्द्रे कर्कट क्षिकांशकगते पापैर्युते शुद्धारुक्। शिखी रिपुफधनस्थयोरशुभयोश्चन्द्रोदयेऽस्ते रवौ चन्द्रे खेऽवनिजेऽष्टगे च विकलो वर्धार्कजोवेक्षितः। अन्तःशशिन्यशुभयोर्द्वगते पतङ्गे स्वासत्रयस्त्रिरुकविद्रधिशुल्मभाजः। शोफीपरस्परदृक्कांशगयोरवीन्द्वोः क्षेत्रेऽथवा युगपदेकगयोः क्रमो वा। चन्द्रेऽस्त्रिमध्यभगकर्किसमाजभागे कुष्ठी समन्दरुधिरे तदवेक्षिते वा। यातैस्त्रिकोणमकिकर्किदृष्टैर्द्वगे च कुष्ठी च पापसहितैरवलोकितैर्वा। निधनारिधनव्ययस्थिता रविचन्द्रारयमा यथा तथा। बलवद्दृग्दोषकारणैर्मनुजानां जनयन्त्यनेकरूपम्। नवमायतृतीयधीयुता न च सौम्यैरशुभा निरीक्षिताः। नियमाच्छ्रुषोपघातदा रदवैकल्यकराश्च सप्तमे। उदयव्ययुडुपे सुरार्चिषि क्षपिशाचोऽशुभयोरिक्षकोक्षयोः। तमसोपगवसखडे रवावुदयस्थे नयनोपवर्जितः। संस्थः पवनेन मन्दगयुते द्यूने विलग्ने हरौ सोन्मादो ऽवनिजे स्थितेऽस्तभवने जीवे विलग्नाश्रिते। तद्वत्सूर्यसुतोदयेऽवनिसुते धर्मात्मजद्यूनगे जाते वा समहरश्मितनये क्षीणे व्यये शीतगौ। राज्यं शशोष्णकरशीतकरामरेज्यैर्नीचाधिपांशकगतैररिभावगैर्वा। एभ्योऽल्पमध्यबहुभिः क्रमशः प्रकृताक्षेयाःस्मृत्युपगमक्रयगर्भदासान्त विक्षतदशनः पापैर्दृष्टे हृज्जडोदये खलतिरशुभक्षेत्रे लग्नेऽस्ते दृष्टेऽपि वा। नवमसुतगे पापैर्दृष्टे रवावुदये क्षणो दिनकरसुतेऽनेकव्याधिः कुजे विकलः पुमान्। व्यवसुतधनधर्मगैरसौम्यैर्भवनसमाननिबन्धनं विकल्पम्। भुजगनिगडपाशभद्दृढकार्यैर्बलवदसौम्यनिरीक्षितैश्च तद्वत्। परुषवचनोऽपस्कारार्त्तः क्षयी च निशापतौ सरवितनये वक्राक्रोकं गते परिवेषगे। रविसमकुजैः सौम्याद्दृष्टैर्नभस्थसमाश्रितैर्भूतकमनुजः पूर्वोद्दिष्टैर्वराधमसध्यमाः।"

चान्द्रयोगास्तु १२अ० उक्ता यथा।

"अधमसमवरिष्टान्यर्ककेन्द्रादिसंस्थे शशिनि विनयवित्तज्ञानधीनैपुणानि। अहनि निशि च चन्द्रे स्वाधिमित्रांशके वा सुरगुरुसितदृष्टे वित्तवान् स्यात् सुखी च। सौम्यैः खरारिनिधनेष्वधियोग इन्दोस्तत्कर्मपश्च चितिपालजन्मा सम्पन्नसौख्यविभवा कृतशस्त्रवश्च दीर्घायुषो विगतरोगभयाश्च जाताः। हित्वार्कं सुनफाऽनफा दुरुधुरा स्वान्योभयस्थैर्यैः शोतांशोः कथितोऽन्यथा तु वक्ष्यभिः केमद्रुमोऽन्यैस्तथौ। केन्द्रे शीतकरेऽथवा यदि युते केमद्रुमो नेष्यते केचित् केन्द्रनवांशकेषु च वदन्त्युक्तिः प्रसिद्धा न तु। त्रिंशत्सङ्ख्याः सुनफाऽनफाख्याः षष्टित्वन्दौरुधुरे प्रभेदाः। इच्छाविकल्पैः क्रमशोऽभिनीय नीते निर्वृत्तिः पुनरन्यनीतिः। स्वयमधिगतवित्तः पार्थिवस्तत्समो वा भवति हि सुनफायान्धीधनस्थानिसंस्थ। प्रभुरगदशरीरः शीलवान् ख्यातकीर्तिर्विषयसुखसुवेषो निर्वृतश्चानफायाम्। उत्तमभोगसुखभुग्धनवाहनाढ्यस्त्यागान्वितो दुरुधुराप्रभवः सुहृद्यः। केमद्रुमे मलिनदुःखितनीचनिःस्वाः प्रेष्याः खलाश्च नृपतेरपि संभ्रजाताः। उक्ताद्दशौर्यधनसाहसवान् महीजः सौम्यः पटुः सुवचनो निपुणः कलासु। जीवोऽर्थधर्मसुखभुग् नृपपूजितश्च कामी भृगुर्बहुधनो विषयोपभोक्ता। परविभवपरिच्छदोपभोक्ता रवितनयो बहुकार्यकृद्दशेशः। शशुक्रडुपोऽङ्गि दृश्यमूर्तिर्गणितततश्च शुभोऽन्यथान्यदूह्यम्।

जन्मादतीव वसुमान् वसुमांश्चशाङ्कात्सौम्यग्रहैरुपचयोपगतैः समस्तैः। द्वाभ्यां समोऽस्तवसुमांश्च तदूनतायामन्येष्वसत्स्वपि फलेष्विदमुत्कटेन"।

द्विपदादियोगास्तु १२ अ० उक्ता यथा

"चित्रांशुर्जनयत्यशेषसहितो यन्नाम्नकारं नरं भौमेनाधरतं बुधेन निपुणं धीकीर्त्तिसौख्यान्वितम्। क्रूरं वाक्पतिनाम्नकार्यनिरतं शुक्रेण रङ्गायुधैर्लक्ष्यलक्षम् रविजेन धातुकुशलं भाण्डप्रकारेषु वा। कूटस्त्रासव कुम्भपक्षमभिवं मातुः सवक्रः शनी संज्ञः प्रस्तुतवाक्यमर्थनिपुणं सौभाग्यकीर्त्यन्वितम्। विक्रान्तं कुजसख्यमस्थिरमतिं वित्तेश्वरं साङ्गिरा वस्त्राणां सहितः क्रयादिकुशलं सार्किः पुनर्भूसुतम्। मूलादिस्त्रेष्कूटैर्व्यवहरति वणिग्वाक्छयोद्या सप्तम्यै पुरुषध्वजः सजीवे भवति नरपतिः प्राप्तवित्तो द्विजो वा। गोपो मन्त्रोऽथ दक्षः परयुवतिरतोद्यूतलुब्धः सासरेऽस्मे दुःखार्त्तो ऽस्तप्रसक्तः सपरिवृतनये भूमिजे निन्दितश्च। सौम्ये रङ्गेश्वरो बृहस्पतियुते गोतप्रियो मल्लविद्याम्नो भृगणपः सितेन सदृना मायापदुर्लुब्धकः। सहितो धनदारवान् बहुगुणः शुक्रेण युक्ते गुरौ। ज्ञेयः शस्त्रकरोऽसितेन सटलज्ञातोऽस्त्रकारोऽपि वा। असितसितसमागमेऽस्त चक्षुर्वलितसमाश्रयसंग्रहङ्गवित्तः। भवति च विपिपुस्तचित्रवेत्ता कथितफलैः परतो विकल्पनीयाः"।

अथ नक्षत्रभेदे जन्मफलम् बृहज्जातके १६ अ०।

"प्रियभूषणः सुरूपः सुभगो दक्षोऽग्निकीषु मतिमांश्च। कृतनिश्चयः सत्यवाग् दक्षः सुखितश्च भरणीषु। बहुभुक्परदाररतश्चलश्री कृत्तिकासु विख्यातः। रोहिण्यां सत्यशुचिः प्रियंवदः स्थिरमतिः सुरूपश्च। चपलचतरो भीरुः पटुरुत्साहो धनी सुगे भोगी। शठगर्वितः कृतघ्नो हिंस्रः पापश्च रौद्रचेष्टः। दान्तः सुखी सुशीलो दुर्मेधो रोगभाक् पिपासुश्च। अल्पेन च सन्तुष्टः पुनर्वसौ जायते मनुजः। शान्तात्मा सुभगः पण्डितो धनी धर्मसंस्तुतः पुष्ये। शठसर्वभक्षः पापः कृतघ्नधूर्त्तश्च भौजङ्गे ९। बहुभृत्यधनोभोगी पितृसुभक्तो महोद्यमः पित्र्ये १०। प्रियवाग् दाता द्युतिमानटनो रूपसेवको भाग्ये ११। सुभगो विद्याप्रधनो भोगी सुखभाग् द्वितीयफल्गुन्याम्। उत्साही धृष्टः पानपोऽहणो तस्करो हस्ते। चित्राम्बरमाल्यधरः सुलोचनाङ्गश्च भवति चित्रायाम्। दान्तो वणिक् कृपालुः प्रियवाग् धर्माश्रितः स्वातौ। दैर्घ्यर्जुर्भ्रुवो द्युतिमान् वचनपटुः सुखहृद्विशाखासु। आढ्यो विदेशवासी क्षुधालुरटनोऽहराधासु। ज्येष्ठासु न बहुमित्रः सन्तुष्टो धर्मकृत् प्रचुरकोपः। मूले मानी धनवान् सुखी निश्चिन्तः स्थिरो भोगी। दृढानन्दकलत्रो मानी दृढः सौहृदश्च जलदेवे २०। वैश्वे २१ विनीतधार्मिकबन्धुमित्रः कृतज्ञसुभगश्च। श्रीमान् श्रवणे श्रुतवानुदारो धनान्वितः ख्यातः। दाताऽऽढ्यः शूरः गीतप्रियो धनिष्ठासु धनकुप्यः। स्फुटवाग् व्यसनी रिपुघ्ना साहसिकः शतभिषजि दुर्भोजः। भाद्रपदास्वहिंस्रः स्त्रीजितधनी पटुरदाता च। वक्ता सुखी प्रजावान् जितशत्रुर्धार्मिको हितीयासु। सम्मूर्खाङ्गः सुभगः शूरः शुचिरर्यम्णि पौष्णे २७।

जन्मराशिफलम् तत्रैव १७ अ०।

"दृक्तातास्वडगुणाकलघुभुक् स्त्रियप्रसादोऽटनः कामी दुर्बलजानुरस्थिरधनः शूरोऽङ्गनावल्लभः। सेवाज्ञः कुनखी व्रणाङ्कितशिरोमानी सकोत्थायजः शक्त्या पाणितले ऽङ्कितोऽतिचपलस्तोये च भीरुः क्रिये १। कान्तः खेलगतिः पृथूरुवदनः पृष्ठास्यपार्श्वेऽङ्कितस्त्यागी क्लेशसहः प्रभुः ककुदवान् कन्याप्रजः शेक्षुजः। पूर्वैर्बन्धुधनात्मजैर्विरहितः सौभाग्ययुक्तः क्षमी दीप्राग्निः प्रमदाप्रियः स्थिरसङ्गध्यान्यसौख्ये गवि २। स्त्रीकोलः सुरतोपचारकुशलस्ताम्रेक्षणः शास्त्रविद्दूतः कुञ्चितमूर्द्धजः पटुमतिर्हास्ये ङ्कितद्यूतवित्। चार्वङ्गः प्रियवाक् प्रभक्षणरुचिर्गीतिप्रियो मल्लवित् क्लीवैर्याति रतिं सखद्वतनसन्धे तृतीयर्क्षगे ३। आयक्रतुनमः सलक्षतकटिः स्त्रीनिर्जितः सत्सङ्गद्वैद्यज्ञः प्रचुरान्नयः क्षयधनैः संयुज्यते चन्द्रवत्। हस्वः पीनगलः समेति च यशं साम्ना सुहृद्वत् सखस्तोत्रोद्यानरतः खवेश्मसहिते जातः शशाङ्के नरः। नीक्ष्णः स्थूलहनुर्विशालवदनः पिङ्गेक्षणोऽल्पात्मजः स्त्रीद्वेषी प्रियमांसकाननरतः कृच्छ्रत्मकार्ये चिरम्। क्षुत्तृष्णोदरदन्तमानसरुजासंपीडितस्त्यागवान् विक्रान्तः स्थिरधीः सुगर्वितमना मातुर्विधेयोऽर्कभे ४। व्रीड़ामन्थरचारुवीक्षणगतिः स्वस्यांसबाहुः सुखी क्षुद्रः सत्यरतः कलासु निपुणः शास्त्रार्थविद्वार्मिकः। मेधावी सुरतप्रियः परगृहैर्मित्रैश्च संयुज्यते कन्यायां ६ परदेशगः प्रियवचाः कन्याप्रजोऽल्पात्मजः। देवब्राह्मणसाधुपूजनरतः प्राज्ञः शुचिः स्त्रीजितः प्रांशुचोन्नतनासिकः क्षणचलद्भालोऽटनोऽर्थान्वितः। क्षीणाङ्गः क्रयविक्रयेषु कुशलो देवद्वि-

नामा सरङ्गवन्धुनासुषकारलहिरुधितक्लक्लस्तुतेः षष्ठमे७। पृथुखलनवनखाहतजङ्घोरुजानुर्जनकगुरुवियुक्तः शैशवे आधितश्च। नरपतिकुलपूज्यः पिङ्गलः क्रूरचेष्टो ऋक्षकुलिशखगाङ्गच्छन्नपापोऽनिलजातः ८। आदीर्घाक्षशिरोधरः पिङ्गधनतनुरामो कविर्पैर्धवान् वक्ता स्थूलरदश्चयोऽधरनखः कर्मोद्यतः शिल्पवित्। कुजांसः कुनखो समांसश्च भुजः प्रागल्भ्यवान् धर्मविद्बन्धुहिट् न बलात् समेति च वर्षं सार्द्धैकसाध्योऽन्यजः९। नित्यं लालयति स्वदारतनयान् धर्मध्वजोऽधःक्रमः स्वल्पः श्यामकटिर्गृहीतवचनः सौभाग्ययुक्तोऽनघः। शीतानुर्मृदुजोऽटनश्च मकरे १० सत्यधिकः काव्यज्ञ्यो गन्धजराङ्गनासु निरतः संयक्त लज्जोऽस्थश्च। करभगलसिरालुः खरलोमयदीर्घतनुः पृथुचरणोरुपृष्ठजघनास्यकटीजठरः। परवनितार्थपापनिरतः क्षयहृद्रुतः प्रियकृत्मानुलेपनसुहृत् घटजो११ऽध्व सहः। परजनधनभोक्ता दारवासोऽनुरक्तः समरुचिर शरीरस्तुङ्गनासो दक्षल्कः। अभिभवति सपत्नान् स्त्रीजितश्चारुदृष्टिर्द्युतिनिधिधनभोगी पण्डितश्चान्यराशौ१२। बलवति राशौ तदधिपतौ च स्वबलयुतः स्वाद्यदि तु क्षिनांशुः। कथितफलानधिकदाता शशिवदतोन्ये त्वनुपरिचिन्त्याः"।

सूर्यादिग्रहाणां तत्तदधिकफलमुक्तं तत्रैव १८अ० उक्तं यथा "प्रथितचतुरोऽटनोऽल्पवित्तः क्रियगे त्वायुधभृद्धितुङ्भागे। गविश वस्त्रसुगन्धपण्यजीवी वनिताहिट् कृपणश्च मेषवाद्ये। विद्याज्योतिषवित्तवान् मिथुनगेश भानौ कुशीरेश स्थिते तीक्ष्णोऽलः परकार्यलक्ष्यपरः क्रूरैश्च संयुज्यते। सिंहस्थेऽ वनगोलगोकुलरतिर्दीर्घान्वितोऽल्पः पुमान्, कन्यास्थे हि लिपिलेख्यकाव्यग चतत्तानान्वितः स्त्री वशुः। जातस्तोक्षिनि ७गौ खलकोऽध्वनिरतो क्रैरणको नीचक्रतू क्रूरः साङ्गिको विपार्जितधनः पश्चान्नगोऽङ्गिदस्थिते। सतृपूज्यो धनवान् धनुर्द्वरगतेऽतीक्ष्णो भिषक्कारको नीचोऽल्पः कुबणिग्मृगे१०ऽल्पधनवाङ्गुह्योऽन्यभाग्ये रतः। नीचो घटे११ तनयभाग्यपरिच्युतोऽखलोयोल्पपण्यविभवो वनिताहतोन्ये१२। सू०। नक्षत्रमानवतनुप्रतिमे विभागे नक्षत्रादिभेक्षुक्षिनरश्मिदिनेशयुक्ते। नरपति सतृक्षतोऽटनश्चमूपवणिक्सधनाः क्षततदुखोरभूरिविषयांश कृजः खलश्चे १८। युवतिजितानु सुहृत्सु विषमान् परदाररतान् कुहकसुवेषभीरुपरुषान् सितभे२७ जनयेत्। बौधेश६ऽसहस्रनयवान् विसुहृत् क्षतज्ञो गान्धर्वयुक्तकुशलः क्षपण्यो-ऽभयोऽर्थी। चान्द्रे४ऽर्थवान् सलिलयानसमर्जितः स्वः प्राज्ञश्च भूमितनये विकलः खलश्च। निशाक्षेशखड्गो वनान्तरचरः सिंहेऽल्पदारात्मजो जैवे६।१२ऽनेकरिपुर्नरेन्द्रसचिवः ख्यातोऽभयोल्पात्मजः। दुःखार्तो विधनोऽटनोऽस्थतरतस्तीक्ष्णश्च कुम्भे ११ स्थिते भौमे भूरिधनात्मजो खग १० गते भूपोऽथवा तत्समः। म०। द्यूतपण्यानरतनाविकशौरिनिःस्वाः कुलीकक्रूटकूटसक्तरताः कुजर्क्षे १।८। आचार्यभूरिसुतदारधनार्जनेष्टाः शौक्रे २।७वदान्यगुरुभक्तिरताश्च सौम्ये। विकत्थनः शास्त्रकलाविदग्धः प्रियंवदः सौख्यरतस्तृतीये३ जलाजितस्वः खलनस्य शत्रुः शशाङ्कजे शीतकरर्क्षयुक्ते। स्त्रीडेड्यो विधनसुखात्मजोऽटनोऽल्पः स्त्रीलोलः सुपरिभवोऽर्कसुराशिगे चे। त्यागी शूः प्रचुरसुखः सुखी क्षमावान् युक्तिज्ञो विगतभयश्च षष्ठराशौ ६। परकर्मकृदस्वः शिल्पबुद्धिर्ऋणवान् विटिकरो बुधेऽर्कजर्क्षे १०।११।स्वपसत्कृतपण्डितताप्रवाक्यो नवमे९।१२ऽन्त्ये जितसेवकोऽन्य शिल्पः" बु०। सेनानीर्बहुवित्तदारतनयो दाता सुभृत्यः क्षमी तेजोदारगुणान्वितः सुरगुरौ ख्यातः पुमान् कौजभे१।८।कल्याङ्गः सतृखोऽर्थमित्रतनयस्त्याभो प्रियः शौक्रभे २।७।बौधे ३।६भूरिपरिच्छदात्मजसुहृत्साचिव्ययुक्तः सुखी। चान्द्रे ४ रत्नतनखदारविभवः प्रज्ञासुखैरन्वितः सिंहे स्वादु वलनायकः सुरगुरौ शोक्तश्च यत्तन्द्रभे। स्वर्क्षे ९।१२ माखलिको नरेन्द्रसचिवः सेनापतिर्वा धनी कुम्भे ११ कर्कटवत् फलानि मकरे १० नीचोऽल्पवित्तोऽसुखी।ह०। परयुवतिरतस्तदर्थवाद्दीर्घ्रतविभवः कुलपांसनः कुजर्क्षे ११८। सबलमतिधनो नरेन्द्रपूज्यः स्वजनविभुः प्रथितोऽभयः सिते स्वे २।७। स्वपलयकरोऽर्थवान् कलाविन्मिथुने ३ यदगतेऽतिनीचकर्मा। रविजर्क्षे१०।११ गतेऽमरारिपूज्ये सुभगः स्त्रीविजितो रतः कुनार्याम्। द्विभार्योऽर्थी भीरुः प्रबलमदशोकश्च शशिभे ४ हरौ योषाप्रार्थः प्रवरयुवतिर्मन्दतनयः। गुरुः पूज्यः सबलसुरगेऽसहिते दानवगुरौ ऋक्षे १२ विद्वानाढ्यो नृपजनितपूजोऽतिसुभगः। शु०। मूर्खोऽटनः कपटवान् विसुहृद्यमेऽजे कीटे८ तु बन्धवधभाक् चपलोऽस्थश्च। निर्द्रीसुखार्थतनयः सबलितश्च लेखे रत्नापसिर्भवति-सख्यपतिश्च बौधे३ ६। वर्क्षे स्त्रीटोनवस्त्रविभवो भूरिभार्यो वृषस्थे२ख्यातः सोजे७ गणपुरवलग्रामपूज्योऽर्थवांश्च। ४कर्किणश्लो-

ऽविकलदृशनो मातृहीनोऽसुतोऽल्पः सिंहेऽनार्यो विसुखतनयो विदिक्सुतः सूर्यपुत्रे । खनाःपत्न्यन्वितो नरेन्द्रभवने सत्पुत्रजायाधनो जीवशेषेऽ।१२गतेऽर्केऽजे पुरबलधामाप्तनेताऽथ वा । अन्यस्त्रीधनसंयुतः पुरबलधामाप्तधीर्मन्दङ्कस्वचेलेः॰ ।।। मन्त्रिनस्थिरावविभवो भोक्ता च जातः पुमान् । अ॰ । शिशिरकरसमानभीक्षणानां सदृशफलं प्रवदन्ति जन्मजातम् । फलमधिकमिदं यदत्र तत्तद्भवनभनाथगुणैर्विचिन्तनीयम्" ।

जन्मतदंशयोर्यं फलदृष्टिफलम् १६अ॰ तत्रैवोक्तं यथा "चन्द्रे भूपबुधौ नृपोपमगुणौ स्वेनोऽधनश्चाऽजगे निःस्वः स्वेन समान्वभूपधनिनः प्रेष्यः कुजाद्यैर्गवि२ । नस्थे२ ऽर्योव्यवहारिपार्थिवबुधाभोक्तुत्रयो धनी सूर्ये४ योद्भवविक्षभूमिपतयोऽर्योजीविदूहोगिणौ । ज्योतिर्ज्ञस्वनरेन्द्रनापितनृपक्षेत्रा बुधाद्यैर्नरो१ तद्वद्भूपभूपैगुणयुताः षष्ठे६ शुभैस्त्र्याश्रयः। जूके७ भूपसुवर्णकारवणिजः मेषेऽथिते नैऋतो,कोटेऽ युग्मपिता नतश्च रजको व्यङ्गोऽधनो भूपतिः । क्षात्र्यु वैंशजनाश्रयश्च तुरगेऽ पापैः सदम्भः शठश्चाप्यु वैंशनरेन्द्रपण्डितधनी द्रव्योनभूपो स्वगे१० । भूपो भूपसमोऽन्यदारनिरतः मेषेऽथ कुम्भस्थिते११ क्षात्रज्ञो नृपतिर्बुधश्च क्षपगे१२ पापश्च पापेक्षिते । क्षेरेवर्क्षं दलाश्रितैः शुभकरोदृष्टः शशी तद्गतस्त्र्यंशे तत्पतिभिः सुहृद्धनगेर्दा वीक्षितः शस्यते । यत् प्रोक्तं प्रतिराशिवीक्षणफलं तद्दृष्टादृशांशे स्थितं सूर्याद्यैरवलोकितेऽपि शशिनि क्षेत्रं नवांशेऽगतः । चारज्ञिको बधरुचिः कुशलो विबुद्धे भूपोऽर्कवान् फलहृत् क्षितिजांशसंस्थे । मूर्खोऽन्यदारनिरतः सुकविः स्तितांशे सत्काव्यकृत् सुखपरोऽन्यकलत्रगश्च । बोधे हि रङ्कचरचौरकवीन्द्रमन्त्री मेषस्थ शिल्पनिपुणः शशिनि स्थितेऽंशे । स्वांशेऽल्पगात्रधनलुब्धतपस्विसख्यः स्त्रीपोष्टिकत्वनिरतश्च निरोक्षमाणे । सक्रोधो नरपतिसंमतो निधीशः सिंहांशे प्रभुरसुतोऽति हिंस्रकर्मा । जीवांशे ग्रथितवलो रथोपदेष्टा क्षात्रज्ञ सचिवविकामङ्गशीलः । अल्पापत्यो दुःखितः सत्यपिः स्वे मानासक्तः कर्मणि खेऽसुरक्तः । दुष्टस्त्रीदः कार्पण्यवार्किभागे चन्द्रे मानौ तद्दृष्टादृष्टे । वर्गोत्तमस्थपरगेषु शुभं यदुक्तं तत्पुष्टमध्यलघुताशुभसत्फलेषु । वीर्यान्वितोऽर्कपतिर्निरीक्षति पूर्वं राशीज्यस्य फलमंशफलं ददाति" ।

जन्मादिद्वादशभावस्थसूर्यादिग्रहफलम् तत्रैव २०अ॰ उक्तं यथा "शूरस्त्र्यो विकलनयनो निर्धनोऽर्के तनुस्थे मेषे सस्त्रस्त्रिभिरनयनः सिंहदृसंस्थे निशान्धः । नीचेऽन्धोऽस्तः शशिदृष्टेऽगते बुद्बुदाक्षः पतङ्गे भूरिद्रव्यो नृपकृतधनोवल्गुरोगी द्वितीये२ । मतिविक्रमवान् तृतीयश्गेऽर्के विसुखपीडितमानसश्चतुर्थे४ । अस्तगो धनवर्जितस्त्रिकोणे५ बलवाञ्छत्रुजितश्च शत्रुस्थाते । स्त्रीभिर्गतः परिभवं मदगे७ पतङ्गे स्वल्पात्मजोनिधनगेऽविकलेक्षणश्च । धर्मे९ सुखार्थसुखभाक् सुतशौर्यभाक् खे१० लाभे११ प्रभूतधनवान् पतितस्तु रिपुफे१२। क्षु०। मूकोन्मत्तजडान्धहीनबधिरप्रेष्याः शशाङ्कोदये१ स्वर्भोजोऽगते धनी बहुसुतः सस्वः कुटुम्बी धने२ । सिंहो भ्रातृ३गते सुखे सुतनये५ तत्प्रोक्तभावान्वितो नैकारिर्दुकायवङ्गिमदनस्त्रीच्छोऽलसचारिगे६ । दैवुर्स्त्रीद्रमदो मदे७ बहुमतिर्व्याध्यर्दितश्चाष्टमेऽ सौभाग्यात्मजमित्रबन्धुधनभाक् धर्मे९स्थिते शीतगौ । निष्पत्तिं सतुपैति धर्मधनधीशौर्यैर्युतः कर्मगे१० ख्यातो भवगुणान्विते भव११गते क्षुद्रो ऽङ्गहीनो व्यये१२। च॰ । "लग्ने१ कुजे क्षततनुर्धनगे २ कदन्नोधर्मे९ऽर्घवान् खरकरपतिमोऽन्यसंस्थः। म॰। विद्वान् धनी प्रखलपण्डितमन्त्रशस्त्रधर्मज्ञविश्रुतगुणः परतोऽर्कवज्ज्ञे। बु॰। विद्वान् सुवाक्यः क्षपगः सुखी च धीमानशत्रुः पितृतोऽधिकश्च । नीचस्वपत्नी सधनः सलाभः खलश्च जीवे क्रमशो विलग्नात् । इ॰क्षरनिपुणः सुखितश्च विलग्ने प्रियकलत्रोऽस्तगते सुरतेप्सुः । तनयगते सुखितो भृगुपुत्रे गुरुवदतोऽन्यस्त्रे द्रविणी स्यात् । शु॰ । अष्टार्थी रोगी मदनवशगोऽस्तलग्नसंस्थिनः शिशुत्वे पीडार्तः सवितृसुतलग्नेऽस्तलसवाक्। गुरु९।१२स्त॰।।।चौर्ये७स्थे नृपतिसदृशो यामपुरपः सुविद्यांशार्केन्दोदिनकरसमोऽन्यत्र कथितः। अ॰। शुक्रदरिपरकौयस्वचंशुक्रस्थितानां फलमनु परिचिन्त्यं जन्मदेशादिभावैः। सदुपचयविपत्ती सौम्यपापेषु सत्यः कथयति विपरीतं रिपुफधष्टाष्टमेषु । उच्चत्रिकोणसुहृत्स्वनीचस्त्रष्टृक्षगैः शुभं संपूर्णपादोनदलपादात्मनिःफलम् ।

आश्रयफलं तत्रैव २१अ॰ उक्तं यथा "कुलसमकुलसख्यबन्धुपूज्या धनिसुखिभोगिनृपाः स्वभैकदृष्टा । परविभवसुहृत्सखबन्धुपोष्या गणपवलेन नृपाश्च मित्रभेषु । जनयति नृपमेकोऽप्युडुगो मित्रदृष्टः प्रचुरधनसमेतं मित्रयोगाच्च सिद्धम् । विधनविसुखमूढव्याधितो बन्धतप्तो वधबुरितसमेतः शत्रुनीचर्क्षगेषु । न

कृन्मज्जनं शुभमाह सतो न भाममेदाद् यवना वदन्ति । कक्षांशभेदो न तथास्ति राशेरतिप्रसङ्गस्थिति विष्णुगुप्तः । यातेष्वसत्खसमभेषु दिनेशकोरां ख्यातो मकोद्यम-बलार्थयुतोऽतितेजाः। चान्द्रौ शुभेषु युजि मार्दवकान्ति-सौख्यसौभाग्यधीमधुरवाक्ययुतः प्रजातः । तास्वेव क्रो-रास्खपरर्क्षगेषु ज्ञेया नराः पूर्वगुणेषु मध्याः । व्यत्यस्तक्रोरा भवनस्थितेषु मर्त्या भवन्त्युक्तगुणैर्विहीनाः । कक्षाष-रूपगुणमात्रसङ्गदृष्टकाषे चन्द्रोऽन्यगस्तदधिनाथगुणं क-रोति । व्यालोद्यतायुधचतुष्करषाख्यजेषु तीक्ष्णोऽतति-क्रिंस्तगुरुत्तरपरतोऽटनश्च । स्त्रैणो भोक्ता पण्डिताढ्यो नरेन्द्रः क्लीवः शूरो विट्टिङ्गासङ्गत्तिः । पापो क्रिंस्थोऽ-भीच वर्गोत्तमांशेष्वेषामीशाराशिवद्वादशांशैः। आद्यान्तिमो बलविभूषणसत्ययुक्तस्त्रोऽतिसाङ्गसयुतश्च कुजे स्वभागे । रोगी स्रुतस्त्रयुवतिर्विषमोऽन्यदारो दुःखी परिच्छदयुतो मलिनोऽर्कपुत्रे। स्वांशे गुरौ धनयशःसुखबुद्धियुक्तास्तेऽजिन पुत्रधनिरुद्यमभोगवन्तः । मेधाकलाकपटकाव्यविवाद-शिल्पप्रागल्भार्थसाङ्गसयुताः शशिजेऽतिमान्याः। स्वे त्रिं-शांशे बहुश्रुतसुखारोग्यभाग्यार्थरूपः, शुक्रे तीक्ष्णः सुख-स्थितवपुः सुप्रकीर्त्येन्द्रियश्च । शूरस्त्रयौ विषमबधकौ सङ्गु-खाद्यौ सुखितौ चार्किज्ञेटौ रविशशियुतेष्वारपूर्वांशकेषु प्रकीर्त्यकफलं तत्रैव २३अ० उक्तं यथा

"स्वर्क्षतुङ्गमूलत्रिकोणगाः कण्टकेषु यावन्त आश्रिताः । सर्व एव तेऽन्योन्यकारकाः कर्मगस्तु तेषां विशे-षतः । कर्कटोदयगते यथोडुपे स्रोऽङ्गगाः कुजयमार्कसू-रयः । कारका निगदिताः परस्परं लग्नगश्च सकलोऽम्बरा-म्बुगः । खलिकोणोऽङ्गगो हेतुरन्योन्यं यदि कर्मगः । सुहृत्सहृत्सुखस्थश्च कारकधापि स कृतः । शुभं वर्गो-त्तमे जन्म वेशिस्थाने च सद्गृहे । अम्बून्येषु च केन्द्रेषु कारकाख्यगृहेषु च । मध्ये वयसः सुखप्रदाः केन्द्रस्था गुरुजन्मलग्नपाः । पृष्ठोभयोदयर्क्षगास्त्वन्ते ऽन्त्याः प्रथमेषु पाकदाः । दिनकरकधिरौ प्रवेशकाले गुरुभृगुजौ भव-नस्थमध्यगतौ । रविसुतशशिनौ विनिर्गमस्थौ शशितनयः फलदस्तु सर्वकालम्" ।

स्त्रीजन्मनि विशेषस्तत्रैवोक्तः २४ अ० यथा

"यद्यत्फलं नरस्योक्तमन्यलग्नानान्तत्तद्देत् पतिषु वा सकलं विधेयम् । तास्वंशतः सर्वमरणं निधने वपुस्थे लग्नेन्दुगे शुभमताऽस्तमये पतिश्च । युग्मेषु लग्नशशिनोः प्रकृतिस्थिता स्त्री सच्छीलभूषणयुता शुभदृष्टयोश्च । ओज-स्थयोश्च पुरुषाकृतिशीलयुक्ता पापा च पापयुतवीक्षि-तयोर्युग्मोना । कन्यैव दृष्टा व्रजतीह दास्यं साध्वी समा वा कुचरित्रयुक्ता । भूम्यात्मजः।८र्क्षे क्रमशोऽंशकेषु वक्रार्किजीवेन्दुजभार्गवाख्याम् । दृष्टा पुनर्भूः सगुणा कलाद्या ख्याता गुणैश्चासुरपूजितर्क्षे । स्यात् कापटी क्लीवसमा सती च बौधेऽङ्गुणाख्या प्रविकीर्णकामा । स्वच्छन्दा पतिघातिनी बहुगुणा शिल्पिन्यसाध्वीन्दुभेऽ-नाचारा कुलटार्कभे स्त्रपवपुः पुत्रेहितागम्यगा । जैवे(६।१२)नैकगुणाल्परत्यतिगुणा विज्ञानयुक्ता सती । दासी भीचरतार्किभे(१०।११)पतिरता दृष्टप्रजा स्वांशकैः । शशिलग्नसमायुक्तैः फलं त्रिंशांशकैरिदम् । बलावल-विकल्पेन तयोरुक्तं विचिन्तयेत् । इक्संस्थावस्थित-स्थितौ परस्परांशे शौक्रे वा यदि घटराशिसम्भवोऽंशः । स्त्रीभिः स्त्री मदनविधानलं प्रदीप्तं संधत्ते नरातिस्थितास्थिताभिः । भूम्ये कापुरुषोऽबलेऽस्तभवने सौम्यग्रहावीक्षिते क्लीवोऽस्ते बुधमन्दयोश्चरस्थे नित्यं प्रवासान्वितः । उत्कृष्टा रविणा कुजेन विधवा बाल्येऽ-स्तराशिस्थिते कन्यैवाशुभवीक्षितेऽर्कतनये द्यूने जरां गच्छति । आन्ध्येर्विधवाऽस्तराशिसहितैर्मिश्रैः पुनर्भू-र्भवेत् क्रूरे हीनबलेऽस्तगे स्वपतिना सौम्ये स्थिते मोक्षिता । अन्योन्यांशगयोः सितावनिजयोरन्यप्रसक्ता-ङ्गना द्यूने वा यदि शीतरश्मिसहितौ भर्तुः सदाज्ञात्रया । सौरारर्क्षं लग्नगे सेन्दुशुक्रे माला सार्द्धं वन्धकी पाप-दृष्टे । कौजेऽस्तांशे सौरिणा व्याधियोनिस्थोऽथो वल्लभा सदृष्टकांशे । दृष्टो मूर्खः सूर्यजर्क्षेऽंशके वा स्त्रीलोलः स्यात् क्रोधनश्चापनेते । सौक्रे कान्तोऽतीव सौभाग्ययुक्तो विद्वान् भर्त्ता नैपुणश्चश्च बौधे । मदनवश-गतो बहुश्च चान्द्रे त्रिदशगुरौ गुणवान् जितेन्द्रियश्च । अतिदुष्टरतिकर्मकश्च सौम्ये भवति गृहेऽस्तमयस्थितेऽंशके वा । दैवज्ञान्विता सुखपरा शशिशुक्रलग्ने श्रेष्ठोः क-लासु निपुणा सुखिता गुणाढ्या । शुक्रक्षयोस्तु रुचिरा सुभगा कलाद्या त्रिदशगुरुकलत्रसौख्यगुणा शुभेषु । क्रूरेऽस्तमे विधवता निधनेश्वरेऽंशे यस्य स्थितो वयसि तस्य समे प्रदिष्टा । सप्तस्थगेषु मरणं स्वयमेव तस्याः कन्यासिगोऽरिषु चास्तसुतत्वमिन्दौ । सौरे मध्यबले बलेन रहितैः शीतांशुशुक्रेन्दुजैः शेषैर्योगसमन्वितैः पुरुषिणी यद्योजराश्युद्भवः । जीवाराक्षुजिदैन्दवेषु बलिषु प्राग्लग्नराशौ समे विख्याता भुवि नैकशास्त्र-

निपुणा स्त्री ब्रह्मादिष्वपि । पादेऽस्ते नवमगतयष्टस्थ तुल्या प्रव्रज्यां युवतिरूपैश्यसंगयेन । उद्वाहे वरणविधौ प्रदानकाले चिनायामपि सकलं विलेखयेतत्" । जातक-पद्धत्यादौ विस्तरो द्रष्टव्यः । ५सुन्दरे त्रि० चतुर्जातकम् ।

**जातकचक्रम्** ज्यो० उक्ते जातस्य शुभाशुभसूचके चक्रभेदे तच्च चक्रं ज्यो० त० उक्तं यथा

"युद्धजयार्थवे यस्मिन्नुचे स्थितोभानुस्तदादित्रीणि मस्तके । सुखे त्रीणि तथा हे भे स्कन्धयोर्भुजयोरभे । हे हस्तयोः पञ्च हृदि नाभावेकं तथा गुदे । तथा जानु-युगे हे हे पादयोर्जन्मर्क्षं न्यसेत् । चरणर्क्षेषु यो जातः सोऽल्पायुर्भवति प्रिये ! । जानुनोर्भग्नशाखो गुह्यो-स्थात् पारदारिकः । नाभौ स्वल्पधनो देवि ! हृदये स्यान्महाधनः । पार्श्वोर्जातो भवेद्वीरो भुजयोर्दुःख-भाजनम् । स्कन्धयोर्भोगभोगी च सुखे धर्मरतो धनी । मूर्द्धि राजा भवेद्देवि ! बालानां जन्मतोवदेत्" । स्वरो-दये । "सुखे शीर्षे शतं वर्षं भवतिः स्कन्धयोर्द्वयोः । पञ्च-शीतिर्हृदि प्रोक्ता हस्तयोः सप्ततिः क्रमात् । बाह्वोः षट्षष्टिवर्षाणि गुह्ये षट्षष्टिका क्रमात् । पञ्चाशत् जङ्घयोः पादे निर्द्वन्द्वाल्पजीवनः" ।

**जातकर्मन्** न० जाते कर्म । पुत्रजन्मनिमित्ते पितृकर्तृके पुत्रसंस्कारभेदे । तच्च आश्व० गृ० १।१५।१ दर्शितं यथा ।

"कुमारं जातं पुराऽन्यैराचक्ष्यात् सर्पिर्मधुनी हिरण्यनिकाषं हिरण्येन प्राशयेत् "प्र ते ददामि मधुनो घृतस्य वेदं सवित्रा प्रसृतं मघोनाम् । आयुष्मान् गुप्तो देवताभिः शतं जीव शरदो लोके अस्मि-न्निति" । रु० । "इदं जातकर्म । कुमारस्यैव कुमारी-निवृत्त्यर्थम् । ननु कुमार्यां अपि भवत्येव जातकर्म । कुतः। वक्ष्यति "आहतैव कुमार्याः" इति, उच्यते । प्रवा-सादागतस्य विहितं कर्माहता भवति न जातकर्म अनन्तरत्वात् । एवमेके अन्ये पुत्रनराहतैव कुमार्यां इत्येतदुभयार्थमिति वदन्ति । तेन कुमार्यां अपि जातकर्म भवति । मनुनाप्युक्तम् "अमन्त्रिका तु कार्येयं स्त्रीणामाहुदशेयतः" इति । तर्हि कुमारस्यैव इदं किमर्थम् ? अधिकारार्थम् । "अष्टमे वर्षे ब्राह्मणमुपनयेदित्युपनयनं कुमारस्यैव यथा स्यात् न कुमार्या इति । ननु ब्राह्मणमिति पुंलिङ्गनिर्देशा-देव न भविष्यति । न जातिनिर्देशे लिङ्गमविव-क्षितम् । यथा ब्राह्मणो न हन्तव्य इति ब्राह्मणेऽपि न हन्यते एवमत्रापि स्त्रियाः प्रसज्यते तन्निवृत्त्यर्थं कुमारस्यैवेति । जातस्यैवेत्यधिकारार्थम् । "गो-दानं षोडशे वर्षे" इति जन्मतः प्रभृतिषोडशोयथा स्यात् उपनयनप्रभृति मा भूदिति । पुरा पूर्वमित्यर्थः अन्य-स्यैवमनधिकृतात्मनात् प्राक् कर्म कर्त्तव्यमित्येव-मर्थम् । सर्पिर्मधुनी हिरण्येन निकाषयति । ते हिरण्य-संघृष्टे हिरण्येन प्राशयेत् मातुरुपस्थ आसीनं "प्र ते ददामीति" मन्त्रेण नारा० ह० ।

"कर्णयोरुपनिधाय मेधाजननं जपति । "मेधान्नो देवः सविता मेधां देवी सरस्वती । मेधान्ने अश्विनौ देवावाधत्तां पुष्करस्रजौ" । सू० "अस्य कर्णयोः हिरण्यं निधाय मेधाजननं जपति मेधान्न इति । उपस्पृश्य तस्य सुखसमीपे वाङ्मनोसुखं निधाय जपार्थं मेधा जननमित्यस्य मन्त्रस्याख्या सकलन्यासः । पर्यायेणोप-निधानमित्येके । अन्ये मन्त्राहुत्तिमिच्छन्ति" नारा० "गर्भैर्होमैर्जातकर्म्मचौडमौञ्जीनिबन्धनैः । बाङ्-नाभिवर्द्धनात् पुंसो जातकर्म विधीयते" मनुः । "नाभिवर्द्धनात् नाभिसम्बन्धात् नाड़ीच्छेदनात् । वैज-वापिः "जन्मनोऽनन्तरं कार्यं जातकर्म यथाविधि । दैवादतीतः कालश्चेत् व्रतीते सूतके भवेत्" । एवञ्च, "ऋदुश्रुवरश्चिप्रभेदेषादृदेऽपि वा । गुरौ शुक्रेऽस्त वा केन्द्रे जातकर्म्म च नाम च" इति ज्योतिःशास्त्रोक्तो दैवात् कालोत्कर्षे वेदितव्यम् । अनुतकर्मेऽपि नक्षत्रादि-नियमो न, नैमित्तिकस्य निमित्तान्तराभावित्वेन निरव-काशत्वात् ज्यो० त० ।

**जातमात्र** त्रि० जात एव । सद्योजाते । "जातमात्रं न यः शत्रुं रोगं च प्रशमं नयेत्" पञ्चत० ।

**जातरूप** न० जातं प्रशस्तं जात+प्राशस्त्ये रूपप् । १स्वर्णे २धूस्तूरवृक्षे पु० अमरः । ३उत्तमरूपे त्रि० । "न जातरूपच्छदजातरूपता" नैष० । "कमण्डलुसुपादाय जातरूपमयान् शुभान्" भा० स० ४७ अ० ।

**जातविद्या** स्त्री जाते निमित्ते होमादौ विद्या विद्यतेऽनया विद्या प्रायश्चित्तज्ञापिका वाक् । होमादि निमित्तानन्तरं प्रायश्चित्तबोधके वाक्यभेदे "ब्रह्मा त्वो वदति जातविद्याम्" ऋ० १०,७१।२ । "जाते जाते कर्त्तव्ये प्रायश्चित्तादौ विद्यां वेदयित्रीं वाचं वदति ब्रह्मा हि सर्वं वेदितुं योग्यो भवति ऋजु" भा० ।

**जातवेदस्** पु० जातं सद्योजातं विन्दति प्राप्नोति विद्-

लाभे असुन् । १वज्रो अमरः तस्य तथात्वञ्च ऋ० ३।१।२० उक्तं "जज्ञान् जज्ञान् निहितो जातवेदाः" "जज्ञान् जज्ञान् सर्वेषु मनुष्येषु निहितो जातवेदाः" भा० । जातमात्रस्य जाठरानलसम्बन्धित्वस्य तथात्वम् । २ज्ञातानां वेत्तरि च "आदाव जातवेदः" ऋ० १।४४।१। हे जातवेदः ज्ञातानां वेदितः" भा० निरुक्ते ७।१९। तस्य बहुधा व्युत्पत्तिर्दर्शिता यथा

"जातवेदाः कस्माज्जातानि वेद जानाति वैनं विदुर्जाते जाते विद्यत इति वा जातविनो वा जातधनो जातविद्यो वा जातप्रज्ञानो यत्तज्जातः पशूनविन्दतेति तज्जातवेदसो जातवेदस्त्वमिति ब्राह्मणम् । तस्मात् सर्वाण्यत्तून् पशवोऽस्मिन्नभिसर्पन्तीति च" ३ज्ञातप्रज्ञे ४जातधने ५ऋत्विजे च "उदु त्यं जातवेदसं देवं वहन्ति केतवः" ऋ० १।५०।१। "जातवेदसः ज्ञातानां प्राणिनां वेदितारं जातप्रज्ञं जातधनं वा" भा० "पञ्चमः पञ्चतपसां तपनो जातवेदसाम्" "विद्युते बाडवजातवेदसाम्" माघः। जातवेदस इदं स देवताऽस्य वा अण् । जातवेदस तत्सम्बन्धिनि त्रि० । "प्र नूनं जातवेदसमश्वम्" निरु०७।२० धृता ऋक् । तद्देवताके सामभेदे मन्त्रे तृचे च तत्रैव निरुक्ते "तदेकमेव जातवेदसं गायत्रं तृचं दशतयीषु विद्यते यत्तु किञ्चिदाग्नेयं तज्जातवेदसां स्थाने युज्यते" इत्युपक्रमे "उत्तरे ज्योतिषी जातवेदसी उच्येते" भा० ।

जातायन पुंस्त्री जातस्य गोत्रापत्यम् अश्वा० फञ् । जातस्य गोत्रापत्ये स्त्रियास्तु जातायाः अपत्यम् ढक् । जातेय जातायाः अपत्ये पुंस्त्री ।

जाति स्त्री जन–क्तिन् । १जननि, २अनुगतैकाकारबुद्धिजननसमर्थे, अवयवव्यङ्ग्ये सकृदुपदेशव्यङ्ग्ये च धर्मभेदे, व्याकरणोक्ते पौत्रादापत्याद्यके ४गोत्रे, ५वेदशाखाभेदे च । न्यायोक्ते साधर्म्यवैधर्म्याभ्यां व्याप्तिनिरपेक्षाभ्यां वादिवाक्येषु दूषणदानरूपे वाक्ये, ७षड्जादिषु सप्तसु स्वरेषु, ८अलङ्कारभेदे, ९चूतद्रुमे, शब्दार्थचि० । १०मालत्यां, ११मालत्याम्, (चामेली) पुष्पप्रधानवृक्षे च मेदि० १२काम्पिल्ले विश्वः ।

तत्र व्याकरणोक्ते जातिलक्षणं यथा

"आकृतिग्रहणा जातिर्लिङ्गानाञ्च न सर्वभाक् । सकृदाख्याननिर्ग्राह्या गोत्रञ्च चरणैः सह" भा० । अस्यार्थः । आक्रियते व्यज्यतेऽनयेति आकृतिः संस्थानम् । गृह्यते इति ग्रहणं ज्ञानम् । आकृत्या ग्रहणं यस्याः सा आकृतिग्रहणा । जातिराकृतिग्रहणा संस्थानव्यङ्ग्येत्यर्थः । तेन मनुष्यगोऽश्वहंसादीनां पृथक् पृथक्संस्थानैर्व्यज्यमानत्वात् मनुष्यत्वगोत्वाश्वत्वहंसत्वादिजातिः । एवं ब्राह्मणक्षत्रियवैश्यशूद्राणां पृथक् संस्थानाभावात् ब्राह्मणत्वादेर्जातित्वं न स्यादिति लक्षणान्तरमाह लिङ्गानाञ्च न सर्वभागिति । या सर्वाणि लिङ्गानि न भजते सा च जातिरित्यर्थः । स्त्रीपुंसयोरपत्यन्ताद्विचतुःषट्पदोरगाः । जातिभेदाः पुमानाख्या"इत्यमरसंक्षेपेण जातिभेदानां स्त्रीपुंसयोरेवेति नियमेन ब्राह्मणादीनां सर्वलिङ्गभागित्वाभावाज्जातित्वम् । किन्तु अज्ञातहंसस्य जनस्य हंसं दृष्ट्वतोऽपि तस्य संस्थानेन हंसत्वं व्यञ्जितुं न शक्यते इति हंसत्वस्यापि जातित्वं न स्यादिति पूर्वलक्षणस्य दोषः । एवं देवदत्तादिसंज्ञाशब्दस्यापि सर्वलिङ्गभागित्वाभावाज्जातित्वापत्तिरिति द्वितीयलक्षणस्य दोषः इति दोषद्वयमपाकर्तुं द्वयोर्लक्षणयोर्विशेषमाह सकृदाख्यात निर्ग्राह्येति । सकृदेकवारमाख्यातेन उपदेशेन निश्चयेन याह्या ग्रहीतुं शक्या इत्यर्थः । तेन देवदत्तो हंसरूपदेशे हंसं दृष्ट्वतस्तस्य संस्थानेन हंसत्वं व्यञ्जितुं शक्यत एवेति पूर्वलक्षणस्य न दोषः । एवं देवदत्तादिसंज्ञाशब्दस्यैकस्मिन्नुपदेशेऽपि अन्यस्मिन् ज्ञानाभावात् जातित्वं न स्यादिति परलक्षणस्यापि न दोषः । गार्ग्यः पुरुषः गार्गी स्त्री गार्ग्यं कुलमिति सर्वलिङ्गभागित्वात् संस्थानव्यङ्ग्यत्वाभावाच्च गार्ग्यादीनां जातित्वानुपपत्तौ तृतीयलक्षणमाह । गोत्रञ्चेति । युवापौत्रप्रभृतिकमपत्यं गोत्रमिति पूर्वाचार्यपरिभाषितं गोत्रमिह गृह्यते गार्गी वात्सीत्यादि । चतुर्थलक्षणमाह चरणैः सहेति चरणञ्च जातिरित्यर्थः । चरणशब्दो वेदैकदेशवाची कठादिरूपः स च अध्ययनक्रियासम्बन्धेन प्रवृत्तत्वात् क्रियावाचक एव न तु जातिवाचकः । तेनास्य जातिसंज्ञार्थं चरणैः सहेत्युक्तम् । गार्ग्यादीनां यज्ञार्थेति ङीपि सिद्धेऽपि जातिसंज्ञाफलन्तु स्वरार्थम् तथा गार्गी भार्या यस्यासौ गार्गीभार्य इत्यादौ "जातेरिति" पुंवद्भावनिषेधः । गार्गी चासौ भार्या चेति गार्ग्यभार्या इत्यादौ "पुंवत् कर्मधारयेति" पुनः पुंवद्भावः" "प्राङ्भावविनाशाभ्यां सत्यस्य युगपद् गुणैः । असर्वलिङ्गां बह्वर्थां तां जातिं कवयो विदुः" इति महाभाष्ये लक्षणान्तरमुक्तम् ।

दैडशान्यतमार्थकशब्दानां जातिशब्दत्वेन व्याकरणे व्यवच्छियते उदा० दण्डते चोपरिष्टात् ।

अनुगतधर्मरूपजातेर्बहुरूपत्वम् । हरिणोक्तं यथा "सम्बन्धभेदात् सत्तैव भिद्यमाना गवादिषु । जातिरित्युच्यते तस्यां सर्वे शब्दा व्यवस्थिताः । तां प्रादिपदिकार्थेषु धात्वर्थेषु प्रचक्षते । सा नित्या सा महासामान्या तामाङुस्तत्त्वदर्शिनः" इति । प्रतिपादिता च तेनैव अनेकव्यक्तीनामनित्यतया जातेरैकरूप्यात् स्फोटात्मशब्दवाच्यता यथा "अनेकव्यक्त्यभिव्यङ्ग्या जातिः स्फोट इति स्मृता । कैश्चिद्व्यक्तय एवास्या ध्वनित्वेन प्रकल्पिताः" इति । अत्र च जातिस्फोटयोः सामानाधिकरण्यनिर्देशात् वाच्यवाचकयोरभेद इति बोध्यम् । वैशेषिकमतसिद्धेषु षट्सु भावेषु मध्ये अनुगतबुद्धिनियामकधर्मभेदरूपभावपदार्थसामान्यलक्षणभेदादिकं कणा० सू० वृत्तौ दर्शितं यथा

"सामान्यं विशेष इति बुद्ध्यपेक्षम्" । सू०

"पदार्थलयोर्देशलक्षणान्तरमिदानीमुद्दिष्टस्य सामान्यपदार्थस्य लक्षणमाह सामान्यं द्विविधं परमपरञ्च परं सत्ता अपरं सत्ताव्याप्यं द्रव्यत्वादि तत्र सामान्यस्य तद्विशेषस्य च लक्षणं बुद्धिरेव । अनुवृत्तबुद्धिः सामान्यस्य, व्यावृत्तबुद्धिर्विशेषस्य इतिना इयमवच्छिद्य परामृश्यते तेन बुद्ध्यपेक्षमिति नपुंसकनिर्देशः । वृत्तिकारस्तु विशेषान्वयमाह परन्तु "नपुंसकमनपुंसकेनैकवच्चास्यतरस्याम्" पा० इत्यनेनैकवद्भावो नपुंसकता चेत्याह । बुद्धिरपेक्षा निमित्तं लक्षणं वा यस्य तद्बुद्ध्यपेक्षं तत्र नित्यमनेकव्यक्तिवृत्ति सामान्यं नित्यत्वे सति स्वाश्रयान्योन्याभावसमानाधिकरणं वा परमपि सामान्यमपरमपि तथा । परन्तु सामान्यं विशेषसंज्ञामपि लभते तथा द्रव्यमिदं द्रव्यमिदमित्यनुवृत्तप्रत्यये सत्येव नायं गुणो नेदं कर्मेति विशेषप्रत्ययः । तथा च द्रव्यत्वादीनां सामान्यानामेव विशेषत्वम् । ननु विधिरूपं सामान्यं नास्त्येव अनुगतमतेरतद्व्यावृत्त्यवोपपत्तेः भवति हि गौरयमिति-प्रतीतेरगोव्यावृत्तोऽयमिति विषयः जातिवादिनाऽपि गोत्वादिविशिष्टप्रत्ययस्य तद्विषयत्वाभ्युपगमात् नहि वैशिष्ट्यमतद्व्यावृत्तेरन्यत्, गवादिपदप्रवृत्तिनिमित्तमप्यगोव्यावृत्त्यादिरेव । किञ्च गोत्वं कुत्र वर्त्तते न तावद्गवि गोत्वदृक्तेः पूर्वं तस्याभावात् नाश्वगवि, विरोधात् यत्र गोपिण्ड उत्पद्यते तत्र कुतश्चागत्य गोत्वं वर्त्तते न तावत्तत्रैवासीत् देशस्यापि तस्य गोत्वापत्तेः नापि गोत्वमपि तदानीमेवोत्पन्नं नित्यत्वाभ्युपगमात् नाप्यन्यत आगतं निष्क्रियत्वाभ्युपगमात् नच एकस्यैव नित्यस्य नानाव्यक्तिवृत्तित्वं कार्त्स्न्यैकदेशविकल्पानुपपत्तेः । नहि कृत्स्नमेकत्रैव वर्त्तते अन्यत्र तद्विशिष्टप्रत्ययानुदयप्रसङ्गात् । नाप्येकदेशेन जातेरेकदेशस्याभावात् । तदुक्तं "न याति नच तत्रासीन्नोत्पन्नं नचांशवत् । अहार्ति पूर्वं नाधारमहोव्यसनसन्ततिः" इति । सामान्यमपि तच्च संस्थानमात्रव्यङ्ग्यं गोत्वघटत्वादिवत् न तु गुणकर्मगतमपीति सगोत्रकलहः । अत्रोच्यते सामान्यं नित्यं व्यापकञ्च व्यापकत्वमपि स्वरूपतः सर्वदेशसम्बन्धित्वं न देशानां गोव्यवहारापत्तिः समवायेन तद्व्यवहारस्याभ्युपगमात् काले रूपादिमत्त्वेऽपि कालो रूपवानित्यप्रतीतिव्यवहारवत् नच कालो नास्त्येव पञ्चस्कन्धसंज्ञाभेदमात्रमित्यभ्युपगमादिति वाच्यं कालस्य साधयिष्यमाणत्वात् । तथाच यत्र पिण्ड उत्पद्यते तत्रैवेमं गोत्वं तेन सम्बध्यते जातः सम्बन्धचेत्येकः काल इत्यभ्युपगमात् । एतेन कौण्डिन्याश्वे वर्त्तते इत्यत्र यत्र प्रतीयते इत्युत्तरम्, कुत्र प्रतीयते इत्यत्र यत्र वर्त्तते इत्युत्तरम् । गोत्वदृक्तेः पूर्वं स पिण्डः कौण्डिन्याश्वीदित्यत्र नासीदित्येवोत्तरम् । एवञ्च "न याति नच तत्रासीत् इत्यादिकं परिदेवनमात्रम्, अतद्व्यावृत्तिरेव गोत्वमित्यस्य गौरयमिति विधिमुखः प्रत्यय एव बाधकः । नन्वनुभवोऽपि व्याख्यायते तदुक्तं "विधिजः प्रत्ययोऽन्योऽयं व्यतिरेकासमर्थकः" इति न हि गौरयमिति प्रत्ययेऽगोव्यावृत्तिरपि भासते । कात्स्न्यैकदेशविकल्पश्चादाभवेत् यदेकस्य सामान्यस्य कात्स्न्यं भवेदेकदेशो वा अकृत्स्नता ह्यनेकाश्रयता । सा चैकस्मिन्नोपपद्यते गौरयमित्यनुभव एवासद्विषयो न वस्तुव्यवस्थापनक्षम इत्यत्रोत्तरं वक्ष्यते । प्राभाकरास्तु संस्थानमात्रव्यङ्ग्यं सामान्यमाचक्षते तद्यंशानुगतप्रतीतिसाक्षिकं तदा किमपराद्धं गुणकर्मगतैः सामान्यैः, भवति हि रूपरसादानुगतधीः सा च जातिव्यवस्थापिकैव बाधकाभात् रूपत्वादिजातिषु न तत्तद्व्यक्तिभेदो बाधकः आकाशत्वादिवत्, रूपरसादिव्यक्तीनामनेकत्वात् नापि बुद्धित्वज्ञानत्वादिवत् षट्त्वकलसत्वादिवद्वा तुल्यत्वं बाधकं तद्व्यूनानतिरिक्तव्यक्तिकत्वं गुणत्वापेक्षया न्यूनव्यक्तिकत्वात् नीलत्वाद्यपेक्षया चाधिकव्यक्तिकत्वात् स्वतएव न सङ्करः भूतत्वमूर्त्त-

त्ववत्,परस्परान्यत्राभावसामानाधिकरण्ये सति जात्यन्तरेण सामानाधिकरण्याभावात् नाप्यनवस्था रूपत्वादिगतसामान्यान्तरानभ्युपगमात् नापि रूपहानिविशेषत्ववत् यदि विशेषाः द्रव्याश्रितत्वे सति जातिमन्तः स्युः गुणाः कर्माणि वा स्युः विभुवृत्तित्वे सति यदि जातिमन्तः स्युर्गुणाः स्युरिति यथा विशेषपदार्थस्वरूपहानिस्तथा प्रकृतेऽभावात् नापि समवायत्ववदसम्बन्धः समवाये समवायाभ्युपगमेऽनवस्थाभयात्तथास्तु, प्रकृते तु समवायस्यैव सम्बन्धस्याभ्युपगमात्। यद्यपि समवायत्वजातिबाधकोक्तभेदेव तथापि वक्ष्यते उत्पादविनाशशीलाः बहवः समवायास्तन्त्रते द्रष्टव्यम्। अभावत्वादिजात्यभ्युपगमे वा बाधकमेतत्, (अभेदस्तुल्यत्वं सङ्करोऽनवस्थितिः। रूपहानिरसम्बन्धो जातिबाधकसंग्रहः)। विवादपदमनुगतबुद्धिः अनुगतनिमित्तसाध्या व्यवहितानुगतमतित्वात् दामकुसुमबुद्धिवत् इति जातौ मानमिति दिक्कारास्तन्त्रित्यम्"। उप० वृत्तिः।

"भावोऽनुवृत्तेरेव हेतुत्वात् सामान्यमेव"। सू०

"सामान्यं विशेष इति द्वैविध्यं तदुपपादयन्नाह। भावः सत्ता अनुवृत्तेरेव हेतुः न तु व्यावृत्तेरपि हेतुः तथा च विशेषसंज्ञां लभते"। उप० वृत्तिः

"द्रव्यत्वं गुणत्वं कर्मत्वञ्च सामान्यानि विशेषाश्च"। सू०

"केषां सामान्यानां विशेषसंज्ञेत्यपेक्षायामाह। चकारः पृथिवीत्वादीनि द्रव्यगतजातीः रूपत्वादीनि गुणगतजातीः उत्क्षेपणत्वादीनि कर्मगतजातीः समुच्चिनोति। द्रव्यत्वमित्यादावसमासः परस्परं व्याप्यव्यापकभावाभावसूचनार्थम् सामान्यानि विशेषाश्चेत्यत्रासमासः सामान्यत्वे सत्येव विशेषत्वं यथा ज्ञायेत तदर्थम्, अन्यथा सामान्यविशेषा इति षष्ठीसमासभ्रमः स्यात् तथाच सामान्यत्वे सति विशेषत्वं न प्रतीयते। ननु द्रव्याकारानुगतमतिसाक्षिकं न द्रव्यत्वम्, पृथिव्यादौ कथञ्चित्, तच्चत्वेऽपि वायुाकाशादौ तदसत्त्वात् नच गुणत्वावच्छिन्नकार्यसमवायिकारणतावच्छेदकतया तल्लिङ्गैः नित्यानित्यवृत्तितया गुणत्वस्य कार्यानवच्छेदकत्वात् गुणत्वार्थमपि पर्याप्तयोगस्य तादवस्थ्यात्, एवं संयोगत्वावच्छिन्नकार्यसमवायिकारणतावच्छेदकतया द्रव्यत्वसिद्धेः सा हि न पृथिवीत्वाद्यवच्छेद्या न्यूनवृत्तित्वात् नापि सत्तावच्छेद्या अधिकवृत्तित्वात् अवश्यं द्रव्यावच्छेदेन भवितव्यम्, अन्यथाकाशिकतापत्तेः तत्र परमाणुषु द्व्यणुकासमवायिकारणत्वात् द्व्यणुकेषु त्र्यणुकासमवायिकारणत्वात् विभुचतुष्टयस्य सर्वमूर्तसंयोगितयैव सिद्धेः मनसि इन्द्रियमनःसंयोगाधारतया वायौ तृणादिनोदनाद्यन्यतया प्रत्यक्षद्रव्येषु प्रत्यक्षतयैव संयोगाभ्युपगमस्यावश्यकत्वात् अजस्तु संयोगो नास्त्येव येन संयोगत्वस्यापि कार्यानार्यवृत्तितया कार्यतावच्छेदकता न स्यात् एवं विभागसमवायिकारणतावच्छेदकतयाऽपि द्रव्यत्वसिद्धेः सुवचत्वात्। गुणत्वन्तु संयोगविभागसमवायिकारणत्वासमवायिकारणत्वशून्ये सामान्यवति यत्कारणत्वं तदवच्छेदकतयैव सिद्धमित्युक्तत्वात् कर्मत्वमपि प्रत्यक्षद्रव्येषु चलतीति-प्रत्यक्षसाक्षिकम्, अन्यत्र तु संयोगविभागानुमेयं संयोगविभागोभयासमवायिकारणतावच्छेदकतयाऽपि कर्मत्वसिद्धेरावश्यकत्वात्"। उप० वृत्तिः

१२ब्राह्मणादिवर्णे वर्णरूपजातिश्च द्विविधा शुद्धा सङ्कीर्णा च तत्र शुद्धाजातयः ब्राह्मणादयः। सङ्कीर्णजातयश्च मूर्धावसिक्तादयः नाना तदेतत् मनुना १०अ० उक्तं यथा

"ब्राह्मणः क्षत्रियेवैश्यस्त्रयो वर्णा द्विजातयः। चतुर्थ एकजातिस्तु शूद्रो नास्ति तु पञ्चमः। सर्ववर्णेषु तुल्यासु पत्नीष्वक्षतयोनिषु। आनुलोम्येन सम्भूता जात्या ज्ञेयास्त एव ते। स्त्रीष्वनन्तरजातासु द्विजैरुत्पादितान् सुतान्। सदृशानेव तानाहुर्मातृदोषविगर्हितान्। अनन्तरासु जातानां विधिरेष सनातनः। द्व्येकान्तरासु जातानां धर्म्यं विद्यादिमं विधिम्। ब्राह्मणाद्वैश्यकन्यायामम्बष्ठो नाम जायते। निषादः शूद्रकन्यायां यः पारशव उच्यते। क्षत्रियाच्छूद्रकन्यायां क्रूराचारविहारवान्। क्षत्रशूद्रवपुर्जन्तुरुग्रो नाम प्रजायते। विप्रस्य त्रिषु वर्णेषु नृपतेर्वर्णयोर्द्वयोः। वैश्यस्य वर्णे चैकस्मिन् प्रसूतेऽपसदाः सुताः। क्षत्रियाद्विप्रकन्यायां सुतो भवति जातितः। वैश्यान्नागधवैदेहौ राजविप्राङ्गनासुतौ। शूद्रादायोगवः क्षत्ता चाण्डालश्चाधमो नृणाम्। वैश्यराजन्यविप्रासु जायन्ते वर्णसङ्कराः। एकान्तरे त्वानुलोम्यादम्बष्ठोग्रौ यथा स्मृतौ। क्षत्तृवैदेहकौ तद्वत्प्रातिलोम्येऽपि जन्मनि। एता येऽनन्तरस्त्रीजाः क्रमेणोक्ता द्विजन्मनाम्। तानेवानन्तरान्नास्तु मातृदोषात् प्रचक्षते। ब्राह्मणाद्व्यकन्यायामावेगव्यान्तु धिग्वणः। अयोगवश्च क्षत्ता च चाण्डालश्चाधमो नृणाम्। प्रति-

लोम्येन जायन्ते शूद्रादपसदास्त्रयः । वैश्यान्मागधवैदेहौ क्षत्रियात्सूत एव तु । प्रतीपमेते जायन्ते परेऽप्यपसदास्त्रयः । जातो निषादाच्छूद्रायां जात्या भवति पुक्कसः । शूद्राज्जातो निषाद्यान्तु स वै कुक्कुटकः स्मृतः । चक्षुर्जातस्तथोषायां श्वपाक इति कीर्त्यते । वैदेहकेन त्वम्बष्ठात्सत्वो वेण उच्यते । द्विजातयः सवर्णासु जनयन्त्यव्रतांस्तु यान् । तान् सावित्रीपरिभ्रष्टान् व्रात्या इति विनिर्दिशेत् । व्रात्यात्तु जायते विप्रात् पापात्मा भूर्जकण्टकः । आवन्त्यवाटधानौ च पुष्पधः शैखएव च । झल्लो मल्लश्च राजन्याद्व्रात्यात्निच्छिविरेव च । नटश्च करणश्चैव खसो द्रविडएव च । वैश्यात्तु जायते व्रात्यात् सुधन्वाचार्य्यएव च । कारुषश्च विजन्मा च मैत्रः सात्वतएव च । व्यभिचारेण वर्णानामवेद्यावेदनेन च । स्वकर्मणाञ्च त्यागेन जायन्ते वर्णसङ्कराः । सङ्कीर्णयोनयो ये तु प्रतिलोमानुलोमजाः । अन्योन्यव्यतिषक्ताश्च तान् प्रवक्ष्याम्यशेषतः । सूतोवैदेहकश्चैव चण्डालश्च नराधमः । मागधः क्षत्तृजातिश्च तथाऽयोगवएव च । एते षट् सदृशान् वर्णान् जनयन्ति स्वयोनिषु । मातृजात्यां प्रसूयन्ते प्रवरासु च योनिषु । यथा त्रयाणां वर्णानां द्वयोरात्मास्य जायते । आनन्तर्य्यात् स्वयोन्यान्तु तथा बाह्योऽपि क्रमात् । ते चापि बाह्यान् सुबहूंस्ततोऽप्यधिकदूषितान् । परस्परस्य दारेषु जनयन्ति विगर्हितान् । यथैव शूद्रो ब्राह्मण्यां बाह्यं जन्तुं प्रसूयते । तथा बाह्यतरं बाह्यात्तुर्वर्ण्यं प्रसूयते । प्रतिलोमं वर्त्तमाना बाह्या बाह्यतरान् पुनः । क्षीणा क्षीणात् प्रसूयन्ते वर्णान् पञ्चदशैव तु । प्रसाधनोपचारज्ञदासं दासजीवनम् । सैरिन्ध्रं वागुरावृत्तिं सूते दस्युरयोगवे । मैत्रेयकन्तु वैदेहो माधुकं सम्प्रसूयते । नन् प्रशंसत्यजस्रं यो चण्डालाड्डोऽरणोदये । निषादो भार्गवं सूते दाशं नौकर्म्मजीविनम् । कैवर्त्तमिति यं प्राहुरार्य्यावर्त्तनिवासिनः । मृतवस्त्रभृद्भारीषु गर्हितान्नाशनासु च । भवन्त्ययोगवीष्वेते जातिहीनाः प्रसूतयः । कारावरो निषादात्तु चर्म्मकारः प्रसूयते । वैदेहकादन्ध्रमेदौ बहिर्ग्रामप्रतिश्रयौ । चण्डालात् पाण्डुसोपाकस्त्वक्सारव्यवहारवान् । आहिण्डिकोनिषादेन वैदेह्यामेव जायते । चण्डालेन तु सोपाको मूलव्यसनवृत्तिमान् । पुक्कस्यां जायते पापः सदा सज्जनगर्हितः । निषादस्त्री तु चण्डालात् पुत्रमन्त्यावसायिनम् । श्मशानगोचरं सूते वाह्यानामपि गर्हितम् । सङ्करे जातयस्त्वेताः पितृमातृप्रदर्शिताः । प्रच्छन्ना वा प्रकाशा वा वेदितव्याः स्वकर्मभिः । सजातिजानन्तरजाः षट् सुता द्विजधर्मिणः । व्रात्याच्छ्रेष्ठ सधर्म्माणः सर्वेऽपध्वंसजाः स्मृताः । तपोबीजप्रभावास्तु ते गच्छन्ति युगे युगे । उत्कर्षञ्चापकर्षञ्च मनुष्येष्विह जन्मनः । शनकैस्तु क्रियालोपादिमाः क्षत्रियजातयः । वृषलत्वं गता लोके ब्राह्मणादर्शनेन च । पौण्ड्रकाश्चौड्रद्रविड़ाः काम्बोजा यवनाः शकाः। पारदाः पह्लवाश्चीनाः किराता दरदाः खसाः । मुखबाहूरुपज्जानां या लोके जातयो बहिः । म्लेच्छवाचश्चार्य्यवाचः सर्वे ते दस्यवः स्मृताः । ये द्विजानामपसदा ये चापध्वंसजाः स्मृताः । ते निन्दितैर्वर्त्तयेयुर्हि जानामेव कर्मभिः । सूतानामश्वसारथ्यमम्बष्ठानां चिकित्सितम् । वैदेहकानां स्त्रीकार्य्यं मागधानां वणिक्पथः । मत्स्यघातो निषादानां त्वष्टित्वायोगवस्य च । मेदान्ध्रचुञ्चुमद्गूनामारण्यपशुहिंसनम् । चक्रिणां यष्टिसानान्तु बिलौकोबधबन्धनम् । धिग्वणानां चर्म्मकार्य्यं वेणानां भाण्डवादनम् । चैलधौतश्मशानेषु शैलेषूपवनेषु च । वसेयुरेते विज्ञाता वर्त्तयन्तः स्वकर्मभिः । चण्डालश्वपचानान्तु बहिर्ग्रामात् प्रतिश्रयः । अपपात्राश्च कर्त्तव्या धनमेषां श्वगर्दभम् । वासांसि मृतचेलानि भिन्नभाण्डेषु भोजनम् । काष्णायसमलङ्कारः परिव्रज्या च नित्यशः । न तैः समयमन्विच्छेत् पुरुषो धर्ममाचरन् । व्यवहारो मिथस्तेषां विवाहः सदृशैः सह । अन्नमेषां पराधीनं देयं स्याद्भिन्नभाजने । रात्रौ न विचरेयुस्ते ग्रामेषु नगरेषु च । दिवा चरेयुः कार्य्यैस्ते चिह्निता राजशासनैः । अबान्धवं शवञ्चैव निर्हरेयुरिति स्थितिः । वध्यांश्च हन्युः सततं यथाशास्त्रं नृपाज्ञया । वध्यवासांसि गृह्णीयुः शय्याश्चाभरणानि च । वर्णापेतमविज्ञातं नरं कलुषयोनिजम् । आर्य्यरूपमिवानार्य्यं कर्म्मभिः स्वैर्विभावयेत् । अनार्य्यता निष्ठुरता क्रूरता निष्क्रियात्मता । पुरुषं व्यञ्जयन्तीह लोके कलुषयोनिजम् । पित्र्यं वा भजते शीलं मातुर्वोभयमेव वा । न कथञ्चन दुर्योनिः प्रकृतिं स्वां नियच्छति । कुले मुख्येऽपि जातस्य यस्य स्यात्योनिसङ्करः । संश्रयत्येव तच्छीलं नरोऽल्पमपि वा बहु । यत्र त्वेते परिध्वंसा जायन्ते वर्णदूषकाः । राष्ट्रिकैः सह तद्राष्ट्रं क्षिप्रमेव विनश्यति । ब्राह्मणार्थे गवार्थे वा देहत्यागोऽनुपस्कृतः ।

स्त्रीवासाभ्युपपत्तौ च ब्राह्मणानां सिद्धिकारणम्। अहिंसा सत्यमस्तेयं शौचमिन्द्रियनिग्रहः। एतं सामासिकं धर्मं चातुर्वर्ण्येऽब्रवीन्मनुः। शूद्रायां ब्राह्मणाज्जातः श्रेयसा चेत् प्रजायते। अश्रेयान् श्रेयसीं जातिं गच्छत्यासप्तमाद्युगात्। शूद्रो ब्राह्मणतामेति ब्राह्मणश्चैति शूद्रताम्। क्षत्रियाज्जातमेवन्तु विद्याद्वैश्यात्तथैव च। अनार्यायां समुत्पन्नो ब्राह्मणात्तु यदृच्छया। ब्राह्मण्यामप्यनार्यात्तु श्रेयस्त्वं क्वेति चेद्भवेत्। जातो नार्यामनार्यायामार्यादार्योभवेद्गुणैः। जातोऽप्यनार्यादार्यायामनार्य इति निश्चयः। तादृग्भावयसंस्कार्यावितिधर्मोव्यवस्थितः। वैगुण्याज्जन्मनः पूर्वसत्तरः प्रतिलोमतः। सदृबीजक्षेत्रवैशेष्ये जातं सम्पद्यते यथा। तथार्याज्जात आर्यायां सर्वं संस्कारमर्हति। बीजमेके प्रशंसन्ति क्षेत्रमन्ये मनीषिणः। बीजक्षेत्रे तथैवान्ये तत्रेयन्तु व्यवस्थितिः। उप्तबीजमतिक्षुद्रमन्तरैव विनश्यति। अबीजकमपि क्षेत्रं केवलं स्थण्डिलं भवेत्। यस्माद्बीजप्रभावेण तिर्य्यग्जा ऋषयोऽभवन्। पूजिताश्च प्रशस्ताश्च तस्माद्बीजं प्रशस्यते। अनार्यमार्यकर्माणमार्यं चानार्यकर्मिणम्। सम्प्रधार्याब्रवीद्धाता न समौ नासमाविति।"

जातिभेदा इद्दृहारीतेनाप्युक्ता यथा

"ब्राह्मणाः क्षत्रिया वैश्याः शूद्रा वर्णा यथाक्रमम्। आद्यास्त्रयो द्विजाः प्रोक्तास्तेषां वै मन्त्रसत्क्रियाः। सवर्णेभ्यः सवर्णासु जायन्ते हि सजातयः। तेषां सङ्करयोगाच्च प्रतिलोमानुलोमजाः। विप्रान् मूर्धावसक्तस्तु क्षत्रियायामजायत। वैश्यायान्तु तथाम्बष्ठो निषादः शूद्रया तथा। राजन्याद्वैश्यशूद्रीसु माहिष्योयौ तु तौ स्मृतौ। शूद्रायां वैश्यात् तु करणस्त्विषैवतेऽनुलोमजाः। विप्रायां क्षत्रियात् सूतः वैश्याद् वैदेहकस्तथा। चण्डालस्तु तथा शूद्रात्पुक्कसस्तु गर्हितः। मागधः क्षत्रियायां वै वैश्यात्, क्षत्ता शूद्रतः। शूद्रादयोगवं वैश्या जनयामास वै सुतम्। रथकारः करणान्तु माहिष्येण प्रजायते। असज्जन्तवो ज्ञेयाः प्रतिलोमानुलोमजाः। प्रतिलोमासु वै जाता गर्हिताः सर्वकर्मसु"।

उशना साप्युक्ता यथा

"अतः परं प्रवक्ष्यामि जातिवृत्तिविधानकम्। अनुलोमविधानञ्च प्रतिलोमविधिं तथा। सान्तरालकसंयुक्तं सर्वं संक्षिप्य चोच्यते। ब्रह्मद् ब्राह्मणकन्यायां विवाहेषु समन्वयात्। जातः पुत्रोऽत्र निर्दिष्टः प्रतिलोमविधिर्द्विजः। वेदानर्हत्वया चैषां धर्माणामनुबोधकः। सूताद्विप्र पुत्रतायां सूतो वेणुक उच्यते। ब्रह्मायामेव तस्यैव जातो यदधर्मकारकः। ब्राह्मण्यां क्षत्रियाच्चौग्र्यकारः प्रजायते। हतस्तु शूद्रवत्तस्य द्विजत्वं प्रतिषिध्यते। यानानां ये च वाहारस्तेषाञ्च परिचारकाः। शूद्रवत्ता तु जीवन्ति न चात्र धर्ममाचरेत्। ब्राह्मण्यां वैश्यसंसर्गाज्जातोमागध उच्यते। वन्दित्वं ब्राह्मणानाञ्च क्षत्रियाणां विशेषतः। प्रशंसादृत्तिको जीवेद्वैश्यप्रेष्यकरस्तथा। ब्राह्मण्यां शूद्रसंसर्गाज्जातश्चाण्डाल उच्यते। क्षौरमाभरणं तस्य काण्डोयः समथापि वा। वर्धी कण्ठे समाबध्य भ्रूक्षरीं कक्षतोऽपि वा। सङ्कापकर्षणं ग्रामे पूर्वाह्णे परिगुह्यिकम्। नापराह्णे प्रविष्टोऽपि चरित्र्यामाच्च नक्षते। पिण्डीभूता भवन्त्यत्र नो चेद् बध्या विशेषतः। चाण्डालाद्वैश्यकन्यायां जातः श्वपच उच्यते। श्वमांसभक्षणं तेषां स्थान एव च तद्वलम्। ब्रह्मायां वैश्यसंसर्गादायोगव इति स्मृतः। तन्तुवाया भवन्त्येव वस्त्रकांस्योपजीविनः। शौल्किकाः केचिदत्रैव जीवन्ति वस्त्रनिर्मिते। आयोगवेन विप्रायां जातास्त्वाखोपजीविनः। तस्यैव ब्रह्मकन्यायां जातः क्षत्रिक उच्यते। क्षत्रिकस्य ब्रह्मायान्तु जाता उद्बन्धकाः स्मृताः। निर्घृणत्वेयुर्वस्त्राणि अस्पृश्याश्च भवन्त्यतः। ब्रह्मायां वैश्यव्रतश्चौग्र्यात् प्रसिद्धः परिकीर्तितः। पशुवृत्तिर्मवेत्तस्य हन्युस्तान् दृष्टसत्वकान्। ब्रह्मायां शूद्रसंसर्गाज्जातः पुक्कस उच्यते। सुराहृत्तिं समास्थाय मधुविक्रयकर्मणा। क्रतकानां सुराणाञ्च विक्रेता पाचको भवेत्। पुक्कसाद्वैश्यकन्यायां जातो रजक उच्यते। ब्रह्मायां शूद्रव्रतश्चौग्र्याज्जातोरञ्जक उच्यते। वैश्यायां रञ्जकाज्जातो नर्तको गायको भवेत्। वैश्यायां शूद्रसंसर्गाज्जातो वैदेहकः स्मृतः। अजानां पालनं कुक्कुटीमक्षियोगां गवामपि। दधिक्षीराज्यतक्राणां विक्रयाज्जीवनं भवेत्। वैदेहकात्तु विप्रायां जातास्त्वार्भोपजीविनः। ब्रह्मायामेव तस्यैव कुचिकः पाचकः स्मृतः। वैश्यायां शूद्रव्रतश्चौर्याज्जातश्चक्री स उच्यते। तैलपिष्टकजीवी तु लवणं भावयन् पुनः। विधिना ब्राह्मणः प्राप्य ब्रह्मायान्तु समन्वयम्। जातः सुवर्ण इत्युक्तः सानुलोमद्विजः स्मृतः। अथ वर्णक्रियां कुर्व-

द्विजनैमित्तिकीं क्रियाम्। अश्वं रथं हस्तिनं वा वाहयेद्वा नृपाज्ञया। सैनापत्यञ्च भैषज्यं कुर्याज्जीवेत्तु वृत्तिषु। नृपायां विप्रतश्चौर्य्यात् संजातो यो भिषक् स्मृतः। अभिषिक्तनृपस्यात्तां परिपाल्ये स वैद्यकम्। आयुर्वेदमथाष्टाङ्गं तन्त्रोक्तं धर्म्ममाचरेत्। ज्योतिषं गणितं वापि कायिकीं वृत्तिमाचरेत्। नृपायां विधिना विप्राज्जातो नृप इति स्मृतः। नृपायां नृपसंसर्गात् प्रमादाद् गूढजातकः। सोऽपि क्षत्रिय एव स्यादभिषेकं च वर्जितः। अभिषेकं विना प्राप्तो गोज इत्यभिधानकम्। सर्वन्तु राजवत्तस्य गद्यते पदवन्दनम्। पुनर्भूकरणे राज्ञां नृपकालीन एव च। वैश्यायां विधिना विप्राज्जातो ह्यम्बष्ठ उच्यते। क्रव्याजीवो भवेत्तस्य तथैवाग्नेय वृत्तिकः। ध्वजिनी जीविका वापि ह्यम्बष्ठाः शस्त्रजीविनः। वैश्यायां विप्रतश्चौर्य्यात् कुम्भकारः स उच्यते। कुलालवृत्त्या जीवेत्तु नापिता वा भवन्त्यतः। मृतके प्रेतके वापि दीक्षाकालेऽथ वापनम्। नाभेरूर्द्ध्वन्तु वपनं तस्मान्नापित उच्यते। कायस्थ इति जीवेत्तु विचरेच्च इतस्ततः। काकाक्षौल्यं यमात् क्रौर्य्यं स्थपतेरथ लक्षणम्। आद्याक्षराणि संगृह्य कायस्थ इति कीर्त्तितः। शूद्रायां विधिना विप्राज्जातः पारशवोमतः। भद्रकादीन् समाश्रित्य जीवेयुः पूजकाः स्मृताः। शिवागमविधाद्यैस्तत्तामसकलवृत्तिभिः। तस्यां वै चौरिका वृत्त्या निषादो जात उच्यते। वने दृष्ट्वा मृगान् हत्वा जीवनं मांसविक्रयम्। नृपाज्जातोऽथ वैश्यायां गृह्यायां विधिना स्मृतः। वैश्यवृत्त्या तु जीवेत्तु क्षात्रधर्मं न चाचरेत्। तस्यां तस्यैव चौरेण मणिकारः प्रजायते। मणीनां रचनां कुर्य्यान्नृसकानां वेधनक्रियाम्। प्रवालानाञ्च सूत्रित्वं शाखानां वलयक्रियाम्। शूद्रायां विप्रसंसर्गाज्जात उग्र इति स्मृतः। नृपस्य दण्डधारः स्याद्दण्डं दण्ड्येषु सञ्चरेत्। तस्यैव चौरसंवृत्त्या जातः शुण्डिक उच्यते। जातिदुष्टान् समारोप्य शुण्डाकर्म्मणि योजयेत्। शूद्रायां वैश्यसंसर्गाद्विधिना सूचकः स्मृतः। सूचकाद्विप्रकन्यायां जातस्तक्षक उच्यते। शिल्पकर्म्माणि चान्यानि प्रासादलक्षणं तथा। नृपायामेव तस्यैव जातो यो मत्स्यबन्धकः। शूद्रायां वैश्यतश्चौर्य्यात् कटकार इति स्मृतः। यज्ञियशापाच्चेतायां केचित् पारशवास्तथा। वैखानसेन केचित्तु केचिद्भागवतेन च। वेदशास्त्रावलम्बास्ते भविष्यन्ति कलौ युगे। कटकारास्ततः पश्चाद्वारायणगणाः स्मृताः। शाखा वैखानसेनोक्ता तन्त्रमार्गविधिक्रियाः। निषेकाद्याः श्मशानान्ताः क्रियाः पूजाङ्गसूचिकाः। पञ्चरात्रेण वा प्राप्तं पूर्वोक्तं धर्मं समाचरेत्। शूद्रादेव तु शूद्रायां जातः शूद्र इति स्मृतः। द्विजशुश्रूषणपरः पाकयज्ञपरान्वितः। सच्छूद्रं तं विजानीयादसच्छूद्रस्ततोऽन्यथा। चौर्य्यात् काकवचो ज्ञेयश्चाण्डानां तृणवाहकः। एतत् संक्षेपतः प्रोक्तं जातिवृत्तिविभागशः। आत्मन्तराणि दृश्यन्ते संकल्पादित एव तु।" पराशरोक्तादासादिजातवत्तच्छब्दे दृश्याः अन्या अपि जातयो ब्रह्मवै० ब्र०ख०१०अ०दर्शिता यथा

"बभूवुर्ब्राह्मणो वक्त्रादन्याब्राह्मणजातयः। ब्रह्मणो बाहुदेशाच्च जाताः क्षत्रियजातयः। ऊरुदेशाच्च वैश्याश्च पादतः शूद्रजातयः। तासां सङ्करजातेन बभूवुर्वर्णसङ्कराः। गोपनापितलोलाश्च तथा मोदकमूलकौ। ताम्बूलिपर्णकारौ च तथा वणिग्जातयः। इत्येवमाद्या विप्रेन्द्र! सच्छूद्राः परिकीर्त्तिताः। शूद्राविप्रोसु करणोऽम्बष्ठो वैश्याद्विजन्मनोः। विश्वकर्म्मा च शूद्रायां चौर्य्याधानं चकार सः। ततो बभूवुः पुत्राश्च नवै ते शिल्पकारिणः। मालाकारः कर्मकारः शङ्खकारः कुविन्दकः। कुम्भकारः कंसकारः षडेते शिल्पिनां वराः। सूत्रधारश्चित्रकरः स्वर्णकारस्तथैव च। पतितास्ते ब्रह्मशापादयाज्या वर्णसङ्कराः। स्वर्णकारः स्वर्णचौर्य्यात् ब्राह्मणानां द्विजोत्तम!। बभूव सद्यः पतितो ब्रह्मशापेन कर्मणा। सूत्रधारो द्विजातीनां शापेन पतितो भुवि। शीघ्रञ्च यज्ञकाष्ठञ्च न ददौ तेन हेतुना। व्यतिक्रमेण चित्राणां सद्यश्चित्रकरस्तथा। पतितो ब्रह्मशापेन ब्राह्मणानाञ्च कोपतः। कस्यचिद् वणिक्विशेषस्य संसर्गात् स्वर्णकारिणः। स्वर्णचौर्य्यादिदोषेण पतितो ब्रह्मशापतः। कुचट्यायाञ्च शूद्रायां चित्रकारस्य चौर्य्यतः। बभूवाट्टालिकाकारः पतितो जारदोषतः। अट्टालिकाकारचौर्य्यात् कुम्भकारस्य योषिति। बभूव कोटिकः सद्यः पतितो मद्यकारकः। कुम्भकारस्य चौर्य्येण सद्यः कोटिकयोषिति। बभूव तैलकारश्च कुटिलः पतितो भुवि। सद्यः क्षत्रियचौर्य्येण राजपुत्रस्य योषिति। बभूव तीवरश्चैव पतितो जारदोषतः। तीवरस्य तु चौर्य्येण तैलकारस्य योषिति। बभूव पतितो दस्युर्नटश्च परिकीर्त्तितः। नेटस्तीवरकन्यायां जनयामास षण्नरान्। झल्लं मल्लं माठरञ्च भट्टं कोलञ्च कन्दरम्। ब्राह्मण्यां शूद्रचौर्य्येण पतितो

जारदोषतः। सद्यो बभूव चाण्डालः सर्वस्मादधमोऽशुचिः। तीवरेणैव चाण्डाल्यां चर्मकारो बभूव ह। चर्मकार्यांञ्च चाण्डालात् मांसच्छेदी बभूव ह। मांसच्छेद्यां तीवरेण कौँचञ्च परिकीर्त्तितः। कौँचस्त्रियान्तु कैवर्त्तात् कारुकारः परिकीर्त्तितः। सद्यश्चाण्डालकन्यायां वेटवीर्य्येण शौनक!। बभूवतुस्तु द्वौ पुत्रौ कुड्डिकशौण्डिकौ तथा। क्रमेण कुड्डिकन्यायां सद्यश्चाण्डालतोऽपतः। बभूवुः पञ्च पुत्राश्च भ्रष्टा वनचराश्च ते। वेटात्तीवरकन्यायां गङ्गातोरे च शौनक!। बभूव सद्योयो वाल्यो गङ्गापुत्रः प्रकीर्त्तितः। गङ्गापुत्रस्य कन्यायां वीर्य्येण वेशधारिणः। बभूव वेशधारी च पुत्रो युद्धी प्रकीर्त्तितः। वैश्यात्तीवरकन्यायां सद्यः शुण्डी बभूव ह। शुण्डीयोषिति वैश्यात्तु पौण्ड्रकश्च प्रकीर्त्तितः। चत्रात् करणकन्यायां राजपुत्रो बभूव ह। राजपुत्रात्तु करणादागरीति प्रकीर्त्तितः। चत्रवीर्य्येण वैश्यायां कैवर्त्तः परिकीर्त्तितः। कलौ तीवरसंसर्गाद्धीवरश्च प्रकीर्त्तितः। तीवर्य्यां धीवरात् पुत्रो बभूव रजकः स्मृतः। रजक्यां तीवराज्जापि कोदालो च बभूव ह। नापिताद्गोपकन्यायां सर्वस्त्री तस्य योषिति। चत्राद्बभूव व्याधश्च बलवान् मृगहिंसकः। तीवरात् शुण्डिकन्यायां बभूवुः सप्तपुत्रकाः। ते कलौ कुड्डिसंसर्गाद्बभूवुर्दस्यवः सदा। ब्राह्मण्यान्महिषीर्य्येण ऋतोः प्रथमवासरे। कुत्सितयोदरे जातः कूदरत्वेन कीर्त्तितः। तदशौचं विप्रतुल्यं पतितोच्छूतदोषतः। सद्यः कोटिकसंसर्गादधमो जगतीतले। चत्रवीर्य्येण वैश्यायामृतोः प्रथमवासरे। जातः पुत्रो महादस्युर्बलवांश्च धनुर्धरः। चकार बागतीतञ्च क्षत्रियो वारितस्तया। तेन जाता स पुत्रश्च बागतीतः प्रकीर्त्तितः। चत्रवीर्य्येण शूद्रायामृतुदोषेण पापतः। बलवत्तो दुरन्ताश्च बभूवुर्म्लेच्छजातयः। कविङ्ककर्णाः क्रूरा निर्भया रणदुर्जयाः। शौचाचारविहीनाश्च दुर्द्धर्षा धर्मवर्জ্জিताः। म्लेच्छात् कुविन्दकन्यायां शराकः परिकीर्त्तितः। वर्णसङ्करदोषेण बह्व्यश्च शठजातयः। तासां नामानि संख्याश्च को वा वक्तुं द्विज! क्षमः। वैद्योऽम्बिनीकुमारेण जातश्च विप्रयोषिति। वैद्यवीर्य्येण शूद्रायां बभूवुर्बहवो जनाः। ते च व्याख्यातुमशक्याश्च मन्वौषधिपरायणाः। तेभ्यश्च जाताः शूद्रायां ते व्याख्यास्यन्ति भुवि"।

षोड़शपदार्थमध्ये जातिरूपपदार्थभेदश्च गौ०सू०उक्तो यथा "साधर्म्यवैधर्म्याभ्यां प्रत्यवस्थानं जातिः" सू०। विवृतञ्चैतत् विश्वनाथेन। "क्रमप्राप्तां जातिं लक्षयति। साधर्म्यवैधर्म्याभ्यामिति सावधारणोनिर्देशस्तेन व्याप्तिनिरपेक्षाभ्यां साधर्म्यवैधर्म्याभ्यां प्रत्यवस्थानं दूषणाभिधानं जातिरित्यर्थः यद्यप्युभाभ्यां प्रत्यवस्थानस्य प्रत्येकप्रत्यवस्थानेऽव्याप्तिरेकप्रत्यवस्थानस्य लक्षणत्वे परप्रत्यवस्थानेऽव्याप्तिर्नवान्यतरप्रत्यवस्थानं नियतं सर्वत्र जातावभावात्तथापि व्याप्तिनिरपेक्षतया दूषणाभिधानमित्येव वाच्यं तेन च सन्दर्भेण दूषणासमर्थत्वं स्वव्याघातकत्वं वा दर्शितं तथा च छलादिभिन्नदूषणासमर्थत्तरं स्वव्याघातकत्तरं वा जातिरिति सूचितं साधर्म्यसमादिचतुर्विंशत्यन्यान्यत्वं तदर्थत्वमपि वदन्ति"।

तद्भेदाश्चतुर्विंशतिरुक्ता च गौतमेन दर्शिता यथा "साधर्म्यवैधर्म्योत्कर्षापकर्षवर्ण्यावर्ण्यविकल्पसाध्यप्राप्तिप्राप्तिप्रसङ्गप्रतिदृष्टान्तानुत्पत्तिसंशयप्रकरणहेत्वर्थापत्त्यविशेषोपपत्त्युपलब्ध्यनुपलब्धिनित्यानित्यकार्य्यसमाः" सू०

"तत्र च विशेषलक्षणार्थं जातिं विभजते" सू०।

अत्र च साधर्म्यादीनां कार्य्यान्तानां हन्त तैः समा इत्यर्थात् साधर्म्यसमादयश्चतुर्विंशतिर्जातय इत्यर्थः अत्र च जातेर्विशेष्यत्वात् समशब्दं मन्यते भाष्यवार्त्तिकादौ समशब्दः क्वचिन्मूलेषु तु समशब्दो निर्विवाद एव तत्र जातिशब्दस्य स्त्रीलिङ्गतया यद्यपि नान्यथापि प्रतिषेधो विशेष्य इति भाष्यादयः। वयन्तु तद्धिकल्पादिति सूत्रस्थविकल्पस्यैव विशेषत्वं विविधः कल्पः प्रकारो विकल्पः तथा चैते साधर्म्यसमादयोजातिविकल्पा एवमपिमूलेष्वपि। इत्थञ्च जातेर्विशेषत्वे साधर्म्यसमेत्यादीति ब्रूमः समीकरणार्थं प्रयोगः समइति वार्त्तिकं यद्यपि नैतावता समीकरणं तथापि समीकरणोद्देश्यकत्वमूलेष्वेव अथवा साधर्म्येण सर्वं यत्र स साधर्म्यसमः एकत्र व्याप्तेराधिक्येऽपि साधर्म्यं समभेवेति भावः" इक्तिः "साधर्म्यवैधर्म्याभ्यामुपसंहारे तद्धर्मविपर्य्ययोपपत्तेः साधर्म्यवैधर्म्यसमौ" ॥२ सू०।

"साधर्म्यवैधर्म्यसमौ लक्षयति। उपसंहारे साध्यस्योपसंहरणे वादिना कृते तद्धर्मस्य साध्यरूपधर्मस्य यो विपर्य्ययो व्यतिरेकस्तस्य साधर्म्यवैधर्म्याभ्यां केवलाभ्यां व्याप्त्यनपेक्षाभ्यां यदुपपादनं ततो हेतोः साधर्म्यवैधर्म्यसमावुच्येते तदयमर्थः वादिना अन्वयेन व्यतिरेकेण वा साध्ये साधिते प्रतिवादिनः साधर्म्यमात्रमुक्ते

तदभावापादनं साधर्म्यसमा। वैधर्म्यप्रमात्रप्रदत्तहेतुना तदभावापादनं वैधर्म्यसमा२। तत्र साधर्म्यसमा यथा शब्दोऽनित्यः कृतकत्वाद्घटवत् व्यतिरेकेण वा व्योमवदित्युपसंहृते नैतदेवं यदनित्यघटसाधर्म्यान्नित्याकाशवैधर्म्याद्वाऽनित्यः स्यान्नित्याकाशसाधर्म्यादमूर्त्तत्वान्नित्यः स्याद्विशेषो वा वक्तव्यः वैधर्म्यसमा यथा शब्दोऽनित्यः कृतकत्वाद्घटवत् व्याकाशवदिति स्थापनायाम् अनित्यघटवैधर्म्यादमूर्त्तत्वान्नित्यः स्याद्विशेषो वा वक्तव्य इति यत्र साधर्म्यत्वमात्रं वैधर्म्यत्वमात्रं वा गमकतौपयिकमित्यभिमानात् सत्प्रतिपक्षदेशनाभासे चेमे अनैकान्तिकदेशनाभासे इति वार्त्तिके त्वनैकान्तिकपदं योगाद्वात्प्रतिपक्षपरं एकान्ततः साध्यसाधकत्वाभावात्" इतिः।

"गोत्वाद्गोसिद्धिवत् तद्सिद्धिः" सू०।

"अनयोरसदुत्तरत्वे बीजमाह। गोत्वात् गोसिद्धिर्गौर्व्यवहार इति सम्प्रदायः यत्तु गोत्वाद्वेतरासमवेतत्वं सति गोसमवेताद्गोसिद्धिः, एतेन व्याप्तिपक्षधर्म्मत्वे दर्शिते गोर्गोत्वस्य तादात्म्येन गोरेव वा सिद्धिर्यथा तथैव कृतकत्वादपि व्याप्तिपक्षधर्म्मतासहितादनित्यत्वसिद्धिर्न तु व्याप्तिपक्षधर्मतारहितात् साधर्म्यमात्रात्, तथा सति अदूषकसाधर्म्यात्प्रमेयत्वादित्यस्यहेतुवचनसमदूषकं स्यादित्यवं विशेषः" इतिः।

"साध्यदृष्टान्तयोर्धर्म्मे विकल्पादुभयसाध्यत्वाद्वोत्कर्षापकर्षवर्ण्यावर्ण्यविकल्पसाध्यसमाः" ३।४।५।६।७।८ सू०

"क्रमप्राप्तं जातिषट्कं निरूपयति। उत्कर्षेण समः उत्कर्षसमः एवमपकर्षसमोऽपि४ वर्ण्यावर्ण्यसाध्येति भावप्रधानो निर्देशः वर्ण्यत्वादिना समो वर्ण्यसमादिः ५।६ ७।८।अविद्यमानधर्म्मारोप उत्कर्षः विद्यमानधर्म्मापचयोऽपकर्षः वर्ण्यत्वं वर्ण्यनीयत्वं तच्च सन्दिग्धसाध्यकत्वादि तदभावोऽवर्ण्यत्वं विकल्पोद्वैविध्यं साध्यत्वं पक्षावयवसाधनीयत्वं साध्यदृष्टान्तयोर्धर्मविकल्पादिति पक्षानातत्यानबीजम् उभयसाध्यत्वादिति पक्षस्य। तदयमर्थः साध्यतेऽत्रेति साध्यं पक्षः तथा च साध्यदृष्टान्तयोरित्यस्य पक्षदृष्टान्तयोरन्यतरस्मिन्नित्यर्थः धर्मविकल्पो धर्म्मस्य वैचित्र्यं तच्च क्वचित्सत्त्वं क्वचिदसत्त्वं प्रकृते साध्यसाधनान्यतररूपस्य धर्मस्य विकल्पात्सत्त्वाद्योऽविद्यमानधर्म्मारोपः स उत्कर्षसमः व्याप्तिपक्षधर्मत्वयोः पक्षदृष्टान्तान्यतरस्मिन् साध्यसाधनान्यतरेणाविद्यमानधर्मप्रसञ्जनं उत्कर्षसमः३ इति फलितार्थः। यथा शब्दोऽनित्यः कृतकत्वादिति स्थापनायाम् अनित्यत्वं कृतकत्वं घटे रूपसहचरितमतः शब्दोऽपि रूपवान् स्यात् तथा च विवक्षितविपरीतसाधनाद्विशेषविरुद्धो हेत्वाभासो हेत्वाभासा चेयम्। एवं श्रावणशब्दसाधर्म्यात् कृतकत्वाद्घटोऽपि श्रावणः स्यादविशेषात्। वस्तुतस्तु घटे श्रावणत्वापादनेऽर्थान्तरमत उक्तलक्षणे दृष्टान्तपदं साध्यपदञ्च न देयम्। अपकर्षसमायान्तु धर्मविकल्पः धर्मस्य सहचरितधर्मस्य विकल्पोऽसत्त्वं ततः अपकर्षः साध्यसाधनान्यतरस्याभावप्रसञ्जनं तथा च पक्षदृष्टान्तान्यतरस्मिन् व्याप्तिपक्षधर्मत्वं सहचरितधर्म्माभावेन हेतुसाध्यान्यतराभावप्रसञ्जनमपकर्षसमः४ यथा शब्दोऽनित्यः कृतकत्वादित्यत्र यद्यनित्यसहचरितघटधर्म्मात् कृतकत्वादनित्यः शब्दस्तदा कृतकत्वानित्यत्वसहचरितघटधर्मरूपदृष्टान्तव्याहत्या शब्दे कृतकत्वाभावोऽनित्यत्वस्य च व्याहृतिः स्यात्। आद्येऽसिद्धिदेशना द्वितीये बाधदेशना, एवं शब्दे कृतकत्वसहचरितश्रावणत्वस्य संयोगादावनित्यत्वकृतकत्वसहचरितगुणत्वस्य च व्याहत्या घटेऽनित्यत्वं कृतकत्वञ्च व्यावर्त्तेतेति दृष्टान्ते साध्यसाधनवैकल्यदेशनाभासाऽपीयम्। यत्तु वार्त्तिके शब्दोनीरूप इति घटोऽपि नीरूपः स्यादित्यपकर्ष इति. तदसत् घटे नीरूपत्वापादनस्यार्थान्तरत्वात् आचार्यस्वरसोऽप्येवं यत्तु वैधर्म्यसमाया अत्रैवान्तर्भावः स्यादिति तत्र उपपेयसङ्करेऽप्युपाधेरसङ्करात् वर्ण्यत्वसमायान्तु साध्यः सिद्धप्रभावत्वात् सन्दिग्धसाध्यकादिर्वा तस्य धर्मः सन्दिग्धसाध्यकादिवृत्तिहेतुसत्त्वस्य विकल्पात्सत्त्वात् दृष्टान्ते वर्ण्यत्वस्य सन्दिग्धसाध्यकत्वस्यापादनं वर्ण्यसमः५। तदयमर्थः पक्षदृत्तिहेतुर्हि गमकः पक्षश्च सन्दिग्धसाध्यकस्तथा च सन्दिग्धसाध्यकवृत्तिहेतुत्वया दृष्टान्तेऽपि स्वीकार्यः तथा च दृष्टान्तस्यापि सन्दिग्धसाध्यकत्वात् सपक्षवृत्तित्वानिश्चयादसाधारणो हेतुस्त्वद्धेत्वाभासा चेयम्। हेतुः सन्दिग्धसाध्यकवृत्तिर्यदि न दृष्टान्ते तदा गमकहेत्वभावात् साधनविकल्पो दृष्टान्तः स्यादिति भावः। अवर्ण्यसमायान्तु दृष्टान्ते सिद्धसाध्यके यो धर्म्मो हेतुस्तस्य सत्त्वात् पक्षे शब्दादावसन्दिग्धसाध्यकत्वापादनमवर्ण्यसमा६ दृष्टान्ते हेतोर्यावत्यं तावत्यो हेतवेव गमक इत्यभिमानेन एवमापादनं दृष्टान्ते यो हेतुः सिद्धसाध्यकवृत्तिः स चेन्न पक्षे तदा गमकहेत्वभावात् स्वरूपासिद्धिः स्यादतस्तावत्यो हेतवस्सन्त्वित्यभिमते स्वीकार्यः तथा च सन्दिग्धसाध्यकत्वलक्षणपक्षत्वाभावा-

दाश्रयासिद्धिः असिद्धिदेशनाभासा चेयम्। विकल्पसमायान्तु पक्षे दृष्टान्ते च योधर्म्मस्तस्य विकल्पोविरुद्धः कल्पो व्यभिचारित्वम् उपलक्षणं चैतत् अन्यदुक्तिधर्मेष्वपि बोध्यं व्यभिचारोऽपि हेतोर्धर्म्मान्तरं प्रति धर्म्मान्तरस्य साध्यं प्रति धर्म्मान्तरस्य धर्म्मान्तरं प्रति वा तथा च कस्यचिद्धर्मस्य क्वचिद्व्यभिचारदर्शनेन धर्मत्वाविशेषात् प्रकृतहेतोः प्रकृतसाध्यं प्रति व्यभिचारापादनं विकल्पसमा७ यथा शब्दोऽनित्यः कृतकत्वादित्यत्र कृतकत्वस्य गुरुत्वव्यभिचारदर्शनाद्गुरुत्वस्यानित्यत्वव्यभिचारदर्शनादनित्यत्वस्य मूर्त्तत्वव्यभिचारदर्शनाद्धर्मत्वाविशेषात् कृतकत्वमप्यनित्यत्वं व्यभिचरेदित्यनैकान्तिकदेशनाभासा चेयम्। पक्षदृष्टान्तादेः प्रकृतसाध्यतुल्यतापादनं स साध्यसमाऽ तत्रायमाशयः एतत्प्रयोगसाध्यस्यैवानुमितिविषयत्वं तथा च पक्षादेरनुमितिविषयत्वात् साध्यवदेतत्प्रयोगसाध्यत्वम् अतः साध्यसमा। तथा हि पक्षादेः पूर्वं सिद्धत्वे एतत् प्रयोगसाध्यत्वाभावान्नानुमितिविषयत्वं पूर्वमसिद्धत्वे पक्षादेरज्ञानादाश्रयासिद्धादयस्तद्देशनाभासा चेयम्। क्वचित्तु उभयसाध्यत्वात् उभयं पक्षदृष्टान्तौ तद्धर्म्मौ हेत्यादिः तत्साध्यत्वं तदधीनानुमितिविषयत्वं साध्यस्यैव पक्षादेरपीति तुल्यतापादनमिति किञ्चोपहितभानमते किञ्चित्साध्यानुमितिविषयत्वात् साध्यसमत्वं हेतोश्च साध्यत्वे हेतुमान्दृष्टान्तोऽपि साध्य इत्याशयः" इत्तिः।

"किञ्चित्साधर्म्म्यादुपसंहारसिद्धेर्वैधर्म्म्यादप्रतिषेधः"इ०।

"एतावत्सङ्ख्यत्वे बीजमाह किञ्चित्साधर्म्म्यात् साधर्म्म्यविशेषात् व्याप्तिसहितात् उपसंहारसिद्धेः साध्यसिद्धेः वैधर्म्म्यादेतद्विपरीतात् व्याप्तिनिरपेक्षात् साधर्म्म्यमात्रात् भवता कृतः प्रतिषेधो न सम्भवतीत्यर्थः। अन्यथा प्रमेयत्वरूपसाधकसाधर्म्म्यात् तदुदूषणमप्यसम्यक् स्यादिति भावः। तथा चायं क्रमः अनित्यत्वव्याप्यात् कृतकत्वात् शब्देऽनित्यत्वमुपसंहरामो नतु कृतकत्वं रूपव्याप्यं व्याप्यं येन तत्रेदं रूपमव्यापादनीयं शब्दे, एवं अनित्यत्वं न रूपव्याप्यं येन रूपाभावादनित्यत्वाभावः शब्दे स्यात् एवं वर्णसमेऽपि किञ्चित्साधर्म्म्यात् व्याप्यतावच्छेदकावच्छिन्नहेतोः साध्यसिद्धिः तादृशहेतुमत्त्वञ्च दृष्टान्तता प्रयोजकं न तु पक्षे यावद्विशेषणावच्छिन्नो हेतुस्तावदवच्छिन्नहेतुमत्त्वम् अन्यथा त्वयापि दूषणीयो दृष्टान्तो कर्त्तव्यः सोऽपि न स्यात् एवमवर्ण्यसमेऽपि व्याप्यतावच्छेदकावच्छिन्नस्य दृष्टान्तदृष्टस्य पक्षे सत्त्वात्साध्यसिद्धिर्न तु दृष्टान्तवृत्तियावद्धर्मावच्छिन्नस्य पक्षे सत्त्वम्। एवं विकल्पसमेऽपि प्रकृतसाध्यव्याप्यात् प्रकृतहेतोः साध्यसिद्धिस्तद्वैधर्म्म्यात् यत्किञ्चिद्व्यभिचारात् कृतः प्रतिषेधो न सम्भवति नहि यत्किञ्चिद्व्यभिचारादेव प्रकृतहेतोः प्रकृतसाध्यासाधकत्वमतिप्रसङ्गात्। एवं साध्यसमेऽपि व्याघातहेतोः सिद्धे पक्षे साध्यसिद्धिर्न तु पक्षदृष्टान्तादेरप्यनेन साध्यत्वे तथा सति क्वचिदपि साध्यसिद्धिर्न स्यात् त्वदीयदूषणमपि विलीयेत" इत्तिः।

"साध्यातिदेशाच्च दृष्टान्तोपपत्तेः" सू०।

"यथार्थवर्ण्यसाध्यसमासु समाध्यन्तरमध्याह्न दृष्टान्तोपपत्तिर्दृष्टान्तोपपत्तिः साध्यातिदेशात् दृष्टान्ते हि साध्यमतिदिश्यते तावतैव दृष्टान्तत्वमुपपद्यते नत्वशेषो धर्मः पक्षदृष्टान्तयोरभेदापत्तेः पक्षादेरपि साध्यसमत्वमनेन प्रत्युक्तं दृष्टोऽनो दृष्टान्तः पक्षः तस्माद्वह्निमानित्यतः पक्षोत्कीर्त्तनात्तथा च साध्यस्यातिदेशात् साधनात् पक्ष इत्युच्यते न तु पक्षोऽपि साध्यतेऽतिप्रसङ्गादिति भावः" इत्तिः।

"प्राप्य साध्यमप्राप्य वा हेतोः प्राप्ताप्राप्तविशिष्टत्वादप्राप्ताप्राप्तसाधकत्वाच्च प्राप्ताप्राप्तिसमौ"इ।१० सू०।

"क्रमप्राप्तौ प्राप्ताप्राप्तिसमौ भवतः। हेतोरिति साधकत्वमिति शेषः प्राप्तिपक्षे दूषणमाह प्राप्ताविशिष्टत्वादिति द्वयोरपि प्राप्तत्वाविशेषात् किञ्चित्स्य साधकं अप्राप्तिपक्षे दोषमाह अप्राप्ताश्चेति अप्राप्तस्य साधकत्वे अतिप्रसङ्गात् साधकत्वञ्चात्र कारकज्ञापकसाधारण्यम् एवञ्च कारकज्ञापकभिन्नं साधनं कार्य्यज्ञाप्यभिन्नेन साध्येन सम्बद्धं सत्साधकं चेन्नदा सत्त्वाविशेषाच्च कार्य्यकारणभावः सत्सम्बन्धस्य प्रागेव ज्ञातत्वाच्च ज्ञाप्यज्ञापकभावः प्राप्तयोर्न जन्यजनकभावः प्राप्तत्वेन तयोरुदकबेरिवाभेदादित्याशय इत्यन्ये। तथा च प्राप्ताप्राप्ताविशेषादनिष्टापादनेन प्रत्यवस्थानं प्राप्तिसमाइ। यदि चाप्राप्तं किञ्चं साध्यबुद्धिं जनयति साध्याभावबुद्धिमेव किन्नेन न जनयेत् अप्राप्तत्वाविशेषात् तथा चाप्राप्ता साधकत्वादनिष्टापादनमप्राप्तिसमा।० प्रतिकूलतर्कदेशनाभासे चेमे" इत्तिः।

"घटादिनिष्पत्तिदर्शनात् पीड़ने चाभिचारादप्रतिषेधः"सू०।

"अनयोरसदुत्तरत्वे बीजमाह। दण्डादितो घटादिनिष्पत्तेर्दर्शनात् सर्वलोकप्रत्यक्षसिद्धत्वादभिचारात् स्वेनादितः शत्रुपीड़ने च व्यभिचारान्न त्वदुक्तः प्रतिषेधः

सम्भवति न हि कारणं दण्डादि प्रागेव घटादिना सम्बद्धमपि तु सदादिना, श्येनादिरप्युड्डेयनतया पीडां जनयति अन्यथा लोकवेदसिद्धकार्यकारणभावोच्छेदे त्वदुक्तो हेतुरप्यसाधकः स्यादिति"इत्तिः ।

"दृष्टान्तस्य कारणानपदेशात् प्रत्यवस्थानाच्च प्रतिदृष्टान्तेन प्रसङ्गप्रतिदृष्टान्तसमौ"॥।१२ सू० ।

"क्रमप्राप्ते प्रसङ्गप्रतिदृष्टान्तसमे जाती लक्षयति । दृष्टान्तस्य कारणं प्रमाणं तदनपदेशोऽनभिधानम् अभिधानं चानतिपत्योजनकं तथा च दृष्टान्तस्य साध्यकत्वे प्रमाणाभावात् प्रत्यवस्थानमर्थः यद्यपीदं सदुत्तरमेव तथापि दृष्टान्ते प्रमाणं वाच्यं तत्रापि प्रमाणान्तरमित्यनवस्थायाः प्रत्यवस्थाने तात्पर्यं तदुक्तमाचार्यैः "नवस्थाभावनसङ्गः प्रसङ्गसमः" इति एतन्मते हेतोर्हेत्वन्तरमित्यनवस्थाऽपि प्रसङ्गसमा एव। पूर्वमते तु हेत्वनवस्थादिकं वक्ष्यमाणाज्जातिगणेऽन्तर्भूतमिति विशेषः । अनवस्थादेशनाभासा चेयम् । प्रतिदृष्टान्तसमः प्रत्यवतव्यः प्रतिदृष्टान्तेन प्रत्यवस्थानात् प्रतिदृष्टान्तसमः॥२ एतच्च सावधारणं तेन प्रतिदृष्टान्तमात्रबलेन प्रत्यवस्थानमर्थः तेन साधर्म्यसमाव्युदासः यदि घटदृष्टान्तबलेनानित्यः शब्दः तदाकाशदृष्टान्तबलेन नित्य एव स्यात् नित्यः किं न स्यादिति बाधः प्रतिरोधापादनोपयः हेतुरनङ्गं दृष्टान्तमात्रबलादेव साध्यसिद्धिरित्यभिमानः बाधप्रतिरोधान्यतरदेशनाभासा चेयम्" इत्तिः ।

"प्रदीपोपादानप्रसङ्गनिवृत्तिवत्तद्विनिवृत्तिः"सू० ।

"प्रसङ्गसमे प्रत्युत्तरमात्र । दृष्टान्तो हि निदर्शनस्थानत्वेन साध्यनिर्णयार्थमपेक्ष्यते न तु दृष्टान्तदृष्टान्ताद्यनवस्थितपरम्परा लोकसिद्धा युक्तिसिद्धा वा। अन्यथा घटादिप्रत्यक्षाय प्रदीप इव प्रदीपोपपत्त्यर्थमनवस्थितप्रदीपपरम्परा प्रसज्येत त्वदीयसाधनमपि व्याहन्येत"इत्तिः।

"प्रतिदृष्टान्तहेतुत्वे च नाहेतुर्दृष्टान्तः" सू० ।

"प्रतिदृष्टान्तसमे प्रत्युत्तरमात्र । अत्रायमुत्तरक्रमः प्रतिदृष्टान्तत्वया किमर्थमुपादीयते मदीयहेतोर्बाधार्थं यत्प्रतिपक्षितत्वार्थं वा नाद्यः यतः प्रतिदृष्टान्तस्य हेतुत्वे स्वार्थसाधकत्वे मदीयो दृष्टान्तो नाहेतुः नासाधकत्वया चातुल्यबलत्वाच्च बाधः न द्वितीयोऽपि यतः प्रतिदृष्टान्तस्य स्वार्थसाधकत्वे उच्यमाने नाहेतुर्दृष्टान्तः मदीयो दृष्टान्तस्तु सहेतुकत्वादधिकबलः वस्तुतो हेतुं विना दृष्टान्तमात्रेण न सत्प्रतिपक्षसम्भावना तदभावव्याप्यवत्ताज्ञानाभावात् हेतूपादाने तु सदुत्तरत्वमेवेति भावः इति" इत्तिः ।

"प्रागुत्पत्तेः कारणाभावादुत्पत्तिसमः"॥१३ सू० ।

"क्रमप्राप्तमनुत्पत्तिसमं लक्षयति। प्रागुत्पत्तेरिति साधनाङ्गस्येति शेषः कारणाभावात् हेत्वभावात् तथा च साधनाङ्गपक्षहेतुदृष्टान्तानामनुत्पत्तेः प्राक् हेत्वभाव इत्यनुत्पत्त्या प्रत्यवस्थानमनुत्पत्तिसमः॥३ यथा घटोऽनुपलब्धेः नास्ति पटवदित्युक्ते घटोत्पत्तेर्नश्वरोत्पत्तेश्च पूर्वं हेत्वभावादसिद्धिः पटे च नश्वरत्वेः पूर्वं हेत्वभावेन दृष्टान्तासिद्धिः एवं आद्यक्षणे रूपाभावाद्धावत्व अनुत्पत्त्या प्रत्यवस्थानस्य तत्रापि सत्त्वात् उत्पत्तेः पूर्वं हेत्वाद्यभावेन प्रत्यवस्थानस्यैव लक्षणत्वात् जातित्वे सतीति च विशेषणीयं तेनोत्पत्तिकालावच्छिन्नो घटो नश्वरानित्यत्व बाधेन प्रत्यवस्थाने नातिव्याप्तिः असिद्धादिदेशनाभासा चेयम्" इत्तिः ।

"तथाभावादुत्पन्नस्य कारणोपपत्तेर्न कारणप्रतिषेधः"सू० "अनुत्तरमात्र । उत्पन्नस्य तथाभावात् घटाद्यात्मकत्वात् तत्र कारणस्य हेतोरुपपत्तेः सत्त्वात् कथं कारणप्रतिषेधः। अयमाशयः पक्षे हेत्वभावादसिद्धिः नित्यत्वपक्षे हेत्वभावः सम्भवति अधिकरणाभावात् न हि हेत्वभावमात्रासिद्धिः त्वदीयहेतोरपि क्वचिदभावसत्त्वात् एतेन दृष्टान्तासिद्धिर्व्याख्याता यदा कदाचिद्धेतुमत्त्वेनैव दृष्टान्तत्वोपपत्तेः एवं हेत्वादीनां यदा कदाचित्पक्षे सत्त्वादेव हेत्वादिभावो न तु सार्वत्रिकी तदपेक्षेति" इत्तिः ।

"सामान्यदृष्टान्तयोरैन्द्रियकत्वे समाने नित्यानित्यसाधर्म्यात् संशयसमः"॥१४ सू० ।

"क्रमप्राप्तं संशयसमं लक्षयति । नित्यानित्यसाधर्म्यादिति संशयकारणोपलक्षणं तेन समानधर्मदर्शनादियत्किञ्चित्संशयकारणबलात् संशयेन प्रत्यवस्थानं संशयसमः॥४ अधिकमुदाहरणपरं तथा हि शब्दोऽनित्यः कार्यत्वाद्घटवदित्युक्ते सामान्ये गोत्वादौ दृष्टान्ते घटे ऐन्द्रियकत्वं तुल्यं यथा कार्यत्वाच्चिणीयकादनित्यत्वं निर्णीयते तथा ऐन्द्रियकत्वात् संशयकारणादनित्यत्वं सन्दिह्यताम् एवं शब्दत्वाद्यसाधर्म्यदर्शनादपि संशयो बोध्यः तथा च हेतुज्ञानेऽप्रामाण्यशङ्काधानद्वारा साध्यसंशयात् सत्प्रतिपक्षदेशनाभासेयम्" इत्तिः ।

"साधर्म्यात् संशये न संशयो वैधर्म्यादुभयथा वा संशयोऽनन्तसंशयप्रसङ्गो नित्यत्वानभ्युपगमाच्च सामान्यस्था-

प्रतिषेधः" गौतमसूत्रस्य पञ्चमाध्याये आह्निकस्यसूत्रम् । "अत्रोत्तरम् । साधर्म्यात्साधर्म्यदर्शनात् संशय आपाद्यमानेऽपि न संशयो वैधर्म्याद्वैधर्म्यदर्शनात् यदि च सार्थं त्वद्रूपविशेषदर्शनेऽपि संशयस्तदाऽत्यन्तसंशयप्रसङ्गः संशयानुच्छेदप्रसङ्गः न च तथाऽभ्युपगन्तुं शक्यमित्याह नित्यत्वेति समान्यस्य सामानधर्मदर्शनस्य नित्यत्वानभ्युपगमात् नित्यसंशयजनकत्वानभ्युपगमात्तथा सति त्वदीयहेतुरपि न परपक्षप्रतिषेधकः स्यादिति भावः । सामान्यस्य गोत्वादेर्नित्यत्वानभ्युपगमात् नित्यत्वानभ्युपगमप्रसङ्गात् तत्रापि साधारणधर्मप्रमेयत्वादिना संशय एव स्यादिति केचित्" इत्तिः ।

"उभयसाधर्म्यात् प्रक्रियासिद्धेः प्रकरणसमः१५" सू० ।

"क्रमप्राप्तं प्रकरणसमं लक्षयति । उभयसाधर्म्यात् प्रकर्षेण क्रिया अन्वयसञ्चाराद्व्यतिरेकसञ्चाराद्वा पूर्क्रिया तत्साधनं विपरीतसाधनमिति फलितार्थः तस्सिद्धेस्तस्य पूर्वमेव सिद्धेः तथाचाधिकबलत्वेनारोपितप्रमाणान्तरेण बाधेन प्रत्यवस्थानं प्रकरणसमः १५ यथा शब्दोऽनित्यः कृतकत्वादित्युक्ते नैतदेवं श्रावणत्वेन नित्यत्वसाधकेन बाधात् बाधदेशनाभासा चेयम्" इत्तिः ।

"प्रतिपक्षात् प्रकरणसिद्धेः प्रतिषेधानुपपत्तिः प्रतिपक्षोपपत्तेः" सू०।

"अत्रोत्तरमाह । प्रतिपक्षाद्विपरीतसाध्यसाधकत्वेनाभिमताच्छ्रावणत्वादितः प्रकरणसिद्धिद्वारा मदीयसाध्यस्य यः प्रतिषेधः त्वया क्रियते तस्यानुपपत्तिः कुतः प्रतिपक्षोपपत्तेः त्वत्पक्षसाधनेच्छया प्रतिपक्षस्य मदीयपक्षस्योपपत्तेः साधनात् । अयमाशयः श्रावणत्वेन पूर्वं नित्यत्वस्य साधनाद्यो बाध उच्यते स नोपपद्यते पूर्वं साधितस्य बलवत्त्वाभावात् कदाचित्कृतकत्वेनानित्यत्वस्यापि पूर्वं साधनादिति त्वत्पक्षप्रतिषेधोऽपि स्यात्" इत्तिः ।

"त्रैकाल्यासिद्धेर्हेतोरहेतुसमः१६" सू० ।

"क्रमप्राप्तमहेतुसमं लक्षयति । त्रैकाल्यं कार्यकालतत्पूर्वापरकालाः तेन हेतोरसिद्धेः हेतुत्वासिद्धेः । अयमर्थः दण्डादिकं घटादेर्न पूर्ववर्त्तितया कारणं तदानीं घटादेरभावात् कस्य कारणं स्यात् अतएव न घटाद्युत्तरकालवर्त्तितयाऽपि नवा समानकालवर्त्तितया हेत्वकालवर्त्तिनोः सव्येतरविषाणयोरिवाविनिगमनापत्तेः तथा च कालसम्बन्धखण्डनेनाहेतुतया प्रत्यवस्थानमहेतुसमः १६ कारणमात्रखण्डनेन सर्वप्रहेतोरपि खण्डनात्र तदसंपन्नं प्रतिकूलतर्कदेशनाभासा चेयम्" इत्तिः ।

"न हेतुतः साध्यसिद्धेस्त्रैकाल्यासिद्धिः" सू० ।

"अत्रोत्तरमाह । त्रैकाल्यासिद्धस्त्रैकाल्येन याऽसिद्धिरुक्ता सा न, कुतः हेतुतः साध्यसिद्धेः त्वयाऽभ्युपगमात्" इत्तिः ।

"प्रतिषेधानुपपत्तेः प्रतिषेद्व्याप्रतिषेधः" सू० ।

"पूर्ववर्त्तितामात्रेणैव हेतुतासम्भवात् अन्यथा त्वदीयहेतोरपि साध्यं न सिध्येदित्याह हेतुफलभाव खण्डने प्रतिषेधस्याप्यनुपपत्तेः प्रतिषेद्व्यस्य परकीयहेतोर्न प्रतिषेध इत्यर्थः" इत्तिः ।

"अर्थापत्तितः प्रतिपक्षसिद्धेरर्थापत्तिसमः१७" सू० ।

"क्रमप्राप्तमर्थापत्तिसमं लक्षयति । अर्थापत्तिरर्थापत्त्याभासः तथा चार्थापत्त्याभासेन प्रतिपक्षसाधनाय प्रत्यवस्थानमर्थापत्तिसमः १७ । अयमाशयः अर्थापत्तिर्हि उक्तेनानुक्तमाक्षिपति यथा शब्दोऽनित्य इत्युक्तेऽर्थादापाद्यतेऽन्यत् नित्यं तथा च हृदान्तासिद्धिः विरोधश्च कृतकत्वादनित्य इत्युक्तेऽर्थादापन्नम् अन्यस्माद्धेतोर्बाधः सत्प्रतिपक्षो वा अनुमानादनित्य इत्युक्ते पुनश्चानित्य इति च बाधः विशेषविधेः शेषनिषेधफलकत्वमित्यभिमानः सर्वदेशनाभासा चेयम्" इत्तिः ।

"अनुक्तस्यार्थापत्तेः पक्षहानेरुपपत्तिरनुक्तत्वादनैकान्तिकत्वाच्चार्थापत्तेः" सू० ।

"अत्रोत्तरम् । किमुक्तेन अनुक्तं यत्किञ्चिदेवार्थादापाद्यते उक्तोपपादकं वा आद्ये त्वत्पक्षहानिरप्यापाद्यतां त्वयानुक्तत्वात् अन्त्ये अस्या अर्थापत्तेरनैकान्तिकत्वम् ऐकान्तिकत्वम् एकपक्षसाधकत्वे बलं तच्चास्ति न हि अनित्य इत्युक्तोपपादकं नित्यत्वमिति न हि विशेषविधिमात्रं शेषनिषेधफलकम्, अपि तु सति तात्पर्ये क्वचित् न हि नीलोघट इत्युक्ते सर्वमन्यदनीलमिति क्वचित्प्रतिपद्यते" इत्तिः ।

"एकधर्मोपपत्तेरविशेषे सर्वाविशेषप्रसङ्गात् सद्भावोपपत्तेरविशेषसमः" १८ सू० ।

"अविशेषसमं लक्षयति । एकस्य धर्मस्य कृतकत्वादेः शब्दे घटे चोपपत्तेः सत्त्वात् यदि शब्दघटयोरनित्यत्वेनाविशेषः उच्यते तदा सर्वेषामविशेषप्रसङ्गः, कुतः सद्भावोपपत्तेः; सतः सद्भावस्य ये भावाधर्माः सत्त्वप्रमे-

यत्वादयस्तेषामुपपत्तेः सत्त्वात् तथा च सर्वेषामभेदे पक्षाद्यविभागः सर्वेषामेकजातीयत्वेऽवान्तरजात्युच्छेदः सर्वेषामनित्यत्वे जात्यादिविलयदित्यादि तथा च सजातीयदृष्टिधर्मेणाविशेषापादनमविशेषसमेति १८ फलितमुक्तं चाविशेषसम इति लक्षणनिर्देशः सङ्गावोपपत्तेः सर्वाविशेषप्रसङ्गादिति लक्षणं मेयं व्युत्पादकम्। प्रतिकूलतर्कदेशनाभासा चेयम्"इत्तिः।

"क्वचिद्धर्म्यनुपपत्तेः क्वचिच्चोपपत्तेः प्रतिषेधाभावः"सू०

"अत्रोत्तरमाह। तद्धर्मस्य हेतोर्धर्म्यव्याप्यत्वादेस्तस्य क्वचित् कृतकत्वादौ उपपत्तेः सत्त्वात् क्वचित् सत्त्वादौ अनुपपत्तेः अभावात् स्वदुक्तस्य प्रतिषेधस्याभावोऽसम्भव इत्यर्थः" इत्तिः।

"उभयकारणोपपत्तेरुपपत्तिसमः" १९सू०।

"उपपत्तिसमं लक्षयति। उभयं पक्षप्रतिपक्षौ तयोः कारणस्य प्रमाणस्य उपपत्तेः सत्त्वात् तथा च व्याप्तिमपुरस्कृत्य यत्किञ्चिद्धर्मेण परपक्षदृष्टान्तेन स्वपक्षसाधनेन प्रत्यवस्थानम् उपपत्तिसमः१९ यथा शब्दोऽनित्यः कृतकत्वादित्युक्ते यथा त्वत्पक्षेऽनित्यत्वे प्रमाणमस्ति तथा मत्पक्षोऽपि सप्रमाणकः त्वत्पक्षमत्पक्षान्यतरत्वात् तथाच बाधः प्रतिरोधो वा। तद्देशनाभासा चेयम्"इ०।

"उपपत्तिकारणाभ्यनुज्ञानादप्रतिषेधः" सू०।

अत्रोत्तरमाह। अयं त्वदुक्तप्रतिषेधो न सम्भवतिकुतः मत्पक्षे उपपत्तिकारणस्य मत्पक्षसाधकप्रमाणस्य त्वयाऽभ्यनुज्ञानात् त्वया हि मत्पक्षस्य दृष्टान्तीकरणेन सप्रमाणकत्वमनुज्ञातमतः कथं तत्प्रतिषेधः शक्यते कर्तुम् अनुज्ञातस्यापि प्रतिषेधे स्वपक्ष एव किं न प्रतिषिध्यते" इत्तिः।

"निर्दिष्टकारणाभावेऽप्युपलब्धादुपलब्धिसमः"२०सू०।

"उपलब्धिसमं लक्षयति। वादिना निर्दिष्टस्य कारणस्य साधनस्याभावेऽपि साध्यस्योपलब्धात् प्रत्यवस्थानमनुपलब्धिसमः२० इत्यर्थः। तथा हि पर्वतो वह्निमान् धूमादित्यादिकं वह्न्यवधारणार्थमुच्यते न च तल्लभ्यते धूमं विना आलोकादितोऽपि वह्निसिद्धेः तथा च न तस्य साधकत्वमिति प्रतिकूलतर्कः न वा धूमाद्वह्निमानेवेत्यवधारणं द्रव्यत्वादेरपि धूमेन साधनात् न वा पर्वत एव वह्निमानेवेत्यादिकम् अवधारयितुं शक्यते महानसादेरपि वह्निमत्त्वादन्यथा दृष्टान्तासिद्धिः स्यात् एवं वह्निशून्यपर्वतस्यापि सत्त्वाद्बाध इत्यादि तद्देशनाभासा चेयम्" अस्य विश्वनाथविरचिता इत्तिः।

"कारणान्तरादपि तद्धर्म्योपपत्तेरप्रतिषेधः" सू०।

"अत्रोत्तरमाह। कारणान्तरात् साधनान्तरादालोकादितोऽपि तस्य धर्मस्य साध्यस्योपलब्धेस्त्वदुक्तः प्रतिषेधो न सम्भवति। अयमाशयः न हि वयमवधारणार्थं वह्निमान् धूमादित्यादिकं प्रयुञ्ज्महे अपि तु सन्दिग्धस्य वह्नेः सिद्ध्यर्थम् अन्यथा त्वदुक्तमसाधकतासाधनमपि न स्यादसाधकतासाधकान्तरस्यापि सत्त्वात्"इत्तिः।

"तदनुपलब्धेरनुपलम्भादभावसिद्धौ तद्विपरीतोपपत्तेरनुपलब्धिसमः २१"सू०।

"अनुपलब्धिसमं लक्षयति। यद्यपि चेयं द्वितीयाध्याये दर्शिता दूषिता च तथाप्यनुपलब्धिसमा२१जातिरेवमिति तत्रानुक्तेरत्र क्रमप्राप्तोऽभिधीयते तत्रायं क्रमः नैयायिकैस्तावच्छब्दा नित्यत्वमेव साध्यते यदि शब्दो नित्यः स्याद्धारणात् प्राक्कृतोनोपलभ्यते न हि घटाद्यावरणकृद्वादिवच्छब्दस्यावरणमस्ति तदनुपलब्धेरिति तत्रैवं जातिवादी प्रतिपतिष्ठते यद्यावरणानुपलब्धेरावरणाभावः सिध्यति तदा आवरणानुपलब्धेरप्यनुपलम्भादावरणानुपलब्धेरप्यभावः सिध्येत् तथाचावरणानुपलब्धिप्रमाणक आवरणाभावो न स्यादपि त्वावरणोपपत्तिरेव स्यादिति शब्दनित्यत्वे नोक्तं बाधकं युक्तं नन्वनुपलब्धेरनुपलब्ध्यन्तरानपेक्षत्वात् कथमेवमिति चेत् सत्यम् अनुपलब्धेरनुपलब्ध्यन्तरानपेक्षत्वे स्वयमेव स्वस्मिन्ननुपलब्धिरूपेति वाच्यं तथा च तयैवानुपलब्ध्यानुपलब्धत्वसम्भवात्तदभावसिद्धेः स्वात्मन्यनुपलब्धिरूपत्वाभावेऽनुपलब्धित्वमेव न स्यात् अनुपलब्धेरनुपलब्ध्यन्तरापेक्षणेऽनवस्था स्यादेव इत्यङ्गीकृत्येन प्रत्यवस्थानमनुपलब्धिसमः२१ इत्यर्थः प्रतिकूलतर्कदेशनाभासा चेयम्" इत्तिः।

"अनुपलब्धात्मकत्वादनुपलब्धेरहेतुः" सू०।

"अत्रोत्तरमाह। अनुपलब्धिः स्वात्मन्यनुपलब्धिरिति कोऽर्थः स्वयमनुपलब्धिरूपेति चेद्भवत्येव स्वविषयिण्यनुपलब्धिरिति चेन्नेदं पूर्वस्मादनुपलब्धेरनुपलम्भात्मकत्वात् उपलम्भाभावात्मकत्वात् अभावस्य च निर्विषयकत्वात् स्वात्मन्यनुपलब्धित्वाभावेऽनुपलब्धित्वमेव कथमस्या इति चेत् कुतो विरोधः नहि घटः स्वविषयो न भवतीति नायं घटः स्वविषयो न भवतीति। नायं घटः आवरणाभावः कथमनुपलब्धिविषय इति चेत् क एव-

माह किन्त्वनुपलब्धिसद्भावेन्द्रियव्याघातादनुपलब्धिपाद्य इत्युपपद्यते अतस्तदनुपलब्धेरनुपलम्भादित्यादिकमहेतुः अन्यथा, त्वत्साधनमपि दोषानुपलब्धेरनुपलम्भात् सदोषमेव स्यादिति" इत्तिः।

"ज्ञानविकल्पानाच्च भावाभावसंवेदनादध्यात्मम्" सू०।

"नन्वनुपलब्धेः क्वचिन्नुपलब्धित्वाभावेऽनुपलब्धिरपि केन सिध्येदतआह अध्यात्मम् आत्मन्यधि ज्ञानविकल्पानां ज्ञानविशेषाणां भावाभावयोर्मनसा संवेदनात् घटं साक्षात्करोमि पञ्चमनुमिनोमि नानुमिनोमीत्येवं ज्ञानविशेषतदभावानां मनसैव सुग्रहत्वादिति भावः"इत्तिः।

"साधर्म्यात्तुल्यधर्मोपपत्तेः सर्वानित्यत्वप्रसङ्गादनित्यसमः२२" सू०

"अनित्यसमं लक्षयति। यदि दृष्टान्तघटसाधर्म्यात् कृतकत्वादिना सह तुल्यधर्मतोपपद्यते शब्देऽनित्यत्वं साध्यते तदा सर्वस्यैवानित्यत्वं स्यात् सत्त्वादिरूपसाधर्म्यसम्भवात् नचेदमर्थान्तरमसत्तामिति वाच्यं सर्वस्यानित्यत्वे व्यतिरेकाग्रहादनुमानदूषणे तात्पर्यात् परस्यान्वयव्यतिरेकिणएवानुमानत्वादित्याशयः तथा च व्याप्तिमदुरस्कृत्य यत्किञ्चिद्दृष्टान्तसाधर्म्येण सर्वस्य साध्यवत्त्वापादनमनित्यसमा२२ साध्यभेदादविशेषसमातोव्यवच्छेदस्तत्र सर्वाविशेष एवापाद्यते नतु सर्वस्य साध्यवत्त्वम्। यत्तु अनित्यत्वेन समाऽनित्यसमेति भावप्रधानो निर्देशस्तथा च अन्वर्थलब्धमेव लक्षणमिति तन्न वह्निमान् धूमादित्यादौ महानससाधर्म्यस्य सत्त्वात्सर्वस्य वह्निमत्त्वं स्यादित्यस्य जात्यन्तरत्वापत्तेः। आचार्यास्तु साधर्म्य" वैधर्म्यस्याप्युपलक्षकं यथाकाशवैधर्म्यात् कृतकत्वाच्चक्षुर्दोऽनित्यस्तथाकाशवैधर्म्यादाकाशभिन्नत्वादितः सर्वमेवानित्यं स्यादित्यस्य लक्षणे यत्किञ्चिद्धर्मेणेत्येव वाच्यमित्याहुः। अत्र च वैधर्म्यस्य विपक्षाऽस्तित्वान्न सर्वस्य साध्यवत्त्वापादनं किन्त्वाकाशादीनामप्यनित्यत्वं स्यादिति तत्र चार्थान्तरमित्यवधेयं प्रतिकूलतर्कहेतुनाभासा चेयम्" इत्तिः।

"साधर्म्यादसिद्धे प्रतिषेधासिद्धिः प्रतिषेध्यसाधर्म्याच्च" सू०

"अत्रोत्तरमाह। यदि यत्किञ्चित्साधर्म्यात्सर्वस्य साध्यवत्तामापादयतस्तव साधर्म्यस्यासाधकत्वमभिमतं तदा त्वत्कृतप्रतिषेधस्याप्यसिद्धिः तस्यापि प्रतिषेध्यसाधर्म्येण ग्रहत्तत्वात्तव्या ह्येवं साध्यते कृतकत्वं न साधकं दृष्टान्तसाधर्म्यरूपत्वात्सत्त्वादिवत् अत्र च त्वदीयहेतुस्तत्प्रतिषेध्येन मदीयहेतुना कृतकत्वेन सत्त्वेन च सह साधर्म्यरूपतया चायमपि न साधकः स्यात्"इत्तिः।

"दृष्टान्ते च साध्यसाधनभावेन प्रज्ञातस्य धर्मस्य हेतुत्वात्तस्य चोभयथाभावाद्विशेषः" सू०

"यदि च साधर्म्यमात्रं न साधकमपि तु व्याप्तिसहितमित्यभिमतं तदा कृतकत्वे तदस्ति नतु सत्त्वइति विशेष इत्याह। साध्यसाधनभावेन व्याप्यव्यापकभावेन दृष्टान्ते प्रज्ञातस्य प्रमितस्य तस्य हेतुत्वात्साधकत्वात् तत्र हेतुत्वस्य उभयथा अन्वयेन व्यतिरेकेण च भावात् मदीयहेतौ सत्त्वात्साधने सत्त्वादिति नाऽविशेष इति यदुक्तं तन्न भवति"इत्तिः।

"नित्यमनित्यभावादनित्ये नित्यत्वोपपत्तेर्नित्यसमः२३"सू०

"नित्यसमं लक्षयति। अनित्यस्य भावः अनित्यत्वं तस्य नित्यं सर्वकालं स्वीकारे अनित्ये शब्दे नित्यत्वं स्यादित्यापादनं नित्यसमा२३। अयमाशयः अनित्यत्वस्य नित्यमस्वीकारेऽनित्यत्वाभावदशायां तस्यानित्यत्वं न, तस्यापि नित्यत्वापत्तिः नहि दण्डाभावदशायां दण्डीत्युच्यते अतोऽनित्यत्वस्य नित्यमेव स्वीकार इत्यभ्युपगन्तव्यं तथा च शब्देऽपि नित्यत्वापत्तिः तेन बाधः सत्प्रतिपक्षो वा तद्धेतुनाभासा चेयम्। एवमनित्यत्वं यदि नित्यं कथं शब्देऽनित्यतां कुर्यात् नहि रक्तं मञ्जिष्ठारञ्जनं परस्य नीलतां सम्पादयति अथाऽनित्यं तदा तदभावदशायां अनित्यत्वं न स्यादित्यादिकमूह्यम्। एतदनुसारेण लक्षणमपि कार्यमित्याचार्याः। वयन्तु अनित्यस्य भावो धर्मस्तस्य नित्यमभ्युपगमेऽनित्यत्वेनाभ्युपगतस्य नित्यत्वं स्यात् यथा क्षितिः सकर्तृकेत्यत्र अनित्यक्षितेर्धर्मः सकर्तृकत्वं त्वया क्षितौ नित्यसुपेयते न वा न चेत् तदा साध्याभावादंशतोबाधः अथ क्षितौ नित्यमेव सकर्तृकत्वं विरुद्धं तद्धेतुनाभासा चेयमिति ब्रूमः" इत्तिः।

"प्रतिषेध्ये नित्यमनित्यभावादनित्ये नित्यत्वोपपत्तेः प्रतिषेधाभावः" सू०

"अत्रोत्तरमाह। प्रतिषेध्ये सत्यत्वे शब्दे सर्वदा अनित्यभावात् अनित्यत्वात् अनित्ये शब्दे अनित्यत्वमुपपद्यते न हि सम्भवति अनित्यत्वं नित्यमस्ति अथ च तन्नित्यमिति व्याघातात् नच नित्यमिति सर्वकालमित्यर्थः तथा च शब्देऽनित्यत्वे कथं सर्वकालमनित्यत्वसम्बन्ध

इति वाच्यं सर्वकालमित्यस्य यावत्सत्त्वमित्यर्थात् अतः त्वदुक्तः प्रतिषेधो न सम्भवति मतान्तरे तु अनित्ये ऽनित्यत्वोपपत्ते हेतोरुत्पाद्यः प्रतिषेधः कृतः स च समवतीत्यर्थः" इत्तिः ।

"प्रयत्नकार्यानेकत्वात् कार्यसमः२४" सू० ।

"कार्यसमं लक्षयति । प्रयत्नकार्यस्य प्रयत्नसम्पादनीयस्यानेकत्वात् अनेकविधत्वात् । अयमर्थः शब्दोऽनित्यः प्रयत्नानन्तरीयकत्वादित्युक्ते प्रयत्नानन्तरीयकत्वं प्रयत्नकार्ये घटादौ प्रयत्नानन्तरोपलभ्यमाने कीलकादावपि दृष्टत्वात् द्वितीयं न तज्जन्यत्वसाधकं आद्ये तु असिद्धं तथा च सामान्यतउक्ते हेतोरनभिमतविशिष्टनिराकरणेन प्रत्यवस्थानं कार्यसमा२४असिद्धदेशनाभासा चेयम् । अथ वा प्रयत्नकार्याणां प्रयत्नकर्त्तव्यानां कर्त्तव्यप्रयत्नानामिति यावत् तादृशानां अनेकविधत्वात् युक्तान्यस्य व्याघातकत्तरं कार्यसमा तथा चाक्षा आकृतिगणत्वात् सूत्रानुपदर्शितानामपि परिग्रहः यथा त्वत्पक्षे किञ्चिद्दूषणं भविष्यतीति शङ्काऽपि शङ्का समा कार्यकारणभावस्योपकारनियतत्वे ऽनवस्थेत्यनुपकारसमा दृत्यादिः" इत्तिः ।

"कार्यान्यत्वे प्रयत्नाहेतुत्वमनुपलब्धिकारणोपपत्तेः" सू० ।

"अत्रोत्तरम् । शब्दस्य कार्यान्यत्वेऽकार्यत्वे प्रयत्नस्य वक्तृप्रयत्नस्य अहेतुत्वम् अकारणत्वम् इदञ्च तदा स्यात् यद्यनुपलब्धिकारणभावरणादिकमुपपद्यते न च तच्छब्देऽस्तीत्यर्थः । आकृतिगणपक्षे तु कार्याणां जातीनामन्यत्वे नानाविधत्वे इदमुत्तरं प्रयत्नस्य त्वदीयदूषणप्रयत्नस्य अहेतुत्वं असाधकत्वाभावः उपलब्धेः कारणस्य प्रमाणस्य निर्दोषवाक्यस्य वा उपपत्तिः निर्दोषवाक्याधीनोपपादनं तदभावात् तद्वाक्यस्य खण्डाघातकत्वादित्यर्थः" इत्तिः ।

१४असभावे जातिवैरम् जातिसुन्दरम् । जातिश्च प्रकारविशेषतया वा शब्दशक्तिज्ञानविषयः । तत्र प्राभाकरमते आकृतिव्यङ्ग्याया एव जातित्वं न गुणत्वादीनां नैयायिकमते तु अनुगतैकबुद्धिनियामकत्वात् नित्यत्वे सति अनेकसमवेतत्वरूपलक्षणयोगाच्च गुणत्वादीनामपि जातित्वमस्त्येव । "समानप्रसवात्मिका जातिः गो०सूत्रभाष्ययोस्तथैवोक्तेश्च । जातिशक्तिवादशब्दे च तद्ग्राह्यं द्रष्टव्यम् । अतएव "द्रव्यादिलिङ्कवृत्तिस्तु सत्ता परतयोच्यते । परभिन्ना तु या जातिः सैवापरतयोच्यते । द्रव्यत्वादिकजातिस्तु परापरतयोच्यते" भाषायामुक्तम् । छन्दोभेदश्च । "पद्यं चतुष्पदी ज्ञेयं वृत्तं जातिरिति द्विधा । वृत्तमक्षरसंख्यातं जातिर्मात्राकृता भवेत्" छन्दोमञ्जर्युक्तेः मात्राकृतं छन्दः । "इयमार्या तल्लीलाढ्या सद्वृत्ता जातिर्गाहिनी" छन्दोम० । वृत्तजातिभेदजातिविशेषजातिप्रभृतयश्च प्राचीनानामिदमर्थसंज्ञाभेदा लीलावत्यादौ दृष्टकर्मप्रकरणे द्रष्टव्याः । "सङ्केतो रूढते जातौ गुणद्रव्यक्रियासु च" काव्यप्र० । "वसन्तादयतः कश्चिदर्थः जातिक्रियागुणैः" माघः । ब्राह्मणादिजातौ "आत्मा कामयध्वोऽसि चरणं त्विदमुद्धृतम्" वेणीसं० "ब्राह्मणस्य ब्राह्मणयोर्ब्राह्मणानाञ्च संबंधे । प्रायश्चित्तस्य चैकत्वं जातिमाश्रित्य लक्ष्यते" प्रा०त० । जन्मनि "आचार्यस्तस्य यां जातिं विधिवद् वेदपारगः । उत्पादयति सावित्र्या सा सत्या साऽजराऽमरा" मनुः । आकारव्यङ्ग्ये "सङ्कर्षणमणिसूत्रायःकाष्ठवल्कलवाससाम् । अजातौ जातिकरणे विक्रेयाष्टगुणोदयः" याज्ञ० । १५जातिवाचकशब्दे च "षोटायुवतिस्तोककतिपयमट्टिहेनुयवावेहद्धयवीप्रवक्तृश्रोत्रियाध्यापकधूर्त्ताः जातिः" "कृत्यतुल्याख्या अजात्या" "जात्याख्यायामेकस्मिन् बहुवचनमन्यतरस्यात्"(ब्राह्मणाः पूज्याः ब्राह्मणः पूज्यः) "जातेरस्त्रीविषयादयोपधात्" इति च पा० ।

**जातिकोश(ष)** पु० न० जातेः जातीफलस्य कोशमिव । (जायफल) जातीफले भावप्र० "जातीफलं जातिकोशः मालतीफलमित्यपि । जातिफलं रसे तिक्तं तीक्ष्णोष्णं रोचनं लघु । कटुकं दीपनं प्राहि स्वर्यं श्लेष्मानिलापहम् । निहन्ति मुखवैरस्यमरुदौर्गन्ध्यव्रणव्यथाः । कृमिकासवमिश्वासशोथपीनसवह्निजः" भावप्र० । हेमचन्द्रे त्वयं मूर्द्धन्यवान् दीर्घमध्यश्च पठितः ।

**जाति(ती)कोषी** स्त्री जातिं जातिफलं कुष्णाति कुष-निकर्षे-अण् उप०स०गौरा० ङीष् । जातीफले राजनि० ।

**जातिधर्म्म** पु० ६त० । ब्राह्मणादीनां धर्मभेदे । स च भा० शा० ६० अ० दर्शितो यथा

"ब्राह्मणस्य तु यो धर्मस्तत्ते वक्ष्यामि केवलम् । इममेव महाराज! धर्ममाहुः पुरातनम् । स्वाध्यायाभ्यसनञ्चैव तत्र कर्म समाप्यते । तच्चेद्वित्तमुपागच्छेद्दर्पमानं स्वकर्मणि । अकुर्व्वाणं विकर्म्मणि यान्तं प्रज्ञानतर्पितम् । कुर्व्वीतापत्यसन्तानमथो दद्याद्यजेत च । संविभज्य हि भोक्तव्यं धनं सद्भिरितीर्य्यते । परिनिष्ठितकार्य्यस्तु

स्वाध्यायेनैव ब्राह्मणः। कुर्य्यादन्यत्र वा कुर्य्यान्नैत्यो ब्राह्मण उच्यते। क्षत्रियस्यापि यो धर्मस्तन्मे वक्ष्यामि भारत!। दद्याद्राजन्न याचेत यजेत न च याजयेत्। नाध्यापयेदधीयीत प्रजाश्च परिपालयेत्। नित्योद्युक्तो दण्डवधे रक्षे कुर्य्यात् पराक्रमम्। ये तु क्रतुभिरीजानाः श्रुतवन्तश्च भूमिपाः। य एवाहवजेतारस्त एषां लोकजित्तमाः। अवित्तेन देहेन समरादो निवर्त्तते। क्षत्रियो नास्य तत् कर्म प्रशंसन्ति पुराविदः। एवं हि क्षत्रबन्धूनां मार्गमाहुः प्रधानतः। नास्य क्रतुतमं किञ्चिदन्यद्दक्षिणवर्हणात्। दानमध्ययनं यज्ञो राज्ञां क्षेमं विधीयते। तस्माद्राजा विशेषेण योद्धव्यं धर्मगीप्सता। स्वेषु धर्मेष्ववस्थाप्य प्रजाः सर्वा महीपतिः। धर्मेण सर्वकृत्यानि शमनिष्ठानि कारयेत्। परिनिष्ठितकार्यस्तु नृपतिः परिपालनात्। कृयग्रोदन्यत्र वा कृयग्रोदैन्द्रो राजन्य उच्यते। वैश्यस्यापि हि यो धर्मस्तन्मे वक्ष्यामि शाश्वतम्। दानमध्ययनं यज्ञः शौचेन धनसञ्चयः। पितृवत् पालयेद्वैश्यो युक्तः सर्वान् पशूनिह। विकर्म तद्भवेदन्यत् कर्म यत् स समाचरेत्। रक्षया स हि तेषां वै महत् सुखमवाप्नुयात्। प्रजापतिर्हि वैश्याय सृष्ट्वा परिददौ पशून्। ब्राह्मणाय च राज्ञे च सर्वाः परिददे प्रजाः। तस्य वृत्तिं प्रवक्ष्यामि यच्च तस्योपजीवनम्। पञ्चानामेकां पिबेद्धेनुं शतात्र मिथुनं हरेत्। लब्धाच्च सप्तमं भागं तथाऽष्टङ्के कलाऽखुरे। शस्यानि सर्वबीजानामेषा सांवत्सरी श्रुतिः। न च वैश्यस्य कामः स्याच्च रक्षेयं पशूनिति। वैश्ये चेच्छति नान्येन रक्षितव्याः कथञ्चन। शूद्रस्यापि हि यो धर्मस्तन्मे वक्ष्यामि भारत!। प्रजापतिर्हि वर्णानां दासं शूद्रमकल्पयत्। तस्माच्छूद्रस्य वर्णानां परिचर्य्या विधीयते। तेषां शुश्रूषयैव महत् सुखमवाप्नुयात्। शूद्र एतान् परिचरेत्त्रीन् वर्णानानुपूर्वशः। सङ्कल्पांश्च न कुर्वीत जातु शूद्रः कथञ्चन। पापीयान् हि धनं लब्ध्वा वशे कृयग्रीदरीयसः। राज्ञा वा समनुज्ञातः कामं कुर्वीत धार्मिकः। तस्य वृत्तिं प्रवक्ष्यामि यच्च तस्योपजीवनम्। अवश्यभरणीयो हि वर्णानां शूद्र उच्यते। छत्रं वेष्टनमौशीरमुपानद्व्यजनानि च। यातयामानि देयानि शूद्राय परिचारिणे। अधोवस्त्राणि विशीर्णानि वसनानि द्विजातिभिः। शूद्रायैव प्रदेयानि तस्य धर्मधनं हि तत्। यच्च किञ्चिद्द्विजातीनां शूद्रः शुश्रूषुराप्नुयात्। कल्प्यां तस्य तु तेनाऽऽवृत्तिं धर्मविदो जनाः। देवः पितृश्चोऽनपत्याय भर्त्तव्यो दक्षदुर्बलौ। शूद्रेण तु न कर्त्तव्यो भर्त्ता कस्याञ्चिदापदि। अतिरेकेण भर्त्तव्यो भर्त्ता द्रव्यपरिक्षये। न हि स्वमस्ति शूद्रस्य भर्त्तर्हार्य्यधनो हि सः। उक्तस्त्रयाणां वर्णानां यज्ञस्तस्य च भारत!। स्वाहाकारवषट्कारौ मन्त्रः शूद्रे न विद्यते। तस्माच्छूद्रः पाकयज्ञैर्यजेताव्रतवान् स्वयम्। पूर्णपात्रमयीमाहुः पाकयज्ञस्य दक्षिणाम्। शूद्रः पैजवनो नाम सहस्राणां शतं ददौ। ऐन्द्राग्न्येन विधानेन दक्षिणामिति नः श्रुतम्। यथा हि सर्ववर्णानां यज्ञस्तस्यैव भारत!। अस्माः सर्वेषु यज्ञेषु श्रद्धायज्ञो विधीयते। दैवतं हि महच्छ्रद्धा पवित्रं यजताञ्च यत्। दैवतं हि परं विप्राः स्वेन स्वेन परस्परम्। अयजन्निह सत्तैस्तैः कामैः समाहितैः। संस्कृता ब्राह्मणैरेव त्रिषु वर्णेषु सृष्टयः। देवानामपि ये देवा यद्ब्रह्मयुक्ते परं हितम्। तस्माद्दर्वैः सर्वयज्ञाः संस्कृत्यन्ते न काम्यया। ऋग्यजुःसामवित्पूज्यो नित्यं स्याद्वेदवद्विजः।"

सङ्कीर्णजातिधर्म्मेषु मन्वाद्युक्तो जातिशब्दे दर्शितः "उत्साद्यन्ते जातिधर्म्माः कुलधर्म्माश्च शाश्वताः" गीता।

**जाति(ती)पत्री** स्त्री जातेः(त्रायाः) जातीफलस्य पत्री गौरा॰ ङीष्। (जायत्री) ख्याते गन्धद्रव्यभेदे "जातीफलस्य त्वक् प्रोक्ता जाति(ती) पत्री मिषग्वरैः। जाति(ती) पत्री लघुः स्वादुः कटूष्णा रुचिवर्द्धनात्। कफकासवमिश्वास-तृष्णाक्षमिविषापहा" भावप्र॰।

**जाति(ती)फल** न॰ जातिः(ती) तद्वामकं फलं, ६त॰ वा। (जायफल) गन्धद्रव्यभेदे ख्यातः।

**जातिबाधक** त्रि॰ ६त॰। जातेर्बाधके प्राचीननैयायिकोक्ते व्यक्तेरभेदादौ स च जातिशब्दे दर्शितः।

**जातिब्राह्मण** पु॰ जात्या जन्मना ब्राह्मणः। तपःस्वाध्यायरहिते ब्राह्मणे। "तपः श्रुतञ्च योनिञ्च त्रयं ब्राह्मणकारणम्। तपःश्रुताभ्यां यो हीनो जातिब्राह्मण एव सः" शब्दार्थचि॰ धृतवाक्यम्।

**जातिभ्रंश** न॰ पापभेदे। तत्स्वरूपप्रायश्चित्ते मनुनोक्ते प्रा॰ वि॰ व्यवस्थापिते च यथा।

"तत्र मनुः "ब्राह्मणस्य रुजः कृत्वा प्राणिरुद्वेजनयोः। जैह्म्यञ्च मैथुनं पुंसि जातिभ्रंशकरं स्मृतम्"। "जातिभ्रंशकरं कर्म कृत्वान्यतममिच्छया। चरेत् सान्तपनं कृच्छ्रं प्राजापत्यमनिच्छया"। रुजः कृत्वा पीड़ाकरणम्। अत्रेयं

चणुनादि जैक्ष्यं मित्रे लटिलत्वं पुंसि मैथुनं पुरुषे याम्य धर्मकरणम्। अत्र कामतः सान्तपनं तत्र धेनुद्वयम्। अकामतः प्राजापत्यं तत्र धेनुरेका। एतच्चाभ्यासे बोद्धव्यम्। रूढः लब्धे तत्र विशेषमाह मनुः "अवगुर्य चरेत् कृच्छ्रमतिकृच्छ्रं निपातने। कृच्छ्रातिकृच्छ्रं कुर्वीत विप्रमोक्षादृषावपि गोक्षितम्"। तथा याज्ञवल्क्यः "विप्रदग्धोद्यमे कृच्छ्रमतिकृच्छ्रं निपातने। कृच्छ्रातिकृच्छ्रोऽस्थिकृपाते काय्यौऽभ्यन्तरगोक्षिते"। अत्र दण्डशब्दः शस्त्रमपि लक्षयति। अतिकृच्छ्रे धेनुत्रयं कृच्छ्रातिकृच्छ्रे धेनुपञ्चकम्। यमः "कृच्छ्रातिकृच्छ्रं कुर्वीत चान्द्रायणमथाचरेत्। दश संख्याश्च गा दद्यादकृच्छ्रेदो यदा भवेत्"। अत्र द्विजाकृच्छ्रेदे व्रतद्वयस्य गोदानानाञ्च समुच्चयः। विशेषमाह डक्षसंहितः, "काष्ठादिना ताड़यित्वा स्वगभेदे कृच्छ्रमाचरेत्। अस्थिभेदेऽतिकृच्छ्रन्तु परार्कं चाङ्गकर्त्तने"।

**जातिमात्र** न० जातिरेव जाति+एवार्थे मात्रच्। स्वाध्यायादिहीने जन्ममात्रे "जातिमात्रेण किं कश्चिद्वन्द्यते पूज्यते क्वचित्" हितो०। "जातिमात्रोपजीवी वा कामं स्यात् ब्राह्मणव्रुवः"। "अव्रतानाममन्त्राणां जातिमात्रोपजीविनाम्। नैषां प्रतिग्रहो देयो न श्रिता तारवेश्मिनाम्" मनुः।

**जातिमाला** जातिविशेषग्रन्थके ग्रन्थभेदे।

**जातिवैर** न० जात्या स्वभावेन वैरम्। स्वभाववैरे यथा अहिनकुलयोः उपयमशब्दे योनिकूटप्रकरणे १२५५ पृष्ठदृश्यम्।

**जातिशक्तिवाद** पु० जातौ शक्तेर्वादः। शब्दानां जातौ शक्तिसमर्थके कथाभेदे स च वादः शब्दशक्तिप्र० पूर्वपक्ष विधया दर्शितो यथा

"ननु गामानयेत्यादौ गोत्वादिकर्मताकत्वेनैवानयनादेरन्वयधीर्गोत्वादिशक्तत्वेन पदज्ञानस्य गोत्वाद्यन्वयबुद्धिं प्रत्येव हेतुत्वात् सुवर्णकर्मत्वादौ स्वाश्रयवृत्तित्वसम्बन्धेनैव प्रकृत्यर्थस्य गोत्वादेः साकाङ्क्षत्वात् गवादिकर्मताकत्वेन बोधस्तूत्तरकालमाक्षेपात् कर्मत्वं गोवृत्ति गोत्वनिष्ठकर्मतात्वात्, आनयनं गोवृत्तिकर्मताकं गोत्ववृत्तिकर्मताकत्वादित्याद्यनुमानसाध्याच्च। न च वस्तुगत्या यद्गोत्वशक्तत्वं तज्ज्ञानस्य हेतुत्वे गोपदं जातिशक्तिमत्त्वेऽपदादपि शुद्धगोत्वस्यान्वयबोधापत्तिः गोत्वत्वावच्छिन्नशक्तत्वप्रकारकज्ञानत्वेन तथात्वे च लाघवाद्गोत्वावच्छिन्नशक्तताप्रकारकज्ञानत्वेनैव हेतुत्वं गोत्वत्वाद्यप्रवेशादितिवाच्यं गोपदं गोत्वशक्तिमत्त्वाकारकज्ञानत्वेन हेतुतायां शुद्धस्यैव गोत्वस्य विषयतासम्बन्धेन शक्त्यंशे विशेषणत्वेन गोत्वत्वादिप्रवेशगौरवस्यायोगात्। न हि समवायान्यसम्बन्धेन जातेः प्रकारतायां धर्मावच्छिन्नत्वनियमो मानाभावात् अयं गौरित्यादिव्यवसायोत्तरमिमं गोत्वेन जानामीत्याकारे तस्य ज्ञातताविशिष्टकानुमानेऽनुव्यवसाये वा व्यभिचाराच्च प्रागनुपस्थित्या गोत्वत्वादेस्तत्रोपनयायोगात्। एतेन जातेर्निरवच्छिन्नप्रकारत्वस्य समवायसंसर्गावच्छिन्नत्वनियमात् केवलस्य गोत्वादेः शक्त्यंशे विषयतया सुवर्णकर्मत्वांशे च परम्परया प्रकारत्वायोग इत्यपि प्रत्युक्तम्, उक्तस्थल एव व्यभिचारात्। न चैवं कालोगौः पदं गौरित्यादिप्रत्ययोऽपि प्रमा स्यात् कालिकादिसम्बन्धेन गोत्वादिमति तत्प्रकारकत्वादिति वाच्यं कालिकादिसम्बन्धेन गोत्वादेः प्रामाणिकस्य गोत्वत्वाद्यवच्छिन्नप्रकारतागर्भत्वेन तादृशमतेः प्रमात्वायोगात् अन्यथा घटत्वादिजातेः संस्थानसमवेतत्वमते संयोगो घट इत्यादिप्रतीतेः समवायेन प्रमात्वस्य दुर्वारतापत्तेः शाब्दस्येव प्रत्यक्षस्यापि कालोगौरित्यादिबोधस्य नियमतोगवाद्यभेदावगाहित्वेनैवाप्रमात्वसम्भवाच्चेति भट्टमतानुवर्त्तिनः।"

जातिशक्तिवादिप्रभाकरमतं च तत्रैवोक्तं यथा

"प्राभाकरास्तु गोत्वशक्तत्वेन ज्ञातं पदं तादृश्येव गोशब्दत्वावच्छिन्नं प्रत्येव हेतुरतोगोत्वशक्तिग्रहाच्च गोत्वेन गवयादेः न वा द्रव्यत्वादिना गोरन्वयधियोऽतिप्रसङ्गः। नचैवं जातेरिव व्यक्तेरपि शक्यत्वमावश्यकं न हि गवादिपदस्य शक्यत्वं जन्यत्वमपि तु जन्यशाब्दधीविषयत्वं तच्च गोत्वस्येव गोरप्यविशिष्टमिति वाच्यं गवादिपदधर्मिकस्वशक्तताज्ञानत्वावच्छिन्नशाब्दधीजनकतावच्छेदकत्वेन गोत्वादेरेव गवादिपदशक्यत्वात् गोत्वशक्ततायेष्यया गोशक्तत्वस्य गुरुतया तज्ज्ञानत्वस्य गोशाब्दं प्रति जनकतानवच्छेदकत्वात्। अतएवान्वयबुद्धेरात्मलाभत्वाद्यवगाहित्वेऽपि न तेषां पदशक्यत्वम्। वस्तु वा गोत्वादिशक्तत्वेन ज्ञातं पदं गोत्वादिशाब्दत्वावच्छिन्नं प्रत्येव हेतुर्विशेष्यतया तादृशशाब्दं प्रति समवायेन गोत्वस्य निरवच्छिन्नत्वकल्पनाच्च नातिप्रसङ्गः गोत्वादिना गवादेरिव गवादेर्गोत्वादिनान्वयबोधत्वावच्छिन्नं प्रत्यपि विनिगमकाभावेन गोत्वादिशक्तिज्ञानत्वेन हेतुत्वमपेक्ष्य गोत्वशाब्दत्वावच्छिन्नं प्रत्येव गोत्वस्य तच्छक्तत्वज्ञानस्य च द्वयोः कारणतायामेव लाघवात्, वस्तुतोगोत्वशाब्दं प्रति गोत्वशक्तिज्ञानमेव हेतुर्न तु गोत्वमपि जातिव्यक्तेरौत्सुल्य-

विच्छिवेद्यत्वनियमादेव गोव्यक्तीनामन्तर्हिण्यत्वसिद्धेः प्रमाणविरहादेव गोत्वादिना गवादिविषयत्वस्य तत्रासिद्धेश्च। यद्यपि जातेर्विषयत्वं तत्समवायिव्यक्तिविषयतानिरूपितमिति न व्याप्तिर्गोत्वाद्यालोचने कालोगोत्ववानित्यादिबोधे च व्यभिचारात् नापि जातेर्निरवच्छिन्नप्रकारतायास्तथात्वनियमः गौरयमित्यादिज्ञानस्य प्रत्यक्षे गोत्वेनेमं जानामीत्याकारे तथात्वात् तथाप्यन्वयबोधस्य निरवच्छिन्नगोत्वादिप्रकारत्वं गवादिविशेष्यतानिरूपितमेवेति व्याप्तिज्ञानदशविशेष्यताकत्वं विना शुद्धस्य गोत्वादेरन्वयबोधेनासंसर्गात् शुक्लां गोत्वेन गवयादिबोधस्यालीकत्वात्। अतएव गवादौ गोत्वादिप्रकारकोबोधः समवायेनैव सम्बन्धान्तरेणापि तत्प्रकारकः स्याद्गोत्वप्रकारतायां गोविशेष्यताकत्वस्यैव समवायावच्छिन्नत्वस्यापि व्याप्तिबलेन सिद्धावपि सम्बन्धान्तरावच्छिन्नत्वस्य प्रमाणविरहेणासिद्धेः। एवञ्च गोत्वादिशक्तिज्ञानत्वेन जनकतायां विषयतयावच्छेदकत्वाद्गोत्वादिरेव गवादिपदस्यार्थः गवादौ तद्व्यवहारस्तु तादृशावच्छेदकधर्मवत्त्वप्रयुक्तोगौणः। नचैवं गम्यादिधातोरपि गत्वादौ शक्तिर्न स्याद्गतित्वादिशक्तिज्ञानादेव तादृश्येव गत्वादेर्गम्यादिधातुतोबोधसम्भवादिति वाच्यं शुक्लां गतित्वादेः संख्यानाव्यङ्ग्यत्वेन जातित्वासम्भवात् उत्तरसंयोगाद्यवच्छिन्नक्रियात्वादुपाधिरूपे च तत्र स्वरूपतः शक्तिग्रहायोगात् सत्त्वस्य निरवच्छिन्नप्रकारत्वाभावात् निरुक्तक्रियात्वतावच्छिन्नशक्यतानिरूपितज्ञातताया एव हेतुतामपेक्ष्य लघुतया तादृशक्रियातावच्छिन्नशक्तिमत्त्वज्ञानत्वेनैव तथात्वौचित्यात् शुक्लत्वादिपूर्वोक्तस्य पतनत्वादेरखण्डत्वे पत्यादिधातूनामत्र शक्तत्वेऽपि लघुभावाच्च। पश्वादिपदानामपि गोत्ववल्लाङ्गूलादिपर्यवसिते पशुत्वादिमात्रे न शक्तिस्तत्तदसिद्धेरुत्तरं तन्मात्रस्यैवानुभवेन तदाश्रयस्यालाभात् लोमादीनां स्वाश्रयतुल्यविच्छिवेद्यत्वस्य लोमवल्लाङ्गूलवानेष इत्याद्यानुभवे व्यभिचारादिति प्राहुः।"

नैयायिकास्तु तदेतन्मतं पूर्वपक्षविधया व्यक्त्यादीनां केवलानां शब्दवाच्यतां निराकृत्य जातिविशिष्टस्यैव शक्यत्वं व्यवस्थापितं यथा गौः सूत्रे तद्भाष्ये च।

"तदर्थे व्यक्त्याकृतिजातिसन्निधानोपचारात् संशयः।" सू॰

"अविनाभावसन्निधिः सन्निधिः अविनाभावेन वर्त्तमानासु व्यक्त्याकृतिजातिषु गौरिति प्रयुज्यते तत्र न ज्ञायते किमन्तमः पदार्थः उत सर्व इति। शब्दस्य प्रयोगसामर्थ्यात्पदार्थावधारणम् न स्यात्" भाष्यम्।

"यावच्छब्दसमूहत्यागपरित्यहसंख्याहङ्गुपचयवर्णसमासानुबन्धानां व्यक्तावुपचाराद्व्यक्तिः" सू॰

"व्यक्तिः पदार्थः कस्मात् यावच्छब्दप्रभृतीनां व्यक्तावुपचारादुपचारः प्रयोगः। या गौस्त्रिशति या गौर्निषण्णेति नेदं वाक्यं जातेरभिधायकभेदात् द्रव्याभिधायकम्, गवां समूह इत्यभेदात् द्रव्याभिधानं न जातेरभेदात्, वैद्याय गां ददातीति द्रव्यस्य त्यागो न जातेरमूर्त्तत्वात् प्रतिक्रमानुक्रमानुपपत्तेश्च। परिग्रहः स्वत्वेनाभिसम्बन्धः, कौण्डिन्यस्य गौ ब्राह्मणस्य गौरिति द्रव्याभिधाने द्रव्यभेदात् सम्बन्धभेद इति उपपन्नमभिन्ना तु जातिरिति, सङ्घा दश गावो विंशतिर्गाव इति भिन्नं द्रव्यं सङ्ख्यायते न जातिरभेदादिति, हृद्विः कारणवतो द्रव्यस्यावयवोपचयः अवर्द्धत गौरिति निरवयवा तु जातिरिति, एतेनापचयो व्याख्यातः। वर्णः शुक्ला गौः कपिला गौरिति द्रव्यस्य शुक्लादियोगो न सामान्यस्य, समासः गोहितं गोसुखमिति द्रव्यस्य हितादियोगो न जातेरिति। अनुबन्धः सरूपप्रजननसन्तानो गौ र्गां जनयतीति तदुत्पत्तिधर्मत्वाद्द्रव्ये युक्तं न जातौ विपर्ययादिति। द्रव्यं व्यक्तिरिति हि नार्थान्तरम्, तस्य प्रतिषेधः।" भा॰ "न तदनवस्थानात्" सू॰

"न व्यक्तिः पदार्थः। कस्मादनवस्थानात् यावच्छब्दप्रभृतिभिर्यो विशेष्यते स गोशब्दार्थो या गौस्त्रिशति या गौर्निषण्णेति न द्रव्यमात्रमविशिष्टं जात्या विनाऽभिधीयते, किन्तर्हि जातिविशिष्टं, तस्माच्च व्यक्तिः पदार्थः एवं समूहादिषु द्रष्टव्यम्। यदि न व्यक्तिः पदार्थः कथं तर्हि व्यक्तावुपचार इति। निमित्तादतद्भावेऽपि तदुपचारो दृश्यते खलु" भा॰।

"सहचरणस्थानतादर्थ्यवृत्तमानधारणसामीप्ययोगसाधनाधिपत्येभ्यो ब्राह्मणमञ्चकटराजसक्तुचन्दनगङ्गाशाटकाक्षपरुषेष्वतद्भावेऽपि तदुपचारः" सू॰

"अतद्भावेऽपि तदुपचार इत्यतच्छब्दस्य तेन शब्देनाभिधानमिति, सहचरणात् यष्टिकां भोजयेति यष्टिकासहचरितो ब्राह्मणोऽभिधीयेत इति, स्थानात् मञ्चाः क्रोशन्तीति मञ्चस्थाः पुरुषा अभिधीयन्ते, तादर्थ्यात् कटार्थेषु वीरणेषु व्यूह्यमानेषु कटङ्करोतीति, वृत्तात् यमो राजा कुबेरो राजेति तद्वदत्रेति, मानात् आढकेन मिताः सक्तवः आढकसक्तव इति धारणात् तुलया धृतं चन्दनं

तुलाचन्दनमिति, सामीप्यात् गङ्गायां गावश्चरन्तीति यष्टिकोटेरेयोऽभिधीयते योगात् कृष्णेन रागेण युक्तः शाटकः कृष्ण इत्यभिधीयते, साधनात् कृष्णं प्राणा इति। आधिपत्यात् अयं पुरुषः कुलं अयं गोत्रमिति तत्रायं सङ्करव्यवहारोगाद्या जातिशब्दो व्यक्तौ प्रयुज्यत इति यदि गौरित्यस्य पदस्य न व्यक्तिरर्थोऽस्तु तर्हि।" भा०

"आकृतिस्तदपेक्षत्वात् सत्वव्यवस्थानसिद्धेः" सू०

"आकृतिः पदार्थः कस्मात् तदपेक्षत्वात् सत्वव्यवस्थानसिद्धेः। सत्ावयवानां तदवयवानाञ्च नियतोव्यूह आकृतिः तस्यां सङ्घातमात्रायां सत्वव्यवस्थानं सिध्यति अयं गौरयमश्च इति नाऽसङ्घातमात्रायाम्, यस्य सङ्घातात् सत्वव्यवस्थानं सिध्यति तं शब्दोऽभिधातुमर्हति सोऽर्थः इति नैतदुपपद्यते तस्य ज्ञात्वा योगस्तदत्र जातिविशिष्टमभिधीयते गौरिति। अवयवव्यूहस्य ज्ञात्वा योगः, कस्य तर्हि नियतावयवव्यूहस्य द्रव्यस्य, तस्मादाकृतिः पदार्थः। अस्तु तर्हि जातिः पदार्थः" भा०

"व्यक्त्याकृतियुक्तेऽप्यप्रसङ्गात्प्रोक्षणादीनां सह्ववके जातिः" सू०

"जातिः पदार्थः, कस्मात् व्यक्त्याकृतियुक्तेऽपि सह्ववके प्रोक्षणादीनामप्रसङ्गादिति। गां प्रोक्षय गामानय गां देहीति नैतानि सह्ववके प्रयुज्यन्ते कस्मात् जातेरभावात्। अस्ति हि तत्र व्यक्तिरस्याकृतिः यदभावात् तत्रासम्प्रत्ययः स पदार्थ इति।" भा०

"नाकृतिव्यक्त्यपेक्षत्वाज्ज्ञात्यभिव्यक्तेः" सू०

"जातेरभिव्यक्तिराकृतिव्यक्ती अपेक्षते नाऽसङ्घातमात्रायामाकृतौ व्यक्तौ जातिमात्रं सह्ववं सङ्घाते तस्माच्च जातिः पदार्थः इति। न वै पदार्थेन न भवितव्यम् कः खल्विदानीं पदार्थ इति" भा०

"व्यक्त्याकृतिजातयस्तु पदार्थः" सू०

"तुशब्दो विशेषणार्थः। किं विशिष्यं प्रधानाङ्गभावस्थानियमेन पदार्थत्वमिति। यदा हि भेदविवक्षा विशेषणत्वं तदा व्यक्तिः प्रधानमङ्गन्तु जात्याकृती। यदा तु भेदोऽविवक्षितः सामान्यगतिस्तदा जातिः प्रधानमङ्गन्तु व्यक्त्याकृती स्वीकृते तदेतदुक्तं भवतेष्वाकृतेषु प्रधानभाव उत्प्रेक्षितव्यः। कथं पुनर्ज्ञायते नानाव्यक्त्याकृतिजातय इति लक्षणभेदात् तत्र तावत्" भा०

"व्यक्तिर्गुणविशेषाश्रयो मूर्त्तिः" सू०

"व्यज्यत इति व्यक्तिरिन्द्रियग्राह्येति न सर्वं द्रव्यं व्यक्तिः। यो गुणविशेषाणां स्पर्शानानां मूर्त्तद्रव्यत्वसंस्काराणामव्यापिनः परिमाणस्याश्रयो यथासम्भवं तद्द्रव्यम्, मूर्त्तिः मूर्च्छितावयवत्वादि" भा०

"आकृतिर्जातिर्लिङ्गाख्या" सू०

"यया जातिर्जातिलिङ्गानि च प्रख्यायन्ते तामाकृतिं विद्यात्। सा च नाना सत्वानां तदवयवानाञ्च नियतव्यूहादिति नियतावयवव्यूहाः खलु सत्वावयवा जातिलिङ्गं शिरसा पादेन न गामनुभिन्दन्ति। नियते तु सत्वावयवानां व्यूहे सति गोत्वं प्रख्यायत इति। अनाकृतिव्यक्तिकायां जातौ सदृशवर्णं रजतमित्येवमादिप्रत्ययनिर्वर्त्तते जड्डाति पदार्थत्वमिति" भा०

"समानप्रसवात्मिका जातिः" सू०

"या समानां बुद्धिं प्रसूते भिन्नेष्वधिकरणेषु यया बह्वनीतरेतरतो न व्यावर्त्तन्ते योऽर्थोऽनेकत्र प्रत्ययानुवृत्तिनिमित्तं तत् सामान्यम्। यच्च केषाञ्चिद्भेदं कुतश्चिद्भेदं करोति तत् सामान्यविशेषो जातिरिति" भा०

शब्दशक्तिप्रकाशिकायामपि तदेतन्मतं समर्थितं यथा

"जात्यवच्छिन्नसङ्केतवती नैमित्तिकी मता। जातिमात्रे हि सङ्केताद्गवादौ भाति दुष्करम्" "यस्माज्जात्यवच्छिन्नसङ्केतवत् सा नैमित्तिकी संज्ञा यथा गोचैत्राः सा हि गोत्वचैत्रत्वादिजात्यवच्छिन्नमेव गवादिकमभिधत्ते न तु गोत्वादिजातिमात्रं गोपदं गोत्वे सङ्केतितमित्याकारकप्रहाद्गामानयेत्यादौ गोत्वादिना गवादेरन्वयानुपपत्तेः एकशक्तत्वपक्षस्याप्यानुभविकत्वेऽतिप्रसङ्गात्" ततःपरं प्राक्प्रदर्शितं भट्टमतं पुनरपि दूषितं यथा

"विनाप्याक्षेपं गामानयेत्यादितोगवादिकर्मताकत्वेनान्वयादेरन्वयबोधस्यानुभविकत्वात् गौर्गच्छतीत्यादौ सङ्गोत्वे गतिमत्त्वाद्यन्वयस्यानुभवेनाक्षर्णनात् गोत्वत्वाद्यनुपस्थित्या च गोत्वं गच्छतीत्याद्यनुभवस्यासम्भवात् स्वाश्रयवृत्तित्वसम्बन्धेन गतिमत्त्वादिहेतुना गवादौ साक्षात्सम्बन्धेन गतिमत्त्वाद्याक्षेपस्य व्यभिचारादिदोषेण दुःशकत्वाच्च। एतेन कर्मत्वादौ गोत्वादेः स्वाश्रयवृत्तित्वसम्बन्धेनान्वयबोधोत्तरं कर्मत्वस्य गोवृत्तित्वं गोवृत्तित्वं विनानुपपन्नमित्यनुपपत्तिधीसहकृतेन गामित्यादिवाक्येनैव कर्मत्वं गवीयमित्यौपादानिकोगवादिव्यक्तेर्बोध इति श्रीकरमतमप्यनादेयं सिद्धोविरुद्धाभ्यां शाब्दत्वार्थापत्तित्वाभ्यामवच्छिन्नबोधस्यानौत्सर्गिकत्वेन शब्दानुपपत्तिभ्यां सम्भूय तथाविधौपादानिकबोधस्य जनना-

योगाच्च। यत्तु गौर्ज्ञायते गौर्नश्यति सर्वत्र गोत्वादि-जातिशक्तेनैव गवादिपदेन लक्षणया गोत्वादिविशिष्टा व्यक्तिर्बोध्यते व्यक्तीनां बहुत्वेनान्वयलभ्यत्वेन च तत्र शक्तेरकल्पनात् तात्पर्यानुपपत्तेरपि लक्षणाया बीजत्वात् यदाङ्गैर्मखनाचार्याः "जातेरस्तित्वनास्तित्वे न हि कश्चिद्विवदति। नित्यत्वाद्बुद्धयपेक्षायां व्यक्तौ हि विप्रतिपत्तिः" इति तदपि तुच्छं व्यक्तिविनाकृतायां गोत्वादि-जातौ गवादिपदस्य सङ्केतप्रयोगाभावेन तन्मात्रस्यागत्यत्वे तद्धि गवादौ लक्षणाया वक्तुमशक्यत्वात् शक्यसम्बन्धस्यैव लक्षणात्वात्। न च गोरन्यो महिष इत्यादौ पञ्चम्यर्थेऽवधित्वे प्रतियोगित्वे वा स्वावच्छेदकत्वसम्बन्धेन शुद्धस्य गोत्वादेरन्वयात्तथाविधस्यैव जातौ सङ्केतप्रयोगः तत्र पञ्चम्याः स्वार्थेऽवधित्वादौ स्वनिरूपितगोत्वावच्छेदकत्वसंसर्गेण प्रकृत्यर्थस्य गवादेरन्वयबोधकत्वात् अन्यथा गोगोत्वयोर्भक्तिशक्तिभ्यां गोपदेन बोधने वृत्तिद्वययौगपद्यापत्तेः वस्तुतः शुद्धस्य गोत्वादेः शाब्दधीप्रकारतायाः समवायावच्छिन्नत्वनियमात्तस्यावधित्वादौ स्वावच्छेदकत्वादिसम्बन्धेनान्वयोदुर्घटः एव द्रव्यं घट इत्यादिप्रतीतेः समवायेन प्रमात्वानुरोधाद्दृत्तजातेर्नानात्वोपगमादिति"।

ततः परं प्रागुपदर्शितं प्राभाकरमतमुत्थाप्य दूषितं यथा

"शाब्दमतेर्गवादिव्यक्तयवगाहित्वमवश्यङ्गीकरणप्रयोज्यं अन्यधीविषयतायास्तत्प्रयोज्यत्वनियमादन्यथा पक्षधर्मक साध्यावगाहित्वादेरपि परामर्शादिप्रयोज्यता न स्यादनुमित्यादि सामान्यं प्रत्येव ज्ञानत्वादिना हेतुत्वस्य बाधवेनौचित्यात् पक्षतादिसहकृतपरामर्शाद्युत्तरज्ञानस्य तत्प्रकाशस्यैव वा पक्षे साध्यावगाहित्वनियमादेवानुमित्यादेः प्रतिनियतपक्षाद्यवगाहित्वसिद्धेः। किञ्च गोत्वशक्यत्वं न गोत्वसमर्थत्वं यस्य धीरन्वयधीहेतुरप्रसिद्धत्वात् नापि तद्बोधकमभिधानामकं पदार्थान्तरं तत्र मानाभावात् न वा गोत्वानुभवजनकत्वं पटादिपदस्यापि गोत्वशक्यत्वापत्तेस्तस्यापि गवादिपदाकाङ्क्षादिसाचिव्येन गोत्वानुभवजनकत्वात् न च गोत्वानुभवसामान्यं प्रति हेतुत्वन्तथा गवादिपदेऽप्यसत्त्वात् नापि गोत्वानुभवजनकत्वप्रकारकनित्यसङ्केतवत्त्वं तादृशसङ्केतवत्त्वमात्रं वा गोत्वशक्यत्वमिति साम्प्रतं, गोपदं गोत्वेन गवानुभवस्य जनकतया न सङ्केतितमित्यादिप्रश्नेऽपि तस्य पश्चाद्गोत्वेन गोरन्वयधीप्रसङ्गात् किन्तु गोत्वेन गवानुभवस्य जनकतया सङ्केतितत्वं तथा, तथा च पदधर्मिकतज्ज्ञानत्वेन गोत्वप्रकारकत्वाद्यं प्रति हेतुतायां गोत्वस्यैव तद्विशिष्टस्य गोरपि विषयविधयावच्छेदकत्वादवश्यं गोत्वादिविशिष्टो गवादिर्गवादिपदस्यार्थः"।

**जातिशब्द** पु० जातिवाचकः शब्दः। प्रकारविधया विशेष्यविधया वा जातिवाचके शब्दे हंसस्त्रगादिशब्दादौ। "चिह्नैर्वर्णैर्भेदैर्वृत्ते जातिशब्दोऽपि वाचकः" हेमच०।

**जातिशस्य** न० ६त०। (जायफल) सुगन्धद्रव्यभेदे शब्दार्थचि०

**जातिसङ्कर** पु० जात्योर्विरुद्धयोः सङ्करः। परस्परविरुद्धयोः (परस्पराभावसमानाधिकरणयोः) १जात्योरेकत्र समावेशे च जातिशब्दे जातिबाधकतया वैशेषिकस्तोपस्करे प्रदर्शितः। २वर्णसङ्करे विभिन्नजातिकाभ्यां मातापितृभ्यां सङ्कीर्णवर्णे च यथा मूर्द्धावसिक्ताम्बष्ठादि।

**जातिसार** न० ६त०। (जायफल) ख्याते पदार्थे राजनि०।

**जातिस्फोट** पु०व्याकरणमतसिद्धे स्फोटभेदे वैयाकरणभूषणसारे हि वर्णस्फोटः पदस्फोटः वाक्यस्फोटः अखण्डपदवाक्यस्फोटौ इति पञ्चविधस्फोटाः, पञ्च वर्णपदवाक्यभेदेन जातिस्फोटास्तय इत्यपि स्फोटा उक्ताः। तत्र जातिस्फोटत्रयं क्रमेण हरिणा दर्शितं यथा

"शक्यत्व एव शक्तत्वे जातेर्नावश्यमीक्ष्यताम्। औपाधिको वा भेदोऽस्तु वर्णानां तारमन्द्रवत्" अयं भावः। वर्णस्फोटवादावश्यकाः उक्तरीत्या च सोऽयं गकार इति यद् योऽयं गकारः श्रुतः सोऽयं ककार इत्यपि स्यात् स्फोटस्यैकत्वात् गकारोऽयं न ककार इत्यनापत्तेश्च। किञ्च स्फोटे गत्वाद्यभ्युपेयं न वा आद्ये तदेव गकारोऽस्तु वर्णनित्यतावादिभिरतिरिक्तगत्वानङ्गीकाराच्च। तथा चातिरिक्तस्फोटकल्पन एव गौरवम्। अन्त्ये गकारादिप्रतीतिविरोधः। वायुसंयोगहत्ति ध्वनिहत्ति वा वैजात्यमारोप्य तथा प्रत्यय इति चेन्न प्रतीतेर्विना बाधकं भ्रमत्वासम्भवात् अस्तु वा वायुसंयोग एव गकारोऽपि तस्यानीन्द्रियत्वं दोष इति चेन्नैवमुपपत्तेरिति कृतं स्फोटेन। तस्मादन्त्येव वर्णाः। परन्तु न वाचकाः गौरवात्। आद्यस्यधिकरणन्यायेन जातेरेव वाच्यत्वबहाचकत्वस्यापि युक्तत्वाच्च। इदं हरिपदमित्यनुगतप्रतीत्या हर्य्युपस्थितित्वावच्छेदेन हरिपदज्ञानत्वेन हेतुत्वात्तदवच्छेदकतया च जाति विशेषस्यावश्यकल्पत्वात्। न च वर्णानुपूर्व्यैव प्रतीत्यवच्छेदकत्वयोर्निर्वाहः घटघटत्वादेरपि संयोगविशिष्ट-

मदा आकारादिभिन्नत्वाभिद्यापत्तेः। तस्मात्सा जातिरेव वाचिका तादात्म्येनावच्छेदिका चेति। ननु शरीरस इत्यादौ जात्योः सत्त्वादर्थभेदबोधो न स्यादित्यत आह औपाधिको वेति। वा स्वर्वे उपाधिरानुपूर्वी सैव जातिविशेषाभिव्यञ्जकेति भेदः कारणीभूतज्ञानस्येति नातिप्रसङ्ग इति भावः। उपाधिप्रयुक्तज्ञानवैलक्षण्ये दृष्टान्तमाह वर्णानामिति। ननु जातेः प्रत्येकं वर्णेष्वपि सत्त्वात् प्रत्येकादर्थबोधः स्यादित्यत आह। "अनेकव्यक्त्यभिव्यङ्ग्या जातिः स्फोट इति स्मृता। कैश्चिद्व्यक्तय एवास्या ध्वनित्वेन प्रकल्पिताः।" अनेकाभिर्वर्णव्यक्तिभिरभिव्यङ्ग्यैव जातिः स्फोट इति स्मृता योगार्थतया बोधिकेति यावत्। एतेन स्फोटस्य नित्यत्वाच्चार्थबोधापत्तिरित्यपास्तम्। अयं भावः यद्यपि वर्णस्फोटपक्षे कथितदोषोऽस्ति तथापि पदवाक्यपक्षयोर्न, तत्र तस्या व्यासज्यवृत्तित्वस्य धर्मिग्राहकमानसिद्धत्वादिति। कैश्चिद्व्यक्तयोध्वनय एव ध्वनिवर्णयोर्भेदाभावादित्यभ्युपेयन्ते इति शेषार्थः। उक्तं हि काव्यप्रकाशे "बुधैर्वैयाकरणैः प्रधानीभूतस्फोटरूपव्यङ्ग्यव्यञ्जकशब्दस्य ध्वनिरिति व्यवहारः कृतः" इति।

ननु का सा जातिरित्यत आह। "सत्यासत्यौ तु यौ भागौ प्रतिभावं व्यवस्थितौ। सत्यं यत्तत्र सा जातिरसत्या व्यक्तयोमताः।" प्रतिभावम् प्रतिपदार्थम्। सत्यांशो जातिः असत्या व्यक्तयः। तत्तद्व्यक्तिविशिष्टं ब्रह्मैव जातिरिति भावः। उक्तञ्च कैयटेन "असत्योपाध्यवच्छिन्नं ब्रह्मतत्त्वं द्रव्यशब्दवाच्यमित्यर्थ इति"। "ब्रह्मतत्त्वमेव शब्दस्वरूपतया भातीति" च। कथं तर्हि ब्रह्मदर्शने च गोत्वादिजातेरप्यसत्त्वादनित्यत्वम्, सर्वात्मकैवेदं सर्वमिति श्रुतिवचनादिति कैयटः सङ्गच्छताम् अविद्या चाविद्यिको धर्मविशेषोवेति पक्षान्तरमादायेति द्रष्टव्यम्"।

**जातिस्मर** पु० जातिः स्मर्यतेऽत्र स्मृ—आधारे घञ्। तीर्थभेदे "ततो देवह्रदेऽरण्ये कृष्णवेनाजलोद्भवे। जातिस्मरह्रदे स्नात्वा भवेज्जातिस्मरो नरः" भा० व० ८५ अ०। जातिं पूर्वजन्मवृत्तान्तं स्मरति स्मृ—क्यच्। २पूर्वजन्मवृत्तान्तस्मारके त्रि०। तत् स्मरणहेतुकर्म च मनुनोक्तं यथा "वेदाभ्यासेन सततं शौचेन तपसैव च। अद्रोहेण च भूतानां जातिं स्मरति पौर्विकीम्"। "शुभेन कर्मणा तेन जाता जातिस्मरा मृगाः। त्रासानुत्पाद्य संविग्नास्ते काञ्चरे गिरौ" हरिवं २१ अ०।

**जाती** स्त्री जन—क्तिच् वा ङीप्। मालत्यां पुष्पप्रधानवृक्षे अमरः। पुष्पेऽपि स्त्री "पुष्पे जातीप्रभृतयः स्त्रीलिङ्गाः" इत्यमरोक्तेः। "जातिर्जाती च सुमना मालती राजपुत्रिका। चेतिका हृद्यगन्धा च सा पीता स्वर्णजातिका। जातीयुगं च तिक्तोष्णं व्रणदोषजित्। शिरोरुक्सुखदन्तार्त्तिविषकुष्ठानिलाक्षजित्" भावप्र०। "तत् कुङ्कुमं नेत्ररोगव्रणविस्फोटकुष्ठजित्" राजनि०।

**जातीय** त्रि० जातौ भवः छ। जातिभवे। अस्य किञ्चिदुपदादेव प्रयोगः सजातीयः विजातीयः तुल्यजातीयः।

**जातु** अव्य० जै—क्विप् जन—वा वा० क्नु। १कदाचिदित्यर्थे अमरः। "मनस्तु यं नोज्झति जातु यातु मनोरथः कण्ठपदं कथं सः" नैष०। "न जातु वैनायकमेकदन्तम्" माघः। "न जातु कामः कामानामुपभोगेन शाम्यति" मनुः २समावनायां २गर्हायाञ्च शब्दर०। गर्हार्थकेन जातुशब्देन योगे अन्यत्रकारबाधेन सर्वत्र खट्। "जातु निन्दसि गोविन्दमपि निन्दसि शङ्करम्" सुबो०। "जातु तत्रभवान् दर्शं याजयति"।

**जातुक** न० जातु गर्हितं कं जलमस्मात्। हिङ्गुनि शब्दच०

**जातुधान** न० जातु गर्हितं धानमभिधानमस्य। यातुधाने राक्षसे अमरटीकायां रमानाथः।

**जातुष** त्रि० जतुनो विकारः अण् सुक् च। जतुनिर्मिते। "यदाऽस्त्रौषं जातुषाद्वेश्मनस्तात्" भाः आ० १३ अ०।

**जातू** पु०जन-ड आतृ तूर्वति हिनस्ति तूर्व—क्विप् पूर्वपददीर्घः। वज्रे। "स जातूभर्मा श्रद्दधानः" ऋ०१।१०३।२। "जातू इत्यशनिमाचक्षते" भा०। व्युत्पत्तिस्तथैवोक्ता।

**जातूकर्ण** पु० ऋषिभेदे। स च अष्टाविंशतितमे द्वापरयुगे जातः यथोक्तं हरिवं० ४२अ० "नवमे द्वापरे विष्णोरष्टाविंशे पुराऽभवत्। वेदव्यासस्तथा जज्ञे जातूकर्ण्य पुरःसरः" स च उपकृतिकर्त्ता यथोक्तं हेमा० दा० खं० अङ्गिरसा "आवालिनांचिकेतस्य स्कन्दो लौगाक्षि कश्यपी। व्यासः सनत्कुमारस्य शतगुर्जनकस्तथा। व्याघ्रः काल्यायनश्चैव जातूकर्ण्यः कपिञ्जलः। बौधायनः कणादश्च विश्वामित्रस्तथैव च। उपकृतय इत्येताः प्रवदन्ति मनीषिणः"। ततो गर्गा० अपत्ये यञ्। जातूकर्ण्य तदपत्ये पुंस्त्री। स्त्रियां ङीप् यञोपौ। जातूकर्णी।

**जातूष्ठिर** त्रि० जातु कदाचित् स्थिरः वेदे वा० षत्वं ष्टुत्वे दीर्घश्च। सर्वदास्थिरे। "जातूष्ठिरस्य प्रवयः सहस्रतः"

ऋ० २।३२।१३। "जातूष्टिरस्य सर्वदास्तिरस्य" भा०।

**जातेष्टि** स्त्री जाते पुत्रजनने इष्टिः। पुत्रजन्मोत्तरं श्रुतिविहिते वैश्वानराख्ये इष्टिभेदे।

**जातेष्टिन्याय** पु० जैमिनिपूर्वमीमांसिते पितृकृतेष्ट्या पुत्रगतफलसूचके एकस्य काम्यत्वनैमित्तिकत्वसूचके न्यायभेदे स च न्यायो जै० प्रथमस्य चतुर्थे पादे यथा।

काम्येष्टिकाण्डे श्रूयते। "वैश्वानरं द्वादशकपालं निर्वपेत् पुत्रे जाते यदष्टाकपालो भवति गायत्र्यैवैनं ब्रह्मवर्चसेन पुनाति यन्नवकपालस्त्रिवृतैवास्मिंस्तेजो दधाति यद्दशकपालो विराजैवास्मिन्नन्नाद्यं, यदेकादशपालस्त्रिष्टुभैवास्मिन्निन्द्रियमादधाति यद्द्वादशकपालो जगत्यैवास्मिन् पशून् दधाति यस्मिन् जाते एतामिष्टिं निर्वपति स एव पूतो बलवान् तेजस्वी अन्नाद इन्द्रियावी पशुमान् भवतीति"। अत्राष्टादिसंख्यासामान्यात् पुरोडाशादीनां गायत्र्यादिरूपताकल्पना कृता द्वादशकपालेषु या संख्या तस्यामष्टत्वादिसंख्यानामन्तर्भावात् संख्यां निमित्तीकृत्याग्निहोत्रादिशब्दवत् अष्टाकपालादिशब्दाः कर्मनामधेयानीत्येकः पक्षः।

अयमनुपपन्नः तथा हि द्वादशकपालादिशब्दा न संख्यापराः किन्तु पुरोडाशद्रव्यपराः द्वादशकपालेषु संस्कृत इति व्युत्पत्तेः एवमष्टाकपालादिशब्दादयोऽपि तथा सति नामधेयस्य निमित्तत्वं नास्तीति चेत् पुरोडाशद्रव्यरूपगुणो विधीयतां न च द्वादशकपालं निर्वपेदित्युत्पत्तिविधिगृहीतद्वादशपुरोडाशविरुद्धत्वादष्टाकपालादेरनवकाश इति वाच्यं ब्रह्मवर्चसादिविशेषफलाय तद्विधीनासुपपत्तेरित्यपरः पक्षः।

अयमपि पक्षोऽनुपपन्नः अनेकगुणविधौ वाक्यभेदापत्तेः न च भिन्नान्येव वाक्यानि, द्वादशकपालं निर्वपेदिति विहितयागस्य यस्मिन् जाते एतामिष्टिमुपसंहारेण एकवाक्यत्वावगमात् द्वादशकपाल इतीष्टेर्नामधेयमिष्टिरंशो अष्टाकपालादिभिरंशैः स्तूयत इति सिद्धान्तः पक्षः। अत्र च पुत्रजन्मनिश्चयः, पुत्रस्य पूतत्वादिफलकामना चेति संवलिताधिकारः काम्यनैमित्तिकत्वात् अतः केवलपुत्रजन्मरूपनिमित्तनिश्चयवतः केवलपुत्रपूतत्वादिकामनावतो वा नाधिकार इति सुधीभिर्विभावनीयम्" तत्त्वबो०।

अनेन न्यायेन अन्यकृतकर्मणा अन्यस्य फलसाधनताऽपि सूचिता यथा पुत्रकृतश्राद्धेन पितुः स्वर्गादि फलं जन्यते एवं पितृकृतेष्ट्या पुत्रगतपूतत्वादिफलसिद्धिः। अतएव हेमाद्रिणा श्राद्धकल्पे अयमेव न्यायः पुत्रकृतश्राद्धेन पितुरुपकारकत्वे दृष्टान्ततयोक्तः।

**जातोक्ष** पु० जातः प्राग्दत्तस्तावस्वः उक्षा टच्समा०। युवद्वये दृढ जातत्वं प्राग्वत्सीवर्द्धभावत्वं प्राग्दत्तस्तावस्वत्वमिति यावत्

**जात्य** त्रि०जातौ भवः यत्। १कुलीने,२श्रेष्ठे,३काले च मेदि०। ४सुन्दरे जटाधरः "किं वा जात्याः स्वामिनो लुप्यन्ति" माघः। "जात्यस्तेनाभिजातेन शूरः शौर्य्यवता कृतः" रघुः। "सर्ववर्णेषु तुल्यासु पत्नीष्वक्षतयोनिषु। आनुलोम्येन संभूता जात्या जात्यास्त एव ते" मनुः।

**जात्यन्ध** त्रि० जातौ जन्मन्येवान्धः। जन्मान्धे "अनंशौ क्लीवपतितौ जात्यन्धबधिरौ तथा। उन्मत्तजडमूकाश्च ये च केचिन्निरिन्द्रियाः" मनुः।

**जात्यासन** न०"अथ जात्यासनं वक्ष्ये येन जातिस्मरो भवेत्। कृत्वाङ्घ्रियुग्मं भूमौ च गमनागमनं ततः" रुद्रयामलोक्ते आसनभेदे।

**जात्युत्तर** न० जात्या व्याप्तिविधुरसाधर्म्यवैधर्म्यादिना उत्तरम्। न्यायोक्ते असदुत्तरे तच्च चतुर्विंशतिविधं जातिशब्दे दर्शितम्।

**जान** पु०जन–भावे घञ् वेदे ह्रस्वः। १उत्पत्तौ "को वेद जान मेषाम्" ५।५२।१। "जानसुत्पत्तिम्" भा०। जनस्येदमण्। २जनसम्बन्धिनि त्रि०। "मरुते जानराज्यायेन्द्रस्येन्द्रियाय" यजु० ९।४०। स्त्रियां ङीप्।

**जानक** त्रि०जनकस्य पितुः तत्सम्बन्धस्येदं वा अण्। १पितृसम्बन्धिनि २जनकरूपसम्बन्धिनि च स्त्रियां ङीप्। सा च श्रीरामपत्न्यां सीतायाम् "सभोच जानक्यपि जानकीं न यः" माघः।

**जानकि** पु० जनकस्यापत्यम् इञ्। भारतप्रसिद्धे ऋषिभेदे। "विनाशनस्तु चन्द्रस्य य आख्यातो महासुरः। जानकिर्नाम विख्यातः सोऽभवन्मनुजाधिपः" भा० आ० ६७अ०। "जानकिश्च सुशर्म्मा च मणिमान् पोतिमत्यकः" भा०उ०३अ०।

**जानन्ति** पु० ऋग्वेदिभिस्तर्पणीये ऋषिभेदे। "जानन्ति वाडविगाय्यै गौतमशाकल्यबाभ्रव्यमाण्डव्यमार्कण्डेयाः" इत्युपक्रमे "ते सर्वे ऋषयस्तृप्यन्ति" आश्व०श्रौ०३।४।४।

**जानपद** पु० जानेन उत्पत्त्या पदाते पद–अण्। १जने लोकमात्रे "कृतप्रज्ञश्च मेधावी बुधो जानपदः शुचिः" भा० शा० ८३अ०। जनपद एव स्वार्थे अण्। २देशे च मेदि०। जनपदादागतः जनपदे भवो वा अण्। जनपदादागते २करादौ "स यथा महाराजो जान-

पदान् गृहीत्वा स्वे जनपदे यथाकामं परिवर्त्तते" शत० ब्रा० १४।५।१।२०। ४देशभवे च "देयं चौरहृतं द्रव्यं राज्ञा जानपदाय तु" याज्ञ०। ५देशे स्त्री ङीप् जानपदी अन्यत्र ङीप्। स्वरे भेदः। नियमपक्षे टाप् इति भेदः। वरणा० बहुत्वे अणो लुक्। जनपदाः।

**जानश्रुतेय** पु० जनश्रुतेः ऋषेरपत्यम् "इतश्चानिञः" पा० ढक्। जनश्रुतेरपत्ये औपविनामके राजर्षिभेदे "औपविनैव जानश्रुतेयेन प्रत्यवरोढम्" शत०ब्रा० ५।५।१।१।५।

**जानायन** पुंस्त्री जनस्य तन्नामकर्षेर्गोत्रापत्यम् अश्वा०फञ्। जननामकर्षिगोत्रापत्ये।

**जानु** न० जन-उण्। ऊरुजङ्घयोर्मध्यभागे (हांटु) स्वार्थे क अत्रैवार्थे अमरः। "निस्टह्य पारीसुभवेन जानुनोः" माघः। "ऊरू अरत्नी जानुनी विशोमेऽङ्गानि सर्वतः" यजु० २७८ "जानुकपिञ्जे चतुरङ्गुले च" ह्र०स०५८अ०

**जानुकारक** पु० रविपार्श्वगभेदे शब्दार्थचि०।

**जानुजङ्घ** पु० ऋषभेदे। "अनरण्यो नरपतिर्जानुजङ्घस्तथैव च" भा० अनु० १६५ अ०।

**जानुप्रहृतिक** न० जानुना प्रहृतं प्रहारस्तेन निर्वृत्तम् अत्तदूता० ठक्। जानुप्रहारनिर्वृत्ते मल्लयुद्धभेदे।

**जानुविजानु** न० खड्गयुद्धप्रकारभेदे तत्प्रकाराश्च हारि॰ग्रन्थे हरिवं० २१६ दर्शिता यथा

तत्र तावसिना युद्धं चक्रतुर्युद्धलालसौ। भ्रान्तसृष्टभ्रान्तमाविद्धं प्रविद्धं वञ्चनिःसृतम्। आकरं विकरं भिन्नं निर्म्मर्य्यादमसानुगम्। सङ्कुचितं कुलचितं सव्यं जानुविजानु च। आक्षिप्तं चिलकं चिप्रं कुद्रवं लवणं धृतम्। सर्वबाहुर्विनिर्बाहुः सव्येतरभवोत्तरम्। तिर्यग्बाहुरुरुबाहु च सव्योन्नतमुदासि च। पृष्ठतः पृथितञ्चैव यौधिकं पृथितं तथा। इति प्रकारान् हारि॰ग्रन्थकृतः खड्गयोधिनौ"।

**जानुहित** त्रि० जनैः हितं परिकल्पितम् पृथो०। जनपरिकल्पिते। "एतद्वै वा अस्य जानुहितं प्रज्ञातमवसानं यज्ञतुष्पथम्" शत० ब्रा० २।६।२।७। "जानुहितं जनैः परिकल्पितम्" भा०। [एव च" हरिवं २६ अ०।

**जान्य** पु० ऋषिभेदे। गार्ग्यः पृथुस्तथैवाग्ये जान्यो वामन

**जाप** पु० जप-घञ्। जपे मन्त्रोच्चारणे कर्म्मण्युपपदे अण्।

मन्त्रजापादयः मन्त्रादिजपकर्त्तरि त्रि०। [धरणिः।

**जापन** न०। चु० जप-भावे ल्युट्। १निरसने २निवर्त्तने च

**जाबाल** पु० जबालाया अपत्यम् अण्। सत्यकामे ऋषिभेदे जबालशब्दे उदा०। तेन दृष्टं साम अण्। २सामवेदीये उपनिषद्भेदे च उपनिषच्छब्दे १२२२ पृ० द्रष्टव्यम्। एतस्मिन् परे कर्म्मधारये महच्छब्दस्य प्रकृतिस्वरः महाजाबालः। महच्छब्दस्यान्तोदात्तः। तदीयस्वर एव न समासस्वरः।

**जाबालि** पु० जबालस्यापत्यम् इञ्। ऋषिभेदे स च उपस्मृतिकर्त्ता। जातूकर्ण्यशब्दे प्रमाणं द्रष्टव्यम्।

**जामदग्न्य** पु० जमदग्नेरपत्यम् गर्गा० यञ्। जमदग्नेऋषेरपत्ये परशुरामादौ। "तेजोभिर्गतवीर्य्यत्वात् जामदग्न्यो जडीकृतः" रामा० बा० ७७।१२। कण्वा० ततोऽण् वलोपः। जामदग्न तच्छात्रे।

**जामदग्नेय** पु० जमदग्नेरपत्यं पुत्रयविधौ तदन्तपक्षस्य प्रतिषेधेऽपि आर्षत्वात् "अग्निकश्यिभ्याम्" पा० ढक्। परशुरामे "भार्गवं जामदग्नेयं राजा राजविमर्दनम्" रामा० बा० ७४ अ०। [द्रष्टव्यम्।

**जामल** न०आगमशास्त्रभेदे। तस्य वर्ण्यादित्वमपि रुद्रजामले

**जामा** स्त्री जम-अदने बा० अण् स्त्रीत्वम्। दुहितरि। "अन्यत्र जामया सार्द्धं प्रजानां पुत्र ईहते। दुहितान्यत्र जातेन पुत्रेणापि विमिश्यते" भा० अनु०४६ अ०। "जामया कन्यया सार्द्धं पुत्रः पित्रे धनमीहते" इत्यर्थः नीलक०।

**जामातृ** पु० जायां माति मिनोति मिमीते वा निपा०। दुहितृपतौ, अमरः। २सूर्य्यपुत्रे, स्वामिनि च भेदि० उणादिषु निपातनसिद्धत्वेन हलन्तत्वाभावात् सर्वनामस्थाने परे न ढुक्। जामातरौ जामातरः इत्यादिः "ऋत्विक्सखियजामातृयाज्यश्वशुरमातुलाः" याज्ञ०। "विष्णुं जामातरं मन्ये"।

**जामि(मी)** स्त्री जम-इन् नि० ढुक्। १भगिन्यां २कुलस्त्रियां, अमरः ३दुहितरि, ४स्नुषायां, ५सन्निहितसपिण्डस्त्रियाम्, शब्दार्थचि० "जामयो यानि गेहानि शपन्त्यप्रतिपूजिताः" "शोचन्ति जामयो यत्र विनश्यत्याशु तत्कुलम्। शोचन्ति तु न यत्रैता वर्द्धते तद्धि सर्व्वदेति" मनुः। "अकृपतिसंवर्द्धनीयसन्निहितसपिण्डस्त्रियो जामय इति" कुल्लू० वा ङीप्। तत्रार्थे शब्दर०। "मातापितृभ्यां जामीभिर्भ्राता पुत्रेण भार्य्यया। दुहित्रा दासवर्गेण विवादं न समाचरेत्" भा० शा० २४२अ०। स्त्री ब० व०। ह्रस्वके ७अक्षुणौ निघण्टुः।

**जा(या)मित्र** न० "जा(या)मित्रं सप्तमं स्थानम्" ज्योतिषपरिभाषिते जन्मात् सप्तमे स्थाने। "तिथौ च जा(या)

मित्रगुणान्वितायाम् कर्म० । उपचारात् तिथेस्तत्त्वाच्छित्वम्

**जा(या)मित्रवेध** पापात् सप्तम्यानस्थचन्द्ररूपे योगभेदे । उपयमशब्दे दृश्यम् । "मूलत्रिकोणनिजमन्दिरगोऽथ पूर्णो मित्रर्क्षसौम्यसुहृदोऽथ तदीक्षितो वा जा(या)-मित्रवेधविहितानपहृत्य दोषान् दोषाकरः शुभमनेकविधं विधत्ते" ज्यो० त० ।

**जामिवत्** व० उदके निघण्टुः जामीत्यत्र पाठान्तरम् ।

**जामेय** त्रि० जाम्या भगिन्या अपत्यम् ढक् । भागिनेये हेम० ।

**जाम्बव** न० जम्ब्वाः फलं अण तस्य वा न लुप् । जम्ब्वाः फले आम्बवेन निर्वृत्तम् अरीहणा० वुञ् । आम्बवक तन्निर्वृत्ते त्रि० ।

**जाम्बवत्** पु० रामायणप्रसिद्धे ऋक्षराजभेदे । तस्यापत्यं स्त्री अण ङीप् । २तद्दुहितरि श्रीकृष्णपत्नीभेदे "वासुदेवस्तु निर्जित्य जाम्बवन्तं महाबलम् । तेभे जाम्बवतीं कन्यामृक्षराजस्य सम्मताम्" हरिवं० ३९ अ० "जाम्बवतीसहितं चारुसद्भावमब्रवीत्" भट्टिः ।

"ऋक्षराजस्य पुत्रोऽत्र महाप्राज्ञः सुदुर्जयः । पिता-महसुतत्वापि जाम्बवानिति दुर्जयः" रामा० । जाम्बवं तदाकारोऽस्यस्याः मतुप् मस्य वः पृषो० वलोपः ङीप् । ३नागदमन्यां स्त्री राजनि० । [नागदमन्याम् राजनि०]

**जाम्बवी** स्त्री जाम्बवं तदाकारोऽस्यस्याः अण् ङीप् ।

**जाम्बवौष्ठ** न० जाम्बवमिव ओष्ठोऽस्य । सुश्रुतोक्ते व्रणादि-दहनोपकरणभेदे "अष्टेमानि दहनोपकरणानि तद्यथा पिप्पलजाम्बवशल्लकोदुम्बरशलाकाजाम्बवौष्ठेतरतोभद्रा, द्वौद्रुपुङ्खे चेति च । तत्र पिप्पलजाम्बवशल्लकोदुम्बरशलाकास्वङ्गुलतानाम् । जाम्बवौष्ठेतरतोभद्रानि मांसगतानाम् । जाम्बोष्ठमध्यत्व "जाम्बोष्ठेनाग्निवर्णेन तप्तया वा शलाकया" "जाम्बोष्ठेनाग्निवर्णेन पश्चाच्छेदं दहेद् भिषक्" सुश्रु० ।

**जाम्बीर(ल)** न० जम्बीरस्य फलं अण् वेदे रस्य वा लः । १जम्बीरफले तदाकारे २जानुमध्यभागे च । "जाम्बीरेनारणम्" यजु० २५।१ । "जाम्बीरं जम्बीरतरो, फलं रत्नयोरभेदः । तदाकारेण जानुमध्यभागो जाम्बीरस्तेनारणदेवं प्रीणामीति" वेददी० ।

**जाम्बुवत्** पु० जाम्बवत्+पृषो० । ऋक्षराजे हिरूपको० ।

**जाम्बूनद** न० जम्बूनद्यां भवम् अण् । १स्वर्णे तन्नामनामके २कनकाह्वये धुस्तूरे च राजनि० ।

जम्बूनद्यां तदुत्पत्तिकथा जम्बूद्वीपशब्दे १०४५ पृ० भाग० च दृश्यम् । "दक्षिणेन तु नीलस्य निषधस्योत्तरेण तु । सुदर्शनो नाम महान् जम्बूवृक्षः सनातनः । सर्वकामफलः पुण्यः सिद्धचारणसेवितः । तस्य नाम्ना समाख्यातो जम्बूद्वीपः सनातनः । योजनानां सहस्रञ्च शतञ्च भरतर्षभ ! । उत्सेधो वृक्षराजस्तु दिवस्पृक् मनुजेश्वर ! । अरत्नीनां सहस्रञ्च शतानि दश पञ्च च । परिणाहस्तु वृक्षस्य फलानां रसमेदिनाम् । पतमानानि तान्युर्व्यां कुर्वन्ति विपुलं स्वनम् । सञ्छिन्ति च रसं राजन् ! तन्निबोधतसत्तमम् । तस्या जम्ब्वाः फलरसो नदी भूत्वा जनाधिप ! । मेरुं प्रदक्षिणं कृत्वा सप्तमायात्युत्तरान् कुरून् । तत्र तेषां मनः शान्तिर्न पिपासा जनाधिप ! । तस्मिन् फलरसे पीते न जरा बाधते च तान् । तत्र जाम्बूनदं नाम कनकं देवभूषणम्" भा० भी० ७अ० । "दक्षद्विरभितस्तटौ विकचपारिजाम्बूनदैर्-विनोदितदिनक्लमाः कृतरुचश्च जाम्बूनदैः" माघः "यदिदं निर्गतं तस्मात्तज्जाम्बूनदप्रभम् । काञ्चनं धरणीं प्राप्य स्थिरत्वमभवत्तदा" रामा० बा० ३८ अ० ।

**जाम्बूनदेश्वरी** स्त्री १देवीभेदे २तदीयस्थाने च शब्दार्थचि०

**जायक** न० जयति गच्छान्तरं जि-ण्वुल् । पीतवर्णे सुगन्धिकाष्ठरूपे गन्धद्रव्यभेदे अमरः ।

**जाया** स्त्री जायतेऽस्यां जनेर्यक् आत्वञ्च । १पत्न्यां विधिनोढायाम् अमरः । "पतिर्भार्यां संप्रविश्य गर्भो भूत्वेह जायते । जायायास्तद्धि जायात्वं यदस्यां जायते पुनः" मनुः "पतिः शुक्ररूपेण भार्यां संप्रविश्य गर्भतामापद्य तस्यां भार्यायां पुत्ररूपेण जायते । तथा च श्रुतिः "आत्मा वै पुत्रनामासीति । जायायास्तदेव जायात्वं यतोऽस्यां पतिः पुनर्जायते । तथाच ब्रह्मणम्, "पतिर्जायां प्रविशति गर्भो भूत्वेह मातरम् । तस्यां पुनर्नवो भूत्वा दशमे मासि जायते । तज्जाया भवति यदस्यां जायते पुनः । ततश्चासौ रत्नचीयेत्तदर्धं नाम निर्वचनम्" कुल्लू० । "अथ प्रजानामधिपः प्रभाते जायाप्रतिग्राहितगन्धमाल्याम्" रघु० "कः सन्नद्धे विरहविधुरां त्वय्युपेक्षेत जायाम्" मेघः । २ज्योतिषोक्ते लग्नावधिकसप्तमस्थाने । तत्र स्थाने जायायाः शुभाशुभचिन्तनीयत्वात् तथात्वम् । बहुव्री० जायाशब्दस्य निरु० । युवतौ जायायाञ्च युवजानिः "युवजानिर्धृतस्त्रियाम्" भट्टिः । पतिशब्देन हन्ते तस्याः जम् दम् वा भवति । जम्पती दम्पती वा पक्षे जायापती ।

जायाघ्न पु॰जायां हन्ति "जायायां हन्तेरुपसंख्यानम्" प॰तत्पु॰ ष॰। हन-टक्। जायाहननसूचकनक्षत्रयुक्ते भत्रिरि। "अमतुष्प्रकर्तृके च" पा॰टक्। २तिलकालके त्रि॰कौ॰ तस्य जायाहननसूचकत्वात् तथात्वम्। एवं ज्ञतिघोक्ते २योगभेदे च "यावतः सप्तविंशतिसदनसदनसावकोनां विरामः" इत्युक्तयोगस्य जायानाशसूचकत्वात् तथात्वम्।

जायाजीव पु॰ जायया तद्भर्तृसङ्गत्या जीवति-क्विप्। भटे अमरः। [१भटे २वकवृक्षे च मेदि॰।

जायानुजीविन् पु॰जायया अनुजीवति अनु+जीव-णिनि।

जायिन् त्रि॰ जि-णिनि। १जयशीले "अफलं जन्म तस्याहं मन्ये दुर्जातजायिनः" भा॰व॰ २५अ॰ "जायीतनाम्ना ध्रुवको द्वाविंशत्यक्षरान्वितः। सङ्क्षिप्तेन तालेन ब्रह्मादेऽसौ रसे" सङ्गीतदा॰उक्ते २ध्रुवकभेदे पु॰। तत्र जायीति पाठान्तरम्। स्त्रीलार्थे तु ङीनि जयीत्येव।

जायु पु॰जरति रोगान् जि-उण्। १ वैद्यके अमरः। २जयशीले त्रि॰। "मखाद्यमितो जायोरणे" ।।११८।२। "अरेष्ठ आयुर्मर्त्तेषु" ऋ॰ १।६७।११

जायेन्य(या)न्य पु॰ त्रि-वा॰ ए (या) न्यत्। जयशीले "यो हरिषा जायान्योऽङ्गभेदो विग्रलकः" ऋय॰१८।४४।२। तैत्तिरीये तु जायेन्य इति पाठः।

जार पु॰ जीर्यत्यनेन जॄ-करणे घञ्। १उपपतौ अमरः। "मूढो यदर्थावै जारो न पोषमनुमन्यते" यजु॰२३।२१। "जारं चौरमिवद्यूतं दाधः पञ्चशतं दमम्" याज्ञ॰। वा॰ कर्त्तरि घञ्। २जारके च। "ऊषारं जारो अभ्येति पश्चात्" ऋ॰१०।३।२। "जारोजरयिता" भा॰।

जारज पुंस्त्री जारात् उपपतेर्जायते जन-ड। कनिष्ठुक्रायां स्त्रियां १उपपतिजाते (वेजन्दा) पुत्रे २तथाभूतकन्यायां स्त्री "अस्ते जारजः कुण्डः स्ते भर्त्तरि गोलकः" अमरः। जन-क्त ५त॰। जारजातादयोऽत्र। "अनियुक्तासुतश्चैव प्रतिषिद्धाप्रसूत देवरात्। उभौ तौ नार्हतो भागं जारजातककामजौ" मनुः।

जारजयोग पु॰ जारजस्य सूचको योगः। ज्योतिषोक्ते योगभेदे। "न लग्नमिन्दुश्च गुरुर्निरीक्षते न वा यमाङ्कं रविणा समायुतम्। सप्तार्कजोर्केन्दुयुतोऽथवा शशी परेण जातं प्रवदन्ति निश्चयात्। लग्नादर्क्षं संयोगात् द्वितीया द्वादशी यदि। सप्तमो चार्कमन्दारे जायते जारजो ध्रुवम्"। अन्योऽपि योगः ज्ञेयो जातकोक्तः जातकशब्दे २०पृ॰ दृश्यः।

जारण पु॰ जारयति जॄ-णि-ल्यु। जारके १द्रव्यभेदे। जार्यतेऽनेन जॄ-णिच् करणे ल्युट्। २जारयत्यनेन द्रव्यभेदे। कर्त्तरि ल्यु। ३जीरके स्त्रीत्वे ङीप् राजनि॰। भावे-ल्युट्। ४जीर्णतासम्पादने न॰।

जारतिनेय पु॰स्त्री जरत्या अपत्यम् ढक् कल्याणा॰ढनङ्। १जरत्या अपत्ये। जरतिनोऽपत्यं शुभा॰ढक्। २जरतिनोऽपत्ये च। [पोषके।

जारभर पु॰जारं बिभर्त्ति भृ-पचा॰ अच्। जारजारित त्रि॰जॄ-णिच्-क्त। १बोधिते २मारिते धात्वादौ।

जारी स्त्री जॄ-णिच्-ङ्वनिप् गौरा॰ ङीष्। (जाड़ी) ख्याते औषधभेदे मेदि॰।

जारु पु॰ जॄ-उण्। १जरायौ। "बीजानीतरयोनि चेतराणि चाण्डजानि च जारुजानि च स्वेदजानि च चोद्भिज्जानि" ऐत॰ उ॰। "जारुजानि जरायुजानि मनुष्यादीनि" भाष्यम्। २जारके त्रि॰।

जारुधि पु॰जारुर्जारको द्रव्यभेदो धीयतेऽस्मिन् धा-आधारे कि उप॰स॰। सुमेरोः कर्णिकाकेसरभूते पर्वतभेदे। "क्रकुच कुरर कुमुद वैकङ्क विकुट शिखर पतङ्ग रुचक निषधशितिवास कपिल शङ्ख वैदूर्य जारुधि हंसऋषभ नागकालञ्जर नीरदादयो गिरयो मेरोः कर्णिकाया इव केसरभूता मूलदेशे परित उपक्लृप्ताः" भाग॰५।१६।२२।

जारुथी स्त्री जरुथेन असुरविशेषेण निर्वृत्ता अण् ङीप्। नगरीभेदे "जारुथ्यामासुतिः क्राथः शिशुपालोऽजनैः सह" भा॰व॰२२अ॰। "जारुथ्यां नगर्याम्" नीलक॰ "जारुथ्यामासुतिः क्राथः शिशुपालश्च निर्जितः" हरिवं॰१६ अ॰।

जारुथ्य त्रि॰जरुथं मांसं स्तोत्रं वा तदर्हति अत्र। १मांसदानयुक्ते २स्तोत्रार्हे च "दशाश्वमेधावाजह्रु जारुथ्यान् स निरर्गलान्" भा॰व॰१८अ॰। "जारुथ्यान् त्रिगुणदक्षिणा नित्यर्त्विजमिमम्" तद्धिन्यं जरुथ्यामृचश्चस्तुवा दक्षत्रे अथनि जरुथं मांसमिति शाब्दिकाः तथा च मांसमयान् मांसादिदानप्रधानान् पुष्टानित्यर्थः। जरुथोऽसुरविशेषः इति वेदभाष्यम्। अत्र जरतेः स्तुत्यर्थस्य शब्दसाधुत्वादयौ विरोधाच्च जरुथं स्तोत्रमुच्यत इति जारुथ्यान् स्तोत्रार्हानित्यर्थः" नीलक॰। जारुथशब्दकल्पनं ग्रामादिकमेव।

जाल पु॰न॰जल-घञ् यद्वा॰ ण, पु॰ जल-संवरणे कर्त्तरि अच् वा। १मत्स्यबन्धनिर्मिते मत्स्यग्राह्यादौ पदार्थे अमरः "अभ्याययुश्च तं देशं निषिदा जालकर्मिणः। जालं ते

योजयामासुर्निःशेषेण जनाधिप !" भा० अनु० ६०अ० । २मत्स्ये २४मूढे च अस्फुटफलादौ ४चारके (जालि) । ६दम्भे मेदि० मत्स्यो मत्स्यबन्धिर्वं तत्र "मत्स्यजालैरभिविष्यन्त्यः" भट्टिः समूहे "नीहारजालमलिनः पुनरुक्षसन्द्राः" "करजालमस्तसमयोऽपि सताम्" माघः "गवाक्षजालप्रतिमां रविभासः" किरा० ६दन्द्रजाले हेम० ७कदम्बवृक्षे पु० मेदिनिः ।

**जालक** पु० जालमिव कायति के-क । १मत्स्यबन्धे हेमच० । स्वार्थे क । २जालशब्दार्थे । "मक्षिकाः मशकान् केशान् जालकानिव पश्यति" सुश्रु० ३चारके पु०स्त्री स्त्रियां ङीप् शब्दार्थचि० । ४जालवृक्षे मेपलोम्नि च ।

**जालकारक** पु० ज्ञ-ण्वुल् कृत० । जालस्य मक्षिकादिघातनाय जालाकारस्य कारके-मर्कटे (माकड़सा) हेमच० यत्नेन कृतिमस्य २कर्त्तरि त्रि० । यत्नेन कृतपदार्थस्य स्वरूपाच्चकत्वेन जालतुल्यकरणात्तस्य तथात्वम् ।

**जालकि** पु० त्रिगर्त्तप्रभृत्यन्तर्गते आयुधजीविभेदे । "आञ्जिगर्त्तमत्स्यांस्तु कौरुखोपरयदाखिकिः। क्रोष्टुकिर्जालमालिश्च मल्लयुद्धोद्यताजकिः" । स्त्रि०कौ० ततः स्वार्थे क । जालकीय तद्वर्त्ते । बहुषु लुक् । जालकय इत्येव ।

**जालकिनी** जालमिव कायति के-क जालकं देहलोमतदभ्यस्ताः इनि ङीप् । १मेष्यां त्रिका० २मेघे ३० ।

**जालकीट** पु० जाले पतितः कीटोऽस्य । मर्कटे लूतायां (माकड़सा) तदीयजाले मशकादीनां पतनात्तस्य तथात्वम् । जालकीटे भवः पक्षाद्या० अण् । २तद्भवे त्रि० ।

**जालचौर्य्य** न० जाले जालके चौरं तत्र साधु यत् । चौरविषे ढक्षभेदे । स्थावरविषोपक्रमे "कुसुदन्नी खुरी जालचौर्याणि स्तोणि चौरविषाणि" सुश्रुतः ।

**जालगर्द्दभ** पु०क्षुद्ररोगभेदे । क्षुद्ररोगशब्दे २२८२पृ०दृश्यम् ।

**जालगोणिका** जालमिव गोणो यत्र कप् ह्रस्वः । दधिमन्थनभाण्डे त्रिका० ।

**जालन्धर** पु० दैत्यभेदे "पुरा जालन्धरं दैत्यं समभि परिकल्पनम् । पादाङ्गुष्ठस्य रेखातश्चक्रं क्षुद्रा क्षुरोऽहरत् । तच्च चक्रं मया लब्धं नेत्रपद्मार्चनात् विभोः । सुदर्शनाख्यं दैत्यचक्रविमर्द्दनम्" काशी० २१अ० प्रुवं प्रति विष्णोरुक्तिः । २त्रिगर्त्तदेशे पु० तद्देशस्य तेन कृतत्वात् तथात्वम् । सोऽभिजनोऽस्य अण् । पित्रादिपरम्परया २तद्देशवासिनि । बहुषु तस्य लुक् ।४चक्रभेदे पु० ततः तस्य० गोत्रापत्ये फक् । जालन्धरायण तद्गोत्रापत्ये पुंस्त्री० । जालन्धरायणस्य विषयो देशः राजन्या० दुञ् । जालन्धरायणक तस्य परिषीलिते देये पु० ।

**जालपाद** पु० जालमिव पादोऽस्य हस्वादि० मान्यलोपः । १हंसे । "जालपादभुजौ तौ तु पादयोश्चक्रचक्रिणौ" (नरनारायणौ) भा० शा० ३१४६ अ० । "प्रतुदान् जालपादांश्च कोयष्टिनखविष्किरान्" मनुः "जालपादान् खड्गरीटानन्तर्जातांश्च सर्वशः" याज्ञ० तस्याप्रभक्ष्यं निषिद्धवान् । स्त्रियां कुम्भपद्मा० अन्यलोपे ङीप् पादः पद्म । जालपदी हंसास्तरणादिगणे जालपदीत्यत्र जालपदीति पाठान्तरे जालपद्मा बहुरभवो देशः तरणा० अण् । जालपद तस्मा बहुरभवदेशे त्रि० पूर्वोक्तस्य लोपः । जालपादु हंसे त्रिका० ।

**जालप्राया** स्त्री जालस्य प्रायो बाहुल्यं यस्याम् । क्षीरमशाङ्कुरचिह्नां (साजोया) हेमच० ।

**जालमालि** पु० आयुधजीविभेदे । ततः स्वार्थे क । तद्वर्त्ते जालकिशब्दे दृश्यम् ।

**जालवर्त्तुरक** पु० जालाकारो वर्त्तुरकः । (काँटावाला) वृक्षभेदे । "जालवर्त्तुरको रूक्षो वातरोगकफापहः । पित्तदाहकरश्चोष्णः कषायश्च प्रकीर्त्तितः" राजनि० ।

**जालसरस** न० नित्यक० अच् समा० । सरोवरभेदे ।

**जालहृद** त्रि० जलप्रचुरो हृदः तत्र भवः तस्येदं वा शिवा० अण् ।१जलप्रचुरहृदभवे २तत्सम्बन्धिनि च स्त्रियां ङीप् ।

**जालाक्ष** पु०जालमिवाक्षि यत्र समा० । मत्स्ये "हेमजालाक्षनिर्भिन्नकङ्कवेनायुरुगन्धिना" भाग० ८।५।६ ।

**जालाघ** न० भेषजभेदे "जालाघेषाभिधित्सत जालाघेषोपधित्सत । जालाघसुखं भेषजं तेन नो मृड जीवस" ऋक० ६।५७।२ ।

**जालिक** पु० जालेन चरति चर्या० ठन् । जालेन जीवति वेतना० ठञ् वा । १जालजीविनि जालेन २चारिणि वा ३कैवर्त्ते त्रिका० ४मर्कटे हेमच० । ५जालजीविनि यायुरिके मृगबन्धनार्थं जालपातिनि मृगयुभेदे अमरः। वर्त्तनि स्त्रियां ङीप् इति भेदः । जालमस्यस्य ठन् । ६जालोपजीविनि यामजालिनि च त्रि० हेमच० ।

**जालिका** स्त्री जाल+अस्यर्थे ठन् । १वस्त्रभेदे स्त्रीणां वस्त्रावरणवस्त्रे २गिरिसारे ३जलौकायां ४विधवायां योधानामङ्गरचिताङ्गरक्षणां (साजोया) च मेदि० । (जालि) ५चारके शब्दार्थ० ।

**जालिनी** स्त्री जाल+अस्यर्थे इनि ।१चित्रशालादां हेमच०

२कोशातकीढले राजनि०। कोशातक्यां रत्नमा०। ४प्रमेहरोगिणां पिड़कभेदे सुश्रु०। "तत्र वसामेदोऽभ्यामभिपन्नशरीरस्य त्रिभिर्दोषैर्वेषानुगतधातोः प्रमेहिणो दश पिड़का जायन्ते। तद्यथा शराविका सर्षपिका कच्छपिका जालिनी विनता पुत्रिणी मसूरिका अलजी विदारिका विद्रधिका चेति। शरावमाला तदूपा निम्नमध्या शराविका१। गौरसर्षपसंस्थाना तत्प्रमाणा च सर्षपी२। बदराऽम्ल कूर्मसंस्थाना श्लक्ष्णा कच्छपिका३ बुधैः। जालिनी४ तीव्रदाहा तु मांसजालसमावृता। मङ्गती पीड़का नीला पिड़का विनता५ स्मृता। मसूरसमसंस्थाना श्लक्ष्णा सा तु मसूरिका७। रक्ता सिता स्फोटवती दाहपाकसमन्विता भवेत्। विदारीकन्दवद्वृत्ता कठिना च विदारिका८। विद्रधेर्लक्षणैर्युक्ता श्लक्ष्णा विद्रधिका९ बुधैः" सुश्रुतः।

**जाली** स्त्री जालमस्त्यस्याः अच् गौरा०ङीष्। १ज्योत्स्नायां (झिङ्गा) अमरः२पटोले राजनि०। (जालि)३चारके च।

**जाल्म** त्रि०पु०जल-बा०म। १पामरे२क्रूरे ३अयसीपुष्पकारिणि च मेदि० "त्वयि पूजयं जगति जाल्म!" माघः "क्षणं विश्राम्यतां जाल्म! स्कन्धस्ते यदि बाधति। न तथा बाधते स्कन्धो यथा बाधति बाधते" उद्भटः। "जनान् योऽभिभवत्यन्यात् कर्मणा हि स वै पुमान्। नत्वेवजाल्मौ कापाकौ इतिमेवतमर्हसि" भा०आ०१२२अ० स्वार्थे क। तत्रार्थे "त्रिलवङ्गपुरद्वेषी जाल्मकः सुविगर्हितः" भा० द्रो० १६६ अ०।

**जाल्य** पु० जल-ष्यञ्। शिवे "मतङ्गो जलचरो जाल्योऽकलः केवलकलः कलिः" भा०आ०२८६अ० शिवसुतौ।

**जावन्य** न० जवनस्य भावः दृढ़ा० वा ष्यञ्। वेगे। पक्षे इमनिच् जवि-मनु पु०, तस्य जवनता स्त्री, तस्य जवनत्व न० तत्रार्थे। [देशादौ।

**जावायनि** त्रि० जव+चतुरर्थां फक्० फिञ्। जवयुक्त-

**जावक** न० जाप्यक+पृषो०। जापके कालीयनामगन्धद्रव्ये अमरटीकायां संसारसुन्दरी।

**जास्कन्द** पुंस्त्री पक्षिभेदे। "अनिङ्गरा जाष्कन्दा स्टप्राः श्येनाः पतत्रिणः" ऋ०१।१८।१।

**जास्पति** पु० जायते जन-ड+जायाः इङ्गितः पतिः वेदे नि०। जामातरि "यद्मन्नास्पतिं वा" ऋ०१।१८५।८। "जाः स्त्रियः तासां पतिं जामातरम्" भा०।

**जास्पत्य** न० जाया च पतिश्च जायापती तयोर्भावः कर्म वा ष्यञ् पृषो०। जायापत्योः १कर्मणि "मं जास्पत्यं सुयममा" ऋ०५।२८।३ "जास्पत्यं जायापत्योः कर्म" भा०।२तद्भावे च।

**जाहक** पु० दह-ण्वुल् पृषो०। (घोड़ू) इति ख्याते १खने, २माञ्जारे, ३खट्टायां ४काकृण्डिकायां मेदि०। ५विशेषजन्तुभेदे राजनि० "जाहकाख्यशकोकृगोधानां कीर्त्तनं शुभम्" हरिवं० ८५अ०।

**जाहुष** पु० राजभेदे "परिक्षिद् जाह्नवं विन्वतः" ऋ० १।११६।२०। "जाह्नवः कश्चित् राजा" भा०।

**जाह्नवी** स्त्री जह्नु+यञ् ङीप्। "जानुदारा पुरादानां जह्नुः संपोष कोपतः। तस्य कन्यास्वरूपा च जाह्नवी तेन कीर्त्तिता" इत्युक्तनिर्वचनायां गङ्गायाम्। जह्नुयज्ञे १०८।पृ० दृश्यम् "ज्यैष्ठे मासि सितसप्तदिने शुक्लपक्षे दशम्यां हस्ते शैलाद्गिरगमदियं जाह्नवी सर्व्वलोकम्" ति०त० शङ्खः तस्यां तिथिविशेषे स्नानफलं यथा "सामान्यदिवसस्नानसङ्ख्यं शृणु सुन्दरि!। पुण्यं दशगुणञ्चैव मौषलस्नानतः परम्। ततस्त्रिंशद्गुणं पुण्यं रविसंक्रमणे दिने। अमायाञ्चापि तत्तुल्यं द्विगुणं दक्षिणायने। ततो दशगुणं पुण्यं नराणाञ्चोत्तरायणे। चातुर्मास्यां पौर्णमास्यामनन्तं पुण्यमेव च। अक्षयायाञ्च तत्तुल्यमेतद्देवनिरूपितम्। अर्कस्य पुण्यफलदमेतेषु स्नानदानकम्। सामान्यदिवसस्नानात् दानात् शतगुणं भवेत्। मन्वन्तरायां देवेशि! युगाद्यायां तथैव च। माघस्य सितसप्तम्यां भीष्माष्टम्यां तथैव च। ततोऽपि द्विगुणं पुण्यं नन्दायां भवदुर्लभे!। दशहरादशम्यान्तु युगाद्यादिसमं फलम्। नन्दासमन्तु वारुण्यां सप्तपूर्वं चतुर्गुणम्। ततश्चतुर्गुणं पुण्यं द्विसप्तपूर्वके सति!। पुण्यं कोटिगुणञ्चैव सामान्यस्नानतो हि यत्। चन्द्रोपरागसमये सूर्य्ये दशगुणं ततः। पुण्यं ज्यर्द्धोदये काले ततः शतगुणं फलम्। सर्वेषामेव सङ्कल्पं वैष्णवानां विपर्य्ययः" इति ब्रह्मवैवप्रकृतिख०। "अपरयत्सा जलधिम्न जाह्नवी" माघः।

**जि** जये अभिभवे भ्वा० पर० सक० अनिट्। जयति अजैषीत् जिगाय जिग्यतुः जिगयिथ जिगेथ। जेता जीयात् जेष्यति। जापयति-ते अजीजपत्-त। जिगीषति। जेता जयी जितः जयः। "जयत्यतिबलो रामोलक्ष्मणश्च महाबलः। राजा जयति सुग्रीवो राघवेणाभिपालितः" रामा० बङ्गलः प्रयोगः। "सर्वद्रव्याणि कुप्यञ्च यो यज्जयति तस्य तत्" मनुः। "इत्युक्तो द्रौपदि! त्वामजै-

धीत्" भा० ह० ६५ अ०। "जिगाय तत्र फलानि स रामः सर्वैलोकिकः" भट्टिः "गर्जतानन्तरं दृष्टिं सोमाग्नेय जिगाय सा" कुमा०। "श्रोयात् पश्चिततमवैयर्वतपविः श्रीगोपदेवकविः" सम्बन्धो० अस्य तुवन्तुस्थाने तिबन्तो। जयति जयन्ति। "जयति जयति देवः" नाटकेषु बहुस्थाने कङ्कुकादुक्तिः। "नवरसरुचिरां निर्मितिमादधतो भारती कवेर्जयति" काव्य०। जयश्च सर्वेभ्य उत्कर्षेणेन स्वापेक्षयाप्युत्कर्षवोधनात् तस्य नमस्कारव्यङ्गता यथाऽऽह काव्य०। "जयत्यर्थेन च नमस्कार आक्षिप्यते इति तात्पर्यम्। प्रथमत इति"। अभिमतपूर्वकपदार्थे अयं द्विरु०। दुरात्च अजदयङ् दधि प्रक्षिप्य मासु जिमत्य भुक्ष्व। कर्मयुक् आदरेऽतत्रया स्वाभीष्टलाभवताम्" इत्युक्तेः। अतं जयति देवदत्तम्" सि० कौ० "इन्द्रं वाजे जापयत" यजु० ६।११। "यदि स्वयंवरे राजे जापयेयुः" आश्व० ६।८। "इमाश्च दृष्ट्वा तनुजाः सनेकाशाः स व्यक्रीजयत्" भा० ह० ३७ अ० स्वार्थे णिच्। व्यक्रीजयत् इति पाठे पुगभाव आर्षः। "गतं जिगीषतः पादौ रक्षतेऽरिकामिकाम्" भाग० २।१०।२५। "अगाकृतादादगतां जिगीषया" नैष०। डेगीयते। कर्मणि अजीयत अजायि। "भाग्यजीयत इवा ततो मही" रघुः

अति+अतिशयेन जये "धिराद्यं सुपजा अत्यजैषीत्" ऋग्० १४।२।७४। [धैर्यं तस्य गच्छतः" भट्टिः

वि+अति परस्परजये आत्म०। "व्यतिजिग्ये सखद्वोऽपि न व्यधि+व्याधिक्लेन जये "सपत्नांव्याधिजोव्याधं" भट्टिः।

अनु+अनुरूपजये पराजये च। "कौशल्योऽन्वजयत् महीम्" भा० शा० २।२३ अ०।

अभि+आ अभिमुख्येन जये। "ते चान्द्रमसेव लोकमभिजयन्ति" श्रुतौ पु० १अधिगमे च "वेदश्रुतिभिराख्यानैरहो विजिगीषति" भा० शा० ८४६५।

अव+अधरीकृत्य जये। "अरेर्विध्वस्त तांश्चैरानवजित्य च तद्धनम्" भा० आ० ७७६। "अवजित्य सुपर्णाक्षं धनं चादाय सर्वशः" भा० वि० २३अ०।

परा+पराक्रमपूर्वकजये आत्म०। पराजयते। "सं पराजयमानोऽसाक्षुच्या पवनात्प्रभम्" भट्टिः। "पराजितेनापि ननौ फल्गु" कुमा०। स्थानी अक० तत्र "पराजेरसोढः" पा० कर्तारंस्थापादानता। "अध्ययनात् पराजयते स्थायतोऽर्थः वि० कौ० "तां पराजयमानां सा प्रीते रक्षां दयानतात्" भट्टिः।

प्रति+प्रतिरूपजये। "बलादिकं भायया प्रत्यजैषीत्" भा० द्रो० १२५७श्लो०। "यथं प्रतिजिगीषन्तस्तान् समभिद्रुताः" ४२७६ श्लो०।

वि+विशेषेण जये आत्म० विजयते। "देव देवान् मनुष्यांश्च पार्थो विजयते रथे" भा० वि० १३८६श्लो०। "अगादाद्रिं विजिगीषाः। "दैत्यं कुलं विजिग्ये" भट्टिः।

जि त्रि० ज्या+वा०कि। १जयशीले २विषाचे पु० एकाक्षरकोः।

जिकन पु० स्मृतिनिबन्धकारके विद्वद्भेदे।

जिगत्न् पु० गम-क्त्न् सम्प्र। प्राप्तवायौ उज्ज्वलद०।

जिगत्नि पु० गु-वा०ति हित्वञ्च। आच्छादके। "जिगत्निं मिन्द्रो अपजर्युराचः" ऋ० ५ ६८।४ "जिगत्निं मरमाच्छादयन्तम्" भा०।

जिगीषा स्त्री जि-सन् भावे अ। १जयेच्छायां २प्रकर्षे, ३उद्यमे च मेदि०। "वेवस्वतं जगीषवां" रघुः। "अगाकृतादादगतां जिगीषया" नैष०।

जिघत्न् पु० जिघांसु+पृषो०। जिघांसौ। "यो नः सनुत्य उत वा जिघत्नुः" ऋ० २।२०।६। "जिघत्नुर्जिघांसुः" भा०।

जिघत्सा स्त्री अत्तुमिच्छा अद-सन् षत्वादेशः भावे अ। १भोजनेच्छायां २क्षुधायां हेमच०। [अमरः।

जिघत्सु त्रि० अत्तुमिच्छति अद-सन्-षत्वादेशे उ। क्षुधिते

जिघांसु त्रि० हन-सन्-उ। हननेच्छौ "प्रजालक्षेद् हरिवं जिघांसुः" भा० २रिपौ पु० हेमच०।

जिघृक्षा स्त्री ग्रह-सन् भावे अ। ग्रहणेच्छायां "पटुरपि प्रियकण्ठजिघृक्षया" रघुः।

जिघ्र त्रि० घ्रा-कर्तरि ष जिघ्रादेशः। घ्राणकर्तरि "स्वामी निश्वसितेऽप्यक्षयति मनोजिघ्रः सपत्नीजनः" मा० ट० "अजिघ्रैः पुष्पगन्धानां पतङ्गैर्ग्लपिता वयम्" भट्टिः।

जिङ्गिनी स्त्री जिगि-गतौ इनि (जिङ्गी) लतायां भावप्र० "जिङ्गिनी मधुरोष्णा च कषाया योनिशोधिनी। कटुका व्रणकृद्दुरोगवातार्तीसारकृत् पटुः" भावप्र० [अमरः।

जिङ्गी स्त्री जिगि-गतौ अच् गौरा० ङीष्। मञ्जिष्ठायाम्

जिज्ञासा स्त्री ज्ञा-भावे अ।१ज्ञातुमिच्छायां २तदर्थविचारे च। "अथातो धर्मं जिज्ञासा" जै० सू०। "अथातो ब्रह्मजिज्ञासा" शा० सू०। उभयत्र विचारार्थकताकरे इच्छा "दुःखत्रयाभिघातात् जिज्ञासा तदपघातके हेतौ" सां० का०।

जिज्ञासु त्रि० ज्ञातुमिच्छुः ज्ञा-सन्-उ। १ज्ञातुमिच्छौ २ससञ्जौ च "चतुर्विधा भजन्ते मां-"आर्त्तो जिज्ञासुरर्थार्थी ज्ञानी च भरतर्षभ!" गीता।

जिज्ञास्थि न० अस्थ्नः जिज्ञासा राजद० षत्वनि० सालोपश्च। अस्थिजिज्ञासायाम्।

जित् त्रि० जि-क्विप्। जेतरि। "मारजित् लोकजिज्जिनः" अमरः "स्वर्जिता यजेत" "विश्वजिता यजेत" स्मृतिः। "यजेत वाश्वमेधेन स्वर्जिता गोसवेन वा" मनुः

जित त्रि० जि-कर्म्मणि क्त। १पराजिते २पराभूते। भावे क्त। २जये न०। तदस्यास्ति अच्। ४अर्हदुपासकभेदे पु० हेमच०।

जितकाशि पु० जितः अभ्यासपटुतया दृढ़ीकृतः काशिः सुदृर्शनं। दृढ़सटौ योधभेदे नीलकण्ठः।

जितकाशिन् त्रि० जितेन जयेन काशते प्रकाशते काशिनि। १जिताहवे, जयिनि हेमच०। "अनिरुद्धो रणे बाणो जितकाशी महाबलैः" हरिवं० १७७ अ०।

जितक्रोध त्रि० जितः क्रोधो येन। १क्रोधशून्ये २विष्णौ पु०। "मनोहरो जितक्रोधो वीरबाहुर्विदारणः" विष्णुसं० "वेदमर्य्यादां स्थापयन् असुरान् हन्ति न तु कोपवशात्" भाष्योक्तेः तस्यासुरहननाय न कोपः किन्तु वेदमर्य्यादारक्षार्थं एवेति न तस्य कोपशक्तितेति बोध्यम्। जितमन्युरघु भयत्र। "अनन्तरूपोऽनन्तश्रीर्जितमन्युर्भयापहः" विष्णुस०।

जितनेमि पु० जिता नेमिरत्र। आश्वत्थदण्डे हेमच०

जितलोक त्रि० जितः आयत्तीकृतः कर्म्मादिद्वारा लोकः स्वर्गादिर्येन। इष्टापूर्त्तादिकर्म्मभिः आयत्तीकृतस्वर्गादिलोके धार्म्मिके "स एकः पितृणां जितलोकानामानन्दः अथ ये शतं पितृणां जितलोकानामानन्दः शत० ब्रा० १४।७.१।२३। "पितृणां दक्षिणमार्गानुयायिनाम् आद्धपिण्डपितृयज्ञादिकर्म्मभिः पितृलोकद्वारा जितो लोको यैस्ते यद्वा जिता लोका येषामिति जितलोकाः" भा०। २अभिभूतलोके त्रि०।

जितवत् त्रि० जि+क्तवतु। १क्तजये स्त्रियां ङीप् सा च उशीनरस्य २कन्यायाम्। "अस्ति मे मानुषे लोके नरदेवात्मजा सखी। नाम्ना जितवती नाम रूपयौवनशालिनी। उशीनरस्य राजर्षेः सत्यसन्धस्य धीमतः। दुहिता कथिता लोके मानुषे रूपसम्पदा" भा० आ० ९९ अ०

जितव्रत त्रि० जितमायत्तीकृतं व्रतं येन। १आयत्तीकृतव्रते पृथुवंशे २कविर्द्धानपुत्रभेदे पु० "हविर्धानाद्धविर्धानी विदूरासूत षट् सुतान्। बर्हिषदं गयं शुक्लं कृष्णं सत्यं जितव्रतम्" भाग० ४।२४।८।

जितशत्रु पु० जितः शत्रुर्येन। १पराजितरिपुके रिपुजयकर्त्तरि। २अर्हतां पितृभेदे पु० हेमच०।

जितासन त्रि० जितानि आयत्तीकृतानि असनानि शीघ्रं तद्ग्राहणपटवादि येन। दृढ़माभ्यासेन कृतरणग्राहणशक्तियुक्ते।

जितात्मन् त्रि० जितो वशीकृत आत्मा इन्द्रियं मनो वा येन। १जितेन्द्रिये। २आद्यभागार्हे देवभेदे पु० कीर्त्तिसच्छब्दे २०६१पृ० दृश्यम्।

जितामित्र त्रि० जितः अमित्रो येन। १शत्रुपराजयकर्त्तरि २जितकामादिरिपुके च। ३विष्णौ पु० शब्दरत्ना० "अजो महार्हः स्वाभाव्यो जितामित्रः प्रमोदनः" विष्णुस० "जिता अमित्रा आभ्यन्तरा रागद्वेषादयो बाह्या रावणादयश्च येनासौ जितामित्रः" भा०।

जितारि पु० जिता अरयो आभ्यन्तरा रागादयो बाह्याश्च रिपवो येन। १बुद्धे त्रिका० २हर्त्तार्हतृपतिरि हेमच० ३जितशत्रौ शत्रुजयकारिणि ४कामादिरिपुजयकर्त्तरि च त्रि० ५अविचिन्तो नृपस्य पुत्रभेदे पु० "अविचिन्तः परिक्षित्तु बलाश्वश्च वीर्य्यवान्। आदिराजो विराजश्च शालमलिश्च महाबलः। उग्रैःक्रूरैश्च भङ्कारो जितारिश्चाष्टमः स्मृतः" भा० आ० ९४ अ०।

जिताष्टमी स्त्री आश्विनकृष्णाष्टम्यां जीमूतवाहनपूजाद्यङ्गभूतायां जीमूताष्टम्यां तत्र कर्त्तव्यतुक्तं चमत्कारचि० भविष्योत्तरे "इयेमासि सिते पक्षे अष्टमी या तिथिर्भवेत्। पुत्रसौभाग्यदा स्त्रीणां ख्याता सा जीवपुत्रिका। शालिवाहनराजस्य पुत्रो जीमूतवाहनः। तस्यां पूज्यः स नारीभिः पुत्रसौभाग्यलिप्सया। प्रदोषसमये स्त्रीभिः पूज्यो जीमूतवाहनः। पुष्करिण्यां विधायाथ प्राङ्मुखे चतुरस्रिकाम्"। विष्णुधर्म्मोत्तरे "पूर्वेद्युरपरेद्युर्वा प्रदोषे यत्र चाष्टमी। तत्र पूज्यः सदा स्त्रीभिः राजा जीमूतवाहनः"। तथा च यद्दिने प्रदोषव्यापिनी अष्टमी तत्रैव व्रतम्। उभयदिने चेत् परदिने त्रिमुहूर्त्तव्यापित्वात्। उभयदिने प्रदोषाव्याप्तौ उदयगामिन्यां तदुक्तं निर्णयामृतसिन्धौ "कृष्णे व्रतं चाश्युदिते प्रभाङ्के यत्राष्टमी चाश्विनकृष्णपक्षे। तत्रोदयं वै कुरुते दिनेश! तदा भवेज्जीवितपुत्रिका सा" इति अस्यामष्टम्यां स्त्रीभिर्न भोक्तव्यम् "आश्विनस्यासिताष्टम्यां याः स्त्रियोऽन्नं हि भुञ्जते। मृतवत्सा भवेयुस्ता वैधव्यञ्च भवेद्ध्रुवम्" वचनात्।

जितारुव पु० जितः शत्रुराहवे येन । जितकाशिनि हेम०।

जितेन्द्रिय त्रि० जितानि वशीकृतानीन्द्रियाणि येन । यथेष्टमिन्द्रियप्रचारप्रतिरोधिनि १वशीकृतेन्द्रिये "स्नात्वा सम्यगाचम्य हृदा च भुक्त्वा घ्रात्वा च यो नरः । न क्षुध्यति ग्लायति वा स विज्ञेयो जितेन्द्रियः" मनूक्ते हर्षविषादशून्ये २शान्ते जने । इन्द्रियजयश्च शौचकार्यः आत्मदर्शनयोग्यत्वे च हेतुः। यथोक्तं पात० सू० भा०

"सत्वशुद्धिसौमनस्यैकाग्र्येन्द्रियजयात्मदर्शनयोग्यत्वानि च" पात०सू०। "भवन्नीति वाक्यशेषः शुचेः सत्वशुद्धिरुक्तः सौमनस्यं तत ऐकाग्र्यं तत इन्द्रियजयस्ततश्चात्मदर्शनयोग्यत्वं बुद्धिसत्वस्य भवतीति । एतच्छौचस्यैवार्थादधिगम्यत इति" भा०। २कामक्रोधादिहन्त्रे पु० शब्दार्थचि० ।

जितु(त्तु)म त्रिपुनराशौ "क्रियतावुरि जितु(त्तु)म कुकोरलेय-पाथेय-शुकौषांख्याः । तौक्तिकव्याकोकेरो क्षुद्रोगशान्त्यम चेत्यम्" ज्यो०त० मेषादिसंज्ञोक्तौ । अतिशयेन जित् जित्तम २अतिशयजययुक्ते त्रि०। [काष्ठमयपदार्थभेदे

जित्या स्त्री जि-क्यप् । हठहठके लक्ष्यभूमिसमीकरणार्थे

जित्वन् त्रि० जि-क्वनिप् । जयशीले । ततः वर्षा०चतुरर्थ्यां ठिञ् । जैत्वनायनि जित्वनोऽदूरदेशादौ ।

जित्वर त्रि०जि-क्वरप् । जयशीले "सुराध्वरे धर्मरजित्वरेण" "गस्त्यागुप्तापार्थसूत जित्वरासि"भट्टिः "करदीकृतभूपालो भ्रातृभिर्जित्वरैर्हितम्" माघः । क्वरपः टिड्ढाण जित्यादि" पा० सूत्रे पाठात् स्त्रियां ङीप् । सुट० मते क्वरप् णित्त्वात् ऐप् इति भेदः । सा च २कामीपूर्व्यां स्त्रिका० ।

जिन पु०जि-क्त । १बुद्धे अमरः २अर्हद्भासबौद्धभेदे ३विष्णौ च हेमच० । ४अतिवृद्धे उणा० । ५जित्वरे त्रि०मेदि० । तस्येदमण् । जैन जिनसम्बन्धिनि त्रि० "क्षुत्क्षामोऽपि न गच्छेज्जैनमन्दिरम्" । तदीयमते च तच्च अर्हच्छब्दे २८७ पृ० दर्शितम् ।

जिनसद्मन् न० ६त० । जिनभट्टे चैत्ये विहारे हेमच० ।

जिनेन्द्र पु०जिनानामिन्द्रः जिन इन्द्र इव वा । १बुद्धे हेमा० २व्याकरणकारके विद्वद्भेदे च । स्वार्थे अण् । तत्रार्थे "पाणिन्यमरजैनेन्द्राः जयन्त्यष्टादिशाब्दिकाः" कविकल्पद्रुमः ।

जिनेश्वर पु० ६त० । बुद्धे हेमच० ।

जिम भक्षे भ्वा० पर०सक०सेट् । जेमति अजेमीत् । उदित् जेमित्वा जान्त्वा जितः । "जेमनं लेप आहारः"अमरः

जिरि हिंसायां स्वा०पर०सक०सेट् । जिरिणोति अजिरायीत । अयं वैदिकः ।

जिल्लिक पु० दक्षिणस्थे देशभेदे, सोऽभिजनोऽस्य अण् । तस्य राजा वा अण् । जैल्लिक पित्वादिकमेषु तद्देशवासिनि तद्भूपे च बहुषु तस्य लुक् । तद्देशवासिषु तद्भूपेषु च ब० व० । "जिल्लिकाः कुन्तलाश्चैव सौह्यदाननकाननाः"भा० स० ८अ० ।

जिव प्रीणने भ्वा० पर० सक० सेट् इदित् । जिन्वति अजिन्वीत् जिजिन्व इदित्त्वात् नोपधालोपः जिन्व्रते । "भूमिं पर्ज्जन्या जिन्वसि दिवं जिन्वन्त्वग्नयः" ऋ० १।१६४।५।१। "इन्द्रेण जिन्विता मरुतोऽगमन्" यजु० ६।२१।७। "रश्मिरसि त्वयस्व त्वयं जिन्व सवितुः प्रसूतौ" तैत्तिरीय ब्रा०१।१।६ । "अपां रेतांसि जिन्वति" ऋ० ८।४४।१६ । "यदा त्वं प्राण ! जिन्वसि" ११।४। १४। छन्दो च अक० । वेदे अस्य क्वचित् आत्म० "स जिन्वते जठरेषु प्रजज्ञोरन्" ऋ० ३।२।११। "जिन्वते वर्द्धते" भा० । वेदे नमध्यस्यैव प्रयोगात् शब्दकल्पद्रुमे अन्त्यस्थवान्तस्थले नस्य निवेशनात् जिन्वतीति प्रयोगदर्शनाच्च ओष्ठ्यत्वभ्रान्त्या मत्कृतशब्दस्तोममहानिधौ जिम्बतीति औष्ठ्यान्ततया रूपप्रदर्शनं भ्रामादिकमेव । कविकल्पद्रुमे अन्तःस्थवान्तमध्य पाठात् धिषिवातोरिव न मध्यत्वसौचितत्वात् ।

जिवाजिव पुंस्त्री जीवञ्जीव+पृषो० । चकोरखगे शब्दरत्नावलित्वात् स्त्रियां ङीष् ।

जिह्रि पु०जू-रिक् रस्य वः । १सप्तदे २खगे च सि० कौ० ।

जिष्ण सेके भ्वा० पर० सक० सेट् । जेषति अजैषीत् । उदित् जेषित्वा जित्वा । जिष्टः ।

जिष्णु पु० जिष-क्नु । १विष्णौ हेमच० २इन्द्रे ३अर्জ্জुने च ४जेतरि त्रि० मेदि० । तत्रार्জ্জुने जयशीले च । "यस्यनाङ्कदोपरिगङ्कसमरुद्बलद्युतिजिष्णु जिष्णुरभटोष्णुवारणम्" "भुजगेश परलोकजिष्णवः" माघः "अहं दुरापो दुर्द्धर्षो दमनः पाकशासनिः । तेन देवमनुष्येषु जिष्णुनामाऽस्मि विश्रुतः" भा० वि० ४४अ० । इन्द्रे "जयंश्च जिष्णुश्चामिलौ जयतामिन्द्रजेन्द्रिणौ" अम० १।१।१८। विष्णौ "विष्णुर्विक्रमणाद्देवो जयनात् जिष्णुरुच्यते" भा०उ०६६ अ० । जिष्णुनामनिरुक्तौ ।

जिह्म त्रि०हा-मन् सम्प्र० आलोपश्च । १कुटिले २मन्दे शतपथब्राह्मणे न० मेदि० । "सचिताजिह्मयोचितैः" कथासं० ।

"जिह्मं त्यजेयुर्निखातमग्नश्लोऽन्येन कारयेत्" याज्ञ०। "सहृदयैर्माहितमजिह्मधियाम्" माघः४कपटे न०। "तदायु कस्तु" त्वयि जिह्मयिष्यते" किरा० "जिह्मं कपटम्" मल्लि०। ५पिहिते त्रि० "जिह्मद्वारमपोवृतं" कठ०८।४।५। "जिह्मद्वारं पिहितद्वारम्" भा०। ६अधस्ताद्वर्त्तमाने च। "उच्चावुच्चं चक्रतुर्जिह्मद्वारम्" रघु० १।११६।११। "जिह्ममधस्ताद्वर्त्तमानम्" भा०। ७अप्रसन्ने च। "विधिसमयनियोगाद्दोषनिसंहारजिह्मम्" किरा० "जिह्ममप्रसन्नम्" मल्लि०।

**जिह्मग** पुंस्त्री जिह्मं कुटिलं मन्दं वा गच्छति गम-ड। १सर्पे स्त्रियां जातित्वात् ङीष्। २मन्दगे त्रि० मेदि० स्त्रियां टाप्। "व्रतं चक्रे विनाशाय जिह्मगानां धृतव्रतः" "स दृष्ट्वा जिह्मगान् सर्वांस्त्रीन्क्रोधसमन्वितः" भा० आ० ६ अ०। [अन्यत्र० स्त्रियां जातित्वात् ङीष्।

**जिह्ममेहन** पुंस्त्री जिह्मं मन्दं मेहति सिह-ल्यु। भेके

**जिह्मयत्य** पु०जिह्मं कुटिलं यत्यमस्मात्। खदिरवृक्षे जटा०

**जिह्माशिन्** त्रि० जिह्मं मन्दमश्नाति अश-णिनि। मन्दभोजिनि ततः स्वार्थे शुभ्रा० ढक्। जैह्माशिनेय तदपत्ये प० स्त्री०।

**जिह्वल** त्रि० हल-अच् वा० मत्वञ्च जिह्मं जिह्माव्यापारं लाति ला-क वा। भोजनलोलुपे। "श्राद्धं कृत्वा परश्राद्धे भुञ्जते ये च जिह्वलाः। पतन्ति नरके घोरे लुप्तपिण्डोदकक्रियाः" श्रा० त०।

**जिह्वा** स्त्री लेढ्यनया लिह-क्वादे व "ग्रेवयङ्गजिह्वेत्यादिना" नि०। १रसास्वादकरणे इन्द्रियभेदे २तदधिष्ठाने गोलके (जिभ) ख्याते पदार्थे च। तदिन्द्रियस्य जलीयत्वं सि० मु० समर्थितं यथा "रसनं जलीयं गन्धाद्याव्यञ्जकत्वे सति रसव्यञ्जकत्वात् सक्तुरसव्यञ्जकोदकवत् रसनसन्निकर्षे व्यभिचारवारणाय द्रव्यत्वे सतीति विशेषणीयम्। तस्याधिष्ठातृदेवता च प्रचेताः "दिग्व्यानार्कप्रचेऽश्वीत्यादि" भा० ति० उक्तेः। अग्नेर्जिह्वाश्च सप्त तन्नामानि "काली कराली च मनोजवा च सुलोहिता या च सुधूम्रवर्णा। स्फुलिङ्गिनी विश्वरुपी च देवी लोकाय माना इति सप्त जिह्वाः" सुश्रुतोक्तेः। "तस्याः कफादिदोषात् लक्षणादिकं भाव०प्र० दर्शितं यथा "शाकपत्रप्रभा रूक्षा स्फुटिता रसनाऽनिलात्। रक्ता श्यामा भवेत् पित्तान्निष्प्रभा श्लथना कफात्। परिदग्धा खरस्पर्शा कृष्णा दोषत्रयेऽधिके। सैव दोषद्वयाधिक्ये दोषद्वितयलक्षणा" यस्य क्लीवत्वं भरत आह स्म। जिह्वलः। इन्द्रियपरत्वे तथात्वमिति तु युक्तम्। २वाक्ये निघण्टुः

**जिह्वाजप** पु० जिह्वया जपः। "जिह्वाजपः स विज्ञेयो केवलं जिह्वया बुधैः" तन्त्रसारोक्ते जपभेदे। "उच्चैर्जपाद्विगिष्टः स्यादुपांशुर्दशभिर्गुणैः। जिह्वाजपः शतगुणः साहस्रो मानसः स्मृतः" तन्त्रसा० तत्फलञ्च तत्।

**जिह्वानिर्लेखन** न० जिह्वा निलिख्यतेऽनेन निर्+लिख-करणे ल्युट्। (जिव व्याचड़ान) द्रव्यभेदे तल्लक्षणं यथा "जिह्वानिर्लेखनं हैमं राजतं ताम्रजं तथा। पाटितं स्रदु तत्काष्ठं स्रदुपत्रमयं तथा। तत्काष्ठं दन्तधावनयोग्यकाष्ठम्। दशाङ्गुलं स्रदु स्निग्धं तेन जिह्वां लिखेत् सुधीः। तज्जिह्वामलवैरस्यदौर्गन्ध्यं जड़ताहरम्" भाव० प्र०।

**जिह्वाप** पु०स्त्री जिह्वया पिबति पा-क। १कङ्कुरे २व्याघ्रे ३विड़ाले ४भल्लूके च शब्दरत्नावली ५पित्तकव्याघ्रे विश्वः। स्त्रियां जातित्वात् सर्वत्र ङीष्।

**जिह्वामल** क्लीव०। जिह्वास्थितमले कफजे विकारे।

**जिह्वामूल** न० ६त०। जिह्वाया मूले। तत्र भवः छ। जिह्वामूलीय अयोगवाहान्तर्गतवर्णभेदे। "जिह्वामूलीयस्य जिह्वामूलम्" सि०कौ०। स च कखयोः परयोः विसर्गस्थाने जातः। कवर्गे च "जिह्वामूले तु कः प्रोक्तः" शिक्षायां कवर्गस्य जिह्वामूलस्थानत्वोक्तेस्तथात्वम्।

**जिह्वारद** पु०स्त्री० जिह्वा रद इव यस्य। पक्षिणि हारा० तस्य जिह्वाया एव दन्तकार्य्यकारित्वात्तथात्वम्। स्त्रियां जातित्वात् ङीष्।

**जिह्वारोग** पु० सर्वरोगान्तर्गतजिह्वागतरोगभेदे। तल्लक्षणादि भावप्र० उक्तं यथा।

"वातजः पित्तजश्चापि कफजोऽसाससंज्ञकः। उपजिह्विका च गदा जिह्वायां पञ्च कीर्त्तिताः। तत्र वातजस्य लक्षणमाह। जिह्वाऽनिलेन स्फुटिता प्रसुप्ता भवेच्च शाकच्छदनप्रकाशा। स्फुटिता मनाग्विदीर्णा। प्रसुप्ता रसानभिज्ञतया सुप्तेव। शाकच्छदनप्रकाशा शाको मरुभूमिजातो द्रुमः तद्वत् कण्टकाचिता। पित्तजमाह। पित्तात् सदाहैरुपचीयते च दीर्घैः सरक्तैरपि कण्टकैश्च। कफजमाह। कफेन गुर्वी बद्धलाचिता च मांसोक्षुभैः शाल्मलिकण्टकाभैः। बद्धला स्थूला। मांसोक्षुभैः मांसजकण्टकैः। असाससाह। जिह्वास्थले यः स्रवथुः प्रगाढः सोऽसाससंज्ञः कफरक्तमूर्त्तिः। जिह्वां सरक्त

सम्भवति प्रहृद्रो मूले च जिह्वा भक्षमेति पाकम् । प्रगाढः प्रकर्षेण गाढो दारुणः । कफरक्तमूर्त्तिः कफरक्ताभ्यां मूर्त्तिर्यस्य स कफरक्तज इत्यर्थः । जिह्वा लम्बेन वायुरत्र बोद्धव्यः । भक्षं पाकेनेति पित्तञ्च अतस्त्रिदोषजोऽयम् । असाध्यत्वञ्चास्य । उपजिह्विकामाह । जिह्वाप्यरूपः स्वयञ्च जिह्वासदृश्या जातः कफरक्तयोनिः । प्रसेककण्डूपरिदाहयुक्तः प्रकथ्यतेऽसावुपजिह्विकेति । जिह्वाप्यरूपः जिह्वाप्राकृतिः" भावप्र० । "पक्वान्नदरणाच्चैव जिह्वारोगः प्रजायते" मातात० ।

**जिह्वाग्रल्य** पु० जिह्वायाः अग्रल्यमिवास्यस्य अच् । खदिरवृक्षे राजनि० ।

**जिह्वावत्** पु० यजुर्वेदीयवंशान्तर्गतर्षिभेदे । "अथ वंश" इत्युपक्रमे । "जिह्वावतो बाध्योगाज्जिह्वाबाध्योगः" शत०ब्रा०१४।९।४।२२। २जिह्वायुक्ते त्रि० स्त्रियां ङीप् ।

**जिह्वास्वाद** पु० जिह्वया स्वादः । लेहने (चाटा) हेमच० ।

**जीति** स्त्री जि-क्तिन् वेदे दीर्घः । जवे "अजीतयेऽहतये परस्य स्वस्तये" ऋ० ६।६६।४ । "अजीतये अजयाय" भा० । लोके तु ज्या-क्तिन् सम्प्रसारणे "व्यचः" इति पा० सम्प्रसारणस्य दीर्घः । २हानौ स्त्री ।

**जीन** त्रि० ज्या-क्त सम्प्रसा० दीर्घः । जीर्णे अमरः "जीनकार्ष्मकवस्त्रादीन् पृथक् दद्यात् विशुद्धये" मनुः ।

**जीमूत** पु० जयति नभः, जीयतेऽनिलेन वा । जि-क्त । "जेर्नुट् चोदात्तः दीर्घश्च" । जीवनस्योदकस्य मूतं बन्धो यस्येति वा जीवनं जलं मूतं बद्धमनेन । मूङ् बन्धने कर्म्मणि क्तः पृषोदरादित्वात् साधु । ज्यानं जीर्णं ज्या-सं० क्विप्, जिया वयोहान्या मूतो बद्ध इति वा जीवनं सुनोति वा पृषो० । १पर्वते २मेघे ३मुस्तायां ४देवताड़द्रुमे च अमरः ५इन्द्रे हृष्टतिकरे ७घोषकलतायां च हेम० । मेघे "यथा जीमूतशब्देन स्रोणां त्रासोऽभिजायते" दुन्दुभिपूजामन्त्रः । "जीमूतैरपिहितसानुरिन्द्रकीलः" किरा० । "जीमूतस्येव भवति प्रतीकम्" ऋ० ६।७५।१ "प्रतिचरणविघट्टरेफाः स्फुरदर्णवव्यानजीमूतनीलाकरोद्दामगर्जादयः" ह० र० उक्ते ८दण्डकभेदे तथा च एकादशभीरगणैः रचितो जीमूताख्यो दण्डकः । स्वार्थे क । जीमूतक तेष्वर्थेषु ।

**जीमूतकूट** पु० जीमूतो मेघः कूटोऽस्य । पर्वते हारा० ।

**जीमूतकेतु** पु० विद्याधरपतौ राजभेदे जीमूतवाहन पितरि । नागानन्दे दृश्यम् ।

**जीमूतमूल** पु०जीमूतस्य सुस्तकस्य मूलमिव मूलमस्य । शठ्यां शब्दरत्ना० ।

**जीमूतवाहन** पु० जीमूतो मेघो वाहनमस्य । मेघवाहने १इन्द्रे शालिवाहनपुत्रे २नृपभेदे जिताष्टमीशब्दे दृश्यम् । जीमूतकेतोः विद्याधरस्य २पुत्रे च तत्कथा नागानन्दे दृश्या ।

**जीमूतवाहिन्** पु० जीमूतं मेघसदृश्यं वहति अर्हं गच्छति वह-णिनि । धूमे हेमच० । मेघानां धूमादेवाविर्भावात् तस्य तथात्वम् ।

**जीर** पु०ज्या-रक् संप्र०दीर्घः । १जीरके, २खड्गे, ३अश्वौ च । मेदि०जीरी रक् च" उणा० सौ०ज्-रप्रत्ययः ईत्वान्तादेशः । ४जवशीले ५क्षिप्रे च उज्ज्वल०जीरदानुः । "उत नः सुश्रोता जीराश्वः" ऋ०१।१४१।१२। "जीराश्वः क्षिप्राश्वः" भा० संज्ञायां कन् । (जीर) ख्याते पदार्थे मेदिनि० । मदनपालनिघण्टौ तस्य स्त्रीत्वता तद्भेदा गुणाश्चोक्ता यथा "जीरकं दीर्घकं शुक्लमजाजीकणजीरकम् । जीरकं जरणं कृष्णं वर्षकालो सुगन्धिकम् । कालिका वाह्निका कृष्णिकारवी चोपकुञ्चिका । पृथ्वीका सुखवी पृथ्वी स्थूलजाथुपकालिका । जीरकत्रितयं रूक्षं कटूष्णं दीपनं लघु । संग्राहि पित्तलं मेध्यं गर्भाशयविशुद्धिकृत् । चक्षुष्यं पवनाध्मानगुल्मच्छर्दिबलासजित्" मदनपालः ।

**जीरण** पु० जीरक+पृषो० । जीरके राजनि० ।

**जीरदानु** पु०जीरं क्षिप्रं जवशीलं वा ददाति दा-नु । १जवशीलदाने, २क्षिप्रदातरि च "विद्यामेषं वृजनं जीरदानुम्" ऋ० १।१६६।५ "जीरदानुं जवशीलदानम्" भा० "जीरदानूरेतो दध्यद्योषधीषु गर्भम्" ५।८२।१ "जीरदानुः क्षिप्रदानः" भा० ।

**जीरि** पु० जीर्य्यति जॄ-बा०रिक् । १मनुष्ये "रक्षन्ति जीरयो वनानि" ऋ०४।५१।६ "जीर्य्यन्ति इति जीरयो मनुष्याः" भा० जॄ-अन्तर्भूतण्यर्थे रिक् । २जारके ३ऋभिभावके च त्रि० "प्रजीरयः सिस्रते सप्तधातृक् पृथक्" ऋ० २।१७।२ "जीरयो जरयितारः" भा० ।

**जीर्ण** त्रि० जॄ-क्त । १जरायुक्ते २पुरातने च अमरः "वासांसि जीर्णानि यथा विहाय" गीता । "जीर्णमन्नं प्रशंसीयात् यच्च स्वल्पमागतम्" चाणक्यः । ३शैलजे न० राजनि० । ४उदराग्निना कृतपाके त्रि० "अजीर्णे भेषजं वारि जीर्णे वारि बलप्रदम्" वैद्यकम् ।

द्रव्यभेदे जीर्णतासाधनद्रव्यभेदा जीर्णसञ्ज्ञासंज्ञा यथा "नारीकेलफलेषु तण्डुलमथ क्षीरं रसाले हितं जम्बीरो-त्थरसे हते सकचितः सर्पिस्सु मोचाफले। गोधूमेषु च कर्कटी हिततमा मांसात्यये काङ्किकं नारङ्गे गुड़-भक्षणञ्च कथितं पिण्डारके कोद्रवः। पिटाके सलिलं पियालफलजे पथ्या सिता मानजे खण्डं क्षीरभवे तु तक्रसहितं कोष्णाम्बु कोलम्बजे। मत्स्ये चतफलं त्व-जीर्णशमनं मद्यस्य पानात्यये तैलं पौष्करजं कटूप्रशमनं श्रेयांस्तु बुद्ध्या जयेत्। पनसे कदले कदले च हृत घृत-पाकविधावपि जम्बुरसः। तदुपद्रवशान्तिकरं लवणं लवणेषु चतण्डुलवारि वरम्। नारिकेलफलताजबीजयोः पाचनं व दृढ तण्डुलं विदुः। ते वदन्ति सुनयोऽथ तण्डुलान् क्षीरवारि परिपाचयत्यपि। दाड़िमाम-लकताजतिन्दुकीबीजपूरजबलीफलान्यपि। बाकुलेन च फलेन पाचयेत् पाकमेति बकुलं स्वमूलतः। मधूक-मालूरबृहत्पादनानां पक्वफलञ्जूरकपित्थकानाम्। पाकाय श्रेयं पिचुमर्दबीजं हृतेऽपि तक्रं प्रवदन्ति पथ्यम्। गो-धूममाषहरिमन्थसतीनसङ्घपाको भवेदिति च मातुलपत्रकेण। खर्ज्जूरिका बिल्वकपेरुसिताम्र भक्तं शृङ्गाटके मधुफलेऽपि भृङ्गसत्तमम्। पिप्पितपनसयोः स्यादाम्रबीजेन पाकः क्षीरमहिष्योश्चित्रकक्षीरयोः सैन्धवेन। चिपिटपरिणतिः स्यात् पिप्पलीदीपिकाभ्यां मधूकरति तृणाख्यो वैदलानामजीर्णम्। कर्पूरपनीफल नागवल्लीकाक्षीरजातीफलजातिकोशम्। कस्तूरिका सिक्थकनारिकेलजलं पचत्याशु सशृङ्गफेनः। श्यामाक नीवारकलत्यवल्लिनिष्पावकक्षुद्रदधिमस्तकस्तु। चिञ्चा-कुलत्थौ तिलतैलयोगात् जटाङ्गनादस्य निहन्त्यवाच्यम्। कपेरशृङ्गाटफलानखण्डौ खर्ज्जूरखण्डा अपि नागरेण। पलाशभक्ष्याम्बु तथार्द्रको वा रसो निहन्याद्रसनिष्कुजातम्। अम्लेन केनाप्यथ व्योषचूर्णेन कोष्णाम्बुना वा हृतमेति पाकम्। तिलादितैलान्यपि काङ्किकेन सर्ज्जस्य मद्या पनसामलक्योः। किमत्र चित्रं बहुमांसमत्स्यभोजी सुखी स्यात् परिपीय शुक्तम्। दृष्ट्वा हृतं केवलवह्निपक्वमांसेन मत्स्यं परिपाकमेति। कपोतपारावतनीलकण्ठकपिञ्जलानां पिशितानि जग्ध्वा। काशस्य मूलं परिमेयमुष्णं सुखी भवेद्वा बहुशो न भूतम्। व्योषैः रसोना सुरभीवस्तुभक्तेन कोष्णेन विपाकमेति। शृङ्गस्य चूर्णेन हरिद्रिकारी-पयोदधिक्षीरसुपैति पाकम्। वटो वेसवाराङ्गवङ्गेन फेनो शमं पर्पटः शिग्रुबीजेन याति। कषामूलतो बृहद्बुका पक्वकादेर्वपाको भवेच्चक्षुलीमण्डयोश्च। स्यादिङ्गोधागण्डकाचित्रतैलाद् यावत् क्षारात् कोल कूलादयोऽपि। जीर्णन्त्येवं पायसो सद्दयूषात् सास्त्र-द्रादयारनालं सुखाय। तप्तं तप्तं क्षेम वा तारमम्भो तोये क्षिप्तं सप्तकृत्वस्तदम्भः। पीत्वावश्यं दीर्घकालो-पसृष्टमो जीर्णं शीघ्रमेवं जहाति। पालङ्किका केसुककारवेल्लो वार्त्ताकुवंशाङ्कुरमूलकानाम्। उपोद कालाबुपटोलकानां सिद्धार्थको मेघवरस्य पक्षा। शुण्ठीसतीनस्य च नागरङ्गजम्बीरयोः कोद्रवको निहन्ता। जरामिरामैरकचन्दनाख्यामभ्येति शीघ्रं बहुशो न भूतम्। पटोलवंशाङ्कुरकारवेल्लीफलान्य लाबूनि बहूनि जग्ध्वा। क्षारोदकं ब्रह्मतरोर्निषेव्य भोक्तुं पुनर्वाञ्छति तावदेव। विपच्यते शूरणको गुडेन तथालुकं तण्डुलतोयपानात्। जम्बीरनीरेण निशा-रसोनं सक्षौद्रेण तूर्णं परिपाकमेति। चञ्चूकसिद्धार्थक वास्तुकानां गायत्रिसारकथितेन पाकः। शाकानि सर्व्याण्युपयान्ति पाकं क्षारेण सद्यस्तिलनालजेन। श्वाखातकोदुम्बरपिप्पलीनां फलानि च क्षुद्रवटादि-कानाम्। क्षुः, श्यामन पर्य्युषितोदकेन पियालमज्जा च कदुष्णकेन। क्षेत्राजीर्णं रोगिणां सद्दयूषं ज्वानां सुखो हन्ति वैरेचकानाम्। माषो भूयाद्विस्वमूलेन पाकविद्या सञ्चूर्णितां चूर्णयोगात्। उष्णेन शीतं शिशिरेण चोष्णमम्लेन च क्षारगणो गुणाय। क्षेत्रेण तीक्ष्णं वमनातियोगे सिता हिता स्यादिति काशिराजः। ताम्बूलमध्यस्थितचूर्णकेन संदह्यते यस्य सुखं नरस्य। तैलेन वा केवलकाङ्किकेन। सुखाय गण्डूषमसौ विद-ध्यात्। शीतोदकं नस्यजरोगहारि नारीपयश्चाञ्जन-रञ्जिनाक्षि। एकोदकं धूमगदे प्रशस्तं धात्रीप्रलेपो-ऽतिविरेचनेषु। सृगस्य मांसं श्रमजेऽनुकूलं प्रवातसुप्तिः सुरतावसाने। क्षीरोष्णा सैन्धवसाधितन्तु क्षामाखण्ड-सक्तं सुरतातिरेके। अश्वत्थपूरणजे तिलतैलतः अश्वत्थ-पूरणमेव सुखं विदुः। कवलेषु गदेष्वथ कारयेत् कवलमार्द्रकजद्रवजं पुनः"।

**जीर्णक** त्रि० जीर्णप्रकारः स्वार्थे कन्। जीर्णप्रकारे।

**जीर्णज्वर** पु० कर्म्मधा०। द्वादशाहाधिककालोत्पन्ने ज्वरे तल्लक्षणादिकं भावप्रका० उक्तं यथा।

"वो द्वादशभ्यो दिवसेभ्यः ऊर्द्धं दोषत्रयेभ्यो द्विगुणेभ्य ऊर्द्धम्। नृणां तनौ तिष्ठति मन्दवेगो भिषग्भिरुक्तो ज्वर एष जीर्णः"। जीर्णज्वरस्यैव विशेषं वातबलासकमाह। नित्यं मन्दज्वरो रूक्षः शूनः क्षुद्रोष विध्यति। स्तब्धाङ्गः श्लेष्मभूयिष्ठो नरो वातबलासकी। वातबलासकी नरः दैडगभवेत्। शूनः शोची। श्लेष्मभूयिष्ठो बद्धश्लेष्मकः। जीर्णज्वरी नरः कुर्य्यादुपवासं कदाचन। लङ्घनात् स भवेत् क्षीणो ज्वरस्तु स्याद्बली यतः। पुराणेऽपि ज्वरे दोषा यद्यपथ्यैः पुनस्तथा। लङ्घयेत् तत्र तत्पश्चात् पूर्वमेवाचरेत् क्रियाम्" तथा पूर्ववत्।

**जीर्णोदार** पु० नित्यक०। इडदारकडचे (विधारा) राजनि०

**जीर्णपत्र** पु० जीर्णं पत्रमस्य। पङ्क्तिकालोध्रे शब्दार्थ०। २जीर्णपत्रयुक्ते त्रि०। बहु० कप् कापि अन इत्त्वम्। जीर्णपत्रिका २वंशपत्रीतृणे स्त्री राजनि०।

**जीर्णपर्ण** पु० जीर्णानि पर्णान्यस्य। १कदम्बे। २पुरातनपत्रयुक्ते त्रि०। कर्म्म०। ३पुरातनपत्रे न०। ४पुरातनाम्बुदे च। "पर्णमूले भवेद्व्याधिः पर्णाग्रे पापसञ्चयः। जीर्णपर्णं हरेदायुः शिरा बुद्धिप्रणाशिनी" वैद्यकम्।

**जीर्णफल्गु** स्त्री नित्यक०। इडदारके वृक्षे (विधारा) राजनि०।

**जीर्णबुध्न** पु० जीर्णं बुध्नं मूलमस्य। पङ्क्तिकालोध्रे राजनि०

**जीर्णभक** न० जीर्णं भकति कै-क। जीर्णभङ्गक। (केओटा इया) ख्याते शस्त्रभेदे। [राजनि०।

**जीर्णवज्र** न० जीर्णं पुरातनं वज्रं हीरकमिव। वैक्रान्तमणौ

**जीर्णवस्त्र** न० कर्म०। पुरातनवस्त्रे पटशब्दे अमरः।

**जीर्णा** स्त्री जृ-क्त। स्थूलजीरके राजनि०।

**जीर्णास्थिसृक्तिका** स्त्री। क्लीबमसृक्तिकाभेदे।

"अथ वक्ष्ये तु जीर्णास्थिसृक्तिकाकरणं प्रिये!। शिलातलस्थले कुर्य्याद् दीर्घं गर्त्तं मनोहरम्। निःक्षिपेत् तत्र नानास्थिसञ्चयं द्विपशूद्भवम्। सर्जिकारं महाक्षारं सृक्षारं लवणानि च। गन्धकोषजलं क्षेयं नानामूत्राणि तत्र च। एवं कृत्वा मासषट्कं दद्यात् पाषाणसृक्तिकाम्। कट्वास्थ्यूर्द्धं तदूर्द्धन्तु कुर्य्याद्दृढीष्टकां शुभाम्। क्षिप्तमात्रायते सर्वमेकीभूतं दृढाश्मवम्। ततो निष्काश्य तद्भूर्द्धं कृत्वा पात्राणि निर्मयेत्। प्रशस्तं भोजनं तत्र सूपवेदद्रव्यसम्। महाक्षिप्तस्य संयोगात् तस्य भङ्गः प्रजायते। दूषीविषादिसंयोगात् पात्रे स्फोटा भवन्ति हि। तत्र क्षिप्तं क्षुद्रविषं पात्रं कृष्णं प्रजायते। एवं ज्ञात्वा तत्र दद्याच्च कदाचिद्विषादिकमिति रावणः" शब्दार्थचिन्तामणिः।

**जीर्णि** स्त्री जृ-क्तिन्। जीर्णतायाम्। अमरः।

**जीर्णोद्धार** पु० जीर्णस्य पूर्वप्रतिष्ठापितलिङ्गादेरुद्धारः। १पूर्वप्रतिष्ठापितलिङ्गादेः भग्नतादौ स्वस्थानादुद्धारे तद्विधानम् अग्निपु० ६७ अ० उक्तं यथा।

"भगवान् उवाच। जीर्णोद्धारविधिं वक्ष्ये भूमिदां स्वपवेद् गुरुः। अचलां विन्यसेद् गेहे अतिजीर्णां परित्यजेत्। व्यङ्गां भग्नां च शैलाद्यां न्यसेदन्यां च पूर्ववत्। संस्कारविधिना तत्र तत्त्वान् संहृत्य देशिकः। सहस्रं नरसिंहेन हुत्वा तामुद्धरेद् गुरुः। दारवीं दारुणेद्धोमे शैलजां प्रक्षिपेज्जले। धातुजां रत्नजां वापि क्षणार्धे वा जलेऽम्बुधौ। यानमारोप्य जीर्णाङ्गं स्नाप्य वस्त्रादिना नयेत्। वादित्रैः प्रक्षिपेत्तोये गुरवे दक्षिणां ददेत्। स्वप्रमाणा च यद्दृष्ट्वा तत्प्रमाणां स्थापयेत् पुनः। क्षुद्रयापीतड़ागादेर्जीर्णोद्धारे महाफलम्" निःसि०विशेषो यथा

"अथ जीर्णोद्धारः स च लिङ्गादौ दग्धे भग्ने चलिते वा कार्य्यः। अयं चानादिसिद्धप्रतिष्ठितलिङ्गादौ भङ्गादिदुष्टेऽपि न कार्य्यः। तत्र तु महाभिषेकं कुर्य्यादिति लिविक्रमः। कर्त्ताऽस्तुकदेवस्य जीर्णोद्धारं करिष्ये इत्युक्त्वा पुण्याहं वाचयित्वा आचार्य्यऋत्विजश्च वृत्वा लिङ्गे ओं व्यापकेश्वरहृदयाय नमः ओं व्यापकेश्वरशिरसे स्वाहेत्येवं षड़ङ्गं कृत्वाऽघोरमन्त्रं शतं जप्त्वाऽग्निं प्रतिष्ठाप्याघोरेण घृतसर्षपैः सहस्रं हुत्वा इन्द्रादिभ्यो नाम्ना बलिं दत्त्वा जीर्णदेवं प्रणवेन संपूज्य ब्रह्मादिसप्तलदेवतानां होमं पूर्ववत् कृत्वा देवं प्रार्थयेत। "जीर्णभग्नमिदं चैव सर्वदोषावहं नृणाम्। अस्योद्धारे कृते शान्तिः शास्त्रेऽस्मिन् कथिता त्वया। जीर्णोद्धारविधानञ्च त्वयाऽनुग्रहितावहम्। तदधिष्ठितां देव! प्रकुरुष्व तवाज्ञयेति"। ततः क्षीराज्यमधुदूर्वाभिः समिद्भिर्व्याहृत्यष्टोत्तरसहस्रं शतं वा देवमन्त्रेण हुत्वाऽङ्गानां दशांशेन लिङ्गचालनार्थं सहस्रं शतं वा पायसेन हुत्वा लिङ्गं प्रार्थयेत। "लिङ्गरूपं समागच्छ येनेदं समधिष्ठितम्। यावास्त्वं संमितं स्थानं तत्त्वज्ञैर्व शिवाज्ञया। अत्र स्थाने च या विद्या सर्वविद्येश्वरैर्युता। शिवेन सह संतिष्ठेति" मन्त्रितजलेनाभिषिच्य विसर्जयेत्। ततोऽस्त्रमन्त्रितेन खनित्रेण खात्वा लिङ्गमानीय नद्यादौ वामदेवेन लिङ्गं प्रणवेन मूर्त्तिं क्षिपेत्। दारुजन्तु मधुनाऽभ्यङ्ग्याघोरेण दहेत्। हेमरत्नादिमयन्तु दग्धं चलितं

वा पुनस्तत्रैव स्थापयेत् । ततः शान्त्यै अघोरेण तिलैः सहस्रं हुत्वा प्रार्थयेत । "भगवान् भूतभव्येश ! लोकनाथ ! जगत्पते ! । जीर्णलिङ्गसंस्कारः कृतस्तावत्त्रया मया । अग्निना दारुजं दग्धं छिन्नं शैलादिकं जले । प्रायश्चित्ताय देवेश ! अघोरास्त्रेण तर्पितम् । ज्ञानतोऽज्ञानतो वापि यथोक्तं न कृतं यदि । तत्सर्वं पूर्णमेवास्तु त्वत्प्रसादान्महेश्वरेति" । ततो यजमानः प्रार्थयेत । "गोविप्रशिल्पिभूतानामाचार्यस्य च वज्रिणः । शान्तिर्भवतु देवेश ! यच्छिद्रं जायतामिदम्" । मूर्त्तौ तु विशेषः । "त्वत्प्रसादेन निर्विघ्नं देवं निर्माप्य वत्सौ । वासं कुरु सुरश्रेष्ठ ! तावत्त्वं चात्मके गृहे। यावन् क्लेशं सहित्वेह मूर्त्तिं वै तव पूर्ववत् । यावत् कारयेत् भक्तः कुरु तस्य च वाञ्छितमिति" । ततो नवां मूर्त्तिं लिङ्गं वा क्रमोक्तविधिना स्थापयेत् ।

भग्नमन्दिरादेः २संस्कारे च स च विष्णुधर्मोत्तरे तृतीयकाण्डे उक्तो यथा "यस्य राज्ञस्तु विषये देवेशस्य विशीर्य्यते । तस्य सीदति तद्राज्यं देवेशस्य यथा तथा । कृत्वा जीर्णस्य संस्कारं तथा देवेशवेश्मनि । द्विगुणं फलमाप्नोति नात्र कार्य्या विचारणा" । विष्णुरहस्ये "पतितस्य च यः कर्त्ता पतमानस्य रक्षिता । विष्णोरायतनस्येह स नरो विष्णुलोकभाक्" अग्निपुराणे "पतितं पतमानन्तु तदार्द्धस्फुटितं नरः । समुद्धृत्य करेद्यस्तु द्विगुणं फलमाप्नुयात्" देवीपुराणे "मूलाच्छतगुणं पुण्यं प्राप्नुयाज्जीर्णकारकः । तस्मात् सर्वप्रयत्नेन जीर्णोद्धारमाचरेत्" । हयशीर्षपञ्चरात्रे "वापीकूपतडागानां सरघाम्नां तथानघ ! । प्रतिमानां समानाञ्च संस्कर्त्ता यो नरो भुवि । पुण्यं शतगुणं तस्य भवेन्मूलाच्च संशयः । प्रतिष्ठाया विधिः कार्य्यस्तथा मन्दिरनिर्म्मिते । प्रायः श्रीहयशीर्षोक्तैरनुसारेण वैष्णवैः । देवानामप्रतिष्ठा च ख्याता तद्विधानेन किम् । श्रीमूर्त्तिस्थापनेनैव संपूर्णा सा विशेषतः । देवस्यैवं देवतायाः प्रतिष्ठाविधिना सदा । संस्कार्य्यं भक्तजानान्तु सप्तदाशोऽस्य कर्म्मणा" हरिभक्ति०२० विलासः ।

**जीर्वि** पु० जॄ–किन् । कुठारे उज्ज्वलदत्तः ।

**जीव** प्राणने असुधारणे भ्वा०अक०प०सेट् । जीवति अजीवीत् जिजीव । जीवितुं अजिजीवत् त जीवितं जीवनम् जीवः जीविका । "संयमं पुनरारुह्य यदि जीवति पश्यति" स्मृतौ० "वातः परमपि जीवेज्जीवितनाथो भवेत्सखाः" भा०द०"ज्योक् जीवति" इत्यत्र उ० । "शतं जीवन्तु शरदः" ऋ०१०।१८।४ । प्राणधारणञ्च प्राणधारणयोग्योपहृत्तिधारणमपि "नक्तंदिवं च जीवति" मनुः । करणे अक० । "जीवेद्दैवस्य जीविकाम्" मनुः । जीवेत् कुर्य्यात् [रघुः । अति+अतिक्रम्य जीवने अक० । "अत्यजीवदमरावतीश्वरौ" अनु+पश्चाज्जीवने अनुरूपजीवने च अक० । "जीवन्तं त्वानुजीवन्तु प्रजाः सर्वा युधिष्ठिर !" भा० उ० ४५।१५ श्लो० "यां तां श्रियमसूयामः पुरा दग्धा युधिष्ठिरे । अद्य तामनुजीवामः" भा० द्रो० ४।१ श्लो० ।

आ+वृत्तिकरणे उपभोगे च अक० । "आजीवन् स्वेच्छया दण्डो दायस्तस्यापि सोदयम्" याज्ञ० । "आजीवनमुपभुञ्जानः" मिता० । "यथाजीवन्ति पुरुषं सर्वभूतानि सञ्जय !" भा०उ०१२२अ० ।

उद्+उच्छ्वसने अक० । "उदजीवत् सुमित्राभूर्भीताऽस्मिन्यत्तमायतम्" भट्टिः ।

प्रति+उद्+प्रतिरूपोज्जीवने ।

उप+आश्रित्य वर्त्तने सक० । "पूर्ववयसे पुत्राः पितरमुपजीवन्ति उत्तरवयसे पुत्रान् पिता" शत० ब्रा० १२।२।३।१ । "श्रेयांसमुपजीवेयुर्यथैव पितरं तथा" मनुः । उपजीवी उपजीव्यः ।

**जीव** पु० जीव–कर्त्तरि क । १प्राणिनि २जीवन्तीवृक्षे २वृद्धश्रुतौ च मेदि० । ४कर्म्मणि ५क्षेत्रे त्रिका० । भावे घञ् । ६असुधारणे अमरः करणे घञ् । ७वृत्तौ आजीविकायां मेदि० । मनुष्यादिकीटपर्य्यन्ते षट्प्राणिमात्रे ८कार्य्यकारणसङ्घाते । अनेकात्मवादिनां जीवास्तिकायसंज्ञया परिभाषिते १०पदार्थभेदे । त्रिविधश्चासौ अनादिसिद्धसाद्यबद्धभेदात् । अत्रानादिसिद्धोऽर्हन् जीवास्तिकायाख्यः । व्यपेतमोक्षादिबन्धो मुक्तः । मोक्षाद्याश्रितस्तु बद्ध इति । ११उपाधिप्रविष्टे बाह्यमनःप्राणकरणयोगानुप्रविष्टे ब्रह्मणि । घटावच्छिन्नाकाशवत्शरीरान्वितयावच्चित्रे १२चैतन्ये । दर्पणस्थमुखप्रतिबिम्बवद् बुद्धिस्थे १३चैतन्यप्रतिबिम्बे १४आभासाहङ्कारे चित्प्रतिबिम्बे । प्राणादिकलापस्य १५धारयितरि "प्राणान् क्षेत्रज्ञरूपेण धारयन् जीव उच्यते" इत्यभियुक्तोक्तेः १६लिङ्गदेहे । "एवं षड्विधं लिङ्गं लिङ्गत्रयोद्भवं विस्तृतम् । एष चेतनया युक्तो जीव इत्यभिधीयते" इति श्रीभागवतम् । षड्विधं षड्गुणमात्मकम् । लिङ्गत्रयं लिङ्गम् । षोडश विकारात्मना विस्तृतमित्यनाद्यभिमानित्वेन इहलोक

परलोकगामी व्यवहारिको जीव उच्यते।"बालाग्रशत भागस्य शतधा कल्पितस्य च। भागो जीवः स विज्ञेयः स चानन्त्याय कल्पते" श्रुतिः। "बालाग्रशतभोभागः कल्पितस्तु सहस्रधा। तस्यापि शतभोभागो जीवः सूक्ष्म उदाहृतः" शङ्करः। "जीवो नाम देहादिव्यतिरिक्तसाक्षी त्वम्पदार्थो योऽयं विज्ञानमयः योऽयं संसरति योऽयं संहारी नतु देहादिर्जीवः तस्य दृश्यस्य द्रष्टृत्वानुपपत्तेः। "अस्ति देवि! परं ब्रह्मस्वरूपी निष्कलः शिवः। सर्वज्ञः सर्वकर्त्ता च सर्वेशो निर्मलोऽव्ययः। स्वयं ज्योतिरनाद्यन्तो निर्विकारः परात्परः। निर्गुणः सच्चिदानन्दस्वदंशा जीवसंज्ञकाः। अनाद्यविद्योपहिता यथाग्नौ विस्फुलिङ्गकाः। देवादुपाधिसम्भिन्नाः कर्मभिरनादिभिः। सुखदुःखप्रदैः पुण्यपापरूपैर्नियन्त्रिताः। तत्तज्जातियुतं देहमायुर्भोगञ्च कर्मजम्। प्रतिजन्म प्रपद्यन्ते तेषामप्यपरं पुनः। सूक्ष्मं लिङ्गशरीरं तदाभोक्षादक्षयं प्रिये!"कुलार्ण०। १७विष्णौ, "जीवो विनयिता साक्षी मुकुन्दोऽमितविक्रमः" विष्णु० सह०। तत्र दृष्टान्तौ

"जीवः सप्तनवद्विपञ्चमगतः" "जीवार्किभानुज्ञेज्ञानां ज्ञेवाग्नि स्फुरजादयः" ज्योति०।८पुष्यनक्षत्रे च। तस्य जीवाधिष्ठातृकत्वात् तथात्वम् शब्दार्णवशब्दे ४६८ पृ० दृश्यम्। घटसंवृत आकाशे नीयमाने यथा घटो नीयेत नाकाशं तद्वत् जीवो नभोपमः"। आर्हतमतसिद्धजीवभेदाश्च अर्हच्छब्दे ३८४ पृ० दृश्याः। स च जीवो विभुरिति साङ्ख्यनैयायिकवैशेषिकपातञ्जलादिनः। अणुपरिमाण इति रामानुजादयः। मध्यमपरिमाणः इति माध्वभिक्षा। आत्मतत्त्वशब्दे ७२पृ०दृश्यम् "हन्ताहमिमास्तिस्रो देवता अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणि" छा० उ०। "भावनाख्यस्तु संस्कारो जीवस्थो त्रिगुणो" भाषा० जीव-क १६जीवनयुक्ते त्रि०। "कर्णनो लाङ्गलैः पुंसो घ्नन्ति भूमिशयान् बहून्। जीवानन्यांश्च सुबहून् तत्र किं प्रतिभाति ते। धान्यबीजानि यान्याढकीत्रीह्यादीनि द्विजोत्तम!। सर्वाण्येतानि जीवानि तत्र किं प्रतिभाति ते। अध्याक्रम्य पशूंश्चापि घ्नन्ति ये भक्षयन्ति च। इक्षांस्तथौषधीश्चापि छिन्दन्ति परशुना द्विज!। जीवाहि बहवो ब्रह्मन्! इक्षुषु च फलेषु च। उदके बहवश्चापि तत्र किं प्रतिभाति ते। सन्तैः सत्त्वानि जीवन्ति बहुधा द्विजसत्तम!। पृथिव्योऽन्योन्यभक्षाश्च तत्र किं प्रतिभाति ते। चक्रस्थभाषा जीवांश्च वस्त्रोसंश्रितान् बहून्। पद्भ्यां घ्नन्ति नरा विप्र! तत्र किं प्रतिभाति ते। उपविष्टाः शयानाश्च घ्नन्ति जीवानने कशः। ज्ञानविज्ञानवन्तश्च तत्र किं प्रतिभाति ते। जीवैर्यस्मादिदं सर्वमाकाशं पृथिवी तथा। अविज्ञानाच्च हिंसन्ति तत्र किं प्रतिभाति ते। अहिंसेति यदुक्तं हि पूर्वैर्ऋषिभिः पुरा। के न हिंसन्ति। जीवान् वै लोकेऽस्मिन् द्विजसत्तम!।"भा० व०२०७अ०। अत्र जीवस्य हिंसा देहवियोजनम्।

**जीवक** पु० जीवयति जीव+णिच्-ण्वुल्। १अष्टवर्गौनर्गते ओषधिभेदे"जीवकर्षभको धीरौ हिमाद्रिशिखरोद्भवौ। रसोनकन्दवत्कन्दौ निःसारौ सूक्ष्मपत्रकौ। जीवकः कूर्चकाकार ऋषभो वृषशृङ्गवत्" तदभावे विदारीमूलं प्रतिनिधितया देयमिति"। "जीवकर्षभकौ बल्यौ शीतौ शुक्रकफप्रदौ। मधुरौ पित्तदाहार्शःकार्श्यवातक्षयापहौ" भावप्र० २पीतसालवृक्षे २वृषपर्णके च पु०। जीव-ण्वुल्। ४प्राणधारके त्रि० मेदि०। ५सेवके ६बद्धाजीविनि त्रि० ७अस्थिशृङ्खले पु० मेदि०।

**जीवकादितैल** न० चक्रदत्तोक्ते तैलभेदे। तच्च तैलं द्विविधं बहुदृष्टत्वात् यदाह तत्रैव "जीवकर्षभको द्राक्षा सिता यष्टी बलोत्पलैः। तैलं नस्यं पयः पक्वं वातपित्तशिरोगदे"। लघु। "जीवकर्षभको द्राक्षा मधूकं मधुकं बला। नीलोत्पलं चन्दनञ्च विदारी शर्करा तथा। तैलप्रस्थं पचेद्देभिः शनैः पयसि षड्गुणैः। जाङ्गलस्य तु मांसस्य तुलार्द्धञ्च रसेन तु। सिद्धमेतद्भवेत्तैलं तैलमद्वौवशेषकम्। वार्धर्यं कर्णशूलञ्च तिमिरं गलशुण्डिकाम्। वातिकं पैत्तिकञ्चैव शीर्षरोगं नियच्छति दत्तचालं शिरःशूलमर्द्धं तद्वापकर्षति" वङ्गसे। चक्रद०।

**जीवघन** पु० जीव एव घनो मूर्त्तिरूः। शिरश्चक्रगर्भे तस्य सर्वजीवसमष्टिरूपत्वात् तथात्वं यथाह पद्मोप०भा०। ओम् शब्दे २५६० पृ० तद्व्याख्यस्थं दृश्यम्। "स एतस्माज्जीवघनात् परात् परम्"।

**जीवजीव** पुंस्त्री जीवञ्जीव+पृषो०। चकोरपक्षिणि अमरः स्त्रियां जातित्वात् ङीष्। स्वार्थे क। तत्रार्थे। "हत्वा रक्षांसि वासांसि जायते जीवजीवकः" मनुः।

**जीवञ्जीव** पुंस्त्री जीवं जीवयति विभ्रमयत्यनया जीव-बा० यच्। चकोरपक्षिणि अमरः स्त्रियां जातित्वात् ङीष्। "जीवञ्जीविकसङ्काशाश्चानुगच्छन्ति पक्षिणः" भा० उ०

जीवत्तोका स्त्री जीवत् तोकं यस्याः। जीवत्पुत्रिकायां स्त्रियां। (जेर्जी त पोयाती) हेमच०।

जीवत्पति स्त्री जीवन् पतिर्यस्याः सपूर्वत्वात् वा न ङीषौ। सधवायां स्त्रियाम्। हेमच०।

जीवत्पितृक पु० जीवन् पिता यस्य कप्। विद्यमानपितृके जने। "यमाद्यानं गयाश्राद्धं दत्त्वाऽश्नन्नभोजनम्। न जीवत्पितृकः कुर्यात् कृते तु पितृहा भवेत्" ति० त०। तत्र जीवत्पितृकस्य श्राद्धविशेषेऽधिकारः निर्णयसिन्धौ व्यवस्थापितो यथा।

"जीवत्पितृकस्य सामेरेव इद्धित्राद्धेऽधिकारः न तु निरग्नेः "न जीवत्पितृकः कुर्याच्छ्राद्धमग्निस्कृते द्विजः। येभ्य एव पिता दद्यात्तेभ्यः कुर्वीत साग्निकः। पितामहेऽप्येवमेव कुर्याज्जीवति साग्निकः। साग्निकोऽपि न कुर्वीत जीवति प्रपितामहे" इति चन्द्रिकायां समन्तूक्तेरित्याहुः प्रयोगपारिजातेऽग्न्याहिताग्निर्न कुर्यादितीदं व्याख्यातम् तत्र "अनग्निकोऽपि कुर्वीत अन्नादौ इद्धिकर्मणि। येभ्य एव पिता दद्यात्तानेवोद्दिश्य तर्पयेदिति" हारीतोक्तेः सौमनस्यन्तु इद्धिश्राद्धभिन्नश्राद्धपरमित्युक्तं मदनरत्ने। श्राद्धपदं पिण्डपितृयज्ञपरमिति पृथ्वीचन्द्रोदयः। निर्णयामृते तु हारीतीयेऽनग्निकोनाहिताग्निरभिप्रेतः पूर्ववचने तु साग्निः श्रौताग्निः स्मार्ताग्निरुच्यते। तेनोभयाग्निहीनस्य नेत्युक्तं तत्र पूर्वोक्तादिशा गतिसम्भवेनाग्निपदस्य स्मार्ताग्निपरत्वे मानाभावात् वक्ष्यमाणनित्यानित्यसंयोगविरोधात् "पितरो जनकस्तेभ्या यावद्व्रतमनाहितम्। समाहितव्रतः पश्चात्स्नात्वा यजेत पितामहानिति, पृथ्वीचन्द्रोदये यमवचोविरोधाच्च। अपराह्णेऽपि समावर्त्तने ब्रह्मचारी स्वयमेव नान्दीश्राद्धं कुर्यादित्याहुः अतः पूर्वमेव साधु बोधदेवोऽप्येवमाह। वस्तु मतं जीवत्पितृकस्य पुत्रनामकर्मादौ न इद्धिश्राद्धम् हारीतीये अन्नाद्यादित्यादिशब्देन तत्प्राप्तावपि "उद्वाहे पुत्रजनने पुत्रेष्ट्यां सौमिके मखे। तीर्थे ब्राह्मण आयाते नेहेते जीवतः पितरिति" मैत्रपरिशिष्टे उद्वाह एव तस्योपसंहारात् एवं यत्र तु संस्कारादिपदं तदप्युद्वाहादिपरमेवेति तत्र उद्वाहपदस्य स्वविवाहपरत्वस्यापि सम्भवात् पुत्रविवाहपरत्वे मानाभावात् "नामकर्मणि वालानां चूडाकर्मादिके तथा" इत्यादिभिर्नित्यश्राद्धस्य चौलाद्यकरणवगतौ नित्यानित्यसंयोगविरोधाच्च अतो अन्नाद्यादिति सर्वसंस्कारसंग्रहः। तथा च कात्यायनः "सपितृभ्यः पिता दद्यात् सुतसंस्कारकर्मसु। पितृव्यानोद्वाहनान्तेषां तस्याभावे तु तत्क्रमात्"। सुतानां चौलादिसंस्कारेषु पिता सपितृभ्यः पिण्डान् श्राद्धम्। "पिण्डदोऽंशहरश्चैषामिति" दर्शनात् चौद्वाहनादिवाहपर्य्यन्तं दद्यात् विवाहस्तु प्रथमः "नान्दीश्राद्धं पिता कुर्यादादौ पाणिग्रहे सुधः। अत ऊर्द्धं प्रकुर्वीत स्वयमेव तु नान्दिकमिति" स्मृतेः तस्य पित्रभावे तत्क्रमात् "असंस्कृतास्तु संस्कार्या भ्रातृभिः पूर्वसंस्कृतैरिति" यः कर्तृक्रमः तेन क्रमेण ज्येष्ठभ्रात्रादिर्दद्यादिति चन्द्रिकादयः। हेमाद्रिस्तु तस्य पित्रभावे यः पितृव्यमातुलादिः संस्कुर्यात् स तत्क्रमात् संस्कार्यं पितृक्रमाद्दद्यात्तत्र स्वपितृभ्य इति व्याचख्यौ। समावर्त्तनस्यापि विवाहप्राचीनसुतसंस्कारत्वात्तेषैव नान्दीश्राद्धं कुर्यात् तदभावे ज्येष्ठभ्रात्रादिः तदभावे स्वयमेव कुर्यात्। उपनयनेन कर्माधिकारस्य जातत्वात् एवमाद्यविवाहेऽपीति पृथ्वीचन्द्रोदयचन्द्रिकादयः। मदनरत्नेऽप्येवम्। यदा तु पितरि संन्यस्ते प्रोषिते पतिते वा धर्मार्थं तत्पुत्रमन्यः संस्कुर्यात्तदा संस्कार्यपितुः पित्रादिभ्यो दद्यात् "पितरो जनकस्तेभ्या यावद्व्रतमनाहितम्। समाहितव्रतः पश्चात्स्नात्वा यजेत पितामहानिति" पृथ्वीचन्द्रोदये यमोक्तेः जीवत्पितृकस्य विशेषमाह कात्यायनः "उद्वाहे तीर्थे च संन्यस्ते ताते च पतिते सति। येभ्य एव पिता दद्यात्तेभ्यो दद्यात्स्वयं सुतः" इति। तीर्थे एव प्रायश्चित्ताङ्गश्राद्धेऽपि तस्याधिकारः।

"पितरि जीवति यः श्राद्धं कुर्यात् स तेषां पिता कुर्यात्तेषां कुर्यात्। पितरि पितामहे च जीवति तेषां पितामहः कुर्यात् तेषां कुर्यात् त्रिषु जीवत्सु नैव कुर्यात्" विष्णुः। "जीवत्पितृकोऽपि" कात्या० श्रौ० सू० पिण्डपितृयज्ञेऽधिक्रियते च। "जीवान्वर्हितेऽपि" कर्कसू० "जीवपितृकस्य जीवेन पित्रादिना व्यवहितेऽपि व्यवहितेऽपि पितामहादेः पिण्डदानं भवति सोमादाविव "तेभ्य एव पिता दद्यात्तेभ्यो दद्यात्तथा सुतः" इति कर्कसूत्रेः। "जीवपितृकस्य सोमान्तमनारब्धो वा" सू०। "जीवपितृकस्य यजमानस्य सोमान्तमेव पिण्डपितृयज्ञसंज्ञं कर्म भवति अथवाऽनारब्ध एव पिण्डपितृयज्ञस्य वाशब्दः पूर्वपक्षनिरासार्थः। अनारब्धपक्ष एव युक्तः यतः पिण्डदानं प्रधानम्। तदभावे सोमस्याङ्गभूतस्यानुष्ठानं न घटते। एवं जीवान्वर्हितेऽपीति पक्षे दूष-

पित्वा जीवत्पितृकस्य क्षौमान्नमित्यस्योपपत्तिमाह" कर्क०। "न व्यवैते जातुकर्णौ न जीवन्नमति ददातीति" स्मृ०। "जीवपितृकस्य क्षौमान्नकर्म कुर्वतः यतोजातुकर्णो आचार्यो न व्यवैते जीवता पिता व्यवच्छिते पितामहादौ पिण्डदानं न भवतीत्याह कुतो न भवतीत्यत्र हेतुः "न जीवन्नमति ददातीति" शास्त्रान्तरे श्रवणात् अतःप्रधाने पिण्डदाने जीवत्पितृकस्य निषिद्धे अनारम्भ एव घटते न क्षौमान्नता। आपस्तम्बः "यदि जीवत्पिता न दद्यादा क्षौमात् ज्ञात्वा विरमेदिति" मानवे च "यदि दद्याद्येभ्य एव पिता दद्यात्तेभ्यो दद्यादिति" काठके "पितापुत्रौ चेदाग्निताग्नी स्यातां येभ्यः पिता तेभ्यः पुत्रो दद्यात् पिता प्रेतः स्यात् पितामहो जीवेत् पित्रे पिण्डं निधाय पितामहात्परास्यां द्वाभ्यां दद्यादिति" कर्क० जीवपुत्रोऽत्र। समासान्तविधेरनित्यत्वात् न कप्। जीवपितृत्वमपि तत्रार्थे।

**जीवथ** पु० जीव-अथ। १क्लेशे २भयूरे ३मेघे च ४चिरायुष्के ५धार्मिके च ७जीवनवति त्रि०। तत्रादिको०

**जीवद** पु० जीवं जीवनं ददाति दा-दो-क। १वैद्ये २रिपौ ३यन्त्रिपर्वण्डवृक्षे च मेदि० ४जीवनदातरि त्रि०। ५जीवन्तीवृक्षे स्त्री राजनि०।

**जीवदात्र** त्रि० जीवं ददाति दा-त्रच्। १जीवनदातरि स्त्रियां ङीप् सा च २व्रह्मिणाभेषधौ ३जीवन्तीवृक्षे च राजनि०।

**जीवदानु** त्रि० जीवं ददाति दा-वा० नु। १जीवनदातरि "विरिप्सच्चुदाय पृथिवीं जीवदानुम्" मनु० १।२८।

**जीवदृष्टा** स्त्री जीवाय जीवनाय दृष्टा। जीवन्तीवृक्षे राजनि०

**जीवधन** न० जीव एव धनम्। गवादिजन्तुरूपे धने त्रिका०

**जीवधानी** स्त्री जीवा धीयन्तेऽस्याम् धा+अधि-करणे ल्युट् ङीप्। पृथिव्याम्। "ददर्श गां तत्र सुपुप्सरस्यां जीवधानीं खयमभ्यधत्त" भाग० २।१३।२। "जीवधानीं सर्वजीवाधारभूतां मह्रीम्" श्रीधरः।

**जीवन** न० जीव-भावे ल्युट्। १हत्तौ २प्राणधारणे। करणे ल्युट्। ३जले मेदि०। जलं विना प्राणधारणासम्भवात्तस्य जीवनकरणत्वम् अत एव "अद्भ्मयं हि सौम्य! मन आपोमयः प्राणः" छान्दोग्ये प्राणानां जलमयत्वञ्चा तस्य तथात्वं समर्थितं यथा।

"आपः पीतास्त्रेधा विधीयन्ते तासां यः स्थविष्ठो धातुस्तन्मूत्रं भवति यो मध्यमस्तल्लोहितं योऽणिष्ठः स प्राणः" "अपां सौम्य! पीयमानानां योऽणिमा स ऊर्ध्वः समुदीषति स प्राणो भवति" "षोडशकलः सौम्य! पुरुषः पञ्चदशाहानि माशीः कामम्भपः पिबापोमयः प्राणो, न पिबतो विच्छेत्स्यते" इति छा०उ०। ४जीवनसाधने त्रि० "सर्वाऽर्च्यो जीवनः प्राता" सुश्रुतः। ५वैद्यकप्रसिद्धे गन्धद्रव्ये स्त्री ङीष्। सद्योहतस्यायुर्द्विकरत्वेन जीवनहेतुत्वात् तथात्वम्। ६मध्यमे राजनि०। ७तेऽजीवकौषधौ च पु०राजनि०। ८क्षुद्रफलवृक्षे पु० शब्दच०। १०पुत्रे पु०हेमच०। जीवयति जीव-णिच्-कर्तरि-ल्यु। ११परमेश्वरे पु० "वीरहा रक्षणः सन्तो जीवनः पर्य्यवस्थितः" विष्णुस०। "सर्वाः प्रजाः प्राणरूपेण जीवयन् जीवनः" भा०। "प्रवर्त्तिय निवर्त्तिय तथा जीवनकारणम्" माघः। "जीवनं जीवनं हन्ति प्राणान् हन्ति समीरणः। किमाश्चर्य्यं आरटेयं प्राणदा यमदूतिका" उद्भटः। हत्तौ १२जीविकायाम्। "ऋषिः श्रियं धृतिर्विद्या कुसीदं शकटं गिरिः। सेवा रूपं रूपो भैक्षमापत्तौ जीवनानि तु" याज्ञ० "विद्या श्रियं धृतिः सेवा गोरक्षं विपणिः ऋषिः। वृत्तिर्भैक्षं कुसीदन्तु दश जीवनहेतवः" मनुः। १३जीवदातरि "शीतस्तव वपो वायुः सुगन्धिं जीवनः शुचिः" भा० व० १६८ अ०।

**जीवनक** न० जीवन+संज्ञायां कन्। अन्ने हेमच०। कस्य प्राणस्यान्नतत्त्वोक्त्या तस्य तथात्वम्।

**जीवनयोनि** स्त्री ६त०। न्यायोक्ते देहे प्राणसञ्चारकारणे अतीन्द्रिये १यत्नभेदे। "यत्नो जीवनयोनिस्तु सर्वदातीन्द्रियो भवेत्। शरीरे प्राणसञ्चारकारणं परिकीर्त्तितम्" भाषापरि०। "जीवनयोनिर्यत्नो यावज्जीवनमनुवर्त्तते स चातीन्द्रियः। तत्र प्रमाणञ्चाह शरीरे प्राणसञ्चारकारणं परिकीर्त्तितमिति। प्राणसञ्चारो हि अधिकः श्वासादिः प्रयत्नतः साध्यः। दृश्यञ्च प्राणसञ्चारस्य यत्नसाध्यत्वानुमानात् प्रत्यक्षयत्नस्य बाधाच्चातीन्द्रिययत्नसिद्धिः। स एव जीवनयोनिप्रयत्नः" सिद्धा०

**जीवना** स्त्री जीवयति जीव-णिच्-ल्यु। मेदोधौ मेदि०।

**जीवनाधात** न० जीवनस्याधातो यस्मात्। विषे शब्दच०।

**जीवनावास** पु० जीवनं जलमावासोऽस्य। वरुणे शब्दच०। ६त०। २प्राणायतने देहे च।

**जीवनी** स्त्री जीवत्यनेन जीव-करणे ल्युट् ङीप्। १काकोल्यां २क्षीरायां ३मेदायां ४महामेदायां ५जीवन्त्यां

राजनि०। ङ्यूख्यां शब्दच०। संज्ञायां कन्। जीवनिका हरितक्यामू राजनि०।

**जीवनीय** न० जीव–बा० करणे अनीयर्। १जले हेमच०। २जीवनीहेच स्त्री अमरः। कर्मणि अनीयर्। ३उपजीव्ये त्रि०। भावे अनीयर्। वर्त्तनीये। ४विद्याशिल्पभित्यादिमतुब्याख्यायाम्।"एभिर्दशभिरापदि जीवनीयमुञ्छशूकः"।

**जीवनीयगण** पु० औषधभेदे "अष्टवर्गश्च पञ्चिन्यौ जीवन्ती मधुकं तथा। जीवनीयगणः प्रोक्तो जीवनन्तु पुनस्तथा" वैद्यकम्। [राजनि०

**जीवनेत्री** स्त्री जीवं नयति नी–तृच् ङीप्। सैंहल्याम्।

**जीवनौषध** न० जीवनस्य जियमाणप्राणस्य रक्षणार्थमौषधम्। जीवातौ जियमाणस्य प्राणरक्षके औषधे अमरः।

**जीवन्त** पु०जीव–कर्त्तरि भ। १प्राणे, २आयुर्विशिष्टे त्रि०। जीव–णिच्–भ। ३औषधे च उणा०।

**जीवन्तिका** स्त्री जीव–जीव–णिच्–वा भ–संज्ञायां कन्। १वन्दायां वृक्षोपरिजातलतायां २गुडूच्यां ३जीवाख्यायके भेदि० ४जीवन्त्यां ५हरीतक्यां च राजनि०।

**जीवन्ती** स्त्री जीव–भ गौरा० ङीष्। (जीवट) ख्याते (जियाता) ख्याते १वृक्षे। "जीवन्ती शीतला वाट्यः स्निग्धा दोषत्रयापहा। रसायना बलकरी चक्षुष्या वाहिनी लघुः। जीवन्त्याः क्षीरसं पक्वं स्निग्धं तक्रसमन्वितम्। स्निग्धेन संयुते तैले तक्रं स्निग्धा प्रवेक्षयेत्" भावप्र०। "जयरेणाथ जीवन्त्रा कपिवेष च सर्षपैः" भा० स० ४अ०। (चोड़ी) ख्याते गुर्जरदेशप्रसिद्धे २लताभेदे ३शक्यां ४गुडूच्यां ५वन्दायां ६डोक्यां ७हरितक्यामू राजनि०। सा च "हरितकी जीवन्ती वर्णवर्धिनी" इत्युक्तलक्षणा।

**जीवन्त्याद्यघृत** न०चक्रदत्तोक्ते पक्वघृतभेदे "जीवन्तीं मधुकं द्राक्षां फलानि कुटजस्य च। यष्टीं पुष्परसञ्चैव व्याघ्रीं गोक्षुरकं बलाम्। नीलोत्पलं चामलकीं त्रायमाणां दुरालभाम्। पिप्पलीञ्च समं पिष्ट्वा घृतं वैद्यो विपाचयेत्। एतद्व्याधिसमूहस्य रोगे ग्रहसमन्वितम्। रूपमेकादशविधं सर्पिरग्र्यं व्यपोहति"।

**जीवन्मुक्त** त्रि०जीवन्नेव मुक्तः जीवन्येवाज्ञानेन बन्धरहिते "जीवन्मुक्तो नाम स्वस्वरूपाखण्डब्रह्मज्ञानेन तदज्ञान बाधनद्वारा स्वस्वरूपाखण्डब्रह्मणि साक्षात्कृते अज्ञान कार्यसञ्चितकर्मसंशयविपर्ययादीनामपि बाधितत्वादखिलबन्धरहितो ब्रह्मनिष्ठ" इति वेदान्तसा०। नन्वेवं जीवन्मुक्तो व्यवहरति न वा। आद्ये तस्य बन्धाभावः द्वितीये देहस्थानुपयोगात् सद्यः पातप्रसङ्ग इत्यत आह। "अयन्तु व्युत्थानसमये मांसशोणितमूत्रपुरीषादिभाजनेन शरीरेण चाण्डालान्द्रपटुत्वादिभाजनेनेन्द्रियग्रामेण च क्षुधायापिपासाशोकमोहादिभाजनेन चान्तःकरणेन पूर्वपूर्ववासनया क्रियमाणानि कर्माणि भुञ्जमानानि ज्ञानाविरुद्धान्यारब्धफलानि च पश्यन्नपि बाधितत्वात् परमार्थतो न पश्यतीति" वे०सा०। दृष्टान्तेनोक्तमर्थं स्पष्टयति। "यथेन्द्रजालमिति ज्ञानवान् तदिदमिन्द्रजालं पश्यन्नपि परमार्थमिदमिति" न पश्यति। उक्तञ्च "शुष्मिवल्मायति यो न पश्यति हयन्तु पश्यन्नपि चाऽहयत्वतः। तथा च कुर्वन्नपि निष्क्रियत्व यः स आत्मविज्ञान्य इतीह निश्चयः" इति वेदान्तसा०। "वेदविद्याऽऽत्मतं ज्ञानं देशिकस्य सुखात् स्वयम्। षट्शीत्याऽष्टोत्तरशतं ये पठन्ति द्विजोत्तमाः। प्रारब्धक्षयपर्यन्तं जीवन्मुक्ता भवन्ति ते" तन्त्रम्। अष्टोत्तरशतमुपनिषदाम्। २कौलिके च "धन्यामाहेश्वराः सार्वप्रत्यभिज्ञानशालिनः। स्वपरिज्ञानमात्रेण जीवन्मुक्ता भवन्ति हि। सङ्कासनन्त्रभावेन कुलाचारप्रभावतः। ते चाचारा निर्विकल्पा जीवन्मुक्ता हि कौलिकाः" तन्त्रशास्त्रम् "योऽन्तर्ज्योमवदत्यच्छः स जीवन्मुक्त उच्यते" कुलार्णवे।

वेदान्तपरिभाषायां विशेष उक्तो यथा।

"निर्गुणब्रह्मसाक्षात्कारवतस्तु न लोकान्तरगमनं "न तस्य प्राणा उत्क्रामन्तीतिश्रुतेः किन्तु यावत्प्रारब्धकर्मक्षयं सुखदुःखे अनुभूय पश्चादपवृज्यते। ननु "जीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे" इत्यादिश्रुत्या "ज्ञानाग्निः सर्वकर्माणि भस्मसात् कुरुतेऽर्जुनेत्यादि" स्मृत्या च ज्ञानस्य सकलकर्मक्षयहेतुत्वनिश्चये सति प्रारब्धकर्मावस्थानमनुपपन्नमिति चेन्न तस्य "तावदेव चिरं यावन्न विमोक्षेऽथ सम्पत्स्ये कैवल्येनेत्यादि" श्रुत्या "नाभुक्तं क्षीयते कर्मकल्पकोटिशतैरपीत्यादि" स्मृत्या च तत्तादृशकार्यकर्मव्यतिरिक्तानां सञ्चितकर्मणामेव ज्ञानविनाश्यत्वावगमात्। सञ्चितं द्विविधं शुभतं दुष्कृतञ्च। तथाच श्रुतिः "तस्य पुत्रादायमुपयन्ति सुहृदः साधुकृत्यां द्विषन्तः पापकृत्यामिति"। नन्वेवं ब्रह्मज्ञानान्मूलाज्ञाननिवृत्तौ तत्कार्यं प्रारब्धकर्मापि निवृत्तेः सद्यः ज्ञानिनां देहधारणमनुपपन्नमिति चेन्न अपतितवृक्षस्थाज्ञाननिवर्त्तकतया प्रारब्धकर्मरूपपतितवृक्षदशायामज्ञाननिवृत्ते-

रत्नकीकारात् । "नन्वेवमपि तत्त्वज्ञानादेकस्मिन्नपि सर्वमुक्तिः स्यात् अविद्याया एकत्वेनैतन्निवृत्तौ क्वचिदपि संसारावशेषादिति चेन्न इष्टापत्तेरित्येके । अपरे त्वेतद्दोषपरीहारायैव "इन्द्रो मायाभिरिति" बहुवचनमुपपन्नमित्याहुः । अन्ये त्वेकैवाविद्या तस्याश्चाविद्याया जीवभेदेन ब्रह्मस्वरूपावरणशक्तयो नाना तथा च यस्य ब्रह्मज्ञानं तस्य ब्रह्मस्वरूपावरणशक्तिविशिष्टाविद्यानाशः नत्वन्यं प्रति ब्रह्मस्वरूपावरणशक्तिविशिष्टाविद्यानाश इत्यभ्युपगमान्नैकमुक्तौ सर्वमुक्तिः । अतएव "यावदधिकारमवस्थितिराधिकारिकाणाम् इत्यधिकरणे अधिकारिपुरुषाणामुत्पन्नतत्त्वज्ञानानामिन्द्रादीनां देहधारणानुपपत्तिमाशङ्क्य अधिकारापादकप्रारब्धकर्मसमाप्त्यनन्तरं विदेहकैवल्यमिति सिद्धान्तितम् । तदुक्तमाचार्यवाचस्पतिमिश्रैः "उपासनादिसंविद्धतोपितेश्वरोदितम् । अधिकारं समाप्यैते प्रविशन्ति परमदमिति" । एतच्चैकमुक्तौ सर्वमुक्तिरिति पक्षे नोपपद्यते । तस्मादेकाविद्यापक्षेऽपि प्रतिजीवमावरणभेदोपगमेन व्यवस्थोपपादनीया" ।

भा० शु० भाष्यवोक्त ज्ञाततत्त्वज्ञानानामपि यावत् प्रारब्धकर्मसमाप्तिभावदेहादिसम्बन्धः समर्थितो यथा "यावदधिकारमवस्थितिराधिकारिकाणाम्" ३।३।३२ सू० । "विदुषो वर्त्तमानदेहपातानन्तरं देहान्तरसम्पत्तिर्न वेति चिन्त्यते । ननु विद्यायाः साधनभूतायाः सम्पत्तौ कैवल्यनिर्वृत्तिः स्याच्च वेति नेयं चिन्तोपपद्यते । न हि प्राक्साधनसम्पत्तावुदितो भवेत् न वेति चिन्ता सम्भवति, नापि भुञ्जानक्षयेत् न वेति चिन्यते । उपपद्यात्रियं चिन्ता, ब्रह्मविदामपि केषाञ्चित् इतिकाम्यबाधादेहान्तरोत्पत्तिदर्शनात् । तथा ह्यपान्तरतमसाम वेदाचार्यः पुराणर्षिर्वेष्णुर्नियोगात् कलिद्वापरयोः सन्धौ कृष्णद्वैपायनः सम्भूतेति स्मरन्ति, वसिष्ठश्च ब्रह्मणो मानसः पुत्रः सन्निमित्तापादपगतपूर्वदेहः पुनर्ब्रह्मादेशात् मित्रावरुणाभ्यां सम्भूतेति । भृग्वादीनामपि ब्रह्मण एव मानसानां पुत्राणां वरुणे यज्ञे पुनरुत्पत्तिः श्रूयते । सनत्कुमारोऽपि ब्रह्मण एव मानसः पुत्रः स्वं रुद्राय वरप्रदानात् स्वेच्छयैव प्रादुर्बभूव । एवमेव दक्षनारदप्रभृतीनामपि भूयसी देहान्तरोत्पत्तिरुक्ता तेन तेन निमित्तेन भवति स्मृतौ श्रुतावपि मन्त्रार्थवादेषु प्रादेशोपलभ्यते । ते च केचित् पतिते पूर्वदेहे देहान्तरमाददते केचित्तु स्थित एव तस्मिन् योगैश्वर्यबलादनेकदेहानभन्यावेश, सर्वं चैते समधिगतसकलवेदार्थाः श्रूयन्ते । तदेतेषां देहान्तरोत्पत्तिदर्शनात् प्राङ्न ब्रह्मविद्यायाः पारिप्लवं मोक्षहेतुत्वमवहेतुत्वं वेत्यत उत्तरमुच्यते । न, तेषामपान्तरतमःप्रभृतीनां वेदप्रवर्त्तनादिषु लोकस्थितिहेतुष्वधिकारेषु नियुक्तानां अधिकारतन्त्रत्वात् स्थितेः । यथासौ भगवान् सविता सहस्रयुगपर्यन्तं जगतोऽधिकारं चरित्वा तदवसाने उदयास्तमयवर्जितं कैवल्यमनुभवति, "अथ ततश्चैतदेव नैवोदेता नास्तमेतैकल एव मध्ये स्याता" इति श्रुतेः । यथा च वर्त्तमाना ब्रह्मविदः प्रारब्धभोगक्षये कैवल्यमनुभवन्ति "तस्य तावदेव चिरं यावत् न विमोक्ष्येऽथ सम्पत्स्ये" इति श्रुतेः । एवमपान्तरतमःप्रभृतयोऽपीश्वराः परमेश्वरेण तेषु तेष्वधिकारेषु नियुक्ताः सन्तः सत्यपि सम्यग्दर्शने कैवल्यहेतावशीयकर्माणो यावदधिकारमवस्थिताः तदवसाने चापवर्ग्यन्ते इत्यविरुद्धम् । सनत्सनत्तमेव हि तेऽधिकारफलदानाय कर्माशयमतिवाहयन्तः स्वातन्त्र्येण स्वेच्छादिव स्वेच्छान्तरमन्यमन्यं देहं सञ्जरन्तः स्वाधिकारनिर्वर्तनायावस्थितयस्तत्तय एव देवेन्द्रियप्रकृतिवशित्वात् निर्माय देहान् युगपत्क्रमेण वाधितिष्ठन्ति । न चैते जातिस्मरा इत्युच्यते, तत्रैव ते, इति स्मृतिप्रसिद्धेः । यथा "सुलभा ब्रह्मवादिनी जनकेन विदितुकामा व्युदस्य स्वं देहं जानकं देहमाविश्य व्युदतेन पश्चात्तं समाविवेश" इति श्रूयते । यदि ह्युपयुक्ते सनत्सनत्तमे कर्मणि कर्मान्तरं देहान्तरारम्भकारणमाविर्भवेत् ततोऽन्यदन्यदग्धबीजं कर्मान्तरं तदेव प्रसज्येतेति ब्रह्मविद्यायाः पारिप्लवं मोक्षहेतुत्वमवहेतुत्वं वा ब्रूयात्, न त्वियमाशङ्का युक्ता ज्ञानात् कर्मबीजदाहस्य श्रुतिस्मृतिप्रसिद्धत्वात् । तथा च श्रुतिः— "भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः । क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे" इति "क्षीयन्ते सर्वग्रन्थीनां विप्रमोक्षः । इति चैवमाद्या स्मृतिरपि 'यथैधांसि समिद्धोऽग्निर्भस्मसात् कुरुतेऽर्जुन ! । ज्ञानाग्निः सर्वकर्माणि भस्मसात् कुरुते तथा" । इति— "बीजान्यग्न्युपदग्धानि न रोहन्ति यथा पुनः । ज्ञानदग्धैस्तथा क्लेशैर्नात्मा सम्पद्यते पुनः" इति—चैवमाद्या । न चाविद्यादिक्लेशदाहे सति क्लेशबीजस्य कर्माशयस्यैकदेशदाहः एकदेशप्ररोहश्चेत्युपपद्यते, न

ज्ञाग्निदग्धस्य शालिबीजस्यैकदेशप्ररोहो दृश्यते। प्रकृत-फलस्य तु कर्म्माशयस्य सकलोपरि वेगक्षयात् निवृत्तिः "तस्य तावदेव चिरम्" इति शरीरपातलेपकरणात्। तस्मादुपपन्ना यावदधिकारमाधिकारिकाणामवस्थितिः,न च ज्ञानफलस्यानैकान्तिकता। तथा च श्रुतिरविशेषेणैव सर्वेषां ज्ञानान्मोक्षं दर्शयति 'तद्धो देवानां प्रत्यबुध्यत स एव तदभवत्तथर्षीणां तथा मनुष्याणाम्' इति। ज्ञानान्तरेषु चैश्वर्य्यादिफलेष्वासक्ताः क्षुद्रैश्वर्यैः ते पश्चादैश्वर्य-क्षयदर्शनेन निर्विण्णाः परमात्मज्ञाने परिनिष्ठाय कैवल्यं ययुरित्युपपद्यते। 'ब्रह्मणा सह ते सर्वे संप्राप्ते प्रतिसञ्चरे। परस्यान्ते कृतात्मानः प्रविशन्ति परं पदम्" इति स्मरणात्। प्रत्यक्षफलत्वाच्च ज्ञानस्य फलविरहाशङ्कानुपपत्तिः। कर्मफले हि स्वर्गादावनुभवानारूढे स्यादपि कदाचिदाशङ्का भवेद्वा न वेति, अनुभवारूढन्तु ज्ञानफलं "यत्साक्षादपरोक्षाद्ब्रह्म" इति श्रुतेः, "तत्त्वमसि" इति च सिद्धवदुपदेशात्। न हि "तत्त्वमसि" इत्यस्य वाक्यस्यार्थः तत्त्वं श्रुतो भविष्यसि इत्येवं शक्यः परिक्षेतुम्। "तद्धैतत् पश्यन् ऋषिर्वामदेवः प्रतिपेदेऽहं मनुरभवं सूर्य्यश्च" इति सम्यग्दर्शनकालमेव तत्फलं सर्व्वात्मत्वं दर्शयति। तस्मादैकान्तिकी विदुषः कैवल्य-सिद्धिः" भा०। ४।१पादे च।

"तदधिगम उत्तरपूर्वाघयोरश्लेषविनाशौ तद्व्यपदेशात्"१२सू०।

"गतस्तृतीयशेषः, अथेदानीं ब्रह्मविद्याफलं प्रति चिन्ता प्रजायते, ब्रह्माधिगमे सति तद्विपरीतफलं दुरितं क्षीयते न वा क्षीयत इति संशयः। किं तावत् प्राप्तं फलार्थत्वात् कर्मणः फलमदत्त्वा न सम्भाव्यते क्षयः। फल-दायिनी ह्यस्य शक्तिः श्रुत्या समधिगता। यदि तदन्तरेणैव फलोपभोगमुपमृद्येत श्रुतिः कदर्थिता स्यात्। स्मरन्ति च 'न हि कर्म्माणि क्षीयन्ते' [मo भा०] इति। नन्वेवं सति प्रायश्चित्तोपदेशोऽनर्थकः प्राप्नोति। नैष दोषः, प्रायश्चित्तानां नैमित्तिकत्वोपपत्तेर्बर्हिदाहेष्टादि-वत्। यपि च प्रायश्चित्तानां दोषसंयोगेन विधानात् भवेदपि दोषक्षयपर्यन्तता, नत्वेवं ब्रह्मविद्याया विधान-मस्ति। नन्वनभ्युपगम्यमाने ब्रह्मविदः कर्मक्षये तत्फल-स्यावश्यभोक्तव्यत्वादनिर्मोक्षः स्यात्। नेत्युच्यते देश-कालनिमित्तापेक्षो मोक्षः कर्मफलवदुभविष्यति। तस्मात् न ब्रह्मविद्याधिगमे दुरितनिवृत्तिरित्येवं प्राप्ते ब्रूमः तदधिगमे ब्रह्माधिगमे सत्युत्तरपूर्वाघयोरश्लेषविनाशौ भवतः, उत्तरस्याश्लेषः, पूर्वस्य विनाशः। कस्मात्, तद्व्यपदेशात् तथा हि ब्रह्मविद्याप्रक्रियायां सम्भाव्य-मानसम्बन्धस्यागामिनो दुरितस्यानभिसम्बन्धं विदुषो व्यपदिशति "यथा पुष्करपलाश आपो न श्लिष्यन्त एव-मेवंविदि पापं कर्म न श्लिष्यते" इति। तथा विनाशमपि पूर्वोपचितस्य दुरितस्य व्यपदिशति "तद्यथेषीकातूलमग्नौ प्रोतं प्रदूयेतैवं ह्यस्य सर्वे पाप्मानः प्रदूयन्ते" इति। अयमपरः कर्मक्षयव्यपदेशो भवति। "भिद्यते हृदय-ग्रन्थिश्छिद्यन्ते सर्वसंशयाः। क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे" इति। यदुक्तमनुपभुक्तफलस्य कर्मणः क्षयकल्पनायां शास्त्रकृदर्थनं स्यादिति। नैष दोषः, न हि वयं कर्मणः फलदायिनीं शक्तिमवजानी-महे, विद्यत एव सा, सा तु विद्यादिना कारणान्तरेण प्रतिबध्यत इति वदामः। शक्तिमद्भावमात्रे च शास्त्रं व्याप्रियते न प्रतिबन्धाप्रतिबन्धयोरपि। न हि कर्म क्षीयत इत्येतदपि स्मरणमौत्सर्गिकं न हि भोगादृते कर्म क्षीयते तदर्थत्वादिति, दृश्यत एव प्रायश्चित्तादिना दुरितस्य क्षयः "सर्वं पाप्मानं तरति" "तरति ब्रह्महत्यां योऽश्वमेधेन यजते"। य उचैनमेवं वेद" इत्यादि श्रुति-स्मृतिभ्यः। यत्तूक्तं नैमित्तिकानि प्रायश्चित्तानि भवि-ष्यन्ति इति। तदसत्, दोषसंयोगेन चोद्यमानानामेषां दोषनिष्कृतिफलसम्बन्धे फलान्तरकल्पनानुपपत्तेः। यत्-पुनरेतदुक्तं न प्रायश्चित्तवद्दोषक्षयोद्देशेन विद्याविधान-मस्तीति अत्र ब्रूमः। सगुणास्तावद्विद्यासु विद्यत एव विधानं, तासु च वाक्यशेषे ऐश्वर्यप्राप्तिः पापनि-वृत्तिश्च विद्यावत उच्यते, तयोश्चाविवक्षाकारणं नास्ती-त्यतः पाप्मप्रहाणपूर्वकैश्वर्यप्राप्तिस्तासां फलमिति नि-श्चीयते। निर्गुणायान्तु विद्यायां यद्यपि विधानं नास्ति तथाप्यकर्तृत्वबोधात् कर्मप्रदाहसिद्धिः। अश्लेष इति चागामिषु कर्मसु कर्तृत्वमेव न प्रतिपद्यते ब्रह्मविदिति दर्शयति। अतिक्रान्तेषु तु यद्यपि मिथ्याज्ञानात् कर्तृत्वं प्रतिपेदे इव तथापि विद्याबलाद्भूयात् मिथ्याज्ञाननिवृत्ते-स्तान्यपि प्रक्षीयन्त इत्याह विनाश इति। पूर्वप्रसिद्ध-कर्तृत्वभोक्तृत्वस्वरूपविपरीतं हि त्रिष्वपि कालेष्वकर्तृ-त्वाभोक्तृत्वस्वरूपं ब्रह्माहमस्मि नेतः पूर्वमपि कर्त्ता भोक्ता वाऽहमासं नेदानीं नापि भविष्यति काले इति ब्रह्मविदवगच्छति। एवमेव च मोक्ष उपपद्यते, अन्यथा

इत्यनादिकालप्रवृत्तानां कर्मणां क्षयाभावे मोक्षाभावः स्यात्। न च देशकालनिमित्तापेक्षो मोक्षः कर्मफलवत् भवितुमर्हति, अनित्यत्वप्रसङ्गात् परोक्षत्वात्तुपपत्तेश्च ज्ञानफलस्य। तस्मात् ब्रह्माधिगमे दुरितक्षय इति स्थितम्" । भा०

"इतरस्याप्येवमसंश्लेषः पाते तु" ४।१।१३ सू०

"पूर्वस्मिन्नधिकरणे बन्धहेतोरस्य स्वाभाविकस्याश्लेषविनाशौ ज्ञाननिमित्तौ शास्त्रव्यपदेशाच्चिरूपितौ, धर्मस्य पुनः शास्त्रीयत्वात् शास्त्रीयेण ज्ञानेनाविरोध इत्याशङ्क्य तन्निराकरणाय पूर्वाधिकरणन्यायातिदेशः क्रियते। इतरस्याऽपि पुण्यस्य कर्मण एवमधवदसंश्लेषो विनाशश्च ज्ञानवतो भवतः। कुतः, तस्याऽपि स्वफलहेतुत्वेन ज्ञानफलप्रतिबन्धित्वप्रसङ्गात्। "उभे उहैवैष एतेन तरति" इत्यादिश्रुतिषु दुष्कृतवत् सुकृतस्याऽपि प्रधानव्यपदेशात् अकर्तात्मबोधनिमित्तस्य च कर्मक्षयस्य सुकृतदुष्कृतयोस्तुल्यत्वात् "क्षीयन्ते चास्य कर्माणि" इति चाविशेषश्रुतेः। यत्रापि केवल एव पाप्मशब्दः पठ्यते तत्रापि तेनैव पुण्यमप्याक्षिप्तमिति द्रष्टव्यं, ज्ञानापेक्षया निकृष्टफलत्वात्। अस्ति च श्रुतौ पुण्येऽपि पाप्मशब्दः 'नैनं सेतुमहोरात्रे तरतः' इत्यत्र सेतु दुष्कृतेन सुकृतमप्यनुक्रम्य "सर्वे पाप्मानोऽतो निवर्तन्ते"इत्यविशेषेणैव ब्रह्मप्राप्तेषु पाप्मशब्दप्रयोगात्। पाते इति। तृशब्दोऽवधारणार्थः। एवं धर्माधर्मयोर्बन्धहेत्वोर्विद्यासामर्थ्यादश्लेषविनाशसिद्धेरवश्यब्रह्मभाविनी विदुषः शरीरपाते मुक्तिरित्यवधारयति।" भा०

"अनारब्धकार्ये एव तु पूर्वे तदवधेः।" ४।१।१५ सू०

"पूर्वयोरधिकरणयोर्ज्ञाननिमित्तः सुकृतदुष्कृतयोर्विनाशोऽवधारितः, स किमविशेषेणारब्धकार्ययोरनारब्धकार्ययोश्च भवत्युत विशेषेणानारब्धकार्ययोरेवेति विचार्यते। तत्र "उभे उहैवैष एतेन तरति" इत्येवमादिश्रुतिष्वविशेषश्रवणादविशेषेणैव क्षय इत्येवं प्राप्ते ब्रूमः अनारब्धकार्ये एव तिष्ठति। अपहते फले एव पूर्वे जन्मान्तरसञ्चिते अस्मिन्नपि च जन्मनि प्राक् ज्ञानोत्पत्तेः सञ्चितं सुकृतदुष्कृते ज्ञानाधिगमात् क्षीयेते नत्वारब्धकार्ये सामिभुक्तफले यास्यामेतत् ब्रह्मज्ञानायतनं जन्म निर्मितम्। कुत एतत्, "तस्य तावदेव चिरं यावन्न विमोक्ष्ये" इति शरीरपातावधिकरणात् क्षेमप्राप्तेः, इतरथा हि ज्ञानादशेषकर्मक्षये सति स्थितिहेत्वभावात् ज्ञानप्राप्त्यनन्तरमेव क्षेममश्नुवीत तत्र शरीरपातप्रतीक्षां नाचक्षीत। ननु वस्तुबलेनैवायमकर्तात्मत्वबोधः कर्माणि क्षपयन् कथं कानिचित् क्षपयेत् कानिचिन्नोपमेक्षेत, न हि समानेऽग्निबीजसम्पर्के केषाञ्चिद्बीजशक्तिः क्षीयते केषाञ्चिन्न क्षीयते इति शक्यमङ्गीकर्तुमिति। उच्यते, न तावदनाश्रित्यारब्धकार्यं कर्माशयं ज्ञानोत्पत्तिरूपपद्यते, आश्रिते च तस्मिन् कुलालचक्रवत् प्रवृत्तवेगसंस्कारान्तराले प्रतिबन्धासम्भवाद्भवति वेगक्षयप्रतिपालनम्, अकर्तात्मत्वबोधोऽपि हि मिथ्याज्ञानबाधनेन कर्माण्युच्छिनत्ति, बाधितमपि मिथ्याज्ञानं द्विचन्द्रादिज्ञानवत् संस्कारवशात् कञ्चित् कालमनुवर्तत एव। अपि च नैवात्र विवदितव्यं ब्रह्मविदः कञ्चित् कालं शरीरं ध्रियते न ध्रियत इति। कथं क्षेत्रज्ञस्य स्वहृदयप्रत्यक्षं ब्रह्मवेदनं देहधारणव्यापारेण प्रतिक्षेप्तुं शक्येत। स्मृतिस्मृतिषु च स्थितप्रज्ञलक्षणनिर्देशेनैतदेव निरूप्यते। तस्मादनारब्धकार्ययोरेव सुकृतदुष्कृतयोर्विद्यासामर्थ्यात् क्षय इति निर्णयः।" भा०

"भोगेन त्वितरे क्षपयित्वा सम्पद्यते" ४।१।१६ सू०

"अनारब्धकार्ययोः पुण्यपापयोर्विद्यासामर्थ्यात् क्षय उक्तः, इतरे त्वारब्धकार्ये पुण्यपापे उपभोगेन क्षपयित्वा ब्रह्म सम्पद्यते "तस्य तावदेव चिरं यावन्न विमोक्ष्ये अथ सम्पत्स्ये" इति "ब्रह्मैव सन् ब्रह्माप्येति" इति चैवमादिश्रुतिभ्यः। ननु सत्यपि सम्यग्दर्शने यथा प्राग्देहपाताद्भेददर्शनं द्विचन्द्रदर्शनन्यायेनानुवर्त्तमेवं पश्चादप्यनुवर्तेत। न, निमित्ताभावात्। उपभोगशेषक्षपणं हि तत्रानुवृत्तिनिमित्तं, न च तादृशमत्र किञ्चिदस्ति। नन्वपरः कर्माशयोऽभिनवमुपभोगमारप्स्यते। न, तस्य दग्धबीजत्वात्। मिथ्याज्ञानावष्टम्भं हि कर्मान्तरं देहपाते उपभोगान्तरमारभते, तच्च मिथ्याज्ञानं सम्यग्ज्ञानेन दग्धमित्यतः साध्वेतदारब्धकार्यक्षये विदुषः कैवल्यमवश्यम्भावीति।" ४।१। भा०

"यत्तु सञ्चितं कर्मान्तरं तच्च निमित्तं फलस्य दग्धमूलत्वात्। अविद्यादयो हि क्लेशाः कर्मणस्तत्फलस्य च मूलम्। तदुक्तं योगशास्त्रे "क्लेशमूलः कर्माशयः सति मूले तद्विपाकः" इति तच्च मूलं ज्ञानाग्निना दग्धमिति कुत पुनः संसारः तस्माद्देहपाते कैवल्यमिति सिद्धम्" आ० गि० सांख्यकारिकायां तत्त्वकौमुद्यामत्रविशेषो उक्तो यथा "सम्यग्ज्ञानाधिगमाद्धर्मादीनामकारणप्राप्ते। तिष्ठति

संस्कारवशाच्चक्रभ्रमिवद्धृतशरीरः।" सांख्यकारिका।

"तत्त्वसाक्षात्कारोदयादेवानादिरप्यनियतविषयकक्लेशोऽपि कर्माशयप्रचयोदग्रबीजभावतया न आत्यादुपभोगलक्षणाय फलाय कल्पते। क्लेशसलिलावसिक्तायां हि बुद्धिभूमौ कर्मबीजान्यङ्कुरं प्रसूते तत्त्वज्ञाननिदाघनिपीतसकलक्लेशसलिलायामूषरायां कुतः कर्मबीजानामङ्कुरप्रसवः। तदिदमुक्तं धर्मादीनामकारणप्राप्ताविति अकारणत्वप्राप्तावित्यर्थः। उत्पन्नतत्त्वज्ञानेऽपि च संस्कारवशात्तिष्ठति। यथोपरतेऽपि कुलालव्यापारे चक्रं वेगाख्यसंस्कारवशाद्भ्रमत्तिष्ठति। कालपरिपाकवशात्तूपरते संस्कारे निष्क्रियं भवति। शरीरस्थितौ च प्रारब्धपरिपाकौ धर्माधर्मौ संस्कारौ। तथाच श्रूयते "भोगेन त्वितरे क्षपयित्वाथ सम्पद्यते" इति "तावदेवास्य चिरं यावन्न विमोक्ष्येऽथ सम्पत्स्ये" इति। प्रक्षीयमाणाविद्याविषयत्व संस्कारलक्षणात्तत्सामर्थ्याद्धृतशरीरस्तिष्ठति "तत्त्वकौ०।

सां०सू० भाष्येऽप्युक्तं यथा

"बाधितानुवृत्त्या मध्यविवेकतोऽप्युपभोगः" सू०। "सकृत् सम्यग्ज्ञानयोगेनात्मसाक्षात्कारोत्तरं मध्यविवेकावस्थो मध्यमविवेकेऽपि सति पुरुषे बाधितानामपि दुःखादीनां प्रारब्धवशात् प्रतिबिम्बरूपेण पुरुषेऽनुवृत्त्या भोगो भवतीत्यर्थः। विवेकनिष्पत्तिद्वारेणानादसम्यग्ज्ञानादेव भवतीत्यतस्तस्यां सत्यां न भोगोऽस्तीति प्रतिपादयितुं मध्यविवेकत इत्युक्तम्। मन्दविवेकस्तु साक्षात्कारात् पूर्वं श्रवणमननध्यानमात्ररूप इति विभागः" भा०।

जीवन्मुक्तश्च सू०।

"जीवन्मुक्तोऽपि मध्यविवेकावस्थ एव भवतीत्यर्थः। जीवन्मुक्ते प्रमाणमाह" भा०।

"उपदेश्योपदेष्टृत्वात् तत्सिद्धिः" सू०।

"शास्त्रेषु विवेकविषये गुरुशिष्यभावश्रवणाज्जीवन्मुक्तसिद्धिरित्यर्थः। जीवन्मुक्तस्यैवोपदेष्टृत्वसम्भवादिति" भा०।

"श्रुतिश्च" सू०।

"श्रुतिश्च जीवन्मुक्तेऽस्ति "दीक्षयैव नरो सुचेद्वृत्तिर्जन्मुक्तोऽपि विपश्चिते। कुलालचक्रमध्यस्थो विच्छिन्नोऽपि भ्रमेद्यटः"। "ब्रह्मैव सन् ब्रह्माप्येतीत्यादि" रिति। नारदीयश्रुतिरपि "पूर्वाभ्यासवशात् कार्यं न लोको न च वैदिकः। अपुण्यपापः सर्वात्मा जीवन्मुक्तः स उच्यते"। इति। नन्वश्रवणमात्रेणोपदेष्टृत्वं स्यात् तत्राह" सांख्यप्रवचनभाष्यम्।

"इतरथान्धपरम्परा"। सू०।

"इतरथा मन्दविवेकस्याप्युपदेष्टृत्वेऽन्धपरम्परापत्तिरित्यर्थः। सामर्थ्येनात्मतत्त्वमज्ञात्वा चेदुपदिशेत् कश्चिदंशे स्खलमेव शिष्यमपि भ्रान्तीकुर्यात् सोऽप्यन्यं सोऽप्यन्यमित्येवमन्धपरम्परेति। ननु ज्ञानेन कर्मक्षये सति कथं जीवनं स्यात् तत्राह" भा०

"चक्रभ्रमणवद्धृतशरीरः"। सू०

"कुलालकर्मनिवृत्तावपि पूर्वकर्मवेगात् स्वयमेव यथा कियत्कालं चक्रं भ्रमति। एवं ज्ञानोत्तरं कर्मानुत्पत्तावपि प्रारब्धकर्मवेगेन चेष्टमानं शरीरं धृत्वा जीवन्मुक्तस्तिष्ठतीत्यर्थः। ननु ज्ञानहेतुसम्यग्ज्ञातयोगेन भोगादिवासनाक्षये कथं शरीरधारणम्। न च योगस्य संस्काराभिभावकत्वे किं मानमिति वाच्यम्। "व्युत्थाननिरोधसंस्कारयोरभिभवप्रादुर्भावौ निरोधपरिणाम" इति योगसूत्रतत्सिद्धेः। चिरकालीनस्य विषयान्तरावेशस्य विषयान्तरसंस्काराभिभावकतया लोकेऽप्यनुभवाच्चेति तत्राह।" भा०

"संस्कारलेशतस्तत्सिद्धिः।" सू०

"शरीरधारणहेतवो ये विषयसंस्कारास्तेषामल्पावशेषात् तस्य शरीरधारणस्य सिद्धिरित्यर्थः। अत्र चाविद्यासंस्कारलेशस्य सत्ता नामेच्छते अविद्याया जन्मादिरूपकर्मविपाकारम्भकत्वे हेतुत्वात्। योगभाष्ये व्यासेनैवं तथा व्याख्यानत्वात्। "वीतरागजन्मादर्शनादिति" न्यायाच्च। न तु प्रारब्धफलकर्मभोगेऽपीति। यत्र च नियमेनाविद्यामेच्छते स प्रयासविशेषरूपो भोगो मूढेष्वेवास्ति जीवन्मुक्तानां तु भोगाभास एवेति प्रागुक्तम्। यत् तु कश्चिदविद्यासंस्कारलेशोऽपि जीवन्मुक्तस्य तिष्ठतीत्याह तत्र धर्माधर्मोत्पत्तिप्रसङ्गात्। अन्धपरम्पराप्रसङ्गात्। अविद्यासंस्कारलेशसत्ताकल्पने प्रयोजनाभावाच्च। एतच्च ब्रह्ममीमांसाभाष्ये प्रपञ्चितमिति" भा०।

**जीवन्मुक्ति** स्त्री जीवतो मुक्तिः। जीवतो बन्धनिवृत्तौ जीवतः पुरुषस्य कर्तृत्वभोक्तृत्वनिबन्धनसुखदुःखविशेषक्लेशादिरूपस्य निवृत्तौ। तस्या उपायास्तु श्रवणमननयोगाभ्यासादयः तन्त्रोक्तकुलाचाराश्च। "जीवन्मुक्तापुपायस्तु कुलमार्गो हि नापरः" इति तन्त्रोक्तेः।

**जीवन्मृत** त्रि० जीवन्नेव मृतः मृततुल्यः। जीवता कर्त्तव्यकार्य्याकारणात् मृतसमे आत्मम्भरौ स हि जीवन्नपि वैश्वदेवातिथिभोजनाद्यन्तरेण आत्मनः पोषणेन नित्यका-

व्याकरणात् मृतसमः। अतएवाह दक्षः "जीवन्तो मृतकाद्यान्ये य आत्मम्भरयो नराः"।

**जीवपति** स्त्री जीवः जीवन् पतिरस्याः सपूर्वत्वात् वा न ङीपौ जीवद्भर्तृकायां सधवायां "स्त्रीचैतदास्याव लभेत सौभगं स्त्रियं प्रजां जीवपतिर्यथोगुप्तम्" भाग० ६।१९।२० वा कप् जीवपतिकादयोऽप्यत्र।

**जीवपत्नी** स्त्री जीवः जीवन् पतिर्यस्याः सपूर्वत्वात् नः ङीप् च। जीवत्पतिकायां सधवायाम् "ब्राह्मण्याच दुहायाः जीवपत्न्याः जीवप्रजाया अगारे एतां रात्रिं वसेत्"। "वाचं विसृजेत् जीवपत्नीं प्रजां विन्देवेति" आश्व० श्रौ० १।७।२१।२१। "तमेतमवेक्षितकरं वीरमर्जुवस्तः जीवपत्नीति ब्राह्मण्यो मङ्गल्यादिभिर्वाग्भिरुपाशीरनू" सं०त० गोभिलः।

**जीवपत्रप्रचायिका** न० जीवस्य जीवपुत्रकस्य पत्राणि प्रचीयन्तेऽस्याम् "नित्यं क्रीडाजीविकयोः" पा० स०। क्रीडायां प्र+चि-भावे ण्वुल्। उदीचां क्रीडाभेदे। "जीवपत्रप्रचायिका उदीचां क्रीडा" सि०कौ०। प्राचां क्रीडायां तु पा०सूत्रे प्राचामिति विशेषणात् न पूर्वपदस्याद्युदात्तता किन्तु तत्पुरुषे प्रकृतिस्वरः।

**जीवपुत्र** पु०जीवः जीवकः पुत्र इव हर्षहेतुत्वात्।(जियाँपोती) १हृच्छभेदे। जीवः जीवन् पुत्रो यस्याः। २जीवसुतायां स्त्रियां "सा जीवपुत्रा सुभगा भवत्यमरवर्षिणी" हरिवं० १२८अ०। जीववत्सादयोऽप्यत्र। "काकवन्ध्या च या नारी मृतवत्सा च या भवेत्। बङ्कपत्या जीववत्सा सा भवेन्नात्र संशयः" काशीखण्डः। "मृतप्रजा जीवपुत्रा धनेश्वरी" भाग० ६।१९।२१। ३ताहशपुरुषे पु० "कश्चित् पुत्रा जीवपुत्राः सुसम्यक्" भाग० उ० २९।

**जीवपुत्रक** पु० जीवयतीति जीव-क जीवः पुत्र इव हर्षहेतुत्वात् स्वार्थे कन्।(जिँआपोती) हृच्छभेदे। शब्दर०।

**जीवपुष्पा** स्त्री जीवयतीति जीव-णिच् अच्-जीवं जीवकं पुष्पं यस्याः। हृद्रुज्जीवन्तीवृक्षे राजनि०। जीवः जन्तुः पुष्पमिव।२जन्तुरूपपुष्पे न०। "अस्माकं शिविरे तावन्निशिताः शस्त्रपाणयः। शत्रूणां जीवपुष्पाणि विचिन्वन्तु नरेश्वर" रामा० सु०४३अ०।

**जीवप्रिया** स्त्री जीवं प्रीणाति प्री-क ह्रस्वः।१हरीतक्याम्। राजनि०। ह्रस्वः। २जीववल्लभे त्रि०।

**जीवभद्र** स्त्री जीवानां भद्रं यस्याः ५ब०। जीवन्तीलतायां राजनि०। ह्रस्वः। जीवकृक्षे न०।

**जीवमन्दिर** न० ६त०। शरीरे राजनि० तस्य जीवभोगायतनत्वात्तथात्वं जीवद्धरादयोऽप्यत्र।

**जीवमातृका** स्त्री ह्रस्वः। "कुमारी धनदा नन्दा विमला मङ्गला बला। पद्मा चेति च विख्याताः सप्तैता जीवमातृकाः" विधानपारिजातोक्ते कुमार्यादौ मातृकासप्तके।

**जीवयाज** पु० जीवैः पशुभिर्याजः याजनम् यज-णिच् भावे अच्। पशुभिर्याजने। "जीवयाजं यजते सोमपादिवः" ऋ०१।२१।१५। अस्य भाष्ये "याजयतेर्घञ् थेरनिटीति णिलोपस्याचः परस्मिन्निति स्थानिवद्भावात् यजोः कुत्विष्णुप्रतोरिति कुत्वाभाव इति" यदुक्तं तत् प्रातिपदिकं याजयतेर्हेतुमत्त्वाभावात् यजोऽप्रसक्तेः "एरच्पा० इवर्णान्नादचः एव प्रसक्ते च।

**जीवयोनि** स्त्री जीवा जीवनवती योनिः। सजीवजन्मनौ "तिर्यङ्मनुष्यविबुधादिषु जीवयोनिषु" भाग०३।९।२०

**जीवरक्त** न०जीवोत्पादकं रक्तम् शाक०त०। स्त्रीणामार्त्तवे शोणिते तस्य गर्भोत्पादकत्वेन तत्स्यजीवोत्पादकत्वं यथाह सुश्रुतः "आर्त्तवं शोणितं त्वाग्नेयमम्भोधोभीयत्वाद् गर्भस्य,पाञ्चभौतिकत्वापि जीवरक्तमाङ्कराचार्याः विस्रता द्रवता रागः स्यन्दनं लघुता तथा। भूम्यादीनां गुणाह्येते दृश्यन्ते चात्र शोणिते"।

**जीवला** स्त्री जीवं जीवनं लाति श्लेषणात् ला-क। सैंहलीलतायां राजनि०।

**जीवलोक** पु० जीवानां लोकः भोगसाधनम्। १संसारे "माता पिता गुरुजनः स्वजनो समेति मायोपमे जगति कस्य भवेत् प्रतिष्ठा। एको यतो व्रजति कर्म पुरःसरोऽयं विश्रामहेतुसदृशः खलु जीवलोकः। सायं सायं वासवृक्षं समेताः प्रातः प्रातस्तेन तेन प्रयान्ति। त्यक्त्वान्योन्यं तत्त्व वृक्षं विहङ्गास्तद्वज्ज्ञातयो ज्ञातयश्च" इति। "ममैवांशो जीवलोके जीवभूतः सनातनः" गीता। "जीवलोके संसारोपभोगार्थम्" श्रीधरः। कर्म०। २जीवरूपे जने च "महागुणं हरति हि पौरुषेण तदा वीरोजीवति जीवलोके" भा०व०३४अ०, "आलोकमर्कादिव जीवलोकः" रघुः।

**जीववल्ली** स्त्री जीवयतीति जीव-णिच्-अच् कर्म०। क्षीरकाकोल्याम् राजनि०।

**जीववृत्ति** स्त्री जीव एव वृत्तिः। पशुपाल्ये हेमच०। तत्र जीवरक्षादिना वैश्यादेर्वर्त्तिरिति तस्य तथात्वम्। जीवे वृत्तिः स्थितिरस्य। २जीवनिष्ठे गुणादौ त्रि०

"जीवद्वत्सो त्रिमो गुणो" भाषापरिच्छेदकारिका।

**जीवग्राक** पु० कर्म०। भावदेवप्रसिद्धे शाकभेदे। "जीवग्राकः सुमधुरः दंडकृष्णो वस्तिशोधकः। दीपनः पाचनो बल्यो हृद्यः पित्तापहारकः" राजनि०।

**जीवशुक्ला** स्त्री जीवतीति जीवा जीवन्त्रेव शुक्ला क्षीरकाकोल्याम् राजनि०। अन्यस्य पक्वतायामेव शुक्लत्वमस्याः पुनर्जीवन्त्रा एव तथात्वमिति तद्भावता। [राजनि०।

**जीवश्रेष्ठा** स्त्री जीवाय जीवनाय श्रेष्ठा। कर्कटशृङ्ग्यौषधौ

**जीवसंज्ञ** पु०जीव इति संज्ञाऽस्य। कामदृद्विडे राजनि०

**जीवसाधन** न०जीवस्य जीवनस्य साधनम्। धान्ये राजनि०

**जीवसू** स्त्री जीवं जीवनं सूते सू–क्विप्। जीवत्पतिकायां स्त्रियां हेमच०। "जीवसूर्वीरसूर्भद्रे! बहुसौख्यसमन्विता" भा० आ० १८८ अ०।

**जीवस्थान** न० ६त०। मर्मणि हला०।

**जीवहीन** पु० "षड्वरो जीवहीनः" विश्वसारतन्त्रोक्ते षड्वरे मन्त्रे कुमारशब्दे २१०६ पृ० दृश्यम्।

**जीवा** स्त्री जीव–अच् जीवयतेरच् वा टाप् अत्रा–क्विप् संप्रसारणे दीर्घः वा अस्यस्य व। १धनुषो गुणे अत्रायां २जीवन्तिकायामौषधौ, ३वचायां, ४मिञ्जिष्ठे, ५भूम्नौ ६जीवनोपाये च मेदि० जीव–भावे अ टाप्। ७जीवने अटा०। धनुराकारक्षेत्रस्य दृक्तस्योभयरेखाऽवृत्तसंलग्ने क्षेत्रभेदे तन्नागानयनादिकं जीवा० दर्शितं तच्च क्षेत्रशब्दे २४०२ पृ० दर्शितम्। षड्भक्तदृग्ज्यादृष्पपयोगिनी राशिरूपक्षेत्रस्य जीवा तु क्रमज्यायब्दे २२०२पृ०उक्ता अधिकं ज्यायब्दे वक्ष्यते ज्योत्पत्तिप्रकारः सि० शि० उक्तो यथा

"दृष्टाङ्गुलव्यासदलेन हतं कार्यं दिगङ्गं भवयाङ्गितं च। ज्यासंख्यया प्राग्नयतेर्लवा ये तदाद्यजीवा धनुरेतदेव। द्वित्र्यादिनिघ्नं तदनन्तराणां चापे तु दक्षोभयतो दिगङ्गात्। क्षेयं तदप्यद्वयवह्नरब्धेरर्धं ज्यकार्धं निखिलानि चैवम्। ज्यान्यथा वा गणितेन वक्ष्ये ज्यार्धानि तान्येव परिस्फुटानि। त्रिज्याक्रतिर्दोर्युवधर्गहीना मूलं तदोयं खलु कोटिजीवा। दोःकोटिजीवाविरहिते त्रिभज्ये तच्छेषके कोटिभुजोत्क्रमज्ये। ज्याचापमध्ये खलु योऽत्र यावः सैवोत्क्रमज्या सुधियात्र वेद्या। त्रिज्यार्धं राशिज्या तत्कोटिज्या च षष्टिभागानाम्। त्रिज्यावर्गार्धपदं शरवेदांशज्यका भवति। त्रिज्याक्रतीषुघातात् त्रिज्याक्रतिवर्गपड्घातस्य। मूलोनादष्टघ्नात्मूलं षट्त्रिंशदंशज्या। गजदृयगजेषु ५८७८ मिते त्रिभज्या वा श्युतेनः०००० इंभक्ता। षट्त्रिंशदंशजीवा तत्कोटिज्याक्रतेष्णाम्। त्रिज्याक्रतोषघातान्मूलं त्रिज्योनितं चतुर्भक्तम्। अष्टादशभागानां जीवा स्पष्टा भवत्येवम्। क्रमोत्क्रमज्याक्रतियोगमूलाद्दलं तदर्धांशकग्रहिणी स्यात्। त्रिज्योत्क्रमज्यानिघ्नतेर्दलस्य मूलं तदर्धांशकग्रहिणी वा। तस्याः पुनस्तद्दलभागकानां कोटेश्च कोटिंशदंशस्य चैवम्। अन्यज्ज्याकासाधनसूक्ष्मभेदं पूर्वैः प्रदर्श्यैव विशिष्टमस्मात्। त्रिज्याभुजज्याकृतिहीनयुक्ते त्रिज्याक्रती तद्दलयोः पदे स्तः। भुजोनयुक्त त्रिभखण्डयोर्ज्ये कोटिं भुजज्यां परिकल्प्य चैवम्। यद्वोज्ज्ययोरन्तरमिष्टयोर्यत्कोटिज्ययोस्तद्क्रतियोगमूलम्। दलीक्रतं स्याद्भुजयोर्विशेषखण्डस्य जीवैक्यमनेकधा वा। दोःकोटिजीवाविवरस्य वर्गो दलीक्रतस्यास्य पदेन हृत्वा। स्यात् कोटिबाह्वोर्विवरार्धजीवा वक्ष्येऽथ मूलग्रहणं विनापि। दोर्ज्यांक्रतिर्ज्यावदलार्धभक्ता लब्धिर्भवेद्यौर्विवरेण हृत्वा। दोःकोटिभागान्तरगृहिणी स्याज्ज्यार्धानि वा कानिचिदेवमत्र। खगोऽङ्कभूघ्नेन(६५६८) वर्जिता भुजगृहिणी। कोटिज्या दशभिः हृत्वा लिप्तेषु(५७३)विभाजिता। तदैक्यमथजीवा स्यादन्तरं पूर्वगृहिणी। प्रथमज्या भवेदेवं षष्टिरन्याक्रतक्रमः। व्यासार्धेऽष्टगुणाब्ध्यग्निहते खखवसुर्तिर्व्वकाः। कोटिजीवा शताभ्यस्ता गोदस्रतिथि (१५२६)भाजिता। दोर्ज्या स्याद्दृग्गुणवेदांश (४६७)हीना तद्योगसंगिता। तदप्यज्या तयोरापि विवरं पूर्वगृहिणी। तत्त्वदस्रा २२५नगांशोना एवमन्याद्यगृहिणी। ज्यापरम्परयैवं वा चतुर्विंशतिमौर्विकाः। चापवोरिष्टयोर्दोर्ज्ये मिथः-कोटिज्याकृते। त्रिज्याभक्ते तयोरैक्यं स्याच्चापैक्यस्य दोर्ज्यका। चापान्तरस्य जीवा स्यात् तयोरन्तरसंमिता। अन्यज्ज्यासाधने सम्यगियं ज्याभावनोदिता। क्रमोत्क्रमभावना चैका तथान्यान्तरभावना। आद्यज्याचापभागानां प्रतिभागज्यकाविधिः। या ज्यानुपाततः सैव-व्यासार्धे परिणाम्यते। आद्यदोःकोटिजीवाभ्यामेवं कार्या ततो रूढः। भावना सुखदायज्या दृष्टे व्यासदले स्फुटाः। स्फुटं ज्यानयनं पाद्यामिह तद्धोदितं मया। उक्ता संक्षेपतः पूर्वं ज्योत्पत्तिः सुगमा च सा। सविशेषाधुना तत्र विशेषाद्दृष्योऽयतः"। तत्र तावदाचार्योक्तां पदवीमित्यादि श्लोकपञ्चकं

सुगमम्। अत्र गणितेन ज्यानयनार्थं मूलभूतज्यावत्रक्षिप्तप्रकारमेवाह। तत्प्रकारो हि बीजगणितक्रियया। त्रिज्यार्धं राशित्रयेत्यादि। त्रिज्यार्धेन १७१६ तुल्या त्रिंशद्भागानां ज्या भवति। तस्याः कोटिज्या षष्टिभागानाम्। त्रिज्यावर्गार्धपदं पञ्चचत्वारिंशद्भागानां ज्या भवति। अथ त्रिज्यावर्गात् पञ्चगुणात् त्रिज्याकृतिवर्गपञ्चघातस्य मूलेन हीनाद्दष्ट हृतात् पदं षट्त्रिंशद्भागानां ज्या। अथ वा गज ऋषभजेषु ५८७८ निघ्नी त्रिज्याऽयुतेन १००००भक्ता षट्त्रिंशद्भागानां ज्या स्यात्। इति गणितलाघवम्। तत् कोटिजार्द्धाच्चतुष्पञ्चाशद्भागानां ज्या। तथा त्रिज्यावर्गस्य पञ्चगुणस्य मूलं त्रिज्याहीनं चतुर्भक्तं सदष्टादशभागानां ज्या भवति। तत्कोटिज्यार्द्धात् द्विसप्ततिभागानाम्। अतोऽन्यथा साधनमाह। क्रमोत्क्रमज्येत्यादि। कोटिज्यौना त्रिज्याभुजज्योत्क्रमज्या स्यात्। भुजज्यौना त्रिज्याकोटिज्योत्क्रमज्या स्यात्। भुजक्रमज्योत्क्रमज्ययोश्च वर्गयोगपदं भुजांशानामर्धस्य ज्या स्यात्। अथवा त्रिज्योत्क्रमजीवाघातदलस्य मूलं तदर्धांशकशिञ्जिनी स्यादिति क्रियालाघवम्। एवमुत्क्रमजीवा अपि कोटिजीवा या तत्कोटिभागानाम्। ततः पुनरेवमन्यास्तदर्धांशकजीवाः साध्याः। कोटेश्चैवमन्याः। तद्यथा। यत्र चतुर्विंशतिजीवासत्र त्रिजार्धमष्टमं जीवार्धम्। तत्कोटिजीवा तु षोड़शम्। शरवेदांशजीवा द्वादशम्। अष्टमात् तदर्धांशप्रकारेण चतुर्थम्। ४। तत्कोटिजीवा विंशम्। २०। एवं चतुर्थात् द्वितीयं २ द्वाविंशं च। २२। द्वितीयाद्यं १ त्रयोविंशं च २३। विंशतितमाद्दशमं १० चतुर्दशं च १४। दशमात् पञ्चमम् ५ एकोनविंशं च १९। द्वाविंशादेकादशं ११ त्रयोदशं च १३। चतुर्दशात् सप्तमं ७ सप्तदशं च १७। अथ द्वादशात् षष्ठं ६ अष्टादशं च १८। षष्ठात् तृतीयं ३ मेकविंशं च २१। अष्टादशाच्चरमं ९ पञ्चदशं च १५। त्रिजीवा चतुर्विंशमिति। एवं किल पूर्वैरन्यजीवासाधनसूत्रम्। इदानीं विनाप्युत्क्रमजीवयाभिनवप्रकारेणाह। त्रिजीवाभुजजीवाकृतीत्यादि। त्रिजीवाभुजजीवाघातेन त्रिजीवाकृतिरेकत्रोनान्यत्र युता। हे चार्धिते। तयोर्मूले। आद्यं भुजोनखाङ्गांशानां दलस्य जीवा। द्वितीयं भुजाखखाङ्गांशानां दलस्य। एवमतोऽन्याः। तद्यथा। अष्टमात् षोड़शं १६ जीवार्धम्। षोड़शाच्चतुर्थं ४ विंशं च २०। चतुर्थाद्दशमं १०। चतुर्दशं च १४। एवं सर्वाण्यपि। प्रकारान्तरमाह। यद्दोर्ज्यौरन्तरमित्यादि। इष्टदोर्ज्यायोर्यदन्तरं कोटिज्यायोश्च यत् तयोर्वर्गैक्यमूलस्य दलं भुजयोरन्तरार्धस्य ज्या भवति। एवमन्ययोरन्यान्याः। यथैका किल चतुर्थी ४। अन्याष्टमी ८ दोर्ज्या। ताभ्यां द्वितीया सिध्यति। द्वितीयाचतुर्थीभ्यां प्रथमेत्यादि। तथा दोःकोटिज्यायोरन्तरवर्गदलस्य मूलं दोःकोटिभागान्तरार्धस्य ज्या स्यात्। तथाष्टमी ८ दोर्ज्या। षोड़शी १६ कोटिज्या। ताभ्यां चतुर्थी ४ स्यादित्यादि। अथ मूलसूत्रक्रियया विनापि दोःकोटिभागान्तरज्यानयनमाह। दोर्ज्यौक्तिरित्यादि। दोर्ज्यावर्गक्षिप्तज्यार्धेन भक्तः। तस्य त्रिज्यायाश्च विवरं दोःकोष्ठान्तरस्य ज्या स्यात्। कानिचिदेवमत्र ज्यार्धानि साध्यानि। तद्यथा। यत्र किल त्रिंशज्ज्यार्धानि तत्र त्रिज्यार्धं दशमम्। १०। तत्कोटिज्या विंशतितमम्। शरवेदांशज्या पञ्चदशम्। षट्त्रिंशज्ज्या द्वादशम्। तत्कोटिज्यार्धाष्टादशं ज्यार्धम्। अष्टादशभागानां ज्या षष्ठम्। ६। तत्कोटिज्या चतुर्विंशमिति। क्रमोत्क्रमज्याकृतियोगमूलादित्यादिना पूर्वोक्तप्रकारेण दशमात् पञ्चमम्। तत्कोटिज्या पञ्चविंशम्। एवं द्वादशात् षष्ठं चतुर्विंशं च। षष्ठात् तृतीयं सप्तविंशं च। अष्टादशाच्चरममेकत्रिंशं च। एतान्येवानेन प्रकारेण सिध्यन्ति नान्यानि। अत उक्तं कानिचिदेवमत्रेति। यद्दोर्ज्यौरन्तरमित्यादिप्रकारेण। अतोऽत्र पञ्चममेका दोर्ज्या। नवममन्या। ताभ्यां यद्दोर्ज्यौरन्तरमित्यादिना प्रकारेण भुजयोरन्तरार्धस्य ज्योत्पद्यते। तच्च द्वितीयं ज्यार्धम्। तत्कोटिज्यार्धाष्टाविंशम्। ताभ्यां क्रमोत्क्रमज्याकृतियोगमूलाद्दलमित्यादिप्रकारेणाद्यं चतुर्दशं च। एवमन्यावतुर्दश सिध्यन्ति। अथ ज्याभावना। सा च द्वेधा। एका समासभावना। अन्यान्तरभावना। तदर्थमाह। खगोङ्केत्युपरुद्धेनेत्यादि। यत्र किल वसुत्रिवेदाग्नि २४३८ तुल्या त्रिज्या नवतिश्च ज्यार्धानि तत्र तावदुच्यते। तत्र मूलभुजज्यानां मध्ये काचनेष्टा भुजज्या तत्कोटिज्या च पृथक् स्थाप्या। भुजज्या खनवषड्विषुरस ६५६९ विभागेन रहिता कार्या। कोटिज्या तु दशगुणा त्रिसप्तपञ्चभिर्भाज्या। तयोरैक्यं तदपज्या। अन्तरं पूर्वज्या स्यात्। यथा त्रिज्यार्धं त्रिंशत्संख्याकं ३० ज्यार्धम्। ततः समासभावनयैकत्रिंशत्संख्यम्।

तस्माद्द्वात्रिंशत्संख्यमित्यादि। अन्तरभावनया त्वेकोनत्रिंशमष्टाविंशमित्यादि। पूर्वं दोर्जीवा कोटिजीवां त्रिजीवां च प्रकल्प्य प्रथमं षण्डमेव यष्टिः स्यात्। अथ यदि चैव त्रिजीवा चतुर्विंशतिजीवांनि तदर्थमाह। कोटिजीवाशतार्धाभ्यस्तेत्यादि। अत्रापि त्रिजीवार्धमष्टमं जीवार्धं सा भुजजीवा। शेषं कोटिजीवा सा कोटिजीवा शतगुणा षोडशनिघ्नि(१५२६) भाजिता। या तु दोर्जीवा सा तु निजेन सप्तांशवेदांशेन४६७हीना कार्या। यदि तयोरैक्यं क्रियते तदा नवमं जीवार्धं भवति। यदन्तरं तदा सप्तमं स्यात्। एवं समासभावनया नवमाद्दशमं दशमादेकादशमित्यादि। तथान्तरभावनया सप्तमात् षष्ठं षष्ठात् पञ्चममित्यादि। एवं प्रथमं सप्तांशोनं तत्त्वदृक्२२५मितं भवति। अथवा पूर्वं० दोर्जीवां त्रिजीवां च कोटिजीवां प्रकल्प्य साध्यते तथापि तदेव। ततः समासभावनया द्वितीयादीन्यखिलानि भवन्ति। अथ वा त्रिजीवां दोर्जीवां प्रकल्प्य पूर्णं कोटिजीवां च प्रकल्प्य साध्यते तदा त्रयोविंशसत्यद्यते तस्मादन्तरभावनया द्वाविंशम् २२। ततोऽन्ये कविंशम् २१। एवमखिलान्यपि निष्पद्यन्ते। अथ भावनामाह। चापयोरिष्टयोरित्यादि। इष्टयोश्चापयोर्यैं दोर्जीवे ते कर्णभुजौ स्याताम्। तयोरधस्तात् कोटिजीवे च। ततः प्रथमकोटिजीवा द्वितीयदोर्जीवया गुण्या। ततो द्वितीयकोटिजीवा प्रथमदोर्जीवया गुण्या। ते अपि त्रिजीवयाभाजिते। फलयोः समासश्चापैक्यभुजीवस्य जीवा भवति। अन्तरं चापान्तरस्य जीवा भवति। एवं सिद्धजीवातोऽन्यज्यासाधने भावना। तद्यथा। तुल्यभावनया प्रथमज्यार्धस्य प्रथमजीवार्धेन सह समासभावनया द्वितीयं, द्वितीयस्य द्वितीयेनैवं चतुर्थमित्यादि। अथातुल्यभावनया द्वितीयतृतीययोः समासभावनया पञ्चमम्। अन्तरभावनया प्रथमं स्यादित्यादि। अर्धज्यासाधं जीवानार्धमाह। आद्यजीवाचापभागानामित्यादि। यावद्भिरंशैरेका जीवा लभ्यते ते आद्यजीवाचापांशाः। प्रतिभागजीवाविधिरिति। त्रिसप्तषड्भि ५७२ भैक्ता त्यादिना प्रागुक्तप्रकारेणैकभागस्य जीवामानीय तद्भावनातो भागद्वयस्यैवं तेषां भागानां जीवा साध्या साभीष्टत्रिजीवया हृता वस्त्रनखाब्धिवह्निभि २४३८ र्भक्ता प्रथमजीवा स्यात्। तस्मात्तयैव सह भावनया द्वितीयाद्याः सिध्यन्ति" प्रमिताक्षरा।

**जीवातु** पु० जीवयति जीव-णिच्-कर्त्तरि आतु, जीवयतेन जीव-करणे वा आतु। १अन्ने २जीवनौषधे ३मृतसंजीवनौषधे च भावे आतु।४जीवने। मेदि०"रे वत्स ! दक्षिण ! मृतस्य शिशोर्द्विजस्य जीवातवे विसृज शूद्रसनौ क्षणार्धम्" उत्तरच०। "आर्त्तेषा पुनर्जीवातवे न मर्त्तवे" ताण्ड्य० ब्रा०१।५।१८। जीवितुमिति भाव्योक्तेः तवेप्रत्ययान्तमित्यन्ये तथा च जीव-तुमर्थे तवे वा० दीर्घः। न मर्त्तवे इति साङ्गत्यात् जीवितुमित्यर्थकता तत्र तवेप्रत्ययान्तत्वमेव सिध्यतीति बोध्यम्।

**जीवातुमत्** पु० जीवातु+मतप्। आयुष्कामेष्टौ देवताभेदे "आयुष्कामेष्टौ जीवातुमन्तौ" आश्व०श्रौ० २।१०। २। "जीवातुमन्तौ सव्योपर्यु स्या" २।१८।१६।

**जीवात्मन्** पु० जीवति जीव-अच् कर्म०। प्राणसञ्चारयुक्ते आत्मनि प्राणिनि। "संयोगो योग इत्युक्तो जीवात्मपरात्मनोः" योगशा०। "जीवात्मन् ! पश्य भद्रं ते मातरं पितरञ्च ते" भाग० ६।१६।२।

**जीवादान** न० ६त०। "अयोगस्तूभयोराद्यानं परिकर्त्तिका परिस्रावाः प्रवाहिका हृदयोपसरणमग्नयोऽभियोगो जीवादानमिति नव व्यापदो वैद्यनिमित्ता भवन्तीति" सुश्रुतोक्ते वैद्यनिमित्ते व्यापद्भेदे तच्च वमनविरेचनव्यापद्भेदः यथोक्तं तत्रैव

"अथातो वमनविरेचनव्यापच्छिकित्सितं व्याख्यास्यामः। वैद्यातुरनिमित्तं वमनं च षड्दशधा व्यापद्यते तत्र वमनस्याधोगतिरूर्द्धं विरेचनस्येति पृथक्। सामान्यतश्चोभयोः सावशेषौ वधत्वं जीर्णौषधत्वं क्षीणाधिदोषापहृतत्वं वातशूलमयोगातियोगौ जीवादानमाध्मानं परिकर्त्तिका परिस्रावः प्रवाहिकाहृदयोपसरणं विबन्ध"इति।

**जीवाधार** पु० ६त०। हृदये हेमच०। "हृद्यं तस्माद्धृदयम्" छा० उ० जीवस्य हृदयाधारत्वोक्तेस्तथात्वम्।

**जीवान्तक** पु०जीवमन्तयति अन्ति-नामधा०ण्वुल्। जीवनाशे प्राणिनाशके शाकुनिके अमरः२प्राणिनाशकमात्रे त्रि०।

**जीवार्द्धपिण्डक** पु०सूर्यसि०परिभाषिते चक्रस्थराशिकलानां १८०० शतानामष्टमे भागे २२५यथाह सू० सि० "राशिलिप्ताष्टमो भागः प्रथमं ज्यार्द्धमुच्यते"तत्त्रिभक्ते लब्धो नवभिश्चितं तद् द्वितीयकम्। आद्येनैवं क्रमात् पिण्डान् भक्ता लब्धोनसंयुताः। षण्डकाः स्युश्चतुर्विंशज्ज्यार्द्धपिण्डाः क्रमादमी"। "एकराशिकलानामष्टादशशतानामष्टमोंऽशलब्धान्विमितः२२५प्रथममाद्यं ज्यार्द्धं सम्पूर्णजीवार्द्धपिण्डकः कथ्यते तदभिज्ञैः" रङ्ग०। अत

जन्ममरणशब्दौ दर्शयति। जातकर्मादिविधानमपि देहप्रादुर्भावापेक्षमेव द्रष्टव्यम्, अभावाज्जीवप्रादुर्भावस्य। जीवस्य परस्मादात्मनः उत्पत्तिर्विद्यादीनामिवास्ति नास्ति वेत्येतदुत्तरेण सूत्रेण वक्ष्यति। देहाश्रयौ तावज्जीवस्य स्थूलावुत्पत्तिप्रलयौ न स्तः इत्येतदनेन सूत्रेणावोच्यते" भा०।

"नात्माऽश्रुतेर्नित्यत्वाच्च ताभ्यः" सू०।

"अस्यात्मा जीवाख्यः शरीरेन्द्रियपञ्चराध्यक्षः कर्मफलसम्बन्धी, स किं व्योमादिवदेवोत्पद्यते ब्रह्मण आहोस्विदब्रह्मवदेव नोत्पद्यते इति श्रुतिविप्रतिपत्तेर्विषयः कासुचिच्छ्रुतिष्वग्निविस्फुलिङ्गादिनिदर्शनैर्जीवात्मनः परस्मात् ब्रह्मण उत्पत्तिराम्नायते कासुचित्त्वविद्यतस्यैव परस्य ब्रह्मणः कार्यप्रवेशेन जीवभावो विज्ञायते न चोत्पत्तिराम्नायत इति। तत्र प्राप्तं तावदुत्पद्यते जीव इति, कुतः प्रतिज्ञानुपरोधात्। (एकस्मिन् विदिते सर्वमिदं विदितम्) इतीयं प्रतिज्ञा सर्वस्य वस्तुजातस्य ब्रह्मप्रभवत्वे सति नोपरुध्येत, तत्त्वान्तरत्वे तु जीवस्य प्रतिज्ञेयमुपरुध्येत। न चाविद्यतः परमात्मनश्चैव जीव इति शक्यते विज्ञातुं, लक्षणभेदात्। अपहतपाप्मत्वादिधर्मको हि परमात्मा, तद्विपरीतो हि जीवः, विभागाच्चास्य विकारात्मसिद्धिः। यावान् हि आकाशादिः प्रविभक्तः सर्वो विकारः, तस्य चाकाशादेरुत्पत्तिः समधिगता जीवात्मापि पुण्यापुण्यकर्मा सुखदुःखभाक् प्रतिशरीरं विभक्त इति तस्यापि प्रपञ्चोत्पत्त्यवसरे उत्पत्तिर्भवितुमर्हति" भा०।

अपि च "यथाग्नेः क्षुद्रा विस्फुलिङ्गा व्युच्चरन्त्येवमेवास्मादात्मनः सर्वे प्राणाः" इति प्राणादेर्भेद्यजातस्य सृष्टिं शिष्ट्वा सर्वे एते आत्मानो व्युच्चरन्तीति भोक्तृणामात्मनां पृथक् सृष्टिं शास्ति। "यथा सुदीप्तात् पावकात् विस्फुलिङ्गाः सहस्रशः प्रभवन्ति सरूपास्तथाक्षराद्विविधाः सोम्य! भावाः प्रजायन्ते तत्र चैवापियन्ति" इति च जीवात्मनामुत्पत्तिप्रलयावुच्येते सरूपवचनात्। जीवात्मानो हि परमात्मना सरूपा भवन्ति चैतन्ययोगात्। न च क्वचिदश्रवणमन्यत्र श्रुतं धारयितुमर्हति, श्रुत्यन्तरगतस्यापि अविरुद्धस्याधिकस्यांशस्य सर्वतोपसङ्हर्तव्यत्वात्। प्रवेशश्रुतिरप्येवं सति विकारभावापन्नस्यैव व्याख्यातव्या "तदात्मानं स्वयमकुरुत" इत्यादिवत्। तस्मादुत्पद्यते जीव इत्येवं प्राप्ते ब्रूमः, नात्मा जीव उत्पद्यत इति कस्मादश्रुतेः, न ह्यस्योत्पत्तिप्रकरणे श्रवणमस्ति भूयस्सु प्रदेशेषु। ननु क्वचिदश्रवणमन्यत्र श्रुतं न धारयितव्यमुक्तं, सत्यमुक्तं उत्पत्तिरेव त्वस्य न सम्भवतीति यदामः। कस्मात् नित्यत्वाच्च ताभ्यः। चशब्दादजत्वादिभ्यश्च। नित्यत्वं ह्यस्य श्रुतिभ्योऽधिगम्यते, तथाजत्वमविकारित्वमविक्रियस्यैव ब्रह्मणो जीवात्मनावस्थानं ब्रह्मात्मता चेति। न चैवंरूपस्योत्पत्तिरूपपद्यते, ताः काः श्रुतयः "न जीवो म्रियते" "य वा एष महानजः" "आत्माऽजरोऽमृतोऽभयो ब्रह्म" "न जायते म्रियते वा विपश्चित्" "अजो नित्यः शाश्वतोऽयं पुराणः" "तत् सृष्ट्वा तदेवानुप्राविशत्" "अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणि" "स एष इह प्रविष्ट आनखाग्रेभ्यः" "तत्त्वमसि" "अहं ब्रह्मास्मि" "अयमात्मा ब्रह्म सर्वानुभूः" इत्येवमाद्या नित्यत्वादिन्यः सत्यो जीवस्योत्पत्तिं प्रतिक्षिपन्ति। ननु प्रविभक्तत्वादिकारो विकारत्वाज्जोत्पद्यते इत्युक्तं अत्रोच्यते, नास्य प्रविभागः स्वतोऽस्ति, "एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा" इति श्रुतेः, बुद्ध्यादयुपाधिनिमित्तं त्वस्य प्रविभागप्रतिभानमाकाशस्येव घटादिसम्बन्धनिमित्तम्। तथा च शास्त्रम् "य वा अयमात्मा ब्रह्म विज्ञानमयो मनोमयः प्राणमयश्चक्षुर्मयः श्रोत्रमयः" इत्येवमादि ब्रह्मण एवाविक्रियस्य सतोऽस्यैकानेकबुद्ध्यादिमयत्वं दर्शयति। तत्त्वमयत्वञ्चास्य तद्विविक्तस्वरूपानभिव्यक्त्या तदुपरक्तस्वरूपत्वं स्फटिकस्येव जात्वा इत्यादिवद्द्रष्टव्यम्। यदपि क्वचिदस्योत्पत्तिप्रलयश्रवणं तदप्यत एवोपाधिसम्बन्धान्नेतव्यम्, उपाध्युत्पत्तौ चास्योत्पत्तिस्तत्प्रलये च प्रलय इति। तथा च दर्शयति "विज्ञानघन एवैतेभ्यो भूतेभ्यः समुत्थाय तान्येवानुविनश्यति न प्रेत्य संज्ञास्ति" इति। तथोपाधिप्रलय एवायं नात्मप्रलय इत्येवदपि, अत्रैव "स भगवान्मोहमापीपदन्न वा अहमिमं विजानामि न प्रेत्य संज्ञास्ति" इति प्रश्नपूर्वकं प्रतिपादयति, "न वा अरे अहं ब्रवीम्यविनाशी वा अरेऽयमात्मानुच्छित्तिधर्मा मात्रासंसर्गस्त्वस्य भवति" इति। प्रतिज्ञानुपरोधोऽप्यविक्रियस्यैव ब्रह्मणो जीवभावाभ्युपगमात्। लक्षणभेदोऽप्यनयोरुपाधिनिमित्त एव। अत ऊर्ध्वं विमोक्षायैव ब्रूहीति च प्रकृतस्यैव विज्ञानमयस्यात्मनः सर्वसंसारधर्मप्रत्याख्यानेन परमात्मभावप्रतिपादनात्। यस्माच्चैवमुत्पद्यते प्रवि-

जीवते वेति" शारीरकसूत्रभाष्ये शङ्कराचार्यः ।

**जीवोपाधि** पु० ६त० । १स्वप्नसुषुप्तिजाग्रदवस्थासु । त्रयो हि जीवस्योपाधयः । तत्र सुषुप्तौ बुद्ध्यादिसंस्कारवासितमज्ञानमात्रमुपाधिः । स्वप्ने जाग्रद्वासनामयं लिङ्गशरीरमुपाधिः । जाग्रदवस्थायां सूक्ष्मशरीरसंसृष्टं स्थूलशरीरमुपाधिरिति तत्तदुपाध्युपलक्षितसुषुप्त्यादेरप्युपाधित्वम् । "कार्य्योपाधिरयं जीवः कारणोपाधिरीश्वर" इत्युक्तेः अज्ञानस्य २व्यष्टिशक्तिभेदे च तस्यास्तु समष्ट्यज्ञानकार्य्यत्वात् तदभिप्रायेणैव "मायोपाधिरयं जीवोऽविद्योपाधिरीश्वरः" इत्यादौ मायाविद्ययोरभेदेऽपि भेदनिर्देशः ।

**जीवोर्णा** स्त्री ६त० । जीवतो मेषादेरोमणि "पवित्रमक्षिनृ करोति शुक्लं जीवोर्णानाम्" काल्या० श्रौ० ६।२।१६ । "जीवन्मेषरोमनिर्म्मितस्त्रनिर्म्मितम्" कर्कः ।

**जीव्या** स्त्री जीवाय हिता यत् । १हरीतक्याम् २जीवन्त्यां ३गोचुरदुग्धायाञ्च राजनि० ४जीवनोपाये त्रि० जीव्योपायं तु भगवान् मम किञ्चित् करोतु सः" हरिवं० २६३अ० ।

**जु** रंहसि भ्वा० पर० अक० अनिट् । जवति । अजौषीत् । जुजाव । जवः जवनः । णिचि जावयति ते अजीजवत् त ततः सनि०जिजावयिषति । अस्य परस्मैपदित्वं गतिकर्म्मत्वञ्च निघण्टूक्तम् "जयति जवति" इत्युपक्रमे इत्येते गतिकर्म्मण इत्युक्तेः । वेदे गणव्यत्ययः "इष्टिं वे विश्वे मरुतो जुनन्ति" ऋ० ५।५८।२ । "येन नः पातमपां जुनास" १।१८६।५ । अयं धातुः ऋ० भाष्ये सौत्र इति माधवः । दीर्घान्तोऽपि । "वातो न जूतः स्तनयद्भिरश्वैः" ऋ०४।१७।१२ ।

**जु** गतौ सौ० आत्म० सक० अनिट् । जवते । अजोष्ट । जुजुवे । "यद्वि मनसा जवते तदाहा वदति" तैत्ति० सं०६।१।७।२ ।

**जुग** त्यागे भ्वा०पर० सक० सेट् इदित् । जुङ्गति । अजुङ्गीत् जुजुङ्ग । कर्म्मणि इदित्त्वात् जुङ्ग्यते ।

**जुगुप्सन** न० गुप-निन्दायां स्वार्थे सन्-भावे ल्युट् । १निन्दने अमरः । कर्त्तरि युच् । २निन्दाशीले त्रि० ।

**जुगुप्सा** स्त्री गुप-निन्दायां स्वार्थे सन्-भावे अ टाप् । निन्दायाम् अमरः । सा च बीभत्सरसस्य स्थायिभावः प्रान्तरसस्यभिचारिभावश्च । यथोक्तं सा० द० "अविरुद्धा विरुद्धा वा यं तिरोधातुमक्षमाः । आस्वादाङ्कुरकन्दोऽसौ भावः स्थायीति सम्मतः । रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयं तथा । जुगुप्सा विस्मयश्चेत्यष्टौ प्रोक्ताः शमोऽपि च" रसभेदे स्थायिभावभेदानुक्त्वा "दोषेक्षणादिभिर्गर्हा जुगुप्सा विषयोद्भवा" तां लक्षयित्वा "अहङ्कारवीरयोर्हासोवीरे क्रोधस्तथा मतः । शान्ते जुगुप्सा कथिता व्यभिचारितया पुनः" देहजुगुप्सा च शौचकार्य्यं यथोक्तं पात० सू० भा० "शौचात् स्वाङ्गजुगुप्सा परैरसंसर्गः" सू० "स्वाङ्गे जुगुप्सायां शौचमारभमाणः कायावद्यदर्शी कायानभिष्वङ्गी भवति किञ्च परैरसं सर्गः कायस्वभावावलोकी स्वमपि कायं जिघृक्षुर्मृज्जलादिभिराचाम्यन्नपि कायशुद्धिमपश्यन् कथं परकायैरत्यन्तमेवाप्रयतैः संसृज्यते" भा० । देहे जुगुप्सायां वैराग्यं भवति । तस्य निन्द्यत्वे हेतुः विवेकचूडामणावुक्तो यथा "मज्जास्थिमेदःपलरक्तचर्मत्वगाद्यैर्धातुभिरेभिरन्वितम् । पादोरुवक्षोभुजपृष्ठमस्तकैरङ्गैरुपाङ्गैरुपयुक्तमेतत्" । वास्तवस्वरूपेण तु देहसंस्थितिसुपवर्ण्य "इत्येतदस्थिरं वपुः यस्य मोक्षाय नत्यसौ" इत्युक्तं व्याख्यातं च मिता० "इतीदृशमस्थिस्नायुाद्यारब्धमेतदशुचिनिधानं वपुरस्थिरमिति यस्य बुद्धिरसौ जाती पण्डितो मोक्षाय समर्थो भवति वैराग्यस्य नित्यानित्यविवेकयोर्मोक्षोपायत्वात् अस्थिमूत्रपुरीषादिपदार्थज्ञानस्य वैराग्यहेतुत्वात् अत एव व्यासः "सर्वाशुचिनिधानस्य जतुनस्य विनाशिनः । शरीरकस्यापि कृते मूढाः पापानि कुर्वते । यदि नामास्य कायस्य यदन्तस्तद्बहिर्भवेत् । दण्डमादाय लोकोऽयं शुनः काकांश्च वारयेदिति" । तस्मादीदृशकुत्सितशरीरस्यात्यन्तविविक्तत्वार्थमात्मोपासने प्रयतितव्यम्" ।

**जुगुर्वणि** त्रि० गृ-स्वतौ यङ्लुकि क्विपि वेदे नि० वन-संभक्तौ इनु-धातवम् ६त० । स्तोतृणां संभक्तरि । "मन्द्रजिह्वा जुगुर्वणी" ऋ० १।१४२।८ । [तत्रार्थे पु०राजनि० ।

**जुङ्ग** पु०जुगि-अच् । हस्तिदारकहस्ते अमरः । ण्वुल् । जुङ्गक

**जुङ्गा** स्त्री जुगि-अच् । हस्तिदारकहस्ते रमानाथः ।

**जुटक** न० जट-संहतौ अच् संज्ञायां कन् ह्रस्वो० । जटायां शब्दर० । [ख्याते शिखाभेदे शब्दर० ।

**जुटिका** स्त्री जट-संहतौ वा० कन् ह्रस्वो० । (झुँटी)

**जुड** प्रेरणे चु० उभ०सक०सेट् । जोडयति ते अजूजुडत् त । **जुड** बन्धे (जोड़ादेखोया) । हृदा०कुटा०पर० सेट् । जुडति

अजुड़ोत् जुजोड । धञि जुडः । [ धञि जोडः ।

जुड गतौ तु० पर० सक०सेट् । जुडति अजोडीत् । जुजोट ।

जुत दीप्तौ भ्वा० आत्म० अक० सेट् । जोतते अजोतिष्ट । जुजुते । ऋदित् अजुजोतत् ।

जुन गतौ तु० पर०सक०सेट् । जुनति अजोनीत् । जुजोन ।

जुम्बक पु० वरुणे "पृथिवीं दृंहा जुम्बकाय स्वाहा" यजु० २५।६। "जुम्बकाय वरुणाय" वेददी० "प्रत्येव तिष्ठति जुम्बकाय स्वाहेत्यवभृथ उत्तमामाहुतिं जुहोति वरुणो वै जुम्बकः" शत० ब्रा० १२।९।६।५।

जुर्व पु० वधे भ्वा० पर० सग० सेट् । जुर्वति अजूर्वीत् । जूर्त्तः जूर्त्तिः । क्विपि जूः ।

जुल मेघणे चु० उभ०सक०सेट् । जोलयति ते अजूजुलत् त

जुवस्ति० सो०जु-वा० असुन् किच्च । वेमवति । "आ नः सोमः सहो जुवो रूपम्" ऋ० ९।६५।१८ ।

जुष तृप्तौ अक०तर्के सक० वा चु०उभ०पक्षे भ्वा० पर०सेट् । जोषयति ते जोषति अजूजुषत् त अजोषीत् ।

जुष हर्षे अक० सेवायां सक० तुदा० आ० सेट् । जुषते अजोषिष्ट जुजुषे जुषमाणः । ऐदित् । जुष्टः । जीत् वर्त्तमाने क्त । जुष्टः । "पौलस्त्योऽजुषत शुचं विपन्नबन्धुः" भट्टिः "यत्र देवासो अजुषन्त विश्वे" यजु० ४।१। "इन्द्र ! जुषस्व प्रवहं" अथ० २।५।१। "अजामेकाम्-अजोह्येकां जुषमाणोऽनुशेते" श्वेताश्वतरोप० "एवैव बुद्धिर्जुषतां सदात्मनाम्" भा० व०१२५।६६ श्लो० । "सत्वं जुषाणाय भवाय देहिनाम्" भाग० ८।५।२२ । "परजुष्टनयाच्चिवर्त्तमानः" दीधितिः । आर्षे गणव्यत्ययात् अदादित्वम् । "देवा नाश्नन्नधानाद्धविर्जुषन्ति" भा०व०१२७३। आर्षत्वात् पदव्यत्ययः। "पारिजातगुणान् मर्त्या जुषन्ति यदि नारद ! । देवानां मानुषाणां च न विशेषो भविष्यति" हरिवं० ७२७२ । सेटि जोजिषत् "सुपेशसस्करति जोजिषद्धि" ऋ० २।३५।१ "जुषी प्रीतिसेवनयोः लेखडागमः । विकरणः सिप् । इड़ागमश्च" भा० । प्राद्य पसर्गपूर्वकश्च प्रादिद्योत्यतत्तदर्थयुक्तो सेवनादौ ।

जुष्टक पु० जुष-कन् ततः संज्ञायां कन् । यूथे शब्दच० ।

जुष्ट न०जुष-कर्म्मणि क्त । १उच्छिष्टे । २सेविते त्रि० मेदि० "परजुष्टनयाच्चिवर्त्तमानः" दीधितिः। "पुरुषो महाब्रह्मसमूहजुष्टः" भट्टिः । [सेवने न० ।

जुष्य त्रि०जुष-कर्म्मणि क्यप् । १सेव्ये भावे क्यप् । २अवश्य-

जुह्वराण पु० । जुहर्च्छ-सन्-आनच् सनो लुक् ऋवोपध । १चन्द्रे पु०उज्ज्वल० । २कौटिल्यकारिणि त्रि० । "युयोध्यस्मज्जुह्वराणमेनः" ह० उ० । "जुह्वराणं कुटिलकारिणम्" भाष्यम् ।

जुह्वान पु० जुह-कर्म्मणि कानच् । १अग्नौ २हवने च । संक्षिप्तसारे कठिनहृदये इत्युक्तिः रमध्यस्यैव तदर्थता हृच्छब्दस्य रूढ्यपसिद्धेस्तदर्थतौचित्यात् अतस्तत्र लिपिकरप्रमादात् जुह्वान इत्यपपाठः जुह्वराण इत्येव पाठः समुचितः ।

जुह्व स्त्री जुहोत्यनया जुह-किप् नि० हित्वं दीर्घश्च । यज्ञिये स्रुगाख्ये पात्रभेदे सा च पलाशघटिता" "पालाशी जुह्वः" कात्या० श्रौ० १।२।२४ । "जुहोत्यनया जुह्वः स्रुक् सा च पालाशी पलाशवृक्षकाष्ठनिर्म्मिता" कर्कः । "यस्य पर्णमयी जुह्वर्भवति न स पापं श्लोकं शृणोति" श्रुतिः । "पर्णमयी पलाशकाष्ठमयीत्यर्थः"। एषा चानारभ्याधीतापि प्रकृत्यर्था यथोक्तं ताण्ड्य० ब्रा० ।

"अनारभ्याधीतानां प्रकृतिगामित्वमिति न्यायेन क्रत्वङ्गत्वावगमात् । स च न्यायस्तृतीयाध्याये षष्ठपादस्य प्रथमाधिकरणे पर्णवाक्यमुदाहृत्याभिहितः । "प्रकृतौ विकृतौ वा सादस्य पर्णत्वमसौ विधिः । प्रकृतेरेव वा तुल्यादचनादुभयोरसौ । जुह्वमाश्रित्य पर्णत्वविधिः प्रकृतिमात्रगः । चोदकेनोभयप्राप्तेर्विकृतौ विधिनात्र किम्" । अनारभ्य चूयते "यस्य पर्णमयी जुहूर्भवति न स पापश्लोकं शृणोतीति" । तत्राव्यभिचरितक्रतुसम्बन्धवर्ती जुहूमाश्रित्य तद्धेतुः पर्णशब्दो वाक्येन विधीयते । या जुहूः सा पर्णमयीति वाक्यञ्च प्रकृतिविकृत्योस्तुल्यमेव प्रवर्त्तते उभयत्राश्रयभूताया जुहूः सत्त्वात् । तस्मात् प्रकृतिविकृत्योरुभयोरप्ययं विधिरिति प्राप्ते, ब्रूमः किमयं विधिर्विकृतौ चोदकात् पूर्वञ्चिन्त्यते पश्चाद्वा । नाद्यः, आश्रयभूताया जुहूः चोदकमन्तरेणासम्भवात् । द्वितीये तु पर्णत्वमपि जुहूा सहैव चोदकेनातिदिश्यते, तत्र पुनर्विधिवैयर्थ्यादयं विधिः प्रकृतिमात्रगः" । जुहोत्यस्यां दिशि-आधारे क्विप् । २प्राग्देशे प्राङ्मुखतयैव होमकरणात् तस्यास्तथात्वम् ।

जुह्वरा(वा)ण पु०जुह्वं र(व)ति र(रण-अण् । १अध्वर्य्यौ २अग्नौ । ३चन्द्रे विश्वः । [वः । अग्नौ शब्दर० ।

जुह्ववत् पु० जुह्वपात्रं होमोद्देश्यतयास्त्यस्य मतुप वा० मस्य

जुहोति स्त्री जु-धात्वर्थनिर्द्देशे यतिप् । होमभेदे "यजति

जुहोतीनां कोविशेषः" काल्या० औ० १।२।५। इति मन्त्रे यजतिलक्षणसङ्गा "उपविष्टहोमाः स्वाहाकारप्रदानाः जुहोतयः" १।२।७इति लक्षितम्। "उपविष्टेन कर्त्रा होमो येषु ते उपविष्टहोमाः स्वाहाकारेण प्रदानं येषु ते स्वाहाकारप्रदानाः य उपविष्टहोमाः स्वाहाकारप्रदानाश्च ते जुहोतयः इत्युच्यन्ते" कर्कः अतोऽस्य पुंस्त्वेन स्त्रीत्वोक्तिः प्रामादिकी। "चरन्ति सर्वा वैदिक्यो जुहोतियजतिक्रियाः" मनुः।

जुह्वास्य पु० जुहूराख्यमिवास्य। होमीयपक्षौ। "हव्यवाहो जुह्वास्यः" ऋ० १।१२।६। [जूतः।

जू गतौ सौत्र० सक० प० सेट्। जवति अजावीत् अजाव।

जू स्त्री सौ०जू-गतौ यथायथं कर्त्तृ भावादौ क्विप्। १काकाक्षे २स्वरखल्यां ३पिशाच्यां च ४जवने शब्दरत्ना० ५जवयुक्ते त्रि० विश्वः। ६त्वरागमने ७गमने च स्त्री मेदि०।

जूट पु०जट-संहतौ अच्-षुत्वे०। १जटासंहतौ बन्धे २जटायाम् शब्दार्थचि०। "जटाजूटसमायुक्तामर्द्धेन्दुलसशेखराम्" दुर्गाध्यानम्। "भूतेशस्य भुजङ्गवल्लिवलयस्कन्धजटाजूटजटाः" मालतीमा०। स्वार्थे क तत्रार्थे।

जूत त्रि० सौ०जू-क्त। १गते २व्याप्ते च। "रथो ह वा ऋतजात्यभिजूतः" ऋ० ३।५८।८। "अभिजूतः स्रोतृभिराव्याप्तः" भा० ३दत्ते च "युवं श्वेतं पेदव इन्द्रजूतम्" ऋ०१।११८।६। "इन्द्रजूतं इन्द्रेण जूतं दत्तम्" भा०।

जूति स्त्री जु-संहृषि भावे क्तिन् सातिहेतीत्यादिना नि०। १वेगे अमरः। "उत स्मास्य पनयन्ति जना जूतिं कृष्टिप्रो अभिभूतिमाशोः" ऋ० ४।३८।६ "मनो जूतिर्जुषतामाज्यस्य" यजु०२।१६। "जूतिः जवतेर्गतिकर्मणः" वेददी० अत्र मनो ज्योतिः इति पाठः प्रामादिकः। मेधा दक्षिर्धृतिर्मतिर्मनीषा जूतिः स्मृतिः" ऐ० ब्रा० "जूतिर्वेतसो रजादिदुःखित्वाभावः" २भाव्योक्षाऽर्थे च।

जूतिका स्त्री जूत्या कायति कै-क। कर्पूरभेदे राजनि०।

जूर वयोहानौ अक० वधे सक० दिवा० आत्म० सेट्। जूर्यते अजूरिष्ट। ईदित्। जूर्णः। कोपे च "इच्छाविभङ्गाकुलमानसत्वात् भक्तेः नखेभ्यश्च चिरं जुजूरे" भट्टिः।

जूर्ण पु० जूर-क्त। (उलुखड़) तृणभेदे रत्नमालायां जूर्णाख्येति तत्पर्य्याये निर्देशात् तस्य तथात्वम्। जूर्णेति आख्या यस्य जूर्णाख्योऽत्रत्र।

जूर्णाह्वय पु० जूर्णमाह्वयते काण्डेन स्पर्द्धते आ+ह्वे-बा० य। देवधान्ये (देधान) हेमच०।

जूर्णि स्त्री ज्वर-रोगे नि०जट् जूर-वेगे वा नि०। १स्त्रीरोगे २वेगे। ३व्याप्तौ ४देहे ५ब्रह्मणि च संक्षि०उणा०। जूर कोपे नि०। १क्रोधे निघण्टुः निरुक्ते १।४।२। "अस्यानिरुक्तिरन्या दर्शिता "जूर्णिर्जवतेर्वा ज्वतेर्वा ज्वलतेर्वा ज्वलतेर्वा" तत्र पृषो०। तेन ७वेगयुते ८ज्वरयुते ९तापके च। "चित्रा जूर्णिर्न वक्षति" ऋ०१।१२९।८। "जूर्णिर्वेगवती सेना" भा०। १०स्तुतिकुशले च। "ऋष्टयूषां जूर्णिरौत्र ऋष्वाम्" ऋ०१।१२७।१०। "जूर्णिः स्तुतिकुशलः" भा०।

जूर्त्ति स्त्री ज्वर-भावे क्तिन् जट्। ज्वरे।

जूर्य्य त्रि० जूर-कर्त्तरि वा०यत्। १जीर्णे "रथः पुरीव जूर्यः" ऋ० ६।२।७। "जूर्यः जीर्णः" भा० २वृद्धे च।

जूष वधे भ्वा० उभ०सक०सेट्। जूषति ते अजूषीत् अजूषिष्ट जुजूष षे। जूषः।

जूष पुंन० यूष+पृषो०। सूपादिक्वाथे भरतः।

जूषण न० जूष-ल्यु। छत्रभेदे-(घाड़फुल) शब्दच०।

जृ ष्यक्कारे भ्वा० पर० सक० अनिट्। जरति अजार्षीत्। जजार।

जृभ जृम्भे (हाइतोला) गात्रवैचित्ये च भ्वा० आत्म०अक० सेट् इदित्। जृम्भते अजृम्भिष्ट। जजृम्भे। "आत्मानमाधाव मधुर्जजृम्भे" कुमा० जृम्भा जृम्भः। जृम्भितः। "जृम्भते सुप्तरासीना बाला गर्भभरालसा" सा० द०।

जृभ जृम्भणे भ्वा० आ० अक० सेट्। जृभते अजृम्भिष्ट जजृभे। ईदित्। जृभ्रः।

जृम्भ पुंन०जृभि-भावे घञ् अर्द्धर्चा०(हाइतोला) १गात्रवैचित्र्यापादके २सुखविकाशकारके च व्यापारभेदे। भावे घञ्। तत्रार्थे स्त्री। जृम्भा च अमगभीदिजनितजाड्यकार्य्यौ यथाह सा०द०"आलस्यश्रमगर्भोद्भवौ जाड्यं जृम्भासितादि कृत्" तत्कारकवायुश्च देवदत्तः। "विजृम्भणे देवदत्तः शुक्लस्फटिकसन्निभः" पदार्थादर्शे योगार्णवः। "जृतोत्पतनजृम्भासु जीवोत्क्षिप्ताङ्गुलिध्वनिः। गुरोरपि च कर्त्तव्यमन्यथा ब्रह्महा भवेत्" तिथित०। ३विकाशे ४विस्तारे च पु० शब्दच०। "धीरवैकं श्वासमनिशः पुनरुज्जति वेगवान्। आलस्यनिद्रायुक्तस्य स जृम्भ इति कथ्यते" "जृम्भात्यर्थं समीरणात्। जृम्भावेगे उत्तमत्वे शोभने शयने नरम्। खादयेत् तेन नियमात् जृम्भावेगः प्रशाम्यति। जृम्भावेगजयं याति कटुतैलेन मर्दनात्। भोजनात् खादुभोज्यानां तथा ताम्बूलभक्षणात्" वैद्यकम्।

जृम्भक त्रि० जृम्भ-ण्वुल्। १जृम्भाकारके २रुद्रगणभेदे पु०

"पृथतोऽनुययौ वालं वरदं दयभध्वजम्। जृम्भकैर्यक्षरक्षोभिः खण्डिभिः समलङ्कृतैः। बालभोगो महाबलो दक्षिणं पक्षमाश्रितः" भा० व० २२०अ०। जृम्भयति जृम्भि–ण्वुल्। २क्रियाशब्दसूचितनये ३तद्विशिष्टे वस्तुभेदे च "क्रियाशब्दतनयरूपाख्यस्यापि विश्वामित्रेण रामाय दत्तानि तत्कथा रामा० बा० २८अ०।

"संहाराद्व्याजहाराथ धृतिमान् सुव्रतः शुचिः। सत्यवन्तं सत्यकीर्त्तिं धृष्टं रभसमेव च। प्रतिहारतरं नाम पराङ्मुखमवाङ्मुखम्। वज्रालज्जाविभौ चैव दृढनाभसुनाभकौ। दशाक्षशतवक्त्रौ च दशशीर्षशतोदरौ। पद्मनाभौ महानाभौ दुन्दुनाभसुनाभकौ। जटोलिपं शकुनञ्चैव नैराकृतिमलावुभौ। वौगन्धरविनिद्रौ च दैत्यप्रमथनौ तथा। शुचिवाङ्मर्महावाङ्मनिष्कलिर्विरुचस्तथा। सार्चिमाली धृतिमाली हृत्तिमान् रुचिरस्तथा। पित्रोः सौमनसश्चैव विधूतमकरावुभौ। करवीरं रतिञ्चैव धनधान्यौ च राघव!। कामरूपं कामरुचिं मोहभावरणं तथा। जृम्भकं सर्पनाथं च पन्थानवरुणौ तथा। क्रियाशतनयान् राम! भास्वरान् कामरूपिणः। प्रतीच्छ मम भद्रन्ते पात्रभूतोऽसि राघव!। बाढमित्येव काकुत्स्थः प्रहृष्टेनान्तरात्मना। दिव्यमास्वरदेहाश्च मूर्त्तिमन्तः सुखप्रदाः। केचिदङ्गारसदृशाः केचिद्धूमोपमास्तथा। चन्द्रार्कसदृशाः केचित् प्रज्वलज्जलितप्रभास्तथा। रामं प्राञ्जलयो भूत्वाऽब्रुवन् मधुरभाषिणः। इमे स्म वरयामोऽद्य! आधिं किङ्करयाम ते। गम्यतामिति तानाह यत्रेष्टं रघुनन्दनः। मनसा कार्यकालेषु साहाय्यं मे करिष्यथ। अथ ते रामामन्त्र्य कृत्वा चापि प्रदक्षिणम्। एवमस्तिति काकुत्स्थ मुक्त्वा जग्मुर्यथागतम्" २८अ०। स्वार्थे क अत इत्वम्। ४जृम्भायां स्त्री(हाइतोला)सा च इन्द्रदत्तयोर्युद्धे इन्द्रे दत्तपक्षे देवैः कृता ततः प्रभृति लोकप्राणवायुसंस्था यथाह भा०उ० ८अ० "ततो जघान देवेन्द्रं बलो वीरः शतक्रतुम्। अपाहरच्चिपङ्क्ते यज्ञं कोपसमन्वितः। यज्ञे हते च यज्ञे तु सम्भ्रान्तास्त्रिदिवेश्वराः; अवज्ञंसे महासत्त्वाजृम्भिकां दत्तवानिमाम्। विजृम्भमाणस्य ततो दत्तस्यास्यादपाहतात्। स्वान्यङ्गान्यभिसङ्क्षिप्य निष्क्रान्तो बलनाशनः। ततः प्रभृति लोकस्य जृम्भिकाप्राणसंस्थिता"।

जृम्भण न० जृभि–भावे ल्युट्। (हाइतोला) १गात्रशैथिल्यापादके २मुखविकाशकारके च व्यापारभेदे। "सुखदुर्मुखजृम्भणतत्पराणि–" अकाण्डजनकः प्रमदाजनस्य करोति लावण्यरसोत्सुकानि" ऋतुसं०"जम्भद्विस्तद्विहृतां तां जृम्भणाख्यां तनुं प्रभोः" भाग०३।२०।४२। जृभि–णिच्–ल्यु। २जृम्भणकारिणि ३जृम्भकास्त्रे च "जृम्भणं नाम सोऽस्त्रं जघान पुरुषोत्तमः। हरं स जृम्भयामास शिवप्रकारी महाबलः" हरिवं०१८३ अ०। "जृम्भणं पातनञ्चैव त्वाष्ट्रञ्चापि सुदारुणम्" २३४ अ०।

जृम्भिणी स्त्री जृभि–णिनि। एलापर्णीम् शब्दच०।

जृम्भित त्रि०जृभि–क्त। १चेष्टिते २प्रवृद्धे च भावे क्त। २जृम्भायां ३स्फुटने ४हेमच० क्लीवे ५करणभेदे न० मेदि०।

जॄ जरायां दिवा० पर० अक० सेट् जीर्य्यति इरित्। अजरत् अजारीत्। जीर्णः। घित्। जरा। चटादि०। जरयति। "या न जीर्य्यति जीर्य्यतः" नीतिमा०जीर्य्यते रहन्। जरन्। जजार। जरीता जीर्णः। "जरितृणां सतां भुवः स्तवे" सामदेव्यगानमन्त्रः।

जॄ जरायां वा चुरा० उभ० पक्षे ण्यादि०णादि० अक० सेट्। घटा०। जरयति ते अजीजरत् त। जृणाति। इरित् अजरत्-अजारीत्।

जेतृ त्रि० जि–तृच्। जयशीले। "जेता स्वभिः इन्द्रः पुरम्" ऋ० १।१७८।३। "जेतारं लोकपालानां स्वसखैरर्चितेश्वरम्" रघुः। स्त्रियां ङीप्। २विष्णौ पु०। "अनघो विजयो जेता" विष्णुस०। जयत्यतिशेते सर्वभूतानि" इति जेता" भा०।

जेतव्य त्रि०जि–कर्मणि तव्य। जेये "जयो यः शक्यते जेतुं जेयो जेतव्यमाजके" अमरः।

जेत्व त्रि० जि–त्वनिप् वेदे नि० दीर्घस्यापि तुक्। जेतव्ये। "अस्यामाजे जयत जेत्वानि" ऋ०।४७।२६। "जेत्वानि जेतव्यानि" भा०।

जेन्ताक न०स्वेदसेवनार्थं गृहभेदे (भापरानकोठार घर) तल्लिर्मितिप्रकारोऽभिधित्सुरकरे यथा

"अथ जेन्ताकं चिकीर्षुर्भूमिं परीक्षेत। तत्र पूर्वस्यां दिश्युत्तरस्यां वा गुणवति प्रशस्ते भूमिभागे क्षणक्षत्तिके सुवर्णक्षत्तिके वा परीवापपुष्परिगणादीनां जलाशयानामन्यतमस्य कूपे दक्षिणे पश्चिमे वा क्षुपतीर्थे समक्षविभक्ते भूमिभागे सप्राष्टौ वा चरत्नीनुपक्रम्योदक्प्राङ्मुखमुदङ्मुखं वाभिमुखतीर्थं कूटागारं कारयेत्। उत्सेधविस्ततः परमरत्नीः षोडश समन्तात् हस्तं कृत्वा

कर्म सम्यङ्मनेकवातायनम् । अस्य कूटागारस्यान्तः समन्ततो भित्तिमरत्नीविस्तारोत्सेधां पिण्डिकां कारयेत् कपाटवर्जम् । मध्ये चास्य कूटागारस्य चतुष्किष्कुमात्रपुरुषप्रमाणं सूक्ष्मयं कन्दुसंस्थानं वज्रसूच्यच्छिद्रमङ्गारकोष्ठकसमं सन्धिधानं कारयेत् । तच्च खादिराश्वमाशकर्णादीनां वा काष्ठानां पूरयित्वा प्रदीपयेत् । स यदा जानीयात् साधुदग्धानि काष्ठानि गतभूतानि अवतप्तञ्च केवलमग्निना तदग्निष्टङ्कं खेदयोग्येन चोष्मणा युक्तमिति तत्रैनं पुरुषं वातहराभ्यक्तगात्रं वस्त्रावच्छन्नं प्रवेशयेत् प्रवेशयंश्चैनमनुशिष्यात् । सौम्य! प्रविश कलत्राधारोत्सवं चेति । प्रविश्य चैनां पिण्डिकामविरुद्धः पार्श्वोपरपार्श्वाभ्यां यथासुखं श्रयीथाः न च त्वया खेदमूर्ध्वोपरीतेनापि सता पिण्डिकैषा विमोक्तव्या वा प्राणोच्छ्वासात् । भवत्समाने ह्यतः पिण्डिकावकाशात् द्वारमनधिगच्छन् खेदमूर्ध्वोपरीततया सद्यः प्राणान् जह्याः तस्मात् पिण्डिकामेनां न कथञ्चन सङ्क्षोभाः त्वं यदा जानीयाः विगताभिष्यन्दमात्मानं सम्यक्प्रसुप्तखेदचिह्नं सर्वस्रोतोविसृक्तं लघुभूतमपगतविबन्धसन्धिसन्धिवेदनागौरवमिति । ततस्तां पिण्डिकामनुसरन् द्वारं प्रपद्येथाः । निष्क्रम्य च न सहसा चक्षुषोः परिपालनार्थं शीतोदकसुपस्पृशेथाः । अपगतसन्तापक्लमस्तु सङ्कल्पात् सुखोष्णेन वारिणा यथान्यायं परिषिक्तोऽभीथाः" अस्य खेदार्थकता शब्दकल्पद्रुमे उक्ता चिन्त्या "भूमिष्टेषु च जैलाके क्षणगर्भमिष्टेषु च । विधूमाङ्गारतप्तेऽभ्यक्तः स्विद्यति ना सुखम्" इति आधारस्वरूपमिष्टकादिसाहचर्य्यात् इष्टभेदस्यैवोपक्रमात् । उपसंहारे च इति जैलाकस्वेद इति कीर्त्तनं सम्प्रतीतत्वात्परम् । इति जैलाकः स्वेद इति संविसर्गपाठोऽनाकरः ।

**जेन्य** त्रि॰ जि-जन+णिच्-वा या॰ण्येन्य । १जयशीले "अग्निर्यत्रेषु जेन्यो न विश्पतिः" ऋ॰ १।१२८।७ । "जेन्यः जयशीलः" भा॰ । २उत्पाद्ये च "जनिष्ट हि जेन्यो अग्रे अह्नाम्" ऋ॰ ५।१।५। "जेन्य उत्पाद्यः" भा॰ ३जेतव्ये च "दुष्टं धयो दृषया जेन्यावत्" ऋ॰ ७।७४।२ । "जेन्यं वसु धनं धयोः । वेदे पूर्वपददीर्घः । "जेन्यावसू जेतव्यधनौ" भा॰ । "गतं देवेभिर्जेन्यावसू" ऋ॰ ८।२८।७ ।

**जेमन्** त्रि॰ जि-मनिन् । १जयशीले "उदन्यजेव जेमना मदेरू" ऋ॰ १०।१०१।६। "जेमना जयशीलौ औस्याने आच् छान्दसो दीर्घाभावः । लोके तु जेमा जेमानौ इत्येव । जेतृभावः इमनिच् तुणो लोपः । २जेतृभावे जये च ३जयसामर्थ्ये पु॰। "जेमा च महिमा च मे" यजु॰ १८।४।

**जेमन** न॰ जिम-भावे ल्युट् । भक्षणे अमरः ।

**जेय** त्रि॰ जि-कर्म्मणि यत् । जेतव्यमात्रे अमरः ।
"दैवैरजेया निर्व्विताशार्जुनेन । तदा नाशंसे विजयाय सञ्जय !" भा॰ आ॰ १अ॰ "विद्धि शत्रून् कौन्तेय ! जेयः क्षितिपतिस्तदा" भा॰ आश्व॰ ६अ॰ ।

**जेष** गतौ भ्वा॰ आत्म॰ सक॰ सेट् । जेषते अजेषिष्ट अदित् अजिजेषत् त । "अपां तोकस्य तनयस्य जेषे" ऋ॰ १।११०।११ ।

**जेह** यत्ने भ्वा॰ आत्म॰ अक॰ सेट् । जेहते अजेहिष्ट । अदित् अजिजेहत् त । "पात्रस्यभो जेहमानम्" ऋ॰ १।११०।५ "जेहमानं प्रयतमानम्" भा॰ । निरुक्ते अस्य गतिकर्म्मतोक्ता "दृढायपवेर्जेहमानस्य" ऋ॰ १०।३।६ । क्वचित् व्याप्त्यर्थतापि "सुगेभिररेणुभिर्जेहमानं पतत्रि" ऋ॰१।१६३।६। "जेहमानं यत्तदेषं व्याप्नुवत्" भा॰। गत्यर्थकधातोः प्राप्त्यर्थकत्वात् प्राप्त्यर्थतापि । "ये तादृशुर्दैवला जेहमानाः" ऋ॰१०।१५।६ । "जेहमानाः प्राप्नाः" भा॰ । [ ओदित् जानः ।

**जै** क्षये भ्वा॰ पर॰ अक॰ अनिट् । जयति । अजासीत् ।

**जैगीषव्य** पु॰ जिगीषोरपत्यं गर्गा॰ यञ् । योगविदि मुनिभेदे तत्कथा भा॰ श॰ ५१ अध्याये शा॰ पर्व्वणि च २३५ अ॰ दृश्या । "अथितो देवलश्चैव जैगीषव्यश्च तत्त्ववित्" भा॰ शा॰ ११ अ॰ । स्त्रियां ओदितो नित्यं ङ्यां क्ङिति च । जैगीषव्यायणी ।

**जैत्र** त्रि॰ जेतैव जेतृ+प्रज्ञादि॰ अण् । १जयशीले अमरः । २पारदे पु॰ ३औषधे न॰ राजनि॰ । "रणाय जैत्रः प्रदिशन्निव स्वराम्" किरा॰ "शरीरिणा जैत्ररथेन यत्न" माघः। "देवस्तनुजालम्बी जैत्रमध्यास राघवः" रघुः । ततश्चतुरर्थ्यां कर्णा॰ फञ् । जैत्रायणि जैत्रादूरदेशादौ त्रि॰।

**जैत्ररथ** त्रि॰ जैत्रो रथोऽस्य । जयशीले कृता॰ ।

**जैत्री** स्त्री जैत्रैव जैत्र+स्वार्थे अण् ङीप् । जयन्तीवृक्षे । शब्दर॰ । [ दुर्गासके च ।

**जैन** पु॰ जिन एव, जिनोदेवतास्य वा अण् । १अर्हति २अर्हद्देवतायां स्त्रियां ङीप् ।

**जैपाल** पु॰ जयपाल+पृषो॰ । जयपालवृक्षे द्विरूपकोषः

**जैमिनि** पु॰ मुनिभेदे स च सामवेदे वेदव्यासशिष्यः यथाह भाग॰ १२।६।८ । "साम्नां जैमिनये प्राह तथा छन्दो-

गसंहिताम्" स च धर्ममीमांसां प्रणीतवान्। तच्च शास्त्रं द्वादशाध्यायात्मकम्। तत्प्रतिपाद्यविषयाद्याधिकरणमालायां माधवाचार्येण संगृहीता यथा

"धर्मो द्वादशलक्षण्या व्युत्पाद्यस्तत्र लक्षणैः। प्रमाणभेदश्चेत्यप्रयुक्तिक्रमसंज्ञकाः। अधिकारोऽतिदेशश्च सामान्येन विशेषतः। ऊहोऽबाधश्च तन्त्रं च प्रसङ्गश्चोदिताः क्रमात्"। "लक्षणाध्यायाः। द्वादशानां लक्षणानां समाहारो द्वादशलक्षणी। तादृशस्य द्वादशाध्यायोपेतस्य शास्त्रस्य धर्मो विषयः। प्रमाणादयः प्रसङ्गान्ता द्वादश पदार्थाः क्रमाद्द्वादशानामध्यायानां विषयाः। तत्र प्रथमेऽध्याये विध्यर्थवादादिरूपं धर्मे प्रमाणं निरूपितम्। द्वितीये यागदानादिकर्मभेदः। तृतीये प्रयाजादीनां दर्शपूर्णमासाद्यर्थत्वेन तच्छेषत्वम्। चतुर्थे गोदोहनस्य पुरुषार्थत्वप्रयुक्तानुष्ठानम् न तु क्रत्वर्थत्वप्रयुक्तेत्येवमादयः। पञ्चमे क्रमनियतिविधेयत्वादयः। षष्ठे कर्तुरधिकारो नाम्नादेरित्यादयः। सप्तमे समानमितरच्छेषेणेत्यादिप्रत्यक्षवचनेनाग्निहोत्रादिनाम्नाद्भिवचनेन च सामान्यतोऽतिदेशः। अष्टमे सौर्यं चरुं निर्वपेदित्यत्र निर्वापस्याङ्गित्वेन देवतानिर्देशेन एकदेवतात्वमौषधद्रव्यकत्वमित्यादिलिङ्गैराग्नेये बहुरोडाशेतिकर्त्तव्यतैव नाग्नेयेत्येवमादिविशेषतोऽतिदेशः। नवमे प्रकृतावग्नये जुष्टं निर्वपामीति पठितेऽग्नये विकृतौ सौर्यं चरावग्निपदपरित्यागेन सूर्यपदप्रक्षेपेण च सूर्याय त्वा जुष्टं निर्वपामीत्येवमादूहः। दशमे ऊष्णेषु चोदकप्राप्तप्रोक्षावघातस्य वितुषीकरणासम्भवेन लोप इत्येवमादिर्बाधः। एकादशे बहूनामाग्नेयादीनां प्रधानानां सकृदनुष्ठितेन प्रयाजाद्यङ्गेनोपकार इत्यादि तन्त्रम्। द्वादशे प्रधानस्य पशोरुपकारायानुष्ठितेन प्रयाजाद्यङ्गेन पशुपुरोडाशेऽप्युपकार इत्यादिप्रसङ्गः। पादानामसाधारणं विषयं दर्शयति" "विध्यर्थवादरूपतयोनाम चेति चतुर्विधम्। प्रथमाध्यायगैः पादैरुद्भिर्मानमीरितम्" "प्रथमे पादे विधिरूपं मानमीरितम्। द्वितीयेऽर्थवादरूपम्। अर्थवादो मन्त्रशेषत्वेनोपलक्षणम्। तृतीये स्मृतिरूपम्। स्मृतिराचारमप्युपलक्षयति। चतुर्थे ऊहिरूहादिनामरूपम्" "उपोद्घातः कर्मभेदानां तत्रापवादगीः। प्रयोगभेद इत्येते द्वितीयाध्यायपादगाः"।

द्वितीयाध्यायस्य प्रथमे पादे आख्यातमेवापूर्वबोधकमपूर्वसङ्गाय इत्यादिकः कर्मभेदचिन्तोपयुक्त उपोद्घातो वर्णितः। द्वितीये धातुभेदश्रुतरुक्त्रादिभिः कर्मभेदः। तृतीये रथन्तरादीनां कर्मभेदप्रामाण्यापवादः। चतुर्थे नित्यकाम्ययोः प्रयोगयोर्भेदः"। "श्रुतिर्लिङ्गं च वाक्यादि विरोधप्रतिपत्तयः। अनारभ्योक्तिवङ्गुर्वस्त्वाख्यर्थाः पदपादगाः"। "तृतीयाध्यायस्य प्रथमे पादे शेषत्वबोधकानां श्रुतिलिङ्गादीनां मध्ये श्रुतिर्विचारिता। द्वितीये लिङ्गम्। तृतीये वाक्यप्रकरणादि। चतुर्थे निवीतोपवीतादिवर्थवादत्वविधित्वादिनिर्णयहेतुः स्तुत्यादेः परस्परविरोधसदसद्भावः। पञ्चमे प्रतिपत्तिक्रमोक्ति। षष्ठेऽनारभ्याधीतानि। सप्तमे बहुप्रधानोपकारकप्रयाजादीनि। अष्टमे याजमानानि"। "प्रधानस्य प्रयोक्तृत्वमप्रधानप्रयोक्तृता। क्वचिन्ना जघन्याङ्गक्वचिन्नोभे ते चतुर्थगाः"। चतुर्थाध्यायस्य प्रथमे पादे प्रधानभूतामिक्षा दध्यानयनस्य प्रयोजकेत्यादिप्रधानप्रयोक्तृत्वं विचारितम्। द्वितीये त्वप्रधानं वत्सापाकरणं शाखाच्छेदे प्रयोजकमित्याद्यप्रधानप्रयोक्तृत्वम्। तृतीये जुह्वपर्णमयीत्वादेरपापश्लोकत्ववर्षादिफलभावाभावचिन्ता। चतुर्थे राजसूयगतजघन्याङ्गाक्षद्यूतादिचिन्ता"। "स्तुत्यादिभिः क्रमस्तस्य विधेयो द्रव्यदर्शने। स्तुत्यादेर्बलता चेति पञ्चमाध्यायपादगाः"। "पञ्चमाध्यायस्य प्रथमे पादे स्तुत्यर्थपाठादिभिः क्रमो निरूपितः। द्वितीये वाजपेयगतेषु सप्तदशस्य पशुत्वेनैकत्वसंपादनमित्यादि क्रमविशेषः। तृतीये पशुप्रवाजादीनामावर्तनेनैकैकस्यनित्यादिदृष्टिः। अदाभ्यपशुचित्रिगवोरनाहुत्तिरित्यादि दृष्टभावः। चतुर्थे क्रमनियामकानां स्तुत्यर्थपाठादीनां प्रबलदुर्बलभावः। "अधिकारी तस्य धर्मैः प्रतिनिध्यर्थलोपने। दीक्षा सत्रं ऐष्टयश्च षष्ठे पादेष्वमीक्षिताः"। षष्ठाध्यायस्य प्रथमे पादे कर्माधिकारः कर्तुरस्यन्वादेर्नास्ति स्त्रिया अस्ति योऽस्ति स च पत्न्या सहेत्येवमादिनाधिकारी निरूपितः। द्वितीये सत्राधिकारिणां सत्त्वेनं सत्रं फलम्। दर्शपूर्णमासयोः कर्तैक्यनियमः। काम्यकर्म समाप्तनीयमित्येवमादयोऽधिकारिधर्मा उक्ताः। तृतीये द्रव्यस्य प्रतिनिधिरस्ति। देवादीनामग्न्यादीनामधिकारित्वस्य च नास्तीत्यादिना निरूपणम्। चतुर्थे पदार्थलोपनं विचारितम्। अवत्तनाथे सत्याज्येन यजेत। इडाद्यर्थनाथे सति श्रेयान् सोमस्तीत्यादिकम्। पञ्चमे काणापराधेन चन्द्रोदये सत्यभ्युदयेष्टिः प्रायश्चित्तम्।

ज्योतिष्टोमस्यैकादयो दीक्षाः। द्वादशाहस्य द्वादशदीक्षा इत्यादि निरूपितम्। षष्ठे सत्राधिकारिधर्मतुल्यकल्पा एव। सप्तमे पुत्रादिकं न देयम् महाभूमिर्न देयेत्येवमादिदैवविचारः। अष्टमे लौकिकाग्नावुपनयनहोमः, स्वपतोदित्सर्थवेत्येवमाद्यग्निविचारः कृतः"। "प्रत्यक्षोक्त्यतिदेशोऽस्य शेषः सामनिरूपणम्। नामलिङ्गातिदेशौ द्वौ सप्तमाध्यायपादगाः"। "सप्तमाध्यायस्य प्रथमे पादे समानमितरच्छेषेणेत्यादि प्रत्यक्षवचनातिदेशः। द्वितीये रथन्तरशब्देन गानमात्राभिधायिना गानस्यैवातिदेशस्तत्सम्बन्धिताऽप्यः पूर्वोक्तातिदेशस्य शेषो विचारितः। तृतीयेऽग्निहोत्रनामातिदेशः। चतुर्थे निर्वापौषधद्रव्यादिलिङ्गातिदेशः"। "षष्ठलिङ्गादथास्पष्टात् प्रबलादपवादतः। अतिदेशविशेषाः स्युरष्टमाध्यायपादगाः"। "अष्टमाध्यायस्य प्रथमे पादे स्पष्टेन लिङ्गेनातिदेशविशेषः। तद्यथा सौर्यचरावतिदेशकानि निर्वापस्थितेन देवतानिर्देश एकदेवतात्वनौषधद्रव्यकत्वमित्यादीनि स्पष्टान्याग्नेयलिङ्गानि। द्वितीये त्वस्पष्टैर्लिङ्गैरतिदेशः। तद्यथा वाजिने ऋविःसामान्येन लिङ्गेन पशोर्विध्यन्तोऽतिदिश्यते। तत्र लिङ्गमस्पष्टम् शीघ्रं तदुद्भूतत्वात्। तृतीये प्रबलेन लिङ्गेनातिदेशः। तद्यथा आभिचारिकेष्टावाग्नावैष्णवसारस्वतवार्हस्पत्येषु ऋविःषु द्वित्वेन लिङ्गेन यथाक्रममाग्नेयादिविध्यन्ते प्राप्ते द्विदैवत्यत्वेन लिङ्गेन प्रथम आग्नावैष्णवे तृतीयस्याग्नीषोमीयस्य विध्यन्तोऽतिदिष्टः। प्रबलं च द्विदैवत्यत्वम् शब्दोच्चारणमात्रेण सहसा प्रतिभासात् क्रमस्तु विलम्बितप्रतीत्या दुर्बलः चतुर्थे दर्विहोमेऽतिदेशोऽपोह्यते"।

"ऊहारक्षोऽथ सामोहो मन्त्रोहस्तत्प्रसङ्गतः। नवमाध्यायपादेषु चतुर्धेते प्रकीर्तिताः"। "नवमाध्यायस्य प्रथमे पादे उपोद्घातपूर्वकमूहविचारप्रारम्भः। तत्र प्रयाजादयो धर्मा अपूर्वप्रयुक्ताः। अवघातमन्त्रादिष्वविवक्षितं व्रीह्यन्त्यादिरूपं साधनविशेषत्वमात्रं विवक्षितमित्यादिरुपोद्घातः। सवितृविष्णुशब्दानां विकृतिषु नास्त्यूहः। अग्निशब्दस्यास्त्यूह इत्यादिरूहविचारारम्भः। द्वितीये सपरिकरः सामोहः। तृतीये मन्त्रोहः। चतुर्थे मन्त्रोहप्रसङ्गापतितो विचारः"। "हारलोपोऽस्य विस्तारः कार्यैकत्वं समुच्चयः। षड्सामप्रकीर्णानि नञर्थषाट्पादगाः" "दशमाध्यायस्य प्रथमे पादे बाधहेतुहारलोपो निरूपितः। तद्यथा स्वर्गकामा वेदिर्भवतीत्यत्र वेदिनिष्पादनरूपस्य हारस्य लोपेन निष्पादकानामुत्खननादीनां बाधः। क्रयलेषु वितुषीकरणरूपस्य हारस्य लोपेनावघातस्य बाधः। द्वितीये संज्ञेपेषूक्तस्य हारलोपस्य बहुभिरुदाहरणैर्विस्तारः। तृतीये बाधकारणं कार्यैकत्वम्। तद्यथा प्रकृतौ गवाश्वादि दक्षिणाया ऋत्विक्परिक्रयः कार्यः। तथा विकृतिरूपे भूमान्नप्रोक्षे धेनुरूपायास्तदेव कार्यम्। ततो धेन्वा गवाश्वादि दक्षिणा विकृतौ चोदकप्राप्ता बाध्यते। चतुर्थे नक्षत्रेष्टिविहिना उपहोमाद्योदकप्राप्तैर्नारिष्टहोमैः सह समुच्चीयन्त इत्यादि समुच्चयः। पञ्चमे शेषशिष्यहः प्रकृतिगामी। स चाध्ययनपाठादेव सङ्कीर्तव्य इत्यादिर्बाधप्रसङ्गागतो यज्ञादिविचारः। षष्ठे साम तृचे गेयमित्यादिर्बाध प्रसङ्गागतः सामविचारः। सप्तमे पशुकृत्येषु ऋविर्भेदः। अष्टमेधीयमपूर्वकर्मेत्यादिर्बाध प्रसङ्गागतः प्रकीर्णविचारः। अष्टमे नानुयाजेष्विति पर्युदासो न सोम इत्यर्थवादो नातिरात्र इति प्रतिषेध इत्यादिर्बाधोपयुक्तो नञर्थविचारः"।

"उपोद्घातस्तथा तन्त्रावापौ तन्त्रस्य विस्तृतिः। आवाप विस्तृतिश्चैकादशाध्यायस्य पादगाः"। एकादशाध्यायस्य प्रथमे पादे तन्त्रस्योपोद्घातो वर्णितः। द्वितीये तन्त्रावापौ संज्ञेपेषूक्तौ। तृतीये तन्त्रसदाहरणबाहुल्येन प्रपञ्चितम्। चतुर्थे तथैवावापः प्रपञ्चितः"। "प्रसङ्गस्तन्त्रनिर्णीतिः समुच्चयविकल्पने। द्वादशाध्यायपादार्था इति पादार्थसंग्रहः"। द्वादशाध्यायस्य प्रथमे पादे पशुधर्माणां पशुपुरोडाशे प्रसङ्गः सौमिकवेदेरुत्तरकालीनत्वेन प्रसङ्ग इत्यादि विचारः। द्वितीये सवनीयपशोस्तन्त्रित्वम् न तु सवनीयपुरोडाशानाम्। विकृतिस्तन्त्रिणी न प्रकृतिः अन्वारब्धयोर्वा विकृतिष्वपि स्यात् न तु प्रकृतावेवेत्यादिविचारः। तृतीये त्वन्वासयोः समुच्चयः। आचारगताङ्गुत्वसन्ततत्वादीनां समुच्चय इत्यादिकं प्राधान्येन यवागूहोर्विकल्प इत्यादिकं समुच्चयापवादत्वेनेत्युभयं चिन्तितम्। चतुर्थे चैन्द्रावार्हस्पत्ययाज्यानुवाक्ययुगलयोर्विकल्प इत्यादिकं प्राधान्येन याज्यानुवाक्ययोः समु-

च्य इत्यादिकं विकल्पापवादत्वेनेत्युभयं चिन्तितम्। तदेवं द्वादशाध्यायगतेषु षष्टिसंख्यकेषु पादेषु प्रतिपाद्या अर्थाः संगृहीताः। ननु यद्योक्तेभ्यः पादार्थेभ्योऽन्येऽप्यर्था बहवस्तत्तत्पादेषु विचार्यन्ते तेषां कथं तत्तत्पादान्तर्भाव इत्याशङ्क्याह"। "उपोद्घातापवादाभ्यां प्रसङ्गानुप्रसङ्गतः। तत्तत्पादगतत्वेन विचारान्तरमुच्यते" "यद्योक्तपादगतिपाद्यादन्येऽप्यर्थेषु यथोचितं क्वचिदुपोद्घातः क्वचिदपवादः क्वचित् प्रसङ्गपतितः क्वचिदनुप्रसङ्गपतित इत्येवं पादान्तर्भाव उच्चैः"। जैमिनिच भारतान्तरं चकार तस्य जैमिनिभारतेति संज्ञा तन्नामस्मरणे च वज्रपातभयवारणं यथा "जैमिनिच सुमन्तुश्च वैशम्पायन एव च। पुलस्त्यः पुलहश्चैव पञ्चैते वज्रवारकाः" शब्दकल्पद्रुमधृतपुराणवाक्यात् "सुनेः कल्याणमित्रस्य जैमिनेरपि कीर्त्तनात्। विद्युदग्निभयं नास्ति पठिते च सदोदरे" इत्युक्तेरपि तत्कीर्त्तनस्य विद्युदग्निभयनिवारकता। तत इदमर्थं ऋ। जैमिनीय जैमिनिप्रणीतशास्त्रादौ। "जैमिनीये च वैयासे विरुद्धार्थो न कथन" सांख्यप्रवचनभाष्यधृतपराशरोपपु०। "जैमिनीयन्यायमाला श्लोकैः संगृह्यते स्फुटम्" माधवः।

जैव त्रि०जीवस्येदम् अण्। १बालस्वन्धिनि २छत्रस्वतिस्वन्धिनि ३तत्त्वेत्ते धनूराशौ मीनराशौ तदधिदेवतायां ४पुष्यनक्षत्रे। ५तदीये पाते च "ऋताद्रिचन्द्राः जैवस्य त्रिखाङ्गाश्च भगोत्तया" सू० सि०।

जैवन्तायन पुंस्त्री जीवन्तस्य गोत्रापत्यं वा फञ्। जीवन्तर्षेः गोत्रापत्ये। स च यजुर्वेदप्रचारकवंशान्तर्गतः। यथाह "जैवन्तायनाच्च रैभ्याच्च रैभ्यः" शत० ब्रा० १४।७।३।२६ पथे इञ्। जैवन्ति तत्रार्थे स्त्रियां ङीप्।

जैवन्तायनि त्रि० जीवन्तात्फाल्गुनादेशादि कर्षा० चतुरर्थ्यां फिञ्। जीवन्तफाल्गुनादेशादौ।

जैवन्ति पु० जीवन्तस्य राज्ञोऽपत्यम् इञ्। जीवन्तनृपापत्ये प्रवाहणे "तं ह प्रवाहणो जैवन्तिरुवाचान्तवद्वै किल ते गार्गावत्य! साम" छा० उ०।

जैवातृक पु० जीवयत्यनेन लोकं जीवति वा यातृ-कनू-डट्टिच। १चन्द्रे २कर्पूरे अमरः। ३शुभे संभिन्नवा०। ४औषधे हेम० ५दीर्घायुष्के त्रि० मेदि०। "जैवातृक! ननु श्रूयते पतिरक्षाः मिथिलायां प्रहारवर्मा-जीत्" दशकु०। [जीवस्फाल्गुनादेशादौ।

जैवि त्रि० जीवस्फाल्गुनादेशादि सूतङ्कभा० चतुरर्थ्यां ञि।

जैवेय पुंस्त्री जीवस्य गुरोरपत्यं गुभा० ढक्। जीवस्यापत्ये कचनामके सुतौ। जीवाया मौर्व्यां स्त्रीत्वात् ढक्। २ज्यासम्बन्धिनि त्रि०।

जैह्माशिनेय पु०जिह्माशिनोऽपत्यं गुभा० ढक् दाक्षिनाο नि० टिलोपः। जिह्माशिनोऽपत्ये।

जैह्म्य न० जिह्मस्य भावः ष्यञ्। कौटिल्ये। "जैह्म्यञ्च मैथुनं पुंसि जातिभ्रंशकरं स्मृतम्" मनुः। "निषिद्धभक्षणं जैह्म्यसत्कर्मत्व वचोऽनृतम्। रजस्वलासखास्वादः सुरापानसमानि तु" याज्ञ०।

जोङ्ग न० जुङ्ग्यते वर्ज्यते जुगि-वर्जने कर्मणि अप् पृषो०। कालीयके गन्धद्रव्यभेदे हारा०।

जोङ्गक न० जुगि-स्वुल् पृषो०। अगुरुचन्दने अमरः।

जोङ्गट पु० जुगि-अटन् पृषो०। गर्भिण्या अभिलाषे दोहदे (साद) हारा०।

जोटिङ्ग पु० जुट- इन् जोटिं गच्छति वा० ड खिच्च। १महादेवे २महाव्रतिनि च त्रिका०। [त्रि० ङी०।

जोड पु० जुड-बन्धने घञ्। बन्धने। अहिजोड़म्

जोन्साला स्त्री जु-विच् तस्यान्नमाजाति आ+ज्ञा-क। देवधान्ये हेमच०।

जोष पु० जुष-भावे घञ्। १प्रीतौ २सेवने च "को वां जोष उभयोः" ऋ० १।१२०।१। ३सुखे न० शब्दर०।

जोषण न०जुषी-प्रीतिसेवनयोः भावे ल्युट्। १प्रीतौ २सेवने च। स्वार्थे णिच्-भावे युच्। तत्रार्थे स्त्री "उत्तरे निगमाः यद्येतं जोषणा श्रुतेः" काल्या०श्रौ०५।१२।६।

जोषम् अव्य०जुष-बा०असु। १तूष्णीमित्यर्थे "इति जोषमवस्थितं हिषः" माघः। २सुखे च अमरः।

जोषा स्त्री जोषयति जुष-णिच्-अच्। १योषिति शब्दर० "चन्द्रेण जुषातोः समुत्ययानायाऽयं व्युत्पादितः" उज्ज्वलदत्तः। [२योषिति च।

जोषिका स्त्री जु-स संज्ञायां कन्। १आलिकायां शब्दर०।

जोषित् स्त्री जुष "कृकृरुहिजु(षि)दुषिभ्यः" उणा० इति। स्त्रीमात्रे शब्दर०। कृदन्तत्वात् वा टाप्। जोषिताऽपि तत्रार्थे शब्दर०।

जोष्टृ त्रि० जुष-तृच् वेदे वा० इड्भावः। सेवके। "उपेमसृग्रं जोष्टारः" ऋ०४।३१।६। "जोष्टारः सेवकाः" भा०। लोके तु जोषितृ इत्येव।

जोमर न० जुमरेण निर्वृत्तः अण्। १जुमरनिर्वृत्ते संधिप्रकाराख्ये व्याकरणे २तदध्येतरि त्रि०।

**जौलायन** पु॰ जुलस्यापत्यम् इञ् तस्य इञलत्वात् यूनि फञ्। जुलस्य यूत्यपत्ये। ततः ऐषुकार्या॰ विषयार्थे भक्तञ्। जौलायनभक्त तदीयविषये त्रि॰।

**जौहव** त्रि॰ जुह्वामवदाने योग्यम् जुह्व-अण्। जुह्वपदार्थेऽवदानयोग्येषु हृदयादिषु "हृदयं जिह्वां क्रोडं सव्यसक्थिपूर्वनडकं पार्श्वं यकृद्वृक्कौ गुदमध्यं दक्षिणा श्रोणिरिति जौहवानि" कात्या॰ श्रौ॰ ६।७।६। "जुह्वामवदानयोग्यानि प्रधानयागसाधनानि" कर्कः।

**ज्ञ** पु॰ ज्ञा-क। १बुधग्रहे "युगे खर्यग्नयुक्षाणां खचतुष्करदार्णवाः" सू॰सि॰। २परिज्ञाते "क्रियासु बाह्यान्तरमध्यमासु सम्यक् प्रयुक्तासु न कम्पते ज्ञः" प्रश्नो॰। ३ब्रह्मर्षिभेदे च हरिवंशः। त्रि॰ उपपदे तत्तत्पदार्थज्ञातरि त्रि॰। "आदेर्ण देशकालज्ञः" रघुः "विधिज्ञो विधिमास्थाय" ति॰ त॰। स्वार्थे क। ज्ञक ज्ञातरि त्रि॰ स्त्रियां वा अत इत्वम् ज्ञका ज्ञिका।

**ज्ञप** मारणे, आलोचे, निशाने, तोषणे स्तुतौ च चुरा॰ उभ॰ सक॰ सेट् चटा॰। ज्ञपयति-ते अजिज्ञपत्-त। ज्ञाङ्मस इत्यनेनैवेऽसिद्धौ ज्ञपपाठश्चुरादिरभवदीति मते फलवत्कर्त्तरि परस्मैपदार्थः इति धातुप्रदीपः। वस्तुतस्तु ज्ञप्तिपदमनेनैव निष्पादितम्। तेन अनिर्दिष्टार्थतया ज्ञप्तिरिह ज्ञानम्। अतएव प्रच्छौ य क्षीप्से इत्यत्र अक्षैव वचनस्य निष्पादितेन क्षीप्सशब्देन ज्ञातुमिच्छा प्रतिपाद्यते। एवं ज्ञानपर्य्याये "प्रतिपज्ज्ञप्तिचेतना इत्यमरः" इति दुर्गादासः। ज्ञप ज्ञाने च इति पाणिनिः। अधिक आधारो वक्ष्यते।

**ज्ञपित** त्रि॰ ज्ञप-ज्ञाने क्त नि॰ वा इट्। ज्ञाते अमरः। इड्भावे। ज्ञप्तोऽभवत्।

**ज्ञप्ति** स्त्री ज्ञप-भावे क्तिन्। १बुद्धौ अमरः २मारणे ३तोषणे ४तीक्ष्णीकरणे ५स्तुतौ च।

**ज्ञा** बोधे क्र्या॰ परः सक॰ अनिट्। जानाति अज्ञासीत्। जज्ञौ। ज्ञाता ज्ञानं ज्ञातिः ज्ञातः जज्ञिवान्।

अनु+अनुमतौ अनुमतिश्च स्वयंप्रवृत्तस्य निषेधनाभावेन स्वाभिमतस्वज्ञापनेन प्रवर्त्तनम्। "तं देवासो अनुजानन्तु कामम्" तैत्ति॰ ब्रा॰। "अनुजानेऽहं यद्वीर ब्रतवांस्त्वं यथाभियस्। सर्वं तदनुजानामि" भा॰आ॰२।२७अ॰

अप+निह्नवे आत्म॰। आत्मानमपजानानः शपसात्रोऽनयद्धिनम्" भट्टिः।

अभि+सम्यग्ज्ञाने "भक्त्या मामभिजानाति यावान् यश्चास्मि तत्त्वतः" गीता। "अभिज्ञाश्चेदपातानाम्" कुमा॰ अभिज्ञा च आद्यज्ञानम् अनुभवात्मकम्।

प्रति+अभि+पूर्वदृष्टस्य वस्तुनः चक्षुरादिसन्निकर्षजे पूर्वसंस्कारोत्पन्ने स्मृतिभिन्ने ज्ञानभेदे यथा सोऽयं देवदत्तः इत्यादि ज्ञानम्। "तं त्वं प्रत्यभिजानीहि स्वप्ने यं दृष्टवत्यसि" हरिवं॰ १७६ अ॰।

सम्+अभि+प्रत्यभिज्ञाने "इन्द्रसेनां सखा भ्राता समभिज्ञाय वाष्पकः" भा॰ व॰ ७५ अ॰।

अव+अनादरे हीनत्वेन ज्ञाने च। "अवजानासि मां यस्मात् ततस्ते न भविष्यति" रघुः। "अदेशकाले यद्दानमपात्रेभ्यश्च दीयते। असत्कृतमवज्ञातं तत्तामसमुदाहृतम्" गीता। "वस्तूनि देशांश्च विचक्षणत्वात् रामं ऋषेः संगिरमाश्च एव। तयावजज्ञे" भट्टिः।

आ+सम्यग्ज्ञाने नियोगे च "न हि मनसा ध्यायतः कथनाजानाति" शत॰ ब्रा॰ ४।६।७।६। "नियोगश्च निकृष्टस्य कर्त्तव्यादेः प्रवर्त्तनम्। स्वार्थे णिच् तत्रार्थे। "आज्ञापय ज्ञातविशेष! पुंसाम्" कुमा॰। ज्ञा-प्रेरणे चौरादिकस्येदं रूपमित्यन्ये।

उप+आद्यज्ञाने "उप तज्जानीत यथा वयमिदमाश्रयामेति" शत॰ ब्रा॰ ६।२।२।७। "उपज्ञा ज्ञानमाद्यं स्यात्" अमरः।

निस्+निर्+निश्चयात्मके ज्ञाने। "विद्युद्वै विद्युत इष्टिमनुप्रविशति सान्तर्धीयते तां न निजानन्ति" ऐत॰ ब्रा॰। परि+परितो ज्ञाने "इन्द्रो दक्षं परिजानादहीनम्" ऋ॰१०। १२६।६। "अनुबन्धं परिज्ञाय देशकालौ च तत्त्वतः" मनुः।

प्र+प्रकृष्टज्ञाने। "यथा धर्ममधर्मं च कार्यं चाकार्यमेव च। अयथावत् प्रजानाति" "तस्य प्रज्ञा प्रतिष्ठिता" गीता।

प्रति+प्रतिज्ञायां साध्यत्वेन पक्षनिर्देशे आत्मकर्त्तव्यत्वेन कथनभेदे च आत्म॰। "साध्यनिर्देशः प्रतिज्ञा" गौत॰सू॰। साध्यत्वेन पक्षनिर्देशः प्रतिज्ञेति तदर्थः। "प्रतिजज्ञे वधं चापि सर्वक्षत्रस्य भारत!" भा॰व॰११७ अ॰॥ "प्रतिज्ञाय वनवासविधिं गुरोः" रामा॰ २।१०६ अ॰। "तत्रौ निशाचरैर्वध्यं प्रतिजज्ञे रघूत्तमः" रघुः। "अक्षेषु पाने द्यूते वा क्रीडासु मृगयासु च। प्रतिज्ञानन्ति पुरुषास्ते व्यसनजं तव" भा॰ स॰ ६अ॰। आर्षत्वात् परः।

वि+विशेषेण ज्ञाने "ज्योतिर्ह्यचीत तमसो विजानन्" ऋ॰ ऋ॰१।१६८।७। "आत्मानं चेद्विजानीयादयमस्मीति पूरुषः" शत॰ ब्रा॰ १४।७।२।१६। "कथमेतद् विजानीयां त्व-

मादौ मोक्षवानिति" गीता। शिल्पशास्त्रविषयके ज्ञाने च "मोचे धीर्ज्ञानमन्यत्र विज्ञानं शिल्पशास्त्रयोः" अमरः। ज्ञानमात्रे ऋषिकविज्ञानमिति बौद्धाः।

सम्+सम्यग् ज्ञाने संज्ञायां चैतन्ये च आत्म०। संजानानान् परिहरन् रावणानुचरान् बहून्" भट्टिः। "रविस्तु संज्ञापयते लोकान् रश्मिभिरुल्बणैः" भा० आ०१२७६७। प्रतिज्ञायाम् आत्म०। "संज्ञानीध्वं स्वमीक्षा" च सम्बोधम्। [ अजिज्ञपत् त।

ज्ञा ज्ञपधात्वर्थे चुरा० उभ० सक० सेट् घटा०। ज्ञापयति ते

ज्ञा प्रेरणे चुरा० उभ० सक० सेट्। ज्ञापयति ते अजिज्ञपत् त। अस्यैव रूपम् आज्ञापयतीत्यादि। "आज्ञापय ज्ञातविशेष! दुःखम्" कुमा०।

ज्ञात त्रि० ज्ञा-कर्मणि क्त। विदिते "ज्ञाततत्त्वोऽपि "खल्वेकः सन्दिग्धे कार्यवस्तुनि" माघः। "ज्ञाताज्ञाताः कुले मम" वायुपु०। भावे क्त। २ज्ञाने न०। वाचा० स्वार्थे कन्। ज्ञातक विदितार्थे। [ अर्हङ्गदे हेम०।

ज्ञातनन्दन पु० ज्ञातेन ज्ञानेन नन्दति नन्द-ल्यु इत०।

ज्ञातल त्रि० ज्ञातं ज्ञानं ख्याति वा-क। ज्ञानयुक्ते तस्यापत्यं शुभ्रा०शतङेत्यत्र ज्ञातलेति पाठान्नरात् ढक्। ज्ञातलेय तदपत्ये स्त्री०। [ नप्ते अमरः।

ज्ञातसिद्धान्त पु० ज्ञातः सिद्धान्तः तत्त्वार्थो येन। सिद्धा-

ज्ञाति पु० जानाति छिद्रं कुलस्थितिं वा संज्ञायां क्तिच्। ज्ञा-कर्तरि करणे वा क्तिच्। १पितरि २पितृबन्धौ सपिण्डसकुल्यसमानोदकसगोत्रेषु एकगोत्रोत्पन्ने पितृव्यादौ अमरः। "ज्ञातिभेदो न नः कार्य्यः साक्षी त्वं मम नारद!" हरिवं०१२६अ०। ज्ञातिश्च चतुर्विधः "सप्तमपुरुषपर्य्यन्तं सपिण्डः। ततश्चिपुरुषपर्य्यन्तं सकुल्यः। ततश्चतुर्थपुरुषपर्य्यन्तं समानोदकः। जन्मनामस्मृतिपर्य्यन्तमपि समानोदकः। ततः परं सगोत्रजः। ज्ञातिद्रोहे दोषो यथा "यानि कानि च पापानि ब्रह्महत्यादिकानि च। ज्ञातिद्रोहस्य पापस्य कलां नार्हन्ति षोडशीम्। "भर्त्रभ्राद्रपितृज्ञातिश्वश्रूश्वशुरदेवरैः"। "ज्ञातिश्चैव सर्वकामानाप्नोति श्राद्धदः सदा" इति च याज्ञ०। "ज्ञातिभ्यो द्रविणं दत्त्वा कन्यायै चैव शक्तितः" मनुः। ततः परञ्च पुत्रशब्दस्य समासे गौणत्वात्।

ज्ञात्र त्रि० ज्ञा-तृन्। १ज्ञानशीले २वेत्तरि च ज्ञात्रभावः अण्। ज्ञात्र ज्ञातृत्वे न० "संविन्म ऐ ज्ञात्रं च मे" यजु० ८७। "ज्ञात्रं विज्ञानसामर्थ्यम्" वेददी०।

ज्ञातेय न० ज्ञातेर्भावः कर्म वा ढक्। ज्ञातित्वे २ज्ञातिकर्म्मणि च। "ज्ञातेयं कुरु सौमित्रे! भवाच्चायत्त राघवम्" भट्टिः

ज्ञान पु० विषयान् जानाति ज्ञः अनिति अनः कर्म०। १जीवे। भावे ल्युट्। २बोधे न०। ३विशेषेण सामान्येन चावबोधे। वेदान्तिमते ४पदार्थयाथार्थिकायां मनोवृत्तौ, तच्च ज्ञानं नानाविधं यथा ज्ञानं द्विधा वस्तुमात्रद्योतकं निर्विकल्पकम्। सविकल्पन्तु संज्ञादिद्योतकत्वादनेकधा। संकल्पसंशयभ्रान्तिस्मृतिसाङ्ख्यनिश्चयाः। ऊहोऽनध्यवसायश्च तथान्येऽनुभवा अपि। इत्यादिभेदेनानेकविधा भवन्तीत्यर्थः। ५सम्यग्बोधे। न्यायमते ६ बुद्धिमात्रे "बुद्धिस्तु द्विविधा मता। अनुभूतिः स्मृतिश्चैव" भाषा० तच्च प्रकारान्तरेण द्विविधं यथा "अप्रमा च प्रमा चेति ज्ञानं द्विविधमुच्यते, तच्चान्ये तत्रतिर्यां स्यादप्रमा सा निरूपिता। तत्प्रपञ्चो विपर्य्ययः संशयोऽपि प्रकीर्त्तितः। आद्यो देहे आत्मबुद्धिः शङ्खादौ पीततामतिः। अनेकक्रियरूपा सा संशयोऽत्र प्रदर्श्यते। किंस्विन्नरो वा स्थाणुर्वेत्यादिबुद्धिस्तु संशयः। तदभावोऽप्रकारो धीस्तत्प्रकारा तु निश्चयः। स संशयो भवेद्या धीरेकत्राभावभावयोः। साधारण्यादिधर्मस्य ज्ञानं संशयकारणम्। दोषोऽप्रमायाजनकः प्रमायास्तु गुणो भवेत्। पित्तदूरत्वादिरूपो दोषो नानाविधो मतः। प्रत्यक्षे तु विशेषेण विशेषणवता समम्। सन्निकर्षो गुणस्तु स्यादथ लक्षणमितौ गुणः। पक्षे साध्यविशिष्टे च परामर्शो गुणो भवेत्। शब्दे साङ्ख्यबुद्धिस्तु भवेदुपमितौ गुणः। शाब्दबोधे योग्यताशक्त्यात्पर्य्यज्ञानवा प्रमा। गुणः स्याद्, भ्रमभिन्नस्तु ज्ञानमात्रोच्यते प्रमा। अथ वा तत्प्रकारं यज्ज्ञानं तद्बुद्धिविशेष्यकम्। ज्ञानं यन्निर्विकल्पाख्यं तदतीन्द्रियमिष्यते। तत् प्रमा नाऽप्रमा नापि ज्ञानं यन्निर्विकल्पकम्। प्रकारत्वादिशून्यं हि सम्बन्धानवगाहि तत्" इति भाषा०। ७बुद्धिवृत्तिनिरोधरूपे योगे "एकत्वं बुद्धिमनसोरिन्द्रियाणाञ्च सर्वशः। आत्मनो व्यापिनस्तात! ज्ञानमेतदनुत्तमम्" इति भा०मा०मोक्षधर्मः। एकत्वं बुद्धिमात्रे यावस्थानम् बुद्धिवृत्तिनिरोध इति यावत्। ८देवताध्यानादौ ९विवेकविज्ञाने शास्त्राचार्योपदेशजे परमात्मविषये साक्षात्मोक्षफले १०आत्मनिश्चये तत्त्वज्ञाने वेदान्तिमते ११जीवेश्वरजगद्ब्रह्मस्वाधिष्ठानभूते नित्यस्वप्रकाशे सच्चिदानन्दरूपाद्वितीये परमार्थसत्ये, चैतन्ये। करणे ल्युट्। १२आत्मानात्मसर्वपदार्थावः

बोधने विवेकसामर्थ्ये । १२अहंब्रह्मेत्युपासने । तद्यथोपासनम् "ब्रह्मैवाहं समः शान्तः सच्चिदानन्दलक्षणः । नाहं देहोऽसद्रूपो ज्ञानमित्युच्यते बुधैः । निर्विकारो निराकारो निरवद्योऽहमव्ययः । नाहं देह इत्यादि । निरामयो निराभासो निर्विकल्पोऽहमाततः । नाहमित्यादि । निर्गुणो निष्क्रियो नित्यो नित्यसुखोऽहमच्युतः । नाहमित्यादि । निर्भेदो निरवद्योऽनन्तः शुद्धोऽहमजरोऽमरः । नाहमित्यादि । वेदान्तशास्त्रोक्तं बोध्यम् । १३शब्दयुक्तिभ्यामात्मनिश्चये । "अमानित्वमदम्भित्वमहिंसा क्षान्तिरार्जवम् । आचार्योपासनं शौचं स्थैर्यमात्मविनिग्रहः । इन्द्रियार्थेषु वैराग्यमनहङ्कार एव च । जन्ममृत्युजराव्याधिदुःखदोषानुदर्शनम् । असक्तिरनभिष्वङ्गः पुत्रदारगृहादिषु । नित्यञ्च समचित्तत्वमिष्टानिष्टोपपत्तिषु । मयि चानन्ययोगेन भक्तिरव्यभिचारिणी । विविक्तदेशसेवित्वमरतिर्जनसंसदि । अध्यात्मज्ञाननित्यत्वं तत्त्वज्ञानार्थदर्शनम् । एतज्ज्ञानमिति प्रोक्तमज्ञानं यदतोऽन्यथा" इति गीतोक्तार्थेषु १४ज्ञानसाधनेषु । तच्च सात्त्विकादिभेदात् त्रिविधम् । यथा "सर्वभूतेषु येनैकं भावमव्ययमीक्षते । अविभक्तं विभक्तेषु तज्ज्ञानं विद्धि सात्त्विकम्" । (सात्त्विकं सर्वसंसारोच्छित्तिकारणम्) । "पृथक्त्वेन तु यज्ज्ञानं नानाभावान् पृथग्विधान् । वेत्ति सर्वेषु भूतेषु तज्ज्ञानं विद्धि राजसम् । यत्तु कृत्स्नवदेकस्मिन् कार्ये सक्तमहैतुकम् । अतत्त्वार्थवदल्पञ्च तत् तामसमुदाहृतम्" । (राजसं तामसञ्च संसारकारणम्) । आत्मनः श्रवणमननाभ्यां परिनिष्पन्ने प्रमाणजन्यचेतोवृत्त्यभिव्यक्तसच्चिद्रूपे १५परमात्मज्ञानसाधनशास्त्रादात्मतत्त्वसाक्षात्कारे "लोकवासनया जन्तोः शास्त्रवासनयापि च । देहवासनया ज्ञानं यथावन्नैव जायते । ज्ञानसत्यद्यते पुंसां क्षयात्पापस्य कर्मणः" "यथादर्शतलप्रख्ये पश्यत्यात्मानमात्मनि" इति ब्रह्मसाक्षात्काररूपज्ञानहेतुरूपः । १७साक्षात्वेदतदर्थविप्रवेऽवबोधे । महावाक्यजन्याखण्डाकारायां १८वृद्धिवृत्तौ १९स्वरूपप्रकाशरूपे । सांख्यमते गुणपुरुषान्यताख्यातिरूपे २०अध्यवसाये । ज्ञायतेऽनेन । ज्ञा–करणे ल्युट् । २१वेदे २२शास्त्रादौ च । तत्र प्रत्यक्षज्ञानोत्पत्तिप्रकारो मतभेदेन निरूप्यते । तत्र नैयायिकैः "आत्मा मनसा युज्यते मन इन्द्रियेण इन्द्रियं विषयेण तस्मादध्यक्षम्" इत्युक्त दिशा प्रत्यक्षं जायते । व्याप्तिज्ञानपरामर्शोत्तरमनुमितिर्जायते । इत्तिज्ञानसहकृतपदज्ञानजन्यपदार्थोपस्थितौ शाब्दबोधो जायते । गवादौ गोसादृश्यज्ञानेन गोसदृशो गवय इत्यादिना अतिदिष्टवाक्यार्थस्य स्मृतौ गवयो गवयपदवाच्य इत्यादि रीत्या उपमितिज्ञानं जायते इत्यङ्गीकृतम् । केचित् बौद्धभेदाः बाह्यार्थाभावेन बुद्धेरेव तत्तदर्थाकारतयावभास इत्यङ्गीचक्रुः" यथोक्तं सर्वद० स०

"बाह्यं बाह्यं नोपपद्यत एव विकल्पानुपपत्तेः । अर्थोज्ञानग्राह्यो भावादुत्पन्नो भवति श्रुत्यन्नो वा, न पूर्वः उत्पन्नस्य स्थित्यभावात् नापरः श्रुत्यन्नस्यासत्त्वात् । अथ मन्येथाः श्रुतीत एवार्थो ज्ञानग्राह्यः तज्ज्ञानकत्वादिति तदपि बालभाषितं वर्त्तमानतावभासविरोधात् इन्द्रियादेरपि ग्राह्यत्वप्रसङ्गाच्च । किञ्च ग्राह्यः किं परमाणुरूपोऽर्थः अवयविरूपो वा । न चरमः श्रुत्यैकदेशविकल्पादिना तन्निराकरणात् । न प्रथमः अतीन्द्रियत्वात् षट्केन युगपद्योगस्य बाधकत्वाच्च । यथोक्तम् "षट्केन युगपद्योगात् परमाणोः षडंशता । तेषामप्येकदेशत्वे पिण्डः स्यादणुमात्रकः" इति । तस्मात् स्वव्यतिरिक्तग्राह्यविरहात्तदात्मिका बुद्धिः स्वयमेव स्वात्मरूपप्रकाशिका प्रकाशवदिति सिद्धम् । तदुक्तम् "नान्योऽनुभाव्यो बुद्ध्यास्ति तस्या नानुभवोऽपरः । ग्राह्यग्राहकवैधुर्यात् स्वयं सैव प्रकाशते" इति । ग्राह्यग्राहकयोरभेदचानुमातव्यः यद्वेद्यते येन वेदनेन, तत्ततो न भिद्यते यथा ज्ञानेनात्मा, वेद्यश्चैतन्यादयः । भेदे हि सत्यनेनार्थस्य सम्बन्धित्वं न स्यात् तादात्म्यस्य नियमहेतोरभावात् तदुत्पत्तेरनियामकत्वात् यस्यायं ग्राह्यग्राहकसंवित्तीनां पृथगवभासः स एकस्मिंश्चन्द्रमसि द्वित्वावभास इव भ्रमः अतोऽनादिरविच्छिन्नप्रवाहो भेदवासनैव निमित्तम् । यथोक्तम् "सङ्घोपलम्भनियमादभेदो नीलतद्धियोः । भेदश्च भ्रान्तविज्ञानैर्दृश्यते तेन्द्राविवाद्वय" इति । "अविभागोऽपि बुद्ध्यात्मा विपर्यासितदर्शनैः । ग्राह्यग्राहकसंवित्तिभेदवानिव लक्ष्यते" न च रसवीर्यविपाकादिसमानभागाभ्यासोद्भोपार्जितमोदकानां स्वादिति वेदितव्यं वस्तुतो वेद्यवेदकाकारविधुरायाः अपि बुद्धेर्व्यवहर्तृपरिज्ञानानुरोधेन विभिन्नग्राह्यग्राहकाकाररूपवत्तया तिमिरादुपप्लुताक्षां केशेन्द्रनाडीज्ञानाभेदवदनादुपप्लववासनासामर्थ्याद्ग्रहस्योपपत्तेः पर्य्यनुयोगायोगात् । यथोक्तम् "अवेद्यवेदकाकारा यथा भ्रान्तैरीक्ष्यते । विभक्तलक्षणग्राह्यग्र-

याकाकारविप्लवः । तथा ज्ञातव्यस्थेयं केशादिज्ञानभेदवत् । यदा तदा न सङ्गोद्या याकाप्रयाकाकलङ्घचेति । तस्माद्बुद्धिरेवानादिवासनावशादनेकाकारावभासत इति सिद्धम् ।"

तदेतन्मतं बौद्धविशेषैर्निराकृतं तदपि तत्रैवोक्तं यथा । "अन्ये तु मन्यन्ते यथोक्तं बाह्यं वस्तुजातं नास्तीति तदयुक्तं प्रमाणाभावात् । न च सहोपलम्भनियमः प्रमाणमिति वक्तव्यं वेद्यवेदकयोरभेदसाधकत्वेनाभिमतस्य तस्याप्रयोजकत्वेन सन्दिग्धविपक्षव्यावृत्तिकत्वात् । ननु भेदे सहोपलम्भनियमाभावः साधनं न स्यादिति चेन्न ज्ञानस्यान्तर्मुखतया भेदेन प्रतिभासमानतया एकदेशस्थैककालत्वलक्षणसहत्वनियमासम्भवाच्च नीलाद्यर्थस्य ज्ञानाकारत्वे अहमिति प्रतिभासः स्यात् नत्विदमिति प्रतीतिः प्रत्यक्षादव्यतिरेकात् । अथोच्यते ज्ञानस्वरूपोऽपि नीलाकारो भ्रान्त्या बहिर्मुखेन प्रतिभासत इति न च तत्राहमुल्लेख इति । यदुक्तम् "परिच्छेदान्तराद्योऽयं भागो बहिरिव स्थितः । ज्ञानस्याभेदिनो भेदप्रतिभासोऽभ्युपप्लव" इति "यदन्तर्ज्ञेयतत्त्वं तद्बहिर्वदवभासत" इति च । तदयुक्तं बाह्यार्थाभावे तदुत्पत्तिरहिततया बहिर्वदित्युपमानोक्तेरयुक्तेः न हि वस्तुमिलो बन्ध्यापुत्रवदवभासत इति प्रेक्षावानाचक्षीत । भेदप्रतिभासस्य भ्रान्तत्वे अभेदप्रतिभासस्य प्रामाण्यं, तत्प्रामाण्ये च भेदप्रतिभासस्य भ्रान्तत्वमिति परस्पराश्रयप्रसङ्गाच्च । अविसंवादाद्गोवलादिकमेव संविदाना "बाह्यमेवोपाददते जगत्युपेक्षन्तेऽबान्तरमिति व्यवस्थादर्शनाच्च । एवञ्चायमभेदबाधको हेतुर्गोमयपायसीयन्यायवदाभासतां भजेत् अतोबहिर्वदिति वदता बाह्यं बाह्यमेवेति भावनीयमिति भवदीय एव बाधो भवन्तं प्रहरेत् ।"

"ननु ज्ञानाभिन्नकालस्यार्थस्य बाह्यत्वमनुपपन्नमिति चेत् तदनुपपन्नम् इन्द्रियसन्निकृष्टस्य विषयस्योत्पाद्ये ज्ञाने स्वाकारसमर्पकतया समर्पितेन चाकारेण तस्यार्थस्यानुमेयतोपपत्तेः अतएव पर्यनुयोगपरिहारौ समर्थयिष्यातां "भिन्नकालं कथं बाह्यमिति चेत् बाह्यतां विदुः । हेतुत्वमेव च व्यक्तेर्ज्ञानाकारार्पणक्षममिति" । तथा च यथा पुष्पा भोजनमनुभूयते यथा च भाषया देशः, यथा वा सम्भ्रमेण क्लेशः, तथा ज्ञानाकारेण ज्ञेयमनुमेयम् । तदुक्तम् "अर्थेन घटयत्येनां न हि मुक्त्वार्थरूपताम् । तस्मात् प्रमेयाधिगतेः प्रमाणं मेयरूपतेति" । न हि चित्तिस्तत्त्वेव तद्वेदना युक्ता तस्याः सर्वत्राविशेषात् तान्तु बाह्यमाविशत् सरूपयित्वं घटवेदिति च । तथाच बाह्यार्थसद्भावे प्रयोगः ये यस्मिन् सत्यपि कादाचित्काः ते सर्वे तदतिरिक्तसापेक्षाः यथा अविद्यन्ति, अजिगमिषति मयि वचनमनप्रतिभावा विद्युज्जिगमिषुरूपालम्बनालम्बनसापेक्षाः तथा च विवादाध्यासिताः प्रवृत्तिप्रत्यया: सत्यर्थालम्बविज्ञाने कदाचिदेव नीलादावुल्लेखिना इति । तत्रालम्बविज्ञानं नामाहमास्पदं विज्ञानं नीलादावुल्लेखि च प्रवृत्तिविज्ञानम् । यथोक्तम् "तत् स्यादालम्बविज्ञानं यदभेदेहमास्पदम् । तत् स्यात् प्रवृत्तिविज्ञानं यन्नीलादिकसंल्लेखि"ति । तस्मादालम्बविज्ञानसन्तानातिरिक्तः कादाचित्कः प्रवृत्तिविज्ञानहेतुर्बाह्योऽर्थो याकाप्र एव न वासनापरिपाकप्रत्ययः कादाचित्कत्वात् कदाचिदुत्पाद इति वेदितव्यम् ।"

वेदान्तिमते । "बुद्धिवृत्तिचिदाभासौ द्वावेतौ व्याप्नुतो घटम् । तत्राज्ञानं धिया नश्येदाभासात्तु घटः स्फुरेत्" इत्युक्त्वा प्रत्यक्षस्थले इन्द्रियादिप्रणाल्या अन्तःकरणं विषयदेशगत्वा तदाकारेण परिणामरूपवृत्तौ सत्यां विषयगताज्ञाननाशे अन्तःकरणवृत्त्यवच्छिन्नचैतन्येन विषयस्फुरणरूपं फौरुषेयज्ञानं जायते । वृत्तिरूपज्ञानन्तु मनो धर्म इति भेदः । यथोक्तं वेदा० प० ।परिच्छे दे "यथा तडागोदकं छिद्रान्निर्गत्य कुल्याक्रमेण केदारान् प्रविश्य तद्देव चतुष्कोणाद्याकारं भवति तथा तैजसमन्तःकरणमपि चक्षुरादिद्वारा घटादिविषयाकारेण परिणमते । स एव परिणामो वृत्तिरित्युच्यते । अतुमित्यादिस्थले तु अन्तःकरणस्य न वह्न्यादिदेशगमनं वह्न्यादेश्चक्षुरादावसन्निकर्षात् तथा चायं घट इत्यादिप्रत्यक्षस्थले घटादेशदाकारवृत्तेश्च बहिरेकत्र देशे समवस्थानात् तदुभयावच्छिन्नं चैतन्यमेकमेव विषयाजकयोरन्तःकरणवृत्तिघटादिविषययोरेकदेशस्थितत्वेन भेदाजनकत्वात् ।"

प्रत्यक्षेऽन्तःकरणवृत्तेः फलभेदस्तत्रैव७परि-दर्शितो यथा

"सा चान्तःकरणवृत्तिरावरणाभिभवार्थैत्यैकं मतम् । तथाहि अविद्योपहितचैतन्यस्य जीवत्वपक्षे घटाद्यधिष्ठानचैतन्यस्य जीवरूपतया जीवस्य सर्वदा घटादिभानप्रसङ्गो घटाद्यवच्छिन्नचैतन्यावरकमज्ञानं मूलाविद्यापरतन्त्रमवस्थापदवाच्यमभ्युपगन्तव्यम् । एवं सति न सर्वदा घटादेर्भानप्रसङ्गः अनावृतचैतन्यसम्बन्धस्यैव भानप्रयोजकत्वात् । तस्य चावरणस्य सदातनत्वे कदाचिदपि

घटभानं न स्यादिति तद्वृत्ते वक्तव्ये तद्वृत्तजनकं न चैतन्यमात्रं तद्वासकस्य तदनिवर्तकत्वात् नापि वृत्त्युपहितचैतन्यं परोक्षस्थलेऽपि तद्विद्वत्त्वापत्तेरिति परोक्षव्यावृत्तवृत्तिविशेषस्य वृत्युपहितचैतन्यस्य वा आवरणभङ्गकत्वमित्यावरणाभिभवार्था वृत्तिरुच्यते। सम्बन्धार्था वृत्तिरित्यपरं मतम्। तत्राविद्योपाधिकोजीवोऽपरिच्छिन्नः स च घटादिप्रदेशे विद्यमानोऽपि घटाद्याकारापरोक्षवृत्तिविरहदशायां न घटादिकमवभासयति घटादिना सह सम्बन्धाभावात् तत्तदाकारवृत्तिदशायां तु भासयति तदा सम्बन्धसत्त्वात्। ननु अविद्योपाधिकस्य जीवस्यापरिच्छिन्नस्य स्वतएव सकलवस्तुसम्बद्धस्य वृत्तिविरहदशायां सम्बन्धाभावाभिधानमसङ्गतम्, असङ्गतत्व इष्टा सम्बन्धाभावाभिधाने च वृत्त्यनन्तरमपि सम्बन्धो न स्यादिति चेत् उच्यते न हि वृत्तिविरहदशायां जीवस्य घटादिना सह सम्बन्धसामान्यं निषेधामः किन्तर्हि घटादिभानप्रयोजकं सम्बन्धविशेषम्। स च सम्बन्धविशेषो विषयस्य जीवचैतन्यस्य च व्यङ्ग्यव्यञ्जकता लक्षणः कादाचित्कस्तत्तदाकारवृत्तिनिबन्धनः। तथा हि तैजसमन्तःकरणं स्वच्छद्रव्यत्वात् स्वतएव जीवचैतन्याभिव्यञ्जनसमर्थं, घटादिकन्तु न तथा अस्वच्छद्रव्यत्वात्। साकारवृत्तिसंयोगदशायान्तु वृत्त्यभिभूतजाड्यधर्मकतया वृत्त्युत्पादितचैतन्याभिव्यञ्जनयोग्यतान्वयतया च वृत्त्युदयानन्तरं चैतन्यमभिव्यनक्ति। तदुक्तं विवरणे "अन्तःकरणं हि स्वच्छिद्रेव स्वसंसर्गिणमपि घटादौ चैतन्याभिव्यक्तियोग्यतामापादयतीति"। दृष्ट्वास्वच्छद्रव्यस्यापि स्वच्छद्रव्यसम्बन्धदशायां प्रतिबिम्बव्याप्तित्वं यथा कुड्यादेर्जलादिसंयोगदशायां सूर्यादिप्रतिबिम्बव्याप्तिता। घटादेरभिव्यञ्जकत्वञ्च तत्प्रतिबिम्बव्याप्तित्वं चैतन्यस्याभिव्यक्तत्वञ्च तत्र प्रतिबिम्बितत्वम्। एवंविधाभिव्यञ्जकत्वसिद्ध्यर्थमेतदुक्तेरपरोक्षस्थले वहिर्निर्गमनाङ्गीकारः। परोक्षस्थले तु वह्न्यादेर्वृत्तिसंयोगाभावेन चैतन्यानभिव्यञ्जकतया नापरोक्षत्वम्।"

सांख्यादिमते अर्थाकारेण परिणतायां बुद्धिवृत्तौ चैतन्ये प्रतिबिम्बनात् विषयप्रकाशरूपं ज्ञानम्। तत्र पौरुषेयबोधे वृत्तिः करणं, वृत्तिरूपज्ञाने च इन्द्रियादिकरणमिति भेदः। यथोक्तं सा०प्र०सू० भाष्ययोः।

"इष्टोरेकतरस्य वाप्यसन्निकृष्टार्थपरिच्छित्तिः प्रमा तत्साधकतमं यत् तत् त्रिविधं प्रमाणम्।" सू० "असन्निकृष्टः प्रमातर्वनाकूतोऽनधिगत इति यावत्। एवंभूतस्यार्थस्य वस्तुनः परिच्छित्तिरवधारणं प्रमा सा च इयोर्बुद्धिवृत्त्योरुभयोरेव धर्मो भवतु। किं वैकतरमात्रस्योभयथैव तस्याः प्रमाया यत् साधकतमं फलायोगव्यवच्छिन्नं कारणं तत्प्रमाणं तच्च त्रिविधं पक्षमाणरूपेणेत्यर्थः। स्मृतिव्यावर्तनायानधिगतेति। भ्रमव्यावर्तनाय वक्ष्यति। संशयव्यावर्तनाय त्ववधारणमिति। अत्र यदि प्रमारूपं फलं पुरुषनिष्ठमात्रमुच्यते तदा बुद्धिवृत्तिरेव प्रमाणम्। यदि च बुद्धिनिष्ठमात्रमुच्यते तदा तत्तदिन्द्रियसन्निकर्षादिरेव प्रमाणम्। पुरुषस्तु प्रमासाक्ष्येव न प्रमातेति। यदि च पौरुषेयबोधो बुद्धिवृत्तिश्चोभयमपि प्रमोच्यते तदा तत्तदुभयमेव प्रमाभेदेन प्रमाणं भवति। चक्षुरादिषु तु प्रमाणव्यवहारः परम्परयैव सर्वत्रेति भावः। पातञ्जलभाष्ये तु व्यासदेवैः पुरुषनिष्ठो बोधः प्रमेत्युक्तः पुरुषार्थमेव करणानां प्रवृत्त्या फलस्य पुरुषनिष्ठतायाः एवौचित्यात्। अतोऽत्रापि स एव सख्यः सिद्धान्तः। न च पुरुषबोधस्वरूपस्य नित्यतया कथं फलत्वमिति वाच्यम् कैवल्यस्य नित्यत्वेऽप्यर्थोपरागस्यैव फलत्वादिति। अत्रेयं प्रक्रिया। इन्द्रियप्रणालिकयार्थसन्निकर्षेण जिघ्रामीत्यादिना यादृशी बुद्धेरर्थाकारा वृत्तिर्जायते तत्र चेन्द्रियसन्निकर्षजा प्रत्यक्षा वृत्तिरिन्द्रियविशिष्टबुद्ध्याश्रिता नयनादिगतपित्तादिदोषैः पित्ताद्याकारवृत्त्युदयादिति विशेषः। सा च वृत्तिरर्थोपरक्ता प्रतिबिम्बरूपेण पुरुषारूढा सती भासते पुरुषस्यापरिणामितया बुद्धिवत् स्वतोऽर्थाकारत्वासम्भवात्। अर्थाकारतायाः एव चार्थग्रहणत्वात् अन्यस्य दुर्वचत्वादिति। तदेतदुक्तं "कुसुमवच्च मणिः" जपास्फटिकयोरिव नोपरागः किन्त्वभिमान इति। योगसूत्रं च "वृत्तिसारूप्यमितरत्रेति"। स्मृतिरपि।"तस्यिंश्चिद्दर्पणे स्कारे समस्ता वस्तुदृष्टयः। इमास्ताः प्रतिबिम्बन्ति सरसीव तटद्रुमाः" इति। योगभाष्यञ्च "बुद्धेः प्रतिसंवेदी पुरुष" इति प्रतिध्वनिवत् प्रतिसंवेदः संवेदनप्रतिबिम्बसंसर्गाश्रय इत्यर्थः। एतेन पुरुषाणां कूटस्थविभुचिद्रूपत्वेऽपि न सर्वदा सर्वाभासनप्रसङ्गः असङ्गतस्य स्वतोऽर्थाकारत्वाभावात्। अर्थाकारतां विना च संयोगमात्रेणार्थग्रहणस्यातीन्द्रियादिष्वपि बुद्धावदृष्टत्वादिति। पुरुषे च सत्त्वबुद्धिवृत्तीनामेव प्रतिबिम्बार्पणसामर्थ्यमिति फलवत्त्वात् कल्प्यते। यथा रूपवतामेव जवादिषु प्रतिबिम्बनसामर्थ्यं नेतरस्येति।

रूपवत्त्वं च न सामान्यतः प्रतिविम्बप्रयोजकं शब्दस्यापि प्रतिध्वनिरूपप्रतिविम्बदर्शनात्। न च शब्दजन्यं शब्दान्तरमेव प्रतिध्वनिरिति वाच्यं स्फटिकनौहित्यादेरपि जपाकुसुमसन्निकर्षजन्यतापत्त्या प्रतिविम्बमिथ्यात्वसिद्धान्तक्षतेरिति। प्रतिविम्बस्तु बुद्धेरेव परिणामविशेषो विम्बाकारो जलादिगत इति मन्तव्यम्। केचित् तु दृक्तो प्रतिविम्बितं सदेव चैतन्यं दृक्तिं प्रकाशयति तथा दृक्तिगतप्रतिविम्ब एव दृक्तो चैतन्यविषयता न तु चैतन्ये दृक्तिप्रतिविम्बोऽस्तीत्याहुः। तदसत्, उपदर्शितशास्त्रविरोधेन केवलतर्कस्याप्रयोजकत्वात् विनिगमनाविरहेण दृक्तिचैतन्ययोरन्योन्यविषयताख्यसम्बन्धरूपतयान्योन्यस्मिन्नन्योन्यप्रतिविम्बसिद्धेश्च। बाह्यस्थलेऽर्थाकारतावा एव विषयतारूपत्वसिद्धाऽऽन्तरेऽपि तत्तदर्थाकारतावा एव विषयतात्वौचित्याच्चेति। ये तु तार्किका ज्ञानस्य विषयतां नेच्छन्ति तन्मते ज्ञानव्यक्तीनामनुगमकधर्माभावेन घटविषयकं पटविषयकं ज्ञानमित्यादानुगतव्यवहारानुपपत्तिः। केचित् तु तार्किका अनयैवानुपपत्त्या विषयतामतिरिक्तपदार्थमाहुः। तदप्यसत् अनुभूयमानानामर्थाकारतां विहाय विषयतान्तरकल्पने गौरवादिति। ननु तथापि स्वोपाधिदृक्तिरूपैव दृक्तिचैतन्ययोरन्योन्यविषयतास्तु स्वोपाधिदृक्तित्वेनैवानुगमादनाकाराख्यप्रतिविम्बहवेनेति चेन्न प्रतिविम्बं विना स्वत्वस्यापि दुर्वचत्वात्। स्वत्वं हि स्वभुक्तदृक्तिवासनावत्त्वम्। भोगश्च ज्ञानम्। तथा च विषयतालक्षणस्य विषयसामग्रीघटितत्वेनाक्षाक्षयः। तस्मादचैतन्यचैतन्ययोरन्योन्यविषयतारूपोऽन्योन्यस्मिन्नन्योन्यप्रतिविम्बः सिद्धः। अधिकन्तु योगवार्त्तिके द्रष्टव्यमिति दिक्। अत्रायं प्रमात्रादिविभागः। 'प्रमाता चेतनः शुद्धः प्रमाणं वृत्तिरेव नः। प्रमार्थाकारवृत्तीनां चेतने प्रतिविम्बनम्। प्रतिविम्बितवृत्तीनां विषयो मेय उच्यते। साक्षाद्दर्शनरूपं च साक्षित्वं वक्ष्यति स्वयम्। अतः स्यात् कारणाभावाद्वृत्तेः साक्ष्येव चेतनः। विषयादेः सर्वसाक्षित्वं गौणं सिद्धाद्यभावतः।'

"ज्ञानमस्ति समस्तस्य जन्तोर्विषयगोचरे" देवीभा०। "कर्मणे कर्मभिः पक्वे ततो ज्ञानं प्रजायते" वेदा०। २४परब्रह्मणि च "सत्यं ज्ञानमानन्दं ब्रह्म" श्रुतिः। २५विष्णौ "सर्वज्ञः ज्ञानसत्तमम्" विष्णुस०।

**ज्ञानकृत** त्रि० ज्ञानेन कृतम्। बुद्धिपूर्वकृते तत्र पापस्य बुद्धिपूर्वकृतत्वे विशेषः प्रा० त० उक्तो यथा "गोवधस्य बुद्धिपूर्वकत्वं तदा भवति यदि गां ज्ञात्वा एनां हन्मीतीच्छया हन्ति तदा कामनाहारैव ज्ञानस्य प्रवृत्त्यङ्गत्वात्" "इत्थञ्च गवयादिभक्षणेऽयं योगोवधस्तत्र गोवधस्य न ज्ञानकृतत्वम् गोत्वेनाज्ञानात् यदि गोत्वेन जानन्नन्योद्देशेन शिम्नाराचादिना गां हन्ति तदापि न ज्ञानकृतत्वं तद्विषयत्वेनेच्छारूपहाराभावात्"।

**ज्ञानगम्य** पु० ज्ञानेनैव गम्यः न कर्मणा न वा ज्ञानकर्मभ्याम्। ज्ञानमात्रगम्ये परमेश्वरे। "उत्तरो गोपतिर्गौप्ता ज्ञानगम्यः पुरातनः" विष्णुस०।

**ज्ञानचक्षुस्** पु० ज्ञानं ज्ञानसाधनं वेदादिशास्त्रं चक्षुरिवास्य। शास्त्रावबोधेन सर्वार्थप्रकाशयुक्ते कर्म०। विदुषि २शास्त्ररूपे नेत्रे च "सर्वं तु समवेक्ष्येदं निखिलं ज्ञानचक्षुषा" मनुः।

**ज्ञानदग्धदेह** पु० ज्ञानेनैव दग्धो देहोऽस्य। चतुर्थाश्रमिणि भिक्षौ तस्य ज्ञानेनैव जीवतोऽपि दग्धदेहत्वात् मृतस्य न दाहान्तरं कार्य्यं यथोक्तं शौनकेन "सर्वसङ्गनिवृत्तस्य ध्यानयोगरतस्य च। न तस्य दहनं कार्य्यं नैव पिण्डोदकक्रिया। निर्दग्धात् प्रणवेनैव विले शिक्षोः कलेवरम्। मोक्षणं खननञ्चापि सर्वं तेनैव कारयेत्"। [ त्रिका०।

**ज्ञानदर्पण** पु० ज्ञानं दर्पण इवास्य। पूर्वजिने भङ्गुघोषे

**ज्ञानद** त्रि० ज्ञानं ददाति दा-क। १गुरौ २उपदेष्टरि च ३सरस्वत्यां स्त्री।

**ज्ञानदातृ** त्रि० ज्ञानस्य दाता। उपदेष्टरि गुरौ "पितुर्दश गुणा माता गौरवेणेति निश्चितम्। मातुः शतगुणः पूज्यो ज्ञानदाता गुरुः प्रभो!" तन्त्र०। २ज्ञानस्य दायकमात्रे त्रि० स्त्रियां ङीप्।

**ज्ञाननिष्ठ** त्रि० ज्ञाने निष्ठाऽस्य। ज्ञानसाधनयुते तत्त्वविदुषि।

**ज्ञानपति** पु० ६त०। ज्ञानस्योपदेष्टृत्वात् स्वामिनि गुरौ २परमेश्वरे च। ततः अस्त्यर्थ० अपत्यादौ अण्। ज्ञानपत तदपत्ये पुंस्त्री स्त्रियां ङीप्।

**ज्ञानपावन** न० ज्ञानमिव पावनम्। तीर्थभेदे "ततो गच्छेत राजेन्द्र! ज्ञानपावनमुत्तमम्। अग्निष्टोममवाप्नोति मुनिलोकञ्च गच्छति" भा० व० ८३ अ०।

**ज्ञानमय** पु० ज्ञान+मयट्। १परमेश्वरे परब्रह्मणि २शिवे च।

**ज्ञानमुद्रा** स्त्री "तर्ज्जन्यङ्गुष्ठकौ संलग्नावयतो विन्यसेदृहृदि। वामहस्ताम्बुजं वामजानुमूर्द्धनि विन्यसेत्। ज्ञानमुद्रा भवेदेषा रामचन्द्रस्य प्रेयसी" तन्त्रसारोक्ते रामार्चनाङ्गे मुद्राभेदे।

**ज्ञानयज्ञ** पु० ज्ञानं यज्ञ इवास्य। तत्त्वज्ञे। "ब्रह्माग्नावपरे यज्ञं यज्ञेनैवोपजुह्वति" इति वाक्येन तत्त्वज्ञानस्य यज्ञरूपत्वोक्तम्। अस्यार्थः। अपरे कर्मयोगिनो विलक्षणा संन्यासिनः ब्रह्म तत्पदार्थः अग्निरिव ज्ञोभाधारत्वात् तस्मिन् यज्ञं प्रत्यगात्मानं त्वंपदार्थं यज्ञेनात्मनैव उपजुह्वति त्वंपदार्थाभेदेनैव तत्स्वरूपतया पश्यन्तीत्यर्थः। "अश्रद्दधानाः पुरुषा धर्मस्यास्य परन्तप। अप्राप्य मां निवर्तन्ते मृत्युसंसारवर्त्मनि॥" गीता। "श्रेयान् द्रव्यमयाद्यज्ञात् ज्ञानयज्ञः परन्तप। सर्वं कर्माखिलं पार्थ ज्ञाने परिसमाप्यते॥" गीता।

**ज्ञानयोग** पु० युज्यते ब्रह्मणाऽनेन युज-करणे घञ् ज्ञानमेव योगः। ब्रह्मप्राप्तिसाधने ज्ञानार्थनिष्ठाभेदे। "लोकेऽस्मिन् द्विविधा निष्ठा पुरा प्रोक्ता मयाऽनघ!। ज्ञानयोगेन सांख्यानां कर्मयोगेन योगिनाम्" गीता।

**ज्ञानलक्षणा** स्त्री ज्ञानं ज्ञानभेदो लक्षणं स्वरूपं यस्याः। न्यायमते अलौकिकप्रत्यक्षसाधने सन्निकर्षभेदे उपनयशब्दे १२१५ पृ० विवृतिः। मथुरानाथेन तु अन्यथैव सामान्यलक्षणाज्ञानलक्षणयोर्भेदो दर्शितः यथा "न च सामान्यप्रकारकज्ञानस्यैव सामान्यलक्षणात्वे ज्ञानलक्षणासामान्यलक्षणयोः कार्यकारणभावे को भेदः इति वाच्यं कारणतावच्छेदकभेदेन कार्यतावच्छेदकभेदेन च भेदात्। सामान्यलक्षणायाः कार्यकारणभावस्तु तत्तत्सम्बन्धावच्छिन्नघटत्वादिप्रकारिताशालित्वेन, स्वरूपतस्तत्सम्बन्धावच्छिन्नघटत्वादिप्रकारिताकतत्तत्सम्बन्धावच्छिन्नघटत्वाद्याश्रयतासालिसुख्यविशेष्यकप्रत्यक्षत्वेन, यावच्चस्य कार्यतावच्छेदकाघटकत्वेऽपि विनिगमनाविरहेण सकलघटभानम्। समवायसम्बन्धेन घटत्वप्रकारकज्ञानानन्तरं कालिकादिसम्बन्धेन घटत्वादिप्रकारकनिखिलघटविषयकप्रत्यक्षस्य समवायसम्बन्धेन घटत्वप्रकारेण घटत्ववतः कालादेः प्रत्यक्षस्य च वारणाय सम्बन्धान्तर्भावः। घटत्वादिप्रकारकज्ञानं विनापि द्रव्यत्वादिसामान्यलक्षणया जायमाने द्रव्यत्वादिप्रकारकघटादिसुख्यविशेष्यकप्रत्यक्षे व्यभिचारवारणाय कार्यतावच्छेदके घटत्वादिप्रकारितेति। प्रकारित्वञ्चालौकिकं ग्राह्यं तेन घटत्वादिप्रकारकज्ञानं विनापि द्रव्यत्वादिविशिष्टबुद्ध्यात्मकघटत्वादिनिर्विकल्पकोत्तरं द्रव्यत्व सामान्यलक्षणया जायमाने यावद्घटविशेष्यकप्रत्यक्षेऽलौकिकसन्निकर्षमर्यादया घटत्वप्रकारके न व्यभिचारः। न च तथापि कालिकादिसम्बन्धेन स्वरूपतो घटत्वादिप्रकारकबुद्ध्यात्मकगवादिविशेष्यकसमवायसंसर्गकद्रव्यत्वप्रकारकस्मरणोत्तरं द्रव्यत्वसामान्यलक्षणया जायमाने यावद्घटसुख्यविशेष्यकप्रत्यक्षे उपनयमर्यादया समवायसम्बन्धेन स्वरूपतो घटत्वप्रकारके व्यभिचार इति वाच्यम्। यथोक्तकार्यकारणभावस्यैव बाधकत्वेन तत्र समवायसम्बन्धेन घटत्वप्रकारत्वात्। घटत्वप्रकारकज्ञानं विनाऽपि जातित्वरूपेण गोत्वादिजात्यन्तरप्रकारकज्ञानाद् जायमाने जातिस्वरूपेण घटत्वादिनिखिलजातिप्रकारकनिखिलजात्याश्रयप्रत्यक्षे व्यभिचारवारणाय स्वरूपत इति घटत्वादिप्रकारितावैशिष्ट्यम्, यथोक्तकार्यकारणभावस्यैव बाधकत्वेन तत्र कथञ्चिदपि स्वरूपतो घटत्वादेरप्रकारत्वात्। कालिकसम्बन्धेन स्वरूपतो घटत्वादिप्रकारकस्मरणादितो जायमाने विशेष्ये विशेषणमिति रीत्या समवायसम्बन्धेन घटादिप्रकारकघटवदित्याद्युपनीतभाने व्यभिचारवारणाय सुख्यविशेष्यत्वप्रवेशः। उपनीतभाने च घटो न सुख्यविशेष्यः बहिरिन्द्रियस्थले उपनीतं विशेषणतया भासते इति नियमात्। सुख्यविशेष्यत्वमप्यलौकिकं ग्राह्यं तेन कालिकसम्बन्धेन स्वरूपतो घटत्वादिस्मरणालौकिकसन्निकर्षाभ्यां जायमाने लौकिकालौकिकोभयघटत्वप्रकारिताशालिघटः इति घटसुख्यविशेष्यकलौकिकप्रत्यक्षे न व्यभिचारः। अथ तथापि कालिकसम्बन्धेन स्वरूपतो घटत्वप्रकारकस्मरणाज्जायमाने समवायसम्बन्धेन घटत्वप्रकारकसुख्यविशेष्यकभानसोपनीतभाने व्यभिचारो मानसोपनीतं विशेषणतयैव भासत इति नियमाभावात् तत्र कालिकसम्बन्धेन घटत्वप्रकारेण प्रत्यक्षं न तु समवायसम्बन्धेन घटत्वप्रकारकमित्युक्तावपि घटवदिति घटादिस्मरणोत्तरं जायमाने परम्परासम्बन्धेन घटत्वप्रकारकभानसोपनीतभाने व्यभिचारो दुर्वारः तदनभ्युपगमे तादृशस्मरणोत्तरं निखिलघटाश्रयसाक्षात्कारानुपपत्तेः द्रव्यत्वप्रकारकज्ञानस्याऽप्रत्यासत्तित्वात् इति चेन्न लाघवात् यथोक्तरूपेण कार्यकारणभावकल्पने यथोक्तभानसे घटादिर्न सुख्यविशेष्यः किन्तु चक्रव्यूहवत् घटत्वपुटितो भवन्नेव भासत इत्येव कल्प्यते यथोक्तकार्यकारणभावस्यैव बाधकत्वात् तत्तदुपनीतभानान्यत्वप्रवेशे गौरवात् सर्वत्रैव मानसोपनीतभाने उपनीतं अवश्यं सुख्यविशेष्यतया भासते इति नियमाभावात्। अस्ति बाधक एव मानसोपनीतस्य प्रकारत्वविशेष्यत्वलक्षणद्विविधविषयतास्वीकारात्। एवं सुखदो दण्डपुरुषोभयविषयकसमूहालम्बनस्मरणानन्तरं जा-

वमाने दण्डप्रकारकदण्डाश्रयप्रत्यक्षेऽपि पुरुषो न दण्डांशे सुख्यविशेष्यतया भासते अपि तु चक्रव्यूढवत् दण्डपुटितः पुरुषः पुरुषपुटितश्च दण्डो भासते इति कल्प्यते। न च तथापि योगजधर्माधीनविशिष्टज्ञानं प्रति विशेषणज्ञानस्य हेतुत्वनये सामान्यज्ञानं विनाऽपि जायमाने सामान्यप्रकारकसामान्याश्रयसुख्यविशेष्यकप्रत्यक्षे व्यभिचारः। योगजविशिष्टज्ञानं प्रति विशेषणज्ञानस्य हेतुत्वनयेऽपि योगजधर्मेण सामान्यतदाश्रये उभयविषयकनिर्विकल्पकं जनयित्वा जनिते सामान्यप्रकारकसामान्याश्रयसुख्यविशेष्यकप्रत्यक्षे व्यभिचार इति वाच्यं योगजधर्मजन्यतावच्छेदकतज्जात्यवच्छिन्नत्वेन प्रत्यक्षविशेषणात्। तादृशयोगजज्ञाने सामान्याश्रयसुख्यविशेष्यतया भाने मानाभावाच्च। अपि च चक्रव्यूढवत् स्वप्रकारीभूतसामान्ये प्रकारीभूयैव भासते लाघवात्तथैव कल्पनात्। अत एव कालिकादिसम्बन्धेन स्वरूपतो घटत्वस्मरणानन्तरं विशेष्ये विशेषणमिति रीत्या कालिकादिसम्बन्धेनैव घटत्वप्रकारकं घटवदित्याकारकोपनीतभानं जायते न तु समवायसम्बन्धेन घटत्वप्रकारकदण्युल्लाघेव व्यभिचारवारणसम्भवात् किं जात्यादिसामान्यलक्षणायाः कार्यतावच्छेदके स्वरूपतः प्रकारतायटितसुख्यविशेष्यत्वप्रवेशेन। न च तथाप्यत्र घटत्वमिति घटत्वविशेष्यकस्मरणोत्तरं जायमाने विशेष्ये विशेषणमिति रीत्या घटवदित्याद्युपनीतभाने व्यभिचारवारणाय तदवश्यं निवेशनीयमिति वाच्यं स्वरूपतो घटत्वविशिष्टबुद्धिं प्रति स्वरूपतो विशेषणीभूतघटत्वविषयकज्ञानस्य हेतुतया तादृशस्मरणोत्तरं तादृशोपनीतभानासम्भवात् घटत्वत्वघटकतयैव स्वरूपतो घटत्वज्ञानाभ्युपगमेन व्यभिचारस्यापि विरहादित्यस्मत्कृतपूर्वपक्षोऽपि निरस्तः। घटवदिति स्मरणोत्तरं जायमाने परम्परासम्बन्धेन घटत्वप्रकारकमानसोपनीतभाने यथोक्तरीत्या योगजधर्मजन्ये घटत्वप्रकारकघटविशेष्यकप्रत्यक्षे च व्यभिचारवारणाय तत्प्रवेशस्यावश्यकत्वात्। एतेनाभावत्वाद्यखण्डोपाधिरूपसामान्यलक्षणाया अपि कार्यकारणभावो व्याख्यातः जात्यखण्डोपाध्यतिरिक्तपदार्थज्ञानञ्च न प्रत्यासत्तिरिति सामान्यपदार्थनिर्वचनावसर एव प्रतिपादितं नन्वेवंरूपेण कार्यकारणभावे जातित्वरूपेणैकजातिमात्रप्रकारकज्ञानानन्तरं जातित्वावच्छिन्नजातिप्रकारकनिश्चितजात्वा एव प्रत्यक्षं कथं स्याज्जात्यन्तराश्रयस्य ज्ञानप्रकारीभूतजात्यक्तेराश्रयत्वाभावात् स्वरूपतो घटत्वादिप्रकारकत्वस्य कार्यतावच्छेदकत्वाच्चेति चेन्न जातित्वरूपेण जातिप्रकारकलौकिकप्रत्यक्षदशायामनतो निर्धर्मितावच्छेदकस्यापि परम्परासम्बन्धेन जातित्वघटकनित्यत्वादिघटकीभूताभावत्वाद्यखण्डोपाधिप्रकारकज्ञानस्यावश्यकत्वात् तत एव सामान्यज्ञानात् जातित्वावच्छिन्नजातिमत्त्वरूपेण निश्चितजात्याश्रयस्य साक्षात्कारः जात्यन्तराश्रयस्यापि परम्परासम्बन्धेन तदाश्रयत्वात्। यत्र जातित्वरूपेण यत्किञ्चित् जातिप्रकारकघटादिधीस्तत्रापि मध्ये परम्परासम्बन्धेन ध्वंसत्वादिप्रकारकमानसोपनीतभानानन्तरमेव जातिमतः सर्वस्य प्रत्यक्षाभ्युपगमात् क्षणविलम्बे क्षतिविरहात्। न च परम्परासम्बन्धेन ध्वंसत्वादिज्ञानस्यैव तत्प्रत्यासत्तित्वे ध्वंसत्वादित्वेव तज्ज्ञानं स्यात् न तु जातिमदिति सामान्यप्रकारज्ञानस्य सुख्यविशेष्ये सामान्यप्रकारकज्ञानकत्वनियमादिति वाच्यं विशेषणज्ञानार्थं जातित्वघटकसामान्यलक्षणायाः मध्ये सकलजातिविशेष्यकज्ञानस्यावश्यकत्वात् ज्ञानलक्षणयैव जातिमदिति फलस्यापि सम्भवात् द्विविधविषयत्वस्यैवेष्टत्वात्। एवं तद्व्यक्तित्वादिरूपेण घटत्वादिज्ञानानन्तरं जायमाने तद्व्यक्तित्वरूपेण घटत्वादिप्रकारकतदाश्रयप्रत्यक्षेऽपि परम्परासम्बन्धेन तद्व्यक्तित्वप्रकारकज्ञानमेव प्रत्यासत्तिरतो घटत्वादिसामान्यलक्षणायाः कार्यदिशि तदसंग्रहो न दोषाय इति भट्टाचार्यानुयायिनः"।

"ज्ञानलक्षणायाः कारणतावच्छेदकन्तु सामान्यतः संसर्गावच्छिन्नघटत्वादिविषयताशालिज्ञानत्वं घटत्वादिप्रकारकज्ञानादिव घटत्वादिविषयकज्ञानादपि घटत्वादिप्रकारकोपनीतभानोदयात्। विनश्यदवस्थलौकिकसन्निकर्षजन्यघटघटत्वादिनिर्विकल्पकानन्तरमपि घटत्वादिप्रकारकप्रत्यक्षापत्तिवारणाय संसर्गावच्छिन्नेति विषयतताविशेषणम्। केचित्तु ज्ञानलक्षणायाः स्वप्रकारकघटघटत्वादिज्ञानत्वं कारणतावच्छेदकं न चैवं विनश्यदवस्थलौकिकसन्निकर्षजन्यद्रव्यत्वादिविशिष्टबुद्ध्यात्मकघटत्वादिनिर्विकल्पकादपि प्रत्यक्षापत्तिरितिवाच्यम् इष्टत्वात् सर्वांशे निर्विकल्पकस्यैव प्रत्यासत्तित्वानभ्युपगमादित्याहुस्तदसत् तथापि सर्वांशे निर्विकल्पकादपि इष्टापत्तेः स्वकरतया कारणतावच्छेदके स्वप्रकारकत्वस्य उपादानस्यावैयर्थ्यात्। सविशेष्यकत्वसंसर्गकविषयतताशालित्वमादाय विनिगमनाविरहेण कार्यकारणभावस्यापत्तेः। ज्ञानलक्षणायाः कार्यतावच्छेद-

कन्तु घटत्वादिप्रकारकप्रत्यक्षत्वं घटत्वादिज्ञानं विनापि जायमाने सामान्यलक्षणाजन्यघटादिसख्यविशेष्यकप्रत्यक्षेऽभिचारवारणाय विषयत्वमपहाय प्रकारितानिवेशः। प्रकारिता चालौकिकी याह्या तेन निर्विकल्पकजन्यप्राथमिकतद्विशिष्टलौकिकप्रत्यक्षे न व्यभिचारः। न चैवं ज्ञानलक्षणासन्निकर्षौ लौकिकसन्निकर्षहयमेव यत्र वर्त्तते तत्र कीदृक् ज्ञानं स्यादिति वाच्यं तत्र लौकिकालौकिकोभयतत्प्रकारिताकज्ञानस्यैव उत्पत्तेः विषयतायाः साङ्कर्य्यादोषत्वात्। न च तत्प्रकारकज्ञानं विनापि जायमाने योगजधर्मजततत्प्रकारकप्रत्यक्षे व्यभिचार इति वाच्यं योगजधर्मजन्यतदवच्छेदकतज्ज्ञात्यवच्छिन्नत्वेन प्रत्यक्षविशेषणात् तत्प्रकारकज्ञानं विना योगजधर्मोऽपि तत्प्रकारकप्रत्यक्षजननात् योगजधर्मस्य निर्विकल्पकाजनकत्वात्। न च चक्षुःसंयोगजन्यनिर्विकल्पकसहकारेण योगजधर्मजनिते तत्प्रकारकप्रत्यक्षे व्यभिचार इति वाच्यम् तत्र निर्विकल्पकजनकीभूतचक्षुःसंयोगादिसत्त्वे तत्प्रकारकलौकिकप्रत्यक्षस्यैव उत्पत्तेः अलौकिकप्रत्यक्षजनकयोगजधर्मसत्त्वेऽपि यथोक्तकार्य्यकारणभावस्यैव बाधकत्वेनालौकिकप्रत्यक्षत्वात्तत्पत्तेः। न चैवं निर्विकल्पकोत्पत्तिकाले चक्षुःसंयोगादिनाशे तन्निर्विकल्पकसहकारेण योगजधर्मात्तत्प्रकारकसाक्षात्कारो न स्यादिति वाच्यम् इष्टापत्तेः। न चैवं तत्प्रकारकप्रत्यक्ष एव तज्ज्ञानस्य हेतुतया इदं रजतमिति शुक्तिविशेष्यकभानसभ्रमे शुक्तिज्ञानस्याहेतुतया शुक्तिज्ञानं विनापि तादृशभ्रमापत्तिरिति वाच्यं इदं रजतमिति शुक्तिविशेष्यकभानसभ्रमस्यापि शुक्तिज्ञानात्मकशुक्तिविशिष्टधीकारणसत्त्वेन यत्र कुत्रचिद्वस्तुनि शुक्तिप्रकारकत्वनियमात्। शुक्तिज्ञानविरहस्थले शुक्तिप्रकारकज्ञानसामान्यकारणविरहादेव तदभावात् विशेषसामग्रीसहितायां एव सामान्यसामग्र्याः फलोपधायकत्वात्। न चेदं रजतमिति शुक्तिविशेष्यकभानसभ्रमस्य न शुक्तिप्रकारकत्वनियमः शुक्तिप्रकारकज्ञानप्रतिबन्धकदोषसत्त्वे तत्र तस्याः योगाप्रकारत्वादिति वाच्यं शुक्तिसख्यविशेष्यकतादृशभानसभ्रमस्थले तादृशदोषे मानाभावात् लाघवाद्यथोक्तरूपेण ज्ञानलक्षणायाः कार्य्यकारणभावकल्पने फलबलेन तथैव कल्पनात्। न चैवं मानसोपनीतभाने उपनीतस्य सख्यविशेषत्वतया भाने मानाभावः। सख्यविशेषत्वस्य कार्य्यतानवच्छेदकतया सामग्र्यासत्त्वात् इति वाच्यं सख्यविशेषत्वस्य कारणतानियम्यतया बाधकासत्त्व एव सख्यविशेषत्वतया भानसम्भवात्, न चैवं मानसोपनीतभानवत् बहिरिन्द्रियजोपनीतभानेऽप्युपनीतस्य प्रकारत्वसख्यविशेषत्वलक्षणद्विविधविषयतापत्तिरिति वाच्यं सामान्यलक्षणालौकिकसन्निकर्षजन्यातिरिक्तस्य बहिरिन्द्रियजतत्तत्सख्याविशेष्यकप्रत्यक्षस्यानुभवसिद्धतया अलीकतया यावद्विशेषसामग्रीबाधादेव तद्बाधात् मानसस्य तत्तदतिरिक्तस्यापि इदं रजतमित्यादावुपनीतविशेष्यकभ्रमस्य उपनीतशुक्त्यादिसख्याविशेष्यकत्वमनुभवसिद्धमतोनालीकत्वं न च तथापि घटघटत्वादिनिर्विकल्पकोत्तरं जायमानेऽयं घट इत्यादिविशिष्टप्रत्यक्षे घटत्वादेर्सख्याविशेषत्वापत्तिः लौकिकसन्निकर्षरूपविशेषसामग्र्यासत्त्वादिति वाच्यम् तथाप्यसतिबाधके घटार्द्रांशे घटत्वादेः प्रकारत्वबन्सख्याविशेषत्वस्यापीष्टत्वादिति। केचित्तु संसर्गावच्छिन्नतद्विषयताशालिज्ञानत्वेन कारणता योगजधर्म्माजन्यसामान्यलक्षणाप्रत्यासत्त्यजन्यतद्विषयकप्रत्यक्षत्वेन कार्य्यता तद्विषयता। चालौकिकी याह्या तेन तल्लौकिकप्रत्यक्षे न व्यभिचारः॥ एवञ्च तद्विषयकप्रत्यक्षत्वमात्रस्य कार्य्यतावच्छेदकतया इदं रजतमिति शुक्तिसख्याविशेष्यकभानसभ्रमोऽपि न शुक्तिज्ञानं विना बहिरिन्द्रियजोपनीतभाने उपनीतस्य सख्याविशेषत्वनिरासश्चोक्तरीत्येत्याहुरिति संक्षेपः।"

मीमांसकवेदान्तिभिस्तु ऋणाः प्रत्यासत्तित्वं नाङ्गीकृतम्। यथोक्तं वेदा०प०। "न च ज्ञानं प्रत्यासत्तिः ज्ञानस्य प्रत्यासत्तित्वे ह्यनुमानमालोच्छेदप्रसङ्गः" इति। ऋणायमाशयः वह्निव्याप्यधूमवान् पर्वत इति परामर्शात्मकज्ञानस्य ह्यनुमितिहेतुतायाः सर्वैः स्वीकारात् तज्ज्ञानस्य च वह्निविषयकत्वेन तदुत्तरं जायमानं वह्निमान् पर्वत इति ज्ञानमलौकिकप्रत्यक्षमेव स्यान्नानुमितिः न च समानविषयस्थले ह्यनुमितिसामग्र्याः अलौकिकप्रत्यक्षसामग्र्याः प्रतिबन्धकत्वेन नालौकिकप्रत्यक्षमपि तु ह्यनुमितिर्भविष्यतीति चेन्न तादृशप्रतिबध्यप्रतिबन्धकभावकल्पनस्यापामाणिकत्वात्। अतएव इदं रजतमिति ज्ञानमनिर्वचनीयरजतविषयकं न देशान्तरस्थानुभूतरजतविषयकमुपनयमर्य्यादया ज्ञानमिति स्थितम्।

**ज्ञानवापी** स्त्री काशीस्थे वापीरूपे तीर्थभेदे तदाविर्भावादि कथा काशी० १२ अ०।

"घटोद्भव !, मङ्कामाद्य ! ह्यनु पापापनोदिनीम्।

ज्ञानवाप्याः सप्तमोत्पत्तिं कथ्यमानां मयाऽधुना ।
अनादिसिद्धे संसारे पुरा देवयुगे शुने ! । प्राप्तः कृत-
विदीशानक्षरन् खैरमितस्ततः । न वर्षन्ति यदाऽभ्राणि
न प्रावर्त्तन्त निम्नगाः । जलाभिलाषो न यदा ज्ञान-
पानादिकर्म्मणि । क्षीरक्षादुदयोरेव यदासीज्जल-
दर्शनम् । पृथिव्यां नरसञ्चारे वर्त्तमाने क्वचित् क्वचित् ।
निर्वाणकमलक्षेत्रं श्रीमदानन्दकाननम् । महाश्मशानं
सर्वेषां बीजानां परमूषरम् । महाशयनसुप्तानां जन्तूनां
प्रतिबोधकम् । संसारसागरावर्त्तपतज्जन्तुतरण्डकम् ।
यातायातातिसंक्षिन्नजन्तुविश्राममण्डपम् । अनेक
जन्मगुम्फितकर्मसूत्रच्छिदुरम् । सच्चिदानन्दनिलयं
परं ब्रह्म रसायनम् । सुखसन्तानजनकं मोक्षसाधन-
सिद्धिदम् । प्रविश्य क्षेत्रमेतत् स ईशानो जटिलस्तदा ।
लसच्छिन्नमूलविमलरश्मिजालसमाकुलः । आलुलोके
महालिङ्गं वैकुण्ठपरमेष्ठिनोः । महाक्रमक्रमिकायां
प्रादुरास यदादितः । ज्योतिर्मयीभिर्मालाभिः परितः
परिवेष्टितम् । इन्द्रेन्द्रारकणीनां गणानाञ्च निर-
न्तरम् । सिद्धानां योगिनां सोमैरर्च्चमानं निरन्तरम् ।
गीयमानञ्च गन्धर्वैः स्तूयमानञ्च चारणैः । अङ्कुरारै-
रप्सरोभिः सेव्यमानमनेकधा । नीराज्यमानं सततं
नागीभिर्मणिदीपकैः । विद्याधरीकिन्नरीभिश्चिकालं
कृतमण्डनम् । अमरीचमरीराजिवीज्यमानमितस्ततः । तस्येशानस्य तल्लिङ्गं दृष्ट्वेच्छा क्षुभवत्तदा ।
स्नपयामि महालिङ्गं कलसैः शीतलैर्जलैः । च
स्नान च विधूलेन दक्षिणांशोपकण्ठतः । कृत्वं
प्रचण्डवेगेन रुद्रो रुद्रवपुर्धरः । पृथिव्यावरणान्यांसि
निष्क्रान्तानि तदा क्षणे ! । भूप्रमाणाद्दशगुणैर्वेरियं वसुधा
हता । तैर्जलैः स्नपयामासुर्दुग्धदैरन्यदेहिभिः ।
क्षीरैर्जाम्बवितुदैर्जलपूर्णैर्महारिभिः । सम्भोभि-
रिवाम्भोदैरनल्पैर्व्योमपर्व्वतैः । ज्योत्स्नावदुज्ज्वल-
च्छायैः पावनैः शम्भुनामवत् । पीयूषवत् स्वादुतरैः
सुखस्पर्शैर्गवाङ्गवत् । निष्पापधीरकृत्रीरैस्तरलैः पापि-
धर्म्मवत् । विजिताब्जमहागन्धैः पाटलामोद-
मोदिभिः । अदृष्टपूर्वलोकानां मनोनयनहारिभिः ।
अज्ञानतापसप्तप्राणिप्राणैकरक्षिभिः । पञ्चाब्दतानां
कलसैः स्नपनातिफलप्रदैः । अद्रोपसर्गिक्षुद्दयक्षिङ्ग-
क्षितवेतुभिः । अज्ञानतिमिराक्षीभैर्ज्ञानदानैदिनै-
नकैः । विश्वभर्तुरमास्पर्शसुखातिसुखकारिभिः ।
महाबभ्रुसुसञ्जातमहाशुक्तिविधाविभिः । सहस्रधारै
कलसैः स ईशानो घटोद्भव ! । सहस्रशतः स्नपया
मास संहृष्टमानसः । ततः प्रसन्नो भगवान् विश्वात्मा
विश्वलोचनः । तमुवाच तदेशानं रुद्रं रुद्रवपुर्धरम् ।
तव प्रसन्नोऽस्मीशान ! कर्म्मणानेन सुव्रत ! । गुरुस्थानन्य-
पूर्वेण ममातिप्रीतिकारिणा । ततस्त्वं जटिलेशान वरं
ब्रूहि तपोधन ! । यदेयं न तवाऽस्त्यत्र महोदयपरा-
यण । ईशान उवाच । यदि प्रसन्नो देवेश ! वरयोग्योऽस्म्यहं यदि । तदेतदतुलं तीर्थं तव नाम्नास्तु शङ्कर ।
श्रीविश्वेश्वर उवाच । त्रैलोक्यां यानि तीर्थानि भू-
र्भुवःस्वःस्थितान्यपि । तेभ्योऽखिलेभ्यस्तीर्थेभ्यः शिव-
तीर्थमिदं परम् । शिवो ज्ञानमितिब्रूयुः शिवशब्दार्थ-
चिन्तकाः । तच्च ज्ञानं द्रवीभूतमिह मे महिमोदयात् ।
यतो ज्ञानोदनामैतत्तीर्थन्त्रैलोक्यविश्रुतम् । अस्य
दर्शनमात्रेण सर्वपापैः प्रमुच्यते । ज्ञानोदतीर्थसंस्पर्शा-
दश्वमेधफलं लभेत् । स्पर्शनाचमनाभ्याञ्च राजसूयाश्व-
मेधयोः । फलमुक्तीर्थे नरः स्नात्वा सन्तर्प्य च पितृ-
महान् । यत् फलं समवाप्नोति तदत्र श्राद्धकर्म्मणा ।
गुरुश्रवणसिताष्टम्यां व्यतीपातो यदा भवेत् । तदात्र
श्राद्धकरणाद्दयाकोटिफलं भवेत् । यत् फलं समवाप्नोति
पितॄन् सन्तर्प्य पुष्करे । तत्फलं कोटिगुणितं ज्ञानतीर्थे
तिलोदकैः । सन्निहत्यां कुरुक्षेत्रे तमोपक्षे विवस्वति ।
यत्फलं पिण्डदानेन तज्ज्ञानोदे दिने दिने । पिण्ड-
निर्वपनं येषां ज्ञानतीर्थे सुतैः कृतम् । मोदन्ते शिव-
लोके ते यावदाकल्पसंप्लवम् । अष्टम्याञ्च चतुर्दश्यामुप-
वासी नरोत्तमः । प्रातः स्नात्वाऽथ पीत्वाम्भस्तल्लिङ्ग-
मयो भवेत् । एकादश्यामुपोषित्वा प्राशेद् यत्नुलुक-
त्वयम् । हृदये तस्य जायन्ते तीव्रे लिङ्गान्यसंशयम् ।
ईशानतीर्थे यः स्नायादहिर्मेषात् सोमवासरे । सन्तर्प्य
देवर्षिपितॄन् दत्त्वा दानं स्वशक्तितः । ततः समभ्यर्च्य
श्रीलिङ्गं महासम्भारविस्तरैः । तत्रापि दत्त्वा नाना-
धनं कृतकृत्यो भवेन्नरः । उपास्य सन्ध्यां ज्ञानोदे यत्
पापं कालोपजम् । क्षणेन तदपाकृत्य ज्ञानवान्
जायते नरः । शिवतीर्थमिदं प्रोक्तं ज्ञानतीर्थमिदं
शुभम् । तारकाख्यमिदं तीर्थं मोक्षतीर्थमिदं स्मृतम् ।
स्मरणादपि पापौघो ज्ञानोदे क्षीयते ध्रुवम् । दर्शनात्
स्पर्शनात् स्नानात् पानाद्वर्षादिसम्भवः । डाकिनी-
शाकिनीभूतप्रेतवेतालराक्षसाः । महाकुष्माण्डखेटाद्याः

कालस्थौ गणपहाः। ज्वरापस्मारविस्फोटहतीयक-चतुर्थकाः। सर्वे प्रशममायान्ति शिवतीर्थजलोक्षणात्। ज्ञानोदतीर्थपानीयैर्लिङ्गं यः स्नपयेत् सुधीः। सर्वतीर्थोदकैस्तेन ध्रुवं संस्नपितं भवेत्। ज्ञानरूपोऽहमेवात्र ध्रुवमूर्त्तिं विधाय च। जाग्रद्विध्वंसनं कुर्यां-कुर्यां ज्ञानोपदेशनम्" "इति दत्त्वा वरान् शम्भुस्तत्रैवान्तरधीयत। ऋतध्वजमिवात्मानं सोऽध्यगंस्त त्रिशूलभृत्। दैशानो जटिलो रुद्रस्तत्पीत्वा परमोदकम्। अवाप्तवान् परं ज्ञानं येन निर्द्वैतमाप्नुवान्"।

**ज्ञानसाधन** न॰ ६त॰। १इन्द्रिये २तत्त्वज्ञानसाधने श्रवणमननिदिध्यासनादौ च।

**ज्ञानापोह** पु॰ ६त॰। ज्ञानजसंस्कारनाशजे विस्मरणे।

**ज्ञानाभ्यास** पु॰ ६त॰। १ज्ञानसाधनश्रवणाद्यावृत्तौ "तच्चिन्तनं तत्कथनमन्योन्यं तत्प्रबोधनम्। एतदेकपरत्वञ्च ज्ञानाभ्यासं विदुर्बुधाः" इत्युक्तलक्षणे २मननादौ च। बोधाभ्यासादयोऽप्यत्र। "सर्गादावेव नोत्पन्नं दृश्यं नास्त्येव तत्सदा। इदं जगदहञ्चेति बोधाभ्यासं विदुः परम्" वेदान्तशा॰।

**ज्ञानासन** न॰ "अधान्यदासनं कृत्वा सर्वव्याधिविनाशनम्। योगाभ्यासी भवेत् क्षिप्रं ज्ञानासनप्रसादतः। दक्षपादोरुमूले तु वामपादतलं तथा। दक्षपादतलं दक्षपार्श्वे संयोज्य धारयेत्। एतज्ज्ञानासनं नाम ज्ञानविद्याप्रकाशकम्। निरन्तरं यः करोति तस्य ग्रन्थिः क्षया भवेत्" इति रुद्रयामलोक्ते कासनभेदे।

**ज्ञानिन्** त्रि॰ ज्ञानमस्त्यस्य इनि। १ज्ञानयुक्ते ब्रह्मसाक्षात्कारयुक्ते "चतुर्विधा भजन्ते मां-आर्त्तो जिज्ञासुरर्थार्थी ज्ञानी च भरतर्षभ!"। "ज्ञानिनामपि सर्वेषां मद्भक्तेनान्तरात्मना" गीता २बोधयुक्तमात्रे त्रि॰ ज्ञानिनो मनुजाः सन्तु किन्तु ते न हि केवलम्। यतो हि ज्ञानिनः सर्वे पशुपक्षिसुरादयः" देवीभा॰। ज्ञान+अस्त्यर्थे मतुप् मस्य वः। ज्ञानवदर्थमात्रे "बहूनां जन्मनामन्ते ज्ञानवान् मां प्रपद्यते" गीता। उभयत्र स्त्रियां ङीप्।

**ज्ञानेन्द्रिय** न॰ ज्ञायतेऽनेन ज्ञा-करणे ल्युट् ज्ञान साधनमिन्द्रियम् कर्म॰। १ज्ञानसाधने इन्द्रिये श्रोत्रादौ "ज्ञानेन्द्रियाणि श्रोत्रत्वक्चक्षुर्जिह्वा च नासिका। ज्ञानेन्द्रियार्थाः विषयाः" शा॰ त्रि॰। इन्द्रियशब्दे विवृतिः। "एतान्याकाशादीनां सात्त्विकांशेभ्यो व्यस्तेभ्यः पृथक्२ क्रमेणोत्पन्नानि यथोक्तं देवीभागवते। "पञ्चभूतस्य-त्त्वांशैः श्रोत्रादीनां समुद्भवः। ज्ञानेन्द्रियाणां राजेन्द्र! प्रत्येकमिति निश्चितम्"। क्रमशो दिग्वातार्कप्रचेतोऽश्विनो ज्ञानेन्द्रियाणां देवताः। शब्दस्पर्शरूपरसगन्धाश्च क्रमशो ज्ञानेन्द्रियाणां विषयाः।

**ज्ञापक** त्रि॰ ज्ञा-णिच् ण्वुल्। बोधके।

**ज्ञापन** न॰ ज्ञा-णिच्-ल्युट्। बोधने।

**ज्ञीप्सा** स्त्री ज्ञप-सन्-भावे अ। ज्ञातुमिच्छायाम्।

**ज्ञीप्सामान** त्रि॰ ज्ञप-सन्-कर्मणि शानच्। ज्ञातुमिच्छ्यमाणे। "ज्ञाप्यज्ञीप्स्यमानः" पा॰।

**ज्ञेय** त्रि॰ ज्ञा-कर्म्मणि यत्। बोद्धव्ये। यथा व्याकरणादि पाणिन्यादेर्ज्ञेयैकदेशार्थमपि" भा॰भा॰। २ज्ञातुं योग्ये ब्रह्मणि च। "ज्ञेयं यत् तत् प्रवक्ष्यामि यद् ज्ञात्वाऽश्नुतमश्नुते। अनादिमत् परं ब्रह्म न सत् तन्नासदुच्यते। सर्वतः पाणिपादं तत् सर्वतोऽक्षिशिरोमुखम्। सर्वतः श्रुतिमल्लोके सर्वमावृत्य तिष्ठति। सर्वेन्द्रियगुणाभासं सर्वेन्द्रियविवर्जितम्। असक्तं सर्वभृच्चैव निर्गुणं गुणभोक्तृ च। बहिरन्तश्च भूतानामचरं चरमेव च। सूक्ष्मत्वात् तदविज्ञेयं दूरस्थं चान्तिके च तत्। अविभक्तं विभक्तेषु विभक्तमिव च स्थितम्। भूतभर्तृ च तज्ज्ञेयं ग्रसिष्णु प्रभविष्णु च। ज्योतिषामपि तज्ज्योतिस्तमसः परमुच्यते"। "ज्ञानं ज्ञेयं ज्ञानगम्यं हृदि सर्वस्य विष्ठितम्" गीता।

**ज्या** जरायां ब्रुवा॰ पर॰ अक॰ अनिट्। जिनाति अज्यासीत्। जिज्यौ जिज्यतुः। जिनः।

**ज्या** स्त्री ज्या-अङ्गत्रा॰ यक्। त्रि॰। १धनुर्गुणे अमरः तस्य निरन्तराकर्षणेन धनुषो अराकरणात्तथात्वम्। २धनुषावयवे तस्याः प्रतिक्षणं क्षीयमाणत्वात् तथात्वं ३मातरि स्वप्रसवेन तस्याः वयोऽनेक्षयात्वम् भेदि॰। गोलक्षेत्रान्तर्गते धनुराकारक्षेत्रस्यकेन्द्रस्थानात् उभयपार्श्वसंलग्ने ४धनुराकारेखाभेदे। क्रमज्याशब्दे २२०२ पृ॰ जीवाशब्दे २१२५ पृ॰ दृश्यम्। तच्च चतुर्विंशतिसंख्यकास्तत्र क्रमज्याशब्दे उक्तावधिदा उत्क्रमज्यासानसंख्याङ्काश्च स्व॰वि॰ उक्ता यथा "खनयोरन्ध्रयमकारसषट्का खनीश्वराः। ह्राद्वैकारूपषड्दृक्षाः सागरार्धकृताशनाः। खर्तुवेदानवाद्र्यर्कादिङ्नगाक्ष्यर्धकुञ्जराः। नगाम्बरवियद्भद्राद्रूपधरणिगङ्कराः। शरार्णवकृताशैकाभुजङ्गाक्षि शरेन्दवः। नवरूपमहीध्रैकागजैकाङ्कनिशाकराः। गुणाब्धिरूपनेत्राणि पावकाग्निगुणाग्निनः। वस्वर्णवार्थय-

मजासुरङ्गर्तनगाधिनः । नवाष्टनवनेत्राणि पावकैकय-
मान्वयः । गजाग्निसागरसुता उत्क्रमज्ञार्द्धपिण्डकाः"

ज्याघातवारण न० ज्याया आघातं वारयत्यनेन वारि-
करणे ल्युट् । गोधायां ज्याघातवारणार्थं धानिनां
हस्तनिबद्धे चर्म्मभेदे अमरः । [ त्रि०मेदि० ।

ज्यानि स्त्री ज्या-नि० । १वयोहानौ २तटिन्याम् ३जीर्णे

ज्यायस् त्रि० अतिशयेन प्रशस्यो वृद्धो वा प्रशस्य+वृद्ध+वा
ईयसुन् ज्यादेशः ईयसुनि आदेरात्वम् । १अतिवृद्धे
२जीर्णे ३प्रशस्ते च । "ज्यायान् पृथिव्या ज्यायानन-
रीक्षाज्ज्यायान्दिवो लोकेभ्यः" छा०उ० । स्त्रियां ङीप् ।
"ज्यायसी चेत् कर्म्मणस्ते मता बुद्धिर्जनार्द्दन !" गीता

ज्यु गतौ भ्वा० आत्म० सक० अनिट् । ज्यवते अज्युष्ट
जुज्युवे । [ अज्युतत् अज्योतीत् । जुज्योत ।

ज्युत दीप्तौ भ्वा० पर० सक० सेट् । ज्योतति इरित् ।

ज्युत दीप्तौ भ्वा०आत्म० अक०सेट् । ज्योतते अज्योतिष्ट ।
जुज्युते । ऋदित् । अजुज्योतत् त । ज्योतिः ।

ज्येष्ठ त्रि०अतिशयेन वृद्धः प्रशस्यो वा वृद्ध+प्रशस्य+वा इष्ठन्
ज्यादेशः ।१अतिवृद्धे २प्रशस्ते ३अग्रजे भ्रातरि ४अग्रज-
भगिन्यां स्त्री ।५अश्विन्यादिनक्षत्रेषु अष्टादशे नक्षत्रे स्त्री
तद्रूपादि अत्रैवार्थशब्दे ४८७ पृ० दृश्यम् । ज्येष्ठानक्षत्र-
युक्ता पौर्णमासी अण् ज्यैष्ठी सास्मिन् मासे पुनरण्
संज्ञात्वात् लुक् । ६ज्येष्ठ ज्यैष्ठमासे मेदि० । गौरा०
ङीप् । ७अष्टगोधिकायां स्त्री शब्दरत्ना० ।
तस्याः दिग्भेदे कृतफलं तिथ्या० तत्र उक्तं यथा
"विप्रं ब्रह्मणि कार्यसिद्धिरतुला शक्रे कृताग्नेर्भयं
याम्यामग्निभयं सुरद्विषि कलिर्नैर्ऋते सस्त्रीजये ।
वायव्यां वरवस्त्रगन्धसहितं दिव्याङ्गना चोत्तरे
ऐशान्यां मरणं ध्रुवं निगदितं दिग्लक्षणं खञ्जने । ज्येष्ठीरते
सुतेऽप्येवमूचुः केचिच्च कोविदाः" अधिकं अष्टगोधिकाशब्दे
२६५७पृ०दृश्यम् । ८मध्यमाङ्गुलौ स्त्री हेमच० ९गङ्गायां
स्त्री राजनि०तस्याः पार्वत्याः प्रथमं हिमालयाज्जातत्वात्
तथात्वम् । १०परिणीते भर्तुरधिकस्नेहभाजने नायि-
कामेदे रतिमञ्जरी । लक्ष्म्याः प्रथमोत्पन्नायां ज्येष्ठभ-
गिन्याम् ११अलक्ष्मीदेव्यां स्त्री । तदुत्पत्त्यादिकथा पद्मपु०
उत्त०ख०उक्ता यथा "मां प्रणम्य पुनर्देवा ममन्थुः क्षीर-
सागरम् । तस्मिन् प्रमथ्यमाने तु मया देवैश्च भाविनि ! ।
ज्येष्ठा देवी समुत्पन्ना रक्तस्रग्वाससाहृता । उत्पन्ना सा-
ब्रवीद्देवान् किं कर्त्तव्यं मयेति वै । तामब्रुवंस्तदा
देवाः सर्वे देवगणा अपि । येषां गृहान्तरे नित्यं
कलहः संप्रवर्त्तते । तत्ते स्थानं प्रयच्छामो वासस्तव
शुभानने ! । यस्य गेहे कपालास्थिभस्मकेशादिचिह्नितम् ।
भग्नं पात्रं नित्यं वसत्यनृतवादिनः । सन्ध्याकाले
च ये सुप्ताः स्वपन्ति मलचेतसः । तेषां वेश्मनि
संतिष्ठ दुःखदारिद्र्यदायिनी । कपालकेशभस्मास्थि
तुषाङ्गारादि यत्र तु । तत्र ते वसतिस्थानं भविष्यति न
संशयः । अक्रत्वा पादयोः शौचं यस्त्वामति दुर्मतिः ।
तं भजस्व सदा देवि ! कलुषेणावृता अयम् । इत्याकर्ण्य
कपालाङ्गवालुकायसचर्म्मभिः । दन्तधावनकर्त्तारो
भविष्यन्ति नराधमाः । रमस्व मयि मे देवि ! तेषां
वेश्मसु नित्यशः । तिलपिष्टञ्च नक्तञ्च कालिङ्गशिम्बि
मद्गलम् । अलाबुं विड्वराहञ्च बिल्वकोशातकीफलम् ।
अलाबुं श्रीफलं ये वै खादन्ति नराधमाः । तेषां गृहे
तव स्थानं देवि ! दारिद्र्यदे ! सदा । इत्यादिश्य सुराः
सर्वे ते ज्येष्ठां कलिवल्लभाम् । पुनश्च मन्थनं चक्रुः
क्षीराब्धिं सुरसंवृताः" । १२नादजातायां ब्रह्मप्रकृति-
भूतायां देव्यां स्त्री "रौद्री विन्दोस्ततो नादाज्ज्येष्ठा
बीजादजायत । वामा, ताभ्यः समुत्पन्ना रुद्रब्रह्मरमा-
धिपाः" भा० ति० । १३परमेश्वरे पु० । "ईशानः प्राणदः
प्राणो ज्येष्ठः श्रेष्ठः प्रजापतिः" विष्णुस० । १४प्राणे
"प्राणो वा ज्येष्ठश्च श्रेष्ठश्च" छा० उ० । काश्यीस्थे
१५ गौरीभेदे स्त्री ज्येष्ठेश्वरशब्दे विवृतिः ।

ज्येष्ठतात पु० तातश्च ज्येष्ठः राज० पूर्वनि० । पितृव्यजे
भ्रातरि (जेटा) । [राजनि० ।

ज्येष्ठबला स्त्री ज्येष्ठं बलं यस्याः । सप्तदेव्यां लतायां

ज्येष्ठवर्ण पु० वर्णानां ज्येष्ठः राजद० पूर्वनि० कर्म० वा ।
ब्राह्मणे तस्य सर्ववर्णज्येष्ठत्वात् तथात्वं । २श्रेष्ठे
वर्णे च । [ स्थानशब्दे विवृतिः ।

ज्येष्ठवापी स्त्री काश्यीस्थज्येष्ठेश्वरस्थाने वापीभेदे ज्येष्ठ-

ज्येष्ठश्वशू स्त्री ज्येष्ठा मान्या श्वशूरिव संज्ञात्वात् पुंव-
द्भावः । पत्युः ज्येष्ठभगिन्यां (बड़शाली) हेमच० ।

ज्येष्ठसामन् न० नित्यकर्म० । सामभेदे । तच्च साम
"मूर्द्धानं दिवो अरतिं पृथिव्या वैश्वानरमृत आजातम-
ग्निम् । कविं सम्राजमतिथिं जनानामासन्नः पात्रं जनयन्त देवाः" सामार्चि० १प्र० १अ० २द० ५ऋ० ।
इत्यृचां गीयमानम् "वामदेव्यं वृहत्साम ज्येष्ठसाम-
रथन्तरम् । तथा पुरुषसूक्तं च रुद्रसूक्तं ततः परम् ।

खाजग्रदोहानि सामानि ग्रामिकं भारुडानि च।
पश्चिमे हारपालौ तु पठेतां सामगौ तथा"। इति दानपारिजातधृतवाक्यम्।

**ज्येष्ठस्थान** न०। काशीस्थे तीर्थभेदे तत्स्थानमाहात्म्यादि कथा काशीख० ६२ अ०।

"यमनेहसमारभ्य मन्दराद्रौ विनिर्यये। कद्रीन्द्रसुतया सार्द्धं रुद्रेणोचेन्द्रगामिना। तं वासरं पुरस्कृत्य जपाद्द नियमं दृढम्। जैगीषव्या महाभिधाः कुम्भयोने! महाव्रती। विघ्नमेतत्पदाब्जं सभीक्षिष्ये यदा पुनः। तदाम्बुविप्रुषमपि भक्षयिष्यामि चेत्वहो। कृतक्षुद्वारणायोगादद्य वा यन्मृतुपद्दात्। अनभ्रपिबन् योगी जैगीषव्यः स्थितो ह्यने!। तं यन्मुरेव जानाति नान्यो जानाति कश्चन। अतएव ततः प्राप्तः प्रथमं प्रमथाधिपः। ज्येष्ठशुक्लचतुर्दश्यां सोमवारानुराधयोः। तत्पर्वणि महायात्रा कर्त्तव्या तत्र मानवैः। ज्येष्ठस्थानं ततः काश्यां तदाभूदितिपुण्यदम्। तत्र लिङ्गं समभवत् स्वयं ज्येष्ठेश्वराभिधम्। तल्लिङ्गदर्शनात् पुंसां पापं जन्मशतार्ज्जितम्। तमोऽर्कोदयमाप्येव तत्क्षणादेव नश्यति। ज्येष्ठवाप्यां नरः स्नात्वा तर्पयित्वा पितामहान्। ज्येष्ठेश्वरं समालोक्य न भूयो जायते भुवि। आविरासीत् स्वयं तत्र ज्येष्ठेश्वरसभीपतः। सर्वसिद्धिप्रदा गौरी ज्येष्ठा नाम समन्ततः। ज्येष्ठे मासि सितारभ्यां तत्र कार्य्यो महोत्सवः। रात्रौ जागरणं कार्य्यं सर्वसम्पत्समृद्धये। ज्येष्ठां गौरीं नमस्कृत्य ज्येष्ठवापीपरिप्लुता। सौभाग्यभाजनं भूयाद् योषा सौभाग्यभागपि। निवासं कृतवान् यस्मात्तस्मिन् स्थाने यतः स्वयम्। निवासेश इति ख्यातं लिङ्गं तत्र परं तपः। निवासेश्वरलिङ्गस्य सेवनात् सर्वसम्पदः। निवसन्ति गृहे नित्यं नित्यं प्रेति पदं पुनः। कृत्वा श्राद्धं विधानेन ज्येष्ठस्थाने नरोत्तमः। ज्येष्ठां हविं ददात्येव पितृभ्यो मधुसर्पिषा। ज्येष्ठतीर्थेश्वरे काश्यां दत्त्वा दानानि शक्तितः। ज्येष्ठान् स्वर्गानवाप्नोति नरोभोक्षञ्च गच्छति। ज्येष्ठेश्वरोऽर्च्चनः प्रथमं काश्यां येनोर्द्धिभिर्नरैः। ज्येष्ठा गौरी ततोऽभ्यर्च्या सर्वज्येष्ठसभीपगैः"।

तत्तत्त्वं ज्योतिःस्वरूपलिङ्गन्तु ज्येष्ठेश्वराभिधं महादेवस्य नितम्बभूतम् यथोक्तं काशीख० २२ अ०।

"सर्वेषामपि लिङ्गानां मौलित्वं कृत्तिवाससः। ओङ्कारेशः शिखा ज्ञेया लोचनानि त्रिलोचनः। गोकर्णभारभूतेशौ तत्कर्णौ परिकीर्त्तितौ। विश्वेश्वराविसक्तौ च बाहवौ दक्षिणौ करौ। कर्णेशमणिकर्णीशौ हौ करौ दक्षिणेतरौ। कालेश्वरकपर्दीशौ चरणावतिनिर्मलौ। ज्येष्ठेश्वरो नितम्बस्तु नाभिर्वै मध्यमेश्वरः। कपर्दोऽस्य महादेवः शिरोभूषा श्रुतीश्वरः। चन्द्रेशो हृदयन्तस्य आत्मा वीरेश्वरः परः। लिङ्गं तस्य तु केदारः शुक्रं शुक्रेश्वरं विदुः। अन्यानि यानि लिङ्गानि परःकोटिमितानि च। क्षेत्रेशानि नखलोमानि वपुषो भूषणान्यपि। यावेतौ दक्षिणौ हस्तौ नित्यं निर्वाणदौ हि तौ। अन्नूनाममयं दत्त्वा पततां मोहसागरे"।

**ज्येष्ठामूलीय** पु० ज्येष्ठां मूलं वा नक्षत्रमर्हति पौर्णमास्याम् छ। ज्यैष्ठे मासि तत्रास्यपौर्णमास्यां हि ज्येष्ठामूलयोरन्यतरस्य योगसम्भवात्तस्य तथात्वम्। यथा च तस्य तथात्वं तथा कार्त्तिकशब्दे १६४८ पृ० दर्शितम्।

**ज्येष्ठाम्बु** न०नि०कर्म्म०। तप्तशुक्लप्रक्षालने जले वैद्यकप० तस्यातीव श्रेष्ठगुणत्वात्तथात्वम्।

**ज्येष्ठाश्रम** पु० ज्येष्ठ आश्रमो यस्य। "यस्मात् त्रयोऽप्याश्रमिणो ज्ञानेनान्नेन चान्वहम्। गृहस्थेनैव धार्य्यन्ते तस्मात् ज्येष्ठाश्रमो गृही" मनूक्ते ३गार्हस्थ्याश्रमयुक्ते कर्म०। २गृहस्थाश्रमे च "गृहस्थो ब्रह्मचारी च वानप्रस्थोऽथ भिक्षुकः। चत्वार आश्रमाः प्रोक्ताः सर्वे गार्हस्थ्यमूलकाः इत्युक्तेस्तस्य सर्वाश्रमपोषकत्वेन श्रेष्ठत्वात्तथात्वम्। ततः इनि। गृहस्थाश्रमीत्यत्र।

**ज्यैष्ठ** पु० ज्येष्ठी पूर्णिमास्मिन् मासे अण्। ज्येष्ठानक्षत्रयुक्तयोगार्हपौर्णमासीघटिते द्वयस्वरव्यारब्धे शुक्लप्रतिपदादिदर्शान्तरूपे ३चान्द्रे मासे "ज्यैष्ठे मासि सितेसुतदिने जाह्नवी मर्त्यलोके" ति०त०। तथाभूतेऽर्द्धमासाऽत्रके २पक्षे। ज्येष्ठामूलानक्षत्रयोरन्यतरनक्षत्रे पर्वान्तकाले गुरोरुदयास्तोपलक्षिते ३वार्हस्पत्ये वर्षभेदे च कार्त्तिकशब्दे १६४६ पृ० विवृतिः। "ज्यैष्ठे संवत्सरे चैव ज्येष्ठमासस्य पूर्णिमा। ज्येष्ठाभेन समायुक्ता महाज्यैष्ठी प्रकीर्त्तिता" राजमार्त्ता०। ज्यैष्ठसंवत्सरश्च। "ज्येष्ठामूलोपगे जीवे वर्षं स्यात् शाक्रदैवतम्" विष्णुधर्म्मोत्तरोक्तः यात्राः"ति०त०। द्वयस्वरविके सौरे ४मासभेदे च।

**ज्यैष्ठी** स्त्री ज्येष्ठानक्षत्रेण तत्समीपस्थमूलानक्षत्रेण वा युक्ता पौर्णमासी अण् ङीप्। ३ज्येष्ठामूलानक्षत्रात्म-

तरनक्षत्रयुक्तपौर्णमास्याम् ज्येष्ठेव स्वार्थे अण् ङीप्। २स्टङ्गोधिकावाङ्। बह्वीशब्दे दृश्यम्।

ज्यैष्ठिनेय पुंस्त्री ज्येष्ठायाः स्त्रियाः अपत्यम् ढक् इनङ्। ज्येष्ठाया अपत्ये। "ज्यैष्ठो ज्यैष्ठिनेयः सुवीर्यतां" मा०२।१।२। "ऋते कानिष्ठिनेयस्य ज्यैष्ठिनेयो विवासितः" भट्टिः।

जौष्ठ्य न० ज्यैष्ठस्य भावः ष्यञ्। १श्रेष्ठत्वे २वयसा अपजत्वे च। "विप्राणां ज्ञानतो ज्यैष्ठ्यं क्षत्रियाणान्तु वीर्यतः। वैश्यानां धान्यधनतः शूद्राणामेव जन्मतः" मनुः

ज्यो नियमे उपनये व्रतोपदेशे च भ्वा० आत्म०सक० अनिट्। ज्यवते अज्यात। जुज्ये।

ज्योक् अव्य०ज्यो-बा० उकुन्। १कालभूयस्त्वे २प्रश्ने ३गीर्ग्रार्थे ४सत्यर्थे शब्दार्थचि०५उच्चत्वे च "सर्वमायुरेति ज्योग् जीवति महान् प्रजया पशुभिर्भवति" ऋ० उ० "ज्योगुच्चलं जीवति" भा०।

ज्योतिरात्मन् पु० ज्योतिरात्माऽस्य। सूर्य्यादौ "यथाह्ययं ज्योतिरात्मा विवस्वान्" श्रुतिः।

ज्योतिरादित्य पु० ज्योतिषि सावित्रे मण्डले आदित्यः। परमेश्वरे "आदित्यो ज्योतिरादित्यः" विष्णुस०

ज्योतिरिङ्ग पु० ज्योतिरिव इङ्गति इगि-गतौ अच्। खद्योते शब्दरत्ना०युच्। ज्योतिरिङ्गणोऽप्यत्र अमरः।

ज्योतिर्गणेश्वर पु० ज्योतिर्गणानामीश्वरः। १परमेश्वरे "रुद्रः साङ्गः मतानन्दो नन्दिज्योतिर्गणेश्वरः" विष्णुस०। "तमेव भान्तमनुभाति सर्वम् तस्य भासा सर्वमिदं विभाति" इति श्रुत्या तस्यैव सर्वज्योतिर्गणानामवभासनस्य प्रतिपादनात्तथात्वम्। [अन्यः। ज्योतिःशास्त्रे।

ज्योतिर्ग्रन्थ पु० ज्योतिषां ग्रहनक्षत्रादीनां गत्यादिसाधनं

ज्योतिर्मय त्रि० ज्योतिरात्मकः प्राचुर्य्ये वा मयट्। १ज्योतिरात्मके ज्योतिःस्वरूपे २ज्योतिःप्रचुरे च। "ऋषीन् ज्योतिर्मयान् सप्त सस्मार स्मरशासनः" कुमा० "न भौमान्येव धिष्ण्यानि हित्वा ज्योतिर्मयानपि" रघुः।

ज्योतिर्विद् पु०ज्योतिषां सूर्य्यादीनां गत्यादिकं वेत्ति विद्-क्विप्। ज्योतिःशास्त्राभिज्ञे। "ब्रह्मा ज्योतिर्विदो वेदात् ददाद्गां काञ्चनं महीम्" याज्ञ०। ज्योतिर्विदाभरणम्।

ज्योतिर्विद्या स्त्री ज्योतिषां सूर्य्यादीनां गत्यादिज्ञानसाधनं विद्या। ज्योतिःशास्त्रे। [ज्योतिषे त्रिका०।

ज्योतिर्वीज न० ज्योतिषो गगने प्रकाशस्य बीजमिव।

ज्योतिर्लोक पु० ज्योतिषां लोकः आश्रयः। कालचक्रप्रवर्त्तकध्रुवलोके २तदधिपे परमेश्वरे च तल्लोकस्थितिवर्णनं भाग०५।२३ अ०।

"अध तस्मात् परतस्त्रयोदशलक्षयोजनान्तरतो यत्तद्विष्णोः परमं पदमभिवदन्ति। यत्र महाभागवतो ध्रुव औत्तानपादिरग्निनेत्रेण प्रजापतिना कल्पेन धर्मेण च समकालयुग्भिः सह वक्ष्यमाणं दक्षिणतः क्रियमाण इदानीमपि कल्पजीविनामाजोव्य उपास्ते तस्य महानुभाव उपवर्णितः। सह्यि सर्वेषां ज्योतिर्गणानां ग्रहनक्षत्रादीनाम् अनिमिषेणाव्यक्तरंहसा भगवता कालेन भ्राम्यमाणानां स्थाणुरिवावष्टम्भ ईश्वरेण विहितः ग्रहदवभासते। यथा मेधीस्तम्भ आक्रमणपशवः संयोजितास्त्रिभिः सवनैर्यथास्थानं मण्डलानि चरन्ति। एवं भगणा ग्रहादय एतस्मिन्नन्तर्बहिर्योगेन कालचक्र आयोजिता ध्रुवमेवावलम्ब्य वायुनोदीर्य्यमाणा आकल्पान्तं परितः क्रामन्ति। नभसि यथा मेघाः श्येनादयो वायुवशाः कर्म्मसारथयः परिवर्त्तन्ते। एवं ज्योतिर्गणाः प्रकृतिपुरुषसंयोगानुसृहीताः कर्मनिर्मितगतयो भुवि न पतन्ति। केचिदेतत् ज्योतिरनीकं शिशुमारसंस्थानेन भगवतो वासुदेवस्य योगधारणायामनुवर्णयन्ति। यस्य पुच्छाग्रेऽवाक्शिरसः कुण्डलीभूतदेहस्य ध्रुव उपकल्पितः तस्य लाङ्गूले प्रजापतिरग्निरिन्द्रो धर्म इति। पुच्छमूले धाता विधाता च कट्यां सप्तर्षयः यस्य दक्षिणावर्त्तं कुण्डलीभूतशरीरस्य यान्युदगयनानि दक्षिणपार्श्वे नक्षत्राणि उपकल्पयन्ति। दक्षिणानि हु सर्व्वे यथा शिशुमारस्य कुण्डलाभोगसन्निवेशस्य पार्श्वयोरुभयोरप्यवयवाः समसंख्या भवन्ति। पृष्ठे त्वजवीथी आकाशगङ्गा चोदरतः। पुनर्वसुपुष्यौ दक्षिणवामयोः श्रोणीरोर्द्धोः श्लेषा च दक्षिणवामयोः पादयोरभिजिदुत्तराषाढे दक्षिणवामपार्श्वबाहुषु युञ्जीत। तथैव मृगशीर्षादीन्युदगयनानि दक्षिणपार्श्वे प्रातिलोम्येन प्रतियुञ्जीत। शतभिषाज्येष्ठे स्कन्धयोर्दक्षिणवामयोर्न्यसेत्। उत्तराफल्गुनावगस्त्यः अधराफल्गुनौ यमः सख्ये चाङ्गारकः शनैश्चर उपस्थे बृहस्पतिः ककुदि बचस्पतिर्हृदये नारायणो मनसि चन्द्रो नाभ्यामुशनास्तनयोरश्विनौ बुधः प्राणापानयोरार्क्षगणे, केतवः सर्वाङ्गेषु, रोमसु सर्वे तारागणाः। एतद्वै भगवतो विष्णोः सर्वदेवता-

मयं रूपम् अहरहः सन्ध्यायां प्रयतो वाग्यतो निरीक्ष-माण उपतिष्ठेत्। नमो ज्योतिर्लोकाय कालायनाय अनिमिषां पतयो महापुरुषाभिधोमहीति"।

**ज्योतिर्ईस्ता** स्त्री "ईस्तं" शरीरमित्याङ्गर्ईस्तञ्च गगनं तथा। ज्योतिश्च यद्गनचलं ज्योतिर्ईस्ता ततः स्मृता" देवीपु०४५ अ० उक्तनिरुक्तियुक्तायां दुर्गायाम्।

**ज्योतिश्चक्र** न० ज्योतिर्भिर्नक्षत्रैर्घटितं चक्रम्। १भचक्रे "सप्तविंशतिभैर्ज्योतिश्चक्रं स्तिमितवायुगम्। तदर्कांशो भवेद्राशिर्नवत्तच्चरणाङ्कितः" ति० त० उक्ते अश्विन्यादि-भिर्नक्षत्रैर्घटिते मण्डलाकारे राशिचक्रे। स्तिमितवायु-गमित्वेन तस्य नाधःपतनमात्रं विवक्षितं न गत्यभावः प्रवहवायुना तस्य प्रतिदिनं प्रत्यगगतेः सूर्य्यसिद्धान्तादा-वुक्तत्वात् खगोलशब्दे २४१६ पृष्ठादौ दृश्यम्।

**ज्योतिः(ष्)शास्त्र** न० ज्योतिषां सूर्य्यादीनां गत्यादि ज्ञापकं शास्त्रम् वा शत्वम्। सूर्य्यादिग्रहगत्यादिबोधके कालज्ञाने वेदाङ्गे शास्त्रभेदे। "वेदास्तावद्यज्ञकर्मप्रवृत्ता-यज्ञाः प्रोक्ताः ते तु कालाश्रयेण। शास्त्रादस्मात् काल-बोधो यतः स्याद् वेदाङ्गत्वं ज्योतिषस्योक्तमस्मात्। शब्दशास्त्रं मुखं ज्योतिषं चक्षुषी श्रोत्रमुक्तं निरुक्तं च कल्पः करौ। या तु शिक्षास्य वेदस्य सा नासिका पाद-पद्मद्वयं छन्द आर्यैर्बुधैः। वेदचक्षुः किलेदं स्मृतं ज्योतिषं सर्वतो ज्योतिषां चाङ्गमध्येऽस्य तेनोच्यते। संयुतोऽपो-तरैः कर्णनासादिभिर्यत्नुषाङ्गेन हीनो न किञ्चित्करः। तस्माद्द्विजैरध्यनीयमेतत् प्रयत्नं रहस्यं परमं च तत्त्वम्। यो ज्योतिषं वेत्ति नरः स सम्यग् धर्मार्थकामान् लभते यशश्च"।"ज्योतिःशास्त्रमनेकभेदविषयम्"ह०स० १अ०। अस्य भेदादि अङ्गशब्दे ७२ पृ० दृश्यम्।

**ज्योतिष** न० ज्योतिः सूर्य्यादिगत्यादिकं प्रतिपाद्यतया-ऽस्त्यस्य अच्।१ज्योतिःशास्त्रे "ज्योतिषं नयनं विदुः" शिक्षा। ज्योतिःशास्त्रशब्दे उदा०।"ज्योतिषमागमशास्त्रं विप्रतिपत्तौ न योग्यमस्माकम्" ह०स० ७अ०। २तारायां स्त्री गौरा० ङीष्। ज्योतिषं श्रेयस्त्वेनास्त्यस्य इनि। ज्योतिषिन्। ज्योतिःशास्त्राभिज्ञे त्रि० स्त्रियां ङीष्।

**ज्योतिषिक** त्रि० ज्योतिरधीते उक्थादि० ठक् संज्ञा-पूर्वकविधेरनित्यात् न ढक्। ज्योतिःशास्त्राध्येतरि।

**ज्योतिष्क** पु० ज्योतिरिव कायति कै-क। १चित्रकवृक्षे "एतान्येवापाद्य क्षारकल्पेन निस्नुते पालाशे क्षारे ततो विपाच्य फाणितमिव सञ्जातमवतार्य्य क्षेपयेत्। ज्यो-तिष्क फलताम्रमरिचपिप्पलीसुमनःपत्रैर्वा" सुश्रु०। २मेषिकावीजे च राजनि०। ३गणकारिकावृक्षे रत्नमा०। ४यष्टतारानक्षत्रादौ ब०व० "तदीशभागे तस्याहेः ग्रहर्क्ष-मादित्यसन्निभम्। यत्तत् ज्योतिष्कमित्याहुः सदा पशु-पतेः प्रियम्" इत्युक्ते ५मेरोः ग्रहर्क्षभेदे न०।

**ज्योतिष्टोम** पु० ज्योतींषि त्रिवृदादयः स्तोमाः यस्य सत्वम्। १खनामख्याते अग्निष्टोमसंस्थारूपे यज्ञभेदे तद्विधानादि ताण्ड्य० ब्रा० ४।१।६।

"यज्ज्योतिष्टोमो भवति यज्ञमुखमेवादौ कुरुते यदुक्थो यज्ञक्रतोरनन्तरयाय यद्रात्रिः सर्वस्याग्रे" मू०

"अथ षोड़शिकोऽयमतिरात्र इत्युक्तं, क्रतुर्वा ज्योति-ष्टोमोऽतिरात्रः स षोड़शिक इति। अथ तद्व्यतिरिक्ता-भिस्तिसृभिः संस्थाभिरवयुज्य स्तूयते। यद्यपि सर्वेषा-मपि ज्योतिष्टोमत्वमस्ति तथापि उक्थ्यातिरात्रसंस्थयोः पृथग्वचनसामर्थ्यात् अग्निष्टोमसंस्थैव ज्योतिष्टोमशब्दे-नोच्यते। ज्योतींषि त्रिवृदादयः स्तोमा यस्य स ज्योतिष्टोमः। तथा च तैत्तिरीयकं त्रिवृत्पञ्चदश सप्तदश एकविंश एतानि ज्योतींषि यत एतस्य स्तोमा इति। यज्ज्योतिष्टोमोऽग्निष्टोमो द्वादशस्तोत्रात्मको भवति ज्यो-तिष्टोमस्य हि अग्निष्टोमसंस्था सत्रा, "एष वाव प्रथमो यज्ञानामिति"श्रुतेः। तस्मेन यज्ञमुखं यज्ञानां मुखभूतम-ग्निष्टोमं प्राथ आप्नुवन्ति सविधः सन्तश्चा भवन्ति तथा तस्मिन्नतिरात्रे उक्थ्यः पञ्चदशस्तुतशस्त्रसाध्यः क्रतुरन्त-र्भवतीति यत् तत् यज्ञक्रतोः संपूर्णस्य यज्ञस्य अनन्तर-याय अपरित्यागाय भवति उक्थसंस्थायां हि क्रतुः संपूर्णो भवति यथा पूर्वयोः सवनयोः पञ्चदश पञ्चदश स्तोत्राणि तथा तृतीयेऽपि स्तोत्रपञ्चकसद्भावात्। अग्नि-ष्टोमस्त्वसंपूर्णः क्रतुः उक्तहेतोरभावात्" भा०।

तस्य च अग्निष्टोमसंस्थत्वेन ज्योतिष्टोमनामताहेतु-रुक्तो यथा "यदेतानि सर्वाणि सह द्रुरूपाणि कै-तेषामप्तिरिति ज्योतिष्टोम एवाग्निष्टोमेनैवाग्निष्टो-मेन यजेत। तस्य वा एतस्य ज्योतिष्टोमस्या-ग्निष्टोमस्य त्रिवृच्छिरः, पञ्च दक्षिणः पक्षः सप्तदशः पुच्छं, पञ्चदशं क्रोतु-राजं सप्तदशं पृष्ठमेकविंशं यज्ञायज्ञियं तत् पुच्छम्" शत० ब्रा० १०।१।२।७। "अधुना प्रथमसंस्थारूपज्योति-ष्टोमाग्निष्टोमं महाव्रतयज्ञात्मना स्तोतुं तत्रैवाग्निचय-नादित्रयस्योपादानाद् ब्रह्मवादिप्रश्नोत्तराभ्यां दर्शयति।

बह्व युगपत् दुरुपपादानि आप्तुमशक्यानि सर्वेषां महात्रतयज्ञानुष्ठाने प्रयोगबाहुल्येन ऋत्विक्सम्पादनादेः दुष्करत्वेन चानधिकारात् तत्राग्निष्टोम इति प्रदेनाग्निस्तवनोक्तेरग्निचयनशब्दमिति मन्तव्यम् । षड्विंशकारस्य महाव्रतसाम्नो हि शिरःपक्षमध्यपुच्छात्मकाः पञ्चावयवाः शिरो गायत्रं, रथन्तरं दक्षिणः पक्षः बृहदुत्तरः पक्षः भद्रमस्य पुच्छं राजनसाम इत्यादेति तत्सर्वमग्निष्टोमे सम्पादयति तस्य वा इति अकल्पयात्मकमेकं शस्त्रं ताद्दशानि त्रीणि शस्त्राणि त्रिवृतोऽवयवायस्य स्तोमस्य तदिदं त्रिवृद् बहिष्पवमानम् प्रातःसवनिकं त्रयं शस्त्रकल्पयात्मकं बहिष्पवमानं महाव्रतस्य शिरो भवति बहिष्पवमानमपि गायत्रीच्छन्दस्कैस्तृचैर्मातव्यम् माध्यन्दिनः पञ्चदश स्तोत्रियात्मकः पवमानः, तृतीयसवने सप्तदशस्तोत्रियात्मकः आभवः पवमानः पक्षस्थानीयौ स्तोत्रानुशंसनीयं प्रथममाज्यस्तोत्रं सप्तदशस्तोत्रियात्मकं पृष्ठनामकं स्तोत्रः प्रथमं स्तोत्रम् तदुभयं मध्यात्मरूपम् । एकविंशत्यात्मकरूपं "यज्ञायज्ञा वो अग्नये" इत्यत्रोक्तं साम पुच्छस्थानीयम्" भा० २स्तोमभागे च "ज्योतिष्टोम धर्मा एकाहद्वादशाहयोस्तदुपपदर्शनात्" कात्या० श्रौ० १२।१।१ "ज्योतिष्टोमशब्देन उपांशुवादिप्रकारियोजनपर्व्वन्तो यज्ञयज्ञाभ्यास्तोऽभिधीयते ज्योतींषि यस्य स्तोमाः स ज्योतिष्टोमः स्तोमैर्ह्यसौ द्योतत इति ते च स्तोमयागस्य स्तोमाः तस्मात् ज्योतिष्टोमशब्देन स्तोमयागोऽभिधीयते" कर्कः ।

**ज्योतिष्मत्** त्रि० ज्योतिरस्त्यस्य मतुप् । १ज्योतिर्युक्ते २प्रकाशयुक्ते ३लतामेदे स्त्री । सा च (मालकाङ्गनी) इति ख्याता लता ।"ज्योतिष्मती कटुस्तिक्ता सरा कफसमीरजित् । अस्तुष्या वामनी तोक्ता वह्निबुद्धिकृतिप्रदा" राजनि० ४रात्रौ राजनि० ५योगशास्त्रोक्ते सत्त्वप्रधाने चित्तवृत्तिभेदे च ।"विशोका वा ज्योतिष्मती"पात०सू० । "प्रवृत्तिरुत्पन्ना चित्तस्य स्थिति-निबन्धिनीति वाक्यशेषः। ज्योतिःशब्देन सात्त्विकः परिणाम उच्यते स प्रशस्तो भूयानतिशयश्च विद्यते यस्याम्" भोजवृत्तिः "प्रसीदत ते विशोका ज्योतिष्मती नाम चित्तवृत्तिः"भट्टावी० "ज्योतिष्मतः पथो रक्ष धिया कृतान्" ऋ० १०।५३।६ "ज्योतिष्मतो दीप्तिमतः" भा० ६अग्निपुराणम् अर्चिष्मत्या तत्कथा अग्निलोकशब्दे ५६ पृ० द्रष्टव्यम् । योऽस्यस्य यथाऽनेन प्राप्ति ज्योतिष्मती पुरी" काशी० ।

७स्वर्गे ८शकद्वीपस्थे ९पर्वतभेदे च शब्दार्थचिन्तामणिः ।

**ज्योतिस्** न०द्योतते द्युत्यतेऽनेन वा द्युत-इसुन् आदेर्दस्य जः जद्युत-दीप्तौ वा इसुन् । १स्वर्गे २अग्नौ, मेदि० ३सेचिकाङ्के राजनि० च । नेत्रकनीनिकामध्यस्थे ४दर्शनसाधने, पदार्थे, शब्दार्थचि० ५नक्षत्रे, ६प्रकाशे, शब्दच० ७स्वयंप्रकाशे, सर्वावभासके चैतन्ये च न० ।

८अग्निष्टोमयागस्य संस्थाभेदे यथोक्तं ताण्ड्य०ब्रा०४।१।७

"स एतान् स्तोमानपश्यत् ज्योतिर्गौरायुरितीमे वै लोका एते स्तोमा अयमेव ज्योतिरयं मध्यमो गौरसावुत्तम आयुः" मू० ।

"स पूर्वोक्तः प्रजापतिः एतान् स्तोमान् स्तोमशब्देन त्रिवृदादिस्तोमवन्त्यहानि लक्षयन्ते । तानि ज्योतिर्गौरायुरिति एतन्नामकान्यपश्यत् । तत्र ज्योतिरग्निष्टोमसंस्थः गौरायुषी उक्थसंस्थे ज्योतिष इयं स्तोमकृत्प्रिः । त्रिवृद्बहिष्पवमानं पञ्चदशान्याज्यानि पञ्चदशो माध्यन्दिनः पवमानः सप्तदशानि पृष्ठानि सप्तदश आभव एकविंशोऽग्नीष्टोमसामेति । अथ गोष्टोमस्य पञ्चदशो बहिष्पवमानः त्रिवृदाज्यानि सप्तदशं माध्यन्दिनं सवनमेकविंशं तृतीयसवनम् । अथायुष्टोमस्य त्रिवृद्बहिष्पवमानं पञ्चदशान्याज्यानि सप्तदशं माध्यन्दिनं सवनमेकविंशं तृतीयसवनमिति । एते उक्ताः स्तोमा इमे लोका वै भूरादिकाः खलु कः कतमो लोक इति बुभुत्सायामाह अयमेव लोको ज्योतिः । अयमध्यमः अन्तरीक्षलोको गौः असावुत्तमस्तृतीयः स्वर्लोक आयुः । स्तोमत्रयस्य लोकत्रयेण सह संख्यासाम्यात् तच्छब्दता एतैः त्रिभिः स्तोमैः साधनैस्त्रीन् लोकान् प्राजनयदिति श्रेयः" भा० । ९विष्णौ "विज्ञायज्ञगतिर्ज्योतिः सर्वविद् भुजगप्रभुः विभुः" विष्णुस० स्वयंद्योतनात् तस्य तथात्वम् ।"अथ यदतः परो दिवो ज्योतिर्दीप्यते । विश्वतः पृष्ठेषु सर्वतः पृष्ठेष्वनुत्तमेषूत्तमेषु लोकेषु । इदं वाव तदादित्यस्यरूपे ज्योतिः" छा० उ० । एतत्सम्बन्धित्वं "ज्योतिःशब्दस्य परब्रह्मपरत्वं शा०सू० भा० व्यवस्थापितं यथा 'ज्योतिश्चरणाभिधानात्"१।३।२४सूत्रभाष्यादौ द्रष्टव्यम् ।"चक्षुर्ज्ञानेरोधकं शार्वरादिकं तमः। तस्या एवानुग्राहकमादित्यादिकं ज्योतिरिति" शा० भा० । १०तेजोद्रव्यमात्रे तस्य प्रकाशवत्त्वात्तथात्वं तदपि तत्रैव भाष्ये द्रष्टव्यम् । "ज्योतिषामपि तज्ज्योतिस्तमसः परमुच्यते"। "ज्ञानं ज्ञेयं ज्ञानगम्यं हृदि सर्वस्य धिष्ठितम्। योऽन्तःसुखो-

इत्यारामस्तथात्मजयोतिरेव यः। स योगी ब्रह्मनिर्वाणं ब्रह्मभूतोऽधिगच्छति" गीता। "हिमक्लिष्टप्रकाशानि ज्योतिंषीव सखानि वः" "स हि देवः परं ज्योतिस्तमःपारे प्रतिष्ठितम्" कुमा०। ज्योतिःसारः ज्योति स्त्वम् ज्योतिःसिद्धान्तः।

ज्योतीरथ पु ज्योतिषां सूर्य्यादीनां रथ इवाधारत्वात्। ध्रुवनक्षत्रे त्रिका० तदाधारतयैव ज्योतिश्चक्रस्य समवस्थानात् तस्य तद्रथत्वम्।

ज्योत्स्ना स्त्री ज्योतिरस्यस्याम् न उपधालोपश्च। १कौमुद्याम् चन्द्रकिरणे अमरः २रेणुकानामगन्धद्रव्ये रत्नमा०। ३दुर्गायां "प्रभा प्रसादशीलत्वात् ज्योत्स्ना चन्द्रार्कमालिनी" देवी० पु० ४५ अ०। "रौद्रायै नमो नित्यायै गौर्य्यै धात्र्यै नमो नमः। ज्योत्स्नायै चेन्दुरूपिण्यै सुखायै सततं नमः" देवीमा०। ततः मत्वर्थे अण् ज्यौत्स्न तद्युक्ते त्रि० स्त्रियां ङीप् ज्यौत्स्नी।

ज्योत्स्नाकाली स्त्री सोमस्य कन्यायां वरुणात्मजपुष्करपत्न्याम् "एषोऽस्य पुत्रोऽभितः पुष्करः पुष्करेक्षणः। रूपवान् दर्शनीयश्च सोमपुत्रा इतः पतिः। ज्योत्स्नाकालीति यामाद्यद्वितीयां रूपतः स्त्रियम्" भा० उ० ९७अ०

ज्योत्स्नादि पु० मत्वर्थे अण्प्रत्ययप्रकृतिभूते पा० ग० सू० पठिते शब्दगणे स च गणः "ज्योत्स्ना तमिस्रा कुरुङ्ग कुरुप विसर्प विपादिका"।

ज्योत्स्नाप्रिय पुंस्त्री ज्योत्स्ना प्रियास्य। चकोरे स्त्रियां जातित्वे ङीप योपधत्वात् टाप्।

ज्योत्स्नाभृत्त पु० ज्योत्स्नाया दीपप्रकाशस्याधारः इवः। दीपाधारे (पिलसुज) त्रिका०।

ज्योत्स्नी स्त्री ज्योत्स्नाऽस्यस्य अण् संज्ञापूर्वकत्वेनानित्यत्वात् न वृद्धिः ङीप्। १ज्योत्स्नायुक्तरात्रौ (झिङ्गा) २पटोलिकायाञ्च अमरः।३रेणुकानामगन्धद्रव्ये शब्दच०। स्वार्थे क। ज्योत्स्निका तत्रार्थे।

ज्यौतिषिक त्रि० ज्योतिषमधीते वेद वा वृत्तादि० ठक्। १ज्योतिषशास्त्राभिज्ञे २तदध्येतरि च अमरः।

ज्यौत्स्न त्रि० ज्योत्स्ना यस्यस्य अण्। १ज्योत्स्नायुक्ते स्त्रियां ङीप् सा च २चन्द्रिकायुक्तरात्रौ रायमुकुटः।

ज्रि अभिभवे भ्वा० पर० सक० अनिट्। जरयति अजरीत्। जिज्राय जिज्रियतुः "आ भानुना पार्थिवानि ज्रयांसि महस्तोदस्य धृषता ततन्थ" ऋ० ६।६६। "जिमादुपज्रयति गोरपीच्यं पदं यदस्य मातुषा अजीजनन्" ६।७१।५।

ज्री वयोहानौ वा चुरा० उभ० पक्षे क्र्या० पा० प० अक० अनिट्। जारयति ते जिज्रयति अजिज्रयत् त अजरीत्।

ज्वर रोगे भ्वा० पर० अक० सेट्। ज्वरति अज्वारीत्। मित्। ज्वरयति ते।

ज्वर पु० ज्वर+भावे घ। स्वनामख्याते रोगभेदे। ज्वरस्योद्भव निदानादि भावप्र० उक्तं यथा।

"दक्षापमानसंक्रुद्धरुद्रनिःश्वाससम्भवः। ज्वरोऽष्टधा पृथग्द्वन्द्वसङ्घातागन्तुजः स्मृतः। अस्यायमर्थः। दक्षकर्तृको योऽपमानस्तेन संक्रुद्धो यो रुद्रस्तस्य यो निःश्वासस्तस्मात्सम्भव उत्पत्तिर्यस्य स ज्वरः। क्रुद्धरुद्रनिःश्वाससम्भूतत्वेन ज्वरः स्वभावात्पैत्तिक इति बोध्यते। यत उक्तं चरकेण, क्रोधात्पित्तमित्यादि तेन सर्व्वज्वरेषु पित्तोपशमकारिणी चिकित्सा कर्त्तव्या अतएव वाग्भटः "उष्णा पित्ताढ्ये नास्ति ज्वरो नाशुघ्नया विना। तस्मात्पित्तविरुद्धानि त्यजेत्पित्ताधिकोऽधिकम्" रुद्रसम्भूतत्वेन ज्वरस्य दैवतात्मकत्वात् पूजार्हत्वं चोपदर्शितम् अतएव वैद्यैः "ज्वरः संपूजनैर्यापि सद्यस्तैवोपशाम्यतीति"। मूर्त्तिरस्योक्ता सुश्रुतेन "रुद्रकोपाग्निसंभूतः सर्वभूतप्रतापनः। त्रिपाद्भुजप्रहरणस्त्रिशिराः शुभलोचनः। वैयाघ्रचर्मवसनः कपिलो भास्मविग्रहः। पिङ्गेक्षणो रुक्षजङ्घो बीभत्सो बलवान्महान्। पुरुषो लोकनाशार्थमयं ज्वर इति स्थितः। तैस्तैर्नामभिरन्येषां सत्त्वानां परिकीर्त्तितः। जन्मादौ निधने चैव प्रायोविशति देहिनम्। अतो देवमनुष्याभ्यां नान्यो विषहते हि तम्" तस्य ज्वरस्य संख्यारूपां संप्राप्तिमाह ज्वरोऽष्टधेति। अष्टत्वं विवृणोति पृथगिति वातिकः पैत्तिकः श्लैष्मिकश्चेति त्रयः। द्वन्द्वजाश्च त्रयः वातपैत्तिकः वातश्लैष्मिकः पित्तश्लैष्मिकश्चेति। सङ्घातजः सन्निपातिक एकः। "द्व्युल्वणैकोल्वणैः षट् समैर्नैकमध्याधिकैश्च षट्। समश्चैको विकाराः स्युः सन्निपातास्त्रयोदश" इति चरके त्रयोदश सन्निपाता उक्तास्ते यथा। वातोल्वणः पित्तोल्वणः। कफोल्वणः। वातपित्तोल्वणः। वातश्लेष्मोल्वणः पित्तश्लेष्मोल्वणः। एवं षट्। अधिकवातो मध्यपित्तो हीनकफः। अधिकवातो मध्यकफो हीनपित्तः। अधिककफो मध्यपित्तो हीनवातश्चेति षट्। त्र्युल्वण एकः एवं त्रयोदश। अत्र तु त्रिदोषत्वेन साम्यात्सान्निपातिक एक एव गणितः। आगन्तुज इति। अत्रागन्तुशब्देनाभिघातादयो हेतव उच्यन्ते।

कुत्रचिद्व्याधयः कार्यकारणयोरभेदोपचारात् आगन्तुजा अभिघातादयनेककारणयोगादनेके भवन्ति । तथाप्यागन्तुजत्वेन सामान्यादागन्तुजोऽयमेक एव मथितः । नन्वागन्तुजेऽपि ज्वरे वातादिलक्षणदर्शनादागन्तुजः कथं दोषजाद्भिद्यते उच्यते, उत्तरकालं दोषोत्पत्तेः । तथा च चरके "आगन्तुजो हि व्यथापूर्वं जायते पश्चाद्भिन्नैर्दोषैरनुबध्यते" इति । अथ ज्वरस्य विप्रकृष्टकारणकथनपूर्वकां सम्प्राप्तिमाह "मिथ्याहारविहाराभ्यां दोषा ह्यामाशयाश्रयाः। वह्निर्हि रस कोष्ठाग्निं ज्वरदाः सूरसानुगाः" । मिथ्याहारविहाराभ्यां अनुचिताहारचेष्टाभ्यां हेतुभूताभ्यां दोषाः वातपित्तकफाः आमाशयाश्रयाः आमाशयं गता रसानुगाः रसदूषकाः वह्निं निरस्य कोष्ठाग्निं कोष्ठगताग्नेरूष्माणम् न तु समस्ताग्निं तदा दोषपाकासम्भवः स्यात् । वह्निः प्रक्षिप्य ज्वरदाः सुष्ठु रकारिणो भवेयुरित्यर्थः । अथ ज्वरस्य सामान्यं विशिष्टञ्च पूर्वरूपमाह "श्रमोऽरतिर्विवर्णत्वं वैरस्यं नयनस्रवः । दृष्ट्याद्वेगो सुखत्वापि शीतवातातपादिषु । जृम्भाऽङ्गमर्दौ गुरुता रोमहर्षोऽरुचिस्तमः । अप्रहर्षश्च शीतञ्च भवन्युत्स्यत्यति ज्वरे । सामान्यतो विशेषात्तु जृम्भात्वर्थं समीरणात् । पित्तात्प्रयतनयनोद्वेगः कफात्तन्द्राभिनन्दनम् !" श्रमो व्यापारं विनैव, अरतिरस्वस्थचित्तत्वम् विवर्णत्वं म्लानगात्रता । वैरस्यं सुख्यस्याऽप्रकृतरसता । नयनस्रवः नयनयोरस्रपूर्णत्वम् । शीतवातातपादिषु सुखरिक्षाद्वेषौ । आदिशब्दाज्ज्वलने जले च । यत उक्तं चरकेण "ज्वलनातपवातेषु भिक्षद्वेषावनिच्छितावपि" । गयनादिष्वित्यन्ये । जृम्भमर्दोऽङ्गमोटनम् । गुरुता गात्रस्य । रोमहर्षः रोमाञ्चता । अरुचिर्भोजने, तमः तमोमग्नमिव ज्ञानम् । अप्रहर्षः हर्षाभावः । शीतं लगति चकाराद्दाहादिः उपदंशद्वेषादयोऽपि भवन्ति । तृतीयश्लोकस्थम् सामान्यत इति पूर्वश्लोकाभ्यां सम्बन्धनीयम् । तेन सामान्यतो ज्वरः उत्स्यत्स्यति भविष्यति श्रमादयः पूर्वमेव भवन्तीत्यर्थः । उत्स्यत्स्यतीत्यात्मनेपदिनोऽपि तङ्भाव आर्षत्वात् । विशेषात् उच्यते । समीरणात् ज्वरे उत्स्यत्स्यति अतिशयेन जृम्भा भवति । पित्तज्वरे उत्स्यत्स्यति अत्यर्थनयनयोर्द्वेषो भवति । कफज्वरे उत्स्यत्स्यति अत्यर्थेन नाद्याभिनन्दनम् अद्याकाङ्क्षा न भवति । जृम्भादयो भवन्ति यतः सामान्यधर्माक्रान्तो विशिष्टोधर्मोभवति । इदानीं पूर्वरूपमाह,

"रूपैरन्यतराभ्यां तु संसृष्टैर्द्वन्द्वजं विदुः । अन्यतराभ्यां जृम्भानेत्रदाहाभ्याम् । जृम्भाहृद्रुचिभ्यां नेत्रदाहाहृद्रुचिभ्यां वा संसृष्टैरूपैः श्रमादिभिः द्वन्द्वजं द्विदोषजं पूर्वरूपं विदुः । त्रिदोषजपूर्वरूपमाह, "सर्वलिङ्गसमावायः सर्वदोषप्रकोपजे । सर्वरूपजे सर्वरूपे सर्वलिङ्गसमवायः । अतिशयितजृम्भानेत्रदाहाहृद्रुचिसहितानां श्रमादीनां समवायो भवति । अथ ज्वरस्य सामान्यलक्षणमाह, "स्वेदावरोधः सन्तापः सर्वाङ्गग्रहणं तथा । युगपद्यत्र रोगे तु स ज्वरो व्यपदिश्यते । तापः इति यक्ष्मे सन्तापाभिधानं देहेन्द्रियमनसां सन्तापबोधनार्थम् । यत उक्तं चरकेण ज्वरविशेषणम् । "देहेन्द्रियमनस्तापीति"। तत्र देहसन्तापो देहेन्द्रियोष्मता । इन्द्रियसन्ताप इन्द्रियदौर्बल्यम् । यत उक्तम् "इन्द्रियाणां तु दौर्बल्यं यत्र सन्तापलक्षणम् । वैचित्त्यमरतिर्ग्लानिर्मनःसन्तापलक्षणम् इति"। सर्वाङ्गग्रहणम् सर्वेषामङ्गानां वेदनया ग्रहणं सर्वाण्यङ्गानि सम्मर्दनष्टहीतानीव वा भवन्ति । युगपदिति । मिलितमेतल्लक्षणम् । प्रत्येकस्य व्यभिचारात् । यथा स्वेदावरोधः कुत्रपूर्वरूपे । तथा सन्तापो दाहव्याधौ । तथा सर्वाङ्गग्रहणं सर्वाङ्गरोगाख्यवातव्याधौ । प्रस्वेदानिर्गमनपक्षे कारणमाह । "रूक्षणद्धि चाप्यपां धातुं यस्मात्तस्माज्ज्वरातुरः । भवत्यत्यूष्मगात्रश्च क्षिप्यते न च सर्वशः । तस्माज्ज्वरोऽत्र भवति सर्वशः क्षिप्यते न च" ।

सुश्रुते उत्तरतन्त्रे च तत्र विशेष उक्तो यथा

"ऋते देवमनुष्येभ्यो नान्यो विप्रकृते तु तम् । कर्मणा लभते यस्माद्देवत्वं मानुषादपि । पुनश्चैव च्युतः स्वर्गान्मानुष्यमनुवर्त्तते । तस्मात्ते देवभावेन सदृशे मानुषा ज्वरम् । शेषाः सर्वे विपद्यन्ते तैर्यग्योना ज्वरार्दिताः । स्वेदावरोधः सन्तापः सर्वाङ्गग्रहणं तथा । विकारा युगपद्यस्मिन् ज्वरः स परिकीर्तितः । दोषैः पृथक् समस्तैश्च द्वन्द्वैरागन्तुरेव च । अनेककारणोत्पन्नः कृतस्वष्टविधो ज्वरः । दोषाः प्रकुपिताः स्वेषु कालेषु स्वैः प्रकोपनैः । व्याप्य देहमशेषेण ज्वरमापादयन्ति हि । दुष्टाः स्वहेतुभिर्दोषाः प्राग्व्याधेराशयमूष्मणा । सहिता रसमागत्य रसस्रोतोवहिष्णाम् । स्रोतसां मार्गमावृत्य मन्दीकृत्य कृताग्नयम् । निरस्य वह्निरूष्माणं पक्तिस्थानाच्च केवलम् । शरीरं समभिव्याप्य स्वकालेषु ज्वरागमम् । जनयन्त्यथ दह्यन्ते स्रवन्ते च त्वगादिषु । मिथ्यातियुक्तैरपि च

क्षेत्रादौः कर्मभिर्ब्धाम्। विविधादभिघाताच्च रोगोत्थानात् प्रपाकतः। श्रमात् क्षयादजीर्णाच्च विषात् सात्म्यपुर्यायात्। ओषधीपुष्पगन्धाच्च शोकाच्चलपीड़नात्। अभिचाराभिशापाभ्यां मनोभूताभिशङ्कया। स्त्रीणामपप्रजातानां प्रजातानां तथाऽहितैः। सन्यावतरणे चैव ज्वरो देहैः प्रवर्त्तते। तैर्वेगवद्भिर्बहुधा सप्तद्वारैर्विमार्गकैः। विक्षिप्यमाणोऽन्तरग्निर्भवत्याशु बहिश्चरः। रुणद्धि चाप्यपान्वातं यस्मात्तस्माज्वरातुरः। भवत्यत्युष्णगात्रश्च न च स्विद्यति सर्वशः। श्रमोऽरतिर्विवर्णत्वं वैरस्यं नयनस्रवः। इच्छाद्वेषौ सदाऽपि शीतवाततापादिषु। जृम्भाङ्गमर्दौ गुरुता रोमहर्षोऽरुचिस्तमः। अप्रहर्षश्च शीतस्य भवत्युत्पत्स्यति ज्वरे। सामान्यतो विशेषात्तु जृम्भात्यर्थं समीरणात्। पित्तात्क्षयतृदोदाहः कफान्नाभिनन्दनम्। सर्वलिङ्गसमायायः सर्वदोषप्रकोपजे। द्वयोर्द्वयोस्तु रूपेण संसृष्टं द्वन्द्वजं विदुः। वेपथुर्विषमो वेगः कण्ठौष्ठमुखशोषणम्। निद्रानाशः क्लमः स्तम्भो गात्राणां रौक्ष्यमेव च। शिरोहृद्गात्रसन्धिग्रैरस्यं बहुविधं कता। जृम्भाध्मानं तथा शूलं भवत्यनिलजे ज्वरे। वेगस्तीक्ष्णोऽतिसारश्च निद्रात्वं तृड् वमिः। कण्ठौष्ठमुखनासानां पाकः स्वेदश्च जायते। प्रलापः कटुता वक्त्रे मूर्च्छा दाहो मदस्तृषा। पीतविण्मूत्रनेत्रत्वं पैत्तिके भ्रम एव च। गौरवं शीतसुखेच्छा रोमहर्षोऽतिनिद्रता। श्लेष्तारोधो मुखत्वं प्रसेकोऽमधुरास्यता। नात्युष्णगात्रता छर्दिरङ्गसादोऽविपाकता। प्रतिश्यायोऽरुचिः कासः कफजेऽजीर्णता। निद्रानाशो भ्रमः कासस्तन्द्रा सुप्ताङ्गता रुचिः। तृष्णा मोहो मदः स्तम्भो दाहः शीतं हृदि व्यथा। पक्षिरिरेष दोषाणामुन्नादः श्यावदन्नता। रसना परुषा कृष्णा सन्निमूर्ष्मस्विजा रुजः। निर्भुग्नकुक्षे नेत्रे कर्णौ शब्दासहिष्णुतौ। प्रलापः श्लेष्मणां पाकः कूजनं चेतनाच्युतिः। स्वेदमूत्रपुरीषाणामल्पशः सुचिरात् स्रुतिः। सर्वजे सर्वलिङ्गानि विशेषाद्वातजे त्वरुक्। नात्युष्णशीतोऽल्पसंज्ञो म्लानप्रेक्षी हतस्वरः। खरजिह्वः शुष्ककण्ठः स्वेदविण्मूत्रवर्जितः। सासनिर्भुग्नहृदयो भक्तद्वेषी हतप्रभः। श्वसन् निपतितः शेते प्रलापोपद्रवैर्युतः। तमभिन्यासमित्याहुर्हतौजसमथापरे। सन्निपातज्वरं कृच्छ्रमसाध्यमपरे विदुः। निद्रोपेतमभिन्यासं क्षीणमेनं हतौजसम्। संन्यस्तगात्रं संन्यासं विद्यात्सर्वात्मके ज्वरे। ओजोविस्रंसते यस्य पित्तानिलसमुच्छ्रयात्। स गात्रसन्धिशीताभ्यां शयने स्रादचेतनः। अपि जाग्रत् स्वपन् जन्तुस्तन्द्रानुद्य प्रलापवान्। संवृष्टरोमा सस्राक्षो मन्दसन्तापवेदनः। ओजोनिरोधजं तस्य जानीयात् कुशलो भिषक्। सप्तमे दिवसे प्राप्ते दशमे द्वादशेऽपि वा। पुनर्घोरतरो भूत्वा प्रशमं याति हन्ति वा। द्विदोषोच्छ्रायनिष्क्रास्तु हन्त्रजास्त्रिविधाः स्मृताः। जृम्भाध्मानमदोत्क्लम्पपर्वभेदपरिक्षयाः। तृट्प्रलापाभितापाः स्युर्ज्वरे मारुतपैत्तिके। श्लेष्मकासकफोत्क्लेशशीतवेपथुपीनसाः। गौरवारुचिविष्टम्भा वातश्लेष्मसमुद्भवे। शीतदाहारुचिस्तम्भक्लेदमोहमदभ्रमाः। कासाङ्गसादहृल्लासा भवन्ति कफपैत्तिके। आमाशयं ज्वरसुखानां मिथ्याहारविहारिणाम्। दोषः क्षुब्धोऽपि संशुद्धो देहिनामनिलेरितः। सन्तताद्येष्वहःप्राप्तं चातुर्थीकं सप्तधातुगान्। कफस्थानविभागेन यथासङ्ख्यं करोति हि। कफोरःकण्ठहृत्तालुस्थानात् स्थानं प्रपद्यते। ततश्चामाशयं प्राप्य घोरं कुर्याज्ज्वरं नृणाम्। तथा प्रलेपको ज्ञेयः शीर्षण्यां प्राणनाशनः। दुश्चिकित्स्यतमो मन्दः सुकष्टो धातुशोषकृत्। कफस्थानेषु वा दोषस्तिष्ठन् द्वित्रिचतुर्षु वा। विपर्ययाख्यान् कुरुते विषमान् कृच्छ्रसाधनान्। परो हेतुः स्वभावो वा विषमे कैश्चिदीरितः। आगन्तुश्चान्यदोषो हि प्रायशो विषमज्वरे। वाताधिक्यात् प्रवदन्ति तज्ज्ञास्तृतीयकस्यापि चतुर्थकस्य। औपाश्लेष्मके मद्यसमुद्भवे च हेतुं ज्वरे पित्तकृतं वदन्ति। प्रलेपकं वातबलासकस्य कफाधिक्येन वदन्ति तज्ज्ञाः। मूर्च्छानुबन्धा विषमज्वरा ये प्रायेण ते द्वन्द्वसमुत्थितास्तु। त्वक्स्थौ श्लेष्मानिलौ शीतमादौ जनयतो ज्वरे। तयोः प्रधानयोः पित्तमन्ते दाहं करोति च। करोत्यादौ तथा पित्तं त्वक्स्थं दाहमतीव च। तस्मिन् प्रशान्ते त्वितरौ कुरुतः शीतमन्ततः। द्वावेतौ दाहशीतादौ ज्वरौ संसर्गजौ स्मृतौ। दाहपूर्वस्तयोः कष्टः कृच्छ्रसाध्यतमः स्मृतः। प्रसक्तव्याभिघातोत्थवेदनाप्रभवस्तु यः। रात्र्यह्नोः षट्सु कालेषु कीर्त्तितेषु यथा पुरा। प्रसह्य विषमोऽभ्येति मानवं बहुधा ज्वरः। स चापि विषमो देहं न कदाचिदिहत्यति। ग्लानिगौरवकार्श्येभ्यः स यस्माच्च प्रमुच्यते। वेगे तु समतिक्रान्ते गतोऽयमिति लक्ष्यते। धात्वन्तरस्थो लीनत्वान्न सोच्छ्रायादवलभ्यते।

अल्पदोषेऽनलः क्षीणः क्षीणेऽन्न इवानलः। दोषोऽ-
ल्पोऽनिलसंभूतो ज्वरोत्सृष्टस्य वा पुनः। धातुमन्यतमं
प्राप्य करोति विषमज्वरम्। सन्तं रसरक्तस्थः सोऽन्येद्युः
पित्रिताश्रितः। मेदोगतस्तृतीयेऽह्नि त्वस्थिमज्जगतः
पुनः। कुर्यात्सातुर्थकं घोरमनकं रोगसङ्करम्। केचिद्
भूताभिषङ्गोत्थं ब्रुवते विषमज्वरम्। सप्ताहं वा दशाहं
वा द्वादशाहमथापि वा। सन्तत्या योऽविसर्गी स्यात्
सततः स निगद्यते। अहोरात्रे सततको द्वौ कालावनु-
वर्तते। अन्येद्युष्कस्त्वहोरात्रादेककालं प्रवर्तते। तृतीय-
कस्तृतीयेऽह्नि चतुर्थेऽह्नि चतुर्थकः। वातेनोद्भूयमानस्तु
यथा पूर्णेन सागरः। वातेनोदीरितास्तद्वद्दोषाः कुर्वन्ति वै
ज्वरान्। यथा वेगागमे वेलां लङ्घयित्वा महोदधेः।
वेगक्षयात्तदेवाम्भस्तत्रैवान्तर्निधीयते। दोषवेगोदये
तद्वदुदीर्णेन ज्वरोऽस्रवै। वेगक्षयात्प्रशाम्येत यथाम्भः
सागरे तथा। विविधेनाभिघातेन ज्वरो यः संप्रवर्तते।
यथा दोषप्रकोपस्तु तथा सन्तत एव तं ज्वरम्। क्षयादास्रता
विक्षते दाहातीसारकृद्व्रणात्। अभक्तरुक्पिपासा
च तोदो मूर्च्छा बलक्षयः। क्षोभोऽन्नजे मूर्च्छा शिरो-
रुक्क्षवथुस्तथा। कामजे चित्तविभ्रंशस्तन्द्रालस्यमभक्त-
रुक्। हृदये वेदना चापि गात्रस्य परिसुप्तता। भयात् प्रलापः शोकाच्च भवेत्कोपाच्च वेपथुः। अभिचारा-
भिशापाभ्यां मोहस्तृष्णाभिजायते। भूताभिषङ्गाद्धु-
ङ्कारहास्यरुदितनरोदनम्। श्रमजव्याधिघातेभ्यो देहिनां
कुपितोऽनिलः। पूरयित्वाखिलं देहं ज्वरमापादयेद्बलम्। रोगाणां तु सप्तत्वानाद्विदाहागन्तुतस्तथा।
ज्वरोऽपरः सम्भवति तैस्तैरन्यैश्च हेतुभिः। दोषाणां स
तु लिङ्गानि कदाचिन्नातिवर्तते। गम्भीरस्तु ज्वरो ज्ञेयो
ज्ञानदौर्बल्येन तृष्णया। ज्ञानक्षयेण चात्यर्थं श्वास-
कासोद्भमेन च। हृतप्रभेन्द्रियं श्यामं दुरात्मानमुप-
द्रुतम्। गम्भीरतीव्रवेगार्तं ज्वरितं परिवर्जयेत्।
क्षीणमध्याधिकैर्दोषैस्त्रिसप्तदशाह्निकः। ज्वरवेगो भवे-
त्तीव्रो यथापूर्वं सुखक्रियः। इति ज्वराः समाख्याता
कर्मदानीं प्रवक्ष्यते"।

ज्वरभेदे क्रियाभेदः सुश्रु० उ० त० उक्तो यथा
"ज्वरस्य पूर्वरूपेषु वर्त्तमानेषु बुद्धिमान्। पाययेत घृतं
स्वच्छं ततः स लभते सुखम्। विधिर्मारुतजेष्वेष
पैत्तिकेषु विरेचनम्। मृदु प्रच्छर्दनं तद्वत्कफजेषु विधी-
यते। सर्वं द्विदोषजेष्वेवं यथादोषं विकल्पयेत्।
अल्पेऽनीयोऽशोध्यत्व संयोज्यो लङ्घनादिना। रूप-
प्राप्त्यपयोर्विद्यात्तानात्वं वह्निधूमवत्। प्रच्छर्दनेषु
हितमेकान्तेनापतर्पणम्। आमाशयस्थे दोषे तु सोत्-
क्लेशे वमनं परम्। आनद्धः स्तिमितैर्दोषैर्व्याप्तं कोष्ठ-
मातुरः। कुर्यादनशनं तावत्ततः संसर्गमाचरेत्। न
लङ्घनेनास्रजे क्षयजे मानसे तथा। अल्पत्वादपि
ये पूर्वं द्विप्रकीये प्रकीर्त्तिताः। अनवस्थितदोषाग्नेर्लङ्-
घनं दोषपाचनम्। ज्वरघ्नं दीपनं कार्श्यारुचिलाघव-
कारकम्। षष्ठमारुतविण्मूत्र क्षुत्पिपासाऽरुङ्
क्षयम्। प्रसन्नात्रेन्द्रियं शान्तं नरं विद्यात् सुलङ्घितम्।
बलक्षयस्तृषाशोषस्तन्द्रानिद्राध्मशङ्कया। उपद्रवाश्च
श्वासाद्याः सम्भवन्त्यनिलङ्घनात्। दीपनं कफविच्छेदि
पित्तवातानुलोमनम्। कफवातज्वरार्त्तेभ्यो हितमुष्णाम्बु
तृट्क्षिदम्। तद्धि मार्दवजद्दोषस्रोतसां शीतमन्यथा।
सेव्यमानेन तोयेन ज्वरः शीतेन वर्द्धते। पित्तमद्यविषो-
ल्वेषु शीतलं तिक्तकैः हृतम्। शार्ङ्गेयनागरोशीरपर्प-
टोदीच्यचन्दनैः। दीपनी पाचनी लघ्वी ज्वरार्त्तानां
ज्वरापहा। अन्नकाले हिता पेया यथास्वं साधनैः
कृता। बद्धदोषस्य मन्दाग्नेः सप्तरात्रात्परं ज्वरे।
लङ्घनान्ने यवागूभिर्यदा दोषो न पच्यते। तदा तं सुख-
वैरसतृष्णारोचकनाशनैः। कषायैः पाचनैर्हृद्यैर्युक्तैः
सप्तपाचरेत्। पञ्चमूलीकषायन्तु पाचनं पवनज्वरे।
सशौण्ठं पैत्तिके सुस्तकटुकेन्द्रयवैः कृतम्। पिप्पल्यादि-
कषायन्तु कफजे परिपाचनम्। हृल्लासेषु तु संसृष्टं
दद्यादन्नं विवर्जयेत्। पीताम्बुर्लङ्घितोभुक्तो जीर्णो
क्षीणः पिपासितः। हृदौ ज्वरे लघौ देहे प्रचलेषु
मलेषु च। पक्वं दोषं विजानीयाज्ज्वरे देयं तदौषधम्।
दोषप्रकृतिवैकृत्यादेषां पक्वत्वजम्। हृदयोद्वेष्टनं
तन्द्रालालास्रुतिररोचकम्। दोषप्रवृत्तिरालस्यं
विबन्धो वह्निमूढता। गुरूदरत्वमस्थे दोषे न पक्तिः श्रम-
तोऽरतिः। स्रोतः स्तम्भो गुरुत्वस्य गात्राणां वह्निमा-
र्दवम्। सुखस्याशुद्धिरग्लानिः प्रसक्तौ बलवान् ज्वरः।
लिङ्गैरेभिर्विजानीयाज्ज्वरमामं विचक्षणः। सप्तरात्रात्परं
केचिन्नान्ये देयमौषधम्। दशरात्रात्परं केचिद्दातव्य-
मिति निश्चिताः। पैत्तिके वा ज्वरे देयमल्पकालसम-
स्थिते। चिरज्वरितस्यापि देयं स्याद्दोषपाकतः। मेदजं
श्लेष्मदोषस्य भूयो ज्वलयति ज्वरम्। दोषं शमनीयन्तु
करोति विषमज्वरम्। ज्वलमानं ज्वरोत्क्लिष्टमपेक्षेत मलं

यदा । अतिप्रवर्त्तमानञ्च साधयेदतिसारवत् । यदा कोष्ठानुगाः प्रकाविबद्धाः स्रोतसां मलाः । अचिरज्वरितस्यापि तदा दद्याद्विरेचनम् । पक्वोष्मनिर्हृतोदोषो देहे लिङ्गे मङ्गल्यम् । विषमं वा ज्वरं कुर्याद्बलव्यापदमेव च । तस्माद्विरेकं कार्य्यं दोषाणां वमनादिभिः । प्राक्कर्म्म वमनं चास्य कार्य्यमास्थापनं तथा । विरेचनं तथा कुर्याच्छिरसश्च विरेचनम् । क्रमेण बलिने देयं वमनं श्लैष्मिके ज्वरे । पित्तप्राये विरेकस्तु कार्य्यः प्रथिविलाशये । सरजेऽनिलजे कार्य्यं सोदावर्त्ते निरूहणम् । कटीपृष्ठग्रहार्त्तस्य दीप्ताग्नेरनुवासनम् । शिरोगौरवशूलघ्नमिन्द्रियप्रतिबोधनम् । कफाभिपन्ने शिरसि कार्य्यं मूर्द्धविरेचनम् । दुर्बलस्य समाघ्रातसुदरं सरजं दिशेत् । दारुहैमवतीकुष्ठशताह्वाश्विङ्गुवैल्वजैः । अक्षपिष्टैः सुखोष्णैश्च पवने तूर्द्धमागते । रुद्रमूलपुरीषाय गुदे वर्त्तिं निधापयेत् । पिप्पलीपिप्पलीमूलयवानीचव्यसाधिताम् । पाययेत यवागूं वा मारुताद्यनुलोमनीम् । गुल्मशोफोभयतो यस्य ज्वरः शान्तिं न गच्छति । सशेषदोषरूक्षस्य तस्य तं सर्पिषा जयेत् । ज्वरञ्चैवालदोषञ्च शमनीयैरुपाचरेत् । उपवासैर्बलस्थन्तु ज्वरे सन्तर्पणोत्थिते । क्षिप्रां यवागूं मन्दाग्निं तृषार्त्तं पाययेन्नरम् । तृट्छर्दिदाहघर्मार्त्तं मद्यं लाजतर्पणम् । सक्षौद्रमम्लसा पञ्चाक्षीद्रे यूषरसौदनम् । उपवासश्रमक्षते क्षीणे वाताधिके ज्वरे । दीप्ताग्निं भोजयेत्प्राज्ञो नरं मांसरसौदनम् । सद्यूषौदनञ्चापि क्षितं कफरसत्थिते । य एव सितया युक्तः शीतः पित्तज्वरे क्षितः । दाडिमामलसङ्घानां यूषश्चानिलपैत्तिके । क्षुद्रमूलकयूषेण भोजयेत्कफवातिके । पटोलनिम्बयूषस्तु पथ्यः पित्तकफात्मके । दाहच्छर्दियुतं लाजं निरन्नं तृष्णयार्दितम् । सिताक्षौद्रयुतं लाजतर्पणं पाययेत च । कफपित्तपरीतस्य क्षीणेऽरुक्पित्तनक्षया । मद्यानित्यस्य न क्षिता यवागूस्तमुपाचरेत् । यूषैरम्लैरनम्लैर्वा लाजैर्वा रसैः क्षितैः । मद्यं पुराणं मन्दाग्नेर्यवाक्षोपक्षितं क्षितम् । सव्योषं वितरेत्तक्रं कफारोचकपीडिते । क्षयोऽल्पदोषो दीनश्च नरो जीर्णज्वरार्दितः । विबद्धः क्षुद्दोषश्च रूक्षः पित्तानिलज्वरी । पिपासार्त्तः सदाहो वा पयसा स सुखी भवेत् । तदेव तु पयः पीतं तरुणे क्षिप्रि मानवम् । सर्वज्वरेषु सप्ताहं मात्रावद्भोजनं क्षितम् । वेगापाये ऽन्यथा तद्धि ज्वरवेगाभिवर्द्धनम् । ज्वरितो क्षितमश्नीयाद्यद्यस्यारुचिर्भवेत् । अन्नकाले क्षुधभुञ्जानः क्षीयते म्रियतेऽथ वा । युर्वभिष्यन्द्यकाले च ज्वरी नाद्यात्कथञ्चन । न तु तस्याक्षितं भुक्तमायुषे वा सुखाय वा । सततं विषमं वापि क्षीणस्य सुचिरोत्थितम् । ज्वरं संभोजनैः पथ्यैर्लघुभिः समुपाचरेत् । सुद्राञ्शूरांश्चणकान् कुलत्थान् समकुष्ठकान् । आहारकाले यूषार्थं ज्वरिताय प्रदापयेत् । लावान् कपिञ्जलानेणान् पृषतान् शरभान् शशान् । कालपुच्छान् कुरङ्गांश्च तथैव मृगमातृकान् । मांसार्थे मांसलाङ्गानां ज्वरितानां प्रदापयेत् । सारसक्रौञ्चशिखिनः कुक्कुटांस्तित्तिरींस्तथा । गुरुष्वत्यर्थं शंसन्ति ज्वरे केचिच्चिकित्सकाः । ज्वरितानां प्रकोपन्तु यदा याति समीरणः । तदैतेऽपि हि शस्यन्ते मात्राकालोपपादिताः । परिषेकावगाहांश्च स्नेहान् संशोधनानि च । स्नानाभ्यङ्गदिवास्वप्नगीतव्यायामयोषितः । न भजेत ज्वरोत्कृष्टो यावन्न बलवान् भवेत् । त्यक्तस्यापि ज्वरेणाशु दुर्बलस्याक्षितैर्नरः । प्रत्यापन्नो दहेद्देहं शुष्कं दवमिवानलः । तस्मात्कार्य्यः परीहारो ज्वरमुक्तेन जन्तुना । यावन्न प्रकृतिस्थः स्याद्दोषतः प्राणतस्तथा । ज्वरे प्रमोक्षो भवति स्वल्पैरप्यवचेष्टितैः । निरन्नं भोजयेत् तस्मान्मूत्रोत्सर्गौ च कारयेत् । अरोचके गात्रसादे वैवर्ण्येऽङ्गमर्दादिषु । शान्तज्वरोऽपि शोध्यः स्यादनुबन्धभयाद्भिषक् । न जातु तर्पयेत् प्राज्ञः सहसा ज्वरकर्शितम् । तेन सन्दूषितो ह्यस्य पुनरेव भवेज्ज्वरः । चिकित्सेच्च ज्वरान् सर्वांश्चिभित्तानां विपर्ययैः । श्रमक्षयाभिघातोत्थे मूलव्याधिमुपाचरेत् । स्त्रीणामप्रजातानां सन्यावतरुणे च यः । तत्र संशमनं कुर्याद्यथादोषं विधानवित्" ।

अत्र विशेषो गरुड़ पुरा० १५२ अ० उक्तो यथा । "ज्वरोरोगपतिः पापमा मृत्युराजोऽयनोऽन्तकः । क्रोधाद्यश्चाधरध्वंसी रुद्रोर्द्धनयनोद्भवः । तत्सन्तापो भैरवयः सन्तापात्मोपचारजः । विविधैर्नामभिः क्रूरो नानायोनिषु वर्त्तते । पाकलो गजेष्वभितापो वाजिष्वर्कः कुक्कुरेषु । ऐन्द्रमदो जलदेऽप्सु नीलिका ज्योतिरौषधिषु भूम्यामूषरो नाम । कूष्माण्डस्फर्दनं कासः कास्यः शैल्यं खरादिषु । चक्रेषु शीतपिड़कामात्रो दर्दः कफोद्भवे । काले यथास्वं सर्वेषां प्रवृत्तिर्द्विरेव या । निदानोक्तानुपशयो विपरीतोपशायिता । ज्वरश्चिरविपाकश्च क्षमामात्रस्थमेव च । कूष्माण्डश्च विपा-

कण्ठ तन्द्राङ्गानाम् मेव च। वह्निविसर्गविलया दोषा-
मप्रवर्तनम्। लालाप्रसेको हृल्लासः क्षुन्नाशो रसदं
सुखम्। यच्च गुरुत्वञ्च गात्राणां बद्धमूलता। न
विजीर्णा न वा ग्लानिर्ज्वरस्यास्य लक्षणम्। क्षुत्-
सामता लघुत्वञ्च गात्राणां ज्वरमार्दवम्। दोषप्रवृत्ति-
रष्टाहो निरामज्वरलक्षणम्। यथास्वलिङ्गं संसर्गे ज्व-
रसंसर्गजोऽपि वा। शिरोऽर्तिमूर्च्छावमिदेहदाहकण्ठास्य
शोषारुचिपर्वभेदाः। उद्विष्टता संभ्रमरोमहर्षा जृम्भाति
वाक्त्वं पवनात् स पित्तात्। तापश्चान्यरुचिपर्वशिरो-
रुक् पीनसस्वसनकासविबन्धाः। शीतजाड्यतिमिर-
भ्रमितन्द्राः श्लेष्मवातजनितज्वरलिङ्गम्। शीतस्य
स्वेददाहव्यत्यया तृष्णाकासः श्लेष्मपित्तप्रवृत्तिः।
मोहस्तन्द्रालिप्रतिश्यायता च श्लेष्यं रूपं श्लेष्मपित्त-
ज्वरस्य। सर्वजो लक्षणैः सर्वैर्द्वाहोऽत्र च सङ्कीर्णः।
तद्रात्रौ नैव निद्रा दिवा जागरणं निशि। सदा वा
नैव वा निद्रा मुखे दोऽति नैव वा। शीतनर्तन-
हृल्लासादिप्रकृतेश्चाप्रवर्तनम्। सास्रुषी कलुषे रक्ते
मन्ये लुलितपक्ष्मणी। अक्षिणी पिण्डिका पार्श्वमूर्ध-
पर्व्वास्थिरुग्भ्रमः। सक्थनौ सरुजौ कर्णौ मुखे दोऽति
नैव वा। परिदग्धा खरा जिह्वा गुरुसक्ताङ्गविह्वला।
रक्तपित्तकफे जिह्वा लोचने शिरसोऽतिरुट्। कीटानां
श्यावरक्तानां मण्डलानाञ्च दर्शनम्। हृद्व्यथा मलसंसर्गः
प्रवृत्तिरल्पशोऽति वा। स्निग्धास्रुता बलभ्रंशः स्वरसादः
प्रलापिता। दोषपाकश्चिरात्तन्द्रा प्रततं कण्ठकूजनम्।
सन्निपातमभिन्यासं तं ब्रूयाच्च हृतौजसम्। वायुना
कफरुद्धेन पित्तमन्तः सुपीड़ितम्। व्यापित्वाच्च
सौक्ष्म्याच्च वह्निमार्गं प्रपद्यते। तेन हारिद्रनेत्रत्वं
सन्निपातोद्भवे ज्वरे। दोषे विद्धे नष्टेऽग्नौ सर्व-
संपूर्णलक्षणः। असाध्यः सोऽन्यथा कृच्छ्रो भवे-
द्वैकल्यदोऽपि वा। अन्यत्र सन्निपातोक्तो यत्र
पित्तं पृथक् स्थितम्। त्वचि कोष्ठे च वा दाहं
विदधाति पुरोऽथ वा। तद्वद्वातकफौ शीतं दाहादि-
र्दुस्तरत्वयोः। शीतादौ तत्र पित्तेन कफे स्तब्धित-
श्लोषिते। शीते शान्तेऽष्टके मूर्च्छा मदस्तृष्णा च
जायते। दाहादौ पुनरन्ने क्षुत्तन्द्रास्वेदविक्रमाः।
आगन्तुरभिघाताभिषङ्गशापाभिचारतः। चतुर्धा स
क्षतच्छेदो दाहाद्यैरभिघातजः। श्रमाच्च तत्क्षिप्तं पवनः
प्रायो रक्तं प्रदूषयन्। सद्यश्चाशोकवैवर्ण्यं सरुजं
कुरुते ज्वरम्। यश्चावेगौषधिविषक्रोधभीशोककामजः।
अभिघाद्दुःखशय्यासनकक्षाक्षासरोदने। क्रोध-
शी मज्जजे मूर्च्छां शिरोरुग्वमथुः क्षयः। विषात् मूर्च्छा-
तिसाराक्षिस्रावता दाहहृद्भ्रमः। क्रोधात् कम्पः
शिरोरुक् च प्रलापो भयशोकजे। कामादुरुभयोरु-
चिर्हृद्रोहो ह्रीनिद्राधीधृतिक्षयः। यश्चादौ सन्नि-
पातस्य रूपादौ मरुतस्त्रयोः। कोपः कोपेऽपि पित्तस्य
यौ तु शापाभिचारजौ। सन्निपातज्वरौ घोरौ तावु-
क्तावतौ मतौ। तत्राभिचारिकैर्मन्त्रैर्हूयमानस्य तप्यते। पूर्वं चेतस्ततो देहस्ततो विस्फोटतृड्भ्रमैः।
सदाहमूर्च्छैर्यस्य प्रबलं वर्त्तते ज्वरः। इति ज्वरो-
ऽष्टधा दृष्टः समासाद्विविधस्तु सः। शारीरो मानसः
सौम्यसौम्योष्णोऽन्तर्बहिराश्रयः। प्राकृतो वैकृतः साध्यो
ऽसाध्यः सामो निरामकः। पूर्वं शरीरे शारीरे तापो
मनसि मानसे। पवने योगवाहित्वाच्छीतं श्लेष्मयुते
भवेत्। दाहः पित्तयुते मिश्रं मिश्रेऽल्पःसंक्षये पुनः।
ज्वरोऽधिकं विकाराः स्युरन्नःक्षोभो मलग्रहः।
वह्निरेव वह्निवेगे तापोऽपि च सुसाधितः। वर्षा
शरद्वसन्तेषु वातादौ प्राकृतः क्रमात्। वैकृतोऽन्यः
सदुः साध्यः प्रायश्च प्राकृतोऽनिलात्। वर्षासु मारुतो
दुष्टः पित्तश्लेष्मान्वितो ज्वरम्। कुर्यात् पित्तञ्च शरदि
तस्य चानुबलः कफः। तत् प्रकृत्या निसर्गाच्च तत्र
नानशनाद्भयम्। कफो यस्मे तमपि वातपित्तं भवेत्तु।
बलवत्सल्पदोषेषु ज्वरः साध्योऽनुषङ्गवः। सर्वथाविकृति
स्थाने प्रागसाध्य उदाहृतः। ज्वरोपद्रवतीक्ष्णत्वमग्लानि-
र्बद्धमूलता। न प्रवृत्तिर्न विजीर्णा न क्षुत् सामज्वरा-
कृतिः। ज्वरवेगेऽधिका तृष्णा प्रलापः श्वसनं भ्रमः।
मलप्रवृत्तिरत्क्लेशः पच्यमानस्य लक्षणम्। जीर्णता-
मविपर्य्यासात् सप्रभावत्व लङ्घनात्। ज्वरः पञ्चविधः
प्रोक्तोमलकालबलाबलात्। प्रायशः सन्निपातेन भूयसा-
ऽभ्युपदस्यते। सन्ततः सततेऽन्येद्युस्तृतीयकचतुर्थकौ।
धातुमूलगताद्यास्थिस्नोतसाश्रयिणो मलाः। तापयन्त-
स्तनूं सर्वां तुल्यदष्टादिवर्द्धिताः। बलिनो गुरवस्तद्व-
द्विषेवेण रसान्विताः। सततं निष्प्रतिद्वन्द्वा ज्वरं कुर्युः
सदुःसहम्। मलं ज्वरोष्मा धातून् वा स शीघ्रं क्षपये-
त्ततः। सर्वाकाररसादीनां शुद्धाऽशुद्धापि वा क्रमात्।
वातपित्तकफैः सप्तदशद्वादशवासरान्। प्रायेऽनुयाति
मर्य्यादां मोक्षाय च वधाय च। इत्यस्मिन्नेवस्य मतं

हारीतस्य पुनः स्मृतिः। द्विगुणा सप्तमी (चतुर्दशी) या च नवम्येकादशी तथा। एषा त्रिदोषमर्थादा मोक्षाय च वधाय च। शुक्लशुक्लौ ज्वरः कालं दीर्घमत्र वर्तते। ऋणानां व्याधियुक्तानां मिथ्याहारादिसेविनाम्। अल्पोऽपि दोषो दुष्ट्वादेर्बाध्यतमतो बलम्। स प्रत्यनीको विषमं यस्माद्दृढत्वान्वितः। सोऽरिपक्षो ज्वरं कुर्याद्विषमक्षयवृद्धिभाग्। दोषः प्रवर्तते तेषां स्वे काले ज्वरयन् बली। निवर्तते पुनश्चैव प्रत्यनीकबलावहः। क्षीणदोषे ज्वरः सूक्ष्मो रसादिष्वेव लीयते। क्षीनत्वात् कार्श्यवैवर्ण्यजाड्यादीनादधाति सः। बाहुल्य विदताम्लत्वात् स्रोतसां रसवाहिनाम्। आशु सर्वस्य वपुषो व्याप्निर्दोषेण जायते। सन्ततः सततस्तेन विपरीतो विपर्ययात्। विषमो विषमारम्भः क्षपाकालेन सङ्गवान्। दोषो रक्तादयः प्रायः करोति सन्ततं ज्वरम्। अहोरात्रस्य सन्धिः स्यात् सदन्येद्युराश्रितः। तस्मिन्नांसवहा नाड़ी मेदोनाड़ी तृतीयके। पाक्षीपित्तानिलात् मूर्द्धस्त्रिकस्य कफपित्ततः। स पृथक्त्वानिलकफात् स चैकाह्नान्तरः स्मृतः। चतुर्थको मलैर्मेदोमज्जास्थ्यन्यतरस्थिते। मज्जामूलरैत्यपरः प्रभावमतदर्शयेत्। द्विविधं कफेन जङ्घाभ्यां सपूर्वं शिरसोऽनिलात्। अस्थिमज्जोरूपगते चातुर्थकविपर्ययः। त्रिधा त्रयहं ज्वरयति दिनमेकन्तु मुञ्चति। बलाबलेन दोषाणामनुचेष्टादिजन्मनाम्। पक्षानामविपर्यासात् सप्तरात्रन्तु लङ्घयेत्। ज्वरः स्यात् मनसस्तद्वत् कर्मणश्च तदा तदा। गम्भीरधातुचारित्वात् सन्निपातेन सम्भवात्। तल्लो भूयिष्ठदोषाणां दुश्चिकित्स्यश्चतुर्थकः। सूक्ष्मात् सूक्ष्मतराख्येषु दूराद्दूरतरेषु च। दोषो रक्तादिमार्गेषु शनैरल्पशिरेषु यत्। याति देहस्य नाशेषं सन्तापादीन् करोत्यतः। क्रमो यत्नेन विच्छिन्नः सन्तापो लक्ष्यते ज्वरः। विषमो विषमारम्भः क्षपाकालानुसारवान्। यथोत्तरं मन्दमतिर्मन्दशक्तिर्यथायथम्। कालेनाप्नोति सदृशान् स रसादींस्तथा तथा। दोषो ज्वरयति क्रुद्धश्चिराच्चिरतरेषु च। भूमौ स्थितं जलैः सिक्तं कालमेव प्रतीक्षते। अङ्कुराय यथा बीजं दोषबीजं भवेत्तथा। वेगं कृत्वा विषं यद्दाशये नीयते बलम्। कृत्स्नव्याप्नुवत् भूयः काले दोषविषं तथा। एवं ज्वराः प्रवर्त्तन्ते विषमाः सन्ततादयः। उत्क्लेशो गौरवं दैन्यं अङ्गोऽङ्गानां विजृम्भणम्। अरोचको वमिः श्वासः सर्वस्मिन्नगे ज्वरे। रक्तनिष्ठीवनं तृष्णा कक्षोरुषु पिड़कोद्गमः। दाहरागश्चमदप्रलापो रक्तसंश्रिते। तृड्ग्लानिस्तत्वर्च्छमन्दाग्नौ भ्रमस्तथा। दौर्बल्यं गात्रविक्षेपो मांसस्थे मेदसि स्थिते। स्वेदोऽतितृष्णा वमनं दौर्गन्ध्यं चासहिष्णुता। प्रलापो ग्लानिरत्यर्थं चिरस्थिते त्वस्थिमेदनम्। दोषप्रवृत्तिरूर्द्ध्वाधःश्वासाङ्गक्षेपकूजनम्। अन्तर्दाहो बहिःशैत्यं श्वासो हिक्का च मज्जगे। तमसो दर्शनं मर्म्मच्छेदनं सन्धिभेदता। शुक्रप्रवृत्तिर्मैथुने च जायते शुक्रसंक्षये। उत्तरोत्तरदुःसाध्याः पञ्चान्ये ते विपर्ययै। प्रसिध्यन्ति च गात्राणि श्लेष्मणा गौरवेण च। मन्दज्वरः प्रलापस्तु स शीतः स्यात् श्लेपकः। नित्यं मन्दज्वरो रूक्षः शीतः शूक्ष्मेण गच्छति। सव्याङ्गः श्लेष्मभूयिष्ठो भवेद्धातवलासकः। हरिद्राभेदवर्णाभस्तद्वल्लेपः प्रमेहति। स वै हारिद्रको नाम ज्वरभेदोऽल्पकः स्मृतः। कफवातौ समौ यत्र क्षीणपित्तस्य देहिनः। तीक्ष्णोऽथ वा दिवा मन्दो जायते रात्रिजो ज्वरः। दिवाकरातीतबले व्यायामाच्च विशोषिते। शरीरे नियतस्थाता ज्वरः स्यात् पौर्वरात्रिकः। आमाशये यदा दुष्टे श्लेष्मपित्ते ह्यधःस्थिते। तदार्द्धं शीतलं देहे त्वर्द्धं चोष्णं प्रजायते। आमे पित्तं यदा दुष्टं श्लेष्मा चान्ने व्यवस्थितः। उष्णत्वं तेन देहस्य शीतत्वं करपादयोः। रसरक्ताश्रयः साध्यो मांसमेदोगतश्च यः। अस्थिमज्जागतः कृच्छ्रस्तैस्तैः साङ्गैश्च तैस्तमः। विसंज्ञो ज्वरवेगार्त्तः सक्रोध इव दीप्यते। सदोषणब्दश्च शब्दद्वेषं सृजति वेगवत्। देहो लघ्वर्थमतल्लक्षमोक्षतापः पाको मुखे करणसौष्ठवमव्यवस्थम्। स्वेदः क्षयः प्रकृतिगामिमनोऽग्निलिप्सा कण्डूश्च मूर्द्धि विगतज्वरलक्षणानि"।

माधवकरनिदाने वातिकादीनां लक्षणभेद उक्तस्तत्र वातिकस्य लक्षणं यथा

"वेपथुर्विषमो वेगः कण्ठौष्ठपरिशोषणम्। निद्रानाशः क्षवःस्तम्भो गात्राणां रौक्ष्यमेव च। शिरोरुग्भ्रान्तिरुग्वक्त्रवैरस्यं गाढविट्कता। शूलाध्माने जृम्भणञ्च भवत्यनिलजे ज्वरे।

पैत्तिकस्य लक्षणं यथा

"वेगस्तीक्ष्णोऽतिसारश्च निद्रानाशस्तथा वमिः। कण्ठौष्ठ मुखनासानां पाकः स्वेदश्च जायते। प्रलापो वक्त्रकटुता मूर्च्छा दाहो मदस्तृषा। पीतविण्मूत्रनेत्रत्वं पैत्तिके भ्रम एव च"।

कफनिमित्तजस्य माधवकरनिदानोक्तं लक्षणं यथा
"स्तैमित्यं स्तिमितो वेग आलस्यं मधुरास्यता। मुक्त-मूत्रपुरीषत्वं सम्मोहस्तिमिरादपि च। गौरवं शीतसुत्क्लेदो रोमहर्षोऽतिनिद्रता। प्रतिश्यायोऽरुचिः कासः कफजेऽ-ल्पेऽथ मुक्तता"।
वातपैत्तिकस्य लक्षणं यथा "तृष्णा मूर्च्छा भ्रमो दाहः स्वप्ननाशः शिरोरुजा। कण्ठास्यशोषो वमथूरोमहर्षोऽ-रुचिस्तमः। पर्वभेदश्च जृम्भा च वातपित्तज्वराकृतिः।
वातश्लैष्मिकस्य लक्षणं यथा
"स्तैमित्यं पर्वणां भेदो निद्रा गौरवमेव च। शिरोग्रहः प्रतिश्यायः कासः स्वेदाप्रवर्त्तनम्। सन्तापो मध्यवेगश्च वातश्लेष्मज्वराकृतिः"।
पित्तश्लैष्मिकस्य लक्षणं यथा
"लिप्ततिक्तास्यता तन्द्रा मोहः कासोऽरुचिस्तृषा। सङ्ग-दौर्हृदं सङ्गःशीतं पित्तश्लेष्मज्वराकृतिः"।
सान्निपातिकस्य लक्षणं यथा
"चक्षे दाहः चक्षे शीतमस्थिसन्धिशिरोरुजा। सास्राक्षे कक्षुषे रक्ते निमग्ने चापि लोचने। खंस्वनौ बधिरौ कर्णौ कण्ठः शूकैरिवाहतः। तन्द्रा मोहः प्रलापश्च कासः श्वासोऽरुचिर्भ्रमः। परिदग्धा खर-स्पर्शा जिह्वा लम्बाङ्कुता परम्। हीवनं रक्तपित्तस्य कफेनोन्मिश्रितस्य च। शिरसो लोटनं तृष्णा निद्रा-नाशो हृदि व्यथा। स्वेदमूत्रपुरीषाणां चिरादर्शन-मल्पशः। क्षयत्वं नातिमात्राणां सततं कण्ठकूजनम्। कीटानां शाखावरक्षानां मक्षकानाञ्च दर्शनम्। मूकत्वं स्रोतसां पाको गुरुत्वमुदरस्य च। चिरात् पाकश्च दोषाणां सन्निपातज्वराकृतिः"।
असाध्यस्य सान्निपातिकस्य तस्य लक्षणं यथा
"दोषे विरूढे नष्टेऽग्नौ सर्वसम्पूर्णलक्षणः। सन्नि-पातज्वरोऽसाध्यः कृच्छ्रसाध्यस्ततोऽन्यथा। सप्तमे दिवसे प्राप्ते दशमे द्वादशेऽपि वा। पुनर्घोरतरोभूत्वा प्रथमं याति हन्ति वा। सप्तमी द्विगुणा (चतुर्दशी) चैव नवम्येकादशी तथा। एषा त्रिदोषमर्यादा मोक्षाय च वधाय च। सन्निपातज्वरस्यान्ते कर्णमूले सुदारुणः। शोथः संजायते तेन कश्चिदेव प्रमुच्यते"।
जीर्णस्य लक्षणं यथा
"त्रिसप्ताहव्यतीतस्तु ज्वरोयत्नतां गतः। क्षीणाग्नि-त्वादं कुरुते स जीर्ण इति उच्यते"।
आगन्तोर्लक्षणं यथा "अभिघातादभिचाराभ्यामभिषङ्गा भ-वापतः। आगन्तुर्जायते दोषैर्यथास्वं तं विभावयेत्"।
विषमक्षणजागन्तुकस्य तस्य लक्षणं यथा
"अग्रवास्यता विण्मूत्रे तथातीसार एव च। भक्तारुचिः पिपासा च तोदश्च सह मूर्च्छया"।
ओषधीगन्धजस्य कामजस्य च तस्य लक्षणं यथा।
"औषधीगन्धजे मूर्च्छा शिरोरुग्वमथुस्तथा। कामजे चित्त विभ्रंशस्तन्द्रालस्यमभोजनम्"।
भयादिजस्य लक्षणं यथा "भयात् प्रलापः शोकाच्च भवेत् कोपाच्च वेपथुः। अभिचाराभिशापाभ्यां मोह-स्तृष्णा च जायते। भूताभिषङ्गाद्धसनं रोदनं कम्पनम्। कामशोकभयाद्वायुः क्रोधात् पित्तं त्रयो-मलाः। भूताभिषङ्गात् कुर्वन्ति भूतसामान्यलक्षणाः"।
विषमज्वरस्य संप्राप्तिर्यथा
"दोषोऽल्पोऽक्षितसम्भूतो ज्वरोत्सृष्टस्य वा पुनः। धातु-मन्यतमं प्राप्य करोति विषमज्वरम्"।
सन्तातादिज्वराणां प्रतिनियतं धातवोदुष्यादयश्च हि
"सन्ततो रसरक्तस्थः सोऽन्येद्युः पिशिताश्रितः। मेदोगत स्तृतीयेऽह्नि स्वस्थमज्जगतः पुनः। कुर्यात्तृतीयकं घोरमन्यकं रोगसङ्करम्। सप्ताहं वा दशाहं वा द्वा-दशाहमथापि वा। सन्तत्या योऽविसर्गी स्यात् सन्ततः स निगद्यते। अहोरात्रे सन्ततको द्वौ कालावनुव-र्त्तते। अन्येद्युष्कस्त्वहोरात्रं एककालं प्रवर्त्तते। तृतीयक स्तृतीयेऽह्नि चतुर्थेऽह्नि चतुर्थकः। केचित्तृतीयाभिषङ्गोत्थं ब्रुवते विषमज्वरम्। कफपित्तात् एकाहो द्व्याहात् कफात्मकः। वातपित्ताच्छिरोग्राही त्रिविधः स्यात् तृतीयकः। चतुर्थको दर्शयति प्रभावं द्विविधं ज्वरः। जङ्घाभ्यां श्लैष्मिकः पूर्वं शिरस्तोऽनिलसम्भवः। विषम-ज्वर एवान्यश्चातुर्थकविपर्ययः। सप्ताहे दशमे देहे त्रयोमलविवर्द्धनः। तेनार्द्ध-

शीतलं देहे चाङ्गेष्णं प्रजायते। काये दुष्टं यदा पित्तं श्लेष्मा चान्ने व्यवस्थितः। तेनोष्णत्वं शरीरस्य शीतत्वं हस्तपादयोः" अत्र मतान्तरम्। "काये श्लेष्मा यदा दुष्टः पित्तञ्चान्ने व्यवस्थितम्। शीतत्वं तेन गात्राणामुष्णत्वं हस्तपादयोः"।

शीतपूर्वोज्वरो यथा।

"त्वक्स्थौ श्लेष्मानिलौ शीतमादौ जनयतो ज्वरे। तयोः प्रशान्तयोः पित्तमन्ते दाहं करोति च"।

दाहपूर्वो ज्वरो यथा

"करोत्यादौ तथा पित्तं त्वक्स्थं दाहमतीव च। तस्मिन् प्रशान्ते शीतरौ कुरुतः शीतमन्ततः। द्वावेतौ दाहशीतादी ज्वरौ संसर्गजौ स्मृतौ। दाहपूर्वस्तयोः कष्टः कृच्छ्रसाध्यतमश्च सः"।

वातादिज्वराणां धातुविशेषदुष्टतया रसादिगतदोषज ज्वराणां लक्षणानि

"गुरुता हृदयोत्क्लेशः सदनं ह्यर्धशिरोरुजौ। रसस्थे त्वज्वरे लिङ्गं दैन्यङ्गास्योपजायते"१। रक्तनिष्ठीवनं दाहो मोहश्चर्दनविभ्रमौ। प्रलापः पिडका तृष्णा रक्तप्राप्ते ज्वरे नृणाम् २। पिपासोद्वेष्टनं तृष्णा दुष्टमूत्रपुरीषता। जाग्रन्दाहरुचिक्षेपौ ग्लानिः स्यान्मांसगे ज्वरे३। भ्रमः स्वेदस्तृषा मूर्छा प्रलापश्चर्दिरेव च। दौर्गन्ध्यारोचकौ ग्लानिर्मेदःस्थे घासहिष्णुता ४। भेदोऽस्थां कूजनं श्वासो विरेकश्चर्दिरेव च। विक्षेपणञ्च गात्राणां मेतदस्थिगते ज्वरे ५। तमः प्रवेशनं हिक्का कासः श्वैत्यं वमिस्तथा। जन्तद्वेषो मर्माच्छेदश्च मज्जगे ६। मरणं प्राप्नुयात् तत्र शुक्रस्थानगते ज्वरे ७। शेषकः सत्यतामेत्य शुक्रस्थे तु विशेषतः"।

ऋतुभेदे प्राकृतादिज्वरविशेषो यथा

"वर्षाशरद्वसन्तेषु क्रमात्स्युः प्राकृतः क्रमात्। वैकृतोऽन्यः स दुःसाध्यः प्राकृतश्चानिलोद्भवः। वर्षासु प्राकृतो दुष्टः पित्तश्लेष्मान्वितो ज्वरम्। कुर्यात् पित्तञ्च शरदि तस्य चानुबलः कफः। तत् प्रकृत्या विदध्याच्च तत्र नानशनाद्भयम्। कफो वसन्ते तमपि वातपित्तं भवेदनु। काले यथास्वं सर्वेषां प्रकृतिर्हि हिरेव वा।

अन्तर्वेगज्वरलक्षणम्

"अन्तर्दाहोऽधिकस्तृष्णा प्रलापः श्वसनं भ्रमः। सन्ध्यस्थिशूलमस्वेदो दोषवर्त्मविनिग्रहः। अन्तर्वेगस्य लिङ्गानि ज्वरस्यैतानि लक्षयेत्"।

बहिर्वेगज्वरलक्षणम् "सन्तापोऽभ्यधिको बाह्यस्तृष्णादीनाञ्च मार्दवम्। बहिर्वेगस्य लिङ्गानि सुखसाध्यत्वमेव च"।

आमज्वरलक्षणम्

"आलाप्रसेको हृल्लासश्छर्दयाशुद्धरोचकाः। तन्द्रानिद्राविपाकाश्च वैरस्यं गुरुगात्रता। क्षुधाशो बद्धमूत्रत्वं लक्ष्यता बलवान् ज्वरः। आमज्वरस्य लिङ्गानि न दद्यात् तत्र भेषजम्। भेषजं ह्यामदोषस्य भूयो ज्वलयति ज्वरम्।

पच्यमानज्वरस्य लक्षणं यथा

"ज्वरवेगोऽधिकस्तृष्णा प्रलापः श्वसनं भ्रमः। मलप्रवृत्तिरुत्क्लेशः पच्यमानस्य लक्षणम्"।

पक्वज्वरस्य लक्षणम्

"क्षुत्क्षामता लघुत्वञ्च गात्राणां ज्वरमार्दवम्। दोषप्रवृत्तिरष्टाहो निरामज्वरलक्षणम्"।

साध्यज्वरस्य लक्षणं यथा

"बलवत्स्वल्पदोषेषु ज्वरः साध्योऽनुपद्रवः"।

असाध्यज्वरलक्षणं यथा।

"हेतुभिर्बहुभिर्जातो बलिभिर्बहुलक्षणः। ज्वरः प्राणान्तकृद्यश्च शीघ्रमिन्द्रियनाशनः। ज्वरक्षीणस्य मूनस्य गम्भीरो दैर्घ्यरात्रिकः। असाध्यो बलवान् यश्च क्षेमशीमन्तकज्वरः"।

गम्भीरस्य लक्षणं यथा "गम्भीरस्तु ज्वरो ज्ञेयो ह्यन्तर्दाहो न तृष्णया। आनद्धत्वेन चात्यर्थं श्वासकासोद्भमेन च। आरम्भाद्विषमो यस्तु यश्च वा दैर्घ्यरात्रिकः। क्षीणस्य चातिवृद्धस्य गम्भीरोयस्य हन्ति तम्। विसंज्ञस्तास्यते यस्तु शेते निपतितोऽपि वा। शीतार्दितोऽन्नरुग्णश्च ज्वरेण म्रियते नरः। यो वृद्धरोमा रक्ताक्षो हृदि संघातमूलवान्। वक्त्रेण चैवोच्छ्वसिति तं ज्वरो हन्ति मानवम्। हिक्काश्वासतृषायुक्तं मूढविज्ञानलोचनम्। सन्तोच्छ्वासिनं क्षीणं नरं क्षपयति ज्वरः। हतप्रभेन्द्रियत्वाममरोचकनिपीडितम्। गम्भीरतीव्रवेगार्त्तं ज्वरितं परिवर्जयेत्"।

ज्वरस्योपद्रवा रचितोक्ताः यथा

"श्वासोमूर्छाऽरुचिश्छर्दिस्तृष्णातीसारविड्ग्रहाः। हिक्काकासोऽङ्गभेदश्च ज्वरस्योपद्रवा दश"।

ज्वरसन्निपूर्वरूपम्। "दाहः स्वेदो भ्रमस्तृष्णा कर्मविद्भिः संप्रिता। कूजनञ्चास्यवैगन्ध्यमाकृतिर्ज्वरमोचने"।

"ज्वरसन्नलक्षणं "स्वेदो लघुत्वं शिरसः कण्डूपाकोऽक्षणस्य च। क्षवथुश्चाग्निलिप्सा च ज्वरसन्नस्य लक्षणम्"।

सुश्रुतगारुड्यादुक्ताद् विशेषप्रज्ञापनाय पृथगुपन्यासः।

ज्वरितस्य वर्ज्यावर्ज्यानि भावप्र० उक्तानि यथा "सामान्यतो ज्वरी पूर्वं निर्वाते निलये वसेत्। निर्वातमायुषो वृद्धिमारोग्यं कुरुते यतः। व्यजनस्थानिल स्तृष्णास्वेदमूर्च्छाश्रमापहः। तालवेतमयो वातश्लेष्मदोषशमनो मतः। वंशव्यजनजः सोष्णो रक्तपित्त प्रकोपनः। चामरो वस्त्रसंभूतो मायूरो वेत्रजस्तथा। एते दोषजिता वाताः स्निग्धा वृद्धाः सुपूजिताः। नवज्वरी भवेद्यस्मादुगुरूष्णवसनावृतः। यद्यर्तुपक्वपानीयं पिबेत् किञ्चिच्चिरायत्। विनापि भेषजैर्व्याधिः पथ्यादेव निवर्तते। न तु पथ्यविहीनस्य भेषजानां शतैरपि। ततो ज्वरे वर्जनीयान्याह सुश्रुतः "परिषेकान् प्रदेहांश्च स्नेहान् संशोधनानि च। दिवास्वप्नं व्यायामं च व्यायामं शिशिरं जलम्। क्रोधप्रवातभोज्यांश्च वर्जयेत्तरुणज्वरी"। परिषेकः स्नानादिः, प्रदेहोऽनुलेपनाभ्यङ्गादिः। परिषेकादिसेवने दोषमाह तत्रैव "शोथं छर्दिं मदं मूर्च्छां अमं तृष्णामरोचकम्। प्राप्नोत्युपद्रवानेतान् परिषेकादिसेवनात्"। आदिशब्देन प्रदेहादयो गृह्यन्ते। हारीतेन प्रत्येकं सेवने फलमुक्तञ्च "व्यायामज्वरसंशुद्धिर्व्यवायात् तन्मूर्च्छनम्। स्नुतिश्च स्नेहपानाद्यैर्मूर्च्छा छर्दिर्मदोऽरुचिः। गुर्वन्नभोजनात् स्वप्नाद्दिवाप्नो दोषकोपनम्। अग्निसादः खरत्वञ्च स्रोतसां च प्रवर्तनम्"। स्नुतिरिति व्यवायादित्यत्र संबध्यते। स्वप्नात् दिवास्वापात्, ज्वरमुक्तावपि वर्ज्यमाह। "सज्वरो ज्वरमुक्तो वा विदाहीनि गुरूणि च। असात्म्यान्नानि पानानि विरुद्धाध्यशनानि च। व्यायाममतिचेष्टां वाऽभ्यङ्गं स्नानञ्च वर्जयेत्। तेन ज्वरः शमं याति शान्तश्च न पुनर्भवेत्"। ज्वरी लङ्घनं कुर्यादित्याह चरको वाग्भटश्च "आमाशयस्थो हृत्वाग्निं सामो मार्गान् पिधापयन्। विदधाति ज्वरं दोषस्तस्माल्लङ्घनमाचरेत्"। तथा "ज्वरादौ लङ्घनं प्रोक्तं ज्वरमध्ये तु पाचनम्। ज्वरान्ते भेषजं दद्याज्ज्वरमुक्ते विरेचनम्। त्रिविधं त्रिविधे दोषे तत्रभीक्ष्य प्रयोजयेत्। दोषेऽपि लङ्घनं पथ्यं मध्ये लङ्घनपाचनम्। प्रभूते शोभनं तस्य मूलादुन्मूलयेन्नवान्"। चक्रदत्तश्च "तरुणं तु ज्वरं पूर्वं लङ्घनेन जयं नयेत्। आमदोषमविज्ञाय लङ्घयेत्तं यथाविधि,। अन्यच्च "वातः पचति सप्ताहात् पित्तं तु दशभिर्दिनैः। श्लेष्मा द्वादशभिर्धातुस्थैः पच्यते वदतां वर!।"लङ्घनं लङ्घनीयस्तु कुर्याद्दोषानुरूपतः। त्रिरात्रमेकरात्रं वाऽहोरात्रमथ वा ज्वरे। निर्वातसेवनात् स्वेदाल्लङ्घनाद्व्यवारिणः। पानादामज्वरे चोषे पश्चाद्दीपधमाचरेत्"। चात्रेयोक्तम् "ज्वरादौ लङ्घनं प्रोक्तं ज्वरमध्ये तु पाचनम्। ज्वरान्ते भेषजं दद्याज्ज्वरमुक्ते विरेचनम्। दोषशेषस्य पाकार्थमग्नेः सन्धुक्षणाय च। लङ्घितस्यापि दोषस्य यवागूपानमाचरेत्। शालिषष्टिकमुद्गानां यूषं वा शस्तमाचरेत्। पञ्चकोलेन संसिद्धां यवागूं मध्यलङ्घने। अत्यर्थं लङ्घितं दृष्ट्वा तस्य सन्तर्पणे हितम्। द्राक्षादाडिम खर्जूरपियालैः सपरूषकैः। तर्पणाश्चैव कर्तव्यास्तर्पणं ज्वरशान्तये"। अत्र लङ्घनशब्देनानशनमुच्यते। यत आह सुश्रुतः "आनद्धःस्तिमितैर्दोषैर्यावन्तं कालमातुरः। तावत्त्वनशनं कुर्यात्ततः संसर्गमाचरेत्"। आनद्धःस्तिमितैर्दोषैः सम्बद्धः। संसर्गं औषधान्नादिप्रसङ्गम्। यत आह चरकः "चतुःप्रकारा संशुद्धिः पिपासारोधमारुतौ। पाचनान्युपवासश्च व्यायामश्चेति लङ्घनम्। चतुःप्रकारा संशुद्धिर्वमनञ्च विरेचनम्। निरूहणं च बस्तिश्च शिरोविरेचनं तथा। नवतुवासनं कार्यं तस्य दुःखत्वात्। अत्र लङ्घनं कर्शनमित्यर्थः। तथा च सुश्रुतः "शरीरलाघवकरं यद्द्रव्यं कर्म वा पुनः। तं लङ्घनमिति ज्ञेयं दुःखं तु प्रथमविधम्"। लङ्घनात्कर्शनादन्यत् शरीरपोषकमित्यर्थः। ननु "आनद्धः स्तिमितैर्दोषैरित्यादि पूर्वोक्तसुश्रुतवचनात्सामान्यतो ज्वरिणा यवाऽनशनरूपं लङ्घनं क्रियते। तथा चतुःप्रकारा संशुद्धिः इत्यादि चरकवचनाद्वमनादिरूपं लङ्घनं सर्वैर्ज्वरिभिः कथं न क्रियते। तत्रोच्यते वमनादिक्रमव्यवस्थाविशेषेषु क्रियते नतु सर्वज्वरेषु तथा च सुश्रुतः "श्लेष्मक्लेशे वलिने देयं वमनं श्लैष्मिकज्वरे। पित्तप्राये विरेकस्तु कार्यः प्रशिथिलाशये। सरुजे नीरुजे कार्यं शोदावर्त्ते निरूहणम्। कफाभिपन्ने शिरसि कार्यं मूर्ध्नि विरेचनम्"। अपिच सर्वज्वरिभिः पिपासानिग्रहो न कार्यः। यत आह हारीतः। "तृष्णा सरीयसी घोरा सद्यः प्राणविनाशिनी। तस्माद्देयं तृषार्त्ताय पानीयं प्राणधारणम्"। अतोऽवस्थाविशेष एव पिपासासहनं ज्वरिभिर्मारुतसेवनं न कार्यम् सुश्रुतेन प्रवातसेवनस्य सर्वथा निषिद्धत्वात्। अतो मारुतसेवनमवस्थाविशेष एव युक्तम्। लङ्घनाम्बुयवागूभिर्यदा दोषो न पच्यते। तदा तु सुखैरुष्णैस्तृष्णारोचकनाशनैः। ज्वरघ्नैः पाचनैर्दद्यात्

कषायैः सक्षुपाचरेत्" इत्यत्र लङ्घनपाचनयोः स्फुट एव भेदः। व्यायामोऽपि न कार्य्यस्तस्यातिनिषिद्धत्वात् अवस्थाविशेषे पुनः पार्श्वपरिवर्तनादिरूपः सोऽपि कर्त्तव्यः तस्माच्चतुःप्रकारा संशुद्धिरित्यादिश्लोके लङ्घनपदं कर्शनपर्य्यायमिति निर्णीतम्। अनशनरूपस्य लङ्घनस्य फलमाह "लङ्घनेन क्षयं नीते दोषे सम्यक्चितेऽनले। विज्वरत्वं लघुत्वं च क्षुत्तैवास्योपजायते"। लङ्घनेन अनशनेन प्रदग्धे दोषे क्षयंनीते। यत आह "आहारं पचति शिखी दोषानाहारवर्जितः"। पचतीति सम्यक्चितेऽनले आच्छादकदोषे क्षीणेऽग्नौ प्रदीप्ते यथोक्तसंप्राप्तिसामग्रीविघटनात् विज्वरत्वं शरीरस्य गौरवाभावेन लघुत्वम्। क्षुत् बुभुक्षा च जायते इत्यर्थः। अन्यत्राह सुश्रुतः "अनवस्थितदोषाग्नेर्लङ्घनं दोषपाचनम्। ज्वरघ्नं दीपनं काङ्क्षारुचिलाघवकारणम्"। अनवस्थितदोषाग्नेः स्वस्थानादितो गतेदोषेऽग्निश्च यस्य तस्य ज्वरिणः काङ्क्षा अन्नाभिलाषः, रुचिः लङ्घनेनामपाकान्मुखशोषादिनाशे सत्यस्य यत्प्रकृतत्वं सैव रुचिः शोभा। "रुचिः स्त्री दीप्तिशोभायामभीष्टार्थाभिलाषयोरिति" मेदिनीकारः" सम्यक्कृतस्य लङ्घनस्य लक्षणमाह "वातमूत्रपुरीषाणां विसर्गे गात्रलाघवे। हृदयोद्गारकण्ठास्यशुद्धौ तन्द्राक्लमे गते। स्वेदे जाते रुचौ चापि क्षुत्पिपासासहोदये। कृतं लङ्घनमाहेयं निर्व्यूढे चान्तरात्मनि"। हृदयस्य शुद्धिरनवरोधः उद्गारशुद्धिः सधूमाम्लोद्गाराभावः। कण्ठस्य शुद्धिः कफानवलिप्तत्वम्। आस्यशुद्धिः सुखस्य प्रकृतरसत्वम्। तन्द्राक्लमे तन्द्रा च क्लमश्च तन्द्राक्लमौ निद्रा क्लमोऽत्र ग्लानिः। क्षुत्पिपासासहोदये क्षुत्पिपासयोः सह युगपदुदये, अन्तरात्मनि मनसि। एतानि लक्षणानि भिषितान्येव सम्यक्कृतं लङ्घनं बोधयन्ति नतु प्रत्येकम्। हीनस्य लङ्घनस्य लक्षणमाह "कफोत्क्लेशः सहृल्लासष्ठीवनं च सुदुर्लभः। कण्ठस्य हृदयाशुद्धिस्तन्द्रा स्याद्धीन लङ्घने"। उपस्थितवमनत्वमिव कफोत्क्लेशः कफस्य वमनायोपस्थितिः। हृल्लासष्ठीवनं हृदयात्कफनिर्गमः। अतियतितस्य लङ्घनस्य लक्षणमाह "पर्वभेदोऽङ्गमर्दश्च कासः शोषो मुखस्य च। क्षुत्प्रणाशोऽरुचिस्तृष्णा दौर्बल्यं श्रोत्रनेत्रयोः। मनसः संभ्रमोऽभीक्ष्णमूर्द्ध्ववातसमो हृदि। देहाग्निबलहानिश्च लङ्घनेऽतिकृते भवेत्। अरतिर्बलहानिश्च लङ्घनेऽतिकृते भवेत्"। कर्णनेत्रयोः दौर्बल्यं स्वविषयग्रहणासामर्थ्यम्। मनसः संभ्रमः भ्रान्तिः। ऊर्द्ध्ववातः उद्गारबाहुल्यम्। हृदि तमः अन्धकारप्रविष्टस्येवाज्ञानम्। बलरक्षणेन लङ्घनं कारयेदित्याह "बलाविरोधिना चैनं लङ्घनेनोपपादयेत्। बलाधिष्ठानमारोग्यं यदर्थोऽयं क्रियाक्रमः"। अयमर्थः। एनं रोगिणं बलाविरोधिना अनतिबलक्षयकारिणा लङ्घनेन उपपादयेत् कृत इति चेत्तत्राह। यदर्थमस्मै आरोग्याय अयं क्रियाक्रमः चिकित्सोपक्रमः। तत आरोग्यं बलाधिष्ठानं बलाश्रयमित्यर्थः। क्षुधाच्छिदनशनस्य निषेधमाह सुश्रुतः" "तद्धि मारुतश्लेष्मातुरक्षयोष्मभ्रमान्वितैः। न कार्यं गुर्विणीबालवृद्धदुर्बलभीरुभिः। न क्षयाध्वश्रमक्रोधकामशोषचिरज्वरी"। तत् अनशनम् उल्बणमारुतयुक्तेन ज्वरिणा न कार्य्यं मारुतेऽत्र निरामोद्वेष्यः। सामे मारुते लङ्घनं कार्य्यमेव यत आह तन्त्रान्तरे "अवश्यमेव कुर्वीत ज्वरी सामे समीरणे। लङ्घनं श्लेष्मपाकार्थं न तद्दुष्टं यथा कफे"। तद्दुष्टं आमपाकादुष्टम्। अतएवोक्तम् "कफपित्ते द्रवौ धातू सङ्क्षेते लङ्घनं वदुः। आमजत्वादुष्टमपि वायुर्न सहते क्षणम्"। आमस्य लक्षणमाह "आहारस्य रसः सारो यो न पक्वोऽग्निलाघवात्। आमसंज्ञस्तु सञ्जते बहुव्याधिसमाश्रयः"। तन्त्रान्तरे तु "आममत्यरसं केचित् केचित्तु मलसञ्चयम्। प्रथमं दोषदुष्टिं वा केचिदामं प्रचक्षते। अविपक्वमसंसक्तं दुर्गन्धं बहुपिच्छिलम्। सादनं सर्वगात्राणामामदोषामयलिङ्गितः। तेनामेन समायुक्ताः दोषा दुष्टाश्च तादृशाः। तदुद्भवा आमयाश्च साम इति बुधैः स्मृताः"। तत्र सामस्य वातस्य लक्षणमाह, "वायुः सामो विबद्धाग्निः सादतन्द्रान्त्रकूजनैः। वेदनाशोथ निस्तोदैः क्रमशोऽङ्गानि पीडयेत्। विचरेदुभयगश्चापि स्रोतांसि कुपितो भृशम्। स्रोतोदार्द्दिमायाति मेघः सूर्योदये निशि"। विचरेत् युगपत् वायुरामश्चैककालं विचरेत् कुपितः सामो वायुः भृशमतिशयेन स्रोतांस्यङ्गानीत्यर्थः। वातस्य तस्यैव निरामस्य लक्षणमाह "निरामो विशदो रूक्षो निर्गन्धोऽल्पवेदनः। विपरीतगुणैः शान्तिः स्निग्धैर्जातिविशेषतः"।

अथ प्रसङ्गात्सामस्य पित्तस्य लक्षणमाह "पित्तं सामं भवेदम्लं दुर्गन्धं हरितं गुरु। श्लिष्मकाकण्ठहृद्दाहकरं स्रावं तथा स्थिरम्"। श्लिष्मका श्लिष्मता (चुवीति)

होवे। पित्तस्य तस्य निरामस्य लक्षणमाह। "निरामं पित्तमाताम्रमल्पाण्डं कटुकं सरम्। दुर्गन्धि रुचिलङ्घिवलवर्द्धनमीरितम्"।

अथ सामकफस्य लक्षणमाह "आलस्यतन्द्राहृद्-द्राविशुद्धिदौर्गन्धप्रहर्षा विड्मूत्रताभिः। गुरुदरत्वारुचिसुप्तताभिरामान्वितं व्याधिमुदाहरन्ति। आमश्लेष्मज्वनकोष्णपेयालङ्घनस्वेदनतिक्तयूषैः। विरूक्षस्वेदनपाचनैव संशोधनैरूर्द्धमधस्तथैव। तद्वि मारुतश्लेष्मावां लङ्घनं कार्यमेव च"। तथा सुखशोषणभावपि निरामयोरेव विवक्षितौ सामयोस्तु तयोर्लङ्घनं कार्यमेव, तृविधीबालवृद्धादिभिरपि निरामैरेव नैव लङ्घनं कार्यं सामैः पुनस्तैरपि लङ्घनं कार्यमेव। "क्षये धातुक्षये रक्तक्षये च वातजे ज्वरे लङ्घनं न कार्यम्। ज्वरी लङ्घनेऽपि जलं पिबेदित्याह सुश्रुतः। "तृषितो मोहमायाति मोहात् प्राणान्विमुञ्चति। अतः सर्वास्ववस्थासु न क्वचिद्वारि वर्जयेत्"। हारीतेनोक्तम् "तृष्णा गरीयसी घोरा सद्यःप्राणविनाशिनी। तस्माद्देयं तृषार्त्ताय पानीयं प्राणधारणम्"। अवश्यं पेयमपि जलं ज्वरी किञ्चिद्वारयन् पिबेत्। यत आह सुश्रुत एव। "जीविनां जीवनं जीवो जगत्सर्वं तु तन्मयम्। अतोऽल्पनिषेधेन न क्वचिद्वारि वारयेत्"। जीवनं जलं क्वचिन्न वारयेदेव तथा च, "ज्वरे नेत्राभये कुक्षे मन्देऽग्नावुदरे तथा। अरोचके प्रतिश्याये प्रसेके क्षयथौ क्षवे। अर्शे च मधुमेहे च पानीयं मन्दमाचरेत्"। सुखप्रसेके जलं पिबेत् मन्दमाचरेत् पिबेत्। यत आह "अतियोगेन सलिलं तृप्यतोऽपि प्रयोजितम्। प्रयाति श्लेष्मपित्तत्वं ज्वरितस्य विशेषतः"। तच्च जलं नवज्वरी शीतलं न पिबेदित्याह सुश्रुतः "नवज्वरे प्रतिश्याये पार्श्वशूले गलग्रहे। सद्यःशुद्धौ तथाऽऽध्माने व्याधौ वातकफोद्भवे। अरुचिपरिणीगुल्मश्वासकासेषु विद्रधौ। हिक्कायां छर्दिषाने च शीतं वारि विवर्जयेत्"। अन्यच्च वर्ज्यमाह स एव "पेयमानेन शीतेन ज्वरस्तोयेन वर्द्धते"। अत्र शीतं जलं अकथितं निषिद्धम्। तथा सति कथितमायातम्। तच्च कथितस्य विधिर्यथा "काथ्यमानं तु निर्वेगं निष्फेनं निर्मलं च यत्। तत्तोयं कथितं ज्ञेयं दोषघ्नं पाचनं लघु"। अन्यैः कथितस्य विधानमाह सुश्रुतः "वातश्लेष्मज्वरार्त्ताय क्षितसुप्ताम्बु तृप्यते। दीपनं स्यात्तु कफजे वातपित्तानुलोमनम्। तद्धि मार्दवजृम्भोपक्लोदसादं शीतमन्यथा"। वाग्भटश्च "तृष्णायां प्राग्घसृष्टाम्बु पित्तेऽतीसारकफज्वरे। तत्कफं विषयं नीत्वा तृष्णामाशु निवर्त्तयेत्। उदीर्यं चाग्निं स्रोतांसि मृदूकृत्य विशोधयेत्। वातपित्तकफस्वेदशकृन्मूत्राणि हारयेत्। अथोष्णोदकस्य लक्षणं गुणाश्च "क्वाथ्यमानन्तु निर्वेगं निष्फेनं निर्मलं तथा। अर्द्धावशिष्टं यत्तोयं तदुष्णोदकमुच्यते। ज्वरकासकफश्वासपित्तवातामयेदसाम्। नाशनं पाचनञ्चैव पथ्यमुष्णोदकं सदा"।

ज्वरभेदे जलस्य पाकभेदः। "त्रिपादशेषं सलिलं शीतं शरदि शस्यते"। "अन्ये तु निदाघे त्वर्द्धपाकेनं पादहीनन्तु शारदम्। हिमेऽर्द्धशेषं शिशिरे तथा वर्षावसन्तयोः। शिशिरे च वसन्ते च हिमे चार्द्धावशेषितम्। अष्टमांशावशेषन्तु वारि वर्षासु शस्यते।"

ज्वरविभेदे कथितस्यावश्यादिभेदः चक्रदत्त उक्तो यथा

"ज्वरितं ज्वरमुक्तं वा दिनान्ते भोजयेन्नरम्। श्लेष्मज्वरे विबद्धोष्मा बलवानलसदा। सुर्वभिष्यन्द्यकाले च ज्वरी नाद्यात् कथञ्चन। न हि तस्याहितं भुक्तमायुषे वा सुखाय वा। लङ्घनं स्वेदनं कार्यं यवान्वस्त्रिकको रसः। पाचनान्यविपक्वानां दोषाणां तरुणे ज्वरे। आसप्तरात्रं तरुणं ज्वरमाहुर्मनीषिणः। मध्यं द्वादशरात्रन्तु पुराणमत उत्तरम्। पाचनीयं शमनीयं कषायं पाययेत् तु तम्। ज्वरितं षड्रहेऽतीते लघ्वन्नं प्रतिभोजयेत्। सप्ताहात् परतोऽल्पेऽग्नौ स्नेहात् पाचनं ज्वरे। निरामे शमनं लघ्वे सामे नौषधमाचरेत्। लाजाप्रसेको हृल्लासहृदयाशुद्धयरोचकाः। तन्द्रालस्याविपाकास्यवैरस्यं गुरुगात्रता। क्षुन्नाशो वह्निमूत्रं च सज्वरता बलवान् ज्वरः। आमज्वरस्य लिङ्गानि न दद्यात् तत्र भेषजम्। भेषजं ह्यामदोषस्य भूयो ज्वलयति ज्वरम्। सदौ ज्वरे लघौ देहे प्रवलेषु मलेषु च। पक्वं दोषं विजानीयाज्ज्वरे देयं तदौषधम्"।

तेन ज्वरो नानाविधः ऐकाहिकादिः नवज्वरः जीर्णज्वरः विषमज्वरादिश्च उक्तवाक्येभ्योज्ञेयः।

नक्षत्रभेदे ज्वरोत्पत्तौ मृत्युतद्रोगकालभेदाः शब्दरत्नावलीधृ० उक्ता यथा

"स्वातीन्द्रपूर्वाश्विवसार्यमे स्युर्ज्वरैरजन्यैर्मृगे स्थिरता भवेद्रुजः। याम्यत्रयोवारुणतक्षमे शिवाघस्रा हि यमो ह्यधिपार्केवासवे। मूलाग्निदाक्षे नव पित्रभे नखा बुध्न्या-

र्क्षमेजाद्यदितिधातुभे नगाः" मासोऽजवैश्वेऽथ यमाहि मूलभे मित्रेऽपित्र्ये फल्गुदंशने क्षतिः। स० चि०

"स्वातीनि। इन्द्रो ज्येष्ठा पूर्वोक्तिः शिव आर्द्रा सार्पमप्यजपा। एषु भेषु ज्वरे दुःखः क्लेशो वा ज्वरोत्पत्तौ मृतिरेव स्यात् उक्तञ्च वसिष्ठेन" "पूर्वाश्लेषास्वातिभुजङ्गरौद्रहरेश्वरर्क्षेषु च यस्य रोगः। स्याद्रचितं देवचिकित्सकोऽपि चिन्तयेत्तस्य रोगिणं तम्" देवचिकित्सको देववैद्यो धन्वन्तरिः। अथान्यमैत्रे रेवत्यनुराधयोर्ज्वरोत्पत्तौ रुजो रोगस्य स्थिरता भवेत् बहुकालेन रोगनिवृत्तिः स्यादित्यर्थः। तथा भरण्यादिनक्षत्रचतुष्के शिवा एकादश पक्षादिवसाः रोगस्थैर्यं स्यात्तदनन्तरं रोगनिवृत्तिरिति सर्वत्र व्याख्येयम्। इदधिपं विशाखा अर्कौ हस्तः वासवं धनिष्ठा एषु त्रिषु भेषु पक्षः पञ्चदश दिवसा रोगस्थैर्यम्। मूलाग्निदाहे मूलज्येष्ठाश्विनीषु त्रिषु नव दिवसाः पित्र्यभे मघायां नखा विंशतिर्दिवसाः नामैकदेशे नामग्रहणमिति न्यायेन वृत्रोऽहिर्बुध्न्य उत्तराभाद्रपदा अर्यमोत्तराफाल्गुनी। दैवजादितिधातुभानि प्रसिद्धानि एषु पञ्चसु भेषु नगाः सप्त दिवसाः। अजवैश्वे मृगोत्तराषाढयोर्द्वयोर्भांसक्षिग्रहिनानि रोगस्थैर्यं ततो रोगनिवृत्तिः यदाह "ऋक्षात् स्फुटं प्राप्तिति मित्रपौष्णे विष्णोर्द्रे च मासाच्छ्रविश्वविष्णुे। रोगस्य मुक्तिः पितृदेवविष्णोर्द्रे वारैर्भवेद्दिंगतिभिश्च नूनम्" प्राप्तिति जीवतीत्यर्थः। "पञ्चाहसप्तोभकरेषु भेषु मूलाश्विनाग्नित्रितये नवाहात्। तोयेश चित्रान्तकविष्णुभेषु नैर्ऋत्रमेकादशभिर्दिनैश्च। पुष्ये त्वहिर्बुध्न्य पुनर्वसौ च ब्राह्म्यार्यमर्क्षेषु च सप्तरात्रात्। अत्र शीघ्रं रोगविमुक्तये संक्षिप्ता शान्तिरुक्तेति वसिष्ठेन "ऋक्षेशरूपं कनकेन कृत्वा तद्विद्वन्मन्त्रैश्च सुगन्धिपुष्पैः। पक्वान्नतैर्गुग्गुलुधूपदीपनैवेद्यताम्बूलफलैश्च सम्यक्। पूजां च कृत्वामयनाशनाय द्विजाय दद्यादतुलं शिवाय" आमयो रोगः। अतुलमपरिमितद्रव्यम् प्रत्येकनक्षत्रशान्तिर्विशदा नक्षत्रशान्त्यध्याये वक्ष्यतेऽतोऽत्र सा तत एव सम्यवधार्या"।

भैषज्यर० अन्यथा तद्रोगकाल उक्तो यथा

"ऋक्षिकायां यदा व्याधिरुत्पन्नो भवति ध्रुवम्। नवरात्रं भवेत् पीडा त्रिरात्रं रोहिणीषु च। मृगशीर्षे पञ्चरात्रमार्द्रायां सप्ततेऽहनिः। पुनर्वसौ तथा पुष्ये सप्तरात्रेण मोचनम्। नवरात्रं तथाऽश्लेषे प्रश्नयानान्तं मघासु च। द्वौ मासौ पूर्वफल्गुन्यामुत्तरासु त्रिपञ्चकम्। हस्ते च सप्तमे मोक्षश्चित्रायामर्द्धमासकम्। मासद्वयं तथा स्वात्यां विशाखे दिनविंशतिः। मित्रे चैव दशाहानि ज्येष्ठायामर्द्धमासकम्। मूलेन लभते मोक्षः पूर्वाषाढे त्रिपञ्चकम्। उत्तरे दिनविंशत्या द्वौ मासौ श्रवणे तथा। धनिष्ठायामर्द्धमासो वारुणे च दशाहकम्। पूर्वभाद्रपदे देवि! जनविंशतिवासरान्। त्रिपञ्चाहाद्भिन्नम्रे च रेवत्यां दशरात्रकम्। अहोरात्रं तथाश्विन्यां भरण्यान्तु गतायुषः। एवं क्रमेण जानीयान्नक्षत्रेषु यथोचितम्"।

रोगिणस्तारायुद्भिरायुद्भिर्भ्यां भोगकालभेदव्यवस्था।

तिथिनक्षत्रवारयोगभेदे ज्वरोत्पत्तौ स्मृ० चि० मृत्युरुक्तो यथा।

"रौद्राहिशाक्राम्बुपयाम्यपूर्वाहिदैवस्वभेषु पापवारे। रिक्ताहरिस्कन्दिने च रोगे शीघ्रं भवेद्रोगिजनस्य मृत्युः" स्मृ० चि०।

"रौद्रादीनि भानि प्रसिद्धानि पापवाराः सूर्यभौमशनयः रिक्ताः प्रसिद्धाः हरिर्द्वादशी स्कन्दिनं षष्ठी एतास्तिथयः एवंविधे विशिष्टयोगे यस्य रोगोत्पत्तिर्भवेत्तस्य रोगिजनस्य शीघ्रं मृत्युर्भवेत्। उक्तं च दैवज्ञमनोहरे "उरगवरुणरुद्राग्नेयवेन्द्रत्रिपूर्वायमदहनविधाताः पापवारेण युक्ताः। तिथिषु नवमिषष्ठीद्वादशी वा चतुर्थी सहजमरणयोगो रोगिणां कालहेतुः" इति चतुर्थीपञ्चमं चतुर्दश्युपलक्षकं मत्वा मूले रिक्तापञ्चमं कृतम् अतएवाह वसिष्ठः "ऋक्षेशाद्रौत्रिपूर्वायमवरुणमरुच्छक्रतारानलाः क्षुद्वादश्यां स्कन्दरिक्षातिथिषु च रविजार्कारवारेषु येषाम्। रोगः संजायते ते यमपुरमचिरात् प्राप्नुवन्त्येव चन्द्रे जन्मन्यष्टास्वबन्धुव्ययभवनगते मृत्युलग्ने च राशौ वा" पी० धा०।

अस्य प्रतिप्रसवः "यद्यत्र चन्द्रस्तस्यैव गोचरे शुभप्रदः। तदा नूनं भवेन्मृत्युः सुधासंसिक्तदेहिन" । इति दीपिकाटीकाधृतवाक्यम्।

२ज्वराधिकारदेवभेदे च रौद्रज्वरदेवस्य वैष्णवज्वरदेवेन युद्धादिकथा हरिवं० १८१ अ०

"भज्यमानेष्वनीकेषु भ्रातृकामः समभ्ययात्। ज्वरश्चिपादश्चिशिराः षड्भुजो नवलोचनः। भस्मप्रहरणो रौद्रः कालान्तकयमोपमः। नदन्भैरवसङ्घेषु वृतो निर्बाधनिस्वनः। निश्वसन् धूमभाषश्च निर्दहन्नितस्ततश्चर्-

शम् । नेत्राभ्यामाकुलं वक्त्रं सङ्घः कुर्वन् भ्रमन्मुहुः । संकटरोमा ग्लानाङ्गः क्षिप्तचित्त इव क्षणम् । कृतायुधमभिक्रुद्धः साक्षेपमिदमब्रवीत्" । तेन बलरामस्याभिभवे ततस्तस्य कृष्णेन सह युद्धे पराजयकथा १८२ अ०

"मृत इत्यभिधायाथ ज्वरं शत्रुनिसूदनः । कृष्णो भुजबलात्तन्तु चिक्षेपाथ महीतले । तस्मात्तस्तु बाहुभ्यां कृष्णदेहं विवेश सः । असङ्ख्या विषहन्तस्य कृष्णस्याप्रतिमौजसः । स ह्याविष्टस्तदा तेन ज्वरेणाप्रतिमौजसा । कृष्णः स्खलन्निव सङ्घः क्षितौ गाढं व्यवर्त्तत । जृम्भते श्वसते चैव स्खलते च पुनः पुनः । रोमाञ्चोत्तिगात्रस्तु निद्रया चाभिभूयते । ततः स्वैर्यं समालम्ब्य कृष्णः परपुरञ्जयः । विकुर्वाणो महायोगी जृम्भमाणः पुनः पुनः । ज्वराभिभूतमात्मानं विज्ञाय पुरुषोत्तमः । सोऽसृजज्ज्वरमन्यं तु पूर्वज्वरविनाशनम् । घोरं वैष्णवमत्युग्रं सर्वप्राणिभयङ्करम् । स सृष्टमात्रस्तेजस्वी बलवान् भीमविक्रमः । कृष्णज्वरो ज्वरं पूर्वं गृहीत्वा स्वेन तेजसा । कृष्णाय कृष्टः प्रायच्छत्त जग्राह ततो हरिः । ततस्तं परमक्रुद्धो वासुदेवो महाबलः । स्वगात्रात् स्वज्वरेणैव निरक्रामयत् वीर्यवान् । आविध्य भूतले चैनं शतधा कर्तुमुद्यतः । व्याघोषयज्ज्वरस्तत्र भोः परित्रातुमर्हसि । आविध्यमाने तस्मिंस्तु कृष्णेनामिततेजसा । अशरीरा ततो वाणी तस्मादाचारलक्षणा । कृष्ण ! कृष्ण ! महाबाहो ! यदूनां नन्दिवर्द्धन ! । मा वधीर्ज्वरमेतं तु रक्षणीयस्त्वयाऽनघ ! । इत्येवमुक्ते वचने तं समोच हरिः स्वयम् । भूतभव्यभविष्यस्य जगतः परमो गुरुः । कृष्णस्य पादयोर्मूर्ध्ना शरणं स गतो ज्वरः । प्रणम्य च हृषीकेशं ज्वरो वाक्यमथाब्रवीत् । शृणुष्व मम गोविन्द ! विज्ञाप्यं यदुनन्दन ! । यो मे मनोरथो देव ! तं त्वं कुरु महाभुज ! । अहमेको ज्वरस्तात ! नान्यो लोके ज्वरो भवेत् । त्वत्प्रसादाद्धि देवेश ! वरमेतं वृणोम्यहम् । देव उवाच । एवमस्तु भद्रं ते यथा त्वं ज्वर ! काङ्क्षसे । वरार्थिनां वरो देयो भवांश्च शरणागतः । एक एव ज्वरो लोके भवानस्तु यथा पुरा । योऽयं मया ज्वरः सृष्टो मध्येवैष प्रलीयताम् । वैशम्पायन उवाच । एवमुक्ते तु वचने ज्वरं प्रति महायशाः । कृष्णः प्रहरतां श्रेष्ठः पुनर्वाक्यमुवाच ह । कृष्ण उवाच । शृणुष्व ज्वर ! सन्देशं यथा लोके चरिष्यसि । सर्वजातिषु विन्यस्तस्तथा स्थावरजङ्गमे । त्रिधा विभज्य चात्मानं मत्प्रियं यदि काङ्क्षसे । चतुष्पदान् भजैकेन द्वितीयेन च स्थावरान् । तृतीयो यश्च ते भागो मानुषेष्वपपत्स्यते । त्रिधाभूतं वपुः कृत्वा पश्चिमं त्वं भव ज्वर ! । चतुर्थो यस्तृतीयस्य भविष्यति च ते ध्रुवम् । एकान्तचतुर्भागः खोरकश्च चतुर्थकः । मानुषेष्वेकपादेन वस त्वं प्रविभज्य वै । जातिष्वथावशेषेषु निवस त्वं शृणुष्व मे । वृक्षेषु कीटरूपेण तथा सङ्घोपपत्तकः । पाण्डुपत्रश्च विख्यातः फलेष्वातुर्थमेव च । पक्षिणीषु हिमं भूत्वा पृथिव्यामपि चोधरः । अपान्तु नीलिकां भूयाः शिखोद्वेदश्च वह्निषाम् । गैरिकः पर्वतेष्वेव मत्प्रसादाद्भविष्यसि । गोष्वपस्मारको भूत्वा खोरकश्च भविष्यसि । एवं विविधरूपेण भविष्यसि महीतले । दर्शनात् स्पर्शनाच्चैव प्राणिनां वधमेष्यसि । ऋते देवमनुष्यांश्च नान्यस्तां विधक्ष्यते" ।

जराश्च नानादेवसृष्टा यथोक्तं हरिवं० १९८अ० "पिताभक्षसमुद्भूता रौद्रा रुद्राङ्गसम्भवाः । कुमारस्कन्दजाश्चैव जरा वै वैष्णवादयः" "खेद्यमामजरं प्राहुः कोऽस्मात्सा परिभिद्यते" माधवः ।

**ज्वरकालकेतुरस** पु० ज्वरस्य कालकेतुरिव कर्म्म० ।

"रसं विषं गन्धकताम्रकञ्च मनःशिलास्फटिकतालकञ्च । विमर्द्य वज्रीपयसा समांशं गजाह्वयं तत्र पुटं विदध्यात् । द्विगुञ्जमस्यैव मधुप्रयुक्तं ज्वरं निहन्यष्टविधं महोग्रम् । पुरा भवान्यै कथितो भवेन नृणां हिताय ज्वरकालकेतुः" भैषज्यर० ज्वरे औषधभेदे ।

**ज्वरकुञ्जरपारीन्द्ररस** पु० ज्वर एव कुञ्जरस्तस्य पारीन्द्रः सिंह इव हिंसकत्वात् तादृशो रसः । भैषज्यर० ज्वरे ज्वरनाशके औषधभेदे । तल्लक्षणं तत्रोक्तं यथा

"मूर्च्छितं रसकर्पूरं तदर्द्धं जारिताभ्रकम् । तारं ताम्रञ्च रसजं रसकं ताम्रकं तथा । मौक्तिकं विद्रुमं लौहं गिरिजं गैरिकं शिला । गन्धकं हेमसारञ्च पलार्द्धञ्च पृथक् पृथक् । चीराबी सुरवल्ली च शोथघ्नी गन्धिकारिका । भाटामला जयोत्क्षिका च सतिक्ता तु सुदर्शना । अग्निजिह्वा पूतितैला मूर्षपर्णी प्रसारिणी । प्रत्येकरसं दत्त्वा मर्दयेत् त्रिदिनावधि । भक्षयेत् पर्णखण्डेन चतुर्गुञ्जाप्रमाणतः । महाग्निकारको रोग सङ्करश्च प्रयोगराट् । सततं सन्ततान्येद्यु स्तृतीयकचतुर्थकान् । ज्वरान् सर्वान् निहन्त्याशु भास्करस्तिमिरं तथा । कासं श्वासं प्रमेहञ्च सशोथं पाण्डुकामलाम् । यक्ष्मणो जयरोगञ्च सर्वोपद्रवसंयुतम् । ज्वरकुञ्जरपारीन्द्रः प्रथितः पृथिवीतले"

**ज्वरकेशरिन्** पु० ज्वरस्य तद्रूपगजस्य केशरीव हन्तृत्वात्। "गुडस्तं विषं व्योषं गन्धं त्रिफलमेव च। जयपालसमं कृत्वा श्लक्ष्णतोयेन मर्दयेत्। गुञ्जामात्रा वटी कार्या बालानां सर्वपाकृतिः। सितया च समं पीता पित्तज्वरविनाशिनी। मरिचेन प्रयुक्ता सा सन्निपातज्वरापहा। पिप्पलीजीरकाभ्याञ्च दाहज्वरविनाशिनी। ज्वरकेशरिनामायं रसो ज्वरविनाशनः" भैषज्वर० उक्ते औषधभेदे।

**ज्वरघ्न** पु० ज्वरं हन्ति हन्—क्यमनुष्यकर्त्तरि टक्। १गुडूच्याम्, २वासकवृक्षे २ज्वरनाशके त्रि० मद्० तत्। ४भङ्गिलतायां स्त्री ङीप्। राजनि०।

**ज्वरधूमकेतुरस** पु० ज्वरस्य धूमकेतुरग्निरिव दाहकत्वात् कर्म०। "भवेत् समं क्षतसंशुद्धफेनं त्रिकटुलगन्धं परिमर्द्य यत्नात्। नवज्वरे वल्गुमितं त्रिवासरमार्द्रांम्बुनाऽयं ज्वरधूमकेतुः" भैषज्वर० उक्ते औषधभेदे।

**ज्वरनागमयूरचूर्ण** न० ज्वर एव नागः सर्पस्तस्य मयूर इव हिंसकत्वात् कर्म०।

"लौहाभ्रटङ्कनं ताम्रं तालकं वङ्गमेव च। गुडूक्तं गन्धकञ्च शिग्रुबीजं फलत्रिकम्। चन्दनादिविषा पाठा वचा च रजनीद्वयम्। उशीरं चित्रकं देवकाष्ठञ्च सपटोलकम्। जीवकर्षभकाजाजृक्षालीयं वंशलोचना। कण्टकारीफलं मूलं शटीपत्रं कटुत्रयम्। गुडूची सत्वधन्याकं कटुका घोषपर्पटी। सुक्तकं बालकं बिल्वं यष्टीमधुसमं समम्। भागाश्चतुर्गुणं देयं कृष्णजीरस्य चूर्णकम्। ततुल्यं तालपुष्पञ्च चूर्णं दण्डोत्पलाभवम्। कैरातं ततुल्यं देयं ततुल्यं चपलाभवम्। एतच्चूर्णं समाख्यातं ज्वरनागमयूरकम्। प्रतिकर्षमितं खाद्यं युक्त्या वा रुचिवर्द्धनम्। सन्ततादिज्वरं हन्ति साध्यासाध्यं न संशयः। क्षयोद्भवञ्च धातुस्थं कामशोकोद्भवं ज्वरम्। भूतावेशज्वरञ्चैवमभिचारसमुद्भवम्। दाहशीतज्वरं घोरं चातुर्थ्यादिविपर्ययम्। जीर्णञ्च विषमं सर्वं प्लीहानसदरं तथा। कामलां पाण्डुरोगञ्च शोथं हन्ति न संशयः। भ्रमं तृष्णाञ्च कासञ्च शूलानाहौ क्षयं तथा। यकृतं गुल्ममूलञ्च आमवातं निहन्ति च। त्रिकपृष्ठकटीजानुपार्श्वानां शूलनाशनम्। अनुपानं शीतजलं न देयमुष्णवारिणा" भैषज्वर० उक्ते औषधभेदे

**ज्वरबलि** पु० ज्वरशान्त्यै देयो बलिः शाक०। भैषज्वर० उक्ते ज्वरनाशके बलिभेदे तत्प्रकारो यथा

"ज्वरामयस्टकीतस्य सृष्टिभिर्नवभिः कृतम्। तण्डुलैरोदनं तेन कुर्यात् पुत्तलकं शुभम्। तं हरिद्राविलिप्ताङ्गं चतुःपीतध्वजान्वितम्। हरिद्रारसपूर्णाभिः पुटिकाभिश्चतसृभिः। मण्डितं गन्धपुष्पाद्यैरवकीर्य्य विसर्जयेत्। एवं दिनत्रयं कुर्यात् ज्वररोगोपशान्तये" (ओदनेन पुत्तलं निर्म्माय वीरणचाचिकायां संस्थाप्य हरिद्राभिरवलिप्य चतुःपीतपताकाभिरलङ्कृत्य गन्धपुष्पाद्यैरवकीर्य्य हरिद्रारसपूर्णाश्चतस्रः पुटिकाश्चतुःकोणे संस्थाप्याः)। पुटिका अश्वत्थपत्ररचितठोङ्गा। अन्योऽपि प्रकारो विधानपारिजातादौ द्रष्टव्यः।

**ज्वरभैरवचूर्ण** न० ज्वरस्य भैरव इव विनाशकत्वात् कर्म०।

"नागरं त्रायमाणा च पिचुमर्दो दुरालभा। पथ्या सुक्तं वचा दारु व्याघ्री शृङ्गी शतावरी। पर्पटं पिप्पलीमूलं विशाला पुष्करं शटी। मूर्वा कृष्णा हरिद्रे द्वे लोध्रचन्दनसुष्ककम्। कुटजस्य फलं वल्कं यष्टीमधुकचित्रकम्। शोभाञ्जनं वला चातिविषा च कटुरोहिणी। मूषली पद्मकाष्ठञ्च यमानी शालपर्णिका। मरिचं चामृता बिल्वं बालं पद्मस्य पर्पटी। तेजपत्रं त्वचं धात्री पृश्निपर्णी पटोलकम्। गन्धकं पारदं लौहमभ्रकञ्च मनःशिला। एतेषां समभागेन चूर्णमेव विनिर्दिशेत्। तदर्द्धं प्रक्षिपेत्तत्र चूर्णं भूनिम्बसम्भवम्। मात्रामस्य प्रयुञ्जीत दृष्ट्वा दोषबलाबलम्। चूर्णं भैरवसंज्ञन्तु ज्वरान् हन्ति न संशयः। पृथग्दोषांश्च विविधान् समस्तान् विषमज्वरान्। द्वन्द्वजान् सन्निपातोत्थान् मानसानपि नाशयेत्। प्राक्तं वैकृतञ्चैव सौम्यं तीक्ष्णमथापि वा। अन्तर्गतं बहिःस्थञ्च निरामं साममेव च। ज्वरमष्टविधं हन्ति साध्यासाध्यं न संशयः। नानादेशोद्भवञ्चैव वारिदोषभवं तथा। विरुद्धभेषजभवं ज्वरमाशु व्यपोहति। अग्निमान्द्यं यकृत् प्लीहा पाण्डुरोगमरोचकम्। उदरागन्त्रदृष्टिञ्च रक्तपित्तं त्वगामयम्। क्षयञ्चैव शिरःशूलं वातामयरुजां जयेत्। ज्वरभैरवसंज्ञन्तु भैरवेण कृतं शुभम्" भैषज्वर० उक्ते औषधभेदे।

**ज्वरभैरवरस** पु० ज्वरे भैरव इव नाशकत्वात् कर्म०।

"त्रिकटु त्रिफला टङ्कविषगन्धकपारदम्। जैपालञ्च समं मर्द्यं द्रोणपुष्पीरसैर्दिनम्। ताम्बूलेन समं खादेद्वल्गुशाभितां वटीम्। सद्यश्चूर्णं शिखरिणी पथ्यं देयं प्रयत्नतः। नवज्वरं त्रिदोषोत्थं जीर्णञ्च विषमज्वरम्। दिनैकेन निहन्त्याशु रसोऽयं ज्वरभैरवः" भैषज्वर० उक्ते औषधभेदे।

ज्वरमातङ्गकेशरिरस पु० ज्वर एव मातङ्गो गजस्तत्र केशरीव कर्म्म०।

"पारदं गन्धकं चैव हरितालं समाक्षिकम्। कटुत्रयं तथा पथ्या चारौ द्वौ सैन्धवं तथा। निम्बस्य विषतरेश्च बीजं चित्रकमेव च। एषां मात्रमितं भागं व्याघ्रं प्रति सुसंस्कृतम्। द्विमाषं कानकफलं विषस्यापि द्विमाषिकम्। निर्गुण्डीस्वरसेनैव शोषयेत्तत् प्रयत्नतः। सार्द्धरत्तिप्रमाणेन वटी कार्य्या सुशोभना। सर्वज्वरहरी चैषा भेदिनी दीपनाशिनी। आमाजीर्णप्रशमनी कासला पाण्डुरोगहा। वह्निदीप्तिकरी चैषा जठरामयनाशिनी। उष्णोदकानुपानेन दातव्या हितकारिणी। भाषितो लोकनाथेन ज्वरमातङ्गकेशरी" भैषज्यर० उक्ते औषधभेदे।

ज्वरमुरारिरस पु० ज्वरो सुर इवाहरभेदस्तस्यारिः कर्म्म०।

"शुद्धसूतं शुद्धगन्धं विषञ्च दरदं पृथक्। कर्षप्रमाणं कर्षार्द्धं लवङ्गं मरिचं पलम्। शुद्धं कनकबीजञ्च पलद्वयमितं तथा। लिहता कर्षमेकञ्च भावयेद्दन्तिकाद्रवैः। सप्तधा च ततः कार्य्या गुडीगुञ्जासमा शुभा। ज्वरमुरारिनामायं रसोज्वरकुलान्तकः। अत्यन्ताजीर्णपूर्णे च ज्वरे विषमसंयुते। सर्वाङ्गपक्षघीगुल्मे चामवातेऽस्रपित्तके। कासश्वासे यक्ष्मरोगेऽप्युदरे सर्वसम्भवे। षट्प्रकारे सन्निपाते ज्वरे शोथे च दुस्तरे। यकृति प्लीहरोगे च वातरोगे चिरोत्थिते। अष्टादश कुष्ठरोगे सिद्धो गुरुविनिर्म्मितः" भैषज्यर० उक्ते औषधभेदे।

ज्वरशूलहररस पु० ज्वरस्य शूलं वेदनां हरति हृ-अच् कर्म०

"रसगन्धकयोः कृत्वा कज्जलीं भाण्डमध्यगाम्। तत्राधोवदनां ताम्रपात्रीं संरुध्य शोषयेत्। पादाङ्गुष्ठप्रमाणेन चूल्ल्यां ज्वालेन तां दहेत्। यामद्वयं ततस्तस्यं रसपात्रं समाहरेत्। चूर्णयेद्दन्तियुगलं तृतीयं वा विचक्षणः। ताम्बूलीदलयोगेन दद्यात् सर्वज्वरेष्वसुम्। जीरसैन्धवसंयुक्तं वक्त्राय ज्वरिणे हितम्। खेदोद्भवो भवत्येव देवि! सर्वेषु पाण्मसु। वातपित्तकादीन् विषमान् नवमाग्नामिनं ज्वरम्। साधारणं सन्निपातं जयत्येष न संशयः। ज्वरशूलहरो नाम रसोऽयं सप्तदाहृतः" भैषज्यर० उक्ते औषधभेदे।

ज्वरसिंहरस पु० ज्वरस्य तद्रूपगजस्य सिंह इव हन्तृत्वात् कर्म०। भैषज्यरत्नावल्युक्ते औषधभेदे। तच्चैवं यथा

"पारदं गन्धकं तालं भल्लातकमथैव च। वज्रीक्षीरसमायुक्तमेकत्र विमर्दयेत्। मृत्तिकाभाजने स्थाप्यं सुद्रितव्यं विचक्षणैः। अग्निं प्रज्वालयेत्तत्र प्रहरद्वय संख्यया। शीतलं खलयेत्तत्र भावना च प्रदीयते। भृङ्गराजरसैरत्र गण्डदूर्वाभवैः रसैः। चित्रकस्य रसेनापि भावना दीयते पुनः। पचात्तच्चूर्णयेद् यत्नात् कूपिकायाञ्च धारयेत्। ज्वरं उत्पद्यते यस्य चतुर्थे वापरे पुनः। माषैकञ्च रसं देयं तत्तच्चणाज्ज्वरं हरेत्। ज्वरशान्तेः परं पथ्यं देयं मुद्गौदनः पयः। ज्वरसिंहरसो नाम सर्वज्वरविनाशनः"।

ज्वरहन्तृ त्रि० ज्वरं हन्ति हन्-तृच्। ज्वरनाशके स्त्रियां ङीप्। सा च २मल्लिकायां राजनि०। (हारा०।

ज्वरारि पु० ज्वरः अग्निरिव सन्तापकत्वात्। आधिमन्थौ

ज्वराङ्कुशरस पु० ज्वरस्य गजरूपस्य अङ्कुश इव प्रतिरोधकत्वात् कर्म०। भैषज्यर० उक्ते औषधभेदे स च नानाविधो यथा

"शुद्धं सूतं विषं गन्धं धूर्त्तबीजं त्रिभिः समम्। चतुर्थांशं त्रिगुणं श्लोषं चूर्णं गुञ्जाद्वयं हितम्। जम्बीरस्य च मज्जाभिरार्द्रकस्य रसैर्युतम्। ज्वराङ्कुशो रसो नाम्ना ज्वरान् सर्वान् निहन्ति वै। (श्लोषं मिलित्वा त्रिगुणम्।)(अयं भेदि ज्वराङ्कुशो नाम्ना ख्यातः।) अन्योऽपि तत्रैव उक्तो यथा "रसस्य त्रिगुणं गन्धं गन्धतुल्यञ्च टङ्कनम्। रसतुल्यं विषं योज्यं मरिचं पञ्चधा विषात्। कट्फलं दन्तिबीजञ्च प्रत्येकं मरिचोन्मितम्। ज्वराङ्कुशो रसोह्येष चूर्णयेदतिचिक्कणम्। माषैकेन निहन्त्याशु ज्वरं जीर्णं त्रिदोषजम्"। अत्रानुरूपमात्रां शर्करादीनां निपीय गिलित्वा किञ्चिज्जलं पिबेत्। अन्यविधोऽपि तत्रैवोक्तो यथा

"ताम्रकाद् द्विगुणं तालं मर्दयेत् सुधीद्रवैः। प्रथमे भूधरे शीते वज्रीक्षीरेण मर्दयेत्। प्रथमे भूधरे पश्चात् पञ्चगुञ्जामितं भवेत्। आर्द्रकस्य रसेनैव सर्वज्वरनिकृन्तनः। ऐकाहिकम् द्व्याहिकञ्च त्र्याहिकं चातुराहिकम्। विषमञ्चापि शीतार्त्तं ज्वरं हन्ति ज्वराङ्कुशः" अन्यविधोऽपि तत्रैव "शुद्धसूतं तथा गन्धं कर्षमानं नयेद् बुधः। महौषधं टङ्कनञ्च हरितालं तथा विषम्। रसार्द्धं मर्दयेत् खल्वे भृङ्गराजरसेन तु। त्रिदिनं भावनां दत्त्वा चतुर्थे वटिकां ततः। कुर्यात्तुण्डकमात्राञ्च पिप्पलीमधुसंयुताम्। एष ज्वराङ्कुशो नाम विषम-

ज्वरनाशनः" महौषधादीनां चतुर्णां प्रत्येकं रसार्द्धम्। अन्यविधोऽपि "मरिचं टङ्कनं शङ्खचूर्णं पारदगन्धकम्। शोधितं ब्रह्मयष्टेश्च भागमेकं विनिःक्षिपेत्। गुञ्जामात्रा प्रदातव्या नागवल्लीदलैः सह। ज्वराङ्कुशो रसोह्येष ज्वरमष्टविधं जयेत्" अन्यविधोऽपि "त्रिभागताम्रेण हतञ्च ताम्रं रसञ्च गन्धञ्च समीनमायुः। विषं समं तद्द्विगुणञ्च ताम्रं त्रिसप्तवारञ्च दिवाकरातपे। संमर्द्य निम्बुस्वरसेन चूर्णं गुञ्जाप्रमाणं सितया समेतम्। ज्वराङ्कुशोऽयं विविधप्रभावो ज्वरं निहन्त्यष्टविधं समग्रम्" मीनमायुः मत्स्यपित्तम्। [राजनि०।

**ज्वराङ्का** स्त्री ज्वरस्याङ्कबाधनमङ्कमस्याः ङीप्। भद्रदन्तिकायां

**ज्वरातिसार** पु०। ज्वरयुक्तोऽतिसारः। ज्वरयुक्ते अतिसाररोगे तत्स्वरूपादि भैषज्यर०उक्तौ यथा। "पित्तज्वरे पित्तमवोऽतिसारस्तथातिसारे यदि वा ज्वरः स्यात्। दोषस्य दुष्यस्य समानभावाज्ज्वरातिसारः कथितो भिषग्भिः"। "ज्वरातिसारयोरुक्तमन्योन्यं भेषजं पृथक्। न तन्मिलितयोः कुर्यादन्योन्यं वर्द्धयेद् यतः। प्रायोज्वरहरं भेदि, स्तम्भनन्त्वतिसारहृत्। अतोऽन्योन्यविरुद्धत्वाद् वर्द्धनं तत्परस्परम्। ज्वरातिसारिणामादौ कुर्यात् लङ्घनपाचने। प्रायस्तावामसम्बन्धं विना न भवतो यतः। ज्वरातिसारे मेषादिक्षमः स्याल्लङ्घिते हितः। ज्वरातिसारी मेषां वा पिबेत् साम्भां भृतां नरः"।

**ज्वरान्तक** पु० ज्वरस्यान्तक इव ज्वरमन्तयति वा अन्तिण्वुल् वा हृतःकर्म०। वारम्बधे नेपालनिम्बे (सोंदाल) राजनि०। ज्वरान्तकरसः।

**ज्वरान्तकरस** पु० ज्वरस्यान्तकः कर्म०।

"भास्करोगन्धकः सर्जो देवी विहङ्गतीक्ष्णकम्। शोणितं गगनञ्चैव पुष्करञ्च महेश्वरम्। भूनिम्बादिगणैर्भाव्यं मधुना गुडिका दृढा। चातुर्थकं तृतीयञ्च ज्वरं सन्तकं तथा। आमज्वरं भूतहतं सर्वज्वरमपोहति" भैषज्यर० उक्ते औषधभेदे। अत्र सर्जोरसः, देवी सौराष्ट्रमृत्तिका, विहङ्गं स्वर्णमाक्षिकं, पुष्करं रसाञ्जनं, महेश्वरं सुवर्णम् अन्यत् सुगमम्। ताम्रादीनां समभागचूर्णं भूनिम्बादिक्वाथेन भावयेत्। भूनिम्बाद्यष्टादशद्रव्याणि सर्वद्रव्यतुल्यानि अष्टावशिष्टं क्वाथं कृत्वा दिनत्रयं विभाव्य विशोष्य मधुना विमर्द्य अनुरूपं लिहेत्"

**ज्वरापहा** स्त्री०ज्वरमपहन्ति अप+हन-ड हृतः। (बेलशुँठ) १विल्वगुण्ठ्राम्, २विल्वपत्रग्राह्ये। ३ज्वरनाशके त्रि०। शब्दच०।

**ज्वरार्य्यम्ब** पु० ज्वरस्यारिः कर्म०।

"अभ्रं ताम्रं रसं गन्धं विषञ्चेति समं समम्। द्विगुणं धूर्त्तबीजञ्च व्योषं पञ्चगुणं मतम्। जलेन वटिकां कुर्याद् यथा दोषानुसारतः। अभ्रं ज्वरारिनामेदं सर्वज्वरविनाशनम्। वातिकान् पैत्तिकांश्चैव श्लैष्मिकान् सान्निपातिकान्। विषमाख्यान् दुष्टजांश्च धातुस्थान् विषमज्वरान्। नाशयेन्नात्र सन्देहो दृष्टमिन्द्राशनिर्यथा। क्षौद्रानं यत्नतं शुल्बमग्निमान्द्यं यशोयकम्। कासं श्वासं तृषां कम्पं दाहं शीतं वमिं भ्रमिम्" भैषज्यर० उक्ते औषधभेदे।

**ज्वरारिरस** न० ज्वरस्यारिः कर्म०।

"दरदवल्लिरसानां शुल्वनागाभ्रकाणाम् शुभ्रविटङ्गिलानां सर्वमेकत्र योज्यम्। विपिनस्थपद्मोत्थैर्भावितं शोषयेत्तम् दिवसदशसमाप्तौ रात्रिकैकाञ्च कुर्यात्। एकैकां भक्षयेदस्य चार्द्रकस्य रसैर्युताम्। दत्तमात्रं ज्वरं हन्ति ज्वरारिः स निगद्यते। सर्वशूलविनाशी च कफपित्तविनाशनः"। भैषज्यर० उक्ते औषधभेदे। सर्वं (सोँदाली) पत्ररसेन दशदिनं भावयित्वा गुञ्जाप्रमाणमार्द्रकरसेन देयम्"।

**ज्वराशनिरस** पु० ज्वरस्याशनिरिव नाशकत्वात् कर्म०।

"रसं गन्धं सैन्धवञ्च विषं ताम्रं समं भजेत्। सर्वचूर्णसमं लौहं तत्समं चूर्णमभ्रकम्। लौहे च लौहदण्डे च निर्गुण्ड्याः स्वरसेन च। मर्दयेत् यत्नतः प्रयान्मरिचं स्नुतदुग्धकम्। पर्णेन सह दातव्यो रसो रात्रिकसन्मितः। कासं श्वासं महाघोरं विषमाख्यं ज्वरं वमिम्। धातुस्थं प्रबलं दाहं ज्वरदोषं चिरोद्भवम्। यत्नदुल्बोदरश्लीपज्वयुञ्च विनाशयेत्" भैषज्यर०उक्ते औषधभेदे। [ज्वरशब्दे उदा०।

**ज्वरित** त्रि०ज्वरः संजातोऽस्य तारका० इतच्। १ज्वरयुक्ते

**ज्वरिन्** त्रि० ज्वरोऽस्यास्ति इनि। ज्वरयुक्ते स्त्रियां ङीप्।

**ज्वल** दीप्तौ चलने च भ्वा० परः अक० सेट्। ज्वलति अज्वालीत्। घटा० ज्वलयति। ज्वला० ज्वलः ज्वालः। "ज्वाल लोकस्थितये स राजा" भट्टिः। "जागर्त्ति लोको ज्वलति प्रदीपः सखीगणः पश्यति कौतुकेन। सङ्कल्पमात्रं कुरु नाथ! धैर्यं दुर्भुक्षितः किं विकरेण भुङ्क्ते" उद्भटः।

उदादिपूर्वकस्य तत्तदुपसर्गद्योत्यार्थयुक्तदीप्तौ । उज्ज्वलः ।

**ज्वल** त्रि० ज्वल–दीप्तौ वा क्च् । दीप्तिविशिष्टे । [क्षेम० ।

**ज्वलका** स्त्री ज्वलतीति ज्वल–वा० वुन् । अग्निशिखायां

**ज्वलति** पु० ज्वल–भावे क्तिन् । ज्वलनक्रियायाम् । "भ्राजते" इत्याद्युपक्रमस्य एकादश ज्वलतिकर्मणः निघ० २।६। उक्तम् ।

**ज्वलन** त्रि० ज्वल–ताच्छील्यादौ युच् । १दीप्तिशीले, २वह्नौ ३चित्रकवृक्षे च पु० अमरः ।

**ज्वलनाश्मन्** पु० नित्यकर्म० । सूर्य्यकान्तमणौ राजनि० ।

**ज्वलित** त्रि० ज्वल–क्त । १दग्धे २दीप्ते च ।

**ज्वलिनी** स्त्री ज्वल–वा० इनि ङीप् । मूर्वालतायां राजनि०

**ज्वाल** पुंस्त्री ज्वल–घञ् । १अग्निशिखायाम् अमरः । २दीप्तियुक्ते त्रि० । ३दग्धान्ने स्त्री शब्दच० । भावे घञ् । ४ दीप्तौ पु० ।

**ज्वालखरगर्द** पु० ज्वालगर्दभाख्ये रोगे राजनि० । ज्वालगर्दभशब्दे दृश्यम् ज्वालागर्दभामयोऽप्यत्र राजनि० ।

**ज्वालाजिह्व** पु० ज्वाला शिखैव जिह्वा यस्य दाह्यवस्तुलेहनसाधनत्वात् । १वह्नौ क्षेम० तन्नामनामके चित्रके च ।

**ज्वालामालिनी** स्त्री ज्वालानां शिखानां मालाऽस्यस्य इनि ङीप् । देवीभेदे । तन्त्रन्तरादिके तन्त्रसारे उक्तं यथा "ओं नमो भगवति ! ज्वालामालिनि ! स्फ्रगणपरिवृते ! हुं फट् स्वाहा"। तस्याङ्गन्यासः । "ओं नमो हृदयं प्रोक्तं भगवतीति शिरः स्मृतम् । ज्वालामालिनीति च शिखा स्फ्रगणपरिवृते ततः । वर्म स्वाहास्त्रमित्युक्तं जातियुक्तं न्यासेत्तमैः । प्रयोगस्तु ओं नमो हृदयाय नम इत्यादि "अमुको नियतश्चैव जपेन्मन्त्रं जपाव्ययी । जपेदष्टसहस्रन्तु त्रयोविंशतिवासरान् । मन्त्रं साधने सिद्धिमाददाति न संशयः । स्मृतिमात्रेण वै मन्त्री रिपून् सर्वान् विनाशयेत्" ।

**ज्वालामुखी** स्त्री पीठस्थानभेदे । "ज्वालासख्यां महाजिह्वा देव ! उन्मत्तभैरवः । अम्बिका सिद्धिदानाम्नी स्त्री जालन्धरे नमेति" तन्त्रम् । २विद्याभेदे "ज्वालासखीक्रमं वक्ष्ये सा पूजा मध्यतः शुभे । नित्यारूपा महानन्दा महामोहाप्रबन्धिनिः । कमला श्रीभारती च आकर्षणी महेन्द्रपि । ब्रह्माणी चैव माहेशी कौमारी वैष्णवी तथा । वाराही चैव माहेन्द्री चामुण्डेति च पूजयेत् । विजया चाजिता चैव मोहिनी चापराजिता । स्तम्भनी जयनी पूजा कालिका पद्मवाहृतः । ज्वालासखी च संपूजा विषादिहरणं भवेत्' । गारुड० पु । २०४ अ०

**ज्वालावक्त्र** पु० ज्वालेव वक्त्रमस्य । शिवे ब्रह्मपु० ।

**ज्वालिन्** पु० ज्वल–णिनि । १शिवे "शिखी सुखी जटी ज्वाली मूर्त्तिजोमूर्द्धगो वली" भा० अनु० १७ अ० । २शिखायुक्तमात्रे ३दीप्तियुक्ते च त्रि० स्त्रियां ङीप् ।

**ज्वालेश्वर** पु० मत्स्यपु० उक्ते तीर्थभेदे ।

इति श्रीतारानाथतर्कवाचस्पतिभट्टाचार्य्यनिर्म्मिते वाचस्पत्ये जकारादिशब्दार्थसङ्कलनम् ।

---

## झ

झकारो व्यञ्जनवर्णभेदोऽर्द्धमात्राकालोच्चार्य्यस्तस्योच्चारणस्थानं तालु आभ्यन्तरप्रयत्नः जिह्वामध्येन तालुनः स्पर्शः। बाह्यप्रयत्नाः संवारनादघोषामहाप्राणत्व। मातृकान्यासेऽस्य वामकराङ्गुलीमूले न्यस्तता। अस्य ध्येयरूपं कामधेनुतन्त्रे उक्तं यथा "झकारं परमेशानि! कुरुकर्णी मोक्षरूपिणीम्। रक्तविद्युल्लताकारं सदा त्रिगुणसंयुतम्। पञ्चदेवमयं वर्णं पञ्चप्राणात्मकं सदा। त्रिबिन्दुसहितं वर्णं त्रिशक्तिसहितं तथा" वर्णोद्धारतन्त्रे तदधिष्ठातृदेवतारूपं यथा "ध्यानमस्य प्रवक्ष्यामि शृणुष्व कमलानने!। सन्तप्तहेमवर्णाभां रक्ताम्बरविभूषिताम्। रक्तचन्दनलिप्ताङ्गीं रक्तमाल्यविभूषिताम्। चतुर्हस्तयुतां देवीं रत्नहारोज्वलां पराम्। ध्यात्वा ब्रह्मस्वरूपां तां तन्मन्त्रं दशधा जपेत्"। तस्य वाचकशब्दाः वर्णाभिधानतन्त्रे उक्ता यथा "झो झङ्कारी गुहो मार्गी झर्झरो वायुः सखनः। अजेयो द्राविणी नादः पाणी जिह्वा जलं स्थितिः। विराजेन्द्रो धनुर्हस्तः कर्कशः नादजः कुब्जः(कुजः)। दीर्घबाहुरसोरूपं शाकम्भितसुचञ्चलम्। दुर्मुखो नट आत्मवान् विकटा कुचमण्डल(ल्ल)कः। कलहंसप्रिया वामा वामाङ्गलक्षणपर्वकः। दक्षहासोऽट्टहासश्च पाशहस्ता व्यञ्जनस्वरः" मात्राभेदे तस्य प्रथमविन्यासे फलञ्च तं॰र॰टी॰ "प्रीतिं जो मित्रलाभं भयमरणकरौ झञौ ठठौ खेददुःखे"।

**झ** पु॰ झट-संहतौ ड। १झञ्झावाते २नदे ३जलवर्षणे शब्दर॰ ४भिक्षीणे ५देवगुरौ ६दैत्यराजे ७ध्वनिभेदे ८वज्रवाते च मेदि॰। [परमेशानि!"कामधेनुत॰।

**झकार** पु॰ झ+स्वार्थे कारप्रत्ययः। झस्वरूपे वर्णे "झकारं

**झगझगायमान** त्रि॰ झगझग+अभूततद्भावे भवा॰ क्यङ् शानच्। देदीप्यमाने। "मयूरवरगामिनीं सुरदणडवर्त्तोत्कटां रणत्कणितघण्टिकां निशितशक्तिशूलोद्यताम्। प्रभानिकररञ्जितभिन्नझगझगायमानांशुकां नमामि गुहसम्भवां त्रिदशचक्रचूडामणिम्" देवी॰ पु॰।

**झगति** अव्य॰ झटिति+पृषो॰। शीघ्रार्थे शब्दार्थचि॰।

**झङ्कार** पु॰ झमित्यव्यक्तशब्दस्य कारः क-घञ्। १भ्रमरादिशब्दे। "मन्दं सञ्चरितपांशुलः परिपतन् झङ्कारझङ्कामरुत्"अमरश॰। ततः तार॰ इतच्। झङ्कारित तच्छब्दयुक्ते त्रि॰। २जलकणवर्षणे च शब्दर॰।

**झङ्कारिणी** स्त्री ङीप्। गङ्गायां भिरुटीशब्दे उदा॰।

**झङ्कृता** स्त्री तारादेवतायां "झर्झरी झङ्कृता झिल्ली झरी झर्झरिका तथा" तारासहस्रनाम।

**झङ्कृति** स्त्री झम् इत्यव्यक्तशब्दस्य कृतिः क-क्तिन्। कांस्यादेर्ध्वनौ शब्दार्थचि॰।

**झञ्झा** स्त्री झमिति कृत्वा झटति झट-ड। १ध्वनिभेदे, तथाध्वनियुक्ते २प्रचण्डवायौ च शब्दर॰।

**झञ्झानिल** पु॰ झञ्झायुक्तोऽनिलः। प्राड्विवाते त्रिका॰ झञ्झामरुदादयोऽप्यत्र झङ्कारशब्दे उदा॰।

**झट** संहतौ भ्वा॰ पर॰ अक॰ सेट्। झटति अझाटीत्-अझटीत्। अझाट।

**झटा** स्त्री झट-अच्। १शीघ्रे। २भूम्यामलक्यां शब्दार्थचि॰

**झटि** पु॰ झट-इन्। क्षुद्रतृणभेदे। (झाँटि) शब्दार्णव॰।

**झटिति** अव्य॰ झट क्विप् झट् इण-क्तिन् ह्रस्व॰ खरादि। १शीघ्रे अमरः। "व्यङ्गा मेहं झटिति यत्तनामञ्जुकुञ्जं जगाम" पदाङ्कदूतम्।

"झटित्यन्यसमाक्षेपे तदा दोषो न विद्यते" "मनः सान्द्रानन्दं स्पृशति झटिति ब्रह्म परमम्" सा॰ द॰।

**झडक** पुंस्त्री अन्त्यजवर्णभेदे "प्रपासरस्ये झड़कस्य कूपे द्रोणां जलं कोद्यविनिर्गतञ्च" व्यतिसं॰।

**झणझणा** अव्य॰ झणत् डाच् द्वित्व पूर्वपदटिलोपः। १अव्यक्तशब्दभेदे २तच्छब्दयुक्ते "सर्वं झणझणाभूतमासीत्तालवनेघिव" भा॰भी॰१६अ॰।३झणत्कारशब्दभेदे च।

**झण(न)त्कार** पु॰ झण(ण)दित्यव्यक्तशब्दस्य कारः क-घञ्। कङ्कणादिध्वनौ। "उद्धेलुद्भुजवल्लिकङ्कणझण(न)त्कारः क्षणं वार्य्यताम्" कालिदासः। "उद्धेजयति दरिद्रं परसद्रागणनझणत्कारः" उद्भटः।

**झम** भये भ्वा॰ पर॰ सक॰ सेट्। झमति अझमीत्। जझाम। उदित् झमित्वा-झान्त्वा। झान्तः।

**झम्प** पु॰ झम्फ+पृषो॰(झाँपदिया पड़ा) झम्फे स्वेच्छाधीने संपातपतने जटाधरः। भावे घ। तत्रार्थे स्त्री "पुच्छास्फोटदलत्सलूनविवरैः पातालझम्पाश्च ताः" मङ्गावीर॰

**झम्पाक** पुंस्त्री झम्पेन आकायति या+कै+क। १वानरे शब्दच॰। स्त्रियां जातित्वात् ङीष्।

**झम्पाग्नि** पु॰ झम्पेन जले स्वेच्छया पतनेनाग्नाति अग्निनि। मत्स्यरूपविष्णौ जटाधरः स्त्रियां ङीष्।

भल्लिन् पु० भल्ल+अस्त्यर्थे इनि। वानरे शब्दर०।

भर पु० भृ-अच्। निर्झरे उत्साद्विर्गते जलप्रवाहे। "स तदुच्चकुचौ भवनं प्रभाभरचक्रभ्रमिमातनोति यत्" नैष०। तस्य स्त्रीत्वं भरत आह ततः टाप् गौरा० ङीष् वा। "विडलपुलिनाः कल्लोलिन्यो नितान्तपतज्-झरामसृचितशिलाः शैलाः सान्द्रद्रुमा वनराजयः" प्रबोधच०। २तारिण्यां स्त्री ङीष् भङ्गताशब्दे उदा०।

भर्च उल्लौ भर्त्सने च तुदा० पर० सक० सेट्। भर्चति अभर्चीत्। जभर्च।

भर्च्छ उल्लौ भर्त्सने च तुदा० पर० सक० सेट्। भर्च्छति अभर्च्छीत्। जभर्च्छ। [अभर्भीत्। जभर्भ।

भर्भ उल्लौ भर्त्सने च तुदा० पर० सक० सेट्। भर्भति

भर्भर पु० भर्भ-करच्। (झाँज) इति ख्याते १वाद्यभेदे २पटहे, ३कलियुगे, ४नदभेदे च। ५वेत्रनिर्मितदण्डभेदे पु० "काञ्चनोष्णीषि-णस्तत्र वेत्रभर्भरपाणयः" भा०भी०६८ अ०। ७वेश्यायां स्त्री त्रिका०टाप्। ८तारादेव्यां स्त्री भङ्गताशब्दे उदा०। ९वाद्यभेदे स्त्रीशब्दर०गौरा०ङीष्। १०पाकसाधने लौह-मये (झाझरा) इति ख्याते पदार्थे पु० रत्नमा०। भर्भरः तदादां शिल्पमस्य वा ठक्। भार्भरिक तदादनशीले त्रि० पक्षे अण्। भार्भर तत्रार्थे त्रि०स्वार्थे क। भर्भरिका तारिण्यां भङ्गताशब्दे उदा०।

भर्भरक पु० भर्भर+संज्ञायां कन्। कलियुगे त्रिका०।

भर्भरावती स्त्री भर्भरः शब्दभेदोऽस्त्यस्य मतुप् मस्य वः संज्ञायां पूर्वपददीर्घः। गङ्गायां भिरण्टोशब्दे उदा०।

भर्भरिन् पु० भर्भरोऽस्त्यस्य इनि। शिवे "त्वं गदी त्वं शरी चापी खड्गी भर्भरी तथा" भा० शा०२८६ अ०।

भर्भरीक पु० भर्भ-ईकन् फर्फरीका० नि०। शरीरे उज्ज्वलद०। [ शौल्कालने शब्दार्थचि०

भलज्झला स्त्री ज्वलन्तं ज्वलति अच् पृषो०। वह्निज्वाले

भला स्त्री भरा-पृषो०। १कन्यायाम् २व्यातपोष्णौ च मेदि०

भल्ल पुंस्त्री भर्त्सं क्विप् तं लाति ला-क स्य लः। "भल्लो-मलुश्च राजन्याद् ब्राह्मात्क्षत्रियवैश्यजे जातिभेदे। "भल्लामलुानटा-श्चैव पुरुषा शस्त्रवृत्तयः। द्यूतपानप्रसक्ताश्च अवन्या राजसी गतिः"। मनुना तस्य शस्त्रवृत्तित्व (नेटाली) सङ्गम् "तत्र भल्ला यदिप्रहरणाः" कुल्लू०। "तत्र भल्लानटा भल्लाः स्मृता वैतालिकास्तथा" भा०स०४अ०।

भल्लक न० भर्त्स-क्विप् तं लाति ला-क संज्ञायां स्य लः। वाद्यभेदे कांस्यनिर्मितकरताले "शिवागारे भल्लकस्य स्वर्णागारे च शङ्खकम्। दुर्गागारे वंशिवाद्यं मधुरीं च न वादयेत्" ति० त०। तत्रार्थे स्त्री शब्दार्थचि०। गौरा० ङीष्।

भल्लकण्ठ पु०स्त्री भल्लस्तत्स्वरः इव कण्ठः कण्ठस्वरोऽस्य। पारावते हारा०। स्त्रियां जातित्वात् ङीष्।

भल्लरा स्त्री भर्भर्ति भर्त्स-अरन् पृषो०। १झर्झरवाद्ये वाद्यभेदे २क्षुद्रङ्के शब्दकङ्कोचे मेदि०। ३गृहे, ४क्षुद्रे च अजयपालः। गौरा०ङीष्। भल्लरीत्यप्यत्रार्थे।

भल्लिका स्त्री भर्भ-एवुल् पृषो०। १उद्वर्त्तनमले २द्योते ३दीप्तौ च शब्दार्थचि०।

भल्लीपक्व न० भल्लीपक्व+पृषो०। खल्वभेदे "भल्लीपक्वन्तु खय-मेव क्षुण्णः खुवंशघोषं नरदेव! पार्थ!" हरिवं०१४८अ०।

भल्लोल पु० भर्त्स-क्विप् तथा सन् लोलः पृषो०। तर्कुनाम्नि (टेकुवार वाँटुल) हारा०। [जभाष भषः।

भष वधे भ्वा०पर० सक० सेट्। भषति अभाषीत् अभषीत्।

भष भक्षणे विधाने च भ्वा० उभ० सक० सेट्। भषति-ते अभाषीत् अभषीत् अभक्षिष्ट। जभाष जभक्षे।

भष पु०स्त्री भष-कर्मणि घ। मत्स्ये, अमरः स्त्रियां जाति-त्वात् ङीष् "वंशीकलेन वडिशेन भषीरिवाक्षान्" आनन्दवृन्दावनचम्पूः २मकरे जलजन्तुभेदे "भषानां मकरश्चास्मि" गीता ३मीनराशौ च "कार्ष्मकौलिककन्या युग्मलग्ने भषगे वा" सं०चि०। ४मकरराशौ "कार्ष्मकं तु परित्यज्य भषं संक्रमते रविः" भल०त०। भावे क। ५ताम्रे। कर्त्तरि अच्। ६खिले, ७यने च न०। ८नागवल्लायां स्त्री शब्दार्थचि०। [शब्दार्थचि० भषकेतनादयोऽप्यत्र।

भषकेतु पु० भषो मीनो मकरो वा केतुर्यस्य। मदने

भषाङ्क पु० भषोऽङ्कोऽस्य। १कन्दर्पे उपचारात् २तत्-पुत्रे अनिरुद्धे च हेम०। [स्त्रियां जातित्वात् ङीष्।

भषाशन पुंस्त्री० भषमश्नाति अश्न-ल्यु। शिशुमारे त्रिका०

भषोदरी स्त्री भषस्योदरं जन्मस्थानतयास्त्यस्या अच् गौरा० ङीष्। मत्स्यगन्धायां व्यासमातरि सत्यवत्याम् त्रिकाण्डशेषः। सा च उपरिचरवसुपुत्रेण बृहद्रथ-प्रभृतिना मत्स्ययोनिमाप्तायामद्रिकायामप्सरोभेदस्य गर्भा-ज्जाता तत्कथा भा० आ० ६३ अ०।

"मत्प्रियार्थमिदं सौम्य! शुक्रं मम गृहं नय। गिरि-काया: प्रयच्छाशु तस्या ह्यार्त्तवमद्य वै"। "गृहीत्वा तु

तदा श्येनस्तूर्णमुत्पत्य वेगवान्। जवं परममास्थाय प्रदुद्राव विहङ्गमः। तमपश्यदथायान्तं श्येनं श्येनस्तथापरः। अभ्यद्रवच्च तं सद्यो दृष्ट्वामिषशङ्कया। तयोस्तुमुलमाकाशे तावुभौ संप्रचक्रतुः। युध्यतोरपतद्रेतस्तस्यापि यमुनाम्भसि। तत्राद्रिकेति विख्याता ब्रह्मशापादप्सराः। मीनभावमनुप्राप्ता बभूव यमुनाचरी। श्येनपादपरिभ्रष्टं तद्दीर्यमथ वासवम्। जग्राह तरसोत्पत्य सादिका मत्स्यरूपिणी। कदाचिदथ मत्स्यीं तां जवन्यु र्मत्स्यजीविनः। मासे च दशमे प्राप्ते तदा भरतसत्तम!। उज्जह्रुरुदराच्चस्याः स्त्रीं पुमांसञ्च मानुषौ। आश्चर्यभूतं तज्ज्ञात्वा राज्ञेऽथ प्रत्यवेदयन्। कायेमत्स्याद्भवौ राजन्! संभूतौ मानुषाविति। तयोः पुमांसं जग्राह राजोपरिचरस्तदा। स मत्स्यो नाम राजासीद्धार्म्मिकः सत्यसङ्गरः। साप्सरा मुक्तशापा च चक्रेण समपद्यत। पुरोक्ता सा भगवता तिर्य्यग्योनिगता शुभे!। मानुषौ जनयित्वा त्वं शापमोक्षमवाप्स्यसि। ततः सा जनयित्वा तौ पितरौ मत्स्यघातिना। सन्त्यज्य मत्स्यरूपं तत् दिव्यरूपमवाप्य च। सिद्धविचारणपथं जगामाथ वराप्सराः। या कन्या दुहिता तस्या मत्स्या मत्स्यसगन्धिनी। राज्ञा दत्ता च दाशाय कन्येयन्ते भवत्विति। रूपसत्त्वसमायुक्ता सर्वैः समुदिता गुणैः। सा तु सत्यवतो नाम मत्स्यघात्यभिसंश्रयात्। आसीत् सा मत्स्यगन्धैव किञ्चित्कालं शुचिस्मिता"।

**झाङ्कृत** पु० झामित्यव्यक्तशब्दः कृतो येन। झारभेदे धरणिः। तत्रार्थे झाङ्कृत इति पाठः प्रामादिकः।

**झाट** पु० झट-घिच्-अच्। १निकुञ्जे, २कान्तारे, ३ग्रन्थादीनां मार्जने च मेदि० ४भूम्यामलक्याम् स्त्री अमरः ५यूथिकायाञ्च शब्दच०।

**झाटल** पु० झट-घिच् अलच्। घण्टापाटलौ अमरः।

**झाटामला** स्त्री झट-अच् न मला अमला कर्म०। भूम्यामलक्याम् "झ(झा)टामला झटा ताली" इत्यत्र झाटामलेत्यपदमिति केचित् अतएव "झाटामला ज्योत्स्निका च सतिक्ता तु सुदर्शना" भैषज्यर० उक्तम्।

**झाटिका** स्त्री झाटा स्वार्थे क। भूम्यामलक्याम् शब्दच०।

**झामक** न० झम-कर्मणि ण्वुल्। (झामा) अतिशयपक्वेष्टकायाम् शब्दार्थचि०। [शब्दर०।

**झामर** पु० झम-भावे घञ् मं राति रा-क। तर्कशाके।

**झालि** पु० "आम्रजामफलं पिष्टं राजिकालवणान्वितम्। भृष्टं हिङ्गुयुतं पूतं घोलितं झालिरुच्यते। झालिर्झरति जिह्वायाः कण्ठत्वं कण्ठशोधिनी। मन्दं मन्दं निपीता सा रोचनी वह्निरोधिनी" भावप्र० उक्ते पदार्थे

**झावु** पु० झा-डुति याति गच्छति वा-डु। (झाउ) वृक्षभेदे अमरः स्वार्थे क। तत्रार्थे शब्दर०। [शब्दार्थचि०

**झिङ्काक** न० झिगि-घाकन् पृषो०। (झिङ्गा) फलभेदे।

**झिङ्झिनी** स्त्री झिगि-घिनि पृषो०। १झिङ्झिनीवृक्षे भावप्र० २उल्कायाञ्च शब्दर०। [भावप्र०

**झिङ्गी** स्त्री० झिगि-अच् गौरा० ङीष्। झिङ्झिनीवृक्षे (झिङ्गा)

**झिञ्झी** स्त्री० झिञ्झा अस्त्यस्याः अच् गौरा० ङीष्। झिङ्झाम् (झिँजिपोँ का) शब्दार्थचि०।

**झिण्टी** स्त्री झिमिति रटति अच् पृषो० गौ० ङीष्। (झाँटि) पुष्पप्रधानवृक्षे अमरः।

**झिण्टीश** पु० शिवे "झिण्टीशवन्द्या झङ्कारकारिणी झर्झरावती" काशीपु० गङ्गास्तवः।

**झिरि** स्त्री झिरित्यव्यक्तशब्दोऽस्त्यस्याः वा० इन्। चिल्लुरां वा ङीष्। तत्रार्थे शब्दर०। [झिल्लुराम् शब्दर०।

**झिरिका** स्त्री० झिरीति कायति शब्दायते कै-क।

**झिल्लि** पु० झिरितिशब्दं लिशति वा-डि। वाद्यभेदे "घण्टाशब्दस्तथा भेरी मृदङ्गो झिल्लिरेव च। यज्ञानां पूज्यते वाद्यं देवताराधनेषु च" शब्दार्थचि० धृतवाक्यम्।

**झिल्ली** स्त्री० चिल्लति चिल-अच् पृषो० गौरा० ङीष्। (झिँझिपोँ का) कीटभेदे। संज्ञायां क। ःआतश्चोपसर्गे ३वर्त्त्यां ङ मेदि०। ४तारिकायां च झङ्कृताशब्दे उदा०।

**झिल्लीकण्ठ** पु०स्त्री झिल्ली तद्वत् इव कण्ठः कण्ठस्वरोऽस्य। मृदङ्गकपोते त्रिका० स्त्रियां जातित्वात् ङीष्।

**झीरुका** स्त्री झिरित्यव्यक्तं रौति वा०रु-कक्। झिल्ल्याम् शब्दरत्ना०। [च शब्दक०।

**झुण्ट** पु०लुण्ट-अच्-पृषो०। अकाण्डे १द्रुमे, २स्तम्बे, ३गुल्मे

**झुमरि** स्त्री रागिणीभेदे "प्रायः शृङ्गारवल्लभा माध्वीक मधुरा वृद्धः। एकैव झुमरिर्लोके वर्षादिनियमोज्झिता। अतो लक्षणमेतस्या नोदाहारि विशेषतः। इदं हि शास्त्रिगं स्वत्वं प्रसिद्धं नृपरञ्जनम्" सङ्गीत०दा०

**झूलि** पु०१क्रमुकभेदे २दुष्टदैवज्ञतौ च मेदि०। [झझार झरः।

**झृ** वयोहानौ दिवा०पर०अक०सेट्। झीर्य्यति अझारीत्

**झोड** पु० युवाकभेदे भूरिप्र०। [जुझुवे।

**झ्यु** गतौ भ्वा० आत्म० सक० अनिट्। झ्यवते अझ्योष्ट।

इति वाचस्पत्ये झकारादिशब्दार्थसङ्कलनम्।

## अ

"अकारोव्यञ्जनवर्णभेदः अर्द्धमात्राकालेनोच्चार्यः तस्योत्पत्तिस्थानं नासिकातुगततालुस्थानम् तस्योच्चारणे जिह्वामध्येन तालुमध्यस्य स्पर्शः आभ्यन्तरप्रयत्नः। संवारनादघोषा अल्पप्राणश्च बाह्यप्रयत्नाः। मातृकान्यासेऽस्य वामकर्णाङ्कुशयोर्न्यासता। वर्णाभिधानेऽस्य वाचकशब्दा उक्ता यथा

"अकारो बोधनी विश्वा कृष्णकौ मखदोवियत्। कौमारी नागविज्ञानी सव्याङ्गुलनखो वकः। सर्वेश्वर्थितोबुद्धिः स्वर्गात्मा घर्घरध्वनिः। धर्मैकपादः सुमुखो विरजा चन्द्रनेश्वरी। गायनः पुष्पधन्वा च वागात्मा च विरञ्चिनी"। एतदधिष्ठातृदेवीध्येयरूपं यथा "चतुर्भुजां शुभ्रवर्णां कृष्णाम्बरविभूषिताम्। नानालङ्कारसंयुक्तां जटामुकुटराजिताम्। दैत्यवासमुखीं नित्यां वरदां भक्तवत्सलाम्। एवं ध्यात्वा ब्रह्मरूपां तन्मन्त्रं दशधा जपेत्" वर्णोद्धारतन्त्रम्। अस्यस्वरूपं यथा "सदा ईश्वर संयुक्तं अकारं शृणु सुन्दरि! रक्तविद्युल्लताकारं वा स्वयं परकुण्डली। पञ्चदेवमयं वर्णं पञ्चप्राणात्मकं सदा। त्रिशक्तिसहितं वर्णं त्रिबिन्दुसहितं सदा" कामधेनुतन्त्रम्। तस्य मातृकायां प्रथमोपन्यासे मरणं फलम् ऋग्वेदे प्रमाणं दृश्यम्। [१वामनतौ च मेदि०।

अ पु० १ गायने २ घर्घरध्वनौ एकाक्षरको०। २छदे ४शुक्रे

अकार पु० अ+स्वरूपे कारप्रत्ययः। अस्वरूपे वर्णे "अकारो बोधनी विश्वा" वर्णाभिधानम्।

इति वाचस्पत्ये अकारादिशब्दार्थसङ्कलनम्।

इति श्रीतारानाथतर्कवाचस्पतिभट्टाचार्य्यविरचिते वाचस्पत्ये चवर्गादिशब्दार्थसङ्कलनं समाप्तम्।

---

## ट

टकारोव्यञ्जनवर्णभेदः अर्द्धमात्राकालेनोच्चार्यः अस्योच्चारणस्थानं मूर्द्धा। अस्योच्चारणे मूर्द्धस्थानेन जिह्वा मध्यस्य स्पर्शः आभ्यन्तरप्रयत्नः। विवारश्वासाघोषा बाह्यप्रयत्नाः। मातृकान्यासेऽस्य दक्षिणस्किचि न्यासता वर्णाभिधाने अस्य वाचकशब्दा उक्ता यथा "टकारश्च कपाली च सोमेशः खेचरी ध्वनिः। सुकन्दो विनदा पृथ्वी वैष्णवी वारुणी नरः। दक्षस्किगर्द्धचन्द्रश्च जवा भूतिः पुनर्भवः। डङ्कस्तिर्धनुर्डङ्कस्तः प्रमोदा विमला कटिः। राजगिरिर्महाधनुर्ढाधात्मा सुखदो मरुत्"। अस्य स्वरूपं यथा "टकारं चञ्चलापाङ्गि! स्वयं परमकुण्डली। कोटिविद्युल्लताकारं पञ्चदेवमयं सदा। पञ्चप्राणयुतं वर्णं त्रिगुणत्रय समन्वितम्। त्रिशक्तिसहितं वर्णं त्रिबिन्दुसहितं वरं सदा" कामधेनुतन्त्रम्। एतदधिष्ठातृदेवतारूपं यथा "ध्यानमस्य प्रवक्ष्यामि शृणुष्व वरवर्णिनि!। मालतीपुष्पवर्णाभां पूर्णचन्द्रनिभेक्षणाम्। दशबाहुसमायुक्तां सर्वालङ्कारसंयुताम्। परमोच्चपदां नित्यं सदा खेटसक्तां पराम्। एवं ध्यात्वा ब्रह्मरूपां तन्मन्त्रं दशधा जपेत्" वर्णोद्धारतन्त्रम्। मातृकायां अस्य प्रथमोपन्यासे खेदः फलम्। ऋग्वेदे प्रमाणं दृश्यम्।

ट पु० टल-ड। १वामने २पादे ३निःस्वने च मेदि०।

टक बन्धे चु० उभ० सक० सेट् इदित्। टङ्कयति-ते अटटङ्कत्-त। "टङ्कितेनोऽतिपाटने" काशी० गङ्गास्तवः। "नाम्रष्टं न च टङ्कितम् न नमितम् नोत्थापितम् स्थानतः" सङ्गीता०। उद्+उल्लेखे। उट्टङ्कितम्।

टकार पु० ट+स्वरूपे कारप्रत्ययः। टस्वरूपे वर्णे टकारश्च कपाली च" वर्णाभिधानम्।

टङ्क पु० टकि-बा० कक् पृषो० उपधालोपश्च। देशभेदे।

टङ्कदेशीय पु० टङ्कदेशे भवः छ। १वास्तूकशाके त्रिका०। २तद्देशभवमात्रे त्रि०।

टगण पु० मात्राष्टके षण्मात्रिकप्रस्तारे त्रयोदशभेदात्मके गणभेदे तेषामाकाराधिदेवाश्च छन्दोग्रन्थोक्ता यथा "(ऽऽऽ) १ शिवः ।।ऽऽ शशी २ (।ऽ।ऽ दिनपतिः) ३ (ऽ।।ऽ सुरपतिः) ४ (।।।।ऽ शेषः) ५ (।ऽऽ। वह्निः) ६ (ऽ।ऽ। सरोजम्) ७ (।।।ऽ। धाता) ८ (ऽऽ।।कलिः) ९

(॥ऽ॥ चन्द्रः) १० (।ऽ॥। ध्रुवः) ११ (ऽ॥ ॥ धर्मः) १२ (।॥।॥ शक्तिकरः) १३ ।

**टगर** पु० टः टङ्कनो गर इव । टङ्कनचारे (सोहागा) २खेलाविलासविभवे ३कैकराचे च त्रि० मेदि० ।

**टङ्क** पु० टकि-घञ्-अच् वा । १कोपे, २कोपे, ३खड्गे ४पाषाणभेदनेऽस्त्रे च ।५जङ्घायां मेदि० । ६चतुर्मांषकरूपे परिमाणे वैद्य० ७नीलकपित्थे, ८खनित्रे, ९दर्पे च पु०न० हेमच० १०परशौ ११राजास्त्रे च शब्दार्थचि० "दार्ष्ण्यं चैव टङ्कौघैः खनित्रैश्च पुरी हृतम्" हरिवं० ६०अ० । "टङ्कैर्मनःशिलगुहेव विदार्य्यमाणा" मृच्छ० । "हिमाद्रिटङ्कादिव भान्ति यस्याम्" भट्टिः । "हरोष रामं शङ्कीव टङ्कच्छिन्नमनःशिलः" रघुः । [ सारसुन्दरी ।

**टङ्कक** पु० टङ्कते घञ् सञ्ज्ञायां क । (तङ्का) रजतमुद्रायाम्

**टङ्ककपति** पु० ६त० । रूपकाध्यक्षे (टाँकशालेर अध्यक्ष) सारसुन्दरी । [ मुद्रे सारसुन्दरी ।

**टङ्कशाला** स्त्री ६त० । (टाँकशाल) ख्याते रूप्यकनिर्माणस्थाने

**टङ्कटीक** पु० टङ्क इव टीकते टीक-क । शिवे त्रिका० ।

**टङ्कण(न)** न० टकि-ल्यु पृषो० वा णत्वम् । (सोहागा) ख्याते खर्षद्रावके १उपरसभेदे । उपरसभेदाश्च भाव०प्र० उक्ता यथा "गन्धो हिङ्गुलमभ्रतालकशिलाः स्रोतोऽञ्जनं टङ्क(न)णम् । राजावर्त्तकचुम्बकौ स्फटिकया गङ्गः खटी गैरिकम् । कासीसं रसकं कपर्दसिकतायोलाश कङ्कुष्ठकम् सौराष्ट्री च मता अमी उपरसाः स्तस्य किञ्चिदूनैः" । "तद्यथा लवणेन सुवर्णम्" छा० उ० भाष्ये "लवणेन क्षारेण टङ्कणादिना, खरेषु स्पृदुत्वकरं हि तत्" भा० । "टङ्कणं वह्निकृत्वातं कफवातिकपित्तहृत्" भावप्र० । भावे ल्युट् । (टाँकादेयोया पानिदिया झाला) २धातूनां योजनभेदे । दन्त्यान्तः ३अश्वभेदे पु०स्त्री "टङ्कनखरनखरखण्डितहरितालपांशुलेन" काद० मूर्द्धन्यान्तः ४देशभेदे स च देशः ब्र०स० १४अ० । कूर्मविभागे दक्षिणस्थासक्तः "अथ दक्षिणेन जङ्घा" इत्युपक्रमे "अङ्कटटङ्कनंवनवासिशिविकफणिकारकोङ्कणाभीराः" इत्युक्तेः ।

**टङ्कवत्** पु० टङ्क+अस्त्यर्थे मतुप् मस्य वः । १पर्वतभेदे "टङ्कवन्तं शिखरिणं वन्दे प्रस्रवणं गिरिम्" रामा०३।५५अ०

**टङ्का** स्त्री टकि-अच् । १जङ्घायां मेदि० । २तारादेव्यां टङ्कारकारिणीशब्दे दृश्यम् ।

**टङ्कानक** पु० टङ्कं कोपमानयति उद्दीपयति अन-णिच् ण्वुल् । १ब्रह्मदारुदण्डे (वामनगाछ) शब्दच० ।

**टङ्कार** पु० टमित्यव्यक्तशब्दस्य कारः क-घञ् । १ध्वनिभेदे धनुर्ज्यार्कर्षणजे शब्दे २विस्मयहेतुके शब्दे च ।३शिञ्जिनीध्वनौ प्रसिद्धे च मेदि० । क-णिनि । टङ्कारिन् १टङ्कारयुक्ते त्रि० स्त्रियां ङीप् सा च २तारादेव्याम् टङ्कारकारिणीशब्दे दृश्यम् ।

**टङ्कारकारिणी** स्त्री०क-णिनि ङीप् ६त० । तारादेव्याम् "टङ्कारकारिणी टीका टङ्का टङ्कारिणी तथा तारासङ्कल्पनाम ।

**टङ्कारी** पु० स्त्री टङ्कमश्नुते क-अण् गौरा० । (टेकारी) वृक्षभेदे "टङ्कारी वातले ग्राही शोफोदररुजापहा । तिक्ता च दीपनी लघ्वी भिषग्भिः परिकीर्त्तिता" राजनि० ।

**टङ्क** पु०न० टङ्क+पृषो० । १खनित्रे (टाँगि) २परशुभेदे च ३जङ्घायां मेदि० । (सोहागा) ४टङ्कणे शब्दच० ।५चतुर्मांषकमाने वैद्य० ।

**टङ्कण** पु०न० टङ्कण+पृषो० (सोहागा) टङ्कणे ।

**टङ्किनी** स्त्री टकि-णिनि पृषो० । (आकनादी) पाठायाम् । शब्दच० । [ज्ये व्याम् त्रिका० ।

**टट्टनी** स्त्री टट्टेति शब्दं नयति नी-ड गौरा० ङीप् ।

**टट्टरी** स्त्री टट्टेति शब्दं राति रा-क गौरा० ङीप् ।१पटहवाद्ये २लम्बावाद्ये ३झल्लरीवादे च मेदि० ।

**टट्टुर** पु० भेरीशब्दे हेमच० ।

**टल** विप्रवे (टला) भ्वा० पर० अक० सेट् । टलति अटालीत् टटाल टेलतुः । ज्वला० टलः टालः ।

**टवर्ग** पु० ट+प्रातिशाख्योक्तः वर्गप्रत्ययः । ट ठ ड ढ ण रूपेषु वर्णेषु । ततो भवार्थे छ । टवर्गीय टादौ वर्णे ।

**टा** स्त्री टल-ड । पृथिव्याम् एकाक्षरकोषः ।

**टाङ्क** न० टङ्केन तद्रसेन निर्वृत्तम् । टङ्करूपनीलकपित्थरसेन निर्वृत्ते मद्यभेदे । "पानसं द्राक्षमाधूकं खार्जूरं तालमैक्षवम् । माध्वीकं टाङ्कं माहीकमरिष्टं नारिकेलजम् । सामान्यानि द्विजातीनां मद्यान्येकादशैव च । द्वादशन्तु सुरा मद्यं सर्वेषामधमं स्मृतम्" । पुलस्त्येन तत्पानं निषिद्धम् । अस्रवत इति आसवो मद्यानामवस्थाविशेषः मद्यःकृतसन्धानेन सञ्जातमद्यभावः यमधिकृत्य इदं पुलस्त्योक्तं प्रायश्चित्तम् । "द्राक्षेक्षुटङ्कखर्जूरपनसादेश्च यो रसः । सद्योजातन्तु पीत्वा तं ब्रह्महाच्छुध्येद् द्विजोत्तमः" ।[नागवीटे वृक्षभेदे त्रिका० ।

**टाङ्कर** पु०टाङ्कं तत्तुल्यरसं राति रा-क टाङ्क+कृझा० र वा ।

**टार** पुंस्त्री० टां पृथ्वीमश्नुते क-अण् उप० स० । घोटके

स्त्रियां जातित्वात् ङीष्। २रङ्के २खङ्के च हेमच०।

टिक गतौ भ्वा० आ० सक० सेट्। टेकते अटेकिष्ट टिटिके। ऋदित् अटिटेकत् त।

टिटिभ पुंस्त्री० टिटीति अव्यक्तशब्दं भषति भष–ड। कोयष्टिके(टिटिरि)स्त्रियां ङीष् स्वार्थे क तत्रार्थे अमरः।

टिट्टिभ पुंस्त्री० टिट्टीत्यव्यक्तं शब्दं भषति भष–ड।(टिटिरि) कोयष्टिके खगे अमरः स्त्रियां ङीष्। "अनिर्दिष्टांश्चैकशफांष्टिट्टिभांश्च विवर्जयेत्" मनुना तन्मांसभक्षणं निषिद्धम्। "टिट्टिभं तदपेक्षेत राज्ञश्चारनिवारणे" भा० शा० १११अ०। कोयष्टिकशब्दे २२६६ पृ० तन्मांसगुणा उक्ताः। टिट्टिभक स्वार्थे क। तत्रार्थे पुंस्त्री०।

टिण्टिनिका स्त्री अम्बुशिरीषिकायां (जाँक) भावप्र०।

टिण्डिश पु० रोमशफले (ढाँडश) ख्याते वृक्षभेदे राजनि०।

"टिण्डिशो रुचिकृत् भेदी पित्तश्लेष्माश्मरीप्रणुत्। सुशीता वातला रूक्षा मूत्रला च प्रकीर्त्तिता" भावप्र०।

टिप क्षोदने चुरा०उभ०सक०सेट्। टेपयति-ते अटीटिपत्-त।

टिप्पनी स्त्री टिप-क्विप् टिपा पन्यते स्तूयते पन–घञर्थे क गौरा०ङीष्। टीकायाम्। सा च टीकाव्याख्यारूपतयैव व्यवह्रियते यथा चिन्तामणिटीकाया दीधितिव्याख्यायाः टीका जगदीशकृता गदाधरकृता च। यथा शारीरिकसूत्रभाष्यव्याख्या पञ्चपादिका भामती च। मङ्गाभाष्यव्याख्या कैयटकृता इत्यादि। प्रथमव्याख्यायामपि क्वचित् प्रयुज्यते यथा "श्रीमतश्चानन नत्वा लोलावत्याः सुटिप्पनी। भवेशेन सुबोधार्थं क्रियते यद्गुरोः श्रुतम्" "टिप्पनी दायभागस्य श्रीनाथेन विधीयते"। [ ऋदित्। अटिटीकत् त।

टीक गतौ भ्वा० आत्म० सक० सेट्। टीकते अटीकिष्ट।

टीका स्त्री टीक्यते गम्यते यया ग्रन्थार्थोऽनया। टीक–करणे घञ् घञर्थे क वा। विषमपदव्याख्यारूपे ग्रन्थभेदे। "अपटीको जडो माघे भर्गे जाड्येन ताद्यते। स च किञ्चित्तरत्येव कण्ठसंलग्नवल्लभः" उद्भटः।

"नत्वा भगवतीं दुर्गां टीकां दुर्गार्थबुद्धये। कुरुते दायभागस्य भट्टाचार्यमहेश्वरः" "करोति टीकामिह दायभागग्रन्थावबोधाय सदेकरक्षाम्" श्रीकृष्णतर्कां०।

टुण्टुक पु० स्त्री टुण्टु इत्यव्यक्तं कायति कै–क। (टुण्टुनि) १पक्षिभेदे शब्दर०। स्त्रियां जातित्वात् ङीष्। २गोक्षाकदम्बे अमरः। ३क्षुद्रखदिरे शब्दच०। तयोः तत्सदृशप्रियत्वात् तथात्वम्। ४अल्पे त्रि० मेदि०। ५क्रूरे त्रि० विश्वः। ६टट्टिनीवृक्षे स्त्री शब्दच०।

टुनाका स्त्री तालमूलीवृक्षे शब्दच०।

टेरक त्रि० केकर+पृषो०। (टेरा) केकरनेत्रे। शब्दार्थचि०।

टोट त्रि० तोट+पृषो०। १अल्पे २हीने च। स्त्रियां गौरादिपाठात् ङीष्।

टोड़लतन्त्र न० तन्त्रभेदे। [इतः टालः।

टुल्ल विक्षेपे भ्वा० पर० अक० सेट्। डुलति अडालीत् अलङ्०

इति वाचस्पत्ये टकारादिशब्दार्थसङ्कलनम्।

---

## ठ

ठकारो व्यञ्जनवर्णभेदः। टवर्गीयः मूर्द्धन्यः अर्द्धमात्राकालोच्चार्यः। तस्योच्चारणे जिह्वामध्येन मूर्द्धस्थानस्य स्पर्शः आभ्यन्तरप्रयत्नः। विवारश्वासाघोषा महाप्राणश्च बाह्यप्रयत्नाः। मातृन्यासेऽस्य दक्षजानुनि न्यसता वर्णाभिधानेऽस्य वाचकशब्दा उक्ता यथा "ठः शून्यो मञ्जरी जीवः पाशिनी लाङ्गलं क्षमा। वनजो नन्दनो जिह्वा सुनन्दाधूर्णकः सदा। वर्त्तुलः कुण्डली वह्निरक्षतं चन्द्रमण्डलः। दक्षजानूद्भवश्च देवमणो ठङ्कध्वनिः। एकपादो विभूतिश्च ललाटं सर्वसिद्धकः। हृष्णो नलिनी विष्णुर्हेरो यामघोः शशी"। एतदधिष्ठातृदेवतारूपं यथा "ध्यानमस्य प्रवक्ष्यामि शृणुष्व कमलानने!। पूर्णचन्द्रप्रभां देवीं विकसत्पङ्कजेक्षणाम्। सुन्दरीं षोड़शभुजां धर्मकामार्थमोक्षदाम्। एवं ध्यात्वा महारूपां तन्मन्त्रं दशधा जपेत्" वर्णोद्धारतन्त्रम्। अस्य ध्येयरूपं यथा "ठकारं चञ्चलापाङ्गि, कुण्डली मोक्षरूपिणी। पीतविद्युल्लताकारं सदा त्रिगुणसंयुतम्। पञ्चदेवात्मकं वर्णं पञ्चप्राणमयं सदा। त्रिबिन्दुसहितं वर्णं त्रिशक्तिसहितं सदा" इति कामधेनुतन्त्रम्। मातृन्यासे अस्य प्रथमोपन्यासे दुःखं फलम् शब्दे प्रमाणं द्रष्टव्यम्।

ठ पु० ट+पृषो०। शिवे २महाध्वनौ ३चन्द्रमण्डले एकाक्षरकोषः। ४मण्डले ५शून्ये ६लोकगोचरे च मेदि०। शून्यत्वात् बिन्दुरूपवर्णभेदः। "क्षितसखि! तदधस्त्रयम् योजयित्वा" कर्पूरस्तवः(ठद्वयं स्वाहा)। "ठिठमेव चेत्यस्य व्याख्यायां ठिठं विसर्गस्य विन्दुद्वयात्मकत्वात् विसर्गशब्देन च लक्षितलक्षणया स्वाहाकारो लक्ष्यते स्वाहाशब्देनैव वह्नौ त्यागात् त्यागस्य च विसर्गपर्य्यायत्वात्" इत्येवं रघुनन्दनादिसम्प्रदायविदः। [कामधेनुत०।

ठकार पु०ठ+कार। ठस्वरूपे वर्णे "ठकारं चञ्चलापार्श्वे!"

ठक्कुर पु०१देवप्रतिमायां,२द्विजोपाधिभेदे च। यथा गोविन्दठक्कुरः काव्यप्रदीपकर्त्ता। ३देवतायाञ्च। "सुदामा नाम गोपालः श्रीमान् सुन्दरठक्कुरः" वामनसंहिता।

इति वाचस्पत्ये ठकारादिशब्दार्थसङ्कलनम्।

---

## ड

डकारो व्यञ्जनवर्णभेदः मूर्द्धन्यः वर्गमात्राकालोच्चार्य्यः टवर्गीयः। तस्योच्चारणे जिह्वामध्येन मूर्द्धस्थानस्य स्पर्शाभ्यन्तरयत्नः। संवारनादघोषा अल्पप्राणश्च बाह्यप्रयत्नाः। मातृकान्यासेऽस्य दक्षपादगुल्फे न्यसता। अस्य वाचकशब्दा यथा "डः स्फुटिदाकिका नन्दिरूपिणी योगिनीप्रियः। कौमारी शङ्करस्त्रासक्षिप्तो व्यापकोध्वनिः। डुरुडो जटिली भीमा द्विजिह्वः पृथिवी सती। कौञ्चगिरिः क्षमा शालिर्नाभिः स्वामी च लोचनम्" वर्णाभिधानम्। तदधिष्ठातृदेवतारूपं यथा "ध्यानमस्य प्रवक्ष्यामि शृणु त्वं हृदि संस्थिता मम। जवासिन्दूरसङ्काशां वराभयकरापराम्। त्रिनेत्रां वरदां नित्यां परमोच्चपदायिनीम्। एवं ध्यात्वा ब्रह्मरूपां तन्मन्त्रं दशधा जपेत्" इति वर्णोद्धारतन्त्रम्। अस्य ध्येयरूपं यथा "डकारं चञ्चलापार्श्वे! सदा त्रिगुणसंयुतम्। शुद्धदेवमयं वर्णं पञ्चप्राणमयं सदा। त्रिशक्तिसहितं वर्णं त्रिबिन्दुसहितं सदा। चतुर्वर्णमयं वर्णमात्मादित्त्वसंयुतम्। पीतविद्युल्लताकारं डकारं प्रणमाम्यहम्" इति कामधेनुतन्त्रम्। तस्य मातृकाद्यत्वे प्रथमोपन्यासे शोभा फलम् "डः शोभां ढो विशोभां णमणमच च वस्तुषु खं वस्तु युद्धम्" इ० र० टी०धृतवाक्योक्तेः।

ड पु० डी-ड। १शिवे २शब्दे ३वासे च एका० को०। ४वाडवाग्नौ ५डाकिन्यां स्त्री मेदि०।

डकार पु० ड+कारप्रत्ययः। डस्वरूपे वर्णे।

डगण पु० छन्दोपन्योक्ते चतुर्मात्रकप्रस्तारे पञ्चभेदभिन्ने गणभेदे तत्स्वरूपादिकं यथा (ऽऽ गजः१) (।।ऽ रथः२) (।ऽ।तुरङ्गमः ३) (ऽ।।पदातिः ४) (।।।पत्तिः ५) इति।

डङ्करी स्त्री डं त्रासं गिरति गृ-अच् पृषो० गौरा०ङीष्। दीर्घकर्कट्याम्(काँकड़ी)राजनि०अण्। डङ्कारीत्यपि तत्रार्थे।

डप संघाते (राशीकरणे) चु०आत्म०अक०सक०सेट्। डापयते अडीडपत। चुरादित्वेऽपि ङित्करणादफलवत्कर्त्तर्य्यपि आत्म०। तेनास्य ङित्करणसामर्थ्यात् पाक्षिकचुरादित्वम् पक्षे भ्वादित्वम्। डपते अडपिष्ट।

डप संहतौ उक्तौ डपवत् इदित्। डम्पयते अडिडम्पत। पक्षे भ्वा० डम्पते अडम्पिष्ट।

डम्ब लोकने चुरा० उभ० सक० सेट्। डम्बयति अडडम्बत् शब्दलोभे अस्य वा चुरादित्वोक्तिः प्रामादिकी। [त।

डम्भ संघे चुरा०इदित् उभ० सेट्। डम्भयति ते अडडम्भत्

डम्भ पु० डं त्रासं भाति भा-क। चाण्डाल्यां नेटाज्जाते सङ्कीर्णजातिभेदे (डोम) ब्रह्मवै०। स्त्रियां-जातित्वात् ङीष्। [पलायने द्वारा०।

डमर पु० डमेति शब्दं राति रा-घञर्थे क। भीत्या

डमरु पु०डमिति शब्दस्यति अस्-सृगया० कु०नि०।१वाद्यभेदे शीर्षमध्ये प्रान्ते दीर्घे, पृटिकाद्वयलम्बिते कापालिकयोगिवाद्ये अमरः। तत्रार्थे द्वारा०न०। "दत्त्वा डमड्डमरुडाडृतिञ्झतभृतवर्गान्तु भर्गस्टर्हिणौ रुधिरैर्धिनोमि" प्रबोधच०। (डमत् डमेति शब्दं कुर्वत्)।

डमरुका स्त्री "सुष्टिञ्च शिखिवां वह्नी दैवदुज्झितमध्यमम्। दक्षिणं तर्ज्जनस्य कर्णदेशे प्रधारयेत्। एषा सृष्टा डमरुका सर्वविघ्नविनाशिनी" तन्त्र० उक्ते सृष्टाभेदे।

डम्बर पु०इपि-संहतौ वा०अरन्।१समूहे आडम्बरे २व्यावोजने "गजायुधे कपिश्राद्धे प्रभाते मेघडम्बरः" शब्दरत्नाव।

३धाद्दते कुमारानुचरभेदे। "डम्बराडम्बरो चैव ददौ धाता महात्मने" भा० श्र० ४७ अ०।

डयन न० डी–भावे ल्युट्। खगानां नभोगतौ (ओड़ा) करणे ल्युट्। २कर्णीरथे हेमच०।

डल्लक न० वंशनिर्मितपात्रभेदे (डाला) "त्रिगतस्तु षष्ट्यधिकं डल्लकं वस्त्रसंयुतम्। सभोज्यं सोपवीतञ्च सोपहारं मनोहरम्" ब्रह्मवै०।

डवित्थ पु०"डित्थः काष्ठमयो हस्ती डवित्थस्तन्मयो मृगः"। सुपद्योक्ते काष्ठमये १मृगे २द्रव्यवाचिसंज्ञाशब्दभेदे च "द्रव्यशब्दाः एकव्यक्तिवाचिनो हरिहरडित्थडवित्थादयः" भा०द०। शब्दकल्पद्रुमेऽयं वर्त्ममध्यतया निवेशितस्तन्मूलं चिन्त्यम्।

डहु(ह्लु) पु० दह उ वा जह् मृगव्यादि० नि०। नकुले (मान्दार) "डह्लुर्मृत्यु विषघ्नी त्रिदोषगुल्मदोषहृत्" भावप्र० तद्गुणोक्तिः शब्दरत्नावलग्रामयं दीर्घान्ततया तदर्थं पठितः।

डाकिनी स्त्री डस्य लासार्थम् अकति अक–वक्रगतौ णिनि ङीप्। १देव्या अनुचरीभेदे। "सार्द्धं च डाकिनीनां च विकटानां त्रिकोटिभिः" ब्रह्मपु०। (डान) इति ख्याते दर्शनमात्रेण २उपद्रवकारिस्त्रीजनभेदे। "डाकिनी शाकिनी भूतप्रेतवेतालराक्षसाः काशीख० ३० अ०।

डाङ्गरी स्त्री डङ्गरी पृषो०।दीर्घकर्कटग्राम् (काँकड़ी) राजनि०

डामर पु० शिवप्रोक्ते तन्त्रशास्त्रविशेषे तच्च षड्विधं तेषां मानादिकं वाराहीतन्त्रे उक्तं यथा

"डामरः षड्विधो ज्ञेयः प्रथमो योगडामरः१। श्लोकास्तत्र त्रयस्त्रिंशत् तथा पञ्च शतानि च। त्रिविंशतिःसहस्राणि श्लोकाश्चैव हि संख्यया। एकादशसहस्राणि सङ्ख्याताः शिवडामरे२। श्लोकाः सप्तैव निर्दिष्ट ईश्वरेणैव भाषिताः। तावच्छ्लोकसहस्राणि पञ्च श्लोकशतानि च। गुणोत्तराणि दुर्गाया डामरे३ कथितानि च। नव श्लोकसहस्राणि नव श्लोकशतानि च। सारस्वते४ तथा श्लोकाः पञ्चैव परिकीर्त्तिताः। शरसंख्यसहस्राणि श्लोकानां ब्रह्मडामरे५। पञ्चोत्तरशतान्यत्र संख्यानि शिवेन तु षष्टिः। श्लोकसहस्राणि गान्धर्वे६ डामरोत्तमे। श्लोकाश्च षष्टिसंख्याता ब्रह्मणाऽव्यक्तयोनिनेति"।

डालिम पु० दाडिम्ब+पृषो०। स्वनामख्याते फलप्रधाने वृक्षे भरतः।

डाहन पु० त्रिपुरदेशे त्रिका०।

डाङ्क पुंस्त्री०डेति ह्रयते ह्वे–बा०ङ्क पृषो०। दाल्यूहखगे जटा० स्त्रियां जातित्वात् ङीष्।

डिङ्गर पु० डङ्गर+पृषो०। १डङ्गरशब्दार्थे २क्षेपे ३वने ४धूर्त्ते ५सेवके च शब्दर०।

डिडिका स्त्री यौवनकालजाते पलितताम्रचक्षके रोगभेदे। "यौवने डिडिकास्त्रेव विशेषाच्छ्वेतम् स्त्रितम्" सुश्रु०।

डिडिमा पु० स्त्री सुश्रुतोक्ते मृतदे खगभेदे स्त्रियां जातित्वात् ङीप्। मृतदशब्दे तद्भेदा दृश्याः।

डिण्डिम पु० डिण्ड्+इमच् मातृ। १वाद्यभेदे (ढँढरा) अमरः। "आर्यबालचरितप्रस्तावनाडिण्डिमः" वीरच० "भेरीशाम्यडनन् डुडा डिण्डिमांश्च सहस्रशः"भा०द्रो० १६६अ०। २कृष्णपाकफले पानीयामलके शब्दच०।

डिण्डिमेश्वर पु० शिवपु० उक्ते तीर्थभेदे। [ हेमच०।

डिण्डिर पु० डिडि–बा० किरच् आदेर्हस्य डः। समुद्रफेने

डिण्डिरमोदक न० डिण्डिर इव मोदकः मोदयति मोदि–ण्वुल्। मद्यजने (गाँजा) ख्याते मादक द्रव्यभेदे राजनि०।

डिण्डिश पु० डिण्डिक+पृषो०। (डाँडश) इति ख्याते रोमशफले वृक्षभेदे। "डिण्डिशो रुचिकृद्भेदी पित्तरक्तं प्रकोपयेत्। सुगोतो वातलोरूक्षो मूत्रलश्चाश्मरीहरः। निःशेषबीजं स्रुतिदुस्तस्वरं सण्डिकम् प्रोच्यते चण्डशब्दम्। स्वेदप्रदं चलदंदण्डं रुचिप्रदं डिण्डिशकं सपिण्डम्" वैद्यक०।

डिण्डीर पु० डिडि–ईरच् आदेर्हस्य डः। समुद्रफेने हेमच०।

डित्थ पु० डवित्थशब्दोक्ते काष्ठमये १हस्तिनि एकव्यक्तिमात्रबोधके २संज्ञाशब्दभेदे तत्प्रतिपाद्ये ३अर्थभेदे च।

डिप संहतौ वा चुरा० उभ० पक्षे भ्वा० आत्म० अक० सेट्। डेपयति–ते डेपते अदित् आडिडेपत् त।

डिप प्रेरणे वा चु० उभ० पक्षे तुदा० पर० सक० सेट्। डेपयति–ते अडीडिपत्–त कुटा० डिपति अडिपीत्। दिवादित्वमपीच्छन्ति डिप्यति इदित् अडिपत् अडेपीत्।

डिप संहतौ वा चुरा०उ०पक्षे भ्वा०आत्म०अक०सेट् इदित्। डिम्भयति-ते डिम्भते। अडिडिम्भत्-त अडिम्भिष्ट।

डिव संघे प्रेरणे च वा चु० उभ० पक्षे भ्वा०पर० सक० सेट् इदित्। डिम्बयति-ते अडिडिम्बत् डिम्बति अडिम्बीत्।

डिभ क्षिप्ते संहतौ वा चुरा०उभ०पक्षे भ्वा०पर०सक० सेट्। इदित्। डिम्भयति-ते अडिडिम्भत्-त डिम्भति अडिम्भीत्।

डिम क्षिप्ते सौ० पर० सक० सेट्। डेमति अडेमीत्।

**डिम** पु० डिम-क। दृश्यकाव्यरूपनाटकभेदे। "मायेन्द्रजाल-संग्रामक्रोधोद्भ्रान्तादिचेष्टितैः। उपरागैश्च भूयिष्ठो डिमः ख्यातोऽतिवृत्तकः" सा० द० तल्लक्षणसङ्गम्।

**डिम्ब** पु० डिबि-घञ् अच् वा। १भये, २कलहे, ३फुप्फुसे च हारा० ४डमरे, अमरः ५भयध्वनौ ६अण्डे, ७क्लीबेऽपि, ८विप्लवे च मेदि०।

**डिम्बाहव** न० डिम्बं भयध्वनियुक्तमाहवम् युद्धम्। युद्धभेदे तस्य नृपतिशून्यतया भययुक्तध्वनिमत्त्वात् तथात्वम्। "डिम्बाहवकृतानां च विधिवत् पार्थिवेन च" मनुना तद्युद्धस्तस्य सद्यःशौचसङ्गम्। जटाधरे पुंस्त्वपाठः प्रामादिकः आहवशब्दान्तत्वात् इत्यतत्पुरुषयोः परवल्लिङ्गतानियमात् क्लीबत्वौचित्याच्च। "डिम्बाहवादिनानाञ्च असुराणां परायणम्" भा० आ० २१ अ०।

**डिम्बिका** स्त्री डिबि-ण्वुल्। १कासक्यां २जलबिम्बे ३शोथाकृतौ च शब्दरत्ना०। अच् गौरा० ङीष्। डिम्बीत्यपि।

**डिम्भ** त्रि० डिबि-अच्। १शिशौ अमरः २मूर्खे मेदि०।

**डिम्भक** पु० डिम्भ+स्वार्थे क। १बालके शब्दर० २शाल्वदेशपति ब्रह्मदत्तसुतभेदे। तत्कथा हरिवं० २८६ अध्यायादौ दृश्या "हंसो ज्येष्ठो नृपसुतो डिम्भकोऽनन्तरोऽभवत्" "हंसश्च डिम्भकश्चैव तपसूर्यं मङ्क्षमते!"।

**डिम्भचक्र** न० खरोदयोक्ते शुभाशुभसूचके चक्रभेदे चक्रशब्दे २८२० पृ० दृश्यम्।

**डी** नभोगतौ (ओड़ा) भ्वा० आ० अक० सेट्। डयते अडविष्ट डिड्ये डोनः। प्रादुपसर्गभेदे खगगतिभेदाः खगगतिशब्दे २४१४ पृ० दृश्याः।

गतौ दिवा० आ० सक० निघण्टुः। डीयते।

**डीतर** त्रि० डी-किप् ततस्तरप्। नभोगतियुक्ततरे "तस्मादिमा अजा अरा डीतरा आक्रममाणा इव यन्ति" शत० ब्रा० ४।५।६।५।

**डीन** न० डी-भावे क्त। पक्षिगतिभेदे जटा०। खगगतिशब्दे २४१४ पृ० दृश्यम्। २आगमशास्त्रविशेषे च यथा "डामरं डमरं डीनं स्तुतं कालीविलासकम्। सप्तकोटिमिता मन्त्रा मम वक्त्रात् विनिर्गताः" सुखड० त०।

**डीनडीनक** न० पक्षिगतिभेदे खगगतिशब्दे २४१४ पृ० दृश्यम्। [दृश्यम्।

**डीनावडीनक** न० खगगतिभेदे खगगतिशब्दे २४१४ पृ०

**डुण्डुभ** पुंस्त्री० डण्डु इत्यव्यक्तशब्दं भवति तेन भाति वा भव-भा-वा ड। (ढोँड़ा) इति ख्याते सर्पभेदे अमरः। स्त्रियां जातित्वात् ङीष्। "शयानं तत्र चापश्यत् डुण्डुभं वयसान्वितम्" भा० आ० ६अ०। पृषो० अन्त्यलोपे डुण्डुरपि तत्रार्थे पुंस्त्री० त्रिका०।

**डुण्डुल** पुंस्त्री डुण्डु इति शब्दं लाति ला-क। क्षुद्रमेघके राजनि० स्त्रियां जातित्वात् ङीष्।

**डुल** पु० डु इति शब्दं लाति ला-क। मेघकभेदे ततः वरणा० चतुरश्रां य। डुल्य तत्सन्निवेशदेशादौ त्रि०।

**डुलि** स्त्री डुल+पृषो०। कमण्डलौ रायमुकुटः।

**डुलिका** स्त्री डुलिरिव कायति कै-क। खञ्जनाकारे खगभेदे जटाधरः।

**डोडिका** स्त्री (करेऊआ) इति प्रसिद्धे फलशाकविशेषे। "डोडिका पुष्टिदा हृद्या रुच्या वह्निप्रदा लघुः। हन्ति पित्तकफार्शांसि कृमिगुल्मविषामयान्"। "बल्यं डोडीफलमविकलं स्निग्धमीषच्च तोये क्षोदे स्निग्धप्रथयिनि ततो वेसवारेण सिद्धम्। गव्यं तक्रं क्षौद्रनिक्षिप्तं साधितं रामठेन खादन् खादन् निभृतमगृहं निन्दितं भोक्तृभिस्तत्। सम्भूय शुष्कं तरणेः प्रतापात् प्रतप्तमाज्येन च डोडिशाकम्। ससैन्धवं रामठदत्तवासं खादन्नरो निन्दति व्यञ्जनानि। डोडिका वातला रूक्षा शीता गुर्वी विषापहा। स्निग्धा रोचना हृद्या श्लिष्मा कण्ठकफेरी" शब्दार्थचि० धृतवाक्यम्। [दृश्यम्।

**डोडी** स्त्री डोडिकायां क्षुपभेदे राजनि०। डोडिकाशब्दे

**डोम** पु० स्त्री खनामख्याते सङ्कीर्णजातिभेदे स्त्रियां ङीष्। तस्यास्पृश्यत्वसङ्गं मत्स्यसूक्ततन्त्रे २६ पटले "चण्डालश्चैव डोमश्च खानकश्च तथा यतिः। दण्डीरश्चैव भण्डीरो भूषण्डश्च तथाऽमी। इत्या सुखी शिङ्खधारी समा एते यशस्विनि!। स्पृष्ट्वा प्रमादतः स्नात्वा गायत्र्याष्टशतं जपेदिति"।

**डोर** न० दो०+रा-ड पृषो०। कुसुम्बादौ वस्त्रसूत्रे "कोऽनन्त इत्यु दीर्य्याथ धृत्वा तत्करपल्लवम्। कृत्वा दारुमयं तद्डोरं क्षिप्तवान् पावकोपरि" भविष्य० पु० स्वार्थे क तत्रार्थे न०। तत्रैव "चतुर्दशग्रन्थियुक्तं कुङ्कुमाक्तं सुडोरकम्। स्त्रियश्च पुरुषश्चैव बध्नीयात् वामदक्षिणे"। [राजनि०।

**डोरडी** स्त्री डोरमिव डयते डी-ड गौरा० ङीष्। हरिद्रायाम्

**डुल** निश्चीकरणे चु० उभ० सक० सेट्। डालयति ते अडि-

ढुलत् त । कात्या० श्रौ० १६।३२० सूत्रभाष्ये "मिश्रयति आड्ढालयतीत्यर्थः" कर्कः । "मेश्रयतिराड्ढालनार्थः" कात्या० श्रौ०१०।४।७ । कर्कः "पार्श्वेनाज्यं वसां च मिश्रयत्याड्ढालयति" ५।८।१८ । कर्कः ।

इति श्रीतारानाथतर्कवाचस्पतिभट्टाचार्यप्रविरचिते वाचस्पत्ये ढकारादिशब्दार्थसङ्कलनम् ।

---

## ढ

ढकारो व्यञ्जनवर्णभेदोऽर्द्धमात्राकालोच्चार्यः मूर्द्धन्यः टवर्गीयः । तस्योच्चारणे जिह्वामध्यभागेन मूर्द्धः स्पर्शः आभ्यन्तरप्रयत्नः । संवारनादघोषा महाप्राणश्च बाह्यप्रयत्नाः । मातृकान्यासेऽस्य दक्षपादाङ्गुष्ठमूले न्यसता । वर्णाभिधाने अस्य वाचकशब्दा उक्ता यथा "ढो ढक्का निर्णयः शूरो यक्षेशो धनदेश्वरः। अर्द्धनारीश्वरस्तोयमोश्वरश्चिन्तितो नरः। दक्षपादाङ्गुष्ठभूमं सिद्धिदस्तो विनायकः। प्रज्ञासक्तिपुरा सन्धिर्निर्गुणो निधनो धनी। विघ्नेशः पाशिनी तद्धारिणी क्रोडपुच्छकः । एलापुरं च दुर्गात्मा विशाखा श्यामणोरतिः" । एतदधिष्ठातृदेवतारूपं वर्णोद्धारतन्त्रे उक्तं यथा । "रक्तोत्पलनिभां रम्यां रक्तपङ्कजलोचनाम् । अष्टादशभुजां भीमां महामोक्षप्रदायिनीम् । एवं ध्यात्वा ब्रह्मरूपां तन्मन्त्रं दशधा जपेत्" । अस्य स्वरूपं कामधेनुतन्त्रे उक्तं यथा

"ढकारः परमाराध्यो या स्वयं कुण्डली परा । पञ्चदेवात्मकं वर्णं पञ्चप्राणमयं सदा । सदा त्रिगुणसंयुक्तं आत्मादितत्त्वसंयुतम् । रक्तविद्युल्लताकारं ढकारं प्रणमाम्यहम्" । मातृकाभेदेऽस्य प्रथमोपन्यासे विशेषो फलम् ढशब्दे प्रमाणं द्रष्टव्यम् ।

ढ पु० ढक्कायां रणने रणवाद्यभेदे च मेदि० । तस्य तदाकृतित्वात् तथात्वम् । ढनिर्गुणे ५ध्वनौ च एकाक्षरको०

ढकार पु० ढ+स्वरूपे कारप्रत्ययः । ढस्वरूपे वर्णे "ढकारं प्रथमाभ्यस्तम्" कामधेनुतं० "ढकारस्य ढकारे परे लोपः" सि० कौ० ।

ढक्का स्त्री ढक्यति ढक्कयति वा-क । यशःपटहे (ढाक) ख्याते वाद्यभेदे अमरः । "न ते डुडुक्केन न शोऽपि ढक्कया न मर्दलैः सापि न तेऽपि ढक्कया" नैषधम् ।

ढक्कानादच्चलज्जला स्त्री ढक्काया नाद इव चलज्जलं तद्वो यस्याः । गङ्गायाम् । "ढक्कानादचलज्जला" काशी० गङ्गास्तवः ।

ढक्कारवा स्त्री ढक्काया रव इव रवो यस्याः । तारिणीदेव्याम् "ढक्कारवा च ढक्कारी" तारसहस्रनाम ।

ढक्कारी स्त्री ढक्यति शब्दं करोति कृ-अण् उपप०स० गौरा० ङीष् । तारिणीदेव्याम् "ढक्कारवा च ढक्कारी ढक्कारवरवाढ्यका" तारासहस्रनाम ।

ढगण पु० मात्राछन्दे त्रिमात्रिकप्रस्तारभेदे तल्लक्षणादि तत्रः "तत्स्वरूपादिकं यथा (ऽ।) १ भ्रजः । (।ऽ) २ ताडः । (।।) २ तालवम् ।

ढण्ढी स्त्री वाक्यभेदे "ढण्ढीवाक्यस्वरूपा च ढकाराक्षरस्वरूपिणी" रुद्रया० अन्नपूर्णासहस्रनाम ।

ढामरा स्त्री हंसाम् शब्दार्थचि० ।

ढाल न० खनामख्याते चर्म्ममयादौ फलके तद्विद्यतेऽस्य इनि ढालिन् तद्युक्ते त्रि० । "ढालिपक्षजयकरी ढकारवर्णरूपिणी" अन्नपूर्णास्तवः । स्त्रियां ङीष् ।

ढुण्ढ अन्वेषणे भ्वा० सक० पर० सेट् । ढुण्ढति अढुण्ढीत् । डुढुण्ढ । ढुण्ढितः ।

ढुण्ढि पु० ढुण्ढ-इन् । काशीस्थे गणेशभेदे तन्नामनिरुक्त्यादिकं काशीख० ५७अ०उक्तं यथा "अन्वेषणे ढुण्ढिरयं प्रथितोऽस्ति धातुः सर्वार्थढुण्ढिततया भव ढुण्ढिनामा । काशीप्रवेशमपि को लभतेऽत्र देही तोयं विना तव विनायक ! ढुण्ढिराज !" तन्माहात्म्यं तत्रैव यथा "ढुण्ढे प्रणम्य पुरतस्तव पादपद्मं यो मां नमस्यति पुमानिह काशिवासी । तत्कर्णमूलमधिगम्य पुरा दिशामि तत्किञ्चिदत्र न पुनर्भवतास्ति येन । यः प्रत्यहं नमति ढुण्ढिविनायकं त्वां काश्यां प्रगे प्रतिहताखिलविघ्नसंघः । नो तस्य जातु जगतीतलवर्त्तिनस्तु दुष्प्रापमत्र च परत्र च किञ्चनापि । प्रथमं ढुण्ढिराजोऽसि मम दक्षिणतोऽनाक् । आढुण्ढ्य सर्वभक्तेभ्यः सर्वार्थान् संप्रयच्छसि" । तस्य यात्राविधानमुक्तं तत्रैव यथा "माघशुक्लचतुर्थ्यान्तु नक्तव्रतपरायणाः। ये त्वां ढुण्ढेऽर्चयिष्यन्ति तेऽद्यार्थाः सुरसत्तम । विधाय वार्षिकीं यात्रां चतुर्थीं माघ तापसीम् । शुक्लां शुक्लतिलैर्ब्रह्मन् प्राग्नीयाङ्गुडुकान्

व्रती। कार्य्या यात्रा प्रयत्नेन चेतसिद्धिमभीप्सुभिः। तस्यां चतुर्थ्यां त्वत्प्रीत्यै दुर्गे! सर्वोपसर्गहृत्। तां यात्रां नात्र यः कुर्य्याच्चिरेद्य तिलडड्डुकान्। उपवास सहस्रन्तु स फलान्विन् समाप्नुया। होमं तिलाज्यद्रव्येण यः करिष्यति भक्तितः। तस्यां चतुर्थ्यां मन्त्रश्चास्य मन्त्रः प्रसीदन्तिति"।

ढोल पु० गले दोलायमानतया वादनीये खनामख्याते वाद्यभेदे। "ढक्काढोलप्रिया नित्या ढोलवाद्यप्रमोदिनी। ढोलरूपा ढोलधरा ढोलशब्दस्वरूपिणी" इति रुद्रयामले चण्डीसहस्रनामस्तोत्रम्।

ढक्काढोलप्रिया स्त्री ढक्काढोलौ तच्छब्दः प्रियोऽस्याः। चण्डीसहस्रनामसु ढोलशब्दे दृश्यम् ढोलरूपादयोऽप्यत्र।

ढौक प्रेरणे गत्यादौ भ्वा० चात्म० सक० सेट्। ढौकते अढौकिष्ट ढुढौके। "तं विप्रदर्शं कृतघातवत्सा यान्तं वने रात्रिचरी ढुढौके" भट्टिः। "शकुन्तला पत्रं ढौकते" शक०। णिचि ढौकयति ते "राक्षसोऽनर्जयत् सूतं पुनर्ढाढौकयद्रथम्" भट्टिः। क्वचित् अढुढौकत् त।

इति वाचस्पत्ये ढकारादिशब्दार्थसङ्कलनम्।

---

## ण

णकारो व्यञ्जनवर्णभेदोऽर्द्धमात्राकालोच्चार्य्यः मूर्द्धन्यः टवर्गीयः। अस्योच्चारणे जिह्वाग्रमध्येन मूर्द्धः स्पर्शः नासिकायत्नप्रभेदश्च आभ्यन्तरप्रयत्नः। संवारनादघोषाः अल्पप्राणश्च बाह्यप्रयत्नाः। मातृकान्यासेऽस्य दक्षपादाङ्गुष्ठस्थे न्यस्तता। अस्य वाचकशब्दावर्णाभिधाने उक्ता यथा "णो निर्गुणं रतिर्ज्ञानं जम्भलः पक्षिवाहनः। जया जम्भो नरकजित् निष्कलो योगिनीप्रियः। द्विभुजं कोटवी चौरं सद्विद्योधनी मता। त्रिनेत्रो मानुषी व्योम दक्षपादाङ्गुलीस्थकम्। साधवः षड्भिनी वीरो नाराङ्गश्च निर्णयः"। एतदधिष्ठातृदेवतारूपं वर्णोद्धारतन्त्रोक्तं यथा "ध्यानमस्य णकारस्य प्रवक्ष्यामि च तत् शृणु। द्विभुजां वरदां रम्यां भक्ताभीष्टप्रदायिनीम्। राजीवलोचनां नित्यां धर्मकामार्थमोक्षदाम्। एवं ध्यात्वा ब्रह्मरूपां तन्मन्त्रं दशधा जपेत्"। एतत्स्वरूपं कामधेनुतन्त्रोक्तं यथा "णकारः परमेशानि! वा स्वयं परब्रह्मणी। पीतविद्युल्लताकारः पञ्चदेवमयः सदा। पञ्च प्राणमयं देवि! सदा त्रिगुणसंयुतम्। आत्मादितत्त्वसंयुक्तं। महामोक्षप्रदायकम्"। मातृकान्यासेऽस्य प्रथमोपन्यासे मरुत् फलम् मूलं ऊर्ध्वदेहे दृश्यम्।

ण पु० णत्व-गतौ ड प्रथो० णत्वम्। १विन्दुदेवे, २भूषणे, ३गुणवर्ज्जिते, ४पानीयनिलये मेदि०। ५निर्णये, ६ज्ञाने च न० एकाक्षरकोः।

णख गतौ भ्वा०पर०सक०सेट्। ओपदेशत्वात् सति निमित्ते णत्वम्। नखति प्रणखति। अनखीत्—अनाखीत्। ननाख नेखतुः। एवं खादिधातूनां गणपाठे खादित्वं प्रयोगे नादित्वं सति निमित्ते णत्वमिति बोध्यम्।

णट नत्वे साभिनये नटकार्य्ये हिंसायामयं न ओपदेशी भ्वा० पर० अक० सेट्। नटति प्रणटति अनाटीत् अनटीत्। ननाट नेटतुः। हिंसायात् प्रनट्टति। नटः नाट्यम्।

णट नटल्वे भ्वा०पर०अक०सेट्। नटति प्रणटति अनाटीत्-अनटीत् ननाट नेटतुः घटा०। नटयति अनीनटत्।

"णट नत्वे। इत्यमेव पूर्वमपि पठितम्। तत्रायं विवेकः। पूर्वपठितस्य नाट्यमर्थो यत्कारिषु नटव्यपदेशो वाक्यार्थाभिनयो नाट्यम्। घटादौ तु नत्तं नत्वं चार्थो यत्कारिषु नर्त्तकव्यपदेशः पदार्थाभिनयो नृत्यम् गात्रविक्षेपमात्रं नृत्तम्। केचित्तु घटादौ षट नताविति पठन्ति। गतावित्यन्ये। ओपदेशपर्य्युदासवाक्ये भाव्यङ्गता नाटीति दीर्घपाठात् घटादिर्णोपदेश एव" सि०कौ०

णद अव्यक्तशब्दे भ्वा० पर० अक० सेट्। नदति प्रणदति अनादीत् अनदीत्। ननाद नेदतुः नदः। नादः नदन् नदिष्यम्। सति निमित्ते एतत्पूर्ववर्त्तिनः न्युपसर्गस्य णत्वम्। प्रणिनदति परिणिनदति।

"वासवश्चानदद्घोरम् रुधिरञ्चाभ्यवर्षत" हरिवं०।८३अ०। "नदति मही गम्भीरम्" हं०स० ५४अ०। "शब्दं घोरं नदन्ति" भा०व०२६७अ०"शिवाश्चैवाशिवान्नादान्नदन्ते" हरिवं०।८३अ०। आर्षत्वात्। णिचि नादयति 'नदय-

द्यावेति पृथिवीमुत द्याम्" ऋ०८।८७।१२। "आ सानु-गुग्नैर्नदयन् पृथिव्याः" ऋ०७।७।२। छान्दसो ह्रस्वः। लोके तु न ह्रस्वः। "नादयन्नधरेण सर्वाः सविदिशो दिशः" भा०व० २५३२ श्लो०। अनर्भूतत्वर्थे तु अस्य सकर्मकता "नटावसाने नटराजराजो ननाद ढक्कां नव पञ्च वारान्" शब्देन्दुशेखरधृतवाक्यम्।

अनु+नादेनानुकरणे सक०। "तथा च तेषां रुदतां महाजनां दिशं च खड्गानुननाद निस्वनः" रामा०२।१११।अ०।

अभि+आभिमुख्येन शब्दकरणे। "घुरेति तन्नयतया तरवोऽभिनेदुः" भाग० १।२।२।

उद्+उच्चैःशब्दकरणे। "कालमेघउवोन्नदन्" भा०द्रो०६८।४

प्रति+प्रतिशब्देन अनुकरणे सक०। "वयं प्रति नदन्नज्ञान्" भा० भी०४५।८।

णद् भाषे चु० उभ० सक० सेट्। नादयति ते प्रणादयति अनीनदत्-त। ननाद नेदतुः।

णभ हिंसे भ्वा० आत्म० सक० सेट्। नभते प्रणभते लृदित् अनभत् अनभिष्ट। नेभे। "नभन्तामन्यकेषां ज्याका अधिधन्वसु" ऋ०१०।१६३। १। "नभन्तां हिंसयन्ताम्" भा० आर्षत्वाड् "नाभाकस्य प्रशस्तिभिः" निरुक्तधृता ऋक्। वेदेऽस्य क्वचित् तुम्। "उन्नभ्य पृथिवीं मिभ्वीदं दिव्यं नभः" तैत्ति०स०२।४।८।२।

णभ हिंसे दिवा० क्र्या० च पर० सक० सेट्। नभ्यति प्रणभ्यति नभ्राति। अनाभीत्-अनभीत्। ननाम नेभतुः।

णम शब्दे अक० नतौ सक० भ्वा० पर० अनिट्। नमति प्रणमति अनं सीत्। ननाम नेमतुः नेमिथ नमन्थ। नतः नतिः नामः नत्वा नन्ना नम्यः नानाम्यः। अस्य अमलत्वेन घटादित्वे प्राप्तेऽपि अनुपसर्गाद्धेति नियमात् वा तथात्वम्। नमयति नामयति उपसर्गात्तु उन्नमयतीत्येव। नतिश्च स्वाकर्षबोधकव्यापारभेदः स च करशिरःसंयोगादिः स्वापकर्षबोधशालिनः कर्मता। नमति गुरून् दुरुक्तशब्दे उदा०। अयगभावे (नोया) अकर्म०। ततः कर्मकर्त्तरि न यक्चिणौ नमते अनंस्त। "नम्रेभिरग्ने वसवो नमध्वम्" ऋ० ७।५६।१७। "एवे द्यूने युवतयो अनमन्त" १०।३०।६। अयगभावे "अनंसीद्भूरेणास्य" भट्टिः। "उन्नमति नमति वर्धते गर्ज्जति मेघः करोति तिमिरौघम्। प्रथमश्रीरिव पुरुषः करोति रूपाण्यनेकानि" रुद्रः "नतभ्रुवो नम्रजनापनेयः" उद्भटः "पुष्पभारनता लता" रामा० २।६६ अ०। "तवाभिधानाद् व्यथते नताननः" किरा०। यङि ननम्यते। "ननम्यमाना फलदृतुसमेव" भट्टिः।

अभि+आभिमुख्येन नमने। "देवान् वै यज्ञो नाभ्यनमत्" अव+अयगभावे अधोभवने (नीचे नोखोया) अक०। "त्वयादातुं जलमवनते" मेघ०। खिच् अवनमयति "अवनामितमेढ्रस्य मेढ्रे" सुश्रु०। "शिरः सुलग्नो जघान खड्गेनावनाम्य च" हरिवं० ६६ अ०। केचिच्चराचेपभयाच्छिरांस्यवननामिरे" भा०आ०१३४अ०। आर्षो न ह्रस्वः आम्बभावश्चार्षः।

उद्+ऊर्द्ध गतौ उन्नभवने उत्थाने च अक०। "उन्नम्योन्नम्य तत्रैव दरिद्राणां मनोरथाः। हृदयेषु विलीयन्ते विधवास्त्रीस्तनाविव" पञ्चत०। "स्थितः सर्वोन्नतेनोर्वीम्" रघुः

अभि+उद्+आभिमुख्येनोन्नतौ अक०। "अभ्युन्नताङ्गुलनखप्रभाभिः" कुमा०। "अभ्युन्नता परस्तादवगाढा जघनगौरवात् पश्चात्" शक०।

उप+प्राप्तौ सक० स्वयमुपस्थितौ अक०। "यं सत्रिया दीक्षोपनमेत"। "अभ्यागो ह यदेनं साधवो धर्मा आ च गच्छेयुरुप च नमेयुः" आ०उ०। "यदा तु परबाधयान्य आत्मने नोपनमति" भाग० ५।१४।१४ श्लो०। "मत्संयोगः कथमुपनमेत् स्वप्नजोऽपि प्रियायाः" मेघ०। "परलोकोपनतं जलाञ्जलिम्" कुमा०।

परि+तुल्यरूपसत्तया वस्तुनोऽन्यथाभवने अक० आत्म०। यथा दुग्धपरिणामः दधि मृत्परिणामः घटादिः। "तथा तैजसमनःकरणमपि चक्षुरादिद्वारा घटादिविषयदेशं गत्वा घटादिविषयाकारेण परिणमते" "समसत्ताकक्रार्यो त्वादः परिणामः इति" वेदा०प०। कर्मकर्त्तरि आत्मनेपदमित्यन्ये "परिणामस्वभावा हि गुणा नापरिणम्य क्षणमवतिष्ठन्ते" सा०त०कौ०। गजानां तिर्यग्दन्तप्रहारे सक०। "विष्कं नागः पर्य्यसीत् स्व एव" माघः। पर्य्यसीत् तिर्यक् प्रजहारेत्यर्थः। "तिर्यग्दन्तप्रहारैस्तु गजः परिणतो मतः" वैजयन्ती। शेषतात्प्राप्तौ अक०। "दिवसाः परिणामरमणीयाः" शक०। "ता एवौषधयः कालपरिणामात् परिणतवीर्य्या भवन्ति" सुश्रु०। परिपाके च "आहारस्य सम्यक्परिणतस्य" सुश्रु० सम्यक्नमने सक०। "यस्य परिणमेच्च तत्" भा० उ० ११०७।

प्र+प्रकर्षेण नतौ। "प्रणतेष्वनुकम्पावान्" भाग० ६।१६।६। "प्रणतैर्मुवि मूर्द्धभिः" भाग० ३। ३।२८। "उरसा शिरसा दृष्ट्या वचसा मनसा तथा। पद्भ्यां कराभ्यां

जानुभ्यां प्रणामोऽष्टाङ्ग इष्यते" नसिंह पु० उक्ते मतिभेदे च ।

प्रति+प्रतीपनतौ ।

वि+विशेषेण नतौ ।

वि+परि+भावस्य विकारभेदे अक० आत्म० "षट्भावविकारा भवन्तीति वार्द्धायणिः । जायतेऽस्ति विपरिणमते वर्द्धते अपक्षीयते नश्यतीति, जायत इति पूर्वभावस्यादिमाचष्टे नापरभावमाचष्टे नो प्रतिषेधति । अस्तीत्युत्पन्नस्य सत्त्वस्यावधारणं, विपरिणमत इत्यप्रच्यवमानस्य तत्त्वाद्विकारं, वर्द्धत इति स्वाङ्गाभ्युच्चयं,सांयौगिकानां वाङ्गानां, वर्द्धते विजयेनेति वा, वर्द्धते शरीरेणेति वा । अपक्षीयत इत्येतेनैव व्याख्यातः प्रतिलोमं, विनश्यतीत्यपरभावस्यादिमाचष्टे न पूर्वभावमाचष्टे न प्रतिषेधति"निरु०१।२।

अन्यविभक्त्यन्ततया श्रुतस्य शब्दस्य अन्यविभक्त्यन्ततया परिकल्पने "कर्त्तरि शविद्यतः कर्त्रभिप्रायमनुवर्त्तते। तच्च प्रथमया विपरिणम्यते" पा० सू० व्याख्या। "अर्थवशात् विभक्तेर्विपरिणामः" परिभाषा ।

सम्+सम्यग्नतौ । "धीरः संनमेत बलीयसे" भा० उ० ११३० । "संनताः फलभारेण पुष्पभारेण च द्रुमाः" रामा०आ०२।१६।च० [अनयीत् । ननाय नेथतुः ।

णय गतौ रचने च भ्वा० पर० सक० सेट् । नयति प्रणयति

णर्द् शब्दे भ्वा० पर० अक० सेट् । नर्दति अनर्दीत । ननर्द प्रणर्दति । नर्दनम् नर्दितः ।

"दुःशासनस्य रुधिरं यदा पास्यति पाण्डवः । आनर्द्द नर्दितः सम्यक् तदा स्वस्थं भविष्यति" भा० उ० १४०अ० । "उदपानाच्च नर्दन्ति यथा गोवृषभास्तथा" १४२ अ० । "नर्दमानो महानादं प्रावृषीव बलाहकः" भा० भी० १०१ अ० । "मत्ता नर्दन्तु कुञ्जराः" रामा० २।१०५ अ० ।

णल बन्धे भ्वा० पर० सक० सेट् । नलति प्रणलति । अनालीत् । ज्वला० नलः नालः ।

णश अदर्शने ध्वंसे च दिवा०पर०अक०सेट् । नश्यति प्रणश्यति अनेशत् पा० अन्यमते नशत् अज्ञानत्वे न घत्वम् प्रनष्टः ।"फलभोग्यो न नश्यति" "प्रनष्टस्वामिकं द्रव्यम्" याज्ञ०।"चेटा व्यनेशन्निधिलाभदाक्षाः शरेषुपातैरिवता विभूताः" नैषध० "एतेन लुडुक्तमपुरुष एव नेशादेशोक्तिरिन्त्वा "ध्रुवाणि तस्य नश्यन्ति ध्रुवं नष्टमेव च" हितो० "आ पाप ! स्वयं नष्टः परानपि नाशयितुमिच्छसि" प्रबो० च० ।

णस कौटिल्ये भ्वा० आत्म० अक० सेट् । नसते प्रणसते । अनसिष्ट । नेसे

णह बन्धने दिवा० उभ० सक० अनिट् । नह्यति-ते प्रणह्यति-ते । अनात्सीत् अनद्ध ननाह नेहे । नद्धा नद्धः नद्धी । "यथा युगं वरत्रया नह्यन्ति" ऋ० १०।६०।८ "खर्जूरीस्कन्धनद्धानाम्" रघुः । "अस्रतोत्पादने नद्धो भुजगेनेव मन्दरः" रामा० सुन्द० २४ अ० ।

अपि+धारणे वा आदेरल्लोपः । पिनह्यति अपिनह्यति । "वितत्य शार्ङ्गं कवचं पिनह्य" भट्टिः । "आसज्य कम्बूपरिघाटके शुभे विसज्य वेणीमपिनह्य कुण्डले" भा० वि० ११ अ० । विशेषेण बन्धने निबन्धने च । "पिनद्धां धूमजालेन प्रभामिव विभावसोः" भा०व०६८अ० "बहुधा तु पिनद्धाङ्गैर्हिमवच्छिखरैरिव" भा० आ० १८५ अ० ।

अव+समन्माद्बन्धने । "वर्मावनद्धं दुर्गन्धि पूर्णं मूत्रपुरीषयोः" मनुः ।

आ+सम्यग्बन्धने "वरत्रायां दार्व्यानद्धा मानः" ऋ०१०।१०२।८ "आनद्धावरणैः कामैः" भा० भी० ११६ अ० । "आनह्यते यस्य विधूयते च पार्श्वे क्षिप्यति चापि नासा" सुश्रु०

परि+आ+परितो बन्धे सक० । "सोमपर्य्याणहनेन पर्य्याणह्यति" शत० ब्रा० ३।२।४।६

उद्+उत्तोल्य बन्धने । "अस्यूरुवयोऽस्मिन्मध्यमनुप्रविश्य मज्जानमुन्नह्यति" "मांसावसुन्नह्यति मांसपिण्डम्" सुश्रु० अतिबन्धने च । "ते नेह शक्याः सहसा विजेतुं वीर्योद्यताः कृतवैराश्च या ते" भा० भी० ८१ अ० ।

सम्+उद्+सस्पृग्बन्धने । "वल्मीकवत् समुन्नद्धमन्तः कुर्वन्ति विद्वधिम्" सुश्रु० पाण्डित्याभिमाने गर्वे च "अतस्त्विमे समुन्नद्धा पण्डितम्मन्यगर्विताः"अमरः। तत्र पाण्डित्याभिमाने "अश्रुतश्च समुन्नद्धो दरिद्रश्च महामनाः"भा०उ०३२अ० । गर्वे "अर्थं महान्तमासाद्य विद्यामैश्वर्यमेव वा । विचरत्यसमुन्नद्धो यः स पण्डित उच्यते" भा० उ० ३२अ० । समुद्भवे च "परोक्षेण समुन्नद्धप्रणयौत्कण्ठ्यकातरः" भाग० १।१५।४

उप+उपरिबन्धने । "विज्ञायैवं क्षिप्रमतन्द्रितश्च शुद्धं प्रथं चाप्युपनाहयेत्तु" सुश्रु० । उपानद् क्विपि पूर्वस्वरदीर्घः ।

नि+निबन्धने । "दृषदिः पृष्ठे निनद्धः" ऋ० ६।७५।५

परि+परितो बन्धने । "न तां बध्नी परिणहेच्छतचर्मा महातनुम्" भा० आ० २६ अ० । विस्तारे "परिणाहो

विशालता" अमरः। "कपाटवक्षाः परिघोद्धतभुजः" रघुः। क्विपि घञि परे वा दीर्घः परी(रि)आङ्गः।

सम्+सम्यगुद्भवे कवचादिधारणे च।

"ऋक्षवद्भ्रुकुटिं कवरीं च विच्युतां संनद्धमुष्टीं वामकरेण वल्गुना" भाग० ८।१२।१६। "कवचेन महार्हेण समन्नद्धमुदक्शताम्" भा० वि० १७ अ०।

णास ध्वनौ भ्वा० आत्म० अक० सेट्। नासते प्रणासते अनासिष्ट ननासे। कर्तरि अननासत्-त।

णिक्ष चुम्बने भ्वा० पर० सक० सेट्। निक्षति प्रणिक्षति। क्षत्सु वा षत्वमिति पाणिनिः। सर्वत्र वा षत्वम् सुग्ध० "निक्ष दर्भं सपत्नान् मे" अथ०१६।२६।१ आर्षमग्रपदयोर्वाल्पागः। "याः पार्श्वे उपर्धन्यनुनिक्षन्ति पुष्टीः" अथ० ६।८।१५ "प्रणिक्षिष्यति नो भूयः प्रनिन्द्राक्षान् मधून्ययम्" भट्टिः। "किमीदिनं प्रत्यङ्गमर्चिषा जातवेदो विनिक्षे" अथ० ८।१।२५

वि+नाशने "शिमीते शङ्के रक्षसे विनिक्षे" ऋ० ५।२।६ "विनिक्षे नाशाय" भा० आर्षक्षाङ्।

णिज शोधने अदा० आत्म० सक० सेट् इदित्। निङ्क्ते प्रणिङ्क्ते अनिङ्क्षि निनिक्षे। गुणौ अक०।

"अहं राष्ट्रस्याभीवर्गे निजो भूयासमुत्तमः" अथ०। ३।५।२।(निजः गुद्यः)"यस्य नास्ति निजा प्रज्ञा केवलं तु बहुश्रुतः" भा० स० ५४ अ०। "बुद्धिः सततमन्वेति ज्ञानेनैव पुरुषं निजा" भा० व० ३० अ०। "सुजन्मनस्तस्य निजेन तेजसा" रघुः। निजेन गुद्येन।

णिज शोधने सक० गुणौ अक० जु० उभ० अनिट्। नेनेक्ति प्रणेनेक्ति। नेनिजाति नेनिक्ते अनेनेक् अनेनिजम् अनेनिक्त इरित् अनिजत् अनैक्षीत् अनिक्त।

"शालग्रामो फलके क्षाल्ये नेनिज्याद्वेजकः शनैः" मनुः "स्तरो निनिक्त रश्मिभिः ऋ० १०।१३२।६

अव+समन्तात् जलप्रोक्षणेन शोधने। "यद्ब्रह्मै क्रूरमभूत् तद्ब्रह्मा एतदृक्षाणीत्तस्मात् पाणी अवनेनिक्ति"। शत० ब्रा० १।२।५।२२।

"अथोदपात्रमादायावनेजयति। असाववनेनिक्ष्वेत्येव यजमानस्य पितरमसाववनेनिक्ष्वेति पितामहमसाववनेनिक्ष्वेति प्रपितामहं तद्यथा शिष्यतेऽभिषिञ्चेदेवं तत्" शत०ब्रा०२।४।२।१६।"अवनेनिक्ष्व दासमानं पिण्डं भोक्तुमाक्रीयै पाणी शोधयेति" भा०। पिण्डदानार्थं रामकृतकृत्ये जलप्रोक्षणे तत् प्रकारः आ० ब० उक्तो यथा "प्रागग्रेष्वथ दर्भेषु आद्यमामन्त्र्य पूर्ववत्। अपः क्षिपेन्मूलदेशेऽवनेनिक्ष्वेति निखिलाः द्वितीयञ्च तृतीयञ्च मध्यदेशाग्रदेशयोः" इत्याभ्युदयिकप्रकरणीयछन्दोगपरिशिष्टवचनेन आभ्युदयिके निखिलत्वाभिधानेनान्यत्र सतिलत्वप्रतीतेः पुष्पयुक्तत्वञ्च। "सपुष्पं जलमादाय तेषां मूले पृथक् पृथक्। अग्रदक्षिणं नेनिज्याद्गोत्रनामानुमन्त्रितम्" इति ब्रह्मपुराणवचनात् "अपसव्ये पितृतीर्थेन प्रदेशिन्यङ्गुष्ठयोरन्तरा अपसव्ये "अपसव्यं वा तेन पितृभ्यो निदधातीति" भट्टभाष्यधृतच्छागलेयात् अपसव्यशब्देन पितृतीर्थमुच्यते अत्रादेव वचनात् तथा च मनुः प्राचीनावीतिना सम्यगपसव्यमतन्द्रिता" इत्यादि तत्र तु मनुवचनोपरि असाविति सम्बोधनविभक्त्या सर्वत्र नामनिर्देश इति भट्टभाष्यम् अतएव प्रागुक्तछन्दोगपरिशिष्टे आद्यमामन्त्र्य पूर्ववदित्युक्तं आद्यं पितरं पूर्ववत् "गोत्रनामभिरामन्त्र्य पितृनर्घ्यं प्रदापयेत्" इतिवत्। पितृतीर्थेनेजनं मूलदेशे पितामहप्रपितामहयोस्तु अवनेजनमध्यदेशाग्रदेशयोः द्वितीयञ्च तृतीयञ्च मध्यदेशाग्रदेशयोः" इति छन्दोगपरिशिष्टात् मातामहादीनामप्येवम्। "मातामहप्रभृतीनां तु एतेषामेव वामतः" इति छन्दोगपरिशिष्टात्। एतेषां पितृणां वामत इत्याभ्युदयिकपरम्। अन्यत्र तु दक्षिणतः कर्तुर्वामोपचारत्वात्। अतएव पार्वणे प्रागुक्तब्रह्मपुराणे "अग्रदक्षिणं नेनिज्यादित्युक्तम्। तेन सतिलपुष्पोदकपात्रं वामहस्ताद्दक्षिणहस्तेन वामाग्रारब्धेन गृहीत्वा अमुकगोत्र! पितरमुकदेवशर्मंस्त्वनेनिक्ष्व ये चात्र त्वामनु यांश्च त्वमनु तेभ्यो ते स्वधा" इति पितृतीर्थेनावनेजयेत्। "अथ उपस्पृश्य जलं स्पृष्ट्वा एवं पूर्वोक्तरीत्या पितामहाय प्रपितामहाय पिण्डदानस्थं जलमर्घनस्थञ्च पूर्ववत् व्याख्येयम्। पिण्डपितृयज्ञे ततुप्रकारः काल्पा० चौ० ४।१।१०। उक्तो यथा "उदपात्रेणावनेज्यासपव्यं सव्येन श्रोत्रेणासाव्यौ दसावनेनिक्ष्वेति यजमानस्य पितृप्रभृति त्रीन्" सू०। "उदकस्य पात्रमुदपात्रं पूर्णपात्रादि तेनाध्वर्युः यजमानस्य पितृप्रभृति पितुरारभ्य त्रीन् पुरुषान् पितृपितामहप्रपितामहान् अपसव्यं यथा स्यात् सव्यप्रदेशाद्दक्षिणैकदेशेनोदकनिनयनं यथा स्यात् तथाकृतप्रदेशिन्योरन्तराले अवनेजयति अवनिक्तान् शुचीन् करोति पिण्डदानाय। असाविति

सम्बुद्ध्यन्तगोत्रनामादेशपूर्वकम् अमुकगोत्र ! यजमानस्य पितरमुकशर्मन्नवनेनिक्ष्वेति रेखायामूलमध्याग्रप्रदेशेषु दक्षिणसंस्थमवनेजनं कार्यम्। अथैष देवानां क्षेत्रः कनिष्ठिकाप्रदेशेन मनुष्याणाम्, उद्धरणं परिवेषणापरपर्यायम् अङ्गुष्ठप्रदेशिन्योरन्तराल्लमेव पितॄणां परिधिष्यते अत इदमाह अपसव्यमिति" कर्कः। "अवनेक्ष्व पूर्ववद्दीर्विखं च नमो व इत्यञ्जलिं करोति" कात्या० श्रौ० १५। निजेः गुद्ध्यर्थकस्य णिचि अवनेजयतीति। अवनेक्ष्वेति प्रयोग इति बोध्यम्। शोधनपरत्वे नेनिज्यादिति अवनेजने च न तन्त्रता यथाह छन्दोगप० "अर्घ्ये उच्छोदके चैव पिण्डदानेऽवनेजने। तन्त्रस्य विनिवृत्तिः स्यात् स्वधावाचन एव च" अवनेजनशब्दे ४२६ पृ० कात्य प्रदीपोक्तं बालपक्षीयावनेजनविधानं छन्दोगेतरविषयम् अन्यवेदिनामाभ्युदयिकादिविषयञ्चेति बोध्यम्।

निर्+निःशेषेण क्षालनेन शोधने "पात्राणि निर्णेनिजानि" यत० ब्रा० १।२।१।२ "पात्राणि निर्णेनिक्ते" तैत्ति० सं०। "यदृष्टमङ्गिर्निर्णिक्तं यच्च वाचा प्रशस्यते" मनुः "तोयनिर्णिक्तपाणिः" रघुः "तेषामेतदृषीणां निर्णिक्तानां शुभाञ्जनाम्" भा० आ० २७१ अ०।

णिद् संक्षिप्तायां क्षये सक० निन्दने सक० भ्वा० उभ० सेट्। नेदति-ते प्रणेदति-ते। अनैदीत् अनैदिष्ट निनेद निनिदे।

णिद् कुत्सने भ्वा० पर० सक० सेट् इदित्। निन्दति प्रणिन्दति अनिन्दीत्। क्त्नु वा यत्वमिति पाणिनिः। सर्वत्र वा यत्वम् सन्धौ "निनिन्द रूपं हृदयेन पार्वती" कुमा०। "निन्दन्तस्तव सामर्थ्यम्" गीता। "अनिन्द्यं निन्दते यो हि" भा० व० २५२ अ०। आर्षत्वात्। "न निन्दा निन्द्यं निन्दति किन्तु विधेयं स्तौति" मीमांसा।

णिल दुर्गन्धे तुदा० पर० सक० सेट्। निलति प्रणिलति। अनैलीत् निनेल।

णिव सेके भ्वा० पर० सक० सेट्। इदित्। निन्वति। अनिन्वीत्। निनिन्व। [अनेषीत् निनेष।

णिश समाधौ भ्वा० पर० सक० सेट्। नेशति प्रणेशति

णिष सेके भ्वा० पर० सक० सेट्। नेषति प्रणेषति अणेषीत्। निनेष।

णिस चुम्बने तुदा० आत्म० सक० सेट् इदित्। निंसे प्रणिंसे अनिंसिष्ट निनिंसे। क्त्नु वा यत्वमिति पाणिनिः। सर्वत्र वा यत्वम् सन्धौ। निंसे दन्तच्छदं न वः भट्टिः। "अभि द्युचः क्रमते दक्षिणावत्ये या अस्य धाम प्रथमं ह निंसते" ऋ० १।१४४।१ "अभि स्वरन्ति बहवो मनीषिणो राजानमस्य भुवनस्य निंसते" ६।८५।१

णी प्रापणे भ्वा० उभ० द्विक० अनिट्। नयति प्रणयति अनैषीत्। प्रधाने कर्मणि वादयः। अजा यामं नीयते। अनेट् निनाय निनयिथ निनेथ निन्ये नेता न्येष्यति ते नेतव्यः। नेयः नीतः नीतिः नीत्वा विनीय।

"सर्वान्नेष्यामि वः सदा। इजिनात्तारयिष्यामि" भा० आ० ६०५२ श्लो० "गमनाय मतिं चक्रे तार्क्ष्यैनं निन्युरङ्गनाः" रामा० बा० ६ अ०। "नयिष्यामि च वाहिनीम्" रामा० ५।६१ अ०। आर्ष इट्। "दैवेन किलयस्यार्थः स नीतोऽपि विपद्यते" भा० वि० २० अ०। यापने च "निनाय सात्यर्थहिमोत्किरानिलाः। सहस्र रात्रीरुदवासतत्पराः" कुमा०।

सम्माने आत्म० "शास्त्रे नयते शास्त्रस्थं विद्वान्तं शिष्येभ्यः प्रापयतीत्यर्थः तेन च सम्माननं फलितम्" सि०कौ० स्नाने निषये आत्म०। "तत्त्वं नयते निश्चिनोति" सि०कौ०

अति+अतिक्रम्य नयने। "न स्वर्गं लोकमतिनयेत्" ऋ०उ० वि+अति अपवाहने सक०। "व्यतिनीय कालमुपसदां चतुर्थम्" आश्वा०श्रौ०१२।८।२५। "व्यतिनीय अपोक्ष्य" नारा०

अनु+स्वाभीष्टप्रवेशनाय सान्त्ववाक्यादिप्रयोगे सक०। "भवतोऽनुनयाम्येवं पुरुराज्ये ऽभिषिच्यताम्" भा० आ० ८४ अ०। "प्रणिपातेन सान्त्वेन दानेन च महायशाः। ऋत्विजोऽनुनयामास" भा० आ० २२३ अ०। आर्ष आसः। "अनुनीता त्वमस्माभिश्चिरं सान्त्वेन मैथिलि!" रामा० यु० २५ अ०।

अप+अपहरणे अन्यत्रनयने "यत्र संसृष्टकाः पार्श्वमपनिन्युरथाजिरात्" भा० आ० ५३० श्लो०।

अभि+२६२ पृ० अभिनयशब्दोक्तार्थे सक०। "गीतानि रम्याणि जगुः प्रहृष्टा कान्ताभिनीतानि मनोहराणि" हरि० ८४४८ अ०। "तदुक्तमभिनीयाभियुक्तैः" वेदा०सा० आभिमुख्येन नयने च। "इहा मरं ज्यामभिनीयमानम्" भा० व० ७६६ श्लो०। प्रधाने कर्मणि यागच्।

अव+अधोनयने। "मन्थे सम्यातमवनेयेत्" ऋ० उ०। "अवोधे अग्निमवनीतसद्मन्थुः" ऋ०१।११६।८।

आ+दूरस्थस्यान्तिकप्रापणे। "दूरादिन्द्रमनयन्ना सुतेन" ऋ० ७।३१।२ "रथमन्वानयत्तूर्णं सुपर्णोच्छ्रितकेतनम्" भा०द्रो० १४७ अ०। "प्रीयता तेन वराङ्गनाभिरानायि विद्वान्

क्रतुषु क्रियावान्" ( पुरीषप्रक्षेपः ) संयोजने च "तप्ते पयसि दध्यानयति सा वैश्वदेव्यामिक्षा भवति" श्रुतिः

अभि+आ+आभिमुख्येन नयने "दधिमधुसर्पिरातपवर्षा आपो ऽभ्यानीय" ऐत० ब्रा०

परि+आ+परित आनयने । "पाञ्चालराजं द्रुपदं गृहीत्वा रथमूर्द्धनि । पर्य्यानयत भद्रं वः सा स्यात् परमदक्षिणा" भा० आ० १३८ अ० ।

प्रति+आ+प्रतिकूलतया आनयने गतस्य पुनरानयने "प्रत्यानेष्यति शत्रुभ्यो वन्दीमिव जयश्रियम्" कुमा०

उद्+ऊर्द्ध नयने "किं खिदादित्यमुन्नयति" भा० व० १७२ अ० । "रेतोधाः पुत्र उन्नयति नरदेव ! यमक्षयात्" भा० आ० ७४ अ० । उद्भावने निरूपदर्शनेनानुमाने च "नीचासन्नसुदनयः पराहजम्" ऋ० २।११।२। उत्सङ्गने उत्क्षेपे आत्म० । "दण्डमुन्नयते उत्क्षिपतीत्यर्थः" सि० कौ० ।

उप+उपस्थापने "उपनिन्युर्भैक्षभागं दुहितृत्वेन जाह्नवीम्" हरिवं० १४२।"मक्षया सेनया राजा दमयन्तोपनयत्" भा० प० ३०६३ श्लो० । द्विजातिसंस्कारे संस्कारभेदे आत्म० । आचार्यः शिष्यमुपनयते । "गर्भाष्टमेऽब्दे वाब्दे ब्राह्मणस्योपनायनम्" "उपनीय ददद् वेदानाचार्य्यः स उदाहृतः" मनुः । "आचार्य्य उपनयमानो ब्रह्मचारिणम्" श्रुतः ११।५।३ "तथेति तं होपनिन्ये" शत० ब्रा० ११।५।३।१। "समिधमाहर उप त्वा नेष्ये" छा० उ० । स च संस्कारः वेदार्थता प्रयोजकः । तस्य परमाभिफलकत्वात् परब्रह्मपदे प्राप्ते सम्मानोत्सङ्गनाचार्यकरणेत्यादिना पा० तङ् विहितः । "न हि उपनयनमात्रेणाचार्यत्वं किन्तु तत्पूर्वकाध्यापनेन "उपनीय ददद् वेदान् आचार्य्यः स उदाहृतः इति स्मृतेः" इत्याशयेन उपनयनपूर्वकेनाध्यापनेन हि उपनेतरि आचार्यत्वं क्रियते इति" सि०कौ० उक्तम् । "यस्य प्रपितामहादेर्नानुस्मर्य्यते उपनयनम्" आपस्तम्बः भृतिदानेन समीपप्रापणे आत्म० । "कर्म्मकरानुपनयते भृतिदानेन स्वसमीपं प्रापयतीत्यर्थः" सि० कौ० ।

नि+उत्सर्जने । "उदकं निनयेच्छेषं शनैः पिण्डान्विके पुनः" मनुः । "निनयेत् उत्सृजेत्" कुल्लू० । "ओषधिभ्यो दधि निनयति" तैत्ति० २।४।८२१। नितरां नयने च "पूर्णपात्रमनर्वेदि निनयति" तैत्ति० १।७।५।२ "दाक्षी कुम्भं बर्हिष्यग्नाविनयेयुः स्वाम्यवाः । पतितस्य बर्हिः कुर्युः सर्वकार्य्येषु चैव तम्" "चरितव्रत आयाते निनयेरन्नवं घटम्" याज्ञ० ।

निर्+निश्चये अवधारणे तदभावाप्रकारकत्वे सति तत् प्रकारके ज्ञानभेदे । "देवःपतिर्विदुषि ! नैषधराजगत्या निर्णीयते न किमु,न ब्रियते भवत्या" नैष० "पुराहस्तकयोद्वारैः कथं निर्णीयते परः" हितो० ।

परा+पुनरानयने गतस्य पुनः स्वस्थानप्रापणे "पुनः कृत्वा कृत्वाक्षते वृत्तमट्टह्य पराणय" ऋग्० ५।१४।४ ।

परि+परितो नयने "तैषां हस्तं परिणयेत् सव्यपाणेषु तद्वरैः" मनुः । प्रदक्षिणीकरणे "तौ दम्पतीः त्रिः परिणीय वह्निम्" कुमा० । "अग्निहुत्रं यज्ञ ते पात्रमग्निं पर्य्यणयं च यत्" रामा० अयो० ४२ अ० । विवाहरूपे संस्कारभेदे च "वरयित्वा यथान्यायं मन्त्रवत् परिणीय च" भा० आ० ६।१४ श्लो० । "सर्वाः परिणयेत् विप्रः" स्मृतिः "परिणेष्यति पार्वती यदा" कुमा० ।

वि+क्षेपे उपसम्यतौ प्रवेशने विधाने च "प्रणीतः संस्कृताग्नौ वा यज्ञपात्रान्तरे स्त्रियाम् । त्रिषु त्रिप्रोपसम्यक्त्रिक्षितेषु प्रवेशितेषु मेदि० । तत्र क्षेपे "तेन सम्यक् प्रणीतानि शरजालानि भागशः" भा० भी० ८७ अ० । विधाने "प्रणीय दारिद्र्यदरिद्रतां त्वयः" नैष० । "सकृन्दं सच्चिदानन्दं प्रणिपत्य प्रणीयते" सुग्ध० "स एव "धर्मो मनुना प्रणीतः" रघुः "यदि न प्रणयेद्दण्डं राजा दण्ड्येष्वतन्द्रितः" मनुः ।

अग्निसंस्कारभेदे । "अग्निप्रणयनं कृत्वा" स्मृतिः । अन्याधेय शब्दे दृश्यम् "मन्त्राध्वरे वह्निरभिप्रणीतः" भट्टिः । उपसम्यक्तिः क्षेपभेदः । प्रणयः । प्रणयिजनः । "प्रणयस्व यथान्यायं राजन् ! किं करवाणि ते" भा० व० २१६ श्लो० । "सङ्गमे च विनाशान्ते मरणान्ते च जीविते । संयोगे च वियोगान्ते को नु विप्रणयेन् मनः" भा० आ० २८६ श्लो० "भक्तिप्रीतिप्रणयसहितं मानदस्यादुपेतम्" उद्भ० दू० ।

प्रति+पुनः प्रापणे यतो गतिस्तत्रैव पुनर्नयने । "प्रतिनेतुमयोध्याम्" रामा० २।८० अ० । "तेभ्यः एनान् प्रतिनयामि वह्नौ" अ० ८।८।१० "भद्रं न सर्वमेतद्धि तं मृत्युं प्रतिनेतुं युज्यते" पञ्चत० ।

वि+अपसारणे "अहं हि ते विनेष्यामि युद्धश्रद्धामितःपरम्" भा० उ० १४७५ श्लो० । भारमेनं विनेष्यामि पाण्डवानां महात्मनाम्" भा० भी० ५० अ० । शिक्षाविशेषे "विनितैस्तु व्रजेच्छिष्यमाप्तगैः" "नाविनितैर्व्रजेद्युर्वैः"

मनुः। "तपस्विसंसर्गविनीतसत्त्वे" (तपोवने) "वन्यान् विनेष्यन्निव दुष्टसत्त्वान्" रघुः। "स्वधर्मोज्झितान् राजा विनीय स्थापयेत् पथि" याज्ञ० आनुकूल्यार्थमनुनये विनयः। ऋणादेर्निर्यातने आत्म०। करं विनयते राज्ञे देयं भागं परिशोधयतीत्यर्थः" सि० कौ०। व्यये विनियोगे आत्म०। शतं विनयते धर्म्मार्थं विनियुङ्क्ते इत्यर्थः सि० कौ०। अपनयने कर्तृशरीरभिन्ने कर्मणि कर्तृस्थे क्रियाफले आत्म०। क्रोधं विनयते अपगमयति क्रोधापसारणफलस्य चित्तप्रसादस्य कर्तृस्थत्वात् "स्वरितजितः" इत्येव सिद्धे नियमार्थमिदं तेनेह न गण्डं विनयति, गण्डस्य शरीरावयवत्वात् कर्तृस्थेऽपि न तङ्। कर्तृस्थे इत्युक्तेः गुरोः क्रोधं विनयतीत्येव।

ञम्+संभोजने। "ब्रह्मणस्तात्मानं संनयन्" भाग० ६।१०।१ "ओषधिभ्योऽध्यात्मन् समनयन्" तैत्ति०ब्रा०२।५।२।२स्वापने च "कंसे घृतदाज्यं संनीय" ह्रह० उ०६।४।२४ मिश्रणे "दधिमधुहविषा हतं संनीय" ह्रह० उ० वैदिकहविः संस्कारभेदे संनाय्यं हविः "नासोमया संनयेत्" तैत्ति० स०२।५।५।१।

णील नीलताकरणे भ्वा० पर० सक० सेट्। नीलति अनीलीत् निनील

णीव स्नौल्ये भ्वा० पर० सक० सेट्। नीवति अनीवीत् निनीव।

णु स्तुतौ अदा० पर० सक० वेट्। नौति अनौषीत् अनावीत् अनौषीत् नुनाव नुनुविथ नुनुविव। नोता नविता नविष्यति नोष्यति नोतव्यं नवितव्यं नुतः। नुतिः नुत्वा प्रणुत्य। "येन नुवन्तमङ्हिंसं पिपक्" ऋ० ६।१७।१०। "द्विधाप्रयुक्तेन च वाङ्मयेन सरस्वती तन्निधुनं नुनाव" कुमा०। "सादरं नौमि तं भक्त्या श्रीगोपीजनवल्लभम्" स्क० पु०। "सैन्यं नीलं नुनाव च" भट्टिः। णिच् नावयति णिच् सन् नुनावयिषति सन् नुनूषते यङ् नोनूयते।

आ+सम्यगस्तवने आत्म०। "यतश्चित्रयः शुभामन्द्रमानुषानास्वजिह्वदत्" भट्टिः।

प्र+प्रकर्षेण स्तवने "एददेवं विद्वानत्वरं प्रणौति" छा०उ०।

णु गतौ भ्वा० आत्म० सक० अनिट् निघण्टुः। नवते नवते इत्यादि गतिकर्मसु मिरुक्तोक्तेः नवते। "अभीनवन्ते अवृकः प्रियमिन्द्रस्य काम्यम्" ऋ० ६।१०।१। "अभीनवन्ते अभिगच्छन्ति" भा०। "हरिं नवन्ते अवता उदन्यवः" ऋ० ६।८६७।२७ "नवन्ते गच्छन्ति" भा०। "गावो न धेनवोऽनवन्त" १०।६५।६

णुद प्रेरणे तुदा० उभ० सक० अनिट्। नुदति-ते प्रणुदति अनौत्सीत् अनुत्त। नुनोद नुनुदे नोत्ता नोत्स्यति-ते नोदनम् नोत्तुम्। नुन्नः नुत्तः। "मन्दं मन्दं नुदति पवनश्चानुकूलो यथा त्वाम्" मेघ०। खण्डने अपसारणे च नुनुदे तनुकण्डु पण्डितः" नैष०। अदस्त्वया नुन्नमनुत्तमं तमः" माघः। "प्रणुद्यान्धे हृजिनं देवदेवः" हरिवं १२१ अ०। "विधिना संप्रणुदितः" भा० व० १ अ०। अनुदात्तेत्त्वेऽपि इट् आर्षः। नोदं करोतीति णिच्। नोदयति नोदितः नोद्यमानः। "ते नोद्यमाना विधिवत् बाह्लकेन हयोत्तमा" भा० व० ७१ अ०। "अङ्कुशाङ्कुशनोदिताः" भा० १६ अ०। धातुपाठे स्वरितत्व णुद प्रेरण इति पाठेऽपि पुनस्तथैवोत्तरत्र पाठः कर्त्राभिप्राये क्रियाफलेऽपि परस्मैपदार्थः" सि० कौ०।

अप+अपसारणे "जरां रोगमपनुद्य शरीरात्" साङ्ख्या०भ० "आच्छाद्य च महाबाहुर्बलात्तृष्णानपानुदत्" भा० आश्व० ६२अ०। "अलक्ष्मीं व्यपनोत्सत्य" भा० व० ३।५ अ०। "अभिद्रवार्जुन! क्षिप्रं कुरून् द्रोणदापानुद" भा० द्रो० १६० अ०।

परा+अपसारणे "तन्न पराणुद विभो! कश्मलं मानसं महत्" भाग० ३।७।७ श्लो०।

प्र+प्रकर्षेण नोदने चालने च। "स शत्रुसेनां तरसा प्रणुद्य" भा० वि० ६४ अ०। अपसारणे "ततोऽन्धकारं प्रणुदन्नुदतिष्ठत चन्द्रमाः" भा० व० ३३ अ०।

वि+विशेषेण नोदने। "चोदयामास तानश्वान् विनुन्नाङ्गीभ्रसायकैः" भा० भी० ४८४६ श्लो०। खिजनस्य दुःखाद्यपसारणे "लक्ष्मीर्विनोदयति येन दिगन्तलम्बी" रघुः मङ्खिनावस्तु तत्करोतीत्यर्थे नामधातुरयमिलाह्न। "दुःखं फलं चार्त्तवमाहरन्ति विनोदयिष्यन्ति नवाभिषङ्गात्" रघुः। "कथं वा देवी सरजस्त्वात् विनोदाते" मालविकाग्नि०। "लोलं विनोदय मनः सुमनोलताभ्यः"। सा० द०।

णू स्तुतौ तु०उ०सक०प०सेट्। नुवति प्रणुवति अनुवीत् नुनाव "अभिन्द्रगर्दभं रूप नुवन्तं पापयामुया" ऋ० १।२९।५ "मङ्हामनूषत नुतम्" ऋ०१।६।६ "अनूषत स्तुतवन्तः आर्षः दृढभावः। अयं नुखान्त इति वररुचिः। नुव-

मानाश्च मर्त्ताः" ऋ० १।१६१। नवमानास्तुवानाः" भा० वेदे आत्म० गणव्याख्यासच।

णेद् सन्निधाने उभ० सक० सेट्। नेदति-ते प्रणेदति-ते। अनेदीत् अनेदिष्ट निनेद निनेदे।

णेष गतौ भ्वा० आत्म० सेट्। नेषते प्रणेषते। अनेषिष्ट ऋदित् अनिनेषत्-त।

एते धातवः नादिका अपि सति हेतौ णत्वार्थं गणे णोपदेशितया पठिताः प्रयोगे तु दन्त्यनादय एव पुनः प्रादियोगे णत्वमुपयान्ति। नन्दनाद्यनाधनक्ष नृनाटिधात वस्तु णोपदेशत्वाभावात् निमित्तेऽपि न णत्वमुपयान्तीति भेदः

त्रय पु० ब्रह्मलोकस्थे सरोवरभेदे

"अथ यदरण्यायनमित्याचक्षते ब्रह्मचर्यमेव तदरण्य ह वै त्रयाणांवै ब्रह्मलोके तृतीयस्यामितो दिवि तदैरम्मदीयम्" आ०ब्रा०। "तत्तत्र हि ब्रह्मलोके सरण्य ह वै प्रसिद्धो त्रयाणांवै सप्तर्षी। सप्तर्षयोमेव सरसी तृतीयस्याम् भुवमन्तरिक्षाद्यामेक्ष तृतीया द्यौस्तस्यां तृतीयस्यामितोऽस्माल्लोकादारभ्य गम्यमानायां दिवि। तत्तत्रैव चैरं हराज्ञं तन्मय ऐरो मखस्तेन पूर्णमैरं मदीयं तदुपयोगिनां मदकरं हर्षोत्पादकं सरः" शाङ्करभा०।

इति वाचस्पत्ये णकारादिशब्दार्थसंकलनम्।

---

## त

तकारो व्यञ्जनवर्णभेदः दन्त्यः अर्द्धमात्राकालेनोच्चार्यः अस्योच्चारणे दन्तमूलेन जिह्वाग्रस्य स्पर्श आभ्यन्तरप्रयत्नः। विवारश्वासाघोषा बाह्यप्रयत्नाः। मातृकान्यासेऽस्य वामस्फिचि न्यसनम्। अस्य वाचकशब्दा वर्णाभिधाने उक्ता यथा "तः पूतना हरिः शुद्धिःशक्तिः शुक्तिर्जटी ध्वजी। वामस्फिग्वामकक्षौ च कामिनी सप्तकर्णकः। आषाढो तण्डतुम्बश्च कामिकाष्टपुच्छकः। रत्नकश्च श्यामसखो वाराही मकरोऽरुणा। सुगतोर्द्धस्थावूर्द्धजानुश्च क्रोष्टुपुच्छकः। गन्धो विश्वा मरुच्चात्रातुराधा च सौरकः। जयन्ती पुत्रको भ्रान्तिरनङ्गमदनातुरा"। तदधिष्ठातृदेवताध्यानं वर्णोद्धारतन्त्रोक्तं यथा "ध्यानमस्य प्रवक्ष्यामि शृणुष्व कमलानने!। चतुर्भुजां महाशान्तां महामोक्षप्रदायिनीम्। सदा षोड़शवर्षीयां रक्ताम्बरधरां पराम्। नानालङ्कारभूषाढ्यां सर्वसिद्धिप्रदायिनीम्। एवं ध्यात्वा तकारन्तु तन्मन्त्रं दशधा जपेत्"। कामधेनुतन्त्रे अस्य स्वरूपमुक्तं यथा "तकारं चञ्चलापाङ्गि! स्वयं परमकुण्डली। पञ्चदेवात्मकं वर्णं पञ्चप्राणमयं सदा। त्रिशक्तिसहितं वर्णम् आत्मादितत्त्वसंयुतम्। त्रिबिन्दुसहितं वर्णं पीतविद्युत् सममप्रभम्" "तोव्योमान्तलसुधनापरूपम्" इति ह० र० टी० तस्य व्योमदेवत्वं मालाढत्ते प्रथमोपन्यासे धनापहारः फलञ्चोक्तम्।

त पु० तक-हसने सहने वा ड। १चौरे २अम्बुते ३पुच्छे ४क्रीडे ५म्लेच्छे च मेदि०। ६गर्भे ७अष्टे शब्दच० ८रत्ने ९सुगते देवे १० गौरविवर्जिते ११क्रोष्टुपुच्छे च एका० को०। १२तरुणे १३पुत्रे क्ली०स्त्री० मेदि०। त्रिवर्णप्रस्तावे आद्यगुरुद्वयके अन्त्यलघुके (ऽऽ।) १३ गणभेदे "सोऽन्तगुरुः कथितोऽन्त्यलघुसः" छन्दोम०।

तंसु पु० तंसि-उन्। गौरवे मतिनारहते रूपभेदे "मतिनारसुता राजंश्चत्वारोऽमितविक्रमाः। तंसुर्मेहातिरथो दुष्टु आप्रतिमद्युतिः। तेषां तंसुर्महावीर्यः गौरवं वंशवर्द्धनः। आजहार यज्ञो दीप्तं जिगाय च वसुन्धराम्"। भा० आ० ९४ अ०। स च सरस्वतीपुत्रः यथा तत्रैवोक्तम् ९५ अ०। "तंसुं सरस्वती पुत्रं मतिनारादजायत। ईक्षिनं जनयामास कालिङ्ग्यां तंसुराजजम्"।

तक हासे अक० सहने सक० भ्वा० पर० सेट्। तकति अतकीत्-अतकीत्। ततक तेकेतुः। निरुक्ते अयं गतिकर्मसु पठितः। कर्मणि भावे च। यत् न अतत्। तक्यं सहनीयम्। [द्वौत् ततङ् तङा आतङा।

तक दौस्थ्ये क्लेशजीवने पा०इदित् प०भ्वा०सेट्। तङति अतत्

तक त्रि० तं गौरवविवर्जितं यथा तथा कायति कै-क। १निन्दिते। "इयत्तकः कुम्भकक्षाकं भिनद्म्यशातनी" ऋ० १।१६१।१५। "तकं कुत्सितम्" भा०। तक-अच्। २सहनशीले च। "तका वयं सुवासहे इदं सधु" काल्या० श्रौ० १३।३।२१सू०। ३स्खलिते च। "सुतं गायत्र तकवासस्य" ऋ०१।१२०।३। "तकवानस्य स्खलितगन्नेः" कर्कः।

**तकत्** अव्य० तक–वा० अति। अल्पत्वे। २ततक्षुते मनायति तकत्क्षुते मनायति" ऋ० १।१२१।४। "तकदिति मनायति अल्पत्वमिदमिति सुष्ठु मन्यते" भा०। तक्–टेर कच्। २तच्छब्दार्थे त्रि० सकः तकौ तके इत्यादि रूपम्

**तकरी** स्त्री तं कुत्सितं करोति क–ट ङीप्। कुत्सितकारिण्यां स्त्रियां "ते भिनद्मि तकरीम्" तैत्ति० सं० ३।३।१०।१

**तकार** पु० त+कार। तत्स्वरूपे वर्णे "एवं ध्यात्वा तकारन्तु" कामधेनुतं०। [१धूर्त्ते २औषधे च शब्दार्थौ स्त्री उज्ज्व०।

**तकिल** पु० तकि–कच् जीवने उणादि० इलच् नलोपश्च

**तक्कु** त्रि० तक–गतौ निरु० उनु। गासुके "पुरुमेधयित् तक्वे नवं ददत्" ऋ० ८।५७।५ "तक्वे तक्तिर्गतिकर्मा औणादिक उनुप्रत्ययः सोममभिगच्छते" भा०।

**तक्कन्** न० तक–कनिन् न कित्। अपत्ये निरुक्तः।

**तक्र** न० तनुच–रक् न्युङ्वा० कुत्वम्। चतुर्थांशजलयोगेन दधिमन्थनजाते दधिविकारभेदे (घोल) अमरः। तद्भेदादिकं भावप्रका० उक्तं यथा

"घोलन्तु मथितं तक्रसदधिच्छक्किकापि च। ससरं निर्जलं घोलं मथितन्त्वसरोदकम्। तक्रं पादजलं प्रोक्तसदधिर्दद्रुवारिकम्। छच्छिका सारहीना स्यात् स्वच्छा प्रचुरवारिका। घोलं तु शर्करायुक्तं गुणैरेतैर्यं रसाढ्यवत्" । मथितं (मठ्ठा) इति लोके। छच्छिका (छाछ) इति लोके। "वातपित्तहरं च्छादि मथितं कफपित्तनुत्। तक्रं ग्राहि कषायाम्लं स्वादुपाकरसं लघु। वीर्योष्णं दीपनं हृद्यं प्रीणनं वातनाशनम्। यकृत्प्लीहादिमतां पथ्यं भवेच्छ्रग्राहि लाघवात्। किञ्च स्वादुविपाकित्वाच्च पित्तप्रकोपणम्। कषायं दीपनं हृद्यं प्रीणनं वातनाशनम्। कषायोष्णविपाकित्वाद्ग्रौढ्याच्चापि कफापहम्। न तक्रसेवी व्यथते कदाचित् न तक्रदग्धाः प्रभवन्ति रोगाः। यथा सुराणाममृतं सुखाय तथा नराणां भुवि तक्रमाहुः। उदश्वित्फलकट्वम्लमाममग्नं परमं मतम्। छच्छिका शीतला लघ्वी पित्तघ्नमतृषाहरी। वातनुत् कफलघुत्वा तु दीपनी लवणान्विता।

अथोष्णतप्ततोष्णतानुष्णतप्तानां तक्राणां गुणाः "ससुष्णतप्तं तक्रं पथ्यं लघु विशेषतः। स्तोकोष्णतप्तं तत्राद्गुरु हृद्यं कफापहम्। अनुष्णतप्तं सान्द्रं गुरु पुष्टिकफप्रदम्"

अथ दोषविशेषे व्याधिविशेषे तक्रविशेषाः।

"वातेऽम्ले शस्यते तक्रं शुण्ठीसैन्धवसंयुतम्। पित्ते स्वादुसितायुक्तं सव्योषमधिके कफे। चित्रकक्षारयुतं घोलं सैन्धवेन च संयुतम्। भवेदतीव वातघ्नमर्शोऽतीसारकृत्परम्। रुचिदं पुष्टिदं बल्यं वह्निमूलविनाशनम्। मूलकृच्छ्रे तु सगुडं पाण्डुरोगे सचित्रकम्"।

अथामयभक्षतक्रगुणाः

"तक्रमामं कफं कोष्ठे हन्ति कण्ठे करोति च। पीनसश्वासकासादौ पक्वमेव प्रशस्यते"।

अथ तक्रसेवननिषिद्धानि।

"शीतकालेऽग्निमान्द्ये च तथा वातामयेषु च। अरुचौ क्षीतसां रोगे तक्रं स्वादसतोपमम्। तत्तु हन्ति गरच्छर्दिसेकविषमज्वरान्। पाण्डुमेदोग्रहण्यर्शो मूत्रयकृद्भगन्दरान्। मेहं गुल्ममतीसारं व्रणप्लीहोदरारुचीः। श्वित्रकोष्ठगतव्याधीन् कुष्ठशोषतृषाक्षयान्"।

तक्रस्यविषयाः "नैव तक्रं क्षते दद्यात् नोष्णकाले न दुर्बले। न मूर्च्छाभ्रमदाहेषु न रोगे रक्तपित्तजे"।

अथ गव्यादीनां विशिष्टाः गुणाः "वान्युष्णानि दध्यष्टौ तद्वृष्यं तक्रमादिशेत्"। भावप्र०।

अधिकं क्षतान्नशब्दे २।८५ पृ० द्रष्टव्यम्। "मन्थनादिपृथग्भूतस्नेहमर्यादकं तु यत्। नातिसान्द्रद्रवं तक्रं स्वादम्लं तुवरं रसे" सुश्रु०। "सूतकार्पासकिण्वानां गोमयस्य गुडस्य च। दग्धः क्षीरस्य तक्रस्य पानीयस्य दशस्य च" मनुः। "तक्रनिस्रावबद्धलं दधिमण्डार्द्रमृत्तिकम्" हरिवं० ६१ अ०। [पदार्थे।

**तक्रकूर्चिका** स्त्री २।६७ पृ० कूर्चिकाशब्दोक्ते तक्रजाते

**तक्रपिण्ड** पु० "दग्ध्वा तक्रेण वा दुष्टं दुग्धं वह्निं सुसंस्कृतम्। द्रवभागेन हीनं यत् तक्रपिण्डः स उच्यते" इत्युक्ते (छाना) ख्याते पदार्थे। [विशेषयुक्ते मांसभेदे।

**तक्रमांस** न० क्षतान्नशब्दे २।८३ पृ० उक्ते तक्रेण पाके

**तक्रवामन** पु० तक्रं वामयति अल्पत्वात् वाम+णिच्–ल्यु ह्रस्वः। नागरङ्गे शब्दार्थचिन्ता०।

**तक्राट** पु० तक्रार्थं तक्रोत्पादनार्थमटति अट–अच्। मन्थानदण्डे हारा०।

**तक्रारिष्ट** पु० "यमान्यामलकं पथ्या मरिचं त्रिपलांशकम्। लवणानि पलांशानि पञ्च चैकत्र चूर्णयेत्। तत्र कंसासुतं जातं तक्रारिष्टं पिबेन्नरः। दीपनं गोधगुल्मार्शः क्रिमिमेहोदरापहम्" चक्र० उक्ते औषधभेदे।

**तक्व** त्रि० तक–गतौ वा० व। गमनशीले। "तक्वो नेता तदिदसुः" ऋ० ८।६९।१२ "तक्वो गमनशीलः" भा०।

तक्कन् त्रि॰ तक-गतौ वनिप् । १गतिशीले "तक्का न भूर्णिर्वना सिषक्ति" ऋ॰ १।६६।१ तक-सहने वनिप् । २चौरे च । "निष्कु च उपसत्कबीरिव" ऋ॰ १।१५।१५ "तक्कवीः तक्का स्तेनस्तस्य वीः गतिः" भा॰ ।

तक्कवी त्रि॰ तक्कानां चौराणाम् वीः । चौराणां गतौ । "भगमीड्ढे तक्कवीये" ऋ॰ १।१२४।५। "तक्कवीये तस्कराणां यत्नविघातिनामन्धत्व गमनाय" भा॰ छान्दस इयङ् दीर्घश्च ।

तक्ष काय्यें तनूकरणे ( चाँचा छोला ) व्यापारे वा भ्वा॰ पक्षे स्वा॰ प॰ सक॰ वेट् । तक्षति तक्ष्णोति तक्ष्नुवन्ति अतक्षीत् अताक्षीत् ततक्ष । तक्षिष्यति तक्ष्यति । तष्टा तक्षणम् तष्टः तक्ष्य तष्टा प्रकाष्टत् । "दारवाक्षाश्च तक्षणम्" मनुः "चषालं ये अश्वयूपाय तक्षति" ऋ॰ १।१।१६२।६ "बाहुभ्यामकलमपतक्ष्नुवन्ति" शत॰ ब्रा॰ ३।७।१।८ ।

तक्ष त्वचो यङ्क्षणे संवरणे भ्वा॰ प॰ सक॰ सेट् । तक्षति कायं वर्म्मणा योधा । अतक्षीत् ततक्ष ।

तक्ष पु॰ रामानुजस्य भरतस्य १पुत्रभेदे । "तक्षः पुष्कर इत्यासां भरतस्य महीपते !" भाग॰ ६।११।७ ।
"स (भरतः) तक्षपुष्कलौ पुत्रौ राजधान्योस्तदाख्ययोः। अभिषेच्याभिषेकार्हौ रामान्निकमगात् पुनः" रघुः । २तद्नामके राजधानीभेदे च । तक्ष भावे घञ् ।३तनूकरणे कवचादि संवरणे । "उभौ कक्षां सुपार्श्वं तु तक्षवन्तौ च शिक्षितौ" भा॰ स॰ २२ अ॰

तक्षक पु॰ तक्ष-ण्वुल् । १विश्वकर्मणि शब्दर॰ । २द्रुमभेदे हेमच॰ । "क्षत्रकात् विप्रकन्यायां जातस्तक्षक उच्यते । उशनसोक्ते सङ्कीर्णजातिभेदे (छुतार) ३क्षत्रधारे कद्रुगर्भे कश्यपात् जाते अष्टनागान्तर्गते ४नागभेदे" अनन्तो वासुकिः पद्मो महापद्मोऽथ तक्षकः। कुलीरः कर्कटः शङ्खो ह्यष्टौ नागाः प्रकीर्त्तिताः" ति॰त॰। "काद्रवेयाश्च बलिनः सङ्क्रमभितोजसः । सुपर्णवशगा नागा जज्ञिरेऽनेकमस्तकाः । तेषां प्रधानाः सप्तैव शेषवासुकितक्षकाः" हरिवं॰ ३अ॰ । "योऽसौ दष्टस्य तातस्य तथा कृच्छ्रगतस्य च । स्वन्धे सप्तं समाक्षाक्षीत् पन्नगं राजकिल्बिषी । तं पापमतिसंक्रुद्धस्तक्षकः पन्नगेश्वरः । आशीविषस्तिग्मतेजा महाक्रोधवशोदितः । सप्तरात्रादितो नेता यमस्य सदनं प्रति । द्विजानामवमन्तारं कुरुष्वाशयमक्षरम्" भा॰ आ॰ ४। तेन च परीक्षितोदंशनकथा भा॰आ॰ ४३अ॰ दृश्या यथा "अथ शुश्राव गच्छन् स तक्षको जगतीपतिम्। मन्त्रैर्गदैर्विषहरैरच्छमाथं प्रयत्नतः । सूत उवाच। स चिन्तयामास तदा मायायोगेन पार्थिव ! । मया वञ्चयितव्योऽसौ क उपायो भवेदिति । ततस्तापसरूपेण प्राक्षिणोत् स भुजङ्गमान् । फलदर्भोदकं गृह्य राज्ञे नागोऽथ तक्षकः । तक्षक उवाच । गच्छध्वं यूयमव्यग्रा राजानं कार्यवत्तया । फलपुष्पोदकं नाम प्रतिगृह्य वितं नृपम् । सौतिरुवाच । ते तक्षकसमादिष्टास्तथा चक्रुर्भुजङ्गमाः । उपनिन्युस्तथा राज्ञे दर्भानपः फलानि च । तच्च सर्वं स राजेन्द्रः प्रतिजग्राह वीर्यवान् । ज्ञात्वा तेषाञ्च कार्याणि गम्यतामित्युवाच तान् । गतेषु तेषु नागेषु तापसच्छद्मरूपिषु । अमात्यान् सुहृदश्चैव प्रोवाच स नराधिपः । भक्षयन्तु भवन्तो वै स्वादूनीमानि सर्वशः । तापसैरुपनीतानि फलानि सहिता मया । ततो राजा सचिवैः फलान्यादातुमैच्छत । विधिना सम्प्रयुक्तो वै ऋषिवाक्येन तेन तु । यस्मिन्नेव फले नागस्तमेवाभक्षयत् स्वयम् । ततो भक्षयतस्तस्य फलात् कृमिरभूदणुः । कृष्णकः कृष्णनयनस्ताम्रवर्णोऽथ शौनक ! । स तं दृष्ट्वा नृपश्रेष्ठः सचिवानिदमब्रवीत् । अस्तमभ्येति सविता विषादद्य न मे भयम् । सत्यवागस्तु स मुनिः कृमिर्मां दशतामयम् । तक्षको नाम भूत्वा वै तथा परिहृतं भवेत् । ते चैनमन्वर्त्तन्त मन्त्रिणः कालचोदिताः । एवमुक्त्वा स राजेन्द्रो ग्रीवायां संनिवेश्य ह । कृमिकं प्राहसत् तूर्णं सुमूर्णनष्टचेतनः । ग्रहसत्रेव भोगेन तक्षकेणान्ववेष्टत । तस्मात् फलादिनिष्क्रम्य यद्राज्ञे विनिवेदितम् । वेष्टयित्वा च वेगेन विनद्य च महास्वनम् । अदशत् पृथिवीपालं तक्षकः पन्नगेश्वरः" अधिकं कश्यपशब्दे उक्तम् "सक्षरं निम्बपत्रञ्च योऽत्ति मेघगते रवौ । अतिरोषान्वितस्तस्य तक्षकः किं करिष्यति" ति॰ त॰ ।

तक्षकनागराजेन्द्रस्य सखा खाण्डवदहनवासी अर्জुनेन खाण्डवदहनस्य दाहकाले न तस्य दाहः तत्कथा "निहत्तेष्वथ देवेषु वासुवाचाशरीरिणी। शतक्रतुं समाभाष्य महागम्भीरनिस्वना । न ते सखा स निहतस्तक्षको भुजगोत्तमः । दाहकाले खाण्डवस्य कुरुश्रेष्ठ गतो ह्यसौ" भा॰ आ॰ २२८ अ॰। ५काश्यादितक्षणकर्त्तरि भावे त्रि॰ ।

**तच्चकीय** त्रि॰ तच्चा अत्यन्तं नडा॰ ढ-कुक् च। तच्चविशिष्टे तस्मिन् भवः छण् विल्वका॰ ढमात्रस्य लुक् न कुको लुक्। तात्रक तत्र भवे त्रि॰।

**तच्चण** न॰ तच्च भावे-ल्युट्। (चाँचा) (छोला) व्यापारे "तच्चणं दारुशस्त्राद्यैः गोवाजफलसम्भवाम्" या॰ "दारवाद्याच्च तच्चणम्" मनुः।

**तच्चणी** स्त्री तच्चतेऽनया तच्च-करणे ल्युट् ङीप्। वास्याम् (वारस) काष्ठतच्चणसाधने अस्त्रभेदे शब्दर॰।

**तच्चन्** पु॰ तच्च-कनिन्। १तक्षरि, बढ़ई को, "आप्तेन तच्चा भिषजेव तच्चणम्" माघः। "तच्चोभयथा" भा॰ सू॰। २विश्वकर्मणि, च अमरः। ३चित्रानक्षत्रे तस्य त्वष्टृदेवताकत्वात् तथात्वम् ४तच्चणकर्त्तृभावे त्रि॰ स्त्रियां ङीप् उपधालोपे तच्ची। ततः शिवा॰ अपत्ये अण् बलन्तत्वादुपधालोपः। ताच्च तच्चोऽपत्ये पुंस्त्री॰।

**तच्चशिला** स्त्री भरतपुत्रतच्चस्य राजधान्यां तच्चशिलानगरी अभिजनोऽस्य तच्चशि॰ अञ्। ताच्चशिल पित्रादिक्रमेण तच्चनगरवासिनि त्रि॰तच्चशिलाया अदूरभवादिः वरणा॰ चतुरर्थ्यां अञो लुक्। तच्चशिला तच्चनगर्यां अदूरभवादौ ब॰ व॰। अनद्यान्तु चतुरर्थ्यां मध्वा॰ मतुप् मस्य वः। तच्चशिलावत् ततुपरस्थादूरभवादौ नदीभिन्ने देशादौ त्रि॰ स्त्रियां ङीप्।

**तच्चशिलादि** पु॰ सोऽस्याभिजन इत्यर्थे विहितेऽञ् प्रत्ययनिमित्ते पा॰ग॰सू॰उक्ते शब्दगणे स च गणः"तच्चशिला वल्लोद्वरण कैमेंदुरक यामणी ऊगल क्रौष्टुकर्ण सिंहकर्ण संकुचित किन्नर काण्डधार पर्वत अवसान बर्बर कंस"।

**तग** स्खलने कम्पे च अक॰ गतौ सक॰ भ्वा॰ सक॰ सेट् इदित्। तङ्कति अतङ्कीत् ततङ्क तङ्कनम् तङ्का तङ्कितः।

**तगण** पु॰ छन्दोग्रन्थप्रसिद्धे अन्तलघुके आदिगुरुद्वयके त्रिवर्णात्मके गणभेदे। "सोऽन्तगुरुः कथितोऽन्तलघुस्तः" छन्दोम॰।

**तगर** पु॰ तस्य क्रोडस्य गरः गृ-अच्। (टगर) इति १वृक्षे शब्दर॰। २मदनवृक्षे राजनि॰। कोङ्कणप्रसिद्धे (पिण्डतगर) ख्याते, ३वृक्षे न॰रत्नमा॰ ४तगरमूलजाते गन्धद्रव्ये न॰। "कालानुसार्य्यं तगरं कठिनं लघु तन्नतम्। अपरं पिण्डतगरं दण्डहस्ति च वर्हणम्। तगरद्वयसञ्जातं स्यात् स्वादु स्निग्धं लघु कृतम्। विषापस्मारमूर्च्छाशिरोरोगोन्मत्तवायापहम्" भावप्र॰ "प्रियङ्गुचन्दनाभ्याङ्ग विल्वेन तगरेण च" भा॰ अनु॰ १०४ अ॰। "तुल्यैः पत्रत्वरक्षवालतगरैरगन्धः करोहीपनः" ह॰ स॰ ७७ अ॰। तगरं पण्यमस्य ञसरा॰ ठन्। तगरिक तद्गन्धद्रव्यविक्रेतरि त्रि॰। ४श्वाङ्गुलवृक्षे राजनि॰।

**तगरपादिक** न॰ तगरस्य पादो मूलमस्यत्व गन्धद्रव्ये ठन्। नन्द्यावर्त्ते गन्धद्रव्यभेदे शब्दार्थचि॰।

**तगरपादी** स्त्री तगरं गन्धद्रव्यभेदः पादेऽमूलेऽस्याः जातित्वात् ङीष्। तगरवृक्षे शब्दार्थचि॰।

**तङ्क** पु॰ तकि-भावे अच्। १क्लेशेन जीवने २प्रियचिह्ने ३ताप ४भये भरतः। कर्मणि-घञ्। ५परिधानवसने रभसाद्यः।

**तङ्कन** न॰ तकि-भावे ल्युट्। क्लेशेन जीवने।

**तच्छील** त्रि॰ तत् शीलं यस्य। स्वभावतः फलभिरपेक्षतया प्रवर्त्तमाने तत्स्वभावे जने। तदर्थं विहितः ठञ्। ताच्छीलिक तच्छीलार्थं पा॰विहितप्रत्यये। "आ कोस्तच्छीलतद्धर्मतत्साधुकारिषु" पा॰।

**तज्ज** त्रि॰ ततो जायते जन-ड। तस्मात् जाते।

**तज्जलान्** त्रि॰ ततो जायते जन-ड तस्मिन् लीयते ली-ड तेनानिति ल्यन-क्विप् ह्रस्वात् पूर्वं श्रुतस्य तच्छब्दस्य प्रत्येकसम्बन्धेन यथायथं विभक्तिप्रत्ययान्वयः। तस्माज्जाते तस्मिन् लीने तेन स्थिते पदार्थे च। "सर्वं खल्विदं ब्रह्म तज्जलानिति शान्त उपासीत" छा॰ उ॰। तज्जलान्, तज्जत्वात् तल्लत्वात् तदनत्वाच्चेति" शाङ्करभा॰।

**तज्जी** स्त्री तं निन्दितं जयते जि-क्विप् गौरा॰ ङीष्। छिङ्गपत्र्यां राजनि॰। [टीत्। ततार तेटतुः। तट्म्।

**तट** उच्छ्राये भ्वा॰ पर॰ सक॰ सेट्। तटति अताटीत्-अतटीत्।

**तट** आहतौ चु॰ उभ॰सक॰सेट्। ताटयति-ते अतीतटत् त।

**तट** त्रि॰ तट-अच्। १कूले नद्यादेस्तीरे अमरः। तीरभूमेश्च नद्याःप्रवाहात् उच्छ्रितत्वात् तथात्वम्। "सिन्धोस्तटाद्वोघ इव प्रहृष्टः" कुमा॰। स्त्रियां ङीप्। "मालञ्च श्मशानञ्च नद्यादीनां तटौ तथा" सा॰द॰। २वृक्षभेदे न॰ मेदि॰। "निःश्रेयस्युतचन्दनं स्तनतटं निर्घृष्टरागोऽधरः" सा॰ द॰। स्तनः तटमिव उप॰ स॰। ३शिवे पु॰ तस्य सर्वोच्छ्रितत्वात् तथात्वम् "नमस्तटाय तथाय तटानां पतये नमः" भा॰शा॰२८५अ॰। ४उच्छ्रिते त्रि॰।

**तटग** पु॰ तड़ाग+पृषो॰ तडागे द्विरूपको॰।

**तटस्थ** त्रि॰ तटे समीपे तिष्ठति स्था-क। १समीपस्थे २वादिप्रतिवादिभावानापन्ने उदासीने च"तटस्थः शङ्कते" जागदीश्यादौ भूरिप्रयोगः। ३वस्तुविशेषे यावद्वस्तु-

कालमनवस्थितत्वे सति इतरव्यावर्त्तके विशेषणे यथा पृथिव्या गन्धवत्त्वं तटस्थलक्षणम् उत्पत्तिकाले प्रलये च लक्ष्यस्थितावपि तत्काले गन्धस्यानवस्थानात् तथात्वम्। यथा वा ब्रह्मणो जगत्कर्त्तृत्वादिकम् तस्य प्रलयादौ लक्ष्यकाले अनवस्थानात् तथात्वम्। "स्वरूपं तटस्थं द्विधा लक्षणाभ्याम्। स्वरूपेऽप्रविष्टात् स्वरूपे प्रविष्टात्। यथा काकस्यनो मटहाः सं विजन्ते" वेदान्तका०।

वेदा० प० अस्य विवृतिर्यथा

"तत्र लक्षणं द्विविधम् स्वरूपलक्षणं तटस्थलक्षणञ्चेति। तत्र स्वरूपमेव लक्षणं स्वरूपलक्षणम् यथा सत्यं ज्ञानमनन्तं ब्रह्मणः स्वरूपलक्षणम्। नन्तु खस्य स्वतन्त्रत्वाभावेन कथं लक्षणत्वमिति चेन्न स्वस्यैव स्वामेदया धर्मधर्मिभावकल्पनया लक्षणत्वसम्भवात्। तदुक्तं विवरणे "आनन्दो विषयानुभवो नित्यत्वञ्चेति सन्ति धर्माः स्वरूपत्वेऽपि चैतन्यात् पृथगिवावभासन्ते इति"। तटस्थलक्षणं नाम यावल्लक्ष्यकालमनवस्थितत्वे सति यद्व्यावर्त्तकं तदेव यथा गन्धवत्त्वं पृथिवीलक्षणम्। सर्गप्रलये परमाणुषु उत्पत्तिकाले घटादिषु च गन्धाभावात्। प्रकृते च जगज्जन्मादिकारणत्वम्। अत्र जगत्पदेन कार्य्यजातं विवक्षितम्। कारणत्वञ्च कर्त्तृत्वम् अतोऽविद्यादौ नातिव्याप्तिः। कर्तृत्वञ्च तत्तदुपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमत्त्वम्। ईश्वरस्य तावदुपादानगोचरापरोक्षज्ञानसद्भावे च "यः सर्वज्ञः सर्ववित् यस्य ज्ञानमयं तपः। तस्मादेतद्ब्रह्म नाम रूपमन्नञ्च जायते" इत्यादिश्रुतिर्मानम्। तादृशचिकीर्षासद्भावे च "सोऽकामयत बहु स्यां प्रजायेयेति" श्रुतिर्मानम्। तादृशकृतौ च "तन्मनोऽकुरुतेत्यादि" वाक्यम्। ज्ञानेच्छाकृतीनामन्यतमगर्भं लक्षणत्रितयं विवक्षितम् अन्यथा व्यर्थविशेषणत्वापत्तेः। अतएव जन्मस्थितिध्वंसानामन्यतमस्यैव लक्षणे प्रवेशः। एवञ्च लक्षणानि नव सम्भवन्ति। ब्रह्मणो जगज्जन्मादिकारणत्वे च "यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति, यत् प्रयन्त्यभिसंविशन्तीत्यादि" श्रुतिर्मानम्। यद्वा निखिलजगदुपादानत्वं ब्रह्मणो लक्षणम्। उपादानत्वञ्च जगदध्यासाधिष्ठानत्वं जगदाकारेण परिणममानमायाधिष्ठानत्वं वा। एतादृशमेवोपादानत्वमभिप्रेत्य "इदं सर्वं यदयमात्मा तस्माद्वा इदमात्मनः सर्वं बहु स्यां प्रजायेयेत्यादिश्रुतिषु ब्रह्मप्रपञ्चयोस्तादात्म्यव्यपदेशः" तटस्थिते लि०। [शब्दर०।

**तटाक** पु० तट-वा० आकन्। तड़ागे पद्मादियुक्तसरसि

**तटाघात** पु० तटे आघातः। इषादिभिः शस्त्रादिभिर्भूमेर्गोत्खननरूपव्यायामक्रीड़ायाम् शब्दार्थवः। "अभ्यस्यन्ति तटाघातं निर्जितैरावताः गजाः" कुमा०। "कैलासतटाघातधावद्भूविघटनमिव क्रूरदण्डम्" काद०।

**तटिनी** स्त्री तटमस्त्यस्या इनि ङीप्। नद्याम् अमरः।

**तटी** पु० तटस्तच्छायमर्हति यत्। शिवे "नमस्तटाय तट्याय" भा० शा० २८६ अ० शिवसहस्रनाम।

**तड** दीप्तौ अक० आङ्पूर्वो सक० चु० उभ० सेट्। ताडयति ते अतितडत् त। "ताडयेत् पञ्च वर्षाणि दश वर्षाणि ताड़येत्" याज्ञव्यः "शिष्ट्यर्थं ताड़येत्ततः" मनुः ताड़ना। ताड़नम् ताडितः। "ओहर्वितन्त्रीरिव ताड्यमाना" कुमा०। "दुन्दुभिस्ताड़तोऽचौ" वेणीसं०।

**तड** आङ्पूर्वो भ्वा० आत्म० सक० सेट् इदित्। तण्डते अतण्डिष्ट। ततण्डे।

**तड़ाक** पु० तड़-आङ्पूर्वो पिनाकादयश्च" उणा० आक। १तड़ागे। तड-दीप्तौ आक। २दीप्तौ स्त्री उज्ज्वलदः।

**तड़ाग** पु० जलैराक्रम्यते तड-आधारे "तड़ागादयश्च" उणा० नि० आग १यन्त्रकूटके शब्दार्थचि० २जलाधारभेदे पद्माकरे अमरः। अर्द्धचं० "प्रशस्तभूमिभागस्तो बद्धसंवृतसरोधितः। जलाशयस्तड़ागः स्यादित्याहुः शास्त्रकोविदाः" शब्दार्थचि०। ३पद्मगतधनुःपरिमिते जलाशये च यथा "चतुर्विंशाङ्गुलो हस्तो धनुषश्चतुरन्तरम्। शतधन्वन्तरञ्चैव तावत् पुष्करिणी शुभा। एतत् पद्मयुतः प्रोक्तस्तड़ाग इति निर्णयः" नव्यस्मृतिधृतो वशिष्ठः। तदुत्खननविधिः मत्स्यपु० २८अ० उक्तो यथा "प्राच्यं पद्मं शुभं शुक्लमतीते (प्राग्रे) चोत्तरायणे। पुष्पेऽद्भि विप्रकर्षिते ह्रदा ब्राह्मणवाचनम्। प्रागुदक्प्रवणे देशे तड़ागस्य समीपतः। चतुर्हस्तां शुभां वेदिं चतुरस्रां चतुर्द्वाराम्। तथा षोड़शहस्तः स्यान्मण्डपश्च चतुर्द्वारः। वेद्याश्च परितो गर्तास्त्रिमात्रास्तु मेखलाः। नव सप्त च वा पञ्च नातिरिक्ता न्यपातयेत्। वितस्तिमात्रा योनिः स्यात् षट्सप्ताष्टवितस्तिका। गर्तावतस्तः कर्त्तव्याः सुस्निग्धर्वोच्छ्रितमेखलाः। सर्वतस्तु सवर्णाः (कोणपादवर्णाः) स्युः पताका ध्वजसंयुताः। अश्वत्थोदुम्बरप्लक्षवटशाखाश्रितानि तु। मण्डपस्य प्रतिदिशं द्वाराण्येतानि कारयेत्। शुभास्तावट्ट होतारो द्वारपाला भवन्ति वै। ऋत्विजस्तु आचार्याः ब्राह्मणा वेदपारगाः। सर्वलक्षणसम्पूर्णा मन्त्रविद्विजितेन्द्रियः। कृष्णाजि-

समायुक्तः पुरोधाः स्याद्द्विजोत्तमः । प्रतिगृह्णेषु कलशा यज्ञोपकरणानि च । व्यजनाक्षमरे शुभे ताम्रपात्रे सुविस्तृते । ततस्त्वनेकवर्णाः स्युश्चरवः प्रतिदैवतम् । आचार्यैः प्रक्षिपेद्भूमावनुमन्त्र्य विचक्षणः । त्र्यरत्निमात्रो यूपः स्यात् खादिरश्चविनिर्मितः । यजमानप्रमाणो वा संस्थाप्यो भूतिमिच्छता । हेमालङ्कारिणः कार्याः पञ्चविंशती ऋत्विजः । कुण्डलानि च हैमानि केयूरकटकानि च । अङ्गुलीयं पवित्राणि वासांसि विविधानि च । पूजयेत्तु समं सर्वान् आचार्यं द्विगुणैः पुनः । दद्याच्छयनसंयुक्तमात्मनापि यत् प्रियम् । सौवर्णौ कूर्ममकरौ राजतौ मत्स्यकच्छपौ । ताम्रौ कुलीरमण्डूकौ वायसः शिशुमारकः । एवमासाद्य तत्सर्वमादावेव विशाम्यते ! । शुक्लमाल्याम्बरधरः सर्वौषध्युदकैस्ततः । संपूर्णैः कलशैस्तत्र स्नपितो वेदपारगैः । यजमानः सपत्नीकः पुत्रपौत्रसमन्वितः । पश्चिमं द्वारमासाद्य प्रविशेद्यागमण्डपम् । ततो मङ्गलशब्देन भेरीणां निस्वनेन च । अञ्जसा मण्डलं कुर्यात् पञ्चवर्णेन तत्त्ववित् । षोडशारान्वितचक्रं पद्मगर्भं चतुर्दलम् । चतुरस्रेण परितो वृत्तं मध्ये सुशोभनम् । वेद्यामोपरि तत् कृत्वा यक्षान् लोकपतींस्ततः । संस्थसेन्मन्त्रतः सर्वान् प्रतिदिक्षु विचक्षणः । कूर्मादि स्थापयेन्मध्ये वास्तुं मन्त्रसमन्वितः । ब्रह्माणञ्च शिवं विष्णुं तत्रैव स्थापयेद् बुधः । विनायकञ्च विघ्नेशं कमलामम्बिकां तथा । शान्त्यर्थं सर्वलोकानां भूतधात्रं न्यसेत्ततः । पुष्पमाल्यफलैर्युक्तमेवं कृत्वाधिवासनम् । कुम्भान् सजलगर्भांस्तान् वासोभिः परिवेष्टयेत् । पुष्पगन्धैरलङ्कृत्य द्वारपालान् समन्ततः । पठध्वमिति तान् ब्रूयादाचार्यस्त्वभिपूजयेत् । वह्नौ पूर्वतः स्थाप्यौ दक्षिणेन यजुर्विदौ । सामगौ पश्चिमे तद्वदुत्तरेण त्वथर्वणौ । उदङ्मुखो दक्षिणतो यजमान उपावियेत् । यजध्वमिति तान् ब्रूयाद् दैवतिकान् पुनरेव तु । उत्कटान् मन्त्रजापेन तिष्ठध्वमिति जापकान् । एवमादिश्य तान् सर्वान् पर्युक्ष्याग्निं स मन्त्रवित् । जुह्वाद्याहारयेन्मन्त्रैराज्यं च समिधस्तथा । ऋत्विग्भिश्च होतव्यं वास्तुरेव सर्वतः । यक्षेभ्यो विधिवद् हुत्वा तथेन्द्रादेश्वराय च । मरुद्भ्यो लोकपालेभ्यो विधिवद्धिक्कर्मणे । रात्रिसूक्तञ्च रौद्रञ्च पावमानं सुमङ्गलम् । जपेयुः पौरुषं सूक्तं पूर्वतो बह्वृचाः पृथक् । शाक्रं रौद्रञ्च सौम्यं च कूष्माण्डं जातवेदसम् । सौरसूक्तं जपेन्मन्त्रं दक्षिणेन यजुर्विदः । वैराजं पौरुषं सूक्तं सौपर्णं रुद्रसंहिताम् । शैवं पञ्च निधनं गायत्रं ज्येष्ठसाम च । वामदेव्यं बृहत्साम रौरवं सरथन्तरम् । गवां व्रतं च काण्वञ्च रथोग्रं वयसस्तथा । गायेयुः सामगा राजन् ! पश्चिमं द्वारमाश्रिताः । अथर्वणश्चोत्तरतः शान्तिकं पौष्टिकं तथा । जपेयुर्मनसा देवमाश्रित्य वरुणं प्रभुम् । पूर्वेद्युरभितो रात्रावेवं कृत्वाधिवासनम् । गजाश्वरथावल्मीकात् सङ्गमाद्गोकुलात् । ह्रदसादाय कुम्भेषु प्रक्षिपेच्छ्रयरात्तथा । रोचनाञ्च सिद्धार्थां गन्धं गुग्गुलुमेव च । स्नपनं तस्य कर्तव्यं पञ्चपल्लव(पल्लव) समन्वितम् । प्रत्येकन्तु महामन्त्रैरेवं कृत्वा विधानतः । एवं स्नपामतिवाह्य विधियुक्तेन कर्मणा । ततः प्रभाते विमले सङ्घातेऽथ शतं गवाम् । ब्राह्मणेभ्यः प्रदातव्यमष्टसप्तिथ वा पुनः । पञ्चाशद्वाथ षट्त्रिंशत् पञ्चविंशतिरथ्य वा । ततः संवत्सरोक्ते शुभे लग्ने सुशोभने । वेदशब्दैश्च गान्धर्वैर्वाद्यैश्च विविधैः पुनः । कनकालङ्कृतां कृत्वा जवे गामवतारयेत् । सामगाय च सा देया ब्राह्मणाय विशाम्यते !। पात्रीमादाय सौवर्णीं पद्मरत्नसमन्विताम् । ततो निःक्षिप्य मकरमत्स्यादींश्चैव सर्वशः । हृतां चतुर्विधैर्विप्रैर्वेदवेदाङ्गपारगैः । महानदीजलोपेतां दध्यक्षतसमन्विताम् । उत्तराभिमुखीं धेनुं जलमध्ये तु तारयेत् । आथर्वणेन स्नातां पुनर्मामित्यृचेति च । आपोहिष्ठेति मन्त्रेण चित्वागत्य च मण्डपम् । पूजयित्वा सरत्नञ्च वह्निं दद्यात् समन्ततः । पुनर्दिनानि होतव्यं चत्वारि मुनिसत्तमाः ! । चतुर्थीकर्म कर्तव्यं देवा तत्रापि शक्रितः । दक्षिणा राजशार्दूल ! वरुणस्यापणं ततः । कृत्वा तु यज्ञपात्राणि यज्ञोपकरणानि च । ऋत्विग्भ्यस्तु समं दत्त्वा मण्डपं विभजेत् पुनः । हेमपात्रीञ्च शय्याञ्च स्थापकाय निवेदयेत् । ततः सकृच्छं विप्राणामष्ट शतं तथा । भोजनीयं यथाशक्ति पञ्चाशद्वाथ विंशतिः । एवमेव पुराणेषु तडागविधिरुच्यते । कूपवापीषु सर्वासु तथा पुष्करिणीषु च । एष एव विधिर्दृष्टः प्रतिष्ठासु तथैव । मन्त्रतस्तु विशेषः स्यात् प्रसादोद्यानभूमिषु । अयत्नयज्ञावर्तेन विधिर्दृष्टः स्वयम्भुवा । अल्पेष्वेकाग्निवत् कृत्वा वित्तशाठ्यं न कार्यम् । प्राड्मुखे स्थिते तोये शुक्लिदोमफलं कृतम् । अरत्नकाले स्थितं यत् स्यात् तदुक्तफलदाय-

कम्। वाजपेयातिरात्राभ्यां ऐमन्ते शिशिरे स्थितम्। अश्वमेधसमं प्राहु वसन्तसमये स्थितम्। ग्रीष्मेऽपि तत् स्थितं तोयं राजसूयादिशिष्यते। एतान् महाराज! विशेषधर्मान् करोति योऽध्यागमशुद्धबुद्धिः। स याति रुद्रालयामाशु पूतः कल्याननेकान् दिवि मोदते च। अनेकलोकान् समहस्रपादीन् भुक्त्वा परार्द्धद्वयमङ्गनाभिः। सहैव विष्णोः परमस्पदं यत् प्राप्नोति तद्यागफलेन भूयः"।

जलाशयखननारम्भनक्षत्रादि सु० चि० पी० उक्तं यथा "मित्रार्कध्रुवासवाम्बुपमघातोयान्यपुष्येन्दुभिः पापैर्हीनबलैस्तनौ सुरगुरौ भे वा भगौ खे विधौ। आप्ये सर्वजलाशयस्य खननम्" सु० चि०।

"मित्रोऽनुराधा अर्कौ हस्तः ध्रुवं रोहिण्युत्तरात्रयं वासवं धनिष्ठा अम्बुपः शततारका तोयं पूर्वाषाढा अन्त्यं रेवती पुष्यः इन्दुर्मृगः एतैर्नक्षत्रैरेकादशभिः सर्वेषां जलाशयानां वापीकूपतड़ागनाम्नां तोयाधाराणां खननं शुभमुक्तम् उक्तञ्च व्यवहारतत्त्वे "आथाम्बुपान्त्य मित्रमित्रवसूत्तरार्केन्दौज्यभेषु खननं सलिलाश्रयाणामिति"। कः ब्रह्मा तद्देवताकत्वेनाभेदात् रोहिणी। अथ जलाशयखनने लग्नविचारः पापैः पापखगैर्बलरहितैः सद्भिः, तनौ लग्ने सुरगुरौ हृद्दस्तौ भे वुधे स्थिते सतीत्यर्थः लग्नात् खे दशमस्थाने भगौ शुक्रे, आप्ये जलचरराशौ विधौ सति जलाशयखननं हितं उक्तञ्च रत्नमालायाम् "लग्ने जीवे भेऽथ वा दुर्बलैश्च क्रूरैः शुक्रे चापि मेष्वरण्यस्थे। आप्ये चन्द्रे सर्वतोयाश्रयाणामारम्भाः स्युःसिद्धये निर्विकल्पम्"। कश्यपेनाप्युक्तम् "गुरौ भे वा लग्नगते शुक्रे कर्मगते, विधौ। आप्यभे जलकार्य्याणामारम्भः सिद्धिदः स्मृतः" इति। दीपिकायान्तु विशेषः "पुष्ये मित्रकरोत्तरस्ववस्वम्बुमित्रेन्दुभिःशुक्रेऽर्के शुभवारयोगतिथिषु क्रूरेक्षवीर्य्येषु च। पुष्येन्दौ जलराशिगे दशमगे शुक्रे शुभांशोदये आरम्भः सलिलाश्रयस्य शुभदोजीवेन्दुपुत्रोदये। स्वं धनिष्ठा। अन्ये तु वापीकूपतड़ागानामाकृतिभेदात्प्रत्येकं भिन्नानि नक्षत्राण्युक्तानि। तत्र वापीखननमाह ऋक्षोद्वयः "स्वात्यश्विपुष्यहस्तेषु सर्वदा च पुनर्वसौ। रेवत्यां वारुणे चैव वापीकर्म प्रशस्यते"। कूपारम्भमाह श्रीपतिः "हस्तः पुष्यो वासवं वारुणञ्च मैत्रं पित्र्यं तीक्ष्णं चैकोत्तराणि। प्राजापत्यञ्चापि नक्षत्रमाहुः कूपारम्भे श्रेष्ठमाद्या मुनीन्द्राः"। तड़ागारम्भमाह वसिष्ठः "मैत्रेन्दुपौष्णोत्तररोहिणीषु देवेज्यवारोत्तरवारिभेषु। प्रारम्भणं सर्वजलाशयानां कार्यं सितेन्द्वंशकवारलग्ने"। अत्र वापीकूपतड़ागानां पार्थक्येनाभिधानात् तड़ागारम्भार्थमिदं वचनमवसीयते बहुवचनमाश्रयाभिप्रायेण सर्वशब्दोपादानं छन्दःपरिपूरणार्थं तत्र कूपतड़ागनक्षत्रेषु सदृशनक्षत्रत्यागावशिष्टानां भेदने त्रयोदश नक्षत्राणि भवन्ति तत्र संक्षेपेच्छुकामेन व्यवहारतत्त्वकर्त्रा सर्वजलाशयानामारम्भे सामान्यतो जलाशयत्वसाधर्म्यादेतानि त्रयोदश भान्युक्तानि तान्येव च ग्रन्थकर्त्रोक्तानि। तत्र वापीकूपतड़ागानां भेदो लोकप्रसिद्ध एव यत्तु पुनर्वसिष्ठेनोक्तं "यथाकृतोयेशकरार्थमित्रध्रुवाम्बुपित्रे वसुरेवतीषु। उद्यानवाप्यादितड़ागकूपकार्याणि सिद्ध्यन्ति जलं ध्रुवं स्यात्"। तच्छीघ्रोद्धारविषयं प्रागुक्तवाक्ये प्रारम्भणपदोपादानान्न नूतनखननविषयमिति पुनरुक्ति परिहारः।" पी० धा०।

अधिकं जलाशयोत्सर्गशब्दे २०७८ पृष्ठादावुक्तम्। अत्र राहुसाम्मुख्यनिषेधः सु० चि० पी० उक्तो यथा "देवालये गेहविधौ जलाशये राहोर्मुखं यत्नदिशो विलोमतः। मीनार्कसिंहार्कमृगार्कतस्थिते खाते सुखात् पृष्ठदिगुत्तमा भवेत्"। सु० चि०।

"देवालये इति। अत्र यथासङ्ख्यं सम्बन्धः। देवालयप्रारम्भे राहोर्मुखं मीनार्कतस्थिराश्यवस्थिते सूर्ये ऐशानीतो विलोमतो विपरीतं दिक्षु वायव्यादिषु राहोर्मुखं स्यात् यथा मीनमेषवृषराश्यवस्थिते सूर्ये राहोर्मुखम् ऐशान्यास्। मिथुनकर्कटसिंहराश्यवस्थिते सूर्ये वायव्यां राहुसुखम्। कन्यातुलावृश्चिकस्थे सूर्ये नैर्ऋत्यां राहुसुखम्। धनुर्मकरकुम्भराश्यवस्थे सूर्ये आग्नेय्यां राहोर्मुखम् इत्यर्थः। एवं गृहारम्भेऽपि सिंहार्कतस्थिराश्यवस्थितेऽर्के विलोमतः ऐशान्यां राहुसुखम्। वृश्चिकादित्रये वायव्यां कुम्भादित्रये नैर्ऋत्याम्। वृषादित्रये आग्नेय्यां राहुसुखं स्यात्। जलाशयारम्भेऽपि मकरार्कतस्थिराश्यवस्थेऽर्के विलोमतः ऐशान्यां राहुसुखं स्यात्। मेषादितः त्रिभिर्वायव्याम्। कर्कादितस्त्रिभिर्नैर्ऋत्याम्। तुलादितस्त्रिभिः आग्नेय्यां राहुसुखं स्यादित्यर्थः। फलमाह खात इति। देवालयादिविषयके खाते भूमिशोधने कर्तव्ये सति राहुसुखाक्रान्तदिशः सकाशात् पृष्ठवर्तिनी दिक् शुभा भवेत् यथा

देवालयविषये मीनादिविराशिस्थितसूर्यत्वेन ऐशान्यां राङ्खसंज्ञम्। ततृष्ठविदिक् आग्नेयी तस्यां प्रथमखातारम्भः शुभद इत्यर्थः। मिथुनादिराशित्रयस्थे सूर्ये राङ्खसं वायव्यां ततृष्ठविदिगैशानी तस्यां खातारम्भः शुभः। एवं सर्वत्र। तथैव षट्त्रिंधौ अपि राङ्खसं कस्यां दिश्यस्ति इत्यवधार्य ततृष्ठविदिशि खातः शुभफल इत्यर्थः। यतः। सर्वेषु विदिक् व्याप्ता। यद्वा। ऐशान्यां खड्गम्। वायव्यासुदरम्। नैर्ऋत्यां पुच्छम् आग्नेय्यां मुखम्। अतः खाते आग्नेयी सम्यक्। एवमन्यत्रापि ऊहनीयम् यदाह विश्वकर्मा "ईशानतः सर्पति कालसर्पो विहाय सृष्टिं गणयेद्विदिक्षु। शेषस्य वास्तोर्मुखमध्यपुच्छं त्रयं परित्यज्य खनेच्चतुर्थम्" इति। ज्योतिर्निबन्धे "मुखाकौदिक्षिकं वेद्यां सिंहादि गणयेदृक्षे। देवालये च मीनादि तडागे मकरादिषु"। तदारम्भतदुद्यमौ च समयाशुद्धौ न कार्य्यौ कालाशुद्धिप्रबन्धे तत्प्रमाणं द्रष्टव्यम् "एतेनाखानि शाखानवनिवरुह हरित्पर्णपूर्णद्रुमाली व्याली?पान्नपान्नव्ययपथिकदशां दत्तरागस्तडागः"नैष०।

तड़ाघात पु० "उच्चैः करिकराक्षेपे तड़ाघातं विदुर्बुधाः" इत्युक्ते तटाघाते वप्रक्रीड़ायाम् शब्दकल्पद्रुमः। तच्चिन्त्यं तत्र वाक्ये तटाघातमित्येव पाठः तड़ेति पाठः लिपिकरप्रमादजतः। [त्रि०।

तड़ि पु० तड-आघाते भावादौ इन्। १आघाते २तत्कर्त्तरि

तड़ित् स्त्री ताड़यत्यभ्रम् चुरा० तड़-इति निः क्विप्। १विद्युति अमरः। "अलदाक्तड़ित्तुलितकालकास्त्वरा:" "घनं घनाले तड़िता गुणैरिव" माघः। "योगस्तड़ित्तोयदयोरिवास्तु" रघुः।

तड़ित्सम्भवादिस्तु "सुजलजलधिमध्ये वाड़वोऽग्निः स्थितोऽस्मात् सलिलभरनिमग्नादुत्थिता धूममालाः। विवति पवननीताः सर्वतस्ता ह्वलन्ति द्युमणिकिरणदीप्ताविद्युतस्तत्स्फुलिङ्गाः"। "अकस्माद्दीप्तं तेजः पार्थिवांशकसिञ्चितम्। वाय्वाहतं भ्रमदाघाते प्रतिकूलानुकूलयोः। वायोस्तात् पतति प्रायो वृत्रकालप्राज्यवर्षणे। यतः प्राङ्मधि नैवेते पांसवः प्रसरन्ति हि। तत्लेधा पार्थिवं चाप्यं तैजसं तड़ित्त्रितम्। ततो निर्भेरदाहैव भूमिस्थैरनुभूयते" सि० शि० टीका। २अग्निके निघण्टुः ३हिंसायां निघण्टुः "तड़ित् आखण्डनेत्युपक्रमे "त्वयञ्जिगत्वधकर्माणः" इति तड़ेः

तड़ित्प्रभा स्त्री तड़ितः प्रभेव प्रभा यस्याः। कुमारानुचरमातृभेदे। "केशयन्ती त्रुटिनामा क्रोधनाऽथ तड़ित्प्रभा" भा० शल्य० ४७अ० कुमारानुचरमातृगणोक्तौ। २तड़ित्तुल्यदीप्तियुते त्रि०।

तड़ित्वत् पु० तड़ित् विद्युतेऽस्य मतुप् मस्य वः नान्तत्वेन अपदान्तत्वात् न तस्य दः। १मेघे "चलिताचलवर्षमाणा गम्भीरविराविषस्तड़ित्वन्तः" ह० सं० ३२ अ० २सप्तर्षौ च अमरः। ३तड़िद्विशिष्टे त्रि० स्त्रियां ङीप् "सस्तनितद्विचयेन तड़ित्वतीम्। नयता शरदभ्रदुर्दृशं तिम्" किरा०।

तड़िद्गर्भ पु० तड़ितो गर्भोऽस्य। मेघे "तड़िद्गर्भा ऋतवः सप्तद्राः" श्वेताश्व० उप० ४ अ०।

तड़िन्मय त्रि तड़िदात्मकः तड़ित्+मयट्। तड़ित्स्वरूपे "तड़िन्मयैरूल्मिपतैर्विलोचनैः" कुमा०।

तण्ड पु० तड-अच्। १ऋषिभेदे तस्य गोत्रापत्यम् गर्गा० यञ्। ताण्ड्य तद्गोत्रापत्ये पुंस्त्री०। यूनि फक्। ताण्ड्यायन तदीये यून्यपत्ये पुंस्त्री०। तण्डशब्दस्य यतण्डशब्देन सभं हन्ते कौर्सकौजपा० पूर्वपदप्रकृतिस्वरः। भावे ष्यञ्। २आकृतौ स्त्री।

तण्डक पुंस्त्री० तड-ण्वुल्। १खञ्जने, स्त्रियां ङीप्। २फेने, ३समासप्राये वाक्ये, ४वटवृक्षे, ५तरुस्कन्धे च न० मेदि० हेमायाबद्धले, उपघातके त्रि० परिष्कारे पुंन० शब्दार्थचि०।

तण्डि पु० कृतयुगोत्पन्ने ऋषिभेदे तत्कथा भा० आनु० १५ अ०। "ऋषिरासीत् कृते तात! तण्डिरित्येव विश्रुतः दश वर्षसहस्राणि तेन देवः समाधिना। आराधितोभूद्भक्तेन तस्योर्द्धं निगामय" इत्यादिका। महादेववराच्च तत्सुतस्य यजुर्वेदीयताण्डिनशाखाभेदे कल्पसूत्रकर्त्तेति तत्रैव १६ अ० उक्तं यथा "अध्ययाध्यवर्षे भविता दम्भवर्জ्जितः। यशस्वी तेजसा युक्तो दिव्यज्ञानसमन्वितः। ऋषीणामभिगम्यश्च सूत्रकर्त्ता सुतस्तव। मत्प्रसादाद्द्विजश्रेष्ठ! भविष्यति न संशयः" "सूत्रकर्त्ता ताण्डिन इति यजुर्वेदे शाखाविशेषस्तत्र कल्पसूत्रकर्त्तेति" नीलकण्ठः। [नन्दिनो नन्दिकेश्वरः" मल्लिनाथधृतकोषः।

तण्ड्र पु० शिवद्वारपालभेदे नन्दिकेश्वरे "नन्दी भृङ्गरिटस्तण्ड्र

तण्ड्रीण पु० तण्डा+अस्यर्थे उरच् तत्र भवः ष। १कीटभाले २वर्बरे त्रि० तण्डुले भवः ख रस्य णः। ३तण्डुलोदके न० मेदि०।

तण्डुल पुं० न० तडि–उलच्। निस्तुषधान्ये। "शस्यं क्षेत्रगतं प्रोक्तं सतुषं धान्यमुच्यते। निस्तुषस्तण्डुलः प्रोक्तः स्निग्धमञ्जसदाहृतम्" भा० त०। "शालितण्डुलप्रस्थस्य कुर्य्यादन्नं सुसंस्कृतम्। सूर्य्याय चरुकं दत्त्वा सप्तम्यान्तु विशेषतः। यावन्तस्तण्डुलास्तस्मिन्नैवेद्ये परिसंख्यया। तावद्वर्षसहस्राणि सूर्य्यलोके महीयते" ति० त०। "तण्डुलो भेदृ जन्तुघ्नः स नवस्तदितुर्जरः"। वैद्य०"भवेत्तु तण्डुलो रूक्षो गुरुर्मन्दः कफप्रणुत्। पित्तकारी स विज्ञेयः" राजव०। तस्य स्निग्धशब्देन समा० राजद० पूर्वनि०। क्षीरकस्य २मानभेदे "सितसर्षपाष्टकं तण्डुलो भवेत् तण्डुलैस्तु विंशत्या" इ० स० ८० अ०।

तण्डुलपरीक्षा स्त्री तण्डुलेन परीक्षा। दिव्यभेदे तद्विधानं वीरमि० उक्तं यथा पितामहः

"तण्डुलानां प्रवक्ष्यामि विधिमग्निप्रणोदितम्। चोर्य्ये तु तण्डुला देया नान्यत्रेति विनिश्चयः" इति। चौर्य्यसङ्क्रमधर्षविवादप्रदर्शनार्थम् "तदर्थोर्थस्य तण्डुलाः" इति धनविवादे कात्यायनेनोक्तत्वात्। पूर्वेद्युर्यत्कर्त्तव्यं तत् सएवाह "तण्डुलान् कारयेच्छुक्लान् शालेर्नान्यस्य कस्यचित्। मृण्मये भाजने क्षिप्त्वा आदित्यस्यायतः शुचिः। स्नानोदकेन सम्मिश्रान् रात्रौ तत्रैव वासयेत्। आवाहनादिपूर्वन्तु कृत्वा रात्रौ विधानतः" इति। शुचिः प्राड्विपाकः सूर्य्यस्थाने धर्म्मावाहनादिहोमान्तं सर्वदिव्यसाधारणविधिं कृत्वा आदित्यस्नानोदकेन शुक्लान् शालितण्डुलानाढ्यान् रात्रावेव कृत्वा तत्रैव प्रातःकालपर्य्यन्तं स्थापयेदित्यर्थः। स्नानोदकं देवताया इत्याह कात्यायनः "देवतास्नानपानीयं दिग्धतण्डुलभक्षणे" इति। प्रातः कर्त्तव्यमपि स एवाह "प्रभाते कारिषे देया आदित्याभिमुखाय स्थिति"। कारिषे शोध्याय। देवाः तण्डुला इत्यनुषङ्गः। भक्षणञ्च सोपवासेन सूर्य्योदयमध्य एव कर्त्तव्यमित्याह बृहस्पतिः "सोपवासः सदा गेहे तण्डुलान् भक्षयेच्छुचिरिति"। शोध्यानुवेधमनुवादव्याजेन दर्शयति पितामहः "प्राङ्मुखोपविष्टं स्नातं शिरोगोपितपल्लवम्। तण्डुलान् भक्षयित्वा तु पत्रे निक्षेपयेत्ततः" इति। भक्षयित्वा भक्षणं कारयित्वा क्षेत्रमतोऽधिजनस्य भक्षेरन्नं प्रयोगः। पत्रे विशेषं स एवाह "भुक्तशेषं तु नान्यस्य अभावे पिप्पलस्य स्थिति"। शुद्धशुद्धयवधारणोपायं स एवाह "शोधितं दृश्यते यस्य चक्षुस्तालु च शीर्यते। गात्रञ्च कम्पते यस्य तमशुद्धं विनिर्दिशेत्" इति। बृहस्पतिरपि "शुद्धः स्याच्छुक्लनिष्ठीवी रक्तमिश्रे तु दोषभागिति"। कात्यायनोऽपि "शुक्लनिष्ठीवनाच्छुद्धो नियमोऽशुचिरन्यथेति"। "अधोभिस्रदकञ्चैव विभ्रष्टोष्ठस्तथैव च। तण्डुलाश्चैव दिव्यानि सप्तमस्तप्तमाषकः।" इति पितामहस्मृतिः। "तण्डुलाश्चैव कोषश्च शङ्खश्चैव न संशयः" इति मिताक्षराधृतस्मृतिः।

तण्डुला स्त्री ताडि–उलच् णि० टाप् ह्रस्वश्च। २मङ्गलसङ्ज्ञायाम् २विहङ्गे च राजनि०। ३तण्डुलीयशाके यवतिक्तायां स्त्री ४यवशाकतुल्यायाम् स्त्री राजनि० गौरा० ङीष्।

तण्डुलाम्बु न० तण्डुलक्षालितमम्बु–श्रा० त०। तण्डुलक्षालनोदके (चेलुनि) तण्डुलोदकादयोऽप्यत्र। "अलमष्टगुणं दत्त्वा दत्त्वा पक्वं कथिततण्डुलात्। भावयित्वा ततो देयं तण्डुलोदककर्मणि" वैद्यकपरिभाषा।

तण्डुलिकाश्रम पुं० न० तीर्थभेदे जम्बूमार्गादपाक्त्य गच्छे–तण्डुलिकाश्रमम्। न दुर्गतिमवाप्नोति ब्रह्मलोकं च गच्छति" भा० व० ८२ अ०। तण्डुलिकाश्रममिति दीर्घपाठः क्वचित् कः, स च लिपिकरप्रमादजन्य इत्यन्ये।

तण्डुलीक पुं० तण्डुलीयक+पृषो० यलोपः। तण्डुलीयकशाके शब्दरत्ना०।

तण्डुलीय पुं० तण्डुलाय तण्डुलाय हितं छ। (कुड़नट) (चाँपानट) १शाकभेदे २विहङ्गे च। स्वार्थे क। तण्डुलीयक उक्तशाके अमरः।

"तण्डुलीयो भेदनादः केन्दरस्तण्डुलेरकः। भण्डीरस्तण्डुलीवीजो विषघ्नश्चाल्पमारिषः। तण्डुलीयो लघुः शीतो रूक्षः पित्तकफापहः। क्षुद्भूमयो रूक्षो दीपनो विषहारकः"। तद्भेदः जलतण्डुलीयं शाके कण्टकिति प्रसिद्धम्। पानीयतण्डुलीयो यस्तत्कण्टस्तदाहृतम्। कण्टं तिक्तं रक्तपित्तं निहरं लघु" भावप्र० स्वार्थे के कापि कृते इत्वम्। तण्डुलीयिका विहङ्गे स्त्री राजनि०। तण्डुलीवीजोऽप्युक्तशाके पु० भावप्र०।

तण्डुलु पुं० तण्डुल+पृषो०। विहङ्गे शब्दर०। [ङेमच०।

तण्डुलेर पुं० तण्डुल+स्वार्थे वा० ट्र। तण्डुलीयकशाके

तण्डुलीय तण्डुलात् तत्क्षालनादुत्तिष्ठति उद्+स्था–क। (चेलुनि) तण्डुलाम्बुनि राजनि०। तण्डुलाम्बुशब्दे दृश्यम्।

**तण्डुलीय** पु० तण्डुलानामोदन इव । (वेडवाँस) १वेष्टबंधे शब्दच० ६त० । २तण्डुलसदृशदाने च । [परीतत् सुखं० ।

**तत्** त्रि० तन+क्विप् अन्यलोपे तुक् । विस्तारके अमरः ।

**तत** न० तन-क्त । १वीणादिवाद्ये अमरः २विस्तारिते ३व्याप्ते च त्रि० । ४वायौ पु० मेदि० । भावे क्त । ५विस्तारे ६सन्ताने च न० । तन्यते अन्वयोऽस्मात् तन-नाम्नि अपादाने कर्मणि वा क्त तक् वा । ८पितरि ९पुत्रे च पु० । "आरुरुहं ततो भिषक्" ऋ० ९।११२।३ तत इति सन्ताननाम तन्यतेऽस्मात् ततः पिता तन्यतेऽसौ ततः पुत्रो वा" भा० इमास्तुचमधिक्षत्व । तत इति सन्तानस्य नाम पितुर्वा पुत्रस्य वा" निरु० । "सततस्तपसक्षीनं सिद्धकीजात्व षड्जम्" माधवः । "सततं वीणादिवाद्य सङ्गितम्" मल्लि० । "सङ्गेवाच पितरं तत ! कस्मै मां दास्यसीति" कठो० । "हे तत ! हे तात !" भा० "यस्य निश्वसितं वेदा यो वेद सर्वमिदं ततम्" माधवः । ततं विस्तारितं व्याप्तं वेत्यर्थः ।

**ततनुष्टि** पु० ततं धर्मसन्ततिं नुदति वृद्धि कामयते कामान् वा नुद-डु वृग-क्तिच् कर्म० शक० । १धर्मसन्ततिनोदकधर्म-सन्ततिकामके । "अपाप शक्रस्तुतनुष्टिमूहति" ऋ० ५।२४।२ ततं धर्मसन्ततिं नुदति वृद्धि कामयते कामान् ततनुष्टिः" भा० निरुक्ते अन्यथा निरुक्तं यथा "शक्र-स्तितनिषुं धर्मसन्तानादपेतमनङ्कुरिष्युम् ६।१९ । तेन २तदर्थे च । [कदल्याम् शब्दच० ।

**ततपत्री** स्त्री ततं पत्रं यस्याः जातित्वात् ङीष् ।

**ततम** त्रि० तेषां मध्ये एकस्य निर्द्धारणे तद्+डतमच् । तेषां मध्ये निर्द्धारिते एकस्मिन् "एतमेव पुरुषं ततममपश्यत्" ऐत० ब्रा० । [मध्ये निर्द्धारिते एकस्मिन् ।

**ततर** त्रि० तयोर्मध्ये एकस्य निर्द्धारणे तद्+डतरच् । तयो-

**ततस्** अव्य० तद्+सार्वविभक्तिस्तसिल् । तस्मादित्यादार्थे "ततस्ततस्या विनियन्तुमक्षमाः" माघः । प्रथमार्थे ततो भवान् । द्वितीयार्थे तत्प्रभवनम् । सप्तम्यर्थे ततस्या तृतीयार्थे "यतोयतः षट्चरणोऽभिवर्त्तते ततस्ततः प्रेरितयामलोचना" शक० । हेतुभूतयो र्द्वयोर्मध्ये एक-स्मातिशये आसु तरप् च । ततस्तराम् विप्रकृष्टार्थे हेतु-भूतानां बहूनां मध्ये एकस्मातिशये आसु तमप् च ततस्त-माम् विप्रकृष्टार्थे अव्य० । [विनियन्तुमक्षमाः" माघः ।

**ततस्थ** त्रि० ततस्तत्र भवः ख्यञ् । तत्र भवे "ततस्ततस्था

**तताम्ह** पु० ततस्य पितुः पिता "पितरि डामहः" इत्यत्र पितृशब्दस्यार्थपरत्वं न स्वरूपपरत्वम् । पितामहे "यस्याकं तावकानमवननानां ततामह । तव चरणयुगलध्यानबद्ध हृदयनिगड़ानाम्" भाग० ६।९।२९ क्वचित् पुस्तके तता-म्हेत्यत्र ततत इत्येव पाठः । सोऽपि तदर्थे एव ।

**तति** स्त्री तन-क्तिन् । १श्रेण्यौ हेमच० । २समूहे च । "विश्वज्यं क्रियतां वराङ्गनतिभिः सुस्राक्षतिः पञ्चले" शक० । "विभक्तिं जनयन्नवसदमयामपायधवला वलाङ्कततीः" माघः । "तत्र हेतितनिहतिन्त्रात्रा अमात्याः" दशकुमा० तत् परिमाणं वेषां इति । २ततपरिमाणे त्रि० ब० व० अवयव षट्संज्ञकत्वात् त्रिषु समः । "ष्णान्ताः षट्" "डति च" पा० तस्य षट्संज्ञा विहिता "षट्संज्ञकास्त्रिषु समा युग्म-दक्षत्तिङ्व्ययाः" अमरः । "बहुगणवतु डति च संख्या" पा० अस्य संख्याकार्यातिदेशः । ततः जसः शसश्च लुक् तति पुरुषाः सन्ति तति पुरुषान् पश्य । ततः प्रकारे धाच् । ततिधा ततिप्रकारे अव्य० "तावत्तेजस्ततिधा वाजिनानि" अथव० १२।२।३।२ ।

**ततिथी** स्त्री तावतीनां पूरणी तावत्+डट् तिथुडागमः ङीप् वेदे अवशब्दलोपः । तावतीनां पूरणीभूतस्त्रियाम् "स यतिथीं तत्समां परिदिदेश ततिथीं समां नाव-सपकल्पोपसाङ्गे" शत० ब्रा० ११।८।१।५ । यावतिथीं तावतिथीमिति प्राप्ते छान्दसोऽवशब्दलोपः" भा० ।

**ततुरि** त्रि० तुर्व-हिंसायाम् कि हित्वं पृषो० । १हिंसके "सद्यो द्युम्ना तिरते ततुरिः" ऋ० ६।६८।७ । "ततुरि र्हिंसकः । तु-कि हित्वं पृषो० । २तारके च "ददुर्मित्रा वरुणा ततुरिम्" ४।२९।२। "ततुरिं तारकम्" भा०

**तत्कर** त्रि० तत् करोति तद्+कृञो हेत्वादावपि छन्दः ढः । तत्-पदार्थकारके ।

**तत्काल** पु० कर्मधा० । वर्त्तमानकाले १तदात्वे अमरः । २तस्मिन् काले च । स कालो यस्य । ३ततकालवृत्तौ त्रि० । "शुचिस्तत्कालजीवी कर्म कुर्यात्" स्मृतिनिबन्धे कल्पद्रा स्मृतिः । "प्रतिनिधौ तत्कालात्" कात्या० श्रौ० १।३।१५ । स कालो यस्यासौ तत्कालः भावप्रधानो निर्देशः प्रतिनिधेस्तत्कालत्वादित्यर्थः । यतः प्रतिनिधेः स एव कालो यो मुख्यद्रव्यस्याभावः" कर्कः । "प्रायश्चित्तं तत्-कालम्" कात्या० श्रौ० १।१।२२ ।

**तत्कालधी** त्रि०तस्मिन् उचिते काले धीर्बुद्धिर्यस्य । अनिष्टादि निवारणाय झटिति प्रत्युत्पन्नबुद्धौ जने हेमच० ।

**तत्क्रिय** त्रि० वेदनं विना स्वभावतः सा क्रिया कर्म यस्य ।

कर्मकरणशीले, वेतनं विना स्वभावतः कर्मकरे अमरः।

**तत्त्वण** पु० स चासौ क्षणः कालः। सद्योऽर्थे क्रियाच०। "विवक्षितामर्थविदन्तत्क्षणप्रतिसंहृताम्" "आप्नेन तक्षणा भिषजेव तत्क्षणम्" माघः "सैकान्ते सुनिकन्याभिस्तत्क्षणो क्षिप्ततद्वस्त्रकम्" रघुः।

**तत्त्व(त्व)** न० तस्य भावः, तल-क्विप् तुक् ततो भावो वा त्व वा तलोपः। १याथार्थ्ये, २स्वरूपे, ३ब्रह्मणि च अमरः ४अनारोपितस्वरूपे, परमात्मनि, "तदिति सर्वनाम सर्वं च ब्रह्म तस्य नाम सर्वनाम तस्य भावः। सर्वस्मिन् दृश्ये बाध्यमानेऽपि तद्बाधाधिष्ठानत्वेन स्वयमबाध्यमानमनारोपितं स्वरूपं तत्त्वमिति विवरणकाराः। ५विवक्षिते वस्त्ववाद्यादौ, ६चेतसि, ७वस्तुनि, ८साङ्ख्योक्तेषु प्रकृत्यादिषु पञ्चविंशतौ पदार्थेषु त्रिका०। "वेदान्ता बहुतर्ककर्कशमतिग्रस्ताः परं मायया भाट्टाः कर्मफलाकुला कृतधियो होते हि वैशेषिकाः। अन्ये भेदरता विवादकलङ्काभो तत्त्वतो वह्निनास्फात् सिद्धमतं स्वभावकलितं धीरः परं संश्रयेत्"। ९सत्त्वरजस्तमःसु। तत्र याथार्थ्ये "त्यक्ष्टाविंशतिस्थाने तत्त्वं वक्ष्यामि यत्नतः" रघुः। श्रीतत्त्वचिन्तामणिः तत्त्वविवेकः। तत्त्वचूडामणिः तत्त्वदीपिका। प्रमाणप्रमेयेत्यादुपक्रमे "तत्त्वज्ञानान्निःश्रेयसाधिगमः" गो०सू० "कार्यं सोऽवेक्ष्य शक्तिञ्च देशकालौ च तत्त्वतः" मनुः। "सतश्च सद्भावोऽसतश्चासद्भावः। सत् 'सत्' इति यद्भावाग्रं यथाभूतमविपरीतं तत्त्वं भवति। असच्च 'असत्' इति यद्भावाग्रं यथाभूतमविपरीतं तत्त्वं भवति"। वात्स्या० प्रस्तावना। प्रकृत्यादिपदार्थे। "एवं तत्त्वाभ्यासान्नास्मि न मे नाहमित्यपरिशेषम्" सां० कौ०। "तत्प्रतिषेधार्थं तत्त्वाभ्यासात्" पात० सू०। १०स्वभावे निस्तत्त्वाः निःस्वभावा इत्यर्थः प्रकृत्यादौ पुंन०केचित्। "यस्यापि देवस्य गुणान् समग्रांस्तत्त्वांश्चतुर्विंशतिमाहुरेके" हरिवं० २७६ अ०। ब्रह्मणि "वदन्ति तत्तत्त्वविदस्तत्त्वं यज्ज्ञानमद्वयम्। ब्रह्मेति परमात्मेति भगवानिति शब्द्यते" भाग०१।२।११ अनारोपितं तत्त्वमिति वेदान्तिनो वदन्ति। पदार्थे। "शून्यं तत्त्वं भावो विनश्यति वस्तुधर्मत्वाद्विनाशस्य" सां० सू०। मतभेदे पदार्थभेदा यथा "सदसदुभयानुभयात्मकचतुष्कोटिविनिर्मुक्तं शून्यमेव तत्त्वमिति शून्यवादिनो बौद्धाः। पृथिव्यादीनि चत्वारि भूतानि तत्त्वानीति चार्वाका आहुः। जीवाजीवाख्ये द्वे तत्त्वे इत्याहुताः। जीवाकाशधर्माधर्मपुद्गलास्तिकायाः पञ्चतत्त्वानीत्याहुतैकदेशिनः। जीवाजीवास्रवबन्धसंवरनिर्जरमोक्षाः सप्त तत्त्वानीत्यपरे आर्हतैकदेशिनः। स्वतन्त्रास्वतन्त्रभेदेन द्विविधं तत्त्वमिति द्वैतवादिनः श्रीपूर्णप्रज्ञाचार्याः। चिदचिदीश्वरभेदेन त्रिविधं तत्त्वमिति रामानुजीयाः पतिपशुपाशभेदेन त्रिविधं तत्त्वमिति पाशुपतशास्त्रकोविदाः नकुलीशाचार्याः शैवाश्च। मरुदादीनि पञ्चविंशतिस्तत्त्वानीति सांख्याः। ईश्वराधिकानि तानि चेति, षड्विंशतिस्तत्त्वानीति पातञ्जलाः। ब्रह्मैकमेव परमार्थतत्त्वं तद्भिन्नाः मायाकल्पिता इति मायावादिनो वेदान्तिनः।

**तत्त्वज्ञान** न० ६त०। १याथार्थ्यज्ञाने, २ब्रह्मज्ञाने च। "प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णय वादजल्पवितण्डाहेत्वाभासच्छलजातिनिग्रहस्थानानां तत्त्वज्ञानान्निःश्रेयसाधिगमः" इति गौ० सू०। ३अनारोपितवस्तुप्रत्यये। इदं सर्वं द्वैतजातमद्वितीये चिदानन्दात्मनि मायया कल्पितत्वात् स्वयमेव आत्मैवैकः परमार्थसत्यः सच्चिदानन्दाद्वयोऽहमस्मीति ४परिज्ञाने। ५यथार्थ्यज्ञाने। यथा सति घटादिवस्तुनि सदिति ज्ञानम् असति च शशशृङ्गादावसदिति ज्ञानम्। "निखिलशोकविमोक्षसुखोपायं मननोपायमात्मनस्तत्त्वज्ञानमाममनन्ति"। यथा आत्मा शरीरादिभ्यो भिन्न इत्याकारं ज्ञानमिति। नैयायिकाः। इतरनिवृत्तिपूर्वको ब्रह्मात्मावगम इति मायावादिनो वदन्ति। भगवद्विषयकसपरोक्षज्ञानमिति द्वैतवादिवेदान्तिन आहुः

**तत्त्वज्ञानार्थदर्शनम्** न०। तत्त्वज्ञानस्याङ्गं ब्रह्मणीति साक्षात्कारस्य वेदान्तवाक्यकरणकस्यानित्यादर्शनसाधनपरिपाकफलस्य अर्थः प्रयोजनमविद्यातत्कार्यात्मकनिखिलदुःखनिवृत्तिरूपः परमानन्दावाप्तिरूपश्च मोक्षः तस्य दर्शनम् आलोचनम्। तत्त्वज्ञानार्थे आलोचने तत्त्वज्ञानफलालोचने हि तत् साधने प्रवृत्तिः स्यात् इति तदालोचनं मोक्षार्थतत्त्वज्ञानसाधनम्।

**तत्त्वन्यास** पु० तन्त्रोक्ते विष्णुपूजाङ्गे न्यासभेदे तत्प्रकारस्तन्त्रसारे यथा

"आदिकान्तानवार्यांश्च जीवाद्येकैकशो वदेत्। नमः परावरेत्युच्चार्य ततस्तत्त्वात्मने नमः" इति गौतमीय वचनात् सर्वत्र तत्त्वपदयोगः। यथा ॐ नमः परात्म

**तथागत** पु॰तथा सत्यं गतं ज्ञानं यस्य यथा न पुनरावृत्तिर्भवति तथा तेन प्रकारेण गत इति वा तथा गतः सङ्गतेति समासः। १बुद्धदेवे सुगते अमरः। "यथा गतास्ते सुनयः शिवां गतिं तथागतिं सोऽपि गतस्तथागतः" सर्वद॰बौद्धागमः। २पूर्वोक्तप्रकारेण गते त्रि॰। "नलं दृष्ट्वा तथागतम्" भा॰ व॰ ७७ अ॰। "त्रिदशं तथागतां दृष्ट्वा ज्वलनीमिव पावकें" भा॰ स॰ १६ अ॰।

**तथाच** अव्य॰ तथा च च च इत्यव्ययं॰। उक्तस्य दृढीकरणार्थे "निरिन्द्रियाह्यमन्त्राश्च स्त्रियोऽनृतमिति स्थितिः। तथा च श्रुतयो बह्व्यो निगीता निगमेष्वपि" मनुः। "एतावानेव पुरुषो यज्जायात्मा प्रजेति ह। विप्राः प्राहुस्तथाचैतद्यो भर्त्ता सा स्मृताङ्गना" हितो॰।

**तथात्व** न॰ तथा+भावे त्व। तथाभूतत्वे। "तथात्वं चेदिन्द्रियाणामुपघाते कथं स्मृतिः" भाषाप॰। "स्वरूपानन्दस्य तथात्वम्" सांख्य॰सू॰।

**तथापि** अव्य॰ तथा च अपि च इत्यव्ययं॰। यद्यपीत्यनेनाचिप्रश्नस्य समाधानार्थे "तथापि मम सर्वस्वं रामः कमललोचनः" उद्भटः। "यद्यपि का नो हानिः परस्य द्वाभ्यां रासभश्वरति। असमञ्जसमिति मत्वा तथापि तरलायते चेतः" उद्भटः। "सा चैवास्मि तथापि सुरतव्यापारलीलाविधौ" काव्यप्र॰।

**तथाभूत** त्रि॰ तेन प्रकारेण भूतः भू-कर्त्तरि क्त। तादृशेन रूपेण भूते। "तथाभूतां दृष्ट्वा नृपसदसि पाञ्चालतनयाम्" वेणी॰। "स्मरस्तथाभूतमयुग्मनेत्रम्" कुमा॰।

**तथाराज** पु॰ तत्रेति राजते राज-अच्। बुद्धदेवे शब्दार्थचि॰

**तथाविध** त्रि॰ तथा विधा यस्य। तथाप्रकारे "तथाविधस्तावदशेषमस्तु सः" कुमा॰ "अतोऽभिलाषे प्रथमं तथाविधे"। "श्रुत्वा तथाविधं मृत्युं कैकेयीतनयः पितुः"। "प्राप्य चाशु जनस्थानं खरादिध्वस्तथाविधम्" इति च रघुः "तस्य तावच्छती सन्ध्या सन्ध्यांशश्च तथाविधः" मनुः

**तथाहि** अव्य॰ तथा च हि च ह॰। १निदर्शने २प्रसिद्धमेवेत्यर्थे शब्दार्थचि॰। २उक्तार्थे दृढीकरणे।

**तथैव** अव्य॰ तथा+स्वार्थे सादृश्ये वा तस्यावधारणम्। तद्वदेवेत्यर्थे तत्सदृश्यावधारणे च शब्दार्थचि॰ "अस्ति पुत्रो वधे यस्य भार्य्या भर्त्तुस्तथैव च" चाणक्यः। "यथा नदीनदाः सर्वे सागरे यान्ति संस्थितिम्। तथैवाश्रमिणः सर्वे गृहस्थे यान्ति संस्थितिम्" मनुः।

**तथ्य** न॰ तथा+साधु यत्। १यद्वस्तु यथाभूतं तथारूपावस्थाने सत्ये २तद्युते त्रि॰ अमरः। "काव्यं वाप्यथ वा खड्गमन्यं वापि तथाविधम्। तथ्येनापि ब्रुवन् दाप्योदण्डं कार्षापणावरम्" मनुः। "कन्यभाजं पतिमाप्नुहीति सा तथ्यमेवाभिहिता भवेन" कुमा॰। "भूय एव तु मां तथ्यैर्वचोभिरुपदंशय" भा॰ द्रो॰ ५६ अ॰। "यदर्जुनगुणांस्तथ्यान् कीर्त्तयानं नराधम!" भा॰ द्रो॰ १५८ अ॰।

**तद्** त्रि॰ तन-आदि डित्। १पूर्वोक्ते बुद्धिस्थे, २परामर्शयोग्ये ३विप्रकृष्टविषये। ४ब्रह्मणि न॰। "ओं तत्सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृतः" इति गीता। "अदसस्तु विप्रकृष्टं तदिति परोक्षे विजानीयात्" इत्युक्तेरस्य परोक्षवाचित्वम्। बुद्धिस्थत्वोपलक्षितधर्मावच्छिन्नेऽस्य शक्तिः। बुद्धिस्थत्वं च पूर्वानुभूतसंस्कारवत्तया, तेन स्मृतिविषयत्वेन तथात्वं बोध्यम्। तदर्थ एवास्य सर्वनामता शब्दपरत्वे न तथात्वम्। अतएव "एतत्तदोः सुलोपोऽकोरनञ्समासे हलि" पा॰ न सर्वनामकार्यमन्यथा एतत्तयोरिति स्यात्। सर्वनामकार्यञ्च त्वदादीनामः असादौ शीभावादि इत्तिमात्रे पुंवद्भावादिव। स तौ ते तस्मै तस्मात् तेषां तस्मिन् इत्यादि। तस्य च टेरकच् सकः तकौ इत्यादि च। "स किं सखा साधु न शास्ति योऽधिपम्" किरा॰। "तौ गुरुर्गुरुपत्नी च" रघुः। "ते त्वद्दर्शनादुर्लभाख्याय चेरुक्षीरपरिप्लवाः" "ते हिमाद्रयमामन्त्र्य" कुमा॰। "तस्मै शंसत प्रथितस्य नन्दौ" कुमा॰। "तस्मिन् मधोर्नन्दिदशानु विद्धाय" कुमा॰। तस्मात्तान्यत्र वापदेत्" स्मृतिः। इदंसंज्ञत्वात् च "तदीयमातङ्कघटाविघट्टितैः" माघः। ततः तत्र तर्हि तदा इत्यादि। ५हेतौ अव्य॰ खरादेराकृतिगणत्वात् खरादि। "शल्यानां त्वमसि शरणं तत् पयोदः प्रियायाः" मेघ॰। "तदङ्गमत्र्यं मधवन्! महाक्रतोः" रघुः। अस्येतावपि ६सर्वनामसमानार्थे न॰। "इन्द्रियदोषात् संस्काराज्ञाविद्या" "तद्दुष्टज्ञानम्" कां॰सू॰ "तदित्यव्ययपदं सर्वनामसमानार्थकमविद्यां परामृशति साऽविद्या दुष्टज्ञानं व्यभिचारिज्ञानमतस्मिंस्तदभिज्ञानं व्यधिकरणप्रकारावच्छिन्न विशेष्यकम्" उप॰ इत्तिः। ८ तदेतत्यर्थे च "ज्यायसी चेत् कर्म्मणस्ते मता बुद्धिर्जनार्द्दन! तत् कर्म्मणि घोरे मां। गीता ९ प्रसिद्धे त्रि॰ सर्वनामकार्य्य च। "तं क्लेशपाशं प्रसभोच्य कृष्णः" कुमा॰। तत्र ब्रह्मणि "तदिज्ञानमभिसन्धाय फलं यत्तपःक्रियाः। दान

क्रियाश्च विविधाः क्रियन्ते मोक्षकाङ्क्षिभिरिति" गीता। तदिति ब्रह्माभिधानसञ्ज्ञार्थं अनभिसन्धाय च कर्मणः फलमित्यर्थः "तत्सत्यं स आत्मा तत्त्वमसि श्वेतकेतो" छा० उ०। तत्पदवाच्यार्थश्च तत्पदवाच्यार्थशब्दे उक्तः शरदा०अव्ययी० अच समासान्तः। तस्य समीपम् उपतदस्।

**तदर्थ** त्रि० स अर्थो यस्य, तस्मै इदं वा "अर्थेन सह नित्यसमासो विशेषलिङ्गता चेति" वार्त्ति० समासो वा। १तत्प्रयोजनके २तदुद्देश्यके "अन्नेवासो वार्थांस्तदर्थेषु धर्मशब्देषु योजयेद्वृद्धा वा" दाय० त० आपस्तम्बः। ३तस्याभिधेये ४ततृप्रयोजने च ततो भावे ष्यञ्। तादर्थ्य ततृप्रयोजनकत्वे। "तादर्थ्ये चतुर्थी" मुग्ध बो०।

**तदन्यत्व** न० तयोरन्यत्वम्। तयोर्भेदाभावे "तदन्यत्व मारम्भणशब्दादिभ्यः" भा० सू०।

**तदन्यबाधितार्थप्रसङ्ग** पु० तदन्यः बाधितार्थस्य प्रसङ्गः। प्रमाणबाधितार्थस्य प्रसङ्गरूपे प्रमाणबाधितार्थप्रसङ्गापरपर्य्याये तर्कभेदे। तत्स्वरूपादि "स चायं तर्कः षड्विधः आत्माश्रयान्योन्याश्रयचक्रकानवस्थाप्रमाणबाधितार्थप्रसङ्गभेदात् इति" विभज्य आत्माश्रयादीन् लक्षयित्वा जगदीशेनोक्तं यथा उक्तचतुष्कान्यः प्रसङ्गः प्रमाणबाधितार्थप्रसङ्गः। सोऽपि द्विविधो व्याप्यारोपको विषयपरित्रोधकश्च तत्राद्यो यथा धूमो यदि वह्निव्यभिचारी स्यात्तदा जन्यो न स्यादिति। द्वितीयस्तु पर्वतो यदि निर्वह्निः स्यात्तिर्धूमः स्यादित्यादि"। विषयस्य व्यभिचारशङ्कानिवृत्तिद्वारा निश्चायकत्वेन परित्रोधकत्वम्।

**तदर्पण** न० तस्य स्वस्मिन् निक्षिप्तस्यार्पणं प्रत्यर्पणम्। निक्षिप्तद्रव्यस्य निक्षेप्तुरर्पणे। ६ त०। तस्यार्पणे च।

**तदा** अव्य० तस्मिन् काले तद्+दाच् विभक्तित्वात् अ। तस्मिन् काले इत्यर्थे। "तदा विधिः कुण्डलनां विधोरपि" नैष०।

**तदात्मन्** पु० स आत्मा यस्य। १तत्स्वरूपे २तदभिन्ने च। तस्य भावः ष्यञ्। तादात्म्य अभेदे "क्रमिकं यद्यमनुगमेकार्थं ज्ञानार्थबोधकम्। तादात्म्येन भवेद्भेदः समासः कर्मधारयः" शब्द० प्र०।

"अभेदस्तादात्म्यं तच्च स्वतन्त्रवृत्त्याधारत्वो धर्मः। असाधारण्यं चैकमात्रवृत्तित्वम्। एकमात्रवृत्तित्वञ्च स्वसामानाधिकरण्यस्वप्रतियोगिवृत्तित्वोभयसम्बन्धेन भेदविशिष्टं यत्तदन्यत्वम्। इत्येकमात्रवृत्तिधर्म एव विशेषणविभक्त्यर्थः। वृत्तिश्च तत्र प्रकृत्यर्थस्य संसर्गमर्यादया आधारादीनां सख्यकालीनत्वं स्यात् एवमनुयाजमात्रापकर्षोत्कर्षे तदूर्द्ध्वभाविनां सूक्तवाकसंवाकादीनां सख्यकालीनधर्मत्वादिना सामान्यप्रत्यासत्त्या सुवेयत्वमेव। अभेदस्य संसर्गतामते त्वेतादृशानुगतभेदस्यैव तथात्वसूचितम्। तत्तद्व्यक्तित्वावच्छिन्नभेदाभावकूटस्य विशेष्यत्वे तथात्वे घटो न नील इत्यादि वाक्यजन्यबोधे प्रतियोग्यभावान्वयीत्यत्वयोगक्षेमार्थितन्त्रत्वेन तादृशानुगतसम्बन्धावच्छिन्नप्रतियोगिताकाभावा एव भासेरन् नीलादिवृत्तिप्रतियोगिताकैकैकाभावः। तथा सति तादृशैकैकाभाव तात्पर्य्येण प्रयुक्तस्य नीलोपि न नील इति वाक्यस्य प्रामाण्यं स्यात्" व्युत्प० मदा० "सत्यैक्ये मिथोभेदस्तादात्म्यं तच्च तत्सत्तातिरिक्तसत्ताकत्वाभावः" वेदा० प० "तदात्मनोपि निषिध्यमानत्वे तन्निषेधाक्षेपे तदात्मनि जगत्प्रवेशात्। न हि घटः पटात्मेत्यनेन घटस्वरूपादन्यस्तादात्म्यं विहितः स्यात् यदि च तादात्म्यं नामाभेदाख्यो धर्मः कश्चिदिष्यते स घटपटाद्यधिकरणतया निषिध्यते तदा संसर्गाभाव एव स्यात्। तस्मान्निर्विशेषस्य तदात्मान्तर्भूतं जगदिति कोऽनुपपन्नाभास इति"। श्रीहर्षखण्डने अन्योन्याभावखण्डने उक्तम्।

**तदात्व** न० तदेतस्य भावः तदा+त्व। तत्काले अमरः। "तदात्वावधिसंयुक्तः सन्धिर्ज्ञेयो द्विजन्मनः। "तदात्वे चाल्पिकां पीडां तदा सन्धिं समाश्रयेत् "आयत्यां गुणदोषज्ञस्तदात्वे क्षिप्रनिश्चयः" इति च मनुः।

**तदादितदन्तन्याय** पु० न्यायभेदे अन्यभूतस्य कर्त्तव्यत्वे शास्त्रतः प्राप्ते आदिभूतस्योत्कर्षेण विधानबोधके न्यायभेदे। स च न्यायः जैमि० पञ्चमस्य प्रथमे पादे दर्शितो यथा। अग्नीषोमीयपशौ श्रूयते "तिष्ठन्तं पशुं प्रयाजयन्ति"। अत्र प्रकृतौ पशुसंस्कारानन्तरं हविष्प्रासादिते पश्चात् प्रयाजादय इज्यन्ते इति विकृतावित्यापि पशुसंस्कारानन्तरं हविष्प्रासादिते प्रयाजाः प्राप्ताः ते च तिष्ठन्तमिति वचनात् जीवत्येव पशौ अपक्रमणीये। तथा सवनीयपशौ अनुयाजानामुत्कर्षः श्रूयते यथा सन्निलाभाद्ध्रुवं मनुयाजैश्चरन्तीति। अत्र संशयः। प्रयाजमात्रोत्कर्षः प्रयाजाद्यङ्गकलापस्यापकर्षः अनुयाजाद्यङ्गकलापस्योत्कर्षो वा इति। श्रुतयोरेव प्रयाजानुयाजयोरपकर्षोत्कर्षौ नतु तदाद्यन्तकलापयोस्तदङ्गप्रयाजपूर्वभाविनासाधारसामधेन्यादीनां तदाद्यपकर्षे ऽत्यन्तव्यवहितत्वेन प्रधानकालीनत्वं न स्यात् प्रयाजमात्रापकर्षे तु

भासते। तादृशश्च धर्मस्तद्व्यक्तित्वादिरूप एव। अपूर्वव्यक्तिनिष्ठ तादृशधर्मस्य विशेष्य ज्ञातुमशक्यत्वेऽपि एकमात्रवृत्तित्वं स्यात् एवमनुयाजमात्रोत्कर्षे तद्गुर्भाविनां सूक्तवाकसम्प्रवाकादीनामुत्कर्षात् प्रधानसन्निधिर्न विलुप्यते तस्मात् प्रयाजमात्रस्योत्कर्षः तथा च सूत्रम् "अङ्गानां सूक्ष्मकालत्वात् यथोक्तसत्कर्षः स्यात्"। अङ्गानां सूक्ष्मकालकर्त्तव्यत्वानुरोधात् यथोक्तस्यानुयाजमात्रस्योत्कर्ष इति प्राप्ते ब्रूमः। प्रकृतियागे सकृत्पदार्थानुष्ठानस्य क्लृप्तत्वात् विकृतावपि सकृन्मात्रां पदार्थानामतिदेशात् क्रमरूपाङ्गबाधस्यान्याय्यत्वात् उत्तरकालकर्त्तव्यकर्मपदार्थस्यानुपस्थित्वानुष्ठानविलोपापत्तेः तदुक्तम् पूर्वमेवोपस्थितं कार्य्यमुत्तरं कर्मचोदनात्। प्राप्तं तदन्यथा भावे क्रमलोपाद्विलुप्यते"। तस्मात् प्रयाजापकर्षे तदङ्गकलापस्यापकर्षः, अनुयाजोत्कर्षे तदाद्यङ्गकलापस्योत्कर्ष", इति तत्त्वबो०। अनया दिशा मासिकानां सकृन्मात्रां करणे उत्कर्षापकर्षौ कल्पनीयौ।

**तदानीम्** अव्य० तस्मिन् काले-तद्+दानीम् विभक्तित्वात् च। तदेत्यर्थे। "तदानीमपि पार्श्ववर्त्तिनाम्" भाग० ५।८।२१। तत्र भवः खुञ् तट् च। तदानीन्तन तत्र भवे त्रि० स्त्रियां ङीप्।

**तदाप्रभृति** त्रि० तदा तत्कालः प्रभृतिरादिर्यस्य तदाशब्दस्य सप्तम्यर्थवृत्तेरपि कथञ्चित् प्रथमार्थवृत्तिता। तत्कालादिके "तदाप्रभृत्येव विसृष्टसङ्गः" कुमा०।

**तदामुख** त्रि० तदा मुखं यस्य। प्रारम्भे।

**तदित्** त्रि० तदेति दृश-क्विप् तुक्। तद्विषयके बोधे। "वयस्त्वा तदिदर्थाः" ऋ० ८।२।१६ यद्विषयकं बोधं तदित् तदेवार्थः प्रयोजनं येषाम्" भा०।

**तद्गत** त्रि० तत् गतः। १तत्परे २तदासक्ते च। तद्गतेनैव मनसा" रामा० बा० २७०। "शुचिस्तद्गतमानसः" गीता

**तद्गुण** त्रि० तस्य गुण इव गुणोऽस्य। १तत्तुल्यगुणके २स्वार्थेऽतद्धारभेदे पु० १६६ पृ० कथितादि दृश्यम्। ३तत्०। १तस्य गुणे पु०। "तद्गुणसारत्वात्" भा० स्मृ०। तत्र प्रधाने गुणः विशेषणम्। ४प्रधानविशेषणे तद्गुणसंविज्ञानः।

**तद्गुणसंविज्ञान** पु० तत्र बहुव्रीहौ गुणस्य गुणीभूतस्य विशेषणस्य संविज्ञानं विशेष्यप्रधानतयेन बोधनं यत्र। व्याकरणोक्ते बहुव्रीहिसमासभेदे। भवति च तस्मिन्कर्मज्ञानवेलादौ गुणीभूतस्य कर्मणोऽभिधानतया प्राधान्येनान्वयबोधः। यद्वा० प्र० क्षमते तद्गुणादिकसङ्गा प्राचीनमतसिद्धमप्युक्तं यथा "तदतद्गुणसंविज्ञानौ द्वौ भेदौ तदादिमः। विपक्षस्य विशेष्यो यत्तद्विशेष्यकबोधकृत्"। तद्गुणसंविज्ञानोऽतद्गुणसंविज्ञानश्च बहुव्रीहेर्द्वौ भेदौ। तत्र विपक्षवाचकस्य विशेष्यप्रधिया प्रत्याय्योर्ध्वसद्विशेष्यकबोधकद्बहुव्रीहिः तयोरादिमस्तद्गुणसंविज्ञानस्य स्वार्थगुणीभूतस्य सम्बन्धिविशेष्यप्रधिया विज्ञानं यस्मादिति व्युत्पत्त्या मान्वयसंज्ञकत्वात्। तद्भिन्नस्तद्गुणसंविज्ञानवरमः इत्यर्थोऽस्यते। घटस्वरूपः पदार्थः इत्यादितोऽहि घटः स्वरूपं यस्येति विपक्षस्थले स्वस्वरूपाभिन्नघटसम्बन्धित्वेन घटाभिन्नस्वस्वरूपसम्बन्धित्वेन वा विपक्षविशेष्यं कलसमेव विशेष्यप्रधिया बोध्यते घटस्य स्वरूपं यस्मादिति विपक्षे च विपक्षस्य यद्विशेष्यं ततोऽन्यदेव स्वजन्यस्वरूपाभिन्नघटसम्बन्धित्वेन। कुटादिर्गंध इत्यादिरपि कुट आदिर्यस्येति व्युत्पत्त्या कुटाभिन्नस्य स्वधर्मिकव्यवस्थाधर्मिणः सम्बन्धित्वेन धात्वन्तरमिव कुटमपि बोधयंस्तद्गुणसंविज्ञान एव बहुव्रीहिः। प्राचां मतेन तद्गुणसंविज्ञानबहुव्रीहिमन्यथा निर्वक्ति। "यः स्वार्थघटकार्थस्य स्वार्थान्वयिनि बोधने। अनुकूलो बहुव्रीहिः स तयोरथवादिमः"। यो बहुव्रीहिः स्वार्थस्यान्वयिनि स्वार्थघटकस्यार्थस्यान्वयबोधने समर्थः स तयोस्तदतद्गुणसंविज्ञानयोरादिमः। कम्बुकर्णमानय हारयीवं पश्येत्यादौ हि बहुव्रीहिर्यस्वकर्णसम्बन्धिनः स्वयीवाद्यभिहारसम्बन्धिनश्च स्वार्थस्यान्वयिनि कर्मत्वादौ स्वार्थघटकीभूतस्य तादृशकर्णहारादेरपि व्युत्पत्तिवैचित्र्येणान्वयबोधने समर्थ इत्थंविध एव तद्गुणसंविज्ञानस्तद्भिन्न एव चार्थादतद्गुणसंविज्ञानः। यथा दृष्टसागरमानय इत्यादाविति

**तद्दिन** न० कर्म्म०। "तस्मिन् दिने। तद्दिनं स्नादनध्यायं व्रतं तत्र न कारयेत्" मल० त०। १दिनमध्ये २प्रतिदिने च मान्त्रम् अव्य० शब्दार्थ चि०।

**तद्धन** त्रि० तदेव धनं यस्य। १कृपणे हेमच० स हि सर्वमेव धनमपर्याप्ततयावधार्य्य आत्मनि तद्धनत्वमेवाभिमन्यते कर्म्म०। २तस्मिन् धने न०।

**तद्धर्म्मन्** त्रि० स धर्म्म यस्य अनिच् समा०। तथाभूतधर्म्मयुक्ते। "आके सञ्चीयतद्धर्म्मा तत्साधुकारिषु" भा०

तद्धित त्रि॰ तस्मै हितम्। ३तस्मै हिते। २व्याकरणोक्ते प्रत्ययभेदे पुं॰न॰। "तद्धिताः ४।१।७६ पा॰ सूत्रेणाधिकृत्य "यूनस्तिः" इत्यादिना पञ्चमाध्यायसमाप्तिं यावदो प्रत्यया विहितास्ते तद्धितसंज्ञकाः।

शब्द॰ प्रका॰ तद्धितप्रत्ययादिकसूत्रं यथा

"विभक्त्यादित्रिकादन्यः प्रत्ययस्तद्धितं मतम्। नामप्रकृतिको नैवमतिव्याप्त्यादिदोषतः"। "विभक्तिप्रत्ययं प्रकृत्योऽन्यः प्रत्ययस्तद्धितः। इत्यत्र इत्यादौ तुरुषाद्यर्थकः कादिरपि तद्धितमेवेति। तदन्यत्वेनापि प्रत्ययं विशेषयन्नन्यः। नामप्रकृतिकप्रत्ययत्वन्तु न तद्धितस्य लक्षणं विभक्तौ व्यजादौ चातिव्याप्तेः पचतितराम्नित्यादौ तराम्प्रत्ययाप्तेश्च"। विभजते। "तस्यापत्यं तद्धितेष्वनङ्सञ्च युतेन्दुमान्। कालसञ्चा तेन रक्तं तस्य व्यूढोऽथ वेत्ति तत्। अधीते वा देवताऽस्य सैवमादीन् यथायथम्। बोधयद्विविधानर्थांस्तद्धितं स्यादनेकधा" तेनास्य स्त्रीत्वमपि "तद्धितस्याचामादेः"। "तद्धितश्चासर्वविभक्तिः" पा०। "समासतद्धितजतां यत्किञ्चिद्वृत्तपदार्थकम्। गुणप्रधानभावे च तस्य दृष्टो विपर्ययः" हरिकारिका। सच तद्धितो द्विविधः प्रकृत्यर्थमिश्रार्थकः स्वार्थिकश्चेति भेदात्।

तद्बल पु॰ तस्मिन् बलं यस्मात्। ३वायुभेदे "चुरप्रतङ्कार्द्धेन्दुतारासख्याच्च तद्विदः" हेम॰। अस्य स्त्रीत्वोक्तिः प्रामादिकी "द्युमान्" इत्यधिकारे "देवासुरात्सवर्गगिरिसङ्घनख केश दन्त स्तन भुज कण्ठ खड्ग शरपङ्क्त्यभिधानानि" पा॰ "पुंस्त्वे सभेदानुचराः सपर्य्यायाः सुरासुराः। स्वर्गयागाद्रिमेघाब्धिदुकालाक्षिशरारयः" अम॰च पुंस्त्वोक्तेः

तद्भाव पु॰ तस्य भावः असाधारणधर्मः प्राप्तिर्वा। ३तस्यासाधारणे धर्मे यथा घटे घटत्वम्। गोर्गोत्वम्। २तद्रूपप्राप्तौ च "अभूततद्भावे च्विः" "पयसस्तद्भावात्" कात्या॰ श्रौ॰ ४।३।२३ सू॰। ७तः तस्मिन् भावः तद्विषयकचिन्तने "सदा तद्भावभावितः" गीता।

तद्राज पु॰ तस्य राजा टच्। ३तस्य नृपतौ २तदर्थविहिते तद्धितप्रत्ययभेदे च। "ते तद्राजाः" पा॰ ते अञ्प्रादयस्तद्राजसंज्ञकाः स्युः "अञ्प्रादयस्तद्राजाः" पा॰ "पूगात् अञ् इत्यारभ्य उक्ताः तद्राजसंज्ञका स्युः" सि॰ कौ॰। तद्राजस्य बहुषु स्त्रियाम् लुक्।

तद्र अवसादे मोक्षे च सौ॰ पर॰ अक॰ सेट् इदित्। तन्द्रति अतन्द्रीत्। तन्द्रा

तद्राच्च(च्) त्रि॰ तदञ्चति गच्छति पूजयति वा-अनूच्-गतौ पूजायां वा क्विप् टेरद्रादेशः पूजार्थत्वे न नञोपः। ३तदुगामिनि २ततपूजके च।

तद्वत् अव्य॰ तेन तुल्यं वा तुल्या सा चेत् क्रियेत्यर्थे वति। ३ततसदृशक्रियावति। तस्येव तत्रेव वा इत्यर्थे वति। २तत्तुल्येऽर्थे यथा तद्वत् शिवस्य विभुता, तद्वत् शिवे भक्तिरित्यादि। "तद्वत्ताऽपि च स्मितम्" स्वाङ्गलक्षणम्। "चित्रं यथाश्रयस्थते स्वाश्रयादिभ्यो विना यथा छाया। तद्वद्विना विशेषैर्न तिष्ठते निराश्रयं लिङ्गम्" "पुरुषस्य भोगार्थं प्रवर्त्तते तद्वदव्यक्तम्" सा॰ का॰। "चतुर्वेदेऽङ्गे तद्वत् प्रातिलोम्येऽपि जन्मनि" मनुः। तद् अस्मिन्नर्थे मतुप् मस्य वः। ३तद्विशिष्टे त्रि॰ "तद्वानपोहो वा शब्दार्थः" काव्य॰ प्र॰ "द्रव्याणि तद्वन्ति पृथक्त्वसंख्ये"। "अथ वा तत्प्रकारं यज्ज्ञानं तद्वद्विशेषणकम्" भाषाप॰ स्त्रियां ङीप्। तस्य भावःतल्। तद्वत्ता तद्विशिष्टत्वे स्त्री "पदार्थे तत्र तद्वत्ता योग्यता परिकीर्त्तिता" भाषा॰।

तद्विध त्रि॰ सा विधा प्रकारो यस्य। तत्प्रकारे "धर्म्मार्थौ यत्र न स्यातां शुश्रूषा वापि तद्विधा" मनुः। "क तद्विधात्वं क च पुरुषलक्षणा" कुमा॰।

तन विस्तृतौ तना॰उभ॰सक॰ सेट्। तनोति तनुते अतानीत् अतनीत् अतत-अतनिष्ट ततान तेनतुः तेने। उदित् तनित्वा तान्त्वा। ततः वितानः। "तनोति भानोः परिवेषकैतवात्" नैष॰। "आचार्य्यस्तनुते विद्यतिमिमां दायभागस्य"। दायभागटीका "ततान सोपानपरम्परामिव" रघुः। "यस्य तस्य विना यज्ञैं तेनेति करणं विना" उद्भटः। "तेनिरेऽभिरुचितेषु तत्परः" माघः "स तमीं तमोभिरभिगम्य तताम्" माघः "तन्यता प्रथमताऽपि रागम्" माघः।

अति+अतिशयविस्तारे। अतितत्। "तन्तनोऽतिततातितुत्" माघः।

वि+अति+अतितत्वारेच्छ विस्तारे आत्म॰ "वियति व्यत्यतन्यातां मूर्त्तौ हरिपयोनिधौ" भट्टिः। [५।३१।७ सू॰।

अधि+आरोप्य विस्तारे। "धनुरधितनोति" शत॰ ब्रा॰

अनु+सन्ततविस्तारे पश्चाद्विस्तारे च "परिपाल्यानुतनुयादेनधर्मः सनातनः" भा॰ शा॰ १३३ सू॰।

अप+अधोविस्तारे। अपतानकः।

अव+सन्ततविस्तारे "विशालमूलावततं पवनाम्भोदधारिणम्" हरिवं॰ ८८ सू॰।

आ+दीर्घतया विस्तारे। आतानः (टाना देखोआ) सम्यक्-

विस्तारे च "मौर्वीं धनुषि चातता" रघुः। यदुत पुनरात्मानुकृतिमोषधं मायामयभोगैश्वर्यं मेवातनुत" भाग० ५।२४।२२ "इदं ते चोभाभ्यस्य चेष्टितं चेतसि चमत्कारमातनोति" प्रबोध० च०। [किरणावली।

वि+आ+विशेषेण विस्तारे। "व्यातेने किरणावलीमदयनः" उद्+ऊर्ध्वतो विस्तारे उत्तानः।

प्र+प्रकर्षेण विस्तारे। "फलं प्रकल्प्य पूर्वं हि ततो यज्ञः प्रतायते" भा० आ० ६६।२ श्लो०। "तदरीकृत्य क्रतिभिर्वाचस्पत्यं प्रतायते" माघः। पक्षे प्रतन्यते।

वि+विशेषेण विस्तारे वितानः (पङ्क्तान देखोया) "यथा सूता व्यातानवितानाभ्यामिति" वेदान्तप्र०।

सम्+सम्यग्विस्तारे सन्तानः सन्ततिः सन्ततम् "सन्तता शुशुभे भूमिः" रामा० सु० १४ अ०।

**तन** उपकारे श्रद्धायां आघाते च या०चुरा० उभ० पक्षे भ्वा० सक० शब्दे अक० सेट्। तानयति ते ततनति अतीतनत् त अतानीत् अतनीत्। व्युपसर्गात् दैर्घ्ये अक० दीर्घीकरणे सक०। वितानयति दीर्घो भवति दीर्घं करोति वा। "वितानयति यः कीर्त्तिं वितनत्यमलं यशः" कविरहस्यम् "अयं वेदे गणव्यात्यसात् दिवा०"घोषा घोषादिन्द्राय तन्यति ब्रुवाणः" ऋ० ६।१८।२। "तन्यति शब्दं करोति" भा०। चौरादिकस्य अदन्तत्वमिति तनयित्नुशब्दार्थे माधवः तनयित्नुशब्दे दृश्यम्।

**तनय** पुंस्त्री० तनोति कुलम् तन–कयन्। १पुत्रे। २दुहितरि, ३चक्रकुल्यायां, (चाकुलिया) लतायां, ४हतकुमार्य्यां च स्त्री टाप्। "अथैनमङ्के तनया सुषोच" कुमा०। तनयाशब्दस्य स्त्रियादिषु पाठात् पूर्वपदस्य न ह्रस्वत्वं। तनया जाता अस्य तनयाजातः इत्यादिः। ५लक्षावधिकपशुमत्स्थाने पु०। "जनयति तनयभवनसुपगतः" ह० स०।

**तनयित्नु** पु० चु० स्तन–शब्दे इत्नु पृषो० सलोपः अदन्तचुरा० तन–शब्दे इत्नु माधवः। १अशनौ "अग्निं पुरा तनयित्नोरचित्तात्" ऋ० ४।३।१ "तनयित्नुरशनिः" भा० २मेघे च "एकपात्तनयित्नुरर्षभः" ऋ०१०।६६।११। "तनयित्नुर्मेघः" भा०।

**तनस्** पु० तनोति वंशम् तन–असुन्। पौत्रादौ "मा शेषसा मा तनसा" ऋ० ५।७०।४। "तनसा पौत्रादिना" भा०

**तना** स्त्री तन–अच् टाप्। धने निघण्टुः।

**तनादि** पु० पा० धातुपाठोक्ते धातुगणे। स च धातुपाठे बोपदेवेन तत्सूचकं द इत्यनुबन्धयुक्ततया पठितः। "तनादिकृञ्भ्यउः"। "तनादिभ्यस्तथासोः" पा०। तनादौ गणे पठितः ठक्। तानादिक तदुगुणपरिते धातौ।

**तनिका** स्त्री तन्यते धातुनामनेकार्थत्वात् बध्यते अनया करणे इनि संज्ञायां कन् कापि अतइत्त्वम्। बन्धनरज्जौ शब्दार्थचि०।

**तनिमन्** पु० तनोर्भावः तनु+इमनिच्। १तनुत्वे, २काश्र्ये च। "विरलातपस्तनिमानमभजत" काद०। तनयति तनुं करोति तनु+णिच् इमनिच् डिद्वद्भावे टिलोपः। २अवकाशे। "अथ पार्श्वयोरथ तनिम्नोऽथ ह्रस्वयोः" शत० ब्रा० २।८।२।७। "तनिम्नः यजतः" भा० तस्य तनूकरणात् तथात्वम्।

**तनिष्ठ** त्रि० अयमनयोरतिशयेन तनुः तनु+इष्ठन् डिद्वद्भावः। द्वयोर्मध्ये एकस्मिन् अतिशयेन तनौ। बेदे बहुभ्यो निर्द्धारणेऽपि इष्ठन्। २बहूनां मध्ये एकस्मिन्, अतिशयेन तनौ च "एतेषां लोकानां अन्तरिक्षलोकस्तनिष्ठः" शत० ब्रा० ७।१।२।२०। लोके तु तत्रार्थे ईयसुन् तनीयानित्येव।

**तनीयस्** त्रि० बहूनां मध्येऽयमतिशयेन तनुः ईयसुन् डिद्वत्। बहूनां मध्ये एकस्मिन् अतिशयेन तनौ "पञ्चपुच्छानि तनीयांसीव" शत० ब्रा० ८।७।२।१ स्त्रियां ङीप्।

**तनु** स्त्री तनोति कर्म काश्र्यं वा तन–उनु। शरीरे अमरः २त्वचि राजनि०। "तनुभिरवतु वस्त्राभिरद्राभिरीशः" शकु०। "तनौ मरुत्सख न कैटभद्विषः" "बभार वाग्भैर्द्विगुणीकृतं तनुः" माघः। वा ऊङ्। तनूः इत्यपि तत्रार्थे तनूजः। २क्षये ३अल्पे ४विरले च त्रि०मेदि०। "तनुरोमकेशदशनां मृदङ्गीमुदहेत् स्त्रियम्" मनुः। स्त्रियां वा ङीप् तन्वी। "तव तन्वि! कुचावेतौ नियतं चक्रवर्त्तिनौ" उद्भटः। सा च हरिणभार्य्याभेदे "शैव्यस्य च सुतां तन्वीं रूपेणाप्सरसां समाम्" हरिवं० ११८ अ०। "भूतसृजीनैर्यतिरिह भतनामतभौ भतनाश्च यदि भवति तन्वी" ह०र० उक्ते चतुर्विंशत्यक्षरपादके ७वृन्दोभेदे च तनोर्भावः तनुता काश्र्ये स्त्री "ततुतां दुःखमनङ्ग मोक्ष्यति" कुमा० "सर्वाणि तनुतां यान्ति जलानि जलदक्षये" हरिवं० १८२५।त्व तत्रार्थे न०। योगशास्त्रोक्तेषु दग्धबीजभावेषु अपरोक्षापन्नेषु क्लेशादिषु "अविद्या क्षेत्रमुत्तरेषां प्रसुप्ततनुविच्छिन्नोदाराणाम्" पात० सू०। "दग्धबी-

जानामग्रवरोऽल्पतनुत्वसूच्यते प्रतिपक्षभावनोपकृताः क्लेशास्तनवो भवन्ति" भा०। तेन प्रतिपक्षभावनया अस्मितादिक्लेशानां तनुत्वात् तनुसंज्ञेति तदर्थः। ज्योतिषोक्ते स्त्री ६चक्रस्थाने स्त्री०। "तनुनिधनस्थ भेदाः केन्द्रकोणे त्रिलाभे" जातकाल०। स्वार्थे क। तनुक तनुशब्दार्थे।

तनुत्तीर पु० तनु अल्पं तीरं नियोऽस्य। आम्रातके राजनि०

तनुच्छद पु० तनुं देहं छादयति छादेर्घः छत्वञ्च। १कवचे वर्मणि। "तरुपल्लाशसवर्णतनुच्छदः" "मातस्त्रिलक्ष माहेन्द्रमासमोच तनुच्छदम्" रघुः।

तनुच्छाय पु०तन्वी अल्पाछाया यस्य।१वर्बुरकवृक्षे राजनि०।इत० २देहच्छायायां स्त्री। तन्वी अल्पा छाया यस्य। २अल्पछायायुक्ते त्रि०। तन्वी छाया कर्म०। ३अल्पछायायां स्त्री।

तनुज पुं स्त्री० तनोर्देहात् जायते जन-ड ६त०। पुत्रे कृष्णायुधः २कन्यायां स्त्री ३लग्नावधिकपञ्चमस्थाने ज्यो०

तनुत्र न० तनुं त्रायते त्रै-क। वर्मणि "काम्बोरः खाडमिकः शार्ङ्गी रज्जुः पिप्पलतुत्रवान्" भट्टिः। "अस्थितारासु विव्याध द्विषतः स तनुत्रिषु" माघः।

तनुत्राण न० तनुस्त्रायतेऽनेन त्रै-करणे ल्युट्। वर्मणि हारा०

तनुत्वच् स्त्री तन्वी त्वग् वल्कलं यस्याः। क्षुद्राम्निमन्थे राजनि०। २सूक्ष्मत्वग्युक्ते त्रि०।

तनुपत्र पु० तनूनि अल्पानि पत्राणि यस्य। १इक्षुदीडवृक्षे राजनि०। २अल्पपत्रयुक्तद्रव्यमात्रे त्रि०।

तनुभव पु० तनोर्भवति भू-अच् ५त०। १पुत्रे "दृश्यते तनुभवः शिशिरांशो" इ०सं० १७ अ०। २दुहितरि स्त्री

तनुभस्त्रा स्त्री तनोर्देहस्य भस्त्रेव। १नासिकायाम् शब्दरत्ना०। कर्म०। क्षुद्रभस्त्रायाम्।

तनुभृत् त्रि० तनुं बिभर्त्ति भृ-क्विप् ६त०। देहधारिणि "छायाफलं तनुभृतां ग्रीष्मादधाति" इ० स० ६८ अ०।

तनुमध्या स्त्री तनु अल्पं मध्यं यस्याः। १अल्पमध्यायां स्त्रियां २षड्क्षरपादके छन्दोभेदे च। "तौ चेत् तनुमध्या"। "भूर्त्तिर्यैरजसोरत्नद्युतरूपा। आसां मम चित्ते नित्यं तनुमध्या" छन्दोम०। ३अल्पमध्यके त्रि०।

तनुरस पु० तनो रस इव। धर्मे हारा०।

तनु(नू)रुट् न० तनौ तन्वां वा रोहति रुह-क्विप् ७त०। लोमनि शब्दर०। [लोमनि शब्दर०।

तन(नू)रुह न० तनौ तन्वां वा रोहति रुह-क ७त०।

तनुल त्रि० तन-उलच्। विस्तृते संक्षिप्तमा०। [वातस्थाने त्रि०।

तनुवात पु० तनुरल्पो वातोऽत्र। १नरकभेदे हेमच०। २अल्प-

तनुवार न०तनुं देहं वृणोति वृ-अण् उपस०। कवचे सङ्ग्रामे शब्दार्थचि०। [राजनि० २अल्पबीजयुक्ते त्रि०।

तनुवीज पु० तनूनि अल्पानि बीजानि यस्य। १बीजवदरे।

तनुव्रण पु० तनुरल्पो व्रणो यतः। बल्मीकरोगे शब्दर०।

तनुस् न० तन-उसि। देहे उणादिको०।

तनुसञ्चारिणी स्त्री तनु अल्पं सञ्चरति सम्+चर-णिनि ङीप्। १वालिकायां शब्दार्थचि०। २अल्पसञ्चारयुक्ते त्रि०।

तनुसर पु० तनोः सरति सृ-अच् ५त०। स्वेदे धर्म्मे शब्दार्थचि०।

तनुस्फुद पु० तनो-स्फुद इव। पायौ त्रिका०।

तनू पु० तनोति कुलं तन-ऊ। १पुत्रे। "ता वां विश्वको नुवते तनूजुवे" ऋ० ८।८६।१॥ "तनोति कुलं तनूः पुत्रः" भा० तनोति कर्म उनु ऊङ्। २शरीरे अमरः। ३प्रजापतौ ४गवि ५अप्सु च तनूनपाच्छब्दे दृश्यम्।

तनूकृ अतनुं तनुं करोति तनु+अभूततद्भावे च्वि कृञोऽनु० प्रयोगः अल्पीकरणे तनूकरोति "लब्धां तनूकृत्य मरेन्द्रकन्या" रघुः। "समाधिभावनार्थः क्लेशतनूकरणार्थश्च" पात०सू०। "तनूकृद्बोधि प्रमतिश्च कारवे" ऋ०१।३१।९

तनूकृत त्रि० तनूक-कर्म्मणि क्त।१तद्धे २अल्पीकृते च अमरः।

तनूज पु० तन्वाः देहात् जायते जन-ड ५त०। १पुत्रे २कन्यायां स्त्री। "समादिदेश प्रयतां तनूजाम्" कुमा० तनूजनि तनूजात तनूजन्मादयोऽप्यत्रार्थे यथायथं पुं स्त्री

तनूद्भव पु० तनोरुद्भवति उद्+भू-अच् ५त०। १पुत्रे २दुहितरि स्त्री। "पञ्चभूतपरित्यक्तं प्राप्यं तं स्वतनूद्भवम्" हरिवं० २१ अ०। [तनूनपात्।

तनूनप न० तन्वा जनं क्रियं पाति-पा-क। घृते शब्दच०

तनूनपात् (द्) पु० तनूं न पातयति यत-णिच्-क्विप् नञ्वाङ्लित्वादिना नञोन नलोपः। तनूनं पाति रक्षति पा-शतृ, तन्वा जनं क्रियं पाति तनूनपृद्वृतं तदस्ति अत्-क्विप् वा। अग्नौ, जठरस्थित्वा भुक्तान्नादिपाचनादस्य देहपावकत्वम्। शतपथे तनूनपानौ इत्यादि क्विप् पक्षे तनूनपादौ इत्यादि भेदः। २घृते न०६त०। ३प्रजापतिपौत्रे। "नराशंसः प्रतिनूरोमिमानस्तनूनपात् प्रतिवत्तस्य धाम" यजु० २०।३७ तनूनपात् तनोति विस्तारयति वृद्धिं तनूः प्रजापतिः मैरीचित्तस्य नपात् पौत्रः कश्यपात्मज इत्यर्थः यद्वा तनूं शरीरं न पातयति रक्षति जाठराग्निरूपेणेति

तनूनपात् अग्निः यद्वा तनोति भोगानिति तनूः औत्तरा नपात् पौत्रं हृतम् गोः पयो जायते पयस आज्यमिति हृतं तनूनपाद्वा" वेददी० निरुक्ते अस्य निरुक्तिर्दर्शिता यथा "तनूनपादाज्यं भवति नपादित्यनन्तरायाः प्रजाया नामधेयं भवति गौरस तनूरुच्यते तता अस्यां भोगात्तस्याः पयो जायते, पयस आज्यं जायते। अग्निरिति शाकपूणिरापोऽस्त तन्व उच्यन्ते तता अन्तरिक्षे, ताभ्य ओषधिवनस्पतयो जायन्त ओषधिवनस्पतिभ्य एष जायते। तस्यैषा भवति। "तनूनपात् पथ ऋतस्य यानान् मध्वासमञ्जन्त्स्वदया सुजिह्व" निरु० ८।६। अग्न्युद्देश्यके ४प्रयाजभेदे च। तनूनपाद्यागश्च वसिष्ठशुनकात्रिवभ्रुश्वराजन्यभिन्नानां प्रयाजेषु द्वितीयः वसिष्ठादीनां तु नराशंसो द्वितीय इति भेदः यथोक्तं आश्व०श्रौ० १।२।६ "प्रयाजेष्वन्ति" "पञ्चैते भवन्ति" पञ्चवचनं नराशंसः तनूनपाद्वा द्वयस्थायपक्षापि पञ्चैव भवन्ति न षड्लेवमर्थम्। एत इति वचनम् अत्र पठिता एवैते तनूनपान्नराशंसयोरन्यतरेण सह पञ्च भवन्ति नापठितेन षड्लेवमर्थम्" नारा०। ये यजामहे वषट्प्रक्रमे "समिधः अग्न आज्यस्य व्यन्तु२ वौश्वडिति वषट्कारः १५ सू०। "इति प्रथमः" १६ सू०। "अयं प्रथमः प्रयाजः" नारा० "तनूनपादग्न आज्यस्येति वेत्यिति द्वितीयोऽन्यत्र वसिष्ठशुनकात्रिवभ्रुश्वराजन्येभ्यः"। २१सू०। "नराशंसो अग्न आज्यस्य वेत्यिति तेषाम्" २२। सू० "वसिष्ठादीनामयं द्वितीयः" नारा० "इडो अग्न आज्यस्य व्यन्त्विति तृतीयः"। २३ सू०। "सर्वेषामिति शेषः" नारा० "बर्हिरग्न आज्यस्य वेत्यिति चतुर्थ आगूर्य पञ्चमे स्वाहाऽऽज्यं स्वाहाऽऽहुतमिति"२४सू०इत्यादि। वसिष्ठादिभिन्नानां समिद्यागतनूनपाद्यागः इडोयागः बर्हियागः स्वाहाकारयाग इत्येते पञ्चैव प्रयाजा इत्यवधेयम्। वसिष्ठादीनां तनूनपात्स्थाने नराशंस इति भेदः। अतएव श्रुतौ "समिधो यजति तनूनपातं यजति इडो यजति बर्हिर्यजति स्वाहाकारं यजतीत्येव पञ्च पठिताः वसिष्ठादिभिन्नपरतया व्यवस्थाप्याः। "बभार वाप्यैर्द्विगुणो ऋतं तनूस्तनूनपादु धूमवितानमाधिजाः" माघः। "तनूं न पातयति जाठरूपेण धारयतीति" मल्लिः।

तनूनपृ न पातयति नप्रा हृत०। वायौ तनोति तनूः परमात्मा आकाशस्य पुत्रो वायुस्तस्य नप्रा पौत्रः वायुहि आत्मजाताकाशजातत्वात् ब्रह्मपौत्रः "तस्माद्वा एतस्मादात्मन आकाशः सम्भूत, आकाशाद्वायुः" इति श्रुतेस्तस्य तथात्वम्। "तनूनप्त्रेव शाकरस्येति यो वा अयं पवत एष तनूनपाच्छाकरः सोऽयं प्रजानामनुप्रहृष्टा प्रविष्टस्ताविमौ प्राणोदानौ" शत० ब्रा० १।४।२।५ "तस्या देहस्य नपातयिता रक्षको देवस्तनूनप्त्रा अथवा सर्वतनूरात्मा प्रजापतिः तस्माकाशः पुत्रः तत्पुत्रो वायुरिति तनूनप्त्रा वायुः स च शाकरः शक्तः सर्वं कर्तुम्" भा०

तनूपा पु० तनूं पाति पा-क्विप्। हृत०। जठराग्नौ जठराग्नेः "तनूपा अग्नेऽसि तन्वं मे पाहि" यजु० १।१७ जठराग्निना भुक्तान्ने जीर्णे रसवीर्यादिपाके सति देहपालनं भवतीति तस्य तथात्वम्। तन्वमिति छान्दसः प्रयोगः। २देहपालकमात्रे च "असन्न ऊर्जो-र्जिता तनूपाः" ऋ० ४।१६।२० "तनूपाः इन्द्रः" भा०

तनूरुह न० तनौ रोहति रुह क। १लोमनि २पक्षिणां पक्षे च मेदि०। "तनुस्तनूरुहोल्लताभिति" नैषधम्। ३पुत्रे ४गरुति ५लोमनि च पु० हेमच०। "कङ्कटस्तनु तनूरुहाकृतिः" ह० स० ६२ अ०। "तस्य तद्वचनं श्रुत्वा सम्हृष्टतनूरुहः" भा० आ० १००अ०। "वज्रा-ङ्काञ्जननिभं वराङ्गतनूरुहम्" हरिवं० ४२ अ०।

तनूर्ज पु० मनुभेदोत्तमपुत्रे ऋषभेदे। "औत्तमेयान् महाराज! दश पुत्रान् मनोरमान्। दश ऊर्जस्तनूर्जश्च मधुर्माधव एव च" हरिवं०७अ०।

तनूहविस् न० वैदिकेषु तनूरूपेषु हविःषु। "द्वादशाहाने तनूहवींषि निर्वपति" कात्या० श्रौ० ४।१०।७। "तनूहवींषि अग्नये पवमानायेत्यादीनि निर्वपति" कर्कः तानि च "अग्नये पवमानाय प्रथमा" ८ सू० "अग्नये पावकायाग्नये शुचये च द्वितीया" ९ सू० "अदित्यै चरुस्तृतीया" १०। इत्युक्तानि

तनॢच गतौ भ्वा० पर० सक० सेट्। तनूचति अतनूचीत्। ततञ्च ततक्षतुः तक्षुः। तच्यते। उदित्। तक्त्वा तक्ता।

तनॢच सङ्कोचे रुधा० पर० सक० सेट्। पाणिनीयमते अनुज साक्षत्यादयं वेङेव वोपदेवमते उदित्करणं प्रामादिकम् किन्तु ऊदिदेव। तनक्ति अतनक्षीत् अतानक्षीत्। ततञ्च। "तनक्षि व्योम विस्तृतम्" भट्टिः।

आ+आतनूनशब्दोल्लार्थेषु (दम्बलदेवोया)"इन्द्रस्य त्वा भागं सोमेनातनक्मि" यजु० १।४। "उद्गात्रातनक्ति प्राणमुत-मेधेनेन्द्रस्य लेति"कात्या०श्रौ०४।२।२२"तां दुग्धस्याहीषुत-

रत उद्गास्य प्रागुक्तशेषेण पूर्वदिने कृताग्निहोत्रशेषेण दग्ध्वा दुग्धमातनक्ति अवशिष्टं दधि दुग्धमध्ये प्रक्षिपति दधित्वसम्पत्त्यर्थम्" कर्कः। २भयहेतुकसङ्कोचे च न्यङ्क्वा० कुत्वम् आतङ्कः। आतङ्कम्।

तन्ज सङ्कोचे रुधा० पर० सक०। पाणिनीयगणे (तन्चू) इत्यत्र तन्ज् इति पाठान्तरम् अयमदित्त्वात् वेडेव। तनक्ति अतङ्क्षीत् अताङ्क्षीत्। ततङ्क्ष। [स्त्रीत् अतन्सीत्।

तन्तस् दुःखे कण्ड्वा० आक० पर० सेट्। तन्तस्यति अतन्-

तन्ति स्त्री तन–कर्मणि क्तिच् वेदे दीर्घनकोपाभावौ। १दीर्घप्रसारितायां रज्ज्वाम्। "यत्सानां न तन्तयस्त इन्द्र"! ऋ० ६।२४।४। "तन्तिर्नाम दीर्घप्रसारिता रज्जुः" भा० लोके तु ततिः तातिरित्येव क्वचिदार्षेऽपि तथा। "साऽसञ्जत शिवसन्त्यां महिषी कालयन्त्रिता" भाग० ७।२।५२। २गवां मातरि च तन्तिपालः। वा ङीप् तन्ती गवां मातरि "तन्तीं प्रसार्य माषां वडवत्सां चानुमन्त्रयेतेयं तन्ती गवां मातेति गोपथब्रा० २।६।७

तन्तिपाल पु० तन्तिं गोमातरं पालयति पालि–अण् उप० स०। २गोमातृपालके। चास्य "गोतन्तियवं पाले" पा० ष्यञ्युदाहृतता। २सहदेवे च "तेषां गोसंख्य आसं वै तन्तिपालेति मां विदुः" भा० वि० १० अ०। अत्र तन्तिपालेति पाठान्तरं तदभिप्रायेण तन्तिं वशीभूतां पालयतीति विग्रहेण तन्तिपालं वचनकरमिति नीलकण्ठेनोक्तम् "तन्तिपाल इति ख्यात नाम्नाऽहं विदितस्तया" भा० वि० १६ अ० इत्यत्र तथैव पाठः।

तन्तु पु० तन–तुन्। १सूत्रे अमरः तन्तुवायः। तन्तुदामनपर्णयोः" नरसिं०पु० "तस्मिन्ओतमिदं प्रोतं विश्वं शाटीव तन्तुषु" भाग० ८।६।७। "तिरश्चि वयने ऊर्णितन्तुजालैः" रघुः। २व्याधे हेम०। ३सन्ताने "तेषामुत्पन्नतन्तूनामपत्यं दायमर्हति" मनुः। "संवेष्टमानं बहुभिर्मोहात्तन्तुभिरात्मजैः। कोशकार इवात्मानं वेष्टयन्नावबुध्यसे" भा० शा०२२१अ०। [गौरा० ङीष्।

तन्तुक पु० तन्तुनेव कायति कै–क। १सर्षपे २नाड्यां स्त्री

तन्तुकाष्ठ न० तन्तुयुक्तं काष्ठम्। (ताँतेर काटि) तन्तुवायोपकरणे तन्तुकाष्ठभेदे शब्दर०। [जटाधरः।

तन्तुकीट पु० तन्तोः तन्त्यर्थं कीटः। (शुटीपोका) कीटभेदे

तन्तुन पु० तन–बा० तुनन्। १व्याधे (डाकोर) ख्याते जन्तुभेदे हेम०।

तन्तुनाग पु० तन्तुर्नाग इव। डहडहपाखे विका०।

तन्तुनाभ पु०तन्तुर्नाभावस्य अच् समा०।(माकड़सा) लूतायाम्

तन्तुनिर्य्यास पु० तन्तुरिव निर्य्यासो यस्य। नालतृणे। शब्दर०।

तन्तुपर्वन् न० तन्तोः यज्ञोपवीतस्यैव दानरूपं पर्व यत्र। चान्द्रश्रावणपौर्णमास्याम् तद्दिने हि वामनाय यज्ञोपवीतदानोत्सवः स्मृतौ विहितः। राघवभट्टधृतनारसिंह वचनम्। "शिवस्त्रिजन्मदिवसे संक्रान्तौ विषुवायने। सत्तोर्वैऽर्कविधुग्रासे तन्तुदामनपर्वणोः। मन्वादीनां प्रकुर्वीणो मासर्क्षादीन्न मोघवेत्"। तन्तुपर्व परमेश्वरोपवीतदानतिथिः श्रावणी पूर्णिमा" रघुनन्दनः।

इयं तिथिः रक्षास्तत्रबन्धरूपोत्सवदिनत्वात्तथेत्यपि तथा च तस्यां रक्षास्तत्रबन्धनप्रकारः निर्णयसि० दर्शितो यथा "अथैव रक्षाबन्धनमुक्तं हेमाद्रौ भविष्ये "संप्राप्ते श्रावणस्यान्ते पौर्णमास्यां दिनोदये। स्नानं कुर्वीत मतिमान् श्रुति स्मृतिविधानतः। उपाकर्मादिकं प्रोक्तमृषीणां चैव तर्पणम्। मूढ्राणां मन्दरहितं स्नानं दानं च शस्यते। उपाकर्मणि कर्तव्यमृषीणां चैव पूजनम्। ततोऽपराह्णसमये रक्षापोटलिकां शुभाम्। कारयेद्वतैः शस्तैः सिद्धार्थैर्हेममूषितैरिति" अतोपाकर्मानन्तर्यस्य पूर्णमासीतिथौ वार्षिकस्यानुवादो न तु विधिः गौरवात् प्रयोगविधिभेदे च क्रमायोगाच्छ्रुत्यादौ तदयोगाच्च। तेन परेद्युरुपाकरणे पूर्वेद्युरपराह्णे तत्करणं सिद्धम्। इदं भद्रायां न कार्यम् "भद्रायां द्वे न कर्त्तव्ये श्रावणी फाल्गुनी तथा। श्रावणी नृपतिं हन्ति ग्रामं दहति फाल्गुनीति" संग्रहोक्तेः तत्रत्ये तु रात्रावपि तदन्ते कुर्यादिति निर्णयामृते। इदं प्रतिपद्युतायां न कार्यम् "नन्दायामर्शने रक्षाबन्धिदानं दशासु च। भद्रायां गोकुलक्रीडा देशनाशाय जायते" इति भद्रनत्रे ब्रह्मवैवर्तात् भविष्ये "उपलिप्ते शुद्धमध्ये दत्तचतुष्के न्यसेत् कुम्भम्। पीठे तत्रोपविशेद्राजामात्यैर्युतश्च शुक्लवस्त्रैः। तदनु पुरोधा नृपते रक्षां बध्नीत मन्त्रेण"। इदं रक्षाबन्धनं नियतकालत्वात् भद्रावर्जं षड्दर्शनेऽपि कार्यं होलिकावत्। षडशीतिसंक्रान्त्यादौ रक्षानिषेधाभावात् "सर्वेषामेव वर्णानां सूतकं राहुदर्शने" इति तत्कालीनकर्मपरमेव न त्वन्यत्र। अन्यथा होलिकायां का गतिः। अतएव "नित्ये नैमित्तिके जप्ये होमयज्ञक्रियासु च। उपाकर्मणि चोत्सर्गे षडशौचेन विद्यते" इति नियतकालीने तदभाव इति दिक्। उपाकर्मणीति तद्विनभिन्नपरं तत्तत्त्रिरात्रादिस्थितं प्राक्। मन्वस्तु

"येन बद्धो बलीराजा दानवेन्द्रो महाबलः। तेन त्वामपि बध्नामि रक्षे! मा चल मा चल"। "ब्राह्मणैः क्षत्रियैर्वैश्यैः शूद्रैरन्यैश्च मानवैः कर्तव्योरक्षणाचारो द्विजान् संपूज्य शक्तितः" इति।

**तन्तुभ** पु० तन्तुना सन्तत्या भाति भा–क। १सर्षपे २वत्से च जटाधरः। "मरीचं पिप्पलं कोलं क्षीरकन्तुभं तथा। संस्कारे च समन्त्रे च महादेव्यै निवेदयेत्" कालि० पु०। "तन्तुभं सर्षपम्" रघुनन्दन।

**तन्तुवर्द्धन** त्रि० तन्तुं सन्तानं संसारं वा वर्द्धयति छिनत्ति वा वृध–वृद्धौ णिच् ल्यु वर्द्धं छेदने ल्यु वा। १तन्तुवर्द्धके २तन्तुच्छेदके च। ३परमेश्वरे पु०। "शुभाङ्गो लोकसारङ्गः सुतन्तुस्तन्तुवर्द्धनः" विष्णु स०। "तन्तुं सन्ततिं संसारं वर्द्धयति छेदयति वा ज्ञानदानेन" भा०।

**तन्तु(र)ल** न० तन्तुर्विद्यतेऽस्य र-लच् वा। सूत्राले। हेमच०

**तन्तुवाप** त्रि० तन्तून् वपति वप-अण् उप०स०। (ताँति) तन्तुवाये जटाधरः।

**तन्तुवाय** त्रि० तन्तून् वयति वे–अण् उप० स०। १तन्तुवयनकर्त्तरि (ताँति) २लूतायां कीटभेदे च अमरः। ३सङ्कीर्णजातिभेदे पुंस्त्री। स्त्रियां जातित्वात् ङीप्। सा च जातिस्तृत्तिश्च मानवोक्ता यथा "वृषायां वैश्यसंसर्गादायोगव इति स्मृतः। तन्तुवाया भवन्त्येव वस्त्रकांस्योपजीविनः। शौलिकाः केचित्तत्रैव जीवनं वस्त्रनिर्मितौ" "तन्तुवायो दशपलं दद्यादेकपलाधिकम्" मनुः।

**तन्तुवायदण्ड** पु० तन्तोर्वायस्य दण्डः ६त० वायते अनेन करणे–घञ् वा कर्म्म०। वेमनि तन्तुवायसाधने दण्डे। (नराज)

**तन्तुविग्रहा** स्त्री तन्तवो विग्रहे यस्याः। कदल्याम् त्रिका०। तत्त्वचि हि बहुसूत्राणि प्रादुर्भवन्ति।

**तन्तुशाला** स्त्री तन्तूनां वयनाय शाला। (ताँतघर) तन्तुवयनगृहे हेम०। [(सिँयोयान) अमरः।

**तन्तुसन्तत** त्रि० तन्तुभिः सन्ततं व्याप्तम्। सूतवस्त्रे।

**तन्तुसार** पु०तन्तव इव सारो मज्जास्य। गुवाकवृक्षे। त्रिका०

**तन्त्र** न० तन्यते तनोति वा कर्त्तरि ष्ट्रन् तन्त्रिकुटुम्बभरणे घञ् वा। १कुटुम्बभरणादिकृत्ये २सिद्धान्ते ३औषधे ४प्रधाने ५परिच्छदे ६वेदशाखाभेदे ७हेतौ ८सप्तमार्थैकप्रयोगे। ९प्रतिकर्त्तव्यतायाञ्च मेदि०। १०तन्तुवाये यज्ञमात्रा ११राष्ट्रे १२परच्छन्दानुगमने १३स्वराड्चिन्तायाम् हेमच०। १४ग्रन्थे यन्त्ररक्षा० १५यूपदण्डे, धरणिः १६धने १७वृद्धे १८वयनसाधने (ताँत) १९कुले च नानार्थमञ्जरी। २०शिवादुक्तशास्त्रभेदे तल्लक्षणभेदादिकं यथा "सर्गश्च प्रतिसर्गश्च मन्त्रनिर्णय एव च। देवतानाञ्च संस्थानं तीर्थानाञ्चैव वर्णनम्। तथैवाश्रमधर्मश्च विप्र संस्थानमेव च। संस्थानञ्चैव भूतानां यन्त्राणाञ्चैव निर्णयः। उत्पत्तिर्विबुधानाञ्च तरूणां कल्पसंश्रितम्। संस्थानं ज्योतिषाञ्चैव पुराणाख्यानमेव च। कोषस्य कथनञ्चैव व्रतानां परिभाषणम्। शौचाशौचस्य चाख्यानं नरकाणाञ्च वर्णनम्। वरचक्रस्य चाख्यानं स्त्रीपुंसोश्चैव लक्षणम्। राजधर्मो दानधर्मो युगधर्मस्तथैवच। व्यवहारः कथ्यते च तथा चाध्यात्मवर्णनम्। इत्यादिलक्षणैर्युक्तं तन्त्रमित्यभिधीयते"। तस्य प्रशंसा। "विष्णुर्वरिष्ठो देवानां हृदानामुदधिर्यथा। नदीनाञ्च यथा गङ्गा पर्वतानां हिमालयः। अश्वत्थः सर्ववृक्षाणां राज्ञामिन्द्रो यथा वरः। देवीनाञ्च यथा दुर्गा वर्णानां ब्राह्मणो यथा। तथा समस्तशास्त्राणां तन्त्रं शास्त्रमनुत्तमम्। सर्वकामप्रदं पुण्यं तन्त्रं वै वेद सम्मितम्। कीर्त्तनं देवदेवस्य हरस्य मतमेव च। पावनं श्रद्धानानामिह लोके परत्र च"। तस्य श्लोकसंख्या यथा "न शक्यं विस्तराद्वक्तुमपि वर्षशतैरपि। संक्षेपाद्वै प्रवक्ष्यामि लोककल्पोक्तवर्त्मना। दिवि देवि! नवलक्षं पाताले ब्रह्मशासने। लक्षमात्रं भारते च क्षितौ तन्त्राणि यानि च। आगमं त्रिविधं प्रोक्तं चतुर्थमेश्वरं स्मृतम्। कल्पश्चतुर्विधः प्रोक्त आगमो डामरस्तथा। यामलञ्च तथा तन्त्रं तेषां भेदाः पृथक् पृथक्। सूक्तकाख्यं सप्तपञ्चम् सारदाख्यञ्च नारदम्। महार्णवश्च कपिलो योगः कल्पः कपिञ्जलः। अद्भुत शुद्धवीरश्च सिद्धसंवरणस्तथा। प्रथमोऽष्टसहस्रन्तु श्लोका दश प्रकीर्त्तिताः। द्वितीयोसूक्तकस्तत्र षट्सहस्राणि संख्यया। श्लोकाः शतार्द्धसंख्याताश्चतुर्थस्त्रिसहस्रकः। शतद्वयं साधिकञ्च श्लोकानां पञ्चविंशतिः। त्रिंशो, त्तरसहस्राणि श्लोकानां मानुसंख्यया। प्रपञ्चः प्रथमे तन्त्रे द्वितीये वसुसंख्यया। सहस्राणि तथा श्लोकाः सप्तविंशतिसंख्यया। भूतनेत्रसहस्राणि तृतीयेऽब्धिसहस्रकम्। शतद्वयं षडधिक १० श्लोकाः प्रपञ्चः कथितस्त्रिधा। कला १६संख्या सहस्राणि सारदायाः प्रकीर्त्तिताः। पञ्चविंशाधिकाः श्लोका वसुश्लोकाश्च नारदे। विंशतिश्च सहस्राणि षट्सहस्राणि संख्यया। वसुश्लोकाश्च कथिताः

कपिलः श्लोकसंख्यया। त्रयोदश सहस्राणि कलोत्तर शतत्रयम्। श्लोकसंख्या समुद्दिष्टा योगे कल्पे च संख्यया। बाणसंख्या सहस्राणि श्लोका नवतिः कीर्त्तिताः। श्लोकानान्तु सहस्राणि अष्टाविंशतिसंख्यया। श्लोकाश्च भानु १२ संख्याता सन्त्रेऽपि च कपिञ्जले। अक्षतशुद्धौ सहस्राणि पञ्चश्लोकाधिकानि च। पञ्चैव कथिता नेत्र संख्यातानि यथार्थतः। वीरागमे षड़धिकानि शतानि परिसंख्यया। सहस्राणि च तावन्ति श्लोकानान्तु यथार्थतः। पञ्चाधिकसहस्राणि श्लोकानामृतसंख्यया। सिद्धसंवरणोक्तानि ईश्वरेण यथा पुरा। डामरःषड्विधो ज्ञेयः प्रथमो योगडामरः। श्लोकास्तत्र त्रयस्त्रिंशत् तथा पञ्च शतानि च। त्रिविंशतिसहस्राणि श्लोकानि चेह संख्यया। एकादश सहस्राणि संख्यया शिवडामरे। श्लोकाःसप्तैव निश्चित्य ईश्वरेणैव भाषिताः। द्वावच्छ्लोकसहस्राणि पञ्च श्लोकशतानि च। गुणोत्तराणि दुर्गाया डामरे कथितानि च। नव श्लोकसहस्राणि नव श्लोकशतानि च। सारस्वते तथा श्लोकाः पञ्चैव परिकीर्त्तिताः। स्वरोदसंख्यसहस्राणि श्लोकानां ब्रह्मडामरे। पञ्चोत्तरशतान्यत्र संख्यातानि शिवेन तु। षष्टिः श्लोकसहस्राणि गन्धर्वडामरोत्तरे। श्लोकाश्च षष्टिसंख्याता ब्रह्मणाऽव्यक्तयोनिना। यामलाः षट् समाख्याताःतन्त्रादावादियामले। द्वात्रिंशच्च सहस्राणि त्रयस्त्रिंशत् शतानि च। द्वितीये ब्रह्मसंज्ञे तु द्वात्रिंशतिश्च संख्यया। सहस्राणि शतान्यत्र तान्येव कथितानि च। तावत्संख्यसहस्राणि शतानि परिसंख्यया। विंशतिश्च तथा संख्या श्लोकाश्च विष्णुयामले। कालसंख्यसहस्राणि वेदसंख्यशतानि च। पञ्चषष्टि स्तथा श्लोका कनिष्ठे रुद्रयामले। नव श्लोकसहस्राणि त्रयोदश शतानि च। द्वात्रिंशतिस्तथा श्लोका गणेशयामलोत्तमे। रविसंख्यसहस्राणि आदित्याख्ये तु यामले। तन्त्रे नीलपताकायां सहस्राणि च पञ्च च। पञ्चविंशतिः श्लोकाश्च कथिता वामकेश्वरे। त्रयोदश सहस्राणि द्वे शते विंशतिस्तथा। श्लोकास्तत्र तु ज्ञेये तन्त्रे संख्यातास्तन्त्रवेदिभिः। गजसंख्यसहस्राणि त्रिकसंख्याशतानि च। सप्त श्लोकास्तथैवात्र तन्त्रयोगार्णवोत्तमे। दश श्लोकसहस्राणि तावन्त्येव शतानि च। सावाख्ये च महातन्त्रे यथार्थतः प्रकीर्त्तिताः। पञ्च श्लोकसहस्राणि तावन्त्येव शतानि च। शताईसंख्यया श्लोका दक्षिणामूर्त्तितन्त्रके। दश श्लोकसहस्राणि तावन्त्येव शतानि च। त्रयोदश तथा श्लोकाः कालिकाख्ये च तन्त्रके। कालेश्वर्यास्तन्त्रवरेऽष्टसप्ततिस्तथा मतः। श्लोकानां संख्यया चात्र तन्त्रराजे च संख्यया। नव श्लोकसहस्राणि नव श्लोकशतानि च। द्वाविंशतिः सहस्राणि हरगौर्य्याख्यतन्त्रके। तथा च विंशतिः श्लोकास्तन्त्रेऽस्मिन् परिकीर्त्तिताः। अर्कसङ्ख्यसहस्राणि द्वितीये तन्त्रवेदिभिः। अष्टाविंशतिश्च श्लोकाः संख्यातास्तन्त्रनिर्णये। कुब्जिकाख्ये महातन्त्रे श्लोकाश्च दशसंख्यया। सहस्राणि तथा सप्त संख्यातानि मनीषिभिः। द्वितीये षट्सहस्राणि तदर्द्धञ्च कनिष्ठके। अर्कसंख्यसहस्राणि तथाङ्कशतानि च। तावद्भेद्या महातन्त्रे संख्यातानि द्विजोत्तमैः। द्वाविंशतिः सहस्राणि द्वाविंशतिः शतानि च। कात्यायन्यास्तु तन्त्रस्य संख्यातानि मनीषिभिः। वसुश्लोकसहस्राणि तावन्त्येव शतानि च। प्रत्यङ्गिरायास्तन्त्रे च निश्चितानि यथार्थतः। भूतसंख्या सहस्राणि तथा तावच्छतानि च। महाशङ्खाख्यतन्त्रराजे पञ्च श्लोकाश्च कीर्त्तिताः। गजसंख्यसहस्राणि श्लोकाः सप्तसंख्यया। त्रिपुरार्णवे महातन्त्रे लिखिताः परमर्षिभिः। सरस्वत्याः सहस्रे द्वे द्वे शते संख्यया स्मृते। पञ्च श्लोकास्तथैवात्र विज्ञातव्या द्विजातिभिः। द्वाविंशतिः सहस्राणि आद्ये तन्त्रोत्तरोत्तरे। अङ्कसंख्या शतान्यत्र श्लोकाः पञ्चदशैव तु। द्वाविंशतिः सहस्राणि तथा नव शतानि च। द्वात्रिंशच्च तथा श्लोका योगिन्यास्तन्त्रराजके। द्वितीये षट् सहस्राणि तथा च त्रिशतानि च। त्रयः श्लोकास्तथैवात्र वाराह्यास्तन्त्र उत्तमे। ऊर्ध्वसंख्यासहस्राणि तत्त्वसंख्यशतानि च। गवाक्षे तन्त्रराजेऽस्मिन् श्लोकाद्रि तत्त्वसंख्यया। वर्षसंख्यसहस्राणि द्वे शते परिनिश्चिते। श्लोकास्तत्रय संख्यातास्तन्त्रे नारायणीयके। वेदसंख्यसहस्राणि तान्येव च शतानि च। श्लोका नवतिःसंख्याता मुण्डानी तन्त्रराजके। द्वितीये त्रिसहस्राणि त्रिशतानि कनिष्ठके। त्रिंशत् श्लोकाश्च संख्याताःप्रोक्तास्तन्त्रवेदिभिः"। वराहोत०

उपतन्त्राणि यथा "सैद्धोक्तान्युपतन्त्राणि कपिलोक्तानि यानि च। ऋषितानि च एतानि जैमिन्युक्तानि यानि च। वशिष्ठः कपिलश्चैव नारदो गर्ग एव च। पुलस्त्यो भार्गवः सिद्धो याज्ञवल्क्योऽङ्गुलस्तथा। शुक्रो बृहस्पतिश्चैव अन्ये ये मुनिसत्तमाः। एभिः प्रणीतान्यन्यानि उपतन्त्राणि यानि च। विसंख्यातानि तान्यत्र धर्मविद्भि-

र्भैरवाभिः। सारात् सारतराण्येव संख्यातानि निबोधत"। वाराहीत०।

शिवोक्तं चतुःषष्टिसङ्ख्यकं तन्त्रं यथा "सिद्धीश्वरं महातन्त्रं कालीतन्त्रं कुलार्णवम्। ज्ञानार्णवं नीलतन्त्रं फेत्कारीतन्त्रसुत्तमम्। देव्यागमं उत्तराख्यं श्रीक्रमं सिद्धियामलम्। मत्स्यसूक्तं सिद्धसारं सिद्धिसाराह्वयं तथा वाराहीतन्त्रं देवेशि! योगिनीतन्त्रसुत्तमम्। गणेशविमर्दनीतन्त्रं नित्यातन्त्रं शिवागमम्। चामुण्डाख्यं महेशानि! सपञ्चमालाख्यतन्त्रकम्। हंसमाहेश्वरं तन्त्रं निरुत्तरमनुत्तमम्। कुलप्रकाशकं देवि! कल्पं गायात्मकं शिवे!। क्रियासारं निरुम्बाख्यं ज्ञानतन्त्रं तन्त्रसुत्तमम्। सम्मोहनं तन्त्रराजं ललिताख्यं तथा शिवे!। राधाख्यं मालिनीतन्त्रं रुद्रयामलसुत्तमम्। हरश्च श्रीक्रमं तन्त्रं गवाक्षं शुकसंदिनि!। विष्णुश्वर तन्त्रञ्च मालिनीविजयं तथा। समयाचारतन्त्रञ्च भैरवीतन्त्रसुत्तमम्। योगिनीहृदयं तन्त्रं भैरवं परमेश्वरि!। सनत्कुमारकं तन्त्रं योनितन्त्रं प्रकीर्त्तितम्। तन्त्रान्तरञ्च देवेशि! नवरत्नेश्वरं तथा। कुलचूड़ामणितन्त्रं भावचूड़ामणीयकम्। मन्त्रदेवप्रकाशञ्च कामाख्यानामकं तथा। कामधेनुकुमारी च भूतडामरसंज्ञकम्। मालिनीविजयं तन्त्रं यामलं ब्रह्म यामलम्। विश्वसारं महायन्त्रं महाकालं कुलार्णवम्। कुलोड्डीशं कुब्जिकाख्यं यन्त्रचिन्तामणीयकम्। एतानि तन्त्ररत्नानि सकलानि युगे युगे। कालीविलासकादीनि तन्त्राणि परमेश्वरि!। कालकल्पे सुसिद्धानि रक्तकान्तासु भूमिषु। महाचीनादितन्त्राणि अविकल्पे महेश्वरि!। सुसिद्धानि वरारोहे! रक्तकान्तासु भूमिषु" इति महासिद्धिसारतन्त्रम्। "षट्षष्टिश्च तन्त्राणि यामलादीनि पार्व्वति। सकलानीह वाराहे विष्णुकान्तासु भूमिषु। कल्पभेदेन तन्त्राणि कथितानि च यानि च। पाषण्डमोहनार्थाय विकल्पानीह सुन्दरि!" विश्वसारतन्त्रम्। अन्यत्र च "दैत्यानां मोहनार्थं तु तन्त्रशास्त्रं शिवोदितम्" तत्र वराहचिन्तायां औषधे च "तन्त्रावापविदा योगैः" आपः। शाम्बे "इदानीं तत्प्रवक्ष्यामि तन्त्रसुत्तरसुत्तमम्" सुश्रुतः अनेकोद्देन सकलप्रयोगे "द्वौ दैवे प्राक् त्रयः पित्र्ये उदगेकैकमेव वा। मातामहानामर्थेवं तन्त्रं वा दैवदैविकम्" याज्ञ०। "पितृश्राद्धे मातामहश्राद्धे च वैश्वदेविकं तन्त्रेण कार्यमिति मिता०। २।विश्वन्ये अङ्गसमुदाये "दर्शपौर्णमासौ तु पूर्वं व्याख्यासमन्त्रस्य तन्त्राम्नातत्वात्" आश्व० श्रौ० १।१।३। तन्त्रमङ्गसंहतिः विश्वन्ये इत्यर्थः स चावस्थादिसंस्त्राजयानः प्रधानस्य तन्त्रणात् तन्त्रमित्युच्यते" कर्कः। तन्त्रलक्षणादिकं काल्या० श्रौ० उक्तं यथा "कर्मणां युगपद्भावस्तन्त्रम्" काल्या० श्रौ० १।७।१

"यत्र प्रधानकर्मणां युगपद्भावः सह प्रयोगः तत्रारादुपकारकाणामङ्गानां तन्त्रं सकृदनुष्ठानं भवति। न प्रतिप्रधानं पृथक् पृथक् यद्धि सकृत् कृतं बह्वनामुपकरोति तत्तन्त्रमित्युच्यते यथा बह्वनां मध्ये कृतः प्रदीपः। कृतस्तन्त्रमिति हेत्वाकाङ्क्षायां स्त्रीनृ हेत्वनाह" कर्कः। "यत्पुरुषार्थकृतत्वैकार्थसमवाय स्तुतिभ्यः" २सू०। "प्रधानकर्मणां सह प्रयोगे सति तदङ्गानां सकृदनुष्ठानसुत्तम्। तत् कुतः यत्नत्वात् सकृदप्यनुष्ठितैरारादुपकारकैरङ्गैर्बह्वनामपि प्राधानानामुपकारस्य कर्त्तुं शक्यत्वात् शक्नुवन्ति ह्यारादुपकारकाण्यि बह्वनामुपकर्तुम्, अव्यक्षमाण्यविशेषत्वात् प्रदीपवत् यथा एक एव प्रदीपो बह्वनां मध्ये कृतः सन् सर्वेषामुपकरोति एवमेतान्यपीति। यद्यप्यङ्गानां प्रत्येकमेव विनियोगस्तथापि विधिना तावदनुष्ठानं सकृदेवोपकारकं भवति यथैव हि षट्सु भावनासु विरूपदेनैव क्रयस्वभावमपेक्षमाणास्वपि सकृदाम्नाता एवाङ्गविधयः तस्यामपि प्रत्येकमङ्गानि समर्पयन्ति सत्यपि च कस्यचित् प्रधानोत्पत्तिविधिसन्निधौ प्रकरणवशेन संनिधिर्बाध्यते तथैव संहतानां प्रधानानां फलसाधनत्वात् कर्त्तृदेशकालैक्याच्च युगपत् सर्वेषनुष्ठातुं प्रारब्धेषु सकृत्कृतमेवाङ्गं सर्वचिकीर्षया कृतत्वात् सत्यमपि क्वेनचित् संनिधिं बाधित्वा प्रकरणवशेन सर्वार्थं भवति। किं च पौर्णमास्यां यजेतेति त्वयाथां युगपदनुष्ठानमवगतं पृथक् पृथक् साङ्गेष्वनुवीयमानेषु बाध्यते तस्मात् सकृदेवाङ्गानामनुष्ठानम्। तथा पुरुषार्थकृतत्वाच्च यतः सकृदनुष्ठितैरप्यङ्गैः पुरुषार्थः कृत एव भवति पुरुषार्थः पुरुषस्याभीष्टं फलम् तद्धि आग्नेयादिभिरङ्गोपकृतैः क्रियते ह्यारादुपकारकाण्यि चाङ्गान्यनेकघटादिप्रकाशकप्रदीपवत् सर्वेषां सकृदेवोपकुर्वन्ति सकृत्कृतैरपि पुरुषार्थः कृतएव भवति। तथा एकार्थसमवायश्रुतेश्चाङ्गानां तन्त्रं भवति एकोऽर्थो यस्य एकार्थं एकफलो यः प्रधानानां समवायः समूहः स एकार्थसमवायः तत्र एकार्थे समवाये एकफले

प्रधानसमूहे चङ्गानां तन्त्रश्रुतेः चङ्गानां सङ्घदनुष्ठानं श्रूयते यतः। तथाहि "ता एकविंशतिराज्ञतयोर्द्वावाधारौ पञ्च प्रयाजा द्वावाज्यभागावाग्नेयः पुरोडाशश्चरुरग्नीषोमीय उपांशुयाजोऽग्नीषोमीयः पुरोडाशोऽग्निः स्विष्टकृदिडा त्रयोऽनुयाजाः सूक्तवाकश्च शस्योर्वाक्त्वाघ यदेवादः पत्नीसंयाजेषु समष्टयजूंषि समिष्टयजुरिति तत्राग्नेयोपांशुयाजाग्नीषोमीयलक्षण एकफले प्रधानसमवाय आज्ञातोनामैकविंशतिसंख्या श्रूयते सा चाङ्गानां सङ्घत्करणपक्ष एवोपपद्यते न प्रतिप्रधानं पृथगनुष्ठानपक्षे। तस्मात् प्रधानानां सङ्घप्रयोगे सङ्घदेवाराद्युपकारिका क्रिया सन्निपत्योपकारकाणां प्रतिप्रधानमावृत्तिरिति तु प्रागुक्तमेव। अथ प्रधानानां सङ्घप्रयोगे कारणान्याह कर्कः। "फलकर्मदेशकालद्रव्यदेवतागुणसामान्ये" २सू०। यत्रैकेन वाक्येन बहूनि प्रधानकर्माणि एकफलसाधनत्वेन विधीयन्ते तत्र तेषामितरेतरापेक्षाणां साधनत्वेन विधानात् सङ्घप्रयोगः तद्यथा मित्रविन्दाश्वीराड्मित्रायुष्कामस्येति वैश्वदेवेन प्रजाकामं याजयेदिति अत्र मित्रविन्दाशब्देन समुदायवचनेन दशानां हविषां सङ्घप्रयोगः वैश्वदेवशब्देन च समुदायवचनेनाष्टानां हविषाम्। सूत्रार्थस्तु सामान्यशब्दः प्रत्येकं सम्बध्यते फलसामान्ये कर्मसामान्ये देशसामान्ये कालसामान्ये द्रव्यसामान्ये देवतागुणयोः सामान्य इति एकवाक्यैकफलसाधनत्वेन विधानेऽपि फलादिसामान्ये सत्येव प्रधानानां सङ्घप्रयोगो भवति फलं स्वर्गादि कर्म पञ्चप्रयाजता त्रयनुयाजतेत्यादि। देशः समप्राचीनप्रवणादिः। कालः पूर्वाह्णापराह्णादिः। द्रव्यं दक्षिणाद्रव्यम् न तु हविर्द्रव्यम् यतेकेषु प्रधानकर्मसु तद्भेदस्यावश्यम्भावात् देवता प्रजापतीन्द्रादिः। तद्गुण उपांशुत्वान्याज्यत्वादिः तस्मिन् सति प्रधानमपि सङ्घैव भवति न पृथक् कर्कः "तद्भेदे भेदः" ३सू०। तेषां फलादीनां भेदस्तद्भेदः तद्भेदे तेषां फलादीनां सङ्घप्रयोगकारणानां भेदे सति प्रधानानां प्रयोगभेदो भवति तत्र प्रयोगवचनभेदान्मित्रविन्दाप्रीतिकामाग्नेययोर्न सङ्घप्रयोगः फलभेदाच्च श्रीकामराड्काममित्रकामायुष्काममित्रविन्दानां पृथक् प्रयोगः। कर्मभेदेऽपि प्रयोगभेदो भवति तद्यथा कस्यचित् पञ्चप्रयाजता कस्यचित्त्रयप्रयाजता यथा च क्रौडिनीया महाहविषोस्तन्त्रसङ्घत्वे इतरेतरस्य विगुणत्वं भवति। देशभेदेऽपि तन्त्रभेदो भवति यथा वरुणप्रघासेषु माहेन्द्याः क्रौडिनीमहाहविषोश्च क्रौडिन्याः समदेशः महाहविषस्तु प्राचीनप्रवणः। कालभेदेऽपि सङ्घप्रयोगो न भवति यथा दर्शस्य पौर्णमासस्य च "पौर्णमास्यां पौर्णमास्या यजेतामावास्यायाममावास्यया यजेतेति वचनेन कालभेदेन तयोर्विधानात्। यथा वा आग्नीध्रीयवतीशालपनीययोः पूर्वाह्णमध्याह्नरूपकालभेदात्तन्त्रभेदः। दक्षिणाद्रव्यैक्ये सति सङ्घप्रयोगो यथा राजसूये त्रयाणां त्रिषंयुक्तानां येषां मते च त्रिषंयुक्तानां त्रयाणामन्येकस्मिन्नेवाहन्यनुष्ठानम् तेषां दक्षिणाद्रव्यभेदेन त्रयाणां त्रयाणां पृथगनुष्ठानम् न सर्वेषां "सङ्घप्रयोगः दक्षिणाभेदश्च त्रयाणां वामनः त्रयाणां श्यामः त्रयाणां बभ्रुरिति तत्र दक्षिणाभेदादानतिभेदः तद्भेदात्तत्कृतस्य स्वरूपस्य भेदः वामनानतैर्हि पूर्वं कर्म कर्त्तव्यम् श्यामानतैरुत्तरम् तन्त्रत्वे ह्युभाभ्यामानता उभयं कुर्युः। तत्र दक्षिणाद्रव्यस्था गम्यमाना बाध्येत। तस्मात् प्रतिदक्षिणं तन्त्रभेदः। अत्र एकवाक्यैकफलार्थमेव विधाने देशकालकर्मैक्ये सत्यपि दक्षिणाभेदात्तन्त्रभेदः। देवताया देवतागुणस्य च सामान्ये सति उच्चारणमपि तस्या देवताया आवाहनत्यागादौ तन्त्रेण भवति यथा सप्तदशप्राजापत्येषु राजसूये प्रजापतेर्देवतायाः समानत्वादुपांशुत्वस्य च समानत्वादनुवचनादौ तन्त्रेणोच्चारणं भवति यागोऽपि तन्त्रेणैव भवति। तथा च प्राजापत्यात् प्रकृत्य श्रूयते एकानुवाक्या भवन्त्येकयाज्यैकदेवत्या हि प्राजापत्या इत्युपांशुत्वाच्च छागानां हविषोऽनूबूधोति अत्रानुवाक्याद्येकत्वे एकदेवतत्वं हेतुं ब्रुवन्ती एकदेवताकानां सिद्धं तन्त्रोच्चारणं दर्शयति। दर्शपूर्णमासयोरेव द्रव्यभेदेऽपि दधः पयसश्च देवताया इन्द्रस्य तद्गुणस्य चाग्नाव्यत्वस्य समानत्वात्तन्त्रेणैव याग उच्चारणं भवति। देवतायां समानायामपि देवतागुणयोरुपांशुत्वादेर्भेदे सति सङ्घोच्चारणं न भवति यथा प्रकृतावेवोपांशुयाजाग्नीषोमयोः पुरोडाशाग्नीषोमयोश्च। इह देवतातद्गुणयोः सामान्ये यागस्य तन्त्रेणानुष्ठानमुच्यते अत्र सिद्धमेव देवतागुणसामान्ये तन्त्रेण यागानुष्ठानमुपजीव्य भेदो यागस्य भेदेनानुष्ठानपूर्वं निषिद्धः न द्रव्यभेदे गुणयोगादिति वा तस्य इति न पुनरुक्तिदोषादि।" कर्कः।

तल्लक्षणविषयादिकं जैमिनिना एकदशाध्याये न्यरूपि तत एवागन्तव्यं संक्षेपतश्च जैमिनिशब्दे माधवेनोक्तं २।४१ पृ० दर्शितम्। तत्र शास्त्रे "आसुरिरपि पञ्चभिर्व्याय तेन बहुधा कृतं तन्त्रम्" "सप्तार्थां किञ्च येऽर्थास्तेऽर्थाः षष्टितन्त्रस्य" सा० का०। २२ श्लोकव्यवे। "तन्त्रैः पञ्चभिरेतद्धि कारं मनोरमं शास्त्रम्" पञ्चत०। तदवयवाश्च भिन्नभेदभिन्नप्राभाकरीयलघ्वप्रभाग्रपरीक्षितकारकाख्याः। तन्त्रं वेत्ति ठक्। तान्त्रिक तन्त्रवेत्तरि त्रि०। तन्त्रं विच्छितः ठक्। तान्त्रिक तन्त्रविच्छिते त्रि० स्त्रियां ङीप् "वैदिकी तान्त्रिकी सन्ध्या यथानुक्रमयोगत" तन्त्रसा० तान्त्रिको दीक्षा २२शे च खतन्त्रः परतन्त्रः।

**तन्त्रक** त्रि० तन्त्रात् अचिराहृतम् कन्। अभिनवे वस्त्रे अमरः पटे पु० शास्त्रां स्त्री इति भेदः। "वसानस्तन्त्रकनिभे सर्वाङ्गीणे तरत्यचौ" भट्टिः।

**तन्त्रकाष्ठ** न० तन्त्रस्थं काष्ठम्। तन्त्रस्थे काष्ठभेदे (ताँतेर काटि) प्रभतौ शिक्षा०।

**तन्त्रता** स्त्री तन्त्रस्य भावः तल्। अनेकोद्देशेन सकृत्प्रवृत्तौ यथा तर्पणपूजनाद्यनेककर्मोद्देशेन सकृत्स्नाने कृते सर्वकर्माङ्गस्नानसिद्धिः। तद्विषयोदाहरणं प्रा० त०उक्तं यथा "आग्नेयाष्टकपालेन्द्रध्यैन्द्रपयोयागानां त्रयाणामाग्नेयाष्टकपालोपांशुयागाग्नीषोमीयैकादशकपालयागानां त्रयाणां सकृत् सकृदनुष्ठितेन प्रयाजाद्यङ्गोपकारः सिद्ध्यति तथा नानाप्रायश्चित्तवधसत्त्वे सर्वोद्देशेन सकृत् प्रायश्चित्ते कृते सर्वप्रायश्चित्तजन्यपापनाशः। तन्त्रतावाहेतुश्च अदृष्टार्थैकजातीयकर्मणः कालदेश कर्त्रादीनां प्रयोगानुबन्धिवैधर्महेतुभूतानामभेदे उद्देश्य विशेषापेक्षः" इति। एवञ्च "स्नातोऽधिकारी भवति दैवे पैत्रे च कर्मणि। पवित्राणां तथा जाप्ये दाने च विधिदर्शिते" इति विष्णूक्तम् "अस्नात्वा नाचरेत् कर्म जपहोमादि किञ्चनेति" दक्षोक्तञ्च, क्रियाङ्गस्नानं कर्त्रसंस्कारद्वारैव तद्दिनकर्त्तव्याग्नेयकर्मार्थमेकमेव न तु प्रतिकर्म कर्त्तव्यम्" इति रघुनन्दनः अधिकं तन्त्रशब्दे द्रष्टव्यम्।

**तन्त्रधारक** पु० तन्त्रं कर्मज्ञापकपद्धतिग्रन्थं धारयति धारि-ण्वुल् ह्रस्व०। "एकस्तत्र नियुक्तः स्यादपरस्तन्त्रधारकः। तृतीयं प्रश्नकं ब्रूयात् ततः कर्म समाचरेत्" स्मृत्यपरिष्टोक्ते कर्मस्वरूपज्ञापकपुस्तकवाचके। "तन्त्रधारकः पुस्तकधारकः" स्म० त० रघुनन्दनः।

**तन्त्रयुक्ति** स्त्री तन्त्रोक्ता आयुर्वेदशास्त्रोक्ता युक्तिः। सुश्रुतोक्ते हारिलिङ्गदृष्टे युक्तिभेदे। तानि यथा "अथातस्तन्त्रयुक्तिनामाध्यायं व्याख्यास्यामः। हारिलिङ्गतन्त्रयुक्तयो भवन्ति। तद्यथा। अधिकरणं योगः पदार्थो हेत्वर्थ उद्देशो निर्देश उपदेशः प्रदेशोऽतिदेशोऽपवर्गो वाक्यशेषोऽर्थापत्तिर्विपर्ययः प्रसङ्गएकान्तोऽनेकान्तः पूर्वपक्षो निर्णयोऽनुमतं विधानमनागतावेक्षणम् अतिक्रान्तावेक्षणम्। संशयो व्याख्यानं प्रसंख्या उदाहरणं निर्वचनं निदर्शनं नियोगो विकल्पः समुच्चय इत्यासां तन्त्रयुक्तीनां किं प्रयोजनमित्युच्यते। वाक्ययोजनमर्थयोजनञ्च। भवन्ति चात्र श्लोकाः। असद्ग्रहादिप्रयुक्तानां वाक्यानां प्रतिषेधनम्। स्ववाक्यानां सिद्धिरपि क्रियते तन्त्रयुक्तितः। व्याख्या नोक्ताश्च ये ह्यर्था लीना ये चाप्यनिर्मलाः। लेशोक्ता ये क्वचित्तन्त्रे तेषाञ्चापि प्रसाधनम्। यथाम्बुजवनस्यार्कः प्रदीपो वेश्मनो यथा। प्रबोधस्य प्रकाश्यार्थस्तथा तन्त्रस्य युक्तयः। यमर्थमधिकृत्योच्यते तदधिकरणं यथा रसं दोषं वा। येन वाक्यं युज्यते स योगः २। यथा तैलं पिबेज्जास्तवच्छिन्नस्विच्छिंशाभयाष्टकपिप्पलीभिः। सिद्धं बलाभ्यान्तु सदेवदारु हितन्तु नित्यङ्कलगण्डरोगी"। सिद्धं पिबेदिति प्रथमं वक्तव्ये तृतीयपादे सिद्धं प्रयुक्तमेवं दूरस्थानामपि पदानामेकीकरणं योगः। योऽर्थोऽभिहितः सूत्रे पदे वा स पदार्थः ३। अपरिमिताश्च पदार्थाः। यथा क्षेत्रक्षेदाङ्गनेषु निर्दिष्टेषु द्वयोस्त्रयाणामर्थानामुपपत्तिर्ज्ञायते तत्र योऽर्थः पूर्वापरयोगसिद्धो भवति स हेत्वर्थो यथा। वेदोत्पत्तिं व्याख्यास्याम इत्युक्ते सन्दिह्यते बुद्धिः। कतमस्य वेदस्यायमुत्पत्तिं विवक्षुरिति। ऋग्वेदादयस्त्रयोवेदास्तत्र पूर्वापरयोगमुपलभ्य विद्-विचारणे विन्दतेर्यत्नेन धात्वोरनेकार्थयोः प्रयोग इति पश्चात्प्रतिपत्तिर्भवति। आर्युवेदोत्पत्तिमयं विवक्षुरित्येवं पदार्थः। यदन्यदुक्तमन्यार्थसाधकं भवति स हेत्वर्थः४। यथा मृत्पिण्डोऽद्भिः प्रक्लिद्यते यथा मापदुग्धप्रभृतिभिर्द्रव्यैः प्रक्लिद्यत इति। समासकथनमुद्देशः५। यथा शल्यमिति। विस्तरवचनं निर्देशः६। यथा। शारीरमागन्तुकं चेति। एवमित्युपदेशः७। यथा "तथा न जाग्रद्व्याहारौ दिवा स्वप्नञ्च वर्जयेत्" अनेन कारणेनेत्युपदेशः। यथोपदिश्यते मधुरेण श्लेष्माभिवर्द्धत इति। प्रकृतस्यातिक्रान्तेन साधनं प्रदेशः८। यथा देवदत्तस्थानेन शब्द-

सङ्कृतं तस्मादुपसदनस्याप्ययनेनोद्धरिष्यतीति। प्रकृतस्थानागतेन साधनमतिदेशः६। यथानेनास्य वायुरूर्ध्वमुपनिष्ठते तेनोदावर्त्तः स्यादिति। अभिव्याप्यापकर्षणमपवर्गः१०। यथा खेद्या विषापसृष्टा अन्यत्र कोटविगादिति। येन पदेनानुक्तेन वाक्यं समाप्यते स वाक्यशेषः११। यथा शिरःपाणिपादपार्श्वपृष्ठोदरोरसामिलुप्ते पुरुषवदुपमपि मन्यते पुरुष एवोक्त इति। यदकीर्त्तितमर्थादापद्यते सार्थापत्तिः१२। यथौदनं भक्षयेत्युक्तेऽर्थादापन्नं भवति नायं पिपासुर्यवागूमिति। यदुपलभ्याभिहितं तस्य प्रातिलोम्यं विपर्ययः१३। यथा जघनाल्लग्नाधोरवो दुचिकित्स्या इत्युक्ते विपरीतं श्लक्ष्णते डहादयः सुचिकित्स्या इति। प्रकरणान्तरेण समापनं प्रसङ्गः१४। यथा प्रकारान्तरितोपसर्जनोऽसङ्गः समाप्यते स प्रसङ्गः महाभूतशरीरसमवायः पुरुषस्तस्मिन् क्रिया सोऽधिष्ठानमिति वेदोत्पत्तावभिधाय भूतविद्यायां पुनरुक्तं यतोऽभिहितं पञ्चमहाभूतशरीरसमवायः पुरुष इति स खल्वेवं कर्मपुरुषचिकित्सावामधिकृतः सर्वत्र। यदवधारणेणोच्यते स एकान्तः१५।

"यथा लवडुविरेचयति मदनफलं वामयतीति। क्वचित्तथा क्वचिदन्यथेति यः सोऽनेकान्तः१६। यथा केचिदाचार्या ब्रुवते द्रव्यं प्रधानं केचिद्रसं केचिद्वीर्यं केचिद्विपाकमिति। आक्षेपपूर्वकः प्रश्नः पूर्वपक्षः१७ यथा कफवातभिभिन्नाशयत्वारः प्रमेहा असाध्या भवन्तीति। तत्रोत्तरं निर्णयः१८। यथा शरीरं प्रपीड्य पश्चादधोगत्वा वस्तिमेदोमज्जानुविद्धं मूत्रं प्रस्रवति वात एवमसाध्या वातजा इति। तथाचोक्तम् "कृत्स्नं शरीरं निष्पीड्य मेदोमज्जवसायुतः। अधः प्रकुप्यते वायुस्तेनासाध्यास्तु वातजाः"। परमतमप्रतिषिद्धमनुमतम्१९। यथान्यो ब्रूयाद्यथा रथा इति। प्रकरणानुपूर्व्याभिहितं विधानम्२०। यथा सक्थिमर्म्मण्येकादशप्रकरणानुपूर्व्याभिहितानि। एवं वक्ष्यतीत्यनागतावेक्षणम्२१। यथा श्लोकस्थाने ब्रूयाच्चिकित्सितेषु वक्ष्यामीति। यत्पूर्वमुक्तं तदतिक्रान्तावेक्षणम्२२। यथा चिकित्सितेषु ब्रूयात् श्लोकस्थाने यदीरितमिति। उभयहेतुदर्शनं संशयः२३। यथा तलहृदयाभिघातः प्राणहरः पार्ष्णिपादक्लेदनं प्राणहरमिति। तत्रातिशयोपवर्णनं व्याख्यानम्२४। यत्रेह पञ्चविंशतिकः पुरुषोऽत्र व्याख्यायते। अन्येष्वायुर्वेदतन्त्रेषु भूतादिपञ्चकारब्धचिना। अन्यत्राक्षासामान्या सम्संज्ञा२५। यथा मिथुनमिति मधुसर्पिषोर्यं इयम्। लोके प्रथितसदाहरणम्२६। यथोष्णमभ्याक्षीतमनुधावति। निश्चितं वचनं निर्वचनम्२७। यथायुर्विद्यतेऽनेनेन वायुर्विन्दतीत्यायुर्वेदः। इत्यनेनार्थः प्रसाध्यते यत्र तद्विदर्शनम्२८। यथाग्निर्वायुना संहितः कोष्ठे वृद्धिं गच्छति तथा वातपित्तकफलोऽपदग्ध इति। इदमेव कर्त्तव्यमिति नियोगः२९। यथा पथ्यमेव भोक्ष्यसीति। इदं वेति विकल्पः३०। यथा रसौदनः सहता यवागूस्त्वा इदश्चेदहेति समुच्चयः३१। यथा मांसवर्गे ऐणरौरवशाशतित्तिरिशारङ्गाः प्रधानमिति। यदनिर्दिष्टं बुद्धिमता तदूह्यम्३२। यथाभिहितमन्नपानविधौ चतुर्विधमन्नमुपदिश्यते। भक्ष्यं भोज्यं लेह्यं पेयमेवञ्चतुर्विधे वक्ष्यमाणे द्विविधमतिहितमलोहितमिति। अन्नपाने विशिष्य द्वयोर्ग्रहणे कृते चतुर्णामपि ग्रहणं भवति किञ्चान्यत्। अन्नेन भक्ष्यमवरुद्धं तुल्यसाधर्म्म्यात्। पेयेन लेह्यं द्रवसाधर्म्म्यात्। चतुर्विधस्याहारः प्रायेण द्विविधः प्रसिद्ध इति। द्वात्रिंशद्युक्तयो हीतास्तन्त्रस्यारम्भणे। मया सम्यग्विनिर्दिष्टाः शब्दन्यायार्थसंयुताः। योक्ष्यते विधिवद्देहे दीपोभूतास्तु बुद्धिमान्। स पूजार्हो भिषक् श्रेष्ठ इति धन्वन्तरेर्मतम्।"

**तन्त्रवाय(प)** पु० तन्त्यते तन्त्र-कर्म्मणि घञ् तन्त्रं सूत्रं वयति वपति वा वे-पय-वा अण् उप० स०। (ताँति) ख्याते ङङ्गीर्षजातिभेदे स्त्रियां जातित्वात् ङीष् योपधस्य च टाप् इति भेदः। तदुत्पत्तिः पराशरपद्धतावुक्ता यथा "ताम्बकृष्णाङ्गकाख्यौ ऋषिकारश्च जायते। ऋषिकारात् ताम्बकृष्णां ऋषिबन्धोऽत्र जायते ऋषिबन्धानृषिकाख्यौ तन्त्रवायाय जज्ञिरे"। मनूक्तस्त्वाङ्गिरः। आधारे घञ् हृत०। २तन्त्रे (ताँत) पुंन० शब्दरत्ना०।

**तन्त्रहोम** पु० तन्त्रेण होमः। परिसमूहनबर्हिरास्तरणयुक्ते होमे छिन्नहोमशब्दे दृश्यम्। तन्त्रमन्त्रत्र। "अङ्गहोमसमित्तन्त्रं शोधनन्याख्येषु कर्मसु" छन्दोगप०

**तन्त्रा** स्त्री तनि-भावे ष्ट्रन्। ऐषच्चिद्रायां तन्द्रायां हिरूपको०।

**तन्त्रायिन्** पु० तन्त्रे कालचक्रे एतिर्गच्छति णिनि उत०। कालचक्रगामिनि सूर्य्यादौ। "तन्त्रायिणे नमोद्यावापृथिवीभ्याम्" यजु० २८।१२ तन्यतेऽनेन तन्त्रं षट्रचनाय शलाकायुक्तं यन्त्रभेदः तद्वत् नभसि कालचक्रमपि तन्त्रमुच्यते" वेददी०।

**तन्त्रिका** स्त्री तन्त्रयते तन्त्रि-ई ततः स्वार्थे क पृषो० ह्रस्वः। गुडूच्याम्। अमरः।

**तन्त्रि** स्त्री तन्त्रि-इ। १तन्त्रायाम् २तन्द्रायां च "व्यपेततन्त्रि र्धर्मात्मा भक्त्या सत्समयाश्रितः" भा० आनु० १।४२अ०।

**तन्त्रित** त्रि० तन्त्रा तन्द्रा जाताऽस्य तार० इतच्। आलस्ययुक्ते "धार्मिको नित्यभक्तश्च पितुर्नित्यमतन्त्रितः" भा० आ० १२७।१२। "गव्यं दीर्घेण कालेन युक्तेनातन्त्रितेन च" भा० आनु० १६२ अ०। "अतन्त्रिता सा स्वयमेव दक्षकात्" कुमा०।

**तन्त्रिपाल** पु० सहदेवे तन्त्रिपालशब्दे दृश्यम्।

**तन्त्रिपालक** पु० जयद्रथराजे शब्दम०।

**तन्त्री** स्त्री तन्त्रि-ई। १वीणायुधे २गुडूच्यां ३देहसिरायां मेदि०। "स ददर्श क्रमांसस्य कृतन्त्रीं विततां सुनिः" भा०शा०१३अ०।४नदीभेदे ५नाड्यां ६युवतीभेदे शब्दर०। अस्य ङीबन्तत्वाभावेन बहुव्रीहौ स्वाङ्गे नाडीतन्त्र्योः पा० न कप् तदभावेऽपि न ह्रस्वः। बहुतन्त्रीपीवा बहुतन्त्रीधमनी"त्रि०कौ०। स्वाङ्ग इत्यु क्तेः बहुतन्त्रीका वीणेतादौ कप्। "सप्ततन्त्री प्रथिता चैव वीणा" भा० व० १३अ०। अस्वाङ्गत्वेऽपि आर्षत्वात् न कप्। ७रज्जौ "न लङ्घयेत् वत्सतन्त्रीं मनुः "यस्य वाचा प्रजाः सर्वा गावस्तन्त्र्येव यन्त्रिताः" भाग० १।१५।८। ८वीणायाञ्च "कण्डूयमानः सततं लोकानटति चञ्चलः। बहुयानो नरेन्द्राणां तन्त्रीवैराणि चैवह" हरिवं०५७अ०।

**तन्त्र्य** न० इत०। तन्त्रनाम्नि ततोगहा० ङ। तन्त्र्यपोय तन्त्रवादो त्रि०।

**तन्वी(ग्वी)** अव्य० तन-वा वी। चर्यादिगणे तन्वीत्यत्र पाठान्तरम् पृषो०। स्वीकारे अभ्युपगमे। गतिसंज्ञकत्वात् सर्वासे तन्वी(ग्वी)त्यत्र।

**तन्द्रा** स्त्री तन्द्रि-भावे अ। १दैवनिद्रायाम् २आलस्ये च हेमच०। "तमोवातकफात्तन्द्रा" इति वैद्यकम् तच्चयथा "इन्द्रियार्थेष्वसंवित्तिर्गौरवं जृम्भणं क्लमः। निद्रार्त्तस्येव यस्येहा तस्य तन्द्रां विनिर्दिशेत्" माधवः "शुचिर्शुश्रूषोद्यक्तस्तन्द्रानिद्राविवर्जितः" "विषयेन्द्रियसंयोगस्तन्द्रालस्यविवर्जनम्" याज्ञ०। निद्रायां प्रवृत्तस्य क्लमाभावः। तन्द्रायां तु प्रवृत्तस्यापि क्लम इत्यनयोर्भेदः। तन्द्रा च दुःखस्य मार्या निद्रायाः कन्या प्रीतेर्भगिनी यथाह "निद्राकन्या च तन्द्रा सा प्रीतिस्वस्रा दुःखप्रिये। याभ्यां व्याप्तं जगत्सर्वम्" शब्दार्थचि० धृतवाक्यम् ३षड्ङ्गिछन्दसि न०। "तन्द्रं छन्दः" यजु० १५।५। तद्रि सादे मोहे च तन्द्रति सीदति स्थानसंकोचेनेति तन्द्र ञ्चेषो "षड्ङ्गिर्वै तन्द्रं छन्दः" इति श्रुतेः" वेददी०

**तन्द्रयु** त्रि० तन्द्रामालस्यं याति या-क्विप् पृषो०। आलस्ययुक्ते "मो षु ब्रह्मेव तन्द्रयुर्भुवो वाजानाम्" ऋ० ८।९२।३० "तन्द्रयुरालस्ययुक्तः" भा०

**तन्द्रवाप** पु० तन्द्रवाप+पृषो०। तन्द्रवापे शब्दार्थचि०।

**तन्द्रालु** त्रि० सौ० तन्द्रि-आलुच्। १दैवनिद्रायुक्ते २आलस्ययुक्ते च जटाधरः।

**तन्द्रि** स्त्री सौ० तन्दि-क्विन्। १दैवनिद्रायाम् २आलस्ये च उणादिको०"विभक्तन्तक्तन्दिवमस्तन्द्रिषा"किरा०।तन्द्रि-ई तन्द्रीत्यपि तत्रार्थे अयं न ङीबन्तस्तेन न ह्रस्वोपः। तन्द्रीच अल्पत्वमादिना सर्वाङ्गेन्द्रियाप्रभुत्वम्। सर्वाङ्गेन्द्रियविमीलनापादकत्वात् तथात्वम्। "क्षुधा च तन्द्रा च विपक्षतां गतः" रामा० अयो० ८० अ०। "गततन्द्रीक्लमो वापि जपेनैतौ महारथौ" २८८अ०। जिततन्द्रीः गततन्द्रीः इत्यादौ ङीबन्तत्वाभावान्न ह्रस्वः न वा कप्।

**तन्द्रिज** पु० यदुवंश्ये कनवकन्यपुत्रभेदे "तन्द्रिजस्तन्द्रिपालश्च सुतौ कनवकस्य तु" हरिवं ३५ अ०।

**तन्द्रित** त्रि० तन्द्रा जाताऽस्य तार० इतच्। जातालस्ये "य इदं धारयिष्यन्ति धर्मशास्त्रमतन्द्रिताः" "अतन्द्रिता सा स्वयमेव दक्षकात्" कुमा०। अतन्त्रितेति पाठान्तरम्।

**तन्द्रिपाल** पु० यदुवंश्ये कनवकन्यपुत्रभेदे तन्द्रिजशब्दे दृश्यम्

**तन्त्रि** स्त्री तन्त्रयति नी-वा० डि। (चाकुल्या) चक्रकुल्यायां रत्नमाला। तन्त्रिरित्यपि पाठः। पृषो०।

**तन्वी** स्त्री तनुः क्रिया स्त्री गुणवचनोदन्तत्वात् वा ङीष्। १क्रशाङ्ग्यां स्त्रियां तनुशब्दे उदा० "अप्रभूतमतनीयसि तन्वी" माघः। २शालपर्ण्यां (शालपान) राजनि०

**तन्मय** त्रि० तदात्मकम् तद्+मयट्। तदात्मके "तन्मयं विद्धि मां विप्र! धृतोऽहं यैर्मया च ते" हरिवं १६९ अ०।

**तन्मात्र** न० तदेव एवार्थे मात्रच् सा मात्रा यस्य वा। सांख्यादिसिद्धेषु शब्दादिषु तत्त्वेषां भूतादिविशेषोऽस्ति। यथोक्तं विष्णुपुराणे "तस्मिं तस्मिंस्तु तन्मात्रास्तेन तन्मात्रता स्मृता। तन्मात्राण्यविशेषाणि अविशेषास्ततो हि ते। न शान्ता नापि घोरास्ते न मूढाश्चाविशेषिणः" इति। "तन्मात्राण्यविशेषास्तेभ्यो भूतानि पञ्च पञ्चभ्यः। एते स्मृता विशेषाः शान्ता घोराश्च मूढाश्च" सा० का०।

तन्यतु पु० तनोति शब्दं तनो वा तन-यतुच्। १वायौ २रात्रौ च उज्ज्व०। स्तन-शब्दे वा० यतुच् सलोपश्च। ३गर्जिते ४अग्नौ च माधवः। "न वेपसा न तन्यतेन्द्रम्" ऋ०१।८०।१२ भाष्ये उक्तैव व्युत्पत्तिः। तन्यता गर्जितेन छान्दस ईत आच्। "आविष्कृणोमि तन्यतुर्दृष्टिम्" ह० उ०। "तन्यतुः पर्जन्यः" भा०।

तन्यु त्रि० तन+वा० ल्यु न अनादेशः। विस्तृते "रजांसि चित्रा वि चरन्ति तन्यवः" ऋ० ९।६२।५।

तन्विन् पु० तामसमनोरपत्यभेदे। "तपोरतिरकल्माषस्तन्वी धन्वी परन्तपः" हरिवं० ७ अ०।

तप उपतापे सक०ऐश्वर्ये अक०दि०आ०अनिट्। तप्यते अतप्त। तेपे तप्ता तप्स्यते तप्तः तप्तिः।

अव-अधस्तापे। अवतप्तेनकुलस्थितम्" सि० कौ०।

आ+सम्यक्तापे। आतप्तजाम्बूनदभूषिताङ्गः" हरिवं ६अ०

अनु+सन्ततापे अनुशोचने च। "अनुतप्ये भृशं तात! तव घोरेण कर्मणा" भा० व० १३७० श्लो०। "अन्वतप्यत धर्मात्मा पुत्रं संचिन्त्य तापसम्" रामा० अयो० ४ अ०। "वनं प्रस्थाप्य दुष्टात्मा नान्वतप्यत दुर्मतिः" भा०व०२७अ०

तप दाहे चु० उभ० सक० सेट्। तपयति-ते अतीतपत्-त। "संप्रत्ययोन्यस्थितिरेव हेतुः करान्हिमांशोरपि तापयन्ति" उद्भटः। "न हि तापयितुं शक्यं सागराम्भस्तृणोल्कया" हितो० "कोऽत्र भूमिवलये जनान् सुधा तापयन् सुचिरमेति सम्मदम्" माघः।

अव+अधोभागे तापने "अथातताप पृथिवीं पृषा दिवसंक्षये। जगामास्तं सहस्रांशुः" भा० उ० १८० अ०।

तप दाहे भ्वा० उभ० सक० सेट्। ज्वलने निरु० तपति-ते अतापीत्-अतपीत् अतप्त। ततापे तेपे तपिष्यति ते "वर्षते तपते कोऽग्नो ज्वलते तेजसा च कः" भा० अनु० १४ अ०। "त्वमेकैकस्तपसे जातवेदाः" भा० आ० २२२ अ० "तपाम्यहमहं वर्षं निगृह्णाम्युत्सृजामि च" गीता "तमस्तपति घर्मांशौ" भक०। तपःकर्मकत्वेऽस्य कर्त्र्यपि यक् तङ् च तप्यते तपस्तापसः।

अभि+पर्य्यालोचने "पृथिवीमन्तरिक्षं दिवं ताभ्यो काममभ्यतपत्" ऐत० ब्रा० अभ्यतपत् पर्य्यालोचितवान्।

उद्+दीप्तौ अक० आत्म० स्वाङ्गकर्मकत्वे सक० आत्म० "उत्तपते दीप्यते इत्यर्थः" सि० कौ०। पार्थिवस्तपते। स्वाङ्गेत्युक्तेः प० मैत्रस्य पार्थिवस्तपति" अन्यकर्मणि तु प०। उत्तपति सुवर्णं विलापयतीत्यर्थः" सि० कौ०।

"तीव्रसन्तपमानोऽयमशक्यः सोढुमातपः" भट्टिः। "करणं कुसुमेषुरुत्तपति यद्विशिखः" माघः।

उप+पीडाजन्यतापे "आहिताग्निश्चेदुपतपेत्" आश्व० श्रौ० ४।१।१। उपतपेत् व्याधिभिरुत्पीडयेत्यर्थः।

नि+नितरां तापे। "तदाङ्गनिशोचति नितपति वर्षिष्यति वा" छा० उ०।

निस्+निःशेषेण तापे पौनः पुन्य न तापे यत्वम्। "दग्धैकदेशा बहवो निष्टप्ताश्च तथापरे" भा० आ० २२६ अ०। निष्टपति सुवर्णम् आसेवने तु नष्ट त्वं निस्तपति सुवर्णं सुवर्णकारः। "यस्तु सूर्य्यं च निष्टप्तं गाङ्गेयं पिबते जलम्" भा० आनु० २२६ अ०। यत्वे उभयतश्च षत्वम्।

प्र+प्रकर्षेण ताप विक्रमहेतुके तापे च "भासस्तपोधाः प्रतपन्ति विष्णो!" गीता "सूर्य्यः प्रतपतां श्रेष्ठः" भा० वि० ४२ श्लो० "भास्करात प्रतपिष्यतः" भा० व० १६० अ० "द्वितीयश्चैव सूर्य्यश्च युगान्ते प्रतपिष्यतः" भा० व० २२ अ०।

वि+उत्तापवत् सर्वम्। "रविर्विलपतेऽत्यर्थम्" भट्टिः दीप्यते इत्यर्थः पार्थिवं विलपते मैत्रस्य पार्थिवं विलपति सुवर्णं विलपतीत्यादि। "विलपन्नरातिम्" ऋच० १२।२।४५

सम्+सम्यक्तापे। "दत्त्वापि च धनं काले सन्तप्यन्ते परोपकारिणः" भा० शा० १६४ अ०।

तप पु० तप-अच्। १ग्रीष्मे ऋतौ शब्दार्थे च अमरः। "तपेन वर्षाः शरदा हिमागमः" माघः। "तपर्तुपूर्त्तावपिभेदसाम्भराः" नैष० "तपात्यये वारिभिरुक्षिताननैः" कुमा०। किञ्चित् कर्म्मोपपदे तापेः अच् हलश्च २तत्तापके परन्तपः भावे अप्। ३तपसि च "अङ्गकृष्टा निरशना दशपञ्चतपा इमे" हरिवं ४६ अ०।

तपःकर त्रि० तपः करोति अच् वा विसर्गस्य सः। १तपःकारके (तपसी) २मतङ्गभेदे पुंस्त्री शब्दरत्ना०। स्त्रियां जातित्वात् ङीष्।

तपःक्लेशसह त्रि० तपसः क्लेशं सहते सह-अच्। इन्द्रियसंयमादिकारके तपस्विनि अमरः।

तपःस्थली स्त्री हृत०। १काश्यां त्रिका०। २तपस्यास्थलमात्रे च

तपती स्त्री। सूर्य्यस्य कन्यायां संवरणपत्न्यां भार्य्यायां कुरुराजमातरि। "ततः संवरणात् सौरो तपती सुषुवे कुरुम्" भा० आ० ९३ अ०। "संवरणः खलु वैवस्वतीं तपतीं नामोपयेमे तस्यामस्य जज्ञे कुरुः" ९५अ०। १७१ अ०। तत्कथा "अर्जुन उवाच तापत्य इति यद्वाक्यसङ्कथा-

मसि मामिह। तदहं श्रोतुमिच्छामि तापत्यार्थविनिश्चयम्। तपतो नाम का चेयं तापत्या यत्कृते वयम्। कौन्तेया हि वयं साधो! तत्त्वमिच्छामि वेदितुम्। वैशम्पायन उवाच। एवमुक्तः स गन्धर्वः कुन्तीपुत्रं धनञ्जयम्। विश्रुतां त्रिषु लोकेषु श्रावयामास वै कथाम्। गन्धर्व उवाच। शृणु ते कथयिष्यामि कथामेतां मनोरमाम्। यथावदखिलां पार्थ! सर्वबुद्धिमतांवर!। उक्तवानस्मि येन त्वां तापत्या इति यद्वचः"।

"य एष दिवि विष्णुर्वै नाकं व्याप्नोति तेजसा। एतस्य तपती नाम बभूव सदृशी सुता। विवस्वतो वै देवस्य सावित्यवरजा विभोः। विश्रुता त्रिषु लोकेषु तपती तपसा युता। न देवी नासुरी चैव न यक्षी न च राक्षसी। नाप्सरा न च गन्धर्वी तथा रूपेण काचन। सुविभक्तांगवदना सुकेशी रक्तितायतलोचना। सदाचारा चैव साध्वी च सुवेषा चैव भामिनी। न तस्याः सदृशं किञ्चित् त्रिषु लोकेषु भारत!। भर्तारं सविता मेने रूपशीलगुणश्रुतैः। तस्मात्प्रयोग्यं पप्रच्छ देवीं दुहितरन्तु ताम्। नोपलेभे ततः शान्तिं तस्मादानं विचिन्वयन्। अथर्क्षपुत्रः कौन्तेय! कुरूणामृषभो बली। सूर्यमाराधयामास ऋषः संवरणस्तदा। अर्घ्यमाल्योपहारादीर्गन्धैश्चैव नियतः शुचिः। नियमैरुपवासैश्च तपोभिर्विविधैरपि। शुश्रूषुरनहंवादी शुचिः पौरवनन्दनः। अंशुमन्तं सदृशनं पूजयामास भक्तिमान्। ततः प्रीतस्तं धर्मज्ञं रूपेण सदृशं भुवि। तपत्याः सदृशं मेने सूर्यः संवरणं पतिम्। दातुमैच्छत्ततः कन्यां तस्मै संवरणाय ताम्। ऋक्षोत्तमाय कौरव्य! विश्रुताभिजनाय च"। भा० आ० १७१ अ०।

**तपन** पु० तप-ल्यु। १सूर्ये २मदारतरौ। ३अग्न्यादौदाहयुक्ते नरकभेदे ४पीलौ च हेम०। ५अर्कवृक्षे ६ऋतुद्वाग्निमन्थवृक्षे ७सूर्यकान्तामणौ च राजनि०। "पश्यमः पश्यतपसां तपनो जातवेदसाम्" माघः। स्त्रीणां यौवने दशवर्षजातावस्थाभेदे म० शा० द०। "यौवने सप्तवर्षासामष्टाविंशतिसङ्ख्यकाः। अवस्थाराः स्मृत्युपक्रमे "विश्रुतं तपनं नीचम्" इत्यादिना विभज्य "तपनं त्रिंशद्विच्छेदे शरावेशोऽथ चेष्टितमिति" लक्षितम्। ६अग्निभेदे पु० "ते जातवेदसः सर्वे कल्मषाः कुलमस्तथा। दहनः शोषणश्चैव तपनश्च महाबलः। स्वाहाकारश्च विख्याताः पञ्च पञ्चयः" हरिवं १८० अ०। १०शिवे पु०। "यज्ञवाहाय दान्ताय तपाय तपनाय च" भा० शा० २८६अ० शिवस्तुतिः भावे ल्युट्। ११तापेन० धरणिः।

**तपच्छद** पु० तपनप्रियः छदोऽस्य। दमनकवृक्षे राजनि०

**तपनतनय** पु० ६त०। १यमे २यमुनायां, ३शमीवृक्षे च स्त्री राजनि०। ४कर्णे ५सुग्रीवे च पु० तपनस्तादवोऽस्यत्र।

**तपनमणि** पु० तपनतेजस्को मणिः। सूर्यकान्तमणौ राजनि०

**तपनात्मजा** स्त्री ६त०। १गोदावरीनद्यां हेम०। २यमुनायां च। ३यमे ४कर्णे ५सुग्रीवे च पु०। [नद्यां हेमच०।

**तपनी** स्त्री तप्यते पापमनया तप-ल्युट् ङीप्। गोदावर्यां

**तपनीय** न० तप-अनीयर्। १स्वर्णे कनकधुस्तूरे च अमरः। "भव्यानि तु तपनीयसंक्रमस्य" माघः। "अवंस्तु यन्तौ तपनीयपीठम्" रघुः। स्वार्थे क। तपनीयक सुवर्णे राजनि०।

**तपनेष्ट** न० ६त०। ताप्ये धातौ राजनि०। तद्धातोः सूर्यप्रियत्वात् तथात्वम्।

**तपस्** न० तप-असुन्। आलोचनात्मके ईश्वरज्ञानभेदे अन्यार्थाभिप्राङ्मुखभावेन दृश्यम्। २लग्नावधिकनवमस्थाने ज्यो० शास्त्रमविहितकर्मणि ३वैधक्लेशजनके कर्मणि। "तपोज्ञानशनात्परम्"। ५क्षुत्तृषिपाशीतोष्णादिद्वन्द्वसहने। ६चित्तप्रसादहेतुभूते व्रतनियमोपासनादिकर्मणि। ७मौनादिव्रते" दृकायेन्द्रियमनसां समाधाने दृशास्त्रीयमार्गेण कायेन्द्रियमनसां शोषणे। १०कृच्छ्रचान्द्रायणप्रजापत्यादिरूपे प्रायश्चित्ते। ११शास्त्रविहितप्रतिग्रहारोहणादौ। १२वानप्रस्थसंन्यासाश्रमधर्मे। तपश्च शारीरादिभेदात् त्रिविधम् यथाह "देवद्विजगुरुप्राज्ञपूजनं शौचमार्जवम्। ब्रह्मचर्यमहिंसा च शारीरं तप उच्यते। अनुद्वेगकरं वाक्यं सत्यं प्रियहितञ्च यत्। स्वाध्यायाभ्यसनं चैव वाङ्मयं तप उच्यते। मनःप्रसादः सौम्यत्वं मौनमात्मविनिग्रहः। भावसंशुद्धिरित्येतत् तपोमानसमुच्यते" गीता। तदपि सात्त्विकादि भेदात् त्रिविधम् यथाह "श्रद्धया परया तप्तं तपस्तत् त्रिविधं नरैः। अफलाकाङ्क्षिभिर्युक्तं सात्त्विकं परिचक्षते। सत्कारमानपूजार्थं तपोदम्भेन चैव यत्। क्रियते तदिह प्रोक्तं राजसं चलमध्रुवम्। मूढग्राहेणात्मनो यत् पीड़या क्रियते तपः। परस्योत्सादनार्थं वा तत् तामसमुदाहृतमिति" गीता। १२मनइन्द्रियाणामैकाग्र्ये "मनसश्चेन्द्रियाणाञ्च ह्यैकाग्र्यं परमन्तपः" स्मृतेः। १३जनोलोकादूर्ध्वे लोकभेदे। "तस्योपरि तपो-

लोकस्तोभय उदाहृतः। वैराजा यत्र ते देवा वसेयुर्दैव पूजिताः। वासुदेवे मनो येषां वासुदेवार्पितक्रियाः। तपसातोऽथ गोविन्दमभिलाषविवर्जिताः। ते तपोलोकमासाद्य वसन्ति विजितेन्द्रियाः। शिलोञ्छवृत्तयो ये वै दन्तोलूखलिकाश्च ये। येऽश्मकुट्टाश्च सनयः शीर्णपर्णाशिनश्च ये। ग्रीष्मे पञ्चाग्नितपसो वर्षासु स्थण्डिलेशयाः। हेमन्ते गिरिरे वा ये जपन्ति सलिले जपाः। कृशाग्यनीरबिन्दूंश्च लक्षिता यतयोऽपिबन्। वायाशिनोऽतिक्षुधिताः पादाङ्गुष्ठाग्रभूस्पृशः। ऊर्द्धहस्ता रविदृशस्त्वेकाङ्घ्रिस्थाननिश्चलाः। ये वै दिवा निरुच्छ्वासा भास्वोच्छ्वासाश्च ये परे। मासोपवासं कुर्वन्ति चातुर्मास्यव्रताश्च ये। कृच्छ्रे तोयपाना ये ये षष्ठ्यमासोपवासकाः। ये च वर्षानिमेषा वै वर्षधाराम्बुतर्पकाः। स्थाणुसाम्योपसंप्राप्ता मृगकण्डूतिसौख्यदाः। जटाटवीकोटरान्तःकृतनीड़ाण्डजाश्च ये। प्रकृढ़ बल्मीकाङ्गाश्च स्नायुनद्धास्थिसञ्चयाः। लतापतानैः परितो वेष्टितावयवाश्च ये। शस्यानि च प्ररूढ़ानि यदङ्गेषु महीपते। इत्येतैर्नियमैर्यै तु क्लिष्टात्मानस्तपोधनाः। ब्रह्मायुषस्तपोलोके ते वसन्त्यकुतोभयाः"। १५माघे स्नाने "तपाश्च तपस्यश्च शैशिराद्भूः यजु० २७।२४ "तपसे त्वा" यजुः ७।३०। तपसे साधाय। तपति स्वर्गो यत्र असन् तपाः" वेददी०। तत्र हि उत्तरायणप्रवृत्तौ रवेः प्रखरकरता अतएवाह "भकरे प्रखरो रविः"। १६धर्मे "विनाप्यस्मादृशं भूपुरिज्याद्यैस्तपसः श्रुतः" माघः १७नियमे "समाधिमास्थाय तपोभिरात्मनः" निगम्य चैनां तपसे कृतोद्यमाम्" "तपः क्व वत्से क्व च तावकं वपुः" कुमा० "तपसा किल्बिषं हन्ति विद्ययाऽमृतमश्नुते" वेदान्तप०। "तमेतं ब्राह्मणा विविदिषन्ति वेदानुवचनेन यज्ञेन तपसा नाशकेन" श्रुतिः। "ब्राह्मणस्य तपो ज्ञानं तपःक्षत्रस्य रक्षणम्। वैश्यस्य तु तपोवार्त्ता तपः शूद्रस्य सेवनम्" मनुः तपश्च योगसाधनं क्रियायोगभेदः यथोक्तं पात०सू० भाष्यविवरणेषु "तपःस्वाध्यायेश्वरप्रणिधानानि क्रियायोगः" सू०। "नातपस्विनो योगः सिद्ध्यति अनादिकर्मक्लेशवासनाचित्रा प्रत्युपस्थितविषयज्ञाना चाशुद्धिः नान्तरेण तपःकर्मक्षयमापद्यते इति तपस उपादानं तच्छित्तप्रसादनमवाधमानमनेनासेव्यमिति मन्यते" भा०। "व्यतिरेकमुखेन तपस उपायत्वमाह नातपस्विन इति तपसोऽन्तरङ्गव्यापारस्वपायोपयोगिनं दर्शयति अनादिकर्मेति। अनादिभ्यां कर्मक्लेशवासनाभ्यां चित्रा अतएव प्रत्युपस्थितसुपनतं विषयजालं यस्यां सा तथोक्ता। अशुद्धेरजस्तमःप्रसङ्गेको नान्तरेण तपःकर्मक्षयमापद्यते सान्द्रस्य नितान्तविरुद्धता सङ्क्षयः ननूपादीयमानमपि तपो धातुवैषम्यहेतुतया योगप्रतिपक्ष इति कथं तदुपाय इति। अत आह। तच्चेति तावन्मात्रमेव तपश्चरणीयं न यावता धातुवैषम्यमापद्यतइत्यर्थः" विवरणम्। १८अग्नौ तपोजाः।

**तपस** पु० तप–असच्। १सूर्ये २चन्द्रे त्रिका० ३खगे सि०कौ०

**तपसोमूर्त्ति** पु०चतुर्थमन्वन्तरे आङ्गिरसे सप्तर्षिभेदे तपोमूर्त्ति शब्दे दृश्यम्। [तस्य इतरतपस्त्वाद्वैपित्वात् तथात्वम्।

**तपस्तक्ष** पु० तपस्तक्षति तक्ष–अण् उप० स०। इन्द्रे हेमच०।

**तपस्य** तपः करोति तपस्+क्तौ क्यच् अक० सेट्। तपस्यति अतपस्यीत् अतपस्यीत् तपस्या। "स्याशुं तपस्यन्तमधित्यकाबाम्" कुमा०।

**तपस्य** पु० तपसि साधु यत्। १फाल्गुने मासि अमरः। "तपाश्च तपस्यश्च शैशिराद्भूः यजु०१५।५७ "तपस्याय त्वा" ७।३०।२अर्जुने तस्य फाल्गुननामकत्वात् तथात्वम्। भावे ष्यञ्। तपस्या। ३तपश्चर्यायां स्त्री। तपसि भवः यत्। ४तपोभवे त्रि० "स्विद्यावेत् तपस्याभ्योऽङ्गेभ्यः स्राहा" शाला० श्रौ० २५।११।२८। तपस्य–भावे घञ्। ५तपश्चरणे पु०। "अथास्य बुद्धिरभवत्तपस्ये भरतर्षभ"! भा० शान्तु० ६अ०। तामसस्य मनोः पुत्रभेदे पु० "पुत्रांश्चैव प्रवक्ष्यामि तामसस्य मनोर्नृप! ऋतिश्चतपस्यः श्रुतपास्तपोरतिरकल्मषस्त्वी धन्वी परन्तपः" हरिवं० ७अ०

**तपस्यामत्स्य** पु०स्त्री (तपस्वी)। मत्स्यभेदे शब्दर०।

**तपस्विन्** त्रि० तपस्+अस्त्यर्थे विनि। १यागिनि, २चान्द्रायणादिव्रतधारिणि, ३अनुकम्पके, ४दीने ५प्रशस्ततपोयुक्ते च। स्त्रियां ङीप् "किं किं व्यवस्यति न वेद्मि तपस्विनी सा" सा० द०। "नयप्रस्तुतिवैरटा तपस्विनी" नैष०। "कस्तपस्विविभिक्षेषु चादरः" किरा०। "पूर्यमाणमहरग्निप्रस्तुद्यातैस्तपस्विभिः" रघुः तपस्विभ्योऽधिको योगी" गीता ६अध्याये पु० शब्दरत्ना० ७तपस्यामत्स्यभेदे शब्दर०। ८हतकरञ्जवृक्षे पु० ९चटके पुंस्त्री राजनि० स्त्रियां जातित्वात् ङीष्। १०जटामांस्यां ११कटुरोहिण्यां स्त्री हेमच० गौ० ङीष्। १२मनश्चाञ्चल्यनिवारिकायाः स्त्री भावप्र० हरिवंशोक्ते चतुर्थमन्वन्तरे कालप्रभेदे १३ऋषिभेदे तपोधृतिशब्दे प्रमाणं दृश्यम्।

भागवतोक्ते द्वादशमन्वन्तरे १४सप्तर्षिभेदे तपोमूर्त्तिशब्दे प्रमाणं दृश्यम्।

**तपस्विपत्र** पु० तपस्विप्रियं पत्रमस्य। दमनकवृक्षे राजनि०।

**तपात्यय** पु० तपस्य ग्रीष्मस्यात्ययोऽवसानं यत्र काले। १वर्षाकाले "तपात्यये वारिभिरुक्षिता नवैः"। कुमा०। "तपात्यये पुष्पफलैरुपेतं महावनं राष्ट्रपतिर्ददर्श" भा० व० २४ अ०। ६त०। २ग्रीष्मस्यावसाने च।

**तपान्त** पु० तपस्यान्तो यत्र। १वर्षाकाले "वर्षं शरदृतुश्च तपान्ते जलदो यथा" भा० भी० ५४ अ०। ६त०। २ग्रीष्मस्यावसाने च।

**तपित** त्रि० भ्वा० तप-दाहे क्त। तप्ते हिङ्गुपक्षोपः।

**तपिनी** स्त्री नदीभेदे शब्दार्थचि०।

**तपिष्ठ** त्रि० अतिशयेन तप्ता तप्तृ+इष्ठन् तृचोलोपः। अतिशयेन तापके। "तपिष्ठेन शोचिषा यः सुराधाः" ऋ० ४।५।४।

**तपिष्णु** त्रि० तप-ब्रा० इष्णुच्। तापकर्त्तरि तपने। "भक्तेन तपसा देवस्तपिष्णुः सेवितो मया। प्रीतेन चाहं विभुना स्वर्ग्योक्षस्तथाऽनघ!" भा० शा० ३२० अ०।

**तपीयस्** त्रि० अतिशयेन तप्ता तप्तृ+ईयसुन् तृचोलोपः। १अतीव तप्तरि २तपस्याकारके "अतप्यताक्षिन् किल लोकतापनं तपस्तपीयांसपतां समाहितः" भाग० २।६।६।

**तपु** त्रि० तप-उनु। १तापके "तपोष्पवित्रं वितनं दिवस्पदे" ऋ० ६।८३।२ "तपोः शत्रूणां तापकस्य" भा०। २तापयुक्ते ३तप्ते च। "तपुर्यथुस्तु चक्रस्मि वाँ इव" ऋ० ७।१०४।२ तपुस्तप्तः" भा०

**तपुषि** त्रि० तप-उषिन् वेदे नेकारस्य इत्। तापके। "ब्रह्मद्विषे तपुषिं हेतिमस्य" ऋ० २।३०।७;६।५२।३। "तपुषिस्तपतेर्हेतिर्हन्तेः" निरु० ६।२ स्त्रियां ऋदिकालत्वात् वा ङीप्। २क्रोधे स्त्री निघण्टुः। क्रोधस्य चित्ततापकत्वात् तथात्वम्।

**तपुस्** पु० तप-उसि। १सूर्य्ये २अग्नौ च उणा०। ३तापयुक्ते ४तापके च त्रि०। "तपुर्जम्भ! यो वसुधक्" ऋ० १।२६।६ हे तपुर्जम्भ! तप्यमानरश्मियुक्त! अग्ने!" भा० "तपुरग्नाभिर्ऋष्टिभिः। १०।८७।२३। "तपुरग्नाभिस्तपनोलापाभिः" भा० "तपूंषि तपसै जिनानि सन्तु" ऋ० ६।५२।२

**तपोज** त्रि० तपसः तपस्यातः अग्नेर्वा जायते जन-ड। १तपस्याजाते २अग्निजाते अवयवे स्त्री। "ऋषीणांतपसस्तस्य तपोजा अपि गच्छतात्" ऋ० १०।१५४।५ "वाचो बन्धुस्तपोजाः" यजु० १०।६ "वाचो बन्धुः वाग्या बन्धुभूताः "यावद्वै प्राणेष्वापो भवन्ति तावद्वाचा वदतीति" श्रुतेः "आपोमयी वागिति" सामश्रुतेश्च। तथा तपोजा तपःशब्देनात्राग्निरुच्यते तपसोऽग्नेर्जातास्तपोजाः अग्नेर्वै धूमो जायते धूमादभ्रमभ्राद्वृष्टिरग्नेर्वा एता जायन्ते तस्मादाहुः तपोजाः" इति श्रुतेः "वायोरग्निरग्नेराप" इति शत०ब्रा० ५।२।५।१७। श्रुत्यन्तरात्" वेददी०

**तपोदान** न० तप इव दानमस्य। तीर्थभेदे। "पुण्यतीर्थेषु कलिङ्गं कुरुक्षेत्रं प्रकीर्त्तितम्। सिन्धूत्तमस्तपोदानं जम्बुमार्गमथापि च" भा० आनु० १६५ अ०।

**तपोधन** त्रि० तपोधनं यस्य। तपोमात्रकारके १तपस्विनि। "तपोधनाभ्यागमसम्भवासुदः" माघः तत्प्रियत्वात् २दमनकवृक्षे पु० राजनि०। ३तक्षीरीवृक्षे स्त्री मेदि०। तप एव धनम्। ४तपोरूपधने न०। "वत्तु तावदतिक्रान्तं धर्मद्वारं तपोधनम्"। भा०आनु०५२अ०। तपोधनं मूल्यं यस्य। ५तपसा लभ्ये स्वर्गादौ त्रि० "सर्वरत्नवरः स्वर्गे पारिजातस्तपोधनः" हरिवं० १२८ अ०।

**तपोधृति** पु० तपसि धृतिःसन्तोषो यस्य। १तपोरते तपस्विनि चतुर्थमन्वन्तरे २भार्गवे सप्तर्षिभेदे "चतुर्थे चैव सायर्णे ऋषीन् सप्त निबोध मे" इत्युपक्रमे "दातिर्वसिष्ठपुत्रश्च यात्रेयः श्रुतपास्तथा। आङ्गिरासप्रसोमूर्त्तिस्तपस्वी काश्यपस्तथा। तपोऽशनश्च पौलस्त्यः पौलहश्च तपोरविः। भार्गवः सप्तमस्तेषां विश्वेपस्तु तपोधृतिः" हरिवं० ७ अ०।

**तपोनिधि** पु० तपो निधीयतेऽस्मिन् नि+धा-आधारे कि उप० स० तपोनिधिरिव यस्य वा। तपोधने तपस्विनि "विधेः सायन्तनस्यान्ते स ददर्श तपोनिधिम्" रघुः। "पतत्पतङ्गप्रतिमस्तपोनिधिः" माघः।

**तपोभृत्** त्रि० तपो बिभर्त्ति भृ-क्विप् तुक् च ६त०। तपोधारके "स्वर्गे तपोभृतां राजन्! फलं पुण्यस्य कर्मणः" हरिवं० ८अ०।

**तपोमय** त्रि० तपःप्रचुरः तपःस्वरूपद्रव्यपदार्थालोचनं तदात्मको वा तपस्+मयट्। १तपःप्रचुरे २स्वरूपद्रव्यपदार्थालोचनात्मके परमेश्वरे पु०। "त्रयीमयीधर्ममयस्तपोमयः" भाग० २।४।१८। स्त्रियां ङीप्। "प्रविश्य बदरीं पुण्यां स्वनिवृत्तां तपोमयीम्" हरिवं० २६४ अ०। "उपर्य्युपरि तत्रापि गतिस्तव तपोमयी" ७६ अ०।

लोकस्तेजोमय उदाहृतः। वैराजा यत्र ते देवा वसेयुर्ह्येव पूजिताः। वासुदेवे मनो येषां वासुदेवार्पितक्रियाः। तपसातोऽथ गोविन्दमभिलाषविवर्जिताः। ते तपोलोकमासाद्य वसन्ति विजितेन्द्रियाः। शिलोञ्छवृत्तयो ये वै दन्तोलूखलिकाश्च ये। येऽश्मकुट्टाश्च सनयः शीर्णपर्णाशिनश्च ये। योगे पञ्चाग्नितपसो वर्षासु स्थण्डिलेशयाः। हेमन्ते शिशिरे वा ये क्षपन्ति सलिले क्षपाः। कुशाग्रनीरबिन्दुं च लक्षिता यतयोऽपिबन्। वातार्णवोऽतिक्षुधिताः पादाङ्गुष्ठाग्रभूस्पृशः। ऊर्द्धरश्मा रविद्वस्ते कालिस्थानविचलाः। ये वै दिवा निरुच्छ्वासा मासोच्छ्वासाश्च ये परे। मासोपवासं कुर्वन्ति चातुर्मास्यव्रताश्च ये। ऋक्षत्वन्ते तोयपाना ये ये षण्मासोपवासकाः। ये च वर्षनिमेषा वै वर्षधाराम्बुतर्पकाः। स्थाणुसाम्योपसंप्राप्ता मृगकण्डूतिसौख्यदाः। जटाटवीकोटरान्तःक्षतनीड़ाण्डजाश्च ये। प्ररूढ़ बल्मीकाङ्गाश्च स्नायुनद्धास्थिसञ्चयाः। लताप्रतानैः परितो वेष्टितावयवाश्च ये। शस्त्राणि च प्ररूढ़ानि यदङ्गेषु महीपते। इत्येतैर्निर्यमैर्यै तु क्षिप्तात्मानस्तपोधनाः। ब्रह्मायुषस्तपोलोके ते वसन्त्यकुतोभयाः"। १५माघे मासि "तपाश्च तपस्यश्च शैशिरावृतू" यजु० १५।५७ "तपस्याय त्वा" ७।३०।२अर्जुने तस्य फाल्गुननामकत्वात् तथात्वम्। भावे क। तपस्या। ३तपश्चर्यायां स्त्री। तपसि भवः यत्। ४तपोभवे त्रि० "स्वित्यावेत् तपस्याभ्योऽङ्गिरः स्वाहा" याज्ञा० औ० २५।११।२८। तपस्-भावे घञ्। ५तपश्चरणे पु०। "अथास्य बुद्धिरभवत्तपस्ये भरतर्षभ"! भा० आनु० ६अ०। तामसस्य मनोः ६पुत्रभेदे पु० "पुत्रांश्चैव प्रवक्ष्यामि तामसस्य मनोर्नृप! ऊर्ध्वबाहुः सुतपास्तपोमूलतपोऽशनः। तपोरतिरकल्माषस्तन्वी धन्वी परन्तपः" हरिवं० ७अ०

**तपस्यामत्स्य** पु०स्त्री (तपसी)। मत्स्यभेदे शब्दर०।

**तपस्विन्** त्रि० तपस्+अस्यर्थे विनि। १यागयुक्ते, २चान्द्रायणादिव्रतधारिणि, ३अनुकम्पके, ४दीने ५प्रशस्ततपोयुक्ते च। स्त्रियां ङीप् "किं किं व्यवस्यति न वेद्मि तपस्विनी सा" सा० द०। "नवप्रसूतिर्वरटा तपस्विनी" नैष०। "कस्तपस्विविशिखेषु चादरः" किरा०। "पूर्यमाणसहस्राग्निप्रत्युद्यातैस्तपस्विभिः" रघुः तपस्विभ्योऽधिको योगी" गीता ६अध्यारदे पु० शब्दरत्ना० ७तपस्यामत्स्यभेदे शब्दर०। ८दृतकरञ्जवृक्षे पु० ९चटके पुंस्त्री राजनि० स्त्रियां जातित्वात् ङीष्। १०जटामांस्यां ११कटुरोहिण्यां स्त्री हेमच० गौ० ङीष्। १२मञ्जिष्ठायां वणिक्कायाः स्त्री भावप्र० हरिवंशोक्ते चतुर्थमन्वन्तरे कालप्रभेदे १३ऋषिभेदे तपोधृतिशब्दे प्रमाणं दृश्यम्।

भागवतोक्ते द्वादशमन्वन्तरे १४सप्तर्षिभेदे तपोमूर्त्तिशब्दे प्रमाणं दृश्यम् ।

**तपस्विपत्र** पु० तपस्विप्रियं पत्रमस्य । दमनकवृक्षे राजनि० ।

**तपात्यय** पु० तपस्य ग्रीष्मस्यात्ययोऽवसानं यत्र काले । १वर्षाकाले "तपात्यये वारिभिरुक्षिता नवैः" । कुमा० । "तपात्यये पुष्पफलैरुपेतं महावनं राष्ट्रपतिर्ददर्श" भा० व० २४ अ० । इत० । २ग्रीष्मस्यावसाने च ।

**तपान्त** पु० तपस्यान्तो यत्र । १वर्षाकाले "वर्षं शरद्वैष तपान्ते जलदो यथा" भा० भी० ५४ अ० । इत० । २ग्रीष्मस्यावसाने च ।

**तपित** त्रि० भ्वा० तप–दाहे क्त । तप्ते हिरुपकोषः ।

**तपिनी** स्त्री नदीभेदे शब्दार्थचि० ।

**तपिष्ठ** त्रि० अतिशयेन तप्ता तप्तृ+इष्ठन् तस्योलोपः । अतिशयेन तापके । "तपिष्ठेन शोचिषा यः सुराधाः" ऋ० ४।५।४।

**तपिष्णु** त्रि० तप–ब्वा० इष्णुच् । तापकर्त्तरि तपने । "भक्त्या तपसा देवस्तपिष्णुः सेवितो मया । प्रीतेन चाहं विभुना स्वर्ग्योक्तस्तथाऽनघ !" भा० शा० ३२० अ० ।

**तपीयस्** त्रि० अतिशयेन तप्ता तप्तृ+ईयसुन् तस्योलोपः । १अतीव तप्तरि २तपस्याकारके "अतप्यताग्निन् किल लोकतापनं तपस्तपीयांसपतां समाहितः" भाग० २।६।६।

**तपु** त्रि० तप–उन् । १तापके "तपोष्पवित्रं वितनं दिवस्पदे" ऋ० ६।८३।२ "तपोः शत्रूणां तापकस्य" भा० । २तापयुक्ते ३तप्ते च । "तपुर्यथुस्तु चक्रुरग्निं वाँ इव" ऋ० ७।१०४।२ तपुस्तप्तः" भा० ।

**तपुषि** त्रि० तप–उषिन् वेदे नेकारस्य इत् । तापके । "ब्रह्मद्विषे तपुषिं हेतिमस्य" ऋ० २।३०।७;६।५२।३। "तपुषिस्तपतेर्हेतिर्हन्तेः" निरु० ६।२ स्त्रियां ङीप् । २क्रोधे स्त्री निघण्टुः । क्रोधस्य चित्ततापकत्वात् तथात्वम् ।

**तपुस्** पु० तप-उसि । १सूर्य्ये २अग्नौ च उणा० । ३तापयुक्ते ४तापके च त्रि० । "तपुर्जम्भ ! यो वसुभुक्" ऋ० १।२६।१६ हे तपुर्जम्भ ! तप्यमानरश्मियुक्त ! अग्ने !" भा० "तपुरग्नाभिर्ऋष्टिभिः । १०।८७।२२। "तपुरग्नाभिस्तपनयोनाग्नाभिः" भा० "तपूंषि तस्मै वृजिनानि सन्तु" ऋ० ६।५२।२

**तपोज** त्रि० तपसः तपस्यातः अग्नेर्वा जायते जन–ड । १तपस्याजाते २अग्निजाते अवयवे स्त्री । "ऋषीणामपरेषां च तपोजा ऋषि गच्छतात्" ऋ० १०।१५४।५ "वाचो बन्धुस्तपोजाः" यजु० १०।६ "वाचो बन्धुः वाग्या बन्धुभूताः "यावद्वै प्राणेष्वापो भवन्ति तावद्वाचा वदतीति" श्रुतेः "आपोमयी वागिति" सामश्रुतेश्च । तथा तपोजा तपःशब्देनात्राग्निरुच्यते तपसोऽग्नेर्जाताऽपोजाः अग्नेर्वै धूमो जायते धूमादभ्रमभ्राद्वृष्टिरग्नेर्वा एता जायन्ते तस्मादाह तपोजाः" इति श्रुतेः "वायोरग्नेरापः" इति शत०ब्रा० ५।२।५।१७। श्रुत्यन्तरात्" वेददी०

**तपोदान** न० तप इव दानमस्य । तीर्थभेदे । "पुण्यतीर्थेषु कलितं कुरुक्षेत्रं प्रकीर्त्तितम् । सिन्धूत्तमस्तपोदानं जम्बुमार्गमथापि च" भा० आनु० १६५ अ० ।

**तपोधन** त्रि० तपोधनं यस्य । तपोमात्रकारके १तपस्विनि । "तपोधनाभ्यागमसम्भवात्मदः" माघः तत्प्रियत्वात् २दमनकवृक्षे पु० राजनि० । ३सुरभीरीक्षे स्त्री मेदि० । तप एव धनम् । ४तपोरूपधने न० । "यत्तु तावदतिक्रान्तं धर्महारं तपोधनम्" । भा०आनु०५२अ० । तपोधनं मूल्यं यस्य । ५तपसा लभ्ये स्वर्गादौ त्रि० "सर्वरत्नवरः स्वर्गे पारिजातस्तपोधनः" हरिवं० १२८ अ० ।

**तपोधृति** पु० तपसि धृतिःसन्तोषो यस्य । १तपोरते तपस्विनि चतुर्थमन्वन्तरे २भार्गवे सप्तर्षिभेदे "चतुर्थे चैव सावर्णे ऋषीन् सप्त निबोध मे" इत्युपक्रमे "दृतिर्वसिष्ठपुत्रश्च व्यासेयः सुतपास्तथा । आङ्गिरासतपोमूर्त्तिस्तपस्वी काश्यपस्तथा । तपोऽग्नेश्च पौलस्त्यः पौलहश्च तपोरविः । भार्गवः सप्तमस्तेषां विद्वेषस्तु तपोधृतिः" हरिवं० ७ अ० ।

**तपोनिधि** पु० तपो निधीयतेऽस्मिन् नि+धा–आधारे कि उप० स० तपोनिधिरिव यस्य वा । तपोधने तपस्विनि "विधेः सायन्तनस्यान्ते स ददर्श तपोनिधिम्" रघुः । "पतत्पतङ्गप्रतिमस्तपोनिधिः" माघः ।

**तपोभृत्** त्रि० तपो बिभर्त्ति भृ–क्विप् तुक् च इत० । तपोधारके "स्वर्गे तपोभृतां राजन् ! फलं पुण्यस्य कर्मणः" हरिवं० ८अ० ।

**तपोमय** त्रि० तपःप्रचुरः तपःश्रेष्ठव्यपदार्थालोचनं तदात्मको वा तपस्+मयट् । १तपःप्रचुरे २श्रेष्ठव्यपदार्थालोचनात्मके परमेश्वरे पु० । "त्रयीत्रयीधर्ममयस्तपोमयः" भाग० २।४।१८। स्त्रियां ङीप् । "प्रविश्य बदरीं पुण्यां सुनिजुष्टां तपोमयीम्" हरिवं० २६४ अ० । "उपर्य्युपरि तत्रापि गतिस्त्व तपोमयी" ७६ अ० ।

**तपोमूर्त्ति** पु० तपः आलोचनभेद एव मूर्त्तिरस्य, तपः प्रधाना मूर्त्तिरस्य वा ।१परमेश्वरे २तपस्विनि च । रुद्रसावर्णिरूपतामसमन्वन्तरे सप्तर्षिमध्ये ३ऋषिभेदे च "ऋषयश्च तपोमूर्त्तिरूपस्त्वग्नीध्रकादयः" भाग०८।१३।१२

**तपोमूल** त्रि० तपो मूलमस्य । १तपोहेतुके स्वर्गादौ तामसस्य मनोः २पुत्रभेदे पु० तपस्यशब्दे दृश्यम् ।

**तपोरति** त्रि० तपसि रतिरस्य । १तपःपरायणे तामसमनोः पुत्रभेदे पु० तपस्यशब्दे दृश्यम् ।

**तपोरवि** पु० तपसा रविरिव । १सूर्य्यतुल्यतेजोयुक्ततपस्के चतुर्थमन्वन्तरे पौलहे सप्तर्षिभेदे तपोमूर्त्तिशब्दे दृश्यम् ।

**तपोलोक** पु० तपोनाम लोकः । ऊर्द्ध्वेषु सप्तसु लोकेषु भुवनभेदे तपःशब्दे दृश्यम् । स च भूमेस्तृतीयकोटियोजनोपरि वर्त्तते । "चतुःकोटिप्रमाणं तु तपोलोकोऽस्ति भूतलात् । उपरिष्टात् स्थितेरष्टौ कोटयः सप्तमीरिमम्" काशीख० २१ अ० उक्तेः । स च विराट्पुरुषस्य स्तनद्वयरूपेण कल्पितः यथाह भाग० २।४। २६। "भूर्लोकः कल्पितः पद्भ्यां भुवर्लोकोऽस्य नाभितः । हृदा स्वर्लोक उरसा महर्लोको महात्मनः । ग्रीवायां जनलोकोऽस्य तपोलोकः स्तनद्वयात् । मूर्द्धभिः सत्यलोकस्तु ब्रह्मलोकः सनातनः" ।

**तपोऽवट** पु० तपसोऽवट इव । ब्रह्मावर्त्तदेशे त्रिका० ।

**तपोवन** न० ६त० । १तापससेव्ये वनभेदे, "वधूभक्तिमती चैनामर्हितामातपोवनात्" तपोवनादित्यपथं गताभ्याम्" रघुः । २तन्नामके तीर्थभेदे च ।

**तपोऽयन** पु० चतुर्थमन्वन्तरे सप्तर्षिमध्ये पौलस्त्ये १ऋषिभेदे तपोमूर्त्तिशब्दे दृश्यम् । २तामसस्य मनोः पुत्रभेदे तपस्यशब्दे दृश्यम् ।

**तप्त** त्रि० तप–क्त । १दग्धे २तापयुक्ते च हेमच० । "तप्ते पयसि दध्यानयति सा वैश्वदेव्यामिक्षा भवति" श्रुतिः । "स तप्तकार्त्तस्वराम्बरावरः" माघः ।

**तप्तकाञ्चन** न० कर्म० । अग्निसंयोगभेदेन विमले काञ्चने । "तप्तकाञ्चनवर्णाभां सुप्रतिष्ठां सुलोचनाम्" दुर्गाध्यानम् ।

**तप्तकुम्भ** पु० तप्तः कुम्भो यत्र । नरकभेदे तत्स्वरूपं यथा "अतःपरं भीषणतरं तप्तकुम्भं निबोध मे । समन्ततस्तप्तकुम्भो वह्निज्वालासमाहतः । ज्वलदग्निचयोद्भूत तैलायत्वेणपूरितः" मार्क० पु० ।

**तप्तकृच्छ्र** न० "षट्पलन्तु पिबेदम्भस्त्रिफलन्तु पयः पिबेत् । पलमेकं पिबेत् सर्पिस्तप्तकृच्छ्रं विधीयते" ऋत्युक्ते व्रतभेदे, "पयोऽतसदकं वायुं तप्तं प्रतिग्रहं पिबेत् स तप्तकृच्छ्र इति गौतमोक्तेः प्रंस्त्वमपि ।

"तप्तकृच्छ्रं चरन् विप्रो जलक्षीरघृतानिलान् । प्रतिग्रहं पिबेदन्यान् सकृत्स्नायी समाहितः" मनुः । तप्तानिलपानन्तु तप्तक्षीरवाय्वपानम् । एतद्व्रतमाह साध्यम् । जलादिपरिमाणन्तु ब्रह्मपुराणे "तप्तकृच्छ्रं व्रतं कुर्य्यात् तप्तं सायं पिबेच्छुचिः । षट्पलानि घृतस्य तोयस्य सुसमाहितः । प्रभाते त्रीणि दुग्धस्य घृतस्य पिबेत् तप्तकम् । पानं घृतस्य तप्तस्य मध्याह्ने त्रिदिनं पिबेत् । वायुभक्षस्त्र्यहं चान्त्यं निर्दहेत् पातकं द्विजः" याज्ञवल्क्यः । "तप्तक्षीरघृताम्बूनां मेकैकं प्रत्यहं पिबेत् । एकरात्रोपवासस्तु तप्तकृच्छ्रस्तु साधनः" एतद्व्रतरहस्याध्यं तप्तकृच्छ्रम् प्रा० वि० ।

**तप्तपाषाणकुण्ड** पु० नरकभेदे नरकशब्दे दृश्यम् ।

**तप्तमाष** पु० तप्तं माषमितं सुवर्णादिकं यत्र । दिव्यभेदे । तद्विधिः वीरमित्रोदये दर्शितो यथा तत्र पितामहः "तप्तमाषस्य वक्ष्यामि विधिमद्भुतरूपिणम् । कारवेदायसस्यात्तं ताम्रं वा षोड़शाङ्गुलम् । चतुरङ्गुलखातन्तु क्षुण्णमयं वापि मण्डलम्" । कर्षषोड़शांशप्रमितं मण्डलं सूर्य्यमण्डलाकारं वर्त्तुलमिति यावत् । एतादृशं पात्रं घृततैलाभ्यां पूरयेदित्याह स एव "पूरयेद्घृततैलाभ्यां पलैर्विंशतिभिस्तु तत् । सुवर्णं माषकल्पञ्च क्षिप्त्वा तप्ते निःक्षिपेत्ततः । अङ्गुष्ठाङ्गुलिमूलेन तप्तमाषकमुद्धरेत्" इति । सुवर्णमाषकमूर्द्धषोड़शांशप्रमाणम् । सुवर्णमयकृष्णं रूप्यमाषनिष्कवर्द्धम् । तन्माषपरिमितं हिरण्यं ताम्रं वा पिण्डीकृत्य निःक्षिपेत् । अङ्गुष्ठाङ्गुलिमूलेन अङ्गुष्ठतर्जनीमध्यमाभिरित्यर्थः । उद्धृत्य तप्तमाषोद्धरणम् प्राङ्मिवा केन घृततैलयोस्तापे समारब्धे धर्मोवाङ्मनादिशोध्यशिरः पत्रारोपणान्तं सर्वसाधारणं कर्म विधाय "त्वमग्ने । वेदाश्चत्वारः" इत्यादिना अग्निदिव्यप्रकरणोक्तेन मन्त्रेणाभिमन्त्र्य कारयितव्यम् शोध्यस्तु याज्ञवल्क्योक्तेन "त्वमग्ने ! सर्वभूतानामित्यादि" मन्त्रेणाभिमन्त्र्य तप्तमाषमुद्धरेत् । अतएव दक्षस्मृतिः "मुद्धरेत्तैलघृतात् तप्तान्माषमाषकमिति" । कल्पान्तरमाह स एव "सौवर्णं राजतं ताम्रं वायसं क्षुण्णमेवापि वा । गव्यं घृतमुपादाय तदग्नौ तापयेच्छुचिः । सौवर्णं राजतं ताम्रं मायसं वा शुभोदयम् । सलिलेन सकृद्धौतं प्रक्षिपे-

स्तत्र सुदर्शनम्। स्वनखोचितरङ्गाद्यै ज्ञानखड्गगोचरे। परीक्षेदाद्यैर्वर्णैन षट्तत्कारसयोपकल्पिति"। ततः प्राङ्विवाको धर्मावाहनादिपत्रारोपणान्तं साधारणं कर्म कृत्वा एतमभिमन्त्रयेत्। मन्त्रस्तु तैनैव दर्शितः "ततथानेन मन्त्रेण सकृत्तदभिमन्त्रयेत्। परं पवित्रमसृतं धृत! त्वं यज्ञकर्मसु। दह पावक! पापं त्वं हिमशीतो भवेति च"। ततः प्राङ्विवाकः शोध्येन "त्वमग्ने! सर्वभूतानामित्यादि मन्त्रेणाभिमन्त्रणं कारयित्वा सुदर्शनं याङ्घवेदित्वाङ्ग स एव "उषोऽग्निनतः स्नातमार्द्रवासःसमावृतम्। याङ्घवेन्सुदर्शनान्तु धृतमध्यगतान्तया। प्रदक्षिणीं च तस्याथ परीक्षेयुः परीक्षकाः" इति। अथ तर्जन्यैव सुदर्शनोद्धरणं कार्यं तस्यां परीक्षाभिधानात् पञ्चवर्षेऽपि शुद्धयधारणोपायं ब्रह्मसंहितायाङ्ग "करायं योन धुनुयात् विस्फोटो वा न जायते। शुद्धो भवति धर्मेण पितामहवचो यथेति"। कालिकापुराणेऽपि "न धुनेयुः करायन्तु यस्य रक्तं न जायते। विस्फोटाद्यैस्तथा दोषैः स शुद्धो यस्य नोद्गतमिति"। रक्तं रक्तवर्णम्। यस्य करायं विस्फोटाद्यैर्नोद्गतमित्यन्वयः। पितामहोऽपि "यस्य विस्फोटका न स्युः शुद्धोऽसावन्यथाऽशुचिरिति"।

तप्तकुलपरीक्षाशब्दे अधिकं द्रष्टव्यम्।

**तप्तमुद्रा** स्त्री वैष्णवैः शरीरधार्यैऽग्नितप्तधातुमयसुदर्शनाङ्कितभगवदायुधचिह्ने तद्विधिः हरिभक्तिविलासे १५ विलासे। "आषाढशुक्लद्वादश्यां हरौ शिशयिषौ सति। वैष्णवः पारणं कृत्वा तप्तमुद्राञ्च धारयेत्। ब्राह्मणः क्षत्रियो वैश्यः शूद्रश्चैकान्तिनस्त्रयः। कुर्वन्त्वात्मार्पणं तप्तमुद्राभिर्हरिमङ्कयेत्"। तप्तमुद्राधारणं वाराहे तप्तमुद्राप्रसङ्गे "चक्रादिधारणं पुंसां परं सम्बन्धवेदनम्। पातिव्रत्यनिमित्तं हि वलयादिविभूषणमिति"। तप्तमुद्राधारणफलं वायुपुराणे "अग्निनैव च सन्तप्तं चक्रमादाय वैष्णवः। धारयेत् सर्ववर्णानां हरिमालोक्य सिद्धये"। ब्रह्मखण्डे "कृत्वा धातुमयीं मुद्रां तापयित्वा खिकां तनूम्। चक्रादिचिह्नितां भूप धारयेद्वैष्णवो नरः"। नारदीयपञ्चरात्रे "द्वादशारन्तु षट्कोणं वलयत्रयसंयुतम्। हरेः सुदर्शनं तप्तं धारयेत्तु विचक्षणः। सौपर्णे च श्रीभगवद्गरुडसंवादे तप्तमुद्राप्रकरणे "गरुत्मद्वविशेषेण सर्ववर्णैरयं विधिः। विप्रो वा क्षत्रियोवापि वैश्यः शूद्रस्तथैव च"। पाद्मे "अग्निहोत्रं यथा नित्यं वेदस्याध्ययनं यथा। ब्राह्मणस्य तथैवेतं तप्तचक्रादिधारणम्"। किञ्च तत्रैवोत्तरखण्डे श्रीशिवोमासंवादे "शङ्खचक्राङ्कनं कुर्याद्ब्राह्मणो बाहुमूलयोः। हुताग्निनैव सन्तप्य सर्वपापापनुत्तये"। "चक्रं वा शङ्खचक्रे वा तथा पद्मायुधानि वा। धारयित्वैव विधिवद्ब्रह्मकर्म समारभेत्"। तदकरणे निन्दा तत्रैव "अकृत्वा विधिना चक्रं ब्राह्मणः प्राकृतो भवेत्। न तस्य किञ्चिदश्नीयादपि क्रतुसहस्रिणः। सर्ववेदविदोऽपि सर्वशास्त्रविशारदः। अकृत्वा विधिना चक्रं ब्राह्मणः पतितो भवेत्। तप्तेनैवाङ्कनं कुर्यात् ब्राह्मणस्य विधानतः। श्रौतस्मार्तादिसिद्ध्यर्थं मन्त्रसिद्ध्यै तथैव च। हरेः पूजाधिकारार्थं चक्रं धार्यं विधानतः। वैष्णवत्वस्य सिद्ध्यर्थं भक्तिसिद्ध्यै विशेषतः। उपवीतादिवद्धार्यो शङ्खचक्रादयस्तथा। ब्राह्मणस्य विशेषेण वैष्णवस्य विशेषतः"। श्रुतयश्च "यो ह वै शुक्लो लोमोर्ध्वमानतुत्तिष्ठमानोऽग्निना चक्रं धत्ते। अग्निर्वै सहस्रारः सहस्रारो नेमिस्तेनैनं तप्ततनुः सायुज्यं सलोकतामाप्नोतीति"। चक्रं बिभर्त्ति बहुधाभितप्तं नमो देवानामसुरघ्नं हरेर्यः। स एति नाकं दुरितं विधूय विमुक्तिं यदृयतयो वीतरागाः" इति। ऋक्परिशिष्टे "अतप्ततनुर्नतदामो अश्नुतेऽश्नुता सह इहस्तन्नसत् समासतेति" यजुषि कण्वशाखीयबाह्मणायन शाखायाञ्च। "अतद्विष्णोरलचक्रे हुतप्ते जलाम्बोधिं वर्त्तते चर्मणीन्द्राः। मूले बाह्वोर्धृतेऽन्ये पुराणाभिज्ञान्यन्ये तप्तान्यायुधान्यर्पयन्ते" इति। छन्दः ऋक्परिशिष्टे "सकोपा च यात्तवल्क्यसत् पुमानात्मचिताय प्रेमृषा हरिं भजेत्। सुलोकमौर्ध्वमाप्यक्षेऽग्निनाधत्ते" इति। अथर्वशिरोऽथर्वपरिशिष्टे तप्तचक्रादिप्रकरणे "देवासो एवैतेन बाह्मणा सुदर्शनेन प्रयताः स्वर्गमायन्"। "येनाङ्किता मनवो लोकसृष्टिं वितन्वते ब्राह्मणास्तद्वदन्तीति"। पाद्मे तप्तमुद्राप्रसङ्गे "विष्णुचक्राङ्कितं विप्रं पूजयेत् सर्वकर्मसु। विष्णुचक्रविहीनन्तु प्रयत्नेन विवर्जयेत्"। नारदीये "तप्तमुद्राप्रसङ्गे "श्रीकृष्णचक्राङ्कविहीनगात्रः ब्रह्मासमस्तः पुरुषोऽथ नारी,। हट्टा नरस्तं त्यपते! स्वयाः स्नात्वा समर्चेद्धरिमङ्ग सद्यः" इति। वङ्गप्रवेङ्कटाचार्य पादप्रभृतिभिर्बुधैः। श्रुतयः स्मृतयोद्धार विख्याता

लिखिताः पराः। अतएव तदनादरे दोषाः पाद्मे "तप्तचक्राङ्कितं दृष्ट्वा ये निन्दन्ति नराधमाः। अवलोक्य सुखं तेषां यादित्यमवलोकयेत्"। अग्निपुराणे च दशरथं प्रति कृतपुत्रविप्रविलापे। "शिलाबुद्धिः कृता किंवा प्रतिमायां हरेर्मया। किं मया पथि दृष्टस्य विष्णुभक्तस्य कर्हिचित्। तन्मुद्राङ्कितदेहस्य चेतसा नादरः कृतः। येन कर्मविपाकेन पुत्रशोको ममेदृशः"। अथ तप्तमुद्रा धारणमाहात्म्यं सौपर्णे "अशुचिर्वाप्यनाचारः सर्वधर्मबहिष्कृतः। एतच्चक्राङ्कनाभ्यासङ्कितः पङ्क्तिं पावनः"। वाराहे तप्तमुद्राधारणप्रसङ्गे "स्थण्डिलेशे शुभे वापि चक्राङ्को यत्र तिष्ठति। योजनानि तथा तीव्रि मम क्षेत्रं वसुन्धरे!। ब्रह्माण्डे "आयुधैर्वैष्णवैः सर्वैस्तापितैः सततं यदि। चिह्नदेहैष्णवो यस्तु स याति परमां गतिम्"। पाद्मे च "अग्नितप्तं पवित्रञ्च दृष्ट्वा तु बाहुमूलयोः। त्यक्त्वा यमपुरं घोरं याति विष्णोः परं पदम्। कृताग्नितप्तचक्रेण शरीरं यस्य चिह्नितम्। तेन तीर्थानि यज्ञाश्च सर्व्वे नात्र संशयः। अग्नितप्तेन चक्रेण ब्राह्मणो बाहुमूलयोः। अङ्कयित्वा जपन्मन्त्रं संसारान् मोक्षमाप्नुयात्। अग्नितप्तेन चक्रेण बाहुमूलेषु लाञ्छिताः। ते सर्वे पापनिर्मुक्ता यान्ति विष्णोः परं पदम्"।

किञ्च "अप्राकृता महात्मानो विष्णुचक्रेण लाञ्छिताः। विष्णुचिह्नविहीनास्तु प्राकृताः पतिताः स्मृताः। इति यत्र निषेधवचनं निर्मूलं सङ्गिरनाडतम्। समूलं यच्च तत् सत्यमविध्यभावादिना क्षततत्परम्। अथ तद्धारणप्रकारः "तप्तमुद्राधारणार्थमुपचारेषु पञ्चसु। क्षणमभ्यर्च्य संपूज्य चक्रशङ्खौ तथा नमेत्। तत्र मन्त्रः "सुदर्शन! नमस्तेऽस्तु पाञ्चजन्य! नमोऽस्तु ते इति। अग्निमभ्यर्च्य मूलेन कृत्वा चाज्याहुतीः क्रमौ। चक्रशङ्खगदादीनि शस्त्राण्यस्त्रौ प्रतापयेत्। तत्तन्मन्त्रैश्चावाह्य तान्यभ्यर्च्य प्रणम्य च। गुरुं क्षणञ्च संवन्द्य भक्त्या विज्ञापयेदिदम्। उच्छिष्टो भोजनादेव किङ्करः शरणागतः। तप्तचक्रगदादीनि तवाज्ञानोद्य धारये" इति। अथ चक्रादीनां भावाङ्गादिमन्त्रः। ओं नमो भगवते वासुदेवाय निर्बाधितसकलरिपुध्वजाय भगवद्वारायणकराग्रो रङ्गस्थलदुर्ल्लक्षिताय। "एह्येहि त्वं सहस्रार चक्रराज! सुदर्शन!। यज्ञभागं प्रगृह्णस्व पूजाञ्चैव नमो नमः। ओं नमो भगवते पाञ्चजन्याय विष्णुशङ्खाय गम्भीरधीरध्वन्याकुलीकृतकौरवचाहिनीनाथाय त्रिरेखादक्षिणावर्त्ताय त्रिप्रणवात्मने। एह्येहि पाञ्चजन्य! त्वं नारायणकरस्थित!। यज्ञभागं प्रगृह्णस्व पूजाञ्चैव नमो नमः। ओं रं यं मं वं पाञ्चजन्याय नमः। ओं भगवते खड्गाय नन्दकाय त्रैलोक्यपवित्राय जविने सकल सुरासुरसुन्दरीनेत्रोत्पलार्च्चिताय। एह्येहि खड्ग रत्न! त्वं नन्दकाख्य सुरार्च्चित। यज्ञभागं प्रगृह्णस्व पूजाञ्चैव नमो नमः। ओं खड्गाय नमः। ओं नमो भगवत्यै कौमोदक्यै भगवद्वारकवासुदेवलालितायै। एह्येहि त्वं मदे! देवि! कौमोदक्यायुधेश्वरि!। यज्ञभागं प्रगृह्णस्व पूजाञ्चैव नमोनमः। शरणाय शार्ङ्गाय नमः। इति। अथ धारणमन्त्रः। सुदर्शन! महाध्वान! सूर्य्यकोटिसमप्रभ!। अज्ञानान्मम मे नित्यं विष्णोर्मार्गं प्रदर्शय। तथा। पाञ्चजन्य! निजध्वानध्व स्तपातकसञ्चय!। पाहि मां पापिनं घोरं संसारार्णवपातिनम्। इत्यनुद्धारयेत् मन्त्रं दक्षिणादिक्रमेण तु। भुजयोश्चक्रपूर्वाणि क्षणशस्त्राणि धारयेत् कक्षवादिपरीवारान् निजान् सर्वांश्च वैष्णवः। भगवत्यर्पयेत् तप्तमुद्राभिस्ताभिरङ्कयेत्"। तथा च वाराहे। "अङ्कये तप्तचक्राद्यैराजानोर्बाहुमूलयोः। कक्षवापत्यभत्येषु पत्न्यादिषु च सम्यदे" "किञ्च आयसं विधिवत् कृत्वा पञ्चायुधविधानतः। तत्तन्मन्त्रेण मन्त्रज्ञः प्रतिशाप्य पृथक् पृथक्। ललाटे च गदा धार्य्या मूर्द्धि चापं शरन्यधा। नन्दकञ्चैव हृन्मध्ये शङ्खचक्रे भुजद्वये"। किञ्च। "दक्षिणे तु भुजे विप्रो विभ्रयाद्वै सुदर्शनम्। सव्ये च शङ्खं विभ्रयादिति ब्रह्मविदो विदुः"। अथ चक्रादिप्रतिकृति द्रव्यम्। नवप्रश्नपञ्चरात्रे "सौवर्णं रजतं ताम्रं कांस्यमायसमेव वा। चक्रं कृत्वा तु मेधावी धारयेत् सुविचक्षणः इति। एवमेव प्रबोधन्यां द्वादश्यां भगवत्परैः। तप्तमुद्रा ध्रुवं धार्य्या द्वारकायां विशेषतः"

तन्निषेधकवाक्यानि वैष्णवेतरविषयाणीति वैष्णवा मन्यन्ते आर्त्तास्तु स्मृतिकृतिविरुद्धत्वात् एतत् नातुतिष्ठन्ति विस्तरभयात् नन्निषेधवाक्यानि नोद्धृतानि।

**तप्तवालुक** पुं० तप्ता वालुका यत्र नरकभेदे नरकशब्दे दृश्यम्।

**तप्तरहस** न० कर्म्म० अच् समा०। तप्ते रहःस्थानभेदे।

**तप्तरूपक** न० नित्यकर्म० शुद्धरजते राजनि०।

**तप्तशूर्म्मिकुण्ड** पुं० तप्ता शूर्म्मिः लौहप्रतिमा यत्र

तादृशः कृष्णो यत्र । नरकभेदे नरकशब्दे दृश्यम् ।

**तप्तशूर्म्मी** पु० नरकभेदे तत्प्राप्तिहेतुरुक्तः भाग०५।२६। यथा "यस्त्विह वा अगम्यां स्त्रियं पुरुषोऽगम्यं वा पुरुषं योषिदभिगच्छति । तावमुत्र कशया ताड्यमानस्तिग्मया शूर्म्या लोहमय्या पुरुषमालिङ्गयन्ति । स्त्रियं च पुरुषरूपया शूर्म्या" २६ तिग्मया तप्तया शूर्म्या प्रतिमया" श्रीधरः

**तप्तसुराकुण्ड** पु० नरकभेदे ७त० । नरकशब्दे दृश्यम् ।

**तप्तायनी** स्त्री तप्तेन अयतेऽत्र अय-आधारे ल्युट् ङीप् । भूमिभेदे "तप्तायनी मेऽसि" यजु०५।६। तप्तं पुरुषमयति प्राप्नोतीति तप्तायनी । यो हि दरिद्रः क्षेत्ररहितोऽभिति मन्यते तं तापोपशान्त्यर्थं प्राप्नोषि इत्यर्थः । यद्वा तप्तः सञ्चरो यस्यामयति सा तप्तायनी मम असि" वेददी०

**तप्यतु** त्रि० तप-यतुन् । तापके स्त्र्यादौ । "स्त्र्यं तप्यतु तप्यतुर्द्वया" ऋ० २।२४।६ ।

**तम** खेदे अक० दृब्धायां सक० दिवा० अमा० पर० सेट् । ताम्यति । दरित् अतमत्-अतमीत् । ततान तेमतुः चदित् । तमित्वा तान्त्वा तान्तः । "यस्ताम्यति विसंस्रस्य येते" सुश्रु० । "ताम्येयुः प्रच्युताः पृथ्व्या यथा पूर्वां नदीं नराः । अवगाढास्त्रिविद्वांसः" भा० शा० ६०३० श्लो० । "यदा वै तान्तः प्राणं जनतेऽथ संक्लिद्यते" शत० ब्रा० ४।२।२।११ । "न मा तमन्न अमोदत तन्द्रुः" ऋ० २।३०।७ सुब्लुप्तम् ।

**उद्+उत्कर्षेण** खेदे । "नश्योत्तास्यतो वाक्यमुज्जहार वनादहम्" रामा० अयो० ६५ अ० ।

**नि+अतिशयार्थे** अक० । नितान्तम् । "नितान्तदीर्घैर्जनिता तपोभिः" "गोरोचनाक्षेपनितान्तगौरैः" कुमा० ।

**परि+भृशं** खेदे । "संतप्तवक्षाः सोऽत्यर्थं दूयनात् परितास्यति" सुश्रु० ।

**तम** न०ताम्यत्यनेन तम-करणे घञर्थे संज्ञायां च ।।अन्धकारे शब्दरत्ना० । २पादार्धे शब्दच० । ३तमोगुणे राजनि० ४राहौ पु० ज्यो० ५तमालवृक्षे पु० शब्दच० ।

**तमक** पु० ताम्यत्यत्र तम वा-वुन् । श्वासरोगभेदे "वृद्धखेदवमप्रायः कण्ठघुर्घुरिकान्वितः । विशेषाद्दुर्दिने ताम्येत् श्वासः श्लेष्मसमीरतः" सुश्रुतः । "क्षुद्रः साध्यतमस्तेषां तमकः कृच्छ्र उच्यते । त्रयः श्वासा न सिध्यन्ति तमको दुर्बलस्य च" सुश्रुतः ।

**तमत** त्रि० तम-काङ्क्षायाम् अतच् । तृष्णापरे उज्ज्वल० ।

**तमस्** न०तम-करणादौ-असुन् । त्रिगुणात्मकप्रधानस्य गुणभेदे "सत्वं रजस्तम इति प्रकृतेर्गुणास्त्रयः" भाग० १।४। भा० आद्यमेधिकपर्वणि तस्य कार्यभेदादिकमुक्तं यथा "ब्रह्मोवाच । तदव्यक्तमनुद्रिक्तं सर्वव्यापि ध्रुवं स्थिरम् । नवद्वारं पुरं विद्यात् त्रिगुणं पञ्चधातुकम् । एकादशपरिच्छेदं मनोव्याकरणात्मकम् । बुद्धिस्वामिकमित्येतत्पुरमेकादशं भवेत् । त्रीणि कोटांसि यान्यस्मिन्नाध्यायन्ते पुनः पुनः । प्राणेष्वस्मिंस्त्व एतास्तु प्रवर्त्तन्ते गुणात्मिकाः । तमो रजस्तथा सत्त्वं गुणानेतान् प्रचक्षते । अन्योन्यमिथुनाः सर्वे तथाऽन्योन्यानुजीविनः । अन्योन्यापाश्रयाश्चापि तथाऽन्योन्यानुवर्त्तिनः । अन्योन्यव्यतिषक्ताश्च त्रिगुणाः पञ्च धातवः । तमसो मिथुनं सत्त्वं सत्त्वस्य मिथुनं रजः । रजस्तथापि सत्त्वं स्यात् सत्त्वस्य मिथुनं तमः । नियम्यते तमो यत्र रजस्तत्र प्रवर्त्तते । नियम्यते रजो यत्र सत्त्वं तत्र प्रवर्त्तते । नैयात्मकं तमो विद्यात् त्रिगुणं मोहसंज्ञितम् । अधर्मलक्षणञ्चैव नियतं पापकर्मसु । प्रवृत्त्यात्मकमेवाहुः रजः पण्डितकारकम् । प्रवृत्तं सर्वभूतेषु ह्यप्रसूत्पत्तिलक्षणम् । प्रकाशः सर्वभूतेषु लाघवं ह्यप्रधानता । सात्त्विकं रूपमेवन्तु लाघवं साधुसम्मतम् । एतेषां गुणतत्त्वानि यज्ञन्ते तत्त्वहेतुभिः । समासव्यासयुक्तानि तत्त्वतस्तान्निबोधत । संमोहोऽज्ञानमत्यागः कर्मणामविनिर्णयः । स्वप्नः स्तम्भो भयं लोभः शोकः स्वप्नतदूषणम् । अकृतित्वाविपाकश्च नास्तिक्यं भिन्नवृत्तिता । निर्विशेषत्वमन्यत्वं जघन्यगुणवृत्तिता । अकृते कृतमानित्वमज्ञाने ज्ञानमानिता । अप्रैती विकृतीभावोऽश्रद्धा मूढभावना । अनार्जवमसङ्कल्पं कर्म पापमचेतना । गुरुत्वं सङ्गभावत्वमवशित्वमवाग्गतिः । सर्व एते गुणावृत्तास्तामसाः संप्रकीर्तिताः । ये चान्ये विहिताभावा लोकेऽस्मिन् भावसंज्ञिताः । तत्र तत्र नियम्यन्ते सर्वे ते तामसा गुणाः । परिवादकथा नित्यं नित्यं आक्षेपनिन्दकाः । आत्मगर्वाभिमानश्च मोहो मन्युरसूयाऽक्षमा । मत्सरश्चैव भूतेषु तामसं वृत्तमिष्यते । वृथारम्भा हि ये केचिद्वृथादानानि यानि च । वृथा भक्षणमित्येतत् तामसं वृत्तमिष्यते । अतिवादोऽतितिक्षा च मात्सर्यमतिमानिता । अश्रद्धानतैव तामसं वृत्तमिष्यते । एवंविधाश्च ये केचिल्लोकेऽस्मिन् पापकर्मिणः । मनुष्या भिन्नमर्यादास्ते सर्वे

तामसाः स्मृताः। तेषां योनिं प्रवक्ष्यामि नियताः पापकर्मिणाम्। अवाङ्निरयभावाय निर्यङ्निरयगामिनः। स्थावराणि च भूतानि पशवो वाङ्मनांसि च। क्रव्यादा दन्दशूकाश्च कृमिकीटविहङ्गमाः। अण्डजा जन्तवश्चैव सर्वे चापि चतुष्पदाः। उद्भिज्जा बधिरामूका ये चान्ये पापरोगिणः। मन्नाम्नमसि दुर्वृत्ताः स्वकर्मकृतलक्षणाः। अवाक्स्रोतस इत्येते मन्नाम्नमसि तामसाः। तेषामुत्कर्षसङ्क्षेपं वक्ष्याम्यष्टमतः परम्। यथा ते सुकृतान् लोकान् जग्मुः पुण्यकर्मिणः। अन्यथा प्रतिपद्यन्ते विद्वांसो ये च कर्मिणः। स्वकर्मनिरतानान्तु ब्राह्मणानां शुभैषिणाम्। संस्कारेणोर्ध्वमायान्ति यतमानाः सलोकताम्। स्वर्गं गच्छन्ति देवानामित्येषा वैदिकी श्रुतिः। अन्यथा प्रतिपद्यन्ते विबुद्धाः स्वेषु कर्मसु। पुनरावृत्तिधर्माणस्ते भवन्तीह मानुषाः। पापयोनिं समापन्नाश्चाण्डालामूकचुक्काः। वर्णान् पर्यायशश्चापि प्राप्नुवन्त्युत्तरोत्तरम्। मूढयोनिमतिक्रम्य ये चान्ये तामसा गुणाः। स्रोतोमध्ये समागम्य वर्तन्ते तामसे गुणे। अभिव्यक्तस्तु कामेषु मन्नामोह इति स्मृतः। अथो सुनयो देवासुरान्तेऽत्र सुखेप्सवः। तमो मोहो महामोहस्तामिस्रः क्रोधसंज्ञितः। मरणं त्वन्धतामिस्रस्तामिस्रः क्रोध उच्यते। वर्णतो गुणतश्चैव योनितश्चैव तत्त्वतः। सर्वमेतत्तमो विप्राः! कीर्त्तितं वो यथाविधि"।

सांख्ये अधर्मोत्तानावैराग्यानैश्वर्याख्यास्तस्य धर्मोऽलायथा "अध्यवसायो बुद्धिर्धर्मो ज्ञानं विराग ऐश्वर्यम्। सात्विकमेतद्रूपं तामसमस्मात् विपर्य्यस्तम्" सा० का० "रजस्तु चलतया परितस्तं गुणं चालयद् गुरुणा ह्रस्वता च तमसा तत्र तत्र प्रवृत्तिप्रतिबन्धकेन क्वचिदेव प्रवर्त्तते इति ततस्ततो व्यावर्त्त्य तमोनियामकत्वञ्च गुरु वरणकमेव तमः" सां० त० कौ०। अयमर्थः त्रयोगुणास्तं गुणं सत्त्वादीनि परितः स्वकर्मकरणाय चालयत् प्रवर्त्तयत् रजः गुरुणा गौरवान्वितेन ह्रस्वता यत्र यत्र कार्य्यजनाय तस्य प्रवृत्तिस्तत्र तत्र प्रतिबन्धकेन तमसा क्वचिदेव कार्य्ये प्रवर्त्तते कर्मक्षमं क्रियते इति। तथा च तस्मात् तस्मात् कार्य्यात् व्यावर्त्त्य रजसः प्रवृत्तिं रोधयित्वा तमो नियामकमिति। अन्योऽपि विशेषस्तत्रोक्तो यथा "प्रीत्यप्रीतिविषादात्मकाः प्रकाशप्रवृत्तिनियमार्थाः। अन्योन्याभिभवाश्रयजननमिथुनवृत्तयश्च गुणाः" "गुणा इति परार्थाः सत्त्वं लघु प्रकाशकमित्वात् च सत्त्वादयः क्रमेण निर्द्दिश्यन्ते। तदनागतावेक्षणेन तन्त्रयुक्त्या वा प्रीत्यादीनां यथासंख्यं वेदितव्यम्। एतदुक्तं भवति प्रीतिः सुखं प्रीत्यात्मकः सत्त्वगुणः, अप्रीतिर्दुःखं अप्रीत्यात्मको रजोगुणः, विषादो मोहः विषादात्मकस्तमोगुण इति। ये तु मन्यन्ते न प्रीतिर्दुःखाभावादतिरिच्यते एवं दुःखमपि न प्रीत्यभावादन्यदिति तान् प्रत्यात्मग्रहणम्। नेतरेतराभावाः सुखादयः अपि तु भावाः आत्मशब्दस्य भाववचनत्वात् प्रीतिरात्मा भावो येषां ते प्रीत्यात्मानः एवमन्यदपि व्याख्येयम्। भावरूपता चैषामनुभवसिद्धा परस्पराभावात्मकत्वे तु परस्पराश्रयापत्तेरेकस्याप्यसिद्धेरुभयासिद्धिरिति भावः। स्वरूपमेषामुक्त्वा प्रयोजनमाह प्रकाशप्रवृत्तिनियमार्थाः अत्रापि यथासंख्यमेव। रजः प्रवर्त्तकत्वात्सर्वत्र लघु सत्त्वं प्रवर्त्तयेत् यदि तमसा गुरुणा न नियम्येत। तमो नियन्तृ क्वचिदेव प्रवर्त्तयति इति भवति तमोनियामकम्। प्रयोजनमुक्त्वा क्रियामाह अन्योन्याभिभवाश्रयजननमिथुनवृत्तयश्च वृत्तिः क्रिया सा च प्रत्येकमभिसम्बध्यते। अन्योन्याभिभववृत्तयः एषामन्यतमेनार्थवशाद्गुणेनान्यदभिभूयते। तथाहि सत्त्वं रजस्तमसी अभिभूय स्वात्मानमात्मनो वृत्तिं प्रतिलभते एवं रजः सत्त्वतमसी अभिभूय घोराम्, एवं तमः सत्त्वरजसी अभिभूय मूढामिति। अन्योन्याश्रयवृत्तयः। यद्यप्याधाराधेयभावेन नाश्रयार्थो घटते तथापि यदपेक्षया यस्य क्रिया स तस्याश्रयः तथाहि सत्त्वं प्रवृत्तिनियमार्थाच्चित्यं रजस्तमसी प्रकाशेनोपकरोति, रजः प्रकाशनियमार्थाच्चित्यं प्रवृत्तमितरयोः, तमः प्रकाशप्रवृत्ती आश्रित्य नियमेनेतरयोरिति। अन्योन्यजननवृत्तयः अन्यतमोऽन्यतमं जनयति जननञ्च परिणामः स च गुणानां सदृशरूपः अतएव न हेतुमत्त्वं तत्त्वान्तरस्य हेतोरभावात्। नाप्यनित्यत्वं तत्त्वान्तरे लयाभावात्। अन्योन्यमिथुनवृत्तयः अन्योन्यसहचराः अविनाभाववर्त्तिन इति यावत् चः समुच्चये भवति चात्रागमः "अन्योन्यमिथुनाः सर्वे सर्वे सर्वत्र गामिनः। रजसोमिथुनं सत्त्वं सत्त्वस्य मिथुनं रजः। तमसश्चापि मिथुने ते सत्त्वरजसी उभे। उभयोः सत्त्वरजसोर्मिथुनं तम उच्यते। नैषामादिः संप्रयोगो वियोगो वोपलभ्यते" इति। सा० त० कौ०

"गुरुवरणकमेव तमः प्रदीपवच्चार्थतो वृत्तिः"। "ऊर्द्ध सत्वविशालस्तमोविशालश्च मूलतः सर्गः"। सां० का०। "सत्त्वं ज्ञानं तमोऽज्ञानं रागद्वेषौ रजः स्मृतम्"। मनुः। चक्षुर्वृत्तिनिरोधके प्रावरादिके अन्धकारे "अदस्त्वयानुत्तमनुत्तमं तमः" "आसादितस्य तमसा नियतेर्नियोगात्" माघः। तच्च स्वपरप्रकाशकतेजः सामान्याभावरूपमिति नैयायिकाः अन्धकारशब्दे २०६३पृष्ठ दर्शितम्। वेदान्तिनस्तु भावरूपं प्रतिपेदिरे यथा विवरणोपन्यासे। तमः प्रकाशवहिरङ्गस्वभावयोरिति"शा० भाष्यव्याख्याने "ननु तमः प्रकाशवदत्रापि भावाभावरूपत्वसुपाधिः। आलोकाभावस्तम इति नैयायिकाः। रूपदर्शनाभावस्तम इति प्राभाकरा इति चेत् मैवं उपचयापचयाद्यवस्थाभेदवत्त्वेनोपलभ्यमानत्वेनाभावत्वायोगात् नीलरूपवत्त्वेन द्रव्यत्वाच्च। ननु भावत्वपक्षे बद्धालोकवति देशे निमीलितनयनस्य कथं तमःप्रतीतिः बद्धालोकेन निरुत्सुकीकारात् सहावस्थानं तु मन्दालोकेनैव पूर्वसङ्गमिति चेत् न गोलकान्तर्वर्त्तितमसः प्रतीत्युपपत्तेः नच नेत्रस्यान्तर्वर्त्तिवस्तुग्राहकत्वासम्भवः पिहितकर्णस्यान्तरशब्दग्राहकत्वदर्शनात्। न चैवं गोलकान्तरस्याञ्जनादेरपि निमीलितनयनेन यहणप्रसङ्गः। तमोव्यतिरिक्तरूपिण आलोकसहितचक्षुर्ग्राह्यत्वनियमात्। अथ मतं द्रव्यत्वे सति तमसः आलोकविनाशितस्यालोकापगमे झटिति नोत्पत्तिः कार्य्यद्रव्याणां द्व्यणुकादिक्रमेणैवारम्भादिति तस्य विवर्त्तवादिनां क्रमानपेक्षत्वात् कारणं तु मूलाविद्यैव। अथापि तमो न रूपवद् द्रव्यं स्पर्शशून्यत्वादाकाशवदिति चेत् न वायुर्न स्पर्शवान् रूपशून्यत्वादाकाशवदित्याभाससमानयोगक्षेमत्वात् प्रत्यक्षविरोधस्य तुल्यत्वात्। अथालोकाभावे समारोपितं नीलं रूपं गोचरयतीति तमःप्रत्यक्षान्यथा गतिरुच्येत एवमपि हेतुरनैकान्तिकः रूपवद्द्रव्यस्यैव धूमस्य चक्षुःप्रदेशादन्यत्र स्पर्शशून्यत्वात्। तत्र विद्यमान एव धूमस्पर्शोऽनुद्भूत इति चेत् तर्हि तमःस्पर्शोऽपि सत्त्वेव सर्वत्रानुद्भूत इति हेत्वसिद्धिः स्यात्। नच सतः सर्वत्रानुद्भवोऽसम्भावितः। आकरजे सुवर्णादौ सतएव स्वपरप्रकाशकभास्वरूपस्योष्णस्पर्शस्य च सर्वत्रानुद्भवदर्शनात्तदेवं भावरूपतमोवादे न कोऽपि दोषः। नन्वभाववादेऽपि तथा उपचयापचयाद्यवस्थानां प्रतियोग्यालोकोपाधिकत्वात् नीलरूपस्य चारोपितत्वादिति चेत् मैवं दुर्निरूपत्वात् तथाहि किमालोकमात्राभावस्तमः उत त्रैकालिकाऽभावः सर्वालोकाभावो वा प्रथमद्वितीयपक्षयोः प्रागभाव इतरेतराभावः प्रध्वंसाभावो वा तम इति दुर्भणं सन्निहितकिरणसन्तते देशे प्रदीपजन्मनः प्राग् जाते वा प्रदीपे दीपनाशे वा। तमोबुद्ध्यभावात्। तृतीये सर्वालोकसन्निधानमन्तरेण न निवर्त्तते। रूपदर्शनाभावस्तम इत्यप्ययुक्तं बद्धालोकान्धकारसंहतापवरकमध्यस्थितस्य बहीरूपदर्शनान्तस्तमोदर्शनयोर्युगपदेव भावात्। तस्माद्भावस्तम इति दृष्टान्ते नास्त्युक्तोपाधिः"। २२तमोवदावरके अज्ञाने अविद्यायां "सहि देवः परं ज्योतिः तमः पारे प्रतिष्ठितम्" कुमा०। "आदित्यवर्णं तमसः परस्तात्" श्रुतिः। "आसीदिदं तमोभूतमप्रज्ञातमलक्षणम्" "महाभूतादि वृत्तौजाः प्रादुरासीत् तमोनुदः" मनुः।

सांख्योक्ते अविद्याया २१अष्टविधे भेदे च। "भेदस्तमसोऽष्टविधः" सां० का०। "तमसोऽविद्यायाया अष्टविधो भेदः। अष्टास्य विधाः अव्यक्तमहङ्कारपञ्चतन्मात्रेषु अनात्मसु आत्मबुद्धिरविद्या तस्या अष्टविधविषयत्वादष्टविधत्वम्" सां० तत्त्वकौ०। २३राशौ पु० न०। तस्य भूताद्यारूपत्वात् तथात्वम्। अणुशब्दे दृश्यम्। "तमोलक्षे चेत् सचेष्टा तनुस्त्वं" नील० ता०। २५विशेषदर्शनविरोधिदोषे २६कार्य्याकार्य्याविवेके च म० शब्दार्थचि०। समूहार्थकाण्डशब्दे परे कस्का० विसर्गश्च सः। तमस्काण्डः "अपातमस्काण्ड मलीमसं नभः" माघः।

"अवसमन्धेभ्यस्तमसः" पा० अच् समा०। अवतमसं सनलमसम् अन्धतमसम्। तृतीयान्तेनानेन ज्ञानस्य समासे तृतीयाया अलुक्। तमसाजतः तमसाच्छन्न इत्यादि। तमसाकृतखेदं चण्। तामसाजत तमःसम्बन्धिनि त्रि० स्त्रियां ङीप्।

**तमस** पु० तम-असच्। १कूपे २अन्धकारे च संज्ञाप्रसारः ३अन्धकारे ४नगरे न० त्रिका०। ५नदीभेदे स्त्री "संप्राप्य तीरं तमसापगायागङ्गाम्बु सम्पर्कविशुद्धिभाजः"। "विगाहितं यासनमम्बु पुण्यम्" भट्टिः। "यस्याः खरत्वात् ताम्यति पापं सा तमसा" जयमङ्गलः। गङ्गाम्बुसम्पर्कैत्युक्तेः सा गङ्गासङ्गता यमुना चास्याः सन्निक-

दृश्या। सैवं वाल्मीकमुनेराश्रमनिकटस्था यथाह रामा० आदि० २६ अ० "अगाम तमसातीरं जाह्नव्यास्त्विदूरतः"। "स तु तीरं समासाद्य तमसाया मनिन्दिता। विख्यमाह स्थितं पार्श्वे दृष्ट्वा तीर्थमकर्दमम्। अकर्दममिदं तीर्थं भरद्वाज! निशामय। रमणीयं प्रसन्नाम्बु सन्मनुष्य मनो यथा। न्यस्यतां कलसस्तात! दीयतां वल्कलं मम। एतमेवावगाहिष्ये तमसातीर्थमुत्तमम्"। "ततस्तु तमसातीरं रम्यमाश्रित्य राघवः" ४६ अ०। "ततस्तु तमसातीरं रम्यमाश्रित्य राघवः" ४६ अ०।

**तमस्काण्ड** पु० ६त०। कस्का० विसर्गस्य सः। तमः समूहे "त्वयातमस्काण्डमखीमसं नमः" माघः।

**तमस्तति** स्त्री ६त०। अन्धकारसमूहे।

**तमस्वत्** त्रि० तमस्+अस्त्यर्थे मतुप् मस्य वः सान्तत्वात् मत्वर्थे न विसर्गः। तमोयुते स्त्रियां ङीप् सा च २रात्रौ स्त्री विघण्टुः २कृरिद्रायाञ्च।

**तमस्विन्** त्रि० तमोऽस्तीति विनि सान्तत्वात् मत्वर्थे न विसर्गः। १तमोयुक्ते स्त्रियां ङीप्। सा च २रात्रौ २कृरिद्रायाञ्च अमरः। "अदृश्यमानस्वाद्य तमस्विन्यामनिन्दिते"। भा० वि० २२ अ०।

**तमाल** पु० तम-कालन्। स्वनामख्याते वृक्षभेदे अमरः। "तमालो मधुरो बल्यो वृष्यश्च शिशिरो गुरुः। कफपित्तव्रणादाहश्रमभ्रान्तिहरश्च सः" राजनि०। तत्पत्राकृतित्वात् २तिलके २वृक्षभेदे ४वृक्षयुक्ते च मेदि०। ५कृष्णखदिरे शब्दच० ६वंशत्वचि भरतः। ७पत्रके (तेजपात) राजनि०।

"यत्तत्तालतमालगाढतरलव्यालोलवल्लीलता" गङ्गास्तवः "अनन्तानेकतमालतालम्" "तेनोपमीयेत तमालनीलम्" माघः। "एकाकिन्यपि यामि सत्वरमतः स्रोतस्तमाला कुलम्" शा० द०। तमालदले तु पर्य्युषितत्वदोषो नास्ति यथोक्तं आ० त० योगिनीतन्त्रे "विल्वपत्रं च माघस्य तमालामलकोद्भवम्। कच्चूरं तुलसी चैव पञ्चकं सुनिरुच्यकम्। एतत् पर्य्युषितं न स्यात् यद्यान्यत् कलिकात्मकम्"। स्वार्थे क। तमालक तत्सदृशे वंशत्वचि च तमालदले पु० न० शब्दरत्ना०।

**तमालपत्र** न० तमालपत्रस्येवाकारोऽस्यस्य अच्। १तिलके अमरः २पत्रजे (तेजपात) ३तमालदले च पु० मेदि०। ४तमालदलपत्रे न०। "तमालपत्रासरघासु रन्तुम्" रघुः।

**तमालिका** स्त्री तम-कालन् संज्ञायां कन् टापि अत इत्त्वम्। १ताम्रवल्ल्यां २भूम्यामलक्यां च राजनि०। (तमलुक) ३देशभेदे लिङ्गा०।

**तमालिनी** स्त्री तमालदृक्षाः बहवः सन्त्यत्र पुष्करा० देशे इनि ङीप्। १तमोलिप्तदेशे (तमलुक) हेम०। तमालाकृतिवृक्षयुक्तत्वात् २भूम्यामलक्यां राजनि०।

**तमाली** स्त्री तम-कालन् गौरा० ङीष्। १ताम्रवल्ल्यां (पान) २वृक्षभेदे च राजनि०।

**तमि(मी)** त्रि० तम-इन् वा ङीप्। २रात्रौ अमरः। "स तमीं तमोभिरधिगम्य ततान्" माघः। २मोहे च तमिधीचिः।

**तमिधीचि** स्त्री तमिं मोहं दिधक्षति सिध-इन् संज्ञायां धत्वं पृषो० दीर्घः। १अप्सरोभेदे। "याः क्रन्दास्तमिधी चयोऽश्वकामा मनोमुहः। ताभ्यो गन्धर्वपत्नीभ्योऽप्सरोभ्योऽकरं नमः" अथ० २।२।५ २बलवति त्रि० "निरत्रसन् तमिधीचीरभैषुः" ऋ० ८।४८।१३। "तमिधीचीबलवत्यः" भा०। छान्दसः जसः अस्।

**तमिस्र** न० तमोऽस्त्यत्र ज्योत्स्नेत्यादि० निः तमिश्रा रात्रिरात्रयत्रेत्यस्य अण् वा। १अन्धकारे २क्रोधे च मेदि०। ३तमःप्रधानरात्रौ स्त्री अमरः ४दर्शरात्रौ वाचस्पतिः। ५अन्धकारतती स्त्री मेदि०। "सूर्य्ये तपत्यावरणाय दृष्टेः कल्पेत लोकस्य कथं तमिस्रा" रघुः। "अनभिज्ञास्तमिस्राणां दुर्दिनेष्वभिसारिकाः" क्षमा० "उज्झतो शुचमिवासु तमिस्रा" किरा०।

**तमिस्रपक्ष** पु० तमिस्राख्यस्य कृष्णताडयः पक्षः। कृष्णपक्षे "तमिस्रपक्षस्तु टिकुटभाषितम्" नैष०। "तमिस्रपक्षस्य तिथौ रुगोः सुतः" इ० स० ६अ०। "आजेयमाषाढ तमिस्रपक्षे त्वयाकरेणोपगतं समीक्ष्य" २४अ०। [कृष्णभेदे।

**तमुष्टुहीय** न० तस्य टुञ्हि इत्यादिकर्मणिक्तस्य प्रवृत्तः शङ्क०अ।

**तमेरु** त्रि० तास्यति तम-एरु। १म्लानियुक्ते "अतमेरुर्यजमानस्य प्रजा भूयात्" यजु०।।२१ "यूपो यज्ञहेतुः पुरोडाशः अतमेरुर्भूयात्। तस्य म्लानौ तास्यतीति तमेरुः औणादिकएरुप्रत्ययः न तमेरुः अतमेरुः। मकाराद्यनेन म्लानिरहितो भवतु। यजमानस्य प्रजा पुत्रपौत्रादिः अतमेरुर्म्लानिरहिता भूयात् यजमानस्य प्रजायाः कदापि दुःखं माभूत्त्वर्थः" वेददी०।

**तमोघ्न** पु० तमोऽन्धकारं मोहमज्ञानं वा हन्ति हन–टक्। १सूर्य्ये, २वह्नौ, ३चन्द्रे, ४बोधे, ५विष्णौ, ६शिवे च मेदि०। अनुभूतकर्त्तृके हन न टक् किन्तु खश्। तमोवात अमनुष्ये तमोनाशके त्रि० तत्र सूर्य्ये "आगुगामी तमोघ्नश्च हरिदश्च कीर्त्यते" भा० ब० २ अ०। "यथा तमांस्यभ्युदितस्तमोघ्नः पूर्वां प्रतिष्ठां क्रमशाश्च वीरः" भा० द्रो० १४६ अ०। [कीटे शब्दरत्न०।

**तमोजगोतिस्** पु० तमसि अन्धकारे ज्योतिरस्य। खद्योते

**तमोनुद** पु० तमोनुदति खण्डयति नुद–क्विप्। १सूर्य्ये २चन्द्रे ३वह्नौ ४बोधे च शब्दरत्ना० ५अन्धकारनाशके त्रि० "एवमुक्तस्तदाऽत्रिर्वै तमोनुदमवच्छ्रयी" भा०आ० १५६ अ०।

**तमोनुद** त्रि० तमोऽज्ञानमन्धकारं वा नुदति नुद–क। १अन्धकारनाशके २अज्ञाननाशके ३ईश्वरे पु०। "वायोरपि विकुर्वाणात् विरोचिष्णु तमोनुदम्" महाभूतादि वृत्तौजाः प्रादुरासीत्तमोनुदः" मनुः।

**तमोऽपह** पु० तमोऽपहन्ति अप+हन–ड। १सूर्य्ये २चन्द्रे ३वह्नौ ४बोधे च मेदि०।५तमोनाशकयुक्ते प्रदीपादौ त्रि० "यस्ते हि तमोऽपरं सुखः" माघः। "पुत्रं तमोऽपहं लेभे नक्तं ज्योतिरिवौषधिः" रघुः। ६मोहनाशके "आगमादिव तमोऽपहादितः" किरा०। बुद्धेरज्ञाननाशकत्वात् तथात्वम् "तत्त्वाज्ञानं धिया नश्येत्" वेदान्तका०।

**तमोभिद्** पु० तमो भिनत्ति भिद–क्विप्। १शार्वरतमोभेदके खद्योते शब्दर० २तमोभेदकयुक्ते त्रि० क। तमोभिदोऽण्यर्थे त्रि०।

**तमोमणि** पु० तमसि मणिरिव। १खद्योते त्रिका०। २मोमेदके मणौ राजनि०।

**तमोमय** त्रि० तमआत्मकम् तमःप्रचुरं वा तमस्+मयट्। १अन्धकारात्मके २अज्ञानात्मके ३तमःप्रचुरे च। ४राक्षौ पु० "तमोमयं सैंहिकेयाख्यम्" हरि० ब० ५ अ०। राक्षोत्व यथा तमोरूपत्वं तथा ऋगुग्रन्थे ४८४ पृ० उक्तम्। "विद्यसजीत्मनः कायं नाभिनन्दंस्तमोमयम्" भाग० १। २०।२२। तमोमयमन्धकारप्रचुरं रात्रिरूपं कायमित्यर्थः।

**तमोऽरि** पु० ६त०। १सूर्य्ये २चन्द्रे ३वह्नौ ४ज्ञाने च "तमोऽरिबिम्बप्रतिबिम्बधारी करावकाले। यवनाश्रमाणः" सुन्दरसमस्यापूरणम्। तमःशत्रुश्चेतयोऽत्र।

**तमोलिप्ती** स्त्री तमसाऽत्यं लिप्यते सा करणोपपदे लिप–क्त उप० स० ङीप्। देशभेदे। (तमलुक) शब्दरत्ना०।

**तमोविकार** पु० ६त०। तमसो विकारे निद्रालस्यादौ तमःशब्दे दृश्यम्। तमसेव विकारो यत्र। २रोगे राजनि०। ३तस्मिन्नारात्रौ शब्दार्थचि०।

**तमोवृध** त्रि० तमसि शार्व्वरे, तमसा आवरकेणाज्ञानेन वा वर्द्धते वृध–क्विप् ७त० ३त० वा। १तमसि रात्रौ वर्द्धमाने प्रचुरसञ्चारिणि राक्षसादौ। "न्यर्षयतं वृषणा तमोवृधः" ऋ० ७।१४०।३। २अज्ञानवर्द्धके च।

**तमोहन्** त्रि० तमोहन्ति हन–क्विप्। अज्ञाननाशके "ज्योतीरथं शुक्रवर्णं तमोहनम्" ऋ० १।१४०।१। तमोहनरि २सूर्य्ये ३चन्द्रे च "तमोहा यदि पापेन त्वयैवैव हि वीक्षितः" ज्यो० त०।

**तमोहर** त्रि० तमोहरति हृ–अच् ६त०। १अन्धकारनाशके २अज्ञाननाशके च २सूर्य्ये ४चन्द्रे च पु० शब्दर० "निर्गुणं वामभागे च सव्यभागेऽङ्गुता निजा। मध्ये नाथ स्वयं ज्योतिस्तज्ज्योतिर्मे तमोहरम्" शब्दार्थचि० धृतवाक्यम्

**तम्बा(म्बा)** तम्ब–अच् पृषो० वा। सौरभेय्याम् हेमच०।

**तम्ब** गतौ भ्वा० पर० सक० सेट्। तम्बति अतम्बीत्। ततम्ब

**तम्बिका** स्त्री तम्ब–ण्वुल् टाप् कापि अत इत्वम्। सौरभेय्यां हेमच०।

**तम्बीर** पु० तम्ब–बा० ईरन्। "वङ्गी राष्ट्रनगोऽन्यर्क्षगामी दीप्तांशुकैर्ण्डजः। दत्तेऽन्यकै कार्यं करक्तम्बीरोऽम्बकार्य्ययोः" नी० ता० उक्ते योगभेदे।

**तम्र** त्रि० ताम्यत्यनेन तम–करणे र। ग्लानिसाधने "प्रतम्रा अवपक्तमांसि" ऋ० १०।७१।५। [तिमे।

**तय** गतौ रक्षणे च भ्वा० आ० सक० सेट्। तयते अतयिष्ट-

**तर** पु० तॄ–भावे अप्। १तरणे "पथं यानं तरे दाथं पौरुषोऽर्द्धपथं तरे" "ब्राह्मणाक्षत्रियस्यैव न दाथात्तो पथं तरे" मनुः कर्त्तरि अच्। २क्षयानौ पु० मेदि०। तरत्यनेन करणे अप्। ३आतरे पथादौ। "दीर्घाध्वनि यथादेशं यथाकालं तरो भवेत्" मनुः।

**तरच्छु** पु० तरं गतिं मार्गं वा च्छिनत्ति भिनत्ति छिद्–डु। मृगादने क्षुद्रव्याघ्रे अमरः। "श्वा क्रव्यादर्क्षा गर्दभस्तरच्छुः रक्षसामिन्द्राय" यजु० २४।४०। अत्रमेधे राक्षसेन्द्रदेवताकपशुकथनम्। "तरच्छून्छशवानरान्" हरिवं० १६५ अ०।

**तरङ्ग** पु० तॄ–अङ्गच्। (ढेउ) जलौघे वायुना जलस्य सञ्चालनेन तिर्य्यग्गत्यादिभ्रवणे अमरः। "समीरणोत्थैव तरङ्गलेखा" रघुः २वस्त्रे ३हयादीनां सप्तप्रकारे उणादि०। ततः तारका० इतच् तरङ्गित जाततरङ्गे त्रि०। "साग-

रप्रतिमं घोरं वाहनोर्मितरङ्गितम्" भा० भी० ८८अ० । पुष्करा० देशे इनि ङीप् तरङ्गिन् तरङ्गयुक्तदेशे त्रि० । नद्यां स्त्री ङीप् ।

**तरङ्गिणी** स्त्री तरङ्ग+पुष्करा० नदी रूपदेशे इनि ङीप् । नद्याम् अमरः । "तरङ्गिणीवेष्विरिवायता भुवः" माघः । "गजवाजिमनुष्याणां योषितानां तरङ्गिणी" भा० भी० ६४ अ० ।

**तरङ्गित** त्रि० तरङ्गः संजातोऽस्य तार० इतच् । १जाततरङ्गे २चञ्चले च । तरङ्गशब्दे उदा० इदम् ।

**तरण** पु० तॄ-करणे कर्मणि भावे वा ल्युट् । १प्लवे (भेला) २स्वर्गे । ३प्लवने ४देशान्तरगमने १पारगमने च न० शब्दार्थचि० "भवति भवार्णवतरणे नौका" मोहमुद्गरः । "स्वप्नदीतरणावर्षणामेध्यदर्शनप्रवाणेषु तु यत्कृत्कालद्रव्यैकार्थत्वात्" कात्या० श्रौ० १।७।१२

**तरणि** पु० तॄ-अनि । १सूर्ये, २भेलके, ३अर्कवृक्षे, च अमरः ४किरणे हेमच० हृताक्षे च । ७नौकायां, ८घृतकुमार्याम् स्त्री मेदि० । वा ङीप् नौकायां ९तारके १०शीघ्रगन्तरि त्रि० । "देवा धूर्षु तरणीनू यो वहन्ति" ऋ० ७।६७।८। "तरणीस्तारकान् शीघ्रगन्तॄन् वा" भा० ११शबूनुत्तीर्य वर्त्तमाने "धृतस्य तरणिर्नावा" ऋ० १।४६।१ शबूनुत्तीर्य वर्त्तते इति तरणिः" भा० "सोऽयं व्याकरणार्थवैकतरणिः" बोपदेवः ।

**तरणिपीत** पु० तरणेः पीत इव । काशाम्बुवाहिन्यां जटा० ।

**तरणिरत्न** न० तरणिप्रियं रत्नम् । सूर्यप्रिये १माणिक्ये राजनि० तरणिमणिप्रभृतयोऽप्यत्र पद्मरागशब्दे २७६२४ पृ० दृश्याम्

**तरणी** स्त्री तरत्यनया तॄ-करणे ल्युट् ङीप् । १नौकायां शब्दरत्ना० २पद्मचारिणीलतायां शब्दच० । ३घृतकुमार्याम् राजनि० ।

**तरण्ड** पु०न० । तॄ-अण्डच् । १वड़िशीसूत्रवन्धनकाष्ठे, (छिप) २प्लवे पु० । ३नौकायां स्त्री मेदि० स्त्रीत्वपक्षे गौ० ङीष् । ४कुम्भतुम्बीरम्भादिफलतुम्बे शब्दरत्ना० ५देशभेदे पु० शब्दर० ।

**तरण्डक** न० तरण्ड+संज्ञायां कन् । तीर्थभेदे "ततो गच्छेत राजेन्द्र ! द्वारपालं तरण्डकम् । तत्र तीर्थं सरस्वत्यां यत्रेन्द्रस्य महात्मनः" भा० व० ८३ अ० । २वड़िशसूत्रबन्धकाष्ठभेदे (फाता) न० । "संसारसागरावर्त्तपतज्जन्तुतरण्डकम्" काशीख० ३३ अ० । ३नौकायां स्त्री गौरा० ङीष् शब्दरत्ना० ।

**तरण्डपादा** स्त्री तरण्ड एव पाद इव तरणहेतुत्वात् यस्याः । लोकाभेदे शब्दरत्ना० ।

**तरण्य** तरण गतौ कण्ड्वा० यक् भा० प० सक० सेट् । तरण्यति अतरण्यीत् अतरण्यीत् ।

**तरत्समन्द** त्रि० तरत्समेत्यादि ऋचः सन्यत्र अच् । पावमानसूक्तान्तर्गते सूक्तभेदे तरत्समन्दीयशब्दे दृश्यम् । "शुक्रवत्योऽथ कुल्माषाः पावमान्यस्तरत्समाः" हेमाद्रि श्राद्धकल्पधृतवाक्यम् ।

**तरत्समन्दीय** न० पावमानसूक्तान्तर्गते सूक्तभेदे । "जपं स्तरत्समन्दीयं पूयते मानवस्यकात्" मनुः । "तरत्समन्दीदीवतीत्येताः चतस्र ऋचोऽपनू" कुल्लू० । ताश्च ऋचः ऋ० ९।५८।१ प्रभूतयज्ञतमः ।

**तरतम** त्रि० तरेति तमेति प्रत्ययार्थौ बोध्यतयाऽस्त्यत्र अच् । न्यूनाधिकभावेन वर्त्तमाने तरतमौ हि प्रत्ययौ न्यूनाधिकभावबोधकाविति तदर्थकत्वादस्य तथात्वम् । "तरतमयोगयुक्तांश्च भावानतिरूक्षानतिस्निग्धानल्पानतिशीतानित्येवमादीन् विवर्जयेत्" सुश्रु० । तस्य भावः ष्यञ् । तारतम्य न्यूनाधिकभावे न० "तारतम्येन वर्त्तमानः" भा० भा० ।

**तरद** स्त्री तॄ-करणे अदि । १प्लवे भेलके । कर्त्तरि अदि । २कारण्डवपक्षिणि च मेदि० ।

**तरदी** स्त्री तरेण तरणेन दीयते खण्ड्यते दो-खण्डने घञर्थेक कौरा० ङीष् । कण्टकयुक्तद्रुमभेदे । राजनि० । "तरदी मधुरा तिक्ता गुर्वी बल्या कफापहा" राजनि० । टाप् तरदाप्यत्र तरटीति पाठान्तरम् ।

**तरहटी** स्त्री पक्वान्नभेदे "हृतेन मर्दितां दृष्ट्वा फेनिकां मेलयेत्ततः । विधाय वटिकाकारां हृते मन्दाग्निना पचेत् । प्रलिप्ताः खण्डपाकेन कर्पूरेण विमिश्रयेत् । तत एताः समरिचास्तरहट्यस्तु ताः स्मृताः । बल्या पुष्टीकरी हृद्या हृद्या पित्तानिलापहा । स्निग्धा कफदा ईषत्किञ्चित् सम्भवति" शब्दार्थचि० वाक्यम् ।

**तरन्त** पु० तॄ-झच् । १मस्तके, २प्लवे, ३भर्त्तरि, ४राक्षसे च ५नौकायां स्त्री गौरा० ङीष् । उणादिको० ।

**तरन्तुक** न० कुरुक्षेत्रस्थानभेदे । "तरन्तुकारन्तुकयोर्यदन्तरं रामह्रदानां च मचक्रुकस्य च । एतत् कुरुक्षेत्रसमन्तपञ्चकं पितामहस्योत्तरवेदिरुच्यते" भा० व० ८३४ अ० ।

**तरपण्य** न० तरस्य नद्यादिपारयानस्य पण्यं शुल्कम् । नद्यादेः पारयानार्थे देये शुल्के आतरे (भाड़ा) अमरः ।

**तरवालिका** स्त्री करपालिका+पृषो०। खड्गभेदे हेमच०।

**तरम्बुज** न० मध्यजलके फलभेदे कालिङ्गशब्दे २६७ पृ० तद्गुणादि दृश्यम्।

"ज्यैष्ठे मासि महेशानि! पौर्णमास्यां निशार्द्धके। हस्तार्क्षतुरा महाकाली भ्रमन्ती पिङ्गकानने। तज्जग्राह ब्रह्मणा तस्यै फलं दत्तं तरम्बुजम्। तत्फलभक्षणात्तृप्ता वरदापि हरप्रिया। यो मे दद्यात् फलं रम्यं स चिरायुर्यतुर्युगम्"। उत्तरकामाख्यातन्त्रम्।

**तरल** पु० तॄ-अलच्। १क्षारमध्यस्थे मणौ, अमरः २क्षारे,। ३तले भेदि०। ४चपले, ५कामुके, ६विस्तीर्णे, ७भास्वरे, ८मध्यस्थूले-द्रव्ये, ९द्रवीभूते पदार्थे च त्रि० हेमच०। १०क्षीरके रत्ने १०यवान्वाम्, ११सुरायाञ्च स्त्री धरणिः तत्र भास्करे "तारावितानतरला इव यामवत्यः" किरा० "व्याधानुसार्य्यमाणतरलतारामृगा" काद०। "उत्कण्ठितासि! तरले" मा० द०। "तारापतिस्तरलविद्युदिवाभ्रवृन्दम्" रघुः। "वैरायितारस्तरलाः" माघः। क्षारमध्यमणौ "प्रवालमुक्तास्तरलाश्च क्षाराः" भा० क० ९४अ० १३ अ०। "क्षारांस्तरलविद्राच सूर्य्यभासा विभूषिताः हरिवं० १५२ अ०। भवा० अभूततद्भावे क्यङ्। तरलायते "तथापि तरलायते चेतः" उद्भटः।

**तरललोचना** स्त्री तरलं चञ्चलं लोचनं यस्याः। चञ्चललोचनायां स्त्रियां हेमच० २चञ्चललोचनयुक्तमात्रे त्रि० कर्म०। ३चञ्चले नेत्रे न०।

**तरलित** त्रि० तरल इवाचरति तरलं करोति तरल+क्विप्-णिच्-क्त। १आन्दोलिते, २कम्पिते, ३धृते, ४लुलिते च हेम०।

**तरवारि** पु० तरं शत्रूणां गतिं वारयति तॄ-णिच्-इन्। खड्गभेदे। (तरवार) इति भाषा। हेमच० असिशब्दे ५५१पृ० तल्लक्षणादिकञ्च युक्तिकल्पतरावत्र विशेष उक्तो यथा "अङ्गं रूपं तथा जातिर्नेत्रादिष्टे च भूमिका। ध्वनिर्मानमिति प्रोक्तं खड्गलक्षणाष्टकं शुभम्। यस्मिन्ने दृश्यते यादृक् विभिन्ने घटिते तथा। यदेव दृश्यते चिह्नं तदङ्गं संप्रचक्षते। नीलकृष्णादिकं खड्गे रूपमित्यभिधीयते। तेनैव यत् प्रतीतं स्यात् तज्जातिरिति गद्यते। अङ्गातिरिक्तं यज्जातिस्तन्नाड्याख्योपलक्षकम्। तन्नेत्रमिति जानीयात् खड्गे खड्गविशारदाः। अङ्गातिरिक्तं खड्गादि यच्छुद्धत्वोपलक्षकम्। तदरिष्टमिति प्राज्ञैर्भूमिरङ्गादिधारणम्। यः खड्गे जायते शब्दो दण्डघट्टनादिना हते। स ध्वनिस्तुलना मानं ज्ञानमष्टविधन्त्विदम्। पञ्चाद्या निपुणैः खड्गे सम्भाव्यन्तेऽपि लक्षिताः। अन्यावलक्षितौ द्वौतौ नावेव सहजाविति। शतमङ्गानि चत्वारि रूपाणि जातयस्तथा। लिंगन्नेत्राणि जानीयादरिष्टानां तथैव च। भूमिश्च द्विविधा प्रोक्ता ध्वनिरष्टविधो मतः। मानन्तु द्विविधं प्रोक्तमित्येषां संग्रहो मतः"। खड्गस्य शताङ्गनामानि लौहार्णवे "कृष्णसर्पगजोरुकटमस्यूलाङ्गकृष्णारुणश्वेताम्भोजगदातिलाननकषायस्निग्धसितैतसिराः। भालाजीवकपट्टपदोर्द्धमरिचव्याघ्राश्ववर्हांघ्रिनखौद्रुद्रुकमक्षिकातुण्डयवद्रोहिषुमासपर्णाः। सिंहीतण्डुलगोशिराशिवनखव्याघ्राक्षिकेशोपलद्रोणीकाककपालपत्तूरीविल्वीफलीसर्षपाः। नीलीरक्तवचारसोनसुमनाजिङ्गीशमीरोहितप्रोष्ठीमारिषभार्गवीखुरतडिन्मेघाद्रिगुञ्जाशराः। दूर्व्वाबिल्वमसूरटुण्टुकशठीमाञ्जारिकाकेतकीमूर्व्वावज्रकलावचम्पकवलान्यग्रोधवंशासनाः। ज्येष्ठीजालपीपिलिकानखरजःकृष्णाखुरोमत्वचीकर्कन्धूवकुलारनालसहिष्णुखर्জ্জুरका इति। प्रोक्ता लौहविशारदेन मुनिना खड्गस्य भेदाः क्रमात्"। तस्य चत्वारि रूपाणि। "नीलः कृष्णश्च पिङ्गश्च धूम्रश्चेति चतुर्विधः। वर्णप्रकर्षः खड्गानां कथितो मुनिपुङ्गवैः"। चतस्रो जातयः। "ब्राह्मणः क्षत्रियो वैश्यः शूद्रश्चेति चतुर्विधः। जातिभेदे विनिर्दिष्टः खड्गानां मुनिपुङ्गवैः"। लिंगन्नेत्राणि। "चक्रं पद्मं गदा शङ्खो डमरुर्डुरङ्कुशः। ध्वजं पताका वीणा च मत्स्यलिङ्गध्वजेन्दवः। कुम्भः शूलञ्च शार्दूलः सिंहः सिंहासनं गजः। हंसो मयूरो जिह्वा च दशनः खड्ग एव च। पुत्तिका चामरं शैलः पुष्पमाला भुजङ्गमः। लिंगन्नेतानि नेत्राणां खड्गानां कथितानि वै"। लिंगदरिष्टानि "छिद्रं काकपदं रेखाभिन्नं भेदश्च मूषिकः। विड्डालः शर्करा नीली मशको भङ्गरुचिके। त्रिबिन्दुः कालिका दारी कपोतः काक एव च। खर्परः शकली क्रोड़ी कृशपत्रक जालिके। करालकङ्कखर्জ্জूरमङ्कुपुष्पखनित्रकम्। लाङ्गूलं वड़िशाख्यञ्च मुनिना तत्त्ववेदिना। प्रोक्तान्येतान्यरिष्टानि खड्गानां लिंगदेव हि"। द्विविधा भूमिः "दिव्यभौमविभागेन भूमिस्तु द्विविधा भवेत्"। षड्विधा ध्वनिः। "हंसकांस्याभ्रघण्टानां काकतन्त्री खराश्मनाम्। ध्वनयोऽष्टविधाः प्रोक्ता नागार्জ্জुन

सनेमैताः"। द्विविधं मानम्। "उत्तमाधममेदेन मानं तदुद्विविधं भवेत्। इति प्रोक्तानि खड्गानां ज्ञानहेतवे। एतानि तत्त्वतो ज्ञात्वा भवेन्नृपतिपूजितः" खड्गाध्यायः। "तत्र प्रथमतोऽङ्गानां लक्षणानि निबोधत"। लौहदीपे "कृष्णपत्रसमा भूमिरङ्गं श्वेतं प्रतीयते। अङ्गं तत्तु महामूल्यं कृष्णवज्रसमानि तत्। एष खड्गवरो दद्याल्लक्ष्मीमायुर्यशो बलम् १। स्वर्णरेखावली तन्वी यद्भूमौ निकषोपमा। स्वर्णवज्रमिति प्राहुरायुर्लक्ष्मी जयप्रदम् २। गजशुण्डाकृतिर्भूमौ कृष्णायामङ्गसम्भवः। गजवज्रमिति प्राहुरङ्गस्वर्गे तु तद्विदेत्। ज्वरादिव्याधिशमनं तस्य प्रक्षालनाम्भसा। अपि चोणोपि भूपालस्तद्दीर्घात् साधयेन्महीम् ३। एरण्डबीजप्रतिमङ्गं भूमिः सितेतरा। उर्वारुकमिदं नाम्ना शत्रुदर्पविषद्धरः। एतस्य स्वर्णमालेव नरः सम्बन्धिसच्यते। महिषाख्यमिदं वज्रं केचिदाङ्गर्मनीषिणः ४। अङ्गं दमनपत्राभं खड्गे यस्मिन् प्रतीयते। विद्याद्दमनवज्रन्तु तज्ज्ञेयं द्विविधं बुधैः। नीला शुभ्रा भवेद्भूमिस्तत्र नीला गरीयसी। तस्मिन् पर्युषितं तोयं गन्धे दमनकोपमम्। तत्प्रभावान्महीपालः क्षत्त्रां दृष्ट्वा हि साधयेत्" ५। शार्ङ्गधरीये "एका स्थूला सिता रेखा भूमिर्नीला दृढा यदि। स्थूलाङ्गमङ्गं वज्रं तद्विद्याल्लक्ष्मीयशःप्रदम्। एतत्क्षते भवेच्छोथः स्थूलश्चिरतरस्थितिः। एतं महालमपरे वदन्ति खड्गकोविदाः ६। दृष्टायां दृश्यते भूमौ अङ्गन्तु प्रतिबिम्बितम्। अङ्गवज्रं भवेत्तस्य द्विधा भूमिः सिताऽसिता ७। लौहप्रदीपे "निरङ्गं कृष्णपत्राभमीषदुन्नतमध्यिनिभन्तु यत्। दुर्लभं तन्महामूल्यं काललौहं प्रचक्षते। कृष्णा भूमिर्भवेत् स्वच्छा पीता वज्राङ्गसंकुला। कृष्णवज्रमिति प्राहुस्तत्क्षते मोह उच्यते। कृष्णा भूमिः सुवर्णाभमीषच्छुक्लाङ्गसङ्कुलम्। डाडलीवज्रकं विद्यात् कालसंज्ञमथापरे ८। अरुणं क्षुद्रमूर्द्धोदङ्गं भूमिः सितेतरा। अरुणाख्यमिदं वज्रं शत्रुदर्पनिसूदनम्। सुवर्णांशुस्वर्णमालेव वह्निरूपा पक्षेत् शिखाम्। तस्य स्वर्णमालेव पद्मकोषः स्फुटेन्निशि। दुर्लभं तन्महाप्राणां भाग्यैः कुत्रापि लभ्यते। तद्योजनसहस्रस्थारिष्टं नाशयति ध्रुवम् ९। श्वेताक्षितो यदा रेखा श्यामलादुपलक्षिताः। श्वेताङ्गमिति तद्विद्याद्दृश्यतोऽक्षी बलप्रदम् १०। कृष्णोजदलसङ्काशमङ्गं भूमिः सितेतरा। कृष्णोजवज्रं तज्ज्ञेयं कवितं मुनिपुङ्गवैः ११। अङ्गं यस्य गदाकारं भूमिश्चैव सितेतरा। गदावज्रमिदं ब्रूयात् तत्क्षते शूलसम्भवः १२। अङ्गं क्षुरितलाकारं भूमिश्चैव सिताऽसिता। तिलवज्रमिदं ज्ञेयं लक्ष्मीबलयशःप्रदम्। तत्क्षते तिलतैलाभा वसा प्रचुरतेऽधिकम् १३। धूम्रवर्णा भवेद्भूमिरङ्गं यद्विशिखोपमम्। अग्निवज्रमिदं ज्ञेयं शत्रूणां दाहकारकम्। अत्र शीतोदकं न्यस्तं तप्तं भवति च क्षणात्। शाखे यद्विद्धं वमेद् वस्तु तथा स्वर्णांशु सङ्गमात्। तत्क्षते बलवान् दाहो दग्धवच्च व्रणो भवेत्। एतत् परमभाग्येन लभ्यते धरणीतले १४। भूमिः सिताऽसिता यापि अङ्गश्चेत् पिप्पलीप्रभम्। कृष्णवज्रमिदं ज्ञेयमल्पदीर्घस्तु तत्क्षते १५। कृष्णा भूमिर्यदीयाङ्गे दृश्यते ग्रन्थिसञ्चयः। ग्रन्थिवज्रमिदं ज्ञेयं वैरिपक्षविनाशनम्। तत्क्षते बलवान् दाह स्तृषा च ज्वर एव च १६। शालपर्णीदलाकारमङ्गं कृष्णासिपुत्रिका। स्थिरावज्रमिदं प्राहुस्तत्क्षते वेपथुर्भवेत् १७। यदा तित्तिरिपक्षाभमङ्गं भूमिः सितेतरा। एतत्तित्तिरिवज्रं स्यात् तत्क्षते वह्निधर्मकम् १८। वनमालासमा यस्मिन् माला खड्गे प्रदृश्यते। मालाङ्गवज्रं तद्विद्यात्तोयं गन्धवद्भवेत्। अत्र तप्तोदकं न्यस्तं शीतं भवति तत्क्षणात्। एव दाहपरीतानामतिपित्तहृतात्मनाम्। भवेत् परमभैषज्यं भाग्येनैतद्धि लभ्यते १९। यदा जीवकसङ्काशमङ्गं भूमिः सिताऽसिता। एतज्जीवकवज्रं स्यात् तत्क्षते तत्क्षणाज्ज्वरः२०। भूमिः सिताऽसिता श्वेते स्याङ्गं भङ्गाभमिष्यते। तत्र चेत् मधु विन्यस्तं शोणमाप्नोति केवलम्। एतद्भ्रमरवज्रं स्यात्तत्क्षते श्वाहिश्चिका २१। अङ्गं कपिलाभासमङ्गं यस्मिन् प्रतीयते। अङ्गवज्रमिदं प्राहुर्विषवेगनिसूदनम्"। लौहप्रदीपे "अङ्गं कपिलाभासमङ्गं यस्मिन् प्रतीयते। लाङ्गलाङ्गन्तु तद्विद्यात् स्वर्गे तस्याऽहिनाशनम् २२। अङ्गं मरीचसङ्काशं भवेद्भूमिः सितेतरा। मरिचाङ्गमिदं वज्रं तत्क्षते कटुरक्षता। तत्प्रक्षालनतोयेन नश्यन्ति पीनसादयः २३। यदा सर्पफणाकारमङ्गं भूमिस्तु निर्मला। भुजङ्गवज्रं तद्विद्यात्तत्क्षते विषवद्व्रणा।

तस्य स्पर्शनमात्रेण भेकः प्राणैर्विमुच्यते। एकस्यास्य प्रसादेन लक्ष्मीं प्राप्नोति मर्त्यो नरः २४। यदाऽक्षुरसङ्काशमङ्कं भूमिस्तु निर्मला। अश्वाङ्कमिति तं विद्यात् खड्गं परमदुर्लभम्। तस्य संयोगमात्रेण वाजीमन्दोऽपि धावति। तस्य चालनतोयेन कृमीणां रोगनाशनम्। एतत्पत्ते भवं मूर्छा दाहश्च भ्रम एव च २५। मयूरपिच्छसदृशमङ्कं भूमिः सितेतरा। बर्हाङ्कमिति तं विद्यात्तत्पत्ते वान्तिरिष्यते। सर्पाणामिह सर्वेषामस्य स्पर्शाद्विषच्युता। एतदेव नृपतिभिर्भोग्यैः कृत्वापि लभ्यते २६। भूमिरञ्जनसङ्काशा धारा चास्य सिता भवेत्। अञ्जनाख्यमिदं प्रायः सर्वदेवोपलभ्यते"। लौहप्रदीपे "धारा शुभ्रा भवेद्यस्य भूमिः कज्जलसन्निभा। कृष्णमङ्कैश्चितं वापि विद्यात् कज्जलवज्रकम्। मधुवर्णसमा भूमिरङ्कं वा मधुबिन्दुवत्। चौद्राख्यमिति जानीयात् जयलक्ष्मीयशःप्रदम्"। शार्ङ्गधरीये "निम्नकक्षो भवेद् यत्र रात्रिन्दिवविखेपितः। मधुरो मधुवर्णाभः स खड्गो देवदुर्लभः। विशेषाज्जात रज्यन्ति सततं मक्षिकादयः"। "आसीमकोक्षिका यस्य क्षुद्राङ्कं कृष्णकीलतम्। क्षुद्रवज्रकनामानं प्राह नागार्जुनो मुनिः। इदं कृष्णलवज्रञ्च प्राह लौहार्णवे मुनिः। अस्य क्षतेषु बलवान् दाहो मदविशेषितः २८। यदङ्कं मक्षिकाकारं भूमिश्चैव सिताऽसिता। क्षेत्रं शुष्यति चैवात्र मक्षिकाङ्कं तमादिशेत् २०। अङ्कं यदा तुषाकारं या च भूमिः सिताऽसिता। तुषवज्रमिदं ख्यातं प्राह नागार्जुनो मुनिः २१। अङ्कं यवफलाकारं भूमिः कृष्णा सिता तथा। यवाङ्कमिति तं विद्यात्तत्स्पर्शे कण्डुसम्भवः। एष खड्गाधमख्याख्यो यदीच्छेद्भूतिमात्मनः २२। अङ्कं व्रीहिप्रसूनाभं भूमिर्भूत्वा स्थिते यदि। तद्व्रीहिवज्रं जानीयाच्छत्रूणां भयवर्द्धनम् २३। अतसीफलसङ्काशमङ्कं भूमिः सिताऽसिता। अतसीवज्रमाख्यातं तत्पत्ते शिरसोरुजा २४। यदा सर्षपबीजाभमङ्कं भूमिः सिताऽसिता। खरधारः खरस्पर्शः सर्षपाङ्कः सदुर्लभः २५। सिंहाकारं भवेद्यस्य भूमिर्यस्य सिताऽसिता। सिंहीवज्रन्तु तद्विद्यात्तत्पत्ते प्रबलेश्वरः। एतद्धारणतोयेन कासरोगापनाशनम् २६। अङ्कं तण्डुलसङ्काशं भूमिर्भूत्वा सिताऽसिता। तण्डुलाङ्कमिमं विद्याद्यशःश्रीबलवर्द्धनम्। एतत्पर्युषितं तोयं तण्डुलोदकसन्निभम्। अस्य प्रभावान्मनुजोऽभ्येति हि लभते श्रियम् २७। अङ्कश्चेद्गोक्षुराकारं भूमिराघातनिःसृता। खड्गाधमभिदं विद्याद्रोवज्रं नाम नामतः २८। स्थूला दीर्घाः सिराः कृष्णा भूमिश्चैव सिताऽसिता। सिराङ्कमिति तं ब्रूयादेनं खड्गाधमं बुधाः २९। शिवलिङ्गाकृतिश्चाङ्के धारा चैव सिताऽथवा। शिवाङ्कमिति तं ब्रूयाच्छत्रूपजनिसूदनम् ३०। यदा व्याघ्रनखाकारमङ्कं भूमिस्तु पिङ्गला। नखवज्रमिदं विद्यात् तत्पत्ते स्यद्भुर्भवेत्। एतदाभिमुखंस्पर्शात् प्रविशेत् स्वयमेव हि ३१। याद्दङ्मुक्तोपमस्वङ्कं भूमिर्भूत्वा खराकृतिः। याद्दाङ्कमिति जानीयाच्छत्रुसंक्षोपनाशनम्। अस्य स्पर्शनमात्रेण जीवनृणत्सा जडत्वमेत् ३२। यदा मनुजनेत्राभमङ्कं भूमिः सिताऽसिता। नेत्राङ्कमिति जानीयात् संग्रामे विजयप्रदम्। एतद्धारणतोयेन नूनमन्धोऽपि पश्यति ३३। अङ्कं केशसमं यस्य भूमिर्भूत्वा सिताऽसिता। केशाङ्कमिति जानीयात् क्लेशदुःखभयापहम् ३४। निरङ्कं स्थूलप्रकृतिसुपलाङ्कं विदुर्बुधाः। एतद्धि प्रायशो लोके दृश्यते द्विजसत्तम"! ३५। पद्म० पुराणे "निरङ्का निशिता धारा शाणे वज्रं वमत्यपि। श्रोणीवज्रमिदं ज्ञेयं पृथिव्यां नातिदुर्लभम् ३६। अङ्कं काकपदाकारं भूमिराघातनिःसृता। एष खड्गाधमख्याख्यो काकाख्यो भूतिमिच्छता ३७। यदा कपालमङ्केषु दृश्यते स्पर्शतः खरम्। एतद्धि दुःखजनकं कपालाङ्कं बुधस्त्यजेत् ३८। तन्वी पत्रा बलीहृद्या सुपर्णाङ्काऽसिपुत्रिका। पत्रवज्रकसाङ्कसमा युर्वेदविदो जनाः"। लौहार्णवे "सुपर्णसदृशा भूमिरङ्कं काकं प्रतीयते। तत् पत्रवज्रं काकस्य सुपर्णसदृशायते ३९। तुवरीदलसङ्काशमङ्कं यस्मिन् प्रतीयते। तुवरीवज्रमाख्यातं तत्पत्ते शिरसो भ्रमः। एष खड्गाधमख्याख्यो यदीच्छेज्जीवनं निजम् ४०। विम्बीदलसमा भूमिरङ्कं विम्बीफलोपमम्। विम्बीवज्रन्तु तद्विद्यात्तज्जं सिन्नसच्यते। पित्तश्लेष्मविकाराणां प्रशमाय प्रयुज्यते ४१। प्रियङ्गुसदृशस्वङ्कं भूमिश्च कपिलाकृतिः। फलीवज्रमिदं प्रोक्तं शाणे घृष्टं वमत्यपि ४२। अङ्कं सर्षपपुष्पाभं भूमिश्चैव सिताऽसिता। एतत् सर्षपवज्रं स्यात् शाणे घृष्टं वमत्यपि।

अपि कुरङ्गशिरां याति एतदत्यन्तकोमलम्। एतत्-प्रसादात् क्षितिपः क्षत्त्रां साधयते महीम् ५२। नीलीरससमा भूमिरङ्गं नीलीतरङ्गवत्। नीलीवज्र-मिदं दृष्टं शाखे वह्निशिखां वमेत्। एष खड्ग-वरोऽत्यन्तरिष्टभयनाशनः ५३। रक्ताक्षिमो मङ्गारेखा भूमिश्चैव सिताऽसिता। रक्ताङ्कमिति जानीयाद्वैरिपक्ष विनाशनम्। शाखेन यस्तु रक्तां वा नीलां वा वमते शिखाम्। रक्तस्वर्णनमात्रेण स्वयमेव निकृन्तति। क्षतेऽस्य रक्तस्रवणुक्त्वा दाहश्च जायते ५५। अङ्कं वचादलसमं भूमिश्चैव सिताऽसिता। वचावज्रमिदं श्रेयं तत्क्षताद्विषनाशनम्। एष खड्गवरो राज्ञा साध-नीयः प्रयत्नतः ५६। रसोनाङ्कसमं ह्यङ्कं भूमिस्तस्य दलोपमा। रसोनवज्रं जानीयात् शाखे वह्निं वमत्यपि। अस्य धावनतोयेन आमवातविनाशनम् ५७। निरङ्का निर्मला भूमिर्धारा तीक्ष्णा खरः खरः। सुमना वज्रमेतत् स्याद्भुवि नात्यन्तदुर्लभम् ५८। जिङ्गिनी सदृशी दीर्घा यस्या रेखा सुविस्तरा। जिङ्गीवज्रमिदं नाम सर्वकामार्थसाधनम् ५९। अङ्कं शमीपत्रसमं भूमिर्धूम्रा सिताऽसिता। शमीवज्रमिदं श्रेयं शनैश्चर सदावहम्। शाखेषु वमते वह्निं सक्षते वह्निपीड-नम् ६०। रोहितशल्कसदृशमङ्कं भूमिः सिताऽसिता वापि। धूम्रा गम्भीरस्वरयुक्ता धारा तीक्ष्णाऽसिता भवेद्रेखा। रोहिताख्यमिदं वज्रं सर्वारिष्टविनाशनम्। वह्निसंस्पर्शमात्रेण किञ्चिच्चिमिचिमायते। इत्ययं दुर्लभः खड्गो देवानामपि कथ्यते ६२। शफरीवल्क-लाकारमङ्कं भूमिः सिताऽसिता। शोणीवज्रमिदं प्रोक्तं न्यस्तं तरति वारिणि। एष खड्गोत्तमो राज्ञां विपक्षकुलनाशकः। कदाचिल्लभ्यते भाग्यैर्लभ्यते तेन वै मही ६२। अङ्कं मारिषपत्राभं भूमिः स्याद्विषम-क्षविः। इत्ययं मारिषाङ्कः स्यात् पृथिव्यां नाति-दुर्लभः ६३। भृङ्गराजस्य पुष्पाभमङ्कं भूमिर्दलप्रभा। आघातं सहते नैव एष खड्गाधमो मतः ६४। धारा तीक्ष्णा क्षुराकारा भूमिरङ्कविवर्जिता। आघातं सहते घोरं शाखे वह्निं वमत्यपि। क्षुराङ्कमिति जानीयात् पृथिव्यां नातिदुर्लभम् ६५। निर्मला सरला भूमिर्भवे-च्चैव कदा कदा। मन्दा तीव्रा भवेद्धारा तडिद्वज्रस्य लक्षणम् ६६। नीलाञ्जनसमा भूमिरङ्कं जलतरङ्ग-वत्। मेघाङ्कमिति जानीयाच्छाखे शीतं भवत्यपि। एष खड्गाधमस्त्याज्यो यदीच्छेद्भूतिमात्मनः। भर्तुः प्रतापं शमयेद्रविबिम्बं यथा घनः ६७। मन्दा धारा ह्यगं गाढ़ा भूमिरङ्कविवर्जिता। पर्वताङ्कमिदं नाम सर्वत्रैवोपलभ्यते ६८। अङ्कं शुक्लाफलसमं भूमि-र्भीनदलोपमा। शुक्लावज्रमिदं दृष्टं तप्तं भवति घर्षणे। शाखे सिन्दूरसङ्काशं रजोवमति चासकृत्। एष खड्गवरो राज्ञा भाग्यादेवोपलभ्यते। अस्य प्रभावात्तद्राष्ट्रं यत्र साधयते नृपः ६९। अङ्कं तनु शराकारं भूमिश्चैव सिताऽसिता। धारा तीक्ष्णा च व-मति शाखे वह्निसमाः शिखाः। शरवज्रमिदं श्रेयं राज्ञां वाञ्छितसिद्धये ७०। दूर्वादलनिभा भूमिर्धारा तीक्ष्णा खरः खरः। शाखेन वमते वह्निं दूर्वावज्रं सुदुर्लभम् ७१। अङ्कं विल्वदलाकारं भूमिश्चैव सिता-ऽसिता। विल्ववज्रमिदं शाखे नीलपीते वमेच्छिखे। एष खड्गवरः प्रोक्तः सर्वरूपां कुलनाशनः ७२। मसूरदलसङ्काशा भूमिरङ्कं मसूरवत्। मसूराङ्कमिदं शाखे रजो वमति चारुणम् ७३। शणपुष्पनिभा रेखा दीर्घा भूमिः सितेतरा। शणाङ्कमिति जानी-यात् खड्गं परमदुर्लभम् ७४। शटीदलसमा भूमि रङ्कं तत्कुसुमोपमम्। शटीवज्रमिदं प्रायो लभ्यते गुणवत्तरम् ७५। मार्जारलोमसदृशमङ्कं भूमिः सितेतरा। मार्जाराङ्कमिदं नाम्ना रोगशोकभयावहम्। एष खड्गाधमस्त्याज्यो यदीच्छेद्भूतिमात्मनः ७६। केतकीपत्रसदृशमङ्कं यस्मिन् प्रतीयते। विद्यात् केतक-वज्रं तत् वाराणसीसमुद्भवम्" ७७। सौश्रुतीये "अङ्कं मूर्वातन्तुनिभं भूमिर्मूर्वादलच्छविः। शाखेन वमते शुक्लां शिखां नीलीं भवेत्ततः। मौर्व्यङ्कमिदमुत्कृष्टं यशःकीर्त्तिबलावहम् ७८। लिङ्गं तीक्ष्णं खरं गाढ़ं शाखे वह्निं वमेत् कथम्। छिनत्त्यन्यविधं लौहं वज्राङ्क-मिति तद्विदेत् ७९। कलायपुष्पसदृशमङ्कं भूमिः सिताऽसिता। कलायवज्रं जानीयात् तत्क्षते पाक दृश्यते ८०। अङ्कं चम्पकपुष्पाभं भूमिः कृष्णा तथा सिता। शिखां शाखे वमेच्छीतं तिक्तं तस्य जलं भवेत्। इदं चम्पकवज्रं स्यात् सर्वत्र विजयप्रदम् ८१। अङ्कं बलादलसमं भूमिः शुक्ला तथेतरा। बलावज्रमिदं श्रेयं नानाभावं सदृतेद्भुतम्। इत्ययं वातरोगाणां नाशने परमौषधम् ८२। अङ्कं वटारोहसमं भूमिर्वटदल-च्छविः। वटवज्रमिदं श्रेयं खरं खड्गाधमं बुधैः।

एतस्य स्पर्शमात्रेण नरोऽच्येत सम्पदा ८२। वंशनीली समा भूमिः खरधारा सिताऽसिता। वंशाङ्कमिति जानीयाद्वंशवृद्धिकरं परम् ८४। भूमिःसाऽदलाकारा खड्गं लघु सितासितम्। साऽङ्क एष खड्गः स्यात् पूज्यः सर्वार्थदायकः। अयं शाखे वमेद्वह्निं धारा चाप्यथ वा भवेत् ८५। भूमिः सिताऽसिता वापि खड्गं ज्ञेयमिदं लघु। ज्ञेयीवज्रमिदं निन्द्यं न स्पृश्यं वा हितेच्छुभिः ८६। पुराणजालसदृशमङ्कं भूमिः सिताऽसिता। जालवज्रमिदं पूज्यं शत्रुसम्पत्तिनाशनम्। यदि शाखे वमेच्छीघ्रां शिखां वह्निं वमेच्च वा। तदैव दुर्लभः खड्गो ह्यन्यथा भवहेतुकः ८७। अङ्कं पिपीलिकाकारं भूमिर्धूम्रा तथा सिता। पिपीलिकाङ्क इत्येष तत्प्रोच्यते कण्डुसम्भवः। स्वयं यदि भवेद्धूम्रः शाखे पूज्यतमस्तदा ८८। नलपत्रसमा भूमिरङ्कस्तत्कुसुमोपमम्। नलाङ्कमिति जानीयाद्धर्तुः सर्वार्थसाधकः ८९। निरङ्का निर्मला भूमिर्दृष्टं दृष्टं वमेद्यजः। दृढा धारा भवं स्थूला आघातं सहते न च। रजोवज्रमिदं निन्द्यं शत्रूणां विजयावहम् ९०। कुष्माण्डबीजसदृशमङ्कं भूमिः सिताऽसिता। कुष्माण्डवज्रं जानीयात्तत्प्रोक्तं वेगनिग्रहः ९१। अङ्कं रोमसदृशं भूमिर्धूम्रा सिताऽसिता। रोमाङ्कमिति जानीयात्तत्प्रोक्तं पिङ्कोद्गमः ९२। भूमिः क्षुद्रीदलाकारा अङ्कं तत्कण्टकोपमम्। धारा तीक्ष्णारवस्तीक्ष्णो लघु मानं खरा रूक्षा। क्षुद्राङ्कः खड्ग इत्येष तत्प्रोक्तं दाहदड्भ्रमः। सुखाच्छिकर्णनासानां दाहः पाकश्च जायते। अयं यदि च सर्पाणां फणाग्रपरि विद्यते। फणा विदारमाप्नोति सर्पोऽप्युटयते शिरः। अस्य धारनतोयेन कुष्ठरोगविनाशनम् ९३। कर्कन्धू दलपृष्ठाभा भूमिरङ्कस्तु तत्समम्। कर्कन्धूवज्रं जानीयात् तत्प्रोक्तं दाहनाशनम्। एष खड्गाधमख्याख्यो ज्ञेतव्या यदि विद्विषः ९४। अङ्कं बकुलपुष्पाभं भूमिस्तत्फलसन्निभा। बकुलाङ्कमिदं पुण्यं शाखे सुरभिगन्धवत्। तच्छास्ति जगतीमध्ये वदनेन न साध्यते ९५। अङ्कं सम्मिश्रितं यत्किञ्चित् किञ्चिद्दृश्यक्रमीक्ष्यते। सर्वेषां दर्शनं वापि तीक्ष्णा धारा खरः खरः। एष काङ्किकवज्रः स्यादृग्वत्रादेवोपलभ्यते। नैनं प्राप्यापि वर्द्धन्ते श्रेयश्चित्तादयोऽपि च ९६। भूमिः कृष्णा निरङ्का चेद्धारा तीक्ष्णा दृढापि च। आघातं सहते घोरं रक्षां स्पर्शेन या विधेत्। शाखेन वह्निं वमति ध्रुवं वाप्यतिघर्षणात् वा महिषाङ्कः स वै खड्गः पृथिव्यां नातिदुर्लभः ९७। अत्यन्तनिर्मला भूमिः शरीरं प्रतिबिम्बितम्। धारा तीक्ष्णा खरतीक्ष्णः खड्गं तद्विनिर्दिशेत् ९८। तस्मिन् यदा भवेद्रेखा ऋज्वी ऋज्वाख्यकं तदा ९९। अस्मिन्नपि भवेद्वक्रा रेखा वक्राभिधन्तु तत् १००। एतत्कृतलक्षणोद्दिष्टं खड्गानां प्रवरं बुधैः। प्रायशो लभ्यते लोके यदि सर्वगुणावहम्। इतीदं निखिलं प्रोक्तं वज्राणां लक्षणं मया। प्रयत्नैर्लिखितं व्यक्तं सर्वेषां हितकाम्यया। इतः परन्तु सौव्हानां लक्षणं यत्र लक्ष्यते। तस्य दासो भवाम्येष प्रतिज्ञेति कृता मया। द्विलिङ्गमिश्रमालोक्य मिश्राङ्कमिति निर्दिशेत्। सर्वेषां मङ्गमालोक्य सर्वाङ्कमिति निर्दिशेत्"। अङ्काध्यायः। खड्गस्य रूपाणि यथा। "नीलीकलायकुसुमच्छविस्निग्धाभा या चेन्द्रनीलमणिकाचमणिप्रभा च। भूमिश्च या मरकतप्रतिमावभासा खड्गस्य नीलमिति रूपमिदं वदन्ति। तत्र चेन्निन्दितान्यङ्गान्यरिष्टानि वज्रन्यपि। दृश्यन्ते बहुदोषाश्च तथापि गुणवत्तरम्। या कालकाम्बुदसमीरसकालसर्पगाढान्धकारकचभारसमा विभाति। भूमिश्च या भ्रमरबन्धुसमावभासा खड्गस्य कृष्णमिति रूपमिदं वदन्ति। अत्र नेत्राणि सम्पत्त्यै अरिष्टान्यशुभाय च। साधारणमिदं रूपं प्राह नागार्जुनो मुनिः २। या प्राहुरेणलनवभेकसमानवर्णा गोमेदरत्नसदृशी च तु यस्य भूमिः। खड्गस्य पिङ्गमिति रूपमिदं वदन्ति भर्तुर्यशोबलधनत्रयकारणाय ३। या मन्दधूमसदृशी च शिरीषपुष्पतुल्या विभाति मलिनापि च खड्गभूमिः। नागार्जुनो वदति धूम्रमिदं हि रूपं भर्तुर्यशोबलधनावलिवर्द्धनाय ४। द्विरूपं मिश्रितं ज्ञात्वा सङ्करं प्रवदेद्बुधः। त्रिभीरूपैः समेतन्तु खड्गं त्रिपुरसंज्ञितम्। रूपैश्चतुर्भिः संयुक्तं चतुरं खड्गसत्तमम्"। रूपाध्यायः "जातिश्चतुर्विधा प्रोक्ता खड्गानां या पुरा मया। लक्ष्यतेऽपि प्रयत्नेन तासां लक्षणमुच्यते। शुद्धाङ्कः शुद्धवर्णश्च सुनेत्रः सुखरश्च यः। खड्गश्रेष्ठः समस्तेषु तीक्ष्णधारो महागुणः। खड्गं प्राह्मणजातिं तं प्राह नागार्जुनो मुनिः। अस्य घाते भवेच्छोघ्रो घोरः सर्वाङ्गगोचरः। मूर्च्छा पिपासा दाहश्च ज्वरो मृत्युश्च जायते। अदृष्टं त्रिफलाकलङ्कमङ्गं रात्रिन्दिवोपि-

तम् । मलिनत्वं न सम्पत्ते निर्मलं कुरुते परम् । तरुणादित्यकिरणसमर्पदेव हृषे स्थितः । दहेत् सर्वं न तु करं पुरुषस्य हि धारिणः । गायत्यङ्गारमात्रेण खरतां व्रजति स्फुटम् । एष खड्गवरः सर्वमरिष्टं नाशयेदध्रुवम् । अस्य प्रसादात् पुरुषस्त्रिलोकमपि साधयेत् । तस्मादेष मनुष्याणां सुलभो न हि भूतले । दृश्यते प्रायशः स्वर्गे कुशद्वीपे हिमालये ? । मूलवर्णं महाकारं तीक्ष्णधारं खरूरम् । सर्वाघातसहं सर्वनेत्रवर्णखराकरम् । खड्गं क्षत्रियजातिं तं जानीयात् खड्गकोविदः । अस्य क्षते भवेद्दाहस्तृषा दाहो ज्वरो भ्रमः । स्तब्धत्व जायते शाखे वमेद्रक्तिकणान् बहून् । संस्कारे चाम्लसंस्कारे नैर्मल्यं तस्य जायते । शाखेऽग्रशाखे खरता मूर्ध्नि चात्यन्ततीक्ष्णता । रक्तसर्षपमात्रेण विशेदन्तरमन्तरम् । अयं खड्गवरः पूज्यो मनुष्यैरपि लभ्यते २ । नीलवर्णः कृष्णवर्णः संस्कारे निर्मलो भवेत् । शाखेन खरता चास्य खातुल्यं निगद्यते । वैश्यजातिरयं खड्गः क्षते त्वङ्मात्रदर्शनम् । नात्युत्कटो नातिहीनः सर्वत्रैवोपलभ्यते ३ । सजलाम्भोदसङ्काशः स्थूलधारो महत्वरः । संस्कारे चैव मलिनः शाखे चापि खरेतरः । शूद्रजातिरयं खड्गः क्षते नास्याऽपि वेदना । दूरादेवोऽधमस्त्राज्ञो यदीक्षेद्धितमात्मनः । प्रायशः सर्वलोकेषु स्वयमेवोपदृश्यते ४। हयोर्लक्षणमालोक्य जारजं खड्गमादिशेत् । त्रयाणां लक्षणेनैव त्रिजातिं खड्गमादिशेत् । चतुर्णां लक्षणेनैव जातिसङ्कर उच्यते" । अथ त्रिंशल्लक्षणानि "चक्राकारं यदा नेत्रं खड्गस्याङ्के प्रदृश्यते । तं चक्रनेत्रं जानीयात् भर्तुः सर्वार्थसाधनम् । अनेनैकेन खड्गेन क्षत्रं साधयते महीम् १ । प्रफुल्लपद्मसङ्काशं नेत्रं पद्मदलोपमम् । यदि वा दृश्यते खड्गे पद्मनेत्रं समादिशेत् । अयं खड्गवरो यत्र तत्रैव कमलालया २। छत्रां स्थूला यदा रेखा गदाकारा प्रतीयते । गदानेत्रमिदं विद्धि सर्वशत्रुनिसूदनम् ३ । शङ्काकारं यदा नेत्रं खड्गमध्येऽभिदृश्यते । शङ्खनेत्रमिदं सर्वदेवानामपि दुर्लभम् ४। डमरूपतिमं नेत्रं यस्य भूमौ प्रतीयते । सर्वार्थसाधकं खड्गं तं विद्यात्विजयप्रदम् ५ । धनुःस्वरूपं यत्रेत्रं धनुर्नेत्रमुशन्ति तम् । तस्य सर्शनमात्रेण सन्दोऽपि प्रसुखायते । अयं निशीथे विजने खड्गो झनझनायते ६ । यत्रेत्रमङ्कुशाकारं तं विद्यादुत्तमवरम् । खड्गमङ्कुशनेत्राख्यं भर्तुः सर्वार्थसाधकम् । अलक्ष्मीपापरक्षोघ्नं क्षत्रायुष्यनिवारणम् ७ । छत्राकारं यदा नेत्रं छत्रनेत्रं वदन्ति तम् । अस्य प्रभावात् क्षीणोऽपि सार्वभौमो भवेन्नृपः । दीनोऽपि च सुखी भूयात् सुखी भूयान्महेश्वरः । महेश्वरोऽपि सचिवः सचिवो सखलेश्वरः । सखलेशयक्रवर्त्ती भवेदत्र न संशयः ८ । पताकाकृति नेत्रञ्चेत् सर्वसम्पत्तिकारकम् । पताकानेत्रमाख्यातं संग्रामविजयप्रदम् ९ । नेत्रं वीणाकृति यदा वीणानेत्रमुशन्ति तम् । निशीथे विजने खड्गो वीणावत् स्वनमावहेत् । अस्य प्रभावात् सर्वेऽपि वशगा अपि वशगा भवन्ति हि १० । मत्स्याकृति यदा नेत्रं मत्स्यनेत्रमिमं विदुः । अस्य प्रभावात् क्षितिपः क्षत्रक्षां साधयते महीम् ११ । शिवलिङ्गसमं नेत्रं लिङ्गनेत्रमिमं विदुः । भर्तुः सर्वार्थसिद्धौ शत्रूणां नाशनाय च । वामपार्श्वे तु यात्रायां धर्त्तव्योऽयं तथा रणे १२। ध्वजाकारं तु यत्रेत्रं ध्वजनेत्रं वदन्ति तम् । अस्य प्रभावात् भूपालः समरां लभते श्रियम् १३ । यस्यार्द्धचन्द्रप्रतिमं नेत्रं स्यादर्द्धचन्द्रकम् । तस्य धारयतो भूपोधरां क्षत्रक्षां लभते वै १४ । यत्रेत्रं कलसाकारं कलसाख्यं तमादिशेत् । तस्य प्रभावात् सकलां भूमिं भूपो लभेत वै १५। शूलाकृति यदा नेत्रं शूलनेत्रं वदन्ति तम् । सर्वार्थसाधकः सर्वारिष्टाऽनिष्टप्रणाशनः १६ । शार्दूलनेत्रं तं विद्यात् शार्दूलाकृतिनेत्रतः । शत्रुक्षयीविनाशाय संग्रामे विजयाय च १७ । सिंहाकृति यदा नेत्रं सिंहनेत्रमिमं विदुः । अस्य प्रभावात् क्षीणोऽपि क्षत्रक्षां साधयते महीम् १८ । तत् सिंहासननेत्रं स्यात् नेत्रे सिंहासनोपमे । अस्य प्रभावात् क्षितिपः क्षत्रक्षां साधयते महीम् १९ । गजाकृति यदा नेत्रं गजनेत्रं वदन्ति तम् । अस्य प्रभावात् क्षीणोऽपि लभते राज्यसम्पदम् २० । नेत्रं हंसाकृति यदा हंसनेत्रं वदन्ति तम् । अस्य प्रभावात् भूपालो यशः प्राप्नोत्यनुत्तमम् २१ । मयूराकृतिके नेत्रे तत्रेत्रमिति निर्दिशेत् । अस्य प्रभावान् मनुजः सर्पदर्पाच्छिखदवेत् २२ । जिह्वाकारं यदा नेत्रं जिह्वानेत्रं वदन्ति तम् । संग्रामसर्परेखेवं विषेहैरिशिरोरजः २३ । दन्ताकारं यदा नेत्रं दन्तनेत्रं वदन्ति तम् । अयं रिपुगणं मूर्ध्नि चर्वत्यति

भैरवम् २४। खड्गाकारं यदा नेत्रं खड्गनेत्रं वदन्ति तम्। अस्य प्रभावान्मनुजस्त्रिलोकीं वशयेदपि २५। मत्स्यपुत्रिकाकारं पुत्रिकानेत्रमुच्यते। अयं सर्वेषां सहीपां क्षत्त्रां साधयते क्षितिम्। न चेयं पुत्रिका किन्तु जयलक्ष्मीरिह स्वयम्। तस्मान्नायं मनुष्याणामल्पभाग्येन लभ्यते २६। चामराकृतिनेत्रत्वात्तत्रैवमिति निर्दिशेत्। अस्य प्रभावात् जायन्ते चामरोद्भूतसम्पदः २७। एकाऽनेकशिखे शैलनेत्रे तच्चेत्रसंज्ञकम्। अपि राष्ट्रभये युद्धे विषमे वैरिसङ्कटे। स्थिरीकरोति धरणीं धरणीं पर्वतो यथा २८। पुष्पमालाकारं नेत्रं पुष्पनेत्रं वदन्ति तम्। अस्य प्रभावात्तुष्यन्ति यक्षाः सर्वाश्च देवताः २९। भुजङ्गमसमे नेत्रे सर्पनेत्रमिदं मतम्। अयं शत्रूणां हन्ति यथा मर्त्यं भुजङ्गमः ३०। सवर्णमसवर्णञ्च तत् सर्वं द्विविधं भवेत्। सवर्णं शान्तिसम्पत्त्यै रिपुनाशे तथा परम्। द्वयोरेकत्र दृष्टे च तत् पुनः द्विविधं भवेत्। एकं लोके सुखं नेत्रं ददाति द्विविधं द्वयोः। मूलमध्याग्रसंस्थानात् तत् पुनस्त्रिविधं मतम्। अग्रे चाग्रफलं श्रेयं मध्ये मध्यफलं मतम्। मूले फलं जघन्यं स्यात् प्राह नागार्जुनो मुनिः। एकं द्वे त्रीणि नेत्राणि नात्र संख्याव्यतिक्रमः। एकं धर्मं, सुखकामो द्वे, त्रीणि च त्रिवर्गकम्। तत् फलानि प्रयच्छन्ति प्राह नागार्जुनो मुनिः। द्विनेत्रमिति जानीयात् सवर्णां नेत्रयोर्द्वयोः। त्रिनेत्रञ्च त्रिभिश्चैवं बहुनेत्रमतः परम्। यथोत्तरं गुणवत्त्वं खड्गमाऽऽरत्नत्तमम्। दिङ्मात्रमिति निर्दिष्टं नेत्राणां शुभदायिनाम्। तीव्राणां भङ्गुलानाञ्च दर्शनञ्च शुभावहम्। यथा नेत्रस्य संस्थानं तथाऽरिष्टस्य लक्षयेत्। नेत्रेषु स्थाननियमो नारिष्टे स्थाननिर्णयः। प्रथमाङ्कोऽपि यः खड्गोऽरिष्टनेत्रेण निन्दितः"। अथ त्रिंशदरिष्टानां लक्षणानि "छिद्रवद्दृश्यते खड्गे स्वभावेन च लक्ष्यते। छिद्रारिष्टमिदं विद्धि भर्तुर्धैर्यबलापहम् १। यदा काकपदाकारमरिष्टं दृश्यते क्वचित्। अयं काकपदारिष्टः सर्वाभीष्टविनाशनः २। रेखाकारं यदाऽरिष्टमूर्ध्वं वा तिर्यगेव वा। रेखारिष्टमिदं विद्धि भर्तुर्धैर्यबलापहम् ३। भिन्नध्वान्तिकरं पापं भिन्नारिष्टमिदं विदुः। भर्तुः कुलं यशो राष्ट्रं नाशयित्वा न व्रजेत् स्वयम् ४। यदा भेकशिरोरूपमरिष्टं दृश्यते क्वचित्। भेकारिष्टमिदं नाम्ना संग्रामे भयदायकम् ५। अरिष्टे सुषिराकारे सुषिकारिष्टमुच्यते। अयं खड्गाधमः कुर्यात् पत्युः पातालसङ्गमम् ६। विड़ालनयनाकारो बिन्दुरेकोऽतिविस्तरः। विड़ालारिष्टमेतत् स्यात् भर्तुः सर्वार्थनाशनम् ७। अरिष्टं शर्कराकारं यदा सूर्येण बुध्यते। शर्करारिष्टमेतत् स्याद्धनबुद्धिविनाशनम् ८। यदा नीलीरसाभासमरिष्टं दृश्यते क्वचित्। नीलारिष्टमिदं श्रेयं यशोलक्ष्मीविनाशनम् ९। अरिष्टे मशकाकारे मशकारिष्टमुच्यते। भर्तुः कुलं यशो बुद्धिं धृतिं प्रीतिञ्च नाशयेत् १०। भृङ्गम प्रतिमो बिन्दुरेकोऽनेकोऽथ वा यदा। भृङ्गारिष्टमित्येष धृतिस्मृतिविनाशनः ११। कूर्चीरूपमरिष्टञ्चेदूर्ध्वं वा तिर्यगेव वा। कूर्चारिष्टमिदं नाम भर्तुः कुलविनाशनम् १२। त्रयश्चेद्विन्दवो राजन्! षड्भुजो विषमेण वा। उपर्युपरि वाधोऽवस्थितिर्नाम्ना मरिष्टकम्। तस्य सूर्यनमालेख सचेलः स्नानमाचरेत् १३। कालिकारिष्टमित्येतद्धीधृतिस्मृतिनाशनम् १४। एकत्र यदि नक्षेत्र प्रयत्नेनापि संहतः। दारीनाममहारिष्टं सर्वाभीष्टविनाशनम्। अनेकगुणसम्पन्नः खड्गोलोकैर्न दृश्यते १५। कपोतपक्षप्रतिमरिष्टञ्चेदाङ्गयम्। भर्तुः कुलं यशो विद्यां बलं बुद्धिञ्च नाशयेत् १६। काकाकृति यदा रिष्टं काकारिष्टं तदोच्यते। अनेन भर्तुः संग्रामे भङ्ग एवोपजायते १७। अरिष्टे खर्पराकारे खर्परारिष्टमुच्यते। भर्तुर्यशो बलं वीर्यं बुद्धिं प्रीतिञ्च नाशयेत् १८। यदाग्नेयोऽग्निकलं लग्नं स्यादिव लक्ष्यते। अकलीति स वै खड्गः सर्वाभीष्टनिसूदनः १९। क्रोड़ीसुखसमाकारं यस्यारिष्टं प्रदृश्यते। क्रोड़ारिष्टमिदं नाम भर्तुः सर्वार्थनाशनम् २०। कुशपत्रसमाकारं यत्रारिष्टं तु लक्ष्यते। कुशपत्रारिष्टमिदं भर्तुर्नाशाय कीर्तितम् २१। यस्मिन्नभिवाभाति मध्ये वा दृश्यते क्वचित्। जलारिष्टमिदं नाम भर्तुः कुलधनापहम् २२। एकैकरेखा दीर्घाग्रा यदा पञ्चविधा भवेत्। स्वर्गे नखे करेखेदं कराख्यारिष्टमुच्यते। अयं हि क्षितिपालानां दृष्टयोर्ग्यो भवेन्न हि। दर्शनादेव नश्यन्ति यशोलक्ष्मी जयादयः २३। अरिष्टे कङ्कपत्राभे कङ्कारिष्टं तदुच्यते। अस्य सूर्यनमालेख नश्यत्यायुर्यशो बलम् २४। खर्जूरदलसदृशं यदाऽरिष्टन्तु लक्ष्यते। खर्जूरारिष्ट-

मेतत् स्याद्भर्तुः कुलधनापहम् २५। गोघ्नङ्काभमरिष्टञ्चेत् भङ्कारिष्टं तदोच्यते। अनेन भर्तुर्नगच्छन्ति लक्ष्मीबलकुलादयः २६। गोपुच्छाकृति चेत् खड्गे अरिष्टं संप्रवीच्यते। पुच्छारिष्टमिदं नाम भर्तुः सर्वार्थनाशनम् २७। खनित्राभमरिष्टञ्चेत् खनित्रारिष्टमुच्यते। शुराणामपि संग्रामे भङ्गमेतत् प्रयच्छति २८। अरिष्टे लाङ्गलाकारे लाङ्गलारिष्टमुच्यते। अयं पापात् पापतरः प्रेक्षणीयो न भूभुजा। अयमायुः श्रियं हन्ति विद्यां बलमशेषतः २९। अरिष्टं वड़िशाकारं वड़िशारिष्टमुच्यते। करोति कुटिलं सर्वं भर्तुः कुलनिकृन्तनम् ३०। इत्यरिष्टानि प्रोक्तानि मानातन्त्रात् प्रयत्नतः। विचार्यैतानि मतिमान् खड्गं कोशे निधापयेत्। दिङ्मात्रमिदमुद्दिष्टमरिष्टानां हिताहिताम्। अमङ्गलानां मन्दानां दर्शनञ्चागुभावहम्। अरिष्टमेकमेव स्यादुद्विरिष्टं शुभावहम्। अन्योन्यमशुभं हन्याद्विषस्य हि विषं यथा। एकमारभ्य समानमरिष्टं प्राह नान्यथा। यथोत्तरं द्विगुणितं फलमाह्मनीषिणः। अरिष्टाध्यायः। अथ द्विविधभूमिः। "दिव्यभौमविभागेन सभूमिर्या द्विविधा मता। दिव्या दिवि समुद्भूता भौमा भूमिसमुद्भवा। तल्लक्षणमशेषेण लिख्यते तन्निबोधत। देवदानवयोर्मध्ये खड्गसृष्टिरभूत् पुरा। ते खड्गाः गुणदेशेषु केषु केषु प्रतिष्ठिताः"। दिव्यलक्षणं यथा "ये खड्गाः स्थूलधारा भृशमतिलघवो निर्मलाङ्गाः सुनेत्रा येऽरिष्टान्यस्वरूपाः सुविमलतनवश्चाप्यसंस्कारयोगात्। दुर्भेद्या दुर्घटाश्च ध्वनिगुणगुरवो यत्नते दारुपाकौ ते दिव्याः कुर्वतेऽमी कुलधनविजयश्रीयशो बुद्धिमायुः" १। अथ भौमलक्षणम्। उद्धारीते "पूर्वं मन्वेण विषाणि यानि भुक्तानि तेषां पतितास्तु बिन्दवः। पुरामृतं क्षीरसमुद्रमध्यादुत्पाद्य संदत्तमथुः सुरेन्द्राः। तद्बिन्दवो यत्र निपेतुरेव शुद्धायसा साकरतां जगाम। ये विषोत्था भृशं काला खराङ्गाः सम्भवन्ति हि। मूर्च्छादाहज्वरानाहशोकहिक्का यमीकराः। येऽमृतोत्थाः सुवर्णाङ्गा मन्दाङ्गाः सम्भवन्ति च। वलीपलितमाक्षिप्यजराव्याधिविनाशनाः। यत्रैव पतितं यत्तु तत्तदाकरतां गताः"। तद्यथा "वाराणसीमगधसिंहलभूमिभागे नेपालभूमिषु तथाङ्गकलिङ्गदेशे। सौराष्ट्रिकेऽन्यतमधन्यमहीविभागे शुद्धायसां क्षितिवराः प्रवदन्ति जन्म"। तथा। "वाराणसेयाः सुस्निग्धाः तीक्ष्णधाराः सदङ्गिनः। लघवः सुखसन्धेया श्रेयाश्चाभेद्यशालिनः। मागधाः कर्कशाः स्थूलधारा गुरुतराङ्गिनः। गुरवो दुःखसन्धेयाः खड्गा श्रेया विचक्षणैः। नेपालदेशप्रभवा निरङ्गा निर्मलाश्च ये। श्रेयाः सदङ्गा मलिना लघवः स्थूलधारिणः। कालिङ्गा गुरवः खड्गा व्यङ्गाङ्गास्तन्तुहेतवः। सौराष्ट्रा निर्मलाः स्निग्धाः सुव्यङ्गाङ्गा भृशं खराः। सिंहलद्वीपजातानां चतुर्द्धा भेद उच्यते। केचित् सदङ्गा गुरवः कर्कशाः स्निग्धधारिणः। केचित् सदङ्गा लघवः सुस्निग्धा स्थूलधारिणः। एषां रूपेण भिन्नेन श्रेया हि द्विजजातयः। सामान्यात् द्विगुणद्वौद्र्यं कलिर्दशगुणस्ततः। कलेः शतगुणं भद्रं भद्राद्वज्रं सहस्रधा। वज्रात् पट्टिगुणः पाखिर्डनिरर्विदशभिर्गुणैः। ततः कोटिसहस्रेण क्षयस्कान्तः प्रशस्यते। आसान्तु लौहजातीनां वज्रं खड्गाय युज्यते। ये खड्गाश्चीक्ष्णधारा भृशमतिगुरवः षड्गुणाढ्याः सुभेद्याः केचित् साङ्गा निरङ्गाः कतिचन समला निर्मलाः केचिदेव। ते भौमाः कुर्वतेऽमी धनविजयबलं षड्गुणा निर्गुणा ये ते दुःखं शोकसख्यं दधति बलकुलश्रीयशोनाशनास्ते"। अथाष्टधा ध्वनिः। "ध्वनिरष्टविधः प्रोक्तो यः पूर्वं खड्गसंश्रये। तेषामपि लिखाम्यत्र सगुणं लक्षणाष्टकम्"। तद्यथा। "पूर्वे चत्वारः शुभदाः परे निन्द्यास्तदाख्यया। विचार्यं खड्गमानञ्च कर्त्तव्यं खड्गकोविदैः। धीरसार इति ख्यातो द्विविधः खड्गकोविदैः। घोरः स्यात् सुखसम्पत्त्यै तार उच्चाटने मतः। यत्र हंसरवस्येव खड्गे नखहते ध्वनिः। हंसध्वनिरयं खड्गः सकलार्थप्रसाधनः १। कांस्यशब्द इवाभाति यस्मिन् खड्गे हते ध्वनिः। कांस्यध्वनिरयं खड्गः प्राह नागार्जुनो मुनिः २। मेघशब्द इवाभाति यत्र खड्गे हते ध्वनिः। अभ्रध्वनिरयं खड्गो भर्तुः सौभाग्यदायकः। ढक्काशब्द इवाभाति यस्मिन् खड्गे हते ध्वनिः। ढक्काध्वनिरयं खड्गः सर्वशत्रुनिसूदनः ४। काकस्वर इवाभाति यस्मिन् खड्गे हते ध्वनिः। काकस्वरोऽयं खड्गः स्यात् श्रीयशःकुलनाशनः ५। तन्त्रीस्वरसमो यस्मिन् भवेत् खड्गे हते ध्वनिः। तन्त्रीध्वनिरयं खड्गः कुलश्रीधननाशनः ६। खरस्येव ध्वनिर्यत

खरध्वनिरयं मतः। श्रीयशोज्ञानविज्ञानजयतेजो विनाशनः ७। प्रस्तरश्चेव यश्चेह कृतश्च ध्वनिरुच्यते। प्रस्तरध्वनिनामायं स निन्द्यः खड्गलक्षणे ८। गभीरतारध्वनिता खड्गस्यागुभलक्षणम्। उत्तानमन्द्रध्वनिता खड्गस्य शुभलक्षणम्। अयत्नेनैव हीनोऽपि खड्गः शुध्वनिरुत्तमः। अन्धः कुरूपो मनुजो यथा भुवि सुगायनः। सर्वलक्षणसम्पन्नः खड्गो यो ध्वनिवर्जितः। स निन्द्यः सुन्दराङ्गोऽपि यथा वाक्यविवर्जितः। नखेन वाऽथ दन्तेन तथा लौहशलाकया। लोष्टेन मृत्करामिर्वा ध्वनिविज्ञानमुच्यते"। अथ द्विविधमानम्। "यन्मानं द्विविधं प्रोक्तं तस्य लक्षणमुच्यते। उत्तमाधममेदेन भेदो हि द्विविधो मतः। उत्तमं यद्विशालं स्यात्सुमानं प्रकीर्त्तितम् १। अधमं तच्च यत् खर्वं दुरमानं प्रकीर्त्तितम् २। तत् पुनस्त्रिविधं प्रोक्तमादिमध्यान्तभेदतः। यो सप्तविंशतिसमायततोऽग्रधारो भवेत् प्रसरतोऽपि षड्डङ्गुलीभिः। मानेन षोडशकिकः स हि खड्गमध्येनातिप्रलम्बमतिकृशफलं ददाति। यो द्वादशाष्टनवसप्तभिरायतः स्यात् मन्दो भवेत् प्रसरतोऽपि चतुर्थभागः। तावत् पलैः परिमितस्तु ततोऽधिको वा खड्गाधमो धनयशःकुलनाशनाय"। नागार्जुनोऽपि "यावत्यो मुष्टयो दैर्घ्ये तद्द्वाङ्गुलयो यदा। प्रसरे तच्चतुर्थांशमिति वै मानमुत्तमम्। यावत्यो मुष्टयो दैर्घ्ये प्रसरे तत्त्रिभागिकः। पलैस्तदर्द्धैस्तुलितः स खड्गो मध्य उच्यते। यावत्यो मुष्टयो दैर्घ्ये तुर्य्यांशः प्रसरे तु तत्। अधमः कीर्त्तितः खड्गस्तत्समोनाधिकः पलैः। भौमानामिदमुद्दिष्टं दिव्यास्तु त्रयवो मताः"। भोजस्तु "दीर्घता लघुता चैव खड्गविस्तीर्णता तथा। दुर्भेद्यता सुघटता खड्गानां गुणसंग्रहः। खर्वता गुरुता चैव मन्दता तनुता तथा। सुभेद्यता दुर्घटता खड्गानां दोषसंग्रहः। इति निखिलसदारुक्रमत्र वक्तव्येषु निरूपय खड्गयष्टेः। नृपतिरिति विचिन्त्य यो विधत्ते स चिरतरां श्रियमुच्छ्रितां लभेत" युक्तिकल्पतरुः।

**तरस्** न० तॄ-करणादौ यथायथम् असुन्। १बले २वेगे, ३तोरे, ४वानरे च। ५रोगे शब्दार्थचि०। "बन्धाय चिच्छिदुरिभास्तरसात्मनेव" "कुचयोर्युगेन तरसा कलिताम्" "तरसाकृष्य करोति काचन" इति च माघः। "कैलासनाथं तरसा जिगीषुः" रघुः।

**तरस** न० तॄ-असच्। मांसे अमरः। "तरसमयाः पूर्वोक्तभागाः" कात्या० श्रौ० २४।५।२०। "तरसमयाः मांसमयाः" कर्कः। तरस्+अस्यर्थे अच्। २वेगयुक्ते त्रि०

**तरसत्** पुंस्त्री० तरस इवाचरति तरस+क्विप् शतृ। खगभेदे स्त्रियां ङीप्। "अपक्षमत्तरसनी न भुज्युः" ऋ० १०।६५।८। "तरसन्नामखगस्य पत्नी" भा०।

**तरसान** पु० तरत्यनेन तॄ-आनच् सुट् च। नौकायां उज्ज्वलद०

**तरस्थान** न०ष६त०। आतर(पारेर भाड़ा)यष्ठस्थाने जटा०

**तरस्वत्** त्रि० तरोऽस्त्यस्य वा मतुप् मस्य वः मत्वर्थे। सान्तत्वात् १वेगयुक्ते भत्वम् २रोगिणि च। स्त्रियां ङीप्। ३चतुर्थमनोः पुत्रभेदे। "तरङ्गभीरुर्वप्रश्च तरस्वानुग्र एव च" हरिवं० ७अ०।

**तरस्विन्** पु० तरस्+अस्यर्थे विनि सान्तत्वात् भत्वम्। १वायौ २गरुड़े राजनि० ३वेगवति, ४शूरे च त्रि० अमरः। "असक्तदेकरथेन तरस्विना" "निर्जितेषु तरसा तरस्विना" रघुः। स्त्रियां ङीप्। "कौमोदकी विष्णुगदा तरस्विनी" भाग० ८।१०।३२। [पञ्चिले त्रिका०।

**तरान्धु** पु० तरे तरणे अन्धुरिव गभीरत्वात्। नौकाभेदे

**तरालु** पु० तराय तरणाय अलति पर्य्याप्नोति अल-उनु। नौकाभेदे हारा०।

**तरि(री)** स्त्री तॄ-करणे इ। १नौकायाम्, २वसनपेटके, ३वस्त्रदशायाञ्च हेमच०। "ओर्णा तरिः सरिदतीव गभीरनीरा" उद्भटः। "संसारसागरदावर्त्ततरिकाभाय विष्णवे" भा० अनु० ४७अ०। वा ङीप्। "तरीषु तत्त्वमफलेषु भाखडम्" माघः।

**तरिक** पु० तराय तरणाय हितः वा० ठन्। १प्लवे त्रिका० २नौकायां स्त्री हारा०। तरे तरणार्थं देयशुल्कक्रयक्रयेऽधिकृतः ठन्। ३तरणशुल्कक्रयक्रयाधिकारिणि। "तरिकः स्वजलं शुल्कं स्थलेनु दाप्यः पणान् दश" याज्ञ०। "तीर्थतेऽनेन तरो नावादिस्तत्क्रयस्य शुल्कं तदुपक्रयेऽधिकृतस्तारिकः" मिता०।

**तरिणी** स्त्री तरस्तरणं कार्य्यं तयास्त्यस्याः इनि ङीप्। नौकायाम् हेमच०।

**तरिष्य** तरिष्+गतौ कण्ड्वा० यक् प० सक० सेट्। तरिष्यति अतरिष्यीत्(षीत्)तृ।

**तरिता** स्त्री तरो जातोऽस्याः तारका० इतच्। १तर्जन्यां शब्दच०। २स्थलने। (गाँजा) तन्त्रम् "संविदा कालकूटञ्च ताम्रकूटञ्च धुस्तुरम्। चरिफेनं खर्जुरसखाड़िका तरिता तथा" कुलार्णवतन्त्रम्।

**तरित्र** न० तरत्यनेन तॄ–इत्र। तरणसाधने नौकादौ। "अतरित्रानिव जले बाहुभिर्मामका रथे। पश्यन्तस्ते परांस्तत्र" भा० उ० ६२ अ०।

**तरिरथ** पु० तरेः रथ इव चालकत्वात्। अरित्रे हारा०।

**तरी** स्त्री तरि+ङीष्। १तरिशब्दार्थे २धूमे च त्रिका० ३द्रोण्यां जटाधरः। ४वस्त्रदशायां मेदि०।

**तरीयस्** त्रि० अतिशयेन तरीता ईयसुन् रुत्वो लोपः। अतिशयेन तारके "स नभस्तरीयानिधरः परिज्मा" ऋ० ५।४३।१२। स्त्रियां ङीष् ङित्वात्। तरिष्ठोऽप्युक्तार्थे त्रि०।

**तरीष** पुंन०। तॄ–ईषन्। १शुष्कगोमये २नौकायाञ्च उज्ज्वलद० ३शोभनाकारे मेदि० ४व्यवसाये उणा० ५वस्त्रे ६समर्थे च संक्षिप्तसा०। ७कर्णे पु० पद्मद्रुकन्यायां स्त्री मेदि०।

**तरीषन्** पु० तॄ–ईषन् छन्दसि नकारस्य नेत्त्वम्। तरणे "विश्वा आशास्तरीषणि" ऋ० ५।१०।६ "तरीषणि तरणे" भा० "बहुलवचनात्नानोऽङ्लोपः" माधवः।

**तरु** पु० तरत्यनेन नरकसारोपकाः तॄ–उन्। १वृक्षे अमरः। "तरवोऽभिनेदुः" भाग० १।२।२ "सुनिवनतरुच्छायां देव्या तया सह शिश्रिये" रघुः।

"तरुं चुचुम्बुरुचैः पक्षिणश्चानुकूलाः" भट्टिः। "उपरिजतरुजानि याचमानाः" माघः। २तारके त्रि० "भूर्भुवःस्वस्तरुस्तारः" विष्णुस० भूर्भुवःस्वस्तरुः लोकत्रयतारकः" भा० ३तरुविकारे च। "संजर्भुराणस्तरुभिः सुते सचा" ऋ०५।४३।२ "तरुभिस्तरुविकारैर्यन्त्रैः"।

**तरुकूणि** पु० तरौ कूणयति कूणि–इन् उत०। वामशुद्ध खगे त्रिका०।

**तरुक्ष** त्रि० तॄ–वा०उक्षन्। १तारके २गवाश्वादीनां पालनाधिकृते च। "विप्रस्तरुक्ष आददे" ऋ०८।४६।३२। "तरुक्षे गवाश्वादीनां तारके गवाद्यधिकृते वा" भा०।

**तरु(प)खण्ड** पु०तरूणां समूहः तरु+खण्ड(प)। वृक्षसमूहे एवं वृक्षखण्डादयोऽप्यत्र। "द्रुम(प)खण्डवनं दृष्ट्वा रामः कृपीयमब्रवीत्। एष मेघ इवाकाशो वृक्षखण्ड(प)खण्डः प्रकाशते" रामा० किं० १२ अ०। "तरुखण्ड(प)खण्डमध्ये" पञ्चत०। कदलीस्त(प)खण्डः। भा० वा०

**तरुजीवन** न० जीव्यतेऽनेन जीव–करणे ल्युट् ६त०। वृक्षमूले शब्दच०।

**तरुण** न० तॄ–उनन्। १कुजवृक्षे (मेथोति) मेदि० २स्थूलजीरके ३एरण्डवृक्षे पु० राजनि०। ४यूनि पुंनपुं च त्रि० मेदि० "स चचार गदापाणिर्वृद्धोऽपि तरुणो यथा" भा०वि०२३अ०। "तरुणं सर्षपशाकं नवोदनं पिच्छिलानि च दधीनि" ऋग्वेदभा०। "वासो वसाना तरुणार्करागम्" कुमा०। "क्षतोऽपि तरुणातपं करुणया हरन्ती हरिणाम्" रसगङ्गा०। "तरुणशकलमिन्दोर्बिभ्रतो शुभ्रकान्तिः" सरस्वतीध्यानम्। तरुणस्य भावः ष्यञ् तारुण्य न० तत्रार्थे। "तारुण्यस्य विलासः" सा० द०।

**तरुणज्वर** पु० कर्म्म०। "आसन्नरात्रं तरुणं ज्वरमायुर्मनीषिणः" इति चक्रद० उक्ते सन्नरात्रमध्यजाते ज्वरे।

**तरुणदधि** न० कर्म्म०। सद्योजाते दधनि। "शुष्कं मांसं स्त्रियो हृद्धा बालार्कस्तरुणं दधि। प्रभाते मैथुनं निद्रा सद्यःप्राणहराणि षट्" चाणक्यम्।

**तरुणाय** अतरुणस्तरुणो भवति क्यङ् अभूततद्भावे क्यङ् अतरुणस्य तरुणताप्राप्तौ अक० आत्म० सेट्। तरुणायते अतरुणायिष्ट। "डुम्बरस्तं पीत्वा हृद्धोऽपि तरुणायते" सुश्रुतः। "वसुदेवो जरां त्यक्त्वा हृद्धोऽपि तरुणायते" हरिवं० २७ अ०।

**तरुणी** स्त्री तरुण+मध्यमवयोवाचित्वात् ङीष्। १युवत्यां स्त्रियां "व्याकीर्णमाल्यकबरां कबरीं तरुण्याः"। "स्तनौ तरुण्याः परिवव्रुरेनम्" माघः। २हनुमात्मायां ३दन्तीवृक्षे ४चिडानामगन्धद्रव्ये ५कुजवृक्षे (मेथती) च राजनि०।

**तरुणीकटाक्षमाल** पु० तरुणीनां कटाक्षाणां माला यत्र प्रियत्वात्। १निम्बवृक्षे राजनि०। ६त०। २तरुणीकटाक्षाणां श्रेण्यौ च स्त्री।

**तरुतल** न० ६त०। १वृक्षमूले। "भोक्ष्यै वयं तरुतलेषु मधुस्रुदानीम्" माघः। २तरुरूपे च।

**तरु(रू)ढ** त्रि० तॄ–क्त "पर्युतस्त्रभितेत्यादिना" पा० नि० ऊठ् ऊठ् वा। तारके। "सद्भावालं तरुतारं रथानाम्" "तरुतारं तारयितारम्" निरु० १०। ८। "यो विप्रैर्वाजं तरुता" १।१२९।२।

**तरुत(तू)लिका** स्त्री तरौ तोलयति दोलयति वा तनुम्, तुल–ण्वुल्तौ तुल–उत्क्षेपे वा खुल् टाप् कापि अतइत्त्वम् पृषो०। (वाडुड) खगभेदे हारा०। तरुं वृक्षे खदेहस्य तो(दो)लनात् तथात्वम्।

**तरुत्र** त्रि० तॄ–वा० उत्र। तारके। "साह्वांसस्तरुत्रो

अत्यन्निकटौ" ऋ० ४।२१।२ "तरुत्सारकः" भा०।

**तरुनख** पु० तरोर्नख इव छेदसाधनत्वात्। कण्टके हारा०

**तरुभुज्** पु० तरुं भुङ्क्ते भुज-क्विप् ६त०। (परगाछा) वन्दाके राजनि०।

**तरुमृग** पु०स्त्री तरौ मृग इव तत्र धावकत्वात्। वानरे शब्दच० स्त्रियां जातित्वात् ङीष्। [हारा०।

**तरुराग** न० तरूणां रागोरक्तता यस्मात् ५व०। नवपल्लवे

**तरुराज** पु० तरूणां राजा उच्चत्वात् टच् ७स०। १ताडवृक्षे राजनि०। २तरुश्रेष्ठमात्रे च। "देवोपभोग्यमेतद्धि तरुराजसमुद्भवम्" हरिवं० १२६ अ०। आर्षे क्वचित् न टच्। "पारिजातस्य भद्रं ते तरुराजोत्तमस्य च" हरिवं० १२६ अ०।

**तरुरुहा** स्त्री तरुषु रोहति रुह-क। १वन्दाके (परगाछा) राजनि०। २वृक्षरोहिणमात्रे त्रि०।

**तरुरोहिणी** स्त्री तरौ रोहति रुह-णिनि ङीप्। १वन्दाके २वृक्षरोहिणमात्रे त्रि०। स्त्रियां ङीप्।

**तरुवल्ली** स्त्री तरोर्वल्लीव। वन्दाके राजनि०। [शब्दार्थचि०।

**तरुविलासिनी** स्त्री तरोर्विलासिनीव। नवमल्लिकायाम्।

**तरुश** त्रि० तरुः अस्त्यत्र लोमा० श। तरुयुक्ते [स्त्रियां ङीप्

**तरुशायिन्** त्रि० तरौ शेते शी-णिनि। वृक्षमात्रे हारा०

**तरुष** त्रि० तॄ-बा० उषन्। तारके। "भूरेः पतस्वान्तरुष तरुषः" ऋ० ६।१५।२। "तरुषस्तारीता" भा०।

**तरुष** हिंसायां वधकर्म्मसु "वनुषति तरुषति" निघण्टूक्तेः दिवा० प० सक० सेट्। तरुषति अतरोषीत्। "त्वं तूर्य तरुषतः" ८।६६।५। "तरुषतो बाधकान्" भा०। "वनुषतिः क्विन्निकर्मा तरुषतिरप्येवंकर्मा" निरु० ५।२ "इन्द्रेण युजा तरुषेण इत्तमित्यपि निगमो भवति" निरुक्तधृतस्मृतिः वेदे गत्यर्थत्वयः।

**तरुष्** न० तरुषति क्विन्नस्यत्र तरुष-आधारे क्विप्। युद्धे "तनूरुचा तरुषि यत् क्षणैते" ऋ० ६।२५।४ "तरुषि युद्धे" भा०। [ऋ० २।२।३ "तरुषस्तारकः" भा०

**तरुस्** त्रि० तॄ-उसि। तारके। "क्षत्वा दग्धश्च तरुषः"

**तरुसार** पु० ६त०। १कर्पूरे हारा०। ६त० २वृक्षसारमात्रे च। "सुवर्णरजताभ्यायोरीतिदन्तमृङ्गमथितरुसारमयाणि" सुश्रु०। [राजनि०।

**तरुस्था** स्त्री तरौ तिष्ठति स्था-क। वन्दाके (परगाछा)

**तरूट** पु० तरोः उट इव। उत्पलचन्दे "तरूटो गुरविष्टम्भी शीतलश्च मतो बुधैः" राजवल्लभः।

**तरूषस्** त्रि० तॄ-बा० उषस्। १तरणकुशले २त्वरायुक्तकारके च। "त्वं न इन्द्र राया तरूषसोषस्" ऋ० १।१२८।१० "तरूषसा तरणकुशलेनाशुकारिणा युद्धेन उत्तरीतुं शक्नोति" भा०

**तर्क** दीप्तौ भक० आकाङ्क्षायाञ्च वितर्के सक० चुरा० उभ० सेट्। तर्कयति ते अतितर्कत् त "एतत्तर्कय चक्रवाकहृदयान्नाशाय" प्रसन्नरा०। "तथा तर्कयामि यथानेनाचिरप्रव्रजितेन भवितव्यम्" मृच्छ०। "दक्षिणेनाथ वामेन कतरेण खिद्यसि। इति मां सङ्कटाः सर्वे तर्कयिष्यन्ति बान्धवः" भा० वि० ६१ अ०।

वि+उत्प्रेक्षायां "तनूनं खलु भाष्यतीति वितर्कयामि" पञ्चत०।

**तर्क** पु० तर्क-भावे अच्। १आकाङ्क्षायां २व्यभिचारशङ्कानिवर्त्तके ऊहभेदे अविज्ञातेऽर्थे कारणोपपत्तितत्त्वज्ञानार्थे ऊहे ३व्याप्यारोपात् व्यापकप्रसञ्जने। ४आगमाविरोधिन्यायै ५आगमार्थपरीक्षणे ६मीमांसारूपविचारे। ७मानसज्ञानभेदे। दक्षवृद्धोक्तमाह "अचिन्त्याः खलु ये भावाः न तांस्तर्केण योजयेत्। नाऽप्रतिष्ठिततर्केण गम्भीरार्थस्य निश्चयः" वेदान्तप्र०। "आर्षं धर्मोपदेशञ्च धर्मशास्त्राविरोधिना। यस्तर्केणानुसन्धत्ते स धर्मं वेद नेतरः" मनुः "तर्काप्रतिष्ठानात्" शा० सू०। करणे घञ्। न्यायशास्त्रे "प्रायस्तर्कमधीते तनुते कृतकौशिवन्नमध्यत्र" दीधितिः "तुहुदस्तर्कोः समस्ताः स्व मे" कुहू०। "यत्काव्यं मधु वर्षयन्ति तपरास्तर्केषु यस्योक्तयः" नैष०। "तर्के वा भक्तर्कशे मम समं क्रीडायते भारती" प्रसन्नरा०। "गदाधरविनिर्म्मिता विषमदुर्गतर्कावली" गदा० ६मीमांसाशास्त्रे १०अर्थवादे तर्कः। "अक्षाः शर्करा उपदधातीति विधिः श्रूयते। तत्राक्षनसाधनं इतं तेजो वा तन्मध्ये केनाक्षा इति संशये तेजो वै घृतमित्यर्थवादात् घृतेनाक्षा इति निर्णीयते। अतस्तर्कोऽर्थवादः। तर्को मीमांसेति कल्पतरुकारः तर्कलक्षणं गौ० सू० भाष्ये उक्तं यथा "अविज्ञाततत्त्वेऽर्थे कारणोपपत्तितस्तत्त्वज्ञानार्थमूहस्तर्कः" गौ० सू०।

"अविज्ञायमानतत्त्वेऽर्थे जिज्ञासा तावज्जायते ज्ञातीच्छेममर्थमिति, अथ जिज्ञासितस्य वस्तुनो व्याहतौ धर्मौ विभागेन विमृशति किं स्विदित्यमाहो स्विन्नेत्थमिति विमृश्यमानयोर्धर्मयोरेकं कारणोपपत्त्याऽनुजानाति सम्भवत्यस्मिन् कारणं प्रमाणं हेतुरिति, कारणोपपत्त्या स्यादेवमेतन्नेतरदिति तत्र निदर्शनम् योऽयं स्थाणौ

ज्ञातव्यमर्थं जानीते तच्च भो जानीतेति जिज्ञासा, स किमुत्पत्तिधर्मकोऽनुत्पत्तिधर्मक इति विमर्शः, विलक्ष्यमानेऽविज्ञाततत्त्वेऽर्थे यस्य धर्मस्याभ्यनुज्ञाकारणमुपपद्यते तमनुजानाति, यद्ययमनुत्पत्तिधर्मकस्ततः स्वकृतस्य कर्मणः फलमनुभवति ज्ञाता, दुःखजन्यप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरस्मादुत्तरं पूर्वस्य पूर्वस्य कारणस्योत्तरापाये तदनन्तराभावादपवर्ग इति ज्ञातां संसारापवर्गौ, उत्पत्तिधर्मके ज्ञातरि पुनर्न ज्ञाताम्, उत्पन्नः खलु ज्ञाता देहेन्द्रियबुद्धिवेदनाभिः सम्बध्यत इति नास्येदं स्वकृतस्य कर्मणः फलम् उत्पन्नश्च भूत्वा न भवतीति तस्याविद्यमानस्य निरुद्धस्य वा स्वकृतकर्मणः फलोपभोगो नास्ति, तदेवमेकस्यानेकशरीरयोगः शरीरादिवियोगश्चात्मनं न स्यादिति। यत्र कारणमनुपपद्यमानं पश्यति तत्रानुजानाति, सोऽयमेवंलक्षण ऊहस्तर्क इत्युच्यते। कथं पुनरयं तत्त्वज्ञानार्थो न तत्त्वज्ञानमेवेति चेदवधारणात्। अनुजानात्ययमेकतरं धर्मं कारणोपपत्त्या न त्ववधारयति न व्यवस्यति न निश्चिनोति एवमेवेदमिति। कथं तत्त्वज्ञानार्थ इति, तत्त्वज्ञानविषयाभ्यनुज्ञालक्षणानुपपत्तेरुद्भावितात् प्रसङ्गादनन्तरप्रमाणसामर्थ्यात् तत्त्वज्ञानमुत्पद्यत इत्येव तत्त्वज्ञानार्थ इति। सोऽयं तर्कः प्रमाणानि प्रतिसन्दधानः प्रमाणाभ्यनुज्ञानात् प्रमाणसहितो वादे उपदिष्ट इत्यविज्ञाततत्त्वमनुजानातीति यथा सोऽर्थो भवति तस्य यथाभावस्तत्त्वमविपर्ययो यथातथ्यम्" वात्स्यायनभाष्यम्।

विश्वनाथवृत्तौ चान्यथा स्वरसमिदं व्याख्यातं यथा "तर्क इति लक्ष्यनिर्देशः कारणोपपत्तित ऊह इति लक्षणम् अविज्ञाततत्त्वेऽर्थे तत्त्वज्ञानार्थमिति प्रयोजनकथनम् कारणं व्याप्यं तस्योपपत्तिरारोपसाध्यात् ऊह आरोपः अर्थाद्व्यापकस्य, तथाच व्यापकाभाववत्त्वेन निर्णीते व्याप्यस्याप्याभावो व्यापकस्याप्याभावः स तर्कः। यथा निर्वह्नित्वारोपान्निर्धूमत्वारोपः निर्वह्निः स्यान्निर्धूमः स्यादित्यादिः। वृद्धो निर्वह्निः स्यान्निर्धूमः स्यादित्यादिवारणाय व्यापकाभाववत्त्वेन निर्णीत इति। निर्वह्निः स्यात् चत्वरं स्यादित्यादिवारणाय व्यापकेति तद्व्याप्यारोपाधीनस्तदारोप इत्यर्थलाभाय व्यापकेति। न चानुमानादितोऽर्थसिद्धे तर्कोऽयमर्थ इति वाच्यम् अप्रयोजकत्वादिशङ्काकलङ्कितेन हेतुनार्थस्य साधयितुमशक्यत्वात्तदेतदुक्तमविज्ञाततत्त्वेऽर्थे तत्त्वज्ञानार्थमिति तत्त्वनिर्णयार्थमित्यर्थः। यत्र नाप्रयोजकत्वाद्याशङ्का तत्र नापेक्ष एवेति भावः। परेतु ऊह इत्येव लक्ष्यं ऊहत्वञ्च मानसत्वव्याप्योजातिविशेषस्तर्कयामीत्यनुभवसिद्धः। तर्कः किं स्वत एव निर्णायकः परम्परया वेत्यत आह कारणेति कारणस्य व्याप्तिज्ञानादेरुपपादनद्वारेत्यर्थः तथा च धूमो यदि वह्निव्यभिचारी स्यात् वह्निजन्यो न स्यादित्यनेन व्यभिचारशङ्कानिरासे निरङ्कुशेन व्याप्तिज्ञानेनानुमितिरिति परम्परयैवास्योपयोग इत्याहुः। स चायं पञ्चविधः आत्माश्रयान्योन्याश्रयचक्रकानवस्थातदन्यबाधितार्थप्रसङ्गभेदात्। स्वस्य स्वापेक्षित्वेऽनिष्टप्रसङ्गः आत्माश्रयः स च उत्पत्तिस्थितिज्ञप्तिद्वारा त्रेधा यथा यद्ययं घट एतद्घटजन्यः स्यात्तदैतद्घटानधिकरणक्षणोत्तरवर्त्ती न स्यात्, यद्ययं घट एतद्घटवृत्तिः स्यात् एतद्घटव्यापो न स्यात् यद्ययं घट एतद्घटज्ञानाभिन्नः स्यात् ज्ञानसामयीजन्यः स्यात् एतद्घटभिन्नः स्यादिति वा सर्वत्रापाद्यम् तदपेक्षापेक्षित्वनिबन्धनोऽनिष्टप्रसङ्गोऽन्योन्याश्रयः सोऽपि पूर्ववत्त्रेधा। तदपेक्षापेक्षापेक्षित्वनिबन्धनोऽनिष्टप्रसङ्गश्चक्रकं चतुःकक्षादावपि स्वस्य स्वापेक्षापक्षापेक्षित्वसत्त्वाच्चाधिक्यम्। अस्यापि पूर्ववत्त्रैविध्यम्। अव्यवस्थितपरम्परारोपाधीनानिष्टप्रसङ्गोऽनवस्था यथा यदि घटत्वं घटजन्यत्वव्याप्यं स्यात् कपालसमवेतत्वव्याप्यं न स्यात्। तदन्यबाधितार्थप्रसङ्गस्तु धूमो यदि वह्निव्यभिचारी स्याद्वह्निजन्यो न स्यादित्यादिः। प्रथमोपस्थितत्वोत्सर्गविनिगमनाविरहलाघवगौरवादिकन्तु प्रसङ्गानाङ्गत्वात् न तर्कः किन्तु प्रमाणसहकारित्वरूपसाधर्म्यात्तथा व्यवहार इति संक्षेपः"।

तर्कग्रन्थे जगदीशोक्तं तर्कविभागलक्षणादिकं यथा। "स चायं तर्कः पञ्चविधः आत्माश्रयान्योऽन्याश्रयचक्रकानवस्थाप्रमाणबाधितार्थकप्रसङ्गभेदादित्याचार्याः। तत्र स्वापेक्षापादकः प्रसङ्ग आत्माश्रयः। अपेक्षा च ज्ञप्त्युत्पत्तौ स्थितौ च सा ज्ञप्तौ तत्रादा, यथा एतद्घटज्ञानं यद्येतद्घटज्ञानजन्यं स्यादेतद्घटज्ञानभिन्नं स्यादिति। द्वितीया घटोऽयं यद्येतद्घटजनकः स्यात् एतद्घटभिन्नः स्यादिति तृतीया चायं घटो यद्येतद्घटवृत्तिः स्यात्तत्त्वे नोपलभ्येतेति स्वापेक्षापेक्षितत्वनिबन्धनः प्रसङ्गोऽन्योन्याश्रयः यथा चायं घटो यद्येतद्घटजन्यः स्यादेतद्घटभिन्नः स्यात् इति उपत्तौ स्थितौ च स्वयमदाहार्यम्। स्वापेक्षणीयापेक्षितस्वापेक्षत्वनिबन्धनः

प्रसङ्गचक्रकः पूर्वोक्त एवापादके जन्यपदान्तरमनर्भाव्योदाहरणम्। अमेधा त्वत्र साक्षात्परम्परासाधारणी व्याप्ता। अनवस्था पुनरप्रामाणिकी न तु प्रमाङ्गमूलकप्रसङ्गः। यथा घटत्वं यदि यावद्घटहेतुवृत्ति स्यात् घटजन्यवृत्ति न स्यादित्यर्थः। उक्तचतुष्कान्यः प्रसङ्गः प्रमाणबाधितार्थकप्रसङ्गः सोऽपि द्विविधो व्याप्तिपाटको विषयपरिशोधकश्च तत्राद्यो यथा धूमो यदि वह्नि व्यभिचारी स्यात्तदा वह्निजन्यो न स्यादिति द्वितीयस्तु पर्वतो यदि निर्वह्निः स्यान्निर्धूमः स्यादित्यादिः।"

धूमादेर्व्यभिचारशङ्कानिवृत्तिद्वारा विषयस्य वह्न्यादेः निश्चायकत्वेन परिशोधकत्वमित्यवधेयम्।

सोऽयं तर्क एकादशविध इति प्राचीननैयायिकाः स्वीचक्रुः तदनुसारेण सर्वं सङ्गच्छम्' स चैकादशविधः व्याघातात्माश्रयेतरेतराश्रयचक्रकानवस्थाप्रतिबन्दिकल्पनालाघवकल्पनागौरवोत्सर्गापवादवैजात्यभेदात्" इति व्याघातादीनामप्रसङ्गरूपत्वात् न तर्करूपत्वमिति किन्तु पञ्चविधत्वमिति नव्याः। एतन्मतानुसारेणैव इष्टौ इतरेषां सख्यतर्कत्वनिरासेन भाक्ततर्कत्वसङ्गम् द्रष्टव्यम्।

तर्कस्य च व्यभिचारशङ्कानिवर्त्तकतयानुमानाङ्गत्वं तच्च खण्डनखण्डखाद्ये निराकृतं यथा

"नापि विपक्षे बाधकस्तर्को वाच्यः तर्कस्य व्याप्तिमूलत्वाभ्युपगमे अनवस्थाप्रसङ्गात्। तदभ्युपगमे मूलशैथिल्येन तर्काभासत्वापातात्। अथ ब्रूषे न शक्यमिदं वक्तुं तथा ह्यग्निधूमव्यभिचारशङ्कायां बाधकस्तर्कोऽयमभिधीयते यदि धूमोऽग्निं व्यभिचरेदकारणकः सन्नित्यः स्यात् न स्यादेव वा स चायमनुत्तरस्तर्कः तत्र शङ्कायां व्याघातापत्तेः। तदेव ह्याशङ्क्यते यन्निमित्ताशङ्कायाने स्वक्रियाव्याघातादयोदोषा भावतरन्नीति लोकमर्यादा एवं सर्वत्रानुत्तरस्तर्को बाधकोऽभिधेय इति चेत् नैवम् किमित्येवं शङ्कितव्यं तद्धेतुफलभाव एव न भविष्यति। एवं तु शङ्कितव्यम् अग्निं विहायान्यस्मादपि हेतोरयमुदेष्यतीति। न च वाच्यमेवं हि सति धूमस्यैकजातित्वं न स्यादिति क्वचिदिन्द्रियजन्यत्वे क्वचिदनुमानादिजन्यत्वेऽपि ज्ञानैकजात्यवत्तदुपपत्तेः। तत्रेन्द्रियादीनामवान्तरसामान्ये साक्षात्कारित्वादौ प्रयोजकत्वं न ज्ञानतायामिति चेन्न ज्ञानत्वस्याकल्पितत्वपरिहारार्थं तत्कारणस्यानुगतस्य भवतावश्यं वक्तव्यत्वात्। धूमेऽपि वह्नेर्विशेष एव प्रयोजकत्वस्य तद्वच्छङ्कितं शक्यत्वात्। न ह्यद्यते तावदग्निप्रयोज्यो धूमे विशेष इति च न वाच्यम् एवं हि सति तद्दर्शनस्याधाततो हेत्वन्तरप्रयोज्यावान्तरजात्यदर्शनेनायोग्यतया विकल्प्यत्वादुपपत्तेः। यदा तु हेत्वन्तरप्रयोज्यो धूमस्य विशेषो द्रुह्यते तदासौ विकल्प्यिष्यत इति सम्भावनायादुर्निवारत्वात्। अस्यात्मनोयोगोऽनुगतं कारणं ज्ञानोत्पत्तावितिं चेन्न यद्यात्मनोयोगादुत्पद्यमानं ज्ञानं स्यादिच्छादयोऽपि ज्ञानं प्रसज्येरन्। यदि त्वदृष्टविशेषो वा शक्तिभेदो वा ज्ञानत्वजातिर्वा ज्ञानप्रागभावो वा तत्रानुगतं कारणमुच्यते तदा तदितरत्रापि वह्निव्यभिचारे धूमस्यैकजात्यप्रयोजकतया शक्यत एव वह्नितम् द्रष्टे व्यभिचारे युक्तमदृष्टादेरैकजात्यपरिकल्पनमिति चेत् अस्तु द्रष्टे तन्निश्चयः अत्रापि व्यभिचारो न द्रुह्यत इत्यत्र नियामकाभावात् शक्ष्यते एवं शङ्कमानस्य भयतो न क्वचिदनुमानं स्यादिति प्रतिबध्यात्माद्यनुमानादित्यतिरेकेण कथायामेव प्रहत्यनुपपत्त्या स्वयं स्वीकर्तव्येष्वनुमानेष्वेतादृशशङ्काक्रमणात् सएव व्याघात इति चेन्न धूमवह्नेरपि वह्निकारणविशेषानुमानस्यैव सति सदनुमानत्वप्रसङ्गात् सामग्रीसाम्येन प्रमाऽप्रमावैचित्र्यानुपपत्तेः। साधारणधर्मदर्शनविशेषादर्शनानां सत्यपि शङ्कायाश्चानुदये सामग्र्यां सत्यामपि कार्यानुदयात्परप्रतिपत्त्युत्पादनार्थं वचनादिरूपां प्रतिपत्तिसामग्रीमुत्पादयितुं यतमानस्य भवतोऽपि स्वक्रियाव्याघात स्तुल्यः। व्याघातस्यैव विशेषत्वात् तद्दर्शनेन शङ्कासामग्र्येव नास्ति प्रत्यक्षे कुतो व्याघातसाम्यमिति चेन्न तद्वि न तावत् आहार्यादिकारणाज्जायमानमेष्टव्यं कूटविषयस्य तथात्वप्रसङ्गकत्वात्। कूटभिन्नः प्रसङ्गकः प्रमितस्यैव स्यादिति चेन्न तस्य तर्कावसरे निरस्तत्वात्। तस्माद्यदेतद्व्याघातरूपस्य विशेषस्य दर्शनं शङ्काप्रतिपक्षभूतमुच्यते तत् किं ? प्रमाणात् कुतश्चिदुपजायमानं वक्तव्यम् तर्काद्वा। यदि प्रथमः शङ्कास्तित्वमपि तेनैव प्रमाणेनोपेयं शङ्कायां सत्यां व्याघातात् यदि च शङ्कां विनापि व्याघातः तदा शङ्क्यमानाशङ्क्यमानयोर्व्याघातस्य साम्यं सिद्धमेव। भवतु शङ्कायामपि तत्प्रमाणं किमेतावता प्रथमोपजातशङ्कासमकालभाव्यवस्थितस्य व्याघातरूपस्य विशेषस्य दर्शनात्तु शङ्कानन्तरं नोत्पद्यत इति चेन्न व्याघातसत्त्वकाले तदवलम्बिकया शङ्कयैव शङ्क्यमानव्यभिचारस्य तस्याः शङ्कायाश्च्युतेश्च तदवलम्बिनो व्याघातरूपस्य

विशेषस्याभावात् कः शङ्कानिरोत्तेर्वारयितेति वक्तव्यम् । मा नामास्तु तदा व्याघातात्मा विशेषस्तद्दर्शनस्तदाहितो वा संस्कारस्तावदस्ति । विशेषावगमतत्संस्कारौ च शङ्काविरोधिनौ । ननु स्वरूपेण क्वचिदपि विशेषस्यावस्थानं तवेति चेन्न व्यवहाराव्यवभाविनो विशेषस्य पूर्वस्थितस्य वा दर्शनं तदाहितो वा संस्कारः तस्य कालान्तरे तत्प्रतिबन्धसंशयविरोधित्वे व्यवहारविषयपक्षे कुम्भस्य परमाणुपाकपक्षे परम्परया तदारम्भकस्य परमाणोः पूर्वं श्यामतया ज्ञातस्य कालान्तरे रक्तिमतया कस्य पाकजन्यरूपविशेषवत्तायां संशयो न स्यात् । यदि च शङ्कायां व्याघातस्तदा शङ्कात्मकस्य विशेषरूपस्य व्याघातस्य दर्शनाच्छङ्कायां शङ्कान्तरं मा भूत् । यदि तु व्यभिचाराव्यवहारे व्यभिचारः स्यादेव व्याघाताव्यवस्य व्यभिचारस्यापि प्रमित्वापत्तेः । अनादिसिद्धव्याप्तिकस्तर्क इति चेन्न तदुद्बुद्धेः प्रमितित्वासिद्धेः शरीरे ज्ञानप्रत्ययस्य तादृशज्ञानप्रमात्वोपगमात् अनादित्वासिद्धेश्चोभयत्राविशेषात् । नापि यत्र व्यभिचारः शङ्केत तदा व्याघातः स्यादित्येवं रूपात्तर्काद्व्याघातावगमः व्याघातप्रतिपादकस्य तर्कस्य मूलशैथिल्ये तर्काभासत्वापातात् तादृशस्यापि व्याघातोपनायकत्वे व्याघातापत्तेश्च साध्यं शक्यत एव तर्काभासाद्भवतोऽपि व्याघात उपनेतुम् । अथ तर्कस्य व्याप्तिर्भ्रमत्वाभ्युपगम्यते तत्रापि व्यभिचारशङ्कायां पुनरनवस्थैव तत्रापि व्याघातापादने पुनरित्यनवस्थैव । "तस्मादक्षाभिरप्यक्षिद्वर्थं न खलु दृष्टम् । स्वहार्थैवान्यथाकारमक्षरादि कियन्त्यपि । व्याघातो यदि शङ्केत न चेच्छङ्का ततस्तराम् । व्याघातावधिराशङ्का तर्कः शङ्कावधिः कुतः ।" व्यभिचारश्चैकपरित्यागव्यवच्छेदेनापरान्वयः सप्तकाक्षदृष्टे नष्टेऽदृष्टः शङ्केत इत्याद्युक्तः ।

तर्कस्य यथा व्याप्तिनिश्चयोपयोगिता तथा अनु० चि० पूर्वपक्षीकृत्य स्वरूपं यथा

"अथोच्यते व्यभिचारज्ञानविरहसहकृतं सहचारदर्शनं व्याप्तिग्राहकम्, ज्ञानं च निश्चयः शङ्का च सा च क्वचिदुपाधिसन्देहात् क्वचिद्विपक्षेबाधदर्शनसहितसाधारणधर्मदर्शनात् तद्विरहश्च क्वचिद्विपक्षबाधकतर्कात् क्वचित् स्वतः सिद्धएव । तर्कस्य व्याप्तिग्रहमूलकत्वेनानवस्थेति चेत् न यावदाशङ्कं तर्कानुसरणात् यत्र च व्याघातेन शङ्कैव नावतरति तत्र तर्कं विनैव व्याप्तिग्रहः तथाहि धूमो यदि वह्न्यसमवहिताजन्यत्वे सति वह्निसमवहिताजन्यः स्यान्नीलः स्यादित्यत्र किं धूमोऽवह्नेरेव भविष्यति क्वचिदग्निं विनापि भविष्यतीति अहेतुकएव वेत्युत्पन्नस्य इति शङ्का स्यात् सर्वत्र स्वक्रियाव्याघातः स्यात् यदि हि स्टष्टोत्पन्नव्यतिरेकं हेतुं विना कार्योत्पत्तिं शङ्केत तदा स्वयमेव धूमार्थं वह्नेः, तृप्त्यर्थं भोजनस्य, परमरिपक्त्यर्थं शस्त्रस्य चोपादानं नियमतः कथं कुर्यात् तेन विनापि तत्सम्भवात् तस्मात्तदुपादानमेव तादृशशङ्काप्रतिबन्धकं, शङ्कायां न नियतोपादानं, नियतोपादाने च न शङ्का तदिदमुक्तं "तदेव ज्ञानमङ्क्यते यस्मिन्नाशङ्क्यमाने स्वक्रियाव्याघातो न भवतीति" नहि सम्भवति स्वयं वह्न्यादिकं धूमादिकार्यार्थं नियमत उपादत्ते तत् कारणं तत्रेत्याशङ्क्यते चेति एतेन व्याघातो विरोधः स च सहानवस्थाननियत इति तत्राप्यनवस्थेति निरस्तं स्वक्रियाव्याप एव शङ्काप्रतिबन्धकत्वात् अतएव "व्याघातो यदि शङ्कास्ति न चेच्छङ्का ततस्तराम् । व्याघातावधिराशङ्का तर्कः शङ्कावधिः कुतः" इति स्वप्ननकारमतमयथार्थम् । नहि व्याघातः शङ्काश्रितः किन्तु स्वक्रियैव शङ्काप्रतिबन्धिकेति न वा विशेषदर्शनात् क्वचित् शङ्कानिवृत्तिरेव स्यात् न चैतादृशतर्कावतारो भूयोदर्शनं विनेति भूयोदर्शनादरः नतु स स्वतएव प्रयोजकः अतएव न तदाहितसंस्कारो न मानान्तरं तर्कस्याप्रमात्वात् तच्च न प्रत्यक्षं व्याप्तिज्ञाने हेतुः तदभावेऽपि शङ्कानुमानाभ्यां तदुपपत्तेः । ननु सहचारदर्शनव्यभिचारादर्शनवद्व्यभिचारशङ्काधिरुद्धात्कुतस्तर्कयोर्ज्ञानं व्यभिचारिसाधारणमिति न ततोऽपि व्याप्तिनिश्चयः इति चेन्न स्वरूपसतोरेव तयोर्व्याप्तिग्राहकत्वात् सत्तर्काद्व्याप्तिभ्रमा तदाभासात्तद्भ्रमा विशेषदर्शनसत्त्वासत्त्वाभ्यां इष्टापत्तिरिव । अपरे तु यत्र तर्कं व्याप्तग्रहभ्रमोत्थं तत्र तर्कान्तरापेक्षा यत्र तु व्याप्तिस्मरणं हेतुः तत्र न तर्कान्तरापेक्षेति मानस्थाः यत्र च जातसाक्षात्काभिष्टानिष्टसाधनतानुमितिहेतुव्याप्तिस्मरणं तदानीं व्याप्तग्रहभावकाभावात् तत्र स्मृत्यनुभवमूला चार्थेऽपि व्याप्तिस्मरणपरम्परेति । यत्तत्वादिसिद्धकार्यकारणभावविरोधादिमूलाः केचित्तर्का इति तच्च तत्र प्रमाणानुपयोगेऽनुमान एव पर्यवसानात् । नच व्याप्तिग्रहाभ्यासानुपपत्त्यैव तर्कस्यानादिसिद्धव्याप्तिकत्वज्ञानमिति वाच्यम् अनुपपत्तेरप्यनुमानत्वात् । अन्ये तु विपक्षबाधकतर्कादनौपाधिकत्वग्रह एव तदधीनो

व्याप्तिपक्ष इति तदपि न तर्कस्याप्रमाणत्वात्। व्यभिचारादिशङ्कानिरासद्वारा प्रत्यक्षादिसहकारी स इति चेन्न अनवस्थाभयेन तर्कं विना व्याघातात् यत्र शङ्का विरहस्तत्र व्याप्तिपक्षे तर्कस्य व्यभिचारात्। यत्तु योग्यानानुपलब्धीनां योग्यानुपलब्ध्याभावयोरुपक्षः अयोग्यानान्तु साध्याव्यापकत्वसाधनव्यापकत्वसाधनादभावयोरुपक्षः इत्यनौपाधिकत्वं सुपक्षमिति तदुच्यम् अनुमानेन तत्साधनेऽनवस्थानात् प्रमाणान्तरस्याभावात्। ये चानुकूलतर्कं विनैव सहचारादिदर्शनमात्रेण व्याप्तिपक्षं वदन्ति तेषां पक्षेतरत्वस्य साध्यव्यापकत्वपक्षेऽनुमानमात्रमुच्छिद्येत अनुमानमात्रोच्छेदकत्वादेव पक्षेतरोपाधिरिति चेत् भ्रान्तोऽसि भद्रि यदनुपाधित्वेन तस्य दोषत्वमाचक्षाणे साध्यव्यापकत्वेन तद्व्यतिरेकात् पक्षे साध्यव्यावर्तकतया व्यापकव्यतिरेके व्याप्यव्यतिरेकस्य वज्रलेपाच्च। अपि च करवह्निसंयोगः यत्तद्विरिक्तातीन्द्रियधर्मसमवायी जनकत्वादित्यत्राप्रयोजकत्वाच्च साधकं तत्र व्याप्तस्य पक्षधर्मत्वे किमप्रयोजकं नाम? तस्मादिपक्षबाधकतर्काभावात्र तत्र व्याप्तिपक्षः इत्यप्रयोजकत्वमिति"। तर्कं वेत्त्यधीते वा ठञ्। तार्किक तर्कवेत्तरि तर्कशास्त्राध्येतरि च। "तार्किकशिरोमणिश्चिन्तते" दीधितिः।

तार्किक त्रि॰ तर्क-ठक्। १तर्ककारके। २याचके हेम॰।
"कामैः सन्तर्पयामास रूपवांस्तार्किकानपि" भा॰ शा॰ ४५ अ॰

तर्कग्रन्थ पु॰ तर्काधिकृतः ग्रन्थः शाक॰ त॰ कर्म॰ वा। तर्कप्रधाने ग्रन्थे "तर्कग्रन्थार्थरहितो नैव शास्त्रावधिक्षितः" सुश्रुतः।

तर्कण न॰ तर्क-भावे ल्युट्। तर्कशब्दार्थोक्ते ऊहभेदे "परकीर्त्यात्मदोषाद्यैः शङ्कानर्थस्य तर्कणम्" सा॰ द॰

तर्कमुद्रा स्त्री "तर्जन्यङ्गुष्ठयोरग्रे श्लिष्टः संयोज्य चाङ्गुलीः। प्रसार्य बन्धनं प्राहुस्तर्कमुद्रेति तान्त्रिकाः" इत्युक्ते मुद्राभेदे "बाहुं प्रकोष्ठेऽक्षमालामासीनं तर्कमुद्रया" भाग॰ ४।६।२२।

तर्कविद्या स्त्री ६त॰। गौतमोक्तानां प्रमाणप्रमेयादीनां षोड़शानां पदार्थानां विद्यायां, कणादोक्तषट्पदार्थादिविद्यायाञ्च। "आन्वीक्षकी तर्कविद्यामनुरक्तो निरर्थिकाम्" भा॰ अनु॰ १७ अ॰।

तर्कारी स्त्री तर्कयत्यति अच्-अण् ङीप्। जयन्तीवृक्षे। अमरः।

तर्किन(ल) तर्क-वा॰ इन(ल) वा। चक्रमर्दवृक्षे रत्नमाला

तर्किन् त्रि॰ तर्क-णिनि। तर्ककारके पण्डितभेदे। "त्रैविद्यो-हैतुकस्तार्की नैरुक्तोधर्मपाठकः। त्रयस्त्राश्रमिणः पूर्वे परिषत् स्याद्दशावरा" मनुः। [स्वार्थे क। तर्कक तत्रार्थे।

तर्कु पु॰ तृक॰-उ नि॰।(टेको)इति ख्याते यन्त्रभेदे। त्रिका॰।

तर्कुट न॰ तृत-कुटे वा॰ भावे उट पृषो॰।(काटनाकाटा) सूत्रकर्त्तनभेदे त्रिका॰। करणे उट। २तर्कौ स्त्री हारा॰ गौरा॰ ङीष्।

तर्कुपिण्ड पु॰ ७त॰। तर्कुस्थितसूत्रपिण्डे (टेकोर बाँटुल) जटाधरः। [हारा॰।

तर्कुपीठी स्त्री स्वल्पः पीठः ङीष् पीठी ६त॰। तर्कुपिण्डे

तर्कुलासक पु॰ तर्कुं लासयति चालयति लस-णिच्-ण्वुल्। तर्कुचालके यन्त्रे (चरका)। हारा॰।

तर्कुग्राण पु॰ ६त॰। (टेकोरगाछ) यामके त्रिका॰।

तर्क्षु पु॰ तरक्षु+पृषो॰। मृगादने व्याघ्रभेदे शब्दरत्ना॰।

तर्क्ष्य पु॰ तृक्ष-यत् वा॰ गुणः। यवक्षारे रत्नमा॰।

तर्ज भर्त्सने भ्वा॰ पर॰ सक॰ सेट्। तर्जति अतर्जीत् ततर्ज।

तर्ज भर्त्सने चुरा॰ आ॰ सक॰ सेट्। तर्जयते अततर्जत। तर्जा तर्जना "सीतामभ्यर्च्य तर्जितः" "तया तु तर्जिताः सर्वा सुखैर्भीमा यथागतम्"। "राज्ञसोऽतर्जयत्सूतं पुनश्चाढौकयद्रथम्" भट्टिः। बालं पुनर्गोसुखं गृह्णीयाच्च चैनं तर्जयेत्" सुश्रुतः। आर्धधातुत्वात् पदव्यवयः।

तर्जन न॰ तर्ज-भावे ल्युट्। भर्त्सने "तरुणताकुलतर्जनविभ्रमाः" माघः। पु॰ तर्ज-युच्। २भर्त्सने स्त्री "बला क्रमेण परिसान्त्वनतर्जनाभिः" माघः। "मधुरवचनैः सख्यभङ्गैः लताकुलितर्जनैः" सा॰ द॰।

तर्जनी स्त्री तर्ज्यतेऽनया तर्ज-करणे ल्युट् ङीप्। प्रदेशिन्यां हस्ताङ्गुष्ठसमीपस्थे अङ्गुलिभेदे। "तर्जन्यङ्गुष्ठयोर्मध्यं पितृतीर्थं प्रचक्षते" स्मृतिः। तर्कमुद्राशब्दे उदा०। मुद्राशब्दे भरि उदा०।

तर्जनीमुद्रा स्त्री "वामहस्तं विधायाथ तर्जनीमध्यमे ततः। प्रसार्य तर्जनीमुद्रा निर्दिष्टा मूलपाणिना" तन्त्रोक्ते मुद्राभेदे।

तर्जिक पु॰ तर्जस्तर्जनमस्त्यत्र ठन्। देशभेदे हेमच॰।

तर्ण पु॰ तृण-अच्। वत्से। स्वार्थे क। तर्णक तत्रार्थे, अमरः "कृष्णसनाथा तर्णकपङ्क्तिः" छन्दोम॰। सद्योजाते २गिर्यां च हेम॰। [२शुने (भेला) शब्दार्थकल्पतरुः।

तर्णि पु॰ तरत्याकाशपङ्क्तिं तॄ-नि करणे नि वा। १सूर्य्ये

तर्तरीक न॰ तॄ-करणे ईक फर्फरीका॰ नि॰। २नौकाभेदे कर्त्तरि ईक। २पारगे त्रि॰ मेदि॰।

तर्ड हिंसायां भ्वा० पर० सक० सेट्। तर्डति अतर्डीत्। ततर्ड। "सेडे कपो रथाङ्गांच रिपोस्ततर्ड शाखिना"। "सुग्रीवः प्रवसं नेभे बङ्गनामस्ततर्ड च" भट्टिः।

तर्डू स्त्री तर्ड-ऊद-वा ङ। काष्ठनिर्मितायाम् दर्व्याम् अमरः।

तर्ड्मन् पु० तर्ड-ऊद वा मनिन्। १चषालच्छिद्रायवेधे "द्वाङ्कृतं त्रङ्कृतं वा तर्ड्मातिक्रान्तं यूपस्य" कात्या० श्रौ० ६।१।२०। "तर्ड्मातिक्रान्तं चषालच्छिद्रायवेधादतिक्रान्तम्" कर्कः। आधारे मनिन्। २तर्डनप्रदेशे च। "तर्ड्मसूते पशाङ्गवतस्तदिमावेव" शत० ब्रा० ३।२।१।२ तर्ड्मसूते इति यथोभयोर्मांसप्रदेशयोः सम्बन्धी भवति यथा च तर्डनप्रदेशेषु पशाङ्गाने जाते परस्परं स्यूते भवतः तस्मैकस्योपर्यपरमास्तृणुयात्" भा०

तर्पण न० तृप-णिच् वा ल्युट्। १तृप्तौ २प्रीणने च अमरः ३यज्ञकाष्ठे हेमच०। स्नातकादिभिःप्रत्यहं कर्तव्ये पञ्चमहायज्ञान्तर्गते ४महायज्ञभेदे स च पितृयज्ञः। पितॄणां तृप्तिहेतुत्वादस्य तथात्वम् तत्प्रकारः आ० त० उक्तो यथा "तदुद्विविधं प्रधानमङ्गञ्च। तत्राद्यमाह यातातपः "तर्पयन्तु शुचिः कुर्यात् प्रत्यहं स्नातको द्विजः। देवेभ्यश्च ऋषिभ्यश्च पितृभ्यश्च यथाक्रमम्"। विधेयमभिधाय काशीखण्डम् "तर्पणं प्रत्यहं कार्यं भर्तुः कुशतिलोदकैः। तत्पितृस्तत्पितृभ्योऽपि नामगोत्रादिपूर्वकम्"। द्वितीयन्तु ब्रह्माण्डपुराणीयम् "नित्यं नैमित्तिकं काम्यं त्रिविधं स्नानमिष्यते। तर्पणन्तु भवेत्तस्य अङ्गत्वेन व्यवस्थितम्"। तर्पणाकरणे दोषमाह योगियाज्ञवल्क्यः "नास्तिक्यभावाद्दुष्टत्वादपि न तर्पयति यो सुतः। पिबन्ति देवरुधिरं पितरो वै जलार्थिनः"। तर्पणमभिधाय ब्रह्मपुराणम् "तस्मात् सदैव कर्त्तव्यमकुर्वन् मनुजैनसा। युज्यते ब्राह्मणः कुर्वन् विप्रमेतद्विमुक्तिं हि"। शङ्खलिखितौ "नेष्टकारचिते स्थाने पितॄंस्तर्पयेत्"। मार्कण्डेयपुराणम् "यच्च सर्व्वाय नोत्सृष्टं यच्चाभोज्यनिपातजम्। तदर्घ्यं सलिलं तात! सदैव पितृकर्मणि"। विष्णुः "स्नातश्चार्द्रवासा दैवपित्र्यतर्पणमन्त्रःस्व एव कुर्यात्। परिवर्त्तितवासास्त्वीर्थसतीर्थे"। अत्रापि तीर्थे विशेषमाह मत्स्यपुराणे "तिलोदकाञ्जलिर्देवो जलस्यैस्तीर्थवासिभिः। सदा न दुष्यतेनैव यद्दत्तं श्राद्धं समिष्यते"। अत्र जलस्यैरित्यनेन स्वस्वस्थानामपि जलस्यत्वं निबध्यते। ततश्च "अन्तरुदक आचान्तोऽन्तरेव पूतो भवति। बहिरुदके आचान्तो बहिरेव पूतो भवति तस्मादन्तरेकं बहिरेकञ्च पादं कृत्वा आचामेत् सर्वत्र शुद्धो भवति" इति पैठीनसिवचनात् जलस्यैकचरणस्थलताचमनेनोभयकर्म्मार्हत्वात् तर्पणकाले तीर्थे जलैकचरणेन भवितव्यम् अन्यत्र त्वनियमः। तद्यथा जले तर्पणमभिधित्सति। स्वस्वतर्पणे आग्नेयपुराणम् "प्रागग्रेषु सुरांस्तृप्येन्मनुष्यांश्चैव मध्यतः। पितॄंश्च दक्षिणाग्रेषु दद्यादिति जलाञ्जलीन्"। अशुचिदेशे तु विष्णुः "यत्रानुचिस्थलं वा स्यादुदके देवतापितॄन्। तर्पयेत्तु यथाकाममप्सु सर्वं प्रतिष्ठितम्"। बृहस्पतिः "ब्रह्मयज्ञप्रसिद्ध्यर्थं विद्याङ्गाध्यात्मिकीं जपेत्। जप्त्वाथ प्रणवं वापि ततस्तर्पणमाचरेत्"। एतच्च तर्पणं ब्रह्मयज्ञानन्तरं छन्दोगेतरपरम्। तेषान्तु वैश्वदेवाय घोषलाय इत्यनस्तूर्ध्वोपस्थानानन्तरं गोभिलेन तर्पणाभिधानात्। "आश्वने तु संप्राप्ते तर्पणं तदनन्तरम्"। "गायत्रीञ्च जपेत् पश्चात् स्वाध्यायञ्चैव शक्तितः"। आश्वने तु संप्राप्ते गायत्रीं जपतः पुरा। तर्पणं कुर्वतः पश्चात् स्नानमेव हुता भवेत्" इतिगोभिलीयवचनाभ्याञ्च। दक्षः "प्रादेशमात्रमुद्धृत्य सलिलं प्राङ्मुखः सुरान्। उदङ्मनुष्यांस्तृप्येत पितॄन् दक्षिणतस्तथा। अर्घ्येषु तर्पयेद्देवान् मनुष्यान् कुशमध्यतः। पितॄंस्तु कुशमूलाग्रे विधिः कौशो यथाक्रमम्"। एवञ्च "गोशृङ्गमात्रमुद्धृत्य जलमध्ये जलं क्षिपेत्" इति यमवचनस्थगोशृङ्गपदं प्रादेशमात्रपरम्। उद्धृतोदके तु हारीतः "पात्राद्वा जलमादाय शुचौ पात्रान्तरे क्षिपेत्। जलपूर्णेऽथ वा गर्त्ते न स्थाने तु विनिक्षिपेत्"। अत्र यदि यदुपक्रम्य हुतं यच्च येन सम्यं समभिव्याहृतं तदेव तस्यैवाङ्गं नान्यदिति बोध्यं तदङ्गं इतरत्समभिव्याहारप्रकरणाभ्यामिति गोतमसूत्रात् तेन पद्मपुराणीयस्नाने तदङ्गमेव तर्पणम्। "तद्यथा ब्रह्माणं तर्पयेत् पूर्वं विष्णुं रुद्रं प्रजापतिम्। देवायक्षासुरा नागा गन्धर्वाप्सरसोऽसुराः। क्रूराः सर्पाः सुपर्णाश्च तरवो जम्भगाः खगाः। विद्याधरा जलाधाराश्चैवाकाशगामिनः निराहाराश्च ये जीवाः पापे धर्मरताश्च ये। तेषामाप्यायनायैतदीयते सलिलं मया"। एतेनैकाञ्जलिरिति सर्वेषां मतम्। "कृतोपवीती देवेभ्यो निवीती च भवेत्ततः। मनुष्यां स्तर्पयेद्वृक्षा ऋषिपुत्रान्दर्भांस्तथा। सनकश्च सनन्दश्च

तृतीयश्च सनातनः । कपिलश्चासुरिश्चैव बोढुः पञ्चशिखस्तथा । सर्वे ते तृप्तिमायान्तु मद्दत्तेनाम्बुना सदा । मरीचिमत्र्यङ्गिरसौ पुलस्त्यं पुलहं क्रतुम् । प्रचेतसं वशिष्ठञ्च भृगुं नारदमेव च । देवान् सर्वान्महर्षीन् सर्वांस्तर्पयेदक्षतोदकैः । अपसव्यं ततः कृत्वा सव्यं जानु च भूतले । अग्निष्वात्तांस्तथा सौम्यान् हविष्मतस्तथोष्मपान् । सुकालिनो बर्हिषद आज्यपांस्तर्पयेत्ततः । तर्पयेच्च पितॄन् भक्त्या सतिलोदकचन्दनैः । दर्भपाणिस्तु विधिना कृष्णाभ्यां तर्पयेत्ततः"। अत्र केचित् पितृधर्मातिदेशात् दिव्यपितृणामपि अञ्जलित्रयदानम् । तदसत् "कव्यवाळ नळं सौम्यं यमसर्व्यमथान्तथा । अग्निष्वात्ताः सोमपाश्च बर्हिषदः सकृत् सकृत्" इति छन्दोगपरिशिष्टेन विशिष्टैकाञ्जलिविधानात् । "पित्रादीन्नामगोत्रं च तथा मातामहानपि । सम्यक् भक्त्या विधिवदिमं मन्त्रमुदीरयेत् । येऽबान्धवा बान्धवा वा येऽन्यजन्मनि बान्धवाः । ते तृप्तिमखिलां यान्तु ये चास्मत्तोयकाङ्क्षिणः"। अत्र ब्रह्मादिचतुर्दं तर्पणप्रयोगाकाङ्क्षायां गोभिलयाज्ञवल्क्योक्तप्रयोगविधिर्ग्राह्यः । स च "अन्वारब्धेन सव्येन पाणिना दक्षिणेन तु । तृप्यतामिति वक्तव्यं नाम्ना तु प्रणवादिना" । अन्वारब्धेन यज्ञोपवीतेन अक्षादेव वचनात् तर्पणाभिलाषे प्रणवादित्वं तृप्यतामिति च लभ्यते । ततश्च ओं ब्रह्मा तृप्यतामिति प्रयोगः । देवा इत्यादि मन्त्रलिङ्गादेकाञ्जलिः । तथा सनक इत्यादि सदा इत्यनेनैकाञ्जलिः एवं पुनरपि । "एकैकमञ्जलिं दत्त्वा द्वौ द्वौ तु सनकादयः । अर्हन्ति पितरस्तीक्ष्णान् स्त्रियस्त्वेकैकमञ्जलिम्" इति व्यासगोभिलस्मृतिवचनात् । तत्र द्वौ द्वाविति वीप्सायुक्तेः सनकादिपक्षे एक एव द्व्यञ्जलिरिति वाच्यं प्रत्येकपक्षे द्वौ द्वौ समुदायपक्षे तृप्यतारोधेन तत्रैव युक्तत्वात् । अवाञ्जलिपदं प्रागुक्तान्वारब्धेनेति अवधार्यत्वाविधिकृष्णद्वयपरम् तद्दैकस्मिकाञ्जलिपरं वा देवादिपक्षे । पितृपक्षे तु "तौ युतावञ्जलिः पुमान्" इत्येतत्परं पद्मपुराणीयतर्पणपक्षे तु पितृपक्ष एव कृष्णाभ्यामिति श्रुतेस्त्रयेवाञ्जलिः । अन्यत्र नाञ्जलिरित्यवगम्यते । आचारमाधवीये प्रचेताः "मातृसख्यास्तु यास्त्रिस्त्रास्तां दद्यात्त्रिरञ्जलीन्" । इति । पराशरभाष्ये सनकादिदिव्यमनुष्याणां तर्पणादिकं सामगेन प्राङ्मुखेन तदितरेणोदङ्मुखेन कर्त्तव्यं तथा च परिशिष्टधृतं सामवेदीयषट्त्रिंशद्ब्राह्मणं "मनुष्याणामेषा दिक् या च प्रतीचीति" । तथाच ज्योतिष्टोमे श्रूयते "प्राचीं देवा अभजन्, दक्षिणां पितरः, प्रतीचीं मनुष्याः उदीचीमसुराः अपरेयासुदीचीं मनुष्याः" । यत्तु "क्षतजप्रोज्झनार्जानुरुदङ्मुखाः । दिव्येन तीर्थेन देवानुदङ्मुखेन तर्पयेत्" इति शङ्खलिखितस्मृतं देवतर्पणे उदङ्मुखत्वविधायकं तच्छ्रुतिविरोधात् शाखान्तरीयम् अगङ्गविषयकम् । उदकेनेत्यवधात् यवादीति फलाधिक्यार्थं व्यवहारोऽपि तथा । यत्तु "निवीती क्षत्रकारेण मनुष्यांस्तर्पयेदथ । कृष्णस्य मध्यदेशेन क्षतीर्थेन उदङ्मुखः" क्षयविष्णुनाक्षत्रप्रयोगेण क्षतदानमुक्तं तत् सनकादिदिव्यदेवतर्पणे यथा "सनकस्तृप्यतां तस्मैतदुदकं क्षत्र" इत्यादौ न तु पद्मपुराणीयविहितपितृतर्पणे "दत्तेनाम्बुना" अनेन दत्तस्य पुनस्त्यागासम्भवात् । क्षतीर्थेन कनिष्ठाङ्गुलिमूलेन "प्राजापत्येन तीर्थेन मनुष्यांस्तर्पयेत् पृथक्" इति विष्णुपुराणीयैकवाक्यत्वात् । मरीच्यादि ऋषितर्पणन्तु अङ्गुल्यग्रेण "अङ्गुल्यग्रमार्षम्" इति यमवचनात् एवञ्चार्षदेवतीर्थयोरङ्गुल्यग्रैकदेशत्वसाधर्म्येण । मरीच्यादितर्पणे तु दिगाद्याकाङ्क्षायां देववदिति । अतएव योगियाज्ञवल्क्यवचने सनकादित्वत्र मनुष्यादिति विशेषणं दत्तम् । ब्रह्माद्यादित्वत्र देवादिति विशेषणं दत्तमिति व्यवहारोऽपि तथा । मरीचिः "सौवर्णेन तु पात्रेण ताम्रेणाज्यमवेक्ष्य वा । औडुम्बरेण खड्गेन पितृणां दत्तमक्षयम् । विना रूप्यसुवर्णेन विना ताम्रमवेक्ष्य वा । विना तिलैश्च दर्भैश्च पितृणां नोपतिष्ठते" । एतच्च समवाभावे बोध्यं तत्र एकस्याभावे शङ्खः । "सौवर्णेन तु पात्रेण राजतेनौडुम्बरेण च । खड्गपात्रेण शङ्खेन वाप्युदकं पितृतीर्थं स्मृशन् दद्यात्" । शङ्खः सुवर्णकीलकः । "अक्षतोदकैर्यवाद्यैस्तर्पयेद्देवान् सतिलाभिः पितॄंस्तथा" इति छन्दोगपरिशिष्टेनापि पितृपक्षे तिलोदकमात्रविधानात् । पद्मपुराणे चन्दनविधानं फलाधिक्यार्थम् । अपसव्यं प्राचीनावीतित्वम् । उपवीतित्वम् प्राचीनावीतित्वञ्चाह गोभिलः "दक्षिणं बाहुमुद्धृत्य शिरोऽवधाय सव्येंऽसे प्रतिष्ठापयति दक्षिणं कक्षमवलम्बनं भवति एवं यज्ञोपवीती भवति । सव्यं बाहुमुद्धृत्य शिरोऽवधाय दक्षिणेंऽसे प्रतिष्ठापयति सव्यकक्षमवलम्बनं

भवति एवं प्राचीनावीती भवति" इति। प्रतिष्ठापयति यज्ञोपवीतमिति शेषः। तथाचामरसिंहोऽपि "उपवीतं यज्ञसूत्रं प्रोद्धृते दक्षिणे करे। प्राचीनावीतमन्यस्मिन्निवीतं कण्ठलम्बितम्" इति। "सावित्री यन्मिसंयुक्तं उपवीतं तदाच्युत" इति ब्रह्मपुराणीय पूजादर्शनात्। गायत्रीमन्त्रेण उपवीतं कर्तव्यमिति प्रतीयते। लौकिकास्तु सावित्रीयन्मिरिति वदन्ति प्रवरसंख्यया वेष्टितयन्मिरिति लौकिकव्यवहारः। विद्याकरधृतं "यथा यज्ञोपवीतम्"। इत्यादिवाक्यात् उत्तरीयमपि यज्ञोपवीतवत् सव्यापसव्यत्वादिना धार्य्यं विदुतं शुद्धितत्त्वे। पित्रादीत्यादिना मातामहादित्रयपरिग्रहः। तथाच विष्णुपुराणे "त्रिरपः प्रोक्षनार्थाय देवानामपवर्जयेत्। कणीग्राह्य यज्ञान्यायं सकृज्जापि प्रजापतेः। पितृणां प्रोक्षनार्थाय त्रिरपः पृथिवीपते!। पितामहेभ्यश्च तथा प्रोक्षयेत् प्रपितामहान्। मातामहाय तत् पिण्डे तत्पिण्डे च समाहितः। दद्यात् पित्र्येण तीर्थेन काम्यञ्चान्यत् शृणुष्व मे"। स्मृतिसारे धृतम् "वामहस्ते तिलान् दत्त्वा जलमध्ये तु तर्पयेत्। स्नानसाध्यञ्जले पात्रे रोमकूपे न कुत्रचित्"। जलतर्पणे रोमरहितप्रदेशे वामपाणौ वस्त्राच्छादिते तिलान् संस्थाप्य सुद्वारहितदक्षिणहस्ततर्ज्जन्यङ्गुष्ठयोरन्यतरेण तिलान् गृहीत्वा वामहस्ततलेन स्थापयित्वा तर्पयेदिति मदनपारिजातः। अतएव मरीचिः "सुक्कहस्तञ्च दातव्यं न सुद्रां दर्शयेत् क्वचित्। वामहस्ते तिला ग्राह्या सुक्कहस्तञ्च दक्षिणम्"। सुक्कहस्तं प्रसारितहस्तं यथा स्यात्! एवं सुद्रा प्रदेशिन्यङ्गुष्ठयोगे सन्दंशरूपः। सुक्कहस्तञ्च दक्षिणम्" इति दक्षिणहस्तं तिलरहितं कुर्य्यात् इति नैयतकालीनकल्पतरुः। तथाच नारदीये "अङ्गुष्ठानामिकाग्रान्तु दक्षिणस्येतरस्थितान्। तिलान् गृहीत्वा पात्रस्थान् ध्यात्वा संतर्पयेत् पितृन्"। देवलः। "रोमसंस्थान् तिलान् कृत्वा यस्तु संतर्पयेत् पितृन्। पितरस्तर्पितास्तेन रुधिरेण मलेन च"। दृष्टिजलसम्पर्के तर्पणनिषेधमाह वायुपुराणम् "मेघे वर्षति यः कुर्य्यात् तर्पणं ज्ञानदुर्बलः। पितृणां नरके घोरे पतितस्य भवेद्ध्रुवम्"। तथा "शूद्रोदकेन कर्णेन तथा मेघादिनिःसृतैः"। इति मेघादिदर्शनादिति कौस्तुभः। योगियाज्ञवल्क्यः "अदृष्टं जलमध्येषु तिलान् संमिश्रयेज्जले। अतोऽन्यथा तु सर्व्वेन तिलाग्राह्या विचक्षणैः"। अत्र शेषार्द्धं मदनपारिजाते लिखितम्। "अन्यथा वामहस्तेन" ततस्तर्पणमाचरेदिति"। वायुपुराणम्। "तिलदर्भैस्तु संयुक्तं अद्भया यत् प्रदीयते। तत्सर्वमक्षतं भूत्वा पितृणामुपतिष्ठते"। स्मृतिः "रविशुक्रदिने चैव द्वादश्यां श्राद्धवासरे। सप्तम्यां जन्मदिवसे न कुर्य्यात्तिलतर्पणम्"। मत्स्यपुराणे "संक्रान्त्यां निशि सप्तम्यां रविशुक्रदिने तथा। श्राद्धे जन्मदिने चैव न कुर्य्यात्तिलतर्पणम्"। श्राद्धे आमावास्यातिरिक्तश्राद्धे "नीलवस्त्रविमोक्षेण आमावास्यां तिलोदकैः। वर्षासु दीपदानेन पितृणामनृणो भवेत्। अमावास्यान्तु ये मर्त्याः प्रयच्छन्ति तिलोदकम्। पात्रभौडुम्बरं प्राप्य मधुमिश्रं तपोधनाः!। कृतं भवति तत् श्राद्धं रक्षस्वञ्च सदा भवेत्। विशेषतस्तु जाङ्गल्यां सर्वदा तर्पयेत् पितृन्। न कालनियमस्तत्र क्रियते सर्वकर्मसु"। बौधायनः "न जीवत्पितृकः कुर्य्यात्तिलैस्तर्पणमाचरेत्। सप्तम्यां रविवारे च जन्मर्क्षदिवसेषु च"। स्मृतिः "निषिद्धदिनमासाद्य यः कुर्य्यात्तिलतर्पणम्। रौधिरं तद्भवेत्तोयं दाता च नरकं व्रजेत्"। प्रतिप्रसवमाह स्मृतिः "अयने विषुवे चैव संक्रान्त्यां ग्रहणेषु च। उपाकर्मणि चोत्सर्गे युगादौ मृतवासरे। सूर्य्यशुक्रादिवारेऽपि न दोषस्तिलतर्पणे। तीर्थे तिथिविशेषे च कार्य्यं प्रेते च सर्वदा"। स्कन्दपुराणम् "तीर्थमात्रे तु कर्तव्यं तर्पणं सतिलोदकैः। योऽन्यथा तर्पयेन्मूढः स विद्यायां भवेत् कृमिः। विशेषतस्तु जाङ्गल्यां सर्वदा तर्पयेत् पितृन्"। एतत्तु निषिद्धदिनतर्पणविधायकम्। "तीर्थे तिथिविशेषे च गङ्गायां प्रेतपक्षके। निषिद्धेऽपि दिने कुर्य्यात्तर्पणं तिलमिश्रितम्" इति मदनपारिजातविद्याकरराजमयूखधृतमरीचिवचनात्। तिलाभावे पितृतीर्थेन प्रतिनिधिना तर्पणम् "तिलानामभ्यभावे तु सुवर्णरजतान्वितम्। तदभावे निषिद्धेषु दर्भैस्तोयैर्न चान्यथा" इति याज्ञवल्क्यात्। सुवर्णरजतान्वितं सुवर्णरजतस्पृष्टम्। अतएव "सुलभं सकलं पुण्यं यत्तदानादिजं फलम्। गङ्गातोयैश्च सतिलैर्दुर्लभं पितृतर्पणम्" इति भविष्यपुराणे गङ्गातोयस्य दुर्लभत्वसङ्कल्पं न च तदभावात्तर्पणाभावः शातातपः "पितृणां पितृतीर्थेन जलं सिञ्चेद्यथो-

विधि। दक्षिणेनाग्न स्कुशीयात् पितृतीर्थेन समीपतः"। गोभिलः "गोत्रं स्वरान्तं सर्वत्र गोत्रस्याचक्ष्य कर्मणि। गोत्रस्तु तर्पणे प्रोक्तः कर्त्ता एवं न संशयति। सर्वत्रैव पितः प्रोक्तः पिता तर्पणकर्मणि। पितृरक्षय-काले तु क्षयां तृप्तिमिच्छता। शर्मन्नध्यादिके कार्य्यं शर्म्मा तर्पणकर्मणि। शर्मणोऽक्षयकाले तु पितृणां दत्तमक्षयम्"। काण्वाजिनिः "नाभिमात्रे जले स्थित्वा चिन्तयेदुर्द्धमानसः। आगच्छन्तु मे पितर इमं गृह्णन्त्वपोऽञ्जलिम्"। योगियाज्ञवल्क्यः "नाम-गोत्रस्वधाकारैस्त्र्यैः स्युरनुपूर्वशः"। तेन अमुकगोत्रः पिता अमुकदेवशर्म्मा तृप्यतामेतत्तिलोदकं तस्मै स्वधेति प्रयोगः सिध्यति। एवं मातामहादौ। एष चासम्बु-द्धिप्रयोगो वाजसनेयीतरपरः। तेषान्तु सम्बुद्ध्यन्तता-माह ब्राह्मणसर्वस्वे जातूकर्ण्यः "प्रमीतपितृकस्तू-भयत्रैवाह नामगोत्रसदाहृत्य यावता पितृका-र्य्यमसावेतत्ते उदकमिति पितृन् पितामहान् प्रपि-तामहान्। एकैकस्मै त्रींस्त्रीन्दद्यात्"। अत्र चासाविति नाम गृह्णातीति कात्यायनोक्तेः नाम्नः ते इति युष्मत्प्रयोगात् सम्बुद्ध्यन्तता प्रतीयते तस्य सम्बु-द्ध्यमानत्वयाचित्वात्। असम्बुद्धिप्रथमान्तत्वेऽनन्व-यापत्तेः। ततश्चामुकगोत्र! पितरमुकदेवशर्म्मन् तृप्य-स्वैतत्ते तिलोदकं स्वधेति प्रयोगः सिध्यति। एवं मातामहानामपि। ततो भ्रात्रादीनां षण्णां तर्पणानि। द्वादशानां मध्ये यो जीवति तं विहाय इतरपितृ-मातामहादीन् संकीर्त्य पूरयेत्। एवं प्रव्रजिते पतिते च। ततो विमातृज्ये श्वश्रूतृपितृव्यमातुलादींस्तर्पयेत्। यमः "बान्धवानां जलं दद्यात् सुहृदां तर्पयेत् सुहृदो मित्रादयः। मित्रायाप्यसवर्णाय जलं न देयम्। "सवर्णेभ्यो जलं देयं नान्यवर्णेभ्य एव च" इति याज्ञवल्क्यीयात्। भीष्मायासवर्णायापि भीष्मात्मकं तर्पणं कार्य्यम् "ब्राह्मणाद्यास्तु ये वर्णादद्युर्भीष्माय नो जलम्। संवत्सरशतं तेषां पुण्यं नश्यति सत्तम!" इत्यादि वचनात्। मन्त्रस्तु "वैयाघ्रपद्यगोत्राय इत्यादि। ब्राह्मणेनैतत् पितृतर्पणानन्तरं कार्य्यम् अन्येन पितृतर्प-णात् पूर्वम्। अत्र बीजं वर्षञ्जैत्रमिति कृत्यायुधः। असम्बुद्ध्यन्तेन दक्षिणासहितेन सतिलोदकेन सकृत् कर्त्त-व्यम्। ततः कृताञ्जलिः "भीष्मः शान्तनवो वीर" इत्यादि पठेत्। ततो येऽबान्धवा बान्धवा वा इत्यादिना एका-ञ्जलिदैयः। योगियाज्ञवल्क्यः "निष्पीड्यति यः पूर्वं स्नानवस्त्रञ्च तर्पणात्। निराशाः पितरस्तस्य यान्ति देवाः सहर्षिभिः। तथा "अन्नप्रकरवत्तस्य अपसव्येन पी-ड़नम्। अन्नप्रकरवत् आर्द्रोच्छिष्टसमीपान्नविकरणवत् तत्राधोवस्त्रस्य "स्नानशाट्यान्तु दातव्या सदक्षिणो विधु-द्धये" इति यमवचने अधोवस्त्रस्य दुष्टस्यैव शुद्धये स्नानं प्रतीयते। योगियाज्ञवल्क्यः "वस्त्रनिष्पी-ड़ितं तोयं स्नातस्योच्छिष्टभागिनः। भागधेयं श्रुतिः प्राह तस्मान्निष्पीड़येत् स्वले"। अत्र मन्त्रमाह गोभिलः "ये चास्माकं कुले जाता अपुत्रागोत्रिणो मृताः। ते तृप्यन्तु मया दत्तं वस्त्रनिष्पीड़नोदकम्"। अगस्त्यो यज्ञः। "आब्रह्मस्तम्बपर्य्यन्तं जगत्तृप्यत्वितिक्रमात्। अञ्जलित्रितयं दद्यात् एतत्संक्षेपतर्पणम्"। "आब्रह्मस्तम्बपर्य्यन्तं देवर्षिपितृमानवाः। तृप्यन्तु सर्वे पितरो मातृमातामहादयः। अतीतकुलकोटीनां सप्तद्वीपनिवासिनाम्। आब्रह्मभुवनाल्लोकादिदमस्तु तिलोदकम्"।

जन्माष्टम्यां तर्पणस्य फलं यथा "तस्यां तिथौ वारिभारं पितृभ्यो यः प्रयच्छति। गयाश्राद्धं कृतं तेन शताब्दं नात्र संशयः" ब्रह्म॰वै॰ श्रीकृष्णजन्म खण्डः। तर्पणञ्च देवर्षिपितृमनुष्याणां जलाञ्जलिदानेन तृप्तिसम्पादनम्। यथा "एवं स्नात्वा पितॄन् देवान् मनुष्यांस्तर्पयेत्तरः। नाभिमात्रे जले स्थित्वा चिन्तये दुर्द्धमानसः। आगच्छन्तु मे पितर इमं गृह्णन्त्वपो-ऽञ्जलिम्। त्रींस्त्रीञ्जलाञ्जलीन् दद्यादाकाशे दक्षिणे तथा। वसित्वा वसनं शुक्लं स्वले चाक्लीर्ण-वर्हिषि। विधिनास्तर्पणं कुर्य्यान्न पात्रे तु कदाचन। यदपां क्रूरमध्यं तु यदमेध्यन्तु किञ्चन। अशान्तं मलिनं यच्च तत्सर्वमपगच्छतु। गृहीत्वानेन मन्त्रेण तोयं सव्येन पाणिना। प्रक्षिपेद्दक्षिणे नैर्ऋत्यां रक्षोघ्न कृतये द्रुतम्। अनाङ्क्तिन्तु यद्भुक्तं पापाद्यच्च प्रतिग्रहम्। दुष्कृतं यच्च मे किञ्चिद्दाक्मनःकायकर्म्मभिः। पुनातु मे तदिन्द्रस्तु वरुणः स बृहस्पतिः। सविता च भगश्चैव सनयः सनकादयः। आब्रह्म स्तम्बपर्य्यन्तं जगत् तृप्यत्विति ब्रुवन्। त्रिपेदपोऽञ्जलीस्त्रींस्तु कुर्वन् सङ्क्षेपतर्पणम्" गारुड़े २१५ अ०। तर्पण विशेषस्तु गारुड़े २१८ अ० वह्निपुराणे नित्यश्राद्ध स्नानविधाननामाध्याये च द्रष्टव्यः। जीवत्पितृकस्य

तर्पणनिषेधो यथा "दर्भस्थानं गयाशीर्षं तिलैस्तर्पणमेव च। न जीवत्पितृको भूप! कुर्यात् क्वचिदपि क्वचित्। मृद्यात्" कालिका० पु० ८६ अ०।

कर्त्तरि ल्यु। तृप्तिकारके त्रि०। "सुरभिर्घ्राणतर्पणः" अमरः। "सन्तर्पणो नाकसदां वरेण्यः" भट्टिः।

तर्पणी स्त्री तृप-णिच्-करणे ल्युट् ङीप्। गुरुरुन्दडाख्ये शब्दमा०।

तर्पणेच्छु पु० तर्पणमिच्छति दृष उ० नि० २त०। १भीष्मे शब्दर०। २तर्पणेच्छुमात्रे त्रि०।

तर्पिन् त्रि० तृप-णिच्-णिनि। १तर्पके प्रीणयितरि स्त्रियां ङीप् सा च २पद्मचारिणीलतायाम् स्त्री शब्दच०।

तर्पिलो स्त्री तृप-बा० इल गौरा० ङीष्। पद्मचारिण्याम्। कपिलका० रस्य वा लः। तल्पिलीतिरूपान्तरं तत्रार्थे। स्वार्थे क। तर्पिलिका तत्रार्थे। तल्पापि वा रस्य लः। तल्पिलिकापि तत्रार्थे।

तर्ब गतौ भ्वा० पर० सक० सेट्। तर्बति अतर्बीत्। ततर्ब।

तर्बट पु० तर्बति सततं गच्छति तर्ब-अटन्। १वत्सरे २चक्रमर्दवृक्षे च राजनि०।

तर्मन् न० तृ-मनिन्। यूषाद्यभागे अमरः।

तर्य पु० ऋषिभेदे। "सदाशृणो यजते वि द्विषो बधीद्दाशद्वृत्रः स्तुतश्चिदर्यः" ऋ० ५।४४।१२ "सदाशृणादयः पञ्चार्यः" इति भाष्योक्तेः।

तर्ष पु० तृष-भावे घञ्। १अभिलाषे २तृष्णायाञ्च अमरः। "निवृत्ततर्षैरुपगीयमानात्" भाग०१।८ तर्षक्षयो न भवति पुरुषस्येह कल्पशतात्। निवर्त्तते तदा तर्षः पापमन्तर्गतं यदा" भा० शा० २०४ अ०। तृ-कर्मणि करणे-घा स। २रसवृक्षे ४भेलके च उज्ज्वल०।

तर्षण न० तृष-भावे ल्युट्। पिपासायां जटाधरः। [त्रिका०।

तर्षित त्रि० तर्षो जातोऽस्य तारा० इतच्। तृषिते पिपासौ

तर्षुल त्रि० तृष-बा० उलच्। तृष्णायुक्ते "ज्ञानेन्द्रियाण्येन्द्रियार्थान् नोपसर्वन्त्यतर्षुलम्" भा० २१३ अ०।

तर्ष्यावत् त्रि० तृषावत् वेदे पृषो०। तृष्णायुक्ते। "निरुद्धचित्तक्षिप्तस्तर्ष्यावान् गोधा" १०।२८।१०। "तर्ष्यावान् तृषावान्" भा०।

तर्हि अव्य० तद्+र्हिल्। तस्मिन् काले इत्यर्थे। "रक्षांसि वा एनं तर्हीज्जघ्नते यर्हि न जायते" ऐत० ब्रा०। "यर्हि वाव वो मयार्थो भविता तर्ह्येव योऽहं पुनरागन्ताऽस्मि" तै० सं०।

तल प्रतिष्ठायां वा चुरा० उभ० पक्षे भ्वा० पर० अक० सेट्। तालयति ते तलति। अतीतलत् त अतालीत्। तालयाम् बभूव आस चकार। ततान तेनतुः तलम्।

तल पु०न० तल-अच्। स्वरूपे "शैलेयनद्धेषु शिलातलेषु" कुमा०। "हिमधाम्नि दर्पणतले च शुद्धः" माघः। "विदाङ्कुर्वन्तु महतस्तलं विद्विषदभ्रसः" "तलं स्वरूपं प्रमाणं वेत्ति" मल्लिना०। २व्याघातवारणे। ३कानने ४कार्य्यबीजे न० मेदि०। ५गर्त्ते पु०त्रिका०। ६पादतलस्य मध्ये हेमच०। "इदं रसातलं नाम सप्तमं पृथिवी तलम्" भा० वि० २६० अ०। "भवस्तलमिव व्योम कुर्वन् व्योमेव भूतलम्" रघुः। ७तालवृक्षे पु० चपेटे (चड़) ८तत्सरौ १०खड्गमुष्टौ ११मद्यकल्पेन तन्त्रोक्तादने पु० मेदि०। १२गोधायां पु० हेमच०।

तलक न० तल-बा०कुन्। पुष्करिण्याम् (तलाओ) टारा०।

तलकीट पु० वृक्षभेदे "तलकोटस्य बीजेषु पचेदुत्कारिकां शुभाम्" सुश्रुते शालचिकित्सायाम्।

तलताल पु० तलेन करतलेन ताड्यते ताड-कर्मणि घञ् डस्य लः। करतलेन वाद्यभेदे वाद्यभेदे "आस्फोटयन् खेलयँश्च तलतालं च वादयन्" भा० व० १७८ अ०।

तलत्राण न० तलं करतलं त्रायते त्रै-ल्यु करणे ल्युट् वा। करतलत्राणकारके करतलरक्षके चर्ममये गोधाभेदे "यत्रैते सतलत्राणाः सुयोधनपुरोगमाः" भा० द्रो०११६ अ०। "विबद्धाशितलत्राणः शास्त्रधर्मसनुव्रतः" भा० व० ६७ अ०।

तलप्रहार पु०तलेन चपेटेन प्रहारः प्र+हृ-घञ् ३त०।(चापड़-मारा) चपेटाघाते। "तलप्रहारभग्नेः सदृशं भीमनिस्वनम्" रामा० ल० ७६ अ०। [नलभीने अमरे पाठान्तरम्।

तलभीन पु० तले जलनिम्ने स्थितो भीनः। (चिङ्गड़ि)

तलयुद्ध न० तलस्य चपेटस्याघातेन युद्धम्। चपेटाघातेन युद्धे (चड़ाचड़ि) "बालानां तलयुद्धे संग्रामः सतृयुद्धे वा" ह० सं० ४७अ० तलशब्दे इति पाठान्तरम्।

तललोक पु०तलस्थो निम्नस्थः भूमेस्तलस्थो लोकः। पाताले "स्वर्लोकपालान् खगलोकपालान्नृलोकपालांस्तललोकपालान्" भाग० २।३६।४२ अ०।

तलव त्रि० तलं हस्तादितलं वाति निहन्ति ताड़यति वा-गतिहिंसनयोः क। तलवाद्यवादके। "तान्नृत्तायानन्दाय तलवम्" यजु० ३०।२०। "तलवं तलवाद्यवादनम्" वेददी०।

**तलवकार** पु० सामवेदशाखाभेदे "छान्दोग्ये तवल्कारा-(तल्वकारा) दिशाखाभेदेषु विलक्षणत्वमीतिहेतवोऽक्षर-विकारादय आम्नाये" सा० भ० भाष्यम्। तस्यैषो-पनिषत् "केनेषितं पततीत्यादि"।

**तलवारण** न० तले वाह्यतले वारयति व्याघातम् वारि-ल्यु। व्याघातवारणार्थे हस्ततले बद्धे (चामाटी)वर्मभेदे

**तलसारक** न० तले वक्षःस्थलाधोभागे सारोबलं यस्मात् कप्। अश्वस्य वक्षोऽधोभागे बद्धरज्जुभेदे (तङ्) हेमच०।

**तलहृदय** न० तलस्य हृदयमिव। पादतलस्य मध्यस्थाने हेम०

**तला** स्त्री तलं व्याघातवारणार्थत्वेनास्त्यस्याः अच्। १व्याघातवारणार्थे हस्तबद्धे चर्ममये पदार्थे (चामाटी) अमरे पाठान्तरम् तलाऽस्त्रस्य इनि। २सोधायुक्ते त्रि०। "ततः कवचधारी च तली खड्गी धरासनी" भा० उद्यो० १५७ अ०।

**तलाची** स्त्री तलमञ्चति अनुच-क्विप् ङीप् अञ्चतेरलोपे पूर्वाग्रो दीर्घः। नलनिर्म्मितकटे (दडमा) द्वारा०।

**तलातल** न० षष्ठ अधोभुवनेषु पातालभेदे "ततोऽधस्ता-त्तलातले मयोनाम दानवेन्द्रस्त्रिपुराधिपतिर्भगवता पुरा-रिणा त्रिलोक्याः संचिकीर्षुणा निर्दग्धस्वपुरत्वयस्तत् प्रसादाच्चक्षुष्पदो मायाविनामाचार्यो महादेवेन परि-रक्षितो विगतसुदर्शनभयो महीयते" भाग० ५।२४।२८ "अतलं वितलं सुतलं तलातलं महातलं रसा-तलं पातालमिति" भाग० ५।२४।११। पातालकथने।

**तलिका** स्त्री तलं वक्षःस्थतलं वन्धनस्थानत्वेनास्त्यस्य वा० ठन्। अश्वहृदयस्थरज्जुभेदे(तङ्)हेमच०।

**तलित्** स्त्री तडित्+डस्य लः। विद्युति शब्दार्थचि०।

**तलिम** न०तल+तारका० इतच्। मृदुमांसभेदे। यथा"मृद-मांसविधानेन मांसं सम्यक् प्रसाधितम्। पुनस्तदाच्छे संघट्टं तलितं प्रोच्यते बुधैः। अस्य गुणाः। "तलितं बलमेधाग्निमांसौजःशुक्रवर्द्धनम्। तर्पणं वातु स्नि-ग्धं रोचनं दृढताकरम्" भा०प्र०।

**तलिन** न० तल-इनन्। १शय्यायां शब्दार्था०। २विरले १श्लोके ३स्वच्छे त्रि० मेदि० ४दुर्बले त्रि० हेम०।

**तलिम** न० तल-वा० इमन्। १कुक्षिमे (जात) २शय्यायां ३खड्गे ४वितानके च मेदि०।

**तलुन** पु० तल-उनन्। १वायौ २यूनि त्रि० स्त्रियां ङीप्।

**तलेक्षण** पुंस्त्री तले ईक्षणमस्य। शूकरे शब्दार्थकल्प० स्त्रियां जातित्वात् ङीप्।

**तलोदरी** स्त्री तलं निम्नमुदरमस्या बहुव्रीहौ ऽपि नासिकोदरेत्यादिविशेषोक्तेः ङीप्। क्षीरोदर्यां भाषायां शब्दार्थकल्पतरुः। [ द्वारा०।

**तलोदा** स्त्री तले उदकं यस्या उदकस्य उदादेशः। नद्यां

**तल्क** न० तल-वा० कन् न कित्त्वम्। वने त्रिका०।

**तल्प** पुंन० तल-पक्। १शय्यायाम्, २खट्वादिकायां, ३दारेषु च अमरः। "अग्विधं तल्प आसीनमर्हयेत् प्रथमं गवा" मनुः। "चौदुच्चरस्तल्पो भवति"तैत्ति० १।२।६।५ "सपदि विगतनिद्रस्तल्पमुज्झाञ्चकार" रघुः। "यत्रातपे दातु-मिवाधितल्पम्" माघः। "सख्युः पुत्रस्य च स्त्रीषु गुरुतल्पसमं विदुः"। "गुरुतल्पोऽभिभाष्यैनस्तप्ते सुयादयोमये"मनुः। "गुरोस्तल्पं तल्पं कलत्रं यस्य" प्राय०वि०। "आचार्यार्थी स्त्रां च सुतां गच्छंस्तु गुरु-तल्पगः" याज्ञ०। "पितृव्यदारगमने भ्रातृभार्यागमे तथा। गुरुतल्पव्रतं कुर्याद्वान्या निष्कृतिरुच्यते" संवर्त्तः "स यद्वै गुदं उत्पद्यतस्य स्यादथ तल्पजः" "यत्तल्पजं प्रणीतस्य क्लीवस्य व्यधितस्य वा" मनुः। तल्पे भवः यत् तल्पप्र रुहभेदे पु० "नमस्तल्प्याय चेड्याय" यजु०१६।४४। तल्पे साधुः यत्। तल्प्या शय्यासाधौ त्रि० "यतं तल्प्या राजपुत्रा आशापालाः" भट्ट भा० १२।१।६।२।

**तल्पकीट** पु० तल्पे खट्वायां जातः कीटः शा० त०। (डार-पोका) कीटभेदे शब्दार्थचि०।

**तल्पक** पु० तल्पे तत्संस्कारेऽधिकृतः वा० कन्। शय्या-रचनायामधिकृते दासभेदे। "सूपव्यञ्जनकर्त्तारस्तल्पका व्यवकास्तथा। प्रसाधका भोजकाश्च गात्रसंवाहका अपि" कामन्दकीयनीतौ चरभेदकथने।

**तल्पन** न० तल्पं इवाचरति, तल्प+क्विप्-कर्त्तरि ल्यु। १करिपृष्ठे २पृष्ठवंशस्थ मांसे च द्वारा०।

**तल्पल** न० तल्पं तथाकारं लाति ला-क। करिपृष्ठवंशे "सान्द्रत्वक्कास्तल्पलाश्चिष्टकाद्याः" साधः "तल्पलाः पृष्ठवंशाः" अमि० द्वारावल्यां तल्पनेत्यत्र तल्पलेति वा पाठः साधे तल्पनेति वा पाठः। अन्यतरपाठः लिपिकर-प्रमादकृत इत्यवधेयम्।

**तल्प** त्रि० तल्पिन् लीयते ली-ड। १तल्पिन् लीने "तल्लक्षा-णिति शाल उपासीत छान्दोग्योप० तल्लक्षणित्यस्य भाष्ये "तल्लत्वात् तल्लत्वात् तदनत्वाच्चेत्युक्तम् २विले त्रिका० ३जलाधारविशेषे (तलाओ हिन्दिभाषा) मेदि०।

**तल्लज** पु० तस् प्रसिद्धं यथा तथा लजति लज-कान्तौ अच्।

प्रशस्ते अयन्तु उत्तरपदस्थः "प्रशंसावचनैश्च" पा० क्रम्-मर्यस्त्रियं समस्तः अशरुद्विद्भ्रच कुमारीतल्लज इत्यादि ।

**तल्लिका** स्त्री तल्लिन् ङीयते ङी-ड संज्ञायां कन् कापि अत इत्त्वम् (तालौ) कुल्लिकायां शब्दार्थचि० ।

**तल्ली** स्त्री तत् प्रसिद्धं यथा तथा लसति लस-ड गौरा० ङीष् । १तरुणाम् मेदि० ।

**तल्वकार** पु० सामवेदस्य शाखाभेदे तलवकारशब्दे दृश्यम् ।

**तवक्षीर** न० तु-अच् नित्यकर्म० । (तिखुर) ख्याते पदार्थे "तवक्षीरन्तु मधुरं शिशिरं दाहपित्तहृत् । अयकासकफश्वासास्रदोषं हन्ति सेवनात्" २गन्धलतायां स्त्री राजनि० । [ यवासशर्करायां राजनि० ।

**तवराज** पु० तु-अच् तवः पूर्णः सन् राजते राज-क्विप् ।

**तवराजोद्भव** पु० तवराजादुद्भवति उद्+भू-अच् । यवासशर्करायां खण्डभेदे । "तवराजोद्भवः खण्डो दाह-तृष्णाविनाशनः । मूर्च्छामोहस्य तापस्य श्वासस्य च निवारकः । इन्द्रियतर्पणः शीतः सदा मधुर एव च" राजनि० ।

**तवर्ग** पु० त+वर्ग । त थ द ध न रूपेषु वर्णेषु । तत्र भवः वर्णात्वात् अ । तवर्गीय तत्र भवे वर्णे ।

**तवस्** न० तु-असुन् । १बले २महति २बले च निघण्टुः । "अल्पादचित्तं तवसा जघन्वः" ऋ०२।३०।८ "तवसा बलेन" भा० । "तवस्तमस्तवसां वज्रबाहो ! " ऋ० २।३३।३ । "प्रपाक्षिणां तवसं जम्भयध्याम्" ऋ० १०।२८।७ । तवसे बलाय हितं-यत् । तवस बलहिते बलसाधने च त्रि० "तवो तवसमनुदानि" ऋ०२।३०।८। तवोऽस्यस्य मतुप् मस्य वः सान्तत्वात् मत्वर्थे न विसर्गः । तवस्वत् बलयुक्ते त्रि० "वीर उग्रते तवस्वान्" ऋ० ६। ६७।४६ । पक्षे विनि तवस्विन् तत्रार्थे त्रि० उभयत्र स्त्रियां ङीप् ।

**तवागा** त्रि० तवसा बलेन गीयते गै-कर्मणि क्विप् पृषो० । प्रशस्तबलयुक्ते "स्तुहि स तुव स्वविरं तवागाम्" ऋ० ४।१८।१० "तवागाम् प्रशस्तबलम्" भा० ।

**तविपुला** स्त्री चतुर्थवर्णात् परं तगणपूर्वके विपुलाछन्दोभेदे "तोऽन्ते सतपूर्वान्या भवेत्" छ०र० । अन्ते चतुर्थाक्षरात् परं तगणश्चेत् तपूर्वा तविपुलानाम छन्दः इति तदर्थः ।

**तविष** पु०नो०तव-"तवेर्षिड्डा" उणा० टिषच् । १स्वर्गे २बलेऽपि च "तविषतारिषावर्ष्मि त्रिदिवं चाहतुः क्वचित्" । "१देव-कन्यायां ४भूमौ ५नद्यां च स्त्री उज्ज्व० टित्त्वात् ङीप् । १महति त्रि० निघण्टुः । ८यज्ञौ ९व्यवसाये पु० सि०कौ० १०बलवति च त्रि० । "धनो वृत्राणां तविषो बभूव" ऋ०८।६६।१८ "तविषः प्रवृद्धो बलवान्वा" भा० "अहं शुष्णस्यविषस्तुविष्मान्" १।१६१।६ मेदिन्यां तवीयेति दीर्घमध्यपाठो लिपिकरप्रमादकृतः ह्रस्वम-ध्यपाठस्यैव प्रयोगदर्शनात् उणादिसूत्रे तथैव धृत-पाठितत्वाच्च । [ ४गुग्गुलौ च ।

**तष्ट** त्रि० तक्ष-क्त । १तनूकृते २विधाकृते, च । ३ताडिते

**तष्टि** स्त्री तक्ष-क्तिच् । तक्षणे ।

**तष्टृ** पु० तक्ष-तृच् । १त्वष्टरि (छुतार) २जातिभेदे ३विश्वकर्मणि ४आदित्यभेदे च रमानाथः ।

**तस** अलङ्कारे वा चुरा० उभ० पक्षे भ्वा० पर० सक० सेट् इदित् । तंसयति ते तंसति अततंसत्-त अतंसीत् । ततंस "प्रतिजानामीति ते पिता गर्भे सृष्टिमतंसयत्" यजु० २३।२४ अवतंसः उत्तंसः । भ्वादित्वपक्षे अस्य आत्मने-पदित्वं केचिदिच्छन्ति तंसते अतंसिष्ट ।

**तस** उत्क्षेपे दिवा० पर० सक० सेट् । तस्यति इरित् अतसत् अतसीत् अतासीत् । ततास तेसतुः । उदित् तसित्वा तस्त्वा । तस्तः "यस्य तस्य विना सर्वं तेनेति करणं विना" उद्भटः ।

**तसर** पु० तस्-क्सरन् । (गुटिपोकार सुता) सूत्रभेदे उणा०

**तस्कर** त्रि० तस् करोति अच-टच् "तसु हसोः करप-त्वोः" पा० सुट् दलोपश्च । १चौरे २वृक्षाराके (पिड़िङ्) शाकभेदे पु० रत्नमा० । ३मदनवृक्षे पु० जटा० ४अश्वे "व्याहृत्या यत् परस्वेभ्यः श्रुतौ तस्करता स्थिता" रघुः "तस्करः कर्षचौरयोरिति" रघुटीकाधृतकोषा-न्तरं मल्लिनाथेन तु अश्वस्य न कर्षार्थकतां स्वीचकार किन्तु तस्य श्लोकस्थार्थान्तरमाह स्म यथा "तस्करता चौर्यं परस्वेभ्यः परधनेभ्यः अविषयभूतेभ्यः व्याहृता सती श्रुतौ वाचकशब्दे स्थिता प्रवृत्ता अपह्नवी-भावात् तस्करशब्द एव अपह्नुतः इत्यर्थः" । ५कोपनायां नार्थां स्त्री शब्दार्थकल्प० टित्त्वात् ङीप् ।

**तस्करस्नायु** पु० तस्करस्य वृक्षाराकस्येव स्नायुरिव नाड़िका अस्याः । काकनासालतायाम् राजनि० ।

**तस्थिवस्** त्रि० स्था-क्वसु । स्थितवति "स पाटलायां गवि तस्थिवांसम्" "तस्थिवान्मासचतुष्टयेऽस्य प्राङ्नाकमधि-तस्थुषि" रघुः ।

**तस्यु** त्रि० स्था-बा० कु हित्वञ्च । स्थावरे "देहश्च सर्व-संघातो जगत् तस्थुरिति द्विधा" भाग० ७।७२।छो० ।

तस्थुस् पु० ब० व० स्था–बा० कुसि द्वित्वञ्च। मानवे निघण्टुः।

ताक्षण्य पुंस्त्री तक्षोऽपत्यं कारित्वात् यञ्। तक्षोऽपत्ये। पक्षे "तक्षोऽण उपसंख्यानम्" पा० अण् अपूर्वत्वादनोऽञ्लोपः। ताक्षण तत्रार्थे पुंस्त्री०।

ताच्छीलिक पु० तच्छीलार्थे विहितः ठञ्। तच्छीलार्थविहिते प्रत्यये। "ताच्छीलिकेषु वा सरूपविधिर्नास्ति" पा० "ताच्छीलिकेषेऽण् इतानि भवन्ति" व्या०प०। [स्वभावे।

ताच्छील्य न० तत् शीलमस्य तस्य भावः ष्यञ्। नियततत्-

ताज(जि)क न० नीलकण्ठादिप्रणीते वर्षलग्नज्ञानादिनिरूपके ज्योतिषग्रन्थभेदे। "न ह्याच्छुभं क्वचन ताज(जि)कशास्त्रगीतम्" नील० ता०। [शोभने निघण्टुः।

ताजत् त्रि० तनूज–सङ्कोचे बा० अदि इडभिनकोपौ।

ताट(ड)ङ्क पु० ताड्यते ताडः पृषो० वा डस्य टः तथाभूतोऽङ्कः चिह्नं यस्य शक०। कर्णभूषणभेदे हिरूपको०।

ताटस्थ्य न० तटस्थस्य भावः ष्यञ्। १औदासीन्ये २नैकट्ये च

ताड पु० चु० तड–भावे अच्। १ताड़ने २गुणने च कर्म्मणि अच्। २शब्दे ३सुष्टिमेयलक्षादौ मेदि० ५पर्वते हेमच०।

ता(ट)ड़का स्त्री। राक्षसीभेदे। तस्या उत्पत्तिकथा रामा० बा० २५ अ०।

"पूर्वमासीन् महायक्षः सुकेतुर्नाम वीर्य्यवान्। अनपत्यः शुभाचारः स च तेपे महत्तपः। पितामहस्तु सुप्रीतस्तस्य यक्षपतेस्तदा। कन्यारत्नं ददौ राम! ताड़(ट)कां नाम नामतः। ददौ नागसहस्रस्य बलं चास्याः पितामहः। न त्वेव पुत्रं यक्षाय ददौ चासौ महायशाः। तान्तु बालां विवर्धन्तीं रूपयौवनशालिनीम्। जम्भ पुत्राय सुन्दाय ददौ भार्य्यां यशस्विनीम्। कस्य चित्त्वथ कालस्य यक्षी पुत्रं व्यजायत। मारीचं नाम दुर्धर्षं यः शापाद्राक्षसोऽभवत्। सुन्दे तु निहते राम! अगस्त्यमृषिसत्तमम्। ता(ट)ड़का सह पुत्रेण प्रधर्षयितुमैच्छत। भक्षार्थं जातसंरम्भा गर्जन्ती साभ्यधावत। आपतन्तीं तु तां दृष्ट्वा अगस्त्यो भगवानृषिः। राक्षसत्वं भजस्वेति मारीचं व्याजहार सः। अगस्त्यः परमामर्षात्ता(ट)ड़कामपि शप्तवान्। रूपादी महायक्षी विकृता विकताननां। इदं रूपं विहायाशु दारुणं रूपमस्तु ते। सैषा शापकृतामर्षा ता(ट)ड़का क्रोधमूर्च्छिता। देशमुत्सादयत्येन मगस्त्याचरितं शुभम्। एनां राघव! दुर्वृत्तां यक्षीं परमदारुणाम्। गोब्राह्मणहितार्थाय जहि दुष्टपराक्रमाम्"। "ताड़का चलकपालकृष्णता" रघुः।

"तां ताड़काख्यां निजघान रामः" भट्टिः। [रत्नमा०।

ताड़काफल न० तारकेव फलमस्याः रस्य ड। इन्द्रदेवायां

ताड़कारि पु० ६त०। रामचन्द्रे तस्य ताड़काहननकथा। रामा० अयो० २६ अ०। "तामापतन्तीं वेगेन विक्रान्तामग्नीमिव। शरेणोरसि विव्याध पपात च ममार च"।

ताड़केय पु० ताड़कायाः अपत्यम् ढक्। मारीचे "मारीचः सुन्दपुत्रश्च ताड़कायां व्यजायत" हरिवं २ अ०।

ताड़कायन पु० विश्वामित्रपुत्रभेदे। "महान्ऋषिश्च कपिलस्तथर्षिस्ताड़कायनः" भा० आनु० ४ अ०। विश्वामित्र पुत्रकथने।

ताड़घ पु० तालं हन्ति हन+टक् नि० घप० स०। तालवादके शिल्पिभेदे अश्विन्यादि तु अण्। ताड़घात इत्येव।

ताड़न न० चु० तड–भावे ल्युट्। १आघाते। "ताडने बहवो दोषास्ताड़ने बहवो गुणाः" चाणक्यम्। "अवतंसोत्पलताड़नानि वा" कुमा०। २दीक्षाङ्गे दीक्षणीयमन्त्रसंस्कारभेदे च। "मन्त्रवर्णान् समालिख्य ताड़येच्चन्दनाम्भसा। प्रत्येकं वायुना मन्त्री ताड़नं तदुदाहृतम्" शार०ति०। वायुना यंबीजेन। ३गुणने च।

ताड़नी स्त्री ताड्यतेऽनया ताड़ि–करणे ल्युट् ङीप्। अश्वादेस्ताड़नसाधने कशायां (चाबुक) अमरः।

ताड़पत्र न० तालस्य पत्रमिव अस्य डः। कर्णभूषणभेदे ताड़ङ्क हेमच०।

ताड़ाग त्रि० तड़ागे भवम् अण्। तड़ागभवे जलादौ अप्सु स्त्री "ताड़ागं वातलं स्वादु कषायं कटुपाकि च। हेमन्ते सारसं ताड़ागं वा सेवेत" सुश्रुतः।

ताड़ि स्त्री चु० तड़ इन्। (ताड़ियात) १पत्रप्रधाने वृक्षे भरतः ङीप् तत्रार्थे स्त्री मेदि०। २आभरणभेदे दुर्गसिंहः। "प्रक्रीड़ितशपलकपिलकपिकुलकरतल ताड़नतरलितताड़ीपुटैः" काद०।

ताड़ुल पु० चु०तड़–उल। ताड़के संक्षिप्तसा०।

ताड्यमान त्रि० चु० तड़–कर्म्मणि शानच्। १ताडनकर्म्मणि "श्रोतुर्वितन्त्रीरिव ताड्यमाना" कुमा०। २पटहे पु० त्रिका०। [ताण्डवशब्दे दृश्यम्।

ताण्ड न० तण्डिना मुनिना प्रोक्तम् अण्। नृत्यशास्त्रे

ताण्डव न० तण्डिप्रोक्तं ताण्डं नृत्यशास्त्रं तत् प्रतिपादकतयास्त्यस्य व, तण्डुना (नन्दिना) प्रोक्तम् अण् इति क्षीरस्वामी। नृत्ये अमरः "पुंनृत्तं ताण्डवं प्रोक्तं

स्त्रीत्वं वाच्यसुच्यते" शब्दार्थचि० धृतवाक्योक्ते २ऊं-त्वे च "गण्डोड्डीनालिमालासखरितकुभस्ताण्डवे मूलपाणेः" मालतीमा०।२उद्धतत्वे ३दृष्यभेदे च मेदि०।

**ताण्डवतालिक** पु० ताण्डवे तालस्तद्दानं शिल्पमस्य ठञ्। शिवद्वारपालके नन्दीश्वरे त्रिका०। [प्रियमाले त्रि०।

**ताण्डवप्रिय** पु०ताण्डवं प्रियमस्य। १शिवे शब्दमा० २वत्स-

**ताण्डवित** त्रि० ताण्डव+ऋतौ ञि कर्म्मणि क्त। नर्त्तिते। "अतिप्रांशुर्भृकाण्डताण्डवितधौतसितरुच्छाम्बरसङ्-सम्" "विकटललाटतटताण्डवितभ्रूकुटिना क्रुद्धेन महामोहेन" प्रबोधच०।

**ताण्डिन्** पु० व० व०। ताण्ड्रेण प्रोक्तमधीयते वैशम्पायनान्ते वासित्वात् इनि-यलोपः। तण्डिकृतिप्रवक्तृताण्ड्र प्रोक्तशाखाध्यायिषु। तस्य छात्रः अण् संयोगपूर्वोकारो न टिलोपः। ताण्डिन तस्य छात्रे। स च यजुर्वेदस्य कल्पसूत्रकर्त्ता तण्डिशब्दे २२०७ पृ० दृश्यम्।

**ताण्ड्य** पु० तण्डिसूनेरपत्यम् गर्गा० यञ्। तण्डिसूनेरपत्ये स्त्रियां ङीप् यलोपः। ताण्ड्यी।

**तात** पु० तन-क्त दीर्घश्च। पितरि अमरः। "ईषदीषदनधीतविद्यया तातमाहसुदमाविवर्द्धयन्" कुसुमाञ्जली हरिदासः "हा तातेति क्रन्दितमाकर्ण्य विषण्णः" रघुः। २अनुकम्प्रे मेदि०। "नाहं मृष्टान्नमि वक्ताता! दृष्टीर्नाक्षिरुषान्विताः" भा० आ० १७६ अ०। "स तात इति विप्रर्षिं वशिष्ठं प्रत्यभाषत। मातुः समक्षं कौन्तेय! अपश्यन्त्याः परन्तप!। तातेति परिपूर्णार्थं तस्य तन्मधुरं वचः। अपश्यन्त्यस्तुपूर्णार्थो मृष्यती तत्तवाच ह। मा तात! तात! तातेति ब्रूहि नं पितरं पितुः। रक्षसा भक्षितस्तात! तव तातो वनान्तरे। मन्यसे यन्तु तातेति नैष तातस्तवानघ!। आर्य्य एष पिता तस्य पितुस्तव यशस्विनः" भा० आ०।७८अ० "ज्येष्ठस्तातो भवति वै ज्येष्ठो भ्रातेति मृच्छतः" भा० आ० २२२ अ०। ३पूज्ये त्रि० शब्दरत्ना०। "तस्मात्मुच्ये यथा तात! संविधातुं तथार्हसि" रघुः। पूज्यं वशिष्ठं प्रति दिलीपस्याम्बोधनम्।

**तातगु** पु० तातस्येव गौर्वाचकशब्दो यस्य गवान्तत्वात् गौरुः। पितृभ्रातरि पितृव्ये। २जनकश्विते शब्दार्थचि० त्रि०।

**तातत्तुल्य** पु० ३त०। पितृसमाने त्रिमच०। तातसमादयोऽप्यत्र

**तातन** पुंस्त्री तातं प्रशस्तं मन्यति मन्त-ड। खञ्जनपक्षिणि त्रिकाण्डशेषः स्त्रियां जातित्वात् ङीप् तातनी।

**तातल** पु० तापं तनोति तन-क धृषो०। १रोगे २पापे ३सौहकूटे ४मनोज्ञवे च ०मेदि०। ५तत्प्रमाणे त्रि० अजयपालः।

**तति** पु० ताय-क्तिच्।१पुत्रे जटाधरः। ताय-भावे क्तिन्। २ह्रस्वौ स्त्री "तदलमवता निष्प्रत्यूहिणा कामममिष्टतातिम् आशाखड्गे" वी० च०। तातिलप्रत्ययान्तः अरिष्टतातिशब्दस्तत्रान्ते।

**तात्कालिक** त्रि० तस्मिन् काले भवः काल्या० ठक् आदादिपूर्वकात्कालात्ठञ् ञिठ् वा। तत्कालभवे तत्र ठञि स्त्रियां ङीप् ञिठि टाप् इति भेदः "कर्त्तुस्तात्कालिकी शुद्धिरशुद्धः पुनरेव सः" शु०त० शङ्खः। "भवेत् तात्कालिको यत्नः" ज्यो०। तात्कालिकस्वरचक्रम् चक्रशब्दे दृश्यम् "अक्षर्गणोत्पन्नषड्वस्य तात्कालिकत्वात्" सू० सि० रङ्गना०।

**तात्पर्य्य** न० तत्परस्य भावः ष्यञ्। १वक्तुरिच्छायाम्, २अभिप्राये ३तत्परतायाञ्च। तात्पर्य्यशब्दार्थनिरूपणेन तात्पर्य्यज्ञानस्य शाब्दबोधजनकत्वमनुमानचि० समर्थितं यथा "तात्पर्य्याधीनं शब्दप्रामाण्यम्। तत्र तत्परत्वं न तत्साध्यत्वम्। पदार्थतत्संसर्गयोः शब्दासाध्यत्वात्। अथ तद्गोचरप्रवृत्तिनिवृत्तिसाध्यत्वं तत्परत्वं तच्च भव्यार्थस्य साक्षात्, भूतार्थस्य तु प्रशंसानिन्दावाक्यस्य प्रशस्तनिन्दितस्वार्थप्रतिपादनद्वारा लाक्षणिकस्य लक्षणीयविषयप्रवृत्तिनिवृत्तिजनकत्वेन तत्परत्वमिति चेत् न तत्परत्वेऽङ्गीक्रियते तज्ज्ञानं जनयित्वा तत्र प्रवर्त्तकत्वं तत्प्रवर्त्तकत्वे च तत्परत्वमिति परस्पराश्रयात् लाक्षणिकस्यानुभावकत्वेऽपि लक्षणीयपरत्वात् काव्यादेः स्वरूपाख्यानमात्रपर्य्यवसानाच्च। ननु तद्बुद्धिजनकत्वं तत्परत्वं प्रशंसानिन्दावाक्यमपि प्रशस्तनिन्दितस्वार्थधीहेतुत्वेन तत्परार्थकं तच्च ज्ञानं प्रशस्ते सर्वः प्रवर्त्तते निन्दिताच्च निवर्त्तत इति स्वविषये प्रवृत्तिनिवृत्ती जनयतीति तत्परमुच्यत इति चेत् न गौणलाक्षणिकयोरनुभावकत्वात्। तद्बुद्धिजनने तत्परत्वमित्यन्योन्याश्रयाच्च तज्जननयोग्यत्वमिति चेत् तथैकशब्दोच्चारणेन नानार्थे नानार्थपरत्वं लक्षणायाञ्च तस्यार्थपरत्वं स्यात् योग्यतासत्त्वात् नापि तत्प्रतिपदाद्यकत्वं तात्पर्य्यं विना न तयेत्यन्योन्याश्रयात् प्रशंसादिवाक्यस्य प्रवृत्त्याद्यप्रतिपादकत्वात् लाक्षणिकस्याप्रतिपादकत्वाच्च। अथ गङ्गापदं स्वार्थाविनाभावे तीरं प्रतिपादयत् तत्पर-

मिति चेत् न मङ्गाः क्रोशन्तीत्यत्र तेन विनापि पुरुषे तात्पर्यात् गङ्गादिपदं भत्स्यादिपरं सख्यतीरपरञ्च स्यात् कविनाभावस्य तदेव स्यात् सख्ये बाधके सतीति चेत्। तर्हि सख्यार्थपरतैव न स्यात्। नापि गच्छ गच्छसीत्यत्र गमनाभावपरत्वम्। उच्यते। तत्प्रयोजनकत्वं तत्परत्वं तदर्थप्रतीतिः प्रवृत्तिनिवृत्ती च। प्रयोजनत्वञ्च न साध्यत्वं कन्योद्वाहयात्रादौ व्यभिचारात् नापि प्रतिपाद्ये स्वविषयत्वं यस्य यदिच्छाविषयत्वं प्रति तत्परत्वापत्तेः तदर्थसाध्यसाधनत्वेनेच्छानियम इति चेत्। न दृष्ट धूम इत्यत्र जन्यज्ञाप्यभेदेन साध्यस्य वस्तुभेदतया वाक्यभेदप्रसङ्गात् पुंसिच्छाया नियन्तुमशक्यत्वात्। किन्तु प्रतिपादकेच्छाविषयत्वं तत्परत्वं यः शब्दो वक्ता यदिच्छया प्रयुङ्क्तः स तत्परः सा च प्रतिपाद्यधीः प्रवृत्तिनिवृत्तिविषययोः तत्परत्वं नानार्थात् चिह्नादनेकपदार्थान्वितैकक्रियापराक्षुण्णाच्चाधिकपदादनाहत्या क्रमेणानेकार्थज्ञानं, न त्वेकदैव सकलदर्थपरत्वनियमेनैकस्योच्चारणेऽनेकपरत्वाभावादिति सकलतान्त्रिकैकवाक्यतया वदन्ति तन्न ब्रूमः। यमेकार्थप्रतीतीच्छयैकस्योच्चारणं भवत्येव पुंसिच्छाया नियन्तुमशक्यत्वात् यदि तदुच्चारणमेकार्थपरं तदा आवृत्तिरपि न स्यात् तात्पर्यनिर्वाहार्थमावृत्तिकल्पनात्। अन्यथैकपरेऽपि तदापत्तेः। अतएव तदुच्चारणस्योभयपरतायामावृत्तिकल्पनं, तस्मात्तुल्यबलयोरनेकार्थोपस्थितौ तात्पर्यादिज्ञाने युगपदनेकान्वयबोधो भवत्येव सामग्र्यास्तुल्यत्वात् प्रथममेकस्यान्वयबोधो न तदन्यस्येति नियन्तुमशक्यत्वाच्च"।

"आकाङ्क्षा यत्परिच्छेद्या तात्पर्यं परिकीर्त्तितम्" भाषा० "तात्पर्यं निर्वक्ति यत्परिच्छेदेति। यदि तात्पर्यज्ञानं कारणं न स्यात् तदा सैन्धवमानयेत्यादौ क्वचिदन्यस्य क्वचिच्चयस्य बोधो न स्यात्। न च तात्पर्यग्राहकप्रकरणादीनामेव शाब्दबोधे कारणत्वमस्विति। तात्पर्यज्ञानजनकत्वेन तेषामनुगमे तु तात्पर्यज्ञानमेव लाघवात् कारणमस्तु। इत्यञ्च वेदस्यापौरुषेयेऽपि तात्पर्यज्ञानार्थमीश्वरः कल्प्यते। न च तत्साध्यापकतात्पर्यज्ञानं कारणमिति वाच्यम् सर्गादावध्यापकाभावात् न च प्रलय एव नास्तीति कुतः सर्गादिरिति वाच्यम् प्रलयस्यागमप्रतिपाद्यत्वात्। इत्यञ्च शुकवाक्येऽपि ईश्वरोक्ततात्पर्यज्ञानं कारणम्। विश्वंवादिशुकवाक्ये तु शिष्यादिरेव तात्पर्यस्य ज्ञानं कारणम्। अन्ये तु नानार्थादौ क्वचिदेव तात्पर्यज्ञानं कारणम्। तथा च शुकवाक्ये विनैव तात्पर्यज्ञानं शाब्दबोधः। वेदे तु अनादिमीमांसापरिशोधिततर्कैरर्थावधारणमित्याहुः। शक्ता० "ननु भाभूदाप्तोक्तत्वस्य निश्चयानुरोधेन सिद्धसाधनं तात्पर्यस्य तु स्यात् तन्निश्चयस्यान्वयधीहेतुत्वात् अन्यथा घटकर्म्मत्वादिपरत्वाभावस्य घटकर्म्मत्वाद्यन्यमात्रपरत्वस्य वा निश्चयेऽपि घटमित्यादिवाक्यात् कर्म्मत्वं घटीयमित्याद्यन्वयबोधापत्तेरिति चेन्न कर्म्मतावच्छेदकधर्म्मिकघटाद्यन्वयधीपरत्वाभावनिश्चयदशायां प्रमेयत्वादिप्रकारेण घटकर्म्मत्वादिपरत्वस्य निश्चयेऽपि घटीयं कर्म्मत्वमित्यन्वयमतेरनुत्पत्त्या कर्म्मतावच्छेदकधर्म्मिकघटान्वयबोधपरत्वप्रकारकनिश्चयत्वेनैव तात्पर्यधियस्तथा कारणत्वेन वाक्यार्थस्य तत्रानिवेशात्। वस्तुतः समानानुपूर्वीकस्यैव वाक्यान्तरस्य तस्यैव वा कालान्तरभाव्यपि घटीयकर्म्मत्वादिपरत्वनिश्चयसत्त्वेऽपि भूयमाणवाक्यस्यशक्तावदानीमनन्वयेन तत्परत्वज्ञानिश्चयेऽभावे वा घटीयं कर्म्मत्वमित्याद्यन्वयमतेरनुत्पादाद्विशिष्यैव तत्तद्वाक्यव्यक्तिधर्म्मिकस्य घटकर्म्मत्वादिपरत्वनिश्चयस्य तत्तदन्वयबोधहेतुत्वसम्भवेयं तथा च तत्तद्धेतूनां प्रकरणज्ञानाभिधानामेव विज्ञानव्यक्तीनान्त्वाश्रयणमुचितम् अवश्यं क्वचित्पूर्ववर्त्तिताकत्वात्। अतएव सैन्धवमानय इत्यादावपि स्वयंपरत्वधीर्न स्वयाद्यन्वयबुद्धौ हेतुः किन्तु तदर्जकत्वेनाभिमतं भोजनादिप्रकरणस्य प्रतिसन्धानमिति न्यायसिद्धान्तः" शब्द० प्र०।

**तादर्थ्य** न० तदर्थ+चतुर्व० ष्यञ्। तदुद्देश्यकत्वे।

**तादात्म्य** न०तदात्मनोभावः ष्यञ्। अभेदे तदात्मशब्दे दृश्यम्।

**तादीक्ष्य** अव्य० तदानीम्+दृशो०। तदानीमित्यर्थे "यातूक्षर्य्य जनयन् यातुधानं तादीक्ष्या शक्वमृ" ऋद १।३३।४ "तादीक्ष्या तदानीमित्यस्य दृशोदरादित्वाद्वर्णविपर्य्ययः।

**तादृक्ष** त्रि० तस्येव दर्शनमस्य तद्+दृश–क्स सर्वनामटेरुक्त्वम् उप० स०। तत्तुल्यदर्शने।

**तादृश** त्रि० तस्येव दर्शनमस्य तद्+दृश–ट उप० स०। तत्तुल्यदर्शने "क्व तद्विधं प्रेम पतिश्च तादृशः" कुमा० "निजुष्टवे तादृशमेव हृष्टितम्" माघः। स्त्रियां ङीप्। "यादृशी भावना यस्य सिद्धिर्भवति तादृशी" उद्भटः।

**तादृश्** त्रि० तस्येव दर्शनमस्य तद्+दृश–क्विप् उप०स०। तत्तुल्ये "तादृग्गुणा सा भवति सस्यद्वेषेव निम्नगा"

"तादृशोऽसि तत्तस्मिन् बीजं सर्व्यक्षितं शुचैः" मनुः।

**तान** पु० तन–घञ्। १विस्तारे ज्वरतानः सन्तानः। "सूर्यो शुङ्घीतानैरासीव्येत्" श्रुतेः। २ज्ञानविषये शब्दार्थकल्प० ३गानाङ्गभेदे। "विस्तार्य्यन्ते प्रयोगा ये मूर्च्छना ग्रेय-संश्रयाः। तानास्तेऽध्यूनषड्जाद्यत् सप्तस्वरसमुद्भवाः। तेभ्य एव भवन्त्यन्ये कूटतानाः पृथक् पृथक्। ते शुः पञ्च सहस्राणि स्वयम्भिंशत् शतानि च" सङ्गी० दा० "तानप्रदायित्वमिवोपगन्तुम्" कुमा०। "माता यं यं स्वरं गच्छेत् तं तं वंशेन तानयेत्" मल्लिनाथधृतम्। "गायन्ति दिव्यतानैस्ते भा०स०४अ०।

**तानव** न० तनोर्भावः तनुत्वा० पक्षे अण्। तनुत्वे "तानवं तनुता गात्रे दौर्बल्यभ्रमणादिजम्" उज्ज्वलमणिः "अङ्गानामतितानवं कचमिदं कस्मात्र कस्मात् कृतः" अमरः।

**तानव्य** पुंस्त्री तनोरपत्यं गर्गा० यञ्। तनोरपत्ये स्त्रियां लोहि० फक्त्वात् ङीप्। तानव्यायनी।

**तानूनप्त्र** न० तानूनप्त्रा देवताऽस्य अण्। तनूनप्तृदेवताके पृषदाज्ये "तानूनप्त्रं मेदसाभि कांसे चमसे वा" मानवश्रौ०। "तानूनप्त्रमेतत्" काल्या० श्रौ० ८।१।२४। "एतदाज्यं तानूनप्त्रसंज्ञं भवति" कर्कः। "तदेतत्तानूनप्त्रं निदानेन" शत० ब्रा० ३।४।२।८ "तानूनप्त्रा च प्रजापतिः वायुर्वै" तानूनप्त्रशब्दे दृश्यम्। [त्रिका०।

**तानूर** पु० तन–वा० ऊरच्। पयसां स्रोतोभेदे आवर्त्ते

**तान्त** त्रि० तम–क्त। १म्लाने २क्लान्ते च। शब्दार्थकल्प०। "स्रस्तुलतान्तलतान्तमलोकयत्" "रतिरभसविलासाभ्यास-तान्तं न यावत्" माघः। "अलसतान्ततारकेण" दशकुमा०।

**तान्तव** न० तन्तोर्विकारः अञ्। वस्त्रे "मणिसङ्खप्रवालानां लोहानां तान्तवस्य च" "सर्वन्तु तान्तवं रक्तं शाणक्षौमाविकानि च" मनुः।

**तान्तव्य** पुंस्त्री तन्तोः सन्तानस्यापत्यं गर्गा० यञ्। तन्तोरपत्ये स्त्रियां लोहिता० फक्त्वात् ङीप्। तान्तव्यायनी।

**तान्तुवायि** पुंस्त्री तन्तुवायस्यापत्यं "उदीचामिञ्" पा० ञ्। तन्तुवायस्यापत्ये। "अन्यमते सेनान्तलक्षणकारिभ्यः" पा० एव। तान्तवाथ्य तदर्थे।

**तान्त्रिक** त्रि० तन्त्रं सिद्धान्तं वेत्ति शास्त्रमधीते वा उक्था० ठक्। १ज्ञातसिद्धान्ते २शास्त्राभिज्ञे च "एवं प्रयत्नवैशिष्ट्यं तान्त्रिकैः परिकीर्त्तितम्" भाग० तन्त्रे विहितः ठक्। ३तन्त्रविहिते त्रि० स्त्रियां ङीप् "वैदिकी तान्त्रिकी सन्ध्या यथानुक्रमयोगतः" तन्त्रम्। इदमर्थे ठञ्। ४शास्त्रसम्बन्धिनि च। "अथातो धर्म्मं व्याख्यास्यामः श्रुतिप्रमाणको धर्म्मः श्रुतिश्च द्विविधा वैदिकी तान्त्रिकी च" हारीतः।

**तान्दुर** न०तन्दुरेण पाकयन्त्रभेदेन निर्वृत्तम् अण्। तन्दुर-पक्के मांसभेदे तत्पाकविधिः शब्दार्थचि० घृतपाके यथा "अङ्गारपूर्णगर्त्ते यदलग्नमवलम्बितम्। संस्कृतं विधिवत् मांसं पक्वं तान्दुरमुच्यते" सुश्रुतात् तान्दुरम्तु। "पचेद्गर्त्तेऽन्तरीक्षस्थं लम्बि सम्भारसम्भृतम्। चतुर्दिङ्मण्डलाकारं पार्श्वप्रज्वलितानले। विपक्वं सुरभि स्वादु तान्दूरमिति कीर्त्तितम्। अन्यच्च। "कोष्ठिकायां सुसम्भारमलग्नमवलम्बितम्। मांसं विधाय वाह्याग्नि-ज्वालया स्वेदितम् वरम्। तान्दुरं रुचिदं बल्यं स्वदु पथ्यतमं स्मृतम्। सद्योद्धृतं नवं स्थूलमन्यथा दोष-कारणमिति"।

**तान्व** पु० तन्वाः प्राणाधिष्ठितत्वात् प्राणवत्त्वा अयम् "प्राणिरजतादिभ्योऽञ्"पा० अञ् संज्ञापूर्वकविधेरनित्य-त्वात् वेदे न गुणः। तनूजे त्रिका०। "न जामये तान्वा-रिक्थम्" ऋ० १।३१।२। तनुनामकस्य ऋषेरपत्यम् प्राणित्वात् अञ् पूर्ववद्गुणाभावः। २ऋषिभेदे। "सद्यो वि-दिद तान्वः" ऋ० १०।६४।५। तान्वो नामर्षिः" भा०। तनु दशापवित्रवस्त्रम् तस्येदम् अण् पूर्ववद्गुणाभावः। ३दशापवित्रवस्त्रसम्बन्धिनि "अरुषस्तान्वा" ऋ० ९।१४।४। "तान्वा तान्वानि छान्दस आच्" भा०। स्वार्थे अण्। ४दशापवित्रवस्त्रे च। "स्तभ्नाति रिप्र विरप्श तान्वा" ऋ०९।७८। "तान्वा स्वकीयेन वस्त्रेण" भा० पूर्ववत् तृतीयास्थाने आच्।

**ताप** पु० तप–घञ्। क्लेशजनके उष्णादिस्पर्शजन्ये १सन्तापे २कष्टे च मेदि०। "निदाघकालोल्बणतापयेव" कुमा०। "करम्भवालुकातापान् कुम्भीपाकांश्च दारुणान्" मनुः।

**तापक** त्रि०तापयति तापि–ण्वुल्। १तापकारके २ज्वरे पु० शब्दर०। ३रजोगुणे च तथा सत्त्वं तापकं रजः सां० शास्त्रे प्रसिद्धम्। "सत्त्वं तथा बुद्धिभावेन दृष्टं भावावे वा राजसास्तापकास्ते। तथा भेदप्राहिणी तामसी या वृत्तिस्तस्यां तथ रजुश्च व्याप्तेति" सर्वद०।

**तापत्य** पुंस्त्री तपत्याः सूर्य्यकन्यायाः अपत्यम् क्षत्रियत्वात्

ष्य । कौरवे तपत्यपत्ये तपतीशब्दे दृश्यम् । तपत्या उपाख्यानं ष्यञ् । २तपत्युपाख्याने न० । तापत्यमथ वाशिष्ठमौर्वं चाख्यानमुत्तमम्" भा० आ० १अ० । तदाख्यानं च भा०आ० चैत्ररथपर्वणि १७२ अध्याये दृश्यम् ।

तापत्रय न० द्वत० । आध्यात्मिकाधिदैविकाधिभौतिकरूपे दुःखत्रये । "आध्यात्मिकादि मैत्रेय ! ज्ञात्वा तापत्रयं बुधः । उत्पन्नज्ञानवैराग्यः प्राप्नोत्यात्यन्तिकं फलम्" विष्णुपु० ।

तापदुःख न० तापरूपं दुःखम् । "पातञ्जलोक्ते दुःखभेदे "परिणामतापसंस्कारदुःखैर्गुणवृत्तिविरोधाच्च दुःखमेव सर्वं विवेकिनः" स्मृ० । "ते जन्मायुर्भोगाः पुण्यहेतुकाः सुखफलाः, अपुण्यहेतुकाः दुःखफला इति । यद्यपि चेदं दुःखं प्रतिकूलात्मकं एवं विषय सुखकालेऽपि दुःखमस्त्येव प्रतिकूलात्मकं योगिनः । कथं तदुपपद्यते" । "अथ का तापदुःखता सर्वस्य द्वेषानुविद्धचेतनाचेतनसाधनाधीनस्वापानुभव इति । तत्रास्ति द्वेषजः कर्माशयः सुखसाधनानि च प्रार्थयानः कायेन वाचा मनसा च परिस्पन्दते ततः परमनुग्रहात्मुपचिनोति वेति परानुपरुपीड़ाम्यां धर्माधर्मावुपचिनोति स कर्माशयो लोभात्मोहाच्च भवतीत्येषा तापदुःखतोच्यते" भा० । "ते जन्मायुर्भोगा इति यद्यपि जन्मायुषोरेव ह्लादपरितापपूर्वभावितया तत्फलत्वं न तु भोगस्य ह्लादपरितापोदयानन्तरभाविनस्तदनुभवात्मनस्तथाप्यनुभाव्यतया भोग्यतया भोगकर्मतामात्रेण भोगफलत्वमिति मन्तव्यं नन्वपुण्यहेतुका जात्यायुर्भोगाः परितापफला भवन्तु हेयाः प्रतिकूलवेदनीयत्वात् । कस्मात् ? पुनः पुण्यहेतवश्चाज्ञते सुखफलाः अनुकूलवेदनीयत्वात्, न चैवं प्रत्यात्मवेदनीयानुकूलता शक्या सहस्रेणाप्यनुमानागमैरपाकर्तुं, न च ह्लादपरितापौ परस्परविनाभूतौ यतो ह्लाद उपादीयमानेनैव परितापोऽप्यवर्जनीयतयापतेत् तयोर्भिन्नहेतुकत्वाद्भिन्नरूपत्वात् चेत्यत आह यद्यपेदमिति" विवरणम् ।

तापन न० तप-णिच्-भावे ल्युट् । (तापान) १तापकरणे हेमच० । तापि-कर्त्तरि ल्यु । २सूर्ये ३कामबाणभेदे पु० जटाध० । ४सूर्यकान्तमणौ राजनि० । ५सूर्यकान्तमणिजे अर्कवृक्षे च । ६तापके त्रि० । "ततोऽम्बराद्विलितभास्वदागतं महाप्रभं चक्रमभिततापनम्" भा० आ० १६अ० । "ततस्तु राजानमभिततापनं समीक्षते तस्य रूपस्य मन्त्रिणः" ४४ अ० ।

तापनीय न० उपनिषद्भेदे । उपनिषच्छब्दे १२२२पृ० दृश्यम् । गोपालतापनीयः ऋसिंहतापनीयः । तपनीयस्य सुवर्णस्य विकारः अण् । २सुवर्णमये त्रि० "तापनीये तथा घण्टे कक्षोपरिविलम्बिते" हरिवं० ८७ अ० । जातरूपेभ्यः परिमाणे अण् । ३सुवर्णनिष्कपरिमाणे सुवर्णे न० ।

तापयित न० तपसि चीयते चि-क्त स्वार्थे अण् । सत्रभेदे तद्विधानादि कात्या० श्रौ० २४।५।१ । यथा "तापयितम् दीक्षाः संवत्सरमुपसदश्च तथा सुत्याः" सू० "तापयितमिति सत्रनाम तत्र दीक्षाः संवत्सरं भवन्ति उपसदः सुत्याश्च" इदानीमङ्गान्याह अत्र सुत्या आह "कर्कः" 'गवामयनेनेयुः" २सू० । गवामयनमेव कर्त्तव्यमित्यर्थः । "अग्निष्टोमेन वा" ३सू० "ईयुः अपूर्वावयवमग्निष्टोमः नैकाहिको न द्वादशाहिकः संख्यामात्रोपदेशात् । अग्निष्टोमसंस्थेन ज्योतिष्टोमेन पूरणं कर्त्तव्यम्" कर्कः । शत०ब्रा०१०।२।५।२ तच्चिरुच्छिर्दर्शिता यथा "एतदुह यत्र तपः । यदुपसदस्तपो वा उपसदस्तद्यत्तपसि चीयते तस्मात् तापयितस्तद्वै यावदेवोपसद्भिरन्ति तावत् प्रवर्ग्यैश्च संवत्सरमेवोपसद्भिरन्ति संवत्सरमवर्ग्यैश्च" "यावतीरुपसदः कुर्यात्तावद्भिः प्रवर्ग्यैश्चरितव्यम् उपसदः तापयिते चयने संवत्सरसंमिताः" भा० ।

तापस त्रि० तपसश्चरणं शीलमस्य अण्० । १तपश्चरणशीले स्त्रियां टाप् । तपोऽस्यास्य "अण् च" पा० अण् । तपो विशिष्टे त्रि० । "तापसेष्वेव विप्रेषु यास्तिकं भैक्षमाचरेत्" मनुः । "खीदन्ति तापसकुलानि मृगोकुलानि" ह० स० १६ अ० । स्त्रियां ङीप् "अब्रवीच्च स्वरामीति कस्य त्वं दुष्टतापसि" भा० आ० ७३ अ० ।

तापसतरु पु० तापसस्थितस्तरुः श० त० । इङ्गुदीवृक्षे अमरः । तापसद्रुमादयोऽप्यत्र ।

तापसद्रुमसन्निभा स्त्री तापसद्रुमेण तुल्या निभा० नि० ब० । गर्भदात्रीक्षुपभेदे राजनि० ।

तापसपत्नी स्त्री तापसप्रियं पत्यमस्याः जातित्वात् ङीष् । दमनकवृक्षे राजनि० ।

तापसप्रिय पु० तापसानां प्रियः छायाप्रदत्वात् । १पियालवृक्षे राजनि० । २तापसप्रियमात्रे त्रि० ।

तापसेष्टा स्त्री तापसेन इष्टा । १छायायां राजनि० २तापसाभिलषिते त्रि० ।

तापस्य न० तापसस्य धर्मः ष्यञ् । तापसधर्मे "क्षीधर्मयोगं तापस्यं मोक्षं संन्यासमेव च । राज्ञश्च धर्मसहितं

कार्य्याणां च विनिर्णयः" मनुः। "पुरा रामभयादेव तापसं वसुपाश्रितः" भा० व० २७६ अ०।

**तापहर** त्रि० तापं हरति हृ-ट। तापनाशके। स्त्रियां ङीप् ङीषन्तः। २व्यञ्जनभेदे (ताहरी) भाव० प्र०

"हते हरिद्रासंयुक्ता मांसानां भर्जवेद्घटीः। तण्डुलांश्चापि निर्वीतान् सर्पिषैव परिभर्जयेत्। सिद्धियोग्यं जलं तत्र प्रक्षिप्य कुशलः पचेत्। लवणार्द्रकहिङ्गूनि मात्रया तत्र निःक्षिपेत्। यथा सिद्धिं समायाता प्रोक्ता तापहरी बुधैः"। अस्या गुणाः। "भवेत् तापहरी बल्या हृद्या स्नेह्याग्निमाहरेत्। हृत्कण्ठी तर्पणी रुच्या गुर्वी तत्र गुणाः स्मृताः"

**तापिक** त्रि० तापे तापकाले भवं ठञ्। ग्रीष्मभवे जलादौ न०।

**तापिच्छ(च्छ)** पु० तापिनं छादयति जयति वा छद्+जिवा ड पृषो०। १तमालवृक्षे अमरः। "अच्छोर्निचिपदङ्गनं अवणयोस्तापिच्छगुच्छावलीम्" गो०गो० "प्रफुल्लतापिच्छनिभैरभीषुभिः" माघः। २धातुमाक्षिके राजनि०

**तापिन्** त्रि० तापयति तापि-णिनि। १तापके तप-णिनि। २तापयुक्ते त्रि० स्त्रियां वा ङीप्। ३वृक्षदेवे पु० स्त्रिका०

**तापी** स्त्री तापयति रुच् गौरा० ङीष्। विन्ध्याचलस्थे पश्चिमवाहिनदीभेदे राजनि०। सा च माक्षिकधातुद्रवस्रविसन्निभा। २यवनायां स्त्रिका०।

**तापीज** पु० तापा नद्याः समीपे व्याकरभेदे जायते जन-ड। माक्षिकधातौ "एवञ्च माक्षिकं धातुं तापीजमस्तोपमम्। मधुरं क्षौद्रनाभासमस्रं वा रजतप्रभम्। पिबन् हन्ति जराकुष्ठमेहानाहामयक्षयान्" सुश्रुतः तापीसम्भवताप्यद्रवादयोऽप्यत्र।

**तापेश्वर** पु० तीर्थभेदे हेम० शि० पु०।

**ताम** पु० ताम्यत्यनेन तम-करणे घञ्। १भीषणे २दोषे च अजयपालः। ३ग्लानिकारणे त्रि०भावे घञ्। ४ग्लानौ पु०

**तामर** न० तामं ग्लानिं रवते क्विनक्षि रुङ्-वधे वा० ड १जले २वृते च भरतधृतरुद्रः।

**तामरस** न० तामरे जले सक्ति सस-ड। १पद्मे, ताम्यतेऽनेन रक्षते इति रसम् कर्म०। २स्वर्णे ३ताम्रे च मेदि०। ४धुस्तूरे, अमरः "इड वद तामरसं नजजायः" छ० र० उक्ते ५वृत्तादशाक्षरपादके छन्दोभेदे च। "तामयतस्तामरसान्तराभाम्" "खनवता नवतामरसाननः" "विकचतामरसा स्टहदीक्षिताः" रघुः। "नवरतममन्दरागतामरसदृशः" माघः। ५पद्मिन्यां स्त्री ङीप्। "यथा गजस्तामरसीं मदोत्कटः" भारते विराटपर्वणि ७ अ०।

**तामलकी** स्त्री तम णिच्-क्विप् तानू कर्म०। भूम्यामलक्याम्। अमरः। "कटुकेन्द्रयवोशीरसिंहीतामलकीवनैः" सुश्रुतः

**तामलिप्त** पु० (तमलुक्) देशभेदे त्रिका०। स्वार्थे क। तत्रार्थे। स च देशः ह०स० १४ अ० कूर्मविभागे प्राच्यासत्तः "अथ पूर्वेषाम्" इत्युपक्रमे "एकपादतामलिप्तकलोमलकावर्द्धमानश्च"। गौरा० ङीष् तत्रार्थे स्त्री।

**तामस** त्रि० तमोऽस्यास्य तमः, प्रधानत्वेनास्यास्य वा अण्। १तमोगुणयुक्ते २तमःप्रधानगुणके स्त्रियां ङीप्। ३सर्पे पुंस्त्रो० जातित्वात् ङीष्। ४खले त्रि० मेदि० ५उलूके पुंस्त्री राजनि० स्त्रियां ङीप्। ६चतुर्थे मनौ पु० "सप्ता देवगणाश्चैव तामसस्यान्तरे मनोः। पुत्रांश्चैव प्रवक्ष्यामि तामसस्य मनोर्नृप!। द्युतिमन्तः सुतपास्तपोमूलस्तपोधनः। तपोरतिरकल्माषस्तन्वी धन्वी परन्तपः। तामसस्य मनोरेते दश पुत्रा महाबलाः" हरिवं० ७अ०। "चतुर्थे तूत्तमभ्राता मनुर्नाम्ना च तामसः। पृथुः ख्यातिर्नरः केतुरित्याद्या दश तत्सुताः। सप्तका हरयो धीरा देवास्त्रिशिखरेश्वरः। ज्योतिर्धामादयः सप्त तस्यवंशामसेऽन्तरे। देवा वैधृतयो नाम विधृतेस्तनया नृप!। नष्टाः कालेन यैर्वेदा विधृताः स्वेन तेजसा। भाग० ८।१।२४। भागवते अन्यथोक्तं कल्पभेदादविरुद्धम्। तमोऽधिकत्व प्रकृतम् अण् तमसा कृता वा अण्। ७तमोगुणाधिकारेण प्रवृत्ते शास्त्रे ८तमसाकृते च स्त्रियां ङीप्। तामसशास्त्राणि च पद्मपुराणे पार्वतीं प्रतीश्वरवाक्येनोक्तानि यथा

"शृणु देवि! प्रवक्ष्यामि तामसानि यथाक्रमम्। येषां श्रवणमात्रेण पातित्यं ज्ञानिनामपि। प्रथमं हि मयैवोक्तं शैवं पाशुपताभिधम्। मच्छक्त्यावेशितैर्विप्रैः संमोहायानि ततःपरम्। कणादेन तु सम्मोहं शास्त्रं वैशेषिकं महत्। गौतमेन तथा न्यायं साङ्गप्रस्तु कपिलेन वै। द्विजन्मना जैमिनिना पूर्वं वेदमपार्थतः। निरीश्वरेण वादेन कृतं शास्त्रं महत्तरम्। धिषणेन च संमोहं चार्वाकमतिगर्हितम्। दैत्यानां नाशनार्थाय विष्णुना बुद्धरूपिणा। बौद्धशास्त्रमसत् प्रोक्तं नग्ननीलपटादिकम्। मायावादमसच्छास्त्रं प्रच्छन्नं बौद्धमेव च। मयैव कथितं देवि! कलौ ब्राह्मणरूपिणा। अपार्थं श्रुतिवाक्यानां दर्शयञ्लोकगर्हितम्। कर्मस्वरूपत्याज्यत्वमत्र च प्रतिपाद्यते। सर्वकर्मपरिभ्रंशान्नैष्कर्म्यं तत्र

चोच्यते । परात्मजीवयोरैक्यं मयात्र प्रतिपाद्यते । ब्रह्मणोऽस्य परं रूपं निर्गुणं दर्शितं मया । सर्वस्य जगतोऽप्यस्य नाशनार्थं कलौ युगे । वेदार्थवन्महाशास्त्रं मायावादमवैदिकम् । मयैव कथितं देवि ! जगतां नाशकारणात्"

कूर्मपुराणे केषाञ्चित्तन्त्राणां तामसत्वमुक्तं यथा "यानि शास्त्राणि दृश्यन्ते लोकेऽस्मिन् विविधानि च । श्रुतिस्मृतिविरुद्धानि निशा तेषां तु तामसी । करालभैरवञ्चापि यामलं वाममाश्रितम् । एवंविधानि चान्यानि मोहनार्थानि तानि तु । मया सृष्टानि चान्यानि मोहायैषां भवार्णवे" । तामस पुराणानि यथा । "मात्स्यं कौर्मं तथा लैङ्गं शैवं स्कान्दं तथैव च । आग्नेयञ्च षडेतानि तामसानि निबोधत" । सात्त्विक पुराणानि यथा । "वैष्णवं नारदीयञ्च तथा भागवतं शुभम् । गारुडञ्च तथा पाद्मं वाराहं शुभदर्शने ! । सात्त्विकानि पुराणानि विज्ञेयानि शुभानि वै" । राजस पुराणानि यथा "ब्राह्माण्डं ब्रह्मवैवर्तं मार्कण्डेयं तथैव च । भविष्यं वामनं ब्राह्मं राजसानि शुभानने !" पद्म० उ० ख० ४२ अ० । "सङ्कीर्णेषु सरस्वत्याः पितृणां व्यष्टिरुच्यते । अग्नेः शिवस्य माहात्म्यं तामसेषु दिवाकरे । राजसेषु च माहात्म्यमधिकं ब्रह्मणः स्मृतम् । यस्मिन् कल्पे तु यत् प्रोक्तं पुराणं ब्रह्मणा पुरा । तस्य तस्य तु माहात्म्यं तत्स्वरूपेण वर्ण्यते । सात्त्विकेष्वधिकं तद्वद्विष्णोर्माहात्म्यमुत्तमम् । तथैव योगसंसिद्धा गमिष्यन्ति परां गतिम्" मत्स्य पु० ।

तामसस्मृतयः पद्मपु० उ० उक्ता यथा । "कणादो गौतमः शक्तिरुपमन्युश्च जैमिनिः । दुर्वासाश्च सुकर्मा च भार्गवश्च हरिस्मृतिः । जमदग्निश्च दक्षेते स्मृतयस्तामसाः स्मृताः" । तामसश्राद्धतत्फलमुक्तं यथा "वार्हस्पत्या गौतमी च सांवर्ती यमनिर्मिता । शाङ्खी चौशनसी चैव तामसाः स्मृतयः स्मृताः" । तामसश्राद्धादिकं गीतायां १७ अ० उक्तं यथा ।

त्रिविधा भवति श्रद्धा देहिनां सा स्वभावजा । सात्त्विकी राजसी चैव तामसी चेति तां शृणु । यजन्ते सात्त्विका देवान् यक्षरक्षांसि राजसाः । प्रेतान् भूतगणांश्चान्ये यजन्ते तामसा जनाः" । तामसाहारादिकमपि भा० १७ अ० उक्तं यथा "यातयामं गतरसं पूति पर्युषितञ्च यत् । उच्छिष्टमपि चामेध्यं भोजनं तामसप्रियम्" । "विधिहीनमसृष्टान्नं मन्त्रहीनमदक्षिणम् । श्रद्धाविरहितं यज्ञं तामसं परिचक्षते" । "मूढग्राहेणात्मनो यत् पीड़या क्रियते तपः । परस्योत्सादनार्थं वा तत्तामसमुदाहृतम्" । "अदेशकाले यद्दानमपात्रेभ्यश्च दीयते । असत्कृतमवज्ञानं तत्तामसमुदाहृतम्" । किञ्च "नियतस्य तु संन्यासः कर्मणो नोपपद्यते । मोहात्तस्य परित्यागस्तामसः परिकीर्त्तितः" । "यत्तु कृत्स्नवदेकस्मिन् कार्ये सक्तमहैतुकम् । अतत्त्वार्थवदल्पञ्च तत्तामसमुदाहृतम् । अनुबन्धं क्षयं हिंसा मनपेक्ष्य च पौरुषम् । मोहादारभ्यते कर्म यत्तत्तामसमुच्यते" । "अयुक्तः प्राकृतस्तब्धः शठो नैष्कृतिकोऽलसः । विषादी दीर्घसूत्री च कर्त्ता तामस उच्यते । अधर्मं धर्ममिति या मन्यते तमसावृता । सर्वार्थान् विपरीतांश्च बुद्धिः सा पार्थ ! तामसी" । "यया स्वप्नं भयं शोकं विषादं मदमेव च । न विमुञ्चति दुर्मेधा धृतिः सा तामसी मता" । "यदग्रे चानुबन्धे च सुखं मोहनमात्मनः । निद्रालस्यप्रमादोत्थं तत्तामसमुदाहृतम्" इत्यादि० । राजसतामसकर्माणि यथा "यत् शैवं दैवतं पैत्र्यं वैष्णवेयं तथाध्वरम् । याक्षं शैवं गाणपत्यं यागहोमादिकं तथा । पौरुहूतं याजनञ्च दैवत्यं श्यामयाजनम् । विष्णुसेवापराधश्च तथा नामापराधकः । असत्प्रतिग्रहो देवि ! सङ्कल्प आभिचारिकः । पशुजीवादिहननं पातकञ्चोपपातकम् । अतिपापं महापापमनुपातकमेव च । लोभो मोहो ह्यहङ्कारः कामः क्रोधः मदस्तथा । एतद् यदपरं कर्म गर्हितञ्च वरानने ! । राजसं तामसं प्रोक्तं मया च मुनिभिः सदा" पद्म० उ० ख० ।

हारीतः "तामसेन तु द्रव्येण ऋत्विग्भिस्तामसैस्तथा । तामसं भावमास्थाय तामसो यज्ञ उच्यते । तामसेन तु यज्ञेन दानेन तपसा तथा । निरये जन्म वेदाङ्गविद्विद्यात्च तामसीम्" । "तामसी दक्षिणेच्छाधिपत्य रूपा" इति रत्नाकरः । तमसो राक्षोरपत्यम् अण् । ६राक्षसे तामसकौलः ।

**तामसकौल** पु०तामसः राक्षसतः कौल इव । ह०स०१अ०उक्ते राक्षसे केतुभेदे । तच्चिह्नोत्पातभेदस्तत्रोक्तो यथा "तामसकौलसङ्ज्ञका राक्षसताः केतवस्तयश्चिह्नं यत् । वर्णस्थानाकारैस्तान्दृष्ट्वाकें फलं ब्रूयात् । ते चार्कमण्डलगताः पापफलाश्चन्द्रमण्डले सौम्याः । ध्वाङ्क्षकबन्धप्रहरणरूपाः पापाः प्रशस्ताऽपि । तेषामुदये रूपाण्यस्मः कलुषं रजोवृतं व्योम । जगतश्चित्त-

रविमर्दी सशर्करो मारुतखण्डः। ऋतुविपरीतास्त-रवो दीप्ता खगपक्षिणो दिशां दाहः। निर्घातम-ङ्गीकम्पादयो भवन्यत्र चोत्पाताः। न पृथक् फलानि तेषां शिखिकोलकराङ्कदर्शनानि यदि। तद्दुष्कार-णमेषां कैलादीनां फलं ब्रूयात्"। "यस्मिन् यस्मिन् देशे दर्शनमायान्ति सूर्यबिम्बस्याः। तस्मिंस्तस्मिन् व्यसनं महीपतीनां परित्वेयम्। क्षुत्प्रस्थानशरीरा सुनयोऽप्युत्कृष्टधर्मसञ्चरिताः। निर्मांसबालवृद्धाः कृच्छ्रेणायान्ति परदेशम्। तस्करविलुप्तवित्ताः प्रदी-र्घनिःश्वासाकुलिताक्षिपुटाः। सलः सन्नशरीराः शोको-ड्डयवाष्पस्खलदृशः। क्षामा जुगुप्समानाः स्वपतिपर-चक्रपीडिता मनुजाः। स्वपतिचरितं कर्म च परावृतं प्रत्युपन्यन्ते। गर्भेऽपि निष्प्रजा वारि-सुचो न प्रभूतवारिसुचः। सरितो यान्ति तनुत्वं क्वचित् क्वचिल्लायते सस्यम्। दण्डे नरेन्द्रसम्भूर्व्या-धिभयं स्यात् कबन्धसंस्थाने। ध्वाङ्क्षे च तस्करभयं दुर्भिक्षं कीलकेऽर्कस्य। राजोपकरणरूपैस्त्रस्यध्वजचा-मरादिभिर्विद्धः। राज्ञाश्वत्थदर्कः स्फुलिङ्गधूमादि-भिर्जनक्षा। एते दुर्भिक्षकरा ह्युत्पाताः सूर्यरपते-र्विनाशाय। सितरक्तपीतकृष्णैर्विद्रोऽर्कोऽहवर्णभृः। दग्धान्ते च यतस्ते रविबिम्बोत्थिता महोत्पाताः। आगच्छति लोकानां तेनैव भयं प्रदेशेन"।

स्वार्थे क तत्रार्थे। लिंगमत्राधिकारात्तोक्तं तामस-कीलका इति ख्याताः ह० सं० ११ अ०।

**तामसध्यान** न० षट्कर्मैरवस्य ध्येयरूपभेदे। "तस्य ध्यानं त्रिधा प्रोक्तं सात्त्विकादिप्रभेदतः" इत्युपक्रमे सात्त्विक-राजसे उक्त्वा तामसध्यानमुक्तं तन्त्रसारे यथा

"ध्यायेन्नीलाद्रिकान्तं शशिशकलधरं सुखभासं महेशं दिग्वस्त्रं पिङ्गलाभं डमरुमथ सृणिं शक्तिमुल्का-भयानि। नागं घण्टां कपालं करसिरुहकैर्बिभ्रतं भीम-दंष्ट्रं सर्पाकल्पं त्रिनेत्रं मणिमयविलसत्किङ्किणीनूपरा-ढ्यम्" "तामसं शत्रुशमनं कृत्याभूतग्रहापहम्" तन्त्रसा०।

**तामसिक** त्रि० तमसा निर्वृत्तं ठञ्। तमोगुणकार्य्ये त्रि०

**तामसी** स्त्री तमांसि मूला सन्त्यस्यां प्रज्ञा० अण् ङीप्। अन्धकारवल्लतायां रात्रौ २महाकाल्यां भेदि०। ३जटा-मांस्यां राजनि०। ४तमोगुणवत्यां स्त्रियाञ्च।

**तामालेय** त्रि० तामालवृक्षस्यादूरदेशादि सप्ता० ढञ्। तमालवृक्षस्या-दूरदेशादौ।

**तामिस्र** पु० तमिस्रा तमस्ततिरस्यत्र अण्। नरकभेदे। "तामिस्रो ह्यन्धतामिस्र इत्युपक्रमे। तच्चिदानरूपादि भाग० ५।२६ उक्तं यथा "वस्तु परिवित्तापत्यकल-त्राण्यपहरति स हि कालपाशबद्धो यमपुरुषैरतिभयान कैस्तामिस्रे नरके बलाच्चिपात्यते" "स पर्य्यावेष यातो-मात् नरकानेकविंशतिम्। तामिस्रमन्धतामिस्रं महा-रौरवरौरवौ। नरकं कालसूत्रञ्च महानरकमेव च। सञ्जीवनं महावीचिं तपनं सम्प्रतापनम्। संघातञ्च सकाकोलं कुड्मलं प्रतिसूचिकम्। लोहशङ्कुञ्जलीयञ्च पन्थानं शाल्मलीं नदीम्। असिपत्रवनञ्चैव लोहदा-रकमेव च" मनुः अत्रोपक्रमे यातोति क्रियासम्बन्धा-पेक्षतया पन्थानं शाल्मलीं नदीमित्युत्तरत्र सप्त द्वितीया-श्रवणाच्च तामिस्रादिशब्दानां द्वितीयान्तानेव नरकविशे-षणत्वात्तस्य पुंस्त्वात्। यच्चकल्पद्रुमे क्लीवतोक्तिः मनु वचने द्वितीयान्ततामिस्रशब्दे प्रथमान्तत्वभ्रान्त्यैवेति बोध्यम्। तमिस्रया साध्यमण्। २ द्वेषे। "भेदस्तमसो-ऽष्टविधो मोहस्य च दशविधो महामोहः। "तामिस्रो-ऽष्टदशधा" सा० का०। "तामिस्रो द्वेषोऽष्टादशधा शब्दादयो दशविषया रञ्जनीयाः स्वरूपतः, ऐश्वर्य्य स्वयिमादिकं न स्वरूपतो रञ्जनं किन्तु रञ्जनीयशब्दा-द्युपायाः। ते च शब्दादय उपस्थिताः परस्परेणोपरु-ध्यमानास्तदुपायावाप्तिमादयः स्वरूपेणैव द्वेषनीया भवन्तीति। शब्दादिभिर्दशभिः सहाणिमाद्यष्टादशधेति तद्विषयो द्वेषस्तामिस्रोऽष्टादशविधस्तादृशधेति" तत्त्वकौ० द्वेषमूलत्वात् भोगेच्छाप्रतिघातरूपे क्रोधे भाग० टी० श्रीधरः।

**तामु** त्रि० तम-उण्। स्तोतरि निघण्टुः।

**ताम्बली** स्त्री ताम्बूली+पृषो०। (पान) ताम्बूल्यां "सङ्काश्चताम्बल्यारसानाः" गोप० ब्रा० २।१०।७।

**ताम्बूल** न०तम-अलच् बुगागमः दीर्घश्च गौ० ङीप् तस्याः पत्रमण्।(पान) ख्याते १नागवल्लीदले। २कर्पूरे च मेदि०। "ताम्बूलं कटुतिक्तरुक्षमधुरं क्षारं कषायान्वितं वातघ्नं कफनाशनं कफकरं दुर्गन्धनिर्नाशनम्। वक्त्रस्याभरणं विशुद्धिकरणं कामाग्निसन्दीपनं ताम्बूलस्य सखे! नवो-दश गुणाः स्वर्गेऽपि ते दुर्लभाः" क्वपि चाह्नः "ताम्बूलं विशदं रुच्यं तीक्ष्णोष्णं लघु सरम्। रक्तं तिक्तं कटु क्षारं रक्तपित्तकरं लघु। वक्त्रं च द्राक्षदौर्गन्ध्यमल-वातघ्नमापहम्" भाव० प्र०। "अनिधाय सखे पर्णं पूगं

स्वादयते नरः। अतिभंगो दरिद्रः स्यादन्ते न स्मरते हरिम्" राजनि०। भावप्र० दिनचर्य्यायामुक्तं यथा "धूमेनापोह्य कृच्छ्रेण कषायकटुतिक्तकैः। पूगकर्पूर कस्तूरीलवङ्गसुमनःफलैः। फलैः कटुकषायैर्वा सुखैश्चैवोपकारिभिः। ताम्बूलपत्रसहितैः सुगन्धैर्वा विचक्षणः। धूमेन अगुर्वादिधूमेन। अपोह्य कफं दूरीकृत्य कषायकटुतिक्तकैः फलैः कर्पूरकस्तूरीलवङ्गादिभिः पूगैः क्रमुकैः सुमनःफलैः जातीफलैः एलाहरीतक्यादिफलैः। रात्रौ सुप्रोक्षिते स्नाते भुक्ते वान्ते च सङ्करे। सभायां विदुषां रात्रौ कुर्य्यात्ताम्बूल चर्वणम्। ताम्बूलयुक्तं तीक्ष्णोष्णं रोचनन्तु परं स्मरम्। तिक्तं चारोष्णं कामरक्तपित्तकरं लघु। वक्त्रं शोभास्यदौर्गन्ध्यमलवातश्रमापहम्। मुख वैशद्यसौगन्ध्यकान्तिसौष्ठवकारकम्। कृमिदन्तमलश्वांसि जिह्वेन्द्रियविशोधनम्। मुखप्रसेकशमनं गलामयविनाशनम्। नवं तदेव मधुरं कषायानुरसं गुरु। बलासजननं प्रायः पक्वमाकगुणं स्मृतम्। वङ्गदेशोद्भवं पर्णं परं कटुरसं स्मरम्। पाचनं पित्तजनकगुणं कफहरं स्मृतम्। पर्णं पुराणमकटु खण्डकन्तु पाण्डुरम्। विशेषाद् गुणवद्देशमन्यद्दीनगुणं स्मृतम्। खदिरः कफपित्तघ्नचूर्णं वातबलासनुत्। संयोगत स्त्रिदोषघ्नं सौमनस्यं करोति च। मुखवैशद्यसौगन्ध्यकान्तिसौष्ठवकारकम्। प्रभाते पूगमधिकं मध्याह्ने खदिरं तथा। निशासु चूर्णमधिकं ताम्बूलं भक्षयेत् सदा। आयुरग्रे यशो मूले लक्ष्मीर्मध्ये व्यवस्थिता। तस्मादग्रं तथा मूलं मध्यं पर्णस्य वर्जयेत्। पर्णमूले भवेद्व्याधिः पर्णाग्रे पापसम्भवः। जीर्णं पर्णं हरत्यायुः सिरा बुद्धिविनाशिनी। आद्यं विषोपमं पीतं द्वितीयं भेदि दुर्जरम्। तृतीयादस्तु पातव्यं सुधातुल्यं रसायनम्। ताम्बूलं नातिसेवेत न विरिक्तो बुभुक्षितः। देहदृक्केशदन्ताग्निश्रोत्रवर्चबलक्षयः। शोषः पित्तानिलास्यं स्यादतिताम्बूलचर्वणात्। विषमूर्च्छामदार्त्तानां क्षयिणां रक्तपित्तिनाम्।

"विना पर्णं मुखे दत्त्वा शुष्काकं भक्षयेद्यदि। तावद्भवति चण्डालो यावद्गङ्गां न गच्छति" कर्मलोचनम्। "ताम्बूलं विधवास्त्रीणां यतीनां ब्रह्मचारिणाम्। तपस्विनाञ्च विप्रेन्द्र! गोमांससदृशं ध्रुवम्" इति ब्रह्मवै० ब्र० ख०। मार्कण्डेयः "भूयोऽभ्यासस्य कर्त्तव्यं ततस्ताम्बूलभक्षणम्" वशिष्ठः "सुपूगञ्च सुपर्णञ्च सचूर्णेन समन्वितम्। अदत्त्वा द्विजदेवेभ्यस्ताम्बूलं वर्जयेद्बुधः" "ताम्बूलद्वयमासनञ्च लभते यः कान्यकुब्जेश्वरात्" नैष० "ताम्बूलाक्तं दशनमसकृद्दर्शयन्नीह चेटो" सा० द०। २पर्णलते स्त्री गौरा० ङीष्। "ताम्बूलीनां दलैस्तत्र रचिताः पानभूमयः" रघुः। [हेमच०।

**ताम्बूलकरङ्क** पु० ६त०। (पानडिबा) ताम्बूलपात्रभेदे

**ताम्बूलद** त्रि० ताम्बूलं ददाति दा-क। १राज्ञां ताम्बूलदाने अधिकृते दासभेदे २विप्रादिभ्यो ताम्बूलदातरि च स्वुञ्। ताम्बूलदायकोऽप्युभयत्र "जलताम्बूलकुसुमगन्धमाल्यादिदायकाः" कामन्दकीये।

**ताम्बूलपत्र** पु० ताम्बूलमिव पत्रमस्य। पिण्डाखौ राजनि०। कर्म०। ताम्बूलीपत्रे न०।

**ताम्बूलपेटिका** स्त्री ६त०। ताम्बूलकरङ्के

**ताम्बूलराग** पु० ताम्बूलजन्ती रागः शाक० त०। (पानेर बोंच) १ताम्बूलजनिते रागे ताम्बूलस्य राग इव रागो रक्तता यस्य। २मस्तूरे हारा०।

**ताम्बूलवल्ली** स्त्री ताम्बूलाख्या वल्ली। (पान) नागवल्लीम् अमरः। स्वार्थे क अत्रैवार्थे।

**ताम्बूलिक** त्रि० ताम्बूलं तद्वचनं शिल्पमस्य। ताम्बूलरचनाधिकृते "आदिगण्डात् मालाकाररजकताम्बूलिकगान्धिकादयः" सा० द०।

**ताम्बूलिन्** त्रि० ताम्बूलं पण्यतयाऽस्यास्ति इनि। १ताम्बूलविक्रेतरि (तामुलि)ख्याते २जातिभेदे पुंस्त्री स्त्रियां ङीष्।

**ताम्र** न० तम-रक् दीर्घः। १धातुभेदे (ताँमा) अमरः २क्षुद्रभेदे कर्म्मविपाकः। ३रक्तवर्णे हेमच०। ४तद्वति त्रि०। धातुभेदस्योत्पत्तिकारणगुणादि भावप्र० उक्तं यथा "अथ ताम्रस्य उत्पत्तिर्नामलक्षणगुणाश्च। "शुक्रं यत् कार्त्तिकेयस्य पतितं धरणीतले। तत्ताम्रं समुत्पन्नमिदमाहुः पुराविदः। ताम्रमौदुम्बरं शुल्बमुदुम्बरमपि स्मृतम्। रविप्रियं रक्तपुष्पं सूर्य्यपर्य्यायनामकम्। जपाकुसुमसङ्काशं स्निग्धं गुरुघनत्वगम्। लोहनागोज्झितं ताम्रं मारणाय प्रशस्यते। लघ्वं रूक्षमतिस्वच्छं श्वेतञ्चापि घनासहम्। लोहनागयुतञ्चेति शुल्बं दुष्टं प्रकीर्त्तितम्। एको दोषो विधे ताम्रे त्वसम्यग्मारिते पुनः। दाहः स्वेदो रुचिर्मूर्च्छा क्लेदो रेको वमिर्भ्रमः" (रेकः विरेकः)तस्य मारणविधिस्तत्रोक्तो यथा

"सच्छाणि ताम्रपत्राणि कृत्वा संस्वेदयेद्बुधः। वास-रत्रयमस्लेन ततः खाते विनिःक्षिपेत्। पादांशं स्रुतकं दत्त्वा यामसस्लेन मर्दयेत्। तत उद्धृत्य पत्राणि लेपये-दृद्विगुणेन च। गन्धकेनाम्लवेटेन तस्य कुर्याच्च गोल-कम्। ततः पिष्ट्वा च मौनाक्षीं चाङ्गेरीं वा पुनर्न-वाम् (चाङ्गेरी चतुष्पत्राम्लालोनिकाभेदः।) तत्कल्केन वह्निगोलं लेपयेद्दृढ्राङ्गुलोन्नितम्। शुष्कं तद्गोलकं भाण्डे सरावेण च रोधयेत्। वालुकाभिः प्रपूर्याथ विभूति लवणाम्बुभिः। दत्त्वा भाण्डमुखे सद्यां ततश्चुल्यां विपा-चयेत्। क्रमदग्न्याग्निना सम्यग्यावद्यामचतुष्टयम्। स्वाङ्गशीतं समुद्धृत्य मर्दयेच्छुरणद्रवैः। यामैकं गोलकं तच्च निःक्षिपेच्छुरणोदरे। सदा लेपस्तु कर्त्तव्यः सर्वतोऽङ्गुलमात्रकः। पाच्यं गजपुटे क्षिप्तं स्रुतं भवति निश्चितम्। वमनं च विरेकं च भस्म श्वासमपारु-चिम्। विदाहं स्वेदसत्क्लेदं न करोति कदाचन। एवं मारितस्य ताम्रस्य गुणा ताम्रं कषायं मधुरं च तिक्तमम्लञ्च पाके कटु सारकञ्च। पित्तापहं श्लेष्महरञ्च शीतं तद्रोपणं रूक्षघु लेखनञ्च। पाण्डूदराशोंव्रण कुष्ठकासश्वासक्षयान् पीनसमम्लपित्तम्। शोथं कृमिं म्लेमपाकरोति प्राक्तुर्वा ह्येषमल्पमेतत्"।

"ताम्रमम्लेन शुद्ध्यति"मनुः। ताम्रपात्रशब्दे भोजननि-षेधः हतेतरोद्धृतसारगव्यभोजननिषेधश्च वक्ष्यते। रक्त-वर्णविशिष्टे "ताम्रौष्ठपर्य्यन्तरुचः क्षितस्य" "तप्तस्त्रिने ताम्ररुचा करेण"कुमा०"प्रचक्रमे पल्लवरागताम्रा"रघुः। ५ द्वीपभेदे पु०। स्वार्थे क। तत्रार्थे अमरः।

**ताम्रकर्ण** त्रि० ताम्रौ कर्णौ यस्य। १रक्तकर्णयुक्ते स्त्रियां ङीप्। ङीषन्तः २पक्षिभेदे स्त्री हलायुधः अमरः।

**ताम्रकार** पुंस्त्री० ताम्रं ताम्रपात्रादिकं करोति कृ-अण् उप० स०। ताम्रोपजीविनि सङ्कीर्णजातिभेदे। "आ-योगवेन विप्रायां जातास्ताम्रोपजीविनः" कंसकार-शब्दे दृश्यम्। स्त्रियां जातित्वात् ङीप्।

**ताम्रकुट** पुंस्त्री० ताम्रं कुट्टयति कुट्ट-अण् उप० स०। ताम्रकारे (काँसारि) संकीर्णजातिभेदे। ण्वुल्। ता-म्रकुट्टक तत्रार्थे अमरः।

**ताम्रकुण्ड** न० कुण्ड-ड किञ्च ताम्रमयं कुण्डम्। ताम्रमये देवजलाधारे पात्रभेदे "देवतान्यजलाधारः कुण्डं कुण्ड-सञ्ज्ञा स्मृताः" "शाश्वतः उपचारात् ताम्रकुण्डम्" उद्भ०

**ताम्रकूट** पुंन० ताम्रस्य कूटमिव। रक्तवर्णनिर्य्यासके (ता-माक) तुपभेदे "संविदा कालकूटं च ताम्रकूटं च धुस्तुरम्। अहिफेनं खर्जूरसस्नाड्विका तरिता तथा। इत्यष्टौ सिद्धिद्रव्याणि यथा स्युर्गुणकं तथा" कुला० त०।

**ताम्रकृमि** पु० कर्म्म०। इन्द्रगोपकीटे हारा०।

**ताम्रगर्भ** न० ताम्रं गर्भ इवोत्पत्तिस्थानमस्य। तुत्थे (तुंते) राजनि०। तस्य ताम्रोद्भवत्वं तुत्थशब्दे दृश्यम्।

**ताम्रचूड** पुंस्त्री० ताम्रा रक्ता चूडा यस्य। १कुक्कुटे (कुकड़ा) ख्याते खगे अमरः स्त्रियां ङीप्। तद्रूपविशेषफलं बृ०स० ८८अ० यथा "भीता रुवन्ति कुक्कुकिति ताम्रचूडास्त्यक्ता रुतानि भयदान्यपराणि रात्रौ"। कुक्कुटश्च द्विविधः नारि-केलाकृतिः प्राच्यवाटः, बलाकाकृतिश्च प्रतीच्यवाटः। तत्र प्राच्यवाटः बलाधिकः। तथैव वर्णितं दशकुमारे ताम्र-चूडयुद्धाधिकारे। "कथमिव नारिकेलजातेः प्राच्य-वाटकुक्कुटस्य प्रतीच्यवाटः पुरुषैरसभीक्ष्य बलाका-जातिस्ताम्रचूडो बलप्रमाणाधिकस्त्वं प्रति विसृष्ट इति। "प्रायुध्यत चातिसंरब्धमनुप्रहारप्रदत्तस्वपक्षसक्तकण्ठी-रवरवं विहङ्गमद्वयम्। जितवांश्चौ प्रतीच्यवाट कुक्कुटः" दशकु०। २कुक्कुरवृक्षे (कुकसिमा) राजनि०। तस्य रक्त-शिखत्वात्तथात्वम्। "हाभ्यां गृहीत्वा पाणिभ्यां शक्तिं चान्येन पाणिना। अपरेणाग्निदायादस्ताम्रचूडं भुजेन सः। महाकायसमुच्छ्रितं कुक्कुटं बलिनां वरम्"भा०व० २२४अ०तथैव "अरुणस्ताम्रचूडश्च प्रददौ वरमायुधम्"। ३कुमारानुचरमातृगणभेदे स्त्री "सुभगा लम्बिनी लम्बा ताम्रचूडाविकाशिनी" भा० श० ४७ अ०। मातृगणौक्तौ ४रक्तशिखायुक्ते त्रि० ताम्रचूडभैरवः।

**ताम्रजात्त** पु० सत्यभामायां कृष्णाज्जाते पुत्रभेदे। "जज्ञिरे सत्यभामायां भौमो भीमरथः सुतः। रोहितो दीप्तिमां-श्चैव ताम्रजात्तो जलान्धकः। भान्वभीमरिका चैव ताम्र-पक्षा जलन्धमा। चतस्रो जज्ञिरे तेषां स्वसारो गरु-ड्ध्वजात्" हरिवं० १६२ अ०।

**ताम्रतपुज** पु० ताम्रञ्च त्रपु च ताभ्यां जायते जन-ड। कांस्ये भावप्र०। तस्योभयधातुजन्यत्वात् तथात्वम्।

**ताम्रदुग्धा** स्त्री ताम्रं रक्तं दुग्धं निर्य्यासोऽस्याः। गोरक्त दुग्धायां राजनि०।

**ताम्रद्वीप** पुंन०। कर्म्म०। दक्षिणदेशस्थे द्वीपभेदे। "द्वीपं ताम्राह्वयञ्चैव पर्वतं रामकं तथा। तिमिङ्गिलञ्च स नृपं वशे कृत्वा महामतिः" भा० स० ३० अ०। सह-देवदक्षिणदिग्विजये।

**ताम्रपत्ता** स्त्री सज्जभामासुतायां तामजातिशब्दे दृश्यम् ।

**ताम्रपट्ट** न० ताम्रनिर्मितं पट्टम् । तामपत्रे लेखनपत्रभेदे "दद्याद्भूमिं निबन्धं वा कृत्वा लेखञ्च कारयेत् । आगामिभद्रनृपतिपरिज्ञानाय पार्थिवः । पटे वा ताम्रपट्टे वा स्वमुद्रोपरिचिह्नितम् । अभिलेख्यात्मनो वंश्यानात्मानञ्च महीपतिः । प्रतिपक्षपरीमाणं मानाच्छेदोपवर्णनम् । स्वहस्तकालसम्बद्धं शासनं कारयेत् स्थिरम्" याज्ञ० ।

**ताम्रपत्र** पु० ताम्रं रक्तं पत्रमस्य । १जीवशाके राजनि० । २रक्तवर्णपत्रके वृक्षमात्रे च । कर्म्म० । ३ताम्रमये लेखनपत्रे । ४रक्ते दले नवपल्लवे च न० ।

**ताम्रपर्णी** स्त्री दक्षिणदेशस्थे नदीभेदे ।

"ताम्रपर्णीन्तु कौन्तेय ! कीर्त्तयिष्यामि तां शृणु यत्र देवैस्तपस्तप्तं महदिच्छद्भिराश्रमे । गोकर्ण इति विख्यातस्त्रिषु लोकेषु विश्रुतः । प्रीततोयो बहुजलः पुण्यस्तात ! शिवः शुभः । ह्रदः परमदुष्प्रापो मानुषैरकृतात्मभिः । तत्र वृक्षश्च्यादौद्य सम्यक्फलमूलवान् । आश्रमोऽगस्त्यशिष्यस्य पुण्यो देवसमो गिरिः । वैदूर्य्य पर्वतस्तत्र श्रीमान् मणिमयः शिवः । अगस्त्यस्याश्रमश्चैव बहुमूलफलोदकः" भा०व०८८अ० । तस्याः सिन्धुसङ्गमस्थाने सङ्गाजन्म यथोक्तं "ताम्रपर्णीसमेतस्य सङ्गासारं महोदधेः । ते निपत्य ददुस्तस्मै यशः स्वमिव सञ्चितम्" रघुः "सिंहलकपारलौकिकसौराष्ट्रकताम्रपर्णीकपारशराः" कौवेरपाण्ड्यकवाटकहैमा इत्याकरा स्मृतौ" ह० म० ८१ अ० सङ्गाकरोक्तौ । २गिरिभेदे च । "ताम्रपर्णी गिरा राजन् ! श्रीमान् मलयपर्वतः" भा० भी० ६ अ० ।

**ताम्रपल्लव** पु० ताम्राणि पल्लवानि यस्य । १अशोकवृक्षे राजनि० । २रक्तपल्लवयुक्ते वृक्षमात्रे च । कर्म्म० । ३रक्ते पल्लवे क्लीबे ।

**ताम्रपाकिन्** पु० पच्यते पाकः फलपुष्पादि ताम्रः पाकः अस्यास्ति इनि । महाभाखण्डवृक्षे । रत्नमा० ।

**ताम्रपात्र** न० ताम्रस्य विकारः अण् कर्म्म० । तामपात्रे तत्र तर्पणविधिस्तर्पणशब्दे उक्तः । "मृद्दारवौडुम्बरं पात्रम्" इत्यादि कृत्वा तस्य संकल्पपात्रतोक्ता तत्र भोजननिषेधो मनूक्तो यथा "ताम्रपात्रे न भुञ्जीत भिन्नकांस्ये मलाविले । पलाशपद्मपत्रेषु मृद्दारौ भुञ्जीन्द्वं चरेत्" । तत्र इतेतरोद्धृतसारगव्यादिभोजननिषेधमाह स्मृतिसागरे स्मृतिः "नारिकेलजलं कांस्ये ताम्रपात्रे स्थितं मधु । गव्यञ्च ताम्रपात्रस्थं मद्यतुल्यं घृतं विना । ताम्रपात्रघृतं मांसं यच्च गव्यं घृतेतरत् । क्षामिश्रन्तु गवां मांसं दधि मद्यं पयो रजः । द्रव्यान्तरयुतं मांसं पयसा संयुतं दधि । पयोऽन्नद्धृतसारञ्च ताम्रपात्रे न दुष्यति" उत्तराङ्गानुसारात् "ततश्च संस्कृते वह्नौ गोक्षीरेण चरुं पचेत् । अस्त्रेण क्षालिते पात्रे नवे ताम्रमयादिके" शारदातिः याज्ञस्य अन्नद्धृतसारक्षीरविषयस्य उद्धृतसारस्यैव तत्र स्थितत्वे निषेधात् पानपात्रं च ताम्रपात्रं प्रशस्तं यथाह सुश्रुतः "दद्यात् ताम्रमये पात्रे सुशीतं सुहृतं पयः" । "जलपात्रं तु ताम्रस्य तदभावे ह्रदो स्थितम्" भाषाप० ।

**ताम्रपादी** स्त्री ताम्रः रक्तः पादो मूलमस्याः ङीष् । हंसपद्याम् राजनि० । तस्या हंसस्येव रक्तमूलत्वात्तथात्वम् ।

**ताम्रपुष्प** पु० ताम्रं पुष्पं यस्य । १रक्तकाञ्चने जटा० २भूमिचम्पके शब्दच० । ३रक्तपुष्पयुक्तमात्रे त्रि० । "ताम्रपुष्पैश्च शिखरैर्दीप्यमानः स्वतेजसा" हरिवं० २१७ अ० । कर्म्म० । ४रक्ते पुष्पे न० ।

**ताम्रपुष्पिका** स्त्री ताम्रं पुष्पं यस्याः कप् कापि अत इत्त्वम् । रक्तविडङ्गे (लालतेउड़ि) राजनि० ।

**ताम्रपुष्पी** स्त्री ताम्रं रक्तं पुष्पं यस्याः ङीष् । १धातक्यां वृक्षे २पाटलावृक्षे च राजनि० ।

**ताम्रफल** पु० ताम्रं रक्तं फलमस्य । १बदरीवृक्षे । राजनि० । २रक्तफलयुक्ते वृक्षमात्रे त्रि० । कर्म्म० । ३रक्ते फले न० ।

**ताम्रमूला** स्त्री ताम्रं रक्तं मूलं यस्या अजादेराकृतिगणत्वात् टाप् । १दूरालभायां २लज्जालौ च राजनि० । ३कच्छुरावृक्षे (खिराद)रत्नमाला । ४रक्तमूलके वृक्षमात्रे त्रि० । कर्म्म० । ५रक्ते मूले न० ।

**ताम्रयोग** पु० चक्रदत्तोक्ते औषधभेदे तद्विधानादि तत्रोक्तं यथा "स्याच्चां संमर्द्य दातव्यौ मात्रिकौ रसगन्धकौ । नखच्छुखं तदुपरि तच्छुक्तीयं द्विमात्रिकम् । ततो नैपालताक्ष्यादि विधाय शुक्तसन्निभम् । पांशुना पूरयेद्भूयो सर्वां स्यार्द्धं ततोऽनलः । स्यात्प्रधो नालिकां यावद्देयस्तेन सूतस्य च । ताक्ष्यो ताक्ष्यस्य रत्त्येका त्रिफलाचूर्णरत्तिका । त्रयूषणस्य च रत्त्येका विड़ङ्गस्य च तन्मधु । हतेनालोड्य सेव्यं प्रथमे दिवसे ततः । रत्तिद्वित्रिं प्रतिदिनं कार्य्या ताक्ष्यादिषु त्रिषु । स्थिरा विड़ङ्गरत्तिस्तु यदा भेदो विवक्षितः । तदा

विड्वल्वधिकं दद्याद्दक्षिहस्तं पुनः । द्वादशाङ्गं योगदृष्टिस्तो ह्यासक्रमोऽव्ययम् । यद्दक्षीमस्तपित्तञ्च क्षयं शूलञ्च सर्वदा । ताम्रयोगो जयत्येष बलवर्णाग्निवर्द्धनः" ।

**ताम्ररसायनी** स्त्री ताम्ररसस्य रक्तनिर्यासस्यायनी । गोरक्षदुग्धायां जटाधरः ।

**ताम्रलिप्त** प्र०देशभेदे । सोऽभिजनोऽस्य तस्य राजा वा अण् । तद्देशवासिनि तद्भूपे च बहुषु अणो लुक् । स च देशः प्राचीस्थः । "ताम्रलिप्तञ्च राजानं कर्वटाधिपतिं तथा" भा० स० २६ अ० । भीमप्राचीदिग्विजये । "वङ्गाः कलिङ्गा मगधास्ताम्रलिप्ताः सपुण्ड्रकाः" भा० स०५१अ०। स्वार्थे क । तत्रार्थे "किराताः कर्वराः सिद्धाः वैदेहास्ताम्रलिप्तकाः" भा०भी० ७ अ० ।जनपदोक्तौ ।

**ताम्रवर्ण** प० ताम्रो रक्तो वर्णोऽस्य । १पक्षिवाहृक्षे ह्रग्रभेदे राजनि० । २जटायां स्त्री शब्दच० । ३ताम्रवर्णयुतमात्रे त्रि० । कर्म्म० । ४रक्ते वर्णे पु० ।

**ताम्रवल्ली** स्त्री कर्म्म० । १मञ्जिष्ठायाम् शब्दच० २चित्र कूटदेशप्रसिद्धे लताभेदे राजनि० । ३रक्तलतामात्रे च ।

**ताम्रवीज** पु०ताम्रं वीजं यस्य । शुक्लत्वे राजनि० । २रक्तवीजके वृक्षमात्रे त्रि० । कर्म०।३रक्ते वीजे न०। ४कुलत्थिकायां स्त्री शब्दार्थचि० । [२रक्तवर्णके वृक्षे पु० ।

**ताम्रवृक्ष** पु० कर्म्म० । १रक्तचन्दनवृक्षे २कुलत्थे च रत्नमा०

**ताम्रवृन्त** पु० ताम्रं वृन्तमस्य । १कुलत्थे, स्त्रीत्वमपि टाप् त्रिका० । २रक्तवृन्तके वृक्षमात्रे त्रि० । कर्म्म० । ३रक्ते वृन्ते न० ।

**ताम्रशिखिन्** पु० ताम्रा रक्ता शिखास्त्यस्य इनि । कुक्कुटे जटाधरः । ब० व० । ताम्रशिख इत्यपि तत्र । ताम्रशिखायुक्ते च त्रि० ।

**ताम्रसार** न० ताम्रं रक्तं सारमस्य । १रक्तचन्दनवृक्षे । रत्नमाला । २रक्तसारके वृक्षमात्रे त्रि० । कर्म्म० । ३रक्ते सारे पुंन० ।

**ताम्रसारक** पु० ताम्रो रक्तः सारोऽस्य कप् । १खदिरे राजनि०।२रक्तचन्दनवृक्षे च । ३तत्काष्ठे न० शब्दार्थचि०।

**ताम्रसारिक** पु० ताम्रः सारोऽस्यास्य ठन् । १रक्तखदिरे, २रक्तचन्दने च शब्दार्थचि० ।

**ताम्रा** स्त्री ताम्र+टाप् । १सैंहिक्यां २ताम्रवक्त्रां शब्दमा० ।

**ताम्राक्ष** पु० उपद्वीपभेदे शब्दमाला । ताम्रद्वीपे ।

**ताम्राक्ष** पुंस्त्री ताम्रे अक्षिणी यस्य अच् समा० । १कोकिले त्रिका० स्त्रियां जातित्वाच्च ङीष् । २रक्तेक्षणयुक्ते त्रि० स्त्रियां विशेषात् ङीष् । ३विशाला यत्र ताम्राक्षैः पूर्णचन्द्रनिभाननैः । वर्षाभूः कीर्य्यते" भा० क० ४६ अ०।

**ताम्राभ** न० ताम्रस्य आभेवाभा यस्य ।१रक्तचन्दने शब्दच० । ताम्रा रक्ता आभा यस्य । २रक्तवर्णाभायुक्ते त्रि० "रुधिरोक्षितसर्वाङ्गैस्तैस्तदायोधनं बभौ । कबन्धैः संवृतं सर्वं ताम्राभैः खमिवाहतम्" भा० द्रो० ११६ अ० ।

**ताम्रारुण** न० तीर्थभेदे "ताम्रारुणं समासाद्य ब्रह्मचारी समाहितः । अश्वमेधमवाप्नोति ब्रह्मलोकञ्च गच्छति" भा० व० ८४ अ० ।

**ताम्रार्द्ध** प० ताम्रस्यार्द्धोऽंशभेद इत्यादेशोऽस्य । कांस्ये त्रिका०

**ताम्रावती** स्त्री ताम्रमाधेयत्वेनाऽस्त्यस्य मतुप् मस्य वः संज्ञायां दीर्घः । ताम्राकरे नदीभेदे "ताम्रावती वेत्रवती नदास्तिस्रोऽथ कौशिकी" भा० व० २२१ अ० ।

**ताम्राश्मन्** पु० नि० कर्म्म० । पद्मरागे "ताम्राश्मरश्मिच्छुरितैर्नखाग्रैः" माघः ।"ताम्राश्मनां पद्मरागाणाम्" मल्लिना० ।

**ताम्रिक** त्रि० ताम्रं तत्पात्रादिनिर्माणं शिल्पमस्य ताम्रक्षेटं वा ठञ् । १कांस्यकारे २सङ्कीर्णजातिभेदे पुंस्त्री० स्त्रियां ङीष् । ३ताम्रसम्बन्धिनि त्रि० । "कार्षिके ताम्रिके पथः" अमरः । "कार्षापणस्तु विज्ञेयस्ताम्रिकः कार्षिकः पणः" मनुः । "निष्काः सुवर्णाश्चत्वारः कार्षिकस्ताम्रिकः पणः" भाग० । ४गुञ्जायां स्त्री टाप् राजनि० । ५वाद्यभेदे शब्दर० ।

**ताम्री** स्त्री ताम्रस्य विकारः अण् ङीप् । वाद्यभेदे त्रिका० ।

**ताय** पालने विस्तारे च भ्वा० आत्म० सक० सेट् । तायते अतायि-अतायिष्ट । तताये । खदित् । णिच् अतितायत्-त । तायितः तातिः "उभौ मायां व्यतायेताम्" भट्टिः । "सरसि संतायमाने" यजु० ३६।५। घञ् । तायः हृषा० आदुदात्तः । ल्युट्—तायनम् "हृत्तिसर्गतायनेषु क्रमः" पा० ।

**तायिक** त्रि०तायै हृद्धौ साधु ठञ् । तच्छिल्पाभिधदेशे ह्रेमच०

**तायु** पु० तायं-उण् । चौरे स्तेने निघण्टुः "अपत्ये तायवो यथा नजाता" ऋ० १।५०।२ ।

**तार** पु० तारयति स्वजापकान् संसाराद्धर्मात् तृ—णिच्—अच् तार्य्यतेऽनेन वा तृ—णिच्करणे अच्, तृ—णिच्—भावे अच् वा । १प्रणवे ओङ्कारे "तारयेद् यद्भवाम्भोधेः स्वजपासक्तमानसम् । ततस्तार इति ख्यातो यस्तं ब्रह्मा व्यलोकयत्" काशीख० ७२ अ० । २वानरभेदे ३शुद्धमौक्तिके ४सक्षारविशुद्धौ मेदि० ५देवीप्रणवे कूर्चबीजे (हुं) तन्त्रसा० ६तारणे विश्वः ७महादेवे "काश्यां विश्वेश्वरोऽहं गिरि-

पतितनवार्कयुतो वामभागे शुण्डादण्डेन दत्ते त्रिपथगतटिनीतीरशुद्धाम्बुभागे । मायाबीजञ्च कर्णे सुरमुनिसहितो ध्यानयुक्तं वदामि प्रीत्या लोकस्य तस्मात् सुरमुनिगणकैरुच्यते तारनामेति" मन्त्रार्णवः । घृतवाक्यम् दक्ष्ये न० राजनि० । दनक्षत्रे न० स्त्री० मेदि० "विपत्तारे गुडं दद्यात्" तारावलादिन्दुरथेन्दुधीर्यात्" ज्योति० त० सां० त० उक्ते अध्ययनरूपे प्रथमे १० गौणसिद्धिभेदे । "जन्तुः शब्दोऽध्ययनं दुःखविघातास्त्रयः सुहृत्प्राप्तिः। दानञ्च सिद्धयोऽष्टौ सिद्धेः पूर्वोऽङ्कुशस्त्रिविधः" सा० का० । "विहन्यमानस्य दुःखस्य त्रित्वात् तद्विघातास्त्रय इति इमा सङ्ख्याः तिस्रः सिद्धयस्तदुपायतया त्वितरा गौणाः पञ्च सिद्धयस्तत्रापि हेतुमत्तया तिस्रः हेतुतया पञ्च व्यवस्थिताः । तास्वाद्या अध्ययनादिलक्षणा सिद्धयो हेतवः सङ्ख्यास्तु हेतुमत्यः । विविधदुःखखादध्यात्मविद्यानामक्षरस्वरूपत्रयलक्षणमध्ययनं प्रथमसिद्धिस्तारसूचयते" त० कौ० । २ विष्णौ पु० "अशोकस्तारणस्तारः शूरः शौरिर्जनेश्वरः" भा० अनु० १४९ अ० सहस्रनामकथने । ३ उच्चशब्दे पु० । ४ तरति त्रि० मेदि० । ५ स्फुरितकिरणे ६ निर्मले त्रि० धरः । दिक्शब्दात् परम् तीरस्य तारादेशः । १ तीरे । दक्षिणतारं दक्षिणतीरमित्यर्थः ८ उच्चैस्तरे त्रि० ९ नेत्रतनीनिकायां न० स्त्री० "मत्तयेव घूर्णितमन्दतारया" कादः । "तारैर्भूषे परभागलाभतः" माघः शुद्धसङ्काशे । "तारहेममहारत्नविमानशतशोभितम्" भाग० ४।६।२७ । प्रणवे "तारो मायारमारोगो मनोदीपनसूचते" । (ओं श्रीं ह्रीं) दी० त० "तारं व्योमाग्निमनुयुगदण्डो ज्योतिर्मनुर्मतः" दी० त० । "हारममलं तरलतारसुरसि दधतम्" जयदेवः । "उरसि निहिततारोहारः" अमरः । "तारलोलवलयेन करेण" सा० द० ।

**तारक** त्रि० तारयति तृ-णिच्-ण्वुल् । १ तारयितरि । "तत्र हि जन्तोः प्राग्धेयुत्क्रममाणेषु रुद्रस्तारकं ब्रह्म व्याचष्टे" जाबालोप० । स्त्रियां कापि अत इत्त्वम् । २ दैत्यभेदे तत्कथा शिवपुराणे दृश्या । ३ कर्णे ४ भेलके च मेदि० । तारैव स्वार्थे क । "तारका ज्योतिषि" पा० अजादि० टाप् न अत इत्त्वम् । तारका । ५ नेत्रतनीनिकायां स्त्री । ६ चक्षुषि न० स्त्री० मेदि० । "तस्मिन् विपक्षतापः काले तारकैव दिवौकसः" कुमा० । "अभिभाव्यतारकमदृष्टहृदयप्रतिबिम्बमस्तमितभानु नभः" माघः "कुमारस्तुतिषु तारकोद्धरणम्" काद० । न दक्षत्राणां नेत्रोत्पाटनमिति ध्वन्यर्थः । "पतनं तारकादीनाम्" सुश्रु० "तनुप्रकाशेन विचेयतारका" रघुः । "तारकावर्षमिव धर्मं विनाशयिष्णुम्" । "कापि विश्लेष दिवावसाने लोहिततारका" काद० । "त्र्यधिकदशयतिर्ननौ रौ भवेतां ररौ तारका, द्वत्तरत्नाकरोक्ते अष्टादशाक्षरपादके ७ छन्दोभेदे च । [तत्कथा शिवपु० दृश्या ।

**तारकजित्** पु० तारकं दैत्यं जयति जि-क्विप् । कार्त्तिकेये

**तारकाक्ष** पु० तारकासुरस्य ताराक्षापरपर्य्याये पुत्रभेदे "निर्जितेषु च दैत्येषु तारकस्य सुतास्त्रयः । ताराक्षः कमलाक्षश्च विद्युन्माली च पार्थिव !" इत्युपक्रमे "काञ्चनं तारकाक्षस्य चित्रमासीन्महात्मनः । राजतं कमलाक्षस्य विद्युन्मालिन आयसम्" भा० क० इत० । २ कुमारानुचरभेदे "महाजठरपादाक्षस्तारकाक्षश्च भारत !" भा० श० ४६ अ० ।

**तारकब्रह्म** न० कर्म्म० । रामस्य (ओं रामाय नमः) षड्क्षरे मन्त्रे । "षड्क्षरं महामन्त्रं तारकब्रह्मसञ्ज्ञितं । रामाय नम इत्येतत् प्रणवादि षड्क्षरम्" इति अन्योऽपि मन्त्रः पद्मपुरा० उक्तो यथा । "सुमेर्वोर्सन्निकर्षान्तु ऋक्षौदकनिवासिनः । अहं दिशामि ते मन्त्रं तारकं ब्रह्मवाचकम् । ओं श्रीरामरामेत्येतन्मन्त्रं तारकसञ्ज्ञितं । अतस्त्वं जानकीनाथ ! परं ब्रह्म विनिश्चितम्" ।

**तारकादि** संज्ञातार्थे इतच्प्रत्ययनिमित्ते पा० गण सू० उक्ते शब्दगणे स च गणो यथा

"तारका, पुष्प, कर्णक, मञ्जरी, अजोष, चण, स्तव मूल, निष्क्रमण, पुरोष, उच्चार, प्रचार, विचार, कुड्मल, कण्टक, सुमन, सुकुल, कुसुम, कुठ्ठल, स्तवक, किसलय, पल्लव, खण्ड, वेग, निद्रा, तन्द्रा, बुभुक्षा, क्षेतुष्या, पिपासा, श्रद्धा, अश्व, पुलक, अङ्गारक, वर्णक, द्रोह, दोह, सुख, दुःख, उत्कण्ठा, भर, व्याधि, वर्म्मन्, व्रण, गौरव, शाल्व, तरङ्ग, तिलक, चन्द्रक, अन्धकार, गर्व, सुकर, हर्ष, उत्कर्ष, रथ, कुवलय, गर्भ, क्षुध्, सीमन्त, ज्वर, नर, रोग, रोमाञ्च, पण्डा, कल्लल, हस्, कोरक, कल्लोल, स्फुट, फल, खड्ग, शृङ्गार, अङ्कुर, शैवाल, वकुल, अभ्र, आराल, कलङ्क, कर्दम, कन्दल, मूर्च्छा, अङ्गार, हलक, प्रतिबिम्ब, चिह्न, तन्त्र, प्रत्यय, दीक्षा, गर्ज, (गर्भादग्राणिनि")"तदस्य

संजातं तारकादिभ्य इतच्" पा० इतच् तारकित अस्य आकृतिगणत्वात् अन्येऽपि शब्दा यथाप्रयोगमत्रावधेयाः।

**तारकायण** पु० विश्वामित्रपुत्रभेदे "औदुम्बरा ह्यविष्याता-स्तारकायणचङ्गुलाः" हरिवं० २७ अ०। विश्वामित्र-पुत्रकथने। [तयोऽप्यत्र।

**तारकारि** पु० ६त०। कार्त्तिकेये हेमच०। तारकशत्रुमात्रे।

**तारकित** न० तारका संजाता अस्य तार० इतच्। नक्षत्रयुक्ते आकाशे "वितनिशाद्यदि स्फुटनिष्प्रतत्कणग-णाधिकतारकिताम्बरः" नैष०।

**तारकिणी** स्त्री तारकाः सन्त्यत्र इनि ङीप्। नक्षत्रयुक्तायां रात्रौ राजनि० २तारकायुक्ते त्रि० स्त्रियां ङीप्।

**तारकोपनिषद्** स्त्री तारयति ज्ञानदानेन तारि-ण्वुल्। तारिका उपनिषत्। उपनिषद्भेदे उपनिषच्छब्दे दृश्यम्।

**तारक्षिति** पु० तारा उक्ता क्षितिर्यत्र। देशभेदे स च देशः भू० स० १४ अ० मतोच्यासन्नः "अपरस्यां मणिमान्" इत्युपक्रमे "पञ्चनदमठपारावततारक्षितिश्रङ्गवैशूरकन-कशकाः" कर्म्म०। २उक्तभूमौ स्त्री।

**तारण** पु०तारयत्यनेन ल्युट्। १भेलके रत्ना०। कुत्सितरि ल्यु। २तारयितरि त्रि० ३विष्णौ पु०। "अशोकस्तारणस्तारः" विष्णुस०। ४भावे ल्युट्। ५तारणकरणे ६उद्धारणे च न० "तत्र चोत्पत्स्यते जन्तुर्भवतां तारणाय वै" भा० अ० १३अ०। भावे युच्। तारणा ७तरणप्रापणे स्त्री "तारणा पारणं चैव तद्व्रतं सर्वकामिकम्" हरिवं०१४० अ०। षष्टिवर्षमध्ये अष्टादशे ८वर्षभेदे। "अति-वृष्टिश्च जायेत धान्यस्याथ प्रपीडनम्। शस्त्रं भवति सामान्यं तारणे शुरवन्दिते!" ज्यो० त०। "तारणं तदनु भूरिवारिदं शस्यवृद्धिसुदितञ्च पार्थिवम्" वृ० स० ८अ०

**तारणि(णी)** स्त्री तार्य्यतेऽनया तृ-णिच्-अनि। १नौकायां हारा० वा ङीप्। ङीवन्तः २काश्यपपत्नीभेदे याज्ञोप-याज्ञयोर्ऋष्योर्मातरि तस्या अपत्यम् ढक्। तारणेय तदपत्ये। "तथैव च महाभागः सोऽपश्यच्छंसितव्रतौ। याज्ञोपयाज्यौ ब्रह्मर्षी श्राद्धेनौ परमेष्ठिनौ। संहिता-ध्ययने युक्तौ गोत्रतश्चापि काश्यपौ। तारणेयौ युक्त-रूपौ ब्राह्मणाद्विषत्तमौ" भा० आ० १६७ अ०।

**तारतण्डुल** पु०तारः शुद्धमौक्तिकमिव शुभ्रस्तण्डुलोऽस्य। धवलशुक्लतण्डुले राजनि०।

**तारतम्य** न० तरतमयोर्भावः ष्यञ्। १न्यूनाधिकत्वे "निर्धनं निधनमेतयोर्द्वयोस्तारतम्यविधिसक्तचेतसाम्। बोधनाय विधिना विनिर्म्मितारेफ एव जयवैजयन्तिका" इत्युद्भटः। "अस्ति तारतम्यं नराणाम्" सङ्क्षिप्त०तरतमशब्दे उदा०।

**तारतार** न० तारयतीति तारं तत्प्रकारः प्रकारे द्वित्वम्। सां० त० उक्ते गौणतृतीयसिद्धिभेदे तारशब्ददर्शिते "जङ्घः शब्दोऽध्ययनम्" इत्यादिवाक्ये "जङ्घस्तर्कः आगमावि-रोधिन्यायेनागमार्थपरीक्षणम् संशयपूर्वपक्षनिराकरणे-नोत्तरपक्षव्यवस्थापनं तदिदं मननमाचक्षते आगमिनः। सा तृतीया सिद्धिस्तारतारसञ्ज्ञिते" त० कौ०।

**तारदी** स्त्री तरद्येव स्वार्थे अण् ङीप्। तरदीवृक्षे राजनि० तारटीति पाठान्तरं तत्रार्थे। [राजनि०।

**तारपुष्प** पु० तारं रजतमिव पुष्पमस्य। कुन्दवृक्षे।

**तारमाक्षिक** न० तारं रूप्यमिव माक्षिकम् उपधातुभेदः। रजततुल्ये उपधातुभेदे। "तारमाक्षिकमन्यत्तु तद्भवे-द्रजतोपमम्। किञ्चिद्रजतसाङ्क्षिप्यात् तारमाक्षिकमी-रितम्। अनुकल्पतया तस्य ततो हीनगुणाः स्मृताः। न केवलं रूप्यगुणावर्त्तने तारमाक्षिके। द्रव्यान्तरस्य संसर्गात् सन्त्यन्येऽपि गुणा यतः। स्यात् तारमाक्षिकं स्वाद्वम्लं दृष्यं रसायनम्। चाक्षुष्यं वस्तिरुक्कृच्छ-पाण्डुमेहविषोदरम्। अर्शः शोथं जयं कण्डूं त्रि-दोषमपि नाशयेत्। मन्दानलत्वं बलहानिमस्यां विद-ध्यितां नेत्रगदान् सकुष्ठान्। तथैव मात्रां ह्यपथ्यकाञ्च करोत्यशुद्धं रजताख्यमाक्षिकम्"। शोधनन्तु। "कर्कोटी मेषशृङ्ग्युत्थैर्द्रवैर्जम्बीरजैर्दिनम्। भावयेदातपे तीव्रे विमला शुद्धयति ध्रुवम्। विमला तारमाक्षिकम्। मार-णन्तु "कृतस्यस्य कषायेण पुटा तैलेन वा पुटेत्। तैलेन वाऽजमूत्रेण म्रियते तारमाक्षिकम्" भावप्र०।

**तारल** पु० तरल एव स्वार्थे अण्। १तरले २विटे च शब्दार्थचि०।

**तारवायु** पु० कर्म्म०। अत्युच्चशब्दयुक्ते पवने।

**तारविमला** स्त्री तारोरजतमिव विमला। तारमाक्षिके उपधातुभेदे शब्दार्थचि०।

**तारशुद्धिकर** न० तारस्य रजतस्य शुद्धिं धात्वन्तरयोगात् जातमलशुद्धिङ्करोति कृ-ट। सीसके तन्मल्यकौद्धि रजतस्य मलशुद्धिर्नोक्तसिद्धा राजनि०।

**तारसार** पु० उपनिषद्भेदे उपनिषच्छब्दे दृश्यम्।

**तारहार** पु० तारनिर्म्मितो हारः। १स्थूलमुक्ताहारे "संव-र्द्धितोरःस्थलतारहारः" रघुः।

**तारा** स्त्री तारयति संसारार्णवात् भक्तान् तृ-णिच्-अच्। १दशमहाविद्यान्तर्गते द्वितीयमहाविद्याभेदे २नक्षत्रे च

तत्र नक्षत्रादीनां लिङ्गभेदा यथा "हस्ता स्वाती श्रवणा ऋक्षीवे मृगशिरो नपुंसि स्यात्। पुंसि पुनर्वसुपुष्यौ मूलं स्त्रियः शेषाः" अधिकमत्रशब्दे १४०० पृ० दृश्यम्। "काली तारा महाविद्या षोड़शी भुवनेश्वरी" इत्यादि तन्त्रसा० "तारकत्वात् सदा तारा सुखमोक्षप्रदायिनी। उग्रापत्तारिणी यस्मादुग्रतारा ततः स्मृता" तन्त्रसा० तन्नामनिरुक्तिः। शुक्लदैवताभेदे ४अहल्यातिभार्य्यायाम् मेदि०। ५सुषेणवानरकन्यायां वालिभार्य्यायाञ्च हेचिड़ानामगन्धद्रव्ये ७शुक्रायाञ्च राजनि०। "इक्ष्वाकुवंशसम्भूतः स वै भार्य्यां तारां नाम यशस्विनीम्। जहार तरसा सर्वानवमत्याङ्गिरःसुतान्। स (चन्द्रः) याचमानो देवैश्च तथा देवर्षिभिः सह। नैव व्यसर्जयत् तारां तस्मायाङ्गिरसे तदा" "ददावङ्गिरसे तारां स्वयमेव पितामहः। तामलःप्रसवां दृष्ट्वा तारां प्राह हरः स्मितः। मदीयायां न ते योनौ गर्भो धार्य्यः कथञ्चन। अयोनावतिसंजातं वै कुमारं दग्धुमनलम्। देवी कालत्वमासाद्य ज्वलन्तमिव पावकम्। जातमात्रः स भगवान् देवानामग्निपद्यतः। ततः संशयमापन्नास्तारामुचुः सुरोत्तमाः। सत्यं ब्रूहि सुतः कस्य सोमस्याथ हरस्य तेः। पृच्छ्यमाना यदा देवैर्नाह सा साध्वसाधु वा। तदा तां शप्तुमारब्धः कुमारो दग्धुमनलः। तं निवार्य ततो ब्रह्मा तारां पप्रच्छ संशयम्। यदत्र तथ्यं तद् ब्रूहि तारे! कस्य सुतो ह्ययम्। सा प्राञ्जलिरुवाचेदं ब्रह्माणं वरदं शनैः। सोमस्येति महात्मानं कुमारं दग्धुमनलम्" हरिवं० २५ अ०। "सुषेणा दुहिता चेयमर्वसूच्चविनिर्णये। औत्पातिके च विविधे सर्वतः परिनिर्मिता। यदेषा साध्विति ब्रूयात् कार्य्यं तन्मृक्तसंशयम्। न हि तारा मतं किञ्चिदन्यथा परिवर्त्तते" रामा० कि० २२ अ०। सा च पश्चात् वालिनो मरणानन्तरं सुग्रीवभार्य्या "तारया सहितः कामी सक्तः कपिवृषस्तदा" २१ अ० "अहल्या द्रौपदी कुन्ती तारा मन्दोदरी तथा। पञ्च कन्याः स्मरेन्नित्यं महापातकनाशनम्" तत्र शुक्रायां "तारावल्लीविकरणैर्व्यरुचत् निवासाः" भावः कलीनिकायां "लुलितनयनतारः श्यामवक्त्रेन्दुबिम्बाः" माघः।

तारादि ऋक्षनादयः। ज्यो० त० ताः तद्विशेषादिकञ्चोक्तं यथा

"अश्विनी भरणी चैव कृत्तिका रोहिणी तथा। मृगशीर्षं तथा चार्द्रा पुनर्वसुरुपुष्यकौ। अश्लेषा च मघा पूर्वफल्गुन्युत्तरफल्गुनी। हस्ता चित्रा तथा स्वाती विशाखा चानुराधिका। ज्येष्ठा मूलं तथाषाढे पूर्वोत्तरपदादिके। श्रवणा च धनिष्ठा च शतभिषाद्यभाद्रिका। उत्तरादिभाद्रपदा रेवती भानि च क्रमात्"। "अश्वियमदृहनकमनजयग्निशूलभदृदितिजीवर्क्षपितरः। योन्यर्क्षभदिनकृत्त्वष्टृपवनशक्राग्निमित्राः। शक्रोनिर्ऋतिस्तोयं विश्वविरञ्ची हरिर्वसुवैरुणः। अजपादोऽहिर्बुध्नः पूषा चेतीश्वरा भानाम्" विशाखायाः शक्राग्न्योर्मिलितदैवतत्वम् अभिजितोऽभिन्नत्वेन अष्टाविंशतिरिति तच्च वक्ष्यते इति नक्षत्राधिपाः "उग्रः पूर्वमघान्तका ध्रुवगणस्तीक्ष्णोत्तराणि क्षिप्रवांतादित्यहरित्रयं चरगणः पुष्याश्विहस्ता लघुः। चित्रा निशृगान्त्यभं मृदुगणस्तीक्ष्णोऽहिरुद्रेन्द्रयुक्। मिश्रोऽग्निः सविशाखभः शुभकराः पूर्वं सकर्त्ते गणाः।" "ग्रहाद्धतारयोः शुद्धिर्विचार्य्या सर्वकर्म्मसु। यद्वाथापि सर्वेषां तच्छुद्धौ फलदा हता"। श्रीपतिस्तु ह्यूचे "ताराचन्द्रबले प्राप्ते दोषाश्चान्ये भवन्ति ये। ते सर्वे विलयं यान्ति सिंहं दृष्ट्वा गजा इव। जन्मसम्पत् विपत्क्षेमं प्रत्यरिः साधकोवधः। मित्रं परममित्रञ्च जन्मभाच्च पुनःपुनः। सर्वमङ्गलकार्य्येषु त्रिषु जन्मसु कारयेत्। विवादञ्चाङ्गभैषज्ययात्राक्षौरादि वर्जयेत्। यात्रायां पथि बन्धनं क्षतिर्विधौ सर्वस्य नाशोभवेत्। भैषज्ये मरणं तथा सुनिश्चितं दाहोष्टहारभाषणे। चौरे रोगसमागमोवधुविधः श्राद्धेऽर्थनाशस्तथा वादे बुद्धिविनाशनं युधि भयं प्राप्तोत्यं जन्मभे। पापाख्या तु त्रिधा पञ्चचतुर्दशविंशतिस्त्रियुता। सिद्धिफला हृद्धिकरी विनाशसंज्ञा क्रमात् कथिता"। "जन्माद्यं कर्म्म ततोपि दशमं सांघातिकं षोड़शकम्। सप्तदशमष्टादशभं विनाशसंज्ञं त्रयोविंशम्। आद्यान्तु पञ्चविंशम् मानमेवं नरः सुखी स्यात्। नवनक्षत्रोडुपतिः स्वजातिदेशाभिषेकर्क्षैः"। ज्यो० त०। "पूर्वात्रयं मानलमग्रजानां रात्रान्तु पौष्णेन सहोत्तराणि। सपौष्णमित्रं पितृदैवतञ्च प्रजापतेर्भञ्च कनीयसानाम्। श्रादित्यहस्ताभिजिदश्विभानि तान्यन्यजातेः प्रभविष्णुतायाम्"। (देशभं देशनामर्क्षम्)। नाड़ीनक्षत्राणि। "हरादेहार्थहानिः स्यात्तन्नाशे उपतापिते। कर्म्मक्षे कर्म्मणां हानिः पीड़ा मनसि मानसे। मूर्त्तिद्विषवन्धूनां हानिः सांघातिके तथा। संतप्ते सप्तदयिके

मित्रस्वार्थसंचयः। वैनाशिके विनाशः स्यात् देहद्रविणसम्पदाम्"। नाड़ीनक्षत्रफलम्। "जातिभे कुलनाशः स्यादन्यजनाभिषेकभे। देशभे देशभङ्गः स्यात् क्रूरैरेवं शुभैः शुभम्। यस्मिन्नाजाभिधिष्ण्येऽभवति तदाभिधेयनिकषम् थ द ध न प फ ब भ ऋक्षिका ओ वि वु रोहिणीत्यादिदेयभम् (चक्रशब्दे १२४८पृ०शतपदचक्रे दृश्यम्)। उग्रादिगणादिकार्य्यभेदः सु० चि० उक्तो यथा "उत्तरात्रयरोहिण्यो भास्करश्च ध्रुवं स्थिरम्। तत्र स्थिरं बीजगेहशान्त्यारामादिसिद्धये। स्वात्यादित्रे चरं चलम्। तस्मिन् गजादिकारोहो वाटिकागमनादिकम्। पूर्वात्रयं याम्यमत्र उग्रं क्रूरं कुलस्तथा। तस्मिन् घातास्त्रिशास्त्राणि विषशस्त्रादिसिध्यति। विशाखाग्नेयभे सौम्यो मिश्रं साधारणं मतम्। तत्राग्निकार्य्यमिश्रं च द्यूतोत्सर्गादिसिद्धये। हस्ताश्विपुष्याभिजितः क्षिप्रं लघु गुरुस्तथा। तस्मिन् पण्यरतिज्ञानं भूषाशिल्पकलादिकम्। मृगान्त्यचित्रामित्रर्क्षमृदु मैत्रं मृगुस्तथा। तत्र गीताम्बरं क्रीड़ा मित्रकार्य्यं विभूषणम्। मूलेन्द्राद्रौक्षिभं सौरिस्तीक्ष्णं दारुणसंज्ञकम्। तत्राभिचारघातोग्रभेदाः पशुदमादिकम्। मूलाक्षिभिश्चोग्रमश्वो सखं भवेद्भूर्क्षमाद्यैज्यहरित्रयं ध्रुवम्। तिर्यङ्मुखं मैत्रकरानिलादितिज्ये दाश्विनान्तीक्ष्णक्रूरमेषु"।

**ताराकूट** न० दग्धयोर्विवाहशुभाशुभज्ञापके कूटभेदे उद्वाहशब्दे १२४८ पृ० दृश्यम्। "पर्यो वसुश्रुत्या तारा योनिश्च यद्वमैक्यकम्। गण्यमित्रं भकूटञ्च नाड़ी चेते गुणाधिकाः"रत्न०चि०। [भेदे तारकाचक्रशब्दे दृश्यम्।

**ताराज** पु० तारकाख्यासुरपर्य्यायके तारकासुरस्य पुत्रे दैत्य-

**ताराचक्र** न०तन्त्रोक्ते दौर्जन्योग्रमन्त्रशुभाशुभज्ञानार्थे चक्रभेदे तत्स्वरूपादि चक्रशब्दे २८०६पृ०नक्षत्रचक्रे दृश्यम्।

**ताराचमन** न० तारायाः पूजाद्यङ्गमाचमनम्" भा० त०। तारादेवीपूजाद्यङ्गे आचमनभेदे तच्च भैरवतन्त्रे उक्तं यथा "ताराभेदैस्त्रिभिः पीत्वा मायया चालयेत् करम्। ॐ ह्रीं तु हिरुत्सृज्य फट्कारैः चालयेत् करम्। आद्यं नासे द्वयौ चाक्षे नाभिवक्षःशिरोभुजान्। वैरोचनादिभिः स्पृष्ट्वा सर्वपापैः प्रमुच्यते। आचम्य भैरवो भूत्वा ततस्तारां प्रपद्यति"। ताराभेदैरिति। उग्रतारैकजटानीलसरस्वतीभेदैः। वैरोचनादयस्तु। वैरोचन, शङ्ख, पाण्डर, पद्मनाभ नामक, मामक, पाण्डर, तारकाङ्कितास्त्र, यमान्तक, विघ्नान्तक, नरान्तकाः, सचतुर्थीप्रणवादिनमोऽन्तकाः" कृष्णानन्दतन्त्रसा०।

**ताराधिप** पु०ष०त०। १चन्द्रे २शिवे३ष्टकस्मर्तौ४वालिवानरे५सुग्रीवे च। "ततार ताराधिपखण्डधारी" कुमा०। "ताराधिपे बलिनि लग्नगतेऽथ वाक्ष्मन्" ज्यो०त०। तारापतितारानाथादयोऽत्र। "कठोरतारापतिलाञ्छनच्छविः" माघः। ६नक्षत्राधिपेषु अश्विनीकुमारादिषु ताराशब्दे दृश्यम्।

**तारापथ** पु० तारायां पन्थाः ६त० समा०। आकाशे ह्लाघ०

**तारापीड़** पु० तारायामापीड़ः भूषणमिव। चन्द्रे त्रिका०।

**ताराप्रमाण** न० अश्विन्यादिनक्षत्राणां स्वरूपावेदकसंख्याविशेषे स च ह० स० ६८ अ० सप्तयोजनसङ्ख्यो यथा

"शिखिगुणरसेन्द्रियानलशशिविषयगुणर्तुपञ्चपक्षाः। विषयैकचन्द्रभूतार्णवाग्निरुद्राश्विवसुदृग्नाः। भूतगतपक्षवसवो द्वात्रिंशच्चेति तारकामानम्। क्रमशोऽश्व्यादीनां कालस्तारामाणेन। नक्षत्रजसङ्घाते फलमदैस्तारकामितैः सदृशम्। दिवसैर्ज्वरस्य नाशो व्याधेरन्यस्य वा वाच्यः"।

**ताराभूषा** स्त्री तारा भूषा यस्याः। रात्रौ राजनि०।

**ताराभ्र** पु० तारो निर्मलः जलशून्यः अभ्रो मेघ इव शुभ्रत्वात्। कर्पूरे राजनि०।

**तारामण्डल** न० तारायां मौक्तिकानां मण्डलं यत्र। हैरमण्डपभेदे शब्दरत्ना०। ६त०। २नक्षत्रमण्डले च।

**तारामृग** पु० तारारूपः मृगः मृगशिरः। मृगशिरोनक्षत्रे "अन्वधावन् मृगं रामो रुद्रस्तारामृगं यथा" भा०व०२७७ अ०"तारारूपं मृगम् तारामृगं. प्रजापतिः स्वां दुहितरं मृगो भूत्वा जगाम तस्य रुद्रः शिरोऽच्छिनत् तदेव मृगशिरो नक्षत्रम्" नीलक०। "एष चैव मृगः श्रीमान् यश्च दिव्यो नभश्चरः। उभावेतौ मृगौ दिव्यौ तारामृगमृगौ" रामा० अर० ४३।२।म०।

**तारारि** पु० ६त०। विटखादिरे उपधातुभेदे हेमच०।

**तारावती** स्त्री ककुत्स्थराजभार्य्यायां मनोन्यिन्यां जातायां दुर्गावतारभूतायां कन्यायां शिवावतारचन्द्रशेखरपत्न्याम्। तत्कथा कालिकापु० ४७ अ० यथा।

"ककुत्स्थो भार्य्यया सार्द्धं मद्यमत्तमुदितोऽभवत्। सङ्गेनाथ हारेण भूषिता सा ककुत्स्थजा। वहये मन्दिरे तस्य वर्षाण्येव सुरापगा। नेत्रेनैव हारच्छिद्रेण तस्यास्तारावतीति वै, नामाकरोत् पिता काले यथोक्तो नृपसत्तम!"। "पतिं पूर्ववरं प्राप्ता राज्ञस्तारावती सती। स्वयं सा पार्वती देवी वने च चन्द्रशेखरम्। वैवाहि-

केन विधिना स राजा चन्द्रशेखरः। तारावतीं तदा भार्यां ऋतध्वजसुतां सुताम्। संस्थाप्य स्थापयामास देवेभ्यो वैदिकैर्मखैः"

**तारापीड़ा** स्त्री ६त०। तारापुराङ्के पीड़ान्तरभेदे तन्त्रसारे तारापीड़ा० डयाम्। "इति पीड़ा च कथिता तारायाः सर्वसिद्धिदा" तन्त्रसा०। [ताड़िकाशब्दे डयाम्।

**तारिका** स्त्री ताड़िका डस्य रः। तालरसजाते मद्यभेदे।

**तारिन्** त्रि० तारयति तृ-णिच्-णिनि। १तारके। स्त्रियां ङीप्। सा च दशसु महाविद्यासु २द्वितीयविद्यायाम् तद्भेदाः तन्त्रसारे उक्ता यथा "तारा चोग्रा महोग्रा च वज्रा काली सरस्वती। कामेश्वरी च चामुण्डा इत्यष्टौ तारिणी मताः। अथ भेदान् प्रवक्ष्यामि तारिण्याः सर्वसिद्धिदान्। येषां विज्ञानमात्रेण जीवन्मुक्तो हि साधकः" इत्युपक्रमे तासामभिधानम्। ३बहुदेवताभेदे त्रिका०।

**तारुक्ष** पु० तरुक्षस्यापैरपत्यं गर्गा० यञ्। तरुक्षापैरपत्ये। स्त्रियां ङीष्ङिता० फक्। तारुक्षायणी। यूनि तु तारुक्षायण फक्। यूनि तदपत्ये स च गोत्रप्रवरान्तर्गतः। [स्त्रियां ङीप्।

**तारुण** पुंस्त्री तरुणस्यापत्यम् उत्सा० अञ्। तरुणस्यापत्ये

**तारुण्य** न० तरुणस्य भावः ष्यञ्। यौवने अमरः। "क्रान्ता गाढतारुण्याः समस्तरतकोविदाः" सा० द०। "ततः स राजा तारुण्यादौरसेन बलेन च" भा० आ० १२५ अ०।

**तारेय** पु० तारायां अपत्यम् ढक्। अङ्गदे १वालिपुत्रे। "करिष्यामि तारेयस्तेजस्वी तरुणोऽङ्गदः" रामा० कि० २२सर्गः। २वृहस्पतिभार्यायांतारायाञ्चन्द्रजे पुत्रे बुधे च।

**तार्कव** त्रि० तर्कोविकारः कोपधत्वात् अण्। तर्कविकारे स्त्रि० ङीप्। [२तर्कशास्त्राभिज्ञे च।

**तार्किक** त्रि० तर्कं वेत्ति तच्छास्त्रमधीते वा ठक्। १तर्कवेत्तरि

**तार्क्ष** पु०ऋक्ष एव स्वार्थे अण्। कश्यपे ऋषौ। "प्रमथ्य तरसा राज्ञः शाल्वादींश्चैद्यपक्षगान्। पक्षव्रतां सर्वलोकानां तार्क्षपुत्रः सुधामिव" भार०। २ पातालगरुड़कुलतायां स्त्री राजनि० गौरा० ङीष्।

**तार्क्ष्य** पु० ऋक्षस्य गोत्रापत्यं गर्गा० इञ्ञेत्यत्र ऋक्षेति पाठान्नरात् यञ्। १ऋक्षगोत्रापत्ये स्त्रियां ङीष्ङिता० फक्। तार्क्षायणी। २गरुड़ापत्ये अरुणे ३गरुड़े ४अश्वे ५सर्पे पुंस्त्री० ६रसाञ्जने च मेदि०। ७शालङ्कायने ८स्वर्णे च शब्दर० ९अश्वकर्णश्च १०स्तम्बे हेमच०। ११पर्वतभेदे १२विहगमात्रे। "अवस्तरात् संयद्वसुस्तस्य तार्क्ष्यारिष्टनेमिश्च सेनानीग्रामण्यौ" यजु० १५।१८। "तीक्ष्णेऽन्नरीचे क्षिपति पक्षौ तार्क्ष्यः" वेददी० भृषो०। तत्र गरुडे "आरुह्य तार्क्ष्यं नभसीव भूतले" माघः "भवन्ति निर्विषाः सर्पाः यथा तार्क्ष्यस्य दर्शनात्" पञ्चत०। "तस्येन तार्क्ष्यात् किल कालियेन" रघुः। "दशरात्रसमयुक्तं सर्वं तरति किल्बिषं तार्क्ष्यदर्शनसमप्रयाते" सुश्रुतः। तार्क्ष्यस्येव दर्शनं दूरात् दर्शनमित्यर्थः। सर्पे "त्रिपदाः शिखिनस्तार्क्ष्याश्चतुर्दंष्ट्राः विषाशिनः" भा०भी० ३ अ०। [शब्दार्थचि०।

**तार्क्ष्यज** न० तार्क्ष्ये पर्वते जायते जन-ड। रसाञ्जने

**तार्क्ष्यध्वज** पु०तार्क्ष्यो ध्वजोऽस्य। गरुड़ध्वजे विष्णौ हेमच० तार्क्ष्यकेतनादयोऽप्यत्र।

**तार्क्ष्यनायक** पु०ष०त०। गरुडे राजनि०तार्क्ष्यनायादयोऽप्यत्र

**तार्क्ष्यप्रसव** पु०तार्क्ष्यः प्रसवोऽस्य। अश्वकर्णवृक्षे राजनि०

**तार्क्ष्यशैल** न० तार्क्ष्यशैले भवम् अण्। रसाञ्जने राजनि० "सिन्धूद्भूतं चक्रमर्दस्य बीजमिन्धूद्भूतं केशरं तार्क्ष्यशैलम्" "सौराष्ट्रं चूर्णं मागधी तार्क्ष्यशैलं तुल्याः कार्याः कृष्णवर्णास्तिलाश्च" सुश्रुतः।

**तार्क्ष्यसामन्** न० सामभेदे ताण्ड्या०।६।१।

**तार्क्ष्यायण** पुंस्त्री० ऋक्षस्य गोत्रेरपत्यं युवा गर्गा० इञ्ञेत्यत्र ऋक्षेति पाठान्नरात् यञ् यूनि फक् अनार्षीत्युक्तेरापत्यस्य बह्वोषो न। तृतीयर्ष्यन्यपत्ये। [शब्दरत्ना०।

**तार्क्षी** स्त्री तार्क्ष्यस्य खगस्य स्त्रिया ङीष्। वनलतामेदे

**तार्ण** त्रि० तृणस्येदं शिवा० अण्। १तृणसम्बन्धिनि २तृणजन्ये वह्नौ पु०। "तार्णतार्णाभयं नास्तीत्यत्र तार्णत्वमतार्णत्वञ्च वह्नित्वव्याप्यो जातिभेदः इति नव्य नैयायिकाः। तृणात् तद्विक्रयात् स्थानादागतः आयस्थानत्वात् गुग्गुलिका०अण्। ३तृणविक्रयस्थानार्थेऽजादौ त्रि०।

**तार्णक** त्रि०तृणानि सन्त्यस्मिन् ऋण् कुक् च तार्णकीयाश्चास्मिन् भवः विल्वका० स्वार्थेऽण् लुक्। तृणयुक्तदेशभवे।

**तार्णकर्ण** पुंस्त्री० तृणकर्णस्यापत्यं शिवा० अण्। तृणकर्णस्यैरपत्ये। [नामकर्णगोत्रापत्ये।

**तार्णायन** पुंस्त्री तृणस्यैर्गोत्रापत्यम् नडा० फक्। तृणतार्त्तीय त्रि० तृतीय एव स्वार्थे अण्। तृतीये "प्रथमस्य तृतीयस्याङ्कस्तार्त्तीयं तृतीयं सवनम्" आश्व० श्रौ० १।३।४

**तार्त्तीयीक** त्रि० तृतीय एव तृतीय+स्वार्थे ठक्। तृतीये "तार्त्तीयीकं पुरारेरुदवतु मदनज्वोषणं लोचनं वः" माल-तीमाधवम्।

ताय्य त्रि० तृ–कर्मणि यत्। तरणीये। "नौतार्य्यां तां नदीं तरेत्" भा० शा० १२४६ श्लो० "नाव्यं त्रिलिङ्गं नौतार्य्यम्" अमरः। तरे हेयम् यञ्। २तरणार्हे देये शुल्के च। "भाण्डपूर्णानि यानानि तार्य्यं दाप्यानि सारतः" मनुः।

ताल पु० तल एव अण्। १करतले शब्दार्थचि०। ताड्यते तड–आघाते कर्मणि घञ् डस्य लः। १करितालेे २तालीगपत्रे न० राजनि० ३दुर्गासिंहासने न० हेमच० तालस्येदम् अण् तस्य लुक्। ४तालफले न०। अङ्गुष्ठमध्यमाभ्यां मिते ५परिमाणे ६करास्फालने ७कांस्यनिर्मितवाद्यभेदे (करताल) पुंस्त्री खड्गमुष्टौ च पु० मेदि० हस्तनामख्याते हस्तभेदे भावप्र०।

"पक्वं तालफलं पित्तरक्तश्लेष्मविबन्धनम्। दुर्जरं वह्निमूलस्य तन्द्राऽभिष्यन्दगुरुकरम्। तालमज्जा तु तरुणः किञ्चिन्मदकरो लघुः। श्लेष्मलो वातपित्तघ्नः सक्षारो मधुरः सरः। तालमज्जा तालफलबीजमज्जा। तालजं तरुणं तोयमतीव मदजन्मतम्। अन्धीभूतं तदा तत् स्यात् पित्तरक्तातदोषकृत्" भावप्र०। "तालो द्वादशभिर्जानुपरिघाऽपरिभ्रमैरिति" उक्ते १०मानविशेषे। हस्तेन जानुमण्डलपरिभ्रमणं यावत्याकालमात्रया क्रियते तावतीभिर्दृगभिस्तालाख्यः कालांशो ज्ञेयः इत्यर्थः।

११गीतकालक्रियामाने। ज्ञेयं स्वर इयत्कालं गेयः इयत्कालं विलम्बित इयत्कालं द्रुतम् इयत्कालं मध्यमिति बोधयितुं दैर्घ्यैर्ह्रस्वैरङ्गुल्याङ्गुष्ठप्रसारणाक्रियाभिर्नर्त्तितव्यं गातव्यञ्चेति कालक्रिययोः प्रमाणं तालः। इदमियत्कालं गेयमिति कालेनाङ्गुल्याद्याकुञ्चनादिक्रियामानं ताल इति यावत्। "कालस्य एकद्वित्रिमात्राद्युच्चारणनियमितस्य क्रियायाः परिच्छन्दात्मिकायाः परिच्छेदहेतुस्तालम्" इति मधुसू०। "कालेन नर्त्तनगलवादनक्रियाणां मानं तालः तारादीनां कालभेदेन विरामस्तान इत्यन्ये" इत्यमरटीकायां भरतः। तद्विरुक्तिस्तु गौरीहरयोर्हस्तेन तालो बभूव। तथा हि। हरस्यस्य ताण्डवं गौर्य्यास्तस्य लास्यम् इति संज्ञा पुरुषस्यस्य ताण्डवं नार्य्यास्तस्य लास्यमिति नियमात्। ताण्डवस्याद्याक्षरेण लास्यस्याद्याक्षरेण च मिलित्वा ताल इति संज्ञा जाता इति" संगीतशास्त्रे तस्य भेदा यथा "चर्च्चत् पुट १ चाचर पुटः २ षट्पितापुत्रकस्तथा। ३उद्घट्टकः ४सन्निपातः ५कच्छपः ७कोकिलारवः। ८राजकोलाहलो ९रङ्गविद्याधर१०श्चौत्रियौ। ११पार्वतीलोचनो १२राजचूड़ामणि १३जयश्रियौ १४वादकाकल १५कन्दर्प १६नलकूबर १७दर्पणाः। १८रतिलीलो १९मोक्षपतिः २०वीरङ्गः २१सिंहविक्रमः। २२दीपको २३मल्लिकामोदो २४मजलीलश्च २५चर्च्चरी। २६कुक्कुको २७विजयानन्दो २८वीरविक्रम २९टेङ्किके। ३०रङ्गाभरण ३१श्रीकीर्त्ति ३२ननालि३३चतुर्मुखाः। ३४सिंहनन्दन ३५नन्दीश ३६चन्द्रबिम्ब ३७हितीयकाः। ३८जयमङ्गल ३९गन्धर्व ४०मकरन्द ४१विभङ्गयः। ४२रतितालो ४३वसन्तश्च ४४जगझम्पो ४५श्च मार्त्तिः। ४६ कविगुेखर ४७घोषौ च ४८हरवल्लभ४९भैरवौ५०। गजपत्यागतो ५१मल्लतालो ५२भैरवमल्लकः ५३। सरस्वतीकण्ठाभरणः ५४क्रीड़ा ५५निःसारुरेव च ।५६सङ्कावली ५७रङ्गराज५८भरतानन्दा५९ऽऽदितालकाः६०। सम्यक्टङ्क६१ इत्यादि तालाभरत संमताः। संक्षेपतो निगदिता अथैषां लक्षणं तथा। अर्द्धमात्रं द्रुतं ज्ञेयमेकमात्रं लघु स्मृतम्। द्विमात्रन्तु गुरु ज्ञेयं त्रिमात्रन्तु प्लुतं मतम् ताले चर्च्चत् पुटे ज्ञेयं गुरु हस्तं लघुः प्लुतः १। गुरुर्लघुः प्लुतश्चैव भवेच्चारुपटाभिधे २। गलागलगलाश्चैव षट्पिता पुत्रके मताः३। उद्घट्टके तु गमनाः४ सन्निपाते गुरुर्मतः५। चतुर्विधः परिज्ञेयस्तालः कच्छपनामकः ६। पूर्णः खण्डः समश्चैव विषमश्चैव कथ्यते। लचतुष्कं गणौ पूर्णे खण्डे विन्दुद्वयं गुरुः। यगणस्तु समे ज्ञेय सगणो विषमे भवेत्। लचतुष्कं सयत्नं गुरुर्विन्दु चतुष्टयम्। सयत्नं लघुरेव तालोऽयं कोकिलारवः ७ लचतुष्कं सयत्नं खत्रयं खत्रयं लघुः। लघुर्विन्दुद्वयञ्चेति राजकोलाहलाभिधे ८। खद्वयं द्वौ प्लुतौ यत्र रङ्गविद्याधरः स तु ९। लघूनि त्रीणि यत्र स्युर्गुरूणि त्रीणि यत्र वै। प्लुतद्वयञ्च यत्रास्ति स तालः स्याच्चौत्रियः १०। खद्वयं गुरुकौ विन्दुर्गौ प्लुतौ गौ प्लुतौ पुनः। यत्र तालः स विज्ञेयः पार्वतीलोचनाभिधः११। राजचूड़ामणौ विन्दुर्लघ विन्दुर्लगौ मतौ१२। रगणोनो गुरुश्चैव जयश्रीरिति कथ्यते १३। प्लुतौ लघुचतुष्कञ्च मौ नौ द्रुतयुगं लघुः। लचतुष्कं विनाशब्दं तालः स्याद्वादकाकलः १४। द्रुतद्वयं यकारश्च कन्दर्पेऽपि प्रकीर्त्तितः१५। चत्वारो गुरवो यत्र चत्वारः प्लुतका अपि। लघ्वक्षराणि चत्वारि तालोऽयं नलकू-

वरः १६। विन्दुद्वयं गुरुश्चैव भवेद्द्वयत्र स दर्पणः १७। रतिलोले विधातव्यं लघुद्वन्द्वं गुरुद्वयम् १८। आदौ षोड्य गुरवो द्वात्रिंशल्लघवस्ततः। चतुःषष्टिर्भुता यत्र सोऽयं मोचपतिर्मतः १९। श्रीरङ्गसंज्ञके ताले मगणाद्यः प्लुतौ मतौ२०। सिंहविक्रमताले तु मगणो नखगाः खगो २१। प्लुतो नव प्लुतश्चैव ताले दीपकनामनि २२ ताले स्यान्मल्लिकामोदे लघुद्वयं खचतुष्टयम् २३। खचतुष्कं विरामान्तं गजलीले प्रकीर्त्तितम्२४। चण्डलत्वस्तु चर्च्चर्यां विरामान्ते प्लुतौ लघुः २५। प्लुतद्वन्द्वं भवेत्ताले कुरुक्षाख्ये लघुद्वयम्२६। भवेच्च विजयानन्दे लत्रयञ्च लघुत्रयम्२७। वीरविक्रमताले तु प्लुतौ नगौ ततः प्लुतः २८। टेङ्किका रगणेन स्यादेतेनैव लतास्पदे २९। भगणो ग प्लुतौ स्यातां रङ्गाभरणनामके ३०। श्रीकीर्त्तिसंज्ञके ताले गुरुद्वन्द्वं लघुद्वयम् ३१। चतुर्लघुता लघू द्वौ तु प्लुतो गो वनमालिनि३२। चतुर्मखाभिधे ताले यगणानन्तरं प्लुतः। ३३। भच प्लुतो नगौ विन्दुद्वयं गौ नः प्लुतस्तथा। लघुः प्लुतो प्लुतश्चैको लघुद्वयमथापि च। निःशब्दं च चतुष्कञ्च ताले स्यात् सिंहनन्दने ३४। गो लघुर्गौ लघुः प्लुतस्ताले नन्दीश्वरे मतः ३५। गो प्लुतौ नौ प्लुतद्वन्द्वं चन्द्रबिम्बे प्रकीर्त्तितम् ३६। प्लुतद्वन्द्वं लघुश्चैकस्ताले स्यात्तु द्वितीयके ३७। सकारश्च यकारश्च जयमङ्गलनामनि ३८। चत्वारो गुरवो विन्दुश्चत्वारश्च प्लुता अपि। विन्दवो दश षट् नाग ताले गान्धर्वसंज्ञके ३९। मकरन्दे प्लुतद्वन्द्वं लघुद्वन्द्वमधो गुरुः ४०। गुरुर्लघुः प्लुतश्चैव त्रिभङ्गिः परिकीर्त्तिता ४१। गुरुद्वयं लघुद्वन्द्वं रतिताले प्रकीर्त्तितम्४२। वसन्ततिलके कर्त्तव्यो नगणो मगण स्त्रया४३। जगन्मल्ले गुरुश्चैको विरामान्तश्च खद्वयम् ४४। गप्लुतौ नौ प्लुतौ नव प्लुतो माकृतिनामनि४५। कविशेखरे प्लुतः शून्यं नगौ नव ततो लघुः४६। खचतुष्कं विना शब्दं यत्र घोषः स उच्यते ४७। हरवल्लभताले च प्लुतो लो गौ च खद्वयम्४८। भगणः प्लुतौ गणौ गयौ प्लुतौ लघुश्च भैरवे४९। गतप्रत्यागते ताले लो नौ गौ नौ प्रकीर्त्तितौ५०। चतुर्लघु भल्लताले विरामान्तं प्लुतद्वयम्५१। नगौ गौ यो नगौ नव खद्वयं लद्वयं पुनः। नवचतुष्कं विना शब्दं ताले भैरवसंज्ञके५२। सरस्वतीकण्ठाभरणे गौ लघुश्च प्लुतद्वयम् ५३। एक एव प्लुतो यत्र क्रीड़ातालः स उच्यते ५४। प्लुतद्वयं विरामान्तं ताले निःसारके मतम् ५५। खत्रयं सविरामान्तं नौ पुनः खत्रयन्तथा। प्लुतौ गः खयुगं गश्च यत्र सल्लावली तु सा५६। नगौ विन्दुयुगं गौ नौ रङ्गराजे प्रकीर्त्तितः ५७। खद्वयं सविरामान्तं गुरुः प्लुतद्वयं लघुः। यत्र ताले स विघ्नेशो भरतानन्दसंज्ञकः ५८। आदितालो लघुर्यत्र स्यात्र भरतो मुनिः ५९। भगणश्च प्लुतादयनःसंपक्वैकतालके ६०। एकाधिकशते ताले षष्टिर्लघ्वतमा क्रमे"। अथ प्लुतादिमात्राभेदेन तालघातनम्। "ताले निष्णातकृत्तः प्लुतमनुघट्टयेद्घातमेकं सशब्दं तत्पश्चात् द्वौ च घातौ निनदविरहितौ दर्शयेदूर्द्ध्वतोऽधः। शून्यत्वात् पक्वतालाविति जगति पुनः स्तब्धसंज्ञौ सनन्दा विज्ञं घातत्रयं तत् त्रिफलतनुवह्निर्वर्द्धयेद्दुर्द्धकारम। एको घातः सशब्दो द्विरल रुरु गुरौ शब्दहीनस्तथान्यः सोऽप्यूर्द्धं याति क्षीणावलयवलयितोत्तानहस्ताङ्गुलीभिः। किञ्चोर्द्ध्वैकैकमात्रा ससदयिनि लघौ घात एको निनादी घात्यो मात्रार्द्धभाजि प्लुतवपुषि लघोरर्द्धनादेन घातः"। संगी० दा० रत्नाकरः।

"आदावष्टतथा रुद्रो ब्रह्म रुन्द्रचतुर्दशः। दशावतारचन्द्रार्कदिक्त्यनाट्टं ततः परम्।"

अथाष्टतालभेदाः। "आद्यः१ दोजः२ ज्योतिः३ चन्द्रशेखरः४ गञ्जनः५ मत्ततालः६ रूपकः७ समतालः८।"

तत्र रुद्रतालस्य भेदाः। वीरविक्रमः१। विषमसमुद्रः२ धरणः३ वीरदर्पकः४ मल्लूकः५ कन्दर्पः६ डाँशपाक्रिड़ः७ ध्रुवचरणः८ दशकोशीः९ गजेन्द्रगुरुः१० क्षुटका११।"

अथ ब्रह्मतालभेदाः "ब्रह्मः१ विरामब्रह्मः२ षट्कलाः३ सप्तमालाः४"

अथेन्द्रतालभेदाः। "देवसारः१ देवचाली२ मदनदोलाः३ गुरुगन्धर्वः४ पञ्चालीः५ इन्द्रभाषः६।"

अथ चतुर्दशतालभेदाः। "चित्रतालः१ चन्द्रमालाः२ देवमालाः३ सूर्य्यज्योतिः४ स्वर्गसारः५ क्षमाटः६ धराधाराः७ वसन्तवाक्८ काकलाः९ कीरशब्दाः१० ताण्डवीः११ कुसुमधारिकाः१२ भाषाः१३ सूर्य्यमालाः१४।"

क्रमेणैषां लक्षणादि तत्रापि अष्ट तालभेदस्य लक्षणानि यथा "एकतालस्ततः शून्यं युगलं तालिका परे। सङ्गीते प्रथमः सार आद्यतालः प्रकीर्त्तितः१। एकतालस्तु शून्यस्तु क्रमेणापि त्रिधा भवेत्। शेषशून्यं कलाभेदे दोजाख्यश्च भवेत् पृथक् २। प्रथमं युगलं तालं एक एकस्तथा परे। कलाभेदे मानमेवं ज्योतिश्च परिकीर्त्तितम् ३। चन्द्रचन्द्रस्तथा युग्मं तथा चन्द्रस्तथा परे। षट् तालानि भवन्त्येवं चन्द्रशेखर-

भाषितः ३। एकतालो भवेत् श्रेष्ठः क्रमेणापि चतुष्टयम्। शेषशून्यं गन्धर्वश्च सर्वतो मुनिभाषितम्॥। प्रथमं युगलञ्चैव तत्परं तालमेककम्। शेषे युग्मं तथा शून्यं षड्तालं प्रकीर्त्तितम् ६। युगलं प्रथमं तालं तत्परन्त्वेक-शून्यकम्। शेषे च युगलं तालं रूपकं परिकीर्त्तितम्७। एकतालं तथा शून्यं क्रमेण द्विविधं भवेत्। शेषे युग-लतालञ्च समतालं भवेत् परम् ८।"

रुद्रतालभेदलक्षणादि "एकतालं तथा शून्यं क्रमेण त्रिविधं भवेत्। तत्परं युगलं ताल इत्येव वीरविक्रमः१। युग्मतालं तथा शून्यं तत्परं हयतालकम्। शेषे च युगलं तालं सप्तद्विधमं स्मृतम् २। युग्मतालञ्च शून्यञ्च एक-तालञ्च तत्परे। शेषैकल त्रिशून्यञ्च विषमं धरणं भवेत् ३। एकतालं तथा शून्यं क्रमेणापि त्रिधा भवेत्। युगलं युगलं पश्चात् स वीरदशकः स्मृतः ४। प्रथममेकतालञ्च तत्परं शून्यमेककम्। शेषैकल त्रितालञ्च षण्डूकस्य गतिर्यथा ५। समतालं यथा दृष्टं तथा कन्दर्पसंज्ञितम्। समतालो भवेत् शून्यं कन्दर्पे नास्ति, तत्पुनः ६। पञ्चतालात् परं शून्यं डाँगपाड़िकुसुम-मम्। खण्डूर्द्धञ्च भवेत् लक्षं संग्रामस्य यथा गतिः ७। एकतालं तथा शून्यं क्रमेणापि द्विधा भवेत्। शेषैकल त्रितालञ्च ध्रुवचरणभाषितम् ८। एकतालं एकशून्य-मित्येवञ्च भवेत् क्रमात्। विरामे एकतालञ्च वाग्भेदे दयकोषिका ९। युगलं युगलं पश्चात् तदन्त्येकतालक-कम्। शेषे च युग्मं शून्यञ्च गजेन्द्रगुरुभाषितम् १० युग्मशून्यं विरामे च एकतालं भवेत् क्रमे। खुडवा-ख्यानकं धीरं सङ्गीतपरिनिष्ठितम्॥ ।"

ब्रह्मतालभेदलक्षणानि। "युगञ्च लक्षं प्रथमैकतालं किञ्चिद्विरामे पुनरेकतालम्। ब्रह्माख्यतालञ्च सुगीत-मध्ये यथा कपोती हि करोति शब्दम् १। युग्म-तालं भवेद्लक्षं एकतालञ्च तत्परे। शेषे द्वितीयशून्ये च विरामब्रह्मतालकम् २। प्रथमञ्चैकतालञ्च युग्मशून्यं तथा परे। शेषैकल त्रितालेति षट्कला खलु कथ्यते ३। आदौ युग्मं तथा युग्मं त्रितालञ्च तथा परे। स्वप्न-माला भवत्येषा ब्रह्मतालान्तरे शुभे४।"

इन्द्रतालभेदलक्षणानि "सविरामं त्रितालञ्च एकशून्यन्तथा-परे। शेषे लक्षं त्रितालञ्च देवसार इतीर्य्यते१। द्वितीय-शून्यं विरामे भवति ततश्च त्रितालानि। शेषेण द्विशून्य-मित्येवं देवचाली २। प्रथममेव युग्मताल्यं तत्पदादेक शून्यविरामे। शेषे त्रितयतालं भवतीति मदन दोलेति। युग्मतालं समारभ्य षड्तालं भवेत्तथा। खण्डूर्द्धञ्च तथा लक्षं गुरु गन्धर्व ईरितः ४। आवणस्य यथा धारा तथा तालो भवेद्घनः। षड्तालान्तराधीति ब्रह्मालीति प्रकीर्त्तिता ५ सविरामं चतुस्तालं त्रितालं शून्यमन्ततः। मेघारम्भे यथा डेका रूपन्ते इन्द्रभा-षितः ६।"

चतुर्दशतालभेदलक्षणानि "एकतालञ्च शून्यञ्च क्रमेण त्रितयं ततः। शेषे चतुष्टयं लक्षं चित्रताल इतीर्य्यते१। एकचन्द्रस्तथा युग्मं तालं प्रत्येकलक्षयम्। शेषे तीणि च शून्यानि चन्द्रमाला भवेत्परा २। प्रथमं षट्कतालञ्च खण्डूर्द्धन्तु भवेत् क्रमात्। शेषे युग्मं तथा शून्यं देवमाला च सोच्यते३। चन्द्रशून्यं त्रितालञ्च विरामेण क्रमेण तु। खण्डूर्द्धन्तु भवत्येवञ्च ज्योतिरिति स्थितिः ४। एकैक-तालान्तरयुग्मतालात् शून्यत्रयं तत्परमेकतालम्। कलाभिदा शून्यभिदा समाख्या स सर्वसाराख्यमयीन-तालः ५। युग्मशून्यं विरामेण देवतालमिति क्रमात्। समाशाख्योऽन्तरे शून्यमिति सर्वत्र भाषितम् ६। नवाम्बुदे राजिनि शीघ्रवालं तथा हसंवद्वहुतानधानम्। युग्मं लक्षं क्रमतश्च तालं शेषे त्रितालञ्च धराध-राख्या ७। एकतालञ्च शून्यञ्च क्रमेणापि चतुष्टयम्। क्रमात्तालत्रयञ्चैव यसन्तवायुदाहृता ८। सविरामं हयं तालं युग्मतालं तथा परे। शेषैकल त्रितालञ्च भवेत् काकलेति सा ९। त्रितालञ्च भवेद् लक्षं तत्परं त्वेकता-लकम्। शेषेऽपि च त्रितालञ्चेत् कोरयड्या प्रचक्षते१०। युग्मं युग्मं तथा युग्मं तालत्वेकं भवेत् क्रमात्। शेषे शून्यं कलाभेदे ताण्डवीति भवेत् पृथक् ११। सवि-रामं हयं तालं युग्मशून्यञ्च तत्परम्। शेषेऽर्द्धन्तु त्रिता-लञ्च हर्षधारा प्रकीर्त्तिता १२। चन्द्रशून्यं विरामेण हयं तालं भवेत् क्रमात्। खण्डूर्द्धन्तु भवेद् लक्षं भाषाख्यं तालसत्तमम् १३। खण्डूर्द्धन्तु त्रितालञ्च हयं तालं विरा-मकम्। इत्यर्द्धमात्रा विज्ञेया सङ्गीता भुवि सर्वतः"१४ सङ्गीतदामोदरे १ स्तवकम्"।

तालस्वेदम् उद्भा० षष्ठ्। "पामसं द्राक्षमाधुकं खार्जुरं तालमैक्षवम्" भा० वि० पुरुषयोक्ते ११ मद्यभेदे न०

तालक न० चु० नड-घञ् संज्ञायां क डस्य लः। हरितालेराजनि० २द्वारकपाटरोधनयन्त्रे (ताला) हेमच०। ३तृणधरिकायां(अरङ्गर)शब्दर०। स्वार्थे क। ४ताले ३चादौ

**ताल(लि)कट** पु० देशभेदे स च देशः ह० स० १४ अ० कूर्मविभागे दक्षिणस्यासन्नः। अथ दक्षिणेनेत्युपक्रमे "कालाजिनसौरिकीर्णताल(लि)कटाः"।

**तालकन्द** न० तालस्येव कन्दोऽस्य। तालमूल्याम् "कसेरु कोविदारस्य तालकन्दं तथाभिषम्" प्रा० त० वायुपु०। "तालकन्दं तालमूलीति प्रसिद्धम्" रघु०।

**तालकाभ** पु० तालकस्येवाभा यस्य। १हरितवर्षे क्षेम० २तद्वति त्रि०।

**तालकी** स्त्री तालकस्येयम् अण् ङीप्। तालजमद्यभेदे(ताड़ी)

**तालकेतु** पु० तालस्तालचिह्नितः केतुरस्य। भीष्मे। "तासां प्रसक्ततो भीष्मस्तालकेतुर्व्यरोचत" भा० उ० १३६ अ०।

**तालक्षीर** पु०तालजातं क्षीरमिव शुभ्रत्वात्। (ताडेर चिनि) शर्कराभेदे राजनि०। स्वार्थे क। तालक्षीरक। तत्रार्थे।

**तालगर्भ** पु० हृत०। (ताडेर मेति) तालमज्जनि। "भग्नपित्तस्रगाद्यस्रदुर्गन्धैः करिहस्तच्छिदये सतालगर्भैः" ह० स० ५० अ०।

**तालङ्क** पु० ताड्यङ्क+डस्य लः। ताड्यङ्के भूषणे शब्दार्थचि०।

**तालचर** पु० १देशभेदे २तद्देशवासिषु ३तद्भूपेषु ब० व०। "अन्ध्रास्तालचराश्चैव चुचुपा रेणुपास्तथा" भा० उ० १३६ अ०।

**तालजङ्घ** पु० ताल इव जङ्घा यस्य। १देशभेदे २तद्देशवासिषु ३तद्भूपेषु च ब०व०। "स हैहयान् समत्साद्य तालजङ्घांश्च भारत!" भा० व० १०६ अ०। "हैहयानामुदावर्त्तो नीपानां जनमेजय!। वसुतस्तालजङ्घानां क्रथानामभवतो वसुः" भा० उ० ७३ अ०। "तालजङ्घं महातालमौर्वेणैकेन नाशितम्" भा० अनु० १५३ अ०। ३यज्ञभेदे "निर्मोकास्तालजङ्घाश्च व्याद्यताक्षाः भयङ्कराः" इत्युपक्रमे "एते यज्ञाश्च सततं रक्षन्तु मम सर्वतः" हरिवं० १६८ अ०। "कण्ठपृष्ठ्यौवाजङ्घ" पा० अस्मादुदात्तता। [तालप्रलम्बे शब्दार्थचि०।

**तालजटा** स्त्री तालस्य जटेव। तालवृक्षस्य जटाकारे पदार्थे

**तालध्वज** पु० तालः ध्वजोऽस्य। बलदेवे "सरस्तस्याश्च तटे जातं नगं तालध्वजो बली" भा० श० ३८ अ०। "नातिदूरं ततो गत्वा नगं तालध्वजो बली" ५५ अ०। "अस्ति तालध्वजा नाम नगरी त्रिदशोपमेति" पद्मपु० क्रियायोगसारोक्ते २पुरीभेदे स्त्री।

**तालनवमी** स्त्री तालोपलक्षिता नवमी या० त०। भाद्रशुक्लनवम्यां "भाद्रे भाद्रपदे या स्यात्तालनवमी बलेतरा। तस्यां संपूज्य वै दुर्गामश्वमेधफलं लभेत्"। संवत्सरकौ० धृतगरुडपुराणवचनम् इयमेव तालनवमी ख्याता

**तालपत्र** न० तालस्य पत्रमिव। १कर्णभूषणभेदे ताड़ङ्क। अमरः। हृत०। २तालस्य पत्रे च। "क्वचित् विधवयेव उन्मूलतालपत्रया" काद०।

**तालपत्रिका** स्त्री तालस्य पत्रमिव पत्रमस्याः ङीप् संज्ञायां कन् ह्रस्वः। तालमूलीवल्ल्यां राजनि०।

**तालपत्री** स्त्री तालस्य पत्रमिव पत्रमस्याः ङीप्। मूषिकपर्ण्याम् राजनि०। "अपामार्गोऽग्निगन्धा च तालपत्री शुवर्चला" सुश्रु०

**तालपर्ण** न०स्त्री० ताल इव खड्गसदृशिरिव पर्णमस्य। १सुरानामद्रुमे शब्दच०। स्त्रीत्वपक्षे पाककर्षेति ङीप्। सा च २मधुरिकायां जटाधरः।

**तालपुष्पक** न० तालःखड्गसदृशिरिव पुष्पमस्य कप्। १प्रपौण्डरीके शब्दर०। हृत०। २तालवृक्षकुसुमे च।

**तालप्रलम्ब** न० ताले वृक्षे प्रलम्बते प्र+लम्ब–क्त्र। तालवृक्षस्य जटायाम् राजनि०। तथा "तालप्रलम्बस्तु भङ्गजतरजापङ्क्तम्" राजनि०। [बलदेवे त्रिका०।

**तालभृत्** पु० तालं ध्वजरूपेण बिभर्त्ति भृ–क्विप् हृत०।

**तालमर्दल** पु०तालस्य तालार्थं मर्दल इव। १वाद्यभेदे हारा०

**तालमूली** स्त्री०तालस्य मूलमिव मूलमस्याः ङीप्। सुसल्याम्। स्वार्थे क। तालमूलिका २दीर्घकन्दायाम्। सुसल्याम्। "तालमूली तु विज्ञेया सुसली मधुरा हृद्या शीर्ष्णा दंष्ट्री गुरुः। तिक्ता रसायनी हन्ति गुदजान्यनिलं तथा" "क्रौष्टुद्रासभास्योनि खदंष्ट्रातालमूलिका। अजमोदा कदम्बस्य मूलं नागरमेव च" सुश्रु०।

**तालयन्त्र** न० सुश्रुतोक्ते शल्योद्धारार्थे यन्त्रभेदे। "तालयन्त्रे द्वादशाङ्गुले मसृणतालवदेकतालद्वितालके कर्णनासानाड़ीशल्यानामाहरणार्थम्" सुश्रु०।

**तालरेचनक** पु०तालेन रेचयति चु० रिच–ल्यु स्वार्थे क। नटे शब्दर०। तालवेचनकेति तत्र पाठान्तरम् तत्रार्थे।

**ताललक्षण** पु० तालो लक्ष्यं ध्वजोऽस्य। बलरामे क्षेमेन्द्र०

**तालवन** न० हृत०। वृन्दावनस्थे तालपचुरे वनभेदे "गोवर्द्धनस्योत्तरतो यमुनातीरमाश्रितम्। दृश्यते ततो वीरौ रम्यं तालवनं महत्" हरिवं० ७० अ०। २तालानां वने च। "सुखतालवनानीव स चकार रथव्रजान्" भा० भी० ११७ अ०।

**तालवृन्त** न० तालो वृन्तवत् वृन्तमस्य, तालस्येव वृन्त-

मस्य वा। व्यजने हेमच०( पाखा) "तालवृन्तेन किं कार्यं लब्धे मलयमारुते" उद्भटः। अस्य वायोर्गुणा यथा। "त्रिदोषशमनोवायुर्लघुरः शकीर्तितः" भावप्र० "तालवृन्तभवो वायुस्त्रिदोषशमनो लघुः" राजनि०। "न याति वायुत्वात्मार्थं तालवृन्तानिलाधिक्यम्" कुमा०। स्वार्थे क व० व०कप् वा। तालवृन्तक तत्रार्थे अमरः।

तालव्य त्रि० तालुनि भवः देहावयवत्वात् यत्। तालूच्चार्येषु "इचुयशानां तालु" इत्युक्तेषु वर्णभेदेषु।

तालाकट पु० दक्षिणस्थे देशभेदे। तालाकटस्य राजा अण् लोऽभिजनोऽस्य वाऽण्। २तद्देशवासिजने ३तद्भूपे च बहुषु अण्लुक्। "ततः शूर्पारकं चैव तालाकटमथापि वा। यवनैश्चक्रे महातेजा दण्डकांश्च महाबलम्" भा० स० १०। सहदेवदक्षिणदिग्विजये। अयमेव देशः तालकटत्वेन ह०स० १४ अ० उक्तः तालकटशब्दे दृश्यः।

तालाख्या स्त्री तालं तत्प्रतिपाख्यायते आ+ख्या घञर्थे कर्म्मणि क। सुरानामगन्धद्रव्ये शब्दच०। [अमरः।

तालाङ्क पु० तालस्तालचिह्नितः अङ्कः ध्वजोऽस्य। बलदेवे।

तालादि पु० "तालादिभ्योऽण् वा" पा० विकारार्थे अण्प्रत्ययनिमित्ते शब्दसमूहे। स च गणः पा०गणसू०उक्तो यथा (तालाङ्कतुथि) वार्क्षिण इन्द्रालिश इन्द्राद्रश इन्द्रायुध चय, श्यामाक पीयूक्षा"। तालं धनुः पत्रे अञ्मयटौ। तालं तालमयं वा मद्यम्।

तालावचर पु०तालेनावचरति अव+चर–अच्। नटे त्रिका०

तालि स्त्री तल–प्रतिष्ठायां णिच्–इन्। भूम्यामलक्यां वा ङीप्। तत्रार्थे (ताड़ियात्) २ख्याते वृक्षे भरतः। "वर्मभिः पवनोद्धूतराजतालीवनध्वनिः" रघुः।

तालिक पु० तालेन करतलेन निर्वृत्तः ठक्। चपेटे (चापड़) (करतालि)। तालो+स्वार्थे क। २तालमूल्यां स्त्री हेमच०। ३लिखितस्य निबन्धने च शब्दर०। ४चपेटे स्त्री शब्दर०। ५ताम्रवल्ल्यां स्त्री राजनि०। "खरैरुत्सन्यदृश विधाय तालिकाम्" काशी० ५ अ०। "उच्चाटनीयः करतालिकानां दानादिदानीं भवतीभिरेवः" नैषधम्। [भावप्रे शुष्के च फलजयपालः।

तालित न० चुरा० तड़–क्त इस्य लः। १तुलितपटे २वाद्यभेदे।

तालिन् पु० व० व०। तलेनर्धिषा प्रोक्तमधीयते यौनकादिनि। तलोक्ताध्येऽण्। तालो वाद्यत्वेनास्त्यस्य इनि। २दत्ततालेत्रि० ३शिवे पु० "वैष्णवी पक्षवी तालो खड्गी कालघटः कटः" भा० अनु० १७। शिवनामोक्तौ।

तालिम्ब न० चु० तल–म्ब न णिच्त्वम्। पर्वते उणादिको०।

ताली स्त्री तालेन तन्निर्यासेन निर्वृत्ता अण्। (ताड़ी) १ताडजातसुरायाम्। तल–घञन्तात् अच् गौरा०ङीष्। (ताड़ियात्) २वृक्षभेदे, अमरः। ३तालमूल्याम्, (भूइआमला) ४वृक्षभेदे राजनि०। ५आढकख्याम्, (अरहर) शब्दरत्ना०। ६तालीशपत्राख्ये वृक्षे, रत्नमाला। ७तालकोद्घाटनयन्त्रे (काटि) कुञ्चिकायाञ्च। हेमच०। ८ताम्रवल्ल्यां ९तत्प्रचरपादके छन्दोभेदे यथा "ताली सा निर्दिष्टा। उद्दिष्टो भो यत्र" यथा "ज्ञानी ते जानीते। चारुत्वं वैरूप्यम्" छन्दोमञ्जर्याम्। अस्य नारीत्वमपि संज्ञोक्ता।

तालीपत्र न० ताल्या इव पत्रमस्य। तालीशपत्रे राजनि०।

तालीश न० तालीव रोगान् स्यति शो–ड। स्वनामख्याते वृक्षे राजनि० "तालीशं लघु तिक्तोष्णं श्वासकासकफानिलान्। निहन्त्यरुचिगुल्मामवह्निमान्द्रच्चयामयान्" भावप्र० २भूम्यामलक्यां मेदि०।

तालीशपत्र न०तालीशं रोगनाशकं पत्रं यस्य। १स्वनामख्याते वृक्षे, २भूम्यामलक्यान्च राजनि०।

तालीशाद्यमोदक पु०चक्रदत्तोक्ते मोदकभेदे यथा "तालीशपत्रं मरिचं नागरं पिप्पली शुभा। यवोक्तसंभागद्वया त्वगेले चार्द्धभागिके। पिप्पल्यष्टगुणा चात्र प्रदेया सितशर्करा। श्वासकासारुचिहरं तर्पणं दीपनं परम्। हृत्पार्श्वपृष्ठशीरोगग्रीहशोफज्वरापहम्। अर्दयतीसारकासघ्नं मूढवातानुलोमनम्। कल्पवेद्गुडिकां चैतच्चूर्णं पक्वासितोपलाम्। गुडिका ग्नेसंयोगाच्चूर्णाच्चतुरा स्मृता। पैत्तिके षाढ्यवन्त्येके शुभाय वंशलोचनम्"।

तालु न० तल्यतेनेन वर्णाः तल–ऊण् रस्य लः। जिह्वेन्द्रियाधिष्ठाने (तेलो) स्थानभेदे। "शुक्रतस्तालु निर्भिन्नं जिह्वा तत्रोपजायते। ततो नानारसो ज्ञाने जिह्वया योऽधिगम्यते" भाग०। "निर्भिन्नं तालु वरुणो लोकपालोऽधिगच्छति। जिह्वायांस्तेन च रसान् यथावत् प्रतिपद्यते" भाग० ३।६।१४श्लो० तालुनि चैकमस्थि तच्च कपालाकारं यथोक्तं सुश्रुते स्त्रीनीलुपक्रमे "एतानि पञ्चविधानि भवन्ति। तद्यथा कपालरुचकतरुणवलयनलकसंज्ञानि। तेषां जानुनितम्बांसगण्डतालुशङ्खशिरस्सु कपालानि" अस्थिसंख्याभेदोक्तौ च तत्रैव। तालुनि चैकमित्युक्तम्। "हया मङ्क्षा परिप्लुक्ततालवः" ऋतुसं०। स्वार्थे यावा०कन्। तालुकमप्यत्र अमरः।

**तालुजा** पुंस्त्री० तलुजर्षेर्गोत्रापत्यं गर्गा० यञ्। तलुजर्षेरपत्ये स्त्रियां बोद्धि० फक्फिञित्वात् ङीप्। तालुजायणी।

**तालुजिह्व** पुंस्त्री तालु एव जिह्वा यस्य। ईक्षीरे क्षेम०। तस्य जिह्वाशून्यत्वेऽपि तालुनैव रसास्वादनात्तथात्वम्। स्त्रियां टाप्।

**तालुपाक** पु० सुश्रुतोक्ते तालुगते रोगभेदे।

तालुगतास्तु गलशुण्डिका तुन्दिकेर्ष्यऽधुषो मांसकच्छपोऽर्बुदं मांसशुक्रातस्तालुपुप्पुटस्तालुशोषस्तालुपाक इति। "श्लेष्मास्रमस्थां तालुमूलात्प्रदृष्टो दीर्घः शोफो ध्मातवस्तिप्रकाशः। तृष्णाकासश्वासजुत् सम्प्रदिष्टो व्याधिर्वैद्यैः कण्ठशुण्डीति नाम्ना। शोफःस्यूतस्तोददाहप्रपाकी प्रागुक्ताभ्यां तृष्णिकेरी मता तु। शोफः स्तब्धो लोहितस्तालुदेशे रक्ताज्ज्ञेयः सोऽधुषोरुग्ज्वराढ्यः। क्रूरौत्सुक्योऽवेदनोऽशोफजन्मा रक्तो ज्ञेयः कच्छपः श्लेष्मणा स्यात्। पद्माकारं तालुमध्ये तु शोफं विद्यादृक्षादर्बुदं प्रोक्तलिङ्गम्। दुष्टं मांसं श्लेष्मणा नीरुजञ्च तालव्यस्थं मांसशुक्रातमाहुः। नीरुक् स्थायी कोलमात्रः कफात्स्यान्मेदोयुक्तात्पुप्पुटस्तालुदेशे। शोषोऽत्यर्थं दीर्यते चापि तालु श्वासो वातात्तालुशोषः स पित्तात्। पित्तं कुर्यात्पाकमत्यर्थघोरं तालव्येऽन्तालुपाकं वदन्ति" तेषां लक्षणान्युक्तानि। [इत्थम्।

**तालुपुप्पुट** पु० सुश्रुतोक्ते तालुगतरोगभेदे तालुपाकशब्दे

**तालुशोष** पु०सुश्रुतोक्ते तालुरोगभेदे तालुपाकशब्दे दृश्यम्।

**तालूर** पु० चु० तल–वा० ऊर। व्यावर्त्ते क्षेमच०।

**तालूषक** न० तल–वा० ऊषक। तालुनि। "अक्षतालूषके श्रोणीफलके च विनिर्दिशेत्" याज्ञ० "तालूषकं कक्कुदम्" मिता०।

**तावक** त्रि०तवेदम् युष्मद्+अण् एकवचने तवकादेशः। त्वत्सम्बन्धिनि स्त्रियां ङीप्। "स्वगं तत्ते तावकेभ्यो रघेभ्यः" ऋ० १।६४।१४। "तपः क्व वत्से! क्व च तावकं वपुः" कुमा०। [त्वत्सम्बन्धिनि।

**तावकीन** त्रि० तवेदम् युष्मद्+खञ् एकवने तवकादेशः।

**तावच्छस्** अव्य० तावत्+संख्यासंज्ञत्वात् वीप्सार्थे+शस्। तावत्तावत्प्रकारे "यावच्छो वै रसः क्षिप्तस्य त्वटा रूपाणि विकरोति तावच्छो वै तत्प्रजायते" तै० स०।

**तावत्** अव्य० तद्+वा० डावत्। १साकल्ये २अवधौ ३माने ४अवधारणे अमरः ५प्रशंसायाम् ६पक्षान्तरे शब्दरत्ना० ७संग्रामे ८अधिकारे च मेदि०। एतदेतेष्वर्थेषु शब्दार्थचि०। "भर्त्तापि तावत् क्रयकौशिकानाम्" रघुः तावत् तदेतेष्वर्थेषु। साकल्ये "तावत्प्रकीर्णाभिनवोपचारम्" अवधौ "वत्सु न सम्भावित एव तावत्" रघुः "तावत् आलोकमार्गमाप्निपर्व्वन्तम्" मल्लि०। मानार्थे "त्वमेव तावत् परिचिन्तय स्वयम्" कुमा० तावत् इति मानार्थे "यावन्मात्रं विचारणीयं तावन्मात्रमित्यर्थः" मल्लि०। अवधारणे "इन्द्रप्रस्थगमस्तावत् कारि मा सन्तु चेदयः" माघः। "मा कारि तावत् न क्रियतामेवेत्यर्थः" मल्लि०। तत्परिमाणमस्य तद्+वतुप् "आ सर्वनाम्नः" पा० आ। १०तत्परिमाणविशिष्टे त्रि०। "यावानर्थ उदपाने सर्वतः संप्लुतोदके। तावान् सर्वेषु वेदेषु ब्राह्मणस्य विजानतः" गीता "जम्बुद्वीपोऽयं तावत्प्रमाणविस्तारस्तावता क्षीरोदधिना वेष्टितः" भाग० ५।२०।२। क्रियाविशेषणत्वे न०। "पुरोऽस्य यावन्न भुवि व्यलीयत। गिरेस्तडित्वानिव तावदुच्चकैः" माघः। स्त्रियां ङीप् "यावती भंभवेद्भृत्तिस्तावतीं दातुमर्हति" मनुः। अस्य वत्वन्तत्वात् संख्यावत् कार्य्यं तावच्छः तावत्कः तावतिकः।

**तावतिक** त्रि० तावता क्रीतः संख्यात्वात् कन् "वतोरिड्वा" पा० वा इट्। तत्परिमाणवता क्रीते। पक्षे इडभावे तावत्क तत्रार्थे।

**तावतिथ** त्रि० तावतां पूरणः डट्। "वतोरिथुक्" पा० इथुक्। तावतां पूरणे। "यावत् सामिधेनि वेदेदमहं तावतिथेन वज्रेणेति" कात्या० श्रौ० ३।१।६।

**ताविष** पु० "तवेर्षिड्डा" उणा०टिषच्। स्वर्गादौ तविषशब्दार्थे तविषशब्दे दृश्यम्।

**तावुरि** पु० इषुराशौ कौपंगशब्दे २२७८ पृ० दृश्यम्।

**तासुन** पु० तस–वा० उनच्। शणडत्वे। तस्येदम् अण्। तासुन तत्सम्बन्धिनि स्त्रियां ङीप्। "सङ्काशतासुन्यो रसनाः" ज्यो० त० गोमिलः। "सङ्घः शरः तासुनः शणस्तद्भवा रसना मेखला तासुनी"।

**ति** अव्य० इति+वेदे पृषो०। इतिशब्दार्थे। "सङ्गोवाचास्तीह प्रायश्चित्तिरित्यस्तीति का ति पिता ते वेदेति" शत० ब्रा० ११।६।१।२। का प्रायश्चित्तिस्ति इति प्रश्नः।

**तिक** गतौ भ्वा० आत्म० सक०सेट्। तेकते अतेकिष्ट अदित् णिच् अतितेकत् त। तितेके। [अतेकीत्। तितेक।

**तिक** आस्कन्दे अधे च भ्वा० पर० सक० सेट्। तिङ्क्ते

तिक पु० तिक–क । ऋषिभेदे । तस्य गोत्रापत्यम् तिकाः फिञ् । तैकायनि तद्गोत्रापत्ये पुंस्त्री० । तस्य तिककितवादित्वात् इन्वे गोत्रप्रत्ययस्य लुक् बहुत्वार्थे । तिककितवाः तिककितव्योर्गोत्रापत्येषु । उत्कर्षा० चतुरर्थ्यां क्व । तिकीय तत्सन्निकृष्टदेशादौ त्रि० ।

तिककितवादि पु० "तिककितवादिभ्यो इन्वे" पा० उक्ते इन्वे बहुत्वे गोत्रप्रत्ययलुगनिमित्ते शब्दगणे । स च गणः पा०गणसू०उक्तो यथा "तिककितवा वह्वरभखदीरवाः । उपकलमकाः । पकलनरकाः वकनखदुदपरिषन्नाः उज्जकुम्भाः लडुमान्लखाः उत्तरगलडुटा कृष्णाजिनकृष्णसुन्दराः अष्टककपिष्ठलाः अग्निवेशदमेरुकाः" ।

तिकादि पु० गोत्रे फिञ् प्रत्ययनिमित्ते शब्दसमूहे स च गणः पा०ग०सू०उक्तो यथा "तिक, कित, संज्ञा, बाला, शिखा, उरस्, शाख, सैन्धव, यसना, रूप्य, राम्य, नील, अमित्र, मौकशुभ्र, कुरु, देवरथ, तैतल, औरस, कौरव्य, भौरिक, भौल्किकि, चौपयत, चैटयत, शौकयत, चैतयत, पाजवत, चन्द्रमस्, शुभ, गङ्गा, वरेण्य, सुषामन्, आरड, वडाका, खल्यका, हय, लोमक, उदश्व, यत्त" । "तिकादिभ्यः फिञ्" पा०उक्ते "तिक इत्येवमादिभ्योऽपत्येऽर्थे फिञ् स्यात् तैकायनिः कैतवायनिः ।

तिक्त पु० तेजयति तिज–क्त० कर्त्तरि क्त । रसभेदे (तेत) अमरः । २पर्पटकोषधौ न० हेमच० । ३गन्धे मेदि० । ४कटजवृक्षे पु० शब्दच० । ५वरुणवृक्षे शब्दमाला । एतेषां तिक्तरसाधिक्यात्तथात्वम् । ६तिक्तरसयुक्ते अमरः । "षड्विधस्तु रसस्तत्र" भावोक्तेर्यद्यपि तिक्तस्य पार्थिवसुष्यत्वं तथापि वायोरुपष्टम्भकत्वादेव पार्थिवे तिक्तरसस्य सम्भवः तदेतत् सुश्रुते व्यक्तीकृतं यथा "आकाशपवनदहनतोयभूमिषु यथासङ्ख्यमेकोत्तरपरिवृद्धाः शब्दस्पर्शरूपरसगन्धाः तस्मादाद्यो रसः परस्परसंसर्गात्परस्परानुप्रवेशात् सर्वेषु सर्वेषां सान्निध्यमस्त्युत्कर्षापकर्षौतु पश्चात्मम् । स खल्वाद्यो रसः प्रेषभूतसंसर्गाद्विद्यः षोढा विभज्यते । तद्यथा । मधुरोऽम्लो लवणः कटुकस्तिक्तः कषाय इति । ते च भूयःपरस्परसंसर्गात्त्रिधाद्विधा भिद्यन्ते । तत्र भूम्यम्बुगुणबाहुल्यान्मधुरः । भूम्यग्निगुणबाहुल्यादम्लः । तोयाग्निगुणबाहुल्याल्लवणः । वाय्वग्निगुणबाहुल्यात्कटुकः वाय्वाकाशगुणबाहुल्यात्तिक्तः । पृथिव्यनिलगुणबाहुल्यात्कषाय इति । तत्र मधुराम्ललवणा वातघ्नाः । मधुरतिक्तकषायाः पित्तघ्नाः । कटुतिक्तकषायाः श्लेष्मघ्नाः । तत्र वायुराकाशवायवीया पित्तमाग्नेयं श्लेष्मा सौम्य इति त एव रसाः स्वयोनिवृद्धिना अन्ययोनिप्रशमनाच्च । केचिदाङ्गरम्लोषोभीथत्वाच्छमतो रसा द्विविधाः सौम्या आग्नेयाश्च तत्र मधुरतिक्तकषायाः सौम्याः । कट्वम्ललवणा आग्नेयाः । मधुराम्ललवणाः स्निग्धा गुरवश्च । कटुतिक्तकषाया रूक्षा लघवश्च । सौम्याः शीता आग्नेयाश्चोष्णाः" ।

"रूक्षरूक्षखरशिशिरलघुविशदं खर्परबङ्गलौहपित्तं विशेषतः कषायमिति वायवीयं तद्वैशद्यलाघवग्लपनविरूक्षणविचारणकरमिति" ।

तिक्तरसलक्षणं तत्रोक्तं यथा "यो गले चोषमुत्पादयति मुखवैशद्यं जनयति भक्तरुचिं चापादयति कृमींश्च स तिक्तः । "तिक्तः शीतस्तृष्णामूर्च्छाज्वरपित्तकफान् जयेत् । रूक्षः स्वयमरोचिष्णुः कण्ठहृन्नाशनोऽनः । वातलोऽग्निकरो नासाशोषघ्नो रूक्षणो लघुः" । रूक्षः अन्येषु वस्तुषु रुचिमुत्पादयति । स्वयमरोचिष्णुः यथा निम्बः स्वयञ्च रोचते । अन्येषु रुचिं करोति (अतियुक्तस्य तिक्तस्य गुणाः) सोऽतियुक्तः शिरः शूलमन्यास्तम्भश्रमार्त्तिकृत् । कम्पमूर्च्छाक्षयाकारी बलशुक्रक्षयप्रदः" भावप्र० "तिक्तः पित्तकफक्लेदी विषकुष्ठज्वरापहः । दीपनः पाचनो रूक्षः कण्डू क्रमिहरो लघुः" आह्निकत० । "पित्तेन दूने रसने सितापि तिक्तायते हंसकुलावतंस !" नैष० सुगन्धे । "नादात्तमन्यकरिकुम्भमदाम्बु-तिक्तम्" रघुः तिक्तं सुरभि "कटुतिक्तकषायास्तु सौरभेऽपि प्रकीर्तिताः" केशवः मल्लि० "चूताङ्कुरस्वादकषायकण्ठः" मधुरकण्ठ इत्यर्थः । "तस्यास्तिक्तैर्वनगजमदैर्वासितं वान्तवृष्टिः" मेघ० । "तिक्तैः सुगन्धिभिस्तिक्तरसवद्भिश्च" मल्लि० । "तोयक्रीड़ानिरतयुवती स्नानतिक्तैर्मरुद्भिः" मेघ० ।

तिक्तक पु० तिक्त+संज्ञायां कन् । १पटोले अमरः २चिरतिक्ते (चिरता) शब्दर० । ३कृष्णखदिरे शब्दमा० । ४कटुदीड़े भावप्र० । एतेषां तिक्तरसत्वात्तथात्वम् स्वार्थे क । तिक्तरसे पु०तद्वति त्रि० स्त्रियां कापि अत इत्वम् तिक्तिका

तिक्तकन्दिका स्त्री तिक्तः कन्दोऽस्याः कप् कापि अतइत्वम् । गन्धपलाशायां राजनि० । [शब्दार्थचि० ।

तिक्तका स्त्री तिक्तेन रसेन कायति के–क । कटुतुम्ब्यां

तिक्तगन्धिका स्त्री तिक्तो गन्धो वेशोऽपि यस्याः । वराह-

क्रान्तायाम् अमरः। तस्याः सर्वत्र तिक्तत्वात् तथात्वम्
**तिक्तगुञ्जा** स्त्री गुञ्जेव तिक्ता राजदन्ता०। करञ्जे हारा०
**तिक्तघृत** न० सुश्रुतोक्ते घृतभेदे तत्प्रकारविधिस्तूक्तो यथा
"त्रिफलापटोलपिचुमर्दाटरूषकटुरोहिण्यीदुरालभात्राय माणापर्पटकार्थेतेषां द्विपलिकान् भागान् जलद्रोणे प्रक्षिप्य पादावशेषं कषायमादाय कल्कपेष्यार्थेभानि भेषजान्यर्द्धपलिकानि त्रायामाणासुरूक्तेन्द्रयवचन्दनकिराततिक्तानि पिप्पल्यर्द्धतानि घृतप्रस्थे समावाप्य विपचेदेतत्तिक्तकं नाम सर्पिः कुष्ठविषमज्वरगुल्मार्शोव्रणीदोषशोफपाण्डुरोगविसर्पपाण्डुग्रमनं चेति।
"तत्रहात् तत्रहाज्याप्तर्पयाम्ने प्रातस्तयोक्तिक्तघृतं प्रशस्तम्" सुश्रु०। तिक्तसर्पिरादयोऽप्यत्र न०।
**तिक्ततण्डुला** स्त्री तिक्तस्तण्डुलोऽन्नमस्यं यस्याः। पिप्पल्याम् राजनि०।
**तिक्ततण्डी** स्त्री कर्म०। कटुतुम्बीलतायां राजनि०।
**तिक्ततुम्बी** स्त्री कर्म०। कटुतुम्बयाम् (तितलाउ) रत्नमा०।
**तिक्तदुग्धा** स्त्री तिक्तं दुग्धं निर्यासो यस्याः। १क्षीरिण्याम्, राजनि०। २स्वर्णक्षीर्याम् जटा०।
**तिक्तधातु** पु० कर्म०। पित्ते धातौ राजनि०।
**तिक्तपत्र** पु० तिक्तं पत्रमस्य। (काकरोल) १कर्कोटके। २तिक्तपत्रके वृक्षभेदे त्रि० कर्म०। ३तिक्ते पत्रे न०।
**तिक्तपर्वन्** स्त्री तिक्तं पर्व ग्रन्थिर्यस्याः। १यन्थिदुर्वायाम् जटा०। २हिलमोच्यां ३शुद्रूच्यां ४यष्टिमधुलतायाञ्च मेदि०।
**तिक्तपुष्पा** स्त्री तिक्तानि पुष्पाण्यस्याः। (काकनादी) १पाठायाम् राजनि०। २तिक्तपुष्पके वृक्षभेदे त्रि०। कर्म०। ३तिक्ते पुष्पे न०।
**तिक्तफल** पु० तिक्तानि फलानि यस्य। १कटुकफले (निमोल्य) राजनि०। २यवतिक्तायां शब्दार्थचि० ३तिक्तफलके वृक्षभेदे त्रि०। ४ वार्त्ताक्यां ५षड्भुजायाञ्च स्त्री टाप् राजनि०। कर्म०। ६तिक्ते फले न०।
**तिक्तभद्रक** पु० भद्रं करोति णिच्-ण्वुल् तिक्तोऽपि भद्रकः कर्म०। पटोले शब्दच०।
**तिक्तमरिच** पु० तिक्तः मरिच इव। कटुकवृक्षे राजनि०।
**तिक्तयवा** स्त्री तिक्तः यव इन्द्रयवस्तोऽस्त्यत्र अच्। शक्विन्यां पारस्करस्कन्दवृक्षे।
**तिक्तरोहिणी** स्त्री तिक्ता सती रोहति रुह-णिनि कर्म०। कटुकायाम्(कट्की) स्वार्थे क हुस्वः। तिक्तरोहिणिका। तत्रार्थे राजनि०।
**तिक्तवल्ली** स्त्री कर्म०। १मूर्वालतायाम् रत्नमा०। २तिक्तलतामात्रे च।
**तिक्तवीजा** स्त्री तिक्तानि बीजानि यस्याः। १कटुतुम्ब्याम् राजनि०। २तिक्तबीजके वृक्षभेदे त्रि०। कर्म०। ३तिक्ते बीजे न०।
**तिक्तशाक** पु० तिक्तः शाकोऽस्य। १वरुणवृक्षे, २खदिरवृक्षे ३पटसुन्दरवृक्षे च मेदि०। कर्म०। ४तिक्ते शाके न०।
**तिक्तसार** पु० तिक्तः सारो निर्यासोऽस्य। १खदिरे रत्नमा०। २दीर्घरोहिण्यृक्षे न० रत्नमा०। ३तिक्तसारके वृक्षभेदे त्रि०। कर्म०। ४तिक्ते सारे अस्त्री।
**तिक्ता** स्त्री तिक्तो रसोऽस्त्यस्य अच्। १कटुरोहिण्यां मेदि० २पाठायां रत्नमा० ३यवतिक्तालतायां ४षड्भुजायां राजनि० ५स्त्रिकन्यां भावप्र०।
**तिक्ताख्या** स्त्री तिक्तेति आख्या यस्याः। कटुतुम्ब्यां राजनि० तिक्ताङ्गवेल्लत्व। [याम् राजनि०।
**तिक्ताङ्गा** स्त्री तिक्तमङ्गमस्त्यस्य अच्। पातालगरुडलता-
**तिक्तिका** स्त्री तिक्ता स्वार्थे संज्ञायां वाक हुस्वे अत इत्त्वम्। कटुतुम्ब्याम् शब्दार्थचि०।
**तिग** हिंसायाम् आक्रन्दे च भ्वा०पर०सक० सेट्। तिग्नोति अतेगीत्। तितेग। "अग्निं जेगीयसिगितैरित्ति" ऋ० १।१४३।५। "तिगितैर्निशितैः" भा०।
**तिग्म** न०तिज-मक् जस्य गः। १तीक्ष्णे स्वर्णे २तहति त्रि०। अमरः। ३ वज्रे निघण्टुः। "तिग्मवीर्यविघाह्येते दन्दशूका महाबलाः" भा० आ० २० अ०।
**तिग्मकर** पु० तिग्मः करः किरणो राजत्वाद्यो वाऽस्य। १सूर्ये त्रिका०। २उग्रराजत्वाद्यके रूपे च। कर्म०। ४तिग्मे करे पु०।
**तिग्मदीधिति** पु० तिग्मा दीधितिरस्य। तिग्मांशौ सूर्ये।
**तिग्ममन्यु** त्रि० तिग्मो मन्युरस्य। १उग्रक्रोधके। २शिवे पु० "अङ्गिरो नक्षत्रस्तिग्ममन्युः सुवर्चसः" भा० अनु० १७अ०।
**तिग्मरश्मि** पु० तिग्मा रश्मयोऽस्य। १सूर्ये। २खररश्मिके त्रि०। कर्म०। ३खरे रश्मौ पु०।
**तिग्मांशु** पु० तिग्मा अंशवो यस्य। १सूर्ये जटाधरः "तिग्मांशुरस्तंगतः" जयदेवः। "तिग्मांशुरश्मिच्छुरितान्मदुरात्" भट्टिः। २खरकिरणके त्रि०। कर्म०। ३खरे किरणे पु०। [तितेघ।
**तिघ** घातने भ्वा० पर० सक० सेट्। तिघ्नोति अतेघीत्।

**तिज** तीक्ष्णीकरणे, चुरा० उभ० सक० सेट्। तेजयति ते अतीतिजत् त। "कुसुमचापमतेजयदंशुभिर्हिमकरः" रघुः "तेजयित्वा तु तत्सैन्यम्" रामा० अर० ३१ स०। "तेजिता बलदर्पाभ्याम्" हरिवं० १२०८। "सा मयोक्तेन तेजिता" ६६४४ श्लो०। तेजः।

**तिज** क्षान्तौ क्षमायां स्वार्थे सन् निगाने न सन् भ्वा० आत्म० सक० सेट्। तितिक्षते तेजते। अतितिक्षिष्ट अतेजिष्ट। "आगमापायिनोऽनित्यास्तांस्तितिक्षस्व भारत!" गीता "क्षिप्रं धृषिं तितिक्षियते" शत० ब्रा० ३।१।२।१४। "अतिवादांस्तितिक्षेत" मनुः "आपन्ने पादं तितिक्षमाणमभ्यापत्तितिक्षितम्" भा० आ० ८।७० अ० "तितिक्षन्ते अभिशस्तिं जना नाम" ऋ० ३।३०।१।

**तिजिन** पु० तिज-इनच् किच्च। चन्द्रे उणा०।

**तिणिश** पु० तिल्वकवृक्षे लोभट्टमे। "न्यग्रोधाश्वत्थतिल्वक-हरिद्रुमयोः" कात्या० श्रौ० सूत्रे "तिल्वकस्तिणिशः" कर्कः।

**तिण्टी** स्त्री तिहति (तेण्डो) शब्दच०।

**तितउ** पु० तन-डउ सन्वच्च डउ इति निर्देशात् न सन्धिः। १चालनाख्ये अमरः। २चालने न० उज्ज्वलदत्तः। "चुडुक्किड्-समोपेतं चालनं तितउ स्मृतम्" लिङ्गे न० स्त्रीत्वमपि। "सक्तुमिव तितउना पुनन्तः" ऋ० १०।७१।२। "इमामूच-मधिक्षत्य" निरु० ४।८। "तितउ परिपवनं भवति तत-वहा तद्वद्वातिलमात्रत्वद्वसति वा" अन्यथा निरुक्तिरत्रा स्त्रीत्वञ्चोक्तम्।

**तितिक्ष** त्रि० तिज-स्वार्थे सन्-अच्। १शीतोष्णादिद्वन्द्वसो-ढरि २क्षमिभेदे पु० तस्य गोत्रापत्यं गर्गा० यञ्। तै-तिक्ष तद्गोत्रापत्ये द्यून्यपत्ये यञन्तत्वात् फक्। तैति-क्षायण तद्गोत्रजे द्यून्यपत्ये पुंस्त्री०।

**तितिक्षा** स्त्री तिज-स्वार्थे सन् भावे अ। १क्षमायां शीतो-ष्णादिद्वन्द्वसहने "सहनं सर्वदुःखानामप्रतीकारपूर्वकम्। चिन्ताविलापरहितं सा तितिक्षा निगद्यते" विवेकचू०। सा संज्ञाताऽस्य तारा० इतच्। तितिक्षित क्षान्ते सोढरि जटाधरः।

**तितिक्षु** त्रि० तिज-स्वार्थे सन्-उ। तितिक्षाशीले। "शान्तो दान्त उपरतस्तितिक्षुः श्रद्धावान् समाहितो भूत्वा आत्म-न्यात्मानमवलोकयेत्" वेदा० सा० धृता श्रुतिः। "अक्रोधनः क्रोधनेभ्यो विशिष्टस्त्वया तितिक्षुरतितिक्षोर्विशिष्टः" भा० आ० ८७ अ०।

**तितिभ** पु०तितीति भक्षयति भक्ष-क। इन्द्रगोपकीटे खद्योते हेमच०। [स्त्रियां जातित्वात् ङीष्।

**तितिर** पुंस्त्री० तित्तिरि+पृषो०। तित्तिरिखगे राजनि०

**तितिल** न० तिल-क वा० द्वित्वञ्च। १नन्दके (नान्दा) मृण्मये पात्रभेदे २तैलिकरूपे ३तिलपिष्टे च अजयपालः

**तित्तिर** पुंस्त्री तित्ति इति शब्दं रौति रु-वा० ड। (तितिर) खगभेदे शब्दर०। स्त्रियां जातित्वात् ङीष्। "कपिञ्जलास्तित्तिराश्च कलविङ्काश्च सर्वशः" "तस्माद्ब्रह्मा-द्विनिष्पेतुस्तित्तिराश्चेव पाखण्ड!" भा० उ० ८अ०।

**तित्तिरि** पु० तित्ति इति शब्दं रौति रु-वा० डि।(तितिर) खगभेदे अमरः। स्त्रियामनुषङ्गजातित्वात् "इतोऽनु-षङ्गजातेः" पा० ङीष्। तित्तिरिः कृष्णवर्णः स्यात् स तु गौरः कपिञ्जलः। तित्तिरिर्वर्णदो वाह्यो दिक्षा-दोषक्षयापहः। श्वासकासज्वरहरस्वाङ्गौरोऽधिको गुणैः" भाव०प्र०। तित्तिरिरूपधरेण याज्ञवल्क्य-वान्तयजुर्ग्रहणे मुनिभेदे तत्कथा "वैशम्पायनशिष्या वै चरकाध्वर्यवोऽभवन्। यज्ञैरर्द्यङ्गहत्याऽऽक्रान्तपर्व खगुरोर्व्रतम्। याज्ञवल्क्यश्च तच्छिष्य आहाहो भगवन्! कियत्। चरितेनाल्पसाराणां चरिष्येऽहं सुदुश्चरम्। इत्युक्तो गुरुरत्याह कुपितो याज्ञं त्वया। विप्राव-मन्त्रा शिष्येण मदधीतं त्यजाशिति। देवरातसुतः सोऽपि छर्दित्वा यजुषां गणम्। ततो गतोऽथ मुनयो ददृशुस्तान् यजुर्गणान्। यजूंषि तित्तिरा भूत्वा तल्लो-लुपतयाऽददुः। तैत्तिरीया इति यजुःशाखा आसन् सुपेशलाः। भाग० १२।६।५८।

तित्तिरिणा प्रोक्तमधीयते वृद्ध्। तैत्तिरीय तित्तिरिप्रोक्त-च्छन्दोब्राह्मणाध्येतृषु ब० व०। तित्तिरिणा अधीता वृद्ध्, ङीष्। तैत्तिरी कृष्णयजुःशाखायां स्त्री।

**तित्तिरीक** न०तित्तिरेः पक्षदाहेन जातम् वा०ईक। तित्ति-रिपक्षदाहेन जाते अञ्जनभेदे। "अञ्जनं तित्तिरीकञ्च नलदं पत्रसुत्पलम्" सुश्रु०। अत्र तित्तिड़ीकमिति पाठा-न्तरम्। दग्धतित्तिड़ीकजातेऽञ्जने इति तदर्थः।

**तित्थ** पु० तिज-थक् नि० जलोपः।१यज्ञे २काले च त्रि०कौ० २काले त्रिका०। ३प्रावृट्काले संक्षिप्तसा०।

**तिथि(थी)** पुंस्त्री० अत-इथिन् पृषो० वा ङीष्। १पञ्चदशसु चन्द्रकलाक्रियारूपासु प्रतिपदादिषु, अमरः २पञ्चदश-सङ्ख्यायाञ्च। अस्य निरुक्त्यादिकं कालमाधवीये उक्तं यथा "अथ तिथयोनिर्णीयन्ते। तत्र तिथिशब्दस्तनोतेर्धा-

र्द्धिप्रदः । तनोति विस्तारयति वर्द्धमानां क्षीयमाणां वा चन्द्रकलामेकां यः कालविशेषः सा तिथिः । यद्वा यथोक्तकलया तन्यत इति तिथिः । तदुक्तं सिद्धान्तशिरोमणौ "तन्यते कलया यस्मात्तस्मात्तिथयः स्मृताः" इति । एतदेवाभिप्रेत्य स्कान्दे पठ्यते "अमाषोडशभागेन देवि ! प्रोक्ता महाकला । संस्थिता परमा माया देहिनां देहधारिणी । अमादिपौर्णमासान्ता या एव शशिनः कलाः । तिथयस्ताः समाख्याताः षोडशैव वरानने !" इति । अयमर्थः । या महामाया आधारूपा देहिनां देहधारिणी संस्थिता या सा चन्द्रमण्डलस्य षोडशभागेन परिमिता चन्द्रदेहधारिण्यमानाम्नी महाकलेति प्रोक्ता क्षयोदयरहिता नित्या तिथिसंज्ञिकैव । इतरा अपि पञ्चदश कला दिवसव्यवहारोपयोगिन्यः क्षयोदयवत्यः पञ्चदश तिथयो भवन्तीति तिथयः षोडशैवेत्यविरुद्धं वचनमिति । श्रुतिस्मृत्यिर्थे पक्षनिर्णय एवोदाहृतः । "तस्य रात्रयः पञ्चदश कला ध्रुवैवास्य षोडशी कलेति" । एवं सत्यत्र सामान्यविशेषरूपेण तिथिद्वैविध्यमुक्तं भवति । तत्र देवयमेत्युक्ता क्षयोदयवर्जिता ध्रुवा षोडशी कला तदुक्तः कालस्तिथिसामान्यम् । यास्त्वपिष्टा इन्द्वित्ययोपेताः पञ्चदश कलास्ताभिर्विशिष्टाः कालविभागास्तिथिविशेषाः । तासां पञ्चदशानामेकैकां कलां वह्न्यादयः प्रजापत्यन्ताः पञ्चदश देवताः क्रमेण पिबन्ति । तत्र वह्निना कला प्रथमं पीयत इति प्रथमेत्युच्यते । तया युक्तः कालविशेषः प्राथम्यवाचिना प्रतिपच्छब्देनाभिधीयते । एवं द्वितीयादीनां पञ्चदशानां तिथीनां नामान्यवगन्तव्यानि । ता एताः कृष्णपक्षतिथयो भवन्ति । पुनश्च ताः पीताः कला अनेनैव क्रमेण तत्तत्पालयङ्ग्यादिदेवताभ्यो निर्गत्य चन्द्रमण्डलं पूरयन्ति । ताभिर्युक्ताः कालविशेषाः शुक्लपक्षगताः प्रतिपदाद्यास्तिथयो भवन्ति । वह्न्यादिदेवतानां कलापानं सोमोत्पत्तौ पठ्यते । तथाहि "प्रथमां पिबते वह्निर्द्वितीयां पिबते रविः । विश्वे देवास्तृतीयान्तु चतुर्थीं सलिलाधिपः । पञ्चमीं तु वषट्कारः षष्ठीं पिबति वासवः । सप्तमीमृषयो दिव्या अष्टमीमजएकपात् । नवमीं कृष्णपक्षस्य यमः प्राश्नाति वै कलाम् । दशमीं पिबते वायुः पिबत्येकादशीसमा । द्वादशीं पितरः सर्वे समं प्राश्नन्ति भागशः । त्रयोदशीं धनाध्यक्षः कुबेरः पिबते कलाम् । चतुर्दशीं पशुपतिः पञ्चदशीं प्रजापतिः । निपीतः कलया शेषश्चन्द्रमा न प्रकाशते । कलाषोडशिका या सा त्वपः प्रविशते सदा । अमायान्तु सदा सोम ओषधीः प्रतिपद्यते । तमोषधिगतं गावः पिबन्त्यन्नमतश्च यत् । तत्क्षीरमसृतं भूत्वा मन्त्रपूतं द्विजातिभिः । हुतमग्निषु यज्ञेषु पुनरायायते शशी । दिने दिने कलाभिश्च पौर्णमास्यान्तु पूर्यते" । ज्योतिःशास्त्रे तु सिद्धान्तशिरोमण्यधिकारेण तिथिरेवं प्रदर्शिता । "अर्कांद्विनिसृतः प्राचीं यद्यात्यहरहः शशी । तच्चन्द्रमानमंशैस्तु ज्ञेया द्वादशभिस्तिथिरिति" । अयमर्थः । सूर्यमण्डलस्य अधःप्रदेशवर्त्ती शीघ्रगामी चन्द्र ऊर्द्ध्वप्रदेशवर्त्ती मन्दगामी सूर्यस्तथा सति तयोर्गतिविशेषवशात् दर्शे चन्द्रमण्डलमन्यूनमनतिरिक्तं सूर्यमण्डलस्याधोभागे व्यवस्थितं भवति तदा सूर्यरश्मिभिः साकल्येनाभिभूतत्वाच्चन्द्रमण्डलमीषदपि न दृश्यते । उपरितने शीघ्रगत्या सूर्यांद्विनिःसृतः शशी प्राचीं याति । त्रिंशदंशोपेतराशौ द्वादशभिरंशैः सूर्यसङ्गञ्च गच्छति । तथा चन्द्रस्य पञ्चदशसु भागेषु प्रथमभागो दर्शनयोग्यो भवति । सोऽयं भागः प्रथमकलेत्यभिधीयते । तत्कलाभिव्याप्तिपरिमितः कालः प्रतिपत्तिथिर्भवति । एवं द्वितीयादितिथिष्ववगन्तव्यमिति । तदेतद्विष्णुधर्मोत्तरे विस्पष्टमभिहितम् "चन्द्रार्कौ गत्वा कालस्य परिच्छेदो यदा भवेत् । तदा तयोः प्रवक्ष्यामि गतिमाश्रित्य निर्णयम् । भगणेन समत्वेन ज्ञेया द्वादश राशयः । त्रिंशांशश्च तथा राशेर्भाग इत्यभिधीयते । आदित्याद्विप्रकृष्टस्तु भागैर्द्वादशकं यदा । चन्द्रमाः स्यात्तदा राम ! तिथिरित्यभिधीयते" इति । सेयं द्वादशभिर्भागैः सूर्यसङ्गतिकृतयो प्रथमा चन्द्रकला शुक्लद्वयोपेतशृङ्गरेखाकारा शौक्ल्यमीषदुपयाति । उत्तरोत्तरदिनेषु सूर्यमण्डलविप्रकर्षतारतम्यानुसारेण शौक्ल्यमुपचीयते । अनयैव रीत्या सन्निकर्षतारतम्येन मेचकत्वमुपचीयते । तदेतदुक्तं सिद्धान्तशिरोमणौ "उपचयमुपयाति शौक्ल्यमिन्दोरयजत इवं व्रजतश्च मेचकत्वम् । जलमयमण्डलस्य गोलकत्वात् प्रभवति तीक्ष्णविषाणरूपताऽस्येति" । सूर्याचन्द्रमसोर्यौ सन्निकर्षविप्रकर्षौ तयोरवसानं दर्शपूर्णिमयोः सम्पद्यते । तदाह गोभिलः "यः परो विप्रकर्षः सूर्याचन्द्रमसोः सा पौर्णमासी । यः परः सन्निकर्षः साऽमावास्येति" नन्वत्र चन्द्रकलानां

सूर्य्यप्रवेशनिर्गमौ प्रतीयेते सोमोत्पत्तौ तु वह्न्यादिदेवतासु। नायं दोषः चक्षुरादिदर्शनापेक्षया ज्योतिःशास्त्रस्य प्रवृत्तत्वात्। सोमोत्पत्तौ तु वह्न्यादिदेवतानां तत्तत्कलाप्रयुक्ता दृष्टिर्विवक्षिता। यदि सूर्य्ये प्रवेशनिर्गमौ यदि वा वह्न्यादिदेवतासु, सर्वत्रापि कलाप्रयुक्ता एव प्रतिपदादितिथयः। ननु सावनदिनेषु सौरदिवसेषु च निर्णयसमपेक्ष्य चान्द्रतिथिरेव कुतो निर्णयोद्यम इति चेत्। सन्देहसद्भावादिति ब्रूमः। न खलु सौरसावनादिदिवसयोः सन्देहसद्भावोऽस्ति नियतपरिमाणत्वात्। तच्च ब्रह्मसिद्धान्तेऽभिहितम् "सावनं स्यादहोरात्रसूदयादोदयाद्रवेः। रवेरिष्टं तु राश्यंशलिप्तिकासम्भोग ऐन्दवमिति"। एकस्मिन् राशौ यावन्तं कालं रविर्वर्त्तते तावतः कालस्य विंशो योऽयमंशः स सौरो दिवसः तिथिरेका कला तत्सम्भोग इन्दोर्यावता कालेन निष्पद्यते तदैन्दवं दिनम्। न चात्र सौरसावनयोरिव चान्द्रेऽपि दिने सन्देहाभावः शङ्कनीयः ह्रासवृद्धिवशेन सन्देहसद्भावात्। ह्रासवृद्धी च गणेन दर्शिते "खर्वो दर्शस्तथा हिंसाक्षितिधं तिथिलक्षणम्। धर्माधर्मक्षयाद्देवं तिथिस्त्रेधा विवक्षितेति"। खर्वा समतिथिः। दर्शा वृद्धियुक्ता हिंसापक्षययुक्ता। तस्यैतस्य त्रैविध्यस्य विपरिवर्तनविशेषेण तिथिः संपूर्णा खण्डा चेति द्वैविध्यमापद्यते। तत्र संपूर्णा स्कन्दपुराणे दर्शिता "प्रतिपत्प्रभृतयः सर्वा उदयादुदयाद्रवेः। संपूर्णा इति विख्याता हरिवासरवर्जिताः" इति। हरिवासर एकादशी। या तु नोक्तलक्षणा सा खण्डतिथिः। तत्र संपूर्णायां विधिनिषेधयोर्नास्ति सन्देहः। खण्डतिथौ तु विधिनिषेधव्यवस्थामाह गार्ग्यः। "निमित्तं कालमादाय प्रवृत्तिर्विधिनिषेधयोः। विधिःपूज्यतिथौ तत्र निषेधः कालमात्रके। तिथीनां पूज्यता नाम कर्मानुष्ठानयोग्यता। निषेधस्तु निरुक्त्यात्मा कालमात्रमपेक्षते" इति। एवञ्च सति खण्डतिथौ पूज्यत्वं निर्णेतव्यं भवति। तत्र प्रतिपदमारभ्य पञ्चदशश्लोकास्तिथयः क्रमेण निर्णीयन्ते।"

कालमाधवीयग्रन्थे विस्तरोद्दृष्टव्यः। कारिकाभिश्च माधवेन तत्तत्तिथिभेदेषु खण्डविशेषग्राह्यता प्रसङ्गागतमासादिनिरूपणपूर्वकं दर्शिता यथा

"व्याख्याय माधवाचार्यो धर्मान् पाराशरानथ। तदनुष्ठानकालस्य निर्णयं वक्तुमुद्यतः। अर्थोऽनुक्रम्यते श्लोकैरखिलो निर्णयोचितः। तावतैवानुतिष्ठानुर्निःसन्देहं प्रवर्त्तताम्। ततो मीमांसुचित्तस्य समाधानाय तत् पुनः। विवरिष्ये यथान्यायं श्रुतिस्मृति वचोबलात्। पञ्च प्रकरणान्यत्र तेषूपोद्घातवत्सरौ। प्रतिपच्छिष्टतिथयो नक्षत्रादिरिति क्रमः। उपोद्घाते कालसत्त्वं तस्य निर्णययोग्यता। ईश्वरो नित्यकालात्मा चिन्तनीयः स कर्म्मसु। जन्यकालेऽब्दसख्यत्व सङ्गमेतच्चतुष्टयम्। अब्दायनर्त्तुमासाश्च पञ्चः प्रकरणान्तरे २। अब्दः पञ्चविधश्चान्द्रो व्रतादौ तिलकादिके। सृजन्मादिव्रते सौरो गोसत्रादिषु सावनः। तयोर्याचार्यसेवादौ विकल्पश्चान्ने निजेच्छया। आयुर्दाये तु नाक्षत्रो वार्हस्पत्योऽधिवत्सरः। चान्द्राणां प्रभवादीनां षष्ट्यब्दे पञ्चके युगम्। संपरीदादन्त्यिष्टयब्दपूर्वास्तु वत्सराः। तिस्रो यत्रो वस्त्रधान्ये रजतं दीयतेऽत्र तु। उर्ध्वे कर्म्मणि यज्ञे च स्रोऽयने दक्षिणोत्तरे। वसन्तादृतवो द्वेधा चान्द्राः सौराश्च चान्द्रकाः। चैत्राद्या अथ मीनाद्या मेषाद्या वा विवक्षतः। तेष्वाधानादयस्तत्तद् यथामूर्त्तिव्रतपूजनम्। मासास्तु सावनः सौरश्चान्द्रो नाक्षत्र इत्यमी। दर्शान्तः पूर्णिमान्तो वा चान्द्रोऽसौ विप्रवैश्ययोः। सौरोराज्ञः सावनस्तु यज्ञे ज्योतिष्टिके परः। माघादिमासभेदेषु तिलदानादयः स्मृताः। चान्द्रोऽधिमासोऽसंक्रान्तः शोभनर्भवति चोत्तरे। असंक्रान्तावेकवर्षे द्वौ चेत्सर्पसमादिमः। अथमासो द्विसंक्रान्तः स चाहस्पतिसंज्ञकः। एतौ त्याज्यौ विवाहादौ संसर्पाहस्पतौ उभौ। गुह्यो शौते तथा खाते मलमासो विविच्यते। काम्यारम्भं तत्समाप्तिं मलमासे विवर्जयेत्। आरब्धं मलमासात् प्राक्कृच्छ्रमलादिकं च यत्। तत्समाप्यं सावनस्य मासस्यानतिलङ्घनात्। आरम्भस्य समाप्तेश्च मध्ये चेत् स्यात् मलिम्लुचः। प्रवृत्तमखिलं काम्यं तदातुष्टेयमेव तु। कारीर्यादि तु यत् काम्यं तस्यारम्भसमापने। कार्यं कालविलम्बस्य प्रतीक्षाया असम्भवात्। अनन्यगतिकं नित्यमग्निहोत्रादि न त्यजेत्। गत्वन्तरयुतं नित्यं सोमयागादि वर्जयेत्। अगति यद्दर्शस्नानं जातेष्टि,र्गतिसंयुतम्। इयं नैमित्तिकं तस्य व्यवस्था नित्यवन्मता। गुह्यमास स्रुतानां स्नानमलिने प्रथमाब्दिकम्। मलमासस्रुतानान्तु मले स्यादाब्दिकान्तरम्। दैवे सख्यः शुक्लपक्षः श्राद्धः पित्र्ये विशिष्यते। तृतीये तु २ प्रकरणे

वर्णिता प्रतिपत्तिथिः। प्रतिपद्याम विज्ञेया चन्द्रस्य प्रथमा कला। शुक्लपक्षे विशेषेन्द्रं कृष्णपक्षे विनिःसरेत्। शुद्धा विद्धा तिथिः शुद्धा हीनातिथ्यन्ययाऽखिलं। उदये पूर्वया तिथ्या विध्यते त्रिमुहूर्त्तकैः। सायन्तनोत्तरया तद्वत्र्यूनया तु न विध्यते। वेध्यापि त्रिमुहूर्त्तैव न न्यूना वेधमर्हति। शुद्धायां नास्ति सन्देहो दैवे पित्र्ये च कर्म्मणि। उपवासस्यैकभक्तं नक्तं चायाचितं व्रतम्। दानस्य षड्विधं दैवं क्रमादत्र विविच्यते। एकोद्दिष्टं पार्वणञ्च पित्र्यं द्विविधमीर्यते। शुक्लपक्षे दर्शविद्धा कृष्णे विद्धा द्वितीयया। उपोष्या प्रतिपच्छुक्ले सख्या स्यादपराह्णिकी। तदभावे तु सायाह्नव्यापिनी परिग्रह्यताम्। प्रातःसंगवमध्याह्नापराह्णाः सायमित्यसौ। अवाङ्मा पञ्चधा भागो मुख्यो द्विजादिभागतः। अभावेऽपि प्रतिपदः संकल्पः प्रातरिष्यते। तिथिक्षियातनोऽर्वाक् चेत् तिथ्यन्ते पारणं भवेत्। वङ्गाद्युत्सवं च पूर्वेद्युरुपवासवदाचरेत्। सङ्क्रतिथ्यन्तराये तु तिथिभेदोऽपि ग्रह्यताम्। शुद्धाऽधिका तु कृष्णापि पूर्वा संपूर्त्तिसंभवात्। ग्रहीतव्या त्वेकभक्ते मध्याह्नव्यापिनी तिथिः। परेद्युरेव पूर्वेद्युरेव व्याप्तिर्दिनद्वये। नोभयत्रोभयत्रांशे साम्यं वैषम्यमित्यमी। षट् पक्षास्तेषु चैकैकव्याप्तौ स्यैवात्र ग्रह्यताम्। द्विनद्वेऽपि तदव्याप्तावव्याप्तौ चैकदेशतः। समव्याप्तौ च पूर्वैव वैषम्ये त्वधिकेष्यताम्। अन्याङ्गस्यैकभक्तस्य कालस्तद्व्रतसारतः। उपवास प्रतिनिधेस्तिथिः स्यादुपवासवत्। प्रदोषव्यापिनी नक्ते तिथिर्व्याप्तिर्दिनद्वये। अव्याप्तिर्वाधयांशेन व्याप्तिः स्यात् सर्वथोत्तरा। सौरनक्ते तु सायाह्नव्यापिनी न प्रदोषगा। अयाचिते तु तिथयः स्वीकार्याः उपवासवत्। सोदयत्रिमुहूर्त्तायां कुर्याद्दानं व्रतानि च। उभयत्र तथात्वे तु पूर्वेद्युस्तदनुक्तितः। परत्रैव तथात्वं चेत् पूर्वा ग्राह्या तिथिद्वये। तिथेः साम्ये च हानौ च ग्रह्यतां तिथिरुत्तरा। अस्तर्क्षे चैकदेशस्य व्याप्तौ पूर्वैव ग्रह्यताम्। एकोद्दिष्टे तु मध्याह्नयुक्ता स्यादेकभक्तवत्। एकदेशे समव्याप्तौ द्वये पूर्वाऽन्यथोत्तरा। कृतपाद्य पराह्णस्य व्याप्तिरादिह उत्तमा। तदभावेऽपराह्णस्य व्यापिका ग्रह्यतां तिथिः। द्वये पूर्वोत्तरा ह्रस्वा व्याप्तिर्वेदपराह्णयोः। न याह्नतिथिगौ ह्रस्वक्षयावूर्द्धतिथेस्तु तौ। साम्ये त्वर्द्धतिथेर्याह्ना परविद्धैव ह्रस्ववत्। न स्यूनत्वपराह्णौ चेत् पूर्वा स्यात् कृतपो हया। वैधस्यैकदेशस्य व्याप्तौ याह्ना महत्त्वतः। साम्येन चेत् द्वये पूर्वा परा स्याद्द्विसाम्ययोः। द्वित्रिसाम्यक्षया याह्ना तिथिगा नोर्द्धगा दृढ़। द्वितीयाद्यास्तु पर्वान्तास्तुर्य्यप्रकरणोदिताः। सङ्क्षारणीयः सामान्यतिथिषु प्रतिपत्क्षयः। क्वचित् क्वचिद्विशेषोऽस्ति सोऽयमत्राभिधीयते। पूर्वेद्युरसती प्रातः परेद्युस्त्रिमुहूर्त्तगा। सा द्वितीया परोपोष्या पूर्वविद्धा ततोऽन्यथा। रम्भाद्वितीया पूर्वाद्युत्तरा स्याद् व्रतान्तरे। परेऽह्नि नास्ति चेत् पूर्वविद्धाप्यस्तु व्रतान्तरे। मुहूर्तमात्रसत्त्वेऽपि दिने गौरीव्रतं परे। शुद्धाधिकायामप्येवं गणयोगप्रशंसनात्। चतुर्थी तु परोपोष्या गणनाथव्रतस्य तु। मध्याह्नव्यापिनी पूज्या तद्वद्भागचतुर्थ्यपि। परेद्युरेव मध्याह्नव्याप्तौ विघ्नस्य सोत्तरा। अन्यथा पूर्वविद्धैव माघयोगप्रशस्तितः। पूर्वेद्युरेव तद्व्याप्तौ पूर्वा सर्वप्रिया तिथिः। नो चेत् सर्वस्य पञ्चम्या योगेऽल्पत्वं प्रशस्यते। गौर्याः शुद्धाजयायुक्ता, नागविद्धा निषिद्ध्यते। सर्वत्र पञ्चमी पूर्वा याह्ना स्कन्दव्रते परा। नागविद्धा स्कन्दषष्ठी सा निषिद्धा व्रतान्तरे। उत्तरस्या अलाभे तु नागविद्धापि ग्रह्यताम्। विनायाद्या परेऽभावात् नागविद्धा न दोषकृत्। सप्तमी पूर्वविद्धैव व्रतेषु निखिलेष्वपि। अलाभे पूर्वविद्धायाः परविद्धापि ग्रह्यताम्। व्रतमात्रेऽष्टमी कृष्णा पूर्वा शुक्लाष्टमी परा। दूर्वाष्टमी तु शुक्लापि पूर्वविद्धा विधीयते। पक्षद्वेऽप्युत्तरैव शिवशक्तिमहोत्सवे। ज्येष्ठर्क्षयोगे पूर्वैव याह्ना ज्येष्ठाव्रते तिथिः। मध्याह्नादूर्द्धसत्त्वं चेत् परेद्युः सा प्रशस्यते। ज्येष्ठर्क्षभानुवाराभ्यां युक्ताष्टम्यतिदुर्लभा। जयन्त्याख्यं व्रतं भिन्नं कृष्णजन्माष्टमीव्रतात्। शुद्धा च सप्तमी विद्धेत्येवं जन्माष्टमी द्विधा। सप्तमी चेद्विशीयात्प्राग्विद्धा शुद्धान्यथा भवेत्। शुद्धायां नास्ति सन्देहो विद्धा च त्रिविधेष्यते। निशीथयोगः पूर्वेद्युः परेद्युर्वा द्वयोरत्र। पूर्वैव प्रथमे पक्षे परेवोत्तरपक्षयोः। अष्टमी रोहिणी शुद्धा जयन्ती सा चतुर्विधा। शुद्धा शुद्धाधिकेत्येवं विद्धाविद्धाधिकेति च। शुद्धायामपि विद्धायां न सम्याव्योत्तरा तिथिः। शुद्धाधिकायां योगः स्यादेकस्मिन्वा दिनद्वये। नैकयोगेऽस्ति सन्देहो द्वियोगे प्रथमं दिनम्। सदा निशीथे पश्चाद्वेत्युत्तमो मध्यमोऽधमः। योगस्त्रिधापि पूर्वेद्युः सम्पूर्णत्वादुपोषणम्। विद्धाधिकायामप्येकदिनयोगे स ग्रह्यताम्। द्वयोर्योगस्त्रिधा भिन्नो निशीथे वृत्तिभेदतः। तद्वृत्ति-

र्दिन एकस्मिन्नुभयोर्नैभयोरिति। एकस्मिंश्चेत् तर्हिनं स्यात् पक्षयोरन्ययोः परा। बुधे योगे जयन्ती चेद्वारे सातिफलप्रदा। तिथ्यृक्षयोर्द्वयोरन्ते उत्तमं पारणं भवेत्। एकस्यान्ते मध्यमं स्यादुत्सवान्तेऽधमं स्मृतम्। यस्मिन् वर्षे जयन्याख्यो योगो जन्माष्टमी तदा। अन्तर्भूता जयन्यां स्याद्वयोगप्रशस्तितः।

नवमी पूर्वविद्धैव पक्षयोरुभयोरपि। मध्याह्ने रामनवमी पुनर्वसुसमन्विता। याद्या नैवाष्टमीयुक्ता सनक्षत्रापि वैष्णवैः। कृष्णा पूर्वोत्तरा शुक्ला दशम्येव व्यवस्थिता। जयन्योव्रतवच्चित्रं काम्यं चैकादशीव्रतम्। अरुणोदयवेधोऽत्र वेधः सूर्योदये तथा। उक्तौ द्वौ दशमीवेधौ वैष्णवस्मार्त्तयोः क्रमात्। कलाकाष्ठादिवेधोऽपि याह्योऽत्र त्रिमुहूर्त्तवत्। वैखानसाद्यागमोक्तदीक्षां प्राप्तो हि वैष्णवः। विद्धा त्याज्या वैष्णवेन शुद्धाप्याधिक्यसङ्गते। एकादशी द्वादशी वाधिका चेत्त्यज्यतां दिनम्। पूर्वं त्याज्य सुत्तरं स्यादिति वैष्णवनिर्णयः। एकादशी द्वादशी चेत्त्रयुभयं वर्द्धते यदा। तदा पूर्वदिनं त्याज्यं स्मार्त्तैर्याह्यं परं दिनम्। एकादशीमात्रवृद्धौ स्पृशियत्योर्व्यवस्थितिः। उषोयुग्मा स्पृशिभिः पूर्वा यतिभिस्तूत्तरा तिथिः। द्वादशीमात्रवृद्धौ तु शुद्धाविद्धे व्यवस्थिते। शुद्धा पूर्वोत्तरा विद्धा स्मार्तनिर्णय ईदृशः। श्रवणेन युता चेत् स्याद्द्वादशी सा हि वैष्णवैः। स्मार्त्तैस्त्रयोदशीयुक्ता स्यात्त्यजेदेकादशीं तदा। उपवासव्रतादन्यव्रते सार्द्धसप्तर्क्षकैः। सप्तभिर्दशमीविद्धामेतामेकादशीं त्यजेत्। द्वादशी पूर्वविद्धैव निखिलेषु व्रतेष्वपि। शुक्लत्रयोदशी पूर्वा परा कृष्णत्रयोदशी। अलाभे सापि पूर्वैव परादनुक्लत्रयोदशी। या शुक्ला स्पृशते पूर्वा स्पृशतां सापराह्णिकी। चतुर्दश्युत्तरा शुक्ला पूर्वा कृष्णचतुर्दशी। उदये द्विमुहूर्त्तापि याह्यानन्यव्रते तिथिः। शुक्लापि रात्रियुक्ता स्याद्वैलक्ष्यावणमासयोः। शुक्ला सर्वापि पूर्वैव यदि स्यादापराह्णिकी। प्रदोषे वा निशीथे वा द्वयोर्वा यास्ति सा भवेत्। शिवरात्रिव्रते तत्र द्वयोः सत्ता प्रशस्यते। तदभावे निशीथेकव्याप्तापि परिग्रहव्रताम्। तस्माच्चास्मिन् याह्या प्रदोषव्यापिनी तिथिः। तिथ्यन्ते पारणं यामत्रयादर्वाक् समापने। अन्यथा पारणं प्रातरन्यतिथ्युपवासवत्। पूर्वविद्धैव सावित्रीव्रते पञ्चदशी तिथिः। नाद्योऽष्टादश भूतस्य स्युश्च तत्र परेऽहनि। व्रतान्तराणि सर्वाणि परेऽह्न्येव सर्वदा। आद्येऽपराह्णकालीनो दर्श स्याद्दिवसत्रयः। दिनद्वयेऽप्येकदेशस्पर्शो याह्यो महत्त्वतः। तत्त्वं चेदेकदेशत्वे पूर्वोऽन्यथोत्तरा। उत्तरव्याप्तौ द्वयोरप्युत्तरस्मिन्निषिद्धवत्। साम्मुख्यनिन्यवस्था स्यान्न चेत् स्यादपराह्णयोः। पूर्वेद्युः साग्निकः कुर्यादुत्तरेद्युर्निरग्निकः। पर्वप्रतिपदोः सन्धिर्मध्याह्ने वा ततः पुरा। अन्वाधानं पूर्वदिने यागः सन्धिदिने भवेत्॥ अर्द्धं मध्याह्नतः सन्ध्यावन्वाधानं तु तद्दिने। दृष्टिं परदिने कुर्यादन्यो वाजसनेयिनः। यत्तु वाजसनेयी स्यात्तस्य सन्धिदिनात् पुरा। न काम्यन्वाहितिः किन्तु सदा सन्धिदिने हि सा। सन्धिश्चेत् सङ्गवादूर्द्धं प्राक्चेदावर्त्तनाद्भवेत्। सा पौर्णमासी विज्ञेया सदाख्यानविधौ तिथिः। दृष्टिः प्रतिपदोयास्ति तदूर्द्धं पर्वणि क्षिपेत्। क्षयस्यार्द्धं तथा क्षिप्त्वा सन्धिर्निर्णीयतां तदा। बौधायनमते दर्शश्चार्द्धं चेष्टिर्विधिष्यते। द्वितीया त्रिमुहूर्त्ता चेत् प्रतिपद् चापराह्णिकी। अन्वाधानं चतुर्दश्यां दर्शस्यान्येऽपि वर्त्तयेत्। दर्शश्चार्द्धं तथा कार्य्यमिति बौधायनोदितम्। दृष्ट्यादिविकृतिः सर्वा पर्वण्येवेति निर्णयः" इत्यकरणे नक्षत्रनिर्णयो विस्तरभयाच्च दर्शितः।

दर्शादिश्चार्द्धेऽन्यत्र चोक्तं यथा

"दर्शो यत्रापराह्णं स्पृशति स दिवसः श्राद्धकालोद्ययोद्यत्तानल्पो यदासौ यदि भवति समः क्षीयमाणे तु पूर्वः। इष्टौ साध्ये त्वनल्पे युवतिरुचलयोश्च स्व एवाहिताग्नेः पूर्वो न ह्यापराह्णं स्पृशति कृतपसंस्पर्शतोऽयं विधिः स्यात्। सायत्नन्यपरत्र चेन्न्यूनतिथिः सैवाद्दिके मासिके याह्या सा ह्युपराह्णयोर्यदि तदा यत्राधिका सा मता। तत्त्वा चेदुभयापराह्णसमये पूर्वा न चेत् सङ्गवे पूर्वैव त्रिमुहूर्त्तसाम्यसमये नो चेत् परैवोचिता"।

तिथिविशेषप्रकरणे खण्डतिथिविशेषपर्वणां तत्तच्छब्दे उक्तं वक्ष्यते च। तिथितत्त्वादौ दृश्यम्।

प्रतिपदातिथिविशेषाणामुभयदिनव्याप्त्यादौ निर्णयः निर्णयसिन्धौ दर्शितो यथा

"शुक्लप्रतिपदपराह्णव्यापित्वे पूर्वा याह्या युग्मराक्यात् प्रतिपत्प्रमुखो कार्या या भवेदापराह्णिकीति" स्कान्दोक्तेः "शुक्ला स्यात् प्रतिपत्तिथिः प्रथमतश्चेत् सापराह्णे भवेदिति" दीपिकोक्तेश्च। अपराह्णस्य पञ्चधा भक्ते दिने चतुर्थो भागः। तदभावे सायाह्नव्या-

पिनी यात्रा "तदभावे तु सायाह्नव्यापिनी परिग्रह्यतामिति" माधवोक्तेः कृष्णा तु परा "कृष्णा तूत्तरतोऽखिलेति" दीपिकोक्तेः कृष्णापि पूर्वेद्युरनल्पभङ्गाः ।

द्वितीया तु कृष्णा पूर्वा शुक्लोत्तरा इति हेमाद्रिः, कृष्णा द्वितीयादिना "पूर्वाह्णे यदि सा सिता तु परतः सर्वा" इति दीपिकोक्तेः माधवानल्पभङ्गमते तु सर्वापि द्वितीया परा तथा च माधवः "पूर्वेद्युरसती प्रातः परेद्युश्चिरङ्गता । सा द्वितीया परोपोष्या पूर्वविद्धा ततोऽन्यथा" इति

तृतीया तु सर्वमते रम्भाव्रतातिरिक्ता परैव तेन युग्मवाक्यं रम्भाव्रतविषयम् "रम्भाख्यां वर्जयित्वा तु तृतीयां द्विजसत्तम ! अन्येषु सर्वकार्येषु गणयुक्ता प्रशस्यत इति ब्रह्मवैवर्तात् गौरीव्रते तु विशेषमाह माधवः "मुहूर्तमात्रसत्त्वेऽपि दिने गौरीव्रतं परे । शुद्धाधिकायामर्धेन गणयोगप्रशंसनादिति" ।

चतुर्थ्यपि सर्वमते गणेशव्रतातिरिक्ता परैव युग्मवाक्यात् "एकादशी तथा षष्ठी रुमावाप्ता चतुर्थिका । उपोष्याः परसंयुक्ताः पराः पूर्वैश्च संयुताः" इति माधवीये हरिहरसिद्धोक्तेश्च

नागचतुर्थी तु मध्याह्नव्यापिनी पञ्चमीयुता च ग्राह्या इति निर्णयाब्धते माधवीये चोक्तम् "युगं मध्यंदिने यत्र तत्रोभौ फणीश्वरान् । क्षीरेणाभ्यर्च्य पञ्चम्यां पूजयेत् प्रयतो नरः । विषाणि तस्य नश्यन्ति न तान् हिंसन्ति पन्नगाः" इति माधवीये देवलोक्तेः युगं चतुर्थी । पूर्वत्र मध्याह्नव्याप्तौ पूर्वा अन्यथेषु परैव पञ्चम्यां पूर्वोक्तेः गणेशव्रते तृतीयायुतैव चतुर्थी "चतुर्थी तु तृतीयायां मङ्गल्यफलदा । कर्तव्या व्रतिभिर्नित्यं ! गणनाथ सुतोषिणी" इति हेमाद्रौ ब्रह्मवैवर्तात् । माधवीये तु गणेशव्रते "मध्याह्नव्यापिनी ग्राह्या" चतुर्थी गणनाथस्य मातृविद्धा प्रशस्यते । मध्याह्नव्यापिनी चेत् स्यात् परतश्चेत् परेऽहनि" इति हरिहरवचनात् "प्रातः शुक्लतिलैः स्नात्वा मध्याह्ने पूजयेद्गणम् !" इति "तत्काले ऽभिधानाच्च तेन परदिने तथात्वे परा अन्यथा पूर्वोक्तम् वस्तुतस्तु यत्र भाद्रशुक्लचतुर्थ्यादौ गणेशव्रतविशेषे मध्याह्नपूजोक्ता तद्विषयमेव प्रागुक्तवचनानि न तु सार्वत्रिकाणि । संकष्टचतुर्थ्यादौ बहूनां कर्मकालानां बाधापत्तेः तेन सर्वत्र गणेशव्रते पूर्वैवेति सिद्धम् । संकष्टचतुर्थी तु चन्द्रोदयव्यापिनी ग्राह्या दिनद्वये तथात्वे मातृयोगस्य सत्त्वात् पूर्वेति केचित् । अन्ये तु मुहूर्तत्रयादिरूपस्य तृतीययोगस्याभावात्परदिने माधवोक्तमध्याह्नव्यापित्वात् संपूर्णत्वाच्च परेत्याचक्षते । दिनद्वये तदभावे तु परैव । गौरीव्रते तु पूर्वैव । "गणेशगौरीवह्निव्यतिरिक्ताः प्रकीर्तिताः । चतुर्थ्यः पञ्चमीविद्धा देवतान्तरयोगतः" इति मदनरत्ने ब्रह्मवैवर्तात्

पञ्चमी तु माधवमते सर्वापि पूर्वा "चतुर्थीसंयुता कार्या पञ्चमी परया न तु । दैवे कर्मणि पित्र्ये च शुक्लपक्षे तथा सितेति" क्षारोक्तेः हेमाद्रिमते तु कृष्णा पूर्वा सिता परा "कृष्णा पूर्वयुता सिता परयुता स्यात् पञ्चमी" इति दीपिकोक्तेः वस्तुतस्तु क्षारोक्तिरूपव्यवस्थाविषया "प्रतिपत्पञ्चमी चैव सावित्रीभूतपूर्णिमा । नवमी दशमी चैव नोपोष्याः परसंयुताः" इति ब्रह्मवैवर्तात् यत्तु "पञ्चमी तु प्रकर्तव्या षष्ठ्या युक्ता तु नारद !" इत्यापस्तम्बीयम् तत् स्कन्दव्रतपरम् "स्कन्दोपवासे स्वीकार्या पञ्चमी परसंयुता" इति वाक्यशेषादिति माधवः तन्नागपूजाविषयमित्यनल्पभङ्गनिर्णयामृतादयः । चमत्कारचिन्तामणौ च "पञ्चमी नागपूजायां कार्या षष्ठीसमन्विता । तस्यान्तु तुष्टिता नागा इतरा सचतुर्थिका" इति तेन नागपूजादौ परैव । यत्तु मदनरत्नदिवोदासीययोः श्रावणपञ्चम्यतिरिक्ता पूर्वैवोक्तं "श्रावणे पञ्चमी शुक्ला संपोष्या नागपञ्चमी । तां परित्यज्य षष्ठ्यसंयुतां सितां पराम्" इति संग्रहोक्तेः, "गणेशस्कन्दयोगाभ्यां क्रमान्नागः शुभाशुभः । मिलाभिले तयोः पत्ते नागानामाखुवह्नियौ" इति षट्त्रिंशन्मताच्च श्रावणपञ्चम्यतिरिक्तायाः नागपञ्चम्याश्चतुर्थीयुतत्वमुक्तं तदुपवासादिविषयम् । पत्ते वाऽज्ञाने ।

षष्ठी सर्वमते स्कन्दव्रतातिरिक्ता परैव युग्मवाक्यात् "नागविद्धा न कर्तव्या षष्ठी चैव कदाचन" इति स्कान्दाच्च निर्णयाब्धते "षष्ठी च सप्तमी चैव वारत्रयेऽनुमालिनः । योगोऽयं पद्मको नाम सूर्यकोटिशतैः समः" ।

सप्तमी पूर्वैव युग्मवाक्यात् "षष्ठ्या युता सप्तमी च कर्तव्या तात ! सर्वदा" इति स्कान्दाच्च ।

अष्टमी तु सर्वमते कृष्णा पूर्वा सिता परा "व्रतमात्रेऽष्टमी कृष्णा पूर्वा शुक्लाष्टमी परा" इति माधवोक्तेः "परयुक् शुक्लाष्टमी पूर्वयुक् कृष्णा" इति दीपिकोक्तेश्च शिवशक्त्युद्भवे तु कृष्णाप्युत्तरा "पक्षद्वयेऽप्युत्तरैव शिवशक्तिमहोत्सवः" इति माधवोक्तेः दिवोदासीये भविष्ये "यदा यदा सिताष्टम्यां

बुधवारो भवेत् क्वचित्। तदा तदा हि सा याह्या एकभक्ताशने रूप !। सम्प्राप्ताकाले तथा चैत्रे प्रशस्ते च जनार्दने। बुधाष्टमी न कर्तव्या कृत्ति पुण्यं पुरातनम्" अन्यं पद्यं हेमाद्रौ न दृतम्।

नवमी तु सर्वमते पूर्वा युग्मवाक्यात् "न कुर्यादुदयगामी तात ! दशम्या तु कदाचन" इति स्कान्दाच्च।

दशमी पूर्वा परा वेति हेमाद्रिः "ऊर्ध्वा पूर्वोत्तरा शुक्ला दशम्येवं व्यवस्थिता" इति माधवः वस्तुतस्तु सूर्योदयात् नवमीयुतैव याह्या "दशमी तु प्रकर्तव्या सदुर्गा द्विजसत्तम !" इत्यापस्तम्बोक्तेः यत्तु "संपूर्णा दशमी कार्या पूर्वेद्युः परयाऽथ वा" इत्यग्निरहोक्तं तत्रवमीयुक्ताऽशक्तौ औदयिकी याह्येत्येवं नेयम्"। एकादशीनिर्णयस्तु कालमाधवीयानुसारेण एकादशीशब्दे १३८८ पृ० उक्तः। मङ्गाद्वादश्यादिनिर्णयः नि० सि० यथा "अष्टौ मङ्गाद्वादश्यः तत्र शुक्लाधिकैकादशीयुक्ता द्वादशी उन्मीलिनी२ संज्ञा द्वादश्येव शुक्लाधिका वर्द्धते चेत्सा वञ्जुली२ वासरत्रयस्पर्शिनी त्रिस्पृशा३ अथ पर्वक्षः संपूर्णाधिकत्वे पक्षवर्द्धिनी४। पुष्यर्क्षयुता जया५ श्रवणयुता विजया६ पुनर्वसुयुता जयन्ती७ रोहिणीयुता पापनाशिनी८ एताः पापक्षयसङ्किकाम उपवसेत्। अत्र मूलं हेमाद्रौ द्रेयम्। एकादशीद्वादश्योरेकाहे तन्त्रेणोपवासः, पार्थक्ये तु यत्नस्योपवासद्वयम् "एकादशीमुपोष्यैव द्वादशीं समुपोषयेदिति विष्णुरहस्यात् अशक्तौ तु द्वादश्यामेव "एवमेकादशीं शुक्ला द्वादशीं समुपोषयेत्। पूर्ववासरजं पुण्यं सर्वं प्राप्नोत्यसंशयमिति" तत्रैवोक्तेः। यदा त्वल्पा द्वादशी तदोक्तं मात्स्ये "यदा भवति स्वल्पापि द्वादशी पारणादिने। ऊर्ध्वकाले इयं कुर्यात्प्रातर्माध्याह्निकं तदा। नारदीयेऽपि "अल्पायामस्य विप्रेन्द्र ! द्वादश्यामरुणोदये। स्नानार्चनक्रियाः कार्या दानहोमादिसंयुताः" इति सङ्कटे तु माधवीये देवलः "सङ्कटे विषमे प्राप्ते द्वादश्यां पारयेत्कथम्। ऊर्ध्वस्तु पारणात् कुर्यात् पुनर्भुक्तं न दोषकृदिति"। सङ्कटे त्रयोदशीव्याप्तप्रदोषादौ। अत्र केचिदाहुः अपकर्षवाक्यान्यनाहिताग्निविषयाणि अग्निहोत्रादीनां श्रौतत्वेनापकर्षायोगादिति। द्वादश्यां च प्रथमपादमतिक्रम्य पारणं कार्यम् "द्वादश्याः प्रथमः पादो हरिवासरसंज्ञितः। तमतिक्रम्य कुर्वीत पारणं विष्णुतत्परः" इति निर्णयामृते मदनरत्ने च विष्णुधर्मोक्तेः। अत्र केचित् सङ्किरन्ते यदा भूयसी द्वादशी तदापि प्रातर्मङ्गल्ये पारणं कार्यम् "सर्वेषामुपवासानां प्रातरेव हि पारणमिति" वचनादिति। अत्यल्पत्वस्तु बहूनां कर्मकालानां विना कारणं बाधापत्तेः प्रायुदयवचनेन अल्पद्वादश्यामेवापकर्षविधानादपराह्ण एव कार्यम्। प्रातःशब्दस्तु "सायं प्रातर्द्विजातीनामशनं श्रुतिचोदितमिति" वदपराह्णवाचित्वेऽप्युपपन्नः न च वाक्यवैयर्थ्यं पुनर्भोजनसायंपारणनिवृत्त्यर्थत्वात्तस्येत्याहुः। प्रमादेन एकादश्युपवासातिक्रमे अपराह्णे वाराहे "एकादशी विद्धुता चेद्द्वादशीपरतः स्थिता। उपोष्या द्वादशी तत्र यदीच्छेत्परमं पदमिति" कैश्चित्तु वैष्णवं पदमिति पठितम् अत्राविरोधिनो नियमाः सर्वव्रतेषु बोद्धव्याः। अन्ये च नवरात्रे वक्ष्यन्ते इति दिक्।

द्वादशी तु पूर्वैव युग्मवाक्यात् द्वादशी तु प्रकर्त्तव्या एकादश्या युता प्रभो !" इति स्कान्दाच्च।

त्रयोदशी तु सर्वमते शुक्ला पूर्वा, कृष्णोत्तरा "त्रयोदशतिथिः पूर्वः सितोऽन्यासितः परादिति" दीपिकोक्तेः "शुक्ला त्रयोदशी पूर्वा परा कृष्णा त्रयोदशीति" माधवीयाच्च

चतुर्दशी सर्वमते कृष्णा पूर्वा, शुक्लोत्तरा, उपवासे तु ह्यपि परेति मदनरत्ने।

पौर्णमास्यमावास्ये तु सावित्रीव्रतं विना परे याह्ये "भूतविद्धे न कर्त्तव्ये दर्शपूर्णे कदाचन। वर्जयित्वा सुनिश्रेष्ठ ! सावित्रीव्रतमुत्तममिति" ब्रह्मवैवर्त्तात् "अमायां योगविशेषमाश्रित्यापराह्णे ज्ञातातपः "अमावस्यां भवेद्यारो यदा भूमिसुतस्य वै। जाह्नवीस्नानमात्रेण गोसहस्रफलं लभेत्"।

"अमा वै सोमवारेण रविवारेण सप्तमी। चतुर्थी भौमवारेण विषुवत्सदृशं फलम्" तत्रैव व्यासः "सिनीवाली कुहूर्वापि यदि सोमदिने भवेत्। गोसहस्रफलं दद्यात् स्नानं वै सौमिनी कृतम्"। हेमाद्रौ हरिवंशः "अश्वत्थे धनिष्ठार्द्धनागदैवतमस्तके। यद्यमा रविवारेण व्यतीपातः स उच्यते"। नागदैवतम् आश्लेषा मस्तको मृगशिरः। प्रथमपाद इत्यन्ये स च सर्वेषाम्"।

सर्वतिथिषु वर्ज्यान्याह सङ्कर्षदीपिकायाम् "कूष्माण्डं हरितीफलानि लवणं वर्ज्यं तिलान्नं तथा तैलं चामलकं दिवा प्रयसता श्रीर्धं कपालान्वितम्। निष्पावांश्च मसूरिकानु फलमयो इलाकसंज्ञं मधु दूतं स्त्रीगमनं क्रमात् प्रतिपदादिषु वर्जयोड्डशात्" "श्रीर्धं नारिकेलम्,कपालम् अलाबु,अन्यं पटोलकम्" भूपालः "कूष्माण्डं

इक्षुतीक्ष्णं मूलकं पनसं फलम् । धात्री शिरः कपालान्त्रं मद्यचर्म तिलानि च । क्षुरकर्माङ्गनासेवां प्रतिपत्सप्तमीति त्यजेत् । नखं शिम्बी चर्म मल्लिका प्रतिपदादितिथिषु कूष्माण्डादिभक्षणफलं चोक्तं तिथितत्त्वे स्मृत्या यथा

"कूष्माण्डे चार्थहानिः स्यादुच्चट्यां न क्षरेद्धरिम् । वृन्ताकुः पटोले स्याद् धनहानिस्तु मूलके । कलङ्की जायते बिल्वे तिर्य्यग्योनिश्च निम्बके । ताले शरीरनाशः स्यात् नारिकेले च मूर्खता । तुम्बी गोमांसतुल्या स्यात् कलम्बी गोवधात्मिका । शिम्बी पापकरी प्रोक्ता पूतिका ब्रह्मघातिका । वार्त्ताकौ सुतहानिः स्यात् चिररोगी च मार्षके । महापापकरं मांसं प्रतिपदादिषु वर्जयेत्" ।

प्रसङ्गात्तिथिसाधनप्रकारः सि० शि० उक्तो दर्श्यते यथा "रवि १२ रसै ६र्विरवीन्दुलवाहृताः फलमितास्तिथयः करणानि च । कुरहितानि च तानि ववादितः शकुनितोऽसितभूतदलादतु । षड्कलाः सरवीन्दुकला हृताः खखगजै ८०० श्च भयोगमितिः क्रमात् । अथ हृता खगतैर्यविलिप्तिकाः खगतिभिश्च गतागतनाड़िकाः" मू० । "व्यर्केन्दोर्भागा द्विघ्नाः । एकत्र रविद्विभौज्यास्तत्र फलं गतास्तिथयः । अन्यत्र रसैर्हृताभ्याः । फलं गतकरणानि । तानि त्येकोनानि ववादितो भवन्ति । कृष्णचतुर्दश्यर्द्धादुपरि यान्यवशिष्यन्ते त्रीणि चतुर्थं प्रतिपत्प्रथमार्धे च । एतानि चत्वारि शकुनितः । शकुनिचतुष्पादनागकिन्तु(किंस्तु)घ्नानीति शेषः । यस्य यद्दस्य नक्षत्रं भुक्तमिष्यते तस्य कलाः कार्याः । तथा चन्द्रार्कयोगस्य कलाः कार्याः । उभयत्र गताष्टकेन ८०० हृते प्रथमस्थाने गतभानि द्वितीयस्थाने गतयोगाः । अथ यान्यवशिष्टानि तानि गतानि । तानि स्वस्वहरभुक्तानि गम्यानि स्युः । तेषां गतानां सम्बन्धिन्यो विकलाः स्वस्वगतिभिर्भाज्याः । यल्लभ्यते ता गतघटिका भवन्ति । यद्भोग्यानां विकला भक्तास्तदैष्या घटिका भवन्ति । अत्रोपपत्तिः । यदि व्यर्केन्दोरेकांशै २६० स्त्रिंशत् तिथयो लभ्यन्ते तदैभिः किमिति । अत्र त्रिंशतापवर्तिते हरे जातो द्वादश हरः । अथ यदि चक्रांशैः २६० षष्टिः ६० करणानि लभ्यन्ते तदैभिः किमिति । अत्रापि षष्ट्यापवर्तिते जातो हरः षण्मितः । अथ यदि चक्रकलाभिः २१६०० सप्तविंशतिर्भानि लभ्यन्ते योगा वा तदेभिः किमिति । अत्रापि सप्तविंशत्यापवर्तने कृते जातोऽष्टशती हर उभयत्र । अथ घटीकरणार्थमनुपातः । यदि गतिकलाभिः षष्टिघटिका लभ्यन्ते तदा गतैष्याभिः कलाभिः किमिति फलं गतैष्या घटिकाः । अथ कलाः षष्ट्या गुणिता विकलाः स्युरित्यतः उक्तम् अथ हृताः खगतैष्यविलिप्तिका इति सर्वमुपपन्नम्" प्रभि० ।

सू० सि० तिथ्यादेरानयनप्रकार उक्तो यथा "अभोगोऽष्टशतीलिप्ताः खाग्निशैलास्तथा तिथेः । यल्लिप्ता अभोगाप्ता भानि भुक्त्या दिनादिकम्" सू० सि० । "अष्टशतमिताः कला नक्षत्रभोगः । प्रसङ्गात् तिथिभोगमाह । खाग्निशैला इति । तिथेर्विंशत्यधिकसप्तशतमिताः ७२० कलास्तथा भोग इत्यर्थः । यस्य यद्दस्य नक्षत्रमानमिष्टं तस्य यद्दस्य राश्यक्षिंशद्गुणा खांशा योज्यास्ते षष्टिगुणिताः कला योज्या इति परिभाषया कला नक्षत्रभोगभक्ताः फलं यद्दस्य गतनक्षत्राणि शेषं वर्तमाननक्षत्रस्य गतकलास्तस्मात् तस्य गतदिनाद्यानयनमाह भुक्त्येति । यद्दस्य कलात्मिकया गत्या शेषदिनादिकं गतं भागहरणेन साध्यमेवं शेषोनाद्भोगाद्गतिकला भागेनैष्यदिनादिकं साध्यम् । अत्रोपपत्तिः । भचक्रभोगेण सप्तविंशतिनक्षत्राणखिन्यादीनि यद्दो भुनक्त्यतः सप्तविंशतिनक्षत्राणां चक्रकलाः षट्शतयुतैकविंशतिसहस्रमिता २१६०० भोगस्तदैकनक्षत्रस्य क इत्यनुपातेनाष्टशतकलाभोगः । एवं तिथेश्चान्द्रमासत्रिंशांशाश्चान्द्रमासस्य सूर्यचन्द्रान्तरैक्यभगणसिद्धत्वाच्च । त्रिंशत्तिथीनां चक्रकलाभोगस्तदैकतिथेः क इत्यनुपातेन त्रिंशत्यधिकसप्तशतकलाभोगः ७२० । अथाष्टशतकलाभिरेकं नक्षत्रं तदा यद्दकलाभिः किमित्यनुपातेन फलमश्विन्यादीनि यद्दभुक्तानि शेषकला यद्दाधिष्ठितनक्षत्रस्य गतं भोगादीनं तस्यैष्यम् । यदि यद्दगत्यैकं दिनं तदाभीष्टकलाभिः किमित्यनुपातेन तस्य गतैष्यदिनाद्यं भवति । एवं चन्द्राहिननक्षत्रं ज्ञेयम् रङ्गना० । "रवीन्दुयोगलिप्ताभ्यो योगा भभोगभाजिताः । गता गम्याश्च घट्टिका भुक्तियोगाप्तनाड़िकाः" सू० सि० "सूर्यचन्द्रयोगस्य राश्यादिकस्य परिभाषया याः कलास्ताभ्यो योगा विष्कम्भादयो भभोगभाजिता भभोगेन पूर्वोक्तेन विभक्ता भवन्ति । एकैकयोगस्य भभोगमितौ भोगः स प्रत्येकं ताभ्योऽपनीय यन्नीताः शुद्धास्तन्नीता योगा गताः । यस्य भोगो

न शुद्धयति स वर्त्तमान इत्यर्थः। कला भभोगभक्ता गता योगास्तदग्रिमो वर्त्तमान इति तात्पर्यम्। तस्य शेषं गतं भोगात् पतितशेषं ताभ्यां घटिकाद्यानयनमाह। गता इति। गता एष्याः। चः समुच्चये। कलाः षष्टिगुणिताः कार्य्यौस्ताभ्यो भुक्तियोगाप्तनाड़िका रविचन्द्रकलाक्यकयोर्योगेन भजनाल्लब्धा घटिका गतैष्या भवन्ति। अत्रोपपत्तिः। सूर्य्यचन्द्रयोगभिन्नस्य भस्य नक्षत्राणि विष्कम्भादिसञ्ज्ञानि योगोत्पन्नत्वाद्योगा उक्तस्तदानयनं पूर्वोक्तवत्। अतएव सूर्य्यचन्द्रगतियोगतुल्यतद्धत्या षष्टिसावनघटिकास्तदा गतैष्या कलाभिः का इत्यनुपातेन गतैष्यघटिकानयनं युक्तमुक्तम्" रङ्गना०। "अर्कोनचन्द्रनिघ्न्याप्तिथयो भोगभाजिताः। गता गम्याश्च घटिका नाड्यो भुक्तप्तलरोद्धृताः" सू० सि०। "पूर्वार्द्धव्याख्यानं पूर्वश्लोकपूर्वार्द्धरीत्या ज्ञेयमुत्तरार्द्धं सुगमम्। अत्रोपपत्तिः। "तिथिभोगकलाभिरेका तिथिस्तदा सूर्य्योनचन्द्रकलाभिः का इत्यनुपातेन फलं गततिथयो वर्त्तमानतिथेर्गतैष्ये शेषशेषोनभोगकले ताभ्यां गल्पलरकलाभिरनुपातेन गतैष्यघटिकाः पूर्ववत्" रङ्गना०।

कल्पे तिथिमानसङ्ख्यं सि० शि० यथा

"विधिदिने दिनकृद्दिवसाः करेन्द्रियशरेषुभवोऽर्णवसंगुणाः। नवनवाङ्ककराम्बरसैन्द्वः प्रयुतसंगुणिता विधुवासराः" १६०२६६६०००००००। अत्रोपपत्तिः, रविवर्षाणि दिनीकृतानीति सुगमम्। चन्द्रार्कयोर्यौवलः कल्पे योगास्तावलः किल भगिमासाः। ते तु योगा भगणान्तरतुल्याः स्युः। उभयोरपि प्रागगमनात्। अतो भगणान्तरतुल्याः भगिमासा भवन्ति। ते त्रिंशद्गुणाः भगिदिवसा भवन्तीत्युपपन्नम्।

युगे तिथिसंख्या सू० सि० उक्ता यथा।

युग इत्युपक्रमे चान्द्रदिनप्रमाणमाह

"चान्द्राः खाष्टखखव्योमखाग्निखर्तुनिशाकराः" सू० सि०।

"अष्टाग्निगजसप्तभूगोनसप्तपञ्चभूमिता युगे सूर्य्यसावनदिवसाः। चान्द्रा दिवसा युगतिथय इत्यर्थः। अशीतिशून्यचतुष्कत्रिखण्डपा एते त्रिंशद्गुणाश्चान्द्रभासा उक्तप्रायाः। अनेनैव चान्द्रदिवसानामुपपत्तिः सूर्य्यचन्द्रयोर्भगणयोरन्तरूपचान्द्रभासाख्यिशद्गुणिता इति सुगमोक्ताः" रङ्गना०।

तिथिभेदे देवभेदपूजा योगः० धा० धृतवाक्ये नोक्ता यथा तत्र नारदः "यद्दिनं यस्य देवस्य तद्दिने तस्य संस्थितिः" अग्निपुराणेऽपि "प्रतिपद्यग्निपूजा स्यात् द्वितीयायाञ्च वेधसः। दशम्यामलकस्यापि षष्ठ्यां पूजा गुहस्य च। चतुर्थ्यां गणनाथस्य गौर्यास्तत्पूर्ववासरे। सरस्वत्या नवम्यान्तु। सप्तम्यां भास्करस्य च अष्टम्यान्तु चतुर्ह्यामेकादश्यां शिवस्य च। द्वादश्यान्तु त्रयोदश्यां हरेश्च मदनस्य च। शेषादीनां फणीशानां पञ्चम्यां पूजनं भवेत्। पर्व्वोन्दोस्तिथिष्वास्तु पञ्चदशसतास्वपीति"।

पञ्चदशसंख्यायां सू० सि० उक्ता०।

स्त्रीत्वे "वैवाहिकीं तिथिं पृष्ट्वास्तत्वर्क्षं हरवल्लुना" कुमा०। पुंस्त्वे "निखिलान् निशि पूर्णिमा तिथीनुपतस्थेऽतिथिरेकिका तिथिः" नैष०।

**तिथिकृत्य** न० ७त०। तिथिविहिते कार्य्ये "तिथिकृत्ये च कृष्णादिर्न्नते शुक्लादिरेव च। विवाहादौ स्मृतः सौरः शेषेषु सावनो मतः" मल० त०। तिथिविशेषे कृत्यानि च तिथितत्त्वे कालमाधवीयनिर्णयसिन्धुपत्यप्रभृतिनिबन्धेषु द्रष्टव्यानि।

तिथिभेदेषु कृत्याकृत्यानि पी० धा० वसिष्ठोक्तानि यथा "नोद्वाह्यायोपनयप्रतिष्ठासीमन्तचौलाखिलयास्तुकर्म्म। षट्प्रवेशाखिलमङ्गल्यं कार्य्यं हि मासाद्यतिथौ कदाचित्"। मासाद्यतिथौ शुक्लपक्षप्रतिपदि अतएव कृष्णपक्षप्रतिपद्योतानि कर्म्माणि सुखेन भवन्तीत्यर्थः। यद्योऽभिप्रायोऽसम्मतः स्यात्तदा पक्षाद्यतिथाविति न्यूयात्। "सप्ताङ्कचिङ्गानि नृपस्य वास्तुव्रतप्रतिष्ठाखिलमङ्गलानि। यात्राविवाहाखिलभूषणाद्यं कार्य्यं द्वितीयादिवसे सदैव। सङ्कोतविद्याखिलशिल्पकर्म्म सीमन्तचौलाव्रतप्रवेशम्। कार्य्यं तृतीयादिवसे यदुक्तं सदा तृतीयादिवसेऽपि कार्य्यम्। रिक्तासु विद्युद्धवबन्धशस्त्रविषाग्निघातादि च याति सिद्धिम्। यत्कृत्यमुक्तासु कृतं विमूढैर्विनाशमायाति तदाशु नूनम्"। रिक्तासु चतुर्थीनवमीचतुर्दशीषु ३।९।१४। "शुभानि कार्य्याणि चरस्थिराणि घोक्तान्यनुक्तान्यपि यानि तानि। सिद्धिं प्रयान्त्याशु कृपणप्रदानं विनाशुद्धं नागतिथौ विधेयम्। अभ्यङ्गयात्रापितृकर्म्मदन्तकाष्ठं विना पौष्टिकमङ्गलानि। षष्ठ्यां विधेयानि रणोपयोग्यशिल्पानि वस्त्राम्बरभूषणानि। द्वितीयायां तृतीयायां पञ्चम्यां कथितान्यपि। तानि सिध्यन्ति कार्य्याणि सप्तम्यां निखिलान्यपि। संग्रामयोग्याखिलवास्तुशिल्पनृपप्रमोदाखिलवेषभानि क्षीरव-

कार्य्याखिलभूषणानि कार्य्याणि कार्य्याणि मङ्गेशतिथ्याम्। द्वितीयायां तृतीयायां पञ्चम्यां सप्तमीतिथौ। उक्तानि यानि सिध्यन्ति दशम्यां तानि सर्वदा। व्रतोपवासाऽखिलधर्म्मकृत्यं सुरोत्सवाद्याऽखिलवास्तुकर्म्म। संग्रामयोग्याखिलवास्तुकर्म्म विश्वे तिथौ सिध्यति शिल्पकर्म्म। पृथिव्यां यानि कर्म्माणि चर्म्मपुष्टिः शुभानि च। चरस्थिराणि द्वादश्यां यात्रां नवमृहं विना। विधाहगौरीभुजगभान्वन्तकदिनेषु च। उक्तानि तानि सिध्यन्ति त्रयोदश्यां विशेषतः। यज्ञक्रियापौष्टिकमङ्गलानि संग्रामयोग्याखिलवास्तुकर्म्म। उद्वाहगिल्पाऽखिलभूषणाद्यं कार्य्यं प्रतिष्ठा खलु पौर्णमास्याम्। सदैव दर्शे पितृकर्म्मसङ्गा नान्यद्विधेयं शुभपौष्टिकाद्यम्। मूढैः कृतं तत्र शुभोत्सवाद्यं विनाशमायात्यचिरादृभृगं तत्" धी०धा० वसिष्ठवचनम्।

**तिथिक्षय** पु०तिथीनां तिथ्यवच्छिन्नचन्द्रकलानां क्षयः क्षयारम्भो यस्मिन्। दर्शे अमावास्यायाम् मध्यार्धकलम०। हृत०। तिथीनां नाशे अवमे अवमशब्दे ४२१ पृ०दृश्यम् दिनक्षयादयोऽप्यत्र। "कौर्मे पाद्मेऽपि "द्वौ तिथ्यावेकवारे यत्र स स्याद्दिनक्षयः" वशिष्ठः "एकस्मिन् सावने त्वङ्घ्रि तिथीनां त्रितयं यदा। तदा दिनक्षयः प्रोक्तस्तत्र साङ्क्तिकं फलम्"। साङ्क्तिकं फलमिति साङ्क्त्येतरवैदिककर्म्मपरम्। "अधिमासे दिनपाते धनुषि रवौ भानुलङ्घिते मासि। चक्रिणि सुप्ते कुर्य्यान्नो साङ्क्त्यं विवाहञ्च" इति भीमपराक्रमात् दिनपाते दिनक्षये रघु० तिथिक्षयानयनञ्च सू० सि० उक्तं यथा "सावनाहानि चान्द्रेभ्यो द्युभ्यः प्रोज्झ्य तिथिक्षयाः" सू० सि०। "चान्द्रेभ्यो द्युभ्यो वक्ष्यमाणचान्द्रदिवसेभ्यः सकाशादित्यर्थः। तिथिषु चान्द्रदिनेषु सावनदिनानामवश्येष्टतुल्याः क्षयो न्यूनत्वम्। यद्वा तिथिशब्देन सावनो दिवसस्तस्य चान्द्रदिवसात् क्षय इति स्वरूपमेव वक्ष्यमाणोपयोगात् परिभाषितम्" रङ्गना०। युगे तत्संख्या सू० सि० उक्ता यथा युग इत्युपक्रमे "तिथिक्षया यमार्कास्त्रिहृद्रव्योमशराश्विनः" १५०८२।५२ एतन्मिता इत्यर्थः।

**तिथिपति** पु० तिथिविशेषाणां पतयः। तिथीनामधिपतौ स च सू० चि० उक्तो यथा "तिथीशावङ्किको गौरी गणेशोऽहिर्गुहोरविः। शिवोदुर्गाऽन्तको विश्वे हरिः कामः शिवः शशी" सू० चि० एतन्मूलं पीयूषधारायां हेतवसिष्ठवचनं यथा "वह्निविधातारुद्रसुता गणेशः सर्पो विशाखोऽदितिरुक्तो मङ्गेशः। दुर्गा यमो विश्वहरिश्च कामः शर्वो निशेशश्च पुराणदृष्टाः इति स्थानिन इति शेषः"। तिथिपतयश्च हृ० सं० ९९ अ० अन्यथोक्ता यथा "कमलजविधाहरिरमगणाङ्गषड्वक्त्रगजवसुभुजगाः। धर्मेशसविहमन्मथकलयो विश्वे च तिथिपतयः। पितरोऽमावास्यायां संज्ञासङ्गाश्च तैः क्रियाः कार्य्याः। नन्दा भद्रा जया रिक्ता पूर्णा च तास्त्रिविधाः। यत्र कार्य्यं नक्षत्रे तद्देवत्यासु तिथिषु तत्कार्य्यम्"। वसिष्ठवराहवचनाभ्यासङ्गदेवानां तत्तत्तिथिषु पूजेति न विरोधः।

**तिथिप्रणी** पु० तिथिं प्रणयति प्र+नी-क्विप्। चन्द्रे त्रिका०

**तिथियुग्म** न०तिथ्योस्तिथिविशेषयोर्युग्मम्। द्वितीयादितिथिसप्तमीयोगरूपे युग्मे तानि च सप्त युग्मानि निगमे उक्तानि यथा "युग्माग्नियुगभूतानां षण्मुन्योर्वसुरन्ध्रयोः। रुद्रेण द्वादशीयुक्ता चतुर्दश्या च पूर्णिमा। प्रतिपदाद्यमावास्या तिथ्योर्युग्मं महाफलम्। एतद्भुक्तं महादोषं हन्ति पुण्यं पुरार्जितमिति"। युग्मं द्वितीया। अग्निस्तृतीया। युगं चतुर्थी। भूतं पञ्चमी। षड् षष्ठी। मुनिः सप्तमी। वसुरष्टमी। रन्ध्रं नवमी। रुद्र एकादशी। अत्र युग्माग्न्यादिषु सप्तसु युग्मेषु पूर्वतिथिरुत्तरविद्धा याह्या उत्तरा तु पूर्वविद्धेत्युक्तं भवति। वेधश्चात्र त्रिमूर्त्तयोरेव तदुक्तं कालमा० "अत्र तिथीनां वेधः पैठीनसिना दर्शितः। "पञ्चवेधेऽपि तिथयस्तिथिं पूर्वां तथोत्तराम्। त्रिभिर्मूहूर्त्तैर्विध्यन्ति सामान्योऽयं विधिः स्मृतः" इति पूर्वेद्युरुदयानन्तरसमापाद्या त्रिमुहूर्ता चेत् सा प्रतिपदं विध्यति। परेद्युरस्तमयात् प्राक् द्वितीया त्रिमुहूर्ता चेत् सापि पूर्वां प्रतिपदं विध्यति त्रिमुहूर्त्तव्याप्तिः स्कन्दपुराणे दर्शिता। "यां तिथिं समनुप्राप्य यावस्तं पद्मिनीप्रियः। सा तिथिस्तादृशे भोक्ता त्रिमुहूर्त्ता च या भवेदिति"। शिवरहस्यसौरपुराणयोरपि "या प्राप्यास्तमुपैत्यर्कः सा चेत् स्यात् त्रिमुहूर्त्तिका। धर्मकृत्येषु सर्वेषु संपूर्णानां विदुर्बुधाः" इति। हरहृदयेऽपि "यस्यां तिथावस्तमियात् सूर्य्यस्तु त्रिमुहूर्त्तकैः। यागदानजपादिभ्यस्तामेवोपक्रमेत्तिथिमिति"। एवं पैठीनस्यादिवाक्ये त्रिमुहूर्त्तत्वेनैव वेधस्थितेः वक्ष्यमाणयोगमात्रेणैव वेधोक्तिः साङ्क्षमात्रम्। वेधकृतिथेस्त्रिमुहूर्त्तत्वेऽपि द्वित्रितिथेर्मुहूर्त्तो-

दिव्याप्तित्वेऽपि ग्राह्यता कालमाधवीये निर्णीता यथा। "देवलः "यां तिथिं समनुप्राप्य उदयं याति भास्करः। सा तिथिः सकला ज्ञेया स्नानदानजपादिषु"। व्यासोऽपि "उदयन्नेव सविता यां तिथिं प्रतिपद्यते। सा तिथिः सकला ज्ञेया दानाध्ययनकर्मसु"। भविष्योत्तरपुराणेऽपि "व्रतोपवासनियमे घटिकैका यदा भवेत्। सा तिथिः सकला ज्ञेया पित्र्यर्थे चाऽपराह्णिकीति" पद्मपुराणेऽपि "व्रतोपवासनियमे घटिकैका यदा भवेत्। उदये सा तिथिस्तत्र विपरीता तु पैतृके" इति स्कन्दपुराणेऽपि "व्रतोपवासदानादौ घटिकैका यदा भवेत्। उदये सा तिथिर्ग्राह्या विपरीता तु पैतृके" इति विष्णुधर्मोत्तरेऽपि "व्रतोपवासस्नानादौ घटिकैका यदा भवेत्। उदये सा तिथिर्ग्राह्या आद्यादावस्तगामिनीति" बौधायनोऽपि "आदित्योदयवेलायां याऽल्पापि च तिथिर्भवेत्। पूर्णा इत्येव मन्तव्या प्रभूता नोदयं विनेति" मन्यन्ते एवं लुप्तस्तिथिसाम्यनुज्ञा तथाप्युत्तरविद्धायास्तिथेर्ग्रहणे कियत्परिमाणमुदये अपेक्षणीयमिति विवेचनीयम्। तत्र बौधायनेनाल्पापीत्यभिधानात् निमेषमात्रं प्रतिभाति तथा व्यासवाक्येऽपि प्रतिभाति "उदयन्नेवेत्यभिधानात्। भविष्योत्तरपुराणादिवचनेषु घटिकामात्रं प्रतीयते। वचनान्तरे तु विष्णुधर्मोत्तरबौधायनोक्ते घटिकाचतुष्टयं भासते। तथा च पठ्यते "उदिते दैवतं भानौ पित्र्यं चास्तमिते रवौ। द्विमुहूर्तं त्रिरभ्रस्य सा तिथिर्हव्यकव्ययोरिति"। अस्यार्थः। भानावुदिते सत्युत्तरकालेऽभ्रो मुहूर्तत्रयं दैवतम्। तस्मिंश्चास्तमिते ततः पूर्वकालोनमभ्रो मुहूर्तत्रयं पित्र्यम्। अतस्तावत्कालव्यापिनी या तिथिर्भवति सैव क्रमेण हव्यकव्ययोर्ग्राह्या। अत्रोच्यते। पौर्वाह्णिकी इति वचनेन दैवे पूर्वाह्णव्याप्त्यभिधानात्। पूर्वाह्णस्य षड्धा विभक्तस्य मुख्यत्वादुदिते भानौ त्रिमुहूर्ता तिथिर्ग्रहीतव्या। यत्तु देवलेनोक्तम्। त्रिमुहूर्ता न कर्तव्या या त्रिधिः क्षयगामिनी "द्विमुहूर्तापि कर्तव्या या तिथिर्द्विगामिनीति"। तत्र त्रिमुहूर्तव्याप्तेर्बाधकं प्रत्युतोपोद्बलकमेव। तथा हि प्रतिषेधः सर्वत्र प्रसक्तिपूर्वकः प्रसक्तिश्चात्र यथोक्तरीत्या पौर्वाह्णिकवाक्यात् त्रिमुहूर्तविधायिपैठीनसिवाक्याद्वा भवति। तत्र प्रसक्तं त्रिमुहूर्तत्वं समतिथौ बाधकाभावात्तत्रैव व्यवतिष्ठते। तिथिक्षये त्वधिकव्याप्तिविधित्वया प्रतिषिध्यते। अतस्तत्र चतुर्मुहूर्तस्पर्शिनी तिथिर्ग्राह्या। तिथिसाम्यवक्तिथिद्वयेऽपि मुहूर्तत्रयमेव मुख्यम्। मुहूर्तद्वयं त्वनुकल्पः। अतएव सूचयितुं द्विमुहूर्तापीत्यपिशब्दः पठ्यते।"अत्राप्येके मुहूर्तव्याप्तिर्लक्षणेत्यर्थसिद्धम्

"द्वितीयादिकयुग्मानां पूज्यता नियमादिषु"व्यासः। अत्र प्रतिषेधः।"भगवत्याः प्रवेशादिविसर्गोत्थाश्च याः क्रियाः। रवेरुदयमीक्षन्ते न तत्र तिथियुग्मता"। "युगाद्या वर्षऋतव मन्वादी पार्वतीप्रिया। रवेरुदयमीक्षन्ते न तत्र तिथियुग्मता" ति० त०।

**तिथिसन्धि** पु० तिथ्योः सन्धिः। तिथ्योः पूर्वापरयोः सन्धौ तत्कालानयनं सि० शि० यथा "ग्रहितनुविकलाभ्यस्तेन्दुभुक्त्रेन्दुभान्वोर्गतितिथिवरकलाभिर्भूय एताभिरेव। पृथगथ गतियुक्त्या भाड़िका सन्धिरात्रा तिथिकरणयोगानां फलं तत्र भिन्नम्"।

एवं ग्रहितनुविकलाभ्यो या घटिका उत्पद्यन्ते ता भतिथिकरणयोगानां सन्धिघटिकाः स्युः। सन्धौ भिन्नफलमित्यर्थः। अत्र सन्धिरुभयतोऽपि विद्धस्य स्थितत्वात्। उपपत्तिरत्रैव द्रष्टव्या" । प्रमिता०

**तिथ्यर्द्ध** न०ऽत०। करणे। करणशब्दे १६६० पृ० दृश्यम्।

**तिनाग्रक** पु० तिनिश+पृषो०। तिनिशवृक्षे शब्दरत्ना०।

**तिनिग्र** पु० अतिप्रयत्नेन नेयति क्षति+निश-क पृषो० अतेरकारलोपः। (सादन) ख्याते वृक्षे अमरः। "तिनिशः श्लेष्मपित्तास्रमेदःकृमिप्रमेहजित्। तुवरः शिखदाहघ्नो व्रणपाण्डुक्षयप्रणुत्" भावप्र०। [२दैत्यभेदे पु० हेमच०।

**तिन्तिड** पु० तिन्तिड़ी+पृषो०। १वृक्षाम्ले (तेँतुल) विड्।

**तिन्तिड़ी** स्त्री तिन्तिड़ीक+पृषो०। (तेँतुल) वृक्षभेदे राजनि० स्वार्थे क। तिन्तिड़िका तत्रार्थे शब्दरत्ना०। "अम्लिका चुक्रिकाम्लो च चुक्रा दन्तशठापि च। अम्ला च विदिका चिञ्चा तिन्तिड़ीका च तिन्तिड़ी। अम्लिकाऽम्ला गुरुर्वातहरी पित्तकफास्रकृत्। पक्का तु दीपनी रुच्या सरोष्णा कफवातनुत्" भावप्र०। "अम्लिकायाः फलं पक्वं मर्दितं वारिणा दृढम्। शर्करा मरिचोन्मिश्रं खण्डक्षेन्दुसुवासितम्। अम्लिकाफलसंभूतं पानकं वातनाशनम्। पित्तश्लेष्मकरं किञ्चित् सुरुच्यं वह्निबोधकम्" भावप्र०। [अमरः।

**तिन्तिड़ीक** पु० तिम-ईक अनीका० नि०। (तेँतुल) वृक्षभेदे

तिन्तिड़ीद्यूत न० तिन्तिड्या तद्बीजेन द्यूतम्। तिन्तिड़ी-बीजेन क्रीड़ने (काँदबोजेरखेला) तिका०।

तिन्तिड़ि(लि)का स्त्री तिन्तिड़ोः+स्वार्थे क हस्वः वा ह्रस्वः। (तँतुल) तिन्तिड्याम् शब्दमा०। कापाबे तिन्ति-डीलक्षणत्व।

तिन्दिश पु० ढिण्डिशवृक्षे (ढाँड़श) राजनि०।

तिन्दु पु० तिज-कु-नुगयादि० नि०। (तेँदु)ख्याते वृक्षे संज्ञायां कन्। तिन्दुक (गाव)इति ख्याते वृक्षे पुंस्त्री शब्दरत्ना०। स्त्रीत्वे गौ०ङीष्। वृक्षभाषे वैद्यकपरिभाषा पुंन०। "स्वादाम्लं तिन्दुकं प्राहि वातलं श्लेतलं लघु। पक्वं पित्तप्रमेहास्रदोषघ्नं मधुरं गुरु। तत्फलं तु भवेद्रुक्षं कफलं चिररोगजित्। विल्वतिन्दुकमध्येवं विशेषात् प्राहि शीतलम्" राजनि०।

तिन्दुकि स्त्री तिन्दुकी+पृषो० ह्रस्वः। तिन्दुके वृक्षे शब्दर०

तिन्दुकिनी स्त्री तिन्दुकस्तदाकारः फलेऽस्त्यस्या इनि ङीप्। कावर्त्तक्याम् राजनि० ८२८ श्लोके।

तिन्दूल पु०तिन्दुक+पृषो० कस्य लः। तिन्दुकवृक्षे शब्दर०

तिप रक्षणे भ्वा० आत्म० सक०सेट्। तेपते अतेपिष्ट अतिप्त। तितेपे। अदित् अतितेपत्-त। [तितेम।

तिम आर्द्रीभावे भ्वा० पर० अक० सेट्। तेमति अतेमीत्।

तिम आर्द्रीकरणे दिवा०पर० सक० सेट्। तिम्यति अतेमीत्। तितेम। "वानरान् तिम्यतोऽपश्यत्" हितो० "तिमिताश्चाभवन् सर्वे तत्र ते हरियूथपाः" रामा० सुन्द० १ स०। "नद्यश्च तिमितोदकाः" रामा० अर० ५४स०। तेमनम्।

तिमि पु० तिम-इन्-तम-इन्-दस्य वा। १मत्स्यभेदे त्रिका०। तद्भक्षे २मत्स्यभेदे पुंस्त्री० स्त्रियां वा ङीप्। "अस्ति मत्स्यस्तिमिर्नाम शतयोजनविस्तृतः" भरत-धृतवाक्यम्। "अस्ति मत्स्यस्तिमिर्नाम तथा चास्ति तिमिङ्गिलः। तिमिङ्गिलगिलोऽप्यस्ति तद्गिलोऽप्यस्ति राक्षसः" शब्दार्थचि०धृतरामा० वाक्यम्। "अमी शिरोभिस्तिमयः सरन्ध्रैर्हुं वितन्वन्ति जलप्रवाहान्" रघुः। "यत्र नानाविधाकारास्तिमयोनैकरूपिणः" भा० उ० ६८ अ०। शब्दकल्पद्रुमेऽस्य स्त्रीत्वोक्तिः प्रामादिकी अमी तिमय इति नैकरूपिण इति पुंस्त्वेन प्रयो-गात् ऋदिकारान्तत्वात् वा स्त्रियां ङीप्। २तज्जाति-स्त्रियां स्त्री भेदः।

तिमिकोष पु० तिमेः कोष इव। वस्त्रे त्रिका०।

तिमिङ्गिल पु० गिरति-गृ-मूलवि० क रस्य लः "गिलेऽगि-लस्य" पा०सम्। महामत्स्यभेदे। तिमिशब्दे उदा०दृश्यम्। "तिमिङ्गिलाः कच्छपाश्च तथा तिमितिमिङ्गिलाः" भा०व० १६६ अ०।

तिमिङ्गिलगिल पु० तिमिङ्गिलं गिलति गृ-मूल० क रस्य लः अगिलस्येति पर्य्युदासात् न सुम्। अतिमहन्मत्स्यभेदे तिमिशब्दे उदा०।

तिमिङ्गिलाशन पु०तिमिङ्गिलो मत्स्यः अश्यते यत्र अश-आधारे ल्युट्। दक्षिणस्थे देशभेदे "बलदेवपट्टनं दण्ड-कावनतिमिङ्गिलाशनाभद्राः" बृ०स० १४अ० कूर्मविभागे दक्षिणस्थदेशोक्तौ। सोऽभिजनोऽस्य तस्य राजा वा अण्। तस्य बह्वपु लुक्। २तद्देशवासिषु शतत्रृषेषु च ब० व०। एकवचने तु तैमिङ्गिलाशन इति भेदः।

तिमिज न० तिमितो जायते जन-ड ५त०। शुक्लाभेदे "तिमिजं मत्स्याक्षिनिभं दृढत्वचित्वं बहुगुणञ्च" वृ०स० ८१ अ०। शुक्लाभेदकथने।

तिमित त्रि० तिम-कर्त्तरि क्त। १निश्चले, धरणी। २क्लिन्ने (भिजे) अमरः। "क्षुद्र इव तिमिनागसंहतः स्तिमि-तजलोर्मिणशङ्खमर्करः" रामा० अयो० ८१ स०।

तिमिर पुंन०तिम-किरच् अर्द्धर्चा०। १अन्धकारे २नेत्ररोग-भेदे च। "तिमिराख्यः स वै दोषस्तुर्यपटलं गतः। दृष्ट्वा सर्वतो दृष्टिं लिङ्गनाशमतःपरम्" माधवः अक्षिपटलशब्दे ४३१६ दृश्यम्। "सामानाधिकरण्यं हि तेजस्तिमिरयोः कृतः"। "पतिते घनतिमिरसुषिः" माघः।

तिमिरनुद् पु० तिमिरं नुदति खण्डयति नुद-क्विप् तुट्। सूर्य्ये "तिमिरनुदो मण्डलं यदि स वेद्मि" वृ०स०५अ०। तिमिरभिदादयोऽप्यत्र। २अन्धकारनाशके त्रि०।

तिमिररिपु पु० ६त०। १सूर्य्ये हला०। तिमिरारिप्रभृत-योऽप्यत्र "तिमिरारिप्रबोधन्ति प्रातःसमयभीरवः। वयं काका वयं काका इति जल्पन्ति वायसाः" उद्भटः। २अन्धकारनाशके त्रि०।

तिमिरि पु० तिमीति शब्दं वाचकत्वेन राति रा-वा० डि। तिमिमत्स्ये राजनि०।

तिमिष पु०तिम-इसक्। १याम्यकर्कख्याम्, त्रिका० २नाटाख्ये च शब्दार्थचि०। [स्त्रियाम्।

तिरश्ची स्त्री तिर्यक् जातिः स्त्री ङीप्। पशुपक्षिण्यां

तिरश्चीन त्रि० तिर्यञ्चेव स्वार्थे ख। तिर्यग्भूते। "गतं तिरश्चीनमनूरुसारथेः" माघः "तिरश्चीनो विततो

रश्मिरेणामधः" ऋ० १०।१२८।५। २वक्रे च "ईक्षमाणः पादेन तिरश्चीनेन चक्षुषा" भाग० ७।८।४।

**तिरस** अव्य० तॄ–असुन् खरादि। १अन्तर्द्धाने २तिर्य्यगर्थे च अमरः। ३तिरस्कारे चोरस्वामी। अस्य क्रिया वा ७त० स०। तिरस्कृत्य तिरः कृत्वेति "तिरस्कृत्योद्धरेत् काष्ठे"त्यादि मनुः "तिरस्क्रियन्ते क्षमितन्तुजालैः" माघः। तिरस्करोति णिच्–सकोपः। तिरयति आच्छादयतीत्यर्थः। "मुरारिसुखाम्बुजद्युतिरयं तिरयन्नपि वेदनाम्" जयदेवः।

**तिरस्कार** त्रि० तिरःकरोति कृ–ट। आच्छादके। स्त्रियां ङीष्। "अहो बत स्वर्गसक्तिरस्करी कृशस्यकी पुरुषयशस्करी भुवः" भाग० १।१०।२८।

**तिरस्करिणी** स्त्री तिरः करोति कृ–णिनि संज्ञापूर्वकविधेरनित्यत्वात् ह्रस्वाभावः ङीष्।(परदा) (काबात)। षटभये आच्छादकपदार्थे अमरः। "तिरस्करिण्यो जलदा भवन्ति" कुमा०। २आच्छादकमात्रे त्रि० "सोऽत्यासादात तद्देश्य तिरस्करिणमन्तरा" रामा० अयो० १५ स०।

**तिरस्कार** पु० तिरस्+कृ–भावे घञ्। १अनादरे हेला०। कर्त्तरि अण्। २अवज्ञाकारके त्रि०। "सौहृत्तिरस्कार इवात्तमन्युः" किराता०।

**तिरस्कारिन्** त्रि०तिरः करोति कृ–णिनि ह्रस्व०। १आच्छादके (कानात) २षटभेदे स्त्री ङीष्। ३अवज्ञाकारके त्रि०

**तिरस्कृत** त्रि०तिरस्+कृ–कर्म्मणि क्त। १अवज्ञाते अनादृते २आच्छादिते च अमरः "अविवक्षितवाच्यो यत्तत्र वाच्यं भवेद् ध्वनौ। अर्थान्तरे संक्रमितमत्यन्तं वा तिरस्कृतम्"काव्यप्र०। ४तन्त्रसारोक्ते मन्त्रभेदे पु० "यस्य मध्ये टकारोऽस्ति कवचं मूर्द्धनि द्विधा। अस्त्रं तिष्ठति मन्त्रः स तिरस्कृत उदीर्य्यते"।

**तिरस्क्रिया** स्त्री तिरस्+कृ–भावे श। १अनादरे २तिरस्कारे अमरः ३आच्छादने च "अप्रकटीकृतशक्तिः शक्रोऽपि जनातिरस्क्रियां लभते" पञ्चत०। "द्विषद्भिः प्रत्युत सा तिरस्क्रिया" माघ०। [तिरस्कृति अतिरस(स्त्री)त्।

**तिरस्य** पु० तिरस्+कण्ड्वा० यक् अन्तर्द्धाने सक० सेट्।

**तिरिट** पु० तॄ–बा० इटक्। इक्षुयन्त्रे शब्दमा०।

**तिरिम** पु० तॄ–बा० इमक्। शालिभेदे राजनि०।

**तिरिय** पु० तॄ–बा० इयक्। शालिभेदे राजनि०।

**तिरीट** न० तॄ–ईटक्। लोध्रवृक्षे उज्ज्वलद०।

**तिरीटक** पु० तिरीट+संज्ञायां कन्। लोध्रे अमरः।

**तिरोधान** न० तिर+धा–भावे ल्युट्। १अन्तर्द्धाने भावे घञ्। तिरोधाय स्त्री।

**तिरोभाव** पु० तिरस्+भू–भावे घञ्। १गुप्तभावे २अन्तर्द्धाने।

**तिरोहित** त्रि० तिरस्+धा–क्त। १अन्तर्हिते गुप्ते २आच्छादिते च "अतिरोहितमन्यत्" तत्त्वकौ०"एष ह वै पुरोहितो य एवं वेदाथ स तिरोहितो य एवं न वेद"ऐत०ब्रा० "न चामारं न च न्यूनं न दूरे न तिरोहितम्" मनुः

**तिर्य्यक्पातिन्** त्रि० तिर्य्यक् पतति पत–णिनि। वक्रप्रसारिते कुटिलवृत्तौ शब्दार्थचि०।

**तिर्य्यक्प्रमाण** न० कर्म्म०। विस्तारप्रमाणे।

**तिर्य्यक्स्रोतस्** पु० तिर्य्यक् स्रोतो आहारसञ्चारो यस्य। पशुपक्ष्यादौ तेषामशितान्नस्य तिर्य्यक्तया उदरे सञ्चारात् तथात्वम्। तद्भेदाभाग०। ३।१०।२१

"तिरश्चामष्टमः सर्गः षोऽष्टाविंशद्विधोमतः। अविदो भूरितमसो ब्राह्मणा ह्रस्वचेतिनः। गौरजो महिषः कृष्णः शूकरो गवयोरुरुः। द्विशफाः पशवश्चेमे अविरुष्ट्र च सत्तम!। खरोऽश्वोऽतरो गौरः शरभश्चमरी तथा। एते चैकशफाः क्षत्तः! शृणु पञ्चनखान् पशून्। श्वा शृगालो वृको व्याघ्रो मार्জ্জारः शशशल्लकौ। सिंहः कपिर्गजः कूर्म्मो गोधा च मकरादयः। कङ्कगृध्र बकश्येनभासभक्षूकवर्हिणः। हंससारसचक्राङ्गकाकोलूकादयः खगाः।"

"तिर्य्यक्स्रोतसां सर्गमाह तिरश्चामिति। स चाष्टाविंशतिभेदः। तिरश्चां लक्षणम् अविदः शब्दनादिज्ञानशून्याः। भूरितमसः आहारादिमात्रनिष्ठाः। ह्रस्वज्ञाः ह्रस्वमेवेदमर्थं जानन्ति ह्रस्वं चेदिनः दीर्घानुसन्धानशून्याः। तथा च श्रुतिः "अथेतरेषां पशूनाम् अथनामपि पाशे एवाभिविज्ञानं न विज्ञातं वदन्ति न विज्ञातं पश्यन्ति न विदुः शब्दनं न लोकालोकाविति"। अष्टाविंशतिभेदानाह गवादय उष्ट्रान्ताः द्विशफाः द्विखुरा नव गवादयः चमर्य्यन्ता एकशफाः षट्। श्वादयो गोधान्ताः पञ्चनखाद्दश। एवमेते भूचराः सप्तविंशतिः, मकरादयो जलचराः कङ्कादयश्च खगाः। अभूचरत्वेनैकीकृत्य सङ्गृहीताः। तदेवमष्टाविंशतिभेदात् वदन्ति। तेषु कृष्णरुरुगौराः सृगविशेषाः अन्येषामपि तिर्य्यक्प्राणिनामेतेष्वेव यथायथमन्तर्भावः।"

**तिर्य्यग्योनि** स्त्री तिरश्चां योनिः पशुपक्ष्यादिजातौ "स निष्क्रियां ह्रस्वचेतस्तिर्य्यग्योनौ च जायते" मनुः।

"अवध्यान्त्र स्त्रियं प्राड्विवर्ण्योनिगतामपि" ति० त०।

**तिल** गतौ भ्वा०पर०सक०सेट्। तेलति अतेलीत्। तितेल।

**तिल** स्नेहे तु० पर० अक० अनिट्। तिलति अतेलीत्। तितेल। [तिलत् त।

**तिल** स्नेहे चुरा० उभ० अक० सेट्। तेलयति ते अतीतिल पु०तिल-क। स्वनामख्याते शस्यभेदे। भावप्र०तद्गुणादयुक्तं यथा "तिलः कृष्णः सितो रक्तः सवर्णोऽल्पतिलः स्मृतः। तिलो रसे कटुस्तिक्तो मधुरस्त्वपरो गुरुः। विपाके कटुकः स्वादुः स्निग्धोष्णः कफपित्तनुत्। बल्यः केशग्रो हिमस्पर्शस्तच्चस्तन्योव्रणे हितः। दन्त्योऽल्पमूत्रकृद्गुर्वाही वातघ्नोऽग्निमतिप्रदः। कृष्णः श्वेतमस्तेषु शुक्लो मध्यमः सितः। अन्ये हीनतराः प्रोक्तास्तज्ज्ञैरक्तादयस्तिलाः"।

तिलप्रतिग्रहनिषेधमाह ब्रह्मपुराणम् "ब्राह्मणः प्रतिगृह्णीयात् इत्यर्थं साधुतत्त्वतः। अव्यक्तमपि मातङ्गतिलकौहांच वर्जयेत्" तिलदाने फलमाह विष्णुः। "तिलप्रदः प्रजामिष्टां दीपदश्चक्षुरुत्तमम्"। महाभारते "कल्यस्त्थाय यो विप्रः स्नातः शुक्लेन वाससा। तिलपात्रं प्रयच्छन् वै सर्वपापैः प्रमुच्यते"। शु० त० स्मृतिः "प्रेतस्तद्दिग्र यो दद्यात् हेमगर्भं तिलाढ्यम्। यावन्तस्ते तिलाः स्वर्गे तावत्कालं स मोदते"। सप्तम्यादिवर्जं तिलैः सदा स्नानं कर्त्तव्यमाह मार्कण्डेयः "सर्वकालं तिलैः स्नानं पुण्यं व्यासोऽब्रवीन्मुनिः। श्रीकामः सर्वदा स्नानं कुर्वीतामलकैर्नरः। रुग्मी नवमी चैव पर्वकालञ्च वर्जयेत्" जन्मतिथौ तिलनिष्पाद्याः षड्व्यापाराः कार्याः यथाह ति० त० "तिलोद्वर्ती तिलस्नायी तिलहोमी तिलप्रदः। तिलभुक् तिलवापी च षट्तिली नावसीदति" कालविशेषे तिलतर्पणनिषेधः गङ्गादौ च सर्वदा निषिद्धदिनेऽपि तिलतर्पणकार्यता च तर्पणशब्दे २०५८ पृ० उक्ता। रात्रौ तिलसंबद्धवस्तुमात्रस्याभक्षता "सर्वञ्च तिलसंबद्धं नाद्यादस्तमिते रवौ" काशी० "तिलाश्चम्पकसंस्रेषात् प्राप्नुवन्त्यधिवासताम्" कामन्दकी० "विक्रीणाति तिलैस्तिलान्" पद्मत०। २तिलतुल्ये रूढ्यप्रमाणे च "तिलं तिलं समादाय रत्नानां यद्विनिर्मिता। तिलोत्तमेति तत्तस्या नाम चक्रे पितामहः" भा० आ० ७६६६ श्लो०। ३तिलाकारे देहस्थे (तिल) ख्याते तिलकालके च "देवगुरुप्रसादेन जिह्वाग्रे मे सरस्वती। तेनाहं नृप! जानामि भानुमत्यास्तिलं यथा" कालिदासः।

तिलस्य विकारः अण्। तैल तिलनिर्यासे तिलस्नेहे तिलसदृशवस्तुजाते स्नेहे च "अदुष्टं सार्षपं तैलं यत्तैलं पुष्पवासितम्। अदुष्टं पक्वतैलञ्च स्नानाभ्यङ्गेषु नित्यशः" तिथित०। पर्वणि तन्निषेधमाह "स्त्रीतैलमांससंभोगी-विण्मूत्रनरकं व्रजेत्" ति०त० एवमन्यदिनेऽपि तैलनिषेधः स्मृतौ दृश्यः।

**तिलक** न० तिल-कन् तिल+स्वार्थे स्वार्थे वा कन् वा। १क्लोमनि २कृष्णसौवर्चले अमरः ३सौवर्चले मेदि०। ४तिलवृक्षे, पु० राजनि०। ५अश्वभेदे, पुंस्त्री० मेदि०। ६रोगभेदे, अमरः। ७मस्यके च हेमच०। स्वनामख्याते नामादौ धार्य्ये दृश्चन्दनादिविशेषके पुंन०। तस्य धारणप्रकारो यथा "द्वादशाङ्के ललाटादौ तिलकं हरिमन्दिरम्। स्नानान्ते वैष्णवः कुर्य्यात् प्रत्येकं कृष्णनामभिः। वामे वक्षसि नेत्रान्ते गण्डेऽसे शङ्खचिह्नितम्। तथैव दक्षिणे कुर्य्याद्धरेश्चक्रादिकं क्रमात्। ललाटे केशवं विद्यात् कण्ठे श्रीपुरुषोत्तमम्। वामबाहौ वासुदेवं सव्ये दामोदरन्तथा। नाभौ नारायणञ्चैव माधवं हृदये तथा। गोविन्दं दक्षिणे पार्श्वे वामे चैव त्रिविक्रमम्। विष्णुं सव्ये कर्णमूले दक्षिणे मधुसूदनम्। शिरोमध्ये हृषीकेशं पद्मनाभञ्च पृष्ठतः। हरेर्द्वादशनामानि पठित्वा तिलकानि तु। यः कुर्य्याद्वैष्णवो नित्यं स प्रेमभक्तिमाप्नुयात्। ये कण्ठलम्बतुलसीभवकाष्ठमाला ये द्वादशाङ्कहरिनामजतोर्द्धपुण्ड्राः। ये कृष्णभक्तिसुदृढा धृतशङ्खचक्रास्ते वैष्णवा भुवनमाशु पवित्रयन्ति। तिलकन्तूर्द्धपुण्ड्राख्यं मध्यच्छिद्रं हि नारद!। यदि कुर्य्याल्ललाटे तद्विष्णोर्यं हरिमन्दिरम्। नासामूलमारभ्य शिरोमध्यगतं सुने!। हरिपादाङ्कितं नासामूलमारभ्य यत्नतः। हरिमन्दिरवत् सर्वं तद्वाधावल्लभीयकम्। श्रीराधावल्लभीयं यत्तिलकं सुमनोहरम्। यौगलं तत्तु विज्ञेयं यदि मध्यसुरङ्कितम्। यदूर्द्धपुण्ड्रं तिलकं शोभनं तन्मनोहरम्। तन्मध्ये पीतरेखञ्च श्रीमद्भागवतं विदुः। श्रीरामोपासना यस्य तिलकं ऊर्द्धपुण्ड्रकम्। भ्रुवोर्मध्ये सविन्दु स्याद् यदि विप्र! मनोहरम्। हरेः सर्वावतारांश मत्स्यादीनां विशेषतः। उपासकानां तिलकं वेषं हरिमन्दिरम्। ऊर्द्धपुण्ड्रं द्विजः कुर्य्यात् क्षत्रियाणां तथैव च। वैश्यानान्तु तथा विप्र! शूद्रादेर्मण्डलाकृति। अच्छिद्रमूर्द्धपुण्ड्रन्तु ये कुर्वन्ति जनाधमाः। तेषां ललाटे सततं

शुनः पादो न संशयः । इदा भाले द्विजातीनामच्छिद्रमूर्द्धपुण्ड्रकम् । कार्ष्णः क्षणिकृतिं कृत्वा वक्त्रेणाच्छादयेन्मुखम् । ललाटदक्षिणे ब्रह्मा वसेद्धामे महेश्वरः । मध्ये विष्णुर्वसेच्चित्रं तस्मात् मध्यं न लेपयेत् । वर्तुलं तिर्य्यगच्छिद्रं ह्रस्वं दीर्घं ततं नतम् । षड्लक्षणसंयुक्तं तिलकं यत्नरर्चकम् । खनित्रयष्टिकूर्चनित्रिशूलसुकराकृति । त्रिपुण्ड्रमर्द्धचन्द्रञ्च तिलकं यत्नरर्चकम् । प्रमाणमूर्द्धपुण्ड्रस्य दीर्घं स्यात् कनिष्ठनम् । स्थानमारभ्य ब्रह्मरन्ध्रगतं यदि । शूद्रस्योकाङ्गुलं प्रोक्तमायतं द्व्यङ्गुलं विशि । क्षत्रिये त्र्यङ्गुलं तद्वद्ब्राह्मणे चतुरङ्गुलम् । नासिकायास्त्रिभागैको भागोमानेन यो भवेत् । भ्रुवोर्मध्यादधः स्थानं मूलमाहुर्मनीषिणः । ब्रह्मचारी गृहस्थश्च वानप्रस्थो यतिस्तथा । कुर्य्यात् यदूर्द्धपुण्ड्रं तद्वैष्णवो हरिमन्दिरम् । वैष्णवा विप्रा भूपाश्चेत् वैश्यशूद्रान्त्यजाश्रमाः । यदूर्द्धपुण्ड्रं विष्णुस्तदेव हरिमन्दिरम् । नरोवाथश्च वा नारी यदि क्षणपथं लभेत् । यत्नतस्तुलसीमाला सन्ध्यार्च्चा हरिमन्दिरम् । मध्यच्छिद्रं न कुर्य्यात् यत्तिलकं यदि वैष्णवः। अपदं तच्चितातुल्यं भवेन्नारद ! नान्यथा । दण्डाकारं द्विरेखं यत्तिलकं मूलकोषकम् । मध्यच्छिद्रन्तु तत्प्राहुर्द्धपुण्ड्रं मनोहरम् । अधोनखाग्रकलिकाकारं तिलकमुत्तमम् । मध्यच्छिद्रं युग्मरेखमूर्द्धपुण्ड्रं प्रकीर्त्तितम् । तीर्थमृद् यत्नकाष्ठञ्च बिल्वोमलयसम्भवम् । अश्वत्थतुलसीमूलमृत्तिका गोपदस्य च । जाह्नवी मृत्तुलसीकाष्ठमेव च । कस्तूरीकुङ्कुमं फल्गुसिन्दूरं रक्तचन्दनम् । गोरोचना गन्धकाष्ठं जलं चागुरु गोमयम् । धात्रीमूलस्य मृद्गन्धो हरिद्रा गोमृदस्य च । स्नानान्ते सर्ववर्णानामाश्रमाणान्तथैव च । एतानि तिलकान्याहुः सन्ध्यादिसर्वकर्म्मसु" । "गङ्गामृत्तुलसीमूलमृत्तिकामलयोद्भवम् । साधोश्चरणसंलग्नं रजोमृद्गोपदस्य च । वाश्वत्थमूलमृद्गोपीचन्दनं तीर्थमृत्तिका । कुङ्कुमं तुलसीकाष्ठं वैष्णवाहृतमृत्तिका । गोरोचना च कस्तूरी हरिद्रागुरुचन्दनम् । वल्मीकमृत्तिकागन्धः पङ्कं हरिचन्दनम् । गन्धकाष्ठं मङ्गानिम्बो यमुनातीरमृत्तिका । गुरुपादरजो वारिसमाध्वङ्गिरजो जले । स्नात्वा प्रतिदिनं स्नानमेतैर्गन्धमृदादिभिः । चारु यत्तिलकं वाक्त्रं तन्नान्या वैष्णवैर्भुवम् । कार्य्यं नैमित्तिकं नित्यं यत् किञ्चित् कर्म्म नारद ! । वर्णाश्रमाणां तन्नास्ति स्नानान्ते तिलकं विना । कर्म्म वर्णाश्रमाणां स्यात् दैवं पैत्रं न तत्फलम् । स्नानं सन्ध्यां पञ्च यज्ञान् पैत्रं होमादिकर्म्म यः । विना तिलकदर्भाभ्यां कुर्य्यात्तच्छिष्फलं भवेत्" । इति पद्मोत्तरखण्डम् "बीज्ञादर्थे जले वापि यो विदध्यात् प्रयत्नतः । ऊर्द्धपुण्ड्रं महाभागः स याति परमाङ्गतिम्" पाद्मे पातालखण्डे "शिवागमे दीक्षितैस्तु धार्य्यं तिर्य्यक् त्रिपुण्ड्रकम् । विष्णागमे दीक्षितस्तु ऊर्द्धपुण्ड्रं विधारयेत्" । इति नागोजीभट्टधृतसङ्गतसंहिता । पद्मपुराणे उत्तरखण्डे "ललाटे केशवं ध्यायेन्नारायणं मधोदरे । वक्षःस्थले माधवन्तु गोविन्दं कण्ठकूपके । विष्णुञ्च दक्षिणे कुक्षौ वामे च मधुसूदनम् । त्रिविक्रमं कन्धरे तु वामनं वामपार्श्वके । श्रीधरं वामबाहौ तु हृषीकेशन्तु कन्धरे । पृष्ठे तु पद्मनाभञ्च कट्यां दामोदरं न्यसेत् । ततःप्रक्षालनतोयन्तु वासुदेवेति मूर्द्धनि" । किञ्च "ऊर्द्धपुण्ड्रं ललाटे तु सर्वेषां प्रथमं स्मृतम् । ललाटादिक्रमेणैव धारणन्तु विधीयते" इति "एवं न्यासं समाचार्य्य सम्प्रदायानुसारतः । न्यसेत् किरीटमन्त्रञ्च मूर्द्धि सर्वार्थसिद्धये" अथ किरीटमन्त्रः "ओम् श्रीकिरीटकेयूरहारमकरकुण्डलचक्रगदापद्महलपीताम्बरधरश्रीवत्साङ्कितवक्षःस्थलश्रीभूमिसहितस्वात्मज्योतिर्दीप्तिकराय सहस्रादित्यतेजसे नमो नमः" हरिभक्तिविलासे ४विलासः । ऊर्द्धपुण्ड्रशब्दे अधिकं दृश्यम् । ध्रुवकभेदे यथा "पञ्चविंशतिवर्णाङ्कितिलको ध्रुवको भवेत् । दृष्टश्रुतपृष्टे ताले रसे वीरे अद्भूतेऽपि वा" सङ्गीतदा० । "सुखे मधुश्रीस्तिलकं प्रकाशय" कुमा० । तिलक इव उत्तरपदस्थः १०श्वेते "प्रियं तिलोकी तिलकः स एव" । "लोध्रचूर्णतिलकाकृतिः" भावः । स्वार्थे क । २तिलवृक्षे राजनि० । "न तिलकस्तिलकः प्रमदामिव" रघुः ।

**तिलकट** न० तिलस्य रजः कटच् । तिलरजसि ।

**तिलकल्क** पु० तिलस्य कल्कः । १पिण्याके (खलि) अमरः "कषायेण स्रोतोनोदकमादाय तिलकल्कमधुसर्पिःप्रगाढ़ौषधयुतां वर्त्तिं प्रविदध्यात्" "तिलकल्कः समधुको घृताक्तो व्रणरोपणः" सुश्रु० ।

**तिलका** स्त्री तिलं तिलपुष्पमिव कायति कै-क । क्षारभेदे जटा० "सगणद्वितयं भवतीह यदा रसवर्णपदा तिलकेति तदा" उक्तलक्षणके द्वादशाक्षरपादके २छन्दोभेदे च ।

**तिलकालक** पु० तिल इव कालकः कृष्णः । १देहस्थे २तिला-

कारे चिह्ने, ३रोगभेदे च अमरः "क्षणानि तिलमात्राणि नीरुजानि समानि च। वातपित्तकफोद्रेकात् तानु विद्यात् तिलकालकान्" सुश्रु०।

**तिलकाम्यय** पु० ६त०। ललाटे शब्दार्थक०।

**तिलकिट्ट** न० ६त०। तिलपिष्टाके "तिलकिट्टं तु रूक्षं स्यात् श्लयनं दृष्टिदोषकृत्। विष्मकारणं तद्वि भिषग्भिः परिकीर्त्तितम्" भावप्र०।

**तिलकिन्** त्रि० तिलक+अस्त्यर्थे इनि। तिलकधारिणि- "शिखी तिलकी कर्म्मी कृष्णात्" पा तिनिबन्धे कल्पद्रुतिः।

**तिलचित्रपत्रक** पु० तिलस्येव चित्रं पत्रमस्य कप्। तैलकन्दे वृक्षभेदे राजनि०।

**तिलचूर्ण** न० ६त०। चूर्णीकृततिले (तिलकुटा) १खाद्यभेदे। २तिलकल्के च राजनि०।

**तिलतण्डुलक** पु० तिलस्य तण्डुल इव कायति कै-क। १आलिङ्गने शब्दमा० आलिङ्गनस्य तिलतण्डुलवत् संश्लेषयुक्तत्वात् तथात्वम्। ६त०। २तिलस्य तण्डुले निस्तुषतिले पु० (माजातिल)।

**तिलतैजा** स्त्री तिल इव तेजयति चुरा० तिज-अच्। लताभेदे "कफजे तिलतैजाद्या दन्तीस्वर्जिकचित्रकाः" सुश्रु०

**तिलन्तुद** त्रि० तिलं तुदति तुद-खश् मुम्। तैलिके तिलपीड़के। [दशभेदे वृतशब्दे दृश्यम्।

**तिलद्वादशी** स्त्री तिलभोजनादिनियमयुक्ता द्वादशी। द्वा-

**तिलधेनु** स्त्री० तिलनिर्म्मिता धेनुः शा० त०। विधानेन दानार्थं तिलकृतायां धेनौ। तद्विधानं यथा।

"विधानं तिलधेनोस्त्वं ब्रूहि शीघ्रं द्विजोत्तम!। मुनिः प्राह विधानं यत् तच्छृणुष्व नराधिप!। षोड़शाढ़ककैर्धेनुश्चतुर्भिर्वत्सको भवेत्। इक्षुदण्डमयाः पादादन्ताः पुष्पमया शुभाः। नासा गन्धमयी तस्या जिह्वा गुड़मयी तथा। स्थितां कृष्णाजिने धेनुं वस्त्रोभिर्वासितां शुभाम्। स्वर्णेन वासितां कृत्वा पञ्चरत्नसमन्विताम्। सर्व्वौषधि समायुक्तां मन्त्रपूतान्तु दापयेत्। चन्द्रं मे जायतां सद्यः पानं सप्त रसास्तथा। कामं सन्तापयात्माकं तिलधेनुस्त्वपार्ज्जिताम्। भक्षयामि त्वां देवि! भक्त्या कुटुम्बार्थे विशेषतः। कुटुम्बकामं कुरुतां तिलोधेनो! नमोऽस्तु ते। एवंविधां नरोदत्त्वा तिलधेनुं नृपोत्तम!। सर्व्वकामसमाप्तिं च कुरुते नात्र संशयः" प०पु० स्व०।

**तिलपर्ण्ण** पु०तिलस्येव पर्ण्णमस्य। १श्रीवेष्टे वृक्षे राजनि०। २चन्दने न० राजनि०। ६त०। तिलवृक्षस्य १पत्रे न०।

**तिलपर्ण्णी** स्त्री तिलस्येव पर्ण्णान्यस्याः ङीप्। १रक्तचन्दने। अमरः २नदीभेदे स्त्री शब्दार्थचि०। तिलपर्ण्णीनदी आकरत्वेनास्यस्या अच् गौरा० ङीष्। ३सिद्धके गन्धद्रव्यभेदे स्त्री हेमच०। स्वार्थे क। तिलपर्णिका रक्तचन्दने हेमच०।

**तिलपिञ्ज** पु० पु० निष्कलस्तिलः तिल+पिञ्ज। निष्कलतिले "वस्त्रोरर्ज्जनकाण्डस्य यवस्य ते पलाल्या तिलस्य तिलपिञ्जरा" अथ० २।८।३।

**तिलपुष्पक** पु०तिलस्येव पुष्पमस्य कप्। विभीतकवृक्षे पारस्करनै०। त०। ६त०। २तिलस्य पुष्पे च ततस्तादृश्यात् ३नासिकायाम् तन्त्रसा०।

"पद्मं दन्ता तथा बिम्बं खञ्जनं शिखरन्तथा। चामरं रविबिम्बञ्च तिलपुष्पं सरोरुहम्। त्रिशूलं बीक्ष्य जम्बुश्च यतश्च गुरुभावतः।" पद्मं मुखं बिम्बमधरं खञ्जनञ्चक्षुः शिखरं मस्तकं चामरं केशं रविबिम्बं सिन्दूरं तिलपुष्पं नासिकां सरोरुहम् नाभिं त्रिशूलं त्रिवलीम्"। तन्त्रसारः।

**तिलपेज** पु०निष्कलस्तिलः तिल+पेज। निष्कले तिले अम०।

**तिलभार** पु० देशभेदे "तिलभाराः समीराश्च मधुमत्ताः सुकन्दकाः। भा० भी० ८३ अ०।

**तिलमय** त्रि०तिलस्य विकारः तिल+अर्शआद्यां मयट्। तिलविकारे संज्ञायां तु अण्। तैलमित्येव।

**तिलमयूर** पुंस्त्री० तिलपुष्पचित्रितः मयूरः शा० त०। (तिलेमयूर) मयूरभेदे त्रिका० स्त्रियां जातित्वात् ङीष्।

**तिलरस** पु० ६त०। तिलतैले।

**तिलशस्** अव्य० तिलं तिलं तत्परिमितं करोतीति नानार्थत्वात् वीप्सायां कारकार्थे शस्। तिलं तिलं छत्वेत्येवमाद्यर्थे। "तिलशस्तद्वयं चक्रे सान्वध्वजपताकिनम्" हरिवं० १८६ अ०।

**तिलशैल** पु० दानार्थं कल्पिते दशसु अचलेषु अचलभेदे। तिलाचलादयोऽप्यत्र। तिलाचलश्च द्विविधः तिलमयप्रधानमेरुः, धान्यशैलस्य पश्चात् कल्पितः तिलमयविष्कम्भगिरिश्च। तत्र मेरूपतिलशैलदानविधिर्यथा

"प्रथमो धान्यशैलः स्याद् द्वितीयो लवणाचलः। गुड़ाचलस्तृतीयस्तु चतुर्थो हेमपर्वतः। पञ्चमस्तिलशैलः स्यात् षष्ठः कार्पासपर्वतः। सप्तमो घृतशैलश्च रत्नशैलस्तथाष्टमः। राजतो नवमस्तद्वदृशमः शर्करागिरिः। वक्ष्ये विधानमेतेषां यथावदनुपूर्व्वशः। अयने विषुवे पुण्ये

व्यतीपाते दिनक्षये। शुक्लपक्षे तृतीयायामपराह्णे श्रविक्षये। विवाहोत्सवयज्ञेषु द्वादश्यामथ वा पुनः। शुक्लायां पञ्चदश्यां वा पुण्यर्क्षे वा विधानतः। धान्यशैलादयोऽपि देयाः शास्त्रं विजानता" इत्युपक्रमे। "अतःपरं प्रवक्ष्यामि तिलशैलं विधानतः। यत्प्रदानाच्चरोयाति विष्णुलोकं सनातनम्। उत्तमो दशभिर्द्रोणैर्मध्यमः पञ्चभिः स्मृतः। त्रिभिः कनिष्ठो विप्रेन्द्र! तिलशैलः प्रकीर्त्तितः। पूर्ववच्छापरान् सर्वान् विष्कम्भानभितोगिरीन्। दानमन्त्रान् प्रवक्ष्यामि यथावन्मुनिपुङ्गव!। यस्मात् मधुवधे विष्णोर्देहस्वेदसमुद्भवाः। तिलाः कुशाश्च माषाश्च तस्माच्छस्ता भवन्तिह। हव्ये कव्ये च यस्मात्ते तिला एवाभिरक्षणम्। भवादुद्धर शैलेन्द्र! तिलाचल! नमोऽस्तु ते"। इत्यामन्त्र्य च यो दद्यात् तिलाचलमनुत्तमम्। स वैष्णवं पदं याति पुनरावृत्तिदुर्लभम्। दीर्घायुष्यं समाप्नोति पुत्रपौत्रैश्च मोदते। पितृभिर्देवगन्धर्वैः पूज्यमानो दिवं व्रजेत्" मत्स्यपु० ८६ अ०। विष्णुस्वरूपतिलाचलस्तु यथा। "पश्चात्तिलाचलमनेकसुगन्धिपुष्पसौवर्णपिप्पलहिरण्मयहंसयुक्तम्। आकारयेद्भजतपुष्पवनेन तद्वद्वल्गान्वितं दधिसितोदरसत्पयोधे" मत्स्यपु० ८२ अ०।

**तिलस्नेह** पु० हृत०। तैले शब्दार्थक०। [राजनि०।

**तिलाङ्कितदल** पु० तिलेनाङ्कितं दलमस्य। तैलकन्दे

**तिलान्न** न०तिलमिश्रितमन्नं श्रा०त०। तिलमिश्रितेऽन्ने ओदने हेम०। [जीरके शब्दार्थचि०।

**तिलापत्या** स्त्री तिलस्येव क्षुद्रः अपत्यं बीजमस्याः। क्षुप-

**तिलित्स** पु० तैलं तिलिर्गतिस्तं त्सरति अत्यना गच्छति त्सर-ड। अजगरे सर्पभेदे अमरः स्त्रियां जातित्वात् ङीष्

**तिलोत्तमा** स्त्री अप्सरोभेदे "तिलोत्तमा नाम पुरा ब्रह्मणो योषिदुत्तमा। तिलं तिलं समुद्धृत्य रत्नानां निर्मिता शुभा" भा०अनु० १४१ अ०। तस्यास्तथानामकरणं यथा "तिलं तिलं समानीय रत्नानां यद्विनिर्मिता। तिलोत्तमेति तत्तस्या नाम चक्रे पितामहः" भा० आ० २११ अ०।

**तिलोदक** न० तिलमिश्रितमुदकम् श्रा० त०। तिलमिश्रिते उदके "तेषां दत्त्वा तु हस्तेषु सपवित्रं तिलोदकम्" मनुः "बलिं भित्त्वा तथाऽर्घ्यञ्च पितृणाञ्च तिलोदकम्" भा० अनु० १२६ अ०। "आवाहयिष्ये तान् सर्वान् दर्भपृष्ठे तिलोदकैः" वायुपु०।

**नतिलीद** पुंन० तिलमिश्रितः ओदनः। अजगरे शारा०।

"दुहिता मे पण्डिता जायेत सर्वमायुरियादिति तिलौदनं पाचयित्वा" शत०ब्रा० १४।८।४।१६। "तिलमिश्रमोदनं अजगरमित्यर्थः" भा०।

**तिलपिञ्ज** पु० तिल+पिञ्ज-वेदे डिच्च। बन्धतिले "दृषीकां जरतीमिङ्गां तिलपिञ्जं दण्डनं नडम्" अथ० १२।२।५४।

**तिल्य** न०तिलानां भवनं क्षेत्रम् यत्। १तिलभवनयोग्ये क्षेत्रे तिलाय हितं यत्। २तिलहिते त्रि०।

**तिल्ल** गतौ भ्वा०पर०सक०सेट्। तिल्लते अतिल्लीत्। तितिल्ल।

**तिल्व** पु० तिल-क्वे हे "उल्लादयश्चेति" उणा० नि०। १लोध्रे अमरः २श्वेतलोध्रे सुभूतिः ३रक्तलोध्रे चीरस्वामी स्वार्थे क। तत्रार्थे राजनि०। "न्यग्रोधाश्वत्थतिल्वकपरिव्रड्भुस्कुर्जविभीतकपाषणभस्मच्छ" कात्या०श्रौ०२१।३।२०"तिल्वकः तिलिशः" कर्कः।

**तिल्विल** त्रि०तिल-क्वे हे वा०कुतिलुः स्निग्धा दलाभूमिर्यस्मिन्। देवयजने स्थाने "भद्रे क्षेत्रे निर्मिता तिल्विले वा" ऋ०५। ६२।७ "हे व तिष्ठ निर्मिता तिल्विलास्मासिरावतीं मध्ये पौष्णस्य तिष्ठन्तीम्" आ० श्रौ० २।८८। "तिल्विलायध्वसुषमो विभातीर्यूयं पात स्वस्तिभिः सदा नः" ऋ० ७।७८।५। "तिल्विलायध्वं तिलुरिला भूमिर्यस्य तत् कुरुत" भा०।

**तिष्ठद्गु** अव्य०तिष्ठन्तो गावो यस्मिन् काले तिष्ठद्गु प्रभृतित्वात् नि० अव्ययीभावः। दोहनकाले "आ तिष्ठद्गु जपनं सन्यां प्रक्रान्तामायतीगवम्" भट्टिः।

**तिष्ठद्गुप्रभृति** न० अव्ययीभावे निपातनाद्गुशब्दसमूहे स च गणः पा० गणसू० उक्तो यथा

"तिष्ठद्गु वहद्गु आयतीगवम् खलेयवम् खलेधुसम् लूनयवम् लूयमानयवम् पूतयवम् पूयमानयवम् संहृतयवम् संहियमाणयवम्। संहृतधुसम् संहियमाणधुसम् समभूमि समपदाति सुप्रमम् विप्रमम्। दुःसमम् निप्रमम् अपसमम् आयतीसमम् प्रौढ़म् पापसमम् पुण्यसमम् प्राङ्मम् प्ररथम् प्रहगम् प्रदक्षिणम् अपरदक्षिणम् सम्प्रति असम्प्रति दृष्टप्रत्ययः समासान्तः"।

**तिष्ठद्धोम** स्त्री तिष्ठता होमो यत्र। यजतिरूपे यागभेदे "यजतिजुहोतीनां को विशेषः" कात्या०श्रौ० १।२।५ "यजतीनां यागानां जुहोतीनां होमानां च परस्परं को विशेषः को भेद इति प्रश्नः। तत्र यजतीनां विशेषमाह" कर्कः "तिष्ठद्धोमा वषट्कारप्रदाना याज्यापुरोनुवाक्यावन्तो यजतयः"। उच्चन्न इति शेषः। "तिष्ठता

होमो येषु ते तिरहोमाः वषट्कारेण प्रदानं येषु ते वषट्कारप्रदानाः तथा याज्यावनः पुरोऽनुवाक्यावनाश्च ये ते यजतय उच्यन्ते" कर्कः ।

**तिष्य** पु० तिष्यन्यक्षिन् तिष-क्यप् नि० । १पुष्यनक्षत्रे । तिष-दीप्तौ यक् अन्नाद्यादि०नि० । २कलियुगे न० । तिष्ये नक्षत्रे जातः अण् तस्य लुक् । ३पुष्यनक्षत्रजाते त्रि० । तिष्यं नक्षत्रमस्यत्र पौर्णमास्याम् अच् । ४पौषमासे शब्दरत्ना० स्वार्थे क । पौषमासे शब्दा० । तत्र पुष्यनक्षत्रे ।

"यदा सूर्यश्च चन्द्रश्च तथा तिष्यगुरुस्त्रयी । एकराशौ समेष्यन्ति प्रवक्ष्यति तदा कृतम्" । भा० व० १४० ६६ श्लो० कलियुगे "ततस्तिष्ये ऽथ संप्राप्ते युगे कलिपुरस्कृते । एकपादस्थितो धर्मो यत्र तिष्ये भविष्यति" भा० शा० ३४२ अ० । "मत्सम्प्रदायप्रथनाय तिष्ये शिष्यैश्चतुर्भिः सह योऽवतीर्णः । उक्तो हरेतत्सङ्गमतन्त्रराजे श्रीगङ्गुराचार्यगुरुं तमीड़े । "तपस्तादृक् च वा तिष्ये तिष्ये योगः क तादृशः । क वा व्रतं क वा दानं तिष्ये भोजस्ततः कुतः" काशीख० ३५ अ० । ५माङ्गल्ये त्रि० । [शब्दर० ।

**तिष्यपुष्या** स्त्री० तिष्यं माङ्गल्यं पुष्यं यस्याः । आमलक्याम् अमरः । "नित्यमामलके लक्ष्मीः" श्रुतेस्तत्फलस्य मङ्गलहेतुत्वात् तथात्वम् । [क्याम् शब्दरत्ना० ।

**तिष्या** स्त्री तिष्यं मङ्गलं हेतुत्वेनास्त्यस्या अच् । आमल-

**तिसृधन्व** न० तिसृभिरिषुभिर्युतं धन्व धनुः बहु० अच् समासान्तः अविभक्तावपि वेदे तिस्रादेशः । तिसृभिरिषुभिर्युक्ते धनुषि "तिसृधन्वं दक्षिणां ददाति" श्रुतः ब्रा० १।१।१।५।१० । "स तिसृधन्वमादायापचक्राम" १४।१।१।७ । [४सद्भावे च संज्ञिसारः ।

**तिहन्** पु०तिह-अर्दने कनिन् नि० । १व्याधौ २व्रीहौ ३धनुषि

**तीक** गतौ भ्वा० पर० सक० सेट् । तीकते अतीकिष्ट तितीके कदित् अतितीकत् त । शब्दस्तोमे याचनार्थं तोक्तिः प्राभिदिकी पा०गणपाठे तस्य गत्यर्थतयोक्तेः ।

**तीक्ष्ण** न०किज-क्त दीर्घश्च । १खरे खर्गे २विषे ३लौहभेदे (इस्पात)४युद्धे अमरः ५मरणे ६शस्त्रे ७शीघ्रे इति भारत० । ८सप्तकेऽपि मेदि० १०चव्यके राजनि० । ११मरिचे हेमच० । १२तीक्ष्णतायुक्ते त्रि० "तीक्ष्णश्चैव मृदुश्च स्यात् कार्यं वीक्ष्य महीपतिः" मनुः । "तीक्ष्णा नारुन्तुदा बुद्धिः कर्म शान्तं प्रतापवत्" माघः "अक्तिं चोभवतस्तीक्ष्णाम्" मनुः । "प्रतिभायां क्षीरके कटाचे दुर्वाक्ये नखे लवणे रविकरे" इति कविकल्पलतायां तीक्ष्णत्वसङ्गमः ।

१३यवक्षारे पु० मेदि० । १४श्वेतकृष्णे १५ कुन्दुरुके राजनि० । नक्षत्रविशेषगणे न० यथा "शक्राग्निशिवमूलाश्च मन्दाश्चतीक्ष्णदारुणे" ज्योतिषम् । १६क्षात्रत्यागिनि त्रि० मेदि० । १७निरालस्ये सुबुद्धौ त्रि० धरणी० १८योगिनि पु० अजयपालः । [राजनि० ।

**तीक्ष्णक** पु० तीक्ष्ण+संज्ञायां कन् । १गौरसर्षपे, २सप्तके च

**तीक्ष्णकण्टक** पु० तीक्ष्णः कण्टकोऽस्य । १धुस्तूरे २वर्बुरे, ३रुद्रजटायां, ४वंशे च जटाध० ५कन्यारीवृक्षे स्त्री टाप् । राजनि० ६तीक्ष्णकण्टकयुक्ते त्रि० कर्म० । ७तीक्ष्णं कण्टके पुंन० ।

**तीक्ष्णकन्द** पु० तीक्ष्णः कन्दो मूलमस्य । पलाण्डौ राजनि०

**तीक्ष्णकर्मन्** त्रि० तीक्ष्णं कर्मास्य । १तीव्रकार्यकरे आयःशूलिके त्रिका० । कर्म० । २तीव्रे कर्मणि न० ।

**तीक्ष्णकल्क** पु० तीक्ष्णः कल्कोऽस्य । तुम्बुरुवृक्षे राजनि० ।

**तीक्ष्णकान्ता** स्त्री नि०कर्म० । तारादेव्याम् उग्रतारायाम् ।

"पीठे दिक्करिवाहिन्या द्विरूपा वसते शिवा । तीक्ष्णकान्ताह्वया त्वेका योग्रतारा प्रकीर्तिता" । "पुरा लक्षितकान्ताख्या या श्रीमङ्गलचण्डिका । तस्यास्तु सततं रूपं तीक्ष्णकान्ताह्वयं नृप ! । कृष्णा लम्बोदरी या तु सा स्यादेकजटा शिवा । तेन रूपेण तां देवीं सततं परिपूजयेत्" कालि०पु० ८२ अ० ।

**तीक्ष्णगन्ध** पु० तीक्ष्णः गन्धोऽस्य । १शोभाञ्जनवृक्षे जटा० । वा कप् । अत्रैवार्थे राजनि० । २रक्ततुलस्याम् शब्दा० कुन्दरुनामगन्धद्रव्ये अमरः ।

**तीक्ष्णगन्धा** स्त्री तीक्ष्णः गन्धोऽस्याः । १यवान्यां, २राजिकायाम्, ३कन्यायां, राजनि० ४जीवन्त्याञ्च शब्दच० । ५श्वेतवचायां मेदि० ७लशुनैलायाम्,रत्नमा० [रत्नमा० ।

**तीक्ष्णतण्डुला** स्त्री० तीक्ष्णास्तण्डुला यस्याः । पिप्पल्याम्

**तीक्ष्णतैल** न० तीक्ष्णस्य स्नेहः तैलच् । १क्षुद्रीचीरे, २सर्जरसे, ३मद्ये च शब्दरत्ना० ।

**तीक्ष्णदंष्ट्र** पुंस्त्री तीक्ष्णा दंष्ट्रास्य । १व्याघ्रे राजनि० स्त्रियां ङीप् कर्म० । तीक्ष्णायां दंष्ट्रायाम् स्त्री । "तुतीक्ष्णदंष्ट्राः समाच शुभाः" हु० स० ६७ अ० ।

**तीक्ष्णधार** पु० तीक्ष्णा धारास्य । १खड्गे "असिर्विशसनः खड्गस्तीक्ष्णधारो दुरासदः । श्रीगर्भो विजयश्चैव धर्मपालो नमोऽस्तु ते । दक्षदो तव नामानि" खड्गपूजा-

मन्त्रः । २तीक्ष्णधारायुक्तमात्रे त्रि० । "नवनीतं हृदयं ब्राह्मणस्य वाचि क्षुरो निशितस्तीक्ष्णधारः । तदुभयमेतद्विपरीतं क्षत्रियस्य वाङ्नवनीतं हृदयं तीक्ष्णधारमिति" भा० आदि० ३ अ० ।

**तीक्ष्णपत्र** पु० तीक्ष्णानि पत्राण्यस्य । १तम्बुरुवृक्षे राजनि० । २तीव्रपत्रयुक्ते त्रि० कर्म्म० । ३तीक्ष्णे पत्रे न० ।

**तीक्ष्णपुष्प** न० तीक्ष्णं पुष्पमस्य । १लवङ्गे । २केतक्यां स्त्री टाप् । राजनि० । ३तिन्तिडीपुष्पयुक्ते त्रि० । कर्म्म० । ४तिन्तिडीपत्रे न० ।

**तीक्ष्णफल** पु० तीक्ष्णं फलमस्य । १तम्बुरुवृक्षे राजनि० । २तिन्तिडीफलयुक्ते त्रि० कर्म्म० । ३तिन्तिडीफले न० ।

**तीक्ष्णमूल** पु० तीक्ष्णं मूलमस्य । १शोभाञ्जने २कलञ्जने च राजनि० । ३तिन्तिडीमूलके त्रि० । कर्म्म० । ४तिन्तिडीमूले न० ।

**तीक्ष्णरश्मि** पु० तीक्ष्णा रश्मयोऽस्य । तिग्मांशौ १सूर्य्ये "भरतप्रज्वलितं तेजस्तीक्ष्णरश्मिर्विशोषयन्" हरिवं० ७२ अ० । २तिन्तिडीरश्मियुक्ते त्रि० । कर्म्म० । ३तिन्तिडीरश्मौ पु० ।

**तीक्ष्णरस** पु० तीक्ष्णो रसोऽस्य । १यवक्षारे रत्नमा० । २तिन्तिडीरसयुक्ते त्रि० । कर्म्म० । ३तिन्तिडीरसे पु० ।

**तीक्ष्णलोह** न० नि० कर्म्म० । (इस्पात) लौहभेदे ।

**तीक्ष्णशूक** पु० तीक्ष्णः शूकोऽस्य यस्य । १यवे । २खरशूकयुक्ते त्रि० । कर्म्म० । ३खरे शूके पु० न० ।

**तीक्ष्णसारा** स्त्री तीक्ष्णः कठिनः सारोऽस्याः । १शिंशपायाम् (शिशु) राजनि० । २तिन्तिडीसारयुक्ते त्रि० कर्म्म० । ३खरे सारे पुंन० ।

**तीक्ष्णा** स्त्री तीक्ष्ण+टाप् । १यवान्यां २सर्षपकङ्कालिकायाम् रत्नमा० ३कपिकच्छ्वां ४मङ्काल्योतिष्मत्याम् ५अत्यम्लपर्णीम् जटा० । ६तारादेव्याम् च । उग्रतारोपक्रमे "हे भगवन्येकजटे विघ्नेशे पदमन्ततः । विकटदंष्ट्रे घोणिन्हि तन्नस्तारा प्रचोदयात् । एषा तु तीक्ष्णा गायत्री पीठदेव्याः प्रकीर्त्तिता" । "पानेषु मदिरा श्रेष्ठा नरो बलिषु पार्थिव ! । मोदको नारिकेलश्च मांसं व्यञ्जनमेवच्च । नैवेद्येषु प्रियकरास्तीक्ष्णायाः परिकीर्त्तिताः ॥ कालि० पु० ८२ अ० ।

**तीक्ष्णायस** न० नि० कर्म्म० अच् समा० । लौहभेदे (इस्पात) राजनि० । [तितीम ।

**तीम** क्लेदने दिवा० पर० अक० सेट् । तीम्यति अतीमीत् ।

**तीर** पारगतौ कर्म्मसमाप्तौ च अद० चुरा० उभ० अक० सेट् । तीरयति ते अतितीरत् त ।

**तीर** न० तीर-अच् । नद्यादेः १कूले । २सीमके पु० अमरः । ३बाणे पु० त्रिका० । ४लवणे पु० मेदि० ।

"सार्द्धहस्तशतं यावत् गर्भंतस्तोरमुच्यते । भाद्रक्ष्णचतुर्दश्यां यावदाक्रमते जलम् । तावद्गर्भं विजानीयात् तदग्रतस्तीरमुच्यते" प्रा० त० उक्ते ५गङ्गाकूलभेदे न० "गङ्गातीरतरङ्गसङ्गतजलैः स्नात्वा हरो नार्चितः" सा० द० । "अगस्त्यतीरं सुनिसङ्गिवेशैः" रघुः । "अवकाशेषु चोच्चेषु नदीतीरेषु चैव हि" मनुः ।

**तीरग्रह** पु० देशभेदे "तीरग्रहाः शूरसेनाः ईजकाः कन्यकाः गुहाः" भा० भी० ९ अ० जनपदोक्तौ ।

**तीरभुक्ति** पु० (त्रिहोत) देशभेदे त्रिका० ।

**तीरु** पु० तॄ-बा० क्रु । शिवे "नमस्तेऽभीषुहस्ताय तीरभीरुहराय च" हरिवं० २७८ अ० । शिवस्तुतौ ।

**तीर्ण** त्रि० तॄ-क्त । १ उत्तीर्णे, २अभिभूते, ३व्याप्ते च । "तीर्णो हि तदा भवति" श्रुतिः "तीर्णाः पूर्णाः कति न सरितो लङ्घिताः के न शैलाः नाक्रान्ता वा कति वनभुवः क्रूरसञ्चारघोराः। पापैरेतैः किमिव दुरितं कारितो नाधि कष्टं यद्दृष्टास्ते धनमदमसीस्नानवक्त्रा दुरीशाः"।

**तीर्णपदी** स्त्री तरतेः कर्तरि क्तः। तीर्णः पादो मूलमस्याः अन्त्यलोपः कृष्णपद्या०ङीषि पद्भावः। तालमूल्याम् शब्दच०

**तीर्णा** स्त्री प्रतिष्ठाख्यवृत्तिविशेषे यथा "यस्मिन् वृत्ते वर्णाः वर्णाः वेदैर्वेदैः सा स्यात् तीर्णा" अस्याः कन्येत्यपि संज्ञा । "स्त्री चैतं कन्येति" लक्षणात् ।

**तीर्थ** न० तॄ-थक् । १शास्त्रे २यज्ञे ३क्षेत्रे ४उपाये ५नारीरजसि ६अवतारे ७ऋषिजुष्टजले ८पात्रे ९उपाध्याये १०मन्त्रिणि च मेदि० ॥ ११योनौ १२दर्शने १३घट्टे हेमच० । १४विप्रे १५आगमे १६निदाने १७वञ्चौ च संक्षिप्तसा० । तीर्थं त्रिविधम् जङ्गमं मानसं२ स्थावरं३ च । तथा हि "ब्राह्मणा जङ्गमं तीर्थं निर्मलं सार्वकामिकम् । येषां वाक्योदकेनैव शुद्ध्यन्ति मलिनाजनाः । अगस्तिरुवाच । शृणु तीर्थानि मदतो मानसानि समानघे ! ! येषु सम्यक् नरः स्नात्वा प्रयाति परमां गतिम् । सत्यं तीर्थं क्षमा तीर्थं तीर्थमिन्द्रियनिग्रहः । सर्वभूतदयातीर्थं सर्वत्रार्जवमेव च ! दानं तीर्थं दमस्तीर्थं सन्तोषस्तीर्थमुच्यते । ब्रह्मचर्य्यं परं तीर्थं तीर्थञ्च प्रियवादिता । ज्ञानं तीर्थं धृतिस्तीर्थं पुनश्च तीर्थमुदाहृतम् । तीर्थानामपि तत्तीर्थं विशुद्धिर्मनसः परा । एतत्ते कथितं देवि ! मानसं तीर्थलक्षणम् ।

भौमानामपि तीर्थानां पुण्यत्वे कारणं शृणु। यथा शरीरस्योद्देशाः केचिन्मोक्षप्रदाः स्मृताः। तथा पृथिव्यामुद्देशाः केचित् पुण्यप्रदाः स्मृताः। प्रभावाद्दुम्बुतादृभूमेः सलिलस्य च तेजसा। परिग्रहात् मुनीनाञ्च तीर्थानां पुण्यता स्मृता। तस्माद्भौमेषु तीर्थेषु मानसेषु च नित्यशः। उभयेष्वपि यः स्नाति स याति परमां गतिम्" तीर्थभेदा ब्रह्मपुराणे उक्ता यथा

मुनय ऊचुः। "पृथिव्यां यानि तीर्थानि वनान्यायतनानि च। वक्तुमर्हसि धर्म्मज्ञ! श्रोतुं नो वर्त्तते मनः। रोमहर्षण उवाच। यस्य हस्तौ च पादौ च मनश्चैव सुसंयतम्। विद्या तपश्च कीर्त्तिश्च स तीर्थफलमश्नुते। मनो विशुद्धं पुरुषस्य तीर्थं वाचांयमस्त्विन्द्रियनिग्रहस्तपः। एतानि तीर्थानि शरीरजानि स्वर्गस्य मार्गं प्रतिबोधयन्ति। चित्तमन्तर्गतं दुष्टं तीर्थस्नानं न शुध्यति। शतशोऽथ जलैर्धौतं सुराभाण्डमिवाशुचि। न तीर्थानि न दानानि न व्रतानि न चाश्रमाः। दुष्टाशयं दम्भरुचिं पुनन्ति व्यपतेन्द्रियम्। इन्द्रियाणि वशे कृत्वा यत्र तत्र वसेन्नरः। तत्र तस्य कुरुक्षेत्रं प्रयागं पुष्करं तथा। तस्माच्छृणुध्वं वक्ष्यामि तीर्थान्यायतनानि च। संक्षेपेण मुनिश्रेष्ठाः। पृथिव्यां यानि कानि च। विस्तरेण न शक्ष्यन्ते वक्तुं वर्षशतैरपि। प्रथमं पुष्करं तीर्थं नैमिषारण्यमेव च। प्रयागञ्च प्रवक्ष्यामि धर्म्मारण्यं द्विजोत्तमाः!। धेनुका चम्पकारण्यं सैन्धवारण्यमेव च। गया प्रयागं श्रीतीर्थं दिव्यं कनखलन्तथा। भृगुतुङ्गं शिरश्चाद्यं भीमारण्यं कुशस्थली। कोटितीर्थं सकेदारं मन्दारारण्यमेव च। महाप्रभं कुरुक्षेत्रं सर्व्वपापहरन्तथा। रूपतीर्थं शूकरञ्च चक्रतीर्थं महाफलम्। योगतीर्थं सोमतीर्थं तीर्थं शाखोटकं तथा। तीर्थं कोकामुखं पुण्यं वदरीशैलमेव च। सोमतीर्थं तुङ्गकूटं तीर्थं स्कन्दाश्रमन्तथा। सूर्य्यप्रभं रामतीर्थं सप्तसारस्वतं तथा। धर्म्मोद्भवं कोटितीर्थं तीर्थञ्चाघप्रणाशनम्। गङ्गाद्वारं पञ्चकुलं मध्यकेशवमेव च। चक्रप्रभं मतङ्गञ्च कृशदण्डञ्च विश्रुतम्। दंष्ट्राकुण्डं विष्णुतीर्थं सर्वकामिकमेव च। तीर्थं सुमलिनञ्चैव वदरीशुभ्रमं तथा। ब्रह्मकुण्डं वह्निकुण्डं तीर्थं सत्यपदन्तथा। चतुःस्रोतश्चतुःशृङ्गं शैलं द्वादशवारकम्। मानसं स्थूलशृङ्गञ्च स्थूलदण्डं तथोर्वशी। लोकपाली मरुवकं सोमाद्रिशैलमेव च। सदाप्रभं मेरुकुण्डं तीर्थं सोमाभिषेचनम्। महाशोभं कोचवकं पञ्चधारं त्रिधारकम्। सप्तधारेतितीर्थञ्च तीर्थञ्चामरकण्टकम्। शालग्रामं चक्रतीर्थं कोटिद्रुममनुत्तमम्। विन्दुप्रभं देवह्रदं तीर्थं विष्णुप्रभन्तथा। शङ्खप्रभं दारुकुण्डं तीर्थं वज्रायुधं तथा। अग्निप्रभं सुपुण्यागं देवप्रभमनुत्तमम्। विद्याधरं सगन्धर्वं श्रीतीर्थं ब्रह्मणा कृतम्। तीर्थञ्च लोकपालाख्यं पुण्यं पिण्डारकं तथा। वस्त्रापदं दारुवनं छायारोहणमेव च। वटावटं भद्रवटं कोषाम्बी च दिवाकरा। द्वीपं सरस्वती चैव विजयं कामजन्तथा। सारवं गोप्रतारञ्च गोचरं वटमूलकम्। स्थानकुण्डं प्रयागञ्च गुह्यं विष्णुपदन्तथा। कन्याश्रमं विष्णुपदं जम्बुमार्गं तथोत्तमम्। गर्भस्तितीर्थञ्च तथा ययाति पतनं शुचि। कोटितीर्थं भद्रवटं महाकालवनं तथा। नर्म्मदातीर्थपरमं तीर्थं वर्षं तथार्बुदम्। पिङ्गतीर्थं सावभ्रिष्टं तीर्थञ्च प्रियसङ्गमम्। तीर्थं दौर्वासिकं नाम तथा पिङ्गरकं शुभम्। ऋषितीर्थं ब्रह्मकुण्डं वसुतीर्थं कुमारिका। शक्रतीर्थं शाम्बनदं रेणुकातीर्थमेव च। पैतामहञ्च विमलं रुद्रपादं तथोत्तरम्। मणिमन्थञ्च कामाख्यं कृष्णतीर्थं कुमारिषम्। यजनं याजनञ्चैव तथैव ब्रह्मवालकम्। पुष्पाभ्यासं पुष्करीकं मणिपूरं तथोत्तरम्। दीर्घसत्रं हंसपदं तीर्थञ्चानशनन्तथा। गङ्गोद्भेदं शिवोद्भेदं नर्म्मदोद्भेदमेव च। वज्रकोटि शङ्खमानं तीर्थं शक्रावनामितम्। समन्तपञ्चकं तीर्थं ब्रह्मतीर्थं सुदर्शनम्। सततं पृथिवीतीर्थं पञ्चयज्ञं पृथूदकौ। दशाश्वमेधिकं तीर्थं सर्पिदं विषयान्तिकम्। कोटितीर्थं पञ्चनदं वाराहं पक्षिणीह्रदम्। पुष्करीकं सोमतीर्थं मङ्कुवाटं तथोत्तमम्। बदरीवनमासीमं रत्नमूलकमेव च। लोकद्वारं पञ्चतीर्थं कपिलातीर्थमेव च। सूर्य्यतीर्थं शङ्खिनी च धराभवनमेव च। तीर्थं च यक्षराजस्य ब्रह्मावर्तं सुतीर्थकम्। कामेश्वरं माहतीर्थं तीर्थं शीतवनं तथा। स्थानशोभायनञ्चैव मांसभक्षनकं तथा। दशाश्वमेधं केदारं ब्रह्मोदुम्बरमेव च। सप्तर्षिकुण्डञ्च तथा तीर्थं देव्याः सुजम्बुकम्। इडास्थं कोटिकूटं किन्नरं किंजपं तथा। कारण्डवञ्च विन्ध्यञ्च त्रिपिटप्रमथापरम्। प्राणिद्वारं मित्रकञ्च मधुवटमनोजवौ। कौशिकी देवतीर्थञ्च तीर्थञ्च कृष्णमोचनम्। दिव्यञ्च तृणबिन्दाख्यं तीर्थं विष्णुपदन्तथा।

श्रीकुण्डं शान्तितीर्थञ्च नैमिषेयञ्च विश्रुतम्। ब्रह्मस्थानं सोमतीर्थं कन्यातीर्थं तथोत्तरम्। ब्रह्मतीर्थं मनस्तीर्थं तीर्थञ्चैवावतन्तथा। सौगन्धिकवनञ्चैव मणितीर्थं सरस्वती। ईशानतीर्थं प्रवरं पाणिनं पाशुयन्त्रिकम्। त्रिशूलधारा माहेन्द्रं देवस्थानं ऋतालयम्। शाकम्भरी देवतीर्थं स्वर्णाख्यं कालियं ह्रदम्। क्षीरेश्वरं विरूपाक्षं भृगुतीर्थं कुशोद्भवम्। ब्रह्मतीर्थं ब्रह्मयोनिं नीलपर्वतमेव च। कुब्जाम्रकं भद्रवटं वशिष्ठपदमेव च। धूमावर्त्तं तथा मेकं वाराहं कपिलञ्च यत्। स्वर्गद्वारं प्रजाद्वारं कालिकाश्रममेव च। रुद्रावर्त्तं सगन्धाख्यं कपिलावनमेव च। भद्रकर्णं ह्रदञ्चैव शङ्खकं ह्रदकं तथा। सप्तसारस्वतञ्चैव तीर्थमौशनसं तथा। कपालमोचनञ्चैव नरकञ्चैव काम्यकम्। तत्र सान्निध्यकञ्चैव प्रतिकञ्च सङ्गमिकम्। रेणुकं पञ्चवटकं विमोचनमथौजसम्। विश्वेश्वरं वामनकं कक्षं नारायणाश्रमम्। गङ्गाह्रदं वटञ्चैव बदरी पचनन्तथा। ऐन्द्रमार्गमेकरात्रं क्षीरिकारामभेव च। सोमतीर्थं दारवञ्च ऋततीर्थञ्च भोद्विजा!। कन्याश्रमं सन्निहितं कोटितीर्थञ्च पुष्कदी। कोटितीर्थस्थलीञ्चैव भद्रकालीह्रदन्तथा। अरुन्धतीवनञ्चैव ब्रह्मावर्त्तन्तथोत्तमम्। अश्ववेदी कुब्जवनं यमुनाप्रभवं तथा। वीरप्रभोजं सिन्धूत्थं शमीकृत्या सकृत्तिका। उर्वशीक्रमणञ्चैव मायाविद्योद्भवन्तथा। महाश्रमो वेतसिकारूपं सुन्दरिकाश्रमम्। ब्रह्मतीर्थन्तु वैशालं गङ्गोद्भेदं सरस्वती। अरुणोदं तथा चान्द्रं शक्रतीर्थं सवालुकम्। तीर्थञ्चैवाविमुक्ताख्यं नीलकण्ठह्रदन्तथा। स्वर्गद्वारं किम्पुरिका तीर्थकोटिस्तथैव च। पिशाचमोचनञ्चैव शुभद्राह्रदमेव च। कुण्डं विमलदं तत्तीर्थं चण्डेश्वरञ्च। अट्टहासह्रदञ्चैव हरिकेशवनं तथा। अजासुखवनञ्चैव घण्टाकर्णह्रदन्तथा। पुण्डरीकह्रदञ्चैव वापीकङ्कोटिकन्तथा। कुण्डं घर्घरिकायाश्च श्यामाकं पद्मपुष्पदम्। प्रज्ञानगुप्तकुण्डञ्च विनायकह्रदन्तथा। कूपं सिद्धभवञ्चैव पुण्यं ब्रह्मसरन्तथा। रुद्रावासं तथा तीर्थं नागतीर्थं सुलोमकम्। मङ्कुतीर्थं महातीर्थं श्रेष्ठा चैव महानदी। दिव्यं ब्रह्मसरः पुण्यं गयाशीर्षाख्यं वटम्। दक्षिणञ्चोत्तरञ्चैव गोभवं रूपशान्तिकम्। कपिलह्रदं स्टप्रकूटं सावित्रीह्रदमेव च। प्रभासनं शीतवनं योनिद्वारञ्च धेनुकम्। रम्यकं कोकिलाख्यञ्च मतङ्गह्रदमेव च। पितृकूपं रङ्गतीर्थं शक्रतीर्थं सुमालिनम्। ब्रह्मस्थानं सप्तकुण्डं मणिरत्नह्रदन्तथा। सङ्गलस्याश्रमञ्चैव सङ्गल्याह्रदमेव च। तीर्थं जनककूपाख्यं वैश्यं विनशनन्तथा। आद्यं विनाशतीर्थञ्च धारा माहेश्वरी तथा। देवपुष्करिणी रम्या पर्य्यङ्ककूपमेव च। जातिस्मरं वामनकं वटेश्वरह्रदन्तथा। कौशाख्यं भरतञ्चैव तीर्थं श्रेष्ठालिका तथा। विश्वेश्वरं कल्पगतं कन्यासायुज्यमेव च। वाराहकं कोटितीर्थं कुमारं सर्वतीर्थकम्। वीराश्रमं ब्रह्मसरो वीरवीरा च तापिनी। कुमारधारा श्रीधारा गौरीशिखरमेव च। कुम्भकर्णं पदञ्चैव कौशिकीह्रदमेव च। धर्मतीर्थं कामतीर्थं तीर्थसङ्घातकं तथा। दण्डा विमालिनी तीर्थं तीर्थञ्चैव नरेश्विका। सन्ध्यातीर्थं कारतोयं कपिला लोहितार्णवम्। सोमोद्भवं वंशगुल्मसप्तर्षं कालतीर्थकम्। पुण्यतीर्थह्रदं तीर्थं तीर्थं बदरिकाश्रमम्। रामतीर्थं सिन्धुवनं विरजातीर्थमेव च। मार्कण्डेयवनञ्चैव लक्ष्मणतीर्थं तथा वटम्। ध्रुवं स्वरूपं प्रवरमिन्द्रद्युम्नसरश्च यत्। सानुगर्त्तं समाहेन्द्रं प्रीतीर्थं श्रीवनन्तथा। दृषद्वतीर्थञ्चर्षभञ्च कावेरीतीर्थमेव च। कन्यातीर्थञ्च गोतीर्थं सोमतीस्थानमेव च। संवर्त्तस्थापिनी स्थानं सप्तगोदावरीह्रदम्। बदरीह्रदसन्यञ्च ब्रह्मदण्डाविकर्त्तनम्। जातिह्रदं वेदह्रदं कुशप्लवमेव च। सर्वदेवव्रतञ्चैव कन्याश्रमह्रदन्तथा। तथान्यत् वा लिखितानां सप्तर्षीणां तथा परम्। तथान्यच्च सप्तर्षीणामखण्डितह्रदन्तथा। तीर्थेष्वेतेषु विधिवत् सम्यक् श्रद्धासमन्वितः। स्नानं करोति यो मर्त्यः सर्वपापैः प्रमुच्यते। अश्वमेधं देवतास्तत्र स्थित्वा च रजनीत्रयम्। पृथक् पृथक् फलं तेषु प्रतितिष्ठंच भो द्विजाः!। प्राप्नोति ह्यमेधस्य फलं प्राप्नोत्यसंशयम्। यस्त्विदं शृणुयान्नित्यं तीर्थमाहात्म्यमुत्तमम्। पठेच्च श्रावयेद्वापि सर्वपापैः प्रमुच्यते"।

पद्मपुराणे श्राद्धे प्रशस्ततीर्थानि उक्तानि यथा

भीष्म उवाच। "कस्मिन् वासरभागे तु श्राद्धं श्राद्धी समाचरेत्। तीर्थेषु केषु वै श्राद्धं कृतं बहुफलं भवेत्। पुलस्त्य उवाच। तीर्थन्तु पुष्करं नाम पुण्यं श्रेष्ठतमं स्मृतम्। सर्वेषां द्विजमुख्यानां मनोरथस्थितं तथा। यत्र दत्तं हुतं सर्वमनन्तं सुनिरन्नगोत्।

पितृणां वल्लभं नित्यमक्षयीणां परमं प्रियम्। नन्दयु-
र्ललिता तद्वत्तीर्थं मायापुरी तथा। शुभं मित्रपदं
राजंस्ततः केदारसत्तमम्। गङ्गासागरसम्भेदाः सर्व-
तीर्थमयं शुभम्। तीर्थं ब्रह्मसरस्तद्वत् शतदुः सलिला-
ह्रदः। तीर्थन्तु नैमिषञ्चैव सर्वतीर्थफलप्रदम्। गङ्गोद्भे-
दस्तु गोमत्यां यत्रोद्भूतः सनातनः। तथा वत्सवराहस्तु
देवदेवश्च शूलधृक्। यत्र तत् काञ्चनद्वारमष्टादशभुजो-
ज्ज्वरः। नेमिस्तु धर्म्मचक्रस्य शीर्णो यत्राभवत् पुरा।
तदेतच्चैमिषारण्यं सर्वतीर्थनिषेवितम्। देवदेवस्य
तत्रापि वराहस्य च दर्शनम्। यः प्रयाति स पूतात्मा
नारायणपुरं व्रजेत्। लोकासङ्खं परं तीर्थं ब्रह्मणोऽव्यक्त
जन्मनः। पुष्करारण्यसंस्थोऽसौ यत्र देवः पितामहः।
विरिञ्चिदर्शनं श्रेष्ठं त्वपवर्गफलप्रदम्। कृतं तेन
महापुण्यं सर्वपापनिकृन्तनम्। यत्रादौ नरसिंहस्तु
स्वयमेव जनार्द्दनः। तीर्थनिच्छमती नाम पितृणां
वल्लभा सदा। तृप्यन्ति पितरो नित्यं गङ्गायत्तनमङ्गमे।
कुरुक्षेत्रं महापुण्यं यत्र मार्गोऽपि कथ्यते। अद्यापि
पितृतीर्थं तत् सर्वकामफलप्रदम्। नीलकण्ठमिति
ख्यातं पितृतीर्थं नराधिप!। तथा मरुवरः
पुण्यं सरोमानसमेव च। मन्दाकिनी तथाच्छेदो विपा-
शाथ सरस्वती। पूर्वमिन्द्रपदं तद्वदैद्यनाथं महासुखम्।
गोदावरी तथा पुण्या तथा कालञ्जरं शुभम्। वंशोद्-
भेदं हरोद्भेदं गङ्गोद्भेदं महालयम्। भद्रेश्वरं वि-
ष्णुपदं नर्म्मदाह्रदमेव च। गवामिषुप्रदानेन समा-
न्याद्धर्म्महर्षयः। एतानि पितृतीर्थानि सर्वपापहराणि
च। स्मरणादपि लोकानां किंतु श्राद्धप्रदायिनाम्।
ओङ्कार पितृतीर्थन्तु कावेरी कपिलोदकम्। कुरुक्षे-
त्राच्छतगुणम् तस्मिन् स्नात्वादिकञ्चरेत्। शक्रतीर्थन्तु
विख्यातं तीर्थं सोमेश्वरं स्मृतम्। सर्वव्याधिहरं पुण्यं
फलं कोटिशताधिकम्। श्राद्धे दाने तथा होमे स्वाध्याये
जपसन्निधौ। जायावरोहणं नाम देवदेवस्य शूलिनः।
ह्यवतारं रोचयानो ब्राह्मणावसथे शुभे। जातं तत्
सुमहापुण्यं तथा चर्म्मण्वती नदी। नदी च वरुणा
तद्वत्तीर्थं कौताशनं परम्। भैरवं भद्रतुङ्गञ्च गौरी-
तीर्थमनुत्तमम्। तीर्थं वैनायकं नाम वज्रेश्वरमनुत्तमम्।
तथा पापहरं नाम पुण्या वेत्रवती नदी। शूलतापी
पयोष्णी च पयोष्णीसङ्गमस्तथा। महाबोधी पदेनापि
नागतीर्थमवल्लिका। तथा वेष्णा नदी पुण्या महाग-
स्त्यश्चैव च। महारुद्रो महालिङ्गो दशार्णा च महा-
नदी। शतरुद्रागता वापि तथा पितृपदं परम्। युद्ध-
वाराहिकं तद्वद्रुद्रौ द्वौ शोणधरौ। कालिका च नदी
पुण्या पितरा च नदी तथा। एतानि पितृतीर्थानि
शस्यन्ते स्नानदानयोः। श्राद्धमेतेषु यद्दत्तं तदनन्तफलं
स्मृतम्। अनीचाटनदीधारा शवशीरनदी तथा।
द्वारका लवणतीर्थञ्च तथाच्युत सरस्वती। नदी मणिमती
नाम तथा च गिरिकर्णिका। धृतपापं तथा तीर्थं
सप्तरुद्रे दक्षिणे तथा। गोकर्णो गणकर्णश्च तथा च
पुरुषोत्तमः। श्रीशैलं शाकतीर्थञ्च नारसिंहमतः परम्।
महेन्द्रश्च तथा पुण्यः पुण्या चापि महानदी। एतेष्वपि
सदा श्राद्धमनन्तफलमश्नुते। दर्शनादपि पुण्यानि सद्यः
पापहराणि च। तुङ्गभद्रा नदी पुण्या तथा भीम
नदी सरित्। भीमेश्वरं कृष्णवेष्णा कावेरी वक्रुरा नदी।
नदी गोदावरी पुण्या त्रिसन्ध्या तीर्थमुत्तमम्।
तीर्थं त्रैयम्बकं नाम सर्वतीर्थनमस्कृतम्। यत्रास्ते भग-
वान् भीमः स्वयमेव त्रिलोचनः। श्राद्धमेतेषु तीर्थेषु
दत्तं शतगुणं भवेत्। स्मरणादपि पापानि व्रजन्ति
शतधा नृप!। श्रीपर्णी च नदी पुण्या व्यासतीर्थमनु-
त्तमम्। तथा मत्स्यनदीधारा शिवधारा तथैव च।
भवतीर्थञ्च विख्यातं पुण्यतीर्थञ्च शाश्वतम्। पुण्यं रामे-
श्वरं तद्वदेलापुरमनुत्तमम्। ओङ्कारभद्रं विख्यात-
माम्रदर्शनायुधम्। तीर्थं वृतेश्वरं तद्वत्तथा कोकामुखं
परम्। गोवर्द्धनं हरिश्चन्द्रं पृथुचन्द्रं पृथूदकम्। मह-
ल्लाक्षं हिरण्याक्षं तथा च कदली नदी। नागाधि
पापि च तथा तथा सौमित्रमुत्तमम्। इन्द्रनीलं
महानादं तथा च प्रियमेलकम्। एतान्यपि सदा श्राद्धे
प्रशस्तान्यधिकानि च। एतेषु सर्वदेवानां सान्निध्यं
पठ्यते यतः। दानमेतेषु सर्वेषु भवेत् कोटिशताधिकम्।
वाडवा च नदी पुण्या तथा सिद्धवनं शुभम्। तीर्थं
पाशुपतञ्चैव नदी पर्पटिका तथा। श्राद्धमेतेषु सर्वेषु
दत्तं कोटिशताधिकम्। तथैव पर्वतीर्थञ्च त्रिपुरं खाण्डवं
नदी। धुता सिद्धसरश्चैव सव्येतरजलाप्लुता। जाम-
दग्न्यस्य तत्तीर्थं वेदायतनसत्तमम्। प्रतीकक्षाभया
सिद्धा यदा गोदावरी नदी। तीर्थं तद्व्यक्ष्यानाम-
प्सरोगणसंयुतम्। श्राद्धादिदानकार्य्यञ्च तद्वत् कोटि
शताधिकम्। तथा सहस्रलिङ्गञ्च राघवेश्वरसत्तमम्।
सैन्द्रफला नदी पुण्या यत्र दुःखाद्वतः पुरम्। निमेष

प्रकृतिमित्रं तपसा स्वर्गमाप्नुयात्। तत्र दत्तं नरैः श्राद्धमनन्तफलदं भवेत्। पुष्करं नाम वै तीर्थं ग्राम्यायां तत्रैव च। गौनपातच विख्यातो यत्र वैश्वानरालयः। तीर्थं सारस्वतं नाम स्वामितीर्थं तथैव च। मनन्दुरा नदी पुण्या कौशिकी चन्द्रिका तथा। विदर्भा चाथवेणाच पयोष्णी प्राङ्मुखी परा। कावेरी चोत्तरागा च तथा जालन्धरो गिरिः। एतेषु श्राद्धतीर्थेषु श्राद्धमानन्त्यमश्नुते। कौरुदण्डं तथा दण्डं चित्रकूटनलेव च। दिव्यं सर्वत्र गङ्गायास्तथा नदीतटं शुभम्। कुब्जाम्रञ्च तथा तीर्थमुर्वशीपुलिनं तथा। संसारमोचनं तीर्थं तत्रैव ऋणमोचनम्। एतेषु त्रिषु तीर्थेषु श्राद्धमानन्त्यमश्नुते। चटुकासं तथा तीर्थं गौतमेश्वरमेव च। तथा वशिष्ठतीर्थञ्च भारतञ्च ततः परम्। ब्रह्मावर्त्तं कुशावर्त्तं हंसतीर्थं तथैव च। पिण्डारकञ्च विख्यातं शङ्खोद्धारं तथैव च। खाण्डवेश्वरं विश्वकञ्च नीलपर्वतमेव च। तथा च बदरीतीर्थं रामतीर्थमतथैव च। जयन्तं विजयञ्चैव शुक्रतीर्थं तथैव च। एतेषु श्राद्धदातारः प्रयान्ति परमं पदम्। तीर्थं मातृष्वसृं नाम करवीरपुरं तथा। सप्तगोदावरीतीर्थं सप्ततीर्थेश्वरेश्वरम्। तत्र श्राद्धं प्रदातव्यमनन्तफलमिच्छुभिः। कीकटेषु गया पुण्या पुण्यं राजगृहं वनम्। ऋषभाश्रमं पुण्यं नदी पुण्या पुनःपुनाः। यत्र गाथा विचरति ब्रह्मणा परिकीर्त्तिता। एडव्याबकवः पुत्रो यदाधेको गयां व्रजेत्। यजेताश्वमेधेन नीलं वा वृषमुत्सृजेत्। एषा गाथा विचरति तीर्थेष्वायतनेषु च। सर्वे मनुष्या राजेन्द्र! कीर्त्तयन्तः समागताः। किमस्माकं कुले कश्चिद्यां यास्यति मत्सुतः। प्रीणयिष्यति ताङ्क्त्वा सप्त पूर्वांस्तथा ऽवरान्। मातामहानामप्येवं स्मृतिरेषा चिरन्तनी। गङ्गायाङ्कास्थिनिचयं गत्वा क्षेपयति मत्सुतः। तिलैः सप्ताष्टभिर्वापि दास्यते च जलाञ्जलिम्। अरण्ये त्रितये चापि पिण्डदानं करिष्यति। प्रथमं पुष्करारण्यं नैमिषन्दनन्तरम्। धर्मारण्यं ततः प्राप्य श्राद्धं भक्त्या प्रदास्यति। गयायां धर्म्मपृष्ठे वा सरसि ब्रह्मणस्तथा। गयाशीर्षवटे चैव पितॄणां दत्तमक्षयम्। व्रतं कृत्वैवरो यस्तु श्रद्धानं परिसर्पति। नरकस्थान् पितॄंस्तारयते स्वर्गं नयति सत्वरः। कुले तस्य न राजेन्द्र! प्रेतो भवति कश्चन। प्रेतत्वनोक्षभावञ्च पिण्डदाताच्च गच्छति। गयायां पिण्डदानस्य नान्यत्स्थानं विशिष्यते। एकेन पिण्डदानेन तृप्तास्ते मोक्षगामिनः। धान्यप्रदानं प्रवरं वदन्ति वस्त्रप्रदानञ्च तथा मुनीन्द्राः। तोयञ्च तीर्थेषु नरैः प्रदत्तं तद्धर्मक्षेत्रं प्रवरं प्रदिष्टम्। सर्वाच्छा सुरुचिरा महावला महानदी। ये तु पश्यन्ति तां गत्वा मानसे दक्षिणोत्तरे। प्रणम्य द्विजमुख्येभ्यः प्राप्तं तैर्जन्मनः फलम्। यदुयदिच्छति वै मर्त्यस्तत्तत् प्राप्नोत्यसंशयम्। एष तद्देशतः प्रोक्तस्तीर्थानां संग्रहो मया। वाग्मीशोऽपि न शक्नोति विस्तरात् किमु मानुषः" पुराणसर्वस्वे।

श्राद्धे तीर्थभेदस्य प्राशस्त्यं विष्णुसंहितायामुक्तं यथा

"अथ पुष्करेषु श्राद्धम् अथक्षोमतपांसि च। पुष्करे स्नानमात्रतः सर्वपापेभ्यः पूतो भवति। एवमेव गयाशीर्षे अक्षयवटे अमरकण्टकपर्वते वराहपर्वते यत्र कचन नर्मदातीरे गङ्गायां विशेषतः, कुशावर्त्ते विल्वके नीलपर्वते कनखले कुब्राम्रे भृगुतुङ्गे केदारे महालये नड्वलिकायां सुगन्धायां शाकम्भर्यां फल्गुतीर्थे महागङ्गायां त्रिधालिकाश्रमे कुमारधारायां प्रभासे यत्र कचन सरस्वत्यां विशेषतः। गङ्गाद्वारे प्रयागे च गङ्गासागरसङ्गमे। सततं नैमिषारण्ये वाराणस्यां विशेषतः। अगस्त्याश्रमे कौशिक्यां सरयूतीरे गोचक्र ज्योतिषावाच सङ्गमे। श्रीपर्वते कालोदके उत्तरमानसे वडवायां मतङ्गवाप्यां सप्तर्षे विष्णुपदे स्वर्गमार्गपदे गोदावर्य्यां गोमत्यां वेत्रावत्यां विपाशायां वितस्तायां शतद्रुतीरे चन्द्रभागायाम् इरावत्यां सिन्धोस्तीरे दक्षिणे पञ्चनदे कौशलसे। एवमादिष्वन्येषु तीर्थेषु सरिद्वरासु सर्वेष्वपि स्वभावेषु पुलिनेषु प्रस्रवणेषु पर्वतेषु निकुञ्जेषु वनेषूपवनेषु गोमयोपलिप्तेषु मनोज्ञेषु"

तीर्थागमने दोषो यथा "अनुपोष्य त्रिरात्राणि तीर्थान्यभिगम्य च। अदत्त्वा काञ्चनं गाञ्च दरिद्रो नाम जायते" प्रा० त०। तीर्थगमने फलं यथा

"अग्निष्टोमादिभिर्यज्ञैरिष्ट्वा विपुलदक्षिणैः। न तत् फलमाप्नोति तीर्थाभिगमनेन यत्। तीर्थान्यनुस्मरन् धीरः श्रद्दधानः समाहितः। ऋतपापो विशुध्येत किं पुनः शुद्धकर्मकृत्। तिर्य्यग्योनिं न वै गच्छेत् कुदेशे न च जायते। न दुःखी स्यात् स्वर्गभाक् च मोक्षोपायञ्च विन्दति" ब्रह्मवै० पु०।

तीर्थसम्यक्फलभागिनो यथा "यस्य हस्तौ च पादौ

च मनश्चैव सुसंयतम्। विद्या तपश्च कीर्त्तिश्च स तीर्थफलमश्नुते। प्रतिग्रहादुपावृत्तः सन्तुष्टो येन केनचित्। अहङ्कारविमुक्तश्च स तीर्थफलमश्नुते। अदाम्भिको निरारम्भो लघ्वाहारो जितेन्द्रियः। विमुक्तः सर्वसङ्गैर्यः स तीर्थफलमश्नुते। अकोपनोऽनलसमतिः सत्यवादी दृढव्रतः। आत्मोपमश्च भूतेषु स तीर्थफलमश्नुते। अश्रद्दधानः पापात्मा नास्तिकोऽच्छिन्नसंशयः। हैतुनिश्च पञ्चैते न तीर्थफलभागिनः। इति काशीखण्डम्। प्रा०त०। तीर्थप्रतिग्रहे दोषोयथा।

"तीर्थेन प्रतिगृह्णीयात् संक्रान्त्यादिषु च तथा। स्वकार्ये पितृकार्येऽपि देवताभ्यर्चनेऽपि वा। निष्फलं तस्य तत्तीर्थं यावत्तद्ग्रहणमश्नुते"। "तत्र नारायणक्षेत्रे कुरुक्षेत्रे हरेः पदे। वाराणस्यां वदर्यां च गङ्गासागरसङ्गमे। पुष्करे भास्करक्षेत्रे प्रभासे रामसद्मके। हरिद्वारे च केदारे सोमे बदरपाचने। सरस्वतीनदीतीरे पुण्ये वृन्दावने वने। गोदावर्यां च कौशिक्यां त्रिवेण्यां च हिमालये। एतेष्वन्येषु यो दानं प्रतिगृह्णाति कामतः। स च तीर्थप्रतिग्राही कुम्भीपाकं प्रपद्यति च" इति ब्रह्मवै०प्र०ख०। अङ्गः "तीर्थं प्राप्यानुपङ्गेन स्नानं तीर्थे समाचरन्। स्नानजं फलमाप्नोति तीर्थयात्राफलं न तु"। तथा यस्य पादौ च हस्तौ च मनश्चैव सुसंयुतम्। विद्या तपश्च कीर्त्तिश्च स तीर्थफलमश्नुते। नृणां पापकृतां तीर्थे भवेत् पापस्य संक्षयः। यथोक्तफलदं तीर्थं भवेच्छुद्धात्मनां नृणाम्"। हस्तसंयमोऽत्र निन्दितप्रतिग्रहादिनिवृत्तिः। पादसंयमस्तु अगम्यदेशादिगमननिवृत्तिः। मनःसंयमः कामक्रोधादिनिवृत्तिः, विद्या तत्तत्तीर्थफलबोधकशास्त्रवेदाद्यधिगमरूपा। तपः व्याधिपादिनिवृत्तिः। कीर्त्तिः धर्मार्थतीर्थगमने धार्मिकत्वादिना प्रसिद्धिः। फलं सम्यगिति शेषः। एतच्च हस्तसंयमनादितीर्थयात्राङ्गं भङ्गभारते तीर्थयात्रासपक्रम्याभिधानात् तीर्थस्नानादिकर्मोक्तेश्च, अङ्गेन यात्राप्रकरणमन्तरेणैव सतीर्थफलमश्नुते इति सामान्याभिधानात्। इति कल्पतरुः। अतएव पैठीनसिः "श्रोत्रियांशं स लभते यः परार्थेन गच्छति। अर्द्धं तीर्थफलं तस्य यः प्रसङ्गेन गच्छति"। परार्थेन वेतनादिना, प्रसङ्गेन उद्देश्यान्तरप्रसङ्गेन। "तथा प्रतिज्ञातं कृत्वा तीर्थवारिणि मज्जयेत्। मज्जयेत्तु यस्तद्दिग्य अष्टभागं लभेत सः"।

तीर्थयात्राविधानं यथा "यो यः कश्चित्तीर्थयात्रान्तु गच्छेत्। सुसंयतः स च पूर्वं मुण्डे खे। कृतोपवासः शुचिरप्रमत्तः संपूजयेद्ब्रह्मनिलयो गणेशम्। देवान् पितॄन् ब्राह्मणांश्चैव साधून् धीमान् प्रीणयन् वित्तशक्त्या प्रयत्नात्। प्रत्यागतश्चापि पुनस्तथैव देवान् पितॄन् ब्राह्मणान् पूजयेच्च। एवं कुर्वतस्तस्य तीर्थे यदुक्तं फलं तत् स्याद्यात्र सन्देह एव" इति ब्रह्मपुराणम्। एतदधिकारे प्रा०त०।

"सुसंयतः पूर्वदिने कृतैकभक्तादिनियमः। तदुत्तरदिने कृतोपवासस्तदुत्तरदिने गणेशं यज्ञानिष्टदेवताश्च संपूज्य वृद्धिश्राद्धं कृत्वा ब्राह्मणान् भोजयेत्। ततः शुभलग्ने यात्रां कुर्यात् तीर्थयात्रान्तु गच्छेदित्युपक्रमादुपवासदिने सपिण्डनमपि। "प्रयागे तीर्थयात्रायां पितृभ्रातृवियोगतः। कचानां वपनं कार्यं न तथा विकचोभवेत्" इति विष्णुपुराणवचनात्। प्रवेशेऽपि तीर्थयात्रायामिति वक्तव्यम्। "गच्छन् देशान्तरं यस्तु श्राद्धं कुर्यात्तु सर्षपैः। यात्रार्थमिति तत् प्रोक्तं प्रवेशे च न संशयः" इति भविष्यपुराणादिति गङ्गावाक्यावली। वस्तुतस्तु तीर्थप्रत्यागमनोत्तरमुण्डप्रवेशे इत्येव वक्तव्यम्। यात्राप्रत्यागमनोत्तरमुण्डप्रवेशयोर्भेदात् प्रत्यागमनोत्तरत्वाभस्तु प्रत्यागतश्चापीति प्रागुक्तत्वात् व्यक्तमाह कृत्यायुधधृतं कूर्मपुराणवचनम् "तीर्थयात्रासु सारम्भे तीर्थात् प्रत्यागमेऽपि च। वृद्धिश्राद्धं प्रकुर्वीत वस्त्रसर्पिःसमन्वितम्"। ततश्च प्रवेशे चेति चकारेण श्राद्धमात्रं समुच्चितम्। नन्वत्र यात्रार्थत्वमपीति। एवं देवान् पितॄनित्यभिधानात् तत्पूजनमेव पुनः कार्यं नत्वुपवासादिकमपि अन्यथा देवानित्यादिकं व्यर्थं स्यात्। मत्स्यपुराणम् "तिलोदकाञ्जलिर्देयोजलस्थैस्तीर्थवासिभिः। सदा न दुष्येन्नैकेन मुण्डे श्राद्धं समिष्यते"। अत्र जलस्थैरित्यनेन स्थलस्थानामपि जलस्थत्वं नियम्यते। तथा हि "अन्तरुदके आचान्तो अन्तरेव शुद्धोभवति। तस्मादन्तरेकं बहिरेकञ्च पादं कृत्वा आचामेत् सर्वत्र शुद्धोभवति" इति पैठीनस्युक्तेन जलैकचरणाकृताचमनेन उभयत्र कर्माङ्गत्वात् तर्पणकाले तीर्थे जलैकचरणत्वं प्रतीयते। अन्यत्र त्वनियमः। तद्यथा जले च तर्पणमविरुद्धमिति। मुण्ड इति स्थलोपलक्षणम्। देवीपुराणे। "अकालेऽप्यथ वा काले तीर्थश्राद्धं तथा नरैः। प्राप्तैरेव सदा कार्यं कर्त्तव्यं

पितृतर्पणम्। पिण्डदानं ततः श्रेष्ठं पितृणाञ्चातिदुर्लभम्। विलम्बो नैव कर्त्तव्यो न च विघ्नं समाचरेत्। श्राद्धं तत्र तु कर्त्तव्यमध्यांवाङ्गनवर्जितम्। श्वध्वाङ्क्षटङ्ककानां नैव दृष्टिहतञ्च यत्"। ध्वाङ्क्षोदण्डकाकः। व्यवाकाल इति न रात्र्यादाविति पर्य्युदस्तप्रतिप्रसवः। तथात्वे तद्बाधापत्तेः। किन्तु पर्य्युदस्तेतराप्रशस्तकालपरम्। "तत् साद्दश्यमभावश्च तदन्यत्वं तदल्पता। अप्राशस्त्यं विरोधश्च नञर्थाः षट् प्रकीर्त्तिताः" इत्यनुसारात्। काल इति प्रशस्तापराह्णादिकालपरम्। अत्र शुचेः प्राग्भ्युत्तरविहितप्रथमदिन एव श्राद्धं तेन पूर्वदिने राज्ञीवेलादावागमनेऽपि परदिने श्राद्धमविरुद्धम्। तथा च कृत्यायुधधृतम् "गत्वैव तीर्थं कर्त्तव्यं श्राद्धं तत्प्राप्तिहेतुकम्। पूर्वाह्णेऽथ वा प्रातर्देये स्यात् पूर्वदक्षिणे"। पूर्वाह्णे सङ्गवे पूर्वदक्षिणे अग्निकोणे। पिण्डदानमिति श्राद्धासम्भवे केवलपिण्डदानमिति न पौनरुक्त्यम्। तीर्थे पिण्डप्रतिपत्तिमाह मत्स्यपुराणम् "पिण्डांस्तु गोऽजविप्रेभ्योदद्यादम्भौ जलेऽपि वा। तीर्थश्राद्धे सदा पिण्डान् क्षिपेत्तीर्थे विचक्षणः"।

वायुपु० "उद्यतश्चेद्व्रजं गन्तुं श्राद्धं कृत्वा विधानतः। विधाय कर्पटीवेशं कृत्वा यामं प्रदक्षिणम्। ततो यामान्तरं गत्वा श्राद्धशेषस्य भोजनम्" इत्युक्तं गयाभिन्नोपलक्षणादन्यत्रापि तथा। अन्यत् मत्स्यकृतगयाश्राद्धादिपद्धतौ द्रष्टव्यम्।

कूर्मपुराणम् "ऐश्वर्य्यलोभमाहात्म्यात् गच्छेद्यानेन यो नरः। निष्फलं तस्य तत्तीर्थं तस्माद्दूरतरं विवर्जयेत्" इति मत्स्यपुराणम् "संवत्सरं हविष्यान्नं पुनस्तीर्थं व्रजेद्यदि। सङ्गवश्चोपवासश्च तदा यत्नेन कारयेत्" इति गङ्गावाक्यावः। तीर्थप्राप्त्यनन्तरविधानं यथा।

"न परीक्षो द्विजस्तीर्थेऽन्नार्थी भोज्य एव हि। सक्तुभिः पिण्डदानञ्च चरुणा पायसेन च। कर्त्तव्यश्चाभिहितं पिण्याकेन गुडेन च। श्राद्धं तत्र तु कर्त्तव्यमध्यांवाङ्गनवर्जितम्। अकालेऽथवा काले तीर्थश्राद्धन्तु तर्पणम्। अविलम्बेन कर्त्तव्यं नैव विघ्नं समाचरेत्। यदर्क्षे तीर्थप्राप्तिः स्यात्ततोऽर्क्षः पूर्ववासरे। उपवासश्च कर्त्तव्यः प्राप्तेऽर्क्षे श्राद्धदो भवेत्। तीर्थोपवासः कर्त्तव्यः शिरसो मुण्डनं तथा। शिरोगतानि पापानि यानि मुण्डनतो यतः। तीर्थं प्राप्य प्रयत्नेन स्नानं तीर्थे समाचरेत्। स्नानजं फलमाप्नोति तीर्थयात्रोत्थितं न तु" इति काशीखण्डम्। "मुण्डनञ्चोपवासश्च सर्वतीर्थेष्वयं विधिः। वर्जयित्वा गयां गङ्गां विशालां विरजान्तथा" इति स्कान्दम् "क्षापयेत् स्निग्धमित्यादीन् स्नातौ क्षौरे नरोत्तमः। अन्यथापहरन्त्येते बलात्तीर्थभवं फलम्" इति स्कान्दम् "मातरं पितरं जायां भ्रातरं सुहृदं गुरुम्। यस्तीर्थ्य निमज्जेत अष्टभागं लभेत सः" इति प्रा०२०मार्क०पु०।

कलौ तीर्थानां पृथिव्यां स्थितिकालो यथा "सरस्वती पुण्यक्षेत्रमाजगाम च भारतम्। गङ्गाभागेन कलया स्वयं तस्थौ हरेः पदे। पद्मावतीरयानीता-मर्द्धं भागेरथी शुभा। समाजगाम कलया वाणी भागेन नारद!। पद्मावती कलया सा च पद्मावती नदी। भारतं भारतीभागात् स्वयं तस्थौ हरेः पदे। कलेः पञ्चसहस्रञ्च वर्षान् स्थित्वा च भारते। जग्मुस्ताश्च सरिद्रूपं विहाय श्रीहरेः पदम्। यानि सन्ति तीर्थानि कार्त्तौ वृन्दावनं विना। यास्यन्ति तानि सार्द्धञ्च वैकुण्ठमाज्ञया हरेः"।

"यानादिना गमनदोषो यथा "पुण्यार्द्धं हरते यानं तदर्द्धं तस्य पादुके। तदर्द्धं तैलभांण्डाभ्यां सर्वं हरति मैथुने" इति कर्म्मलोचनम्।

तत्र उपाये बहु च "ऋततीर्थः पयसामिवाशयः" किरा० शास्त्रे तीर्थकरः। पात्रे। "ब्रह्मचारी धनदायी मेधावी श्रोत्रियः प्रियः। विद्यया विद्यां यः प्राह तानि तीर्थानि षण्णम" विद्यावाक्यम्। इदचात्वालोत्करयोरन्तराले देशे "दक्षिणेनाहवं तीर्थेन पूर्वेण वेदिमपरेण वा" कात्या०श्रौ० ५।५।११। "तीर्थेन चात्वालोत्करावन्तरेण प्रवेश्य वेदिचात्वालयोरन्तरालेन पूर्वेणोत्तरवेदिं दक्षिणेनाग्नेः पुरस्तादाहृत्य अथवा तीर्थेन प्रवेशनानन्तरसुत्तरां वेदिमपरेण चानीय वेद्योरन्तरालेन दक्षिणस्याग्नेः पुरस्तादानीय जुहोति" "तेनान्तरेण प्रतिप्रद्यन्ते चात्वालं चैतद्वै देवानां तीर्थम्" षड्विं०ब्रा०। करकुलितलेषु ब्राह्मादितीर्थता यथाह मनुः "ब्राह्मेण विप्रस्तीर्थेन नित्यकालमुपस्पृशेत्। कायत्रैदशिकाभ्यां वा न पित्र्येण कदाचन। अङ्गुष्ठमूलस्य तले ब्राह्मं तीर्थं प्रचक्षते। कायमङ्गुलिमूलेऽग्रे दैवं पित्र्यं तयोरधः" आह्निकतत्त्वादिधृते। "अहिंसन् सर्वभूतान्यन्यत्र तीर्थेभ्यः" छा०उ०तीर्थशास्त्रातत्त्वादिधृतः" भाष्यम्। इदमन्त्र्यादशादगम्। "कश्चिदष्टादशान्येषु स्वपचे दश पञ्च च। त्रिभिस्त्रिभिर-

विज्ञातैर्वेदि तीर्थानि चारकैः" भा० स० ५ अ०। "तीर्थानि मन्त्रिप्रभृतीन्यष्टादश यान्यवगम्य राजा कृतकृत्यो भवति तानि चोक्तानि नीतिशास्त्रे "मन्त्री१ पुरोहित२श्चैव युवराज३श्च भूपतिः४ पञ्चमो द्वारपाल५श्च षष्ठोऽन्तर्वेशिक६स्तथा७। कारागाराधिकारी८ च द्रव्यसञ्चयकृत्तथा९। कृत्याकृत्येषु चार्याणां नवमो विनियोजक१०ः। प्रदेष्टा११ नगराध्यक्ष१२ः कार्यनिर्माणकृत्तथा१३। धर्माध्यक्ष१४ः सभाध्यक्षो१५ दण्डपालस्त्रिषष्ठम१६ः। षोड्शो दुर्गपाल१७श्च तथा राष्ट्रान्तपाल१८कः। अटवीपालकाश्चानि१९ तीर्थान्यष्टादशैव तु। चारान् विचारयेत्तीर्थैश्चात्मनश्च परस्य च। पाषण्डादीनविज्ञातानन्योन्यमितरेष्वपि। मन्त्रिणं युवराजञ्च हित्वा स्वेषु पुरोहितमिति" एषां तीर्थशब्दवाच्यत्वे हलायुधः "द्यूते जनावतारे च मन्त्राद्यष्टादशस्वपि। पुष्पप्रचये तथा पात्रे तीर्थं स्त्राद्दर्शनेष्वपि"। इति परेषामष्टादशसु स्वस्य मन्त्रिपुरोहितयुवराजवर्जं पञ्चदशसु च तीर्थेषु चारान्यैः परस्परं चाविज्ञातांस्त्रीन्त्रीन् प्रयुञ्ज्य तत्तत्यां वार्त्तां सर्वचारसंवादे तथ्यां जानीयात्" नी० क०।

२ जलाशयादरत्निमात्रदेशे आदित्यपुराणे "अरत्निमात्रं जलं त्यक्त्वा कृत्यांस्त्वाचमनादृते। पश्चाच्च शोधयेत्तीर्थमन्यथा न शुचिर्भवेत्"। तस्मिन् देशे शौचं न कर्त्तव्यं यस्मादरत्निमात्रव्यवहितजलात् तत् स्थलमेव तीर्थं जलसमीपत्वात्" श्रा० त०।

"तीर्थान्यमवनारण्यगिरिपर्वतसागराः। सरस्वती भारती च पुरीति दश कीर्तिताः" महानि० तन्त्रोक्ते ३सन्न्यासिनामुपाधि भेदे। तल्लक्षणं तत्रैव "त्रिवेणीसङ्गमे तीर्थं तत्त्वमस्यादिलक्षणे। स्नायात्तत्तीर्थभावेन तीर्थनाम्ना स उच्यते"। अन्यानि च भौमतीर्थानि भारततीर्थयात्रापर्वादौ पुराणान्तरेषु प्रसिद्धानि। "अन्यानि यानि तीर्थानि काशीप्राप्तिकराणि च। काशीं प्राप्यैव मोक्षन्ते नान्यथा कल्पकोटिभिः" नीलकण्ठधृतवाक्यम्।

**तीर्थकर** पु० तीर्थं शास्त्रं करोति कृ-ट। १जिने हेमच०। २शास्त्रकरे त्रि०। ३विष्णौ पु०। "मनोज्ञवस्तीर्थकरः" विष्णुस०। "चतुर्दशविद्यानां बालसमयानां च प्रणेता प्रवक्ता चेति तीर्थकरः कश्यपोरूपेण मधुकैटभौ हत्वा विरिञ्चये सर्गादौ सर्वाः श्रुतीरन्याश्च विद्या उपादिशत् बालविद्याः सुरवैरिणां वञ्चनाय चोपादिशदिति पौराणिकाः कथयन्ति" भाग० मू०।

**तीर्थकाक** पु० तीर्थं काक इव लोलुपत्वात्। तीर्थे काकसदृशव्यवहारिणि लोलुपे। तीर्थश्राद्धादधोऽयत्र।

**तीर्थकृत्** पु० तीर्थं करोति कृ-क्विप् तुक्०। १जिनदेवे हेमच०। २शास्त्रकरे त्रि०। [हेमच०।

**तीर्थङ्कर** पु० तीर्थं शास्त्रं करोति कृ-ख सुम् च। जिनदेवे

**तीर्थदेव** पु० तीर्थमिव श्रेष्ठः देवः तीर्थे दीव्यति वा दिव-क्च् वा। शिवे शिवसहस्रनाम।

**तीर्थमहाह्रद** पु० तीर्थरूपो महाह्रदः। स्वनामख्याते तीर्थभेदे "नन्दा च परनन्दा च तथा तीर्थमहाह्रदः" भा० अनु० १६५ अ०। नानातीर्थौघे।

**तीर्थयात्रा** स्त्री तीर्थसहिता यात्रा। १तीर्थोद्देशेन यात्रायाम्। तद्विधिः मत्स्यसूक्तयात्राशब्दादिपद्धतौ दृश्यः। भारतान्तर्गते २वनपर्वणि द्वात्रिंशदधिकशततमे ३वालखिल्यपर्वभेदे। "तीर्थयात्रा ततः पर्व कुरुराजस्य धीमतः" भा० व० १अ०। तच्च वनपर्वणि ८०अध्यायावधि१५६अध्यायान्तम्। [तीर्थराजिशब्दे उदा०

**तीर्थराज** पु० तीर्थानां राजा षष्ठस०। प्रयागे तीर्थे।

**तीर्थराजि(जी)** स्त्री तीर्थानां राजित्व। अविरुद्धे काशप्रां लिका० वा ङीप्। निन्द्नातत्वादष्टतीर्थानामानन्त्यात्तत्वम्। यथोक्तं काशी० ६६ अ०।

"सर्वरत्नमया रम्या साष्टतीर्थभूदिह। भूर्भुवःस्वर्तले यानि शुभान्यायतनानि हि। सन्निदान्यपि तानीह मयाऽऽनीतानि सर्वतः। यतोयत्र समानीतं यत्र यत्र कृतास्पदम्। कथयिष्याम्यहं नाथ! तत्र तत्राधीयताम्। स्थाणुनाम महालिङ्गं देवदेवस्य भोक्षदम्। कुरुक्षेत्रादिहोद्भूतं कलाग्नेयोऽस्ति तत्र वै। तदग्ये सन्निहित्याख्या महापुण्यकरिणी शुभा। सोमार्कपश्चिमे भागे कुरुक्षेत्रस्थली तु सा। तत्र स्नातं कृतं जप्तं तप्तं दत्तं शुभार्थिभिः। कुरुक्षेत्राद्भवेत् सत्यं कोटिकोटिगुणाधिकम्। नैमिषाद्वै च देवोऽत्र ब्रह्मावर्त्तेन संयुतः। तत्रांशमात्रं संस्थाप्य कालाग्नाविरभूद्विभो!। दुण्डिराजोत्तरे भागे सिद्धिदं साधकस्य वै। सिद्धं वै देवदेवाख्यं तदग्ये कूप उत्तमः। ब्रह्मावर्त्त इति ख्यातः पुनराद्यत्तिकृच्चयाम्। तत्कूपाद्विधिः कृतस्नानो देवदेवं समर्च्य च। तत्पुण्यात्तैर्मिषारण्यात् कोटिकोटिगुणं फलम्। गोकर्णायतनादत्र स्वयमाविरभून्महत्। सिद्धं महाबलं नाम शाम्बादित्यसमीपतः। दर्शनात् स्पर्शनाद्यस्य सर्वपापैर्नो महाबलम्। यातायातस्मरराशिरिव विद्राति दूरतः। कपालमोचनपुरो हृद्या सिद्धं महाबलम्। महाबल-

मवाप्नोति निर्वाणनगरं व्रजेत्। ऋणमोचनतः प्राच्यां प्रभासात् चेत्रसम्भवात्। अग्निभूष्णसंज्ञं तु लिङ्गमत्र प्रतिष्ठितम्। तल्लिङ्गं सेवनान्नृणां अग्निभूष्णतां व्रजेत्। प्रभासचेत्रयात्रायाः पुण्यं प्राप्नोति कोटिगत्। उक्त्वित्था महाकालः स्वयमत्रागतो विभुः। यन्नामस्मरणादेव न भयं कलिकालतः। ऋणमोचनाख्यान्महालिङ्गात् प्राच्यां कलुषनाशनम्। महाकालाभिधं लिङ्गं दर्शनान्मोचदं परम्। योगन्धेश्वरलिङ्गं पुष्कराक्तीर्थसम्भवात्। आविरासीदिह महत् पुष्करेण सदैव तु। मत्स्योदर्युत्तरे भागे दृष्ट्वा योगन्धसत्तमम्। स्नात्वाऽयोगन्धकुण्डे तु भवात्तारयते पितृन्। महानादेश्वरं लिङ्गमट्टहासादिहागतम्। त्रिलोचनाद्दीक्षान्तु तद्दृष्टिर्मुक्तये सताम्। महोत्कटेश्वरं लिङ्गं मरुत्कोटादिहागतम्। कामेश्वरोत्तरे भागे दृष्टं विमलसिद्धिदम्। विश्वस्थानादिहायातं लिङ्गं वै विमलेश्वरम्। स्वर्गीनात् पश्चिमे भागे दृष्टं विमलसिद्धिदम्। महाव्रतं महालिङ्गं महेन्द्रादिह संस्थितम्। स्कन्देश्वरसमीपे तु महाव्रतफलप्रदम्। इन्द्रारकर्षिवृन्दानां स्तुवतां प्रथमे युगे। उत्पन्नं यन्महालिङ्गं भूमिं भित्त्वा सुदुर्भिदाम्। महादेवेति तैरुक्तं यन्नोरथपूरणात्। वाराणस्यां महादेवस्तदारभ्याभवच्च यत्। सन्निधेयं कृतं येन महालिङ्गेन काशिका। अविमुक्ते महादेवं यो द्रक्ष्यत्यत्र मानवः। शम्भुलोके गमस्तस्य यत्र तत्र मृतस्य हि। अविमुक्ते प्रयत्नेन तत् संसेव्यं ससक्तुभिः। कल्पान्तरेऽपि न त्यक्तं कदाप्यानन्दकाननम्। येन लिङ्गस्वरूपेण महादेवेन सर्वदा। तत्प्रसादोऽयमतुलः सर्वरत्नमयः शुभः। हिरण्यगर्भतोयाच्च प्रतीच्यां चेत्ररक्षिका। वाराणस्यामधिष्ठात्री देवता साभिलाषदा। महादेवेति संज्ञा वै सर्वलिङ्गस्वरूपिणी। वाराणस्यां महादेवो दृष्टो यैर्लिङ्गरूपधृक्। तेन त्रैलोक्यलिङ्गानि दृष्टानीह न संशयः। वाराणस्यां महादेवं समभ्यर्च्य महेश्वरः। आह्नतसंयुतं यावच्छिवलोके वसेन्मुदा। पवित्रपर्वणि सदा श्रावणे मासि यत्नतः। लिङ्गे पवित्रमारोप्य महादेवेन शर्मभाक्। पितामहेश्वरं लिङ्गं गवातोदीहागतम्। फल्गुप्रभृतिभिस्तीर्थैः सार्द्धं कोटिशतैर्मितैः। धर्म्मेण यत्र वै नप्तं युगानामयुतं शतम्। साक्षीलत्र महालिङ्गं श्रीमद्धर्मेश्वराभिधम्। पितामहेश्वरं लिङ्गं तत्राभ्यर्च्य नरोमुदा। त्रिःसप्तकुलसंयुक्तो मुच्यते नात्र संशयः। प्रयागतीर्थराजस्य शूलटङ्को महेश्वरः। तीर्थराजेन सहितः स्थित आगत्य वै स्वयम्। निर्वाणमरुत्पादृम्यादवाप्यामतिनिर्मलः। प्रासादो मेरुणा यस्य स्पर्द्धते काञ्चनोज्ज्वलः। देवैर्नेवरो दत्तो तत्र पूर्वयुगान्तरे। पूज्यो महेश्वरः काश्यां प्रथमं कलुषापहः। यः प्रयाग इह स्नातो नमस्यति महेश्वरम्। समभ्यर्च्य विधानेन महासम्भारविस्तरैः। प्रयागस्नानजात् पुण्यं शूलटङ्कविलोकनात्। स प्राप्नुयान्न सन्देहः पुण्यं कोटिगुणोत्तरम्। शङ्कुकर्णान्महाचेत्रात् महातेज इतीरितम्। लिङ्गमाविरभूदत्र महातेजोभिदुद्भिदम्। महातेजोनिधेस्तस्य प्रासादोऽतीव निर्मलः। ज्वालाजटिलिताकाशो माणिक्यैरेव निर्मितः। तल्लिङ्गदर्शनात् स्पर्शात् स्तवनाच्च समर्च्चनात्। प्राप्यते तत् पुरं धाम यत्र गत्वा न शोचते। विनायकेश्वरात् पूर्वं महातेजःसमर्च्चनात्। तेजोमयेन यानेन याति माहेश्वरं पदम्। रुद्रकोटि समाख्यानात्तीर्थात् परमपावनात्। महायोगेश्वरं लिङ्गमाविरुक्तं स्वयं परम्। पार्वतीश्वरलिङ्गस्य समीपे सर्वसिद्धिदम्। तल्लिङ्गदर्शनात् पुंसां कोटिलिङ्गफलं लभेत्। तत्प्रासादस्य परितो रुद्राणां कोटिसम्मिता। प्रासादरम्यसंस्थाना निर्मिता रुद्रमूर्त्तिभिः। काश्यां रुद्रस्थली सा तु पठ्यते वेदवादिभिः। रुद्रस्थल्यां मृता ये वै कृमिकीटपतङ्गकाः। पशुपक्षिमृगा मर्त्या म्लेच्छा वाप्यथ दीक्षिताः। तेषां तु रुद्रीभूतानां पुनराकृत्तिरत्र न। जन्मान्तरसहस्रेषु यत् पापं समुपार्जितम्। रुद्रस्थलीं प्रविष्टस्य तत् सर्वं व्रजति क्षयम्। अकामो वा सकामो वा तिर्यग्योनिगतोऽपि वा। रुद्रस्थल्यां त्यजन् प्राणान् परं निर्वाणमाप्नुयात्। स्वयमेकाम्बरात् चेत्रात् कृत्तिवासा इहागतः। कृत्तिवाससि लिङ्गेऽत्र स्वयमेव व्यवस्थितः। अस्मिन् लिङ्गे स्वभक्तानां साम्बः सर्पिगणो विभुः। स्वयम्भोपदिशेदुच्चैः श्रुतौ स्मृतिभिरीरितम्। चेत्रेऽत्र सिद्धिदे प्राप्तचण्डीशो मरुजाङ्कजात्। प्रचण्डपापसंघातं खण्डयेच्चतधेत्तणात्। पाशपाणिगणाध्यक्षसमीपे यः प्रपश्यति। चण्डीश्वरं महालिङ्गं स याति परमां गतिम्। कालञ्जराद्भीलकण्ठस्तिष्ठेत्र स्वयं विभुः। गणेशात् कूटदन्ताख्यात् समीपे भवनाशनः। नीलकण्ठेश्वरं लिङ्गं काश्यां यैः परिपूजितम्। नीलकण्ठाक्षएव क्षुक्षएव

ग्निभूषणाः । काश्मीरादिह संप्राप्तं लिङ्गं विजय-संज्ञितम् । सदा विजयदं पुंसां विजवेशः समर्च-नात् । ऊर्ध्वरेतास्त्रिदण्डायाः संप्राप्तोऽत्र स्वयंविभुः । कृष्णाख्यकं गणाध्यक्षं पुरस्कृत्य व्यवस्थितः । ऊर्ध्वां गतिमवाप्नोति वीक्षणादूर्ध्वरेतसः । ऊर्ध्वरेतसि ये भक्ता न हि तेषामधोगतिः । मण्डलेश्वरतः क्षेत्रा-ल्लिङ्गं श्रीकण्ठसंज्ञितम् । विनायकान्मुखसंज्ञादुत्तरस्यां दिशि स्थितम् । श्रीकण्ठस्य तु ये भक्ताः श्रीकण्ठा एव ते नराः । नेह म्रिया वियुज्यन्ते न परत्र कदाचन । छागलाण्डान्महातीर्थात् कपर्दीश्वरसंज्ञितः । पिशाच मोचने तीर्थे स्वयमाविरभूद्विभुः । कपर्दीशं समभ्यर्च्य न नरो निरयं व्रजेत् । न पिशाचत्वमाप्नोति हत्वाऽ-त्याश्वमेधसप्तमम् । आषाढकेश्वरात् क्षेत्रात् लिङ्गं रुक्मेशसंज्ञितम् । स्वयमभ्यागतं चात्र क्षेत्रे वै श्रेयसां पदे । विकटद्विजसंज्ञस्य गणेशस्य समीपतः । दृष्ट्वा लिङ्गेश्वरं लिङ्गं गतिं शुभामवाप्नुयात् । संप्राप्तमिह देवेशं जयन्तं मधुकेश्वरात् । लम्बोदराद्गणपतेः पुरस्ता-त्तदवस्थितम् । जयन्तेश्वरमालोक्य स्नात्वा गङ्गाजले शुभे । प्राप्नुयाद्वाञ्छितां सिद्धिं सर्वत्र विजयी भवेत् । प्रादुश्चकार देवेशः श्रीशैलाच्छ्रिपुरान्तकः श्रीशैलशिखरं दृष्ट्वा यत् फलं समुदीरितम् । त्रिपुरान्तकमालोक्य तत्-फलं क्षेत्रमाप्यते । विघ्नेशात् पश्चिमे भागे त्रिपुरान्तक-मीश्वरम् । संपूज्य परया भक्त्या न नरो गर्भमावि-शेत् । सोमस्थानादिहायातो भगवान् कुक्कुटेश्वरः । वक्रतुण्डगणाध्यक्षसमीपे सोऽवतिष्ठते । तद्दर्शनादवै-नाञ्च करस्थाः सर्वसिद्धयः । जलेश्वराच्चिमूर्त्ती च स्वय-मीशः समागतः । एकदन्तोत्तरे भागे सोऽर्चितः सर्व-कामदः । त्रिसन्ध्याक्षेत्रतो देवस्त्रम्बकोऽत्रि समागतः । त्रिसन्ध्यात् पूर्वदिग्भागे पूजितस्त्रम्बकत्वकृत् । हरेश्वरो हरिश्चन्द्रात्क्षेत्रादत्र समागतः । हरिश्चन्द्रेश्वर-पुरः पूजितो जयदः सदा । दृष्ट्वा सर्वः समायातः स्थानात् मध्यमकेश्वरात् । चतुर्वेदेश्वरं लिङ्गं पुरो वायव्यसंस्थितम् । सर्वलिङ्गं समभ्यर्च्य काश्यां परम-सिद्धिकृत् । न जातु जन्तुपदवीं प्राप्नुयात् क्वापि मानवः । स्थलेश्वरान्महालिङ्गं प्रादुर्भूतं परत्रिह । यत्र यत्रेश्वरं लिङ्गं सर्वयज्ञफलप्रदम् । महालिङ्गं समभ्यर्च्य सङ्गमुद्गासमन्वितः । महतीं श्रियमाप्नोति लोकेऽत्र च परत्र च । दृष्ट्वा लिङ्गं सङ्गमाख्यं सुरर्षी-ख्यात् समागतम् । यस्य संदर्शनात् पुंसां ज्ञानचक्षुः प्रजायते । शैलेश्वरादाचन्द्रान्तं सङ्गमेश्वरं विभुम् । दृष्ट्वा जन्मसहस्राणां शतानां पातकं त्यजेत् । हर्षिता-हर्षितं चात्र प्रादुरासीत्तमोहरम् । लिङ्गं हर्षप्रदं पुंसां दर्शनात् स्पर्शनादपि । महेन्द्रेश्वरसमीपे तु प्रासादो हर्षितेशितुः । तद्विलोकनतः पुंसां नित्यं हर्षपरम्परा । दृष्ट्वा स्वयं समायातो रुद्रो रुद्रमहा-लयात् । यस्य दर्शनतो यान्ति रुद्रलोके नराः स्फुटम् । यैस्तु रुद्रेश्वरं लिङ्गं काश्यामत्र समर्चितम् । ते रुद्ररूपिणो मर्त्या विज्ञेया नात्र संशयः । त्रिपुरेण समीपे तु दृष्ट्वा रुद्रेश्वरं विभुम् । रुद्रास्त एव विज्ञेया जीवन्मोऽपि मृता अपि । आगादिह महादेवो दक्षेशो वृषभध्वजात् । वाणेश्वरस्य लिङ्गस्य समीपे हृष्टः सदा । दृष्ट्वागतं तु केदारादीशानेश्वरसंज्ञितम् । तत् दृष्ट्वं प्रतीच्यां च लिङ्गं प्रह्लादकेश्वरात् । ईशा-नेशं समभ्यर्च्य स्नात्वा तु वरणाम्भसि । वसेदीशान-नगरे ईशानसदृशप्रभः । भैरवाद्भैरवीमूर्त्तिरत्रायाता मनोहरा । संहारभैरवो नाम दृष्ट्वः स प्रयत्नतः । पूजनात् सर्वसिद्धौ स प्राच्यां स्वर्विनायकात् । संहार-भैरवः काश्यां संहरेदघसन्ततिम् । उग्रः कनखलात्तीर्था-दाविरासोत् सुसिद्धिदः । तद्विलोकनतो नृणामाशुघं पापं विनश्यति । उग्रं लिङ्गं सदा सेव्यं प्राच्यां स्वर्विनाय-कात् । अल्पा अपि नश्यन्ति युरुपसर्गास्तदर्चनात् । यस्मा-त्पधान्महाक्षेत्राद्भवो नाम स्वयं विभुः । प्राच्यां दण्डीश्वरः पूज्यः सदेहत्रिविनायकात् । तस्मात्तेन मर्त्यानां न पुनर्भव ईक्ष्यते । भीमचण्डीसमीपे तु प्रादुरासीदिह प्रभुः । भवेश्वरं समभ्यर्च्य भवे नाविर्भवेन्नरः । प्रभुर्भवति सर्वेषां राज्ञामाज्ञाक्षतामिह । देवदारुवनादक्षो दण्डयन् पातकावलीः । वाराणस्यां समागत्य स्थितो लिङ्गाकृति-र्भवः । प्राच्यां दण्डीश्वरः पूज्यः स देहत्रिविनाय-कात् । तस्मात्तेन मर्त्यानां न पुनर्भव ईक्ष्यते । भद्र-कर्णह्रदाद्दण्डो भद्रकर्णह्रदान्वितः । शिवः साक्षादि-हायातः सर्वेषां शिवदोऽर्चितः । उद्दण्डाख्याद्गणपतेः प्राच्यां तत्तीर्थमुत्तमम् । भद्रकर्णह्रदे स्नात्वाऽभ्यर्च्य लिङ्गं शिवाह्वयम् । सर्वत्र शिवमाप्नोति भद्रं भयविनाशकम् । भद्रयुयात् सर्वभूतानां भद्रं पश्यति चाखिभिः । भद्रश्च हरिश्चन्द्रात् त्वत्पुरः प्रतिभासते । तत्पूजनाज्जनानां न जननीजठरे जनिः । यमलिङ्गान्महातीर्थात् कात्यलिङ्ग-

मिह स्थितम्। कनखेश इति ख्यातं चन्द्रेशात् पश्चिमेन तु। यमतीर्थं नरः स्नात्वा लिङ्गावरुणदक्षिणे। काललिङ्गं समालोक्य कलिकालभयं कुतः। तत्र भौम चतुर्दश्यां यस्तु यात्रां करिष्यति। अपि पातकयुक्तश्च यमयातां न यास्यति। नेपालाच्च महाचैलादायात् पशुपतिस्त्विह। यत्र पाशुपतो योग उपदिष्टः पिनाकिना। महता देवदेवेन ब्रह्मादिभ्यो विमुक्तये। तस्य संदर्शनादेव पशुपाशैर्विमुच्यते। करवीरकतीर्थाच्च कपालीश इहागतः। कपालमोचने तीर्थे द्रष्टव्यः स प्रयत्नतः। तद्विलोकनमात्रेण ब्रह्महत्या विलीयते। उमापतिर्देविकाया इहागत्य व्यवस्थितः। दृष्टः पशुपतेः प्राच्यां हरेत् पापं चिरार्जितम्। लिङ्गं महेश्वरचैत्यादिह दीप्रेशसंज्ञितम्। उपोमापति तिष्ठेत्तु दीप्रायै चेह परत्र च। मुक्तिमुक्तिप्रदं लिङ्गं दीप्रेशं कामिमध्यगम्। छायारोहणतः चैलादायातो नकुलीश्वरः। शिष्यैः परिवृतस्तिष्ठेन्महापाशुपतव्रतैः। दृष्ट्वा हि महादेवात् दृष्टो ज्ञानं प्रयच्छति। अज्ञानं नाशयेत् क्षिप्रं गर्भसंसृतिहेतुकम्। गङ्गासागरतश्चागादमरेशदृतीरितम्। लिङ्गं यद्दर्शनादेव नामरत्वं हि दुर्लभम्। सप्तगोदावरीतीर्थाद्धोभीमेश्वरः प्रभुः। प्रकाशते लिङ्गरूपी भुक्त्यै मुक्त्यै नृणामिह। नकुलीशात् पुरोभागे दृष्ट्वा भीमेश्वरं प्रभुम्। महाभीमानि पापानि प्रणश्यन्ति हि तत्क्षणात्। भूतेश्वरात् भक्तगात्रः प्राकाशोदिह स्वयम्। भीमेशाद्दक्षिणे भागे तदभ्यर्च्यं प्रयत्नतः। सम्यक् पाशुपताद्योगादभ्यस्ताच्च समाः शतम्। यत्प्राप्नोति फलं तत्राद्भक्तगात्रविलोकनात्। नकुलीश्वरतो देवः स्वयम्भुरिति विश्रुतः। आत्मना प्रकटीभूतः काम्यां लिङ्गात्तिर्हरः। स्वयम्भुलिङ्गं संपूज्य स्नात्वा सिद्धिह्रदे नरः। महाकालेश्वरपुरो न भूयो जन्मभाग्भवेत्। प्रयागतीर्थं निकषा प्रासादो विष्णुभः प्रभुः। वाराहस्य महानेष वरणो नाम एव हि। विन्ध्यपर्व ततः प्राप्तो देवं श्रुत्वा समागतम्। सगणं सर्षिदेवञ्च मन्दराद्रिकन्दरात्। काम्यां धरणि वाराहोद्रष्टव्यः स प्रयत्नतः। आपत्सप्तसहस्रसंमन्त्रसहस्रेश्वरस्थागतम्। कर्णिकारान्नगाध्यक्षः कर्णिकार प्रसन्नरुक्। समभ्यर्च्यं मदाद्रक्ष उपसर्गसहस्रकृत्। तस्माद्वरणिवाराद्वात् प्रतीच्यां दिशि संस्थितम्। पूजयित्वा गणाध्यक्षं गाणपत्यपदं लभेत्। हेमकूटाद्दिक्पालं लिङ्गमत्राविराम च। महेश्वरादशाच्यां तु दृष्टं संसारतारकम्। गङ्गाद्वाराद्दिमस्थेशं लिङ्गं हिममप्रभम्। ब्रह्मनालात् प्रतीच्यां च द्रष्टव्यमिह सिद्धिदम्। गणाधिपत्य कैलासात् गणा अन्ये महाबलाः। कैलासाद्दैः समायाताः सप्तकोटिमिताः प्रभो!। दुर्गाश्च तैः कृतानीह सप्त स्वर्गसमानि च। सहस्राणि सप्तत्वानि सकपाटनिभानि च। कोटिकोटिभटास्थानि सर्वर्द्धिसहितानि च। सुवर्णरूप्यताम्रैश्च कांस्यरीतिकसीसकैः। व्ययस्कान्तेन कान्तानि रत्नान्यत्र लिङ्गान्यपि। ततः शैलं महादुर्गं तैः कामी परितः कृतम्। परिखापि कृता निम्ना मोत्स्योदर्या जलान्विता। मत्स्योदरी द्विधा जाता बहिरन्तश्चरी पुनः। तच्च तीर्थं महाख्यातं सिक्तं गाङ्गवारिभिः। यदा संहारमार्गेण गङ्गाम्भः प्रसरेदिह। तदा मत्स्योदरी तीर्थं लभते पुण्यगौरवात्। सूर्याचन्द्रमसोः पर्वतदा कोटिगुणं शतम्। सर्वपर्वाणि तत्रैव सर्वतीर्थानि तत्र वै। तत्रैव सर्वलिङ्गानि गङ्गा मत्स्योदरी यतः। मत्स्योदर्यां हि ये स्नाता यत्र कुत्रापि मानवाः। कृतपिण्डप्रदानास्ते न मातुरुदरेशयाः। अविमुक्तमिदं क्षेत्रं मत्स्याकारत्वमाप्नुयात्। परितः खर्धुनीवारिसंसारो परि दीप्यते। मत्स्योदर्यां कृतस्नाना ये नराः नरोत्तमाः। कृत्वापि बहुपापानि नेक्षन्ते भास्करेः पुरीम्। किं स्नात्वा बहुतीर्थेषु किं तप्त्वा दुष्करं तपः। यदि मत्स्योदरीस्नाताः कुतो गर्भभयं ततः। यत्र यत्र हि लिङ्गानि स्वदेवर्षिकृतान्यपि। तत्र मत्स्योदरीं प्राप्य सुस्नातो मोक्षभाजनम्। सन्ति तीर्थान्यनेकानि भूर्भुवः स्वर्गतान्यपि। न समानि परस्तानि कोट्यंशेनापि निश्चितम्। दृष्ट्वं तीर्थं कृतं तेन विभो!। कैलासवासिनः। गणाधिपेन सुमहत्सु महोदरकर्मणा। भूर्भुवःसंज्ञकं लिङ्गं पर्वताद्ब्रह्मणादनात्। स्वयमाविरभूत्तस्मात् प्राच्यां गणाधिपात्। विलोक्य भूर्भुवं लिङ्गं भूर्भुवःस्वर्गहः परे। निवसन्ति जनाः पुण्याः सुचिरं दिव्यभोगिनः। हाटकेशं महालिङ्गं भोगवत्या समायुतम्। सप्तपातालतत इहायातं स्वयं विभो!। शेषवासुकिसख्यैव तत्प्रासादो महानिह। मणिमाणिक्यरत्नैश्चित्रमायि प्रयत्नतः। तल्लिङ्गं हाटकमयं रत्नमालाभिरर्चितम्। ईशानेश्वरतः प्राच्यां पूजनीयं प्रयत्नतः। भक्तितोऽभ्यर्च्य तल्लिङ्गं नरः स्वैः सप्तभिर्मात्। ज्ञा भोगभानसंज्ञा-

तानन्ते निर्वाणमृच्छति। आकाशात्तारकं लिङ्गं ज्योतीरूपमिहागतम्। ज्ञानवाप्यां पुरोभागे तल्लिङ्गं तारकेश्वरम्। तारकज्ञानमाप्नोति तल्लिङ्गस्य समर्चनात्। ज्ञानवाप्यां नरः स्नात्वा तारकेशं विलोक्य च। ऋतसञ्ज्ञादिनियमः परितर्प्य पितामहान्। श्रुतमौनव्रतो धीमान् यावल्लिङ्गविलोकनम्। मुच्यते सर्वपापेभ्यः पुण्यं प्राप्नोति शाश्वतम्। प्राप्ते च तारकं ज्ञानं यस्मात् ज्ञानादिमुच्यते। किरातात्र किरातेश इह चाविर्बभूव ह। किरातरूपो भगवान् यत्र देवोऽभवत् पुरा। तत्किरातेश्वरं लिङ्गं भारभूतेश्वरादनु। नमस्कृत्वा नरो जातु न मातुरुदरेशयः। लड्डापूर्णैः समागच्छन्नरकेश्वरसंज्ञकम्। पौलस्त्यलाघवात् पश्चात् पूजितं सर्वदुःखहृत्। पुण्यं जलप्रियं लिङ्गं जललिङ्गस्यनादपि। आयातं तच्च गङ्गाया जलमध्ये व्यवस्थितम्। तत्प्रासादोऽद्भुततरो मध्येगङ्गं निरीक्ष्यते। सर्वधातुमयः श्रेष्ठः सर्वरत्नमयः शुभः। अद्यापि दृश्यते कैश्चित् पुण्यसञ्चारगौरवात्। श्रेष्ठं लिङ्गमिहायातं तीर्थात्कोटीश्वरादपि। कोटिलिङ्गेषुपुण्यं तल्लिङ्गस्य निरीक्षणात्। श्रेष्ठं श्रेष्ठेश्वरात्मत्वात् श्रेष्ठसिद्धिप्रदायकम्। वड्वाख्यात् समुद्भूतं लिङ्गमालानलेश्वरम्। नलेश्वरपुरोभागे पूजितं सर्वसिद्धिदम्। आगत्य विरजस्तीर्थाद्देवदेवस्त्रिलोचनः। लिङ्गे त्वनादिसंसिद्धे ह्यवतस्थे त्रिपिष्टपे। पुण्ये पितृमिले तीर्थे सर्वेषां तारकप्रदे। आविरुक्ते स्वयं देव ओङ्कारेऽमरकण्टकात्। तदाद्यं तारकक्षेत्रं यदा गङ्गा न चागता। तदैवाविरभूत् काशी त्रैलोक्योद्धरणाय वै। तदोद्भूति महल्लिङ्गं स्वयमाविरभूत्ततः। महिमानं न तस्यान्यः परिवेत्ति विभोर्ऋते। एतान्या यतनानीश! आनिनाय महान्ति च। श्रेयस्त्वांशमात्रेण तस्मिन् क्षेत्रे निजे निजे। दृष्टायातानि पुण्यानि सर्वभावेन नान्यथा। प्रासादाः सर्वतः श्रेष्ठा रम्या ऊर्ध्वलिङ्गा विभो!। बहुधातुमयाश्चित्राः सर्वरत्नमरोज्ज्वलाः। येषां कलसमात्रस्य दर्शनान्मुक्तिरायते। श्रुत्वा च नामचैतेषां लिङ्गानां सुरसत्तम! अपि जन्मसहस्रोत्थाः क्षीयन्ते पापराशयः। इदानीं को निदेशोऽत्र मयानुष्ठेय ईङ्गितः!। प्रसादीक्रियतां सोऽपि सिद्धो मन्तव्य एव हि। श्रीस्कन्द उवाच। श्रुत्वेति नन्दिनो वाक्यं देवदेवेश्वरो हरः। सदा प्रसाद्य शैलादिमिदं प्रोवाच कुम्भज!। श्रीदेवदेव उवाच। साधु कृतं त्वया नन्दिन्! सदानन्दविधायक!। विधेहि मे निदेशं च चण्डीव्यापारयाधुना। नव कोट्यस्तु चामुण्डायाश्चात्र निवसन्ति हि। सदैव ताभिः सहिताः भूतवेतालभैरवैः। ताः पुरीरक्षणार्थाय सवाहनबलायुधाः। प्रतिदुर्गं दुर्गरूपाः परितः परिवारय। श्रीस्कन्द उवाच। नन्दिनं स निदेश्यापि सङ्ग्राह्य सहितो गणैः। ययौ त्रैपिष्टपं क्षेत्रं सस्त्रिबीजपुरोहणम्। गिलादतनयोऽप्यैशीं मूर्ध्नाघ्रातां विधाय च। आहूय सर्वांस्तां दुर्गाः प्रतिदुर्गं न्यवेशयत्। निशम्याध्यायमेतच्च पुण्यायतनगर्भितम्। नरः स्वर्गापवर्गौ च प्राप्नुयात् श्रद्धया क्रमात्। श्रुत्वाष्टषष्टिमेतां वै महायतनसंभवाम्। न जातु प्रविशेन्नर्त्यो जनन्या जठरीदरीम्"। [प्रशंसनीयत्वात्। केशे केमच०।

**तीर्थवाक** पु० तीर्थस्येव वाको वचनमस्य उक्ताङ्गस्त्वात्

**तीर्थशौच** न० तीर्थस्य घट्टस्य शौचं परिष्कारः। घट्टादिपरिष्कारे। "सेतुबन्धरता ये च तीर्थशौचरताश्च ये। तडागकूपकर्त्तारो सुचक्रे ते तथाभयात्"। आदित्यपु० तीर्थशौचं घट्टपरिष्कारः" रघु०।

**तीर्थसेनि** स्त्री कुमारानुचरमातृभेदे। "माधवी शुभवक्त्रा च तीर्थसेनिश्च भारत!" भा० शल्य० ४७ अ०।

**तीर्थसेविन्** पुंस्त्री० तीर्थं जलप्रान्तं सेवते मत्स्याहारार्थं सेव-णिनि। १वके राजनि० स्त्रियां ङीप्। २तीर्थसेवके त्रि०।

**तीर्थ्य** पु० तीर्थे भवः यत्। रुद्रभेदे। "नमस्तीर्थ्याय च कुल्याय च" यजु० १६।४२। समानतीर्थे वसति यत्। सतीर्थ्य एकगुरुके अमरः। [तितीव।

**तीव** स्थौल्ये भ्वा० पर० अक० सेट्। तीवति अतीवीत्।

**तीवर** पु० तु-वरजन्तः नि०। १समुद्रे, २व्याधे, ३वर्णसङ्करजातिभेदे (तेओर) पुंस्त्री० जातिशब्दे ङ्यप्रम्। स्त्रियां ङीप्।

**तीव्र** न० तीव-रक् तिज-वन् दीर्घः जस्य वो वा। १अतिशये २तद्वति त्रि० अमरः। ३तीक्ष्णे ४औषधभेदे (इस्पात) ५तीरे हलमुखि च उणा० ७औषधमात्रे राजनि०। ८व्यत्युष्णे ९कटौ १०नितान्ते च त्रि० उणा०। ११शिवे पु० शब्दर०। "विलङ्घिताधोरणतीव्रयत्नाः" रघुः। "तीव्रोल्लिताक्षावदसद्वरंहसः" "तीव्रं महाव्रतमिवात्र चरन्ति यत्राः" माघः। वैराग्यस्य उपायस्य च तीव्रत्वं पात० सू० भाष्ये विवरणे च दर्शितं यथा "ते खलु नव योगिनोमृदुमध्याधिमात्रोपाया भवन्ति। तद्यथा, मृदूपायोमध्योपायोऽधिमात्रोपाय इति। तत्र मृदूपायोऽपि त्रिविधः मृदुसंवेगोमध्यसंवेगस्तीव्रसंवेग

इति । तथा मध्योपायस्यापि मात्रोपाय इति, तत्राधिमात्रोपायानाम्" भा० "तीव्रसंवेगानामासन्नतमः पात० सू० । "समाधिलाभः समाधिफलञ्च भवतीति" भाष्यम् ननु अङ्गादयश्चेद्योगोपायास्तर्हि सर्वेषामविशेषेण समाधितत्फले स्यातां दृश्यते तु कस्यचित्सिद्धिः कस्यचिदसिद्धिः कस्यचिच्चिरेण सिद्धिः कस्यचिच्चिरतरेण सिद्धिः कस्यचित्तच्चिरमित्यत आह, "ते खलु नवयोगिन" इति । उपायाः अङ्गादयोऽहमध्याधिमात्राः प्राग्भवीयसंस्काराद्दृढत्वादुवेषां ते तथोक्ताः संवेगोवैराग्यं तस्यापि मृदुमध्यतीव्रता प्राग्भवीयवासनादृढत्वादेवेति तेषु यादृशां चेपीयसी सिद्धिस्तान् दर्शयति सूत्रेण, "तीव्रसंवेगानामासन्नतमः इति सूत्रम्" विव० ।

तीव्रकण्ठ पु० तीव्रः कण्ठो यस्मात् ५ब० । सेवनेन कण्ठपीड़के ।शूरणे (ओल)रत्नमा० तस्य सेवने हि कण्ठोद्वेजिता लोकप्रसिद्धा ।

तीव्रक्रन्द पु० तीव्रः क्रन्दोऽस्य । शूरणे राजनि० ।

तीव्रगन्धा स्त्री तीव्रो गन्धो यस्याः । यवान्यां राजनि० । २तीव्रगन्धयुक्ते त्रि० । कर्म० । ३तीव्रे गन्धे पु० ।

तीव्रज्वाला स्त्री तीव्रं यथा तथा ज्वालयति दहेज्जयति सेचिनम् ज्वल–णिच्–अच् । ।धातक्याम् राजनि० । तत्स्वर्शने हि गात्रे व्रणजन्म लोकप्रसिद्धमिति तथात्वम् २तीव्रज्वालायुक्ते त्रि० । कर्म० । ३तीव्रायां ज्वालायां स्त्री ।

तीव्रदारु न० कर्म० । ।तीव्रे दारुणि । तस्य विकारः रजता० अञ् । तैव्रदारव तद्विकारे त्रि० स्त्रियां ङीप् ।

तीव्रबन्ध पु० तीव्रो बन्धो यस्मात् । तामसभेदे "दैवी सम्पद्विमोक्षाय निबन्धायासुरी मता" गीतायां तामसकार्य्यासुरसम्पदोबन्धहेतुत्वोक्तेस्तथात्वम् ।

तीव्रवेदना स्त्री कर्म० । घोरायां यातनायाम् अमरः ।

तीव्रसंवेग पु० कर्म० । तीव्रवैराग्ये तीव्रशब्दे दृश्यम् ।

तीव्रा स्त्री तीव्र+टाप् ।।गण्डदूर्व्वायां २कटुरोहिण्यां ३राजिकायां (राइसरिषा) मेदि० । ४नदीभेदे भारत० । ५मङ्काज्योतिष्मत्यां हरितदीप्तेः ७तत्तस्याञ्च राजनि० । ८तीव्रवेगयुक्तस्त्रीमात्रे च ।

तीव्रानन्द पु० तीव्र आनन्दोऽस्य । शिवे शिवसहस्रनाम ।

तु उक्तौ (उद्यौ पा०)अक० हिंसायां पूर्त्तौ च सक०अदा०पर० अनिट् । तौति तवीति । अतौषीत् । अत्र "नाभ्यस्तस्याचिपिति सार्वधातुके" ७।३।८७। "सूतेः सार्वधातुके इत्यनुवृत्तिसम्भवेऽपि "तरस्तुगम्यमः सार्वधातुके" ७।३।९५ पा०सूत्रे "पुनः सार्वधातुकग्रहणमपिदर्थमिति" सि०कौ० । तेन "उतो वृद्धिर्लुकि हलि" ७।३।८९पा०सूत्रात् हलीत्यस्य "ध्रुवसेट्" ७।३।९२पा०सूत्रात् "सेटः यङो वा" सू०वैत्यस्य चानुवृत्तिः न पितीत्यस्य तेन तुवीतः तुतः तुवीयः तुषः। अचि तु न । तुवन्ति । सम्बोधनसुङ्लोत्यस्यानुवृत्तिवत् पितीत्यस्यानुवृत्तिरिति वक्ष्याम" तेन तन्वते तुत इत्येव इति भेदः। तुताव । वेदे तुजादित्वाभ्यासदीर्घः। "स तुताव नैनमश्नोत्यंहतिरन्ने !" ऋ० १।९४।२ "ब्रह्मा तुतोदिन्द्रो गातुमित्यन्" ऋ०२।२०।५। तु उद्धावित्यस्य लकि बहुलं छन्दसि विकरणस्य लुः । अङ्गागमाभावश्च" भा० ।

तु अव्य० तुद–मितद्रु०डु । ।पादपूरणार्थे निरर्थके । "निरर्थकं तुहीत्यादि पूरणैकप्रयोजनम्" चन्द्रालोकः । २भेदे ३अवधारणे अमरः। ४समुच्चये ५पक्षान्तरे ६नियोगे ७प्रश्नाशांकाविनिग्रहे शब्दर० तत्र पक्षान्तरे "आधारेण तु संयुक्तः संपूर्णफलभाक् भवेत्" मनुः। समुच्चये "उष्ट्रयानं समारुह्य खरयानं तु कामतः । स्नात्वा तु विप्रो दिग्वासाः प्राणायामेन शुध्यति" मनुः । पूजायामेतद्योगे "तुपश्र पशृतादैः पूजायाम्" पा०निरुक्तं न निहन्यते" आदृच् सुधाम तु पुनर्गर्भेषु मेनिरे" शि० कौ० धृता श्रुतिः ।

तुकाक्षीरी स्त्री तुगाक्षीरी+पृषो० । वंशरोचनायाम् हेम० ।

तुक्त त्रि० तुच–बा० क्त । तोषयुक्ते ततः पक्षा० चतुरर्थ्यां फक् । तौक्तायन तत्सम्बन्धिशब्दादेशादौ त्रि० ।

तुखा(षा)र पु०विन्ध्यपर्वतस्थे जातिभेदे । "ये चान्ये विन्ध्यनिलयास्तुखा(षा)रास्तुम्बरास्तथा। अधर्म्मरुचयस्तात ! विद्धि तान् वेणसम्भवान्" हरिवं० ५अ० ।

तुगा स्त्री तुज–बा० घ किच्च । वंशरोचनायां राजनि० ।

तुगाक्षीरी स्त्री तुगैव क्षीरी । वंशरोचनायाम् राजनि० ।

तुग्र न० तुज–रक् न्यङ्वा० जस्य गः । अश्विनीकुमारयोः शिष्ये राजर्षिभेदे । "तुग्रोह भुज्युमश्विनोदमेघे रयिं न कश्चिन् ममृवाँ अवाहाः" ऋ०१।११६।२ । अस्येयमाख्यायिका। "तुग्रो नामाश्विनोः प्रियः कश्चिद्राजर्षिः । स च द्वीपान्तरवर्त्तिभिः शत्रुभिरत्यन्तसम्पद्भृतः सन् तेषां जयाय स्वपुत्रं भुज्युं सेनया सह नावा प्राहैणोत् । सा च नौर्मध्येसमुद्रमतिदूरं गता वायुवशेन भिन्नासीत् । तदानीं स भुज्युः शीघ्रमश्विनौ तुष्टाव" भा० । "तां भुज्युं विभिरद्भ्रः समुद्रात् तुग्रस्य सूनुमूहथूरजोभिः" ऋ०६।६२।६। "तां नौ अश्विनौ युवां

तुषस्य स्तुतं भुज्यं भुज्यु नामकं सप्तद्वमध्ये मज्जनावम्" भा०

तुङ्गा स्त्री तुज-रक् न्यङ्वा० कुः स्वार्थे यत्। १जले निघण्टुः। "आपः शर्म तुषं तुङ्गाम्" ऋ० १।३३।५। "तुङ्गाम्ब जलेषु" भा० निघण्टौ वुसं तुषमिति पाठान्नरात्। जले न०। तदनुसारेण "पिब स्वधैनवानाहुत यस्तुङ्गे सचा" ८।३२।२०। वुसं तुषमित्युदकनामसु पाठात्" भा० वस्तुतस्तु निघण्टौ वुसं तुषं तुषावर्वरमित्येव पाठः सुद्रितपुस्तके तुषमिति पतितम्। तुषस्य राजधैरपत्यं वा० यत्। तुषदत्ते भुज्यौ पु०। "अस्तं ययो न तुषतम्" ऋ० ८।३।२२ "तुषां तुषदत्तम्" भा०।

तुञ्चन् त्रि० तुज-बा० कनिप् न्यङ्वा० जस्य गः। १हिंसके। "तुवास्वा अधि तुञ्चनि" ऋ० ८।१६।२७।

तुङ्ग पु०तुज-हिंसायां घञ् न्यङ्वा०कुः। १पुन्नागवृक्षे २पर्वते ३बुधग्रहे हेमच०।४नारिकेले ५गरुडके राजनि०। ६उच्चे त्रि०। ७यदृच्छिमेषस्य राशिभेदे पु०। उच्चशब्दे १५८पृ० दृश्यम् "अजवृषभसृगाङ्गनाकुलीरा झषवणिजौ च दिवाकरादितुङ्गाः। दशशिखिमनुयुक्तियोन्द्रयांशैस्त्रिनवकविंशतिभिश्च तेऽस्तनीचाः"। "सूर्यादुच्चान् क्रियदृषसृगस्त्रीकुलीरान्त्ययूके दिग्वह्नीन्द्रहयतिथिशरान् सप्तविंशांश्च विद्यात्। खंयानेतान् वदति यवनस्त्वन्य तुङ्गांस्तुतुङ्गांस्तानेवांशान् मदनभवनेत्याह नीचान्त्रनीचानिति"।

तुङ्गस्यफलभेदफलम् "तुङ्गेऽर्कः शुभसंयुतः शुभकरैर्मित्रैश्च दृष्टो यदा दैवात् पश्यति सोऽपि वा शुभकरानेकं द्विकं वा त्रिकम्। वित्तेशः प्रथितो विमर्दितरिपुः स्त्रीपोषमान्योऽथवा क्ष्मापालार्चितपादपद्मयुगलो राजा त्रिकोणे यदा"। र०। "तुङ्गे चन्द्रमसि प्रसन्नवपुषि ब्रह्मादनद्युतौ प्रख्यातोऽरिविमर्दकोऽगदतनू राजेश्वरो रूपवान्। क्ष्मापालार्चितपादपद्मयुगलो वा धर्म्मशीलो महान् सौम्यैरेव युतोऽथ वा प्रियतमैर्दृष्टे त्रिकोणेऽपि च"। च०। "यदि भवति सुगस्थो भूमिपुत्रस्तदा वै न दिनकरभयूखादुभ्यरश्मिर्नरेन्द्रः। जगदतनुरभीतः शत्रुदर्पापहारी प्रथतरिपुनरेन्द्रः स्यात्त्रिकोणेऽपि जातः"। म०। "कन्यास्थः शशलाञ्छनस्य तनयस्तिष्यांशकैः संयुतो दृष्टो वा यदि संयुतः शुभकरैश्चन्द्रात्तदा भूपतिः। यात्रायां हरगोदमत्तकरिणां यानैर्मही कम्पते स क्ष्माभृद्वरशीकृताखिलिता यान्ति त्रिकोणेऽपि च"। बु०। "तुङ्गे गुरौ मित्रखगेन दृष्टो राजा भवेदिन्द्रसमानमूर्त्तिः। गजाश्वनौकार्थवपुष्मतश्रीः पृथ्वीपतिः स्यात्त्रिकोणगोऽपि"। शु०। "तुङ्गे शनौ शुभसङ्गतयुते च दृष्टे दैवात् पुनः स यदि पश्यति मित्रसंघान्। भूपाधिपो भवति कीर्त्तिकरः प्रधानो दीर्घायुरुत्तमसुखभुगुरुगुजे त्रिकोणे"। रा०। "तुङ्गे शनौ मित्रखगेन दृष्टे प्रचण्डदण्डो नृपतिप्रधानः। न ह्रस्यते दिग्गमने च युद्धे त्रिकोणगे चापि नरेन्द्रमूर्त्तिः"। श०। "भवति धरणीपालो नीचबुद्धिः प्रतापी हयगजधनपूर्णो ज्ञातिवर्गैर्विरक्तः। कुटिलमतिरनीतो भूरिभाण्डारयुक्तस्तमसि मिथुनसंस्थे जायते मानवेन्द्रः"। रा०। "सुगपतिदशकन्याकण्ठस्थे च राहौ भवति विपुललक्ष्मी राजराजाधिपो वा। हयगजनरनौकाभण्डितः सार्वभौमोन्नपतिरमरपूज्यो राड्तङ्गी चिरायुः"। रा०। "अरिनिधनव्ययतुङ्गे कीर्त्तिमेतत्फलं व्यर्थं केन्द्रे त्रिकोणे लाभे वा तुङ्गफलं यथोद्दिष्टम्" इति कोष्ठीप्र०। ६त्रिकुलके न०मद्वार्थचि०। १०वश्ये ११प्रधाने १२उच्चते त्रि० शब्दर०। "तुङ्गत्वमितरा नाड्यौ नेदं सिद्धावगाधता" माघः।१६शिवे पु०तुङ्गबीजशब्दे दृश्यम्।

तुङ्गक पु० तुङ्ग+स्वार्थे क संज्ञायां कन् वा। १पुन्नागवृक्षे शब्दरत्ना० २तुङ्गशब्दार्थे ३स्वरगतभेदे तीर्थभेदे न०। "तुङ्गकारण्यमासाद्य ब्रह्मचारी जितेन्द्रियः। वेदानध्यापयत्तत्र ऋषिः सारस्वतः पुरा। तत्र वेदेषु नष्टेषु सनेरङ्गिरसः सुतः। ऋषीणामुत्तरीयेषु स्वपविष्टो यथासुखम्। ओङ्कारेण यथान्यायं सम्यगुच्चारितेन च। येन यत्पूर्वमभ्यस्तं तत्सर्वं समुपस्थितम्। ऋषयस्तत्र देवाश्च वरदोऽस्मिन् प्रजापतिः। हरिर्नारायणस्तत्र महादेवस्तथैव च। पितामहश्च भगवान् देवैः सह महाद्युतिः। ऋषीं नियोजयामास याजनार्थं महाद्युतिम्। ततः स चक्रे भगवान् ऋषीणां विधिवत्तदा। सर्वेषां पुनराधानं विधिदृष्टेन कर्मणा। आज्यभागेन तत्राग्निं तर्पयित्वा यथाविधि। देवाः स्वभवनं याता ऋषयश्च यथागतम्। तदरण्यं प्रविष्टस्य तुङ्गकं राजसत्तम!। पापं प्रणश्यत्यखिलं स्त्रिया वा पुरुषस्य वा" भा० व० ८५ अ०। तत्कथा दृश्या

तुङ्गकूट पु० तुङ्गं कूटमस्य। उच्चशृङ्गे पर्वतभेदे।

तुङ्गनाभ पु० तुङ्गो नाभिरस्य। कीटभेदे। तुङ्गीनाभशब्दे दृश्यम्। [ दृश्यम्। तुङ्गराख्यादयोऽत्र।

तुङ्गभ न० कर्म्म०। सूर्यादीनामुच्चराशौ मेषादौ तुङ्गशब्दे

तुङ्गभद्र पु० तुङ्गोऽपि भद्रः। १नदीभेदे २नदीभेदे स्त्री मेदि०। "शर्करावर्त्तां तुङ्गभद्रां कृष्णवेणीं त्यादि" भाग० ५।१९।१८ स्त्री० भारतस्थनदीकवने। "तुङ्गभद्राजलं स्वादु स्निग्धं शीतं तथा गुरु!। कण्डूपित्तास्रदं प्रायः सात्म्यं मेधाकरं मतम्" राजनि० तज्जलगुणा उक्ताः।

तुङ्गवीज न० तुङ्गस्य शिवस्य वीजम्। १पारदे। "तुङ्गवीजसमायुक्तं गोलयन्त्रं प्रसाधयेत्" रु०सि० "तुङ्गो महादेवस्तस्य वीजं वीर्य्यं पारद इत्यर्थः" रङ्गना०।

तुङ्गवेणा स्त्री नदीभेदे "तुङ्गवेणा कृष्णवेणा कपिला शोण एव च" भा०व० २२१ अ०। "विनदीं पिङ्गलां वेणां तुङ्गवेणां महानदीम्" भा० भी० ६अ०।

तुङ्गरस पु० तुङ्गः श्रेष्ठो रसोऽस्य। गन्धद्रव्यभेदे "कालागुरुविमिश्रेण तथा तुङ्गरसेन च" भा० आ० १२७ अ०।

तुङ्गशेखर पु०तुङ्गश्चासौ शेखरश्च। १पर्वते शब्दमा०। २उच्चशेखरयुक्ते त्रि०। कर्म्म०। ३उच्चे शेखरे न०।

तुङ्गा स्त्री तुङ्ग+टाप्। १वंशलोचनायां २शमयाञ्च राजनि०।

तुङ्गिन् त्रि० तुङ्गं मेषादिकं स्थानमाश्रयत्वेनाऽस्त्यस्य इनि। उच्चस्थिते षड्वे ३महाग्रहतावर्य्यां स्त्री ङीप् राजनि०। ४प्रधानस्थानस्थे त्रि०। [३रात्रौ शब्दार्थचि०।

तुङ्गी स्त्री तुङ्ग+गौरा०ङीष्। १हरिद्रायां २वर्वरायां मेदि०।

तुङ्गीनास पु०तुङ्गी हरिद्रेव पीता नासाऽस्य। १कीटभेदे। "तुङ्गीनासो विचिलकस्तालको वाहकस्तथा। कोडागारी क्रिमिकरो यश्च मण्डलपुच्छकः। तुङ्गनाभः सर्पपिकोऽवलगुडी शम्बुकस्तथा। अग्निकीटश्च घोराः क्षुद्रोदंश प्राणनाशनाः" सुश्रु०।

तुङ्गीपति पु०तुङ्गाः रात्रेः पतिः। निशापतौ चन्द्रे त्रिका०

तुङ्गीश पु० कर्म्म०। १शिवे २कृष्णे ३सूर्य्ये च शब्दर० तेषां प्रधानस्थानस्थित्वा तथात्वम्। इत०। रात्रीशे ४चन्द्रे।

तुच् पु० त्वच–क्विप् वा० संप्रसा०तुज–क्विप् वा पृषो० जस्य चः। १अपत्ये निघण्टु। "तुचे तनाय ततसु" ऋ० ८। १८।१८। "तुचे पुत्राय" भा०। "तुचे तु नो भवन्तु" ८।२७।१४। "तोजयति पितृर्खादिकमिति तुच् पुत्रः तत्रै" भा०। पृषो० जस्य चः इति भेदः। क्षेमचन्द्रे तु आन्तत्वाऽयं पठितः वेदे तु सर्वत्र चान्तत्वेनैव प्रयोगः।

तुच्छ न० तुद–सम्प० क्विप् तुदा व्यथया छाति छो–क। १प्रलापे (तुच्छ) २क्षीणे, उणा०। ३शून्ये अमरः ४अल्पे क्षेमच०। ५शून्ये च त्रि०। "किमेतैरात्मनस्तुच्छैः सह देहेन नश्वरैः। अनर्थैरर्थसङ्काशैर्निरानन्दधरोदधेः" भाग०७।७। २८।८५ नीलीद्वत्तेऽतत्यावाच्च भावप्र०। ७मन्दे अक्षीबे च त्रि०

तुच्छद्रु पु० कर्म्म०। एरण्डवृक्षे शब्दच०।

तुच्छधान्यक न० कर्म्म०। (धनी) पुलाकु अमरः।

तुच्छ्य न०तुच्छ–वेदे स्वार्थे ष्यञ्वार्थे वा यत्। १तुच्छशब्दार्थे २तुच्छकल्पे च "तम आसीत्तमसागूढमग्रेऽप्रकेतं सलिलं सर्वमा इदम्। तुच्छ्येनाभ्वपिहितं यदासीत्तपसस्तन्महिना जायतैकम्"। ऋ०१०।१२९।३ अयमर्थः। ननूक्तप्रकारेण यदि पूर्वमिदं जगन्नासीत् कथं तर्हि तस्य जन्म? जायमानस्य जनिक्रियायां कर्त्तृत्वेन कारकत्वात् कारकं च कारणाव्यतिरेविशेष इति कारकस्य सतो नियतपूर्वक्षणवर्तित्वस्यावश्यम्भावात्। अथैतद्दोषपरिजिहीर्षया जनिक्रियायाः प्रागपि तद्विद्यत इत्युच्यते कथं तस्य जन्म? अत आह। तमसागूढमग्र आसीत्, प्राक् प्रलयदशायां भूतभौतिकं सर्वं जगत्तमसागूढम्। यथा नैशं तमः सर्वपदार्थजातमावृणोति तद्वत् आवृतत्वस्यावरकत्वात् मायापरसंज्ञं भावरूपाज्ञानमत्र तम इत्युच्यते। तेन तमसा निगूढं संवृतं कारणभूतेन तेनाच्छादितं भवति। आदकात्तत्कात्तमसो नामरूपाभ्यां यदाऽविर्भवनं तदेव तस्य जन्मेत्युच्यते। एतेन कारणावस्थायामसदेव कार्य्यं सत्प्रद्यत इत्यसद्वादिनोऽसत्कार्य्यवादिनो ये मन्यन्ते ते प्रत्याख्याताः। ननु कारणे तमसि तज्जगदात्मकं कार्य्यं विद्यते चेत् कथं नासीद्रज इत्यादि निषेधः। तत्राह तम आसीदिति। तमोभावरूपाज्ञानं मूलकारणं तद्रूपता तदात्मनाम्। यतः सर्वं जगत् प्राक् तम आसीदतो निर्विशेषत इत्यर्थः। नन्वावरकत्वादावरकं तमः कर्तृ आवार्य्यत्वाज्जगत् कर्म्म। कथं तयोः कर्म्मकर्त्रोसादात्म्यम्। तत्राह अप्रकेतमिति। अप्रकेतमप्रज्ञायमानम्। अयमर्थः। यद्यपि जगतस्तमसश्च कर्म्मकर्तृभावोयौक्तिको न विद्यते तथापि व्यवहारदशायामिव तस्यां दशायां नामरूपाभ्यां विश्लेषं न ज्ञायत इति तादात्म्यवर्णनम्। अतएव मनुना स्मर्य्यते "आसीदिदं तमोभूतमप्रज्ञातमलक्षणम्। अप्रतर्क्यमनिर्देश्यं प्रसुप्तमिव सर्वतः" इति। कुतो वा न प्रज्ञायते तत्राह सलिलम्। सल–गतौ। औणादिक इलच्। इदं दृश्यमानं सर्वं जगत् सलिलं कारणेन संगतमविभागापन्नम् आसीत्। अस्तेर्लङि तिपि बहुलं छन्दसीतीड्भावे हल्ङ्यादिलोप इति

तिलोपे तियनस्तेः पा० इति पर्य्युदासाद्दीर्घाभावः। यद्वा सलिलमिति लुप्तोपमम्। सलिलमिव। यथा क्षीरेणाविभागापन्नं नीरं दुर्विज्ञानं तथा तमसाऽविभागापन्नं जगत्र सम्यं विज्ञातुमित्यर्थः। ननु विविधविचित्ररूपभूयसः प्रपञ्चस्य कथमतितुच्छेन तमसा क्षीरेण नीरस्येवाभिभवः। तथा तमोऽपि क्षीरवद्बलवदित्येवोच्यते। तर्हि दुर्बलस्य जगतः सर्गसमयेऽपि नोद्भवस्तत्र दृश्यत आह तुच्छ्येनेति। आसमन्ताद्भवतीत्याभु तुच्छ्येन। छन्दसो यकारोपजनः। तुच्छ्येन तुच्छकल्पेन सदसद्विलक्षणेन भावरूपाज्ञानेनापिहितं आदितमासीत्" भाष्यम्।

तुज दीप्तौ चुरा० उभ० सक० सेट् इदित्। तुञ्जयति-ते अतुतुञ्जत्। तुञ्जने।

तुज प्राणने हिंसायाञ्च भ्वा० पर० सक० वले अक० सेट् इदित्। तुञ्जति अतुञ्जीत्। ततुञ्ज तुतुञ्जतुः। "तुञ्जे तुञ्जे य उत्तरे स्तोमाः" ऋ०१।७।७। इमाञ्चमधिकृत्य "तुञ्जतेर्दानकर्म्मणः तुञ्जे तुञ्जे दाने दाने" इति ६।१।७ निरुक्तोक्तेः। दाने च।

तुज हिंसायां भ्वा० पर० सक० सेट्। तोजति अतोजीत्। ततोज। वेदे तुजादि० अभ्यासस्य दीर्घः। तूतुजानः। प्रेरणे च "या वां तोके तनये तूतुजानाः" ऋ०७।६७।६। "प्रायस्तोके तनये तूतुजाना" ७।८४।५। "तूतुजानाःप्रेर्य्यमाणाः" भा०। "अस्मा इन्द्र प्रभर्या तूतुजानः" निरु०६।२० धृता ऋक्।

तुञ्ज पु० तुज-बले अच्। वज्रे निघण्टुः।

तुट कलहे तुदा० कुटा० पर० अक० सेट्। तुटति अतुटीत् ततोट। [च" हरिवं० २७७ अ०।

तुटितुट पु० शिवे। "नमस्तुण्डाय तुण्डाय नमस्तुटितुटाय

तुटुम पुंस्त्री० तुट-बा०डुम। उन्दुरौ त्रिका०।

तुड भेदे तु० कुटा०पर०सक० सेट्। तुडति अतुडीत् ततोड।

तुड निष्पीडने भ्वा० आ० सक० सेट् इदित्। तुण्डते अतुण्डिष्ट। ततुण्डे। तुण्डिता।

तुड विधाकरणे भ्वा० पर० सक० सेट्। तोडति अतोडीत् ऋदित्। अततोडत्-त।

तुडि स्त्री तुड-इन् किच्च। तोड़ने।

तुड्ड अनादरे भ्वा० पर० सक० सेट्। तुड्डति अतुड्डीत्। अयं दोपध इत्यन्ये तन्मते किपि तुद्-डोपधत्वे तुड् इति भेदः।

तुण कुटिलीकरणे तु० पर० सक० सेट्। तुणति अतोणीत्। तुतोण।

तु(ढ)णि पु० तुण+सङ्कोचे इण् बा० पृषो०। १क्षीरिरोगे अमरटीकायां क्षीरस्वामी २नन्दिवृक्षे राजनि०। "तूणीरूक्षः कटुः पाके कषायो मधुरो लघुः। तिक्तो व्याधी हिमो दृष्टो व्रणकृच्छ्रास्रपित्तहृत्" भावप्र०।

तृणिक पु० तृणि-स्वार्थे क। नन्दिवृक्षे राजनि०।

तुण्ड न० तुडि-तोड़ने अच्। १मुखे अमरः। "अयस्तुण्डैरुलूखलैः" हरिवं० २४५ अ०। "स तेन पतगेन्द्रेण पक्षतुण्डक्षतः" भा० आ० ३२ अ०। "दीर्घनखा दीर्घतुण्डा दीर्घतुण्डाश्च भारत!" भा० श० ४७। २शिवे पु०तुटितुटशब्दे दृश्यम्। ३राक्षसभेदे। "तुण्डेन च नलस्तत्र पटुप्रः पनसेन च" भा० व० २८४ अ०।

तुण्ड(ण्डि)केरी स्त्री प्रशस्तं तुण्डं(ण्डिः) कन् तद्-रेरयति रेरे वा रेर-अण् १कार्पास्याम् तस्याः फलमुखविदारे हि विलोर्णसूत्रहेतुकार्पासोत्पत्तिः। २बिम्बिकायाम् (तेलाकुचा) तस्याः फलेन हि सुखाङ्गोऽसादश्यदानात् तथात्वम्। स्वार्थे क ह्रस्वः। तुण्ड(ण्डि)केरिकाप्यत्र अमरः। संज्ञायां कन्। बिम्बिकायां राजनि०।

तुण्डदेव पु० तुण्डरूपो देवः तुण्डेन दीव्यति दिव-अच् वा। ऋषभेदे तस्य विषयो देशः ऐषुका० भक्तल्। तुण्डदेवभक्त तदीये विषये देशे पु०।

तुण्डि पु० तुण्ड-इन्। १मुखे, २चञ्चौ च। ३बिम्बिकायां, ४वन्दायां, उणा०। ५नाभौ स्त्री शब्दरत्ना० वा ङीप्। स्वार्थे कन् उक्तार्थेषु। तुन्दो माधवः तुण्डिभशब्दे दृश्यम्।

तुण्डिका स्त्री तुण्डम् तदवयवाधरसादृश्यमस्त्यस्याः ठन्। १बिम्बिकायां तत्फलस्यावयवाधरसादृश्यात्तथात्वम्। स्वार्थे क। नाभौ शब्दरत्ना०।

तुण्डि(ण्ड)केशी स्त्री तुण्डे (ण्डौ) सुखे कायति कै-क तुण्डि(ण्ड)कः ओष्ठः तत्र रेरे तत्तुल्ययोर्भाधारत्वाद् रेर-अच् गौरा०ङीष्। बिम्बिकायाम्(तेलाकुचा)। शब्दच०।

तुण्डिभ(ल) त्रि० तुण्डि+भ सिध्मा० लच् वा। १तुन्दिले (भुँड़ि)युक्ते। अमरः। "तुन्दि(ण्डि) बलिवटेभः" पा०सू०। मूर्द्धन्योपधोऽयमिति माधवः। स्वार्थे २तुण्डरे उणादि०।

तुण्डेल पु० गर्भोपद्रवके असुरभेदे। "उपेयन्नसुदुम्बलं तुण्डेलसुत यातुडम्" ऋग० ८।६।१७।

तुतात पु० मीमांसकभेदे । तेन प्रोक्तं ठक् । तौतातिक तत्-प्रोक्तमीमांसादर्शने । तत्कृतञ्च दिङ्मात्रम् अर्हच्छब्दे ३८० पृ० दर्शितम् । "नैवाचार्यो गुरोर्मतं न विदितं तौतातिकं दर्शनम्" सा० द० ।

तुतुर्वणि पु० तुर्णोर्वनिर्भजनमस्य वेदे पृषो० । १तुर्णभजने । "यत्रावत्रादः समानां तुतुर्वणिः" ऋ०१।१६१।१। "तुतुर्वणिः त्वरमाणः संभजमानः" भा० । [ त्यत्-त ।

तुत्थ स्तुतौ ऋदo चु० उभ० सक० सेट् । तुत्थयति ते अतुत-

तुत्थ पु० तुद-थक् । १धातुभेदे उणा० । २अग्नौ संक्षिप्तमा० । (तूंते) ३अञ्जनभेदे न० । ४नीलाम् । ५रसाञ्जनायाञ्च स्त्री हेमच० । स्वार्थे क । तत्रार्थे । रसनाञ्जनस्य गुणादिकं भावप्र० उक्तं यथा

"तुत्थं ताम्रोपधातुर्हि किञ्चित्ताम्रेण तद्भवेत् । किञ्चित्ताम्रगुणं तस्मात् वक्ष्यमाणगुणञ्च तत् । तुत्थकं कटुकं क्षारं कषायं वामकं लघु । लेखनं भेदनं शीतं चक्षुष्यं कफपित्तहृत् । विषाग्निकृमिकण्डूघ्नं खर्पराख्यं तदृगुणम्" भावप्र० अस्य शोधनम् "विडायां मर्दयेत्तुत्थं मार्जारकपोतयोः । दर्शांशं टङ्कणं दत्त्वा पचेत् लवणपुटे ततः । पुटं दत्त्वा पुटं चैवं तैर्यं तुत्थविशुद्धये" भावप्र० "कासीसं रोचनां तुत्थं फरिताले मनःशिलाम्" सुश्रुतः । [ २मयूरकण्ठे च राजनि० ।

तुत्थाञ्जन न० कर्म० । १अञ्जनभेदे (तूंते) । तद्गुणत्वात्

तुत्थ पु० तु-थक् तुद-बधे थक् पृषो० वा । १छेदनकर्त्तरि "तुत्थोऽसि जनधारयो नमोऽसि" तारब्राह्मा०१।४।३। "तुद्यतेर्वधकर्म्मणः तुत्थः रज्जःप्रभृतीनां छेत्ता" भा० । २ब्रह्मणि । "तुत्थोऽसि विश्ववेदाः" यजु० ५।३१ । "हे ब्राह्मणाङ्गंसिन् त्वं तुत्थो विश्ववेदाश्चसि । ब्रह्म वै तुत्थः" इति श्रुतेः । ब्रह्मरूपोऽसि । विश्वं वेत्ति विश्ववेदाः सर्वज्ञः । यद्वा तुत्थशब्देन देवान् प्रति दक्षिणानां विभागकर्त्ता पुरुष उच्यते तदाह तित्तिरिः "तुत्थो ह वा वै विश्ववेदा देवानां दक्षिणा विभजतीति" । "ब्रह्मा वै तुत्थः" शत० ब्रा० ४।३।४।१६ । श्रुतेः । ३दक्षिणाविभाजके ब्रह्मरूपे ऋत्विग्भेदे ।

"तुत्थो वै विश्ववेदा विभजतीति ब्रह्म वै तुत्थस्तेनैनं ब्रह्मणा विभजति । ब्रह्मा वै दक्षिणीयं चादक्षिणीयं च वेद तुत्थो ह्यस्मैता दक्षिणीयायैव दत्त्वा भजति नादक्षिणीयाय" । "रूपेण वो रूपमाप्नुयां तुत्थो वो विश्ववेदा विभजतु" । यजु० ७।४५ "किं च तुत्थो ब्रह्मरूपः प्रजापतिर्वा युष्मान् विभजतु यथायोग्यमृत्विग्भ्यो विभज्य ददातु "ब्रह्म वै तुत्थ इति श्रुतेः" वेददी० ।

तुद व्यथने तुदा० उभ० सक० अनिट् । तुदति ते अतौत्सीत् । अतुत्त तुतोद तुतुदे "तुतुदे गदयाचचारीनू" । "अतौत्सीत् गदयाङ्गदम्" भट्टिः । "दृष्टिभिरिव मानसं कामिनां तुदति कुसुमचापः" पञ्चत० । "यथा तुदति मर्म्माणि" भा० स० २५३० ।

तुदादि पु० शपन्त्यर्थनिमित्ते धातुसमुदाये स च गणः कविकल्पे धातुबन्धेन पठितः । "तुदादिभ्यः शः" पा० ।

आ+सम्यग्व्यथने । "अतोदेनातुदन् श्वगम्" मनुः । "धनुः कोटप्रातुद्य कर्षेन धीरम्" भा० का० १ अ० ।

निस्+निष्पीडने । "स्रुचिभिरिव निस्तुद्यते दग्धत इव पिपीलिकाभिः" । [ इय तदपत्ये ङीष्० ।

तुद त्रि० तुद-क । व्यथके । तस्यापत्यं गुञ्चा० ढक् । तौ-

तुन्द न० अधु अर्दने अन्दा० नि० । उदरे अमरः ।

तुन्दकूपी स्त्री तुन्दः कूपः कूपी तुन्दस्य कूपीव । १नाभौ ल्लिका० । स्वार्थे क । २तुन्दकूपिकाप्यत्र हेमच० ।

तुन्दपरिमृज पु० तुन्दं परिमार्ष्टि परि+मृज-क ह्रस्वः । १अलसे २मन्दे । अण् । तुन्दपरिमार्जोऽप्यत्र रमानाथः ।

तुन्दमृज त्रि० तुन्दमुदरं मार्ष्टि मृज-क । १अलसे २मन्दे च हेमच० ।

तुन्दादि पु० "तुन्दादिभ्य इलच्" पा० अस्यर्थे इलच्प्रत्ययनिमित्ते शब्दसमूहे स च गणः । पा०ग०सू० उक्तो यथा "तुन्द उदर पिचण्ड यवग्रीव(खाङ्गाहिह्वौ) विवधौ कर्णौ वस्य स्तः कर्णिलः" । चादिनिठनौ मतुप् च । "तुन्दिलः तुन्दी तुन्दिकः तुन्दवान्" सि० कौ० ।

तुन्दिक(ल)(भ) त्रि० तुन्दं विद्यतेऽस्य ठन् । तुन्दि+भ तुन्द+इलच् वा । तुन्दियुक्ते (भुँड़ि) युक्ते ।

तुन्दिकर पु० तुन्दिं करोति क-अच् । (भुँड़ि) युक्ते तुन्दिले स्त्रियां ङीप् । [ त्रिका० ।

तुन्दिन् त्रि० तुन्दोऽस्यास्ति इनि । तुन्दयुक्ते (भुँड़ि) युक्ते

तुन्दिलफला स्त्री तुन्दिलं डुडुलफलमस्याः । त्रपुण्याम् (शशा) राजनि० ।

तुन्न पु० तुद-क्त । १नन्दिवृक्षे (तुंद) अमरः । २व्यथिते, ३छिन्ने च त्रि० । स्वार्थे क । तत्रैवार्थे ।

तुन्नवाय पु० तुन्नं छिन्नं वयति वे-कण् । १सौचिके, २सच्चाजीविनि (दरजी) अमरः । "शैलूषतुन्नवायान्नं कृतघ्नस्यान्नमेव च" मनुना तदन्नभक्षणं निषिद्धम् ।

तुम्बसेवनी स्त्री तुम्बं छिन्नं सीव्यतेऽनया सिव-करणे ल्युट् ङीप्। खचीभेदे "प्रवेश्य तुम्बसेवन्या सम्यक् सीव्येत् ततः परम्" स्मृतेः। [तुतुम्बतुः तुतुम्बिथ।

तुन्प बधे भ्वा० सक०पर० सेट्। तुम्पति अतुम्पीत्। तुतुम्प

तुन्प बधे सक० क्षेपे अक० तु० पर० सेट्। तुपति-तुम्पति अतुप(पी)म्पीत्। तुतुप(प)म्प तुतुप(प)म्पतुः तुतुपिथ तुतुम्पिथ

तुन्फ बधे भ्वा० पर० सक० सेट्। तुम्फति अतुम्फीत्। तुतुम्फ तुतुफ(म्फ)तुः। तुतुम्फिथ।

तुन्फ बधे सक० क्षेपे अक० तुदा० पर० सेट्। तुफति तुम्फति अतु(तु)म्फीत्। तुतु(तु)म्फ तुतुफ(म्फ)तुः तुतुफिथ तुतुम्फिथ।

तुप बधे भ्वा० पर० सक०सेट्। तोपति अतोपीत्। तुतोप।

तुप बधे सक० क्षेपे अक०तुदा० सचादि०पर० सेट्। तुम्पति अतोपीत्। तुतोप। पारस्क० सट्। प्रस्तुम्पति।

तुप अर्दने चुरा० उभ० सक० सेट् इदित्। तुम्पयति ते अतुतुम्पत्-त्। तुम्पते। [अतोपीत्। तुतोपत्।

तुफ बधे सक० क्षेपे अक० तु० स्वा० पर० सेट्। तुम्फति

तुफ बधे भ्वा० पर०सक०सेट्। तोफति अतोफीत्। तुतोफ।

तुब अर्दने वा चुरा० उभ० सक० पक्षे भ्वा० पर० सेट् इदित्। तुम्बयति-ते तुम्बति अतुतुम्बत्-त अतुम्बीत्। [इदित्। अतुभत् अतोभिष्ट। तुतुभे।

तुभ हिंसे भ्वा० आत्म० लङि उभ० सक० सेट्। तोभते।

तुभ हिंसायां दिवा० क्या० च पर० सक० सेट्। तुभ्यति तुभ्नाति अतोभीत्। तुतोभ "संकुटो सक्थिनातुभ्नाद-भूदोऽतु मङ्कोदरम्" "अक्षान् विभीषणोऽतुभ्नात्" भट्टिः।

तुम प्रेरणे आक्षेपने च तुमशब्दे माधवः। सक० भ्वा० पर० सेट्। तोमति अतोमीत् तुतोम तुम्वः। तोमरः।

तुमुर न० तुमुल+अच् रः। तुमुले समरटीका।

तुमुल पुंन० यौ० तु-मुलच्। १परस्परसंघातेन सङ्कुले युद्धे २कलिङ्गे मेदि० ३व्याकुलयुद्धे न० त्रिका०। "बभूव युद्धं तुमुलं जयैषिणोः" रघुः ४सङ्कुलमात्रे त्रि०। "उभयोरपि पार्श्ववर्त्तिनां तुमुलेनार्त्तरवेण वेजिताः" रघुः

तुम्ब पुंस्त्री०तुम्बति रुचिं तुबि-अर्दने अच्। १अलाबूक्षे अमरः। २कटुतुम्बीफलायाम्, राजनि०। ३आमलक्यां, ४गवि च स्त्री। स्वार्थे क तत्रार्थे शब्दरत्ना०। स्त्रीगव्यां अलाब्वां स्त्री त्रिका०। टाप्।

तुम्बर न०तुम्बं तदाकारं राति-रा आदाने क। (तानपूरा) १वाद्यभेदे तुम्बरचक्रम्। २तुम्बुरुगन्धर्वे च।

तुम्बरचक्र न० नरपतिजयचर्यौक्ते चक्रभेदे चक्रशब्दे २८२४ पृ० दृश्यम्।

तुम्बरु पु० गन्धर्वभेदे। "सुप्रिया चातिबाहुश्च विख्यातौ च हाहाहूहूः। तुम्बरुरिति चत्वारः स्मृता गन्धर्वसत्तमाः" भा० आ० ६५ अ०।

तुम्ब(ब)वन न० देशभेदे स च देशः ह० सं० दक्षिणस्यासक्तः "अथ दक्षिणेन सङ्क्रम्यैकमेतुम्ब(ब)वनकार्मणेयक यास्योदधितापसाश्रमा ऋषिकाः" १४ अ०।

तुम्बि(म्बी) स्त्री तुबि-इन्। १अलाबूवां (लाउ) शब्दरत्ना० वा ङीप् तत्रार्थे अमरः। "तुम्बी गोमांसतुल्या स्यात्" इति तन्त्रवचनात्तद्भक्षणनिषेधः। स्वार्थे क। तुम्बिका तत्रार्थे कटुतुम्ब्यां राजनि०।

तुम्बिनी तुबि-इनि ङीप्। कटुतुम्ब्यां राजनि०।

तुम्बिपुष्प न० तुम्बेरिव पुष्पमस्याः। लताभेदे हारा० ह्रस्व०। अलाबूपुष्पे च।

तुम्बुक न० तुबि उक। अलाबूफले हेमच०।

तुम्बुर पु० विन्ध्यपर्वतस्थे जातिभेदे। "ये चान्ये विन्ध्यनिलयास्तु(ता)स्तारास्तुम्बुरादयः" हरिवं०५ अ०। [मेदि०।

तुम्बुरी स्त्री तुबि+बा०उर गौरा०ङीष्। १शस्यां २धन्याके च

तुम्बुरु पु० १गन्धर्वभेदे जटा०। २अर्हदुपासकभेदे हेम०। "गन्धर्वैः सहितः श्रीमान् प्रागायत च तुम्बुरुः" भा० आ० १२३अ०।२३अभेदे। "तुम्बुरुः सौरभः सौरोवनजः सानुजोऽम्बकः। तुम्बरु ग्रथितं स्निग्धं कटु पाकेऽपि तत् कटु। रूक्षोष्णं दीपनं तीक्ष्णं रुच्यं लघु विदाहि च। वातश्लेष्मार्शिकर्णोऽशिरोरुक्गुरुतानाशनम्। कुलत्थूवा रुचिश्वासप्लीहकण्ठाग्नि नाशयेत्" भावप्र०।

तुम्र त्रि०तुम-प्रेरणे आक्षेपने च रक्। १प्रेरके २हिंसके च "सत्राकृषं दाधृषिं तुम्रमिन्द्रम्" ऋ० ४।३७।८। "तुम्रं प्रेरकम्" भा० "आगत्या तुम्रो दमो मरुत्वान्" ऋ० ३।५१।१। तुम्रः आक्षेपनाय तुमिराक्षेपनार्थः" भा०।

तुर त्वरणे जुहो० पर० अक० सेट्। तुतोर्त्ति अतोरीत्। तुतोर। वैदिकोऽयम् धातुः। "अपाभिवेदूर्मयस्तुर्याचाः" ऋ०६।८५।३। ताच्छील्ये चानश्। अभ्यासस्यातोऽत्वं च "सक्षिणे तुरतस्तुरस्य" ऋ०६।१८।४। "कर्णा वा यन्तुरते" ते० ब्रा०२।२।१२।४। वेदे सर्वधात्वर्थः पदव्यत्ययश्च। अस्मादन्यत्रापि तुरयति। "तुरयन्तृ जिष्यः" ऋ०४२८।७।

तुर त्रि० तुर-क। वेगवति। "प्र तव्यसो नम उक्तिं तुरस्याहम्" ऋ० ५।४२।६ "नहि त्वा शूरो न तुरो न ह

णुर्न" क्र०६।२५।५ । घञर्थे भावे क वा ।२वेगे तुरगः ।

**तुरग** पुंस्त्री तुरेण वेगेन गच्छति गम–ड । घोटके अमरः स्त्रियां जातित्वात् ङीष् । "तुरगशताकुलस्य परमेकतुरङ्गजन्मनः" । "उच्चैश्चुत्र गन्तुं तुरगास्तदीषुः" माघः २चित्ते मेदिनिः। सम्बबोधे तुरां वेगं गच्छतीति वाक्यम् ।

**तुरगगन्धा** स्त्री तुरगस्येव गन्धोऽस्याः। अश्वगन्धायां राजनि० ६त० । अश्वस्यगन्धे पु० । तुरङ्गगन्धादयोऽप्यत्र रत्नमा० ।

**तुरगदानव** पु० तुरगाकारो दानवः मा०त० । केशिदानवे । "यस्मात्ते स हि दुष्टात्मा केशी तुरगदानवः" "हतं तुरगदैत्येन सर्वान् गोपान् जिघांसता" हरिवं० ८१अ० ।

**तुरगब्रह्मचर्य्य** न० तुरस्येव ब्रह्मचर्य्यम् । स्त्रिया अलाभे तत्त्यागरूपे व्रतभेदे तिका०।[संगीतदा० उक्ते तालभेदे ।

**तुरगलीलक** पु० "द्रुतं द्वन्द्वं विरामान्तं लघुस्तुरगलीलके"

**तुरगातु** त्रि० तुरेण गातुः गम–वेदे वा० डातु । १त्वरया गमनकारके ।२तूर्णगमने च "अनश्वये तुरगातु जीवमेजदध्वरम्" ऋ० १।१६४।२० । "तुरगातु खव्यापाराय गमनम्" भा० ।

**तुरगानन** पु०तुरगस्याननमिवाननमस्य । १किन्नरभेदे तुरङ्गवदने । देशभेदे स च देशः द्र० स० १४ अ० उत्तरस्यां दिक्स्थः । "उत्तरतः कैलासः" इत्युपक्रमे "किंपुरुषास्तुरगाननाश्चमुखाः" ।

**तुरगिन्** त्रि० तुरगो वाहनत्वेनास्त्यस्य इनि । अश्वारोहिणि मच० । तुरङ्गिन् प्रभृतयोऽप्यत्र "तुरङ्गिभिर्यत्ननिरङ्कुशैर्गाः" माघः ।

**तुरगी** स्त्री तुरगस्तद्वन्योऽस्यस्या अच् गौरा०ङीष् । १अश्वगन्धायाम् मेदि० । तुरग+जातौ ङीष् ।२तुरगजातिस्त्रियाञ्च ।

**तुरङ्ग** पुंस्त्री० तुरेण गच्छति गम–ड सुम् वा डित्व ।१घोटके स्त्रियां जातित्वात् ङीष् । २चित्ते न० शब्दरत्ना० । "नियोज्यतं क्षोमतुरङ्गरक्षणे" रघुः। तुरगशब्दे उदा० ।

**तुरङ्गक** पु० तुरङ्ग इव कायति कै–क । १क्षत्रियोपाधौ रत्नमाला० । स्वार्थे क ।२घोटके । [अश्विन्यां राजनि० ।

**तुरङ्गदियणी** स्त्री तुरङ्गोद्दियतेऽनया वा० क्यु–ङीष् ।

**तुरङ्गप्रिय** पु० ६त० । यवे राजनि० ।

**तुरङ्गम** पुंस्त्री०तुरं गच्छति गम–खच् सुम् । १घोटके अमरः स्त्रियां जातित्वात् ङीष् । "अवेहि मां प्रीतमते तुरङ्गमात्" रघुः ।"रसातलं संक्रमिते तुरङ्गमे" रघुः ।

**तुरङ्गवक्त्र** पु० तुरङ्गस्येव वक्त्रमस्य । अश्वाकारमुखे किन्नरे जटाधरः तुरङ्गवदनादयोऽप्यत्र अमरहेमचन्द्रौ ।

**तुरङ्गारि** पु० ६त० सेवनेऽश्वनाशके १करवीरे वृक्षे, जात्या तद्वृक्षेधिष्ठि २भक्षिते च रत्नमा० । [लतायाम् राजनि० ।

**तुरङ्गिका** स्त्री तुरङ्गः तदाकारोऽस्यस्याः ठन् । देवदाली-

**तुरङ्गी** स्त्री तुरङ्गस्तद्वन्योऽस्यस्याः अच् गौरा०ङीष् ।१अश्वगन्धायां रत्नमा० तुरङ्ग+जातौ ङीष् ।२घोटकजातिस्त्रियाञ्च । [ षी(स्त्री)तृ ।

**तुरण** त्वरायां कण्ड्वा० पर० अक० सेट् । तुरणति अतुर-

**तुरण** न० जु० तुर–वा० भावे क्यु । क्षिप्रगमने "हरेतस्तुरण्ये तुरण्युः" ऋ०१।१२१।५ । "तुरण्ये क्षिप्रगमने" भा० ।

**तुरण्य** पु०तुरण्य–कण्ड्वा०भावे यक् । त्वरायाम् ।"उपस्तुरण्यसत्" ऋ० ४।४०।२। "तुरण्यसद्त्वरया सीदतीति" भा० ।

**तुरण्यु** त्रि०कण्ड्वा०तुरण्य–उनु । त्वरायुक्ते ।"तस्थं गुक्रास स्तुरण्यवस्तुरण्यवः"ऋ०१।१३४।५।"तुरण्यवः त्वरायुक्ताः"भा० ।

**तुरम्** अव्य० अद० चु० तुर–वा० असु । त्वरायाम् । "तुरं यतीषु तुरयन्नृजिप्यः" ऋ० ४।३८।७ ।

**तुरस्** न० अद० चुरा० तुर–असुन् । त्वरायाम् । "आयस्तुरस्ये वे" १०।६६।८ ।

**तुरायण** न० तुर–क तस्यायनं "पूर्वपदात् संज्ञायाम्" पा० णत्वम् । १यज्ञभेदे स्त्रि०को० ।२अश्वके अमरः त्वरितस्य हि गमनमश्वस्यवद्भवतीति तस्य तथात्वम् । २सत्रभेदे "तुरायणं वैशाखशुक्लपञ्चम्याम्" "चैत्रस्य वा" कात्या० २४।८।१।२ । "तुरायणं सत्रनाम" कर्कः तद्विधानं तत्रैव उत्तरतो द्रष्टव्यम् । अत ऊर्द्धमिष्ट्रयनानि" आ० श्रौ० २।१४।१। उपक्रमे । "संवत्सरिकाणि" २स० "इष्ट्रयनानि संवत्सरेण संवत्सरैर्वा साध्यानि" नारा० तुरायणम् ४क्लू० तद्विहितं दक्षिणिरयनं "तुरायणं हि व्रतमध्वर्यवमक्रुधनोऽकरवं लिंगतोऽवदान्"भा० आनु०१०३ अ० । तुरायणं यज्ञभेदमावर्त्तयति ठञ् । तौरायणिक तद्यज्ञकारके ।

**तुरासाह** पु० तुरं त्वरितं साढ्यति अभिभवति चु० साहेः किप् पूर्वपददीर्घः । १इन्द्रे अमरः अस्य इलादौ सुपि इस्य ढत्वे णत्वम् । तुराषाट्–अजादौ तु न णत्वं तुरासाड्भिरित्यादि "तुरासाहं पुरोधाय धाम स्वायम्भुवं ययुः" कुमा० "कालेनारिवधात् प्रीतः तुराषाडिव शार्ङ्गिणम्"रघुः"तुराषाट् विश्वमूर्त्ते सुरार्च्यज ।"हरिवं० २५६ अ० । इन्द्रसुतौ ।

**तुरि(रो)** स्त्री तुर–इन् "इगुधात् कित्" उणा० किच्च वा ङीप्। तन्त्रवायस्य काष्ठादिनिर्मिते वयनसाधने (माकू) द्रव्ये "तङ्कटचातुरीतुरीति नैय०तुरीतन्तुसंयोगः जगदीशः २त्वरायुक्तमात्रे। "ऋचा स्तुतीव तुर्यै" ऋ०१०।१०६। "तुर्यै त्वरमाणायै संश्लथवत्यै जनतायै" भा०।

**तुरीय** त्रि० तूर्णमाप्नोति व्याप्नोति तूर्ण+आप–क पृषो०। तूर्णं व्यापके। "तुरा तुरा तुरीयोऽद्भुत इन्द्राग्नी पुष्टिवर्द्धनौ" यजु० २१।२०। तुरीयः तूर्णमाप्नोति तुरीयः" वेददी०। "तच्चतुरीयमद्भुतम्" १।१४२।१ "तुरीयं तूर्णं व्यापि" भा० सहितपुस्तके तुरीयमिति पाठः सन्धिदोषात् भाष्यव्याख्यादर्शनात् तुरीयपाठस्यैवोचितत्वात्। [चतुरीयात्।

**तुरीय** गतौ भ्वा०सक०सेट् गतिकर्म्मसु निघण्टुः। तुरीयति

**तुरीय** त्रि० तुरीय–अच् चतुर्णां पूरणः चतुर्+छ आदेलोपश्च। १गतियुक्ते २चतुर्णां पूरणे च। ३तारके। "तनस्तुरीयमघ पोषयित्नुः" ऋ०२।३।८। "तुरीयं तारकम्" भा०। "गुहा त्रीणि निहितानेङ्गयन्ति" "तुरीयं वाचो मनुष्या वदन्ति" ऋ०१।१६४।४५। अस्यार्थः भाष्ये ब्रह्मणा मतभेदेन दर्शितः किन्तु वैखरीरूपा वाक् चतुर्थीति निष्कृष्टार्थः तथा हि

"परा प्रथमजा मध्यमा वैखरीति चत्वारि। एकैव नादात्मिका वाक् मूलाधारादुदिता सती परेत्युच्यते। नादस्य च सूक्ष्मत्वेन दुर्निरूपत्वात् सैव हृदयगामिनी पश्यन्तीत्युच्यते योगिभिर्द्रष्टुं शक्यत्वात्। सैव बुद्धिं गता विवक्षां प्राप्ता मध्यमेत्युच्यते मध्ये हृदयाख्ये उदीयमानत्वात् मध्यमायाः। अथ यदा सैव पद्मे स्थिता तालोष्ठादिव्यापारेण बहिर्निर्गच्छति तदा वैखरीत्युच्यते एवं चत्वारि वाचः पदानि परिमितानि। मनीषिणो मनसः स्वामिनः स्वाधीनमनस्का ब्राह्मणा वाचोऽस्य शब्दब्रह्मणोऽधिगन्तारो योगिनः पदानि चत्वारि पदानि विदुः। जानन्ति। तेषु मध्ये त्रीणि परादीनि गुहानिहितानि हृदयान्तर्वर्त्तित्वात्। तुरीयं तु पदं वैखरीसंज्ञकं मनुष्याः सर्वे वदन्ति। सर्वाधारभूतेऽनुपहितचैतन्ये परब्रह्मणि "घनश्चनतदवच्छिन्नाकाशयोर्जलाशयजलतदुपहितप्रतिबिम्बाकाशयोर्यो आधारानुपहिताकाशयदनयोरज्ञानतदुपहितचैतन्ययोराधारभूतं यदनुपहितचैतन्यं तत् तुरीयमित्युच्यते" वेदान्तसा०। आधारत्वाच्चानुपहितत्वाच्च आकाशश्च स तथा तद्वदिति यावत्। यद्यप्याकाशस्य घनाश्रयत्वं जलाश्रयत्वं वा नास्ति तदनारम्भकत्वात् तथाप्याकाशमन्तरेण तयोः स्थित्यनुपपत्तेस्तदाधारत्ववचनमिति द्रष्टव्यम्। अस्य चैतन्यस्य तुरीयत्वं विश्वतैजसप्राज्ञापेक्षया द्रष्टव्यम्। "शिवमद्वैतं तुरीयं मन्यन्ते" वेदान्त सारधृता श्रुतिः

"तुरीयो यज्ञो यत्र हव्यमिति"। यजु०१७। ५७ तुरीयः चतुर्थः "आदौ यजुर्जपः ततोऽहोता ऋचां पठनम् ब्रह्मणोऽप्रतिरथजपः एवं च तुरीयोऽहोमः तथा च श्रुतिः "अध्वर्युः पुरस्ताद्यजूंषि जपति होता पश्चादृचोऽन्वाह ब्रह्मा दक्षिणतोऽप्रतिरथं जपत्येष एव तुरीयो यज्ञ" इति वेददी०। "तुरीयः ब्रह्मक्षत्रायाः क्षत्रियस्य वधे स्थितः" मनुः स्वार्थे क। तत्रार्हे। "भगिन्यश्च निजादंशात् दत्त्वांशन्तु तुरीयकम्" याज्ञ०।

**तुरीयवर्ण** पु० कर्म्म०। गूढे हला०।

**तुरुष्क** पु० तुर–उषिक् स्वार्थे क दस्तुरोरिति धत्वम्। १गन्धद्रव्यभेदे (शिलारस) अमरः।२म्लेच्छजातिभेदे मेदि० ३पारस्यभाषाभेदे च हेमच० ४श्रीवासदत्ते विश्वः।

**तुर्फरी** त्रि० तर्फ–हिंसायाम् बा० अरि। हन्तरि।

"स्फ्योव जर्भरी तुर्फरीतू नैतोशेव तुर्फरी पर्फरीका" ऋ० १०।१०६।६ "तर्फ तर्म्फ हिंसायाम्। अस्मात् जनस्य तुर्फरीतारावित्यस्य पृषोदरादित्वाडर्थविकारः। यद्वाऽस्माद्धातोरौणादिकोऽरीतुप्रत्ययः। उक्तं चास्य निः १२।६।"द्विविधा स्त्रियो भवति भर्त्री च हन्त्री च तथा द्विनौ चापि भर्त्तारौ जर्भरी भर्त्तारावित्यर्थस्तुफरीतू हन्तारावित्यादि। जर्भरिशब्दे ३०६२ पृ० दृश्यम्।

**तुर्फरीतु** त्रि० तर्फ–बा० अरीतु पृषो०। हन्तरि तुर्फरीशब्दे दृश्यम्।

**तुर्य** त्रि० चतुर+पूरणे यत् च भागस्य लोपः। चतुर्थे। "एक एवेश्वरस्तुर्य्यः भगवान् स्वाश्रयः परः" भाग०६।५।१२। "तुर्यशब्दस्य वा एकदेशिसमासः तुर्यं भिक्षायाः तुर्यभिक्षा पक्षे षष्ठीसमासः भिक्षातुर्यम्।

**तुर्यगोल** पु० शि०। "दक्षोत्तरं चक्रसमन्नि चापं कोदण्डखण्डं खलु तुर्यगोलम्" शि०उक्ते कालज्ञानार्थे यन्त्रभेदे

**तुर्यवाह** पु० तुर्यं चतुर्थं वर्षं वहति वह–क्विप्। चतुर्वर्षे पशौ। "तुर्यवाट् वयोऽनुष्टुप्छन्दः" यजु०१४।१८ "तुर्यवाट् तुर्यं चतुर्थं वर्षं वहतीति पशुः अनुष्टुप् छन्दो भूत्वोत्क्रान्तं तुर्यवाहं पशुं प्रजापतिर्वयसाऽयच्छत्। तुर्यवाहं वयसाप्रोदनुष्टुप्भूत्वा तुर्यवाह उच्छक्वरिति" शत० ब्रा० ८।२।४।१५ श्रुतेः" वेददी०।

तुर्व हिंसायां भ्वा० पर०सक०सेट्। तूर्वति अतूर्वीत्। तुतूर्वतुः "इत्थं यादिन्द्र तूर्वसि" ऋ० ८।६८।६। "तूर्वये सहस्रक्षेऽमश्विनोरवः" ऋ० ८।६।३२। तूर्वये। हिंसने" भा०।

तुर्वणि त्रि० तूर्वं वनुते वन् संभक्तौ इन् पृषो०। तूर्वसंभक्तरि "तुर्वणिरत्रा विश्वेव तुर्वणिः" ऋ०१।१३०।६। "तुर्वणिस्तूर्ववनिः क्षिप्रं संभक्ता तूर्वणिस्तूर्ववनिरिति निरुक्तम् (६।१४) भा०।

तुर्वयाण पु० ऋषभेदे। "त्वमाविथ नर्यं तुर्वयाणं यदुम्" ऋ० १।५४।६। "नर्यादीन् हि राज्ञः" भा०। "उत त्या तुर्वयाणयदू अस्नातारा शचीपतिः" ऋ० ४।३०।१७।

तुर्वशे अव्य० अन्तिके निकटे निघण्टुः।

तुर्वसु पु० ययातिनहुषपुत्रभेदे। "अन्वस्मात् प्रजां सर्वां ययातिरपराजितः। तस्य पुत्रा महेष्वासाः सर्वे समुदितागुणैः। देवयान्यां महाराज! धर्म्मिष्ठायाञ्च जज्ञिरे। देवयान्यामजायेतां यदुस्तुर्वसुरेव च। द्रुह्युश्चानुश्च पूरुश्च धर्म्मिष्ठायां प्रजज्ञिरे" भा०आ०७५ अ० तत्रैव ययातिशापकथा यथा। "तुर्वसो! प्रतिपद्यस्व पाप्मानं जरया सह। यौवनेन चरेयं वै विषयांस्तव पुत्रक!। पूर्णे वर्षसहस्रे तु पुनर्दास्यामि यौवनम्। स्वञ्चैव प्रतिपत्स्यामि पाप्मानं जरया सह। तुर्वसुरुवाच। न कामये जरां तात! कामभोगप्रणाशिनीम्। बलरूपान्तकरणीं बुद्धिप्राणप्रणाशिनीम्। ययातिरुवाच। यत्तं मे हृदयाज्जातो वयः स्वं न प्रयच्छसि। तस्मात् प्रजासमुच्छेदं तुर्वसो! तव यास्यति। सङ्कीर्णाचारधर्मेषु प्रतिलोमचरेषु च। पिशिताशिषु चान्त्येषु मूढ! राजा भविष्यसि। गुरुदारप्रसक्तेषु तिर्य्योनिगतेषु च। पशुधर्म्मिषु पापेषु म्लेच्छेषु त्वं भविष्यसि" ८४ अ०। [ऋ०१।३६।१८

तुर्वीति पु० राजर्षिभेदे। "इन्द्रद्रवं तुर्वीतिं दस्यवे सहः"।

तुल उन्माने वा चुरा० उभ० पक्षे भ्वा० पर० सक० सेट्। तोलयति ते तोलति अतुतुलत् त। "पतिष्यति चितौ भानुः पृथिवीं तोलविष्यते" भट्टिः। तुलयतीति तु तुलाशब्दात् णिच्। "अनः सारं धनुतुलयितुं नानिलः शक्नोति त्वाम्" "अनस्तोयं मधिमयभुवस्तुङ्गमभ्रंलिहाग्राः प्रासादास्त्वां तुलयितुमलं यत्र तैस्तैर्विशेषैः" मेघ०। "तुलयति ब्रज विलोचनतारकाः" माघः। "नक्षत्रिन्दैस्तुलितलक्षितशोभाः" रघुः।

उद्+उत्तुल्य तोलने। उत्तोलयति।

तुलभ पु० तुरेण वेगेन भाति भा-क रस्य लः। आयुधलोहसंघभेदे। ततः दामन्या० स्वार्थे क। तुलभीय तदर्थे।

तुलसारिणी स्त्री तुरेण वेगेन सरति सृ-णिनि ङीप्। दण्डे शब्दमा०।

तुलसी स्त्री तुलां सादृश्यं स्यति सो-क गौरा० ङीष् शकन्ध्वा०। स्वनामख्याते वृक्षभेदे। "यस्या देव्यास्तुला नास्ति विश्वेषु चाखिलेषु च। तुलसी तेन विख्याता" शब्दार्थचि० देवीभाग० उक्तनिरुक्तेरस्यास्तथात्वम्। "तुलसी कटुका तिक्ता हृद्योष्णा दाहपित्तकृत्। दीपनी कृमिकुष्ठारुक्पार्श्वरुक्कफवातजित्। शुक्ला कृष्णा च तुलसी गुणैस्तुल्या प्रकीर्त्तिता" भावप्र० तद्गुणा उक्ताः तुलस्यामाहात्म्यं यथा। "ब्रह्मोवाच। तुलस्याः श्रृणु माहात्म्यं पापघ्नं सर्वकामदम्। यत्पुरा विष्णुना प्रोक्तं तत्ते वक्ष्याम्यशेषतः। सम्प्राप्य कार्त्तिकं हरिं नियमेन जनार्दनः। पूजनीयो महाविष्णोः कोमलैस्तुलसीदलैः॥ दृष्टा स्पृष्टा तथा ध्याता कार्त्तिके नमिताऽर्चिता। रोपिता सेचिताऽनित्यं पापं हरति युगार्जितम्। अपरा तुलसी यैस्तु सेविता द्विजसत्तम!। युगकोटिसहस्राणि ते वसन्ति हरेर्गृहे। रोपिता तुलसी यावत् कुरुते मूलविस्तृतिम्। तावद्युगसहस्राणि तनोति सुकृतं हरिः। तुलसीदलपुष्पाणि योऽर्पयाद्धरये सुते!। कार्त्तिके सकलं पापं सोऽत्र जन्मार्जितं दहेत्। रोपिता तुलसी यावत् वर्द्धते वसुधातले। तावत्कल्पसहस्राणि विष्णुलोके महीयते। यत्फलं सर्वपुष्पेषु सर्वपत्रेषु यत्फलम्। तुलस्यास्तद्दलार्द्धेन प्राप्नुयात् पूजने हरेः। तुलसीगन्धमादाय यत्र गच्छति मारुतः। दिशोदश पुनात्याशु भूतग्रामांश्चतुर्विधान्। तुलसीकाननोद्भूता छाया यत्र भवेन्नृणाम्। तत्र श्राद्धं प्रदातव्यं पितृणां तृप्तिहेतवे। तुलसीबीजनिकरो यस्मिन् पतति वैष्णवे!। तत् स्थानं परमं पुण्यं पितृणां प्रीतिवर्द्धनम्। यस्मिन् गृहे द्विजश्रेष्ठ! तुलसीतत्समृत्तिका। तत्रैव नोपसर्पन्ति भूतले यमकिङ्कराः। तुलसीमृत्तिकालिप्तो यदि प्राणान् परित्यजेत्। यमेन नेक्षितुं शक्तो सक्षः पापशतैरपि। तुलसीमृत्तिकालिप्तं ललाटं यस्य दृश्यते। कृतं स्मृतिं नो तस्य कलिर्मुनिवरोत्तम!। यः कश्चित्तुलसीमूले कार्त्तिके केशवप्रियः। दीपं ददाति विप्रेन्द्र! स लभेद्वैष्णवं पदम्। तुलसीकाननस्यैव गृहे यस्यावतिष्ठते। तद्गृहं तीर्थभूतं हि नायान्ति यमकिङ्कराः।

दर्शनं नर्मदायास्तु गङ्गास्नानं तथैव च। तुलसीवनसंसर्गं समेतत्त्रयं स्मृतम्। रोपणात् पालनात् सेकादर्शनात् स्पर्शनात्नृणाम्। तुलसी दहते पापं वाङ्मनःकायसञ्चितम्। तुलसीमञ्जरीभिर्यः कुर्य्यादरिहरार्च्चनम्। न स गर्भेष्टकं याति मुक्तिभागी भवेन्नरः। पुष्करादीनि तीर्थानि गङ्गाद्याः सरितस्तथा। वासुदेवादयोदेवा वसन्ति तुलसीदले। तुलसीमञ्जरीयुक्तो यस्तु प्राणान् विमुञ्चति। यमोन वीक्षितं तस्य युक्तं पापशतैरपि" पाद्मोत्तरख०। "यत्रैकस्तुलसीवृक्षस्तिष्ठति द्विजसत्तम!। तत्रैव त्रिदशाः सर्वे ब्रह्मविष्णुशिवादयः। क्षेत्रेषु पत्रमध्येषु पत्राग्रेषु प्रजापतिः। पत्रदण्डे शिवस्तिष्ठेत् तुलस्याः सर्वदैव हि। लक्ष्मीः सरस्वती चैव गायत्री चण्डिका तथा। शची चान्या देवपत्न्यस्तत् पुष्पेषु वसन्ति वै। इन्द्रोऽग्निः शमनश्चैव नैर्ऋतो वरुणस्तथा। पवनश्च कुबेरश्च तच्छाखायां वसन्त्यमी। आदित्यादिग्रहाः सर्वे विश्वे देवाश्च सर्वदा। वसवो मनवश्चैव तथा देवर्षयोऽखिलाः। विद्याधराश्च गन्धर्वाः सिद्धाश्चाप्सरसस्तथा। तुलसीपत्रमाश्रित्य सर्वदा निवसन्ति वै। चिन्वन्ति लक्षजातानि तुलसीमूलजानि वै। तद्देहस्था ब्रह्महत्यां विनोति तत्क्षणाद्धरिः। पीडकाले द्विजश्रेष्ठ! सुगन्धैः शीतलैर्जलैः। तुलसीसेचनं कृत्वा नरो निर्वाणमाप्नुयात्। चन्द्रातपं वा कृत्वा वा तुलस्यै यस्तु यच्छति। विशेषतः निदाघेषु स मुक्तः सर्वपातकैः। वैशाखेऽक्षतधाराभिरर्च्चयेत्तुलसीं जनः। सेचयेत् सोऽश्वमेधस्य फलं प्राप्नोति नित्यशः। कदाचित्तुलसीं दृष्ट्वा सेचयेद् यो नरोत्तमः। तस्य वेश्मनि विप्रर्षे! लक्ष्मीर्भवति निश्चला। गोमयैस्तुलसीमूले यः कुर्य्यादुपलेपनम्। सम्मार्ज्जनञ्च कुरुते तस्य पुण्यफलं शृणु। रजांसि तस्य यावन्ति दूरीभूतानि जैमिने!। तावत्कल्पसहस्राणि मोदते ब्रह्मणा सह। यद्यन्यकर्म्म कुरुते मनुजः पृथिव्यां नारायणप्रियतमां तुलसीं विना च। तत्सर्वमेव विफलं भवति द्विजेन्द्र! पद्मेक्षणोऽपि न हि तुष्यति देवदेवः। यस्य स्यात्तुलसीपत्रं मुखे शिरसि कर्णयोः। मृत्युकाले द्विजश्रेष्ठ! तस्य स्वामी न भास्करिः" पाद्मे क्रियायोगसारः। "स स्नातः सर्वतीर्थेषु सर्वयज्ञेषु दीक्षितः तुलसीपत्रतोये च योऽभिषेकं समाचरेत्। गवामयुतदानेन यत्फलं लभते नरः। तुलसीपत्रदानेन तत्फलं लभते नरः। तुलसीतोयकणिकां मृत्युकाले च यो लभेत्। रत्नयानं समारुह्य वैकुण्ठं स प्रयाति च। विकीर्णं तुलसीपत्रं शुष्कं पर्य्युषितं सति!। श्राद्धे व्रते वा दाने वा प्रतिष्ठायां सुरार्च्चने। भुक्तं तोयपतितं यद्दत्तं विष्णवे सति!। शुद्धन्तु तुलसीपत्रं चालनादन्यकर्म्मणि" पार्वतीं प्रति शिववाक्यम्। तुलसीचयननिषेधकालो यथा। "पूर्णिमायाममायाञ्च द्वादश्यां रविसंक्रमे। तैलाभ्यङ्गे च स्नाते न मध्याह्ने निशि सन्ध्ययोः। क्षणोचेऽशुचिकाले च रात्रिवासान्विते ऽपि वा। तुलसीं ये च चिन्वन्ति ते छिन्दन्ति हरेः शिरः"। हरिभ०। तुलसीसर्जनेन मिथ्याप्रतिज्ञायां मिथ्याशपथे च दोषोक्तथा। "तुलसीं खदिरे कृत्वा स्वीकारं यो न रक्षति। स याति कालसूत्रञ्च यावच्चन्द्रदिवाकरौ। करोति मिथ्याशपथं तुलसीं यो हि मानवः। स याति कुम्भीपाकञ्च यावदिन्द्राश्चतुर्दश" ब्रह्मवैवर्त्ते प्रकृतिखण्डम्। तुलसीपत्रचयने मन्त्रो यथा। "मातस्तुलसि! गोविन्दहृदयानन्दकारिणि!। नारायणस्य पूजार्थं चिनोमि त्वां नमोऽस्तु ते। कुसुमैः पारिजातादैः सुगन्धैरपि केशवः। त्वया विना नैव हरिं चिनोमि त्वामतः शुभे!। तया विना महाभागे! सकलं कर्म निष्फलम्। अतस्तुलसि! देवि! त्वां चिनोमि वरदा भव। चयनोद्भवदुःखं यद्देवि! ते हृदि वर्त्तते। तत् क्षमस्व जगन्मातस्तुलसि! त्वां नमाम्यहम्। कृताञ्जलिरिमान् मन्त्रान् पठित्वा वैष्णवो जनः। करतालतयं दत्त्वा चिनुयात्तुलसीदलम्। शनैः शनैस्त्वाकारैश्चीयते तुलसीदलम्। यथा न कम्पते शाखा तुलस्याद्विजसत्तम!। पत्राणां चयने विप्र! भग्नशाखा यथा भवेत्। तथा हृदि व्यथा विष्णोर्दीयते तुलसीपतेः"। पाद्मे क्रियायोगसारः।

तुलसीकाष्ठमालामाहात्म्यं यथा। "तुलसीकाष्ठनिर्म्माणमालां धत्ते हरेर्हि यो नरः। पदेपदेऽश्वमेधानां लभते निश्चितं फलम्" ब्रह्मवैवर्त्ते प्रकृ०। "सात्वतैस्तुलसीकाष्ठमाला कृष्णस्य वल्लभा। धार्य्या नित्यं प्रयत्नेन त्वेतल्लक्षस्य लक्षणम्"। हरिभक्तस्य तुलसीकृष्णकाष्ठसमुद्भवा। चिह्नार्थमात्मनो माला पुरा लक्ष्मणेन दर्शिता" पाद्मोत्तरखण्डम् "काष्ठमालाधरं विप्रं यतिनं यानरोहिणम्। खट्टास्थां विधवां दृष्ट्वा सचेलं जलमाविशेत्" इति वचनस्य साकल्ये तुलसीकाष्ठेतरकाष्ठविषयत्वमिति वैष्णवाः। स्नार्त्तास्तु विप्रेतरपरत्वं पाद्मोत्तरखण्डवाक्यस्य वर्णयन्ति। तन्मूलञ्च "तुलसीपत्रजातेन

माल्येन भव भूषितः। विप्र! त्वं न च तत्काष्ठमालां गलगतां कुरु" इति वाक्यमालोच्य तथा व्यवस्थापयन्ति। अन्ये तु विष्णुदीक्षाविहीनविप्रस्य तत्काष्ठमालाधारणनिषेधः। विधिस्तु वैष्णवस्येति वर्णयन्ति। गणेशपूजने तुलसीनिषेधो यथा तुलसीं प्रति गणेशवाक्यम् "पुष्पाणां सारभूता त्वं भविष्यसि मनोरमे!। कलांशेन महाभागे! स्वयं नारायणप्रिया। प्रिया त्वं सर्वदेवानां कृष्णस्य च विशेषतः। पूजा विमुक्तिदा नृणां मम त्याज्या च सर्वदा" ब्रह्मवैवर्ते गणेशखण्डम्। "अतैर्नार्चयेद्विष्णुं न तुलसा विनायकम्। न दूर्वया यजेद्दुर्गां धुस्तूरेण न भास्करम्" राघवभट्टधृतम्।

तुलसीपत्रग्रहणविधिः वायुपुराणे। "अस्नात्वा तुलसीं छित्त्वा यः पूजां कुरुते नरः। सोऽपराधी भवेत् सद्यं तत् सर्वं निष्फलं भवेत्"। तद्यथा मन्त्रान्तरं स्कान्दे "तुलस्यमृतजन्मासि सदा त्वं केशवप्रिया। केशवार्थे चिनोमि त्वां वरदा भव शोभने"। "त्वदङ्गसम्भवैः पत्रैः पूजयामि यथा हरिम्। तथा कुरु पवित्राङ्गि! कलौ मलविनाशिनि"। गारुडे च। मोक्षैकहेतो! धरणीप्रशस्ते। विष्णोः समस्तस्य गुरोः प्रियेति। आराधनार्थं वरमञ्जरीकं लुनामि पत्रं तुलसि! क्षमस्व। इत्युक्त्वा तुलसीं नत्वा चित्वा दक्षिणपाणिना। पत्राग्रमेकमप्यस्येत् सत्पात्रे मञ्जरीरपि। तन्मात्रात्प्रभृत्य स्कान्दे। "मन्त्रेणानेन यः कुर्यात् स्पृहीत्वा तुलसीदलम्। पूजनं वासुदेवस्य लक्षकोटिफलं लभेत्"। किन्तु "शालग्रामशिलार्थं प्रत्यहं तुलसीचितौ। तुलसीं ये विचिन्वन्ति धन्यास्ते करपल्लवाः"। इति। संक्रान्त्यादौ निषिद्धेऽपि तुलसवचयः स्मृतौ। परं श्रीविष्णुभक्तैस्तु द्वादश्यामेव नेष्यते" हरिभ० तुलसवचयनिषेधकालः। विष्णुधर्मोत्तरे "नोच्चिन्द्यात् तुलसीं विप्रा द्वादश्यां वैष्णवः क्वचित्"। गारुडे "भानुवारं विना दूर्वां तुलसीं द्वादशीं विना। जीवितस्यापि नाशाय न विचिन्वीत धर्मवित्"। पाद्मे च श्रीकृष्णसत्यासंवादोद्यकार्त्तिकमाहात्म्ये "द्वादश्यां तुलसीपत्रं धात्रीपत्रञ्च कार्त्तिके। लुनाति स नरो गच्छेन्निरयानतिगर्हितान्"। अतएवोक्तम्। "देवार्थे तुलसीच्छेदो होमार्थे समिधामथा। इत्युक्त्वैव न दुष्यत्येव गवार्थे तु तृणस्य च"। "एवं कृत्वा महापूजामङ्गोपाङ्गादिकं प्रभोः। क्रमाद् यथा सम्प्रदायं तत्तत् स्थानेषु पूजयेत्"। हरिभक्तिविलासे ऊर्ध्वलासे। तुलसीविवाहप्रतिष्ठाविधिः "श्रीवशिष्ठ उवाच। विवाहं सम्प्रवक्ष्यामि तुलस्यास्तु यथाविधि। यथोक्तं पद्मरात्रे वै ब्रह्मणा भाषितं पुरा"। "आदावेव वने वाथ तुलसीं स्वप्नेऽपि वा। वर्णक्रमेण पूर्वेण ततो यजनमारभेत्। सौम्यायने प्रकर्त्तव्यं गुरुशुक्रोदये तथा। अथ वा कार्त्तिके मासि भीष्मपञ्चदिनेषु च। वैवाहिकेषु कृत्येषु पूर्णिमायां विशेषतः। मण्डपं कारयेत्तत्र कृष्णवेदी तथा पुनः। शालिकञ्च प्रकर्त्तव्यं मातृणां स्थापनं तथा। मातृश्राद्धादिकं सर्वं विवाहवत् समाचरेत्। ब्राह्मणांश्च शुचिः स्नातान् वेदवेदाङ्गपारगान्। ब्रह्मा चादेशकश्चैव चत्वारश्च तथर्त्विजः। वैष्णवेन विधानेन वर्द्धनीकलसं यजेत्। मण्डपं कारयेत्तत्र लक्ष्मीनारायणं शुभम्। यज्ञियञ्च पुरः कृत्वा मातृणां यजनं तथा। कृत्वा नान्दीमुखं श्राद्धं दैवज्ञं स्थापयेद्धरिम्। कृत्वारोप्य च तुलसीं लग्ने लग्नगते रवौ। वासःशतेन मन्त्रेण वस्त्रयुग्मेन वेष्टयेत्। यदा वध्नेति मन्त्रेण कङ्कणं पाणिपल्लवे। कोऽदादिति च मन्त्रेण पाणिग्राहो विधीयते। ततः कृष्णे समागत्य आचार्यः सहसा द्विजैः। आचार्यो वैदिकाकृष्णे जुहुयाच्च नवाहुतीः। विवाहकर्मवत् सर्वं वैष्णवं दैशिकोत्तमैः। कर्त्तव्यञ्च ततो होमोविशेषाद्विधिपूर्वकम्"। "यजमानः सपत्नीको ह्यन्ये ये गोत्रबान्धवाः। प्रदक्षिणाश्च कर्त्तव्याश्चत्वारो विष्णुना सह। तुलस्याः पाणिग्रहणे वैदिकायां विभावसौ। प्रातःकृत्यं जपेत् स्तुत्यं पावमानीं विशेषतः। तथैव शालिकाध्यायम्। नवसूक्तीं तथैव च। जोषसूक्तं पुनर्जप्त्वा तथा वैष्णवसंहिताम्। मङ्गलैर्मङ्गलानीर्यैर्नीराजनविधिं चरेत्। गायन्ति मङ्गलानार्यो माङ्गल्यं विधिमाचरेत्। दद्यात् पूर्णाहुतिं पश्चादभिषेकविधिं ततः। ब्रह्मणे दक्षिणां दद्यादाचार्यं परिधाप्य च। गां पटञ्च तथा शय्यामाचार्याय प्रदापयेत्। ऋत्विग्भ्यो दापयेद् वस्त्राण्येषां दद्याच्च दक्षिणाम्। एवं प्रतिष्ठिता देवी विष्णुना च समन्विता आजन्मोपार्जितं पापं दर्शनेन प्रणश्यति। रोपयेत्तुलसीं यस्तु सेचयेच्च प्रयत्नतः। प्रतिष्ठाप्य यथोक्तेन विष्णुना सह मानवः। स मोक्षं लभते जन्तुर्विष्णुलोकं तथा धनम्। प्राप्नोति विपुलान् भोगान् विष्णुना सह

भोदते" हरिभक्तिविलासे। "तुलसी ब्राह्मणस्पर्शे रुदा भवति सुन्दरी" तन्त्रसा०। [अण्। वर्ब्या°(वायुर)रत्नसा०

**तुलसीहेषा** स्त्री तुलसीं हेटि तुल्यगन्धत्वात् सर्हते हिष-
**तुला** स्त्री तुल-भिदा०अङ्। १खादिरे २माने च मेदि०। राशिचक्रस्य द्वादशधा विभक्तस्य ६समप्रमे राशौ स च २६° अंशात्मकराशिचक्रस्य १८१ अंशावधि २१० पर्य्यन्तः चित्रार्द्धस्वातिविशाखालिमपादत्रयात्मकः। अस्याधिष्ठाता तुलाधरः पुरुषः। अस्य योगतारादिकम् अश्लेषशब्दे उक्तरूपशब्दे च विशेष उक्तः। "तौलीना कचितस्तुलाधटधरः" ज्योतिषपद्धतिः। "पुमांवरश्चित्रसमोदयोमतः प्रत्यक् मरुत् स्त्रिम्बरवोऽस्य वन्यः। स्वल्पप्रजासङ्गमसूद उच्यस्तुला द्युवीर्यौ द्विपदः समानः" ज्योतिषपद्धत्युक्तस्वभावः। वादिप्रतिवादिनोर्लौकिकप्रमाणाभावे दिव्यपरीक्षया अर्थनिर्णये कर्त्तव्ये घटापरनामके ७परीक्षाभेदे। सा च परीक्षा दिव्यशब्दोक्तसामान्यविधिपूर्वकं सर्वं ज्ञात्वा कर्त्तव्या। तद्विधिश्च वीरमित्रोदये दर्शितो यथा

पितामहः "विशालासच्छितां शुभ्रां घटशालान्तु कारयेत्। यत्रस्थो नोपहन्येत अभिघातैर्बलवयसैः। कपाटद्वोजसंयुक्तां परिचारकरक्षिताम्। पानीयादि समायुक्तामग्न्यां कारयेन्नृपः" इति। बीजानि यवव्रीह्यादीनि। घटार्थानि काष्ठानि नारद आह "खादिरं कारयेत्तत्र निर्व्रणं शुष्कवर्जितम्। शिंशपन्दभावे वा सालं वा कोटरैर्विना। "अर्जुनन्तिन्दुकोसारन्तिणिसो रक्तचन्दनम्। एवंविधानि काष्ठानि घटार्थं परिकल्पयेत्। अर्जुनन्तिलकः शाकन्तिणिसो रक्तचन्दनम्" इति। माधवीये पाठः। शिंशपेति शिंशपाशब्दसम्बन्धि। "देविकाशिंशपेति" पाणिनिसूत्रादिकारस्याकारः। एवंविधानीत्यनेनाम्बुदुम्बरादेर्वृक्षस्य काष्ठस्य सङ्ग्रहः"। अतएव पितामहः "छित्त्वा तु यत्नियं काष्ठं यूपवन्मन्त्रपूर्वकम्। प्रणम्य लोकपालेभ्यस्तुला कार्य्या मनीषिभिः। मन्त्रः सौम्यो वानस्पत्यः छेदने अय एवेति"। यूपवन्मन्त्रपूर्वकमित्यनेन ओँ ओषधे त्रायस्वैनमित्यादिच्छेदनमन्त्रप्रयोगादिकमुक्तम्। वानस्पत्यः "वनस्पते शतवल्शोविरोहेति" मन्त्रः। छेदने कृते इति शेषः। वानस्पत्यच्छेदनानन्तरं प्रयोगे यूपवदित्यतिदेशाल्लिङ्गेऽपि पुनर्विधानम् औपदेशिकस्य सोमदैवत्येनेति देशिकस्य तस्य बाधनिवृत्त्यर्थम्। अत्र अय एव चेति चशब्दस्य वानस्पत्येत्यनेनान्वयात् तस्य च समुच्चयद्योतकत्वात्समुच्चय इति केचित् सौम्यवानस्पत्ययोरेकार्थत्वात्। "तुल्यार्थास्तु विकल्पेरन्निति वनेन" सामर्थ्येव व्रीहियवादिभ्यः" इत्यपरे। पितामहः "प्राङ्मुखो निखनः कार्य्यः शुचौ देशे घटः सदा। इन्द्रस्थाने सभायां वा धर्मस्थाने चतुष्पथे" इति। घटनिर्माणप्रकारस्तत्प्रमाणञ्चाह पितामहः, "चतुर्हस्ता तुला कार्य्या पादौ कार्य्यौ तथाविधौ। अन्तरन्तु तयोर्हस्तौ भवेदध्यर्द्धमेव चेति"। पादौ तुलाधारकाष्ठनामककाष्ठधारणाख्यौ तस्यौ तथाविधौ चतुर्हस्तौ। अन्तरं मध्यम्। अध्यर्द्धं सार्द्धहस्तद्वयम्। अत्रकाष्ठस्य प्रमाणमादस्तम्भमध्यप्रमाणाभिधानेनैव सूचितमिति न पृथगुपन्यस्तम्। अन्तरालप्रमाणपर्य्यालोचनया ततः किञ्चिदधिकमत्रकाष्ठं कर्त्तव्यम्। पादस्तम्भयोर्मस्तकप्रदेशादुपरि यथा वह्निर्न निःसरति तथा अत्रकाष्ठङ्कार्य्यमिति स्मृतिचन्द्रिकायाम्। अत्र निखातभागपरित्यागेन पादस्तम्भयोरुत्सेधहस्तत्वाभिधानं ज्ञेयम्। अतएव पितामहः "हस्तद्वयं निखेयन्तु प्रोक्तं सगडकयोर्द्वयोः। षड्हस्तन्तु तयोः प्रोक्तं प्रमाणं परिमाणतः" इति सगडकौ पादस्तम्भौ। हस्तप्रमाणञ्चन्द्रर्शितं कालिकापुराणे "यवानामष्टभिर्हस्तैरेकमङ्गुलमुच्यते। अदीर्घयोजितैर्हस्तैश्चतुर्विंशतिरङ्गुलैः"। इति स्मृत्यन्तरेऽपि "तिर्यग्यवोदराण्यष्टौ तज्ज्ञैर्या व्रीहयस्त्रयः। प्रमाणमङ्गुलस्योक्तं वितस्तिर्द्वादशाङ्गुलः"। शारदातिलके "चतुर्विंशत्यङ्गुलार्द्धं हस्तमन्त्रविदो विदुः। यवानामष्टभिः क्रूरं मानाङ्गुलमितीरितमिति"। हस्तो वितस्तिसहितयं चतुर्विंशत्यङ्गुलो हस्त इत्यर्थः। यवानां यवसङ्ख्यानामित्यर्थः। "यवानान्तण्डुलैरिति"शारणात्। तुलाया विशेषान्तरमाह पितामहः "चतुरस्रा तुला कार्य्या दृढा अच्छी तथैव च। कटकानि च देयानि त्रिषु स्थानेषु यत्नतः" इति। कटकानि लोहमयानि वक्ष्यमाणानि। त्रिषु स्थानेषु अन्ययोर्मध्ये। कटकसङ्ख्यं लोहकीलादीनामुपयुक्तानामुपलक्षणम्। नारदोऽपि "अच्छी घटतुला कार्य्या खादिरी तैन्दुकी तथा। चतुरस्रा त्रिभिः स्थानैर्घटकैर्घटकादिभिरिति"। घटो घटमध्यम्। कर्कटकौ अन्तौ। पादस्तम्भादीनां स्थूलता तु विशेषानभिधानात् यावति

स्थौल्ये दार्ढ्यं भवति तावत्येव कार्या। शिष्टाचारादिमेयो ज्ञेयः। पादसम्भावुदग्दक्षिणसंस्थानौ कृत्वा तुला प्राग्धारा कार्या। "पश्चिमे तोलयेत्कर्तृ न् ऋन्यक्षित् स्रक्तिकां शुभामिति" पितामहस्मरणात्। पूर्वपश्चिमसंस्थानौ कृत्वोदग्धारा वा कार्या। "धारयेदुत्तरे पार्श्वे पुरुषं दक्षिणे शिलामिति" नारदस्मरणात्। घटाङ्गत्वेन तोरणादिकं कार्यमित्याह पितामहः "तोरणे तु तथा कार्ये पार्श्वयोरुभयोरपि। घटादुत्तरे स्थाताश्चित्यन्द्रशिरकूलैः। अवलम्बौ तु कर्तव्यौ तोरणाभ्यामधोमुखौ। सूत्रमयौ सूत्रसम्बद्धौ घटमस्तकचुम्बिनाविति"। घटारोहणमाह नारदः "शिक्यद्वयं समासज्य घटकण्ठवोर्दृढम्। एकशिक्ये तु पुरुषमन्यत्र तोलयेच्छिलाम्"। "धारयेदुत्तरे पार्श्वे पुरुषन्दक्षिणे शिलाम्। घटकम्भरयेत्तस्मिन्घटकापांशुलोष्टकैरिति"। दृष्टकाभिर्मांसभिः पांशुभिर्लोष्टैर्वालुकैः। माषराशिभिरपि घटकम्भरयेत्। "माषराशिभवापिवेति" सूत्रान्तरवचनात्। पितामहोऽपि "शिक्यद्वयं समासज्य पार्श्वयोरुभयोरपि। प्रागग्रान् कल्पयेद्दर्भांस्तत्र विप्रः समाहितः। पश्चिमे तोलयेत्कर्तृन्यक्षिन्मृत्तिकां शुभाम्। दृष्टकाभग्नपाषाणकपालास्थिविवर्जितामिति"। अत्र दृष्टकापाषाणयोर्वर्ज्यत्वोक्तिः सप्तद्रव्यनिराकरणार्था नतु विकल्पनिराकरणार्था पूर्वोदाहृतनारदवचने तयोरपि विधानात्। "एतेन स्रक्तिकापाषाणादीनां समूह्य तोलनकर्तव्यमिति मतमपास्तम्। स्रक्तिकाशिलेष्टकादीनामेकार्थत्वात् "तुल्यार्थास्तु विकल्पेरन्निति" न्यायेन विकल्प इति मिताक्षरायाम्। विष्णुरपि "अत्रैकशिक्ये पुरुषमारोपयेत् द्वितीये प्रतिमानं शिलादीति"। समतानिरीक्षणार्थं राज्ञा तद्विदो नियोक्तव्याः। तथा च पितामहः "परीक्षका नियोक्तव्यास्तुलामानविशारदाः। वणिजो हेमकाराश्च कांस्यकारास्तथैवेति"। नियुक्ताश्च निरीक्षेरन्नित्याह नारदः। "सुवर्णकारा वणिजः कुशलाः कांस्यकारकाः। तान्तुलामन्वेक्षेरन् तुलाधारणकोविदाः इति"। निरीक्षणं प्रकारमाह पितामहः "कार्यः परीक्षकैरित्थमवलम्ब्य समो घटः। उदकञ्च प्रदातव्यं घटस्योपरि पण्डितैः। यस्मिन्न प्लवते तोयं स विज्ञेयः समो घट" इति। अवलम्बसमः तोरणयोर्लम्बमानौ यौ सूत्रौ ताववलम्बौ तयोः समः। नारदोऽपि "प्रथमारोहणे यावत् प्रमाणद्विगुणैः सह। तुलाशिरोभ्यान्तुल्यं तु तोरणन्यस्तलक्षणमिति"। तोलनानन्तरं कर्तव्यमितामह आह "तोलयित्वा नरं पूर्वं पश्चात्तमवतार्य तु। घटं तु कारयेच्छिद्रं पताकाध्वजशोभितम्"। तत आवाहयेद्देवान्विधिनानेन मन्त्रवित्। वादित्रतूर्यनिर्घोषैर्गन्धमाल्यानुलेपनैः। प्राङ्मुखः प्राञ्जलिर्भूत्वा प्राड्विवेकस्ततोवदेत्" इति। विवादानुरूपं प्रश्नमुच्चतीति प्राट् तद्विवेचयतीति विवेकः प्राट् चासौ विवेकश्च प्राड्विवेकः। ततोऽभियुक्तं तोलयित्वाऽवतार्य धर्मार्थाद्दनादारभ्याभियुक्तशिरसि पत्रबन्धनान्तं साधारणविधिं कुर्यात्। घटपञ्चाशद्धुन्यादिविशेषमारद आह "रक्तैर्गन्धैश्च माल्यैश्च दध्यक्षतादिभिः। अर्चयेत्तु घटं पूर्वं ततः शिष्टांस्तु पूजयेदिति"। शिष्टा नवशिष्टानिन्द्रादीन्। पत्रबन्धनानन्तरं मन्त्रयेत् प्राड्विवेक इत्याह पितामहः "घटमामन्त्रयेच्चैव विधिनानेन मन्त्रवित्"। विधिना मन्त्रेण मन्त्रवित्प्राड्विवेकः। मन्त्रश्च तेनैव दर्शितः" "त्वं घट! ब्रह्मणा सृष्टः परीक्षार्थं दुरात्मनाम्। धकाराद्धर्ममूर्त्तिस्त्वं सृष्टकारात् कृतिं नरम्। धृतो धारयसे यस्माद्घटस्तेनाभिधीयसे। त्वं वेत्सि सर्वभूतानां पापानि सुकृतानि च। त्वमेव देव! जानीषे न विदुर्यानि मानवाः। व्यवहाराभिशस्तोऽयं मानुषः शुद्धिमिच्छतीति"। शोध्यस्याभिमन्त्रणमाह याज्ञवल्क्यः "तुलाधारणविद्वद्भिरभियुक्तस्तुलाश्रितः। प्रतिमानसमीभूतो रेखां कृत्वावधारितः। त्वन्तुले! सत्यधामासि पुरा देवैर्विनिर्मिता। तत्सत्यं वद कल्याणि! संशयान्मां विमोचय। यदत्रास्मि पापकृदात्मा! स्तेनो मां त्वमधो नय। शुद्धश्चेदमयोर्द्ध्वं मां तुलासित्यभिमन्त्रयेदिति"। तुलाश्रितः तुलामारूढः। प्रतिमानसमीभूतः प्रतिमानेन सदृशेन समीकृतः। रेखां कृत्वावतारणे साम्यचिह्नं कृत्वा अभिमन्त्रणमेवावतारणानन्तरं कार्यम् अवतारित इति हृदयनाथस्तत्रः प्राड्विवेकः तुलाधारकं शपथैर्नियम्य शिरोगतपत्रकं पुनर्घटमारोपयेत्। अतएव नारदः "समयैः परिरक्षाय पुनरारोपयेच्छरम्। निर्यातं दृष्टिरक्षिते शिरस्यारोप्य पत्रकमिति"। समयैः शपथैः परिरक्षा नियम्य। ते च विष्णुना दर्शिताः। "ब्रह्मघ्नो ये स्मृता लोकाः ये लोकाः कूटसाक्षिणः। तुलाधारस्य ते लोकास्तुलान्धारयतो भवेति" पुनरारोहणकालेऽभि-

मन्त्रणमाह नारदः "त्वं वेत्सि सर्वभूतानां पापानि सुकृतानि च। त्वमेव देवि ! जानीषे न विदुर्यानि मानवाः। व्यवहाराभिशस्तोऽयं मानवस्तोल्यते त्वयि। तदेनं संशयारूढं धर्मतस्तातुमर्हसि। देवासुरमनुष्याणां सर्वे त्वमभिपिप्रिषे। सत्यसन्धोऽसि भगवन् ! शुभाशुभविभावने। आदित्यचन्द्रावनिलोऽनलश्च द्यौर्भूमिरापो हृदयं यमश्च। अहश्च रात्रिश्च उभे च सन्ध्ये धर्मश्च जानाति नरस्य वृत्तमिति"। मन्त्रोद्धारणानन्तरकर्त्तव्यं पितामह आह "ज्योतिर्विद्ब्राह्मणश्रेष्ठः कुर्यात्कालपरीक्षणम्। विनाद्याः पञ्च विज्ञेयाः परीक्षाकालकोविदैः। साक्षिणो ब्राह्मणाः श्रेष्ठाः यथादृष्टार्थवादिनः। ज्ञानिनः शुचयोऽलुब्धा नियोक्तव्या न्यपेक्षया तु। शंसन्ति साक्षिणः श्रेष्ठाः शुद्धाशुद्धौ तदा" इति।

कानि पुनर्जयपराजयचिह्नानीत्यपेक्षायामाह नारदः "तुलितो यदि वर्द्धेत विशुद्धः स्यान्न संशयः। समो वा क्षीयमानो वा न विशुद्धो भवेन्नरः" इति वर्द्धेत उपरि गच्छेत्। क्षीयमानः अधो गच्छेत्। यत्पुनरुक्तं पितामहेन "तुलितो यदि वर्द्धेत शुद्धो भवति धर्मतः। क्षीयमानो न शुद्धः स्यादेकेषान्तु समोऽशुचिः। अल्पपापः समो ज्ञेयो बहुपापस्तु क्षीयते" इति। अल्पत्वं व्यभिचारे समाजिङ्गनादिना" चौर्ये तद्देशगमनादिना तत्र एकेषामिति पृथगर्थं न तु स्वमते समस्य शुचित्वद्योतनार्थम् अल्पपापिनोऽप्यशुचित्वात्। तेन क्षीयमानसमयोर्न कश्चिद्भेदः। दण्डप्रायश्चित्ते पापविशेषस्तयोर्दोषानुसारित्वात्। यत्तु केचिदेकेषां तु समोऽशुचिरिति वचनम्। "अल्पपापः समो ज्ञेयः" इति वचनं साम्ये संशयपरमेवेत्युक्तत्वात्तद्विरुद्धकल्पनया व्याख्यानार्जवन्नैवेक्षणीयम्। यत्पुनरुक्तम्, बृहस्पतिना "घटेऽभियुक्तसुलितो क्षीणश्चेद्दानमाप्नुयात्। तदप्यस्तु पुनस्तोल्यो वर्द्धितो विजयी भवेदिति" अयमर्थः पुनर्दैवतावाहनाद्यनुसहितं सर्वं कर्म विधायोत्तोलनीय इति समक्षाशुचित्वनिश्चयो न प्रथमतोलनपर्य्याये कार्य्यः। किन्तु पुनस्तोल्यमानस्य समतैव यदि भवति तदा कथञ्चिदवधारणीयेत्यर्थः इति स्मृतिचन्द्रिकायाम्। यत्तु केश्चित्तस्मिन्नेव प्रयोगे तोलनभङ्गं तन्मन्दं प्रधानाङ्गत्वाद्भङ्गात्तिरिति न्यायेन तोलनस्य फलसम्बन्धेन प्रधानत्वात् तदाङ्गौ देवतावाहनाद्यङ्गानामप्याङ्गत्वेरेवोचितत्वात्। शिक्यादिच्छेदेऽपि पुनः समीकृत्य तोलनीय इत्याह कात्यायनः "शिक्यच्छेदे तुलाभङ्गे तथा चापि गुणस्य वा। शुद्धेस्तु संशये चैनं परीक्षेत पुनर्नरमिति" शुद्धिसंशयकारीण्याह नारदः "तुलाशिरोभ्यासदृभ्रान्तं विचलं न्यस्तलक्षणम्। यदा वायुप्रयुक्तं वा तदा नैकतरं वदेत्" इति। अयमर्थः। यदा तुलान्तौ तिर्यक्चलितौ यदा च समतासाधनार्थन्यस्तं चिह्नमपैति यदा च वायुना प्रेरिता तुला ऊर्द्धमधश्च कम्पते तदा जयं पराजयं च न वदेदिति। व्यासोऽपि "कक्षच्छेदे तुलाभङ्गे धटकर्कटयोस्तथा। रज्ज्वृक्षेदेऽक्षभङ्गे वा दद्याच्छुद्धिं पुनर्नरः" इति। कक्षं शिक्यतन्त्रं कर्कटौ तुलोपान्तस्थौ शिक्याधारावीषद्वक्रौ कर्कटशब्दसन्निभौ लोहकीलकौ। अक्षः पादसम्भवोऽपरिनिहितस्तुलाधारयष्टिरिति मिताक्षरा। दार्ढ्यप्रयोजकः कीलक इति कृष्णायुधः। यत्तु बृहस्पतिवचनम् "कक्षच्छेदे तुलाभङ्गे धटकर्कटयोस्तथा। रज्ज्वृक्षेदेऽक्षभङ्गे च तथैवाशुद्धिमाप्नुयादिति" तदाऽऽकस्मिककक्षच्छेदादिविषयम्। कात्यायनवचनन्तु दृश्यमानकारणकशिक्यच्छेदादिविषयमिति विज्ञानेश्वराचार्य्यादयः" वीरमि०। तुलापुरुषाङ्गतुला तु हेमाद्रौ दा० खण्डे दृश्या। मत्कृत कृततुलादानादिपद्धतौ च विस्तरेण दृश्या।

टतोलने मिता०। "तुलाः स्त्रियां पलशतं भारः स्याद्विंशतिस्तुला दशभरोन्मेयः पलशतमानं तुला। तत्र वाक्ये "तुलां यदा रोहति दन्तवाससा," कुमा० "कामवानसमस्थया तुलाम्" रघुः। तुलोपमाशब्दयोगे षष्ठ्येव साधु न तु तृतीया "तुलोपमाभ्यां" पा० तृतीयाविधाने तयोः पर्य्युदासात् तृतीयाप्रयोगस्तु सदृशार्थशब्दाध्याहारेण तद्योगे इति भट्टि०। तुलाराशौ। "कन्यार्के च तुलार्के च पितरो श्राद्धमिच्छन्ते" स्मृतिः "तुलायां लोलया सह" ति०त०। "सह भक्षस्तुलया" ज्यो०त०। तोलनदण्डात्मके माने "अथ स दक्षिणादूरोरुत्थ स्वमांसपेशीं तुलया धारयन् गुरुतर एव कपोत आसीत्" भा०प०१८६ अ०। "तुलामानं प्रतीमानं सर्वत्र स्यात् सुलक्षितम्। षट्सु षट्सु च मासेषु पुनरेव परीक्षयेत्" मनुः "तुलामानं सुवर्णादीनां परिच्छेदार्थं यत् क्रियते प्रतीमानं प्रस्थद्रोणादि तत्सर्वं खनिरूपितं यथा स्यात् षट्सु षट्सु मासेषु गतेषु पुनस्तत्सर्वं सभ्यपुरुषैर्नृपतिः परीक्षयेत्" कुल्लू०। "आषाढ्यां तुलया बीजतोलने भाविशस्यहानिद्विज्ञापनम् हे० स० २६ अ० उक्तं तत्र अधिवासनाङ्गतुलानिर्माणप्रकारस्तत्रैवोक्तो यथा

"आषाढ्यां समतुलिताधिवासितानाम् अन्ये दुर्वदधिकतासुपैति बीजम् । तद्दुद्विर्भवति न जायते यदूनं मन्त्रोऽस्मिन् भवति तुलाभिमन्त्रणाय । स्तोतव्या मन्त्रयोगेन सत्या देवी सरस्वती । दर्शयिष्यसि यत्सत्यं सत्ये सत्यव्रता ह्यसि । येन सत्येन चन्द्रार्कौ यथा ज्योतिर्गणास्तथा । उत्तिष्ठन्तीह पूर्वेण पश्चादस्तं व्रजन्ति च । यत्सत्यं सर्ववेदेषु यत्सत्यं ब्रह्मवादिषु । यत्सत्यं त्रिषु लोकेषु तत्सत्यमिह दृश्यताम् । ब्रह्मणो दुहिता चासि त्वमादित्येति कीर्तिता । काश्यपी गोत्रतश्चैव नामतो विश्रुता तुला । क्षौमं चतुःस्तम्भकसन्निबद्धं षड्हस्तं शिक्यकस्तम्भकाः । स्तम्भप्रमाणं च दशाङ्गुलानि षड्वेव कक्षोभयशिक्यमध्ये । याम्ये शिक्ये काञ्चनं सन्निवेश्यं श्रेष्ठद्रव्याण्युत्तरेऽन्यानि चैवम् । तोयैः कौम्यैः स्नन्दिभिः सारसैश्च हृष्टिहीना मध्यमा चोत्तमा च । दन्तैर्नागा गोहयाद्याश्च लोम्ना छेम्ना भूपाः सिक्थकेन द्विजाद्याः। तद्वद्धेया वर्षमाया दिशश्च श्रेष्ठद्रव्याण्यात्मरूपस्थितानि । हैमी प्रधाना रजतेन मध्या तयोरलाभे खदिरेण कार्या । विद्वः पुमान् येन धरेण सा वा तुला प्रमाणेन भवेद्विनिष्ठाः । हीनस्य नाशोऽभ्यधिकस्य वृद्धिस्तुल्येन तुल्यं तुलितं तुलायाम् । एतत्तुलाकोशरहस्यसूक्तं प्राज्ञेयशोऽपि नरो विदध्यात्" ।

**तुलाकूट** न॰ ६त॰। तुलामानस्य कूटे १प्रकृतमानापेक्षया न्यूनतापादने । तुलायां कूटं यस्य । २तत्कारिणि पुरुषे च "मानकूटं तुलाकूटं कण्टमोष्ठं निपीड़य" काशी॰८अ॰ स्वकिङ्करं प्रति यमवाक्यम् ।

**तुलाकोटि(टी)** स्त्री तुलया तुलां वा कोटयति कुट–परितापे-इन् वा ङीप् । नूपुरे, "तुलाकोटिकाथैः कुसुमशरसुज्जागरयति" उद्भटः । "स्खलत्तुलाकोटिनिनादकोमलः" माघः ।

**तुलाकोश** पु॰तुला कोश इव। तुलायां भाविशस्त्रास्त्रनिरूपणार्थतुलारूपे मानदण्डभेदे ह॰स॰वाक्यं तुलाशब्दे दृश्यम् । २तुलया परीक्षणे च मिता॰ ।

**तुलादान** न॰ तुलया स्वदेहमानेन दानम् । तुलापुरुषसंज्ञके महादाने मत्स्यतत्तुलादानादिपद्धतौ तत्प्रयोगो दृश्यः ।

**तुलाधट** पु॰तुलायै तोलनाय धटः । तुलाधारदण्डे त्रिका॰

**तुलाधर** त्रि॰तुलाया मानदण्डस्य धरः ष॰-अच् ।१वाणिजके, २तुलाराशौ, ३तुलादण्डधारके त्रि॰ मेदि॰ ।

**तुलापुरुष** पु॰ षोड़शसु महादानेषु आद्ये महादाने तत्प्रकारः मत्स्यपु॰२७३अ॰उक्तो यथा "अथातः सम्प्रवक्ष्यामि महादानानुकीर्तनम्" इत्युपक्रमे । "आद्यन्तु सर्वदानानां तुलापुरुषसंज्ञकम्" महादानानि विभज्य उक्तं यथा "मत्स्य उवाच । यानि नोक्तानि गुह्यानि महादानानि षोड़श । तानि ते कथयिष्यामि यथावदनुपूर्वशः । तुलापुरुषदानोऽयं येषामादौ विधीयते । अयने विषुवे पुण्ये व्यतीपाते दिनक्षये । युगादिषूपरागेषु तथा मन्वन्तरादिषु । षडशीतौ वैधृतिदिने चतुर्दश्यष्टमीषु च । सितपञ्चदशीपर्वद्वादशीष्वष्टकासु च । यज्ञोत्सववियाहेषु दुःस्वप्नादद्भुतदर्शने । द्रव्यब्राह्मण्यलाभे वा श्रद्धा वा यत्र जायते । तीर्थे वायतने वापि तड़ागे रुचिरे तथा । महादानानि देयानि संसारभयभीरुणा । अनित्यं जीवितं यस्मात् वसु चातीव चञ्चलम् । केशेष्वेव गृहीतः सन् मृत्युना धर्ममाचरेत् । पुण्यां तिथिमथासाद्य कृत्वा ब्राह्मणवाचनम् । षोड़शारत्निमात्रन्तु दण्डं द्वादश वा करान् । मण्डपं कारयेद्विद्वान् चतुर्भद्रासनं बुधः । सप्तहस्ता भवेद्वेदी मध्ये पञ्चकरा तथा । तन्मध्ये तोरणं कुर्यात् सारदारुमयं बुधः । कुर्यात् कुण्डानि चत्वारि चतुर्दिक्षु विचक्षणः । समेखलायोनियुतानि कुर्यात् सम्पूर्णकुम्भानि महासनानि । घृताक्तपात्रद्वयसंयुतानि सवस्त्रपात्राणि सुविष्टराणि । हस्तप्रमाणानि तिलाज्यधूपपुष्पोपहाराणि सुशोभनानि । पूर्वोत्तरे हस्तमितान्य वेदी यज्ञादिदेवेश्वरपूजनाय । अलार्चनं ब्रह्मशिवाच्युतानां तत्रैव कार्यं फलमाल्यवस्त्रैः । लोकेशवर्णाः परितः पताकासध्ये ध्वजः किङ्किणिकायुतः स्यात् । द्वारेषु कार्याणि च तोरणानि चत्वार्यपि क्षीरवनस्पतीनाम् । द्वारेषु कुम्भद्वयमत्र कार्यं सगन्धचूर्णाम्बररत्नयुक्तम् । वेद्यां चन्दनदेवदारुश्रीपर्णिबिल्वप्रियकाञ्जनोत्थम् । स्तम्भद्वयं हस्तयुगावसातं कृत्वा दृढं पञ्चकरोच्छ्रितञ्च । तदन्तरं हस्तचतुष्टयं स्यादथोत्तराङ्गञ्च तदङ्गमेव । समानजातिञ्च तुलावलम्ब्या हैमेन मध्ये पुरुषेण युक्ता । दैर्घ्येण सा हस्तचतुष्टयं स्यात् पृथुत्वमस्यास्तु दशाङ्गुलानि । सुवर्णपट्टाभरणा तु कार्या सा लोहपाशद्वयषट्कृताभिः । युता सुवर्णेन तु रत्नमालाविभूषिता माल्यविलेपनाढ्या । चक्रं त्रिशेद्वारिजगर्भयुक्तं नानारजोभिर्भुवि पुष्पकीर्णम् । वितानकञ्चोपरि पञ्चवर्णं संस्थापयेत् पुष्पफलोपशोभम् । ऋत्विजो वेदविदश्च कार्याः सुरूपवे-

शान्वयशोभयुक्ताः। विधानदक्षाः पटवोऽनुकूला ये चार्य देशप्रभवा द्विजेन्द्राः। गुरुश्च वेदान्तविदार्यवंशसम्भवः शीलकलाभिरूपः। पुराणशास्त्राभिरतोऽतिदक्षः प्रसन्नगम्भीरसरस्वतीकः। सिताम्बरः कुण्डलहेमसूत्र केयूरकण्ठाभरणाभिरामः। पूर्वेण ऋग्वेदविदावयास्तां यजुर्विदौ दक्षिणतश्च शस्तौ। स्याच्यौ द्विजौ सामविदौ तु पश्चादाथर्वणाश्चोत्तरतस्तु कार्यौ। विनायकादित्यलोकपालवस्वष्टकादित्यमरुद्गणानाम्। ब्रह्माच्युतेशार्कवनस्पतीनां क्षमन्त्रतोऽहोमचतुष्टयं स्यात्। जप्यानि सूक्तानि तथैव चैषामनुक्रमेणापि यथास्वरूपम्। होमावसाने कृतपूर्णनादो गुरुर्घटीत्वा बलिपुष्पधूपम्। द्यावाहवेद्धोकपतीन् क्रमेण मन्त्रैरमीभिर्यजमानयुक्तः। एह्येहि सर्वामरसिद्धसाध्यैरभिष्टुतोवज्रधराऽमरेश!। संवोह्यमानोऽप्सरसाङ्गणेन रक्षाध्वरस्थो भगवन्नमस्ते (इन्द्रस्य)। एह्येहि सर्वामरहव्यवाह! सनिग्रहैरभितोऽभिजुष्ट!। तेजस्विना लोकगणेन सार्द्धं ममाध्वरं रक्ष कवे! नमस्ते" (अग्नेः)। एह्येहि वैवस्वत! धर्मराज! सर्वामरैरर्चितदिव्यमूर्ते!। शुभाशुभानन्दशुचामधीश। शिवाय नः पाहि मखं नमस्ते" (यमस्य)। एह्येहि रक्षोगणनायकस्त्वं सर्वैस्तु वेतालपिशाचसङ्घैः। ममाध्वरं पाहि शुभाधिनाथ! लोकेश्वरस्त्वं भगवन्नमस्ते (नैर्ऋतस्य)। एह्येहि वारीगवरारिधीनाङ्गणेन पर्जन्यमहाप्सरोभिः। विद्याधरेन्द्रामरगीयमान! पाहि त्वमस्मान् भगवन्नमस्ते (वरुणस्य)। एह्येहि यत्ते मम रक्षणाय मृगाधिरूढः सह सिद्धसङ्घैः। प्राणाधिपः कालकवेः सहायः स्वष्टाथ पूजां भगवन्नमस्ते (वायोः)। एह्येहि यक्षेश्वर! यक्षरक्षां विधत्स्व नक्षत्रगणेन सार्द्धम्। सर्वौषधीभिः पितृभिः सहैव स्वष्टाथ पूजां भगवन्नमस्ते (सोमस्य)। एह्येहि विश्वेश्वर! नक्षिणूल कपालखट्वाङ्गधरेण सार्द्धम्। लोकेश! यक्षेश्वर! यक्षसिद्धैः स्वष्टाथ पूजां भगवन्नमस्ते (ईशस्य)। एह्येहि पातालधराधरेन्द्र! नागाङ्गनाकिन्नरगीयमान!। यक्षोरगेन्द्रामरलोकसङ्घैरनन्त! रक्षाध्वरमस्मदीयम्" (अनन्तस्य)। एह्येहि विश्वाधिपते! सुरेन्द्र लोकेन सार्द्धं पितृदेवताभिः। सर्वस्य धातास्मितप्रभाव! विघ्नाध्वरस्थो भगवन्नमस्ते (ब्रह्मणः)। त्रैलोक्ये यानिभूतानि स्थावराणि चराणि च। ब्रह्मविष्णुशिवैः सार्द्धं रक्षां कुर्वन्तु तानि मे। देवदानवगन्धर्वा यक्षराक्षसपन्नगाः। ऋषयो मनवोगावो देवमातर एव च। सर्वे ममाध्वरे रक्षां प्रकुर्वन्तु सदान्विताः। रत्नावाप्तं सुरान् दद्याद्ऋत्विग्भ्यो हेममूषणम्। कुण्डलानि च हैमानि स्रक्त्राणि कटकानि च। अङ्गुलीयपवित्राणि वासांसि वयनानि च। द्विगुणं गुरवे दद्याद्भूषणाच्छादनानि च। जप्येषु शान्तिकाध्यायं जापकाः सर्वतोदिशम्। तत्तोषितास्तु ते सर्वे कृत्वैवमधिवासनम्। आदावन्ते च मध्ये च कुर्याद्ब्राह्मणवाचनम्। ततो मङ्गलशब्देन स्थापितो वेदपुङ्गवैः। त्रिःप्रदक्षिणमावर्त्य स्वष्टोत्तकुसुमाञ्जलिः। शुक्लमाल्याम्बरोभूत्वा तां तुलामभिमन्त्रयेत्। नमस्ते सर्वदेवानां शक्तिस्त्वं सत्यमाश्रिता। साक्षिभूता जगद्धात्री निर्मिता विश्वयोनिना। एकतः सर्वसत्यानि तथान्यतशतानि च। धर्माधर्मकृतां मध्ये स्थापितासि जगद्धिते!। त्वं तुले! सर्वभूतानां प्रमाणमिह कीर्तिता। मां तोलयन्ती संसाराद्दुरन्त नमोऽस्तु ते। योऽसौ तत्त्वाधिपोदेवः पुरुषः पञ्चविंशकः। स एकोऽधिष्ठितो देवि! त्वयि तस्मान्नमोनमः। नमोनमस्ते गोविन्द! तुलापुरुषसंज्ञक!। त्वं हरे! तारयस्वास्मात्कृतसंसारकर्दमात्। पुण्यकालं समाद्याद्य कृत्वैवमधिवासनम्। पुनः प्रदक्षिणं कृत्वा तुलामारोहयेद्बुधः। सकङ्कणचर्मकवचः सर्वाभरणभूषितः। धर्मराजमथादाय हैमं सूत्रेण संयुतम्। कराभ्यां बद्धमुष्टिभ्यामास्ते पश्यन् हरेर्मुखम्। ततोऽपरे तुलाभागे न्यसेद्बुद्धिमपङ्कजवाः। समादभ्यधिकं यावत् काञ्चनं चातिनिर्मलम्। पुष्टिकामस्तु कुर्वीत भूमिसंस्थं नरेश्वरः। क्षणमात्रं ततः स्थित्वा पुनरेवमुदीरयेत्। नमस्ते सर्वभूतानां शक्तिभूते! सनातनि!। पितामहेन देवि! त्वं निर्मिता परमेष्ठिना। त्वया धृतं जगत्सर्वं सकस्थावरजङ्गमम्। सर्वभूतात्मभूतस्थे! नमस्ते विश्वधारिणि!। ततोऽवतीर्य गुरवे पूर्वमर्द्धं निवेदयेत्। ऋत्विग्भ्योऽपरमर्द्धन्तु दद्यादुदकपूर्वकम्। गुरवे यानरत्नानि ऋत्विग्भ्यश्च निवेदयेत्। प्राप्य तेषामनुज्ञां तु तथान्येभ्योऽपि दापयेत्। दीनानाथविशिष्टादीन् पूजयेद्ब्राह्मणैः सह। न चिरं धारयेद्गेहे सुवर्णं रोगिणं बुधः। तिष्ठद्धयावहं यस्माच्छोकव्याधिकरं स्मृतम्। शीघ्रं परस्वीकरणाच्छ्रेयः प्राप्नोति मानवः। अनेन विधिना यस्तु तुलापुरुषमाचरेत्। प्रतिलोकाधिपस्थाने प्रतिमन्वन्तरं वसेत्। विमानेनार्कवर्णेन किङ्किणीजाल-

मानिना । पूज्यमानोऽप्सरोभिश्च ततो विष्णुपुरं व्रजेत् । कल्पकोटिशतं यावत्तस्मिन् लोके महीयते । कर्म्मक्षयादिह पुनर्भुवि राजराजो भूपालमौलिमणिरञ्जितपादपीठः । श्रद्धान्वितो भवति यज्ञसहस्रयाजी दीप्रप्रतापलितसर्वमहीपलोकः । यो दीयमानमपि वस्त्रति भक्तियुक्तः कालान्तरे स्मरति वाचयतीह लोके । यो वा शृणोति पठतीन्द्रसमानरूपः प्राप्नोति धाम सुरसुन्दरदेवजुष्टम् । अन्यविधानं हेमा० दा० दृश्यम् एतत् प्रयोगस्तु मत्कृततुलादानादिपद्धतौ दृश्यः ।

२व्रतभेदे । तच्च व्रतं पञ्चदशदिनसाध्यमेकविंशतिदिनसाध्यञ्च यथा ।

"पिन्याकाचामतक्रोदकसक्तूनामुषवासान्तरितोऽभ्यवहारासुलापुरुषः" । विष्णु० स० । "पिन्याकाचामतक्रान्युसक्तूनां प्रतिवासरम् । एकरात्रोपवासश्च तच्छ्रः सौम्योऽयमुच्यते" इत्युपक्रमे "इयं त्रिरात्रमभ्यासादेकैकस्य यथाविधि । तुलापुरुष इत्येष त्रयोदशदशाहिकः" । एषां पिन्याकादीनां पञ्चानां क्रमेणैकैकस्य त्रिरात्राभ्यासेन पञ्चदशाहव्यापी तुलापुरुषाख्यः श्रेष्ठो वेदितव्यः । अत्र पञ्चदशाहिकत्वविधानादुपवासस्य निवृत्तिः । क्रमेण त्वेकविंशतिरात्रिकस्तुलापुरुष उक्तः "आचामस्य पिन्याकं तक्रोदकसक्तुकान् । त्रयहं त्रयहमश्नानो वायुभक्षस्त्रयहत्रयम् । एकविंशतिरात्रन्तु तुलापुरुष उच्यते इति" ।

तुलाप्रय(या)ह पु०प्र+यह वा अच् पक्षे कप् इत्व० ।तुलास्तम्भे त्रि० कौ० । [ल्युट् । ।तुलादण्डे शब्दार्थचि० ।

तुलामान न०तुलार्थं तोलनार्थं मानं मीयतेऽनेन मा-करणे

तुलायष्टि स्त्री ६त० । ।तुलादण्डे । "श्लोकेनोद्धरतिमायाति श्लोकेनायात्यधोगतिम् । अहो सुसदृशी चेष्टा तुलायष्टेः खलस्य च" पञ्चत० ।

तुलावीज न० तुलायाः तोलनस्य बीजं मूलम् । ।गुञ्जायाम् तदारभ्यैव हि मानं शास्त्रे दर्शितं यथा "दशार्द्धगुञ्जं प्रवदन्ति माषमिति" लीला० [दशन्थितस्तत्र प्रथमे अमरः।

तुलासूत्र न० तुलार्थं तोलनार्थं सूत्रम् । तोलनार्थं तुला-

तुलि(ली) स्त्री तुरि(री)+रच् ङीः । तुर्या शब्दरत्ना० ।

तुलिका स्त्री तुल-बा० कन् । खड्गनिकायां त्रिका० ।

तुलित त्रि० तुला+तत्करोति णिच्-कर्मणि क्त । ।परिमिते "वेऽपोन्द्रवाणितुलितायुवलूनपक्षाः" माघः । २सदृशीकृते

तु(तू)लिनी स्त्री तूलं विद्यते फेनोऽस्या इनि ङीप् वा पृषो० ह्रस्वः । ।शाल्मलिवृक्षे रत्नमाला ।

तु(तू)लिफला स्त्री तुलि तूलयुक्तं फलमस्याः वा पृषो० । ।शाल्मलीवृक्षे रत्नमाला ।

तुल्य त्रि० तुलया सम्मितं यत् । ।सदृशे अमरः । "सकामां दूष्यंस्तुल्यो न वधं प्राप्नुयान्नरः" । "सकामां दूष्यं स्तुल्योनाङ्गुलिच्छेदमाप्नुयात् मनुः" । "कृष्णकर्णः कपीन्द्रेण तुल्यावस्थः सखा ह्यतः" रघुः । [वस्तुभिरेकत्र पाने अमरः।

तुल्यपान न० तुल्येन सजातीयेन सह पानम् । सजातीयै-

तुल्ययोगिता स्त्री अर्थालङ्कारभेदे अलङ्कारभेदे अलङ्कारशब्दे २६६१० दृश्यम् । ["विम्बीलोटाञ्च तुल्यशः" सुश्रु० ।

तुल्यशस् अव्य० तुल्य+शीप्सार्थे शस् । तुल्यं तुल्यमित्यर्थे ।

तुल्वल पु० ऋषिभेदे । तौल्वलिशब्दे दृश्यम् ।

तुवर पु० तवति हिनस्ति रोगान् तु-वरच् नि० गुणाभावः । ।धान्यभेदे २कषायरसे च शब्दरत्ना० ४आढक्याम् ५सौराष्ट्रमृत्तिकायाञ्च स्त्री स्त्रियां ङीप् स्वार्थे क तुवरिकाशब्दवत् । रसभेदे पुंस्त्री तद्वति त्रि० अमरः । ६ह्रस्वशरीरे नरे उणा० ।

तुवरयावनाल पु० कर्म० धान्यभेदे राजनि० । "तुवरो यावनालस्तु कषायोष्णो विरेचकः । संग्राही वातशमनो विदाही शोषकारकः" राजनि० ।

तुवरिका स्त्री० तुवरोऽस्त्यस्याः ठन् । ।सौराष्ट्रमृत्तिकायां (फटकिरि) अमरः । २आढक्यां (अरहर) भरतः ।

तुवरी स्त्री तु+वरच् स्त्रियां ङीप् । ।आढक्यां २सौराष्ट्रमृत्तिकायाञ्च (फिट्कारि) राजनि० । (तोरी) इति ३धान्यभेदे भावप्र० तद्गुणास्तत्रोक्ता यथा । "तुवरी यात्तिकी शीता लघ्वी कफपित्तास्रजित् । तीक्ष्णोष्णा वह्निदा कण्डूकुष्ठकोठक्रिमिप्रणुत्" । [चक्रमर्दने शब्दच० ।

तुवरीशिम्ब पु० तुवर्याः आढक्या इव शिम्बा यस्य । रक्त-

तुवि स्त्री० तुम्बो+पृषो० ।तुम्बयां । तु-पृच्छौ इन् किच्च । २बहुशब्दार्थे निघण्टुः । "तुविकूर्मिर्ह्यवावान्" ऋ० २।३०।३ । ऊ-मि वेदे गुणे अकारस्योत्वम् "तुविग्रामं तुविकूर्मिं रभोदाम्" ऋ० ६।२२।५ । "यज्ञेस्य । तुविग्रामं बहुग्रामकम्" भा० "तुविशुष्म ! तुविक्रतो !" ऋ०८।६८।२या ङीप् । "मघवन्तुवीमघ !" ऋ० १।२६।१ । तुवीमघ कथञ्चन" "य इद्धाम तुवीरवम्" ऋ०१०।६६।६ ।

तुविस् न० तु-इसौ पृच्छौ वा इसि किच्च । ।इच्छौ २प्रज्ञायां ३बले च । "यः सप्तरश्मिर्वृषभस्तुविष्मान्" ऋ० २।१२।

१२। "तुविमान् हविमान् बलवान् वा" भा०। "भीमस्तुविमान् चर्षणिभ्यः" १।५५।१। "तुविमान् प्रज्ञावान् बलवान् वा" भा०। बलेन प्रज्ञया च हविषः पूर्त्तेश्च सम्भवात् बलप्रज्ञयोस्तथात्वम्।

**तुवीरवत्** त्रि० तुवी मत्वर्थीयोरः ततो मतुप् मस्य वः। बहुसोऽयुक्ते। "रथा कविस्तुवीरवान्" ऋ० १०।१६४। ४। "तुवीरवान् बहुसोऽयुक्तो भवति। मत्वर्थीयप्रत्ययाद्वृत्तिः। यद्वा तुविशब्दस्य रो मत्वर्थीयः। बाहुल्ययुक्तदेवैः सहितो भवति" भा०।

**तुश** वधे भ्वा० आ० सक० सेट्। तोशते अतोशिष्ट तुतुशे। "इन्दुरिन्द्राय तोशते नितोशते" ऋ०९।१०९।२२ "इन्दुः सोम इन्द्रायेन्द्रार्थं तोशते" तोशते हन्यते अभिभूयते। नितोशते नितरामभिभूयते। तोशतिर्वधकर्म्मा" भा० कर्मकर्तरि तङ्। यगभावश्छान्दसः। "सत्वात्वं पुरुष्टुतं एको द्वयोषि तोशसे"। ऋ०८।१५।११। तोशसे हिनस्सि" भा०।

**तुष** तोषे आनन्दभेदे दि० प० सृदित् अक० सेट्। तुष्यति अतुषत्। तुतोष। ओदित् वर्त्तमाने क्तः तुष्टः। तुष्टिः। तोषः "तुष्य द्रौपदि! मा क्रुध" भा० व० ११०९ श्लो० "तुष्यन्ति च रमन्ति च" भा० शान्तु० १२७६ श्लो० "तुतोष पश्यन् विश्वान्तरात्माः" भट्टिः।

**तुष** पु० तुष-क। १विभीतकवृक्षे (बयड़ा) २धान्यत्वचि च स्वनामख्याते द्रव्ये च अमरः। "क्षीरोदनं जिघासति सितोत्तमतण्डुलान्वान् को नाम भोस्तुषकणोपहितान् हितार्थी" प्रबो० च०। "तुषेणापि परित्यक्ता न प्ररोहन्ति तण्डुलाः" हितो०। "सतुषं धान्यमुच्यते" आ०त०।

**तुषग्रह** पु० तुषेण सदृशेन ग्रह-कर्म्मणि अप्। वङ्गे त्रिका०

**तुषज** त्रि० तुषे जायते जन-ड। तुषजाते वङ्गादौ। अस्य "दीर्घकाशतुषवटं जे" पा० आदुदात्तता।

**तुषधान्य** न० तुषावृतं धान्यं ष०त०। तुषावृते सतुषे धान्ये। "तुषधान्यतोऽन्नमन्त्राभिचारवेतानकर्मज्ञाः"। "परधनहरणाभिरतास्तुषधान्यं सर्षपेभ्यश्च" हे०म०१५ अ०।

**तुषसार** पु० तुषं सरति अनुसरति सृ-अण्। वङ्गे शब्दमा०

**तुषानल** पु० तुषस्यानलः। तुषजाते अग्नौ। तुषाग्न्यादयोऽप्यत्र।

**तुषाम्बु** न० तुषोदकशब्दार्थे "तुषाम्बु दीपनं पाण्डु क्रिमिरोगगदापहम्। तीक्ष्णोष्णं पाचनं पित्तरक्तकृद्वह्नि सूलहृद्" भावप्र०।

**तुषार** पु० तोषयति तुष-ऋन्भूतण्यर्थात् आरन् किच्च। १देशभेदे। (तुखार) यद्दे दृश्यम् तत्र तुखारा इत्यत्र तुषारा इति पाठान्तरम्। २हिमकणभेदे नीहारे हेमच०। ३शीतलस्पर्शे अमरः ४तद्वति त्रि०।

"अपां हि हृद्याय न वारिधारा स्वादुः सुगन्धिः स्रवते तुषारा" नैष० "प्रपतत् तुषारो हेमन्तकालः" ऋतुसं० ५कर्पूरभेदे राजनि०। "जनस्तुषाराञ्जनपर्वताविव" "स्नपनवारितुषारशतानि" माघः। "आचचाम सतुषारशीकरः" रघुः। "पदं तुषारच्युतिधौतरक्तम्" कुमा०। "लघुतुषारतुषारजलच्युतम्" किरा०।

**तुषारकर** पु० तुषारो हिमः करोऽस्य। १हिमकरे चन्द्रे तुषारकिरणादयोऽप्यत्र। "कलया तुषारकिरणस्य पुरः" माघः। २कर्पूरे च।

**तुषारगिरि** पु० ष०त०। १हिमालये "तुषारगिरिकूटाभं सिताभ्रशिखरोपमम्" भा० अनु० १४ अ०। तुषाराचलादयोऽप्यत्र।

**तुषित** पु० तुष-बा० क्तिच् तुष-सम्भ० क्विप् ततः तारका० इतच् वा। १गणदेवताभेदे ते च द्वादश। किन्तु मन्वन्तरभेदे भिन्ननामानः यथा "चाक्षुषस्यान्तरे पूर्वमासन् ये तुषिताः सुराः। वैवस्वतेऽन्तरे ते वै आदित्या द्वादश स्मृताः" हरिवं० ३अ०। तथा च आदित्यरूपा द्वादश१२ "प्राणापानावुदानश्च समानो व्यान एव च। चक्षुः श्रोत्ररसाघ्राणस्पर्शे बुद्धिर्मनस्तथा। द्वादशैते तु तुषिताः देवाः क्षीरोदिधेऽन्तरे" सारसुन्दरीधृतवाक्योक्ता द्वादश१२ "तोषः प्रतोषः सन्तोषो भद्रः शान्तिरिडस्पतिः। इध्मः कविर्विभुः स्वाहा सुदेवो रोचनो द्विषट्१२। तुषिता नाम ते देवा आसन् स्वायम्भुवेऽन्तरे" शब्दार्थचि० धृतवाक्योक्ता द्वादश इति षट्त्रिंशत्। ये च द्वादशेति मन्यन्ते ते एकैकमन्वन्तरापेक्षया द्वादशेति वर्णयन्ति। समष्ट्यभिप्रायेण षट्त्रिंशदिति विवेकः। तदभिप्रायेणैव "षट्त्रिंशत्तुषिता मताः" इत्युक्तम्। २विष्णौ पु०। "तुषित! महातुषितेत्यादि" भा०शा०३४अ०। विष्णुस्तुतौ।

**तुषोत्थ** न० तुषादुत्तिष्ठति उद्+स्था-क ३त०। १तुषोदके राजनि०।

**तुषोदक** न० तुषमिश्रितमुदकं मा० त०। १क्वाथिकभेदे क्षारा०। तत्करणप्रकारो भावप्र० उक्तो यथा "तुषोदकं यवैराभैः सतुषैः प्रकटीकृतैः"। यवैरुदकसहितैः सन्धानवर्गोक्तत्वात्"। तुषाम्बुशब्दे तद्गुणादि दृश्यम्।

तुष्ट त्रि॰ तुष-कर्त्तरि क्त। १सन्तोषयुक्ते। "तस्मिँस्तुष्टे जगत्तुष्टं प्रीणिते प्रीणितं जगत्" पुरा॰। २विष्णौ पु॰ "परर्द्धिः परमस्तुष्टस्तुष्टः पुष्टः शुभेक्षणः" विष्णुस॰ "परानन्दैकरूपत्वात्तुष्टः" भा॰। तस्यानन्दरूपत्वेऽपि आनन्दाश्रयत्वं कल्पितम् अतएव विवरणे "आनन्दो विषयानुभवो नित्यत्वञ्च सति धर्मी स्वरूपत्वेऽपि पृथगिवावभासते" इत्युक्तम्। न्यायनये तु दुःखाभावस्यैवानन्दरूपत्वात् तस्य तदाश्रयत्वमस्त्रेवेति भेदः।

तुष्टि स्त्री तुष-भावे क्तिन्। १तोषे २भोगेच्छे तावतार्थमिति बुद्धौ ३अधिगतार्थादन्यत्र तुच्छत्वबुद्धौ "तुष्टिर्नुरक्तार्थस्य लताथोंऽस्तीति या मतिः" इत्युक्ते ४बुद्धिभेदे सा च नवविधा इति सांख्याचार्य्याः यथोक्तं सा॰ का॰ त॰ कौ॰ च।

"तुष्टिर्नवधेत्युक्तं ताः परिगणयति। "आध्यात्मिकाश्चतस्रः प्रकृत्युपादानकालभाग्याख्याः। बाह्याविषयोपरमात् पञ्च नव तुष्टयोऽभिमताः" का॰।

"प्रकृतिव्यतिरिक्तं आत्मास्तीति प्रतिपद्य ततोऽस्य श्रवणमननादिना विवेकसाक्षात्काराय त्वयुपदेशगुरौ यो न प्रयतते तस्य यतस्ता आध्यात्मिकास्तुष्टयो भवन्ति प्रकृतिव्यतिरिक्तमात्मानमधिकृत्य यस्मात्तास्तुष्टयस्तस्मादाध्यात्मिकाः, काला इत्यत आह प्रकृत्युपादानकालभाग्याख्याः प्रकृत्यादिराख्या यासां तास्तथोक्ताः। तत्र प्रकृत्याख्या तुष्टिर्यथा कस्यचिदुपदेशः (विवेकसाक्षात्कारो हि प्रकृतिपरिणामभेदः तञ्च प्रकृतिरेव करोतीति ज्ञातं ते ध्यानाभ्यासेन, तस्मादेवमेवास्त्विति)। सेयमुपदेष्टव्यस्य शिष्यस्य प्रकृतौ तुष्टिः प्रकृत्याख्या तुष्टिः अम्भ इत्युच्यते। "या च प्रकृत्यविवेकख्यातिर्न सा प्रकृतिमात्रावगतिर्या भूत्वैवस्य सर्वदा तन्मात्रस्य सर्वान् प्रत्यविशेषात् प्रव्रज्यायास्तु सा भवति तस्मात्प्रव्रज्यानुपादेयाः ज्ञातं ते ध्यानाभ्यासेनायुष्मन्नित्युपदेशे या तुष्टिः सोपादानाख्या सलिलमुच्यते। 'या तु प्रव्रज्यापि न सद्यो निर्वाणदेति सैव कालपरिपाकमपेक्ष्य सिद्धिं विधास्यति अनन्तत्तप्रतया तवेत्युपदेशे या तुष्टिः सा कालाख्या मेघ उच्यते। "या तु न कालात् नाप्युपादानाद्विवेकख्यातिरपि तु भाग्यादेव अतएव मदान्धसाधनानि अतिबलानि मातृरुपदेशमात्रादेव विवेकख्यातिमन्ति शुक्लानि बभूवुः तत्र भाग्यमेव हेतुर्नान्यदित्युपदेशे या तुष्टिः सा भाग्याख्या तुष्टिरुच्यते। बाह्या दर्शयति बाह्यास्तुष्टयोविषयोपरमात् पञ्च, याः खल्वनात्मनः प्रकृतिमहदहङ्कारादीनात्मत्वेनाभिमन्यमानस्य वैराग्ये सति तुष्टयस्ता बाह्याः आत्मज्ञानाभावेऽनात्मानमधिकृत्य प्रवृत्तेरिति। ताश्च वैराग्ये सति सम्भवन्ति तुष्टय इति वैराग्यहेतुपञ्चविधत्वाद्वैराग्यान्यपि पञ्च, तत्पञ्चकत्वात् तुष्टयः पञ्चेति, उपरम्यतेऽनेनेत्युपरमो वैराग्यं विषयादुपरमो विषयोपरमः। विषया भोग्याः शब्दादयः पञ्च, उपरमा अपि पञ्च। तथा च अर्জ্জनरक्षणक्षयभोगहिंसादोषदर्शनहेतुजन्मान उपरमाः पञ्च भवन्ति। तथा हि सेवादयो धनोपार्জ্জनोपायास्ते च सेवकादीन् दुःखा कुर्वन्ति। इयद्धनीश्वरदासःस्यदस्मदत्तचक्रार्द्धचन्द्रजां वेदनां भावयन् प्राज्ञः कः सेवासु प्रसज्जते। एवमन्येऽप्यर्জ্জनोपाया दुःखा इति विषयोपरमे या तुष्टिः सैषा पारस्रुच्यते। तथार्জিतं धनं राजैकागारिकाग्निजलौचादिभ्यो विसङ्ग्रतीति तद्रक्षणे महद्दुःखमिति भावयतो विषयोपरमे या तुष्टिः द्वितीया सुपारस्रुच्यते। तथा महतायासेनार्জিतं धनं भुञ्जमानं क्षीयते इति तत्प्रक्षयं भावयतो विषयोपरमे या तुष्टिः सा तृतीया पारपारस्रुच्यते। एवं शब्दादिभोगाभ्यासाद्धर्म्मे कामाक्षे च विषयाप्राप्तौ कामिनं दुःखयन्तीति भोगदोषं भावयतो विषयोपरमे या तुष्टिः सा चतुर्थी अनुत्तमाम्भ उच्यते। एवं नानुपकृत्य भूतानि विषयोपभोगः सम्भवतीति हिंसादोषदर्शनाद्विषयोपरमे या तुष्टिः सा पञ्चमी उत्तमाम्भ उच्यते। एवमाध्यात्मिकीभिश्चतसृभिर्बाह्याभिश्च पञ्चभिर्नव तुष्टयोऽभिमताः"। भाष्यकृता अन्यथा तुष्टिभेदा दर्शिता यथा "तुष्टिर्नवधा" सा सू॰ "आध्यात्मिकादिभेदान्नवधा तुष्टिः" भा॰। "इदं सूत्रं कारिकया व्याख्यातम्। आध्यात्मिकाश्चत्वारि इत्यादि व्याख्यायमर्थः। आत्मानं तुष्टिमतः सङ्घातमधिकृत्य वर्त्तन्त इत्याध्यात्मिकास्तुष्टयश्चतस्रः। तत्र प्रकृत्याख्या तुष्टिर्यथा। साक्षात्कारपर्य्यन्तः परिणामः सर्वोऽपि प्रकृतेरेव तं च प्रकृतिरेव करोत्यहं तु कूटस्थः पूर्ण इत्यात्मभावनात् परितोषः। इयं तुष्टिरम्भ इत्युच्यते। ततश्च प्रव्रज्योपादानेन या तुष्टिः सोपादानाख्या सलिलमित्युच्यते। ततश्च प्रव्रज्यायां बहुकालं समाध्यनुष्ठानेन या तुष्टिः सा कालाख्या तुष्टिर्मेघ इत्युच्यते। ततश्च प्रज्ञानपरमकाष्ठारूपे धर्ममेघसमाधौ सति या तुष्टिः सा जलाख्या तुष्टिरित्युच्यत इति चतस्र आध्यात्मिकाः।

बाह्याः पञ्च तुष्टयो बाह्यविषयेषु पञ्चसु शब्दादिष्वर्जनरक्षणक्षयभोगहिंसादिदोषनिमित्तकोपरमाख्यायन्ते । ताश्च तुष्टयो यथाक्रमं पारं सुपारं पारापारमनुत्तमाम्भ उत्तमाम्भ इति परिभाषिता इति । कश्चित् त्विमां कारिकामन्यथा व्याख्यातवान् । तद्यथा विवेकसाक्षात्कारोऽपि प्रकृतिपरिणाम एवेत्थं ध्यानाभ्यासेनेत्येवं दृष्ट्वा या ध्यानादिनिवृत्तौ तुष्टिः सा प्रकृत्याख्या । प्रकृत्योपादानेनैव मोक्षो भविष्यति किं ध्यानादिनेति या तुष्टिः सोपादानाख्या । क्रतसत्रासस्यापि कालेनैव मोक्षो भविष्यत्यलमुद्वेगेनेति या तुष्टिः सा कालाख्या । भाग्यादेव मोक्षो भविष्यति न मोक्षशास्त्रोक्तसाधनैरेवं कुतर्के या तुष्टिः सा भाग्याख्येत्यादिरर्थ इति तत्त्व । तद्व्याख्यातत्तुष्टीनामभावस्य ज्ञानाद्यनुकूलत्वेनाशक्तिपरिभाषानौचित्यादिति" ।

तुष–कर्त्तरि क्तिच् । ६गौर्य्यादिषु षोढ़शसु मातृषु मध्ये मातृभेदे । कुलदेवताशब्दे २१२० पृ० दृश्यम् । ६ऋनन्तदेवपत्न्याञ्च । "ऋनन्तपत्नी तुष्टिश्च पूजिता वन्दिताऽभवत् । यया विना न सन्तुष्टाः सर्वे लोकाश्च सर्वतः" देवीभा० । "या देवी सर्वभूतेषु तुष्टिरूपेण संस्थिता" देवीमाहा० । "आचारश्चैव साधूनामात्मनस्तुष्टिरेव च" मनुः ।

तुष्टिमत् त्रि० तुष्टिरस्त्यस्य मतुप् । तोषयुक्ते । स्त्रियां ङीप् । २उग्रसेनात्मजे कंसभ्रातरि पु० "कंसः सुनामा न्यग्रोधः कङ्कः शङ्कुः सुभूस्तथा । राष्ट्रपालोऽथ सुष्टिश्च तुष्टिमानुग्रसेनजाः" भाग० ६।२४।१४ ।

तुष्ट पु० तुष–बा० तुक् । कर्णस्वमयौ शब्दच० ।

तुष्य पु० तुष–कर्त्तरि क्यप् । १महादेवे तुष्टितुष्टशब्दे दृश्यम्

तुस ध्वनौ भ्वा० पर० सक० सेट् । तोसति अतोसीत् । तुतोस ।

तुस पु० तुष+पृषो० । तुषे धान्यत्वचि रमानाथः ।

तुस्त न० तुस–क्त बा० दृढ़भावः । १रेणौ अमरे तुस्तोत्यत्र तुस्तेति पाठं मत्वा भारतुन्द्यां व्याख्यातम् ।

तुह अदर्शने वधे भ्वा० पर० सक० सेट् । तोहति । इरित् अतुहत् अतोहीत् । । तुतोह ।

तुह(हा)र पु०तुह–बा० करन् कारन् वा । कुमारपारिषद्भेदे । "तुहरश्च तुहारश्च चित्रदेवश्च वीर्य्यवान्" भा० स० ४६ अ० । कुमारपारिषदोक्तौ ।

तुहिन न० तुह्यतेऽनेन तुह–इनन् हुश्च । १हिमे अमरः २चन्द्रतेजसि उज्ज्वल० "तुषारालस्नैस्तुहिनैः पतद्भिः" ऋतुस० "सान्द्रस्तुहिनान्तरितः" प्रबोधच० ।

तुहिनकर पु० तुहिनं करोऽस्य । १चन्द्रे तुहिनांशुप्रभृतयोऽत्र ।२कर्पूरे च ।

तुहिनांशुतैल न० ६त० । कर्पूरतैले राजनि० ।

तुहिनाचल पु० ६त० । हिमालये तुहिनाद्रिप्रभृतयोऽत्र ।

तुहुण्ड पु० दनुवंशजे दानवभेदे । "अश्वग्रीवश्च सूक्ष्मश्च तुहुण्डश्च महाबलः । एकपादेकचक्रश्च विरूपाक्षमहोदरौ । निचन्द्रश्च निकुम्भश्च कपटः कपटस्तथा । शरभः शलभश्चैव सूर्य्यचन्द्रमसौ तथा । एते ख्याता दनोर्वंशे दानवाः परिकीर्त्तिताः" भा० आ० ६५ अ० । २धृतराष्ट्रपुत्रभेदे "नन्दको वाडवाक्षी च तुहुण्डोविकटस्तथा" १८६ अ० ।

तूड अनादरे भ्वा० पर० सक० सेट् । तूडयति अतूडीत् । तुतूड । ऋदित् । णिच् अतितूडत् त ।

तूण सङ्कोचे अद० चुरा० उभ० सक० सेट् । तूणयति ते । अतितूणत् त ।

तूण सङ्कोचे चु० उभ०सक०सेट् । तूणयति ते अतितूणत् त ।

तूण पूरणे चु० आ० सक० सेट् । तूणयते, अतितूणत् त ।

तूण पु० तूण्यते पूर्य्यते बाणैः तूण–पूरणे कर्म्मणि घञ् । इषुधौ बाणाधारे अमरः ।

तूणक न० "तूणकं भवेदिदं रजौ रजौ ततश्च रः" छ० र० टीकोक्ते पञ्चादशाक्षरपादके छन्दोभेदे ।

तूणधार पु० तूणं धारयति धारि–अण् उप० स० । तूणधारिणि धातुष्के । अस्य नियुक्तत्वात् "अणि नियुक्ते" पा० न वाद्युदात्तत्वम् । किन्तु तत्पुरुषस्वरः ।

तूणव पु०तूणस्तदाकारोऽस्त्यस्य केशा०व तूणं तदाकारं वाति वा–क वा । तूणाकारे वाद्यभेदे । "सैषा वाग् वनस्पतिषु वदति या दुन्दुभौ या तूणवे या वीणायाम्" तै० स० ६।१।४।१ । "वीणावादं क्रोशाय तूणवध्मवरस्कराय" यजु० ३०।१९ । "तूणवं वाद्यभेदं धमति तथाभूतम्" वेददी० । "वीणावादं पाणिघ्नं तूणवध्मं तावृत्तायानन्दाय" यजु० ३०।२० ।

तूणवत् त्रि० तूण+अस्त्यर्थे मतुप् मस्य वः । १तूणयुक्ते धातुष्के "सायुधा बद्धनिस्त्रिंशास्तूणवन्तः संमार्गणाः" भा० व० ६२अ० । ठन् । तूणिक इनि तूणिन् तत्रार्थे त्रि० इन्यन्तस्य स्त्रियां ङीप् । तूणिनी । नन्दिवृक्षे पु० राजनि० ।

तूणी स्त्री तूणयते पूर्यते शरैः तूण–पूरणे घञ् गौरा० ङीष् । १इषुधौ २तूणे ३नीलीवृक्षे शब्दार्थचि० । ४तूणे स्त्री टाप् शब्दार्थचि० ।

तूणीक पु० तूणीव कायति कै–क । नन्दिवृक्षे राजनि० ।

तूणीर पु० तूणयते पूर्यते शरैः तूण–पूरणे वा० ईरन् । १तूणे इषुधौ अमरः ।

तूतक न० तूत्य+पृषो० । तूत्थे (तुँतिया) शब्दच० ।

तूतुजान पु० तुजि–बले कानच् तुजा० अभ्यासदीर्घः वा० नलोपः । १क्षिप्रे निघण्टुः ।२धैर्य्यमाणे च तुजधातौ दृश्यम् ।

तूतुजि स्त्री तुजि–बले दाने वा कि द्वित्वे तुजा० अभ्यासदीर्घः नलोपः । १क्षिप्रे निघण्टुः २दातरि च । "जज्ञेऽतूतुजिं चित्तूतुजिरग्निम्" ऋ० ७।२८।३ । "तूतुजिदीता" भा० ।

तूतुज्यमानास पु०तुजि–बले कर्मणि शानच् द्वित्वम् अभ्यासदीर्घः वा० नलोपः तथाभूतः असति दीप्यते असदीप्तौ अच् कर्म्म० । क्षिप्रे निघण्टुः ।

तूतुम त्रि० तुज–अच् द्वित्वे अभ्यासदीर्घः पृषो० । १तूर्णे माधवः "सवना तूतुमा कृधे" ऋ० १०।५०।५ । "एता विश्वा सवना तूतुमा कृधे" ऋ०१०।५०।६। "तूतुमा तूर्णानि" भा० ।

तूद पु० तुद–घञर्थे कर्म्मणि क पृषो०।१तूलवृक्षे राजनि०। अश्वत्थाकारे (पार्श्वपिप्पल) ख्याते वृक्षे भावप्र० "तूदं पक्वं गुरु स्निग्धं पित्तानिलापहम् । तदेवामं सुमधुरं संशोधि रक्तपित्तहृत् ।

तूदी स्त्री देशभेदे । तूदी अभिजनोऽस्य दक् । तौदेय पित्रादिकत्वेन तूदीदेशवासिनि त्रि० ।

तूपर पु० ऋक्षकीने १पक्षौ । स्त्रियां टाप् । तस्य ऋक्षकीनत्वकारणं यथा

"तासान्वेव वाऽग्र्यवत्सासक्षा एवैनौ द्वादशौ मासौ सं संवत्सरमापयामेति तासां द्वादशसु मासेषु ऋक्षाणि प्रावर्त्तन्त ताः सर्वमद्याग्र्यमाप्नुवंस्ता एतत्तूपरास्तस्मात्ताः सर्वान् द्वादशमासः प्रेरते सर्वं हिता अद्याग्र्यमाप्नुवन्" ताण्ड्य०ब्रा०४।१।२। "तुशब्दो वैलक्षण्यद्योतनार्थः,तासांगवां मध्ये काश्चिदग्र्यवत् किमित्युच्यते, यो द्वादशौ द्वादशसंख्यापूरकावेव शिष्टावेकादशद्वादशौ मासौ एभौ आसासक्षा एवं अनुशयैवं अनुशय प्रारब्धं संवत्सरसाध्यं समापयामेति व्यवहितार्थेति समित्यस्य व्यवहितेन सम्बन्धः, तासां गवां जातानि ऋक्षाणि द्वादशसु मासेषु पूर्वेषु प्रावर्त्तन्त प्रापतन् दशभिर्मासैः ऋक्षपाप्तिलक्षणफले सिद्धेऽपि पुनरश्रद्धया यतो मासद्वयमन्वतिष्ठन् अतो जातानामपि ऋक्षाणां पुनः पतनमित्यभिप्रायः, तथा चैतरेयकम् "अथ समापयिष्यामः संवत्सरमित्यासत तासामश्रद्धया ऋक्षाणि प्रावर्त्तन्तेति" । एतास्तूपरा इति ताः पतितऋक्षाः गावः सर्वत्तुभवमद्याग्र्यमग्र्यं प्राप्नुवन् ता गावस्तूपराः ऋक्षहीनाः दृश्यन्ते तस्मात्ताः सर्वान् द्वादश मासो मासान् प्रेरते प्रगच्छन्ति दैर गतौ शीतवातातपेषु सर्वदा पुष्टाङ्गा एव यथायथं गच्छन्ति ऋक्षिणो ऋक्षादयस्तु क्षणा भवन्ति, तस्मादित्युक्तं कस्मादित्याह हि यस्मात्ता गावः सर्वमद्याग्र्यमाप्नुवन् तस्मात् सर्वर्त्तुषु पुष्टाङ्गा भवन्ति तथा चैतरेयकम् "ऊर्जं त्वमसमन्वत तस्माद् ता: सर्वभूतान्नरसक्षित्रा इति" भा० । "प्राजापत्यांश्च सप्तदश ग्राम्यपशूनालभते" काल्या० श्रौ० १४।२।१२ "अश्वस्तूपरो गौरः गस्तो प्राजापत्याः" यजु० १२४।१ ।

तूबर पुंस्त्री० सौ० तु+किप् तूः बृ–हलां अच् कर्म्म० । तूपर+पृषो० पस्य बो धो ।१तूपरे कालेऽजातऋक्षे पशौ २कालेऽजातशस्यके पुरुषे ३अव्यक्तपुरुषलक्षणे च "जहि तूबरकं क्षिप्रं कर्षस्व बलमादधत्" भा० द्रो० १३३अ० "तत्र तूबरकं बालं बह्वाशिनमविद्यकम्" भा० उ० १६८ अ० । ४कषाये रसे पु० ३तद्वति त्रि० । ४आढक्यां ५गौराद्वल्लिकायां स्त्री गौरा० ङीष् ।

तूय न० तोय+पृषो० । १जले निघण्टुः । तू–भावे सम्प० किप् तां याति या–क वा । २क्षिप्रे न० "देव ऋरिभिर्याहि तूयम्" ऋ० २।४३।२ "तूयं क्षिप्रम्" भा० । ३क्षिप्रगामियुक्ते त्रि० "अद्रिश्चा ते मन्दिन इन्द्र ! तूयात्" ऋ० १०।२८।३ । "तूयानविलम्बितान्" भा० ।

तूर हिंसे, सक० वेगे अक० दिवा० आत्म० सेट् । तूर्यते अतूरिष्ट । तुतूरे ।

तूर त्रि० तुर–कर्त्तरि किप् ।१वेगयुक्ते । भावे सम्प० किप् । २वेगे स्त्री "पुभिर्भवेन विहितामिरहस्तत्भिः" भा० २। ७।३८। "अहस्तत्भिः अनल्पवेगाभिः" श्रीधरः ।

तूर न०तूर्यते ताड्यते सुखमारुतेन तूर–घञर्थे कर्मणि क । १वाद्यभेदे (सानाइ) हेमच० । २ताड्यमाने पटहादौ शब्दार्थचि० । [ घूस्तुरे भावप्र० ।

तूरी स्त्री तूरं तदाकारोऽस्त्यस्याः अच् गौरा० ङीष् ।

तूर्ण न० त्वर–संभ्रमे भावे क्त पक्षे दृढ़भावः ऊठ् तस्य नः। १शीघ्रे कर्त्तरि क्त। २त्वरायुक्ते त्रि० अमरः। "अभ्याजतोऽभ्यागतत्वर्णतर्णकान्" माघः। "चूर्णमानीयतां तूर्णं पूर्णचन्द्रनिभानने!"। पर्णानि स्वर्णवर्णानि मीदन्त्यार्कर्णलोचने!" उद्भटः।

तूर्णाग्र न० तूर्णमश्नुते अश–अच्। १उदके। "प्रतिस्तुताया वो दृषत्तूर्णाग्रं न गिरेरधि" ऋ० ८।३२।३। "तूर्णाग्रमुदकं भवति तूर्णमश्नुते" निरु० भा०।

तूर्णि पु०त्वर–नि नि० ऊठ्। १मनसि उज्ज्वलदत्तः शब्दकल्पद्रुमे मनार्थतोक्तिः नकारस्थाने लकारभ्रमात्। भावे नि। २त्वरायां क्षेमच०। ३क्षोके संक्षिप्तसारे उणा० ४क्षिप्रे निघण्टुः। ५तद्वति त्रि०। "प्र यत्तत्स्रोता जरिता तूर्ण्यर्थः" ऋ० ३।५२।५। "तूर्ण्यर्थैः त्वरितगमनाः" भा० "विगाहं तूर्णिं तविषीभिराघृतम्" ऋ० ३।३।५। "तूर्णिं क्षिप्रगामिनम्" भा०।

तूर्त न० त्वर–क्त ऊठ् वेदे न तस्य नः। १क्षिप्रे "यद्वै क्षिप्रं तत्तूर्त्तमथ यत् क्षिप्रात् क्षेपीयस्तत्प्रतूर्त्तम्" शत० ब्रा० ६।३।२।२।

तूर्य्य न० तूर्य्यते ताड्यते तूर–यत्। वाद्यभेदे "ढोभावसाने ह्यततूर्य्यनादः" मत्पु० तुलापुरुषदानविधौ "तत्र भुक्ता पुनः किञ्चित्तूर्य्यघोषैः प्रहर्षितः" मनुः। एतत्परस्य मानस्य गिरिनद्या० न षत्वम् तूर्य्यमानम् "सतूर्य्यमेभां क्षपयाम्बभूवुः" कुमा०।

तूर्य्यखण्ड पु० ६त०। वाद्यभेदे डमरुवाद्ये झारा०।

तूर्व न०तूर्व अच्–रेफे पूर्वाणो दीर्घः। १क्षिप्रे तूर्णे "तूर्वयाणो मूर्त्तवचसमः" ऋ० १०।६१।२। "तूर्य्यायन्तूर्वगमनः" भा०। "रघो अग्निमशुं तूर्वयाणम्" ऋ० १।१७३।२। [ऋ० ८।४२।२।

तूर्वि न० तूर्व–इन् दीर्घः। १क्षिप्रे "वाहधानाय तूर्वये"

तूल पूरणे चुरा० आ० सक० सेट्। तूलयते अतूतुलत।

तूल द्रव्यपरिच्छेदे निष्कासने भ्वा० पर० सक० सेट्। तूलति अतूलीत्। ततूल।

तूल न० तूलयति पूरयति तूल्यते वा तूल–अच्। १सर्वव्यापके आकाशे मेदि० २अश्वत्थाकारे तूदे वृक्षे भावप्र० तूदशब्दे दृश्यम्। कार्पासादिबीजजाते(तूला)। ख्याते पदार्थे। "सर्वं दहति सङ्काश्मश्रूराशिमिवानलः" भा० त०। अव्ययीभावेऽस्य "ऊनतोरत्वेत्यादिना" पा० आदुदात्तता उपतूलम्। तूलशब्दे परे दैर्घिकशब्दस्य षष्ठीतत्पुरुषे लुप्तः। दैर्घिकतूलं सङ्क्षेपीकातूलम्। "कञ्चुकं तूलगर्भञ्च तूलिकाम् सुपधीतिकां मञ्जिष्ठारक्तवासांसि तथा तूलवतीं पटीम्। ऊर्णामयानि वासांसि यतिभ्योऽपि प्रदापयेत्" काशी० ४ अ०।

तूलक न० तूल–स्वार्थे क। तूले क्षेमच०।

तूलकार्मुक न० तूलस्य स्फोटनार्थं कार्मुकम्। तूलस्फोटनार्थे धनुषि (धुनखरा) तूलचापादयोऽत्र शब्दच०।

तूलनालि(ली) स्त्री० तूलनिर्म्मिता नाली। पिञ्जिकायाम् (पादज) स्वार्थे क। अत्रैवार्थे स्त्री त्रिका०।

तूलपिचु पु० पिच–मर्दने कु तूलमर्द्दनः पिचुः। तूलवृक्षे (तुलारगाछ) भरतः। [राजनि०।

तूलवृक्ष पु० तूलसाधनं वृक्षः शाक०त०। शालमलिवृक्षे।

तूलशर्करा स्त्री तूलस्य शर्करेव। कार्पासबीजे रत्ना०।

तूलसेवन न० ६त०। तूलस्तूलकर्त्तने (काटनाकाटा) शब्दभा० तूलसेचनेति चमध्यपाठः भ्रमादिकः।

तूलि(ली) स्त्री तूल–इन् वा ङीप्। चित्रसाधने स्वनामख्याते पदार्थे मि० कौ०।

तूलिका स्त्री तूली स्वार्थे क। १नील्यां २वर्त्तौ च शब्दर०। तूलीशब्दार्थे ३लेख्यकूर्चिकायां ४वीरणादिशलाकायाम्। ५आवर्त्तितसुवर्णादेर्द्रव्याधारपात्रभेदे(मुचि)। तूल अस्त्यस्य ठन् कापि अत इत्त्वम्। ६(तोषक) शय्याभेदे तूलशब्दे उदा०। "उन्मीलितं तूलिकयेव चित्रम्" कुमा०। "तूलिका कथिता लेख्यकूर्चिका तूलशय्ययोः" विश्वः। तूलपूरितशय्या च तूलशय्येत्यर्थः।

तूलिनी स्त्री तूलोऽस्त्यस्या इनि ङीप्। शालमलीवृक्षे भावप्र०। २लक्ष्मणाकन्दे राजनि०। ३तूलयुक्ते त्रि० स्त्रियां ङीप् तूलिफला। [रत्नमा०।

तूलिफला स्त्री तूलि तूलवत् फलं यस्याः। १शालमलीवृक्षे

तूवर पु० तौ०तु–वा० वरच् दीर्घश्च। १तूवरशब्दार्थे २कषाये रसे अमरः। ३तद्वति त्रि० अमरः।

तूवरिका स्त्री तौ० तु–वा० वरच् दीर्घः संज्ञायां कन् कापि अत इत्त्वम्। १आढक्याम् (अहरहर) २सौराष्ट्रवृत्तिकायाञ्च भरतः। [कायाञ्च (फिट्किरि) भरतः।

तूवरी स्त्री तूवर+गौरा०ङीष्। १आढक्याम् २सौराष्ट्रवृत्तिकायाञ्च भरतः।

तूष तुष्टौ भ्वा० पर०सक०सेट्। तूषति अतूषीत्। ततूष।

तूष्णींशील त्रि० तूष्णीं शीलं यस्य। १मौनावलम्बिनि।

तूष्णीक त्रि० तूष्णीं शीलं यस्य शीलेऽर्थे कन् मलोपश्च। मौनावलम्बिनि अमरः।

तूष्णीकाम् अव्य० तूष्णीम्+अकच्प्रकरणे तूष्णीमः काम् वक्तव्यः" वार्त्ति० काम् मित्त्वादन्त्यादचः परः। तूष्णीं शब्दार्थे। "तूष्णीकामास्ते" सि०कौ०।

तूष्णीङ्गङ्ग अव्य० तूष्णीं गङ्गा यत्र "अव्ययदार्थे च संज्ञायाम्" पा० बहुव्रीह्यर्थे अव्ययी०। १देशभेदे। "अपांक्षुदं च पुण्याख्यं भृगुतुङ्गं च पर्वतम्। तूष्णींगङ्गे च कौन्तेय! सामात्यः सत्रमस्सृज" भा०व० १३५अ०। तूष्णीङ्गङ्गे इत्यत्र सप्तम्या वा न अम्।

तूष्णीम् अव्य०तूष्ण वा०नीम् खरादि ।१मौने(चुपकरा)अमरः। "यत्किञ्चित् दश वर्षाणि सन्निधौ प्रेक्षते धनी। भुज्यमानं परैस्तूष्णीं न स तल्लब्धुमर्हति" मनुः "परैर्वा कीर्त्यमानेषु तूष्णीमास्ते पराङ्मुखः" भा०आ०१०३अ०। तूष्णींशब्दे उपपदे "तूष्णीमि भुवः" ङ्णाप्रसङ्गे तूष्णींभूय तूष्णीं भावम्। "तूष्णींभूय भयादासाञ्चक्रिरे समुपस्थिताः" भट्टिः। ङ्णा च इति" पा०वा समासाभावेतूष्णीं भूत्वा।

तूष्णीम्भाव पु० तूष्णीम्+भू-घञ्। तूष्णीम्भवने मौनावलम्बने "अनिमिषनयननिरीक्षणे तूष्णींभावादयस्तत्र" सा० द० "तूष्णींभावेऽपि विज्ञेयं न चेङ्गवति कारणम्" भा० आ०१०३अ०।

तूस्त न० तुस-बा० तन् दीर्घश्च। १रेणौ। २जटायाञ्च मेदि० ३पापे ४स्तुत्यै च शब्दच०।

वि+तूस्त-क्विप्। तूस्तस्य त्रुटने। वितूस्तयति तूस्तं केशं इत्यर्थे केशे जटीभूताः केशा इत्यन्ये पापमित्यपरे सि०कौ०।

तृंहण न०तृहि-भावे ल्युट्। हिंसने। [वा तत्र पाठः तत्रार्थे।

तृक्कन् पु०स्तेने निघण्टुः रिक्केत्यत्र पाठान्तरम् तृक्का त्रिकेति

तृक्त गतौ भ्वा० पर०सक० सेट्। तृक्तति अतृक्षीत् ततृक्त।

तृक्त पु० तृक्त-अच्। काश्यपे ऋषौ तस्यापत्यं गर्गा० यञ्। तार्क्ष्य गरुडे अश्वे विहगमात्रे च तार्क्ष्य शब्दे दृश्यम्

तृक्ताक पु०तृक्त-आकन्। ऋषिभेदे ततोऽपत्ये शिवा० अण्। तार्क्षाक तदपत्ये।

तृक्षि पु० तृक्ष-इन्। त्रसदस्योः पुत्रे ऋषिभेदे। "येभिस्तृक्षिं इषणा त्रासदस्वम्" ऋ० ८।२२।७। "त्रासदस्वं त्रसदस्योः पुत्रं तृक्षिमेतन्नामकम्" भा०।

तृख न० तृप्र-क पृषो०। जातीफले।

तृ(तृ)च न० तिसृणामृचां समाहारः तिस ऋचो यत्र वा ऋक्समा० वा समासारणम्। १समानदेवताकानां समानच्छन्दस्कानामृचां त्रये २तद्युक्ते अनुवाकखण्डादौ त्रि०। "मधुवाता तृचं जपेत्" हेमाद्रिश्राद्धकल्पः। "वाजोश्वो रिति तृचैर्वपत्युदपात्रवत्" कात्या० श्रौ० १७।१।८। ऋक्परत्वे न० "गायत्रं तृचं दश त्रयीषु विद्यते" निरु० १२।४०। वा संप्रसारणाभावे तृचमप्यत्र।

तृण भक्षे तना० उभ० सक० सेट्। तृणोति तर्णोति तृणुते-तर्णुते। अतर्णीत् अतर्णिष्ट। उदित् तर्णित्वा-तृष्ट्वा।

तृण न० तृह-नक् हलोपश्च। १नडादौ, खड़े (खड़)। अमरः। "तृणेन वाप्येव तयाऽनुगम्यते" नैष०। "लघुर्बहुतृणं नरः" माघः। तृणस्यायं शिवा० अण्। तार्ण तृणजन्ये वह्नौ पु० "तार्णौतार्णौभयं नास्तीति" जगदीशः। तृणसम्बन्धिमात्रे त्रि०। घोषादि० उत्तरपदस्थे तृणशब्दे पूर्वपदमाद्युदात्तम्। शमतृणमित्यादि। समूहार्थे पाशा० य। तृणया तृणसमूहे स्त्री तत्र भवः। उत्करा० मत्वर्थे छ नडा० कुक् च। तृणकीय तृणभवे त्रि०।

स्वल्पं तृणं कन्। तृणक स्वल्पतृणे "क्रीणीष्वेतास्तृणकेनापि राजन्!" भा०आ०६१अ०। स्वार्थे क। तत्रार्थे।

तृणकर्ण पु० तृणमिव कर्णोऽस्य। ऋषिभेदे ततः शिवा० अपत्यादौ अण्। तार्णकर्ण तद्गोत्रापत्ये। यस्का०बह्वृषु अणो लुक्। तृणकर्णास्तद्गोत्रापत्येषु ब० व०।

तृणकाण्ड न० तृणानां समूहः दुर्वा० काण्डच्। तृणसमूहे

तृणकुङ्कुम न० तृणजातं कुङ्कुमम्। सुगन्धद्रव्यभेदे राजनि०। "तृणकुङ्कुमं कटूष्णं कफपित्तविनाशनम्। वातशोकपामकण्डूकुष्ठमेदोघ्ननाशनम्। परमं भास्करं तत्तु भिषग्भिः परिकीर्त्तितम्" राजनि० तद्गुणा उक्ताः।

तृणकुटी स्त्री तृणाच्छादिता कुटी शा०त०। तृणाच्छादिते गृहे त्रिका०। तृणकुटीरादयोऽप्यत्र (कुड़ेघर)।

तृणकूर्म्म पु० तृणमयः कूर्म्मः। तूष्ण्यां शब्दमा०।

तृणकेतु पु०तृणेषु केतुरिव श्रेष्ठत्वात् असारत्वाद् वा। १वंशदण्डे, २बालदण्डे, तृणद्रुमतृणध्वजावप्यत्र। राजनि०। स्वार्थे क। तत्रार्थे।

तृणगण्ड पु० तृणमिव गण्डोऽस्य। उच्चिङ्गटे (उच्चिङ्गड़ा) कीटभेदे मेदि०। [२तृणजलौकायाञ्च।

तृणगोधा स्त्री तृणमिव गोधा। १गोधाजातिभेदे मेदि०

तृणगौर न० तृणमिव गौरं पीतम्। तृणकुङ्कुमे राजनि०।

तृणग्रन्थि स्त्री तृणमिव ग्रन्थिरस्य। सर्षजीवन्त्याम् राज०

तृणग्राहिन् पु० तृणं गृह्णाति ग्रह-णिनि ह्रस्व० नीलमण्डौ राजनि०।

**तृणचर** पु० तृणेषु चरति चर–अच्। १गोमेदमणौ २तृणचारिमात्रे त्रि०।

**तृणजम्भन्** त्रि० तृणं जम्भो भक्षणमस्य तृणमिव जम्भोऽस्येति वा "जम्भा सुहरितृणसोमेभ्यः" पा० ऋतसमासान्तः नि०। तृणभक्षके तृणतुल्यदन्तयुक्ते च। शब्दकल्पद्रुमे व्युत्पत्त्युक्तिः प्रामादिकी पा० सू० नान्तत्वेन निपातनात्।

**तृणजलायूका** स्त्री० तृणाकारा तृणजाता वा जलायूका जलौकाभेदे। "तद्यथा तृणजलायूका तृणस्यान्तं गत्वात्मानमुपसंहरत्येवमेवायं पुरुष इदं शरीरं निहत्याविद्यां गमयित्वात्मानमुपसंहरति" श्रुतः आ० १४।७ २।४। तृणजलूकादयोऽत्र स्त्री "यथा तृणजलूकेयं नापयात्यपयाति च" भाग० ४।२६।७६।

**तृणजलौकान्याय** तृणजलौकायाः यथा अपरदेशसंयोगानन्तरं पूर्वदेशवियोगस्तत्सुखे जीवस्यापरदेहसंयोगेन पूर्वदेहपरित्यागरूपे न्याये। स च नैयायिकानां तृणजलायूकाशब्दे दर्शितसूत्रा कल्पितः। तदेतन्मतं आ०भा० व्याघाताच्च तन्मूलसूत्रैरन्यार्थत्वं प्रदर्श्य दूषयित्वा आ० त० पञ्चाग्निविद्युक्तोक्तेः अन्यविध एव संसरणप्रकार उक्तः। यथा "नन्वन्या श्रुतिः तृणजलौकावत् पूर्वदेहं न सञ्चरति यावन्न देहान्तरमाक्रमतीति दर्शयति। इति। तद्यथा तृणजलायूकेति, (तृणजलायूकाशब्दे दर्शिता) तत्राप्यपरिवेष्टितस्यैव जीवस्य कर्मोपस्थापितप्रतिपत्तव्यदेहविषयभावनादीर्घीभावमात्रं तृणजलूकयोपमीयत इत्यविरोधः। एवं श्रुत्युक्ते देहान्तरप्रतिपत्तिप्रकारे सति याः पुरुषमतिप्रभवाः कल्पनाः" इत्युपक्रमे 'ताः सर्वा एवानादर्तव्याः श्रुतिविरोधात्'। "नन्वेतद्देहं त्यक्त्वाऽग्निः सङ्गतस्य पराद्देहान्तरप्राप्तिरित्ययुक्तम्। यथा तृणजलायूका तृणान्तरं गत्वोत्वा पूर्वतृणं त्यजति तथा जीवो देहान्तरं गत्वोत्वा पूर्वदेहं त्यजतीति श्रुतिविरोधादिति शङ्कते नन्वेति। इदमेव कर्मोपस्थापितभाविदेहं देहोऽहमित्यादिभावनया गत्वोत्वा पूर्वदेहं त्यजतीति श्रुत्यर्थः। अतो न विरोधः, इति समाधत्ते, तत्रापीति भावनाया दीर्घभावो भाविदेहविषयत्वम्। घटाकाशवदुपहितो जीवः सूक्ष्मोपाधिगत्वा लोकान्तरं गच्छतीति पञ्चाग्निश्रुत्युक्तः प्रकारस्तद्विरोधादन्याः कल्पनाः अनादर्तव्या इत्यन्वयः" रत्नप्र०।

**तृणजाति** स्त्री तृणमेव जातिः। उलपादौ (खड़)।

**तृणज्योतिस्** न० तृणेषु मध्ये ज्योतिः ज्योतिश्चतः। रात्रौ प्रकाशवत्यां ज्योतिष्मत्यां लतायाम् शब्दार्थचि०।

**तृणता** स्त्री तृणमिव तायते ताय–किप्। १धनुषि तृणस्य भावः तल्। २तृणत्वे च मेदि०।

**तृणद्रुम** पु०तृणमिव द्रुमः असारत्वात्। १नारिकेले, २ताले, ३सुपाके, ४ताल्यां, ५केतक्यां, ६खर्जूरे, ७हिन्ताले, ८खर्जूर्यां च। "फलसङ्गमेते च हिन्तालसहितास्त्रयः (तालनारिकेलसुपाकाः)खर्जूरः केतकी तालो खर्जूरी च तृणद्रुमाः" अमरः।

**तृणधान्य** न० तृणमिव धान्यं अकृष्टोत्पन्नत्वात् शाक० त०। १नीवारे, अमरः २श्यामाकादौ च।

**तृणध्वज** पु०तृणेषु ध्वज इव। १तालवृक्षे २वंशवृक्षे च अमरः

**तृणनिम्ब** पु० तृणाकारः निम्बः। नेपालनिम्बे किराततिक्ते (चिराता) राजनि०।

**तृणप** पु० तृणं पाति -पा क। गन्धर्वभेदे। "युगपत्तृणपः काण्वैर्नन्दिचित्ररथस्तथा" भा०आ०१२३अ०। गन्धर्वौकसौ।

**तृणपञ्चमूल** न० तृणरूपाणां पञ्चानां मूलम्। कशेरुशररावाणकटकाल्पके पञ्चमूले वैद्यकम्। [राजनि०।

**तृणपत्रिका** स्त्री तृणस्येव पत्रमस्याः ठन्। इक्षुदर्भायां

**तृणपत्री** स्त्री तृणमिव पत्रमस्याः गौरा० ङीष्। गुण्ड्रागिन्यां राजनि०।

**तृणपदी** स्त्री तृणस्येव पादोऽस्याः अन्यलोपः कप्प० ङीषि पक्षावः। तृणतुल्यमूलयुक्तायां लतायाम्।

**तृणपीड** न० तृणस्येव पीड़ा यत्र। युद्धभेदे "तृणपीड़ं यथाकामं पूर्वयोगं सषष्टिकम्। एवमादीनि युद्धानि प्रकुर्वन्तो परस्परम्" भा० स० २२अ०।

**तृणपुष्प** न० तृणजातं पुष्पम्। तृणकद्रुमे १गन्धद्रव्यभेदे राजनि०। तृणमिव पुष्पमस्याः ङीप्। २सिन्दूरपुष्पीवृक्षे स्त्री राजनि०। [स्वार्थे क। तृणपुष्पिकाऽप्यत्र स्त्री मेदि०।

**तृणपुली** स्त्री तद्वन्निर्मिता पुली। चञ्चायां (चाँच) हारा०

**तृणमणि** पु० तृणपाहको मणिः शा० त०। तृणग्राहिणि मणिभेदे हारा०।

**तृणमत्कुण** पु० प्रतिभुवि (जामिन्) त्रिका०।

**तृणमय** त्रि० तृणस्य विकारः मया० मयट्। तृणविकारे "कुर्यात् तृणमयं चापं शरीतं खगशायिकाम्" भा० आ० १४५ अ०। स्त्रियां ङीप्। [तालवृक्षे अमरः।

**तृणराज** पु० तृणेषु राजते राज–अच् ह्रस्व० टच् समा०वा।

**तृणवल्वजा** स्त्री तृणरूपा वल्वजा। वल्वजायां राजनि०।

**तृणविन्दु** ऋषिभेदे "जवद्रुद्धेन पापेन यत् कृष्णा क्लेशिता

वने। यातेषु मृगयाङ्गैव तृणबिन्दोरथाश्रमम्" भा० श्र० ६२ अ०। "तृणबिन्दुप्रसादाच्च धौम्यस्य च महात्मनः" भा० वि० १३ अ०। "द्रौपदीमाश्रमे न्यस्य तृणबिन्दोरनुज्ञया" भा० व० २६३ अ०। "चरतः किल दुश्चरं तपः तृणबिन्दोः प्रतिगच्छितः पुरा" रघुः।

**तृणबिन्दुसरः** ६त०। तृणबिन्दोः ऋषेः सरोरूपे तीर्थे तत्स्नानं भारते उक्तं यथा "मरुभूमेः शिरः स्नानं तृणबिन्दुसरः प्रति" भा० द० २५७ अ०।

**तृणबीज** न० ६त०। श्यामाके धान्ये रत्नमा०।

**तृणभीत** न० तृणेषु भीतम्। १कुत्तृणे मन्दतृणे रत्नमा०। २जलपिप्पल्यां स्त्री राजनि०।

**तृणशून्य** न०१तृणमिव शून्यं फलरहितम्। केतकीपुष्पे २मल्लिकायाञ्च मेदि० तयोः फलरहितत्वात्तथात्वम्। तृणेन शून्यम्। २तृणरहिते त्रि०।

**तृणशूली** स्त्री तृणं शूलमिव तीक्ष्णाग्रं यस्याः गौरा०ङीष्। लतानेदे। "सुरक्षास्तृणशूल्याश्च सिन्धुवारस्य यानि च" (पुष्पाणि) सुश्रु०।

**तृणशोषक** पुंस्त्री तृणमपि शोषयति शुष्क-णिच्-ण्वुल् उप० स०। राजिमत्स्यभेदे। अक्षिगते ५८१ पृष्ठे दृश्यम्

**तृणशौण्डिका** स्त्री तृणेषु शौण्डिका। लघुकेतकीवृक्षे। शारस्करनिघण्टुः। [हारा०।

**तृणषट्पद** पु० तृणमिव षट्पदः। (गोधूम) वरोधे

**तृणसारा** स्त्री तृणस्येव सारोऽस्याः। १कदल्याम् हारा०। तस्याः सर्वस्याऽसारत्वात्तथात्वम्।

**तृणसिंह** पु० तृणे-सिंह इव। कुठारे शब्दार्थक०।

**तृणसोमाङ्गिरस** पु०दक्षिणदिक्स्थिते धर्मराजस्य ऋत्विग्भेदे "उशनुचः प्रसुचुर्यश्च स्रुस्थाले यश्च वीर्यवान्। दृढव्रतोर्द्ध्वबाहुश्च तृणसोमाङ्गिरास्तथा। मित्रावरुणयोः पुत्रस्तथाऽगस्त्यः प्रतापवान्। धर्मराजर्त्विजः सप्तदक्षिणां दिशमाश्रिताः भा० अनु० १५० अ०।

**तृणस्कन्द** तृणमिव स्कन्दति स्कन्द-क्विप्। तृणवच्छलनस्वभावे "तृणस्कन्दस्य तु विशः" मनुः १।१७२।२।

**तृणहर्म्य** पुंन०तृणव्याप्तो हर्म्यः। तृणव्याप्ते हर्म्ये हारा०

**तृणाङ्गिप** पु०तृणरूपोऽङ्घिपः। मन्थानतृणे राजनि०।

**तृणाग्नि** पु० तृणजातोऽग्निः शा० त०। तार्णे वह्नौ त्रिका०। "ब्राह्मणस्त्वनधीयानस्तृणाग्निरिव शाम्यति" मनुः।

**तृणाञ्जन** पु० तृणमिवाञ्जनः। कृकलासे त्रिका०।

**तृणाटवी** स्त्री तृणप्रचुराटवी। तृणमये वने हेम०।

**तृणाढ्य** न० तृणेषु आढ्यम्। पर्वतजाते तृणे राजनि०।

**तृणादि** पु० चतुरर्थां सप्तम्यर्थनिमित्ते शब्दगणे स च गणः पा० ग० सू० उक्तो यथा

"तृण, नड़, मूल, वन, पर्ण वर्ण, पराग, विल, पुल, फल, अर्जुन, अर्ण, सुवर्ण, वल, चरण, वसु."।

**तृणाम्ल** न० तृणेषु अम्लम्। तृणजन्यरसे राजनि०।

**तृणारणिन्याय** पु० तृणस्यारणेश्च वह्निजनने यथा परस्परनिरपेक्षतया कारणत्वमेवं स्वातन्त्र्येण कारणतासूचके न्यायभेदे।

**तृणावर्त्त** पु०तृणमावर्त्तयति भ्रमयति आ+वृत-णिच्-अण्। १वात्यारूपे वातसमूहे(घूर्णा)२तद्रूपजनभ्रामके असुरभेदे पु०

**तृणासृज्** न०तृणेषु असृगिव रक्तत्वात्। तृणकुङ्कुमे राजनि०

**तृणेक्षु** पु० तृणमिक्षुरिव मधुररसत्वात्। वल्लजायां राजनि०।

**तृणेन्द्र** पु० तृणमिन्द्र इव। तृणराजे तालवृक्षे। "फलीवल इति ख्यातो भविष्यति धराधरः। त्रिशिरास्तस्य देवस्य भ्रातृकृत्यमयोद्भुवः। ध्वजस्तृणेन्द्रो देवस्य भविष्यति रथाश्रितः" भा० आनु० १४७ अ०।

**तृणोत्तम** पु० तृणेषु उत्तमः। उत्तमे तृणे राजनि०।

**तृणोद्भव** पु० तृणेष्वुद्भवति उद्+भू-अच्। १शीवारे धान्यभेदे राजनि०। २तृणजाते वह्नौ च ३तज्जातमात्रे त्रि०।

**तृणोलका** स्त्री तृणजाता उल्का। तृणजायामुल्कायाम् "न हि तापयितुं शक्यं सागराम्भस्तृणोल्कया" हितो० "तृणोल्कया ज्वलते जातरूपं दक्षेण भक्तो व्यवहारेण साधुः" भा० उ० ३४ अ०। [घर)। हेमच०।

**तृणौकस्** न० तृणनिर्मितमौकः। तृणनिर्मिते गृहे (खड़ेर

**तृणौषध** न० तृणात्मकमौषधम्। एलवालुकाख्ये गन्धद्रव्ये शब्दच०।

**तृत्था** स्त्री तृणानां समूहः पाशा० य। तृणसमूहे।

**तृतीय** त्रि०त्रयाणां पूरणः त्रि+तीयच्। संप्रसारणञ्च। त्रयाणां पूरणे। "वाग्दण्डं प्रथमं कुर्यात् क्रियदण्डं तदनन्तरम्। तृतीयं धनदण्डं तु वधदण्डमतःपरम्" "मातुः प्रथमतः पिण्डं निर्वपेत् पुत्रिकासुतः। द्वितीयन्तु पितुस्तस्यास्तृतीयं तत्पितुः पितुः" मनुः।

**तृतीयक** पु० तृतीयेऽह्नि भवः रोगः कन्। तृतीयदिनभवे ज्वरभेदे स च "दिनमेकमतिक्रम्य यो भवेत् स तृतीयकः" इत्युक्तलक्षणः। "वातादिकत्वात् प्रवदन्ति तल्लक्षणं तृतीयकस्यापि चतुर्थकस्य" सुश्रुतः।

**तृतीयप्रकृति** स्त्री तृतीया प्रकृतिः प्रकारः। स्त्रीपुरुषा-

मेतया तृतीये प्रकारे नपुंसके अमरः। तत्र तृतीया-प्रकृतिरिति व्यस्तं पदं समस्तत्वे तृतीयप्रकृतिरित्येव स्यात् व्यस्तपाठं हृदा यज्ञकल्पद्रुमे तृतीयाप्रकृतिशब्दकल्पनं भ्रमादिकम्।

**तृतीययुगपर्य्यय** पु० तृतीयस्य युगस्य द्वापररूपस्य पर्य्ययः परिवर्त्तो यत्र काले। द्वापरयुगस्य परिवर्त्ताधारे कलिसम्बन्धरूपे काले "द्वापरे समनुप्राप्ते तृतीययुगपर्य्यये" भाग० १।४।१५ श्लो०। इतः परं किं भविष्यतीति द्वापरे सन्देहे जाते इत्यर्थः तेन न विरोधः।

**तृतीयसवन** न० क्रियते सोमोऽस्मिन् कर्म्म०। कालत्वे सवनत्रयोपेताग्निष्टोमादेः तृतीये सवने। तद्विधानादि ताण्ड्य० ब्रा० १।६।१७ भाष्ये उक्तं यथा "तृतीयसवनारम्भमादित्यग्रहमाचरेत्। आर्भवेण स्तुतीताथ पवित्रैः प्रचरत्यथ। सावित्रवैश्वदेवाख्यौ यद्दौ सौम्यचरुस्तथा। पात्नीवतग्रहाद्दूर्द्धं यज्ञायज्ञायसंस्रवः। अग्निमारुतशस्त्रं स्यात् स्तुहीयात् हारियोजनम्। समाप्ते सवने पश्चात् कुर्य्यादवभृथं ततः। कुर्य्यादुदयनीयेष्टिमनूबन्ध्यां यजेत गाम्। देविकानिर्ऋतेष्टेश्चसुवासापि यजुष्यथ। उपोह्य वेदिमाग्नेयमिष्टान्तिष्टोमसंस्थितिः" "प्रातः सवने नोक्थैः कर्माणि" कात्या० श्रौ० ६।६।१८ "प्रातः सवने यान्युक्थैः कर्माणि प्रैषोच्चारणादीनि तान्यपि प्रथमस्वरेणैव कार्य्याणि "मन्द्रं प्रातः सवने चरन्नीति" शाखान्तरात्। अतश्चाग्नीदग्नीन्धिच्छरेत्यादयः प्रैषा आश्रावणादयश्च प्रथमस्वरेणैव प्रयोक्तव्याः" कर्कः। "मध्यमेन माध्यन्दिने" १६ खण्ड० "माध्यन्दिने सवने यानि कर्माणि नीचैर्यानि चोच्चैस्तान्युभयान्यपि मध्यमेन स्वरेण कार्य्याणि शाखान्तरे तथा श्रवणात्" कर्कः। "उत्तमेन तृतीयसवने" २० खण्ड० "तृतीयसवने यानि नीचैर्यानि च मध्यमेन स्वरेण प्राप्नुवन्ति तानि सर्वाण्युत्तमेन तृतीयेनैव स्वरेण कार्य्याणि तथैव शाखान्तरे श्रुतत्वात्" कर्कः।

**तृतीया** स्त्री तृतीय+टाप्। १चन्द्रमण्डलस्य तृतीयकलाक्रियायां २तदुपलक्षिते कालभेदे च तत्र व्रतादिकालव्यवस्थादि तिथिशब्दे ३२६० पृ० दर्शितम्। जन्मनक्षत्रामेलया ३तृतीयहादशैकविंशात्मकनक्षत्ररूपविपत्तारायाञ्च।

**तृतीयाकृत** त्रि० तृतीय+डाच्+कृ-क्त। १त्रिगुणं कृते त्रिवारकृते खेलादौ।

**तृतीयाश्रम** पुंन० कर्म्म०। वानप्रस्थाश्रमे। "उपित्वैवं गृहे विप्रो द्वितीयादाश्रमात् परम्। वलीपलितसंयुक्त स्तृतीयन्तु समाश्रयेत्" संवर्त्तः।

**तृतीयिन्** त्रि० तृतीय+अस्त्यर्थे इनि। तृतीयभागार्हे। "सर्वेषामर्हिणो सख्यास्तदर्हेनार्हिणोऽपरे। तृतीयिन-स्तृतीयांशाच्चतुर्थांशाच्च पादिनः" मनुः। दक्षिणागोशततृतीयभागे।

**तृत्सु** त्रि० तृद्-बा० सुक्। हिंसके। "गव्या तृत्सुभ्यो अजगन्युधा नॄन्" ऋ० ७।१८।७। "तृत्सुभ्यो हिंसकेभ्यः"। भा० २राजर्षिभेदे "व्यानवस्य तृत्सवे गयम्" ऋ० ७।१८।१३। तृत्सुं राजर्षिभेदम्" भा०। [प्रतर्द्दनः।

**तृद** हिंसायां भ्वा० प०सक० सेट्। तर्द्दति अतर्दीत् ततर्द्द।

**तृद** अनादरे रु०उभ०सक०सेट्। तृणत्ति तृन्ते। इरित् अतर्दीत् अतृदत् अतर्द्दिष्ट। उदित् तर्द्दित्वा-तृत्वा। "भूतिं तृणद्मि यजमानस्य" भट्टिः "अतस्य श्लोको वधिरा ततर्द" ऋ० ४।२१।८ "ततर्द तरसा विष्णुर्बाणैः शत्रुबलार्द्दनैः" हरिवं० १३४ अ०। "सेहे कपीरथाक्षांश्च रिपोस्ततर्द शाखिना" "अतर्दीच्चैव शूलेन कुम्भकर्णः प्लवङ्गमान्" भट्टिः।

**तृदिल** त्रि० तृद्-बा०किलच्। १भेदके २भिन्ने च। "तृदिला अतृदिलासः" ऋ० १०।६४।११। "तृदिला भेदकाः अतृदिला अभिन्नाः" भा०।

**तृन्प(म्प)** प्रीणने तु० पर० सक० सेट्। तृपति तृम्पति अतृम्पीत् अतृपीत्। ततृम्प ततृप।

**तृन्फ(म्फ)** प्रीणने तु० प० सक० सेट्। तृफति तृम्फति अतृम्फीत् अतृफीत् ततृम्फ ततृफ।

**तृन्ह** हिंसे तु० प० सक०सेट् क्रा वेट्। तृंहति तृदित् अतृहत्। ततृंह ततृहतुः ततृंहुः।

**तृप** प्रीणने स्वा०पर०सक०सेट्। तृप्नोति अतर्पीत्। ततर्प।

**तृप** सन्दीपने प्रीणने च वा चुरा० उभ० पक्षे भ्वा० पर० सक०सेट्। तर्पयति ते तर्पति अततर्पत् त अतीतृपत् त। अतर्पीत्। ततर्प ततर्पिथ।

**तृप** प्रीणने दि०पर० सक०वेट् इरित्। तृप्यति अतर्पीत् अतार्प्सीत्-अतार्पसीत्-अतृपत्। ततर्प।

**तृप** प्रीणने तु० पर० सक० सेट्। तृपति अतर्पीत्। "तृपत्सोमं पाहि" ऋ० २।११।१५।

**तृपत** पु० तृप। चन्द्रे उणादि०। [संक्षिप्तसा०।

**तृपाना** स्त्री तृप-कानच्। १लतायाम् २उषा०।

**तृपल** न०तृप-कलच्। १उपले प्रकारे। "अपां तमन्युस्तृपलप-

भर्मा" ऋ० १०।८८।५ । तृपलप्रभर्मा यास्कादिभिः क्षिप्रप्रहारी" भा० । २त्रिफलायाञ्च।

तृप्त त्रि० तृप--क्त । १तृप्तियुक्ते । "नित्यं तृप्ता गृहेयस्य देवायज्ञस्य धर्मतः" भा०व०५८अ०। "स्वागतेनात्मवस्तृप्ता आसनेन शतक्रतुः। पितरः पादशौचेन स्निग्धानेन गृहो यतिः" पु० ।

तृप्ति त्रि० तृप--क्तिन् । भोजनादिना यथाकाङ्क्षितानिवृत्तौ "वार्धीणसस्य मांसेन तृप्तिर्द्वादशवार्षिकी" मनुः "तस्यालमेषा क्षुधितस्य तृप्त्यै" रघुः।

तृप्तिमत् त्रि०मुखा०अस्त्यर्थे इनि तृप्तमनेन इष्टादि० इनि वा। १तृप्तियुक्ते स्त्रियां ङीप्। २उदके निघण्टुः।

तृप्नु त्रि० तृप--क्नु । तृप्तिशीले ।

तृप्र पु०तृप--रक् । १पुरोडाशे उज्ज्वलदः। २तर्पके त्रि० "न यं शुक्रो न इराशीर्न तृप्राः" ऋ० ८।२।५ "तृप्रास्तर्पकाः" भा० ३दुःखे न० ततः अस्मिन्नर्थे आलु। तृप्रालु तदस्मिन्नर्थे। "तृप्रं दुःखमिति माधवः" सि०कौ० । ४हते न० उणादि० ।

तृफ प्रीणने तुदा० पर० सक० सेट् । तृफति ततर्फीत् । ततर्फ । तृफतेरपि कलच् इत्युज्ज्वलदत्तः । दुर्गादासस्तु अयं सुचादित्वभ्रान्त्या तृम्फतीत्युदाजहार । तच्चिन्त्यं पा० सुचादिमध्ये तृफधातोरनुत्कीर्त्तनात् उज्ज्वलदत्तेन तृफते रिति निर्देशाच्च । सुचादयश्च सि०कौ०।५६२ आदौ द्रष्टव्याः । तृम्फादिग्रन्थे द्रष्टव्यः ।

तृफला स्त्री तृफ-कलच्। त्रिफलायाम् उज्ज्वलदः।

तृफू स्त्री तृफ--कू । खर्परजातौ उणादि० ।

तृम्फादि "तृनृफ तनृफ तॄनृफ दनृफ धनृफ गुनृफ उनृफ शुनृफ" पा० धातुपाठोक्ते धातुगणभेदे ।

तृष तृष्णायां दिवा०पर०सक०सेट् । तृष्यति इरित् अतृषत् अतर्षीत् । ततर्ष । "तृषित्वेवानिशं स्वादु पिबन्तं सरितां पयः" । "समूर्ज्जुर्वेवमूरक्षं सतृषुर्गोभवे भटाः" "रक्षमन्नोतिषुः क्षुधाः क्षताश्च कपयोऽतृषन्" भट्टिः ।

तृष(षा) स्त्री तृष--सम्प०क्विप् वा टाप्। १आकाङ्क्षायां २पिपासायां ३कामकन्यायाञ्च शब्दर०। ४लाङ्गलीवृक्षे शब्दच० "लोभो जनयते तृषां तृषार्त्तो दुःखमाप्नोति" हितोप० । "कृपा हि मे समुत्पन्ना त्वां दृष्ट्वा तृट्समाश्रितम्" भा० आश्व०५५ अ०। "न हन्ति मण्डूककुलं तृषाकुलः" ऋतु० ।

तृषाभू स्त्री ६त०। तृष्णाधारे लोमनि शब्दच०तृष्णाशब्दे चरकवाक्ये लोमकतृल्यानत्वं दृश्यम्। [(मौरी)स्त्री शब्दच०

तृषाह न० तृषां हन्ति हन--ड। १जले २मधुरिकायां

तृषित त्रि०तृषा जातास्य तार०इतच्। १तृष्णान्विते हेमच० "तृषितान्याददे भोक्तुं रूपमांसानि वै भृशम्" हरिवं० ८२अ० । [शब्दच० ।

तृषितोत्तरा स्त्री तृषित उत्तरः यस्याः । अशनपर्य्यायभेदे

तृषु न० तृ--उरु--वा सुक् पृषो० । १क्षिप्रे निघण्टुः। २तर्हति त्रि० स्त्रियामुदन्तगुणवचनत्वात् ङीप्। "तृषीमतु प्रसितिं दूणानोऽस्यक्षि" ऋ० ४।४।१ । "तृषिति क्षिप्रनाम भरतेर्वा त्वरतेर्वा निरु०" भा० । "तृषु यदद्रा तृषुणा" ऋ० ४।७।११ ।

तृष्ट त्रि० तृष--क्त वेदे वा० इडभावः । १दाहजनके "तृष्टमेतत् कटुकमेतत्" ऋ० १०।८५।३४ । "तृष्टं दाहजनकम्" भा० ।

तृष्टामा स्त्री तृष्टं दाहमयति गमयति यम णिच्--अच् टाप् १नद्याम् "तृष्टामया प्रवणे यातवे" ऋ०१०।७५।६ । "तृष्टामया नद्या" भा० ।

तृष्णज् त्रि० तृष नजिङ् । १लुब्धे अमरः । "असिद्वैधु वसं गोतमाय तृष्णजे" ऋ० १।८५।११ ।

तृष्णा स्त्री०तृष न किच्च । १पिपासायां, २लोभे, ३अप्राप्ताभिलाषे च अमरः ४रोगभेदे । तच्चिदाशादि भावप्र० उक्तं यथा

"भयश्रमाभ्यां बलसङ्क्षयाद्वा अर्द्धं चितं पित्तविवर्द्धनैश्च । पित्तं सवातं कुपितं नराणां तालुप्रपद्यं जनयेत् पिपासाम् । स्रोतःस्वपांवाहिषु दूषितेषु दोषैश्च तृट् सप्तभवतीह जन्तोः । तिस्रः क्षतासृक्क्षतजा चतुर्थी क्षयात्तथान्यामयसङ्गजा च । भुक्तोल्बणा शस्त्रविषेति तासां विशेष विज्ञान्यनुपूर्वशस्तु" । नराणां चितं स्वस्थान एव सञ्चितं पित्तं सवातं पित्तविवर्द्धनैः कटूष्णादिभिः कुपितम् । भयश्रमाभ्यां बलसङ्क्षयादुपवासादेश्च वातः कुपितः । तद्द्वयं अर्द्धं प्रसरत् तालुप्रपद्यं सत् पिपासां जनयेत् । न केवलं तालुन्येव दूषिते तृष्णा भवति किन्तु जलवाहिस्रोतःस्वपि । यत आह । स्रोतः स्वित्यादि । नन्वत्र बहुवचनमयुक्तम् । यतो जलवहे द्वे स्रोतसी श्रुततेनोक्ते । उच्यते । तयोरेवानेकप्रतायोगाच्च दोषः । अपांवाहिषु स्रोतःस्विति जिह्वादेरथ्वनश्चग्रहणम् । यत आह चरकः । "रसवाहिन्यौ धमनीर्जिह्वाहृदयगलतालुस्रोम च । संशोष्य नृणां देहे कुरुतस्तृष्णामतिबलौ पित्तानिलाविति" । सङ्क्षयाच्च तिस्र "इत्यादि । तृष्णायाः सामान्यं लक्षणमाह ।

"सततं यं पिबेत्तोयं न तृप्तिमधिगच्छति। तृड्डः काङ्क्षति तोयन्तु तं तृष्णार्हितमादिशेत्। वातजायाञ्चाह। ज्ञामाशुता मारुतसम्भवायां तोदस्तदा शङ्खशिरःसु चापि। स्रोतोनिरोधो विरसञ्च वक्त्रं शीताभिरद्भिश्च विहन्यमेति"। शङ्खशिरःसु शङ्खयोः शिरसि च। स्रोतो निरोधः। पित्तजामाह "मूर्च्छाभ्रविद्वेषविलापदाहरक्तैश्चयत्वं प्रततञ्च शोषः। शीताभिनन्दो सुखतिक्तता च पित्तात्मिकायां परिशूषनञ्च"। विलापः प्रलापः प्रततञ्च शोषः अविरतञ्च शोषः। शीताभिनन्दः शीतेच्छा। परिशूषनं कण्ठाद्यभिनिर्गम इव। कफजामाह। "वाय्वावरोधात् कफसंहतेऽग्नौ तृष्णा बलासेन भवेन्नरस्य। निद्रागुरुत्वं मधुरास्यता च तयार्दितः शुष्यति चातिमात्रम्"। अग्नौ जठराग्नौ। कफसंहते सकारेण कुपितेन कफेनोपरिष्टादाच्छादिते। वाय्वावरोधात् अग्नेरुभ्यावरोधात्। अवरुद्धानलोष्माम्बुवहस्रोतःशोषणात् बलासेन कफेन नरस्य तृष्णा भवेत्। तया तृष्णया अर्दितः पीड़ितः शुष्यति क्षयो भवति। क्षतजामाह। "क्षतस्य रक्तशोणितनिर्गमाभ्यां तृष्णा क्षतार्त्तौ क्षतजा मता तु"। क्षतस्य शस्त्रादिक्षतयुक्तस्य। रक्तं पीड़ा। क्षयजामाह। "रसक्षयाद्वा क्षयसम्भवा वा सा तत्राभिभूतस्तु निशादिनेषु। पेपीयतेऽम्भः स सुखं न याति तां सन्निपातादिति केचिदाहुः। रसक्षयोक्तानि च लक्षणानि तस्यामशेषेण भिषग् व्यवस्येत्"। रसक्षयलक्षणानि सुश्रुतेनोक्तानि "रसक्षये हृत्पीड़ा कम्पः शोषः शून्यता तृष्णा चेति"। व्यवस्येत् जानीयात्। कामजामाह। "त्रिदोषविक्लामससङ्गवा च दुश्छर्दनिर्दोषनसादकर्त्री"। भुक्तोद्भवामाह। "स्निग्धं तथाम्लं लवणञ्च भुक्तं गुर्वञ्च सेवासु तृषां करोति"। लवणञ्चेति चकारात् कटु च। उपसर्गजामाह "क्षीणस्वरः प्रताम्यं दीनाननहृदयशुष्कगलतालुः। भवति खलु सोपसर्गात् तृष्णा सा शोषिणी कष्टा"। शोषिणी धातुशोषिणी। उपसर्गानाह। "ज्वरमोहक्षयः श्वासो वाधिर्य्यं कास एव च। बहिर्निर्गतजिह्वत्वं सप्तैते तदुपद्रवाः"। तदुपद्रवायां अरिष्टत्वमाह "ज्वरमोहक्षयकासश्वासाद्युपद्रुतदेहिनाम्। सर्वास्वतिप्रसक्तारोग क्षयाणां वमिप्रसक्तानाम्। घोरोपद्रवयुक्तासृष्णा मरणाय विनिर्देशेत्"। आदिशब्दादतीसारादीनां ग्रहणम्। अतिप्रसक्ताः निरन्तराः। घोरोपद्रवयुक्ताः अतीव सुखशोषादियुताः।

तृष्णाशब्दस्य वस्त्रीशब्देन द्वन्द्वे उभयपदे प्रकृतिस्वरः।

**तृष्णाक्षय** पु० तृष्णायाः क्षयो यत्र। १शान्तिगुणे क्षेमच०। २तं०। ३पिपासानाशे च।

**तृष्णारि** पु० ३तं०। १पर्पटे राजनि०। २तृष्णानाशके च।

**तृष्णालु** त्रि० तृष्णा+अस्त्यर्थे आलु। तृष्णायुक्ते। "तृष्णालुर्भवति पूतनास्टहीतः" सुश्रु०।

**तृष्य** त्रि०तृष-ऋदुपधत्वात् क्यप्। १लोभ्ये २एषणीये। भावे क्यप्। ३लोभे न०। तृष्यमस्त्रस्य मतुपि वेदे दीर्घः। तृष्यावत्। तृष्णायुक्ते। "अध्यर्धौत्तृष्यावतः प्राङ्तृष्यागतायाम्" ऋ०७।१०२।३। तृष्यावतस्तृष्णायतः" भा०।

**तृह** हिंसे तु० पर० सक०वेट्। तृंहति अतर्हीत् अतृहत्।

**तृह** हिंसे वा चु० उ० पक्षे रुधा० पर० सक० वेट्। तर्हयति ते तर्हेदि अततर्हत् त अतीतृहत् त अतर्हीत् अतृहत्। "तृंहतु रामः सह लक्ष्मणेन" भट्टिः।

**तॄ** तरणे प्लवने अभिभवे च भ्वा० प० सक० सेट्। तरति अतारीत्। ततार। "तरति ब्रह्महत्यां योऽश्वमेधेन यजते" तरति शोकमात्मविदु" श्रुतिः शत०ब्रा०१४।७।१।२२ "ततार तारापिपक्षक्षधारी" कुमा० "क्रमेण तस्मिन्नव तीर्थदक्षपथे" नैष०। तेरतुः। तरीतरिता तरि(री)ष्यति। तीर्यात्। तरीतुं तरितुं तीर्त्वा तीर्यते। तारयति तितीर्षति। "तितीर्षुर्दुस्तरं मोहात्" रघुः। "ताञ्च तर्तुं प्रयच्छामीत्यत्रार्षः रुडभावः। अति+अतिक्रम्य गमने। "स्वर्गानतितरन्ति ते" स्मृतौ०। "न यस्य कश्चातितितर्त्ति मायाम्" भाग०८।५।३०। यङ्लुङोरूपम्।

वि+अति+विशेषेण अतिक्रमे। "यदा ते मोहकलिलं बुद्धिर्व्यतितरिष्यति" गीता। [नीम्" भा० द्रो० २८०।

अभि+उल्लङ्घने। "कथं नाभ्यतरामस्तां पारुष्यवानमनीकिनम्" रामा०

अव+अवतरणे। "अथोरुदेशादवतार्य्य पादम्" कुमा०। अवतारः। "अवतरतः सिद्धिपरं शब्दस्य मनोरथस्य वा" मालविकाग्नि०।

उद्+उत्प्लवने अक०। "सपल्लवोत्तीर्णवराहयूथम्" रघुः। उल्लङ्घने सक०। "उदतारीदुदन्वन्तम्" "उदतारिषुरम्भोधिम्" भट्टिः। [१५६६ श्लो०।

निस्+निःशेषेण तरणे। "कथञ्च निस्तरेयाहम्" भा०व० वि+दाने। "तडिल्लेखालक्ष्मीर्वितरति पताकावलिरियम्" "ज्योत्स्ना शङ्कामिव वितरति" १ किरा०।

सम्+सम्यक् तरणे (सँतार देओया)।

तेजस्तम-वा०डे ।१त्वेत्वर्थे त्रिका०।२गौर्यां तेनशब्देऽग्रम्

तेगा स्त्री तिज-घञि च जस्य गः। अप्रसिद्धदेवताभेदे ।"शादं दद्भिरवकां दन्तमूलैर्हदं वर्त्तेत्तेगां दंष्ट्राभ्याम्" यजु० २५।१। "हेगां देवतां शादयोऽप्रसिद्धा देवाः आदित्यादयः प्रसिद्धाः देवाः" वेददीपः। [अतेजीत् । तितेज ।

तेज निशाने पालने च भ्वा० पर० अक० सेट् । तेजति

तेज:फल न० तेजसे फलमस्य तेजः फलति-फल अच् वा । (तेजबल) द्रव्यभेदे "तेजःफलः कटुस्तीक्ष्णः सुगन्धिर्दीपनो मतः । वातश्लेष्मरुचिघ्नश्च बालरञ्जकरः स्मृत इति" भावप्र० ।

तेजन पु० तेजयति शस्त्रमनेन वा तिज-णिच्-ल्यु । १वंशे २सञ्जे च अमरः संज्ञायां कन् । ३शराभिधे तृणे, करणे ल्युट् । ङीष् । ४मूर्वायां, ५ज्योतिष्मत्यान्च स्त्री ङीष् । राजनि० । ६शस्त्रे अमरः ।

तेजपत्र न०तेजयति तिज-णिच्-अच् तेजं पत्रमस्य ।(तेजपात) ख्याते द्रव्यभेदे । "तेजपत्रं वराङ्गं स्यात् त्वचं चोचं तथोत्कटम् । त्वचं लघुष्णं कटुकं स्यात् तिक्तञ्च रूक्षकम् । पित्तलं कफवातघ्नं कण्ठामारुचिनाशनम् । हृद्धस्तिरोगवातार्शःक्रिमिपोनसशुक्रकृत्" भावप्र० ।

तेजल पु० तिज-करणे कलच् । कपिञ्जलपक्षिणि राजनि० ।

तैजस् त० तिज-भावे करणादौ वा अञ् । १दीप्तौ २प्रभावे ३पराक्रमे ४रेतसि च मेदि० । ५देहजकान्तौ ६नवनीते ७वङ्गे च हेमच० । ८सुवर्णे ९मज्जनि १०पित्ते च राजनि० । सा०द० उक्ते सात्विके अधिक्षेपापमानादेरसहनरूपे ११नायकगुणभेदे यथा

"शोभा विलासो माधुर्य्यं स्थाम्नीर्य्यं धैर्य्यं तेजसी । ललितौदार्य्यमित्यष्टौ सत्त्वजाः पौरुषा गुणाः" इत्युद्दिश्य "अधिक्षेपापमानादेः प्रयुक्तस्य परेण यत् । प्राणात्ययेऽप्यसहनं तत्तेजः सत्त्वदाहृतम्" सा०द० लक्षितम् । १२सारे "रसादीनां शुक्रान्तानां धातूनां यत्परं तेजस्तत् खल्वोजस्तदेव बलमित्युच्यते" सुश्रु० १३प्रागल्भ्ये १४पराभिभवसामर्थ्ये । १५परैरनभिभाव्यत्वे । १६अप्रतिहतात्मत्वे । १७चैतन्यात्मके ज्योतिषि ।१८स्त्रीबालकादिभिर्दुर्बलैरनभिभाव्यत्वे । १९सत्त्वगुणजाते त्रिकूटदेहे । २०हयवंगे । "तेजोनाम दर्शापरनामा सत्त्वगुणविकारः प्रकाशकोऽन्तःसारविशेषः । यथाह भोजराजः "तेजोनिसर्गजं सत्त्वं वाग्मिनां स्फुरणं रजः । क्रोधस्तम इति प्रोक्तास्तयोऽपि सहजा गुणाः" । तच्च द्विविधम् । सततोत्थितं भयोत्थितञ्चेति । यथाह स एव "धारासु योजितानाञ्च निसर्गात् प्रेरणं विना । अवच्छिन्नमिवाभाति तत् तेजःसततोत्थितम् । कषापादादिघातैर्यत् साध्वसात् स्फुरितन्तु तदिति" । शब्दस्पर्शतन्मात्र सहितात्भूतन्मात्रादुत्पन्ने शब्दस्पर्शरूपगुणे २।तृतीये महाभूते । यथा "तृतीयं ज्योतिरित्याहुश्चक्षुरध्यात्मसञ्ज्ञितं । अधिभूतं ततो रूपं सूर्य्यस्तत्राधिदैवतम्" भा०आश्व० उष्णस्पर्शवत्तेजः। "तदपि द्विविधम् । नित्यमनित्यञ्च । नित्यं परमाणुरूपम् । अनित्यं कार्य्यरूपम् । पुनस्त्रिविधम् । शरीरेन्द्रियविषयभेदात् । शरीरमादित्यलोके । इन्द्रियं रूपग्राहकं चक्षुः कृष्णतारायवर्त्ति विषयस्तत्त्रिविधः। भौमदिव्योदर्य्याकरजभेदात् । भौमं वह्न्यादिकम् । अयोनिजं दिव्यं विद्युदादि । भुक्ताद्यस्य परिणामहेतुरौदर्यम् । आकरजं सुवर्णादि" तर्कसंग्रहः "स्पर्शे उष्णस्तेजसस्तु स्याद्रूपं शुक्लभास्वरम् । नैमित्तिकं द्रव्यवन्तं नित्यतादि च पूर्ववत् । इन्द्रियं नयनं यद्विस्पर्शादिविषयोमतः" इति भाषाप० ।

उपचारात् २२तेजस्विनि च । "त्रीणि तेजांसि नोच्छिष्ट आलभेत कदाचन" "अग्निं गां ब्राह्मणं चैव" भा० आनु०५०।७ श्लो० । स्वपरप्रकाशकं तेजः अन्धकारविरोधि तच्चक्षुश्च शुक्लभास्वरूपसमानाधिकरणद्रव्यत्वव्याप्यजातिमत्त्वम् । तेजसो गुणादिकमग्निशब्दे ४८ पृ० दृश्यम् । "सामानाधिकरण्यं हि तेजस्त्विमरयोः कृतः" माघः । भुक्ततेजसः कार्य्यञ्च आ० त० दर्शितं "तेजोऽग्नितं त्रेधा विधीयते तस्य यः स्थविष्ठो धातुस्तदस्थि भवति यो मध्यमं स मज्जा योऽणिष्ठः सा वाक् ।"अन्नमयं हि सौम्य ! मन आपोमयः प्राणस्तेजोमयी वागिति च" तेजोभूतञ्च वायुकार्य्यमयं कारणञ्च । यथोक्तं "अद्भिः सौम्य ! शुङ्गेन तेजोमूलमन्विच्छ" छा० श्रुतिः २३रजोगुणे तैजसशब्दे दृश्यम् तेजसा निर्वृत्तः अण् तेजोजन्ये त्रि० । तेजस्+अस्यर्थे विनि । तेजस्विन् मतुप् मस्य वः तेजस्वत् । तेजोविशिष्टे त्रि० स्त्रियां सर्व्वत्र ङीप् । तैजसी तेजस्विनी तेजस्वती । २४ वीर्य्ये च । [द्रव्ये स्त्रियां ङीप् ।

तेजस्कर त्रि० तेजः करोति कृ-खेलादौ ट । तेजोहेतौ

तेजस्य त्रि० तेजसि साधु यत् । तेजःसाधने "यावाभिन्द्रावरुणा सहसा रक्षसा तेजसा तनूः" तै०स०२।३।१२।१ ।

तेजस्वत् त्रि० तेजस+अस्यर्थे मतुप् मस्य वः । तेजोयुक्ते

"तेजस्वदस्तु सख्यम्" तैत्ति० १।७।७।२। स्त्रियां ङीप्। सा च २गजपिप्पल्यां शब्दरत्ना० ३चविकायां रत्नमाला ४महाज्योतिष्मत्यां राजनि०। अत्र संज्ञात्वेन सान्तत्वात् मस्य पदत्वाभावे तेजोवतीत्यपि तत्रार्थे।

**तेजस्विन्** त्रि० तेजस्+अस्त्यर्थे विनि। तेजोयुक्ते "तेजस्विमध्ये तेजस्वी दवीयानपि गण्यते" माघः। स्त्रियां ङीप्। सा च २ज्योतिष्मतीलतायां शब्दर०। ३महाज्योतिष्मतीलतायाम् राजनि०। "तेजोस्विनी कफश्वासकासाऽऽस्यामयवातहृत्। पाचन्युष्णा कटुस्तिक्तारुचिवह्निप्रदीपनी" भावप्र०।

**तेजित** त्रि० तिज-णिच्-क्त। शाणितेतीक्ष्णीकृते अमरः

**तेजिष्ठ** त्रि० तेजस्विन्+अतिशये इष्ठन् विनेर्लुकि डिद्भावः। अतिशयेन तेजस्विनि। "तेजस्विया तिथिस्वस्य वर्तनी" रघु०१।५३।८।

**तेजीयस्** त्रि० तेजस्विन्+अतिशये ईयसुन् विनेर्लुकि डिद्भावः। अतितेजस्विनि। "तेजीयसां न दोषाय वह्नेः सर्वभुजो यथा" भाग० १०।३३।२९। स्त्रियां ङीप्।

**तेजेयु** पु०रौद्राश्वस्य पुत्रभेदे। "रौद्राश्वस्य मरुेय्यासा दशाप्सरसि सम्मताः" इत्युपक्रमे। "तेजेयुर्बलवान् धीमान् सत्येयुरेन्द्रविक्रमः" भा० आ० ९४ अ०।

**तेजोनाथ** तीर्थभेदे शिवपु० दृश्यम्। [रत्नमा०।

**तेजोमन्थ** पु०तेजो मथ्नाति मन्थ-अण्। मक्षिकारिकायाम्।

**तेजोमय** त्रि० तेजस्+प्रचुरार्थे विकारे वा मयट्। १तेजःप्रचुरे २तेजोविकारे ३ज्योतिर्मये च। स्त्रियां ङीप्। "तेजोमयी वाक्" इति ऋ०७ श्रुतिः। "तस्य तेजोमया लोका भवन्ति ब्रह्मवादिनः" मनुः।

**तेजोमात्रा** स्त्री तेजसां सत्त्वगुणानां मात्रांऽशः। इन्द्रियेषु भूतानां सात्त्विकांशेभ्य एव तेषामुत्पत्तिः सांख्यसिद्धा।

**तेजोमूर्ति** पु० तेजस्तेजस्वती मूर्तिर्यस्य। १सूर्ये २तेजआत्मके ३तेजःप्रचुरे च त्रि०। "स गच्छति परं स्थानं तेजोमूर्त्तिपथर्जुना" मनुः।

**तेजोरूप** न० तेजः सर्वप्रकाशकं चैतन्यं रूपं स्वरूपं यस्य। ज्योतीरूपे प्रकाशात्मके ब्रह्मणि "अशरीरं विप्रवदिन्द्रियवदतीन्द्रियम्। यदसाधि सर्वसाधि तेजोरूपं नमाम्यहम्" ब्रह्मवै० पु०। ६त०। २तेजसो रूपे च अभिधेये तद्रूपं दर्शितम्।

**तेजोवत्** त्रि०तेजस्+अस्त्यर्थे मतुप् मस्य वः वा०न पदत्वम्। तेजोयुक्ते स्त्रियां ङीप्। सा च (तेजस्वत्)शब्दोक्तार्थेषु।

"तेजोवता लोकगणेन सार्द्धम्" मत्स्यपु०।अग्न्याधानमन्त्रः।

**तेजोविन्दु** पु०उपनिषद्भेदे उपनिषच्छब्दे दृश्यम्।[राजनि०।

**तेजोवृक्ष** पु० तेजोयुक्तः वृक्षः शा० त०। क्षुद्राग्निमन्थद्रुमे

**तेजोवृत्त** न० तेजसः वीर्य्यस्यानुरूपं वृत्तम्। वीर्य्यानुरूपचरिते। "इन्द्राग्नार्कस्य वायोश्च यमस्य वरुणस्य च। चन्द्राग्न्योः पृथिव्याश्च तेजोवृत्तं नृपश्चरेत्" मनुः।

**तेजोह्वा** स्त्री तेजः ह्वयते स्पर्द्धते ह्वे-क। तेजस्विन्यां लतायाम् भावप्र०। "कम्पिल्लकं सिन्दूरं तेजोह्वा तत्फलाह्वये" शब्द०। [२। "तेदनीं देवतां प्रीयामि" वेददी०।

**तेदनी** स्त्री देवताभेदे "तेदनीमधरकराटेनापः" यजु० २५।

**तेन** अ०तद्+वा०एन ।१तद्धेतुनेत्यर्थे भरतः। ते इति न इति शब्दौ यत्र। २गानाङ्गभेदे पु०। "तेनेति शब्दस्तेनः स्यान्मङ्गलानां प्रदर्शकः। तेशब्देनोच्यते गौरी नशब्देनोच्यते हरः। तेन माङ्गलिकत्वायं शब्दस्तेन इति स्मृतः" सङ्गी० दा०।

**तेप** कम्पे, च्युतौ च भ्वा० आ० अक० सेट्। तेपते अतेपिष्ट। तितेपे। कदित्। अतितेपत् त।

**तेम** पु० तिम-घञ्। आर्द्रीभावे। अमरः।

**तेमन** न०तिम-ल्युट्।१आर्द्रीकरणे। कर्मणि ल्युट्।२व्यञ्जने। अमरः। आधारे ल्युट् ङीप्। ३चूल्लीभेदे हेमच०।

**तेलु** पु०नृपभेदे ततः राजन्या०विषये देशे वुञ्। तैलवक तेलुनृपविषये देशे। [तितेवे। कदित् अतितेवत् त।

**तेव** क्रीड़ने भ्वा० आ० अक० सेट्। तेवते अतेविष्ट।

**तेवन** न०तेव-भावे ल्युट्। १क्रीड़ायाम्। आधारे ल्युट्। २केलिकानने हेमच०।

**तैङ** पु०तिङां व्याख्यानः ग्रन्थः अण्। तिङां व्याख्याने ग्रन्थे

**तैजस** न० तेजसो विकारः अण्। १इन्द्रिये, २धातुद्रव्यमात्रे च। सांख्योक्ते ३रजोगुणोत्पन्ने त्रि०। "वैकारः सात्विको नाम तैजसः राजसः स्मृतः। भूतादिस्तामसस्तेऽपि पृथक् तत्त्वान्यवासृजन्" पदार्थादर्शधृतवाक्यम्।

"सात्विक एकादशकः प्रवर्त्तते वैकृतादहङ्कारात्। भूतादेस्तन्मात्रः स तामसस्तैजसादुभयम्" सा०का०। "ननु यदि सत्वतमोभ्यामेव सर्वं कार्य्यं जन्यते तदा कृतमकिञ्चित्करेण रजसेत्यत आह तैजसादुभयं तैजसात् राजसादुभयं ग्रहणद्वयं भवति। यद्यपि रजसो न कार्य्यान्तरमस्ति तथापि सत्वतमसी स्वयं क्रियासमर्थे अपि न स्वस्वकार्य्यं कुरुतः रजस्तु चलतया ते यदा चालयति तदा स्वस्वकार्य्यं कुरुत इति तदुभयस्मिन्नपि कार्य्ये सत्वतमसोः

क्रियोत्पादनद्वारेणास्ति रजसः कारणत्वमिति न व्यर्थं रजं दतित०कौ०। तिज निशाने इत्यस्मादसुन् तेन तेजसा क्षतः तैजसः रजसश्च सत्वतमसोः स्वस्वतेजस्कार्य्यसमर्थत्वकरणरूपतैक्ष्ण्यकरणगुणयोगात् तेजःपदाभिधेयता इति तदाशयः "तैजसादिन्द्रियाण्यासन्" भा०ति०। सत्त्वगुणस्य प्रकाशकत्वात् "तैजसमन्तःकरणमिति" वेदान्तप०। ४तीर्थभेदे न०। "तैजसं नाम तत्तीर्थं यत्र तीर्थैश्चापां पतिः। अभिषिक्तः सुरगणैर्वरुणो भरतर्षभ!" भा०श०४७ अ० एतद्ग्रन्थपठितं चैतन्यं तैजसो भवति। तेजोमयान्तःकरणोपहितत्वात्" वेदान्तसारोक्ते ५चैतन्यभेदेपु०।

तैजसावर्त्तनी स्त्री तैजसं धातुद्रव्यमावर्त्यतेऽत्र आ-वृत णिच्-आधारे ल्युट् ङीप्। मूषायाम्।(सुची) अमरः

तैतल पु० ऋषिभेदे ततः तिका० अपत्ये फिञ्। तैतलायनि तदपत्ये पुंस्त्री।

तैतिक्त त्रि०तितिक्षा शीलमस्य ऋतादि० ष्ण। तितिक्षाशीले।

तैतिल्य पुंस्त्री० तितिलस्य ऋषिभेदस्य गोत्रापत्यं गर्गा० यञ्। तितिल्यर्षिगोत्रापत्ये तस्य छात्राः कण्वा० अण यञो लोपः। तैतिल्याः तैतिल्यस्य छात्रेषु ब०य०।

तैतिर पुंस्त्री० तैत्तिर पृषो०। (तितिर) खगे राजनि०। स्त्रियां ङीप्।

तैतिल पु० १गण्डूकपशौ। २ववादितत्वतर्षे करणे न० मेदि०। ३देवे च। "अक्लिन्नदग्धेन दानेनावाधितधरणीतलतैतिलगणः" दशकु०। तैतिलशब्दस्य कद्रूशब्देन समासे पूर्वपदप्रकृतिस्वरः।

तैतिलिन् पु० गोत्रप्रवर्त्तकर्षिगणस्यप्रवरभेदे।

तैत्तिर न० तित्तिरीणां समूह अण्। तित्तिरखगसमूहे। तित्तिर+स्वार्थे अण्।(तितिर)खगभेदे पुंस्त्री राजनि०। गण्डूकपशौ च मेदि०।

तैत्तिरि पु० कुक्कुरवंश्यऋषभेदे। "कुक्कुरस्य सुतो धृष्णुर्धृष्णोऽस्तु तनयस्तथा। "कपोतरोमा तस्यापतैत्तिरिस्तनयोऽभवत्"। हरिव० ३८अ०। २ऋषिभेदे। आद्याः कठस्तैत्तिरिश्च वैशम्पायनपूर्वजः" भा० आ० ३१८ अ०। ३कृष्णयजुःप्रवर्त्तके ऋषिभेदे।

तैत्तिरीय पु०ब०व०तित्तिरिणा प्रोक्तमधीयते छ। १तित्तिरिप्रोक्तशाखाध्येतृषु स्वार्थे क। तैत्तिरीयकास्तत्रार्थे। यजुःशाखाभेदे। तच्छाखानिरुक्तिः यथा।

"देवरातसुतः सोऽपि छर्दित्वा यजुषां गणम्। ततो गतोऽथ तनयोदद्यशस्तान् यजुर्गणान्। यजूंषि तित्तिराभूत्वा तच्छेलुपतया ददुः। तैत्तिरीया इति यजुःशाखा[ऽभवन् सुमेधसाः" भाग० १२।

तैन्तिडीक त्रि० तिन्तीड्या संस्कृतम् कोपधत्वात् अण्। तिन्तिड्याःसंस्कृतव्यञ्जनादौ। तस्य विकारः कोपधत्वात् अण्। २तिन्तिड्याविकारे च।

तैमिर तिमिरमेव अण्। नेत्ररोगभेदे "ऐमं हन्यात्तैमिरकान्ध्यकाचान् नीलीरोगं तैमिराञ्जनेन" सुश्रु०। तैमिरो रोगोऽस्यास्य ठन् तैमिरिकः। तिमिररोगयुक्ते। "न वामयेत्तैमिरिकोर्द्ध्ववातगुल्मोदरप्लीहकृमिश्रमार्त्तान्" सुश्रु०। "तैमिरिका इवादूरदर्शिनम्" काद०।

तैर न० तीरे भवः अण्। कूलस्थे राजनि०।

तैरणी स्त्री तीरे नमति नम-वा०ड ततः स्वार्थे अण् गौरा० ङीष्। कुनीलिकायां रागदे लुपभेदे।[तिर्यग्जातिसम्बन्धिनि

तैरश्च त्रि०तिरश्चामिदम् तिर्यञ्च अण्+भत्वात् तिरश्चादेशः।

तैर्थ त्रि० तीर्थं दीयते कार्य्यं वा व्युष्टा० अण्। १तीर्थे देये २तीर्थकार्य्ये च तीर्थात् आयस्थानादागतः शुल्कादा० अण्। तीर्थरूपायस्थानादागते द्रव्यादौ च।

तैर्थक त्रि० तीर्थं देशे भवः ध्मा० वुञ्। तीर्थदेशभवे।

तैर्थिक त्रि० तीर्थं सिद्धान्तनिष्ठयं नित्यमर्हति ठेदा० ठञ्। १तीर्थसिद्धान्ताभिज्ञे शास्त्रकरे कपिलकणादादौ तीर्थं वेत्ति ठञ् वा।२सिद्धान्ताभिज्ञे। तीर्थं भवः ठञ्।३तीर्थभवे। "तैर्थिकाभुञ्जते यत्तु मघिनागरू" भा०श०८५ श्लो०।

तैर्य त्रि० तीर्थ+चतुरर्थ्यां सङ्घा० यञ्। तीर्थसमीपादौ।

तैर्यग्योनिक त्रि० तिरश्चामयनं सत्वभेदः तदेव ठञ्। सत्वभेदे। "अष्टादशभिर्व्वर्षैरादित्यः संवत्सर एव तैर्यग्योनिको भवति। आदित्यः खलु शब्देकदा यच्छमासानुदङ्डेति नव चाहानि तच्छा दक्षिणा" श्रुतिः।

तैर्यग्योन त्रि० तिर्यग्योनेरिदम्+अण्। तिर्यग्योनीनां पश्वादीनां सम्बन्धिनि सर्गभेदे।

"अष्टविकल्पो दैवस्तैर्य्यग्योनश्च पञ्चधा भवति। मानुष्यश्चैकविधः समासतो भौतिकः सर्गः" सा० का० तैर्य्यग्योनश्च पञ्चधा भवति पशुमृगपक्षिसरीसृपस्थावराख्यः" त० कौ०। तत्र भवः अण्। तद्योनिभवे।"निन्द्यत्वमेतन्मन्त्रं तैर्य्यग्योनास्तथैव च" मनुः।

तैल न०तिलस्य तत्सदृशस्य वा विकारः अञ्। तिलवर्षाद्यजनिते स्नेहद्रव्यभेदे। तल्लक्षणादिकं भावप्र० उक्तं यथा "तिलादिस्निग्धवस्तूनां स्नेहस्तैलमुदाहृतम्। तच्च वातहरं सर्वं विशेषात्तिलसम्भवम्। अथ तिलतैलगुणाः

"तिलतैलं गुरु स्थैर्य्यबलवर्णकरं सरम्। हृद्यं विकाशि विशदं मधुरं रसपाकयोः। सूक्ष्मं कषायानुरसं तिक्तं वातकफापहम्। वीर्य्येणोष्णं हिमं स्पर्शे दंहणं रक्तपित्तजित्। लेखनं बद्धविण्मूत्रं मर्म्माक्षिविशोधनम्। दीपनं बुद्धिदं मेध्यं व्यवायि व्रणमेहजित्। श्रोत्रयोनिशिरःशूलनाशनं लघुताकरम्। त्वच्यं केश्यञ्च चक्षुष्यमभ्यङ्गे भोजनेऽन्यथा। छिन्नभिन्नच्युतोत्पिष्टमथितक्षतपिच्छिले। भग्नस्फुटितविद्राधिदग्धविच्छिन्नदारिते। तथाभिहितनिर्भुग्ने मृगव्याघ्रादिविक्षते। वस्तौ पाने ऽन्नसंस्कारे नस्ये कर्णाक्षिपूरणे। सेकाभ्यङ्गावगाहेषु तिलतैलं प्रशस्यते"। ननु दंहण लेखनयोः कथं सामानाधिकरण्यमित्यत आह। "रूक्षादिदृष्टः पवनः स्रोतः सङ्कोचयेद्यदा। रसोऽसम्यक्वहन् कार्य्यं कृत्वादृक्षादयद्वयन्। तेषु प्रवेष्टुं सरता सौक्ष्म्यात् स्निग्धत्वमार्दवैः। तैलं क्षमं रसं नेतुं क्षणानां तेनदंहणम्। व्यवायि सूक्ष्मतीक्ष्णोष्ण सरत्वैर्मेदसः क्षयम्। अनैः प्रकुरुते तेलं तेन लेखनमीरितम्। द्रुतं पुरीषं वस्राति स्खलितं तत्प्रवर्त्तयेत्। यावूकं सारकत्वापि तेन तैलन्तदीरितम्। एतस्मादुत्तरं पक्वं हीनवीर्य्यं प्रजायते। तैलं पक्वमपक्वं वा चिरस्थायि गुणाधिकम्"। सर्षपतैलगुणाः। "दीपनं सार्षपं तैलं कटुपाकरसं लघु। लेखनं सर्व्वतीक्ष्णोष्णं तीक्ष्णं पित्तासृदूषकम्। कफमेदोऽनिलार्शोघ्नं शिरःकर्णामयापहम्। कण्डूकुष्ठक्षित्रिवित्रकोठदुष्टव्रणमपनुत्"।

राजिकातैलगुणाः "तद्वद्राजिकयोस्तैलं विशेषान्मूत्रकृच्छ्रजित्"। राजिकयोः (क्षारारई) (आरकारई) द्वयोः। तुवरी(तोरी)तैलगुणाः "तीक्ष्णोष्णं तुवरीतैलं लघु यावि कफापहम्। वह्निकृद्विषनुत्कण्डूकुष्ठकोठक्रिमिप्रणुत्। मेदोदोषापहञ्चापि व्रणशोथहरं परम्"। अतसीतैलगुणाः "अतसीतैलमाग्नेयं स्निग्धोष्णं कफपित्तजित्। कटुपाकमचक्षुष्यं बल्यं वातहरं गुरु। मलकृद्वृसतः स्वादु यावि त्वग्दोषनुद्व्रणम्। वस्तौ पाने तथाभ्यङ्गे नस्ये कर्णस्य पूरणे। अनुपानविधौ चापि प्रयोज्यं वातशान्तये। वररोः तैलगुणाः "कुसुम्भतैलमम्लं स्यादुष्णं गुरुविदाहि च। चक्षुष्यमहितं बल्यं रक्तपित्तकफप्रदम्। खश (खाखस) बीजतैलस्य गुणाः। "तैलं तु खसबीजानां बल्यं हृद्यं गुरु स्मृतम्। वातदूषकदूषीतं स्वादुपाकरसं च तत्"। एरण्डतैलगुणाः "एरण्डतैलं तीक्ष्णोष्णं दीपनं पित्तिलं गुरु। हृद्यं त्वच्यं वयःस्थापि मेधाकान्तिबलप्रदम्। कषायानुरसं सूक्ष्मं योनिशुक्रविशोधनम्। विपक्वं स्वादु रसे पाके सतिक्तं कटुकं सरम्। विषमज्वरहृद्रोगगुल्मशूलादिशूलनुत्। श्लीपदानाहगुल्माष्ठीलाकटीपृष्ठजान्। वातशोणितविड्बन्धव्रणशोथाग्निविद्रधीन्। श्वासबातगजेन्द्रस्य शरीरवनचारिणः। एक एव निहन्त्यमेरण्डश्चैकेश्वरी"। राजतैलगुणाः "तैलं सर्ज्जरसोद्भूतं विस्फोटव्रणनाशनम्। कुष्ठपामक्रिमिहरं वातश्लेष्मामयापहम्"। सर्व्वतैलगुणाः "तैलं स्वयोनिगुणकृद्वान्यतैलाधिकं मतम्। अतःशेषस्य तैलस्य गुणास्तेषामयोनिवत्"। "प्रातः स्नाने व्रते श्राद्धे द्वादश्यां पर्व्वणे तथा। मद्यलेपसमं तैलं तस्मात्तैलं विवर्जयेत्" कर्म्मलोचन०। "एतच्च सार्षपं तैलं यत्तैलं पुष्पवासितम्। यद्दृष्टं पक्वतैलञ्च तैलाभ्यङ्गे च नित्यशः" तिथ्या० त० वारिधेये तैलपर्व्वफलं यथा।

"अर्के नूनं दहति हृदयं कीर्त्तिलाभश्च सोमे भौमे मृत्युर्भवति नियतं चन्द्रजे पुत्रलाभः। अर्थस्थानिर्भवति च गुरौ भार्गवे शोकयुक्तस्तैलाभ्यङ्गात्तनयमरणं सूर्य्यजे दीर्घमायुः" ज्यो०त०। "एतादृशगुणं तैलं मर्दयेद्य तु खादयेत्" वैद्यक०। कल्पे कनू। तैलक खल्पतैले न०।

**तैलकन्द** पं०तिलस्यायम् अण् तैलः तिलसम्बन्धी कन्द इव कन्दोऽस्य। तिलपिष्टपत्रके वृक्षभेदे "तैलकन्दः कटूष्णश्च लौहदाहकरोमतः। भास्तापक्षारविषशोफनाशकरश्च सः। रसस्य बन्धकारी च देहगुप्तिकरस्तथा" राजनि०

**तैलकल्कज** पु०तैलात् तिलसम्बन्धिनः कल्काज्जायते जनड। तिलकल्कजाते (तैलेर काट) तैलकिट्टे राजनि०।

**तैलकार** पु० तैलं करोति कृ-अण् (तेली) (कलु) इति प्रसिद्धे वर्णसङ्करे चाक्रिके तैलिनि। स च कोटकस्त्रीगर्भे कृष्णकाराज्जातः सङ्कीर्णजातिभेदः ब्रह्मवै०ब्रह्मख०

**तैलकिट्ट** न० ६त०। तैलमले (काट) इति ख्याते।

**तैलकीट** पु० कीटभेदे राजनि०।

**तैलक्य** न० तिलस्य भावादौ पुरोहि० यक्। तिलकभावे।

**तैलङ्ग** पु०"श्रीशैलं तु समारभ्य चोलेशान्मध्यभागतः। तैलङ्गदेशो देवेशीयुक्ते १देशे। २तत्रस्थे जने ब०व०। शब्दरत्ना०

**तैलचोरिका** स्त्री तैलं चोरयति चुर-ण्वुल् पृषो०। तैलपायिकायाम् (तेलाघोका)। पृषो०। तैलचौरिकाशब्दे।

**तैलद्रोणी** तैलपूर्णा द्रोणी शा०त०। "कण्ठपर्य्यन्तमज्जनार्थं

तैलपूर्ण काष्ठादिनिर्मिते पात्रविशेषे । अत्रावस्थितिगुणाः । वातरोगव्याधिकुष्ठरोगपङ्गुत्वाधिर्यान्धिन्यनगद्गदत्वक्लैब्यस्तब्धपृष्ठग्रचलितपवनगलत्कम्पकपाटीशीर्षाभङ्गापतन्त्रजयरुधिरभवमूलकच्छ्रवस्तिरोगेषु हितत्वमिति" राजवल्लभः ।

तैलधान्य न० तैलोपयोगि धान्यं सतृणं शस्यम् । "तिलोऽतसी च तोरी (डी) च त्रिविधश्चापि सर्षपः । द्विधा राजी खसश्चैव बीजं कौसुम्भसम्भवम् । एतानि तैलधान्यानीत्युक्तेषु तिलादिषु ।

तैलपक्व पु० तैलं पिबति पा–क स्वार्थे क । तैलपायिकाख्ये पक्षयुक्ते कीटे । तैलहरणे तत्प्रातिग्राह्यिमनुनोक्ता यथा "मांसं मद्यौषधं मद्यं तैलं तैलपकः खगः" [भावप्र०।

तैलपर्णक पु० तैलाक्तमिव पर्णमस्य कप् । सन्धिपर्णवृक्षे

तैलपर्णिक न० तैलपर्णो गिरिभेद उत्पत्तिस्थानत्वेनास्यस्य ठन् तैलाक्तं पर्णमस्यस्य ठन् वा । १हरिचन्दने अमरः । तिलपर्णः इव उत्पत्तिस्थानत्वेनास्यस्य ठन् । २चन्दनभेदे ।

तैलपर्णी स्त्री तिलपर्णो गिरिस्तत्र भवः अण् ङीप् ।१चन्दने २श्रीवासे ३सिल्हके च मेदि० । स्वार्थे क । तैलपर्णिका तत्रार्थे । "कालियकादुकुलाच्च हिङ्गुपत्रैलपर्णिकाः" हरिवं० २३१अ० । [राजनि० ।

तैलपा स्त्री तैलं पिबति पा–क । (तेलापोका) कीटभेदे ।

तैलपायिका स्त्री पा–ण्वुल् इत्व० । (तेलापोका) (आरशुला) कीटभेदे अमरः।

तैलपायिन् पु० तैलं पिबति पा–णिनि । तैलपायिकाख्ये पक्षयुक्ते कीटभेदे । "तैलक्षुत् तैलपायी स्यात्" याज्ञ०।

तैलपिपीलिका स्त्री तैलाक्तेव पिपीलिका । पिपिलीकाभेदे

तैलपीत त्रि० पीतं तैलं येन व्याहि०परनि० । पीततैलके ।

तैलफल पु० तैलं फले यस्य । इक्षुदीक्षे राजनि० ।

तैलभाविनी स्त्री तैलं भावयति वासयति भू–णिनि ङीप् । तैलवासके जातीपुष्पवृक्षे राजनि०।

तैलमाली स्त्री तैलेन मालः सम्बन्धो यस्याः गौरा० ङीष् । वर्त्तिकायां दीपदशायां यष्टिमाला ।

तैलम्पाता स्त्री तिलस्य पातोऽत्र अ नि०सुम् च । १स्रुधायाम्, २तदुपलक्षिते श्राद्धे च अमरः ।

तैलयन्त्र पु० तैलमर्हमार्थं यन्त्रम् । तिलादिनिष्पीड़नार्थे यन्त्रभेदे (कलुचघानि) "अणीमांस्यानि शौचानि तैलयन्त्रेक्षुयन्त्रयोः" स्मृतिः "रविरथचक्रं च तैलयन्त्रचक्रवत् भ्रमत्" भागवते ५।२१।१६ श्लोकः ।

तैलवक पु० तेलुन्दस्य विषयो देशः राजन्या० वुञ् । तेलुन्दविषये देशे । [रनिच० ।

तैलवल्ली स्त्री तैलाक्तेव वल्ली । लघुशतावर्य्यां पारस्क-

तैलसाधन न० तैलं साधयति सुरभीकरोति सिध–णिच् साधि–ल्यु । कङ्कोले गन्धद्रव्ये शब्दच० । [भेदे हेमच० ।

तैलस्फटिक पु० तैलाक्तः स्फटिक इव । हरिमण्यौ गो-

तैलस्यन्दा स्त्री तैलमिव स्यन्दति स्यन्द–अच् । १श्वेतगोकर्ण्यां २काकोल्यां पारस्करनिघण्टुः ।

तैलागुरु पु० तैलाक्तमिवागुरु । दाहागुरौ राजनि० ।

तैलाटी स्त्री अटति अट तैलेनाटं विषमस्याः गौरा० ङीष् । वरटायां तैलस्पर्शे तद्विषनाशात् तस्याः तथात्वम् ।

तैलाम्बुका स्त्री तैलमम्बु इव मेयमस्याः । तैलपायिकाख्ये कीटे जटा० ।

तैलिक त्रि० तैलं पण्यं यस्य तैलं शिल्पमस्य वा ठक् । २तैलार्थं तिलनिष्पीड़ने (कलु) "खलमलिननीचतैलिकविक्रीमसत्त्वोपहतपुंस्त्वा" ह०स०१६अ० । २तैलविक्रेतरि च "सत्यङ्गामी वन्दी च तैलिकः कूटकारकः" मनुः तिलविक्रेतरपाङ्क्तेयत्वञ्च ।

तैलिन् त्रि० तैलं निष्पाद्यत्वेनास्यस्य इनि । १तैलकारे हेमच०।२तैलयुक्ते त्रि० । स्त्रियां ङीप् ङीबन्तः। ३तैलकीटे राजनि० ४दशायां वर्त्तौ शब्दमा० । [हेम० ।

तैलिशाला स्त्री ह्रस्व० तैलनिष्पीड़नार्थे गृहे (घानिघर)

तैलीन तिलानां भवनं क्षेत्रं खञ् । तिलभवनयोग्ये क्षेत्रे अमरः । [तत्सम्बन्धिनि स्त्रियां ङीप् ।

तैव्रदारव त्रि० तीव्रदारुणदृढम् रजता० अञ् । तीव्रदारुसम्बन्धिनि

तैष पु० तिष्यनक्षत्रयुक्ता पौर्णमासी अस्मिन् यस्मिन् ङीप् । तौषी साऽस्मिन् मासे अण् ।१पौषे मासि धनुःस्थरव्यारब्धे शुक्लप्रतिपदादिदर्शान्ते चान्द्रे मासि अमरः तदीय पूर्णिमायामेव तद्योगसम्भवः । तिष्यशब्देन तत्समीपनक्षत्रस्यापि ग्रहणात् कदाचित् तत्सम्बन्धाभावेऽपि न क्षतिः।२तदीयपौर्णमास्यां स्त्री "सास्मिन् पौर्णमासी" पा० नक्षत्रयुक्तकालस्य पूर्णिमायामेव तद्योगे साधुत्वेन पौर्णमासीपरत्वमेवेति बोध्यम् । "तैष्या नधीतपूर्वाम्" याज्ञ० श्रौ० ८।१४।२२ ।

तोक न० तौ–क तस्य नेत्त्वम् । १अपत्ये पुत्रे, दुहितरि च अमरः। "तिल्ये तोके दीदिवांसम्" २।२।११ "पश्ये तोकाय तनयाय जीवसे" ऋ० १०।३५।१२ "तोकेन

जीवङ्करणं यदुलूकिकायास्त्रैमासिकस्य च पदा शकटोऽपहृतः" भाग० २।७।२८।

तोक्म पु० तक्क स्पृशो० अत ओत्वम्। हरिद्वर्णे अपक्वयवे अमरः। २हरिद्वर्णे हेमच०। ३कर्णमले न० हेम०। ४मेघे पु० अजयपालः। ५नवप्ररूढे यवे यवाङ्कुरे न०। "प्रायणीयस्य तोक्मानि" यजु० १६।१३। "तोक्मानि नवप्ररूढयवाः" वेददी०। "पत्रपुष्पफलच्छायामूलवल्कलदारुभिः। गन्धनिर्यासभस्मास्थितोक्मैः कामान् वितन्वते भाग०१०।२२।२५ "तोक्माः पक्वयवाङ्कुराः" श्रीधरः तेन हृतदर्थेऽपि च।

तोक्मन् न० तक्क-मनिन् स्पृशो० अत ओत्वम्। नवविरूढयवे २अपत्ये न० निघण्टुः। "मेषजं तोक्मभिः" यजु० २१। ३०। "तोक्मभिर्जाजैर्मेहःखलः" यजु० २१।४२।

तोटक न० द्वादशाक्षरपादके छन्दोभेदे। "इह तोटकमम्बुधिसैः प्रथितम्" छन्दः०। [ऋदित्। णिच् अतएडत्त।

तोड अनादरे भ्वा० पर० सक० सेट्। तोड़ति अतोडीत्।

तोड़ल न० तन्त्रभेदे।

तोतस् अव्य० तु-बा० तसि। १कुत्से २स्वयीत्वर्थे च। "मा वयं रायस्पोषेणवियौष्म तोतो रायः" यजु०४।२२। तोतः शब्दः कुत्सवाची अव्ययम्। तोतः कुत्से रायो धनानि पशवो वा पदरूपेण तिष्ठन्तु। यद्वाऽव्ययानामनेकार्थत्वात्तोतः शब्दो युष्मत्पर्यायः। तोतः त्वयि रायः सन्तु" वेददी०।

तोड़न न० तुड-भावे ल्युट्। १भेदने २दारणे ३हिंसने च।

तोड़ो(रो) स्त्री तुड़-अच् गौरा० ङीष् वा डस्य रः। स्वनामख्याते तैलसाधने धान्यभेदे। [अमरः।

तोत्त्र न०तुद्यतेऽनेन तुद-करणे ष्ट्रन्। गवादितोदने दण्डे

तोद पु० तुद-भावे घञ्। व्यथायां रत्नमाला। "हीनदन्ते तोदकण्डूजाड्यानि व्याधिवद्विच" सुश्रु०। "दंशे तोदकण्डूपादुर्भावैजौनोयात्" सुश्रु०। कर्त्तरि अच्। २व्यथके त्रि०। "तोदो वातस्य हर्योरीशानः" ऋ० ४।१६।११। "तोदस्तोदकः" भा०।

तोदन न०तुद्यतेऽनेन करणे ल्युट्। १तुण्डे सुखे अमरः। भावे ल्युट्। २व्यथायाम् मेदि०। कर्त्तरि ल्यु। ३व्यथके त्रि०। "कषायं मधुरं रूक्षं तोदनं कफपातजित्" सुश्रु०। ४क्षीरिवृक्षभेदे पु०। "क्षीरद्रुफलजाम्बवराजादनतोदनतिन्दुकबकुलधन्वनाम्रजम्बूकाम्रकार्श्यफल्गुपरूषकगाङ्गेरुकीपुष्करपर्णिबिल्वबिम्बीप्रभृतीनि। फलान्येतानि शीतानि कफपित्तहराणि च। संग्राहकाणि रूक्षाणि कषायमधुराणि च" सुश्रु०।

तोदपर्णी स्त्री तोदं तोदकं पर्णमस्याः गौरा० ङीष्। कुत्सिते धान्यभेदे।

"कोरदूषकश्यामाकनीवारश्यामतुवरकोद्दालकप्रियङ्गुमधूलिकानान्दीमुखकुरविन्दगवेधुकवरकतोदपर्णीं सकुन्दकवेणुयवप्रभृतयः कुधान्यविशेषाः" सुश्रु०।

तोमर पुंन० तु-विच् तौमेतो म्रियतेऽनेन मृ-करणे अप्। १कुसचेष्टे शस्त्रभेदे दण्डाकारेऽस्त्रभेदे (रायफल) अमरः। तोमरलक्षणं हेमा०प०लक्षणसमुच्चये उक्तं यथा। औशनसधनुर्वेदे। "शुक्रो भगवानुवाच जमदग्निं प्रति वत्स! निबोध यथाग्रसुच्यमानम् तत्र दण्डान्वितं सर्वलौहं वेति तोमरं द्विविधं भवति। तच्च तोमरं सदण्डं लक्ष्यायतं भवेत् तोमरं सर्वायसं तद्धार्य्यं प्रयोजयेत्। तच्च निकृष्टमध्यमोत्तमं भूयस्त्रिविधं प्रमाणतो भवति तत्र चतुर्हस्तप्रमाणं निकृष्टं सार्द्धचतुर्हस्तं मध्यमं पञ्चहस्तप्रमाणं तूत्तमं भवति। तथा कलनायां चाद्यं द्वितीयं तृतीयं चेति त्रिधा द्व्यङ्गुलमध्ये द्व्यङ्गुलकलितमेकं स्थानमध्यात्पूर्वं त्र्यङ्गुलकलितं द्वितीयं स्यात्। मध्यात्पूर्वं षड्ङ्गुलकलितस्थानकलनया तृतीयं स्यात्। सार्द्धमेकं निकृष्टं, त्रयोमध्यमं षड्ङ्गुलं कलनायास्तथा तोमरास्त्रस्य परिणाहः परः षड्ङ्गुलो भवति सार्द्धपञ्चाङ्गुलो मध्यमः पञ्चाङ्गुलः कनिष्ठ इति। त्रयाणां देशानां त्रयः छन्दाः। छादनात्तथा यावन्तोभागधो दाक्षिण्यात्यक्षेति। तत्रावन्त्यतोमरं तक्षणसंस्थानं भवति मागधं तोमरं योनिसंस्थानं भवति दाक्षिण्यात्यं तोमरं वृत्तं भवति। तेषां सुखानि तद्देशाच्छन्दतः इति इत्यादि। २नवाक्षरपादके छन्दोभेदे "प्रथमं सकं विनिधाय जगणद्वयञ्च निधाय। कुरु तोमरं सुखकारि फणिराजवल्लविहारि" तल्लक्षणम्। [भरतस्याष्टमि।

तोमरग्रह पु० तोमरं गृह्णाति ग्रह-अच् न षत्वं। तोमरधारके योद्धरि।

तोमरधर पु० तोमरमस्त्रं धरति धृ-अच्। वह्नौ शब्दार्थक०

तोमरिका स्त्री तोमर+संज्ञायां कन्। खाडक्याम् शब्दर०

तोय न० सौ०तु-विच् तवे पूर्त्तौ याति या क। १जले २पूर्वाषाढानक्षत्रे च। "अद्भ्य मेघैस्ततः एव तोयम्" माधः। "मृत्तोयैः शुध्यते शोध्यं नदीवेगेन शुध्यति" मनुः। पूर्वाषाढानक्षत्रस्य जलदैवतत्वात् तथात्वम्। ३चन्द्राधिष्ठितचतुर्थस्थाने च ज्यो० त०। तत्र जलस्य चिन्तनीयत्वात् तथात्वम्।

तोयकर्मन् न० तोयेन कर्म । तर्पणे "तोयकर्मणि चारब्धे राज्ञाखड्गदानिके" भा०शा०१अ० ।

तोयकाम पु० तोयं कामयते कम-अण् । १जलवेतसे जटाधरः । २जलाभिलाषुके त्रि० ।

तोयकुम्भ पु० तोयस्य कुम्भ इव । शैवाले पारस्करनिघण्टुः ।

तोयकृच्छ्र न० जलमात्रपानरूपे माससाध्ये व्रतभेदे ।

"यदा तु बिल्वानि फलानि प्रत्येकं क्वथितानि मासमश्नीयात् तदा फलकृच्छ्रादिव्यपदेशं लभते । यथाह मार्कण्डेयः "फलैर्मासेन कथितः फलकृच्छ्रो मनीषिभिः । श्रीकृच्छ्रः श्रीफलैः प्रोक्तः पद्माद्यैरपरस्तथा । मासेनाम्मलकैरेवं श्रीकृच्छ्रमपरं स्मृतम् । पत्रैर्मतः पत्रकृच्छ्रः पुष्पैस्तत्कृच्छ्र उच्यते । मूलकृच्छ्रःस्मृतोमूलैस्तोयकृच्छ्रो जलेन तु" इति । "इति पर्णकृच्छ्रमेकादशविधम्" मिता० ।

तोयडिम्भ पु० तोयस्य डिम्भ इव । १मेघोपले करकायां हारा० ।

तोयद पु० तोयं ददाति दा+क । १मेघे, २मुस्तके च । ३घृते न० मेदि० । ४विधिना जलदातरि त्रि० । "तोयदस्तृप्तिमाप्नोति" पुरा० । तद्दानमाहात्म्यं भा० शा० दानधर्मे यथा

"अन्ने दत्ते नरेणेह प्राणा दत्ता भवन्त्युत । प्राणदानाद्धि परमं न दानमिह विद्यते । अन्नं वापि प्रभवति पानीयात् कुरुसत्तम ! । नीरजातेन हि विना न किञ्चित् संप्रवर्त्तते । अन्नौषध्यो महाराज ! वीरुधश्च जलोद्भवाः । यतः प्राणभृतां प्राणाः सम्भवन्ति विशाम्पते ! । तस्मात् पानीयदानाद्धि परं विद्यते क्वचित् । तच्च दद्यान्नरोनित्यं यदीच्छेद् भूतिमात्मनः । धन्यं यशस्यमायुष्यं जलदानमिहोच्यते । अतः शान्त्यधि कौन्तेय ! सदा तिष्ठति तोयदः । सर्वकामानवाप्नोति कीर्त्तिञ्चैवेह शाश्वतीम् । प्रेत्य चानन्त्यमश्नाति पापेभ्यश्च प्रमुच्यते । तोयदो मनुजव्याघ्र ! स्वर्गं गत्वा महाद्युते ! । अक्षयान् समवाप्नोति लोकानित्यब्रवीन् मनुरिति" ।

तोयधर पु० तोयं धरति धृ-अच् । १मेघे मेदि० २मुस्तके च "नौका इवातपात्यये तोयं तोयधरा घनाः" रामा० बा० ६३ अ० ।

तोयधार पु० तोयानां धारा यत्र । १मेघे २मुस्तके च । धारि-भावे अच् । तोयस्य धारः वर्षणम् । ३जलवर्षणे पु० । "घनवत्तोयधारेण ववर्ष कनकाम्बुभिः" हरिवं० ११२अ० । ४तन्तौ स्त्री । "शरान् व्यसृजतां शीघ्रं तोयधारा घना इव" भा०वि० १२अ० । "गिरिः प्रस्रवण इव तोयधारा" रामा० आ० २५ सु० ।

तोयधि पु० तोयानि धीयन्तेऽत्र धा-कि उप०स० । १समुद्रे जलधिप्रभृतयोऽप्यत्र । २चतुःसंख्यायाञ्च । "समनाम्नोरुमध्यात् तु तुल्यो भागेषु तोयधेः" सु० सि० ।

तोयधिप्रिय न० तोयधिं प्रीणाति प्री-क । १लवङ्गे शब्दच० ।

तोयनिधि पु० तोयं निधीयतेऽस्मिन् नि+धा-कि उप०स० । १समुद्रे २चतुःसंख्यायाञ्च । "पूर्वापरौ तोयनिधी वगाह्य" कुमा० ।

तोयनिवी स्त्री तोयं समुद्रोदकं नीवीव यस्याः खार्थे न कप् । १पृथिव्यां "तोयनीव्याः पतिं भूमेरभ्यषिञ्चद्गजाङ्गदे" भाग० ९।१५।२८। लोके तु कप् तोयनीविका तत्रार्थे । [नाड्यास्याम् अमरः।

तोयपिप्पली स्त्री तोये पिप्पलीव । (काँचड़ा) शाकभेदे

तोयपुष्पी स्त्री तोयेन बहुजलदानेन पुष्पाण्यस्याः । १पाटलावृक्षे शब्दमाला ।

तोयप्रसादन पु० तोयं प्रसादयति फलयोगेन प्र+सद्-णिच्-ल्यु । १कतके (निर्मालि) । फलपरत्वे न० रत्नमाला "तोयप्रसादकाम्बुप्रसादकादयोऽप्यत्र "फलं कतकवृक्षस्य यद्यम्बुप्रसादकम्" मनुः ।

तोयफला स्त्री तोयप्रधानं फलं यस्याः । १दर्व्यां कर्कटीभेदे राजनि० । [२मुस्तके च ।

तोयमुच् पु० तोयं मुञ्चति मुच-क्विप् दुक् । १जलमुचि मेघे

तोययन्त्र न० ष० त० क्लृप्ते कालज्ञानार्थे घटीयन्त्रभेदे घटीयन्त्रशब्दे २७८१ पृ० दृश्यम् । (फोआरा) इति ख्याते २जलयन्त्रभेदे च ।

तोयराज् पु०तोयेषु राजते राज-क्विप् । १समुद्रे "यदीच्छेत् सागरः किञ्चिदुत्सृष्टमिह तोयराट्" हरिवं०२२६अ०।२वरुणे च

तोयराशि पु० तोयानां राशिरिव । १समुद्रे । दुक् त० । २जलसमूहे च "तोयराशिसमप्यापि तृष्णां संवर्द्धयति" कादं० । [रत्नमा० । स्वार्थे क । तोयराशिकाप्यत्र ।

तोयवल्ली स्त्री तोयसञ्चिञ्चितस्थाने वल्ली । १कारवेल्ले (उच्चे)

तोयशुक्तिका स्त्री तोयजाता शुक्तिका श०त० । जलशुक्तिकायां राजनि० ।

तोयशूक पु० तोयस्य शूक इव । शैवाले पार० नि० ।

तोयसूचक पुंस्त्री० तोयं तोयवर्षं सूचयति रवेश सूच-ण्वुल् । १मेघे शब्दार्थक० । स्त्रियां जातित्वात् ङीष् । २जलवर्षणसूचके योगभेदे त्रि० । जलशब्दे १०६५ पृ० दृश्यम् ।

**तोयविम्ब** न० तोयोत्थितं बिम्बम् अर्द्धडिम्बाकारं वस्तु। जलबिम्बे जलोपरिभासमाने अर्द्धगोलाकारे पदार्थे। अयं शब्दः तोयबुद्बुदशब्दात् परं पाठ्यः।

**तोयात्मन्** पु० तोयमात्मा स्वरूपं यस्य तत्प्रकृतित्वात्। १परमेश्वरे। "यस्य केशेषु जीमूताः। नद्यः सर्वाङ्गसन्धिषु कुक्षौ समुद्राश्चत्वारस्तस्मै तोयात्मने नमः" विष्णुस्तुतिः।

**तोयाधार** पु० ६त०। १जलाशये। जलाशयोत्सर्गशब्दे ३०७५ पृ० तद्भेदादि दृश्यम्। "तोयाधारपथाश्च वल्कलशिखा-निष्यन्दरेखाङ्किताः" शकु०।

**तोयाधिवासिनी** स्त्री तोयं तोयार्हं देशमधिवसति अधि+वस-णिनि ङीप्। पाटलाहृक्षे रत्नमाला।

**तोयेश** पु० ६त०। १वरुणे तदधिदेवताके २शतभिषानक्षत्रे च। तोयं जलमधिदेवोऽस्य। ३पूर्वभाद्रानक्षत्रे न०।

**तोरण** पुंन०। तुर-युच आधारे ल्युट् तोलयत्यनेन तुल-उन्माने करणे-ल्युट् लस्य रो वा। बहिः स्थिते १द्वारे। "अथोच्चकैस्तोरणमङ्गभङ्गेति" "गणो न्यपाक्षमथ तोरणाद्बहिः" माघः। "भासोज्ज्वलत्काञ्चन-तोरणानाम्" कुमा०। तच्च द्वारार्थे निखातस्तम्भो-परिनिबद्धो धनुराकारः (फटक) इति ख्यातः पदार्थः। यागादौ मण्डपाद्बहिर्द्वारूपस्य तोरणस्य काष्ठविशेषप्रमाणादिकं मण्डपशब्दे दृश्यं मत्कृततत्तुलादा-नादिपद्धतौ विस्तरो दृश्यः। २कन्धरायां न० हारा०।

**तोरश्ववस** पु० अङ्गिरोमुनौ।

**तोल** पुंन०। चु० तुल-कर्म्मणि घञ्। अशीतिरत्तिकामाने १कर्षे। "एकतोलं द्वितोलं वा त्रितोलं वेदतोल-कम्। दृतोऽधिकं नरः कृत्वा प्रायश्चित्तीयते ध्रुवम्" यागमः। स्वार्थे क। तत्रार्थे "पलं तु लौकिकैर्मानैः साष्टरत्तिद्विमाषकम्। तोलकत्रितयं प्रोक्तम्" तिथित०।

**तोल्य** त्रि० तुल+उन्माने कर्म्मणि-यत्। १तोलनीये। भावे यत्। २तोलने न०। "जीवानां वयसां मौल्ये तोल्ये वर्णस्य क्षेमनि" लीला०।

**तोश** पु० तुश-वधे भावे घञ्। १हिंसायाम्। कर्त्तरि अच्। २हिंसके "त्वे राय इन्द्र! तोशतमाः" ऋ०१।१६८।५। "तोशतिर्वधकर्मा निगोशयति निवर्हयतीति तद्वामस्य पाठात् तोशतमाः नाशयितृतमाः" भा०। "तोशा दृतनृषाड्डवे" पद० ३।२।४। "तोशा बाधकौ" भा०। औत्वाभावे आच्। [भा०ड०३६अ०।

**तोष** पु० तुष-भावे घञ्। सन्तोषे। "तोषपरो हि लाभः" तोषण न० तुष-भावे ल्युट्। १सन्तोषे। तुष-णिच् भावे ल्युट्। २सन्तोषोत्पादने। "एतावदेव पुरुषैः कार्य्यं हृद-यतोषणम्" भा०स०१६अ०। कर्त्तरि ल्यु। ३सन्तोषजनके त्रि० "पश्यन् हृदयतोषणात्" भा० उ० ८३ अ०। करणे ल्युट्। ४तोषसाधने स्त्रियां ङीप् तोषणी।

**तोषल** न० तोषं लुनाति लू-घञ् ड। अस्त्रभेदे १सघलेऽस्त्रे "क्षणस्तोषलसद्यस्य गिरिकूटोपमं वपुः" हरिवं०८७अ०।

**तौक्तिक** पु०धनूराशौ दीपिका कौर्य्यशब्दे २२७८पृ०दृश्यम्।

**तौतातिक** न० तुतातभट्टेन निर्वृत्तम् ठञ्। तुतात-भट्टकृतशास्त्रे "नैवाम्नावि गुरोर्मतं न विदितं तौतातिकं दर्शनम्" प्रबोधच०।

**तौतिक** न० १सक्तायां २शुक्तौ च राजनि०।

**तौदी** स्त्री विषनाशके ओषधिभेदे हतकुमार्याम्। "तौदी नामनि कन्या हतार्चो वा ऋषि" ऋष० १६।४।४२।

**तौम्बरविन्** पु० व०व०। तुम्बुरुणा कलाध्यक्षेणोक्त-मधीयते इनि। कलाध्यक्षोक्तेन तुम्बुरुणा प्रोक्त-शास्त्राध्येतृषु।

**तौर** न० यागभेदे। "संवत्सरमङ्गरङ्गौरेण यजेत" लाट्या० श्रौ० १०।२०।१। "दार्ष्टततौरयोर्व्रतानि" १०।१८।१०। तत्रैव।

**तौरयान** न० तूर्णं यानमस्य पृषो०। तूर्णगमनयुक्ते। "स तौरयान उपयाहि यज्ञम्" निरुक्ते ५।२५। श्रुतिः तौरयानः तूर्णयानः "तौरयान इत्यपि निगमो भवति"

**तौरश्रवस** न०तौरश्रवसाङ्गिरसा दृष्टं साम अण्। सामभेदे "तौरश्रवसे माध्यन्दिने पवमाने तदावपनश्रुतेः" कात्या० श्रौ० २५।१४।१४। "तौरश्रवसे सामनी" कर्कः।

**तौर्य्य** न० तूर्य्ये सूरजादौ वाद्ये भवम् अण्। सूरजादि-ध्वनौ।

**तौर्य्यत्रिक** न० त्रयः परिमाणमस्य कन् तौर्य्योपलक्षितं त्रिकम्। नृत्तवादित्रेषु नृत्यगीतवाद्येषु अमरः। "वनेऽपि तौर्य्यत्रिकमारराध तम्" नैषधम्। "तौर्य्यत्रिकं तदाचार्य्य! कामजो दशको गणः" मनुः।

**तौल** न० तुलैव तुला+स्वार्थे अण् स्वार्थिका अपि प्रत्ययाः क्वचित्प्रकृतितो लिङ्गवचनान्यतिवर्त्तन्ते इत्युक्तेः दैवता-दिवत् क्लीवता। मानभेदे १तुलायाम् २उन्मानदण्डे ३तुलाराशौ च ज्यो०।

**तौलिक** पु०तुल्या जीवति तुली+ठक्। चित्रकरे शब्दमाला।

**तौलिकिक** पु० तूलिकया जीवति ठक्। चित्रकरे हेमच०।

तौलिन् पु० तुलैव तौलं तत् विद्यतेऽस्य इनि। तुलाराशौ "तौलिनि चित्रान्यार्द्धं स्वातिः पादत्रयं विशाखायाः" ज्यो० सं० १०३अ०। अस्य क्लीवत्वमपि "शक्रे तौलि च्छताशनेऽलिधनुषी यामे सगो नैर्ऋते" ज्यो० रात्रिलग्ननिर्णयः।

तौल्य त्रि० तुलया परिच्छिन्नम् ष्यञ्। तुलया परिच्छिन्ने त्रिका०। तुल्यमेव स्वार्थेऽण्। २तुल्ये न०।

तौल्वलि पु० तुल्वलस्यापत्यम् इञ्। तुल्वलार्षेरपत्ये "सर्वेभ्य एव निपृणीयादिति तौल्वलिः क्रियागुणत्वात्" आश्व० श्रौ० २।६।१७ "अभक्षणमितरेषां तौल्वलिः क्रतार्थत्वात्" ५।६।२४। ततः इञन्तत्वात् यूनि फक् तौल्वल्यादित्वात् युवप्रत्ययस्य न लुक्। तौल्वतायन-यूनि तदपत्ये।

तौल्वल्यादि पु० "न तौल्वलिभ्यः" पा० सूत्रोक्ते युवप्रत्ययस्य लुकि पर्युदस्ते शब्दगणे स च गणः पा० ग० सू० उक्तो यथा

"तौल्वलि, धारणि, पारणि, रावणि, दैवीपि, दैवति, बार्कलि, नैवकि, दैवमति, दैवयज्ञि, चाफट्टकि, वैल्वकि, वैडि, आनुराहति, पौष्करसादि, आनुरोहति, आसुति, प्राटोहनि, नैमिशि, प्राड्वाहति, यास्कि, वैशीति, आसिनासि, आहिंसि, आसुरि, नैमिषि, आसिवन्धकि, पौष्करेणुपालि, वैकर्णि, वैरकि, वैहति।

तौवरक त्रि० तुवर्या इदम् अण् स्वार्थे क। तुवरीसम्बन्धिनि श्लेष्मादौ "क्षते भल्लातकश्लेष्मात् श्लेष्मातौवरकात्तथा" सुश्रुतः। स्वार्थे अण्। ततः स्वार्थे क। २तुवरके। "आयुष्करं तौवरकं कषायं कटुपाकिकम्। उष्णं क्रमिज्वरानाहमेहवर्त्तविनाशनम्" सुश्रुतः।

तौविलिका स्त्री ओषधिभेदे। तौविलिके! ऽवेत्यवायवैत्यव ऐत्ययौत्" अथ० ६।१६।३।

तौषायण त्रि० तुषस्यादूरदेशादि पचा० चतुरर्थां फक्। तुषस्यादूरदेशादौ।

तौषार त्रि० तुषारस्येदमण्। तुषारसम्बन्धिनि जले राजनि० "तत्रान्तरिक्षजलविभागे सुश्रुतः। भावप्र० नक्षत्रगणादि उक्तं यथा "अपि नद्याः सस्रवन्ति वङ्क्षिरापश्च तद्भवाः। धूमाभ्रयवनिर्मुक्ताक्षौषाराख्यास्तु ताः स्मृताः। अपथ्याः प्राणिनां प्रायो भूरुक्षाणान्तु ता हिताः। तुषाराम्बुहिमं रूक्षं स्वादातलमपित्तलम्। कफोरुस्तम्भकण्ठाग्निमेदोगण्डादिरोगनुत्" नदीमारभ्य सस्रवन्ति पर्य्यन्तं वङ्क्षिराख्ते तद्भवा वङ्क्षिभवाः धूमाभ्रयवनिर्मुक्ताः धूमाभ्ररहिता आपः तौषाराख्या इत्यर्थः।

त्मन् पु० आत्मन्+आकोपः। आत्मनि "त्मनमूर्जं न विश्वध चरध्यै" ऋ० १।६३।८। त्मनमात्मानम्। "आङोऽन्यत्रापि छन्दसि दृश्यते" पा० इत्यात्मन आकारलोपः संज्ञापूर्वकस्य विधेरनित्यत्वादुपधादीर्घो भावः" भा०। "त्मने तोकाय तनयाय शंस" ऋ० १।११४।६। "उप त्मन्या वनस्पते" ऋ० १।१८८।१०। 'त्मन्या आत्मना" भा०। ततीयास्थाने या। "अग्नो इतेन त्मन्या" यजु० २६।१०। "वनस्पतिरवसृष्टो न पाशैः त्मन्या" २०।४५।

त्यक्त त्रि० त्यज-कर्मणि क्त। कृतत्यागे उत्सृष्टे सस्रज्झिते अमरः "अवश्यार्थत्यक्तद्रव्यस्वीकारः प्रतिग्रहः" मूलपाणिः त्यजधातौ उदा०। २त्यक्तु सुद्यते च "मदर्थे त्यक्तजीविताः" गीता "इत्युक्तः करुणं वाक्यं वानरैस्त्यक्तजीवितैः, रामा० कि० ५४ अ०।

त्यज हानौ दाने च भ्वा० सक० पर० अनिट्। त्यजति अत्याक्षीत् तत्याज। त्यक्तव्यं त्याज्यम् त्यागः त्यक्तं त्यक्ता त्यागी। "त्यजेदेकं कुलस्यार्थे ग्रामस्यार्थे कुलं त्यजेत्। ग्रामं जनपदस्यार्थे आत्मार्थे पृथिवीं त्यजेत्" चाणक्यः "योऽत्याक्षीत् संयुगं भयात्" भा० द्रो० ६५ अ० "तं तत्याजाहितं पुत्रम्" रामा० २।३६ अ०। "नैव नीलिवर्णेन कदाचित् त्यज्यते" पञ्चत०। (नूरा:) "मदर्थे त्यक्तजीविताः" गीता "प्रतिरोद्धा गुरोर्वैव त्यक्ताग्निर्वाङ्मिस्तथा" मनुः "न माता न पिता न स्त्री न पुत्रस्त्यागमर्हति" मनुः "त्याज्यं दोषवदित्येके कर्म प्राहुर्मनीषिणः। यज्ञदानतपः कर्म न त्याज्यमिति चापरे" गीता "ज्ञातिसम्बन्धिभिस्त्यक्ते त्यक्तव्याः मृतसूतकाः" मनुः "चतुष्पदां खयूथेभ्यस्त्यक्तव्याः परभूमिषु" ह० स० ६० अ०। वेदे तु नि०। यजि तित्याज "यस्तित्याज सचि विदं सखायम्" ऋ० १०।७१।६। त्यागश्च स्वत्वध्वंसानुकूलव्यापारः न ममेदमित्याकारः। स च मूर्त्तद्रव्यावामेव भवति अमूर्त्तजीवनादेर्वियोजनरूपः। उपसर्गपूर्वकस्य तत्तदुपसर्गद्योत्यार्थयुक्तत्यागे इति भेदः।

त्यजस् पु० त्यज-भावेऽसुन्। १त्यागे "इन्द्रश्च न त्यजसा वि हुणाति" ऋ० १।१६६।१२। "त्यजसा त्यागेन" भा० कर्त्तरि-असुन्। २त्यागकर्त्तरि त्रि०। "चिद्वारयातेमहि। त्यजः" ऋ०

१०।१४४।६। त्यजो दुःखस्य वर्जयितृ भा० "न तं तिग्मं चन त्यजो न" ऋ०८।४७।७। करणे ल्युट्। १क्रोधे च क्रोधात् प्रयुज्यमानमायुधं सञ्चते इति तस्य तथात्वम्।

**त्यद्** त्रि० त्यज–"त्यजितनियजिभ्यो डित्" उ० यदि डित्त्व।१प्रसिद्धे। अस्य सर्वनामतया त्यदादिकार्यम्, स्यः त्यौ त्ये त्यम् त्यस्मात् त्येषां त्यस्मिन्। स्त्रियां स्या ते त्याः। क्लीबे त्यद् ते त्यानीति भेदः। २सर्वदा परोक्षाभिधानार्हे वस्तुनि।

"द्वे वाव ब्रह्मणो रूपे मूर्त्तञ्चैवामूर्त्तञ्च मर्त्यञ्चामृतञ्च स्थितञ्च यच्च सच्च त्यच्च। तदेतन्मूर्तं यदन्यद्वायोश्चान्तरीक्षाच्चैतन्मर्त्यमेतत् स्थितमेतत् तस्यैतस्य मूर्त्तस्यैतस्य मर्त्यस्यैतस्य स्थितस्यैतस्य सत एष रसो य एष तपति सत्यो ह्येष रसः। अथामूर्तं वायुश्चान्तरिक्षं चैतदमृतमेतद्यदेतत्त्यत्तस्यैतस्यामूर्त्तस्यैतस्यामृतस्यैतस्य यत एतस्य त्यस्यैष रसो य एष एतस्मिन्मण्डले पुरुषस्तस्य ह्येष रस इत्यधिदैवतम्" बृ० उ०। "ते एते द्वे वाव वावशब्दोऽवधारणार्थः। द्वे एवेत्यर्थः। ब्रह्मणो परमात्मनो रूपे रूप्यते याभ्यामरूपं परमब्रह्माविद्याध्यारोपणाभ्यां के ते द्वे। मूर्त्तञ्च एव मूर्तमेव च। तथा अमूर्त्तञ्च एवामूर्तमेव चेत्यर्थः। अतश्चैतस्मात्त्रिविशेषणे मूर्त्तामूर्ते द्वे एवेत्यवधार्येते। कानि पुनस्तानि विशेषणानि मूर्त्तामूर्तयोरित्युच्यते। मर्त्यं मरणधर्म्यं सत्यञ्च तद्विपरीतम्। स्थितं परिच्छिन्नं गतिपूर्वकं यत् स्यात्। यच्च यातीति यद्व्याप्यपरिच्छिन्नं स्थितविपरीतम्। सच्च सदित्यन्योऽविशेषमाणासाधारणधर्मविशेषवत्। तच्च तद्विपरीतं त्यदित्येव सर्वदा परोक्षाभिधानार्हम्। अथामूर्तमथाधुनाऽमूर्तमुच्यते। वायुश्चान्तरिक्षञ्च यत्परिशेषितं भूतद्वयं एतदमृतममूर्तत्वादस्थितमतोऽविरुध्यमानं केनचिदमृतममरणधर्मं तद्यत् स्थितविपरीतं व्याप्यपरिच्छिन्नं यस्माद्येतदन्येभ्योऽप्रतिरुध्यमानविशेषमतस्तत्त्यदिति परोक्षाभिधानार्हमेव पूर्ववत्। तस्येतस्यामूर्तस्यैतस्यामृतस्यैतस्य यत एतस्य त्यस्य चतुष्टयविशेषणस्यामूर्तस्यैव रसः। कोऽसौ। य एष एतस्मिन्मण्डले पुरुषः करणात्मको हिरण्यगर्भः प्राण इत्यभिधीयते। यः स एषः अमूर्तस्य भूतद्वयस्य रसः पूर्ववत् सारिष्टः, एतत्पुरुषसारञ्चामूर्तं भूतद्वयं हैरण्यगर्भलिङ्गारम्भाय हि भूतद्वयाभिव्यक्तिरव्याकृतात्तस्मात्तादर्थ्यात्तत् सारं भूतद्वयम्। त्यस्य ह्येष रसो यस्मादो मण्डलस्थः पुरुषो मण्डलवच्च सङ्घसारश्च भूतद्वयस्य च साधर्म्यम्। तस्मादृक् प्रसिद्धवद्धेत्वपादानं त्यस्य ह्येष रस इति" पा० भाष्यम् "सूतो वा सूतपुत्रो वा यो वा को वा भवाम्यहम्" वेणी०। अव्ययीभावे अदरा० अच् समासान्तः। उपत्यदम्।

**त्यदादि** पु० पा० गणसूत्रोक्ते शब्दसमूहे। स च गणः "त्यद् तद् यद् एतद् इदम् अदस् एक द्वि युष्मद् अस्मद् भवत् किम्" "त्यदादीनामः" पा० अत्र अत्त्वविधौ द्वियर्थ्यन्तस्यैव यद्ग्रहणमिति भाष्यकारेष्टिः।

**त्याग** पु० त्यज–भावे घञ्। उत्सर्गे मूर्तद्रव्यस्य स्वत्वध्वंसानुकूलव्यापारे न ममेदमित्याकारे। "न माता न पिता न स्त्री न पुत्रस्त्यागमर्हति" "उन्मत्तं पतितं क्लीबमवीरं पापरोगिणम्। न त्यागोऽस्ति द्विषन्त्याश्च न च दायापवर्तनम्" मनुः अमूर्तद्रव्यस्य तु वियोगमात्रे च। त्यागश्च सात्त्विकादिभेदात् त्रिविधः। यथाह गीता "नियतस्य तु सन्न्यासः कर्मणो नोपपद्यते। मोहात्तस्य परित्यागस्तामसः परिकीर्तितः। दुःखमित्येव यत् कर्म कायक्लेशभयात् त्यजेत्। स कृत्वा राजसं त्यागं नैव त्यागफलं लभेत्। कार्यमित्येव यत् कर्म नियतं क्रियतेऽर्जुन!। सङ्गं त्यक्त्वा फलं चैव स त्यागः सात्त्विको मतः"। विशेषणाभावात् विशेषणाभावात् उभयाभावाच्च पुनरपि सात्त्विकस्त्यागः त्रिविधः तथा हि फलाभिसन्धिपूर्वककर्मत्यागः सत्यपि कर्मणि फलाभिसन्धित्यागादेकः। स च सात्त्विकत्वादादेयः। सत्यपि फलाभिसन्धौ कर्मत्यागात् द्वितीयः। स च दुःखबुद्ध्या कृतो राजसः विपर्यासेन कृतस्तामसः इति भेदः। द्विविधोऽपि हेयो भवति। फलाभिसन्धेः कर्मणश्च त्यागात् कृतीयः। स च कर्मानधिकारिकर्तृको नैर्गुण्यरूपः। सोऽपि साधनफलभेदेन द्विविधः। तत्र सात्त्विकेन फलाभिसन्धित्यागपूर्वककर्मानुष्ठानरूपेण त्यागेन शुद्धान्तःकरणस्योत्पन्नविविदिषस्य आत्मज्ञानसाधनश्रवणाख्यं वेदान्तविचाराय फलाभिसन्धिरहितस्यान्तःकरणशुद्धौ सत्यां तत्साधनस्य परित्यागः स एकः साधनभूतो विविदिषासन्न्यास उच्यते। जन्मान्तरकृतसाधनाभ्यासपरिपाकादस्मिन् जन्मनि श्रादावेवोत्पन्नात्मबोधस्य कृतकृत्यस्य सत एव फलाभिसन्धेः कर्मणश्च परित्यागः फलभूतः स विद्वत्सन्न्यास इत्युच्यते। "त्यागप्रपञ्चरूपस्य चिदात्मत्वावलोकनात्। त्यागो

हि महतां पूज्यः सद्यो मोक्षमयो यतः। त्यागेन युक्ता दिवमुत्पतन्ति त्यागेन हीना नरकं व्रजन्ति। न त्यागिनां दुष्करमस्ति किञ्चित् त्यागो हि सर्वव्यसनानि हन्ति" शब्दार्थचि॰ धृतवाक्यम्।

**त्यागिन्** त्रि॰ त्यज–घिणुन्। १ दातरि, २त्यजनशीले, ३कर्मफलत्यागिनि च "न द्वेष्ट्यकुशलं कर्म कुशलेनानुषज्जते। त्यागी सत्त्वसमाविष्टो मेधावी छिन्नसंशयः। न हि देहभृता शक्यं त्यक्तुं कर्माण्यशेषतः। यस्तु कर्मफलत्यागी स त्यागीत्यभिधीयते" गीता "त्यक्तात्मनस्त्यागिनां चैव निवर्त्तोदकक्रिया" मनुः।

**त्यागिमन्** त्रि॰ त्यागेन निष्पन्नं त्याग+इमनिच्। त्यागेन निर्वृत्ते।

**त्याज्य** त्रि॰ त्यज+ण्यत् कृत्वाभावः। १वर्जनीये "तीरे प्रतिग्रहस्तत्राज्यस्तत्राज्यो धर्मसंक्रयः" प्रा॰ त॰। २दातुं योग्ये च। "त्याज्यो दृष्टः प्रियोऽप्यासीदङ्गुलीवोरगक्षता" रघुः। "सा त्वत्पाप्यन्यतो गर्भं त्याज्या भवति पापिनी। महापातकदुष्टा च पतिगर्भविनाशिनी" व्यासस॰।

**त्वक** गतौ भ्वा॰ आत्म॰सक॰सेट्। त्वकते अत्वकिष्ट। तत्वके।

**त्वख** गतौ भ्वा॰ पर॰ सक॰ सेट् धातुपाठः। त्वखति अत्वखीत् अत्वाखीत्। तत्वाख। [अत्वङ्क्षीत्। तत्वङ्ख।

**त्वख** गतौ भ्वा॰ पर॰ सक॰ सेट् इदित् धातुपाठः। त्वङ्खति

**त्वग** गतौ भ्वा॰ पर॰सक॰ सेट् इदित्। त्वङ्गति अत्वङ्गीत्। तत्वङ्ग। अयं दिवा॰ धातुपाठः। त्वङ्ग्यति।

**त्वङ्ग** पुंस्त्री त्वगि–अच्। पुरभेदे हरिश्चन्द्रपुरे सौभे उद्वङ्गे प्रतिसार्गके त्रिका॰।

**त्वद** चेष्टायां भ्वा॰ पर॰ अक॰ सेट् इदित्। त्वन्दति अत्वन्दीत्। तत्वन्द।

**त्वप** लज्जायां भ्वा॰आ॰ अक॰ वेट्। त्वपते अत्वपिष्ट अत्वप्त लेभे। णिच् वा ध॰। त्वपयति त्वापयति। णित् त्वपा। "कालया कालसंयोगे किमकारि नवोढया। अद्यापि च क्रिया प्रश्नोत्तरा मुग्धा न बुध्यते" विदग्धमुख॰। "अपेक्षाभिक्षायामपि किमपि चेतस्त्वपयति" शान्तिश॰। अप–अन्यतो लज्जायाम् "तस्माद्बलैरपत्रेपे" भट्टिः। "लज्जा सापत्रपान्यतः" अमरः।

**त्वपा** स्त्री त्वप–भावे अङ्। १लज्जायाम् अमरः। कर्त्तरि अच्। २सलज्जे त्रि॰। ३कुवटायां स्त्री मेदि॰। ४कुले ५कीर्त्तौ च शब्दच॰।

**त्वपाक** पुंस्त्री॰ त्वप–आक। म्लेच्छजातिभेदे उणादि॰।

**त्वपारण्डा** स्त्री त्वपायां रण्डा। लज्जाहीनायां वेश्यायां जटा॰ शब्दक॰ वस्तुतः त्वपारण्डेति नामद्वयं मेदिनौ त्वपाशब्दस्य वेश्यार्थकत्वोक्तेः रण्डाशब्दस्य च तदर्थप्रसिद्धेस्तत्समानार्थकत्वौचित्यात्।

**त्वपिष्ठ** त्रि॰ अतिशयेन लघुः अतिशायने इष्ठन् प्रियादि॰ त्वपादेशः। लघुतरे। [स्त्रियां ङीप्।

**त्वपीयस्** त्रि॰ अतिशयेन लघुः ईयसुन् त्वपादेशः। लघुतमे

**त्वपु** न॰ अग्निं हुत्वा त्वपते लज्जते इव त्वप–उनु। १सीसके २रङ्गे च मेदि॰ तस्य विकारः अण् "त्रपुजतुनोः षुक् च" पा॰ षुक् च। त्रापुष तद्विकारे त्रि॰। "ताम्रायःकांस्यरैत्यानां त्रपुषः सीसकस्य च" मनुः। "सुवर्णस्य मलं रूप्यं रूप्यस्यापि मलं त्रपु। ज्ञेयं त्रपुमलं सीसं सीसस्यापि मलं मलम्" भा॰उ॰ १८ अ॰। [लताभेदे।

**त्वपुकर्कटी** स्त्री त्वपु इव शुभ्रा कर्कटी। (ससा) इति ख्याते

**त्वपुटी** स्त्री त्वप–वा॰–उटक् गौरा॰ ङीष्। क्षुद्रश्लेष्मायाम्। रक्तमाला।

**त्वपुल** न॰ त्वप–वा॰ उल। रङ्गे हिरूपकोषः।

**त्वपुष(स)** न॰ त्वपुषाः(पुत्राः)फलम् अण् फले तस्य लुप्। त्वपुषी(सी)फले। "त्वपुसं(षं) लघु शीतञ्च नवं त्वट्क्रमदाहजित्। स्वादु पित्तापहं प्रीतं रक्तपित्तहरं परम्। तत्पक्वमम्लमुष्णं स्यात् पित्तलं कफवातनुत्। तद्वृन्नमूलं शीतं रूक्षं पित्तास्रकृच्छ्रजित्" भावप्र॰।

**त्वपु(ष)स** न॰त्वप-वा॰उस(ष)। १रङ्गे हिरूपकोषः। गौरा॰ ङीष् २भार्गेन्द्रवारुण्यां कर्कटीभेदे (ससा) लताभेदे। सा च पीतपीष्पा काण्डालुः बहुफला वृन्दिकफला कण्टकफला सुधावासा च।

**त्वपा** स्त्री घनीभूतश्लेष्मादौ। "ऊर्मिकीटपदक्षेपैर्दूषिता यत्र मेदिनी। त्वप्सया कर्षणैः क्षिप्रा वान्तैर्वा दूषितां व्रजेत्। नखदन्तनखोत्पन्नकृमयांशुरजोमलैः। भक्षणैर्दूषणैरपि प्रच्छन्ना मलिना भवेत्" "त्वप्सा घनीभूतश्लेष्मादि" शु॰त॰।

**त्वप्स** न॰ घनेतरदधनि अमरटीकायां विद्याविनोदः।

**त्रय** न॰स्त्री त्रयाणामवयवम् अयच्। त्रितये १त्रित्वसंख्यायाम् "वेदत्रयं निरदुहत् भूर्भुवः स्वरितीति च" मनुः। स्त्रीत्वपक्षे ङीप्। "व्याघोतिष्ठ समाबेद्यामसौ नरशिखित्रयी" माघः त्रयोऽवयवा अस्य अयच्। २त्रित्वसंख्यान्विते त्रि॰ स्त्रियां ङीप्। "प्रत्यक्षमनुमानञ्च शास्त्रञ्च विविधागमम्। त्रयं सुविदितं कार्य्यं धर्म॰

शुद्धिमभीप्सताः" मनुः ङीषन्तः "ऋग्यजुःसामरूपे श्रेदत्रये त्रित्वसंख्यान्विते ऋगादिवेदेषु अमरः "एतद्धिदन्नोविद्वांसस्त्रयीनिष्कर्षमन्वहम्" "त्रैविद्येभ्यस्त्रयीं विद्याद्दण्डनीतिञ्च शाश्वतीम्" मनुः। "ब्रह्माऽथ पुरुषो रुद्रस्त्रयमेतत् त्रयीमयम्। सर्गादावङ्मयो ब्रह्मा स्थितौ विष्णुर्यजुर्मयः। रुद्रः साममयोऽन्ताय तस्मात् तस्याशुचिर्ध्वनिः" मनुः ४पुरन्ध्रां ५सुमतौ स्त्री विश्वः ६सोमराजीहले स्त्री शब्दच०। ७भवान्याम् दुर्गायाम्। यथा "ऋग्यजुःसामभागेन साङ्गवेदगतापि या। त्रयीति पठ्यते लोके इष्टा इष्टार्थसाधिनीति" देवीपु०।

**त्रयःपञ्चाशत्** स्त्री त्रयधिका पञ्चाशत् त्रिशब्दस्य त्रय आदेशः। (तिपान्न)१त्रयधिकपञ्चाशत्संख्यायां २ततसंख्यान्विते च बहुत्वेऽप्येकत्वम्। एवं त्रयोदशत्रयोविंशतित्रयस्त्रिंशत् त्रयश्चत्वारिंशत् प्रभृतयः त्रयधिकदशादिसंख्यायां ततसंख्ये वे च। इयांस्तु भेदः अशीतिभिन्ने चत्वारिंशदादौ वा त्रय आदेशः। तेन पक्षे त्रिचत्वारिंशादित्वादि तत्रार्थे अशीतौ नेति त्रयशीतिः।

**त्रययाय्य** पु० त्रयं जन्मत्रयं याति या--बा० काश्य। जन्मत्रयप्राप्ते "छन्दुर्न त्रययाय्यः" ऋ० ६।२।७। "त्रययाय्यो जन्मत्रयं प्राप्तः। जन्मत्रयं कथ्यते। मातुरग्रेऽधिजननात् द्वितीयं मौञ्जिबन्धनात्। तृतीयं यज्ञदीक्षाया इति जन्मत्रयं स्मृतमिति" ताण्डयः पुत्र इति भा०।

**त्रयस्त्रिंश** त्रि० त्रयस्त्रिंशत्+तमट्। त्रयधिकत्रिंशत्संख्यापूरणे स्त्रियां ङीप्।

**त्रयस्त्रिंशत्पति** पु० त्रयस्त्रिंशतो देवानां पतिः। १इन्द्रे हेमच०। २प्रजापतौ च तयोः त्रयधिकत्रिंशतो देवानां पतित्वात् तथात्वम्। देवानां त्रयस्त्रिंशत्त्वं तु

"अष्टौ वसवः एकादश रुद्रा द्वादशादित्या इमे एव द्यावा पृथिवी त्रयस्त्रिंश्यौ त्रयस्त्रिंशद्वै देवाः प्रजापतिश्चत्रयस्त्रिंशत्तेनं प्रजापतिम्" शत० ब्रा० ४।५।६।२। "कतमे ते त्रयस्त्रिंशदित्यौ वसव एकादश रुद्रा द्वादशादित्यास्त एकत्रिंशत् इन्द्रश्चैव प्रजापतिश्च त्रयस्त्रिंशाविति" शत० ब्रा० ११।६।३।५। तु अन्यथोक्ता अग्निन् पक्षे निर्द्वारण्यसप्तम्यासमासात् इन्द्रप्रजापतिपरत्वम् तयोस्तेषां मध्ये श्रेष्ठत्वेन पतित्वात्तथात्वमिति बोध्यम्। "आदित्यांश्च वसूंश्चैव रुद्रांश्चैवाश्विनावपि" रामा० १। २०। अन्यथा संख्योक्ता।

**त्रयस्त्रिंशस्तोम** पु० त्रयस्त्रिंशत् स्तोमा अस्य पृषो०। यज्ञभेदे। "त्रयस्त्रिंशस्तोमेन शोणः सात्रासाहः पाञ्चालो राजा। तदेतद्गाथयाऽभिगीतम् "सात्रासाहे यजमाने अश्वमेधेन तोर्डशाः। उदीरते त्रयस्त्रिंशाः षट्सहस्राणि वर्मिणाम्" शत० ब्रा० १३।५।४।१६।

**त्रयस्त्रिंशिन्** न० त्रयस्त्रिंशत् ऋचः सन्त्यस्मिन् इनि डिच्च। त्रयस्त्रिंशदृग्भिर्गेयमाने सामभेदे। "त्रयस्त्रिंशि नाम साम माध्यन्दिने पवमाने भवति" तैत्ति० १।२।२।४

**त्रयीतनु** पु० त्रयी वेदा एव तनुरस्य। १सूर्ये हेमा०। "स्वर्गद्वारं त्रया विद्यया भगवन्तं त्रयीमयं सूर्यमात्मानं यजन्ते" भाग०५।२०।७। तस्य त्रयीमयत्वोक्तेस्तथात्वम्।

**त्रयीधर्म्म** पु० त्रया वेदत्रयेण विधीयमानो धर्मः शाक०। वैदिके धर्मे ज्योतिष्टोमादौ अमरः।

**त्रयीमय** पु०त्रयात्मकः मयट्। १सूर्ये त्रयीतनुशब्दे उदा० २त्रयीधर्मात्मके त्रि०। "एवं सङ्कर्षणेन चतुस्त्रिंशल्लक्षयोजनान्यष्टशताधिकानि सौरो रथस्त्रयीमयोऽसौ चतसृषु परिवर्त्तते पुरीषु" भाग० ५ २१।७। "त्रयीमयं रूपमिदञ्च सौकरम्" इत्युक्ते वाराहे रूपे न०तद्रूपविहतिस्तत्रैव "स्रुक्तुण्ड आसीत् स्रुवरंग ! नासयोरिडोदरे चमसाः कर्णरन्ध्रे। प्राशित्रमास्ये यसने ग्रहास्तु ते यच्चर्वणं ते भगवन्नग्निहोत्रम्। दीक्षानुजन्मोपसदः शिरोधरं त्वं प्रायणीयोदयनीयदंष्ट्रः जिह्वाप्रवर्ग्यस्तवशीर्षकं क्रतोः सत्रावसथ्यं चितयोऽसवो हि ते। सोमस्तु रेतः सवनान्यवस्थितिः संस्थाविभेदास्तव देव ! धातवः। सत्राणि सर्वाणि शरीरसन्धयस्त्वं सर्वयज्ञक्रतुरिष्टिबन्धनः। नमो नमस्तेऽखिलमन्त्रदेवताद्रव्याय सर्वक्रतवे क्रियात्मने" भाग० ३।१३।४०। ४परमेश्वरे च पु०। "स एष आत्मात्मवतामधीश्वरस्त्रयीमयो धर्ममयस्तपोमयः" भाग०२।४।१६।

**त्रयीमुख** पु० त्रयी मुखेऽस्य। विप्रे हेमच०।

**त्रयोदशन्** त्रि०त्रयश्च दश च, त्रयधिका वा दश शाक० त्रय आदेशः। १त्रयधिकदशसङ्ख्यायां २ततसंख्यान्विते च। "क्वचित् द्वादश मासाः संवत्सरः क्वचित् त्रयोदश मासाः" श्रुतिः मन्त०। ततः पूरणे डट्। त्रयोदश ततपूरणे त्रि० "ज्यैष्ठे ज्येष्ठस्य कृष्णे त्रयोदशदिनात् परम्" ज्यो० स्त्रियां ङीप्। सा च चन्द्रस्य त्रयोदशकलात्मिकायामके तिथिभेदे सा च क्षयतिथिः तत्रैव तस्योत्पत्तेः। "त्रयोदशी पञ्चदशी च माघे" मन्वादिकथने "वरुणेन समायुक्ता मघौ कृष्णा त्रयोदशी" वारुणीकथने च ति०त०।

**त्रय्यारुण** पु० मान्वातृवंश्ये त्रिधर्मणः सुते नृपभेदे "रात्र-

स्त्रिधर्मणवासीत् विहांस्त्र्यारुणः सुतः" हरिवं०१२अ०।

त्रस गतौ भये निक्षेपे च चुरा० उभ० सक० सेट्। त्रसयति ते अतित्रसत् त।

त्रस भासे वा चुरा० उभ० पक्षे भ्वा० पर० अक० सेट् इदित्। त्रंसयति ते त्रंसति अतत्रंसत् त अत्रंसीत्।

त्रस भये वा दिवा० पक्षे भ्वा०पर०अक०सेट्। त्रसति अत्रासीत् अत्रसीत् त्रत्रास फक्वा० त्रेसतुः तत्रसतुः। इदित् त्रस्तः। तस्य दिवादित्वे मार्धधातुके श्यन्। त्रस्यति। "त्रस्नो चलशफरीविचकिलोरुः" माघः "त्रस्तुराद्रिसुतासंभ्रमस्खलयंश्चन्द्रे घनस्खेन निशङ्किताम्" "सुन्दरत्वमङ्गिरपि यत्र गौरवात्" माघ। "त्रस्यन् वै जायमानेभ्यः" भट्टिः। "ततो रामेति चक्रन्दुस्ते सुः परिदिदेविरे" भट्टिः "कपेरत्रासिषुर्दानं मृगाः सिंहध्वनेरिव" भट्टिः। "राक्षसस्य न चात्रासीत् प्रनष्टभयतिष्ठ च" भट्टिः।

उद्+उत्त्रसटत्रासे। "बालानुत्त्रासयन्ति स्म" हरिवं०२३७७।

त्रस त्रि० त्रस-भवे आधारे घञर्थे क। १वने त्रिका० त्रस-गतौ अच्। २जङ्गमे त्रि० अमरः। त्रसरेणुः।

त्रसदस्यु पु० मान्धात्रपौत्रभेदे। "तस्मात्तादयामास मान्धातः हो सुतौ नृप!। पुरुकुत्सञ्च धर्मज्ञं सचुकुन्दञ्च धार्मिकम्। पुरुकुत्सस्तु तस्यासीत् त्रसदस्युर्महीपतिः" हरिवं० १२ अ०। [श्त्रासयुक्ते त्रि०।

त्रसन न० त्रस-भावे ल्युट्। १भये २उद्वेगे कर्तरि ल्यु। त्रसर पु०त्रस-अरन्। तन्तुवायोपकरणभेदे (तासनी) अमरः

त्रसरेणु पु० त्रसः चलो रेणुः कर्म०। "जालान्तरगते भानौ यत्सूक्ष्मं दृश्यते रजः। प्रथमं तत्प्रमाणानां त्रसरेणुं प्रचक्षते" मनूक्ते गवाक्षान्तर्गतसूर्य्यकिरणेषु दोधूयमाने रजसि २परमाणुषट्कात्मके द्व्यणुकत्रयात्मके रजसि "परमाणुद्वयेनाणुस्त्रसरेणुस्तु ते त्रयः" अङ्गवै०, "जालान्तरगते सूर्य्यकरे ध्वंसी विलोक्यते। त्रसरेणुस्तु विज्ञेयः त्रिंशता परमाणुभिः" इति वैद्यकपरिभाषया ३त्रिंशत्परमाणुरूपे रजसि च। ४सूर्य्यपत्नीभेदे स्त्री त्रिका०।

त्रसर त्रि० त्रस-अरच्। भीरौ संक्षिप्तसारः।

त्रस्त त्रि० त्रस-क्त। १भीते २चकिते। ३शीघ्रे न०। "त्रस्तो समासन्नकरेणुसङ्गात्" "त्रस्तः समस्तजनत्रासकरः करेणुः" माघः "जुगोपात्मानमत्रस्तः" रघुः।

त्रस्नु त्रि० त्रस-क्नु। भीरौ त्रासशीले अमरः। "सीतां सौमित्रिणा त्रस्तां स श्रीचीं त्रस्नुमैक्षिताम्" भट्टिः "अत्र त्रस्नुभिर्युक्तधुरं हरद्भिः" रघुवंशकाव्यम्।

त्रा पालने अदा० ब्या० सक० अनिट् क्रमदोश्वरः। त्राते अत्रात। "कान्तारे ब्राह्मणान् गाश्च यः परित्राति कौशिकः!" भा०अनु०७३अ०। आर्षत्वात् पदव्यत्ययः।

त्राण न०त्रै-पालने भावे ल्युट् भावे क्त तस्य नो वा। १रक्षणे। कर्मणि क्त वा तस्य नः। २रक्षिते त्रि० ३त्रायमाणालतायां न० मेदि० तत्रार्थे स्त्री राजनि०। "न कुर्यादात्मनस्त्राणं गोरक्षत्वा तु दुष्कृतः" मनुः। [भावे क्त। २रक्षणे न०।

त्रात त्रि० त्रै--कर्मणि क्त वा तस्य नत्वाभावः। १रक्षिते

त्रापुष त्रि०त्रपुषा निर्वृत्तम् अण् सुक् च। रक्तमये पात्रादौ।

त्रामन् त्रि०त्रै-पालने मनिन्। १रक्षके "तव त्रामभिरिन्द्र! तूर्वयाणम्" ऋ० १।५३।१०।

त्रायन्ती स्त्री त्रै--सम्प० भावे क्विप् त्राः त्रायति गच्छति भ्वा० इ गतौ शद-डोप्। त्रायमाणालतायाम् अमरः। "त्रायन्ती तुवरा तिक्ता सरा पित्तकफापहा। ज्वरकृद्दोषगुल्मास्रश्वासकासविषप्रणुत्" भावप्र०। "कलसी दहती द्राक्षा त्रायन्ती निम्बगोक्षुरैः" सुश्रु०। स्वार्थे क। त्रायन्तिका तत्रार्थे "प्रियङ्गुनलायूचिका पद्मात्रायन्तिकालोध्रतिक्काम्बष्ठादार्ङ्गिमत्वक्शालपर्णीपद्मकेशरधातकीबकुलशालमलीत्वीवेष्टकमोचरसैन्धवरिष्टानयस्तीर्ङ्गानासवान् कुर्वीत" सुश्रु०।

त्रायमाण त्रि० त्रायते त्रै-कर्मणि शानच्। १रक्षमाणायां (वाक्षा) ख्यातायां २लतायाम् अमरः। स्वार्थे क। तत्रार्थे स्त्री राजनि०। [दशीभवे।

त्रायोदश त्रि० त्रयोदश्यां भवं सम्भवेत्ति० अण्। त्रयोदशीभवे।

त्रास पु०त्रस-भावे घञ्। १भये "त्रासाकुलः परिपतन् परितो निकेतान्" माघ०। २भयोत्पादके त्रि०।

त्रासन न०त्रस-णिच् भावे ल्युट्। १भयोत्पादने कर्तरि ल्यु। २भयोत्पादके त्रि०।

त्रि त्रि० ब० व० तृ-डि। त्रित्वसंख्याविशिष्टे। "इति वेदास्त्रयस्त्रयी" अमरः "न्यायैस्त्रिभिरुदीरणम्" कुमा० "त्रिभ्य एव तु वेदेभ्यः पादत्रयमदूदुहत्" मनुः। स्त्रियां ङीप्रत्ये सख्ये च विभक्तौ परतः तिस्रादेशः। तिस्रः अतितिस्रा कैश्चित्तु प्रियतिस्रेत्युदाहृतम् तच्चिन्त्यम् "तिस्रभिस्तनयास्त्रिभिर्महिमानस्त्रीरयन्" कुमा०। तृयाम्यां वेदे तु क्वचित् तीर्याभिति रूपं "महि! तीर्याभयोऽस्तु दुर्गं मित्रस्यार्यमणः" ऋ०१०।१८५।१।

त्रिंश त्रि० त्रिंशत्+पूरणे डट्। त्रिंशत्पूरणे, त्रिंशत्सङ्ख्ये

"त्रिंशांशकस्तथा राशेर्भाग इत्यभिधीयते" सू० सि०।

**त्रिंशक** त्रि० त्रिंशता क्रीतः वुन् डित्र। त्रिंशत्संख्यान्वित-द्रव्येण क्रीते वस्तुनि।

**त्रिंशत्** त्रि० त्रयोदशतः परिमाणमस्य नि०। १तिदशकसंख्यायां २तत्संख्यान्विते च। तत्र संख्येये "निमेषा दश चाष्टौ च काष्ठास्त्रिंशत्तु ताः कलाः। त्रिंशत् कला गुहूर्तः स्यादहोरात्रन्तु तावतः" "त्रिंशद्वर्षो वहेत् कन्यां हृद्यां द्वादशवार्षिकीम्" मनुः "संख्यायां "तत्त्रिंशता भवेक्रामः" सू० सि०।

**त्रिंशत्क** त्रि० त्रिंशत्परिमाणमस्य कन्। १त्रिंशत्परिमाणे अवयवे कन्। २तत्संख्यायाम् "अमावास्याः पृथक् तेषां त्रिंशत्कं परिचक्षते" कामन्द०।

**त्रिंशति** स्त्री त्रिंशत्+पृषो०। १त्रिंशत्संख्यायां २तत्संख्येये च। "पञ्चकं मण्डलं ज्ञेयं त्रिंशत्यात्र मनीषिभिः" कामं०

**त्रिंशत्तम** त्रि० त्रिंशतः पूरणः तमप्। १त्रिंशत्संख्यापूरणे स्त्रियां ङीप्। "ततस्त्रिंशत्तमे व्यूहे षड्विंशत्यतिदन्ती" शत०ब्रा० १०।४।२।२३।

**त्रिंशत्पत्र** न० त्रिंशत्संख्यानि पत्राणि दलानि प्रतिपुष्पमस्य। १कुसुदे शब्दमाला।

**त्रिंशांश** पु० त्रिंशस्त्रिंशत्पूरणोऽंशः। राशेस्त्रिंशत्पूरणे भागे षष्टिकलात्मके भागे षड्वर्गान्तर्गतानां राशिभेदे तेषामंशविशेषाणामधिपतयः ज्यो० उक्ता यथा

"पञ्च पञ्चाद्रिबाणा विषमे त्रिंशदंशकाः। माहेयशनिजीवज्ञशुक्राणां व्युत्क्रमात् समे"। विषमराशौ कुजशनिगुरुबुधशुक्राणां पञ्च पञ्चाष्टसप्तपञ्चमितास्त्रिंशांशकाः क्रमात् ज्ञेयाः। समे राशौ व्युत्क्रमात् तेषां विपर्य्ययेण त्रिंशांशा ज्ञेयाः। यथा मेषो विषमराशिः तत्र प्रथमावधिपञ्चांशा भौमस्य। षडंशमारभ्य दशमांशपर्य्यन्तं पञ्चांशाः शनेः। एकादशांशमारभ्याष्टादशांशपर्य्यन्तमष्टावंशा गुरोः। ऊनविंशांशमारभ्य पञ्चविंशांशपर्य्यन्तं सप्तांशा बुधस्य। ततः षड्विंशांशमारभ्य त्रिंशांशपर्य्यन्तं पञ्चांशाः शुक्रस्य त्रिंशांशाः क्रमात् ज्ञेयाः। निशुम्भसंज्ञतुलाधनुःकुम्भेष्वयमेवम्। समराशौ व्युत्क्रमादयं। वृषे प्रथमांशमारभ्य पञ्चांशा भृगोः। ततो द्वादशांशपर्य्यन्तं सप्तांशा बुधस्य, ततो विंशांशपर्य्यन्तमष्टावंशा गुरोः। ततः पञ्चविंशांशपर्य्यन्तं पञ्चांशाः कुजस्य त्रिंशांशाः। एवं कर्कन्याहस्तिकमकरमीनेष्वपि बोध्याः। त्रिंशदंशका ह्यत्र हस्तौ विभागवत् पूरणार्थता

**त्रिंशिन्** त्रि०त्रिंशत् प्रमाणमस्य इनि डित्र। त्रिंशत्प्रमाणे स्त्रियां ङीप्।

**त्रिक** न०त्रयाणां संघः कन्। १त्रित्वसङ्ख्यायाम् २पृष्ठवंशाधोभागे, ३कटिभागे, ४त्रिफलायाम् (हरितक्यामलकीबिल्वस्याफलत्रये) ५त्रिकटुनि, (शुण्ठीपिप्पलीमरिचत्रये)। वातादिषु मिलितेषु त्रिषु वर्तति कै-क। ६गोच्चुरे पु० अमरः। ७त्रिपदसंस्थाने हेम०। ८त्रिमदे "गुडुचीसारसंयुक्तात् त्रिकत्रयसमन्वयात्। वातरक्तं निहन्त्याशु सर्वरोगहरस्त्वयः" सुश्रुतोक्तः त्रिकत्रयं त्रिकटु त्रिमदम् त्रिफलम् चेति त्रयमित्यर्थः। "युगं सङ्कटकारविवर्तिनत्रिकः" माघः। "व्यपोढपार्श्वैरपवर्तितत्रिका" किरा०। "त्रिफला तु फलत्रिकम् "कथिद्विद्धत्रिकत्रिभिद्विहारः" रघुः। "एकं द्विकं त्रिकं चैव चतुष्कं पञ्चकं तथा" हरिवं०। ततीयेश्च रूपेण यड्यं यस्य कन् पूरणप्रत्ययस्य वा लुक्। ९ततीयके त्रि०। त्रयः अधिकाः शुल्कं लाभो वृद्धिर्वा यत्र शतादौ १०तत्राधिकलाभादियुक्ते शतादौ। "द्विकं त्रिकं चतुष्कञ्च पञ्चकञ्च शतं समम्। मासस्य वृद्धिं गृह्णीयात् वर्णानामनुपूर्वशः" मनुः। (शतकरा तिनटाका सुद) "स्कन्धस्थोः पृष्ठवंशास्थ्नोर्यः सन्धिस्तत्त्रिकं स्मृतम्" इत्युक्तौ ११सन्धिभेदे न०।

**त्रिककुद्** पु० त्रीणि ककुदवत्यानि अङ्गावयवस्य ककुदस्य अन्यलोपः समा०। त्रिकूटाख्ये पर्वतभेदे अमरः। पर्वत एवास्य अन्यलोपः नान्यत्र। तत् त्रिककुद तद्युक्ते त्रि०। २विष्णावपि पु० वा अन्यलोपः। "तथैवासं त्रिककुदो वाराहं रूपमास्थितः। त्रिककुत् तेन विख्यातः शरीरस्य प्रमाणतः" भा० आ० २४४ अ०। ३दशरात्रसाध्ये यज्ञभेदेऽपि वा अन्यलोपः। "त्रिककुद्वा एष यज्ञो यद्दशरात्रः ककुत् पञ्चदशः ककुदेकविंशः ककुत्तृतयस्त्रिंशो य एवं विद्वान् दशरात्रेण यजते त्रिककुद एव समानानाम्" तै०स०७।२।५।२। "चतुष्टोमात् समदा त्रिककुदः अश्वम् अथ मरुत्वतिककुदश्च, छन्दोमत्रिककुदम्" मा० श्रौ० १६।२६।१४। "यत् वा इन्द्रो वृत्रमहंस्तस्य यदब्रूषीत्तं गिरिं त्रिककुदमकरोत्" शत० ब्रा०३।१।३। १२। "वर्षिष्ठः पर्वतानां त्रिककुद्राम ते पिता" अथ०४।६।८।

**त्रिककुभ्** पु० त्रेधा कं पीतसदकं स्कुभ्नाति स्कुभ्नुम क्विप् क्रान्दसः मलोपः। १उदाने वायौ "उदानो वै त्रिककुप्कन्द्रः" शत०ब्रा०८।५।२।४। २नवरात्रसाध्ये यज्ञ-

भेदे। त्रिककुभोऽप्यत्र। त्रिककुबध्यर्द्धः पृषो०। महात्रिककुप् व्यूढो नवरात्रः। समूहत्रिककुप्समूढः" आह्नि०औ०१०। ३।२१ नवरात्र इत्यनुवर्त्तते,नारा०"चतुर्होम त्रिककुबध्यर्द्धोऽभिप्लवः एतैश्चतुर्भिः स्वानां श्रैष्ठ्यकामो यजेत। २२ एतैस्त्रिककुम्महात्रिककुप्समूढत्रिककुप्चतुर्होमत्रिककुद्भिः स्वानां श्रैष्ठ्यकामो यजेत। एतेषां दशमो वैश्वानर एव भवति। कामश्चैतेषामेकैकेन सम्बध्यते" नारा०।

**त्रिककुबधामन्** पु० मूर्द्धोर्ध्वमध्याभेदेन त्रिसृणां ककुभां दिशां समाहारः त्रिककुब् तत् धाम आश्रयो यस्य। विष्णौ विष्णुस०। [ गोचुरशब्दे शब्दर०।

**त्रिकट** पु० त्रीन् वातादिदोषान् कटति आवृणोति अच्।

**त्रिकटु** न० त्रयाणां कटुरसानां समाहारः। मिलितेषु शुण्ठीपिप्पलीमरिचेषु हेम०। "विश्वोषकुल्यामरिचं त्रयं त्रिकटु कथ्यते। त्रूषणं दीपनं हन्ति श्वासकास त्वगामयान्। गुल्ममेहकफस्थौल्य मेदस्त्रीपदपीनसान्" भावप्र०।

**त्रिकण्ट** पु० त्रयः कण्टाः कण्टका अस्य।।गोचुरे रत्नदीपे शब्दच०, च रत्नमा०।(टेङ्गरा)३मत्स्यभेदे शब्दर०।४पत्रयुक्ते शब्दच०। इदमत्रेन्दिमनीदुःस्पर्शाख्यके पुंद्रव्ये राजनि०।

**त्रिकण्टक** पु० स्त्री लघुगर्भमत्स्ये त्रिका० समा० द्वि०। २कण्टकत्रये स्त्री। ततः परिमाणे रजता०ञ्। त्रैकण्टक तत्परिमाणे। त्रयः कण्टका अस्य। ३गोचुरकण्टके पु० हेमच०।४कण्टकत्रयान्विते त्रि०।

**त्रिकद्रुक** पु०ज्योतिर्गौरायुरित्येतन्नामके "अभिप्लवात्त्रिकद्रुके "अभिप्लवत्रयं पूर्वं त्रिकद्रुका इत्याचक्षते" आश्व०औ०१२। १।११त्रिकद्रुकेषु पाहि सोमभिन्द्र!" ऋ०२।११।७"त्रिकद्रुकेषु ज्योतिर्गौरायुरित्येतन्नामकेषु आभिप्लविकेष्वहःसु: भा० "अत्राहार्षं ज्योतिर्गौरायुरिति त्रिकद्रुकाः" कात्या० श्रौ० २४।१।६ त्रिकद्रुक इति ज्योतिरादीनां समुदितानां संज्ञा संव्यवहारार्थो" कर्कः "त्रिकद्रुकाः पृष्ठावलम्ब्य इति पशुकामस्य" आश्व० श्रौ० ।१०।३।१६।

**त्रिकर्मन्** पु० त्रीणि कर्माण्यस्य। यजनं याजनञ्चैव तथा दानप्रतिग्रहौ। अध्यापनञ्चाध्ययनं षट् कर्मा धर्मभाग् द्विजः" भा० अनु० १३१ अ०। उक्तेषु षट्सु कर्मसु मध्ये इत्यर्थयाजनप्रतिग्रहाध्यापनभिन्नाद्यत्रयदाने-ज्याध्ययनरूपकर्मकारिणि द्विजे। "त्रैविद्यो ब्राह्मणो विद्वान् न चाध्ययनजीवकः। त्रिकर्मा त्रिपरिक्रान्तो मैत्र एष स्मृतः द्विजः" भा० अनु० १४१ अ०।

**त्रिकाय** न०त्रिसृणां कषायाणां तदाघातानां समाहारः। कषायातत्रये। कषायातत्रिकञ्च कषशब्दे १८२६पृ०दर्शितम्।

**त्रिकशूल** न० ह्रस्व०। वातजन्ये त्रिकस्थे व्यथाभेदे। "श्रोणिकस्थोः पृष्ठवंशास्थ्नोर्यः सन्धिस्तत्त्रिकं स्मृतम्। तत्र वातेन या पीडा त्रिकशूलं तदुच्यते" भावप्र०।

**त्रिका** स्त्री त्रिधा कायति कै-क। कूपसमीपस्थे जलोद्धारके त्रिदारुमये यन्त्रभेदे चीरस्वामी।

**त्रिकाण्ड** पु० त्रीणि काण्डान्यस्य। स्वर्गवर्गादिकाण्डभूमिवर्गादिकाण्डसामान्यकाण्डरूपात्मके नामलिङ्गानुशासने अमरसिंहकृते १कोषभेदे तस्यैव शेषभूतस्त्रिकाण्डशेषः पुरुषोत्तमकृतः यथाह तदुपोद्घाते"अलौकिकत्वादमरः स्वकोषे न यानि नामानि ससङ्गिलेख। विलोक्य तैरल्पधुना प्रचारमयं प्रयत्नः पुरुषोत्तमस्य"। २निरुक्ते तदपि त्रिकाण्डं तच्चानुक्रमणिकाभाष्ये दर्शितम् यथा "आद्यं नैघण्टुकं काण्डं द्वितीयं नैगमं तथा। तृतीयं दैवतं चेति समाम्नायस्त्रिधा मतः"। तत्रयाणां काण्डानां समाहारः ङीप्। त्रिकाण्डी ३काण्डत्रये स्त्री। त्रीणि काण्डानि प्रमाणमस्य मातृच् द्विगोस्तस्य लुकि चेत्परत्वे ङीप् त्रिकाण्डी चेत्यभिधेः। त्रिकाण्डभिते रज्वादौ स्त्री टाप्।

**त्रिकाय** पु० त्रयः काया अस्य त्रिकं दुःखत्रिकमेत्यस्मात् इ-अर्थादाने अच् वा। बुद्धदेवे हेमच०।

**त्रिकार्षिक** न० कर्षाय हितम् ठक् त्रयाणां वातपित्तकफानां कार्षिकम्। नागरातिविषास्तस्माख्ये भिषजिते औषधभेदे राजनि०।

**त्रिकाल** न० त्रयाणां कार्य्यकालभूतभविष्यत्कालानां समाहारः। १भूतभविष्यद्वर्त्तमानकालत्रये २प्रातर्मध्याह्नरूपकालत्रये च। "त्रिकालं पूजयेद्देवीम्" इति तन्त्रम्। त्रिकालज्ञः। त्रयः कालाः अस्य। ३कालत्रयवर्त्तिनि त्रि०। सास्यतकालं वाह्यं त्रिकालमाभ्यन्तरं करणम्" सां० का०। करणस्य मनसः त्रिकालवृद्ध्यादिसाधनत्वं यथा "नदीपुरभेदादनुद्वृष्टिः, अस्ति धूमादग्निरिह नगनिकुञ्जे, अस्त्यु पघातके पिपीलिकाण्डसञ्चरणाद्वृष्टिरिति। तदनुरूपाश्च सङ्कल्पाभिमानाध्यवसाया भवन्ति" सां० कौ०।

**त्रिकालज्ञ** पु० त्रिकालवर्त्तिपदार्थान् जानाति ज्ञा-क। १सर्वज्ञे त्रिकालविदादयोऽप्यत्र। २भूतभविष्यद्वर्त्तमानकालाभिज्ञे त्रि०। "युद्धं यथा यदा वा भविष्यदादिश्यते त्रिकालज्ञैः" ह०स० १७ अ०। त्रिकालवेत्तायप्यत्र।

**त्रिकालदर्शिन्** पु॰त्रिकालं तद्वर्तिवस्तु पश्यति दृश-णिनि। १ऋषौ हारा॰। २त्रिकालज्ञे त्रि॰"प्रध्वंसिन्यपि काले त्रिकालदर्शी कवौ भवति" इ॰ स॰ २१ अ॰।

**त्रिकूट** पु॰ त्रीणि कूटानि शृङ्गाण्यस्य। लवणसमुद्रमध्यस्थे लङ्कापुराधारे पर्वतभेदे अमरः। "तैरूढे केशरिक्रान्तत्रिकूटशिखरोपमा" माघः "स सागरमनाधृष्यमतिक्रम्य महाबलः। त्रिकूटस्य तटे लङ्कां स्थितः खस्थो ददर्श ह" रामा॰सु॰२अ॰। स आकारत्वेनास्त्यस्य अच्। २तद्वति सासमुद्रलवणे न॰। ३सुमेरुसुते क्षीरोदसमुद्रतीरस्थे पर्वते च तत्कथा वामनपु॰ "सर्वरत्नमयः श्रीमान् त्रिकूटो नाम पर्वतः। सुतः पर्वतराजस्य सुमेरोर्भास्कर द्युतेः। क्षीरोदजलवीच्या यो धौतामलशिलातलः। उत्थितः सागरं भित्त्वा देवर्षिगणसेवितः" इत्युपक्रमे "तस्यैकं काञ्चनं शृङ्गं सेवते यद्विभाकरः। नानापुष्पसमायुक्तं नानागन्धाधिवासितम्। द्वितीयं राजतं शृङ्गं सेवते यन्निशाकरः। पाण्डुराम्बुदसंकाशं तृतीयं वज्रसंचयसन्निभम्। वज्रेन्द्रनीलवैदूर्यतेजोभिर्भासयन् दिशः। तृतीयं ब्रह्मसदनं प्रकटं शृङ्गमुत्तमम्। न तत् क्रतुघ्नाः पश्यन्ति न नृशंसा न नास्तिकाः। नातप्ततपसो लोका ये च पापकृतो जनाः। तस्य सानुमतः पृष्ठे सरः काञ्चनपङ्कजम्। कारण्डवसमाकीर्णं राजहंसोपशोभितम्। गजोल्लचलसंकाशो मदाञ्चलितलोचनः। तृषितः पातुकामोऽसावपतीर्णश्च तज्जलम्। संलीनः पङ्कजवने यूथमध्यगतश्चरन्। गृहीतस्तेन रौद्रेण ग्राहेणाव्यक्तमूर्त्तिना। गरुडस्थो जगन्नाथो लोकाधारस्तपोधन!। ग्राहयुक्तं गजेन्द्रं तं तच्च ग्राहं जलाशयात्। उज्जहारामेयात्मा तरसा मधुसूदनः। स्थलस्थं दारयामास ग्राहं चक्रेण माधवः। मोचयामास नागेन्द्रं पापेभ्यः शरणागतम्"।

**त्रिकूटलवण** न॰ त्रिकूटं सासमुद्रमिव लवणम्। द्रोणीलवणे राजनि॰।

**त्रिकूटवत्** पु॰ त्रीणि कूटानि सन्त्यस्य मतुप् मस्य वः। १त्रिकूटपर्वते। "हिमवान् पारियात्रश्च सह्यः शुक्तिमांस्त्रिकूटवान्" भा॰ आश्व॰मेधिकप॰ अनुगीतापर्वतकथने ४३ अ॰।

**त्रिकूटा** स्त्री भैरवीभेदे तन्त्रसा॰।

**त्रिकूर्चक** न॰ सुश्रुतोक्ते शस्त्रभेदे अर्द्धधारशब्दे २७५ पृ॰ दृश्यम्। "विशेषेण बालवृद्धकुमारभीरुनारीणां राज्ञां राजपुत्राणाञ्च त्रिकूर्चकेन विस्रावयेत्" सुश्रु॰।

**त्रिकोण** त्रि॰ त्रयः कोणा यस्य। त्रिकोटियुक्ते १पदार्थे "विन्दुत्रिकोणवसुकोणदशारयुग्मम्" तन्त्रे श्रीचक्रोक्तौ। ज्योतिषोक्ते लग्नात् २नवमपञ्चमस्थाने न॰। "त्रिकोणं नवपञ्चमम्" दीपि०। "त्रिकोणगान् गुरुश्चैव पश्यन् पूर्णफलप्रदः" ज्यो॰ त॰। ३भोजे शब्दकल्पतरुः। ४त्रिभुजे क्षेत्रभेदे न०। क्षेत्रशब्दे २३६१ पृ॰समत्रिकोणविषमत्रिकोणादिस्वरूपादिकमुक्तम्। ५कामरूपपीठभेदे "करतोयां समारभ्य यावद्दिक्करवासिनीम्। शतयोजनविस्तारं त्रिकोणं सर्वसिद्धिदम्" कामाख्यातन्त्रम्। त्रिकोणपदार्थाश्च कतिचित् कविकल्पलतायां संचिप्य दर्शिताः। "त्रिनेत्रकामाख्यावङ्गिमण्डलैकारवज्रशृङ्गाटशकटयोनिरूपाः"।

**त्रिकोणफल** न॰ त्रिकोणं फलमस्य। १शृङ्गाटके भावप्र॰। २त॰। त्रिभुजक्षेत्रफले "लम्बगुणं भूमर्द्धं स्यात् त्रिभुजे फलं भवति" लीला॰। [काचारयवचारटङ्कषचारेषु।

**त्रिक्षार** न॰ त्रयाणां क्षाराणां समाहारः। मिलिते सर्जि-

**त्रिक्षुर** पु॰त्रीणि क्षुराणीवाग्राण्यस्य। कोकिलाख्यद्रुमे रत्ना॰।

**त्रिख** न॰त्रिधा खमाकाशोऽवकाशः फलेऽत्र। त्रपुषे शब्दच॰।

**त्रिखट्व** न॰ त्रिषां खट्वानां समाहारः। खट्वात्रये। ततः वा ङीप्। तत्रार्थे स्त्री अमरः।

**त्रिखर्व** पु॰सामवेदशाखाभेदाध्यायिनि "तामेतान्त्रिखर्वा उपासते तस्मात्ते स्पर्द्धमाना न व्यृध्यन्ते" ताण्ड्यब्रा॰२।८।२। "नामेतां दशसंख्यां विष्टुतिं त्रिखर्वाः प्राच्यिन उपासते प्रयुञ्जते" भाष्यम्।

**त्रिगङ्ग** अव्य॰ त्रिस्रो गङ्गा नद्यो यत्र बहुव्रीह्यर्थे "नदीभिश्च" पा॰ अव्ययी॰। १तीर्थभेदे। "सप्तगङ्गे त्रिगङ्गे च इन्द्रमार्गे च तर्पयन्। सुधां चैव लभेत् भोक्तुं यो नरो जायते पुनः" भा॰अनु॰ २५ अ॰।

**त्रिगण** त्रि॰ त्रयाणां गणः। १त्रिवर्गे अमरटीकायां नीलकण्ठः "न बाधतेऽस्य त्रिगणः परस्परम्" किरा॰।

**त्रिगन्धक** न॰ त्रयाणां गन्धकद्रव्याणां समाहारः। १त्रिजातके त्रि॰ नैघण्टुपारस्करः। त्रिसुगन्धिकमप्यत्र। त्रिजातकशब्दे दृश्यम्।

**त्रिगम्भीर** पु॰त्रिभिर्गम्भीरः। स्वरेण सत्त्वनाभ्यां त्रिगम्भीरः शिशुः शुभः" काशी॰ ११ अ॰ उक्ते शुभलक्षणयुक्ते "त्रिषु विपुलो गम्भीरस्त्रिष्वेव बहुशतचतुर्ष्वः" इत्युपक्रमे "नाभिः स्वरः सत्त्वमिति प्रदिष्टं गम्भीरमेतत्त्रितयं नराणाम्" इ॰ स॰ ६८ अ॰।

**त्रिगर्त्त** पु० तीणि गर्त्तानि यत्र। १जालन्धरे देशे स च देशः ह० म० १४अ० कूर्मविभागे उत्तरस्यामुक्तः "उत्तरतः कैलास" इत्युपक्रमे "आदर्शानहीपित्रिगर्ततुरगाननाश्वमुखाः" सोऽस्याभिजनः, तस्य राजा वा अण्। त्रैगर्त्त पितृादिक्रमेण तद्देशवासिनि तद्भूमे च बहुषु अपो लुक्। २तत्रार्थे ब० व०। "द्रविड़ाम्बष्ठत्रिगर्तसौराष्ट्रान्" ह० म० ६अ०। "सुगर्भा च नरव्याघ्र! त्रिगर्तः प्रस्थलाधिपः" भा० द्रो० १७अ०। आर्षत्वात् एकत्वेऽपि अपो लुक्। "भद्रराजश्च बलवान् त्रिगर्त्तानाधीश्वरः" हरिवं० ६१ अ०। स्वार्थे क। तत्रार्थे त्रिका०।

**त्रिगर्तषष्ठ** पु० ब० व० त्रिगर्त्तः षष्ठो वर्गो यस्य। १आयुर्जीविसंघभेदे स च संघः स्त्रि० कौ० उक्तो यथा "आहुस्त्रिगर्त्तषष्ठांस्तु कौरवोपरवदाख्यकौ। क्रौष्टुकिर्जालभालिश्च ब्रह्मगुप्तोऽथ जानकिः" "दामन्यादित्रिगर्त्तषष्ठाच्छः" पा० स्वार्थे तेभ्यः छ। कौरवोपरवीय इत्यादि।

**त्रिगर्त्ता** स्त्री त्रयो योनिस्था गर्त्ताः यस्याः। कासक्यङ्गनायां मेदि०। एकयोनिकायां अपि तस्यां मैथुनाचरणे त्रियोनिकतुल्यत्वात्तथात्वम्।

**त्रिगुण** न०तयाणां सत्त्वरजस्तमसां गुणानां समाहारः। समाहृता वा त्रयो गुणाः,त्रयोगुणा यस्य वा। सांख्यमतसिद्धे साम्यावस्थापन्नगुणत्रयात्मके १प्रधाने। "त्रिगुणमविवेकिविषयं सामान्यमचेतनं प्रसवधर्मि" सा० कौ० "त्रिगुणं त्रयो गुणाः सुखदुःखभोहा यस्येति त्रिगुणं तदनेन सुखादीनामात्मगुणत्वं पराभिमतमपाकृतम्" त०कौ०"शब्दस्पर्शविहीनं तद्रूपादिभिरसंयुतम्। त्रिगुणं तज्जगद्योनिरनादिप्रभवाव्ययम्" विष्णुपु०"सत्त्वरजस्तमसां साम्यावस्था प्रकृतिः प्रकृतेर्महान्महतोऽहङ्कारोऽहङ्कारात् पञ्च तन्मात्राण्युभयमिन्द्रियं तन्मात्रेभ्यः स्थूलभूतानि पुरुष इति पञ्चविंशतिर्गणः" सा० सू०। "सत्त्वादीनि द्रव्याणि न वैशेषिकवद्गुणाः संयोगवत्त्वात्, लघुत्वचलत्वगुरुत्वादिधर्मकत्वाच्च। तेष्वत्र शास्त्रे सत्त्वादौ च गुणशब्दः पुरुषोपकरणत्वात्पुरुषप्रयुक्तबन्धकत्रिगुणात्मकमहदादिरज्जुनिर्माणत्वाच्च प्रयुज्यते। तेषां सत्त्वादिद्रव्याणां या साम्यावस्था न्यूनातिरिक्तावस्था न्यूनाधिकभावेनाबंहतावस्थेति यावत्। अकार्यावस्थेति निष्कर्षः। अकार्यावस्थोपलक्षितं गुणसामान्यं प्रकृतिरित्यर्थः। यथाऽऽहुर्वैधर्म्यावस्थायां प्रकृतिनाशप्रसङ्गात् "सत्त्वं रजस्तम इति एषैव प्रकृतिः सदा। एषैव संसृतिर्जन्तोरस्याः पारे परं पदम्" इत्यादिश्रुतिभिर्गुणमात्रस्यैव प्रकृतित्वकथनाच्च। सत्त्वादीनामनुगमाय सामान्येति। पुरुषव्यावर्तनाय गुणेति। महदादिव्यावर्तनाय चोपलक्षितान्मिति। महदादयोऽपि हि कार्यसत्त्वादिरूपाः पुरुषोपकरणतया गुणाश्च भवन्तीति। तदत्र प्रकृतेः स्वरूपमेवोक्तम्" भाष्यम् २सत्त्वादिगुणयुक्ते त्रि० "महान्तमेव चात्मानं सर्वाणि त्रिगुणानि च। विषयाणां गृहीतृणि शनैः षड्वेन्द्रियाणि च" मनुः। त्रिभिर्गुण्यते गुण-घञर्थे क। ३त्रिभिर्गुणिते त्रि० "सप्त व्यतीयुस्त्रिगुणानि तस्य दिनानि दीनोद्धरणोचितस्य" रघुः "व्रताय मौञ्जीं त्रिगुणां बभार वाम्" कुमा० "एतच्छौचं स्नातकानां द्विगुणं ब्रह्मचारिणाम्। त्रिगुणं स्नातकानां यतीनान्तु चतुर्गुणम्" मनुः। त्रयोगुणा अस्याः। ४मायायां स्त्री ५तन्त्रोक्ते (ह्रीं)बीजभेदे च "वेदादां त्रिगुणां रमामथ वदेत् कामेन संसेविताम्" तन्त्रसा० श्रीविद्यामन्त्रभेदोक्तौ ६त्रिशिखे त्रिशूले "त्रिगुणपरिवारमहरणः" किरा०। "त्रिगुणः त्रिशिखः परिवार आकारो यस्य" मल्लि०। कर्मशब्दे परेऽस्य लक्षणपरत्वे दीर्घत्वम् त्रिगुणौ कर्णौ अस्य। त्रिगुणाकर्ण तथा लक्षणयुक्ते त्रि०। "यदैस्त्रिभिर्विहिनो रागादि त्रिपदार्थ वा। उत्पत्तिस्थितिनाशेषु रजादित्रिगुणा मता" देवीपु० ४५ अ० उक्तेः ७ दुर्गायां स्त्री।

**त्रिगुणाकृत** त्रि० त्रिगुणं कृत्वा कृत डाच् क-क। त्रिधाकृतेन कृते चेतादौ अमरः।

**त्रिगुणात्मक** न० त्रयो गुणाः तेजोबन्नरूपा आत्मानोऽस्य। आत्मने। "गुणाश्च लोहितशुक्लकृष्णाः अज्ञानकार्येषु तेजोबन्नेष्वग्नान्नरप्रकृतिषु श्रुतिप्रसिद्धाः। तथा च कार्यगतत्रिरूपेण कारणमप्यज्ञानमव्यक्तात्मकं त्रिगुणात्मकम्। यद्वा रजःसत्त्वतमोलक्षणास्त्रयोगुणास्तदुक्तमज्ञानं गुणगुणिनोरभेदविवक्षया त्रिगुणात्मकं भवति।

**त्रिगुणित** त्रि० त्रिभिर्गुणितः। त्रिराहत्ते।

**त्रिगुणी** स्त्री त्रयो गुणाः यत्रेऽस्याः गौरा०। ङिबन्तेऽस्य यत्रस्य त्रिगुणात्मकत्वात्तथात्वम्। "मूलं धार्य्यं त्रिगुणग्राः सवितरि विगुणे, चोरिकामूलभिन्दो"ज्यो०"त्रिगुणी श्रीफलवृक्षः" प्रभिधा०।

**त्रिचक्र** पु० त्रीणि चक्राण्यस्य। अश्विनीकुमारयोः रथे। "अधाङ् त्रिचक्रो मधुवाहनो रथो जीवाश्वो अश्विनो यातु सुष्टुतः" ऋ०१।१५७।२।

**त्रिचक्षुस्** पु० तीणि चक्षूंष्यस्य । त्रिनेत्रे शिवे "त्रिचक्षुः शम्भुरेकस्त्वं विभुर्दामोदरोऽपि च" भा० शा० ४२ अ० ।

**त्रिचतुर** त्रि० । त्रयो वा चत्वारो वा विकल्पार्थे बहु० डच् समा० । विकल्पेन त्रित्वचतुष्कसंख्यान्विते (तिन वा चार) अर्थे । "सद्यः पुरीषपरिसरे च शिरीषसद्मो गत्वा जवात् त्रिचतुराणि पदानि सीता" सा० द० ।

**त्रिचित्** पु० त्रीन्+अग्नीन् चिनोति अग्नि-चि-भूते क्विप् । अतीताग्नित्रयचयनकर्तरि ।

**त्रिचित** पु० त्रिभागोत्सेधाभिरिष्टकाभिः चितः । गार्हपत्येऽग्निभेदे । "त्रिचितमित्येके" कात्या० श्रौ० १७।१।२२ । "गार्हपत्यं कुर्वन्ति तत्र च त्रिभागोत्सेधा इष्टका इति सम्प्रदायः। अथिं च पक्षे प्रथमचितिः लोकंपृणानां पूरणं सूत्रम्" कर्कः । "उपर्येव चितित्वात्कं चिनोति । अथ यो गार्हपत्येऽग्निः सोऽस्यावाङ् प्राणाः तं हैके त्रिचितं चिन्वन्ति" शत० ब्रा० ७।१।२।१५ ।

**त्रिजगत्** न० त्रिगुणितं जगत् संघातत्वात् कर्मधारयः । स्वर्गमर्त्यपातालरूपे लोकत्रये "तस्यां प्रियस्त्रिजगतो जनको जनन्याः" भाग० ८।८।१६ श्लो० । त्रिजगत्यत्र स्त्री "अन्तराल एव त्रिजगत्यास्तु दक्षिणस्याम्" भाग० ५।२६।६ श्लो० ।

**त्रिजटा** स्त्री त्रिको जटा यस्याः ।१रावणालयस्थे सीतापहारितराक्षसीभेदे "सीतां ताभिरनार्याभिर्दृष्ट्वा संतर्जितां तदा । राक्षसी त्रिजटा दृष्ट्वा प्रबुद्धा वाक्यमब्रवीत्" । "एवमुक्त्वात्रिजटया राक्षस्यः क्रोधमूर्च्छिताः" रामा० २७ अ० "हनुमानपि विक्रान्तः सर्वं शुश्राव तत्त्वतः । सीतायास्त्रिजटायाश्च राक्षसानाञ्च गर्ज्जितम्" ३० अ० । "सीतां मायेति शंसन्ती त्रिजटा समजीवयत्" रघुः । २शिवे पु० । "त्रिजटाय त्रिशीर्षाय त्रिशूलायुधपाणिने । त्र्यम्बकाय त्रिनेत्राय त्रिपुरघ्नाय वै नमः" भा० अनु० २८६ । ३विश्वदेवे पु० । "शृणु देवि ! प्रवक्ष्यामि रहस्यं त्रिजटोत्तमम् । एवं ब्रह्ममयं देवि ! अद्भुतं वरवर्णिनि ! । श्रीशैलशिखरे जातः श्रीफलः श्रीनिकेतनः । विष्णुप्रीतिकरश्चैव मम प्रीतिकरः सदा । ब्रह्मविष्णुशिवाः पत्रे फले च शक्तिरूपिणी । फलमूले तु वज्रं स्यात् पत्रं ब्रह्म त्विदं प्रिये ! । एवञ्च त्रिजटापत्रैर्हरं वा हरिमर्चयेत् । कैवल्यं तस्य तेनैव भक्तिपूजा विशेषतः" ज्ञानभैरवीतन्त्रे ६प० ।

**त्रिजात** न० त्रिगुणितं जातं सुगन्धिद्रव्यरूपं सुन्दरद्रव्यं संघातत्वात् कर्म० । १तुल्यभागे त्वगेलापत्ररूपे मिलितेसुगन्धिद्रव्यभेदे । स्वार्थे क । त्रिजातक तत्रार्थे "त्वगेलापत्रकैस्तुल्यैस्त्रिसुगन्धि त्रिजातकम् । नागकेशरसंयुक्तं चतुर्जातकमुच्यते" राजनि० "एलादिभिः समुद्दिष्टं त्रिजातं त्रिसुगन्धिकम् । चतुर्जातं सनागञ्च इदं वातकफापहम्" "शीतं त्रिजाताक्षमथो विसह्य योगानुरूपा गुटिकाः प्रयोज्याः" "व्योषं त्रिजातकं सुक्ष्मा विड्वराम्लके तथा" सुश्रु० ।

**त्रिजीवा** स्त्री त्रिषु राशिषु जीवा । त्रयाणां राशीनां ज्या-३४३८ संख्यारूपे ज्यार्द्धरूपे पदार्थे "खाब्ध्यब्राग्नित्रिजीवाग्रः स्फुटो भूपरिधिः खकः" सू० सि० । "त्रिज्या० वा गजाग्निवेदराम ३४३८ सितवा भक्तः" रङ्गना० । त्रिजग्रादयोऽत्यल । "तच्छेषं विवरेणाथ हन्यात् त्रिजाग्न्यकर्णयोः" सू० सि० "त्रिज्यान्त्यकर्णयोस्त्रिराशिज्यादितीयशीघ्रकर्णयोः" रङ्गना० ।

**त्रिण** न० तृण+पृषो० । तृणशब्दार्थे शब्दरत्ना० । तृणशब्द्व्युत्पत्तौ रेफेकारसंयुक्तमव्युत्पन्नशब्दान्तरमस्तीति उज्ज्वलद० । "उत्तिष्ठप्रत्रिणपत्रप्रांशुविटपः सौम्यखनः पूजितः" वराहः ।

**त्रिणता** स्त्री त्रिषु स्थानेषु नता संघातत्वात् पूर्वपदात् षत्वम् । १धनुषि त्रिका० । २त्रिषु स्थानेषु नते त्रि० । असंघातायां न षत्वमिति भेदः । "स्वयुग्वैराफलमाम्रे राजन्य गणिका इव । कासुकानिव मालीकांस्त्रिणताः सङ्गसाऽसृजन्" माघः । वेद्यानां मध्यभूषु त्रिषु स्थानेषु नतत्वात् त्रिणतत्वं ज्ञेये वनकारयोरभेद इत्यालङ्कारिकाः । त्रिणस्य भावः तल् । १तृणभावे तृणत्वे च स्त्री ।

**त्रिणव** पु० त्रिराद्यत्तानव इच्समा० संघातत्वात् षत्वम् । सप्तविंशाहस्ते सामस्तोमभेदे । "त्रिणवत्रयस्त्रिंशौ स्तोमौ ज्ञेयनशिशिराद्यहः" यजु० १०।१४ । "त्रिणवस्तोम एव माम्नातः "नवभ्यो हिंकरोति स तिसृभिः स पञ्चभिः स एकया" नवभ्यो हिङ्करोति स एकया स तिसृभिः स पञ्चभि, नवभ्यो हिङ्करोति स पञ्चभिः स एकया स तिसृभिर्वज्रो वै त्रिणव इति" श्रुतिः । "प्रथमपर्य्याये प्रथमां त्रिगायेत् मध्यमां पञ्चकृत्वः उत्तमां सकृत्, द्वितीयपर्य्याये प्रथमां सकृदावेत्यमध्यमां त्रि,रुत्तमां पञ्चकृत्वः,तृतीयपर्य्याये प्रथमां पञ्चकृत्वो, मध्यमां सकृ,दुत्तमां त्रिगायेत् सोऽयं त्रिराद्यत्तनवसंख्योपेतत्वात् त्रिणवको वज्रसमानः स्तोमः" वेददी० । "त्रिणवान्युक्थानेकविंशानि षट्शतानि षट्-

त्रिंशः" शतपथब्राह्मणे १२।५।४।२०। अध्यायादि।

त्रिणाचिकेत पु० त्रिःकृत्वश्चितो नाचिकेतोऽग्निर्येन पृषो० संज्ञात्वात् णत्वम्। अध्ययुभेदे "ज्ञायतपो ब्रह्मविदो वदन्ति पञ्चाग्नयो ये च त्रिणाचिकेताः" इति श्रुतिः "त्रिणाचिकेतः पञ्चाग्निस्त्रिसुपर्णः षडङ्गवित्" मनुः।

त्रित पु० १४६।६७ पृ०एकतशब्दोक्ते व्याख्ये १देवभेदे ब्रह्मणो मानसपुत्ररूपे २ऋषिभेदे च त्रिषु त्रित्यादिस्थानेषु तायमानः ताय-ड। त्रिषु विस्तीर्णतमे ३प्रख्यातकीर्त्तौ च त्रि०। "यस्य त्रितो व्योजसा वृत्रं विपर्वमर्दयत्" ऋ० १। १८७।१। [तच्छब्दं त्रितये। स्त्रीत्वे वा ङीप्।

त्रितच्च न० स्त्री त्रयाणां तच्छब्दं समाहारः अच् समा०

त्रितय न०स्त्री त्रयाणामवयवः त्रयोऽवयवा वेषाम् वा तयप्॥ त्रयशब्दार्थे १त्रित्वसंख्यायाम् "ब्रह्मकृत्याव्रतं वापि वत्सरत्रितयं चरेत्" याज्ञ० "उदुदुम्बरकत्रितयेन साम्नातम्" माधवः। "वरमाप स दिष्टपतित्रितयानन्यसहग्-गुणोदयाम्" नैष०। स्त्रियां ङीप्। २तत्सङ्ख्याविशिष्टे त्रि०। "पतिश्वशुरता ज्ञेये पतिदेवरतानुजे। इतरेषु च पाञ्चाल्याः त्रितयं त्रितयं त्रिषु" शब्दटः। "त्रितयं ज्ञानमयेन चक्षुषा" रघुः। "प्रणवव्याहृतिभ्यां च गायत्र्या त्रितयेन च। उपास्यं परमं ब्रह्म आत्मा यत्र प्रतिष्ठितः" योऽयाज्ञ०। [धिभौतिकाधिदैविकरूपे दुःखत्रये।

त्रिताप न० त्रयाणां तापानां समाहारः। आध्यात्मिका-

त्रिदण्ड न० त्रयाणां दण्डानां समाहारः। १चतुरङ्गुलगो-बालवेष्टनादन्योन्यसंबद्धे यतेर्दण्डत्रये। २वाङ्मनःकाय-दण्डत्रये च। तदस्यास्तीति अच्। ३संन्यासाश्रमे पु०। त्रिदण्डिशब्दे दृश्यम्। "यस्त्वसंकृतषड्वर्गः प्रचण्डेन्द्रि-यसारथिः। ज्ञानवैराग्यरहितस्त्रिदण्डमुपजीवति" भाग०

त्रिदण्डिन् पु० त्रिदण्डमस्त्यस्य इनि। सन्यासाश्रमे। "वा-गदण्डोऽथ मनोदण्डः कायदण्डस्तथैव च। यस्यैते निहिता बुद्धौ त्रिदण्डीति स उच्यते। त्रिदण्डमेतन्निक्षिप्य सर्वभूतेषु मानवः। कामक्रोधौ तु संयम्य ततः सिद्धिं नियच्छति" मनुः। "त्रिदण्डमयहस्थादेव प्रेतत्वं नैव जायते। अहन्येकादशे प्राप्ते पार्वणन्तु विधीयते" त्रिदण्डिसं० तस्यापि पार्वणं श्राद्धं विहितम्।

त्रिदला स्त्री तीणि तीणि दलानि प्रतिपत्रं यस्याः। (गो-जालिया) १गोधापदोक्तायाम् जटा०। २बिल्लवृक्षे पु०।

त्रिदलिका स्त्री तीणि दलानि प्रतिपत्रेऽस्याः कप् कापि अत इत्त्वम्। चर्म्मकसालतायां शब्दच०।

त्रिदश पु० त्रिषो दशा जन्मसत्ताविनाशाख्या न तु वृद्धि परिणामक्षया मर्त्यानामिव यस्य, तीन् तापान् दशति वा दश-अच्प्रत्यये संज्ञायां कर्त्तरि को वा। १देवे अमरः। अथ वा त्रयधिकास्त्रिराहुत्याश्च दश परिमाणमेषां डच् समा० शाक० अधिकाहुत्यशब्दलोपः एकस्यैव त्रिशब्दस्य तन्त्रतयोच्चारणात् उभयार्थपरत्वम्। तत्रस्त्रिंशन्मुख्य-गणवत्तु २देवेषु अयमेव पक्षः सुत्यनुगुणास्तु च दश चेति छान्दोग्येऽभिहित्वात् त्रयधिकाहुत्तपरतादद्योतन-तार्थं तु चेति द्विवचनान्ततया निर्देशः। ते च देवाः "अर्का द्वादश, रुद्रा एकादश, वसवोऽष्टौ, अश्विनौ द्वा-विति। अश्विनीकुमारौ विहाय इन्द्रः प्रजापतिश्चेति वा द्वाभ्यां पक्षान्तरे संख्यापूरणं तत्रस्त्रिंशत्पदशब्दे मूलं दृश्यम् "तस्मिन् मघोनस्त्रिदशान् विहाय" कुमा०। "त्रिदशैर्दिशे नमः" माघः। तिस्रो दशा जायदाद्यवस्था यस्य। ३जीवे त्रिदशाध्यक्षशब्दे दृश्यम्।

त्रिदशगुरु पु०ष०त०। बृहस्पतौ। "धूमाभेऽनाहुतिस्त्रिदशगुरौ रूपवधो दिवा दृष्टे" बृ० स० ८ अ०।

त्रिदशगोप पु० त्रिदशो देवभेद इन्द्रः गोपो रक्षकोऽस्य तस्य वर्षाभवत्वात्। इन्द्रगोपकीटे "अहृषे त्रिदशगोपमा-तृके" रघुः। [यादयोऽप्यत्र।

त्रिदशदीर्घिका स्त्री ष०त०। गङ्गायां क्षेमच०। त्रिदशवा-

त्रिदशपति पु० ष०त०। इन्द्रे त्रिदशेश्वरादयोऽप्यत्र।

त्रिदशमञ्जरी स्त्री त्रिदशप्रिया मञ्जरी यस्य संज्ञात्वात् न कप्। तुलस्याम् राजनि०।

त्रिदशवधू स्त्री ष०त०। अप्सरःसु त्रिदशवनितादयोऽप्यत्र "कैलासस्य त्रिदशवनितादर्पणस्यातिथिः स्याः" मेघ०।

त्रिदशवर्त्मन् न०ष०त०। नभसि शब्दार्थचि०। [नैष०चरित्रकारः

त्रिदशसर्षप पु० त्रिदशप्रियः सर्षपः। १देवसर्षपे सर्षपभेदे

त्रिदशाङ्कुश पु० ष०त० वज्रे शब्दार्थचिन्तामणिः।

त्रिदशाचार्य्य पु० ष०त०। बृहस्पतौ हलायु०।

त्रिदशाधिप पु० ष०त०। शक्रे।

त्रिदशाध्यक्ष पु० विष्णौ "त्रिदशस्त्रिदशाध्यक्षः" विष्णुस०। अस्य व्युत्पत्तिर्भाष्ये दर्शिता यथा "गुणावेशेन संजाता-स्तिस्रो दशा अवस्थाजाग्रदादयस्तासामध्यक्ष इति त्रिदशाध्यक्षः। त्रिदशानां वाऽध्यक्षः स्वामी"।

त्रिदशायन पु०त्रिदशानामयनं यत्र। विष्णौ "नारायणाया-त्मभवायनाय लोकायनाय त्रिदशायनाय" हरिवं १४३अ०।

त्रिदशायुध न० ष०त०। १वज्रे त्रिकाण्ड०। २इन्द्रधनुषि च।

"अथ नभस्य इव त्रिदशायुधम् कनकपिङ्गतडिद्गुणसंयुतम्" रघुः।

**त्रिदशारि** ६त० । असुरे शब्दरत्ना० ।

**त्रिदशालय** पु० ६त० । १स्वर्गे अमरः। २सुमेरुपर्वते हलायु०

**त्रिदशावास** पु० ६त० । १स्वर्गे हला०। २सुमेरुपर्वते च ।

**त्रिदशाहार** ६त० । अमृते सुधायां हलायु०।

**त्रिदशेश्वर** पु० ६त० । १इन्द्रे २दुर्गायां स्त्री ङीप् । "सराङ्गास्त्रिदशा देवा नन्दिनी दुन्दुभिर्मता । तेषाञ्च नन्दिनी नन्दी ईशत्वात् त्रिदशेश्वरी" देवीपु० ४५ अ० ।

**त्रिदिनस्पृश्** पु० त्रिदिनं स्पृशति स्पृश–क्विन् । १त्रिदिनस्पर्शे जयाहे अवमदिनभेदे यथा "तिथ्यलक्षयमेको दिनवारः स्पृशति यत्र तद्भवत्यवमदिनम् । त्रिदिनस्पृक् दिनत्रयस्पर्शनादृक्षः" इति ज्यो० त० । अयनशब्दे ४२१ पृ० तदानयनादि द्रष्टव्यम् । अस्य क्विन्नन्तत्वात् झलि पदान्ते च कुत्वम् ।

**त्रिदिव** पु० त्रयो ब्रह्मादयो दीव्यन्त्यत्र यजर्थे आधारे क, त्रिधा सत्त्वादिभेदेन दीव्यन्ति प्रकाशन्तेऽत्र दिव–क वा तृतीया द्यौः ह्रस्वविषये संज्ञाशब्दस्य पूरणार्थत्वात् पृषो० । लोकात् पुंस्त्वम् । १स्वर्गे, अमरः २आकाशे, हेमच० । ३नभसि ४सुखे न० शब्दार्थचि० । ५नदीभेदे स्त्री मेदि० । "न क्षीणस्य त्रिदिवेऽपि भूपतेः" । "त्रिदिवस्थेऽपि निस्पृहोऽभवत्" । "देवादिनाम त्रिदिवेऽपि यस्य" रघुः। "अयं किल त्वं त्रिदिवादवातरः" माघः ।

**त्रिदिवाधीश** पु० ६त० । १इन्द्रे हेम० २देवमात्रे च । त्रिदिवेश्वरादयोऽप्यत्र ।

**त्रिदिवेश** पु० ६त० । १देवे अमरः ।

**त्रिदिवोद्भवा** स्त्री त्रिदिव उद्भवो यस्याः । १स्थूलैलायां राजनि० । २गङ्गायाञ्च । ३स्वर्गभवमात्रे त्रि० ।

**त्रिदिवौकस्** पु० त्रिदिव ओको यस्य । १देवे अमरः।"यस्यास्येन सदाश्नन्ति हव्यानि त्रिदिवौकसः" मनुः पृषो० त्रिदिवौकसोऽपि तत्रार्थे ।

**त्रिदृश्** पु० त्रिभिः दृशोऽस्य त्रीणि भूतादीनि पश्यति वा दृश–कर्त्तरि क्विप् वा । १त्रिनयने शिवे हेमच० ।

**त्रिदोष** न०त्रयाणां दोषाणां वातपित्तकफजानां समाहारः । १वातपित्तकफजदोषत्रये त्रयो दोषाहेतुत्वेन यत्र । २त्रिदोषजे रोगभेदे त्रिदोषजशब्दे दृश्यम् ।

**त्रिदोषज** त्रि० त्रिदोषात् जायते जन–ड । दोषत्रयजाते वातादिसन्निपातजे रोगभेदे "चिरज्वरे वातकफोल्लसे वा त्रिदोषजे वा दशमूलमिश्रः । किराततिक्तादिगणः प्रयोज्यः शुद्ध्यर्थिने वा त्रिफलाविमिश्रः" चक्रद० । अस्य पूर्वरूपं "सर्वलिङ्गसमवायः"भावप्र० । ज्वरशब्दे दृश्यम् ।

**त्रिधन्वन्** पु० सुधन्वनः पुत्रभेदे "सुधन्वनः सुतत्रयीत् त्रिधन्वा रिपुमर्दनः । रात्रस्त्रिवर्म्मणस्त्रासीद्दिव्यास्त्रत्रयधारणः सुतः" हरिवं० १२ अ० ।

**त्रिधा** अव्य० त्रि+प्रकारे धाच् । त्रिप्रकारे । "एकैकमूर्त्तिर्विभिदे त्रिधा सा"कुमा०।"ज्ञानं कर्म च कर्त्ता च त्रिधैव गुणभेदतः" गीता ।

**त्रिधातु** पु० त्रीन् धर्मार्थकामान् दधाति पुष्णाति धा–तुन् । १गन्धे त्रिका० । समा०हिगुः । २धातुत्रये न० ।

**त्रिधामन्** पु० त्रीणि धामानि भूरादीनि स्थानानि, तेजांसि सत्त्वादीनि वा यस्य । १शिवे, २विष्णौ, ३अग्नौ च । शब्दार्थकल्पतरुः । समाहारद्विगुः।४धामत्रये न०स्त्री स्त्रीत्वपक्षे वा ङीप् ।"स एवोक्तक्रमिदं त्रिधाभिसन्धायुक्तं वक्ष्ते वै त्रिधाम" भा० आनु० १५८ अ० । "त्रिधामानं जगत्स्थास्नुं चरन् विष्णुं सनातनम्" हरिवं० २७१अ० । ६त्रिसंख्यान्विते त्रि० तति च कतिचित् संख्यिय "त्रिगुणोऽतसवर्णी चिद्रूपा शिवगेहिनी । प्रसूते" इत्युपक्रमे "त्रिपुष्करं स्वरान् देवीर्ब्रह्मादीनां त्रयं त्रयम् । यक्षिकात्रयं शक्तित्रयं दृक्त्रितयं महत् । नाड़ीत्रयं त्रिवर्गं सा यद्यदन्यत् त्रिधाम तत्" शा० ति० उक्तानि । अन्यान्यपि त्रित्वसंख्यान्वितानि एकादिशब्दे द्रष्टव्यानि ।

**त्रिधामूर्त्ति** पु० त्रिधा मूर्त्तिरस्य । ब्रह्मविष्णुमहेशरूपमूर्त्तित्रयान्विते परमेश्वरे ।

**त्रिधार** त्रि०त्रिस्रो धारा अस्याणि, त्रिषु स्थानेषु वा धाराः प्रवाहा अस्य अस्या वा । १धारात्रयान्विते २गङ्गायां स्त्री तस्याः स्वर्गमर्त्यपातालेषु धारारूपत्वात् तथात्वम् ३क्षुद्रोहे च शब्दार्थचि० । तस्य अवयवत्वात् तथात्वम् ।

**त्रिधारक** पु० त्रिस्रो धारा अस्याणश्च कप् संज्ञायां कन् वा । गुग्गुलुवृक्षे राजनि० ।

**त्रिधारक्षुद्र** स्त्री त्रिषु भागेषु धारा यस्याः कर्म० । (तेकांटासिजु) क्षुद्रोभेदे राजनि० ।

**त्रिधाविशेष** पु०त्रिधा त्रिप्रकारो विशेषः । सूक्ष्मादित्रयरूपे विशेषे "सूक्ष्मा मातापितृजाः सह प्रभूतैः त्रिधा विशेषाः स्मृः"सां०का० । "सूक्ष्मशरीरमेकः माता पितृजो द्वितीयः सहाभूतानि तृतीयो विशेषः । तेषां

मध्ये सूक्ष्मानियताः मातापितृजा निवर्तन्ते कीटाना वा भक्षाना वा विड्जा वेति" त० कौ० ।

**त्रिधासर्ग** पु० त्रिकारः सर्गः । १भूतादिसर्गे । "अष्टविकल्पो दैवस्तैर्य्यग्योनश्च पञ्चधा भवति । मानुषश्चैकविधः समासतोऽयं त्रिधासर्गः" सां० का० । "ब्राह्मः प्राजापत्यः ऐन्द्रः पैत्रः गान्धर्वः याक्षः राक्षसः पैशाच इत्यष्टविकल्पो दैवः सर्गः । पशुमृगपक्षिसरीसृपस्थावरा इति पञ्चविधस्तैर्य्यग्योनः सर्गः । मानुष्यश्चैकविधः ब्राह्मणाद्यवान्तरजातिभेदाविवक्षया संख्यानस्य चतुर्ष्वपि वर्षेष्वविशेषात्" सां० त० कौ० ।

**त्रिनयन** पु० त्रीणि नयनानि यस्य "पूर्वपदात् संज्ञायामगः" पा० णत्वे प्राप्ते चुत्वा० पाठात् न णत्वम् । १महादेवे "योऽस्य त्रिनयनलोचनार्चिः" "शोभां शुभ्रत्रिनयनवृषोत्खातपङ्कोपमेयाम्" माघः । २पार्वत्यां स्त्री "लोचनत्रयसंयुक्तां पूर्णेन्दुसदृशाननाम्" तन्त्रोक्ते तस्या नेत्रत्रयोक्ते ॥ ३लोचनत्रययुक्ते त्रि० "बिभ्राणां विंशदप्रभां त्रिनयनां वाग्देवतामाश्रये" मालकाक्षरस्वतीध्यानम् । त्रिनेत्रत्रिलोचनादयोऽप्यत्र । इयांस्तु भेदः त्रिनेत्रशब्दस्य महादेवपरत्वे संज्ञात्वात् पूर्वपदात् णत्वे प्राप्ते गिरिनद्या० वा नत्वम् । अन्यत्र न णत्वमिति । शिवस्य तृतीयनेत्राविर्भावकथा भा० अनु० १० १४० । यथा

"सेवन्ती हिमवत्पार्श्वं हरपार्श्वमुपागमत् । ततः क्षयन्ती पाणिभ्यां नर्म्मार्थं चारुदर्शना । हरनेत्रे शुभे देवी सहसा सा समाहृणोत् । संहताभ्यान्तु नेत्राभ्यां तमो भूतमचेतनम् । निर्हौमं निर्विषट्कारं जगद्वै सहसाऽभवत् । जनश्च विमनाः सर्वो भयत्रासमन्वितः । निमीलिते भूतपतौ नष्टसूर्य्ये इवाभवत् । ततो वितिमिरो लोकः क्षणेन समपद्यत । ज्वाला च महती दीप्ता ललाटात्तस्य निःसृता । तृतीयञ्चास्य सम्भूतं नेत्रमादित्यसन्निभम्" इत्युपक्रमे उमोवाच "भगवान् सर्वभूतेश ! भूतपाणे ! महाव्रत ! संशयो मे महान् जातस्तन्मे व्याख्यातुमर्हसि । किमर्थं ते ललाटे वै तृतीयं नेत्रमुत्थितम् । किमर्थञ्च गिरिर्दग्धः सपक्षिगणकाननः । किमर्थञ्च पुनर्देव ! प्रकृतिस्त्वया हृतः । तथैव द्रुमसंघश्च हृतोऽयं तु पिता मम" महेश्वर उवाच । "नेत्रे मे संहते देवि ! त्वया बाल्यादनिन्दिते । नष्टालोकस्ततो लोकः क्षणेन समपद्यत । नष्टादित्ये तथा लोके तमोभूते नगात्मजे ! । तृतीयं लोचनं दीप्तं सृष्टं मे रक्षता प्रजाः । तस्य चाक्षो महत्तेजो येनायं स्थितो गिरिः । त्वत्प्रियार्थञ्च मे देवि ! प्रकृतिस्थः पुनः कृतः" । दुर्गायाः त्रिनयनाशब्दवाच्यत्वे हेतुर्देवीपु० ४५ अ० उक्तो यथा

"पक्षिणां चोत्तरं लोकं तथा ब्रह्मायनं परम् । नयं सन्मार्गधर्मत्वं दृष्टौ त्रिनयना मता" देवीपु० ४५ अ० । "पञ्चवक्त्रं त्रिनेत्रम्" शिवध्यानम् । "निजत्रिनेत्रत्वावतरत्वबोधिकाम्" नैष० साध्यगणभेदानां त्रिनेत्रत्वं मत्स्यपु० उक्तं यथा "ततः साध्यगणानीतस्त्रिनेत्रानसृजत् पुनः । कोटयश्चतुरशीतिर्जरामरणवर्जिताः । कामं सृजन्तमालोक्यान् ब्रह्मणा विनिवारितः । नैवं विधा भवेत् सृष्टिर्जरामरणवर्जिता" ।

**त्रिनवति** स्त्री त्रयधिका नवतिः मा० त० । १त्रयधिकनवतिसंख्यायां २तत्संख्येये च । ततः पूरणे डट् । त्रिनवत ततूसंख्यापूरणे त्रि० तमप् वा । त्रिनवतितम ततूसंख्यापूरणे त्रि० स्त्रियामुभयतो ङीप् । पक्षे त्रयादेशे त्रयोनवत्यादयोऽप्यत्र । तत्रायं भेदः "संख्या" पा० त्रिनवत्यादौ पूर्वपदे प्रकृतिस्वरः । त्रय आदेशोऽन्तोदात्त इति ।

**त्रिनाक** पु० नास्ति एकं दुःखं यस्मिन् नाकं सुखलोकः । तृतीयं नाकं वृत्तिविषये संख्याशब्दस्य परत्वार्थत्वात् । १तृतीये नाके २उत्तमस्थाने च । "यत्रानुकामं चरणं त्रिनाके" ऋ० ८।१३।८ । "तावच्चिनाकं नहुषः शशास" भाग० ६।१३।१३ श्लोकः ।

**त्रिनाभ** पु० त्रयो लोका नाभौ यस्य बहु० समा० । विष्णौ "त्रिनाभाय त्रिपृष्ठाय शिपिविष्टाय विष्णवे" भा० ८। १७।० । विष्णुस्तुतौ ।

**त्रिनिष्क** त्रि० त्रिभिर्निष्कैः क्रीतम् ठञ् तस्य वा लुक् । त्रिभिर्निष्कैः क्रीते लुगभावे ठञि उत्तरपदस्य वृद्धिः । त्रिनैष्किक तत्रार्थे त्रि० ।

**त्रिनेत्रचूडामणि** पु० ६त० । चन्द्रे त्रिका० ।

**त्रिपक्ष** पु० तृतीयः पक्षः संख्याशब्दस्य वृत्तौ पूरणार्थत्वात् । तृतीये पक्षे "षष्ठे मासि त्रिपक्षे वा" स्मा० त० ।

**त्रिपञ्च** त्रि० ब० व० । त्रिगुणिताः पञ्च । पञ्चदशसंख्यान्विते "त्रिपञ्चारे पीठे" कर्पूरस्तवः ।

**त्रिपञ्चाङ्ग** पु० त्रिपञ्च पञ्चादशाङ्गान्यस्य । समाधिभेदे तद्भेदानि च "यमो हि नियमस्त्यागो मौनं देशः सुकालता । आसनं मूलबन्धश्च देहसाम्यञ्च दृक्स्थितिः । प्राणसंयमनञ्चैव प्रत्याहारश्च धारणा । आत्मध्यानं समाधिश्च प्रोक्तान्यङ्गानि वै क्रमात्" शब्दार्थचि० धृतवाक्योक्तानि ।

**त्रिपञ्चाशत्** स्त्री त्रयधिका पञ्चाशत् ष० त०। १त्र्यधिकपञ्चाशत्संख्यायां २तत्संख्यान्विते च। ततः पूरणे डट्। ३त्रिपञ्चाश तत्संख्यापूरणे त्रि०। पक्षे तमप्। त्रिपञ्चाशत्तम तस्मिन्नर्थे स्त्रियामुभयतो ङीप्। पक्षे त्रय आदेशे। त्रयःपञ्चाशदादयोऽपि उक्तार्थेषु।

**त्रिपटु** पु० काचे पारस्करनिघण्टुः।

**त्रिपताक** न०तिस्रः पताका इव यस्मिन्। पताकाकारवलित्रयान्विते १ललाटे, स्त्रियां० मध्यमानामिकासङ्कोचेनावशिष्टाङ्गुलित्रयोन्नतत्वेन २त्रिपताकाकारिते करे पु०। "त्रिपताकं करं कृत्वा" इत्यादि सा० द० जनान्तिकशब्दनिर्वचने स्थितम्।

**त्रिपत्र** पु० त्रीणि त्रीणि पत्राणि प्रतिपत्रं यस्य सप्रच्छदवत् संख्याशब्दस्य द्वित्वे वीप्सार्थत्वम्। १बिल्ववृक्षे। तदीयपत्रेषु ब्रह्मादीनां स्थितिरुक्ता यथा "ऊर्द्धपत्रं हरो ज्ञेयः पत्रं वामं विधिः स्वयम्। अधः दक्षिणपत्रं च त्रिपत्रदलमित्युत" इतिब्रह्मपु० ११ अ०। २पुष्पत्रययुक्ते त्रि०। समा० द्विगुः। ३पत्रत्रये न०।

**त्रिपत्रक** पु० त्रिपत्र+संज्ञायां कन्। १पलाशवृक्षे राजनि०। त्रयाणां पत्राणां समाहारः संज्ञायां कन्। "तुलसी कृष्णमानूरपत्राख्याऽस्त्रिपत्रकम्" देवीपु० उक्ते २तुलस्यादिपत्रत्रये न०।

**त्रिपथ** न० त्रयाणां पथां समाहारः अच् समा०। "पथः संख्याव्ययादेः" पा०क्लीवता। १मार्गाणां त्रितये। त्रयः पन्थानो यत्र अच् समा०। २त्रिमार्गयुक्ते (तेमाथा पथ) इति ख्याते स्थाने। "शून्यागारे श्मशाने वा निर्जने वा चतुष्पथे। विल्वधात्रीवृक्षमूलान्त्रिपथे वा भजेच्छिवं। स भवेत् सर्वसिद्धीशः सर्ववेदविदां वरः' गुप्तसाधनतन्त्रम्।

**त्रिपथगा** स्त्री त्रयाणां पथां समाहारः अच् समा० तेन गच्छति गम–ड। गङ्गायाम्। त्रिमार्गगादयोऽप्यत्र "गङ्गा त्रिपथगा नाम दिव्या भागीरथीति च। त्रीन् पथो भावयन्नीति तस्मात् त्रिपथगा स्मृता" रामा० बा० ४४ अ० "तराम सरितां श्रेष्ठां पुण्यां त्रिपथगां नदीम्" ४५ अ० "तन्वी श्यामा शिखरिदशना पक्वबिम्बाधरोष्ठी मध्यक्षामा चकितहरिणीप्रेक्षणा निम्ननाभिः। श्रोणीभारादलसगमना स्तोकनम्रा स्तनाभ्यां या तत्र स्याद्युवतिविषये सृष्टिराद्येव धातुः" मेघदूतः। "त्रिशिखां भ्रुकुटिञ्चास्य ददृशुर्दानवा रणे। ललाटस्थां त्रिकूटस्थां गङ्गां त्रिपथगामिव" हरिवं० २३५ अ०। "त्रीन् पथो हेतुना केन स्रावयेल्लोकपावनी। कथं गङ्गा त्रिपथगा विश्रुता सरिदुत्तमा। त्रिषु लोकेषु धर्मज्ञ! कर्मभिः कैः समन्विता" इत्युपक्रमे रामप्रश्ने विश्वामित्रस्योत्तरम् रामा० आ० ३६अ० वाक्यं गङ्गाशब्दे दृश्यम्। त्रिपथ गामिन्यादयोऽप्यत्र।

**त्रिपदी** स्त्री त्रयः पादा अस्याः अन्त्यलोपः समा०ङीपि पङ्क्तावृ १त्रिपादयुक्तायां स्त्रियां २गायत्र्यादिच्छन्दसि तस्या अष्टाक्षरपादत्वेन चतुर्विंशत्यक्षरायास्त्रिपादत्वात् तथात्वम्। यथा "इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम्। समूढमस्य पांसुरे" ऋ० १।२२।१७। "गायत्र्यनुष्टुबुष्णिहो कपदी द्विपदी त्रिपदी चतुष्पदापदसि न हि पदासे" शत० ब्रा०१४।८। १५।१०। ३हस्तिनां पादबन्धनार्थरज्जुभेदे "नागबलत्करिणां यैवं त्रिपदीच्छेदिनामपि" रघुः ४अर्घ्यांधारपात्रभेदे(तेपाद)तन्त्रसा०५गोधापदीलतायां रत्नमा०। स्वार्थे क त्रिपदिकापि तत्रार्थे। भाषाकवितायां छन्दोभेदे तल्लक्षणं यथा "यज्भटिकाना यदि यमकान्ना द्वादशपरिणतमात्रा किन्नरगीतिस्तदिति नीवितिः स्यार्द्धसमाचरगात्रा। (स्यःपदान्तः)। यैषा सङ्गीतके नित्यं निवीतिः किन्नराख्यिका। सैव स्यात् प्राकृते गाने त्रिपदीति परिश्रुता" इति काव्योदयः। "ढाढचि" पा० टापि भवात् पङ्क्तावृः। त्रिपद ७गायत्र्यादिच्छन्दसि अक्षरभेदे स्त्री तच्छन्दस्के दण्डकमात्रे स्त्री "त्रिपदा चैव सावित्री विप्रैर्यं ब्रह्मणो मुखम्" मनुः। "द्विपदा याश्चतुष्पदास्त्रिपदा याश्च षट्पदाः" यजु० २३।३४। "त्रीणि पदानि पादा अस्याः "इतिपदशब्देन समासः" वेददी०। त्रिविक्रमे परमेश्वरे पु० त्रीणि पदानि विचक्रमे इति श्रुतेस्तथात्वम्। "त्रिपदस्त्रिदशाध्यक्षो महाशृङ्गः कृतान्तकृत्" विष्णुस०। ८अक्षरवृत्तेदशमभागरूपपदत्रययुक्ते प्रक्रमे पु० यथा। "पञ्चारत्निः पुरुषो दशपदो द्वादशाङ्गुलं पदं प्रक्रमस्त्रिपदः समविभक्तस्य" कात्या० श्रौ० १६।८।२१ "पञ्चारत्नयो यस्य सः पञ्चभिररत्निभिः पुरुषः दशभिः पदैः पुरुषो द्वादशभिरङ्गुलैः पदम् इत्येवमर्थो न भवति इतः प्रागरत्न्यादीनां लक्षणस्यानुक्तत्वेनासिद्धत्वात् अतश्चैवम् पुरुषस्य समविभक्तस्य यः पञ्चमो भागः सोऽरत्निः तस्य दशमो भागः पदम् पदस्य द्वादशो भागोऽङ्गुलम् त्रिभिः पदैरेकः प्रक्रमः" कर्कः।

**त्रिपरिक्रान्त** पु०त्रिषु कृत्यर्थं कर्मसु परिक्रान्तः चेष्टमानः। याजनाध्यापनप्रतिग्रहरूपजीविकात्रयनिरते ब्राह्मणे। "त्रैविद्यो ब्राह्मणो विद्वान् न चाध्ययनजीवकः। त्रि-

कर्मा त्रिपरिक्रान्तो मैत्र एष स्मृतो द्विजः" भा० अनु० १४१ अ०।

**त्रिपर्ण** पु० त्रीणि त्रीणि प्रतिपत्रं पर्णान्यस्याः। १किंशुके। २वनकार्पास्यां स्त्री राजनि० टाप् ङीप् वा। ३शालपर्ण्यां, लतायां ४पृश्निपर्णीभेदे च स्त्री ङीप् भावप्र०। संज्ञायां कन्। त्रिपर्णिका कन्दाली "त्रिपर्णी मधुरा शीता श्वासकासविषव्रणान्। विनाशयति सा नित्यं पित्तकोपप्रशान्तिकृत्" राजनि०। समा० ह्रिगुः। ५ पर्णत्रये स्त्री ङीप्।

**त्रिपाठ** पु० ह्रस्व०। त्रयाणां पदक्रमसंहितानां पाठे।

**त्रिपाठिन्** पु० त्रीन् पदक्रमसंहितारूपपन्थान् पठति पठ-णिनि। वेदानां पदक्रमसंहितारूपपन्थाध्यायिनि।

**त्रिपाण** न० त्रिःकृत्वः पानं उदकपानं यस्य इत्तौ सुचो लोपः संज्ञात्वात् षत्वम्। त्रिःकृत्वःपायिते १स्रुवभेदे २वल्कले च "तार्ष्यं परिधापयति" कात्या० श्रौ० १५।४।७। "तार्ष्यशब्दं स्वयमेव व्याकरोति "शौषम्" ८। शुषा शतसी तस्य विकारः। "त्रिपाणम्" ६। त्रिःकृत्वः पायितं वा सकृदिति विकल्पः। वपनकाले उदकेन त्रिस्तर्पयित्वा यदूयते स्रुवम् तत्तृष्यम् तस्य विकारस्तार्ष्यम् त्रिः पायितैस्तन्तुभिर्व्यूतमित्यर्थः। केचित्त्रिपाणं वल्कलमित्याहुः "कर्कः।

**त्रिपाद्** पु० त्रयः पादा अस्य संख्यापूर्वत्वेऽपि समासान्तविधेरनित्यत्वान्नान्यलोपः। १परमेश्वरे "पादोऽस्य सर्वा भूतानि त्रिपादस्यामृतं दिवि" छा० उ०। भाष्यकारस्तु "त्रिपात् अस्यामृतः दिवीति" छित्वा त्रिपाद् त्रयः पादा अस्य सोऽयं त्रिपादिति छलनमाह। "नमो हिरण्यैं त्रिपदे चतुःशृङ्गाय तन्वे" भाग० ८।१६।२६। भवात् पादस्य षड्भावः। २ज्वरे च "ज्वरस्त्रिपादस्त्रिशिराः षड्भुजो नवलोचनः" हरिवं० १८।अ०

**त्रिपाद्** पु० त्रयः पादा अस्य संख्यापूर्वत्वादन्यलोपः। १त्रिविक्रमे २विष्णौ तस्य तथात्वकथा यथा "भूयश्चैवाब्रवीदेनं वामनं वटुरूपिणम्। स्वल्पैः स्वल्पमते! किन्ते पादैस्त्रिभिरुत्तमम्। क्रतुक्षां ददामि ते विप्र! पृथिवीं सागरैर्वृताम्" वामन उवाच "न पृथ्वीं कामये क्रतुक्षां सन्तुष्टोऽस्मि पदैस्त्रिभिः। एष एव वरश्रेष्ठो मे वरो दानवसत्तम!" वैशम्पायन उवाच "तथास्त्विति बलिः प्रोक्त्वा स्वर्गयामास दानवः। पदानि त्रीणि देवाय विष्णवेऽमिततेजसे। तोये तु पतिते हस्ते वामनोऽभूद्वामनः। सर्वदेवमयं रूपं दर्शयामास वै प्रभुः। भूः पादौ द्यौः शिरश्चास्य चन्द्रादित्यौ च चक्षुषी। पादाङ्गुल्यः पिशाचाश्च हस्ताङ्गुल्यश्च गुह्यकाः" हरिवं० २६२ अ० "तस्य विक्रमतो भूमिं चन्द्रादित्यौ स्तनान्तरे। नभः प्रक्रममाणस्य पादमूले व्यवस्थितौ। विष्णोरमितवीर्यस्य वदन्त्येवं द्विजातयः" २६३ अ० "क्षितिं पदैकेन बलेर्विचक्रमे नभः शरीरेण दिशश्च बाहुभिः। पदं द्वितीयं क्रमतस्त्रिपिष्टपं न वै तृतीयाय तदीयमस्वपि। उरुक्रमस्याङ्घ्रिरुपर्युपर्यथो महर्जनाभ्यां तपसः परञ्जनः" भाग० ८।२०।२६ "बलिरुवाच "यदुत्तमश्लोक! भवान् ममेरितं वचो व्यलीकं सुरवर्य्य! मन्यते। करोम्यृतं तन्न भवेत् प्रलम्भनं पदं तृतीयं कुरु शीर्ष्णि मे निजम्" ८।२२।३। "इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम्। समूढमस्य पांसुरे" ऋ० १।२२।१७। ३परमेश्वरे च त्रिपादशब्दे छा० उ० वाक्यं दृश्यम्। ४त्रेतायुगधर्मरूपे वृषे "राघवः शिथिलं तस्थौ भुवि धर्मस्त्रिपादिव" रघु०।

**त्रिपादिका** स्त्री त्रयः पदाः मूलान्यस्याः कप् टाप्। छंसपदीलतायां राजनि०।

**त्रिपिण्ड** न० त्रीणि पिण्डानि देयान्यत्र। पित्रादित्रयोद्देशेन कर्त्तव्ये १पार्वणश्राद्धे "ततः प्रभृति संक्रान्त्युपरागादिपर्वसु। त्रिपिण्डमाचरेत् श्राद्धमेकोद्दिष्टं मृताहनि" श्रा० त० मत्स्यपु०। समाहारद्विगुः ङीप्। २पित्रादुद्देशेन पिण्डत्रये स्त्री।

**त्रिपिब** पु० त्रिभिः कर्णाभ्यां जिह्वया च पिबति स्मृणति जलं पा-क। वार्धीनसे जम्बुकर्षे ऋषिभेदे यस्य निगमे "त्रिपिबन्त्विन्द्रियज्योषं श्वेत हृद्भजापतिम्। वार्धीनसन्तु तं प्राहुर्याज्ञिकाः पिङ्गकर्णिणं"। "नद्यादीपयः पिबतो यस्य त्रीणि जलं स्पृशन्ति कर्णौ जिह्वा च त्रिभिः पिबतीति त्रिपिबः" कुल्लू०।

**त्रिपि(पि)ष्टप** न० अर्त्यपातालापेक्षया तृतीयं पि(पि)ष्टपं भुवनम् इत्तौ त्रिशब्दस्य त्रिभागवत् पूरणार्थता। १स्वर्गे अमरः "तत् त्रिपिष्टपमङ्गाभिन्द्रप्रस्थं व्यरोचत" भा० आ० २०६ अ०। २आकाशे शब्दर०। [हस्ता०।

**त्रिपिष्टप(ष)सद्** पु० त्रिपिष्टपे(षे) सीदति सद-क्विप्। देवे

**त्रिपु** पु० स्तोत्रे निघण्टुः। तृपुरित्यत्र पाठान्तरम्।

**त्रिपुट** पु० त्रीणि पुटान्यस्य। (खेसारी) १कलायभेदे २शरे, ३तालकवृक्षे, ४वृक्षभेदे शब्दर०। ५क्षीरे हेमोक्षुरडङ्गे

रत्नमा०। ७मल्लिकायां ८वल्लकैलायां ९त्रिवृतिति (तेओड़ि) च स्त्री मेदि०। १०कर्णस्फोटजतायां ११स्थूलैलायां १२रक्तत्रिवृतिति च स्त्री राजनि०। १३देवीभेदे च स्त्री "ऋषिः सम्मोहनश्छन्दो गायत्री देवता पुनः। त्रिपुटाख्या द्विरुक्तैस्तैर्बीजैरङ्गानि षट् क्रमात्" तन्त्रसा०तस्याध्यानादिकं तत्रैव द्रष्टव्यम् १४त्रिवृतिति एरण्डे वा ङीप्। त्रयाणां पुटानां समाहारः। १५ पुटत्रये स्त्री ङीप्। त्रीणि पुटानि यस्य कप्।१६व्रणाकारभेदे "तत्रायश्चतुरस्रो वृत्तस्त्रिपुटक इति सर्वव्रणसमासः" सुश्रुतः। त्रिपुट+स्वार्थे क संज्ञायां कन् वा। त्रिवृतिति वैद्यके "सहचरसुरफलायमकुटमरुरमङ्गल्यचणकसतीनत्रिपुटकङ्करेखाङ्कीप्रभृतयो वैदलाः" सुश्रु०।

**त्रिपुटिन्** पु०त्रीणि पुटानि सन्त्यस्य इनि। एरण्डवृक्षे शब्दमा०

**त्रिपुटी** स्त्री त्रीणि पुटानि सन्त्यस्याः अच् गौरा० ङीष्। त्रिवृतिति भरतः।

**त्रिपुटीफल** पु० त्रिपुटी पुटत्रयं फलेऽस्य। एरण्डवृक्षे हारा०

**त्रिपुण्ड्र** न०त्रयाणां पुण्ड्राणां द्वन्द्वदाकाराणां समाहारः। ललाटस्थे तिर्यग्रेखात्रयात्मके, "वक्राः ललाटगास्तिस्रो भस्मरेखास्त्रिपुण्ड्रकम्" इत्युक्ते तिलकभेदे "विना भस्मत्रिपुण्ड्रेण विना रुद्राक्षमालया। पूजितोऽपि महादेवो न स्वात्तस्य फलप्रदः। तस्मान्मृदापि कर्तव्यं ललाटेऽपि त्रिपुण्ड्रकम्" ति०त० ब्रह्माण्डपुराणम्। "ऊर्द्धपुण्ड्रं सदा कुर्यात् त्रिपुण्ड्रं भस्मना सदा। तिलकं वै द्विजः कुर्यात् चन्दनेन यदृच्छया। ऊर्द्धपुण्ड्रं द्विजः कुर्यात् क्षत्रियश्च त्रिपुण्ड्रकम्। ऊर्द्धचन्द्रञ्च वैश्यश्च वर्त्तुलं शूद्रयोनिजः" श्वा० त०। "शिवाग्नये दीक्षितस्तु धार्य्यं तिर्यक् त्रिपुण्ड्रकम्। विष्णवग्नये दीक्षितस्तु ऊर्द्धपुण्ड्रं विधारयेत्" इति नागोजीभट्टधृतसत्यसंहिता "कृत्स्नया भस्मना वापि त्रिपुण्ड्रं विन्दुसंयुतम्। ललाटे तिलकं कुर्याद्ब्रह्मविष्णुशिवात्मकम्" इति सङ्गनिर्णयतन्त्रम् "वेदा यज्ञमनुष्याणां त्रिपुण्ड्रेण विना स्थितम्। ब्रह्मणासदृशं तत् स्यान्न श्रेष्ठं पुण्यकर्म्मभिरिति" देवीभाग०। क्वापि च तत्रैव नारदं प्रति नारायणवाक्यम् "त्रिपुण्ड्रं ये विनिन्दन्ति निन्दन्ति शिवमेव ते। धारयन्ति च ये भक्त्या धारयन्ति तमेव ते। तिर्य्यगेखाः प्रदृश्यन्ते ललाटे सर्वदेहिनाम्। तथापि मानवा मूर्खा न कुर्वन्ति त्रिपुण्ड्रकमिति"।

**त्रिपुर** स्त्री त्रिपुरिताः पुरः समाहारत्वविधेरनित्यत्वात् आर्थे न कप् समा०। पुराणां त्रये त्रिपुरशब्दे च पुरत्रयं द्रष्टव्यम्। "ददाह तेन दुर्भेद्या हरोऽथ त्रिपुरो नृप!" भाग० ७।१०।५४।

**त्रिपुर** न० त्रयाणां पुराणां समाहारः। चतुराणां इपुरत्वे। तत्पुरकथा भा० क० प० ३३ अ०।

"ततस्ते सहिता राजन्! संप्रधार्य्यासकृद्बहु। सर्वलोकेश्वरं वाक्यं प्रणम्येदमथाब्रुवन्। अस्माकं त्वं वरं देव! प्रयच्छेमं पितामह!। वयं पुराणि त्रीण्येव समास्थाय महीमिमाम्। विचरिष्याम लोकेऽस्मिँस्त्वत्प्रसादपुरस्कृताः। ततो वर्षसहस्रे तु समेष्यामः परस्परम्। एकीभावं गमिष्यन्ति पुराण्येतानि चानघ। समागतानि चैकत्वं यो हन्याद्भगवंस्तदा। एकेषुणा देववरः स नो मृत्युर्भविष्यति। एवमस्त्विति तान्देवः प्रत्युक्त्वा प्राविशद्दिवम्। ते तु लब्धवराः प्रीताः संप्रधार्य्य परस्परम्। पुरत्रयविनिष्पत्त्यर्थं मयं वव्रुर्म्महासुरम्। विरूपाक्षांशमजरं दैत्यदानवपूजितम्। ततो मयः स्वतपसा चक्रे धीमान् पुराणि च। त्रीणि काञ्चनमेकं वै रौप्यं कार्ष्णायसं तथा। काञ्चनं दिवि तत्रासीदन्तरीक्षे च राजतम्। आयसञ्चाभवद्भौमं चक्रस्थं पृथिवीपते!। एकैकं योजनशतं विस्तारायामसंयुतम्। षट्प्राकारसंयुक्तं वृत्तप्राकारतोरणम्। षट्पुरवरसंबाधमसम्बाधमहापथम्। प्रासादैर्विविधैश्चैव हारैश्चाप्युपशोभितम्। पुरेषु चाभवन् राजन्! राजानो वै पृथक् पृथक्। काञ्चने तारकाक्षस्य चित्रमासीन्महाद्भुतः। राजते कमलाक्षस्य विद्युन्मालिन आयसम्। त्रयस्ते दैत्यराजानस्त्रीँल्लोकानाशु तेजसा। आक्रम्य तस्थुरुद्युक्ता कथं नाम प्रजापतिः। तेषां दानवसङ्घानां प्रयुतान्यर्बुदानि च। कोट्यश्चाप्रतिवीराणां समाजग्मुस्ततस्ततः। मांसादाश्च सुरप्राश्च सुरैर्विनिकृताः पुरा। महदैश्वर्य्यमिच्छन्तस्त्रिपुरं दुर्गमाश्रिताः। सर्वेषाञ्च पुनस्तेषां सर्वयोगवहो मयः। तमाश्रित्य हि ते सर्वे वर्त्तयन्त्यकुतोभयाः। यो हि यं मनसा कामं दध्यात् त्रिपुरसंश्रयः। तस्य तं कामं मयस्तं तं विदधे मायया तदा। तारकाक्षसुतो वीरो हरिर्नाम महाबलः। तपस्तेपे परमकं येनातृप्यत् पितामहः। सन्तुष्टमब्रवीद्ब्रह्मा वरो भवतु वः पुरे। शस्त्रैर्विनिहता यत्र त्रिप्राः स्युर्वेदपारगाः। स तु लब्ध्वा वरं वीरस्तारकाक्षसुतो हरिः। सङ्गते

तत्र वार्षी तां क्षतसञ्जीवनीं प्रभो ! । येन रूपेण दैत्यास्तु येन योगेन चैव ह । क्षतास्तेऽहं परिच्छिन्ना-स्ताहग्येनैव जघ्निरे । तां प्राप्य ते पुनस्तांस्तु सर्वान् लोकान् बबाधिरे । महता तपसा सिद्धाः सुराणां भयव-र्द्धनाः । न तेषामभवद्राजन् क्षयो युद्धे कथञ्चन" । "संगी-यमानस्त्रिपुरावदानः" कुमा० । "गङ्गेव त्रिपुरद्विषः" रघुः "त्रिपुरदाहसमापतिसैनिकः" किरा० । त्रीणि पुराणि येषाम् । २तारकाक्षसुतहरिण्यादिषु असुरभेदे पु०ब०व० । त्रीन् धर्म्मार्थकामान् त्रिपर्त्ति पृ-क । ३देवीभेदे स्त्री । "वैष्णव्याः मन्त्रसख्येषु त्रिपुरायास्ततः शृणु" तन्त्रसारः । "शृणु त्वं त्रिपुरामूर्त्तेः कामाख्या-यास्तु पूजनम्" कालिकापु० ६२ अ० । अतदिनगर्य्यां त्रिपुराख्यदेशभेदे स्त्री ङीप् हेमच० ।

**त्रिपुरघ्न** पु० त्रिपुरं हन्ति हन-टक् । १महादेवे तस्य त्रिपुरहननकथा भा० क० २१ अ० ।

"मूर्त्तिं सर्वां समाधाय त्रैलोक्यस्य ततस्ततः । रथं ते कल्पयिष्यामो देवेश्वर ! महौजसम् । तथैव ब्रह्मणा विहितं विश्वकर्म्मकृतं महत् । ततो विबुधशार्दूलास्तं रथं समकल्पयन् । विष्णुं सोमं कृताग्निञ्च तस्येषुं समकल्पयन् । अङ्गमग्निर्बभूवास्य भल्लः सोमो विशाम्यते ! । कृष्णवह्निभवद्विष्णुस्त्रिशिखिपुरे तदा । बन्धुरं पृथिवीं देवीं विशालपुरमालिनीम् । सपर्वतवनद्वीपां चक्रुर्भूतधरां तदा । मन्दरः पर्वतश्चाक्षं जङ्घा तस्य महानदी । दिशश्च प्रदिशश्चैव परिवारो रथस्य ह । ऐरा नक्षत्रवंशश्च युगः कृतयुगोऽभवत् । क्षुरश्च रथ-क्षासीद्दासुकिर्भुजगोत्तमः । अपस्करमधिष्ठानं हिम-वान् विन्ध्यपर्वतः । उदयास्तावधिष्ठाने गिरी चक्रुः सुरोत्तमाः । ससुद्रमक्षमक्षजन् दानवालयसत्तमम् । सप्तर्षिमण्डलञ्चैव रथस्यासीत् परिष्करः । गङ्गा सर-स्वती सिन्धुर्नर्मदाकाशमेव च । उपस्करो रथस्यासन्नापः सर्वाश्च निम्नगाः । अहोरात्राः कलाश्चैव काष्ठाश्च ऋतवस्तथा । अनुकर्षौ यद्वा दीप्ता बरूथञ्चापि तारकाः । धर्म्मार्थकामसंयुक्तं त्रिवेणुं दारुबन्धनम् । ओषधीर्वीं रथस्तस्य नानापुष्पफलोपगाः । सूर्य्याचन्द्रमसौ कृत्वा चक्रे रथवरोत्तमे । पक्षौ पूर्वापरौ तस्य कृते रात्र्यहनी शुभे । दश नागपतीनीषां धृतराष्ट्रमुखान् दृढान् । द्यां युगं युगचक्राणि संवर्त्तैकबलाहकान् । सन्ध्यां धृतिञ्च मेधाञ्च स्थितिं सन्नतिमेव च । अहनक्षत्रतारामिश्रं चित्रं नभस्तलम् । सुराम्बुप्रेतविन्नानां पतीन्नौ-केश्वरान् हयान् । कालपृष्ठोऽथ मन्युः कर्कोटकधन-ञ्जयौ । इतरे चाभवन्नागा हयानां बालबन्धनाः । दिशश्च प्रदिशश्चैव रश्मयो रथवाजिनाम् । वषट्कारः प्रतोदोऽभूत् गायत्री शीर्षबन्धनी । सिनीवालीमनुमतिं कुहूं राकाञ्च सुव्रताम् । योक्त्राणि चक्रुर्वीरानां रोहकांस्तत्र कण्टकान् । कर्म्म सत्यं तपोऽर्थञ्च विहि-तास्तत्र रश्मयः । अधिष्ठानं मनश्चासीत् परिरथ्या सरस्वती । नानावर्णाश्च चित्राश्च पताकाः पवनेरिताः । विद्युदिन्द्रधनुर्नद्धं रथं दीप्तं व्यदीपयन् । यो यज्ञे विहितः पूर्वमीशानस्य महात्मनः । संवत्सरो धनु-स्तद्वै सावित्री ज्या महात्मनः । दिवञ्च वर्म्म विहितं महार्हरत्नभूषितम् । अनेद्यं विरजस्कं वै कालचक्र-वहिष्कृतम् । ध्वजयष्टिरभून्मेरुः श्रीमान् कनकपर्वतः । पताकाश्चाभवन्मेघास्तडिद्भिः समलङ्कृताः । रेजुरध्वर्यु-मध्यस्था ज्वलन्त इव पावकाः । कल्पन्तु तं रथं ब्रह्मा विश्रुता देवताभवन् । सर्वलोकस्य तेजांसि हरैकस्थानि मारिष ! । युक्तं निवेदयामासुर्देवास्तत्रौ महात्मने । एवं तस्मिन् महाराज ! कल्पिते रथसत्तमे । देवैर्म्मनु-जशार्दूल ! दितिजाभिमर्दने । स्वान्यायुधानि दिव्यानि न्यदधात् शङ्करो रथे । ध्वजयष्टिं वियत् कृत्वा स्थापयामास गोवृषम् । ब्रह्मदण्डः कालदण्डो रुद्रद-ण्डस्तथा ज्वरः । परिष्कन्दा रथस्यासन् सर्वतोदिशसु-दातताः । अथर्वाङ्गिरसावास्तां चक्ररक्षौ महात्मनः । ऋग्वेदः सामवेदश्च पुराणञ्च पुरःसरा । इतिहास-धनुर्वेदौ पृष्ठरक्षौ बभूवतुः । दिव्या वाचश्च दिव्याश्च परिपार्श्वचराः स्थिताः । स्तोत्राद्यश्च राजेन्द्र ! वष-ट्कारस्तथैव च । ओंकारश्च सखे राजन्निति शोभा-करोऽभवत् । विचित्रस्तनुभिः षड्भिः कृत्वा संवत्सरं धनुः । ज्यामेवात्मनश्चक्रे धनुर्ज्यामलयारुणे । कालो हि भगवान् रुद्रस्तस्य संवत्सरो धनुः । तस्मात्तौ द्वौ कालरात्रिर्ज्यां कृत्वा धनुषोऽजराम् । हत्वास्त्रमभवद्विष्णु-र्ज्वलनः सोम एव च । अग्नीषोमं जगत् कृत्स्नं वैष्णवञ्चोच्यते जगत् । विष्णुश्चात्मा भगवतो भवस्या-मिततेजसः । तस्माद्वसुर्ज्यासंस्पर्शं न विषेहुर्हरस्य ते । तस्मिन् शरे तिग्मनन्युर्मोचाविषहं प्रभुः । अग्न्यङ्गि-रोमन्युभवं क्रोधाग्निमतिदुःसहम् । स नीललोहितो धूम्रः कृत्तिवासा भयङ्करः । आदित्यायुतसङ्काशस्तेजो-

ज्वालाहतोऽज्वलत्। दृष्ट्वाप्लवङ्गावनौ जेता हत्वा ब्रह्मद्विषं हरः। नित्यं त्राता च हन्ता च धर्माधर्मान्वितान्नरान्। प्रमाथिभिर्भीमबलैर्भीमरूपैर्मनोजवैः। विभाति भगवान् स्थाणुस्तैरेवात्मगुणैर्युतः तस्याङ्गानि समाश्रित्य स्थितं विश्वमिदं जगत्। जङ्गमाजङ्गमं राजन्! शृणुष्वाद्भुतदर्शनम्। दृष्ट्वा तन्तु रथं युक्तं कवची स शरासनी। बाणमादाय तं दिव्यं सोमविष्णुग्निसम्भवम्। तस्य राजंस्तदा देवाः कल्पयाञ्चक्रिरे प्रभोः। पुण्यगन्धवहं राजन्! शुभनं देवसत्तमम्। तमास्थाय महादेवस्त्रासयन् दैवतान्यपि। आरुरोह तदा यत्तः कम्पयन्निव मेदिनीम्। तमारुरुक्षुं देवेशं तुष्टुवुः परमर्षयः। गन्धर्वा देवसंघाश्च तथैवाप्सरसाङ्गणाः। ब्रह्मर्षिभिःस्तूयमानो वन्द्यमानश्च वन्दिभिः। तथैवाप्सरसांवृन्दैर्नृत्यद्भिर्नृत्यकोविदैः। स शोभमानो वरदः खड्गी बाणी शरासनी। हसन्द्विजाब्रवीद्देवान् सारथिः को भविष्यति। तमब्रुवन् देवगणा यं भवान् संनियोक्ष्यते। स भविष्यति देवेश! सारथिस्ते न संशयः। तानब्रवीत् पुनर्देवो मत्तः श्रेष्ठतरो हि यः। तं सारथिं कुरुध्वं मे स्वयं सञ्चिन्त्य मा चिरम्। एतच्छ्रुत्वा ततो देवा वाक्यमुक्तं महात्मना। गत्वा पितामहं देवाः प्रसाद्येदं वचोऽब्रुवन्। यथा तत् कथिता देव! त्रिदशारिविनिग्रहे। तथा च कृतमस्माभिः प्रहृष्टो नो वृषध्वजः। रथश्च विहितोऽस्माभिर्विचित्रायुधसंवृतः। सारथिन्तु न जानीमः कः स्यात्तस्मिन् रथोचिते। तस्माद्विधीयतां कश्चित् सारथिर्देवसत्तम!। सफलं तां गिरं देव! कर्तुमर्हसि। नो विभो! एवमस्त्विति हि पुरा भगवन्नुक्तवानसि। हितं कर्ताऽसि भवतामिति तत् कर्तुमर्हसि। स देवयुक्तो रथवरो नो दुराधरो द्रावणः शात्रवाणाम्। पिनाकपाणिर्विहितोऽत्र योद्धा विभीषयन् दानवानुद्यतोऽसौ। तथैव वेदावतरो हयाश्चत्वारो मनोजवाः। नक्षत्रवंशानुगतो वरूथी हरो हि योद्धा सारथिर्नाभिरक्ष्यः। तत्र सारथिरेतव्यः सर्वैरेतैर्विशेषवान्। ततप्रतिष्ठो रथो देव! हरो योद्धा तथैव च। कवचानि शरश्चापि कार्मुकञ्च पितामह!। त्वामृते सारथिं तत्र नान्यं पश्यामहे वयम्। त्वं हि सर्वगुणैर्युक्तो दैवतेभ्योऽधिकः प्रभो!। स रथं त्वरमारुह्य संयच्छ परमान् हयान्। जयाय त्रिदशेशानां वधाय त्रिदशद्विषाम्। इति ते शिरसा नत्वा त्रिलोकेशं पितामहम्। देवाः प्रसादयामासुः सारथ्यायेति नः श्रुतम्"। पितामह उवाच। "नात्र किञ्चिन्मृषा वाक्यं यदुक्तं त्रिदिवौकसः। संयच्छामि हयानेष युध्यतो वै कपर्दिनः"।

इत्युपक्रमे "तान् सोऽसुरगणान् दग्ध्वा प्राक्षिपत् पश्चिमार्णवे। एवन्तु त्रिपुरं दग्धं दानवाशाग्निशेषतः। महेश्वरेण क्रुद्धेन त्रैलोक्यस्य हितैषिणा" भा०क०३४अ०। भा० द्रो० २०० अ० किञ्चिदन्यथोक्तं यथा

"गन्धमादनविन्ध्यौ च कृत्वा वंशध्वजौ हरः। पृथ्वीं ससागरवनां रथं कृत्वा तु शङ्करः। अक्षं कृत्वा तु नागेन्द्रं श्रेष्ठं नाम त्रिलोचनः। चक्रे कृत्वा तु चन्द्रार्कौ देवदेवः पिनाकधृक्। अर्षीं कृत्वैव पक्षञ्च पुष्पदन्तञ्च त्र्यम्बकः। युगं कृत्वा तु मलयमनाहञ्च तक्षकम्। योक्त्राङ्गानि च सत्त्वानि कृत्वा शर्वः प्रतापवान्। वेदान् कृत्वाथ चतुरश्चतुरोऽश्वान्महेश्वरः। उपवेदान् खलीनांश्च कृत्वा लोकत्रयेश्वरः। गायत्रीं प्रग्रहं कृत्वा सावित्रीञ्च महेश्वरः। कृत्वोङ्कारं प्रतोदञ्च ब्रह्माणञ्चैव सारथिम्। गाण्डीवं मन्दरं कृत्वा गुणं कृत्वा च वासुकिम्। विष्णुं शरोत्तमं कृत्वा शल्यमग्निं तथैव च। वायुं कृत्वाथ वाजाभ्यां पुङ्खौ वैवस्वतं यमम्। विद्युतं कृत्वाथ निर्ह्रादं मेरुं कृत्वाथ वै ध्वजम्। आरुह्य स रथं दिव्यं सर्वदेवमयं शिवः। त्रिपुरस्य वधार्थाय स्थाणुः प्रहरतां वरः। असुराणामन्तकरः श्रीमानतुलविक्रमः। स्तूयमानः सुरैः पार्थ! ऋषिभिश्च तपोधनैः। स्थानं महेश्वरं कृत्वा दिव्यमप्रतिमं प्रभुः। अतिष्ठत् स्थाणुभूतः स सहस्रं परिवत्सरान्। यदा त्रीणि समेतानि व्यन्तरीक्षे पुराणि च। त्रिपर्वणा त्रिशल्येन तदा तानि विभेद सः। पुराणि न च तं शेकुर्दानवाः प्रतिवीक्षितुम्। शरं कालाग्निसंयुक्तं विष्णुसोमसमायुतम्। पुराणि दग्धवन्तं तं देवा यातां प्रवीक्षितुम्"।

त्रिपुरदहनादयोऽप्यत्र।

**त्रिपुरभैरवी** स्त्री त्रिपुरा भैरवी कर्म०। त्रिपुराख्यदेवीभेदे "आद्यं त्रिपुरभैरव्याः बीजाद्यं प्रकीर्तितम्" इति "चिन्मयेहरदां देवीमेवं त्रिपुरभैरवीम्" इति च तन्त्रसा०

**त्रिपुरमल्लिका** स्त्री त्रीणि पुराणीव पुष्पाणि यस्याः कर्म०। त्रिपुरमल्लिकापुष्पाकृतिभेदे लिका०।

**त्रिपुरान्तक** पु० त्रिपुरस्यान्तं करोति अन्त-णिच् ण्वुल्। शिवे अमरः।

**त्रिपुरारि** पु० ६त०। शिवे "त्रिपुरारिस्त्रिलोचनः" शब्दरत्नावलिः।

**त्रिपुरुष** न० त्रयाणां पुरुषाणां समाहारः। १पित्रादि-पुरुषत्रये। "क्रमात्त्रिपुरुषागता" स्मृतिः। त्रयः पुरुषाः पित्रादयो भोक्तारो यस्य। २भोगभेदे पु०। त्रि-पूरुषादयोऽप्यत्र। व्यासः "प्रपितामहेन यद्भुक्तं तत् पुत्रेण विना च तम्। तौ विना यस्य भोगः स्यात् स विज्ञेयः त्रिपूरुषः। पिता पितामहो यस्य जीवेच्च प्रपितामहः। त्रयाणां जीवतां भोगो विज्ञेयस्त्रैक-पूरुषः" व्यव०त०। त्रयः पुरुषाः परिमाणमस्याः ठन् तस्य लुक्। ३पुरुषत्रयपरिमिते त्रि० "अथ त्रिपुरुषां रज्जु मि-मीते" शत०ब्रा०१०।२।१२। वा ङीप्। त्रिपुरुषीत्यप्यत्र।

**त्रिपुषा** स्त्री त्रीन् वातादिदोषान् पुष्णाति पुष-क। कृष्णत्रिवृति (काकतेओड़ि) शब्दच०।

**त्रिपुष्कर** न० त्रयाणां पुष्कराणां समाहारः। १पुष्करत्रये ब्रह्मक्षेत्रतीर्थभेदे २ज्येष्ठमध्यमकनिष्ठभेदेषु त्रिषु पुष्क-राभिधक्षेत्रेषु। ३नक्षत्रतिथिवारयोगभेदे पु०। "वारः क्रूरास्तिथिर्भद्रा नक्षत्रं भग्नपादकम्। जातेऽत्र जारजो योगो मरणेऽत्र त्रिपुष्करः" ज्यो०त०। स्वार्थे न अण्। त्रैपुष्करोऽप्यत्र पु० "भद्रातिथोरविज्ञभूतनयार्कवारे ह्रीशार्यमाजचरणादितिवह्निदैवे। त्रैपुष्करो भवति हन्त्यु विनाशहन्त्रौ त्रैगुण्यदो हिगुणकृद्धनतश्चचान्द्रे" कृ० चि०।

"अथ त्रिपुष्करयोगं सफलं वक्ष्यतिलकयोश्च भद्रेति भद्रासंज्ञिका तिथिः द्वितीया सप्तमी द्वादशी तथा शनिभौमस्तूर्यवारेषु तथाहीर्ग विशाखा अर्धमो-त्तराफाल्गुनी अजचरणः पूर्वाभाद्रपदा ऋदितिः पुनर्वसुः वह्निः कृत्तिका विश्वत्तरराढ़ा एषु षट्सु नक्ष-त्रेषु उक्ततिथिवारनक्षत्ररूपे विशिष्टयोगे सति त्रिपुष्कर एव त्रैपुष्करः प्रज्ञादिभ्यश्चेति स्वार्थेऽण्। त्रि-पुष्करयोगो भवतीत्यर्थः कीदृशः। हन्त्यु विनाशहन्त्रौ-त्रैगुण्यदः तद्दिने यदि कश्चित् म्रियेत तदा तदीयास्तत् सञ्चिताक्षयो म्रियेरन् यदि किञ्चिद्वस्तु विनष्टं तदा तस्य वस्तुत्रयनाशः तथा किञ्चिद्वस्तु लब्धं तदा त्रिगुण-तद्वस्तुलाभः इत्यर्थः उक्तञ्च वसिष्ठेन। "रविरविज भौमवारे भद्रायां विषमपादऋक्षञ्चेत्। त्रैपुष्कराख्य-योगः त्रिगुणफलो यमलभैर्द्विगुणः"। नारदेनापि। "अर्कार्किभौमवारे चेद्भद्रायां विषमार्क्षभम्। त्रिपुष्करः त्रिगुणदोद्विगुणो यमलार्क्षभे"। अत्र यस्मिन्नक्षत्रे प्रथमपादान्ते तृतीयपादान्ते वा राशिसमाप्तिस्तद्विष-मपादऋक्षमुच्यते तदेव स्पष्टं ह्रीशार्यमेत्यादिनोपनिबद्धम् अथ वासवोधनिष्ठा तक्षा चित्रा चान्द्रं ऋगः एतानि भानि भद्रास्त्रियः रविजभूतनयार्कवारास्तु अत्रापि विशिष्टयोगे सति हिगुष्करनामायोगो भवति तत्फलं हन्त्यु विनाशहन्त्रौ द्वैगुण्यकृत् हते नष्टे हन्त्रौ द्विगुणतां करोतीत्यर्थः "द्विगुणो यमलार्क्षभे" इत्युक्तेः यस्मिन्नक्षत्रे द्वितीयचरणान्ते राशिसमाप्तिस्तद्यमलार्क्षभं तच्च ऋग-क्षितक्षनिष्ठारूपमेव। अथ दैवात्त्रिपुष्करादिके तिथि-वारनक्षत्रात्मके विशिष्टयोगे सति कस्यचिन्मरणसम्भव-स्तदा तद्दोषशान्त्यर्थं दानं विधेयं यथाह वसिष्ठः "त्रि-तयं गवां हि दद्याद्दोषस्यापनुत्तये विद्वान्। हितयं द्विपुष्करेऽपि च तिलपिष्टैर्विप्रसुखेभ्यः"। हितयं गवा-मिति शेषः अत्र तिथिवाराभावे केवलं विषमार्क्षभे यमलार्क्षभे वा मरणसम्भवे दोषो नास्तीत्यर्थः। अमुमर्थं स्पष्टमाह नारदः "प्रदद्याद्दोषनाशाय गोत्रयं मूल्यमेव वा। द्विपुष्करे हयं दद्यात्र दोषस्त्वृक्षमात्रतः" इति। अत्र त्रिपुष्करयोगे क्वचिद्दृष्टस्त्रितिवारोऽप्युक्तः यथाह कश्यपः "भद्रा तिथिः शनैश्चारवारे चेद्विषमार्क्षभम्। त्रिपुष्करं त्रिगुणदं द्विगुणं द्व्य-र्क्षभे मृताविति" इदमेव हृदा श्रीपतिनाप्युक्तम्। "विषमचरणं धिष्ण्यं भद्रा तिथिर्यदि जायते सुरगुरुश-निक्ष्मापुत्राणां कथञ्चन वासरे। मुनिभिरुदितः सोऽयं योगः त्रिपुष्करसंज्ञितः त्रिगुणफलदो हन्त्रौ नष्टे हृते च मृतेऽपि वा"। अस्य पूर्वोक्तवाक्यस्य चैकवाक्यतां देवाः कर्तुमर्हन्ति। कश्यपवाक्ये मृताविति पदोपादानान्नै-वमयं विचारो न हि नष्टे हन्त्रौ च यदुक्तं ब्रह्म-पुराणेऽपि "धनिष्ठापञ्चके जीवो मृतो यदि कथञ्चन। त्रिपुष्करे याम्यभे च कुलजान्मारयेत् ध्रुवम्। तदनि-ष्टविनाशार्थं विधानं सम्प्रदीर्यते" इति। पी० धा०।

**त्रिपुष्ट** पु० त्रयः धर्मार्थकामाः पुष्टा अस्य। १प्राजापत्ये राजभेदे हेमच०। [स्थिते मत्स्यलोके हेमच०।

**त्रिपुष्ठ** न० त्रयाणां लोकानां पृष्ठः समाहारः। त्रिपृष्ठ-

**त्रिपौरुष** त्रि० त्रीन् पित्रादीन् पुरुषान् व्याप्नोति अण् उत्तरपदवृद्धिः। पित्रादिक्रमेण पुरुषत्रयव्यापके भोगादौ। त्रिपुरुषशब्दे दृश्यम्। स्त्रियां ङीप्

यस्य वेदश्च वेदी च उत्सन्ना त्रिपौरुषी स वै दुश्चर्माह्मणः" कात्या० श्रौ०८।२।१६ सूत्रे कर्कः ।

**त्रिप्रश्न** पु० त्रयाणां दिग्देशकालानां प्रश्नः । १दिग्देशकालानां प्रश्ने २तन्मूलके दिगादिनिरूपणे च । तदधिकारेण सि० शि० उक्तं यथा "जगुर्विदोऽदः किल कालतन्त्रं दिग्देशकालावगमोऽत्र यस्मिन् । त्रिप्रश्ननाम्नि प्रचुरोक्तिधाम्नि" । सू० सि० "शिलातलेऽम्बुसंशुद्धे" इत्यादिनोक्ता "इति त्रिप्रश्नाधिकारः" इत्युक्तम् "दिग्देशकालानां प्रतिपादनमिदं परिपूर्त्तिमाप्नुमित्यर्थः । दिशां साधनं शिलातल इत्यादि नियतं, तत्सम्बन्धेन समकोणवाम्योत्तरशङ्कूनां साधनान्यपि दिगन्तर्गतान्यनियतानि । पलभासाधनाक्षादिसाधनं देशनिरूपणं नियतम् । अयनाचरादिसाधननियतम् । कालसाधनं तद्घटिकादिसाधनं च कालनिरूपणमिति विवेकः" रङ्गना० ।

**त्रिप्रसृत** पु० त्रिषु स्थानेषु प्रसृतः मेढ्रकपोलनेत्रेषु त्रिषु स्थानेषु चरितमदे मत्तगजे "गजानां तु प्रभिन्नानां त्रिधा प्रस्रवतां मदम्" भा० आ० २२१ अ० । "त्रिप्रसृतमदः स्थूलो यष्टिवर्षीयतङ्करात्" १५१ अ० । "करात् कटाभ्यां मेढ्राच्च नेत्राभ्यां च मदस्रुतिः" । पालकाव्ये तु मदप्रस्रावस्य सप्तस्थानत्वोक्तेरिह प्राधान्यात् त्रिस्थानत्वं बोध्यम् ।

**त्रिप्लक्ष** पु० देशभेदे तद्देशविहृतिः । "खण्डयमभ्यवयन्ति यवसनां त्रिप्लक्षावहरणं प्रति" कात्या० श्रौ० २४।६।३६ । "यथा त्रिप्लक्षावहरणशब्देन यवसनामखण्डयमभ्युपैति तत्र च यवसनां प्राप्य त्रिप्लक्षहरणे देशे त्रिप्लक्षं नाम जनपदं प्राप्य तत्रैव यवसनायामखण्डयमभ्युपैति तत्रैव हि देशे दण्डतो मनुष्येभ्यस्तिरोभवति । बहूदकापि सती तत्रैवान्तर्हिता भवतीत्यर्थः" कर्कः ।

**त्रिफला** स्त्री त्रयाणां फलानां समाहारः अजा० टाप् । "पथ्या विभीतधात्रीणां फलैः स्यात् त्रिफला समा" इत्युक्ते हरीतक्यादित्रये । तद्गुणा भावप्र० उक्ता यथा "फलत्रिकञ्च त्रिफला सा वरा च प्रकीर्तिता । त्रिफला कफपित्तघ्नी मेहकुष्ठहरा वरा । चक्षुष्या दीपनी रुच्या विषमज्वरनाशिनी" ।

**त्रिफलाघृत** न० त्रिफलानां रसेन युक्तं घृतम् शा० त० । चक्रदत्तोक्ते घृतभेदे तच्च नानाविधं तत्रैवोक्तं यथा

"त्रिफलाभृङ्गमञ्जौषधमध्याज्यक्षागपयसि गोमूत्रे । नागं सप्तनिशिक्तं करोति गरुडोपमञ्चक्षुः" चन्यदपि "त्रिफलाकाथकल्काभ्यां सपयस्कं घृतं घृतम् । तिमिराण्यचिराद्धन्ति पीतमेतच्छिवासखे" ।

**त्रिफलादिलौह** न० भैषज्यरत्नावल्युक्ते लौहभेदे यथा "त्रिफला सप्तकं व्योषं विड्ङ्गं पुष्करं वचा । चित्रकं मधुकञ्चैव पलांशं श्लक्ष्णचूर्णितम् । अयश्चूर्णपलान्यष्टौ गुग्गुलोस्तावदेव हि । आलोड्य मधुनोपेतं पलाद्दशकेन च । प्रातर्विलिह्य भुञ्जानो जीर्णे तस्मिन् जयेद्गुदः । दुःसाध्यमामवातञ्च पाण्डुरोगं प्लीहकम् । जीर्णान्न समवं मूलं क्षयञ्च विषमज्वरम्"

**त्रिफलाद्यघृत** न० चक्रदत्तोक्ते घृतभेदे तदपि लघुमहद्भेदेन द्विविधं तत्र लघु यथा

"फलत्रिकं भीरुकषायसिद्धं कल्केन यष्टीमधुकस्य युक्तम् । सर्पिः समं क्षौद्रचतुर्थभागं हन्यात् त्रिदोषं तिमिरं पुराणम्" महत् यथा

"त्रिफलाया रसप्रस्थं प्रस्थं भृङ्गरसस्य च । द्वयमस्य रसप्रस्थं घृतप्रस्थञ्च तत्समम् । अजाक्षीरं गुडूच्याश्च श्यामलक्षारसस्य च । प्रस्थं प्रस्थं समाहृत्य सर्वैरभिघृतं पचेत् । कल्कः कणा सिता द्राक्षा त्रिफला नीलसत्पलम् । मधुकं क्षीरकाकोली मधुपर्णी निदिग्धिका । तत्साधुसिद्धं विज्ञाय शुभे भाण्डे निधापयेत् । ऊर्द्धपानमधःपानं मध्यपानञ्च शस्यते । यावन्तो नेत्ररोगास्तान् पानादेवापकर्षति । सरक्ते रक्तदुष्टे च रक्ते चातिप्रवृत्तेऽपि च । नक्तान्ध्ये तिमिरे काचे नीलिकापटलार्बुदे । अभिष्यन्देऽधिमन्थे च पक्वकोपे सुदारुणे । नेत्ररोगेषु सर्वेषु वातपित्तकफेषु च । अदृष्टिं मन्ददृष्टिञ्च कफवातप्रदूषिताम् । क्षपतो वातपित्ताभ्यां सकण्डूसञ्चदूरदृक् । स्पष्टदृष्टिकरं सद्यो बलवर्णाग्निवर्द्धनम् । सर्वनेत्रामयं हन्यात्त्रिफलाद्यं महद्घृतम्" ।

**त्रिःफलीकृत** त्रि० त्रिः त्रिवारं फलीकृतः विशोधितः । त्रिधा विशोधिते तण्डुलादौ । "दक्षिणोत्तराभ्यां पाणिभ्यां त्रिःफलीकृतांस्तण्डुलांस्त्रिर्देवताभ्यः प्रज्ञापयेत्" गोभिलः "त्रिःफलीकृतान् त्रिधा विशोधितान्" सं० त० रघुनन्दनः ।

**त्रिबन्धन** पु० कर्म्मणपौत्रे १नप्तृभेदे । "कर्म्मणस्तत्सुतस्यापि सीदुरगोऽथ त्रिबन्धनः" भाग० ७।४ । त्रीणि बन्धनानि यस्य । २जामदाग्न्यवस्थालयधृक्ते जीवे पु० ।

त्रिवली(लि) स्त्री त्रिगुणिता व(ली)वलिः। १उदरस्थे वलीत्रये "त्रिवलीवलयोपेतां भ्रुकुटीभीषणाननाम्" दुर्गाध्यानम्। तिसृणां वलीनां समाहारः। २तिवलि तत्रार्थे न० उच्चनदत्तः। [तस्य वलीत्रयवत्त्वात्तथात्वम्।

त्रिवलीक न० त्रिको वल्गो यत्र कप्। पायौ हेम०।

त्रिवाहु पु० त्रयो बाहवोऽस्य। १रुद्रानुचरभेदे "त्रिबाहु-पञ्चबाहुश्च व्याघ्रवक्त्रः सितानन:" हरिवं० २७७ अ०। २कार्त्तिकेयानुचरभेदे। "त्रिबाहुस्तुङ्गबाहु च" हरिवं ६।१६ अ०। खड्गशब्दे २४६० दृश्यम्।

त्रिभ न० त्रयाणां भानां राशीनां समाहारः। १चन्द्रादि-राशित्रये। "त्रिभं त्रिभं लग्नगतः क्रमेण स्त्रीणां नृणां रात्रिदिनेषु तेषु" नीलक०ता०। २राशित्रयमात्रे च। "इत्रिभस्थरुजक्कालिभागज्ञाः क्षेपनिष्क्रिकाः" सू०सि०। त्रीणि भानि नक्षत्राणि यत्र। ३नक्षत्रत्रययुक्ते "कार्त्ति-क्यादिषु संयोगे कृत्तिकादि इयं द्वयम्। अन्त्योपान्त्यौ पञ्चमस्य त्रिभं मासत्रयं स्मृतम्" सू०सि०। "अत्र कार्ति-कस्यादित्वेन पञ्चादन्त्य आश्विनः उपान्त्यः भाद्रः पञ्चमः फाल्गुनः। मासत्रयं त्रिभिः स्मृतम्। रेवत्यश्विनीभर-णीतिनक्षत्रत्रयसम्बन्धादाश्विनः। शततारापूर्वोत्तराभाद्र-पदेति नक्षत्रत्रयसम्बन्धाद्भाद्रपदः पूर्वोत्तरफाल्गुनीरूपो नक्षत्रत्रयोगात् फाल्गुनः" रङ्गना०।

त्रिभङ्गी स्त्री "मधुरं यदि दधुरं वदति विरामं तदनु निकामं पलकम्। वसुविमलतुरङ्गमयतिरुदयङ्गमहृषि-तभुजङ्गमलपतिलकम्। त्रिंशदुपविकलासुविहितनि-वासं सततविलासं हृदयसदेति-मदसदितभुजङ्गी मोहन-रङ्गी वदति त्रिभङ्गीहृत्तमदः" इत्युक्ते मात्राहृत्ते छन्दोभेदे।

त्रिभजीवा स्त्री इत० राशित्रयधनुराकारक्षेत्रस्य जीवायाम् त्रिज्यायां त्रिज्याशब्दे दृश्यम्। "शङ्कुः सत्रिभजीवाघ्नः" सू० सि०। त्रिभज्यायाम्। "त्रिभज्यया भवे-च्छङ्कुस्तद्वर्गं परिशोधयेत्" सू० सि०।

त्रिभण्डी स्त्री त्रीन् वातादिदोषान् भण्डति भण्ड-परि-भाषणे अच्। त्रिदति (तेओड़ि) अमरः।

त्रिभद्र न० त्रिषु दलेषु तालिङ्गनमर्दनेष्वपि भद्रं यत्र। सुरते त्रिका०।

त्रिभाग पु० त्रयो भागः इत्तौ संख्याशब्दस्य पूरणार्थ-त्वम्। त्रयाणां भागे "त्रिभागशेषासु निशासु च क्षयम्" कुमा०। "अब्दयुक्कृष्णपक्षे तु श्राद्धं कुर्यात् दिने दिने। त्रिभागहीनं पक्षं वा त्रिभागं सर्वमेव वा" ११४०नक्षत्र०।

त्रिभानु पु० तृतीयवंश्ये ऋषभेदे। "तृतीयोऽसु सुतो वह्निर्दक्षे-भर्गोऽथ भानुमान्। त्रिभानुस्तत्सुतोऽप्यापि करन्धम उदारधीः" भाग० ६।२३।४।

त्रिभाव पु० त्रिषु कालेषु भावोऽस्य। त्रैकालिके पदार्थे तस्य भावः कर्म वा ब्राह्मणा० ष्यञ्। त्रैभाव्य तद्भावादौ न०।

त्रिभुक्ति पु० त्रिषु भुक्तिरस्य। (तीरहुत) देशभेदे त्रिका०।

त्रिभुज न० त्रयो भुजा यत्र। त्रिबाहुके त्रिकोणे क्षेत्रभेदे क्षेत्रशब्दे दृश्यम्। "त्रिभुजे भुजयोर्योगखण्डान्तरगुणो भू-वा हृतो लम्बः" "खण्डं त्रिभुजे फलं भवति" लीला०। "योनिं कृत्वा त्रिभुजं त्रयाग्नः" ऋक्० ८।६। अत्र योनिं त्रिभुजमिव कृत्वेत्यर्थः तेन न स्त्रीत्वम्। अतः त्रिभुज इति शब्दान्तरकल्पनं प्रामादिकम्।

त्रिभुवन न० त्रयाणां भुवनानां लोकानां समाहारः पात्रा० न ङीप्। त्रिलोक्यां मिलितेषु स्वर्गमर्त्यपाता-लेषु। "त्रिभुवनजये सा पञ्चेषोः करोति सहायताम्" सा०द० "त्रिभुवनगुरोर्धाम चण्डीश्वरस्य" मेघ०।

त्रिभूम पु० त्रिषु भूमयः छाद्यौधोमध्यस्था यस्य अच्-समा०। (तेताला) प्रासादभेदे।

त्रिमण्डला स्त्री लूताभेदे "लूतासु द्विविधा स्मृताः" "तासा-मष्टौ क्षुद्रसाध्यावज्ञौस्तावत्य एव तु। त्रिमण्डला तथा श्वेता कपिला पिटिका तथा। आलमूत्रविषा रक्ता कमला चाष्टमी स्मृता। ताभिर्दष्टे शिरो दुःखं कण्डू-र्दंशे च वेदना। भवन्ति च विशेषेण गदाः स्वैस्वैक वातिकाः"। "त्रिमण्डलया दंशेऽस्रक् क्षणं स्रवति दीर्यते" इति च सुश्रु०।

त्रिमद पु० त्रिगुणितो मदः संज्ञायात् कर्म०। "विद्यामदो-धनमदस्तृतीयोऽभिजनो मदः। एते मदा मदान्धानां त एव हि सतां दमाः" इत्युक्ते गर्वत्रये "नूनं नृपाणां त्रिमदोत्-पथानां मद्धी सुखायास्यति चक्रभिः" भाग० २।१।१२। २तत्साधितकविड्भेदेषु च वैद्यकम्।

त्रिमधु न० त्रिगुणितं मधु संज्ञायात् कर्म०। "दुग्धं सिता माक्षिकञ्च विज्ञेयं मधुरत्रयम्" इत्युक्ते दुग्धादित्रये। २ऋग्वेदैकदेशे पु० ३तद्वेदाध्या-यिनि पु०मिता० "मधुवाता ऋतायत इति त्रयः मधुशब्दा यत्र। मधुवाता इत्यादिके ९ऋक्त्रये पु०। "वेदार्थवित् ज्ञेय-सामा त्रिमधुस्त्रिसुपर्णकः" याज्ञ०। "त्रिणाचिकेतः त्रि-मधुस्त्रिसुपर्णः षडङ्गवित्" मनुः। ४मधुशब्दत्रये च

"गायत्रीं त्रिः सकृदापि जपेदाहुतिपूर्विकाम्। मधुवाता इति ऋचं मध्वित्येतत् त्रिकं जपेत्" इति पारस्करः। ७आच्छन्नसुप्तितात्पर्ये न० "कमलैव त्रिमध्वक्षैर्ङनेदशोत्तरं शतम्" तन्त्र०।

**त्रिमधुर** न० त्रिगुणितं मधुरं संज्ञात्वात् कर्म०। दुग्धसितामाक्षिकरूपे मधुरत्रये त्रिमधुशब्दे दृश्यम्। त्रिमधुरेणाध्यर्द्धवेलायाम्" हरिः ४८ अ०।

**त्रिमात** त्रि० त्रयाणां लोकानां माता निर्माता। लोकत्रयनिर्मातरि "उत त्रिमाता विदथेषु सम्राट्" ऋ०३।५६।५ अ०।

**त्रिमात्र** पु० त्रिरः मात्रा उच्चारणकालोऽस्य। प्लुतस्वरे "एकमात्रो भवेद् ह्रस्वो द्विमात्रो दीर्घ उच्यते। त्रिमात्रस्तु प्लुतो ज्ञेयो व्यञ्जनं चार्द्धमात्रकम्" शिक्षा० "प्रणवस्य ऋषिर्ब्रह्मा देवोऽग्निस्तस्य कथ्यते। गायत्रञ्च भवेच्छन्दो नियोगः सर्वकर्मसु। त्रिमात्रस्तु प्रयोक्तव्यः प्रारम्भे सर्वकर्मणाम्" संवर्त्तः। भोजदेवेन तु तस्य सार्द्धत्रिमात्रकतोक्ता यथा "तज्जपस्तदर्थभावनम्" पा० सू० "तस्य सार्द्धत्रिमात्रिकस्य प्रणवस्य जपः" वृत्तिः। युक्तञ्चैतत् ओकारस्य प्लुतत्वेन त्रिमात्रत्वेऽपि तदुत्तरमकारस्य व्यञ्जनत्वादर्द्धमात्रत्वेन सार्द्धत्रिमात्रत्वं संवर्तवचने त्रिमात्रपदं सार्द्धत्रिमात्रे लाक्षणिकमिति बोध्यम्। वस्तुतः मकारान्तत्वे सार्द्धत्रिमात्रत्वम् अनुस्वरान्तत्वे त्रिमात्रत्वमिति भेदः। तदभिप्रायेणैव तस्य त्रिमात्रतया जपफलं प्रद्योपनिषद्युक्तं तत्र ओम् शब्दे १५६० पृ० दर्शितम्।

**त्रिमार्गगा** स्त्री त्रिभिर्मार्गैर्गच्छति गम-ड। १गङ्गायां हेमच०। "त्रिमार्गमावीचिविमर्दशीतः" रघुः। "ऊर्ध्वमंशेन परं त्रिमार्गगा" माघः। गम-क्विनि। त्रिमार्गगाशिन्यादयोऽप्यत्र।

**त्रिमार्गा** स्त्री त्रयो मार्गा यस्याः। १गङ्गायां "त्रिमार्गयेव त्रिदिवस्य मार्गः" कुमा०। (तेमाता) २पथि। "त्रयाणां मार्गाणां समाहारः। ३मार्गत्रये स्त्री ङीप्। [हेमच०।

**त्रिमुकुट** पु०त्रीणि सुकुटानीव शृङ्गाणि यस्य। त्रिकूटपर्वते

**त्रिमुख** पु० त्रीणि मुखानि यस्य। १शाक्यमुनौ त्रिका०। गायत्रीजपाङ्गे चतुर्विंशतिसङ्ख्यानमंशे सङ्ख्याभेदे तच्चतुर्थं विधानपारिजाते उक्तं यथा "संख्यासङ्ख्यायोः पाणोः कनिष्ठाद्ययोगतः। श्रेष्ठाङ्गुलीनां वैरल्यात् सङ्ख्याः स्युर्द्विसप्तादयः" "संख्यासङ्ख्यापाणोः कनिष्ठाद्ययोगेन श्रेष्ठाङ्गुलीनां विरलत्वेनाङ्गुष्ठद्वयमारभ्यानामिकान्तं यावत् द्विसप्तत्रिसप्तचतुर्दशपञ्चदशाः सङ्ख्याः स्युः" तद्व्याख्या। तथा चाङ्गुष्ठतर्ज्जनीनां वैरल्ये त्रिसप्तसङ्ख्या। २रुद्रदेवीभेदे मायादेव्यां स्त्री त्रिका०।

**त्रिमुनि** न० त्रयाणां मुनीनां समाहारः। पाणिनिकात्यायनपतञ्जलिरूपे मुनित्रये। त्रयो मुनयो वंश्याः "संज्ञा वंश्येन" पा० स०। पाणिन्यादिमुनित्रयप्रणीते व्याकरणे विद्यातद्ग्रन्थभेदविवक्षया तस्य तथात्वम् "वंशश्च जन्मना विद्यया वा तत्र भवः वंश्यः" इति सि०कौ०।

**त्रिमूर्त्ति** पु० त्रिरो मूर्तयोऽस्य। ब्रह्मविष्णुशिवरूपमूर्तित्रययुक्ते परमेश्वरे। "नमस्त्रिमूर्त्तये तुभ्यं प्राक्सृष्टेः केवलात्मने" कुमा०। त्रिमूर्तिर्यः सर्गस्थितिविलयकर्माणि तनुते" चिन्तामणिः २ब्रह्मशक्तिभेदे स्त्री। "एकमूर्तिरपि भिन्नरूपिणी या जगज्जननपालनक्षये। काप्यु-तेश्वरतया विवर्त्तते ब्रह्मशक्तिमहमानतोऽस्मि ताम्" शब्दार्थचि० धृ० वाक्यम्। ३रुद्रदेवीभेदे स्त्री त्रिका०।

**त्रिमूर्द्ध** पु० त्रयो मूर्द्धानोऽस्य ब समा०। मूर्द्धत्रययुक्ते। "बद्धमूर्ध्नो द्विमूर्द्धांश्च त्रिमूर्द्धांश्चाहतां स्रधे" भट्टिः।

**त्रियम्बक** पु० त्रीणि अम्बकानि दृष्टयो यस्य। "ऋन्दस्युभयथा" पा० वा दयङ्। त्रिनेत्रे। क्वचिल्लोकेऽपि दयङ् "त्रियम्बकं संयमिनं ददर्श" कुमा० तद्व्याख्यायां मल्लिनाथेन मङ्काविप्रयोग एव तत्र मूलतयोक्तः।

**त्रियव** न० त्रयो यवाः परिमाणमस्य। क्षणे "सर्षपाः षट् त्रयो मध्यस्त्रियवं त्वेककृष्णलम्" मनुः।

**त्रियष्टि** स्त्री त्रिषु वातादिषु यष्टिरिव विद्रावकत्वात्। (त्रेतपाषड़ा) १ज्वरभेदे रत्नमा०। त्रिरो यष्टयो यस्य। २त्रिगुणके हारभेदे पु०। [ष्वुन्। पापे शब्दमा०।

**त्रियामक** न० त्रिषु कालेषु यमयति ऋनर्भूतयर्थे यम-

**त्रियामा** स्त्री त्रयो यामा यस्याः आद्यान्त्ययोरर्द्धयामयोश्चेटाकालत्वेन दिनप्रायत्वात्। १निशायाम् अमरः "त्रियामां रजनीं प्राहुरुषाद्यन्तचतुष्टयम्। नाड़ीनां, तदुभे सन्ध्ये दिवसाद्यन्तसंज्ञिते" ति० त०। "दृश्यते चन्द्रमिव कर्षं दीर्घयामा त्रियामा" मेघ०। "क्वचिदसमेतपरिच्छदस्त्रियामाम्" रघुः। "ज्योतिर्भिरुद्यद्भिरिव त्रियामा" कुमा० २हरिद्रायाम् अमरः। कृष्णत्वात् ३वस्त्रायां ४नील्यां ५कृष्णत्रिवृति च उणादिको०।

**त्रियुग** पु० त्रीणि युगानि आविर्भावकालोऽस्य। १यज्ञपुरुषे तस्य कृतयुगे आविर्भावाभावात् कलौ वस्तुत्वात् वा। "इत्थं ऋतिर्यङ्मनुदेवऋषावतारैर्लोकान् विभावयसि

हंसि जगत् प्रतीपान् । धर्मं महापुरुष ! पासि युगानुवृत्तं क्षेमः कलौ यदभवस्त्रियुगोऽथ स त्वम्" भाग० ७।६।२८ "कलौ तु तत्र करोसि यतस्तदा त्वं क्षेमोऽभवः यतस्त्रिष्वेव युगेष्वाविर्भावात् स एवम्भूतस्त्वं त्रियुग इति प्रसिद्धः" श्रीधरस्वामी । २वर्षनादिकालत्रये । "या ओषधीः पूर्वा जाता देवेभ्यस्त्रियुगं पुरा" यजु० १२।७५ "युगशब्दः कालवाची त्रयाणां युगानां समाहारस्त्रियुगं त्रिकालं वर्षन्ते प्रावृषि शरदि च । वेददी० ।

**त्रियूह** पुंस्त्री कपिलाश्वे हेमच० स्त्रियां ङीष् ।

**त्रिरात्र** न० त्रिरूपां रात्रीणां समाहारः अच् समा० । "अङ्गाढ्यानाः क्षेड्भेदाः रात्र्यान्ताः प्रागसंख्यकाः" इत्यमरोक्तेः संख्यापूर्वत्वात् ङीषन्ता । १रात्रित्रये २तदुपलक्षिते दिनत्रये च । "उपाकर्मणि चोत्सर्गे त्रिरात्रं क्षपणं स्मृतम्" "अतिक्रान्ते दशाहे तु त्रिरात्रमशुचिर्भवेत्" मनुः । त्रिभिः रात्रिभिः निर्वृत्तम् ठञ् तस्य लुक् । तद्धितार्थद्विगुत्वात् अच् समा० । ३दिनत्रयोपलक्ष्ये व्रतभेदे न० । "एकरात्रं त्रिरात्रं वा षड्रात्रं वा विधीयते" प्रा० वि० धृतवचनम् । रात्रित्रयसाध्ये ४गर्गभेदादौ यज्ञभेदे पु० । "सङ्क्षदक्षिणे त्रिरात्रे" काल्या० श्रौ० १२।४।१५ । गर्गत्रिरात्रशब्दे २५४५ पृ० दृश्यम् । [ शब्दे दृश्यम् ।

**त्रिरूप** पु० त्रीणि रूपाण्यस्य । अश्वमेधीये अश्वभेदे अश्वमेध-

**त्रिरेख** पु० त्रिस्रो रेखा यत्र । १गङ्के हेमच० । समा० द्वि० । २रेखात्रये न० । ["त्रिशोनोऽटौ" इ० र० ।

**त्रिल** पु० त्रयो लाः लघुवर्णा यत्र । लघुवर्णयुक्ते गणे

**त्रिलघु** त्रि० त्रयो लघवः यत्र । छन्दोऽन्यप्रसिद्धे गणे "त्रिलघुश्च नकारः" छन्दोम० । त्रिभिर्लघुः । २शुभलक्षणभेदान्विते स्थानत्रयह्रस्वे पुरुषे "त्रिपृथुलघुगम्भीर" इत्युद्देशे "ग्रीवाजङ्घासेढ्नैव त्रिभिर्हस्वोऽयमीड्रितः" काशी० ११अ० । ह्रस्व-ह्रस्वश्च चतुर्हस्वश्चैव शुभत्वसूक्तं यथा "हस्वानि चत्वारि च लिङ्गपृष्ठं ग्रीवा च जङ्घे च स्थितप्रदानि" तत्र हस्वे पृष्ठाधिक्यमिति भेदः ।

**त्रिलवण** न० त्रयाणां लवणानां समाहारः पात्रा० न ङीष् त्रिगुणितं लवणं वा संघातात् कर्म० वा । "सैन्धवञ्च विड्ञ्चैव रुचकं च ततीयकम् । मिलित्वैतत् त्रिलवणम्" इत्युक्ते लवणत्रये राजनि० ।

**त्रिलिङ्ग** त्रि० त्रीणि लिङ्गान्यस्य । १पुंस्त्वादिलिङ्गत्रययुक्ते शब्दे । समा० द्वि० ङीष् । २लिङ्गत्रये स्त्री "त्रिलिङ्गप्रां त्रिलिति पदम्" अमरः । त्रीणि सत्त्वादीनि लिङ्गानि अनुमापकान्यस्य । ३अङ्गङ्कारादौ त्रि० "रजःप्रधानान्महतस्त्रिलिङ्गो दैवनोदितात् जातः समर्ज्ज भूतादिर्विकादीनि पञ्चशः" भाग० ३।२०।१४ । ४वातादिधातुदोषजे रोगे च त्रि० सुश्रुतः ।

**त्रिलोकधृत्** पु० त्रयाणां लोकानां धृत् धृतिरस्य, धृ-सम्प० भावे क्विप् उत्तरपदद्विगुः । लोकत्रयस्थापनानुकूलप्रयत्नविशेषरूपधारणशालिनि परमेश्वरे "लोकस्वामी त्रिलोकधृत्" विष्णुस० ।

**त्रिलोकनाथ** पु० त्रयाणां लोकानां नाथः उत्तरपदद्विगुघटितस्तत्पुरुषः । त्रयाणां लोकानां नाथे परमेश्वरादौ । "त्रिलोकनाथेन सतां सखद्विषः" रघुः । "त्रिलोकनाथः पिठरप्रगोचरः" कुमा० । त्रिलोकपत्यादयोऽप्यत्र ।

**त्रिलोकात्मन्** पु० त्रयो लोकाः आत्मानः स्वरूपाणि यस्य कार्य्यकारणयोरभेदात् उत्तरपदद्विगुघटितस्तत्पुरुषो वा । १परमेश्वरे "त्रिलोकात्मा त्रिलोकेशः केशवः केशिहा हरिः" विष्णुपु० ।

**त्रिलोकी** स्त्री त्रयाणां लोकानां समाहारः ङीष् । स्वर्गमर्त्यपातालरूपे लोकत्रये "यदि त्रिलोकी गणनापरा स्यात्" नैष० । "स्त्रियं त्रिलोकीतिलकः स एव" माघः ।

**त्रिलोकेश** पु० त्रयाणां लोकानामीशः उत्तरपदद्विगुघटितस्तत्पुरुषः । १परमेश्वरे "त्रिलोकात्मा त्रिलोकेशः" विष्णु० । २स्वर्ये शब्दच० । त्रिलोकेश्वरादयोऽप्यत्र ।

**त्रिलोचन** पु० त्रीणि लोचनानि यस्य । १शिवे "त्रिलोचनैकांशतया दुरासदः" रघुः । "त्रिलोचनस्यासुपचक्रमे च" कुमा० । २काशीस्थे चतुर्दशमङ्गलिङ्गान्तर्गते लिङ्गभेदे न० । "द्वितीयं च त्रिलोचनम्" ७५ अ० । तन्माहात्म्यं च तत्रैव दृश्यम् । ३लोचनत्रययुक्ते त्रि० "सुखेन पूर्णेन्दुनिभस्त्रिलोचनः" माघः । ४दुर्गायां स्त्री । "लोचनत्रयसंयुक्ताम्" दुर्गाध्यानोक्तेः ।

**त्रिलोचनाष्टमी** स्त्री गौणचान्द्रज्यैष्ठकृष्णाष्टम्याम् "ज्यैष्ठे मासि त्वपक्षेऽहं ! कृष्णाष्टम्यां त्रिलोचनम् । यः पूजयति देवेशमीशलोकं स गच्छति" संवत्सरकौमुदीधृतभविष्यपुराणम् । "ज्यैष्ठे माससिते पक्षे अष्टम्यान्तु महेश्वरि ! । भिषार्द्रायां च तल्लोकं लभते नात्र संशयः" उत्तरकामाख्यातन्त्रे ११ पटले ।

**त्रिलौहक** त्रि० त्रीणि लौहानि धातवो यत्र कपसंज्ञायां कन् वा । सुवर्णरजतताम्रमये पात्रादौ ।

त्रिलौही स्त्री त्रीणि लौहानि साधनत्वेनास्त्यस्याः गौरा० ङीष्। सुवर्णरजतताम्रपरिमाणभेदेन निर्मिते सट्टाभेदे "अथ मन्त्रिणां हिताय त्रिलौही सट्टा निरूप्यते। सोमसूर्याग्निरूपाः सुवर्णा लौहत्रयं तथा। रौप्यमिन्दुः स्मृतो हेम सूर्यस्त्राक्षो हुताशनः। लौहभागाः समुद्दिष्टाः खराश्चत्वार संख्यया। तैर्लौहैः कारयेन्मुद्रामसङ्कलितसङ्कताम्। एषु खराः स्मृताः सौम्याः स्रग्धाः गौराः शुभोदयाः। त्राग्नेया व्यापकाः सर्वे सोमसूर्याग्निदेवताः। खराः षोडश विख्याताः स्रग्धाः स्युः पञ्चविंशतिः। व्यापका दश ते कामधनधर्मप्रदायिनः। साष्टं सहस्रं संजप्य स्मृद्धा तां जुहुयात्ततः। तस्यां सम्यातयेन्मन्त्री सर्पिषा पूर्वसंख्यया। निःक्षिप्य कुम्भे तां सट्टामभिषेकोक्त वर्त्मना। आवाह्य पूजयेद्देवीसपचारैर्विधानतः। अभिषिच्य विनीताय दद्यात्तां साधिकां गुरुः। इयं सट्टा क्षुद्ररोगविषमज्वरनाशिनी। व्याघ्रचौरसृगादिभ्यो रक्षां कुर्याद्विशेषतः। युद्धे विजयमाप्नोति धारयन् मनुजेश्वरः। मन्त्रसिद्धिकरी पुंसां चतुर्वर्गफलप्रदा। धारयन् मनुजो नित्यं देवतुल्यो भवेद्भुवि"" तन्त्रसा०।

त्रिवत्स पु०। त्रयो वत्सा वत्सरा वयोऽस्य पृषो०। त्रिवर्ष वयस्के वृषे। स्त्रियां तु टाप् त्रिवत्सा। "त्रिवत्सश्च मे त्रिवत्सा च मे" यजु०१८।२६। "वत्सो वत्सरः त्रयो वत्सा यस्य स त्रिवत्सः त्रिवर्षो वृषः तादृशी गौस्त्रिवत्सा" वेददी०। "सोमक्रयणस्त्रिवत्सः साण्डः" कात्या० श्रौ० २२।२।४०। "त्रिवत्सस्त्रिवर्षः साण्डः अण्डसंयुक्त ऋषभः" कर्कः।

त्रिवर्ग पु० त्रयाणां धर्मार्थकामानां वर्गः। १धर्मार्थकामरूपेषु पुरुषार्थेषु, अमरः २त्रिफलायां,३कटुत्रिके, मेदिनि० साङ्ख्योक्ते ४सत्त्वरजस्तमोरूपगुणत्रये। "त्रयःस्थानं च दृष्ट्वा च त्रिवर्गो नीतिवेदिनाम्" अमरोक्ते राज्ञामायव्ययदृष्टिरूपेषु ५पदार्थेषु च। "त्रिवर्गपारीक्षमणौ भवन्तम्" भट्टिः। "धर्मार्थावुच्यते श्रेयः कामार्थौ धर्म एव च। अर्थ एवेह वा श्रेयस्त्रिवर्ग इति वा स्थितिः"। "तं राजा प्रयतन् सम्यक् त्रिवर्गेणाभिवर्द्धते" मनुः।

त्रिवर्णक न० त्रयो वर्णाः पुष्पेष्वस्य कप्। १गोजुरे। २त्रिफलायां, ३त्रिकटौ। समा० हि० पात्रा० स्वार्थे कन्। ४ब्राह्मणक्षत्रियवैश्यरूपे द्विजातित्रिवर्णत्रये न० मेदि०। ५श्यामरक्तपीतात्मके वर्णत्रये च।

त्रिवर्त्तु न० त्रिषु वसन्तादिषु ऋतुषु वर्त्तते वृत-उनु। वसन्तादिके ऋतुत्रये प्रातरादिकाले अतिशयेन वर्त्तमाने आदित्यतेजसि। "त्रीणि वा आदित्यस्य तेजांसि वसन्ते प्रातर्वीर्यं मध्यन्दिने गरद्यपराह्णे" इति श्रुतेस्तस्य वसन्तादिषु प्रातरादिकालभेदेऽतिशयेन वर्त्तमानत्वात् तथात्वम्" "त्रिवर्त्तु ज्योतिःस्वभिष्ट्र क्षे" ऋ०७।१०१।२ "त्रिवर्त्तु त्रिष्वृतुष्वतिशयेन वर्त्तमानम्" भा०।

त्रिवर्त्मन् पु० त्रीणि वर्त्मान्यस्य। देवयानपितृयानदक्षिणायानरूपमार्गत्रययुक्ते जीवे "स विश्वरूपस्त्रिगुणस्त्रिवर्त्मा पञ्चाधिपः स करोति सत्कर्मभिः" श्वेता० ५।७। त्रीणि वर्त्मानि देवयानादयो मार्गभेदा अस्येति त्रिवर्त्मा धर्माधर्मज्ञानमार्गभेदान् अर्हति वा" भा० २गङ्गायां स्त्री। त्रिगुणितं वर्त्म। स्वर्गमर्त्यपातालस्थे मार्गे "जह्नोर्वतौ महापुण्यां मधुवतीं त्रिवर्त्मगाम्"। भा०आनु० २६अ०।

त्रिवर्ष त्रि० त्रयो वर्षा वयोऽस्य। त्रिवर्षवयस्के १प्राणिनि। "न त्रिवर्षस्य कर्त्तव्या बान्धवैरुदकक्रिया" मनुः।२त्रिहायणयोग्यां गवि स्त्री "त्रिहायणो त्रिवर्षो गौः" अमरः। स्वार्थे क। त्रिवर्षिका तत्रार्थे। त्रिगुणितो वर्षः मा०त०। ३वर्षत्रये पु० न० "न सिद्ध्यत्यर्हितं वाढं त्रिवर्षं वपनस्य च" स्मृतेः।

त्रिवर्षीय त्रि० त्रिवर्षे भवः छ। त्रिवर्षभवे "एकैकं वै त्रिवर्षीयं तेन पीवान् शुना सह" भा० आनु० ६३अ०

त्रिवार त्रि० त्रयो वारा अस्य। १वारत्रययुक्ते।२गरुडात्मजभेदे पु०। "त्रिवारः सप्तवारश्च वाल्मीकिर्दीपकस्तथा" भा० उ० १०० अ० गरुडात्मजोक्तौ।

त्रिविक्रम पु० त्रयो विक्रमाः पादन्यासा अस्य। १विष्णौ अमरः त्रिक्रमयुक्ते दशग्रम्। "आनन्दो नन्दनानन्दः सत्यधर्मस्त्रिविक्रमः" विष्णुस०। "त्रयो विक्रमाश्चिषु लोकेषु विक्रमः क्रान्तं यस्य स त्रिविक्रमः "त्रीणि पदानि विचक्रमे" श्रुतेः त्रयो लोका विक्रमाः क्रान्ता येनेति वा। "त्रिरित्येवं त्रयो लोकाः कीर्तिता मुनिसत्तमैः। क्रमसे तांस्ततो सर्वांस्त्रिविक्रमो जनार्दन!" विष्णुसं० भाष्यधृतदुर्विवेकवाक्ये तन्नाम निरुक्तिर्दर्शिता। इत०। २लोकत्रयक्रमयुक्ते पु० "त्रिविक्रमे यथा विष्णुः सर्वदैत्यवधे पुरा" रामा० स० ७६ अ०।

त्रिविद्य पु० त्रिषु विद्याऽस्य। त्रिवेदज्ञे द्विजे।

त्रिविध त्रि० त्रिषु विधा अस्य। त्रिप्रकारे "अथ त्रिविध-

दुःखात्मकमनिष्टमित्यज्ञपुरुषार्थः" सां० सू०। "त्रिविधदुःखज्ञाध्यात्मिकाधिभौतिकाधिदैविकरूपम्। "दैवत्वं सात्त्विका यान्ति मनुष्यत्वञ्च राजसाः। तिर्य्यक्त्वं तामसा नित्यमित्येषा त्रिविधा गतिः" मनुः। परद्रव्येष्वभिध्यानं मनसाऽनिष्टचिन्तनम्। वितथाभिनिवेशश्च त्रिविधं कर्म मानसम्" मनुः। नित्यं नैमित्तिकं काम्यं त्रिविधं स्नानमिष्यते" दक्षसं०। सात्त्विकादिभेदेन श्रद्धादित्रैविध्यं गीतायामुक्तं यथा

"त्रिविधा भवति श्रद्धा देहिनां सा स्वभावजा। सात्त्विकी राजसी चैव तामसी चेति तां शृणु। सत्त्वानुरूपा सर्वस्य श्रद्धा भवति भारत। श्रद्धामयोऽयं पुरुषो यो यच्छ्रद्धः स एव सः। यजन्ते सात्त्विका देवान् यक्षरक्षांसि राजसाः। भूतान् प्रेतगणांश्चान्ये यजन्ते तामसा जनाः। अशास्त्रविहितं घोरं तप्यन्ते ये तपो जनाः। दम्भाहङ्कारसंयुक्ताः कामरागबलान्विताः। कर्शयन्तः शरीरस्थं भूतग्राममचेतसः। मां चैवान्तःशरीरस्थं तान् विद्ध्यासुरनिश्चयान्। आहारस्त्वपि सर्वस्य त्रिविधो भवति प्रियः। यज्ञस्तपस्तथा दानं तेषां भेदमिमं शृणु। आयुःसत्त्ववलारोग्यसुखप्रीतिविवर्द्धनाः। रस्याः स्निग्धाः स्थिरा हृद्या आहाराः सात्त्विकप्रियाः। कट्वम्ललवणात्युष्णतीक्ष्णरूक्षविदाहिनः। आहारा राजसेष्टा दुःखशोकामयप्रदाः। यातयामं गतरसं पूतिपर्य्युषितं च यत्। उच्छिष्टमपि चामेध्यं भोजनं तामसप्रियम्। अफलाकाङ्क्षिभिर्यज्ञो विधिदृष्टो य इज्यते। यष्टव्यमेवेति मनः समाधाय स सात्त्विकः। अभिसन्धाय तु फलं दम्भार्थमपि चैव यत्। इज्यते भरतश्रेष्ठ! तं यज्ञं विद्धि राजसम्। विधिहीनमसृष्टान्नं मन्त्रहीनमदक्षिणम्। श्रद्धाविरहितं यज्ञं तामसं परिचक्षते। देवद्विजगुरुप्राज्ञपूजनं शौचमार्जवम्। ब्रह्मचर्य्यमहिंसा च शारीरं तप उच्यते। अनुद्वेगकरं वाक्यं सत्यं प्रियहितञ्च यत्। स्वाध्यायाभ्यसनं चैव वाङ्मयं तप उच्यते। मनःप्रसादः सौम्यत्वं मौनमात्मविनिग्रहः। भावसंशुद्धिरित्येतत्तपो मानसमुच्यते। श्रद्धया परया तप्तं तपस्तत्त्रिविधं नरैः। अफलाकाङ्क्षिभिर्युक्तैः सात्त्विकं परिचक्षते। सत्कारमानपूजार्थं तपो दम्भेन चैव यत्। क्रियते तदिह प्रोक्तं राजसं चलमध्रुवम्। मूढग्राहेणात्मनो यत् पीड़या क्रियते तपः। परस्योत्सादनार्थं वा तत्तामसमुदाहृतम्। दातव्यमिति यद्दानं दीयतेऽनुपकारिणे। देशे काले च पात्रे च तद्दानं सात्त्विकं स्मृतम्। यत्तु प्रत्युपकारार्थं फलमुद्दिश्य वा पुनः। दीयते च परिक्लिष्टं तद्दानं राजसं स्मृतम्। अदेशकाले यद्दानमपात्रेभ्यश्च दीयते। असत्कृतमवज्ञातं तत्तामसमुदाहृतम्। ओँ तत्सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृतः। ब्राह्मणास्तेन वेदाश्च यज्ञाश्च विहिताः पुरा। तस्मादोमित्युदाहृत्य यज्ञदानतपःक्रियाः। प्रवर्त्तन्ते विधानोक्ताः सततं ब्रह्मवादिनाम्। तदित्यनभिसन्धाय फलं यज्ञतपःक्रियाः। दानक्रियाश्च विविधाः क्रियन्ते मोक्षकाङ्क्षिभिः। सद्भावे साधुभावे च सदित्येतत् प्रयुज्यते। प्रशस्ते कर्मणि तथा सच्छब्दः पार्थ! युज्यते। यज्ञे तपसि दाने च स्थितिः सदिति चोच्यते। कर्म चैव तदर्थीयं सदित्येवाभिधीयते। अश्रद्धया हुतं दत्तं तपस्तप्तं कृतञ्च यत्। असदित्युच्यते पार्थ! न च तत् प्रेत्य नो इह" १७अ०।

"सन्न्यासस्य महाबाहो! तत्त्वमिच्छामि वेदितुम्। त्यागस्य च हृषीकेश! पृथक् केशिनिसूदन!। भगवानुवाच। काम्यानां कर्मणां न्यासं सन्न्यासं कवयो विदुः। सर्वकर्मफलत्यागं प्राहुस्त्यागं विचक्षणाः। त्याज्यं दोषवदित्येके कर्म प्राहुर्मनीषिणः। यज्ञदानतपः कर्म न त्याज्यमिति चापरे। निश्चयं शृणु मे तत्र त्यागे भरतसत्तम!। त्यागो हि पुरुषव्याघ्र! त्रिविधः संप्रकीर्त्तितः। यज्ञदानतपःकर्म न त्याज्यं कार्य्यमेव तत्। यज्ञो दानं तपश्चैव पावनानि मनीषिणाम्। एतान्यपि तु कर्म्माणि सङ्गं त्यक्त्वा फलानि च। कर्त्तव्यानीति मे पार्थ! निश्चितं मतमुत्तमम्। नियतस्य तु संन्यासः कर्मणो नोपपद्यते। मोहात्तस्य परित्यागस्तामसः परिकीर्त्तितः। दुःखमित्येव यत् कर्म कायक्लेशभयात्त्यजेत्। स कृत्वा राजसं त्यागं नैव त्यागफलं लभेत्। कार्य्यमित्येव यत् कर्म नियतं क्रियतेऽर्জুন!। सङ्गं त्यक्त्वा फलञ्चैव स त्यागः सात्त्विको मतः। न द्वेष्ट्यकुशलं कर्म कुशले नानुषज्जते। त्यागी सत्त्वसमाविष्टो मेधावी छिन्नसंशयः। न हि देहभृता शक्यं त्यक्तुं कर्म्माण्यशेषतः। यस्तु कर्मफलत्यागी स त्यागीत्यभिधीयते। अनिष्टमिष्टं मिश्रञ्च त्रिविधं कर्मणः फलम्। भवत्यत्यागिनां प्रेत्य न तु संन्यासिनां क्वचित्। पञ्चैतानि महाबाहो! कारणानि निबोध मे। सांख्ये कृतान्ते प्रोक्तानि सिद्धये सर्वकर्मणाम्।

ज्ञानं तथा कर्त्ता करणञ्च त्रिविधम्। विविधाश्च पृथक् चेष्टा दैवं चैवात्र पञ्चमम्। शरीरवाङ्मनोभिर्यत् कर्म प्रारभते नरः। न्याय्यं वा विपरीतं वा पञ्चैते तस्य हेतवः। तत्रैवं सति कर्त्तारमात्मानं केवलन्तु यः। पश्यत्यकृतबुद्धित्वान्न स पश्यति दुर्मतिः। यस्य नाहङ्कृतो भावो बुद्धिर्यस्य न लिप्यते। हत्वापि स इमाँल्लोकान् न हन्ति न निबध्यते। ज्ञानं ज्ञेयं परिज्ञाता त्रिविधा कर्मचोदना। करणं कर्म कर्त्तेति त्रिविधः कर्मसंग्रहः। ज्ञानं कर्म च कर्त्ता च त्रिधैव गुणभेदतः। प्रोच्यते गुणसंख्याने यथावच्छृणु तान्यपि। सर्वभूतेषु येनैकं भावमव्ययमीक्षते। अविभक्तं विभक्तेषु तज्ज्ञानं विद्धि सात्त्विकम्। पृथक्त्वेन तु यज्ज्ञानं नानाभावान् पृथग्विधान्। वेत्ति सर्वेषु भूतेषु तज्ज्ञानं विद्धि राजसम्। यत्तु कृत्स्नवदेकस्मिन् कार्य्ये सक्तमहैतुकम्। अतत्त्वार्थवदल्पञ्च तत्तामसमिति स्मृतम्। नियतं सङ्गरहितमरागद्वेषतः कृतम्। अफलप्रेप्सुना कर्म यत्तत् सात्त्विकमुच्यते। यत्तु कामेप्सुना कर्म साहङ्कारेण वा पुनः। क्रियते बहुलायासं तद्राजसमुदाहृतम्। अनुबन्धं क्षयं हिंसामनपेक्ष्य च पौरुषम्। मोहादारभ्यते कर्म यत्तत्तामसमुच्यते। मुक्तसङ्गोऽनहंवादी धृत्युत्साहसमन्वितः। सिद्ध्यसिद्ध्योर्निर्विकारः कर्त्ता सात्त्विक उच्यते। रागी कर्मफलप्रेप्सुर्लुब्धो हिंसात्मकोऽशुचिः। हर्षशोकान्वितः कर्त्ता राजसः परिकीर्त्तितः। अयुक्तः प्राकृतः स्तब्धः शठो नैष्कृतिकोऽलसः। विषादी दीर्घसूत्री च कर्त्ता तामस उच्यते। बुद्धेर्भेदं धृतेश्चैव गुणतस्त्रिविधं शृणु। प्रोच्यमानमशेषेण पृथक्त्वेन धनञ्जय!। प्रवृत्तिञ्च निवृत्तिञ्च कार्य्याकार्य्ये भयाभये। बन्धं मोक्षञ्च या वेत्ति बुद्धिः सा पार्थ! सात्त्विकी। यया धर्ममधर्मञ्च कार्य्यञ्चाकार्य्यमेव च। अयथावत् प्रजानाति बुद्धिः सा पार्थ! राजसी। अधर्मं धर्ममिति या मन्यते तमसावृता। सर्वार्थान् विपरीतांश्च बुद्धिः सा पार्थ! तामसी। धृत्या यया धारयते मनःप्राणेन्द्रियक्रियाः। योगेनाव्यभिचारिण्या धृतिः सा पार्थ! सात्त्विकी। यया तु धर्मकामार्थान् धृत्या धारयतेऽर्जुन!। प्रसङ्गेन फलाकाङ्क्षी धृतिः सा पार्थ! राजसी। यया स्वप्नं भयं शोकं विषादं मदमेव च। न विमुञ्चति दुर्मेधा धृतिः सा पार्थ! तामसी। सुखं त्विदानीं त्रिविधं शृणु मे भरतर्षभ!। अभ्यासाद्रमते यत्र दुःखान्तञ्च निगच्छति। यत्तदग्रे विषमिव परिणामेऽमृतोपमम्। तत् सुखं सात्त्विकं प्रोक्तमात्मबुद्धिप्रसादजम्। विषयेन्द्रियसंयोगात् यत्तदग्रेऽमृतोपमम्। परिणामे विषमिव तत् सुखं राजसं स्मृतम्। यदग्रे चानुबन्धे च सुखं मोहनमात्मनः। निद्रालस्यप्रमादोत्थं तत्तामसमुदाहृतम्। न तदस्ति पृथिव्यां वा दिवि देवेषु वा पुनः। सत्त्वं प्रकृतिजैर्मुक्तं यदेभिः स्यात्त्रिभिर्गुणैः" श्रुत०। त्रिविधार्थश्च विष्णुक्रोऽर्थशब्दे २६७ पृ० उक्तः। अन्यस्य त्रैविध्यं यथायथं यथास्थाने उक्तं वक्ष्यते च। उत्पातशब्दे उत्पातत्रैविध्यमुक्तम्। तस्य भावः ष्यञ्। त्रैविध्य त्रिप्रकारत्वे "एवं त्रैविध्यमापन्नः संसर्गोभाव इष्यते" भाषा०। "त्रैविध्यादियमर्थानां प्रत्येकं त्रिविधा मता" सा० द०।

**त्रिविष्टप** न० विशत्यस्मिन् सुकृतिनः विश-कपन् तुट्-त्वञ्च। "विटपविष्टपपिण्डिपोलपाः" उणा० उज्ज्वलदत्तेन विष्टपेत्यत्र पिष्टपेति पठितम्। अन्ये तत्र दन्त्योष्ठ्यादितया भेदुः। "यत्र ब्रह्मस्र विष्टपमित्यादिप्रयोगात् "विष्टपं भुवनं जगत्" अमरपद्ये विष्टपेति पाठस्य क्षीरस्वामिप्रभृतिसम्मतत्वाच्च। स्वर्गोऽयं विष्टपम् इत्यौ त्रिभागवत् संख्याशब्दस्य पूरणार्थत्वम्। स्वर्गे अमरटीकायां स्वामी। "त्रिविष्टपस्थेव पतिं जयन्तः" रघुः। "स्वर्गं त्रिविष्टपं प्राप्य धर्मराजो युधिष्ठिरः" भा० स्व० १अ०। समा० हि०। २त्रिभुवने न०

**त्रिविष्टपसद्** पु० त्रिविष्टपे स्वर्गे सीदति सद-क्विप्। देवे हेमा०।

**त्रिविष्टब्ध** न० त्रीणि विष्टब्धानि यत्र। त्रिदण्डरूपे अपष्टम्भने "य इमां कुल्फिकां भिन्द्यात्त्रिविष्टब्धं च यो हरेत्। वासश्चापहरेत् तस्मिन् कथं ते मानसं भवेत्"। "त्रयीञ्च नाम वार्त्तां च त्यक्त्वा पुत्रान् व्रजन्ति ये। त्रिविष्टब्धञ्च वासव प्रतिगृह्णन्त्यबुद्धयः" भा० शा० १८ अ०।

**त्रिविस्त** त्रि० त्रीणि विस्तानि स्वर्णकर्षमूल्यान्यर्हति ठक् तस्य वा लुक्। स्वर्णकर्षत्रयमूल्यार्हे। सुगमत्वे त्रैविस्तिक तत्रार्थे त्रि०।

**त्रिविस्तीर्ण** पु० त्रिभिः विस्तीर्णः। शुभलक्षणभेदान्विते पुरुषे। "त्रिपृथुजघनशीरो द्वात्रिंशल्लक्षणान्वित" उपक्रमे "ललाटकटिवक्षोभिस्त्रिविस्तीर्णो यथाक्रमात्। सर्वतेजोऽतिमैश्वर्यं तथा प्राप्स्यति नान्यथा" काशी० ११अ०। त्रिपृथुशब्दोऽप्यत्र ६० स० ६८ अ० तु "उरो

ललाटं वदनञ्च पुंसां विस्तीर्णमेतच्त्रितयं प्रशस्तम्" विस्तीर्णचतुष्कप्रशस्ततयोक्तमिति भेदः। [भावे राजनि०।

त्रिबीज पु० त्रीणि त्रीणि बीजानि प्रतिफलं यस्य। शम्या-

त्रिवृत्(त्ता) पु० त्रीन् अवयवान् वर्त्तते इति वृत्-क्विप् त्रिभिरवयवैर्वर्त्ता वा। १(तेओड़ि) ओषधिभेदे, अमरः "श्वेता त्रिवृद्रोचनी स्यात् स्वादुरूष्णा सभीरुहृत्। रूक्षा पित्तज्वरश्लेष्मप्लीहशोथोदरापहा। श्वेतरक्तप्रभेदेन द्विविधा त्रिवृदुच्यते। शुक्लाभा त्रिवृत्ततो हीनगुणा तीव्रा विरेचिका। मूर्च्छादाहमदभ्रान्तिकरहृत्कण्ठपीडकारिणी" भावप्र०। वर्त्तनं वृत् त्रिः त्रिसः वृतो यत्र। एकस्य त्रिशब्दस्य त्रिवारे त्रिसंख्यान्विते च वृत्तिः तन्त्रोच्चारणात्। २त्रिधात्रिगुणिते त्रि०। "त्रिप्रस्रोर्वृतं त्रिवृत्" इति मनुः त्रिगुणितसूत्रतन्तुसमूहस्यैवोपवीतरूपत्वात्तथार्थता। त्रिर्वर्त्तते वृत-क्विप्। त्रिगुणितेषु ३तेजोजलान्नेषु च। "तासां त्रिवृतं त्रिवृतमेकैकां करवाणि" छा०उ० ४त्रिगुणिते "यजेत वाश्वमेधेन स्वर्जिता गोसवेन वा। अभिजिद्विश्वजिद्भ्यां वा त्रिवृताग्निष्टुतापि वा" मनुः। त्रिभिर्ऋग्यजुःसामभिर्वर्त्तते वृत-कर्त्तरि क्विप्। ५यज्ञे पु०। "यः सुपर्णो यजुर्नाम छन्दोगास्त्रिवृदक्षरः" भा० शा० ४७ अ०। "त्रिवृत् यज्ञः शिरोऽस्य" नीलक० त्रिर्वर्त्तते सृज्यतेऽस्य त्रिशब्दस्य वीप्सार्थत्वम्। ६कस्मिंश्चेषाणां नवके। यथोक्तं सामसंहिताभाष्ये

"लौकिको वाक्यशेषार्थस्त्रिवृदादेः समत्वतः। उभौ विध्यर्थवाक्यैकवाक्यत्वादस्त्रिवृन्नामिभः। "त्रिवृद्वहिष्पवमानम्" इति श्रुतौ त्रिवृच्छब्दस्य तु गुणं लोकसिद्धोऽर्थः वाक्यशेषादक्-तुवाक्येषु सूक्तेष्ववस्थितानां वह्निप्रवमानाख्य-स्तोत्र-निष्पादन-क्षमाणाम् "उपास्मै गायता नरः (उ १म०१२, २सू०) इत्यादीनामृचां नवकेऽर्थः तत्र धर्मनिर्णये वेदस्य प्रबलत्वेऽपि पद-पदार्थनिर्णये लोकवेदयोः समान-बलवत्त्वात् उभावर्थौ विकल्पेन गृहीतव्यौ, इति चेत्—नैवम्, लौकिकार्थ-स्वीकार-पक्षे विधिवाक्ये तृगुणप्रमर्थः, अर्थवाद-वाक्ये स्तोत्रियाणामृचां नवकम्, इत्येवं विध्यर्थवादयोर्वैयधिकरण्यादेकवाक्यत्वं न स्यात्, अतः एकवाक्यत्वाय स्तोत्रियाणां नवकमेव विधिवाक्ये नियतोऽर्थः"।

त्रिवृत्करण न० वृत०। तेजो जलान्नानां त्र्यात्मककरणे तत्प्रकारश्च छा० उ० भाष्ये दर्शितो यथा

"तासां त्रिवृतं त्रिवृतमेकैकां करवाणीति सेयं देवतेमास्तिस्रो देवता अनेनैव जीवेनात्मनानुप्रविश्य नामरूपे व्याकरोत्। तासां त्रिवृतं त्रिवृतमेकैकामकरोद्यथा तु खलु सोम्येमास्तिस्रो देवतास्त्रिवृत्त्रिवृदेकैका भवति तन्मे विजानीहीति। यदग्ने रोहितं रूपं तेजसस्तद्रूपं यच्छुक्लं तदपां, यत्कृष्णं तदन्नस्यापागादग्नेरग्नित्वं वाचारम्भणं विकारो नामधेयं त्रीणि रूपाणीत्येव सत्यम्। यदादित्यस्य रोहितं रूपं तेजसस्तद्रूपं, यच्छुक्लं तदपां, यत्कृष्णं तदन्नस्यापागादादित्यादादित्यत्वं वाचारम्भणं विकारो नामधेयं त्रीणि रूपाणीत्येव सत्यम्। यच्चन्द्रमसो रोहितं रूपं, तेजसस्तद्रूपं यच्छुक्लं तदपां, यत्कृष्णं तदन्नस्यापागाच्चन्द्राच्चन्द्रत्वं वाचारम्भणं विकारो नामधेयं त्रीणि रूपाणीत्येव सत्यम्। यद्विद्युतो रोहितं रूपं तेजसस्तद्रूपं यच्छुक्लं तदपां यत्कृष्णं तदन्नस्यापागाद्विद्युतो विद्युत्त्वं वाचारम्भणं विकारो नामधेयं त्रीणि रूपाणीत्येव सत्यम्।

"सैवं तिस्रो देवता अनुप्रविश्य स्वात्मावस्थे बीजभूते व्याकृते नामरूपे व्याकरवाणीतीच्छित्वा नामाभ्यां तिसृभ्यां देवतानामेकैकां त्रिवृतं त्रिवृतं करवाणि एकैकस्याः त्रिवित्करणे एकैकस्याः प्राधान्यं ह्ययोहयोर्गुणभावोऽन्यथा हि रज्ज्वा इवैकमेव त्रिवृत्करणं स्यात्। न तु तिसृणां पृथक् त्रिवृत्करणमिति। एवं हि तेजोबन्नानां पृथङ्नामप्रत्ययलाभः स्यात्तेज इदमिमा आपोऽन्नमिदमिति च। पृथङ्नामप्रत्ययलाभे देवतानां सम्यगव्यवहारस्य प्रसिद्धिः प्रयोजनं स्यात्। एवमीक्षित्वा सेयं देवता अनेनैव यथोक्तेनैव जीवेन सूर्यबिम्बवदनः प्रविश्य वैराजं पिण्डं प्रथमं देवतादीनां च पिण्डानामनुप्रविश्य यथासङ्ख्यमेव नामरूपे व्याकरोदसौनामायमिदंरूप इति तासाञ्च देवतानां मुख्यप्रधानभावेन त्रिवृतं त्रिवृतमेकैकामकरोत् कृतवती देवता। त्रिवृत्तावद्देवतादिपिण्डानां नामरूपाभ्यां व्याकृतानां, तेजोबन्नमयत्वेन त्रित्वात् यथा तु खलु बहिरिमाः पिण्डेभ्यस्तिस्रो देवतास्त्रिवृत्त्रिवृदेकैका भवति तन्मे सम निगदतो विजानीहि विसृष्टमवधारयोदाहरणतः। यत्तद्देवतानां त्रिवृत्करणसूक्तं तस्यैवदाहरणसूच्यते। उदाहरणं नामैकदेशप्रसिद्ध्यार्थप्रसिद्ध्यर्थमुदाहियत इति। तदेतदाह यदग्नेः त्रिवृत्कृतस्य रोहितं रूपं प्रसिद्धं लोके तत्त्रिवृत्कृतस्य तेजसो रूपमिति विद्धि। तथा च यच्छुक्लं रूपमग्नेरेव तदपामत्रिवृत्कृतानाम्

यत्कृष्णं तस्यैवाग्ने रूपं तदस्य पृथिव्या अतिरिक्तकृतायां इति विद्धि। ततश्चैवं सति रूपवत्यव्यतिरेकेणाग्निरिति यन्मन्यसे त्वं तस्मादग्नेरग्नित्वमिदानीमपागादपगतम्। प्राग्यत्वविवेकविज्ञानाद्याग्निबुद्धिरासीत्तेजसाग्निबुद्धिरपगतात्राग्निशब्दश्चेत्यर्थः। यथा दह्यमानरक्तोपधानसंयुक्तः स्फटिको रक्तभाणः पद्मरागोऽयमिति शब्दबुद्धोः प्रयोजको भवति प्रागुपधानस्फटिकयोर्विवेकविज्ञानात्, तद्विवेकविज्ञाने तु पद्मरागशब्दबुद्धी निवर्त्तेते तद्विवेकविज्ञानात्तत्सदृशत्। ननु किमत्र बुद्धिशब्दकल्पनया क्रियते प्राग्यत्वविवेककरणादग्निरेवासीत्तदग्नेरग्नित्वं रोहितादिरूपविवेककरणादपागादिति युक्तम्। यथा तन्त्वपकर्षणे पटाभावः। नैवं बुद्धिशब्दमात्रमेव ह्यग्निर्यत आह वाचारम्भणमग्निर्नाम विकारो नामधेयं नाममात्रमित्यर्थोऽतोऽग्निबुद्धिरपि मृषैव। तर्हि किं तत् सत्यं ? त्रीणि रूपाणीत्येव सत्यं नाणुमात्रमपि रूपत्वव्यतिरेकेण सत्यमस्तीत्यवधारणार्थः। तथा यदादित्यस्य यच्चन्द्रमसो यद्विद्युत इत्यादि समानम्। ननु यथा तु खलु सोम्येमास्तिस्रो देवतास्त्रिवृत्त्रिवृदेकैका भवति तन्मे विजानीहीत्युक्ता तेजस एव चतुर्भिरण्वादिभिस्त्रिवृत्करणं दर्शितं नाबन्धयोरुदाहरणं दर्शितं त्रिवृत्करणे। नैष दोषः। यावद्विषयाणामण्वादिभेदानां त्रिवृत्करणमुदाहरणान्येवमेव च द्रष्टव्यानीति मन्यते श्रुतिः। तेजस उदाहरणमुपलब्ध्यर्थम्, रूपवत्त्वात् स्पष्टार्थत्वोपपत्तेश्च। गन्धरसयोरनुदाहरणं त्रयाणामसम्भवात् न हि गन्धरसौ तेजसि स्तः। स्पर्शशब्दयोरनुदाहरणं विभागेन दर्शयितुमशक्यत्वात्। यदि सर्वं जगत्त्रिवृत्कृतमित्यन्नादिवत्त्रीणि रूपाणीत्येव सत्यमग्नेरग्नित्ववदपागाज्जगतो जगत्त्वम्। तथाऽन्नस्यापि अप्शुङ्गत्वादाप इत्येव सत्यं वाचारम्भणमात्रमन्नम्। तथापामपि तेजःशुङ्गत्वाद्वाचारम्भणत्वे तेज इत्येव सत्यम्। तेजसोऽपि सच्छुङ्गत्वाद्वाचारम्भणत्वं, सदित्येव सत्यमित्येषोऽर्थो विवक्षितः। ननु वायवन्तरिक्षे त्वत्रिवृत्कृते तेजःप्रभृतिष्वनन्तर्भूतत्वादविशिष्टे ते। एवं गन्धरसशब्दस्पर्शाश्चाविशिष्टा इति। कथं ? सतो विज्ञानेन सर्वमन्यद्विज्ञातं भवेत्तद्विज्ञाने वा प्रकारान्तरं वाच्यम्। नैष दोषो रूपवद्द्रव्ये सर्वस्य दर्शनात्। कथं, तेजसि तावद्रूपवति शब्दस्पर्शयोरप्युपलम्भाद्वायवन्तरिक्षयोस्तु स्पर्शशब्दगुणवतोः सद्भावोऽनुमीयते। तथाबन्धयो रूपवतो रसगन्धवतोर्भाव इति। रूपवतां त्रयाणां तेजोऽबन्नानां त्रिवृत्करणप्रदर्शनेन सर्वं तदन्तर्भूतं सहिकारत्वात्त्रीण्येव रूपाणि विज्ञातं मन्यते श्रुतिः। न हि मर्त्यं रूपवत् द्रव्यं प्रत्याख्याय वायुराकाशयोस्तद्गुणयोर्गन्धरसयोर्वा यत्किञ्चनास्ति। अथ वा रूपवतामपि त्रिवृत्करणं प्रदर्शनार्थमेवमन्यते श्रुतिः यथा तु त्रिवृत्कृते त्रीण्येव रूपाणीत्येव सत्यं तथा पञ्चीकरणेऽपि समानो न्याय इत्यतः सर्वस्य सहिकारत्वात्ततो विज्ञानेन सर्वमिदं विज्ञातं स्यात्तदेकमेवाद्वितीयं सत्यमिति सिद्धमेव भवति" भाष्यम्।

त्रिवृत्करणं त्रयाणां प्रत्येकं द्वेधा विभागे द्वितीयार्द्धस्य पुनर्द्वेधा विभागे च एकैकस्मिन् स्वस्वेतरद्वितीयांशार्द्धयोजनरूपं पञ्चीकरणवत् त्रिवृत्करणम् "द्विधा विधाय चैकैकं द्विधा च प्रथमं पुनः। स्वस्वेतरद्वितीयांशैर्योजनात् त्र्यात्मकाश्च ते" इत्युक्तरीत्या कल्प्यम्।

**त्रिवृत्पर्णी** स्त्री त्रिषु दोषेषु वर्त्तते नाशनाय त्रिवृत् त्रिदोषघ्नम् पर्णमस्याः। (हेलञ्चा) छिलमोचिकायाम् शब्दच०।

**त्रिवृत्ता** स्त्री त्रिराहत्ता। १त्रिवृतति अमरः। २त्रिराहत्ते त्रिगुणे त्रि० "त्रिवृत्ता (मेखला) यन्त्रिनैकेन त्रिभिः पञ्चभिरेव वा" मनुः।

**त्रिवृत्तिका** स्त्री त्रिवृः वृत्तयोऽस्याः कप्। १त्रिवृतति राजनि०। २त्रिधावृत्तियुक्ते त्रि०।

**त्रिवृद्वेद** पु० ऋगादात्मना त्रिर्वर्त्तते त्रिवृत् कर्म्म०। १त्रयां वेदत्वे तदुत्पन्ने २प्रणवे च। "ऋचो यजूंषि चान्यानि सामानि विविधानि च। एष (प्रणवः) त्रैयस्त्रिवृद्वेदो यो वेदैनं स वेदवित्। आद्यं यत् तूत्तरं ब्रह्म त्रयी यस्मिन् प्रतिष्ठिता। स गुह्योऽन्यस्त्रिवृद्वेदोयस्तं वेद स वेदवित्" मनुः।

**त्रिवे(णि)णी** स्त्री त्रिवः वेणयः प्रवाहाः विच्छित्राः संयुक्ता वा यत्र ततः इदन्तत्वात् वा ङीप्। गङ्गायमुनासरस्वतीनां विच्छिन्नप्रवाहे १दक्षिणप्रयागे युक्तप्रवाहे २प्रयागे तीर्थभेदे च दक्षिणप्रयागसीमा च यथा "प्रद्युम्नस्य ह्रदात् याम्ये सरस्त्यास्तथोत्तरे। तद्दक्षिणप्रयागन्तु गङ्गातो यमुना गता" प्रा० त०। त्रिवेणस्या इदम् शिवा० अण्। त्रैवेण। तदीये त्रि०।

**त्रिवेणु** पु० त्रयो वेणवो यत्र। रथमुखस्थेऽवयवभेदे शब्दरत्नावलिः। "अथांश्चिवेणुं तत्सङ्घ तिलशोव्यधमच्छरैः" भा० व० २४१अ०।

**त्रिवेद** पु० त्रीन् वेदान् वेत्ति विद्-अण् उप० स० त्रयो वेदा

अधीतत्वेन सन्त्यस्य कच् वा । ३वेदत्रयवेत्तरि । "नाग्निस्त्रितस्त्रिवेदोऽपि सर्वाशी सर्वविक्रयी" मनुः ततः स्वार्थे ब्राह्म० यञ् । त्रैवेद्य तदर्थे "त्रैवेद्याः शुचयोदान्ताः" गौता । त्रिगुणितो वेदः या०त० । २वेदत्रये ३तद्विहितकर्मणि च "त्रिवेदसंयोगाच्च" कात्या० श्रौ० २५।१४।३७ । "वेदत्रयविहितकर्मयोगो ब्राह्मणः" कर्कः ।

त्रिवेला स्त्री तिस्रो वेला सीमानोऽस्याम् । त्रिवृति (तेओड़ि) राजनि० ।

त्रिशक्ति स्त्री त्रिगुणिता शक्तिः । १कालीतारात्रिपुरारूपे तन्त्रोक्ते देवीत्रये "त्रिशक्तिविषये देवि ! क्रमदीक्षा प्रकीर्तिता" तन्त्रसा० इच्छाज्ञानक्रियारूपे ऐश्वरे २शक्तित्रये प्रभावोत्साहमन्त्रजे राज्ञां ३शक्तित्रये । ब० व्री० । ४त्रिगुणात्मके प्रधाने च ।[१परमेश्वरे २विजिगीषुत्रये च ।

त्रिशक्तिधृत् पु०त्रिशक्तिं इच्छादिशक्तित्रयं धरति धृ–क्विप् ।

त्रिशङ्कु पु० त्रयः शङ्कव इव यत्र । १माञ्जीरे २शनभेदि० । ३चातकखगे शब्दच० । ४खद्योते शब्दमा० । ५सूर्यवंश्ये नृपभेदे । तस्य नामनिरुक्तिः हरिवं०१३अ० दर्शिता यथा

"अविद्यमाने मांसे तु वशिष्ठस्य महात्मनः । सर्वकामदुघान्दोग्ध्रीं ददर्श स नृपात्मजः । तां वै क्रोधाच्च मोहाच्च श्रमाच्चैव क्षुधार्दितः । दशधर्मगतो राजा जघान जनमेजय ! । मत्तः प्रमत्त उन्मत्तः श्रान्तः क्रुद्धो बुभुक्षितः । त्वरमाणश्च भीरुश्च लुब्धः कामी च ते दश । तत्र मांसं स्वयञ्चैव विश्वामित्रस्य चात्मजान् । भोजयामास तच्छ्रुत्वा वशिष्ठोऽस्य चुक्रुधे । क्रुद्धस्तु भगवान् वाक्यमिदमाह नृपात्मजम् । वशिष्ठ उवाच । पातयेयमहं क्रूर ! तव शङ्कुमसंशयम् । यदि ते ह्यविभौ शङ्कू न स्यातां वै पुनःकृतौ । पितुश्चापरितोषेण गुरोर्दोग्ध्रीवधेन च । अप्रोक्षितोपयोगाच्च त्रिविधस्ते व्यतिक्रमः । वैशम्पायन उवाच । एवं क्रोधस्य शङ्कूनि तानि दृष्ट्वा महातपाः । त्रिशङ्कुरिति होवाच त्रिशङ्कुस्तेन स स्मृतः" । तस्य सशरीरस्वर्गयानकथा रामा०बा०५७अ०

"सोऽभिगम्य महात्मानः सर्वानेव गुरोः सुतान् । अभिवाद्यानुपूर्व्येण स्थिरा किञ्चिदवाङ्मुखः । अब्रवीत् स महात्मानः सर्वानेव कृताञ्जलिः । शरणं वः प्रपन्नोऽहं शरण्यान् शरणं मतः । प्रत्याख्यातो हि भद्रं वो वशिष्ठेन महात्मना । यष्टुकामो महायज्ञं तदनुज्ञातुमर्हथ । गुरुपुत्रानहं सर्वान्नमस्कृत्य प्रसादये । शिरसा प्रणतो याचे ब्राह्मणान् तपसि स्थितान् । ते मां भवन्तः सिद्ध्यर्थं याजयन्तु समाहिताः । सशरीरो यथाहं वै देवलोकमवाप्नुयाम् । प्रत्याख्यातो वशिष्ठेन गतिमन्यां तपोधनाः ! । गुरुपुत्रान्ते सर्वांश्चाहं पश्यामि काञ्चन । इक्ष्वाकूणां हि सर्वेषां पुरोधाः परमा गतिः । तस्मादनन्तरं सर्वे भवन्तो दैवतं मम" ।

"ततस्तिशङ्कोर्वचनं श्रुत्वा क्रोधसमन्वितम् । ऋषिपुत्रशतं राम ! राजानमिदमब्रवीत् । प्रत्याख्यातोऽसि दुर्बुद्धे ! गुरुणा सत्यवादिना । तं कथं समतिक्रम्य शाखान्तरमुपेयिवान् । इक्ष्वाकूणां हि सर्वेषां पुरोधाः परमा गतिः । न चातिक्रमितुं शक्यं वचनं सत्यवादिनः । अशक्यमिति होवाच वशिष्ठो भगवान्मुनिः । तं वयं वै समाहर्तुं क्रतुं शक्ताः कथञ्च न । यालिङ्गस्व नरश्रेष्ठ ! गम्यतां स्वपुरं पुनः । याजने भगवान् शक्तस्त्रैलोक्यस्यापि पार्थिव ! । अयमानं कथं कर्तुं तस्य शक्ष्यामहे वयम् । तेषां तद्वचनं श्रुत्वा क्रोधपर्याकुलाक्षरम् । स राजा पुनरेवैतानिदं वचनमब्रवीत् । प्रत्याख्यातो भगवता गुरुपुत्रैस्तथैव हि । अन्यां गतिं गमिष्यामि क्षमध्वं वोऽस्तु तपोधनाः ! । ऋषिपुत्रास्तु तच्छ्रुत्वा वाक्यं घोराभिसंहितम् । श्वेषुः परमसंक्रुद्धाश्चण्डालत्वं गमिष्यसि । इत्युक्त्वा ते महात्मानो विविशुः स्वं स्वमाश्रमम् । अथ रात्र्यां व्यतीतायां राजा चण्डालतां गतः । नीलवस्त्रधरो नीलः परुषो ध्वस्तमूर्धजः । चिताभस्माङ्गरागश्च आयसाभरणोऽभवत् । तं दृष्ट्वा मन्त्रिणः सर्वे त्यक्त्वा चण्डालरूपिणम् । प्राद्रवन् सहिता राम ! पौरा येऽस्यानुगामिनः । एको हि राजा काकुत्स्थ ! जगाम परमात्मवान् । दह्यमानो दिवारात्रं विश्वामित्रं तपोधनम् । विश्वामित्रस्तु तं दृष्ट्वा राजानं विकृतीकृतम् । चण्डालरूपिणं राम ! मुनिः कारुण्यमागतः । कारुण्यात् स महातेजा वाक्यं परमधार्मिकः ! इदं जगाद भद्रन्ते राजानं घोरदर्शनम् । किमागमनकार्य्यन्ते राजपुत्र ! महाबल ! । अयोध्याधिपते ! वीर ! शापाच्चण्डालतां गतः । अथ तद्वाक्यमाकर्ण्य राजा चण्डालतां गतः । अब्रवीत् प्राञ्जलिर्वाक्यं वाक्यज्ञो वाक्यकोविदम् । प्रत्याख्यातोऽस्मि गुरुणा गुरुपुत्रैस्तथैव च । अनवाप्यैव तं कामं मया प्राप्तो विपर्ययः । सशरीरो दिवं यायामिति मे सौम्यदर्शन ! । मया चेष्टं क्रतुशतं तथा तन्नाप्यते फलम् । अन्तं

नोक्तपूर्वं मे न च वक्ष्ये कदाचन। कच्छेष्वपि गतः सौम्य! क्षत्रधर्मेण ते शपे। यत्नैर्बहुविधैरिष्टं प्रजाधर्मेण पालिताः। गुरवश्च महात्मानः शीलवृत्तेन तोषिताः। धर्मे प्रयतमानस्य यत्नं चाहर्तुमिच्छतः। परितोषं न गच्छन्ति गुरवो मुनिपुङ्गव!। दैवमेव परं मन्ये पौरुषं तु निरर्थकम्। दैवेनाक्रम्यते सर्वं दैवं हि परमा गतिः। तस्य मे परमार्तस्य प्रसादमभिकाङ्क्षतः। कर्तुमर्हसि भद्रन्ते दैवोपहतकर्मणः। नान्यं गतिं गमिष्यामि नान्यच्छरणमस्ति मे। दैवं पुरुषकारेण निवर्तयितुमर्हसि" ५८ स०।

"उक्तवाक्यं तु राजानं कृपया कुशिकात्मजः! अब्रवीत् मधुरं वाक्यं साक्षाच्चण्डालताङ्गतम्। इक्ष्वाकोः! स्वागतं वत्स! जानामि त्वां सुधार्मिकम्। शरणं ते प्रदास्यामि मा भैषीर्नृपपुङ्गव!। वयमाभन्त्रये सर्वान्महर्षीन् पुण्यकर्मणः। यत्तमाच्छकरान् राजंस्ततो यज्ञसि निर्दहतः। गुरुशापकृतं रूपं यदिदं त्वयि वर्त्तते। अनेन सह रूपेण सशरीरो गमिष्यसि। इक्ष्वाकूणामहं मन्ये स्वर्गं तव नराधिप!। यस्त्वं कौशिकमागम्य शरण्यं शरणागतः। एवमुक्त्वा महातेजाः पुत्रान् परमधार्मिकान्। व्यादिदेश महाप्राज्ञान् यज्ञसम्भारकारणात्। सर्वान् शिष्यान् स चाहूय वाक्यमेतदुवाच ह। सर्वान्नृपीन् सवाशिष्यानानयध्वं समाहिताः। सशिष्यान् सुहृदश्चैव सर्त्विजः सुबहुश्रुतान्। यदन्यो वचनं ब्रूयान्महाक्रतुबलनोदितः। तत्सर्वमखिलेनोक्तं समाख्येयमनाहतम्। तस्य तद्वचनं श्रुत्वा दिशो जग्मुस्तदाज्ञया। आजग्मुश्च देशेभ्यः सर्वेभ्यो ब्रह्मवादिनः। ते च शिष्याः समागम्य मुनिं ज्वलिततेजसम्। ऊचुश्च वचनं सर्वं सर्वेषां ब्रह्मवादिनाम्। श्रुत्वा ते वचनं सर्वे समायान्ति द्विजातयः। सर्वदेशेभ्य आगच्छन् वर्जयित्वा महोदयम्। वाशिष्ठं यज्ञकर्तृ सर्वं क्रोधपर्य्याकुलाक्षरम्। यथाह वचनं सर्वं शृणु त्वं मुनिपुङ्गव!। क्षत्रियो याजको यस्य चण्डालस्य विशेषतः। कथं सदसि भोक्तारो हविषस्य सुरर्षयः। ब्राह्मणा वा महात्मानो भुक्त्वा चण्डालभोजनम्। कथं स्वर्गं गमिष्यन्ति विश्वामित्रेण पालिताः। एतद्वचनमैक्ष्वाकमूचुः संरक्तलोचनाः। वाशिष्ठा मुनिशार्दूल! सर्वे सहमहोदयाः। तेषां तद्वचनं श्रुत्वा सर्वेषां मुनिपुङ्गवः। क्रोधसंरक्तनयनः सरोषमिदमब्रवीत्। यद्यदुष्टं मां तप उग्रं समास्थितम्। भस्मीभूता दुरात्मानो भविष्यन्ति न संशयः। अद्य ते कालपाशेन नीता वैवस्वतक्षयम्। सप्त जातिशतान्येव मृतपा भक्षयन्तु ते। श्वमांसनियताहारा मुष्टिका नाम निर्घृणाः। विक्रियाश्च विरूपाश्च लोकानुचरन्त्वमी। महोदयश्च दुर्बुद्धिर्मामदुष्यं दूषयत्। दूषितः सर्वलोकेषु निषादत्वं गमिष्यति। ब्राह्मणातिपाननिरतो निरनुक्रोशताङ्कृतः। दीर्घकालं मम क्रोधात् दुर्गतिं वर्त्तयिष्यति। एतावदुक्त्वा वचनं विश्वामित्रो महातपाः। विरराम महातेजा ऋषिमध्ये महामुनिः" ५९ स०।

"तपोबलकृतान् ज्ञात्वा वाशिष्ठान् समहोदयान्। ऋषिमध्ये महातेजा विश्वामित्रोऽभ्यभाषत। अयमिक्ष्वाकुदायादस्त्रिशङ्कुरिति विश्रुतः। धर्मिष्ठश्च वदान्यश्च मां चैव शरणं गतः। स्वेनानेन शरीरेण देवलोकजिगीषया। यथायं स्वशरीरेण देवलोकं गमिष्यति। तथा प्रवर्त्यतां यज्ञो भवद्भिश्च मया सह। विश्वामित्रवचः श्रुत्वा सर्व एव महर्षयः। ऊचुः समेताः सहसा धर्मज्ञा धर्मसंहितम्। अयं कुशिकदायादो मुनिः परमकोपनः। यदाह वचनं सम्यगेतत् कार्यं न संशयः। अस्मिन्क्रतौ हि भगवान् शापं दास्यति रोषतः। तस्मात् प्रवर्त्यतां यज्ञः सशरीरो यथा दिवि। गच्छेदिक्ष्वाकुदायादो विश्वामित्रस्य तेजसा। ततः प्रवर्त्यतां यज्ञः सर्वे समभितिष्ठत। एवमुक्त्वा च ऋषयः संजह्रुस्ताः क्रियास्तदा। याजकश्च महातेजा विश्वामित्रोऽभवत् क्रतौ। ऋत्विजश्चानुपूर्वेण मन्त्रवन्मन्त्रकोविदाः। चक्रुः सर्वाणि कर्माणि यथाकल्पं यथाविधि। ततः कालेन महता विश्वामित्रो महातपाः। चकारावाहनं तत्र भागार्थं सर्वदेवताः। नाभ्यागमंस्तदा तत्र भागार्थं तस्य देवताः। ततः कोपसमाविष्टो विश्वामित्रो महामुनिः। स्रुवमुद्यम्य सक्रोधस्त्रिशङ्कुमिदमब्रवीत्। पश्य मे तपसो वीर्यं स्वार्जितस्य नरेश्वर!। एष त्वां स्वशरीरेण नयामि स्वर्गमोजसा। दुष्प्रापं स्वशरीरेण स्वर्गं गच्छ नरेश्वर!। स्वार्जितं किञ्चिदप्यस्ति मया हि तपसः फलम्। राजंस्त्वं तेजसा तस्य सशरीरो दिवं व्रज। उक्तवाक्ये मुनौ तस्मिन् सशरीरो नरेश्वरः। दिवं जगाम काकुत्स्थ! मुनीनां पश्यतां तदा। स्वर्गलोकं गतं दृष्ट्वा त्रिशङ्कुं पाकशासनः। सह सर्वैः सुरगणै-

रिदं वचनमब्रवीत्। त्रिशङ्को! गच्छ भूयस्त्वं नास्ति स्वर्गकृतालयः। गुरुशापहतो मूढ! पत भूमिमधाक्शिराः। एवमुक्तो महेन्द्रेण त्रिशङ्कुरपतत् पुनः। विक्रोशमानस्त्राहीति विश्वामित्रं तपोधनम्। तच्छ्रुत्वा वचनं तस्य क्रोशमानस्य कौशिकः। रोषमाहारयत् तीव्रं तिष्ठ तिष्ठेति चाब्रवीत्। ऋषिमध्ये स तेजस्वी प्रजापतिरिवापरः। सृजन् दक्षिणमार्गस्थान् सप्तर्षीनपरान् पुनः। नक्षत्रवंशमपरमसृजत् क्रोधमूर्च्छितः। दक्षिणां दिशमास्थाय ऋषिमध्ये महायशाः। सृष्ट्वा नक्षत्रवंशञ्च क्रोधेन कलुषीकृतः। अन्यमिन्द्रं करिष्यामि लोको वा स्यादनिन्द्रकः। दैवतान्यपि स क्रोधात् सृष्टुं समुपचक्रमे। ततः परमसम्भ्रान्ताः सर्षिसङ्घाः सुरासुराः। विश्वामित्रं महात्मानमूचुः सानुनयं वचः। अयं राजा महाभाग! गुरुशापपरिक्षतः। सशरीरो दिवं यातुं नार्हस्येव तपोधन!। तेषां तद्वचनं श्रुत्वा देवानां सुनिपुङ्गवः। अब्रवीत् सुमहद्वाक्यं कौशिकः सर्वदेवताः। सशरीरस्य भद्रं वस्त्रिशङ्कोरस्य भूपतेः। आरोहणं प्रतिज्ञातं नान्यथं कर्तुमुत्सहे। स्वर्गोऽस्तु सशरीरस्य त्रिशङ्कोरस्य शाश्वतः। नक्षत्राणि च सर्वाणि मामकानि ध्रुवाणि च। यावल्लोका धरिष्यन्ति तिष्ठन्त्येतानि सर्वशः। मत्कृतानि सुराः सर्वे तदनुज्ञातुमर्हथ। एवमुक्ताः सुराः सर्वे प्रत्यूचुर्मुनिपुङ्गवम्। एवं भवतु भद्रन्ते तिष्ठन्त्येतानि सर्वशः। गगने तान्यनेकानि वैश्वानरपथाद्बहिः। नक्षत्राणि मुनिश्रेष्ठ! तेषु ज्योतिःषु जाज्वलन्। अधाक्शिरास्त्रिशङ्कुश्च तिष्ठत्यमरसन्निभः। अनुयास्यन्ति चैतानि ज्योतींषि ऋषिसत्तमम्। कृतार्थं कीर्तिमन्तञ्च स्वर्गलोकगतं यथा। विश्वामित्रस्तु धर्मात्मा सर्वदेवैरभिष्टुतः। ऋषिमध्ये महातेजा वाढमित्येव देवताः। ततो देवा महात्मानं ऋषयश्च तपोधनाः। जग्मुर्यथागतं सर्वे यज्ञस्यान्ते नरोत्तम!।" ६० स०

त्रिशङ्वोरपत्यम् अण्। त्रैशङ्व हरिश्चन्द्रे "तस्य (त्रिशङ्वोः) सत्यरथा नाम पत्नी कैकयवंशजा। कुमारं जनयामास हरिश्चन्द्रमकल्मषम्। स वै राजा हरिश्चन्द्रस्त्रैशङ्व इति श्रुतः" हरिवं० १३अ०। (हेमच० त्रिशङ्कुशब्दे दृश्यम्।

त्रिशङ्कुज पु० त्रिशङ्वोर्जायते जन-ड। हरिश्चन्द्रे नृपे

त्रिशङ्कुयाजिन् पु० त्रिशङ्कुं याजयति यज-णिनि। विश्वामित्रे हेमच० त्रिशङ्कुशब्दे दृश्यम्।

त्रिशत न० त्रिगुणितं शतम् या० त०। त्रिगुणिते शते। "चतुर्विंशतिसंयुक्तं मण्डलं त्रिशतं स्मृतम्" कामन्दकी। "नरकं त्रिशतं प्राप्य स विड्वासमुपजीवति" भा० अनु० १०१ अ०। समा० ङीप्। २शतत्रये स्त्री।

त्रिशरण न० त्रीणि शरणान्यस्य। बुद्धदेवे त्रिका०।

त्रिशर्करा स्त्री त्रिगुणिता शर्करा या० त०। त्रिगुणितगुडोत्पन्नाश्मोत्था मधुरेति मधुरत्रिके राजनि०।

त्रिशला स्त्री अर्हन्मातृभेदे हेमच०।

त्रिशाख त्रि० त्रिषः शाखा अवयवा यस्य। शिखाकारावयवयुते। "कृत्वा त्रिशाखां भ्रुकुटीं ललाटे" भा० कर्ण० ८५ अ०। [बिल्वे राजनि०।

त्रिशाखपत्र पु० त्रिसृः शाखा अस्य तादृशं पत्रं यस्य।

त्रिशाण त्रि० त्रयः शाणाः परिमाणमस्य तैः क्रीतं वा अण् तस्य वा लुक्। १त्रिशाणपरिमिते २तत्क्रीते च। पक्षे न लुक्। त्रैशाण तत्रार्थे पक्षे यत् त्रिशाण्य तत्रार्थे एवं द्विशाणद्विशाण्य द्वैशाण द्विशाणक्रीते तत्परिमिते त्रि०

त्रिशालक न० त्रिसृः शाला यत्र वा कप्। हिरण्यनाभाख्ये वास्तुभेदे तत्फलादिकं बृ० सं० ५३ उक्तं यथा "उत्तरशालाहीनं हिरण्यनाभं त्रिशालकं धन्यम्। प्राक्शालया वियुक्तं सुतेजं दक्षिदं वास्तु। याम्याहीनं पुत्री त्रिशालकं वित्तनाशकरमेतत्। पक्षत्रमपरयावर्जितम् सुतध्वंसवैरकरम्"।

त्रिशिख न० त्रिसृः शिखा अस्य। १त्रिशूले अस्त्रभेदे २किरीटे च हेमच०। ३शिखात्रययुक्ते त्रि०।

"त्रिशिखां भ्रुकुटिञ्चास्य ददृशुर्दानवा रणे" हरिवं० २२५ अ०। "त्रिशिखां भ्रुकुटीं कृत्वा सन्दश्य दशनच्छदम्" भा०आ०१६३अ०। ४रावणपुत्रे राक्षसभेदे पु०

त्रिशिखिदला स्त्री त्रिसृः शिखाः सन्त्यत्र इनि तादृशं दलमस्य। मालाकन्दे राजनि०।

त्रिशिरस् पु०त्रीणि शिरांस्यस्य। १कुबेरे हेमच०। २रावणपुत्रभेदे ३खरसेनापतिभेदे च। त्रिशिरस्के ४ज्वरे च। "त्रिशिरस्को प्रसक्तोऽहं व्येतु ते मज्ज्वराद्भयम्" भाग०१० अ० वाग्यु०। अस्य अदन्तत्वमपि "सर्वे सान्ता अदन्ताः स्युः" इत्युक्तेः "खरत्रिशिरदूषणसख्यबन्धून्" भाग०९। १०।१० "ज्वरस्त्रिपादस्त्रिशिराः षड्भुजो नवलोचनः" हरिवं० १८१ अ०। त्रयो वेदाः शिरांसीव यस्य। ५जैवे रथे पु०। "सवन्धुरस्तस्य रथस्त्रिचक्रस्त्रिवृच्छिरास्त्रिशिराश्च त्रिनाभिः" भा० आनु० १९८ अ०। नील-

कण्ठस्तु "ऊर्ध्वाङ्गिरावतरत्वक्षिनाभिः" इति पठित्वा "चतुरश्रः कालाग्नेरेरेखाखर्वकलायत्वारोऽश्रा अ-ग्नेति"व्याचख्यौ। "अतीव हि त्रिशिरसं मखक्षिन्द्यात् क्रतत्वरः" कामन्दकी। त्रिशीर्षकादयोऽप्यत्र। तच्च त्रिशूले न० हेमच०।

**त्रिशुच्** पु०त्रिसृः शुचो दीप्तयः शोका वाऽस्य। स्वर्गान्तरिक्ष-पृथिवीस्थदीप्तित्रययुते घर्मे। "घर्मस्त्रिशुक् विराजति विराजा"यजु०१८।२७।"ताः शुचश्च तत्रैव १८ मन्त्रे उक्ता यथा"या ते घर्म! दिवा शुग्या गायत्र्यां हविर्धाने। सा त आप्यायतां निष्ट्यायतां तस्यै ते स्वाहा। या ते घर्मान्तरिक्षे तस्याः त्रिष्टुभ्याग्नीध्रे सा त आप्यायतामित्यादि या ते घर्म पृथिव्यां तस्या जगत्यां सदस्या। सा त आप्यायताम्"इत्यादि। २आध्यात्मिकादिशोकत्रययुक्ते च।

**त्रिशूल** न० त्रीणि शूलानीव अग्राणि यस्य। स्वनामख्याते अस्त्रभेदे हेमच०। "त्रिशूलं दक्षिणे हस्ते खड्गं चक्रं क्रमादधः" दुर्गाध्यानम् "त्रिशूलडमरुकरं व्याघ्रचर्म्मवसानम्" शिवध्यानम्।

**त्रिशूलखात** न० त्रिशूलेन खातम्। तीर्थभेदे "त्रिशूलखातं तत्रैव तीर्थमासाद्य भारत!। ततोऽभिषेकं कुर्वीत पितृदेवार्च्चने रतः। गाणपत्यञ्च लभते देहं त्यक्त्वा न संशयः" भा० भ० ८४ अ०।

**त्रिशूलमुद्रा** स्त्री त्रिशूलमाकारत्वेनास्त्रमुद्राः कर्म०। मुद्राभेदे "अङ्गुष्ठेन कनिष्ठान्तु बद्ध्वा शिष्टाङ्गुलीत्रयम्। प्रसारयेच्च त्रिशूलाख्या मुद्रैषा परिकीर्तिता" तन्त्र० तद्विवरणमस्त्रम्

**त्रिशूलिन्** पु०त्रिशूलमस्त्रमस्य इनि। शिवे "त्रिशूलोऽभेद्यखड्गी च दृषकेतुर्भवाबलः" स्कन्दपु० शिवस्तवः। २दुर्गायां स्त्री ङीप्। "त्रिशूलिनीं नमस्यामि महिषासुरघातिनीम्" हरिवं० १६६ अ०।

**त्रिशृङ्ग** पु० त्रीणि शृङ्गाण्यस्य। त्रिकूटपर्वते शब्दरत्ना०। "त्रिशृङ्गः पर्वतश्चैव कुमारो च सरिद्वरा" हरिवं०२३७ अ०।२त्रिकोणे। "कुरङ्गेण हीनस्त्रिशृङ्गस्तदलः" सारसमुच्चयः। [ मत्स्ये शब्दार्थकल्पतरुः।

**त्रिशृङ्गिन्** पु०त्रीणि शृङ्गाणि सन्त्यस्य इनि। रोहित-

**त्रिशोक** पु० त्रयः आध्यात्मिकाद्याः शोका अस्य। १जीवे २कण्वपुत्रे ऋषिभेदे च। "अतु त्रिशोकः शतमावृणन्मृगान्" ऋ०१०।२९।२। त्रिशोको नामर्षिः" भा०। "याभिस्त्रिशोक उशिजा" ऋ० १।११२।१२ "कण्वपुत्रस्त्रिशोक ऋषिः" भा०।

**त्रिषंयुक्त** त्रि० त्रिभिर्हविर्भिः संयुक्तं वेति छन्दसीति यातुडत्तौ "पूर्वपदात्"पा० वा षत्वम्। त्रिभिर्हविर्भिः संयुक्ते इष्टिभेदे। "ऐन्द्राग्नमेकादशकपालं चरुं, वैष्णवं त्रिकपालं वा पुरोडाशं चरुं वा तेन त्रिषंयुक्तेन यजते" श्रुत० ब्रा० ५।२।५।१। "त्रिषंयुक्तेषु" कात्या० श्रौ०१५। २।१। "त्रिभिर्हविर्भिः संयुक्तं कर्म त्रिषंयुक्तम्" संय० व्याख्या। २त्रिभिः संयुतमात्रे त्रि०। "दक्षिणेऽग्नौ पावयन्ति पवित्राभिस्त्रिषंयुक्ताभिः" श्रुत० ब्रा० १२।६। २२।१२१। लोके तु न षत्वम्।

**त्रिषंवत्सर** न० त्रयः संवत्सराः साधनकाला अस्य वेदे वा षत्वम्। त्रिवर्षसाध्ये सत्रभेदे। "त्रिषंवत्सरं षष्टिदीक्षम्" कात्या० श्रौ० २५।५३।१२ "त्रिषंवत्सरं सत्रं तच्च षष्टिदीक्षं भवति" सं० व्या०त्रिगुणितः संवत्सरः। २त्रिवर्षे च। "महातापचितं त्रिषंवत्सरोपसत्कम्" कात्या० श्रौ० २५।५।६। "त्रयः संवत्सरा उपसदो यत्र" कर्कः। लोके तु न षत्वम्। ३त्रिवर्षसाध्ये वस्तुनि त्रि०।

**त्रिषन्धि** त्रि०त्रयः सन्धयोऽस्य वेदे वा षत्वम्। त्रिसन्धियुक्ते "चातुर्मास्यानि त्रिषन्धीनि द्विसमस्तानि तस्मादिमानि पुरुषस्याङ्गानि त्रिषन्धीनि द्विसमस्तानि" श्रुत०ब्रा० ११।५। २।७। "त्रयः सन्धयोऽन्नरात्रकालाश्चत्वारश्चत्वारो मासा येषां तानि त्रिसन्धीनि द्विसमस्तानि सुनासीरीयमैन्द्रमेव योः फाल्गुनस्य शुक्लचतुर्दश्यां पौर्णमास्यां वा पौर्णमास्यैकाष्टकयोर्व्यवहितानुष्ठानात् द्वाभ्यां पर्वभ्यां समस्तानि संश्लिष्टानि पादतलादधस्तनोपरितनसन्ध्योरुभयोः प्रत्यासन्नत्वाद्द्विसमस्तत्वम्" भा०। [ पाठान्तरम्।

**त्रि(ष)षम** त्रि० त्रुटे त्रिषष्टुः सायुषेत्यत्र तथा,त्रुषमेति च

**त्रिषवण** न०स्रूयते सोमोऽत्र सु-आधारे ल्युट् "पूर्वपदात्"पा० वा षत्वम्। त्रिकाले प्रातर्मध्याह्नसायाह्नरूपे काले "उपस्पृशंस्त्रिषवणं पितॄन् देवांश्च तर्पयेत्। दान्तस्त्रिषवणस्नायी निष्टप्तश्च प्रतिग्रहात्" "कुर्य्यात् त्रिषवणस्नायी कृच्छ्रं चान्द्रायणं तथा"यात्त०। अत्वाभावे लोके च त्रिसवनमप्यत्र

**त्रिषष्टि** स्त्री बहुत्वेऽपि एकवचनान्ताधिका षष्टिः शा०त०। [त्र्यधिकषष्टिसंख्यायां २तत्संख्येये च। "चतुःषष्टिस्त्रिषष्टिर्वर्षाः सम्भवतो मताः"शिचा। पक्षे त्रय आदेशे त्रयःषष्टिरप्यत्र। त्रयश्च षष्टिश्चेति विग्रहेऽपि तदर्थे। "संख्याः" पा० त० पक्षे पूर्वपदप्रकृतिस्वर इति भेदः। इयांस्तु भेदः त्रय आदेशे अन्तोदात्तः। त्रिषष्ट्या युतं शतादि ड। त्रिषष्टि त्रिषष्टियुतशतादौ त्रि०। ततः पूरणे डमट्।

त्रिषष्टितम त्रयःषष्टितम तत्संख्यापूरणे त्रि० । स्त्रियां ङीप् । पूरणे डट् । त्रिषष्ट त्रयःषष्ट त्रिषष्टि पूरणे त्रि० । स्त्रियां ङीप् ।

**त्रिषु(सु)पर्ण** पु० त्रयः सुपर्णाःसुदाचक्षणशब्दा यत्र । १वह्वृचवेदभागभेदे त्रिसौपर्णशब्दे दृश्यं २तद्व्रते च तद्योगात् ३तद्व्रतधारिणि पुरुषे "त्रिषाचिकेतः षड्भाग्निस्त्रिसु(षु)पर्णः षडग्नित्" मनुः । वा कप् । तत्रार्थे "वेदार्थवित् ज्येष्ठसामा त्रिमधुस्त्रिसुपर्णकः" यात्त० ।

**त्रिष्टुभ्** स्त्री त्रिषु स्थानेषु स्तुभ्यते स्तुभ्–क्विप् षत्वम् । एकादशाक्षरपादके वर्णवृत्ते छन्दोभेदे "गायत्र्युष्णिगनुष्टुप् च बृहती पङ्क्तिरेव च । त्रिष्टुप् च जगती चैव" वृ० र० । प्रस्तावे तस्याः २०४८ भेदाः । "एकादशाक्षरा वै त्रिष्टुप् गायत्री चतुष्पात् त्रिष्टुप्" शत०ब्रा० १।३।५।५। "तथैव माध्यन्दिनं सवनमतन्वत" इत्युपक्रमे "एकादशाक्षरा त्रिष्टुभ् तस्मादाहुस्त्रैष्टुभं माध्यन्दिनं सवनमिति" शत०ब्रा० ४।३।२।८ । २तच्छन्दोऽभिमानिदेवतायाञ्च । "इन्द्र एकादशाक्षरेण त्रिष्टुभमसृजयत्" यजु० ८।३० । "इन्द्रो देवः एकादशाक्षरेण छन्दसा त्रिष्टुभं त्रिष्टुप् छन्दोऽभिमानिनीं देवतामसृजयत्" वेददीपः । प्रसङ्गात् छन्दोऽभिमानिदेवताः सर्वानुक्रमणिकायां ४ अ० उक्ताः प्रदर्श्यन्ते । "अथातश्छन्दोदेवता गायत्र्या अग्निरृषिर्ब्रह्मा सविताऽनुष्टुभः सोमोऽबृहत्या बृहस्पतिः, पङ्क्तेर्वरुणस्त्रिष्टुभ इन्द्रो जगत्याविश्वे देवा विराजो मित्रः, सम्राजो वरुणोऽतिच्छन्दसः प्रजापतिर्विच्छन्दसो वायुर्द्विपदायाः पुरुष एकपदाया ब्रह्मा । सर्वा ऋचः आग्नेयः सर्वाणि यजूंषि वायव्यानि सर्वाणि सामानि सौराणि सर्वाणि ब्राह्मणानि च । स्वाहाकारस्याग्निर्वषट्कारस्य विश्वे देवाः । कर्मारम्भे मन्त्राणां देवता वेदितव्याः संन्यस्य मनसि देवतां ततो ऋषिर्ध्यायते देवतामविज्ञाय यो जुहोति देवास्तस्य ऋषिं जुघ्नते । स्वाध्यायमपि योऽधीते मन्त्रदैवतज्ञः सोऽस्मिन् लोके देवैरपीड्यते । तस्माच्च देवता वेद्या मन्त्रे मन्त्रे प्रयत्नतः । मन्त्राणां देवताज्ञानान्मन्त्रार्थमधिगच्छति" । ब्रह्मब्रह्मात्मनः मांसात् तस्या उत्पत्तिः भाग०२।१२।२८ श्लो० उक्ता यथा "तस्योष्णिगासीत्त्वचोमयो गायत्री च त्वचो विभोः । त्रिष्टुप्मांसात् स्नुतोऽनुष्टुब्जगत्यस्थ्नः प्रजापतेः । मज्जातः पङ्क्तिरुत्पन्ना बृहती प्राणतोऽभवत्" ।

**त्रिष्टोम** पु० त्रयः स्तोमा यत्र षत्वम् । चतुष्टयसङ्ख्य उभयतः कर्त्तव्ये यज्ञभेदे । "चतुष्टयैः" कात्या०श्रौ० १५।८। २४ सू० "तस्योभयतः एके त्रिष्टोमज्योतिष्टोमौ" २५ सू० । "एके तं चतुष्टयैस्तुभयतः त्रिष्टोमज्योतिष्टोमौ कुर्वन्ति" सं० व्या० ।

**त्रिष्ठ** पु० त्रिषु चक्रेषु तिष्ठति स्था–क षत्वाभ्वेत्यादिना षत्वम् । चक्रत्रयस्थिते रथे । "त्रिष्ठं वां रथे दुहितरुह्यमम्" ऋ० १।३४।५ । "त्रिष्ठं चक्रत्रयेऽवस्थितं रथम्" भा० ।

**त्रिष्ठिन्** त्रि० त्रिषु विद्यादानयज्ञेषु तिष्ठति स्था–वा० इनि सुधामः० षत्वम् । विद्यादिशीलयुक्ते । "उत् कूलन्निकूलेभ्यस्त्रिष्ठिनम्" यजु० २०।१४० । "त्रिषु विद्यादिषु स्थितं शीलवन्तम्" वेददी० ।

**त्रिस्** अव्य० त्रि+धारे सुच् । त्रिवारे "येन त्रिःसप्तकृत्वो ऋषयश्चत्वारांसस्त्रिष्कपङ्क्ति" प्रबोधच० । "अनेन विधिना चार्द्धं त्रिरवदस्य हि निर्वपेत्" मनुः । "त्रिर्जपेदघमर्षणम्" स्मृतिः ।

**त्रिसन्धि** स्त्री त्रयः सन्धयोऽत्रकाला विकाशेऽस्याः । (फागनिया) १पुष्पभेदे राजनि० । सा त्रिविधा सिताऽसिता रक्ता च । समा०हि० । २पूर्वापरमध्यसन्धौ न० ।

**त्रिसन्ध्य** न० समाहारद्वि० । प्राह्णमध्याह्नरूपे सन्ध्यात्रये । "सान्निध्यं पुष्करे येषां त्रिसन्ध्यं कुरुनन्दन !" भा० व० ८२ अ० । "करैस्त्रिसन्ध्यं त्रिदशैर्दिशे नमः" माघः । "त्रिसन्ध्यव्यापिनी या तु सैव पुण्या सदा तिथिः । न तत्र युग्मादरणमन्यत्र हरिवासरात्" ति०त० पराशरः । कुसुमे (फागनिया) राजनि० ।

**त्रिसन्ध्याकुसुमा** स्त्री त्रिसन्ध्यं कुसुमं यस्याः । त्रिसन्धि-

**त्रिसप्तति** स्त्री एकव०त्रयधिका सप्ततिः या०त०त्रयश्च सप्ततिश्च द्वन्द्वस०वा । त्रयधिकसप्ततिसंख्यायां २तत्संख्येये च पक्षे वा त्रयआदेशे त्रयःसप्तति तत्रार्थे । तत्र त० पूर्वप्रकृतिस्वरः त्रय आदेशे अन्तोदात्त इति भेदः । ततः पूरणे तमप् । त्रिसप्ततितम त्रयःसप्ततितम तत्पूरणे त्रि०स्त्रियां ङीप् । पूरणे डट् । त्रिसप्तत तत्रार्थे त्रि० स्त्रियां ङीप् । "भीमसेनं त्रिसप्तत्या नकुलं सप्तभिः शरैः" भा०म०२३अ० । त्रिसप्तत्या युतं शतादि ड । त्रिसप्तत तद्युते शतादौ त्रि० ।

**त्रिसप्तन्** त्रि० व०व०त्रिगुणिताः सप्त । १एकविंशतिसंख्यायाम् २तत्संख्येये च । "विद्वा चैनं त्रिसप्तभिः भा०म०१३अ० । "त्रिसप्तकृत्वः पृथिवीं योजिगाय भृगूत्तमः" हरिवं०३०४अ० ।

**त्रिसम** न० त्रयः समा यत्र। समहरीतकीनागरगुड़रूपे पदार्थे राजनि०। समा० द्वि०। २वर्षत्रये न०।

**त्रिसर** पु० त्रसर+पृषो०। त्रसरे हेमच०।

**त्रिसरक** न० त्रिवारं सरकम्, त्रयाणां सरकाणां शीधुपानानां समाहारः पात्रा०न ङीप् वा। त्रिवारे मधुपाने "प्रातिभं त्रिसरकेण गतानाम्" माघः।

**त्रिसर्ग** पु० त्रयाणां सत्त्वरजस्तमसां सर्गः। सत्त्वरजस्तमसां सर्गे। "यत्र त्रिसर्गो रूपा" भा० १।१।१।

**त्रिसामन्** पु० त्रीणि सामानि स्तुतिसाधनानि यस्य। १परमेश्वरे। "त्रिसामा सामगः साम त्रिवर्गो भेषजं भिषक्" विष्णुसं०। "त्रीणि वेदव्रतसामाख्यानि तैस्त्रिसामभिः स्तुतस्त्रिसामा" भा० वेदव्रतसामानि च। "अधिपताद् मित्र! पताद् सुरपताद्" इत्येवमादीनि त्रीणि सामानि।२महेन्द्राद्रेः शरण्यां नद्याम् स्त्री टाप् शब्दार्थचि०। "अधिकृत्या त्रिसामा कौशिकी इत्यादि" भाग० ५।१९।१८। भारतवर्षमहानद्याम्।

**त्रिसाहस्र** त्रि० त्रीणि सहस्राणि परिमाणमस्य अण् उत्तरपदवृद्धिः। त्रिभिः सहस्रैः १परिमिते। स्त्रियां ङीप्। "त्रिसाहस्रोत्तमा" कात्या० स्त्री० १७।७२१। "उत्तमा चितिः त्रिसाहस्री लोकस्मृद्धानां भवति" कर्कः।

**त्रिसिता** स्त्री त्रिगुणिता सिता या० त०। त्रिशर्कराशब्दार्थे राजनि०। [सीतया क्रष्टक्षेत्रे अमरः।

**त्रिसीत्य** न० त्रिवारं सीतया समितम् यत्। त्रिःकृत्वः

**त्रिसुगन्धि** न० त्रयाणां सुगन्धिद्रव्याणां समाहारः। "त्वगेलापत्रकैस्तुल्यैस्त्रिसुगन्धि त्रिजातकम्" इत्युक्ते तुल्यभागे एलादित्रिके राजनि०। "पिवेद्रसं पुष्पफलोद्भवं वा सितामधूकत्रिसुगन्धियुक्तम्" सुश्रुतः।

**त्रिसुवर्चक** पु० आङ्गिरसे च्यवनरूपे वह्नौ "अग्निराङ्गिरसश्चैव च्यवनस्त्रिसुवर्चकः" भा० व० २१६ अ०।

**त्रिसौपर्ण** न०त्रिः सुपर्णेन ऋषिणा कृतमण् इत्तौ त्रिशब्दस्य सुजर्थता उत्तरपदवृद्धिः। सुपर्णर्षिणा चरिते व्रतभेदे।

"सुपर्णो नाम तस्यर्षिः प्राप्तवान् पुरुषोत्तमात्। तपसा वै सुतप्तेन दमेन नियमेन च। त्रिः परिक्रान्तवानेतत् सुपर्णो धर्मसत्तमम्। यस्मात्तस्माद्व्रतं ह्येतत् त्रिसौपर्णमिहोच्यते। ऋग्वेदपाठपठितं व्रतमेतद्धि दुष्करम्। सुपर्णोक्ताध्यधिगतो धर्म एष सनातनः। वायुना द्विपदां श्रेष्ठः कथितो जलदायुषा। वायोः सकाशात् प्राप्तश्च ऋषिभिर्विबुधाग्निभिः। ततो मरुदधिश्चैव प्राप्तवान् धर्मसत्तमम्। ऋतदधे ततो भूयो नारायणसमाहितः" भा० शा० ३५० अ०। सुपर्णा एव स्वार्थे अण् त्रयः सौपर्णा यत्र। ऋग्वेदे १० । ११४ । ३ । ४। ५। मन्त्रत्रिके। ते च मन्त्राः "चतुष्पदीं युवतिः सुपेशा घृतप्रतीका वयुनानि वस्ते। तस्यां सुपर्णा द्रप्सा निषेदतुर्यत्र देवा दधिरे भागधेयम्"। २ "एकः सुपर्णः स समुद्रमाविवेश स इदं विश्वं भुवनं वि चष्टे। तं पाकेन मनसा पश्यमन्तितस्तं माता ह्वि स उ रेह्वि मातरम्"।३ "सुपर्णं विप्राः कवयो वचोभिरेकं सन्तं बहुधा कल्पयन्ति। छन्दांसि च दधतो अध्वरेषु यज्ञान्त सोमस्य मिमते ह्वादश"।५ सुपर्णपदघटिते मन्त्रे विदितं अण् उत्तरपदवृद्धिः।२परमेश्वरनामभेदे "त्रिसौपर्णं तथा ब्रह्म यजुषां शतरुद्रियम्" भा०शा०२८६अ०। "त्रिसौपर्णं विदितं नाम त्रिसौपर्णमिति तदर्थः" श्रीधरः। त्रिसौपर्णेति पाठः लिपिकरप्रमादात्।

**त्रिस्कन्ध** न० त्रयः स्कन्धा इवावयवा यस्य। ज्योतिःशास्त्रे ह० स० १ अ० तस्य स्कन्धत्रयमुक्तं यथा

"ज्योतिःशास्त्रमनेकभेदविषयं स्कन्धत्रयाधिष्ठितम् तत्कार्त्स्न्योपनयस्य नाम मुनिभिः सङ्कीर्त्यते संक्षिता। स्कन्धेऽस्मिन् गणितेन या ग्रहगतिस्तन्त्राभिधानस्त्वसौ होराऽन्योऽङ्गविनिश्चयश्च कथितः स्कन्धस्तृतीयोऽपरः"। तेन तन्त्रहोराङ्गनिर्णयाख्यास्तस्य त्रयः स्कन्धाः।

**त्रिस्तन** न० त्रयः स्तना दोहायत्र। क्रतुसाध्ये यज्ञे प्रथमायासुपसदि दोह्यत्रिस्तनरूपे १व्रतभेदे "त्रिस्तनं प्रथमायां दोहयति" कात्या० श्रौ० ८।२।१ त्रयःस्तना यस्या ङीप्। स्तनत्रययुक्ते २राक्षसीभेदे स्त्री "त्रिस्तनीमेकपादाञ्च त्रिजटामेकलोचनाम्" भा० व० २७६ अ०।

**त्रिस्रावा** स्त्री त्रिगुणिता तावती वेदिः। "द्विस्रावा त्रिस्रावा वेदिः" पा० अच् समा० टिलोपः समासश्च निपात्यते। प्रकृतौ यावती वेदिः ततस्त्रिगुणेऽस्मेधाङ्गे वेदिभेदे। वेदिभिन्ने तु त्रिस्रावती रज्जुः" इत्येव सि० कौ०।

**त्रिस्थली** स्त्री त्रयाणां गयाकाशीप्रयागरूपस्थलानां समाहारद्वि०। काशीगयाप्रयागरूपस्थलत्रिके। तदधिकृत्यैव त्रिस्थलीसेतुनामा ग्रन्थः अनन्तभट्टेन कृतः।

**त्रिस्थान** त्रि० त्रीणि स्थानान्यस्य। १स्वर्गमर्त्यपातालस्थे परमेश्वरे २जात्यादावस्थात्रयवाचिनि जीवे च।

त्रिस्रोतस् स्त्री त्रिषु लोकेषु स्रोतो यस्याः। गङ्गायाम् "त्रिस्रोतसः कान्तिमतीव तस्थौ" कुमा०। "ऋताभिषेकैर्दिव्यायां त्रिस्रोतसि च सप्तभिः" रघुः।

त्रिस्रोतसी स्त्री त्रीणि स्रोतांसि सन्त्यस्याम् अच् गौरा० ङीष्। स्रोतस्त्रययुक्ते नदीभेदे "तथा समुद्गाश्चत्वारः। नदी भागीरथी च सा" इत्युपक्रमे "लघ्वी गोमती चैव सन्ध्या त्रिस्रोतसी तथा" भा० स० ६अ०। वरुणसभास्थतीर्थभूतनद्यादिकथने।

त्रिस्पृशा स्त्री त्रीणि चान्द्रदिनानि एकस्मिन् सावने दिने स्पृशति स्पृश–क। एकादशीभेदे "यदा पूर्वदिने दशमी परदिने चैकादशी स्वल्पा ततो द्वादशी रात्रिशेषे त्रयोदशी सा चैकादशी त्रिस्पृशा" स्मृ० "एकादशी द्वादशी च रात्रिशेषे त्रयोदशी। तत्र क्रतुशतं पुण्यं त्रयोदश्यान्तु पारयेत्" एका० त० धृत वचनम्। "एकादशी द्वादशी च रात्रिशेषे त्रयोदशी। त्रिस्पृशा नाम सा प्रोक्ता ब्रह्महत्यां व्यपोहति" संवर्त्तवचनम्। चतसृ महाद्वादशीषु वासरत्रयस्पर्शिन्यां २द्वादश्याञ्च द्वादशीशब्दे दृश्यम्।

त्रिस्नान न० त्रिषु कालेषु स्नानमत्र। त्रिकालस्नानाङ्गे व्रतभेदे। तच्च वानप्रस्थाङ्गं प्रायश्चित्ताङ्गञ्च। तत्राद्यं कामन्दकीनीतिशास्त्रे उक्तं यथा "वनवासः पयोमूलनीवारफलवृत्तिता। प्रतिस्रोतोनिवृत्तिश्च त्रिस्नानं व्रतचारिता। देवातिथीनां पूजा च धर्मोऽयं वनवासिनः" द्वितीयन्तु त्रिषवणशब्दे दर्शितम्। [त्रेते] अमरः

त्रिहल्य न० त्रिः हलेन कृष्टं क्षेत्रम्। त्रिवारं हलेन कृष्टे

त्रिहायण त्रि० त्रयो हायना वयोऽस्य त्यत्वम्। त्रिवर्षे नवादौ "अथ संस्कारं कृत्वा लक्षयित्वा त्रिहायणान्" भा० व० २२१ अ०। स्त्रियान्तु ङीष्। "त्रिहायणी त्रिवर्षा गौः" अमरः। "वत्सतर्यश्च त्रिहायणोऽप्रीताः पञ्चवर्षा राजीवपृष्ठ्यो नवनीतपृष्ठ्योऽरुणाः पिशङ्गाः सारङ्गाः" कात्या० श्रौ० २२।८।१२। २क्षोपदां ब्रह्मवै० "कृते युगे वेदवती त्रेतायां जनकात्मजा। द्वापरे द्रौपदी च्छाया तेन कृष्णा त्रिहायणी" जन्मखण्डम्।

त्रीषु त्रि० त्रय इषवः परिमाणमस्य कन् तस्य लुक्। १इषुत्रयमिते स्थाने। त्रयः इषवो यत्र कप्। २बाणत्रययुक्ते धनुषि न०। "त्रीषुकं धनुर्दक्षिणा" कात्या० श्रौ० २५।४। ३७।यस्यां त्रिइषुच्छायायामिष्टौ त्रिभिरिषुभिरुपेतं धनुर्दक्षिणेत्यर्थः" सं० व्याख्या।

त्रीष्टक पु० त्रिस्तः इष्टका यस्य। अग्निभेदे "स एष त्रीष्टको अग्निः। ऋगेका यजुरेका सामैका तद्यां कां चानचीपदधाति रूपमेव तस्या आयतनमेव यां यजुषा पुरुष एव तस्या आयतनमेव यां साम्ना पुष्करपर्णमेव तस्या आयतनमेवं त्रीष्टकम्" शत० ब्रा० १०।५।२।२१।

त्रुट छेदने वा दिवा० पक्षे तुदा०क्र०पर०सक० सेट्। त्रुट्यति त्रुटति अत्रुत्(त्रो)टीत्। तत्रोट। छेदयति अवयवविधाभाव मात्रम् "यावन्ने दन्ता न त्रुट्यन्ति" हितो० "त्रुटितं पयोधरतटे हारं पुनर्योजय" सा० द०। "त्रुटित इव सङ्ग्रामशिखरः" उत्तर०।

वि+विस्रंसीकरणे सक०। "कण्टकैरेना विस्रंसेयुः" कात्या० श्रौ० २३।३।२२। "विस्रंसेयुः विस्रंसेयुः" स० व्याख्या।

त्रुट छेदने चुरा० आ०सक० सेट्। त्रोटयते अत्रुत्रुटत।

त्रुटि(टी) स्त्री त्रुट–इन् वा ङीष्। १क्षुद्रकालायां २अल्पे ३संशये ४कालभेदे च अमरः स च "योऽक्ष्णोर्निमेषस्य खरामशभागः स तत्परस्तत्कृतभाग उक्ता। त्रुटिर्निमेषैर्दशभिश्च काष्ठा तत्त्रिंशता सद्गणकैः कलोक्ता" सि० शि० उक्तेः तत्परस्य शतभागकालरूपः। "षण्महायात्मकः कालस्त्रुटिरिति" 'भरतः तन्मूल्यं ग्राह्यम्। तदपेक्षया षण्णस्य भाग० अधिककालतोक्तेः तस्यामूर्त्तत्वात् षण्णस्य मूर्त्तत्वाच्च तथा हि "प्राणादिः कथितो मूर्त्तस्त्रुट्याद्योऽमूर्त्तसंज्ञकः" सू०सि०"त्रुटिराद्या यस्य तादृशः कालः एकमाषान्तर्गतत्रुटितत्परादिकोऽमूर्त्तसंज्ञकः व्यवहारायोग्यत्वेनाप्यामूर्त्तत्वम्। भाग० ३।११।५० ६। अन्यथा मानसङ्ख्यं यथा "अणू द्वौ परमाणुः स्यात् त्रसरेणुस्त्रयः स्मृतः। ज्वालार्करश्मिप्रगतः खमेवानुपतन्नगात्। त्रसरेणुत्रयं भुङ्क्ते यः कालः सः त्रुटिः स्मृता। शतभागस्तु वेधः स्यात्तैस्त्रिभिस्तु लवः स्मृतः। निमेषस्त्रिलवो ज्ञेय आम्नातस्ते त्रयः क्षणः"। "मरुतः सप्त पञ्चेन्द्राः कलात्रुटिलवक्षणाः" हरिवं०१६८अ०, "शुक्लस्य कृष्णस्य च कला काष्ठा त्रुटिस्तथा" भा० आ० २५ अ०। "प्राणत्रुटित्रुवयवादिकालस्य चेतृत्वं च वेत्ता" इ०सं०२अ०। २कुमारानुचरमातृभेदे "केशयन्ती त्रुटिनाम क्रोधना तु तडित्प्रभा" भा० श०४७० मातृगणोक्तौ। भावे इन्। ३अवयवादिक्षीणतायाम्।

त्रुटिवीज पु०त्रुटिरल्पं वीजमस्य। कचौ मूलभेदे शब्दमा०।

त्रुटिशस् अव्य० त्रुटि+वीप्सार्थे शस्। त्रुटित्रुटित्यादार्थे। "त्रुटिशोऽवयवाऽपि गण्यते कालनिश्चयः" भा० उ० ११८ अ०।

त्रुन्प(म्प) बधे भ्वा०पर०सक० सेट्। त्रुम्पति अत्रुम्पीत्। ओपधत्वे क्विपि त्रुप् त्रुपौ ओपधत्वे त्रुन् त्रुम्पौ इति भेदः।

त्रुन्फ(म्फ) बधे स्वा० पर० सक० सेट्। त्रुम्फति अत्रुम्फीत्। ओपधत्वे क्विपि त्रुप् त्रुफौ ओपधत्वे त्रुन् त्रुम्फौ इति भेदः। [ ( फौ)त्। तृलोप (फ)

त्रुप(फ) बधे भ्वा० पर० सक० सेट्। तृोप(फ)ति अतोपीत्।

त्रेता स्त्री त्रिसंख्यिता पूर्णो०। दक्षिणाग्निगार्हपत्याहवनीयानां समुदिते १कस्मिन्तरे, सत्ययुगानन्तरवर्त्तिनि युगभेदे, द्यूतक्रीड़ासाधनस्याक्षस्य यस्मिन् पार्श्वे तृयोऽङ्कास्तस्य पार्श्वस्य उत्तानतया २पतने, द्यूतविशेषे वराटकानां मध्ये तृयाणामुत्तानतया ४पतने च "त्रेतया कृतसंज्ञः" इति सूक्तकटिका। अयमब्दे ११४८०६५म् "त्रेतायुगमानञ्च दिव्यमानेन २००० वर्षाः आदौ सन्ध्या २००। अन्ते सन्ध्यांशः २०० मिलिताः २४००। वर्षाः मानुषमानेन २४० गुणिता १२९६००० वर्षाः। यथाह मनुः "चत्वार्याहुः सहस्राणि वर्षाणान्तु कृतं युगम्। तस्य तावच्छती सन्ध्या सन्ध्यांशश्च तथाविधः। इतरेषु ससन्ध्येषु ससन्ध्यांशेषु च त्रिषु। एकापायेन वर्त्तन्ते सहस्राणि शतानि च"। सि० शि० "खखाभ्रदन्तसागरैर्युगाग्नियुग्मभूगुणैः। क्रमेण सूर्य्यवत्सरैः कृतादयोयुगाङ्घ्रयः। खसन्ध्यकातदंशकैर्निजाकोऽभागसञ्मितैः। युताश्च तद्युता युगं रदाब्धयोऽयुताहताः"। खखाभ्रदन्तसागरैः ४३२०००सङ्ख्यैर्भिर्गुणितैस्सङ्गिता वर्षा त्रेतामानं तत्रापि तृतादौ सन्ध्यामानं १०८००० त्रेतामानं १०८०००० वर्षाः। त्रेतान्ते सन्ध्यांशमानम् १०८०००। मिलित्वा १२९६००० वर्षाः त्रेतामानम्। खष्टसङ्ख्यं ब्रह्मवै० प्र० ख० "द्विषट्सङ्ख्यपरिमितं षष्ठावतिसहस्रकम्। त्रेतायुगं परिमितं कालविद्भिः प्रकीर्तितम्"।

"दण्डनीत्यां यदा राजा त्रीनंशाननुवर्त्तते। चतुर्थमंशमुत्सृज्य तदा त्रेता प्रवर्त्तते। अशुभस्य चतुर्थांशक्षीनंशानुवर्त्तते। क्षत्पञ्चैव पृथिवी भवत्योषधयस्तथा"। "राजा कृतयुगस्रष्टा त्रेतायाः द्वापरस्य च। युगस्य च चतुर्थस्य राजा भवति कारणम्। कृतस्य कारणाद्राजा स्वर्गमत्यन्तमश्नुते। त्रेतायाः कारणाद्राजा स्वर्गं नात्यन्तमश्नुते" भा० शा० ६९अ०। तद्यथा च "त्रेतायुगे समायाते धर्मः पादोनतां गतः। अल्पक्लेशान्विता लोकाः केचित्, केचिद्दयान्वयाः। विष्णुध्यानरता लोका यज्ञदानपरायणाः। वर्णाश्रमाचाररताः सुखिनः सुस्थचेतसः। चत्वा भूमिस्पृशः शूद्राः सर्वे ब्राह्मणसेविनः। ब्राह्मणाश्च महात्मानो वेदवेदाङ्गपारगाः। प्रतिग्रहनिवृत्ताश्च सत्यसन्धा जितेन्द्रियाः। तपोव्रतपरा नित्यं दातारो विष्णुसेविनः। कालवर्षी तडित्वांश्च स्त्रियः सर्वाः पतिव्रताः। वसुन्धरा च शस्याढ्या पुत्राश्च पितृसेविनः" इति पाद्मे क्रियायोगसारोक्ताः। "अत्राहाद्या भगवती जीवानां निष्कृतिं यथा। कृते व्यतीते त्रेतायां हृदा धर्मव्यतिक्रमम्। वेदोक्तकर्मभिर्मर्त्या न यक्ष्यन्ति खेष्टसाधने। बहुक्लेशकरं कर्म वैदिकं भूरिसाधनम्। कर्तुं न योग्यमनुजाश्चिन्ताव्याकुलमानसाः। त्यक्तुं कर्तुं न चार्हन्ति सदा कातरचेतसः। वेदार्थयुक्तशास्त्राणि स्मृतिरूपाणि भूतले। तदा त्वं प्रकटीकृत्य तपःस्वाध्यायदुर्बलान्। लोकानतारयः पापात् दुःखशोकभयप्रदात्। त्वां विना कोऽस्ति जीवानां घोरसंसारसागरे। भर्त्ता पाता ससुहृत्तां पितृवत् प्रियकृत् प्रभुः" इति श्रीमहानिर्वाणतन्त्रे जीवोद्धारणहेतवे सदाशिवं प्रति जगन्मातुः वाक्यम्। तस्मिन् युगे पुरुषायुष्कालश्च त्रिशतवर्षो मनुनोक्तो यथा "चतुष्पात् सकलो धर्मः सत्यञ्चैव कृते युगे। नाधर्मेणागमः कश्चिन्मनुष्यान् प्रतिवर्त्तते। इतरेष्वागमाद्धर्मः पादशस्त्ववरोपितः। चौरिकानृतमायाभिर्धर्मश्चापैति पादशः। अरोगाः सर्वसिद्धार्थाश्चतुर्वर्षशतायुषः। कृते त्रेतादिषु ह्येषामायुर्ह्रसति पादशः। वेदोक्तमायुर्मर्त्यानामाशिषश्चैव कर्मणाम्। फलन्त्यनुयुगं लोके प्रभावश्च शरीरिणाम्"।

पुराणान्तरे अयुतवर्षात्मकाल उक्तः अतएव "दशवर्षसहस्राणि रामो राज्यमकारयत्" इत्यादि सङ्गच्छते। तपसा आयुःकालाधिक्यमिति न मन्वुक्तिविरोधः इति तु न्याय्यम्।

"धर्मांघ्रयो हि यत्रैता वर्द्धन्ते तास्तथैव च। तथैव पुत्रपौत्राणां स्वर्गस्त्रेता निगद्यते" भा० आश्व० ९० अ०। अग्नित्रयस्य तृतानामनिरुक्तिर्यथा "त्रिधा प्रणीतो ज्वलनो ह्यनिर्भिर्वेदपारगैः। अतस्त्रेतात्मना-

पन्नो वटेकस्त्रिविधः कृतः" हरिवंशे २१३ अध्याये।

वैताय पु० वेतानामकोऽयः। द्यूतभेदे कृतायशब्दे दृश्यम्।

वैतिनी स्त्री वेता अस्त्यत्र इनि ङीष्। वेतान्निसाध्यक्रियायाम् "कर्त्री यत्ते वैतिनी भूत्" ऋ० १०। १०५।८।

वैधा अव्य० त्रि+प्रकारे धाच्। त्रिप्रकारे "इदं विष्णुर्विचक्रमे वैधा निदधे पदम्" ऋ० १।२२।१७ "एकस्त्रेधा विहितो जातवेदाः" अथ० १८।३।११। "तथ्यं वैधा स्थितात्मने" कुमा०।

वै पालने भ्वा०आ० सक० अनिट्। वायते अवात। वाणः तृतः। "स्वयोरात्मानं वायते" शत० ब्रा० २।२।४।७। "गायन्तं त्रायते यस्मात् गायत्री तेन कीर्तिता" स्मृतिः "दुन्नाम्नो नरकाद्यस्मात् पितरं त्रायते सुतः" मनुः। "भ्रातेयं कुरु सौमित्रे! भयात् त्रायस्व राघवम्" भट्टिः। [ त्रिंशदध्यायपरिमिते ब्राह्मणभेदे।

वैंश न० त्रिंशदध्यायाः परिमाणमस्य ब्राह्मणस्य ड।

वैकङ्कुद न० त्रिककुद् नाम पर्वतः तत्र भवः अण्। सौराङ्गने। "इलस्येत्यञ्जावनक्ति त्रैककुदाङ्गनेनाभावेऽन्यदुद्विर्दत्विणं त्रिस्तरं पराक्सक्तत्सक्तन्यः शरेषीकया सायया" कात्या० श्रौ० ७।२।१४। "अध्वर्युः सायया शरेषीकया शरस्यायशलाकया त्रैककुदाङ्गनेन सौवीराङ्गनेन यजमानस्य अक्ष्णौ चक्षुषी अञ्चिणी पराक् अनाहत्यमनक्ति नेतरयानुतरं तत् दक्षिणं चक्षुर्हिरनक्ति उत्तरं त्रिवारम्। तदाङ्गनमन्यः सकृत् सकृत्पठनीयः। त्रिककुत् पर्वतस्तत्र भवमञ्जनं त्रैककुदं सौवीरमिति यत् प्रसिद्धम्। त्रैककुदाभावेऽन्यत् लोकप्रसिद्धं यत् कज्जलादि। व्याख्यातम्यः "इलस्य कर्मोनिकाशीति त्रैककुदेनाङ्गनेनाङ्क्ते यदि त्रैककुदं नाधिगच्छेदीनैव कनाङ्गनेनाञ्जीतेति" कर्कः। "त्रैककुदं भवति। यत्र वा इन्द्रो इलमहंस्तस्य यदश्रायीत्तं गिरिं त्रिककुदमकरोत्तद्वृत्रत्रैककुदं भवति चक्षुषैवैतच्चक्षुर्दधाति तस्मात्त्रैककुदं भवति यदि त्रैककुदं न विन्देदयत्रैककुदमेव स्यात् समानी स्त्रोवाञ्जनस्य बन्धुता" शत० ब्रा० ३।१।३।१२।

वैकालिक त्रि० त्रिकाले भवः ठञ्। भूतभविष्यद्वर्त्तमानकालवर्त्तिनि "त्रैकालिकमिदं ज्ञानं प्रादुर्भूतं तवेप्सितम्" भा० आ० २४२ अ०। २त्रिसन्ध्याव्यापके च।

वैकाल्य न० त्रिकाल+स्वार्थे ष्यञ्। भूतादिषु त्रिषु कालेषु। "अथालाय काष्ठाय कलाकैकाल्यमेव च" हरिवं० ४१ अ०। "त्रैकाल्यसन्न्याकरणात् तत् सर्वं विप्रणश्यति" याज्ञ०।

वैगर्त्तक त्रि० विगर्तस्य देशभेदस्यादूरदेशादि चतुरर्थ्यां ठक्। विगर्त्तदेशस्यादूरदेशादौ।

वैगुणिक त्रि० त्रिगुणार्थं द्रव्यमेकगुणं प्रयच्छति। "तत् "प्रयच्छति गर्ह्यम्" पा०ठक्। त्रिगुणमादातुमेकगुणद्रव्यप्रयोक्तरि वार्द्धुषिकभेदे।

वैगुण्य न० त्रिगुणानां भावः कर्म वा स्वार्थे ष्यञ् तेन निर्वृत्तं वा। १सत्त्वादिगुणत्रये २तद्भावे ३तत्साध्ये संसारे च "त्रैगुण्यविषया वेदा निस्त्रैगुण्यो भवार्जुन!" गीता। "अविवेकाद्देः सिद्धिस्त्रैगुण्यात्तद्विपर्ययेऽभावात्" "पुरुषबहुत्वं सिद्धं त्रैगुण्यविपर्ययाच्चैव" सा० का०।

वैत पु० त्रीन् वत्सान् तनोति युगपत् तन-बा० ड त्रितो गर्भभेदस्तत्र भवः अण्। युगपच्छब्दाधायकगर्भजाते यमौ। "रूपेणैवावरुद्धे सौमापौष्णं त्रैतमालभेत पशुकामो द्वौ वा अजायेतां तनौ नानैव द्वावभिजायेते जर्जं पुष्टिं तृतीयः" तै० सं० २।१।१।६ "त्रयाणां वत्सानां युगपज्जातानां तः समुदायश्चितः तत्र भवस्त्रैतः तेषामन्यतमः इत्यर्थः। त्रयाणामत्तौ प्रयोजनमेवमुक्तेऽयम् अजाया स्तावदुद्वौ स्तनौ प्रसिद्धौ तौ नानैव पृथगेव पातुं द्वौ वत्सौ जायेते मातृरूपायामजायां वेयमूर्क् पयःसारं या च शरीरगता पुष्टिस्तदुभयं स्थापयितुं तृतीयो वत्स उत्पद्यः द्वावेव हि सर्वत्र जायेते तृतीयस्तु क्वचिदेव तथा सति वत्सौ तृतीयो जातस्तयोः शरीरे वीर्याधिक्यं पुष्ट्याधिक्यञ्चाक्षीति लक्षयितुं शक्यते" भा० अत्र भाष्ये सप्तदेत्यत्रिन् इत्याधारे क्वचि गर्भपरतेति बोध्यम्।

वैतन पु० अल्पनिर्वेशे दासभेदे। "शिरो यदस्य त्रैतनो वितक्षत् स्वयं दासः" ऋ० १।१६८।५। "त्रैतन एतन्नामको दासोऽल्पनिर्वेशः" भा०।

वैदग्धिक न० विदग्धा देवता अस्य ठञ्। दैवे कङ्कुलग्रहणे तीर्थे। "ब्राह्मेण विप्रस्तीर्थेन नित्यकालमुपस्पृशेत्। कायत्रैदग्धिकाभ्यां वा न पित्र्येण कदाचन" मनुः।

वैधस् अव्य० त्रि+प्रकारे धसञ्। त्रिप्रकारे "व्रताग्नौ वा त्रैधं तण्डुलान् विभज्य" कात्या० श्रौ० २५।४।४० "सर्वमेव जटैनैके दैवेनैके वदन्त्युत। पुंसः प्रयत्नजं किञ्चित्त्रैधमत्रिरुच्यते" भा० व० ३२ अ०।

वैधर्म्य न० त्रयाणां वेदानां धर्मान् कौत्राध्वर्यवौद्गात्रान-

र्हति यत्र्। अनादिवेदसम्बन्धिहोत्राध्वर्यवौद्गात्राहें ज्योतिष्टोमादौ कार्य्यकर्म्मणि।

**वैधातवी** स्त्री तदवखानीयाख्ये दृष्टिभेदे "तस्य योनिराश्रय आस। तमनु पराक्षस्य संतृप्याच्छिनत् सैषेष्टिरभवत् तदादेतस्मिन्नाश्रये त्रिधातुरिवैषाविद्याग्नेत तस्माच्चैधातवी नाम" शत० ब्रा० १।५।५।६। "सर्वा दृष्टीरपि दर्विहोमाभ्यो राजसूयेन यजते देवसुतो वा एषेष्टियंच्चैधातवी" ११। "त्रैधातव्युदवसानीयासावेव बन्धुः" शत० ब्रा० १२।६।२।७। "त्रैधातव्युदवसानीया भवति" कात्या० श्रौ० १२।४।८।

**वैधातवीय** न० त्रिधातवी+गहा० छ। दृष्टिभेदाङ्गकर्म्मभेदे "सर्वो वा एष यज्ञो यच्चैधातवीयम्" तैत्ति०सं०२।४।१२।२।

**वैधातुक** त्रि० त्रिभिः धातुभिः स्वर्णरौप्यताम्रैः निर्वृत्तः ठञ्। स्वर्णादिधातुत्रयनिष्पाद्ये।

**वैनिष्किक** त्रि० त्रिभिः निष्कैः क्रीतम् ठक्। त्रिनिष्ककीते। तस्य वा लुक्। त्रिनिष्क इत्यत्र।

**वैपारायणिक** त्रि० त्रिः पारायणमावर्त्तयति ठञ्। त्रिवारं वेदपारायणकारके।

**वैपुर** पु० त्रिपुर+स्वार्थे अण्। १त्रिपुरदेशे ङेषच०। त्रिपुरोऽभिजनोऽस्य तस्य राजा वा अण्। २पित्रादिक्रमेण तद्वासिनि ३त्रिपुराधीशे च बह्वृषु अणो लुक्। "मेखलैस्त्रैपुरैश्चैव चिह्नैश्च समन्वितः" भा० भी० ८८ अ०। आर्षत्वात् बह्वृषु अणो न लुक्। त्रिपुरं पुरत्रयमस्यास्य अण्। त्रिपुरस्वामिषु ४अक्षरभेदेषु त्रिपुरशब्दे दृश्यम्। "येनोद्धृतास्त्रैपुरा मायिनो वै दग्धाघोरेण वितथाग्नाः शरेण" हरिवं० १३१ अ०।

**वैपुरुष** त्रि० त्रीन् पुरुषान् व्याप्नोति अण् आर्षे पूर्वपदवृद्धिः। त्रिपुरुषव्यापके। "ब्राह्मणानिन्दिता राजन्! हन्युस्त्रैपुरुषं कुलम्" भा० आनु० ९० अ०। लोके तु उत्तरपदवृद्धिः त्रिपौरुष इत्येव।

**वैफल** न० त्रिफलानां तदाद्यव्याख्यामिदम् अण्। चक्रदत्तोक्ते घृतभेदे। यथा "त्रिफलां त्रिगुणं द्राक्षां मधुकं कटुरोहिणीम्। पर्पौशकरोकं सप्तपलां त्रिवृद्वृतं नागकेसरम्। नीलोत्पलं शारिवे द्वे चन्दनं रजनीद्वयम्। कार्षिकं पयसा तुल्यं त्रिगुणं त्रिफलारसम्। घृतप्रस्थं पचेदेतत् सर्वनेत्ररुजापहम्। तिमिरं दोषभास्रावं कामलां काचमर्बुदम्। वीसर्पं प्रदरं कण्डूं रक्तं व्रणमेव च। खालित्यं पलितं चैव केशानां पतनन्तथा। विषमज्वरमर्माणि शुक्राण्यपोहति। अन्ये च बहवो रोगा नेत्रजा ये च वर्त्मजाः। तान् सर्वान् नाशयत्याशु भास्करस्तिमिरं यथा। न चैवाक्षात् परं किञ्चिद्दृष्टिभिः काश्यपादिभिः। दृष्टिप्रसादनं दृष्टं यथा स्यात् त्रैफलं घृतम्"।

**वैबलि** पु० ऋषिभेदे "दामोष्णीषस्त्रैबलिश्च पर्णादो वरलालुकः। मौञ्जायनो वायुभक्षः पाराशर्य्यश्च सारिकः" भा० स० ४ अ०।

**वैमातुर** पु० तिसृणां मातृणामपत्यम् अण् मातुरुत्। तिसृणां कौशल्यकैकयीसुमित्राणां स्वेच्छाभोजनत्वेन तदीयांशपायसभोजनेन जनिते लक्ष्मणे "त्रैमातुरः कृतघ्नजितास्त्रशस्त्रः" भट्टिः। "यद्धि सुमित्रया, स्वांशपिण्डद्वयप्रदानात्ताभ्याञ्च जनितः" जयम०। तत्कथा रामायणे दर्शिता यथा "पायसं प्रतिस्कन्धोयाः पुत्रीयं त्विदमात्मनः। कौशल्यायै नरपतिः पायसार्द्धं ददौ तदा। अर्द्धादर्द्धं ददौ चापि सुमित्रायै नराधिपः। कैकेय्यै चावशिष्टार्द्धन्ददौ पुत्रार्थकारणात्। प्रददौ चावशिष्टार्द्धं पायसस्यामृतोपमम्। अनुचिन्त्य सुमित्रायै पुनरेव महामतिः। एवन्तासां ददौ राजा भार्याणां पायसं पृथक्। तासां च पायसं प्राप्य नरेन्द्रस्योत्तमाः स्त्रियः। तस्मानं मेनिरे सर्वाः प्रहर्षोदितचेतसः। ततस्तु ताः प्राप्य तस्मात्तस्मिन्नियो महीपतेरुत्तमपायसं पृथक्। हुताशनादित्यसमानतेजसोऽचिरेण गर्भान् प्रतिपेदिरे तदा" आ० १६ स०।

**वैमासिक** त्रि० त्रिमासं तृतीयमासं भूतः स्वसत्तया प्राप्तः "तमधीष्टो भूतो भावी"पा० ठञ् द्वौ त्रिशब्दस्य पूरणार्थत्वेन संख्यावाचकत्वाभावात् न द्विगुत्वं तेन "द्विगोर्लुगनपत्ये" पा० न लुक्। स्वसत्तया जन्मतस्तृतीयमासव्यापके त्रिमासवयस्के "लोकेन लोकस्करणं यदूलूकिकायास्त्रैमासिकस्य च पदा शकटोऽपहृतः" भाग० २।७।२८। २त्रिमासभवे च।

**वैमास्य** न० त्रिमास+स्वार्थे ष्यञ्। त्रिमासे "अर्द्धमासमासत्रैमास्यषाण्मास्ये चैके" का० श्रौ० २०।३।६।

**वैयम्बक** त्रि० त्रियम्बको देवता अस्य। "त्र्यम्बकदेवताके १पशुभेदे। "पृषन्तस्त्रैयम्बकाः" यजु० २४।१८। "विंशे यूपे त्रियम्बकदेवताकाः पृषन्तः" वेददी०। २होमभेदे पु० "त्रैयम्बकान् यक्ष्यामि" इत्युपक्रमे कात्या० श्रौ० २।१०।१०। "निर्ऋतिं रौद्रानित्यादिना ते होमाः दर्शिताः

रुद्रदेवताके २ धनुर्विद्याभेदे च। "वेदं षड़ङ्गं वेदार्थविद्याञ्च मानवीम्। वैयम्बकमथेज्यास्त्रमस्त्राणि विविधानि च" भा० द्रो० १७ अ०। ४रुद्रदेवताके बल्यादौ त्रि० "निशायां नैऋतं चैत्रैर्नरं वैयम्बकं बलिम्" भा० द्रो० ७६ अ०।

**वैयाघ्रावक** त्रि० व्याघ्रावे देशभेदे भवः भूमा० वुञ्। "न य्वाभ्यां पदान्ताभ्यां पूर्वं ताभ्यामैच्" पा० इञ्निषेधात् ऐच्। व्याघ्रावदेशभवे।

**वैराशिक** त्रि० त्रीन् राशीन् अधिकृत्य प्रवृत्तम् ठञ्। लीलावत्युक्ते राशित्रयाधिकारेण अनुपातरूपे गणितभेदे तत्प्रकारश्च क्रमव्यस्तभेदसहितो लीला० उक्तो यथा "वैराशिके करणसूत्रं दृष्टम्। प्रमाणमिच्छा च समानजातौ आद्यन्तयोस्तः फलमन्यजाति। मध्ये, तद्भाजितमाद्यहृत् स्यादिच्छाफलं व्यस्तविधिर्विलोमे। उदाहरणम्। कुङ्कुमस्य पलं पञ्चदय निष्कसप्तमूल्यैस्त्रिभिर्यदि। प्राप्यते सपदि मे वणिग्वर! ब्रूहि निष्कनवकेन तत्क्षिप्रम्। न्यासः ३/७। ५/२। ९/१। लब्धानि कुङ्कुमपलानि। ५२। कर्मौ। २। अपि च प्रक्षेपकपूरणविपर्ययेण चेद्भवते निष्कचतुष्कयुक्तम्। यतं तदा द्वादशभिः सपादैः पलैः किमाचक्ष्व सखे! विचिन्त्य। न्यासः ६३/१ १०४/१ ४९/४। इच्छागुणितमक्षेपम्। ५०९६/४। छेदभक्तम्। १२७४। लब्धेन। ६२। भूतं लब्धा निष्काः। २०। शेषम्। १४। षोड़शगुणितम्। २२४। लब्धेन भक्तं जातद्रम्माः। २। एवं पञ्चाः। ८। काकिण्यः। २। वराटकाः। ११। भागाश्च १/९। पुनश्च। इच्छाहतेन द्वादशांशा ग्राह्यितव्यं लब्धारिका। लब्धा चेत्पञ्चसप्तया तत्किं सपदि कथ्यताम्। अत्र प्रमाणेच्छयोः सजातीयकरणार्थं इच्छाहतस्य पणीकृतस्य न्यासः ३३/१। ९/८। ७०/१। लब्धे स्वार्थौ। २। द्रोणाः। ७। आढकाः।१। प्रस्थौ। २। इति क्रमवैराशिकम्। अथ व्यस्तं वैराशिकम्। इच्छाहतौ फले छायो छायौ फलेन हृद्विद्य जायते। व्यस्तं वैराशिकं तत्र क्षेयं गणितकोविदैः। यत्र इच्छाहतौ फले छायः छायौ वा फले हृद्विस्तत्र व्यस्तं वैराशिकं स्यात्। तद्यथा। जीवानां वयसोमौल्ये तोल्ये वर्षस्य षेभनि। भागहारे च राशीनां व्यस्तं वैराशिकं भवेत्। जीववयोमूल्ये उदाहरणम्। प्राप्नोति चेत् षोड़शवत्सरा स्त्री द्वात्रिंशतं विंशतिवत्सरा किम्। द्विघ्नैर्हरो निष्कचतुष्कसंज्ञा प्राप्नोति घूःषट्कवत्सरा किम्। न्यासः। १६ ।३२।२०। लब्धं २५/२/५। द्वितीयन्यासः। २। ४। ६। लब्धं १/१/२। वर्षौंशसुवर्णतोल्ये उदाहरणम्। दशवर्षं सुवर्णं चेद्द्यानकमवाप्यते। निष्के च तिथिवर्णन्तु तदा वद कियन्मितम्। न्यासः १०।१। १५। लब्धं २३/२/३। राशिभागहरणे उदाहरणम्। सप्तादकेन मानेन राशौ शस्यस्य मापिते। यदि मानशतं जातं तदा षड्दादकेन किम्। न्यासः ७।१००। ६। लब्धम् १४०।"

"अस्ति वैराशिकं बीजं पाटी च विमला मतिः। किमज्ञातं सुबुद्धीनामतो मन्दार्थसञ्चये" लीला०।

**वैरूप्य** न० विरूपस्य भावः ष्यञ्। विरूपे "चात् यत् तेन वैरूप्यम्" सि० कौ०।

**वैलिङ्ग** न० लीणि सत्त्वरजस्तमांसि पुंस्त्रीक्लीवरूपाणि वा लिङ्गान्यस्य, तस्येदम् वा अण्। त्रिलिङ्गप्रधानकार्य्ये। "पुमांश्चैवाप्युमांश्चैव वैलिङ्गं प्राकृतं स्मृतम्। न पाप्युमात् पुमांश्चैव वैलिङ्गीत्वमिधीयते" भा०मा०३०७अ०।

**वैलोक्य** न० त्रिलोक्येव स्वार्थे ष्यञ्। स्वर्गमर्त्यपातालरूपे लोके। "तपसैव प्रपद्यन्ति वैलोक्यं सचराचरम्" मनुः "वैलोक्ये यानि रत्नानि शाश्वतं भान्ति ते यदि" देवीभा०। "प्रस्तुतिं चक्रमे तस्मिन् वैलोक्यप्रभवोऽपि यत्" रघुः। स्वार्थे तु क्वचित् स्वार्थे अण्। त्रैलोक तत्रार्थे। "तत् प्रेक्ष्य तादृशं रूपं वैलोक्येनापि दुर्जयम्" भा०शा० २८२ अ०।

**वैलोक्यमोहन** न० वैलोक्यं मोहयति मुह्-णिच्-ल्यु। तन्त्रोक्ते तारास्तवभेदे। "तारापूजा श्रुता नाथ! विद्याश्च सकलास्ततः। साम्प्रतं श्रोतुमिच्छामि कवचं मन्त्रविग्रहम्। वैलोक्यमोहनं नाम सर्वापद्विनिवारकम्। पुरैव सूचितं नाथ! कृपया मे प्रकाशय" भैरव उवाच "देवदानवविद्याधृक्पूजिते! प्राणवल्लभे!। वैलोक्यमोहनं नाम कवचं शृणुतां वरम्"। स्तवपक्षस्य दर्शितम्।

**वैलोक्यविजया** स्त्री वैलोक्यं विजयते सेवने स्वाधीनं करोति वि+जि-अच्। भङ्गायाम् (भाङ्) शब्दच०।

**वैवण** त्रि० त्रिवर्णस्य वर्णत्रयस्येदम् शिवा० अण् त्रिवर्णसम्बन्धिनि सोऽस्यास्तीति उत्करा०ञ्। वैवणीय तदुक्ते त्रि०

**वैवणि** स्त्री त्रिवर्णस्य स्त्रैरपत्यम् इञ्। त्रिवर्णस्त्रैरपत्ये। "वैवणेस्तैवणिः" शत० ब्रा० १४।५।५।२१।

**वैवर्गिक** त्रि० त्रिवर्गाय हितं वा० ठञ्। धर्मार्थकाम-

साधने कर्म्मादौ । "संख्यां विज्ञाय संन्यस्य कर्म्म त्रैवर्गिकञ्च यत्" भा०ग० २।४।५। स्त्रियां ङीप्। "विद्वि-स्त्रैवर्गिकी यतः" भाग० १।१४।१५ । त्रिवर्गे प्रभुतः ठञ् ।२त्रिवर्गरते । "त्रैवर्गिकास्ते पुरुषा विमुखा हरि-मेधसः" भाग० २।२२।१४ ।

वैवर्ग्य त्रि० त्रिवर्गे साधुः यत्र् । त्रिवर्गसाधने धनादौ "त्रैवर्ग्यार्थो यतो नित्यं क्षतान्नभयसंयुतः" भाग० ४।२।१२२ ।

वैवर्णिक त्रि० त्रिषु वर्णेषु विहितः ठञ् । १ब्राह्मणादित्रयरूपद्विजातिधर्म्मे । स्वार्थे ठञ् । २द्विजातौ च "त्रैवर्णिकानामराजकेषु राष्ट्रेषु परराष्ट्रपरचक्रागमनाद्विजनिते स्त्रीमङ्गलादौ प्राप्ते" कुल्लू० । "त्रैवर्णिकानामधिकारः" कल्पः ।

वैवर्षिक त्रि० त्रिवर्षे भविष्यति ठञ् । "वर्षाभविष्यति" पा०नोत्तरपदवृद्धिः । त्रिवर्षे भविष्यति वस्तुनि "त्रैवर्षिकं तापचितं तस्य सोम्यं संवत्सरः" आश्व० श्रौ० १२।५। १२ । अभविष्यति तु त्रैवार्षिक इत्येव ।

वैवार्षिक त्रि० त्रिवर्षे भूतो भवति वा ठञ् अभविष्यत्त्वात् उत्तरपदवृद्धिः । १त्रिवर्षभूते २तत्र भवति वा । "यस्य त्रैवार्षिकं भक्तं पर्य्याप्तं भृत्यवृत्तये" मनुः । "त्रैवार्षिकाधिकाद्योयः स तु सोमं पिबेत् द्विजः" याज्ञ० ।

वैविक्रम त्रिविक्रमस्येदम् अण् । १त्रिविक्रमसम्बन्धिनि । "त्रैविक्रमं पादमिवेन्द्रगत्वः" रघुः २त्रिविक्रमावतारे च । "वर्द्धयस्व महाबाहो! पुरा त्रैविक्रमे यथा" हरिवं० ५६ अ० ।

वैविद्य पु० तिस्रो विद्याः समाहृताः ऋग्यजुःसामरूपास्त्रिविद्यं तदधीते वेद वा अण् । १वेदत्रयाभिज्ञे । "त्रैविद्यो हैतुकस्तार्की नैरुक्तो धर्म्मपाठकः । त्रयश्चाश्रमिणः पूर्व्वे परिषत् स्याद्दशावरा" व्यव० त० नारदः । "चत्वारो वेदधर्म्मज्ञाः पर्षद् त्रैविद्यमेव वा" "राजा कृत्वा पुरे स्थानं ब्राह्मणान्यस्य तत्र तु । त्रैविद्यं हैतिकं तत्र वृत्तिकर्म्मप्रयोजयेत् स्वधर्मः पात्र्यतामिति" याज्ञ० । तिसृणां विद्यानां समाहारः त्रिविद्यं स्वार्थे अण् । २तिसृषु विद्यासु । "धर्म्मं भागवतं शुद्धं त्रैविद्यं च गुणाश्रयम्" भाग०६।२।२४ । तत्र तिस्रो नानारूपाः "ऋचो यजूंषि सामानि त्रैविद्यं तेन तिष्ठति" मा०भट्ट० "स्वाध्यायेन व्रतैर्होमैस्त्रैविद्येनेज्यया सुतैः । महायज्ञैश्च यज्ञैश्च ब्राह्मीयं क्रियते तनुः" मनुः "कर्म्मकाण्डं त्रयिर्वृत्तिः पशव्यं विषयिजोविनाम् । गावोऽस्याङ्गं परा हृत्तिरेतत्त्रैविद्यमुच्यते" हरिवं० ७३अ० "त्रयोऽग्नयस्त्रयो वेदास्त्रैविद्यं कौस्तुभो मणिः" हरिवं० १६८ अ० "त्रयो लोकास्त्रयो वेदास्त्रैविद्यं पावकास्त्रयम्" मार्कण्डेयपु० ।

वैवि(पि)ष्टप पु० त्रिविष्टपे वसति अण् । देवे शब्दार्थचि० । "त्रैविष्टपानामपि दूरदर्शनम्" भाग० ११।७ ।

वैविष्टपेय पु० त्रिविष्टपे वसति वा० ढक् । देवे "गन्धर्वसिद्धासुरयक्षचारणत्रैविष्टपेयादिषु नानुविन्दत" भाग० ८।८।१२ ।

वैवृहद्रथ पु० त्रिवृहद्रथस्यापत्यं वा० अण् । राजभेदे "त्रैवृहद्रथो अन्ये दशभिः सहस्रैर्वाजिभिरा त्वा रथयन्तिकेत" ऋ०५। २७।१ ।

वैवेदिक त्रि० त्रिषु वेदेषु तदध्ययनार्थं विहितः ठक् । वेदत्रयाध्ययनार्थे व्रतादौ । "अष्टत्रिंशदाब्दिकं चर्य्यं गुरौ त्रैवेदिकं व्रतम्" मनुः । [ शब्दे दृश्यम् ।

वैश्वकर्व पु० त्रिशङ्कोरपत्यम् अण् । हरिश्चन्द्रे त्रिशङ्कु-शब्दे दृश्यम् ।

वैश्रोक न० त्रिश्रोकेन ऋषिणा दृष्टं साम । "त्रिश्रा पृतना," इत्यादिकायामृचि गेये ब्रह्मसोत्रके सामभेदे ।

वैसानु पु० तुर्वसुवंश्ये गोभानुसुते नृपभेदे "गोभानोस्तु सुतो राजा त्रैसानुरपराजितः । करम्भस्तु त्रैसानोर्मरुत्तस्य चात्मजः" हरिवं०३२ अ० ।

वैस्वर्य्य न० त्रिस्वर+चतुर्व० स्वार्थे ष्यञ् । उदात्तानुदात्तस्वरितरूपस्वरत्रिके । तत्र यत्र यः स्वरः तत्र उदात्तानुदात्तशब्दयोरुक्तं स्वरितशब्दे वक्ष्यते च तस्यापवादः एकश्रुतिशब्दे १४८४पृ० उक्तः ।

वैहायस त्रि० त्रिहायसस्येदम् हायनान्तत्वात् अण् । १त्रिवर्षसम्बन्धिनि । स्त्रियां ङीप् । भावे अण् ।२तद्भावे न० ।

वोडक त्रि० लोढ्यति चु० क्त्रुट-एवुल् । १छेदके । "सम्प्राप्तनवपञ्चाङ्गं दिव्यमानुषसंश्रयम् । लोटकं नाम तत् प्राहुः प्रबन्धं कविदूषकम्" सा० द० उक्ते २दृश्यकाव्यभेदे प्रबन्धं कविदूषकत्वात् प्रहसनोऽत्राङ्गीति बोध्यम् । तत्र सम्प्राप्तं सन्धितरन्ध्रम् । पञ्चाङ्गं विष्कम्भोर्वगो ।

वोटि(टी) स्त्री चु० क्त्रुट-इ वा ङीप् । १कट्फले, २चञ्चुम्, ( पक्षिर ठोट ) ३पक्षिभेदे ४मल्लभेदे च मेदिनि० । [ खने शब्दच० । स्त्रियां जातित्वात् ङीप् ।

वोटिहस्त पुंस्त्री लोटिर्हस्त इव यत्नसाधनं यस्य । वोतल न० १लोढ्यतन्त्रे (तोतला) २स्वल्पलोढ्ये त्रि० ।

वोत्र न० लायतेऽनेन ल-उत्र । भाजने तोदने गवादेः

पेरणसाधने १दण्डभेदे (पाचनी) अमरः। २यज्ञे त्रि० कौ०। ३त्र्यङ्गक्रियायाम् ४व्याधिभेदे च संज्ञिप्रसा०।

त्र्यंक गत्यां चुरा० आ० सक० सेट्। त्र्यंकयते अदित् अतत्र्यंकत।

त्र्यंश पु० त्रयोऽंशाः। १त्रयांशे। "सर्वस्मिन् विषुवापयुक्तत्रयोदशावर्द्धं निशाक्षोर्घटीत्र्यंशं वै कुनवांशकं यद्भवतः पूर्वं दिनानां त्रयम्" सङ्ग्र। २त्रिगुणितेऽंशे च "त्र्यंशं दायाद्य हरेद्विप्रो द्वावंशौ क्षत्रियासुतः" मनुः

त्र्यक्ष पु० त्रीण्यक्षीण्यस्य ब० समा०। त्रिनेत्रे शिवे त्रिका० "त्र्यक्षपत्न्या समादिष्टः सदृशः सज्जनः पतिः" हरिवं० १७६ अ०। २नेत्रत्रययुक्तमात्रे त्रि०। "चेदिराजकुले जातस्त्र्यक्ष एष चतुर्भुजः। रासभारावसदृशं रराव च ननाद च" भा० स० ४२ अ०। स्त्रियां ङीष्। "त्र्यक्षीं त्र्यक्षीं ललाटाक्षीं दीर्घजिह्वामजिह्मिकाम्" भा० व० २८६ अ०। राक्षसीभेदोक्तौ। आर्षे क्वचित् न ष समा०। त्र्यक्षि शिवे। "त्र्यक्षे पुष्पो दलभिदे वामनाय शिवाय च" भा० आश्व० ८ अ० शिवस्तुतौ।

त्र्यक्षर पु० त्रीणि अकारोकारमकाररूपाणि अक्षराणि यत्र। १प्रणवे "आद्यं यत् त्र्यक्षरं ब्रह्म त्रयी यत्र प्रतिष्ठिता। स गुह्योऽन्यस्त्रिवृद्भेदो यज्ञं वेद स वेदवित्" मनुः। त्रीण्यक्षराणि यस्यां यत्र। मध्यानामके २छन्दोभेदे न०। "विष्णुस्त्र्यक्षरेण (छन्दसा) त्रीँल्लोँकानदधात्" यजु० ६।२१। "विष्णुस्त्र्यक्षरेणाक्षरत्रयात्मकेन छन्दसा त्रीन् भूरादीन् लोकान् उदजयत्" वेददी०। त्रिवर्णात्मके तन्त्रोक्ते ३मन्त्रभेदे तन्त्रसारे भूरिप्रयोगः। ४विद्यायां स्त्री गौरा० ङीष्। ५त्रयेणवयवयुक्तमात्रे त्रि०। "तदेतत् त्र्यक्षरं सत्यमिति स एतेनैकमक्षरं त्रीण्येकमक्षरमित्येकमक्षरं प्रथमोत्तमे अक्षरे सत्यं मध्यतोऽनृतं तदेतदनृतं सत्येन परिगृह्णीतं सत्यभूयमेव भवति नैवंविद्वांसमनृतं हिनस्ति" शत० ब्रा० १४।८।४।२। ६खटके त्रिका०। [३ईश्वरे पु० हेमच०।

त्र्याङ्(ङ्ग)ट न०। १शिक्यभेदे २धौतास्त्रभेदे च मेदि०।

त्र्याङ्ग न० त्रीणि अङ्गान्यस्य। त्रीविष्टिकृते कृविधि "मध्यं जुह्वां हेधा कृत्वाऽवद्यत्यधिम त्र्याङ्गेषु" शत० ब्रा० ३।८।३।१८। "त्र्याङ्गस्य दोष्णो गुदं हेधा कृत्वावद्यति त्र्याङ्गायै त्रीणेरव छिरण्यशकलावदधाति" १६। त्र्याङ्गाय हितं यत् त्र्याङ्ग तत्साधनद्रव्ये।

त्र्याङ्गल त्रि० त्रिरङ्गुल्याः प्रमाणमस्य तद्धितार्थद्वि० ढयसच् तस्य लुकि अण् समा०। १त्रयङ्गुलिप्रमिते "त्र्यङ्गुलं त्र्यङ्गुलं वा तद्भोक्तिक्रान्तं यूपस्य" कात्या० श्रौ० ६। २१।३०।२तत्प्रमाणशलाकान्विते च स्त्रियां टाप् सा च सोमयज्ञस्य वेदिः। "तं खनन्त स्वाग्नीध्रं त्र्यङ्गुलेऽन्वविन्दं तस्मात् त्र्यङ्गुला वेदिः स्यात्तु खलु पाङ्क्तस्त्र्यङ्गुलामेव सौम्यस्याध्वरस्य वेदिं चक्रे" शत० ब्रा० १।२।५।६। "पाङ्क्तः सोमयागस्यापि वेदिं त्र्यङ्गुलशलाकामेव मेने" भा०

त्र्याञ्जन न० समा० द्वि०। कालाञ्जनरसाञ्जनपुष्पाञ्जनरूपे मिलिते अञ्जनत्रये राजनि०।

त्र्याञ्जल(लि) न० त्रयाणामञ्जलीनां समाहारः वा टच्स०। १समाहृते अञ्जलित्रये "तिसृभिरञ्जलिभिः क्रीतः तद्धितार्थद्विगौ तु तद्धितलुकि न टच्। तृयञ्जलि इत्यमरः" भेदः सि० कौ०।

त्र्याधिष्ठान पु० त्रीणि मनोवाक्शरीराणि अधिष्ठानान्यस्य तिसृणां जाग्रदादीनामधिष्ठानं वा ब्रह्म०। १जीवे तत्पुरुषपक्षे न० "तस्येह त्रिविधस्यापि तृत्र्याधिष्ठानस्य देहिनः" मनुः जाग्रदाद्यवस्थात्रयसाक्षिणि कूटस्थे २चैतन्ये न०।

त्र्यध्वगा स्त्री तिसृभिरध्वभिर्गच्छति गम–ड्वन्। यङ्गायाम् त्रिका०।

त्र्यनीक पु० त्रीणि उष्णवर्षशीताख्यानि अनीकानि सृष्टा अस्य। संवत्सराभिमानिदेवभेदे "तिग्मानीको द्युमो विश्वरूप उत त्र्यनुधा पुरुध प्रजावान्। त्र्यनीकः पत्यते माहिनावान्त्सरेतोधाद्वृषभः शश्वतीनाम्" ऋ० ३।५६।२। "त्र्यनीकस्त्रिभिरुष्णवर्षशीताख्यैरनीकैर्युक्तश्चैकमेतः" भा०। २कृत्तत्रयरचायुक्ते सैन्यभेदे स्त्री।

त्र्यमृतयोग पु० तृयाणां तिथिवारनक्षत्राणाममृततुल्यो योगः। तिथिनक्षत्रवारभेदानां योगभेदे। स च योगः ज्यो०उक्तो यथा "नन्दा भौमार्कवारे शशिवसुशतभिर्भार्गवेन्द्वग्निमूलासार्पैर्भद्रा बुधेन, श्रवणनिधिभसंयुक्ते फल्गुपुष्यानुराधाभवारुणैः। सौम्यार्के वै जया स्याद्गुरुहरिभेन्द्राश्वियास्वाभिजिद्भिर्जयेति रिक्ता च विश्वादितिवरुणविधाखाहिराधाभवाभिः। सौरे पूषा धनिष्ठाकरकमलजलक्षेत्रयुक्ता यदि स्याद् योगं प्राङ्क्षिप्तपूर्वं सततशुभकरं चामृताख्यं मुनीन्द्राः"।

त्र्यम्बक न० त्रीणि अम्बकानि नयनान्यस्य, तृयाणां लोकानां अम्बकः पितेति वा, त्रीन् वेदान् अम्बते शब्दायते वा अवि–अच् ओष्ठ्योपधः कर्मण्यण् संज्ञायामिति कः। त्रिषु लोकेषु कालेषु वा अम्बः

यज्ञो वेदलक्षणो यस्येति वा, त्र्यम्बनम् त्र्यम्बः यज्ञः। त्र्योऽकारोकारमकाराः त्र्यम्बाः यज्ञाः प्रतिपादकाः वाचका वा अस्येति वा, त्रीणि पृथिव्यन्तरीक्षद्युलोकाख्यानि त्र्यम्बकानि स्थानानि यस्येति वा। १गिरौ अमरः "त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्द्धनम्" यजु०३।६० "जङ्घोक्तस्त्र्यम्बकवीक्षणेन" महेश्वरस्त्र्यम्बक एव नागरः" रघुः। २दुर्गायां स्त्री "सोमसूर्याग्निलक्षित्वात् त्र्यम्बका सा कृता बुधैः" देवीपुरा०।

त्र्यम्बकसख पु० ६त० टच् समा०। कुबेरे अमरः कुबेरयज्ञे तस्य तथात्वम् दृश्यम्। [ख्यादिकं दृश्यम्।

त्र्यरुण पु० त्रिशङ्कपुत्रे राजर्षिभेदे त्रैशङ्कयशब्दे ऋ० वा०

त्र्यरुषि त्रि० त्रीणि अरुषीणि रोचमानानि शुभ्राणि ककुप्पृष्ठपार्श्वस्थानानि यस्य। रोचमानशुभ्रपृष्ठादिवयुक्ते गवादौ। "त्र्यरुषीणां दश गवां सहस्रा" ऋ० ८।४६।२२।

त्र्यर्वि पु० षण्मासात्मकः कालः अर्विः तिस्रोऽर्वयोऽस्य। अष्टादशमासवयस्के पशौ। "त्र्यर्विर्वयस्तिष्टुप्छन्दः" यजु० १४।१०। त्रीन् लोकान् अर्वति अव-रक्षणादिषु इन्। वेददी०। "तस्यो त्र्यर्वि रेरिहाणा" ऋ०१।१५५।१४। "त्र्यर्वि सार्द्धसंवत्सरवयस्को वत्सस्त्र्यर्विरुच्यते तत् प्रमाणमादित्यम् त्रीन् लोकानर्वति व्याप्नोतीति वा" भा० उक्तेः २त्रैलोक्यव्यापके च।

त्र्यह न० समा०हि०पात्वा०। १वर्षत्रये "त्र्यहं चरेद्व्रतं नियतो जटी ब्रह्मचर्यो व्रतम्" मनुः। त्र्योऽहादावयोमानं यस्य तद्धितार्थद्विगुः आर्हीयष्ठञ् अध्यर्धेत्यादि पा० तस्य लुक्। २त्रिवर्षवयस्के त्रि०।

त्र्यशीति स्त्री त्र्यधिकाऽशीतिः शाक० त० त्र्यश्च अशीतिश्च समा० इ० वा। (तिरासी) १त्र्यधिकाशीतिसंख्यायां २तत्संख्येये च। ततः पूरणे डट्। त्र्यशीत तत्पूरणे त्रि०। स्त्रियां ङीप् तमप्। त्र्यशीतितम तत्पूरणे त्रि०। त्र्यशीत्या युतं शतादि ड। त्र्यशीत तद्युतशतादौ।

त्र्यष्टक न० स्तुतोक्ते अजनिजेषणस्थानभेदे। पञ्च निजेषणानि भवन्ति। तद्यथा फलकं त्र्यष्टकं सङ्ग्रवश्च उदकभङ्क्तिका शिक्याश्चेति श्रुतेः।

त्र्यष्टन् त्रि० त्रिगुणिताः अष्ट। १चतुर्विंशतिसंख्यायां २तत्संख्येये च। "त्र्यष्टवर्षोऽष्टवर्षां धर्म्मे सीदति सत्वरः" मनुः।

त्र्यस्र न० तिस्रः अस्रयः कोणा यस्य अच् समा०। १त्रिकोणे राजनि०। "प्रथमत्र्यस्रे द्वितीयत्र्यस्रे इत्यादि" काशीपूजापद्धतिः।

त्र्यह पु० त्र्याणामङ्गां समाहारः टच् समाहारद्विगुत्वात् नाञ्जादेशः। "अञ्जाहाः पुंसि" पा०पुंस्त्वम्। दिनत्रये। उत्तरपदद्विगौ तु अञ्जादेशः त्र्यञ्जप्रिय इत्यादि। "त्र्यहं न कीर्त्तयेत् ब्रह्म राज्ञो राहोश्च सूतके" "त्र्यहं प्रातस्त्र्यहं सायं त्र्यहमद्यादयाचितम्। त्र्यहं परञ्च नाश्नीयात् प्राजापत्यं चरन् द्विजः" मनुः।

त्र्यहस्पृश पु० त्र्यहं चान्द्रदिनत्रयं स्पृशति स्पृश-क्विप्। १तिथित्रयसम्बन्धिन्येकसावनदिने त्र्यहस्पर्शिनि २दिनत्रये च

त्र्यहस्पृश पु० "एकं दिनं यत्तिथित्रयं च स्पृशेत्तमाहुस्त्र्यहस्पृशमाख्यम्। एका तिथिस्त्रीणि दिनानि यत् स्पृशेत्तदाहुस्त्रिदिनस्पृशन्तु" इत्युक्ते सावनदिनत्रयसम्बन्धिनि एकस्मिन् तिथौ "त्र्यहस्पृशं नाम यदेतदुक्तं तत् प्रयत्नः कृतिभिर्विवेद्यः। विवाहयात्राशुभपुष्टिकर्मसर्वं न कार्य्यं त्रिदिनस्पृशे तु" ज्यो० त०। क्विप्। त्र्यहस्पृश् स्त्रियां ङीत्वात् ऋचि पदान्ते च कुः। तत्रार्घे "तिथिवारर्क्षयोगे चैका त्र्यहस्पृक् सप्तदाहृता"। "एकादशी द्वादशी च रात्रियोगे त्रयोदशी। त्र्यहस्पृक् तदहो रात्रसुपोष्या सा यदा तिथिः" स्मृतिः। [क्रतुभेदे।

त्र्यहीन पु० त्रिभिरहोभिः निर्वृत्तः ख। त्रिदिननिष्पाद्ये

त्र्यहैहिक त्रि० इहा चेष्टा तस्यां भवं ठञ् ऐहिकम् धनादि-त्र्यहपर्य्याप्तमैहिकं धनं यस्य। दिनत्रयनिर्वाहोचितधनशालिनि। "त्र्यहैहिको वापि भवेदृक्थिक एव वा" मनुः।

त्र्याचायण पु० त्र्यचस्य युवाऽपत्यम् फञ् ऐञ्कारिगणे "द्व्याचायण त्र्याचायणेति निर्देशात्" न यञ्भ्यां पदान्ताभ्यां पूर्वौ ताभ्यामैच्" पा०सूत्रोक्तं कार्य्यं न। त्र्यचस्य शिशुपालहरादेर्युन्यपत्ये। तस्य विषयो देशः ऐषुका० भक्तञ्। त्र्याचायणभक्त तदीये विषये।

त्र्यायुष न०त्रयाणां बाल्ययौवनस्थाविराणामायुषां समाहारः वेदे अच् समा०। बाल्याद्यायुस्त्रये। "त्र्यायुषं जमदग्नेः कश्यपस्य त्र्यायुषम्" यजु० ३।६२।

त्र्यार्षेय पु० त्रयः आर्षेयाः ऋषयः यत्र। त्रिप्रवरे १गोत्रभेदे आर्षेयशब्दे दृश्यम्। ऋषेरयम् ढक् आर्षेयः ऋषिधर्मः त्रयः आर्षेया धर्माविषाम्। २ऋग्वेदविहरमूलेषु तेषान्तु यद्यप्यृषिधर्मवत्त्वं तथा समन्वितं तत्त्वबोधिन्याम् यद्यप्येतत्त्रायमूलक एव तिर्यक्कपञ्चलार्षेयदेवतानां यागेषु नाधिकार इति प्रवादः। त्र्यार्षेयाख्य ऋषि-

धर्मा अन्धत्वबधिरत्वमूकत्वानि वेषां ते कर्मणां हि परद्रव्यदर्शनेन तत्र रागोत्पत्तिसम्भावनया चक्षुर्निमीलनेनान्धत्वं, परनिन्दाश्रवणशङ्कया श्रोत्रनियन्त्रणेन बधिरत्वं मिथ्याकथनशङ्कया वाक्संयमनान्मूकत्वम्" । अन्धादीनां कर्मानधिकारे हेतव "मनुष्याणां वा आरम्भसामर्थ्यात्"४ "अङ्गहीनाश्रोत्रियषण्ढशूद्रवर्जम्" काल्या० श्रौ० १।१।५। सूत्राभ्यां निरूपितः अत्र कर्तव्याख्या "अङ्गहीनाश्रोत्रियषण्ढशूद्रान् वर्जयित्वा मनुष्याणामधिकारः कर्मसु भवति । मनुष्या अपि ये अङ्गहीना अङ्गेन चक्षुरादिना हीना अन्धपङ्गुमूकबधिरादयः अश्रोत्रिया अनधीतवेदाः षण्ढा नपुंसकाः शूद्राश्च नैतेषामधिकार इत्यर्थः । आरम्भसामर्थ्यादित्यत्राप्यनुवर्तते न चैतेऽङ्गहीनादयो यथाश्रुतं कर्मारब्धुं कर्तुं शक्नुवन्ति तद्यथा न ह्यन्ध आज्यावेक्षणं कर्तुं शक्नोति मूकश्च मन्त्रोच्चारणम्, पङ्गुश्च विष्णुक्रमम् । बधिरश्च प्रैषश्रवणम् अनधीतवेदोऽश्रोत्रिय इत्युच्यते स च किमपि मन्त्रसाध्यं कर्तुं न शक्नोति षण्ढो नपुंसकः तस्मादनधीतवेदत्वादद्रव्यत्वादशुचित्वाच्च नाधिकारः शूद्रस्य चानधीतवेदत्वादनधिकारः। आज्यावेक्षणाभिघ विना कर्मणो वैगुण्यं भवत्येव । ननूक्तम् अयक्ष्याङ्गरहितकर्मानुष्ठानादधिकारो भविष्यतीति। अत्रोच्यते । भवेदेवं यदि आज्यमवेक्षत इत्यादीन्यङ्गवाक्यानि स्नातव्येष पुरुषैः सम्बध्येरन् प्रधानवाक्यशेषत्वात्तेषाम् । तदङ्गयुक्तेन प्रधानवाक्येन तदङ्गयुक्तः कृतः पुरुषैः सम्बध्यमानोऽसमर्थान् परित्यज्य समर्थान् प्रतिपद्यते तेनान्यस्य कृतरेवाविहितो न त्वाज्यावेक्षणमेवाविहितमितरच्च विहितमिति मन्तव्यम् । न च प्रधानवाक्यविरोधः सर्वाधिकारानिषयात् विशेषभावाद्धि सर्वाधिकारः स्यात् अस्ति च विशेषः आरम्भसामर्थ्यम् अतः समर्थानामेवाधिकारः । यत्र तु प्रधानवाक्यविरोधो यावज्जीवं यजेतेत्यादौ तत्र यथाशक्तिप्रयोगादपि फलं भवति तदविरोधे तु सर्वाङ्गयुक्तकर्मानुष्ठानादेव फलम् । ननु आरम्भसामर्थ्यादित्यनेनैव सर्वादीनामिवान्धादीनामप्यधिकाराभावसिद्धेः किमर्थं पुनरङ्गहीनादिवर्जमित्युक्तम् उच्यते नियमार्थम् एतेषामेवानधिकारो न निर्धनस्य तस्य चाधिकारो भवत्येव न ह्यारम्भसामर्थ्याभावादनधिकारः अतो निर्धनोऽपि क्रत्वर्थं धनमर्जनादिना सम्पाद्यावश्यं यजेतेति । एवमन्धादिरपि यद्यौषधिप्रयोगादिनान्धत्वादिकं स्फोटयितुं शक्नोति तस्याप्यधिकारो भवत्येव पूर्वमङ्गहीनत्वावस्थायामाहिताग्निश्चेत् पश्चाद्रोगादिनाङ्गवैकल्ये जाते काम्येष्वधिकारो न भवति नित्येषु तु यथाशक्ति कुर्वन्नधिक्रियत एव अङ्गवैकल्ये सति अन्याधेयं न भवत्येव" तीर्थे आर्षेयाणि यस्य । श्रेत्रियोत्पन्ने साधवः । अत्रेदमभिधीयते तत्त्वबोधिन्याम् तत्रार्षेयशब्दस्यान्धादिपरत्वकल्पनं सूत्रभाष्यविरुद्धम् । तथाहि "अङ्गहीनश्च तद्धर्मा ६।१।४१। जै० सू०। "अग्निहोत्रादिषु एवाङ्गहीनं प्रति सन्देहः किम् असावधिक्रियते, उत न इति। तत्राप्यधिकरणातिदेशः । असमर्थः इति ज्ञात्वा पूर्वः पक्षः शक्तेर्विद्यमानत्वात् उत्तरः । तदिदम् अभिधीयते अङ्गहीनश्च तद्धर्मा । किंधर्मा अदृष्टधर्मा" शब० भा० । "उत्पत्तौ नित्यसंयोगात्" जै०६।१।४२ "यस्य तु अप्रतिसमाधेयमङ्गवैकल्यं तं प्रति विचारः किं अधिक्रियते न, इति पूर्वाधिकरणेन अधिक्रियते इति प्राप्ते ब्रूमः न अधिक्रियते इति। कुतः ? शक्त्यभावात् न ह्यसौ केनचित् अपि प्रकारेण शक्नोति यष्टुम्, तस्मात् तस्य अधिकारो न गम्यते । ननु यत् शक्नोति तत्र अधिक्रियते इति चक्षुर्विकलो विना आज्यावेक्षणेन, विना विष्णुक्रमैः पङ्गुः, विना प्रैषादिश्रवणेन च बधिरः, एतान् पदार्थान् प्रति चक्षुर्विकलादीनामनधिकारः इति यदि हि तं प्रति निर्दिश्येत ततो विकलोऽप्यधिक्रियते कृतम् प्रति। एषाम् उपदेशः प्रकरणाविशेषात् पुरुषस्य च आख्यातेन अनभिधानात् इति उक्तमेतत् । "विधिर्वा संयोगान्तरात् (२।४।१२) इत्यत्र । तेन विना विगुणं कर्म प्रयुक्तमपि न फलं साधयेत् । तस्मात् तस्य अनधिकारः"भा० । "अत्रार्षेयस्य स न स्यात्"जै०६।१।४२ "दर्शपूर्णमासयोः श्रूयते, "आर्षेयं इष्टीते एकं इष्टीते द्वौ इष्टीते त्रीन् इष्टीते न चतुरो इष्टीते पञ्चाति इष्टीते इति । तत्र सन्देहः किम् अत्रार्षेयस्य अधिकारः उत न इति किं प्राप्तम् । अत्रार्षेयोऽप्यधिक्रियते इति कुतः आर्षेयं इष्टीते इति सामान्यवचनम् तस्मात् एकं परिशिष्यति द्वौ वा तत्र दर्शयति एकं इष्टीते इति तथा प्रतिषेधति न चतुरो इष्टीते इति। न हि अप्राप्तस्य प्रतिषेधोऽवकल्पते । तस्मात् अत्रार्षेयोऽप्यधिक्रियेत ।

एवं प्राप्ते ब्रूमः यो न तत्रार्षेयः स न अधिक्रियते ।

कुतः ? त्रीन् इष्टीते इति विशेषवचनात् विधिश्च अप्राप्तत्वात् । ननु एकं इष्टीते इत्यपि विशेषवचनमस्ति । न इत्युच्यते, विधायिकाया विभक्तेरभावात् । ननु स्तुत्या विधास्यते यथा त्रीन् इष्टीत इति । उच्यते त्रयाणामेव स्तुतिः सा त्रित्वं विधास्यति । एकं इष्टीते इत्यप्युत्सर्गवादोऽयं त्रयाणामेव, तत्रापि त्रित्वमेव श्रूयते विधातुम् । एवम् एकवाक्येन विधानं भविष्यतीति । न चतुरो इष्टीते न पञ्चातिइष्टीते इति नित्यानुवादो भविष्यति । तस्मात् त्रय्यर्थं यस्य अधिकारो नान्यस्य इति" शब०भा० । न्यायमालायां माधवस्तु "अधिगोत्रप्रवर्त्तकः कश्यपभरद्वाजादिस्तस्य सम्बन्ध आर्षेयस्तं इष्टीते उच्चारयति कश्यपगोत्रोऽहं भरद्वाजगोत्रोऽहमिति एवम् उपमन्युवशिष्ठगोत्रोऽहमिति त्रिगोत्रोच्चारणम् । आङ्गिरसवार्हस्पत्यभरद्वाजगोत्रोऽहमिति त्रिगोत्रोच्चारणम्" । एवञ्च स्वत्वभाष्यादिषन्थेषु त्रय्यर्थेयशब्दस्य अन्यार्थपरत्वात् जात्यन्तरेण अनधिकारस्य प्रतिपादनात् त्रय्यर्थेयशब्दस्य न अन्यादिपरत्वमिति सुधीभिर्भाव्यम् ।

**त्रयाशिर्** त्रिः दधितक्रपयोरूपा आशिरः अधिश्रपणसाधनभूता यस्य । अग्नेर्द्यभेदे । "यस्य मा परुषाः शतसङ्ख्यं अन्यु अणः । अश्वमेधस्य दानाः सोमा इव त्रयाशिरः" ऋ०५।२७।५ ।

**त्रयाहण** पुंस्त्री त्रिभिः चतुष्पादैराहन्ति आ+हन–अच् पूर्वपदात् संज्ञायां णत्वम् । विष्किरे पक्षिभेदे । "चकोरकलविङ्कमयूरक्रकरोपचक्रकुक्कुटसारङ्गशतपत्रकतित्तिरिकुररबाङ्कयवलभ्रतयस्त्रयाहणाविष्किरास्तथवः श्रीतमधुराः कषायादोषशमनाश्च" सुश्रुतः ।

**त्रयाहाव** पुं० देशभेदे तत्र भवः वुञ् । तैयाहावक तत्रार्थे

**त्रयाहिक** त्रि० त्रयाहे भवः ठञ् । आर्धत्वात् त्रयाहावयोरिति निर्देशाद्वा द्वाभ्यां पूर्वं न ऐच् । त्रयाहभवे ज्वरादौ । "ऐकाहिको द्व्याहिकश्च तृयाहिकश्चातुर्थिकेत्यादि अपराजितायां औत्रे । त्रयाहपर्य्याप्तं धनं वेत्ति अण् त्रयाहम् तदस्यास्ति ठन् । त्रयाहपर्य्याप्तधनयुक्ते त्रि० । "कुसूलकुम्भीधान्योवा त्रयाहिकोऽश्वस्तनोऽपि वा" याज्ञ० । लोके तु द्व्याभ्यां पूर्वमेवेव तैयाहिक इत्येव त्रयाहभवे वस्तुनि ।

**त्रयुदय** न० त्रिषु सवनेषु उदयो गतिरस्य । सोमाख्ये द्रव्ये । "त्रयुदयं देवहितं यथा वः" ऋ० ४।२७।२ ।

**त्रयुधन्** पुं० त्रिभिः वसन्तशरन्निदाघैर्धनुर्भिरूधोऽस्य अनङ् हुस्वश्च । वसन्तादिरूपोधोयुक्ते वत्सररूपे द्रव्ये । "उत त्रयुधा पुरुध प्रजावान्" ऋ० २।५६।२ ।

**त्रय(त्रा)षण** न० त्रयाणामुषणानां समाहारः पृषो० वा दीर्घः । मिलितशुण्ठीपिप्पलीमरिचत्रिके अमरः भरतस्तु दीर्घमध्यं पपाठ ।

**त्रृच** न० त्रिऋचां समाहारः अच् समा० । ऋक्त्रये । "उदितृग्वा वा वारुणघ्रा त्रृचेनाद्दैवतेन वा" "अथ त्रृचं जपेदेतदम्" मनुः । पञ्चे संग्रसारणे ह्रचमप्यत्र ।

**त्रेधी** स्त्री त्रीणि एतान्यस्य त्रि०कौ० त्रिषु स्थानेषु एतः कर्बुरो यस्याः ब०व०माधवः।"वर्णादनुदात्तात्" पा० ङीष् तस्य नच त्वम् । त्रिषु स्थानेषु कर्बुरायां स्त्रियाम् । "तत्त्रेधी शबली भवति क्रोडः क्षुरः सा या त्रेधी शबली सा तथै विद्यायै रूपं क्रोडः क्षुरो ब्रह्मणो रूपमग्निर्हि ब्रह्मणो हित इव ह्यग्निस्तस्मात्क्रोडः क्षुरो भवति" शत० ब्रा० २।६।४।५ । "त्रेधीति त्रिषु स्थानेषु एतः श्वेतः वर्णो यस्याः सा त्रेधी" भा० । "अथास्यै युग्मेन शबलतूलएषेण त्रेधया च शबल्या" आश्वा० गृ० १।१४।४ । त्रीण्येतानि यस्याः सेयं त्रेधी शबली । एतः शुक्ल इत्यर्थः" नारा० ।

**त्व** त्रि० तन–क्विप् अनच वः । ऽभिन्ने अन्यार्थे सर्वनामकार्य्यं सर्वनामगणे त्वत्वसमसिमेति पठित्वा "त्वेति द्वावप्यदन्तौ अन्यपर्य्यायौ एक उदात्तोऽपरोऽनुदात्त इत्येके । एकस्मात् इत्यपरे" सि० कौ० उक्तेः तान्तत्वमपि तत्र क्विपि तुकि रूपमिति विवेकः । "ऋचां त्वः पोषमास्ते पुपुष्वान् गायत्रं त्वो गायति शकरीषु । ब्रह्मा त्वो वदति जातविद्यां यज्ञस्य मात्रां विमिमीत उत त्वः" ऋ० १०।७१।११ त्वशब्दः सर्वनामसु पठितः एकशब्दपर्य्यायः भा०उक्तौ २एकशब्दार्थे माधवः । "प्रजायै त्वस्यै यदशित्व इन्द्र !" ऋ० १०।५४।१ । "त्वस्यै एकस्यै प्रजायै" भा० । "उत त्वः पश्यन्न ददर्श वाचमुत त्वः शृण्वन्न शृणोत्येनाम् । उतो त्वस्मै तन्वं वि सस्रे जायेव पत्य उशती सुवासाः" ऋ० १०।७१।४ "त्वशब्द एकवाची । एकः । उतशब्दोऽप्यर्थे । पश्यन्नपि मनसा पर्य्यालोचयन्नपि वाचं न ददर्श दर्शनफलाभावान्न पश्यति । त्व एकः शृण्वन्नर्थेनां वाचं न शृणोति श्रवणफलाभावात् । इत्यनेनार्थेनाविद्वानभिहितः । तृतीयपादेन विदित-

वेदार्थमाह। त्वक्ता एकक्ता अपि तन्मात्रीयं शरीरं वि सर्क्षे, स्वयं वाग्विविधं गमयति" भा०। अस्या एव ऋचामर्थव्याख्याने ऋग्वेदीयहादे माधवः त्वशब्दस्य अन्याथेतामभिप्रेत्याह, यथा "त्वः अन्यः कश्चिदर्थज्ञानाय व्याकरणाद्यङ्गानि श्रुत्वाऽपि मीमांसाराद्धित्यादेर्नां वेदरूपां वाचं न सम्यक् शृणोति" अत उभयार्थेता "विश्वं सुशस्तिमभिरूपां विराजं पशून्नि त्वे न त्वे पशून्न्येनाम्" ऋ० ८।६।६। सर्वनामत्वात् जसः शोभावः

त्वक्कण्डुर पु०त्वचः कण्डुं राति रा-क। व्रणे क्षारा०।

त्वक्क्षीरा स्त्री त्वचः वंशत्वचः क्षीरमस्यस्याः आकारत्वेन कच्। १वंशरोचनायां। २तत्सार्थे गौरा० ङीष् राजनि०। "मितान्नगन्धा त्वक्क्षीरी विदारी क्षितता समा" सुश्रु०

त्वक्छद पु० त्वगेव छदोऽस्य। क्षीरीवृक्षे (क्षीरकाकुली) प्रसिद्धे वृक्षे रत्नमा०।

त्वक्तरङ्ग पु०त्वचस्तरङ्ग इव। कण्डुपदार्थे पार०निघण्टुः।

त्वक्पञ्चक न० त्वचां पञ्चकम्। "न्यग्रोधोडुम्बराश्वत्थशिरीषप्लक्षपादपाः। पञ्चैते क्षीरिणो वृक्षास्तेषां त्वक्पञ्चकं मतम्" इत्युक्ते न्यग्रोधादिवल्कले। केचित्तु शिरोऽस्थाने वेतसं परे पारिशम् वदन्तीति शेषः "त्वक्पञ्चकं हिमं ग्राहि व्रणशोथविसर्पजित्। विष्टम्भाध्मानजित् तिक्तं कषायं लघु लेखनम्" भावप्र०।

त्वक्पत्र न० त्वगिव पत्रमस्य। १गुडत्वचि (दारुचिनि) २तेजपत्रे च अमरभरतौ। "चन्दनागुरुसल्लानि त्वक्पत्राणां वनानि च" भा० वा०१७०अ०। ३क्षिङ्गुपत्रवृक्षे स्त्री गौरा० ङीष् अमरः।

त्वक्पाक पु० त्वचः पाको यत्र। शूकदोषनिमित्ता दश चाष्टौ च व्याधयो जायन्ते" इत्युपक्रमे "त्वक्पाकः शोणितार्बुदम्" इत्यादिना च तान् विभज्य "पित्तरक्तकृतो ज्ञेयस्त्वक्पाको ज्वरदाहवान्" सुश्रुतोक्ते शूकदोषनिमित्ते व्याधिभेदे।

त्वक्पारुष्य न० त्वचः पारुष्यं कठोरता। त्वचः काठिन्ये "तस्य पूर्वरूपाणि त्वक्पारुष्यमकस्मात् रोमहर्षः" सुश्रुतः।

त्वक्पुष्प न० त्वचः पुष्पमिव। १रोमाञ्चे त्रिका०। २किञ्चासे (जुली) ख्याते क्षेमच०। त्वचि पुष्पं यस्याः गौरा० ङीष्। ३किञ्चासे स्त्री जटा० स्वार्थे क। त्वक्पुष्पिका किञ्चासे त्रिका०।

त्वच तनूकरणे भ्वा०पर०सक० सेट् त्वक्षति अत्वक्षीत्। "त्वष्टा तक्षत्यक्षते इति नैरुक्तास्त्रिष्वेषां स्यात् त्वक्षतेर्वा स्यात्" निरुक्ते ८।१२ उक्तत्वात् तथा धातुरत्नेऽपि गम्यते। "प्रत्वक्षाणो अतिविलो महांसि" ऋ०१०।४४।१। "प्रत्वक्षाणः प्रकर्षेण तनूकुर्वन्" भा०।

त्वक्षस् न० त्वक्षतेऽनेन त्वच-करणे असुन्। बले निघण्टुः। "सप्तविका त्वक्षसा च्यो दिवम्" ऋ० १।१००।१५। "त्वक्षसा बलेन" भा०।

त्वक्षीयस् त्रि०अतिशयेन त्वक्षिता दैर्घ्यसुन् ईयसो लोपः। दीर्घे "महत्वान् त्वक्षीयसा वयसा नाधमानम्" ऋ० २।२३।५। "त्वक्षीयसा दीर्घेण" भा०।

त्वक्सार पु० त्वचि सारोऽस्य। १वंशे अमरः। त्वगेव सारोऽस्य। २गुडत्वचि (दारुचिनि) ख्याते पदार्थे शब्दच०। ३शोणवृक्षे ४रज्जुप्रधानवंशे (तलताबाँश) राजनि०। "त्वक्सारररज्जुपरिपूरणलक्षणीतिः" माघः। "चक्षुष्यात् पाण्डुरोपाकस्त्वक्सारव्यवहारवान्" मनुः। "शिग्रूणां मूलशीरूणां शस्तानामे च बीजतेत्। त्वक्सारादिचतुर्वर्गं क्षेपे भेद्यो च बृंहणम्" सुश्रु०। त्वक्सारः उत्पत्तिस्थानत्वेनास्त्यस्याः अच्। ५वंशरोचनायां स्त्री राजनि०। [ङीष्। क्षुद्रक्षुपे राजनि०।

त्वक्सारभेदिनी स्त्री त्वचः सारं भिनत्ति भिद्-णिनि (नेदु) भेदे भावप्र०। २एलवालुकाख्यगन्धद्रव्ये स्त्री शब्दार्थचि०। [त्वचि शब्दार्थचि०।

त्वक्स्वादी स्त्री त्वचि स्वादौ। (दारुचिनि) ख्याते गुल्मे।

त्वग गतौ भ्वा० सक० पर० सेट् दैदित्। त्वङ्गति अत्वङ्गीत् तत्वङ्ग।

त्वगङ्कुर पु० त्वचः अङ्कुर इव। रोमाञ्चे क्षारा०।

त्वगाक्षीरी स्त्री त्वचः त्वगेव क्षीरं यस्याः गौरा० ङीष्। वंशरोचनायाम् जटा०।

त्वग्गन्ध पु० त्वचि फलत्वचि गन्धोऽस्य। नागरङ्गे राजनि०

त्वग्ज न० त्वचो जायते जन-ड। १रोमणि २रुधिरे च राजनि०।

त्वग्दोष पु० त्वचं दूषयति दुष-णिच्-अण्। कोठरोगे राजनि० "त्वयुं पाण्डुरोगञ्च त्वग्दोषमविपाचिताम्" सुश्रु०। "प्रियः प्रजानामपि स त्वग्दोषेण प्रदूषितः" भा० ७०१४८अ०। ततः अस्यर्थे इनि तदुक्ते त्रि०। "देवापिस्तु महातेजास्त्वग्दोषी राजसत्तमः!" भा०उ० १४८अ०।

त्वग्दोषापहा स्त्री त्वग्दोषमपहन्ति अप+हन-ड। वाकुच्याम् राजनि०।

**त्वग्दोषारि** पु० ६त० । कुष्ठिकन्दे राजनि० त्वग्दोषान्मोऽस्यत्व । [ अत्वचीत् । तत्वाच । त्वक् ।

**त्वच** संवरणे तु० पर० सक० सेट् । त्वचति अत्वाचीत्

**त्वच्(चा)** स्त्री त्वच्यते संव्रियते देहोऽनया त्वचति संवृणोति वा देहम् त्वच–क्विप् । १गुडूत्वचि (दारचिनि) २वल्कले ३चर्मणि च मेदि० ।४सर्वशरीरावरके बाह्येन्द्रियभेदे सा च देहव्यापिनी त्वचिस्थिता स्पर्शज्ञानवायोः सत्त्वांशेनोत्पन्ना वातादधिष्ठातृदेवताका" वेदा० सा० दृश्यम् । तत्र "उद्भूतस्पर्शवद्द्रव्यं गोचरः सोऽपि च त्वचः । रूपान्यच् चक्षुषो योग्यं रूपमत्रापि कारणम् । द्रव्याश्रयी, त्वचो योगो मनसा ज्ञानकारणम्" भाषा० चर्मन् शब्दे २८०१ पृ० दृश्यम् ।

चर्मणि "त्वचं समेध्यां परिधाय रौरवीम्" रघुः "आयूंषि त्वचु निर्भिद्य प्राभञ्जनिरमोचयत्" भट्टिः । "त्वगुत्तरासङ्गवतीमधीतिनीम्" कुमा० वल्कले "भुजत्वचः कुञ्जरबिन्दुगोचराः" कुमा० । गुडूत्वचि "त्वगेलापत्रकैस्तुल्यैः त्रिसुगन्धि त्रिजातकम्" राजनि० । कृदन्तत्वात् वा टाप् । तत्रार्थे शब्दरत्ना० त्वचापत्रम् । "सुकृत्वच इवोरगः" भा० द्रो० २५०अ० । "श्रीवत्साङ्कोऽरविन्दाक्ष ऊर्ध्वरोमा महत्त्वचः" हरिवं० १७६ अ० ।

**त्वच** न० त्वच–अच् । वल्कले "त्वचवेष्टितमस्थिपञ्जरम्" उज्ज्वलद० । गुडूत्वचम् इत्यादि । प्रशस्ता त्वगस्यस्य अच् । २त्वक्पत्रे न० । "त्वचं लघूष्णं कटुकं स्वादु तिक्तञ्च रूक्षकम् । पित्तलं कफवातघ्नं कण्ठ्यमाग्निदीपनम् । कृमिकुष्ठारोगवातार्शःश्लीपदोनसशुक्रहृदिति" । [ त्वचयति ।

**त्वच** त्वचं करोति सत्यापेत्यादि० पा० स्वार्थे–णिच् नामधातुः ।

**त्वचम्** न० त्वच–असुन् । त्वचि । त्वचसि हितम् यत् । त्वगिन्द्रियहिते "वक्षं त्वचस्यं ते वयम्" ऋग्० २।३३।७।

**त्वचापत्र** न० त्वचा त्वक् पत्रमिवास्य । (दारचिनि) त्वक्पत्रे शब्दार्थचि० ।

**त्वचिष्ठ** त्रि० अतिशयेन त्वच्यात् दृढत्वात् इष्ठन् मतुपो लुकि न पदान्तकार्यम् । अतिशयत्वगयुक्ते । दृढत्वात् त्वचीयस् तत्रार्थे त्रि० स्त्रियां ङीप् ।

**त्वचिसार** पु० त्वचि सारोऽस्य दृढत्वात् वा समासा० न लुक् । वंशे अमरः । [ जायाम् ङीप् ।

**त्वचिसुगन्धा** स्त्री त्वचि सुगन्धोऽस्याः बहुव्री० समा० । कुष्ठे

**त्वच्य** त्रि० त्वचि हितं यत् भवात् न पदान्तकार्यम् । त्वचिहिते । "त्वच्यं दृश्यं मधुरविपाकम्" सुश्रु० ।

**त्वत्** त्रि० तन–क्विप् अनो वः तुक् च । अन्यार्थे सर्वनामावयम् । त्वगर्थे दृश्यम् । सर्वनामत्वात् डेरकच् त्वकत् । इति बोध्यम् । [ काशादित्वादर्थे "त्वतः सर्वं प्रवर्तते" ।

**त्वत्तस्** अव्य० एकार्थद्योतेः युष्मदः तसिल् त्वदादेशः । त्वत्तस-

**त्वदीय** त्रि० तव इदम् त्वदादित्वेन छत्वात् ख त्वदादेशः । एकवचनार्थद्वित्वबहुत्वार्थसम्बन्धिनि । "पितुस्त्वदीयस्य मयाऽपकारितः" रघुः ।

**त्वन्च** गतौ भ्वा० पर० सक० सेट् । त्वञ्चति अत्वञ्चीत् । त्वत्वञ्च । चदित् । त्वञ्चित्वा त्वक्त्वा । त्वक्तः

**त्वन्च** सङ्कोचे रुधा० पर० सक० वेट् । त्वनक्ति अत्वाङ्क्षीत् मतान्तरे चदित् । क्त्वा वेट् । अन्यत्र सेट् । त्वक्तः ।

**त्वदिध** त्रि० तवेव विधा प्रकारो यस्य । त्वद्वत्ये ।

**त्वम्पदलक्ष्यार्थ** पु० त्वमिति पदस्य लक्ष्योऽर्थः । अज्ञानादिव्यष्ट्युपाध्युपहिताधारभूते अनुपहितप्रत्यगानन्दरूपे तरोरचैतन्ये । [ जीवस्तु त्वम्पदाभिधः" वेदान्तप्र० ।

**त्वम्पदवाच्य** त्रि० ६त० । त्वम्पदाभिधे । "देहादिभिः परिच्छिन्नो

**त्वम्पदवाच्यार्थ** त्रि० त्वम्शब्दार्थे अज्ञानादिव्यष्टिः एतदुपहितात्मत्वादिविशिष्टं चैतन्यम् एतदनुपहितचैतन्यञ्च । एतत्त्रयं तत्प्रायःपिण्डवदेकत्वेनावभासमानः त्वम्पदवाच्यार्थो भवति" वेदान्तसा० ।

**त्वम्पदाभिध** पु० त्वम्पदमभिधा यस्य । त्वम्पदवाच्ये जीवे "आलम्बनतया भाति योऽस्मत्प्रत्ययशब्दयोः । अन्तःकरणसम्मिश्रबोधः स त्वम्पदाभिधः" इत्युक्तेः ।

**त्वयता** स्त्री त्वया दत्तम् गृणो० । त्वया दत्ते इत्यर्थे "मन इन्द्र ! त्वयताया इषे" ऋ० ७।२०।२० । "त्वयतायै इषे त्वया दत्तायै इषे अन्नाय" भा० अन्नाय अन्नं भोक्तुमित्यर्थः ।

**त्वर** वेगे भ्वा० आत्म० अक० सेट् । त्वरते अत्वरिष्ट । घटा० । णिच्–त्वरयति । णित् त्वरा । जीत् त्वरितोऽस्ति । "गच्छावः सहितौ तत्र समापि त्वरते मनः" रामा० आर० ७८ स० । "यस्य वा त्वरते बुद्धिः" भा० स० १५५ श्लो० "दूता हि त्वरयन्ति माम्" रामा० बा० "अतत्वरञ्च तान् योद्धुम्" भट्टिः ।

**त्वरा** स्त्री त्वर–अङ् ।।वेगे, २अभीष्टलाभार्थं विलम्बासहने च "औत्सुक्येन कृतत्वरा बहुभवा व्यावर्त्तमाना स्त्रिया" रत्नावली ।

**त्वरायण** त्रि० त्वरा अयनमस्य यत्नम् । त्वरायुक्ते अमरः

**त्वरायस्** त्वरणे कण्ड्वा० आत्मनेपगः पर० अक० सेट् । त्वरायस्यति ।

त्वरि स्त्री त्वर–वेगे भावे इन्। त्वरायां हेमचन्द्रकोषः।

त्वरित न० त्वर–क्त। १शीघ्रे। २तद्वति त्रि०। "पथोऽभिरक्षत्वरितं चमूचराः" माघः "त्वरितगतिर्न्नजयुवतिः" छन्दोम०। ३देवीभेदे स्त्री "अथाभिधास्ये त्वरितां त्वरितं फलदायिनीम्" इत्युपक्रमे तन्नसा० तद्ध्यानादिकञ्च दृश्यम्।

त्वरितक पु० त्वरितं कायति प्रकाशते आयते कै–क। व्रीहिभेदे (तोरी) ऋणव्रीहीत्याद्युपक्रमे "त्वरितककुक्कुटाण्डकेत्यादि" सुश्रु०।

त्वरितगति स्त्री "त्वरितगतिश्च नजनगैः" छ० म० उक्ते दशाक्षरपादके वर्णवृत्तभेदे। [ वचित्र अमरः।

त्वरितोदित न० त्वरितमुदितम्। शीघ्रोच्चारिते निरुक्ते

त्वलग पु० जलग+पृषो०। जलसर्पे पारस्करनि०।

त्वष्ट त्रि० त्वक्ष–तनूकरणे क्त। तनूकृते तदशब्दार्थे अमरः

त्वष्टि पु० "सतृक्षाधातो निषादानां त्वष्टिस्त्वायोगवश्च च" मनूक्ते सङ्कीर्णजातिभेदे।

त्वष्टीमती स्त्री त्वष्टा तदनुग्रहोऽस्त्यस्याः मतुप् पृषो०। त्वष्टुरनुग्रहोपेतायां स्त्रियाम् "स्त्रीपुरुषमिथुनरूपाणां पशुमनुष्यादीनां शरीरनिर्माता त्वष्टा तथा च अस्मदुपस्थानप्र० श्रूयते "यावच्छो वै रेतसः सिक्तस्य त्वष्टा रूपाणि विकरोति तावच्छो वै तत् प्रजायते" तादृशस्य त्वष्टुरनुग्रहोपेता" भा०।

त्वष्टृ पु० त्वक्ष–तृच्। "एकादशस्त्वष्टा द्वादशो विष्णुरुच्यते" भा० आ० ६५ अ० उक्ते १द्वादशादित्यमध्ये १आदित्यभेदे। "निर्भिन्ने अक्षिणी त्वष्टा लोकपालोऽविशत् विभोः। चक्षुषांशेन रूपाणां प्रतिपत्तिर्यतो हृषाम्" भाग०२।६।१४श्लो०। उक्तेऽस्य नेत्रोपकारकतया नेत्राधिष्ठातृत्वम्। २देवशिल्पिभेदे अमरः "विश्वकर्मा च त्वष्टा च चक्राते ह्यायुधं वज्र" हरिव० २।६ अ०। "आहुवे विश्वकर्माणमहं त्वष्टारमेव च" रामा० बा० ६१ स०। "त्वष्टा तथैवोर्ज्जितविश्वकर्मा" हरिवं० २४२ अ० इत्यादिषु तयोर्भेदेन निर्देशात् न पर्य्यायता। ३तद्देवताके चित्रानक्षत्रे। ४सूतधरे तक्षके वर्णसङ्करभेदे च। ५तक्षणकर्त्तरि त्रि० स्त्रियां ङीप्। ६पशुमनुष्यादीनां गर्भान्तःस्थरेतोरूपविकारकारके देवभेदे त्वष्टीमतीशब्दे दृश्यम्।

त्वष्टृमत् त्रि० त्वष्टृ+अस्त्यर्थे मतुप्। वीर्य्याधिष्ठातृदेवभेदयुक्ते "त्वष्टृमन्तस्त्वा सपेम" यजु०२७।२०। "त्वष्टा रेतसामधिष्ठाता तद्युक्ताः। मैथुनार्थोपस्थर्थे वीर्य्याधिष्ठातारोचितोऽत एतद्युताः" वेददी०।

त्वाम्कामा स्त्री त्वां कामयते कम–णिङ् अण् वेदे द्वितीयायाः न लुक्। त्वामभिलषन्त्याम्। "कण्वे! त्वांकामया गिरा" ऋ० ८।११।७। लोके तु त्वत्काम इत्येव।

त्वायु त्रि० त्वामात्मन इच्छति क्यच् युष्मदस्मदादेशे "क्याच्छन्दसि" पा० उ। आत्मनः त्वां मन्यमाने। "सुता इमे त्वायवः" ऋ० १।२।४।

त्वावत् त्रि० तवेव दर्शनमस्य युष्मद्+वतुप्प्रकरणे "युष्मदस्मद्भ्यां छन्दसि सादृश्ये उपसंख्यानम्" उक्तेः सादृश्ये वतुप् त्वादेशः "या सर्वनाम्नः" पा० आ। त्वत्सदृशे "आ घ त्वावान् त्मनाप्तः" ऋ० १।२०।१४।

त्वावसु पु० त्वं वसुर्व्याप्तोऽस्य त्वादेशः वेदे पृषो० आ। त्वया व्याप्ते। लोके तु त्वद्वसुः इत्येव।

त्वाष्टी स्त्री दुर्गायाम्। "तुष तुष्टौ ऋतो धातुस्तस्य तृटीनिपातने। सृजत्येषा प्रजास्तुष्टौ त्वाष्टी तेन प्रकीर्तिता" देवीपु० ४५ अ०।

त्वाष्ट्र त्रि० त्वष्टृ देवता अस्य अण्। त्वष्टृदेवताके १आर्द्रादौ २चित्रानक्षत्रे स्त्री। त्वष्टुः आदित्यभेदस्य रूपत्वम् अण्। ३विश्वरूपे ४दैत्यासुरे च। "त्वाष्ट्रस्य विश्वरूपस्य गोपशाचक्राणः तीक्ष्णैः शीर्षाण्यपरार्त्तके" ऋ०१०।८।६। "विश्वेभ्यो हि त्वा भुवनेभ्यस्परि त्वष्टाजनत्साम्ने अह्नाम्" इत्युपक्रमे विश्वेशादीनां नामभिधाय। "त्वष्टुर्दैत्याभवत् भार्य्या रोचना नाम कन्यका। सन्निवेशस्तयोर्जज्ञे विश्वरूपश्च वीर्य्यवान्। तं वव्रिरे सुरगणाः स्वस्रीयं हितमात्मनः" भाग०६।६।५० २२श्लो० इति विश्वरूपोत्पत्तिकथा। इत्यासुरोत्पत्तिकथा च "कृतपुत्रस्ततस्त्वष्टा जुहावेन्द्राय शत्रवे। इन्द्रशत्रो! विवर्द्धस्व मा चिरं जहि विद्विषम्" इत्युपक्रमे तदुत्पत्तिप्रपञ्चे "तेनाहृता इमे लोकास्तमसा त्वाष्ट्रमूर्त्तिना। स वै हतु इति प्रोक्तः पापः परमदारुणः" भाग० ६।६ अ०द्रष्टव्या। त्वष्टुः स्त्रीत्वम् अण् ङीप्। संज्ञानामनि ४सूर्य्यपत्न्यां स्त्री शब्दरत्ना०। आर्यशब्दे २९८५ पृ० दृश्यम्। ५चतुष्करणे त्रिका०। ६सामभेदे। "इन्द्रो हतात्विभ्यहां प्राविशत् तं त्वाष्ट्रेऽभ्रुवन् जनयामेति तमेतैः सामभिरजनयन्" पञ्चविंशब्रा०।

त्विष दीप्तौ भ्वा० उभ० सक० अनिट्। त्विषति ते। अत्विक्षत् अत्विक्षत। तित्विषे। तित्विषे। त्विक्षीष्ट। "ओजस्तदस्य तित्विषे" ऋ० ८।६।५। "समक्षन्न इन्द्रजातिं

त्विषन यत्" ऋ० ५।५३।१२। "अग्निरिव मन्यो ! त्विषितः सहस्व" ऋ० १०।८३।२।

त्विष(षा) स्त्री त्विष्-सम्प०भावे क्विप्। दीप्तौ। "निशीथ-दीपाः सहसा हतत्विषः" रघुः। "रुचिधाम्नि भर्तरि परलोकमभ्युपगते विविधुः। ज्वलनं त्विषः कथमिवेत-रथा" "चक्रस्त्विषामिव वधारितं पुरः" माघः। कृदिन-त्वात् वा टाप्। तदर्थे शब्दरत्ना०।

त्विषानीग्र पु० इत० अनुक् समा०। १सूर्ये हेमच० २सूर्य-हरे च। [हरे च।

त्विषाम्पति पु०इत० अनुक् स०। १सूर्ये अमरः २सूर्य-

त्विषि पु० त्विष्-इन्। किरणे हेमच०।

त्विषित त्रि० त्विष् जातास्त तारा० इतच्। ज्वलिते। "अग्निरिव मन्यो त्विषितः" ऋ० १०।८३।२।

त्वेषथ त्रि० त्विष्-अथच्। दीप्ते। "शूरस्येव त्वेषथा दीषते वयः" ऋ० १।१४१।८। [त्वयः" ऋ० १।६१।११

त्वेषम् त्रि० त्विष-असुन्। दीप्ते "अस्तेव त्वेषसारन्न सि-

त्वै अव्य० त्वच-वा० डै ।१विशेषे २वितर्के च शब्दार्थचि०।

त्वोत त्रि० त्वया ओतः वेदे नि०। त्वया रक्षिते इत्यर्थे। "त्वोतासो न्यर्यता" ऋ० १।८।२। लोके तु त्वदूत इत्येव

त्सर छद्मगतौ भ्वा० पर० सक० सेट्। त्सरति त्सारीत्। "यस्त्वा स्वप्नेन त्सरति यस्त्वा दिप्सति जाग्रतीम्" अथ० ८।६।८। "यो वैनं पाप्मा मायया त्सरति न वैनं सो-ऽभिभवति" शत० ब्रा० १२।१।६।१०।

त्सरु पु० त्सर-उन्। खड्गतरौ। "मा मां पथेन रथमा विदत् त्सरुः" ऋ०७।५०।१। "खड्गं च कनकत्सरुम्" भा० व० १५२७ श्लो०। "दृष्ट्वोत्तखड्गचर्माणस्ततो भूयः प्रहारिणः। त्सरुपाणीन् यतोद्दिष्टांश्चेरुः सर्वासु भूमिषु" भा० आ० ५२४।श्लो०।

त्सारुक त्रि० त्सरौ तद्युक्ते निपुणः आकर्षा० कन् ततः स्वार्थे अण्। असियुद्धनिपुणे। "तथाऽतिपरुषानन्तात् त्सारुको यमजावुभौ" भा० आ० १२२-अ०।

त्वाष्टदस्यूश् पु० त्वाष्ट्रं त्वैवर्षत्वयं सृजति स्यूश क्विप् त्वै-वर्षत्वयकृते लुप्तसंवत्सरे सौरवर्षभेदे। "एकस्मिन् रविवर्षे सौरवर्षद्वयावसानं चेत्। त्वाष्टदस्यूवर्षमेतं विलुप्तसंवत्सरं प्राहुः" यशोधरजातन्त्रम्। "युग्मवर्षयुग्मवत्समा गदिता सा नतु लुप्तसंज्ञिता" ज्योतिर्विदाभरणम्।

इति वाचस्पत्ये तकारादिशब्दार्थखण्डनम्।

---

## थ

थकारः तवर्गोद्वितीयवर्णो व्यञ्जनवर्णविशेषः अस्योच्चारणस्थानम् दन्तमूलं तदुच्चारणे दन्तमूलेन सह जिह्वाग्रसम्बन्धः आभ्यन्तरप्रयत्नः, अतएवास्य सपर्यन्तता। बाह्यप्रयत्नास्तु विवारश्वासाघोषमहाप्राणाश्च। अस्य वाचकशब्दा वर्णाभिधाने उक्ता यथा

थस्त्रिवासो महायन्त्रिर्थनिथाहो भयानकः। थिल्ली शिरसिजो दन्ती भद्रकाली थिलोद्भवः। कृष्णो बुद्धिर्विकर्णा च दक्षिणाशाधिपोऽमरः। वरदा भोगदा क्षेमी वामजङ्घाऽजरोऽनलः। नोक्ष्यिनी पृथुर्गुहः शरजन्द्रो विदारकः" | भाडकान्यासे अस्य वामजङ्घायां न्यासः। अस्याधिष्ठातृदेवीध्येयरूपं यथा "नीलवर्णां त्रिनयनां षड्भुजां वरदां पराम्। पीतवस्त्रपरीधानां सदा सिद्धिप्रदायिनीम्। एवं ध्यात्वा थकारन्तु तन्मन्त्रं दशधा जपेत्। पञ्चदेवमयं वर्णं पञ्चप्राणमयं सदा। तरुणादित्यसङ्काशं थकारं प्रणमाम्यहम्" अस्य स्वरूपं यथा "थकारं चञ्चलापाङ्गि! कुण्डली लोल-रूपिणी। त्रिशक्तिसहितं वर्णं त्रिबिन्दुसहितं सदा। पञ्चदेवमयं वर्णं पञ्चप्राणात्मकं सदा। तरुणादित्य-सङ्काशं थकारं प्रणमाम्यहम्" कामधेनुतन्त्रम्। काम्यादौ अस्य प्राक्प्रयोगे युक्तं फलम् "वस्तु युक्तम्" इ० र० टीको क्रोः।

थ पु० थुड्-घञ् वा ड। १पर्वते २अभ्रलावके त्रि० ३समुच्चये ४अर्थे रक्षणे न० मेदि०। [पार्श्वे!" कामधेनुत०।

थकार पु०थ+स्वरूपे कार। थस्वरूपे वर्णे "थकारं चञ्चला-

थर्व् चरणे भ्वा० पर० सक० सेट्। थर्वति अथर्वीत्। तथर्व "अङ्गिरसो नः पितरो नवग्वा अथर्वाणो भृगवः सोम्यासः" निघण्टुधृता श्रुतिः "अथर्वाणोऽचरन्त्स्वर्-तिचरतिकर्मा तत्प्रतिषेधः" निरु० ११।८। लोकेऽपि गतिशून्ये ( अथर्व इति ) प्रसिद्धिः।

थुड संवृतौ तु० कु० पर० सक० सेट्। थुड्डति अथुड्डीत्। तथोड्ड। [करणे शब्दभेदे।

थुत्कार पु० थुत् इत्यव्यक्तशब्दस्य कारः। निर्जीवनत्वात्तथा-

थुथूक्क थुथु इत्यव्यक्त शब्दात् निर्जीवनत्वात्तथानुकरणशब्दात् च्वि-कृञोर्लुप्तप्रयोगः। थुथूकरोति। "थुथूकृत्य वमन्निरध्वगजनैः" रुक्मिकर्णीस्तम्।

थुथूकृत् स्त्री थुथु इत्यव्यक्तशब्दं करोत्यस्मिन् कृ-वा० आधारे क्विप्। होकाकामां पारस्करनिघ०।

थुर्व वधे भा० पर० सक० सेट्। थूर्वति अथूर्वीत्। तुथूर्व।
थ्यै अव्य० थे–यै इत्यव्यक्तशब्दानुकरणशब्दभेदे संगीतदामो०।
थो(थु)ड न० थुड–भावे ल्युट् कुटादित्वेऽपि वा० गुणः।
संवरणे। वस्तुतः थुड्नमिलेव तत्रार्थे साधु शब्दकल्प
द्रुमे थोड्नशब्दकल्पनं प्रामादिकमेव। [शब्दार्थचि०।
थौणेय त्रि० स्थूणायां स्थितादि ढक् थूणो०। स्थूणास्थितादौ

इति वाचस्पत्ये थकारादिशब्दार्थसङ्कलनम्।

---

## द

दकारः तवर्गीयद्वितीयवर्णः व्यञ्जनवर्णभेदः अस्योच्चारणस्थानं दन्तमूलम्। दन्तमूलेन सह जिह्वायोगेन स्पर्शनादस्य उच्चार्यत्वात् स्पर्शवर्णता। अस्योच्चारणे बाह्यप्रयत्नाः संवारनादघोषा अल्पप्राणत्वं। तस्य वाचकशब्दा वर्णाभिधानोक्ता यथा।

"दोऽद्रीशोधातकि धाता दाता त्रासः कलत्रकम्। दीनं ज्ञानञ्च दानञ्च भक्तिरावट्टनी धरा। क्षुत्क्षमा क्षोगिनी सदाःकुन्नतो वामगुल्फवः। कात्यायनी शिवा दुर्गाऽनङ्गनामा त्रिकण्टकी। खड्गिकः कुटिलाकृपः कृष्णः श्यामा जितेन्द्रियः। धर्मज्ञद्दामदेवश्च अमरेशः सुचञ्चला। कपिद्रापुरवेदी च दत्तपाणिस्त्रिरेखकः" अस्याधिष्ठातृदेवता ध्यानादि यथा "ध्यानमस्य दकारस्य वक्ष्यते शृणु पार्वति!। चतुर्भुजां पीतवस्त्रां नवयौवनसंस्थिताम्। अनेकरत्नघटितालङ्कारसुपरशोभिताम्। एवं ध्यात्वा दकारन्तु तन्मन्त्रं दशधा जपेत्। त्रिशक्तिसहितं देवि! त्रिबिन्दुसहितं तथा। आत्मादितत्त्वसंयुक्तं दकारं प्रणमाम्यहम्" वर्णोद्धारतन्त्रम्। अस्य स्वरूपं यथा "दकारं शृणु चार्वङ्गि! चतुर्वर्गप्रदायकम्। यद्देवमयं वर्णं प्रत्यक्षप्राणमयं सदा। त्रिशक्तिसहितं देवि! त्रिबिन्दुसहितं सदा। आत्मादितत्त्वसंयुक्तं स्वयं परमकुण्डली। रक्तविद्युल्लताकारं दकारं हृदि भावयेत्" कामधेनुतन्त्रम्। काव्यादौ अस्य प्रयोगे सौख्यं फलम्। दोषः सौख्यं सदं नः" उक्त० र० टी० उक्तेः। मारकात्वादेऽस्य वामगुल्फे न्यासः।

द पु० दैप्–शुद्धौ दा–दाने दो–खण्डने वा क दद–दाने वा० ड वा। १पर्वते २दत्ते ३दातरि च मेदि०। ४कमले न० एकाक्षरकोषः। दो–खण्डने सम्प० भावे क्विप्। ५खण्डने ६रक्षणे च स्त्री मेदि०। "दाददोडृहृहृादीदादादोदूददीददोः। डृहृादं ददे डृहे-ददाददददोऽददः" माघः अस्य कञ्चिनाथव्याख्यायामर्थ विशेषा बोध्याः। "अरण्यावधिदां सरस्वतीम्" कुमा० "करिणां सुदे सनलदा नलदाः" किरा०। "क्षादक्षानलदं विना न दहने तापस्य कोऽपि क्षमः" "हे! वःपतिविदुषि नैषधराजनाम्नाः" नैषधम्। हे विदुषिहे विद्वज्जने दात्रि! वो वरुणः इति वरुणपक्षे व्याख्येदः।

दंश पु० दृश–अच् भावे घञ् वा। (डाश) प्रसिद्धे कीटभेदे २सङ्घट्टने (वर्मणि) ३दंशने च मेदि०। ४दोषे ५सर्पजाते च विश्वः करणे घञ्। ७दन्ते पु० हेमच०। "सर्वत्र दंशमशकं स्थावरञ्च पृथग्विधम्"। "खेदजा दंशमशकं यूकामत्कुणकादयः" मनुः। "कण्डूयनैर्दंशनिवारणैश्च" रघुः। गौरा० ङीष् क्षुद्रोदंशः अल्पार्थे ङीष् वा। दक्षुद्रदंशे (मशक) भेदे स्त्री अमरः।

दंशक पु० दृश–ण्वुल्। (डाश) १मक्षिकाभेदे शारा०। २दंशनकर्तरि त्रि०।

दंशन न० दृश–भावे ल्युट्। (कामड़ानु) (डबबसान) १दन्तादिना खण्डने "दष्टाश्च दंशनैः कान्तं दासीकुर्वन्ति योषितः" सा० द० २वर्म्मणि न०। "दृष्टदुष्टमदृष्टवा तु न विमोक्ष्यामि दंशनम्" भा० क० ५७ अ०।

दंशनाशिनी स्त्री दंशं नाशयति नाश–णिनि–ङीप्। तैलकीटभेदे राजनि०।

दंशभीरु पु० दंशात् भीरुः। मक्षिके हेमच०।

दंशमूल पु० दंशते कर्मणि घञ् दंशं मूलमस्य। शिग्रौ (सजिना) राजनि०।

दंशित त्रि० दंशः वर्म संजातोऽस्य तारा० इतच्। १क्षतसञ्जाते क्षतवर्मणि "सूर्य्या यत्र च सौवर्णास्त्रयो भासन्ति दंशिताः। तेजसा प्रज्वलन्तो हि कल्पे तद्वत्तुरुत्तमम्" भा० वि० ४२ अ० "व्यालाश्च विराजन्ते दंशितानि सितानि च" हरिवं ५४५४ श्लो०।

दंशूक त्रि० दृश वा० ऊक। दंशनशीले। "तस्मात् क्रीवाः दन्दंशूका दंशूकाः" तैत्ति० ब्रा० १।७।८।२।

दंष्ट्रा स्त्री दंश–ष्ट्रन् गौरादिषु मातामहशब्दस्य पाठात् विकल्पात् ङीषोऽनित्यत्वात् टाप्। १स्थूलदन्तभेदे। दन्त-

पञ्चेन्द्रियप्राणे चत्वारो दन्तभेदा दंष्ट्रा इति प्रसिद्धिः। द्विगुणाक्षतदन्तावलिरित्यत्रके "दंष्ट्राकरालानि च ते मुखानि" माता। "दंष्ट्रायां धरणिर्मग्ने दितिसुतारीशः पदे रोदसी" मा० द०। "दंष्ट्रामयूखैः शकलानि कुर्वन्" रघुः

**दंष्ट्रानखविष** पु० दंष्ट्रायां नखे च विषं यस्य। व्याघ्रादौ यथाह सुश्रुतः।

"तत्र दंष्ट्रिनिर्घातं दंष्ट्रानखमूलपरीक्षणुक्लालालास्रवसुखबन्धंविवर्णतनुदाक्षिप्तिक्ष्मूक्षणवानीति" विपरीतानोपक्रमे "मार्जारश्वानरमकरमण्डूकपाकमत्स्यनोधाग्रम्बूकप्रचलाकवृकगोधिकाचतुष्पादकीटाक्षतान्ये दंष्ट्रानखविषाः"।

**दंष्ट्राल** त्रि० दंष्ट्रा+अस्यर्थे लच्। दंष्ट्रायुक्ते "धूम्रवेधो हरिताक्षस्तुदंष्ट्रालोऽतिदारुणः" हरिवं० ४७ अ०।

**दंष्ट्राविष** पु० दंष्ट्रायां विषमस्य। १मौसे सर्पे "मौसास्तु दंष्ट्राविषाः" सुश्रुतः २ लूताभेदे स्त्री। यथाह सुश्रुतः "विषन्तु लालानखमूलदंष्ट्रारजःपरीषैरथ चेन्द्रियेण। सप्तप्रकारं विदुषोऽनि लूतास्तदुपमध्याधरवीर्य्ययुक्तम्। सकण्डुकोठं स्थिरमल्पमूलं लालास्रतं मन्दरुजं वदन्ति। शोफश्च कण्डूश्च पुलाभिका च धूमायनं चैव नखाघदंशे। दंशन्तु मूत्रेण सजाणमध्यं सरक्तपर्य्यन्तमवेहि दीर्घम्। दंष्ट्राभिरुग्रं कठिनं विवर्णं जानीहि दंशं स्थिरमण्डलञ्च"। लालाविषादयोऽत्र। [वृधादयोऽत्र

**दंष्ट्रास्य** पुंस्त्री दंष्ट्रास्यमिवास्य। वराहे मन्दार्थचि०। दंष्ट्रा-

**दंष्ट्रिका** स्त्री दंष्ट्रा स्वार्थे क। कापि क्षुद्रे जन्तुभेदे रत्नम्। दाढ़िकायां दंष्ट्राशब्दार्थे। दंष्ट्रा+ग्रीवा० वा ठन्। दंष्ट्रायुक्ते त्रि०।

**दंष्ट्रिन्** पु० दंष्ट्रा अस्त्यर्थे ग्रीवा० इनि। शूकरे अमरः २सर्पे मेदिनी०। ३दंष्ट्रायुक्ते त्रि०। "दंष्ट्रिभिः शृङ्गिभिर्वापि कृतान्ते चैव तस्करैः" मनुः त० व्यभिचा०।

**दंसना** स्त्री चु० दंस्–भावे युच्। १कर्म्मणि निरुक्ते दंसस् इति शब्दस्य कर्मपर्य्यायतोक्तेस्तथात्वम्। "तव क्रत्वा तव दंसनाभिः" ऋ० ६।१७।६। "दंसनाभिः कर्मभिः" भा०। "शची वस्तव दंसना" ऋ० १।२८।२।

**दंसस्** न० दंस्–असुन्। कर्म्मणि निघण्टुः "चारुतममिति दंसः" ऋ० १।६२।६। "अपर्वयो वसिनो अस्य दंससा" १०।१२८। "दंससा कर्म्मणा" भा०। "सजोषावश्विना दंसोभिः" यजु० १२।७४।

**दंसि** पु० दंस्–इन्। कर्म्मणि। "कुत्साय मन्मन्नश्च दंसयः" ऋ० १०।१२८।१। "दंसयः कर्माणि" भा० "दंसयः कर्माणि दंसयन्तेनानि" निरुक्ते ४।२५।

**दंसिष्ठ** त्रि० दंस्–इन् दंसयिता अतिशयेन सः इष्ठन् तयो लुकि सिलोपः। १अत्यन्तकर्मकर्त्तरि। "दक्षा दंसिष्ठा रथ्या रथीतमा" ऋ० १।१८२।२। "दंसिष्ठा अतिशयितकर्माणौ" भा० औरुस्थाने आच्। २दर्शनीयतमे ३अतिशयेन शत्रुहिंसके च। "येना दंसिष्ठ!" इत्यने" ऋ०८।२४।२५।"हे दंसिष्ठ! दर्शनीयतम! यद्वा शत्रूणां क्षपयितः!" भा०। अत्र दंसेः दंसे र्वा धातोरूपं पृषो०।

**दक** न० उदक+पृषो० दैप्–शोधे क ततः संज्ञायां कन् वा। जले त्रिका० दकोदरम्। दकार्णवम्।

**दकोदर** न० दकं जलस्रोतसदरं यत्र। सुश्रुतोक्ते जलोदरापरनामके उदररोगभेदे यथा "यः क्षीणपीतोऽत्यनुवासितो वा वान्तो विरिक्तोऽथ वा निरूढः। पिबेज्जलं शीतलमाशु तस्य स्रोतांसि दुष्यन्ति हि तद्वहानि। क्षीणोपसिक्तेषु च तेषु दकोदरं पर्ववदभ्युपैति। स्निग्धं महत्सम्परिवृत्तनाभि श्वयोन्नतं पूर्णमिवाम्बुना च। यथा हतिः क्षुभ्यति,कम्पते च यद्वाधते चापि दकोदरं तत्। "नाभेरधस्तादरुणे सिरेऽस्या वामपार्श्वे दकोदरे" "सिध्याः सिरा बहुविधा मूलहृद्दकोदरम्" सुश्रु०।

**दक्ष** धातौ वृद्धौ च भ्वा० आत्म० सक० सेट्। दक्षते अदक्षिष्ट। ददक्षे। दक्षः। "त्वमिनो अंहसो यजिष्ठो दक्षसे" ऋ० २।१।११।

**दक्ष** हन्त्यर्थे (गतौ वधे च) भ्वा० आत्म० सक० सेट्। दक्षते अदक्षिष्ट ददक्षे। नित् तत्करणसामर्थ्यात् अनुपधाया अपि दीर्घे चिणि अदाक्षि अदक्षि अदक्षत दक्षं दक्षम् दाक्षं दाक्षमिति रूपं नित् भावे च। दक्षा।

**दक्ष** पु० दक्ष–कर्त्तरि अच्। १ताम्रचूडे दक्षसंहिताकर्त्तरि २ऋषिभेदे ३शिवरुद्रभेदे ४रुद्रभेदे ५अग्नौ च विश्वः। ६महेश्वरे शब्दरत्ना०। ब्रह्मणो दक्षिणाङ्गुष्ठजाते ७प्रजापतिभेदे। ८चतुरे त्रिषु कर्त्तव्येषु चोपस्थितेषु सद्य एव ज्ञातुं कर्त्तुं च समर्थे पटौ त्रि० मेदि०।

"दक्षस्त्वजायताङ्गुष्ठाद्दक्षिणाद्भगवान् ऋषिः। ब्रह्मणः पृथिवीपाल! ज्ञानात्मा सुमहातपाः। वामादजायताङ्गुष्ठाद्यो दक्षस्य मनोः। तस्यां पञ्चाशतं कन्याः स एवाजनयत् सुतः। ताः सर्वास्तनवद्याङ्ग्यः कन्याः कमललोचनाः। पुत्रिकाः स्थापयामास नष्टपुत्रः प्रजा-

पतिः" भा० आ० ६६ अ० तस्य पुत्रनाशकथा दक्षशुत शब्दे द्रष्टव्यम् हरिवंशे २अ० तु तस्य प्राचेतसत्वसूत्रं यथा

"उपगम्याब्रवीदेतानथ सोमः प्रजापतीन्। कोपं यच्छत राजानः! सर्वे प्राचीनबर्हिषः!। दक्षशून्या कृता पृथ्वी शाम्येतामग्निमारुतौ। रत्नभूता च कन्येयं दक्षाणां वरवर्णिनी। भविष्यं जानता तत्त्वं धृता गर्भेण वै मया। मारिषा नाम कन्येयं दक्षाण्यामिति निर्मिता। भार्यावोऽस्तु महाभागा सोमवंशविवर्द्धिनी। युष्माकं तेजसोऽर्द्धेन मम चार्द्धेन तेजसः। यस्मात्सृष्टेयमेतस्मै पुत्रो दक्षो नाम प्रजापतिः। स इमां दग्धभूयिष्ठां युष्मत्तेजोमयेन वै। अग्निनाऽग्निसमो भूत्वा प्रजाः संवर्द्धयिष्यति। ततः सोमस्य वचनाज्जगृहुस्ते प्रचेतसः। संहृत्य कोपं दक्षेभ्यः पत्नीं धर्मेण मारिषाम्। मारिषायां ततस्ते तु मनसा गर्भमादधुः। दशभ्यस्तु प्रचेतोभ्यो मारिषायां प्रजापतिः। दक्षोजज्ञे महातेजाः सोमस्यांशेन भारत!। पुत्रानुत्पादयामास सोमवंशविवर्द्धनान्। अचरांश्च चरांश्चैव द्विपदोऽथ चतुष्पदः। स सृष्ट्वा मनसा दक्षः पश्चादथसृजत् स्त्रियः। ददौ स दश धर्माय कश्यपाय त्रयोदश। गिरीशाय सोमाय राज्ञेऽथ नक्षत्रात्मने ददौ प्रभुः। तासु देवाः खगा गावो नागा दितिजदानवाः। गन्धर्वाप्सरसश्चैव जज्ञिरेऽन्याश्च जातयः। ततः प्रभृति राजेन्द्र! प्रजा मैथुनसम्भवाः। सङ्कल्पाद्दर्शनात् स्पर्शात् पूर्वेषां श्रोच्यते प्रजा"।

अनयोर्विरोधमाशङ्क्य कल्पभेदादविरोधः भङ्क्त्या तत्रैव समाहितो यथा

"जनमेजय उवाच। देवानां दानवानाञ्च गन्धर्वोरगरक्षसाम्। सम्भवः कथितः पूर्वं दक्षस्य च महात्मनः। ब्रह्मणाद् ब्रह्मणो जातो दक्षः प्रोक्तस्त्वयाऽनघ! वामाङ्गुष्ठात्तथा चैव तस्य पत्नी व्यजायत। कथं प्राचेतसत्वं स पुनर्लेभे महातपाः। एतन्मे संशयं विप्र! सम्यगाख्यातुमर्हसि। दौहित्रत्वञ्च सोमस्य कथं श्वशुरतां गतः"। वैशम्पायन उवाच। "उत्पत्तिश्च निरोधश्च नित्यौ भूतेषु पार्थिव!। ह्रस्वयो ह्रस्व न ह्रस्वन्ति विहांसश्चैव ये जनाः। युगे युगे भवन्त्येते सर्वे दक्षादयो नृपाः। पुनश्चैव निरुध्यन्ते विहांसश्च न सन्तपि। ऋते ह्रस्वं कालिष्टमध्येवां पूर्वं नासीज्जनाधिप!। तप एव परीवोऽभूत् प्रभावश्चैव कारणम्" हरिवं० २ अ०। हरौशीनरपुत्रभेदे "शिबिर्वृषदर्भः क्रमिर्दक्षश्चत्वारौशीनरात्मजाः" भाग० ६।२३।४। ६दक्षिणभागे "वामतो जानकी यस्य दक्षभागे च लक्ष्मणः। मारुतिः पुरतो यस्य" रामकवचम्। ३०विष्णौ "त्रयः संवत्सरो दक्षः" विष्णुस०। "जगद्भूमेष वर्द्धमानत्वात् सर्वकर्माणि क्षिप्रं करोतीति वा दक्षः" भा० तत्र कुशले "दक्षमिष्टमधुवासरसारम्" "उपवनपवनातुपातदक्षैः" माघः "रम्भान्वेषणदक्षाणां हिणामभिमतां ययौ" रघुः। "मेरौ स्थिते दोग्धरि दोहदक्षे" कुमा०। दक्ष-क्विप् करणे षच्। ११बले निघण्टुः।

"स दक्षाणां दक्षपतिर्बभूव" ऋ० ६८५।६। "दक्षाणां बलानाम् मध्ये यदतिशयितं बलं तस्याधिपतिः" भा०। १२वीर्य न० "स्वैर्दक्षैर्दक्षपितरहं सीद देवानाम्" यजु० १४।२। "स्वैर्दक्षैः वीर्यैः सामर्थ्यैः सह, दक्षशब्दोऽत्र वीर्यार्थः। दक्षपिता दक्षं वीर्यं पातीति पालयिता" वेददी०।

**दक्षकन्या** स्त्री ६त०। दक्षस्य सुतासु तासु यष्टिः। यथाह मत्स्यपु० ५ अ०।

"ततस्तेषु विनष्टेषु यष्टिं कन्याः प्रजापतिः। वैरिण्यां जनयामास दक्षः प्राचेतसस्तथा। ददौ स दश धर्माय कश्यपाय त्रयोदश। सप्तविंशतिं सोमाय यतस्तोऽरिष्टनेमये। द्वे चैव भृगुपुत्राय द्वे ऊर्णायाय धीमते। द्वे चैवाङ्गिरसे तद्वत्तार्क्षायामित विस्तरात्"। "तांश्चैव नष्टान् विज्ञाय पुत्रान् दक्षः प्रजापतिः। यष्टिं ततोऽसृजत् कन्यां वैरिण्यामिति नः श्रुतम्। तांस्तदा प्रतिजग्राह भार्यार्थं कश्यपः प्रभुः। सोमो धर्मश्च कौरव्य! तथैवान्ये महर्षयः। ददौ स दश धर्माय कश्यपाय त्रयोदश। सप्तविंशतिं सोमाय यतस्तोऽरिष्टनेमिने। द्वे चैव बहुपुत्राय द्वे चैवाङ्गिरसे तथा। द्वे ऊर्णायाय विदुषे तासां नामानि मे शृणु" हरिवं० २ अ०। २सतीनाम्न्यां भवपत्न्यां दुर्गायाञ्च तत्कथा "प्रसूतिं मानवीं दक्षः उपयेमे सुजाजजः। तस्यां ससर्ज्ज दुहितॄः षोडशामललोचनाः। त्रयोदशाऽदाद्धर्माय तथैकामग्नये विभुः। पितृभ्य एकां युक्तेभ्यो भवायैकां भवच्छिदे" भाग० ४।१। "अवमानेन पितुः प्रयुक्ता दक्षस्य कन्या भवपूर्वपत्नी। सती सती योगविसृष्टदेहा क्रमा० दक्षसुतादयोऽत्रैव।

**दक्षक्रतु** पु० ६त०। दक्षप्रजापतिकृते निरीश्वरभागे यज्ञभेदे। तद्यज्ञकथा काशी० ८७ अ० यथा

"अहं वियत्सुर्यूयं मे यज्ञसाहाय्यकारिणः। भवन्तु यज्ञसम्भारानानयन्तु त्वरान्विताः। श्वेतद्वीपमथो गत्वा

चक्रे चक्रिणमच्युतम्। महाक्रतूपदेष्टारं यज्ञपुरुषमेव च। तस्मिन्विजोऽभवन् सर्वे ऋषयो ब्रह्मवादिनः। प्रावर्त्तत ततस्तस्य दक्षस्य च महाध्वरः। दूरादेव निकायाच्च तस्मिन् दक्षमहाध्वरे। अनीश्वरात्ततो वेधा व्याजं कृत्वा ययौ हविः। दधीचिरेव संवीक्ष्य सर्वांस्त्रैलोक्यवासिनः। दक्षयज्ञे समेयातान् सतीश्वरविवर्जितान्। प्राप्तसम्मानसम्भारान् वासोऽलङ्कृतिपूर्वकम्" इत्युपक्रमे तत्र दधीचिना सह दक्षस्य उक्तिप्रत्युक्ती यथा

"तं विदन्ति वसिष्ठाद्यास्तत्त्वार्थिज्ञं भजन्ति ये। एको रुद्रो न द्वितीयः संविदानाद्यपीति हि। प्रावर्त्तन्तर्त्वियोऽन्येऽपि गौरवात्तव च क्रतौ। यदि मे ब्राह्मणस्यैकं वचनं हितम्। तदा क्रतुफलाधीशं विश्वेशं तं समाश्रय। विना तेन क्रतुरसौ क्रतोऽप्यङ्गत एव हि। सति तस्मिन् महादेवे विश्वकर्मैकसाक्षिणि। तवापि चैषां सर्वेषां फलिष्यति मनोरथः। यथा जड़ानि बीजानि न फलन्ति स्वयं तथा। जड़ानि सर्वकर्माणि न फलन्तीश्वरं विना। अर्थहीना यथा वाणी धर्महीना यथा तनूः। पतिहीना यथा नारी शिवहीना तथा क्रिया। गङ्गाहीना यथा देशाः पुत्रहीना यथा गृहाः। दानहीना यथा सम्पत् शिवहीना तथा क्रिया। मन्त्रहीनं यथा राज्यं स्तुतिहीना यथा द्विजाः। योगाहीनं यथा सौख्यं शिवहीना तथा क्रिया। दर्भहीना यथा सन्ध्या तिलहीनं तु तर्पणम्। हविर्हीनो यथा होमः शिवहीना तथा क्रिया। इत्थं दधीचिनाख्यातं जगाद वचनं न तत्। दक्षो दक्षोऽपि तत्रैव मन्योर्भावाविमोहितः। प्रोवाच च भृशं क्रुद्धः का चिन्ता तव मे क्रतोः। क्रतुमुख्यानि सर्वाणि यानि कर्माणि सर्वशः। तानि सिध्यन्ति नियतं यथार्थकरणादिह। अयथार्थविधानेन सिद्धेत् कर्माणि नेशितुः। स्वकर्मसिद्धये वाच्य सर्व एव हि चेश्वरः। ईश्वरः कर्मणां साक्षी यत् त्वयोक्तं विनायीशं कालेऽपि कर्म फलेत् स्वयम्। स एव कालो भगवान् सर्वकर्त्ता महेश्वरः। अन्यच्च भवता प्रोक्तं यदेवं तथ्यमेव तत्। किमीश्वरेण तेनात्र महाऽमङ्गलमूर्त्तिना। ये महान्तो भवन्त्रेव ये च मङ्गलमूर्त्तयः। ईश्वराख्या च ये सन्ति किं तैरत्र तवाग्निके। उत्तराद्उत्तरश्चेति प्रत्युत्तरयति द्विजे। दधीचौ चुकुपेऽत्यन्तं दक्षो गर्वेण दुर्मतिः। आदिदेश सभीपस्थानालोक्य परितस्थिवान्। ब्राह्मणाग्रसरं चासुं परिदूरयतात्र वै। अतश्चाध्वरश्चेदानादिष्टात्मनाऽऽगतम्। इत्थं दधीचिराकर्ण्य प्रोवाच प्रहसन्निव। किं मां दूरयसे मूढ! दूरीभूतो भवानपि। सर्वेभ्यो मङ्गलेभ्यश्च सर्वैरेभिः समं ध्रुवम्। अकाण्डे क्रोधजो दण्डश्चण्ड मूर्ध्नि पतिष्यति। महेशिताक्षिजगतीपुरीशास्तुः प्रजापते!। इत्युक्त्वा निर्जगामाशु यज्ञवाटात् ततो द्विजः। तस्मिन्नियाति नियतो दुर्वासाश्चण्डनो महान्। उत्तङ्क उपमन्युश्च ऋचीकोद्दालकावपि। माण्डव्यो वामदेवश्च गालवो गर्गगौतमौ। शिवतत्त्वविदोऽन्येऽपि दक्षयज्ञाद्विनिर्ययुः"। दक्षयज्ञादयोऽध्वर। दक्षाः कुशलाः क्रतवः संकल्पाश्चेषाम्। श्चक्षुरादीन्द्रियरूपेषु प्राणेषु "ये देवा मनोजाता मनोयुजो दक्षक्रतवस्ते नोऽवन्तु" यजु०३।११। "ये देवा इडयाः दीव्यन्ति द्योतन्ते इति देवाश्चक्षुरादीन्द्रियरूपाः प्राणाः। "इमे वै प्राणाः वाग्नेवाग्निः प्राणोदानौ मित्रावरुणौ चक्षुरादित्यः श्रोत्रं विश्वे देवा इति" शत० ब्रा० २।२।२।१२ श्रुत्युक्ताः। किम्भूताः मनोजाताः दर्शनश्रवणादीच्छारूपान्मनस उत्पन्नाः इच्छोत्पत्तौ तेषां प्रवर्त्तमानत्वात्। तथा मनोयुजः रूपादिदर्शनकालेऽपि मनसा युक्ता एव वर्त्तन्ते अन्यमनस्कस्य रूपादिप्रतिभासाभावात्। यद्वा स्वप्नावस्थायां मनसा युज्यन्ते ते मनोयुजः। तथा दक्षक्रतवः दक्षाः कुशलाः क्रतवः संकल्पाः येषां ते सङ्कल्पितार्थकारिण इत्यर्थः। ते देवा नोऽस्मानवन्तु यज्ञानुष्ठानविघ्नपरिहारेण पालयन्तु तेभ्यः प्राणरूपेभ्यः स्वाहा इदं हविरं हुतमस्तु" वेददी०।

दक्षक्रतुध्वंसिन् पु० दक्षक्रतुं ध्वंसयति ध्वंस-णिच्-

थिनि। १महादेवे तदंशाविर्भूते २वीरभद्रे च तत्कथा कृतध्वंसिनि शब्दे २२८४ पृ० दक्षम्।

दक्षजा स्त्री दक्षात् जायते जन–ड। सतीरूपायां १ दक्षकन्यायां मरुद्गणभेदे दुर्गायाम् २अश्विन्यादौ च। दक्षजातादयोऽत्र।

दक्षजापति पु० ६त०। १शिवे २चन्द्रे च हेमच०।

दक्षतनया स्त्री ६त०। दक्षप्रजापतेर्दुहितरि १अश्विन्यादौ २दुर्गायाम्। ३वेदिरूपायां भूमौ च। "अदितिर्जजनिष्ट दक्ष! या दुहिता तव" ऋ० १०।७२।५। दक्षस्य भूमिजत्वेऽपि तज्जनकत्वात्तस्याश्चयमाशङ्क्य निरु० ११।२३। समाहितं यथा "अदितेर्दक्षो अजायत" "दक्षादहदितिं परीति"च तत्कथमुपपद्येत? समानजन्मानौ स्यातामिन्नपि वा देवधर्मचेतरेतरजन्मानौ चेतरेतरप्रकृती"। पृषो० दक्षतनाप्यत्र "दक्षस्य पितरं तना" ऋ०२।२७।६ "दक्षस्य दक्षप्रजापतेस्तना तनया" भा०।

दक्षपिष्ट पु० दक्षः दक्षप्रजापतिः पिता उत्पादकोऽस्य सम्बन्धान्विधेरनित्यत्वात् न कप्। दक्षप्रजापतिजातमात्राभिमानिदेवे "ये देवा मनोजाता मनोयुजः सुदक्षाः दक्षपितरस्ते नः पान्तु"तैत्ति०१।२।१।१। दक्षपितर इत्यत्र गौणत्वात् इन्द्रि। चक्षुरादिप्राणाभिमानिनो ये देवाः सन्ति तेऽस्मान् पयःपानरूपव्रतानुष्ठायिनोऽस्मर्क्ष्य युष्मिन्सम्पादनेन पालयन्तु। कीदृशा देवाः। उत्पत्तिकाले मनसा सङ्कल्पजाः। व्यवहारकालेऽपि मनसा युक्ताले। अन्यमनस्कस्य चक्षुरादिभिः सन्निहितविषयाणामप्यनवगमात्। अति तु मनःप्राधान्ये स्वस्वविषयेषु सुदक्षाः कृपलाः। दक्षः प्रजापतिरुत्पादको येषां ते दक्षपितरः" भा०। लोके तु कप्। दक्षपिष्टका अश्विन्यादिषु स्त्री। दक्षस्य वीर्यस्य पिता पालक!। २वीर्योत्पादके दक्षयज्ञध्वंसे रुद्रा० शब्दम्।

दक्षविहिता स्त्री १गीतिजातिभेदे। "अगणाद्या याधिका दक्षविहिता ब्रह्मगीतिका। गेयमेतत्तदध्यायकरणान्नोक्तसंज्ञितम्" ब्राह्म०। "अगणाद्याद्यावतस्रो गीतिकाः" जिता०। २दक्षकृते त्रि०।

दक्षस् न० दक्ष–असुन्। बले। "इषया दक्षसे यशः" ऋ० २।२६।३। "दक्षसे बलाय" भा०।

दक्षसावर्णि पु० मनुभेदे नवमे मनौ। "नवमो दक्षसावर्णि मैत्रेयरुद्रसम्भवः। भूतकेतुदीप्तकेतुरित्याद्याश्चसुता नृप। परे धृतिकेतुभीद्या देवा इन्द्रः शुतः शुचेः। द्युतिमत्प्रमुखाः सप्त भविष्यन्त्यघनाशतः। आयुष्मतोऽम्बुधारायामृषभो भगवान् किल। भविता येन संराड्वै त्रिलोकीं भोक्ष्यते ऽद्भुतः" भाग० ८।१३।६। "दक्षसावर्णि र्दक्षसावर्णि १०ऋक्षसावर्णिकस्ततः। ११धर्मसावर्णिको१२ रुद्रपुत्रो१३ रौच्यश्च १४भौत्यकः" पुराणान्तरम्। हरिवंशे तु नवमस्य रोहितत्वमुक्तं यथा। "अवनक्षैव कार्तिकालौयो हव्यवाहनः। मौलहः सप्त इत्येते सुतयो रोहितेऽन्तरे। देवतानां गणास्तत्र तत्र एव नराधिप!। दक्षपुत्रस्य पुत्रास्ते रोहितस्य प्रजापतेः। मनोः पुत्रो भूतकेतुः पञ्चहोत्रो निराकृतिः। पृथुश्रवा भूरिधामा ऋचीकोऽष्टहतो गयः। प्रथमस्य तु सावर्णेरेव पुत्रा महौजसः" ७ अ०। कल्पभेदादविरोधः।

दक्षसुत पु० ६त०। १देवे शब्दार्थचि०।

देवस्य दक्षस्यदत्वात् तनयत्वेन दक्षेण पुत्रिकाधर्मेण दत्तावामादितावुत्पन्नत्वेन तस्य पुत्रिकात्वाच्च तत्सुतत्वम् यथाह हरिवं० ३ अ०।

"प्रजाः सृजेति व्यादिष्टः पूर्वं दक्षः स्वयम्भुवा। यथा सर्वज्ञं भूतानि तथा शृणु महीपते!। मनसा चैव भूतानि पूर्वमेवाससृजत् प्रभुः। ऋषीन् देवान् सगन्धर्वानसुरान्य राक्षसान्"। २दक्षादिषु तत्कथा "दक्षस्य सुता दक्षा विवर्द्धविषयः प्रजाः। समागता महाबीर्या नारदस्यानुशाच ह। वालिशा यत यूयं वै नाशा जानीथ वै भुवः। प्रमाणं सृष्टुकामा वै प्रजाः प्राचेतसात्मजाः। अन्तरूर्द्धमधश्चैव कथं सृक्ष्यथ वै प्रजाः। ते तु तद्वचनं श्रुत्वा प्रयाताः सर्वतोदिशः। अद्यापि न निवर्त्तन्ते समुद्रेभ्य इवापगाः। दक्षश्चैव्य नष्टेषु दक्षः प्राचेतसः पुनः। वैरण्यामेव पुत्राणां सहस्रमसृजत् प्रभुः। विवर्द्धविषयस्तु शबलाश्वाः प्रजाक्षया। पूर्वोक्तं वचनं तात! नारदेनैव चोदिताः। अन्योन्यमूचुस्ते सर्वे सम्यगाह महामुनिः। ज्ञातव्यं पदवीं ज्ञातुं गन्तव्यं नात्र संशयः। ज्ञात्वा प्रमाणं पृथ्व्याश्च सृक्ष्यामश्चे प्रजाः। एकाग्राः सुस्थमनसो यथावदनुपूर्वशः। तेऽपि तेनैव मार्गेण प्रयाताः सर्वतो दिशम्। अद्यापि न निवर्त्तन्ते समुद्रेभ्य इवापगाः। नष्टेषु शबलाश्वेषु दक्षः क्रुद्धोऽब्रवीद्वचः। नारदं नाशमेहीति गर्भवासं वसेति च। तदा प्रभृति वै भ्राता भ्रातरन्वेषते नृप!। प्रयातो नश्यति क्षिप्रं तच्च कार्यं विपश्चिता। तांश्चैव नष्टान् विज्ञाय पुत्रान् दक्षः

प्रजापतिः। यदि ततोऽहजत् कन्यां वैरखाभिति न श्रुतम्"।

२क्षत्रियादौच स्त्री "तमोऽपहं दक्षसुता ददावमुः" रघुः।

**दक्षाध्वरध्वंसक** दक्षस्याध्वरं ध्वंसयति ध्वंस-णिच्-ण्वुल्। १शिवे २वीरभद्रे च दक्षाध्वरनाशकादयोऽस्यत्र।

**दक्षाय्य** पु० दक्ष-आय्य। १गरुडे २स्मृप्रभेदे च उणादिवृत्तौ मि०को०। दक्ष-उद्यौ अन्तर्भूतण्यर्थे ण्यत्। २वर्द्धके त्रि०। "मित्रो दक्षाय्यो अर्य्यमेवास्ति सोम!" ऋ०२।८२।२। "दक्षाय्यः सर्वेषां वर्द्धकः" भा०।

**दक्षिण** त्रि० दक्ष-इनन्। १परच्छन्दानुवर्त्तिनि पराभिप्रायानुवर्त्तिनि २सरले। ३दक्षभागस्थे च मेदि०। ४अवामे अपसव्ये देहभागभेदे (डाहिन) ख्याते भागे हेमच०। "एषु स्वनेकमहिलासु समरागो दक्षिणः कथितः" सा० द० उक्ते ५नायकभेदे यथा "ज्ञाता तिष्ठति कुन्तलेश्वरसुता वारोऽङ्गराजस्यदूतै रात्रिरियं जिता कमलया, देवी प्रासादाद्य च। इत्यन्तः पुरसुन्दरीः प्रति मया विज्ञाय विज्ञापिते देवेनाऽप्रतिपत्तिमूढमनसा स्थितं नाडिकाः"। स्वामेच्छया मेरुगिरितो विप्रकृष्टायां दृष्टिभि स्त्री ७वहर्त्तिनि त्रि०। व्यक्तदानाले दाने ८प्रतिष्ठायां स्त्री यज्ञाङ्गान्तदक्षिणानामनिरुक्तिः" श्रुत० ब्रा० २।२।२।२। "स एष यज्ञो हतो न ददत्ते। तं देवा दक्षिणाभिरदक्षयंस्तद्यदेनं दक्षिणाभिरदक्षयंस्तस्माद्दक्षिणा नाम तद्यदेनान्न यज्ञस्य हृतस्य व्यथते तदस्यैतद्दक्षिणाभिर्दक्षयत्यथो खल्वाहुरेष यज्ञो भवति तस्माद्दक्षिणा ददाति"। दक्षिणाविशेषनिरूपणं यथा देवी० दा० यथा

भविष्यपुराणे "यदत्तदक्षिणं दानं व्रतञ्चैव सुरोत्तम!। विफलं तद्विजानीयाद्यज्ञमनीव हुतं हविः"। यद्दक्षिणत्वात् "श्रद्धायुक्तः शुचिर्दान्तो दानं दद्यात् सदक्षिणम्। यदक्षिणन्तु यद्दानं तत् सर्वं निष्फलं भवेत्"। मैत्रायणीयपरिशिष्टम् "दक्षिणाहीने यज्ञानां अश्रद्धया ददाति न त्वेवं यजेत्"। तथा श्रुतयस्तुतिः "तस्माद्दक्षिणं हविः स्यादिति"। भविष्योत्तरे "कार्य्यं यद्दीयते किञ्चित्तत्तुष्यमग्र्यं सुखावहम्। यज्ञमध्यन्तु दोषाय भवतीह परत्र च। तस्मात्र दक्षिणाहीनं विधानविकलं न च। देयं दानं मघोराज! इमयफलकाङ्क्षया। अन्यथा दीयमानं तदपकाराय केवलम्। प्रत्यवायार्थहानिर्न च तत् फलदं भवेत्"। आह भगवान् व्यासः "सुवर्णं परमं दानं सुवर्णं दक्षिणा परा। सर्वेषामेव दानानां सुवर्णं दक्षिणेष्यते।" एतच्च, विशेषविहितगोवस्त्रादिदक्षिणकदानवर्जं सामान्यविहितदक्षिणेषु दानेषु व्यवतिष्ठते तत्रापि परा श्रेष्ठतमेति प्राशस्त्यं दर्शयति न त्वन्यां दक्षिणां निराचष्टे आनन्त्यार्थत्वाद्दक्षिणायाः सुवर्णस्य प्रकृतत्वात् सर्वदानेषु सुवर्णं दक्षिणेतिवचनार्थः, अन्यदपि पुरुषसंस्कारोपयिकं तण्डुलादिकं दक्षिणार्थेन योज्यं यत्तु श्रूयते "अन्येषाञ्चैव दानानां सुवर्णं दक्षिणा स्मृता। सुवर्णे दीयमाने तु रजतं दक्षिणेष्यते" इति तदेतच्छ्रौतस्मार्त्तं परित्यज्य श्रद्धातव्यम्। "सुवर्णं रजतं ताम्रं तण्डुला धान्यमेव च। नित्यश्राद्धं देवपूजा सर्वमेव सदक्षिणम्"। स्कन्दपुराणे। "देवद्रव्यतृतीयांशं दक्षिणां परिकल्पयेत्। अनुक्तदक्षिणे दाने दशांशं वापि शक्तितः"। तुलापुरुषादिदानानि अधिकृत्य लिङ्गपुराणे "दक्षिणा च यतश्चार्द्धं तदर्द्धं वा प्रदापयेत्। ऋत्विजाञ्चैव सर्वेषां दश निष्कान् प्रदापयेत्"। भविष्योत्तरे "श्रेयं निष्कशतं पार्थ! दानेषु विधिरुत्तमः। मध्यमस्तु तदर्द्धेन तदर्द्धेनाधमः स्मृतः। मेरुप्रस्थे कालपुरुषे तथान्येषु महत्स्वपि। एवं हेमे तथा हे च धेनोः कृष्णाजिनस्य च। अयज्ञस्यापि क्षुद्रोऽयं पञ्चसौवर्णिको विधिः। अतोऽल्पेन यो दद्यान्महादानं नराधमः। प्रतिगृह्णाति या तस्य दुःखयोगावहं भवेत्"। जयाभिषेकसदाफले लिङ्गपुराणे "अष्टपलिपलोन्मानं दद्याद्वै दक्षिणां गुरोः। क्षौमवस्त्रञ्चैव सर्वेषां त्रिंशत्पलसुदाहृतम्। अध्येतृणां तदर्द्धेन द्वारपानां तदर्द्धतः"। एतेनान्यत्रापि, गुरोरर्द्धम्, ऋत्विजां तदर्द्धं, जापकानां तदर्द्धं द्वारपालानां तदर्द्धमिति दक्षिणाविभागोऽवगन्तव्यः।" अन्या अपि दक्षिणाः तत्र तत्रोक्ता वेदितव्याः। यज्ञभेदे दक्षिणाभेदः कात्या० श्रौ०सू० उक्तः कातीयग्रन्थे दर्शितप्रायः विशेषतोऽवगन्तव्यः। सर्वत्र दक्षिणाया अदाने कालविलम्बभेदे च दोषा दक्षिणानामनिरुक्तिसहिता उक्ता यथा। "कार्त्तिक्यां पूर्णिमायान्तु रासे राधामहोत्सवे। यदि मूर्छा दक्षिणायाः कृष्णस्य तेन दक्षिणा"। यज्ञो दक्षिणया यातं प्रत्नेण च फलेन च। कर्मिणां फलदात्री सेत्येवं वेदविदो विदुः। कृत्वा कर्म च तत्रैव तूर्णं दद्याच्च दक्षिणाम्। तत् कर्मफलमाप्नोति वेदैरुक्तमिदं हरे!।

कर्त्तां कर्मणि पूर्णे च तत्क्षणं यदि दक्षिणाम्। न दद्याद्ब्राह्मणेभ्यश्च दैवेनात्मानतोऽथ वा। सङ्कल्पे समतीते तु द्विगुणा सा भवेद्ध्रुवम्। एकरात्रे व्यतीते तु भवेत् शतगुणा च सा। त्रिरात्रे तद्गुणा सप्ताहे द्विगुणा ततः। मासे लक्षगुणा प्रोक्ता ब्राह्मणानाञ्च वर्द्धते। संवत्सरे व्यतीते तु सा त्रिकोटीगुणा भवेत्। कर्म तद्यजमानानां सर्वञ्च निष्फलं भवेत्। स च ब्रह्मस्वापहारी न कर्मार्होऽशुचिर्नरः। दरिद्रो व्याधियुक्तश्च तेन पापेन पातकी। तद्दृष्ट्वादुयाति लक्ष्मीश्च शापं दत्त्वा सुदारुणम्। पितरो नैव गृह्णन्ति तद्दत्तं श्राद्धतर्पणम्। एवं सुराश्च तत्पूजां तद्दत्ताग्निराहुतिम्। दाता न दीयते दानं गृहीता च न याचते। उभौ तौ नरकं यातश्छिन्नरज्जुर्यथा घटः। नार्पयेद्यजमानाय दद्याच्चित्तेषु च दक्षिणाम्। भवेद्ब्रह्म स्वापहारी कुम्भीपाकं व्रजेद्ध्रुवम्। वर्षलक्षं वसेत्तत्र यमदूतेन ताड़ितः। ततो भवेत् स चाण्डालो व्याधियुक्तो दरिद्रकः। पातयेत् पुरुषान् सप्त पूर्वांश्च सप्तजन्मतः" ब्रह्मवैवर्त्ते प्रकृतिखण्डे। प्राप्तिरूपदक्षिणाद्रव्यग्रहणे मन्त्रभेदेनाभिमन्त्रणम् अप्राप्तिद्रव्यग्रहणे तु अभिमर्शनमात्रम् यथाह व्यास० औ० सू० ५।१२।१५। "क इदं कस्मा अदात् कामायादात् कामो दाता कामः प्रतिग्रहीता कामं समुद्रमाविश कामेन त्वा प्रतिगृह्णामि कामैतत्ते एष योनिः कामाय त्वेति प्राप्तिद्रव्यं प्रतिगृह्णात्यित्यतीतासु मन्त्रयेत् प्राप्ति"। सू० "विहारदेशमतीत्य नीतेषु दक्षिणाद्रव्येषु तन्मध्ये यत् प्राप्तिद्रव्यं तदेतेनानुमन्त्रयते" नारा०। "अभिमृशेदप्राप्ति" सू० "तन्मध्ये यदप्राप्ति तदभिमृशेत् नारा०। सा च यज्ञपत्नी तथाह "दक्षिणा यज्ञपत्नी च दीक्षा सर्वत्र पूजिता। यया विनापि विप्रस्य सर्वं कर्म तु निष्फलम्" भाग० २८।२।२८। १० नायिकाभेदे स्त्री यथा "या गौरवं भयं प्रेम सद्भावं पूर्वनायके। न मुञ्चत्यन्यसङ्गेपि सा ज्ञेया दक्षिणा बुधैः" इति विष्णुप० टीकायां स्वामी" ११विष्णुपु०। "अक्रूरः मेघजो दक्षो दक्षिणः दक्षिणाम्बरः" विष्णुस०। अस्य दिग्देशादिव्यवस्थायामेव सर्वनामता तेन दक्षिणे गायकाः अन्यत्र दक्षिणाः(कृष्णाः)इत्येव। "दिशः सपत्नी भव दक्षिणस्याः" रघुः "दक्षिणोयमयनस्य षड्क्रियः षड्क्रियापवनमग्र्य द्विजव्रजम्। दक्षिणः क्षितिपतिर्व्यभिश्रयद्दक्षिणाः सदसि राजसूयकोः" माघः। अन्नतादौ दक्षिणकर्मस्वर्गनं पराशरो विधत्ते। "क्षुते निष्ठीवने चैव दन्तोच्छिष्टे तथाऽनृते। पतितानाञ्च सम्भाषे दक्षिणं श्रवणं स्मृतेत्। ब्रह्मा विष्णुश्च रुद्रश्च सोमः सूर्योऽनलस्तथा। ते सर्वे चापि तिष्ठन्ति कर्णे विप्रस्य दक्षिणे"। १२आचारभेदे दक्षिणाचारशब्दे दृश्यम्। १३दक्षिणाग्नौ पु० "दक्षिणपश्चिमे दक्षिणम् आश्व० श्रौ० ४।२।३।

**दक्षिणकालिका** स्त्री दक्षिणा कालिका। १शिवहृदये न्यस्तदक्षिणपादायां कालिकायाम्।

**दक्षिणगोल** पु० कर्म०। विषुवरेखातो दक्षिणस्थिते तुलादिराशिषट्के यथाह सि० शि० "सोम्यगोलो भदलं यदाद्यं वाम्योऽपरं सायनभागभानोः" दक्षिणायनशब्दे रङ्गनाथ व्याख्या दृश्या।

**दक्षिणतस्** अव्य० दक्षिणा-तसिल् सर्वनाम्नोऽत्तिमात्रे पुंवद्भावः ।१दक्षिणस्यां दिशि। २दक्षिणभागे च "पितृभ्यो बलिमेषन्तु सर्वदक्षिणतो हरेत्" मनुः।

**दक्षिणतस्कपर्द** त्रि० दक्षिणतः शिरसो दक्षिणभागे कपर्दश्चूड़ा यस्य। दक्षिणभागचूड़ायुक्ते "शिवश्चो मा दक्षिणतस्कपर्दाः" यजु० ७।२२।२। चूड़ाकर्मणि दक्षिणतो वपनानामिति स्मर्य्यते" भा०। [दक्षिणस्यतीरे।

**दक्षिणतीर** न० कर्म० तीरस्य तारभावः। नद्यादे

**दक्षिणत्रा** स्त्री दक्षिण+त्रेदे नि० त्रा। दक्षिणभागादौ। "धिष्व वज्रं दक्षिण त्रा दक्षिणतोभिः" ऋ० ६।२८।६।

**दक्षिणदिक्** स्त्री दक्षिणा दिक्। स्वापेक्षया मेरुतो विप्रकृष्टदिशि। तदधिपः भौमः यथाह

"सूर्यः सोमः क्षमापुत्रः सैंहिकेयः शनिः शशी। सौम्यस्त्रिदशमन्त्री च प्राच्यादिदिगधीश्वराः" ज्यो०त०। तत्र वह्निनौ यत्नौ भास्करभूमिजौ यथाह तत्रैव "प्राच्यां भौम्यगुराचार्यौ याम्यां भास्करभूमिजौ। प्रत्यक् सौरिरुदीच्यां तु सितेन्दू दिग्बलान्वितौ" तद्दिक्पतिः शक्रः "इन्द्रो वह्निः पितृपतिर्नैर्ऋतो वरुणो मरुत्। कुबेर ईशः पतयः पूर्वादीनां दिशां क्रमात्" इत्युक्तेः। तद्दिग्बलिनो राशयश्च अजवृषसृमसिंहाः। "ऐन्द्रे मानुपराशयस्तु पशवो याम्ये सवीर्याश्चिवारुण्यां बलयुक् तथैव वणिनः पानीयजाधोत्तरे" ज्यो० त० उक्तेः। तद्दिक्पतिराशयः वृषकन्यामकरराशयः यथाह ज्यो० त० "प्रागादिकक्रमा नाथा यथासंख्यं

प्रदक्षिणम् । मेषाद्याराशयो ये व्याख्याराढत्या परिभ्रमात्" ।। तद्दिङ्मण्डलनक्षत्राणि च मयादिसप्तकम् । "अश्विकाद्यास्तु पूर्वादौ सप्त सप्तोदिताः क्रमात्" ज्यो० त० उक्तेः । दक्षिणदिग्भागस्था देशाश्च कूर्म्मविभागशब्दे ६०सं० १४अ० उक्ताः "अथ दक्षिणेन सह्यं" इत्युपक्रमे दर्शिताः ।

**दक्षिणपश्चात्** अव्य० दक्षिणस्याः परायाश्च दिशः अन्तराला दिक् बहु० आति परस्य पश्चादेशः । प्रथमापञ्चमी सप्तम्यर्थवृत्तौ दक्षिणपश्चिमाशब्दार्थे नैर्ऋतकोणे ।

**दक्षिणपश्चिमा** स्त्री दक्षिणस्याः पश्चिमाया दिशोऽन्तराला-दिक् । "दिङ्नामान्यन्तराले" पा० बहु० ङीप् । १नैर्ऋते कोणे । "अभ्युद्धरतमार्द्रञ्च ! दिशं दक्षिण पश्चिमाम्" भा० मश्वाप्र० १अ० । २तद्देशवर्त्तिनि त्रि० "दक्षिणपश्चिमे दक्षिणम्" आश्व० श्रौ० १।२।१२ ।

**दक्षिणपूर्व्वा** स्त्री दक्षिणस्याः पूर्वस्या दिशोऽन्तराला दिक् बहु० ङीप् । १अग्निकोणे २तद्दिग्भागस्थे त्रि० "दक्षिणपूर्वे उद्धृतान् आहवनीयं निदधाति" आश्व० श्रौ० ४।२।१

**दक्षिणमानस** न० मयास्थिते तीर्थभेदे "तस्य दक्षिणभागे तु तीर्थं दक्षिणमानसम् । दक्षिणे मानसे चैव तीर्थत्वमुदाहृतम्" वायुपु० गयामा० ।

**दक्षिणमार्ग** पु० १तन्त्रोक्ते आचारभेदे २पितृयाने मार्गभेदे "निर्विण्णोऽहं दक्षिणमार्गेण गतागतलक्षणेन" श्वेताश्वतरोपनिषद् भाष्यम् । [ लक्षणाम्बुधौ ।

**दक्षिणसमुद्र** पु० कर्म्म० । दक्षिणदिक्स्थे समुद्रे

**दक्षिणस्थ** त्रि० दक्षिणे भागे तिष्ठति स्था-क ७त० । १दक्षिणभागस्थिते २सारथौ पु० अमरः ।

**दक्षिणा** अव्य० दक्षिण+प्रथमापञ्चमीसप्तम्यर्थे आच् । प्रथमाद्यर्थवृत्तिके दक्षिणाशब्दार्थे दक्षिणा वसति आगच्छति रमणीयं वा "अयं दक्षिणा विश्वकर्मा" यजु० २३।५५

**दक्षिणांसत्रयिन्** पु० दक्षिणांसे दक्षस्कन्धे त्रयोऽस्त्राश्च इनि । दक्षिणस्कन्धस्थत्रययुक्ते "पितृस्वभिगमनात् दक्षिणांसत्रयी भवेत् । तेनापि निष्कृतिः कार्य्या अजादानेन शङ्खतः" पराशरः ।

**दक्षिणाग्नि** पु० दक्षिणोऽग्निः । अन्वाहार्य्यपचनाख्ये यज्ञाग्निमध्येऽग्निभेदे । "अन्वाहार्य्यं दक्षिणाग्नावधिश्रयति" कात्या० श्रौ० २।५।२७ "हीनं यज्ञस्यान्वाहरतीत्यन्वाहार्य्यः अध्वर्युरन्वाहार्यसंज्ञकं दक्षिणार्थं तण्डुलरूपमोदनं दक्षिणाग्नावधिश्रयति चतुर्णामृत्विजां तृप्तिर्भवेत्ता यस्माच्यते तत्परिमाणं ततोऽधिकं वान्वाहार्य्यमोदनं कुर्य्यात्" कर्कः ।

"उत्सर्गेऽपराह्णे गार्हपत्यं प्रज्वाल्य दक्षिणाग्निमानीय विट्कुलादित्तवतो वैश्ययोनेर्य इच्छेत् प्रियमाणं वा प्रज्वाल्यारणिमन्थं वा मथित्वा गार्हपत्यादाहवनीयं ज्वलन्तमुद्धरेत्" आश्व० श्रौ० २।२।१ "उत्सर्गे अजस्रोत्सर्गे अग्निहोत्रहोमार्थं विहरेत् नाजस्रेषु । होमस्यजस्रेष्वपि भवतीत्युक्तम्, एवं स्थिते विहरणसहितमग्निहोत्रहोमप्रयोगं वक्तुकाम उत्सर्गं इत्युक्तवान् । अतापराह्णशब्देन अङ्गुष्ठपर्वभागो गृह्यते । विहरणकाले गार्हपत्यं प्रादुष्कृत्य प्रज्वाल्य च दक्षिणाग्निं वैश्यगृहादानयेत् । चतुर्णां वर्णानामन्यतमस्य द्रव्यवतो वा गृहात्, गार्हपत्याद्वा । धार्य्यश्चेत् प्रज्वलयेत् । काले काले यदि निर्मन्थ्यः तदा मन्थेत् । एषां प्रकाराणामुत्पत्तिप्रयोगाद्यवस्था । तेषामन्यतमप्रकारेण दक्षिणाग्निं साधयित्वा ततो गार्हपत्यात् ज्वलन्तमग्निमाहवनीयार्थमुद्धरेत् पात्रान्तरेण पृथक् कुर्य्यादित्यर्थः" नारा० । तस्य स्थापनञ्च नैर्ऋतकोणे "दक्षिणपश्चिमे दक्षिणम्" आश्व० श्रौ० ४।१२ । उक्तेः ।

**दक्षिणाय** पु० दक्षिणस्यामयमस्य । दक्षिणदिग्भागस्थार्थे कुबादौ "अथ यान्यमून्युदीचीनान्यक्षाणि भवन्ति दक्षिणाय्याणि तानि करोति पितृदैवत्यमेवैनत्तत्करोति" शत० ब्रा० १२।५।१।१२ । "उदगयात् दक्षिणाय्यात् करोतीति श्रुतेः" कात्या० श्रौ० ४।१०।१५ ।

**दक्षिणाचल** पु० दक्षिणस्थितोऽचलः । मलयपर्वते हेमच० दक्षिणपर्वतादयोऽप्यत्र ।

**दक्षिणाचार** पु० कर्म० १तन्त्रोक्ते आचारभेदे । "स्वधर्मनिरतो भूत्वा पञ्चतत्त्वेन पूजयेत् । स एव दक्षिणाचारः शिवो भूत्वा शिवं यजेत्" आचारभेदतत्त्वम् । दृश्यन्तु तत्र भेदः मद्यस्थाने विजयारसः । "चतुर्मकाराः सन्त्येव पञ्चमो विजयारसः" इत्युक्तेः । दक्षिणा दक्षिणस्यां चारो गतिरस्य । २दक्षिणदिग्गतिशालिनि त्रि० । "दक्षिणां दक्षिणाचारो दिशं वेनाजयत् प्रभुः" भा० वि० ५अ० ।

**दक्षिणाज्योतिस्** पु० दक्षिणा दक्षिणस्यां ज्योतिरस्य । पञ्चौदने यागभेदे । "योऽजं पञ्चौदनं दक्षिणाज्योतिषं ददाति" अथ० ९।५।२२।२३।२४।२५।६ । तद्दानफलसङ्गम् ।

**दक्षिणात्** अव्य० दक्षिण+प्रथमापञ्चमीसप्तम्यर्थे क्याति। प्रथमाद्यर्थत्रयो दक्षिणशब्दार्थे दक्षिणात् रमणीयम् आगच्छति वसति वा।

**दक्षिणान्तिका** स्त्री "षड्विंशमेऽष्टौ समे कलासाश्च समे स्युर्नोनिरन्तराः। न समात्र परान्विता कला वैतालीयेऽन्ते रलौ गुरुः" इत्युपक्रमे "तृतीययुग्दक्षिणान्तिका समसमपादेषु द्वितीयलः" छं० र० उक्तलक्षणे वैतालीयभेदे मात्राष्टत्तभेदे। "समसमपादेषु द्वितीयलः यदि तृतीयवत् द्वितीयमात्रातृतीयमात्राभ्यामेको गुरुर्वेत् शेषं वैतालीयवत् तदा दक्षिणान्तिका नाम छन्द इत्यर्थः।

**दक्षिणापथ** पु० दक्षिणा (आजन्मः) पन्थाः कच् समा०। देशभेदे तद्देशवर्त्मनि भा० व० ६१ अ० यथा

"एते गच्छन्ति बहवः पन्थानो दक्षिणापथम्। अवन्तीमुज्जयिनञ्च समतिक्रम्य पर्वतम्। एष विन्ध्यो महाशैलः पयोष्णी च सरिद्वरा। आश्रमाश्च महर्षीणां वन्यमूलफलान्विताः। एष पन्था विदर्भाणामाषभी गच्छति कोशलाम्। अतः परञ्च देशोऽयं दक्षिणे दक्षिणापथः"। "दक्षिणापथजानान्च सर्वे नरवराश्च ये। गुहाः पुलिन्दाः शबराश्च मूका महद्भिः सह" भा० शा० २०७ अ०। "युयुधे पाण्डुराजेन दिवमं नलकूबरजः। तं जित्वा स महाबाहुः प्रययौ दक्षिणापथम्" भा० स० ३० अ०। "तथापरे जनपदा दक्षिणापथवासिनः। पाण्ड्राश्च केरलाश्चैव चोलाः कुल्यास्तथैव च। सेतुका सह्यकाश्चैव कृष्णवारवासिकाः। नवराष्ट्रा माहिषकाः कलिङ्गाश्चैव सर्वशः। कालेराश्च सहैषीकैराटव्याः शबरास्तथा। पुलिन्दा विन्ध्यमूलिका वैदर्भाः दण्डकैः सह। कुलीयाश्च सिराश्चाश्च रूपसास्तापसैः सह। तथा तैत्तिरकाश्चैव सर्वे कारस्करास्तथा। नासिक्याश्चाश्च ये चान्ये ये चैवान्तरनर्मदाः। भोजकच्छाः सभाहेयाः सह सारस्वतैस्तथा। कच्छीयाश्च सुराष्ट्राश्च आनर्ताश्चार्बुदैः सह" सभापु०। २दक्षिणास्थितमार्गमात्रे पु०। "ऋणाजिनानि धुन्वन्तः स्वयमेव दक्षिणापथं यान्ति" आश्व० श्रौ० ५।१२।१२। दक्षिणापथोऽस्यास्त्यस्य स्वामित्वेन आवासत्वेन सम्बन्धत्वेन वा ठन्। दक्षिणापथिक तद्देशवासिनि तत्सम्बन्धे च। "एते चान्ये च बहवो दक्षिणापथिकान् पथः" हरिवं० ११० अ०।

**दक्षिणापरा** स्त्री दक्षिणाया अपराया दिशोऽन्तराला दिक् नैर्ऋतकोणे "दक्षिणपूर्वस्यां दिशि दक्षिणपरस्यां वा" आश्व० श्रौ० ४।१।६। २तत्संस्थिते त्रि० "पुनर्दक्षिणापरेऽध्वर्यु: पूर्वोत्तरे यजमानः" कात्या० श्रौ० ८।५।१६। दक्षिणायां परः। ३यत्पूर्वं देहव्यदानरूपदक्षिणा तत्परे त्रि०।

**दक्षिणाप्रवण** त्रि० दक्षिणा (आजन्मः) दक्षिणस्यां प्रवणं निम्नम्। उत्तरापेक्षया दक्षिणतो निम्ने आद्यादिदेशे "दक्षिणाप्रवणम्" कात्या० श्रौ० २२।३।६। "दक्षिणाप्रवणं देवयजनं भवति" कर्कः "शुचिदेशं विविक्तं च गोमयेनोपलेपयेत्। दक्षिणाप्रवणं चैव प्रयत्नेनोपपादयेत्" मनुः। "दक्षणाप्लवनमथत्र परिस्तृते शुचौ देशे दक्षिणाप्लवने तथा" याज्ञ० आद्यदेशोक्तौ।

**दक्षिणाप्रष्टि** पु० ध्रुवांपेक्षया प्रकृष्टं देशमश्नोति प्र+अश्—क्तिच् पृषो० दक्षिणा दक्षिणभागे प्रष्टिः वाह्याः। ध्रुवमध्ये दक्षिणस्थे पृष्टाङ्गे प्रकृष्टदेशस्थे वा अश्वभेदे "दक्षिणाप्रष्टिं जयो यन्ति इति" कात्या० श्रौ० १४।३।८। "रथे तृतीयमश्वं युनक्ति ध्रुवांपेक्षया प्रकृष्टं देशमश्नोतीति प्रष्टिर्वाहो युग्यः" सं० व्या०। दक्षिणस्यां स एव इति विग्रहे २दक्षिणस्थे प्रष्टिसदृशेऽश्वे च। "अथ दक्षिणा प्रष्टिं युनक्ति सव्यप्रष्टिं वा" शत० ब्रा० ५।१।३।८। "प्रष्टिर्नाम पादत्रयोपेतो भोजनपात्रादिकाधारः" (तेषाद) भा०।

**दक्षिणाबन्ध** पु० दक्षिणायां बन्धः कृतबन्धः। ब्रह्मचर्य्यादीनां दक्षिणानुबन्धभेदे यथा "दक्षिणाबन्धो नाम ब्रह्मचर्य्यब्रह्मचारिभिक्षुवैखानसानां कामभोक्तोपकृतचेतसामभिमानपूर्विका दक्षिणां प्रयच्छतां दक्षिणाबन्ध इत्युच्यते" तत्त्वसारः।

**दक्षिणाभिमुख** त्रि० दक्षिणा दक्षिणस्यामभिमुखमस्य। दक्षिणदिक्सुखे। "दक्षिणाभिमुखो रात्रौ सन्ध्यायोश्च यथा दिवा" व्याडि० त०। दक्षिणासुखादयोऽव्यय। "आयुष्यं प्राङ्मुखो भुङ्क्ते यशस्यं दक्षिणासुखः"। "उदङ्मुखैव विधिना निर्वपेत् दक्षिणासुखः" मनुः। "यद्वेष्टितशिरा भुङ्क्ते यद्वा भुङ्क्ते दक्षिणासुखः" मनुना आद्धीयविप्रस्य तथा भोजनं निषिद्धम्। दक्षिणा दक्षिणस्यां सुखम्। दक्षिणदिक्स्थे सुखे न०। "अमावास्यां गयाश्राद्धं दक्षिणासुखभोजनम्। न जीवत्पितृकः कुर्य्यात् कृते च पितृहा भवेत्" ति० त०।

**दक्षिणामूर्त्ति(क)** पु० दक्षिणा दक्षकृता मूर्त्तिरस्य वा कप् संज्ञात्वात् न ह्रस्वत्। शिवमूर्त्तिभेदे तद्ध्यानादिकं

यथा "प्रोद्यच्छ्मश्रुशावटङ्कुमतले योगासनस्थं प्रभुं प्रत्यक्-तत्त्वभुतृक्षुभिः प्रतिदिशं प्रोद्दीप्तमाघानम्। सद्यां तर्कमयीं दधानममलं कर्पूरगौरं शिवं क्षुद्यन्तः कलये स्फुरन्मनिशं श्रीदक्षिणामूर्तिकम्"। "नित्यशो दक्षिणामूर्त्तिं ध्यायेत् साधकसत्तमः। शास्त्रव्याख्यानसामर्थ्यं लभते वत्सरान्तरे" तन्त्रान्तरादिकं तन्त्रे द्रष्टव्यम्। ध्यानान्तरं ध्यानशब्दे द्रष्टव्यम्।

**दक्षिणायन** न॰ दक्षिणा दक्षिणस्यां दक्षिणे गोले वायनं रवेः। रवेः स्वाधिष्ठितस्थानापेक्षया १दक्षिणदिग्गमने २दक्षिणगोलरूपतत्तुल्यादिराशिषट्के गमने तदुपलक्षिते षण्मासात्मके ३कालभेदे च तत्प्रतिपाद्यग्रन्थे "षण्मासाभ्यामयनं हे अयने वर्षसंज्ञिते। कर्कटादिस्थिते भानौ दक्षिणायनमुच्यते" मनु॰ त॰ विष्णुपु॰। द्वितीयार्थे "दैवे रात्र्यहनी वर्षं प्रविभागस्तयोः पुनः। यद्रात्रौ शयनं रात्रिः स्यादुदक्षिणायनम्" मनुः। अयनशब्दे ३५३ पृ॰ उत्तरायणशब्दे ११०४ पृ॰ खगोलशब्दे च दक्षिणायनशब्दार्थस्योक्तप्रायत्वेऽपि दक्षिणायनव्यवस्थार्थमधिकमुच्यते यद्यपि चन्द्रस्यापि स्वाधिष्ठितस्थानापेक्षया दक्षिणस्यां दक्षिणगोले च गतिः सम्भवति तथापि सूर्यस्यैव गतिभेदे तदुपलक्षितकाले च दक्षिणायनशब्दव्यवहारः। "सौरेण द्युनिशोर्मानं षड्गीतिस्तानि च। अयनं विषुवं चैव संक्रान्तेः पुण्यकालता" सू॰ सि॰ अयनस्य सौरत्वोक्तेः "यान् मासान् दक्षिणा आदित्य एति यान् मासानुत्तरादित्य एति" वाजसनेयिनां षड्ग्निविद्यायां दक्षिणोत्तरमार्गयोः पाठात् "तस्मादादित्यः षण्मासान् दक्षिणेनैति षण्मासानुत्तरेणैतीति तैत्तिरीयश्रुतेश्चादित्यगतिसम्पन्नौ-त्वेनायनशब्दप्रवृत्तेश्च। तेनादित्यगतिनिष्पन्नत्वात्तस्य सौरत्वम्। उभयविधदक्षिणायनस्य किमवधिकस्य मानकं रात्रित्वं तदभिधीयते। तत्र "मेषादौ देवभागस्थो देवानां याति दर्शनम्। अन्यराशौ तुलादौ तु सूर्यस्तद्वन्मनुष्यगः" सू॰सि॰।

"अम्बुद्वीपलवणसमुद्रसन्धौ परिधिवृत्तं भूगोलमध्ये तत्समतलेषाकाशे वृत्तं विषुवद्वृत्तं तत्र क्रान्तिवृत्तं षड्भान्तरेण स्थानद्वये लग्नं तन्मेषतुलास्थानं प्रवहवायुना विषुवद्वृत्तमार्गे भ्रमति मेषस्थानात् ककादिस्थानं विषुवद्वृत्तावृर्ध्वगत्वंस्थानान्तरे उत्तरतः। मकरादिस्थानं विषुवद्वृत्तावृर्ध्वगत्वंस्थानान्तरे दक्षिणतः। तत् स्वस्थाने प्रवहवायुना भ्रमति। एवं क्रान्तिवृत्तप्रदेशाः स्वस्वस्थाने प्रवहवायुना भ्रमन्ति। तत्र मेषादौ देवभागस्थः "जम्बुद्वीपं च तत्रापि देवासुरविभागवदिति" पूर्वोक्तेः। तत्सम्बन्धा मेषादिकन्यान्ता राशय उत्तरगोलः। तत्रस्थः सूर्येन्द्रा मेषादौ मेषादिप्रदेशे देवानां मेरोरुत्तरावर्त्तिनां दर्शनं षण्मासानन्तरं प्रथमदर्शनं याति गच्छति प्राप्नोतीत्यर्थः विषुवद्वृत्तस्य तत्क्षितिजत्वात्। एवं दैत्यानां मेरोर्दक्षिणावर्तिनामित्यसुराणामित्युक्तमेवोक्तम्। तद्भागसञ्चरो दैत्यभागे सप्तद्वादिदक्षिणविभागस्थास्तुलादिमीनान्ता राशयो दक्षिणगोलस्तत्र सञ्चरो गमनं यस्मिंस्तादृशसूर्यस्तुलादिप्रदेशे तुलारादर्शनानन्तरं प्रथमदर्शनं प्राप्नोतीत्यर्थः तेषामपि विषुवद्वृत्तक्षितिजत्वात् रङ्गना॰। "देवासुरा विषुवति क्षितिजस्थं दिवाकरम्। पश्यन्त्यन्योन्यमेतेषां वामसव्ये दिनक्षपे" सू॰ सि॰। "विषुवति काले देवदैत्याः सूर्यं क्षितिजस्थं पश्यन्ति विषुवद्वृत्तस्य तयोः स्वस्थानाद्गोलमध्यस्थत्वेन क्षितिजत्वात्। एतेषां देवदैत्यानामन्योन्यं परस्परं ये वामसव्ये अपसव्यसव्ये ते क्रमेण दिनक्षपे दिवसरात्री भवतः। अयं भावः देवानां भूमेरुत्तरभागः स्वकीयत्वात् सव्यमतो दैत्यानामपसव्यं स्वकीयत्वाभावात्। एवं दैत्यानां भूमेर्दक्षिणभागः स्वकीयत्वात् सव्यं देवानां स्वकीयत्वाभावादपसव्यमतो दैत्यानां वामसव्यमावुत्तरदक्षिणगोलौ देवानां क्रमेण दिनरात्री। देवानां वामसव्यभागौ दक्षिणोत्तरगोलौ दैत्यानां दिनरात्री। अन्यथाऽन्योन्यं वामसव्ये दृश्यनयोः सङ्गतार्थानुपपत्तेः। अतएव पूर्वं मेषादावित्यादुक्तमिति" रङ्गना॰। अथ पूर्वश्लोकोत्तरार्धस्य सन्दिग्धत्वशङ्कया दिनपूर्वापरार्धकथनच्छलेन तदर्थं श्लोकाभ्यां विशदयति।

"मेषादावुदितः सूर्यस्त्रीन् राशीनुदगुत्तरम्। सञ्चरन् प्रागर्धमध्यं पूरयेत्स्वस्वासिनाम्। ककादीन् सञ्चरंस्तद्वदक्षः पश्चार्धमेव सः। तुलादींस्त्रीनृक्षगादींस्तद्वदेव सुरद्विषाम्" सू॰ सि॰।

"मेषादौ विषुवद्वृत्तस्यक्रान्तिवृत्तभागे रेवत्यास्य उदितो दर्शनतां प्राप्तः सूर्य उत्तरं यथोत्तरं क्रमेणेति यावत् त्रीन् राशीनुदगुत्तरभागस्थान् मेषवृषमिथुनान् सञ्चरन्नतिक्रामन् सन् मेरुस्थानां देवानां प्रागर्धमध्यं प्रथमं दिनस्यार्धं पूरयेत् पूर्णं करोतित्यर्थः। मिथुनान्ते सूर्ये मेरुस्थानां मध्याह्नं स्यादिति फलितार्थः। ककादीन् त्रीन्

राशीन् कर्कसिंहकन्यास्तद्वत् क्रमेणेत्यर्थः। अतिक्रामन् वन् स सूर्यो दिनस्य षष्ठ्यर्धमपरदलम्। एवकारोऽन्ययोगव्यवच्छेदार्थः। पूरयेत्। कन्यान्ते सूर्ये मेरुस्थानां सूर्यास्तो भवतीति फलितार्थः। अथ दैत्यानामाह। तुलादीनिति। सुरद्विषां मेरोर्दक्षिणापवर्त्तिनां दैत्यानामित्यर्थः। तुलादींस्त्रीन् राशींस्तुलाद्यधनुराख्यान् मृगादींस्त्रीन् राशीन् मकरकुम्भमीनांस्तद्वत् क्रमेणातिक्रामन् सूर्यः। चकारस्तुलाद्यादिक्रमेण पूर्वापरार्धमित्यर्थकः। एवकार उक्तातिरिक्तव्यवच्छेदार्थः। दिनं पूरयतीत्यर्थः। धनुरन्ते सूर्ये दैत्यानां मध्याह्नभोगान्ते सूर्ये सूर्यास्तो भवतीति फलितार्थः" रङ्गना०।

"अतो दिनक्षपे तेषामन्योन्यं हि विपर्ययात्। अहोरात्रप्रमाणं च भानोर्भगणपूरणात्। दिनक्षपार्धमेतेषामयनान्ते विपर्ययात्। उपर्यात्मानमन्योन्यं कल्पयन्ति सुरासुराः" सू० सि०।

"अतेषां देवदैत्यानामयनान्ते ऽयनसन्धौ विपर्ययाद्व्यत्यासाद्दिनक्षपार्धं दिनार्धं रात्र्यर्धं च भवति। यत्र देवानां मध्याह्नं रात्र्यर्धं च तत्र दैत्यानां क्रमेण रात्र्यर्धमध्याह्ने यत्र च दैत्यानां मध्याह्नरात्र्यर्धं तत्र देवानां क्रमेण रात्र्यर्धमध्याह्ने इति फलितार्थः। अत्र हेतुमाह। उपरीति। देवदैत्या मेरोरुत्तरदक्षिणाग्रवर्तिनोऽन्योन्यमात्मानं स्वस्वपरिभागे ऊर्ध्वभागे कल्पयन्त्यूर्ध्वीकुर्वन्ति। वस्तुतो भूमेर्गोलत्वेन सर्वत्र तुल्यत्वान्मेरावूर्ध्वाधोभागयोरनुपपत्तेः। तथा च देवा दैत्यापेक्षयोर्ध्वस्थत्वं मन्यमाना दैत्यानधःस्थानङ्गीकुर्वन्ति। दैत्याश्च देवस्थानापेक्षयोर्ध्वस्थं मन्यमाना देवानधः कुर्वन्तीति तात्पर्यार्थः। एवं च देवदैत्ययोर्विपरीतावस्थानाद्दिनरात्र्योर्वैपरीत्यं युक्तमेवेति भावः" रङ्गना०।

ततश्च उत्तरगोलरूपमेषादिराशिषट्कस्थरविकालस्य देवानां दिनत्वे दक्षिणगोलरूपतुलादिराशिषट्कस्थरविकालस्य रात्रित्वे स्थितेऽपि मकरादिकानां देवानां दिनरात्रिकालनोक्तिः औदयिकार्कमौढ्योपयोगिनी रवेः खार्धिष्ठितस्थानापेक्षया दक्षिणोत्तरतो गत्या वा तथा व्यवह्रियते इति बोध्यम् अतएव सि० शि० उक्तं यथा

"दिनं दिनेशस्य यतोऽत्र दर्शने तमो तमोऽन्तुरदर्शने क्षितेः। कृष्टतामानां द्युनिशं यथा स्थितं तथा पितॄणां मणिपृष्ठवासिनाम्"। इदानीं संहितोक्तस्वाभिप्रायमाह। "दिनं सुराणामयनं यदुत्तरं निशेतरत् सांहितिकैः प्रकीर्तितम्। दिनोन्मुखेऽर्के दिनमेव तन्मतं निशा तथा तत्फलकीर्त्तनाय तत्। इत्थानमारोहति यैः क्रमेण तैरेव दक्षैरवरोहतीनः। यत्रैव दृष्टः प्रथमं स दैवैस्तत्रैव तिष्ठन् न विलोक्यते किम्?"। "सांहितिकानां न चेदयमभिप्रायस्तर्हि मेषादेर्दक्षं मिथुनान्तं यावद्यै र्दक्षैरेवारोहणं कुर्वद्भिरपि दैवैर्दक्षैरेव पुनरवरोहणं कुर्वन् किं न दृश्यत इति" प्रमिता०।

एतदभिप्रायेणैव श्रीपत्युक्तं यथा

"मृगादिराशित्रयभानुभोगात् षट्कर्तवः स्युः शिशिरो वसन्तः। ग्रीष्मश्च वर्षा च शरच्च तद्वन्मतान्तरेणाथ कथितोऽत्र षष्ठः॥ शिशिरपूर्वमृतवस्तत्तरं त्रयमयनमाद्यरहश्च तदामरम्। भवति दक्षिणमन्यदहर्मितं निगदिता रजनी मरुतां च सा। षट्कप्रवेशविदगप्रतिष्ठाविवाहचौलव्रतबन्धपूर्वम्। सोऽयनयोः कर्म शुभं विधेयं यद्दक्षितं तत् खलु दक्षिणे च"।

एतदभिप्रायेणैव च सत्यव्रतः—"देवतारामवाप्यादिप्रतिष्ठोद्वाहमुखे रवौ। दक्षिणाभिमुखे कुर्वन् न तत्फलमवाप्नुयात्" सूर्यश्च दक्षिणोत्तराभिमुख्येनैव प्रतिष्ठाद्यौ विधिनिषेधावाह। अतएव सू० सि० "भानोर्भकरसंक्रान्तेः षण्मासा उत्तरायणम्। कर्कादेस्तु तथैव स्यात् षण्मासाद्दक्षिणायनम्" इत्युक्तम्। अतः स्वापेक्षया दक्षिणोत्तरगमनादेव दक्षिणोत्तरायणव्यवहारो भाक्तो दक्षिणोत्तरगोलयोर्मुख्य इत्यवधेयम्। तेन भाक्ते दक्षिणायन एव प्रतिष्ठादिनिषेधः न मुख्ये" प्रागुक्तकल्पव्रतवाक्यैकवाक्यत्वात्। विवाहव्रतबन्धादिचूडासंस्कारदीक्षणम्। यज्ञदीक्षप्रवेशादिदानार्चनव्रतिष्ठनम्। पुण्यानि यानि कर्माणि वर्जयेद्दक्षिणायने" म०त०भविष्यपु०। तत्रापवादः कालमा० वैखानसंहितायां यथा "साष्टभैरवराक्षनरसिंहविक्रमाः सक्षिप्राक्षरक्षन्नी च स्याद्या वै दक्षिणायने"

इतदभिमानिदेवताभेदे च "धूमो रात्रिस्तथा कृष्णः षण्मासादक्षिणायनम्" गीता। "यातिवाहिकास्तल्लिङ्गात्" मी० भा० धूमादीनां तदभिमानिदेवतापरत्वसमर्थनात्। ५दक्षिणभागस्थे प्राणे च "दक्षिणस्थो यदा प्राणस्तदा स्यात् दक्षिणायनम्। पञ्चभूतात्मकास्तत्र तस्याः पञ्चोदयन्ति वै" पदार्थादर्श धृतप्रयोगसारवाक्यम्।

**दक्षिणारण्य** न० दक्षिणस्थमरण्यम्। अरण्यभेदे।

दक्षिणारुस् पु० दक्षिणे भागे अरुर्व्रणमस्य । व्याधक्षतदक्षिणाङ्गके मृगे अमरः । [रुत्विजि ।

दक्षिणार्ह पु० दक्षिणामर्हति अर्ह-अण् उप०स०। दक्षिण्ये

दक्षिणावत् त्रि० दक्षिणा+अस्त्यर्थे मतुप् मस्य वः । दक्षिणायुक्ते अन्वाहार्य्यशब्दे २२० पृ० दृश्यम् ।

दक्षिणावर्त्त त्रि० दक्षिणे आवर्त्तते आ+वृत-अच् । १दक्षिणे आवर्त्तयुक्ते । "सृतकुम्भवालुकारन्ध्रपिधानरचनेच्छया । दक्षिणावर्त्तशङ्खोऽयं हन्त चक्रीकृतो मया" भा० द० । दक्षिणा दक्षिणस्यां वर्त्तते वृत-अच् । २दक्षिणदिक्स्थे त्रि० । "दक्षिणावर्त्त आदित्य एतन्मे मनसि स्थितम्" भा० भी० १२० अ० ।

दक्षिणावर्त्तकी स्त्री दक्षिणावर्त्त इव कायति कै-क गौरा० ङीष् । दक्षिणकाल्यां राजनि० । [दक्षिणाग्निके ।

दक्षिणावह पु० दक्षिणा दक्षिणदिक्तो वहति वह-अच् ।

दक्षिणाहृत् त्रि० दक्षिणा आवर्त्तते हृत-क्विप् । दक्षिणावर्त्ते । "तस्मादिमं लोकं दक्षिणाहृत समुद्रः पर्य्येति" शत० ब्रा० ७।१।१।१२ ।

दक्षिणाग्यापति पु० ६त० । १यमराजे २भौमे यहे च ।

दक्षिणाहि अव्य० दक्षिण+आहि दूरे । दूरस्थे दक्षिणभागे

दक्षिणित् अव्य० दक्षिणात्+वेदे पृषो० । दक्षिणस्यामित्यार्थे । "प्रदक्षिणिद्गरिवो मा वि वेनः" ऋ०५।२६।४।

दक्षिणीय पु० दक्षिणामर्हति छ । दक्षिणार्हे ऋत्विजि । "क्रतवः संप्रवर्त्तन्तां दक्षिणीयैर्द्विजातिभिः । दक्षिणोपवर्त्तन्तां यथार्थं सत्रयाजिनाम्" हरिवं० ६८ अ० ।

दक्षिणेन अव्य० दक्षिण+एनप् । सप्तम्यर्थेऽव्ययौ १दक्षिणस्यां दिशि २दक्षिणदेशे च । एनपा योगे पञ्चमीबाधिका द्वितीया । "तत्रागारं धनपतिर्गुह्यान् दक्षिणेनाक्षादीयम्" मेघ० । "जम्बुतर्दङ्कारण्यं दक्षिणेन परन्तपौ" भा० व० २७८। अ० ।

दक्षिणेमन् पु० दक्षिणे देशे व्रणं अस्य नि० अनिच् । व्याधक्षतव्रणयुक्तदक्षिणाङ्गके मृगे अमरः । "मृगयुमिव क्षमोऽद्य दक्षिणेमानं" भट्टिः ।

दक्षिण्य त्रि० दक्षिणामर्हति यत् । दक्षिणार्हे ऋत्विगादौ "दक्षिण्यदृष्टं क्रतमार्त्विजीनैः" भट्टिः ।

दक्षेश्वर न०काशीस्थे दक्षप्रजापतिस्थापिते लिङ्गभेदे तत्कथा "यत्त्वया स्थापितं लिङ्गमेतद्दक्षेश्वराभिधम् । अस्य संसेवनात् पुंसामपराधसहस्रकम् । क्षमिष्येऽहं न सन्देहस्तस्मात् पूज्यमिदं जनैः" काशीख० ८६अ० ।

दगा(का)गेल न० दकस्य जलद्वाररोधस्थागेलमिव गमध्यपाठे पृषो०मध्यपाठस्तु सम्यक् । ५४ अ० वराहसंहितोक्ते निर्जलदेशे जलोपलब्धिसाधने उपायभेदे । यथा

"धर्म्यं यशस्यं च वदाम्यतोऽहं दगा(का)गेलं येन जलोपलब्धिः । पुंसां यथाङ्गेषु सिरास्तथैव क्षितावपि प्रोन्नतनिम्नसंस्थाः । एकेन वर्णेन रसेन चाम्भश्चुतं नभस्तो वसुधाविशेषात् । नानारसत्वं बहुवर्णतां च गतं परीक्ष्यं क्षितितुल्यमेव । पुरन्दरानलयमनिर्ऋति वरुणपवनेन्दुधनेश्वरा देवाः । विज्ञातव्याः क्रमशः प्राच्यादीनां दिशां पतयः । दिक्पतिसञ्ज्ञास्ताश्च सिरा नवमी मध्ये ब्रह्मसिरानाम्नी । एताभ्योऽन्याः शतशो विनिःसृता नामभिः ग्रथिताः । पातालादूर्ध्वं सिराः शुभाश्चतुर्दिक्षु संस्थिता याश्च । कोषदिगुत्था न शुभाः सिरानिमित्तान्यतो वक्ष्ये । यदि वेतसोऽम्बुरहिते देशे हंसैश्चिभिश्चातः पश्चात् । सार्धे पुरुषे तोयं वहति सिरा पश्चिमा तत्र । शिखमपि चार्द्धपुरुषे मण्डूकः पाण्डुरोऽथ शतं पीता । पुटभेदकश्च तस्मिन् पाषाणो भवति तोयमधः । जम्बूपोदग्रवर्त्तिभिः सिराभी नरहये पूर्वा । मण्डूकश्चन्द्रिका पाण्डुराथ पुरुषेऽत्र मण्डूकः । जम्बूवृक्षस्य प्राग् वल्मीको यदि भवेत् समीपस्थः । तस्माद्दक्षिणपार्श्वे सलिलं पुरुषहये स्वादु । अर्धपुरुषे च शतशः पारावतसन्निभश्च पाषाणः । मण्डूकवती चात्र नीला दीर्घं कालं वहति च तोयम् । पश्चादुदुम्बरश्च त्रिभिरेव करैर्नरहये सार्धे । पुरुषे सितोऽरिष्टवृक्षनिभोऽधः सिरा सुजला । उदगर्जुनश्च वृक्षो वल्मीको यदि ततोऽर्जुनाह्वस्तैः । त्रिभिरम्बु भवति पुरुषैस्त्रिभिरर्धसमन्वितैः पश्चात् । श्वेता गोधार्धनरे पुरुषे मण्डूकरा ततः कृष्णा । पीता सिता ससिकता ततो जलं निर्दिशेदसितम् । वल्मीकोपचितायां निर्गुण्डयां दक्षिणेन कथितकरैः । पुरुषहये सपादे स्वादु जलं भवति चाशोष्यम् । रोहितमण्डूकोर्ध्वनरे शतं कपिला पाण्डुरा ततः परतः । सिकता शर्करा च क्रमेण परतो भवत्यधः । पूर्वेण यदि बदर्यां वल्मीको दृश्यते जलं पश्चात् । पुरुषैस्त्रिभिरादेयं श्वेता मण्डूकोपधिकार्धनरे । रुधनाशा बदरी चेद् दिग्भ्रपरस्यां ततो जलं भवति । पुरुषत्रये सपादे पुरुषेऽत्र च दुण्डुभिश्चिह्नम् । बिल्वोदुम्बरयोगे विज्ञाय हस्तत्रयं तु यास्येन । पुरुषैस्त्रिभिरम्बु भवेत् कृष्णो

र्धनरे च मण्डूकः। काकोदुम्बरिकायां वल्मीको दशग्रते शिरा तस्मिन्। पुरुषत्रये सपादे पश्चिमदिक्स्था वहति सा च। आपाण्डुपीतिका मृदु गौरसवर्णश्च भवति पाषाणः। पुरुषार्धे कुसुदनिभो दृष्टिपथं सूचिको याति। जलपरिहीने देशे दक्षः कम्बिल्लको यदा दक्षः। प्राच्यां हस्तत्रितये वहति शिरा दक्षिणा प्रथमम्। सक्षीरोत्पलवर्णा कापोती चैव दशग्रते तस्मिन्। हस्तोऽजगन्धिमत्स्यो भवति पयोऽल्पं च सञ्चारम्। शोषाकतरोरधरोत्तरे शिरा द्वौ करावतिक्रम्य। कुसुदो नाम शिरा सा पुरुषत्रयवाहिनी भवति। आसन्नो वल्मीको दक्षिणपार्श्वे विभीतकस्य यदि। अध्यर्धे तस्य शिरा पुरुषे ज्ञेया दिशि प्राच्याम्। तस्यैव पश्चिमायां दिशि वल्मीको यदा भवेद्वृक्षे। तदोदग्भवति शिरा चतुर्भिरर्धाधिकैः पुरुषैः। श्वेतो विद्रुमरक्तः प्रथमे पुरुषे तु कुङ्कुमाभोऽन्या। अपरस्यां दिशि च शिरा नगग्रति वर्षत्रयेऽतीते। सकुशासित ऐशान्यां वल्मीको यत्र कोविदारस्य। मध्ये तयोर्नरैरर्धपञ्चमैस्तोयमक्षोभ्यम्। प्रथमे पुरुषे भुजगः कमलोदरसन्निभो मही रक्ता। कुरविन्दः पाषाणश्चिक्कान्यतानि वाच्यानि। यदि भवति सप्तपर्णो वल्मीकहतस्तदुत्तरे तोयम्। वाच्यं पुरुषैः पञ्चभिरल्पापि भवन्ति चिह्नानि। पुरुषार्धे मण्डूको हरितो हरितालसन्निभा भूश्च। पाषाणोऽभ्रनिकाशः सौम्या च शिरा शुभान्यु वहा। सर्वेषां वृक्षाणामधःस्थितो दर्दुरो यदा दक्षः। तस्माद्वृक्षे तोयं चतुर्भिरर्धाधिकैः पुरुषैः। पुरुषे तु भवति सकृष्णो नीला मृत् पीतिका ततः श्वेता। दर्दुरसमानरूपः पाषाणो दशग्रते चात्र। यदक्षिनिलयो दक्षो दक्षिणतः संस्थितः करञ्जस्य। हस्तद्वये तु याम्ये पुरुषत्रितये तु शिरा सार्धे। कक्षपकः पुरुषार्धे प्रथमं चोद्भिद्यते शिरा पूर्वा। उदगन्धा स्वादुजला हरितोऽक्षाधस्ततस्तोयम्। उत्तरतश्च मधूकादक्षिनिलयः पश्चिमे तरोस्तोयम्। परिहृत्य पञ्च हस्तान् अर्धोत्तमपौरुषे प्रथमम्। अक्षिराजः पुरुषेऽस्मिन् धूम्रा धात्री कुजत्यवर्णोऽक्षा। माक्षेन्द्री भवति शिरा वहति समेनं सदा तोयम्। वल्मीकः स्निग्धो दक्षिणेन तिलकस्य सकृगदुर्वेत्। पुरुषैः पञ्चभिरन्तो दिशि वारुण्यां शिरा पूर्वा। सपौवासः पश्चाद् वदा कदम्बस्य दक्षिणेन जलम्। परतो हस्तत्रितयात् षड्भिः पुरुषैस्तुरीयोनैः। कौबेरी चात्र शिरा वहति जलं दोहसन्निभं चाक्षोभ्यम्। कनकनिभो मण्डूको नरमात्रे मृत्तिका पीता। वल्मीकसंवृतो यदि तालो वा भवति नारिकेलो वा। पदात् षड्भिर्हस्तैर्नरैश्चतुर्भिः शिरा वाम्या। वामेन कपित्थाक्षिसंनिभवर्णोदगञ्जलं वाच्यम्। सप्त परित्यज्य करान् खात्वा पुरुषान् जलं पश्च। कर्बुरकोऽक्षिः पुरुषे क्षुण्णा मृत् पुटभिदपि च पाषाणः। श्वेता मृत् पञ्चिमतः शिरा ततश्चोत्तरा भवति। अञ्जनकस्य वामे वदरी वा दशग्रतेऽक्षिनिलयो वा। षड्भिरूर्ध्वं तस्य करैः सार्धे पुरुषत्रये तोयम्। कूर्मः प्रथमे पुरुषे पाषाणो धूसरः सिकता मृत्। आदौ शिरा च वाम्या पूर्वोत्तरतो द्वितीया च। वामेन करिहस्तरोर्वल्मीकश्चेत्ततो जलं पूर्वे। हस्तत्रितये पुरुषैः सप्तभिः षड्भिर्भवति। नीलो भुजगः पुरुषे मृत् पीता मरकतोपमचाक्षा। क्षुण्णा भूः प्रथमं वारुणी शिरा दक्षिणेन नान्या। जलपरिहीने देशे दशग्रन्त्यूपजानि चिह्नानि। वीरणदूर्वा मृदङ्ग यत्र तस्मिन् जलं पुरुषे। भागौ स्निग्धा दन्ती शुकरपादी च लक्षणा चैव। नवमालिका च हस्तद्वयेऽम्बु वाम्ये त्रिभिः पुरुषैः। स्निग्धाः प्रलम्बशाखा वामनविटपद्रुमाः समीपजलाः। सुधिरा जर्जरमूला रुक्षाश्च जलेन सन्त्यक्ताः। तिलकाम्रातकवरुणकभल्लातकबिल्वतिन्दुकाङ्कोलाः। पिण्डारशिरीषाञ्जनपरूषकावञ्जुलातिबलाः। एते यदि स्निग्धा वल्मीकैः परिवृतास्ततस्तोयम्। हस्तैस्त्रिभिरुत्तरतश्चतुर्भिरर्धेन च नरस्य। चतुर्थी सतृणा यस्मिन् सतृणे तृणवर्जिता मही यत्र। तस्मिन् शिरा प्रदिष्टा वक्तव्यं वा धनं तस्मिन्। कण्टककण्टकानां व्यत्यासेऽभ्रसन्निभैः करैः पश्चात्। खात्वा पुरुषत्रितयं त्रिभागयुक्तं धनं वा स्यात्। नदति मही गम्भीरं यस्मिंश्चरणाहता जलं तस्मिन्। सार्धैस्त्रिभिर्मनुष्यैः कौबेरी तत्र च शिरा स्यात्। वृक्षस्यैका शाखा यदि विनता भवति पाण्डुरा वा स्यात्। विज्ञातव्यं शाखातले जलं त्रिपुरुषं खात्वा। फलकुसुमविकारो यस्य तस्य पूर्वे शिरा त्रिभिर्हस्तैः। भवति पुरुषैश्चतुर्भिः पाषाणोऽधःक्षितिः पीता। यदि कण्टकारिका तु कण्टकैर्विना दशग्रते सितैः कुसुमैः। तस्माद्वृक्षेऽम्बु वाच्यं त्रिभिर्नरैरर्धपुरुषे च। खर्जूरी शिशिरच्छाया यत्र भवेज्जलविवर्जिते देशे। तस्याः पश्चिमभागे निर्देश्यं त्रिपुरुषे वारि।

यदि भवति कर्णिकारः सितकुसुमःस्यात्पलाशवल्लो वा। सव्येन तत्र हस्तद्वयेऽम्बु पुरुषत्रये भवति। अश्मा यस्यां धात्र्यां धूमो वा तत्र वारि नरयुग्मे। निर्देष्टव्या च शिरा मरुता तोयप्रवाहेण। यस्मिन् क्षेत्रोद्देशे जातं यस्यं विनाशमुपयाति। स्निग्धमतिपाण्डुरं वा मरुच्छिरा नरयुगे तत्र। मरुदेशे भवति शिरा यथा तथातः परं प्रवक्ष्यामि। ग्रीवा करभाणामिव भूतलसंस्थाः शिरा भान्ति। पूर्वोत्तरेण ग्रीवोर्यदि वल्मीको जलं भवति पश्चात्। उत्तरगमना च शिरा विज्ञेया पञ्चभिः पुरुषैः। चिह्नं दर्दुर आदौ स्यात् कपिलातः परं भवेद्धरिता। भवति च पुरुषेऽधोऽश्मा तस्य तले वारि निर्देशयम्। ग्रीवोरेव प्राच्यां वल्मीकोऽतोऽर्धपञ्चमैर्हस्तैः। दिशि याम्यायां तोयं वक्तव्यं सप्तभिः पुरुषैः। प्रथमे पुरुषे भुजगः सितासितो हस्तमात्रमूर्त्तिश्च। दक्षिणतो वहति शिरा सचारं भूरि पानीयम्। उत्तरतश्च करीरादक्षिणभिमुखे दक्षिणे जलं स्यात्। दशभिः पुरुषैर्नैर्ऋ्यं पुरुषे पोतोऽत्र मण्डूकः। रोहीतकस्य पश्चादक्षिणवक्षेत्रिभिः करैर्याम्ये। द्वादश पुरुषान् खात्वा सचारा पश्चिमेन शिरा। इन्द्रतरोर्वल्मीकः प्राग्द्वयग्रः पश्चिमे शिरा हस्ते। खात्वा चतुर्दश नरान् कपिला गोधा नरे प्रथमे। यदि वा सुवर्णनाम्नस्तरोर्भवेद्यामतो भुजङ्गस्टङ्कम्। हस्तद्वये तु याम्ये पञ्चदशनरावसानेऽम्बु। चारं पयोऽत्र नकुलो ऽर्धमानवे ताम्रसन्निभश्चाश्मा। इक्षा च भवति वसुधा वहति शिरा दक्षिणा तत्र। बदरीरोहितवृक्षौ सम्भृक्षौ चेद्विनापि वल्मीकम्। हस्तत्रयेऽम्बु पश्चात् षोडशभिर्मानवैर्भवति। सरसं जलमादौ दक्षिणा शिरा वहति चोत्तरेणान्या। पिष्टनिभः पाषाणो मच्छेता दक्षिणोऽर्धनरे। मकरीरा खेदरी त्रिभिः करैः पश्चिमेन तत्राश्मः। अष्टादशभिः पुरुषैरग्नी वह्निजला च शिरा। शीघ्रगमेता बदरी हस्तत्रयमिते दिशि प्राच्याम्। विंशत्या पुरुषाश्चाश्मशोष्यमधोऽत्र सचारम्। कक्षभकरीरावेकत्र संयुतौ यत्र कक्षभवित्वौ वा। हस्तद्वयेऽम्बु पश्चान्नरैर्भवेत्पञ्चविंशत्या। वल्मीकमूर्द्धनि यदा दूर्वा कुशाश्च पाण्डुराः सन्ति। कूपो मध्ये देयो जलमत्र नरैकविंशत्या। भूमिःकदम्बकयुता वल्मीके यत्र दह्यते दूर्वा। हस्तत्रयेण याम्ये नरैर्जलं पञ्चविंशत्या। वल्मीकत्रयमध्ये रोहीतकपादपो यदा भवति। नानाद्यैः सहितस्त्रिभिर्जलं तत्र वक्तव्यम्। हस्तचतुष्के मध्यात् षोडशभिश्चाङ्गुलैरुदम्बारि। चत्वारिंशत्पुरुषान् खात्वाश्नातः शिरा भवति। यस्मिन्नचुरा यस्मिन्क्षमी भवेदुत्तरेण वल्मीकः। पश्चात्सङ्करान्ते शतार्धसङ्ख्यैर्नरैः सलिलम्। एकस्याः पञ्च यदा वल्मीका मध्यमो भवेच्छेतः। तस्मिन् शिरा प्रदिष्टा नरषष्ट्या पञ्चवर्जितया। सपलाशा यत्र शमी पश्चिमभागेऽम्बु मानवैः षष्ट्या। अर्धनरेऽस्थिः प्रथमं सवालुका पीतमत् परतः। वल्मीकेन परिवृतः श्वेतो रोहीतको भवेद्यस्मिन्। पूर्वेण हस्तमात्रे सप्तत्या मानवैरम्बु। श्वेता कण्टकवल्ली यत्र शमी दक्षिणेन तत्र पयः। नरपञ्चकसंयुतया सप्तत्याश्चिनरार्धे च। मरुदेशे यस्मिन्नं न जाङ्गले तैजसं विनिर्देश्यम्। जम्बूवेतसपूर्वे ये पुरुषास्ते मरौ द्विगुणाः। जम्बूस्निग्धता मूर्वा शिग्रुभारी सारिवा शिवा श्यामा। वीरुधयो वाराही ज्योतिष्मती च मरुद्भवेगा। सूकरिकामाषपर्णीव्याघ्रपदाश्चेति यद्यस्मिन्निम्बे। वल्मीकादुत्तरतस्त्रिभिः करैस्त्रिपुरुषे तोयम्। एतदूनमे वाच्यं जाङ्गलभूमौ तु पञ्चभिः पुरुषैः। एतैरेव निमित्तैर्मरुदेशे सप्तभिः कथयेत्। एकनिभा यत्र मही हयतरुवल्मीकगुल्मपरिहीना। तस्यां यत्र विकारो भवति धरित्र्यां जलं तत्र। यत्र स्निग्धा स्निग्धा सवालुका सानुनादिनी वा स्यात्। तत्रार्धपञ्चमैर्वारि मानवैः पञ्चभिर्यदि वा। स्निग्धतरुण्यां याम्ये नरैश्चतुर्भिर्जलं प्रभूतं च। तरुगहनेऽपि हि विज्ञतो यत्नात्तद्देव वदेत्। नमते यत्र धरित्री सार्धं पुरुषेऽम्बु जाङ्गलानूपे। कीटा वा यत्र विनाश्रवेण बहवोऽम्बु तत्रापि। उष्णा शीता च मही शीतोष्णास्त्रिभिर्नरैः सार्धैः। इन्द्रधनुर्मत्स्यो वा वल्मीको वा चतुर्हस्तात्। वल्मीकानां षड्भ्यां यद्येकोऽभ्युच्छ्रितः शिरा तदधः। शुष्यति न रोहते वा यस्यं यस्यां च तत्राश्मः। न्यग्रोधपलाशोदुम्बरैः समेतैस्त्रिभिर्जलं तदधः। वटपिप्पलसमवाये तद्वाच्यं शिरा चोदक्। याम्येऽथ यदि कोणे यामस्य पुरस्य वा भवति कूपः। नित्यं न करोति भयं दाहं च समानुषं प्रायः। नैर्ऋतकोणे वाच्यं वनिताभयं च वायव्ये। दिक्क्षयमैत्यङ्गा ग्रेणसु शुभावहाः कूपाः। सारस्वतेन मुनिना दगा(का)र्णवं यत्कृतं तदृषिभ्य। आर्याभिः कृतमेतद् हृत्तैरपि

मानं वक्ष्ये । स्निग्धा यतः पादपगुल्मवल्ल्यो निश्छिद्रपत्राश्च ततः शिरास्ति । पद्मोत्पलोशीरकुशाः सगुच्छाः काशाः कुशा वा नलिका नलो वा । खर्जूरजम्बूनवेतसाः स्युः क्षीरान्विता वा द्रुमगुल्मवल्ल्यः । क्षवेमनागाः शतपत्रनीपाः स्युर्नक्तमालाश्च सदिन्दुसाराः । विभीतको वा सदयन्तिका वा यत्रास्ति तस्मिन् पुरुषत्रवेऽम्भः । स्यात्पर्वतस्योपरि पर्वतोऽन्यस्तत्रापि मूले पुरुषत्रवेऽम्भः । या मौञ्जकैः काशकुशैश्च युक्ता नीला च मृद् यत्र ससर्करा च । तस्यां प्रभूतं सुरसं च तोयं कृष्णावटा यत्र च रक्तमृद्वा । ससर्करा ताम्रमृद्वी कषायं क्षारं धरित्री कपिला करोति । आपाण्डुरावां लवणं प्रदिष्टं मिष्टं पयो नीलवसुन्धरायाम् । शाकाम्रकार्जुनबिल्वसर्जाः श्रीपर्णरिष्टाधवशिंशपाश्च । छिन्नैश्च पर्णैर्द्रुमगुल्मवल्ल्यो रूक्षाश्च दूरेऽम्बु निवेदयन्ति । सूर्याग्निभस्मोड्डखरातुवर्णा या निर्जला सा वसुधा प्रदिष्टा । रक्ताङ्कुराः क्षीरयुताः करीरा रक्ता धरा चेल्लसमश्मनोऽधः । वैदूर्यसङ्काम्बुदमेचकाभा पाकोत्क्षोडुम्बरसन्निभा वा । भृङ्गाञ्जनाभा कपिलाश्च वा या श्वेता शिला भूरिसमीपतोया । पारावतक्षौद्रदृतोपमा वा क्षौमस्य वस्त्रस्य च तुल्यवर्णा । या सोमवल्ल्याद्यैः समानरूपा साप्याशु तोयं कुरुतेऽत्यं च । ताम्रा समेता पृषतैर्विचित्रैरापाण्डुभस्मोड्डखरातुरूपा । भृङ्गोपमाङ्गुष्टिकपुष्पिका वा सूर्याग्निवर्णा च शिला वितोया । चन्द्रातपस्फटिकमौक्तिकेभरूपा याखेन्द्रनीलमणिच्छविभृङ्गुकाञ्जनाभाः । सूर्योदयांशुहरितालनिभाश्च याः स्युः शोभना गुणिवोऽत्र च दृष्टमेतत् । एता शुभेदाश्च शिलाः शिवाश्च यत्रैव नागैश्च सदाभिजुष्टाः । येषां च राष्ट्रेषु भवन्ति राज्ञां तेषामदृष्टिर्भ भवेत्कदाचित् । भेदं यदा नैति शिला तदानीं पाषाणकाष्ठैः सह तिन्दुकानाम् । प्रज्वालयित्वानलमग्निवर्णा सुधाम्बुशिला प्रविदारमेति । तोयं स्रुतं मोचकभक्षणा वा यत्प्रक्षालः परिषेचनं तत् । कार्यं प्रस्तारसुतं शिलायाः प्रस्फोटनं वह्नितापितायाः । तक्रकाञ्जिकसुराः सकृत्वा योजितानि वदराणि च तस्मिन् । सप्तरात्रसंस्थितान्यभिमन्त्रां दारयन्ति हि शिलां परिषेकैः । नैवं यत्र त्वक् च नालं तिलानां सापामार्गं तिन्दुकं स्याद्गुडूची । गोमूत्रेण स्रावितः क्षार एषां षट्कृत्वोऽतप्तापितो भेदतेऽश्मा । क्षारं पयो ह्युडुविषाग्निमथीश्वमेतं पाराबतास्रगता च युतं प्रलेपैः । टङ्कस्य तैलमथितस्य ततोऽस्य पानं पलाक्षितस्य न शिलाश्च भवेद्विघातः । क्षारे कदल्या मथितेन युक्ते दिनोषिते पाचितमायसं यत् । सम्यक् शितं चाश्मनि नैति भङ्गं न चान्यलोहेष्वपि तस्य कौण्ठ्यम् । पाली प्रागपरायतास्वु सुचिरं धत्ते न याम्योत्तरा कल्लोलैरवदारमेति महता सा प्रायशः प्रेरितैः । तां चेद्दिशति सारदारुभिरपां सम्पातमाचारवेत् पाषाणादिभिरेव वा प्रतिचयं क्षुण्णं क्षिपाश्मादिभिः । ककुभवटाम्रप्लक्षकदम्बैः सनिचुलजम्बूवेतसनीपैः । कुरवकतालाशोकमधूकैर्बकुलविभिन्नैश्च ततीराम् । हारं च नैर्ऋतिकमेकदेशे कार्यं शिलासङ्क्षितवारिमार्गम् । कोशस्थितं निर्विवरं कपाटं कृत्वा ततः पांशुभिरावपेत्तम् । अञ्जनसक्षौद्रैः सरालकोशातकामलकचूर्णैः । कतकफलसमायुक्तैर्योगः कूपे प्रदातव्यः । कलुषं कटुकं लवणं विरसं सलिलं यदि वाप्युपगच्छि भवेत् । तदनेन भवत्यमलं सुरसं सुरभि च गुणैरपरैश्च युतम् । रूक्षो मधाम्बुराधाप्युष्यधनिष्ठोत्तराभिरोक्षिण्यः । शतभिषगित्या रम्भे कूपानां शस्यते भगणः । कृत्वा वरुणस्य बलिं पटवेतसकीलकं शिरास्थाने । कुसुमैर्गन्धैर्धूपैः संपूज्य निधापयेत् प्रथमम् । मेघोद्भवं प्रथममेव मया प्रदिष्टं ज्ञेयामतीत्य बलदेवमतादि हृद्या । भौमं दगा(का)र्णव मिदं कथितं हितोयं सम्यग्वराहमिहिरेण मुनिप्रसादात्" ।

**दग्ध** त्रि॰ दह–क्त । ज्वलदादौ अभक्षीज्जते "दग्धा दग्धं मनसिजं जीवयन्ति दृशैव याः" सा॰ द॰ । "सर्वं स्याद् दग्धसाभिषम्" कर्मशोचनम् । देहस्थाग्निदाहभेदाः सुश्रुते उक्ता यथा

"अत ऊर्द्धमितरथा दग्धलक्षणं वक्ष्यामः । तत्र स्निग्धं रूक्षं वा शित्र द्रव्यमग्निर्दहति । अग्निसन्नो हि खेदः सूक्ष्मशिरास्नायुसन्धिविस्रावादीनसुपविश्याशु दहति । तस्मात् खेददग्धेऽधिका रुजो भवन्ति । तत्र शुष्कं दुर्दग्धं सम्यग्दग्धमतिदग्धञ्चेति चतुर्विधमग्निदग्धम् । तत्र यद्विवर्णं शुष्यतेऽतिमात्रं तत्शुष्कम् । यत्रोत्तिष्ठन्ति स्फोटाकोद्रावोदाहरागपाकवेदनाश्चिरात्रोपशाम्यन्ति तद्दुर्दग्धम् । सम्यग्दग्धमनवगाढं ताम्रफलवर्णं सुसंस्थितं पूर्वलक्षणयुक्तञ्च । अतिदग्धे मांसास्रस्नायुसन्धिसिरास्नायुसन्धिव्यापादनमतिमात्रं ज्वरदाहपिपासामूर्च्छाश्चोपद्रवा भवन्ति । तत्रशस्त्रं चिरेण रोहति रूक्षञ्च विवर्णं भवति । तदेतच्चतुर्विध-

अग्निदग्धलक्षणमात्मकर्मप्रसाधकं भवति । भवति चात्र । अग्निना कोपितं रक्तं भृशं जन्तोः प्रकुप्यति । ततस्तेनैव वेगेन पित्तमस्याभ्युदीर्यते । तुल्यवीर्ये उभे ह्येते रसतो द्रव्यतस्तथा । तेनास्य वेदनाक्लेदाः प्रक्लेदश्च विदह्यते । स्फोटाः शीघ्रं प्रजायन्ते ज्वरस्तृष्णा च वर्द्धते" सुश्रु० ।

तिथिभेदेन युक्ते २चन्द्रान्वितराशौ पु० । "मृगसिंहौ तृतीयायां प्रथमायां तुलाझगौ । पञ्चम्यां बुधराशी द्वौ सप्तम्यां चापचन्द्रभे । नवम्यां सिंहकीटाख्यावेकादश्यां वृषोर्ट्टे । द्वयभीनौ त्रयोदश्यां दग्धसंज्ञास्तमी वटहाः । दग्धसङ्ख्यानि यत् कर्म कृतं सर्वं विनश्यति" ज्यो० त० । ३वारभेदेन युक्ते नक्षत्रभेदे न० । "याम्यं त्वाष्ट्रं वैश्वदेवं धनिष्ठार्द्धमृक्षं ज्येष्ठान्त्यं रवेर्दग्धभं स्यात्" ज्यो०त० । ४वारभेदयुक्ते तिथिभेदे स्त्री "एकादशी चेन्दुवारे द्वादशी चार्कवासरे । षष्ठी द्वादशतेवारे तृतीया बुधवासरे । अष्टमी शुक्रवारे च नवमी शनिवासरे । पञ्चमी भौमवारे च दग्धयोगाः प्रकीर्त्तिताः" नारदः । "द्वादश्रेकादशी नागगौरीस्कन्दवसुष्वपि नवम्यां दग्धयोगाख्या भानुवारादितः क्रमात्" वसिष्ठः । ५स्वर्थं चन्द्राक्रान्तराशिभेदेन युक्ते तिथिभेदे स्त्री राजमार्त्तण्डे "द्वितीया मीनधनुषोश्चतुर्थी वृषकुम्भयोः। मेषकर्कटयोः षष्ठी कन्यामिथुनकेऽष्टमी । दशमी वृश्चिके सिंहे द्वादशी मकरे तुले । चाद्या धनुःषु शफरीषु परा द्वितीया एकान्तरे दिनकरे तिथयः प्रदग्धाः । कार्मुके च तथा कुम्भे मेषे युग्मे हरौ घटे । एषु शुक्ला द्वितीयाद्याः दग्धाः कृष्णा भृग्वादिषु । राशौचन्द्रस्य च रवेः स्थित्वा वाच्यं फलं बुधैः । याः प्रोक्तास्तिथयो दग्धाः मेषादिषु च राशिषु । शुक्लास्ता विषमे राशौ समे कृष्णाः प्रकीर्त्तिताः । एभिर्जातो न जीवेत यदि शक्रसमो भवेत् । विवाहे विधवा नारी यात्रायां मरणं भवेत् । निष्फलं क्षत्रियाधिक्यं विद्यारम्भे च मूर्खता । दग्धप्रवेशे भङ्गः स्याच्चूडायां मरणं ध्रुवम् । ऋणदाने फलं नास्ति व्रतदाने च निष्फले । शुभकर्माणि सर्वाणि नैव कुर्याद्विचक्षणः" । उत्तरराशिषु चन्द्रस्थित्या दग्धायां व्यक्तत्वं यथा "षष्ठी मेषकुलीरयोर्हिमकरे कन्यायुगे चाष्टमी सिंहे वृश्चिकराशिगे च दशमी तौलौ तुले द्वादशी । चापे चाथ झषे द्विका यदि वृषे कुम्भे चतुर्थी यदा दग्धाख्यास्तिथयो वदन्ति मुनयस्त्याज्या सदा कर्मसु" ज्यो० त० ।

दग्धादिदोषाद्यङ्गभेदे फलभेदः मु० चि० उक्तो यथा "वक्षस्यां नवभागकेषु च चतुष्कोणेऽमरा राक्षसा मध्यत्र्यंशगता नरास्तु सदशे पार्श्वे च मध्यांशयोः । दग्धे वा स्फुटितेऽम्बरे नवतरे पङ्क्तादिविघ्ने न स्वरूपोऽंशे, वसुरांशयोः शुभमसत् सर्वांशके प्राणतः" तदुक्तं श्रीपतिना "कर्दमकज्वलनोमवलिप्ते वाससि दग्धवति स्फुटिते वा । चिन्त्यमिदं नवधाभिहितेऽस्मिन्निष्टमनिष्टफलञ्च सुधीभिः । निवसन्त्यमरा हि वक्षकोष्ठे मनुजाः पार्श्वदशान्तमध्ययोश्च । अपरेऽपि च राक्षसा त्रयोऽंशे शयने चासनपादुकासु चैवम् । भोमप्राप्तिर्देवतांशे, नरांशे पुत्राप्तिः, स्याद्राक्षसांशे च मृत्युः । प्राप्ते सर्वांशेऽनिष्टं तथा स्यात् प्लुष्टे वस्त्रे नूतने साध्वसाधु" । ६सूर्याधिष्ठितदिग्भि स्त्री । ७दग्धरूढायां दग्धे च स्त्री ङीप्संज्ञायां स्त्रि० । [स्त्रियां जातित्वात् ङीष् ।

दग्धकाक पुंस्त्री० दग्ध इव काकः । द्रोणकाके हेमच० ।

दग्धमन्त्र पु० नित्यकर्म० । "यस्त्रिर्वायुसमायुक्तो यस्य मन्त्रस्य मूर्द्धनि । सप्तधा ह्यश्नते तन्तु दग्धमन्त्रं प्रचक्षते" तन्त्रसारोक्ते मन्त्रभेदे । [२८४६ पृ० तद्भयदाहकथा दग्धा ।

दग्धरथ पु० दग्धो रथोऽस्य ; चित्ररथगन्धर्वे चित्ररथशब्दे ।

दग्धरुह पु० दग्धोऽपि रोहति रुह-क । १तिलकवृक्षे, २भस्मरोहायाञ्च स्त्री राजनि० ।

दग्धिका स्त्री कुत्सिता दग्धा कुत्सिते कन् । (घोड़ाभात) १दग्धान्ने भरतः । दग्ध+स्वार्थे क । अतदग्धम् । २दग्धरूढाहचे राजनि० ।

दग्धेष्टका स्त्री कर्म० । भामके (झामा) शब्दरा० ।

दघ त्यागे पालने च भ्वा० पर० सक० सेट् इदित् । दघ्नुति अदघ्नोत् । ददघ्न ।

दघ घातने स्वा० पर० सक० सेट् । दघ्नोति अदाघीत्-अदघीत् । ददाघ देघतुः । गतौ दिवा० सिधगट् । दघ्यति इति भेदः । "पद्या स दघ्या यो अघस्य" ऋ० १।१२१।५। "दघ्याः गच्छतु पुरुषव्यत्ययः" भा० । "पद्याद्घ्यस्यो विभागे" ऋ० ७।५६।२१ ।

दण्ड दण्डपातने दमने च अदं०चुरा०उभ०सक०सेट्। दण्डयति ते अददण्डत्-त । दण्डः दण्ड्यः दण्डनीयः दण्डितः । अकृच्छ्रपूर्वकशासने द्विक० । "प्रजाः शतं दण्डयति राजा । दुहा० गोघे कर्म्मणि लकारादयः । गर्गाः शतं दण्ड्यन्ते । दण्डशब्दे उदा० "अदण्ड्यान् दण्डयन् राजा दण्ड्यांश्चैवाप्यदण्डयन्" मनुः ।

दण्ड पुं॰ न॰ दण्ड–अच् कर्म्मणि पुंसि च वा दमेर्डो वा। १लगुड़े (लाठि) ख्याते पदार्थे २विप्रदण्डोद्यमे „ अच्छ मतिक्रुच्छ्रं निपातने। "परस्य दण्डं नोद्यच्छेत् क्रुद्धो नैव निपातयेत्" मनुः। दण्डधारणगुणाः "स्खलतः संप्रतिष्ठानं शत्रूणाञ्च निबर्हणम्। अवप्लवनमायुष्यं भयघ्नं दण्डधारणम्" वैद्यकम्।

भिन्दिपालाद्युद्दण्डलक्षणं हेमा॰ प॰ लक्षयस्तुद्दोक्तं भिन्दिपालशब्दे वक्ष्यते तदनुसारेणान्योऽपि दण्डो विधेयः। अजाद्युद्दण्डस्तु "समवृत्तदण्डयुक्तम्" इ॰ द॰ ७१ अ॰ उक्तः। चामराद्युद्दण्डस्तु तत्रैव ७२अ॰ उक्तो यथा "कथ्यर्द्धहस्तप्रमितोऽथ दण्डो दक्षोऽथ वा रत्निसमोऽथवान्यः। काशाङ्कुशात् काञ्चनरूप्यगुम्फाद् रत्नैर्विचित्रश्च हिताय राज्ञाम्"।

ब्रह्मचारिणार्थे कालभेदे लगुड़ाकारे २पदार्थे, वर्णभेदेन तत्प्रमाणादि मनूक्तं यथा "ब्राह्मणो बैल्वपालाशौ क्षत्रियो वाटखादिरौ। पैलवौदुम्बरौ वैश्यो दण्डार्हन्ति धर्मतः। केशान्तिको ब्राह्मणस्य दण्डः कार्य्यः प्रमाणतः। ललाटसम्मितो राज्ञः स्यात्तु नासान्तिको विशः। अजस्रे तु सर्व्वे स्युरवज्ञायां क्रौर्य्यदर्शनाः। अनुद्वेगकरा नृणां सत्वचो नाग्निदूषिताः। प्रतिगृह्योर्ध्वसितं दण्डमुपस्थाय च भास्करम्। प्रदक्षिणं परीत्याग्निं चरेद्भैक्षं यथाविधि"।

संन्यासिनां दण्डधारणे विशेषादि नि॰ सि॰ उक्तो यथा "हारीतः "कुटीचको बह्वदको हंसश्चैव तृतीयकः। चतुर्थः परमो हंसो यो यः पश्चात् स उत्तमः"। बाह्वादः इत्यादिना कुटिं कारयित्वा तत्र स्थिते वा बह्वन् काषायवासाः शिखोपवीतत्रिदण्डवान् बन्धुषु स्वस्थे वा भुञ्जान वात्मज्ञो भवेत् एतदत्यन्ताश्रमपरम् द्वितीयस्तु बन्धून् क्षित्वा सप्तागारादि भैक्षं चरन् पूर्वोक्तवेषः स्यात्। हंसस्तु पूर्वोक्तवेषोऽप्येकदण्डः "एकन्तु वैणवं दण्डं धारयेच्छिखयादरादिति" स्कान्दात् विष्णुरपि "यज्ञोपवीतं दण्डं च वस्त्रं जन्तुनिवारणम्। तावत् परिव्रड् मोक्षो नान्यो हंसपरिव्रड्"। चतुर्थोऽपि स्कान्दे "परहंसस्त्रिदण्डं च रज्जुं गोबालनिर्मिताम्। शिखां यज्ञोपवीतं च नित्यं कर्म परित्यजेत्। यतयश्चैकदण्डः एव। ये तु शिखोपवीतादित्यागनिषेधाक्षे कुटीचकादिपराः। यत्तु मेधातिथिः "यावच्च क्षुद्रको दण्डात्तावद्देहेन वर्त्तयेदिति" तदपि तत्परमेव। यज्ञाह्निः "चतुर्धा भिक्षवः प्रोक्ताः सर्व्वे चैव त्रिदण्डिनः" इति तद्वाग्दण्डादिपरं न यष्टिपरम् "वाग्दण्डोऽथ मनोदण्डः कायदण्डस्तथैव च। यस्यैते नियता दण्डाः स त्रिदण्डीति चोच्यते" मनूक्तेः। तस्मात् परमहंसस्यैकदण्ड एव। सोऽप्यविद्वान् विदुषस्तु सोऽपि नास्ति "न दण्डं न शिखां नाच्छादनं न भैक्षं चरति परमहंस" इति मन्त्रोपनिषदुक्तेः "ज्ञानमेवास्य दण्ड" इति वाक्यशेषाच्च यत्तु यमः "काष्ठदण्डो धृतो येन सर्व्वाशी ज्ञानवर्जितः। स याति नरकान् घोरान् महारौरवसंज्ञकानिति" तदैराग्यं विना जीवनार्थभक्षतसञ्चासपरम् "एकदण्डं समाश्रित्य जीवन्ति बहवो नराः। नरके रौरवे घोरे कर्मत्यागात् पतन्ति ते" इति स्मृतेः यज्ञाश्वमेधिके "एकदण्डी त्रिदण्डी वा शिखासहित एव वा। काषायमात्रधारोऽपि यतिः पूज्यो युधिष्ठिरेति" तस्यापि पूर्वोक्तव्यवस्था ज्ञेया"।

भावे अच्। २दमने "वाग्दण्डश्च मनोदण्डः कायदण्डस्तथैव च" मनुः। "अनुपागतसंत्रासं भूतानामप्यहिंसनम्। बर्हिर्वेदि च दानञ्च दण्डमित्यभिधीयते" भा॰ मोक्षधर्म्मोक्ते ३शरणागतत्राणादिरिक्ते। दण्ड इवाच रति दण्ड+क्विप् ततो भावे यञ्। ५दण्डतुल्यस्थितौ (दाँड़ान) सारसुन्दरी दण्ड–यथायथं कर्मभावकरणादौ ण्यच्। ६प्रकाण्डे ७अश्वे ८कोशे ९मन्थने १०सैन्ये ११भूमिमानभेदे (काठा) "हस्तैश्चतुर्भिर्भवतीह दण्डः" बीजा॰। गोधर्म्मशब्दे २६९५ पृ॰ दृश्यम् "दशहस्तेन दण्डेन" इति पाठान्तरम्। १२स्वर्यपरिषदभेदे १३यमे १४अभिमाने च मेदि॰। १५दण्डाकारे यष्टभेदे हेमच॰ यष्टयङ्गाटकशब्दे २७६८ पृ॰ दृश्यम्। १६दण्डाकृन्दपत्रभेदे। तत्कथा ज्ञानस्नानशब्दे २०२४पृ॰ दृश्या। स्वार्थे क। तत्रार्थे। "धृष्णुकचाम्बरीश्च दण्डकश्चेति ते त्रयः। अयकार महात्मा वै दण्डकारण्यसुत्तमम्" हरिवं॰१०अ॰।

घटिपलात्मके दिनघटिभागरूपे घटिकापरपर्य्याये १७कालभेदे तज्ज्ञानोपायश्च घटीयन्त्रशब्दे उक्तप्रायः। श्रीपतिनाप्युक्तो यथा

"शुल्बस्य दिग्भिर्विहितं पलैर्यत् षड्भिर्लोहद्विगुणावतास्यम्। तदम्भसा प्रस्थिपलैः प्रपूर्यं पात्रं घटार्द्धप्रतिमं घटी स्यात्। सत्रंशमाषत्रयनिर्मिता वा हेम्नः शलाका चतुरङ्गुला स्यात्। विद्धं तया प्राक्तनमत्र पात्रं प्रपूर्यते नाडिकयाम्बुना तत्" "षष्टिदण्डात्मिका-

यात् तिर्येर्निष्क्रमणं परे"। "दण्डैकरज्जनीयोगः" ति० त०।

१८व्यूहभेदे तल्लक्षणभेदादि अग्निपु० २४१ अ० यथा

"मण्डलासंहतौ भागो दण्डाख्ये बहुधा स्मृतः। तिर्यग्वृत्तिस्तु दण्डः स्यात् भोगोऽन्या हस्तिरेव च। मण्डलः सर्वतो हस्तिः पृथग्वृत्तिरसंहतः। प्रदरो दृढकोऽसह्यः चापो वैकृतिरेव च। प्रतिहः सुप्रतिहश्च यत्नेनो विजयसञ्जयौ। विशालो विजयः स्थूलो स्थूलाकर्णश्चमसुखौ। सर्पाख्यो बलयश्चैव दण्डभेदाश्च दुर्जयाः। अतिक्रान्तः प्रतिक्रान्तः कक्षाभ्याञ्चैकपक्षतः। अतिक्रान्तस्तु पक्षाभ्यां त्रयोऽन्ये तद्विपर्ययैः। पक्षोरस्यैरतिक्रान्तः प्रतिष्ठोऽन्यो विपर्ययः। स्थूलापक्षो धनुःपक्षो द्विस्थूलो दण्ड उच्यते। द्विगुणोऽयमतिक्रान्तपक्षोऽन्यस्य विपर्ययः। द्विचतुर्दण्ड इत्येते क्षेया लक्षणतः क्रमात्। गोमूत्रिका हि सञ्चारी शकटो मकरस्तथा"

१९राज्ञामुपायभेदे चतुर्थोपाये। ते चोपायाः सामदानभेददण्डाः सर्वत्र प्रसिद्धाः तु अग्निपु० २४० अ०। अन्येऽप्युपायाः सामादिप्रयोगविषयाश्चोक्ता यथा

"साम दानं च भेदश्च दण्डश्चोक्तश्चेन्द्रजालकम्। मायोपायाः सप्त परे निक्षिपेत् साधनाय तान्। चतुर्विधं स्मृतं साम उपकारानुकीर्त्तनात्। मिथः सम्बन्धकथनं सदृशैः च भाषणम्। आयातेः दर्शनं वाचा तवाहमिति चार्पणम्। यः सम्यग्धनोत्सर्गं उत्तमाधममध्यमः। प्रतिदानं तदा तस्य स्मरीतस्यानुमोदनम्। द्रव्यदानमपूर्वं च स्वयंग्राहप्रवर्त्तनम्। देयस्य प्रतिमोक्षश्च दानं षड्विधं स्मृतम्। क्षेत्ररागासनयनं संहतौत्पादनं तथा। मिथो भेदश्च भेदस्तैर्भेदश्च त्रिविधः स्मृतः। वधोऽर्थहरणं चैव परिक्लेशस्त्रिधा दमः। प्रकाशश्चाप्रकाशश्च लोकद्विष्टान् प्रकाशतः"। "दण्डस्य दर्शनादुद्दिष्टान्, पुत्रभ्रात्रादि, सामतः। दानभेदैश्च मूलस्थान् बोधान् जनपदादिकान्। सामलाटविकान् भेददण्डाभ्यामपराद्धकान्। देवताप्रतिमानान्तु पूजयान्तर्गतैर्नरैः। उभान् स्त्रीवस्त्रसंवीतो निशि चाद्भुतदर्शनः। वेताल्लोलकापिशाचानां शिवानां च रूपिता। कामतो रूपधारित्वं यस्मान्मन्त्रास्त्रवर्षणम्। तमोऽनिलोऽनलो मेघ इति माया त्रयोदशी। जघान कीचकं भीम आस्थितः स्त्रीरूपतां। आपदे व्यसने युद्धे ब्रह्मस्वाहरणे वधम्। उपेक्षेयं क्षता ख्यातोपेक्षितश्च द्विड्विधा। मेघान्धकारदृष्ट्यग्निपर्वताद्भुतदर्शनम्। दरस्यानं च सैन्यानां दर्शनं ध्वजशालिनाम्। छिन्नपाटितभिन्नानां संहतानां च दर्शनम्। इतीन्द्रजालं द्विषतां भीत्यर्थमुपकल्पयेत्"। २०विष्णौ पु० "धनुर्द्धरो धनुर्वेदो दण्डो दमयिता दमः" विष्णुसं० १२ अ०। २१शिवे "शत्रुघ्नाय दण्डाय पर्णचीरपटाय च" भा० आ० २८६ अ०। २२दण्डाकारे अजौ सूर्य्यपरिवेषभेदे "परिधिस्तु प्रतिसूर्य्योदण्डस्त्वनुरिन्द्रचापनिभः" बृ० स० १६ अ०। २३दण्डवत्स्थिते रविकरादेः संघाते "रविकिरणजलदमरुतां सङ्घातो दण्डवत्स्थितो दण्डः। स विदिक्स्थितो रूपाचामरुभो दिशु द्विजातीनाम्। भस्मभयातङ्करो दृष्टः प्राङ्मध्यसन्धिषु दिनस्य। शुक्लाद्यो विप्रादीन् वदभिहतस्तां निर्हन्ति दिशम्" बृ० स० १६ अ०।

२४राज्ञः प्रजाशासनभेदे तत्स्वरूपादि भा० शा० १२१ अ०

"भीष्म कौरव्य! यो दण्डो व्यवहारो यथा च सः। यस्मिन् हि सर्वमायत्तं स दण्ड इह केवलः। धर्मसंस्था महाराज! व्यवहार इतीर्य्यते। तस्य लोपः कथं न स्यात्तन्नोकेष्ववस्थितात्मनः। इत्येवं व्यवहारस्य व्यवहारत्वमिष्यते। अपि चैतत् पुरा राजन्! मनुना प्रोक्तमादितः। सुप्रणीतेन दण्डेन प्रियाप्रियसमात्मना। प्रजा रक्षति यः सम्यक् धर्म्म एव स केवलः। यथोक्तमेतद्वचनं प्रागेव मनुना पुरा। यस्मयोक्तं मनुष्येन्द्र! ब्रह्मणो वचनं महत्। प्रागिदं वचनं प्रोक्तमतः प्राग्वचनं विदुः। व्यवहारस्य चाख्यानाद्व्यवहार इहोच्यते। दण्डे त्रिवर्गः सततं सुप्रणीते प्रवर्त्तते। दैवं हि परमो दण्डो रूपतोऽग्निरिवोत्थितः। नीलोत्पलदलश्यामचतुर्दंष्ट्रचतुर्भुजः। अष्टपात्रैकनयनः शङ्कुकर्णोर्द्ध्वरोमवान्। जटी द्विजिह्वशार्दूलो नगराजतनूरुहः। एतद्रूपं बिभर्त्तुग्रं दण्डो नित्यं पुरा धरः। अधिर्द्धनुर्गदा शक्तिश्चिन्तनं शतरः शरः। सुदर्शनं परशुश्चक्रं पाशो दण्डस्त्रिशूलोमरः। सर्वप्रहरणीयानि सन्ति यानीह कानिचित्। दण्ड एव च सर्वाणि लोके चरति मूर्त्तिमान्। भिन्दन् छिन्दन् खनन् क्षनन् दारयन् पाटयंस्तथा। घातयन्नभिधावंश्च दण्ड एव चरत्युत। अधिर्विधयनो धर्मस्त्रीक्षयक्षमो पुरा धरः। श्रीगर्भो विजयः शास्ता व्यवहारः सनातनः। शास्त्रं ब्राह्मणमाचार्य शास्ता प्राहुर्वदां वर!। धर्मपालोऽक्षरो देवः सत्यगो नित्यगोऽजः। अक्षरो रुद्रतनयो मनुर्लोकः शिवङ्करः। नामान्येतानि दण्डस्य कीर्त्तितानि

युधिष्ठिर ! । दण्डो हि भगवान् विष्णुर्दण्डो नारायणः प्रभुः । अग्रह्यं महद्बिभ्रद्दण्डरूपेण उच्यते । तथोक्ता ब्रह्मकन्येति लक्ष्मीर्देवीति सरस्वती । दण्डनीतिर्जगद्धात्री दण्डो हि वसुविग्रहः । धर्माधर्मौ सुखं दुःखं धर्मार्थौ बलाबले । दौर्भाग्यं भागधेयञ्च पुण्यापुण्ये गुणागुणौ । कामाकामाहतुर्भासः पर्वरी दिवसः क्षणः । अप्रमादः प्रमादश्च हर्षक्रोधौ शमोदमः । दैवं पुरुषकारश्च मोक्षामोक्षौ भयाभये । हिंसाहिंसे तपो यज्ञः संयमोऽथ विषाविषम् । अन्नवादिव मध्यञ्च ज्ञानाज्ञे प्रपञ्चनम् । मदः प्रमादो दर्पश्च दम्भो धैर्यं नयानयौ । अशक्तिः शक्तिरित्येवं मानस्तम्भौ व्ययाव्ययौ । विनयश्च विसर्गश्च कालाकालौ च भारत !। अन्नतं चानिता सत्यं श्रद्धाश्रद्धे तथैव च । क्लीवता व्यवसायश्च लाभालाभौ जयाजयौ । तीक्ष्णता मृदुता क्षेत्रुरागमानागमौ तथा । विरोधश्चाविरोधश्च कार्याकार्यं बलाबले । असूया चानसूया च धर्माधर्मौ तथैव च । अपत्रपानपत्रपे क्लीवे सम्यद्विपत्सदम् । तेजः कर्माणि पाण्डित्यं वाक्शक्तिश्चात्मबुद्धिता । एवं दण्डस्य कौरव्य ! लोकेऽस्मिन् बहुरूपता । न स्याद्यदीह दण्डो वै प्रमथेयुः परस्परम् । भयाद्दण्डस्य नान्योन्यं ग्लपि चैव युधिष्ठिर !। दण्डेन रक्ष्यमाणा हि राजन्नङ्गरङ्गः प्रजाः । राजानं वर्द्धयन्तीह तस्माद्दण्डः परायणम् । व्यवस्थापयति क्षिप्रमिमं लोकं नरेश्वर !। सत्ये व्यवस्थितो धर्मो ब्राह्मणेष्वतिष्ठते । धर्मयुक्ता द्विजश्रेष्ठा वेदयुक्ता भवन्ति च । बभूव यज्ञो वेदेभ्यो यज्ञः प्रीणाति देवताः । प्रीताश्च देवता नित्यमिन्द्रे परिवदन्त्यपि । वृष्टं ददाति शक्रश्चाप्यनुगृह्णन्ति प्रजाः । प्राणाश्च सर्वभूतानां नित्यमग्नौ प्रतिष्ठिताः । तस्मात् प्रजाः प्रतिदग्धे दण्डो जागर्त्ति तासु च । एवंप्रयोजनश्चैव दण्डः क्षत्रियतां गतः । रक्षन् प्रजाः स जागर्त्ति नित्यं स्वरक्षितोऽक्षरः । दैवरः पुरुषः प्राणः सत्त्वं चित्तं प्रजापतिः । भूतात्मा जीव इत्येवं नामभिः प्रोच्यतेऽष्टभिः । यददृष्टदण्डमेवाहुर्ध्रुवमैश्वर्यमेव च । बलेन यश्च संयुक्तः सदा पञ्चविधात्मकः । कृत्स्नं बहुधनामात्याः प्राप्ताः प्रोक्ता बलानि तु । आङ्गार्यमष्टकैर्व्यैलमन्यद्युधिष्ठिर !। हस्तिनोऽश्वा रथाः पत्तिगोरी विष्टिस्तथैव च । दैशिकाश्चाविकाश्चैव तदष्टाङ्गं बलं स्मृतम् । यश्च वाङ्गस्य युक्तस्य रक्षिनो क्षत्रियाधिनः । अङ्गारोङ्गाः पदातांश्च मन्त्रिणो रथदांश्च ये । भिक्षुकाः प्राड्विवाकाश्च मौङ्गत्तौ दैवचिन्तकाः । कोषो मित्राणि धान्यञ्च सर्वोपकरणानि च । सप्तप्रकृति चाष्टाङ्गं शरीरमिह यद्विदुः । राज्यस्य दण्डमेवाङ्गं दण्डः प्रभव एव च । दैवरेण प्रयत्नेन कारणात् क्षत्रियस्य च । दण्डो दत्तः सनात्मा दण्डो हीदं सनातनम् । राज्ञां पूज्यतमो नान्यो यथा धर्मः प्रदर्शितः । ब्रह्मणा लोकरक्षार्थं स्वधर्मस्थापनाय च । भर्तृप्रत्यय उत्पन्नो व्यवहारस्तथाऽपरः । तस्माद्यः स्मृतितो दृष्टो भर्तृप्रत्ययलक्षणः । व्यवहारस्तु वेदात्मा वेदप्रत्यय उच्यते । मौलश्च नरशार्दूल ! शास्त्रोक्तश्च तथाऽपरः । उक्तो यद्यपि दण्डोऽसौ भर्तृप्रत्ययलक्षणः । श्रेयो नः स नरेन्द्रस्थो दण्डप्रत्ययलक्षणः । दण्डप्रत्ययदृष्टोऽपि व्यवहाराश्रयः स्मृतः । व्यवहारः स्मृतो यच्च स वेदविषयात्मकः । यच्च वेदप्रसूतात्मा स धर्मो गुणदर्शनः । धर्मप्रत्यय दृष्टिस्तो यथाधर्मं कृतात्मभिः । व्यवहारः प्रजानोप्ता ब्रह्मदिष्टो युधिष्ठिर !। लोन् धारयति लोकान् वै सत्यात्मा भूतिवर्द्धनः । यच्च दण्डः स दृष्टो नो व्यवहारः सनातनः । व्यवहारश्च दृष्टो यः स वेद इति निश्चितम् । यच्च वेदः स वै धर्मो यच्च धर्मः स सत्पथः । ब्रह्मा पितामहः पूर्वं बभूवाथ प्रजापतिः । लोकानां स हि सर्वेषां सदेवासुरराक्षसाम् । समनुष्योरगवतां कर्त्ता चैव स भूतकृत् । ततोऽन्यव्यवहारोऽयं भर्तृप्रत्ययलक्षणः । तस्मादिदमथोवाच व्यवहारनिदर्शनम् । माता पिता च भ्राता च भार्या चैव पुरोहितः । नादण्ड्यो विद्यते राज्ञो यः स धर्मेण तिष्ठति ।" तत्रैव १५ अ० ।

"दण्डः शास्ति प्रजाः सर्वा दण्ड एवाभिरक्षति । दण्डः सुप्तेषु जागर्त्ति दण्डं धर्मं विदुर्बुधाः । धर्मं संरक्षते दण्डस्तस्यैवार्थं जनाधिप !। कामं संरक्षते दण्डस्त्रिवर्गो दण्ड उच्यते । दण्डेन रक्ष्यते धान्यं धनं दण्डेन रक्ष्यते । एवंविद्यस्तुपादत्त भावं पश्यस्व लौकिकम् । राजदण्डभयादेके पापाः पापं न कुर्वते । यमदण्डभयादेके परलोकभयादपि । परस्परभयादेके पापाः पापं न कुर्वते । एवं सांसिद्धिके लोके सर्वं दण्डे प्रतिष्ठितम् । दण्डस्यैव भयादेके न खादन्ति परस्परम् । अन्धे तमसि मज्जेयुर्यदि दण्डो न पालयेत् । यस्माद्दाम्यान्दमयत्यशिष्टान्दण्डयत्यपि । दम-

नादृदण्डनाद्वैव तस्मादृदण्डं विदुर्बुधाः। वाचा दण्डो ब्राह्मणानां क्षत्रियाणां भुजार्पणम्। दानदण्डाः क्षुता वैश्या निर्दण्डः शूद्र उच्यते। अयमोक्षाय मर्त्यानामर्थसंरक्षणाय च। मर्यादा स्थापिता लोके दण्डसंज्ञा विधास्यते॥ यत्र श्यामो लोहिताक्षो दण्डश्चरति स्वयंतः। प्रजास्तत्र न मुह्यन्ति नेता चेत्साधु पश्यति। ब्रह्मचारी गृहस्थश्च वानप्रस्थश्च भिक्षुकः। दण्डश्चैव भयादेते मनुष्या वर्त्मनि स्थिताः। नाभीतो यजते राजन्! नाभीतो दातुमिच्छति। नाभीतः पुरुषः कश्चित्सभये स्थातुमिच्छति। नाकृत्वा परमर्माणि नाहत्वा कर्म दुष्करम्। नाहत्वा मत्सखातीव प्राप्नोति महतीं श्रियम्। नाप्नुतः कीर्तिरक्षीह न दत्तं न पुनः प्रजाः। इन्द्रो हतवधेनैव महेन्द्रः समपद्यत। य एव देवा हन्तारस्तान् लोकोऽर्चयते भृशम्। हत्वा रुद्रस्तथा स्कन्दः शक्रोऽग्निर्वरुणो यमः। हत्वा कालस्तथा मृत्युर्वीर्युर्वैश्रवणो रविः। वसवो मरुतः साध्या विश्वे देवाश्च भारत!। एतान्देवान्नमस्यन्ति प्रतापप्रवता जनाः। न ब्रह्माणं न धातारं न पूषार्यं कथञ्चन। मध्यस्थान् सर्वभूतेषु दान्तान् शमपरायणान्। यजन्ते मानवाः केचित्प्रशस्ताः सर्वकर्मसु। न हि पश्यामि लोकेऽस्मिन् लोके कञ्चिदहिंसया। सत्त्वैः सत्त्वा हि जीवन्ति दुर्बलैर्बलवत्तराः। नकुलो मूषिकानत्ति बिडालो नकुलं तथा। बिडालमत्ति श्वा राजन् श्वानं व्याघ्रस्तथा। तानत्ति पुरुषः सर्वान् पश्य कालो यथागतः। प्राणस्यान्नमिदं सर्वं जङ्गमं स्थावरञ्च यत्। विधानं दैवविहितं तत्र विद्वान्न मुह्यति। यथा मृगोऽसि राजेन्द्र! तथा भवितुमर्हसि। विनीतक्रोधहर्षा हि सन्तो वनमुपाश्रिताः। विना धर्मं न कुर्वन्ति तापसाः प्राणयापनम्। उदके बहवः प्राणाः पृथिव्यां च फलेषु च। न च कश्चित्तान् हन्ति विनस्यत्प्राणयापनात्। क्षुद्रजन्तूनि भूतानि तत्रागम्याथि कानिचित्। पक्षाघातोऽपि निपातेन वेषां स्यात् क्षुन्मयो व्ययः। यामाश्रित्याश्रम्य सन्तो विगतक्रोधमत्सराः। वने कुटुम्बधर्माणो दृश्यन्ते परिमोक्षिताः। भूमिं भित्त्वौषधीश्चित्वा इत्यादीनखजान् बभून्। मनुष्यास्तन्वते यज्ञांस्ते स्वर्गं प्राप्नुवन्ति च। दण्डनीत्यां प्रणीतायां सर्वे सिध्यन्त्युपक्रमाः। कौन्तेय! सर्वभूतानां तत्र मे नास्ति संशयः। दण्डश्चेन्न भवेल्लोके विनश्येयुरिमाः प्रजाः। मूले मत्स्यानिवापक्ष्यन् दुर्बलान् बलवत्तराः। सत्यं चेदं ब्रह्मणा पूर्वसृष्टं दण्डः प्रजा रक्षति साधुनीतः। पशूनामत्तयश्च प्रतिगम्य भीताः सन्तर्ज्जिता दण्डभयाज्जयन्ति। अस्वस्तम इवेदं स्यान्न प्राज्ञायेत किञ्चन। दण्डश्चेन्न भवेल्लोके विभजन् साध्वसाधुनी। वेऽपि सन्तिभमर्यादा नास्तिका वेदनिन्दकाः। तेऽपि भोगाय कल्पन्ते दण्डेनाशु निपीडिताः। सर्वो दण्डजितो लोके दुर्लभो हि शुचिर्जनः। दण्डस्य हि भयाद्भीतो भोगायैव प्रवर्तते। चातुर्वर्ण्यप्रभेदाय सुनीतिनयनाय च। दण्डो विधात्रा विहितो धर्मायैवभिरक्षितम्। यदि दण्डान्न विभ्येयुर्वर्णाश्च स्वापदानि च। अद्युः पशून्मनुष्यांश्च यज्ञार्थानि हवींषि च। न ब्रह्म चाध्यधीयीत अस्वाध्यायी न दुहेत गाम्। न कन्योद्वहनं गच्छेदादि दण्डो न पालयेत्। विप्लवोपः प्रवर्तेत भिद्येरन् सर्वसेतवः। ममत्वं न प्रजानीयुर्यदि दण्डो न पालयेत्। न संवत्सरसत्राणि तिष्ठेयुरकृतोभयाः। विधिपूर्वाणि यानि यदि दण्डो न पालयेत्। चरेयुर्नाश्रमे धर्मं यथोक्तं विधिमाश्रिताः। न विद्यां प्राप्नुयात् काञ्चित् यदि दण्डो न पालयेत्। न योद्धा न वलीवर्दा नाश्वाश्वतरगर्दभाः। युक्ता वहेयुर्यानानि यदि दण्डं न पालयेत्। न प्रेष्या वचनं कुर्युर्न वाता जातु कर्हिचित्। तिष्ठेत्सिद्धमती धर्मे यदि दण्डो न पालयेत्। दण्डे स्थिताः प्रजाः सर्वा दण्डे सर्वं विदुर्बुधाः। दण्डे स्वर्गो मनुष्याणां लोकोऽयञ्च प्रतिष्ठितः। न तत्र क्रूरं पापं वा वक्तुमर्हति कश्चन। यत्र दण्डः सुविहितश्चरत्यरिविनाशनः। क्षत्रियः स्वादपि सिद्धेर्दृढा दण्डस्य चोद्यतो भवेत्। क्षत्रेत्काकः पुरोडाशं यदि दण्डो न पालयेत्।"

मनुनाप्युक्तं यथा "दण्डः शास्ति प्रजाः सर्वा दण्ड एवाभिरक्षति। दण्डः सुप्तेषु जागर्ति दण्डं धर्मं विदुर्बुधाः। समीक्ष्य स धृतः सम्यक् सर्वा रञ्जयति प्रजाः। असमीक्ष्य प्रणीतस्तु विनाशयति सर्वतः। यदि न प्रणयेद्राजा दण्डं दण्ड्येष्वतन्द्रितः। शूले मत्स्यानिवापक्ष्यन् दुर्बलान् बलवत्तराः। अद्यात् काकः पुरोडाशं श्वा चाविलिहेद्धविस्तथा। स्वास्यं न स्यात् क्रियासु प्रवर्तेताधरोत्तरम्। सर्वो दण्डजितो लोको दुर्लभो हि शुचिर्नरः। दण्डस्य हि भयात् सर्वं जगद्भोगाय कल्पते।

देवदानवगन्धर्वा रक्षांसि पतगोरगाः। तेऽपि भोगाय कल्पन्ते दण्डेनैव निपीड़िताः। दुष्प्रेयुः सर्ववर्णाश्च भिद्येरन् सर्वसेतवः। सर्वलोकप्रकोपश्च भवेद्दण्डस्य विभ्रमात्। यत्र श्यामो लोहिताक्षो दण्डश्चरति पापहा। प्रजास्तत्र न मुह्यन्ति नेता चेत् साधु पश्यति। तस्माद्धर्मं यमेतारं राजानं सत्यवादिनम्। समीक्ष्यकारिणं प्राज्ञं धर्मकामार्थकोविदम्। तं राजा प्रणयन् सम्यक् त्रिवर्गेणाभिवर्द्धते। कामात्मा विषमः क्षुद्रो दण्डेनैव निहन्यते। दण्डो हि सुमहातेजा दुर्धरश्चाकृतात्मभिः। धर्मात्किलषितं हन्ति नृपमेव सबान्धवम्।" तस्य स्थानानि च मनूक्तानि

"दश स्थानानि दण्डस्य मनुः स्वायम्भुवोऽब्रवीत्। त्रिषु वर्णेषु यानि क्षुत्रियो ब्राह्मणो व्रजेत्। उपस्थमुदरं जिह्वा हस्तौ पादौ च पञ्चमम्। चक्षुर्नासा च कर्णौ च धनं देहस्तथैव च। अनुबन्धं परिज्ञाय देशकालौ च तत्त्वतः। सारापराधौ चालोक्य दण्डं दण्ड्येषु पातयेत्। अधर्मदण्डनं लोके यशोघ्नं कीर्तिनाशनम्। अस्वर्ग्यञ्च परत्रापि तस्मात्तत् परिवर्जयेत्। अदण्ड्यान् दण्डयन्राजा दण्ड्यांश्चैवाप्यदण्डयन्। अयशो महदाप्नोति नरकञ्चैव गच्छति। वाग्दण्डं प्रथमं कुर्यात् धिग्दण्डं तदनन्तरम्। तृतीयं धनदण्डन्तु वधदण्डमतः परम्। वधेनापि यदा त्वेतान्निग्रहीतुं न शक्नुयात्। तदैषु सर्वमप्येतत् प्रयुञ्जीत चतुष्टयम्।"

तस्योत्तमाधममध्यमभेदेन परिमाणभेदा मनूक्ता यथा "पणानां द्वे शते सार्द्धे प्रथमः साहसः स्मृतः। मध्यमः पञ्च विज्ञेयः सहस्रन्त्वेव चोत्तमः"।

विवादभेदे तद्भेदाः सहस्रोक्ताः क्रमशो दर्शने।

तत्र ऋणादाने प्रतिवादिनो निह्नवे निह्नुतद्रव्यतुल्यम्। वादिनो मिथ्याभियोगे अभियोगविषयधनात् द्विगुणं धनं वादिनो दमः। "निह्नवे भाषितो दद्यात् धनं राज्ञे च तत्समम्। मिथ्याभियोगोद्द्विगुणमभियोगात् धनं हरेत्" याज्ञ०। मनुनात्र विशेष उक्तः यथा

"ऋणे देये प्रतिज्ञाते पञ्चकं शतमर्हति। अपह्नवे तद्द्विगुणं तन्मनोरनुशासनम्"।

"यः साध्यन्तं ऋन्देन चेदयेत् धनिकं नरम्। स राज्ञा तद्दशमांशं दाप्यस्तस्य च तद्धनम्" मनुः।

प्रतिपन्नार्थस्य राज्ञा दापने अधमर्णस्य निह्नवाभावे दशकं शतं साधितद्रव्यस्य दशमभागो दमः। "राज्ञाऽधमर्णिको दाप्यः साधितादृशकं शतम्" याज्ञ०।

उपनिधिनिक्षेपादौ नाशभेदे दमभेदो याज्ञ० उक्तो यथा

"क्षेपचेत् मार्गितेऽदत्ते दाप्यो दण्डं च तत्समम्" आजीवन् सेक्षया दण्ड्यो दाप्यस्त्वापि सोदयम्। याचितान्याहितन्यासनिःक्षेपादिष्वयं विधिः"।

अत्र विशेषो मनुनोक्तो यथा "यो निक्षेपं नार्पयति यश्चानिक्षिप्य याचते। तावुभौ चौरवच्छास्यौ दाप्यौ वा तत्समं दमम्। निक्षेपस्योपकर्त्तारं तत्समं दापयेद्दमम्। तस्योपनिधिकर्त्तारमविशेषेण पार्थिवः"।

अन्यना उत्कोचयकर्षे मनुनोक्तो यथा "उपधाभिश्च यः कश्चित् परद्रव्यं हरेन्नरः। स सहायः संहन्तव्यः प्रकाशं विविधैर्वधैः"। "करचरणशिरस्कर्णादिभिर्नानाविधैः वधोपायैः स दण्ड्यः" कुल्लू०।

कौटसाक्ष्ये मनुनोक्तो दमो यथा

"लोभान्मोहाद्भयान् मैत्रात् कामात् क्रोधात्तथैव च। अज्ञानाद्बालभावाच्च साक्ष्यं वितथमुच्यते। एषामन्यतमे स्थाने यः साक्ष्यमनृतं वदेत्। तस्य दण्डविशेषांस्तु प्रवक्ष्याम्यनुपूर्वशः। लोभात् सहस्रं दण्ड्यस्तु मोहात् पूर्वन्तु साहसम्। भयाद्द्वौ मध्यमौ दण्डौ मैत्रात् पूर्वं चतुर्गुणम्। कामाद्दशगुणं पूर्वं क्रोधात्तु त्रिगुणं परम्। अज्ञानात् द्वे शते पूर्णे बालिश्याच्छतमेव तु। एतानाहुः कौटसाक्ष्ये प्रोक्तान् दण्डान् मनीषिभिः। धर्मस्याभिविचारार्थमधर्मनियमाय च। कौटसाक्ष्यन्तु कुर्वाणान् स्त्रीन् वर्णान् धार्मिको नृपः। प्रवासयेद्दण्डयित्वा ब्राह्मणन्तु विवासयेत्"। अत्र विशेषमाह याज्ञ० "यः साक्ष्यं भाषितोऽन्येभ्यो निह्नुते तत्समो हतः। स दाप्योऽष्टगुणं दण्डं ब्राह्मणन्तु विवासयेत्"।

साक्ष्यादाने दममाह याज्ञ०। "ब्रुवन् हि नरः साक्ष्यमृणं स दशबन्धकम्। राज्ञा सर्वं प्रदाप्यः स्यात् षट्चत्वारिंशकेऽहनि। न ददाति च यः साक्ष्यं जानन्नपि नराधमः। स कूटसाक्षिणां पापैस्तुल्यो दण्डेन चैव हि"।

सङ्कल्पितद्रव्यविषये दमो मनुनोक्तो यथा "समेदमिति यो ब्रूयात् सोऽनुयोज्यो यथाविधि। संख्यादि रूपसंस्थादीन् स्वामी तद्द्रव्यमर्हति। अवेदयानो नष्टस्य देशं कालञ्च तत्त्वतः। वर्णं रूपं प्रमाणञ्च तत्समं दण्डमर्हति"। "कृतं प्रनष्टं यो द्रव्यं परकृत्यादवाप्नुयात्। अनि-

वेद्य रूपे दण्ड्यः स तु धनवतिं पणान्" मनुः। "आगमेनोपभोगेन नष्टं भाव्यमतोऽन्यथा। पञ्चबन्धो दमस्तत्र राज्ञे तेनाविभाविते" याज्ञ०। "पञ्चबन्धः पञ्चमांशः" मिता०।

स्वस्वामिविक्रये मनुनोक्तो दमो यथा "अवहार्यौ भवेचैव सान्वयः षट्शतं दमम्। निरन्वयोऽनपसरः प्राप्तः स्वाद्चौरकिल्बिषम्"। "एष परस्वविक्रयी यदि स्वामिनो भ्रात्रादिरूपत्वेन सान्वयः सम्बन्धी भवति तदा षट् पणशतानि अवहार्यौ दमनीयः यदि पुनः स्वामिनः सम्बन्धी न भवति अनपसरत्वं स्यात् अपसरत्वेनानाप्तात् सकाशाद्ग्रहणमित्यपसरः प्रतिग्रहीतृक्रयादिः स यस्य स्वामिसम्बन्धिपुत्रादेः सकाशात् नास्ति तदा चौरसम्बन्धि पापं तद्दमनीय इत्यर्थः" कुल्लू०। "नान्यदन्ये न संसृष्टरूपं विक्रयमर्हति। न चासारं न च न्यूनं न दूरे न तिरोहितम्" मनुः। "कुङ्कुमादिद्रव्यं कुसुम्भादिना मिश्रीकृत्य न विक्रेतव्यं न चासारं सारमित्यभिधाय न च तुलादिना न्यूनं न च परोक्षावस्थितं न च रागादिनास्थापितरूपम् अतोऽस्वामिविक्रयसाहश्यादस्वामिविक्रयदम एव स्यात्" कुल्लू०।

दोषविशिष्टकन्यादाने दमो यथा। "यस्तु दोषवतीं कन्यामनाख्याय प्रयच्छति। तस्य कुर्यान्नृपो दण्डं स्वयं षण्णवतिं पणान्। अकन्येति च यः कन्यां ब्रूयाद्द्वेषेण मानवः। स शतं प्राप्नुयाद्दण्डं तस्या दोषमदर्शयन्"।

दत्ताप्रदानिके नारदेनोक्तो दमो यथा "अदत्त्वान्यदेयं यो लोभाद्यस्यादेयं प्रयच्छति। अदेयदायको दण्ड्यस्तावदत्तप्रतीच्छकः"। तत्समभित्यर्थः।

अभ्युपेत्याशुश्रूषायां "शिक्षयन्नसकृद्दुष्टं न चाचार्यं परित्यजेत्। बलाद्वासयितव्यः स्यात् बधबन्धौ च सोऽर्हति" नारदः। "बधोऽत्र ताडना दोषस्याल्पत्वात्" मिता०।

संविद्व्यतिक्रमादौ "गणद्रव्यं हरेद्यस्तु संविदं यश्च लङ्घयेत्। सर्वस्वहरणं कृत्वा तं राष्ट्राद्विप्रवासयेत्" याज्ञ०। "अयञ्च दण्डोऽनुबन्धादतिशये द्रष्टव्यः। अनुबन्धाद्यत्वे तु "यो ग्रामदेशसङ्घानां कृत्वा सत्येन संविदम्। विसंवदेन्नरो लोभात्तं राष्ट्राद्विप्रवासयेत्। निष्कान्दापयेदेनं समयव्यभिचारिणम्। चतुःसुवर्णं निष्कं शतमानञ्च राजतमिति" मनूक्त निष्कसुवर्णचतुःसुवर्णनिष्कशतमानानां चतुर्णामन्यतमो जातिप्रकृत्याद्यपेक्षया कल्पनीयः" मिता०।

वेतनादाने "भृत्यो नार्तो न कुर्याद्यो दर्पात् कर्म यथोदितम्। स दण्ड्यः कृष्णलान्यष्टौ न देयं तस्य वेतनम्" मनुः।

द्यूतसमाह्वये "राज्ञा सचिह्नं निर्वास्याः कूटाक्षोपधिदेविनः" याज्ञ० "कूटाक्षदेविनः पापान् राज्ञा राष्ट्राद्विवासयेत्। कशाङ्कोत्तमाङ्गामासज्य स ह्येषां विनयः स्मृतः" नारदः यानि च मनुवचनानि द्यूतनिषेधपराणि। "द्यूतं समाह्वयञ्चैव यः कुर्यात् कारयेत वा। तान् सर्वान् घातयेद्राजा शूद्रांश्च द्विजचिह्निनः" इत्यादीनि तान्यपि कूटाक्षदेवनविषयतया राजाध्यक्षसंविकरहितद्यूतविषयतया च योज्यानि" मिता०।

स्वामिपालविवादे मिताक्षरोक्ता दमा यथा "साधानष्टौ तु महिषी सस्यघातस्य कारिणी। दण्डनीया तदर्धं तु गौस्तदर्धं सजाविकम्" याज्ञ०। परसस्यविनाशकारिणी महिषी अष्टौ माषान् दण्डनीया। गौस्तदर्धं चतुरो माषान् अजामेषश्च माषद्वयं दण्डनीयम्। महिष्यादीनां धनसम्बन्धाभावात्तत्स्वामी पुरुषो लक्ष्यते। माषस्यात्र तात्त्विकपणस्य विंशतितमो भागः "माषो विंशतिमो भागः पणस्य परिकीर्त्तितः" इति नारदस्मरणात्। एतच्चात्तानविषयम्। ज्ञानपूर्वं तु "पणस्य पादौ द्वौ गां तु द्विगुणं महिषीं तथा। तथाऽजाविकवत्सानामादौ दण्डः प्रकीर्त्तितः" इति स्मृत्यन्तरोक्तं द्रष्टव्यम्। यत् पुनर्नारदेनोक्तम् "माषश्चान्द्रायणेद्दुदण्डं द्वौ माषौ महिषीं तथा। तथाजाविकवत्सानां दण्डः स्यादर्धमाषिक" इति। तत्पुनः प्ररोहयोग्यमूलावयवेभक्षणविषयम्। अपराधातिशयेन क्वचिद्दण्डद्वैगुण्यमाह "भक्षयित्वोपविष्टानां यथोक्ताद्द्विगुणो दमः" याज्ञ०। "यदि पशवः परक्षेत्रे सस्यमक्षयित्वा तत्रैवावतिष्ठन्ते प्रेरिते। तदा यथोक्तादण्डाद्द्विगुणो दण्डो वेदितव्यः। "वसतां द्विगुणः प्रोक्तः सवत्सानामतुर्गुण" इति वचनात्। क्षेत्रान्तरे पशुान्तरे चातिदेशमाह "समभेषां विवीतेऽपि खरोष्ट्रं महिषीसमम्" याज्ञ०। विवीतः प्रचुरतृणकाष्ठोरक्षभाग्यः परक्षेत्रतो भूप्रदेशस्तदुपघातेऽपीतरक्षेत्रदण्डसमदण्डमेषां महिष्यादीनां विद्यात्। खराश्वोष्ट्राश्च खरोष्ट्रं तन्महिषीसमं महिषी यत्र ताडनेन दण्डेन दण्ड्यते तत्र ताडनेनैव दण्डेन खरोष्ट्रमपि प्रत्येकं दण्डनीयम्। सङ्घोपरोधकत्वे खरोष्ट्रयोः प्रत्येकं महिषीतुल्यत्वाद्दमस्य चापराधानुसारित्वात् खरोष्ट्रमिति समाहारो न विवक्षितः। परक्षेत्रनाशे

गोस्वामिनो दण्ड उक्त इदानीं क्षेत्रस्वामिने फलमथ-सौ दापनीय इत्याह "यावत्सस्यं विनश्येत् तावत् स्यात् क्षेत्रिणः फलम्। गोपस्तावत्तु गोमी तु पूर्वोक्तं दण्डमर्हति" याज्ञ०। सस्यपदेन क्षेत्रोपचयोपलक्षणार्थम्। यच्चित् क्षेत्रे यावत्प्रमाणधान्यादिकं गवादिभिर्विनाशितं तावत्क्षेत्रफलमेतावति क्षेत्रे एतावद्भवतीति सामन्तैः परिकल्पितं तत्क्षेत्रस्वामिने गोमी दापनीयः। गोपस्तु ताड़नीय एव न फलं दापनीयः। गोपस्य ताड़नं पूर्वोक्तधनदण्डसहितमेव पालदोषेण सस्यस्य नाशे द्रष्टव्यः। "या नष्टा पालदोषेण गौस्तु सस्यानि नाशयेत्। न तत्र गोमिनो दण्डः पालस्तद्दण्डमर्हतीति" वचनात्। गोमी पुनः स्वापराधेन सस्यनाशं पूर्वोक्तं दण्डमेवार्हतीति न ताड़नम्। फलदानं पुनः सर्वत्र गोमिन एव तत्फलपुष्टमहिष्यादिक्षीरोपभोग द्वारेण तत्क्षेत्रफलभोगत्वात्।

"क्षेत्रविशेषेऽपवादमाह "यदि ग्रामविधीतान्ते क्षेत्रे दोषो न विद्यते। अकामतः कामचारे चौरवद्दण्डमर्हति" याज्ञ०। यदि मार्गसमीपवर्त्तिनि क्षेत्रे ग्रामविधीतसमीपवर्त्तिनि च क्षेत्रेऽकामतो गोभिर्भक्षिते गोपगोमिनोर्द्वयोरप्यदोषः। दोषाभावप्रतिपादनं च दण्डाभावार्थं विनष्टसस्यमौल्यदानप्रतिषेधार्थं च। कामचारे कामतचारे चौरवत् चौरस्य यादृशो दण्डः तादृशं दण्डमर्हति। एतच्चानाहृतक्षेत्रविषयम्। "तत्रापरिवृतं धान्यं विहिंस्युः पशवो यदि। न तत्र प्रणयेद्दण्डं नृपतिः पशुरक्षिणामिति" दण्डाभावस्यानाहृतक्षेत्रविषयत्वेन मनूक्तत्वात्। आहृते पुनर्गोगोदिक्षेत्रेऽपि दोषोऽस्त्येव। इतिकरणञ्च तेनैवोक्तम् "इतिञ्च तत्र कुर्वीत यासुष्ठो नावलोकयेत्। छिद्रं निवारयेत्सर्वं शूकरस्वानुगमिति"। पशुविशेषेऽपि दण्डाभावमाह "मक्षोत्क्षोत्कृष्टपशवः सूतिकागन्तुकाश्च यः। पालो येषां न, ते मोच्या दैवराजपरिप्लुताः" याज्ञ०। "मक्षांवासावृता च मक्षोत्क्षः क्षुधः पेक्षा। उत्कृष्टपशवः क्षुधोत्सर्गविधानेन देवतोद्देशेन त्यक्ताः। सूतिका प्रसूता ऋतुर्दशाहा। आगन्तुकः स्वयूथात्परिभ्रष्टोदेशान्तरादागतः। एते मोक्षाः। परस्वमक्षणेऽपि न दण्ड्याः। येषां च पालो न विद्यते तेऽपि दैवराजपरिप्लुताः दैवराजोपद्रुताः सस्यनाशकारिणो न दण्ड्याः। आदिग्रहणात् कृष्यादयो गृह्यन्ते। ते चोत्सृष्टपशवः "अदण्ड्या दक्षिणोक्षाणः प्रजापाला हि ते स्मृताः। अदण्ड्यो काणकुब्जौ च ये चान्यत्सदृशव्रणाः। अदण्ड्यागन्तुको गौश्च सूतिका चाभिसारिणी। अदण्ड्याश्चोत्सृष्टे गावः श्राद्धकाले तथैव चेति"। अत्रोत्सृष्टपशूनामस्वामिकत्वेन दण्डप्रत्यासन्नत्वात् इदानीमर्थसंपादानं यथोत्सृष्टपशवो न दण्ड्या एवं मक्षोत्क्षादय इति" मिता०।

"यदि क्षेत्रे परिवृते ग्रामान्तीयेऽथवा पुनः। सपालः शतदण्डार्हो विपालान् वारयेत् पशून्" मनुः। क्षेत्रादिसीमाविवादे मनूक्तो दण्डो यथा। "क्षेत्रकूपतड़ागानामारामस्य गृहस्य च। सामन्तप्रत्ययो नेयः सीमासेतुविनिर्णयः। सामन्ताश्चेन्मृषा ब्रूयुः सेतौ विवदतां नृणाम्। सर्वे पृथक् पृथग्दण्ड्या राज्ञा मध्यमसाहसम्"। "सर्वदायाः प्रभेदे तु सीमातिक्रमणे तथा। क्षेत्रस्य हरणे दण्डा अधमोत्तममध्यमाः" याज्ञ०। "अनेकक्षेत्र व्यवच्छेदिका साधारणी भूमर्यादा तस्याः प्रकर्षेण भेदने सीमातिक्रमणे सीमामतिलङ्घ्य कर्षणे क्षेत्रस्य च मवादिप्रदर्शनेन हरणे यथाक्रमेणाधमोत्तममध्यमदमा वेदितव्याः। क्षेत्रग्रहणञ्च गृहारामादुपलक्षणार्थम्। यदा पुनः स्वीयभान्त्या क्षेत्रादिकमपहरति तदा द्विगुणो दमो वेदितव्यः। "गृहं तड़ागमारामं क्षेत्रं वा भीषया हरन्। शतानि पञ्च दण्ड्यः स्यादज्ञानाद्द्विगुणो दमः" मनूक्तः। अपह्नियमाणक्षेत्रादिभूयस्त्वपर्य्यालोचनया कदाचिदुत्तमोऽपि दण्डः प्रयोक्तव्यः। अतएवाह "बधसर्वस्वहरणं पुराद्विर्वासनादृते। तदङ्गच्छेद इत्युक्तो दण्ड उत्तमसाहस इति" मिता०।

वाक्पारुष्ये दमो मनूक्तो यथा "शतं ब्राह्मणमाक्रुश्य क्षत्रियो दण्डमर्हति। वैश्योऽध्यर्द्धशतं द्वे वा शूद्रस्तु वधमर्हति। पञ्चाशद्ब्राह्मणो दण्ड्यः क्षत्रियस्याभिशंसने। वैश्ये स्यादर्द्धपञ्चाशच्छूद्रे द्वादशको दमः। समवर्णे द्विजातीनां द्वादशैव व्यतिक्रमे। वादेष्वसाक्ष्ये तद्देव द्विगुणं भवेत्। एकजातिर्द्विजातींस्तु वाचा दारुणया क्षिपन्। जिह्वायाः प्राप्नुयाच्छेदं जघन्यप्रभवो हि सः। नामजातिग्रहन्त्वेषामभिद्रोहेण कुर्वतः। निःक्षेपोऽयोमयः शङ्कुर्ज्वलन्नास्ये दशाङ्गुलः। धर्म्मोपदेशं दर्पेण विप्राणामस्य कुर्वतः। तप्तमासेचयेत्तैलं वक्त्रे श्रोत्रे च पार्थिवः। युतं देशञ्च जातिञ्च कर्म शारीरमेव च। वितथेन ब्रुवन् दर्पा-

हाथः स्याद्विगतं दमम्। काष्ठं वाप्यथ वा यष्टिमन्यं वापि तथाविधम्। तच्चेनापि ब्रुवन् दाप्यो दण्डं कार्षापणावरम्। मातरं पितरं जायां भ्रातरं तनयं गुरुम्। आक्षारयन् शतं दाप्यः पन्थानं चाददद्गुरोः। ब्राह्मणक्षत्रियाभ्यान्तु दण्डः कार्यौ विजानता। ब्राह्मणे साहसः पूर्वः क्षत्रिये त्वेव मध्यमः। विट्शूद्रयोरेवमेव स्वजातिं प्रति तत्त्वतः। छेदनं प्रथमं दण्डस्येति विनिश्चयः।"

"सत्यासत्यान्यथाकौल्यैर्नाङ्गेन्द्रियरोगिणाम्। छेदं करोति चेद्दण्ड्यः पणानर्हत्रयोदश। अभिगन्ताम्बि भागिनेयीं मातरं वा तवेति च। शपन्तं दापयेद्राजा षड्विंशतिकं दमम्। अर्द्धोरुमेषु द्विगुणः परस्त्रीपुत्तमेषु च। दण्डप्रणयनं कार्यं वर्णजात्युत्तराधरैः। प्रतिलोम्यापदादेषु द्विगुणात्त्रिगुणादमाः। वर्णानामानुलोम्येन तस्माद्दण्डं हानितः। बाहुशीर्षानेत्रसक्थिविनाशे वाचिके दमः। शत्यक्षदर्शिकः पादनासाकर्णकरादिषु। अथाक्षस्तु वदन्नेवं दण्डनीयः पणान् दश। तथा भक्तः प्रतिभुवं दाप्यः क्षेमाय तस्य तु। पतनीये हते क्षेपे दण्डो मध्यमसाहसः। उपपातकयुक्ते तु दाप्यः प्रथमसाहसः। त्रैविद्यब्रह्मदेवानां क्षेप उत्तमसाहसः। मध्यमो जातिपूगानां प्रथमो ग्रामदेशयोः" याज्ञ०।

दण्डपारुष्ये दण्डा मनुक्ता यथा "येन केनचिदङ्गेन हिंसा देत् श्रेष्ठमन्यजः। छेत्तव्यं तत्तदेवास्य तन्मनोरनुशासनम्। पाणिमुद्यम्य दण्डं वा पाणिच्छेदनमर्हति। पादेन प्रहरन् कोपात् पादच्छेदनमर्हति। सहासनमभिप्रेप्सुरुत्कृष्टस्यापकृष्टजः। कट्यां कृताङ्को निर्वास्यः स्फिचं वाऽस्यावकर्त्तयेत्। अवनिष्ठीवतो दर्पात् द्वावोष्ठौ छेदयेन्नृपः। अवमूत्रयतो मेढ्रमवशर्धयतो गुदम्। केशेषु गृह्णतो हस्तौ छेदयेदविचारयन्। पादयोर्हादिकायान्तु पीडायां व्रणेषु च। त्वग्भेदकः शतं दण्ड्यो लोहितस्य तु दर्शकः। मांसभेत्ता तु षण्निष्कान् प्रवासस्त्वस्थिभेदकः। वनस्पतीनां सर्वेषामुपभोगे यथा यथा। तथा तथा दमः कार्यो हिंसायामिति धारणा। मनुष्याणां पशूनाञ्च दुःखाय प्रहृते सति। यथा यथा महद्दुःखं दण्डं कुर्यात्तथा तथा। अङ्गावपीडनायाञ्च प्राणशोणितयोस्तथा। समुत्थानव्ययं दाप्यः सर्वं दण्डमथापि वा। द्रव्याणि हिंसात् यो यस्य ज्ञानतोऽज्ञानतोऽपि वा। स तस्योत्पादयेत्तुष्टिं राज्ञे दद्याच्च तत्समम्। चर्मचार्मिकभाण्डेषु काष्ठलोष्टमयेषु च। मूल्यात् पञ्चगुणो दण्डः पुष्पमूलफलेषु च। यानस्यैव तु यातुश्च यानस्वामिन एव च। दशातिवर्त्तनान्याद्यः पूर्वे दण्डो विधीयते। छिन्नयुग्मे भिन्नयुगे तिर्यक्प्रतिमुखागते। अक्षभङ्गे च यानस्य चक्रभङ्गे तथैव च। छेदने चैव यन्त्राणां योक्त्ररश्मोत्तथैव च। अक्रन्दे चाप्यपैहीति न दण्डं मनुरब्रवीत्। यत्रापवर्त्तते युग्यं वैगुण्यात् प्राजकस्य तु। तत्र स्वामी भवेद्दण्ड्यो हिंसायां द्विगतं दमम्। प्राजकश्चेद्ब्रवेदाप्तः प्राजको दण्डमर्हति। युग्यस्थाः प्राजकेऽनाप्ते सर्वे दण्ड्याः शतं शतम्। स चेत्तु पथि संरुद्धः पशुभिर्वा रथेन वा। प्रमापयेत् प्राणभृतस्तत्र दण्डोऽविचारतः। मनुष्यमारणे क्षिप्रं चौरवत् किल्बिषी भवेत्। प्राणभृत्तु महत्सङ्घं गोमहोष्ट्रहयादिषु। क्षुद्रकाणां पशूनाञ्च हिंसायां द्विगतो दमः। पञ्चाशत्तु भवेद्दण्डः शुभेषु मृगपक्षिषु। गर्दभाजाविकानाञ्च दण्डः स्यात् पञ्चमाषकः। साधकन्तु भवेद्दण्डः शूकरनिपातने। भार्यां पुत्रञ्च दासञ्च शिष्यो भ्राता च सोदरः। प्राप्नापराधान् शास्याः स्यू रज्ज्वा वेणुदलेन वा। पृष्ठतस्तु शरीरस्य, नोत्तमाङ्गे कथञ्चन। अतोऽन्यथा तु प्रहरन् प्राप्नः स्याच्चौरकिल्बिषम्" । अस्य विशेषमाह याज्ञ० यथा

"भस्मपङ्कुरजःसर्गे दण्डो दशपणः स्मृतः। अमेध्यपाणिनिष्ठ्यूतसर्गने द्विगुणस्ततः। समेष्वेवं परस्त्रीषु द्विगुणश्चोत्तमेषु च। क्षौमेष्वर्द्धदमो मोहमदादिभिरदण्डनम्। विप्रपीडाकरं छेद्यमङ्गमब्राह्मणस्य तु। उद्गूर्णे प्रथमो दण्डः संसर्गे तु तदर्द्धकः। उद्गूर्णे चरणपादे च दशविंशतिकौ दमौ। परस्परन्तु सर्वेषां शस्त्रे मध्यमसाहसम्। पादकेशांशुकरोरुश्मश्रुनेषु पणान् दश। पीडाकर्षांशुकावेष्टपादाघ्रासे शतं दमः। शोणितेन विना दुःखं कुर्वन् काष्ठादिभिर्नरः। द्वात्रिंशतं पणान् दाप्यो द्विगुणं दर्शनेऽस्रजः। करपादद्रुतौ भङ्गे छेदने वर्णनाशयोः। मध्यो दण्डो व्रणोद्भेदे शस्त्रकल्पकृते तथा। चेष्टाभोजनवाग्रोधे नेत्रादिप्रतिभेदने। कराङ्घ्रिबाहुसक्थ्नाञ्च भङ्गे मध्यमसाहसः। एकं शतं बहूनाञ्च वधोक्तद्विगुणो दमः। कलहापहृतं देयं दण्डश्च द्विगुणः स्मृतः। दुःखसुतपादोद्भवस्तु स समुत्थानजव्ययम्। दाप्यो दण्डश्च यो

वस्त्रिनृ कलहे षड्दाहृतः। अभिघाते तथा क्षेदे भेदे कुट्यावपातने। पणान् दाप्यः पञ्चदशविंशतिनवतिं तथा। दुःखोत्पादि स्टष्टे द्रव्यं क्षिपन् प्राग्वदरन्तथा। षोड़शाद्यः पणान् दाप्यो द्वितीयो मध्यमं दमम्। दुःखे च शोणितोत्पादे शाखाङ्गच्छेदने तथा। दण्डः क्षुद्रपशुनाञ्च द्विपञ्चप्रभृति क्रमात्। छिन्नस्य च्छेदने चैव मध्यमो मूल्यमेव च। सङ्घातपशुनामेतेषु स्थानेषु द्विगुणो दमः। प्ररोहिशाखिनां शाखाच्छत्वर्षविदारणे। उपजीव्यद्रुमाणाञ्च विंशतेर्द्विगुणो दमः। चैत्यश्मशानसीमासु पुण्यस्थाने सुरालये। जातद्रुमाणां द्विगुणो दमो दलेऽथ विद्युते। गुल्मगुच्छलतावल्लितानौषधिवीरुधाम्। पूर्वसूतादृते दण्डः स्थानेषूक्तेषु कर्त्तने"।

विक्रयासम्प्रदाने "वमानस्त्रीनृ पणान् दण्डो नेजकस्तु परांशुकम्। विक्रयावक्रयाधानयाचितेषु पणान् दश। पितापुत्रविरोधे तु साक्षिणां त्रिपणो दमः। अन्तरे च तयोर्यः स्यात्तस्याष्टगुणो दमः। तुलामानसमानानां कूटत्वाद्यकस्य च। एभिश्च व्यवहर्त्ता यः स दाप्यो दण्डमुत्तमम्। कूटं कूटकं ब्रूते कूटं यश्चापि कूटकम्। स नाणकपरीक्षी तु दाप्य उत्तममाहसम्। भिषङ्मिथ्या चरन् दाप्यस्त्रिंशत्तु प्रथमं दमम्। मानुषे मध्यमं राजमानुषेषूत्तमं दमम्। अवन्ध्यं यश्च बध्नाति बन्ध्यं यश्च प्रमुञ्चति। अपाप्तव्यवहारञ्च स दाप्यो दण्डमुत्तमम्। यानेन तुल्यया यापि योऽंशमष्टमकं हरेत्। दण्डं स दाप्यो द्विगतं हृद्धौ हानौ च कल्पितम्। भेषजस्नेहलवणगन्धधान्यगुड़ादिषु। पण्येषु क्षिपन् हीनं पणान् दाप्यस्तु षोड़श। सुवर्णमणिरूप्यायःकाष्टवल्कलवाससाम्। अजातौ जातिकरणे विक्रेयाष्टगुणो दमः। सप्तद्रव्यपरिवर्त्तञ्च सारभाण्डस्य कृत्रिमम्। आधानं विक्रयं वापि नयतो दण्डकल्पना। भिन्ने पणे तु पञ्चाशत् पणे तु शतमुच्यते। द्विपणे द्विगतो दण्डो मूल्यद्विद्धौ च द्विगुणो यात्र उक्तो दमः।

"अन्यरूपे च विक्रीतं दुष्टं वाऽदुष्टवद् यदि। विक्रीणीते दमस्तत्र मूल्यात्तु द्विगुणो भवेत्" याज्ञ०।

साङ्गे याज्ञ०उक्तो दमो यथा "सामान्यद्रव्यसमहरणात् साङ्गं सकलम्। तन्मूल्याद्द्विगुणो दण्डो निष्क्रये तु चतुर्गुणः। यः साङ्गं कारयति स दाप्यो द्विगुणं दमम्। यश्चैवसङ्गाऽर्द्धं दाता कारयेत् स चतुर्गुणम्। अध्यर्द्धोगातिक्रमहृद्भाद्यांशग्रहारकः। हस्तिदक्षाग्रदाता च सकलस्टभेदकृत्। सामन्तकुलिकादीनामपकारस्य कारकः। पञ्चाशत्पणिको दण्ड एषामिति विनिश्चयः। स्वच्छन्दं विधवागामी विक्रुष्टेऽनभिधावकः। अकारणे च विक्रोष्टा चण्डालश्चोत्तमान् स्मृतान्। मूढः प्रव्रजितानाञ्च दैवे पित्र्ये च भोजकः। अवुक्तं मृषयं कुर्वन्नयोर्व्यवहारकर्मकृत्। क्षुद्रपशुनाञ्च पुंस्त्वस्य प्रतिघातकृत्। साधारणस्यापहारी दासीगर्भविनाशकृत्। पितृपुत्रस्त्रभ्रातृदम्पत्याचार्यशिष्यकाः। एषामपतितानां तु त्यागी च शतदण्डभाक्।"

चौर्य्ये दण्डो मनूक्तो यथा। "यस्तु रज्जुं घटं कूपादरेर्द्विन्द्याच्च यः पथः। स दण्डं प्राप्नुयात् माषं तच्च तस्मिन् समाहरेत्। धान्यं दशभ्यः कुम्भेभ्यो हरतोऽभ्यधिकं वधः। शेषेऽप्येकादशगुणं दाप्यस्तस्य च तद्धनम्। तथा परिमेयानां धनादभ्यधिके वधः। सुवर्णे रजतादीनामुत्तमानाञ्च साहसम्। पञ्चाशत्स्वभ्यधिके हस्तच्छेदमिष्यते। शेषेऽप्येकादशगुणं मूल्याद्दण्डं प्रकल्पयेत्। पुरुषाणां कुलीनानां नारीणाञ्च विशेषतः। सुख्यानां चैव रत्नानां हरणे वधमर्हति। महापशूनां हरणे पञ्चाशद्धनमर्हति। कोशसामाद्यकार्य्यञ्च राजा दण्डं प्रकल्पयेत्। योषु ब्राह्मणसंस्थासु च्छुरिकायाश्च भेदने। पशूनां हरणे चैव सद्यः कार्योऽर्द्धपादिकः। क्षुद्रकाणामकिंचनानां गोमयस्य गुड़स्य च। दधः क्षीरस्य तक्रस्य पानीयस्य तृणस्य च। वेणुवैदलभाण्डानां सवणानान्तथैव च। मत्स्यमयानाञ्च हरणे सद्यो मांसन एव च। मत्स्यानां पक्षिणाञ्चैव तैलस्य च घृतस्य च। मांसस्य मधुनश्चैव यन्मान्यत् पशुसन्निभम्। अन्येषाञ्चैवमादीनां मद्यानामोदनस्य च। पक्वान्नानाञ्च सर्वेषां तन्मूल्याद्द्विगुणो दमः। पुष्पेषु हरिते धान्ये गुल्मवल्लीनगेषु च। अन्येष्वपरिपूतेषु दण्डः स्यात् पञ्चकृष्णलः। परिपूतेषु धान्येषु शाकमूलफलेषु च। निरन्वये शतं दण्डः सान्वयेऽर्द्धशतं दमः। स्यात् साहसं त्वन्ववत् प्रसभं कर्म यत्कृतम्। निरन्वयं भवेत् स्तेयं ज्ञात्वापह्नुयते च यत्। यस्त्वेतान्युपकृष्टानि द्रव्याणि स्तेनयेन्नरः। तस्याद्यं दण्डयेद्राजा यथाग्निं चोरमेदृष्टवान्। येन येन यथाङ्गेन स्तेनो नृषु विचेष्टते। तत्तदेव हरेत्तस्य प्रत्यादेशाय पार्थिवः"। अन्यत्र च चौर्य्यादिनानाविषये मनूक्तो दमो यथा।

"न क्षोद्येन विना कोरं घातयेद्वाग्मिको नृपः। न-

क्षोद्यं मोषकरणं घातयेदविचारयन्। यामेष्वपि च ये केचिच्चौराणां भक्तदायकाः। भाण्डावकाशदाश्चैव सर्वांस्तानपि घातयेत्। राष्ट्रेषु रक्षाधिकृतान् सामन्तांश्चैव चोदितान्। अभ्यावहेषु मध्यस्थान् शिष्याच्चौरानिव द्रुतम्। यद्यपि धर्ममयात् प्रच्युतो धर्मजीवनः। दण्डेनैव तमप्योषेत् स्वकाद्धर्माद्धि विच्युतम्। यामघाते हिताभङ्गे पथि मोषाभिदर्शने। शङ्कितो नाभिधावन्तो निर्दोषाः सपरिच्छदाः। राज्ञः कोशापहर्तॄंश्च प्रतिकूलेषु च स्थितान्। घातयेद्विविधैर्दण्डैररीणाञ्चोपजापकान्। सन्धिं छित्त्वा तु ये चौर्यं रात्रौ कुर्वन्ति तस्कराः। तेषां छित्त्वा नखौ हस्तौ तीक्ष्णशूले निवेशयेत्। अङ्गुष्ठौ प्रन्थिभेदस्य च्छेदयेत् प्रथमे यहे। द्वितीये हस्तचरणौ हतीये वधमर्हति। चन्दिदान् भक्तदांश्चैव तथा स्थानकदायकान्। सन्धिधारूंश्च मोक्षस्य हन्याच्चौरमिवेश्वरः। तडागभेदकं हन्यादप्सु शुद्धवधेन वा। तद्वापि प्रतिसंस्कुर्याद्दाप्यस्तूत्तमसाहसम्। कोशागारायुधागारदेवतागारभेदकान्। हस्त्यश्वरथहर्तॄंश्च हन्यादेवाविचारयन्। यस्तु पूर्वनिविष्टस्य तडागस्योदकं हरेत्। आगमं वाप्यपां भिन्द्यात् स दाप्यः पूर्वसाहसम्। समुत्सृजेद्राजमार्गे यस्त्वेकध्वमनापदि। स द्वौ कार्षापणौ दद्यादेवमेवाशु शोधयेत्। आपद्गतोऽथवा वृद्धो गर्भिणी बाल एव वा। परिभाषणमर्हन्ति तत्र शोध्यमिति स्थितिः। चिकित्सकानां सर्वेषां मिथ्या प्रचरतां दमः। अमानुषेषु प्रथमो मानुषेषु तु मध्यमः। संक्रमध्वजयष्टीनां प्रतिमानाञ्च भेदकः। प्रतिकुर्याच्च तत् सर्वं पञ्च दद्याच्छतानि च। अदूषितानां द्रव्याणां दूषणे भेदने तथा। मणीनामपहारे च दण्डः प्रथमसाहसः। कर्मैकं विषमं यस्तु चरेद्वै मूढतोऽपि वा। स प्राप्नुयादृजुं पूर्वं नरो मध्यममेव वा। बन्धनानि च सर्वाणि राजमार्गे निवेशयेत्। दुःखिता यत्र दृश्येरन् विकृताः पापकारिणः। प्राकारस्य च भेत्तारं परिखाणाञ्च पूरकम्। द्वाराणाञ्चैव भङ्क्तारं क्षिप्रमेव प्रवासयेत्। अभिचारेषु सर्वेषु कर्त्तव्यो द्विगुणो दमः। मूलकर्मणि चानाप्तैः क्रीत्वा वा विविधासु च। अवीजविक्रयो चैव बीजोत्कृष्टनञ्चैव च। मर्यादाभेदकश्चैव विज्ञेयः प्राप्नुयाद्वधम्। सर्वकण्टकशोधिं क्षेमकारन्तु पार्थिवः। प्रवर्त्तमानमन्याये क्षेदयेत्करमेव चौरैः। मीताद्रव्यापहरणे शस्त्राणाञ्चौषधस्य च। कालमासाद्य कार्यञ्च राजा दण्डं प्रकल्पयेत्। "चौरं प्रदाप्यापहृतं घातयेद्विविधैर्वधैः। सचिह्नं ब्राह्मणं कृत्वा स्वराष्ट्राद्विप्रवासयेत्" या०। अङ्गनविशेषे मनुनोक्तो यथा "गुरुतल्पे भगः कार्य्यः सुरापाने सुराध्वजः। स्तेये च श्वपदं कार्यं ब्रह्महण्यशिरः पुमान्"। "एतच्च दण्डोत्तरकालं प्रायश्चित्तमविकोपेतं द्रष्टव्यम्। यथाह मनुः "प्रायश्चित्तन्तु कुर्वीयाः सर्वे वर्णा यथोदितम्। नाङ्का राज्ञा ललाटे तु दाप्यास्तूत्तमसाहसमिति" मिता०। "घातितेऽपहृते दोषो यामभर्तुरनिर्गते। विवीतभर्तृके तु पथि चौरोद्धर्तुरवीतके। स्वसीम्नि दद्याद् यामस्थः पदं वा यत्र गच्छति। पञ्चयामो बहिःक्षेत्रादशयामस्य वा पुनः। वन्ध्याहांश्चथा वाजिकुञ्जराणान्तु हारिणः। प्रसह्यघातिनश्चैव शूलमारोपयेन्नरान्। उत्क्षेपकसन्धिभेदौ करसन्दंशहीनकौ। कार्यौ द्वितीयापराधे करपादैकहीनकौ। क्षुद्रमध्यमहाद्रव्यहरणे सारतोदमः। देशकालवयःशक्तिं संचिन्त्य दण्डकर्म्मणि। भक्तावकाशाग्न्युदकमन्त्रोपकरणव्ययान्। दत्त्वा चौरस्य हन्तुर्वा जानतो दम उत्तमः। शस्त्राघपाते गर्भस्य पातने चोत्तमो दमः। उत्तमो वाऽधमो वापि पुरुषस्त्रीप्रभापणे। विप्रदुष्टां स्त्रियञ्चैव पुरुषद्वीमगर्भिणीम्। सेतुभेदकरीञ्चापि शिक्षां वद्धा प्रवेशयेत्। विप्राग्निदां पतिगुरुनिजापत्यप्रमापिणीम्। विरूपकरणासौष्ठीं कृत्वा गोभिः प्रमापयेत्। अविज्ञातहतस्यापि कर्त्तुः शुद्धिं हतबान्धवाः। प्रदद्युर्योषितद्दास्यं परपुंसि रताः पृथक्। स्त्रीद्रव्यवृत्तिकामो वा केन वार्यं गतः सह। सत्सु देशेषमामत्तं पृक्षेद्वापि जनं शनैः। चेलवेष्टशवप्रख्यविवीतस्खलदङ्गकाः। राजपत्न्याभिगामी च दग्धव्यास्तु कटाग्निना" याज्ञ०। "हर्षं वा यदि वा काङ्क्षेद्यं वा यदि वा फलम्। अनाप्टुवन् हि स्खलनो हस्तच्छेदनमर्हति" मिता० धृतवचनम्।

स्त्रीसंग्रहे मनुनोक्तो दमो यथा "परदाराभिमर्शेषु प्रवृत्तान् नृन् महीपतिः। उद्वेजनकरैर्दण्डैर्विविधैस्तान् प्रवासयेत्। परस्य पत्न्या पुरुषः सम्भाषां योजयन् रहः। पूर्वमाचारितो दोषः प्राप्नुयात् पूर्वसाहसम्। परस्त्रियं योभिवदेत् तीर्थेऽरण्ये वनेऽपि वा। नदीनामपि संभेदे स संग्रहणमाप्नुयात्। उपचारक्रियाकेलिः स्त्रीणां भूषणवाससाम्। सह खट्वासनञ्चैव सर्वं संग्रहणं तथा। स्त्रियं स्पृशेददेशे यः स्पृष्टो वा मर्षयेत्तथा। परस्परस्या-

नुमते सर्वं संपद्यते कृतम्। अब्राह्मणः संपद्यते प्राणान्तं दण्डमर्हति। न समाप्तं परस्त्रीभिः प्रतिषिद्धः समाचरेत्। निषिद्धो भाषमाणस्तु सुवर्णं दण्डमर्हति। नैष चारणदारेषु विधिर्नाक्षोपजीविषु। सन्त्यन्यानि हि ते नारीर्निगूढाचारयन्ति च। किञ्चिदेव तु दाप्यः स्यात् समाप्तं ताभिराचरन्। योऽकामां दूषयेत् कन्यां सद्यो वधमर्हति। सकामां दूषयंस्तुल्यो न वधं प्राप्नुयाच्चरः। कन्यां भजन्तीमुत्कृष्टं न किञ्चिदपि दापयेत्। अवन्द्यं सेवमानान्तु संयतां वासयेद्गृहे। उत्तमां सेवमानस्तु जघन्यो वधमर्हति। शुल्कं दद्यात् सेवमानः समामिच्छेत् पिता यदि। अभिशस्य तु यः कन्यां कुर्याद्वर्षेण मानवः। तस्याशु कर्त्तेदङ्गुल्यौ दण्डञ्चार्हति षट् शतम्। सकामां दूषयंस्तुल्यो नाङ्गच्छेदमाप्नुयात्। द्विशतन्तु दमं दाप्यः प्रसक्तविनिवृत्तये। कन्यैव कन्यां या कुर्यात् तस्याः स्याद्द्विशतो दमः। शुल्कञ्च द्विगुणं दद्याच्छिफाश्चैवाप्नुयाद्दश। या तु कन्यां प्रकुर्यात् स्त्री सा सद्यो मौण्ड्यमर्हति। अङ्गुल्योरेव च छेदं खरेणोद्वहनं तथा। भर्त्तारं लङ्घयेद्या तु स्त्री ज्ञातिगुणदर्पिता। तां श्वभिः खादयेद्राजा संस्थाने बहुसंस्थिते। पुमांसं दाहयेत् पापं शयने तप्त आयसे। अभ्यादध्युश्च काष्ठानि तत्र दह्येत पापकृत्। संवत्सराभिशप्तस्य द्विगुणो दमः। ब्राह्मया सह संवासे चाण्डाल्या तावदेव तु। शूद्रो गुप्तमगुप्तं वा हीनजातं वर्णावसन्। अगुप्तमङ्गसर्वस्वैर्गुप्तं सर्वेण हीयते। वैश्यः सर्वस्वदण्ड्यः स्यात् संख्यारनिरोधतः। सहस्रं क्षत्रियो दण्ड्यो मौण्ड्यं मूत्रेण चार्हति। ब्राह्मणीं यद्यगुप्तान्तु गच्छेतां वैश्यपार्थिवौ। वैश्यं पञ्चशतं कुर्यात् क्षत्रियन्तु सहस्रिणम्। उभावपि तु तावेव ब्राह्मण्या गुप्तया सह। विद्युतौ मूत्रवद्दण्ड्यौ दग्धव्यौ वा कटाग्निना। सहस्रं ब्राह्मणो दण्ड्यो गुप्तां विप्रां बलाद्व्रजन्। शतानि पञ्च दण्ड्यः स्यादन्या सह सङ्गतः। मौण्ड्यं प्राणान्तिको दण्डो ब्राह्मणस्य विधीयते। इतरेषान्तु वर्णानां दण्डः प्राणान्तिको भवेत्। न जातु ब्राह्मणं हन्यात् सर्वपापेष्वपि स्थितम्। राष्ट्रादेनं बहिः कुर्यात् समग्रधनमक्षतम्। न ब्राह्मणवधाद्भूयानधर्मो विद्यते भुवि। तस्मादस्य वधं राजा मनसापि न चिन्तयेत्। वैश्यश्चेत् क्षत्रियां गुप्तां वैश्यां वा क्षत्रियो व्रजेत्। योषाङ्गस्यागुप्तायां तावुभौ दण्डमर्हतः। सहस्रं ब्राह्मणो दण्डं दाप्यो गुप्ते तु ते व्रजन्। शूद्रायां क्षत्रियविशोः साहस्रो वै भवेद्दमः। क्षत्रियायामगुप्तायां वैश्ये पञ्चशतं दमः। मूत्रेण मौण्ड्यमिच्छेत्तु क्षत्रियो दण्डमेव वा। अगुप्ते क्षत्रियावैश्ये शूद्रां वा ब्राह्मणो व्रजन्। शतानि पञ्च दण्ड्यः स्यात् सहस्रन्त्वन्त्यजस्त्रियम"।

"स्त्री निषेधे शतं दद्याद्द्विशतन्तु दमं पुमान्। प्रतिषेधे द्वयोर्दण्डो यथा संपद्यते तथा। अजातावुत्तमो दण्ड आनुलोम्ये तु मध्यमः। प्रातिलोम्ये वधः पुंसः स्त्रीणां नासादिकर्त्तनम्। अनङ्गुतां हरन् कन्यामुत्तमस्त्वन्यथाऽधमम्। दण्डं दद्यात् सवर्णासु प्रातिलोम्ये वधः स्मृतः। सकाम अनुलोमासु न दोषस्त्वन्यथा दमः। दूषणे तु करच्छेद उत्तमायां वधस्तथा। शतं स्त्रीदूषणे दद्याद् हेतु मिथ्याभिशंसने। यमून् गच्छन् शतं दाप्यो हीनां स्त्रीं गान्तु मध्यमम्। अवरुद्धासु दासीषु भुजिष्यासु तथैव च। गम्यास्वपि पुमान् दाप्यः पञ्चाशत्पणिकं दमम्। प्रसह्य दास्यभिगमे दण्डो दमपणः स्मृतः। बन्धनं यदकामासौ चतुर्विंशतिकः पृथक्। सदृशीतवेतना वेश्या नेच्छन्ती द्विगुणं वहेत्। अदृशीते समं दाप्यः पुमानप्येवमेव च। अयोनौ गच्छतो योषां पुरुषं वापि मोहतः। चतुर्विंशतिको दण्डस्तथा प्रव्रजितागमे। अन्याभिगमने त्वङ्गैः कुवस्त्रेण प्रवासयेत्। शूद्रस्त्वार्याञ्च एवं स्यादन्त्यस्यार्यागमे वधः"।

राजशासनकूटकरणादौ मनुनोक्तो दमो यथा

"कृतं यश्चाधिकं वापि लिखेद् यो राजशासनम्। पारदारिकचौरं वा सद्यतो दण्ड उत्तमः। अभक्ष्यं च द्विजं दृष्ट्वा दण्ड्य उत्तमसाहसम्। क्षत्रियं मध्यमं वैश्यं प्रथमं शूद्रमर्हकम्। कूटस्वर्णव्यवहारी विभांसश्च विक्रयी। अङ्गहीनस्तु कर्त्तव्यो दाप्यश्चोत्तमसाहसम्। चतुष्पादक्षतो दोषो नापैतीति प्रजल्पतः। काष्ठलोष्टेषु पाषाणवाङ्मयुग्व्यक्तवत्तया। जिह्मनखेन यानेन तथा भस्मतुषादिना। पश्चाच्चैवापवरता क्षिप्ते स्याद्दोषभाक्। शक्तो भ्रमोत्पादयन् स्वामी दंष्ट्रिणां ग्राहकृत्तां तथा। प्रथमं साहसं दद्यादिक्रुष्टे द्विगुणं ततः। जारं चौरेत्यभिवदन् दाप्यः पञ्चशतं दमम्। उपजीव्य धनं सत्त्वं ह्यदेवाद्दशगोधनम्। राज्ञोऽनिष्टप्रवक्तारं तस्यैवाक्षोभकारिणम्। तज्जन्यस्य च भेत्तारं जिह्वां छित्त्वा प्रवासयेत्। स्वताङ्गवर्णविक्रेतुर्गुरो-

स्ताड़ियितुमिच्छया। राजयानासनारोढुर्दण्ड उत्तमसाहसः। द्विजेतरभेदिनो राजद्विष्टादेश्च तत्समः। विप्रत्वेन च शूद्रस्य जीवतोऽङ्गतो दमः। दुर्बलांस्तु पुनर्हत्वा व्यवहारान्नृपेण तु। सभ्याः सभ्यविनो दण्ड्या विवादाद्द्विगुणं दमम्। यो मन्येतालितोऽक्षोति न्यायेनापि पराजितः। तमायान्तं पुनर्जित्वा दापयेद्द्विगुणं दमम्"। याज्ञवल्क्यवचनानि चतुष्पदमेषां मानवत्वोक्तिः प्रामादिकी।

सामान्यतोदण्डविधिः "पिताचार्यः सुहृन्माता भार्या पुत्रः पुरोहितः। नादण्ड्यो नाम राज्ञोऽस्ति यः स्वधर्मे न तिष्ठति। काषापणं भवेद्दण्ड्यो यत्रान्यः प्राकृतो जनः। तत्र राजा भवेद्दण्ड्यः सहस्रमिति धारणा। शतादूर्ध्वन्तु शूद्रस्य क्षये भवति किल्बिषम्। षोड़शैव तु वैश्यस्य द्वात्रिंशत् क्षत्रियस्य च। ब्राह्मणस्य चतुःषष्टिः पूर्णं वापि शतं भवेत्। द्विगुणा वा चतुःषष्टिस्तद्दोषगुणविद्धि सः। वानप्रस्थं मूलफलं दार्व्यग्न्यर्थं तथैव च। दण्डश्च गोभ्यो ग्रासार्थमसंहार्यं मनुरब्रवीत्। योऽदत्तादायिनो हस्ताद्विप्रसेत ब्राह्मणो धनम्। याजनाध्यापनेनापि यथा स्तेनस्तथैव सः। द्विजोऽध्वगः क्षीणवृत्तिर्हरेद्विड् द्वे च मूलके। आददानः परक्षेत्रात् दण्डं दातुमर्हति। असम्भिनानां सम्भाता सम्भिनाच्च भोजकः। दासाश्वरथकृत्तां च प्राप्तः स्याद्दौरकिल्बिषम्"।

"ऋत्विजं यस्त्यजेद्याज्यो याज्यञ्चर्त्विक् त्यजेदृदि। शक्तं कर्म्मण्यदुष्टञ्च तयोर्दण्डः शतं शतम्। न माता न पिता न स्त्री न पुत्रस्त्यागमर्हति। त्यजन्नपतितानेतान् राज्ञा दण्ड्यः शतानि षट्" मनूक्तो दमः।

अग्निपु० २२६ अ० सर्वविषये दमभेद उक्तो यथा

"चौरैरभियितो यस्तु मुषितोऽस्मीति भाषते। तत्प्रदातरि भूपाले स दण्ड्यस्तावदेव तु। यो यावद्विपरीतार्थं मिथ्या वा यो वदेत्तु तम्। तो नृपेण स्वधर्मज्ञौ दाप्यौ तद्द्विगुणं दमम्। कूटसाक्ष्यं तु कुर्वांस्त्रीन् वर्णांश्च प्रभापयेत्। विवासयेद्ब्राह्मणन्तु विधिरेष न क्षीतरः। निक्षेपस्य समं मूल्यं दण्ड्यो निक्षेपभुक् तथा। वस्त्रादिकस्य, धर्मज्ञ! तथा धर्मो न क्षीयते। यो निक्षेपं याचयति यश्चानिक्षिप्य याचते। तावुभौ चौरवच्छास्यौ दण्ड्यौ वा द्विगुणं दमम्। अज्ञानाद्यः प्रमाद्यन्तु कुर्यात् परद्रव्यस्य विक्रयम्। निर्दोषो, ज्ञानपूर्वन्तु चौरवद्दण्डमर्हति। मूल्यमादाय यः पण्यं न दद्याद्दण्डभृ एव सः। प्रतिश्रुत्याप्रदातारं सुवर्णं दण्डयेन् नृपः। भृतिं स्वस्य न कुर्याद्यः कर्मणो ह्यपलापी दमः। अकाले तु त्यजन् भृत्यं दण्ड्यः स्यात्तावदेव तु। क्रीत्वा विक्रीय वा किञ्चिद्यस्येच्छातुशयो भवेत्। सोऽन्तर्दशाहात्तत्स्वामी दद्याच्चैवाददीत च। परेण तु दशाहस्य नादद्यान्नैव दापयेत्। आददद्वि द्विशतं दण्ड्यः शतानि षट्। वरे दोषानविख्याप्य यः कन्यां वरयेदिह। दत्ताप्यदत्ता सा तस्य राज्ञा दण्ड्यः शतद्वयम्। प्रदाय कन्यां योऽन्यस्मै पुनस्तां सम्प्रयच्छति। दण्डः कार्यो नरेन्द्रेण तस्याप्युत्तमसाहसः। मत्सद्भावेन वाचा च युक्तं पणसमंसयम्। लुब्धोऽन्यत्र च विक्रीता षट्शतं दण्डमर्हति। दद्याद्वेतनं न यः पाल्यो गृहीत्वा भक्तवेतनम्। स तु दण्ड्यः शतं राज्ञा सुवर्णं वाप्यरक्षिता। धनुःशतं परीहारो ग्रामस्य तु समन्ततः। द्विगुणं त्रिगुणं वापि नगरस्य च कल्पयेत्। इतिं तत्र प्रकुर्वीत वासद्भो नावलोकयेत्। तत्रापरिहृते धान्ये क्षिप्तिते नैव दण्डनम्। गृहक्षेत्रागमारामं क्षेत्रं वा भीषया हरन्। शतानि पञ्च दण्ड्यः स्यादज्ञानात् द्विगुणो दमः। सर्वादाभेदकाः सर्वे दण्ड्याः प्रथमसाहसम्। शतं ब्राह्मणमाक्रुश्य क्षत्रियो दण्ड्यमर्हति। वैश्यस्तु द्विशतं राम! शूद्रस्तु वधमर्हति। पञ्चाशद्ब्राह्मणो दण्ड्यः क्षत्रियस्याभिशंसने। वैश्ये चार्धं पञ्चाशच्छूद्रे द्वादशको दमः। क्षत्रियक्षेपको वैश्यः साहसं पूर्वमेव तु। शूद्रः क्षत्रियमाक्रुश्य जिह्वाच्छेदमवाप्नुयात्। धर्मोपदेशं विप्राणां शूद्रः कुर्वंश्च दण्डभाक्। श्रुतदेशादिवित्थी दाप्यो द्विगुणसाहसम्। उत्तमः साहसस्तस्य यः पातैरुत्तमान् क्षिपेत्। प्रमादाद्भेदयात् प्रोच्य प्रोच्य दण्डार्द्धमर्हति। मातरं पितरं ज्येष्ठं भ्रातरं श्वशुरं गुरुम्। आक्रोशयञ्छतं दण्ड्यः पत्न्यानं चाददद्गुरोः। एकजातिर्द्विजातीस्तु वेनाक्रोशयराक्षुवात्। तदेव च्छेदयेत्तस्य क्षिप्रमेवाविचारयन्। अवनिष्ठीवतो दर्पाद्द्वावोष्ठौ छेदयेन्नृपः। अपभूत्रयतो मेढ्रमपशब्दयतो गुदम्। उत्कृष्टासनसंस्थस्य नीचस्याधोभिभाषणम्। यो यदङ्गं च समयेत्तदङ्गन्तस्य कर्त्तयेत्। अर्द्धादकराः कार्या गोमज्जाश्वोष्ट्रघातकाः। हन्तुं विक्रयं कृत्वा सुवर्णं दण्डमर्हति। द्विगुणं

दापयेच्चिह्ने पणि शीघ्रं जलाशये। द्रव्याणि यो हरेद्यस्य ज्ञानतोऽज्ञानतोऽपि वा। स तस्योत्पाद्य तद्दित्तु राज्ञे दद्यात्ततो दमम्। यस्तु रज्जुं घटं कूपाद्धरेच्छिन्द्याच्च वा प्रपाम्। स दण्डं प्राप्नुयान्मध्यं मार्यं दण्डः स्यात् प्राणिताडने। धान्यं दशभ्यः कुम्भेभ्यो हरतोऽभ्यधिकं वधः। शेषेऽप्येकादशगुणं तस्य दण्डं प्रकल्पयेत्। सुवर्णरजतादीनां रत्नानां हरणे वधः। येन येन यथाङ्गेन स्तेनो नृषु विचेष्टते। तत्तदेव हरेदस्य प्रत्यादेशाय पार्थिवः। ब्राह्मणः शाकघान्यादि स्वल्पं स्वल्पञ्च दोषभाक्। गोदेवार्थं हरंश्चापि, हन्याद्दुष्टं बधोद्यतम्। स्वल्पचेलापहर्त्तारं तथा पत्यभिगामिनम्। अग्निदं गरदं हन्यात्तथा शस्त्रास्त्रघातिनम्। परस्त्रियं न भाषेत प्रतिषिद्धो विशेन्न हि। अदण्ड्या स्त्री भवेद्राज्ञा वरयन्ती पतिं स्वयम्। उत्तमां सेवमानः स्त्रीं जघन्यो वधमर्हति। भर्त्तारं लङ्घयेद्या तां श्वभिः संखादयेत् स्त्रियम्। सवर्णदूषितां कुर्यात् पिण्डमात्रोपजीविनीम्। व्यालसा दूषिता नारी सण्डनं समवाप्नुयात्। वैश्यागमे तु विप्रस्य क्षत्रियस्यान्त्यजागमे। क्षत्रियः प्रथमं, वैश्यो दण्ड्यः शूद्रागमे भवेत्। स्वस्त्रीत्वा वेतनं वेश्या लोभादन्यत्र गच्छति। वेतनस्त्रिगुणं दद्याद्दण्डञ्च द्विगुणं तथा। भार्या पुत्राश्च दासाश्च शिष्यो भ्राता च सोदरः। कृतापराधास्ताड्याः स्युरज्ज्वा वेणुदलेन वा। पृष्ठे, न मर्मके हन्याद्दोरस्याप्नोति किल्बिषम्। रक्षाधिकृतैर्यैस्तु प्रजानर्थं विलुप्यते। तेषां सर्वस्वमादाय राजा कुर्यात् प्रवासनम्। ये नियुक्ताः स्वकार्येषु हन्युः कार्याणि कर्मिणाम्। निर्दयाः क्रूरसंसर्गात्तान्निःस्वान् कारयेन्नृपः। अमात्यः प्राड्विवाको वा यः कुर्यात् कार्यमन्यथा। तस्य सर्वस्वमादाय तं राजा विप्रवासयेत्। गुरुतल्पे भगः कार्य्यः सुरापाने सुराध्वजः। स्तेयेषु अपदं विद्याद् ब्रह्महत्याशिरः प्रभान्। शूद्रादीन् घातयेद्राजा पापान्, विप्रान् प्रवासयेत्। महापातकिनां वित्तं वरुणायोपपादयेत्। ग्रामेष्वपि च ये केचिच्चौराणां भक्तदायकाः। भाण्डारकोष्ठदाचैव सर्वांस्तानपि घातयेत्। राष्ट्रेषु राजाधिकृतान् सामन्तान् पापिनो हरेत्। सन्धिं कृत्वा तु ये चौर्यं रात्रौ कुर्वन्ति तस्कराः। तेषां छित्त्वा नखौ हस्तौ तीक्ष्णे शूले निवेशयेत्। तडागदेवतागारभेदकान् घातयेन्नृपः। सप्तसप्तजेद्राजमार्गे यस्त्वमेध्यमनार्पदि। स हि कार्षापणन्दण्ड्यस्तममेध्यञ्च शोधयेत्। प्रतिमासङ्क्रमभिदो दद्युः पञ्च शतानि ते। समेषु विषमं यो वा चरते मूल्यतोऽपि वा। समाप्नुयाद्धरः पूर्वं दमं मध्यममेव वा। द्रव्यमादाय वणिजामनर्घ्यावरुन्धताम्। राजा पृथक् पृथक् कुर्याद्दण्डस्तत्समसाहसम्। द्रव्याणां दूषको यश्च प्रतिच्छन्दकविक्रयी। मध्यमं प्राप्नुयाद्दण्डं कूटकर्त्ता तथोत्तमम्। कलहापहृतं देयं दण्डश्च द्विगुणस्ततः। अभक्ष्यभक्षे विप्रे वा शूद्रे वा कृष्णलो दमः। तुलामानसमानानां कूटकृद्वाणिजस्य च। एभिश्च व्यवहर्त्ता यः स दाप्यो दमरुत्तमम्। विणान्निदां पतिगुरुविप्रापत्यप्रमापिणीम्। विकर्णकरनासौष्ठीं कृत्वा गोभिः प्रवासयेत्। क्षेत्रवेश्मवनघ्नामविदाहकास्तथा नराः। राजपत्न्यभिगामी च दग्धव्यास्तु कटाग्निना। जनं वाप्यधिकं वापि लिखेद्यो राजशासनम्। पारजायिकचौरौ च सङ्गतो दण्ड उत्तमः। राजयानासनारोढुर्दण्ड उत्तमसाहसः। यो मल्लैराजितोऽक्षैर्नि न्यायेनापि पराजितः। तमाक्रान्तं पराजित्य दण्डयेद् द्विगुणं दमम्। आक्रान्तकारी वध्यः स्यादनाक्रान्तमर्थाद्धरन्। दाण्डिकस्य च यो हस्तादभिसृतः पलायते। क्षीणः पुरुषकारेण तद् दद्याद्दाण्डिको धनम्"। "दण्डो दमयतामसि" गीता। "दण्डवत्प्रायश्चित्तानि भवन्ति" प्रा० वि० धृतवाक्यम् कुलालचक्रार्थे "कलमे निजहेतुदण्डजः किमु चक्रभ्रमिकारिता गुणः" नैष०। दण्डव्रतोऽनेन करणे क्त्र। २५देशे दण्डपारुष्यशब्दे मिता०। २६द्वापरोद्भवे नृपभेदे। "क्रोधस्त्वेति यस्तस्य बभूवावरजोऽसुरः। दण्ड इत्यभिविख्यातः सोऽभवन्मनुजर्षभः" भा० आ० ६७ अ०। "वधः पाण्डस्य च तथा अश्वत्थाम्ना महात्मना। दण्डसेनस्य च ततो दण्डस्य च वधस्तथा" भा० आ० १ अ०। दण्डयति कर्त्तरि-अच्। २७नवमे दण्डनीतिशब्दे कामन्द०। अस्य शब्दस्य शब्दकल्पद्रुमदृष्ट्या शरणागतत्राणाद्यर्थतोक्तिः प्रामादिकी तत्प्रमाणयाक्ये दत्तमित्यभिधीयते इत्येव पाठः साधुः। लिपिकरप्रमादात् दत्तमित्यत्र दण्डमिति पाठ इति बोध्यम् दत्तशब्दे दृश्यम्।

**दण्डक** पु० दण्ड+स्वार्थे क। १इक्ष्वाकुराजपुत्रभेदे। "दण्ड-

को नृपतिः कामात् क्रोधाच्च जनमेजयः" कामन्दकी। जनस्थानशब्दे दृश्यम्। क्षुद्रो दण्डः अल्पार्थे कन्। २क्षुद्रबलगुडे(सोँटा)। ३षड्विंशत्यक्षराधिकपादके चण्डप्रयातादौ छन्दोभेदे। "यदिह नयुगलं ततः सप्तरेफात्तदा चण्डप्रयातो भवेद्दण्डकः" ह०र०। ४दण्डच्छन्दयुक्ते सन्निवेशे पु०। "दण्डकानध्यवात्सीं यौ" भट्टिः पुंस्त्वेन बहुवचनान्ततया जयमङ्गलः पपाठ। "पराक्रमात् जिगमिषुरेव दण्डकान्" रामा० अयो० २१स० ६४ श्लो०। "प्राप्तानि दुःखान्यपि दण्डकेषु" रघुः। तद्भिन्नत्वे स्त्री त्रिका० "भरतस्तु दण्डकामध्यवात्सीं यौ" इति पपाठ उदाजहार च "कायोध्यायाः पुनरुपगमो दण्डकारण्यवासे यः" भवभूतिवाक्यम्। तच्च वर्णं ह० म० १४० अ० कूर्मवि०दक्षिणस्यासक्तं यथा "बलदेवपट्टनदण्डकारण्यतिभिन्नाशना भद्राः"। [कन्दे राजनि०]

**दण्डकन्दक** पु० दण्डः प्रकाण्डः कन्दोऽस्य कप्। भूमिदण्डाकाक पुंस्त्री० दण्डः यम इव कृष्णत्वात् काकः। (डाँड) काकभेदे हेमच०। [बहुविधो भा०व०४२ अ०।

**दण्डगौरी** स्त्री अप्सरोभेदे "उर्वशी मिश्रकेशी च दण्डगौरी

**दण्डग्राह** त्रि० दण्डं ग्रहाति ग्रह-अण् उप० स०। दण्डधारके ततः रेवत्या०अपत्यादौ ठक्। दाण्डग्राहिक तदपत्यादौ पुंस्त्री०।

**दण्डघ्न** त्रि० दण्डेन देहेन हन्ति हन-क। देहेन घातिनि दण्डपारुष्यकर्त्तरि। "न साहसिकदण्डघ्नौ स राजा शक्रलोकभाक्" मनुः। [वाद्यभेदे त्रिका०।

**दण्डटङ्का** स्त्री दण्डा प्रकाण्डा टङ्का। (दामामा) ख्याते

**दण्डताम्री** स्त्री ताम्रेण निर्वृत्ता अण् ङीष् दण्डा प्रकाण्डा ताम्री। ताम्रीवाद्यभेदे शब्दर०।

**दण्डदास** पु० दण्डेन क्रतो दासः। दण्डद्रव्यदानासामर्थ्येन तच्छोधनार्थं स्वीकृतदासभावे दासभेदे "ध्वजाहृतो भक्तदासो गृहजः क्रीतदत्रिमौ। पैतृको दण्डदासश्च सप्तैते दासयोनयः" मनुः। "दण्डादिधनशुद्ध्यर्थं स्वीकृतदासभावः" कुल्लू०।

**दण्डधर** पु० दण्डं लोकानां कर्मानुसारिणं दण्डं नयुगं वा धरति धर-अच् हेतु०। १यमे अमरः २नृपे। ३नगुडधारके त्रि०। "अमनुष्टं मनुदण्डधरान्वयम्" रघुः। "देशो दण्डस्य वरुणो राज्ञां दण्डधरो हि सः" मनुः। "नाहं दण्डधरस्तव" भा० आ० २२ अ०।

**दण्डधार** पु० दण्डं धरति धृ-अण् उप० स०। १यमे २नृपे च भेदि०। ३नगुडधारके त्रि० "क्रोधवर्द्धन इत्येव यस्त्वन्यः परिकीर्त्तितः। दण्डधार इति ख्यातः स आसीन् नृपतिः क्षितौ" भा०आ०६७अ० उक्ते ४नृपभेदे पु० ५धृतराष्ट्रपुत्रभेदे। "कवची निषङ्गी दण्डी दण्डधारो धनुर्द्धरः" ह०७अ० धृतराष्ट्रपुत्रकथने।

**दण्डनायक** पु० दण्डं नयति नी-ण्वुल् हृत०। १सैनान्याम् हेमच०। दण्डप्रणेतरि २नृपे च।

**दण्डनीति** स्त्री दण्डो नीयतेऽनया नी-करणे क्तिन्। विद्याभेदे। "एकैव दण्डनीतिस्तु विद्येत्यौशनसी स्थितिः। तस्मात्तु सर्वविद्यानामारम्भाः मनुदाहृताः"। "दमो दण्ड इति ख्यातस्तात्स्वयादृदण्डो महीपतिः। तस्य नीतिर्दण्डनीतिर्नयनान्नीतिरुच्यते" काम० नीतिः। तच्छास्त्रविषयविभागादि भा० शा० ५९ अ० उक्तं यथा

"ततोऽध्यायसहस्राणां शतञ्चक्रे स्वबुद्धिजम्। यत्र धर्मस्तथैवार्थः कामश्चैवाभिवर्णितः। त्रिवर्ग इति विख्यातो गण एष स्वयम्भुवा। चतुर्थो मोक्ष इत्येव पृथगर्थः पृथग्गुणः। मोक्षस्यापि त्रिवर्गोऽन्यः प्रोक्तः सत्त्वं रजस्तमः। स्थानं वृद्धिः क्षयश्चैव त्रिवर्गस्यैव दण्डजः। आत्मा देशश्च कालश्चाप्युपायाः कृत्यमेव च। सहायाः कारणञ्चैव षड्वर्गो नीतिजः स्मृतः। त्रयी चान्वीक्षिकी चैव वार्त्ता च भरतर्षभ!। दण्डनीतिश्च विपुला विद्याश्चात्र निदर्शिताः। अमात्यरक्षा प्रणिधी राजपुत्रस्य लक्षणम्। चारश्च विविधोपायः प्रणिधेयः पृथग्विधः। साम भेदः प्रदानञ्च ततो दण्डश्च पार्थिव!। उपेक्षा पञ्चमी चात्र कार्त्स्न्येनैवमुदाहृता। मन्त्रश्च वर्णितः कृत्स्नस्तथा भेदार्थ एव च। विग्रहस्यैव मन्त्रस्य सिद्धिसिद्धीश्च यत् फलम्। सन्धिश्च त्रिविधाभिख्यो हीनो मध्यस्तथोत्तमः। भयसत्कारसंज्ञाख्यं कार्त्स्न्येन परिवर्णितम्। यात्राकालाश्च चत्वारस्त्रिवर्गस्य च विस्तरः। विजयो धर्मयुक्तश्च तथार्थविजयश्च ह। आसुरश्चैव विजयस्तथा कार्त्स्न्येन वर्णितः। लक्षणं षड्वर्गस्य त्रिविधस्त्रात्र वर्णितम्। प्रकाशाप्रकाशश्च दण्डोऽत्र परिगर्हितः। प्रकाशोऽष्टविधस्त्रात्र गुप्तस्य च सुविस्तरः। रथा नागा हयाश्चैव पादाताश्चैव पार्थिव!। विष्टिर्नावश्चराश्चेह दैविका इति चाष्टमम्। अङ्गान्येतानि कौरव्य! प्रकाशानि बलस्य तु। अङ्गमाजङ्गमाश्चोक्ता मूर्योगा विग्रहादयः। अर्थे चास्यवहार्थे चाप्युपांशुश्चिविधः स्मृतः। अरिर्मित्रमुदासीन इत्येतेऽप्यनुवर्णिताः।

ज्ञत्वा मार्गगुणाश्चैव तथा भूमिगुणाश्च ह । आत्मरक्षणमाश्वासः सर्वाणाश्वान्ववेक्षणम् । कल्पना विविधाश्चापि नागरथवाजिनाम् । व्यूहाश्च विविधाभिख्या विचित्रं युद्धकौशलम् । उत्पातांश्च निपातांश्च सुयुद्धं सुपलायितम् । शस्त्राणां पालनं ज्ञानं तथैव भरतर्षभ ! । बलव्यसनसङ्कल्पं तथैव बलहर्षणम् । पीड़ातापदकालस्य प्रत्तिज्ञानञ्च पाण्डव ! । तथा क्षतविधानञ्च योगसञ्चार एव च । चोरैराटविकैश्चोग्रैः परराष्ट्रस्य पीड़नम् । अग्निदैर्गरदैश्चैव प्रतिरूपकारकैः । श्रेणीमुख्योपजापेन वीरघ्नच्छेदनेन च । भूषणेन च नागानामातङ्काजननेन च । आराधनेन भक्तस्य प्रत्ययोपार्जनेन च । सम्राड्भस्य च राज्यस्य ह्यासवृद्धौ समञ्जसम् । कृतसाम्ययोगाच्च राष्ट्रस्य च विवर्द्धनम् । अरिमध्यस्थमित्राणां सम्यक् चोक्तं प्रपञ्चनम् । अवमर्दैः प्रतीघातस्तथा चैव बलीयसाम् । व्यवहारः सुसूक्ष्मश्च तथा कण्टकशोधनम् । अग्नौ व्यायामयोगश्च त्यागो द्रव्यस्य संग्रहः । आपत्तानाञ्च भरणं क्षतानाञ्चान्ववेक्षणम् । अर्थस्य काले दानञ्च व्यसने चाप्रसङ्गिता । तथा राजगुणाश्चैव सेनापतिगुणाश्च ह । कारणञ्च त्रिवर्गस्य गुणा दोषास्तथैव च । दुष्टैर्पुरुषितञ्च विविधं दुष्टचैवानुवर्त्तिनाम् । अङ्गितज्ञञ्च सर्वस्य प्रसादस्य च वर्द्धनम् । अलब्धलाभो, लब्धस्य तथैव च विवर्द्धनम् । प्रदानञ्च विद्वद्भ्यः पात्रेभ्यो विधिवत्ततः । विसर्गोऽर्थस्य धर्म्यार्थं कामहेतुकमुच्यते । चतुर्थं व्यसनाघाते तथैवात्मानुवर्त्तितम् । क्रोधजानि तथोग्राणि कामजानि तथैव च । दशोक्तानि कुरुश्रेष्ठ ! व्यसनान्यत्र वै ह । मृगयाक्षास्तथा पानं स्त्रियश्च भरतर्षभ ! । कामजान्याहुराचार्याः प्रोक्तानीह स्वयम्भुवा । वाक्पारुष्यं तथार्थत्वं दण्डपारुष्यमेव च । नियहोऽत्यात्मनस्त्यागमर्थदूषणमेव च । अन्तराणि विविधान्येव क्रियाक्षेषाञ्च वर्ज्जिताः । अवमर्दैः प्रतीघातः केतनानाञ्च भञ्जनम् । चैत्यद्रुमावमर्दश्च रोधः कर्म्मानुशासनम् । अपस्करोऽथ गमनं तथोपायाश्च वर्ज्जिताः । पण्यवानकयज्ञानां भेरीणाञ्च युधिष्ठिर ! । उपार्जनञ्च द्रव्याणां परिमर्दश्च तानि षट् । लब्धस्य च प्रशमनं सतानाञ्चैवाभिपूजनम् । विद्वद्भिरेकीभावश्च दानकोमविधिज्ञता । मङ्गलालम्भनञ्चैव शरीरस्य प्रतिक्रिया । आहारयोजनञ्चैव नित्यमाक्षिप्तमेव च । एकेन च यथोक्तेन सत्यं मधुरं गिरः । उत्सवानां समाजानां क्रियाकेतनजातयः । प्रत्यक्षाश्च परोक्षाश्च सर्वाधिकरणेषु च । इत्ते भरतशार्दूल ! नित्यञ्चैवान्ववेक्षणम् । अदण्ड्यत्वञ्च विप्राणां युक्त्या दण्डनिपातनम् । अनुजीविज्ञातिभ्यो गुणेभ्यश्च समुद्भवः । रक्षणञ्चैव पौराणां राष्ट्रस्य च विवर्द्धनम् । भण्डलस्या च या चिन्ता राजन् ! हायप्ररोचिका । हासप्रतिविधा चैव शरीरस्य प्रतिक्रिया । देशजातिकुलानाञ्च धर्म्माः समनुवर्णिताः । धर्म्मश्चापि कामश्च मोक्षश्चात्रानुवर्णितः । उपायश्चार्थलिप्सा च विविधा भूरिदक्षिणा । मूलकर्मक्रिया चात्र मायायोगश्च वर्णितः । दूषणं स्रोतसाञ्चैव वर्णितं च स्थिरात्मनाम् । यैर्यैरुपायैर्लोकस्तु न चलेदार्यवर्त्मनः । तत्सर्वं राजशार्दूल ! नीतिशास्त्रेऽभिवर्णितम् । एतत् कृत्वा शुभं शास्त्रं ततः स भगवान् प्रभुः । देवानुवाच संहृष्टः सर्वाञ्छक्रपुरोगमान् । उपकाराय लोकस्य त्रिवर्गस्यापनाय च । नयनीतं सरस्वत्या बुद्धिरेषा प्रभाविता । दण्डेन सहिता ह्येषा लोकरक्षणकारिका । नियहानुग्रहरता लोकाननुचरिष्यति । दण्डेन नीयते चेदं दण्डं नयति वा पुनः । दण्डनीतिरिति ख्याता त्रींल्लोकानतिवर्त्तते । षाड्गुण्यगुणसारैषा स्वायम्भुवे महात्मनः । धर्म्मार्थकामभोक्षाश्च सकला ह्यत्र ग्रन्थिताः । ततस्तां भगवान्नीतिं पूर्वं जग्राह शङ्करः । बहुरूपो विशालाक्षः शिवः स्थाणुरुमापतिः । प्रजानामायुषो ह्रासं विज्ञाय भगवान् शिवः । संक्षिपेप ततः शास्त्रं संक्षार्थं ब्रह्मणा कृतम् । विशालाक्षमिति प्रोक्तं तदिदं प्रत्यपद्यत । दशाध्यायसहस्राणि सुब्रह्मण्यो महातपाः । भगवानपि तच्छास्त्रं संक्षिपेप पुरन्दरः । सहस्रैः पञ्चभिस्तात ! यद्बृहस्पतिकम् । अध्यायानां सहस्रेषु त्रिभिरेव बृहस्पतिः । संक्षिपेपेश्वरो ब्रह्मा वार्हस्पत्यं यदुच्यते । अध्यायानां सहस्रेण काव्यः संक्षेपमब्रवीत् । तच्छास्त्रमसुरगणो योगाचार्यो महायशाः । एवं लोकानुरोधेन शास्त्रमेतन्महर्षिभिः । संक्षिप्तमायुर्विज्ञाय मर्त्यानां ह्रासमेव च ।"

२दुर्गायाम् "नयानयगता लोके विकल्पनिलयामला । दण्डनादुनयनाद्वापि दण्डनीतिरिति स्मृता" देवीपु० ४५ अ० भावे क्तिन् । २दण्डप्रणयने स्त्री ।

**दण्डनेत्र** न० दण्डं नयति अपराधिनम् नी–ड्रच् ६त० । दण्डप्रणायके त्रये । "सैन्यापत्यञ्च राज्यञ्च दण्डनेतृत्वमेव च" मनुः ।

**दण्डप** पु॰ दण्डेन पाति पा–क। दण्डेन पालके रूपे तस्यापत्यं नडा॰ फक्। दाण्डपायन तदपत्ये पुंस्त्री।

**दण्डपांशुल** पु॰ दण्डेन यष्टिधारणेन पांशुलः अधमः। द्वारपाले शब्दर॰।

**दण्डपाणि** पु॰ दण्डः यष्टिः पाणौ यस्य। दण्डधरे यमे। काशीस्थे ३भैरवभेदे "विघ्नेशं माधवं दुर्गां दण्डपाणिञ्च भैरवम्" स च पूर्णभद्रयक्षसुतो हरिकेशनामा शिवाराधितशिवरेण काश्यां दण्डपाणिनामत्वमवाप। यथाह काशीख॰ ९२ अ॰ "इति श्रुत्वा वचः पत्न्याः पूर्णभद्रः स यक्षराट्" इत्युपक्रमे "अनन्तेनाथ कालेन तत्पत्नी सुषुवे सुतम्। तस्य नाम पिता चक्रे हरिकेश इति द्विज!" इत्यनेन तत्पुत्रोत्पत्तिसङ्गा तस्य शिवाराधनसुपवर्ण्य तपस्यासन्नशिवस्य तस्मै वरदानसूक्तं यथा "भक्तस्य धीरस्य तपोनिधेर्देवो हरो वराणां निकरं ददौ सदे। क्षेत्रस्य यक्षास्य मम प्रियस्य भो भवाधुना दण्डधरो वरान्मम। स्थिरस्त्वमद्यादि दुरात्मदण्डकः सुपालकः पुण्यकृतान्तु मत्प्रियः। त्वं दण्डपाणिर्भव नामतोऽधुना सर्वान् गणान् याधि ममाश्रयोत्कटान्। त्वत्साक्षात्कृतक्षेत्रवरेऽद्य यक्षराट् कस्त्वामनाराध्य सुसिद्धिभाजनम्। समाजनं प्रागत एव ते चरेत् ततः समर्च्यो मम भक्त आदरात्। मद्भक्तियुक्तोऽपि विना त्वदीयां भक्तिं न काशीवसतिं लभेत। गणेषु देवेषु हि मानवेषु तदप्रमान्यो भव दण्डपाणे"। काश्यां तत्स्थितिस्थानञ्च तत्रैवोक्तं यथा "त्वं दक्षिणस्यां दिशि दण्डपाणे! सदैव मे नेत्रसमक्षमत्र। त्वं दण्डयन् प्राग्भवतो दुरीहानिरीक्ष्य निस्त्राणभयं दिशन् वै"।

**दण्डपारुष्य** न॰ दण्डेन देहेन पारुष्यम्। व्यवहारविषयभेदे "तत्स्वरूपञ्च नारदेनोक्तम् "परगात्रेष्वभिद्रोहो हस्तपादायुधादिभिः भस्मादिभिश्चोपघातो दण्डपारुष्यसञ्ज्ञितं" इति। "परगात्रेषु स्थावरजङ्गमात्मकद्रव्येषु हस्तपादायुधैरादिपदग्राह्यैर्दण्डादिभिर्वोऽभिद्रोहो हिंसनं दुःखोत्पादनं तथा भस्मना आदिपदग्राह्यैः रजःपङ्कगूथादिभिश्च य उपघातः संस्पर्शनरूपं मनोदुःखोत्पादनन्तुभयं दण्डपारुष्यम्। दण्ड्यतेऽनेनेति दण्डो देहस्तेन यत् पारुष्यं विरुद्धाचरणं जङ्गमादेर्द्रव्यस्य, तद्दण्डपारुष्यम्" मिता॰।

तद्भेदादिकं वीरमि॰ उक्तं यथा

"तस्य त्रैविध्यमाह नारदः। "तस्यापि द्वैविध्यं हीनमध्योत्तमक्रमात्। स्वयमेवानिःशङ्कपातनकृतदर्शनैः। हीनमध्योत्तमानाञ्च द्रव्याणां समतिक्रमात्। त्रीण्येव साहसान्याहुस्तत्र कष्टक्रयोधनमिति"। स्वयमेवं ताडनाद्युद्योगः। निःशङ्कपातनं निःशङ्कप्रहरणम्। त्रीण्येव साहसानि त्रिप्रकाराण्येव साहसाकृतानि दण्डपारुष्याणीत्यर्थः। अन्यानपि भेदानाह परिशिष्टकारः। "दुःखं रक्तं व्रणं भङ्गं छेदनं भेदनन्तथा। कुर्यादुदः प्राणिनां तद्धि दण्डपारुष्यमुच्यते"। स्थावरजङ्गमप्राणिनां प्राणव्यतिरेकजनकादिना छेदनादिभवं दुःखं रक्तव्रणादिकञ्च दण्डपारुष्यमुच्यत इत्यर्थः। व्यासोऽपि "भस्मादिना प्रक्षिपणे ताडनञ्च करादिना। वासेष्टनञ्चांशुकाद्यैर्दण्डपारुष्यमुच्यते"। वादिपदग्राह्यदुःखकरं कर्दमपांशुमलादि द्रव्यं गृह्यते। करादिनेत्यादिशब्देन पाषाणेष्टकायुधादि द्रव्यम्। वांशुकाद्यैरित्यादिशब्देन रज्जुचर्मवल्कलादिद्रव्यम्। दण्डपारुष्यस्य षड्विधप्रकारा विधयो नारदेन दर्शिताः। "विधिः षड्विधस्तूक्त एतयोरुभयोरपि। पारुष्ये सति संरम्भादुत्पन्ने क्रुद्धयोर्द्वयोः। स मान्यते यः क्षमते दण्डभाग्योऽतिवर्त्तते। पूर्वमाचारवेद्यस्तु नियतं स्यात् स दोषभाक्। पश्चाद्यः सोऽप्यसत्कारी पूर्वं तु विनयो गुरुः। द्वयोरापद्यथोस्तुल्यमनुबध्नाति यः पुनः। स तयोर्दण्डमाप्नोति पूर्वो वा यदि चेतरः। पारुष्यदोषाहतयोर्युगपत्सम्प्रहृत्तयोः। विशेषश्चेन्न लक्ष्येत विनयः स्यात् समस्तयोः। स्वपाकपण्डचाण्डालव्यङ्गेषु वधबन्धिषु। कृत्तिपद्मान्यदासेषु गुर्वाचार्यस्त्रमेषु च। मर्य्यादातिक्रमे सद्यो घात एवानुशासनम्। यमेव क्षतिवर्त्तेरन्ते सन्नयनं स्मृतम्। स एव विनयं कुर्यात् न तद्विनयभाङ्नरः। मनो ह्येते मनुष्याणां धनमेषां मनात्मकम्। व्यतस्तान् घातयेद्राजा सार्धदण्डेन दण्डवेदिति"। अयमर्थः। यागदण्डपारुष्ययोरुभयोरपि द्वयोः प्रहर्त्तृकलहयोर्मध्ये यः क्षमते न तस्य केवलं दण्डाभाव एव किन्तु पूज्यत्वमपि। तथा पूर्वं कलहे प्रहर्त्तुस्य दण्डगुरुत्वम्। कलहे च द्वन्द्वैरानुलम्बात्तुरेव दण्डभाकत्वम्। तथा तयोर्द्वयोरपराधविशेषापरिज्ञाने सम एव दण्डः। तथा स्वपचादिभिरार्यैश्चापराधे कृते सज्जना एव दण्डने ऽधिकारिणस्तेषामशक्तत्वे तान् राजा घातयेदेव सार्धं दण्डेनेत्यादि।

उक्तं दण्डस्तुतिवचनम् "क्षान्तं दण्डेन समाक्रोशं ताडितः प्रतिताडयन्। दत्वापराधिनश्चैव नापराधी भवेन्नरः" इति। तत्पूर्वप्रवृत्तस्य समो दण्डः पश्चात् प्रवृत्तस्य नेत्येवंपरश्च न दण्डाभावपरम्। दण्डपारुष्यञ्च स्वरूपसन्देहे निर्णायकमाह याज्ञवल्क्यः "असाक्षिकेऽर्थे चिह्नैर्युक्तिभिश्चागमेन च। दृष्ट्वा व्यवहारन्तु कुर्याच्चिह्नकृतो भयादिति"। यदा कश्चिद्दण्डदण्डनेनाहत इति राज्ञे निवेदयति तदा चिह्नैर्व्रणादिभिस्तत्स्वरूपगतैर्लिङ्गैः युक्तिभिः कारणप्रयोजनपर्यालोचनादिभिः आगमेन जनप्रवादेन चशब्दाद्दिव्येन वा कूटचिह्नकृतसम्भावनभयात् परीक्षा कार्येत्यर्थः।

**दण्डपाल** पु० दण्डं देहं पालयति भक्षणात् पालि-अण् उप० स०। (डाड़िकोआ) मत्स्यभेदे हारा०। तल्लोजिनो रोगिणो देहस्यास्थ्रजननात्तस्य तथात्वम्। संज्ञायां कन्। दण्डपालक शकुलमत्स्यभेदे हारा०। उभयमपि दण्डनायके।

**दण्डपिङ्गलक** पु०दण्डः देहः पिङ्गोऽस्त्र। उत्तरस्थदेशभेदे "उत्तरतः कैलासः" इत्युपक्रमे ह० ख० १४ अ० कूर्मविभागे "पौरवकवचदारुदण्डपिङ्गलकाः" उक्तः।

**दण्डबालधि** पु० दण्ड इव बालधिरस्य। कृसिनि शब्दर०। तस्य चाङ्गुलस्य दण्डाकारत्वात् तथात्वम्।

**दण्डबाहु** त्रि० दण्ड इव बाहुरस्य। १दण्डाकारबाहुयुक्ते २कुमारानुचरभेदे पु०। "दण्डबाहुः सुबाहुश्च रजःकोकिल एव च" भा० श० ४६ अ० कुमारानुचरोक्तौ।

**दण्डभृत्** त्रि० दण्डं यष्टिं लोकदमनं वा बिभर्त्ति भृ-क्विप्। १यष्टिधारके २यमे त्रिका०।

**दण्डमत्स्य** पु०दण्ड इव मत्स्यः। दण्डाकारे शकुलमत्स्ये। "दण्डमत्स्यो रसे तिक्तः पित्तरक्तं कफं हरेत्। वातघ्नाधारणः प्रोक्तः शुक्रलो बलवर्द्धनः" राजव०।

**दण्डमान(ण)व** पु० दण्डप्रधानो मान(ण)वः शा० त०। दण्डप्रधाने जने बालके च तदर्थपरतायां गोत्रप्रत्ययान्तशब्दात् "दण्डमान(ण)वान्तेवासिषु" पा० न लुक्। दाक्षा दण्डमान(ण)वाः शिष्या वा" त्रि० कौ०।

**दण्डमातङ्ग** पु० पिङ्गतमरे पारस्करनिघण्टुः।

**दण्डमाष** पु० दण्डाकारो माषः मध्यः शा० त०। प्रधानमाषे दण्डमाषं धावति ठक्। दाण्डमाषिक तत्प्रधावके त्रि०।

**दण्डमुद्रा** स्त्री दण्डाकारा मुद्रा "उत्तानोर्द्धस्था मध्या सरला वङ्कुटिका। दण्डमुद्रा समाख्याता" तन्त्रसारोक्ते मुद्राभेदे।

**दण्डयात्रा** स्त्री दण्डार्थं शत्रुदमनार्थं दण्डा प्रकाण्डा वा यात्रा। १जिगीषोर्यात्रायां २सम्यग्गमने ३वरयात्रायाञ्च मेदि०।

**दण्डयाम** पु० दण्डेन यच्छति यम-घञ्। १यमे २दिने। दण्डे इन्द्रियदमने यामः संयमो यस्य। ३अगस्त्ये मुनौ च मेदि०।

**दण्डरी** स्त्री दण्डं तदाकारं राति रा-क गौरा० ङीष्। (डङ्गरा) इतिनामके वृक्षे राजनि०।

**दण्डवादिन्** पु० दण्डेन तदुत्तोलनेन वदति वद-णिनि। १द्वारपाले हारा०२दण्डधारिणि प्राड्विवाकादौ च।

**दण्डवासिन्** पु० दण्डे दण्डनिमित्तं वसति द्वारदेशे वस-णिनि। १द्वारपाले त्रिका०। २एकग्रामदण्डनेऽधिकृते जने जटा०।

**दण्डविष्कम्भ** पु० दण्डं मन्थानदण्डं विष्कम्भ्नाति वि+स्कभ्-घञ् उप० स०। (घोलमओयार खुँटि) तक्रमन्थनार्थं रज्ज्वा दण्डाकर्षणार्थे मन्थानबन्धनहेतौ स्तम्भभेदे अमरः।

**दण्डवृत्त** पु० दण्डाकारः पत्रादिहीनत्वात् वृत्तः। क्षुद्रो-वृक्षे। स्वार्थे क। क्षुद्रोवृक्षे राजनि०। तस्य पत्रन्यूनत्वेन दण्डाकारत्वात्तथात्वम्।

**दण्डव्यूह** पु० दण्डसंज्ञको व्यूहः। व्यूहभेदे दण्डशब्दे दृश्यम्। "दण्डव्यूहेन तन्मार्गं यायात्तु शकटेन वा" मनुः। "दण्डाकृतिरचनो दण्डव्यूहः" कुल्लू०। "यत्रायं बलाध्यक्षो मध्ये राजा पश्चात् सेनापतिः पार्श्वयोर्हस्तिनस्तत्समीपे घोटकास्ततः पदातयः इत्येवं क्रमरचनो दीर्घः सर्वतः समविन्यासो दण्डव्यूह उच्यते। तेन यातव्यं मार्गं सर्वतोभये सति यायात्" तदर्थः।

**दण्डसहाय** पु० दण्डे सहायः। दुष्टनिग्रहादौ राज्ञा सहाये। स च सहायो दण्डपक्षे "दण्डेषु शूद्रतक्षमाराटविकाः सामन्तकाद्याश्चेति" मा० द० उक्तः।

**दण्डसेन** पु० पौरवे विष्वक्सेनसुते नृपभेदे विष्वक्सेनस्य पुत्रोऽभूत् दण्डसेनो महीपतिः" हरिवं० २०अ० २द्वापरयुगीये नृपभेदे च। "वधः पाण्डस्य च तथा पुत्रत्यागो महात्मनः। दण्डसेनस्य च ततो दण्डस्य च वधस्तथा" भा० आ० १ अ०।

**दण्डस्थान** न०ष०त०। मनूक्तेषु दण्डस्य दण्डस्थानेषु उपस्थादिषु

दश स्थानानि दण्डस्येत्यादिवाक्यं दण्डशब्दे दृश्यम् ।

**दण्डहस्त** पु॰ दण्ड इव हस्तो हस्तमस्य । तगरपुष्पे राजनि॰।

**दण्डाक्त** न॰ चर्म्मानदीसमीपस्थे तीर्थभेदे । "तथा चर्म्मां समासाद्य भागीरथ्यां कृतोदकः । दण्डाक्तमभिगम्यैव गोसहस्रफलं लभेत्" भा॰ व॰ ८५ अ॰ । दण्डार्क्तमित्यपि तस्य पाठान्तरम् ।

**दण्डाजिन** न॰ दण्डश्चाजिनञ्च समा॰ द्व॰ । १दण्डचर्मणोः समाहारे । तत् कर्म्मणा धार्य्यतयाऽस्त्यस्य अच् । २शाठ्ये शब्दार्थचि॰ ।

**दण्डादण्डि** अव्य॰ दण्डेन च दण्डेन च प्रहृत्येदं प्रवृत्तं युद्धम् "क्रियाव्यतिहारे दण्ड् समा॰ पूर्वपदस्यदीर्घः । परस्पर-दण्डकरणकप्रहारपूर्वकं प्रवृत्ते युद्धे ।

**दण्डादि** न॰ "दण्डादिभ्यो यत्" पा॰ अर्हार्थे यत्प्रत्ययनिमित्ते शब्दगणे स च पा॰ ग॰ सू॰ उक्तो यथा "दण्ड, समन, मधुपर्क, कशा, अर्घ, मेघा, मेघ, सुवर्ण, उदक, वध, युग, युद्ध, भाग, दम, भङ्ग" ।

**दण्डापूप** पु॰ दण्डे दण्डाकर्षे अपूपस्य तत्सम्बद्धस्यापूपस्याकर्षः । दण्डाकर्षणे अर्थसिद्धे तत्सम्बद्धापूपस्याकर्षे । तत्प्रतिपादकः न्यायः दण्डापूपन्यायः । यथा "भुञ्जीतामरणात् क्षान्तेति" वचनेन जातानधिकारायाः पत्न्या अभावे अनुत्पन्नाधिकारपत्न्यभावोक्तानां पूर्वधन-स्वामिदायग्राहिणां दुहित्रादीनां धनाधिकारस्य दर्शितत्वात् पत्नीतो जघन्यदुहितृदौहित्रयोरधिकारे दण्डापूपन्यायसिद्धोऽयमर्थः" "स्यावरपदाद्दण्डापूप-न्यायादेवापरस्य धनस्य सिद्धिः" दा॰ भा॰ दण्डापूप इवाचरति क्यच् ततः कर्त्तरि क्तः । दण्डापूपायित-दण्डापूपवदाचरिते पदार्थे "पत्न्या च भर्त्तृधनात् कन्यायै विवाहार्थं तुरीयांशो देयः, पुत्राणामेव तद्दान-प्रतिपादनात् दण्डापूपायितं पत्न्यादीनां दानम्" दा॰ भा॰। "यथा दण्डाकर्षे तत्सम्बद्धस्यापूपस्याकर्षः तथा अपुत्र-संक्रान्तधनस्य पत्नीगततया आकर्षे तत्सम्बद्धस्य कन्यावि-वाहधनावशिष्टत्वविशेषस्याप्याकर्षः इति भावः" श्रीजीवः ।

**दण्डार** त्रि॰ दण्डमर्हति अ-अण् उप॰ स॰ । दण्डप्राप्ते । २मत्तहस्तिनि शब्दर॰ । ३कुम्भकारचक्रे ४यन्त्रभेदे ५वाहने पु॰ मेदि॰ ।

**दण्डार्क्त** न॰ चर्म्मानदीसमीपस्थे तीर्थभेदे "अथ चर्म्मां समासाद्य भागीरथ्यां कृतोदकः । दण्डार्क्तमभिगम्याथ गोसहस्रफलं लभेत्" भा॰ व॰ ८२ अ॰। दण्डाक्तमिति वा पाठः ।

**दण्डावतानक** पु॰ सुश्रुतोक्ते वातरोगभेदे "कफान्वितो भृशं वायुस्त्वक्षु यदि तिष्ठति । स दण्डवत्सम्भव-ति ततो दण्डापतानकः" ।

**दण्डासन** न॰ आसनभेदे हेमच॰ ।

**दण्डाहत** न॰ दण्डेन मन्थानयष्ट्याऽऽहतम् । (घोल) मन्थन-दण्डेनालोड़िते तक्रे अमरः ।

**दण्डिक** त्रि॰ दण्डोऽस्त्यस्य ठन् । १दण्डधारके (डाडिकोया) २मत्स्यभेदे राजनि॰ ३हारभेदे स्त्री जटाधरः । ४रज्ज्वां सुपद्माख्या हलायुधः ।

**दण्डिन्** पु॰ दण्ड+अस्त्यर्थे इनि । १यमे, हेमच॰ २नृपे, ३हारपाले, ४मक्षुकाधे, ५रवेः पार्श्वचरभेदे, शब्दार्थचि॰ ६जिनभेदे, त्रिका॰ ७दमनवृक्षे, राजनि॰ ८चतुर्थांश-मविशिष्टे, काव्यादर्शग्रन्थकर्त्तरि ९कविभेदे च । "जाते जगति वाल्मीकौ कविरित्यभिधीयते । कवी इति ततो व्यासे कवयस्त्वयि दण्डिनि" उद्भटः । १०दण्डधारके त्रि॰ । स्त्रियां ङीप् । ११महादेवे पु॰ । "दण्डिने सोमक-र्त्तायं दण्डिदण्डाय वै नमः" भा॰ शा॰ २८५ अ॰ । दण्डिदण्डोऽपि शिवे "गुह्यकेशनखड्गश्च पाली दण्डी कुसुम्भवान्" १२धृतराष्ट्रपुत्रभेदे दण्डधारशब्दे दृश्यम् ।

**दण्डिमन्** पु॰ दण्डस्य भावः कर्म्म वा पृथ्वा॰ इमनिच् । दण्डभावे दण्डकर्म्मणि च ।

**दण्डोत्पल** न॰ दण्डयुक्तस्तत्पलमिव । १वृक्षभेदे, (डानिकोया) २मत्स्यभेदे राजनि॰ । तत्रार्थे स्त्री रत्नमाला ।

**दण्ड्य** त्रि॰ दण्ड-कर्म्मणि यत् । १दण्डनीये । दण्डमर्हति दण्डा॰ यत् । २दण्डार्हे । दण्डशब्दे उभयोदा॰ दृश्यम्

**दत्** पु॰ दन्+क्विप्॰ । १दन्ते शब्दरत्ना॰ । "दत् दतौ दतः नासाकर्षदतो भङ्गे" मनुः । दन्तशब्दस्यैव रूप-भित्येके दन्तशब्दस्य शसादौ दत आदेशे तत्सिद्धेः शुद्धादेः परतः दन्तस्य तु दद्भावे "शुद्दन् लोकृष्णकः" भट्टिः । "शुदतीजनमज्जनार्तितः" नैष॰ ।

**दत्त** त्रि॰ दा-कर्म्मणि क्त । १त्यक्ते कृतदाने उत्सृष्टे "स्वकृत्तदत्ते सनिमासने सनिम्" माघः । दत्तं च सप्तविधं दत्ताप्रदानिकशब्दे वक्ष्यते । २आत्रेयगर्भ-जाते दत्तात्रेयापरनामके विष्ण्वतारभेदे पुत्रभेदे पु॰ । आत्रेयशब्दे १९२ पृ॰ तत्सम्भवकथा दृश्या "कपिलो नारदो दत्तो योगेशाः सनकादयः" भाग॰ ४।१८।६ । ३अग्निहिंकृनन्दने जिनभेदे हेमच॰ ।४सात्वतवंश्ये भज-मानान्वयजे राजाधिदेवस्य पुत्रभेदे । "राजाधिदेवस्य

श्रुता जज्ञिरे वीर्यवत्तराः । दत्तादिदत्तौ बलिनौ शोचाश्वः श्वेतवाहनः । शमी च दत्तश्च दत्तवच्च शतजित् । अवधा च अविष्ठा च सप्तसारौ सम्बभूवतुः" हरिवं० १९ अ० । भावे क्त । ५ दाने न० "दत्तभुक्तफलं धनम्" दायभा० भारतवाक्यम् । "शरणागतसंत्राणं भूतानां चाप्यहिंसनम् । वह्निर्वेदि च यद्दानं दत्तमित्यभिधीयते" भा० शा० उक्तौ शरणागतादिक्रिये अत्र दण्डमिति लिपिकरप्रमादपाठदर्शनात् शब्दकल्पद्रुमे दण्डशब्दस्य शरणागतत्राणार्थकतोक्ता तदुद्दीपनाभिः दण्डशब्दस्य तदर्थकता प्रागुक्ता प्रमादकृतैव अर्थपर्य्यालोचनया तत्र "दत्तमित्यभिधीयते" इति पाठस्यैव सङ्गतित्वात् द्वादशपुत्रान्तर्गते ७ औरसपुत्रभेदे । स च कलियुगेऽपि कर्त्तुं शक्यते "दत्तौरसेतरेषान्तु पुत्रत्वेन परिग्रहः" कलिवर्ज्यप्रे० आदित्यपु० "दत्तपदं कृत्रिमस्याप्युपलक्षणं "औरसः क्षेत्रजश्चैव दत्तः कृत्रिम एव च" कलिधर्म्मे पराशरः इति दत्तकमीमा० । अन्यैस्तु क्षेत्रजपदस्य औरसविशेषणत्वं कृत्रिमपदस्य दत्तकविशेषणत्वं मत्वा द्वयोरेव कलौ पुत्रत्वमिति व्यवस्थापितम् । स्वार्थे क । तत्रार्थे । तच्छब्दं याज्ञव० "दद्यान्माता पिता वा यं स पुत्रो दत्तको भवेत्" मनुरपि "माता पिता वा दद्यातां यमद्भिः पुत्रमापदि । सदृशं प्रीतिसंयुक्तं स ज्ञेयो दत्रिमः सुतः" इति । "आपद्यपत्यादानापदि न देयो दातुरयं प्रतिषेधस्तथा एकः पुत्रो न देयः "न त्वेकं पुत्रं दद्यात् प्रतिगृह्णीयादेति" वसिष्ठस्मरणात् । तथानेकपुत्रसङ्गावेऽपि ज्येष्ठो न देयः । "ज्येष्ठेन जातमात्रेण पुत्री भवति मानवः" इति तस्यैव पुत्रकार्य्यकरणे सक्षत्वात्" मिता० ।

अथ दत्तकग्रहणाधिकारादिकं दत्तकचन्द्रिकायां दर्शितं तच्चेह प्रदर्श्यते ।

मनुः "अपुत्रेण सुतः कार्य्यो यादृक्तादृक् प्रयत्नतः । पिण्डोदकक्रियाहेतोर्नामसंकीर्त्तनाय च ।" अत्रिश्च "अपुत्रेणैव कर्त्तव्यः पुत्रप्रतिनिधिः सदा । पिण्डोदकक्रियाहेतोर्यस्मात्तस्मात् प्रयत्नतः" । अपुत्रेण अजातपुत्रेण मृतपुत्रेण वा । "अपुत्रो मृतपुत्रो वा पुत्रार्थं ससपोष्य च" इति गौनकसंवादात् । तेन पुत्रोत्पत्त्या "ज्येष्ठेन जातमात्रेण पुत्री भवति मानवः। पितृणामनृणश्चैव स तस्माद्व्युच्यतेति" मनुवचनावगते अपरीहारेऽपि तत्पुत्रमरणे पिण्डोदकाद्यर्थं पुनः पुत्रकरणमावश्यकम् । अत्र पुत्रपदं पौत्रप्रपौत्रयोरप्युपलक्षणम् तयोरपि पिण्डदातृत्वसंभवकरत्वाविशेषात् । अन्यथा सत्यपि पौत्रे मृतपुत्रस्य निर्निमित्तपुत्रपरिग्रहापत्तिः अतः पुत्रपौत्रप्रपौत्ररहितस्यैव पुत्रीकरणमवगम्यते । अपुत्रेणेत्यत्र पुंस्त्वैकत्वयोर्विधेयविशेषणतया विवक्षितत्वम् तेन द्वाभ्यां त्रिभिर्वा नैकः प्रतिग्राह्य इति तु न देयं द्व्यादेरप्यायणस्य द्वाभ्यां परिग्रहस्य वक्ष्यमाणत्वात् । स्त्रियाश्च भर्त्तुरनुज्ञया तदधिकारात् । यथाह वसिष्ठः "न तु स्त्री पुत्रं दद्यात् प्रतिगृह्णीयाद्वान्यत्रानुज्ञानाद्भर्त्तुरिति" । प्रतिनिधिरिति । स च क्षेत्रजादिरेकादशविधः । यथाह मनुः "क्षेत्रजादीन् सुतानेतानेकादश यथोदितान् । पुत्रप्रतिनिधीनाहुः क्रियालोपान्मनीषिणः" । हरीतस्मृतिः "पुत्राश्चैवोदिता मोक्षा मनुना वेदपूर्वकः । सन्तानकारणश्चैषामौरसः पुत्रिका तथा । आद्यं विना यथा तैलं सर्पिः प्रतिनिधीकृतम् । तथैकादश पुत्रास्तु पुत्रिकौरसयोर्विना" । तत्रापि कलौ न सर्वेषामभ्यनुज्ञानम् । "अनेकधा कृताः पुत्रा ऋषिभिर्ये पुरातनैः । न शक्यन्तेऽधुना कर्त्तुं शक्तिहीनैरिदन्तनैरिति"वचनात् । "दत्तौरसेतरेषान्तु पुत्रत्वेन परिग्रहः" इत्याद्यभिधाय "इमान् धर्म्मान् कलियुगे वर्ज्यान्नाहुर्मनीषिणः" इति दत्तकेतरप्रतिनिधिनिषेधात् अतो दत्तकविधिर्विवेच्यते । तत्र गौनकः । "ब्राह्मणानां सपिण्डेषु कर्त्तव्यः पुत्रसंग्रहः । तदभावेऽसपिण्डे वा अन्यत्र तु न कारयेत्" । सपिण्डेष्विति सामान्यश्रवणात् समानासमानगोत्रेष्वित्यर्थः । तथाच सपिण्डाभावे असपिण्डः सगोत्रस्तदभावे भिन्नगोत्रोऽपि ग्राह्य इत्याह शाकलः "सपिण्डापत्यकश्चैव सगोत्रजमथापि वा । अपुत्रको द्विजो यस्मात् पुत्रत्वे परिकल्पयेत् । समानगोत्रजाभावे मातृवेदन्यगोत्रजम् । दौहित्रं भागिनेयञ्च मातृस्वसृसुतं विना" इति । "अन्यत्र तु न कारयेदिति" ब्राह्मणातिरिक्तः क्षत्रियादिरसमानजातीयो दत्तको व्यवस्थाप्यते" यदाह मनुः । "माता पिता वा दद्यातां यमद्भिः पुत्रमापदि । सदृशं प्रीतिसंयुक्तं स ज्ञेयो दत्रिमः सुतः" । आपदि पुत्रप्रतिग्रहीतुरपुत्रत्वे सदृशं सजातीयम् । यत्तु "सदृशं न जानितः किन्तु कृतानुरूपैर्गुणैस्तेन क्षत्रियादिरपि ब्राह्मणस्य पुत्रो युज्यते"

इति मेधातिथिव्याख्यानम्। तत्रायमभिसन्धिः औरसाक्षेत्रे क्षत्रियादेरसमानजातीयतया पिण्डोदकादानकर्तृत्वेऽपि नामसंकीर्त्तनादिप्रयोजनकतया पुत्रत्वसत्त्वाद्ध एव याज्ञीयत्वात् परत्वस्योपकारतया यासाच्छादनमात्रभागित्वं यदाह कात्यायनः "असवर्णासु यासाच्छादनभागिन" इति। तथा शौनकः "यदि स्यादन्यजातीयो स्वक्षेत्रोऽपि सुतः क्वचित्। अंश भाजं न तं कुर्याच्छौनकस्य मतं हि तत्।" याज्ञवल्क्येनाऽपि पिण्डदोंऽशहरत्वयोर्व्याप्तिभावे परः परः। सजातीयेष्वयं प्रोक्तक्रमेषु मयाविधिः"। सजातीयस्य पिण्डदात्वांशहरत्वे विहिते न तु विजातीयस्य पुत्रत्वं निषिद्धम् व्यक्तमाह वृद्धयाज्ञवल्क्यः "सजातीयः सुतो याह्यः पिण्डदाता स रिक्थभाक्। तदभावे विजातीयो वंशमात्रकरः स्मृतः "यासाच्छादनमात्रन्तु स लभेत तदक्षिण" इति। वस्तुतस्तु स्मृतिवचने सदृशपदस्य सजातीयार्थकतैव युक्ता परत्व तादृशदत्तकस्य विभागदर्शनात् असवर्णस्य च विभागासम्भवात्। "दौहित्रो भागिनेयश्चेति" दौहित्रभागिनेयनिषेधः शूद्रातिरिक्तविषयः तथा च शौनकः "क्षत्रियाणां सजातौ च गुरुगोत्रसमेऽपि वा। वैश्यानां वैश्यजातेषु शूद्राणां शूद्रजातिषु। सर्वेषामेव वर्णानां जातिष्वेव न चान्यतः। दौहित्रो भागिनेयश्च शूद्रैस्तु क्रियते सुतः। ब्राह्मणादित्रये नास्ति भागिनेयः सुतः क्वचित्"। गुरुगोत्रसमेऽपि वेति क्षत्रियाणां प्रातिस्विकगोत्राभावात् गुरुगोत्रनिर्देशः "पौरोहित्यान् राजन्यविशां प्रदर्शीते इति" सूत्रेण तस्य पुरोहितगोत्रभागित्वोक्तेः। जातिष्वेव नचान्यत इति नियमः सजातीयसम्भवे विजातीयनिषेधार्थः अन्यथा प्रागुक्तकात्यायनविरोधः स्यात्। तत्रापि सन्निहितसपिण्डेषु सति भ्रातृसुते स एव पुत्रीकार्य्य इत्याह मनुः "सर्वेषामेकजातानामेकश्चेत् पुत्रवान् भवेत्। सर्वे ते तेन पुत्रेण पुत्रिणो मनुरब्रवीत्"। वृद्धशातिः "यद्येकजाता बहवो भ्रातरश्च सहोदराः। एकस्यापि सुते जाते सर्वे ते पुत्रिणः स्मृताः" इति। अत्र वचनद्वयेऽपि भ्रातृसुते पुत्रप्रतिनिधितया कथञ्चित् सम्भवति अन्यो न प्रतिनिधिः कार्य्य इत्यवगम्यते। न चापत्यमुत्पादयितव्यमिति नित्योऽयं विधिः स यथा कथञ्चित् पालनीयस्तत्र भ्रातृजे पुत्रातिदेशेन तत्फलस्य पिण्डोदकादेरलोकतापरीहारस्य च सिद्धत्वेन न पुनस्तत्र प्रवृत्तिरत एवाऽतस्तस्यैव भ्रातृपुत्रस्य पुत्रत्वम्। "अपुत्रस्य पितव्यस्य तत्पुत्रो भ्रातृजो भवेत्। स एव तस्य कुर्वीत आद्यपिण्डोदकक्रियामिति" वृद्धशातपराशरस्मरणात्। तस्मिन् सति तु न दत्तकाद्युपादानमिति वाच्यम्। भ्रातृजस्य पुत्रातिदेशेनालोकतापरीहारादिसाधकत्वेऽपि नामसंकीर्त्तनोचितवंशकरत्वानुपपत्त्या तदर्थं तदुपादानस्यावश्यकत्वात्। किञ्च इदं हि वचनद्वयं सति भ्रातृपुत्रे न दत्तकाद्युपादाननिषेधकं परन्तु श्राद्धादिकर्तृत्वरूपपुत्रधर्म्मातिदेशकम् अन्यथा सत्यपि भ्रातृपुत्रे क्षेत्रजपुत्रोत्पादनविधिविरोधापत्तेः। "अक्षता वा क्षता वापि यं विन्देत सदृशात् सुतम्। पौत्री मातामहस्तेन दद्यात् पिण्डं हरेद्धनमिति" वचने दौहित्रेऽपि पौत्रातिदेशसत्त्वात् दौहित्रसत्त्वेऽपि प्रागुक्तयुक्त्या दत्तकादानुपादानप्रसङ्गाच्च। ननु सत्यपि भ्रातृपुत्रे दत्तकाद्युपादानस्य शास्त्रीयत्वे "बहूनामेकपत्नीनामेष एव विधिः स्मृत" इति वृद्धशातिवचने "सर्वासामेकपत्नीनामेका चेत् पुत्रिणी भवेत्" सर्वासां तेन पुत्रेण प्राह पुत्रवतीर्म्मनुरिति" मनुवचने च सपत्नीपुत्रे पुत्रधर्म्मातिदेशेन सत्यपि तस्मिन् दत्तकाद्युपादानमस्तिति चेन्न यथा "तप्ते पयसि दध्यानयति सा वैश्वदेव्यामिक्षा भवति वाजिभ्यो वाजिनम्" इत्यत्रामिक्षार्थं प्रकृतस्योद्देश्यीभूतामिक्षापचारे अमिक्षा पुरुषं प्रवर्त्तयति न तु वाजिनम् अनुद्देश्यत्वेनाप्रयोजकत्वात् यथा वा पितुः श्राद्धे पित्रादिकस्य पार्वणे कृते मातामहादिश्राद्धाय न पुनः पार्वणारम्भः तस्य पितृश्राद्धाधीनप्रवृत्तेः तथाऽत्रापि भर्तृरनुज्ञाश्लोक तत्पुत्रोपादानाय प्रवृत्तायामातृपुत्राभाव एव तदुपादानं न तु ततपुत्रानपचारेऽपि स्वपुत्रापचारे तदुपादानं ततप्रवृत्तेरप्रयोजकत्वात् तत्रालोकतापरीहारोद्देश्या न स्यादित्यपेक्षायां मनुवृद्धशातिवचनद्वयं स्वपुत्रोपुत्रे पुत्रातिदेशेनालोकतापरीहारश्राद्धोपपादकं, भर्तृवंशनन्तरेण चाऽन्या वंशान्तरासम्भवेन तस्यैव स्वंशकरत्वं चेत्यतः समस्तस्यापि पुत्रप्रयोजनस्य सम्भवेन सति सपत्नीपुत्रे न दत्तकाद्युपादानं, भ्रातृपुत्रस्य तु वंशकरत्वाभावेन सत्यपि तस्मिन्नुपादीयन्ते दत्तकादय इत्येतावान् परं विशेषः। ननु सति भ्रातृसुते तस्यैव पुत्रीकरणाद्वंशसम्भवे यत्रैक एव भ्रातृपुत्रस्तत्र तदसम्भवः। "सत्रेकं पुत्रं दद्यात् प्रतिगृह्णीयाद्वा स हि सन्तानाय

पूर्वेणेति" वशिष्ठस्मरणादिति चेन्न एतस्य द्वयोरुभयोरन्यतरविषये सावकाशत्वात् द्वयोरुभयोश्चये च हेतुपरिगददर्शितसन्ततिविच्छेदाभावात् वेतावत्त्वं च भैरवपुत्रपुत्रीकरणे पौराणिकनिदर्शनाच्च। यथा "ततः कदाचिद्दुर्वेशां भैरवो मैथुनं गतः। तस्यां च जनयामास सुवेशं नाम पुत्रकम्। तमेव चक्रे तनयं वेतालोऽपि स्वकं सुतम्। ततस्तौ तेन पुत्रेण स्वर्गां गतिमवापतुरिति"।

केन पुत्रो देय इत्याह शौनकः "नैकपुत्रेण कर्त्तव्यं पुत्रदानं कदाचन। बहुपुत्रेण कर्त्तव्यं पुत्रदानं प्रयत्नतः" इति। द्विपुत्रस्यापि पुत्रदाने ऊर्ध्वपुत्रनाशे वंशविच्छेदमाशङ्क्याह बहुपुत्रेणेति। स्त्रियास्तु जीवति भर्त्तरि तदनुमतौ, प्रोषिते मृते वा तदनुज्ञां विनापि यथाह वशिष्ठः। "न तु स्त्री पुत्रं दद्यात् प्रतिगृह्णीयाद्वा अन्यत्रानुज्ञानाद्भर्तुरिति"। अनुमतिश्च अप्रतिषेधेऽपि भवति "अप्रतिषिद्धं परमतमनुमतं भवतीति" न्यायात्। निरपेक्षदानमाह याज्ञवल्क्यः "दद्यान्माता पिता वा यं स पुत्रो दत्तको भवेत्"। तथा। "मातापितृभ्यामुत्सृष्टस्तयोरन्यतरेण वेति"।

अथ पुत्रपरिग्रहविधिमाह शौनकः "शौनकोऽहं प्रवक्ष्यामि पुत्रसंग्रहमुत्तमम्। अपुत्रो मृतपुत्रो वा पुत्रार्थं यस्तपोव्रत च। संग्रहं संग्रहविधिम्। उपोषित्र ग्रहणात् पूर्वदिने कृतोपवासः। वृद्धगौतमः "वाससी कृष्णले दत्त्वा उपोषद्याद्गुणीयकम्। आचार्यं धर्म्मसंयुक्तं वैष्णवं वेदपारगम्। मधुपर्केण सम्पूज्य राजानञ्च द्विजान् शुचीन्"। राज्ञो विप्रकृष्टत्वे ग्रामस्वामिनम् "बन्धूनाहूय सर्वांस्तु ग्रामस्वामिनमेव च" इति स्मरणात्। द्विजानिति बहुत्वं त्रित्वपर्य्यवसितं कपिञ्जलन्यायात्। द्विजानां पूजनं याचनार्थम्। "वह्निः कृतमयश्चैव पात्राणं चेध्ममेव च। एतानाहृत्य बन्धूंश्च ज्ञातीनाहूय यत्नतः। बन्धूनञ्चेन सम्पूज्य ब्राह्मणांश्च विशेषतः। ऊर्ध्वाधानादिकं तत्र कृत्वाज्योत्पवनान्तकम्। दातुः समक्षं गत्वा च पुत्रं देहीति याचयेत्। दाने समर्थौ दातारौ "ये यज्ञनेति पञ्चभिः"(१)। दद्यादिति शेषः। बन्धूनात्ममातृपितृबन्धून्। ज्ञातीन् सपिण्डान्। तदाह्वानं दृष्टार्थम् बन्धूनाहूतान् ब्राह्मणान्, पूर्वकृतान्। चकारात् आहूतान्, ज्ञातींश्च सम्पूज्येत्यर्थः। तथा "देवस्यत्वेति"(२) मन्त्रेण हस्ताभ्यां परिगृह्य च। अङ्गादङ्गेत्यृचं (३) जप्त्वा आघ्राय शिरुर्मूर्द्धनि। वस्त्रादिभिरलङ्कृत्य पुत्रच्छायावहं सुतम्। पुत्रच्छाया पुत्रसादृश्यं नियोगादिना(४) स्वयमुत्पादनयोग्यत्वमिति यावत्। तथा "वस्त्रगीतैश्च वाद्यैश्च स्वस्तिशब्दैश्च संयुतम्। गृहमध्ये समाधाय चरुं कृत्वा विधानतः। यस्यास्यदेत्यृचा(५) चैव तुभ्यमग्ने त्यृचैकया(६)। सोमोऽददित्यृचाभिः(७) प्रत्यृचं पञ्चभिस्तथेति"।

(अत्र प्रतीकस्थिताः ऋचः प्रायशोऽनेकेषां तत्स्वरूपाज्ञानात् तेषां प्रबोधाय वेदादुद्धृत्य प्रदर्श्यन्ते। (१) "ये यज्ञेन दक्षिणया समक्ता ऋतुश सप्तमह्नतत्वमानश। तेभ्यो भद्रमङ्गिरसो वो अस्तु प्रतिगृह्णीत मानवं सुमेधसः" ऋ०१०।६२।१। "य उदाजन् पितरो गोमयं वस्वृतेनाभिन्दन् परिवत्सरे बलम्। दीर्घायुत्वमङ्गिरसो वो अस्तु प्रतिगृह्णीत मानवं सुमेधसः। २। य ऋतेन सूर्य्यमारोहयन् दिव्यपथयन् पृथिवीं सुप्रजास्त्वमङ्गिरसो वो अस्तु प्रतिगृह्णीत मातरं सुमेधसः। ३। अयं नाभा यदति वस्तु वो गृहे देवपुत्रा अयास्तृणोतन। सुप्रजास्त्वमङ्गिरसो वो अस्तु प्रतिगृह्णीत मानवं सुमेधसः। ४। विरूपास इदयस्त इङ्गिरोवेषसः। ते अङ्गिरसः सुनवस्ते अग्नेः परिजज्ञिरे" ५। (२) "देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां प्रतिगृह्णामि" यजु० १।२। (३) "अङ्गादङ्गं सम्भवसि हृदयादधिजायसे। आत्मा वै पुत्रनामासि संजीव शरदां शतम्"। (४) "नियोगादिनेति आदिना विवाहसंग्रहः। दुहितृभगिनीप्रभृतीनां विवाहयोग्यत्वाभावात् अर्थतश्च तत्सिद्धौ विरुद्धसम्बन्धोपलक्षणार्थमित्युक्तिरपि विवाहयोग्यत्वाभावस्मरणार्थं स्वयंदेर्दौहित्रादिप्रतिसम्बन्धार्थज्ञातसेयं पुत्रगृह्यमिति बोध्यम्)। (५) ("यस्या हृदा कीरिणा मन्यमानोमर्त्यो जोहवीमि। जातवेदो यशो अस्मासु धेहि प्रजाभिरग्ने अमृतत्वमानश" ऋ०५।४।१०। (६) "तुभ्यमग्ने पर्य्यवहन्त्सूर्य्यां वहतुना सह। पुनः पतिभ्यो जायां दा अग्ने ! प्रजया सह" ऋ०१०।८५।३८। (७) "सोमोऽददद्गन्धर्वाय गन्धर्वोऽदददग्नये। रयिं च पुत्रांश्चादादग्निर्मह्यमथो इमाम्" ऋ० १०।८५।४१। "इहैव स्तं मा वि यौष्टं विश्वमायुर्व्यश्नुतम्। क्रीळन्तौ पुत्रैर्नप्तृभिर्मोदमानौ स्वे गृहे" ४२।

"आ नः प्रजां जनयतु प्रजापतिराजरसाय समनक्त्वर्यमा। अदुर्मङ्गलीः पतिलोकमाविश शं नो भव द्विपदे शं चतुष्पदे" ४२ "अघोरचक्षुरपतिघ्न्येधि शिवा पशुभ्यः सुमनाः सुवर्चाः। वीरसूर्देवकामा स्योना शं नो भव द्विपदे शं चतुष्पदे" ४३ "इमां त्वमिन्द्रसीढः सुपत्नीं सुभगां कृणु। दशास्यां पुत्रानाधेहि पतिमेकादशं कृधि" ४५)।

इङ्गौतमः। "पायसं तत्र साज्यञ्च श्रपयेत्। "प्रजापते न (८) त्वदेतान्यिन्द्विश्च प्रजापतिमिति"। ("प्रजापते न त्वदेतान्यन्यो विश्वा रूपाणि परिता बभूव। यत्कामास्ते जुहुमस्तन्नो अस्तु वयं स्याम पतयोरयीणाम्" (८) यजु० १०।२०।) वशिष्ठः। "पुत्रं प्रतिग्रहीष्यन् बन्धूनाहूय राजनि निवेद्य निवेशनस्य मध्ये व्याहृतिभिर्हुत्वा अदूरबान्धवं बन्धुसन्निकृष्टमेव गृह्णीयात् सन्देहे चोत्पन्ने दूरबान्धवं गूढमिव स्यापयेत् विज्ञायते हेत्रेकेन बहुजायते इति"। (संहितापुस्तके बहुः स्यायते इति पाठस्तु संहिताऽसंवादी अनन्वितश्चेत्युपेक्षितः। बहुस्यायते" सौभांसाधृतपाठः। एकेन पुत्रेण बहवः पितरादयस्यायन्ते इति व्याख्याय विज्ञायते इत्यादि श्रुतिं मत्वा बहुरिति जसः स्याने सुप् इति लायते इति वचनव्यत्ययः"सौभांसाशयः)। निवेशनं गृहम्। सन्देहे इति दूरावस्थितबान्धवस्य अत्यन्तदेशभाषाविषयकथादिना कृतभोजादिसन्देहो भवत्येव तथात्वे तन्निर्णयपर्यन्तं न व्यवहरेत् तत्र हेतुरेकेनेति। एतदन्यतरविधिरावश्यकः। ततश्च शौनकः "दक्षिणां गुरवे दद्यात् यथा शक्ति द्विजोत्तमः। ऋणो राज्ञार्द्धमेवाथ वैश्यो वित्तशतत्रयम्। शूद्रः सर्वस्वमेवापि अशक्तश्चेद्यथाबलम्"। राज्ञार्द्धमर्द्धराज्योत्पन्नमेकवर्षीयं द्रव्यम्। "प्रदद्यादर्द्धराज्योत्पन्नमेकवर्षीकृतं धनमिति" इङ्गौतमस्मरणात्। उत्तममध्यमाधमभेदेन वित्तानां सुवर्णरजतताम्राणामिति ज्ञेयम्। "शतत्रयं नाथकानां सौवर्णमथ राजतम्। प्रदद्यात् ताम्रमथ वा उत्तमादिव्यवस्थेति" इङ्गौतमस्मरणात्। सर्वस्वमेकवर्षीयमिति ज्ञेयमिति यावत्। तैत्तिरीयाणान्तु विधिविशेषमाह बौधायनः "अथ पुत्रपरिग्रहविधिं व्याख्यास्यामः प्रतिगृहीष्यन्नुपकल्पयते द्वे वाससी द्वे कुण्डले अङ्गुलीयकम्, आचार्यञ्च वेदपारगञ्च कृतमग्निं परिहृत्य पर्यग्नि पर्यग्निमित्यथ बन्धूनाहूय निवेशनस्य मध्ये राजनि निवेद्य परिषदि वागारमध्ये ब्राह्मणवागारम्बेन उपविश्य पुण्याहं स्वस्ति ऋद्धिमिति वाचयित्वा यद्देवयजनोल्लेखमभ्रति आप्रणीताभ्यः हुत्वा दातुः समक्षं गत्वा मे पुत्रं देहीति भिक्षेत ददानीतीतर आह तं परिगृह्णामि धर्म्मोऽसि त्वा परिगृह्णामि सत्योऽसि त्वा परिगृह्णामि इत्यनेन वस्त्रकुण्डलादिभिरलङ्कृत्य परिधानप्रभृत्यग्निमुखं हुत्वा पञ्चा जुहोति यस्याहुता क्षीरिणाः मन्यमान(९) इति" पुरोऽनुवाक्या मनूद्य "यस्मै त्वं सुकृते जातवेद" इति (१०) याज्यया जुहोत्यथ व्याहृतीर्हुत्वा स्विष्टकृत्प्रभृति सिद्धमाधेनुवरप्रदानदक्षिणां ददाति एते च वाससी एते कुण्डले एतच्चाङ्गुलीयकं च एवं त्वौरस उत्पद्यते तुरीयभागे सम्भवतीति आह च बौधायनः" इति। (९) प्राग्वत् (१०) यस्मै त्वं सुकृते जातवेद उ लोकमग्ने! कृणवः स्योनम्। अश्विनं पुत्रिणं वीरवं गोमन्तं रयिं नशते स्वस्ति" ५।४।११)। एवमुक्तविध्यभावे परिष्टहोनस्य तु विवाहोचितधनमात्रभागित्वं नत्वंशभागित्वमिति वक्ष्यते तथा मनुः। "गोबरिकृते जनयितुर्न हरेद्दत्रिमः सुतः। गोबरिक्थानुगः पिण्डो व्यपैति ददतः स्वधेति"। एतेन दातृधने दानादेव पुत्रत्वनिवृत्तिद्वारा दत्रिमस्य स्वत्वनिवृत्तिर्दातृगोबरनिवृत्तिश्च भवतीत्युच्यते। तथा च गोबरादिनिवृत्तेरेव दर्शनात्"संस्कुर्य्यात् स्वसुतान् पितेति" स्मरणात् यद्दत्तानन्तरसम्भाव्यमाना एव दत्तकस्य संस्काराः प्रतिगृहीता कार्य्या न पुनर्जनकेन कृतपूर्वा अपि कार्य्या इति। "एवमेनः शमं याति बीजगर्भसमुद्भवमिति"। "चित्रं कर्म यथानेकैरङ्गैरुन्मील्यते जनैः। ब्राह्मण्यमपि तद्वत् स्यात् संस्कारैर्विधिपूर्वकैरिति" मनुवचनबोधितस्य तत्तत्क्रियातो बीजादिदोषनाशस्य ब्राह्मण्याधानस्य च ज्ञातत्वेन तदादृत्तौ प्रमाणाभावात्। अन्यथा "अतो संस्कारकर्माणि गर्भाधानमिव स्वयम्। पिता कुर्यात्तदन्यो वा तस्याभावेऽपि तत्क्रमात्" इत्यनेन पुंसवनसीमन्तोन्नयनयोरपि करणापत्तेः। तस्मादुक्तं यथाम्नायिकत्वात्। किन्तु यद्दत्तानन्तरमेव पितृत्वेन संस्काराधिकारात् तत्पूर्वभाविषु संस्कारेषु प्रतिगृहीतुरनधिकार एवायाति ज्ञानाभावात्। यदि च तत्पूर्वभाविनोऽपि संस्कारा जनकेन न कृताश्चेदा बीजगर्भदोषनाशायशक्यत्वेन क्रमानुरोधेन च प्रतिगृहीतैव ते समाधेयाः। एवञ्च उपनयनमात्रकरणेऽपि प्रतिगृहीत-

दत्तकपुत्रसिद्धिः। "अन्यशाखोद्भवो दत्तः पुत्रत्वेनोपनायितः। स्वगोत्रेण स्वशाखोक्तविधिना स स्वशाखभागिति" वशिष्ठस्मरणात्। एतच्चाष्टमाब्दरूपतन्मुख्यकालाभ्यन्तरवर्त्तिपरिग्रहे बोध्यम् अन्यथा मुख्यकालेऽधिकारयोग्यत्वाभावे गौणकाले अनधिकाराच्च तत्सिद्धिरिति। अत्र च जनकप्रतिग्रहीत्रोरुभयोरपि पुत्राभिसन्धाने सति दत्तकस्य द्व्यामुष्यायणत्वेनोभयगोत्रभागित्वम्। विशेषो वक्ष्यते वसु पुराणनाम्ना पठन्ति। "पितुर्गोत्रेण यः पुत्रः संस्कृतः पृथिवीपते!। चूड़ान्तं न पुनः स पुत्रतां याति चान्यतः। चूड़ाद्या यदि संस्कारा निजगोत्रेण वै कृताः। दत्ताद्यास्तनयास्ते स्युरन्यथा दास उच्यते। यदि स्यात् कृतसंस्कारो यदि वातीतशैशवः। अदत्ते पञ्चमाद्वर्षात् पुनेष्टिं प्रथमं चरेदिति"। तदमूलम्। समूलत्वेऽपि वञ्जनकगोत्रेण चूड़ान्तसंस्कारसंस्कृतस्य न परीतः पुत्रत्वं परीतैव चूड़ादिसंस्कारकरणे तत्। यदि च कृतचूड़ोऽतीतपञ्चवर्षो वा आहूतो भवति न तदास्य पुत्रत्वं सम्भवतीति च विदध्वन्ति तन्न कृतवादापत्तेः। पञ्चवर्षाभ्यन्तरगृहीतस्याप्युपनयनात् पूर्वं सकलशिष्टानुमोदितपुत्रत्वव्यवहारानुपपत्तेः तदानीं परीतरि मृते तच्छ्राद्धानधिकारापत्तेश्च। किन्त्वयं वचनार्थः जनकगोत्रेण कृतचूड़ान्तसंस्कारस्य पुत्रत्वं निषिद्ध्य प्रतिपरीता पुनश्चूड़ादिकरणे तत् प्रतिप्रसूतम्। ततश्च कृतसंस्कारस्यातीतपञ्चवर्षस्य च परीता चूड़ादिकरणात् पूर्वं दासत्वाच्चेपात् चूड़ादिकरणानन्तरं पुत्रत्वं लभ्यम्। अकृतसंस्कारस्यानतीतपञ्चवर्षस्य तु परिग्रहशास्त्रादेव तत्प्राप्तं तच्च वितथम्। अथवा जनकेन चूड़ान्तं संस्कृतोऽपि पुत्रो न पुत्र इत्यपुत्रत्वादेवः यतोऽन्यत्र इतरतां यातीति हेतुरपदिष्टः। तथा च एकस्य पुत्रपदस्य चकारस्य च वैयर्थ्यदूषणमपि परिहृतम्। एवञ्च चूड़ाद्या इत्यतद्गुणसंविज्ञानबहुव्रीहिणा द्विजातीनामुपनयनलाभः शूद्रस्य तु विवाहलाभः। "अन्यशाखोद्भवो दत्तः पुत्रत्वेनोपनायितः। स्वगोत्रेण स्वशाखोक्तविधिना स स्वशाखभागिति" प्रागुक्तैकवाक्यत्वात्। पञ्चमाद्वर्षादिति। ब्रह्मवर्चसफलार्थिविप्राभिप्रायं "ब्रह्मवर्चसकामस्य कार्यं विप्रस्य पञ्चमे) इति मनुवचने तत्कामस्य पञ्चमवर्षस्यैव उपनयनमुख्यकालत्वेन तदेकमूलत्वात्। तदनाचिनस्त्वाष्टमाब्दादिति। क्षत्रियादेरप्युपनयनतन्मुख्यकालादरः। मुख्यकालेऽपि सिद्धाधिकारयोग्यत्वञ्चैव गौणकालेऽपि संस्काराधिकारादित्युक्तप्रायम्। चूड़ायां गौणकालदरस्तु वचनबलादेव। पुनेष्टिमिति तत्र वर्षत्रयस्यैवाधिकारं तेन पुनेष्टिपूर्वकचूड़ादिभिः पुत्रत्वं सम्भाव्यम्। शूद्रेण तु तदापि संस्कारमात्रादेवेति सर्वमनवद्यम्।

एवञ्च सर्वेषामेव प्राचां कालविशेषमनन्तर्भाव्यैव पुत्रपरिग्रहविधानमुपपद्यते उक्तार्थस्य स्वतःसिद्धत्वात्। अथैवमुक्तवचनपरव्याख्याने कृतचूड़स्य दत्तकस्य जनकमात्रपुत्रत्वं निषिध्य अन्यतश्च पुत्रत्वं यातीत्यत्र चकारेण जनकप्रतिग्रहीतृसाधारण्यं लभ्यम् उभयोरेव संस्कारकत्वात् तच्च उभयोरावयोरयं पुत्र इत्यभिसन्धाने सति बोध्यम्। अयमेव द्व्यामुष्यायणो नाम द्विपितृको द्विगोत्रश्च। ननु चौलजन्यैव द्विपितृकत्वं श्रूयते। यथा हारीतः, "जीवति चौलजन्माङ्करस्यातन्त्रत्वात्कृते द्व्यामुष्यायणं अशुद्धबीजत्वात्" जीवत्यपि क्रियाभ्युपगमाद्द्विपितृको भवतीत्याह मनुः, "क्रियाभ्युपगमात्त्वेवं बीजार्थं यत्प्रदीयते। तस्येह भागिनौ दृष्टौ बीजी क्षेत्रिक एव चेति"। अशुद्धबीजक्षेत्रिकयोर्भम क्षेत्रं तव बीजं यदपत्यं तदावयोरित्ययं क्रियाभ्युपगमः। तथा "अपुत्रेण परक्षेत्रे नियोगोत्पादितः सुतः। उभयोरप्यसाधारणो पिण्डदाता च धर्मतः" इति। दत्तकस्य तु तददृष्टचरं प्रत्युत "गोत्रिरिक्थे जनयितुर्न हरेद्विभः सुतः" इति प्रागुक्तमनुवचनं तद्विपरीतार्थपराङ्कमेवास्तीति चेन्न दत्तकादिष्वपि "सर्वेषामेकधर्मोणामेकस्यापि यदुच्यते। सर्वेषामेव तत् कृत्स्नादेकरूपा हि ते स्मृताः" इति बौधायनवचनेन क्षेत्रजधर्मलाभात्। "हे आद्ये कृत्स्नादेकस्याद्वे वा पृथगतद्दिश्य एकपिण्डे वा द्वावनुकीर्त्तयेत् प्रतिपरीतारं चोत्पादयितारम् वा तृतीयात् पुरुषादिति" कात्यायनवराध्याये सामान्यतोदर्शनाच्च दत्तकस्यापि द्विपितृकत्वसिद्धिः। अतएव सत्याषाढोऽपि "नित्यानां द्व्यामुष्यायणानां क्षेत्रजानां सप्तवरगोत्रहृदयसम्बन्धसङ्ख्या दत्तकादीनां द्व्यामुष्यायणवदिति सूत्रेण तन्नामोऽतिदिष्टः। विस्तरस्तेतन्त्राप्रकारैः "नित्यद्व्यामुष्यायणप्रसङ्गेनानित्यानाच्च दत्तकादीनामिति"। तावदेव नोत्तरसन्ततौ प्रथमेनैव संपरीता चेत्तदा उत्तरस्य पूर्वत्वाक्षेपेण दत्तरेति"।

एतद्वाग्दानेषु क्षेत्रजवत् उभयोरभिसन्धौ दत्तकस्योभयगोत्रभागित्वम् अन्यथा जनकेनैव सर्वसंस्कारकरणे जनकगोत्रभागित्वं न परीतृगोत्रभागित्वं परीता संस्कारकरणे तु उत्तरस्य परीतुः पूर्वत्वात् प्राधान्यात्तेनैव उत्तरसन्ततेर्गोत्रमिति। तथा च पैठीनसिः "अथ दत्तक्रीतकृत्रिमपुत्रिकापुत्राः परपरिग्रहेणार्षेण वेदत्त जाताको ऽसङ्कृतकृतीना द्व्यामुष्यायणा भवन्तीति"। आर्षेण पशुप्रदानेन परिग्रहेण जनकपरीतोः स्वीकारेण द्व्यामुष्यायणा भवन्तीत्यर्थः। व्यक्तमुक्तम् "द्व्यामुष्यायणका वे स्युर्दत्तक्रीतादयः सुताः। गोत्रद्वयेऽप्यनूढाङ्गः शुक्लगैरर्षयेयेति"। न च दत्तस्य द्व्यामुष्यायणत्वं न घटते जनकस्यापि तत्र स्वत्वानपायेन "माता पिता वा दद्यातामिति" दानविध्यनुपपत्तेरिति वाच्यम्। "सामान्यं सर्वभूतेभ्यो मयोत्सृष्टमिदं जगत्। रमन्तु सर्वभूतानि स्थानपानावगाहनैः" इत्यादौ स्वमात्रस्वत्वनाशकस्वभूतोद्देश्यकत्यागादेव मद्यादिवत् साधारण्यसिद्धेरित्यास्तां विस्तारः।

अथ दत्तककर्तृकत्वाद्विनिर्णयः। तत्र पितुः सपिण्डीकरणात्प्रेतोऽयमर्थो दत्तकस्य पूर्वपरीतृत्वेऽपि स्वौरसे नाधिकारः। "औरसे पुनरुत्पन्ने तेषु त्वैषम्यं न विद्यते" इति देवलेन त्वैषम्यप्रतिषेधात्। "पिण्डदोऽंशहरस्तेषां पूर्वाभावे परः परः" इति याज्ञवल्क्यवचनाच्च। अन्यत्र सर्वत्रौरसवत्। "त्रयाणे तु विशेषमाह जातूकर्ण्यः, "औरसक्षेत्रजौ पुत्रौ विधिना पार्वणेन तु। प्रत्यवृद्धमितरे कुर्युरेकोद्दिष्टं सुता दश"। इतरे दश दत्तकादयः"। तथा पराशरः "पितृगोत्रस्य देवत्वमौरसस्य त्रिपौरुषम्। सर्वत्रानेकगोत्राणामेकोद्दिष्टं त्रयेऽहनीति" अनेकगोत्राणां द्विगोत्राणाम्। औरसक्षेत्रजयोरपि साम्ये रेव पार्वणाधिकारः "पार्वणेन विधानेन देयमस्मिन्मता सदेति" आवाहनतत्पुराणैकवाक्यत्वात्। औरसक्षेत्रजव्यतिरिक्तानान्तु साग्निनिरग्निसाधारणानामेकोद्दिष्टमिति सिद्धम्। द्व्यामुष्यायणस्यैतिकर्तव्यतायां विशेषमाह साङ्खायनस्तम् "पिण्डान् यथावनेजनं निधाय उभावेकस्मिन् पिण्डे पितृभेदे" इति। पितृभेदे एकस्मिन् पिण्डे उभौ जनकपरीतारौ कीर्त्तयेदिति शेषः। प्रवराध्याये, "पितृव्येण चैककार्यजाताको परिग्रहीतृरेव भवन्ति अथ यद्येषां भार्यासपत्नं न स्यात् तदा रिक्थं हरेयुः पिण्डं तेभ्यः त्रैपुरुषिकं दद्युः यद्यपि स्यादुभाभ्यामेव दद्युरित्याचार्यवचनं हे श्राद्धे कार्ये कस्मादेकस्माद्वा पृथगनड्डिश्य एकपिण्डे वा द्वादशीत्तयेत् प्रतिपरीतारं चोत्पादयितारं वा तृतीयात् पुरुषादिति"। परीतुः क्रियानियमाभावे पुत्रान्तराभावे च तस्यैव क्रियानियमे अपत्यसद्भावे च न द्विपितृकत्वमित्यर्थः। अत्र श्राद्धभेदाभेदयोर्विकल्पः। न चेदं क्षेत्रजविषयं सत्याषाढेन दत्तकादीनां द्व्यामुष्यायणवदिति सूत्रेण दत्तकेऽपि तद्धर्मस्यातिदेशात्। तथा हारीतः, "तेषामुत्पादयितुः प्रथमं प्रवरो भवति द्वौ द्वौ पिण्डौ निर्वपेत् एकपिण्डे वा द्वादशीत्तयेद्वितीये पुत्रः तृतीये पौत्रः लेपिनक्षीनू वाचक्नवाण आ सप्तमादित्येके" इति। तेषां पितृणां मध्ये बीजिनः प्रथममार्षेयं क्षेत्रिणो द्वितीयमिति द्विप्रवरता। एकपिण्डे त्वेतत् बीएसाध्याहारः। "यदि द्विपिता स्यादेकस्मिन्नेव द्वौद्वावुपलक्षयेत्" इत्युपलम्भवचनात्। द्वितीये पितामहपिण्डे द्व्यामुष्यायणस्य पुत्रः, तृतीये प्रपितामहपिण्डे द्व्यामुष्यायणस्य पौत्र इति। यदि परीता प्रथमं मृतः तदा तस्मै तदाद्यं अथ यदि जनकस्तदा जनकाय, यद्युभौ तदादौ जनकाय पश्चात्परीतरे दद्यादित्याह मरीचिः, "सगोत्रादन्यगोत्राद्वा यो भवेद्विधवासुतः। पिण्डं श्राद्धविधानेन क्षेत्रिणे प्राक् प्रदापयेत्। बीजिने तु ततः पश्चात् क्षेत्री जीवति चेत् क्वचित्। बीजिने दद्युरादौ तु मृते पश्चात् प्रदीयते। उभौ यदि मृतौ स्यातां बीजिन्यादौ ततो ददेत्। क्षेत्रिण्यादौ न दत्तं स्याद्बीजिने नोपतिष्ठते" इति। एतेनैकतरोपरतावपि द्विपितृकस्य पार्वणं दर्शितम्। तथा तुल्यन्यायेन मातृभेदेऽपि द्व्यामुष्यायणदत्तकस्य "पितरौ यत्र पुष्यन्ते तत्र माताममा ध्रुवम्" इत्यनेन प्राग्प्रमातामहश्राद्धे जननीपितृणां प्रथमं निर्देशतः प्रतिपरीत्री या माता तत्पितृणाम्। शुद्धदत्तकस्य तु प्रतिपरीत्रा एव मातुः पित्रादिपिण्डदानं तस्य तन्मात्रस्वधाकरत्वादिति। एवञ्च "स हि सन्तानाय पूर्वेषामिति" हेतुवचनादस्यैकं पुत्रं ददादिति निषेधो द्व्यामुष्यायणातिरिक्तविषयः सन्तानविच्छेदाभावादित्युक्तमेव।

अथास्य सापिण्ड्यम्। जनककुले अवयवान्वयेन

प्रतिग्रहीतृकुले च पिण्डान्वयेन त्रिपौरुषं यदाह काण्वाजिनिः "यावन्तः पितृवर्गाः स्युस्तावद्भिर्दत्तकादयः। प्रेतानां योजनं कुर्युः स्वकीयैः पितृभिः सह। ताभ्यां सहाय तत् पुत्राः पौत्रादयैकेन तत्समम्। चतुर्थं पुरुषे क्लेदं तस्मादेषा त्रिपौरुषीति"। अस्यार्थः दत्तकादयः पुत्राः प्रेतानां प्रतिग्रहीत्रादीनां पितृणामौरसत्वे दत्तकत्वे, द्व्यामुष्यायणत्वे वा यावन्तः पितृवर्गाः त्रयः षट् वा तावद्भिः सह तेषां योजनं सपिण्डनं कुर्युः तत्र प्रतिग्रहीत्रादीनामौरसत्वे तत्पितृपितामहप्रपितामहास्त्रयः, दत्तकत्वे तत्प्रतिग्रहीतृपितामहप्रपितामहास्त्रयः, द्व्यामुष्यायणत्वे तज्जनकादयस्त्रयः तत्प्रतिग्रहीत्रादयस्त्रय इति षट्। एवञ्च दत्तकस्य स्वकर्तृके पार्वणे येषां देवतानां स्वपुत्रकर्तृके सपिण्डीकरणेऽपि तेषामेव तथात्वमिति ज्ञापितम्। दत्तकस्य पुत्रास्तु दत्तकसपिण्डीकरणं तत्प्रतिग्रहीत्रा तत्पितृणां त्रयाणां मध्ये ताभ्यान्च सह कुर्युः। एवञ्च दत्तकस्य पौत्रा दत्तकप्रतिग्रहीतृभ्यां गृहीतुः पितृणां त्रयाणां मध्ये एकेन गृहीतुः पित्रेति यावत्तेन च समं सह तत् स्वपितृसपिण्डनं कुर्युः। चतुर्थपुरुषे क्लेदमिति। यो यदा यत् सपिण्डीकरोति स तत्पित्रादिभिस्त्रिभिरेव करोतीति चतुर्थे विरामः सिद्ध एवेति तदारम्भः "सिद्धे सत्यारम्भो नियमाय" इति न्यायेन लेपिनां लेपनिरासेन सापिण्ड्यव्यवच्छेदार्थः। तदेवाह तस्मादेषेति। एषा सपिण्डता। तथाच "लेपभाजश्चतुर्थाद्याः पित्राद्याः पिण्डभागिनः। पिण्डदः सप्तमस्तेषां सापिण्ड्यं सप्तपौरुषमिति" मत्स्यपुराणोक्तसप्तपौरुषसापिण्ड्यस्य सामान्यस्थानेन विशेषेण बाध एव। अतएव हारीतेन "लेपिनस्त्रीन् वाचक्नव्यः आ सप्तमादित्येके" इति पक्षान्तरमुपन्यस्तं सङ्गच्छते। तदेव संवर्त्तेनान्यत्रोक्तम् "दत्तकानान्तु पुत्राणां सापिण्ड्यं स्यात्त्रिपौरुषम्। जनकस्य कुले तद्वदृषगृहीतुरिति धारणेति"। यदिदमुभयत्र त्रिपुरुषसापिण्ड्याभिधानं तत् द्व्यामुष्यायणाभिप्रायेण, तस्य त्रिकल्पत्वेन सपिण्डनविधानात्। शुद्धदत्तकस्य तु "गोत्ररिक्थे जनयितुर्न हरेद्धिमः सुतः। गोत्ररिक्थानुगः पिण्डो व्यैति ददतः स्वधेति" प्रागुक्तमनुवचने पिण्डनिवृत्तिदर्शनात् प्रतिग्रहीतृकुल सापिण्ड्यमिति।" यत्तु उद्वहगोत्तमीयम् "सगोत्रेषु गता ये स्युर्दत्तक्रीतादयः सुताः। विधिना मोक्षतां यान्ति न सापिण्ड्यं विधीयते"। सगोत्रेषु मध्ये गता अपि दत्तकादयो विधिनैव गोत्रं भजन्ते परन्तु तेषु सापिण्ड्यं नोत्पद्यते सगोत्रेष्वपि सापिण्ड्यानुत्पत्तौ परगोत्रेषु तरां सापिण्ड्यानुत्पत्तिरिति। तत्तु पुत्रान्तरवत् साप्तपौरुषसापिण्ड्यप्रसक्तौ निषेधकं सापिण्ड्यप्रयुक्तदशाहाशौचादिप्रतिषेधकम् वा न तु सामान्यतस्सापिण्ड्यनिषेधसूत्रवचनजातात्।

अथ दत्तकाशौचनिर्णयः। तत्र शुद्धदत्तकस्य जनककुले परस्परमशौचं नास्त्येव गोत्रपिण्डनिवृत्त्या अशौचनिबन्धनस्यार्थसिद्धत्वात् द्व्यामुष्यायणस्य तु उभयत्रैवाशौचमिति। ब्रह्मपुराणे "दत्तश्च स्वयन्दत्तः कृत्रिमः क्रीत एव च। अपविद्धश्च ये पुत्रा भरणीयाः सदैव ते। भिन्नगोत्राः पृथक् पिण्डाः पृथग्वंशकराः स्मृताः। जनने मरणे चैव त्र्यहाशौचस्य भागिनः"। पराशरः "भिन्नगोत्रः सगोत्रो वा नीतः संस्कार चेच्छया। जनने मरणे तस्य त्र्यहाशौचं विधीयते"। तथा "चौरसं वर्जयित्वा च सर्ववर्णेषु सर्वदा। चेलजादिषु पुत्रेषु जातेषु च मृतेषु च। अशौचन्तु त्रिरात्रं स्यात् समानमिति निश्चयः"। सर्वदा उपनयनानन्तरमपि। अत्र सगोत्रस्यापि विधिना जनकगोत्रविच्छित्तिपूर्वकग्रहीतृगोत्रप्राप्तावसगोत्रदत्तकाविशेषात् त्र्यहाशौचसङ्गः युक्तमेव। तथा दत्तके व्रतोद्वाहे पश्चाज्जातस्यौरसस्य विवाहे न परिवेदनदोषः न वा दत्तकस्याग्रजसोदरात् पूर्वं विवाहकरणेऽपि क्षतिः। ननु शुद्धदत्तकस्य जनककुले सापिण्ड्यविच्छेदस्य दर्शितत्वात् तत्र विवाहः प्रसज्यते प्रसज्यते च द्व्यामुष्यायणस्यापि त्रिपुरुषानन्तरितकन्यासन्ततिपरम्परया विवाहः, मैवं "असपिण्डा च या मातुरसगोत्रा च या पितुः। सा प्रशस्ता द्विजातीनां दारकर्मणि मैथुने"। मनुवचने चकारात् पितुरसपिण्डा च इति गृहीतृमातृगोत्रस्यापि दत्तकस्य जनकस्यापि सपिण्डासगोत्रावर्जनाय पितुरिति पदोपादानात्। न च तथापि दत्तकस्य पितुरपि दत्तकत्वे तच्चिपुरुषानन्तरितकन्यासन्ततेर्विवाहः केन वार्यते पितृसापिण्ड्यसगोत्रत्वयोरभावादिति वाच्यम् यतो विवाहे नैतत् सापिण्ड्यमुपयुज्यते किन्तु सर्वसाधारणं परिभाषितं पितृपक्षे साप्तपौरुषं मातामहपक्षे पाञ्च-

पौरुषञ्चेति न काप्यनुपपत्तिः। तत्प्रपञ्चस्तु तत्र तत्र द्रष्टव्य इति।

अथ दत्तकविभागः। तत्र हरदत्तस्मृतिः "एक एवौरसः पुत्रः पित्र्यस्य वसुनः प्रभुः। शेषाणामानृशंस्यार्थं प्रदद्यात्तु प्रजीवनम्"। शेषाणां ये तत्रांशभागित्वेन निर्दिष्टास्तेषाम्। आनृशंस्यं दया। प्रजीवनं भरणम्। तथा यमः "पुत्रास्तु द्वादश प्रोक्ता मुनिभिस्तत्त्वदर्शिभिः। तेषां षड्बन्धुदायादाः षड्दायादबान्धवाः। स्वयमुपादितस्त्वेको द्वितीयः क्षेत्रजः स्मृतः। तृतीयः पुत्रिकापुत्रो जातिधर्मविदो विदुः। पौनर्भवश्चतुर्थस्तु कानीनः पञ्चमः स्मृतः। सहोढ च गूढ उत्पन्नः षड्डेते पिण्डदायिनः। अपविद्धः सहोढश्च दत्तः क्रत्रिम एव च। क्रीतश्च षष्ठमः पुत्रो यश्चोपनयते स्वयम्। इत्येते षड्बन्धूत्पन्नाः षड्दायादबान्धवाः" नारदः। औरसः क्षेत्रजश्चैव पुत्रिकापुत्र एव च। कानीनश्च सहोढश्च गूढोत्पन्नस्तथैव च। पौनर्भवोऽपविद्धश्च दत्तः क्रीतः कृतस्तथा। स्वयं चोपागतः पुत्रो द्वादशैते प्रकीर्तिताः। तेषां षड्बन्धुदायादाः षड्दायादबान्धवाः। पूर्वः पूर्वः स्मृतो ज्येष्ठो जघन्यो यो य उत्तरः। क्रमादेते प्रकल्पे स्मृते पितरि तद्धने। ज्यायसो ज्यायसोऽभावे जघन्यो यो य आप्नुयात्"। पूर्वपूर्वाभावे उत्तरोत्तरेषां दायार्हत्वमित्यर्थः। औरसक्षेत्रजपुत्रिकापुत्रपौनर्भवकानीनगूढोत्पन्नसहोढजदत्तकक्रीतस्वयमुपागतापविद्धयत्र क्वचनोत्पादितानभिधाय विष्णुः "तेषां पूर्वः पूर्वः श्रेयान् स एव दायहरः स चान्यान् बिभृयात्"। औरसपुत्रिकापुत्रक्षेत्रजगूढजकानीनपौनर्भवदत्तकक्रीतक्रत्रिमस्वयंदत्तसहोढापविद्धानभिधाय याज्ञवल्क्यः "पिण्डदोऽंशहरश्चैषां पूर्वाभावे परः परः।" मनुः "न भ्रातरो न पितरः पुत्रा रिक्थहराः पितुः" तथा "श्रेयसः श्रेयसोऽभावे वयीयान्दक्षमर्हति। बहवश्चेत्तु सदृशाः सर्वे रिक्थस्य भागिनः"। सदृशा गुणेन औरसत्वक्षेत्रजत्वादिनोपाधिना वा। श्रेयस औरसादेः। वयीयान् न्यूनः क्षेत्रजादिरित्यर्थः। तथा "औरसक्षेत्रजौ पुत्रौ पितुरिक्थस्य भागिनौ। दशापरे च क्रमशः पितुरिक्थांशभागिनः"। दश दत्तकादयः। हारीतः "स्वयमुपादितः क्षेत्रजः पौनर्भवः कानीनः पुत्रिकापुत्रो गूढोत्पन्नश्चेति बन्धुदायादाः, दत्तः क्रीतोऽपविद्धः सहोढजः स्वयमुपागतः सप्तमाष्टमेत्यबन्धुदायादाः"। मनुः "पुत्रान् द्वादश यानाह नृणां स्वायम्भुवो मनुः। तेषां षट् बन्धुदायादाः षड्दायादबान्धवाः। औरसः क्षेत्रजश्चैव दत्तः क्रत्रिम एव च। गूढोत्पन्नोऽपविद्धश्च दायादबान्धवास्तु षट्। कानीनश्च सहोढश्च क्रीतः पौनर्भवस्तथा। स्वयंदत्तश्च षष्ठश्च षड्दायादबान्धवाः"। बौधायनः "औरसं पुत्रिकापुत्रं क्षेत्रजं दत्तक्रत्रिमौ। गूढश्चापविद्धश्च रिक्थभाजः प्रचक्षते। कानीनश्च सहोढश्च क्रीतं पौनर्भवं तथा। स्वयंदत्तं निषादश्च गोत्रभाजः प्रचक्षते"। एतच्च कानीनादीनां गोत्रभाक्त्वभागित्वकथनमौरसीनां मध्ये कस्यापि सम्भवेऽंशहरत्वप्रतिषेधार्थम्। सहोढदत्तकक्रीतस्वयमुपागतापविद्धौद्दानभिधाय औरसादीन् पराक्षिप्य पुनर्गौतमः "यस्य तु सर्वेषां वर्णानां न कश्चित् दायादः स्यादेते तस्य भागं हरेयुः"। औरसपुत्रिकापुत्रक्षेत्रजकानीनगूढोत्पन्नापविद्धसहोढपौनर्भवदत्तकस्वयमुपागतक्रीतानभिधाय देवलः "एते द्वादश पुत्रास्तु मनुनात्मबन्धुसदाहृताः। आत्मजाः परजाश्चैव लब्धा याद्दच्छिकास्तथा। तेषां षड्बन्धुदायादाः पूर्वेऽन्ये पितुरेव षट्। विशेषतोऽपि पुत्राणामानुपूर्व्या विधिष्यते। सर्वे ह्यौरससदृशैते पुत्रा दायहराः स्मृताः। औरसे पुनरुत्पन्ने तेषु ज्यैष्ठ्यं न विद्यते। तेषां सवर्णा ये पुत्रास्ते तृतीयांशभागिनः। हीनास्तमुपजीवेयुर्यावच्छादनसम्मिताः" कात्यायनः, "उत्पन्ने त्वौरसे पुत्रे तृतीयांशहराः स्मृताः। सवर्णा असवर्णासु पादाच्छादनभागिनः"। चतुर्थांशहराः स्मृता" इति द्वितीयचरणे क्वचित् पाठः। वसिष्ठः, "तस्मिंश्चेत् प्रतिगृहीते औरस उत्पद्यते स चतुर्थभागभागी यदि नाभ्युदयिकेषु प्रयुक्तं स्यात्"। स प्रतिगृहीतपुत्रः आभ्युदयिकेषु यज्ञादिषु यदि औरसेन प्रयुक्तं न स्यात् प्रभूतं धनमिति शेषः। अत्र नानाविधवचनानां परस्परविरोधपरिहारार्थमेवं व्याख्यायते हरदत्तस्मृतिवचने औरसमात्रस्य धनभागित्वकथनमन्येषां भरणमात्रकथनञ्च असवर्णक्षेत्रजदत्तकादिविषयं, देवलकात्यायनवचनैकवाक्यत्वात्। नारदादिवचनेषु च औरसाद्यभावे क्षेत्रजदत्तकादीनामृक्थहरविधिरपि सवर्णधनग्रहणविषयः। अतश्च दत्तकग्रहणानन्तरमौरसोत्पत्तौ तदौरसचतुर्थांशविधिर्वसिष्ठोक्तो दत्तकविषये ज्ञेयः। तथा देवलकात्यायनवचने तृतीयांशग्रहणविधिरप्युत्कृष्टगुणदत्तकविषयो वाच्यः। "उपपन्नो गुणैः सर्वैः पुत्रो

यस्य हि दत्त्रिमः । स हरेतैव तद्विधं संप्राप्तोऽप्यन्यगोत्रतः" इति मनुवचनैकवाक्यत्वात् । गुणैः जातिविद्याचारैः । "समधनभोक्ता स्यादौरसोऽपि जघन्यजः । त्रिभागं क्षेत्रजो भुङ्क्ते चतुर्थं पुत्रिकासुतः" इति ब्रह्मपुराणदर्शनात् । क्षेत्रजविषय इत्यन्ये । तथा केनापि सुनिना दत्तकस्य बन्धुदायादत्वमन्येन चादायादत्वमुक्तम् तत् गुणवदगुणवद्विषयेण समाधेयम् । पितुरिव बन्धूनां सपिण्डानामपि दायहरत्वाद्बन्धुदायादत्वं पितृभ्रातृदायहरत्वात् अबन्धुदायादत्वम् "तेषां षड्बन्धुदायादाः पूर्वेऽन्ये पितुरेव षट्" इत्यत्र पितुरेवेत्येवकारश्रवणात् । एवं दत्तकस्य धनग्रहणादौ सुनिभेदेन पूर्वापरोक्तिवैषम्यं गुणागुणविवेकेनापास्तम् । एतेनौरसस्य भ्रात्रादिधने येनैव भ्रातृत्वादिना संबन्धेनाधिकारित्वं ताद्रूपेणैव सम्बन्धेन ताद्रूप्यदत्तकस्यापि यथासम्भवसुचितांशभागित्वमवधेयम् । एवं धनिनः पुत्रान्तरसत्त्वे मृतपितृकस्य दत्तकपौत्रस्यापि दत्तोचितांशभागित्वं तदसत्त्वे सर्वहरत्वमपीति । न च पौत्रस्य स्वपितृतोऽन्यांशभागित्वनियमात् दत्तकस्य गृहीतुः पितामहौरसत्वे ताद्रूप्यपितृव्यतुल्यस्यैवांशस्य तद्दायाद्यत्वाद्दत्तकपौत्रः पितृव्यतुल्यमेवांशं लभतामिति वाच्यं पुत्रस्य दत्तकत्वे चतुर्थांशः पौत्रस्य तु तथात्वे समानांश इति वैषम्यात् । ततश्च स्वसमानरूपस्य पितुर्यादृशांशः शास्त्रसिद्धस्तस्यैव स्वपितृतोऽन्यांशतेति यथोक्तमेव साधु । एवं रीतिः प्रपौत्रेऽप्यनुसर्त्तव्येति । ननु क्षेत्रजदत्तकादीनां सामान्यधनाधिकारित्वेऽपि राज्येऽनधिकारः श्रूयते । यथा "औरसः क्षेत्रजश्चैव दत्तः कृत्रिम एव च । गूढोत्पन्नोऽपविद्धश्च भागाहांस्त्रिनयान् दश । कानीनश्च सहोढश्च क्रीतः पौनर्भवस्तथा । स्वयंदत्तश्च दासश्च षडिमे पुत्रपांशुलाः । अभावे पूर्वपूर्वेषां परान् समभिषेचयेत् । पौनर्भवं स्वयंदत्तं दासं राज्ये न योजयेत्" । तथा "न क्षेत्रजादीन्नवान् राजा राज्येऽभिषेचयेत् । पित्र्यां साध्वेन्द्रियमौरसे तनये सतीति" उच्यते । शास्त्रान्तरसद्भावे विशेषशास्त्रस्य सामान्यपरत्वमेव न्यायात् । अतएव पूर्वपूर्वाभावे परपराधिकारबोधकं हि पूर्ववाक्यं प्रागुक्तनारदादिवचनैकवाक्यतया समग्रराज्यमेव विषयीकरोति परवचनञ्च सत्यौरसे क्षेत्रजदत्तकादीनां समानांशनिषेधकम् असवर्णक्षेत्रजदत्तकादिविषयं वा । अन्यथा वाक्यभेदे गौरवम् । तत्स्वीकारेऽपि नानेन वचनेन क्षेत्रजदत्तकादीनां सत्यौरसे स्वस्वोचितांशो निषिध्यते किन्त्वौरससत्त्वे तेषामभिषेकं निषिध्यौरसस्य राज्येऽभिषेको विधीयते तथा च क्षेत्रजदत्तकादयः सामान्यशास्त्रप्राप्तमंशं लभन्त एव तत्सङ्कोचकाभावात् । न चैतदेव वचनं बाधकं भिन्नविषयत्वात् । अतएव "भागार्हांस्त्रिनयान् दशे" त्यनेन पूर्ववचने भागार्हत्वं स्वीकृतम् । राज्यातिरिक्तस्य भाग इति न शक्यते वक्तुं राज्यस्यैव तत्रोपस्थितत्वात् पौनर्भवादीनान्तु पूर्वपूर्वाभावेऽपि राज्यनियोजनाभावः पृथगभिधानसामर्थ्यादिति । एतावता ग्रन्थेनाभिहितोऽयं क्षेत्रजदत्तकादीनामौरसेन सह विभागप्रकारः । स तु शूद्रस्य न सम्भवति तस्य तु "दास्यां वा दासदास्यां वा यः शूद्रस्य सुतो भवेत् । सोऽनुज्ञातो हरेदंशमिति धर्मो व्यवस्थित" इति मनुवचनेन "जातोऽपि दास्यां शूद्रेण कामतोऽहरो भवेत् । मृते पितरि कुर्य्युस्तं भ्रातरस्तद्भागिनम् । अभ्रातृको हरेत् सर्वं दुहितृणां सुताश्च ते" इति याज्ञवल्क्यौशनेन च दासीपुत्रस्यौरसेन समांशाभिधानेन पितुरनन्तरं भ्रातृरहितस्य तस्यैव दौहित्रेण सह विभागदर्शनेन दत्तापूपायितः सति पितरि क्षेत्रजदत्तकादीनामौरसेन समांशः असति तु तदर्द्धांशः । अन्यथा यत्र च क्षेत्रजदत्तकादीनामौरसचतुर्थांशित्वं तत्र तदपेक्षया अत्यन्तविप्रकृष्टस्य दासीपुत्रस्यौरससमांशित्वमिति महद्वैषम्यं स्यात् । एवं सत्सु क्षेत्रजादिषु सत्स्वेव पत्नीकन्ययोर्दौहित्राधिकारे ऋणाधिकारविधिबाधापत्तिः । तेन दौहित्रपर्य्याप्ताधिकारिभङ्गप्रसङ्गायां तदेकतमे सत्यपि न दासीपुत्रस्य सर्वहरत्वं किन्तु ततसमांशः । अतएव "दत्तपुत्रे यथा जाते कदाचित्त्वौरसो भवेत् । पितृवित्तस्य सर्वस्य भवेतां समभागिनौ" इत्यपि वचनं शूद्रविषय एव योजनीयम् । तथा "शूद्रस्य तु सवर्णैव नान्या भार्योपदिश्यते । तस्यां जाताः समांशाः स्युर्यदि पुत्रशतं भवेत्" इत्यत्र वचने शूद्राणां भार्योत्पन्नानां सर्वेषां समांशमभिधाय पुनर्यदि पुत्रशतमित्यनेन पुत्रान्तराणामपि समांशता प्रतिपादिता । औरसभ्रात्रपरत्वे पूर्वेणैतत्प्राप्ता पुनरेतदभिधानं व्यर्थं स्यात् । ह्यानुष्यायणदत्तकस्य तु जनकप्रतिपन्नौरसभयोरपुत्रत्वे सर्वहरित्वं सत्यौरसे गृहीतस्य तु नांशहरत्वं गृहीतानन्तरमौरसोत्पत्तौ तु जनकधने तदौरसार्द्धहरत्वं गृहीतुरसाधारणदत्तकस्य यादृशोंऽशः शास्त्रीयः तदर्द्ध-

करत्वञ्चेति । यदाह प्रवराध्यायः । "यद्येषां स्यात्तु भार्य्यासु अपत्यं न स्यात् तदा रिक्थं हरेयुरिति" । तथा नारदः "द्व्यासुप्रायणका दत्तुर्द्वाभ्यां पिण्डोदके पृथक् । रिक्थादर्द्धमादद्युर्वैजिके त्रिकयोस्तथा" । वैजिके त्रिकपदयोर्जनकप्रतिग्रहीत्रुभयोपलक्षकत्वं प्रागेवाभिहितम् ।

अथान्धपङ्गुप्रभृतिपुत्राणां धनानधिकारितया तदौरसक्षेत्रजयोरेव पितामहधनभागित्वश्रुतेर्न तदृष्टदत्तकपुत्रादेः पितामहधनाधिकारः । किन्तु भरणमात्रम् अन्धादिभार्य्याणां भरणविधानेन तद्भरणस्य दत्तापूपावितत्वात् । तथा हि, "अन्धपङ्गुादीननधिकारिपुत्रानभिधायाह "औरसाः क्षेत्रजाश्चैषां निर्दोषा भागहारिणः । अपुत्रा योषितश्चैषां भर्त्तव्याः साधुवृत्तयः । सुताश्चैषां प्रभर्त्तव्या यावन्न भर्तृशात् क्षता ।" याज्ञ० । एवं यदृष्टानन्तरश्रुतत्वौरसेन सह दत्तकस्य विभागदर्शनात् सत्यौरसे सदृष्टीतस्यापि नांशभागित्वमित्याह "तस्मिन् जाते सुते दत्ते न क्षते च विधानके । तत् स्वं तस्यैव वित्तस्य यः स्वामी पितरङ्गमा" । तथा मनुः "अविधाय विधानं यः परिदद्यात्सुतं क्रमम् । विवाहविधिभाजं तं न कुर्य्यात् धनभाजनम्" इति । अन्यजातीयदत्तकस्यापि नांशभागित्वमित्याह "यदि स्यादन्यजातीयो दृष्टीतोऽपि सुतः क्वचित् । अंशभाजं न तं कुर्य्यात् यौनस्य मतं हि तत्" ।

दत्तकमीमांसोक्तो विशेषो दिङ्मात्रमत्रोदाहियते । "पुत्रानुमत्या पुत्रवतोऽपि पुत्रान्तरेऽधिकारः "यद्यः पिता संजानीते तस्मिंस्तिष्ठामहे वयम् । पुरस्तात् सर्वे कुर्म्महे त्वामन्वञ्चो यथं स्म हि" इति औतलिङ्गात्" ।

"अपुत्रेणेति पुंस्त्वं विवक्षितं स्त्रियाश्चौनप्रतिग्रहमन्त्रानधिकारेण तदृष्टदत्तानधिकारः इति वाचस्पतिमतं तदुदूषयित्वा ब्राह्मणादिद्वारा होममन्त्रपाठेन भर्त्तृतुल्यया तयाप्यधिकारः इति" व्यवस्थापितम् । "एकत्वविवक्षया द्वाभ्यां त्रिभिर्वा एकः पुत्रो न दृष्टीतुं शक्यते द्व्यासुप्रायणविधिश्च जनकपरिग्रहीतद्वयविषयकः न प्रतिग्रहीतृद्वयविषयक इत्यविरोधः" इति । अतन्द्रिकामतात् वैलक्षण्यम् । सोदरभ्रातृपुत्रस्य पुत्रीकरणे बहूनामपि मिलितानां युगपदेवाधिकारः । "तदयं निर्गलितोऽर्थः । समानगोत्रः सपिण्डो मुख्यः तदभावेऽसमानगोत्रः सपिण्डः । यद्यप्यसमानगोत्रः सपिण्डः समानगोत्रोऽसपिण्डश्चेत्युभावपि तुल्यकक्षौ एकैकविशेषराहित्यादुभयोक्तावपि गोत्रप्रवर्त्तकपुरुषात् सपिण्डप्रवर्त्तकपुरुषस्य सन्निहितत्वेनाभ्यर्हितत्वं तेन चासमानगोत्रोऽपि सपिण्ड एव याज्ञो मातामहकुलीनः सर्वथा सपिण्डाभावेऽसपिण्डस्तत्रापि समानोदकः या चतुर्थात्समानगोत्रः प्रत्यासन्नः । तस्याभावे असमानोदकः सगोत्र ऐकविंशात् । तस्याप्यभावे असमानगोत्रोऽसपिण्डश्चेति तदाह शाकल्यः "सपिण्डापत्यकश्चैव सगोत्रजमथापि वा । अपुत्रको द्विजो यस्मात् पुत्रत्वे परिकल्पयेत् । समानगोत्रजाभावे पात्रयेदन्यगोत्रजम्" इति । सगोत्र इत्यनेन सोदकसगोत्रौ स्पृष्टौ ते । अत्र च पूर्वपूर्वस्य प्रत्यासत्तिप्रतिपत्त्येन निर्देश इति तदेवाह वशिष्ठोऽपि "अदूरबान्धवं बन्धुसन्निकृष्टमेव प्रतिगृह्णीयात्" इति । अस्यार्थः अदूरश्चासौ बान्धवश्चेत्यदूरबान्धवः सन्निहितः सपिण्ड इत्यर्थः । सन्निध्यञ्च द्विधा सगोत्रतया स्वल्पपुरुषान्तरेण च भवति । तत्र सगोत्रः स्वल्पपुरुषान्तरः सपिण्डो मुख्यस्तदभावे बहुपुरुषान्तरोऽपि सगोत्रः सपिण्डः । तदभावे असमानगोत्रः सपिण्डस्तस्याप्यभावे बन्धुसन्निकृष्टः सपिण्डः बन्धूनां सपिण्डानां सन्निकृष्टः सपिण्डः स्वस्मात्सपिण्डः सोदक इत्यर्थः पर्य्यवस्यति । तत्रापि सन्निकर्षो द्विविधः सगोत्रतया स्वल्पपुरुषान्तरेण च । स्वस्मात्सपिण्डोऽपि स्वसमानगोत्रः स्वल्पपुरुषान्तरः सपिण्डानां सपिण्डो मुख्यस्तदभावे बहुपुरुषान्तरोऽपि सगोत्रः सपिण्डसपिण्डः सोदक इति यावत् । सपिण्डसोदकासम्भवे समानगोत्र ऐकविंशात् याज्ञः । "तदभावेऽसमानगोत्रोऽसपिण्डोऽपि याज्ञः । "तदभावेऽसपिण्डश्चेति" औनकोक्तात् "सन्देहे चोत्पन्ने दूरबान्धवं स्पृष्टमिव स्थापयेत्" इति वशिष्ठलिङ्गाच्च । "दूरे बान्धवा यस्मात्सौ दूरबान्धवः गोत्रसपिण्डाभ्यामसन्निहित इत्यर्थः । सन्देहोऽत्र कुलशीलादिविषयः । स चासपिण्डेऽसगोत्रे च भवतीति सोऽप्यनुज्ञायते" ।

सगोत्रसपिण्डेषु भ्रातृपुत्र एव पुत्रीकार्य्य इत्यत्र यथा "तत्र सोदरभ्रातृपुत्र एव पुत्रीकार्य्य इत्याह मनुः । "भ्रातृणामेकजातानामेकश्चेत् पुत्रवान् भवेत् । सर्वे ते तेन पुत्रेण पुत्रिणो मनुरब्रवीत्" इति । अत्र भ्रातृणां प्रतिगृहीतृत्वप्रतिपादनात् याज्ञत्वाभावोऽवगम्यते ।

एकजातानामित्यनेनैकेन पिता एकस्यां मातरि जातानामेव सङ्घातत्वं न भिन्नोदराणां भिन्नपितृकाणां वेति गम्यते। भ्रातृणामिति पुंस्त्वनिर्देशात् पदद्वयोपादानसामर्थ्याच्च सोदराणां भ्रातृभगिनीनामपि परस्परपुत्रग्रहीतृत्वाभावोऽवगम्यते। तदाह वृद्धगौतमः "ब्राह्मणादितत्रे नास्ति भागिनेयः सुतः क्वचिदिति" भागिनेयपदं भ्रातृपुत्रस्योपलक्षणम् तेन भगिन्या भ्रातृपुत्रो न याह्य इत्यर्थः सिद्ध्यति"।

एकपुत्रेण पुत्रदानस्य निषेधेन प्रतिग्रहोऽपि निषिद्धः यथोक्तं तत्रैव।

"एक एव पुत्रो यस्येति एकपुत्रः तेन तत्पुत्रदानं न कार्यम् "न त्वेवैकं पुत्रं दद्यात्प्रतिगृह्णीयाद्वेति" वशिष्ठस्मरणात्। यत्र स्वस्वत्वनिवृत्तिपूर्वकपरस्वत्वापादनस्य दानपदार्थत्वात् परस्वत्वापादनस्य च परप्रतिग्रहं विनानुपपत्तेस्तमप्याक्षिपति तेन प्रतिग्रहनिषेधोऽपि अनेनैव सिद्ध्यति। अतएव वशिष्ठः "न त्वेवैकं पुत्रं दद्यात्प्रतिगृह्णीयाद्वेति" उक्त्वा तत्र हेतुमाह "स हि सन्तानाय पूर्वेषामिति" सन्तानार्थत्वाभिधानेनैकस्य दाने सन्तानविच्छित्तिप्रत्यवायो बोधितः। स च दातृप्रतिग्रहीतृोरुभयोरपि उभयथेप्यत्वात्"।

मातापित्रोर्मध्ये पितृभिरपेक्षतया स्त्रियास्तु भर्तृसन्तानापेक्षतया सुख्यगौणाधिकारौ तत्रोक्तौ यथा

"बह्वपुत्रेषेति पुंस्त्ववचनात् स्त्रियाः पुत्रदानप्रतिषेधः। "न स्त्री पुत्रं दद्यात्" नैरपेक्ष्यश्रवणात् भर्तृसन्तानेऽस्या अप्यधिकारः। तथा च वशिष्ठः "अन्यत्रानुज्ञानाद्भर्तुः" इति। यत्तु "दद्यान्माता पिता वं वा" इति यच्च "माता पिता वा दद्यातामिति" मातुः पितृसमकक्षतयाभिधानं तदपि भर्तृसन्तानविषयमेव। न चैवं विधायाया आपद्यपि पुत्रदानं न स्यात् भर्तृसन्तानासम्भवात् परिग्रहवदिति वाच्यम्। मानवोक्तविरुद्धदर्शनेन तथाकल्पनात् नैरपेक्ष्यकल्पनाच्च स्त्रीनिरपेक्षस्यैकस्यापि भर्तृदानाधिकारः। "दद्यात् माता पिता वं वा"। "माता पिता वा दद्यातामिति" मातृनिरपेक्षैकपितृनिर्देशात्, बीजस्य प्राधान्यात् "अयोनिजा अपि पुत्रा दृश्यन्ते" इति बौधायनोक्तेश्चेत्यदर्शनाच्च। भारतेऽपि "माता भस्त्रा पितुः पुत्रो येन जातः स एव हि" इति। श्रुतिरपि "आत्मा वै जायते पुत्रः" इति। मानवे दद्यातामित्युभयकर्तृकतायाश्चौभयाधिकारो मुख्यः। अतएव वशिष्ठः "शुक्रशोणितसम्भवः पुत्रो मातापितृनिमित्तकस्य प्रदानविक्रयपरित्यागेषु मातापितरौ प्रभवतः" इति। बौधायनोऽपि "मातापित्रोरेव संसर्गसाम्यात्" इति। अतएव "माता पिता वा दद्यातामिति" मनुना मातुर्भर्तृसन्तानसामेक्षत्वात् जघन्यत्वं स्त्रीत्वानुज्ञानैरपेक्ष्यात् पितुर्मध्यमत्वं जनकतासाम्यात् उभयोर्मुख्यत्वमभिप्रेत्य पूर्वपूर्वोत्तरमादुत्तरोत्तरमभिहितम्। न चेदमेकमेव वाक्यं द्विवचनानैकक्रियान्वयादिति वाच्यम् मध्ये विकल्पाश्रयतेः तस्मात् कल्पतयमेव। अतएव योगीश्वरः "दद्यान्माता पिता वं वा" इति प्रत्येकमेकवचनान्तमेव क्रियापदमुदाजहार। तत्रापि निमित्तमाह प्रवृत्त इति। प्रकृतो यत्नो यस्मिन् कालेऽसौ प्रवृत्त आपत्कालस्तेन चापत्काल एव पुत्रदानं नान्यथेत्यर्थः"।

षड्वर्षातीतस्यान्यदत्ता तत्रोक्ता यथा

"कात्यायनः "दत्ताद्या अपि हीनया निजगोत्रेण संस्कृताः। यान्ति पुत्रतां सम्यगन्यबीजसमुद्भवाः। पितृगोत्रेण यः पुत्रः संस्कृतः पृथिवीपते। चूडान्तं न पुत्रः स पुत्रतां याति चान्यतः। चूडाद्या यदि संस्कारा निजगोत्रेण वै कृताः। दत्ताद्यास्तनयास्ते स्युरन्यथा दास उच्यते। अर्हन्ति षड्वर्षादूर्ध्वं न दत्ताद्याः सुता नृप"। स्वीकृत्य षड्वर्षीयं पुत्रेष्टिं प्रथमवुरेत्। पौनर्भवन्तु तनयं जातमात्रं समानयेत्। कृत्वा पौनर्भवेष्टिं जातमात्रस्य तस्य वै। सर्वान्तु कुर्यात् संस्कारान् जातकर्मादिकान् नरः। कृते पौनर्भवेष्टिं ततः पौनर्भवः सुतः इति"। अन्यबीजसमुद्भवा अपि दत्ताद्यास्तनया निजगोत्रेण प्रतिग्रहीता स्वगोत्रेण सम्यक् स्वस्मृत्युक्तविधिना जातकर्मादिभिः संस्कृताश्चेत् तदैव प्रतिग्रहीतुः पुत्रतां प्राप्नुवन्ति नान्यथेत्यर्थः। तदाह वशिष्ठः "अन्यशाखोद्भवो दत्तः पुत्रत्वेनोपनायितः। स्वगोत्रेण स्वशाखोक्तविधिना स स्वशाखभागिति" दत्ताद्या इत्यादिपदेन कृत्रिमादीनां ग्रहणम्। औरसः क्षेत्रजश्चैव दत्तः कृत्रिम एव च। गूढोत्पन्नोऽपविद्धश्च भागहारास्तनवा इमे। कानीनश्च सहोढश्च क्रीतः पौनर्भवस्तथा। स्वयन्दत्तश्च दायश्च पड्विधे पुत्रबान्धवाः। अभावे पूर्वपूर्वेषां परान् समभिचेचेत्। पौनर्भवं स्वयन्दत्तं दासं राज्ये न योजयेदिति" पूर्वोपक्रमात्

योऽयं पौनर्भवादीनां राज्यनियोजनाभावः स औरस-व्यतिरिक्ताभाव एव "अभावे पूर्वपूर्वेषामित्यस्यैवानेनापवादात् सत्यौरसे तु राज्ञाभावस्य "न क्षेत्रजादींस्तनयान् राजा राज्येऽभिषेचयेत्। पितृव्यां साधवेच्चित्यौरसे तनये सतीत्यनेन" प्रागेवाभिधानात्। सत्यौरसे क्षेत्रजादीन् राज्ये नैवाभिषेचयेत् पितृव्यां नित्यं श्राद्धादि च नैव साधयेत् न कारयेदित्यर्थः। गोत्रेणेति यद्यपि जातकर्मादीनां साक्षाद्गोत्रस्य करणता न श्रूयते तथापि तदङ्गभूते इद्धिश्राद्धे तत्सम्बन्धावश्यम्भावात् प्रधानेऽपि तत्सम्बन्ध इति। चूड़ादिषु साक्षादेव तत्सम्बन्धः। "शिखा अपि च कर्त्तव्याः कुमारस्यार्षसङ्ग्रहेति" स्मरणात्। संस्कारैः पुत्रत्वमित्युक्तम् तानेवान्वयव्यतिरेकाभ्यामाह पितुर्गोत्रेणेति। यः पुत्र आचूड़ान्तं चूड़ान्तैः संस्कारैः पितुर्जनकस्य गोत्रेण संस्कृतः सोऽन्यतोऽन्यस्य पुत्रतां न याति। अयमर्थाभिसन्धिः। कृतचूड़स्य परिगृहीतः पुत्रताभावप्रतिपादनम् असाधारणपुत्रतां विषयीकरोतीत्यवश्यं वाच्यम्। अन्यथा स्वीकृत्या पञ्चवर्षीयमिनेन कृतचूड़स्यापि परिगृहीतपुत्रताप्रतिपादनविरोधात्। स्वीकृतेत्यस्य च कृतचूड़विषयत्वावश्यम्भावः स्वदभिप्यते ततश्च चूड़ान्तसंस्कृतस्य परिग्रहे दृष्टान्तन्यायेनता भवति गोत्रद्वयेन संस्कृतत्वात् तस्य च फलं गोत्रद्वयसम्बन्ध इत्यग्रे वक्ष्यते। अनेन जातकर्मादीनां चूड़ान्तानां संस्काराणां पुत्रताहेतुत्वमुक्तम्। आचूड़मिति वक्तव्ये यदनयङ्गं तदकृतार्षसमसङ्ग्रहशिखस्य पुत्रीकरणाभ्यनुज्ञानार्थं प्रधाननिष्पत्त्या पुत्रताहेतुत्वात् चूड़ाद्या इति वक्ष्यमाणत्वाच्च। अकृतजातकर्मादिसम्बन्धे कथमित्यत आह चूड़ाद्या यदीति। यदि चूड़ाद्याः संस्कारा निजगोत्रेण प्रतिगृहीतगोत्रेण कृता वैगुण्योऽवधारणे तदैव दत्ताद्याख्यायाः स्युरन्यथा ते दासा उच्यन्ते इति। चूड़ा आद्या येषां ते तथेति न तु चूड़ाया आद्या इति पूर्वेण पौनरुक्त्यापातात्। अनेन जातकर्मादिसम्प्राशनान्तानां जनकगोत्रेणानुज्ञानेऽपि न विरोधः। तथा च कृतजातकर्मादिसंस्कारः कृतचूड़ोऽनुकल्प इति सिद्ध्यति। दत्ताद्या इत्यादिपदेन कृत्रिमादिसङ्ग्रहमित्युक्तमेव तेषामपि संस्कारैरेव पुत्रत्वं न परिग्रहमात्रेण अन्यथा दास उच्यत इति विप्रतिषेधबाधकात्। अन्यथा चूड़ाद्यकरणे कृतचूड़ादिपरिग्रहे वा दासता भवति न तु पुत्रत्वमित्यर्थः अस्य पुत्रत्वस्य ब्रुवत्वादिवत् संस्कारजन्यत्वात्। असंस्कृतः पुत्रीकार्य्य इति स्थितम् तत्रावश्यपेक्षायामाह अर्हन्तिति। असंस्कृतोऽपि पञ्चमादूर्द्ध्वं न याद्यः कालाभावेन पुत्रत्वानुपपत्तेः। अनेन पञ्चैव वर्षाणि पुत्रपरिग्रहकाला इत्युक्तं भवति तद्व्यतिरेकेणाभिधानन्तु पञ्चमानन्तरं गौणोऽपि कालो नास्तीति प्रतिपादनाय। अन्यथा "स्वकालादुत्तरः कालो गौणः सर्वः प्रकीर्त्तित" इति न्यायेन पञ्चमानन्तरस्य गौणकालत्वापत्तिः। ततश्च जनकभारभ्यातृतीयवर्षं, तत्रापि तृतीयवर्षस्य मुख्यकालता अर्हन्तु पञ्चमाद्वर्षादित्युपसंहारे वर्षत्रयाच्च यत्रापि चूड़ाशब्दस्य तृतीयवर्षपरतैवाभिप्रेतेति गम्यते। अन्यथा उपनीतसङ्गभावपक्षे अष्टमवर्षस्याकृतचूड़स्य परिग्रहापत्तिः। नचेदापत्तिः "अर्हन्तु पञ्चमाद्वर्षादित्यनेन विरोधात्"। तस्मादाचूड़ान्तमित्यत्र चूड़ाशब्दस्तृतीयवर्षपर एव युक्तः तृतीयानन्तरमापञ्चमं गौणः अर्हन्तु गौणोऽपि नेति स्थितम्"।

"अन्नकाल्यायनस्मरणम्। विक्रयञ्चैव दानञ्च न नेयाः स्युरनिच्छवः"। दारा: पुत्राश्च" इत्यनिच्छूनां दानादिनिषेधः सोऽपि पञ्चवार्षिकस्यैव नाधिकस्येति व्याख्येयम्। यच्च "सप्तमन्तु प्रकुर्वीत यमिति" वाक्ये गुणदोषविचक्षणमिति पाठमभिप्रेत्य विचक्षणं न तु बालमिति सर्वत्रैव व्याख्यातम् तदपि पञ्चवार्षिकमेव। विचक्षणं चातुर्थविशेषेण न तु बालम्"बाल्या षोड़शाद्वर्षात्" इति बालत्वविशिष्टं न कुर्यादित्यर्थं इति व्याख्येयम्। तत्रासंस्कृताभावे कथमित आह यदीत्येति। पञ्चवर्षीयं चूड़ान्तसंस्कारसंस्कृतमित्यर्थः। ननु कथं तस्य ग्रहणं दासताभिधानादित्यत आह पुत्रोदितमिति। अयमर्थाभिसन्धिः "अग्नये पुनवते पुरोडाशमष्टकपालं निर्वपेदिन्द्राय पुत्रिणे पुरोड़ाशमेकादशकपालं प्रजाकामोऽग्निरेवास्मै प्रजां प्रजनयति इद्धामिन्द्रः प्रयच्छतीति" वाक्ये प्रजाफलकत्वमिष्टेः श्रूयते तत् यत्रानुत्पन्ना प्रजा तत्र तदुत्पत्तिरेव भाव्या यत्र त्वुत्पन्ना परिष्टद्यते तत्रोत्पत्तेरभावात्तस्याः प्रजात्वमेव भाव्यमिति कल्प्यते प्रकृतविध्यन्यथानुपपत्तेः। तच्च दासत्वापनोदनस्थले न सम्भवतीति तदपनोदोऽवश्यमभ्युपेयः। अन्यथा प्रजात्वमात्रसम्भवे पुत्रपरिग्रहमात्रे स्यात्। यदि च संस्कारै-

रेव तत् पुत्रत्वोत्पत्तेर्न तदपेक्षेति तर्हि प्रकृतेऽपि तुल्यं प्रथमपदेनात् तत्सूचनात्। "सर्वांस्तु कुर्यात् संस्कारान् जातकर्मादिकाञ्छरः" इत्यनेऽभिधानाच्च। तस्मात् पुत्रेदृग् पूर्वसंस्कारप्रयुक्तदाक्षत्वापनोदपूर्वकप्रजात्वसम्पादनात् संस्कृतोऽपि परिग्राह्य इति स्थितम्। यद्येवं तर्हि संस्कृतमित्येव वाच्यम् किं पञ्चवर्षीयपदोपादानेनेति चेन्नैवम् पञ्चवर्षीयस्यैवेति नियमार्थत्वात् नियमश्चाचरप्रकृष्णपूर्वकब्रह्मपर्यन्तसकलकर्मोपनयनप्राप्त्यर्थः। नचायद्वियमः पूर्वेवाक्येनैव सिद्ध इति वाच्यम् तस्मात्तसंस्कारावधिसमर्पकत्वेन प्रकृतत्वाभावे परिगृहीतत्वात्। प्रथममिति संस्कारेभ्यः प्रागित्यर्थः। ननु परिग्रहोमादेव प्रागिति कुतो नेष्यते, गृहीतेति साकाङ्क्षया ग्रहणभावनायाः क्त्वाप्रत्ययेन पूर्वकालतावगमात्। पुत्रेदृग् पूर्वसंस्कारापनोदेन संस्कारान्तरावश्यप्रापेक्षयाच्चेति"।

पुत्रच्छायावहमित्यस्यार्थत्वात्तथोक्तो यथा

"पुत्रच्छाया पुत्रसादृश्यं तच्च नियोगादिना स्वयमुत्पादनयोग्यत्वम् यथा भ्रातृसपिण्डसगोत्रादिपुत्रस्य, नचासम्बन्धिनि नियोगासम्भवः "बीजार्थं ब्राह्मणः कश्चिद्धनेनोपनिमन्त्र्यतामिति" स्मरणेन निमन्त्रणसम्भवात्। ततश्च भ्रातृपितृव्यमातृष्वसृदौहित्रभागिनेयादीनां निरासः पुत्रसादृश्याभावात्। एतदेवाभिप्रेत्योक्तमपरे तेनैव "दौहित्रो भागिनेयश्च शूद्राणां विहितः सुतः। ब्राह्मणादित्रये नास्ति भागिनेयः सुतः क्वचिदिति"। अत्रापि भागिनेयपदं पुत्रासदृशानां सर्वेषामुपलक्षणं विरुद्धसम्बन्धस्य समानत्वात्। विरुद्धसम्बन्धश्च नियोगादिना स्वयमुत्पादनायोग्यत्वम्। यथा विरुद्धसम्बन्धो विवाहदत्तपरिगृहीते च वर्जितः। "दम्त्योर्भिन्नः पितृमातृसाम्ये विवाहो विरुद्धसम्बन्धो यथा भार्यास्वसुर्दुहिता पितृव्यपत्नीस्वसा चेति"। अस्यार्थः यत्र दम्त्योर्बन्धुवरयोः पितृमातृसाम्यं बध्वा वरः पितृस्थानीयो भवति वरस्य वा वधूर्मातृस्थानीया भवति तादृशो विवाहो विरुद्धसम्बन्धः तत्र यथाऽमुकदाक्षरगृहीतं भार्यास्वसुर्दुहिता श्यालिकापुत्री पितृव्यपत्नीस्वसा पितृव्यत्वा भगिनी चेति। तथा प्रकृते विरुद्धसम्बन्धः पुत्रो बन्धुनीव इति यतो रतियोग सम्भवति तादृशः कार्य इति यावत्।"

"परिग्रहविधिभाजे विशेषमाह मनुः। "अविधाय विधानं यः परिगृह्णाति पुत्रकम्। विवाहविधिभाजं तं कुर्यान्न धनभाजनमिति"। परिग्रहविधिं विना परिगृहीतस्य विवाहमात्रं कार्यं न धनदानमित्यर्थः किन्तु तत्र पत्न्यादय एव धनभाजः विधिं विना तस्य पुत्रत्वानुत्पादात्। अतएव वृद्धगौतमः "सगोत्रेषु क्रता ये क्रीतक्रीतादयः सुताः। विधिना गोत्रतां यान्ति न सापिण्ड्यं विधीयते" इति विधिनैव गोत्रतां यान्तीति नियमः दानादिविधीनां दत्तकादिलक्षणान्तर्गतत्वेन स्वरूपनिर्वाहकत्वात् यथोक्तं "यमङ्गिः पुत्रमापदि"। अत्र परिग्रहः सकलदानविधेरुपलक्षणं तेन च प्रतिग्रहविधिरप्याक्षिप्तो भवति"।

"मेधातिथिरपि दत्तकादिषु संस्कारनिमित्तमेव पुत्रत्वमाह "सत्यपि प्रयोगे इन्द्रादिशब्दवल्लोकतोऽर्थोतिशयात् शास्त्रे चोत्पत्तिविधानात् भार्यादिव्यवहारवत् पुत्रत्वव्यवहारोऽवगन्तव्य इत्यादिग्रन्थसन्दर्भेण"। तस्मात् दत्तकादिषु संस्कारनिमित्तमेव पुत्रत्वमिति सिद्धम्। दानप्रतिग्रहहोमाद्यन्यतमाभावे तु पुत्रत्वाभाव एवेति।"

दत्तकस्य जनकगृहीतोर्मध्ये सापिण्ड्यमस्ति न वेति संशयनिर्णयाय सापिण्ड्यविशेषस्य तयोरभावस्तत्र प्रतिपादितः "ननु मनुवचनात् जनकगोत्रनिवृत्तावपि प्रतिगृहीतृगोत्रप्राप्तौ किं मानमित्यत आह वृद्धगौतमः। दत्तक्रीतादिपुत्राणां बीजवप्तुः सपिण्डता। पञ्चमी सप्तमी तद्वत् गोत्रं तत्पालकस्य चेति"। दत्तक्रीतादिपुत्राणां बीजवप्तुर्जनकस्य सपिण्डताक्षयेव दानादिनापि सा न निवर्तते तस्या अवयवान्वयरूपतया यावच्छरीरं दुरपनेयत्वात् अनेनावयवान्वय एव सापिण्ड्यं न पिण्डान्वय इत्युक्तं भवति पिण्डान्वयस्तु "व्यपैति ददतः स्वधेति" अपनयावगमात्। सा च सपिण्डता कियतीत्यपेक्षायामाह पञ्चमी सप्तमीति। पञ्चानां पूरणी पञ्चमी पञ्चपुरुषव्याप्तेत्यर्थः एवं सप्तमी। गोत्रमोऽपि "जह्नु सप्तमात् पितृबन्धुभ्यः बीजिनश्च मातृबन्धुभ्यः पञ्चमादिति"। अत्र बीजिग्रहणं दत्तकादुत्पादकानां सर्वेषामपि संग्रहार्थं न केवलं क्षेत्रजोत्पादकस्यैव "य एतेऽभिहिताः पुत्राः प्रसङ्गादन्यबीजजाः। यस्य ते बीजतो जातास्तस्य ते नेतरस्य त्विति" मनुस्मरणात्। तस्य ते पुत्रा इति पुत्रत्वप्रतिपादनं सापिण्ड्यप्रतिपादनार्थं न तु पुत्रत्वोत्पादनार्थं "पुत्रान् ह्यादत्त यानाह" इत्यादिप्रतिगृहीतृपुत्रत्वप्रतिपादनविरोधात्

नेतरस्य प्रतिग्रहीतुरित्यर्थः। नन्वेवं कन्यावदुभयत्रापि सापिण्ड्यमास्तां प्रतिग्रहेण गोत्रवत् सापिण्ड्यस्याप्युत्पत्तेरिति चेन्नैवम् "सगोत्रेषु कृता ये स्युर्दत्तक्रीतादयः सुताः। विधिना गोत्रतां यान्ति न सापिण्ड्यं विधीयते" इति वृद्धगौतमस्मरणविरोधात्। ये दत्तादयः सुताः सगोत्रेषु सगोत्रमध्ये कृताश्च विधिना गोत्रतां सन्ततित्वं यान्ति परन्तु तैः सह विधिना सापिण्ड्यं न विधीयते नोत्पद्यत इत्यर्थः। सगोत्रेऽपि सापिण्ड्यानुत्पत्तौ परगोत्रे सुतरां सापिण्ड्यानुत्पत्तिरुक्ता। युक्तश्चैतत् पितृत्वेन भर्तृ सहैकशरीरारम्भकत्वेन च यथा उभयत्रापि सापिण्ड्यं सिद्ध्यति न तथा दत्तके पितृत्वेऽपि प्रतिग्रहीतृ सहैकशरीरारम्भकत्वाभावात्"। तत्र चायमर्थः धर्मार्थं स्वस्यालोकतापरिहारकधर्मसम्पत्त्यर्थं तत्पत्नीत्वेन जनकामेच्छया भिन्नगोत्रेणापि परिग्रहीता पुत्रवत् पुत्रप्रतिनिधितया परिगृह्य ये पुत्रा वर्द्धिताः तेषु केवलं परिग्रहीतृसापिण्ड्यविभागित्वमेव न सापिण्ड्यमिति तस्मात् यत् दत्तके न परिग्रहीतृसापिण्ड्यं किन्तु जनककुल एव साम्प्रतं रिक्थं सापिण्ड्यमिति सिद्धम्"।

"नन्वेवं दत्तकस्य प्रतिग्रहीतृकुले सापिण्ड्याभावे कथं विवाहो न स्यादिति चेत् सत्यम्। सगोत्रत्वादिति ब्रूमः। तर्हि तद्भगिन्यादिसन्ततौ विवाहोऽस्तु सगोत्रत्वसपिण्डत्वयोरभावात् न चात्र निषेधकं वचनमुपलभामहे प्रत्युत "सावित्रीं यस्य यो दद्यात् तत्कन्यां न विवाहयेत्। तद्गोत्रे तत्कुले वापि विवाहो नैव दोषवत्" इत्याद्यनुकूलमेव वचनमस्ति। न चेदापत्तिः अविच्छिन्नाविगीतसकलदेशीयशिष्टाचारविरोधात् तस्मात् किं तत्राविवाहनिमित्तमिति। अत्र कैश्चिदुच्यते "असपिण्डा च या मातुरसगोत्रा च या पितुः। सा प्रशस्ता द्विजातीनां दारकर्मणि मैथुने" इति मनुवाक्ये स्वस्रादसपिण्डेति वक्तव्ये यत् पितुरसपिण्डावचनं तद्दत्तकस्य प्रतिग्रहीतृसपिण्डाया विवाहो मा प्रसाङ्क्षीदित्येवमर्थम् अन्यथा पितृद्वारके सापिण्ड्ये मूलपुरुषादष्टमस्य वरस्य, मातृद्वारके सापिण्ड्ये मूलपुरुषात् षष्ठ्याः कन्यायाः विवाहो न स्यात् पितुः सपिण्डत्वेन असपिण्डताभावात् न चेदापत्तिः "पञ्चमात् सप्तमादूर्द्धं मातृतः पितृतस्तथा" इत्यादिसकलस्मृतिनिबन्धशिष्टाचारविरोधात्। न चेदं दूषणं दत्तकेऽपि समानम् अष्टमस्य तस्य षष्ठ्याः कन्यायाः पितुः सपिण्डत्वेन अविवाह्यत्वप्रसङ्गादिति वाच्यम् "सपिण्डता तु पुरुषे सप्तमे विनिवर्तते" इति वक्ष्यमाणवाक्येन सप्तमस्य दत्तकपितृमूलपुरुषासपिण्डत्वेन षष्ठ्याः कन्यायास्तदसापिण्ड्येन षष्ठ्याः सप्तमस्य च पितुः सपिण्डत्वाभावादित्युक्तमेव। तस्मात् दत्तकसापिण्ड्यनिर्णायकमिदमेव वचनमिति कानुपपत्तिः७। तदतिभ्रान्तमूलपितं विकल्पासङ्गत्वात् तथा हि किमिदं दत्तकस्यैव सापिण्ड्यनिर्णायकमुत दत्तकौरसयोरुभयोरिति। नाद्यः द्वेधा हि अस्य वचनस्य दत्तकविषयता सम्भवेत् दत्तकप्रक्रमाद्वा, दत्तकसापिण्ड्यनिर्णायकविशेषवचनैकवाक्यत्वाद्वा न चेदोभयमप्यस्ति अनुपलम्भात्। किञ्चाद्य दत्तकपरत्वे कल्प्यं पितृपदं गौण्या प्रतिग्रहीतृपितृपरं स्यात् तच्च अनिष्टम् "न विधौ परः शब्दार्थे" इति न्यायविरोधात्। नाप्यन्त्यः पितृपदे युगपद्वृत्तिद्वयविरोधात्। न च गङ्गायां मीनघोषादिवत्यैव इत्यन्तरतात्पर्य्याद्दकं प्रमाणमस्ति। तस्मात् औरसविषयमेवेदं वचनं गर्भाधानादिप्रक्रमात् "पञ्चमात् सप्तमादूर्द्धमिति" वचनान्तरैकवाक्यत्वाच्च। न चाप्यौरसपरत्वे कूटस्थात् अष्टमस्य वरस्य षष्ठीकन्यायाश्च अनुद्वाहत्वप्रसङ्गः पितुरसपिण्डत्वाभावादित्युक्तमेव दूषणमिति वाच्यम् तस्य पितुरिति षष्ठ्यां षष्ठीश्रवणिबन्धनत्वेन अदूषणत्वात्। अतएव योगीश्वरेण "मातृतः पितृतस्तथा" इत्यत्र पञ्चमीत्वनिर्णायकस्मृतिसम्प्रयोग आदृतः। तथापि सार्द्धविभक्तिकत्वशङ्कायाम् "ऊर्द्धं सप्तमात् पितृबन्धुभ्यो योजिनश्च मातृबन्धुभ्यः पञ्चमादिति" गौतमवाक्ये पञ्चम्या निर्णय इति न किञ्चित् समाधानमिति समाधानान्तरं वक्तव्यम्। तत्रापरे आहुः "क्षेत्रजादीन् सुतानेतानेकादश यथोदितान्। पुत्रप्रतिनिधीनाहुः क्रियालोपान्मनीषिणः" इत्यत्र वाक्ये क्षेत्रजादीनां पुत्रप्रतिनिधित्वाभिधानात् "प्रतिनिधिस्तद्गुणे स्यादिति" न्यायेन सकलौरसधर्म्मप्राप्त्या प्रतिग्रहीत्रादिपितृसपिण्डावर्जनं सेत्स्यतीति। तत्र "न सापिण्ड्यं विधीयते" इत्यनेन निषिद्धस्य सापिण्ड्यस्य अतिदेशासम्भवेनाप्राप्त्या तद्वर्जनासम्भवात्। एतेन पुत्रनाम्ना औरसधर्मातिदेशात् प्रतिग्रहीत्रादिपितृसपिण्डावर्जनसिद्धिरित्यपास्तम् "न तौ पशौ करोतीति" वत् निषिद्धस्य सापिण्ड्यस्य अतिदेशासम्भवेन वर्जनासम्भवात् तस्मात् अनन्यगत्या वाचनिकमेव प्रतिग्रहीतृकुले सापिण्ड्यम् अभ्युपगन्त-

व्यवहितं । चेदुच्यते । द्विविधं हि सापिण्ड्यम् अवयवान्वयेन पिण्डान्वयेन चेति तत्रावयवान्वयसापिण्ड्यस्य दत्तके प्रत्यक्षविहितत्वेन हेमाद्रिः पिण्डान्वयमेवोपादाय दत्तकादीनां प्रतिग्रहीतृकुले त्रिपुरुषमेव सापिण्ड्यं व्यवातिष्टिपत्" ।

"दत्तकानामेषा पिण्डान्वयरूपा अशौचादिव्यवहारत्वादिप्रयोजिका त्रैपौरुषत्वेव सपिण्डता, न "लेपभाजस्तत्पौत्र्याः पित्राद्याः पिण्डभागिनः । पिण्डदः सप्तमस्तेषां सापिण्ड्यं साप्तपौरुषमिति" मात्स्याभिहिता साप्तपौरुषी तस्याः सामान्यरूपतया विशेषेणापवादात्" । "एतदेवाभिप्रेत्योक्तं संग्रहकारेण "दत्तकानान्तु पुत्राणां सापिण्ड्यं स्यात् त्रिपौरुषम् । जनकस्य कुले तद्वदृषगृहीतरितिधारणेति"। यदिदमुभयत्र त्रिपुरुषसापिण्ड्याभिधानं तत् द्व्यामुष्यायणाभिप्रायेण तस्य त्रिकद्वयेन सह सपिण्डीकरणाभिधानात् शुद्धदत्तकस्य तु प्रतिग्रहीतृकुले त्रिपुरुषं पिण्डान्वयरूपं सापिण्ड्यं जनककुले साप्तपौरुषमवयवान्वयरूपमेवेति । तदुक्तं सपिण्डतावत् गोत्रमपि बीजवप्तुर्जनकस्य न केवलं जनकस्य अपि तु तत्पालकस्य च दत्तकादेर्यः पालकस्तस्य च गोत्रं दत्तकादीनां भवतीति । अनेन सपिण्डतावैलक्षण्यं गोत्रेऽभिप्रेतं यथा सपिण्डता जनकस्यैव न तथा गोत्रं किन्तु उभयोरपि तदिति । न चेदमपि दत्तकमात्रे किन्तु द्व्यामुष्यायणे दत्तकविशेषे । तथा हि द्विविधा दत्तकादयो नित्यवद्द्व्यामुष्यायणा अनित्यवद्द्व्यामुष्यायणाश्चेति । तत्र नित्यवद्द्व्यामुष्यायण नाम ये जनकप्रतिग्रहीतृभ्यामावीरसं पुत्र इति संप्रतिपन्नाः। अनित्यवद्द्व्यामुष्यायणास्तु ये चूडान्तैःसंस्कारैर्जनकेन संस्कृताः उपनयादिभिश्च प्रतिग्रहीतृ, तेषां गोत्रद्वयेनापि संस्कृतत्वात् द्व्यामुष्यायणत्वं परन्त्वनित्यं जातमात्रस्यैव परिग्रहे गोत्रद्वयेन संस्कारामावात् तस्य प्रतिग्रहीतृगोत्रमेव । तदिदं सर्वमभिप्रेत्याह शङ्खलिखितः "नित्यानां द्व्यामुष्यायणानां द्वयोरिति" श्रुतेश्च नित्यद्व्यामुष्यायणानां गोत्रद्वयप्रवरसम्बन्धमुक्त्वा तमेवानित्येऽतिदिशति "दत्तकादीनान्तु द्व्यामुष्यायणवदिति" श्रुतेश्च । व्याख्यातञ्चैतत् प्रवरख्यामिभिः द्व्यामुष्यायणप्रकरणे नानित्यानाह दत्तकेति । तावदेव गोत्रसन्ततौ प्रथमेनैव संस्काराः परिग्रहीतृ चेत् तदा उत्तरस्य पूर्वत्वात्तेनैव उत्तरत्र । तथा पितृव्येण भ्रातृव्येण चैवार्षेण ये जातास्ते परिग्रहीतुरेवेति" । अस्य भाष्यस्यायमर्थः यो गोत्रद्वयेन संस्कृतस्तस्यैव गोत्रद्वयसम्बन्धो नोत्तरसन्ततेः जनकगोत्रसम्बन्धे किं कारणमित्यत आह प्रथमेनेति प्रथमो जनकस्यैव संस्कृतत्वात् । संस्काराश्च चौडान्ताः । "पितुर्गोत्रेण यः पुत्रः संस्कृतः पृथिवीपते ! । चूडान्तं न पुत्रः स पुत्रतां याति चान्यतः" इति कालिकापुराणात् । व्याख्यातञ्चैतत् प्रागेव अन्यस्यासाधारणीं पुत्रतां न याति किन्तु द्व्यामुष्यायणो भवतीति । प्रथमेनासंस्कारे कथमित्यत आह परिग्रहीत्रा चेदिति । परिग्रहीत्रैव जातकर्मादिसर्वसंस्कारकरणे चौडादिसंस्कारकरणेऽपि वा उत्तरस्य परिग्रहीतुरेव गोत्रमुक्तं हेतुः पूर्वत्वात् संस्कारकरणे प्रथमत्वात् । द्व्यामुष्यायणसन्ततौ दत्तकसन्ततौ चामेप्सितं गोत्रमाह तेनैवेति । परिग्रहीतृगोत्रेणैव उत्तरसन्ततेर्गोत्रसम्भवत्वात्पि । स्वगोत्रपरिग्रहमाह तथेति । जनकपरिग्रहीतोरेकगोत्रत्वेऽपि परिग्रहीतृरेव व्यपदेशः परिग्रहसंस्कारकरणादिति । यत्तु "गोत्रद्वयेऽनयितव्यं भजेदृक्थिमः सुत इति तत्परिग्रहीतृरेव जातकर्मादिसर्वसंस्कारकरणपक्षे वेदितव्यम् । ये तु नित्यवद्द्व्यामुष्यायणादत्तकादयस्तेषां गोत्रद्वयम् । "द्व्यामुष्यायणका ये स्युर्दत्तकक्रीतकादयः । गोत्रद्वयेऽप्यतुल्याः शुक्लगैरिरयोर्वपेति" पारिजातधृतस्मरणात् । गोत्रद्वये जनकगोत्रे परिग्रहीतृगोत्रे च । दत्तकादीनाञ्च द्व्यामुष्यायणत्वे" इदं वचनं "नित्यानां द्व्यामुष्यायणानामिति" सत्याषाढवचनं च प्रमाणम् । प्रवरमञ्जर्यामप्यनेनैवाभिप्रायेणोक्तं "दत्तक्रीतकृत्रिमपुत्रिकापुत्रादीनां यथासम्भवं गोत्रद्वयं सप्रवरमस्तीति" एतावता द्विगोत्राणां गोत्रद्वयं सप्रवरं विवाहे वर्ज्यमिति" ।

शाखाया विशेषस्तूक्तो यथा

"शाखापि प्रतिग्रहीतुरेवेत्याह वशिष्ठः "अन्यशाखोद्भवो दत्तः पुत्रश्चौपनायितः । स्वगोत्रेण स्वशाखोक्तविधिना स्व स्वशाखभागिति" । अस्य प्रतिग्रहीतुः शाखा यस्मिन् कर्मणि तत् स्वशाखं कर्म तद्भजतीति स्वशाखभागिति प्रतिग्रहीतृशाखीयमेव कर्म तेन कर्त्तव्यमित्यर्थः । दत्तकादीनां मातामहा अपि प्रतिग्रहीत्री वा माता तत्पितर एव पितृन्यायस्य

मातामहेऽपि समानत्वात्" दत्तकौमांसाऊत् ।

श्राद्धीयद्रव्यग्रहणनिषेधे विशेषस्तत्रोक्तो यथा

"एवं प्रतिगृहीतृकृतश्राद्धीयद्रव्यं दत्तकाय प्रतिगृहीतृजनककृतश्राद्धीयद्रव्यञ्च ब्रह्मसुताय न दातव्यं "सपिण्डाय सगोत्राय श्राद्धीयं नैव दापयेत् । न भोजयेत् पितृश्राद्धे समानप्रवरं तथेति" हेमाद्रिधारिजातधृतवचनात् । श्राद्धीयं श्राद्धे दत्तद्रव्यम् ।

दत्तदुहितापि गृहीतुं शक्यते यथोक्तं तत्रैव

"औरसपुत्रस्यैव औरसपुत्रा अप्यपचारे चेत्राद्याः पुत्राः प्रतिनिधयो भवन्ति । "सख्यापचारे प्रतिनिधिरिति" न्यायात् । सख्यत्वञ्चास्या दानादिविधौ साधनत्वेन साधनत्वञ्च ऋतुगमनविधिना साधितायां द्रव्यार्ज्जनविधिना चर्ज्जितस्य व्रीह्यादेः ऋतुसाधनत्ववत् । तथा हि रात्रिसत्रन्यायेन "ऋत्वियात् प्रजां विन्दामहे ऋत्वियात् प्रजां विन्दते" इत्याद्यर्थवादोद्धीते "अतानुमेयात् तस्मिन् संविशेत्" इत्यादौ नित्ये ऋतुगमनविधौ स्त्रीपुंससाधारण्याः श्रुतिसिद्धायाः प्रजाया एव भाव्यत्वमवगम्यते । प्रजनयतीति प्रजेतिव्युत्पत्त्या प्रजननशक्तिमतः स्त्रीपुंसयोरेव प्रजाशब्दवाच्यत्वात् न नपुंसकस्य, तस्य शुक्रशोणितसाध्यजन्यत्वेन नान्तरीयकत्वात् । अतएव "अनधीत्य द्विजो वेदमनुत्पाद्य च सन्ततिम् । अनिष्ट्वा विविधैर्यज्ञैर्मोक्षमिच्छन् पतत्यधः" इति ताडक्ष्या एव सन्तेरनुत्पादे अधःपातः श्रूयते । संतनोत्यनयमिति सन्तिः प्रजापर्य्यायः एव । "प्रजा स्यात् सन्ततौ जने" इति कोषात् । एवम् "अपत्यार्थं स्त्रियः सृष्टाः स्त्री क्षेत्रं बीजिनो नराः । क्षेत्रं बीजवते देयं नाबीजो क्षेत्रमर्हति" इत्यत्र अपत्यशब्दो व्याख्यातः "अपत्यं कस्मादपतनं भवति नानेन पततीति" यास्कस्मरणात् । "आत्मजस्त्वनयः सूनुः सूनः पुत्रः स्त्रियान्त्वमी । आत्मदुहितरं सर्वेऽपत्यं तोकं तयोः समे" इति कोषाच्च । यत्तु "पुमान् पुरुमना भवति पुंसतेर्वेति" यास्कोक्त्या पुंसदं वंशपरं तदा पुंसतेर्वेति" तदुक्त्यैव प्रसवकर्त्तृमिथुनपरमेव व्याख्यायताम् । अतएव यास्कः "मिथुनाः पित्र्यदायादाः" इति । दक्षेताडक्, श्लोकाभ्यामप्युक्तम् । "ऋक्थादृक्थात् सम्भवसि हृदयादधिजायसे । आत्मा वै पुत्रनामासि स जीव शरदां शतमिति" । "अविशेषेण पुत्राणां दायो भवति धर्म्मतः । मिथुनानां विसर्गादौ मनुः स्वायम्भुवोऽब्रवीत्" इत्यत्र पुत्रपदं मिथुनपरं दर्शितवान् । नचात्र मिथुनपदं पुत्रसुतापरमिति वाच्यम् । ऋक्थादृक्थात् सम्भवसि इत्यस्यासङ्गतेः । "न दुहितर इत्येके पुमान् दायादोऽदायादा स्त्रीति विज्ञायते" इत्येकीयमते दुहितृनिराकारणासङ्गतेश्च । यच्च "नापुत्रस्य लोकोऽस्तीत्यादौ पुत्रपदं तदथुभयपरमेव । "आत्मपुत्रौ स्वसृदुहितृभ्यामिति" पाणिनिना पुत्रदुहितृपदयोरेकशेषस्मरणात् । एतेन "अपुत्रेणैव कर्त्तव्यः पुत्रप्रतिनिधिः सदा" इत्यादावपि पुत्रपदं व्याख्यातम् । तत्साधनञ्च पुत्रिकाकरणलिङ्गमये वक्ष्यते । अतएवोक्तम् "तत्समः पुत्रिकासुत" इति । "ऋक्थादृक्थात्सम्भवति पुत्रवद्दुहिता स्मृतेति" च । यदि च ऋक्थैकत्वेन कन्यानुत्पादः तदा ऋणप्रतिपत्त्यादिना तत्सम्पादनं कार्य्यं ऋणचतुर्थीश्राद्धादिना पुत्रादप्यस्त्येव" । यत्तु गमनकरणिकायामेव भावनायाम् "एवं गच्छन् पुत्रं जनयेदिति" पुत्रस्यैव भाव्यत्वं प्रतीयते तत्प्रजापदोपात्तयोः स्त्रीपुंसयोर्मध्ये पुत्रस्य तद्व्यापारविहितसुखफलतया अवश्यत्वानुवादः पुत्रार्थिप्रवृत्त्यर्थः । सुखाच्च युग्मनिषायुक्ताधिक्यस्त्रीक्षामतेन्दुसौम्यप्रसवनापूपादयो योगिमन्यादिभिरेव एवमित्यादिना स्पष्टीकृताः । आश्वलायनेनापि पाणिग्रहणे पुत्रपुत्रोर्युग्मफलत्वं प्रकटितम् । "स्पृङ्गाभि ते सौभगत्वाय हस्तमित्यङ्गुलयेव स्पृशीयात् यदि कामयेत पुमांस एव मे पुत्रा जायेरन्नित्यङ्गुलीरेव, स्त्रीकामोरोमान्ते हस्तं धारुक्षमुभयकाम इति" । एतेन "स्त्रियोऽयुग्मासु रात्रिषु" इत्यपि व्याख्यातम् । तस्मात् पुत्रस्यैव श्राद्धकर्त्तृत्वेन परलोकसाधनतया च पुत्रा अपि दानश्राद्धादिविधिसाधनत्वेन सिद्धे सख्यत्वे तदपचारे प्रतिनिधिर्युक्त एव । "दुहिता दुरहिता दूरे हिता दोग्धा" इति निरुक्त्या दुहितृहौहित्रद्वारापि पित्रुपकारकत्वं दर्शयति यास्कः मनुरपि "पौत्रदौहित्रयोर्लोके विशेषो नोपपद्यते । दौहित्रोऽपि ह्यमुत्रैनं सन्तारयति पौत्रवदिति" । महाभारते माद्र्य्युक्तिश्च "एका यतान्विका बाला भविष्यति मरीयसी । तेन दौहित्रजाताँल्लोकान् प्राप्नुयामिति मे मतिः" । अन्यत्रापि "दुहितर एव मातापितोः किमौरसाः पुत्राः । निपतन् दिवो यथा-

तिर्दौहित्रैरङ्गतः पूर्वमिति"। दौहित्रैरष्टकादिभिः कानीनैर्मातामहीपुत्रैः। एवञ्चौरसदौहित्रभावे दौहित्रक्षेत्रजोक्तप्राप्त्यर्थं क्षेत्रजादिदौहित्रणामपि प्रतिनिधित्वेनोपादानं सिद्धमेव। न च दौहित्रप्रतिनिधित्व एव वचनमस्ति। यदीयं तर्हि भर्तृपचारे देवरस्येव भार्योपचारे श्यालिकायाः प्रतिनिधित्वं स्यात् श्वशुरशरीरावयवान्वयेन सौसादृश्यादिति चेन्नैवम् नहि श्वशुरशरीरावयवान्वयेन भार्योपादानं किन्तु तस्याः संस्कृतस्त्रीत्वेन, न च तत् श्यालिकायामस्ति। यत् च कनिष्ठादौ तदस्ति तत्र भवत्येव तस्याः ज्येष्ठाप्रतिनिधित्वम्। यथाह व्यतिरेकमुखेन योगीश्वरः। "सत्यामन्यां सवर्णायां धर्मकार्यं न कारयेत्। सवर्णासु विधौ धर्मं ज्येष्ठया न विनेतरेति"। तस्मात् सिद्धमासां न्यायत एव प्रतिनिधित्वम्"।

"दुहितृप्रतिनिधौ पुराणेषु सिद्धदर्शनानि उपलभ्यन्ते। तत्र दत्तकाया रामायणे बालकाण्डे दशरथं प्रति सुमन्त्रस्य सनत्कुमारोक्तभविष्यानुवादो लिङ्गम्। "इक्ष्वाकूणां कुले जातो भविष्यति सुधार्मिकः। नाम्ना दशरथो वीरः श्रीमान् सत्यपराक्रमः। सख्यं तस्याङ्गराजेन भविष्यति महात्मना। कन्या चास्य महाभागा शान्ता नाम भविष्यति। अपुत्रस्त्वङ्गराजो वै लोमपाद इति श्रुतः। स राजानं दशरथं प्रार्थयिष्यति भूमिपः। अनपत्योऽस्मि धर्मज्ञ! कन्येयं मम दीयताम्। शान्ता शान्तेन मनसा पुत्रार्थे वरवर्णिनी। ततो राजा दशरथो मनसाभिविचिन्त्य च। दास्यते तां तदा कन्यां शान्तामङ्गाधिपाय सः। प्रतिग्रहीता तु तां कन्यां स राजा विगतज्वरः। नगरं यास्यति क्षिप्रं प्रहृष्टेनान्तरात्मना। कन्यां तामृष्यशृङ्गाय प्रदास्यति च धीर्यवान्" इत्यादि"।

"तत्रैव ऋष्यशृङ्गं प्रति लोमपादवाक्यम्। "अयं राजा दशरथः सखा मे हृदयः सुहृत्। अपत्यार्थं समायेन दत्तेयं वरवर्णिनी। याचमानस्य मे ब्रह्मन्! शान्ता प्रियतमा मम। सोऽयं ते श्वशुरो धीर! यथैवाहं तथा नृपः" इत्यादि। अत्र दीयतां दास्यते प्रतिग्रहीता दत्ताशब्दैर्हीनविधिः स्पष्ट एव। तथा पुत्र इत्युपक्रम्य पुत्रार्थं इत्युपसंहारात् औरसपुत्रीवत् दत्तपुत्रेऽपि पुत्रप्रतिनिधिर्भवतीति गम्यते"।

एवं क्षत्रियादिपुत्रीकरणेऽपि शकुन्तलादौहित्रादौ द्रष्टव्यम्।

"दत्तकाशौचनिर्णयः। तत्र जनककुले परस्परं नास्त्येव। "गोत्रर्क्षे जनयित्र्यै भजेदृक्थमृतः। गोत्रर्क्षानुगः पिण्डो व्यपैति ददतः स्वधा" इति मनुवचनात्। अत्र च स्वधापिण्डशब्दौ अशौचादिसकलपितृकर्मोपलक्षणं पिण्डदानादिनिमित्तीभूतगोत्रर्क्षयोर्निवृत्तिश्रवणात् एतत्पिण्डदानादेश्चाशौचपूर्वकालत्वनियमात् ततश्च पिण्डनिवृत्त्या अशौचनिवृत्तिरर्थसिद्धैव। "असगोत्रः सगोत्रो वा यदि स्त्री यदि वा पुमान्। प्रथमेऽह्नि यो दद्यात् स दशाहं समाचरेत्। प्रयाणिकान्तु नैव स्यात् कर्तुः स्वस्ति तथापि च। यावदशौचमुदकं पिण्डमेकञ्च दद्युः" इत्यादिवाक्यपर्यालोचनया पिण्डाशौचयोः समव्याप्तिसिद्धेः तस्मात् दत्तकतज्जनकादीनाञ्च परस्परं नाशौचादि। यत्तु "वैजिकादपि सम्बन्धादनुरुन्धाद्यं तत्र डमिति" तदपि "व्यपैति ददतः स्वधा" इत्यनेनोपोदितम् दत्तकात्रिरिक्थस्थले तस्य बाधकत्वात्। किन्तु अशौचोदकदानादौ गोत्रर्क्षपिण्डप्रयोर्मिलितयोर्निमित्तत्वावगमात् अन्यतरापाते न तन्निमित्तमशौचादि। तथा च शङ्खलिखितौ "सपिण्डता तु विज्ञेया गोत्रतः सप्तपौरुषी। पिण्डोदकदानञ्च शौचाशौचं तदानुगमिति"।

प्रतिग्रहीतृपित्रादीनान्तु दत्तकादिभरथे त्रिरात्रमशौचम्। तदाह हरीतः "अन्याश्रितेषु दारेषु परपत्नीसुतेषु च। स्नातेष्वाप्लुत्य शुद्ध्यन्ति त्रिरात्रेण द्विजोत्तमाः"। ददच्च त्रिरात्राशौचविधानं यत्प्रतियोगिकं भार्यात्वं पुत्रत्वञ्च तत्रैव। त्रिपुरुषानन्तरवर्तिनां पितृसपिण्डानान्तु पृथगाह मरीचिः "सुतके सुतके चैव त्रिरात्रं परपर्वयोः। एकाहस्तु सपिण्डानां त्रिरात्रं यत्र वै पितुः" इति। यद्यपि दत्तकादीनामसत्प्रायाणामेव स्वीकारात् परिग्रहीतुस्तदुपत्न्याशौचं न घटते तथापि तदपत्योत्पत्त्याशौचं घटत एवेति सुतकनिर्देशः। ददमपि समानजातीयानामेव पुत्राणाम्। तथा च ब्रह्मपुराणम्। "औरसं वर्जयित्वा तु सर्ववर्णेषु सर्वदा। क्षेत्रजादिषु पुत्रेषु जातेषु च सुतेषु च। अशौचन्तु त्रिरात्रं स्यात् समान इति निश्चयः" इति। सर्वदा सर्वकाले उपनयमानरमपि। "अन्याश्रितेषु दारेषु परपत्नीसुतेषु च। गोत्रिणः स्नानशुद्धाः स्युस्त्रिरात्रेणैव तत्त्ववित्" इति। यद्यपि प्रतिग्रहीतृमरणे दत्तकस्य दशाहाशौचं न घटते

सपिण्डसगोत्रत्वयोर्मिलितयोरभावात् अशौचविशेषाकत्व नोपलभ्यते तथापि "गुरोः प्रेतस्य शिष्यस्तु पितृमेधं समाचरन्। प्रेतहारैः समं तत्र दशरात्रेण शुद्ध्यतीति" मरीचिवचनेन शिष्यस्य गुरुप्रेतकार्य्यकरणनिमित्तदशाहाशौचसङ्कल्पमवति। अत्र गुरुशब्द आचार्य्यादिरूपः। गुरुत्वमत्राप्यस्ति उपनयनादिकर्तृत्वात्। ततश्च दत्तकस्य प्रतिग्रहीतृक्रियाकरण एव दशरात्राशौचं सिद्ध्यति अन्यथा त्रिरात्रमेव पूर्वोक्तवचनात्। एवं दत्तकस्य प्रतिग्रहीतुस्त्रिपुरुषानन्तरवर्तिसपिण्डमरणे एकाहः "एकाहस्तु सपिण्डानाम्" इति पूर्वोक्तमरीचिवाक्यात्। सोदकसगोत्रयोर्मरणे स्नानमात्रम्। "अन्याश्चितेषु दारेषु परपत्नीसुतेषु च" इति पूर्वोक्तप्रजापतिवाक्यात्"।

अन्येऽपि मीमांसादौ विशेषाः सन्ति ते च तत्र एवावगन्तव्या विस्तरभयात् न लिखिताः।

दत्तकचन्द्रिकानुसारिव्यवस्था बङ्गदेशे प्रचलिता मीमांसानुसारिव्यवस्था तु पाश्चात्यदेशप्रचलितेति भेदः।

वीरमित्रोदये व्यक्तानुज्ञे भर्त्तरि मृते स्त्रिया दत्तको ग्रहीतुं शक्यते इति व्यवस्थापितम् यथा "न तु स्त्री पुत्रं दद्यात्प्रतिगृह्णीयाद्वान्यत्रानुज्ञानाद्भर्त्तुरिति"। अत्र भर्त्तुरनुज्ञां विना स्त्रियाः पुत्रप्रतिग्रहनिषेधाददत्तानुज्ञे भर्त्तरि मृते विधवया कृतः पुत्रो दत्तको न भवतीत्याङ्गीकृत्य अपुत्रस्य गत्यभावात्पुत्रकरणस्यावश्यकत्वश्रवणाच्चास्मन्मूलकृतदत्तचन्द्रिकायास्तात्पर्य्यमुक्तेः। न चैवमनुज्ञानादन्यत्रेति व्यर्थम् व्यावर्त्त्याभावाच्चास्त्रीयानुमतेः सर्वत्रावश्यकत्वादिति वाच्यम्। सपत्न्योः, पत्न्यन्तरे पुत्रवतो वानुज्ञाया असम्भवाच्चार्थात् यदि स्वपुत्रार्थिनी तां प्रति निषेधात्। तथा हि "सर्वासामेकपत्नीनामेका चेत्पुत्रिणी भवेत्। सर्वास्तास्तेन पुत्रेण प्राह पुत्रवतीर्मनुरिति"। पुत्रकार्य्यश्राद्धादेः सपत्नीपुत्रेण सिद्धेर्भर्त्तुज्ञां विना तादृग्भ्राः पुत्रो न कार्य्यः। उभयोरपि तत्र कार्य्यस्य तेन निष्पत्तेः। भर्त्तुर्हि स औरस एव सुखः तस्या अपि दत्तपुत्रोऽयं इति तादृग्भ्रा भर्त्तुमतिमन्तरेणेतरो न प्रतियाहृत्र इति तात्पर्य्यार्थः। वस्तुतस्तु "भ्रातृणामेकजातानामेकश्चेत् पुत्रवान् भवेत्। सर्वांस्तांस्तेन पुत्रेण पुत्रिणो मनुरब्रवीदिति" वचनवदेतस्यापि भ्रातृपुत्रस्य गौणदत्तकपुत्रत्वादिसम्भवेऽन्यपुत्रप्रतिनिधिर्न कार्य्य इत्यर्थकतया मिताक्षरास्मृतिचन्द्रिकादौ व्याख्यातत्वाद्भर्त्तरि जीवति भार्य्या स्वातन्त्र्येण तदनुमत्या न पुत्रीकरणीय इति भर्त्तुरनुज्ञानादन्यत्रेत्यस्यार्थः। मृते तु तस्मिन् न पारतन्त्र्यम् तस्या यत्पारतन्त्र्यं तदनुमतिरेवापेक्षिता। एवं सति दृष्टार्थता भवति प्रतिषेधस्य। तस्मादृत्तानुज्ञे मृतेऽपि भर्त्तरि भार्य्यया दत्तकादिकरणमविरुद्धम्। मनुवचनस्य पूर्वोक्तार्थकत्वे उपपत्तिरपि मिताक्षरादावेवोक्ता"।

इदमपि व्यवस्था पाश्चात्यैकदेशे प्रचलिता।

दत्तैश्वर्य्योपाधिभेदे "शर्म्मा देवश्च विप्रस्य वर्म्मा त्राता च भूभुजः। भूतिर्दत्तश्च वैश्यस्य दासः शूद्रस्य कारयेत्" उद्वा० त०। [हरिवं० १६अ० दत्तशब्दे दृश्यम्।

**दत्तशत्रु** पु० अधिदेवत्वेपपुत्रभेदे दत्तशर्म्मापि तत्पुत्रभेदे

**दत्तात्मन्** पु० द्वादशपुत्रान्तर्गते पुत्रभेदे "दत्तात्मा तु स्वयंदत्तः" याज्ञ०। "मातापितृविहीनस्ताभ्यां सक्तो वा तवाहं पुत्रो भवामीति स्वयंदत्त उपनतः" मिता०। "स्वयमेव स्वात्मानमन्यस्मै दत्तवांस्त्वाहं पुत्रो भवामीति स्वयमुपगतो मातापितृविहीनस्ताभ्यां त्यक्तो वा सवर्णोऽपतितः स उच्यते तथा च मनुः "मातापितृविहीनो यस्त्यक्तो वा स्वादकारणात्। आत्मानं सर्पयेद्यस्तु स्वयन्दत्तस्तु स स्मृतः" इति। चकारात् पातित्यादिकारणमन्तरेणैव दुर्भिक्षादौ योषणाद्यसामर्थ्यादिना मातापितृभ्यामन्यत्रः स्वतन्त्र इत्यर्थः" वी० मि०।

**दत्तात्रेय** पु० दत्तसंज्ञकः आत्रेयः। योगाचार्य्ये अनसूयागर्भजे ऋषिपुत्रे ब्रह्मे भगवदवतारभेदे। आत्रेयशब्दे तत्रोत्पत्तिकथा दृश्या "ब्रह्मत्वेरपत्यत्वं हतः प्राप्तोऽनसूयया। आत्रिर्ऋक्षीमलकाँश्च ब्रह्मादादिभ्यः स जग्राहवान्" भाग० १।३।१२। तेन च स्वसंहितायां योगोऽनुशिष्टः कार्त्तवीर्य्याय च तेन वरो दत्तः कार्त्तवीर्य्यशब्दे दृश्यः।

**दत्तात्रेयेश्वर** पु० काश्यां शिवलिङ्गभेदे "भीमकेशवनामासौ दत्तात्रेश्वराङ्गयम्। दत्तात्रेश्वरात् पूर्वमेष आदिगदाधरः" काशीख० ३२ अ०।

**दत्तानपकर्म्मन्** न० दत्तस्य न अपकर्म्म यत्र। दत्ताप्रदानिकाख्ये व्यवहारविषयभेदे।

**दत्ताप्रदानिक** न० दत्तस्य असत्यकतया दत्तत्वात् पुनराप्रदानं यत्र तत्र ठन्। अष्टादशविवादान्तर्गते व्यवहारविषयभेदे तत्स्वरूपादिकं वी०मि० उक्तं यथा नारदः "दत्त्वा द्रव्यमसत्यस्यः पुनरादातुमिच्छति।

दत्तापदानिकं नाम व्यवहारपदं हि तदिति"। सम्यक् अशास्त्रीयमार्गाश्रयणेनेत्यर्थः। दानप्रकारस्यादेयादिभेदैश्चतुर्विधत्वमाह स एव। "अदेयमथ देयञ्च दत्तं वाऽदत्तमेव च। व्यवहारेषु विज्ञेयो दानमार्गश्चतुर्विधः" इति। तत्र तावदेयस्य स्वरूपभेदानाह वृद्धशातातपः "सामान्यं पुत्रदाराधिसर्वस्वन्यासयाचितम्। प्रतिश्रुतमथान्यस्य न देयं त्वदृता स्मृतमिति"। सामान्यं साधारणं प्रतिश्रुतं वाचादत्तम्। नारदोऽपि "अन्याहितं याचितकमाधिः साधारणञ्च यत्। निक्षेपः पुत्रदाराश्च सर्वस्वञ्चान्वये सति। आपत्स्वपि हि कष्टासु वर्त्तमानेन देहिना। अदेयान्याहुराचार्य्या यच्चान्यस्य प्रतिश्रुतमिति"। साधारणं बहुस्वामिकं रिक्थादिकं न त्वविभक्तस्वामिकं सुवर्णादिकं तस्य सम्मतौ देयत्वेन वक्ष्यमाणत्वात्। अत्र पुत्रदानमेक पुत्रविषयं तद्दाने सन्ततिविच्छेदप्रसङ्गात्। अतएव विष्णुः, "शुक्रशोणितसम्भवः पुरुषो मातापितृनिमित्तस्य प्रदानविक्रययोरित्यागेषु मातापितरौ प्रभवतो नत्वेकं पुत्रं दद्यात्प्रतिगृह्णीयाद्वा स हि सन्तानाय पूर्वेषामिति"। अतएव "सुतस्य सुतदाराणां वशित्वन्त्वनुशासने। विक्रये चैव दाने च वशित्वं न सुते पितुः" इत्यादीनि स्मृत्यन्तरोक्तवचनानि सुतस्यादेयत्वप्रतिपादकानि एकपुत्रविषयाणीति ज्ञेयानि। अनेकपुत्रेष्वपि मातापितृवियोगसङ्कटसमय एव देयः। अतएव कात्यायनः "विक्रयञ्चैव दानञ्च न नेयाः स्युरनिच्छवः। दाराः पुत्राश्चेति" यथा दारा विक्रयं दानं वा भर्त्तुर्न नेयास्तथा मातापितृभ्यां पुत्रा अपि पितृवियोगानिच्छवो न नेया इत्यर्थं उक्तः स्मृतिचन्द्रिकायाम्। न नेयाः स्युरनिच्छव इत्येतदनापद्विषयम्। "आपत्काले तु कर्त्तव्यं दानं विक्रयमेव वा। अन्यथा न प्रवर्त्तेत इति शास्त्रविनिश्चयः" इति तानेवाधिकृत्य तेनैवाभिधानात्। शास्त्रापि यत्सतुत्तया देयमित्याह विष्णुः "न तु स्त्री पुत्रं दद्यात्प्रतिगृह्णीयाद्वान्यत्रानुज्ञानाद्भर्तुरिति"। अन्याहितादिवत् स्त्रीधनमप्यदेयम्। अतएव दक्षः "सामान्यं याचितं न्यास आधिर्दारास्तथैव च। अन्याहितञ्च निक्षेपः सर्वस्वं चान्वये सति। आपत्स्वपि न देयानि नव वस्तूनि पण्डितैः। यो ददाति स मूढात्मा प्रायश्चित्तीयते नरः" इति। अदेयदाने प्रतिग्रहे च दण्डमाह मनुः। अदेयं यश्च गृह्णाति यश्चादेयं प्रयच्छति। तावुभौ चौरवच्छास्यौ दाप्यौ चोत्तमसाहसमिति"। अदेयग्रहणमदत्तस्याप्युपलक्षणार्थम्। अतएव नारदः। "गृह्णात्यदत्तं यो मोहाद्यश्चादेयं प्रयच्छति। दण्डनीयावुभावेतौ धर्मज्ञेन मनीषितेति"। अदत्तादेय ग्रहणाद्गृहीतस्य परावर्त्तनमपि कार्यमिति गम्यते। अदत्तग्रहणे दाने च दानसिद्धभावात्परस्वत्वानुत्पत्तेरित्युक्तं स्मृतिचन्द्रिकायाम्। देयस्वरूपमाह स एव। "कुटुम्बभरणाद्द्रव्यं यत्किञ्चिदतिरिच्यते। तद्देयमुपकल्पान्यन्न तद्दोषमवाप्नुयादिति"। अन्यदुपकल्प्य भर्त्तव्य कुटुम्बमनयरुद्ध्रेत्यर्थः। उपरोधश्च भोजनाच्छादनादिराहित्यनिबन्धनतोऽभिमतो न ताम्बूलादिभोगसाधनवैकल्यनिबन्धनः। अतएव हृद्धशातातपः। "कुटुम्ब भक्तवसनाद्देयं यदतिरिच्यत इति"। भक्तं भोजनं वसनम् आच्छादनम्। भक्तवसनाद्यदतिरिच्यत इत्वन्वयः। याज्ञवल्क्योऽपि" स्वं कुटुम्बाविरोधेन देयं दारसुताऽऽते" इति। कुटुम्बाविरोधेन कुटुम्बानुपरोधेन कुटुम्बभरणावशिष्टं स्वन्देयमित्यर्थः। स्थावरविषये देयमाहतुः प्रजापतिवृद्धशातातपौ "यत्प्रागमाद्गृहक्षेत्राद्यद्यत्क्षेत्रं प्रदीयते। पित्र्यं वाथ स्वयंप्राप्तं तद्दातव्यं विवक्षितमिति"। यत्प्रागमात्पूर्वोक्तसप्तविधागमयुक्तात्। क्षेत्रमुपलक्षणमुपलक्षयम्। पित्र्यं वंशपरम्परायातम्। स्वयंप्राप्तं स्वयमर्जितम्। पित्र्यस्वयंप्राप्तयोरुपादानं क्रीतादीनामुपलक्षणार्थम्। पित्र्यं वा स्वयंप्राप्तं वा यद्गृहक्षेत्रादिकं प्रदीयते तत्सप्तागमान्वितादृगृहक्षेत्रादृद्धृत्य दातव्यमिति विवक्षितमित्यर्थः। अत्र सप्तागमाद्गृहक्षेत्रादित्यभिधानं गृहक्षेत्रादिदानं कुटुम्बपर्य्याप्ते सागमके गृहे क्षेत्राद्यन्तरे सत्येव नान्यथेत्येवमर्थम्। उक्तञ्च कात्यायनेनोक्तम् "सर्वस्वं गृहवर्जं तु कुटुम्बभरणाधिकम्। यद्द्रव्यं तत् स्वकन्देयमदेयं ह्यातितोऽन्यथेति"। तद्गृहाद्यन्तराभावविषयम्। स्वकं स्वकीयम् यथेष्टविनियोगार्हद्रव्यमिति यावत्। स्वयंप्राप्तं त्वविभक्तधनैर्ज्ञातृभिरननुज्ञातमपि देयम्। "स्वेच्छादेयं स्वयंप्राप्तं बन्धाचारेण बन्धकम्" इति वृद्धशातातपस्मरणात्। स्वेच्छादेयं भ्रात्राद्यनुज्ञामन्तरेणापि देयम्। बन्धकं बन्धाचारेणाधिरूपेण देयमित्यर्थः। यत्तु तेनैवोक्तम् "विभक्ता अविभक्ता वा दायादाः स्थावरे समाः। एकोऽन्यथोः सर्वत्र दानाधमनविक्रये" इति। तत् सज्ञानाधिकाविभक्तस्थावरविषयम्। आधमनमा-

धीकरणं विभक्ता अपि स्थावरे धनाः किन्तताविभक्ता इति दण्डापूपन्यायेन व्याख्येयम्। अन्यथा विभागो निरर्थकः स्यात्। अतश्च यदुक्तं स्मृत्यन्तरे "एकोऽपि स्थावरे कुर्याद्दानाधमनविक्रयम्। आपत्काले कुटुम्बार्थे धर्मार्थे च विशेषतः" इति। तत्क्रमायातविभक्तस्थावरविषयं सप्तानधिकस्थावरविषयं वेति मन्तव्यम्। स्वार्जितमपि किञ्चित्प्राप्तव्यवहारेषु पुत्रेषु सत्सु तदनुमत्यैव दातव्यमित्यभिप्रेत्याह भगवान् व्यासः। "स्थावरं द्विपदञ्चैव यद्यपि स्वयमर्जितम्। असम्भूय सुतान् सर्वान्न दानन्न च विक्रयः। ये जाता येऽप्यजाताश्च ये च गर्भे व्यवस्थिताः। वृत्तिं च तेऽभिकाङ्क्षन्ति न दानन्न च विक्रयः" इति। अत्रोत्तरपदं पूर्वपदप्रदर्शितदृष्टान्तविवरणार्थञ्च दण्डापूपन्यायप्रदर्शनेन दृढीकरणार्थम्। किञ्चिद्भर्त्रा पत्न्यनुज्ञातमेव देयम्। किञ्चिन्मुख्येनापि भर्त्राद्यनुज्ञातमेव देयम्। तथा च दृष्टस्मृतिः "सौदायिकं क्रमायातं यौर्ध्वदेहिकं च यद्भवेत्। स्त्रीज्ञातिस्वाम्यनुज्ञातं दत्तं सिद्धिमवाप्नुयादिति"। सौदायिकं वैवाहिकं यस्याः परिणयने लब्धं तस्याः अनुज्ञयैव दातव्यम्। क्रमायातमित्यादि पितामहादिक्रमायातम्। स्त्रीज्ञात्यनुमतं न सकलन्देयम्। "वैवाहिके क्रमायाते सर्वदानन्न विद्यते" इति नैनैवोक्तत्वात्। देयोक्तिप्रसङ्गेन प्रतिग्रहे प्रकारविशेषं दर्शयति याज्ञवल्क्यः "प्रतिग्रहः प्रकाशः स्यात् स्थावरस्य विशेषतः" इति। प्रकाशः प्रकटः सक्षात्कि इति यावत्। पुत्रप्रतिग्रहे प्रकारविशेष उक्तो वसिष्ठेन। "पुत्रं परिग्रहीष्यन् बन्धूनाहूय राजनि चावेद्य निवेशनस्य मध्ये व्याहृतिभिर्हुत्वाऽदूरबान्धवमसन्निकृष्टमेव दृष्ट्वेति"। अदूरबान्धवं सन्निहितमातृष्वादिबान्धवम् असन्निकृष्टं सन्निकृष्टभ्रातृभगिनीपुत्रादिव्यतिरिक्तमेव प्रतिगृह्णीयादित्यर्थः। प्रासङ्गिकमुक्त्वा प्रकृतमाह याज्ञवल्क्यः "देयं प्रतिश्रुतं चैव दत्त्वा नापहरेत् पुनः" इति। इदन्ते दास्यामीति यत् प्रतिश्रुतन्तदवश्यं तस्मै दातव्यं यदि धर्मात्प्रच्युतो न भवति। प्रच्युते पुनर्न दातव्यं "प्रतिश्रुत्याप्यधर्मसंयुक्ताय न दद्यादिति" गौतमस्मरणात्। "दत्त्वा नापहरेत् पुनः"। न्यायप्राप्तेन यत् दत्तं सप्रविधमपि पुनर्नापहर्त्तव्यम् किन्तु तथैवानुमन्तव्यमित्यर्थः। यत् पुनः प्रतिश्रुतञ्च ददाति दत्तं वापहरति तस्य दोषमाह हारीतः "प्रतिश्रुतार्थादानेन दत्तस्य छेदनेन च। विविधाञ्चरकान् याति तिर्यग्योनौ च जायते। वाचैव यत्प्रतिज्ञातं कर्म्मणा नोपपादितम्। कथं तद्धर्मसंयुक्तमिह लोके परत्र च" इति। यद्धनं धर्म्मसंयुक्तं प्रतिग्रहीतुः प्रदत्तधर्म्मसम्पत्त्यर्थं वाचा प्रतिज्ञातञ्च पश्चादर्पितं तदिह परत्र च अफलतापत्तेरित्यर्थः। प्रतिश्रुतमदत्त्वा तद्ग्राह्यो दण्डयेत्याह कात्यायनः "स्वेच्छया यः प्रतिश्रुत्य ब्राह्मणाय प्रतिग्रहम्। न ददाद्यवहार्य्यः प्राप्नुयात्पूर्वसाहसम्" इति। मत्स्यपुराणेऽपि "प्रतिश्रुत्याप्रदातारं सुवर्णं दण्डयेन्नृपः" इति। अनयोर्दण्डयोरपराधानुसारेण व्यवस्था।

दत्तं सप्तविधमदत्तं षोढ़शप्रकारमित्याह नारदः "दत्तं सप्तविधं प्रोक्तमदत्तं षोढ़शात्मकम्" इति। तत्र दत्तभेदानाह स एव। "पण्यमूल्यं श्रुतिस्तुल्या स्नेहात् प्रत्युपकारतः। स्त्रीशुल्कानुग्रहार्थञ्च दत्तं दानविदो विदुः" इति। पण्यमूल्यं क्रीतद्रव्यस्य मूल्यम्। श्रुतिरूपं कात्यायनेन दर्शितम्। "अभीप्सितोपलब्ध्यर्थं दानं यत्तन्निरूपितम्। उपलब्धिक्रियासम्पादनार्थं श्रुतिरियत्त्वेति" इति। प्रयोजनक्रियासम्पादनार्थं श्रुतिरियत्त्वेत्यर्थः। तुष्ट्या परितोषेण वन्दिप्रभृतिभ्यो दत्तमिति शेषः। स्नेहात् प्रीत्या दुहित्रादिभ्यो दत्तम्। प्रत्युपकारतः कृतोपकाराय प्रत्युपकारिणा दत्तम्। तत्प्रदर्शनार्थमाह। कात्यायनः "भयत्राणोपरक्षार्थात्तच्चाकार्यप्रसाधनात्। अनेन विधिना लब्धं भयत्राणादिकं धनम्"। उपकारकरणेन लब्धमिति यावत्। स्त्रीशुल्कं विवाहार्थं कन्याबन्धुभ्यो दत्तम्। अनुग्रहार्थं परोपकारः कर्त्तव्य इति विधिवत्तात्र कृत्वाप्यनुग्रहार्थं दत्तमेतत् सकलं सफलं भवतीति दर्शयितुं नारद आह "मातापित्रोर्गुरौ मित्रे विनीते चोपकारिणि। दीनानाथविशिष्टेभ्यो दत्तं तु सकलम्भवेदिति"। उपकारिणि परोपकारे सफलं फलातिशयोपेतमित्यर्थः। तदेतत्षष्ठादि सप्तविधं दत्तमेव दानविदोविदुः अपरावर्तनीयं विदुरित्यर्थः। दृष्टस्मृतिरपि "श्रुतिस्तुल्या पण्यमूल्यं स्त्रीशुल्कमुपकारिणे। अनुग्रहसंप्रीत्या दत्तं सप्तविधं विदुरिति" अदत्तानि दर्शयति नारदः "अदत्तन्तु भयक्रोधशोकवेगहृतैः। तथोत्कोचपरीहासव्यलीकानृतयोगतः। बालमूढ़ार्त्तमत्तोन्मत्तापवर्जितम्। कर्त्ता ममायं कर्मेति प्रतिलाभेच्छया च यत्। अपाये पालयित्वा वा धर्म्मसंहिते। यद्दत्तं स्यादविज्ञानाद्दत्तमिति

तत्कृतमिति"। रुक् उपतापः भयादिजन्योय उपतापस्तदन्वितैरित्यन्वयः। अपवर्जितं दत्तं बालादिभिरपवर्जितमित्यन्वयः। एतदुक्तं भवति भयोपतप्तेन बन्दिग्राहादिभ्यो दत्तं क्रोधोपतप्तेन क्रोधविषयीभूतानां पुत्रभ्रात्रादीनां भयं कर्तुमितरेभ्यो दत्तम्। पुत्रादिवियोगजनितशोकवेगादुपतप्तेन किं स्थितेन धनेनेति तात्कालिक्या बुद्ध्या दत्तम्। उत्कोचेन राजकीयादिभ्यो दत्तम्। उपहासेन दत्तम्। व्यलीकेन एकः स्वद्रव्यमन्यस्मै ददाति अन्योऽपि स्वीयमन्यस्मै ददातीति दानव्यलीकेन दत्तम्। ऊनयोगतः शतदानमभिसन्धाय सहस्रमिति परिभाष्य दत्तम्। बालेनाप्राप्तव्यवहारेण दत्तं मूढेन लोकवेदानभिज्ञेन दत्तम्। अयत्तन्त्रेण दासादिना दत्तम्। आर्त्तेन रोगोपहतेन दत्तम्। मत्तेन धुस्तूरादिभक्षणादिना मत्तेन दत्तम् उन्मत्तेन वातपित्तादुद्रेकादिना चलितधिया दत्तम्। अयं मदीयं कर्म करिष्यतीति प्रतिलाभेच्छया प्रतिलाभकुर्वाणाय दत्तम्। अपात्रायायोग्याय योग्योऽहम् इत्युक्तिमात्रेण दत्तम्। यज्ञादिं करिष्यामीत्युक्त्वा धनं गृहीत्वा दूतादिकर्म्मणि विनियुञ्जानाय दत्तं इत्येवं षोढशप्रकारमपि दत्तं पुनः प्रत्याहरणीयत्वाददत्तमुच्यत इत्यर्थः। पुनःप्रत्याहरणीयत्वमेवंविधानामाह कात्यायनः "कामक्रोधाभ्यतन्त्रार्त्तक्लीबोन्मत्तप्रमोहितैः। व्यलीकपरिहाराय यद्दत्तन्तत्पुनर्हरेत्। यां तु कार्यप्रसिद्ध्यर्थमुत्कोचां स्यात्प्रतिक्रिया। तस्मिन्नपि प्रसिद्धेऽर्थे न देया स्यात्कथञ्चन। अथ प्रागेव दत्ता स्यात्प्रतिदाप्यस्ततोऽन्यतः। दण्डं चैकादशगुणमाहुर्भागार्थिमानवाः" उत्कोचस्वरूपमाह स एव। "श्रेयसाऽधिकोद्दृत्तपारदारिकशंसनात्। दर्शनाद्दुष्टनष्टस्य तथाऽसत्प्रवर्त्तनात्। प्राप्तमेतैस्तु यत्किञ्चिदुत्कोचाख्यं तदुच्यते। न दाता तत्र दण्ड्यः स्यान्नाध्यस्यर्थं च दोषभागिति" एतदुक्तं भवति यदि मह्यं न प्रयच्छसि तदा त्वत्कृतं श्रेयादि कथयामीति भीतिसृत्पाद्य श्रेयादिकर्त्तुः सकाशाद्धनमादत्ते। तथा त्वं यदि धनं मह्यं न प्रयच्छसि तदा पलायमानं त्वां दर्शयामीति भीतिसृत्पाद्य पलायिनः सकाशाद्यत्किञ्चिदादत्ते तथा तव सत्वमपि स्वामिनिकटेऽसत्यं वदिष्यामीत्युक्त्वा यत्किञ्चिदादत्ते तदुत्कोचाख्यं तद्राज्ञा दाप्ये दाप्यम् उत्कोचापादकयाज्ञको च दण्ड्यौ याविति पुनः प्रत्याहरणीयमिति दृश्यते-रत्याह प्रतिलाभेच्छया दत्तमपात्रे पात्रबुद्ध्या। कार्य्ये वाधर्म्मसंयुक्ते स्वामी तत्सुतराप्नुयादिति"। आर्त्तदत्तस्यादत्तत्वं धर्म्मकार्य्यव्यतिरिक्तविषयम्। तथा च कात्यायनः "स्वस्थेनार्त्तेन वा दत्तं स्थावितं धर्म्मकारणात्। अदत्त्वा तु सुते दाप्यस्तत्सुतो नात्र संशयः" इति। मनुरपि सोपाधिकदानादेर्निवर्त्तनमाह "योगाधमनविक्रीतं योगदानप्रतिग्रहम्। यस्य वाप्युपधिग्रस्यं तत्सर्वं विनिवर्त्तयेदिति"। योग उपाधिः येनागामिनोपाधिविशेषेणाधिविक्रयादानप्रतिग्रहाः कृतास्तदुपाधिविगमे ते सर्वेऽपि निवर्त्तेरन्नित्यर्थः।"

**दत्तामित्र** पुं० सौवीरे नृपभेदे। "दत्तामित्र इति ख्यातं संग्रामे कृतनिश्चयम्। दुर्मित्रं नाम सौवीरमज्जुनोदग्रवर्त्मभिः" भा० आ० १२६ अ०। [दत्तिभिः" रघुः

**दत्ति** स्त्री दा-क्तिन् ददादेशः। दाने "अनुष्टुब्भीव निवाप-

**दत्तिक** त्रि० अल्पो दत्तः ठक्। अल्पदत्ते। दत्तान्नशब्दात् मनुष्यनाम्नः घन् इलच् ठक् वा। देवदत्त+यज्ञदत्त+स्वार्थाद्यर्थे चादौ पूर्वपदलोपे दत्तिय, दत्तिल दत्तिक दत्तक देवदत्त यज्ञदत्त सोमदत्तादौ।

**दत्तेय** पुंस्त्री०दत्तायाः अपत्यम् ढक्। १दत्तायाः दत्तककन्यायाः अपत्ये २दत्ते पु० हेमच० दत्तेयेति वा तत्र पाठः।

**दत्तोलि** पु० पुलस्त्यसुनौ विष्णुपु०।

**दत्र** न० दा-बा० कत्रन्। १धने "इन्द्र! यत्ते माहिनं दत्रम्" ऋ० ३।३६।८। "दत्रं धनम्" भा०। "दत्रे विश्वा अधिथा इन्द्र! कृष्टीः" ऋ० ४।१७।६। "दत्रे धने" भा० १२हिरण्ये निरु० "यो दत्रैर्वा उपसो न प्रतीकम्" ऋ० ६।५०।८।

**दत्रिम** त्रि० दानेन निर्वृत्तः दा-क्त्रि-क्रमेण च। १दाननिर्वृत्ते। "निष्ठां गते दत्रिमसभ्यतोषे" भट्टिः। "माता पिता वा दद्यातां यमद्भिः पुत्रमापदि। सदृशं प्रीतिसंयुक्तं स ज्ञेयो दत्रिमः सुतः" इत्युक्ते २दत्तकपुत्रे पु०।

**दद** दाने ध्वतौ च भ्वा० आ० सक० सेट्। ददते अददिष्ट ददे। "विटविटपमसं ददस्व तस्यै" माघः। [तत्रार्थे।

**दद** त्रि० दा-बा० य। दातरि। पक्षे आदन्तत्वात् यः दाय

**ददन** न० दद-भावे ल्युट्। दाने जट्धर०।

**ददि** त्रि० दा-कि द्वित्वम्। दानकर्त्तरि। [ विदारणशीले।

**ददत्** त्रि०दीर्यति दृ-क्विप् हस्वः द्वित्वं तुगम्। दीर्यति।

**ददग्रान** त्रि० दृश-ग्रानच्। दृष्टे "अस्य गुह्यासो ददग्रानपदे-

जैर्दृश्यमानस्य" ऋ० १०।३।६। "दृश्यानपवेः दृश्यमानायुधस्य" भा० अत्र दृश्यमानेति विवरणं कालाविवक्षयेति बोध्यम्

**दधि(ग्धि)** अव्य० याच्ञायाम् निघण्टुः। अयं धातुरित्यन्ये।

**दद्रु** पु० ददते कण्डूं दद-रु। रोगभेदे। "सकण्डुरागपिड़कं दद्रुमण्डलसङ्गतम्" भावप्र०। उद्गतं उच्छूनम् कुष्ठशब्दे २।५४ पृ० दृश्यम्। स्वार्थे क। द्रुक तत्रार्थे शब्दर०। [अमरः २।६।कुचेरत्नमा०।

**दद्रुघ्न** पु० दद्रुं हन्ति हन-टक्। १चक्रमर्दके (दादमर्दन)।

**दद्रुण** त्रि० दद्रू+पामा० अस्त्यर्थे न ह्रस्वश्च। दद्रुरोगयुक्ते अमरः। [भेदे (दाद)।

**दद्रू** स्त्री दरिद्रात्यनयाङ्गम् दरिद्रा-क नि०। त्वग्रोगभेदे च।

**दध** दाने धारणे च आ० भ्वा० सक० सेट्। दधते अदधिष्ट।

**दधन्वत्** त्रि० दधि-मतुप् वेदे नि० दधन्नादेशे मस्य वः। दधिविशिष्टे। "अच्छिद्रस्य दधन्वतः सुपर्णस्य दधन्वतः" ऋ० ६।४८।८। "दधन्वतः दधिमतः" भा०।

**दधि** त्रि० धा-कि हित्वम्। १धारणकर्त्तरि किप्रत्ययान्तत्वेन तद्योगे न कर्म्मणि षष्ठी "सुहृदा दधिं सारङ्गमेतदर्चकान्" सुश्रु०। दध-इन्। २दुग्धविकृतिभेदे, (दइ) ३यज्ञे च न० हेमच०। दधिगुणभेदादिकं भावप्र० उक्तं यथा

"दध्युष्णं दीपनं स्निग्धं कषायानुरसं गुरु। पाकेऽम्लं श्लेष्मपित्तास्रशोथमेदःकफप्रदम्। मूत्रकृच्छ्रे प्रतिश्याये पीनसे विषमज्वरे। अतीसारेऽरुचौ काश्यें भक्षयेत् . बलशुक्रकृत्। अथ दधिभेदाः। "आद्यौ मन्दं ततः स्वादु स्वाद्वम्ल तत्परम्। अम्लमत्युल्बणाम्लं पञ्चमं दधि पञ्चधा। अथ मन्दादीनां लक्षणानि गुणाश्च। मन्दं दुग्धं यदव्यक्तरसं किञ्चिद्घनं भवेत्। मन्दं स्यात् सृष्टविण्मूत्रं दोषत्रयविदाहकृत्। यत्सम्यग् घनतां यातं व्यक्तं स्वादुरसं भवेत्। अव्यक्ताम्लरसं तत्तु स्वादु विद्यादृदाहृतम्। स्वादु स्वादम्लमिच्छन्ति दध्नः मेदःकफापहम्। वातघ्नं मधुरं पाके रक्तपित्तप्रसादनम्। स्वाद्वम्लसान्द्रं मधुरं कषायानुरसं भवेत्। स्वाद्वम्लस्य गुणा ज्ञेया सामान्यदधिवज्जनैः। यत्तिरोहितमाधुर्यं व्यक्ताम्लत्वं तदम्लकम्। अम्लन्तु दीपनं पित्तरक्तश्लेष्म विवर्द्धनम्। तदत्यम्लं दन्तरोमहर्षकण्ठादिदाहकृत्। अत्यम्लं दीपनं रक्तवातपित्तकरं परम्"। गोदधिगुणाः "गव्यं दधि विशेषेण स्वाद्वम्लञ्च रुचिप्रदम्। पवित्रं दीपनं हृद्यं पुष्टिकृत् पवनापहम्। उक्तं दध्नामशेषाणां मध्ये गव्यं गुणाधिकम्। माहिषदधिगुणाः। माहिषं दधि सुस्निग्धं श्लेष्मलं वातपित्तनुत्। स्वादुपाकमभिष्यन्दि हृद्यं गुर्वम्लदूषकम्"। छागीदधि गुणाः "छाजं दध्युत्तमं प्राहि लघु दोषत्रयापहम्। शस्यते श्वासकासार्शःक्षयकार्श्येषु दीपनम्"। पक्वदुग्धदधिगुणाः। पक्वदुग्धभवं रूक्षं दधि स्निग्धं गुरूत्तमम्। पित्तानिलापहं सर्वधात्वग्निबलवर्द्धनम्। निःसरदुग्धदधिगुणाः। असारं दधि संग्राहि शीतलं वातलं लघु। विष्टम्भि दीपनं रूक्षं यकृच्छ्लीरोगनाशनम्। गालितदधिगुणाः "गालितं दधि सुस्निग्धं वातघ्नं कफलद्गुरु। बलपुष्टिकरं रूक्षं मधुरं नातिपित्तलम्। शर्करादिसहितदधिगुणाः। सशर्करं दधि श्लेष्म क्षयापित्तासृदाहजित्। सगुडं वातनुद्बृंहि हृद्यं तर्पणं गुरु।" अथ रात्रौ दधिभोजननिषेधः। न नक्तं दधि भुञ्जीत नचाप्यघृतशर्करम्। नामुद्गसूपं नाशौद्रं नोष्णं नामलकैर्विना। अयमर्थः। रात्रौ दधि न भुञ्जीत भुञ्जीत चेत्तदा अघृतशर्करमसूद्गसूपं क्षौद्रमुष्णं विनामलकैश्च दधि न भुञ्जीत। तेन घृतशर्करादियुक्तं दधि रात्रावपि भुञ्जीतेत्यर्थः। तथा च। भक्षयेत् दधि नो रात्रौ भक्षयेच्छाम्बुघृतान्वितम्। रक्तपित्तकफोत्थेषु विकारेषु तु नैव तत्। तदम्बुघृतान्वितमपि। अथर्तुविशेषेण विधिनिषेधौ। हेमन्तशिशिरे चापि वर्षासु दधि भक्षयेत्। शरदृष्मीष्मवसन्तेषु प्रायशस्तद्विगर्हितम्। अथाविधिना दधिसेवने दोषमाह ज्वरासृक्पित्तवीसर्पकुष्ठपाण्डामयभ्रमान्। प्राप्नुयात् कामलाञ्चोग्रां विधिं हित्वा दधिप्रियः। अथ सरस्य मस्तुनश्च लक्षणं गुणाश्च। दध्नस्तूपरि यो भागो घनः स्नेहसमन्वितः। स नीतो सर इत्युक्तो दध्नोमण्डस्तु मस्त्विति। सरः स्वादुर्गुरुर्ग्राही वातवह्निप्रणाशनः। मस्तोर्वस्तिप्रशमनः पित्तश्लेष्मविवर्द्धनः। मस्तु क्रमहरं बल्यं लघु भक्ताभिलाषकृत्। स्रोतोविशोधनं छर्दि कफश्वासानिलापहम्। अतस्त्रं प्रीणनं शीतं भिनत्ति मलसञ्चयम्"।

"दधि सक्तुषु भोक्तव्यम् सर्वत्र दधिसम्भवम्" मनुः। "विना लवणतोयाभ्यां दधि मासेन जीर्य्यति" "कफपित्तकरं दधि" इति वैद्य०।

दधिशब्दस्य दुग्धविकाररूपार्थत्वे स्त्रीत्वेन तदर्थे उक्तङीषन्त्वाभावात् टादावचि न ङीबद्भावः। धारणकर्त्-

रूपार्थपरत्वे तु प्रवृत्तिनिमित्तसाम्यात् उल्लुंक्तत्वात् स्त्रीत्वेऽपि वा पुंवद्रूपं दधये दधिने कुलाय इत्यादि। अस्य उरःप्रभृतिषु पाठात् बहुव्रीहौ नित्यं कप् बहुदधिको यज्ञ इत्यादि।

**दधिकूर्चिका** स्त्री "दध्ना सह पयः पक्वं यत् स्यात् सा दधिकूर्चिका" इत्युक्तलक्षणायामामिक्षायाम्।

**दधिक्रा** पु० दधिः दधदन्नं धारयन् सन् क्रामति क्रम-विट् अनङ्त्वात्। १अश्वरूपे अन्नात्मके देवभेदे "दधिक्रांव्णो अकारिषं जिष्णोरश्वस्य वाजिनः। सुरभि नो मुखाकरत् प्राण आयूंषि तारिषत्" तारण्ड्य०ब्रा०१।६।१७। "दधिः दधद्धारयन् क्रामतीति दधिक्रावा क्रमेर्वनिपि विड्वनोरनुनासिकस्यादिति" मकारस्याकारः, तस्य दधिक्रावणः एतत् संज्ञकस्याश्वरूपस्य देवस्य" भा० अत्र द्राक्ष्यायणः, "आग्नीध्रीयं गत्वा दधिमन्थं भक्षयेयुरसमुपहूय दधिक्रावण्ण इति। अत्र यद्यप्यग्निः सर्वेषु देवतात्वेनाभिधीयते, तथापि दधिशब्दयोगात् साम्येन दधिभक्षणे विनियोग इति द्रष्टव्यम्" भा०। एतदनुसारेण पशुगव्यादिशोधनेऽपि दधिशोधनेऽयं मन्त्रो विनियुक्तः इति बोध्यम्।

**दधिधर्म्म** पु० दधिसंस्कारके वैदिके कर्म्मभेदे। "दधिधर्म्मेण चरन्ति प्रवर्ग्यवंवेत" आश्व० श्रौ० ५।१३।१। दधिधर्मो नाम कर्मविशेषः" नारा०। स च कात्या० श्रौ० उक्तो यथा १०।६।२०। "सप्रवर्ग्यं दधिधर्म्मः" सू० दध्याहरेति प्रेषितो दधिधर्मार्थं दध्याहरति तत्र योगार्थत्वात् साक्षाच्छब्देन वत्सापाकरणादिना संस्कार्यं तत्र दध्नो द्व्यहसाध्यत्वात् पूर्वस्मिन्नहनि प्रातःसवनिकं दध्यर्थदोहानन्तरं दधिधर्मः दध्यर्थमपि रात्रौ दोहः प्रातर्नानाः कर्त्तव्यः। तत्सम्बन्धिनो वत्सापाकरणादयोऽप्यनेनैव क्रमेण कर्त्तव्याः प्रवर्ग्यकाले चार्यं दधिधर्मः" कर्कः। तत्करणप्रकारमपि तदुत्तरसूत्रैराह यथा "उपविश्य सदसः पुरस्तात् सपवित्रायामग्निहोत्रहवण्यां यद्दधि यद्योक्तम्" २१ सू०। तत् प्रतिप्रस्थात्राहृतदधि उत्तरवेदेः पश्चादासाद्यालभ्य ततः सदसः पश्चादुपविश्य सपवित्रायामग्निहोत्रहवण्यां शाखापवित्रेणाग्निहोत्रहवण्याम् यद्योक्तं यथा प्रवर्ग्याध्यायोक्तं तथा यद्दधि करोति यतो यावतीति मन्त्रान्ते स्वाहोसुखेनैवाग्निहोत्रहवण्यां निनयनं कर्त्तव्यम्। आनयनन्तु निनयनमेव" कर्कः विस्तरः तदुत्तरसूत्रेषु दर्शितः। तादृशकर्म्मसमुदायश्च दधिधर्मशब्दार्थः।

**दधिचार** पु० दधि चारयति चालयति चर-णिच्-घञ् उप० स०। मन्थानदण्डे त्रिका०।[2]दधिजातमात्रे त्रि०।

**दधिज** न० दध्नो जायते जन-ड। १नवनीते राजनि०

**दधित्थ** पु० दधीव तद्वर्णवत् स्थिरे तिष्ठति स्था-क पृषो०। कपित्थे अमरः तद्वृक्षस्य दधिवर्णत्वात् तथात्वम्। "दधित्थरससंयुक्तां पिप्पलीं माक्षिकान्विताम्" सुश्रु०।

**दधित्थाख्य** पु० दधिमाख्याति आ+ख्या-क। सरलवृक्षे (लोबान) रालमाला।

**दधिधेनु** स्त्री दानार्थं कल्पितदधिकुम्भनिर्म्मिते धेनुभेदे तद्विधानं हेमा० दा० स्कन्दपु० उक्तो यथा

"दधिधेनोर्मयाराज! विधानं शृणु साम्प्रतम्। अनुलिप्ते मही भागे गोमयेन नराधिप!। गोचर्म्ममात्रन्तु पुनः पुष्पप्रकरसंयुतम्। कृशैरास्तीर्य्य वसुधां कृष्णाजिनलतास्तराम्। दधिकुम्भञ्च संस्थाप्य सप्रधानस्य चोपरि। चतुर्थांशेन वत्सन्तु सौवर्णसुखसंयुतम्। प्रशस्तपत्रसंवृतां सुक्षीरफलमवेक्षणाम्। चन्दनागुरुहट्टीं च सूत्रं वै गन्धमाल्किम्। जिह्वां शर्करया राजन्! श्रृंगं श्रीखण्डकं तथा। फलमूलमयान् दन्तान् सितसूत्रस्य कम्बलान्। ताम्रपृष्ठा दर्भरोमा पुच्छं सूत्रमयं तथा। सुवर्णखुरीं रौप्यखुरीं नवनीतमयस्तनीम्। इक्षुदण्डां सुसंकल्प्य सर्वालंकारभूषिताम्। आच्छाद्य वस्त्रयुग्मेन पुष्पगन्धैस्तु पूजिताम्। ब्राह्मणाय कुलीनाय साधुवृत्ताय धीमते। समाधियमयुक्ताय ताडशाय प्रदापयेत्। पुच्छदेशोपविष्टाय सद्विजाकर्णमात्रकैः। षाड्गुण्यानन्दो ऋचं दत्त्वा मन्त्रमनुस्मरेत्। दधिक्रावण्णेतिमन्त्रेण दधिधेनुं प्रदापयेत्। एवं दधिमयीं धेनुं दत्त्वा राजर्षिसत्तम!। एकाहारो दिनं तिष्ठेद्ब्रह्मचारी जपन्नरः। यजमानो वसेद्राजन्! तिदिवं च

द्विजोत्तमः ! दीयमानां प्रपश्यन्ति तेऽपि यान्ति परां गतिम् । दश पूर्वान् दश परानात्मानञ्चैकविंशकम् । विष्णुलोकमवाप्नोति यावदाहूतसंप्लवम् । दाता च दापकावेव तेऽपि यान्ति परां गतिम् । यत्र मधुवहा नद्यो यत्र पायसकर्दमाः । अपयो घृतयं सिद्धास्तत्र गच्छन्ति धेनुदाः । य इदं शृणुयाद्भक्त्या श्रावयेद्वापि मानवः । सोऽश्वमेधफलं प्राप्य विष्णुलोकं स गच्छति" । एतद्धेनुविधिवत् सर्वमत्र कर्म्म ।

**दधिपयस्** न० द्वि०व० दधि च पयश्च । "जातिरप्राणिनाम्" पा० अप्राणिजातित्वात् समाहारद्वन्द्वे प्राप्ते "न दधिपय आदीनि" पा० तन्निषेधः दधिपयसी ।

**दधिपयआदि** न० समाहारद्वन्द्वनिषेधनिमित्ते शब्दद्वयगणभेदे । स च गणः पा०ग०सूत्रे उक्तो यथा "दधिपयसी सर्पिर्मधुनी मधुसर्पिषी ब्रह्मप्रजापती शिववैश्रवणौ स्कन्दविशाखौ परिव्राट्कौशिकौ प्रवर्ग्योपसदौ शुक्लकृष्णौ द्रुह्वावर्द्धिषी दीक्षातपसी अद्वातपसी मेधातपसी अध्ययनतपसी उलूखलमुसले आद्यवसाने अङ्गामेधे ऋक्सामे वाङ्मनसे" ।

**दधिपुष्पिका** स्त्री दधीव शुभ्रं पुष्पमस्याः कप् अत इत्त्वम् । श्वेतापराजितायाम् राजनि० ।

**दधिपुष्पी** स्त्री दधीव शुभ्रं पुष्पमस्याः जातित्वात् ङीष् । कोलशिम्व्यां राजनि० ।

**दधिपूप** पु० दधिपक्वः पूपः । अपूपभेदे । "शालिपिष्टं घृतं दत्त्वा मर्दयित्वा एते पचेत् । वेष्टयेत् पक्वखण्डेन सदृशं दधिपूपकम् । दधिपूपो गुरुर्ह्यो हृच्छ्वोऽग्निसन्धिकृत् । हृद्योऽग्निजननश्चैव विशेषाद् रुचिकारकः" पाकशास्त्रम् ।

**दधिफल** पु० दधीव द्रवः फलेऽस्य । कपित्थे अमरः तद्वृक्षस्य दधितुल्यान्तरसत्वात् तथात्वम् । [रत्नमाला ।

**दधिमण्ड** पु० ६त० । दध्नः मस्तुनि (मात) ख्याते पदार्थे ।

**दधिमण्डोद(क)** पु० दधिमण्ड इवोदकमत्र उदकस्य वा उदादेशः । दधिमण्डतुल्यजले लवणभेदे । "दधिमण्डोद एवात्र विष्णोर्यो वारिजासनः" हेमा० ब्र० तद्ध्यानम् । "उत्तरेषु च कौरव्य ! द्वीपेषु श्रूयते कथा । एवं तत्र महाराज ! ब्रुवतश्च निबोध मे । इक्षतोयः समुद्रोऽत्र दधिमण्डोदकः परः । सुरोदः सागरश्चैव तथान्यो लवणसागरः" भा० भी० १२ अ० ।

**दधिमुख** पु० रामसैन्यपतियानरभेदे "श्रीमान् दधिमुखो नाम हरिवक्त्रोऽतिवीर्यवान्" भा०व०२८२अ० । नागभेदे "सुरामुखो दधिमुखस्तथा विमलपिण्डकः" भा०आ०३५ अ० सर्पनामोक्तौ दधिवक्त्रादयोऽप्यत्र ।

**दधिवत्** त्रि० दधि अस्त्यत्र मतुप् वेदे मस्य वः । दधियुक्ते "अपूपवान् दधिवांश्चरुरेष सीदत" यजु० १८। ४।१७। लोके तु न मस्य वः दधिमत् इत्येव स्त्रियां ङीप् ।

**दधिवामन** न० १शालग्राममूर्त्तिषु वामनमूर्त्तिभेदे ब्रह्मवैo प्रकृतिखo तल्लक्षणञ्च यथा । "अतिक्षुद्रं द्विचक्रञ्च । नवीननीरदोपमम् । दधिवामनकं श्रेष्ठं स्फटिकाभं सुखप्रदम् । दध्योदने क्षोतव्यः वामनः । २दध्योदनेन क्षवनीये वामनभेदे पु० । "दध्योदनेन शुद्धेन स्नात्वा सध्येत दुर्गतः । स्नात्वा त्रैविक्रमं रूपं जपेन्मन्त्रमनन्यधीः" तन्त्रसारे दधिवामनप्रयोगः ।

**दधिवारि** न०ह्रत० दधिमस्तुपदार्थे (दधिर मात) हेमच० ।

**दधिवाहन** पु० अङ्गनामकन्यपपुत्रे "अङ्गपुत्रो महानासीत् राजेन्द्रो दधिवाहनः । दधिवाहनपुत्रस्तु राजा दिविरथोऽभवत्" हरिवं० २१ अ० । दधिवामनपुत्रस्तु पुत्रो दिविरथस्य तु" भा० मा० ४६ अ० ।

**दधिशोण** पु० वानरे त्रिका० ।

**दधिषाय्य** पु०दधि स्थिति सो—आय यत्वम् ।१इष्टे यज्ञभेद० । "दधिषाय्यः" उषा० सू० त्रि० कौ० इष्टौ "दधातेराय्यः हित्वमित्त्वं सुक्च इत्युक्त्वा "मित्रावरुणो दधिषाय्य" इत्युदाजहार" ।

**दधिसक्तु** पु० ब० व० । "दध्युपसिक्ताः सक्तवः "अन्नेन व्यञ्जनम्" पा०समासः । दध्युपसिक्तेषु सक्तुषु । "कन्दुपक्वानि तैलेन पायसं दधिसक्तवः" ति० त०कूर्म्मपु० ।

**दधिसार** पु० ह्रत० । नवनीते हेमच० ।

**दधिस्कन्द** पु० तीर्थभेदे ।

**दधिस्नेह** पु० ह्रत० । दधिसारे त्रिका० ।

**दधिस्य(ध्यस्य)** अतिगाढ्रेन दधीक्षति क्यचि क्विप् अस्य सक् वा । अतिगाढ्रेन दधीक्षायां पर० अक० सेट् । दधिस्यति दध्यस्यति ।

**दधिस्वेद** पु० दध्नः स्वेद इव । तक्रे (घोल) लटाधरः ।

**दधी(च)चि** पु० अथर्वऋषेरौरसे कर्दमप्रजापतिकन्यायां शान्तिनाम्न्यां जाते ऋषिभेदे । इन्द्रयाचितेन तेन च प्राणांस्त्यक्त्वा स्वदेहास्थीनि दत्तानि इन्द्रेण च तैर्वज्रं निर्माय वृत्रासुरो निहतः तत्कथा

"अतेऽस्थिभिर्दधीचस्य न इन्द्रं ब्रिदयद्विषः । तस्मा-

इत्वा ऋषिश्रेष्ठो याच्यतां सुरसत्तमाः"। दधीचास्थीनि देहीति तैर्वधिष्यामहे रिपुम्। स च तैर्याचितोऽस्थीनि यत्नादधिवरत्सदा। प्राणत्यागं कुरुश्रेष्ठ! चकारैवाविचारयन्। सलोकानत्ययान् प्राप्तो देवप्रियकरत्सदा। तस्यास्थिभिरथो शक्रः संप्रहृष्टमनात्सदा। कारयामास दिव्यानि नानाप्रहरणानि च। वज्राणि चक्राणि गदा गुरून् दण्डांश्च पुष्कलान्" भा० शल्य० ५२ अ०। "गते शतक्रतौ चक्तः! कर्दमस्तेन चोदितः। यथोचितं सुदुःखितः प्रादात् विश्वसृजां ततः" इत्युपक्रमे "अथर्वणेऽददाच्चास्मै यया यज्ञो वितन्यते" भाग० ३।२४।२४ अ०। "दध्यङ्ङाथर्वणस्तद्वै यन्मौमेद्यं मदात्मकम्" भाग० ६।६।५१। तस्याथर्वणकर्दमदुःखितत्वादाथर्वणत्वविशेषणम्। "ददौ चास्थीनि देवेभ्यो दधीचिः सुमनात्सदा" अग्निपु० दध्यनूचशब्दे व्युत्पत्तिर्दर्शिता।

**दधीचास्थि** न०ष०त०। तज्जातत्वात् १वज्रे २तच्चास्थिनामके क्षीरजे च त्रिका०।

**दधृष्** त्रि०धृष-क्विप् नि०। १धृष्टे किन्नन्तत्वात् झलि पदान्ते च कुत्वम्। २धर्षके च। "वाजेषु दधृषं कवे" ऋ०२।४२।६। "दधृषम् शत्रूणामभिभावकम्" भा०।

**दधृष्वणि** त्रि० दधृषिगत्याचरति दधृष्+क्विप् ततो वा० वनि। धर्षके। "सासह्यिमधृष्टं चिद् दधृष्वणिम्" ऋ०८।६१।२। [सायः परमेष्ठिने "यमतर्पणमन्त्रः।

**दध्न** पु० दध-बा० न। यमभेदे। "औदुम्बराय दध्नाय नी-

**दध्यन्च्** पु० दधि धारकमञ्चति अनुच-क्विप्। अथर्वर्षिपुत्रे दधीचौ मुनिभेदे "दध्यङ्ङाथर्वणस्तद्वै" भाग०६।६।८।५। "स वा अधिगतो दध्यङ्ङाथर्वणेभ्यां ब्रह्म निष्कलम्" भाग०६।८।५५। "यामथर्वा मनुष्यिता दध्यङ्धियमत्नत इत्यृचमधिलक्ष्य निरुक्ते तु १२।३२ अन्या निरुक्तिरुक्ता "दध्यङ्प्रत्यक्षो ध्यानमिति वा प्रत्यक्षमस्मिन् ध्यानमिति वा"। "दध्यङ् ह यन्मध्वाथर्वणो वामस्य शीर्ष्णा प्र यदीमुवाच" ऋ० १।११६।१२। आथर्वणः अथर्वणः पुत्रो दध्यङ् एतत्संज्ञ ऋषिरस्य शीर्ष्णा युद्धसामर्थ्येन प्रतिच्छिन्नेन शिरसा वाँ युवाभ्यामीमिमं मधुविद्यां यद् यदा खलु प्रोवाच प्रोक्तवान्। तदानीमस्य शिरसः सन्धानलक्षणं पुनर्मानुषस्य शिरसः प्रतिसन्धानलक्षणं च यद्वदीयं कर्म तदाविष्कृत्योमीत्यर्थः। अत्रेयमाख्यायिका "इन्द्रो दधीचे प्रवर्ग्यविद्यां मधुविद्यां चोपदिश्य यदीमानस्य वक्षसि शिरस्ते हेतुस्त्वामी-ल्युवाच। ततोऽश्विनावस्य शिरश्छित्वा दधीचः शिरःप्रक्षिप्यान्यत्र निधाय तत्राश्वं शिरः प्रत्यधत्तां तेन च दध्यङ् ऋचः सामानि यजूंषि च प्रवर्ग्यविद्याश्च मधुविद्याप्रतिपादकं ब्राह्मणं चाश्विनावध्यापयामास। तदिन्द्रो ज्ञात्वा वज्रेण तच्छिरोऽच्छिनत्। अथाश्विनौ तस्य स्वकीयं मानुषं शिरः प्रत्यधत्तामिति। आश्वायनवाजसनेययोः प्रपञ्चेनोक्तम्। तस्य टादावजादौ दधीचः दधीचा इत्यादि। ततः स्वार्थे अण् इञ् वा पृषो० ह्रस्वभावे। दधीच दधीचि इति रूपमित्यवधेयम्।

**दध्यन्न** न० दध्युपसिक्तमन्नम् "अन्नेन व्यञ्जनम्" पा० समासः। दध्युपसिक्ते अन्ने "दध्यन्नं पायसं चैव गुडपिष्टं समोदकम्" याज्ञ० दध्योदनोऽप्यत्र पु०। दध्योदनं हविष्यूर्षम्" याज्ञ०यकृत्प्लुकौ।

**दध्याकर** पु० ६त०। दधिसमूहे शब्दार्थकल्पतरुः।

**दध्यानी** स्त्री दधि-दधिरसमानयति या--नी--क गौरा० ङीष्। (सुदर्शनगुलञ्च) सुदर्शनायाम् रत्नमाला।

**दध्युत्तर** न० ६त०। दधिसहे हे शब्दच०। "पयसः सर्पिषश्चैव दध्नोदध्युत्तरस्य च" हरिवं० ७८२ अ०।

**दध्युत्तरग** न० दध्न उत्तरं गच्छति गम-ड। दधिसहे रत्नमाला। [जटाधरः।

**दध्युद(क)** पु० दधि उदकमिवास्य वा उदादेशः। दधिसहे

**दनायुस्** पु० दनुकन्याभेदे सा च कश्यपपत्नीभेदः दनुशब्दे दृश्यम्। "दनुश्च दनायुश्च भातेव च पितेव च परिजग्मतुस्तत्राहानव इत्याहुः" शत० ब्रा०३।६।४।६ "दनायुषः पुत्राश्चत्वारोऽसुरपुङ्गवाः। विक्षरो बलवीरौ च वृत्रश्चैव महासुरः" भा० आ० ६५ अ०।

**दनु** स्त्री दनुकन्याभेदे सा च कश्यपपत्नीभेदः दानवमाता। "प्रजज्ञिरे महाभागा दनुकन्याश्चतस्रोऽथ। अदितिर्दितिर्दनुः काला दनायुः सिंहिका तथा। क्रोधा प्रधा च विश्वा च विनता कपिला मुनिः। कद्रूश्च मनुजव्याघ्र! दनुकन्यैव भारत। एतासां वीर्यसम्पन्नं पुत्रपौत्रमनन्तकम्। "चत्वारिंशद्दनोः पुत्राः ख्याताः सर्वत्र भारत। तेषां प्रथमजो राजा विप्रचित्तिर्महायशाः। शम्बरो नमुचिश्चैव पुलोमा चेति विश्रुतः। असिलोमा च केशी च दुर्जयश्चैव दानवः। अयःशिरा अश्वशिरा अश्वशङ्कुश्च वीर्यवान्। तथा गगनमूर्धा च वेगवान् केतुमांश्च सः। स्वर्भानुरश्वसश्चैव पृषपर्वाजकस्तथा। अश्वयोवश्च सूक्ष्मश्च तुङ्ग-

खड्ग महाबलः। एकपादेकचक्रश्च विरूपाक्षमहोदरौ। निचन्द्रश्च निकुम्भश्च कुजटः कपटस्तथा। शरभः शलभश्चैव सूर्य्यचन्द्रमसौ तथा। एते ख्याता दनोर्वंशे दानवाः परिकीर्त्तिताः। अन्यौ तु खलु देवानां सूर्य्याचन्द्रमसौ स्मृतौ। अन्यौ दानवसङ्घानां सूर्य्यचन्द्रमसौ तथा। इमे च वंशाः प्रथिताः सत्त्ववन्तो महाबलाः। दनुपुत्रा महाराज! दश दानववंशजाः। एकाक्षोऽमृतपो वीरः प्रलम्बनरकावपि। वातापिः शकुतपनः षष्ठश्चैव महासुरः। गविष्ठश्च वनायुश्च दीर्घजिह्वश्च दानवः। असंख्येयाः स्मृतास्तेषां पुत्राः पौत्राश्च भारत!" भा०का०६५अ०। दनोरपत्यम् यञ्। दानव दनोरपत्ये पुंस्त्री स्त्रियां ङीप्।

**दनायु** पु० दानवभेदे दानवशब्दे दृश्यम्। अयं शब्दः दनायुम् शब्दात् प्राक् पाठ्यः।

**दनुज** पु० दनोर्जायते जन-ड। दनोरपत्ये असुरे अमरः।

**दनुजद्विष्** पु० दनुजान् द्वेष्टि द्विष-क्विप्। देवे हेम०। दनुजारिशब्दतोऽप्यत्र।

**दनुसूनु** पु० दनु०। दानवे जटाधरः।

**दन्त** पु० अन्नभौदितगन्धे दम-तन्। १मुखान्तःस्थचर्वणसाधनेऽस्थिभेदे (दाँत) २कुञ्जे, ३पर्वतनितम्बे ४खातनि, ५द्वात्रिंशत्संख्यायाञ्च मेदि०। अत एव नैषध० दन्तानां द्विगुणितषोड़शपदार्थरूपत्वेन भङ्ग्या द्वात्रिंशत्त्वं वर्णितं यथा। "उद्देशपर्वणापि लक्षणेऽपि द्विधोदितैः षोड़शभिः पदार्थैः। आत्विचिकीं वहन्नहिमांशौ तां मुक्तिकामाकलितां प्रतीमः"। ६गैलग्रहे त्रिका० (१३३) रूपे ७पञ्चमात्राप्रभेदे छन्दोग्य० सदन्ततया जन्मनि जन्मोत्तरं मासभेदे च तज्जन्मफलं ज्यो०त० उक्तं यथा "जातः सदन्तः पितृमातृहन्ता तातं विहन्यात् प्रथमे तु मासे। अम्बां द्वितीये सहजं ततीये मासे चतुर्थे शुभकारकः स्यात्। मिष्टान्नभोजी शुभगः सुताख्ये५ षष्ठे सुखी पण्डितकल्पबुद्धिः। ततोऽधिकः स्यात् बलवान् द्यूनाख्ये७ मासेऽष्टमे वित्तसुखैर्विहीनः। सुरप्रतापी नवमे खलु च दशमे तथा। एकादशे द्वादशे च सुखी च शुभगो भवेत्। कृत्वा पुत्तलकान् सुगन्धैर्गन्धकैस्तथा। स्रोतःसु संक्रमे चापि स्नापयेत् शुक्लपुष्पकैः। स्नानं संक्रमणस्थाधः शम्भोर्हर्म्यनन्तरः। होमं विप्रार्च्चनञ्चैवमशुभे दन्तदर्शने"। "स्निग्धा घनाश्च दशनाः सुतीक्ष्णदंष्ट्राः समाश्च शुभाः" ह०स०६७अ०। दन्तमूलप्रादुर्भावश्च गर्भोपनिष्क्रमे गर्भे सप्तममासे जायते इति प्रतिपादितम्।

**दन्तक** त्रि० दन्ते दन्तमार्ज्जने प्रसितः कन्। १दन्तमार्ज्जनप्रसिते। दन्त इव कन्। २गैलग्रहे गिरेः प्रदेशादुद्वर्त्तिनिर्गते ३पाषाणभेदे च हेमच०। स्वार्थे क। ४दन्तशब्दार्थे पु०।

**दन्तकर्षण** पु० दन्तान् कर्षति कृष-ल्यु। जम्बीरे शब्दर०।

**दन्तकाष्ठ** न० दन्तधावनार्थं काष्ठम्। १दन्तधावने काष्ठे। तत्काष्ठमस्त्रत्र साध्यतया अच्। २विकङ्कतवृक्षे पु० राजनि०। सफलतत्काष्ठभेदाः ह० स० ८५ अ० उक्ता यथा

"वल्लीलतागुल्मतरुप्रभेदैः स्युर्दन्तकाष्ठानि सहस्रशो यैः। फलानि वाच्यान्यतितत्प्रसङ्गो मा भूदतो वक्ष्यथ कामिकानि। अज्ञातपूर्वाणि न दन्तकाष्ठान्यद्याच्च पत्रैश्च समन्वितानि। न युग्मपर्वाणि न पाटितानि न चोर्ध्वशुष्काणि विना त्वचा वा। वैकङ्कतश्रीफलकाश्मरीषु ब्राह्मी द्युतिः क्षेमतरी सुदाराः। इङ्गिबेंटेऽर्के प्रचुरं च तेजः पुत्रा मधूके कफमे प्रियत्वम्। लक्ष्मीः शिरीषे च तथा करञ्जे प्लक्षेऽर्थसिद्धिः समभीप्सिता स्यात्। मान्यत्वमायाति जनस्य जात्यां प्राधान्यमश्वत्थतरौ वदन्ति। आरोग्यमायुर्बदरीद्रुमोरैश्वर्यं खदिरे सविल्वे। द्रव्याणि चेष्टान्यतिसक्तके स्युः प्राप्नोति तान्येव पुनः कदम्बे। निम्बेऽर्थाग्निः करवीरेऽम्लवल्विर्पाण्डीरे खादिदमेव प्रभूतम्। शम्यां शत्रूनपहन्यर्जुने च श्यामायां च द्विषतामेव नाशः। साकेऽक्षकर्षे च वदन्ति गौरवं समद्रदारावपि चाटरूपके। याञ्चाभ्यमायाति जनस्य सर्वतः प्रियङ्गुश्यामागसञ्जयुदाड़िमैः। उदङ्मुखः प्राङ्मुख एव वाग्यतं कामं यथेष्टं हृदये निवेश्य। अद्यादनिन्द्यं च सुखोपविष्टः प्रक्षाल्य जलाच्च शुचिप्रदेशे। अभिमुखपतितं प्रशस्तदिक्स्थं शुभमतिशोभनमूर्ध्वसंस्थितं यत्। अशुभकरमतोऽन्यथा प्रदिष्टं स्थितपतितं च करोति कष्टमग्रम्"।

ब्रा० त० नरसिंहपुराणे च "दन्तकाष्ठस्य वक्ष्यामि समासेन प्रशस्ततास्। सर्वे कण्टकिनः पुण्याः क्षीरिणश्च यशस्विनः"। महाभारते। "तिक्तं कषायं कटुकं सुगन्धि कण्टकान्वितम्। क्षीरिणो वृक्षगुल्माद्यान् भक्षयेद्दन्तधावने"। निषिद्धकाष्ठानि यथा "गुवाकताडहिन्तालाकतथा ताड़ी च जेतकी। खर्জ্জूरनारिकेलौ च सप्तैते वृक्षराजकाः। वृक्षराजगिरा पत्रैर्वैः कृत्यादन्तधावनम्। तावद्भवति चाण्डालो याव-

दन्तां न पश्यति । तस्य स्त्रीत्वं परिभाषणाद् विष्णुः "कनिष्ठापर्वमं स्त्रीत्वं कनूचं द्वादशाङ्गुलम् । प्रातर्भूत्वा च यतवाक् भक्षयेद्दन्तधावनम्" मरीचिः द्वादशाङ्गुलञ्च वैद्यानां मूढाग्रान्तु षडङ्गुलम् । चतुरङ्गुलमानेन नारीणां विधिरुच्यते । अनरप्रमाणाच्च षडङ्गुलसदाहृतम्" । दन्तधावनदन्तपवनशब्दे ऽधिकं द्रष्टव्यम् । (राजनि०

**दन्तकाष्ठक** न० दन्तधावनोपयोगि काष्ठमस्मात् । आङ्गुल्यादित्वे

**दन्तकूर** पु० दन्ताः कूरमस्त्रमिव चर्व्यत्वात् यत्र । संग्रामे नीलकण्ठः "माद्रीपुत्रः सहदेवः कलिङ्गान् समागतान-जयद्दन्तकूरे" भा० उ० २३ अ० । "अयं कपाटेन जघान पार्थ्रं तथा कलिङ्गान् दन्तकूरे समर्दे" ४७ अ० ।

**दन्तक्रूर** पु० दन्ताः क्रूरा यत्र ।।देशभेदे २तद्वृक्षे च नीलक० । "नक्तहिंसाञ्च तक्षिन् षड्रात्रि चतुर्दश । पुनर-न्यानि जघाह दन्तक्रूरं जघान ह" भा० द्रो० ७० अ० ।

**दन्तधर्ष** पु० ६त० दन्तानां परस्परघर्षभेदे । "यस्य वै भुक्तमा-त्रस्य हृदयं बाधते क्षुधा । जायते दन्तधर्षश्च स गतायुः कृतो बुधैः" मार्क० पु० ।

**दन्तचाल** पु० दन्तानां चालयत्यनमत्र । क्षुद्रतोक्ते आतु-रोपद्रवभेदे (दाँतनड़ा) । आतुरोपद्रवोपक्रमे "नेत्रकर्म निमेषञ्च तृष्णां कासं प्रजागरम् । सभक्ते दन्तचालञ्च तांस्तानन्यानुपद्रवान्" ।

**दन्तच्छद** पु० दन्ताच्छाद्यतेऽनेन छद-णिच्-घ हस्वः । ओष्ठे (ठोंठ) हलायुधः । "निंसो दन्तच्छदं न वा" भट्टिः । "दन्तच्छदैः सव्रणदन्तचिह्नैः" ऋतुसंहारः ।

**दन्तच्छदोपमा** स्त्री दन्तच्छद ओष्ठ उपमीयतेऽनया कप् । बिम्बीलतायाम् (तेलाकुचा) राजनि० । तत्फलेन हि ओष्ठसादृश्यं प्रसिद्धम् ।

**दन्तजात** त्रि० जातो दन्तोऽस्य निष्ठान्तत्वात् परनिपातः । १जातदन्ते । "दन्तजातेऽनुजते वा ऋतचूडे च संस्थिते" मनुः । दन्तजननं तज्जननयोग्यकालश्चोभयमपि दन्तजात शब्देनोच्यते । मासोपनिषदि सप्तममासे दन्तजननकाल-स्योक्तत्वात् तत्र दैवात् दन्तानुत्पत्तावपि जातदन्तकाल-त्वात् दन्तजनन एवाशौचनिमित्तता" शुद्धित० ।

**दन्तजाड** न० दन्तानां मूलं कफो० जाड० । दन्तमूले ।

**दन्तदर्शन** न० दन्तानां दर्शनम् दृश-णिच्-ल्युट् । युद्धस्यादौ योधानां प्रतियोधं प्रति स्वदन्तान् बहिष्कृत्य दर्शने (दाँतखाहटि) "दन्तदर्शनमारब्धतो युद्धं प्रवर्त्तते" भा० द्रो० ७१ अ० ।

**दन्तधावन** पु० दन्तान् धावयति शोधयति धाव-ल्यु । १खदिरवृक्षे, २शुक्लकरञ्जे, राजनि० २वकुले शब्दच० । एतेषां तत्साधनत्वात् तथात्वम् । भावे ल्युट् । ३दन्त-मार्जने तत्प्रकारो यथा "प्रातर्भुक्त्वा च हृदयं कषायं कटुतिक्तकम् । भक्षयेद्दन्तधावनं दन्तमांसान्यबाधयन् । तस्य काष्ठानि यथा "कोविदारकरवीरार्कमार्कवकुलास-नान् । दन्तकाष्ठार्थमन्वे तु सर्वान् कण्टकिनोऽग्रधुः । खदिरश्च कदम्बश्च करञ्जश्च वटस्तथा । तिन्तिड़ी वेणु-पृक्षश्च शाल्मलिस्त्वी तथैव च । अपामार्गश्च बिल्वश्च अर्कश्चोडुम्बरस्तथा । एते प्रशस्ताः कथिता दन्तधावन-कर्मणि" । तत्र निषिद्धकाष्ठानि यथा "गुवाकताडहिन्-तालखर्जूरैः केतकीयुतैः । नारिकेलेन ताड्या च न कुर्याद्दन्तधावनम्" । तस्य दिग्भेदफलभेदे शुभाशुभफलं यथा "स्नायुः स्याद्दक्षिणास्येन पश्चिमास्येन चायुषः । पूर्वास्येनोत्तरास्येन सम्पदो दन्तधावनात्" । तस्य तिथि-विशेषे निषेधो यथा "प्रतिपद्दर्शषष्ठीषु नवम्येकादशीषु च । दन्तानां काष्ठसंयोगो दहत्यासप्तमं कुलम्" । दन्त-धर्षणानन्तरं चक्षुःसेचनं यथा । दन्तानूर्द्धमधो हृदा प्रातः सिञ्चेच्च लोचने । तोयपूर्णसुखस्पर्शेन दृष्टिराशु प्रसीदति" । रोगविशेषे दन्तकाष्ठवर्जनं यथा "अर्दितः कर्णशूली च दन्तरोगी नवज्वरी । शोषी कासी च मूर्च्छार्त्तो दन्तकाष्ठं विवर्जयेत्" । तस्य गुणा यथा "निर्हन्ति वक्त्रवैरस्यं जिह्वादन्तास्यितं मलम् । आरोग्यं रुचिमाधत्ते सद्यो दन्तविशोधनम्" इति राजवल्लभः । "कृतशौचस्ततः प्राज्ञः कुर्याद्दन्तस्य धावनम् । जिह्वाया मार्जनञ्चापि रसज्ञाच्छदनादिभिः । दक्षिणाभिमुखो भूत्वा पश्चिमाभिमुखस्तथा । न दन्तधावनं कुर्यात् कुर्याच्चेद्वारकी भवेत् । मध्यमानामिकाभ्याञ्च हस्ताङ्गु-ष्ठेन च द्विजः । दन्तस्य धावनं कुर्यात् तर्जन्या न कदाचन । अश्वत्थवटविल्वानां धावनात् काञ्चिकया बुधः । न दन्तधावनं कुर्यान्नखेनेन्द्रस्य च । नित्यक्रियाफलं प्रेप्सुस्त्वरया दन्तधावनम् । प्रभाते कृते प्राज्ञः सूर्योदयविवर्जिते । सूर्योदये द्विजश्रेष्ठ ! यः कुर्याद्दन्त-धावनम् । नित्यक्रियाफलं तस्य सर्वमेव विनश्यति । यः स्नानसमये कुर्यात् जैमिने ! दन्तधावनम् । निराशाः पितरो यान्ति तस्य देवाः सुरर्षयः । दन्तस्य धावनं कुर्याद्दो मध्याह्नापराह्णयोः । तस्य पुण्यं न सङ्ख्यन्ति देवताः पितरो जनम् । स्नानकाले

पुष्करिण्यां यः कुर्यादन्तधावनम्। तावज्ज्ञेयः स चाण्डालो यावद्गङ्गां न पश्यति। भगवद्युदिते सूर्ये यः कुर्यादन्तधावनम्। तद्दत्तकार्वी पितरो भुञ्जा गच्छन्ति दुःखिनः। उपवासदिने विप्र! पितृश्राद्धदिने तथा। न च तत्फलमाप्नोति दन्तधावन कृत्वरः। प्रभाते मार्जयेद्दन्तान् वाससा रसनां तथा। कुर्याद्द्वादश विप्रेन्द्र! कवलानि जलैर्बुधः। उपवासे पितृश्राद्धे विधिनानेन कर्मिणे!। दन्तधावनकर्त्तारः संपूर्णं लभते फलम्" पाद्मे क्रियायोगसारः। "अधःकाले तु सम्प्राप्ते शौचं कृत्वा यथार्थवत्। ततः स्नानं प्रकुर्वीत दन्तधावनपूर्वकम्। सदा पर्व्वदिने नित्यं भक्षयेदुदनधावनम्। कदम्बबिल्वखदिरकरवीरवटार्जुनाः। तगरं इङ्गुदी जातीकरञ्जार्कोतिलकाः। अम्बूमधूकापामार्गशिरीषोडुम्बरासनाः। क्षीरिकण्टकिवृक्षाद्याः प्रशस्ता दन्तधावने। कटुतिक्तकषायाश्च धनारोग्यसुखप्रदाः। प्रक्षाल्य भुक्त्वा च शुचौ देशे क्षिप्त्वा तदाचमेत्। अमावास्यां तथा षष्ठ्यां नवम्यां प्रतिपद्यपि। वर्जयेदुदनकाष्ठन्तु तथैवार्कस्य वासरे। अभावे दन्तकाष्ठस्य निषिद्धायां तथा तिथौ। अपां द्वादश गण्डूषैः कुर्य्यात् सुखशोधनम्" इति गारुडे २१४ अ० "मैत्रं प्रसाधनं स्नानं दन्तधावनमञ्जनम्। पूर्वाह्ण एव कुर्वीत देवतानाञ्च पूजनम्" मनुः।

**दन्तपत्र** न० दन्त इव पत्रमस्य। दन्ताकारपत्रयुक्ते कर्णभूषणभेदे मेदि०। "विलासिनीविभ्रमदन्तपत्रम्" रघुः "कर्णावसक्तासनदन्तपत्रम्" कुमा० दन्तः गजदन्तः तन्निर्मितं पत्रम्। २गजदन्तनिर्मिते पत्राकारे कर्णभूषणभेदे च "अङ्गदये! मदीयं निपतितं दन्तपत्रम्" काद०।

**दन्तपत्रक** न०दन्त इव शुभ्रं पत्रं दलं यस्य कप्। कुन्दपुष्पे शब्दच०। स्वल्पार्थे कोपि यत दन्तम्। दन्तपत्रिका स्वल्पे तत्रार्थे स्त्री विदग्धलोलोचितदन्तपत्रिका" माघः

**दन्तपवन** न० दन्तं पुनाति अनेन पू-करणे ल्युट्। १दन्तकाष्ठे। भावे ल्युट्। २दन्तधावने च। तत्प्रकारो भावप्र० उक्तो यथा

"तलादौ दन्तपवनं द्वादशाङ्गुलमायतम्। कनिष्ठिकापरीणाहसुवृत्तपर्वितमग्रतः। अदुष्यन्ति यदापि प्रत्यग्रं शस्तभूमिजम्। अवेक्ष्यन्तुञ्च दोषञ्च रसं वीर्यञ्च योजयेत्। कषायं मधुरं तिक्तं कटुकं प्रातः कल्पितः। स्निग्धं तिक्तके श्रेष्ठः कषाये खदिरस्तथा। मधूको मधुरे श्रेष्ठः करञ्जः कटुके तथा। क्षौद्रव्योषत्रिवर्गाक्तं सतैलं सैन्धवेन च। चूर्णेन तेजोयुक्तां च दन्तान्हित्वं विशोधयेत्। एकैकं पर्वयेदुदन्तं मृदुना कूर्चकेन च। दन्तशोधनचूर्णेन दन्तमांसान्यबाधयन्। तद्दोषमन्थ्योपदेहौ तु श्लेष्माणं चापकर्षति। वैशद्यमग्न्यभिरुचिं सौमनस्यं करोति च। न खादेद्दन्तालोष्टजिह्वारोगग्रसङ्गवे। अथास्यपाके स्रावे च कासश्वित्रकायमीषु च। दुर्बलोऽजीर्णभक्तश्च मूर्च्छार्त्तो मदपीडितः। शिरोरुगार्त्तक्षुधितः श्वासःपानक्लमान्वितः। अर्दितः कर्णशूली च दन्तरोगी च वर्जयेत्"

**दन्तपात** पु०६त०। १दन्तानां पतने। २वर्षभेदे अष्टानां स्वतो दन्तविशेषपतने च तत्कालश्च ह० सं०६६अ० उक्तो यथा "षड्भिर्दन्तैः सिताभैर्भवति हयशिशुकैः कषायैर्हिवर्षः सन्दंशैर्मध्यमान्यैः पतितसुदितैस्तत्प्रवृद्यप्तावृदिकोऽन्तः। सन्दंशानुक्रमेण त्रिकपरिगताः कालिकापीतशुक्लाः काचा माचोरुशङ्खावटचलनतो दन्तपातश्च विद्वि"

**दन्तपाली** स्त्री ६त०। दन्तानां "तालोष्ठदन्तपाल्योजिह्वानेलान्तपायुकरचरणैः। रक्तैस्तु रक्तधारा बहुरुग्वनितार्थपुत्रयुताः" ह० स० ६८ अ०।

**दन्तपुप्पुटक** पु० दन्तरोगभेदे दन्तरोगशब्दे सुश्रुतवाक्यम्।

**दन्तपुष्प** न०दन्त इव शुभ्रं पुष्पमस्य। १कुन्दे, २कतकफले च शब्दच०।

**दन्तफल** न० दन्त इव शुभ्रं फलमस्य। १कतकफले शब्दच० दन्तवत् शुभ्रं फलमस्य। २कपित्थे पु० ३पिप्पल्याम् राजनि० स्त्री टाप्।

**दन्तभाग** पु० दन्तसम्बन्धी भागः। गजस्य सुखात् स्कन्धपर्य्यन्ते अधभागे अमरः।

**दन्तमल** न० ६त०। दन्तसम्भवे क्षारा०।

**दन्तमांस** न० दन्तसंलग्नं मांसम्। दन्तसंलग्नमांसे (मेढ़े) ख्याते मांसभेदे।

**दन्तमूल** न० दन्तरोगभेदे दन्तरोगशब्दे दृश्यम्।

**दन्तमूलिका** स्त्री दन्त इव शुभ्रं मूलं यस्याः कप्। दन्तीवृक्षे राजनि०। [दृश्यम्।

**दन्तमूलीय** पु० दन्तमूले भवः छ। तवर्गादौ। दन्त्यशब्दे

**दन्तरोग** पु० ६त०। मुखरोगान्तर्गते दन्तदन्तमूलगते रोगभेदे स च रोग. सुश्रुते उक्तो यथा।

"कफातो मुखरोगाणां निदानं व्याख्यास्यामः। मुख-

रोगाः पञ्चषष्टिः सप्तक्षायतनेषु तत्रायतनान्योष्ठौ दन्तमूलानि दन्ता जिह्वा तालुकण्ठः "सर्वाणि चेति। तत्राष्टावोष्ठयोः। पञ्चदश दन्तमूलेषु, अष्टौ दन्तेषु, इति चोपक्रम्योक्तं यथा।

"दन्तमूलगतास्तु शीतादोः दन्तपुप्पुटको२ दन्तवेष्टकः३ शौषिरो ४महाशौषिरः५ परिदरः६ उपकुशो७ दन्तवैदर्भोऽष्ट वर्ज्यनोऽधिमांसो१०नाद्यः११ पञ्चेति" इत्युक्तम्। "शोणितं दन्तवेष्टेभ्यो यस्माच्चात् प्रवर्त्तते। दुर्गन्धीनि सलक्षणानि प्रक्लेदीनि बहूनि च। दन्तमांसानि शीर्य्यन्ते पच्यन्ति च परस्परम्। शीतादो नाम स व्याधिः कफशोणितसम्भवः१। दन्तयोस्त्रिषु वा यस्य स्रवयुः सरुजो महान्। दन्तपुप्पुटको ज्ञेयः कफरक्तनिमित्तजः२। स्रवन्ति पूयरुधिरं चला दन्ता भवन्ति च। दन्तवेष्टः स विज्ञेयो दुष्टशोणितसम्भवः३। स्रवयुर्दन्तमूलेषु रुजावान् कफरक्ततः। लालास्रावो स विज्ञेयः कण्डूमान् शौषिरो गदः४। दन्तास्थन्ति वेष्टेभ्यस्तानु चाप्यवदीर्य्यते। दन्तमांसानि पच्यन्ते सुषिरञ्च परिपीयते। यस्मिन् स सर्वजो व्याधिर्महाशौषिरसंज्ञकः५। दन्तमांसानि शीर्य्यन्ते यस्मिन् क्रीवति चाप्यसृक्। पित्तासृक्कफजो व्याधिर्ज्ञेयः परिदरो हि सः६। वेष्टेषु दाहः पाकश्च तेभ्यो दन्तास्थन्ति च। "व्याघट्टिताः प्रस्रवन्ति शोणितं मन्दवेदनाः। व्याध्मायन्ते स्रुते रक्ते सुखं पूति च जायते। यस्मिन्नुपकुशः स स्यात्पित्तरक्तकृतो गदः७। दष्टेषु दन्तमूलेषु संरम्भो जायते महान्। भवन्ति च चलादन्ताः स वैदर्भोऽभिघातजः८। मारुतेनाधिको दन्तो जायते तीव्रवेदनः। वर्ज्यनः स मतो व्याधिर्जाते रक्ते च प्रशाम्यति९। ज्ञातव्ये पञ्चमे दन्ते महान् शोथो महारुजः। लालास्रावो कफकृतो विज्ञेयः सोऽधिमांसकः१०। दन्तमूलगता नाद्याः पञ्च ज्ञेया यथेरिताः११। "दन्तगतास्तु दालनः१ क्रिमिदन्तको२ दन्तहर्षः३ भञ्जनकः४ दन्तशर्करा५ कपालिका६ श्यावदन्तो७ हनुमोक्षश्चेति। दालने बहुधा दन्ता यस्मिंस्तीव्ररुजान्विताः। दालनः स इति ज्ञेयः सदागतिनिमित्तजः। क्षणाच्छ्वयी चलः स्रावी सशब्दो महारुजः१। अनिमित्तरुजो वाताद्विज्ञेयः क्रिमिदन्तकः२। दशनाः शीतक्षणाच्च सहन्ते स्पर्शनं न च। यत्र तं दन्तहर्षन्तु व्याधिं विद्यात्सुधीरत्वात्३। वक्रं वक्रं भवेद्यस्मिन् दन्तभङ्गश्च तीव्ररुक्। कफवातकृतो व्याधिः स भञ्जनकसंज्ञितः४। शर्करेव स्थिरीभूतो मलोदन्तेषु दृश्यते। सा दन्तानां शुषिरा तु विज्ञेया दन्तशर्करा५। दलन्ति दन्तवल्कानि यदा शर्करया सह। ज्ञेया कपालिका सैव दशनानां विनाशिनी६। योऽस्थिमध्येषु पित्तेन दग्धो दन्तस्त्वशेषतः। श्यावतां नीलतां वापि गतः स श्यावदन्तकः७। वातेन तैस्तैर्भावैस्तु हनुसन्धिर्विसंहतः। हनुमोक्ष इति ज्ञेयो व्याधिरिष्टैतलक्षणः८"।

**दन्तलेखक** त्रि॰ दन्तान् लिखति जीविकार्थम् लिख—"संज्ञायाम्" पा॰ ण्वुल् "नित्यं क्रीडाजीविकयोः" पा॰ नित्यस॰। दन्तलेखनरूपजीविकायुक्ते। "खञ्जे-जीविकार्थे" पा॰ पूर्वपदस्यादुदात्तत्वम्।

**दन्तवक्र** पु॰ करूषाधिपे द्वापरयुगोद्भवे क्षिरण्यकशिपोरवतारभूते नृपभेदे "क्षिरण्यकशिपुर्योऽसौ दैत्यराजोऽभवत् पुरा। शृणुकौत्स्यां त संजज्ञे तनयो हृदयर्भयः। करूषाधिपतिर्वीरो दन्तवक्रो महाबलः" हरिवं॰ ३५ अ॰। "अधिराजाधिपश्चैव दन्तवक्रं महाबलम्। जिगाय करदञ्चैव कृत्वा राज्ये न्यवेशयत्" भा॰स॰३०अ॰। सहदेवदक्षिणदिग्विजयोक्तौ "द्वारवत्यां निवसता यदुसिंहेन तेन वै" इत्युपक्रमे "दन्तवक्रश्च कारूषो निहतो दक्षिणापथे" हरिवं॰१७१अ॰। द्वारकावासकाले कृष्णेन वधो वर्णितः। "भालचक्रोद्भवौ दन्तौ दन्तवक्रश्च पार्श्वतः!। पार्षदप्रवरौ विष्णोर्विप्रशापात् पदच्युतौ" भाग॰ ७।१।३२ इत्युपक्रमे क्षिरण्याक्षादिजन्मनामोल्लेखानन्तरम् "तावेव साम्प्रतं जातौ भालचक्रात्मजौ तव। अधुना शापनिर्मुक्तौ कृष्णचक्रहतांहसौ"। ४४ "कृष्णोऽपि तमहन् गुर्व्यां कौमोदक्या महाबलः। गाढनिर्भिन्नहृदय उद्वमन् रुधिरं मुखात्। प्रसार्य केशान् बाहूंश्च परेषां व्यचरद्बलः। ततः सूक्ष्मतरं ज्योतिः कृष्णमाविशदद्भुतम्" भाग॰१०।७७।७

**दन्तवल्क** पु॰ दन्तस्य वल्कमिव। दन्तावरकचर्मात्मके मांसभेदे "दलन्ति दन्तवल्कानि यदा शर्करया सह" सुश्रुतः।

**दन्तवर्त्ति** स्त्री दन्तनिर्मिता वर्त्तिः। "दन्तैर्हस्तिवराहोष्ट्र गवाश्वाजखरोद्भवैः सशङ्खशौक्तिकाभ्रौषिफेनैर्मरिचादिभिः चतुर्गुणमपि व्याधिं दन्तवर्त्तिर्निवर्त्तयेत्" चक्रदत्तोक्ते वर्त्तिकाभेदे। [ओषे हेम॰।

**दन्तवस्त्र** न॰ दन्तस्य वस्त्रमिव छादकत्वात्। दन्तवाससि

**दन्तवासस्** न॰ दन्तस्य वास इवाच्छादकत्वात्। ओष्ठे लिङ्गा॰

"तृणां यदारोहति दन्तवाससा" कुमा० । [राजनि० ।

**दन्तवीज(क)** पु० दन्त इव बीजमस्य वा कप् । दाड़िमीवृक्षे

**दन्तवेष्ट** पु० सुश्रुतोक्ते दन्तरोगभेदे दन्तरोगशब्दे दृश्यम् ।

**दन्तवैदर्भ** पु० सुश्रुतोक्ते दन्तरोगभेदे दन्तरोगशब्दे दृश्यम् ।

**दन्तशङ्कु** पु० "बडिशो दन्तशङ्कुश्चानतास्ये तीक्ष्णकण्टकप्रथमवयवसन्निभे" सुश्रुतोक्ते अस्त्रभेदे ।

**दन्तशठ** पु० दन्तान् शठति क्लेदयति शठ-अच् । १जम्बीरे २कपित्थे ३कर्मरङ्गे, ४नागरङ्गे च । ५चाङ्गेर्यां ६क्षुद्रकास्त्रिकायां स्त्री० मेदिनि० ७अस्त्रे हेमच० क्षुद्रकास्त्रिकायाम् स्त्री राजनि० ।

**दन्तशर्करा** स्त्री दन्तस्य शर्करेव । दन्तरोगभेदे दन्तरोगशब्दे दृश्यम् । [ख्याते चूर्णभेदे त्रिका० ।

**दन्तशाण** पु० दन्तस्य शाण इव चिक्कणताहेतुत्वात् (मिसि)

**दन्तशूल** न० दन्तस्य शूलमिव । दन्तवेदनायाम् । "शीर्षरोगेऽक्षिरोगे च दन्तशूले गलग्रहे" भा० श्रा०३५ अ० ।

**दन्तशोफ** पु० दन्तस्य शोफ इव । दन्तार्बुदे (दाँतेर आव) राजनि० । [भागे मांसपिण्डे शब्दच०]

**दन्तसिरा** स्त्री दन्तस्य सिरा यत्र । (मेड़े) ख्याते दन्ताधो-

**दन्तहर्ष** पु० सुश्रुतोक्ते दन्तरोगभेदे दन्तरोगशब्दे दृश्यम् ।

**दन्तहर्षक** पु०दन्तान् हर्षयति हृष-णिच्-ण्वुल् । जम्बीरे जटाधरः । [दन्तार्थीय तद्भवादौ त्रि० ।

**दन्ताग्र** न० दृत० । दन्तस्याग्रे ततः गङ्गा० भवादौ ञ् ।

**दन्ताघात** पु० दन्तानाहन्ति आ+हन-अच् उप० स० । १निम्बूके । भावे घञ् । २दन्तैराहनने राजनि० । "दन्ताघातविदारितारिरुधिरैः सिन्दूरशोभाकरम्" गणेशध्यानम् । रतौ तत्स्थानानि यथा "स्तनयोर्गण्डयोश्चैव ओष्ठे चैव तथाधरे । दन्ताघातः प्रकर्त्तव्यः कामिनीनां सुखावहः" कामशास्त्रम् ।

**दन्ताद** पु० "केशरोमनखादाच्च दन्तादाः चिक्कणाश्चया । कुष्ठजाच्च परीसर्पात्तेषां श्रोणितसम्भवाः" सुश्रुतोक्ते दन्तखादकक्लमिरोगभेदे । "दन्तादानां समुद्दिष्टं विधानं सुखरोगिणाम्" सुश्रु० ।

**दन्तादन्ति** त्रि० दन्तैश्च दन्तैश्च प्रहृत्य प्रवृत्तं युद्धम् इच् समा० पूर्वपदोदीर्घः । परस्परदन्तप्रहारेण प्रवृत्ते युद्धे "कचाकचि युद्धमासीद्दन्तादन्ति नखानखि" भा० कर्ण० ४६ अ० । [जातित्वात् ङीष् ।

**दन्तायुध** पुं स्त्री०दन्ता आयुधमिवास्य । शूकरे त्रिका० स्त्रियां

**दन्तार्बुद** पु० दन्तस्यार्बुदमिव । दन्तरोगभेदे राजनि० ।

**दन्तालिका** स्त्री दन्तान् अलति भूषयति, तेभ्यो वा पर्य्याप्नोति अल+ण्वुल् । वल्गायाम् । (लागाम) त्रिका० । "दन्तालिकाधरक्षतिरक्तपाणियुग्मम्" । (वल्गयाक्तम्) माघः। अण् गौ०ङीष् दन्तानां तत्रार्थे वैजय० । [अमरः।

**दन्तावल** पु० दन्त+अस्त्यर्थे वलच् पूर्वपददीर्घः । हस्तिनि

**दन्तिका** स्त्री दम-तनू+गौरा० ङीष् स्वार्थे क हृस्वः । दन्तीवृक्षे अमरः ।

**दन्तिजा** स्त्री दन्तिका+पृषो० । दन्तीपर्णौ शब्दर० ।

**दन्तिन्** पु० दन्त+अस्त्यर्थे इनि । हस्तिनि अमरः "अनिर्वाणस्य दन्तिनः" रघुः । "पिष्टाद्विपृष्ठाक्षरसा च दन्तिनः" माघः । [दन्तीवृक्षे राजनि० ।

**दन्तिनी** स्त्री दन्तसदाकारोऽस्त्यस्याः मूले इनि ङीप् ।

**दन्तिमद** हृत० । हस्तिमदे गन्धद्रव्यभेदे शब्दार्थचि० ।

**दन्तिमूलिका** स्त्री दन्ति गजदन्तयुक्तमिव मूलमस्याः कप् कापि अत इत्त्वम् । दन्तीवृक्षे राजनि० ।

**दन्ती** स्त्री दम-तनू गौरा०ङीष् । १उड्डम्बरपर्णी, प्रत्यक्पर्ण्यौषधौ अमरः । दन्तः गजदन्त इव मूलमस्त्यस्याः अच् गौरा०ङीष् । २स्वनामख्याते वृक्षे भावप्र० "क्षुद्रदीर्घप्रभेदेन प्रोक्तं दन्तीद्वयं बुधैः। दन्तीद्वयं सरं पाके रसे च कटु दीपनम् । गुदाङ्कुराश्मशूलास्रकण्डूकृमिविदाहनुत् । तीक्ष्णोष्णं हन्ति पित्तास्रकफगोदोरकृमीन्" भावप्र० तद्गुणा उक्ताः ।

**दन्तीबीज** न० दन्त्या इव बीजमस्य । जयपाले राजनि० ।

**दन्तुर** त्रि० उन्नताः दन्ताः सन्त्यस्य दन्त+उरच् । १उन्नतदन्तयुक्ते, उन्नतानते विषमे स्थाने च शब्दार्थचि० । "शूकरे निहते चैव दन्तुरो जायते नरः" ज्ञाता० तथाभवनसाधनं कर्मविशेष उक्तः। "कदाचिद्दुदन्तुरो मूर्खः कदाचिल्लोमशः सुखी । कदाचित् तन्द्रितो दुःखी कदाचिच्छुचा सतीति" सारसङ्ग्रहः । "अमलमणिगलाका दन्तुराभिः किरीटकोटिभिः" काद० । "करयन्त्रदन्तुरान्तरे" नैष० ।

**दन्तुरक** पु० देशभेदे स च देशः बृ० स० १४ अ० कूर्म्मविभागे अस्य पूर्वस्यामिक्षुपक्षमे "मिथिलसमभटोड्राश्ववदनदन्तुरकाः" । पूर्वस्यामुक्तः । [राजनि०।

**दन्तुरच्छद** पु० दन्तुर उन्नतानतः छदो यस्य । बीजपूरे

**दन्तोलूखलिक** पु० दन्ता एव उलूखलः करणसाधनं विद्यतेऽस्य ठन् । स्नानप्रस्थभेदे स हि दन्तैरेव व्रीह्यादीन् कण्डयित्वा खादति । "दन्तोलूखलिकः काष्ठपक्वाशी

वाक्षकृकः" वाग्भ० । "वाक्षकृको मयेहापि दन्तोलूखलिकोऽपि वा" मनुः । इनि । दन्तोलूखलीत्यत्र ।

दन्तौष्ठ न० दन्तश्च ओष्ठौ च तेषां समाहारः । दन्तौष्ठानां समाहारे । ततः शरीरावयवत्वात् भवादौ यत् । दन्तौष्ठ्य तदुच्चार्ये वर्णे दन्त्यवकारे "दन्तौष्ठ्यवः स्मृतो बुधैः" शिक्षा०

दन्त्य पु० दन्ते दन्तमूले वा भवः यत् । दन्तदन्तमूलयोर्जाते ।तवर्गादौ वर्णे । "लृतुलसानां दन्ताः" सि०कौ० । "दन्त्यावृतुलसाः स्मृताः" पा० शि० । शेखरादौ दन्तशब्दस्य दन्तमूलपरतोक्ता अन्यथा भन्दन्तस्य तदनुच्चारणापत्तेः" दन्तेभ्यो हितः यत् । २दन्तहितकारके त्रि० ।

दन्त्यरिष्ट न० दन्त्यम् अरिष्टं रिष्टाभावो यत्रौषधे । चक्रदत्तोक्ते अर्शोघ्ने औषधभेदे ।

"दन्ती चित्रकमूलानि अजक्षीरे विपाचयेत् । त्रिपलं त्रिफलायाश्च दलानां तत्र दापयेत् । तत्रां गुडस्य तत्तिल्यांशार्द्धं घृतभाजने । तन्मात्रया पिबेच्चित्रमर्शोभ्यो विप्रमुच्यते । अक्षपीपाण्डुरोगघ्नं वातवर्चोऽनुलोमनम् । दीपनञ्चारुचिघ्नञ्च दन्त्यरिष्टमिदं विदुः" ।

दन्दशूक पुंस्त्री गर्हितं दशति दन्श-गर्हायां वुञ्-उक । १राजसे, "दन्दशूकान् निषांसो" भट्टिः २सरीसृपे, ३सर्पे च मेदि० । "दन्दशूकः पतङ्गो वा भवेत् कीटोऽथवा क्रमिः" यात्र० ।

दन्द्रम्यमाण त्रि० द्रम-यङ् शानच् । कुटिलगतियुक्ते ।

दन्भ दम्भे स्वा० पर० सक० सेट् । दम्भोति अदम्भीत् । दम्भित्वा दब्ध्वा । दब्धः । सनि वेट् दृढभावपक्षे नलोपे धीप्सति धिप्सति दिदम्भिषति ।

दन्भ संघाते चुरा० आत्म० सक० सेट् । दम्भयते अददम्भत ।

दन्श क्लिशने रदकरणकव्यापारभेदे दंशने (कामड़ान) भ्वा०पर०सक०अनिट् । दशति अदाङ्क्षीत् ददंश । "करौ निरोद्धुं दशति स्म केवलम्" "कटुकीटान् दशतः सतः क्वचित्" नैष० । दष्टः दंष्ट्रा ।

दभ्र प्रेरणे चु० उभ० सक० सेट् इदित् । दम्भयति ते अदद्भत् त ।

दम्र न० दन्भ-रक् । १अल्पे २तद्वति त्रि० अमरः ३सक्तुके पु० उणा० "अदम्भदर्भसिधिशम स च स्वनीम्" किरा० । ४उत्तरस्यां दिशि स्त्री निघण्टुः । "अ सिदम्भस्य चिदृधः" ऋ० १।८।२।

दन् अव्य० दम-क्विप् । कलहे शब्दार्थचि० ।

दम उपशमे दण्डे च दिवा० शमा० अक० सेट् । दाम्यति अदमत्-अदमीत् ददाम देमतुः । णिच् दमयति ते अदिदमत् त दित् दमयुः दमितः दान्तः । ण्वुल् दमित्वा दान्त्वा । "यमो दाम्यति राजसान्" "जानुभ्यामदमज्जान्यान्" "दमित्वाप्यरिसंघातान्" "अदान्तां स्त्रिदशैरपि" भट्टिः । दमः दम्यः दमनः ।

दम पु० दम-भावे घञ् । १दण्डे, २बाह्येन्द्रियाणां स्वस्वविषयेभ्यो निवर्त्तने, "नियहो बाह्यवृत्तीनां दम इत्यभिधीयते" इत्युक्ते बाह्येन्द्रियव्यापाररोधे, विकारहेतुसन्निधानेऽपि शमनसः स्थैर्ये, "कुत्सितात् कर्मणो विप्र ! यच्च चित्तनिवारणम् । स कीर्त्तितो दम" इत्युक्ते ४कुकर्मभ्यो मनसो निवारणे, ५कर्दमे, मेदि० ६दमने च । ७भीमसेनपुत्रभेदे दमयन्तीशब्दे दृश्यम् । ८विष्णौ पु० दमयितृशब्दे दृश्यम् ।

दमघोष पु० श्रुतश्रवोऽपरनामके शिशुपालपितरि राजभेदे "ततः संजनयामास सुतमेकं च दारिके । कुलीनं पाण्डोर्महिषीं देवतामिव भूचराम् । भार्यांञ्च दमघोषस्य चेदिराजस्य सुप्रभाम्" हरिवं० ३५ अ० ।

दमघोषज पु०दमघोषाज् जायते जन-ड । शिशुपाले "सुदमो दमघोषजः" माघः ।

दमघोषसुत पु० ६त० । शिशुपाले "दमघोषसुतो वीरः शिशुपालो महामतिः" भा० सभा० १८७ अ० दमघोषतनयादयोऽप्यत्र । [क्लेशसहने च ।

दमथ पु० दम-भावे अथच् । १दण्डे २तपः-

दमथु पु० दम-भावे अथु । १दमे दमने अमरः ।

दमन न०दम-भावे ल्युट् । १दण्डे २इन्द्रियादीनां बाह्यवृत्तिनिरोधे । कर्त्तरि अच् । (दोना)ख्याते २पुष्पचामरे पुंस्यमधाने ङीष्भेदे "दमनस्तु रसे तिक्तो हृद्यो दग्धः सुगन्धिकः। यक्ष्मविषकृमिश्लेष्मदूषकव्रणदोषजित्" भावप्र० । दमनारोपणोत्सवश्च नि०शि०उक्तो यथा "चैत्रशुक्लद्वादश्यां दमनोत्सवः "द्वादश्यां चैत्रमासस्य शुक्लायां दमनोत्सवः। औधायनादिभिः प्रोक्तः कर्त्तव्यः प्रतिवत्सरमिति" रामाचैनचन्द्रिकोक्तेः "अत्रैव व्रतं मधौ दोला आरोप्य तन्नृपूजनम् । चैत्रे च दमनारोपमकुर्वाणो व्रजत्यधः" इति तत्रैव पाद्मवचनाच्च । शिवभक्तादिभिस्तु चतुर्दश्यादौ कार्य्यः "तत्र स्यात् जीवतिथिषु वह्न्यादेर्दमनार्पणम्" इति तत्रैवोक्तेः । ज्योतिःप्रकाशेऽपि "चतुर्दश्यामतिशयात् मन्त्रसंयहणे तथा । पवित्रदमनारोपे यात्रा तत्तत्तिथिषु धीः" । विधयस्तु "वह्निर्विरिञ्चिर्गिरिजा गणेशः

फणी विशाखो दिनकृन्नखेशः। दुर्गालको विश्वहरिः करश्च शर्वः शमी चेति तिथीषु पूज्याः" इत्युक्ताः आगमोक्तदीक्षावतो दमनरोपणविधिः रामार्चनचन्द्रिकायाम्। तद्विधिस्तत्रैव दृश्यः। ३उपधान्ते ५वीरे शब्दर०। ४कन्दट्टे राजनि०। ७ऋषिभेदे दमयन्तीशब्दे दृश्यम्। "यद्वरात् भीमस्य नृपस्य दमयन्तीकन्यावरलाभः। "दमनादमनाक् प्रसेदुषस्तनयां तव्यगिरक्षपोधनात्। वरमाप" नैष०। दमयति-दम-णिच्-ल्यु। ८शासनकर्त्तरि त्रि० दुष्टदमनः सर्वदमन इत्यादि। ९विदर्भाधिपभीमनृपसुतभेदे च दमयन्तीशब्दे दृश्यम्। स्वाधिकारात्प्रमाद्यन्तीः प्रजाः दमयितुं शीलमस्य युच्। १०परमेश्वरे। "मरीचिर्दमनो हंसः" विष्णुस०। "वैश्वस्तादिरूपेण दमयितृत्वात् वा" भाष्योक्तेस्तथात्वम्। भावे ल्युट्। ११दमने न० "स्यस्य दुष्टदमनक्षमं कुरिम्" माघः।

**दमनक** पु० स्वार्थे क। १दमनवृक्षे "द्विगुणनगणयुक्तः द्वितनुर्हि। दमनकमिति गदति मुनि हि" इत्युक्ते २षड्क्षरपादके छन्दोभेदे ३एकादशाक्षरपादके छन्दोभेदे च। "द्विजवर! युगलममलं तदनु कलय नवगुरुकम्। फणिपतिवरपरिगदितं दमनकमिदमतिललितम्" छं०र०टी०

**दमनी** स्त्री दम्यतेऽस्मिन्नया-करणे ल्युट् ङीप्। अस्मिन्दमनीवृक्षे राजनि०।

**दमन्य** दमन इवाचरति दमन-क्यच् वेदे अन्यत्रोपः दमनकर्तृतुल्याचारे पर० अक० सेट्। दमन्यति अदमन्यीत्। "अदृष्टं लिप्सीर्धाक्षं दमन्यत्" ऋ०१०।६६।

**दमयन्ती** स्त्री विदर्भाधिपभीमनृपस्य कन्याभेदे तत्कथा भा० व० ५५अ० यथा

"तथैवासीद्विदर्भेषु भीमो भीमपराक्रमः। शूरः सर्वगुणैर्युक्तः प्रजाकामः स चाप्रजाः। स प्रजार्थे परं यत्नमकरोत् सुसमाहितः। तमभ्यागच्छदृषिर्दमनो नाम भारत! तं स भीमः प्रजाकामस्तोषयामास धर्मवित्। सत्क्रिया सह राजेन्द्र! सत्कारेण सुवर्चसम्। तस्मै प्रसन्नो दमनः सभार्याय वरं ददौ। कन्यारत्नं कुमारांश्च त्रीनुदारान् महायशाः। दमयन्तीं दमं दान्तं दमनञ्च सुवर्चसम्। उपपन्नान् गुणैः सर्वैर्भीमान् भीमपराक्रमान्। दमयन्ती तु रूपेण तेजसा यशसा श्रिया। सौभाग्येन च लोकेषु यशो प्राप सुमध्यमा"। भा० व० ५८अ०। सा च पुण्यश्लोकनलराजकृतम् यथोक्तं तत्रैव ५७अ०

"सा समीक्ष्य तु तान् देवान् पुण्यश्लोकस्तु भारत!। नैषधं वरयामास भैमी धर्मेण पाण्डव!। विलज्जमाना वस्त्राग्रे जगाहायतलोचना। स्कन्धदेशेऽवजस्तस्य स्रजं परमशोभनाम्। वरयामास चैवैनं पतित्वे वरवर्णिनी" "पार्थिवाश्चानुभूयास्य विवाहं विस्मयान्विताः। दमयन्त्याश्च सुहृदाः प्रतिजग्मुर्यथागतम्। गतेषु पार्थिवेन्द्रेषु भीमः प्रीतो महामनाः। विवाहं कारयामास दमयन्त्या नलस्य च। उषित्वा तत्र यथार्हं नैषधो द्विपदां वरः। भीमेन समनुज्ञातो जगाम नगरं स्वकम्"। "त्वयि वीर! विराजते परं दमयन्तीकिलकिञ्चितं किल" नैष०। [ "दण्डो दमयिता दमः" विष्णुस०।

**दमयितृ** त्रि० दम-णिच्-तृच्। १शासनकर्त्तरि २विष्णौ पु०

**दमाय** दमं दमनमिच्छति क्यच्-आत्मनोदमनेच्छायां पर० अक०सेट्। दमायति अदमायीत् "ऋष्वे वीर! उपस्तुयं दमायन्नव्यमन्म मतिने नीयमानः" ऋ० ६।४७। १६। "दमायन्त ब्रह्मचारिणः" तै० ब्रा० १।४।२।

**दमित** त्रि० दम्यते स्म दम-णिच्-क्त वा दान्तेत्यादि इट्। ऌतदमने दृशादौ।

**दमिन्** त्रि०दम-णमा०शीलार्थे विष्णुन्। १दमनशीले स्त्रियां ङीप्। २सागरसिन्धुनदीसङ्गमदक्षिणस्थे तीर्थभेदे न० ३ततप्रवर्त्तके ऋषिभेदे पु०"सागरस्य च सिन्धोश्च सङ्गमं प्राप्य भारत!" इत्युपक्रमे "प्रदक्षिणमुपावृत्य गच्छेत भरतर्षभ!। तीर्थं कुरुवरश्रेष्ठ! त्रिषु लोकेषु विश्रुतम्। दमीति नाम्ना विख्यातं सर्वपापप्रणाशनम्। तत्र ब्रह्मादयो देवा उपासन्ते महेश्वरम्। तत्र स्नात्वार्चयित्वा च रुद्रदेवगणैर्वृतम्। जन्मप्रभृति यत्पापं तत्स्नातस्य प्रणश्यति। दमी चात्र नरश्रेष्ठ! सर्वदेवैरभिष्टुतः। तत्र स्नात्वा नरव्याघ्र! क्रतुमेधमवाप्नुयात्" भा०व०८२अ०।

**दमु(म्नु)नस्** पु०दम-अनसि पृषो०वा हुस्वः। १अग्नौ, अमरः २शुक्राचार्ये उणा०। निरुक्ते ४।५। "जुष्टो दमूना अतिथिर्दुरोणः" ऋचमधिकृत्य ऋक्षु अन्वा निरुक्तिरुक्ता यथा "दमूना दमनना वा दानमना यापि वा दम इति गृहनाम तन्मनाः स्वाम्ना मनोतेः"। ३दमयितरि त्रि०। "दमूना गृहपतिर्दम आँ" ऋ० १।६०।३। "दमयति राक्षसादिकमिति दमूनाः" भा०।

**दमे** अव्य० दम-भा० के। गृहे निघण्टुः।

**दम्पती** पु० द्वि० व०। जाया च पतिश्च हन्द्वे जायाशब्दस्य पत्ये दमादेशः। मिथुनयोः जायापत्योः अमरः। "तौ दम्पती वसिष्ठस्य गुरोर्जग्मतुराश्रमम्" रघुः।

"भुञ्जीयातां ततः पश्चादवशिष्टं तु दम्पती" मनुः। "दम्पत्योर्मध्यगं धनम्" दायभा०। तयोरिदं पत्यन्तत्वात् यक्। दाम्पत्य तत्सम्बन्धिनि त्रि०।

**दम्भ** पु० दभ्-घञ्। १कपटे २शाठ्ये अधार्मिकेणात्मनो धार्मिकत्वस्य ख्यापने ४लोभवञ्चनाभ्यां विहितकर्मानुष्ठाने ५पूजाप्राप्त्यर्थं स्वधार्म्मिकत्वख्यापने। "द्वेषं दम्भं च मानं च क्रोधं तैक्ष्ण्यं च वर्ज्जयेत्" मनुः। "सत्कारमानपूजार्थं तपो दम्भेन चैव यत्" गीता। न्यायरत्नवृत्तौ तु दम्भस्य रागविशेषेच्छाभेदरूपत्वमुक्तं यथा "तद्वैराग्यं रागद्वेषमोहान्नभावात्" गौ०सू०। "तत्र रागपक्षः कामो मत्सरः स्पृहा तृष्णा लोभो माया दम्भः" इत्युक्ता "कामो विरंचा रतिश्च विजातीयः संयोगः नारीगताभिलाष इति तु न युक्तं स्त्रियः कामेऽव्याप्तेः मत्सरः स्वप्रयोजनप्रतिसन्धानं विना पराभिमतनिवारणेच्छा, यथा राजकीयादुदपानान्नोदकं पेयम् इत्यादि। एवं परगुणनिवारणेच्छाऽपि। स्पृहा धर्माविरोधेन प्राप्तीच्छा तृष्णा इदं मे न म्रियतामितीच्छा उचितव्ययाकरणेनापि धनरक्षणेच्छारूपं कार्पण्यमपि तृष्णाभेद एव। धर्मविरोधेन परद्रव्येच्छा लोभः, परवञ्चनेच्छा माया, कपटेन धार्मिकत्वादिना स्वोत्कर्षख्यापनेच्छा दम्भः" गौ० सू० ४।२ कामादिकदम्भान्तानामिच्छाविशेषरूपत्वात् रागरूपे दोषे अन्तर्भाव उक्तः अधिकं दोषशब्दे वक्ष्यते।

**दम्भक** पु० दभ्-ण्वुल्। प्रतारके। "धर्म्मध्वजी सदालुब्धश्छाद्मिको लोकदम्भकः" मनुः।

**दम्भन** पु० दभ्-भावे ल्युट्। १दम्भे २मोहने च। "व्रतेन यावं प्रच्छाद्य कुर्वन् स्त्रीशूद्रदम्भनम्" मनुः।

**दम्भिन्** त्रि० दभ्-णिनि। दम्भकर्त्तरि। "दम्भिनैतुकपाषण्डवकवृत्तींश्च वर्ज्जयेत्" याज्ञ०।

**दम्भोद्भव** पु० १सार्वभौमे नृपभेदे। "राजा दम्भोद्भवो नाम सर्वभौमः पुराऽभवत्" भा० उ० ६१ अ०। इत्युपक्रमे तस्य नरनाम्ना ऋषिणा गर्वो निहतस्तत्कथा तत्रैवाध्याये दृश्या। "दण्डको नृपतिः कामात्, क्रोधाच्च जनमेजयः। लोभादैलस्तु राजर्षिर्नाभिर्हर्षस्तथोऽत्तरः। पौलस्त्यो राक्षसो मानात् मदाद्दम्भोद्भवो नृपः। प्रयाता निधनं सर्वे यत्नुषड्वर्गमाश्रिताः" काम०। दम्भ उद्भवो यस्य। २दम्भसम्भवे कर्म्मादौ त्रि०। [ ३क्षीरके अमरः।

**दम्भोलि** पु० दम्भोति खेदयति दभ्-ओलि। १वज्रेऽस्त्रे।

**दम्य** त्रि० दम-यत्प्रत्ययान्तत्वात् यत्। १प्राग्भारवहनयोग्यावस्थे वत्सतरे २अनड्वहि च अमरः। २दमनीये ३दमनार्हे त्रि०। "अप्राप्तदम्यावस्थः" मा० त०। "धुर्य्येण दम्यः सदृशं बिभर्त्ति" रघुः।

**दय** गतौ वधे, दाने पालने च भ्वा० आत्म० सक० सेट्। दयते अदयिष्ट अदयिढ्वम् अदयिध्वम् अदयिह्वम्। दयाम् बभूव आस चक्रे। "न वा पलायाञ्चक्रे विदयाञ्चक्रे न राक्षसः" भट्टिः दया दयितः। "व्रजन्ति तेषां दयसे न कस्मात्"। "स चापि रुधिरैर्मेर्त्तः खेषामध्यदयिष्ट न" भट्टिः

**दया** स्त्री दय-भिदा० भावे अङ्। १दुःखितेषु भूतेष्वनुकम्पायाम्। २परदुःखाऽसहने करुणाशब्दे दृश्यम्। ३परदुःखापहरणेच्छायाम्। "यत्नादपि परकीयं हर्त्तुं वा हृदि जायते। इच्छा भूमिसुरश्रेष्ठ! सा दया परिकीर्त्तिता"। आत्मवत् सर्वभूतेषु यो हिताय शुभाय च। वर्त्तते सततं हृष्टः क्रिया श्लोषा दया स्मृता। प्राणा यथात्मनोऽभीष्टा भूतानामपि ते तथा। आत्मौपम्येन सर्वत्र दयां कुर्वन्ति साधवः"। इयं मोक्षपत्नी यथा। "मोक्षपत्नी दया साध्वी पूजिता च जगत्प्रिया। सर्वलोकाश्च सर्वत्र निष्फलाश्च यया विना" देवीभागवते ६स्क० १अ०। यत्र मोक्षोऽस्ति तत्र दयायाः सत्त्वाद्दया मोक्षपत्नीति "अहिंसा परमो धर्म्मो विप्राणां नात्र संशयः। दया सर्वत्र कर्त्तव्या ब्राह्मणेन विजानता। यद्यादन्यत्र विप्रेन्द्र! न हिंसा यज्ञिकी मतेति" देवीभागवतम्। यद्यादन्यत्र दया कर्त्तव्या यज्ञे तु हिंसैव कर्त्तव्या न सा यज्ञिकी हिंसा हिंसा भवति। "अहिंसन् सर्वभूतान्यन्यत्र तीर्थेभ्यः" इति श्रुतेः। "या वेदविहिता हिंसा नियताऽस्मिंश्चराचरे। अहिंसा मेव तां विद्याद् वेदाद् धर्मो हि निर्बभाविति" मनुस्मृतेश्च। "हन्तं वाप्यविधानेन क्षेदयेच्च कदाचनेति" कुलार्णवोक्तेश्च। ४दक्षकन्याजाते धर्मस्य पत्नीभेदे तदपत्यम् अभयम् धर्म्मशब्दे दृश्यम्। "धनुर्भृतोऽप्यस्य दयार्द्रभावम्" रघुः। "तव धर्म्मः सदयोदयोज्ज्वलः" नैष० सा च शान्तिरसस्य व्यभिचारिभावः यथाह सा० द०। शान्तरसोपक्रमे "रोमाञ्चाद्याः स्वानुभावास्तथा स्युर्व्यभिचारिणः निर्वेदहर्षस्मरणमतिभूतदयादयः"।

**दयाकूट** पु० दयायाः कूट इव। वृद्धे क्षेमः।

**दयालु** त्रि० दय-आलुच्। कृपायुक्ते। "दयालुरपि स क्षणः" इत्युद्भटः। "यशःशरीरे भव मे दयालुः" "निरीक्षमाणः सुतरां दयालुः" रघुः।

दयावीर पु० दयया वीरः। १दयार्द्रचित्ते वीरे रसे २तद्युक्ते नायकभेदे च सा० द० वीररसलक्षणसङ्गा "स च दानधर्म्मयुद्धदयया च समन्वितस्तद्वान् स्यात्" स च दानवीरो धर्म्मवीरोदयावीरो युद्धवीरश्चेति चतुर्विधः" इति विभज्य "दयावीरो यथा जीमूतवाहनः। "शिरास्तैः स्रन्दत एव रक्तमद्यापि देहे मम मांस मस्ति। तृप्तिं न पश्यामि तवापि तावत् किं भक्षणात्त्वं विरतो मदङ्गम्" । एवमपि विभावादयः पूर्वोदाहरणवदूह्याः" उदाजहार।

दयित पु० दय-क्त। १पत्यौ अमरः। २प्रियमात्रे त्रि०। ३भार्य्यायां स्त्री। "दयिता दयितानन्माम्बुजं दरमीलन्नयना निरीक्षते" रघुः। "न गजा नगजा दयिता दयिताः" भट्टिः।

दयिलु त्रि० दय-इलु। दयायीले।

दयू त्रि० देव-क्विप् ऊठ्। देवनकर्त्तरि।

दर अव्य० दृ-भावे अप्। १ईषदर्थे। २भये, ३शब्दे चपुंस० । अमरः "दरादराभ्यां दरकम्पनौ भये" नैषधम् "दरमीलन्नयनानिरीक्षते" रघुश्च०। "न जातङ्कोन न विद्विषादः" किरा०। ४कन्दरे पुंस्त्री० स्त्रीत्वे ङीष्। "दरीश्चकोतसङ्गनिषङ्गभाषः"। "दरीसखो स्थितेन समीरणेन" कुमा०। ५शङ्के शब्दार्थचि०। "य एष्कारागे धवलो दरोदरोष्णरुक्मस्याधरशोणशोणि-मेति" भाग०। [शब्दार्थचि०।

दरक त्रि० दर+भवे "ज्ञाजादिभ्यो युन्" पा० युन्। भीरौ

दरकण्टिका स्त्री दर ईषत् कण्टो यस्याः कप् कापि अत इत्त्वम्। अतावर्य्याम् राजनि०।

दरणि पुंस्त्री दृ-अनि। नद्यादेः कूलभङ्गे (भाङ्गन) शब्दार्थचि०। स्त्रीत्वे वा ङीष्।

दरथ पु० दृ-विदारे "दृगमिदमिभ्यश्च" उज्ज्वलदत्तधृत-सूत्रात् अथ। १दिवु प्रसरणे २शब्दे च उज्ज्वलदत्तः।

दरद स्त्री दृ-विदारणे "शृदभसोऽदिः" उणा० अदि। १हृदये २कुले च उज्ज्वलदः। दृ-भये अदि। २पर्व्वते ३प्रपाते ५भये च पु० मेदिः। ६म्लेच्छजातौ अमरटीका।

दरद त्रि० दरं भयं ददाति दा-क दर ईषत् दायति शुध्यति दैप-शोधे-क वा। १भयदातरि २क्रिङ्कुते पु० न० भावप्र० तद्भेदादिशब्दे यथा "क्रिङ्कुतं दरदं म्लेच्छमिङ्गुलच्चूर्णपारदम्। दरदस्त्रिविधः प्रोक्त-स्तमोरः शुक्लवर्णकः। हंसपादस्तु नीलः स्यात्पृथु-वालुकरोत्तरम्। चमोरः शुक्लवर्णः स्यात् पयोतः शुक्ल-वर्णकः। जपाकुसुमसङ्काशो हंसपादो मनोरमः। तिक्तं कषायं कटुकिङ्कुतं स्याच्चेतोमयप्लीहकफित्तहारि। कुष्ठाक्षकुष्ठज्वरकामलांश्च श्लीपदमेहौ च नरस्त्रिहन्ति। अर्शःपातनयुक्तं तु दमरुयन्त्रपाचितम्। क्रिङ्कुतं तच्च सूतन्तु शुद्धमेवं न शोधयेत्। २देशभेदे पु०ब च देशः ह०स० १४ अ० ऐणान्यासक्तः ऐणान्याभिस्तुपक्रमे अभिसार-दरदतङ्गणकुलूतसैरिन्ध्रबर्बराद्याः" "शूद्राभीराश्च दरदाः काश्मीराः पत्तिभिः सह" भा० भी० ९ अ०। प्राच्यो-दीच्यदेशौ। ३अभिजनोऽस्य तस्य राजा वा अण्। दारद पित्तादिरोगेच तद्रोगयुक्ते तद्रोगे च। मडयु अयो लुक्। "सङ्गीत्वा तु बलं सारं फाल्गुनः पाण्डु-नन्दनः। दरदान् सह काम्बोजैरजयत् पाकशासनिः। प्रागुत्तरां दिशं ये च वसन्त्याश्रित्य दस्यवः। निवसन्ति वने ये च तान् सर्वानजयत् प्रभुः" भा० स० २६ अ०। आर्षे क्वचिदेकत्वेऽपि अयो लुक्। "शाल्वराजश्च दरदो विदेहाधिपतिस्तथा" हरिवं० ९१ अ०। ४म्लेच्छ-जातिभेदे। ५भये शब्दरत्ना०। ६शनैः क्रियायोगात् मृदु-त्वापन्ने क्षत्रियभेदे च। "शनकैस्तु क्रियालोपादिमाः क्षत्रियजातयः" इत्युपक्रमे "पारदापह्लवाश्चीनाः किराता दरदाः खशाः" मनुः।

दरवर पु० दरेषु शङ्खेषु वरः। पाञ्चजन्ये भगवतः शङ्खे श्रीधरः। "दध्मौ दरवरं तेषां विषाद मनयन्निव" भाग० १।११।२।

दरसान पु० दृ-विदारणे असानच्। द्योते उज्ज्वलदः।

दरि(री) स्त्री दृ-विदारे इन् वा ङीष्। १कन्दरे शब्द-रत्ना०। २तत्सदृकुलजे सर्पभेदे पु० "पृषोदरः पृथुसखः प्रहासः शकुनिर्दरिः" भा० आ० ५७ अ०।

दरित त्रि० दरो जातोऽस्य तारा० इतच्। जातभये हेमच०।

दरिद्र त्रि० दरिद्रा-क। १दुर्गते २निःस्वे अमरः। "प्रणीय दारिद्र्यदरिद्रतां त्वया" नैष०। "स्त्रीबालोक्तसङ्गाच्च दरिद्राणाञ्च रोगिणाम्" मनुः। दरिद्रत्वे हेतुः "अनुपोष्य त्रिरात्राणि तीर्थान्यनभिगम्य च। अदत्त्वा काञ्चनं गाञ्च दरिद्रो नाम जायते" प्रा० त०। "दरिद्रो यस्त्वसन्तुष्टः कृपणो योऽजितेन्द्रियः" भाग०। "अयं षटः खलदरिद्रतां गतः" मृच्छ०।

दरिद्रा दुर्गतौ अदा० परा० अक० सेट्। दरि-द्राति अदरिद्रीत्-अदरिद्रासीत्। दरि-

ह्रासास बभूव चकार ददरिद्र ददरिद्रौ इत्येके। दरिद्रिता दरिद्रात्। दरिद्रिष्यति। दरिद्राथः। सनि। दिदरिद्रिषति दिदरिद्राषति। [भीले च।

दरिन् त्रि॰ दृ-भवे विदारे वा इनि। १भीरौ २विदारणे-

दरीदर पु॰ इरोदर+पृषो॰। पाशके "आस्थित्य दुर्गं गिरिकन्दरोदरं क्रीडन्मृगस्त्वन्मृगयातं दरोदरम्" "यमकात् दरोदरो निष्कारः इति गोपालदत्तः" उज्ज्वलदत्तः

दर्त्तृ त्रि॰ दृ-विदारे वेदे रङ्भावः। दारयितरि "स त्रसं दर्त्ता पार्षं अध द्योः" ऋ॰ ६।६६।८। "दर्त्ता दारयिता" भा॰। लोके तु दरी(रि)ता इत्येव।

दर्दुं पु॰ दृ-विदारे वा॰ तु रङ्भावश्चान्दसः। दारके। "यत् पुरां दर्दुराः" ऋ॰६।२०।३। "दर्दुः दारकम्" भा॰

दर्दर पु॰ दृ-यङ् अच् पृषो॰। १पर्वते। २रूप्यभाजने च मेदि॰।

दर्दराह्व न॰ व्यञ्जनभेदे शब्दच॰।

दर्दरीक न॰ दृ-विदारे फर्फरीका॰ नि॰। १वाद्यभेदे।

दर्दुर न॰ इषाति कर्षौ शब्देन उरच् नि॰। १भेके २मेघे ३वाद्यभेदे ४पर्वतभेदे "शैलस्य दर्दुरइटानिव वादयन्तः" भाग॰ "कौशेयं तित्तिरिर्हत्वा लौमं हत्वा तु दर्दुरः" मनुः "खनाविव दिग्वस्त्राः शैलौ मलयदर्दुरौ" रघुः। "हिमवान् पारियात्रश्च विन्ध्यकैलासमन्दराः। मलयो दर्दुरश्चैव महेन्द्रो गन्धमादनः" भा॰ स॰ १० अ॰। "निर्यान्ति तस्माद्दृषद्वत्याः पश्चाभो लवणाम्भसः। समीपे बहुमलयौ दर्दुरञ्च महागिरिम्" भा॰ व॰ २८१ अ॰। "मलयात् दर्दुराच्चैव चन्दनागुरुसञ्चयान्" ५१ अ॰। दर्दुरः पर्वतः सन्निकटतयास्त्यस्य अच्। ५तत्सन्निकटे देशभेदे च। स च देशः "अथ दक्षिणेन गङ्गा" इत्युपक्रमे "गिरिनगरवनाद्दर्दुरमहेन्द्रमाल्यिमरुकच्छाः" बृ॰ सं॰ १४॰अ॰ दक्षिणपार्श्वस्थः। ६राक्षसभेदे संक्षिप्तसारः। ७चर्मिकायां स्त्री मेदि॰।

दर्दुरक पु॰दर्दुराय कायति दर्दुर इव कायति शब्दायते वा कै-क। १वाद्यभेदे शब्देन मेघसूचके २भेके। स्वार्थे क। ३दर्दुरशब्दार्थे। [रक्करनिघण्टुः।

दर्दुरच्छदा स्त्री दर्दुर इव छदो यस्याः। ब्राह्मयां पा-

दर्द्रु(द्रू) पु॰ दरिद्रा-दरिद्रातेर्योलोपश्च "उषाऽज उषा इकारोकारयोर्लोपश्च" उज्ज्वलदत्तः। १दद्रुरोगे भोजदेवशब्दानुशासने तु "दरिद्रातेर्योलोपश्च इति तिपानिर्देशात् रिव आदेशे संहितापाठेयंशब्दलोपे दर्द्रुरित्यपि साधितम्। तथा रप रप आर्धधातुकादेशसहितीयरेफलोपेन दर्द्रित्यपि साधितम्। एवञ्च रूपचतुष्टयमिति। मि॰ को॰।

दर्द्रु(द्रू)घ्न पु॰दर्द्रु(द्रू) हन्ति हन-ठक्। चक्रमर्दके शब्दर॰।

दर्द्रु(द्रू)नाशिनी स्त्री दर्द्रु(द्रू)नाशयति नश-णिच् णिनि ङीप्। तैलिनीवृक्षे राजनि॰।

दर्प पु॰ दृप-भावे घञ् कर्त्तरि अच् वा। १अहङ्कारे परावधीरणहेतौ गुरुलघुपाद्यतिक्रमके २चित्तवृत्तिभेदे। गर्व॰ भेदे ३हर्षजन्यगर्वे ४मदमदे मेदि॰। ५जलेऽपि त्रिका॰। ६उच्छृङ्खलत्वे ७धर्ममर्य्यादातिक्रमे मौलकण्ठः दर्पस्य सविषयभेदादिकं ब्रह्मवै॰ जन्मख॰ उक्तं यथा "अहङ्कारश्च सर्वेषां पापबीजमसङ्गलम्। ब्रह्मखण्डेषु च सर्वेषां गर्वपर्य्यन्तसञ्चितिः। येषां येषां भवेद्दर्पो ब्रह्मखण्डेषु परात्परे। विहाय सर्वं सर्वात्मा तेषां शान्तोऽहमेव च। क्षुद्राणां महतान्चैव येषां गर्वो भवेत् प्रिये!। एवंविधमहं तेषां चूर्णीभूतं करोमि च। चकार दर्पभङ्गञ्च महाविष्णोः पुरा विभुः। ब्रह्मणश्च तथा विष्णोः शेषस्य च शिवस्य च। धर्मस्य च यमस्यापि शाम्बस्य चन्द्रसूर्ययोः। गरुडस्य च वह्नेश्च गुरोर्दुर्वाससस्तथा। द्वारपालस्य भक्तस्य जयस्य विजयस्य च। सुराणामसुराणाञ्च भवतः कामशत्रवोः। सनकस्यासुरेन्द्रस्य वायोश्च भृगोस्तथा। क्षमेशस्य सतां धातुर्वायोश्च वरुणस्य च। सरस्वत्याश्च दुर्गायाः पद्मायाश्च भुवस्तथा। सावित्र्याश्चैव गङ्गायाः मनसायास्तथैव च। प्राणाधिष्ठातृदेव्याश्च प्रियायाः प्राणतोऽपि च। प्राणाधिकायाः राधायाः अन्येषामपि का कथा। कृत्वा दर्पञ्च सर्वेषां प्रसादञ्च चकार सः"।

दर्पाघ्ने मल्लिना॰ "तेजो विद्वीर्यं विजहाति दर्पः" किरा॰ "दर्प उत्साहः" मल्लि॰।

दर्पक पु॰दर्पयति दृप-हर्षमोहनयोः णिच-ण्वुल्। मोहकारके १कन्दर्पे अमरः। २अहङ्कारमोहयोः कारके त्रि॰।

दर्पण पु॰ दृप-सन्दीपने ल्यु। १स्वादर्शे (आयना)। मुकुरे अमरः २नेत्रे न॰जटा॰ ३पर्वतभेदे ४मदभेदे च। "ततः पूर्वं महाराज! दर्पणो नाम पर्वतः। कुबेरो यत्र वसति धनधान्यैः समं सदेति। यस्मिन्नाके मध्यभागे रोहिणी रोहिताकृतिः। यस्मिन् लोहादिकं सृष्टं सर्वतां याति तत्क्षणात्। तस्मादिदूरे स्रवति दर्पणो नाम वै नदः। हिमाद्रिप्रभवो नित्यं लौहित्य

सदृशः फले। सत्यत्वं हि औचित्यं सर्वैरेवगणैरिरः। सर्वतीर्थोदकैः सम्यक् स्नापयामास तं सुतम्। तस्य स्नानसमुद्भूतः पापदर्पस्य पाटनः। तेनायं दर्पणो नाम पुरा देवगणैः कृतः। यस्मिन् स्नात्वा नरवरे योऽर्चयेद् दर्पणाचले। कुलैरं प्रतिपत्तिथ्यां कार्त्तिके शुक्लपक्षतः। स याति ब्रह्मसदनमिह भुक्तिमवैर्युतः" इति कालि॰ पु॰ ८१ अ॰। "दर्पणनिर्मलात्मा पतिते धनतिमिरसंघे" माघः।

"भूयो यथौ दर्पणमादधाना" कुमा॰। "लोचनाभ्यां विहीनस्य दर्पणः किं करिष्यति" चाण॰। दर्पणस्य बिम्बस्य स्वगतत्वव्यत्यस्तसुखत्वादिमोहजनकत्वात् दर्पणत्वम्।

**दर्पद** त्रि॰ दर्पं ददाति दा-क। १गर्वदायकपदार्थे। २विष्णौ पु॰ "दर्पहा दर्पदो दृप्तः" विष्णुस॰ "धर्मवर्त्मनि वर्त्तमानानां दर्पं ददाति दर्पदः" भा॰।

**दर्पहन्** त्रि॰ दर्पं हन्ति हन-क्विप्। १गर्वहारके २विष्णौ पु॰। दर्पदशब्दे उदाहृतम्। [ २१४२ पृ॰ उक्तम्।

**दर्भ** पु॰ दृभ-घञ् चञ् वा। कुशभेदे तल्लक्षणादिकं कुशशब्दे

**दर्भट** न॰ दृभ-संदर्भे वा॰ अटन्। निष्टप्तपट्टे त्रिका॰।

**दर्भपत्र** पु॰ दर्भस्येव पत्रमस्य। काशे राजनि॰।

**दर्भपुष्प** पु॰ सर्पभेदे अस्मिन्शब्दे सुश्रुतवाक्यं दृश्यम्।

**दर्भमय** त्रि॰ दर्भात्मकः मया॰मयट्। कुशनिर्म्मिते ब्राह्मणादौ

**दर्भमूला** स्त्री दर्भस्येव मूलमस्याः पाकस्थानीति ङीष्। औषधीभेदे। [ दूरदेशादौ।

**दर्भर** त्रि॰ दर्भस्य संघातदेशादि दर्भ+अस्मा॰ रः। दर्भा-

**दर्भानूप** पु॰ दर्भप्रचुरोऽनूपः संज्ञायामपि कुम्बादिपाठात् पक्षे पूर्वपदात् न षत्वम्। दर्भप्रचुरेऽनूपे देशभेदे।

**दर्भाङ्कय** पु॰ दर्भमाङ्कयते साङ्कयात् आ+ङ्क-य। सङ्घे तृणभेदे राजनि॰। [ भा॰ व॰ ८३ अ॰।

**दर्भि** पु॰ ऋषिभेदे अर्द्धकीलाख्यं तीर्थं तेन निर्म्मितं यथाह "अर्द्धकीलस्य तत्रैव तीर्थं कुरुकुलोद्वह"। "विप्रायामनुकम्पार्थं दर्भिणा निर्म्मितं पुरा। व्रतोपनयनाभ्यासाच्यवनप्रवासेन चाच्युत। क्रियामन्त्रैश्च संयुक्तो ब्राह्मणः स्नात्र संशयः। क्रियामन्त्रविहीनोऽपि तत्र स्नात्वा नरर्षभ!। चीर्णव्रतो भवेद्विद्वान् इत्येतत् पुरातनैः। समुद्रावापि चत्वारः समानीताश्च दर्भिणा। तेषु स्नात्वा नरश्रेष्ठ न दुर्गतिमवाप्नुयात्। फलानि गोसहस्राणां चतुर्णां विन्दते तु सः।

**दर्भ्य** त्रि॰ दृ-विदारे वा॰ भ। दारके। "इरां दर्भ्यो अपाजः" ऋ॰ १।४५।२। मनि दर्भ्मन् तत्रार्थे "दर्भ्मो दर्भीत विश्वतः" ऋ॰१।१२१।६।

**दर्य्य** त्रि॰ दरस्य हितम् गवा॰ यत्। दरहिते भयसाधने।

**दर्व** पुंस्त्री दृ-व। १राक्षसे उज्ज्वलद॰। स्त्रियां ङीष्। २उशीनरपत्नीभेदे स्त्री "उशीनरस्य पत्न्यस्तु पञ्च राजर्षिवंशजाः। सृंगा सृंजयिनेवा दर्वा पञ्चमी च दृषद्वती" "नवायास्तु नवः पुत्रो दर्व्यायाः सुव्रतोऽभवत्" हरिवं॰ २१ अ॰। ३हिंसके त्रि॰। घञ्। ४हिंसायां पु॰

**दर्वट** पु॰ दर्वाय हिंसायै अटति अट-अच् गक॰। दस्युवादिनि चौरा॰। [ २वादभेदे संक्षिप्तसा॰।

**दर्वरीक** पु॰ दृ-विदारे फर्फरीकादि॰ नि॰। १दन्दे २वाते

**दर्वि(र्वी)** स्त्री दृ-विन् वा ङीष्। अस्रुवदारके (हाता) स्त्राते पदार्थे खजाकायाम्।

"दक्षजातीयमिक्षार्द्धप्रमाणं मेक्षणं भवेत्। दर्व्या चाङ्गुष्ठपर्व्वप्रमवदानक्रियाक्षमम्। एवैव दर्वी यत्रास्य विशेषस्तमहं ब्रुवे। दर्वीं ध्रुक्चमसस्थया तरीयोनन्तु मेक्षणम्" कात्या॰ श्रौ॰। "मार्ष्टु दर्वीपरिघृष्टेन" भा॰ व॰ यज्ञप्रश्ने। २स्रुक्स्रुवयोर्मध्यरेखा॰ दर्वीकरः। [ तत्रार्थे हिरण्यकोषः।

**दर्विका** स्त्री स्वार्थे क। दर्व्यां रायसकुटः। दर्वक पु॰

**दर्वि(र्वी)होम** पु॰ इत॰। दर्वीसाधने होमभेदे "दर्वीहोमानुपादाय सर्वान् यः प्राप्नुते क्रतून्" भा॰ स॰ १२ अ॰।

**दर्वीकर** पु॰ दर्वी कृषा कर इवाश्व। सर्पे अस्मिन्शब्दे उदाहृतम्।

**दर्वीसंक्रमण** न॰ तीर्थभेदे। "दर्वीसंक्रमणं प्राप्य तीर्थं त्रैलोक्यपूजितम्। अश्वमेधमवाप्नोति स्वर्गलोकञ्च गच्छति" भा॰ व॰ ८३ अ॰।

**दर्श** पु॰ दृश्यते यामुद्दश्या सूर्य्यचन्द्रौ एकत्र स्थितौ यत्र। दृश-आधारे घञ्। १सूर्य्येन्दुसङ्गमकाले अमावास्यातिथौ "एकत्रस्थौ चन्द्रसूर्य्यौ दर्शनात् दर्श उच्यते" मत्स्यपु॰ कृष्णशब्देऽस्य विवृतिः। स निमित्ततयाऽस्यास्य अच्। २दर्शकालकर्त्तव्ये यागभेदे। आग्नेयाष्टापालेन्द्रदध्नैन्द्रवोऽपयामगृहीतयाज्यकोदर्शयागः। कालोऽयशब्दे तदितिकर्त्तव्यता दृश्या। "सर्वेभ्यो दर्शपौर्णमासौ" श्रुतिः भावे घञ्। दर्शने २चाक्षुषज्ञाने।

**दर्शक** त्रि॰ पश्यति दृश-ण्वुल् दर्शयति दृश-णिच् ण्वुल् वा। १द्रष्टरि २प्रधाने शब्दर॰। ३द्वारपाले पु॰ अमरः स हि द्वारदेशे समागतान् निवेद्य राजानं

दर्शयतीति तस्य तथात्वम् ५दर्शयितरि च। "कर्त्तार इवाचारे अनङ्वान् पारदर्शकः" भाग० १।१३।२८। तुमर्थे क्सुन्। ३द्रष्टुमित्यर्थे। अनिमन्त्रितोन गच्छेत यज्ञं गच्छेत दर्शकः" भा० अनु० १०३ अ०। दर्शकः द्रष्टुमित्यर्थः एतद्योगेन कर्म्मणि न षष्ठीत्यतः यज्ञमित्यत्र द्वितीया।

**दर्शत** पु० दृश्यतेऽसौ दृशि दृश--कर्म्मणि अतच्। १सूर्य्ये २चन्द्रे च शि० कौ०। ३दर्शनीये त्रि०। "स दर्शतश्रीरतिथिर्दुरोण आ" ऋ०१०।८१।२। "दर्शतश्रीः दर्शनीयविभूतिः" भा०।

**दर्शन** न० दृश--भावकरणादौ ल्युट्। १नेत्रे २सूत्रे ३वुद्धौ ४धर्म्मे ५दर्शने ६शास्त्रे मेदिनि०७रक्षायाम् अजयपा० ८वर्षे त्रिकाण्ड०९निभालने जटाध०। दृश्यते यथार्थतया ज्ञायते पदार्थोऽनेन करणे ल्युट्। अध्यात्मवेदके १०शास्त्रभेदे तानि च नास्तिकबौद्धजैनवैष्णवास्तिकादिमतभेदेन नानाविधानि। तानि च सर्वदर्शनसंग्रहे तत्तन्मतप्रदर्शनावसरे दर्शितानि। तत्रास्तिकदर्शनानि षट् तत्र गौतमेन न्यायदर्शनं, कणादेन वैशेषिकं, कपिलेन सांख्यं, पतञ्जलिना योगदर्शनं, जैमिनिना पूर्वमीमांसाख्यासेन वेदान्तदर्शनम् प्रणीतम्। तत्र वेदान्तदर्शनं व्यासप्रणीतमेकमपि बहुभिर्विद्वद्भिः इतोऽहैतविशिष्टाहैतशुद्धाहैतभेदेन नानाविधं यथा बुद्धस्यैकस्योपदेशकर्त्तेऽपि विनेयानां बुद्धिवैचित्र्यात् क्षणबुद्ध्यनुसारिपदार्थकल्पनया योगाचारमाध्यमिकादिभेदा उपजाताः। एवं वेदान्तस्यापि "षड्दर्शनानि मेऽङ्गानि पादौ कुक्षिः करौ शिरः। तेषु भेदन्तु यः कुर्यान्मदङ्गच्छेदको हि सः। एतान्येव कुलस्यापि षड्ङ्गानि भवन्ति हि। तस्मान्मदात्मकं कौलमहं कौलात्मकः शिवे!" तन्त्रशास्त्रम्। यदर्थभेदे दर्शने फलभेदो यथा "नन्द उवाच। "वेषाञ्च दर्शने! पुण्यं पापञ्च यस्य दर्शने। तत्सर्वं वद सर्वेश! श्रोतुं कौतूहलं हि मे।श्री भगवान् उवाच। शुक्लाम्बराणां तीर्थानां वैष्णवानाञ्च दर्शने। देवताप्रतिमादर्शात् तीर्थस्नायी भवेन्नरः। सूर्य्यस्य दर्शने भक्त्या सतीनां दर्शने तथा। सन्न्यासिनां यतीनाञ्च तथैव ब्रह्मचारिणाम्। भक्त्या गवाञ्च वृद्धीनां वृद्धानाञ्च विशेषतः। गजेन्द्राणाञ्च सिंहानां श्वेतानानां तथैव च। शुकानाञ्च पिकानाञ्च खञ्जनानां तथैव च। हंसानाञ्च मयूराणां चासानां शङ्खपक्षिणाम्। वत्सप्रसूक्षधेनूनामश्वानां तथैव च। पतिपुत्रवतीनाञ्च नराणां तीर्थयायिनाम्। प्रदीपानां सुवर्णानां मणीनाञ्च विशेषतः। शङ्खानां क्षीरकाणाञ्च मालिकानां महामये!। तुलसीशुक्लपुष्पाणां दर्शनं पापनाशनम्। फलानि शुक्लधान्यानि घृतं दधि मधूनि च। पूर्णकुम्भञ्च लाजांश्च राजेन्द्र दर्पणं जलम्। मालाञ्च शुक्लपुष्पाणां दत्त्वा पुण्यं लभेन्नरः। गोरोचनाञ्च कर्पूरं रजतञ्च सरोवरम्। इक्षोद्यानं पुष्पितञ्च दत्त्वा पुण्यं लभेन्नरः। देवालयितं देवघटं सुगन्धिपवनं तथा। शङ्खञ्च दुन्दुभिं दत्त्वा सद्यः पुण्यं लभेन्नरः। शुक्लपक्षस्य चन्द्रस्य पीयूषं चन्दनं तथा। कस्तूरीं कुङ्कुमं दत्त्वा नन्द! पुण्यं लभेन्नरः। पताकामक्षयवटं तरुं देवोत्थितं शुभम्। देवालयं देवखातं दत्त्वा पुण्यं लभेन्नरः। शुक्तिं प्रवालं रजतं स्फाटिकं कृष्णकुङ्कुमम्। शङ्खाम्बरं कुशं ताम्रं दत्त्वा पुण्यं लभेन्नरः। पुराञ्च पुस्तकं गुरुं सवीजं विष्णुयन्त्रकम्। स्निग्धदूर्वान्वितं रत्नं दत्त्वा पुण्यं लभेन्नरः। तप्तस्वर्णं विद्रुमञ्च वस्त्रं क्षौमसारकम्। यत्नं मङ्गोत्सवं दत्त्वा सुपुण्यं लभते नरः। गोभूमं गोभवं दुग्धं गोभूस्थिं गोश गोमदम्। शङ्खस्थान्वितं तोयं दत्त्वा पुण्यं लभेन्नरः। रुचिरां पद्मिनीं श्यामां न्यग्रोधपरिमण्डलाम्। सवेदिकां सुवसनां दिव्यभूषणभूषिताम्। वेश्यां वेशभरीं गन्धं बहुदूर्वान्वितस्रजम्। सिद्धान्नं परमान्नञ्च दत्त्वा पुण्यं लभेद्ध्रुवम्। कार्त्तिक्यां पूर्णिमायाञ्च राधिकाप्रतिमां शुभाम्। संपूज्य दत्त्वा नत्वा च करोति जन्मखण्डनम्। शिवरात्र्यां तथाष्टम्यामिषे मासि सिते शुभे। चौदुर्गाप्रतिमां दत्त्वा करोति जन्मखण्डनम्। शिवरात्रौ च काश्याञ्च विश्वनाथस्य दर्शनम्। कृत्वोपवासं पूजाञ्च करोति जन्मखण्डनम्। जन्माष्टमीदिने भक्त्या दत्त्वा मां विन्ध्यमाधवम्। प्रणम्य पूजां कृत्वा च करोति जन्मखण्डनम्। उपोष्य व्रजभूमौ च माघक्षीरे माघतीवने। संपूज्य राधां मां चैव करोति जन्मखण्डनम्। पौषे मासि शुक्लरात्रौ यत्र तत्र स्थले नरः। पद्मायाः प्रतिमां दत्त्वा करोति जन्मखण्डनम्। सप्तजन्म भवेत्तस्य पुत्रः पौत्रो धनेश्वरः। उपोष्यैकादशीं स्नात्वा प्रभाते द्वादशीदिने। दत्त्वा काश्यामक्षपूर्णं करोति जन्मखण्डनम्। दत्त्वा विष्णुपदे पिण्डं विष्णुं यत्र विलोकयेत्। पितॄणां स्वात्मनश्चैव करोति जन्मखण्डनम्। प्रयागे मुण्डनं कृत्वा यत्र पितॄन् प्रतर्पयेत्। उपोष्य नैमिषारण्ये करोति जन्मखण्डनम्। उपोष्य

पुष्करे स्नात्वा किं वा बदरिकाश्रमे। संपूज्य हत्वा मामेव करोति जन्मखण्डनम्। सिद्धां कृत्वा च बदरीं भुङ्क्ते बदरिकाश्रमे। हत्वा मत्प्रतिमां नन्द! करोति जन्मखण्डनम्। दीनावमानं गोविन्दं हत्वा वृन्दावने च माम्। हत्वा संपूज्य नत्वा च करोति जन्मखण्डनम्। भाद्रे हत्वा च मत्स्यं मामेव मधुसूदनम्। संपूज्य नत्वा भक्त्या करोति जन्मखण्डनम्। रवस्यङ्ग जगन्नाथं यो द्रक्ष्यति कलौ नरः। संपूज्य भक्त्या नत्वा च करोति जन्मखण्डनम्। उत्तरायणसंक्रान्त्यां प्रयागे स्नानमाचरेत्। संपूज्य हत्वा मामेव करोति जन्मखण्डनम्। कार्त्तिक्यां पूर्णिमायाञ्च हत्वा मत्प्रतिमां शुभाम्। उपोष्य पूजां कृत्वा च करोति जन्मखण्डनम्। चन्द्रभागासमीपे च माघ्यान्तु मां नमेत् शनैः। राधया सह मां हत्वा करोति जन्मनः क्षयम्। रामेश्वरं सेतुबन्धे आषाढ़पूर्णिमादिने। उपोष्य हत्वा संपूज्य करोति जन्मनः क्षयम्। दीननाथं दिनकरं लोलार्के चोत्तरायणे। उपोष्य हत्वा संपूज्य करोति जन्मनः क्षयम्। ऋणिकोष्ठे सुवसने कलविङ्के सगह्वरे। विघन्द्रके राजकोष्ठे नन्दके पुष्पभद्रके। पार्वतीप्रतिमां हत्वा कार्त्तिकेयं गणेश्वरम्। नन्दिनं शङ्करं हत्वा करोति जन्मनः क्षयम्। त्रिकूटे मणिभद्रे च पश्चिमोदधिसन्निधौ। सप्तपोष्य दृषि प्राग्वा मां हत्वा सुक्तिमाप्नुयात्" ब्रह्म० वै० जन्म० ख०। भक्तनभेददर्शने फलभेदः भक्तशब्दे दृश्यम्।

**दर्शनप्रतिभू** पु०दर्शनाय प्रतिभूः। प्रतिभूभेदे "दर्शने प्रातिभाव्ये च विधिः स्यात् पूर्ववोदितः" "यो यस्य प्रतिभूस्तिष्ठेत् दर्शनायेह मानवः। अदर्शयन् स तं तस्य प्रयच्छेत् स्वधनादृणम्" मनुः। वीरमि० विस्तरेण तद्विधिरुक्तो यथा "अथ प्रतिभूः तत्र प्रातिभाव्यं नाम विश्वासार्थं पुरुषान्तरेण सह समयः। तद्भेदाच्च हरहस्पतिः "दर्शने प्रत्यये दाने ऋणिद्रव्यार्पणे तथा। चतुःप्रकारः प्रतिभूः शास्त्रे दृष्टो मनीषिभिः"। प्रत्ययो विश्वासः दानम् ऋणापाकरणार्थमर्पणम्। ऋणिद्रव्यार्पणम् ऋणिनो यद्द्रव्यं स्वकोपकरणादि तदर्पणम्। चतुःप्रकाराणां प्रतिभूनां प्रातिभाव्यस्वीकारप्रकारं दर्शयति स एव "आहैको दर्शयामीति साधुरित्यपरोऽब्रवीत्। दाताहमेतद्द्रविणमर्पयास्यपरोऽब्रवीत्"। एको दर्शनप्रतिभूरहमेनं धनायनप्रहृत्तं दर्शयिष्यामीत्याह। अपरः प्रत्ययप्रतिभूरेषः साधुर्न त्वां प्रतारयिष्यति यतोऽयं श्रेत्रियपुत्रोऽस्य सर्वस्वसम्मतो यामोऽस्मि मत्प्रत्ययेनास्य द्रव्यं देहीति ब्रवीति। दानप्रतिभूर्यद्ययं न ददाति तदा सदृढिकरूपमहं दास्यामीति। अपरः ऋणिद्रव्यार्पणप्रतिभूर्यद्ययं न ददाति तदाहमेतदीयस्वकोपकरणादिकमर्पयिष्यामीति कथयतीत्यर्थः। दर्शनप्रतिभुवा यदा धनिकस्य धारणिकदर्शनापेक्षा तदैव स दर्शनीयः इत्याह कात्यायनः "दर्शनप्रतिभूर्यस्तु देशे काले च दर्शयेत्"। यस्मिन् देशे काले च धनिकस्तद्दर्शनमपेक्षते तत्रैव दर्शयेत् अधमर्णमिति शेषः। दर्शिते च तस्मिन् धनिकेन प्रातिभाव्यात् स मोक्तव्य इत्युत्तरार्द्धेनाह स एव। "यदासौ दर्शयेत् तत्र मोक्तव्यः प्रतिभूर्भवेत्"। एवं प्रत्ययादिप्रतिभुवोऽपि तदविसंवादे मोक्तव्याः, अन्यथा धारणिकदेयं धनं दाप्या इत्याहतुः कात्यायनबृहस्पती "यो यस्य प्रतिभूस्तिष्ठेद्दर्शनायेह मानवः। अदर्शयन् स तन्तस्मै प्रयच्छेत् स्वधनाद्दृणम्। आद्यौ तु वितथे दाप्यौ तत्कालावेदितं धनम्। उत्तरौ तु विसंवादे तौ विना तत्सुतौ तथा"। यत्तु योगीश्वरेण प्रतिभुवान्तैर्विध्यमेवोक्तम। "दर्शने प्रत्यये दाने प्रातिभाव्यं विधीयते" तद्दानार्पणयोरनतिभेदाभिप्रायेण। "आद्यौ तु वितथे दाप्यौ वितरस्य सुता अपि"। वितथे दर्शनप्रत्यये विसंवादे इतरस्य सुता न दाप्याः। सुता इत्यभिधानाच्च पौत्रा इत्युत्तरभवति दानं स्वधनार्पणं धनिकाय। अर्पणन्तु धारणिकधनमानीय तस्य अर्पणं धनिकस्य स्वधनलाभे उभयतो न विशेषः अतएव सूक्ष्मभेदविवक्षया पञ्चप्रकारा अपि प्रतिभुवो व्यवहारीतेनोक्ताः। "अभये प्रत्यये दाने उपस्थाने प्रदर्शने। पञ्चस्वेषु प्रकारेषु प्राहुर्हि प्रतिभूर्बुधैः" अभयसप्रदववारणम्। उपस्थानमत्र धारणिकधनस्य धनिकायानीयार्पणं न दर्शनं तस्य पृथङ्निर्देशात् पञ्चस्त्वित्यनन्वयाच्च। व्यासस्तु सप्तभिर्विधैः सप्तप्रकारं प्रतिभुवमाह। "लेख्ये कृते च दिव्ये वा दानप्रत्ययदर्शने। स्वकीतवस्तूपस्थाने ऋणिद्रव्यार्पणे तथा"। प्रतिभूर्यात्रेत्र इत्यत्र प्रकृतम्। कात्यायनोऽपि "दानोपस्थानवादेषु विश्वासप्रत्ययाय च। सप्तकद्वारवेदेवं यथायोग्यं विपर्यये"। वादोविवादस्तत्र प्रतिभूरहस्यम्। "उभयोः प्रतिभूर्यात्रेत्रः समर्थः कार्यनिर्णये" इति। योगीश्वरेणाप्युक्तञ्च प्रागेव व्याख्या-

तम् । दर्शनप्रत्ययदानेषु यथायथं सर्वेषामनभीवसम्भव इति परमार्थः । दर्शनप्रतिभुवे नष्टधारणिकान्वेषणाय कालावधिर्देय इत्याह । उशनाः "नष्टस्यान्वेषणे कालं दद्यात् प्रतिभुवे धनी । देशानुरूपतः पक्षं मासं सार्द्धमथापि वा" । सार्द्धमासमिति परमावधिः । तथा च कात्यायनः "नष्टस्यान्वेषणार्थन्तु देयं पक्षत्रयं परम् । यद्यतो दर्शयेत्तत्र मोक्तव्यः प्रतिभूर्भवेत् । काले प्रतीते प्रतिभूर्यदि तं नैव दर्शयेत् । स तमर्थं प्रदाप्यः स्यात् प्रेते चैव विधिः स्मृतः" । परं परमावधिभूतम् । प्रतीतेऽन्वेषणाय परिकल्पिते, प्रेते चैव विधिरिति धारणिके सति प्रतिभूरूपमर्थं प्रदाय इति विधिः कालावधिविधेरुत्तरान्वयबाधात् । एतदपि देवराजसत्प्रतिबन्धाभावे बोध्यम् । अतएव कात्यायनः "दर्शनप्रतिभूर्यत्र देये काले न दर्शयेत् । निबन्धभावहेतुत्वं देवराजकृतादृते" । निबन्धसत्त्वम् । दैवकृतो दीर्घरोगशरणादिरूप ऋणदानप्रतिबन्धः । राजकृतो बन्धनासेधदण्डादिरूपः । प्रतिभूभेदेन ऋणमाह नारदः "ऋणिप्रत्यर्थिकुर्वतस्तु प्रत्यये वाथ स्थापिते । प्रतिभूस्तद्धनं दद्यादन्यस्यापयंस्तथेति" । ऋणिप्रत्यर्थिधर्मेण स्वप्रतिकुर्वतः स्वसाध्येषु निर्हरणत्वादिना ऋणमप्रत्यर्पयतः स्थितिः दानप्रतिभूविषयम् । प्रत्यये विश्वासे स्थापिते विसंवादिते इति प्रत्ययप्रतिभूविषयम् । अन्यस्यापयतः ऋणिनदर्शयतः ऋणिनः सकाशादाधिस्थं पर्याप्तं तद्धनं दोत्तमर्णायानर्पयन्तिति दर्शनद्रव्यार्पणप्रतिभूविषयमिति विवेकः" ।

**दर्शनीय** त्रि॰ दृश-कर्म्मणि अनीयर् । १मनोहरे, २दर्शनयोग्ये च धरणिः । "दर्शनीयतमो नृणामिदं वचनमब्रवीत्" भा॰ स॰ ७५ अ॰ ।

**दर्शप** पु॰ दर्शेन दर्शनेन पिबन्ति पा-क । दर्शनमात्रेण पातृषु देवेषु "न वै देवा अश्नन्ति पिबन्ति एतदेवामृतं दृष्ट्वा तृप्यन्ति" छा॰ उ॰ दर्शनमात्रेण तेषां तृप्तिहेतुत्वमस्मत्सकाशे तथात्वम् । "युष्माद्य निर्ऋतिरताख्यदेवाः स्वर्शनना दर्शपा आज्यपाश्च" भा॰ अनु॰ १६ अ॰ । [रात्रौ केचित्॰ ।

**दर्शयामिनी** स्त्री दर्शस्येव यामिनी । अन्धकारयुक्तायां

**दर्शयितृ** त्रि॰ दृश-णिच्-तृच् । १दर्शनकारके दर्शके "पक्षः स्तनेर्दर्शयितारः ईश्वराः" रघुः २प्रतीहारे द्वारपाले पु॰

**दर्शविपट्** पु॰ दर्शे अमावास्यायां विपट् नाशोऽदर्शनमस्य । चन्द्रे त्रिका॰ । [दिते च हेमच॰ ।

**दर्शित** त्रि॰ दृश-णिच्-क्त । १प्रकटिते २प्रकाशिते ३प्रतिपादिते च ।

**दर्शिन्** त्रि॰ दृश-णिनि । १द्रष्टरि २विवेचके ३साक्षात्कारके च । "तद्दर्शिनस्तदासीनं त्वामेव पुरुषं विदुः" कुमा॰ । "तस्यै सुनिर्दोहदलिङ्गदर्शी" रघुः । मन्त्रदर्शिभिरुच्यते" मनुः । स्त्रियां ङीप् । प्रतीपदर्शिनी ।

**दर्शिवन्** त्रि॰ दृश-"अन्येऽपि दृश्यन्ते" इति वा॰ क्वनिप् । द्रष्टरि । "कृष्णां पाण्डवानां च भयात् प्रत्यक्षदर्शिवान्" भा॰ आ॰ ६ अ॰ । "अन्यो न त्वामृते क्षेत्रज्ञो विद्यते सर्वदर्शिवम्" स्फु॰ सि॰ । "अत्र दर्शिवस्" इति शब्दकल्पनमतीव ग्राम्यादिकम् ।

**दल** भेदे भ्वा-पर॰-सक॰ भेदने सक॰ सेट् । दलति अदालीत् दिदलिषति दाल्यते दाल्यति । ददाल देलतः दलितः । दला "ददाल भूर्नभोरन्ध्रं गोप्रदप्रं ववर्ष च" "ददाल भूः पुपूरे द्यौः कपीनामपि निस्वनैः" "अदालिषुः शिलादेहे चूर्णभूवन् महाद्रुमाः" भट्टिः "दलति शतधा यन्न हृदयम्" अमरः ।

**दल** भेदने चुरा॰ उभ॰सक॰सेट् । दालयति-ते अदीदलत् त । "सुष्टिनाऽदालयत्सस्य" "दालयत्यटौ कलञ्जाश्रितः" अनर्घरा॰ । भेदचेह द्विधाकरणं विकसनन्तु तत्रविकसने । "दरविदलितमल्लीवल्लिचञ्चत्परागे" गीतगो॰ ।

**दल** न॰ दल-अच् । १छत्रसेधे २खण्डे ३पत्रे ऋदे भेदि॰ । ४घने शब्दर॰ ५तमालपत्रे राजनि॰ ६शर्द्धे लीलावती "प्राप्तापराधाल्लाघाः स्यूरज्वा वेणुदलेन वा" मनुः "ताम्बूलीनां दलैस्तत्र रचितायानभूमयः" रघुः "वापीजलैर्नभङ्गानोल्लदलासु" माघः । "अङ्कुः खलंग्रयुक्तः सनिजदलयुतः कीटगः कीटगोऽसौ" लीला ।

**दलकोष** पु॰ दलान्येव कोषो यस्य । कुन्दवृक्षभेदे शब्दमा॰ । तस्य पुष्पे कोषान्तराभावात् तथात्वम्

**दलत** त्रि॰ दल-वा अतन् । द्विधाकारके । तेन निर्वृत्तं अरी॰ वुञ् । दालिकत्तद्विर्वृत्तादौ त्रि॰ ।

**दलनिर्मोक** पु॰ दलतीति दलं वल्कलं निर्मोक इव यस्य । भूर्जपत्रवृक्षे शब्दरत्ना॰ । तस्य हि वल्कलस्य निर्मोकाकारत्वात्तथात्वम् ।

**दलन** न॰ दल-करणे ल्युट् । १दलनकारणे (छेदा) २खोड़े स्त्री॰ ङीप् रत्नावली । तथाभूतस्त्रियां स्त्री "प्रतिपक्षपक्षदलनी" विद्धन्मनो॰ ।

**दलप** न॰ दल-कपन् । १प्रहरणे उज्ज्वलद॰ । २विदारकमात्रे त्रि॰ ३शस्त्रे तत्रादि॰ । दलं पाति पा-क । ४दलपतौ

दलाधिपदलपत्त्रादयोऽप्यत्र पु० । [हि दलाकार पुष्पा"
दलपुष्पा स्त्री दल इव पुष्पमस्याः । केतक्याम् राजनि० । या
दल(मा)ग्रालो स्त्री दलेन मलति सम्बध्नाति मल--णिनि
मलते मल--णिनि वा । कञ्चुकवाके पारस्करनि० । [रत्नमा०
दलसारिणी स्त्री दले पत्रे सारोऽस्यस्या इनि । केतके
दलसूचि(ची) स्त्री दलस्य सूचिरिव । कण्टके हारा० ।
दलस्रसा स्त्री दल० । पत्रशिरायाम् हेमच० ।
दलाढ़क पु०दलेनाढ़क इव । १खर्जूजातितिलवृक्षे, २शुभ्रग्रामे,
३गैरिके ४फेने, ५खातके, ६नागकेशरे, ७भल्लातके, मेदि०
८कुन्दे, ९करिकर्षे, १०गिरीषे, ११वाल्मायाञ्च हेमच० ।
दलाढ्य पु० दलेन दर्भेणाढ्यः । षड्डकर्वटे (दलदलिया) कर्द-
मभेदे त्रिका० । [ १दमनवृक्षे च पु० शब्दर० ।
दलामल न० दलेनामलम् । १मरुवके मेदि० । २मदनवृक्षे
दलाम्ल न० दलेनाम्लम् । चुक्रे (चुकापालङ्ग) राजनि० ।
दलि स्त्री दल-इन् । १कोष्ठे उज्ज्वल० तत्रार्थे पुंस्त्री
रन्तिदेवः । संज्ञायां कन् । दलिक १कोष्ठे हेमच० ।
दलित त्रि० दल--क्त । १विकसिते । २खण्डिते ३मर्दीकृते ।
"द्व्येका दलिता विभाजितेऽहेन" "दलिता बाधे तयोः
स्याताम्" नीला० । [ ङीप् ।
दलिन् त्रि० दल--इच्मा० मत्वर्थे इनि । दलयुक्ते स्त्रियां
दलेगन्धि पु० दले गन्धो यस्याः इत् समा० सप्तम्या अलुक् ।
सप्तच्छदवृक्षे (छातिम गाछ)त्रिका० ।
दलोद्भव त्रि० दलादुद्भवति उद्+भू--अच् ५त० । दलजाते
२मधुभेदे न० । "ऋद्धिमेद्यप्रशमनं मधु रूक्षं दलोद्भवम्"
सुश्रु० ।
दल्भ पु०दल--भ । १ऋषिभेदे २चक्रे च उज्ज्वल०ततो गर्गा०
यञपत्ये घञ् । दाल्भ्य तदपत्ये पुंस्त्री । "तेन तं ह वको
दाल्भ्यो विद्याञ्चकार" छान्दो० ।
दल्लि पु० दल--भि । १इन्द्रे २वज्रे उज्ज्वलद० । ततो
मत्वर्थे मतुप् यवादि० मोपधत्वेऽपि न मस्य वः । दल्लि-
मत् वज्रयुक्ते इन्द्रे । [ दलस्यादूरदेशादौ ।
दल्य त्रि० दलस्यादूरदेशादि दल+चतुरर्थ्यां बला० य ।
दव गतौ भ्वा० पर० सक० सेट् इदित् । दवति अदवीत् ।
ददव । क्विपि दव् ।
दव पु० दुनोति दु-अच् । १वने, २वनानले च अमरः । भावे
अप् । ३उपतापे । "अतिमात्रं दववद्दह्यसि" माघः ।
दवथु पु०दु--उपतापे भावे अथुच् । उपतापे । "स दवथु
बहुलोविप्लवम्" माघः "केचिद्वे पथुमाहेदरन्ये दवथु-
सत्तमम्" भट्टिः । [रोद्धिपद्वये राजनि० ।
दवदग्धक न० दवेन दग्धं सत् कायति प्रकाशते कै--क ।
दवदहन पु० दवजातो वनजातो दहनः । दावानले ।
"सरःसख्येऽख्ये दवदहनदाहव्यतिकरः" स्फुटः । "कि-
ञ्चात्मजविश्लेषज्वरदवदहनज्वालाभिः" भाग०५।८।२७श्लो०
"दवाग्निप्रभृतयोऽप्यत्र" शाश्वत इच्छापि विना दवाग्निः,
रघुः ।
दवि दूरीकरोति दूर+णिच्--स्थूलदूरेत्यादिना दवादेशः
नामधातुः दूरीकरणे सक०सेट् । दवयति अदीदवत् ।
"दवयदतिरवेण प्राप्तसन्ध्याविभागम्" भट्टिः ।
दविष्ठ त्रि० इदमेषामतिशयेन दूरम् इदन् दवादेशः । दूर-
तमे । दवीयस् तत्रार्थे त्रि० "तेजस्विमध्ये
तेजस्वी दवीयानपि गण्यते" माघः स्त्रियां ङीप् । "नैव
सक्तिरपि दवीयसी" किरा० । [ मत्-त ।
दश दीप्तौ चु० उभ० सक० सेट् इदित् । दंशयति-ते अददंत
दश दंशने चुरा०आत्म० सक० सेट् इदित् । दंशयते अददंशत
दशक न०दश परिमाणमस्य कन् । दशति, दशसङ्ख्याम् ।
"धृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः ।
धीर्विद्या सत्यमक्रोधो दशकं धर्मलक्षणम्" । "मृगया
ऽक्षो दिवास्वप्नः परीवादः स्त्रियो मदः । तौर्यत्रिकं
वृथाट्या च कामजो दशको गणः" मनुः ।
दशकण्ठ पु० दश कण्ठा यस्य । १रावणे हेमच० ।
दशकण्ठजित् पु० दशकण्ठं जयति जि--क्विप् । १रामे
त्रिका० । दशकण्ठारिप्रभृतयोऽप्यत्र "दशकण्ठारिरुद्रं
विदुर्बुधाः" रघुः ।
दशकन्धर पु० दश कन्धरा यस्य । रावणे हेमच० । कृषो०
रलोपे दशकन्धोऽप्यत्र "दशकन्धराजसूनोरथा युद्ध
मभून्महत्" भा० व० २८६ अ० । [ त्रिका० ।
दशकन्धरजित् पु० दशकन्धरं जयति जि--क्विप् । रामे
दशकर्मन् न० दशविधम् कर्म । गर्भाधानादिश्मशानान्ते
दशविधे संस्कारकर्मणि । दशकर्मपद्धत्यादौ तद्विवृति-
र्द्रष्टव्या ।
दशकुलदृच्च पु० दशकुलानि कुलदृचः संज्ञात्वात् कर्मधा०
या व० ब० । तन्त्रोक्ते कुलदृचदशके कुलदृचदशकं च तत्सारोक्तं यथा "श्रीभ्रातकः करञ्जश्च बिल्वाश्वत्थ-
कदम्बकाः । निम्बो वटोडुम्बरौ च धात्री चिञ्चा
दश स्मृताः" "साधकः प्रातरुत्थाय कुलदृचं प्रणम्य च" ।
दशक्षीर न० दशविधं क्षीरम् । मृगीगवीभीक्षीरसहिते

"गव्यमाजं तथा चौष्ट्रमाविकं माहिषञ्च यत्। अजायाश्चैव नार्य्याश्च करेणूनां तथैव च" इत्युक्ताष्टविध-क्षीररूपे क्षीरदशके "पुनः पचेत् दशक्षीरं सिता-मधुकचन्दनैः सुस्थितः।

**दशग्रामपति** पु० दशानां ग्रामाणां पतिः उत्तरपदहिगुः। दशग्रामाध्यक्षे। तद्वियोगादि मनुनोक्तं यथा

"ग्रामस्याधिपतिं कुर्य्यात् दशग्रामपतिं तथा। विंश-तीशं शतेशञ्च सहस्रपतिमेव च। ग्रामे दोषान् समुत्प-न्नान् ग्रामिकः शनकैः स्वयम्। शंसेद्ग्रामदशेशाय दशेशो विंशतीशिनम्। विंशतीशस्तु तत्सर्वं शतेशाय निवेदयेत्। शंसेद्ग्रामशतेशस्तु सहस्रपतये स्वयम्। यानि राजप्रदेयानि प्रत्यहं ग्रामवासिभिः। अन्नपाने-न्धनादीनि ग्रामिकस्तान्यवाप्नुयात्। दशी कुलन्तु भुञ्जीत विंशी पञ्चकुलानि च। ग्रामं ग्रामशताध्यक्षः सहस्रा-धिपतिः पुरम्। तेषां ग्राम्याणि कार्य्याणि पृथक् का-र्य्याणि चैव हि। राज्ञोऽन्यैः सचिवैः स्निग्धैस्तानि पश्येदतन्द्रितः"।

**दशग्रामिक** त्रि० दश ग्रामा अधिकृतत्वेन सन्त्यस्य ठन्। तस्माद्दूरदेशादि कृञ्चतुरर्थ्यां ठच् वा।१दशग्रामाधिपे २तस्माद्दूरदेशादौ। स्त्रियां ङीप् चतुरर्थान् काश्या० ठञ् ञिठौ वा। दाशग्रामिक तस्माद्दूरदेशादौ त्रि० ठञि स्त्रियां ङीप् ञिठे टाप् इति भेदः।

**दशग्रामिन्** पु० दश ग्रामा अधिकृतत्वेन सन्त्यस्य इनि। दशग्रामाधिपतौ। "सभीभि दद्यात् ग्रामस्य पदं वा यत्र गच्छति। पञ्चग्रामी बहिः कोशात् दशग्राम्यथ वा पुनः" याज्ञ०।

**दशग्रीव** पु० दश ग्रीवा अस्य। १रावणे।

"पुष्पोत्कटायां जज्ञाते द्वौ पुत्रौ राक्षसेश्वरौ। कुम्भ-कर्णदशग्रीवौ बलेनाप्रतिमौ भुवि"। "दशग्रीवस्तु सर्वेषां श्रेष्ठो राक्षसपुङ्गवः। महोत्साहो महावीर्य्यो महा-सत्त्वपराक्रमः" भा०व० २७४ अ०। २असुरविशेषे "दश-ग्रीवश्च बाली च मेघवासा दशारुधः। टिट्टिभो विट-भूतश्च संह्रादश्चेन्द्रतापनः" भा० व० ६ अ०। ३दमघोषस्य पुत्रभेदे। "शिशुपालो दशग्रीवो रौद्र्योऽग्रोपदिग्रो बली। सर्वोल्लकुशला वीरा वीर्य्यवन्तो महाबलाः" हरिवं०११७ अ०। ४एकादशमन्वन्तरीयेन्द्रशत्रुभेदे तदुपक्रमे भाग० पु० ८७ अ० "एकैकस्मिंश्चक्रसंख्यं गणाश्चेन्द्रश्च वै दृढः। दशग्रीवो रिपुश्चास्य स्त्रीरूपी घातविष्यति"।

**दशज्योति(स्)** पु०सुव्राजः पुत्रभेदे। "सुव्राजस्तु त्रयः पुत्राः प्रजावन्तो बहुश्रुताः। दशज्योतिः शतज्योतिः सहस्र-ज्योतिरेव च। दशपुत्रसहस्राणि दशज्योतेर्महात्मनः" भा० आ० १ अ०।

**दशत्** स्त्री दश परिमाणमस्य अति। दशानां पूर्णे-दशके दश-सङ्ख्यायाम्। "स वै दक्षिणा नयन्। ।ऊनाना दशतो नयेदाहा एकां दाक्षन्न ब्राह्मणभ्यस्तेभ्यो दशत-सुपावर्त्तयेद्यद्वै द्वे दाक्षन्न ब्रात् पञ्चभ्यस्तेभ्यो दशतसु-पावर्त्तयेद्यद्वै तिस्रो दाक्षन्न ब्राक्षत्रियस्तेभ्यो दशतसु-पावर्त्तयेद्यद्वै पञ्च दाक्षन्न ब्राह्मा तस्यां दशतसुपार्त्तये देवमा शतात्तयो ह्याद्यैवान्यूना विराडसृक्षि लोके काम-दुघा भवति" शतब्रा०४।५।८।६। "या प्रथमा दशदयं स लोको या द्वितीयान्तरिक्षं तद्या तृतीया द्यौः सेमामेव लोकं प्रथमया दशतारोहत्यन्तरिक्षं द्वितीयया दिवं तृतीयया तथैवैतद्यजमान इमामेव लोक प्रथमया दशता रोहत्यन्तरिक्षं द्वितीयया दिवं तृतीयया" ८।५।२।५। "एकादश दशत आप्नुवते। एकादशाक्षरा वै वीर्य्यं त्रिष्टुब्त्रिष्टुभ्येव वीर्य्यमवरुद्ध्या एकादश दशत आप्नु-वते दश वै पशोः प्राणा आत्मैकादशः प्राणैरेव पशूनात्मन्धत्ते" शत० ब्रा० १।२।५।४।

**दशतय** त्रि० दशावयवा यस्य दशानामवयवा वा संख्यायाः अवयवे तयप्। १दशसंख्यायां २तत्संख्यान्विते त्रि०स्त्रियां ङीप्। "अथास्य संस्तविका देवा इन्द्रः सोमो वरुणः पर्जन्य ऋतव आम्नावैष्णवं ऋचिन्न त्वक्संस्तविको दश-तयीषु विद्यते" निरु० ७।८। "तदेकमेव जातवेदसं गायत्रं ऋचं दशतयीषु विद्यते" २०।

**दशति** स्त्री दशाहता दश नि०। दशाहतदशके शतसंख्यायां "कालेन महता कङ्कुरण्डानां दशतीर्दश। जनया-मास विप्रेन्द्र!" भा० आ० १६ अ०। यथा "दशाहता नव नवतिः तथा दशाहता दश दशतिः शतमित्यर्थः। दश दशतीर्दशशतानीत्यर्थः नीलक०। तत्संख्यावाच्च "ओङारस्याथ जायन्ते स्तुतयो दशतिर्दश" भा०उ०१०७अ०

**दशदश्रिन्** त्रि० दशाहता दश परिमाणमस्य इनि। शत-गुणिते स्त्रियां ङीप्। [धर्मभेदे दशकशब्दे दृश्यम्।

**दशधर्म्म** पु० दशविधो धर्मः। सर्ववर्णसाधारणे मनूक्ते

**दशधा** अव्य० दशानां प्रकारः धाच्। दशप्रकारे "गायत्रीं दशधा जप्त्वा ततः सन्ध्यां समाचरेत्" मल० त०। "स्मृते सर्वं रिक्थजातं दशधा परिकल्पते च" मनुः।

**दशन्** त्रि॰ दन्त्य वा॰—कनिन्। संख्याविशेषे १द्विगुणितपञ्चके २तत्संख्यान्विते च। तत्संख्यावाचकाच्च एकादिशब्दे उक्ताः "दिशो दशोक्ताः पुरुषस्य लोके सहस्रमाहुर्दशपूर्ण शतानि। दशैव मासान् विभ्रति गर्भवत्यो दशैरेका दश दाशा दशार्हाः" भा॰ व॰ १२४ अ॰। आसमन्तादी रयन्ति उपदिशन्ति एरका उपदेष्टारः दशोपनिषदां प्राधान्येन दशत्वात् तत्प्रतिपाद्योपदेशकत्वेन तेषां दशत्वम्।

**दशन** न॰दश्यतेऽनेन वा दन्त्य—भावे करणादौ वा ल्युट् नि॰ नलोपः। १कवचे वर्मणि २शिखरे पु॰ मेदि॰। ३दन्ते पुंन॰ अमरः। "बभौ सदशनज्योत्स्ना सा विभोर्वदनोद्भवा" रघुः। "ततुलोमकेशदशनां सहङ्कीसहहेत स्त्रियम्" मनुः। "ताम्बूलाक्तं दशनमसकृत् दर्शयन्तीव चेटी" मा॰ द॰।

**दशनच्छद** पु॰दशनान् दन्तान् छादयति छद्—घञ् हुस्वः। ओष्ठे "दशनो दशनच्छदान्" भा॰ आ॰ १०२ अ॰।

**दशनपद** न॰दशनस्य दशनच्छदस्य पदम्। दशनच्छदस्थाने तदङ्के "दशनपदं भवदधरगतं मम जनयति चेतसि खेदम्" गीतगो॰

**दशनवासस्** न॰ दशनस्य वास इवाच्छादकत्वात्। ओष्ठमात्रे अमरः।

**दशनवीज** पु॰दशन इव बीजमस्य। दाडिमीवृक्षे पारस्करनि॰

**दशनाङ्क** पु॰ ह्रस्व॰। दशनक्षते। [ (चुकापाखड) शब्दच॰।

**दशनाच्छा** स्त्री दशन आच्छो यस्याः सेवनात्। चुक्रिकायां

**दशनोच्छिष्ट** न॰ दशनेनोच्छिष्टं यत्। अधरादिचुम्बने "रेवतीदशनोच्छिष्टपरिपूतपुटे हरौ" माघः। २निशाये पु॰ ह्रस्व॰। ३दन्तोच्छिष्टे त्रि॰ मेदि॰।

**दशप** पु॰ दश ग्रामान् पाति रक्षति पा—क। दशग्रामी रक्षके राजनियुक्ते पुरुषभेदे। तद्नियोगादिकं भा॰ शा॰ ८७ अ॰ उक्तं यथा

"ग्रामस्याधिपतिः कार्यो दशग्राम्यास्तथाऽपरः। द्विगुणायाः शतस्यैवं सहस्रस्य च कारयेत्। ग्रामेयान् ग्रामदोषांश्च ग्रामिकः प्रतिभावयेत्। तान् ब्रूयाद्दशपायासौ स तु विंशतिपाय वै। सोऽपि विंशत्यधिपतिर्दुष्टं जानपदे जने। ग्रामाणां शतपालाय सर्वमेव निवेदयेत्। यानि ग्राम्याणि भोज्यानि ग्रामिकस्तान्युपाश्नीयात्। दशपस्तेन भर्त्तव्यस्तेनापि द्विगुणाधिपः। ग्रामं ग्रामशताध्यक्षो भोक्तुमर्हति सत्कृतः। महान्तं भरतश्रेष्ठ! सुस्फीतं जनसङ्कुलम्। तत्र ज्ञानेऽपायत्तं राज्ञो भवति भारत!। ग्रामानगरमर्हस्तु सहस्रपतिरुत्तमः। धान्यं स्थिरण्यं भोगेन भोक्तुं राष्ट्रीयसङ्कृतः। तेषां संग्रामकृत्यं स्याद् ग्रामकृत्यञ्च तेषु यत्। धर्मज्ञः सचिवः कश्चित् तत् प्रपश्येदतन्द्रितः"।

**दशपञ्चतपस्** पु॰ दशसु इन्द्रियेषु पञ्चसु वह्निषु च तपो यस्य। इन्द्रियजयपूर्वकपञ्चाग्नितपस्विनि। "ऋभुक्षो वायुभक्षश्च दन्तोलूखलिकस्तथा। अश्मकुट्टो निरग्निश्च दशपञ्चतपाश्च यः" हरिवं॰ ४५ अ॰। [ बुद्धे। हेमच॰

**दशपारमिताध्वर** पु॰ दशभिर्बलैः पारमितोऽध्वरो येन।

**दशपुर** न॰दश दिशः पिपर्त्ति पॄ—क। १कैवर्त्तीमुस्तके अमरः। दश पुरो यत्र अच् समा॰। २मालवदेशैकखण्डे मेदि॰ स च देशः ह्र॰सं॰१४ अ॰ अथ दक्षिणेन चङ्क्रम्योपक्रमे "दशपुरगोनर्द्दकोलकाः" दक्षिणस्यामुक्तः। "पालोकुर्वन् दशपुरवधूनेत्रकौतूहलानाम्" माघः।

**दशपुरुष** पु॰ दशगुणितः पुरुषः। स्वजनकावधिपुरुषदशके। "यो मातृतः पितृतश्च दशपुरुषं समनुष्ठिता विद्यातपोभ्यां पुण्यैश्च कर्मभिर्येषामुभयतो नाम्नाक्षण्यं निनयेयुः" आश्व॰ श्रौ॰ ६।३।२०। "येषां मातृतः पितृतश्चोभयतो ये दशपूर्वाः पुरुषाः ते विद्यया तपसा पुण्यैः प्रतिषिद्धवर्जितैश्च युक्ताः सम्यगनुष्ठितवन्तो वैदिकं पन्थानम्, अपि च अम्नाक्षण्यं न निनयेयुः निरयेणा म्नाक्षण्यं न गमयेयुः। अम्नाक्षण्यगमनं नाम मूढायामपत्योत्पादनमित्युच्यते। विद्या नाम षड़ङ्गो वेदः, तदर्थज्ञानञ्च। तपो नाम श्रौतस्मार्त्तकर्मानुष्ठानम्। पुण्यकर्म नाम प्रतिषिद्धवर्जनम्। तानेवंविधान् पुरुषानुभयमर्षयेयुः, एतदुक्तं भवति मातृतः पितृतश्चोभयतः पूर्वं दश ये पुरुषाः ते षड़ङ्गवेदाध्ययनेन तदर्थज्ञानेन च श्रौतस्मार्त्तकर्मानुष्ठानेन च प्रतिषिद्धवर्जितेन च युक्ताः मूढायामपत्योत्पादनं चाक्षतवन्तो ये पुरुषा तानेवंविधान् पुरुषानुभयमर्षयेयुः। दशपुरुषमिति दशपुरुषा इत्यर्थः। नारा॰। "मातापितृतोवेद्य वंश्यः श्रोत्रियो दशपूरुषः" भा॰ अनु॰ ६० अ॰ "दशपुरुषविख्यातश्रोत्रियाणां महाकुलम्" स्मृतिः।

**दशपूर** न॰ दश दिशः पूरयति पूर—अण्। कैवर्त्तीमुस्तके अमरे पाठान्तरम्।

**दशपेय** पु॰दशभिः पुरुषैर्यसं पेयमत्र। यागभेदे। "संस्थेष्टिमिष्ट्वरित्वा दशपेयेन यजेत" आश्व॰ श्रौ॰ ६।३।१७। "संस्थेष्टयो नाम सप्तेष्टयः सोमेयादयः, ताभिः सप्ताहं चरित्वा दशपेयेन यजेत। दशपेयो नाम यज्ञ-

क्रतुः" नारा०। "तत्र दश दशैकैकं चमसं भक्षयेयुः" १८. "तत्र दशमेवे एकैकं चमसं दशपुरुषा भक्षयन्ति" नारा०।

**दशबल** पु० दश बलानि यस्य। बुद्धदेवे अमरः तानि च बलानि "दानशीलक्षमावीर्य्यध्यानप्रज्ञाबलानि च। उपायः प्रणिधिर्ज्ञानं दश बुद्धबलानि वै"। [ बाहुयुक्ते त्रि०

**दशबाहु** स्त्री दश बाहवोऽस्याः। दशभुजायां दुर्गायाम्। दश-

**दशभुजा** स्त्री दश भुजा अस्याः। दुर्गायां "इतिदत्तं पुरा कल्पे मनोः स्वायम्भुवेऽन्तरे। आविर्भूता दशभुजा देवी देवहिताय वै" कालिकापु० ५६ अ०।

**दशभूमिग** पु० दशसु भूमिषु दानादिबलेषु गच्छति गम-ड। बुद्धे हेमच०। [ त्रिका०।

**दशभूमीश** पु० दशानां दानादीनां भूमीनामीशः। बुद्धे

**दशम** त्रि० दशानां पूरणे डटि नान्तत्वात् मट्। दशसंख्यायाः पूरणे। "दशमस्त्वमसि" वेदान्तपरिभाषा। "नवमे दशमे मासि प्रबलैः सूतिमारुतैः" याज्ञ०। "अददो-ताथ षड्भागं प्रनष्टाधिगताद्भृपः। दशमं द्वादशं वापि सतां धर्ममनुस्मरन्"। यद्यपि स्यात्तु सत्पुत्रोऽप्यपुत्रोऽपि वा भवेत्। नाधिकं दशमाद्द्याच्छूद्रापुत्राय धर्मतः" मनुः। स्त्रियां ङीप्। सा च "शतायुर्वै पुरुषः" इति श्रुतेः पुरुषस्यायुःकालस्य शतसंख्यकतया तस्य दशभिर्विभागे नवतेरूर्द्धं दशवर्षावच्छिन्ने २काले पुरुषावस्थादौ स्त्री। "यत्र द्युः षोडश मानाद्दृष्टः सूद्रोऽपि दशमीं गतः"। "चक्रिणो दशमीस्थस्य रोगिणो भारिणः स्त्रियाः। स्नातकस्य च राज्ञश्च पन्था देयो वरस्य च" मनुः। चन्द्रस्य दशमकलाक्रियारूपे तदुपलक्षिते वा कालभेदरूपे तिथिभेदे स्त्री। सा च शुक्ला एकादश्यां, कृष्णा तु नवम्या युता ग्राह्या। "सम्पूर्णा दशमी कार्य्या पूर्वया परयाऽथ वा। युक्ता न दूषिता यस्मादिति सा सर्वतो मखी"। यथा सम्पूर्णा दोषरहिता तथा विद्धापीति विकल्पे व्यवस्थापयति विष्णुधर्मोत्तरीयम्। "शुक्लपक्षे तिथिर्यात्रा यस्मिन्भ्युदितोरविः। कृष्णपक्षे तिथिर्यात्रा यस्मिन्नस्तमितो रविः"। "आरभ्य तस्यां दशमीञ्च यावत्" तिथित०। "कृष्णपक्षे दशम्यादि वर्जयित्वा चतुर्दशीम्" मनुः।

**दशमभाव** पु० कर्म० जन्मवर्षादिलग्नांशविशेषानीतेषु तत्तादिद्वादशभावेषु दशमे भावे। तदानयनप्रकारो यथा। "पूर्वं नतं स्याद्दिनरात्रिखण्डं दिवानिशोरिष्टघटीविहीनम्। दिवानिशोरिष्टघटीषु शुद्धं द्युरात्रिखण्डं त्वपरं नतं स्यात्। तत्कालके सायनार्कस्य भुक्तभोग्यांशसंयुतात्। खोदयात् खाग्निलवं यत् भुक्तं भोग्यं रवेरक्षजेत्। इष्टनाड़ीपलेभ्यश्च गतगम्याच्चिखोदयात्। शेषं खलग्राङ्कितं भुक्तभुक्तेन लवादिकम्। अयुक् शुद्धभे हीनयुक् तत्तुर्य्यनांशकम्। एवं लङ्कोदयैर्भुक्तभोग्यं शोध्यं पलीकृतात्। पूर्वपश्चात्तादन्यत् प्राग्वत्तद्दशमं भवेत्"। जातकोपयोपयोगितद्भावे शुभाशुभं सर्वार्थचि० उक्तं यथा

"दशमात् प्रकृतिमात्रां कीर्त्तिं दृष्टिं प्रवासपुत्रादीन्। मानं कर्माजीवं ज्ञातुस्थानं च निर्दिशेद्धीमान्। कर्माधिपे हीनबले सपापे कर्मादिवैकल्यसंयुते तज्ज्ञाः। कर्मेशवागीशयशाङ्गपुत्रावीर्यान्विता यत्नकरा भवन्ति। शुभग्रहैर्दृष्टसमन्विताशे वीर्य्यान्विता यत्नविशेषमाहुः। दुःस्थाः यशाङ्गात्मजजीवशुक्राः पापेक्षिताः कर्मविनाशमाहुः। नाशस्थितास्तत् तदंशनाथास्तद्युक्तराशेरधिपाश्च नाशम्। राहौ च माने यदि वा दिनेशे भागीरथी स्नानसुयन्ति तज्ज्ञाः। माने च भौमे यदि वा सपौम्ये भौमान्विते वा भवितां च सक्तिः। जन्मर्क्षगे पूर्वयशाङ्गजीवे मानस्थिते गाङ्गजलादिपूतः। माने गुरौ शुक्रयुते च केन्द्रे स्वोच्चस्थिते तादृशतोयपूतः। माने धने शुक्रयुते सजीवे केन्द्रोऽगे तादृशतोयपूतः। बुधे व्यये वा यदि वा तदीये स्वोच्चान्विते तादृशपुण्यभाक् स्यात्। चन्द्रे तृतीये जलराशियुक्ते सौम्यान्विते तादृशपुण्यभाक् स्यात्। शुभेक्षरे केन्द्रयुते जलर्क्षे सौम्येक्षिते तादृशतोयपूतः। बुधे सजीवे यदि वा सभौमे प्राकारकन्धरखपरगोपुरादीन्। मानस्थिते तद्दृष्टनाथयुक्ते करोति जीर्णोद्धरणादि तज्ज्ञः। करोति कूपादितटाग्रभूमिं कर्मेश्वरे गोपुरभागयुक्ते। सद्दृंशके वा शुभदृष्टियुक्तभाग्येश्वरेणापि निरीक्षिते वा। चन्द्राक्रजे कर्मगते तदीये भाग्यस्थिते पापविवर्जितेऽखिन्। सौम्येक्षिते शोभनभावयुक्ते यज्ञस्य कर्त्ता स भवेत् तदानीम्। कर्माधिपेऽखिन् यदि सोमपुत्रे स्वोच्चस्थिते वा यदि धर्मराशौ। विवर्जितः स्याच्चिखराङ्गपापैर्यज्ञस्य कर्त्ता स भवेत्तदानीम्। कर्माधिपे स्वोच्चगते सपापे नीचांशगे नाशगतेऽपि तस्मिन्। विघ्नो भवत्येव मखस्य तस्य क्रूरादिषष्ठांशगतेऽपि चैवम्। तुङ्गस्थिते सोमसुते तदीये स्वोच्चान्विते सोमसुतेन दृष्टे। शुभेक्षिते वा सबुधे खराशौ यज्ञस्य कर्त्ता स भवेत्तदानीम्। आत्मास्थानाधिपे सौम्ये शुभदृष्टियुतेऽपि वा। सोमनांश-

गते वापि जातस्वाज्ञाधिपो भवेत् । आज्ञास्थानगते सूर्ये भूमिपुत्रेऽथ वा युते। केन्द्रान्विते तदीशेऽपि क्रूरामाज्ञां करोति सः । आज्ञाधिपे मन्दयुते रन्ध्रनाथेन संयुते । क्रूरांशे केन्द्रराशौ वा क्रूरामाज्ञां करोति सः । मानाधिपे केन्द्रयुते शुभयुक्षेक्षितेऽपि वा । क्रूरषष्ठांशसंयुक्ते सौम्यामाज्ञां करोति सः । राहुमन्दयुते माने रन्ध्रे राहौ ध्वजेऽपि वा । नीचस्थे धर्मभावेशे क्रूरामाज्ञां करोति सः । यशाङ्के कर्किसंयुक्ते गुरुशुक्रनिरीक्षिते । पारावतादिभागस्थे सत्कीर्त्तिसहितो भवेत् । तदीशे शुभसंयुक्ते शुभमध्यगतेऽपि वा । शुभग्रहाणामंशे वा सत्कीर्त्तिरहितो भवेत् । कान्तिस्थानाधिपे सौम्ये खोच्चभित्रखवर्गगे । सौम्यषष्ठांशके वापि सत्कीर्त्तिसहितो भवेत् । तदीशे देवलोकस्थे सिंहांशे शुभनायके । बलयुक्ते विलग्नेशे सत्कीर्त्तिसहितो भवेत् । पापग्रहाणां सम्बन्धे मानेशे बलयुते । क्रूरषष्ठांशसंयुक्ते सत्कीर्त्तिसहितो भवेत् । अपकीर्त्तियुतो जातः कर्मस्थे च रवौ शनौ । पापांशके पापदृष्टे पापमध्यगतेऽपि तत् । शुभग्रहाणां सम्बन्धे मानेशयुतेऽपि वा । खोच्चे वा स्वगृहे वापि जातो मानी दृढव्रतः । दुश्चिक्यगोऽपि मानी स्यान्मानेशे जीवेऽथ वा शुभे । तदीशे शुभसम्बन्धे शुभमध्यगतेऽपि वा । पापे माने पापदृष्टे तदीशे नीचराशिगे । पापराशिगते वापि मानहीनो भवेन्नरः । मानाधिपे चरांशस्थे सञ्चारसहितो भवेत् । स्थिरांशस्थैर्यसंयुक्तं सूत्रयात्र द्विदेहगे । षष्ठेशे कर्मराशिस्थे कर्मेशे मन्दसंयुते । केन्द्रत्रिकोणगे वापि दासो दासान् विनिर्दिशेत् । कर्माधिपस्यांशपतौ शनिसम्बन्धसंयुते । षष्ठाधिपस्य सम्बन्धे बहुदासान् विनिर्दिशेत् । शुभग्रहेण संदृष्टे कर्मराशौ तदीश्वरे । भानुपुत्रेण वा युक्ते बहुदासान् विनिर्दिशेत् । कर्मनाथेन वा भुक्तिप्रदे पूर्तिं विनिर्दिशेत् । तत्र पापसमायोगे जातुर्दौर्ब्रह्म्यमादिशेत्" ।

वर्षलग्नात् दशमभावफलादिकं नीलं॰ता॰ उक्तं यथा "सबलेऽब्दपतौ स्वस्थे राज्यार्थसुखकीर्त्तयः । स्थानान्तराधिरन्ध्रस्थिते केन्द्रे सहसुखाप्तयः । दृश्ये बली रविः स्वस्थः पूर्वार्जितपदाप्तिकृत् । एकादशेऽस्थिते स्वस्थे स्वात्मपामात्यशुभोक्तमैः । रविस्थानेन्थिहा लग्ने खे वा राज्याप्तिसौख्यदा । नीचेऽर्के पापसंयुक्ते भूयादुन्नवर्षं दिशेत् । सिंहे रविर्बली स्वस्थः स्थानलाभन्दपाश्रयः । स्थानान्तराधिकाराप्तिः इन्दुः सारपदे बली । खेशलग्नेशवर्षेशेत्यशाको राज्यदायकः । वर्षेशे राज्यसहमेऽर्केत्यशाके महाभूपः । धनिस्थाने कुजः पश्यन् स्वगृहं पापजन्मतः । स्वपतीतिं वित्तनाशं दद्याद्दशमगो यदि । दैवज्ञे त्रिनवस्थेऽस्मिन् दग्धे नष्टेऽब्दसञ्चयः । मन्दोऽब्दपोऽधिकारी त्रिधर्मगे धर्मवृद्धिदः । तस्मिन् दग्धेऽपि नष्टे च पापलग्नधर्मनिन्दकः । दैवज्ञोदकफलं सूर्ये सुरावित्यं नयार्थभाक् । तत्स्था सुस्वग्रहा पुण्यागमपापं खलाश्रयात् । स्फुटो खेशे रवौ स्वस्थे वर्षेसूर्यगिते यदि । तन्माधिपेन राज्याप्तिरुक्ता वीर्यानुमानतः । धर्मकर्माधिपौ दग्धौ धर्मराज्यक्षयावहौ" ।

**दशमहाविद्या** स्त्री दशसंख्या महाविद्या । "काली तारा महाविद्या षोढ़शी भुवनेश्वरी । भैरवी छिन्नमस्ता च विद्या धूमावती तथा । बगला सिद्धविद्या च मातङ्गी कमलात्मिका । एता दश महाविद्याः सिद्धविद्याः प्रकीर्त्तिताः" इति तन्त्रोक्तेषु दशसु देवीमूर्त्तिभेदेषु ।

**दशमालिक** पु॰ देशभेदे २तद्भूपे ३तद्वासिजने च ब॰व॰। "तथैव रमणाधीनास्तथैव दशमालिकाः" भा॰भी॰ ६अ॰ ।

**दशमास्य** पु॰ दश मासान् गर्भे स्थितः यत् । दशमासान् व्याप्य गर्भे स्थिते बाले। तथाभूतस्य गर्भात् सुखनिर्गमाय पाठ्यसूक्तत्वं ऋ॰ दर्शितं यथा ।

"यथा वातः पुष्करिणीं समिङ्गयति सर्वतः । एवा ते गर्भ एजतु निरैतु दशमास्यः" ऋ॰ ५।७८।७ । "यथा वातो यथा वनं यथा समुद्र एजति । एवा त्वं दशमास्य सहावेहि जरायुणा" ८ । "दश मासाञ्छयानः कुमारो अधिमातरि । निरैतु जीवो अक्षतो जीवो जीवन्त्या अधि" ९ । "एतदाचक्ष्यं गर्भस्राविण्युपनिषत् । एतदाचक्षेषासौ सप्तवध्रिः स्रयोपितः । गर्भिण्याः प्रसवायासु स्रुतवानश्विनाहृषिः" । "यथा वातः पुष्करिणीं सर आदिकं सर्वतः समिङ्गयति सम्यक् चालयति एवैवं तव गर्भ एजतु कम्पताम् । इतस्ततः सञ्चरतु । दशमास्यो दश मासान् गर्भे स्थितो निरैतु" । निर्गच्छतु "वातो यथा कम्पमानो वनं कम्पयति स्वयम् । यथा समुद्रश्चलति चाल्यते वाथ वायुना । स्थित्वा दशैव मासांस्त्वं गर्भौल्बेन संवेष्टितः । निर्गच्छ जठरान्मातुर्जरायुजसंततः पतेत् । दशमासानुषित्वासौ जननीजठरे सुखम् । निर्गच्छतु सुखं जीवो जननी चापि जीवतु" भा॰ ।

**दशमिन्** त्रि॰ नवतेरूर्द्धं दशमी सङ्ख्यास्मेदोऽस्यस्य

परणार्थात् इनि । नवत्यूर्द्ध वयस्के अतिवृद्धे अमरः ।

**दशमीस्थ** त्रि० दशम्यामवस्थायां तिष्ठति स्था-क । १अतिवृद्धे दशमगते उदा० । २खरक्षतानां कामिनां दशानां मध्ये नाशरूपां दशां प्राप्ते च दशागते दक्षम् ।

**दशमुख** पु० दश मुखान्यस्य । १रावणे "गत्वा चोर्द्धं दशमुखभुजोच्छ्वासितप्रस्थसन्धेः" मेघ० । २महाकालीरूपे देवीभेदे स्त्री "नीलाञ्जनद्युतिमाद्यपादद्वयकां यैवे महाकालिकाम्" महाकालीध्यानम् । तस्या दशास्यत्वात्तथात्वम् । दशवदनादयोऽप्यत्र ।

**दशमुखरिपु** पु० ६त० । रामे "सीतां क्षिप्त्वा दशमुखरिपुर्नोपयेमे यदन्याम्" रघुः ।

**दशमूलक** न० दशानां मूलानां समाहारः । दशानां प्राणिनां गोमहिषाजाविहयगजखरोष्ट्रमानुषमातृणां मूत्रे । प्राणिभेदे तद्गुणाः सुश्रुते उक्ता यथा

"गोमूत्रं कटुतीक्ष्णोष्णं सक्षारत्वान्न वातलम् । लघ्वग्निदीपनं मेध्यं पित्तलं कफवातजित् । शूलगुल्मोदरानाहविरेकास्थापनादिषु । मूत्रप्रयोगसाध्येषु च । गव्यं मूत्रं प्रयोजयेत् । दुर्नामोदरगुल्मेषु कुष्ठमेहाविसर्पिषु । आनाहशोफगुल्मेषु पाण्डुरोगे च माहिषम् । कासश्वासापचीं शोफकामलापाण्डुरोगनुत् । कटुतिक्तान्वितं क्षारं शोफोन्मादारुचिक्रिमिनाशनम् । अर्शोघ्नं क्षारभेदि मूत्रं मानुषन्तु १०विषापहम्" ।

**दशमूल** न० दशसंख्यकानां मूलानां समाहारः पात्वा० न वा ङीप् । चक्रदत्तोक्ते पाचनभेदे "बिल्वश्योनाकगाम्भारी पाटलागणिकारिकाः । दीपनं कफवातघ्नं पञ्चमूलमिदं मतम् । शालपर्णीपृश्निपर्णीबृहतीद्वयगोक्षुरम् । वातपित्तहरं ह्येषां कनीयः पञ्चमूलकम् । उभयं दशमूलन्तु सन्निपातज्वरापहम् । कासे श्वासे च तन्द्रायां पार्श्वशूले च शस्यते । पिप्पलीचूर्णसंयुक्तं कण्ठहृद्ग्रहनाशनम्" । अत्र वा ङीप् । दशमूलीरसे सर्पिः" चक्रद० ।

**दशमूलघृत** न० चक्रदत्तोक्ते ज्वरघ्ने घृतभेदे ।

"दशमूलीरसे सर्पिः सक्षीरे पञ्चकोलकैः । सक्षारैर्हन्ति तत्पूर्वं ज्वरकासाग्निमन्दताः । वातपित्तकफव्याधीन् शोफानं चापि पाण्डुताम् । २तत्रोक्ते कासघ्ने घृतभेदे च । "दशमूलीकषायेण भार्गीकल्कं पचेत् घृतम् । दद्यात्तित्तिरिनिर्यूहे तत्परं वातकासनुत्" ।

**दशमूलतैल** न० चक्रदत्तोक्ते बाधिर्य्यनाशके तैलभेदे ।

"दशमूलीकषायेण तैलप्रस्थं विपाचयेत् । एतत्कल्कं प्रदायैव बाधिर्य्ये परमौषधम्" ।

**दशमूलषट्पलघृत** न० चक्रदत्तोक्ते कासादिघ्ने घृतभेदे ।

"दशमूलीचतुःप्रस्थे रसे प्रस्थोन्मितं घृतैः । सक्षारैः पञ्चकोलैस्तु कल्कितं साधु साधितम् । कासहृत्पार्श्वशूलघ्नं क्षिप्तोन्मादनिबर्हणम् । कल्कं षट्पलमेवात्र योजयन्ति भिषग्वराः" ।

**दशमूलाद्यघृत** न० चक्रदत्तोक्ते कासनाशके घृतभेदे

"दशमूलादके प्रस्थं घृतप्रस्थसमैः पचेत् । पुष्करार्द्धशटीबिल्वसुरसव्योषक्षिङ्कुभिः । मेषाद्युपानं तत् देयं कासे वातकफाधिके । श्वासरोगेषु सर्वेषु कफवातात्मकेषु च"

**दशयोग** पु० दशानामङ्गानां योगः । विषाङ्गादौ वक्ष्ये दोषभेदे तत्स्वरूपप्रतिप्रसवादिकम् उपयमशब्दे १२६८ पृ० दृश्यम् । अयं दशयोगभङ्ग इत्यन्ये । २दशङ्गराशब्दे वक्ष्यमाणे ज्यैष्ठमासशुक्लपक्षादिदशके च ।

**दशरथ** पु० सूर्य्यवंश्ये अजतनयात्मजे रामचन्द्रपितरि नृपभेदे भेदि० "अयोध्यायां महाराजो रघुवंशीनृ महाबलः । अजस्तु रघुतो जज्ञे अजाद्दशरथोऽभवत्" हरिवं० १५ अ० ।

**दशरथसुत** पु० ६त० । रामे दशरथात्मजादयोऽप्यत्र ।

**दशरश्मिशत** पु० दश रश्मिशतान्यस्य । सहस्रकिरणे सूर्य्ये "दशरश्मिशतोपमद्युतिम् । यशसा दिवु दशस्वपि श्रुतम् । दर्शपूर्वरवं यमाख्यया दशकण्ठारिगुरुं विदुर्बुधाः" रघुः ।

**दशरात्र** पु० दशभिः रात्रिभिर्निर्वृत्तः ठञ् तस्य लुकि तद्धितार्थद्वि० अच् समा० । १दशरात्रसाध्ये यागभेदे स च यागः कात्या० २५ । ११ । १७ श्रौ० उक्तः । दशानां रात्रीणां समाहारः । २रात्रिदशके न० । अस्य रात्रान्तत्वेऽपि संख्यावाचकपूर्वकत्वात् स्त्रीत्वता । "प्रतिप्रहैः समं तत्र दशरात्रमशुध्यति । यच्छेषं दशरात्रस्य तावदेवाशुचिर्भवेत्" मनुः । "अथ चेद्दशरात्रं सन्निपतेत् आद्यं दशरात्रम्" शु० त० ।

**दशरूपक** न० दश रूपकाणि दृश्यकाव्यानि प्रतिपाद्यत्वेन सन्त्यत्र अच् । नाटकादिदृश्यप्रतिपादकग्रन्थभेदे ।

**दशरूपभृत्** पु० दश मत्स्यादीनि रूपाणि बिभर्त्ति भृ-क्विप्। मत्स्यादिदशावतारधारके विष्णौ शब्दार्थकः। दशावतारशब्दे तद्रूपाणि दृश्यानि।

**दशलक्षणक** पु० दश लक्षणान्यस्य कप्। धर्म्मे "दश लक्षणको धर्मः सेवितव्यः प्रयत्नतः" इत्युपक्रमे "धृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः। धीर्विद्या सत्यमक्रोधो दशकं धर्म्मलक्षणम्" मनुः।

**दशवाजिन्** पु० दश वाजिनो रथेऽस्य। इन्द्रे हेमच०। "दशाश्वं श्वेतपद्मस्थं चिन्तयेन्माधिदैवतम्" चन्द्रध्या०।

**दशवार्षिक** त्रि० दशसु वर्षेषु भवः ठञ् उत्तरपदवृद्धिः। दशवर्षभवे स्त्रियां ङीप्। "पश्यतोऽव्रतो ह्यानिर्भूमेर्विंशतिवार्षिकी। परेण भुज्यमानाया धनस्य दशवार्षिकी" याज्ञ०।

**दशविध** त्रि० दश विधा प्रकारा यस्य। दशप्रकारे "भेदस्तस्योऽष्टविधो दशविधो महाभोहः" सा० का०। दशविधसंस्कारः।

**दशवीर** न० दश वीरा यत्र। सत्रभेदे। "तदेतच्छाक्वानां दशवीरत्रैषां दश वीरा जायन्ते य एतदुपयन्ति" ता० ब्रा० २५।७।४। "तदेतदुक्तं सत्रं शक्वानां दशवीरं वीरवन्यमित्यनिति वीराः पुत्रास्तेषां दशसंख्यानां साधकम् अतो वै दीक्षिता एतदुपयन्ति तेषामपि दश वीराः पुत्रा। जायन्ते" भा०। [भिर्वंशं दशव्रजम्" ऋ०८।८।२०

**दशव्रज** पु० ऋषिभेदे। "यामिः कण्वं मेधातिथिं यज्ञं याः

**दशशत** न० दशगुणितं शतम्। सहस्रसंख्यायां २तत्संख्येये च। "गवां दशशतं धनम्" भा०व० ६८ अ०।

**दशशतरश्मि** पु० दशशतं सहस्रं रश्मयोऽस्य। सूर्य्ये हेमच०।

**दशशताङ्गि** स्त्री दश शतमङ्गवोऽस्य। १शतमूल्यां २शताङ्गवस्यां पारस्करनि०।

**दशसप्ता** स्त्री दश च सप्त चाक्षां विष्टुतौ। साम्नो विन्यासभेदेन विष्टुतिभेदे तत्प्रकारादिकं ता० ब्रा० भाष्ये दर्शितं यथा।

"अथ सप्तदशस्तोमस्य दशसप्ताख्या विष्टुतिः। सा द्विःप्रकारा। सप्तास्थितेत्यपरा सा च द्विःप्रकारा। ततः पञ्चभ्यस्तिसृभ्यो नवभ्यश्चेत्येकः। तत उद्यती ततो भक्षेति दशसप्तसप्तास्थितयोर्भेदेन सप्तेत्येवं सप्त विष्टुतयः। तद्याद्यां दशसप्ताख्यां विष्टुतिं दर्शयति" भा०। "पञ्चभ्यो हिङ्करोति स तिसृभिः स एकया स एकया, पञ्चभ्यो हिङ्करोति स एकया स तिसृभिः स एकया, सप्तभ्यो हिङ्करोति स एकया स तिसृभिः स तिसृभिर्दशसप्ता सप्तदशस्य विष्टुतिः" ता० ब्रा०२।७।१। "ऋतार्थः। आदितो द्वाभ्यां पञ्चभ्यो हिङ्करोति पर्य्यायाभ्यां दश। उत्तरे सप्तेति दश च सप्त चाक्षां विष्टुताविति दशसप्तेयं सप्तदशस्तोमस्य विष्णुतिः"। तदुत्तरत्र खण्डादौ उद्यती सप्तास्थिताभक्षाणां प्रकारो वर्णितस्तत्रैव दृश्यः

**दशसाहस्र** न० दश गुणितं सहस्रं परिमाणमस्य अण् उत्तरपदवृद्धिः। १दशगुणितसहस्रमिते अयुते २तत्संख्येये च "भूतानां दशसाहस्रं परिवेष्य समाहृतम्" हरिवं० २५२ अ०।

**दशसाहस्रिक** त्रि० दश सहस्राणि प्रमाणमस्य ठञ् उत्तरपदवृद्धिः। अयुतमितभागादौ। "दशसाहस्रिको भागस्तेषां धात्रा प्रकल्पितः" हरिवं० ११२ अ०।

**दशस्य** त्रि० दशं दानमिच्छति यक् सुक् च नामधातुः दानेच्छायां प०अक० सेट् दशस्यति अदशस्यीत्। "एवा नो अग्ने विश्वा दशस्य" ऋ० ७।४२।५। "इरावती धेनुमती हि भूतं "सूयवसिनी मनुषे दशस्या" ७।९९।२।

**दशहरा** स्त्री दश पापानि हरति हृ-ट। गङ्गाजन्मदिने ज्यैष्ठशुक्लदशम्याम्।

"ज्यैष्ठे मासि सितेतरदिने शुक्लपक्षे दशम्यां हस्ते शैलाद्गिरगमदियं जाह्नवी सर्व्वलोकम्। पापान्यस्यां हरति च तिथौ सा दशेत्याहुराद्यां दुग्धं दद्यादपि शतगुणं वाजिमेधायुतस्येति" शङ्खः। अपि च "अदत्तानामुपादानं हिंसा चैव विधानतः। परदारोपसेवा च कायिकं त्रिविधं स्मृतम्। पारुष्यमनृतं चैव पैशुन्यञ्चापि सर्व्वशः। असम्बद्धप्रलापश्च वाङ्मयं स्यात् चतुर्विधम्। परद्रव्येष्वभिध्यानं मनसानिष्टचिन्तनम्। वितथाभिनिवेशश्च मानसं त्रिविधं स्मृतम्। एतानि दशपापानि हर त्वं मम जाह्नवि!। दशपापहरा यस्मात् तस्माद्दशहरा स्मृता। "ज्यैष्ठे मासि सिते पक्षे दशम्यां बुधहस्तयोः। गरानन्दे व्यतीपाते कन्याचन्द्रे वृषे रवौ। दशयोगे नरः स्नात्वा सर्वपापैः प्रमुच्यते" इति स्कन्दपुराणे काशीखण्डे। अत्र कुजबुधयोः कल्पभेदेन व्यवस्था ज्ञेया। २सेतुबन्धरामेश्वरयोः प्रतिष्ठादिने यथोक्तं स्कान्दे सेतुमाहात्म्ये "ज्यैष्ठे मासि सिते पक्षे दशम्यां बुधहस्तयोः। गरानन्दे व्यतीपाते कन्याचन्द्रे वृषे रवौ। दशयोगे सेतुमध्ये लिङ्गरूपधरं हरम्। रामो वै स्थापयामास त्रिवलिङ्गमनुत्तमम्। अतो-

ऽस्यां तु विशेषेण पूजा कार्या हितार्थिभिः"। अत्र स्नानाङ्गसङ्कल्प उक्तः गारुडे २१५ अ० यथा। "अद्य कृष्णे तु नक्षत्रे दशम्यां ज्येष्ठके सिते। दशापापहरा-वाप्त्यै अदत्तादानकल्मषम्। विरुद्धाचरणं हिंसा पर-दारोपसेवनम्। पारुष्यानृतपैशुन्यमसम्बद्धं प्रलापकम्। परद्रव्याभिध्यानञ्च मनसानिष्टचिन्तनम्। एतद्दशाविघा-ताय गङ्गास्नानं करोम्यहमिति"।

**दशा** स्त्री दंश-अङ् नि० नलोपः। १अवस्थायां २दीपव-र्त्तौ, मेदि०"अपेक्षते न च स्नेहं न पात्रं न दशान्तरम्। परोपकारनिरता मणिदीपा इवोत्तमाः"इत्युद्भटः। ३चित्ते, अजयपालः। ४कालकृतविशेषरूपायां ५गर्भवास-जन्मादिबाल्ययौवनादिरूपायामवस्थायाञ्च। तत्र "गर्भ-वासः१जन्म२बाल्यं३ कौमारं४ पौगण्डम्५ यौवनं६ स्था-विरता७ जरा८ प्राग्परोधः९ नाश१०" मौलकण्ठेनोक्ताः दश वेद्याः।६कामकृते विरक्तिर्यां नेत्ररागाद्यवस्थादशके, ज्योतिषोक्ते नक्षत्रानुसारेण सूर्य्यादिग्रहाणां स्वामित्वेन ६भोग्यकाले च। तत्र चरकृतदशाच "नयनप्रीतिः प्रथमं चित्तासङ्गस्ततोऽथ सङ्कल्पः। निद्राक्षेदस्तनुता विषयनि वृत्तिस्त्रपानाशः। उन्मादो मूर्च्छा मृतिरित्येताः क्रमद-शादशैव स्युः"। यद्वा यां स्वस्वसञ्चितफलविपाककाल-भेदरूपा दशा च नानाविधा तत्र "कलौ नाक्षत्रिकी दशा" इत्युक्तेः नक्षत्रसञ्चितैव दशा यद्वा साऽपि नानाविधा षट्त्रिंशद्वर्षीया मङ्गलादियोगिनीदशा, अष्टो-त्तरीयवर्षात्मिका रव्याद्यष्टग्रहाणां दशा। विंशोत्तरी-यवर्षात्मिकासूर्य्यादिनवग्रहैर्विपच्यमानफलात्मिका च तत्र योगिनीदशा तु "शुभं संवोह्य जन्मर्क्षं वसुभिर्भागमाहरेत्। मङ्गलाद्यास्तिराद्यत्ता ज्ञेया अष्टौ महादशाः"। "मङ्गला पिङ्गला धन्या भ्रामरी भद्रिका तथा। उल्का सिद्धा सङ्कटा च एकोत्तरमिताः क्रमात्" इत्युक्तानुसारेण ज्ञेया। तदानयनञ्चान्यत्र "आर्द्रा दिभिस्तिराद्यत्ता ज्ञेयाः क्रमादमूः। मङ्गला पिङ्गला धन्या भ्रामरी भद्रिका तथा। उल्का सिद्धा सङ्कटा च एकैकोत्तरवत्सरा। अष्टिन्यादित्रयं तत्र भ्रामर्य्यादित्रयेऽधिकम्। सिद्धायां रोहिणी ज्ञेये सङ्कटायां मृगः परः। मङ्गलायाः पतिश्चन्द्रः पिङ्ग-लाया रविस्तथा। धन्यायास्तु बुधः स्वामी भ्रामर्य्यां धरणीसुतः। भद्रिकायाः पतिर्जीव उल्कायाः रवि-नन्दनः। सिद्धायाः भार्गवः स्वामी सङ्कटायास्तु दानवः" इत्येवं क्रमात् दशाज्ञेया। तासां सुखेन ज्ञानाय

## योगिनीदशाचक्रम्।

| दशानाम | म | पि | ध | भ्रा | म | उ | सि | सं० |
|---|---|---|---|---|---|---|---|---|
| तदीशाः | च | र | बु | कु | जी | श | शु | रा |
| मानवर्षाः | १ | २ | ३ | ४ | ५ | ६ | ७ | ८ |
| जन्मनक्ष- | ६ | ७ | ८ | ९ | १० | ११ | १२ | १३ |
| त्रानुसारेण | १४ | १५ | १६ | १७ | १८ | १९ | २० | २१ |
| तासां प्रवेश- | २२ | २३ | २४ | २५ | २६ | २७ | ४ | ५ |
| नक्षत्राणि। | | | | १ | २ | ३ | | |

त्रैराशिकेन नक्षत्रभुक्तकालमपहाय प्रकृतदशाका-लात् गतभोग्यकालानुसारेण दशाकालाः कल्प्याः एवं सर्व्वत्र।

विंशोत्तरीयदशा तु "रविचन्द्रभौमबुधजीवशनैश्चराः। बुधः केतुः शुक्रश्चेति क्रमिकादशा-स्तिथा भवेत्"। दशावर्षाणि च "षट् सूर्य्यस्य दशा वर्षाः दिङ्मिता रजनीपतेः। कुजस्य सप्त वर्षाः स्युः राहोरष्टा-दशैव तु। गुरोः षोड्श विज्ञेयाः शनेरेकोनविंशतिः। बिदः सप्तदश ज्ञेया केतूनां सप्त कीर्त्तिताः। भगोर्विंश-तिरुद्दिष्टा सूर्य्यादीनां महादशाः"।

## विंशोत्तरीयदशाचक्रम्।

| दशेशाः | र | च | म | रा | जी | श | बु | के | शु |
|---|---|---|---|---|---|---|---|---|---|
| वर्षमानम् | ६ | १० | ७ | १८ | १६ | १९ | १७ | ७ | २० |
| जन्मनक्षत्रा- | २ | ३ | ५ | ६ | ७ | ८ | ९ | १० | ११ |
| नुसारेण | १२ | १३ | १४ | १५ | १६ | १७ | १८ | १९ | २० |
| प्रवेशनक्षत्राणि | २१ | २२ | २३ | २४ | २५ | २६ | २७ | १ | २ |

त्रैराशिकेन प्राग्वद्भुक्तभोग्यकालानुसारेण दशाकल्पनम्। एतद्दशाफलानि सर्व्वार्थचिन्तामण्यादिषूक्तानि यथा

"दशानुरोधेन फलं वदन्ति सनीश्वरा जातशुभाशुभं तत्। सारं समुद्धृत्य तदेव वक्ष्ये भेदं यथा विस्तरतो दशानाम्। दीप्तः१ स्वस्व२स्तु मुदितः३ शान्तो४ दीनो५-ऽतिदुःखितः६। विकलश्च७ खलः८ कोपी९ नवधा खेचरो भवेत्। उच्चस्थः खचरो दीप्तः१ स्वस्वः२ स्वक्षेत्रगो मतः। मुदितो३, मित्रभे४ शान्तः समगो दीनको५ऽधरः। शत्रुभे दुःखसंयुक्तो६ विकलः७ पापसंयुतः। खलः८ पराजितो-ज्ञेयः कोपी९ स्यादर्कसंयुतः। पृथक् पृथक् फलं तेषां दशा-काले विशेषतः। तत्र नामानुरोधेन परिपाके वदन्ति हि। पाके प्रदीप्तस्य धराधिपत्यसत्काद्य गौर्य्यं धनवाङ्-नद्य। स्त्रीपुत्रलाभं सुखवस्त्रपूजां क्षितीश्वरात्मानसुपैति

विद्याम्। । खस्थस्य खेटस्य दशाविपाके खस्थो नृपाद्धनादिसौख्यम्। विद्यायशःप्रीतिमहत्त्वताश्च दारार्थभूस्थात्मजधर्ममेतिः। सदान्वितस्यापि दशाविपाके वस्त्रादिभूगन्धसुतार्थधैर्यम्। पुराधधर्मत्ववणादिगानदानादियानाम्बरभूषणाप्तिम्२। दशाविपाके सुखधैर्यमेति शान्तस्थ भूपुत्रकलत्रयानम्। विद्याविनोदान्वितधर्मयात्रां बन्धुर्वदेशाधिपपूज्यताच्च। स्थानच्युतिर्बन्धुविरोधिता च हीनस्थ खेटस्य दशाविपाके। जीवत्सौकुल्लितहीनदृष्ट्या त्यक्तोजनै रोगनिपीड़ितः स्यात्। दुःखान्वितस्यापि दशाविपाके नानाविधं दुःखमुपैति नित्यम्। विदेशगो बन्धुजनैर्विहीनस्तीरादिभूपैर्भयमाप्नुयात्। वैकल्यखेटस्य दशाविपाके वैकल्यतां याति मनोविकारम्। पित्रादिकानां मरणं विशेषात् स्त्रीपुत्रयानाम्बरचोरपीड़ाम्। दशाविपाके कलहं वियोगं खलस्थ खेटस्य पितुर्वियोगम्। अल्पुज्झनानाम्बनभूमिनाशमुपैति नित्यं खलनैश्च निन्द्यः। कोपान्वितस्यापि दशाविपाके पापं समायाति बहुप्रकारैः। विद्यायशः स्त्रीधनभूमिनाशं रात्राच्च वित्तं हरतेऽत्र रोगी"।

अथ परमोच्चादिगरविदशाफलानि। भानोर्दशायां परमोच्चगस्य भूम्यर्थदारात्मजकीर्त्तिशौर्यम्। संमाननं भूमिपतेः सकाशादुपैति सञ्चारविनोदगोष्ठीम्। उच्चान्वितस्यापि रवेर्दशायां गोष्ठद्विधाम्बार्थपरिश्रमञ्च। संसारयुग्बन्धुजनैर्विरोधं देशाद्विदेशञ्च रतिश्चकोपात्। प्रचण्डवेश्यागमनं चितीशादुपैति दृष्टिं रतिकेलिमानम्। अदङ्गभेरीरवयुक्तयानमन्योन्यवैरं लभते मनुष्यः। आरोहिणी वासरनायकस्य दशा महत्त्वं कुरुतेऽतिसौख्यम्। परोपकारं सुतदारभूमिगोवाजिमातङ्गलाधिक्रियादीन्। दशावरोहा दिननायकस्य लाधिक्रियावित्तमहेष्टनाशम्। चोराग्निपीड़ां कलहं विरोधं नरेशकोपं कुरुते विदेशम्। नीचस्थितस्यापि रवेर्विपाके मानार्थनाशं क्षितिपालकोपात्। स्वबन्धुनाशं सुतमित्रदारैः पित्रादिकानामपकीर्त्तिमेति। अत्यन्तनीचान्वितसूर्यदाये विपत्तिमाप्नोति महच्युतिञ्च। विदेशयानं मरणं गुरूणां स्त्रीपुत्रगोभूमिलाभेर्विनाशम्। मूलत्रिकोणस्थरवेर्विपाके क्षेत्रार्थदारात्मजबन्धुसौख्यम्। राजाश्रयं गोधनमित्रलाभं स्वस्थानयानादिकमेति राज्यम्। स्वक्षेत्रगस्यापि रवेर्दशायां स्वबन्धुसौख्यं लाधिक्यकीर्तिम्। विद्यायशःप्राप्तिं राजपूजां स्वभूमिलाभं सुखमेति विद्याम्। दशाविपाके सुधियत्नुगस्य रवेः प्रनष्टार्थकलत्रपुत्रः। गोमित्रविद्यादिशरीरकष्टं शत्रुत्वमायाति जनैः समन्तात्। सपत्नराशिस्थितसूर्यदाये दुःखी परिभ्रष्टसुतार्थदारः। नृपाग्नि चोरैर्विपदं विषादं पित्रोर्विरोधञ्च दशान्तमेति। स्वमित्रराशिस्थितसूर्यदाये स्वल्पत्वमित्रात्मजराजपूजाम्। स्वगेहवासं स्वजनस्य सङ्गाद् यानादिभूषाम्बरतालाभम्। अत्यन्तमित्रङ्गगतस्य भानोर्दशाविपाके क्षतिसौख्यमेति। स्त्रीपुत्रधान्यार्थमनोविलासतटागयानाम्बरभूषणानि। समर्जगस्यापि रवेर्दशायां समञ्जनैः स्यात् क्षतिभूमिधान्यम्। गोवाजियानाम्बरदेहसौख्यं स्त्रीपुत्रदोषं रुषपीड़ितः स्यात्। नीचान्वितस्यापि रवेर्दशायां नीचानुहत्त्वा कुनखी कुशीलः। स्त्रीपुत्रधान्यार्थपशुक्षियादिमनोविकारं लभतेति ज्ञेयम्। उच्चान्वितस्यापि रवेर्दशायां मनोविलासं लभते खहत्त्वा। तीर्थाभिषेकं हरिकीर्त्तनञ्च प्राकारकूपादिपुराधधास्त्रम्। पापान्वितस्य शुभखेर्विपाके नित्यं मनः क्लिश्यति ज्ञेयबुद्ध्या। कुभोजनं कुत्सितवस्त्रपानं कुशीलहत्त्वा स्वधनं क्षयत्वम्। दिनाधिनाथस्य शुभान्वितस्य पाके सुखं भूमिधनादिवस्त्रम्। दृष्टैर्विलासं स्वजनैः समाजं कल्याणवाग्जालविनोदगोष्ठीम्। पापेक्षितस्यापि महत्सभानोर्दशाविपाके परमन्तु दुःखम्। पित्रोर्विनाशं सुतदारकष्टं चोराग्निभूपालभयत्वम्। करोति भानुः शुभवीक्षितश्चेत् विद्यायशस्त्री सुतवाग्विलासम्। कान्तिप्रतापं रतिकेलिसौख्यं पित्रोः सुखं भूपतिमाननां च। केन्द्रान्वितस्यापि दिवाकरस्य दशाविपाके नृपदण्डदुःखम्। स्थानच्युतिम्बन्धुविरोधमेति भङ्गः क्षयेर्वित्तपरिश्रमञ्च। त्रिकोणसंयुक्तरवेर्विपाके बुद्धिभ्रमं राजविमाननञ्च। सौख्यादिहानिं निधनं पितुश्च कर्म्मादिवैकल्यमुपैति काले। उच्चांशकस्थ च दशा विधत्ते हृत्तिं नित्यं प्रतापजनितां मृदुतीं श्रियञ्च। नानाविनोदललितं रतिकेलिसौख्यं स्त्रीवस्त्रलाभमनिशं पितृवर्गनाशम्। नीचांशयुक्तस्य रवेर्दशायां भार्यार्थभूपुत्रविदेशयानम्। त्यक्तोजनैर्बन्धुविकुत्सितस्तु मनोविकारं ज्वरमेहरोगम्। आदौ सूर्यदशायां दुःखं पितृरोगक्षतक्षयाधिः। मध्ये पशुधनहानिशान्ते विद्यामहत्त्वञ्च। दशाविपाके धनहानिमेति अष्टस्थभानोरतिदुःखजालम्। गुह्यभवोद्भूतपवित्ररोगं मूत्रादिकृच्छ्रं त्वचया प्रमेहम्। रन्ध्रस्थभानोरपि वा दशायां देहस्य कष्टं त्वचयाभिचिह्नम्।

चातुर्धिकं नेत्रविकारकारं ज्वरातिसारं स्वपदच्युतिञ्च । भानोर्हादशगस्य चेद्दादि दशा क्लेशार्थहानिं क्लेशं स्त्रीबन्धुक्षेत्रभूमिनाशमथ वा पित्तोर्विनाशं कलिम् । स्थानात् स्थानपरिभ्रमं विपक्षतं राज्ञोभयं पादरुक् विद्यावादविनोदगोष्ठिकलहं गोवाजिसंपीडनम् । पुत्रोत्पत्तिविपत्तिमत्र कुरुते भानोर्धनस्थस्य वा क्लेशबन्धुवियोग दुःखकलहं वाग्दूषणं क्रोधनम् । स्त्रीनाशं धननाशनं रूपभयं भूपुत्रवानाम्बरं सर्वं नाशमुपैति तत्र शुभयुक् वाच्यं न चैतत्फलम् । भानोर्विक्रमयुक्तस्य दशा धैर्यं महत् सुखम् । रूपमाननमकीर्त्तिं भ्रातृवैरं विपत्तथा । सुखस्थितस्यापि रवेर्दशायां भोगार्थभूषाम्बरकलत्रहानिम् । क्षेत्रादिनाशं स्वपदच्युतिं वा वानच्युतं चोरविषाग्निशस्त्रैः । दारान्वितस्यापि रवेर्दशायां कलत्ररोगस्तथ वा मृतिर्वा । कुभोजनं कुत्सितपाकजातं क्षीरादिदध्याज्यविहीनमन्नम् । कर्मस्थितस्यापि रवेर्दशायां राज्यार्थलाभं समुपैति धैर्यम् । उद्योगसिद्धिं यशसा समेतं जयं विवादे रूपमाननं च । कायस्थितस्यापि दशा विपाके भानोर्धनाप्तिं शुभकर्मलाभम् । उद्योगसिद्धिं सुतदारसौख्यं यानादिभूषाम्बरदेहसौख्यम् । संग्राध्यावे यस्य यद्द्रव्यसक्तं कर्मा जीवे यस्य यद्योपदिष्टम् । भावस्थानालोकयोगोद्भवं च तत्तत्सर्वं तस्य योज्यं दशायाम् । सर्वे स्थानबलाधिके क्षपिधनं गोभूमियानाम्बरं सौख्यं राजसु मानं परधनैः संयुज्यते कान्तिमान् । तत्पाके भवनाम्बरादि लभते सर्वोपकारं महाकीर्त्तिं भूषणमिष्टबन्धुसहितं तीर्थाभिषेकं महत् । रविर्यदा स्थानबलेन हीनस्तत्पाककाले बलमर्थनाशम् । स्थानच्युतिं बन्धुविरोधतापं देशाद्विदेशं समुपैति दुःखम् । दिग्वीर्ययुक्ते दिवसेश्वरे तु दिगन्तराक्रान्तिधनादिसौख्यम् । तत्तद्दिशः प्राप्नुयशोऽर्थभूमिर्नो चेत्तथा तादृशमत्र नास्ति । तत्कालमानात्ततते क्षपिते रवौ विपाके क्षपिभूमिवित्ते । उद्योगसिद्धिं रूपमाननाढ्ये हीने रवौ कालबलेन नाशम् । निसर्गतः सर्वमुपैति कालरवौ तु नैसर्गिकवीर्ययुक्ते । यानार्थभूषाम्बरदेहसौख्यं हीने रवौ चोरसर्पाग्निभीतिम् । रवौ तु चेष्टाधिकवीर्ययुक्ते स्वचेष्टितार्थागममेति सौख्यम् । रूपस्य मानं सुतदारसौख्यं क्षमादिवानाम्बरमत्र हीने । रवौ खगानां बलदृष्टियुक्ते स्वचिन्तयित्वा सकलं च सौख्यम् । तज्ज्ञायते तत्परिपाककाले तेनैव हीने सकलं विनाशम् । क्रूरादिषष्ठांशरविर्दशायां स्थानच्युतिं वा रूपचोरभीतिम् । कोपाधिकं तत्र शिरोरुजं च पित्तादिनाशं त्वथवा तदीयम् । सप्तांशषष्ठांशरवेर्दशायां सप्तांशपानाम्बरभूषणाग्निम् । नामद्वयं राजसु पूजितत्वं वेदान्तशास्त्रागमधर्मशास्त्रम् । पारावताद्यंशयुतस्य भानोर्दशाविपाके महतीञ्च कीर्त्तिम् । बन्धुर्धदेशाधिपमानतं च पुत्रादिसंमिलकलत्रलाभम् । स्त्रीद्यादिजन्यं कलभाण्डरादौ पश्चात् फलं खेचरदृष्टिजन्यम् । मध्ये फलं स्थानभवं तथैव पापग्रहाणामिह योजयन्ति । भुजङ्गमत्रंशयुतस्य भानोर्दशाविपाकेऽस्थिभयं विषाद्वा । रूपाग्निपातित्वमनेकदुःखं पापादिभत्रंशयुतस्य चैवम् । स्त्रीक्षयोऽपि दित्रेशो नीचांशे चेत्कलत्रधनहानिः । स्वकुलजबन्धुविरोधः पित्रादीनां तथैव सनिवाक्यम् । उच्चांशकयुतो भानुर्नीचस्थोऽपि महत्सुखम् । करोति राज्यभारं च दशान्ते विपदं क्रमात्" ।

अथोद्यादिगचन्द्रदशाफलानि "अल्पेऽशगस्यापि निशाकरस्य दशाविपाके कुसुमाम्बरत्वं । महत्त्वतामेति कलत्रलाभं धनार्थतिं पुत्रमनोविलासम् । उच्चस्थितस्यापि निशाकरस्य प्राप्तौ दशायां सुतदारवित्तम् । मिष्टान्नपानाम्बरभूषणाग्निं विदेशयानं स्वजनैर्विरोधम् । आरोहिणी चन्द्रदशा प्रपन्ना स्त्रीपुत्रवित्ताम्बरसौख्यकीर्त्तिम् । करोति राज्यं सुखभोजनत्वं देवार्चनं भूसुरतर्पणत्वं । निशाकरस्याम्बरोहकाले स्त्रीपुत्रमित्राम्बरसौख्यहानिम् । मनोविकारं स्वजनैर्विरोधं चोराग्निभूपैः पतनं तटाके । नीचांशगस्यापि निशाकरस्य प्राप्तौ दशायां विविधार्थहानिम् । कुभोजनं कुत्सितराजसेवा मनोविकारं समुपैति निद्राम् । मूलत्रिकोणस्थितचन्द्रदाये रूपाङ्गनं भूमिसुतार्थदारान् । प्राप्नोति भूषाम्बरमानलाभं सुखं जनन्या रतिकेलिलोलम् । स्वक्षेत्रगस्यापि निशाकरस्य रूपाङ्गनप्राप्तिसुपैति सौख्यम् । प्रचण्डवेगप्रागमनं क्षितीशात् संमानं स्त्रीसुतबन्धुसौख्यम् । निशाकरस्याप्यतिशत्रुराशिं गतस्य दाये कलहोऽर्थनाशम् । कुपक्वतां कुत्सितभोजनत्वं क्षेत्रार्थदारात्मजतापयानम् । यानाम्बरालङ्करणादिहानिं विदेशयानं परिचारकत्वम् । देशान्तरे भ्रमति बन्धुहीनो दुःखी परिक्लिश्यति शत्रुगेहे । मित्रर्क्षगस्यापि निशाकरस्य पाकेऽर्थलाभं क्षितिपालमैत्रीम् । उद्योगसिद्धिं जलवस्तुलाभं चित्राम्बराभूषणवाग्विलासम् । सुधाकरस्याप्यतिमित्रराशिं गतस्य

दाये स्वतिसौख्यमेति। विद्याविनोदाद्धितराजपूजां क्षेत्रात्मदारात्मजकामलाभम्। दशाविपाके समराग्निभस्म कलानिधेः काञ्चनभूमिलाभम्। किञ्चित्सुखं बान्धवरोगपीड़ां विदेशयानं लभते मनुष्यः। नीचस्थितस्य हि दशा विवादं महार्तिं क्लेशार्तदुःखवनवाससुपैति काले। कारागृहं निगड़पादलग्नाच्चहीनचौराग्निभूपतिभयं सुतदारशेषम्। चोथेन्दुपाके सकलं विहीनं राज्यार्थभूषितकलत्रमित्रम्। उच्चादचित्तं स्वजनैर्विरोधस्थित्यमायाति कुशीलदृष्ट्या। पूर्णेन्दुपाके परिपूर्णमेति विद्याविनोदाद्धितराजपूजाम्। स्त्रीपुत्रभट्टार्थमनोविलासं विशेषतः शोभनकर्मलाभम्। केनापि स्त्रोऽस्यवियुक्तरेष युक्तस्य चन्द्रस्य दशाविपाके। मनःप्रसादं सदनाभिरामं स्त्रीपुत्रभट्टादिविनोदगोष्ठीम्। बाधान्वितस्यापि निशाकरस्य पाकेऽग्निचोरक्षितिपालकोपैः। दुःखं सुतस्त्रीसुतबन्धुहानिं विदेशयानं स्वशुभादिकर्म। चन्द्रस्य सौम्यग्रहसंयुतस्य प्राप्तौ दशायां शुभकर्मलाभम्। गोभूद्विरत्नाम्बरभूषणानि तीर्थाभिषेकं परदारसौख्यम्। पापेक्षितस्यापि निशाकरस्य दशाविपाके विफलं सुकर्म। कोपाधिकं कुत्सितभोजनञ्च मातुर्वियोगं स्वपदा तदीयम्। निशाकरस्यापि शुभेक्षितस्य परोपकारं महतीं च कीर्त्तिम्। दृष्टार्थबन्धुगमभूषमानं जलक्रियावस्त्रमनोविलासम्। मूलत्रिकोणगेन्दोर्दशां प्रपन्नो नरः सुवर्णकोषः। बहुपुत्रवान् विनीतो बन्धुविरोधं प्रधानतां याति। सुखस्थितस्यापि निशाकरस्य मातुर्वियोगं सुखस्थानभूमिम्। क्लेशेनाग्निं सदृकर्मलाभकीर्त्तिं स्वनामाङ्कितपद्मलाभम्। दारान्वितस्यापि निशाकरस्य पाके कलत्राग्निसदाहरन्ति। सुपुत्रसौख्यं शयनाम्बरञ्च प्रमेहशस्त्रादिकृतं मनोरुक्। कर्मस्थितस्यापि दशा प्रपन्ना चन्द्रस्य कीर्त्तिं लभते सुविद्याम्। यज्ञादिकर्माग्निमनेकसौख्यं भूषणयानाम्बरबन्धुपूजाम्। नीचांशगस्यापि दशा ददाति रोगं महत्तरं चेन्दोः। पादाक्षिरोगपीड़ां युद्धेषु पराजयं मनोव्याकुलम्। उच्चांशगस्यापि दशा ददाति सौख्यं महत्तरं चेन्दोः। नानाविधधनलाभं भूपतिसम्मानदेहदृष्टिं च। चन्द्रदशायामादौ नरपतिसम्माननकीर्त्तिसौख्यं च। मध्ये स्त्रीसुतनाशं सदृधनसौख्याम्बरं चान्ते। शत्रुक्षचन्द्रस्य दशा प्रपन्ना करोति दुःखं कलहं वियोगम्। चोराग्निभूपात्भयं जलेन मूलादिलक्ष्मं धननाशमाशुः। रन्ध्रस्थितस्यापि दशा प्रपन्ना देहस्य कार्श्यं जलभीतिदुःखम्। विदेशयानं सकलैर्विरोधं कुभोजनं मातृजनेषु नाशम्। रिपुक्षचन्द्रदशायां प्राप्तो धनिनाशनं कुरुते। राज्ञोऽक्षतधनभाग्यं स्थानविनाशं महत्तरं दुःखम् चन्द्रस्य वित्तस्थितिपाककाले वित्तात्मजस्त्रीसुखभोगभाग्यम्। मिष्टान्नपानं रतिकेलिसौख्यं धनागमं पुण्यजलाभिषेकम्। तृतीयराशिस्थनिशाकरस्य दशा महत्सौख्यमनेकवित्तम्। मनो दृढं भ्रातृजनादिसौख्यं क्षत्रात्रयानाम्बरभूषणाप्तिम्। वामस्थितस्यापि निशाकरस्य प्राप्तौ दशायां विविधार्थलाभम्। सहस्रपानाम्बरकेलिलोलं स्त्रीपुत्रलाभं तु मनोविलासम्। दिनेश्वरेणाहतचन्द्रदाये प्राप्नोति दुःखं स्वजनैर्विरोधम्। भार्याक्षयं भूपतिपाग्निचोरैर्मातुर्वियोगं क्षतिधान्यनाशम्। चन्द्रे स्वानबलाधिके धनसुखं कीर्त्तिञ्च विद्यागमं देवब्राह्मणतर्पणं नृपधनान्याप्नोति भूमिं धनम्। क्षीरान्नाम्बरभूषणं क्षतिधनं गोविक्रियासेवनं मिष्टान्नादिरसायनं फलयुतं दध्यान्नमाल्याम्बरम्। निशाकरे स्वानबलैर्विहीने स्वानार्थनाशं स्वपदच्युतिञ्च। स्वबन्धुनाशं त्वथ वा वियोगं क्लेशैर्विनाशं सुखपैति काले। निशाकरे दिग्बलसंयुतेऽस्मिन् दिनकरादासतवस्तु चिन्तम्। विद्यागमं भूपतिमित्रताञ्च स्वबन्धुपूजां गजवाजिभूमिम्। चन्द्रे तथा कालबलान्वितेऽस्मिन् तुरङ्गयानं क्षतिगोमहीश्च। विद्यादियोगं नवकेशदलवर्णाम्बरालङ्कृतवाहनञ्च। निसर्गवीर्यान्वितचन्द्रदाये निसर्गतश्चापि करोति सौख्यम्। अयत्नतो वाहनदेहलाभं नृपात्पूजां बहुवाहनञ्च। चन्द्रे यदा दिग्बलवीर्ययुक्ते कृपाकटाक्षेण नरेश्वरस्य। समस्तभाग्यं सुखपैति सौख्यं परोपकारं च मनोऽभिलाषम्। क्रूरादिषड्वांशसमन्वितस्य दाये ग्रहाणां बहुदुःखम्। स्त्रीपुत्रनाशं क्षितिपालकोपं विद्याविवादं कलहं जनैश्च। सहांशषड्वांशसमन्वितस्य चन्द्रस्य दाये बहुपुत्रलाभम्। स्वार्थलाभं विजयं सुखं च कीर्त्तिञ्च विद्यां लभते विशेषात्। पारावताङ्घ्रयंशसमन्वितस्य चन्द्रस्य दाये महतीं च कीर्त्तिम्। विद्याविनोदं लभते च सौख्यं देवार्चनं पुण्यजलाभिषेकम्। क्रूरक्षेत्रांशसंयुक्तचन्द्रो दिशति रोगिताम्। कार्श्यं प्रायसमायुक्तं मोक्षाङ्घ्रयंशनिपीड़नम्। आदौ भावफलं भोक्तुं स्थानजन्यं ततः फलम्। चंक्रोडुदं फलं पश्चाद्दृग्जातफलं तथा"।

कक्षोद्भादिसौख्यदशाफलम्। "अन्नक्षुभूनस्यदाय-

काले क्षेत्रार्थलाभं समरे जयञ्च । आधिक्यमन्वेति नरेश-मानसहोदरस्त्रीसुतबान्धवानाम् । उच्चङ्गतस्य हि दशा धरणीसुतस्य प्राप्नोति राज्यमथवा क्षितिपाच्च वित्तम् । भूमेश्चदारसुतबन्धुसमागमं च यानादिरोहणविशेषविदेश-गमनम् । आरोहिणी भूमिसुतस्य सौख्यं दशा तनोरुच्च-नरेन्द्रपूजाम् । प्रधानतान्वैर्यमनोऽभिलाषं भाग्योत्तरं भोगजवाजिसङ्गम् । धरासुतस्याप्यवरोहकाले स्थानार्थ-नाशं कलिकोपदुःखम् । विदेशवासं स्वजनैर्विरोधं चोरा-ग्निभूपैर्भयमेति कष्टम् । नीचस्थितस्यापि धरासुतस्य दाये कुवृत्त्या स्वजनादिरक्षाम् । कुभोजनं भोगजवाजि-नाशं स्वबन्धुनाशं नृपवह्निचोरैः । मूलत्रिकोणस्थित-भौमदाये मिष्टान्नपानाम्बरभूषणाप्तिम् । पुराणधर्म-व्रतं मनोज्ञं भ्रातृादिसौख्यं क्षितिलाभमेति । स्वक्षेत्र-गस्यापि धरासुतस्य दशाविपाके लभतेऽर्थभूमिम् । स्था-नाधिपत्यं सुखवाहनञ्च नामद्वयं भ्रातृसुखं सुखा-प्तिम् । धरासुतस्याप्यतिशत्रुराशिं गतस्य दाये कलहा-दिदुःखम् । नरेशकोपं स्वजनैर्विरोधं भूस्वर्णदारात्मज-मित्ररोगम् । भूनन्दनस्याप्यरिराशिगस्य दशाविपाके समरे च पीड़ाम् । शोकाग्निभूपालविषैः प्रमादं पी-ड़ातिरुच्छादिगुदाश्चिरोगम् । मित्रर्क्षगस्यापि कुजस्य दाये मित्रत्वमायाति सपत्नवक्त्रैः । चोराग्निमान्द्याच्चि-विषादभूमिं क्षयैर्विनाशं कलिकोपदुःखम् । कुजस्य दाये त्वतिमित्रराशिं गतस्य भूपालकृतार्थभूमिम् । वह्न्यादियन्त्रादिविचक्षणत्वं देशान्तरलब्धभाग्यम् । धरासुतस्यापि समर्क्षगस्य स्वोपकार्यं स्वधनप्रणाशात् । स्त्रीपुत्रभ्रात्रात्मसहोदराणां शत्रुत्वमाप्नोति नृपाग्नि-भीड़ाम् । नीचप्रदेशेऽपि समन्वितस्य धरासुतस्यापि-मनोविकारम् । प्रेष्यत्वहृत्तिं परकीयमन्त्रं स्त्रीसुतनाशं नृपवह्निचोरैः । किञ्चित् सुखं भोजनवस्त्रपानं क्षुच्छेष-वृत्तिं नृपपूजनञ्च । उच्चान्वितेनापि समन्वितस्य भौमस्य दाये सुतदारपीड़ाम् । पापान्वितस्यापि कुजस्य दाये पापानि कर्माणि करोति नित्यम् । देवद्विजानां परदे-वतानां सहोदराणाञ्च कुमार्गहत्त्या । शुभान्वितस्यापि कुजस्य दाये क्वचित् सुखं देहक्षयाङ्कुरोगम् । भूपैर्विवादं समरे जयं च विद्यार्थिवादं परदेशवासम् । शुभेक्षित-धरासुतनीचदाये भूस्वर्णनाशनम् । तस्मिन् गोचरसंयुक्ते स्वल्पं शोभनं भवेत् । आरुह्य पापसहवीक्षितस्य प्राप्तौ दशायां बहुदुःखकष्टम् । जनैः परित्यक्तकलत्रमित्रो देशा-न्तरस्थः क्षितिपालकोपात् । केन्द्रगतभौमदाये चोरविषा-ग्न्यासपैति दुःखानि । कलहो बान्धवविरोधं लभते देशान्तरं याति । चतुर्थराशिस्थितभौमदाये स्थानच्युतिं बन्धुविरोधि-तान्च । चोराग्निपीड़ां नृपतेः सकाशात् भीतिं परे दुर्गपदे प्रयाति । कलत्रयुक्तस्य कुजस्य दाये कलत्रहानिर्गुदमूत्र-कृच्छ्रम् । खगोचरस्यस्य च तादृशं फलं तदन्यथा चेत् फलमन्यदेव । कर्मस्थितस्यापि कुजस्य पाके कर्मादिवैक-ल्यमुपैति दुःखम् । उद्योगभङ्गं स्वपकीर्त्तिमेति विद्या सुतस्त्रीधनमानहानिः । चतुर्गभौमदशायां दधाति शोकं स्त्रिया विरोधं च । राज्याच्च्युतिं विपक्षाद्देशाद्देशान्तरं याति । वित्तगभौमदशायां संप्राप्तौ तस्य हस्तिनपयाति । स्वकुलाद्बन्धुत्वं लभते नृपहृतवित्तं सखाचिरोगञ्च । भ्रा-तृस्थानगतस्य सौख्यफलदो भूनन्दनोऽरातिहा धैर्यं वित्तसुतार्थदारसहजैः सङ्गं नृपात् पूज्यताम् । पुत्रस्थान-गतस्य पुत्रभरणं बुद्धिभ्रमं जाड्यतां शत्रुक्षेत्रगतस्य भूमि-सहजैर्दुःखं महारोगभाक् । षष्ठस्थधरासुतोदये कीर्त्तिं विवेकिताम् । नेत्ररोगं व्रणनाशं दद्यात् कलहमेव वा । मरणपदस्थो भौमः करोति दुःखं महद्भयं पाके । स्फोटकमन्यविरोधं स्थानविनाशं विदेशयानञ्च । नव-मस्थधरासुतोदयाशाके पदच्युतिम् । गुरुर्वा च तथा कष्टं तपोविघ्नं महद्भयम् । आयस्थभौमदाये करोति राज्यार्थभूषसम्मानम् । समरे जयप्रतापं वा-गुपकारं मनोज्ञं कीर्त्तिम् । व्ययगतभौमदशायां प्राप्तौ धनच्युतिं नृपाद्भीतिम् । स्थानसुतदारनाशं भ्रातृकां विदेशवासञ्च । उच्चांशसंयुक्तधराजकाले मनोभिलाषं विजयं सुखञ्च । प्रचण्डदासीगमनं नृपस्य प्रधानतां याति सुगन्धपद्मम् । नीचांशभौमदाये नीचयुतेऽस्थान-कर्मवैकल्यम् । धनहानिभूपदण्डः शिरोदरपरायणो-ऽशीतः । भौमदशायामादौ लभते विविधार्थमान-हानिं च । मध्येऽस्मिन्भूपचौरैर्भीतिं तत्र विनि-र्दिशेन्नृतिमान् । अन्ते भ्रातृवियोगं सुतधनदाराग्नि-गुल्ममूलादिम् । भौमेऽस्तगे न भवेद्गोचरशुद्धे विशेषतः कथयेत् । भौमस्य संस्थानबलान्वितस्य दशाविपाकेऽर्थ-कलत्रसौख्यम् । स्थानादिलाभं सुखकीर्त्तिशौर्य-सद्योगसिद्धिं त्वनयादुपैति । स्थानधैर्यविहीनस्तु कुरुते स्वपदच्युतिम् । कुजः कुवीक्षदृष्ट्या च जीवनं भवति ध्रुवम् । दिग्वीर्ययुक्तस्य कुजस्य दाये नृपात् सुखार्घ-रत्नप्रतापम् । गोभूमिलाभाम्बरयानलाभं दिगन्तरा

क्रान्तवशःप्रतापम्। कालवीर्ययुतभौमदशायां काम्यलब्धिरिति सौख्यमेति। षष्ठस्थभस्थितभौमक्रियाभं चित्रवस्त्रलवणभोगजलाभम्। निसर्गवीर्यान्वितभौमदाये कृपाकटाक्षेण महीपतीनाम्। समस्तभाग्यात्मजमित्रबन्धुगोभूमिभूषाम्बरदेहसौख्यम्। निसर्गतः स्थानधनार्थनाशं पित्ताधिकं कुत्सितभोजनञ्च। कुजस्य दाये कुनखी पिशङ्गः सक्रोदराणामपि देहपीड़ा। वक्रान्वितस्य भौमस्य दशाकाले महद्भयम्। चौराग्निसर्पपीड़ां च वनवासं पदच्युतिम्। दृग्वीर्ययुक्तस्य कुजस्य दाये कृपाकटाक्षेण महीपतीनाम्। समस्तभाग्यात्मजमित्रबन्धुगोभूमिभूषाम्बरदेहसौख्यम्। क्रूरषष्ठांशसंयुक्तभौमदायेऽतिपीड़नम्। कारागृहप्रवेशञ्च समस्तविभवक्षयम्। सौम्यषष्ठांशसंयुक्तभौमदाये शुभं भवेत्। विवाहदीक्षायज्ञं च सर्वैश्वर्यप्रकारकम्। पारावतादिसंयुक्तभौमदाये महत् सुखम्। भूम्यर्थदारसम्पत्तिधनवाहनभोजनम्। क्रूरद्रेक्काणसंयुक्तकुजदाये मनोव्यथा। निगड़ं विग्रहीतिं च पाशबन्धनमेव च। उच्चस्थोऽपि धराक्षत्रुनीचांशकसमन्वितः। तत्पाके भ्रातृमरणं स्वपक्षविग्रहाद्भयम्। भूमिपुत्रोऽपि नीचस्थः स्वोच्चभागसमन्वितः। तत्पाके भूमिदारार्थपुत्रमित्रविवर्द्धनम् कुजदशा।

अथ बुधदशा। "बलयुक्तसोमात्मजदायकाले धनान्वितः ख्यातिमुपैति सौख्यम्। ज्ञानञ्च कीर्त्तिं जननायकत्वं स्त्रीपुत्रभूभ्यर्थमहोत्सवञ्च। उच्चस्थितस्यापि शशाङ्कसूनोर्दशा महत्त्वं कुरुतेऽर्थसौख्यम्। देहस्य पुष्टिर्धनधान्यपुत्र गोवाजिमत्तेभसदङ्गनादम्। धारोक्षियो सौम्यदशा प्रपन्ना वस्त्रोत्सवं गोवृषवाजिसङ्गम्। महद्यशभूषाम्बरयानलाभं वाणिज्यभूभ्यर्थपरोपकारम्। शशाङ्कसूनोस्त्ववरोक्षियो या दशा महत्कष्टतरञ्च दुःखम्। विज्ञानहीनं परदारसङ्गं स्वपाग्निचोरैर्भयमत्र कष्टम्। नीचस्थचन्द्रात्मजदायकाले ज्ञानेन हीनं स्वजनैर्वियुक्तम्। पदच्युतिं बन्धुविरोधितां च विदेशयानं वनवासदुःखम्। मूलत्रिकोणान्वितसौम्यदाये राज्यं महत्सौख्यकरं च कीर्त्तिम्। विद्याविलासं निजमार्थ्यशीलं पुराणधर्मज्ञवचादिपूतः। स्वक्षेत्रगस्यापि शशाङ्कसूनोः प्राप्तौ दशायां धनधान्यसम्पत्। वाणिज्यगोभूमिसुतार्थदारमहद्यशानाम्बरभूषाप्तिः। शशाङ्कसूनोस्त्वरिराशिगस्य शत्रोर्भयं भूपतिकोपजातम्। विद्याविहीनं कुसहीनसेवां कुभोजनं दारसुतार्थनाशनम्। शशाङ्कसूनोरतिशत्रुराशिं गतस्य पाके विपदं च दुःखम्। उद्योगभङ्गं स्वजनैर्विरोधं यत्नादिविघ्नं शुभकर्मनाशम्। मित्रक्षेत्रदशायां शशाङ्कसूनोर्धनावाप्तिः सौख्यम्। नामद्वयसंप्राप्तिः स्वनामाङ्कितमद्यपद्यानि। स्वतिमित्रराशिगस्य दशा प्रपन्ना महत्त्वतां याति। भूपतिमैत्रं सौख्यं धनसुतदाराश्च बन्धुसम्मानम्। समर्क्षगस्यापि शशाङ्कसूनोर्दशा सुखं धान्यसुताम्बराणि। करोति राज्यच्युतिमत्रविघ्नं विज्ञानहीनं पिटकादिरोगम्। नीचखेचरसंयुक्त सौम्यदायेऽतिकष्टताम्। पदभ्रंशं बन्धुनाशं कर्मनाशं मनोरुजम्। उच्चखेचरसंयुक्तसौम्यदाये महत् सुखम्। भाग्योत्तरं सुविद्यां च वाग्मित्वं गोक्रियाः। विदः पापान्वितस्यापि दाये पापक्षयेति च। क्षेत्रार्थदारपुत्रादिक्षयिणोभूमिनाशनम्। विदः सौम्ययुतस्यापि परिपाके महत् सुखम्। राज्ययोगं सुखं कीर्त्तिं दारपुत्रलाभात् सुखम्। सौम्येक्षितस्यापि शशाङ्कसूनोर्दशाविपाके महतीं च कीर्त्तिम्। विद्याविलासोद्भव राजपूजां कान्तिप्रतापं यशसा समेतम्। पापेक्षितस्यापि शशाङ्कसूनोर्धान्यक्षयं बन्धुजनैर्वियुक्तम्। विदेशयानं स्वपदच्युतिं च प्रेष्यानुदृष्ट्या कलहोऽतिकष्टम्। केन्द्रोपगस्य हि दशा शशिनन्दनस्य भूपालमित्रधनधान्यकलत्रलाभान्। यज्ञादि कर्मश्रवणानयज्ञःप्रलिप्सं महद्यशानशयनाम्बरभूषणानि। लग्नं गतस्य हि दशा शशिनन्दनस्य भूपालमानं क्षणिलब्धभाग्यम्। भेरीरवादि परिघोषितयानमार्गं तीर्थाभिषेकमथवा लभते प्रसिद्धम्। वित्तगसौम्यदशायां विद्याप्राप्तिं महत्त्वकीर्त्तिञ्च। भूपतिभाग्यसमानो राज्यस्थाने प्रपन्नतां याति। तृतीयराशिस्थितचन्द्रसूनोर्दशाविपाके सुहृदां समेति। उद्यानभाजीवनगुल्मरोगमस्वार्त्तियोगे स्वपमाननञ्च। शशाङ्कसूनोश्चिपुकस्थितस्य दशा प्रपन्ना मृदधान्यनाशम्। सौख्यादिहीनं शिपुकेशसत्त्वुरुद्योगभङ्गं च पदच्युतिं वा। षष्ठस्थशशिनन्दनस्य या क्रूरवुद्धिरतिकष्टता भवेत्। हीनक्षत्तिरपि राजसेवया कष्टलब्धधनमेति सम्पदम्। प्रशस्तमान्यस्थित सौम्यदाये स्वगदोपजातं वस्तुरोगमेति। विचर्चिका पैत्तिकपाण्डुरोगं स्वपाग्निचौरैर्मरणं क्षतत्वम्। देहाङ्गवैकल्यकलत्रबन्धुविद्वेषणं भूपतिदत्तकोपम्। चाक-

खिलं सत्त्वभवं प्रमादं रिपुस्थितस्थापि शशाङ्कनोः। दारस्थितस्थापि शशाङ्कनोर्दशा विपाके सुतदारवित्तम्। विद्याविनोदं विमलाम्बरं च नामदयं भूपतिमित्रताङ्ग। भाग्यस्थितस्थापि शशाङ्कनोर्भाग्योत्तरं दारसुतार्थलाभम्। तीर्थाभिषेकं अपक्रोशदानं यज्ञादिकर्माणि लभेन्नरेषुग्रः। कर्मस्थितस्थापि शशाङ्कनोर्दशाविपाके नृपतौल्यमेति। सौख्यं खनाशाङ्कितगद्यपद्यं नामदयं दारसुतार्थलाभम्। प्रपूजनं देवमहीरुहाणां साम्राज्यलाभं जननायकत्वम्। कवित्वमार्गं लभतेति काले यज्ञादिदीक्षां खजनैर्विशेषात्। उपान्त्यराशिस्थितसौम्यदाये लभेनरेषु वित्तमुपैति काले। दानेन वा भूपतिमाननाद्वा क्रमेण वाणिज्यविचारतो वा। लग्नांशसंयुक्तशशाङ्कनोर्दशाविपाके सुतभूषणाप्तिः। मनोविलासं नयनाभिरामसल्लाङ्गधैर्यं च जलाभिषेकम्। नीचांशकयुतः सौम्यो नीचस्थानुजीवनम्। प्रेष्यत्वं परिक्षारं च दशायाञ्च करोति तत्। सौम्यदशायामादौ लभते धनधान्यसम्पदं पुरुषः। अन्ते स्वजनविरोधं मध्ये दाये नरेशसम्मानम्। अर्कभसौम्यदशायां लभते विविधापदं मनोदुःखम्। स्वकुलजनपविरोधं निन्द्यभवं वाणिक्कर्मरोगञ्च। स्थानवीर्ययुते सौम्ये तत्पाके कीर्त्तिराज्यदम्। मनोधैर्यं मनोलाभं यज्ञदीक्षाशुभप्रदम्। तद्विहीनवुधे स्थानदारसुतसङ्क्षयम्। विदेशवासं दुःखं च नानापरिभवक्रियाः। दिग्वीर्यसहिते सौम्ये दिग्लाङ्गनिकः सुधीः। सामन्तराजमित्रत्वं मन्त्रशास्त्रस्य लेपनम्। कालवीर्ययुतसौम्यदशायां देहसौख्य कलत्रादिवियोगम्। दारपुत्रलपमाननमेति साकुतोयपरिप्लुततनुः स्नात्। निसर्गवीर्यान्वितसौम्यदाये निसर्गतयापि शुभादि कर्म। विद्याविवादं स्वजनैर्विरोधं मातृवियोगं स्वयं तदीयम्। वक्रचेष्टान्विते सौम्ये भाग्यदारसुतार्थभाक्। तथा परार्थदानादिसत्कर्मानाचरेत्। रन्ध्रवेन युते सौम्ये सर्वभूतेषु सौम्यताम्। करोति रतिं कचिच्च राजप्रभाग्यसमन्वितम्। क्रूरषष्ठांशसौम्यस्य दशापाके सङ्कटम्। चोराग्निभूपैर्भीतिः स्वाच्छुभदृग्योगवर्जिते। सप्तमादियुते सौम्ये राज्यलाभं महत्सुखम्। मार्दवं सर्वभूतेषु ऋणिपुत्रार्थसम्पदम्। सौम्ये वैश्लेषिकांशस्थे विशेषाद्राजपूज्यताम्। सुतस्त्रीवस्त्रमाल्यं च विद्यामोदोरुदर्शनम्। क्रूरदृष्ट्याचसंयुक्तचन्द्रक्षवर्षदा तदा। चोराग्निभूपतिभयं स्थानहानिं महद्भयम्। उच्चराशिगतः सौम्यो नीचभागगतो यदि। राज्यं सुखं महत्कीर्तिम् विनाशयति तत्क्षणात्। चन्द्रात्मजोऽपि नीचस्थः स्वोच्चभागसमन्वितः। अशुभं फलमादौ तु शुभमन्ते प्रयच्छति"।

अथ गुरुदशा "गुरोर्दशायां परभोजनस्य राज्यं महत्सौख्यमुपैति कीर्त्तिम्। मनोविलासं गजवाजिसङ्गं रूपाभिषेकं स्वकुलाधिपत्यम्। कुलीरगस्यापि गुरोर्दशायां भाग्योत्तरं भूपतिमाननाद्वा। विदेशयानं महदाधिपत्यं दुःखैः परिक्लिष्टतनुर्मनुष्यः। आरोहिणी देवगुरोर्महत्त्वं दशा प्रपद्या कुरुतेऽर्थभूमिम्। ज्ञानक्रिया स्त्रीसुतराजपूजां स्वकीर्यतः प्राप्नुयशःप्रतापम्। जीवदशायामारोहिण्यामीयो मण्डलादिनाथो वा। द्विजभूपालब्धधनो मेधावी कान्तिमान् विनीतश्चः। देवेन्द्रपूज्यस्य दशावरोहा करोति सौख्यं सकलैव नाथः। सकलश्चयः कान्तिविशेषलाभं नरेश्वरत्वं सकलैव याति। अतिनीचभागभाजो गुरोर्दशायां प्रभग्नसद्वृपुष्पः। अन्योन्यदुष्टयवैरं क्षयिनाथं याति परभृत्यः। मूलत्रिकोणनिलयस्य गुरोर्दशायां राज्यार्थभूमिसुतदारविशेषसौख्यम्। यानाधिरोहणमपि स्वबलाप्तवित्तं यज्ञादिकर्मजनपूजितपादपीठम्। गुरोर्दशायां खलु हं गतस्य राज्ञोऽर्थभूधान्यसुखाम्बरत्वम्। मिष्टान्नगोवाजिमनोविलासं काव्यादिपुण्यागमवेदशास्त्रम्। गुरोर्दशायामतिशत्रुराशिं गतस्य दुःखं बसुपैति शोकम्। विषादभूम्यर्थकलत्रनाशं रूपाग्निचोरैर्बहुदुःखपीडाम्। गुरोर्दशायामरिराशिगस्य क्षेत्रादिवित्तं शयनाम्बरत्वम्। नरेशसम्मानसुपैति नित्यं स्त्रीपुत्रभव्यात्मसहोदरार्त्तिम्। प्राप्तो दशायामतिमित्रराशिं गतस्य जीवस्य नरेन्द्रपूज्यम्। महद्गजैरोरवयानयोगं दिगन्तराक्रान्तसमस्तभाग्यम्। मित्रर्क्षगस्यापि गुरोर्दशायां नरेशमैत्रीं बसुपैति कीर्त्तिम्। विद्याविवादे जयमद्भसौख्यसुतस्वहस्वपरोपकारम्। समर्क्षगस्यापि गुरोर्दशायां सामान्यतो भूपतिदत्तभाग्यम्। क्रूरार्धगोभूमिमनोविलासं मित्राम्बराच्छादितभूषणाप्तिम्। नीचखेचरसंयुक्तजीवदाये मनोदुःखम्। परभेषग्राघवादङ्ग पुत्राद्याङ्ग विरोधिताम्। उच्चखेचरसंयुक्तगुरुदाये महत्सुखम्। अनेकगोपुराटोनां निर्माणं नृपपूज्यताम्। पापान्वितस्थापि गुरोर्दशायां करोति पापं बहुदाम्बरस्वम्। मूढं बहिः पुण्यफलं विशेषात् भूस्वर्णदाराकलत्रसौख्यमेति। शुभान्वितस्थापि गुरोर्दशायां नरेश्वराद्यं

स्वदुःखाम्बरं च। दानेन वित्तं स्वपमाननाहा यत्नादिसंभा-वितेष्वलाभम्। पापेक्षितस्थापि गुरोर्दशायां प्राप्तं सुखं किञ्चिदुपैति धैर्यम्। क्वचिद् यशः कुत्रचिदाप्तसौख्यं क्वचिद्धनं नाशमुपैति चान्ते। शुभेक्षितस्थापि गुरो-र्दशायां देशान्तरे वित्तमुपैति भूपात्। देवार्चनं भूसुर-तर्पणञ्च तीर्थाभिषेकं गुरुपूज्यताञ्च। केन्द्रगतजीवदावे-राज्यं भूदारराजसम्मानम्। विविधसुखानन्दकरं बहुजनरक्षां प्रधानतां याति। लग्नङ्गतस्य हि दशा-पूरुषं करोति जीवस्य सौख्यमलाम्बरभूषणाप्तिम्। यानाधिरोहणसदङ्गसारवैद्य मत्तेभवाजिभटसङ्कुलतां करोति। चतुर्थकेन्द्रस्थितजीवदावे यानालयं भूपतिमित्र-भावम्। भूपालयोगो यदि भूपतित्वं नो चेत्तदा तत्सदृशं करोति। कलत्रराशिस्थितजीवदावे दारार्थपुत्रार्थसुखं प्रयाति। विदेशयानं समरे जयञ्च धान्यं धरत्नक्षणि पुण्यकर्म। कर्मस्थितस्थापि गुरोर्विपाके राज्याप्तिमाहु-र्मनयस्तदानीम्। भूपालयोगे त्वथ वार्धपुत्रकलत्रसत्कर्मसु राजयोगम्। पद्मस्थगुरोर्दावे मन्त्रोपाधिर्मनःसुखम्। सुताप्तिं राजपूजाञ्च वेदान्तश्रवणादिकम्। त्रिकोणसं-स्थस्य गुरोर्दशायां स्त्रीपुत्रधान्यार्थविवेकबुद्धिम्। सदन्न-पानाम्बरपट्टवस्त्रयानादिलाभं नवमे तु सौख्यम्। उच्चां-शसंयुक्तगुरोर्दशायां भाग्योत्तरं राजसमानमेति। प्रधानसङ्गामधिरत्नलाभं सर्वेषु सख्यं समुपैति सौख्यम्। नीचांशसंयुक्तगुरोर्विपाके भूपाद्भयं गुल्मविचर्चिकादीन्। स्थानच्युतिं बन्धुविरोधितान्न सपाग्निचोरैः स्वकुलोद्भवैश्च। स्वर्कगजीवदशायां सहसा ज्वरपीड़ितो भवेत् क्षीणः। जहांङ्कुरोगतप्तो दुःखोन्नतप्रभग्नसंसारः। आदौ गुरुदशाकाले नृपपूजां महत्सुखम्। मध्ये स्त्रीपुत्रलाभादि चान्ते कष्टं विनिर्दिशेत्। धनस्थित-स्यापि गुरोर्विपाके धनार्थतं भूपतिमाननञ्च। विद्या विवादाद्धिनराजगोष्ठीं सर्वोपकारं विजयं सुखञ्च। नृपक्षतबन्धुमानं भ्रातृभिर्भूमिलाभं परयुतविजनैर्वा दत्तगोभूमिवित्तम्। कृशनवसनभूषागन्धमाल्याम्बराप्ति परक्षतसुपकारं शुद्धतामेति शौर्यम्। तृतीयस्थगुरो-र्दावे भ्रातृणां च सुखं धनम्। नृपदत्तं धनं सौख्यं गन्धमाल्याम्बरादिकम्। नीरोगतां पुत्रकलत्रलाभं लग्नाद्विपुत्रस्थ गुरोर्दशायाम्। आदौ भवेद्देवमचान्त्य पाके दारार्थचोरादिभयं सरोगम्। जीवोऽरण्य-मदस्थः करोति सौख्यं स्वबन्धुजनहानिम्। स्थान-च्युतिं विदेशं प्राप्ते स्त्रीराजपुत्रसम्मानम्। लाभ गजीवदशायां संप्राप्तौ राज्यलाभमुपयाति। बन्धुर्ध-दारपुत्राङ्गुपविरोधं स्वबन्धुविद्वेषम्। व्ययगतजीव-दशायां प्राप्तौ वाहनादि समुपयाति। लभते विदेशयानं नानाक्लेशैश्च परिभूतः। पापे स्थानबलान्वितस्य च गुरोः क्षेत्रार्थदारान्नजान् संप्राप्नोति गजाश्ववस्त्रजनकं चित्राम्बरं भूषणम्। दिग्वीर्यान्वितदेवनायकगुरौ लोके प्रसिद्धं तथा जीवे कार्त्तबलाधिके नृपबधूसम्प्राप्ति तां याति सः। निसर्गवीर्यान्वितजीवदावे निसर्गत-श्चातिसुखं महत्त्वम्। विद्याविलासं रतिकेलिसौख्यं भागीरथीतोयलताभिषेकम्। वक्रं गतस्थापि गुरोर्दशायां महार्थतां याति सुतार्थदारान्। युद्धे जयं भूपति-मित्रतां च सुगन्धजात्याम्बरयानविलासम्। दिग्वीर्ये-युक्तस्य गुरोर्विपाके कृपाकटाक्षैः महीपतीनाम्। समस्तभाग्यं समुपैति नित्यं देशान्तरे भाग्यति किञ्चि-देव। क्रूरषष्ठांशसंयुक्तगुरोर्दावेऽतिकष्टताम्। राज-कोपावमानादीन् लभते नात्र संशयः। सौम्यषष्ठांश-संयुक्तगुरोर्दावेऽतिसौख्यताम्। वाहनं बन्धुसम्मानं यत्नवैवाहिकं शुभम्। पारावतांशयुक्तस्य गुरोः पाके महत् सुखम्। सदन्नपट्टवस्त्रञ्च हेमविक्रियभूषणम्। पापक्षेत्रांशयुक्तस्य गुरोर्दावे च बन्धनम्। कारागृह-प्रवेशञ्च निगड़ं दारविग्रहम्। उच्चस्थोऽपि गुरुर्नीच-रांशकसमन्वितः। महाभाग्यं तु संप्राप्तं तमृक्षणा-देव नश्यति। नीचस्थो देवपूज्योऽपि स्वोच्चांशकसम-न्वितः। भाग्यक्षये तु संप्राप्ते भाग्यं याति तदा नरः"।

अथ शुक्रदशा। "अम्बुस्थशुक्रदशायां मनोविलास-प्रियार्थभोगी स्यात्। माल्याच्छादनभोजनशयनस्त्री-पुत्रधनयुक्तः। स्वोच्चस्थितस्यापि भृगोर्दशायां स्त्रीसङ्गम-नार्थविरुद्धधर्मम्। पित्रोर्विनाशं समुपैति दुःखं शिरो-रुजं भूपतिमाननञ्च। आरोहिणी शुक्रदशा प्रदत्ता धान्यं वराहद्भुतिकालिपूजाम्। प्रवृत्तिसिद्धिं स्वजने-र्विरोधं माल्यादिनाशं परदारसङ्गम्। भृगोः सुतस्योच्च-वरोहकाले प्रचण्डवेश्यागमनं धनाप्तिम्। स्त्रीपुत्रबन्धा-र्त्तिमनोविकारं कृच्छ्रारोगं मदनार्त्तिमेति। उच्चेगरो-गतप्तः कर्मसु विक्लेष सर्वदाभिरतः। अतिनीचग-तस्य दावे शुक्रस्यात्मार्थदारपुत्रार्त्तिम्। मूलत्रिकोण-भाजो भृगोर्दशायां महाधिपत्यं स्यात्। क्रयविक्रयकुश-लधनवान् कीर्त्यन्वितो विधिज्ञश्च। स्वर्क्षगशुक्रदशायां

लभते स्त्रीपुत्रमित्रधनशौर्यम्। निर्लोल्याद्धं हेयं परोपकारं महत्त्वञ्च। भृगोर्दशायामनिष्टराशिं मतस्य पुत्रार्थकलत्रहानिम्। प्रभग्नसंसारविशीर्णदेहं गुल्माक्षिरोगं यक्ष्मीप्रकोपम्। शत्रुक्षेत्रदशायां भृगोरपत्यार्थदारहानिः स्यात्। भूपतिरोषं कुरुते मत्तविलासार्थपापकर्माणि। मित्रक्षेत्र दशायां परोपकारी कलाविधिश्च। पुंगारामलब्धिः स्याद्देवमनुष्येश्वरोद्भूतार्थश्च क्षतिमित्रशुक्रदाये भूपतिसम्मानसौख्यं च। शोधनवाजिसमेतं गजवरमङ्गैः निरस्तदोषैश्च। समर्क्षगस्यापि भृगोर्विपाके प्रमेहगुल्माक्षिरुदरोगः। किञ्चित् सुखं भूपतिवह्निचोरैः भयं स्वनामाङ्कितगद्यपद्यम्। नीचक्षेत्रसंयुक्तभृगोर्दाये महद्भयम्। अपवादकलं दोषं लभते पापकर्मभिः। क्षीणस्थितेन सहितस्य भृगोर्विपाके राज्यं महत्त्वसमराधिपतित्वमेव। क्षेमाम्बरादिमणिभूषणयानलाभं भेरीमृदङ्गपणवानकवाद्यघोषैः। पापान्वितस्यापि भृगोर्दशायां स्वानच्युतिं बन्धुजनैर्विरोधम् आचारहीनं कलहप्रियत्वं क्षयर्थभूम्यात्मजदारनाशम् शुभान्वितस्यापि भृगोर्दशायां सौभाग्यमित्रात्मजधान्यलाभम्। नरेशपूजां गजवाजिसङ्घं प्रवालसङ्कामणिवानलाभम्। पापेक्षितस्यापि भृगोर्दशायां मानार्थहानिं वसुपैति दुःखम्। स्त्रिया विरोधं स्वपदच्युतिं च विदेशवासं निजकर्महीनम्। शुभेक्षितस्यापि भृगोर्विपाके धनाम्बरं भूपतिपूजनञ्च। जनाधिपत्यं स्वशरीरकान्तिं कलत्रमित्रात्मजसौख्यमेति। केन्द्रं गतस्य हि दशा भृगुनन्दनस्य यानाम्बरादिमणिभूषितदेहकान्तिम्। राज्यार्थभूमिक्षितिवाहनवस्त्रशस्त्रदुर्गादियानवनवाद्यजलाभिषेकम्। लग्नगशुक्रदशायां संप्राप्तं राजमानन्दं लभते मणिगोधनक्षितिलाभं परापवादं महोत्साहम्। चतुर्थराशिस्थितशुक्रदाये राज्यं महत्सौख्यमुपैति यानम्। क्षतिक्रियावित्तपशुप्रजानां वृद्धिं प्रतापान्वितकीर्त्तिजालम्। कलत्रराशिस्थितशुक्रदाये कलत्रनाशं त्वथवा विदेशम्। प्रमेहगुल्मादिशरीररोगं प्रभग्नवित्तात्मजबन्धुराज्यम्। कर्मस्थशुक्रस्य दशाविपाके विद्याधनप्राप्तिनरेशपूजे। भाग्योत्तरं पालितदेहकान्तिं दिगन्तरप्राप्तयशः प्रतापम्। त्रिकोणसंयुक्तभृगोर्विपाके विद्याधनप्राप्तिनरेशपूजाम्। प्रवालसङ्कामणिशङ्खशुक्तिगोभूमियानाम्बरलाभम्। पञ्चमस्थभृगोर्दाये पुत्रावाप्तिं विनिर्दिशेत्। कीर्त्तिञ्च राजपूजाञ्च सर्वेषामुपकारकम्। त्रिकोणस्थगतः शुक्रः करोति नृपपूज्यताम्। यत्नकर्मादिलाभञ्च गुरुपितोः सुखं यशः। वित्तगशुक्रदशायां धनहानिमाङ्घ्रिनाशतिं चापि। अन्नसुखं वाग्विलासं परोपकारं नरेशसम्मानम्। तृतीयराशिस्थितशुक्रदाये धैर्यं महोत्साहमदीनसत्त्वम्। चित्राम्बरालङ्कृतिवाहनाप्तिं सहोदराणां बहुभाग्यलाभम्। भृगोर्विपाकेऽरिगतस्य नाशं धान्यार्थवस्त्रात्मजसोदराणाम्। रोगं महाकार्यविनाशनं च शत्रोर्भयं भूपतिवह्निचौरैः। रन्ध्रस्थितस्यापि भृगोर्विपाके यस्याग्निचोरक्षतमित्रविघ्नम्। क्वचित् सुखं किञ्चिदुपैति वित्तं क्वचिच्छरीराग्नियशः प्रतापम्। लाभस्थितस्यापि भृगोर्विपाके सुगन्धमाल्याम्बरराज्यपूजाम्। पुत्रार्थसौख्यं क्षतिविक्रयञ्च दानं स्वनामाङ्कितपद्यजालम्। व्ययगतशुक्रदशायां लभते धान्यार्थराजसम्मानम्। स्थानच्युतिं प्रवासं मातृवियोगं मनोविलासञ्च। जीवक्षेगतस्य भृगोः स्त्रीपुत्रमहीनाशनं कुरुते। कर्मसु नित्यो विघ्नो जननीक्लेशान्वितो मनोदुःखी। स्वर्क्षगशुक्रदशायां जीर्णाष्टवासः शुभावरोधश्च। लभते दारविनाशं भ्रातृवियोगञ्च कलहञ्च। सिंहगशुक्रदशायां लभते विविधापदं मनोदुःखम्। उद्योगरोधप्रभः कर्मसु विफले तु सर्वदाभिरतः। शुक्रे स्थानबलाधिके नरपतेः सम्मानमं भूयश्च विद्यावादविषादगोष्ठिरसिकं नामह्रयं संभ्रमम्। तस्मिन् दिक्प्रबलान्विते बन्धुयशःपुत्रार्थदाराम्बरं शुक्रे कालबलान्विते सुखधनं कीर्त्तिः स्वनामाङ्किता। निसर्गधैर्ययुक्तस्य भृगोर्दाये महत् सुखम्। क्षितिगोभूमिवित्तादि भ्रातृमातृसुखं भवेत्। वक्रं गतस्यापि भृगोः सुतस्य दशाविपाके क्षतिराजपूजाम्। स्वदन्तभेरीरवयुक्तयानं विचित्रवस्त्राभरणानि राज्यम्। दिग्वीर्ययुक्तस्य भृगोर्विपाके यज्ञादिकर्माणि करोति काले। विद्याविलासं श्रयनाम्बरञ्च नृपाभिषेकं कलहं विरोधम्। क्रूरषडंशयुक्तस्य भृगोर्दाये विपद्भयम्। चोराग्निराजभीतिः स्यात् क्षितिगोभूमिनाशनम्। सौम्यषडंशयुक्तस्य भृगोर्दाये महत् सुखम्। कूपारामतटागानां निर्माणं देवपूजनम्। वैशेषिकांशसंयुक्तभृगोर्दाये महत् सुखम्। वाहनं भूपसम्मानं भ्रातृस्त्रीधनसम्पदः। क्रूरस्त्रीक्ष्वाणसंयुक्तभृगोर्दायेऽरिभीतिदम्। कारागृहमहत्कष्टमनर्थं चोरपीडनम्। उच्चक्षेत्रेऽपि नीचांशयुक्तः शुक्रोऽतिकष्टदः। करोति राजप्रणाशञ्च स्थाननाशमथापि वा। उच्चांशयुक्तशुक्रोऽपि नीचराशिसमन्वितः। क्षितिगोभूमि-

वाणिज्यं धनधान्यविवर्द्धनम्" शुक्रमहादशाफलम्।

अथ शनिदशा। "मन्दाख्यदशायां यामसभामण्डलाधिपत्यं स्यात्। लभते विनोदशीलं पितृनाशं बन्धुकलहं च। खोच्चदशायां कुरुते देशभ्रंशं मनोरुजं दुःखम्। वाणिज्यहानिसत्वं क्षयिहानिं नृपविरोधञ्च। खारोच्चो वासरनाथसूनोर्दशा विपाके नृपलब्धभागम्। वाणिजगृहाभं क्षयिभूमिलाभं गोवाजिवानं सुतदारलाभम्। दिनेशसूनोस्त्वरोच्चकाले राजच्युतिं दारसुतार्थनाशम्। भागृहत्रयं भूपतिकोपयुक्तं प्रेष्यत्वमायाति गुदाक्षिरोगम्। नीचस्थितस्यापि दिनेशसूनोर्दशे कलत्रात्मजसोदराणाम्। नाशं महाकष्टतरां क्षयिं च नीचानुरक्त्या लभते हृत्तिम्। मूलत्रिकोणनिलयस्य शनेर्दशायां देशान्तरादिवनवासमुपैति काले। नामहृयं यदि समानगराधिपत्यं विद्वेषणं सुतकलत्रजनादिभिर्वा। स्वोच्चगस्य च दशा दिवसेशसूनोर्हर्षं करोति बलपौरुषकीर्त्तिजातम्। राजाश्रयं कनकभूषणभूमिलाभं धैर्यं स्वनामसदृशानुगुणं च सौख्यम्। शनेर्दशायामतिशत्रुगस्य स्थानच्युतिं बन्धुविरोधिताञ्च। चोरादिभूपैर्भवभत्र विघ्नं भृत्यार्थदारात्मजकोपमेति। दिनेशसूनोस्त्वरिराशिगस्य वैश्याङ्गनं प्राप्य तु भूमिनाशम्। क्षयिर्विनाशं स्वपदच्युतिञ्च वैरं समायाति शरीरकष्टम्। मित्रक्षेत्रदशायां मन्दस्य तु शिल्पकर्मवेत्ता। ज्ञानवन्तं प्रतापं ददाति दुःखं महत्त्वञ्च। अधिमित्रमन्ददाये ददाति सौख्यं नरेशसम्मानम्। सुतबन्धुदारविशेषात् पशुक्षयिमहिषादिवाणिजम्। समगृहस्थापि शनेर्दशायां समानबुद्धिः सुतदारमित्रे। भृत्यापदं बन्धुजनेषु वैरं देहस्य कष्टं क्षयवातपित्तैः। नीचखेचरसंयुक्तशनेर्दाये महद्भयम्। विप्रलम्भोपवासश्च नीचत्वात्तनुजीवनम्। स्वोच्चखेचरसंयुक्तशनेर्दाये महत् सुखम्। किञ्चिद्राज्यं क्षयिलाभं भृत्यवर्गार्थनाशनम्। पापान्वितस्थापि शनेर्दशायां पापानि गूढानि करोति काले। नीचस्थिया सङ्गमनं विशेषाच्चोरादिनीचैः कलहं विदारम्। शुभान्वितस्थापि शनेर्दशायां विशेषतो ज्ञानमुपैति काले। परोपकारं नृपलब्धभागं क्षयानि धान्यान्वयधाञ्च लाभम्। पापेक्षितस्थापि शनेर्दशायां भृत्यार्थदारात्मजसोदराणाम्। नाशं समायाति परापवादं कुभोजनं कुत्सितगन्धमाल्यम्। शुभेक्षितस्थापि शनेर्दशायां स्त्रीपुत्रभृत्यार्थसुपैति काले। पश्चादुपैत्यत्र महत्त्वकष्टं गोभूमिवाणिजगृहक्षयैर्विनाशम्। केन्द्रान्वितशनेर्दाये कलहायासपीड़नम्। पुत्रमित्रार्थदारादिबन्धूनां मरणं ध्रुवम्। लग्नगतशनेर्दाये देहलक्ष्मुपैति च। स्थानच्युतिं प्रवासञ्च राजकोपं शिरोरुजम्। चतुर्थस्थशनेर्दाये मातृतद्वर्गनाशनम्। मृहृदाहं पदभ्रंशं चोरार्त्तिं नृपपीड़नम्। दाररात्रिगतस्थापि शनेर्दाये रिपीड़नम्। मूलत्रिकोणं महाहृयं स्त्रीहेतोर्मरणन्तु वा। दशमस्थशनेर्दाये कर्म्मनाशमुपैति च। देशान्तरं पदभ्रंशं निगड़ं राजपीड़नम्। हितीयस्थशनेर्दाये वित्तनाशमवाप्नुयात्। राजकोपं मनस्तापमङ्गपीड़ं मनोरुजम्। तृतीयस्थशनेर्दाये क्षयिशोधनसम्भवः। मनोजाग्रमनुत्साहं भ्रातृतद्वर्गनाशनम्। पञ्चमस्थशनेर्दाये पुत्रनाशं मनोरुजम्। राजकोपं भृत्यनाशं बन्धुस्त्रीवित्तविभ्रमम्। षष्ठस्थरविसूनोस्तु दशाकालेऽरिपीड़नम्। व्याधिचोरविषैर्बाधां यच्छत्रविनाशनम्। मरणपदस्थो मन्दः करोति नित्यं सुतार्थदाराधाम्। नाशं भृत्यजनानां गोमहिषभूमिदारनाशं च। नवमगतमन्ददाये पितोर्नाशं गुरोस्तथैवापि। लभते विदेशयानं स्वकुलजातैर्विनाशमुपयाति। लाभगमन्ददशायां लभते विविधार्थसौख्यसम्मानम्। सुतदारभृत्यसौख्यं मनोविलासं क्षयेश लब्धधनम्। व्ययगतमन्ददशायां भीतिं चोराग्निभूपसङ्गञ्च। विविधापदं च दुःखं विदेशयानं स्वबन्धुनाशञ्च। अर्कगमन्ददशायां स्वजनद्वेषं परस्त्रियं लभते। भृत्यापत्यविरोधं महोद्योगं दोषपरिभूतम्। नीचांशिमन्ददाये नीचाचारेश जीवनं लभते। सर्वेषां प्रेष्यत्वं धनसुतदारैश्च वियद्दुःखम्। उच्चांशिमन्ददाये विविधसुखानन्दभोगभागग्रादीन्। कुरुते विदेशयानं यामसभामण्डलाधिपत्यं वा। आदौ मन्ददशायामतिदुःखं मातृनाशनं कुरुते। मध्ये विदेशयानं परगृहवासं परान्नभुक्त्वान्ते। स्थानवीर्य्ययुतमन्ददशायां दारसुतधनकीर्त्तिमुपैति। चोरशत्रुनृपवह्निभयं वा बन्धुनाशमथवाप्नुयादार्त्तिम्। मन्दस्य दिग्बलीर्य्ययुतस्य दाये दिगन्तरादाप्तसुखार्थकीर्त्तिम्। भूम्यर्थदारात्मजसोदराणां विनाशनं बन्धुजनैर्विरोधम्। कालबलीर्य्ययुतमन्ददशायां कालकूटविषभीतिमुपैति। दारसुतबन्धुचोरभयं वा धान्यभूमिक्षिवाहनलाभम्। वक्रचारयुतो मन्दः करोति विफलां क्रियाम्। उद्योगभङ्गदुःखञ्च सोदराणाञ्च नाशनम्। क्रूरषडंशसंयुक्तशनिदाये महद्भयम्। नृपकोपं

यदभंगं कारास्थस्थितिवेशनम्। सौम्यपदांशसंयुक्त-शनिदाये महत्सुखम्। दारपुत्रार्थसंपत्तिं लभते बन्धु-प्रियत्वम्। वैशेषिकांशसंयुक्तः शनिः सौख्यं करोति च। विशेषाद्राजसम्मानं विचित्राम्बरभूषणम्। क्रूर-दृष्काणसंयुक्तशनिदाये महद्भयम्। उच्चस्थं विषा-द्भीतिं नृपचोराग्निजन्मभयम्। नीचराशिगतो मन्दः खोच्चांशकसमन्वितः। दशादौ दुःखमाप्नोति दशान्ते कष्टदो भवेत्। उच्चराशिगतो मन्दो नीचांशकसम-न्वितः। दशादौ सुखमाप्नोति दशान्ते कष्टदो भवेत्।"

अथ राहुदशा। "राहोर्दशोद्भवं केतोस्तु दशिकस्तुङ्गसंस्थितः। मूलत्रिकोणं कुम्भश्च क्रियो मिश्रमुच्यते। एतद्गृहराशिस्तु केतोर्मूलत्रिकोण-मम्। षष्ठाष्टरिष्फगो राहुस्तदाये कष्टदो भवेत्। उच्चस्थः सैंहिकेयस्तु तत्पाके सुखदो भवेत्। राज्यं करोति मित्राग्निं धनधान्याभिवर्धनम्। राहुर्नीच-स्थितोदाये चोराग्निनृपभीतिदः। उच्चस्थं विषा-द्भीतिं कुरुते सिंहिकासुतः। राहोर्दशायाः संप्राप्तौ नृपचोराग्निपीड़नम्। विदेशयानं दुःखार्तिं वनवासा-द्भयं ध्रुवम्। लग्नगतराहुदाये बुद्धिविहीनं विषाग्नि-शस्त्राद्यैः। बन्धुविनाशं लभते दुःखार्तिञ्च पराजयं समरे। राहोर्दशायां धनराशिगस्य राज्यञ्च चित्तं हरते विशेषात्। कुभोजनं कुत्सितराजसेवा मनो विकारं त्वचतं प्रकोपम्। तृतीयराशिस्थितराहुकाले भ्रात्रर्थदारात्मजसोदराणाम्। सुखं क्षणेबन्धनमाधिपत्यं विदेशयानं नरपालपूजाम्। चतुर्थराशिस्थितराहुकाले मातुर्विनाशन्त्वथवा तदीयम्। क्षेत्रार्थनाशं नृपतेः प्रकोपं भार्यादिपातित्यमनेकदुःखम्। चोराग्निबन्धार्ति मनोविकारं दारात्मजानामपि रोगपीड़ा। चतुर्थ-राशिस्थितराहुकाले प्रभग्नसंसारकलत्रपुत्रम्। बुद्धि-भ्रमं भोजनसौख्यनाशं विद्याविवादं कलहञ्च दुःखम्। कोपं नरेन्द्रस्य सुतस्य नाशं राहोः सुतस्थस्य दशा-विपाके। दशाविपाके त्वरिराशिगस्य चोराग्निभूपै-र्भयमाप्तनाशम्। प्रमेहगुल्मक्षयपित्तरोगं त्वग्दोषरोगं त्वथवा मृतिञ्च। कलत्रराशिस्थितराहुदाये कलत्रनाशं कलहैति शीघ्रम्। विदेशयानं क्षतिभागहानिं सर्पा-द्भयं स्वल्पसुतार्थनाशम्। राहोर्दशायां निधनस्थितस्य यमालयं याति सुतार्थनाशम्। चोराग्निभूपैः स्वकुलो-द्भवैश्च भयं सदैवं वनवासदुःखम्। राहोर्दशायां नवमस्थितस्य पितोर्विनाशं लभते मनुष्यः। विदेशयानं गुरुबन्धुनाशं ज्ञानं यशश्चस्य सुतार्थनाशम्। मान-स्थितस्यापि दशाविपाके राहोः प्रवृत्तिं लभते मनुष्यः। पुराणधर्मेश्ववरादिभिश्च गाङ्गेयतोऽरेरपि गुरुदेहः। सौम्यर्क्षगश्चेत्फलमेवमेव पापर्क्षगश्चेत्तथा भवेद्वि। भोक्तं फलं यल्लकलं तदेव सौम्यर्क्षगश्चेत्फलमन्यथान्यत्। पापक्षेत्रगतो राहुः कर्मस्थः पापसंयुतः। अभिमत-स्वदाकाले पुत्रदारास्निपीड़नम्। व्ययराशिगतो राहु-स्तत्पाके नृपमाननम्। धनाग्निः दारलाभञ्च मृत्यु-क्षेत्रादिसम्पदः। व्यत्यगतराहुदशायां देशभ्रंशं मनो-रुजं कुरुते। विच्छिन्नदारपुत्रं क्षयिपशुधनं धान्य-सम्पदां नाशम्। कुलीरगोमेषयुतस्य राहोर्दशाविपाके धनलाभमेति। विद्याविनोदं नृपमाननञ्च कलत्रभ्रात्रा-त्मसुखं प्रयाति। पाथोजमीनाश्रयुतस्य राहोर्दशाविपाके सुतदारलाभम्। देशाधिपत्यं नरवाहनञ्च दशावसाने सकलं विनाशम्। पापर्क्षसंयुक्तफणीन्द्रदाये देहस्य कार्श्यं स्वकुलस्य नाशम्। भूपाद्भयं बन्धनतोऽरिभीतिः प्रमेहकासक्षयमूलरुक्षम्। शुभदृष्टियुतो राहुः करोति सफलक्रियाम्। राजमाननमर्थाग्निं बन्धूनां मरणं ध्रुवम्। पापदृष्टियुतो राहुः कर्मनाशं करोति च। षष्ठोगभङ्गं देहार्तिं चोराग्निनृपपीड़नम्। डङ्गमेह-युतो राहु राजप्रभावं करोति च। स्त्रीपुत्रधनसम्पत्तिं वस्त्राभरणलेपनम्। नीचयहयुतो राहुर्नीचहत्त्वानु-भोवनम्। कुभोजनं कुदारञ्च कुपुत्रं लभते तदा। दशादौ दुःखमाप्नोति दशामध्ये सुखं यशः। दशान्ते स्थाननाशञ्च गुरुपुत्रादिनाशनम्।"

अथ केतुदशाफलम्। "भार्यासुतविनाशनं नरपते-र्भौमिमेहाकुटतां विद्याबन्धुधनाग्निभिश्चरहितं रोगा-ग्निभिर्भेदवम्। यानारोहणपातनं विषजलैः शस्त्रा-दिभिर्वा भयं देशाद्देशविवासनं कलिरुचिं वज्रादि-भिर्वा भयम्। केतोर्दशायां संप्राप्तौ दारपुत्रविनाशनम्। राजकोपं मनस्तापं चोराग्निक्षतिनाशनम्। केन्द्रस्थस्य दशा केतोः करोति विफलक्रियाम्। राज्ञोऽसुत-दाराणां नाशनं विपदं तथा। लग्नकेन्द्रगतस्यापि केतोर्दाये महद्भयम्। ज्वरातिसारमेहञ्च स्यासकादि विसूचिकाः। धनराशिगतस्यापि केतोर्दाये धनक्षयम्। वाक्पारुष्यं मनोदुःखं कुत्सिताचं मनोरुजम्। तृतीय-राशिगस्यापि केतोर्दाये महत्सुखम्। मनोवैकल्य-

मायाति भ्रातृभिर्हर्षं परम्। चतुर्थराशिगस्यापि केतोर्दाये सुखत्रयम्। प्रभन्दारपुत्रादिदृष्टे धान्य प्रहर्षितः। पञ्चमस्थस्य केतोस्तु दशाकाले सुतत्रयम्। बुद्धिभ्रमं विशेषेण राजकोपं धनक्षयम्। केतोस्त्रिगतस्यापि दशाकाले महद्भयम्। चोराग्निविषभीतिः स्याद्देशाग्निं वसुपैति च। कलत्रराशिसंयुक्तकेतोर्दाये महद्भयम्। दारपुत्रार्थनाशञ्च मलक्लेशं मनोरुजम्। केतोरष्टमयुक्तस्य दशाकाले महद्भयम्। पितृमृत्युश्वासकासयक्ष्मादिव्याधान्वितः। नवमस्थस्य केतोस्तु दशापाके पितुर्विपत्। गुरोर्वा विपदं दुःखं शुभकर्म्मविनाशनम्। कर्म्मस्थ केतोः संप्राप्तौ दशायां सुखमेति च। मानहानिं मनोजाड्यमपकीर्तिं मनोरुजम्। लाभस्थकेतोः संप्राप्तौ दाये सौख्यं करोति च। भ्रातृवर्गादिसौख्यञ्च वस्त्रदारादिवर्धनम्। रिःफस्थकेतोः संप्राप्तौ दाये कष्टतरं भवेत्। स्थानच्युतिं प्रवासञ्च राजपीड़ाक्षिनाशनम्। दशादौ सुखमाप्नोति दशामध्ये महद्भयम्। दशान्ते राजभीतिञ्च देहजाड्यमथापि वा। शुभवीक्षणसंयुक्तः केतुः सौख्यं करोति च। राजप्रार्थं महत्स्थानञ्च राजपूजां महत्तराम्। पापेक्षितयुतो वापि केतुर्दुःखं करोति च। ज्वरातिसारमेहांश्च त्वग्दोषं राजपीड़नम्। इयं हरगौरीदशेत्युच्यते।

अष्टोत्तरीयदशा ज्यो०त० उक्ता यथा।

"षट् सूर्यस्य दशा ज्ञेया शशिनोदश पञ्च च। अष्टादङ्गारके प्रोक्ता बुधे सप्तदश स्मृताः। शनैश्चरे दश प्रोक्ता गुरोरेकोनविंशतिः। राहोर्द्वादश वर्षाणि भृगोरेकविंशतिः। दिक्षु त्रयं त्रयं ज्ञेयं विदिक्षु च चतुष्टयम्। कृत्तिकादि प्रदातव्यं दिगम्बरमता दशा। कृत्तिकादित्रये सूर्यः सोमो रौद्रचतुष्टये। मघादित्रितये भौमोबुधोहस्तचतुष्टये। अनुराधात्रये सौरिर्गुरुः पूर्वाचतुष्टये। धनिष्ठात्रितये राहुः शेषे शुक्रः प्रकीर्त्तितः। सूर्योपप्लवभौमार्किदशातिकष्टदा नृणाम्। सुरज्ञचन्द्रशुक्राणां यवेप्सितफलप्रदा"। वराहः "खशाकहीनशाकात्तु प्रत्यब्दं पञ्च वासरान्। तिथींश्च चन्द्राग्निगुणौ च लताग्निनौ। दण्डपलविपलान्यनुपलानि च सावने। वर्द्धयित्वा ऋक्षशेषभोगघ्नात्तु गणनक्रमात्"। अन्तर्दशाज्ञानमाह। "स्वदशाभिर्हृतां हृत्वा नवभिर्भागमाहरेत्। लब्धा मासास्तु तच्छेषं पूरयित्वा तु त्रिंशता। अष्टैर्हृत्वा दिनं लब्धं तच्छेषे प्रक्षिपूरिते। नवभिश्च हृते लब्धा ज्ञेया दण्डास्तदन्तरे। रवेः षड्वर्षमध्ये तु वेदा ४ मासा रवेर्निजाः। चन्द्रस्य दश मासाश्च दिक्दिनं पञ्च मासकाः। कुजस्य, तस्य रुद्रास्तु मासा दिक्दिवसाः शनेः। ऋतुमासाद्युविंशच्च गुरोर्वर्षा द्युविंशतिः। राहोर्मासाष्टका ज्ञेया भृगोर्वर्षस्तु मासकौ। एवं यद्दशामन्थेषामूह्याश्चैवान्तरीदयाः। यद्यदृक्षान्तरे यस्तु यत्संख्यं कालमाप्नुयात्। तत्संख्यं स्वान्तरे तत्तै स दद्यादिति निश्चयाः। स्वान्तरघ्नहृते स्वांशं स्वांशेन पूरयेत् सदा"। दशाफलन्तु। "यद्विम्नचित्तपरिखेदितवित्तनाशक्लेशप्रवासगदपीड़ितपक्षघातैः। संक्षोभितस्खलनबन्धुवियोगदुःखैर्भानोर्दशा भवति कष्टकरी नराणाम्"। र। "सौख्यं विभर्त्ति वरवाहनयानरत्नकीर्त्तिप्रतापबलवीर्य्यगुणान्वितञ्च। मिष्टान्नपानशयनासनभाजनानि चान्द्री ददाति धनकाञ्चनभूमिलाभम्"। च। "यक्ष्माभिघातबधबन्धनरेन्द्रपीड़ाक्षिनाड्यरं विकलताञ्च मङ्गे करोति। चौराग्निदाहभयभङ्गविपत्तिरोगकीर्त्तिप्रतापधनहा च दशा कुजस्य"। म। "दिव्याङ्गनावदनपङ्कजषट्पदत्वं लीलाविलासशयनासनभोजनञ्च। नानाप्रकारविभवागमकोषवृद्धिः क्षिप्रं भवेद्बुधदशासु हितार्थसिद्धिः"। बु। "मिथ्यापवादबधबन्धनकार्य्यहानिर्मातृस्वर्य्ययुक्प्रियसुखद्रविणैर्विहीनः। मित्रेषु वैरमभिवाञ्छति वैरयुक्तः कष्टात्तु पापदशासु शनैश्चरस्य"। श। "रम्यं गृहं विनयसञ्चयमानवद्भिं प्राप्नोति सौख्यधनधान्यविभूतियोगम्। धर्मार्थकामसुखभोगयुतं यावत् तुङ्गस्थतिदशा गुरुरेष तावत्"। ब। "क्षुद्वा विहीनमतिनाशवियोगदुःखं नष्टार्थसिद्धिभयभङ्गविधार्त्तिरोगम्। सन्तापशोकपरदेशगतिं करोति राहोर्दशा भवति जीवनसंशयाय"। रा। "मन्त्रप्रभावनिपुणः प्रमदाविलासः श्वेतातपत्रवपपूजितदेशलाभः। कृष्णस्य लाभधनपूर्णमनोरथः स्यात् शौक्रो दशा भवति निश्चलराजलक्ष्मीः"। शु। अन्तर्दशाफलं तु विस्तरभयान्नोक्तम्। "सत्ये स्वदशा प्रोक्ता त्रेतायां योगिनी मता। द्वापरे हरगौरी तु कलौ नाक्षत्रिकी दशा" अग्निपुराणान्मा पठित्वा गौड़ा अष्टोत्तरीयदशामेव नाक्षत्रिकी दशेत्याहुः। वराहेण तु नाक्षत्रिकीं दशामनादृत्यैव हृष्ट्वा जातके बलिष्ठलग्नकेन्द्रस्थादिदशा प्रतिपादिता यथा

"उदयरविगशाङ्कप्राणिकेन्द्रादिसंस्थाः प्रथमवयसि

मध्येऽन्त्ये च दद्युः फलानि । न हि न फलविपाकः केन्द्रसंस्थाद्यभावे भवति हि फलपक्तिः पूर्वमापोक्लिमेऽपि । आयुः कृतं येन हि यत्तदेव कल्प्या दशा सा प्रबलस्य पूर्वम् । साम्ये बहूनां बहुवर्षदस्य तेषां च साम्ये प्रथमोदितस्य । एकर्क्षगोऽर्धमपहृत्य ददाति तु खन्त्यंशं त्रिकोणसप्तगः क्रूरगः खरांशम् । पादं फलस्य चतुरस्रगतः स चोरास्त्वेवं परस्परगताः परिपाचयन्ति । स्थानान्यथैतानि सवर्णयित्वा सर्वौषधर्क्षेष्व विवर्जितानि । दशावदर्पिखेऽ शुभका यवांशं छेदस्तदैक्येन दशाप्रभेदः" ४ मू० ।

"उदयो लग्नं रविरात्मा शशाङ्कश्चन्द्रो मनः एषामुदयरविशशाङ्कानां मध्याद् यः प्राणी बलवान् तद्बलवशात्तस्य सम्बन्धिनी प्रथमा दशा भवति प्राणिनां देहवताम् । तथा च यवनेश्वरः "निशाकरादित्यविलग्नभानां तत्कालयोगादधिकं बलं यः। बिभर्ति तस्यादिदशेष्यते सा शेषात्ततः शेषबलक्रमेणेति" उदयश्च रविश्च शशाङ्कश्चोदय रविशशाङ्काः उदयरविशशाङ्कानां प्राणी उदयरविशशाङ्कप्राणी च केन्द्रादिसंस्थाश्चोदयरविशशाङ्कप्राणिकेन्द्रादिसंस्थाः एवमेषां मध्याद्यो प्रथमा दशा दत्ता तस्यैव केन्द्रादिसंस्थाः केन्द्रपणफरापोक्लिमेषु स्थिता यदाः वीर्योपचयक्रमेण दशां दद्युः एवं लग्नार्कशशाङ्कानां मध्यादेकस्य बलवतो दशा आदौ परिकल्प्या ततस्तस्य ये केन्द्रस्थाः तेषां दशाः परिकल्प्याः तैः केन्द्रस्थैः प्रथमे वयसि फलं दत्तं भवति ततः प्रथमदशापतेरेव ये पणफरस्थास्तेषां दशाः परिकल्प्याः तैः मध्ये वयसि फलं दत्तं भवति । ततः प्रथमदशापतेरेवापोक्लिमस्थानां दशाः परिकल्प्याः तैरन्त्ये वयसि फलं दत्तं भवति यदुक्तम् प्रथमवयसि मध्येऽन्त्ये च दद्युः फलानि तथा च यवनेश्वरः "पूर्वं तु केन्द्रोपगताः फलन्ति मध्ये वयः पणफरे निविष्टाः । आपोक्लिमस्थाः फलदावयोऽन्त्ये यथाबलं स्वं लभतेति पूर्वम्" । अथ यदि केन्द्रस्थाः यदाः न भवन्ति तदा कः प्रथमे वयसि फलं प्रयच्छति इत्याह न हि न फलविपाक इत्यादि केन्द्रस्थाद्यभावे केन्द्रस्थानां यदाणामभावे असम्भवे सति प्रथमे वयसि यः फलविपाकः स न हि न यतो द्वौ नञौ प्रकृतार्थं गमयतः पणफरस्थानामप्यभावे मध्ये वयसि फलविपाको न हि न एतदुक्तं भवति तदा केन्द्रस्था यदा न भवन्ति तदा पणफरस्थाः पूर्वं फलं प्रयच्छन्ति ततः आपोक्लिमस्थाः अथ केन्द्रस्थाश्च भवन्ति पणफरस्थाश्च न भवन्ति । तदा सर्वस्मिन्नेव वयसि आपोक्लिमस्थाः फलं प्रयच्छन्ति । यत उक्तं भवति हि फलपक्तिः पूर्वमापोक्लिमेऽपि इति एवमापोक्लिमस्थानामभावे प्रथमं केन्द्रस्थाः फलं प्रयच्छन्ति ततः पणफरस्थाः। आपोक्लिमस्था न भवन्ति न च पणफरस्थास्तदा सर्वस्मिन्नेव वयसि केन्द्रस्थाः फलं प्रयच्छन्ति । एतदुक्तं भवति । लग्नार्कशशाङ्कानां मध्ये यो बलवांस्तस्य प्रथमां दशां कल्पयित्वा ततस्तत्केन्द्रगानां सर्वेषां कल्पनीया तेषां परिकल्प्य पणफरस्थानां ततः परिकल्पनीयास्ततः परमापोक्लिमस्थानाम् केन्द्रस्थानामभावे प्रथमं दशापतेरनन्तरं पणफरस्थानां कल्पनीयास्ततः आपोक्लिमस्थानाम् केन्द्रस्थानामभावे पणफरस्थानामप्यभावे आपोक्लिमस्थानामेव कल्पनीयाः । अथ केन्द्रस्थाः पणफरस्थाश्च भवन्ति । आपोक्लिमस्था न भवन्ति तदा केन्द्रस्थानां परिकल्प्य पणफरस्थानामेव परिकल्पनीयाः अथ केन्द्रस्था भवन्ति पणफरस्था न भवन्ति आपोक्लिमस्थाश्च भवन्ति तदा केन्द्रस्थानां कल्पयित्वा आपोक्लिमस्थानामेव कल्पनीयाः । अथ केन्द्रगा एव केवलं भवन्ति तदा तेषामेव कल्पनीयाः । अथ पणफरगा एव भवन्ति तदा पणफरगानामेव कल्पनीयाः। अथाऽपोक्लिमगा एव भवन्ति तदा तेषामेव कल्पनीयाः। तथा च खल्पजातके उक्तम् । लग्नार्कशशाङ्कानां यो बलवांस्तदृशा भवेत् प्रथमा । तत्केन्द्रपणफरापोक्लिमोपगानां बलाच्छेषाः" ? ।

अथ दशाकालप्रमाणं केन्द्रगानामपि दशाक्रमज्ञानमिन्द्रवज्रयाह "आयुः कृतमिति शोध्यक्षेपविशुद्धमायुर्यावद्वर्षप्रमाणं येन यक्षेण दत्तं तस्य यक्षस्य सम्बन्धिनी दशा कल्प्या परिकल्पनीया तत्र "लग्नार्कशशाङ्कानां यो बलवान् तदृशा भवेत्प्रथमेति न्यायेन तदृशां प्रथमं कल्पयित्वा ततस्तत्केन्द्रगानां परिकल्पनीया यत्रैषां च केन्द्रगानां मध्यात् सा च दशा प्रबलस्यातिबलस्य पूर्वं प्रथमं कल्पया अनन्तरं तस्मादूनबलस्य एवं क्रमेण यथा यथा ऊनबला भवन्ति तथा तथा पश्चात्तदीयदशाः कल्पनीयाः । एवं केन्द्रगानां दशाः परिकल्प्य ततः पणफरगानाम् अनेनैव क्रमेण परिकल्प्याः ततः आपोक्लिमगानाम् अनेनैव क्रमेणेति । साम्ये बहूनामिति केन्द्रगानां बहूनां यदाणां बलसाम्ये सति बहुवर्षदस्य बहूनि वर्षाणि येन दत्तानि तस्य प्रथमं दशा परि-

कल्प्या । नन्वत्र कथं यहाणां बलसाम्यं भवति यदि द्वावपि स्वस्वोच्चत्रिकोणोच्चगतौ भवतस्तदा नैसर्गिकेण बलेन योऽधिकः स एव बली स्यात् किन्तु स्थानदिक्चेष्टाकालबलयहदर्शनादिबलानि यावद्धिनविधिनैकी क्रियन्ते तावद्बलसाम्यं भवति यहाणां यथा सामान्येनोदाहरणम् । यदि शनैश्चरो बलवत्येव संयुक्तो भवति भौमो बलहीनेन तदा तत्र भौमस्य निसर्गबलबत्वाद्बलसाम्यं भवत्येवं सर्वेषामपि ज्ञेयम् । तेषाञ्च साम्ये प्रथमोदितस्येति तेषां वर्षाणां साम्येऽपि वर्षतुल्यत्वेऽपि प्रथमोदितस्य दशा परिकल्प्या प्रथममादावर्कमण्डलाद्य उदित उद्गतस्तस्य । यदा बलसाम्यं न भवति तदा बहुवर्षेऽपि यहे स्थिते तदा प्रथमोदितेऽपि स्थिते बलाधिकस्यैव पूर्वं परिकल्प्येति तेषाञ्च बलसाम्ये प्रथमोदितस्येत्यत्र द्विविध उदयः प्रत्यहं चक्रभ्रमवशादेकः, क्षितिजविषुवद्वैषाधरः । तत्रोदयासविषुवद्वैषेण उदयो गणितस्फुटोक्तकालांशकयशाज्ज्ञेयः यत्र च भगवान् गार्गिः "बली लग्नेन्दुसूर्याणां दशामाद्यां प्रयच्छति । तस्मात्ततः प्रयच्छन्ति केन्द्रादिस्थाः क्रमेण तु । तत्रापि बलिनः पूर्वं तत्साम्ये बहुदायकाः । तत्साम्येऽपि प्रयच्छन्ति ये पूर्वं रविविच्युताः" २ भट्टो० ।

"एवं दशाव्यवस्थायां जातायामन्तर्दशायाञ्च यहज्ञानं बहुलतिलकेनाह एकर्क्षगोऽर्द्धमिति दशापतिना सहैकर्क्षगोयहः एकस्मिन् राशौ गतः दशापतिदत्तान्तर्दशाकालस्य यदर्द्धं तदर्द्धमपहृत्य खैरात्मीयैः दशागुणैः परिपाचयति । त्र्यंशं त्रिकोणस्थहगः दशापतेस्त्रिकोणस्थहगो नवपञ्चमे स्थाने स्थितो दशापतिदत्तान्तर्दशाकालात् त्र्यंशं तृतीयभागमपहृत्य स्वैरात्मीयैः दशागुणैः परिपाचयति । खरगः खरांशमिति दशापतेः खरगः सप्तमस्थानगः दशापतिदत्तान्तर्दशाकालात् खरांशं सप्तमभागमपहृत्य स्वैः दशागुणैः परिपाचयति । पादं फलस्य चतुरस्रगतः दशापतेः चतुरस्रगोऽष्टमचतुर्थस्थानस्थो दशापतिदत्तान्तर्दशाकालात्पादं चतुर्थभागमपहृत्य स्वैर्दशागुणैः परिपाचयति । सङ्कोराः क्रोरा लग्नं तया सहिताः परस्परमन्योन्यमनेकप्रकारेण व्यवस्थिताः स्वैः स्वैः गुणैः परिपाचयति । एतदुक्तं भवति । यथा दशापतेः सकाशादेकर्क्षादिगो यहो यद्यस्यं पठितभंशं परिपाचयति तथा लग्नमपि पाचयति । अथ दशापतेः प्रथमभंशपरिकल्पनां कृत्वा यहादेकर्क्षादिगतानां कर्त्तव्याः यस्माद्दशापतेर्यो भाग आगच्छति तदनुसारेणाद्यादयो भागाः। परिशेषाणां भवन्ति । अथैकस्मिन् स्थाने यदा बहवो यहा भवन्ति तदा तेषां मध्याद् यो बलवान् स एवैकः परिपाचयति नान्ये । कथमेतदुच्यते उच्यते । एकवचननिर्देशात् एकर्क्षगोऽर्द्धमपहृत्य ददाति तु स्वमित्याद्येकवचनात् न केवलं भिक्षिराचार्येणैकवचननिर्देशः कृतो यावत् स्वल्पज्ञातकेऽपि तथा चोक्तम् "एकर्क्षेऽर्द्धं त्र्यंशं त्रिकोणयोः सप्तमे तु सप्तांशं चतुरस्रयोस्तु पादं पाचयति मतो यहः स्वगुणैरिति" गर्गादीनामप्येकवचननिर्देशोऽस्ति तथा च भगवान् गर्गः "एकर्क्षे संगतस्यार्द्धं त्रिभागन्तु त्रिकोणगः सप्तमस्थः खरांशन्तु पादन्तु चतुरस्रगः । लग्नेन सहिताः सर्वे चान्योन्यं फलदायकाः" यवनेश्वरस्याप्येवम् "कालोऽर्द्धभागैकयहाश्रितस्य तदर्द्धभागं लभते चतुर्थं । त्रिभागभागी च त्रिकोणसंस्थात्तदर्द्धभाक् स्याच्च पृथक् त्रिकोणे । स्यात् सप्तमे सप्तमभागभागी स्थितो यहश्चारवशात् यहस्य" । एवं सर्वत्रैकवचननिर्देशः । तस्मादेवं ज्ञायते यत्रैक एवांशहारो भवति न सर्व इति तथा च मयः "अर्द्धं तृतीयमर्द्धं तथार्द्धं षोडशसप्तमं भागम् । एकर्क्षे नवपञ्चमचतुर्थनिधनासंस्थानम् । दद्युर्यहा यहाणां स्वदशास्वन्तर्दशाख्यानाम् । फलकालान्मितविधिक्रमेण भेदाच्च तेऽप्येवम् । एकर्क्षगेषु बलवान् भागहारो मितो रिपोर्वापि मित्रस्य" । एष्यत्फलं तस्मिन् काले रिपोर्नैवं तथा च मयः "एकर्क्षोपगतानां यो भवति बलाधिको विशेषेण । एकः स एव हर्त्ता नान्ये तत्र स्थिता विहगाः" । इति लग्नेऽपि यत्रांशापहारित्वं प्राप्तस्तत्र च लग्ने यदा यहः स्थितो भवति तदा लग्नयहयोर्यो बलवान् स एवैकः पठितभंशमपहरति नान्ये सर्वेषामेकादिराशिगानामन्तर्दशाभागमिच्छन्ति । अन्ये पुनः एकमेव भागं कल्पयित्वा तं भागमेकर्क्षगानां भागीकृत्य तद्भागांशमिच्छन्ति" इभट्टो० ।

"अथ दशांशपरिकल्पनात्रानभिज्ञत्वाच्च स्थानानीति अर्द्धादिका भागाः स्थानशब्देनोच्यन्ते तेषां चार्द्धादिकानां भागानां सवर्णना कार्या सवर्णना सदृशच्छेदता ततः सवर्णयित्वा छेदसाम्यसत्पाद्य ततस्तानि सवर्णि स्थानानि अधः स्वैः स्वैः छेदैः विवर्जितानि कार्याणि छेदा अपास्या इत्यर्थः । उपरिगतारागयो यत्रांशं प्रत्यंशं गुणना कार्या भवन्ति छेदः तदैक्येन संछेदेन

छेदो भागहारो भवति। कस्मिन् गुणके को भागहार इत्याह दशाब्दपिण्डे दशावर्गसमूहे। तेनैतदुक्तं भवति दशाब्दान् पृथक् पृथक् संगुणकारैः संगुण्य छेदेन विभज्यावाप्तं वर्षाद्यमन्तर्दशा भवति" ४ भट्टो०।

"सम्यग्बलिनः स्वतुङ्गभागे संपूर्णा बलवर्जितस्य रिक्ता। नीचांशगतस्य शत्रुभागे श्रेयानिष्टफला दशा प्रस्तौ" ५ मू०।

"एवं दशान्तर्दशाविभागे ज्ञाते कस्य सम्बन्धिनी दशान्तर्दशा वा शुभफला भवति कस्याशुभफलेत्येतन्न ज्ञायते तदर्थं दशासु फलानुरूपाः संज्ञा वैतालीयेनाह सम्यग्बलिन इति प्रस्तौ पुरुषस्य जन्मकाले यो षड्वः सम्यग्बलवान् भवति पूर्णैः बलैः सर्वैः युक्तो भवति तत्सम्बन्धिनी संपूर्णनाम्नी दशा भवति न केवलं यावत् स्वतुङ्गभागेऽवस्थितस्य परमोच्चभागगतस्यैव संपूर्णा नाम्नी भवति सम्यग्बलिनइत्युक्ता पुनः स्वतुङ्गभाग इत्यनेनैतज्ज्ञापयति यदि परमोच्चगतो षड्वोऽन्यैः बलकारणैः युक्तो न भवति तथापि तस्य सम्बन्धिनी संपूर्णैव संपूर्णायां दशायामन्तर्दशायाञ्च काले शरीरारोग्यधनबुद्धिभिः पुरुषोऽभिवर्द्धते। अथ समस्तबलैः युक्तो न भवति किञ्चिदूनबलस्य भागे यो षड्वो गतः भवति यश्च शत्रुभागे शत्रुनवांशे च गतस्तस्य दशानिष्टफला श्रेया ज्ञातव्या। अथानिष्टफलदशान्तर्दशाकाले धनक्षानिमनारोग्यञ्च प्राप्नोति अत्र च भगवान् गार्गिः "सर्वैर्बलैरुपेतस्य परमोच्चगतस्य च। संपूर्णाख्या दशा श्रेया धनारोग्यविवर्द्धिनी। सर्वैर्बलैर्विहीनस्य नीचराशिगतस्य वा। रिक्ता नाम दशा श्रेया धनारोग्यविनाशिनी। स्वोच्चराशिगतस्याथ किञ्चिदूनबलगतस्य च। पूर्णा नाम दशा श्रेया धनबुद्धिकरी शुभा। यः स्यात् परमनीचस्यस्तथाचारिनवांशके। तस्यानिष्टफला नाम व्याध्यनर्थविवर्द्धिनी"५ भट्टो०।

"अष्टस्य तुङ्गादवरोहिसंज्ञा मध्या भवेत् सा स्वतुङ्गभागे। आरोहिणी निम्नपरिच्युतस्य नीचारिभागेऽधमा भवेत् सा" ६ मू०।

"अथ दशान्तर्दशासंज्ञाः पुनरपीन्द्रवज्रयाह अष्टस्येति तुङ्गात्परमोच्चादष्टस्य च्युतस्यावरोहिसंज्ञा दशा परमोच्चभागान्मादारभ्य यावत् परमनीचभागादि तत्रान्तरे यद्राशिषट्कं तत्रावस्थितेन षड्वेण या दत्ता दशान्तर्दशा वा सावरोहिणीसंज्ञा भवति यस्मात्परमोच्चादष्टवः प्रत्यङ्गमधोऽवतरतीति षड्वः कल्प्यते यावत्परमनीचमिति अवरोहिसंज्ञा दशाऽधमफला भवति। यस्माद्वक्ष्यति "संज्ञानुरूपाणि फलान्यथैषामिति"। मध्या भवेत् सा स्वतुङ्गभाग इति सैवारोहिणी यत्र तत्र राशौ व्यवस्थितेन स्वतुङ्गांशेन मित्रांशकस्थेन दत्ता दशा मध्यानाम्नीव भवति एवं यत्र तत्र राशौ स्वांशकस्थेन दशा मध्यैव। एवं यत्र तत्र राशौ स्वोच्चनवांशकस्थेन दशा मध्यैव। आरोहिणीति; निम्नात्नीचात् परिच्युतस्य चलितस्य षड्वस्यारोहिणीनाम्नी दशा भवति परमनीचान्तभागादारभ्य यावत् परमोच्चभागादि तत्रान्तरे यद्राशिषट्कं तत्रावस्थितेन षड्वेण या दत्ता दशान्तर्दशा वा सारोहिणीनाम्नी दशा भवति यस्मात् परमनीचादुच्चवः प्रत्यङ्गं तावदारोहतीति षड्वः परिकल्प्यते यावत् परमोच्चमिति। आरोहिणी च श्रेष्ठफला भवति। नीचारिभांग इति सैवारोहिणी यत्र तत्र राशौ स्वनीचराश्यंशोपगतेन दत्ताऽधमानाम्नी दशा भवति एवं यत्र तत्र राशावरिभांशकस्थेन शत्रुनवांशकगेन दत्ताऽधमैव दशा भवति। पूर्वं शत्रुनवांशकगेन दत्तानिष्टफलेत्युक्तमधुना सैवाधमेति तत् किमेतदित्यत्रोच्यते अवरोहिणीशत्रुनवांशकस्थेन दत्तापि अनिष्टफला श्रेया आरोहिण्यधमा अनयोः कः फलभेदः अत्रोच्यते अनिष्टफलाफलमशुभं प्रयच्छति अधमाशुभमेवाल्पमिति एवमवरोहिणीसंज्ञा यदाधमसंज्ञा भवति तदा सैवानिष्टफलसंज्ञां लभते आरोहिणी यदा मध्यसंज्ञा भवति तदा सैव पूर्वेति संज्ञा श्रेया अत्राह, भगवान् गार्गिः "उच्चनीचान्तरस्थस्य दशा स्यादवरोहिणी। तस्यामल्पमवाप्नोति फलं क्लेशाच्छुभं नरः। मित्रोच्चस्वांशकस्थस्य मध्या मध्यफला तु सा। नीचोच्चमध्यमस्योक्ता श्रेष्ठा चारोहिणी दशा। सैवाधमाख्या भवति नीचराश्यंशगस्य तु। अवरोहिणी चेदधमा भवेत् कष्टफला तदा। आरोहिणी मध्यफला संपूर्णा परिकीर्त्तितेति"६ भट्टो०।

"नीचारिभांशे समवस्थितस्य शत्रोः स्मृते मित्रफला प्रदिष्टा। संज्ञानुरूपाणि फलान्यथैषां दशासु वक्ष्यामि यथोपयोगम्" ७मू०।

"अथ दशान्तर्दशासंज्ञाः पुनरप्युपजातिकयाह नीचारीति शस्त्राणि षड्वाणि स्वोच्चमूलत्रिकोणाक्षचेलमित्रक्षेत्राणि तेष्ववस्थितेन नीचराश्यंशकेऽरिभांशे शत्रु-

नवांशके समवस्थितेन वा यद्देशेन दत्ता वा दशान्तर्दशा वा सा मिश्रफलानाम्नैव मिश्रफला शुभमशुभञ्च फलं प्रयच्छति व्याधिसमेतमर्थांगमनेवमादिशेत् अर्थादेवाशस्तराशिगतेन, अशस्ताः अल्पनीचरागयः तद्वेन खोच्चमित्रमूलत्रिकोणात्मवर्गोत्तमनवांशकगेनापि दत्ता मिश्रफलैव भवति संज्ञारूपाणि नामसदृशानि फलानि दशास्वन्तर्दशासु च ज्ञेयानि। तद्यथा संपूर्णाऽत्यन्तश्रेष्ठफलप्रदा। पूर्णा श्रेष्ठफला। अधमाऽशुभफलदा अल्पफलदा रिक्ता अर्थापहारिणी अनिष्टफलदात्यन्तमशुभफलकारी। मिश्रफला शुभमशुभञ्च फलं प्रयच्छति। अथैषां दशास्विति अथशब्दः आनन्तर्ये एषामादित्यपूर्वाणां ग्रहाणां दशासु यथोपयोगम् उत्तरत्र वक्ष्यामि यथा येन प्रकारेणैव युज्यते तथा तत्प्रथयिष्यामि कस्यान्दशायां किं फलमुपयुज्यते" भट्टो०

"उभयेऽधममध्यमपूजिता द्रेष्काणचरभेषु चोत्क्रमात्। अशुभेष्टसमाः स्थिरे क्रमाद्धोरायाः परिकल्पिता दशा" ८मू०।

"अथ लग्नदशायां शुभाशुभज्ञानं वैतालीयेनाह उभये इति। उभये द्विस्वभावे राशौ लग्नगते द्रेष्काणक्रमेणाधममध्यमपूजिता दशा ज्ञेयाः प्रथमद्रेष्काणे जातस्याधमाऽशोभनाऽनिष्टफला द्वितीये द्रेष्काणे मध्यमा मिश्रफला तृतीये द्रेष्काणे पूजिता श्रेष्ठफला। चरभेषु चरराशिषु उत्क्रमेण वैपरीत्येन तेन प्रथमद्रेष्काणे जातस्य पूजिता द्वितीये मध्यमा तृतीयेऽधमानिष्टफला अशुभेष्टसमाः स्थिरे क्रमादिति स्थिरे स्थिरराशौ प्रथमद्रेष्काणेऽशुभा द्वितीये द्रेष्काणे दत्ता श्रेष्ठा तृतीये द्रेष्काणे समा मध्यफला एवं होरायाः लग्नस्य दशाः परिकल्पिता उक्ता इति" भट्टो०।

"एकं द्वौ नवविंशतिर्वसुतिथी पञ्चाशदेषां क्रमाच्चन्द्रारेन्द्वर्कजगुरुजीवदिनकृद्वैवाकरणीयां समाः। स्वैः स्वैः पुष्टफला निसर्गजनितैः पञ्चैर्दशायाः क्रमादन्ये लग्नदशा शुभेति यवनानेच्छन्ति केचित्तथा" ९मू०।

"अथ नैसर्गिकदशाकालं ग्रहाणां शार्दूलविक्रीडितेनाह एकमिति। एकाद्याः समाः एकादीनि वर्षाणि चन्द्रादीनां यथाभिहितानि नैसर्गिकाणि तद्यथा जन्मसमयादारभ्यैकं संवत्सरः एकचन्द्रस्य ततः परं द्वादशाब्दाङ्गारकस्य एवं त्रयः ततः परं नवेन्दुजस्य बुधस्य एवं द्वादश। ततः परं विंशतिः गुरुस्य एवं द्वात्रिंशत्। ततः परं षट्त्रयः षष्टादश जीवस्य गुरोः एवं पञ्चाशत् ततः परं ऋतिसंख्या विंशतिः दिनकृतः सूर्यस्य एवं सप्ततिः। ततः परं पञ्चाशत् दैवाकरेः सौरेः, एवं विंशत्यधिकं वर्षशतम् १२०। एतेषु निसर्गदशाधिपेषु यद्देशेषु बलवत्सूपचयशब्दितेषु च तद्दशासु शोभनानि दशाफलानि भवन्ति क्षीणबलेष्वनुपचयस्थेष्वशोभनानि। एतच्च सर्वथा चिन्त्यम्। यतो निसर्गदशासु विसंवाद इति तथा च यवनेश्वरः "स्तनोपभोगः शशिनो वयः खम् भौमस्य विद्याद्दशनानुजन्म। बोधन्तु शिक्षापदकालमाहुरमैथुनेच्छालसितप्रवृत्तिम्। शौक्रं युवत्वं विधुपूर्वदृष्टमाध्यमाहुरोर्वदन्ति। रवेर्वयोऽर्धात्परमन्यमाहुः सौरेर्जरा दुर्भगकालमाहुरिति" नैसर्गिकस्वदशाकालस्य प्रयोजनमाह स्वैः स्वैरिति तत्र यस्य ग्रहस्य सम्बन्धिनी पूर्वविधिना कृता दशान्तर्दशा वा सा यदि नैसर्गिकसमाभिः निसर्गकथितवर्षैः स्वैः स्वैः आत्मीयैः युज्यते स्वदशाकालेन समकालं भवति तदा यावत्कालं तस्य दशाहयस्यैकं भवति तावत्कालं तस्य दशान्तर्दशा वा यदि भवति तस्याः पुष्टा परिपूर्णा फलपक्तिः पाको भवति क्रमात् प्रतिपद्य यावदृक्षं ते तावच्छुभफलेत्यर्थः। अत्र केचिद्वदन्ति "यथा पूर्वविधिना ज्ञाता शुभा तदा शुभफलमत्यर्थं प्रयच्छत्यथाशुभा तदाऽशुभमत्यर्थमिति" एतदायुक्तम् यस्माद्यवनेश्वरः "स्वेष्टा दशा स्वे वयसि यद्वस्वेति" तथा च सत्यः "एकाब्दिकः शशी ज्ञेयो द्व्यब्दिकः कुजो द्वादशाब्दिकः सौम्यः द्वात्रिंशद्वर्षपुत्रो गुरुस्तु कथितः शतस्यार्धं ५०। सप्तत्यब्दः सूर्यो विंशत्यधिकः शनैश्चरोऽब्दशतः। वयसोऽन्तरानि चैषां स्वदशा नैसर्गिकः कालः। स्वं वयसः सदृशं यद्वाः समासाद्य देहिनां कालम्। भक्षणपोषणचेष्टास्वभावदाः स्युर्यथासंख्यम्"। अथ लग्नदशानैसर्गिककालं पुराणयवनमतेनाह अन्ये लग्नदशा इति विंशत्यधिकाद्वर्षशतादूर्ध्वं यदि कस्यचिदायुषः कालो भवति तदा स कालः सर्व एव लग्नस्य नैसर्गिकी दशा। कालो भवति तस्मिन् काले पुराणयवनानां मतेन लग्नदशा शोभना भवति। विंशत्यधिकाद्वर्षशतादूर्ध्वमित्येतत् कुतोऽवगम्यते उच्यते तदर्वाक्कालस्यान्यग्रहपरिगृहीतत्वात् लग्नस्यानावकाशादेव। अथ वान्यः कश्चिदाह यथा ननु विंशत्यधिकात् शतादधिकं यस्यायुर्नास्ति किं तस्य लग्ननैसर्गिको दशाकालो नास्ति। उच्यते नास्त्येव न केवलं यावद्वर्षसप्ततेरभ्यधिकं नास्ति यस्यायु-

नास्ति तस्य शनैश्चरसम्बन्ध नैसर्गिको दशाकालो नास्ति यस्य पञ्चाशतोऽधिकं नास्ति तस्यादित्यस्यापि नास्ति एतमन्येषामपि योज्यम् ननु विंशत्यधिकं वर्षशतं परमायुरत ऊर्ध्वं जीवितामावात्को लग्नस्य नैसर्गिको दशाकालः उच्यते पूर्वमेव व्याख्यातं यथा विंशत्यधिकं वर्षशतं परमायुः तैराशिकार्थमङ्कादीनामायुर्ज्ञानार्थं प्रदर्शितं यतः तावत्प्रमाणादायुषः परं सम्भवतीति तथा च यदा मीनलग्ने बलवति मीनांशकाले च कश्चिज्जातो भवति सर्वे च ग्रहाः यत्र तत्र राशौ मीनांशकावस्थिता भवन्ति केचिदुच्चगताः केचिच्च वक्रितास्तदा मीनलग्नो द्वादशवर्षाणि ददाति स एव बलयुतस्तदान्यानि द्वादशवर्षाणि मङ्गलो मीनांशकान्तं गत्वा द्वादशवर्षाणि ददाति तानि च वक्रोच्चगत्वात् त्रिगुणानि षट्त्रिंशद्भवन्ति आदित्यवर्जम् आदित्यस्य मेषे धन्वंशके सतस्य सप्तविंशतिवर्षाणि भवन्ति एवं चन्द्रादीनां षष्ट्या शतद्वयं षोड़शाधिकं भवति आदित्यस्य सप्तविंशतिः लग्नस्य चतुर्विंशतिः। एवमेकीकृतं शतद्वयं सप्तषष्ट्यधिकं भवति। नन्वेतावत् प्रमाणं कालं कश्चिज्जीवमानो न दृश्यते योगश्चातिदुर्लभत्वात् उच्यते कश्चित् दृश्यत एव जन्त्वादिकः नेच्छन्ति केचित्तथा तां लग्नदशामन्ये केचिदाचार्याः श्रुतिकीर्त्तिप्रभृतयः तथा तेनैव प्रकारेण शुभेति नेच्छन्ति नो वाञ्छनीयत्वेः यस्मादबलत्वे लग्नस्य वयोऽन्ते तद्दशा भवति सा शुभा। आचार्येण लग्नदशायां शुभाशुभत्वं बलवशाच्चोक्तं ज्ञेक्षणवशादुक्तम् उभयेऽधमसञ्ज्ञेपूजिता इति तस्मादुबलहीनस्यापि लग्नस्य वयोऽन्ते दशाज्ञेक्षणवशाच्छुभा भवति तस्मादो आचार्या अन्ते लग्नदशां नेच्छन्ति ते निष्कारणमेव नेच्छन्ति। ननु किमागमसम्बन्धानां कारणेन उच्यते य एवाचार्याः अन्ते लग्नदशां नेच्छन्ति त एवागमान् व्यक्त्वा यथादर्शितकारणम् उपन्यस्य नेच्छन्ति तेन कारणेन दोष उक्तः तथा च श्रुतिकीर्त्तिः "अन्ते लग्नदशा शुभेति" यवनानेतदुक्तमतं तस्मिन् क्षीणबले यतोऽन्यसमये सास्यादतो नेष्यते एतच्छ्रुतकीर्त्तिना कारणमुपन्यस्तं तच्च दुष्टमतो नैसर्गिके लग्नदशाकालेऽनर्दशा शुभेत्यवगन्तव्यम्" भट्टो०।

"पाकस्वामिनि लग्नगे सुहृदि वा वर्गस्यसौम्येऽपि वा प्रारब्धा शुभदा दशा त्रिदशषड्लाभेषु वा पाकगे। मित्रोच्चोपचयत्रिकोणमदने पाकेश्वरस्य स्थितश्चन्द्रः सत्फलबोधनानि कुरुते पापानि चातोऽन्यथा" इ०मू०।

"अथ दशान्तर्दशाशुभाशुभज्ञानं शार्ङ्गधविक्रीडिते-नाह पाकस्वामिनीति। सौरसावनचान्द्रनाक्षत्राणि चत्वारि मानानि तत्र सौरमानं रविभगणभोगः। यावता कालेनार्कोऽमेकं भुङ्क्ते स सौरो मासदिनं यावता कालेन राशिद्वादशकं भुङ्क्ते तत्सौरं वर्षं तच्च षष्ट्यधिकैस्त्रिभिः शतैः दिनानां घटिकाषष्टिदशकेन सार्द्धेन भवति। सावनस्तूदयादुदयः। अर्कोदयात् पुनरेवार्कोदयः सावनमहोरात्रं तच्च षष्टिघटिकमहोरात्रं अहोरात्रत्रिंशन्मासः मासा द्वादश वर्षम्। एवं षष्ट्यधिकैस्त्रिभिः शतैः दिनानां सावनं वर्षम्। चान्द्रं तिथिभोगः तच्च स्वमानेन षष्ट्यधिकं शतत्रयं भवति सावनेनेदं मानं शतत्रयं चतुःषष्ट्यधिकं दिनानां तच्चान्द्रं वर्षं भवति। एवं सौरसावनचान्द्राणि त्रीणि मानानि प्रत्येकं स्वस्वमानेन षष्ट्यधिकं शतत्रयं भवति। नाक्षत्रं चन्द्रनक्षत्रभोगः तच्च दिनानां सप्तविंशत्या मासो भवति तत्र शतत्रयेऽष्ट चतुर्विंशत्यधिकेन दिनानां वर्षमुक्तञ्च "रव्यंशगोऽर्कोरात्रः सौरश्चान्द्रमसक्षितिः। चन्द्रनक्षत्रभोगस्तु नाक्षत्रः परिकीर्त्तितः। स सावनो यच्छ्रांणासूदयादुदयावधि। नाक्षत्रमाने मासः स्यात् सप्तविंशतिवासरः। शेषमानेषु निर्दिष्टो मासस्त्रिंशद्दिनात्मकः" इति तस्मात् सावनमानेनायुर्दायगणना कार्या यस्माच्छोध्यशेषविशुद्धमायुः कर्तव्यं तच्च सावनमानं सौरमानेन संक्रान्त्यधिको मासः सावनस्त्रिंशद्दिनः चान्द्रोऽमास्यान्तिकः, नाक्षत्रो रेवत्यन्तिकः। सौरमधिमासकयुतं चान्द्रं भवति चान्द्रमयमरात्रोनं सावनं भवति चान्द्रं सावद्दिनाक्षत्रम् उक्तञ्च "युगवर्षमासपिण्डं रविमानं साधिमासकं चान्द्रम्। त्रयमविहीनं सावनमैन्द्रवमवद्दानितं वर्षमिति। एवं शोध्यशेषविशुद्धं सावनमानेनायुर्दायविधिः तथा च मयूरचित्रके भगवान् गार्गिः "आयुर्दायविभागश्च प्रायश्चित्तक्रियास्तथा। सावनेनैव कर्त्तव्या सत्ताषामप्युपासनम्"। नन्वर्कोदयादारभ्यार्कोदयावधिं यावदहोरात्रं तत् पुनिशतन्त्रे सौरमहोरात्रं पठ्यते। "षष्ट्यधिकत्रयसप्तमहस्रनवसुनिनगतिघ्नाः शतगुणाश्च सौरैरेति" एतच्च पुलिश एव जानाति यस्मात् पुलिशतन्त्रं वर्जयित्वा सर्वसिद्धान्तेषु तन्त्रेषु सौरमानेन रविभगणभोगः सौरमानमधिमासयुक्तं चान्द्रमयमरात्रोनं सावनं भवति एवं शोध्यशेषविशुद्धं चान्द्रं भवति। सावनमानं सर्वसंहितासु

चार्कोदयादारभ्यार्कोदयं यावद्यद्दोरात्रं तद्भावनमहोरात्रमिति संज्ञा तथा च भगवान् पराशरः गार्गिय "भावनेन कृतो मासस्त्रिंशद्घटिकरोदयः" तथा श्रीभट्टप्रद्युम्नः "भावनस्तदयादुदयमिति" एवं पुरुषस्य जन्मसमये भावनमहर्गणं कृत्वा तत्कालिकनक्षत्रपरिच्छेदस्तात्कालिकमहाः सलग्ना यथा कृतास्तथा दशान्तर्दशावसाने कर्त्तव्याः तत आगामिदशाफलं वक्तव्यम्। कथमुच्यते। प्रथमं जन्मनि यद्दोरात्रात् तात्कालिकं कृत्वा ततस्तत्कालदशाकालं वर्षादिकं दिनीकृत्य योजयेद्दर्शाणि द्वादशभिः संगुण्य तेषु मासान् संयोज्य त्रिंशता पुनः संगुण्य तेषु दिनानि क्षिपेत्। एवं कृते दशाकालो दिनरूपो भवति तच्च तात्कालिके जन्माहर्गणे सविकले सविकलं संयोज्याहर्गणो भवति तत्राद्यो यद्दृष्टिकादिः कालो भवति तस्मात्तीतार्द्धरात्रात्परतो गणना कार्या तस्मादिष्टदिनमानमानयेदनेनाचार्यसूर्येण द्युगणोऽधोभवसुखितो हिनवरसाग्रावधिकचान्द्रः चान्द्रोऽधरर्तुवेदानागाग्रः अधिमासदिनैर्हीनः इति अथ वसुगुणत्रिरात् सुनिसुखितः हिनवखरसाग्रः पृथ्यसखदिगभिः लब्धं खरामसुखितं शुद्धाग्रात् सैककोरविद्युगणः एवत् खखनाद्यकरणेनैव भवति। कोऽसौ रविद्युगण इत्याह शाकोऽगवसुशरोनोऽर्कगुणः चैत्रादिमासशुक्लः त्रिंशद्धृतस्तिथियुत इति। खं षट्त्रयधिकेन शतत्रयेण भागमपहृत्यावाग्रं करणाब्दाः शेषास्त्रिंशद्धक्तास्तैस्तिथ्याद्या मासाः शेषा वर्त्तमानमासे तिथाद्यास्तिथयः करणाब्देष्वगवसुशरान् संयोज्यातीतशककालो भवति तस्मिन् शाके तस्मिन्मासे तस्मिन् दिने सोऽहर्गण इति तत्रैव दशाप्रवेशः पुनरप्यन्यमन्तर्दशाकालं दिनीकृत्य तस्मिन् योजयेत् एवं यावत्योऽन्तर्दशा भवन्ति तावत्योऽनेनैव प्रकारेण योजनीयाः। एवं ततो यद्दान् लग्नञ्च गणयेत् अथ वानेन प्रकारेण कालानयनम् "आदित्ये क्रियमाणे यावन्तो गतभगणा भवन्ति तावतः करणप्रारम्भादारभ्य गतान्दाः। तेषु करणप्रणीतं शककालं संयोज्येष्टशककालो भवति वर्त्तमाने वर्षे यावन्तो राशयः स्फुटाः भवन्ति तावन्तो मासाः सूर्यभगणानीतात् शुक्लप्रतिपदं कृष्णप्रतिपदं वा तिथिनक्षत्रं चन्द्रार्काभ्यां" आयते एव। पाकस्वामिनीत्यादि यस्य यद्दस्यान्तर्दशाप्रवेशः स पाकस्वामी तावच्चासौ पाकस्वामी यावत् तस्यान्तर्दशामेव। स च पाकस्वाम्यन्तर्दशाप्रवेशे लग्नगो यदि भवति तदा तस्य सम्बन्धिन्यन्तर्दशा प्रारब्धा शुभदा शोभनफलदा भवति अथ वा तात्कालिकं पाकस्वामिनो यत् सुहृन्मित्रं तस्मिन्नपि दशा प्रवेशकाले लग्नगे शोभना दशा वक्तव्या। अथ वास्य दशापतेः पूर्वव्याख्यातो यो वर्गः तस्मिन्नपि लग्नगे शोभना। अथवान्यस्मिन् सौम्ये शुभयुते तत्कालिलग्नगे दशा प्रारब्धा शोभनैव। अथवा पाकपे दशाधिपतौ युते तात्कालिकलग्नात्त्रिदशषड्लाभेषु तृतीयषट्दशमैकादशस्थानानामन्यतमस्थे शोभनैव दशा वक्तव्या। यद्यप्यत्र सामान्येनोक्तं प्रारब्धा शुभदा दशा तथापि "अधिशत्रुदशां शत्रोः प्राप्तो ऽनिष्टफलप्रदः। अधिमित्रोऽपि मित्रस्य दशां प्राप्तोऽतिशोभनः। समः समदशामेत्य यथोक्तफलदो हि सः"। एतदपि चिन्तनीयम् अनेन प्रकारेण यदि शुभफलान्तर्दशा भवति तदा शुभैव अन्यथाऽशुभैव। अथ शुभफलायामन्तर्दशायां किमप्यनवरतमेव सर्वकालं शुभफलावाप्तिर्भवति किं वा कस्मिंश्चिद्दिवसे एवमशुभायामन्तर्दशायामशुभफलावाप्तिरित्यभवत् सन्देहच्छेदनार्थमाह मित्रोडुपचयेत्यादि पाकेश्वरस्य दशापतेः प्रतिराशौ सञ्चरतः तत्काले यो यद्दो मित्रं तत्क्षेत्रस्थितचन्द्रमा यदा भवति तदा सत्फलबोधनानि कुरुते न केवलं यावत् पाकपतेरुपचयस्थानगतोऽपि त्रिषड्दशमैकादशस्थानानामन्यतमस्थानस्थितोडुगोऽपि नवपञ्चमस्थानगतोऽपि तथा मदनस्थः सप्तमे च स्थितः एतेषु निर्दिष्टस्थानेष्वन्यतमस्थानगचन्द्रमाः शुभफलायां दशायां सत्फलबोधनानि कुरुते। ज्ञायते तेषां फलानामित्युडोपचयत्रिकोणमदने यस्मिन् स्थाने पाकेश्वरस्य चन्द्रमाः स्थितः स राशिः जन्मनि योभाव आसीत्तदुद्भूतं सत्फलं बोधयति विशेषेण तथा दशा पठितमिति यतोऽस्मादुक्तप्रकारादन्यथा पाकपतेस्तत्कालं शत्रुक्षेत्रे नीचराशौ वा दशापतिना सहैकराशौ द्वितीयचतुर्थाष्टमद्वादशस्थानानामन्यतमस्थानस्थो भवति तदा शुभफलायां दशायां पापानि फलानि प्रकटीकरोति स च राशिर्यो भाव आसीत्तदुद्भूतं फलं बोधयति विशेषेण दशापठितमपि अनिष्टमथ षडवर्गोद्भूतं च मिश्रदशायां मित्रोडुपचयादिषु सत्फलबोधनानि कुरुते शत्रुनीचादिषु चाशुभफलानामिति तथा च भगवान् गार्गिः "यद्राशिसंस्थः शीतांशुः शुभकृत् परिकीर्त्तितः। तद्राशिर्जन्मकाले तु यो भावस्तत् कृतञ्च तत्"। शरीरादि-

कृतं सौख्यं वक्तव्यं बलयोगतः अनिष्टराशिसंस्थं तु तद्भावनामशोभनं इति" इ० भट्टो०।

"दशासु शस्तासु शुभानि कुर्वन्त्यनिष्टसंज्ञासु शुभानि चैवम्। मिश्रासु मिश्राणि दशाफलानि होराफलं लग्नपतेः समानम्" १६ मू०।

"अथैकस्मिन् इष्टे दशासु शुभान्यशुभानि च फलान्युक्तानि तेषां विषयविभागं लग्नदशाफलं चोपजातिकयाह दशासु इति शुभाशुभं व्यामिश्रत्वं दशासु पूर्वमेवोक्तं तथा जन्मकाले उपचयराशिस्थानिमैत्रमूर्त्तयः स्वदृगतयश्च ये षड्वर्गेषामपि दशाः शुभाः ये चोपचयस्था इता रुग्णाः खलमूर्त्तयस्तेषामपि दशा अशुभाः तथा च यवनेश्वरः "निशाकरादित्यविलग्नभानां तत्कालयोगादधिकं बलं यः। विभर्त्ति तस्यादिदमेव्यते सा शेषास्ततः शेषबलक्रमेण। वयोऽधिको यः प्रथमाहतो वा षड्वर्गः स पूर्वं पठितो दशेशः। बलाधिकश्चेद्यदि केन्द्रसंस्थः पूर्वं स शेषासु यथा प्रदिष्टः। अथेष्टा दशासु वयसि षड्वर्गस्य स्वोच्चश्रितात्कालबलाश्चिताच्चेत्। मूलत्रिकोणात् स्वदृक्काङ्गमध्या मित्राश्रिताज्जन्मदृक्काश्रिताद्वा। नीचारिभांशोपगताज्जितो वा दृक्काद् परिध्वस्तविवर्णरुग्णा। जन्मेशशत्रोर्निधनारिभेशाद् वा वाक्यते सा बहुदोषदा स्यात्"। एवं शस्तासु शोभनासु दशासु षड्वर्गाः शुभान्येव फलानि कुर्वन्ति दशाफलवक्त्रे यानि शुभान्यभिहितानि तान्येव भवन्ति नेतराणि, अनिष्टसंज्ञासु अशुभदशासु अशुभान्यनिष्टानि एव भवन्ति मिश्रासु दशासु मिश्रायामेव दशाफलानि भवन्ति एतच्च प्रतिस्फुटमाचार्येण व्याख्यातं तथा च सत्यः "जन्मन्युपचयभवनेषु संस्थिताः सद्यगाः सुमूर्त्तिधराः, श्रेष्ठं फलं विदध्युर्दृक्काः क्रमात् स्वां दशां प्राप्य अन्यैर्निरीक्षिता रुग्णाश्चमूर्त्तयो ह्युपचयर्क्षसंस्थाश्च स्वदशाभिहतं नेष्टं षड्वर्गाः प्रयच्छन्ति लोकेषु होराफलं लग्नपतेः समानमिति" होरायाः लग्नस्थानदशाफलं लग्नपतेः लग्नाधिपस्य समानं तुल्यम् वक्तव्यं यथा मेषलग्नजातस्य भौमदशाफलं वृषलग्नजातस्य शुक्रदशाफलं एवमन्येष्वपि वक्तव्यं किन्तु दृक्काणवशाच्छुभायां लग्नदशायां शुभफलमशुभायामशुभम् मिश्रायामुभयमपि। अथ ये पूर्वं दशारिष्टा उक्तास्तेषामिमे भङ्गाः मोक्षाः तथा च सारावल्याम् "प्रबले बलवान् खेटः शुभैर्वा संनिरीक्षितः। सौम्याधिमित्रवर्गस्थो मरुद्भवं न भवेत् तदा। लग्नदेशाधिनाथस्य विबलस्य दशा यदा। बलिनः स्यात् तदा भङ्गो न बाध्या तस्य च ध्रुवम्। युद्धे च विजयी तस्मिन् षड्योगे शुभो यदि। दशायां न भवेत् कष्टं स्रोऽन्त्यादिषु च संस्थिते इति" १८भट्टो०।

"संज्ञाध्याये यस्य यद्द्रव्यमुक्तं कर्मांजीवो यस्य यस्योपदिष्टः। भावस्थानालोकयोगोद्भवस्य तत्तत्सर्वं तस्य योज्यं दशायाम्" २०मू०।

"अथान्येषामपि फलानां दशास्वतिदेशं मालिन्याच्च संज्ञाध्याये इति। यस्य यद्द्रव्यं संज्ञाध्याये यद्द्रव्यम् ताम्रं स्यान्मणिश्चेमेत्यादिना, यन्नोक्तं कथितं तस्य तद्द्रव्यस्य शुभदशायां प्राप्तिः योज्या अशुभदशायां हानिः। यस्य कर्मांजीवो यस्य यद्दोपदिष्टो जातकेऽभिहितः "अर्थाप्तिः पितृपत्नीत्यादि तस्य यद्दृक्तस्य कर्मांजीवस्य तदन्यदशायामेवाप्तिर्भविष्यति। भावफलं यथा "शूरस्त्रय" इत्यादि स्थानफलं राशिफलं "ग्रथितघनरोऽटन" इत्यादि तथा "मेषे सस्क्तिमिरनयन" इत्यादि। आलोकनफलं दृष्टिफलम् "चन्द्रे भूपबुधौ" इत्यादि योगोद्भवं नामसयोगानुक्ता "सर्वयोगेषु योगकर्तृभ्यो यद्देभ्यो मध्याद् यो बलीयान् स स्वदशायामेव फलं ददाति" नामसयोगाः सकलदशास्वपि फलप्रदाः वक्ष्यति च "इति निगदिता योगाः सार्द्धं फलैरिह नामसाः नियतफलदायिन्या ह्येते समस्तदशास्वपीति"। एवमादि यद् यदुक्तं तत्सर्वं निरवशेषं तस्य यद्दृक्तस्य दशायां योज्यमिति" २०भट्टो०।

"छायां महाभूतकृतां च सर्वेऽभिव्यञ्जयन्ति स्वदशासमवाप्य। कर्म्वग्निवाय्वम्बरजान् गुणांश्च नासास्वदृक्त्वक्श्रवणानुमेयान्" २१ मू०।

"अथ यस्य जातकमपि न गणितं तस्य शरीरच्छायां दृष्ट्वा यद्दशात्मानमिन्द्रवज्रयाह छायां महाभूतकृतामिति पूर्वसूक्तम् "शिखिभूखपयोमरुद्घनानां वह्निनो भूमिसुतादयः क्रमेणेति" तत्रादित्यचन्द्रौ वक्ष्यमाणसिद्धावेव यः कश्चिद्यद्दृक्तः स्वदशामात्मीयदशामवाप्य महाभूतकृतां छायां अभिव्यञ्जयति प्रकटीकरोति छायाशब्देन शरीरशोभाभिधीयते शरीरकान्तिरित्यर्थः तथा च "सच्छायोऽयं विच्छायोऽयं वर्त्तत इत्यभिधीयते स्वमात्मीयदशायां पृथिव्यादिमहाभूतकृतां शरीरच्छायां व्यञ्जयति प्रकटीकरोति सा च कर्म्वग्निवाय्वम्बरजान् गुणान् कुः पृथिवी अम्बुरुग्णः अग्निः क्षुतायनः

वायुः अनिलः अम्बरम् आकाशम् एभ्यो जातोत्पन्ना सा छाया ग्रहगुणान् करोति तांश्च यथासंख्यं नासाक्ष्यक्त्वक्श्रवणानुमेयान् । पार्थिवी पार्थिवं गुणं गन्धमभिव्यञ्जयति नासानुमेयं घ्राणेनोपलभ्यते आप्या आप्यं गुणं रसमभिव्यञ्जयति तच्चास्यानुमेयम् आस्यशब्देनेह जिह्वा ग्रेया तया रसस्योपलब्धेः आस्यपक्षं चात्र इत्यनुरोधात् कृतम्, आग्नेयी आग्नेयं गुणं रूपमभिव्यञ्जयति दृष्ट्यनुमेयं, वायवी वायव्यं स्पर्शं गुणमभिव्यञ्जयति त्वगनुमेयं स्पर्शेनोपलभ्यते नाभसी नाभसं गुणं शब्दमभिव्यञ्जयति श्रवणानुमेयं कर्णोपलभ्यम् । एतदुक्तं भवति यदा शुभगन्धः पुरुषो भवति तदास्य बुधकृता पार्थवीच्छाया ग्रेया । यदा मिष्टरसभोजी भवति तदास्य चन्द्रशुक्रकृताप्या छाया ग्रेया । यदातीवरूपवान् सुकान्तः पुरुषो भवति तदा सूर्यभौमकृता आग्नेयी छाया ग्रेया । यदा स्पर्शेन सुदुर्भगति तदा शनैश्चरकृता वायवी छाया ग्रेया । यदास्य वचनं कर्णयोः सुखकरं भवति तदा जीवकृता नाभसी छाया ग्रेया। छायाविशेषलक्षणमाचार्येण संक्षिप्तायामभिहितम् तथा च "छाया शुभाशुभफलानि निवेदयन्ती लक्ष्या मनुष्यपशुपक्षिषु लक्षणज्ञैः । तेजो गुणान् बहिरपि प्रविकाशयन्ती दीपप्रभा स्फटिकरत्नघटस्थितेव । स्निग्धद्विजत्वङ्नखरोमजेशा छाया सुगन्धा च मनोरमत्वा । इष्टार्थलाभाभ्युदयान् करोति धर्मस्य चाहन्यहनि प्रवृत्तिम् । स्निग्धा सिता च हरिता नयनाभिरामा सौभाग्यमार्दवसुखाभ्युदयान् करोति । सर्वार्थसिद्धिजननी जननीव छाया छायाफलं ततुष्टता शुभमाददाति । चक्षुष्या दृश्या पद्मेक्षाग्निवर्णा युक्तं तेजो विक्रमैः सप्रतापैः । आग्नेयीति प्राणिनां छाययाव्य क्षिप्रं सिद्धिं वाञ्छितार्थेषु धत्ते । मलिनपरुषकृष्णा पापमन्यानिलोत्था जनयति वधबन्धं व्याधनार्थैर्नाशम्। स्फटिकसदृक्षरूपा भाग्ययुक्तात्युदारा निधिरिव गगनोत्था श्रेयसां स्वच्छवर्णा" २१भट्टो० ।

"शुभफलददशायां तादृगेवान्तरात्मा(च्छा) वक्त्र जनयति पुंसां सौख्यमर्थागमं च । कथितफलविपाकैस्तर्कयेद्दर्शनानां परिणमति फलाप्तिः स्वप्रचिन्ताक्षरीयैः" २२भ० ।

"अत्र च वायवीं छायां वर्जयित्वा सर्वास्वेव छायासु अशुभं शुभं च फलं तत्कथम् शुभफलेयमशुभफलेयमिति तद्दशा ज्ञायते तत्संज्ञानमन्तरात्मनः स्वरूपं भाविन्याह शुभफलदेति शुभं फलं ददाति यः स शुभफलदः शुभफलदश्च पक्षस्य या दशा तस्याम् अन्तरात्मा स्वदेहस्थः परमात्मा चित्स्वरूपः तादृगेव शुभो भवति । तस्य च पुरुषस्य छायादर्शितस्वदशाकाले बहुविधमनेकप्रकारं सौख्यं सुखभावमर्थागमं धनलाभं च जनयत्युत्पादयति अर्थादेवाशुभदशायां पुरुषस्यान्तरात्माप्यशुभो भवति तत्र दर्शितस्वछाया सूचिता तादृगेव फलदा सा चासौख्यमनर्थागमञ्च बहुप्रकारं जनयति मिश्रायां मिश्रा च । बालायाञ्च वक्ष्यति "निमित्तानुचरं सूक्ष्मं देहेन्द्रियमहत्तरम् । तेजो ह्येतच्छरीरस्थं त्रिकालफलवत्तृणाम् । प्रीतये न मनो नार्थैर्नासिद्धावभिनन्दति । तस्मात् सर्वात्मना यातुरनुमेयं यथा मनः। शुभाशुभानि सर्वाणि निमित्तानि शुरेकतः । एकतश्च मनःशुद्धिस्त्रिशुद्धिर्जयावहा" इति कथितफलविपाकैरिति षड्वर्षां दशासु यानि फलानि शुभान्यशुभानि कथितान्युक्तानि तानि यः पुरुषो भुङ्क्ते तस्य पुरुषस्य तद्दृष्टदशा वर्त्तते इति ग्रेयम् एतदुक्तं भवति यादृशं फलं शुभमशुभं वा पुरुषस्योपलभ्यते तच्च यस्य यस्य दशायां पठितं सा तस्य दशा नरस्य वर्त्तत इति ग्रेयम् । एवं वर्त्तमानां दशान्तर्दशेत्युक्तमेवेत्यर्थः । एवं छायावशेनान्तरात्मवशेन फलपक्तिवशेन वा गणितस्य जातकस्य वर्त्तमानां दशां वदेत् । यथा सौरदशायामशुभायां व्यङ्ग्यत्वमुक्तं न च शुभायामथ नैकध्यं व्यङ्ग्यत्वं दृष्टम् । शुक्रदशायां शुभायां निधिप्राप्तिरुक्ता न च सापि दृष्टा । तदर्थमाह परिणमति फलाप्तिरिति अर्थैः बलक्षीणैः यत्नैः फलानि यानि शुभान्यशुभानि वा दत्तानि तत्फलाप्तिः फलप्राप्तिः स्वप्ने स्वप्नावस्थायां परिणमत्यनुभूयते चिन्तायां मनोरथेन वेति । केचित्तु "शुभफलददशायां तादृगेवान्तरात्मेति पठित्वैवं व्याचक्षते यथा शुभायां दशायामन्तरात्मान्तर्दशा शुभापि भवति तदा पुंसां बहु जनयति सौख्यमर्थागममिति अर्थादेवाशुभायां दशायामशुभान्तर्दशा असौख्यमनर्थागमञ्च बहु जनयतीति"अनेन व्याख्यानेन शुभायामशुभायाञ्च शुभाशुभानि भवन्ति मिश्रफलं प्रयच्छन्ति । न चैतदिष्यते यस्मादुक्तम्"एकर्णगोऽर्धमपहृत्य ददाति तु ऋणिति" अत्र दशापतेः फलमपहृत्यान्तर्दशापतिरेव स्वं फलं ददातीति ग्रेयम् अन्यथापहृत्येति निरर्थकं स्यादिति तस्मात् पूर्वपाठः श्रेयान् द्वितीयः प्रमादपाठः । प्रमादपाठेन विना छायां दृष्टायां दशायाः शुभाशुभत्वमानेतुं

न शक्यत इति" २२भट्टोत्पलकृतं तद्व्याख्यानम् ।

"एकयर्क्षस्य षड्गे फलयोर्विरोधे नाशं वदेद् यदधिकं परिपच्यते तत् । नान्यो यर्क्षः षड्गमन्यफलं छिनत्ति स्वां स्वां दशामुपगताः स्वफलप्रदाः स्युः" २३भ० ।

"ऋक्षैकयर्क्षदत्तयोः फलयोः षड्गयोर्नाशो भवति भिन्नदत्तानां बहूनामपि पक्षिरेव भवतीत्येतद्वासनातिलङ्घनाह एकयर्क्षस्येति सर्वाण्येव फलानि नाशयत्यर्क्षं स्वदशायां यर्क्षः प्रयच्छतीत्युक्तम् तत्रैकेन यर्क्षेण यदा षड्गं विरुद्धं फलद्वयं दत्तं भवति तस्मिन् षड्गे तस्मिन् द्वयोः फलयोर्विरोधे सति नाशो भवतीति तस्य फलद्वयस्य वदेद्ब्रूयात् कीदृशं तद्विरुद्धमित्यतोच्यते यथा कश्चिद्यर्क्षः कयापि युक्त्या दशाफलादिना सुवर्णदो भवति स एवान्यया युक्त्या षष्टवर्गफलयोगफलदृष्टिफलभावफलानामन्यतमेन सुवर्णापहारी भवति तदा फलद्वयेऽपि सुवर्णसम्बन्धोऽस्ति इति साम्यं सुवर्णदानापहारयोरिति विरोधः । एवमेकस्य यर्क्षस्य षड्गे फलयोः विरोधे नाशं वदेत् न सुवर्णलाभो न चापहानिरिति यदधिकं परिपच्यते तत एकेनापि यर्क्षेण फलद्वयं दत्तमन्यरूपं तयोः मध्याद्यदधिकं तत्परिपच्यते । यथा कश्चिद्यर्क्षो निर्दिष्टप्रकारद्वयेन सुवर्णदः स एव प्रकारैकेन सुवर्णापहारी तदा द्वयोरधिकत्वाच्छुभस्य सुवर्णं ददात्येव नापहरति । अथ वा प्रकारद्वयेन सुवर्णापहारी-प्रकारैकेन सुवर्णदस्तदापहरणस्याधिकत्वादपहरत्येव । अथवा सुवर्णापहारी रूप्यदश तथापि हे षड्गे षड्गत्वादधिकं परिपच्यते सुवर्णापहारी रूप्यदश भवति इति कश्चित् नान्यो यर्क्ष इति अन्येन यर्क्षेण दत्तं षड्गं विरोध्यपि फलं नान्यो यर्क्षोऽपि छिनत्त्यपहरति यथा कश्चिद्यर्क्षः सुवर्णदो भवत्यत्यन्त सुवर्णापहारी तदा तत्र सुवर्णदः स्वदशायां सुवर्णं ददाति स्वदशायां सुवर्णापहारी चापहरति अनेनैतदुक्तं भवति । यथैकयर्क्षस्य षड्गफलयोः विरोधे समयजन्मान्तरेऽपि फलनाशं वदेत् अन्यत्र विरुद्धयोरपि फलयोः नाशं न वदेत् यतः सुवर्णदो यर्क्षः स्वामात्मीयां दशामुपगतः प्रायः सुवर्णलाभं करोति सुवर्णापहारी स्वदशामुपगतः प्रायः सुवर्णमपहरति एतदष्टवर्गफलं विनाशयतस्तस्यैकस्य यर्क्षस्य फलषड्गयोरपि तुल्यसंख्ययोः फलयोर्नाशो भविष्यति यथा च भविष्यति तथा तत्रैव प्रतिपादयिष्यामः इति" २२भट्टो०

ताजकोक्तवर्षदशा क्षीणांशदशाख्या तु नीलकण्ठोक्ता यथा

अथ दशाक्रमः "स्वर्क्षात् सप्तमात् खचरान् विधाय राशीन् विनाऽल्पसंख्यं तु पूर्वम् । निवेश्य तस्मादधिकाधिकांशं क्रमादयं स्यात् तु दशाक्रमोऽब्दे । जन्मविशोध्याधिकतः क्रमेणांशाद्यं विशुद्धांशकयेयकैक्यम् । सर्वाधिकांशोन्मितमेव तत् स्यादनेन वर्षस्य मितिस्तु भाज्या । शुद्धांशकांस्तान् गुणयेदनेन लब्धं ध्रुवाङ्केन भवेद्दशायाः । मानं दिनाद्यं खलु तद्यर्क्षस्य फलान्यथैषां निगदेत्तु शास्त्रात् । शुद्धांशसाम्ये बलिनो दशाद्या बलस्य साम्येऽल्पगतेऽस्तु पूर्वा । साम्ये विलग्नस्य बलेन चिन्त्यं बलादिकं लग्नपतेर्विचिन्त्यम्" ।

तत्फलादिकं "दशा रवेः पूर्णबलस्य दत्ते" इत्यादिना तत्रोक्तं द्रष्टव्यम् । पाराशर्यैः वर्षकाले सदृदा दशा व्यवस्थ्यते सा तु "वर्षोन्मितिर्जन्मभसंयुताङ्कृता क्रमेण रवितो दिनानि । विंशोत्तरीयात्तु हतेस्तु वर्षाः वर्षप्रवेशात् त्रिगुणा दशाः स्युः" यथा रवेः षड्वर्षाः त्रिगुणिताः १८ दिनानि । एवं विधोः १०वर्षा वर्षे ३० दिनानि । कुजस्य ७वर्षा वर्षे २१ दिनानि । राहोः १८ वर्षा वर्षे ५४ दिनानि । गुरोः १६ वर्षा वर्षे ४८ दिनानि । शनेः १९वर्षा वर्षे ५७दिनानि । बुधस्य १७वर्षा वर्षे ५१ दिनानि । केतोः ७ वर्षा वर्षे २१ दिनानि । शुक्रस्य २० वर्षा वर्षे ६० दिनानि । एवं ३६० दिनानीति बोध्यम् । जातकरत्ने तु दशविधा दशा उक्ता १योगिनी २वार्षिकी ३नाक्षत्रिकी ४साम्बिकी ५सद्दा ६विंशोत्तरा ७विंशोत्तरा ८पताकी ९हरगौरी १०दैनिकीति । तत्रैव तद्विशेषो बोध्यो विस्तरभयादिह तदानयनादिकं नोक्तम् ।

"सत्ये सप्तदशा चैव त्रेतायां हरगौरिका । द्वापरे योगिनी चैव कलौ नाक्षत्रिकी दशा" इति समयात्तम् वराहस्तु दृष्टव्यातके एतदनादृत्यैव कलौ साम्बिकी दशा दर्शितेति बोध्यम् । अत्रदशाशब्दे विंशोत्तरीयदशान्तर्दशानयने "स्वदशाभिर्दशां हत्वा दशभिर्भागमाहरेदित्येव पाठः । तत्र वसुभिरित्यप पाठो बोध्यः ।

## विंशोत्तरीयान्तर्दशाचक्रम् ।

| | | | |
|---|---|---|---|
| मङ्गादशावर्षाः | र६ | च७ | म२० |
| | ख०।३।८ | ख०१०।० | ख०४।२७ |
| | च०६। | म०७।० | रा१।०।८ |
| | म०४।६ | रा१।६।० | जी०।११।६ |
| | रा०१०।२४ | जी१।४।० | श१।१।८ |
| | जी०८।१८ | श१।७।० | बु०१।१।२७ |
| | श०१।१।१२ | बु१।५।० | के४।२७ |
| | बु०१०।६ | के०।७।० | शु१।२ |
| | के०४।६ | शु१।८।० | र०४।६ |
| | शु१।०।० | र०।६ ० | च०।७। |
| समष्टिवर्षाः | ६ | १० | ७ |
| मङ्गादशावर्षाः | रा १८ | जी १६ | श १८ |
| | ख२।८।१२ | ख२।१।१८ | ख२०।२ |
| | जी२।४।२४ | श२।६।१२ | बु२।८।८ |
| | श२।१०।६ | बु२।३।६ | के१।१।८ |
| | बु२।६।१८ | के०।११।६ | शु३।२।० |
| | के१।०।१८ | शु२।८। | र०।१।१२ |
| | शु३।०।० | र०।८।१८ | च१।७।० |
| | र०१०।० | च१।४। | म१।१।८ |
| | च१।६।० | म०।११।६ | रा२।१०।६ |
| | म०।१।८ | रा२।४।२४ | जी२।६।१२ |
| समष्टिवर्षाः | १८ | १६ | १८ |
| मङ्गादशावर्षाः | बु १७ | के ७ | शु २० |
| | ख०२।४।२७ | ख०।४।२७ | ख२।४। |
| | के०।१।२७ | शु१।२। | र१।०।० |
| | शु२।१०।० | र०।४।६ | च१।८। |
| | र०१०।६ | च१।५।० | म१।२। |
| | च१।५।० | म०।४।२७ | रा२।०।० |
| | म०।१।२७ | रा१।०।१८ | जी२।८।० |
| | रा२।६।१८ | जी०।११।६ | श१।२। |
| | जी२।२।६ | श१।१८।८ | बु२।१०।० |
| | श२।८।८ | बु१।१।२७ | के१।२ |
| समष्टिवर्षाः | १७ | ७ | २० |

अष्टोत्तरीयान्तर्दशामानं ज्योतिस्तत्त्वेऽस्तीति नात्र प्रदर्शितम् ।

पूर्वमनुक्तत्वात् योगिन्यामन्तर्दशाचक्रमत्र प्रदर्श्यते

### योगिन्यन्तर्दशाचक्रम् ।

| | | | | | | | | |
|---|---|---|---|---|---|---|---|---|
| मङ्गादशावर्षाः | मं। | चि२। | धरा | श्वा४। | भद्र। | ब्रह्मा | चि७। | वट। |
| अन्तर्दशामानम् । | मं० | चि१।० | धरा | श्वा४।१० | भद्र।१० | ब्रह्मा | चि।४।१० | वट।१० |
| | चि२० | धरा० | श्वा४। | भद्र।२० | उल्का | चि१२ | वा।६।२० | मा२।२० |
| | धरा० | श्वा१२० | भद्र | उल्का | चि१२० | वा१।४ | म०२।० | चि५।१० |
| | श्वा१।१० | भद्र।१० | उल्का | चि८।१० | वा२। | म०१।१० | चि०३।२० | पाट।० |
| | भ२।१० | उल्का | चि७ | वा१।२० | प्र।४। | ध।७। | श्वा।०।२० | |
| | उ२। | चि४।२० | वा८। | म्रक्ष।१० | भद्र। | श्वा१।१० | म१।१।१० | |
| | चि२।१० | वा५।२० | म१। | श्वा८। | म१।२० | ध्व।१० | उ१।४ | |
| | ब२।२० | म०।१२० | ध्व। | प्र२।२० | ब्रह्मा | म१।१२० | | |
| समष्टिवर्षाः | १। | २। | ३। | ४। | ५। | ६। | ७। | ८। |

**दशाकर्ष** पु० दशया तैलादिकमाकर्षति आ+कृष-अण् । १प्रदीपे २वस्त्राञ्चले पु०स्त्री० पुंस्त्वे व०व० । झारा० । स्त्रियां दशाकर्षिनृ प्रदीपे झारा० ।

**दशाक्षर** न० दश अक्षराणि यादेऽत्र । १षड्क्षिनामके छन्दोभेदे । "बस्वो दशाक्षरेण विराजछन्दजवत्" यजु० ६।२६। २दशाक्षरयुक्ते मन्त्रभेदे त्रि० । स्त्रियां टाप् । "दशाक्षरा वै विराट्" श० ब्रा० १।१।१।२२। ३तन्त्रोक्ते स्त्रीदेवतामन्त्रे स्त्री तत्र अर्थ आद्यचि गौरा०ङीष् । "एषा दशाक्षरी विद्या सर्वसम्पत्प्रदायिनी" तन्त्रसा० ।

**दशाङ्गधूप** पु० त्रिदोषघ्ने अवयवरूपिशाचादिनाम्नि धूपविशेषे यथा "वासवेहा दशाङ्गेन त्रिदोषघ्नेन चार्मकम् । नश्यन्ति यस्य धूमेन अवयवरूपिशाचकाः । गङ्गांभो गन्धपाषाणात् तावच्चन्दनमुशीरम् । चतुरंशं चन्दनञ्च जटामांसी च तावती । त्रिभागः सर्जकः सारस्तावदेव हि रालकम् । उशीरन्तु त्रिभागं स्यात् धृते भक्तं नखं समम् । कर्पूरो मृगनाभिश्च एकभागौ प्रकीर्त्तितौ ।

एष दशाङ्गधूपस्तु रुद्रस्यापि मनोहरेदिति" शब्दार्थचि० धृतवाक्यम्। पुष्पदानोत्तरं देवाय दीयमाने २धूपविशेषे यथा "मधुसक्तं घृतं गन्धो गुग्गुलुश्चगुरुश्चैलजम्। सरलं सिल्ह-सिद्धार्थं दशाङ्गधूप उच्यते इति"। अन्यच्च। कर्पूरं कुङ्कुमगुरु गुग्गुलुर्मलयोद्भवम्। केशरं वालकं पत्रं त्वक् जातीकोषसत्तमम्। सर्वमेतद्घृततयुतं दशाङ्गधूप ईरित" इति।

**दशाङ्गुल** न० दश अङ्गुलय इव फलत्वमुपरि सन्त्यस्य अच्। १खर्जुरे फलभेदे भावप्र०तस्य फलोपरि अङ्गुलाकारदश-शिरासत्त्वात् तथात्वम्। तद्गुणाः खर्जुरशब्दे २४६८ पृ० उक्ताः। दश अङ्गुलयः प्रमाणमस्य तद्धितार्थद्विगोः ठञ् तस्य लुक् अच्समा०। २दशाङ्गुलिप्रमाणयुक्ते त्रि०। "निःक्षेप्योऽयोमयः शङ्कुर्दशाङ्गुलः" मनुः। सङ्ख्याशब्दे त्वादि "अत्यतिदशाङ्गुलम्" ऋ० १०।६०।१ "दशाङ्गुलं दशाङ्गुलिपरिमितं देशमत्यतिदत् अतिक्रम्य व्यवस्थितः" भा०।

**दशाधिपति** पु० ६त० ज्योतिषोक्ते १दशापतौ रव्यादिग्रहे दशानां पदातीनामधिपतिः। दशपदात्यधिपत्ये राजनियुक्ते २सैन्यभेदे च (जमादार) "समानाशनपानास्ते कार्य्या द्विगुणवेतनाः। दशाधिपतयः कार्य्याः शताधिपतयस्तथा। ततः सङ्ख्याधिपतिं कुर्य्याच्छूरमतन्द्रितम्" भा०शा०१००अ०।

**दशानन** पु० दश आननान्यस्य। रावणे शब्दर०। "दशानन किरीटेभ्यस्तत्क्षणं राक्षसश्रियः" रघुः। "ध्वंसितोद्धत दशाननाम्" (लङ्काम्) माघः। दशास्यादयोऽप्यत्र।

**दशानिक** पु० आने जीवने हितः आनिकः दशाभेदे आनिकः। दन्त्यादौ शब्दच०

**दशान्त** पु० ६त०। १दशार्द्धके २वर्त्तिकान्ते च। "निर्विष्ट-विषयस्नेहः स दशान्तमुपेयिवान्। आसीदासन्ननिर्वाणः प्रदीपार्चिरिवोषसि" रघुः।

**दशामय** पु० दशामया यक्ष्मात्। रुद्रे शेषच०।

**दशापवित्र** न० दशा वस्त्राञ्चलं पवित्रमिव। आद्यादिदेये वाससः खण्डे। "दशापवित्रनामको यो वस्त्रस्यखण्डस्तेनोद्धृतो द्रोणकलशमूलमध्ये विलभागान् मन्त्रगतैस्त्रिभिः शोधयेत्" "दशापवित्रस्य मध्ये शुक्लां पूर्णां स्रुवं सोम धारास्रावणार्थं यजमान आवघ्नाति, सा नाभिरित्युच्यते। उदीचीनदशमवाचीननाभि च 'दशापवित्रं' कृत्वा द्रोणकलशस्योपरिष्टाद्दृढात्रादयन्तो वितनुयुः। वितन्य च दशापवित्रस्य कोणान् धारयेयुः" ता० ब्रा०१।२ भा०। "अथ दशापवित्रमुपस्तृणाति स्त्रिङ्करोति" शत० ब्रा० ४।२।२।११

**दशारुहा** स्त्री दशसु दिक्षु आरोहति आ+रुह-क। कैवर्त्तीभेदे राजनि०।

**दशार्ण** पु० दश ऋणानि दुर्गाणि भूमयो जलाधारा वा यत्र "प्रवत्सेत्यादिना" पा०ढञ्। १देशभेदे स च देशः ह० सं० कूर्म्मविभागे १४ अ० आग्नेय्यामुक्तो यथा "आग्नेय्यां दिशि कोसलाः" इत्युपक्रमे "निषादराष्ट्राणि पुरिकदाशार्णाः"। स्वार्थे अण्। "तुलाधरेऽवन्त्यपरान्त साधून् वणिग्दशार्णान् भरुकच्छपांश्च" ५ अ०। "सप्त-व्याधा दशार्णेषु" आद्ये पाशविहगाथा। तद्वाचकशब्दो यत्तानुवाकेऽध्याये अस्ति विसङ्गा०अण्। दाशार्ण दशार्ण-शब्दयुक्ते अनुवाके अध्याये च। सोऽभिजनोऽस्य तस्य राजा वा अण्। दाशार्ण पितादिक्रमेण तद्देशवासिनि तद्भूपे च "तत्र दाशार्णको राजा सुधर्म्मा सोमकर्षणम्। हतवान् भीमसेनेन सङ्युद्धे निरायुधम्" भा०स०२८ अ०। भीमप्राच्यजये। अत्र स्वार्थे क। वहुषु अणो लुक्। "पूर्वभागस्थितो जित्वा दशार्णाः समरे जिताः" भा०आ० ११२अ०। "विजित्याल्पेन कालेन दशार्णानजयत् प्रभुः। प्रतीच्योस्योऽपि तद्भामा देशोऽस्ति "तान् दशार्णान् स जित्वा च प्रतस्थे पाण्डुनन्दनः" भा० स० २१ अ०। नकुलप्रतीच्यजये। अतएव भा०भी० ६अ० "अतश्च" जनपदाश्चिबोध गदतोमम" इत्युपक्रमे "उत्तमाश्च दशा-र्णाश्च मेकलाश्चोत्कलैः सह" इत्यत्र उत्तमत्वेन पूर्वं पूर्वदक्षिणस्याम् दशार्णानुक्त्वा "जठराः कुकुराश्चैव सदशार्णाश्च भारत!। पुनरन्यो निर्विशेषो दशार्णदेश उक्तः। परस्तात् "वातायना दशार्णाश्च रोमाणः कुशविन्दवः इत्यत्र वातायनत्वेन विशेषणात् लाटोऽपि देशभे-दोऽस्तीति गम्यते। "सम्यक्सन्ने कतिपयदिनस्थायिहंसा दशार्णाः" मेघ०।

**दशार्णेयु** पु० पौरवरौद्राश्वस्य पुत्रभेदे "दशार्णेयुञ्जेयु स्थलेयुश्च महावलः" हरिवं०३१अ०।

**दशार्द्ध** न० दशानामर्द्धम्। १पञ्चसंख्यायां २तत्संख्येये च "अस्थ्नोमात्रा विनाशिन्यो दशार्द्धान्तु याः स्मृताः" मनुः। "छिद्रेण यन्त्रस्य समर्पयध्वं शरैः शितैर्द्यौमच-रैर्दशार्द्धैः" भा०आ० १८५ अ०। दश बलानि अश्नोति क्विप्-अण्। ३दशबले बुद्धे त्रिका० दशबलशब्दे दृश्यम्।

**दशार्ह** पु०क्रोष्टुवंश्यस्य वृष्णेः पुत्रभेदे "वृष्णेस्तु जज्ञिरे पुत्रास्त्रयः

धरमधार्मिकाः । आवन्त्यश्च दशार्हश्च वशी विषहरश्च यः" हरिव० ३७ अ०क्रोष्टुवंश्योक्तौ । भाग० ९।२४।१ उक्ते २दक्षिणदपौत्रे च । "ऋक्षस्य कुत्तिः पुत्रोऽभूद् दक्षिणस्यांच निर्वृतिः । ततो दशार्हो नाम्नाभूत् तस्य व्योमः सुतस्ततः" । उपचारात् २तद्वंशेऽपि ३तदधिकृतदेशे च "भीष्मश्च भीमश्च युधिष्ठिरश्च यमौ च कृष्णाश्च दशार्हसिंहः । उवाच दिष्ट्या भवतां शिवेन प्राप्तः किरीटी सुहृदः कृतास्त्रः । प्रोवाच कृष्णामपि यादवेनीं दशार्हभर्त्रा सहितःसुहृद्भिः"भा०व०१८३अ०।५विष्णौ पु०"विजयोजयः सत्यसन्धो दशार्हः सात्वतां पतिः" विष्णु०स० । भरतभाष्ये तु दाशार्ह इति पठित्वा दाशोदानं तमर्हति दाशार्हः दशार्हश्च कुले उत्पन्नत्वाद्वा"व्याख्यातम् । दशार्हस्य गोत्रापत्यम् शिवा०अण् । दाशार्हे यदुवंशप्रभावे कृष्णादौ त्रि०स्त्रियां ङीप् । दशार्हसंज्ञाचकशब्दोऽस्मिन् अध्याये अनुवाके वा विदुक्ता० अण् । दाशार्हे दशार्हशब्दयुक्ते अनुवाके अध्याये च । ६त्रायुधजीविसंघभेदे च । ततः स्वार्थे पक्षा० अण् । दाशार्हं आयुधजीविसंघभेदे । प्रज्ञा०स्वार्थे अण् । दाशार्हं यदुवंशेऽपि नृपमात्रे च ।

**दशावतार** ङ०दश अवतारा अस्य । विष्णौ दश अवतारास्य अवतारशब्दे दर्शिता अन्येऽपि दशावताराः मत्स्यपु०उक्ता यथा "धर्मोद्धारायसङ्कल्पः संभूतश्चाक्षुषेऽन्तरे । यज्ञश्च वर्त्तयामासुर्देवा वैवस्वतेऽन्तरे । प्रादुर्भावे ततस्तस्य ब्रह्मा ह्यासीत् पुरोहितः । युगाख्यायाश्चतुर्थान्तु आपन्नेषु सुरेषु वै । संभूतः स वसुद्वान्ते हिरण्यकशिपोर्वधे । द्वितीये नरसिंहाख्ये ऋषो ह्यासीत् पुरोहितः । बलिसंस्थेषु लोकेषु त्रेतायां सप्तमं प्रति । तृतीये वामनाख्यो धर्मेण तु पुरोधसा । एताभिस्तः कृतास्तस्य दिव्याः संभूतयो द्विजाः । मानुष्याः सप्त वैवस्वते तु शापजाताञ्छिबोधत । त्रेतायुगे तु प्रथमे दत्तात्रेयो बभूव ह । नष्टे धर्मे चतुर्थांशे मार्कण्डेयपुरःसरः । पञ्चमः पञ्चदश्यान्तु त्रेतायां सम्बभूव ह । मान्धाता चक्रवर्त्ती तु तस्यौतथ्यपुरःसरः । एकोनविंश्यां त्रेतायां सर्वक्षत्रान्तकृद्विभुः । जामदग्न्यस्तथा षष्ठो विश्वामित्र पुरःसरः । चतुर्विंशे युगे रामो वशिष्ठेन पुरोधसा । सप्तमो रावणस्यार्थे जज्ञे दशरथात्मजः । अष्टमे द्वापरे विष्णुरष्टाविंशे पराशरात् । वेदव्यासस्तथा जज्ञे जातूकर्ण्यपुरःसरः । कर्त्तुं धर्मव्यवस्थानमसुराणां प्रणाशनम् । तिष्ये नवमके जज्ञे तपसा पुष्करेक्षणः । देवक्यां वसुदेवेन द्वैपायनपुरःसरः । तस्मिन्नेव युगे चीर्णे सन्ध्याशिष्टे भविष्यति । कल्की विष्णुयशा नाम पाराशर्यपुरःसरः । दशमो भाव्यसंभूतो याज्ञवल्क्यपुरःसरः ।"

**दशाश्व** पु० दश अश्वा रथेऽस्य । चन्द्रे गन्धर्व० । "रथस्त्रिचक्रः सोमस्य कुन्दाभास्तस्य वाजिनः । वामदक्षिणतो युक्ता दश तेन चरत्यसौ । वीथ्याश्चवापि चत्वारि ध्रुवाधारेण वेगिना । त्रासद्वित्रिक्रमस्तस्य राशीनां सवितुर्यथा । चर्कस्येव स्थितस्याद्याः सप्तद्युक्ता वहन्ति ते । कल्पमेकं मुनिश्रेष्ठ ! वारिगर्भसमुद्भवाः" पुराण सर्वत्रे विष्णु० पु० ।

**दशाश्वमेध ( धिक )** न०काशीस्थतीर्थभेदे तन्महात्म्यादिकथा काशी०ख० ५२अ० उक्ता यथा

"साहाय्यं प्राप्य राजर्षेर्दिवोदासस्य पद्मभूः । दत्वाज दशभिः काश्यामश्वमेधैर्महामखैः । यद्यापि व्योमभूमोर्द्वयं ह्यासीन्न गगनान्तरम् । तदा प्रभृति नैवेह नीलिमानं जहात्यदः । तीर्थं दशाश्वमेधाख्यं प्रथितं जगतीतले । तदा प्रभृति तत्रापि हारणस्यां शुभप्रदम् । पुरा रुद्रसरो नाम तत्तीर्थं कलशोद्भव ! । दशाश्वमेधिकं पश्चाज्ज्ञातं विधिपरिग्रहात् । खड्गेनाथ ततः प्राप्ता भगीरथसमागमात् । अतीव पुण्यवज्ज्ञात मतस्तीर्थमनुत्तमम् । विधिर्दशाश्वमेधेशं लिङ्गं संस्थाप्य तत्र वै । स्थितवान् न गतोऽद्यापि क्वापि काशीं विहाय तु । राज्ञो धर्मरतेस्तस्य छिद्रं नाप च किञ्चन । अतः पुरारेः पुरतो विदित्वा किं वदेद्विधिः । चेतःप्रभावं विज्ञाय ध्यायन् विश्वेश्वरं विभुम् । ब्रह्मेश्वरं च संस्थाप्य विधिस्तत्रैव संस्थितः । परा ततुरिदं काशी विश्वेशस्येति निश्चितम् । अस्याः संवेदनाच्छम्भुर्न कृपयति पुरा भवि । कः प्राप्य काशीं दुर्मेधाः पुनस्त्यक्तुमिहेहते । अनेकजन्मार्जनितकर्म्मनिर्मूलनक्षमाम् । विश्वनाथसंज्ञर्द्धः स्थाने विश्वपतेस्तनुः । सन्त्यक्ते परं काश्याविश्वेशजमहाग्निना । प्राप्य काशीं त्यजेदास्तु समस्ताघौघनाशनीम् । स्वपशुः सं परिज्ञेयो महामौख्यपराङ्मुखः । निर्वाणलक्ष्मीं यः काङ्क्षेद्वाञ्छन् संसारदुर्गतिम् । तेन काशी न सन्त्याज्या यद्याप्नैशादनुग्रहात् । यः काशीं संपरित्यज्य गच्छेदन्यत्र दुर्मतिः । तस्य हस्ततलाद्भ्रष्टेऽतुर्वर्गफलोदयः । निर्वाणश्रीमधौघस्य सुपुण्यपरिदंहि-

णीम्। कः प्राप्य कार्त्तीं दुर्मेधास्त्यजेन्मोक्षसुखप्रदाम्। सत्यलोके तु यत् सौख्यं क सौख्यं वैष्णवे पदे। यत् सौख्यं लभ्यते काश्यां निमेषार्द्धनिषेवणात्। वाराणसीगुणगणान्निर्गुणोऽपि ब्रुवन्सिति। व्याडस्य मन्दरगिरिं न पुनः प्रयगान्मुने!। स्कन्द उवाच। मित्रावरुणयोः पुत्र। महिमानं ब्रवीमि ते। काश्यां दशाश्वमेधस्य सर्वतीर्थगिरोमणेः। दशाश्वमेधिकं प्राप्य सर्वतोर्थोत्तमोत्तमम्। यत् किञ्चित् क्रियते कर्म तदक्षयमिहेरितम्। स्नानं दानं तपो होमः स्वाध्यायो देवतार्चनम्। सन्ध्रोपासिस्तर्पणञ्च श्राद्धं पितृसमर्चनम्। दशाश्वमेधिके तीर्थे सकृत् स्नात्वा नरोत्तमः। दृष्ट्वा दशाश्वमेधेशं सर्वपापैः प्रमुच्यते। ज्यैष्ठे मासि सिते पक्षे प्राप्य प्रतिपदं तिथिम्। दशाश्वमेधिके स्नात्वा मुच्यते जन्मपातकात्। ज्यैष्ठशुक्लद्वितीयायां स्नात्वा रुद्रसरोवरे। जन्मद्वयकृतं पापं तत्क्षणादेव मुञ्चति। एवं सर्वासु तिथिषु क्रमात् स्नायान्नरोत्तमः। या शुक्लदशमीं यावद्दशजन्माघहारिणीम्। तिथिं दशहरां प्राप्य दशजन्माघहारिणीम्। दशाश्वमेधिके स्नात्वा दशमीयामीं पश्येन्न यातनाम्। लिङ्गं दशाश्वमेधेशं दृष्ट्वा दशहरातिथौ। दशजन्मार्जितैः पापैर्मुच्यते नात्र संशयः। स्नातो दशहरायां यः पूजयेल्लिङ्गमुत्तमम्। भक्त्या दशाश्वमेधेशं न तं गर्भदशा स्पृशेत्। ज्यैष्ठे मासि सिते पक्षे पक्षं रुद्रसरे नरः। कुर्वन्वै वार्षिकीं यात्रां न विघ्नैरभिभूयते। दशाश्वमेधावभृथैर्यत् फलं सम्यगाप्यते। दशाश्वमेधे तत्सर्वं स्नात्वा दशहरातिथौ। स्वर्दुन्याः पश्चिमे तीरे नत्वा दशहरेश्वरम्। न दुर्गामवाप्नोति पुमान् पुण्यतमः क्वचित्। यत् काश्यां दक्षिणद्वारमन्तर्मेरुश्च कीर्त्यते। तत्र ब्रह्मेश्वरं दृष्ट्वा ब्रह्मलोके महीयते। इति ब्राह्मणवेषेण वाराणस्यां महाधिया। दुढिण्ढेन स्थितं तावद्यावद्विघ्नेशरागमः। दिवोदासोऽपि राजेन्द्रो दृढब्राह्मणरूपिणे। ब्रह्मणे क्षतयज्ञाय ब्रह्मशालामकारयत्। ब्रह्मेश्वर समीपे तु ब्रह्मशाला मनोहरा। ब्रह्मा तत्रावसद्ब्रह्म ब्रह्मघोषैर्निनादयन्।"

**दशाह** पु० दशानामहां समाहारः टच् समा० समाहारत्वात् नाह्नादेशः "अह्नोऽह्नः पुंसि" पा० पुंस्त्वम्। दशदिनसमुदाये। "दशाहं शावमाशौचं सपिण्डेषु विधीयते" "अतिक्रान्ते दशाहे तु त्रिरात्रं मनुरब्रवीत्" मनुः।

**दशिन्** त्रि० ब० व० दश संख्याः सन्ति येषाम् इनि। १दशसंख्यायुक्ते। दशसंख्या यामाः अधिकतत्वेन सन्त्यस्य इनि। २राज्ञा नियुक्ते दशयामाधिकृते च "दशी कुलन्तु भुञ्जीत विंशो ग्रामं कुलानि च" मनुः। दश संख्याः प्रमाणं येषाम् इनि। ३दशसंख्याप्रमाणके त्रि०। "तां दशभिः प्रायुङ्क्त" शत० ब्रा० १३।१४।२। दशा वर्त्तिका वस्त्राञ्चलं वा अस्त्यस्य इनि। ४दशायुक्ते दीपे ५सदशे वस्त्रे च त्रि०

**दशीविदर्भ** पु० दक्षिणस्थे देशभेदे "अथापरे जनपदा दक्षुपक्रमे "दशीविदर्भाः कान्तीकास्तङ्गनाः परतङ्गनाः" भा० भी० ९ अ०।

**दशेन्धन** पु० दशा वर्त्तिकैव इन्धनं यस्य। प्रदीपे त्रिका०।

**दशेर** त्रि० दश-एरक्। छिन्ने त्रिका०।

**दशेरक** पु० दशेर+संज्ञायां कन्। १मध्यदेशे सोऽभिजनोऽस्य तस्य राजा वा अण्। दाशेरक पित्रादिक्रमेण तद्देशवासिनि तद्राजे च। बह्वादि० णो लुक्। २दशेरक तत्रार्थे ब०व०। हेमचन्द्रे दशेरक इति पाठान्तरम्।

**दशेश** पु० दशानामीशः। दशापतौ १रव्यादिग्रहे। दशानां यामानामीशः। २राज्ञा नियुक्ते दशयामाधिकृते च। "यं सेद्दु यामो दशेशाय दशेशो विंशतीशिनम्" मनुः।

**दशैकादशिक** त्रि० एकादशार्थेत्वादेकादश वस्तुतो दश ते दत्ता दश एकादश भविष्यन्ति ते दशैकादशाः निपातनात् समासान्तोऽकारः। "प्रयच्छति गर्हाम्" पा० दशैकादशान् प्रयच्छतीत्यर्थे "कुसीददशैकादशात् ठञ्ठचौ" इति पा०ठञ्। यतं प्रति दशरूपां दक्षिं यच्छतीति वार्द्धुषिकभेदे स्त्रियां स्त्रियाम् ङीष्।

**दशोणि** पु० दश बहवः ऊधयोऽस्य। बह्वृचविल्के "दशोणये कवये तक्वसातौ" ऋ० ६।२०।४ "दशोणये बह्वृचविल्कात् कवये मेधाविनः पञ्चम्यर्थे चतुर्थी" भा०।

**दशौषधकाल** पु० दशविध औषधकालः मा० क०। दशविधे औषधकाले स च सुश्रुते उत्तरतन्त्रे उक्तो यथा "अत ऊर्द्धं दशौषधकालान्व्याख्यास्यामः। तत्र "निर्भक्तं प्राग्भक्तमधोभक्तं मध्येभक्तमन्तराभक्तं समक्तं सामुद्गं मुहुर्मुहुर्यामं यामान्तरमिति दशौषधकालाः। तत्र निर्भक्तं ह्येवलमेवौषधमुपयुज्यते। वीर्याधिकं भवति भेषजमल्पहीनं हन्यात्तथामयमसंशयमाशु चैव। तद्वाल्वजद्वयुवतीस्तदहश्च पीत्वा स्नानं परां सुखयन्ति बलञ्चयच्च। प्राग्भक्तं त्वनाम यत्तु प्राग्भक्त-

क्षोपयुज्यते। योग्रं विपाकसमयाति बलं न हिंस्या दग्धादतं न च सङ्कर्षदनाक्षिरेति। प्राग्भक्तसेवनमथो बलमादधाति दद्याच्च दङ्गिणुभीरुवराङ्गनाभ्यः। अधो भक्तं ३नाम यद्भुक्तान्ते पीयते। पीतं यदन्नमुपयुज्य तदूर्द्धकाले हन्याद्गदान् बहुविधांश्च बलं दधाति। मध्येभक्तं ४नाम यन्मध्ये भक्तस्य पीयते। मध्ये तु पीतमुपहन्त्यविकारिभावाद्यो मध्यदेहमभिभूय भवन्ति रोगाः। अन्तराभक्तं ५नाम यदन्तरा पीयते पूर्वापरयोर्भक्तयोः। हृद्यं मनोबलकरञ्चय दीपनीयं पथ्यञ्च सम्भवति चान्तरभक्तमेतत्। समभक्तं ७नामौषधेषु यत्साध्यते भक्तम्। पथ्यं समभक्तमबलाबलयोर्हि नित्यं तद्वृद्धिष्वपि तथा शिशुवृद्धयोश्च। सासृक्कं ८नाम यद्भक्षणादावन्ते च पीयते। दोषे द्विधा प्रतिहते तु सासृक्कं तन्मादृग्जनयोर्दहनस्य निरेत्यते तु। सङ्कर्षङ्कर्षसमं समभक्तमभक्तं वा यदौषधं सङ्कर्षङ्करमुपयुज्यते। श्वासे सङ्कर्षङ्करतिपथ्यते च कासे हिक्कावमीषु च वदन्त्युपयोज्यमेतत्। श्वासं ९नामकधमनम् (फलमस्य सङ्क्षिप्तपुस्तके पतितम्) श्वासान्तरं १०नाम यत्पिण्डव्याप्तिचम्। श्वासान्तरेषु वितरेद्वमनीयधूमान् श्वासादिषु ग्रथितदृष्टगुणांश्च लेहान्। एवमेते दशौषधकालाः"।

**दस** उत्क्षेपे उपक्षये च अपक्षये अक० दि० पर०सक०सेट्। दस्यति। इरित् अदसत् अदासीत्-अदसीत्। उदित्। दसित्वा-दस्वा। "तेषां दिशोऽदसन्" तै० सं० १।६।१।३ "त्वां त्वारी दसमानो भगमीट्टे तक्वीदे" ऋ०१।१२४।५। आर्षेलङ् गणव्यत्ययश्च "मा ते प्राण उपदसन्" अथ०५।२०।५ "अब्रह्मतादिदसाम" यजु० १०।२२

**दस** दर्शने दंशने च चु० आ० सक० सेट् इदित्। दसयते अदर्दसत दंसशब्दे द्रष्टव्यम्।

**दस** पु० दस उपक्षये वेदे भावे अच्। उपक्षेपे "मनुं चक्रुरपरं दसाय" ऋ० ६।२।२। दसाय शत्रूणामुपक्षेपाय" भा० लोके तु घञ् दास इत्येव तत्रार्थे उत्क्षेपे च।

**दसेरक** पु० दशेरकशब्दार्थे मरुदेशे "दसेरकाः केकयाः सकैकेयाः ह० सं० ४च०। सोऽभिजनोऽस्य तस्य राजा वा अण्। दासेरक पित्रादिक्रमेण तत्र वासिनि तद्भूमे च बहुषु अणो लुक्। तत्रार्थे "आवन्त्यान् दाक्षिणात्यांश्च पार्वतीयान् दसेरकान्" भा०द्रो०११अ०। दासेरक पृषो०।२गर्दभे पुंस्त्री०।"यास्त्रिलक्ष्यः प्रमेहन्ति दशैवोष्ट्र दसेरकाः" भा०क०१०अ०। अयं तालव्यमध्यश्च लिखा०।

**दस्र** त्रि०दस उपक्षेपे मक् इत्वपक्षे "इदृचि दस्रो निरियाति व्यजस्रैः ऋ०१।१४८।४। "दस्र उपक्षपयिता" भा० दस दर्शने कर्मणि मक्। २दर्शनीये "राजेव दस्र! निषदोऽधिवर्हिषि" ऋ०१०। ४३।२। "हे दस्र! दर्शनीयेन्द्र!" भा०। "दस्रत् क्षणोव्यध्वरम्" १।७४। ४। दस्रत् दस दंशनदर्शनयोः इण्युधीन्धीत्यादिना मक्। "दस्रमित्यत्र मकारस्य वर्णव्यत्ययेन तकारः" भा० "एतेनास्य तालत्वकल्पनम् प्रामादिकम्। "जुजोषदिन्द्रोदस्रवर्चाः ऋ० १।१७३।४ "दस्रवर्चाः दर्शनीयतेजाः" भा० ३यजमाने ४चौरे ५क्षतारणे च मेदि०। स्वार्थे यत् दस्र दर्शनीये त्रि०। "हुवाच दस्रं वचः" ऋ० ८। २४। २०।

**दस्यु** पु० दस-युच् अनुनासिकत्वात् नानादेशः।१भक्षासाङ्कसिके (डाकाइत) २खले च शब्दार्थचि० "अभिक्रीतस्य यन्मांसं शुचि तन्मनुरब्रवीत्। क्रव्याद्भिश्च हतस्यान्यैश्चण्डालाद्यैश्च दस्युभिः" मनुः। "सुखवाक्रूरपक्षाणां या लोके जातयो बहिः। म्लेच्छवाचश्चार्यवाचः सर्वे ते दस्यवः स्मृताः" मनूक्ते ब्राह्मणादिचतुर्वर्णभिन्ने ३जातिभेदे च। "प्रसाधनोपचारघ्नमदासं दासजीवनम्। सैरिन्ध्रं वासुराद्वत्तिं स्मृते दस्युरयोगवे" मनुः। ४कर्मवर्जिते च। "मर्ते दस्युजूताय स्तवान्" ऋ०।६। २४। ८। "दस्युजूताय कर्म्मवर्ज्जितैः प्रेरिताय" भा० ५उपक्षपके त्रि०६असुरे पु० "चेतन्ते दस्युतर्हणा" ऋ०८।४७।२ "दस्यूनामसुराणां तर्हणा" भा० "स वज्रभृद्दस्युहा भीम उग्रः" ऋ०१।१००।१२दस्युहा "दस्यूनामुपक्षपयितॄणामसुराणां वधिता" भा०।

**दस्युसात्** अव्य०दस्युनामधीनं भवति करोति सम्पद्यते वा साति। तस्करायत्ते भूतादौ "अनाथाकाल एव स्युर्लोकोऽयं दस्युसाद्भवेत्। पतेयुर्नरकं घोरं यदि राजा न पालयेत्" भा० शा० ६८ अ०।

**दस्र** पुंस्त्री० दस्यति पांसून् दस उत्क्षेपे रक्। १गर्दभे स्त्रियां जातित्वात् ङीष्। दस्यति रोगान् क्षिपति दस उपक्षेपे। २अश्विनीकुमारयोर्द्वयोः द्वि० व०। तत्तुल्यसंख्यत्वात् ३द्वित्वसंख्यायां ४तत्संख्येवे च तदधिष्ठातृकत्वात् ५अश्विनीनक्षत्रे च मेदि०। "अनुसवतु-स्तमश्च दस्रयोः सुतौ" माघः। तयोर्मध्ये विशेषवाचित्वे एकवचनान्तोऽयं "नासत्यश्चैव दस्रश्च सूतौ द्वावश्विनामपि। मार्त्तण्डस्यात्मजावेतावदसस्य मङ्गा-

क्रमः" भा०शा०२०८। "देवौ तस्यामजायेतामश्विनौ भिषजां वरौ। नासत्यश्चैव दस्रश्च स्मृतौ द्वावश्विनाविति" हरिव० ६ अ०। नासत्यदस्रयोर्द्वन्द्वचारित्वात् द्विवचनान्तता इहिंसे त्रि०। ७शिशिरे न० संक्षिप्तसारः।

**दस्रदेवता** स्त्री० दस्रौ देवता अस्य। अश्विनीतारायां रेम०। अश्वियमदहनेत्यादिवाक्ये तस्या दस्रदैवत्यमनुसन्धेयम्।

**दस्रसू** स्त्री० दस्रौ सूते सू-क्विप्। सूर्य्यपत्न्यां त्वष्टृकन्यायां संज्ञायाम् त्रिका० अश्विनीकुमारयन्त्रे ह्यग्रम्

**दह** दोग्धौ अक० दाहे सक०चु०उभ० सेट् इदित्। दंहयति ते अददंहत् त।

**दह** दाहे भस्मीकरणे सक०भ्वा०प०अनिट्। दहति अधाक्षीत् ददाह देहतुः। दग्धा दहात् धक्ष्यति। दग्धः दग्धिः दग्ध्वा दग्धव्यः दहनीयः दाह्यः। दाहः दहनम्। दाहयति अददीहत् दिधक्षति "उष्णो दहति चाङ्गारः शीतः कृष्णायते करम्" हितो० "क्रुद्धं कुलं धक्ष्यति विप्रवह्निः" भट्टिः इवानङ्गारकारीव मैनान् धाक्षीः समूलकान्" भा०स०। ६०अ० "इमा दग्धं मनसिजं जीवयन्ति दृशैव याः" सा०द० "देहं धारयसम्मेधा दग्ध्वा धामाविशत् स्वकम्" भाग० "दग्धव्योऽसौ कटाग्निना" सनुः। "कर्म्माणि दहते अदाहि देहे। "दहते च कुलं सर्वम्" चाणक्यः। "देहे ब्रह्म मतेश्वरा" भट्टिः दंदह्यते। "दंदह्यमाना शोकेन" भट्टिः।

**दहदहा** स्त्री कुमारानुचरमातृभेदे "ख्याता दहदहा चैव तथा धमधमेति च" भा० श०४७अ०दह दहेति वह्नि मयूरव्य० कर्त्तारं चाभिदधातीति कर्त्तरि अयं साधुः एवं धमधमेत्यत्रापि बोध्यम्।

**दहन** पु० दह-ल्यु। १अग्नौ, "दग्दहनस्तुहिनदीधितिस्तस्य" सा०द० "दह दहन! तदेतत् पापमङ्गं मदीयम्" स्तोत्रोक्तिः। २चित्रकवृक्षे, ३भल्लातके, ४दुष्टचेतसि च। ५कपोते पुंस्त्री० राजनि०स्त्रियां जातित्वात् ङीष्। ६दाहकमात्रे त्रि०। लोकदहन! मनो दहन इत्यादि। ७रुद्रभेदे पु०। "एकादश सुताः स्थाणोः ख्याताः परमतेजसः। मृगव्याधश्च सर्पश्च निर्ऋतिश्च महायशाः,। अजैकपादहिर्बुध्न्यः पिनाकी च परन्तपः। दहनोऽथेश्वरश्चैव कपाली च महाद्युतिः, स्थाणुर्भगश्च भगवान् रुद्रा एकादश स्मृताः" भा० आ० ६६ अ०। उपचारात् एकत्तिकानक्षत्रे "दहनविधिगताख्यामैत्रभं सौम्यवारे" ज्यो० त०। भावे ल्युट्। १दाहे न०। "अपरो दहने स्वकर्म्मणां वहते ज्ञानमवेन वह्निना" रघुः।

**दहनकेतन** पु०न० दहनस्य केतन इव। धूमे हेमच०।

**दहनप्लुष्ट** त्रि०दहनादिव प्लुष्टं प्लोषणं यस्मात्। वैद्यकप्रसिद्धे (वेसेलारा) पदार्थे अग्निप्लुष्टदोषोऽत्र। तत्प्रदाने हि देहे वह्नेरिव प्लोषणं (फोस्का) भवतीति प्रसिद्धिः।

**दहनप्रिया** स्त्री ६त०। स्वाहायामग्निभार्यायाम् त्रिका०

**दहनर्क्ष** न०६त०। ऋक्षिकानक्षत्रे "यदा विशाखासु महेन्द्रमन्त्री सूतश्च भानोर्दहनर्क्षयातः" ह० स० १० अ०। दहनभादयोऽत्र।

**दहनसारथि** पु०६त०। वायौ। "दक्षिणदहनसारथिरयाङ्गतश्चलभूतकलिके" दशकु०। दहनसहचरादयोऽत्र।

**दहनागुरु** न०दहनस्य दाहाय अगुरु। दाहागुरुणि राजनि०

**दहनाराति** पु० ६त०। जले राजनि०। तस्य वह्निनाशकत्वात् तथात्वम् दहनरिपुप्रभृतयोऽत्र।

**दहनोपल** पु० दहनाय वह्नये हितः उपलः (आतसी) सूर्य्यकान्तमणौ हेम०। सूर्य्यकिरणसम्पर्केण हि ततो वह्नेः प्रादुर्भावात् तस्य तथात्वम्।

**दहनोल्का** ६०। विस्फुलिङ्गरूपायामुल्कायाम् त्रिका०

**दहर** पु० दह-अरन्। १भूमिकायां २स्वल्पे ३भ्रातरि ४बालके च मेदि०। ५अतिसूक्ष्मे ६दुर्बोधे च "अथ यदिदं दहरं पुण्डरीकं वेश्म दहरोऽस्मिन्नन्तराकाशस्तस्मिन् यदन्तस्तदन्वेष्टव्यं तद्वाव विजिज्ञासितव्यम्" छा०उ०। तत्र स्वल्पे "नेत्रा पत्नीमानेष्यन् कौशं वासः परिधापयति चण्डातकं दहरं वा" काल्या०श्रौ० १४। ५। २ "परिधापयतीति कारितत्वादधेयत्वात् भवति चण्डातकं चलनक उच्यते एवं छत्रभियुक्तोपदेशः अङ्कोलकं विलासिन्या वासचण्डातकं विदुः दहरं तु कौपीनम् दहरशब्दस्याल्पवाचकत्वात्" कर्कः। ३नरके ४वरुणे च उणादि०।

**दहराकाश** पु० कर्म्म०। चिदाकाशे ईश्वरे।

**दक्ष** पु०दह-रक्। १दावाग्नौ २जठरे च। "सोऽन्यजन्मनि दक्षाग्निर्विश्वश्च महातपाः" भाग०४।१।२० "दक्षाग्निः जठराग्निः" श्रीधरःस्वल्पार्थस्यैवात्र कर्मधारयः जठरस्याग्नेः स्वल्पत्वात् इत्यन्ये।

**दा** दाने भ्वा०पर० सक० सेट् य इत्। यच्छति अयिष्यच्छति अदात्। ददौ ददतुः। देयात्। दास्यति। देयम् दानीयं दातव्यं दनः दातुम् दत्वा।

दा दाने जुहो० उभ०सक०सेट्। ददाति दत्ते प्रणिददाति। दद्यात् ददीत। ददातुददत्त देहि दत्ताम् दत्स्व। अददात् अदत्त। अदात् अदित। ददौ ददिव-ददाथ ददिव। ददे ददिवे। दाता देयात् दासीष्ट। दास्यति। कर्मणि दीयते अदायि अदायिषाताम्-अदिषाताम्। दासीष्ट-दायिषीष्ट दास्यते-दायिष्यते। दापयति। दित्सति देदीयते। दातव्यः दानीयः देयम्। दाता। दानं दायः दत्तं प्रत्तम्। दातुं दत्तिः दत्त्वा प्रदाय। ददत् ददानः। ददिवान्। "यो ददाति स कुक्कुदः" अमरः। "मूर्ध्नि मूर्धाभिषिक्तस्य ददति स्म विधानतः" रामा०अयो० २६स० "दद्याच्चैवासनं स्वकम्" "क्षोऽन्तर्दशाङ्गात् तद्ग्रव्यं दद्याच्चैवादरीत वा" मनुः। "देहि युद्धं नरपते! ममाद्य रणमूर्द्धनि" भा० उ०१६३अ० "ददौ स दश धर्माय" मनुः। "अवकाशं किलोदन्वान् रामायार्थितो ददौ" रघुः। "पाण्डवानां समामध्ये ऽर्जुनोऽधन उपागतः। तस्मै गाञ्च हिरण्यञ्च" विदग्धमु०। "न दास्यामि समादातुं क्षोभं कस्यचिदप्यहम्" भा० आ०२४अ० "दातव्यमिति यद्दानं दीयतेऽनुपकारिणे" गीता "देयं दारसुताहते" याज्ञ०। "दत्तमुक्तफलं धनम्" दायभागधृतभारतम् "दत्तात्मा तु स्वयं दत्तः" मनुः "सुता दद्यात् तस्य सुताय मैथिली" भट्टिः। "आददानः परक्षेत्रात्" न दण्डं दातुमर्हति" "स क्षेयः दक्षिमः सुतः" मनुः "तेषां दत्त्वा तु लग्नेषु सपवित्रं तिलोदकम्" स्मृतिः। "अदित्सन्तं दापयति प्रजानन्" यजु०८।२४। "दायादानपि दापयेत्" मनुः। "तेषामगीतिं यानानि रत्नपूर्णानि दापय" रामा०अयो०३२ स०। "स दाप्यः प्रथमं दमम्" याज्ञ० "अस्मभ्यमित्त दित्ससि" ऋ०१।१७०।२ "दित्सन्तं भूयो यजमानचिकीर्षन्तं" ऋ०२। १४।१०।

अति+अतिक्रम्य दाने अत्यन्तदाने च। "न जीवन्तमतिददाति" कात्या० ४।१।२७। "अतिदाने बलिर्बद्धः" भाग०

अनु+पश्चाद्दाने तुल्यरूपदाने प्रतिनिधित्वेन दाने च। "न दूढेऽ अनुददासि वामम्" ऋ०१।१६०।५। "सूरश्चिदस्मा अनु दादपस्याम्" ७।४५।२ "यः गर्धते नानुददाति रध्यान्" २। १२।२०

अभि+आभिमुख्येन दाने "तथैव चैनमुद्धा वामपार्श्वेऽभ्यदात्" भा० व० १६७अ० गद्यम्।

अव+अधोदाने अवत्तम् आदिकर्मणि तु वा तादेशः यथाह सि० कौ० "अवदत्तं विदत्तञ्च प्रदत्तञ्चादिकर्मणि। सुदत्तमनुदत्तञ्च निदत्तमिति वेष्यते" चण्डेश्वरधृतपाठः।

आ+अग्रहणे "दद्याच्चैवाददीत वा"। "शुभां विद्या मादद्यादवरादपि" मनुः। "त्वं चादास्यसि भूयोऽहं पापमानं जरया सह" भा०आ०८३अ०। "शरीरमात्तं स्वमृना" छा० उ० "आददानः परक्षेत्रात्" मनुः।

अप+आ+अपेक्ष्य ग्रहणे। "मृत्पिण्डमपादाय मक्षावीरं करोति" शत०ब्रा० १४।१।२।१७

उद्+आ+उदस्य ग्रहणे "उदादाय पृथिवीं जीवदानुम्" यजु०१। २८। [रघुः।

उप+आ+सामीप्येन ग्रहणे "उपात्तविद्यो गुरुदक्षिणार्थी"

परि+आ+परिवर्त्य ग्रहणे "पर्य्यादानं चास्त्राणि भीमधन्वानमर्जुनम्" भा०उ०४८अ० "तस्मिन्निधीनादधीत प्रत्तां पर्य्यादधीत च" भा०आ० ८६अ०।

प्रति+आ+प्रतिग्रहणे दत्तस्य पुनर्ग्रहणे च। "शुभाशुभं कर्मजातं यदन्यत्तदेव प्रत्यादत्ते स्वदेहे" भा०आ० २०२ अ० "न चाहं शक्रः प्राणं प्रत्यादातुम्" भा०आ०३अ०

वि+आ+अङ्गादेःप्रसारणे आत्व०स्वाङ्गप्रसारणे तु परः। "व्यादायास्यं महारक्षस्तौ दद्राऽथ क्षुधावृतः" हरिवं० ३।७ अ०। "भक्षयत्येष मां रुद्रो व्यात्तास्यो दारुणाकृतिः" भा०व०६४अ०। "नभःस्पृशं दीप्तमनेकवर्णं व्यात्ताननं दीप्तविशालनेत्रम्" गीता।

परि+उपरिस्थापने। "त्रिते द्विःअग्रं सवमाग्ने परिदद्मसि" ऋ० ८।४७।१५ "परिदद्मसि उपरि दद्मः वयं त्रितः परित्यजामः इत्यर्थः। अथवा त्रिते मयि यद्दुष्प्रणीतं हृतं तत् स्वर्णकाराय मालाकाराय वा परिदद्मसि अस्मत्तोऽपि निष्कृष्य तयोरुपरि स्थापयामः" भा०

प्र+विधानादिना प्रकर्षेण च दाने। "प्रदानं स्वाम्यकारणम्" मनुः। "प्रत्तं जलं इत्यञ्जलयस्त्रिकेऽपाम्" भट्टिः। "नष्टं विनष्टं क्षमिभिः स्मृतं विषमे स्थितम्। क्षीणं पुरुषकारेण प्रदद्यात् पाणएव तु" मनुः।

अनु+प्र+पश्चात् प्रदाने। "एते त्रासानुप्रदाना अघोषाश्च विहण्यते। कण्ठम्" शिक्षा।

प्रति+प्र+प्रत्यर्पणे स्वीकृतस्य पुनरर्पणे "राज्यं प्रतिप्रदास्यामि" भा० उ० ५६।२५ श्लो०।

सम्+प्र+सत्कारेण प्रदाने। "तदर्हमासनं तस्मै सम्प्रदाय यथाविधि। गां चैव मधुपर्कं च सम्प्रदायार्घ्यमेव च" भा० व०५अ०। "अकन्यकनि चाप्येवं याचतां सम्प्रदीयते" भा० व०८५।२१श्लो०। अविच्छेदेन शिष्टानामाचारे च, सम्प्रदायः।

प्रति+प्रतिरूपदाने मूल्यपणे च। "सत्यङ्कारकृतं द्रव्यं द्विगुणं प्रतिदापयेत्" याज्ञ०। "प्रतिदास्यामि भगवन्! इन्द्रियं तव सुव्रत!" भा० उ० १६२ अ०।
"शिष्यव्यतिक्रमं दीक्ष्य निवर्त्य गुरुरागतः। अशपत् पततां देहो निमे! पण्डितमानिनः। निमिः प्रतिददौ शापं गुरवे धर्मवर्जिते। तवापि पततां देहो लोभाद्धर्ममजानतः" भाग० ६।१३।५

दा लवने अदा० प० सक० अनिट् पित् तेन न घुसंज्ञा। दाति अदासीत् दायात्। "अस्मिन्हे दाति रोमा पृथिव्याः" ऋ०१०।६५।४ "दाति स्तिनत्ति दाप् लवने अदादित्वाच्छपो लुक्" भा०। "कुविदङ्ग यवमन्तो यवं चिद्यथा दान्त्यनुपूर्वं वियूय" १०।१३१।२ "स हि ष्मा धन्वाचितं दाता न दात्या पशुः" ५।७।७ "अहिंसन्तो ओषधीर्दान्तो पर्वन्" अथ० १२।२।२१ "वर्हिर्देवसदनं दामि" कात्या०श्रौ० कर्कोद्धृतश्रुतिः। [उज्ज्वलद०।

दाक्ष पु०दक्षति यज्ञे ऋत्विरादिकं दा-क न कित्। यजमाने

दाक्ष त्रि०दक्षस्येदम् अण्। दक्षसम्बन्धिनि मखादौ "भागोयसां भागमादातुमिच्छन् मखो दाक्षो येन क्रतोऽन्यथावत्" हरिवं०१३१ अ०। दाक्षीणां सङ्घः अञो लक्षणं वा इञजनात् अण्। २दाक्षिसमुदाये ३तद्बद्धे च पु० ४तल्लक्षणे न०। "परम्परासंबद्धोऽङ्कः साक्षात्तु लक्षणम्" सि०कौ०। दाक्षेः अपत्यम्"इञश्च"पा०अण्। ५दाक्षेः अपत्येषु ब० व०। दाक्षेरागतः अण्। ६दाक्षेरागते त्रि०। गोत्रचरणात् वुञि प्राप्ते "न दण्डमानवान्तेवासिषु" पा० पर्युदासात् अणेव। ७दाक्षेः दण्डप्रधानमानवेषु दण्डान्तेवासिषु च तेन तच्छब्देषु दाक्षकः। तेषु तु दाक्षा-दण्डमानवाः शिष्या वा" सि०कौ०।

दाक्षक पु० दाक्षेरिदम् गोत्रचरणात् वुञ्। १दण्डमानवान्तेवासिभिन्ने तत्सम्बन्धिनि तेषु तु अणेव। दाक्षशब्दे दृश्यम्। दाक्षीणां विषयो देशः राजन्या० वुञ्। २दाक्षेर्विषये पु०।

दाक्षायण पुंस्त्री दक्षस्य गोत्रापत्यम् इञ "यञिञोश्च"पा० यूनि फक् "इञः प्राचामिति" पा० विशेषणात् न युवप्रत्ययस्य लुक् तस्य प्राग्देशस्थितत्वाभावादिति" सि०कौ० १दक्षस्यापत्ये गोत्रापत्ये। दाक्षायणस्य विषयो देशः ऐषु आर्या०भक्षल्। दाक्षायणभक्ष तदीये देशरूपे विषये पु०। दक्षस्येदम् दाक्षं तच्च तदवयवेति। २सुवर्णादिावयवालङ्कारे च। "दाक्षायणं हिरण्यम्" कात्या० श्रौ० ४।४।२८।

"दाक्षायणं सुवर्णमुच्यते" कर्कः। "यो बिभर्त्ति दाक्षायणं हिरण्यम्" यजु० २४।५१। "दाक्षायणशब्दोऽलङ्कारार्थः" वेददी०उक्तेः २भूषणे च। तत्र दक्षस्य यून्यपत्ये "यदाबध्नन् दाक्षायणा हिरण्यम्" यजु०२४।५२। स्त्रियां ङीप्। "भोः कश्यपस्य पुत्रोऽहं माता दाक्षायणी च मे" भा० शा०१७०अ०"दाक्षायणीऽश्विनीत्याद्याः"अमरः। दक्ष एव दाक्षः तस्यायनं तत्कृतो यज्ञभेदः संज्ञात्वात् पूर्वपदादुत्वम्। ४दक्षकृते यज्ञभेदे स च यज्ञः शत०ब्रा० २।४।४।२ उक्तो यथा
"प्रजापतिर्ह वा एतेनाग्रे यज्ञेनेजे प्रजाकामो बहुः प्रजया पशुभिः स्यां स्त्रियं गच्छेयं यशस्त्रेवमन्नादः स्यामिति। स वै दक्षो नाम। तदद्भनेन सोऽयजत तस्माद्दाक्षायणयज्ञो नाम" तद्विधिर्यथा "दाक्षायणयज्ञः प्राजापत्यसूत्रयशस्कामस्य" कात्या०श्रौ० ४।४।१। इत्यादिषु २०सूत्रेषूक्तः। "तत्रैवं प्रथमं पौर्णमास्यां आहवनीयपूर्वकोऽग्नीषोमीययागः पुनरुद्वृत्य सांनाय्यवदुपक्रमः। प्रतिपद्याग्नेयेन पुरोडाशेनैन्द्रेण दध्ना पयसा च यागः, पक्षे वैष्णवः। मांसमैथुनवर्जनसङ्कल्पः। पुनरुद्वृत्य तस्मिन् प्रतिपद्दिन एवैन्द्राग्नयागः पुनरुद्वृत्य मैत्रावरुण्या पयस्यया उपक्रमः। प्रातर्हितोवायाग्नेयेन मैत्रावरुण्या च यागो यथोक्त पक्षे आदित्यचरुः तदानीमेव पुनरुद्वृत्याग्नीषोमीय यागः। ततः पुनरुद्धरणादिदधियागोपक्रमः। प्रातस्तूतोवायाग्नेयसांनाय्ययागः पक्षे वैष्णवः। तदानीमेवोद्वृत्यैन्द्राग्नयागः। पुनरुद्वृत्य मैत्रावरुण्या उपक्रमः तदनन्तरमादित्यो वा इत्येवमुच्चारेण संवत्सरं यावत् प्रत्यहं कर्त्तव्यम्" कर्कः। तत्पद्धतिस्तु तत्र भाष्ये दृश्या। "अत्रेष्ट्वाग्नयणञ्चैव चातुर्मास्यानि चाचरेत्। उत्तरायणञ्च क्रमशो दाक्षायनमेव च" मनुः। सुवर्णे "दाक्षायणी ब्रह्मसवी वेणुमान् सकमण्डलुः" याज्ञ०"दाक्षायणं सुवर्णं तदस्यास्तीति इनि। दाक्षायणी" मिता०।

दाक्षायणी स्त्री० दक्षस्य स्त्रीयपत्यम् इञि फक् ङीप्। १अश्विन्यादितारासु २सत्यां दुर्गायाम् मेदि०"सापि दक्षाय सुश्रोणी गौरी दक्षाच ब्रह्मणा। दुहितृत्वे पुरा याचि रुद्रेणोढा महात्मना। सा च दाक्षायणी देवी पुनर्भूत्वा त्वपोत्तम!" वराह०पु०। ३रेवतीनक्षत्रे हेम०। ४दनोर्दक्षे रत्नमा०।५अदितौ कश्यपपत्न्याम्"दक्षस्तु तेषामारभ्य प्रजाः

सम्यग्विवर्द्धिताः । तत्र दाक्षायणीपुत्राः सर्वे देवाः-सवासवाः । यत्रवोऽष्टौ च रुद्राश्च आदित्यामरुतस्तथा" ।

**दाक्षायणीपति** पु० ६त० । १शिवे २चन्द्रे च त्रिका० ।

**दाक्षायण्य** पु० दाक्षायण्यामदितौ भवः ब्रा०यत् । आदित्ये "प्रजेभतस्तथा दक्षो भवितेह प्रजापतिः । दाक्षायण्य स्तवादित्यो मनुरादित्यतस्तथा" भा० अनु०१४७अ०

**दाक्षि** पुंस्त्री दक्षस्य गोत्रापत्यम् इञ् । दक्षस्यापत्ये घोषादिषु परेषु अस्य आद्युदात्तता दाक्षिघोषः दाक्षिकन्या दाक्षि-छत्र इत्यादि । संज्ञात्वेऽपि एतत्पूर्वककन्यायास्तत्पुरुषे "तत् पुरुषे गोत्राया नपुंसके" "कन्या च" पा० क्लीव-त्वप्राप्तावपि "संज्ञायां कन्योशीनरेषु" पा०उशीनरत्वाभावात् न क्लीवता । उशीनरदेशकन्यायान्तु क्लीवत्वात् नाद्युदा-त्तता । "कन्यापलदनगरग्रामहृदोत्तरपदात्" पा०एतत्पूर्वक-कन्यादिभ्यः भवादौ ढक् । दाक्षिकन्यीयं दाक्षिनगरीयमि-त्यादि । "कूलसूदस्थलकर्षाः" पा० आद्युदात्तात् अस्मात् परस्यकूलादीनामादिरुदात्तः । दाक्षिकूलः दाक्षिकर्षः । एतौ च व्यासविशेषवाचिनौ । अस्य ङित्त्वात् प्रत्यये परे नाद्युदात्तता । दाक्षिपुत्रः ।

**दाक्षिण** त्रि० दक्षिणा प्रयोजनमस्य अण् । अतुगवडाङ्होम भेदे स च "अथ प्रतिपरेत्य गार्हपत्यम् दाक्षिणानि जुहोति" शत०ब्रा०४।२।४।६ इत्युपक्रम्य दर्शितः "इडां भक्षयित्वा शालाद्वार्यं दाक्षिणहोमः" काला०श्रौ० १०।२।४ "ततः शालाद्वारं दाक्षिणहोमः कर्त्तव्यः दाक्षिणहोम इति संज्ञा "अथ प्रतिपरेत्य गार्हपत्यं दाक्षिणानि जुहोतीति" श्रुतत्वात् दाक्षिणानि दक्षिणा प्रयोजनानि येषाम् कर्माङ्गाणि ।

**दाक्षिणक** पु० दक्षिणायां कर्म्मसमाप्तौ द्रव्यदानरूपायां क्रि-यायां प्रस्तुतः दक्षिणमार्गेण चन्द्रलोकं गच्छति वा वुञ् । १दक्षिणातत्परे दृष्टापूर्त्तेन २चन्द्रलोकगामिनि च उपचारात् दक्षिणमार्गगामिनो ३चन्द्रे च । "विष-र्यवादतत्त्वज्ञाना द्रव्यते बन्धः स च त्रिविधः प्राकृति-कोवैकृतिको दाक्षिणकश्चेति इत्युपक्रमे "दृष्टापूर्त्तेन-दाक्षिणकः पुरुषतत्त्वानभिज्ञो हि दृष्टापूर्त्तकारी कामोपहतमनाबध्यत इति" सा०को० । [लायां भवे ।

**दाक्षिणशाल** त्रि० दक्षिणशालायां भवःञ । दाक्षिणशा-

**दाक्षिणात्य** त्रि० दाक्षिणा भवः "दक्षिणापश्चात्पुरसस्त्यक्" पा० त्यक् । १दक्षिणाभवे २नारिकेले पु० राजनि० ।

**दाक्षिणापथक** त्रि० दक्षिणापथे देशे भवः भूमा० वुञ् । दक्षिणापथदेशभवे ।

**दाक्षिण्य** न० दक्षिणस्य अनुकूलस्य भावः ष्यञ् । १आनुकूल्ये २पटुतायाम् । "नारदो मत्प्रियं कुर्वन् सुनि-रक्षितकर्मज्ञः । दाक्षिण्यादनुरोधाच्च दत्तवान्नात्र संशयः" हरिवं०१२६अ० । "तस्य दाक्षिण्यरूढेन नाम्ना मगध-बंधुजा" रघुः । "दाक्षिण्यं च चेष्टया वाचा परचि-त्तानुवर्त्तनम्" सा०द०उक्ते ३नाटकलक्षणभेदे च ।

**दाक्षी** स्त्री दक्षस्य स्त्र्यपत्यम् इञ् । "इतो मनुष्यजातेः" पा०ङीष् । १दक्षस्य स्त्र्यपत्ये २पाणिनिमुनेर्मातरि च

**दाक्षीपुत्र** पु० ६त० । पाणिनिमुनौ हेमच० ।

**दाक्षेय** पु०दाक्ष्या अपत्यम् । पाणिनिमुनौ हेमच० ।

**दाक्ष्य** न० दक्षस्य भावः कर्म्म वा ष्यञ् । १कौशले महसा-प्रत्युत्पन्नकार्येषु अव्याकोहेन प्रवृत्तौ "शक्तिं चा-वेक्ष्य दाक्ष्यं च भृत्यानाञ्च परिग्रहम्" मनुः । "दाक्ष्यं सदाफलदं यदयतः" माघः ।

**दाघ** पु० दह-भावे घञ् न्यङ्क्वा० कुः । दाहे शब्दार्थचि० ।

**दाडक** पु० दल-ण्वुल् अस्य डः । दले शब्दार्थक० ।

**दाडिम** त्रि०दल-विशरणे भावे घञ् डालेन निर्द्देशः भावात् इमप् अस्य डः । स्वनामख्याते फलप्रधाने वृक्षे मेदि० "तत् फलं त्रिविधं स्वादु स्वाम्लं केवलाम्लकम् । तत्र स्वादु १त्रिदोषघ्नं तृड्दाहज्वरनाशनम् । हृत्कण्ठमुख-रोगघ्नं तर्पणं शुक्रलं लघु । कषायानुरसं याहि स्निग्ध मेधाबलावहम् । स्वाम्लं २दीपनं रुच्यं किञ्चित् पित्तकरं लघु । अम्लन्तु ३पित्तजनकमुष्णं वातकफापह-मिति" भाव०प्र० २एलायां मेदि० अस्य स्त्रीत्वे गौरा० ङीष् । "वियोगिनीमैक्षत दाडिमीमसौ" नैष० "रक्ता दन्ता भविष्यन्ति दाडिमीकुसुमोपमाः" देवी० । एतत् स्थिता दुर्गा रक्तदन्ती । अमरे पुंस्त्वोक्तिः प्रायिकी उदाहरण वृद्धा मेदिनिकरेण त्रिलिङ्गत्वोक्तेः ।

**दाडिमपत्रक** पु० दाडिमस्य पत्रमिव पत्रमस्य कप् । रोहितकवृक्षे २राजनि०

**दाडिमपुष्प** पु० दाडिमस्य पुष्पमिव पुष्पमस्य । १रोहितक वृक्षे ६त० । २दाडिमस्य पुष्पे न० ।

**दाडिमप्रिय** पु० दाडिमं तत्फलं प्रियमस्य । १शुकपक्षिणि २दाडिमप्रियमात्रे त्रि० शब्दरत्ना० ।

**दाडिमभक्षण** पु०दाडिमं भक्षयितुं शीलमस्य ल्यु । १शुक-पक्षिणि शब्दच० । २दाडिमफलभक्षके त्रि० । भक्ष-भावे ल्युट् ६त० । ३दाडिमफलस्य भक्षणे न०

**दाडिमादिचूर्ण** न० दाडिमफलत्वगादिचूर्णविशेषे । "हे

पले दाडिमादष्टौ खण्डाद् व्योषं पलत्रयम् । त्रि गुणम्त्रिपलञ्चैव चूर्णमेकत्र कारयेत् । तच्चूर्णं मात्रया भुक्तमरोचकहरं परम् । दीपनं पाचनं च स्यात् पीनसज्वरकासजित्" वैद्य०

**दाडिमाष्टक** पु० दाडिमस्य तत्त्वचः अष्टकं पलाष्टकं यत्र । दाडिमफलत्वगादियुक्ते चूर्णभेदे "कर्षौन्मिता हुगाचीरी चातुर्जातं द्विकार्षिकम् । यमानी धान्यका जाटी व्योषं पादांशकम् । पलानि दाडिमादष्टौ सितायाश्चैकतः कृतः । गुणैः कपित्थाष्टकवच्चूर्णोऽयं दाडिमाष्टकः" चक्रद० । कपित्थाष्टकञ्च १६६ पृ० उक्तम् तद्वत्गुण युतोऽयमिति बोध्यम् ।

**दाडिमीरस** पु० "दाडिमं रससन्नं तत्र पात्रे विनिःक्षिपेत् । ततः पक्वः पटेपूत इति स्याद्दाडिमीरसः" रत्नमु० रसभेदे

**दाडिमीसार** पु० दाडिमीं तत्फलं सरति गच्छति अण् । दाडिमवृक्षे राजनि० । [वृक्षे शब्दार्थचि० ।

**दाडिम्ब** पु०दा–बा०डिम्ब डस्य नेत्वम् । (डालिम) । ख्याते

**दाढी** स्त्री दल्यते फलेऽसौ दल–कर्म्मणि घञ् गौरा० ङीष् लस्य डः । दाडिमे पा० । तस्याः फलम् । अण् तस्य हरितक्या० लुपि "हरीतक्यादि चेति" प्रकृतिविकृत्यात् २तत्फलेऽपि स्त्री ।

**दाढ़ा** स्त्री दैप् शोधे दा–दाने सम्यदा०भावे क्विप् दे शुद्धौ दानाय वा ढौकते ढौक–बा०ड । १दन्तभेदे दंष्ट्रायाम् हेम० । दानाय प्रेरणे २मार्गणायां ३समूहे च" शब्दार्थैकल्प० । स्वार्थे क कापि अत इत्वम् । दाढ़िका तत्रार्थे हेम० । दाढ़ायै केशसमूहाय प्रभवति ठक् । दाढिका (दाढ़ि) श्मश्रुणि । "केशेषु श्मश्रुतोऽस्त्री स्यादेदयेदविचारयत् । पादयोर्दाढ़िकायां च" मनुः । "दाढिकायां श्मश्रुणि" कुल्लू० ।

**दाण्ड** पु०स्त्री दण्डस्य रज्ज्वादिपत्रभेदस्यापत्यम् शिवा० अण् । १दण्डस्यापत्ये स्त्रियां ङीप् । दण्डस्य भावः पृथ्वा० । वा अण् । २दण्डभावे न० । ३आयुधजीविसङ्घभेदे । दण्डानां समूहः अञ् । ४दण्डसमूहे न० ।

**दाण्ड(ण्डि)कि** त्रि० "आण्डस्त्रिगर्त्तषष्ठांश कौण्डोपरदाण्ड(ण्डि)की । क्रोष्टुकिर्जांबमालिश अङ्गणुप्रोऽथ जालकिः" त्रि० कौ० उक्ते त्रिगर्त्तषष्ठे आयुधजीविसङ्घभेदे ततः स्वार्थे अ । दाण्ड(ण्डि)कीय तत्रार्थे ।

**दाण्डपाता** स्त्री दण्डस्य पातो यस्यां तिथौ "यास्यां क्रियायाम्" पा०स्त्रलोपे ६तायां अः । दण्डमात्रस्थितिभिदे ।

**दाण्डाजिनिक** त्रि० दण्डाजिनेन तद्धारणेनार्थानन्विच्छति "अयःशूलदण्डाजिनाभ्याम्" पा०ठञ् । मायाविनि कपटेनार्थलाभेच्छया दण्डाजिनधारिणि

**दाण्डायन** पु० दण्डस्य गोत्रापत्यम् नडा० फक् । दण्डगोत्रापत्ये तस्य स्थलं दाण्डिनायनस्थलम् । ग्रामभेदे "कूलसूदस्थलकर्णाः संज्ञायाम्" पा० ततः उत्तरपदस्थलशब्द आद्युदात्तः" स्वि० कौ० ।

**दाण्डिक** त्रि० दण्डेन तद्धारणेन जीवति जेतना० ठञ् । दण्डधारणोपजीविनि । तस्य भावः पुरो० यक् । दाण्डिक्य तद्भावे न० । [दण्डप्रोक्तकल्पसूत्राध्यायिषु

**दाण्डिन्** पु० ब०व० । दण्डेन प्रोक्तमधीयते वौन० णिनि ।

**दाण्डिनायन** पुंस्त्री० दण्डिनो गोत्रापत्यं नडा० फक् दाण्डिनायनेत्यादिना टिलोपाभावः । दण्डिनोगोत्रापत्ये ।

**दात** त्रि० दाप् लवने कर्म्मणि क्त । १लूने, २छिन्ने । दैप्-शोधे कर्त्तरि क्त । ३शुद्धे च । दो–खण्डने दृब्लस्य त इतः दा–दाने दृब्लस्य दत्त इति भेदः ।

**दाति** स्त्री०दैप् शोधे दाप् लवने भावे क्तिच् । १शुद्धौ २छेदने दा–दाने बा०ति । ३दाने ४दत्ते च "मरुतो दातिवारः" ऋ०१।१६७।८। "दातिवारः प्रदेयजनः दत्तवरणीयऋत्विक्सम्बन्धनो वा" भा०

**दातु** न०दा–भावे तुन् । १दाने "कत्तस्य दातु शवसो वृत्रहा" ऋ० १०।६६।१ "कदु दातु किं दानम्" भा० "सहस्र दातु पशुमद्धिरण्यवत्" ऋ०६।७२।६। २दातरि त्रि० ।

**दाढ** त्रि० दा–दाने ढच् । १दानकर्त्तरि २दानशीले च १दाता मे भूयासं नाथः प्रमाणीक्रियतामिति" कुमा० "कामो दाता कामः प्रतिग्रहीता कामैतत्ते" यजु०७।४८ स्त्रियां ङीप् । शीलार्थे ढचि तु न कर्म्मणि षष्ठी "स हि वां धन्वाजिरं दाता न दाता पशुः" ऋ० ५।७।७। दाढर्म्मेण दानशब्दे दृश्यः ।

**दातूह** पुंस्त्री० दाप्–लवने क्विप् दातिमूहते जह–अण् दो–खण्डने क्विप् दितिं वहति वह–क जह् दितूहः ततः स्वार्थे अण् देविकाशिंशपेत्यादिना आत्वम् । १कालकण्ठके पक्षिभेदे अमरः । २जलकाके राजनि० । ३चातके मेदि० ४मेघे पु०शब्दर० । जातित्वे सर्वत्र स्त्रियां ङीप् । "सारसं रज्जुवालं च दात्यूहं शुकसारिके" मनुः "क्रव्यादपक्षिदात्यूहशुकग्रहदृढिह्विभानू" याज्ञ० ।

दात्यौह पुं॰स्त्री॰ दात्यूह+पृषो॰। दात्यूहे खगे शब्दर॰

दात्र न॰ दो–खण्डने दाप् लवने वा करणे ष्ट्रन्। छेदन साधने लवित्रे (दा) अस्त्रभेदे अमरः। "क्षुरैः क्षुरप्रैर्भल्लैश्च दात्रैरञ्जलिकैस्तथा" हरिव॰२१७ अ॰ "दात्रेण धान्यं लुनाति" व्या॰। दा–दाने कर्मणि त्र। २दातव्ये। "दात्रं यत्रोपदक्षति" ऋ॰८।४२।२१ "दात्रं दातव्यम्" कर्त्तरि त्र। ३दानकर्त्तरि "सोमस्य दात्रमसि" यजु॰१०।६"दात्रं दानकर्त्तृ" वेददी॰दा दाने भावे त्र। ४दाने "तद्वां दात्रं महि कीर्त्तेन्यम्" ऋ॰१।११६।६ "दात्रं दानम्" भा॰।

दात्र पु॰ दा–दाने त्रन्। १दातरि २यज्ञकर्मणि च उज्ज्वल॰।

दाद पु॰दद–भावे घञ्। दाने "दत्त्वा च विविधान् दादान् पूजयित्वा च वै द्विजान्" भा॰व॰ २७अ॰ "तत्र दत्त्वा बहून् दादान् विप्रान् संपूज्यमाधवः" ४०अ॰।

दाधिक त्रि॰ दध्नि दध्ना वा संस्कृतः दध्ना चरति दध्ना संस्कृतं उपसिक्तं वा ठक्। १दध्नि संस्कृतद्रव्ये २दध्नाचरिणि ३दध्ना संस्कृते ४दध्नोपसिक्ते च "बीजपूररसोपेतं सर्पिर्दधि चतुर्गुणम्। साधितं दाधिकं नाम गुल्महृत् प्लीहशूलजित्" सुश्रुतोक्ते गुल्मादिनाशके ५औषधभेदे न॰।

दाधित्य न॰ दाधित्यस्य विकारः अनुदात्तादित्वात् यञ्। दधित्यस्य कपित्थस्य विकारे। तस्य परिमाणम्। तत्प्रचयात् पुनरञ्। २दाधित्यपरिमाणे न॰।

दाष्टवि स्त्री दृवि–यङ्लुक् इन्। धरित्र्यां माधवः "पुत्रा यांवो तु दाष्टविभरध्यै" ऋ॰६।६६।३। "दाष्टविर्धरित्री" भा॰।

दाष्टर्षि त्रि॰ दृष–यङ्लुक्–इन्। अत्यन्तधर्षके "ब्रह्मणा वामि सवनेषु दाष्टर्षिः" ऋ॰२।७।७ "दाष्टर्षिर्धर्षकः" भा॰ "सत्राहणं दाष्टर्षिं तुम्बमिन्द्रम्" ऋ॰४।१६।८ "दाष्टर्षिमत्यन्तधर्षकम्" भा॰।

दान आर्जवे ऋजूकरणे सक॰ उभ॰ भ्वा॰ सार्वे सन्। छेदने तु न सन्। दीदांसति ते अदीदांसीत् अदीदांसिष्ट छेदने तु दानति ते। अदानीत् अदानिष्ट दीदांसयति दानयति। दीदांसति काष्ठं ऋजूकरोतीत्यर्थः दानति काष्ठं छिनत्तीत्यर्थः।

दान न॰दा–दाने दो–खण्डने दैप् शोधने वा भावादौ ल्युट्। १गजमदजले २दीयमाने त्रि॰ ३धने न॰ "दानं दत्त्वापि जलैः सङ्गसाधिरूढे" माघः "सेनाचरीभवदिभानदानवारिवासेन यस्य जनिता सुरभीरणश्रीः" नैष॰ "काश्मीरदानविच्छृतदानराजिः" रघुः। ४पालने ५छेदने ६शुद्धौ च खस्वत्यागादङ्गीकृतव्यापारभेदे स्वत्वाभिसम्बन्धानुपूर्वकस्वत्वत्यागे दानपदार्थनिरूपणं तदङ्गादिकं च शुद्धि॰ त॰ यथा

देवलः "अर्थीनासुदिते पात्रे श्रद्धया प्रतिपादनम्। दानमित्यभिनिर्दिष्टं व्याख्यानन्तस्य वक्ष्यते" अर्थीद्रव्यम्। उदिते शास्त्रकथिते श्रद्धा देवलोक्ता यथा "सत्कृतिश्चानसूया च सदा श्रद्धेति कीर्त्तिता"। अतएव भगवद्गीतासु "अश्रद्धया हुतं दत्तं तपस्तप्तं कृतञ्च यत्। असदित्युच्यते पार्थ! न च तत् प्रेत्य नेह च"। हरिवंशे वसिं प्रति भगवद्वाक्यम् "अग्नेरियं आङ्गमधीतमग्रतं त्वदर्पितं यज्ञमन्त्रविज्ञा हुतम्। अश्रद्धया दत्तमसंस्कृतं हविर्भागाः षड्ढेते तव दैवयुक्तव!"। प्रतिपादनं स्वीकरणं पात्रायत्तीकरणमिति यावत्। तेन शास्त्रोक्तस्वदानस्वत्वावच्छिन्नद्रव्यत्यागो दानम्। ततश्च उद्देश्यपात्रविशेषो यदि न स्वीकरोति तदा सोपाधित्यागविशेषस्यानिर्वाहान्न दातुः स्वत्वं निवर्त्तते इति रत्नाकरप्रभृतयः। वस्तुतस्तु "प्रदानं स्वाम्यकारणमिति" मनूक्तेर्दानमात्रात् सस्यदानस्य तद्विषयत्नानाभावदशायामपि स्वत्वसत्त्वाद्यते पितुः स्वत्वोपरमात्तद्दने गर्भस्थस्यैव। तेन शास्त्रोक्तसस्यदानस्वत्वापादकद्रव्यत्यागोदानम्। तथाच दत्तस्य प्रतिग्रहो न तु प्रतिग्रहघटितं दानमिति। व्यक्तमाह कात्यायनः "पित्रा दत्तमादाय गृहीत्वा निष्क्रामतीति" आदाय प्रतिगृह्य ततोऽन्यं गृहीत्वा वक्ष्यमाणमन्त्रेण निष्क्रामयतीत्यर्थः। "दत्त्वान्ते स्वस्तिवाचयेत्" इति वक्ष्यमाणवचनाच्चेति। अतएव मरीचिः "बन्धुगोषु यथा नष्टां मातरं लभते सुतः। मनसा यस्य यद्दत्तं तद्धि तस्योपतिष्ठते"। नचैतत्तर्पणमात्रपरं बन्धुगोषितीति दृष्टान्ताभिधानेन च यस्य यदिति सामान्याभिधानेन क्षीराधिकरणन्यायात् सामान्यपरं तेन श्राद्धादावपि तथा। "एकत्र निर्णीतः" इति न्यायाच्च। अतएव दत्तस्योद्देश्यपात्राभावेऽपि इतरधनवत्तद्धनस्वामिकत्वे प्रतिपत्तिमाह हेमाद्रिधृतधौम्यः "परोक्षे कल्पितं दानं पात्राभावे कथं भवेत्। गोत्रजेभ्यस्तथा दद्यात् तदभावेऽस्य बन्धुषु"। दानकल्पतरौ नारदः "ब्राह्मणस्य च यद्दत्तं सान्वयस्य न चास्ति सः।

सङ्कल्पे तस्य निमित्तस्यभावेऽस्य वस्तुनः। यदा तु न सङ्कल्पः स्यात्तच सम्बन्धिबान्धवाः। दद्यात् सजातिशिष्येभ्यस्तदभावेऽप्सु निःक्षिपेत्" अतएव श्राद्धीयाद्यस्य पात्राभावे जले प्रक्षेपः। अतएव "मनसा पात्रमुद्दिश्य भूमौ तोयं विनिःक्षिपेत्। विद्यते सागरस्यान्तो दानस्यान्तो न विद्यते" इति नारदीयोक्तम्। दानानन्तरमेव स्वीकारात् पूर्वं दक्षिणा क्रियते। यत्र तु पात्रविशेषानुद्देश्यकदानं तत्र दातुः प्रतिपत्त्युपदेशात् तदधीनसम्प्रदानविशेषनिरूपितस्वत्वं त्यागादेव जायते। तत्र प्रतिपादनमाह मत्स्यपुराणम् "न चिरं धारयेद्धेम्ने हेम संप्रोक्षितं बुधाः। तिष्ठद्धयापहं यस्मात् शोकव्याधिकरं नृणाम्। शीघ्रं परस्वीकरणाच्छ्रेयः प्राप्नोति पुष्कलम्"। "संप्रोक्षितं पात्रमुद्दिश्य त्यक्तमिति" हेमाद्रिः। अतएव विष्णुपुराणे "तस्मात् सर्वात्मना पात्रे दद्यात् कनकसत्तमम्। अपात्रे पातयेद्दत्तं सुवर्णं नरकार्णवे। प्रमादतस्तु तद्दत्तं तावन्मात्रं नियोजयेत्। अन्यथा क्लेशयुक्तः स्याद्धेमप्रदत्ते विनायिनि"। तद्धेम ब्राह्मणायोत्सृष्टं ब्राह्मणसादकृतम् यदि चौरादिनापह्रियते तदा तावदेव पुनरुत्सृज्य देयमिति दानसागरः। "द्रव्यमर्जयन् ब्राह्मणः प्रतिगृह्णीयात् याजयेदध्यापयेत्" इति श्रुतौ याजनाध्यापनसाहचर्यात् प्रतिग्रहस्य स्वत्वसर्जनयतोऽप्यर्जनरूपता न विरुद्धा याजनाध्यापनादौ दक्षिणादानादेव स्वत्वादिति दायभागः। अत्र प्रतिग्रहात् स्वयं प्राप्तुकमनुधौम्यनारदीयवचनविरोधात्। सम्प्रदानस्वीकारात् पूर्वं त्यक्तद्रव्यस्यान्येन ग्रहणे ब्रह्मस्वापहारापत्तेश्च। एवञ्च दाने सम्प्रदानस्य कारणतोद्देश्यत्वात्, नत्वनुमतिद्वारा मानाभावात् मनसा पात्रमनुद्दिश्येत्यत्र व्यभिचाराच्च। एवञ्च त्यागाच्चिरत्तमपि दातुः स्वत्वं संप्रदानायत्तग्रहणादसम्यक्त्वेन तस्यादानत्वश्रुतेर्दातुः पुनः स्वत्वमुत्पद्यते। तथाच नारदः "दत्त्वा दानमसम्यग्यः पुनरादातुमिच्छति। दत्ताप्रदानिकं नाम व्यवहारपदं हि तत्" असम्यक्त्वञ्च दानस्यादेयद्रव्यदानाद्वा व्ययार्थदानाद्वा सम्प्रदानस्यान्यादिना वा पित्र्यादसम्मत्यादिना वा दातुरेवागुद्वा व्यवस्थाभेदाद्वा इति वाचस्पतिमिश्राः। तथाच देवलः। "दाता प्रतिग्रहीता च श्रद्धा देयञ्च धर्मयुक्। देशकालौ च दानानामङ्गान्येतानि षड्विदुः"। धर्मयुक् न्यायार्जितं द्रव्यं तथाच विष्णुधर्मोत्तरम् "देशकाले तथा पात्रे धनं न्यायागतं तथा। यद्दत्तं ब्राह्मणश्रेष्ठाः! तदनन्तं प्रकीर्तितम्"। प्रतिग्रहाभावे प्रतिग्रहीतृरूपाङ्गाभावादसम्यक्त्वम्। दत्तस्याप्रदानं पुनर्हरणं यस्मिन् व्यवहारपदे तत्तथेति विज्ञानेश्वरः। अतएव यस्मादर्थं याचकाय धनं दत्तमपि तेन तदकरणे पुनस्तदुपग्रहणमाह मनुः "धर्मार्थं येन दत्तं स्यात् कस्मैचिद्याचते धनम्। पश्चात्र च तथा यत् स्यान्न देयन्तस्य तद्भवेत्"। दत्तस्य परिगृहीतस्य भक्तस्यापि पुनरादानश्रुतेः श्रुतरां पात्रस्योपेक्षायां तथेति। उपेक्षया स्वत्वहानिमाह हरिस्मृतिः "ग्राह्यमात्रं येन भुक्तं स्वीकृत्यापरिपन्थिनम्। तस्य तत् सिद्धिमाप्नोति हानिस्त्वोपेक्षया तथा"। अतएव प्रतिग्रहीतृस्वागात् फलं वक्ष्यते। अन्यत्र हारीतः "प्रतिश्रुत्याः प्रदानेन दत्तस्य छेदनेन च। विविधान् नरकान् याति तिर्यग्योनौ च जायते। वाचा यच्च प्रतिज्ञातं कर्मणा नोपपादितम्। तद्ऋणं ऋणसंयुक्तम् इह लोके परत्र च"। दत्तस्योच्छेदनं स्वयन्दत्तस्य द्रव्यस्य प्रतिग्रहीतृदानविक्रयादिकं विना छेदं बलात् स्वीकरणं तत्तद्विक्रीतादेर्यच्छनम्। तथा चाश्वमेधिके पर्वणि युधिष्ठिरं प्रति व्यासवाक्यं "दत्तैषा भवता मह्यं तान्तु भूमिं ददाम्यहम्। अरण्यं दीयतां मेऽद्य यावीत् पूर्वन्तु ते यतः" इति कात्यायनः "मुक्तेनार्त्तेन वा दत्तं आवितं धर्मकारणात्। अदत्त्वा तु मृते दाप्यस्तत्सुतोनात्र संशयः"। आर्त्तेन जन्मप्रभृति महारोगिव्यतिरिक्तरोगिणेत्यर्थः। महारोगिणां दाने "तेषां मध्ये तु यः कुष्ठी गर्हितः सर्वकर्मसु" इति प्रागुक्तभविष्यपुराणीयनिषेधात्। एवञ्च सुमुर्षुदत्तस्य यदुदानोपसर्गत्वाभिधानं तदूर्ध्वेतरदानपरम्। स्मृतिः "स्नात्वा शुद्धे समे देशे गोमयेनोपलेपिते। वस्त्रित्वा वसनं शुद्धं दानं दद्यात् सदक्षिणम्"। अत्र श्राद्धवत्कीर्तितदेशाभिधानात् "यज्ञोदानं तपोजप्यं श्राद्धञ्च सुरपूजनम्। गङ्गायान्तु कृतं सर्वं कोटिकोटिगुणं भवेत्" इति स्कान्दे गङ्गायामिति गङ्गातीरपरमिति गङ्गावाक्यावली। पाद्मे "शिवस्य विष्णोरग्नेश्च सन्निधौ दत्तमक्षयम्"। लिङ्गपुराणे "शालग्रामशिला यत्र तत्तीर्थं योजनद्वयम्। तत्र दानञ्च होमञ्च सर्वं कोटिगुणं भवेत्"। यत्र भूर्लोके। भूर्लोकमाह विष्णुपुराणम्। "यादगम्यञ्च यत् किञ्चि-

इत्यस्ति पृथिवीमयम्। स भूर्लोकः क्षमाख्यातोविस्तारोऽस्य मयोदितः" पृथिवीमयं पार्थिवम्। ततश्च शालग्रामस्य पात्रादावस्थानेऽपि तीर्थत्वमतएव केवलभूमौ शालग्रामावस्थानं तीर्थाय मैथिलानां दुराचरणमेव। शङ्खलिखितौ "आहारं मैथुनं निद्रां सन्ध्याकाले विवर्जयेत्। कर्म चाध्ययनञ्चैव तथा दानप्रतिग्रहौ"। स्मृतिः "गत्वा यद्दीयते दानं तदनन्तफलं स्मृतम्। सहस्रगुणमाहुश्च याचिते तु तदर्द्धकम्"। विष्णुधर्मोत्तरम् "क्लीदते द्विजसुख्याय योऽर्थिने न प्रयच्छति। सामर्थ्ये सति दुर्बुद्धिर्नरकायोपपद्यते"। यमः "आशां दत्त्वा तु दातारं दानकाले निषेधकम्। दत्त्वा म्लायते यस्तु तमाहुर्ब्रह्मघातकम्"। भात्रे "अनित्यं जीवितं यस्मात् वसु चातीव चञ्चलम्। तेनेदमिव सत्कीर्त्तिस्तु सत्वरं धर्ममाचरेत्"। भारते "एकां गां दशगुर्दद्याद्दश दद्याच्च गोशतौ। शतं सहस्रगुर्दद्यात् सहस्रं यज्ञगोधनः"। व्यासः "यामादर्द्धमपि याममर्थिभ्यः किञ्च दीयते। इच्छानुरूपोविभवः कदा कस्य भविष्यति"। तथा "भुक्त्वा दानं न गच्छते"। अतएवाग्निपुराणम् "घासमुष्टिं परगवे सान्नं दद्यात्तु यः सदा। अक्षय्या क्षयमाहारं स्वर्गलोकं स गच्छति"। देवलः "अपापरोगी धर्म्मात्मा दित्सुरव्यसनः शुचिः। अनिन्द्याजीवकर्म्मा च षड्भिर्दाता प्रशस्यते" अनिन्द्याजीवकर्म्मा अगर्हितजीवनोपायः। तथा "अपराधार्जितं प्रत्यैर्न्यायेनार्जितं धनम्। अल्पं वा विपुलं वापि देयमित्यभिधीयते"। अपराधं परपीड़ारहितम् अक्लेशं पात्रक्लेशाजनकम्। तथा "यत् यच्च दुर्लभं द्रव्यं यस्मिन् कालेऽपि वा पुनः। दानार्हौ देशकालौ तौ स्मृतौ श्रेष्ठौ न चान्यथा" देवलः "दृष्टं दत्तमधोतं वा विनश्यत्यनुकीर्त्तनात्। आचानुशोचनाभ्याञ्च भस्मतेजो विभिद्यते। तस्मादात्मकृतं पुण्यं हृष्टा न परिकीर्त्तयेत्" दृष्टं यजनं अनुकीर्त्तनं कथनं आचा प्रशंसा अनुशोचनं धनव्ययेन पश्चात्तापः। भस्मतेजः फलजननशक्तिहीनं हृष्टा रक्षादिप्रयोजनं विना। देवलः "पात्रेभ्यो दीयते नित्यमनपेक्ष्य प्रयोजनम्। केवलं धर्मबुद्ध्या यत् धर्मदानं प्रचक्षते"। प्रयोजनमिह लौकिकमभिप्रेतम्। याज्ञवल्क्यः "न विद्यया केवलया तपसा वापि पात्रता। यत्र ह्येतत्त्रयं चोभे तद्धि पात्रं प्रचक्षते"। दत्तमात्रारः। विष्णुधर्मोत्तरे "पतनात् त्रायते यस्मात् पात्रं तस्मात् प्रचक्षते"। महाभारते "पात्राणामपि तत् पात्रं शूद्रान्नं यस्य नोदरे"। अत्र साक्षाच्छूद्रदत्तस्यैतस्यैवाद्यानुपयोगीति दानसागरः। शूद्रस्यत्वान्नयाज्ञाभोजीति रत्नाकरः। वस्तुतस्तु क्रमूर्णप्रकरणाभिहितशूद्रान्नानुपयोगीत्यर्थः। याज्ञवल्क्यः "दातव्यं प्रत्यहं पात्रे निमित्तेषु विशेषतः"। निमित्तेषु गङ्गातीरादिसंक्रान्त्यादिषु। हरिवंशः "सहस्रगुणितं दानं भवेदक्षं युगादिषु। कर्म चाद्यादिकञ्चैव तथा मन्वन्तरादिषु"। विवादचिन्तामणौ वशिष्ठः "शुक्रशोणितसम्भवः पुत्रोमातापितृनिमित्तकः। तस्य प्रदानविक्रयपरित्यागे तु मातापितरौ प्रभवतः नत्वेकं पुत्रं दद्यात् प्रतिगृह्णीयात् वा स हि सन्तानाय पूर्वेषामिति"। कात्यायनः "विक्रयञ्चैव दानञ्च न नेयाः सुरनिष्क्रयः। दाराः पुत्राश्च सर्वस्वमात्मन्येव तु योजयेत्। आपत्काले तु कर्त्तव्यं दानं विक्रय एव च। अन्यथा न प्रवर्त्तेत इति शास्त्रार्थनिश्चयः"। एवं भरणासामर्थ्य एव परित्यागः। मनुः "यत्र वित्तागमाधर्म्यौ दायोलाभः क्रयोजयः। प्रयोगः कर्मयोगश्च सत्प्रतिग्रह एव च"। दायोऽन्वयागतः लाभो निधादेः। जयः संग्रामादेः। प्रयोगः कुशीदं, कर्मयोगः कृषिवाणिज्यपुत्रकन्यादि। हरिस्मृतिः "कुटुम्बभरणक्षमादेयं यदतिरिच्यते। मध्यात्स्वादो विषं पश्चादात्मधर्म्मोऽन्यथा भवेत्"। कौर्म्मे नरकाभ्यामित्यर्थः। अस्यापवादमाह स एव "कुटुम्बं पीड़यित्वा तु ब्राह्मणाय महात्मने। दातव्यं भिक्षवे चान्नमात्मनोभूतिमिच्छता"। अतएव भविष्यपुराणे "स्वल्पे महति वा तुल्यं फलमाद्यदरिद्रयोः"। विष्णुधर्मोत्तरे "यस्योपयोगि यद्द्रव्यं देयं तस्मै च तद्भवेत्"। हारीतः "तामसेन तु द्रव्येण ऋत्विग्भिस्तामसैस्तथा। तामसं भावमास्थाय तामसो यज्ञ उच्यते। तामसेन तु यज्ञेन दानेन तपसा तथा। निरये जन्म चेदाहुर्द्विं विद्याच्च तामसीम्"। तामसी दुर्द्धिर्ज्ञानाधिपत्यरूपा इति रत्नाकरः। "राजसेन तु द्रव्येण ऋत्विग्भीराजसैस्तथा। राजसं भावमास्थाय राजसोयज्ञ उच्यते। राजसेन तु यज्ञेन दानेन तपसा तथा। निरयस्वर्गयोर्जन्म क्रूरराज्यं श्रिया युतम्। सात्विकेन तु द्रव्येण ऋत्विग्भिः सात्विकैस्तथा। सात्विकं भावमास्थाय सात्विको यज्ञ उच्यते। सात्विकेन तु यज्ञेन दानेन तपसा

तथा। देवलोके ध्रुवं वासो देवसायुज्यमेव च"। मत्स्यपुराणञ्च "येषां पूर्वकृतं कर्म सात्विकं मनुजोत्तम!। पौरुषेण विना तेषां तेषाद्विदृश्यते फलम्। कर्मणा प्राप्यते लोके राजसस्य तथा फलम्। कृच्छ्रेण कर्मणा विद्धि तामसस्य तथा फलम्" इत्याद्यामपि तत्तद्देमाह नारदः "पार्श्विकद्यूतचौर्य्यार्त्तिप्रतिरूपकसाहसैः। व्याजेनोपार्जितं यद्यत्तत् कृच्छ्रं ससदाहृतम्। पार्श्विकः पाशतया योऽर्जयतीति प्रायश्चित्तविवेकः। आर्त्त्या परपीड़या, प्रतिरूपकेण कृत्रिमरत्नादिना, साहसेन ससहायानग्निर्य्यारोहणादिना, व्याजेन ब्राह्मणवेषेन शूद्रादिना। कृच्छ्रं तामसं इति रत्नाकरः। "कृषीदकुसीदवाणिज्यशुल्कशालानुवृत्तिभिः। कृतोपकारादाप्तञ्च राजसं ससदाहृतम्" अनुवृत्तिः सेवा। "श्रुतशौर्य्यतपःकन्यागिषग्याज्यान्ययागतम्। धनं सप्तविधं शुद्धं मुनिभिः ससदाहृतम्"। श्रुतेनाध्ययनेन शौर्य्येण जयादिना तपसा जपहोमदेवार्च्चनादिना कन्यागतं कन्यया सहागतं श्वशुरादेर्लब्धं गिषग्गतं गुरुदक्षिणादिना, याज्यागतं ऋत्विग्लब्धम् अन्ययागतं दायादिभ्योलब्धं शुद्धं सात्विकम्। अत्र स्वत्वहेतुभूतव्यापाररूपार्जनमात्रे शौर्य्यस्यापि निर्देशाच्छौर्य्योपात्तद्रव्येऽपि यथेष्टविनियोज्यत्वेन शास्त्रगम्यत्वरूपस्वत्वमस्तीति प्रतीयते भवदेवभट्टसम्मतोऽयं पक्षः। यत्तु "द्रव्यमस्वामिविक्रीतं पूर्वस्वामी समश्नुयात्" इति याज्ञवल्क्यीयेन चौरविक्रीतस्यास्वामिविक्रीतत्वसङ्गं तस्यास्वामिपदमप्रयुक्तस्वामिपरं "अप्राप्तव्यवहारो विरोधश्च नवार्थाः षट् प्रकीर्त्तिताः" इति प्रागुक्तत्वान्नतु स्वामित्वाभावपरं प्रागुक्तनारदवचनविरोधात्। "ब्राह्मणस्वं न हर्त्तव्यं क्षत्रियेण कदाचन। दस्युनिष्क्रिययोस्तु स्वमजीवन् हर्त्तुमर्हति" इत्यनेन चौरस्वत्वभिधानाच्च अतएव याज्ञवल्क्यः बुभुक्षितस्त्वग्रहं स्थित्वा धान्यमब्राह्मणाहरेत्"। मनुरपि "तथैव सप्तमे भक्ते भक्तानि षड़नश्नता। अश्वस्तनविधानेन हर्त्तव्यं हीनकर्मणः" इत्याभ्यां तत्रैकोपवासषड़पवासानन्तरं धान्यचौर्य्येण जीवनाभिधानात्तदन्नस्य बलिवैश्वदेवार्हता प्रतीयत इति। (अहोरात्रे भोजनद्वयविधानात् त्रिरात्रोपवासे षड़भोजनस्य सम्भवेन वाक्ययोरेकवाक्यत्वया त्रिरात्रोपवास एव सिद्ध्यति। अतः षड़ोपवासस्य पाक्षिकत्वोक्तिश्चिन्त्यमूला)। अत्र हरिवंशीयसप्तव्याधोपाख्याने "ते नियोगाद्गुरोस्तस्य गां दोग्ध्रीं समपालयन्। क्रूरा बुद्धिः समभवत्तां गां वै हिंसितुं तदा। पितृभ्यः कल्पयित्वैनामश्नीत भारत!। क्षतिः प्रत्यवमर्षश्च तेषां जात्वन्तरेऽभवत्"। अत्र गुरोर्गां हत्वा व्याधेन चौराणामपि जातिस्मरत्वदर्शनाद्धैर्य्येण स्वत्वं प्रतीयते। एतत्तु अज्ञानाभक्षानां भक्षानां तु मत्स्यपुराणे "ग्रामस्थं ब्राह्मणं शास्त्रं काञ्चनं सलिलं स्त्रियः। मातरं पितरञ्चैव ये निन्दन्ति नराधमाः। न तेषामूर्द्धगमनमेवमाह प्रजापतिः। परस्वं हरते यस्तु पश्चाद्दानं प्रयच्छति। न स गच्छति वै स्वर्गं दातारो यत्र भोगिनः" इति सात्विकराजसिकवत् फलाभावपरम्। अन्यथा प्रागुक्तहारीतादिवचनविरोधापत्तेः। भ्रातातपपराशरौ "सञ्चितटमधीयानं ब्राह्मणं यो व्यतिक्रमेत्। भोजने चैव दाने च दृष्ट्वासप्तमं कुलम्" यमिष्ठव्यासपराशराः "यस्य चैकस्मिन् मूर्खो दूरे चैव बहुश्रुतः। बहुश्रुताय दातव्यं नास्ति मूर्खे व्यतिक्रमः"। भ्रातातपः "मन्त्रपूर्वञ्च यद्दानमपात्राय प्रदीयते। दातुर्निष्फलदं तद्धि ऊर्जिङ्गां निगलन्ति। न ददस्वेति यो ब्रूयात् देवाग्नौ ब्राह्मणेषु च। तिर्य्यग्योनिशतं गत्वा चाण्डालेष्वभिजायते"। वशिष्ठः "परिभुक्तमवज्ञातमपध्यानमसंस्कृतम्। यः प्रयच्छति विप्रेभ्यस्तद्धव्यवनिगच्छते"। अपध्यानं स्वकार्य्याच्चलम्। यमः "सुवर्णं रजतं ताम्रं यतिभ्यो यः प्रयच्छति। न स तत्फलमाप्नोति तत्रैव परिवर्त्तते"। अत्रैव दत्तफल एवावतिष्ठते न स्वर्गादिफलमाप्नोतीत्यर्थः। महाभारते "पङ्गन्धबधिरामूकाव्याधितोपहृताश्च ये। भर्त्तव्यास्ते महाराज! न तु देवः प्रतिग्रहः"। व्याधिना यक्ष्मादिना। व्यासः "मातापितृभ्यां यद्दत्तं यद्दत्तं भ्रातृबन्धुषु। आत्मजेषु च यद्दत्तं सोऽनन्तस्वर्गसंक्रमः। पितुः शतगुणं दानं सहस्रं मातुरेव च। अनन्तं दुहितृदानं कोटयं दत्तमक्षयम्"। विशेषयति नारदः "साक्षित्वं प्रातिभाव्यञ्च दानं यड़्गणमेव च। विभक्ता भ्रातरः कुर्युर्नाविभक्ताः परस्परम्। योऽसङ्ग्रः प्रतिग्रहाप्ति पुनः सङ्ग्रः प्रयच्छति। आत्मानं संक्रमं कृत्वा परांस्तारयते हि सः" धनस्वामिनमात्मानं सन्तारयति दुस्तरमिति। शेषार्द्धं स्वान्दे विशेषः। गौतमः "अनर्जानु करं कृत्वा सकृन्नन्तु तिलोदकम्। फलांशमभिसन्धाय प्रदद्याच्छ्रद्धयान्वितः"। उदकस्तुतिमभिधायाह हारीतः "तस्मादद्भिर-

वोच्यैतद्ददद्यादानभ्य एव च" इति यवोच्य प्रोच्येति रत्नाकरः। अत्र यद्यपि "उत्तानेन तु हस्तेन प्रोक्षणं वसुदाहृतम्। न्युब्जेनाभ्युक्षणं प्रोक्तं तिरश्चावोक्षणं स्मृतम्" इति वर्द्धमानधृतेन विरुद्धम्। अतएव कृत्यसाङ्गतौ प्रोक्षणाभ्युक्षणादिभिरिति भेदेनोक्तं तथापि "यस्य यद्दीयते वस्त्रमलङ्कारादि काञ्चनम्। तेषां दैवतस्यार्घ्यं कृत्वा प्रोक्षणपूजने। उत्सृज्य मूलमन्त्रेण प्रतिनाम्ना प्रतर्पयेत्" इति कालिकापुराणाद्व्याख्यानेऽपि न शास्त्रविरोधः। वस्तुतस्तु उभयदर्शनाद्वैकल्पिकम्। आनभ्य पाणिना स्पृष्ट्वा। आपस्तम्बः "सर्वाण्युदकपूर्वाणि दानानि यथाश्रुति वीक्षारे" इति। अन्वाहार्य्यदानादौ यथाश्रुति यावदेव श्रूयते तावदेव कुर्य्यात् वीक्षारे यत्ते नोदकपूर्वतानियमः इति कल्पतरुरत्नाकरौ। अन्वाहार्य्यममावस्याश्राद्धं एवञ्चापस्तम्बस्यैकवाक्यत्वात् यथाश्रुति वीक्षारः इति जैमिनिसूत्रेऽपि श्रुतिरुत्पत्तिवाक्यं शाब्दी व्युत्पत्तिश्च तेनोत्पत्तिव्युत्पत्तिवाक्ययोरर्थः यथाश्रुतः स एव विनियोगवाक्ये यावान् इति सूत्रार्थः। नतु श्रुतेरेव शब्दैर्वाक्यरचना कार्य्येत्यर्थः मूलभूतश्रुत्यन्तरकल्पनापत्तेरदृष्टार्थतापत्तेश्च। ततश्च सङ्कल्पादिवाक्ये सङ्कल्पविषयीभूतस्यार्थस्याभिलप्यमानत्वादभिलाषे तु तद्वाचकसर्वशब्दानां सामर्थ्यात् श्रुतशब्दस्य नियमो नास्ति अन्यथा विश्वजिता यजेतेत्यादौ स्वर्गकाम इत्यभिलाषो न स्यादश्रुतत्वात् तथा "कपिलाकोटिदानात्तु गङ्गास्नानं विशिष्यते इति ब्रह्माण्डपुराणात् कपिलाकोटिदानजन्यफलाधिकफलप्राप्तिकाम इति शिष्टानुमताभिलाषो न स्यात्। अतएव यज्ञादीनां नानाश्रुतिभिर्नानानाम्नोक्तानि तेषां यत् किञ्चिन्नाम्नोल्लेखाय। तथाच मत्स्यपुराणम् "सूर्य्यः सोमस्तथा भौमो बुधजीवसितार्कजाः। राहुः केतुरिति प्रोक्ता ग्रहाः लोकहितावहाः"। याज्ञवल्क्यः "सूर्य्यः सोमो महीपुत्रः सोमपुत्रः बृहस्पतिः। शुक्रः शनैश्चरो राहुः केतवेति ग्रहाः स्मृताः" अत्र त्वेकस्य देवस्य पूजादौ विधिप्राप्ते नानानामोपादानं तत्र ततएव तान्येवाभिलप्यानि न तु नामान्तराणि यत्र यत्र बहुभिर्नामभिर्विधानमामिधीयते तत्र तदेव वक्तव्यं तथाभिधानेन श्रुतिस्तत्रैव तात्पर्य्यं प्रतीयते। एवञ्च विधिशब्दस्य मन्त्रत्वे भावः स्यादिति न्यायेनापि विधिशब्दस्य विधिवाक्यस्यदेवताप्रतिपादकमात्रस्य मन्त्रत्वम्यादस्त्वं बोध्यम्, योगियाज्ञवल्क्येन "मित्रोधाता भगस्त्वष्टा पूषार्य्यमांशुरेव च। पर्य्यायनामभिश्चैव एकएव निगद्यते" तथा। "वाचकेऽपि च विज्ञाते वाच्यएव प्रसीदति" इत्युक्तम्। अतएव मनुः "वाग्दैवत्यैश्च चरुभिर्यजेरंस्ते सरस्वतीम्। अनन्तस्यैनसस्तस्य कुर्वाणा निष्कृतिं पराम्"। अत्र वाग्देवता सरस्वतीति श्रुतेर्वाक्सरस्वत्योरेकार्थत्वात् वाग्दैवत्यैश्चरुभा सरस्वती यजनं संगच्छते। अन्यथा नामभेदाद्देवताभेदे विरुद्धं स्यात्। तेऽसत्यवचने सम्भाव्यमाने शूद्रविट्क्षत्रियविप्रवधविषयान्हतादिसाक्षिणः। स्मृतिः "नामगोत्रे समुच्चार्य्य प्राङ्मुखो देवकीर्त्तनात्। उदङ्मुखाय विप्राय दत्त्वान्ते स्वस्ति वाचयेत्"। देवकीर्त्तनादिति ल्यब्लोपे पञ्चमी देवकीर्त्तनं कृत्वेत्यर्थः। ततश्च दात्रानुकूलदैवतं विष्णुदैवतं वा वक्तव्यमिति।

देयद्रव्यदेवा विष्णुधर्मोक्ता यथा "अभयं सर्वदैवत्यं भूमिर्वै विष्णुदेवता। कन्या दासस्तथा दासी प्राजापत्याः प्रकीर्त्तिताः; प्राजापत्यो गजः प्रोक्तस्तुरगोयमदैवतः। तथा चैकशफं सर्वं कथितं यमदैवतम्। महिषश्च तथा याम्य उष्ट्रो वै नैर्ऋतो भवेत्। रौद्री धेनुर्विनिर्दिष्टा अजा आग्नेय उच्यते। मेषस्तु वारुणं विद्याद्वराहो वैष्णवः स्मृतः। आरण्याः पशवः सर्वे कथिता वायुदैवताः। जलाशयानि सर्वाणि वारिधानीं कमण्डलुम्। कुम्भञ्च करकञ्चैव वारुणानि विनिर्दिशेत्। वसुद्रव्याणि रत्नानि वासुद्रव्याणि तथैव च। आग्नेयं कनकं प्रोक्तं सर्वलौहानि चाग्नय। प्राजापत्यानि शस्यानि पक्वान्नमपि च द्विजाः!। ज्ञेयानि सर्वगन्धानि गान्धर्वाणि विचक्षणैः। वार्क्षसत्वं कृतं वासः सौम्यानि रजतानि च। पक्षिणश्च तथा सर्वे वायव्याः परिकीर्त्तिताः। विद्या ब्राह्मी विनिर्दिष्टा विद्योपकरणानि च। सारस्वतानि ज्ञेयानि पुस्तकाद्यानि पण्डितैः। सर्वेषां शिल्पभाण्डानां विश्वकर्मा तु दैवतम्। द्रुमाणामथ पुष्पाणां शाकानां फलितैः सह। फलानामपि सर्वेषां तथा ज्ञेयो वनस्पतिः। मत्स्यमांसे विनिर्दिष्टे प्राजापत्ये तथैव च। अत्र कृष्णाजिनं शय्या रथमासनमेव च। उपानद्यौ तथा यानं तथा यत् प्राणवर्जितम्। औत्तानाङ्गिरसं त्वेतत् प्रतिगृह्णीत मानवः। पार्थिवस्तु तथोशीरं वर्मशस्त्रध्वजादिकम्। व्रतोपकरणं सर्वं कथितं सर्वदैवतम्। गृह्णन्तु सर्वदैवत्यं यदुक्तं द्विजोत्तमाः!। तज्ज्ञेयं विष्णुदैवत्यं सर्वं वा विष्णुदैवतम्। देवकीर्त्तनादित्यत्र

देवकीर्त्तनादिति षट्त्रिंशन्मते पाठः व्याख्यातश्च हेमाद्रिणा "देवकीर्त्तनोत्तरकालं दत्त्वेत्यर्थः।

विष्णुधर्मोत्तरेऽपि "द्रव्यस्य नाम सङ्कीर्त्याद्दानीति ततो वदेत्। तोयं दद्यात्तथा दाता दाने विधिरयं स्मृतः"। व्यासः "नामगोत्रे समुच्चार्य्य प्रदद्याच्छ्रद्धयान्वितः। परितुष्टेन भावेन तुभ्यं सम्प्रददे" इति। सम्प्रदानवाक्योच्चारं प्रयोगमाह कात्यायनः "अहमस्मै ददानीति एवमाभाष्य दीयते" एवञ्च सम्प्रददे ददानीत्येतयोर्विकल्पः स च व्यवस्थितः आत्मगामिफले सम्प्रददे परगामिफले ददानीति उभयपदित्वात् दाधातोः फलवति कर्त्तर्य्यात्मने पदं दृश्यते अफलवति कर्त्तरि परस्मैपदमिति पाणिनिस्मरणात्। अतएवात्मनेपदं परस्मैपदम् इत्येतदोरात्मने परस्मै इत्याभ्यां समाख्या सङ्गच्छते। ददानीत्यस्य दद इतिवत् वर्त्तमानार्थतेति। अतएव "सकृदाह ददानीति" मनुनाप्युक्तं सङ्गच्छते अनुमत्यर्थं तु सकृत्त्वाभिधानमप्रयोजकमिति। श्राद्धादौ फलभागिनां गोत्राद्युल्लेखदर्शनात् तदितरत्रापि तथोल्लेखाचारः। हारीतः "यथासद्द्रव्यदानमस्वर्ग्यं यच्च दत्त्वा परितप्यते तद्दानमफलं यज्ञोपकारिणे ददाति तन्नात्मं परिक्लिष्टं यच्च सोपधं ददाति अन्यत्रावितमलं यज्ञापात्राय ददाति अनिष्टदानं स्रवति यच्छ्रद्धया ददाति क्रोधाद्दानं यच्चाक्रुश्य ददाति दत्त्वा वा क्रोशति अयतकृतं प्रैषाच्च यच्चावज्ञातं ददाति दत्त्वा वावजानीते सम्भोक्तासमं यच्चाप्रकृतो ददाति एते दानोपसर्गायैरुपसृष्टं दानमप्रसिद्धमस्वर्ग्यमयशस्यमध्रुवफलं भवत्यल्पफलं वेति"। तर्हि त्यागानन्तरकाले, हस्तार्पणसमवेऽप्यदानमसमर्पणम्। उपकारिणे व्यसनोपकारिणे तदितरोपकारिणे तु दद्यः। "मातापित्रोर्गुरौ मित्रे विनीते चोपकारिणे। दीनानाथविशिष्टेभ्यो दत्तन्तु सफलं भवेत्"। तन्नात्मं यथोक्तोपकरणरहितम्। सोपधं सङ्कल्पान्यत्रावितं लोकसमाचरणार्थं प्रकाशितम्। अनिष्टदानं यत्नजे दानं, क्रयोभानभेदः अप्रकृतोभयादिमान्। तथाच नारदः "अदत्तन्तु भयक्रोधकामयोकसमन्वितैः। बालमूढाप्तसत्कार्त्तमत्तोन्मत्तापवर्जितम्। कर्त्ता ममेदं कर्म्मेति प्रतिलाभेच्छया च यत्"। "प्रतिलाभेच्छया सोपाधिदत्तमुपाध्यधिष्ठौ" इति विवादचिन्तामणिः। एतत्परमेव हारीतेन सोपधमित्युक्तम्"। हेमाद्रौ दानञ्च दानाङ्गादिकं विस्तरेणोक्तं यथा

"अथ दानाङ्गनिरूपणम्। तानि च प्रतिग्रहीतृ द्रव्यकालदेशश्रद्धासंज्ञकानि। तदुक्तं भविष्यपुराणे "प्रतिग्रहीता द्रव्यञ्च कालो देशश्च पावनः। श्रद्धा च सात्त्विकी चेयं दानानामङ्गपञ्चकम्"।

तत्र प्रतिग्रहीतृपात्रनिरूपणम्। स्कन्दपुराणे देवीं प्रति ईश्वरवचनम् "श्रुतीनामाकराश्चैते रत्नानामिव सागराः। विप्रा विप्राधिपमुखे! पूजनीयाः प्रयत्नतः"। विप्राधिपः चन्द्रः तद्वन्मुखं यस्याः सा तथा देवीसम्बोधनमेतत्। "यत्र वेदविदो विप्रा न प्राञ्चस्त्युक्षं हविः। न तत्र देवा देवेशि! हविरन्नन्ति कर्हिचित्"। तथाच तैत्तिरीयश्रुतिः "यावतोर्व्वै देवतास्ताः सर्व्वा वेदविदि ब्राह्मणे वसतीत्यादि"। "विवदित्युच्यते व्योम प्रकारः प्राणने स्मृतः। दिवं सम्प्राप्नवन्त्येते दातृन् विप्रास्ततः स्मृताः। अपि नारायणोऽनलो ब्रह्मा स्कन्दोऽग्निः शिखी। तद्दानं नाभिनन्दन्ति यत्र विप्रा न पूजिताः। येषां प्रसादसुलभ-मायु-र्धर्म्मः सुखं धनम्। श्री-र्यशः-स्वर्गवासश्च तान् विप्रानर्च्चयेद्बुधः"। विष्णुधर्म्मोत्तरे श्रीभगवानुवाच "ब्राह्मणैः पूजितैर्नित्यं पूजितोऽहं न संशयः। निर्मन्त्रितैश्च निर्मन्त्रैस्तैरहं सर्वकर्म्मसु। विप्राः परा गतिर्मह्यं यस्मात् पूजयते नृप!। तस्मन्त्वेन रूपेण प्रपद्यामि युधिष्ठिर!। काणाः कुण्डाश्च षण्ढाश्च दरिद्रा व्याधिताश्च ये। एवंरूपाश्च ये विप्राः पश्य रूपं ममैव ते"। एतच्च ब्राह्मणजातिमात्रस्तुतिपरम्। याज्ञवल्क्यः "तपस्तप्त्वाऽऽहरह्ब्रह्म ब्राह्मणान् वेदशुश्रवे। तत्प्रत्यं पितृदेवानां धर्मसंरक्षणाय च"। मनुस्मृतः "नास्ति विप्रसमो देवो नास्ति विप्रसमो गुरुः। नास्ति विप्रात् परः शत्रुर्नास्ति विप्रात् परो विधिः"। वह्निपुराणम् "न जातिर्न कुलं राजन्! न स्वाध्यायः श्रुतं न च। कारणानि द्विजत्वस्य वृत्तमेव तु कारणम्। किं कुलं वृत्तहीनस्य करिष्यति दुरात्मनः। ह्रदयः किं न जायन्ते कुसुमेषु सुगन्धिषु। नैकमेकान्ततो याति पठनं हि विशाम्पते!। वृत्तमस्थितां तात! रज्जोभिः किं न यज्यते। बहुना किमधीतेन यदल्पेऽपि दुरात्मनः। तेनाधीतं श्रुतं वापि यः क्रियामनुतिष्ठति। कपालस्थं यथा तोयं स्रवते च यथा पयः। दुग्धं स्यात् स्यानदोषेण, वृत्तहीनं तथा श्रुतम्। तस्माद्विद्धि महाराज! वृत्तं ब्राह्मणलक्षणम्। चतुर्वेदोऽपि दुर्वृत्तः

शूद्रादत्यन्तरः स्मृतः। सत्यं दम-स्तपोदानमहिंसेन्द्रिय-निग्रहः। दृश्यन्ते यत्र राजेन्द्र! स ब्राह्मण इति स्मृतः"। वशिष्ठः "यं न सत्यं न दानं न क्षान्तं नाहुतं न ब्रह्मधुतम्। न सुवृत्तं न दुर्वृत्तं वेद कश्चित्स ब्राह्मणः"। मनु, विशिष्टः यमन्, तद्विपरीतः। अत्र चात्मोत्कर्षप्रकाशनं यो न करोति स पात्रमिति तात्पर्यमिति। यमः "अहिंसानिरतो नित्यं जुह्वानो जातवेदसम्। स्वदारनिरतो दाता स वै ब्राह्मण उच्यते। श्रुतं प्रज्ञानुगं यस्य प्रज्ञा चैव श्रुतानुगा। असम्भिन्नार्यमर्यादः स वै ब्राह्मण उच्यते। आशिषोऽर्थं पूजाञ्च प्रसङ्गान्न करोति यः। निवृत्तो लोभ-मोहाभ्यां तं देवा ब्राह्मणं विदुः"। 'आशिषः' आशीर्वादान्,-'अर्थं' धनलाभाय। प्रसङ्गः अत्यासक्तिः। "सत्यं दानं क्षमा शीलमानृशंस्यं दया घृणा। दृश्यन्ते यत्र नोकेऽस्मिंस्तं देवा ब्राह्मणं विदुः"। अत्रिशातातपौ "तपोधर्मो दया दानं सत्यं शौचं श्रुतं घृणा। विद्याविज्ञानमास्तिक्य-मेतद्ब्राह्मणलक्षणम्"। बौधायनः "विद्या तपश्च योनिश्च एतद्ब्राह्मणलक्षणम्। विद्यातपोभ्यां योहीनो जातिब्राह्मण एव सः"। वशिष्ठः "ये शान्तदान्ताः श्रुतपूर्णकर्णा जितेन्द्रियाः प्राणिवधे निवृत्ताः। प्रतिग्रहे सङ्कुचिताग्रहस्ताः ते ब्राह्मणास्तारयितुं समर्थाः"। यमः "विद्यावन्तश्च ये विप्राः सुव्रताश्च तपस्विनः। सत्य-संयम-संयुक्ता ध्यान-युक्ता जितेन्द्रियाः। पुनन्ति दर्शनं प्राप्ताः किं पुनः संगतिं गताः। तेषां दत्त्वा च संभोज्य प्राप्नुयुः परमां गतिम्। दत्त्वा द्विजाय शूद्राय दाता याति शुभां गतिम्। विद्यातपःशीलयुतं च स च तारयते नरः"। कूर्मपुराणे "श्रोत्रियवन्तो ये विप्रा विद्यावन्तो-जितेन्द्रियाः। सत्यसंयमयुक्ताश्च तेभ्यो दद्यात् द्विजोत्तमाः!। श्रोत्रियाय कुलीनाय विनीताय तपस्विने। व्रतस्थाय दरिद्राय प्रदेयं भक्तिपूर्वकम्"। संवर्तः "श्रोत्रियाय दरिद्राय क्षयिने च विशेषतः। यद्दानं दीयते तस्मै तद्दानं शुभकारकम्"। श्रोत्रियस्तु, यमेनोक्तः "ओंकारपूर्विकास्तिस्रः सावित्रीर्यश्च विन्दति। चरितब्रह्मचर्यश्च स वै श्रोत्रिय उच्यते" ओंकारपूर्विका महाव्याहृतीरिति शेषः"। याज्ञवल्क्यः "सर्वस्व प्रभवोविप्रा श्रुताध्ययनशालिनः। तेभ्यः क्रियापराः श्रेष्ठास्तेभ्योऽप्यध्यात्मवित्तमाः"। पद्मपुराणे "यथाहि सर्वदेवानां श्रेष्ठः श्रेष्ठः पितामहः। तथा ज्ञानी सदा पूज्यो निर्ममोनिरहंकृतिः"। मत्स्यपुराणे "शीलं संवासतो ज्ञेयं शौचं संव्यवहारतः। प्रज्ञा संकथनात् ज्ञेया त्रिभिः पात्रं परीक्ष्यते"। भविष्यपुराणे "क्षान्ति-सृष्टा-दया-सत्यं-दानं शौचं तपः श्रुतम्। एतदष्टाङ्गसंदिष्टं परमं पात्रलक्षणम्"। वशिष्ठः "स्वाध्यायाढ्यं योनिमन्तं प्रधानं वैतानस्थं पापभीरुं बहुज्ञम्। क्षीणे क्षान्तं धार्मिकं गोशरण्यं व्रतैः क्षान्तं तादृशं पात्रमाहुः"। योनिमान् *प्रशस्तकुलोद्भवः। वैतानस्थः अग्निहोत्रादिकर्मपरः। क्षीणे क्षान्तः स्त्रीविषये क्षान्तः। गोशरण्यः गोषु शूरतः"। यमः "विद्यायुक्तो धर्मशीलः प्रधानः क्षान्तोदान्तः सत्यवादी श्रुतज्ञः। दक्षिणम्लानो गोक्षितो गोशरण्यो दाता यज्वा ब्राह्मणः पात्रमाहुः। स्वाध्यायवान् नियमवांश्चपक्षी ध्यानविच्च यः। क्षान्तो दान्तः सत्यवादी विप्रः पात्रमिहोच्यते" महाभारते "साङ्गांस्तु चतुरो वेदान् योऽधीते वै द्विजर्षभः। षडङ्गोऽनिहुतः कर्मश्रुत्तं पात्रमृषयोविदुः"। 'पात्र' पालतमभित्यर्थः। वशिष्ठः "किञ्चिदेतमयं पात्रं किञ्चित्पात्रं तपोमयम्। पात्राणामपि तत् पात्रं मूलात्रं यस्य नोदरे"। हरीतः "किञ्चिदेतमयं पात्रं किञ्चित्पात्रं तपोमयम्। यन्मिश्रयति यत् पात्रं तत्पात्रं तारयिष्यति। ब्रह्मचारी भवेत्पात्रं पात्रं वेदस्य पारगः। पात्राणामुत्तमं पात्रं मूलात्रं यस्य नोदरे"। व्यासः "किञ्चिदेतमयं पात्रं किञ्चित्पात्रं तपोमयम्। यन्मृत्तीर्णं च यत्पात्रं तत्पात्रं तारयिष्यति"। अयन्मृत्तीर्णं योन्यादिसङ्कररहितम्। याज्ञवल्क्यः "न विद्यया केवलया तपसा वापि पात्रता। यत्र वृत्तमिमे चोभे तद्धि पात्रं प्रकीर्त्तितम्"। देवलः "पात्रञ्च ब्राह्मणश्चैव श्रोत्रियश्च ततः परः। अनूचानस्तथा भ्रूण-ऋषिकल्प ऋषिर्मुनिः। एतेतेऽष्टौ समुद्दिष्टा ब्राह्मणाः प्रथमं स्मृतौ। तेषां परः परः श्रेष्ठो विद्यावृत्तविशेषतः। ब्राह्मणानां कुले जातो जातिमात्रो यदा भवेत्। अनुपेतः क्रियाहीनो मात्र इत्यभिधीयते"। अनुपेतः उपनयनरहितः। "एकदेशमतिक्रम्य वेदस्याचारवान्ऋजुः। स ब्राह्मण इति प्रोक्तो निभृतः सत्यवाङ्मुनी"। एकदेशातिक्रमः वेदस्य किञ्चिदूनस्याध्ययनम्। निभृतः

शास्त्रः। "एकां शाखां सकल्पां वा षड्भिरङ्गैरधीत्य वा। षट्कर्मनिरतो विप्रः श्रोत्रियो नाम धर्मवित्। वेद-वेदाङ्ग-तत्त्वज्ञः शुद्धात्मा पापवर्जितः। श्रेयं श्रोत्रियवत् प्राप्तः सोऽनूचानं इति स्मृतः। अनूचानगुणोपेतो यज्ञ-स्वाध्यायसन्नतः। भ्रूणवत्त्वुच्यते शिष्टैः श्रेयभोजी जितेन्द्रियः। वैदिकं लौकिकञ्चैव सर्वं ज्ञानमवाप्य यः। आत्मस्थो वशी नित्यमधिकस्य इति स्मृतः"। लौकिकम् अर्थार्जनादिज्ञानम्। "ऊर्द्ध-रेतास्त्वस्थ्यु ये नियताशो न संशयी। आपोनुग्रहयोः शक्तः सत्यसन्धो भवेदृषिः। निवृत्तः सर्वतत्त्वज्ञः काम-क्रोधविवर्जितः। ध्यानस्थो निस्पृहो दान्तस्तुल्यमृत्-काञ्चनो मुनिः। निवृत्तः निषिद्धकाम्यकर्मभ्यः। निस्पृहः अर्थार्जनादिक्रियारहितः। "एवमन्यविद्याभ्यां इत्तेन च समन्विताः। त्रिशुक्ला नाम विप्रेन्द्राः पूज्यन्ते सवनादिषु"। सवनादिषु यज्ञादिषु। "प्रतिग्रह-समर्थोऽपि कृत्वा विप्रो यथाविधि। निवारयति दाता-रमात्मानञ्च स्वतेजसा। समर्थोऽपि, समर्थएवेत्यर्थः। "न लोके ब्राह्मणेभ्योऽन्यत् पवित्रं पुण्यमेव वा। अग-म्यञ्च द्विजेन्द्राणां नास्ति इत्तवतामिति। योक्तव्यो हव्यकव्येषु त्रिशुक्लो ब्राह्मणो द्विजैः। अभिभूतञ्च पूर्वोक्तैर्दोषैः स्पृष्टञ्च नेष्यते"। अभिभूतः अपकृष्टः। पूर्वोक्तैः कुलविद्याचारैः। दोषैः उपपातकादिभिः। मनुः "पात्रस्य हि विशेषेण श्रद्धानस्यैव च। अल्पं वा बहु वा प्रेत्य दानस्य प्राप्यते फलम्"। दक्षः "सम्यं द्विगुणमाहस्रमनन्तञ्च यथाक्रमम्। दाने फल-विशेषः स्याद्विधायामेवमेव हि। शतमब्राह्मणे दानं द्विगुणं ब्राह्मणव्रुवे। सहस्रगुणमाचार्ये अनन्तं वेद-पारगे"। 'अब्राह्मणः, राजभृतादिः। यदाह शाता-तपः। "अब्राह्मणास्तु षट्प्रोक्ता ऋषिः शातातपोऽब्र-वीत्। आद्योराजभृतस्तेषां द्वितीयः क्रयविक्रयी। तृतीयो बहुयाज्यः स्यात् चतुर्थो ग्रामयाजकः"। बहवो याज्या यस्य स बहुयाज्यः। "पञ्चमस्तु भृतस्तेषां ग्रामस्य नगरस्य वा"। ग्रामस्य नगरस्य भृत इत्यन्वयः। "अना-गतान्तु यः पूर्वां संदित्याद्वै पश्चिमाम्। नोपासीत द्विजः सन्ध्यां स यतोऽब्राह्मणः स्मृतः"। 'ब्राह्मणव्रुवस्तु, परम्परादपात्रेषु व्याख्यास्यते"। आचार्यस्तु महाभारते "अध्यापयेत्तु यः शिष्यं ऋतोपनयनं द्विजः। सरहस्यञ्च सकलं वेदं भरतसत्तम!। तमाचार्यं महाबाहो! प्रव-दन्ति मनीषिणः। एकदेशन्तु वेदस्य वेदाङ्गान्यपि वा पुनः। योऽध्यापयति इत्त्यर्थमुपाध्यायः स उच्यते। निषे-कादीनि कर्माणि यः करोति यथोदितम्!। सम्भावयति चान्नेन स विप्रोगुरुरुच्यते। आम्नायेषु पाकयज्ञा नग्निष्टोमादिकं तथा। यः करोति इतो नूनं स तु स्याद्ऋत्विजो द्विजः"। यमः "सममब्राह्मणे दानं द्विगुणं ब्राह्मणव्रुवे। प्राधीते शतसाहस्रमनन्तं वेदपारगे। 'प्राधीतः, पारम्याध्ययनः। "उत्पत्तिं प्रलयञ्चैव भूता-नामागतिं गतिम्। वेत्ति विद्यामविद्याञ्च स भवेद्वे-दपारगः"। दक्षस्मृतिः "शूद्रे समगुणं दानं वैश्ये तु द्विगुणं स्मृतम्। क्षत्रिये त्रिगुणं प्राहुः षड्गुणं ब्राह्मणे स्मृतम्। श्रोत्रिये चैव साहस्रमाचार्ये द्विगुणं ततः। आत्मस्ते शतसाहस्रमनन्तं त्वग्निहोत्रिणि"। विष्णु-धर्मोत्तरे "अमानुषे समं दानं सोष्णु श्रेयं फलं तथा। द्विगुणञ्च तदेवोक्तं तथा त्रैवर्षसङ्करे। शूद्रे चतुर्गुणं प्रोक्तं विशि चाष्टगुणं भवेत्। क्षत्रिये षोड़शगुणं ब्रह्मबन्धौ तदेव तु। हास्तिं शद्गुणं स्मृतं दानं वेदाध्ययनतत्परे। शतघ्नं तद्विनिर्दिष्टं प्राधीते सह-स्रमितम्। अनन्तञ्च तदेवोक्तं ब्राह्मणे वेदपारगे"। एतेषु, केषाञ्चिद्ब्राह्मणब्राह्मणव्रुवादीनामपात्रत्वेऽपि पात्रत्वनिरूपणं मन्वत्रवादिदानव्यतिरिक्तदानविषयम्। "मन्त्रपूर्वञ्च यद्दानमपात्राय प्रदीयते। दातुर्निष्फलमेवं तद्भोक्तुर्जिह्वां निकृन्तति" शातातपवचनात्। "उपरुदन्ति दातारं गौरश्वः काञ्चनं क्षितिः। अश्रोत्रियस्य विप्रस्य हस्तं दृष्ट्वा निराकृतेरिति" वशिष्ठवचनाच्च मन्त्रपूर्वं गवादिदानानामपात्रप्रतिपादननिषेधात्। शूद्रादीनान्तु पात्रत्वनिरूपणम् अन्नदानविषयम्। "क्षत्रान्नमितरेभ्यः" इतिगौतमवचनात् "अन्नं सर्वत्र दातव्यमिति" वक्ष्य-माणत्वाच्च। दक्षः "व्यसनापदर्थञ्च कुटुम्बार्थञ्च याचते। एवमन्यत्र दातव्यं सर्वदानेष्वयं विधिः"। व्यसनं, राजचौराद्युपद्रवः। 'आपत् दुर्भिक्षादिपीड़ा। 'आद्योऽर्थशब्दो, निवृत्तिवचनः। मनुः "सान्तानिकं यक्ष्यमाणमध्वगं सार्ववेदसम्। पुत्रार्थं पितृमात्रर्थं स्वाध्यायार्थ्युपतापिनः। नयेतान् स्नातकान् विद्याद्-ब्राह्मणान् धर्मभिक्षुकान्। 'सान्तानिकः, सन्तान-प्रयोजनविवाहार्थौद्यतः। 'अध्वगः' अत्र धर्मार्थं प्रचलितः। सार्ववेदसः सर्वस्वदक्षिणयज्ञकृत्। 'उप-तापी, व्याधिपीड़ितः "निःस्वेभ्योदेयमेतेभ्यो दानं

विद्याविशेषतः। एतेभ्यो हि द्विजाग्र्येभ्यो देयमन्नं सदक्षिणम्। इतरेभ्यो बहिर्वेदि कृतान्नन्तु प्रदीयते"। विद्याविशेषत इति अल्पविद्याय अल्पं बहुविद्याय बहित्यर्थः। बौधायनः श्रुत्राङ्गच-श्रोत्रिय-वेदपारगेभ्यो पूर्वार्थ-निर्वैशौषधार्थ-हस्तिकौण-यज्ञमाणाध्ययनाध्वसंयोग वैश्वजितेषु द्रव्यविभागो यथाशक्ति कार्यो बहिर्वेदि भिक्षमाणेषु कृतान्नमितरेषु"। निर्वैशः, विवाहः। वैश्वजितः, सर्वस्वदक्षिणया कृतविश्वजिद्यागः। बहिर्वेदि एव हस्तादेतेभ्यो बहिर्वेद्यपि धनमवश्यं देयम्। अन्येभ्यस्तु अन्तर्वेद्येव धनदाननियमः। बहिर्वेदि तु कृतान्नस्यैव। आपस्तम्बः "भिक्षमाणो निमित्तमाचार्यो विवाहो यज्ञो मातापित्रोर्बुभूर्षाहेतव नियमादिलोपः। तत्र, गुणान् समीक्ष्य यथा देयं, इन्द्रिय-प्रीत्यर्थस्य तु भिक्षमाणमनिमित्तं न तथाद्रियेत"। 'बुभूर्षा भरणेच्छा। अर्हतव नियमादिलोप इति, अधिकारिणश्चावश्यक-कर्मविधिलोपप्रसङ्गः। यमः "वेदेष्वनस्नातेषु हुतं विप्रहुताग्निषु। सन्नारयति दातारं महतः किल्बिषादपि"। पद्मपुराणे "एकं वेदान्तगं विप्रं भोजयेत् श्रद्धयान्वितः। तस्य भुक्ता स वै कोटिविप्राणां नात्र संशयः"। शातातपः "वेदपूर्णमुखं विप्रं सुभुक्तमपि भोजयेत्। न तु मूर्खं निराहारं यद्वात्रमुपवासिनम्"। व्यासः "यत् सिक्थं वेदविद्भुङ्क्ते षट्कर्मनिरतः शुचिः। दातुः फलमसंख्येयं जन्म जन्म तदक्षयम्। वेदविद्याव्रतस्नाते श्रोत्रिये गृहमागते। क्रीडन्त्योषधयः सर्वा याज्ञामः परमां गतिम्"। 'ओषधयः, अन्नानि। महाभारते "तद्भक्तास्तद्भनाराजंस्तद्गृहास्तद्गवाश्वयाः। अर्थिनश्च भवन्त्यर्थं तेषु दत्तं महाफलम्"। अत्र तच्छब्देन पूर्वोक्ताः पितरो देवताश्च परामृश्यन्ते। अथवा तदेव दीयमानं भक्तमदनीयं येषां ते तथा एवं तद्भनादिशब्दा अपि। "तस्करेभ्यः परेभ्यो वा ये भयार्त्ता युधिष्ठिर!। अर्थिनो भोक्तुमिच्छन्ति तेषु दत्तं महाफलम्। क्षुतक्षा क्षुतदाराश्च ये विप्रा देशसंप्लवे। अर्थार्थमभिगच्छन्ति तेषु दत्तं महाफलम्। चारित्रनियता राजन्! ये नराः क्रमशस्त्रयः। अर्थिनश्चोपगच्छन्ति तेषु दत्तं महाफलम्। ऋतुव्रतक्रान्ताः स्वधर्मेषु पाषण्डसमयेषु च। क्रमप्राप्ताः क्रमाचाराश्चेषु दत्तं महाफलम्। तपस्विनस्तपोनिष्ठास्तथा भैक्षचराश्च ये! अर्थिनः किञ्चिदिच्छन्ति तेषां दत्तं महाफलम्"।

आदित्यपुराणम् "अक्रोधना धर्मपराः शान्ता दमदमे रताः। तादृशाः साधवो विप्रास्तेभ्यो दत्तं महाफलम्। हृतसर्वस्वदारधनार्हेभ्यः प्रभविष्णुभिः। स्पृहयन्ति सुभक्तानां तेषु दत्तं महाफलम्"। शातातपपराशरौ "सन्निकृष्टमधीयानं ब्राह्मणं यो व्यतिक्रमेत्। भोजने चैव दाने च दक्षत्यासप्तमं कुलम्"। भविष्यत्पुराणे यस्तासन्नमतिक्रम्य ब्राह्मणं पतितादृते। दूरस्थं भोजयेन्मूढो गुणाढ्यं नरकं व्रजेत्। तस्माद्यातिक्रमेत् प्राज्ञो ब्राह्मणान् प्रातिवेशिकान्"। प्रातिवेशिकान् स्वगृहादूरवर्त्तिगृहान्। "सम्बन्धिनस्तथा सर्वान् दौहित्रं विट्पतिं तथा। भागिनेयं विशेषेण तथा बन्धून् धराधिप!। नातिक्रमेच्छ्रद्धस्तेतान् सुमूर्खानपि भोपते!। अतिक्रम्य महारौद्रं रौरवं नरकं व्रजेत्"। विट्पतिः जामाता। सुमूर्खानपि नातिक्रमेदित्येतत्, अन्नदान-विषयम्। हिरण्यादिदाने तु, सच्छ्रोत्रियमूर्खव्यतिक्रमे दोषाभावात् तदुक्तं व्यासवशिष्ठौधायनशातातपपराशरैः "यस्य चैव गृहे मूर्खो दूरे चापि बहुश्रुतः। बहुश्रुताय दातव्यं नास्ति मूर्खे व्यतिक्रमः। ब्राह्मणातिक्रमो नास्ति विप्रे वेदविवर्जिते। ज्वलन्तमग्निसंस्पृष्टञ्च न हि भस्मनि क्षयते"। महाभारते "यदि स्यादधिको विप्रो दूरे श्रुत्यादिभिर्युतः। तस्मै यत्नेन दातव्यमतिक्रम्यापि सन्निधिम्"। विष्णुः "पुरोहित-स्वाकर एव पात्रं स्वदुहितृसुतजामातरश्चेति"। 'यस्यैते पुरोहितादयः, तस्यैव ते अन्यगुणरहिता अपि पुरोहितादित्वेनैव पात्राणि। व्यासः "माता-पितृषु यद्दत्तं भ्रातृषु स्वसृतासु च। जायापत्योस्तु यद्दत्तं सोऽनिन्द्यः स्वसिसंक्रमः। पितुः शतगुणं दानं सहस्रं मातुरुच्यते। अनन्तं दुहितृदानं सोदर्ये दत्तमक्षयम्"। विष्णुधर्मोत्तरम् "आत्मनस्तु भवेत् पात्रं नान्यस्य स्यात् पुरोहितः। पुरोहिते तु ये दत्तं दानमक्षयमुच्यते। उपाध्यायर्त्विजोश्चैव गुरावपि च मानवैः। वक्तव्येक्षा न कर्त्तव्या मातरं पितरं प्रति"। उपाध्यायादयस्तु, पूर्वमेव व्याख्याताः तथा। "मातृष्वसा स्वसा चैव तथैव च पितृष्वसा। मातामही भागिनेयी भागिनेयस्तथैव च। दौहित्रोविट्पतिश्चैव तेषु दत्तञ्च अक्षयम्। श्रीमटे यत्तथा दत्तं तदक्षयमुच्यते। मातापित्रोर्गुरौ मित्रे विनीते चोपकारिणि। दीनानाथविशिष्टेभ्योदातव्यं भूतिमिच्छता। अदत्त-

दानाजःयन्ते परभाग्योपजीविनः"। उपकारिणि परोपकारपरे। विशिष्टाः गुणातिशयशालिनः। ब्रह्मपुराणे "यत् कन्यासु पिता कुर्याद्दानं पूजनमर्चनम्। यत्कृतं सुकृतं विद्यात्तासु दत्तं तदक्षयम्। यद्दत्तं तासु कन्यासु तद्दानं पुरुषमेव च"। कालिकापुराणम् "यद्दत्तं वेदविद्विप्रे यद्दत्तं ब्रह्मचारिणि। तपोनिधेषु यद्दत्तं कारुण्येन च यत् सदा। तत् सर्वमक्षयं दानं वै मानेन विधाय यत्"। विष्णुधर्मोत्तरे "अन्नदाने न कर्त्तव्यं पात्रापेक्षणमण्वपि। अन्नं सर्वत्र दातव्यं धर्मकामेन वै द्विज!। सदोषेऽपि तु निर्दोषं सगुणेऽपि गुणावहम्। तस्मात् सर्वप्रयत्नेन देयमन्नं सदैव तु। विद्याध्ययनसम्पन्नामन्नदानं महाफलम्"। तथा "दत्त्वा नृपतिभीतानाच्छिनाच्च तथा धनम्। तस्करेभ्यश्च भीतानां फलमक्षयमश्नुते यियत्नतां तथा दत्तं व्यसनं तर्कुमिच्छताम्। दुःखान्वितानां दीनानामक्षयं परिकीर्त्तितम्। विवाहमेखलाबन्धप्रतिष्ठादिषु कर्मसु। आपत्सु तु यद्दत्तमक्षयं तदुदाहृतम्"। संवर्त्तः "दानान्येतानि देवानि तथान्यानि च सर्वशः। दीनान्धकृपणार्थिभ्यः श्रेयःकामेण धीमता"। पद्मपुराणे "दीनान्धकृपणानाथवाग्विहीनेषु यत्तथा। विकलेषु तथान्येषु जड़वामनपङ्गुषु। रोगार्त्तेषु च यद्दत्तं तत्स्याद्बहुफलं धनम्"। अत्र अपात्रनिरूपणम्। तत्र मनुः "घोरचक्रान् वाणिजकांस्तथा कारुकुशीलवान्। प्रेष्यान् वार्द्धुषिकांश्चैव विप्रान् शूद्रवदाचरेत्। ये व्यपेताः स्वकर्मभ्यः परपिण्डोपजीविनः। द्विजत्वमभिकाङ्क्षन्ति तांश्च शूद्रवदाचरेत्। नान्नगब्राह्मणो भवति न वणिग्न कुशीलवः। न शूद्रप्रेषणं कुर्वन्न स्तेनो न चिकित्सकः। अव्रता ह्यनधीयाना यत्र भैक्षचरा द्विजाः। तं ग्रामं दण्डयेद्राजा चौरभक्तप्रदोहि सः"। वसिष्ठः "उदक्योऽन्वासते येषां ये च केचिदनग्नयः। कुलं वाऽप्योत्रियं येषां सर्वे ते शूद्रधर्मिणः"। अन्वासते कर्मकाले समीप एव तिष्ठन्ति। विष्णुः "न दानं यशसे दद्याद्भवाञ्छोपकारिणि। न ह्यत्र गोतमोक्तेभ्यो धर्मार्थमिति निश्चयः"। उपकारिणि आत्मोपकारपरे प्रत्युपकारसमीहवेत्यर्थः। महाभारते "यस्तु प्रेष्यान् द्विजान् मूढो योजयेद्वहव्यकव्ययोः। न भवेत्तत्फलं तस्य दैवीयं तथा स्मृतिः"। यमः "अव्रतानामनूचानां जातिमात्रोपजीविनाम्। नैषां प्रतिग्रहो देयो न शिला तारयेच्छिलाम्। अपविद्धाग्निहोत्रस्य गुरोर्विप्रियकारिणः। द्रविणं नैव दातव्यं सततं पापकर्मणः। न प्रतिग्रहमर्हन्ति इषलाध्यापका द्विजाः। शूद्रस्याध्यापनाद्विप्रः पतत्यत्र न संशयः"। तथा "राजधानी यथा शून्या यथा कूपश्च निर्जलः। यथा हुतमनग्नौ च तथा दत्तं द्विजेऽनृचे"। वसिष्ठः "यथा काष्ठमयो हस्ती यथा चर्ममयो मृगः। यश्च विप्रोऽनधीयानस्त्रयस्ते नामधारकाः। विद्वज्जोक्ष्यान्यविद्वांसो येषु राष्ट्रेषु भुञ्जते। अचिराद्विपिभिक्ष्यन्ति महद्भा जायते भयम्"। व्यासयातपौ "नष्टशौचे व्रतभ्रष्टे विप्रे वेदविवर्जिते। रोदित्यन्नं दीयमानं किं मया दुष्कृतं कृतम्। शौचहीनास्तु ये विप्रा न च यज्ञोपवीतिनः। हुतं दत्तं तपस्तेषां नश्यत्यत्र न संशयः। ऊषरे वापितं बीजं यच्च भस्मनि हूयते। क्रियाहीनेषु यद्दत्तं विषु नाशोविधीयते। प्रस्तरे पतितं बीजं भिन्नभाण्डे च दोहनम्। भस्मन्यपि हुतं द्रव्यं तद्वदानमसाधुषु"। पूर्वत्र पात्रगुणकथने कृतेऽपि पुनर्दोषवचनमेवंविधदोषभाग्जनप्रतिषेधार्थम्। मनुः "पात्रभूतो हि यो विप्रः प्रतिगृह्य प्रतिग्रहम्। असत्सु विनियुञ्जीत तस्य देयं न किञ्चन। सञ्चयं कुरुते यस्तु प्रतिगृह्य समन्ततः। धर्मार्थं नोपयुङ्क्ते यो न तं तस्करमर्चयेत्"। असत्सु, निष्क्रियेषु द्यूतादिषु। दक्षः "विधिहीने तथा पात्रे यो ददाति प्रतिग्रहम्। न केवलं हि तद्याति श्रेयमस्य नश्यति"। मनुः "अनर्हते यद्ददाति न ददाति यदर्हते। अर्हानर्हौपरिज्ञानाद्दानाद्धर्मान्न हीयते"। यमः "यस्तु क्षिप्तचितां हस्तिमश्विभ्यः प्रयच्छति। घोरायां ब्रह्महत्यायां पच्यते नात्र संशयः"। भविष्यपुराणे "नाब्रह्मणाय दातव्यं न देयं ब्राह्मणाक्रिये। न ब्राह्मणब्रुवे चैव न च दुर्ब्राह्मणे धनम्"। व्यासः "ब्रह्मबीजसमुत्पन्नो मन्त्रसंस्कारवर्जितः। जातिमात्रोपजीवी च भवेदब्राह्मणः स तु। गर्भाधानादिभिर्यैस्तु संस्कारैरुपनयनेन च। न कर्मविद्यया धीते स भवेद्ब्राह्मणाक्रियः"। वराहपुराणे "अव्रतो वैश्यराजन्यौ शूद्रवद्ब्राह्मणास्त्रयः। वेदव्रतविहीनश्च ब्राह्मणो ब्राह्मणब्रुवः"। यमः "यस्य वेदश्च वेदी च विक्रियेते त्रिपौरुषम्। स वै दुर्ब्राह्मणो नाम यश्चैव वृषलीपतिः"। कूर्मपुराणे "न वार्ष्यपि प्रयच्छेत नास्तिके हैतुकेऽपि वा। न पाषण्डिषु सर्वेषु नावेदविदि धर्मवित्।

नास्तिकः, परलोकवासनाशून्यः। हैतुकः हेतुभिः परलोकं निराकरिष्णुः। मनुर्विष्णुश्च "न वार्य्यपि प्रयच्छेत वैडालव्रतिके द्विजे। न बकव्रतिके पापे नावेदविदि धर्म्मवित्। विध्यर्थेतेषु दत्तं हि विधिनोपार्जितं धनम्। दातुर्भवत्यनर्थाय परत्रादातुरेव च"। अनर्थः प्रत्यवायः। "यथा प्लवेनौपलेन निमज्जत्युदके तरन्। दातृप्रतिग्रहीतारौ तथैवाप्सु निमज्जतः"। यमः "यः कारणं पुरस्कृत्य व्रतचर्यां निषेवते। पापं व्रतेन प्रच्छाद्य वैडालं नाम तद्व्रतम्। अर्थञ्च विपुलं लब्ध्वा दत्त्वा लिङ्गं विवर्जयेत्। आत्मसान्तरितं रक्षेद्वैडालं नाम तद्व्रतम्। यतीनामाश्रमं गत्वा प्रत्यवस्येत्तु यः पुनः। यतिधर्मविलोपेन वैडालं नाम तद्व्रतम्"। विष्णुः "धर्म्मध्वजी सदा लुब्धः शूद्रिको लोकदम्भकः। वैडालव्रतिको ज्ञेयो हिंस्रः सर्वाभिसन्धकः। यश्च धर्मध्वजी नित्यं सुराध्वज इवोच्छ्रितः। प्रच्छन्नानि च पापानि वैडालं नाम तद्व्रतम्। अधोदृष्टिर्नैकृतिकः स्वार्थसाधनतत्परः। शठो मिथ्याविनीतश्च बकव्रतचरो द्विजः। ये बकव्रतिनो विप्रा ये च मार्जारलिङ्गिनः। ते पतन्त्यसताभिक्षे तेन पापेन कर्मणा"। चतुर्विंशतिमतम् "रोदिष्यद्भ्यं दीयमानं किं मया दुष्कृतं कृतम्। यद्गो त्रियस्य विप्रस्य हस्तं दृष्ट्वा निराकृतेः"। कात्यायनस्त्वन्यथाह "यः स्वाध्यायाग्निमानस्नाद्वेदादीन्नैभिरिष्टवान्। निराकर्त्तामरादीनां स विप्रेयो निराकृतिरिति"। शातातपः "नेष्टं देवकृते दत्तमप्रतिष्ठञ्च वार्द्धुषौ। यच्च वाणिजके दत्तं न च तत् प्रेत्य नो दृढ" दक्षः "धूर्त्ते वन्दिनि मल्ले च कुवैद्ये कितवे शठे। चाटचारणचोरेभ्यो दत्तं भवति निष्फलम्"। स्कन्दपुराणे "देवपितृविहीने यदीश्वरेभ्यश्च दीयते। दत्त्वा तु कीर्त्तितं यच्च देवाग्निस्वामिने तथा। अन्यायोपार्जितधनैर्दत्तमब्राह्मणे च यत्। गुरवेऽन्यतमे च क्लीबाय पतिताय च। कृतघ्नाय च यद्दत्तं सर्वदा ब्रह्मविद्विषे। याजकाय च सर्वस्व दृष्ट्वाः पतते तथा। परिचाराय भृत्याय सर्वस्व पिशुनाय च। इत्येतानि च राजेन्द्र! षोडशादानानि षोडश। गर्भस्थोऽज्ञानबालोऽपि भुङ्क्ते दृष्टो न यौवने। तद्दत्तस्यैह नाप्नोति सर्वथा रिपुसूदन"। तदीयफलमिति शेषः। विष्णुधर्मात् "परस्थाने हृथा दानं सदोषं परिकीर्त्तितम्। आरूढपतिते चैव अन्यायार्त्तैर्नैव यत्। व्यर्थं हि ब्राह्मणे दानं पतिते तस्करे तथा। गुरोश्चाप्रीतिजनके कृतघ्ने यागयाजके। वेदविक्रायके चैव यश्च चोपपतिर्द्विजे। स्त्रीभिर्जितेषु यद्दत्तं व्यालग्राहे तथैव च। ब्रह्मबन्धौ च यद्दत्तं यद्दत्तं दृष्टपीयतौ। परिचारके च यद्दत्तं हृथा दानानि षोडश" महाभारते "यद्भुक्त्वावधिरा मूका व्याधिनोपहताश्च ये। भवन्त्यात्ते महाराज! न तु देयः प्रतिग्रहः" इति प्रतिग्रहीतृनिरूपणम्।

अथ द्रव्याख्यं दानाङ्गमुच्यते। तत्र देयनिरूपणम्। भविष्यपुराणे "यदादिष्टं विशिष्टञ्च न्यायप्राप्तञ्च यद्भवेत्। तत्तद्गुणवते देयमित्येतद्दानलक्षणम्"। वह्निपुराणे "शुभोपायेन यत्किञ्चित् करोति लघुना नरः। अनन्तं फलमाप्नोति सद्भोऽपि यथा पुरा"। शुभोपायेन न्यायोपार्जितेन। लघुना स्वल्पेन द्रव्येणेति शेषः। देवीपुराणे "न्यायतो यानि प्राप्तानि शाकान्यपि नृपोत्तम!। तानि देयानि देव्यास्तु कन्यकायोषितां सदा। तद्भक्तेषु च विप्रेषु अपरेषु च नित्यशः" विष्णुपुराणे "यद्यदिष्टतमं लोके यच्चाप्य दयितं गृहे। तत्तद्गुणवते देयं तदेवाक्षयमिच्छता"। महाभारते "विशेषतो महाराज! तस्य न्यायार्जितस्य च। श्रद्धया विधिवत् पात्रे दत्तस्यान्तो न विद्यते"। गौतमः "स्वामी अकृयक्रय संविभागपरिग्रहाधिगमेषु ब्राह्मणस्याधिकं लब्धं, क्षत्रियस्य विजितं, निर्विष्टं वैश्यशूद्रयोरिति"। 'अप्रतिबन्धः दायएव अकृयम्। संविभागः अप्रतिबन्धोदायः। परिग्रहः, जलदण्डकाष्ठादेरनन्यपूर्वस्य स्वीकारः। अधिगमः निध्यादेः प्राप्तिः। एषु निमित्तेषु स्वामी भवति। अधिकम् असाधारणम्। निर्विष्टम् क्षेत्रादिना द्विजशुश्रूषादिना च यल्लब्धम्। "निर्विष्टो धृतिभोगयोरिति" स्मरणात्। मनुः "सप्त वित्तागमा धर्म्या दायो लाभः क्रयो जयः। प्रयोगः कर्म्मयोगश्च सत्प्रतिग्रह एव च"। प्रयोगः न्यायोपचयार्थं द्रव्यप्रयोगः। कर्म्मयोगः कार्त्विज्यम्। नारदः "धनमूलाः क्रियाः सर्वा यत्नस्तस्यार्जने मतः। रक्षणं वर्द्धनं भोग इति तस्य विधिः क्रमात्। तत्पुनस्त्रिविधं ज्ञेयं शुक्लं शबलमेव च। क्षयञ्च, तस्य वित्तस्य विभागः सप्तधा पुनः। एकैकस्य शुक्लादेः सप्त सप्त भेदा भवन्तीत्यर्थः। "सुतशौर्य्यतपःकन्यायाज्यशिष्यान्ववागतम् धनं सप्तविधं शुक्लमृदयोऽस्य तद्विधः"। आगतशब्दः सुतादिभिः प्रत्येकं संबध्यते। कन्यागतम् आर्षविवाहे

वराहृतं गोमिथुनादि। याच्ञागतम् आर्त्विज्यादिलब्धम्। शिष्प्रागतम्। गुरुदक्षिणादि। अत्र च यथाधिकारं शुक्लत्वमवधेयम्। उदयः फलं तदर्थस्य शुक्लमित्यर्थः "कृषीदलब्धिवाणिज्यशिल्पशुल्कानुवृत्तितः। कृतोपकारादाप्तञ्च शबलं सप्तदाहृतम्"। न्यायोपपन्नार्थं द्रव्यप्रयोगः कृषीदम्। शिल्पं कारुकादिकर्म। आकरादिभ्योद्रव्योदयः शुल्कम्। अनुवृत्तिः सेवा। "पार्श्वकद्यूतचौर्यार्त्तिप्रतिरूपकसाहसैः। व्याजेनोपार्जितं यत्तत् सर्वेषां क्षणसुच्यते"। पार्श्वकोपार्जितं उत्कोचादिलब्धम्। आर्त्युपार्जितं परपीडया लब्धम्। प्रतिरूपकं मणिसुवर्णादेः प्रतिरूपकरणम्। साहसं सप्राणात्ययाङ्गीकारेण परस्तोदरत्वादिकम्। व्याजः दम्भेन तपः प्रभृति। "तेन क्रयो विक्रयश्च दानं सङ्क्रमणमेव च। विविधाश्च प्रवर्त्तन्ते क्रियाः सम्भोग एव च। यथाविधेन द्रव्येण यत्किञ्चित् कुरुते नरः। तथाविधमवाप्नोति स फलं प्रेत्य चेह च"। यथाविधेन शुक्लेन क्षणेन शबलेन वा दानादि कुरुते तथाविधं फलमाप्नोतीति, शुक्लेन शुद्धं दुःखरहितम्, शबलेन, मिश्रम्, क्षणेन अल्पोदयम्। पद्मपुराणे "शुक्लेन वित्तेन कृतं शुक्लं बहुफलं भवेत्। शबलं मध्यमफलं क्षणं क्षीनधनं फलम्"। ब्रह्मोक्ते "शुक्लवित्तेन यो धर्मं प्रकुर्य्यात् श्रद्धयान्वितः। तीर्थं पात्रं समासाद्य देशत्वे तत् समश्नुते। राजसेन च भावेन वित्तेन शबलेन च। दद्याद्दानमतिथिभ्योमानुषत्वे तदश्नुते। तमोऽवस्तु यो दद्यात् क्षणवित्तेन मानवः। तिर्य्यक्त्वे तत्फलं प्रेत्य समश्नाति नराधमः"। नारदः "तत् पुनर्द्वादशविधं प्रतिवर्णाश्रयात् स्मृतम्। साधारणं स्त्रीत्रिविधं श्रेयं नवविधं स्मृतम्"। धर्म्यमिति शेषः। प्रतिवर्णाश्रयाच्चतुर्विधं, साधारणं त्रिविधमित्येवं द्वादशविधमित्यर्थः। "क्रमागतं पैतृदायः प्राप्तञ्च सह भार्य्यया। क्रयविक्रयेण सर्वेषां वर्णानां त्रिविधं धनम्। वैशेषिकं धनं श्रेयं ब्राह्मणस्य त्रिलक्षणम्। प्रतिग्रहेण संलब्धं याज्यतः शिष्यतस्तथा। त्रिविधं क्षत्रियस्यापि प्राहुर्वैशेषिकं धनम्। युद्धोपलब्धं कारात्र दण्डाच्च व्यवहारतः"। कारः करादिः। "वैशेषिकं धनं श्रेयं वैश्यस्यापि त्रिलक्षणम्। ऋणिनोरुत्तमार्णेभ्यः शूद्रस्वेभ्यस्तथैव च"। एभ्यः ब्राह्मणादिभ्यः। "सर्वेषामेव वर्णानामेवं धर्म्यो धनागमः। विपर्य्ययाद्धर्म्यः स्यात्र चेदापद्गरीयसी"।

एवंधर्मसाधनं द्रव्यं निरूप्य तच्च कियद्देयं किं देयमित्यपेक्षायां याज्ञवल्क्यः "स्वं कुटुम्बाविरोधेन देयं दारसुताहते। नान्वये सति सर्वस्वं यच्चान्यस्मै प्रतिश्रुतम्"। अन्वये सन्ताने। प्रतिश्रुतं प्रतिज्ञातम्। कुटुम्बाविरोधस्तु, व्याख्यातो दक्षस्मृतिना "कुटुम्बभरणाद्देयं यदतिरिच्यते। भक्ष्याच्छादो विधं यावद्यातुर्नार्त्तोऽन्यथा भवेत्"। भक्ष्यं अन्नम्। वस्त्रं वस्त्रम्। (यावता द्रव्येण कुटुम्बस्य वस्त्रभक्ष्यं संपद्यते तदतिरिक्तं देयं, इतरत्तु न देयमित्यर्थः)। मनुः "भक्तः परजने दाता सजने दुःखजीविनि। मध्यापनो विषाखादः स धर्मप्रतिरूपकः"। कात्यायनः "सर्वस्वं स्वकुटुम्बभरणाधिकम्। यच्च द्रव्यं स्वकं देयमदेयं स्यादतोन्यथा"। तथा "सप्तरात्राद्गृहक्षेत्रात् यद्यत् क्षेत्रं प्रपीयते। पिता वाथ स्वयं प्राप्तं तद्दातव्यं विवक्षितम्"। सप्तरात्रादिभ्यो यत्प्रपीयते, अधिकं भवति, तद्दातव्यमिति विवक्षितमित्यर्थः। शिवधर्म्मात् "तस्माच्चिभागं वित्तस्य जीवनाय प्रकल्पयेत्। भागद्वयन्तु धर्म्मार्थमनित्यं जीवितं यतः"। अशेषवित्तस्य भागपञ्चकं परिकल्प्य भागत्रयं जीवनाय संरक्ष्य भागद्वयं धर्म्माय कल्पयेदित्यर्थः। महाभारते "एकां गां दशगुर्दद्याद्दश दद्याच्च गोवृषी। शतं सहस्रगुर्दद्यात् सर्वे तुल्यफलाः स्मृताः"। नन्वेतद्वचनद्वयोपात्तयोर्विक्तगोशब्दयोरुपलक्षणार्थत्वेन देयमात्रपरत्वाद्विषमभागपरिकल्पनं विरुद्धं यथाश्रुतगोवित्तपरत्वेनाविरोधे दशगुरेकां गां दद्यादितिवचनाद्दशावरगोर्द्विनोऽपि गोदानानधिकारः स्यात् दशधेनुयोग्यधनपरत्वे तु उपलक्षणपक्षाङ्गीकाराद्विरोधादस्यं तस्मान्नानाधिकल्पयोः क्षणोदाराधिकारिविषयतयैव व्यवस्थेति तुल्यम्। कुटुम्बाविरोधेन देयमित्युक्तम् तत्रापवादमाह व्यासः "कुटुम्बं पीडयित्वापि ब्राह्मणाय महात्मने। दातव्यं भिक्षवे चात्ममांसं भूतिमिच्छता"। यत्नतित्यादिविषयमेतत्। कात्यायनः "स्वेच्छादेयं स्वयंप्राप्तं बन्धाचारेण बन्धकम्। वैवाहिकक्रमायातं सर्वदानं न विद्यते"। बन्धक आधिः तद्बन्धाचारेणाधिरूपेणैव देयम्। यद्विवाहलब्धं तत्तस्यां भार्य्यायां सत्यां सर्वमदेयम्। यच्च पितामहादिक्रमायातं तत्र पुत्रे सति न देयम्। "सौदायिकं क्रमायातं शौर्य्यप्राप्तञ्च यद्भवेत्। स्त्रीजातिस्वाम्यनुज्ञातं दत्तं सिद्धिमवाप्नुयात्"। सौदायिकं

विवाहलब्धं तद्भार्य्यायानुज्ञातम्। क्रमायातम् अविभक्तधनैर्ज्ञातिभिरनुज्ञातम्। श्रद्धेन सता युद्धेन लब्धं स्वामिनानुज्ञातमित्यर्थः। याज्ञवल्क्यः "देयं प्रतिश्रुतञ्चैव दत्त्वा नापहरेत् पुनः" यमः "यच्च वाचा प्रतिज्ञातं कर्म्मणा नोपपादितम्। तद्दानमृणसंयुक्तमिह लोके परत्र च" ऋणसंयुक्तम् ऋणासमर्पणजन्यदोषसंयुक्तमित्यर्थः। "सप्राजाताद्गुरो हन्याद्दत्तमानांस्तु सप्त च। अतिक्रान्तान् सप्त हन्यादप्रयच्छन् प्रतिश्रुतम्। प्रतिश्रुताप्रदानेन दत्तस्य हरणेन च। जन्मप्रभृति यत् पुण्यं तत्सर्वं संप्रणश्यति"। महाभारते "ब्राह्मणं स्वयमाहूय भिक्षार्थे लवणर्त्तिनम्। पश्चान्नास्तीति यो ब्रूयात्तं विद्याद्ब्रह्मघातकम्" तथा "संश्रुत्य यो न दित्सेत याचितो यस्य नेच्छति। उभावन्तकावेतौ सद्यः पापमवाप्नुतः" तथा "यो न दद्यात् प्रतिश्रुत्य स्वल्पं वा यदि वा बहु। आशास्तस्य हताः सर्वाः क्लीवस्येव प्रजाफलम्। यं निरीक्षेत संक्रुद्ध आशया पूर्वजातया। प्रदहेत हि तं राजन्! कक्षमग्निरिवोद्यतः। तस्माद्दातव्यमेवेह प्रतिश्रुत्य युधिष्ठिर!"। नारदः "ब्राह्मणस्य च यद्देयं सान्वयस्तु न चाप्नुयः। सकुल्ये तद्भवेन्निनश्येत्तदभावेऽस्य बन्धुषु। यदा तु न सकुल्यः स्यात्तस्य च सम्बन्धि-बान्धवाः। दद्यात् सजातिशिष्येभ्यस्तदभावेऽप्सु निक्षिपेत्"। गौतमः "प्रतिश्रुत्याप्यधर्मसंयुक्ताय न दद्यात्"। कात्यायनः "प्राणसंशयमापन्नं यो मासुत्तारयेदितः। सर्वस्वेनापि प्रदाप्यो मृत्युकालेऽपि न तथा भवेत्"

अथ फलातिशयप्रतिपादनार्थं पात्रविशेषेण देयविशेषाः। भविष्यपुराणे "गोभूतिलहिरण्यादि दद्याच्छ्रद्धासमन्वितः। तथा द्रव्यविशेषांश्च दद्यात् पात्रविशेषतः। आत्मनामञ्च दानञ्च गोदानञ्च कुटुम्बिनाम्। तथा प्रतिग्रहीतानां क्षेत्रदानं प्रशस्यते। सुवर्णं याज्ञिकानाञ्च विद्याञ्चैवोर्द्धरेतसाम्। कन्याञ्चैवानपत्यानां ददतां गतिरुत्तमा"। विष्णुधर्मोत्तरात् "युद्धोपकरणं द्रव्यं चक्रिणे द्विजयुद्धुवाः॥ पक्षोपयोगि तद्देयं यूद्दे शिल्पोपयोगि च। यक्षोपयोगि यद्द्रव्यं देयं तस्यैव तद्भवेत्। येन येन च भावेन यस्य वृत्तिरुदाहृता। तत्तत्तस्यैव दातव्यं पुण्यकामेन धीमता। दण्डं कृष्णाजिनञ्चैव तथा विप्राः! कमण्डलुम्। धीरं पुण्यमवाप्नोति दत्त्वैतान् ब्रह्मचारिणे। वस्त्रं शय्यासनं धान्यं वेश्म वेश्मपरिच्छदम्। गृहस्थाय तु तद्दत्तं क्षेयं बहुफलं सदा। नीवारं वल्कलं शाकं फलं मूलञ्च गोरसम्। वानप्रस्थाय यद्दत्तमन्नं परिकीर्त्तितम्। भिक्षाप्रदानं यतये पात्रदानं तथाहितम्। गन्धमाल्यरसाम्बूत्तरत्नवस्त्रादिकं स्त्रियः। स्त्रीणां प्रदानं दातव्यं भर्त्तृहस्ते तु नान्यथा। प्रोक्षणं संयतस्यैव तद्दत्तं भर्त्तुः प्रयच्छतः। अन्नं प्रतिश्रयञ्चैव पान्थे दत्तं महाफलम्। विवाहादिक्रियाकाले तत्क्रियासिद्धिकारणम्। यः प्रयच्छति धर्मज्ञः सोऽश्वमेधमवाप्नुयात्। आतुरेभ्यो धनं दत्त्वा दानं बहुफलं भवेत्। बाले क्रीडनकं दत्त्वा भक्तमन्नं तथैव च। फलं मनोहरं वापि अग्निष्टोमफलं लभेत्। भक्तान्नं मानवो दत्त्वा भक्तान्नानि तु काङ्क्षताम्। अक्षयं फलमाप्नोति स्वर्गलोकञ्च गच्छति। श्रीविहीने तथा दत्त्वा भोजनं द्विजसत्तम!। वस्त्रं शुभं वा धर्मज्ञः पुण्यं महदवाप्नुते। कृपास्थानं परं विप्रा विद्युताः पुरुषाः स्त्रियः। तेभ्योऽनुकम्पा कर्त्तव्या सतां वर्त्मनि तिष्ठता। कार्य्यं सत्वरमुद्यम्य कृत्वा परेषां समुपस्थिते। अक्षयं फलमाप्नोति नात्र कार्य्या विचारणा। यवसानां प्रदानेन धेनुमत्सु द्विजातिषु। अवक्षानाञ्च धर्मज्ञाः! फलमक्षयमश्नुते। प्रसवेषु तु यद्दत्तं व्यसनार्त्तिभवेषु च। तद्दानमक्षयं प्रोक्तं पुरुषस्य विपश्चितः। दत्त्वा ब्राह्मणमार्त्तञ्च! जलपात्रमवार्द्धने। फलमक्षयमाप्नोति नात्र कार्य्या विचारणा"। अङ्गिराः "देवतानां गुरूणाञ्च मातापित्रोस्तथैव च। पुण्यं देयं प्रयत्नेन नापुण्यं भोदितं क्वचित्" नन्दिपुराणे "पापदः पापमाप्नोति नरो लक्षगुणं सदा। पुण्यदः पुण्यमाप्नोति शतशोऽथ सहस्रशः। तथा पात्रविशेषेण दानं स्यादुत्तरोत्तरम्। पितृमातृगुरुब्रह्मादिनां दीयते तु यत्। तल्लक्षगुणितं विद्यात् पुण्यं वा पापमेव वा" वह्निपुराणे "द्वाविमौ पुरुषौ लोके सूर्य्यमण्डलभेदिनौ। दातात्मस्थ च दुर्भिक्षे सुभिक्षे क्षेमवत्सदः"

अथ कर्त्तव्यनिरूपणम्। देवलः "अन्यायाधिगतां दत्त्वा सकलां पृथिवीमपि। अश्वावर्त्तमपात्राय न कार्ष्णिर्नृणमाप्नुयात्"। वह्निपुराणात् "अन्यायोपगतं द्रव्यं गृहीत्वा यो ऽपण्डितः। धर्माभिकाङ्क्षी यजते न धर्मफलमश्नुते। धर्मवैतंसिको यस्तु पापात्मा पुरुषश्लथा। ददाति दानं विप्रेभ्यो लोकविश्वासकारणम्। पापेन कर्म्मणा विप्रो धनं लब्ध्वा निरर्थकः। रागमोहान्वितस्तस्मात्

कुलं योनिमाप्नुयात्। सर्वसङ्क्षयबुद्धिर्हि लोभमोहवशंगतः। उद्वेजयति भूतानि हिंसया पापचेतनः। एवं लब्ध्वा धनं लोभात् यजते यो ददाति च। स पापकर्मणा तेन न विन्दति परां गतिम्" तथा। "एतैरन्यैश्च बहुभिरन्यायोपार्जितैर्धनैः। आरभ्यन्ते क्रिया यासु पिशाचाक्षय दैवतम्"। हरिस्वातातपः "द्रव्येऽन्यायलब्धेन यः करोत्यौर्द्धदेहिकम्। न स तत्फलमाप्नोति तस्यार्थस्य दुरागमात्" स्कन्दपुराणे "देवद्रव्यं गुरुद्रव्यं द्रव्यं चण्डेश्वरस्य च। त्रिविधं पतनं दृष्टं दानलक्षणभक्षणात्"। यमः "अपहृत्य परस्यार्थं दानं यस्तु प्रयच्छति। स दाता नरकं याति यस्यार्थस्य तत्फलम्" तथा। "परिभुक्तमवज्ञातमपर्याप्तमसंस्कृतम्। यः प्रयच्छति विप्रेभ्यस्तद्वन्यपतिष्ठते। परिभुक्तं भट्टीतोपयोगं वस्त्रादि। अपर्याप्तं स्वकार्यौचितं जरद्गवादि। शातातपः "वेदविक्रयनिर्दिष्टं स्त्रीषु यज्ञार्जितं धनम्। यदेयं पितृदेवेभ्यो यच्च स्त्रीवादुपागतम्" वेदविक्रयो निर्दिष्टो व्यपदिष्टो यत्र तत्तथा निर्दिष्टमितिपाठे वेदविक्रयाद्यत्र्यमित्यर्थः। स्त्रीषु यज्ञार्जितमिति स्त्रीव्यापारोपजीवनेन यद्यत्र्यम्। स्त्रीषु विक्रीतास्विति केचित् दत्तः "सामान्यं याचितं न्यास आधिर्दारास्तथैव च। अन्वाहितञ्च निक्षेपः सर्वस्वाम्यये सति। आपत्स्वपि न देयानि नव वस्तूनि पण्डितैः। यो ददाति स मूढात्मा प्रायश्चित्तीयते नरः"। सामान्यं अनेकस्वामिकम्। याचितं संव्यवहारार्थं याचित्वानीतं वस्त्रालङ्कारादि। भट्टस्वामिने अदर्शयित्वा तत्परोक्षमेव भट्टस्वामिने अर्पयोऽयमिति भट्टजनहस्ते स्थापितं द्रव्यं न्यासः। आधिः प्रसिद्धः। दारा: कलत्रम् तद्दानं दारधनम्। तच्च व्याख्यातं मनुना "अध्यग्न्यध्यावाहनिकं दत्तञ्च प्रीतिकर्मणि। भ्रातृमातृपितृप्राप्तं षड्विधं स्त्रीधनं स्मृतम्"। अध्यग्नि अग्निसमक्षं यत् स्त्रियै दत्तम्। अध्यावाहनिकं विवाहकाले पित्रादि दत्तम्। प्रीतिकर्मणि स्त्रीपुंसम्बन्धेन भर्त्रार्पितम्। विवाहोत्तरकालेऽपि भ्रात्रादिभ्यः प्राप्तम्। आत्रेयवल्क्योऽप्याह "भ्रातृमातृपितृपतिप्राप्तमध्यग्न्युपागतम्। आधिवेदनिकञ्चैव स्त्रीधनं परिकीर्त्तितम्" दारान्तरमिच्छता भर्त्रा यद्दत्तं तदाधिवेदनिकम्। एवंप्रकारं स्त्रीधनं न देयमिति। अन्वाहितं यदेकस्य हस्ते निहितं द्रव्यं तेनाप्यनु प्रदातव्यं यस्य हस्ते स्वामिने देहीति निहितम्। भट्टस्वामिसमक्षं स्थापितं द्रव्यं निक्षेपः। कात्यायनः "विक्रयञ्चैव दानञ्च न नेयाः स्युरनिश्चयः। दाराः सुताश्च सर्वस्वमात्मनैव तु योजयेत्। आपत्काले तु कर्तव्यं दानं विक्रय एव वा। अन्यथा न प्रवर्त्तन्ते इति शास्त्रस्य निश्चयः"। "आपत्काले तु कर्तव्यं दानं विक्रय एव वेति" स्वीयदानविक्रयेच्छुदारादिविषयम्। यत्तु दारादीनाम् "आपत्स्वपि न देयानीति" दत्तेष्वदेयत्वमुक्तं तत् स्वदानविक्रयानिच्छुदारादिविषयम्। वसिष्ठः "शुक्रशोणितसम्भवः सुतो मातापितृनिमित्तकस्तस्य प्रदानविक्रयपरित्यागेषु मातापितरौ प्रभवतः नत्वेकं सुतं दद्यात् प्रतिगृह्णीयाद्वा न हि सन्तानाय पूर्वेषां न तु स्त्री सुतं दद्यात् प्रतिगृह्णीयाद्वा अन्यत्रानुज्ञानादृते भर्तुः"। हरीतस्तिः "कस्मैचिद्याचमानाय दत्तं धर्माय यद्भवेत्। पश्चाच्च न तथा तत् स्यान्न देयं तस्य तद्भवेत्"। धर्मं कर्तुं याचमानाय यद्दत्तं तेन चेदसौ धर्मं न कुर्यात्तदा तत्तस्मै न देयमित्यर्थः। अङ्गिराः "बन्धुभ्यो न प्रदेयानि गौर्हृतं शयनं स्त्रियः। विभक्तदत्तिभाक्षीता दातारं तारयन्ति हि। एका एकस्य दातव्या न बन्धुभ्यः कथञ्चन। दातुर्विक्रयमापन्ना दृष्ट्वाचप्रभं कुलम्"। विक्रेतुरेवैतद्दोषप्रदर्शनं न ग्रहीतुस्य दातुरिति। औपकायनः "कन्याश्वाश्वतरञ्चैव देवं यद्दोक्षियादिकम्। तदेकस्मै प्रदातव्यं न बन्धुभ्यः कथञ्चन" व्यासः "न व्यङ्गां रोगिणीं बन्ध्यां न क्रूरां मृतवत्सिकाम्। न वामनां वेहतञ्च दद्याद्विप्राय गां नरः। वेहत् गर्भौषधातिनी। देवलः "विवत्सां रोगिणीं रूक्षां स्थविरां भङ्गभीषणाम्। क्षीणक्षीरशरीराङ्गां दत्त्वा दोषमवाप्नुयात्"। कात्यायनः "न क्षीरां न निर्दन्तां महीं दद्यात् कथञ्चन। न श्मशानपरीतान्तां न च पापनिषेवितां"। पापाः हिंसाप्राणिनो व्याघ्रादयः। विष्णुधर्मोत्तरे "सोगीरां तस्करावीर्णां तथा व्याधवतीं भुवम्। न दद्यात्तु द्विजश्रेष्ठो या च सम्भिन्नसंस्थिता"। स्कन्दपुराणे "पापदः पापमाप्नोति नरो लक्षगुणं सदा। तस्मान्न दद्यान्मेधावी पातकं जातु कस्यचित्"। महाभारते "दुःखितेभ्यो हि भूतेभ्यो मलरोगजरादिभिः। भूयः को दुःखमपरं सहेतो दातुमर्हति। दुःखं ददाति योऽन्यस्य ध्रुवं दुःखं स विन्दति। तस्मान्न कस्यचिद्दुःखं दातव्यं दुःखभीरुणा।

"अथ पात्रविशेषे अदेयमुच्यते। यमः "सुवर्णं रजतं ताम्रं यतिभ्यो यः प्रयच्छति। न तत्फलमवाप्नोति तत्रैव परिवर्त्तते'। परिवर्त्तः विपर्ययः एवशब्दः अवधारणे। तेन तत्र तस्मिन् दातर्यपि परिवर्त्तते धर्म्मविपरीतं धर्मं जनयतीत्यर्थः। तथा चोक्तम् "यतये काञ्चनं दत्त्वा दातापि नरकं व्रजेदिति"। देवलः "पक्वमन्नं सदक्षस्य वातघ्नस्य गोरसः। दक्षिश्च भिक्षुवृत्तिभ्यो न देयं पुण्यमिच्छता"। वृत्तिः भिक्षातिरिक्तं वर्त्तनम्। तथा "न शूद्राय कृषिं दद्यात् स्नेहं क्षीरं तिलान् मधु। न शूद्रात् प्रतिगृह्णीयात्तेषामन्नन्निवेदयेत्। गोरसं काञ्चनं क्षेत्रं गास्तिला मधुसर्पिषी। तथा सर्वान्नसांघापि चण्डालेभ्यो ददेत न"। स्नेहं न ददादिति प्रथममन्तरेण शूद्रस्य स्नेहीति न ब्रूयादित्यर्थः। तेषामपि चोरादीनां क्रयार्थमन्यद्द्रव्यं निवेदयेदित्यर्थः। शङ्खलिखितौ "क्षारं पायसं यावं दधिमधुकृष्णाजिनानि शूद्रेभ्यो न दद्याद्नोपाकृतं किञ्चित्"। विष्णुधर्मोत्तरात् "भूमं धेनुमश्वञ्च रत्नानि कनकन्तथा। तिलांश्च कुञ्जरं दद्यात्रविज्ञातगुणागुणान्" अतःपरं याज्याग्राह्यद्रव्ये विस्तरेणोक्ते ते च याज्याग्राह्यशब्दे प्रायेण दर्शिते।

दानाङ्गकालेषु तिथिकालः प्रथमस्तत्रैव।

भविष्यपुराणे "तिथीनां प्रवरा यस्माद्ब्रह्मणा समुदाहृता। प्रतिपादिता पदे पूर्वं प्रतिपत्तेन चोच्यते। स्नानं दानं व्रतगुणं कार्त्तिके या तिथिर्भवेत्"। स्कन्दपुराणे "आश्विने मासि संप्राप्ते द्वितीया शुक्लपक्षगा। दानं प्रदत्तं यत्तस्यामनन्तफलमुच्यते"। पद्मपुराणे "वैशाखमासे या पुण्या तृतीया शुक्लपक्षगा। अनन्तफलदा दातुः स्नानदानादिकर्मसु"। भविष्यपुराणे "शिवा शान्ता सुखा राजंस्तृतीया त्रिविधा स्मृता। माघे भाद्रपदे शुक्ला शिवा लोकेषु पूजिता। तस्यां स्नानं तथा दानं उपवासो जपस्तथा। भवेत् सप्तगुणितं प्रसादाद्दन्तिनोऽनघ। माघमासि तथा शुक्ला या चतुर्थी महीपते!। सा शान्ता शान्तिदा नित्यं शान्तिं कुर्यात्सदैव हि। स्नानदानादिकं सर्वमक्षयमुच्यते। यदा शुक्लचतुर्थ्यन्तु वारो भौमस्य वै भवेत्। तदा सा सुखदा ज्ञेया सुखा नामेति कीर्त्तिता। स्नानदानादिकं सर्वमक्षयमुच्यते"। स्कन्दपुराणे "शुक्ला मार्गशिरे मासि श्रवणे या च प्रह्वणी। स्नानदाने बहुफला नागलोकप्रदायिनी"। भविष्यपुराणे "वैशे भाद्रपदे मासि षष्ठी च भरतर्षभ!। स्नानदानादिकं सर्वमक्षयमुच्यते" तथा "शुक्लपक्षस्य सप्तम्यां सूर्य्यवारो भवेद्यदि। सप्तमी विजया नाम तत्र दत्तं महाफलम्। शुक्लपक्षस्य सप्तम्यां नक्षत्रं पञ्चतारकम्। यदा च स्यात्तदा ज्ञेया जया नामेति सप्तमी। स्नानदानादिकं तस्यां भवेत् शतगुणं विभो!। पञ्चतारकसंज्ञितः रोहिण्यां क्षेमसंज्ञस्य। "या मार्गशीर्षमासस्य शुक्लपक्षे तु सप्तमी। नन्दा सा कथिता वीर! सर्वानन्दकरी स्मृता। स्नानदानादिकं सर्वमक्षयमुच्यते"। आदित्यपुराणे "रेवती यत्र सप्तम्यामादित्यदिवसे भवेत्। तद्दानं शतसाहस्रमिति प्राह दिवाकरः। भविष्यपुराणे "पौषे मासि यदा देवि! शुक्लाष्टम्यां बुधो भवेत्। तदा तु सा महापुण्या महारुद्रेति कीर्त्तिता। तस्यां स्नानं महादानं तर्पणं विप्रभोजनम्। सत्प्रीतये कृतं देवि! शतसाहस्रिकं भवेत्"। महाभारते "अष्टकासु च यद्दत्तं तदनन्तमुदाहृतम्"। आश्वलायनः "हेमन्तशिशिरयोस्तिसृणामपरपक्षाणामष्टमीष्वष्टका" इति। तथा शातपतस्मृतिः "द्वादश पौर्णमास्यो द्वादशाष्टका द्वादशामावास्या" इति। द्वादशापि कृष्णाष्टम्य इत्यर्थः। देवीपुराणे "आश्विनस्य तु मासस्य नवमी शुक्लपक्षगा। जायते कोटिगुणितं दानं तस्यां नरवरप्रिय!"। गरुडपुराणे "ज्यैष्ठस्य शुक्लदशमी संवत्सरसुखी स्मृता। तस्यां स्नानं प्रकुर्वीत दानञ्चैव विशेषतः। "एकादश्यां सिते पक्षे पुण्यर्क्षं यत्र सत्तम!। तिथौ भवति सा प्रोक्ता विष्णुना पापनाशिनी। दानं यद्दीयते किञ्चित् सकृद्दिव्यं जनार्दनम्। होमो वा क्रियते तस्यामक्षयं कथितं फलम्। माघे भाद्रपदे शुक्ला द्वादशी श्रवणान्विता। महती द्वादशी ज्ञेया उपवासे महाफला। फलं दत्तकृतानाञ्च तस्यां तत्तगुणं भवेत्"। विष्णुधर्मोत्तरात् "भाग्यर्क्षसंयुता चैत्रे द्वादशी स्नानमहाफला"। भाग्यर्क्षं पूर्वफल्गुनी। "हस्तयुक्ता तु वैशाखे ज्यैष्ठे तु स्वातिसंयुता। ज्येष्ठया च तथाषाढे मूलोपेता च वैष्णवे" वैष्णवे श्रावणे मासि। "तथा भाद्रपदे मासि श्रवणेन तु संयुता। आश्विने द्वादशी पुण्या भवत्याजर्क्षसंयुता"। आजर्क्षः पूर्वभाद्रपदा। "कार्त्तिके रेवतीयुक्ता सौम्ये कृत्तिकया तथा"। सौम्यः मार्गशीर्षः। "पौषे मृगशिरोपेता माघे चादित्यसंयुता"। आदित्यः पुनर्वसुः।

भेदे। विष्वग्नुर्ये दत्तायर्थं सौम्यर्क्षं स्वर्यं।" पूर्वोक्तैर्व्याख्यातमेतत्। "अयनांशकतुल्येन काष्ठेनैतत् स्फुटं भवेत्। सर्वविष्णुपदाद्युक्तभेदादि ह्ययनेऽन्यथा। स्वगकर्कादिगे सूर्ये याम्योदगयने सति। तदा संक्रान्तिदाने स्वरूक्ता विष्णुपदादयः।" अयमर्थः राशिं प्रति त्रिंशद्दंशकाः भवन्ति सूर्यश्च प्रतिदिनमेकैकमंशं भुङ्क्ते तत्र यावद्भिरंशैरयनच्युतिर्भवति तावता सूर्यस्य भोग्यकालेन भाविनां विष्णुपदादिकानां च्युतिर्भवतीति ततश्च यदा द्वादशभिरयनच्युतिर्भवतीति तदा भाविन्याः संक्रान्तेर्द्वादशभिर्दिनैरर्वाक् पुण्यकालो भवति ऋणं च तत्संक्रान्तिनिमित्तं दानादि कर्त्तव्यमिति। एवं न्यूनातिरिक्तेष्वपि बोद्धव्यम्। न केवलमादित्यस्यैव संक्रमसमये पुण्यकालः किन्तु सर्वेषामपि ग्रहाणां नक्षत्रराशिसंक्रमे पुण्यकालो भवतीति। तदुक्तं ज्योतिःशास्त्रे "नक्षत्रराश्योरविसंक्रमे खुरर्वाक् परत्रापि रसेन्दुनाड्यः। पुण्याख्यवेन्दोस्त्रिधरापलैर्युता एकैव नाड़ी खनिभिः शुभोक्ता। नाड्यस्ततः सपलाः कुजस्य बुधस्य तिस्रः पलविंशयुक्ताः। सार्द्धाब्धिनाड्यः पलसप्तयुक्ताः गुरोस्तु शुक्रे सपलास्ततस्रः। द्विनागनाड्यः पलसप्तयुक्ता शनैश्चरस्याभिहिताः सुपुण्याः। आद्ये तु मध्ये जपदानहोमं कुर्वन्नवाप्नोति सुरेन्द्रधाम।" अस्यार्थः आदित्यस्य राशिनक्षत्रगमने अर्वाक् परतश्च षोड़श घटिकाः पुण्यकालः। तथा चन्द्रस्यापि राशिनक्षत्रगमने घटिकैकापलानि त्रयोदश अर्वाक् परतश्च पुण्यकालः। एवं मङ्गलस्य घटिकाचतस्रः पलमेकञ्च पुण्यकालः। तथा बुधस्य तिस्रो घटिकाश्चतुर्दश पलानि पुण्यकालः। बृहस्पतेरपि सार्द्धाश्चतस्रो घटिकाः सप्त पलानि पुण्यकालः। शुक्रस्य चतस्रो घटिकाः पलमेकञ्च पुण्यकालः। शनैश्चरस्यापि द्व्यशीतिघटिकाः सप्त पलानि पुण्यकाल इति।

अथ प्रकीर्णकालाः। आह विष्णुः "अमावस्या व्यतीपातो ग्रहणं चन्द्रसूर्ययोः। मन्वादयो युगादिश्च संक्रान्तिर्वैधृतिस्तथा। दिनक्षयं दिनच्छिद्रमवमञ्च तथा परम्। ह्ययने विषुवद्युग्मं षड़शीतिमुखन्तथा। चतस्रो विष्णुपद्यश्च पुत्रजन्मादि चापरम्। आदित्यादिग्रहाणाञ्च नक्षत्रैः सह सङ्गमः। विज्ञेयः पुण्यकालोऽयं ज्योतिर्विद्भिर्विचार्य च। तत्र दानादिकं कुर्यादात्मनः पुण्यवृद्धये।" अमावास्यादीनि प्रसिद्धानि। दिनक्षय उक्तः पद्मपुराणे "द्वौ तिथ्यन्तावेकवारे यस्मिन् स स्याद्दिनक्षयः।" वशिष्ठोऽप्याह "एकस्मिन् सायने त्वस्मिन् तिथीनां त्रितयं यदा। तदा दिनक्षयः प्रोक्तस्तत्र श्राद्धमिदं फलम्।" दिनच्छिद्रलक्षणमाह भृगुः "तिथ्यर्द्धतिथियोगर्क्षभेदादौ शशिपर्वणः। सदृशौ दिवसच्छिद्रसमाख्यौ प्राह भार्गवः। अयमर्थः तिथ्यर्द्धं करणं करणतिथियोगनक्षत्राणामन्ते आदौ च पर्वकालः सोमग्रहणतुल्यः स च दिनच्छिद्रसंज्ञः इति। भेदकालमानमप्युक्तं तेनैव "भेदादिकालः कथितस्तिथिनक्षत्रयोर्घटीद्वयम्। नागवह्निपलोपेतं तच्चे तत्त्वपलैर्युतम्। पलैः षोड़शभिर्युक्तं नाडिकाद्वितयं युतेः। भेदादिसमयः प्रोक्तो दानेऽनन्तफलप्रदः।" क्षतिः करणम्। नागः अष्टौ। वह्नयः त्रयः। भं नक्षत्रम्। तत्त्वं पञ्चविंशतिः। युतिः योगः। तदयमर्थः खिद्यो भवति। तिथिकरणयोरादन्ते घटिकाद्वयमष्टत्रिंशत् पलानि पुण्यकालः। नक्षत्रस्य तु पञ्चविंशतिपलैर्युक्तं घटिकाद्वयम्। योगस्यापि षोड़शभिः पलैर्युक्तं घटिकाद्वयमिति। अयनलक्षणमाह विष्णुः "तिथित्रयं स्पृशत्येको वारः स्यादवमं हि तत्। तिवारस्पृक् तिथिर्यत्र दिनस्पृक् च तदुच्यते।" अत्र दिनक्षयावमयोरियान् भेदः। यत्र तिथिद्वयावसाने वारावसानं स दिनक्षयः। यत्र तिथिद्वयावसानेऽपि वारानुवृत्तिः सोऽवम इति। ब्रह्मप्रोक्ते "एकादश्यमावस्या पूर्णिमा पुत्रजन्म च। वैधृतिश्च व्यतीपातो भद्रा चावसवासरः। युगमन्वादयस्त्वेते स्युरिन्दुपर्वसमानकाः। क्रान्तिसाम्यं दिनच्छिद्रं ग्रहाणां भगमस्तथा"। भगमः राशिनक्षत्रेषु गमनम्। देवीपुराणे "व्यतीपातो विष्णुपदं षड़शीतिमुखन्तथा। क्रान्तिसाम्यमभावास्या ग्रहणं वैधृतिश्च यः। संक्रान्तिश्च दिनच्छिद्रं तिथिद्वित्रिदिनक्षयः। इत्यादिः पुण्यकालस्तु होमदानादिकर्मणः"। स्कन्दपुराणे "ग्रहणं चन्द्रसूर्यस्याप्युत्तरायणमुत्तमम्। विषुवं सव्यतीपातं षड़शीतिमुखन्तथा। दिनच्छिद्राणि संक्रान्तिर्ह्ययं विष्णुपदं पुनः। इति कालः समाख्यातः पुंसां पुण्यविवर्द्धनः। अस्मिन् दत्तानि दानानि स्नानहोमतपांसि च। अमलफलदानि स्युः स्वर्गमोक्षप्रदान्यपि"। आह च्यवनः "अमावास्यासंक्रान्तिव्यतीपातविषुवायनषड़शीतिमुखविष्णुपदादिवैधृतिग्रहणानां स एव पुण्यकालः। "अयने षड़शीतौ च चन्द्रसूर्यग्रहे तथा। युगादौ वैधृतौ चैव दत्तं भवति चाक्षयम्"। आह

भारतेषु "अयनेषु तु यद्दत्तं षडशीतिमुखेषु च। चन्द्रसूर्योपरागे च दत्तं भवति चाक्षयम्"। नारदः "विशाखासु यदा भानुः कृत्तिकासु च चन्द्रमाः। स योगः पद्मको नाम पुष्करेष्वतिदुर्लभः"।

अथ निषिद्धकालाः तत्र शङ्खलिखितौ "व्याहारं मैथुनं निद्रां सन्ध्याकाले तु वर्जयेत्। कर्म चाध्ययनञ्चैव तथा दानप्रतिग्रहौ"। स्कन्दपुराणे "रात्रौ दानं न कर्त्तव्यं कदाचिदपि केनचित्। हरन्ति राक्षसा यस्मात् तस्माद्दातुर्भयावहम्। विशेषतो निशीथे तु न शुभं कर्म शस्यते। अतो विवर्जयेत् प्राज्ञो दानादिषु महानिशाम्। तथा "स्नानञ्चैव महादानं स्वाध्यायन्तु न तर्पणम्। प्रथमेऽब्दे न कुर्वीत महागुरुनिपातने"। व्याघ्र व्यतिःपराशरः "अन्नव्याधेयं प्रतिग्राह्य यत्तदानाद्य भियहान्। माङ्गल्यमभिषेकञ्च मलमासे विवर्जयेत्। वापीकूपतडागादिप्रतिष्ठोदङ्मुखे रवौ। दक्षिणायनसंस्थे कुर्वन् न तत्फलमवाप्नुयात्। बाले वा यदि वा वृद्धे शुक्ले वासुरुपागते। मलमासव्रतैतानि वर्जयेद्व्रतिनः सदा"।

अथ निषिद्धस्यापि धर्मविशेषेषु पुण्यकालत्वमभिधीयते। देवलः "राहुदर्शनसंक्रान्तिविवाहाद्यव्रतेषु। स्नानदानादिकं कुर्युर्निशि काम्यव्रतेषु च"। हस्तवसिष्ठः "ग्रहणोद्वाहसंक्रान्तियात्रादिव्रतेषु च। दानं नैमित्तिकं ज्ञेयं रात्रावपि तदिष्यते"। विष्णुधर्मोत्तरे "पूजनन्त्वतिथीनाञ्च पान्थानामपि पूजनम्। तच्च रात्रौ तथा ज्ञेयं गवासन्नञ्च पूजनम्"। महाभारते "रात्रौ दानं न शंसन्ति विना स्वमयदक्षिणाम्। विद्यां कन्यां द्विजश्रेष्ठा! दीपमन्नं प्रतिश्रयम्"। श्रीमार्कण्डेयपुराणे "महानिशा तु विज्ञेया मध्यस्थं प्रहरद्वयम्। स्नानं तत्र न कुर्वीत काम्यनैमित्तिकादृते"। विश्वामित्रः "महानिशा हे घटिके रात्रौ मध्यमयामयोः। नैमित्तिकन्तथा कृत्यान्नित्यन्तु न मनागपि"।

अथ निमित्तानुरोधेन सदा पुण्यकालाः। विष्णुधर्मोत्तरे "कालः सर्वोऽपि निर्दिष्टः पात्रं सर्वत्रदाहृतम्। उभयस्य प्रदाने तु नास्ति कार्य्या विचारणा। तदेव दानकालस्तु यदा भवसुपस्थितम्"। तथा "न कालनियमो दृष्टो दीयमाने प्रतिग्रहे। तदैव दानमुक्तं यदा पात्रसमागमः। न हि कालं प्रतीक्षेत जलं दातुं तृषान्वितः। यस्मोदकं सदा देयमित्याह भगवान्मनुः"। स्कन्दपुराणे "अर्द्धप्रस्तां गां दद्यात् कालादीनविचारयन्। कालः स एव पर्वाणे यदा सा हिंसकी न गौः"। व्यासः "व्याघ्रग्रस्तुना देया गौः सवत्सा तु पूर्ववत्। तदभावे तु गौरेव नरकोद्धरणाय वै। तदा यदि न शक्नोति दातुं वैतरणीन्तु गाम्। शक्तोऽन्योऽरुक् तदा दत्त्वा चेयो दद्यान्मृतस्य च"। वराहपुराणे "व्यतीपातोऽथ संक्रान्तिस्तथैव ग्रहणं रवेः। पुण्यकालास्तदा सर्वे यदा स्वल्पुरुपस्थितः। तदा गोभूहिरण्यादि दत्तमक्षयतामियात्"। तथा "यावत् कालं स्तुते जाते न नाड्यो छिद्यते नृप!। चन्द्रसूर्योपरागेषु तमाहुः समयं समम्"। विष्णुधर्मोत्तरे "अच्छिन्नधारां यद्दत्तं पुत्रे जाते द्विजोत्तमाः!। संस्कारेषु च पुत्रस्य तदक्षयं प्रकीर्त्तितम्"। मत्स्यपुराणे "यदा वा जायते वित्तं चित्तं श्रद्धासमन्वितम्। तदैव दानकालः स्याद्यतोऽनित्यं हि जीवितम्"। इति कालनिरूपणम्।

अथ देशाख्यं दानाङ्गमुपवर्ण्यते। तत्र देवीपुराणे "सर्वे शिवाश्रमाः पुण्याः सर्वा नद्यः शुभप्रदाः। दानस्नानोपवासादिफलदाः सततं नृणाम्"। व्याघ्र विष्णुः "चातुर्वर्ण्यव्यवस्थानं यस्मिन् देशे न विद्यते। स म्लेच्छदेशो विज्ञेय आर्य्यदेशस्ततः परः"। भविष्यपुराणे "न क्षीयते यत्र धर्मश्चतुष्पात् सकलो द्विज!। स देशः परमो नित्यं सर्वपुण्यफलप्रदः। विद्वद्भिः सेवितो यत्र यस्मिन् देशे प्रवर्त्तते। शास्त्रोक्तश्चापि विप्रेन्द्र! स देशः परमोमतः"। याज्ञवल्क्यः "यस्मिन् देशे मृगः कृष्णस्तस्मिन् धर्म्मान्निबोधत"। श्रीमार्कण्डेयपुराणे "सह्यस्य चोत्तरो यस्तु यत्र गोदावरी नदी। पृथिव्यामपि कृत्स्नायां स प्रदेशोऽतिपावनः"। व्यासः "गङ्गाद्वारे प्रयागे च कपिलके च पुष्करे। नगरे चाङ्गदासे च गङ्गासागरसङ्गमे। कुरुक्षेत्रे गयायाञ्च तीर्थे वाडवरकण्टके। एवमादिषु तीर्थेषु दत्तमक्षयतामियात्। सर्वतीर्थमयी गङ्गा तत्र दत्तं महाफलम्"। स्कन्दपुराणे "वाराणसी कुरुक्षेत्रं प्रयागः पुष्कराणि च। गङ्गा सप्तगतीरञ्च नैमिषारण्यकण्टकम्। श्रीपर्वतमहाकालं गोकर्णं वेदपर्वतम्। इत्याद्याः कीर्त्तिता देशाः सुरसिद्धनिषेविताः। सर्वे शिवोद्भवाः पुण्याः सर्वा नद्यः ससागराः। गोसिद्धमुनिवासाश्च देशाः पुण्याः प्रकीर्त्तिताः। एषु तीर्थेषु यद्दत्तं फलस्यानन्त्यमश्नुते"। पद्मपुराणे "गङ्गा चोदङ्मुखी यत्र यत्र प्राची सर-

स्तनी। तत्र क्रतुशतं पुण्यं स्नानदानेषु सत्रत !। लिङ्गं वा प्रतिमा वापि दृश्यते यत्र कुत्रचित्। तत् सर्वं पुण्यतां याति दानेषु च महाफलम्"। ब्रह्मभोक्ते "नदीतीरे गवां गोष्ठे ब्राह्मणानाञ्च वेश्मनि। दत्तं शतगुणं प्राहुर्लक्षमादित्यसन्निधौ। शिवस्य विष्णोर्दुर्गेश सन्निधौ दत्तमक्षयम्"। तथा "अग्निहोत्रे गवां गोष्ठे वेदघोषविनिश्चिते। शिवायतनसंस्थाने यदल्पमपि दीयते। तदनन्तफलं ज्ञेयं शिवलोकानुभावतः"। मत्स्यपुराणे "शालग्रामसमुद्भूता शिला चक्राङ्कसंस्थिता। यत्र तिष्ठति वसुधे। तत्क्षेत्रं योजनशतम्। द्वारवत्याः शिला देवि! क्षुद्रिता मम सद्मया। यत्रापि नीयते तत्रा-तीर्थं द्वादशयोजनम्"। तथा "प्रयागादिषु तीर्थेषु पुण्येष्वायतनेषु च। दत्त्वा चाक्षयमाप्नोति नदीपुण्या-वनेषु च"। आयतने शङ्करादिक्षेत्रे तदुक्तं भविष्य-पुराणे "क्रोशमात्रं भवेत् क्षेत्रं शिवस्य परमात्मनः। प्राणिनान्तत्र यद्दत्तं शिवसायुज्यकारणम्। फलं दत्त-ङ्कतानाञ्च अनन्तं परिकीर्त्तितम्। मनुजैः स्थापिते लिङ्गे क्षेत्रे मानमिदं स्मृतम्। स्वयम्भुवि सहस्रं स्यादार्षे चैव तदर्द्धकम्"।

अथ श्रद्धाख्यं दानाङ्गमुच्यते। स्कन्दपुराणे "दानं दद्यात् प्रयत्नेन श्रद्धापूतमतन्द्रितः। श्रद्धाकृतं स्वल्पमपि दानमानन्त्यमश्नुते। अश्रद्धयापि यद्दत्तं सर्वस्वमपि सत्तम !। न तत् फलाय भवति तस्माच्छ्रद्धां समाश्रयेत्"। देवलः "प्रदाय याचतेऽर्थं वा श्रद्धाभक्तिसमुद्यताम्। भक्ते पात्रभूताय सर्वाभ्युदयमाप्नुयात्"। महाभारते "श्रद्धया साध्यते धर्म्मो महद्भिर्नरराशिभिः। निष्किञ्चनास्तु सनयः श्रद्धावन्तो दिवं गताः। धर्मार्थकाम-मोक्षाणां श्रद्धा परमकारणम्। पुंसामश्रद्दधानानां न धर्म्मो नापि तत्फलम्"। वह्निपुराणात् "श्रद्धापूर्वाः सर्वधर्म्माः श्रद्धामध्यास्तसंस्थिताः। श्रद्धानिष्ठाप्रतिष्ठाश्च धर्म्माः श्रद्धैव कीर्त्तिताः। श्रुतिमात्ररसाः सच्छाः प्रधानपुरुषेश्वराः। श्रद्धामात्रेण सद्भक्ते न वाक्येन न चक्षुषा। वाचकैर्मनै बहुभिर्न चैवार्थस्य राशिभिः। धर्मः सम्प्राप्यते सच्छैः श्रद्धाहीनैः सुरैरपि। श्रद्धा धर्मः परः सच्छैः श्रद्धा ज्ञानं श्रुतन्तपः। श्रद्धा स्वर्गश्च मोक्षश्च श्रद्धा सर्वमिदं जगत्। सर्वस्वं जीवितञ्चापि दद्याच्छ्रद्धया यदि। नाप्नुयात् स फलं किञ्चित् श्रद्धा-रहितो भवेत्"। वेदव्यासः "श्रद्धा वै सात्विकी देवी सूर्य्यस्य दुहिता नृप !। सवित्री प्रसवित्री च लोक-विश्रुतिनी तथा। वाग्दुष्टं त्रायते श्रद्धा मनोदुष्टञ्च भारत"। महाभारते "क्रियावान् श्रद्दधानश्च दाता प्राप्नोऽनसूयकः। धर्माधर्मविशेषज्ञः सर्वं तरति दुस्त-रम्"। स्कन्दपुराणे "श्रद्धा मातेव जननी स्नानस्य सुकृतस्य च। तस्माच्छ्रद्धां समुत्पाद्य स्नानं सुकृतमर्जयेत्" मनुः "श्रद्धयेष्टञ्च पूर्त्तञ्च नित्यं कुर्यात् प्रयत्नतः। श्रद्धा-कृते ह्यये ते भवतः स्वागतैर्द्वैः"। याज्ञवल्क्यः "दातव्यं प्रत्यहं पात्रे निमित्तेषु विशेषतः। याचि-तेनापि दातव्यं श्रद्धापूतन्तु शक्तितः"। हरीतिः "मन्दा ज्वरोपाद्धोमे तु तपसोन्द्रियदोषतः। न्यूनता स्नान-दाने तु श्रद्धायुक्ते भवेत् क्वचित्"।

"देशनिरूपणञ्च पूर्वं व्रतखण्डादावेव प्रपञ्चितम्। इह तु पात्रादिदानाङ्गनिरूपणप्रतिज्ञानिर्वाहार्थं दिङ्मात्रमेव प्रदर्शितम्। न चात्र भविष्यपुराणमतेन दानाङ्गपञ्चके निरूप्यमाणे दानाङ्गभूतस्यापि दातुः कथं पृथगनुपादन-मिति शङ्कनीयं दानस्य दातृव्यतिरेकेणानुपपत्तेरेव तदाक्षेपात्। एवं तर्हि देशकालादेरप्यनुपादानं स्यात्। "अथ सामान्येनैव तदाक्षेपेऽपि ब्रह्मावर्त्तादिविशेषलाभार्थं तद्विरूपणमिति चेत् दातापि तर्हि शुचित्वादिविशेषलाभार्थं निरूपणीयः स्यात्। उच्यते तत्तद्विधायकवाक्यगता-ख्यातप्रत्ययोपात्तत्वादेव तदनिरूपणं नत्वाक्षेपात्, शुचि-त्वादिविशेषलाभस्तु वाक्यान्तरादिति कर्त्तृनभिधानपक्षे तु प्रत्ययोपात्तभावनयैवासाधारण्येन तदाक्षेपाच्च देशा-दिसाम्यम्। एवमादिकेऽपर्य्यालोचनया षडङ्गं दान-मिति वदता देवलेन तु निरूप्यतएव तथा हि "दाता प्रतिग्रहीता च श्रद्धा देयञ्च धर्मयुक्। देशकालौ च दानानामङ्गान्येतानि षड्विदुरिति"। नन्वत्रोच्यन्त प्रागभिहितमिति तु न पुनरादियामहे। न तु श्रद्धा-दिवदितिकर्त्तव्यतापि दानाङ्गमित्यतः प्रतिपादनीयैव यदाह याज्ञवल्क्यः "देशकाल उपायेन द्रव्यं श्रद्धास-मन्वितम्। पात्रे प्रदीयते यत्तत् सकलं धर्मलक्षणम्"। इति उपायः इतिकर्त्तव्यता।

अथ दानसामान्यविधिरुच्यते। तत्र दातृधर्म्माः। भविष्य-पुराणे "सम्यक् संसाधनं कर्म कर्त्तव्यमधिकारिणा। निष्कामेण महावीरः! काम्यं कामान्वितेन च। आचार युक्तः श्रद्धावान् प्राप्नोत्यध्यात्मवित्तमः। कर्मणां फलमाप्नोति न्यायार्जितधनश्च यः"। तस्मात् प्रथम

कल्पादिना। संसाधनं यथाविहितसाधनम्। अधिकारिणा अर्थिना समर्थेन विदुषा च। अध्यात्मचित्तमः परलोकफलभागित्वात्मनि दृढप्रत्ययवान्। न्यायार्जितधनः स्वदत्त्यर्जितधनः। आपस्तम्बः "प्रयोजयितानुमन्ता कर्त्तेति स्वर्गनरकफलेषु भागिनः यो भूय आरभते तस्मिन् फलविशेषः"। याज्ञवल्क्यः "विधिदिष्टन्तु यत् कर्म करोत्यविधिना तु यः। फलं न किञ्चिदाप्नोति कृशमात्मं हि तस्य यत्"। मनुः "प्रभुः प्रथमकल्पस्य योऽनुकल्पेन वर्त्तते। न साम्परायिकं तस्य दुष्कृतंविद्यते फलम्"। साम्परायिकं पारलौकिकम्। योगियाज्ञवल्क्यः "श्रद्धान्वितमसायुक्तं कर्म यत् क्रियते नरैः। सुविशुद्धेन भावेन तदानन्त्याय कल्पते। विधिहीनं भावदुष्टं हतमश्रद्धया च यत्। तद्वरन्त्यसुरास्तस्य मूढस्य ह्यकृतात्मनः"। भविष्योत्तरे "काम्योदानविधिः पार्थ! क्रियमाणो यथातथम्। फलाय मुनिभिः प्रोक्तो विपरीतो भयावहः"। गारुडपुराणे "प्रशस्तदेशकाले च पात्रे दत्तं तदक्षयम्। कोटिजन्मार्जितं पापं ददतस्तस्य नश्यति। सकलाङ्गोऽपि सम्भारो यस्य दानक्रियाविधौ। सम्पन्नेदपि पापीयान् स सद्यो दुष्कृमेष्यति"। देवीपुराणे "शुचिना भावपूतेन शान्तिसत्यव्रतादिना। अपि सर्वपमात्रोऽपि दातारं तारयेदिह"। दक्षः "दानञ्च विधिवद्देयं काले पात्रे गुणान्विते"। यमः "सर्वत्र गुणवद्दानं श्रपाकादिष्वपि स्मृतम्। देशे काले विधानेन पात्रे दत्तं विशेषतः"। गुणवत् उत्तमफलम्। तथा "दानं हि वर्द्धमानार्थो गुणवद्भ्यः प्रयच्छति। स तु प्रेत्य धनं लब्धा पुत्रपौत्रैः सहाश्नुते। परत्रादृष्टफलेह दानं दत्त्वा विचक्षणः। सुखोदयं सुखोदर्कं प्रेत्य वै लभते धनम्"। अदृष्टफलं पीड़ानुत्पाद्य, सुखोदर्कं सुखोत्तरफलम्। रामायणे "नावज्ञया प्रदातव्यं किञ्चिदा केनचित् क्वचित्। अवज्ञया हि यद्दत्तं दातुस्तद्दोषमावहेत्"। शातातपः "अभिगम्य तु यद्दानं यच्च दानमयाचितम्। विद्यते सागरस्यान्तस्तस्यान्तो नैव विद्यते। प्रशस्तानि च दानानि ज्ञानञ्च निरहंकृतम्। तपांसि च सुगुप्तानि तेषां फलमनन्तकम्"। ब्रह्मपोक्ते "सुप्राधघ्रायी सुप्रदाता सुप्रपूजाग्निसत्क्रियः। पूज्यते सर्वलोकेषु सर्वदेवैः शतक्रतुः"। व्यासः "स्वयं नीत्वा तु यद्दानं भक्त्या पात्राय दीयते। तत् सहस्रगुणं भूत्वा दातारमुपतिष्ठति"। हरिस्मृतिः "कृते प्रदीयते गत्वा त्रेतायां दीयते स्वके। द्वापरे च प्रार्थयति कलौ चानुगमान्विते"। प्रतिग्रहीतृगृहं गत्वा यद्दीयते तत् कृते युगे दत्तं भवति प्रतिग्रहीतारं स्वगृहमाहूय यद्दीयते तत् त्रेतायुगे दत्तं भवतीत्यर्थः एवमुत्तरत्रापि। वह्निपुराणे "तमोद्धतस्तु यो दद्याद्भयात् क्रोधात् तथैव च। नृप! दानन्तु तत्सर्वं सुदृक्के गर्भस्थ एव च। दैवमन्युमनाश्चैव दम्भार्थं चार्थकारणात्। यो ददाति द्विजातिभ्यः स बालत्वे तदश्नुते। देशे काले च पात्रे च योददाति द्विजातिषु। परितुष्टेन मनसा यौवने तु तदश्नुते। वैश्वदेवविहीनं च सन्ध्योपासनवर्जितम्। यद्दानं दीयते तत्तु दृद्धकाले समश्नुते"। आह्न मनुः "न विक्रयेत तपसा, वेदैर्दिष्टां न चाचरेत्। नार्त्तो विप्रवदेद्विप्रान् न दत्त्वा परिकीर्त्तयेत्। यशोऽर्थतेन चरति तपः चरति विक्रयात्। आयुर्विप्रापवादेन दानन्तु परिकीर्त्तनात्"। यमः "आर्त्तां दत्त्वा ह्युदातारं दानकाले निषेधकम्। दत्त्वा सन्तप्यते यस्तु तमाहुर्ब्रह्मघातकम्"। हारीतः "दानं स्नानं तपस्त्यागोमन्त्रकर्म्म विधिक्रियाः। मद्यलाचारनियमाः शौचभ्रष्टस्य निष्फलाः"। आह्न प्रचेताः "स्नातोऽधिकारी भवति दैवे पित्र्ये च कर्मणि। पवित्राणां तथा लाभ्ये दाने च विधिचोदिते"। वायुपुराणे "क्रियां यः कुरुते मोहादनाचम्योह नास्तिकः। भवन्ति न तथा तस्य क्रियाः सर्वाः न संशयः"। शाङ्खायनः "दानमाचमनं होमं भोजनं देवतार्चनम्। प्रौढ़पादोन कुर्वीत स्वाध्यायं पितृतर्पणम्। आसनाद्भूपादस्तु जान्वोर्वा जङ्घयोस्तथा। कृतावसक्थिकोयत्र प्रौढ़पादः स उच्यते"। वशिष्ठः "यज्ञे शुक्लवस्त्रेण स्वले चैरार्द्रवाससा। अपोहोमस्तथा दानं तत्सर्वं निष्फलं भवेत्"। विष्णुपुराणे "होमदेवार्चनाद्यासु क्रियास्वाचमनं तथा। नैकवस्त्रः प्रवर्त्तेत द्विजवाचनके जपे"। द्विजवाचनके द्विजस्वस्तिवाचनादौ। शातातपः "सव्यादंसात् परिभ्रष्टकटिदेशश्च ताम्बरः। एकवस्त्रन्तु तं विद्यात् दैवे पित्र्येच वर्जयेत्"। लोकगौतमः "स्नाने दाने जपे होमे दैवे पित्र्ये च कर्मणि। वस्त्रीयाद्यासुरी कक्षां शेषकाले यथारुचि। याज्ञवल्क्यः "परिधानाद्बहिः कक्षा निबद्धा ह्यासुरी भवेत्। धर्मकर्मणि विद्वद्भिर्वर्जनीया प्रयत्नतः। बहिःकक्षा बहिर्निगता कक्षेत्यर्थः"।

मनुः "न कुर्यात् कस्यचित् पीड़ां कर्मणा मनसा गिरा। आचरन्नभिषेकन्तु कर्माण्यन्यन्यथा चरन्। सन्ध्ययोरुभयोर्जप्ये भोजने दन्तधावने। पितृकार्ये च दैवे च तथा मूत्रपुरीषयोः। गुरूणां सन्निधौ दाने याने चैव विशेषतः। एषु मौनं समातिष्ठन् स्वर्गं प्राप्नोति मानवः"। पराशरः "स्नाने दाने जपे होमे दैवे पित्र्ये च कर्मणि। सव्यापसव्यौ कर्तव्यौ सपवित्रौ करौ द्विजैः"। लघुहारीतः "जपे होमे तथा दाने स्वाध्याये पितृतर्पणे। अन्यूनन्तु करं कुर्यात् सुवर्णरजतैः कुशैः। दर्भहीना तु या सन्ध्या यच्च दानं विनोदकम्। असंख्यातन्तु यज्जप्तं तत्सर्वं निष्प्रयोजनम्"। हारीतः "देवाश्च पितरश्चैव तपोयज्ञदानानामीशते मन्वारः सर्वकार्यसाधनानामार्त्तिभयोपसर्गेभ्योरक्षितारो भवन्ति मन्त्रा देवतास्तदा एवंसिद्धमन्त्रवत् करोति देववत्करोति यद्ददाति देवताभिरेव तद्ददाति यत् प्रतिगृह्णाति देवताभिरेव तत् प्रतिगृह्णाति तस्माद्रामन्त्रवत् प्रतिगृह्णीयात् यत्त्वमन्त्रतः प्रतिपादिता हि देवतास्तुष्टीं प्रतिगृह्णीयुर्हि यठा भवन्ति तस्मान्मन्त्रवदङ्गिरोवोक्ष्य दद्यादालभ्य वा"। अवोक्ष्य प्रोक्षणं कृत्वा। आलभ्य सोदकेन पाणिना स्पृष्ट्वा। आपस्तम्बः "सर्वाणुदकपूर्वाणि दानानि यथाश्रुति वीहारे" वीहारे यज्ञे कन्याहार्यदानादौ यथाश्रुति यावदेव श्रुतं तावदेव कुर्यान्नोदकपूर्वतादिनियम इत्यर्थः। वराहपुराणे "तोयं दद्यात् द्विजकरे दाने विधिरयं स्मृतः। सकृत्तोदकहस्तश्च ददामीति तथा वदेत्"। गौतमः "अन्नजांस्तु करं कृत्वा सकृदन्तु तिलोदकम्। फलानि चाभिसन्धाय प्रदद्यात् श्रद्धयान्वितः" पात्रासन्निधाने तु नारदीयपुराणे विशेष उक्तः। "मनसा पात्रमुद्दिश्य जलं भूमौ विनिःक्षिपेत्। विद्यते सागरस्नानो दानस्नानो न विद्यते"। धौम्यः "दानकाले तु सम्प्राप्ते पात्रस्यासन्निधौ जलम्। अन्यविप्रकरे दत्त्वा दानं पात्रे निधीयते"। षट्त्रिंशन्मतात् "पात्रं मनसि सङ्कल्प्य क्रियावन्तं गुणान्वितम्। देशे काले च संप्राप्ते देवमप्सु विनिःक्षिपेत्"। उभयासन्निधाने तु विशेषस्तत्रैवोक्तः "द्रव्यपात्रविकर्षेत्तु परोक्षं दातुमुद्यतः। तत् ध्यायेद्विभुं पात्रं द्रव्यमादित्यदैवतम्"। धौम्यः "परोक्षेऽपि तु यद्दत्तं तीर्थे स्नातेन सोदकम्। तद्दानं सोदकं प्राहुरनन्तफलदायकम्। परोक्षे कल्पितं दानं पात्राभावे कथं भवेत्। गोत्रजेभ्यस्तथा दद्यात् तदभावेऽस्य बन्धुषु। परोक्षेऽपि च यद्दत्तं भावपूर्वेण चेतसा। गुरुमित्रद्विजातिभ्यस्तत्तु दानमनन्तकम्। परोक्षे खलु यद्दत्तं सस्यस्वरविवर्जितम्। दृश्यते सागरस्नानस्तस्नानो नैव दृश्यते"। आपस्तम्बः "तस्मादोमित्युदाहृत्य यत्तदानतपःक्रियाः। प्रवर्त्तन्ते विधानोक्ताः सततं ब्रह्मवादिनः। त्रिमात्रस्तु प्रयोक्तव्यः कर्मारम्भेषु सर्वशः। तिस्रः साद्धांस्तु कर्त्तव्या मात्रास्तत्रार्थचिन्तकैः। देवताध्यानकाले न प्लुतं कुर्यात् न संशयः।" हस्तवशिष्ठः "नामगोत्रे समुच्चार्य सम्यदानस्य चात्मनः। सम्प्रदेयं प्रयच्छन्ति कन्यादाने तु प्लुत्वयम्। प्लुत्वयमिति प्रपितामहादिपुरुषत्रयमित्यर्थः। तदुक्तं "वान्दीमुखे विवाहे च प्रपितामहपूर्वकम्। नाम सङ्कीर्त्तयेत् विद्वानन्यत्र पितृपूर्वकम्। तथा दानहोमजपान् कुर्वन्नासीनः कुशसंस्तरे। एषां फलमनन्तन्तु लभते प्राङ्मुखोनरः"। स्मृत्यन्तरात् "नामगोत्रे समुच्चार्य सम्यक् श्रद्धान्वितो वदेत्। सङ्कीर्त्य देशकालादि द्रव्यं सम्प्रदेहि इति। न समेति सस्यत्वस्य निवृत्तिमपि कीर्त्तयेत्" षट्त्रिंशन्मतात् "प्रणीते तु समिद्वह्नौ जुहुयाद्व्याहृतित्रयम्। उदगग्रेषु दर्भेषु पात्रं तेषूपपादयेत्। प्रागग्रेषु स्वयंस्थित्वा दाता च परमेश्वरम्। ध्यात्वा स्वपुष्पमुद्दिश्य दक्षिणां प्रतिपादयेत्। समस्ता व्याहृतीर्जुहुत्वा तत्रोपरि समाप्नुयेत्। ब्राह्मणं प्रणिपत्याथ ततः पात्रं विसर्जयेत्। अनेन विधिना दानं दातव्यं होमपूर्वकम्। तत् कर्म दक्षिणावर्जं होमवर्जञ्च नार्हति"। एतच्च विच्छिन्नाङ्गभूतहोमेषु होमानुवादपुरःसरमुपदर्शितं तत्तद्गुणविधिपरम्। अन्यथा श्रुतयाऽदृष्टशिष्टाचारेषु ताम्बूलादिदानेष्वपि प्रसङ्गः स्यात्। ततःपरं प्रतिगृहीतृधर्मास्तत्रोक्तास्तु च प्रतिगृहीतृ शब्दे द्रष्टव्याः।

दानप्रतिग्रहीतृधर्मधर्मास्तत्रोक्ता यथा

मरुड़पुराणे "दैवं वा कर्म पित्र्यं वा नाशुचिः कर्तुमर्हसि। स्नानमेव द्विजातीनां परं शुद्धिकरं स्मृतम्। अतः स्नातोऽर्हतामेति दाने चैव प्रतिग्रहे। अस्नातमन्त्रादिना कर्म राक्षसत्वाय कल्पते। प्रजापतिः कर्मशुद्ध्यै पवित्रमसृजत्पुरा। रक्षोघ्नमेतत् परमं मुनिभिः कल्पितं सदा। तस्मात्सत्कर्मयोर्ह्यं" ददता प्रतिगृह्णता। स्नानहोमजपादीनि कुर्वता च विशेषतः। संख्यञ्च

दैवत्यं मार्गं ब्रह्ममार्गविनिर्मितम्। सकृत् प्रदक्षिणीकृत्य पवित्रमभिधीयते"। वायुपुराणे "दानं प्रतिग्रहो होमो भोजनं बलिरेव च। साङ्गुष्ठेन सदा कार्यमन्यथा भवेत्"। साङ्गुष्ठेन अङ्गुलीसङ्गताङ्गुष्ठेन। "एतान्येव च कार्याणि दानादीनि विशेषतः। अन्यत्रापि विधेयानि तदाचमनं नृप!"। बौधायनः "भोजनं श्रवणं दानमुपहारः प्रतिग्रहः। बहिर्जानु न कार्याणि तदाचमनं स्मृतम्"। ब्रह्माण्डपुराणे "नाधिकारी सकृत्कृत्वो सकृच्चूडस्तथैव च। दाने प्रतिग्रहे यज्ञे ब्रह्मयज्ञादिकर्मसु। देवाः समेत्य यस्मात् हि तच्च पुंसामकल्पयन्। ततश्च वाससा हीनमसंपूर्णं प्रचक्षते। सोत्तरीयस्ततः कुर्यात् सर्वकर्माणि भावतः। अधौतं कार्पासं धौतञ्च परिदध्यान्न वाससी। ददानः प्रतिगृह्णंश्च दध्यादहतमेव च"। वराहपुराणे "स्नातः सम्यगाचान्तः कृतसंध्यादिकक्रियः। कामक्रोधविहीनश्च पापसङ्गविवर्जितः। जितेन्द्रियः सत्यवादी पात्रं दाता च शस्यते" तथा "प्रमीते गोत्रपुरुषे सूतके वा समागमे। दशरात्रमनर्हः स्यात् कर्तुं दानप्रतिग्रहौ। पिण्डोदकादि सूतके दातुं प्रेताय युज्यते। अच्छिन्नायां तथा नाड्यां दानार्हौ सूतसूतके"। विष्णुधर्मोत्तरे "शुचिर्वाप्यशुचिर्वापि दद्यादभयदक्षिणाम्। शुचिनाऽशुचिना वापि यस्मा भय उपस्थिते"। छन्दोगपरिशिष्टे कात्यायनः "कृशोपरिनिविष्टेन तथा यज्ञोपवीतिना। देयं प्रतिग्रहीतव्यमन्यथा विफलं हि तत्"। याज्ञवल्क्यः "ओङ्कारेण ददात् प्रतिगृह्णीयाच्च"। स्कन्दपुराणे "प्रणवो जगतां बीजं वेदानामादिरेव च। एष एव परं ब्रह्म पवित्रमयसत्तमम्। तस्मात् प्रणवसङ्घार्यं कार्यौ दानप्रतिग्रहौ" यमः "योऽर्चितं प्रतिगृह्णाति योऽर्चयित्वा प्रयच्छति। तावुभौ गच्छतः स्वर्गं विपरीते विपर्ययः"। लिङ्गपुराणे "दद्याद्दानं यथा शक्त्या सदाभ्यर्चनपूर्वकम्। ब्राह्मणश्चापि गृह्णीयाच्छक्त्या दत्तं प्रतिग्रहम्"। शातातपः "प्रश्रयपूर्वन्तु यो दद्यात् ब्राह्मणाय प्रतिग्रहम्। स पूर्वं नरकं याति ब्राह्मणश्चादनन्तरम्"। प्रश्रयपूर्वमिति एतमध्यायम् एतमनुवाकं वा यदि त्वमस्खलितं पठसि तदा तवैतावद्दद्दामीत्युक्त्वा तथा कृते यद्दीयते तत् प्रश्रयपूर्वकम्। व्यासः "अवमानेन यो दद्याद्गृह्णीयाद्यः प्रतिग्रहम्। तावुभौ नरके मग्नौ वसेतां शरदां शतम्"। शातातपः "कार्यलोभेन योदद्याद्गृह्णीयाद्यः प्रतिग्रहम्। दाताये नरकं याति ब्राह्मणश्चादनन्तरम्"। विष्णुधर्मोत्तरे "प्रतिग्रहोयोविधिना प्रदत्तः प्रतिग्रहो योविधिना गृहीतः। द्वयोः प्रयोगस्तरमन्तु कार्यः श्रेयस्तथाप्नोति न संशयोऽत्र"।

अथ मिश्रधर्माः। नन्दिपुराणे "दाने विधिमविज्ञाय नहि तद्दातुमर्हति। प्रतिग्रहानभिज्ञश्च गृह्णन्निरयमश्नुते। सावत्तं प्रतिगृह्णानो यद्गीतापि पतत्यधः। किन्वं वेत्तीति वक्तव्यो न दात्रा ब्राह्मणः क्वचित्। सोऽपि पृष्टः स्वयं तेन दानार्थं तं न कीर्त्तयेत्"। यदि त्वमेतत् पठसि तदा तुभ्यमेतद्ददामीति साक्षात् परीक्षणमत्र निषिध्यते, पात्रत्वबोधार्थमुपायान्तरेण परीक्षणं त्वनुमतमेव। तदुक्तं यमेन "शीलं संवसनाज्ज्ञेयं शौचं संव्यवहारतः। प्रज्ञा संकथनात् ज्ञेया त्रिभिः पात्रं परीक्ष्यते"। संकथनं शुद्धभावेन विद्याकथा। वराहपुराणे "अपि सर्वप्रपात्रं हि न देयं विचिकित्सता। मनसा ज्ञानतुल्यातः प्रतिगृह्णीत नैव हि। ददानः प्रतिगृह्णंश्च यतो लोभभयादिना। नाप्नोति श्रेयसा योगं निरयं चैव गच्छति।" नारदीयपुराणे "देशकालविधानादौ हीनं दानं मयोदितम्। दातुः प्रतिग्रहीतुश्च गृहीतमसतः सदा।" षट्त्रिंशन्मतात् नामगोत्रे समुच्चार्य प्राङ्मुखो देयकीर्त्तनात्। षडङ्गसुखाय विप्राय दत्त्वान्ते स्वस्ति वाचयेत्। देयकीर्त्तनादिति देयकीर्त्तनोत्तरकालं दत्त्वेत्यर्थः। "प्राक्प्रत्यगास्यो वोहार्हे दातृयाचकयोः स्थितिः। ददात् पूर्वमुखो द्रव्यमेष एव विधिः सदा"। यत्तु कीर्त्तयन्ति "प्राङ्मुखः प्रतिगृह्णीद्विवाहे तु विपर्ययः" इति तस्य समूलत्वे सिद्धे अनुष्ठानविकल्पः, तत्राद्यं दङ्मुखसंप्रदानवैशिष्ट्यमूलेनोत्तरदेवानुरोधेन। तदुक्तं स्मृत्यन्तरे "ददात् पूर्वमुखो दानं गृह्णीयादुत्तरामुखः। आयुर्विवर्द्धते दातुर्गृहीतः क्षीयते तु तत्"।

देयद्रव्याणां दानमन्त्राः हेमाद्रौ खण्डे दर्शिता यथा तत्र कपिलायाः मात्स्ये "कपिले! सर्वभूतानां पूजनीयासि रोहिणि!। सर्वतीर्थमयी यस्मादतः शान्तिं प्रयच्छ मे" शङ्खस्य "पुण्यस्त्वं शङ्ख! पुण्यानां मङ्गलानाञ्च मङ्गलम्। विष्णुना विधृतो नित्यमतः शान्तिं प्रयच्छ मे"। वृषस्य "धर्मस्त्वं वृषरूपेण जगदानन्दकारकः। अष्टमूर्त्तेरधिज्ञानमतः शान्तिं प्रयच्छ मे"।

धेनुः "हिरण्यगर्भगर्भस्थं हेम बीजं विभावसोः। अनन्त-पुण्यफलदमतः शान्तिं प्रयच्छ मे"।

पीतवस्त्रस्य "पीतवस्त्रयुगं यस्माद्विष्णुदेवस्य वल्लभम्। प्रदानात्तस्य मे विष्णुरतः शान्तिं प्रयच्छतु"।

श्वेताश्वस्य "यस्माद्विष्णुस्वरूपेण यस्मादमृतसम्भवः। चन्द्रार्क-वाहनं नित्यमतः शान्तिं प्रयच्छ मे"।

धेनोः "यस्मात्त्वं पृथिवी सर्वा धेनुः केशवसन्निभा। सर्व-पापहरा नित्यमतः शान्तिं प्रयच्छ मे"।

लोहस्य "यस्मादायुधकर्माणि त्वदधीनानि सर्वदा। लाङ्ग-लाद्यायुधादीनि ततः शान्तिं प्रयच्छ मे"।

छागस्य "यस्मात्त्वं छाग! यज्ञानामङ्गत्वेन व्यवस्थितः। वानं विभावसोर्नित्यमतः शान्तिं प्रयच्छ मे"।

श्वेतवस्त्रस्य "शरणं त्रं सर्वलोकानां लज्जाया रक्षणं परम्। सुवेशधारि त्वं यस्माद्वासः! शान्तिं प्रयच्छ मे"।

रक्तवस्त्रयुगस्य "रक्तवस्त्रयुगं यस्मादादित्यस्य प्रियं सदा। प्रदानादस्य मे सूर्यो सुतः शान्तिं प्रयच्छतु"।

कृष्णवस्त्रस्य "धर्मराजेन विधृतं कृष्णवस्त्रं सुशोभनम्। सर्वक्लेशविनाशाय कृष्णवस्त्रं ददाम्यहम्"।

अक्षस्य "अक्षमेव यतो लक्ष्मीरक्षमेव जनार्दनः। अक्षं ब्रह्मा-खिलत्राणमस्तु मे जन्मजन्मनि"।

सोपस्करदध्यन्नस्य "चन्द्रमण्डलमध्यस्थं चन्द्राम्बुजसमप्रभम्। दध्यन्नं तस्य दानेन प्रीयतां वामनो मम। दध्यन्नं सोपस्करञ्च ब्रह्मविष्णुशिवात्मकम्। प्रीयतां धर्मराजो हि तद्दानान्मम सर्वदा"।

सपानीयदध्यन्नस्य "पानीयसहितञ्चैतत् सदध्योदनपात्रकम्। समर्चितं तत् सफलं सदक्षिणं सट्टाणं दध्योदनपात्रकं मम"।

क्षीरान्नस्य "सर्वात्मा सर्वलोकेशः सर्वव्यापी सनातनः। नारायणः प्रसन्नः स्यात् क्षीरान्नप्रदानतः"।

पायसान्नस्य "पायसं परमान्नञ्च सर्वदानोत्तमोत्तमम्। सर्वदेवतयोग्यञ्च श्रेयःपुष्टिं प्रयच्छतु"।

सपूपान्नस्य "आदित्यतेजसा भक्तं जातिश्रैष्ठ्यकरं परम्। तदन्नं मम विप्र! त्वं प्रतीच्छापूपसत्तमम्"।

सक्तूनाम् "प्राजापत्या यतः प्रोक्ताः सक्तवो यज्ञकर्मणि। तस्मात् सक्तून् प्रयच्छामि प्रीयतां मे प्रजापतिः"।

रजतस्य "असुरेषु समुद्भूतं रजतं पितृवल्लभम्। तस्मादस्य प्रदानेन रुद्रः सन्प्रीयतां मम"।

ताम्रपात्रस्य "परापवादपैशून्यादभक्ष्यस्य च भक्षणात्। तत्प्रजातञ्च यत् पापं ताम्रपात्रं प्रणाश्यतु"।

कांस्यपात्रस्य "यानि पापानि कास्यानि कामोत्थानि कृतानि च। कांस्यपात्रप्रदानेन तानि नश्यन्तु मे सदा"।

स्वर्णगर्भतिलपात्रस्य "देवदेव! जगन्नाथ! वाञ्छितार्थफल-प्रद!। तिलपात्रं प्रदास्यामि तवाङ्गे संस्थितेरहम्"।

दर्पणस्य "दर्शनेन त्वमादर्श! स्त्रियां मङ्गलदायकः। सौभ्य-सौभाग्यसत्कीर्तिनिर्मलज्ञानदो भव"।

सक्तूनाम् "ताम्रपर्ण्यां समुत्पन्ना वर्षाद्याकल्पवर्धिताः। सक्तवः शुक्लपुष्पाः सन्तु मुक्तिसुक्तिप्रदा मम"।

सुवर्णपद्मस्य "त्वद्गर्भो जगतश्चक्षुर्वेधसो हेमपङ्कजः। पद्मा-वासकरेणाभिजातो मां पाहि सर्वदा"।

सिंहस्य "कान्तारवनदुर्गेषु चौरव्याघ्राकुले पथि। हिंसकास्तु न हिंसन्ति सिंहदानप्रभावतः"।

अङ्गुलीयकस्य "हिरण्यगर्भसम्भूतं सौवर्णमङ्गुलीयकम्। धर्मप्रदं प्रयच्छामि प्रीयतां कमलापतिः"।

वलयस्य "काञ्चनं हस्तवलयं रूपकान्तिसुखप्रदम्। विभूषणं प्रदास्यामि विभूषयतु मां सदा"।

कुण्डलद्वयस्य "क्षीरोदमथने पूर्वसम्भूतं कुण्डलद्वयम्। श्रिया सह यदुद्भूतं ददे श्रीः प्रीयतां मम"।

तुलसी: "मणिकाञ्चनपुष्पाणि मणिसम्भवानि च। तुल-सीपत्रदानस्य कलां नार्हन्ति षोडशीम्। तुलसीपत्र-दानाद्धि ब्रह्मणः कायसम्भवम्। पापप्रशमनं यातु सर्वं सन्तु मनोरथाः"।

दुग्धस्य "अमृतक्षीरसम्भूतं नित्यं नित्यं सौभाग्यवर्द्धनम्। क्षीरं मङ्गलमायुष्यं ततः शान्तिं प्रयच्छ मे"।

नवनीतस्य "कामधेनोः समुद्भूतं विष्णोस्तुष्टिकरं परम्। नव-नीतं प्रदास्यामि बलं पुष्टिञ्च देहि मे"।

आज्यस्य "कामधेनुसमुद्भूतं देवानामुत्तमं हविः। आयुर्वि-वर्द्धनं दातुराज्यं पातु सदैव माम्"।

तैलस्य "तैलं पुष्टिकरं नित्यमायुष्यं पापनाशनम्। अभा-ङ्गल्यहरं पुण्यमतः शान्तिं प्रयच्छ मे"।

पादुकायाः "कण्टकोच्छिष्टपाषाणदुश्चिकादिनिवारणम्। पादुकां सम्प्रदास्यामि विप्र! प्रीत्या प्रगृह्यताम्"।

चामरस्य "यशोङ्करसङ्काश! क्षिप्तक्षीरपाण्डुर!। प्रोन्नारयाशु दुरितं चामरामरवल्लभ!"।

चन्दनखण्डस्य "चन्दनावासमन्दारसखे! वृन्दारकार्चित!। चन्दन! त्वत्प्रसादान्मे सान्द्रानन्दप्रदो भव"।

चन्दनाद्यनुलेपनस्य "श्रीखण्डकाश्मीरकर्पूरकस्तूरीकुङ्कु-मा-

न्वितम्। विलेपनं प्रयच्छामि सौख्यमस्तु सदा मम"।

कस्तूर्याः "समस्तेभ्योऽपि वस्तुभ्यः संस्तुतासि सुरासुरैः। विन्यस्ताऽङ्गेषु कस्तूरी सुखदाऽस्तु सदा मम"।

कर्पूरस्य "कन्दर्पदर्पदो यस्मात् कर्पूर! ग्राहयतर्पण!। श्रमभावभवज्वापल्लहनादपसर्पतु"।

गोपीचन्दनस्य "यदभूदङ्गसंलग्नं कुङ्कुमादिविलेपनम्। जलक्रीडासु गोपीनां द्वारवत्यां जलार्पितम्। गोपीचन्दनमित्युक्तं मुनीन्द्रैः किल्बिषापहम्। तस्मादस्य प्रदानेन विष्णुर्दिशतु वाञ्छितम्"।

शिवप्रतिमायाः "त्वया सुराणामसृतं विधाय हालाहलं संहृतमेव यस्मात्। तथाऽसुराणां, त्रिपुरञ्च दग्ध्वा मेकेषुणा लोकहितार्थमीश!। तव प्रदानादहमद्यदोषी दोषैर्विमुक्तस्तु गुणान् प्रपद्ये। तथा कुरु त्वं शरणं प्रपद्ये त्वयि प्रभो! देववर! प्रसीद"।

उमामहेश्वरयोः "प्रसीदत भवोनित्यं शक्तिपार्वा महेश्वरः। पार्वत्या सहितोदेवोजगदुत्पत्तिकारकः"।

शिवलिङ्गस्य "शिवयक्त्यात्मकं यस्मात् जगदेतच्चराचरम्। तस्मादनेन सर्वं मे करोतु भगवान् शिवम्। कैलासवासी गौरीशो भगवान् भगनेत्रभित्। चराचरात्मकोलिङ्गरूपी दिशतु वाञ्छितम्"।

मरकतलिङ्गस्य "इदं मारकतं लिङ्गं रौप्यपीठसमन्वितम्। धान्यैर्द्वादशभिर्युक्तमेकादशफलान्वितम्। सम्प्रदद्यां विधानेन यथोक्तं फलमस्तु मे"।

काश्मीरलिङ्गस्य "काश्मीरलिङ्गपट्टे तु इदं काश्मीरजं वदेत्"।

सप्तभूमेः "सर्वभूताश्रया भूमिर्वराहेण समुद्धृता। धनधान्यसुखफलदा यतः शान्तिं प्रयच्छ मे"।

ऊर्णायाः "ऊर्णा मेषसमुत्पन्ना शीतवातभयापहा। यस्मात्तुषारहारी स्यादतः शान्तिं प्रयच्छ मे"।

ऊर्णापटस्य "ऊर्णपटमनुध्येयं स्वर्णवोजं तव प्रभो!। दत्तं मयाद्य देवेश! पापं संहर सत्वरम्"।

धान्यस्य "धन्यं करोषि दातारमिह लोके परत्र च। तस्मात् प्रदीयते धान्यमतः शान्तिं प्रयच्छ मे"।

गोधूमानाम् "यस्मादस्मद्भवोजम्बूद्वीपो गोधूमसम्भवः। गान्धर्वसौख्यधनदः यतः शान्तिं प्रयच्छ मे"।

मुद्गानाम् "सद्बीजानि वै यस्मात् प्रियाणि परमेष्ठिनः। तस्मादेषां प्रदानेन प्रीतिः सिद्धतु मे सदा"।

चणकस्य "पुरा गोवर्द्धनोद्धारसमये हरिभक्षिताः। चणकाः सर्वपापघ्ना यतः शान्तिं ददत्वमी"।

यवस्य "रसानामग्र्यजं श्रेष्ठं जवं बलवर्द्धनम्। ब्रह्मणा निर्मितं साक्षादतः शान्तिं प्रयच्छतु"।

यवानाम् "धान्यराजाच्च माङ्गल्या द्विजप्रीतिकरा यवाः। तस्मादेषां प्रदानेन ममास्त्वभिमतं फलम्"।

तिलानाम् "तिलाः पापहरा नित्यं विष्णोर्देहसमुद्भवाः। तिलदानेन सर्वं मे पापं नाशय केशव!"।

शर्करायाः "अक्षतस्य कलोत्पन्नाः इक्षुधाराजशर्करा। सूर्यप्रीतिकरा नित्यमतः शान्तिं प्रयच्छ मे"।

खण्डस्य "मनोभवधनुर्मध्यादुद्धृतः शर्कराजनिः। तस्मादस्य प्रदानेन मम सन्तु मनोरथाः"।

गुडस्य "प्रथमः सर्वमन्त्राणां नारीणां पार्वती यथा। तथा रसानां प्रवरः सदैवेक्षुरसोभतः। मम तस्मात् परां लक्ष्मीं ददस्व गुड! सर्वदा"।

मधुनः "यस्मात्पितॄणां श्राद्धे त्वं पीतं मधुसम्भवम्। तस्मात्तव प्रदानेन रक्ष मां दुःखसागरात्"।

उदकुम्भस्य "वारिपूर्णघटोपेतं देवत्वमयं यतः। प्रीयतां धर्मराजोऽस्तु दानेनानेन पुण्यदः"।

उपानहोः "उपानहौ प्रदास्यामि कण्टकादिनिवारणे। सर्वस्थानेषु सुखदे यतः शान्तिं प्रयच्छतम्"।

व्यजनस्य "धुवित्वा सर्वजन्तूनां श्रमापनुदकरी शुभा। पितॄणां तृप्तिदा नित्यमतः शान्तिं प्रयच्छ मे"।

शालग्रामस्य "महाकोषनिवासेन चक्राद्यैरुपशोभितम्। अस्य देव! प्रदानात्तु मम सन्तु मनोरथाः"।

शिवनाभस्य "महाकोषनिवासी ते महादेवो महेश्वरः। प्रीयतां तव दानेन यतः शान्तिं प्रयच्छ मे"।

वैतरण्याः "यमद्वारे महाघोरे या सा वैतरणी नदी। तान्तर्तुकामोयच्छामि उत्तारय सुखेन माम्"।

धेनोः "यस्मात्त्वं पृथिवी सर्वा धेनुर्वैष्णवसम्भवा। सर्वपापहरा नित्यमतः शान्तिं प्रयच्छ मे"।

उत्क्रान्तिधेनोः "सत्युत्क्रान्तौ प्रदत्तस्य सुखक्रान्तिसिद्धये। तुभ्यं सम्प्रददे नाम्ना गां सत्युत्क्रान्तिसंज्ञिताम्"।

मेध्याः "वाङ्मनःकायजनितं यत्किञ्चिन्मम दुष्कृतम्। तत् सर्वं विलयं यातु त्वद्दानेनोपसेविनाम्"।

शूलस्य "भगवन्! शूलहस्तेश! दक्षाध्वरविनाशन!। तवायुधप्रदानेन शूलं नश्यतु मे सदा"।

लोहपात्रस्य "यानि पापान्यनेकानि मया कामकृतानि च। लोहपात्रप्रदानेन तानि नश्यन्तु सर्वदा"।

रौप्यपात्रस्य "अगम्यागमनं चैव परदाराभिमर्शनम्। रौप्य-

पात्रप्रदानेन तानि नश्यन्तु मे सदा"।

सप्तर्षिरक्षतिलानाम् "तिलाः स्वर्णसमायुक्ता दुरितक्षयकारकाः। विष्णुप्रीतिकरा नित्यमतः शान्तिं ददत्वमी"।

सप्तर्षिघृततिलपात्रस्य "तिलाः पुण्याः पवित्राश्च सर्वकामकराः शुभाः। शुक्राश्चैव तथा कृष्णा विष्णुगात्रसमुद्भवाः। यानि कानि च पापानि ब्रह्महत्यासमानि च। तिलपात्रप्रदानेन तानि नश्यन्तु मे सदा"।

कुम्भाण्डस्य "ब्रह्महत्यादिपापघ्नं ब्रह्मणा निर्मितं पुरा। कुम्भाण्ड! बहुबीजाढ्यतः शान्तिं प्रयच्छ मे"

फलस्य "इदं फलं मया विप्र! प्रभूतं पुरतस्तव। तेन मे सफलावाप्तिर्भवेज्जन्मनिजन्मनि"।

मण्डकानाम् "आदित्यतेजसोत्पन्नाः सर्वमङ्गलकारकाः। मण्डकाः सर्वपापघ्ना अतः शान्तिं ददत्वमी"।

स्वर्णपात्रस्य "जन्मान्तरसहस्रेषु यत् कृतं दुरितं मया। स्वर्णपात्रप्रदानेन तस्य शान्तिरिहास्तु मे"।

क्षीरोभ्यार्घ्यस्य "या लक्ष्मीर्दुग्धरूपेण सर्वगात्रे व्यवस्थिता। तत् सर्वं शमयाऽऽशु त्वं लक्ष्मीं पुष्टिं च वर्द्धय"।

पायसयार्घ्यस्य "आज्यं तेजः समुद्दिष्टमाज्यं पापहरं स्मृतम्। आज्यं सुराणामाहार आज्ये देवाः प्रतिष्ठिताः"।

आयुधस्य "त्वं देवानां मनुष्याणां रक्षसामायुधो ह्यसि। तस्मात् सर्वप्रयत्नेन शान्तिर्भवतु सर्वदा"।

भक्ष्याणाम् "केशवप्रीतिदा भक्ष्याः यस्मात् ब्रह्मार्कतुष्टिदाः। पृथिव्यिन्द्रापघ्नकाद्याः यच्छन्तु बलमौरसम्"।

काष्ठानाम् "सोमोद्भवानि दारूणि जातवेदःप्रियाणि च। तस्मादेषां प्रदानेन श्रियं देहि विभावसो!"।

कृतस्य "अग्निवर्णोद्भवो नाम बलकीर्तिप्रवर्द्धनः। कृतः सर्वपापघ्नः अतः शान्तिं प्रयच्छ मे"।

कटच्छेदस्य "सदा रोहन्ति बीजानि काले क्षेत्रे सहीतले। तव प्रदानात्फला मम सन्तु मनोरथाः"।

संक्रान्तिशूलस्य "सर्वग्रहेशतारेश! सर्वेश! त्वं हि भास्कर!। संक्रान्तिशूलदोषं मे निवारय दिवाकर!"।

पुस्तकस्य "सर्वविद्याश्रयं ज्ञानकरणं ललिताक्षरम्। पुस्तकं तस्मयच्छामि प्रिया भवतु भारती"।

तण्डुलानाम् "अन्नेन जायते विश्वप्राणिनां प्राणरक्षणम्। तण्डुला वैश्वदेवाद्याः पाकेनान्नं भवन्ति ये। पावनाः सर्वयज्ञेषु प्रशस्ता लोककर्मणि। तस्मात्तण्डुलदानेन मोदन्तां विश्वदेवताः"।

पुष्पाणाम् "आश्वयन्ति मनो यस्मात् तस्मात् सुमनसः स्मृताः। दत्ता ददतु मे नित्यमत्यन्तादृतां श्रियम्"।

क्षीरस्य "क्षीरोदो जायते यस्मान्नक्रूरं शुभकर्मसु। तस्मात्क्षीरप्रदानेन प्रीयतां गिरिजा मम"।

ताम्बूलस्य "ताम्बूलं श्रीकरं भद्रं ब्रह्मविष्णुशिवात्मकम्। यस्य प्रदानात् ब्रह्माद्याः शिवं ददतु पुष्कलम्"।

ताम्बूलकरङ्कस्य "पूरितं पूगपूरेण नागवल्लीदलान्वितम्। पूर्णेन पूर्णपात्रेण कर्पूरपूरकेण च। सपूगखण्डनं दिव्यं गन्धर्वाप्सरसां प्रियम्। करङ्क! त्वं सुधाधारस्तव प्रदानात् कुरुष्व माम्"।

हरिद्रायाः "लक्ष्मीप्रिया या लक्ष्मीदा लक्ष्मीवद्वसनप्रिया। सौभाग्यसुहृदस्त्रीणां हरिद्रा श्रीप्रदाऽस्तु मे"।

सौभाग्यवस्त्रयुग्मस्य "कञ्चुकीवस्त्रयुग्मैश्च तथाकर्णावतंसकैः। कण्ठसूत्रैश्च भूषाभिः प्रीयतां निमिनन्दिनी"(सीता)।

धूपस्य "रामपत्नि! महाभागे! पुण्यमूर्ते! निरामये!। गृहाणेमानि धूपांणि मया दत्तानि जानकि!"।

कमण्डलोः "कमण्डलुर्जलैः पूर्णः सर्वगर्भः सुलक्षणः। अर्पितस्ते महादेव! प्रसन्नश्च सदा भव"।

यज्ञोपवीतस्य "ब्रह्मसूत्रं महादिव्यं मया यत्नेन निर्मितम्। ब्राह्मं जन्मास्तु मे देव! ब्रह्मसूत्रसमर्पणात्"।

अक्षमालायाः "अष्टाविंशतिसंख्याकैरक्षाद्यैर्योजिता मया। अर्पिता तव हस्ते च गृहाण सुरसेवक!"।

स्वर्णनासस्य "विधुन्तुद! नमस्तुभ्यं सिंहिकानन्दनाव्यय!। दानेनानेन नासस्य रक्ष मां वेधजात्भयात्"।

इक्षुदण्डस्य "इक्षुदण्ड महापुण्य रसाढ्य सर्वकामद। तुभ्यं दास्यामि तेनाशु प्रीयतां परमेश्वरः"।

गन्धद्रव्यस्य "कर्पूरः कदलीभूतो देवदेवप्रियः सदा। भाग्योत्सवो नृपाणाञ्च तद्दानात् सुखमश्नुते। जटामांसकुष्ठं देवीमणिनाभिसमुद्भवम्। भक्त्याहं संप्रदास्यामि मम सन्तु मनोरथाः"।

सूर्यमूर्तेः "ददाति भास्वर्भवनं सर्वोपस्करसंयुतम्। मनोऽभिलषितावाप्तिं करोतु मम भास्करः"।

गणेशप्रतिमायाः "यमामनन्ति विघ्नेशं विघ्नानामसुरासुतम्। विघ्नेशं तं विप्रवर! तुभ्यं दास्याम्यभीष्टदम्"।

गोमालस्य "गवामङ्गेषु तिष्ठन्ति भुवनानि चतुर्दश। यस्मात् तस्माच्छिवं मे स्यादिह लोके परत्र च"।

शय्यायाः "यस्मादशून्यं शयनं केशवस्य शिवस्य च। शय्या ममाप्यशून्यास्तु तस्माज्जन्मनिजन्मनि"।

रत्नस्य "यथा रत्नेषु सर्वेषु सर्वे देवा व्यवस्थिताः। तथा शान्तिं प्रयच्छन्तु रत्नदानेन मे सुराः"।

भूमेः "यथा भूमिप्रदानस्य कलां नार्हन्ति षोडशीम्। दानान्यन्यानि मे शान्तिर्भूमिदानाद्भवत्विह"।

दासस्य "इदं दासी मया तुभ्यं श्रीवत्स! प्रतिपादिता। तव कर्म्मकरी भोग्या यथेष्टं भद्रमस्तु मे"।

रथस्य "रथाय रथनाथाय नमस्ते विश्वकर्म्मणे। विश्वभूताय नाथाय कारुणाय नमोनमः"।

छत्रस्य "दुःखासनोभयत्राणं कुरु केशव! मे प्रभो!। छत्रन्त्वत्प्रीतये दत्तं ब्राह्मणाय मया शुभम्"।

शिबिकायाः "देवदेव! जगन्नाथ! विश्वात्मन्! दत्तयानया। प्रभो! शिबिकया देव! प्रीतो भव जनार्दन!"।

स्रुचस्य "इदं स्रुक् स्रुचाग्र्य त्वं सर्वोपस्करसंयुतम्। तव विप्र! प्रसादेन ममास्त्वभिमतं फलम्"।

आज्यस्य "समाज्यं प्रयच्छामि प्रीत्यर्थं ते जगद्विधे!"। तव विप्र! प्रसादेन ममास्त्वभिमतं फलम्"।

कन्यायाः "गौरीकन्याभिमां विप्र! यथाशक्ति विभूषिताम्। गोत्राय शर्म्मणे तुभ्यं विप्र! त्वं तां समाश्रय"।

महिष्याः "चन्द्रादिलोकपालानां या राजमहिषी शुभा। महिषीदानमाहात्म्यात्सा मे सर्वकामदम्। धर्म्मराजस्य याम्याख्ये यस्याः पुत्रः प्रतिष्ठितः। महिषासुरस्य जननी सास्तु मे सर्वकामदा"।

सत्तुमहिष्याः "महिषीं वत्ससंयुक्तां सुशीलाञ्च पयस्विनीम्। रत्नवस्त्रेण पुष्पेण दत्त्वा सत्तुञ्जयेश्वरः"।

वेश्मनः "रोमसङ्ख्यसमब्दाद्यैः सर्वोपकरणैः शुभैः। जगतः सम्मदश्चोऽसि त्वामतः प्राप्ते शिवम्"

अजायाः "देवानां योनिरज्या हव्यवाहनः सर्वपूजितः। तस्य त्वं वाहनं पुण्यं देवैः सेन्द्रैर्मरुद्गणैः। अग्निमान्द्यं पूर्वकर्म्मविपाकोत्थन्तु यन्मम। तत्सर्वं नाशय क्षिप्रं जठराग्निं विवर्द्धय। त्वं पूर्वं ब्रह्मणा सृष्टा पवित्रा भवती परा। त्वत्प्रसत्त्युत्थिता यज्ञाः सन्त्वाज्यान्तिकरी भव"। तत्तत्पुरुषादीनां देयद्रव्याणां मन्त्रास्तु तत्तच्छब्दे द्रष्टव्याः। अन्यद्रव्यदानमन्त्रा अपि केचित् क्वचिदुक्ता अनुसन्धेयाः।

दानक न० कल्पितं दानम् "दान कल्पिते" पा०ग०सू०व्यावा० कन्। कल्पिते दाने।

दानकाम त्रि० दानं कामयते कम-ण्वुल्। दानशीले "गौतमस्तोमेन यदीक्षेदानकामा मे प्रजा स्यादिति" आश्व०श्रौ० ८।३।१४।

दानच्युत पुंस्त्री गोत्रप्रवरविभेदे कार्त्तकौ० बाभ्रवशब्देनास्य इत्थं पूर्वपदे प्रकृतिस्वरः बाभ्रवदानच्युताः।

दानधर्म्म पु० दानरूपो धर्मः। दानात्मके धर्मे स च भारते आनुशासनपर्व्वणि ५७ अध्यायावधिषु ६९ अध्यायान्तेषु विस्तरेणोक्तः। अन्यत्र "अथातः संप्रवक्ष्यामि दानधर्म-मनुत्तमम्। अर्थानासादिते पात्रे श्रद्धया प्रतिपादनम्। दानन्तु कथितं तज्ज्ञैर्भुक्तिमुक्तिफलप्रदम्। न्यायेनोपार्जयेद्वित्तं दानभोगफलञ्च तत्। अध्यापनं याजनञ्च तृतीयं विप्र प्रतिग्रहः। रक्षणं विजयश्चैव क्षत्रवृत्तिरुदाहृता। कृषीदं कर्षणाणिज्यं वैश्यवृत्तिः सुभावजा। यद्दीयते च पात्रेभ्यस्तद्दानं परिकीर्त्तितम्। नित्यं नैमित्तिकं काम्यं विमलं दानमीरितम्। अहन्यहनि यत् किञ्चिद्दीयतेऽनुपकारिणे। अनुद्दिश्य फलं तत् स्यात् ब्राह्मणाय तु नित्यकम्। यत्तु पापोपशान्त्यै च दीयते विदुषां करे। नैमित्तिकं तदुद्दिष्टं दानं सद्भिरनुष्ठितम्। अपत्यविजयैश्वर्य्यस्वर्गार्थं यत् प्रदीयते। दानं तत् काम्यमाख्यातमृषिभिर्धर्म्मचिन्तकैः। ईश्वरप्रीत्यर्थाय ब्रह्मवित्सु प्रदीयते। चेतसा सत्त्वयुक्तेन दानं तत् विमलं स्मृतम्" इत्युपक्रम्य गारुडे ५१अ०उक्तः। "दानधर्मात् परोधर्मो भूतानां नेह विद्यते" तत्रैवाध्याये

दानपति पु० ६त०। १अक्रूरे यादवभेदे। "गच्छत्वयं दानपतिः क्षिप्रमानयितुं व्रजात्। नन्दगोपञ्च गोपांश्च करदान् मम शासनात्" हरिवं० ७६ अ०। "संसद्भिः स्यन्दनेनाशु प्राप्तो दानपतिर्व्रजम्" ८२ अ०। २बहुपदे त्रि० "यज्वा दानपतिर्धीमान् यथा नान्योऽस्ति कश्चन" भा० आ०२२३अ०। ३असुरभेदे पु०। "रथोत्कटो दानपतिः सैनध्वजी कुलाकुलः" हरिवं०२४० अ० असुरोक्तौ।

दानपात्र न०६त०। दानयोग्ये ब्राह्मणभेदे दानशब्दे दृश्यम्

दानफल न० ६त०। दानजन्ये फलभेदे तत्र दानभेदे कतिचित् फलभेदा वह्नि०पु०उक्ता यथा

"गत्वा यद्दीयते दानं भक्त्या पात्रे विधानतः। तदनन्तफलं विद्धि व्यवस्थानितये नृप!। तमोद्दातस्तु यो दद्यात् भयात् क्रोधात्तथैव च। नृप! दानन्तु तत् सर्वं भुङ्क्ते गर्भस्थ एव तु। ईर्ष्याभ्यसूयनाच्चैव तस्मार्थं चार्थकारणात्। यो ददाति द्विजातिभ्यः स वाच्यो न तदश्नुते। वैश्वदेवविहीनञ्च सन्ध्योपासनवर्जितम्। यद्दानं दीयते तच्च उद्वकाले तदश्नुते। दयाजन्मानि

चत्वारि हवा दानानि षोडश। तान्यहं संग्रवक्ष्यामि यथावदनुपूर्वशः। अपुत्रस्य हवाजन्म धर्मबाह्या नराःस्मृता। परपाकं सदाश्नन्ति३ परतापरताश्च ये। देव पित्रविहीनं४ यत् दैवेभ्यः स्वदोषतः२। दत्त्वानुकीर्तनाच्चैव वेदाग्निव्रतत्यागिने४। अन्यायोपार्जितं दानं५ व्यर्थं ब्रह्महरो६ तथा। गुरवेऽनृतवक्त्रे ७यत् स्त्रीनायट पतितायट च। क्रतघ्नाय१० च यद्दत्तं सर्वदा ब्रह्मविद्विषे ११। याचकाय१२ च सर्वस्व हवाख्याः पतवे१३ तथा। परिचारकाय१४ भृत्याय१५ सर्वत्र पिशुनाय१६ च। इत्येतानि तु राजेन्द्र! हवा दानानि षोडश"।

**दानव** पु० दनोरपत्यम् अण्। कश्यपपत्न्याः दक्षकन्याभेदस्य दनोरपत्ये। १दानवाश्च भा०आ०६५अ०उक्ता यथा "चत्वारिंशद्दनोः पुत्राः ख्याताः सर्वत्र भारत!। तेषां प्रथमतो राजा विप्रचित्तिर्महायशाः। शंवरो नमुचिश्चैव पुलोमा चेति विश्रुतः। असिलोमा च केशी च दुर्जयश्चैव दानवः। अयःशिरा अश्वशिरा अश्वशङ्कुश्च वीर्यवान्। तथा गगनमूर्द्धा च वेगवान् केतुमांश्च यः। स्वर्भानुरश्वोऽश्वपतिर्वृषपर्वाजकस्तथा। अश्वपीवश्च हरश्च हरश्च महाबलः। एकपादेकचक्रश्च विरूपाक्षमहोदरौ। निचन्द्रश्च निकुम्भश्च कपटः कपटस्तथा। शरभः शलभश्चैव सूर्यचन्द्रमसौ तथा। एते ख्याता दनोर्वंशे दानवाः परिकीर्त्तिताः" "दानवांश्च विबुधा विजिग्यिरे" भागः। दानवस्येदम् अण्। २दानवसम्बन्धिनि त्रि० स्त्रियां ङीप्। "मायामायै ददौ सर्वाः दानवीः कामरोहिता" हरिवं० १६३अ०।

**दानवगुरु** पु० ६त०। शुक्राचार्ये

**दानवज्र** पु० दैवे गान्धर्वे च वैश्यजातिके अश्वभेदे। "देवगन्धर्ववाहास्ते दिव्यवर्णा मनोजवाः। चीर्णाचीर्णा भवन्त्येते न क्षीयन्ते च रंहसः। पुरा क्रतं महेन्द्रस्य वज्रं हत्तनिवर्हणम्। दशधा शतधा चैव तच्छीर्णं हतमूर्द्धनि। ततो भागोऽतो देवैर्वज्रभाग उपास्यते। लोके यशोधनं किञ्चित् सा वै वज्रतनुः स्मृता। वज्रपाणिर्ह्यश्वः स्यात् तत्र वज्ररथं स्मृतम्। वैश्या वै दानवज्राश्च कर्मवज्रा यवीयसः। तत्र वज्रस्य भागेन अवध्या वाजिनः स्मृताः। रथाङ्गं यदवा स्मृते शूराश्चाश्वेषु ये मताः। कामवर्णाः कामजवाः कामतः सत्त्वसंस्थिताः। इति गन्धर्वजा कामं पूरयिष्यन्ति ते हयाः" भा०आ०१७०अ०।

**दानवारि** ष०त०। १देवे २विष्णौ च। दानं गजमदरूपं वारि। ३गजमदजले न०। "सेनाचरीभवद्दिग्गजदानवारिवासेन यस्य जनिताऽसुरभी रथचीः" नैष०। "कटस्थस्य प्रोक्षितदानवारिभिः" माघः।

**दानवीर** पु० १वीररसभेदे तदाश्रये २नायकभेदे च। "स च दानधर्मयुद्धैर्दयया च समन्वितश्चतुर्धा स्यात्"। स च वीरः दानवीरो धर्मवीरो दयावीरो युद्धवीरश्चेति चतुर्विधः तत्र दानवीरो यथा परशुरामः। "त्यागः सप्तसप्तसप्तिमहीनिर्व्याजदानावधिरिति" अत्र परशुरामस्य त्यागे उत्साहः स्थायी भावः। सम्यदानत्राह्मणैरालम्बनविभावैः सत्काध्यवसायादिभिरुद्दीपनविभावैर्विभावितः सर्वस्वत्यागादिभिरनुभावितो हर्षौत्सुक्यादिभिः सञ्चारिभिः पुष्टिं नीतो दानवीरतां भजते" सा० द०।

**दानवेय** पु० दनोरपत्यं दनु-स्त्रियां मनुष्यजातित्वात् ढक्। ततः "स्त्रीभ्यो ढक्" पा० ढक्। दनुनाम्न्या दक्षकन्याया अपत्ये "दैतेया दानवेयाश्च किमिच्छन्ति पराक्रमात्" हरिवं०२२१अ०"विष्णुना निहतेष्वेव दानवेयेषु ते हताः" भा०क०७१अ०।

**दानशील** त्रि० दानं शीलं सततमनुष्ठानं यस्य। वदान्यतरि "यत् फलं दानशीलस्य क्षमाशीलस्य यत् फलम्" भा० भी० १२० अ०।

**दानशौण्ड** त्रि० दाने शौण्डः दक्षः। बहुप्रदे अमरः "निर्गुणोऽपि विभुर्नो न भूपतेर्दानशौण्डमनसः पुरोऽभवत्" माघः।

**दानसागर** पु० गौडदेशप्रसिद्धे भूम्यासनानादीनां षोडशानां पदार्थानां प्रत्येकं षोडशसंख्यान्विते देवद्रव्यभेदे। "यः कश्चित् कुरुते देवि! यज्ञे दानसागरम्। इहोत्सर्गं महादानं यत् किञ्चित् पृथिवीतले" कामधेनुतं० २५ पटले। दानानां सागर इव प्रतिपादकतया आधार इव। २तुलापुरुषादिमहादानानां विधानज्ञापके स्मृतिनिबन्धभेदे।

**दानयोग्य** त्रि० ६त०। दानशब्दोक्ते दानस्य पात्रे।

**दानीय** त्रि० दीयतेऽसौ दा-बा०सम्प्रदाने अनीयर्। १सम्प्रदाने। "दानीयः प्रभवो नयः" सम्प्र०। दानमर्हति यत्। २दानयोग्ये दानपात्रे च।

**दानु** त्रि० दा-दाने दो-खण्डने वा कर्त्तरि नु। १दातरि २विक्रान्ते मेदि०। ३वायौ ४तुच्छे च संक्षिप्तसा० उणा०। ५दानवे च। "दानुं यथानं स जनास इन्द्रः" ऋ०

३।१२।११। "दानुं दानवम्" माधवः भावे तु। १दाने ७वर्षणेऽ न० "यवं न वृष्टिर्दिव्येन दानुना" ऋ०१०। ४२।७ "दानुना दानेन वर्षणेन वा" भा०"आदित्या दानुनस्पतो" ऋ० १।१३६।३। "दानुनः दानस्य" भा०कर्मणि तु।८देये धने च। "करत्तिलोमवत्वा दानुचित्वाः" ऋ०१।१७४।७ "दानुभिर्देयैर्धनैश्चित्वाः" भा०

दान्त त्रि० दम–कर्त्तरि क्त। १वशिरिन्द्रियनियन्तृकर्त्तरि "शान्तोदान्त उपरतस्तितिक्षुः श्रद्धावान् समाहितो भूत्वात्मन्यात्मानमवलोकयेत्" वेदान्तसारधृता श्रुतिः। दम–णिच्–क्त नि०। २दमिते ३शिक्षिते वलीवर्दादौ त्रि० ४दमनकवृक्षे पु० राजनि०। [न्द्रियनियन्ते च।

दान्ति स्त्री दम–क्तिन्। १तपःक्लेशादिसहिष्णुतायां २वाग्रो-

दापित त्रि० दा–णिच्–कर्मणि क्त। १साधिते २दण्डिते दापितधनके १प्रतिवाद्यादौ च।

दाप्य त्रि०दा–णिच्–कर्मणि यत्। १दण्ड्ये २दापनीये च।

दाम न० दो–खण्डने बा०करणे मन्। १पश्वादिबन्धनरज्जौ "खगदाभैरिव चित्रिता" भा० भी०५७अ०। "सन्तानमाल्यदामं च तैरेव कुसुमैः कृतम्" हरिवं०१४५ अ०। भावे मन् २खण्डने। दम्यते अनुशिष्यते दम–कर्मणि घञ् बा०दीर्घः। लोके विश्वसंसारे दामोदरशब्दे दृश्यम्।

दामकण्ठ पु० गोत्रप्रवर्त्तकर्षिभेदे तस्य गोत्रापत्यम् इञ्। दामकण्ठि तदीये यून्यपत्ये ततः उपका० इञ्ये अहञ्ये च बहुषु युवप्रत्ययस्य लुक्। कलसीकण्ठदामकण्ठाः दामकण्ठा वा इत्येवम्।

दामग्रन्थि पु० मत्स्यराजविराटस्य सेनापतिभेदे "अथ मत्स्योऽग्रयोद्राजा शतानीकं जघन्यजम्। कङ्कवल्लभगोपालदामग्रन्थिञ्च वीर्य्यवान्। युध्येयुरिति मे बुद्धिर्वर्त्तते नात्र संशयः" भा०वि०२।अ०

दामचन्द्र पु० द्रुपदस्यस्य पुत्रभेदे "धृष्टद्युम्नः शिखण्डी च दौर्मुखिर्जनमेजयः। चन्द्रसेनो रुद्रसेनः कीर्त्तिवर्मा ध्रुवो धरः। वसुचन्द्रो दामचन्द्रः सिंहचन्द्रः सुतेजनः। द्रुपदस्य तथा पुत्रा द्रुपदञ्च महारथम्" भा० द्रो० १५८ अ०

दामन् न०स्त्री दो–खण्डने करणभावादौ मनिन्। दोहन काले पश्वादिपादबन्धनरज्जौ (ढाँदनदड़ि) २मालायां ३रज्जुमात्रे अमरः बहुप्रयत्नयुक्ते एकस्मिन् यत्न पशवो बध्यन्ते (टोका)ख्याते ४पदार्थे च "भाति क्ष दामाप्रपदो-नमस्य" माघः स्त्रियां नान्तत्वेऽपि मनन्तत्वात् न ङीप्। दामानौ दामानः किन्तु वा ङाप्। दामे दामा इत्यादि

दामनपर्वन् न० दमनस्येदमस्य दामनं पर्व यत्र। दमनभञ्जनतिथौ १चैत्रशुक्लचतुर्दश्याम् २तन्नामीयहादश्यादिषु च दमनशब्दे मूलं दृश्यम्। "सत्तीर्थैर्ऋविष्यासे तन्तुदामनपर्वणोः" नरसिंहपु० तन्तुपर्वशब्दे दृश्यम्

दामनि पु० दमनस्यापत्यम् इञ्। १दमनस्यापत्ये २आयुधभेदे च ततः स्वार्थे दामन्यादि० क्। दामनीय तत्रार्थे बहुत्वे तु तद्राजत्वात्तस्य लुक्। दामनय इत्येव

दामनी स्त्री दामैव प्रज्ञा० स्वार्थे अण् ङिच्च न लोपः ङीप्। पशुबन्धनरज्जौ अमरः "दामनीदामभारैश्च केचित् कायावलम्बिभिः। कीलैरारोप्यमाणैश्च दामनीपाशपाशितैः" हरिवं०६६अ०

दामन्यादि पु० "दामन्यादिभ्यश्च" पा० छप्रत्ययनिमित्ते पा०ग० स्वरोक्ते शब्दगणे स च गणः "दामनि चौलपि वैजयापि चौदकि चौदहि चाच्युतनि चाच्युतदत्ति शाकुलकि चाकिदत्ति चौड़पि काकदत्तकि शालुनापि सार्वसेनि विन्दुवैन्दवि तुलभ मौद्गायन काकन्दि सावित्रीपुत्र"।

दामलिप्त न० तमोलिप्तनगरे (तमलुक) हेम०

दामलिप्त् पु०दाम–लेढि लिह्–क्विप्। १दामलेहके। तमात्मन इच्छति क्यच् दामलिप्तति ततः क्विप्। २आत्मनो दामलेहकेच्छौ "दादेर्धातोर्घः" पा०उपदेशे दादेरिति विशेषणात् अस्य उपदेशे दादित्वाभावात् न घः सि०कौ०।

दामाञ्जन न० दाम्नः अञ्जनम्। अञ्जादेः पादबन्धनरज्जौ (पिछाड़ि) हेमच०दामाञ्जनमयत्वार्थे हारावली "दामाञ्जनस्खलितलोलपदं हरङ्गाः" माघः।

दामिनी स्त्री भीमो भीमसेनेनवत् दामा सुदामा नगः स एकदेशत्वेनास्यास्य "संज्ञायां मन्त्राभ्याम्" पा० इनि ङीप्। सौदामन्यां विद्युति।

दामोदर पु० दाम बन्धनसाधनं उदरे यस्य। यशोदानन्दने कृष्णे तत्कथा "ततो यशोदा संक्रुद्धा कृष्णं कमललोचनम्। खानाय्य शकटीमूले भर्त्सयन्ती पुनःपुनः। दाम्ना चैवोदरे बद्धा प्रत्यबध्नादुदूखले। यदि शक्नोषि गच्छेति तस्थौ कर्म साऽकरोत्" इत्युपक्रमे "स च तेनैव नाम्ना तु कृष्णो वै दामबन्धनात्। घोषे दामोदर इति गोपिभिः परिगीयते" हरिवं० ६४अ० "विदारो रोहितोमार्गो हेतुर्दामोदरः सहः" विष्णु०स०। शाङ्करभाष्ये तु अस्यान्यापि व्युत्पत्तिर्दर्शिता यथा

"दमादिसाधनेनोदरा उत्कटा गतिर्यत्र तया गम्यत इति दामोदरः। "दमाद्दामोदरं विदुरिति" महाभारते यशोदया दाम्नोदरे बद्ध इति वा "दामानि लोकनामानि-तानि यस्योदरान्तरे। तेन दामोदरस्त्वेषः श्रीधरस्त्विट्सु-माश्रितः" इति व्यासवचनात् वा दामोदरः। "दमो बहिरिन्द्रियनियहः तज्जन्यो दामः तस्योदमित्यच् करगताविति धातोर्भावे "ऋदोरप्" पा० अपि गुणे रपरत्वे च अरः अवगतिः गत्यर्थानां ज्ञानार्थकत्वात्तस्य विशेषणत्वादिति उत्कट इत्यर्थः तथा च दामो दमसाधकः उत् उत्कटः अरः अवगतिः साक्षात्कारोऽस्येति दामोदरः। उत्कटा च गतिः धूमादिगतिमपेक्ष्यार्चिरादिः दमादिसाधना अस्य सगुणस्येति दामोदरनामनिरुक्तिः। "तवौम-ध्यगतं बद्धं दाम्ना गाढं तयोदरम्। ततश्च दामोदरतां स ययौ दामबन्धनादिति" ब्रह्मपुराणम् इति आनन्दगिरिः। २अतीते अर्वाङ्भेदे हेमच०। वर्त्तमानपुरसन्निकृष्टे ३नदभेदे च। ४शालग्राममूर्त्तिभेदे तल्लक्षणं पद्मपुराणे यथा "स्थूलो दामोदरो ज्ञेयः सुचक्रश्चक्रो भवेत्तु यः। चक्रे तु मध्यदेशेऽस्य पूजितः सुखदः सदा"। ब्रह्मखण्डपुराणे "दामोदरश्चया स्थूलो मध्यचक्रः प्रतिष्ठितः" प्रतिष्ठित इत्यत्र प्रकीर्तित इति क्वचित् पाठः। "दूर्वाभं द्वारसङ्कीर्णं पीतरेखायुतं शुभम्"। "पीतरेखा तथैव चेति" ब्रह्मपुराणे पाठः। ब्रह्मपुराणे "उपर्य्यधश्च चक्रे द्वे नातिदीर्घे सुखे बिलम्। मध्ये च रेखा सम्बैका स च दामोदरः स्मृतः"। अन्यत्र "स्थूलो दामोदरो ज्ञेयः सुचक्रश्चक्रो भवेत्तु यः। चक्रे तन्मध्यदेशस्थे पूजितः शुभदः सदा"। ब्रह्मवैवप्रकृतिखण्डे "द्विचक्रं स्थूलमत्यन्तं ज्ञेयं दामोदराभिधम्"। मत्स्यसूक्ते "विचक्रश्चेन्नतिस्थूलं लघु दामोदरं स्मृतम्"

दामोष्णीष पु० गोलव्यावर्त्तकप्रवरर्षिभेदे "दामोष्णीषश्चैवलिश्च पर्णादो वरजानुकः" भा० स० ४ अ०। युधिष्ठिरसभासभ्योक्तौ। तस्यापत्यं कुर्वा०ण्य। दामोष्णीष्य तदपत्ये पुंस्त्री

दाम्पत्य न० दम्पत्योरिदं पत्यन्तत्वात् यक्। १दम्पति सम्बन्धिनि अग्निहोत्रादौ २दम्पत्योरन्योन्यप्रीतौ च "ब्रह्मवर्चसकामस्तु यजेत ब्रह्मणस्पतिम्" इत्युपक्रमे "विद्याकामस्तु गिरिशं दम्पत्यार्थसमां सतीम्" भाग०२।२।८।

दाम्भिक त्रि० दम्भेन चरति धर्मं ठक्। लोकेषु कीर्त्यादि ख्यापनार्थं धर्मचारिणि २वैडालव्रतिनि, २दम्भयुक्ते च। "पाषण्डिनोऽभिशस्तांश्च दाम्भिको रसविक्रयी" मनुना रसविक्रयकर्मविपाकः दाम्भिकत्वमित्युक्तम्। "दाम्भिको दुष्कृतः प्राप्तः शूद्रेण सदृशो भवेत्" भा० व० २१५ अ०। ३कपटिनि पुंस्त्री० राजनि०।

दाय दाने भ्वा० आत्म० सक० सेट्। दायते अदायिष्ट अदायिष्टम् अदायिष्यम्। अदित् यिच् अददायत-त।

दाय पु० दा-दाने भावे घञ्। १दाने "मिथोदायः कृतो येन सङ्गीतो मिथ एव वा। मिथ एव प्रदातव्यो यथा दायस्तथा ग्रहः। अस्वामिना कृतो विक्रय एव वा" मनुः। दीङ्क्षये भावे घञ्। २क्षये अजयपालः स्थाने मेदि०। दो-खण्डने भावे घञ्। ३खण्डने शब्दरत्ना० ५सोङ्खनभाषणे मेदि०। तस्य परोक्षस्य खण्डनरूपत्वात् तथात्वम्। दा-दाने कर्मणि घञ्। ६देये धनादौ "ते तत्र विविधान् दायान् विजयार्थं नरेश्वराः" भा० आ० १८३ अ०। "संस्थाः सुचारसंस्थित्यै दत्तदायाः शुभाशयाः" कामन्दकीये। "दायन्तु विविधं तत्र शृणु मे गदतोऽनघ! यत्रार्थं राजभिर्दत्तं महान्तं धनसञ्चयम्" भा० स० ५ अ०। ७विवाहकाले कन्यायै दीयमाने यौतकादिधने कन्यादानकाले जामात्रादिभ्यो दत्तेये धने व्रतान्तभिक्षादौ समाहृतब्रह्मचारिभ्यो दत्तीयमाने धने च १० विभागार्हपित्रादिधने च दायभागशब्दे दृश्यम्।

दायक त्रि० दा-दाने ण्वुल्। १दातरि "तावतां लोकदृक्षाणां फलं प्राप्नोति दायकः" भा० व० १९३ अ० "चौराणां मृतदायकाः" मनुः। दो-खण्डने ण्वुल्। २खण्डके च। दायेन धनेन कायति कै-क। ३दायादे "मृता इति सुताख्याता यजमानस्य दायकाः" मृतस्य दायका दायादा इत्यर्थः।

दायबन्धु पु० दाये बन्धुः। ज्ञातरि शब्दरत्ना०

दायभाग पु० दायस्य सम्बन्धिभिर्भागो यत्र। अष्टादशविवादान्तर्गते विवादपदभेदे तद्विरूपणं जीमूतवाहनकृते दायभागे यथा "अथ दायभागो निरूप्यते तत्र नारदः "विभागोऽर्थस्य पित्र्यस्य पुत्रैर्यत्र प्रकल्प्यते। दायभाग इति प्रोक्तं तद्विवादपदं बुधैः"। पितृत आगतं पित्र्यं तच्च पितृमरणोपलक्षितस्वत्वमुच्यते। पित्र्यस्येति पुत्रैरिति च द्वयमपि सम्बन्धिमात्रोपलक्षणं सम्बन्धिमात्रेण सम्बन्धिमात्रधनविभागेऽपि दायभागपदप्रयोगात् अतएव दायभागं विवादपदमुपक्रम्य नारदोऽपि मात्रादिधन-

विभागमप्युपदर्शितवान् तथा मनुरपि पित्रादिपदमदत्त्वैव "एष स्त्रीपुंसयोरुक्तो धर्मो वो रतिसंहितः। आपद्यपत्यप्राप्तिश्च दायभागं निबोधत" इत्युपक्रम्य यावत्सम्बन्धिधनविभागमुक्तवान्। दीयत इति व्युत्पत्त्या दायशब्दो ददातिप्रयोगश्च मौचः मृतप्रव्रजितादिस्वत्वनिवृत्तिपूर्वकपरस्वत्वोत्पत्तिफलसाम्यात् न तु मृतादीनां तत्र स्वामोऽस्ति। ततश्च पूर्वस्वामिसम्बन्धाधीनं तत्स्वाम्योपरमे यत्र द्रव्ये स्वत्वं तत्र निरूढो दायशब्दः। नन्वत्र किं दायस्य विभागो विभक्तव्यवत्वं? यद्वा दायेन सह विभागोऽसंयुक्तं? न तावत् पूर्वः दायविनाशापत्तेः नापि द्वितीयः संयुक्तेऽपि न ममेदं विभक्तं स्वं भ्रातरिदमिति प्रयोगात्। न च सम्बन्धविशेषात् सर्वेषां सर्वधनोत्पन्नस्य स्वत्वस्य द्रव्यविशेषे व्यवस्थापनं विभाग इति वाच्यं सम्बन्धान्तरसद्भावप्रतिपक्षस्य सम्बन्धस्यावयवेष्वेव विभागव्यङ्ग्यस्वत्वापादकत्वात् कृत्स्नपितृधनगतस्वत्वोत्पादविनाशकल्पनागौरवात् यज्ञेऽविनियोगफलाभावेनानुपयोगाच्च। उच्यते एकदेशोपात्तस्यैव मूर्छिरणादावुत्पन्नस्य विनिगमनाप्रमाणाभावेन वैशेषिकव्यवहारानर्हतया अव्यवस्थितस्य शुटिकापातादिना व्यञ्जनं विभागः। विशेषेण भजनं स्वत्वापादनं वा विभागः। यद्यपि चैकं दासीगवादिकं बहुसाधारणं तथापि तत्तत्कालविशेषे वहनदोहनफलेन स्वत्वं व्यज्यते। तदाह हारीतः "एकां स्त्रीं कारयेत् कर्म यथाशक्त्या पृथक् पृथक्। उद्धृत्य कूपवाप्यम्बुस्वतुसारेण पृथक्ते। युक्त्या विभजनीयं तदन्यथानर्थकं भवेत्"। इदं श्लोकार्द्धत्रयं नानास्थानस्थं न तु क्रमिकम्। ननु "पितर्यूर्द्धं मते पुत्रा विभजेयुर्धनं पितुरिति" नारदवचनात् पितुर्धनं विभजेयुरित्यन्वयात् विभागात् पूर्वं न तत्र पुत्राणां स्वत्वं न च विभागस्य स्वत्वकारणता असम्बन्धिधनेऽप्यतिप्रसङ्गात्। उच्यते पित्रादिनिधनानन्तरमेवाद्यदीयं धनमिति प्रयोगात् एकपुत्रे च विभागं विनैव स्वत्वस्वीकाराच्च सम्बन्धिनिधनमेव स्वत्वकारणमतो नातिप्रसङ्गः। नन्वर्जाविष्टव्यापारोऽर्जनम् अर्जनाधीनस्वामिभावार्जयिता तेन पुत्रव्यापारोजन्मैवार्जनं युक्तम् अतो जीवत्येव पितरि पुत्राणां तत्र स्वत्वं न तु तद्धनात् अतएवोक्तं "क्वचिज्जन्मनैव यथा पित्रेद्र धने"। नैतत् मन्वादिविरोधात्। यथा मनुः "अर्द्धं पितुश्च मातुश्च समेत्य भ्रातरः समम्। भजेरन् पैतृकं रिक्थमनीशास्ते हि जीवतोः" जीवतोरपि पितोः पुत्राणां कुतो न विभाग इत्याशङ्क्यायमिदमुत्तरं तदानीमस्वामित्वादिति। न च भार्यां पुत्रवत्त्वादिवत् अस्वातन्त्र्याभिप्रायमिति वाच्यं तदानीं स्वत्वे प्रमाणाभावात् भार्यादिषु तु यत्ते समधिगच्छन्ति अर्जयन्तीति स्वत्वे सिद्धे युक्तमस्वातन्त्र्यवर्णनम्। किञ्च स्त्रीपात्तेऽपि तेषामस्वामित्वे स्वधनसाध्यवैदिककर्मोच्छेदात् श्रुतिविरोधः स्यात्। देवलश्च पितृधने अस्वाम्यमेव आह यथा "पितर्यूर्द्धं परते पुत्रा विभजेयुर्धनं पितुः। अस्वाम्यं हि भवेद्येषां निर्देशे पितरि स्थिते"। किञ्च जीवत्यपि पितरि पितृधने पुत्राणां स्वामित्वे पितुरनिच्छयापि विभागः स्यात् जन्मनैव स्वत्वसिद्धत्व प्रमाणाभावाच्च अर्जनरूपतया जन्मनः क्षतावनधिगमात्। क्वचिज्जन्मनैवेति च जन्मनिबन्धनत्वात् पिता पुत्रसम्बन्धस्य पितृधनस्य च स्वत्वकारणत्वात् परम्परया वर्णनम्"।

अस्य मते च पुत्राणां पित्राद्युपरमादावेव तद्धने स्वत्वं तद्धैकदेशनिष्ठम्।

मिताक्षरादिप्राचीनमते जन्मनैव पुत्राणां पितृधने स्वत्वं तच्च समुदितद्रव्यनिष्ठमिति भेदः।

तदेतत् प्राचीनमतं वीरमित्रोदये जीमूतवाहनमतनिराकरणेन परिष्कृत्य समर्थितं यथा

"यत्तु मन्वादिवचनव्याख्यासु बहुधा बुधाः। विवदन्ते दायभागः स प्रबन्धेन वर्ण्यते"। तद्वचनमाह नारदः "विभागोऽर्थस्य पित्र्यस्य पुत्रैर्यत्र प्रकल्प्यते। दायभाग इति प्रोक्तं तद्विवादपदं बुधैरिति"। पित्रोरयं पित्र्यम् इति कृत्तद्धितसमासेष्वर्थशब्दात् स्वार्थे भावधनस्यापि विभागकथनात्। पित्र्यस्य पुत्रैरिति च द्वयमपि सम्बन्धिमात्रोपलक्षणम् पत्नीत्वादिनान्येषामपि भर्त्रादिधने तद्विरूपणात्। अतएवोपक्रमे मनुना पित्रादि पदमुपात्तम्। "एष स्त्रीपुंसयोरुक्तो धर्मो वो रतिसंहितः। आपद्यपत्यप्राप्तिश्च दायधर्मं निबोधतेति"। "दायधर्मोऽयत्र विभागरूपोऽभिप्रेतस्तस्यैवार्थे लक्षण कथनपूर्वकविधिरूपत्वात् उद्देशावसरेऽपि "स्त्रीपुत्रधर्मो-विभागश्चेति" तस्यैव विवादपदत्वेनोद्देशात्। अतएवार्थे यावत्सम्बन्धिधनविभागमेव प्रदर्शितवान्मनुः। दायग्रहणाच्च स्वामिसम्बन्धमात्रं सकलस्वत्ववद् द्रव्यं वदति।

तथा च निघण्टुकारः "विभक्तव्यं पितृद्रव्यं दायमाहुर्मनीषिणः" इत्याह। अत्रापि पितृपदं सम्बन्धिमात्रोपलक्षणमन्यत्रापि दायशब्दप्रयोगात्। विभक्तव्यं विभागार्हमित्यर्थः अन्यथैकपुत्रादिस्वामिके विभागाभावाद्दायशब्दवाच्यता न स्यात्। यत्तु जीमूतवाहनेन (दीयत इति व्युत्पत्त्या दायशब्दो ददातिप्रयोगश्च गौणः मृतप्रव्रजितादिस्वत्वनिवृत्तिपूर्वकपरस्वत्वोत्पत्तिफलसाम्यात्। न तु मृतादीनां तत्र त्यागोऽस्ति। तच्च पूर्वस्वामिसम्बन्धाधीनं तत्स्वाम्योपरमे यत्र द्रव्येऽन्यस्य स्वत्वं तत्र निरूढोदायशब्दः) इत्युक्तं, तच्च सुन्दरम् निरूढत्वाङ्गीकारे दायददातिशब्दयोर्गौणत्वोपन्यासानर्थक्यात्। सर्वत्राऽवयवार्थरहित्ये हि निरूढत्वम्। न च योगरूढत्वम् अवयवार्थबाधश्च स्वयमेवोपन्यासात् गौणमवयवार्थं परिकल्प्य तदङ्गीकारस्य निष्प्रयोजनत्व मन्योन्याश्रयत्वमनुभवविरोधो व्याघातश्च। तत्स्वाम्योपरम इति च। जन्मनापि स्वत्वोपपादयिष्यमाणत्वादव्यापकम्। विभागशब्दस्त्वनेकस्वाम्यानां द्रव्यसमुदायविषयाणां तत्तदेकदेशे व्यवस्थापने शक्तः। अतएवैकपुत्रादीनां पित्रादिधनस्वाम्ये विभागशब्दाप्रयोगो दायोऽनेन लब्ध इत्येव च प्रयोगः। यद्यपि चैकं दासीगवादि बहुसाधारणं तत्रापि तत्तत्काल विशेषनियतदास्यदोहनादिना तस्य तस्य मूल्यव्यञ्जनादस्त्येकदेशस्वाम्यव्यवस्थापनरूपो विभागशब्दार्थः। अतएव "एकां स्त्रीं कारयेत्कर्म यथांशेन भजेमहे" इति "उद्धृत्य कूपवाप्यम्भस्तुल्यैरेव भजन्ते" "युक्त्या विभजनीयं तदन्यथानर्थकमवेदिति" च इदंस्वत्वादिवचनेषु वक्ष्यमाणरीत्या तदुपपादयिष्यते। स च दायोद्विविधोऽप्रतिबन्धः सप्रतिबन्धश्च। पुत्रादीनां पित्रादिधने पुत्रत्वादिनैव सत्यपि स्वामिनि पितादौ जन्मनैव स्वत्वोत्पत्तेः स तेषामप्रतिबन्धोदायः स्वामिसद्भावस्याप्रतिबन्धकत्वात्। यत्तु विभक्तस्वांशसंवृद्धिनोऽपुत्रस्य मृतस्य भ्रात्रादीनां तद्धनरूपोदायः स सप्रतिबन्धः स्वामिसद्भावस्य प्रतिबन्धकस्यापगम एव तत्र स्वत्वोत्पत्तेः। नन्वसौऽपि सप्रतिबन्ध एव दायः। स्वामिसद्भावे पुत्रादीनामपि जन्ममात्रेण स्वत्वस्य वक्तुमशक्यत्वात्। तथाहि। यदि जन्मनैव पुत्रादीनां पित्रादिधने स्वत्वं स्यात्तर्हि तत्समस्य पुत्रादेस्तत् साधारणमिति तदनुमतिं विना द्रव्यसाध्येष्वाधानादिषु पित्रादीनामनधिकारापत्तौ "जातपुत्रः ऋणवेधोऽग्नीनादधीतेति" श्रुतिविरोधः। किञ्च विभागात् प्राक्पित्रादिस्वाद्रव्यस्याविभाज्यत्ववचनं व्यर्थं स्यात्। तद्धि पिता पुत्रान्नरानुमत्या यदि दत्तं सर्वैरेव दत्तमिति विभाग प्राग्भावादेव प्रतिषेधोऽनर्थकः। अननुमत्या तु साधारणद्रव्यस्य दानमेव न सम्भवतीति पित्रादि प्रीतिदत्तत्वादिवचने युक्तिरयुक्ता। एवं पुत्राद्यनुमति मन्तरेण स्त्र्यादीनामपि भर्त्रादिभिः प्रीतिदानस्यासम्भवात्तदनुमतौ तु तैरपि दत्तत्वात्। "भर्त्रा प्रीतेन यद्दत्तं स्त्रियै तस्मिन्मृतेऽपि तत्। सा यथाकाममश्नीयाद्यदि स्थावरादृते" वचने यथाकाममश्नीयाद्यदीत्यनेनाविभाज्यत्वं भर्तृप्रीतिलब्धस्य यदभिहितं तदपि व्यर्थम्। न चेदमविभागावस्थायां प्रीतिदानं तस्य चाविभाज्यत्वञ्च प्रतिपादयति किन्तु स्थावरादृते यद्दत्तमित्यन्वयाद्विभागोत्तरमपि भर्त्रा स्त्रियै स्थावरञ्च प्रीत्या देयमज्ञानाद्दत्तमपि तेन पुत्रादिभिरपहृत्य विभजनीयमस्थावरन्तु न प्रत्याहर्त्तव्यमित्यनुवादमात्रम् स्थावरस्य स्त्रियै प्रीतिदानप्रतिषेधमात्रं तात्पर्येण बोधयतीति शङ्कनीयम्। तथान्वयस्य व्यवहितयोजनाप्रसङ्गेनायुक्तत्वात्। स्थावरप्रीतिदानप्रतिषेधमात्रता समर्पकत्वेऽन्यांशस्यानुवादमात्रं व्यर्थत्वापरपर्यायत्वापद्यते।

अथ "मणिमुक्ताप्रवालानां सर्वस्यैव पिता प्रभुः। स्थावरस्य तु सर्वस्य न पिता न पितामहः"। तथा "पितृप्रसादाद् भुञ्जन्ते वस्त्राण्याभरणानि च। स्थावरन्तु न भुञ्जीत प्रसादे सति मेहक इति" वचनमवश्यं विभागप्राक्कालीनस्थावरप्रसाददानप्रतिषेधपरं वाच्यं मणिमुक्तादिप्रसाददानानुमतिपुरःसरं तत्प्रतिषेधाभिधानात् अन्यथा तस्यानुवादमात्रत्वेन वैयर्थ्यापत्तेः। तथा च जन्मना पुत्रादीनां स्वत्वान्मणिमुक्तादिषु तदनुमतिमन्तरेणापि दाने पितुः स्वातन्त्र्यम्। स्थावरे तु तदनुमत्यैवेति विशेष इति वचनद्वयार्थस्य वाच्यत्वाज्जन्मना स्वत्वमायातीति, नैवम् तस्य पितामहोपात्तस्थावरविषयत्वात्। अतीते पितामहे तत्स्वाम्यनाशात्पितापुत्रयोः साधारणे तदीयद्रव्यस्वत्वेऽपि स्थावर एव पुत्रानुमत्यपेक्षा मणिमुक्तादौ तु नेति तदर्थात्। यत्तु गौतमवचनम् "उत्पत्त्यैवार्थस्वामित्वं जनयते इत्याचार्याः" इति। जन्मनः स्वत्वहेतुत्वे पितुश्चिरञ्जीवता प्रभुत्वेनोपन्यस्तद्वयभागदायतत्त्वज्ञता व्याख्यातमेव।

पितृस्वत्वोपरमे तज्जन्यत्वस्य हेतुभूतेनोत्पत्तिमात्रसम्बन्धेनान्यसम्बन्धाधिकेन जनकधने पुत्राणां स्वामित्वात्तद्धनं पुत्रोलभते नान्यः सम्बन्धीत्यार्थां मन्यत इति। न ह्य पितृस्वत्वे विद्यमानेऽपि तत्र पुत्रस्वत्वमिति तदर्थः। नारददेवलवचनविरोधात्। "पितर्यूर्ध्वं गते पुत्रा विभजेयुर्धनमित्युत" नारदः पितृद्धनमित्याह। अन्यथा धनं विभजेयुरित्येवावक्ष्यत्। "पितर्युपरते पुत्रा विभजेयुर्धनमित्युत"। अस्वाम्यं हि भवेदेषां निर्दोषे पितरि स्थिते इति"। देवलोऽपि पितृद्धनमित्युक्त्वोत्तरार्द्धेनास्वाम्यं हीति स्पष्टमेव तेषामस्वत्वं तत्र हेतुत्वेनोक्तवान्। निर्दोषे पातित्यादिदोषापगमकदोषरहिते। मनुरपि "ऊर्ध्वं" पितुश्च मातुश्च समेत्य भ्रातरः समम्। भजेरन् पैतृकं रिक्थमनीशास्ते हि जीवतोरिति" जीवतोर्मातापित्रोस्तद्धने पुत्राणामस्वाम्यं स्पष्टमेवाह। यत्तु शङ्खलिखितावाहतुः "न जीवति पितरि पुत्रा रिक्थमजेरन्। यद्यपि स्वाम्यमवादधिगतन्नैरन्तर्यं एव पुत्रा अर्थधर्मयोरस्वातन्त्र्यादिति" स्मृतिचन्द्रिकाकारेण च व्याख्यातम्। यद्यपि "तैः पुत्रैःस्वकीयजन्मनः पश्चादनन्तरमेव पितृधने स्वाम्यमधिगतं प्राप्तमथापि जीवति पितरि तद्धनं तदिच्छां विना न विभजेरन्नर्थधर्मयोरस्वातन्त्र्यात्पितृव्यारतन्त्र्याद्विभागकरणेऽनर्हाः पुत्रा" इति। तेनानेन वचनेन जन्मना पुत्रादीनां पित्रादिस्वाम्यधने स्वत्वमिति"तदपि न मन्वादिवचनानां बहूनामस्वाम्यप्रतिपादकानामनुरोधेनास्वाम्यार्थस्य वर्णनीयत्वात्। वर्णितञ्च कल्पतरौ "यद्यपि पश्चादधिते पितृधनव्यापारनिरपेक्षैः पुत्रैर्विद्यादिभिरुपात्ते धने स्वाम्यनवापि तत्राप्यस्वाम्यञ्जीवति पितरि, किमुत पितृधने अर्थधर्मयोस्तेषां पितरि जीवत्यस्वातन्त्र्यादिति। किञ्च स्वत्वं शास्त्रैकसमधिगम्यं तत्र च रिक्थक्रयादिवज्जन्मनः स्वत्वहेतुत्वेनानुक्तेर्जन्मना स्वत्वमप्रमाणकमेव। अतएव यथा भार्यादिवचनम् "भार्यां पुत्रश्च दासश्च त्रय एवाधनाः स्मृताः। यत्ते समधिगच्छन्ति यत्कृते तस्य तद्धनमिति"। पारतन्त्र्यमात्रप्रतिपादनपरत्वाद्स्वाम्यवचनान्यपीत्यपास्तम्। भार्यादिष्वध्यन्वादिवचनैः कर्त्रनादिसाधनकत्वेन स्वामित्वे सिद्धे युक्तमस्वातन्त्र्यमात्रपरत्वमन्यथा श्रौतादिषु धनसाध्येषु पुराणादिस्मृतन्तेषामधिकारित्वमपि विरुध्येत। अस्तु प्रकृत जन्मनः स्वत्वहेतुत्वे प्रमाणाभावादुच्यर्थमेवान्यधानेकवचनवर्णनम्। किञ्च यदि स्वत्वं लौकिकं स्यात्तर्हि तदुपायानामपि लौकिकत्वात् "स्वामी रिक्थक्रयसंविभागपरिग्रहाधिगमेषु ब्राह्मणस्याधिकं लब्धं, क्षत्रियस्य विजितम् निर्विष्टं वैश्यशूद्रयोरिति" गौतमवचनं व्यर्थमेव स्यादनुवादमात्रत्वात्। न हि पाकादोदनो भवतीत्यादि शास्त्रे निष्प्रयोजनमनुवादमात्रं सभ्यते। तस्य हि वचनस्यायमर्थः। रिक्थं दायः क्रयः प्रसिद्धः। संविभागो दायस्यैकदेशनिष्ठस्वामित्वव्यञ्जकोविभागः। परिग्रहः पूर्वमपरेणास्वीकृतस्यारण्यादि साधारणप्रदेशसम्बन्धिनस्तृणजलकाष्ठादेः स्वीकारः। अधिगमोऽज्ञातस्वामिकस्य निध्यादेः प्राप्तिः। एतेषु स्वत्वहेतुषु सत्सु स्वामी भवति। जातेषु च जायते। ब्राह्मणस्य लब्धं प्रतिग्रहादिप्राप्तमधिकमसाधारणं रिक्थादयस्तु सर्वसाधारणाः। अधिकमित्युत्तरत्र सर्वत्र सम्बध्यते। क्षत्रियस्य विजितं युद्धविजयदण्डादिप्राप्तमसाधारणम्। वैश्यस्य निर्विष्टं कृषिगोरक्षणादिभक्तिलब्धम्। शूद्रस्य द्विजशुश्रूषादिभक्तिलब्धम्। निपूर्वस्य विशेर्भक्तिवाचकत्वम् "निर्वेशोभक्तिभोगयोरिति" विश्वकोषाभिधानात्। वैश्यशूद्रयोरुपलक्षणत्वादन्येषामप्यनुलोमजप्रतिलोमजातानां "स्मृतानामस्वारण्यम्" इत्याद्यौशनसादिप्रतिपादितं वृत्तिजातं निर्विष्टशब्देन संगृह्यते सर्वेषां स्मृतिरूपत्वात्। किञ्च "योऽदत्तादायिनो हरेत्तादृङ्निषेवेत ब्राह्मणोधनम्। याजनाध्यापनेनापि यथा तेनस्तथैव सः"। इत्यदत्तादायिनश्चौरस्य हरणाद्याजनादिसहस्रेणापि धनमर्जयतो दण्डविधानमनुपपन्नं स्वत्वस्य लौकिकत्वे। सहस्रेणार्जयतोनिरपराधत्वात्। मन्यते तु शास्त्रैकसमधिगम्यत्वात् स्वत्वस्य चौरदारहरयाजनादावेतद्वचनादेव स्वत्वानुत्पादकत्वात्तद्विधानमुपपन्नतरम्। अपि च मम स्वमनेनापहृतमिति व्यपदेशो न स्यात् स्वत्वस्य लौकिकत्वे अपहर्तुरेव तत्र स्वत्वात्। मन्यते त्वपहारस्य निषिद्धत्वेन स्वत्वानुत्पादकत्वादुपपन्नोऽयं व्यपदेशः। यदि च सुवर्णत्वादिकमिव तत्र स्वत्वमपि प्रत्यक्षप्रमाणकमभविष्यत्तर्हि सुवर्णत्वादौ यथा न सन्देहस्तथास्य स्वमिदमस्य नेत्यपि सन्देहो न स्यान्निर्णीतत्वात्। इदमेवोक्तं संग्रहकारेण। "वर्त्तते यस्य यद्वस्तु तस्य स्वामी स एव न। अन्य स्वमन्यहस्तेषु चौर्यादौः किन्न दृश्यते। तस्माच्छास्त्रत एव स्यात् स्वाम्यं नानुभवादपि। अस्यापहृतमेतेन न

युक्तं वक्तुमन्यथा। विदितोऽर्थागमः शास्त्रे तथाऽर्थे पृथक् पृथगिति"। शास्त्रे "स्वामी रिक्थग्रहणेत्यादौ" साधारणासाधारणरूपोऽर्थागमः स्वत्वोपायः पृथक् पृथगर्थे-तत्तया विदितो लौकिकत्वे तच्छास्त्रानर्थक्यं स्वाद्लोकविदितत्वादित्यर्थः। अन्यत् स्पष्टम् यथार्थमिति स्मृति चन्द्रिकायां पाठः। पूर्वपाठस्तु मदनरत्नलिखितः। अथ यदयस्य यत्रेष्टं विनियोक्तुं तत्तस्य स्वमिति लोकप्रसिद्धेर्यत्रेष्टविनियोक्तृत्वं स्वत्वमिति चौर्याद्यर्जितेनातिप्रसङ्गस्तत्र चौरादेरर्थेष्टविनियोक्तृत्वाभावाद्विनियोगकाले त्रासादिदर्शनात्। अतएव सन्देहोऽप्युपपन्नः सुवर्णादितुल्यत्वाभावात् स्वत्वस्य। नैवम् असम्भवात्। शास्त्रेण सर्वस्य कुटुम्बभरणादौ विनियोगविशेषनियमादैच्छिकविनियोग-विषयत्वस्य कृत्याप्रसिद्धेः। तदयाह संग्रहकारः शङ्कोपन्यासपुरःसरम् "न च स्वस्वत्वते तदात् स्वेच्छया विनियुक्ते। विनियोगोऽस्य सर्वस्य शास्त्रेणैव नियम्यते इति"। अत्र पूर्वार्द्धे शङ्कोपन्यास उत्तरार्द्धे तत्परिहारः। न च रिक्थादिवदुत्पत्त्यैवार्थस्वामित्वमिति गौतमवचने उत्पत्तेरपि जन्मापरपर्यायायाः स्वत्वहेतुत्वोक्तेः सत्यपि स्वत्वस्य तदुपायानाञ्च शास्त्रैकसमधिगम्यत्वे जन्मना पुत्रादेः पित्रादिधने स्वत्वमज्ञातमेवेति वाच्यम् तस्यानेकदूषणैरन्यथा व्याख्यानस्य प्रागेवोक्तत्वात्। इदमेवाभिसन्धाय धारेश्वरेणापि शास्त्रैकसमधिगम्यमेव स्वत्वमिति सिद्धान्तितम्। किञ्च। जीवत्यपि पितरि पुत्रादेस्तद्धने जन्मना स्वत्वे तदनिच्छायामपि पुत्रादीच्छयैव विभागः स्यात्। अस्वातन्त्र्यवचनात्तथैवमिति चेत् न तथा सति दृष्टादृष्टविरोधमात्रं भवेद्व्यवहारस्तु सिद्ध्येदेव। यथा पित्रादिभिः सह पुत्रादिभिश्चतुर्थाद्व्यवहारे प्रवर्त्त्यमाने तेषां दृष्टादृष्टयोः श्रेयोविघातमात्रं स्निग्धे पितुः पुत्रे इत्यादि वचनार्थ इति प्राक्प्रपञ्चितं तथात्रापि स्यात्। अस्तिति चेन्न सकलनिबन्धविरोधात्। क्वचिज्जन्मनैवेति प्राचीनपत्र-लिखनमपि जन्मनिबन्धनत्वात्पितापुत्रादिसम्बन्धस्य पितरस्यस्य च तत्स्वत्वापगमहेतुत्वेन परम्परया वर्णनीयम्। किञ्च। अर्हं पितर्येत्यादि मनुवचनं जन्मना पुत्राणां स्वत्वपरं जीवति पितरि सत्यपि पुत्राणां स्वाम्ये तदिच्छया विनाऽपि विभागः अर्थन्तु स्वेच्छयेति विभागनिषेधार्थं तदिति वाच्यं तन्नान्याय्यम् अस्वाम्यपरत्वापत्तेः। न च पितृस्वरमकालविधानार्थमिति युक्तम् दृष्टार्थत्वाद्विभागस्योभयस्याप्यनुपपत्तेः। नापि नियमविधिर्विभागस्य "एवं सह वसेयुर्वा पृथग् वा धर्मकाम्यया" इति मनुना विकल्पाभिधानात्। कालविधौ च पित्रुपरमानन्तरकाल एव विभागो नैमित्तिकस्य निमित्तानन्तर्यबाधोऽयं स्यात्। जातेष्टिवज्ज्ञातप्राप्तवियोगापत्तिस्वरूपविशेषविरोधस्यात्राभावात्। अतो जीवतोः पित्रोस्तद्धने स्वाम्यं नास्ति किन्तूपरतयोस्तयोरिति तत्कालीनास्वत्वज्ञापनार्थं मन्वादिवचनं विभागस्तु स्वातन्त्र्यात्तत्कालीन इच्छाप्राप्तोऽनूद्यते। तथा चैतद्वचनविरोधादपि न जन्मना स्वत्वं वक्तुं शक्यम्। उपरभवत्पतितत्वादिकमपि पित्रादिस्वत्वनाशकारणं वक्ष्यते। तस्मात् पित्रादिस्वत्वनाश एव तद्धने पुत्रादीनां स्वाम्यं न तत्स्वत्वसमकालीनमिति स्वाम्यादिसङ्ग्रहस्य सर्वत्र प्रतिबन्धकत्वात् सर्वोऽपि सप्रतिबन्ध एव दाय इति द्वैविध्यमनुपपन्नमिति। अत्रोच्यते। यदि स्वत्वापगम एव पुत्रादीनां तद्धने स्वत्वं तर्हि पितर्यप्रे पित्रादौ जीवति तेषां धनसाध्यवैदिककर्मस्वनधिकारप्रसङ्गे "जातपुत्रः ऋणवेगोऽस्मीनादधीतेत्यादि श्रुतिविरोधस्तुल्यः स्वरूपोक्तकल्पितहेत्वाभासासमर्थितस्वत्वार्थानुरोधेन स्मृति सङ्कोचोऽयुक्तः। आहिताग्न्यादिप्रकरणे पित्रादौ जीवत्यपि पुत्रादीन् प्रति तत्प्रहत्त्वविशेषात्। सकलयाज्ञिकशिष्टानां तदनुष्ठानदर्शनाच्च। जातपुत्रत्वर्णवेगपदाभ्यां वयोवृद्धानतिक्रमस्यैव विवक्षा न तु तयोरव्यवस्थितयोः स्वरूपेणेति विरोधाधिकरणे भाष्यवार्त्तिकादौ स्थितत्वात्। न च यथा पुत्रानुमत्या पितुर्भवन्मते तदधिकारस्तथा मन्मतेऽपि पुत्रादीनामपि पित्राद्यनुमत्येति वाच्यम्। यतो ह्योरपि मते पितुः स्वत्वस्य धने विद्यमानत्वात् स्वत्वत्यागरूपप्रधाननिष्पत्तिरविहता भवन्मते तु पुत्रादीनां स्वत्वस्यैवाभावादनुमतेश्च स्वत्वजनकत्वाद्यागादिप्रधाननिष्पत्तिरेव कथम्। वस्तुतस्तु पितुः पुत्रानुमतिरपि नापेक्षिता स्वातन्त्र्यात्। पित्राद्यनुमतिस्तु पुत्रादेरपेक्षिता पारतन्त्र्यादित्येतावान् विशेषो यथा स्त्रियाः स्वधनेत्यापीष्टा पुत्रोदिप्रतादौ भर्त्रादेरनुमतिस्तत्पारतन्त्र्यवचनात्। अननुमतौ तु स्वतन्त्रः प्रत्यवायो वैगुण्यं वा कर्मणि न तु प्रधानस्वरूपानिष्पत्तिः। पित्राद्यनुमतेः स्वत्वोत्पादकत्वञ्चैतदनुरोधात्कल्प्यमानमलौकिकमशास्त्रीयञ्च। तस्माच्छास्त्रैकसमधिगम्येऽपि स्वत्वे कथञ्चिज्जन्मनोऽपि

रिक्थादिवचनादधिगमादिपदेन संग्रह आवश्यकः श्रुति स्मृतिपुराणशिष्टाचारविरुद्ध निर्दोषे जीवत्यपि पित्रादौ पुत्रादिवत्ताद्यनुज्ञानाधिकारस्यानुरोधात्। वस्तुतस्तु लौकिकमेव स्वत्वं लोके च जातमात्रादामेव पुत्रादीनां पित्रादिधने स्वाम्यव्यवहारोऽन्येषामपीति साधयिष्यामः। यच्च पित्रादीनामनुमत्यर्थोऽयं पुत्रादिसाधारण्यस्वत्वे कथमनुमतिमन्तरेणाधानादिकं स्यादित्युक्तन्दनुमतियोग्येऽपि पुत्रादिषु स्वातन्त्र्यात्मिवादीनां न तदनुमत्यपेक्षा किंतानुमत्योर्भेदेति परिहृतप्रायमेव तद्विधिबलादेवाधिकारोऽवगम्यत इति तु विज्ञानेश्वराचार्यः। अतोत्पत्त्यैवार्थस्वामित्वमिति गौतमवचनस्य यज्ञीभूतदाक्षनरघुनन्दनाभ्यामारभ्यरिक्थोत्पत्तिस्वत्वहेतुत्वेन व्याख्यानं तत्तदपि व्यर्थमेव। यत्तु शङ्खवचनस्यापि स्मृतिचन्द्रिकोक्तव्याख्यैव साधीयसी। कल्पतरूक्तव्याख्यायान्तु विद्यादयुपात्ताध्याहारेऽनुपस्थितभूयःपदाध्याहारः प्रसज्येत। जन्मपदाध्याहारस्तु पुत्रत्वाद्याक्षेपस्थितेरध्याहाराच्च नायुक्तः। तेन स्वल्पदृष्टमूलानुरोधान्मनुनारददेवलादिवचनानामेवास्वातन्त्र्यपरत्ववर्णनसङ्गतितरम्। यदप्युक्तं मीतिदत्तस्यादिमाञ्छब्दवचनानि जन्मना स्वत्वाभ्युपगमेऽनुपपन्नानीति। तदपि न अनुमत्यभिप्रायेण स्थावरमीतिदानाभावस्थिरीकरणार्थतयोपपत्तेः। स्वातन्त्र्याद्वा पितरनुमतिमन्तरेणापि तेन दत्ते स्थावरव्यतिरिक्ते पुत्राणामविभाज्यत्वमुच्यते। अतएव स्थावरे विशेषवचनम् "स्थावरं द्विपदञ्चैव यद्यपि स्वयमर्जितम्। असम्भूय सुतान् सर्वांश्च दानञ्च न विक्रयः" इति। मणिमुक्ताप्रवालानामित्यादिवचनन्तु जन्मना स्वत्वपक्ष एवोपपन्नतरम्। न च पितामहोपात्तस्थावरमात्रविषयत्वमिति युक्तम्। न पिता न पितामह इति द्वयग्रहणात्। पितामहस्य हि स्वार्जितमपि पुत्रे पौत्रे च सत्यपि न देयमिति वचनं जन्मना स्वत्वङ्गमयति। यथा परमते मणिमुक्ताप्रवालादीनां पैतामहानामपि पितुरेव स्वत्वनियमस्मरणात्तथात्रापि मते ऽपि पुत्रादीनामत्र जन्मना स्वत्वे साधारण्येऽपि पितुर्दानाधिकार इत्यविशेषः। तस्मात्पैतृके पैतामहे च द्रव्ये पुत्रादीनां यद्यपि जन्मनैव स्वत्वं तथापि पितुरावश्यकेषु धर्मकृत्येषु वाचनिकेषु च प्रसाददानकुटुम्बभरणापद्विमोक्षादिषु च स्थावरव्यतिरिक्तद्रव्यविनियोगे स्वातन्त्र्यमिति ध्येयम्। स्थावरादौ तु स्वार्जितेऽपि पित्रादिपरम्पराप्राप्ते च पुत्रादिधारतन्त्र्यं तुल्यमेव। "स्थावरं द्विपदञ्चैव यद्यपि स्वयमर्जितम्। असम्भूय सुतान् सर्वांश्च दानञ्च न विक्रयः। ये जाता येऽप्यजाताश्च ये च गर्भे व्यवस्थिताः। तस्मिन्नु तेऽभिकाङ्क्षन्ति न दानञ्च न विक्रयः" इत्यादि वचनात्। अस्यापवादो वक्ष्यते यच्च स्वत्वस्य शास्त्रैकसमधिगम्यत्वाच्छास्त्रे च जन्मनः क्वापि स्वत्वहेतुतानभिधानात् कथञ्जन्मना पुत्रादीनामित्रादिधने स्वत्वस्वीकार इत्युक्तम्। तत्तु शास्त्रैकसमधिगम्यत्वमभ्युपेत्यापि गौतमादिवचन उत्पत्तेरपि स्वत्वोक्तेः परिहृतमेव प्राक्। वस्तुतस्तु न स्वत्वस्य शास्त्रैकसमधिगम्यत्वं युक्तियुक्तम्। सर्वथा शास्त्रज्ञानगन्धरहितानां म्लेच्छादीनामपि मम स्वमिदं नान्यस्य स्वमिति व्यपदेशस्तत्कृतश्च क्रयविक्रयादिव्यवहारो दृश्यते। तेनान्वयव्यतिरेकाभ्यां क्रयाद्युपायकं स्वामित्वमपि तैर्यग्योनविनियोगार्हत्वरूपं पदार्थान्तररूपं वा म्लेच्छादिप्रमाणादेवावगतमित्यवश्यं वाच्यम्। एतत्तर्कोपपन्नोऽनुमानवाक्यप्रयोगोऽपि विज्ञानयोगिनोक्तः "स्वत्वं लौकिकं लौकिकार्थक्रियासाधनत्वाद्व्रीह्यादिवम् इत्यन्वयदृष्टान्तः। याज्ञवल्क्यादीनां हि शास्त्रैकसमधिगम्यानां न लौकिकार्थक्रियासाधनत्वमस्तीति व्यतिरेकदृष्टान्तः। तेनान्वयव्यतिरेकौ हेतुः। यद्यप्याज्ञवल्क्यादीनामपि यागादिलौकिकक्रियासाधनत्वमस्त्येव। तथापि तल्लोकप्रमाणकान्नाद्यादिरूपेण नालौकिकाज्ञवल्क्यादिरूपेणेति न व्यभिचारः। दृष्टं तु सुवर्णादिरूपेण न क्रयादिसाधनत्वमपि तु स्वत्वेनैवेति सुवर्णत्वादिना भरणाद्यर्थक्रियासाधनत्वात्तद्व्यावहारिकं रूपमेवं स्वत्वमपि सर्वानुगतं लौकिकमेव नह्यस्वत्वेन क्रयादिक्रियानिर्वाहो लोके। न चैवं स्वामी रिक्थेत्यादि स्मृतीनां लोकसिद्धार्थानुवादकत्वेनानर्थक्यापत्तिरिति वाच्यम्। धर्माधर्मोपयोगितया व्याकरणस्मृतावनादिवाचकत्वतद्भावरूपसाधुत्वासाधुत्वविवेकस्येव तस्योपपत्तेः। साधुशब्दाधिकरणे ह्येतदुक्तं यल्लौकिकव्यवहारिणां लोकानामविरुद्धं लौकिकमेव साधुत्वं शास्त्रेण विविच्यते। नत्वलौकिकसाधुत्वं साधुभिर्भवितेत्यादिविधावन्योन्याश्रयप्रसङ्गादित्यादि। एवमत्रापि तथा च नयविवेके भवनाथः "लोकसिद्धाज्जङ्ग-

न्नादि स्वतएवानित्यं प्रथमश्लोकजीविष्यव्यवस्थितं तन्निबन्धनार्थं स्मृतिव्याकरणादिस्मृतिवदिति। जन्मादीत्यादिपदेन क्रयादिपरिग्रहः। व्याकरणादित्यादिपदेन सङ्कीर्णरत्नपरीक्षासङ्ग्रहिकायां परिग्रहः। रागादीनामपि हि लोकसिद्धानामेवानभियुक्तान् प्रति विवेकार्थमेव तल्लक्षणकथनमित्युक्तं स्मृत्यधिकरणे आचार्यैश्चरणैः। स्वामी रिक्थेत्यादिवचनन्तु प्रागेव व्याख्यातम्। रिक्थशब्दस्तु निष्प्रतिबन्धदायपरः संविभागशब्दश्च सप्रतिबन्धदायपर इति मिताक्षरायां विज्ञानेश्वरेण व्याख्यातम्। स्मृतिचन्द्रिकाकृता तु रिक्थं पित्रादिधने पुत्रादीनां स्वामित्वापादकं जन्मनैवेति व्याख्याय संविभागः पित्रादिधने विशेषनिष्ठस्वामित्वसम्पादको विभाग इति संविभागशब्दो व्याख्यातस्तच्च स्वत्वं यतो विभागात् स्वत्वहेतुत्वेन तत्प्रतिपादनानौचित्यात्। एकदेशव्यवस्थापनमात्रं हि स्वत्वस्य विभागेन क्रियते। सङ्घातस्वत्वहेतुत्वपक्षे स्वामिपदे वैरूप्यापत्तेः। अतएवाह मिताक्षरायां विज्ञानेश्वराचार्यैः 'विभागशब्दश्चानेकस्वामिकधनविषयः प्रसिद्धोनान्यदीयविषयो न ग्रहीष्यविषय इति'। लोके पुत्रादीनां जन्मनैव स्वत्वं प्रसिद्धतरमेव। यदपि पत्नी दुहितरश्चेत्यादिवचनं तदपि स्वामिसम्बन्धनिबन्धनानेकदायग्रहणप्राप्तौ लोकप्रसिद्धेऽपि स्वत्वे व्यामोहनिरासार्थम्। प्रायेण व्यवहारस्मृतीनां लोकसिद्धार्थानुवादकत्वमिति सकलनिबन्धृभिरभिधानात्। नियतोपायिकं स्वत्वं लोकसिद्धमेवेति भगवतोशनसोरपि संमतम्। क्षिप्तानये हि तृतीये वर्षके द्रव्यार्जननियमानां क्रत्वर्थत्वे स्वत्वमेव न स्यात् स्वत्वस्यालौकिकत्वादिति पूर्वपक्षासम्भवमाशङ्क्य द्रव्यार्जनप्रतिग्रहादीनां स्वत्वसाधनत्वं लोकसिद्धमेवेति पूर्वपक्षः समर्थितस्तेन। न च द्रव्यार्जनस्य क्रत्वर्थत्वे स्वमेव न भवतीति याग एव न संवर्त्तेत। प्रलपितमिदङ्केनापि। अर्जनं स्वत्वं नापादयतीति विप्रतिषिद्धमिति' यत्तेन। अस्यार्थश्चीकालता विहत एवम्। यदा द्रव्यार्जननियमानां क्रत्वर्थत्वतदा नियमानां स्वत्वोपायतामिदं शास्त्रं न बोधयति क्रत्वर्थताबोधने व्याप्तत्वात्। तथा सति प्रतिग्रहादिप्राप्तस्य स्वत्वमित्यत्र प्रमाणाभावादस्तेन च स्वत्वत्यागात्क्रियासम्भवात् कस्येह द्रव्यार्जननियमा भवेयुरिति पूर्वपक्षासम्भव इति ग्रन्थार्थः। प्रलपितमित्यादुत्तरस्यस्यार्थः। अर्जनप्रतिग्रहादेः स्वत्वहेतुतायां लोकसिद्धत्वेन शास्त्रस्य तत्राव्यापाराच्चियमानां क्रत्वर्थतैव तेन गम्यत इति न रागासम्भवो नियमानर्थक्यञ्चेति। सिद्धान्तेऽपि तेन स्वत्वस्य लौकिकत्वाभ्युपगमेनैव विचारप्रयोजनमुक्तम् 'अतो नियमातिक्रमः पुरुषस्य न क्रतोरिति'। अस्यार्थश्च एवं विहतः। यदा द्रव्यार्जननियमानां क्रत्वर्थत्वतदा नियमार्जितेनैव क्रतुर्न नियमातिक्रमार्जितेन द्रव्येण। न तु पुरुषस्य नियमातिक्रमदोषः पूर्वपक्षे। सिद्धान्ते अर्जननियमस्य क्रत्वर्थत्वाभावात्केवलपुरुषार्थत्वात्तन्नियमातिक्रमार्जितेनापि द्रव्येण क्रतुसिद्धिरभ्युपेत्य पुरुषस्यैव तु नियमातिक्रमदोष इति अनेन नियमातिक्रमार्जितस्यापि स्वत्वमभ्युपगतमन्यथा क्रतुसिद्ध्यभिधानविरोधात्। तत्रैवाधिकरणे कुमारीस्वामिनोऽप्यत्वमवतः स्वत्वं लौकिकमित्येवाभिमतमिति। तत्त्ववार्त्तिकतन्त्ररत्नाभियोगभाजां सुलभमेव। अतएवाह शास्त्रदीपिकायां, पार्थसारथिः रागप्राप्तं तावदर्जनञ्च शास्त्रीयम्। रागतश्च पुरुषार्थतया प्राप्तैः प्रत्यक्षैर्वार्जितं द्रव्यं पुरुषस्वीयत्वं पुरुषार्थं विज्ञायते न तदनुभाने क्रत्वेकशेषतया शक्यं विज्ञातुम्। तस्मात् पुरुषार्थं द्रव्यं क्रतुरपि पुरुषकार्य्यीयामनन्तम इति कार्य्यान्तरवत् क्रतावभ्युपयुज्यत इत्येतावान् विशेषः। नन्वेवाङ्गं तथा सति जीवनलोपात् क्रतुरेव न प्रवर्त्तेतेति प्रधङ्केन। अत्रार्जनस्य शास्त्रीयत्वच्चिरस्थता स्वत्वस्य तदुपायानाञ्च लौकिकत्वं स्पष्टतरमेवोक्तम्। अन्यदपि तेनैवोक्तम्। तस्मात् पुरुषार्थत्वाद्द्रव्यार्जनमेवञ्च दृष्टार्थमपि भवति। नियमस्तु दृष्टाभावात्कामदृष्टार्थः स्यात्। अदृष्टमपि पुरुषार्थार्जनविषयत्वात्। नियमस्य पुरुषगतत्वमेव कल्प्यते। तेनासावुपायान्तरेणार्जयन् प्रत्यवेतीति गम्यत इति। ततश्च स्वामी रिक्थेत्यादिवचसां लौकिकमेव रिक्थादीनां स्वत्वोपायत्वमनूद्य तदतिरिक्तोपायनिवृत्तौ तात्पर्यं क्रियमविधयेति नानर्थक्यशङ्कापि तृप्तिसाधनभोजनाश्चितदक्षिणावत्। द्रव्यार्जनमेव क्रत्वर्थपुरुषार्थत्वविचारोदाहरणत्वेनोपन्यस्तः। स एव तत्रोदाहरणमित्येव भट्टगुरुमतयोर्भेदः स्वत्वस्य लौकिकत्वं तूभयसम्मतमिति निष्कर्षः। तत्तद्भूषणभूषणादि तु तन्त्राभियोगवतामाकरे एव व्यक्तं प्रस्तुतानुपयोगादिह नोच्यते। एतेन चौर्यादिप्राप्तस्यापि स्वत्वं

स्यादिति यत्संयहकारधारेश्वराभ्यां स्वत्वस्य लौकिकत्वे दूषणमभिहितं तदपि परास्तम्। चौर्यादिषु स्वत्वोपायत्वस्य लोकएवाप्रसिद्धेरन्यस्य स्वमिदमस्येवं व्यवहाराच्। क्रयाद्युपायसन्देहादेव स्वत्वसन्देहोऽपीदमस्य वास्तव्य वेत्याकारोनानुपपन्नः। मम स्वमनेनापहृतमिति न ब्रूयादपहर्तुरेव स्वत्वादिति च यत्स्वत्वस्य लौकिकत्वे दूषणमभिहितं तदप्येतेनानुसन्धिशेषम्। यच्चोक्तं संयहकृता "शास्त्रेण सर्वस्य तत्र विनियोगनियन्त्रणाद्दुर्यशेदविनियोगार्हत्वरूपस्वत्वासम्भवः दृष्ट्या क्वापि नियोगासम्भवादिति। तदयुक्ततः न हि वयमैहिकविनियोगोपयुक्तत्वं ब्रूमोऽपि तु तदर्हत्वमात्रम्। अन्यथा राजादिभयादिच्छाप्रतीघातेऽपि तत्र विनियोगेच्छानिच्छादयोश्च स्वत्वतदभावौ विरुद्धौ प्रसज्येयाताम् राजादिनियन्त्रणादिव शास्त्रनियन्त्रणादन्यत्रैहिकविनियोगाभावेऽपि तदर्हत्वस्यानपायात्। अतएव दुर्वृत्तेनाशास्त्रीयविनियोगे स्वव्यपहारो नास्ति। प्रत्यवायमात्रपरं शास्त्रातिक्रमात्। तदर्हत्वं च तदर्जितत्वप्रयुक्तमस्त्येव। तथा च नयविवेकेऽप्युक्तम्। "तच्च तस्य तदर्हं यद्येनार्जितमिति"। तदर्हं यद्येदविनियोगार्हमित्यर्थः प्रतिबन्धादङ्कुरमजनयतोऽपि कुमूलस्यबीजस्य बीजत्वप्रयुक्तमङ्कुरोत्पादनार्हत्वमिव। वस्तुतस्तु बीजत्वाङ्कुरार्हत्वयोरिव स्वत्वव्ययेदविनियोगार्हत्वयोरपि भेद एव। अन्यथार्हतावच्छेदकाऽपरिचयेऽर्हताया दुर्निरूपत्वात्। तेन शास्त्रप्रयुक्तमेव स्वत्वमपि तदुपायत्वज्ञानव्यङ्ग्यं पदार्थान्तरमेवोत्पत्तिविनाशशालि। शास्त्रप्रयुक्तन्तु जातिरूपं नित्यमित्येतावान् परं भेदः। दत्तकाकरे व्यक्तं श्रीनायस्यादौ च। अत्र मिताक्षरायां स्वत्वलौकिकालौकिकत्वविचारप्रयोजनसङ्गं शास्त्रैकसमधिगम्ये स्वत्वे। मनुः "यद्गर्हितेनार्जयन्ति कर्मणा ब्राह्मणा धनम्। तस्योत्सर्गेण शुद्ध्यन्ति दानेन तपसैव च" इत्यादिप्रकरणादसत्प्रतिग्रहादि यस्य यदर्जनोपायत्वेन निषिद्धन्तदर्जिते तस्य स्वत्वाभावाद्यौर्यादार्जितवत्तत्पुत्रादाप्यमपि तदविभाज्यमेव। लौकिकत्वे तु स्वत्वस्य तदर्जितेऽपि पितुः स्वत्वात्तत्पुत्रादाप्यं पितृधनत्वेन तद्विभाज्यम्। वर्जयितुरेव प्रतिषेधातिक्रमनिमित्तप्रत्यवायात् प्रायश्चित्तम्। तत्पुत्रादीनान्तु दायरूपधर्मोपायतस्तत्स्वमिति न प्रायश्चित्तमपि "सप्त वित्तागमा धर्म्या दायो लाभः क्रयो जयः। प्रयोगः कर्मयोगश्च सत्प्रतिग्रह एव चेति" मनुस्मरणात्। प्रयोगो हट्टार्थन्द्रव्यप्रयोगः कर्मयोग ऋत्विज्यादिकरणम्। तत्र दायादीनां त्रयाणां वर्णचतुष्टयसाधारण्येन जयस्य क्षत्रियं प्रति, योगस्य स्वयंकृतस्य वैश्यं शूद्रं च प्रति धर्म्यत्वम् अस्वयंकृतस्यापदि च स्वयंकृतस्यापि सर्वान् प्रति। कर्मयोगस्य तु विप्रं प्रत्येवेति विशेष इति। अत्र मदनरत्नकरो दूषणमाह 'स्वत्वस्य शास्त्रैकसमधिगम्यत्वेऽप्यसत्प्रतिग्रहादिनिषेधो न स्वत्वानुत्पादकतामेवं वदति किन्तु प्रत्यवायमात्रहेतुताम्। इतरथा "व्यापद्गतः सम्यग्दत्तं भुञ्जानो वा यतस्ततः। न लिप्यते तेनसा विप्रो ज्वलनार्कसमो हि सः। कुसीदं कृषिवाणिज्यं प्रकुर्वीतास्यवड्क्रतम्। आपत्काले स्वयं कुर्यात्तेनसा युज्यते द्विजः" इति वचनैरेनसा न युज्यत इत्यभिधानेनापदि प्रत्यवायाभावावगमेनानापदिप्रत्यवायस्यैवावगमात् प्रतिषेधप्रतिप्रसवयोः समानविषयत्वौचित्यात्। अतएवानापदि तत्र द्रव्यपरित्यागपूर्वकं जपतपोरूपं प्रायश्चित्तमेव विदधाति। न चौर्यादिवद्राजदण्डमपि किञ्चिद्वचनमसत्प्रतिग्रहादौ। तेनासत्प्रतिग्रहादेः पूर्वपक्षसिद्धान्तयोर्द्वयोरपि तेषां स्वत्वोत्पादकत्वाविशेषात्तदर्जितस्य पुत्रादिविभाज्यत्वमपि तुल्यमिति नेतत्प्रयोजनं विचारस्यास्य युक्तमिति'। अत्र वदामः। शास्त्रैकसमधिगम्यस्वत्ववादिनो मते यथा चौर्यादिनिषेधस्य स्वत्वानुत्पादकत्वदण्डप्रयोजनं विचारस्यास्य युक्तमिति अत्र कर्तुः प्रायश्चित्तार्हतामयोजकत्वपरता। तथाऽसत्प्रतिग्रहादिनिषेधस्यास्य यथा चापदुपाधिना "तथैव सप्तमे भक्ते भक्तानि षड्नश्नता। अश्वस्तनविधानेन भोक्तव्यं क्षीणकर्मणः। आख्यातव्यञ्च तत्तस्मै पृच्छते यदि वृच्छतीत्यादि" प्रतिप्रसवबलाद्यौर्यं तच्चिकित्साभावस्तथाऽसत्प्रतिग्रहादेरप्यस्तु। अन्यथोभयत्रापि ततः पञ्चमहायज्ञाद्यनिष्पत्तिप्रसङ्गः। शास्त्रीयत्वे स्वत्वस्याप्रसक्तचौर्योपायकत्वनिषेधः कथमिति चेत्। अधिगमान्तर्भावेन कथञ्चित्तत्प्रसक्तेरेनोवश्यवक्तव्यत्वात् अपरथा प्रतिषेधानुपपत्तेः। शास्त्रापाप्तप्रतिषेधे च विकल्पापत्तिभिया "दीक्षितो न जुहोतीत्यादिवद्वाक्यकारभेदेन पर्युदासत्वं सामान्यविशेषभावेन विशेषनिषेधसामान्यविध्योर्बाध्यबाधकभावोऽपि वा मतान्तरेणेत्यपि स्वीकार्य्यमेवागत्या। प्रतिग्रहादेस्तु प्रसक्तशास्त्रापादेरभावेत्यापत्तदभावोपाधिकौ प्रतिप्रसवप्रति-

षेधावश्युपपद्यतरौ । तर्ह्यसत्प्रतिपद्यक्षत्रियंकृतवाग्दत्ताद्यादावनापदि ब्राह्मणस्य राजदण्डोऽपि स्यादिति चेन्न इष्टापत्तेः । न हि स्वधर्मत्यागिनो राजदण्डाभावः कस्यापि सम्मतः । स च क्वचित् सामान्यरूपेणोक्त एव स्मर्यते क्वचिद्विशेषादाम्नात इत्यन्यदेतत् । अतएवालौकिकस्वत्ववादिन इदमप्यपरदूषणम् । चौर्यादिनिषेधस्य स्तेयप्रयोजकतागौरवम् । पर्युदासत्वादिस्वीकारगौरवञ्च लौकिकस्वत्ववादिनस्तु दण्डप्रत्यवायमात्रपरत्वम् । तेषां स्वत्वानुपायत्वस्य लोकसिद्धत्वादिति रागप्राप्तिपूर्वके पर्युदासादिस्वीकारानापत्तिरेवेति लाघवमिति । तस्माच्छास्त्रैकसमधिगम्ये स्वत्वेऽसत्प्रतिपद्यादेस्तदनुपायत्वासदर्जिते पितुः स्वत्वाभावः स्यादेवेति चौर्यार्जितपितृधनादिविभागवदसत्प्रतिपद्यार्जितस्याप्यविभाज्यत्वम् । लौकिके तु तस्मिन् लोके तेषामपि तदुपायत्वात् सिद्धं तद्विभाज्यमिति मिताक्षरोक्तं साध्येव प्रयोजनम् । इदञ्चोपलक्षणम् । पूर्वपक्षे चौर्यार्जितपितृधनस्वीकारे यथा पुत्रादीनामपि दण्डप्रायश्चित्तं भवत्येव तथाऽसत्प्रतिपद्यार्जिततदृव्यग्रहणेऽपीत्यपि प्रयोजनमवसेयम् वर्जयितुरेव प्रायश्चित्तमित्यभिधानेनोचितत्वात् । इदन्त्विह विचार्यम् । स्वत्वस्य लौकिकत्वे चौर्यस्य लोके तदनुपायत्वे सिद्धे षड्भक्तानशनाद्यापदि यच्चौर्यमनुमतन्नेन चोरिते स्वत्वमुत्पद्यते न वा । नाद्यः लोकेऽनुपायत्वेनावधारितत्वात्तदुत्पत्तेरभ्युपगन्तुमशक्यत्वात् । न हि प्रत्यक्षविरुद्धं शास्त्रमङ्गेऽपि जलादेर्दधिजनकत्वादि बोध्यते । न द्वितीयः अस्वेन पञ्चमहायज्ञाद्यप्रधानानिष्पत्तेः । नच श्रुतप्रतिघातमात्रमेव तेन क्रियतां नान्यदलौकिकमिति वाच्यम् । शिष्टाचारविरोधात् न हि "शिष्टाः पञ्चमहायज्ञाद्यकृत्वा तदुपयुञ्जते "यदृचः पुरुषो लोके तदन्नास्तस्य देवताः" इति स्मरणाच्च । अतएव विश्वामित्रः श्वजाघनीं श्वपचगृहात् क्षुत्वेन्द्रादिदेवोद्देशेन त्यक्त्वा भोक्ष्यामीति मनसिकृत्य यदा यथादैवतमङ्गमांसमयक्षुं प्रवृत्तस्तदा तुष्टैरिन्द्रादिभिर्दृष्टिः सृष्टा शस्त्रञ्च तत्क्षणमेव प्रभूतमभूदित्याख्यायिका पुराणेषु श्रूयते । शास्त्रैकसमधिगम्ये तु स्वत्वे यथाशास्त्रञ्चौर्यादेरपि स्वत्वोत्पादकत्वतदभावौ न विरुद्धौ । लौकिकस्वत्वतदुपायवादिनस्त्वभयतः पाशारज्जुरियमिति । अत्र प्रतिविदध्मः । यद्यपि चौर्यस्य स्वत्वोत्पादकत्वञ्च लोकसिद्धं तथाप्यनेनैव सप्तभक्तानशनकाले षड्भक्तानशिनो विधानाद् गम्यते । स्वत्वमात्रस्य हि शास्त्रीयत्वे विरुद्धत्वमतज्ज्ञानानां क्रयादिस्वत्वसाध्यव्यवहारानुपपत्तेः । अतश्चौर्यनिषेधोदण्डपापमात्रबोधक एव । चौर्यस्य स्वत्वोत्पादकत्वाप्रसक्तेर्न तदभावपरः । यथा ब्राह्मणस्य सर्वत्र प्रत्यक्षत्वेऽपि जात्युत्कर्षस्थले शास्त्रीयत्वमेव । पुरुषेच्छानियमस्य शास्त्रैकगम्यत्वात् । यथाऽऽचार्याः "एतावन्मात्रन्त्विङ्गमिकं प्रत्येतव्यम् नक्षत्रं पुरुषेच्छानियमोलोकप्रमाणगम्य इति" । तत्रापि तावत् पुरुषपरम्पराजन्यव्यक्तौ ब्राह्मणत्वमभिव्यञ्जयत इति व्यङ्ग्यव्यञ्जकभाव एव परं शास्त्रीय व्यञ्जके ज्ञानवतस्ताडशव्यक्तौ ब्राह्मणत्वं प्रत्यक्षमेव व्यक्तिप्रत्यक्षप्रसक्तजातिप्रत्यक्षसामग्रीसम्भारादित्यपि वदन्ति । इह तु चौर्यमात्रस्यैव स्वत्वानुत्पादकत्वपक्षात्ताडशस्य तस्य स्वत्वोत्पादकतैव शास्त्रेण बोध्यते । न च प्रत्यक्षविरोधः । नहि प्रत्यक्षविरुद्धं शास्त्रमङ्गेऽपि बोधयितुं शक्यमिति वाच्यम् नक्षत्रस्योत्पादकत्वमपि लोकात् । ताडशेन व्यवहाराभावादन्वयव्यतिरेकगम्या स्वत्वस्य चौर्योपायकता नावगम्यत इत्येतावत् । तथा च पुत्रेच्छादीनां लोकानवगतपुत्रादिजनकता यथा शास्त्रादवगम्यते तेषां दृष्टोपायान्तरजन्यतायामपि, तद्वदत्रापि । स्वर्गोऽवभीयादीनामलौकिकमात्ररूपाणां दृष्टोपायाभावोऽप्यधिक इत्यन्यदेतत् । प्रतिबन्धकप्रतिबद्धदाहादिजनकता यथोक्तेजकमन्त्राणामदर्शादि शास्त्रगम्या लोकप्रमाणगम्यत्वात् चोक्तेजकतायाश्च प्रतिबन्धकप्रतिबद्धकार्यजनकतातिरिक्ताया अनिर्वाच्यत्वात् । शक्तिनाशतदुत्पत्तिकल्पनायामतिगौरवात् । यत्तु जन्मना स्वत्वचिराकुर्वता जीमूतवाहनेन 'क्वचिज्जन्मनैवेति जन्मनिबन्धनत्वात्पितापुत्रस्य सम्बन्धस्य पितृमरणस्य च कारणत्वात्परम्परया प्रयोजनमिति' प्राचीनलिखनाभिप्रायमुक्त्वा कथमुत्पादनरूपेण पितृगतव्यापारेण पुत्रे स्वत्वोत्पत्तिरित्याशङ्क्योक्तं 'अन्यव्यापारेणाप्यस्य स्वत्वमविरुद्धं शास्त्रमूलकत्वादस्य । दृष्टञ्च लोकेऽपि दाने हि चेतनोद्देश्यकत्यागादेव दातव्यापारात् सम्प्रदानस्य द्रव्ये स्वामित्वम् । न च स्वीकारणात् स्वत्वं स्वीकर्तुरेव दातृत्वापत्तेः । परस्वत्वापत्तिफलेन हि दानरूपता तस्य फलं सम्प्रदानाधीनम् । यथा हि देवतोद्देशेन त्यागं कुर्वन्नपि यजमानो न होता किन्तु तस्यैव यागस्य

होमाभिधाननिमित्तभूतमन्त्रेषं कुर्वन्नृत्विगेव होतेत्युच्यते तद्वदत्रापि स्यात्। किञ्च। मनसा पात्रसंहिश्येत्यादिशास्त्रे स्वीकारात् प्रागेव दानपदं दृष्टम्। ननु यद्दृष्टं स्वीकारः स्वभूततद्भावे चिप्रयोगादस्वं स्वं कुर्वन् व्यापारः स्वीकारो भवति कथन्ततः प्रागेव स्वत्वम्। उच्यते। स्वत्वमपि स्वं सम्प्रदानव्यापारेण ममेदमिति ज्ञानेन यथेष्टव्यवहारार्हं क्रियते इति स्वीकारशब्दार्थः याजनाध्यापनसाहचर्याच्च प्रतिपद्यस्व स्वत्वमर्जनमयतोऽर्थार्जनरूपता न विरुद्धा याजनादौ दक्षिणादानादेव स्वत्वात्। पितृनिधनकालीनक्षीवनमेव वा पुत्रस्यार्जनमभविष्यति। किञ्च। भ्रात्रादिधने तन्मरणात्तन्मरणकालीनजीवनाद्वा भ्रात्रन्तरादेः स्वत्वमकामेनापि वाच्यन्नहदिदंमस्त्विति'। तदेतदुत्तानमतिविलसितम्। तथा हि शास्त्रमूलत्वादस्येति तावत् स्वत्वस्य लौकिकत्वसाधनादेव निराकृतम्। यदपि दृष्टस्य लोकेऽपीत्यादि तदप्यापातसुन्दरम्। न हि प्रतिपद्यीतार्थं स्वीकुर्वन्नपि तस्य स्वत्वमुत्पद्यते। पात्रविशेषोद्देशेन त्यागे तेनास्वीकृतेऽपि ततस्वत्वोत्पत्तौ परस्य तस्य प्रतिपादनासम्भवप्रसङ्गात्। यदपि स्वीकर्तुरेव दातृत्वापत्तेरिति तदप्ययुक्तम्। परस्वत्वापत्तिफलकव्यापारस्य दानत्वात्सम्प्रदानस्वीकारानुकूलतामात्रस्य दानपदार्थत्वात्तत्फलोपहितता तु तस्य सम्प्रदानस्वीकारमन्तरेण न सम्भवतीति सम्प्रदानव्यापारसहचरः। न तु सएव दानशब्दार्थः। यदपि यथा स्रीत्यादि तदपि न यजमानकर्तृकाग्निहोत्रहोमादौ तदविरोधात्। यत्रापि दर्शपूर्णमासादौ त्यागमात्रं यजमानेन क्रियते। ऋत्विक्तस्य प्रक्षेपोऽध्वर्यादिभिस्तत्रापि विविक्तकर्तृकत्वाद्यथास्वमद्रव्यव्यवहारविरोधात्। स्वत्वन्तस्य प्रक्षेपपरहोमशब्दवाच्यता नास्ति। न तु त्यागः सकर्तृकोऽन्यकर्तृको वाऽवच्छेदकोऽस्तु न तावता कश्चिद्दोषः। अतएव यागस्य न प्रक्षेपामेध्य आज्यलाभो होमस्य तु तदमेध्यएव। दानस्य तु प्रतिपद्यीदव्यापारसामेध्यतैव तदभावे दानपदार्थानिष्पत्तेः। यच्च किञ्चेत्यादि। तदपि यत्किञ्चित् यत्किञ्चेत्यर्थं तत्र विधानात् न तु दानस्य। अतएव दाता तत् फलमाप्नोतीत्युक्तमन्यथा तस्यानुवादत्वापत्तेः। दानत्वे हि तस्य तत्फलभावाप्रसक्तेस्तु तत् फलमाप्नोतीति व्यर्थमेव स्यात्। अतस्तत्र जलप्रक्षेपरूपः पात्रोद्देश्यक यत्किञ्चेत्यर्थ एव दक्षिणा विवक्षितोदानत्वनिष्पत्तिस्तु तस्य सम्प्रदानकर्तृकस्वीकारे सत्येवेति परमार्थः। अतएवोत्सृजे इत्येव तत्र सङ्कल्पवाक्यं शिष्टानामत्र दास्ये इति सम्प्रदद इति वा। अतः प्रतिपद्यादेव दानस्य फलेऽपि सम्प्रदानस्य स्वत्वमिति प्रतिपद्यस्वार्जनरूपत्वमविरुद्धम्। स्वत्वजनकोहि व्यापारोऽर्जनशब्दार्थः। अतएवाह प्रभाकरः 'प्रक्षिपतमिदं केनापि अर्जनं स्वत्वं नापादयतीति विप्रतिषिद्धमिति'। यस्य मन्त्रः प्रागेव विहृतः। किञ्च। प्रतिपद्यस्व ममेदमिति ज्ञानरूपस्य दातृव्यापारमात्रोत्पन्नस्वत्वव्यवहारार्थतामात्रसम्पादकतायामर्जनशब्दस्य तत्र गौणता स्यात्। अन्यथा तत्प्रतिपादनानुपपत्तिश्च पूर्वसङ्गा। तदस्वीकारे प्रागुत्पन्नतत्स्वत्वनाशश्च कल्प्यः स्यात्। न च दातृव्यापारात्तत्स्वत्वनाशाद्याधारण सम्प्रदानस्वत्वोत्पत्तिरवश्याभ्युपेया त्वयापि। अपरञ्चैतत्स्वत्वनाशेऽन्यस्य च स्वत्वानुत्पत्तौ मध्यस्थस्य तस्य परिपद्यादिनाऽन्यस्य यस्य कस्यापि वनगतास्वामिकतृणकाष्ठादाविव तत्र स्वं स्यात्परिपालनाप्रसक्तिश्च। तथा मन्मतेऽपि पात्रविशेषोद्देश्यकत्यागे पात्रविशेषस्योत्पन्नमपि स्वत्वमदस्वीकारे नश्यत्यन्यस्य स्वीकारात्तस्योत्पद्यत इति न कोऽपि विरोधः साधारणस्वत्वविनाशसाधारणस्वत्वोत्पत्तिरिति वाच्यम्। यतस्तत्र साधारण स्वत्वव्यवहाराभावेन तदुत्पत्तिरप्रमाणिकी नैव स्वीक्रियते गौरवाच्च। किन्तु दातुरेव यथेष्टविनियोगार्हस्वत्वापगमेऽपि परस्वत्वापत्तिफलाभावे दानशब्दार्थानिष्पत्तेर्विधिशिरस्कफलार्थिनः प्रतिपादनावधिपरिपालनीयत्वरूपं स्वत्वमस्त्येव। यथा श्रुते हविषि भक्षसाङ्गावावधि यस्य यद्ग्रहणादिनिषेधाश्रयणनिमित्तदोषस्तद्व्यवधानानुरोधेन, तथा चान्यस्वत्वानुत्पत्तावपि न मध्यस्थपरिपद्यादिनिवारणादिदोषः। शिष्टाचारोऽप्युभयत्र परिपालनरूपस्तन्मूलकएव। न चोत्सर्गसाम्यस्य तत्र त्वया वक्ष्याभ्युपगमात्परस्वत्वापादनादरएव न स्यादिति वाच्यम्। तादृशोत्सर्गस्यैव विधिनात्यर्थविषयत्वात्। होमस्यैवेऽन्यथा भक्षसाङ्गावानादरापत्तेः। यच्च याजनाध्यापनसाहचर्यात् प्रतिपद्यस्यापि स्वत्वार्जनकत्वेऽपि गौणमेवार्जनत्वमिति। तदप्यबोधात्। तत्र हि ये ये द्विजप्रभृतीनाम्नागास्तेभ्यस्तेभ्यो ऋतिरूपेणैव दक्षिणाकाले प्रतिपादनम्। परिक्रयव्यवहारोऽप्यतएव "स्वामिकर्म परिक्रयः" इति जैमिनिसूत्रादौ विस्तरेण

निर्णीतएव विस्तरस्तु तत्रैव द्रष्टव्यः । कर्मकरानतिजनिका श्रुतिरेव हि परिक्रयः । एवमध्यापनेऽपि शिष्योऽध्यापकाद्याध्यापनश्रुतिमेव ततस्तन्नीयजननोमध्ययनान्तेऽर्थयन्ति । नियतश्रुतिकरणे तु श्रुतकाध्यापनसुपपातकम् । अतएव याजनाध्यापनयोः प्रतिषिद्धाङ्गनिषद्वाच्यनिर्वेशाच्च पृथगभिधानसुभयमिश्रितत्वात् । तेन तयोरपि सख्यमेवार्जनत्वम् । दक्षिणात्वव्यवहारोऽप्यतएव श्रुत्यध्यापकदेये । यदपि भ्रात्रादिधने भ्रात्रनरादि स्वत्वोत्पादकत्वन्निबन्धनस्य तत्कालीनभ्रात्रनरादिजीवनस्य वा ऋणमिति पुत्रादावपि पित्रादिनिधनन्तत्कालीनञ्जीवनं वा स्वत्वोत्पादकमस्तु तत्रऋणं पुत्रादिजन्मनैवेत्युक्तम् । तदपि जन्मनोऽपि स्वत्वोत्पादकत्वस्यावश्यकत्वोपपादनादेव परिहृतम् । यच्चोक्तं ऊर्ध्वमित्यत्रेत्यादि मनुवचनमपि जन्मनः स्वत्वापादकत्वे न घटते प्राग्विभागनिषेधार्थत्वे तस्यास्वार्थपरत्वापत्तेः विभागस्य दृष्टार्थत्वेन तद्विधानकालविधानयोरसम्भवात् । विभागस्य पञ्चप्राप्तस्य नियमार्थत्वे सहवासविधिविरोधाद्यापत्तेः । तस्मात्पितरि सति मातरि च सत्यान्तनस्वाभ्यभाव उपरतयोरेव तयोः पुत्रादेस्तनस्वाभ्यमिति प्रतिपादनार्थमेव तद्वाच्यमिति । तदयुक्तमभिधानम् अस्वार्थविधानापत्तेस्तुल्यत्वात् । प्रागस्वातन्त्र्येण कालविधिपरत्वेबाधकाभावात् । इच्छाप्राप्तकालानुवादेऽपि व्यवहारारूढत्वेनाविरोधात् । एतेन जातेष्टिवच्छेषविरोधादि निमित्तानन्तर्यबाधकाभावात्पित्रुपरमानन्तरक्षणएव विभागः प्रसज्येतेत्यपास्तम् । कालविधानेन पित्रुपरमस्य निमित्तत्वाबोधनाच्च । अन्यथा निमित्ते सति नैमित्तिकस्यावश्यकत्वात्पित्रोरूर्ध्वं विभागाकरणे प्रत्यवायोऽपि प्रसज्येत । पतितत्वपारिक्षाज्ययोः पितृस्वत्वनाशोऽप्यधिकः जन्मना स्वत्वन्तुल्यमेव । पातित्ये तु प्रायश्चित्तानाचरण एव स्वत्वनाशो विभागानर्हता च । अन्यथा द्रव्यसाध्यं प्रायश्चित्तमपि पित्रोः स्वद्रव्येण न स्यात् । अतएव मातुर्निवृत्ते रजसोत्पाद्यपि कालविधिपरमेव । न तु पातित्यादिवत्तत्र स्वत्वाभावः । स तु लोकत एव विभागनिषेधाच्च भ्रात्रादाविवेत्यादि वक्ष्यते । किञ्च । तदेवं पितृस्वत्वापगमएकः कालः अपरश्चापगत एव पितरिक्षवेति कालद्वयमित्युक्त्वा मध्ये मिताक्षरोक्तं विभागकालत्रयं दूषयित्वा तस्मात्पतितत्वनिवृत्तेरपरैः पितृस्वत्वापगम एकः कालः अपरश्च सति स्वत्वे तदिच्छात इति कालद्वयमेव युक्तमित्युपसंहरता जीमूतवाहनेनैव पितृस्वत्वानपगमेऽपि पुत्राणां विभागो स्वीकृतस्तत्र पुत्राणामित्यधने स्वत्वोत्पादः कथम् । कथञ्च जीवतोः पित्रोरस्वाम्यप्रतिपादकवचनैः सह न विरोधः । अस्वस्य विभागासम्भवात्कथन्तेषां विभागः । पितृस्वत्वापगमएवोर्ध्वं पितृवेत्यनेन विवक्षितोऽतएव मृतपदमपरित्यज्योर्ध्वमित्युक्तम् । पितृस्वत्वापगमोर्ध्वमित्यर्थः पितृस्वत्वापगमश्च तन्निधनादिवत्तस्य पतितत्वनिवृत्त्याभ्यामपीत्यादि स्वपन्थे पूर्वापरविरोधश्च न कथम् । अत्राप्युपरतस्यृक्थादिना पुत्राणां स्वमित्यधने भवतीति ज्ञापनादयमेकःकाल इति युक्तम् तत्राप्युपरतस्यृक्थादिनेत्यनेन पितृस्वत्वापगमएव यदि विवक्षितस्तर्ह्यनपगते पितृस्वत्वे तदिच्छाऽपरः काल इत्यभिधानं विरुद्धम् । पितृस्वत्वापगमकालीनपुत्रादिजीवनस्वैवार्जनस्य तदीयस्य स्वीकारात्पितृस्वत्वे सति पुत्राणामित्यधने स्वत्वस्वीकारः कथम् । तस्मान्मातृस्वामिकमातृरजोनिवृत्तिभावेन पितुः स्वत्वापगमे पूर्वद्रव्यस्वामिसम्बन्धाधीनन्तत्स्वाम्योपरमे यत्र द्रव्ये स्वत्वन्तत्र निरूढोदायशब्द इति स्वोक्तदायशब्दार्थाभावात्पितृस्वत्वानपगमे यत्र विभाग स्तत्र दायशब्दप्रयोगोऽपि दुरन्त इत्यादि वक्तुं व्याकुलीस्यात् । जन्मना स्वत्वस्वीकारे तु सर्वमनाकुलमित्यादिसुधीभिरूह्यम् । अतएव मिताक्षरादौ पूर्वस्वामिसम्बन्धाधीनं स्वत्वमस्य यत्र धने तदेव दायशब्दवाच्यमित्युक्तम् तु पूर्वस्वाम्योपरमेऽपि तत्र प्रवेशितः । तस्मिद्विविधो दाय इति" ।

यच्च जीमूतवाहनेनैव मिताक्षरोक्तम् विभागोनाम द्रव्यसमुदायविषयाणामनेकस्वाम्यानान्तदेकदेशेषु व्यवस्थापनमिति विभागशब्दार्थः । न च सम्बन्धाविशेषात् सर्वेषां सर्वधनोत्पन्नस्य स्वत्वस्य द्रव्यविशेषे व्यवस्थापनं विभाग इति वाच्यमित्याशङ्क्य सम्बन्धान्तरसद्भावप्रतिपत्तस्य सम्बन्धस्यावयवेष्वेव विभागव्यङ्ग्यस्वत्वापादकत्वात् । अतस्तत्पितृधनगतस्वत्वोत्पादविनाशकल्पनागौरवात् । यत्तेष्टनियोगफलाभावेनानुपयोगाच्चेति दूषयित्वा उच्यते । "एकदेशोपात्तस्यैव भूरिरणादावुत्पन्नस्य स्वत्वस्य विनिगमनाप्रमाणाभावेन वैशेषिकव्यवहारानर्हतया अव्यवस्थितस्य गुटिकाघातादिना व्यञ्जनं विभागः । विशेषेण भजनं स्वत्वज्ञापनं वा विभाग इति व्युत्पत्त्येत्युक्तम् । तद्दायतत्त्वकृतोपन्यस्य

दूषितम् "यत्तास्य स्वत्वत्वमेव गुटिकापातात् इति कथं वचनाभावाच्चिन्तव्यम्। यत्र हि पितृनिबन्धनानन्तरम्-दोयाश्चयोरेकमादाय भ्राता यदर्जितन्तत्तार्जकस्य द्वौ भागावपरस्यैकः सर्वसम्मतः। तत्र यदि प्राचीनधनविभागकाले गुटिकापातादर्जकेन स एवायः पश्चात्तस्यादाप्रादेशिकस्वत्ववादिमते प्रागर्जकस्यैव सोऽयं इति तेनार्जितधने कथं भ्रातृन्तरस्य विभागः। तत्रैवास्वत्वेन तदुत्पन्ने सुतरां स्वत्वाभावादस्य चाविभाज्यत्वात्। यदि चार्जकेतरेण सोऽयीकृतस्तदा तेनार्जितधनस्य समभाग एव युक्तः। एकस्य स्वायासेनापरस्यास्वायासेनार्जकत्वादिति। वस्तुतस्तु सम्बन्धाविशेषात् सर्वसम्बन्धिनां सर्वधनोत्पन्नस्य तस्य गुटिकापातादिना प्रादेशिकव्यवस्थापनं विभागः। कृत्स्नधनगतस्वत्वोत्पादविनाशावप्यगत्या कल्प्येते। संसृष्टतायां प्रादेशिकस्वत्वोत्पादकृत्स्नधनस्वत्वोत्पादविनाशाविव। तच्च "विभक्तो यः पुनः पित्रा भ्राता वैकत्र संस्थितः। पितृव्येणाथ वा प्रीत्या स तु संसृष्ट उच्यते" इतिवृद्धस्मृतिवचने येषामेव हि पितृभ्रातृपितृव्यादीनां पितृपितामहोपार्जितद्रव्येष्वविभक्तं स्वत्वमुत्पत्तितः सम्भवति। तएव विभक्ताः सन्तः पुनः परस्परप्रीत्या पूर्वकृतविभागाः एव यत्तद्धनं तन्मात्रेऽपि यन्मम धनमत्तयापीत्येकस्मिन् कार्ये एकरूपतया स्थितास्ते संसृष्टाः तत्तनैवंरूपाभ्यवसंसर्गमात्रेण सम्भूयकारिणां वणिजामपि संसर्गित्वम्। नापि विभक्तानां द्रव्यसंसर्गमात्रेण। प्रीतिपूर्वकताद्गभिसन्धिं विनेत्यभिदधता दायभागकृतापि स्वरूपलक्षितम्। साधारणस्वत्वादेव हि "बन्धूनामविभक्तानामप्योगत्तैव प्रदापयेत्" इति कात्यायनवचनं यथाश्रुतमेव सङ्गच्छते। यावद्वृत्तधनमात्रे स्वस्वत्वस्यापि सत्त्वात्। अतएवात्र धने परस्परस्य चौर्यमपि नास्ति। एवञ्च।

"साधित्वस्मातिभाव्यञ्च दानं यच्चणमेव च। विभक्ताभ्रातरः कुर्युर्नाविभक्ताः परस्परम्" इति नारदवचने परस्परनिरूपितदानादिनिषेधोऽपि न्यायमूलक एव। दानादेःपूर्वमपि देवादौ प्रतिग्रहीत्रादेः स्वत्वसत्त्वाद्दानप्रतिग्रहादेरसम्भवात्। अविभक्तत्वादेव चाविभक्तद्रव्येष्व यत्कृतं दृष्टादृष्टार्थं कर्म तत्र सर्वेषां फलभागित्वम्। तथा च नारदः "भ्रातृणामविभक्तानामेको धर्मः प्रवर्त्तते। विभागे सति धर्मोऽपि भवेत्तेषां पृथक् पृथक्"। व्यासोऽपि "स्थावरस्य समस्तस्य गोत्रसाधारणस्य च। नैकः कुर्यात्क्रयन्दानं परस्वरमतं विना"। अत्र समस्तस्येति विशेषणोपादानात् कृत्स्नधनगतमेव प्रत्येकं स्वत्वं स्वीक्रियते। तस्मात्तुल्यधनसम्बन्धान्तरसत्त्वेन सम्बन्धिसकाशात् संक्रान्तत्वेन यत्तव ममापीति सम्बन्धिनां प्रतीयते तद्विषयौ दानादिकं प्रतिषिद्धं स्वार्थम्। अतो नैकदेशगतं स्वत्वमिति। इदञ्च द्रव्यसमुदायविषयाणामनेकस्वाम्यानामेकदेशे व्यवस्थापनं विभाग इति वदतो मिताक्षराकृतोऽप्यभिमतमिति लक्ष्यते। इदन्त्विह विचार्यम्। द्रव्यसमुदायनिरूपितं स्वामिगतं स्वास्यम् स्वामिनिरूपितञ्च द्रव्यसमुदाये स्वत्वं व्यासज्यवृत्ति प्रत्येकवृत्ति वा। नाद्यः एकैकस्वामित्वस्वत्वाश्रयनाशे तन्नाशस्यावशिष्टसमुदायगतत्वत्तश्च कल्पनायामतिगौरवापत्तेः प्रत्येकस्य प्रत्येकद्रव्ये दानक्रयादियथेष्टविनियोगानर्हत्वापत्तौ व्यवहारविसंवादापत्तेश्च। न द्वितीयः विभागे सति तावतावयवोत्पादकल्पनापत्तेः। स्वस्य ततोविभागो न तु विभागात् स्वत्वमिति यन्त्वविरोधाच्च। अत्र ब्रूमः। प्रत्येकवृत्तीनि सम्बन्धाविशेषात् स्वास्यानि च सन्त्येव। परस्परविभागागते परस्परस्वान्यान्यदीयद्रव्ये तानि नश्यन्ति परमते मरणपारिप्लवादिनेवेति न काप्यनुपपत्तिः। व्यवस्थापनमपीदमेव अन्यदेकदेश उत्पादनमित्येव वदेत्। अतएव विनाशमात्रकल्पना न तु स्वत्वान्तरोत्पादकल्पना। जीमूतवाहनमते च कृत्स्नं वास्तवं मम स्वत्वमिति विभागात् प्रागनिरूपणात्तदधीनस्मृतेस्तत्तौकिककर्मोच्छेदः। अनुमत्या विभागोत्तरकृतया परस्परद्रव्ये परस्परस्वत्वान्तरोत्पत्तिस्वीकारे तदुत्पादविनाशकल्पनागौरवं यत्त्वया मिताक्षरामतं प्रत्यापादितं ततोऽपि तवाधिकमापन्नम्। व्यवहारानुपयोगेन समुदायस्वत्वस्य निष्प्रयोजनता च योपन्यस्ता साध्येकदेशगतस्वत्वाभ्युपगमे तुल्येवेति कृतमतिदूरंगत्वा। अनयोश्च मतयोर्युक्तायुक्तत्वं सुधीभिर्भाव्यम्

"देशानां जातिसंघस्य धर्मो यामस्य यो भवेत्। उदितः स्यात् स तेनैव दायभागं प्रकल्पयेत्" भृगुवचनम् भृगुराहेति शेषः। दायस्य भागः प्रतिपाद्यतयाऽस्त्यस्य अच्। २जीमूतवाहनादिकृते दायस्य विभागव्यापके ग्रन्थे ६०। दायभागव्याख्यानञ्च उत्तराधिकारिशब्दे १०८८ पृ० उक्तम्।

दायाद पु० दायं विभजनीयधनमादत्ते या+दा-क । दायमस्ति अद्-अण् उपपदसमासो वा । १सपिण्डे २सुते च अमरः । "न तं भजेरन् दायादाः" मनुः । "भक्षीतामरणात् क्लान्ता दायादा ऊर्द्धमाशुवः" काल्या० । २दायाधिकारिणि त्रि० "तेषां षट् बन्धुदायादाः" मनुः स्त्रियां टाप् "पुमान् दायादोऽदायादा स्त्री" निरु० कप्रत्यान्तस्यैवेदं रूपम् सुखबोधभते यक्षन्तात् ङीप् स्यात् दायादीति भेदः । सा च ४कन्यायाम् शब्दार्थकल्प० । पुत्रे "त्वया दायादवानस्मि त्वं मे वंशकरः सुतः" भा०आ० ७५ अ० ।

दायाद्य न०दायादस्य भावः ब्राह्मणा० यञ् । १सपिण्डेऽ दायरूपमाद्यम् । २सपिण्डनिबन्धने धने च "दायाद्यस्य प्रदानञ्च" मनुः "स एव पारुषोदायाद्यं यदि प्राप्नोति पारुषः" भा०आ० १४१ अ० । "स्त्रीणां स्वपतिदायाद्यसुपभोगफलं स्मृतम्" भा०अनु०४७अ०

दायित त्रि० दायं दानं करोति दायि-कर्मणि-क्त । कृतदाने दायिते भरतः एतन्मूलं मूल्यम् ।

दार पु० ब०व० । दारयति भ्रातृन् दृ-णिच् दारि-कर्त्तरि अच् । भार्य्यायां "दारांश्च कुरु धर्मेण या निषण्णोः पितामहान्" भा०आ० १०३अ० "दाराणां सुरवैरिणो रतिपतेर्मातस्त्रिलोकजितः" धनञ्जयवि० । "पाणिग्रहणिका मन्त्रा नियतं दारलक्षणम्" मनुः । "सदृशानाहरेत् दारान्" यमः । करणे घञ् । २औषधभेदे । भावे घञ् । ३विदारणे पु० ।

दारक त्रि०दृ-ण्वुल् । १विदारके २बालके "चाणक्यादारकेष्वानुगम्यमानम्" कादं० "एकैव त्वमिहानेक तिष्ठन्त्यैव दारकाः । तच्छ्रुत्वा वचनं तस्यास्तमेवाधाय दारकान्" भा०आ० १२६ अ० । "सदृशरांश्च महाघोरान् समरे शत्रुदारकान्" भा०द्रो० १५६अ० २सुते "कुमारो भर्तृदारकः" अमरः । ४कन्यायां स्त्री "सन्तानसन्निविष्टेयः दारिकादानपूर्वकः" कामन्दकी० "पूतनां दैत्यदारिकाम्" हरिवं०४२अ०१श्यामशूकरे पुंस्त्री राजनि० । तस्य भूमिविदारकत्वात् तथात्वम् ।

दारकर्म्मन् न०दाराणां तद्भावस्य प्रतिपादकं कर्म । भार्य्यात्व सम्पादके ज्ञानविशेषरूपे विवाहे त्रिका० "सा प्रशस्ता द्विजातीनां दारकर्मणि मैथुने" । "सवर्णायां द्विजातीनां प्रशस्ता दारकर्मणि" मनुः । दारक्रियाऽप्यत्र स्त्री "पुनर्दारक्रियां कुर्यात् पुनराधानमेव च" मनुः "दारक्रिया योग्यदशञ्च पुत्रम्" रघुः । "स्त्रीवे दारक्रिया बाढक्" भा० स० ३६अ० ।

दारग्रहण न०दाराणां दारत्वस्य सम्पादकं यद्गृह्यं ज्ञानम् । दारत्वसम्पादके ज्ञानरूपे विवाहे "तेन भार्य्यात्वसम्पादकं यद्गृह्यं विवाहः । तस्य स्वीकाररूपज्ञानविशेषस्य समवायिविषयतयोर्भेदात् वरकन्ययोर्विवाहकर्तृत्व कर्मत्वे अतएव "कन्यापुत्रविवाहेष्विति" विष्णुपुराणोक्तं संगच्छते । भार्य्यात्वस्य स्वरूपसद्विशेषत्वेन नेतरेतराश्रयदोष इति" उद्वा० रघु० । "तद्दारग्रहणे यत्नं सन्तत्यां च मनः कुरु" भा० आ० १३अ० । दारपरिग्रहादयोऽप्यत्र "अतःपरं समाहृतः कुर्य्याद्दारपरिग्रहम्" मनुः

दारण न०दारयति जलमनेन दृ-णिच् ल्युट् । १कतकफले शब्दर० । तस्य जलकालुष्यदारणात्तथात्वम् २दारकमात्रे त्रि० "समाधत्त शितं वाणं गिरीणामपि दारणम्" भा० क०४६अ०करणे ल्युट् । ३विदारणसाधने अस्त्रादौ त्रि० स्त्रियां ङीप् । "नमस्ते शुम्भहननीं निशुम्भस्य हृदि दारणीम्" हरिव०१६६अ० भावे ल्युट् । ४विदारणे भेदने "दारुदारणपर्व्वैः समाहृतम्" "तद्दारुदारणपर्व्वेषु चतुर्षु किं स्यात्" लीला० । ५धीकरणे व्रणादिस्फोटनसाधने ६औषधभेदे तच्च सुश्रुतेनोक्तं यथा

"चिरविल्वोऽग्निको दन्ती चित्रको हयमारकः । कपोतवङ्गवृक्षाणां पुरीषाणि च दारणम् । चारट्टव्याधिवा यानि चारो वा दारणं परम्"

दार्द न०दर्दरि देशभेदे भवः स्निग्ध्वा०अण् । १विषभेदे अमरः २पारदे ३स्फिङ्गुले च मेदि० । दर्दरो देशस्य सन्निवेशः अण् । ४समुद्रे त्रिका० ।

दारबलिभुज् पु०दारेण चञ्चुपुटेन विदारणेन बलिं भुङ्क्ते भुज-क्विप् । वकपक्षिणि त्रिका० ।

दारव त्रि० दारुणः विकारः रजता० अञ् । दारुविकारे काष्ठमये पदार्थे "दारवाणां च तत्त्वज्ञम्" मनुः । "अभीष्टं पृथिवीगोलं कारयित्वा तु दारवम्" सू०सि० ।

दारि त्रि०दृ-णिच्-इन् । १दारके स्त्रियां वा ङीप् ।

दारिका स्त्री दारक+टाप् कापि अत इत्त्वम् । कन्यायाम् जटाध० दारकशब्दे उदा० ।

दारिद्र्य न० दरिद्रस्य भावः ष्यञ् । दरिद्रतायां दुर्गतौ धनादिराहित्ये "प्रणीय दारिद्र्यदरिद्रतां नृपः" नैष० दारिद्र्यवर्णनं सुभाषितावल्यां यथा

"सुखं हि दुःखान्यनुभूय शोभते घनान्धकारेष्विव दीप

दर्शनम्। सुखात्तु यो याति नरो दरिद्रतां मृतः शरीरेण मृतः स जीवति। दारिद्र्यमनन्तकं दुःखम्। वयस्य! न ममार्थान् प्रति दैन्यम्। पश्य "एतत्तु मां दहति यदुत्कृष्टमखण्डितं शीलार्जवमित्यतिशयः परिवर्जयन्ति। संशुष्कसान्द्रसदृक्षमिव भ्रमन्तः कालाब्धये मधुकराः करिणः कपोलम्"। सत्यं न मे विभवनाशकृतास्ति चिन्ता, भाग्यक्रमेण हि धनानि भवन्ति यान्ति। एतत्तु मां दहति नष्टधनाश्रयस्य यत् सौहृदादपि जनाः शिथिलीभवन्ति। दारिद्र्याद्धि बभेति धीपरिगतः प्रभ्रश्यते तेजसो, निस्तेजाः परिभूयते, परिभवार्त्तिर्वैदमापद्यते। निर्विद्यः शुचमेति, शोकपिहितो बुद्धा परित्यज्यते, निर्बुद्धिः क्षयमेत्यहो निधनता सर्वापदामास्पदम्। दारिद्र्यं हि पुरुषस्य। निवासक्षिन्नायाः परपरिभवो वैरमपरं, जुगुप्सा मित्राणां स्वजनजनविद्वेषकरणम्। वनं गन्तुं बुद्धिर्भवति च कलत्रात् परिभवो, हृदिस्थः शोकाग्निर्न च दहति सन्तापयति च"। तत्रैव अन्यत्र स्थाने "दारिद्र्यात् पुरुषस्य बान्धवजनो वाक्यं न सन्तिष्ठते, सुस्निग्धा विमुखीभवन्ति सुहृदः स्फारीभवन्त्यापदः। सत्यं ह्रासमुपैति शीलमखिलः कान्तिः परिम्लायते, पापं कर्म च यत्परैरपि कृतं तत्तस्य सम्भाव्यते। सङ्गं नैव हि कश्चिदस्य कुरुते सम्भाव्यते नादरात् सम्भ्रान्तो मुहुरुन्नतेषु धनिनां सर्वत्रमालोक्यते। दूरादेव महाजनस्य विहरत्यल्पच्छदो व्रज्यया मन्ये निर्धनता प्रकामसुपरं षष्ठं महापातकम्। दारिद्र्य! शोचामि भवन्तमेवमखिलशरीरे सुहृदिलुप्तिं गत्वा। विपन्नदेहे मयि बन्दभाग्ये, अमेति चिन्ता क्व गमिष्यसि त्वम्"।

तत्सूचकयोगभेदा जातकपद्धतावुक्ता यथा "समस्तपापखेचरैर्युतेक्षितं धनाभिधम् दरिद्रताविधायकं विनेश्वरः कुजानुना"। "बुधगुरुकवयथेक्षितगा वित्तनाशं विदधति यदि इष्टाः सोमसौम्येन्दुपुत्रैः" "चोरः शशी सूर्येण विलोकितोऽर्कं पूर्वोक्तितार्थस्य विनाशदः स्यात्"। "नवीनवित्तागमरोधकोभवेत् रविर्धनेऽल्पस्थिमिते कुजोऽङ्के यद्वा शशाङ्के धननाशदः स्यात्"। नाभनयोगशब्दे वक्तव्यलक्षणन्यूनयुगगोलकयोगैर्दरिद्रताद्विः इष्टज्या॰उक्ता यथा "विधनत्व मूले" "धनविरहितः पापखेटो वा युगे त्रय गोलके विधनसंज्ञिते" इत्यादि "पुष्यवन्नार्कियोगे स्यान्मूर्खो धूर्तो धनोज्झितः"। "तपनारार्कपुत्राणां योगे निःस्वोऽति दुःखितः"। "त्रयतेर्वं व्रजातोऽपि क्षेमद्रुमभवो नरः। मलिनो दुःखितो नीचो निःस्वोदासः खलो भवेत्"। अस्य अपवादः "तस्माद्विधोर्वा दृष्टिस्थैः शुभैः सूर्यैः शुभं फलम्। द्वाभ्यां मध्यं तयैकेनाल्पं चेद्भवति दरिद्रता"। जातकपद्धतिः।

**दारित** त्रि॰ दृ-णिच्-क्त। विदारिते अमरः।

**दारी** स्त्री दारयति दृ-णिच्-इन्-ङीप्। क्षुद्ररोगभेदे। तल्लक्षणं सुश्रुते उक्तं यथा "परिक्रमणशीलस्य वायुरत्यर्थरूक्षयोः। पादयोः कुरुते दारीं सरुजां तां संचिताम्"।

**दारु** पु॰न॰ दीर्यते दृ-उण्। काष्ठे अमरः "प्रतिग्रहस्तप विद्वांसु भस्मीभवति दारुवत्"। "वानप्रस्थं मूलफलं दार्वग्न्यर्थं तथैव च" मनुः "शैक्यं कमण्डलुश्चैव छिदलं दारुमेव च" हरिवं॰ २०१अ०। १किंसले २देवदारुणि मेदि०। ३शिल्पिनि ४दारके त्रि॰ धरणिः। दा-दाने दो-खण्डने वा रु। ५दानशीले ६खण्डनशीले च त्रि॰।

**दारुक** न॰दारु+स्वार्थे क। १देवदारुणि राजनिः। दारु+संज्ञायां कन्। २कृष्णस्य सारथौ पु॰। "रथेऽतिरथो यत्ता दारुकः केशवस्य वै" हरिवं॰ ११६अ०। "रैवतस्तु गिरिं देवो गत्वा दारुकमब्रवीत्। मदीयं रथमेतं त्वं यदावेद्धैव दारुक!" ११२अ०। "उत्कन्धरं दारुक इत्युवाच" माघः तस्यापत्यं फिञ्। दारुकि तदपत्ये "शिनितो दारुकिस्तदा" भा॰व॰१८अ०

**दारुकच्छ** पु॰देशभेदे तत्र भवः कच्छादेशवाचित्वात् युञ्। दारुकच्छक तद्भवे त्रि॰। [२वनकदल्यां च राजनिः।

**दारुकदली** स्त्री दारु इव कठिना कदली। १काष्ठकदल्यां

**दारुका** स्त्री दारुणा कायति कै-क। दारुणः प्रतिकृतिर्वा इवार्थे क। काष्ठमयपुत्तलिकायाम् शब्दरत्ना॰

**दारुकावन** न॰वनभेदरूपे तीर्थभेदे शिवपु॰

**दारुकेश्वर** पु॰ शिवलिङ्गभेदे शिवपु॰। [भेदे राजनि॰।

**दारुगन्धा** स्त्री दारुणि गन्धो यस्याः। (चोड़ा) गन्धद्रव्य-

**दारुगर्भा** स्त्री दारु तन्मयो गर्भोऽस्याः। काष्ठकदल्यां हारा॰

**दारुचिनी** स्त्री खनामख्यातायां गुल्मत्वचि शब्दार्थचि॰।

**दारुचीर्णक** न॰ गुल्मत्वचि शब्दार्थचि॰।

**दारुज** त्रि॰ दारुणो जायते जन-ड। १काष्ठजाते २मर्दले वाद्यभेदे पु॰ शब्दर॰।

**दारुण** पु॰ दारयति भीषयते चित्तं दृ-भये णिच् "ऋतृदारिभ्य उनन्" उणा॰उनन्। १चित्तभये २भयानकरसे

अमरः । २तद्वति भयानके दुःसहे भीषणे ३भयहेतौ त्रि० "हृदयकुसुमशोषी दारुणो दीर्घशोकः" मा०द० । उज्ज्वल दत्तस्तु दृ-विदारे इत्यस्यैव णिजन्तस्य रूपमिदमित्याह । ५रौद्रसंज्ञकनक्षत्रगणे ज्यो० । "उपेन्द्र ! वज्रादपि दारुणोऽसि" गीत० "दारुणा कण्डुरा रूक्षा केशभूमिः प्रजायते" सुश्रुतः । "वाचा दारुणया क्षिपन्" मनुः । ६विदारके त्रि० । ततः भवार्थे अभूततद्भावेऽर्थे च्वि दारुणायते "वियोगिहृद्दारुणि दारुणायसे" नैष० ७विष्णौ पु० "सुधन्वाखण्डपरशुर्दारुणोद्रविणप्रदः" विष्णुस० । "सन्मार्गविरोधिनां दारुणत्वात् (खण्डकत्वात्) दारुणः" भा० ।

**दारुणक** पु० सुश्रुतोक्ते क्षुद्ररोगभेदे क्षुद्ररोगशब्दे २१८२पृ० दृश्यम् । "शिरां दारुणके विद्धा स्निग्धस्विन्नस्य मूर्द्धनि" सुश्रु० ।

**दारुणा** स्त्री "तृतीयाऽन्त्यसंज्ञा या दारुणा सा प्रकीर्तिता" इत्युक्ते १तिथिभेदे । २नर्मदाखण्डाधिष्ठातृदेवीभेदे च शब्दार्थचि० ।

**दारुतीर्थ** न० दारुवनभेदरूपे तीर्थभेदे शिवपु० ।

**दारुनिशा** स्त्री दारुप्रधाना निशा हरिद्रा । दारुहरिद्रायाम् रत्नमा० । [ हिङ्गुपत्र्याम् राजनि० ।

**दारुपत्री** स्त्री दारुवः देवदारुवः पत्रमिव पत्रमस्याः ङीप् ।

**दारुपात्र** न० दारुवः पात्रम् । काष्ठमये जलाधारादिपात्रे "अलाबुं दारुपात्रञ्च मृण्मयं वैदलं तथा । एतानि यतिपात्राणि मनुः स्वायम्भुवोऽब्रवीत्" मनुः ।

**दारुपीता** स्त्री दारुणा काष्ठेन पीता । दारुहरिद्रायां राजनि० । [ हारा० ।

**दारुपुत्रिका** स्त्री दारुमयी पुत्रिका । काष्ठपुत्तलिकायाम् ।

**दारुमुख्याह्वया** स्त्री दारुमुख्यमाह्वयते आ+ह्वे-य । गोधायां राजनि० । आ+ह्वे-क । दारुमुख्याह्वाऽत्यत्र शब्दार्थ० । [ ओषधिभेदे शब्दार्थचि० ।

**दारुमूषा** स्त्री दारुप्रधाना मूषा । (दारुमूषीति) ख्याते

**दारुयन्त्र** दारुमयं यन्त्रम् । काष्ठनिर्मितयन्त्रभेदे "यन्त्रतन्त्रो हि पुरुषः कार्य्यते दारुयन्त्रवत् । केचिदीश्वरनिर्दिष्टाः केचिदेव यदृच्छया" भा० उ० १५८ अ० ।

**दारुवधू** स्त्री दारुमयी वधूः वधूप्रतिमा दारुमयी वधूरिव वा । १काष्ठपुत्तलिकायां २काष्ठमयीस्त्रीप्रतिमायाञ्च । "जलबिन्दुसिन्दुभणिदारुवधूम्" माघः । "इन्दुमणिः चन्द्रकान्तशिला सैव दारुवधूरूपमयी वधूः स्त्रीप्रतिमा" मल्लि० दारुस्त्रीदारुपुत्रीदारुपुत्तलिकादयोऽप्यत्र ।

**दारुवह** न०दारु वहति वह-अच् "हरो वहेऽपोख्यादिभ्यः" पा०पीख्या०न पूर्वपददीर्घः । दारुवाहके जलादौ ।

**दारुसार** पु० दारुषु सारः श्रेष्ठः । चन्दने शब्दार्थचि० ।

**दारुसिता** स्त्री दारुणि सितेव (दारुचिनीति) ख्यातायां गुडत्वचि । "श्वेता दारुसिता खाढी सिक्ता चानिलपित्त हृत् । तुरभिः गुरुवाय्वग्निसृष्मशोषतृषापहा" भावप्र० तद्गुणा उक्ताः । [ हरिद्रायाम् रत्नमाला ।

**दारुहरिद्रा** स्त्री दारुमयी हरिद्रा । खनामख्यातायाम्

**दारुहस्तक** पु० दारुणोहस्त इव "इवे प्रतिकृतौ" पा० कन् । काष्ठमयदर्वीभेदे अमरः ।

**दार्घसत्र** त्रि० दीर्घसत्रे भवः अण् "देविकाशिंशपेक्षा" पा० आद्यच आत् । दीर्घसत्रे भवे ।

**दार्ढ्य** न० दृढस्य भावः ष्यञ् । दृढत्वे "वत्सानां दान्तिता दार्ढ्यमापत्तेऽमस्थिष्णुता" कामन्दकी० ।

**दार्तेय** त्रि० दृतौ भवादि ढक् । १दृतिभवे २दृतस्थे च ।

**दार्दुर** पु० दर्दुरः मत्स्यपात्रभेदस्तदाकारोऽस्यास्य प्रज्ञा० ण । १दक्षिणावर्त्तशङ्खभेदे शब्दार्थचि० । दर्दुर स्येदम् अण् । २दर्दुरसम्बन्धिनि त्रि० स्त्रियां ङीप् । "चालितो गुरुपुत्रेण भार्गवोऽङ्गिरसेन वै । प्रविष्टो दार्दुरीं मायामनाहृष्टिं चकार ह" हरिवं० ४१६१ अ० । दर्दुरस्येह राज्ञः तेन दार्दुरी राक्षसी

**दार्दुरिक** त्रि०दर्दुरः मत्स्यपात्रभेदः शिल्पमस्य ठक् । मत्स्यपात्र भेदकारके (कुमार) कुलाले ।

**दार्भ** त्रि० दर्भस्येदम् अण् । कुशसम्बन्धिनि ।

**दार्भि** पुंस्त्री दर्भस्य गोत्रापत्यम् इञ् । दर्भिगोत्रापत्ये आयायणे तु तस्यिन् फक् । दार्भायण इत्येव ।

**दार्भ्य** त्रि० दर्भे भवः कुर्वा० यत् । दर्भभवे ।

**दार्व** पु० देशभेदे स च देशः ह०स० कूर्मविभागे १४ अ० ऐशान्यामुक्तः "ऐशान्यां मेरुकनटराज्यौलुपक्रमे ब्रह्मपुरदार्वडामरवनराज्यकिरातचीनकौशिन्दाः" । "कोलिसर्पाः समङ्गिषा दार्वाघोषाः सकेरलाः" हरिवं० १४ अ० । १तत्रस्थे २नदीभेदे च तस्या इदम् नद्यादि० ढक् । दार्वेय तदीयजलादौ त्रि० दार्वेषु भवः बहुवचनार्थं ढञ् । दार्वक दार्वजनपदेषु भवे त्रि० ।

**दार्वाट** न० दारु इव निश्चलतया निरूपणीयविषयनिश्चयार्थं-मटन्यत्र वट-घञर्थे क । १चिन्ताघट्टे, २मन्त्रघट्टे च । हारा० ।

दार्वेण्ड पुंस्त्री दारु-इव कठिनोऽण्डोऽस्य । मयूरे शब्दार्थ-कल्प० । स्त्रियां जातित्वात् ङीष् ।

दार्वाघाट पुंस्त्री दारु आहन्ति आ+हन-क्विप् "दारावा हनोऽण् चलस्य च टः संज्ञायाम्" वार्त्ति०क्विप् नस्याने टः । (काठठोकरा) पक्षिभेदे अमरः स्त्रियां जातित्वात् ङीष् । "पुरुषस्यगयेन्द्रमसो गोधा-कालका-दार्वाघाटास्ते वनस्पतीनाम्" यजु०२४।३५। अमंज्ञायां तु न टान्तादेशः । दार्वाघात काष्ठाघातमात्रे त्रि० । स च दार्वाघातखगे शब्दरत्ना० अत्रार्थे टान्तत्वमेव युक्तं वार्त्तिके संज्ञायां टान्तत्वस्यैव साधनात् ।

दार्विका स्त्री दारयति दृ+उत्वादित्वात् साधुः ङीष् दार्वी दारुहरिद्रा तद्विकारोऽपि दार्वी अभेदोपचारात् स्वार्थे क । १दारुहरिद्राकाथोद्भवे तैले अमरः २गोजिह्वौषधौ शब्दार्थचि० ।

दार्विपत्रिका स्त्री दार्व्याः दारुहरिद्रायाः पत्रमिव पत्रमस्याः ठन् संज्ञायां ह्रस्वः तत् तदाकारः पत्रेऽस्या वा ठन् । गोजिह्वायां रत्नमाला ।

दार्वी स्त्री दारयति दृ-क्विप् उन् स्त्रियां दारुणस्य अवयव-विभागरूपत्वेन गुणवचनत्वात् वा ङीष् दृ+उत्वा०नि० ङीष् वा । दारुहरिद्रायाम् ।

दार्वीकाथोद्भव न०दार्व्याः दारुहरिद्रायाः काथादुद्भवति उद्+भू-क्विप् । १रसाञ्जने राजनि०२कृत्तिमरसाञ्जने रत्नमा० ।

दार्श त्रि० दर्शे भवम् अर्थे ठञ् वाधित्वा अण् । १दर्शभवे "दार्शमस्कन्दयन्पर्व पौर्णमासञ्च योगतः" मनुः । लोके तु कालात् ठञ् । दार्शिक इत्येव । दृशि नेत्रे भवः अण् । २नेत्रभवे त्रि० ।

दार्शपौर्णमासिक त्रि० दर्शे पौर्णमास्यां च भवः ठञ् । दर्शपौर्णमासीभवे । "दार्शपौर्णमासिकेतिकर्त्तव्यता" कात्या०श्रौ० ५।६।२१। स्वामी कर्कः ।

दार्षद त्रि० दृषदि पिष्टः शैषिकः अण् । दृषदि प्रस्तरे पिष्टे सक्तुप्रभृतौ

दार्षदत न० दृषदुत्वा नद्यास्तीरे कर्त्तव्यम् अण् । सत्रभेदे तद्विधानादि यथा "दार्षदतस्त्विगाचार्य्योरन्यतरस्य वा रज्जेत् संवत्सरम्" कात्या०श्रौ० २४।६।२२ इत्यादिभिः "एत्य च दृषदतीतीरेण" इत्यनैः सूत्रैरुक्तः तथाव ऋषविशेषस्तत उत्तरसूत्रेषु दृश्यः । "दार्षदतमेतत्सत्रं सत्रमभिधीयते" कर्कः ।

दार्ष्टान्तिक त्रि० दृष्टान्तेन युतः ठञ् । दृष्टान्तयुक्ते उपमेये "स्वापस्य दार्ष्टान्तिकत्वेन विवक्षितम्" दु०उ०शङ्करभाष्यम्

दाल न० दले सञ्चितम् अण् । द्रुमात् पतिते दलसञ्चिते १मधुभेदे भावप्र०उक्तलक्षणादि मधुशब्दे दृश्यम् इन्द्रनीलदलाकारक्षुद्रमक्षिकोत्पन्ने २वृक्षकोठरान्तर्भवे मधुनि च राजनि० । ३कोद्रवे धान्यभेदे पु०हेमच० ।

दालन पु०दालयति दल-णिच्-ल्यु । दलति रोगभेदे रोग-शब्दे २४६६ पृ०दृश्यम् । [विशरणे हेमच० ।

दालव पु० दलति दल-उन् तस्यायम् अण् । स्थावर-

दाला स्त्री दल्यते दल-कर्मणि-घञ् । भङ्गाकाले किण्वपाके दत्ते भावप्र० स्वार्थे क । दालिका तत्रार्थे

दालि स्त्री दल-इन् । (दाल)इति ख्याते दलिते १शमीधान्ये शब्दार्थचि० । दाडि इत्य नः । २दाडिमशब्दार्थे च स्त्री त्वात् वा ङीष् तत्रार्थे सा च ३देवदालीलतायां राजनि०

दालिम पु० दाडिम+इत्य नः । दाडिमवृक्षे भरतः

दालभ पु० ब०व० । दाल्भ्यस्य दल्भगोत्रजस्य छात्राः अण् यलोपः । दाल्भ्यस्य छात्रेषु

दाल्भ्य पुंस्त्री दल्भस्य गोत्रापत्यम् गर्गा०यञ् । दल्भर्षि-गोत्रापत्ये वके मुनिभेदे । "वकोदाल्भ्यः स्थूलशिराः कृष्णद्वैपायनः शुकः" भा०स०४अ० दल्भशब्दे क्रान्दो० वाक्यम् दृश्यम् । तस्य युवापत्यम् यूनि फिञ् । दाल्भ्यायनि दल्भस्य यून्यपत्ये । २पुरुषाश्वमेधरूपे तीर्थभेदे । "दाल्भ्यघोषञ्च दाल्भ्यस्य धरणीस्थो महात्मनः । कौलेयानन्तयशसः सुव्रतस्यामितौजसः । आश्रमः ख्यायते पुण्यश्चिषु लोकेषु विश्रुतः" भा०व०६०अ०

दाल्मि पु० दल-णिच् बा०मि । इन्द्रे त्रिका० ।

दाव पु० दुनाति दु-कर्त्तरि घ । १वने २वनभवेऽनले च अमरः । "ददर्श दावं दहनं महान्तं गहने वने" भा०व० २६०श्लो० । "वनमिव दावपरीतम्" इ०स०२४अ० । "इदमिन्द्रः सदा दावं खाण्डवं परिरक्षति" भा०आ० २२३अ० "दावं दग्ध्वा यथा शान्तं पावकं शिशिरात्यये" भा०द्रो० २८४२ श्लो० । 'अधिज्यधन्वा विचचार दावम्' रघुः । भावे घञ् । ३उपतापे च ।

दावन् पु० दा-कर्मभावादौ उणा०बनि । १देवे २दाने च "नियुक्तता रचेनायाश्चि दावने वायो मघस्य दावने" ऋ०१।१३४।१ "दावने दातव्याय हविषे तत्स्वीकाराय पुनः किमर्थं दावने अस्मभ्यमभिमतदानाय । उभयत्र ददातेः कर्मणि भावे च क्रमेणौणादिको वनिः । क्रान्दसः नोपधालोपः साधवः । लोके तु दावे इत्यादि ।

"अतो मनिन्क्वनिब्वनिपश्च" पा० सूत्रेणोपसर्गे उपपदे च वनिप्। भूरिदावा इत्यादि बहुदातरि। अयं छन्दस्येव लोके तु न पाणिनिः सम्बबोधे तु लोकेऽपीत्युक्तम्।

दावप पु० दावं वनवह्निं पाति पा–क। पुरुषभेदे "अरण्याय दावपम्" यजु०३०।६ पुरुषभेदे एकादशरूपे आलभ्यपुरुषभेदोक्तौ।

दावसु पु० अङ्गिरसो सुनौ पञ्चमाध्यायस्य।

दावाग्नि पु० ६त०। वनानले दावानलादवोऽध्यत्र। "दावाग्निसदृशो मेऽद्य दन्दह्यीति शुभां तनुम्" हरिवं० १५२अ० "ज्वलत्व चाग्निमदनो दावाग्निरिव निर्दयः" भा० वि० १४अ०।

दाविक त्रि०देविकायां नदीभेदे भवः अण् "दाविकाशिंशपेत्यादिना" खाद्यच वात्। देविकानद्यां भवे। एवं देविकाकूले भवः अण्। दाविककूल तत्कूलभवे शाल्वादौ।

दाश(स) क्रियने स्वा० पर०सक० सेट्। दाश्नो(स्नो)ति अदाशी(सी)त् अयं वैदिकः। "यस्ते दाश्नोति नम उक्तिभिः" ऋ०८।३।६ "दाशद्दाशुषे क्षत्रिय क्षत्रम्" ऋ०२।१।६४ "यस्मै त्वं सुद्रविणो ददाशो अनागास्त्वमदिते!" ऋ०१।६४।१५

दाश दाने चु० उभ०सक० सेट्। दाशति-ते अदित् अदिदाशत्-त। "स वा एतेभ्यस्त्रयं पुरोऽदाशयत् तस्मात् पुरोडाशः" शत० ब्रा०१।६।२।५

दाश दाने भ्वा० उभ०सक० सेट्। दाशति-ते अदाशीत् अदाशिष्ट अदित् क्षिप्च् अदिदाशत्-त। "यस्तुभ्यं दाशान्न तमंहो अश्नवत्" ऋ०२।२३।४ "तुभ्यं दाशतः स्याम" ७।१४।२

दाश(स) पुंस्त्री दाश्नो(स्नो)ति मत्स्यान् दस्(श)ति मत्स्यान् वा घञ् नि०सलोपः दाश(स)ते दीयते मत्स्यैरस्य मूल्यमत्रं घञ् वा। १मत्स्योपजीविनि धीवरे स्त्रियां जातित्वात् ङीप्। "दाशानां भुजवेगेन नद्याः स्रोतोजवेन च। वायुना चातकूलेन तूर्णं पारमवाप्नुयात्" भा० आ० ६८अ० श्लो० "क्षेत्रात् संभोक्तमापन्नो नावि दाशो यथा तथा" भा० आश्व० १२६अ० श्लो०। "एष नौयायिनासङ्गो व्यवहारस्य निर्णयः। दाशापराधतस्तोये दैविके नास्ति निग्रहः। यस्मादि किञ्चिद्दाशानां विशोर्दैवापराधतः। तद्दाशैरेव दातव्यं समांशस्य ऋतोऽंशतः"। "निषादो भागधं क्षत्ते दा(श)धं नौकर्मजीविनम्। कैवर्त्तमिति यं प्राहुरार्यावर्तनिवासिनः" इति च मनुः स्मार्त्तं च। तत्रार्थे। ततः परं तुल्यशब्दं आदुदात्तस्तत्पुरुषे दाशतः। दाश्यते भृतिरस्मै। २भृत्ये (चाकरे) पु०रमानाथः।

दाशग्राम पु० दाशप्रधानो ग्रामः। धीवरप्रधाने ग्रामे ततः चतुरर्थ्यां कुलादि०ठञ् काश्यादि०ठञ्जिठौ वा दाशग्रामिक तस्य वच्चिरूपदेशादौ त्रि०। स्त्रियां ठञि ङीप् ङीठि टाप् इति भेदः।

दाशतयी त्रि० दश अवयवा यस्य तयप् दशतयः ततः स्वार्थे प्रज्ञा० ष्ण। दशावयवके ऋग्भेदसंहितायां स्त्री तस्याः दशमण्डलात्मकत्वात्तथात्वम्।

दाश(स)नदिनी स्त्री ६त०। व्यासमातरि सत्यवत्यां धीवरकन्यायाम्। कालीशब्दे २०२१ पृ० दृश्यम्।

दाश(स)पु(पू)र पु० दाश(स)न् कैवर्त्तान् पिपूर्त्ति पालयति पृ–क। पूरयति पूर–अच् वा। कैवर्त्तैरुक्तके चोरस्वामी [धभेदे शब्दार्थचि०।

दाश(स)फली स्त्री दाश(स)प्रियं फलमस्याः ङीप्। बीजपूरे राजनि०।

दाश(स)मेय पु० देशभेदे स च देशः ह०स० १अ० उत्तरतः कैलास इत्युपक्रमे "दौधेय दाश(स)मेय यद्राषाढास्ते मधूत्तंव" उत्तरस्यामुक्तः।

दाशरथ पु० दशरथस्येदम् अण्। १श्रीरामे "प्रदीयतां दाशरथाय मैथिलीति" भट्टिकाव्यम्। दाशरथेः श्रीरामस्येदम् अण्। २दाशरथिसम्बन्धिनि त्रि०। "अजीगषद्दाशरथं न वाजम्", भट्टिः।

दाशरथि पु० दशरथस्यापत्यम् अत इञ्। दशरथस्यापत्येषु श्रीरामादिषु चतुर्षु। "अवधिं विलङ्घ्य शपिदाशरथिः" "एष दाशरथिर्भूयमेत्य च" "अरण्यदोदाशरथिर्भवन् भवान्" माघः। "श्लोकं दाशरथिर्भूत्वा रचयन्नेवमेव च" रघुः।

दाशराज्ञ त्रि० दशानां राज्ञामिदं तद्धितार्थद्विगोः अण्। उपधालोपः। दशानां राज्ञां सम्बन्धिनि।

दाशरात्रिक त्रि० दशरात्रेण निर्वृत्तः ठञ्। दशरात्रसाध्ये १सत्रभेदे २दशरात्रसम्बन्धिनि "दाशरात्रिकाख्याङ्गानि इत्यादिनोक्तेन" कात्या०श्रौ० २३।१।५ "देवेभ्यो दशरात्रं दिग्भ्यो दाशरात्रिकं पृथग्" शत० ब्रा० १२।१।२।२

दाशु त्रि० दाश–दाने उनु। १दातरि २दत्ते च "यं युवं दाशध्वराय देवाः" ऋ०६।६८।६ "दाशद्धराय दत्तवि-श्वाय" भा०।

दाशुरि त्रि० दाश हिंसने उरिन्। हिंसके। "स्वयं चित्त मन्यते दाशुरिः" ऋ० ८।४।१२। "दाशुरिर्दाशान्" भा०

दाशेय पुंस्त्री दाशा धीवर्या अपत्यम् ढक्। धीवर्यां अपत्ये। स्त्रियां ङीप्। सा च व्यासमातरि सत्यवत्यां शब्दर० "अभिनम्योपसंगृह्य दाशेयीमिदमब्रुवन्" भा० उ० १७२ अ०। [स्त्रियां टाप।

दाशेर पुंस्त्री दाशा अपत्यम् क्षुद्रा०ढक्। धीवर्यां अपत्ये

दाशेरक पु० दाशेरप्रधानः देशः संज्ञायां कन्। १भारतदेशे २तदधिपे नृपे पित्रादिक्रमेण १तद्देशवासिषु ब०व०। "दाशेरकगणैः सह" भा०भी०५०अ०।

दाशौदनिक पु० दश ओदना यत्र यत्ते तस्य व्याख्यानो ग्रन्थः ठञ्। १दशौदनपक्वव्याख्याने ग्रन्थे। दशौदनयज्ञस्य दक्षिणा यज्ञाख्यत्वात् ठञ्। २तदाख्ययज्ञदक्षिणायां स्त्री ङीप्।

दाश्य त्रि० दश-क दशस्य दंशकस्यादूरदेशादि वद्भावा० चतुर्थ्यां यत्। दंशकादूरदेशादौ।

दाश्वत् त्रि० दाश-क्वसु वा० दुगभावः। दातरि जटाध०। तस्य दाशुष् इत्येव पाठो न्याय्यः।

दाश्वस् त्रि०दाश-दाने क्वसु "दाश्वान् साह्वानित्यादिना" पा०नि० १दत्तवति। दाश-हिंसने क्वसु। २हिंसितवति। दाश धातौ(दाशुषे)इत्यादाहरणम्। "पीपरो दाश्वांसम्" ऋ०४। २।८ "दाश्वांसं क्षपिर्दत्तवन्तम्" भा० "तस्मै सविर्देवरदिक्कदर्शी दाश्वान् सुप्रजास्त्रिपथमित्युवाच" रघुः। "पुंसां पुनः परमहंस्य आश्रमे व्यवस्थितानामनुमस्य दाशुषे" भाग०२।४।१२

दास-दाने भ्वा०उभ०सक०सेट्। दासति ते अदासीत् अदासिष्ट। कृदित् णिच् अददासत् त। इनने च "यो नः कदाचिदपि दासति दुष्टः" ऋ०७।१०४।७। दासति हनि" भा० "स्वादिगणीयोऽन्येभ्य दाशधातौ दशग्रः।

दास त्रि० दस्-दाने "दंसेष्टनौ नस्य आत्" उणा० १ज्ञातालुनि २भृत्ये ३धीवरे च पुंस्त्री स्त्रियां ङीप्। दास्यते भृतिरूपं दासति ददात्यङ्गं स्वामिने उपचारात् वा दास-अच् वा। ४भृत्ये (चाकर)। दास-दाने सम्प्रदाने घञ् ५दानयाले सम्प्रदाने क्षुद्रजातौ नामान्त्य प्रवोज्जोपाधिभेदे "शर्मान्तं ब्राह्मणस्य स्यात् वर्मान्तं क्षत्रियस्य तु। गुप्तदासात्मकं नाम प्रशस्तं वैश्यशूद्रयोः" उदाहृ०त०। दासशब्दनिरुक्तिभेदादिकं वीरमित्रोदये दर्शितं यथा

"शिष्यप्राप्तेवासिभृतकाधिकर्मकरेभ्यो दासानाम्नेदन्दासशब्दव्युत्पत्तिप्रदर्शनसङ्गेनाह कात्यायनः "स्वतन्त्र स्वात्मनोदानाहास्त्वं दारवद्भुरिति"। "यथा भर्तुः सम्भोगार्थं स्वशरीरदानाहारत्वम्। तथास्वतन्त्रस्यात्मनः परार्थत्वेन दानाहास्त्वमिति भट्टुराचार्यैर्मन्यत इत्यर्थः। "अनेनात्मनपारार्थ्यमासाद्य शुश्रूषका दासाः। पारार्थ्यमात्मसाद्य शुश्रूषकास्तु कर्मकरा इति भेदोऽप्युक्त इत्यवगन्तव्यम्। आत्मनपारार्थ्यं तु तेषामस्यति यैः स्वपुरुषार्थहत्तिनिरोधेन परार्थत्वमाश्रितमिति स्मृति चन्द्रिका। दासत्वं ब्राह्मणव्यतिरिक्तस्यैव "त्रिषु वर्णेषु विप्रस्य दास्यं विप्रस्य न क्वचिदिति" तेनैवाभिधानात्। अनेन दासानां जातितो भेद उक्तः। विप्रेतरेऽपि दासमानुलोम्येनैव भवति "वर्णानामानुलोम्येन दासत्व प्रतिलोमतः। राजन्यवैश्यशूद्राणान्यजातास्तु स्वतन्त्रतामिति" तेनैवोक्तत्वात्। स्वतन्त्रतां त्यजताम् आत्मनपारार्थ्यमजतामित्यर्थः। न प्रतिलोमत इति स्वधर्मपरित्यागिभ्योयतिभ्योऽन्यत्र द्रष्टव्यम्। अतएव नारदः" "वर्णानां प्रातिलोम्येन दासत्वन्न विधीयते। स्वधर्मत्यागिनोऽन्यत्र दारवद्दासता मतेति"। "यद्दीनवर्णं प्रति हीनवर्णा सवर्णा वा भार्या भवति न पुनर्हीनवर्णं प्रत्युत्तमवर्णा तथैव दासोऽपि भवेदित्यर्थः। एतच्च प्रव्रज्यावसितो हीनवर्णस्यापि दासोभवतीत्यभिधानं क्षत्रियवैश्यप्रव्रज्यावसितविषयञ्च तु ब्राह्मण प्रव्रज्यावसितविषयम् तस्य निर्वासत्वाभिधानेन दासत्वाभावात्। तस्य निर्वासत्वं दर्शितं कात्यायनेन" "प्रव्रज्यावसिता यत्र त्रयो वर्णा द्विजातयः। निर्वासं कारयेद्विप्रं दासत्वं क्षत्रविट् भवुरिति"। "कारयेद्राजेति शेषः क्षत्रञ्च विट्च क्षत्रविट् सर्वोहन्द्वोविभाषैकवद्भवतीति वचनादेकवद्भावः। निर्वासनञ्च स्वदेशादुच्चाट्य कर्त्तव्यमित्याह तदेवनारदो" "पारिव्रज्यं समाश्रित्य तु यः स्वधर्मे न तिष्ठति। स्वदेशादुच्चाट्य तु राजा शीघ्रं प्रवासयेदिति"। न चैवं सति "राज्ञ एव तु दासः स्यात् प्रव्रज्यावसितो नरः। न तस्य प्रतिलोमोऽस्ति न विशुद्धः कथञ्चनेति" नारदेन प्रव्रज्यावसितोराज्ञ एव दासो नान्यस्येत्यभिधानात् स्वधर्मत्यागिनोऽन्यस्येति यत्नेनोक्तं तद्विरुध्यमानमिति वाच्यम्। यतोऽवेक्षाधिकरणन्यायेन क्षत्रियमात्रवचनेनापि राजशब्देनात्र क्षत्रियया प्रजापालनस्य सहजात् प्रजापालकत्वञ्च राज्याधिकृते वैश्यादावपि

सम्भवाद् यः क्षत्रियः प्रव्रज्यावसितः स हीनवर्णस्यापि प्रजापालस्य वैश्यस्य दासो भवतीति प्रतिपादनार्थत्वात्। केचित्तु प्रव्रज्यावसितस्य ब्राह्मणस्य दासत्वनिर्वासनयोर्विकल्पमाहुः तच्च पूर्वोक्तप्रकारेण सम्भवन्याहुतौ अष्टोधदुष्टविकल्पाङ्गीकरणसान्याय्यत्वात्। "दास्यं विप्रस्य न क्वचिदिति" निषेधाच्च। दारवद्दासतेति वचनाद्ब्राह्मणस्य सवर्णं प्रति दासत्वं प्राप्तं तन्निषेधार्थमाह कात्यायनः"। "सवर्णोऽपि हि विप्रं तु दासत्वेन न कारयेदिति" यदि ब्राह्मणः स्वेच्छया दासत्वं भजते तदाऽसावशुभकर्म न कुर्यादित्याह स एव "शीलाध्ययनसम्पन्ने तदूनं कर्म कामतः। तत्रापि नाशुभं कर्म प्रकुर्वीत द्विजोत्तमः" इति। "यस्मात्परोपकारः कर्त्तव्य इति विधिः तस्मात्स्वदूनं कर्म मध्यमोत्तमव्यतिरिक्तमपि कर्म कामतो वेतनमन्तरेण स्वेच्छया परोपकारार्थं कुर्यादित्यर्थः पूर्वार्द्धस्य। तत्रापि तेष्वपि हीनकर्मसु यदशुभकर्म शूद्रद्वारशोधनादिकं तच्च कुर्यादित्युत्तरार्द्धार्थः। क्षत्रियवैश्यविषये स्वामिनः कर्त्तव्यमाह मनुः" "क्षत्रियञ्चैव वैश्यञ्च ब्राह्मणोऽनुक्रमेण तौ। भृत्यादान्दण्डसंस्थेन स्वामी कर्माणि कारयेदिति"। दान्दण्डसंस्थेन अक्लीवेन। क्लयमर्थः। अनुक्रमेण क्लीवेन च क्षत्रियं वैश्यञ्च दासीभूतमक्लीवेन स्वानि कर्माणि कारयन् स्वामी दोषवेदिति। अत्र स्वामीत्यनेन न सम्बन्धिजनकर्माणि कारयेदित्याह कर्माणीति सामान्याभिधानेन जघन्यकर्मण्येव कारयितव्यानीति नियमो नास्तीति सूचयति। अनुक्रमेणेतिवचनेन, गत्यन्तराभावे एव क्षत्रियवैश्ययोर्दासत्वाङ्गीकारः कार्यो न तु गत्यन्तरसम्भवे इति दर्शयति। बलाद्दासीकरणे दण्डमाह मनुः" "दास्यन्तु कारयँल्लोभाद्ब्राह्मणः संस्कृतान् द्विजान्। अनिच्छतः प्रभावत्याद्राज्ञा दाप्यः शतानि षड्डिति"। "प्रभोः भावः प्रभावस्तस्मात् प्रभुत्वादित्यर्थः। साधारणादिभ्यः स्वार्थे अञ्वक्तव्य इति वार्त्तिकादञ्। द्विजातिपदाच्च दण्डः शूद्रविषय इति दर्शयति। अत एवाह "शूद्रन्तु कारयेद्दास्यं क्रीतमक्रीतमेव वा। दास्यायैव हि सृष्टोऽसौ ब्राह्मणस्य स्वयम्भुवेति"। स च दासः पञ्चदशप्रकार इत्याह नारदः "गृहजातस्तथा क्रीतो लब्धोदायागतः। अनाकालभृतश्चैव आहितः स्वामिना च यः। भोजितो वसनञ्चैव युद्धप्राप्तः पणे जितः। तवाहमित्युपगतः प्रव्रज्यावसितः कृतः। भक्तदासश्च विज्ञेयस्यैव बड़वाकृतः। विक्रीता चात्मनः शास्त्रे दासाः पञ्चदश स्मृताः" इति। गृहजातः स्वगृहे दासाज्जातः। क्रीतो मूल्येन स्वाभ्यन्तरात् प्राप्तः। लब्धः तत एव प्रतिग्रहादिना। दायादुपागतः रिक्थग्राहित्वेन लब्धः। अनाकालभृतोदुर्भिक्षे यो भरणाद्दासत्वाय रक्षितः। आहितः स्वामिना ऋणदानदर्थितां नीतः। ऋणमोचनेन दासत्वमभ्युपगतः ऋणदासः। युद्धप्राप्तः समरे विजित्य गृहीतः। पणे जितः दासत्वपणेद्यूतादौ जितः। तवाहमित्युपगतः तवाहन्दासोऽस्मीति स्वयमेवोपगतः। प्रव्रज्यावसितः प्रव्रज्यातश्च्युतः। कृतः एतावन्तं तव दासोभवामीत्यभ्युपगतः। भक्तदासः सर्वकालमन्नकार्यमेव दासत्वमभ्युपगम्य यः प्रविष्टः। भक्तिं यावत्ते मूल्यद्वारेण ददामि तावद्दास इत्यभ्युपगत इति स्मृतिचन्द्रिका। बड़वाकृतः बड़वा गृहदासी तया कृतसङ्कोचेन तासङ्गाद्दासत्वेन प्रविष्टः। यद्वाऽन्नं विक्रीणीते अभावाद्यविक्रेतेत्येवं धर्मशास्त्रे दासभेदाः पञ्चदशप्रकाराः स्मृताइत्यर्थः। अत्राद्यानां गृहजातक्रीतलब्धदायागतानामुत्तरेषां दासत्वापगमः स्वामिप्रसादादेव नान्यथेत्याह स एव" "तत्र पूर्वसवर्णौ दासत्वाच्च विमुच्यते। प्रसादात् स्वामिनोऽन्यत्र दास्यमेषां क्रमागतमिति"। आत्मविक्रेतुरपि दासत्वं स्वामिप्रसादादन्यतो नापैतीत्याह स एव "विक्रीणीते स्वतन्त्रः सन् य आत्मानमराधमः। सजघन्यतमस्तेषां सोऽपि दास्याच्च मुच्यत इति" अत्र प्रसादात् स्वामिनोऽन्यत्र इत्यनुषज्यते। ततश्चायमर्थः। आत्मविक्रेतापि गृहजातादिवत् स्वामिप्रसादं विना दास्याच्च विमुच्यत इति एवञ्च गृहदासादयोऽप्यात्मविक्रेतृपञ्चमाः स्वामिप्रसादादकालभृता इव दास्यान्मुच्यन्त इति वचोभङ्ग्यादर्शितमिति मन्तव्यम्। स्वामिप्राधरत्वाद्गृहजातादयोऽकालभृताश्च सर्वेऽपि दास्यान् मुच्यन्ते इत्याह स एव "यश्चैषां स्वामिनं कस्मिंश्चोचयेत् प्राणसंशयात्। दासत्वात् स विमुच्येत पुत्रभागं लभेत चेति"। एषामिति निर्द्धारणे षष्ठी पञ्चदशानां मध्ये अन्यतमइत्यर्थः। यत्तु "ध्वजाहृतोभक्तदासोगृहजः क्रीतदत्रिमौ। पैत्रिको दण्डदासश्च सप्तैते दासयोनयः इति मनुवचने सप्तविधत्वसङ्कल्पेषां दासत्वप्रतिपादनाय न परिसंख्यार्थम्। ध्वजाहृतो गृहदासी। एतच्च स्वामिप्रसादात् प्राधरत्वाद्वा दास्यापगमनं प्रव्रज्यावसितभिन्नदासेषु द्रष्टव्यम्।

तस्य दासत्वोक्तेरभावात्। अतएव याज्ञवल्क्यः "प्रव्रज्यावसितोराज्ञोदास आमरणान्तिकम्" इति। राज्ञो दासः पार्थिवस्यैव दासो नान्यस्येत्यर्थः। अनाकाल ऋतादीनां प्रव्रज्यावसितालाभविक्रेतव्यतिरिक्तानामवानान्दाख्यापनयनप्रकारमाह नारदः "अनाकाल ऋतोदाख्यानुसृच्यते गोयुगन्ददत्। आहितोऽपि धनं दत्त्वा स्वामी यद्येनमुद्धरेत्। ऋणं तु शोदयंदत्त्वा ऋणी दास्यात् प्रमुच्यते। तवाऽस्मित्युपगतो युद्धप्राप्तः रणेजितः। प्रतिमोक्षप्रदानेन मुच्येरंस्तुल्यमर्षणा। ऋतकालव्यपगमात् ऋतदासो विमुच्यते। भक्तस्रोतःक्षेपणात् यद्वो भक्तदासः प्रमुच्यते। नियमाद्वड़वायास्तु मुच्यते बड़वाभृतः" इति। एतदुक्तं भवति दुर्भिक्षे घोषणेन कारितो दासो गोयुग्मार्घप्रदानात्मुच्यते। आहित दासस्तु स्वामिना मुक्तीते ऋणे प्रत्यर्पिते सति उत्तमर्णदास्यादिमुच्यते। ऋणदासस्तु ऋतमृणं येनोत्तमर्णाय यावद्धनन्दत्त्वाधाऋतं तस्मै तावद्धनं सद्विकं दत्त्वा विमुच्यते। तवाऽस्मित्युपगतादयस्त्रयोदासाः स्वनिर्वर्त्त्यकीयव्यापारनिर्वर्त्तकदासान्तरप्रदानादिमुच्यन्ते। ऋतकालस्तु दासो दास्यावधित्वेन परिभाषितकालस्यातिक्रमणादिमुच्यते। भक्तदासस्तु भक्तस्रोतःक्षेपणाद्भक्षितभक्तमूल्यसमर्पणादिमुच्यते। मुक्तदासीजोमेन दासत्वं प्राप्तस्तत्सम्भोगजन्यापादिमुच्यत इति। बलादासीकृतानान्यागमाह याज्ञवल्क्यः "बलाद्दासीकृतचौरैर्विक्रीतापि मुच्यते" इति। अधिमन्देन दत्ताहितौ मुक्तीते। ततश्चायमर्थः। बलात्कारेण यो दासीकृतः यश्च चौरैरपहृत्य दासत्वेन विक्रीत आहितोदलो वा स यस्य पार्श्वे दासभावेन तिष्ठति तेन प्रायुक्त मोचनहेतुमन्तरेणैव शीघ्रं मोचनीय इत्यर्थः। यदि तेन लोभादिदोषादसौ न मुक्तस्तदा राज्ञा मोचयितव्य इत्याह नारदः "चौरापहृतविक्रीता ये च दासीकृता बलात्। राज्ञा मोचयितव्यास्ते दासत्वेषु हि नेष्यते" इति। चौरैरपहृताश्च ते विक्रीताश्चेति कर्मधारयः। यस्त्वेकस्य दास्यं पूर्वमङ्गीकृत्यापरस्यापि दासत्वमङ्गीकरोति यस्यापरेणापि विवर्जनीय इति स एवाह। "तवाऽस्मिति चात्मानं योऽन्यतन्त्रः प्रयच्छति। न स तं प्राप्नुयात्कामं पूर्वस्वामी लभेत तमिति"। अन्यतन्त्रः परदासत्वेनान्यतन्त्रः कामं नूतनस्वामिदास्यं काम्यमानम् इतरदासीभवनं दास्यं पूर्वस्वामी लभेतादित्यर्थः। एवं यदेतद्दासमधिकृत्योक्तजातमुक्तं दास्यामपि समानन्यायत्वाद् योजनीयम्। दासीस्वामिनमधिकृत्य विशेषमाह कात्यायनः "स्यां दासी यस्तु मुञ्चेच्छेत् प्रसूता च भवेत्सुतः। अवेक्ष्य बीजं कार्या स्यादासी सान्वया तु सेति"। अन्यतगर्भाधानमनुसन्धाय या दासी धनान्वहिता दासत्वविमोक्षविधिना अन्यतगर्भोद्दीपत्वपरिहारार्थं अदासीत्वेन कार्या स्यादित्यर्थः। कः पुनर्दासत्वविमोचकोविधिरित्याकाङ्क्षायामाह नारदः "स्वन्दासमिच्छेद् यः कर्तुमदासं प्रीतमानसः। स्वस्यादादाय तस्यासौ भिन्द्यात् कुम्भं सहाम्भसा। साक्षतामिः सपुष्पाभिर्मुच्यद्भिरवाकिरेत्। अदास इति चोक्त्वा त्रिः प्राङ्मुखमनवलोकयन्निति"। अत्रापि दासशब्देन दासा अपि परिग्रह्यन्ते विशेषाभावेन षष्ठाधिकरणन्यायेनाविवक्षितत्वात्। एवमुक्तेर्गे सति यद्भवति तदाह स एव "ततः प्रभृति वक्तव्यः स्वाम्यनुपरुपालितः। मोक्षाद्योऽन्यगतिपाद्यो भवत्यभिमतः सतामिति"। स्वाम्यनुपरुपेण दासापाकरणमुपेत्य वक्तव्यः सम्भाषणादिः। अदासा अपि दासेन परिणीताया दासीत्वमेव भवतीत्याह कात्यायनः "दासेनोढा त्वदासी या सापि दासीत्वमाप्नुयात्। यस्माद्भर्त्तुः प्रभुत्वस्याः स्वाम्यधीनः प्रभुर्यतः" इति। दासधनस्यापि तत्स्वामिधनत्वमित्याह स एव "दासस्य तु धनं यत्स्यात् स्वामी तस्य प्रभुः स्मृतः" इति। आत्मक्रयादिना दासीकरणे दण्डमाह कात्यायनः "आदद्याद् ब्रह्मणीं यस्तु विक्रीणीत तथैव च। राज्ञा तदुक्तं कार्यं दण्ड्याः स्युः सर्व एव ते। कामात्तु संश्रितां यस्तु कुर्याद्दासीं कुलस्त्रियम्। संक्रामयन् तथान्यस्य दण्ड्यश्चाञ्जलतस्मृतेः। बालधात्रीमदासीञ्च दासीमिव भुनक्ति यः। परिचारकपत्नीं वा प्राप्नुयात्पूर्वसाहसमिति"। तत्कार्यं अञ्जलं निवर्तनीयमित्यर्थः। तेन राज्ञा दण्ड्याः स्युरित्यर्थः। विष्णुरपि "यस्तूत्तमवर्णं दास्ये नियोजयति तस्योत्तमसाहसोदण्ड" इति। क्वचिद्दासीविक्रयेऽपि दण्डमाह कात्यायनः "विक्रीयमाणां यो भक्तां दासीं क्रेतुमिच्छति। अनापदि स्वयं शक्तः शतं प्राप्नुयात् द्विगतं दममिति"। द्विगतं पणानामिति शेषः। भक्तामित्यनेन दुष्टाया विक्रयेऽपि दण्डाभाव इति दर्शितमिति"।

"चूड़ाद्या यदि संस्कारा निजगोत्रेण वै कृताः। दत्ता-

ज्ञातनयास्ते शूद्रन्यया दास उच्यते" कालिकापुराणोक्ते निजगोत्रेण संस्कारं विना गृहीते ऽदत्तकादौ च तेषां च दासवद्धरणीयतया तथात्वम् दत्तकशब्दे मूलं दृश्यम् । स्त्रियां ङीप् । दास-उपजीवे अच् । दत्तोपजीवके त्रि० । हडलासुरे पु० दासपत्नीशब्दे दृश्यम् । १० दासी च दासवेशशब्दे दृश्यम् । दासस्यापत्यं नडा० फक् । दासायन दासापत्ये पुंस्त्री० । दास+भृशा० अभूततद्भावे क्यङ् । दासायते अदासो दासो भवतीत्यर्थः । अदासं दासं करोत्यर्थे चिञ्जाद्यतु प्रयोगः अदासो दासो भवति दासीभवति अदासं दासं करोति दासीकरोतीत्यादि संज्ञायां कन् । दासक गोत्रप्रवर्त्तकर्षिभेदे तस्य गोत्रापत्यम् अश्वा० फक् । दासकायन तद्गोत्रापत्ये पुंस्त्री ।

**दासपत्नी** स्त्री ब०व० । दासयति दास-उपजीवे अच् दासोढत्वात्तुरः पतिर्यासाम् । १ऋषिस्त्री । "दासपत्नीरङ्गिरोपा अतिष्ठन्" ऋ०१।१२३।११ "दासो विश्वोपजीवकेतर्दत्तः पतिः स्वामी यासामृषीणां ता दासपत्नीः । दासपत्नीः दस्तु उपक्षये दासयतीति दासोढत्वात् पचाद्यच् । चित इत्यन्तोदात्तत्वम् । दासः पतिर्यासां "विभाषा सपूर्वस्य" पा०ङीप् तत्संनियोगेनेकारस्य नकारः बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम्" भा०। "अश्विनाविन्दुमन्तं दत्तभूयौ निरोधत्तामश्विनौ दासपत्नीः" भा० आ०२अ० । इत० दासस्य पत्नीव दासस्त्रियाञ्च सर्ववचनम् ।

**दासमित्र** न० इत० । दासस्य मित्रे ततः अदूरदेशादौ काश्या० ठञ् ञिठौ । दासमित्रिक तददूरदेशादौ त्रि० । स्त्रियां ठञि ङीष् ञिठि टाप् । दासमित्रस्यापत्यम् ऋञ् । दासमित्रि तदपत्ये पुंस्त्री० । ततः ऐषुका०विषये देवे भक्षल् । दासमित्रिभक्ष तदीये विषये देशे न० ।

**दासमीय** त्रि०दासमे देशभेदे भवः, दास शूद्रं मिमते मानयन्ति मैथुनार्थिन्यस्तादासम्यस्तासु भवोवा छ । १दासमेदेशभवे २स्वदास्यशूद्राभिरतस्त्रीजाते च । "आत्मानां दासमीयानां वाहो कानामयज्वनाम्" भा०क० ४४अ० । नौलक्षणेनोक्तौ व्युत्पत्तिर्दर्शिता ।

**दासवेश्म** इ० दासस्य दस्योर्विशः । दस्युनाशे "शूद्रायै च दासवेशाय चावहः" ऋ०२।११।८ "दासवेशाय दासानां दस्यूनां वेशाय नाशाय" भा०

**दासी** स्त्री दास+गौरा०ङीष् दासस्य पत्नीव, तज्जातिस्त्री वा ङीष् । १परिचारिकायां कर्मकर्यां दासशब्दे दृश्यम् । "जातोऽपि दासां शूद्रेण कामतोऽधरो भवेत् । क्षत्रे पितरि कर्त्तव्यं भ्रातरस्तद्धि भागिकम्" याज्ञ० २शूद्रवैश्यजातीयायां स्त्रियाम् । ४काकजङ्घायां ५नीलीक्षुपे ६नीलभिण्टाङ्गे राजनि० । ७पीतभिण्टाख्यां रत्नमा० । दास्यां विद्वः । दासाः पाद इव पादोऽस्य ह्रस्वादित्वाच्चान्त्यकोपः । दासीपाद दासतुल्यपादयुक्ते त्रि० । स्त्रियां कृष्णपद्मा०ङीष् पादस्य पद्भावश्च । दासीपदीत्यत्रैव "पतितस्योदकं कार्यं सपिण्डैर्बान्धवा बहिः । निन्दितेऽहनि सायाह्ने श्राद्धे त्विग्गुरुकर्मणि । दासी घटसपां पूर्णं पर्यस्येत् प्रेतवत् पदा" मनुः । अत्र मेधातिथिकुल्लूकभट्टमते दासीघटत्वेकपदकल्पनं ग्रामादिकं तत्र दासाः कर्तृत्वेन घटस्य च कार्यत्वेन भिन्नपदार्थत्वेन पदद्वयम्

**दासीभारादि** पु० पूर्वपदे प्रकृतिस्वरनिषिद्धे शब्दगणे च पा०ग०सू० उक्तो यथा "दासीभारः देवकृतिः । देवभीतिः देवजातिः वसुनीतिः ओषधिचन्द्रमाः ।

**दासीसभ** न० दासीनां सभा संघातः "सभाराजमनुष्य पूर्वा" "अशाला च" पा० स्त्रीवत्ता । दासीसंघाते अमरः दासा मनुष्यत्वात् शंघातार्थकत्वे एव अशालापरत्वे स्त्रीवत्ता शब्दकल्पद्रुमे विपक्षे दासाः बभेत्येकवचनोक्तिः ग्रामादिवी एकस्याः संघातावयवात् ग्रामार्थत्वे च स्त्रीवत्ताप्रसङ्गः ।

**दासेर** पुंस्त्री दासाः अपत्यम् बुद्धत्वात् ढक् । दासा अपत्ये १शूद्रे २वैश्ये च । स्त्रियां जातित्वात् ङीष् । दासां भवे त्रि० । दास-वा० एरच् । १शूद्रे पुंस्त्री मेदि० स्त्रियां जातित्वात् ङीष् । स्वार्थे क । दासेरक शूद्रे राजनि० । दासीपुत्रादौ च शारा० ।

**दास्य** न० दासस्य भावः कर्म वा यञ् । दासस्य १कर्मणि २तस्य भावे च । "निवेदनं खस्य दास्यं नवधा भक्तिलक्षणम्" ब्रह्मवै० प्रकृ० "पशूनां रक्षणं चैव दास्यं शूद्रे द्विजन्मनाम्" मनुः । दासशब्दे उदा०दृश्यम् ।

**दास्र** न० दस्रौ देवते अस्य अण् । अश्विनीनक्षत्रे ।

**दाह** पु० दह-भावे घञ् । १भस्मीकरणे "दाहयज्ञक्रियां कुर्य्यात्तत्र" रघुः "दाहाद्दुर्गन्धयौचं स्यात् यस्य वैतानिको विधिः" शु०त० स्मृतिः । "पांशुदाहे निशां दाहे" मनुः । भवदाहप्रकारः कन्दोगपरिशिष्टे उक्तो यथा

"दर्भैस्तं स्थापयित्वा तं शुद्धचेलाभिसंहतम् । दक्षिणाशिरसं भूमौ वह्निप्रज्वां निवेशयेत् । ततेनाभ्यङ्गमाज्यं सुपक्वसपयीतिनम् । चन्दनोशितसर्वाङ्गं सुमनोभिर्विभूषयेत् । शिरस्यग्रकलान्यस्य चिता लिङ्गेषु सप्तसु । तस्येव्यत्र पिधायैनं शिरैरेयुः सुतादयः ।

आभपात्रेऽग्निमादाय प्रेतमग्निपुरःसरम् । एकोऽनुगच्छेत्सहाईमर्द्धं पथ्युत्सृजेद्भुवि । अर्द्धमादहनं प्राप्य आसीनोदक्शिखासुखः । सर्व्वं जात्वाघृतं सकैः मतिलं पिण्डदानवत्" । "अथ पुत्रादिराकृत्य कुर्य्याद्दाहचयं महत् । भूप्रदेशे शुचौ देशे पलाश्चित्रादि लक्षणम् । तत्रोत्तानं निपात्यैनं दक्षिणाशिरसं सुखे । आज्यपूर्णं स्रुवं दद्याद्दक्षिणाग्नं नधि स्रुवम्" । इताक्रस्काल्पावने विशेषमाह वराहपुराणम् "दक्षिणाशिरसं कृत्वा सचेलन्तु भवं तथा । तीर्थस्नावाहनं कृत्वा स्नपनं तत्र कारयेत् । मयादीनि च तीर्थानि ये च पुण्याः शिलोच्चयाः । कुरुक्षेत्रञ्च गङ्गाञ्च यमुनाञ्च सरिद्वराम् । कौशिकीं चन्द्रभागाञ्च सर्वपापप्रणाशिनीम् । भद्रावकाशां सरयूं गण्डकीं पनसां तथा । वैष्णवञ्च वराहञ्च तीर्थं पिण्डारकं तथा । पृथिव्यां यानि तीर्थानि सरितः सागरास्तथा । ध्यात्वा तु मनसा सर्वं कृतस्नानं मतायुषम् । देवाद्याग्निसखाः सर्वे स्मृत्वा तु कृताशनम् । स्मृत्वा पाणिना चैव मन्त्रमेतमुदीरयेत्" । ओम् "कृत्वा तु दुष्कृतं कर्म जानता वाप्यजानता । मृत्युकालवशं प्राप्य नरं पञ्चत्वमागतम् । धर्माधर्मसमायुक्तं लोभमोहसमावृतम् । दहेयं सर्वगात्राणि दिव्यान् लोकान् स गच्छतु । एवमुक्त्वा ततः शीघ्रं कृत्वा चैव प्रदक्षिणम् । ज्वलमानं तथा वह्निं शिरःस्थाने प्रदापयेत् । चातुर्वर्ण्येषु संस्थानमेवं भवति पुत्रिके !" । याग्निकदाहप्रकारस्तु नारायणभट्टकृतान्त्येष्टिपद्धतौ द्रष्टव्यः ।

२कपिलपिङ्गलदेहसन्तापभेदे यथाह पित्तकोपकारणसङ्घा विदाहिलक्षणे भावप्र० "विदाहि द्रव्यसङ्कारमम्लं कुर्य्यात्तथा दृशाम् । हृदि दाहञ्च जनयेत् पाकङ्कृच्छति यच्चिरात्" । "कपिलिमतस्तु चैतेषु दाहः परम उच्यते" । "अतिदग्धे दाहपाकरागसन्तापाङ्गभङ्गमपिपासामूर्च्छाः श्वभैरवं वा । पाकाले च गलतालोष्ठशोषदाहसन्तापान् जनयति" इति च सुश्रु० ।

दाहक त्रि० दहति दह-ण्वुल् । १दाहकर्त्तरि "क्षेत्रवेश्मवनग्रामविद्योतस्वदाहकः" याज्ञ० स्त्रियां ङीपि अत इत्वम् । दाहिका "शक्तिर्यवाग्नौ खलु दाहिका स्थिता" ब्रह्मवै० पु० । २वह्नौ पु० ३चित्रके हृषे च ४रक्तचित्रकवृक्षे पु० राजनि० वह्नौ च दाहिका शक्तिरतिरिक्तेति सांख्याः । तन्मतं च अनुष्णानचिलानग्नौ अतिरिक्तशक्तिवादनिरासे उत्थाप्य दूषितं प्रसङ्गादत्र दिङ्मात्रं दर्श्यते यथा

"स्यादेतत् ईश्वरवत् कार्य्ये चैव शक्तिरप्यनुमीयते तथा हि यावदादेव करानलसंयोगाद्दाहो जायते तावदादेव सति प्रतिबन्धके न जायते अतो यदभावात् कार्याभावस्तद्दक्प्रादानस्यु पेयं तेन विना तदभावात् यत्नद्वारानुपपत्तेर्व्यतिरेकसुखेन शक्तिसिद्धिः । न चाऽदृष्टवैगुण्यं दृष्टसामग्र्यां तदभावात् तस्य तदर्थत्वात् अन्यथा दृढदण्डहतमपि चक्रं न भ्राम्येत । अथाऽदृष्टविलम्बादपि विलम्बो यथा वन्ध्यास्त्रीप्रयोगे, परमाणुकर्मणि, अध्ययनतुल्यत्वे एकत्र फलनारतम्यमिति चेन्न अदृष्टविलम्बे हि न तत्रानुत्पादो मन्त्रप्रहारवत्पदं दाहाभावप्रसङ्गात् । किञ्च नियमतो मणिसद्भावे कार्याभावस्तदभावे कार्यमिति दृष्टत्वात् मणाद्यभाव एव कारणम् अन्यथा कदाचित् मणाद्यभावेऽपि तदभावात् कार्यं स्यात् वन्ध्यासंप्रयोगे तु दृष्टव्यभिचाराददृष्टविलम्बादेव विलम्बः । अदृष्टञ्च क्वचित् साक्षाज्जनकम् अन्यथा परम्परया हेतुरपि न स्यात् । न च समप्रत्नयोः समञ्च निरपवादमव्यवहितोरेकप्रगल्भते नापर इति वक्तव्यं । न च सर्वोत्पत्तिमतामदृष्टं निमित्तं कारणम् अगम्यागमनसाध्ये सुखे तदभावात् तद्विनाऽधर्मात् सुखं स्यात् न धर्मात् । एतेन सुगम्यागमनादुत्पादं सुखमप्युक्तं तथा चागम्यागमनकारणत्वेन न स धर्मः स्येनापूर्ववद्विधिविहितफलकत्वेनानर्थत्वात् । दाहप्रतिकूलादृष्टादेव तदभाव इति चेन्न लक्षोत्तेजकाभावसहितमणजन्यत्वे तत्र दाहार्थिनोऽप्रवृत्तिप्रसङ्गात् तज्जन्यत्वे ततस्तदुत्पादकादेव दाहाभाव इति नियमस्यादृष्टेन प्रथमोपस्थितोपजीव्यत्वाच्च । प्रतिबन्धकाभावहेतुत्वस्य तेनाभ्युपगमात् अदृष्टात् शौचाचमनादेश्च साधारणस्यात्ताद्यन्वयः स्यात् । अशुचेरेव तदुत्पत्तौ, शौचे सति तदभावापत्तेः प्रतिपक्षसन्निधापकस्य तत्त्वे, अदृष्टे सति मणप्रयोगेऽपि दाहानापत्तिः अग्निमणेव सन्निधिदर्शनेन तदसिद्धाभावात् । अस्तु तर्ह्युक्तेजकाभावसहकृतप्रतिबन्धकाभावस्यान्वयव्यतिरेकाभ्यां हेतुत्वम् एवं च केवलोत्तेजकसद्भावे उभयसत्त्वे उभयाभावे च विशिष्टाभावोऽनुमितोहेतुः प्रतिबन्धकत्वञ्च कारणीभूताभावप्रतियोगित्वं तच्च मणाद्यभावत्वेन, न तु प्रतिबन्धकाभावत्वेनेति नान्योन्याश्रयः । एवं प्रतिबन्धकत्वाभिमतमणाद्यादीनामभावकूट एव कारणं तेन मणिसद्भावे मणाद्यभावेऽपि न कार्यम् । अनतिरि-

भावत्वादिष्यते च व्यवहारार्थं तत्स्थानाभिधिक्षया हेतुत्वम्। न चाभावो न कारणं, भावदुष्प्राङ्कतौल्यात्। दृष्टश्च कुद्यसंयोगाभावस्य गतौ, अनुपलम्भस्याभावविज्ञाने, विहितात्करणस्य प्रत्यवाये, निदोषत्वस्य वेदप्रामाण्ये जनकत्वमिति प्राहुः। मैवं विशिष्टं हि नाधोत्तरं येन तदभावोऽनुगतः स्यात् किन्तु विशेषणविशेष्यसम्बन्धा इति तेषां प्रत्येकाभावस्य हेतुत्वे क्वचित् विशेषणस्याभावः क्वचित् भवद्भावः क्वचिदुभयं कारणमिति व्यभिचाराच्चैकमपि हेतुः स्यात्। स्यादेतत् प्रतियोगिभेदादिव प्रतियोगितावच्छेदकविशेषणभेदेऽप्यभावो भिद्यते अन्यथा पृथिव्यां प्रत्येकरूपाभावेऽवगतेऽपि वायौ रूपसंशयो न स्यात्। एवञ्च यथा केवलदण्डसद्भावे, दण्डपुरुषसद्भावे, द्वयाभावे च विशेषणविशेष्योभयाभावप्रयुक्तः केवलपुरुषाभावोऽबाधितानुगतव्यवहारबलात् प्रतीतिसिद्धः तथा विशेष्यस्य प्रतिबन्धकस्याभावे विशेषणस्योत्तेजकाभावस्याभावे द्वयाभावे च केवलप्रतिबन्धकाभावो विशेष्यविशेषणोभयाभावव्यापकोऽनुगत एव दाहकारणमस्तु। अथ विशेषणाद्यभावादेव केवलपुरुषाभावव्यवहार एकधर्मिकत्वादिति चेन्न अनुगतव्यवहारस्यानुगतज्ञानसाध्यत्वात् यत्तु चातीन्द्रियत्वात्। अथोत्तेजकप्रयोगकाले मध्येः कोऽभावः? न तावत् प्राग्ध्वंसाभावौ तयोः प्रतियोगिसमानकालत्वात् न च ग्रामोऽयमासीदित्यत्र यथा ग्रामध्वंसप्रयुक्तग्रामघटत्वेन घटघटस्य ध्वंसएव, तथोत्तेजकाभावध्वंसप्रयुक्त उत्तेजकाभावत्वेन वह्निध्वंस एवेति वाच्यं ध्वंसस्यानन्तत्वे उत्तेजकापनयेऽपि दाहप्रसङ्गाभावात्। नाप्यत्यन्ताभावः, तस्य कादाचित्कत्वाभावादिति चेत् यथा दण्डोपनयापनयदशायां केवलपुरुषाभाव उत्पादविनाशवान् अबाधितकेवलपुरुषाभावतदभावव्यवहारयोरुपपादयितुमशक्यत्वात् तथोत्तेजकोपनयापनयदशायां प्रतिबन्धकाभावोऽपि तथैव स्वीकरणीयः तुल्यन्यायत्वात्। यदि च संसर्गाभावत्वयवधर्म्यौत्तरकालभवति तदा तरीव एव संसर्गाभावोऽस्तु न हि ह्रस्वप्रविशेषबाधे सामान्यबाधो, विशेषान्तरमादायापि तस्य सम्भवात् अन्यथा ह्रस्वादिसंसर्गाभावध्वंसे च ध्वंसोऽपि न सिद्ध्येत् व्यवहारानुपपत्तिश्च तुल्यैव सोऽयमस्यां घटोत्पत्तौ न तु शक्तिवादः। अस्तु वा ध्वंसएवायं संसर्गाभावविभागे जन्याभावत्वेन ध्वंसस्य विभजनात् न चैवं विनाशवत्त्वेन प्रागभाव एव स्यात्, परिभाषाया अपर्यनुयोज्यत्वात्। यद्वाऽत्यन्ताभाव एवायं तस्य नित्यत्वेऽपि कादाचित्कप्रतीतिकार्यानुदयौ प्रत्यासत्तिकादाचित्कत्वात् प्रत्यासत्तिश्च विशेषणाभावो विशेष्याभाव उभयाभावश्च तदैव विशिष्टात्यन्ताभावसत्त्वादिति तच्च यदि प्रतीतविशेषणावच्छेदेन विद्यमानस्यैव विशेषस्य ध्वंसः स्यात् तदा जपकुसुमादौ तविशेषणावच्छिन्नत्वेन प्रतिपन्नं घटस्य विनाशः स्यात् इति जपकुसुमादेः विद्यमानस्य विनष्टत्वे चाप्रतीतेः मिथ्या विनष्टा पुरुषो न विनष्ट इति विपरीतावाधितप्रत्ययाच्च न विशेषणाभावेऽपि विशेषध्वंसः ग्रामोऽयमासीत् पुरुष इत्यादौ सविशेषणे इति न्यायेन विशेष्यवति ग्रामकैवल्यध्वंस एव प्रतीयते ध्वंसस्य ध्वंसानुपपत्तेः न विद्यमानस्य ध्वंसः। एतेनोत्तेजकसद्भावे सत्युत्तेजकाभावविशिष्टमन्त्रेरुत्पन्नध्वंसस्य उत्तेजकापनयसमये ध्वंसो जातोऽध्वस्तश्च स इति कारणमिति न विफलं उत्तेजकापनयस्यत्यपास्तं, विद्यमानध्वंसस्य ध्वंसाभावात्। न च ध्वंसान्तरं संसर्गाभावो विशिष्टाभाव इति वाच्यम् उत्पन्नाभावस्य विशिष्टप्रत्ययहेतुतया ततोऽपि विद्यमानस्य विनष्टत्वप्रत्ययापत्तेः। नापि विशिष्टाभावोऽत्यन्ताभावः। तथा हि स एव क्वचित्विशेषणाभावसहितः क्वचिद्विशेष्याभावसहितो दाहकारणमिति अननुगमस्तदवस्थ एव विशेषणविशेष्याभावयोः प्रत्यासत्तिव्यवच्छेदकानुगतधर्माभावात्। अथ विशिष्टविरोधित्वं विशेषणविशेष्याभावयोरनुगतं तदवच्छेदकमस्ति तयोश्च सत्त्व एव विशिष्टात्यन्ताभावसत्त्वादिति चेत्तर्हि विशिष्टविरोधित्वेनानुगतेन तयोरेव विशिष्टाभावत्वेन दाहव्यवहारादौ जनकत्वमस्तु किं तदुपजीविनातिरिक्तविशिष्टाभावेन। अथोत्तेजककाले विद्यमानात्यन्ताभावानुद्धारायोत्तेजकापनये उत्तेजकाभावव्यक्तयो जाता तदवच्छिन्नमन्त्रेरभावो न तत्रेति तदा न दाहोदयः तत्तदुत्तेजकाभावविशिष्टमन्त्रेरभावकूटस्य जनकत्वादिति चेन्न तत्तदुत्तेजकाभावानामननुगतत्वेनानुगतविशिष्टाभावव्यवहारानुपपत्तेः उत्तेजकाभावत्वेनानुगमेऽतिप्रसङ्गः। अथ विशेष्यविशेषणाभावयोर्विशिष्टविरोधित्वमनुगतं कारणतावच्छेदकं यत्र तदन्तराभावस्तत्र न विशिष्टं यत्र विशिष्टं तत्र न तयोरभाव इति सङ्कानवस्थाननियमस्य विरोधस्यानुभवसिद्ध-

त्वादिति चेन्न सङ्कानवस्थाननियमो न परस्परविरुद्धरूपतया विशेष्यविशेषणाभावस्य प्रत्येकं विशिष्टाभावतया तत्प्रत्येकाभावाभावस्य विशिष्टत्वापत्तेः तथा च विशेष्यविशेषणयोः प्रत्येकं विशिष्टत्वापत्तेः तदभावस्य तत्त्वात् न चोभयाभाव उभयविशिष्ट एवं द्वाभावद्वयं विशिष्टाभावो न तु प्रत्येकभावरूप इति प्रत्येकाभावाद्विशिष्टव्यवहारो न स्यात्। नापि परस्परविरुद्धव्याप्यत्वं तदाक्षेपकत्वं वा विशेष्यविशेषणाभावस्य विशिष्टाभावत्वेन तदव्याप्यत्वात् तदनाक्षेपकत्वाच्च भेदे तयोरभावात्। एतेनान्यदपि विशिष्टव्यवहारविरोधित्वादिनानुगतत्वमपास्तं केनाप्यनुगतेन विशेष्यविशेषणाभावस्य विशिष्टाभावत्वे प्रत्येकाभावस्य विशिष्टाभावत्वेन तदव्याप्यत्वात् तदनाक्षेपकत्वाच्च भेदे तयोरभावात्। विशेष्यविशेषान्यतरमात्रस्य विशिष्टत्वापत्तेः तदभावाभावस्य तत्त्वादित्युक्तत्वात् तस्माद्विशेष्यविशेषाभावो विशेष्यावच्छिन्नविशेषाभावो न विशिष्टाभाव इति।

"अत्रोच्यते विशेष्यविशेषयोः सम्बन्धाद्विशिष्टव्यवहार इति तयोः सम्बन्धाभावाद्विशिष्टाभावव्यवहार इति घटतदभावव्यवहारावित्र घटसत्त्वासत्त्वाभ्याम्। न हि तयोरसम्बन्धे विशिष्टव्यवहारः। न च तदभावे सति न विशिष्टाभावव्यवहारः। यस्य च यत्र सम्बन्धः स एव तत्र तस्य वैशिष्ट्यम् स च सम्बन्धाभावोविशेष्याभावाद्विशेषाभावादुभयाभावात् सर्वत्राविशिष्ट एकस्तेषां व्यापकोऽनुगतविशिष्टाभावव्यवहारकारणम् दृष्ट दण्डी पुरुषो नास्तीत्यत्र तथा दर्शनात्। अतएव दण्डमात्रसद्भावे दण्डपुरुषसद्भावे च केवलपुरुषयोः सम्बन्धाभावः सर्वत्रास्तीत्यनुगतः केवलपुरुषतो व्यवहारः। एवञ्च प्रतिबन्धकोत्तेजकाभावयोः सम्बन्धाभावो दाहकारणं स च प्रतिबन्धकाभावे प्रतिबन्धकोत्तेजकसद्भावे उभयाभावे चास्ति सर्वत्र प्रतिबन्धकोत्तेजकाभावयोः सम्बन्धो नास्तीति प्रतीतेः। नन्वेवं यत्र प्रतिबन्धकोत्तेजकाभावौ तत्रापि दाहः स्यात् अधिकरणाभावयोरतिरिक्तसम्बन्धाभावादिति चेन्न तदभावेऽपि स्वरूपसम्बन्धाभावात् सर्वत्र स्वरूपसम्बन्धादेवाधिकरणाभावयोर्वैशिष्ट्यप्रतीतेः तथापि प्रतिबन्धकोत्तेजकाभावावेव स्वरूपसम्बन्धः तयोरभावश्च प्रतिबन्धकाभाव उत्तेजकत्व दाहकारणं तथाचोभयाभावे उत्तेजकसत्त्वे परं दाहः स्यात् उत्तेजकवति च प्रतिबन्धके दाहो न स्यादिति चेन्न अधिकरणाभावावेव स्वरूपसम्बन्धस्तयोर्घटवद्भूतलचत्वरीयतदभावयोर्विशिष्टप्रत्ययजननयोग्यत्वमस्ति घटवति कदापि घटाभावप्रत्ययानुदयात् तदिहापि प्रतिबन्धकोत्तेजकाभावयोर्विशिष्टप्रत्ययजननयोग्यत्वं स्वरूपसम्बन्धः, अन्यथोत्तेजकवति प्रतिबन्धके चत्वरीयोत्तेजकाभावविशिष्टप्रत्ययापत्तेः। तादृशस्वरूपसम्बन्धाभावश्च प्रतिबन्धकाभावे प्रतिबन्धकोत्तेजकसद्भावे उभयाभावे चाविशिष्ट एव। यद्वा यदण्डपुरुषाभावे दण्डो पुरुषो न प्रतियोगी तस्य दण्डित्वाभावात् किन्तु तदन्यः, तस्य चाभावे दण्डिसद्भावेऽपि दण्डमात्रसत्त्वे उभयासत्त्वे चाविशिष्ट इति। तस्मात् केवलपुरुषाभावव्यवहारोऽनुगतः तदुक्तं न हि दण्डिनि सति यदण्डानामन्येषां नाभावः किन्तु दण्डाभावस्यैवेति युक्तम् अन्यथा तदन्येषामिति पदस्य व्यर्थत्वापत्तेः। तथा केवलप्रतिबन्धकाभावे उत्तेजकसङ्कृतः प्रतिबन्धको न तु प्रतियोगी तस्य केवलत्वाभावात् किन्तु तदन्यः, तदन्यस्य च प्रतिबन्धकस्याभावे उत्तेजकसहितप्रतिबन्धकसत्त्वे उत्तेजकमात्रसत्त्वे उभयासत्त्वे विशिष्ट इति नानुगमः उत्तेजकापनये केवलप्रतिबन्धकोऽस्तीति न तदभाव इति दाहो न भवति। ननु न प्रतिबन्धकाभावः कारणम् एकदण्डान्वये घटोत्पत्तिवत् प्रतिप्रतिबन्धकसत्त्वेऽपि तदन्यप्रतिबन्धकाभावेऽपि कार्योदयात् न हि यावत्कारणतावच्छेदकावच्छिन्नं तावदन्यनेऽपि कार्यमिति चेन्न प्रतिबन्धकाभावत्वेन न हेतुत्वं अन्योन्याश्रयात् किन्तु तत्तन्मत्याद्यभावत्वेनेत्युक्तत्वात् तत्त्वेऽपि वा घटे दण्डसलिलादिकप्रतिबन्धकाभावकूटहेतुत्वात्। यद्वा प्रतिबन्धकतावच्छिन्नप्रतियोगिक एक एवाभावः कारणं स च यावद्विशेषाभावनियत इति न प्रतिबन्धकसत्त्वेऽपरप्रतिबन्धकाभावेऽपि कार्योदयः प्रतिबन्धकस्य च संसर्गाभावो हेतुः तेन तत्सत्त्वे तदन्योन्याभावेऽपि न कार्यम् अन्वयव्यतिरेकाभ्यां व्याप्रिकारणत्वयोर्यद्वे संसर्गाभावस्य त्वयाऽपि हेतुत्वाङ्गीकारात् अन्यथा कार्यव्याप्यकयोः सत्त्वे तदन्योन्याभावे च कार्यव्याप्याभावापत्तौ कार्यकारणयोर्व्याप्यव्यापकभावाभावे व्याघातात्। किञ्च तथापि प्रतिबन्धकाभावे यत्किरक्षीति तत्सत्त्वे तदन्योभावमादाय यत्किञ्चित्त्वप्रसङ्गः। न च स दुर्वचः न वा प्रागभावत्वादिनानुगमव्यभिचारौ। प्रतियोग्यधिकरणयोः संसर्गसारोप्य यो निषेधः स संसर्गाभावः भूतलं घटसंसर्गो नेत्यत्र भूतले घटसंसर्गस्य

संसर्गो नारोप्यते किन्तु तादात्म्यम्। वयन्तु ब्रूमः यत्र प्रतियोगिनमधिकरणे समारोप्य निषेधागमः स संसर्गाभावः यत्र चाधिकरणे प्रतियोगितावच्छेदकमारोप्य निषेधावगमः सोऽन्योन्याभावः भूतलं न घट इत्यत्र भूतलस्य घटत्वावगमात् घटत्वमेव च घटतादात्म्यम्। आरोपस्य हेतुत्वे किं मानमिति चेत् मा भूत्तावदन्यथा, इदमिह, नेदमित्यबाधितविलक्षणव्यवहारस्यैव तत्र मानत्वादिति। ननु प्रतिबन्धकाभावान्नाभावो न हेतुः तस्मिन् सत्यपि संसर्गाभावात् न हि करादौ मणित्वनाभावः तत्संयोगाद्वान्नाभावो वा मणेः स्वावयवदृत्तित्वात् संयोगस्य चाव्याप्यवृत्तित्वात् अतएव न तत्प्रध्वंसप्रागभावौ हेतू तयोः करादावदृत्तेः गुणकर्मादेश्च प्रतिबन्धकत्वानापत्तेश्च तस्य जन्यधर्मानाश्रयत्वेन तत्तयोरभावात् न चान्यः संसर्गाभावोऽस्तीति चेन्न संसर्गावच्छिन्नप्रतियोगिकत्वाभावविशेषस्य प्रतिबन्धकेऽनभ्युपगमात् न च समवायावच्छेदेन संसर्गितया वह्न्नाभाव एव तत्रैवान्वयव्यतिरेकावधारणात्। अतएव प्रागभावप्रध्वंसयोस्ते समयविशेषावच्छिन्नत्वान्नाभावेनैवोपपत्तौ न तयोः सिद्धिः वह्न्नाभावोऽव्याप्यवृत्तिः तस्य चैकत्र भावाभावे क्वचिद्भेदोऽवच्छेदकः क्वचित्काल इति चेन्न तत्र विद्यमानतावि रोधित्वेनैव कपाले न घट इति प्रतीतिवैलक्षण्यात् नत्वेवं भूतले घटाभावप्रतीतिः। अन्ये तु भविष्यति घटो घटो नष्ट इति विलक्षणप्रतीत्या वह्न्नाभावमेकेन समयितुमशक्यत्वात् अन्य एवायं संसर्गाभाव इत्याहुः। एतेन विशेषणाभावविशेष्याभावतदुभयाभावघटितसामग्रीत्रयमेवास्तु हेतुः दाहे च जातित्रयकल्पनमिति प्रत्युक्तं अनुगतहेतुसत्त्वात् दाहवैजात्यस्य योग्यानुपलब्धिबाधितत्वात् व्यक्तियोग्यत्वेन जातियोग्यत्वे मानं योग्येऽयोग्यजात्यभावात्। ननु प्रहरं मा दहेत्यादौ यावधिमन्त्रपाठे मन्त्रविनाशे दाहः स्यात् न च संकल्पविषयकालविशेष एव तत्र प्रतिबन्धकः संकल्पनाशसमयस्य स्वतोऽविशेषात्। न च मन्त्रपाठजनितमदृष्टमेव तत्र प्रतिबन्धकं तत्कालदाहाप्राप्तिरूपफलनाश्यत्वेनाप्ये दाहाप्रतिबन्धादिति वाच्यं प्रतिबन्धकस्याविच्छिन्नत्वेनानिश्चितत्वेनाहष्टाजनकत्वात्। तदाचारस्याविगीतत्वेन तुल्यादृष्टजनकत्वादिति चेत् मैवम् यद्देशप्रज्ञानाच्छिन्नसंस्कारविषयकालस्य प्रतिबन्धकत्वात् प्रतिबन्धकतावच्छेदकानामप्रतिबन्धकत्वात् न चक्षिमनपकर्षणां मन्त्रादीनां प्रतिबन्धकत्वमतः शक्तिसिद्धिः। न च कार्यानुत्पाद एव प्रतिबन्धः तज्जनकमेव प्रतिबन्धकमिति वाच्यं कार्यानुत्पादो हि तत्र न प्रागभावो न वा तदुत्तरकाल संसर्गः तस्य मन्त्रादिजन्यत्वात् इति चेन्न मन्त्रदीक्षाप्रतिबन्धकत्वात् तत्प्रयोक्तारस्तु प्रतिबन्धकाः ते च क्षिप्रकरा एव मन्त्रादौ कार्यकारणोपचारात् स्वार्थिकफलप्रत्ययात् वा तथा व्यपदेशः। प्रतिबन्धकत्व सामग्रीविरहः मन्त्राद्यभावघटितसामग्रीविरहः स च मन्त्रादिरेव तदभावाभावस्य तत्त्वात्। नन्वास्तु प्रतिबन्धकाभावो न कारणं न वा शक्तिः, किन्तु तत्तत्कालीनदाहविशेषं प्रति तत्तत्कालप्रतिबन्धोत्तरत्वस्य कारणत्वमिति प्रतिबन्धकाभावः कारणतावच्छेदको न तु कारणं दण्डत्ववत् आकाशाद्येकव्यक्तिकेन यथा कारणत्वं क्वचित् प्रतिबन्धेऽव्यवस्थ यद्वोत्पत्तेः किन्तु भेर्यादेस्तथा कारणत्वमिति तत्प्रतिबन्धे यद्वोत्पत्तिर्नेत्याहुः। तत्र वह्निप्रतिबन्धकाभावयोरन्वयव्यतिरेकतौल्येनोभयत्रापि कारणत्वात् नत्वेकमवच्छेदकं विनिगमकाभावात्। किञ्च यद्यपि सत्यपि यदभावात् कार्याभावस्य कारणत्वमायाति न तु तदवच्छेदकत्वं न हि कार्येऽयोग्यावच्छेदः कारणत्वं किन्तु नियतपूर्वसत्त्वं यच्च सहकारिविरहप्रयुक्तकार्याभावेऽव्यभिचरितम्। अन्यथा चक्रसहितदण्डत्वेन कारणत्वे सहकार्युच्छेदः। यस्य यद्धर्मावगमश्चैव नियतपूर्ववर्त्तित्वमवगम्यते तदवच्छेदकं दण्डत्वमिव। सहकारी तु न तथा। ननु मा भूत् अदृष्टापत्तिः मन्त्रो भावमनुभावन्तु स्यात्। तथाहि स्थिरोऽवयवी जनकदशाविशिष्टावस्थिरजनकदशाव्याप्यभावभूतधर्मवान् जनकत्वात् कृष्णकुठाराक्षीणकुठारवत् दाह्यासंयुक्तावस्थेदाह्यासंयुक्तावस्थित्वादेः प्रतिबन्धकत्वे संयोगादेरजनकदशाव्याप्यत्वेन तदतिरिक्तातीन्द्रियभावभूतधर्मसिद्धिः। यद्यपि शक्तेर्भावहेतुत्वेन नाजनकदशाव्याप्यत्वं तथाप्युक्तविशिष्टाया सख्यत्वम् यद्वा धर्मेऽतीन्द्रियत्वं विशेषणं न च दृष्टान्तासिद्धिः तुल्यधारत्वेऽपि लौहविशेषघटितकुठारे विलक्षणच्छिदाक्रियारूपकार्यजनकादतीन्द्रियत्वसिद्धेः। अथ वा तथाभूत एव वह्निः कार्यानुकूलविशिष्टातीन्द्रियधर्मसमवायी जनकत्वात् आत्मवत्। अतीन्द्रियत्वञ्च यद्यपि न साक्षात्कारविषयत्वं अनित्यसाक्षात्कारविषयत्वं योगजधर्मजन्यसाक्षात्कारविषयत्वं वा परं तं वा प्रत्यक्षसिद्धेः सुखादिप्रत्यक्षजनकज्ञाना-

विषयत्वमैन्द्रियकाणामपि। तथापि संयोगाद्यन्यतर-प्रत्यासत्तिजन्यसाक्षात्कारविषयत्वसम्भवादिविशेषम् अन्यत्वरञ्च तदन्यान्यत्वं न चाभावातीन्द्रियत्वं तस्यासिद्धेः। न च वह्नौ स्थितिस्थापकेनार्थान्तरं तत्र तदभावात् क्रियाया वेगेनाहतवदात्मसंयोगे वा उत्पत्तेः, नचात्मत्वं नित्यत्वं वोपाधिः स्पर्शैकत्वादिमति द्व्यणुके साध्याव्यापकत्वात् यद्वा पिण्डीभूतोवह्निः दाहारम्भकातीन्द्रियभावभूतधर्मवान् दाहजनकत्वात् आत्मवत्। नचाऽनित्यत्वमुपाधिः अहतस्य दाहानुकूलत्वेनाहतसाध्याव्यापकत्वात्। अथ वा करवह्निसंयोगः कार्यानुकूलातीन्द्रियधर्मसमवायी जनकत्वात् आत्मवत् द्व्यणुकवच्च। न चात्मत्वं द्रव्यत्वं वोपाधिः द्व्यणुकैकत्वसामादौ साध्याव्यापकत्वात्। यद्वा प्रतिबन्धकदशायां प्रत्यक्षसकलदाहहेतुसमवहितोदाहजनकोवह्निर्जनकदशाहत्तिकार्यानुकूलभावभूतधर्मशून्यः जनकत्वात् तीक्ष्णात् कृशवत् यद्वा तथाभूतोवह्निः दाहजनकदशाहत्तिदाहानुकूलभावभूतधर्मशून्यः दाहाजनकत्वात् दाहासंयुक्तवह्निवत् अनुकूलत्वञ्च कार्याभावव्याप्याभावप्रतियोगित्वं कारणतदवच्छेदकसाधारणं दृढदण्डत्वेन कारणत्वदृढाभावादपि कार्याभावदर्शनादिति। उच्यते। साध्यं विनाप्युभयसिद्धप्रतिबन्धकाभावादेव जनकत्वादिहेतुसम्भवात् विपक्षबाधकाभावेनानुमानानामप्रयोजकत्वं यदि च सहचारदर्शनव्यभिचारादर्शनोपाध्युपलम्भमात्रादेव व्याप्तिग्रहस्तदा यत्किंचिद्व्यक्तिरं तेनैव हेतुना यत्किंचिदतिरिक्तत्वं साधेयं यत्किंचिदतिरिक्तदाहानुकूलातीन्द्रियधर्मसिद्धिः एवं तत्तदतिरिक्तत्वस्य प्रत्येपत्तेनैव हेतुनाऽनन्ततादृशधर्मसिद्धिप्रसङ्गः। द्वितीयादितादृशधर्मं विनापि प्रथमानुमितयत्किंचिदेव जनकत्वाद्युपपत्तेः न तादृशानन्त्यसिद्धिरिति चेत् हन्तैवं शक्तिं विनापि तदसिद्धेः किं शक्त्या। यत्तीश्वरानन्त्यञ्च शक्त्यानन्त्यमित्युक्तं तदबोधात् कार्यमात्रे हि कर्तृत्वेन कारणत्वं नत्वीश्वरत्वेन द्विकर्तृकत्वादिना वा गौरवात् घटे त्वार्थः समाजः। एवञ्च जनकदशाव्याहत्तत्वेनैव प्रयोजकत्वं न तु भावभूतत्वेनेति गौरवात्। अपि च भावकार्यमात्रस्य समवायिकारणजन्यत्वेन शक्तेरपि तथात्वात् शक्त्यनुकूला शक्तिरपरा समवायिकारणे मन्तव्या एवं द्वापि समवायिकारणजन्येऽपि तदनुकूलशक्तिस्वीकारे शक्त्यनवस्था। किञ्च प्रथमानुमाने जनकत्वं न सहपयोग्यत्वं वह्नौ कुठारे च तदभावात् किन्तु कार्यानुपधानं तथा च तदुपधानदशायामपि वह्नौ शक्तिः कुठारे तच्छक्तिमिति बाधोद्धारान्नाधिक्यम्। लौहविशेषाणामेव सातिशयच्छिदाजनकत्वमतोनातीन्द्रियतच्छक्तिसिद्धिः। अस्मिंश्चतुर्थे वह्निरिन्द्रियाप्रत्यक्षत्वसमुपाधिः तुल्ययोगक्षेमत्वेऽपि सन्दिग्धोपाधित्वेन दूषकत्वात्। अपिच जनकत्वस्य केवलान्वयित्वेन व्यतिरेकाप्रसिद्ध्या नान्वयव्यतिरेकी न च जनकत्वाभावस्य शक्त्यैव प्रसिद्धिः अन्योन्याश्रयात् न च गुरुवचनपरम्परातएव वाक्यार्थतया तत्सिद्धिः अन्यत्र सिद्धार्थस्याप्रमाणत्वात्। न च परार्द्धसंख्यायां साध्यजनकत्वव्यतिरेकयोः प्रसिद्धिः अप्रत्यक्षायाः यद्वैकवेद्यायास्तस्याः प्रत्यक्षेण साध्यहेतुव्यतिरेकयोर्ग्रहीतुमशक्यत्वात्। एतेन पक्षापूर्वेऽपि तत्प्रसिद्धिरपास्ता। स्यादेतत् तृणारणिमणीनां वह्नौ कारणत्वादेकशक्तिमत्त्वसिद्धेयमेकता एकजातीयकार्ये एकजातीयकारणत्वनियमात्। यद्यवान्तरजातीये तेषां प्रत्येकं कारणत्वमिति चेद्व वह्निजातीयलाघवक्षतिरापत्तेः कारणगतैकरूपमर्यादाय कार्यगतबहुतररूपकल्पने गौरवात् तृणारणिमणिप्रभववह्नित्वावान्तरजातेरनुपलब्धिबाधितत्वाच्च। यत्र च तत्तदिन्धनप्रयोज्यं प्रदीपादारूढहनादौ वैजात्यमनुभूयते तत्र कारणे त्वेकशक्तिमत्त्वमपि नास्ति, किन्तु गोमयदहिकप्रभवदहिकादिषु वैजात्यकल्पने तत्प्रभवदहिकेऽपि वैजात्यं कल्प्यम् एवं तत्प्रभवत्वं तत्प्रभवेष्वपीति वैजात्यानन्त्यं विजातीयकारणानां विजातीयकार्यजनकत्वनियमात्। न च तयोर्नैको दहिको बुद्धिव्यपदेश्ययोरविशेषात्। यदि विजातीयेष्वेककार्यां शक्तिः समवेयात् न कार्यविशेषात् कारणविशेषः तदभावात्तदभावः कार्यानुभवेत तदभावेऽपि तज्जातियशक्तिमतोऽन्यस्मादपि तत्त्वापत्तिसम्भवादिति चेत् वह्निदहिकादावेवमेतन्निरूपितनियतवह्न्यादिकारणत्वे धूमादौ कुतो न तदनुमानम् अन्यथा कार्यवैजात्येऽपि तृणस्य वह्निविशेष एव वह्नित्वेन धूमविशेष एव कारणत्वं न तु धूममात्रे तृणादिप्रभवत्वप्रज्ञानानन्तरं वह्न्यवान्तरजातियवत् वह्नि-तदन्यजन्यत्वज्ञानानन्तरं धूमावान्तरजातियज्ञो भविष्यतीत्यव्याहतम्। बाधकं विना धूमत्वेन वह्निकार्यतेति चेत्तर्हि बाधकं विना धूमं प्रति वह्नित्वेन कारणतेत्यपि तुल्यम्। यत्तु तृणत्वेन कारणत्वप्रज्ञोपजीव्यत्वात्तद्व्यावर्त्यं वह्नौ जातिविशेष एव

कल्प्यते इति तत्र वह्नित्वेन कार्यतावच्छेदकार्थं तृणादौ शक्तिकल्पनौचित्यात्। यथा चान्वयव्यतिरेकाभ्यां तृणफुत्कारयोः परस्परसहकारित्वं तथैव तच्छक्त्योरपि परस्परसहकारित्वेन वह्नेरनुकूलत्वं तथैव कार्यदर्शनात् एवं तृणारणिमणिफुत्कारनिर्मन्थनतरणिकिरणानां वह्न्यनुकूलशक्तिमत्त्वेन कारणत्वेऽपि फुत्कारेण तृणादेव, निर्मन्थनेनारणेरेव प्रतिफलिततरणिकिरणैर्मणेरेवाग्न्युत्पत्तिः न तु मणिफुत्कारादिभ्यो, मणिफुत्कारशक्त्योः परस्परसहकारित्वविरहात्। यत्तु तृणफुत्कारादिश्लोमत्वे विशिष्टे शक्तिरिति तत्र तृणत्वेन गृहीतकारणतायाः भङ्गप्रसङ्गादिति। उच्यते। तृणारणिमणिफुत्कारादिव्यक्तीनामानन्त्येन प्रतिव्यक्ति भावहेतुज्ञानलाघवशक्तिस्वीकारे गौरवं तावदनन्तव्यक्तिजन्यावान्तरवह्निव्यक्तिषु जातित्वकल्पने लाघवमिति तदेव कल्प्यते न च जातौ योग्यानुपलब्धिबाधः गोमयप्रभवदधिकप्रभवदधिकयोर्वा पाटवत्वकपिलत्वव्यङ्ग्यवैजात्यस्य प्रत्यक्षसिद्धत्वात् तृणजन्यनानावह्निषु तृणजन्यत्वज्ञानानन्तरं मणिजन्यव्यावृत्त्याऽनुगतबुद्धिरस्ति। जातिविषया तृणजन्यत्वेनोपाधिनाऽसाधीति चेन्न बाधकं विनानुगतबुद्धेः सद्भावेन जातिविषयत्वनियमात् न च। गोमयप्रभवदधिकप्रभवदधिकजातिपरम्परायामननुगतत्वापत्तिः गोमयजन्यदधिक-प्रभवत्वजातेः सत्त्वात् वह्निमात्रे च दाहकार्यवानयवयः तत्संयोगः सेवनादिश्च कारणानि न तु तृणादिकं विनापि, तदुत्पत्तिप्रसङ्गः विशेषसामग्रीमादायैव सा, साध्यसामग्र्याजनकत्वात्। ननु तृणारणिमणीनां वह्नौ कारणत्वपक्षे शक्तिवैजात्ययोरन्यतरकल्पनं तदुभयस्य नान्वयव्यतिरेकाभ्यां व्यभिचारात्। अथारणिमणिभावति स्तोमविशेषे तृणं विना वह्निव्यतिरेकः तृणान्वयवह्निरित्यन्वयव्यतिरेकाभ्यां तत्रैव स्तोमे तदितरहेतुसकलसमवधाने तृणान्वयेऽवश्यं वह्निरिति नियतान्वयेन रासभादिव्यावृत्तेन तृणादि कारणत्वपक्ष इति चेन्न तृणं विनापि वह्निरिति ज्ञाने सति नियतपूर्ववर्तित्वस्य कारणत्वस्य गृहीतुमशक्यत्वात्। तृणाजन्ये वह्नौ मणेः कारणत्वपक्ष इति चेत् व्यभिचारेण वह्नौ तृणजन्यत्वाग्रहे तदजन्यत्वस्याग्रहात् वह्निमात्रस्यैव उपजन्यत्वाच्च। न च मणिजन्यत्वेन तृणजन्यत्वपक्ष इति, अन्योन्याश्रयात्। यत्तु यत्र कारणतायाग्रहं नास्ति तत्र व्यभिचारज्ञानग्रहपरिपन्थीति तत्र अबाधितनियतपूर्ववर्तिताभावपक्षे तदृग्रहसामग्र्यात् अभावप्रमायां भावज्ञानानुदयादिति उच्यते उक्तप्रकारेणैव निश्चितकार्यतानिरूपितकारणतावच्छेदकरूपवत्त्वं तृणस्य तृणनिश्चितनिरूपितकार्यतावच्छेदकरूपवत्त्वं वह्नेर्वा कार्यकारणभावग्राहकं परिच्छिद्यते। न तु तृणत्वेन कारणत्वं वह्नित्वेन वा कार्यत्वं तच्चोभयथापि सम्भवति वह्नित्वेन कार्यतया तदनुकूलशक्तिमत्त्वेन तृणादीनां कारणतया वह्नित्वावान्तरजातिविशेषेण कार्यतया वा क्वचित्क्वचिन्नियमकल्पनमेव। अथ तृणारणिमणीनामभावत्वेन कार्यमित्यन्वयव्यतिरेकाभ्याम् अभावत्वयाभावत्वेन तृणादीनां कारणत्वमिति न व्यभिचारः अभावाभावत्वस्य भावपर्यवसन्नत्वादिति चेत् अभावत्वयाभावः किं तृणादिप्रत्येकव्यापकोऽथवैक एव उत तृणादि प्रत्येकमेव। आद्येऽभावस्य कारणत्वमिति किमायातं तृणादिकारणत्वे, द्वितीये तृणस्य तारणिमणित्वाभावाभावत्वं भावाभावत्वतदुभयापत्तेः। एतेनाभावत्वे कार्यं न तदभावे कार्यमित्यन्वयव्यतिरेकाभ्यां तृणादिप्रत्येकस्य कारणत्वपक्ष इति परास्तम्।

**दाहकाष्ठ** न० दाहस्य दाहार्थं काष्ठम्य। दाहानुरूपि गन्धद्रव्यभेदे राजनि०।

**दाहघ्न** न० दाहं हन्ति हन-टक्। देहदाहनाशके औषधादिभेदे तत्र चक्रद० उक्तं यथा।

"अतघौतघृताभ्यक्तं दिग्धाहा यवकङ्कुभिः। कोशाम्बलकयुक्तैर्वा धान्याम्बुभिरपि बुद्धिमान्। आदद्येत तस्य सर्वाङ्गमारनालाढ्यवाससा। शाम्यज्जेनाथ शुक्लेन चन्दनेनानुलेपयेत्। चन्दनाम्बुकणाखण्डितालङ्कोपवीजितः। सुखाद्दाहार्दितोऽम्भोजकदलीदलसंस्तरे। परिक्षेत्रावगाहेषु व्यजनानाच्च सेवने। शस्यते शिशिरं तोयं तृष्णादाहोपशान्तये। चीरैः चीरिकयावैव सुगीतैश्चन्दनान्वितैः। चन्दनं दाहं प्रशमयेदेतैश्चान्यैश्च शीतलैः। कृष्णादिधात्रयपर्णीभिर्जीवकाद्यैश्च साधितम्। तैलं घृतं वा दाहघ्नं वातपित्तविनाशनम्। फलिनीकोशसेव्याम्बुलेपनं कूटसटम्। कार्पासबीजकरञ्जोपेतं दाहे श्रेष्ठं प्रलेपनम्। क्षीरेरण्यार्कक्षीरचन्दनक्षोदवारिणा। संपृक्तमवगाहेत क्षीणो दाहार्दितो नरः"।

**दाहज्वर** पु० दाहप्रधानो ज्वरः। देहज्वालाविशेषरूपदाहकारके ज्वरभेदे "पीतं हविष्यमूलन्तु पर्युषितं जलेन वै। सार्द्धं विनाशयेद्दाहज्वरञ्च परमेश्वर!" माधवे १८१ ख०।

दाहनागुरु न०दाहनस्य दाहनाय वागुरु। दाहागुरुवृक्षि गन्धद्रव्यभेदे राजनि०।

दाहमय त्रि०दाहेन प्रचुरः। दाहप्रधाने ज्वरादौ। "तत्र दाहमयत्वे भूमोक्षादयः" सा०द०। [लिका०।

दाहसर पु०दाहार्थं क्षियतेऽसौ क्षि-आधारे अप्। श्मशाने

दाहहरण न०दाहो क्षियतेऽनेन क्षि-ल्युट् षिच्-कर्त्तरि ल्युवा। १वीरणमूले (वेखारमूल)शब्दच०।२दाहनाशके त्रि०

दाहागुरु न० दाहस्य दाहार्थमगुरु। खनामख्याते गन्धद्रव्यभेदे राजनि०। तत्काष्ठस्य दाहेनैव गन्धोत्पादनात् तस्य तथात्वम्। [गरदः मतुः। स्त्रियां ङीप्।

दाहिन् त्रि० दहति दह-णिनि। दाहके "अगारदाही

दाहुक त्रि० दह-वा०उकञ्। दाहके "नाग्न्यादिदाहुको। भवतीति विज्ञायते" आह्नि० स्मृ० २।८।१०

दाह्य त्रि०दह-कर्म्मणि यत्। १दहनीये दग्धव्ये २दाहार्हे च। "अच्छेद्योऽयमदाह्योऽयमक्लेद्योऽशोष्य एव च" गीता

दिक् पु० दिशु आयते कै-क। विंशतिवर्षवयस्के करिशावके करभे शब्दर०।

दिक्कन्या स्त्री दिश एव कन्याः। १दिग्रूपकन्यायाम्। "दिक्कन्याभिः पवनचमरैर्वीज्यमानः" भारतरत्नम्। दिश एव कन्याः ब्रह्मकन्याः। ब्रह्मणः कन्यारूपायां दिशि तासां ब्रह्मकन्यात्वेनोत्पत्तिकथा वराहपु० यथा

"शृणु राजन्यवहितः प्रजापाल! कथामिमाम्। यथा दिशः समुत्पन्नाः श्रोत्रेभ्यः पृथिवीपते!। ब्रह्मणः सृजतः सृष्टिमादिसर्गे समुत्थिते। चिन्तामुन्मुद्रती को मे प्रजाः सृष्टिं करिष्यति। एवं चिन्तयतस्तस्य सर्वकार्यं व्रजत्यिह। प्रादुर्बभूवुः श्रोत्रेभ्यो दश कन्या महाप्रभाः। पूर्वा च दक्षिणा चैव प्रतीची चोत्तरा तथा। ऊर्द्ध एव ध्रुवस्तस्याः कन्या ह्यासंस्तदा नृप!। तासां मध्ये चतस्रस्तु कन्याः परमशोभनाः। याः पप्रच्छुः पितामहं गान्धर्व्येण समन्विताः। ता ऊचुः प्रणताहेवं प्रजापतिमकल्मषम्। सर्वकार्याणि भो देहि देवदेव! प्रजापते!। यत्र तिष्ठामहे सर्वा भर्तृभिः सहिताः सुखम्। पतयश्च महाभाग! देहि नोऽव्यङ्गसम्भव!। ब्रह्मोवाच ब्रह्माण्डमेतत् शृण्वोघ्राः! शतकोटिप्रविस्तरम्। यस्मात्रे खेचया तुष्टा उपयाता मा विलम्बत। भर्तॄंश्च वः प्रयच्छामि रूपश्रियोऽनघाः!। यथेष्टं गम्यतां देवो यस्या यो रोचतेऽधुना। एवमुक्ताश्च ताः सर्वा यथेष्टं प्रययुस्तदा। ब्रह्मा सर्गे तु तूर्णं तान् लोकपालान् महाबलान्। दत्त्वा तु लोकपालांस्तु ताः कन्याः पुनराब्रुवन्। विवाहं कारयामास ब्रह्मा लोकपितामहः। एकस्मिन्वाय च प्रादादन्यस्मैऽन्यां यमाय च। निर्ऋताय च देवाय वरुणाय महात्मने। वायवे धनदेशाय ईशानाय च सुव्रतः। ऊर्द्धं स्वयमधिष्ठाय शेषायाधो व्यवस्थिताम्। एवं दत्त्वा पुनर्ब्रह्मा तिथिं प्रादात् दिशां पुनः। दशमीं भर्तृनाम्नस्तु ऊर्द्धनाम्नोऽहरत् प्रभुः। ततः प्रभृति ता देव्यः शेन्द्राद्याः परिकीर्त्तिताः"।

दिक्कर पु०। दिशं स्त्रोसुखदर्शनं करोति कृ-टच्। १यूनि लिका० २शिवे च दिक्करवासिनीशब्दे दृश्यम्।

दिक्करवासिनी स्त्री दिक्करे शिवे वासिनी। देवीभेदे "एवं दिक्करवासिन्याः कथितः पूर्ववत् क्रमः। यं श्रुत्वा नाशुभं किञ्चिदाप्नोति श्रवणे रतः। दिक्करस्तरुणः प्रोक्तस्तया सम्भुज दिक्करः। तस्मिंस्तथ्युषिता देवी तस्माद्दिक्करवासिनी" कालिका० पु० ८२ अ०।

दिक्करिका स्त्री १नदीविशेषे। तत्र या "अस्ति नाटकशैले तु सरो मानसवच्छुभम्। यत्र सार्द्धं शैलसुता जलक्रीड़ां सदा हरः। कुरुते नरशार्दूल! सर्वपङ्कजशोभिते। तस्य पश्चान्मध्यपूर्वभागेभ्यश्च सरित्त्रयम्। स्रवतीर्थं प्रयात्येव दक्षिणं सागरं प्रति। तस्य पश्चिम भागे तु नदी दिक्करिकाह्वया। दिग्गजक्षेत्रसंजाता तेन दिक्करिका स्मृता" कालि० पु० ८२ अ०। दिक् दन्तदंशनं करिका नखक्षतरेखा च यस्याः। २युवत्यां स्त्री दिक्करिन्शब्दे उदा०।

दिक्करिन् पु० दिशु स्थितः करी। ऐरावतादौ दिग्गजे "परिघतदिक्करिकास्तटीर्विभर्त्ति" माघः। ते च पूर्वादिक्रमेण स्थिताः अमरे दर्शिताः यथा "ऐरावतः पुष्करीको वामनः कुमुदोऽञ्जनः। पुष्पदन्तः सार्वभौमः सुप्रतीकश्च दिग्गजाः"। दिशु स्थिताः गजाः दिग्गजाः इत्यर्थः। ततस्त्रियां स्त्री ङीप्। तेषां क्रमेण स्त्रियश्च "करिणोऽभ्रमुकपिलापिङ्गलातनुपमाः क्रमात्। ताम्रकर्णी शुभदन्ती चाञ्जना चाञ्जनावती" अमरोक्ताः।

दिक्करी स्त्री "दिग् दृष्टे वर्त्तुलाकारे करिका नखरेखिका" वैजयन्त्युक्तेः दिग्वर्त्तुलाकारा दन्तक्षतभेदा करी च नखक्षतभेदा यस्याः संज्ञात्वात् न कप्, दिक्करः युवा ततः "वयसि चरमे" वा० तरुणवयोवाचित्वात् स्त्रियां ङीप् वा। २युवत्यां स्त्रियाम् हेमच०।

**दिक्पति** पु० ६त० । दिशां पतौ । इन्द्रादौ दिक्पत्या शब्दे दृश्यम् । "पवनोदिक्पतिर्भौम आकाशः खचरा-चराः" संकल्पप्रारम्भतन्त्रः "वितरसि दितु रथे दिक्-पतिकमनीयम्" गीतगो० । "सूर्यः सोमः कुमारपुत्रः वैश्विकेयः यमिः शनी सोमस्त्रिदशमन्त्री च पूर्वादिदिग्गजेश्वराः" इत्युक्तेषु २सूर्यादिपदेषु ।

**दिक्पाल** पु० दिशं पालयति पाल्-अण् उप०स०। दिक्-पतौ इन्द्रादौ "यत्रार्च्यन्ति विधिना दिक्पालांश्चैव कर्मिणः" पद्मपु० । कलशशब्दे १७८१ पृ० उदा० ।

**दिक्शब्द** पु० दिशि रूढः शब्दः । दिग्वाचकशब्दे पूर्वादि-रादौ तस्य देशकालादिपरत्वेऽपि भूतपूर्वं गत्या दिग्वा-चकत्वात्तथात्वम् "अन्यारादितरर्तेदिक्शब्दाञ्चूत्तरपदा-जाहियुक्ते" पा० "दिशि रूढः शब्दो दिक्शब्दः तेन यस्मिन् देशकालवृत्तिना योगेऽपि भवति" सि०कौ० ।

**दिक्शूल** न०दिशि दिग्भेदे शूलमिव । प्राच्यादिदिक्षु गमने निषिद्धवारभेदे । "शुक्रादित्यदिने न वारुणदिशं नक्रे कुजे चोत्तरां मन्देज्ये दिने न शक्रकुजं याम्यां गुरौ न व्रजेत् । सूक्ष्मानीति विलङ्घ्य यान्ति मनुजा ये वित्तलाभाशया भ्रष्टाशाः पुनरापतन्ति यदि ते शक्रेण तुल्या अपि" ज्योतिःसारसंग्रहः । मेधाथिनाऽप्युक्तं "बौधे गुरौ दक्षिणाम् । ऐशाने ज्वलने चैव नैर्ऋते मारुते तथा । न गन्तव्यं गुराचार्यै प्र-तीच्यां रविशुक्रयोः" इति

**दिक्साधन** न०दिशां साधनमिव ज्ञानार्थम् ल्युट् । दिग्ज्ञान साधने उपायभेदे तच्च कुण्डार्के दर्शितं यथा "न्यङ्कुभिः संमितकर्कटेन सूत्रेण वा दक्षरं वि-लिख्य । रज्जुकुलं शङ्कुमस्य मध्ये निवेशयेत् खाचि मिताङ्गुलीभिः । चतुर्मिताभिश्च ऋजूत्तमाभिः संसृष्ट-मूर्धं तु शलाकिकाभिः । तच्छङ्कुभा यत्र विशेदधेयाद्-दत्ते क्रमात् सोदरणेन्द्रकाष्ठे" न्यङ्कुभिः परिमितेन कर्कटेन सूत्रेण वा वृत्तं विलिख्य तन्मध्ये द्वादशाङ्गुलं दृढलक्ष्यं स्थापयेत् कीदृशं विंशत्यङ्गुलमितमाभिश्चतुरश्रुभिः ऋजुभिः समानाभिः शलाकाभिः कल्पितचतुर्दिग्गत-दण्डाभ्यां संसृष्टमस्तकम् एवं शङ्कुसमत्वं साधयित्वा तावच्च शङ्कोश्छाया पूर्वाह्णे यत्र यस्मिन् प्रदेशे वृत्ते प्रविशति यत्र वापराह्णे वृत्ताद्बहिरेति तत्र चिह्नयोः क्रमात् प्रतीचो प्राची च भवत इति अत्र दिग्ज्ञानयन्त्रे वक्ष्यमाणम् "वृत्तेऽस्मिन् सुसमी-कृतचिह्नगते इत्यादि सि० शि० वाक्यं क्रमाद्यम् । तत्र यस्मादुक्तोक्तयोपपत्तिः समि०उक्ता यथा "दोःकोट्योर्नास्ति भेदो न स्वरूपभेद इति दोःकोटिवर्गयोगपदं कर्णः । उत्तरपरिधिस्पृदिगन्ताच्छङ्कुयं यावद्दीयमानात्ततस्तः शलाकाः कर्णा भवन्ति समे देये शङ्कुं निखाय शङ्कु समितया रज्ज्वा मण्डलं परिलिख्य यत्र शङ्कुच्छाया पतति सा प्राचीति" अत्र शङ्कुसंमितेत्यनुपपन्नं तेनाधिकयापि रज्ज्वा वृत्तं कार्यम् । अन्यथा यत्राच्छा षड्ढुत्वा तत्र यत्संक्रान्तौ द्वादशाङ्गुलशङ्वोश्छायाप्रवेशस्तावद्वृत्ते न स्यादेव तस्माद्-द्वाभिः षोडशाङ्गुलसूत्रेण वृत्तं कारितं तथा वृत्ते क्षेत्रे लाघवं चैवमेव वृत्तेन शङ्कुसमत्वसाधनं दिक्साधनं च सिध्यति । अतएव रामयाज्ञवल्क्यौ "शङ्कुमानाधिक्ये व्यासदले वृत्ते विशेदादि" इत्याह एवं सूत्रप्राचीसाधनं कृत्वा सूत्रक्षमपि यास्यन्याह । "कर्के कीटे मीनगे यूकया सा द्राभ्यां चाल्या सिंहकुम्भाश्चिकेऽपि । यां वै काष्ठां भानुमान् याति तस्यां चाल्या इन्दे कार्मुके चालनं न ।" सा प्राची कर्के कर्कसंक्रान्तौ कीटे वृश्चिकसंक्रान्तौ इत्यर्थः मकरसंक्रान्तौ एकया यूकया चाल्या सूर्यस्यायनवशात् उत्तरायणे उत्तरतः दक्षिणायने दक्षिणतः एवं सिंह-कुम्भाश्चिके सिंहकन्यातुलासंक्रान्तौ कुम्भमीनमेषसंक्रान्तौ च द्वाभ्यां यूकाभ्यां चालनीया अयनवशात् मिथुनधनुः-संक्रान्तौ चालनं नास्तीति एवं प्राचीसाधनं कृत्वोत्तरदक्षिणयोः साधनं शास्त्रिभ्याह "रज्ज्वा द्विधा मध्यचिह्नात् कपाले प्राचीं शङ्कौ पश्चिमे चापि दत्त्वा । कर्णैर्दोर्मान् दक्षिणे चोत्तरे च तच्चिह्ने स्याद्दक्षिणा-चोत्तरा दिक्" । कुण्डमण्डलपयोर्यावान् विस्तारस्तद्वद्धि-गुणक्षतमध्याद्भुजभवतः पार्श्ववती रज्ज्वर्धं स्पृशेत् तां प्राची प्रतीच्यूर्ध्वसंस्थशङ्वोर्विन्यसेत् ततो मध्यात् कृत्वा रज्ज्वं दक्षिणे उत्तरे चार्कयेत् विद्वान्, कर्णाद्दक्षिणा उत्तरा च स्यादिति अत्र स्यादेव युक्तिरिति । अथ रात्रौ दिक्साधनोपायं वक्तुमालिकयाह "निशि वा ध्रुवोदये दिगैन्द्री गुरुभस्योदयनेऽथ वह्निभस्य । ध्रुवदर्शिकयानुभान्तरालेऽभ्यसतः साधव पूर्ववच्च याम्याम्" अथवा रात्रौ ध्रुवोदये प्राची अथ वा पुष्योदये प्राची अथवा श्लेषोदये प्राची अथ ध्रुवदर्शिकया वायुभयोर्भे चित्राखात्यौ तयोरन्तराले प्राची । अस्तः प्राचीतः पूर्ववत् पूर्वोक्तेन तथा याम्यां दक्षिणादिशं

खावयेदिति "कृत्तिका अवधः पुष्यचित्रास्वात्योर्यदन्तरम्। एतत् प्राच्या दिशो रूपं युगमात्रोदितं पुरः" इति। अथ चित्रास्वात्योर्यदन्तरे प्राचीमुक्तं तन्मध्यस्थं दुर्विज्ञेयत्वात्तदुपायमनङ्माह "चित्रां विद्ध्वैकया खातीमन्यवापि शलाकया। तिर्यक्स्थान्तरचिह्नात्तु द्विभूखेऽन्या स्फुटेन्द्रदिक्। एकया कृत्वा शलाकया चित्रां विद्ध्वा अन्यया तादृशैव शलाकया स्वातीं विद्ध्वा-तयोः शलाकयोरुपरि यदक्षिणोत्तरा मध्याद्धात् द्वितीयां शलाकां समतया दद्यात् प्रथमद्वितीयशलाकयोर्मूलम् एकीकृत्य तृतीयां मध्याद्धादभयसंपातं यावच्चतुर्थीं शलाकां प्राग्वत् रज्ज्वप्रोतनम्बद्वयवर्तीं पूर्वापरायतां दद्यात् यत्र सम्बन्धौ भूम्यां पतितौ तत्राङ्कयोः पूर्वापर-सूत्रदानात् स्पष्टा प्राचीत्वत्र स्पष्टा युक्तिरिति। अथ प्रकारान्तरेण लघूपायेनोदीचीसाधनमाह, दिन-मानदले सम्प्राकृतच्छायायतो हि यत्। शङ्कुमूले नीय-मानं सूत्रं स्यादुत्तरा दिशा। तिथिपत्रादृगधिताद्वा दिनमानमेतावदिति ज्ञात्वा ततो घटिकादिना ज्ञाते दिनार्द्धे मध्याह्ने सम्प्राकृतशङ्कोर्यत्र छायायं लगति तत्राच्छङ्कुमूलं यावच्चीयमानं सूत्रं दक्षिणोत्तरसूत्र-मिति अथ वा सम्प्राकृतशङ्कोर्गतिगतमाध्याह्निक-छायातुल्या तत्रैव छाया यदा स्यात्तदाच्छङ्कुमूले नीयमानं सूत्रं दक्षिणोत्तरेति। अत्र युक्तिस्तस्मिन् समये रविर्दक्षिणोत्तरवृत्ते भवतीति ततः पूर्ववत् पूर्वा-परे साध्ये एवं दिक्साधनं विधाय सकलपक्ष चतुष्को-णत्वाच्चतुष्कोणक्षेत्रसाधनं विपरीताख्यानत्वाच्च "दिगन्तरज्जु-द्वयं दिशार्द्धं विस्तारतुल्यं तद्गुणं दलार्द्धे। कोणे प्रकर्षं दिति वेदकोणेष्वेवं चतुःकोणमतीव साधु"। दिगन्तयोः पूर्वदक्षिणयोः दक्षिणापरयोः अपरोत्तरयो उत्तरपूर्वयोः रज्जुद्वयं द्वौ पार्श्वौ यस्य तं विस्तारेण तुल्यगुणं सूत्रं अर्द्धक्षेत्रे धृत्वा कोणे आकर्षयेत्। एवं चतु-र्ष्वपि कोणेष्विति कृते साधु चतुरस्रं स्यादिति तद्व्याख्या। अधिकं दिगन्तशब्दे द्रष्टव्यम्।

**दिक्सूत्रिन्** न० दिक्कोणे। "दिक्सूत्रि पुरुषमात्रं मीयते" काया० श्रौ० २।३।२।३८। "दिक्सूत्रि दिक्कोणम्" कर्कश व्याख्या।

**दिगंश** पु० ७त०। सि०शि० उक्ते दिक्स्थे अंशभेदे यथा "चक्रांशकाद्धे क्षितिजाख्यवृत्ते प्राक्खस्तिकाभीष्ट दिशस्तु मध्ये। वेदांशाः स्युस्तासु तत्र दिगंशकाख्यास्त-व्याग्रे दिग्ज्ञेऽपरे विभागे" सि०शि० "कदाचिदभी-ष्टदिने दक्षिणे वाते प्रकल्पः पृच्छति तत्र कालेऽर्कोपरि न्यस्तस्य दिग्मण्डलस्य क्षितिजस्य च सम्पाते या-भीष्टा दिक् तस्याः प्राक् खस्तिकस्य चान्तरे क्षितिज-वृत्ते वेदांशास्तत्र दिगंशका ज्ञेयाः। तेषां ज्या दिग्-ज्येति एवं पश्चिमभागेऽपि" प्र०सि०

**दिगन्त** पु० ६त०। १दिशामन्ते। दिगन्तविश्रान्तरवोऽपि ततश्रुतः "भुजाङ्गितानां च दिगन्तसम्पदाम्" रघुः। २शास्त्रीयज्ञानकर्मयुतजनाधिष्ठितमध्यदेशादतिरिक्ते देशे च

**दिगन्तर** न० दिशामन्तरमवकाशः। १दिगवयवकाशे "सङ्घा-रूपतानि दिगन्तराणि" रघुः। अन्या दिक् मयूर०। २प्रकृतदिशोऽन्यस्यां दिशि च न०।

**दिगम्बर** पु० दिक्शब्दमम्बरं यस्य। १शिवे २जैनभेदे पु० तन्मतमर्हच्छब्दे उक्तप्रायं किञ्चिदत्राधिकमभ्यते। "दि-गम्बरा मध्यमलम्बमाङ्गरागादमलकम्। चैतन्यव्याप्तिसंदृष्टे-रानन्त्यमस्तुतेरपि"। अस्य भाषा प्राकृतान्तरभेदमिश्रा मागधी। अस्य स्वरूपन्तु गलन्मलपङ्केन पिच्छिलबी-भत्सदृश्येऽप्यदेहच्छविदुद्धितचिक्करो सक्लेदमलो वेग-दुर्दर्शनः शिखिशिखण्डपिच्छिकाहस्तः इति। एतन्मत-सिद्धं जीवस्य मध्यमपरिमाणत्वं शा०सू० भाष्यवार्त्ति-काकृतं यथा

"एवञ्चात्माऽकात्स्न्यं" सू०। "शरीरपरिमाणो हि जीव इत्यार्हता मन्यन्ते। शरीरपरिमाणतायां च सत्यामकृत्स्नोऽसर्वगतः परिच्छिन्न आत्मेष्यतो घटादि-वदनित्यत्वमात्मनः प्रसज्येत। शरीराणाञ्चानवस्थित-परिमाणत्वान्नतुल्यजीवो मनुष्यशरीरपरिमाणो भूत्वा पुनः केनचित् कर्मविपाकेन हस्तिजन्म प्राप्नुयन्न कृत्स्नं हस्तिशरीरं व्याप्नुयात्, पुत्तिकाजन्म च प्राप्नुयन्न कृत्स्न पुत्तिकाशरीरे समीयेत। समान एव एकस्मिन्नपि जन्मनि कौमारयौवनस्थाविरेषु दोषः। स्यादेतत्, अव-यवयो जीवस्तस्य त एवावयवा अल्पे शरीरे सङ्कु-चेयुर्महति च विकाशेयुरिति। तेषां पुनरनन्तानां जीवावयवानां समानदेशत्वं प्रतिहन्येत वा न वेति वक्तव्यम्। प्रतिघाते तावदानन्त्यावयवाः परिच्छिन्ने देशे समीयेरन्। अप्रतिघातेऽप्येकावयवदेशत्वोपपत्तेः सर्वेषामवयवानां प्रचितानुपपत्तेः जीवस्याणुमात्रत्वप्रसङ्गः स्यात्। अपि च शरीरमात्रपरिच्छिन्नानां जीवावयवा-नामानन्त्यं नोत्प्रेक्षितुमपि शक्यम्। अथ प्रदीपेव

इहशरीरप्रतिपत्तौ च केचिज्जीवावयवा उपगच्छन्ति तनुशरीरप्रतिपत्तौ च केचिदपगच्छन्ति इत्युच्यते तत्रोच्यते" भा०। "न च पर्य्यायादप्यविरोधो विकारादिभ्यः" सू०। "न च पर्य्यायेणाप्यवयवोपगमापगमाभ्यामेतद्धेतुपरिमाणत्वं जीवस्याविरोधेनोपपादयितुं शक्यते कुतः विकारादिदोषप्रसङ्गात्। अवयवोपगमापगमाभ्यां ह्यनित्यमापूर्य्यमाणस्यापचीयमाणस्य च जीवस्य विक्रियावत्त्वं तावदपरिहार्य्यं, विक्रियावत्त्वे च धर्म्मादिवदनित्यत्वं प्रसज्येत, ततश्च बन्धमोक्षाभ्युपगमो बाध्येत, कर्म्माष्टकपरिवेष्टितस्य जीवस्यानादिवत् संसारसागरे निमग्नस्य बन्धनोच्छेदादूर्द्ध गामित्वं भवतीति। किञ्चान्यदागच्छतामपगच्छतामवयवानामागमोपायधिधर्म्मवत्त्वादेवानात्मत्वं शरीरादिवत्। ततश्चाव्यवस्थितः कश्चिदवयवी यात्रेति स्यात्, न च स निरूपयितुं शक्यते अयमसाविति। किञ्चान्यदागच्छन्त्यन्यते जीवावयवाः कुतः प्रादुर्भवन्ति उपगच्छन्त्य क्व वा जीवन्त इति वक्तव्यम्। न हि भूतेभ्यः प्रादुर्भवेयुः भूतेषु च लीयेरन् अभौतिकत्वाज्जीवस्य। नापि कश्चिदन्यः साधारणोऽसाधारणो वा जीवानामवयवाधारो निरूप्यते प्रमाणाभावात्। किञ्चान्यदनवस्थितस्वरूपत्वेन सत्तात्मा स्यात् आगच्छतामपगच्छतामवयवानामनियतपरिमाणत्वात्, अत एवमादिदोषप्रसङ्गात् न पर्य्यायेणाप्यवयवोपगमापगमाभ्यामात्मनो भावयितुं शक्यते। अथ वा पूर्वेण सूत्रेण शरीरपरिमाणत्वान्न उपचितापचितशरीरान्तरप्रतिपत्तावप्यात्मनः प्रसङ्गनद्वारेणानित्यतायां चोदितायां पुनः पर्य्यायेण परिमाणान्तरस्थानेऽपि क्षीरस्यानित्यता न्यायेनात्मनो नित्यता स्यात्, यथा रक्तपटादीनां विज्ञानावस्थानेऽपि तत्सन्तानानित्यता तद्वद्विज्ञानानां(विषयाणाम्) वापीत्याशङ्क्यानेन सूत्रेणोत्तरमुच्यते। सन्तानस्य तावदवस्तुत्वे नैरात्म्यवादप्रसङ्गः, वस्तुत्वेऽप्यात्मनो विकारादिदोषप्रसङ्गादस्य पक्षस्यानुपपत्तिरिति"।

दिगम्बर त्रि० "दिगम्बरत्वेन निवेदितं वसु"। कुमा० स्त्रियां ङीष्। "तथा चैव दिगम्बरी" कालीध्यानम् "क्षीरेऽपि दिगम्बरी त्रिजगतां मातापि सद्यौवना" कालीस्तवः। दिगेवाम्बरम्। ४तत्पु० समा० ह०। ५दिगाकाशसमङ्कारे च न०"आशादितावतदिगम्बरसङ्कैर्गाम् माघः। ६तमधि० भेदि० स्वार्थे अ। दिगम्बरक उपधर्मे स्त्रियां०।

दिगादि पु० "दिगादिभ्योयत्" पा० विहितयत्प्रत्ययनिमित्ते शब्दगणभेदे स च गणः पा०गण०सू०उक्तो यथा "दिक् दर्श पूरण गण पक्ष धाय मित्र मेधा अनर पथिन् रक्षस् अलीक उक्षा साक्षिन् देव आदि अन्न सुख जघन मेघ यूष (उदकाख्यायाम्)न्याय वंश वेश काल आकाश"।

दिगीश्वर पु० ६त०। इन्द्रादौ दिक्पाले २सप्तर्षादिपदे च "दिगीश्वरा भास्करशुक्रभौमा राहुर्कुजेन्द्वर्कसुतार्चिताः स्युः" ज्यो०त०दिगीशादयोऽत्र "दिगीशछन्दांसि विभूतिरीरिता" नैष० [उदवाचलादौ।

दिगुपाधि पु० ६त०। दिशां प्राच्यादिव्यवहारोपाधौ

दिग्गज पु० दिशि स्थितो गजः। दिक्षु स्थिते ऐरावतादौ गजे दिक्करिशब्दे दृश्यम्। "नदत्याकाशगङ्गायाः स्रोतस्युद्दामदिग्गजे" रघुः। "चिरस्य यावार्थ्यमलम्भि दिग्गजैः" माघः।

दिग्जय पु० दिशां तत्स्थलोकदेवपाणां जयः। जिगीषुकृते युद्धेन १दिक्स्थितदेवजये विद्यया २दिक्स्थलोकादिजये च। दिग्विजयादयोऽत्र

दिग्ज्ञान न० ६त० सि०शि० उक्ते दिशां प्राचीत्वादिज्ञानसाधने प्रकारभेदे स च तत्रोक्तो यथा

"इष्टेऽह्नः सुसमीकृतक्षितिगते केन्द्रस्यखद्वोः क्रमाद्भाग्यं यत्र विलग्नमेति च यतस्तत्रापरेन्द्र्वोर्दिशौ। तत्कालापमजोदयोस्तु विवराद्भाक्यैमित्या हृताद्भम्बज्याप्रमिताद्भुजेरवनदिक्पैन्द्री स्फुटा चालिता। तन्मध्यादथ याम्यसौम्यककुभौ सौम्या ध्रुवे वा भवेद्देक्षादपि भाग्यतो भुजमितां कोटीमिमां शङ्कुतः। न्यस्येदूर्ध्वमिमं तथा भुवि यथा यच्छङ्वयोः संवृतिः कोटिः प्राच्यपरा भवेदिति कृते बाहुश्च याम्योत्तरा" भू० "उदक्स्थे समीकृतायां भूमाविष्टप्रमाणं इष्टं विलिख्य तस्य केन्द्रे द्वादशाङ्गुलशङ्कुं निवेश्य तस्य छाया तस्मिन् इष्टे यत्र प्रविशति पूर्वाह्णे वा अपराह्णे यतो निर्गच्छति तत्र पश्चिमपूर्वदिशौ किल भवतः। परन्तु यस्मिन् काले छायाप्रवेशो ज्ञातो यस्मिन् काले च निर्गमस्तात्कालिकयोरर्कयोः क्रान्तिज्ये साध्ये। तयोरन्तरात् तच्छायायाः कर्णेन गुणितात्तच्छ्रुत्या भक्तादृद्युद्भवमङ्गुलादि फलं तेनेन्द्रो दिगुत्तरतश्चालिता स्फुटा भवति यद्युत्तरेऽयने रविर्वर्त्तते तदा उत्तरतः यदि दक्षिणे तदा दक्षिणतः। एवं स्फुटा प्राची। अन्यथा स्खलेत्सर्वः। तन्मध्यादृद्याम्यसौम्यौ दिशौ। अथ प्रकारान्तरेणाह। ध्रुवमवलम्बसूत्रेण विद्धा ध्रुवाभिमुखशङ्की-

ऊकः सौम्या। अस्तानकोलको याम्या। तत्कालात् पूर्वापरे। प्रथमं भाक्षायायदर्शने दिग्ज्ञानसाधनम्। इदानीमवधैक्यादपि भायतः। तच्चैवम्। अभीष्टकाले ग्रहोभांशं चिन्तयित्वा तस्माच्छायाया वक्ष्यमाणप्रकारेण भुजं कोटिं चानीय भुजकोटिभिते शंकौ संस्थाप्य ग्रहभुजादृग्याद्दिगगतां कोटिशलाकां छायाग्राद्गतदिगगतां भुजशलाकां च तथा भवि न्यसेद्यथा शंकाग्रयोः संयुतिः स्यात्। एवं कृते सति कोटिः प्राच्यपरा दिश्यति। बाहुश्च याम्योत्तरा। अत्रोपपत्तिः। अहोरात्रवृत्तं इष्टानासन्नघटिकानामग्रे पूर्वार्द्धे समसप्तकेन यावदन्तरं तावदेवापरार्द्धे तावतीनां घटीनामग्रे भवति। अतस्तच्छायाग्रबिन्दुभ्यां दिग्ज्ञानमुपपद्यते। परं तत्कालान्तरेण यदर्कक्रान्त्यन्तरं तेनान्तरितं भवति। अतस्तत् सम्यगेवम्। तच्चैवम्। तस्मिन् काले यानि कर्णदृक्छायाकुलानि पूर्वार्द्धे यानि चापरार्द्धे तेषामन्तरं कार्यम्। तत्र लाघवार्थं तत्कालक्रान्त्योरेवान्तरं कृतम्। ततोऽभीष्टकरणायानुपातः। यदि चक्रक्रान्तिकोष्ठा त्रिज्या कर्णदृक्क्रान्तिज्यान्तरेण किमिति। अत्र लब्धमक्षान्तरम्। ततोऽभीष्टानुपातः। यदि त्रिज्याव्यासार्धे एतावदन्तरं तदा कर्णव्यासार्धे किमिति। अत्र तुल्यत्वाद्गुणकभाजकयोस्त्रिज्यानाशे कृते सत्युपपन्नं तत्कालापमज्योर्योस्तु विवरादित्यादि। यद्युत्तरमयनं यतते उत्तरतोऽर्कं चालिते ग्रहोभांशं दक्षिणतो याति तदोत्तरतश्चालनीयम्। अत उपपन्नमैन्द्री स्फुटा चालितेति। भुजकोटीनामुपपत्तिरग्रे। यन्त्रेणमालेख दिग्ज्ञानमिव दर्शितम्" ग्रहि०।

**दिग्ज्या** स्त्री दिगंशशब्दे दर्शिते त्रि०शि०उक्ते दिशांशभेदे।

**दिग्दर्शन** न० दिशो दृश्यान्तेऽनेन दृश-करणे ल्युट्। १दिग्ज्ञानसाधने यन्त्रभेदे(कम्पास)हेत०। २दिशां दर्शने च

**दिग्दाह** पु० दिशां दाहः। ६त०। २उल्के उत्पातभेदे तच्छुभाशुभादिकं तत्रोक्तं यथा

"दाहो दिशां राजभयाय पीतो देशस्य नाशाय कृताग्नवर्णः। यद्वारुणः स्यादपसव्यवायुः यस्यस्य नाशं स करोति दृष्टः। योऽतीव दीप्त्या कुरुते प्रकाशं छायामपि व्यक्षयतेऽर्कवत् यः। राज्ञो महद्देवते भयं सः यस्यप्रकोपं चतजानुरूपः। प्राक् क्षत्रियाणां समरेष्वराणां प्राग्दक्षिणे त्रिस्रिकुमारपीड़ा। याम्ये महोष्ठैः पुरुषैस्तु वैश्या दूनाः पुनर्भूप्रभवाश्च शोचे। पश्चात्तु शूद्राः कपिलोविनश्च चौरासुरक्षैः सह वायुदिक्षे। पीड़ां प्रजन्युत्तरतश्च विप्राः पाषण्डिनो वाणिजकाश्च याम्याम्(ऐशान्याम्)। नभः प्रसन्नं विमलानि भानि प्रदक्षिणं याति सदागतिश्च। दिशां च दाहः कनकावदातो हिताय लोकस्य सपार्थिवस्य"।

**दिग्देवता** स्त्री दिशां तन्मर्यादानां देवता साक्षिभूतेव। दिशां मर्यादासाक्षीभूतदेवतायाम् "दिग्देवता अतिरभसमतिर्न विजानाति" भाग०३।१४।९

**दिग्ध** पु० दिह-क्त। १विषाक्तबाणे अमरः "क्षुद्रे दिग्धशरैरियाकृतः" कुमा०। २चर्मणो रङ्गे च पु०हेमच०। ३प्रलेपे अजवपालः। ४लिप्ते त्रि० मेदि०।

**दिग्बल** न० दिङ्निमित्तं यद्दायाम् बलम्। लग्नादौ स्थितयद्दायां दिग्भेदनियमिते बले यथाह ज्योतिषे "लग्ने सौम्यगुरायौ कुजार्की दशमे तथा। द्यूने सौरिचतुर्थे तु सितेन्दू दिग्बलान्वितौ"। अत्र कोणदिग्बलित्वनिरासाय लग्नदशमसप्तमचतुर्थपदैः पूर्वदक्षिणपश्चिमोत्तरदिगुपादानम्। लग्ने स्थितौ बुधगुरू पूर्वदिग्बलिनौ यतो राशीनामादयो लग्नं यद्यस्तु पूर्वदिश्येव भवति। लग्नात् दशमे स्थितौ कुजार्कौ दक्षिणदिग्बलिनौ यतो लग्नाद्दशमराशिरेव दक्षिणदिशि तिष्ठति। सप्तमे स्थितौ शनिः पश्चिमदिग्बली यतो लग्नात् सप्तमराशिरस्तमेति। अस्तश्च पश्चिमदिश्येव भवति। तथा लग्नाच्चतुर्थे स्थितौ शुक्रचन्द्रौ उत्तरदिग्बलिनौ यतो लग्नाच्चतुर्थराशिरेवोत्तरदिग्भागे तिष्ठति। तद्बलान्वितो यद्दो दिग्बलीत्युच्यते" एतच्चायुर्दायादिषु बलसाधनोपयोगि। यात्रादिषु यथास्थितपूर्वाद्युपेक्षयैव यद्दाणां दिग्बलित्वं ज्यो०त० उक्तं यथा "प्राच्यां सौम्यगुराचार्यौ याम्यां भास्करभूसुतौ। प्रत्यक् सौरिरुदीच्यान्तु सितेन्दू दिग्बलान्वितौ"।

**दिग्बलिन्** पु० दिग्बलमस्त्यस्य इनि। १दिङ्निमित्तबलयुक्ते यद्दे दिग्बलशब्दे दृश्यम्। २ताद्दशे राशिभेदे च "ऐन्द्रां भानुसुराग्यवस्तु पश्चयोयाम्ये सचीर्थां कलियोरुणां बलयुक् तथैव बलिनः पानीवजाशोत्तरे" ज्यो०त०

**दिग्वदन** न० दिग्भेदे वदनं यस्य। प्राच्यादिदिग्भेदेन तत्तत्स्थितसप्तके राशिभेदे। "लग्ने दिग्वदनेऽतिदग्धगमनं प्राच्यादि शून्यं विना" ज्यो०त० राशीनां दिग्भेदेन सप्तकत्वं तत्रैव। "मेषाद्यास्त्रिसप्तात् ज्ञेया

प्राग्दिदिङ्मुखास्त्रयी" तथा च मेषः प्राग्वदनः, वृषोऽग्नीग्वदनः, मिथुनः पश्चिमास्यः, कर्कः उत्तरास्यः एवं सिंहादयः धनुरादयश्च । दिङ्नादयोऽप्यत्र ।

दिग्वस्त्र पु० दिग्रूपं वस्त्रमस्य । १शिवे २जैनभेदे च ३नग्ने त्रि० "दिग्वस्त्रायङ्गकाञ्चीमणिमयमकटाद्यैर्युतादीप्तजिह्वः" रत्नाकरोध्यानम् । दिग्वसनादयोऽप्यत्र ।

दिग्वारण पु० दिशु स्थितो वारणः । दिग्गजे ऐरावतादौ । "दिग्वारणमदाविलम्" "प्रभिन्नदिग्वारणवाङ्मनो इव" कुमा० ।

दिग्विजय पु० दिशां तत्स्थलपलोकानां विजयः । विक्रमायुद्धेन वा दिक्स्थलपलोकजये "पाण्डवदिग्विजयः भीमदिग्विजयः शङ्करदिग्विजयः" इत्यादि ।

दिङ्नाग पु० दिङ् इति नायति शब्दायते के-क । उल्कुषडिम्बे शब्दकल्प० । तत्स्फोटने हि दिङ् इति शब्दो जायते इति तस्य तथात्वम् ।

दिङ्नक्षत्र न० दिशि दिग्भेदेन स्थितं नक्षत्रम् । "कृत्तिकाद्यासु पूर्वादौ सप्त सप्तोदिताः क्रमात् । यद्दिग्यं यस्य नक्षत्रं तत्तस्य शुभं सदृक्षम्" ज्यो०त०उक्ते कक्षभेदे

दिङ्नाग पु० दिशि स्थितो नागः । दिग्गजे "दिङ्नागानां पथि परिहरन् स्थूलहस्तावलेपान्" मेघदू० दिङ्नाग मदगन्धिषु" कुमा० ।

दिङ्मण्डल त्रि०ष्ठत० १दिशां मण्डले २मण्डलाकारे तन्मूढे च । "उन्मादाम्बुदवर्त्मतान्धतमसप्रध्वस्तदिङ्मण्डले" उद्भटः ।

दिङ्मात्र न० दिशेव मात्रच् । एकदेशे शब्दार्थचिन्ता० ।

दिङ्मूढ त्रि०दिशि मूढः । दिग्भ्रान्तियुक्ते पूर्वादिदिशां यथार्थतोऽपरिज्ञानम् दिग्भ्रमः तद्युक्ते दिशामयथार्थज्ञानयुक्ते ।

दिण्डि पु० डिण्डि+पृषो०वाद्यभेदे ।

दिण्डिर पु० दिण्डिर+पृषो० । वाद्यभेदे अमरः ।

दित त्रि० दो-खण्डने क्त दत्तम् । छिन्ने द्वैधीकृते अमरः ।

दिति(ती) स्त्री दो-खण्डने क्तिच् वा ङीप् । १दैत्यमातरि कश्यपपत्न्याम् । "प्रजज्ञिरे मङ्गाभागा दक्षकन्यास्त्रयोदश । अदितिर्दितिः दनुःकाला" भा०आ०६५अ० । तासु कश्यपस्य पत्न्याः "ददौ स दश धर्माय कश्यपाय त्रयोदश" हरिवं० ६अ० । भावे क्तिन् न ङीप् । २खण्डने च ।

दितिज पु० दितेर्जायते जन-ड । असुरे "इत्येव दितिजसंघानाम्" भा०अनु०१४अ० । "दितिजयदृक्षगणैर्निषेव्यमाणम्" हरिवं०२२२अ० "एकएव दितेः पुत्रो हिरण्यकशिपुः स्मृतः" भा०आ०६५अ० । उक्तेरेकस्यैव तत्सुतत्वेऽपि तद्गजानानामप्युपचारात् तज्जन्यत्वं द्रष्टव्यम् ।

दितितनय पु० ६त० । दैत्ये दितिनन्दनदितिसुतादयोऽप्यत्र । "नखे दितिसुताधीशः पदे रोदसी" मा०ध्या० ।

दित्य पु० दितौ भवः यत् । १श्वसुरे शब्दार्थकल्प० । दितिं खण्डनमर्हति यत् । २छेदनार्हे-धान्यादौ त्रि० ।

दित्यवाट् पु०दित्यं छेदनार्हं धान्यादिकं वहति वह-क्विप् । द्विवर्षवयस्के पशौ । "दित्यवाट्योविराट् छन्दः" यजु०१३।१४० । "दो अवखण्डने क्यप् तुगवः दितिं खण्डनमर्हति दित्यं धान्यं वहति दित्यवाट् यद्वा द्विवर्षः पशुर्दित्यवाट् विराट् छन्दो भूत्वोत्क्रान्तं दित्यवाहं पशुं वयसा पक्षीत् "दित्यवाहं वयसाग्रोद्विराट् छन्दः विराड्भूत्वा दित्यवाह उत्क्रमुः" शत०ब्रा० ८।२।४।१२। स्त्रियां ङीपि वाहौः । दित्यौहीत्येव । "दित्यवाट च मे दित्यौही च मे" यजु० १८।२६। "द्विसंवत्सरो वृषोदित्यवाट् तादृशी गौर्दित्यौही" वेददी० ।

दित्सा स्त्री दातुमिच्छा दा-सन् इस् अभ्यासलोपः भावे क । दानेच्छायाम् ।

दित्सु त्रि० दातुमिच्छुः दा-सन्-उ । दानेच्छावति "दित्सुः सतां बोधकरैस्सुरद्रुमैः" भट्टिः क्वचित् आर्षे तु नाभ्यासलोपः "संग्रहदो यदा मल्यो दित्सुरपि जीवितम्" भा०उ०७अ० ।

दिदृक्षा स्त्री द्रष्टुमिच्छा दृश-सन्-भावे अ । दर्शनेच्छायाम् । "द्रौपदीं प्राप्तुमनसो स्वयंवरदिदृक्षया" भा०आ० १अ० । "एकस्यसौदर्यदिदृक्षयेव" कुमा० ।

दिदृक्षु त्रि० द्रष्टुमिच्छुः दृश-सन्-उ । द्रष्टुमिच्छौ "कोपितोऽसि मया दिदृक्षुणा" रघुः । "व्यवहारान् दिदृक्षुस्तु ब्राह्मणैः सह पार्थिवः" मनुः ।

दिदृक्षेण्य त्रि० द्रष्टुमेष्यः दृश-सन् केण्य । "द्रष्टुमेष्ये । "दिदृक्षेण्यः परि काशासु जेन्यः" ऋ०१।१४६।५।

दिदृक्षेय त्रि० दिदृक्षामर्हति वा०ढक् । दर्शनीये "दिदृक्षेयः सूनवे भागदोकः" ऋ० ३।१।१२। "दिदृक्षेयः सर्वैर्दर्शनीयः" भा०

दिद्यु पु० दिद्युत्+पृषो० । १वज्रे निघण्टुः "क्षुद्रदस्रा घृणता दिद्युमन्तौ" ऋ०१।७१।५। "पाहि मा दिद्योः" यजु० २।२०। २बाणे च "चलाचां चलपतिरेभ्यति दिद्यून्

पाहि" यजु० १०।१७। दो अर्धखण्डने द्यति खण्डयति दिद्यो वाचाः "दृष्वो वै दिद्यव दृष्टुवधमेवैनमेतदति नयतीति" शत०ब्रा०५।४।२।२।

दिद्युत् त्रि० द्युत-क्विप् नि०। १दीप्तिशीले २वज्रे पु०निघ०।

दिधिषाय्य न० दधात्याङ्ग दम् धा-आय्य नि०द्वित्वं धुक् च। १मद्ये २आरोपितवस्तुभावे ३धारके त्रि०। "मित्र इव यो दिधिषाय्यो भूदेव" ऋ०२।३।१। "दिधिषाय्यो धारयितव्यो भा० षड्विंशब्राह्मणस्तु दधिषाय्य इति स्वरं पठित्वा दधिपूर्वकादक्षतेराय्यः इति व्याचख्यौ।

दिधिषु पु० दिधीं धैर्यम् दक्षति दक्ष-क्विप् गङ्गा०। द्विरूढायाः स्त्रियाः पत्यौ पुनर्भूपतौ अमरः

दिधिषू स्त्री दधाति धारं धिष्यते वा धा-धिष-वा ऊ ङीन्ङनुभू इत्यादिना नि०। वारद्वयविवाहितायां स्त्रियाम्। "ज्येष्ठायां यद्यनूढायां कन्यायामक्षतेऽक्षता। सा चाग्नेदिधिषूर्नेया पूर्वा त दिधिषूः स्मृता" देवलोक्तायां ज्येष्ठाविवाहप्रागभावकालीनविवाहदत्तायां २कनिष्ठायां भगिन्याञ्च।

दिधिषूपति पु०ष०त०। "भ्रातुर्मृतस्य भार्यायां योऽनुरज्येत कामतः। धर्मेणापि नियुक्तायां स ज्ञेयो दिधिषूपतिः" मनूक्ते विधवायां भ्रातृभार्यायां रते भ्रातरे।

दिधीषू स्त्री दिधिष-ऊ०। दिधिषूशब्दार्थे शब्दरत्ना०।

दिन पु०न०द्यति तमः दो-खण्डने दी-क्षये वा नक् ह्रस्वः। १सूर्यकिरणावच्छिन्ने काले तद्भेदादिकं अहन् शब्दे ५७६ पृ० दृश्यम्। २षष्टिदण्डात्मके मानुषे अहोरात्रे चान्द्रे ३तिथिरूपे काले ४चान्द्रमासात्मके पैत्र्ये कालभेदे सौरवर्षरूपे ५दैवे कालभेदे ब्राह्मे १कल्परूपे काले च "खद्योतपतियुग्मङ्ग कर्किधन्विमृगास्तथा। निशासंज्ञाः स्मृताश्चैव शेषास्त्वन्ये दिनाख्यकाः" इति ज्योतिषतत्त्वोक्ते ७राशिभेदे। "दिने दिने त्वं तनुरेधि रेऽधिकम्" नैष० "दिनानि दीनोद्धरणोचितस्य" "दिनेषु गच्छत्सु सितानतीवरम्" रघुः। "प्रौढध्वान्तं दिनमिव जलदाः" माघः जीमूतवाहनस्तु सूर्यकिरणावच्छिन्नं चतुर्थांशात्मकं दिनमित्याह "दिनं दिनेशस्य यतोऽस्य दर्शने तमो तमोऽन्तुरदर्शने सति। कृष्णत्वमानां द्युनिशं यथा तथा पितॄणां यमिकृष्णवासिनाम्" सि०शि० दिनमानशब्दे दृश्यम् "तिथिषाड्भागं दिनम्" स्मृ०सि०।

दिनकर पु० दिनं करोति क-ट, दिने करः किरणोऽस्य। १सूर्ये २अर्कवृक्षे च "दिनकराभिसृता बहरेणवः" रघुः। "ब्रह्माण्डस्य मुटपरिभ्रमणं समन्तादभ्यन्तरे दिनकरस्य करप्रसारः" स्फु० सि०।

दिनकरतनय पु० ६त०। कर्णनन्दने १यमौ २यमे च "चारवशात् द्वितीयस्कन्धे दिनतनये" भ०स०१०३अ०। दिनकरसुतादयोऽप्यत्र २कर्णे ३सुग्रीवे ४तपत्यां ५वसुनायां च स्त्री। ["दिनकर्त्ता न दृश्यते" हरिवं०१६२अ०।

दिनकर्त्तृ पु०दिनं करोति कृ-तृच्। १सूर्ये २अर्कवृक्षे च

दिनकृत् पु० दिनं करोति कृ-क्विप्। सूर्ये हेमच०।

"शुक्लाः करा दिनकृतो दिवादिमध्यान्तगामिनः स्निग्धाः" भ०सं० १०अ०। २अर्कवृक्षे च [शब्दर०।

दिनकेशव पु० दिनस्य केशव इवालंकरणात्। अन्धकारे

दिनक्षय पु० दिनस्य तिथेः क्षयः। तिथिक्षये। "एकस्मिन् सावने त्वर्के तिथीनां त्रितयं यदा। तदा दिनक्षयः प्रोक्तस्तत्र श्राद्धिकं फलम्" मलमा०त०वशिष्ठः। तिथिक्षयशब्दे दृश्यम्।

दिनचर्य्या ७त०। भावप० कृत्ये दिने कर्त्तव्यभेदे यथा "मानवो येन विधिना स्वस्थस्तिष्ठति सर्वदा। तमेव कारवेहद्यो यतः स्वास्थ्यं सदेप्सितम्। दिनचर्यां निशाचर्यां ऋतुचर्यां यथोदिताम्। आचरन् पुरुषः स्वस्थः सदा तिष्ठति नान्यथा"। तत्र स्वस्थस्य लक्षणमाह सुश्रुतः "समदोषः समाग्निश्च समधातुमलक्रियः। प्रसन्नात्मेन्द्रियमनाः स्वस्थ इत्यभिधीयते"। क्रियात्र कर्म तेन समक्रियः शरीरानुरूपकर्मा। तत्र दिनचर्यामाह ब्राह्मे मुहूर्ते बुध्येत स्वस्थो रक्षार्थमायुषः। तत्र दुःस्वप्नशान्त्यर्थं स्मरेद्विष्णुमधुसूदनम्। दध्यक्षतदर्भसिद्धार्थविल्वगोरोचनाकृशाम्। दर्शनं स्पर्शनं कार्यं प्रयत्नेन शुभावहम्। समानं घृते पश्येत् यदीच्छेत् चिरजीवितम्। आयुष्प्रसर्पणे प्रोक्तं मलादीनां विसर्जनम्। तदत्र कुजनाध्मानोदरगौरवकारणम्। आदिशब्देन वातमूत्रादीनां ग्रहणम्। आटोपशूलौ परिकर्त्तिका च वङ्क्षः पुरीषस्य तयोर्द्वयातः। पुरीषमाश्रयत्यधो निरेति पुरीषवेगेऽभिहते नरस्य। परिकर्त्तिका गुदे परिकर्त्तनवत्पीड़ा। पुरीषस्य वङ्क्षो निरोधः। ऊर्द्ध वातः उद्गाढवाङ्मुखम्। वातमूत्रपुरीषाणां वङ्क्षाध्माने क्रमो रुजा। जठरे वातजाध्मान्ये रोगाःस्यु वातनियहात्। बस्तिमेहनयोः शूलं मूत्रकृच्छ्रं शिरोरुजाः। विनामो वङ्क्षणानाहः स्याद्विड्भेदं मूत्रनिग्रहे। विनामः शरीरस्य नम्रता वङ्क्ष-

थानाङ्गः वङ्क्षणक्षाकर्षणवत्पीड़ा। न वेगितोऽन्त-
कार्यः स्राव्य वेगान् धारयेद् बलात्। कासशोकभ-
यक्रोधान् मनोवेगान्विधारयेत्। गुदादिमलमार्गाणां
शौचं कान्तिबलप्रदम्। पलितकरमाख्यानमलक्ष्मीकलि
पापहृत्। प्रक्षालयं मतं पाण्योः पादयोः शुद्धिकार-
णम्। मलघ्नमङ्गरं हृद्यं चक्षुष्यं राजसापहम्।
दन्तकाष्ठविधिः भक्षयेद्दन्तपवनं द्वादशाङ्गुलमायतम्।
कनिष्ठिकाप्रवत् स्थूलमृजुग्रन्थि तथाऽव्रणम्। एकैकं
वर्जयेद्दन्तं मृदुना कूर्चकेन तु। दन्तशोधनचूर्णेन दन्त-
मांसान्यवाधयन्। चौद्भित्तिकटुकाक्षेन तैलसिन्धुभवेन
वा। चूर्णेन तेजोवत्याश्च दन्तान्हित्वं विशोधयेत्। तेजो-
वती (तेजवल्लक) इति लोके प्रसिद्धा। मधूको मधुरे
श्रेष्ठः करञ्जः कटुके तथा। निम्बं क्षात्तिक्तके श्रेष्ठः
कषाये खदिरस्तथा। समयन्तु समालोक्य दोषञ्च प्रकृतिं
तथा। यथोचितैरसैर्योज्यं युक्तं द्रव्यं प्रयोजयेत्।
तेनास्य मुखवैरस्यदन्तजिह्वास्रजा गदाः। रुचिर्वैशद्य
लघुता न भवन्ति भवन्ति च। अर्कं वीर्यं वटे दीप्तिः
करञ्जे विजयो भवेत्। प्लक्षे चैवार्थसम्पत्तिर्वैद्यां
मधुरायनम्। खदिरे मुखसौगन्ध्यं बिल्वे तु
विपुलं धनम्। उदम्बरे तु वाक्सिद्धिराम्रे त्वारोग्यमेव
च। कदम्बे तु धृतिर्मेधा चम्पके दृढवाक्शुतिः।
शिरीषे कीर्तिसौभाग्यमायुरारोग्यमेव च। अपामार्गे
धृतिर्मेधा प्रज्ञाशक्तिस्तथाक्षने। दाड़िम्यां सुन्दराकारः
कुन्दे कुटजे तथा। जातीतगरमन्दारैर्दन्तः सम्प्रति विन-
श्यति। शुक्लाकाशास्थिसंकाशं केतकञ्च दृढच्छदः।
खर्जूरं नारिकेलञ्च सप्तैते दलराजकाः। दलराज
मलत्यक्तं दः कुर्याद् दन्तधावनम्। नरशाखाश्ववोनिः
स्याद्यावद्भक्षाच्च पश्यति। न खादेद् गलतालुजिह्वा
दन्तगदेषु तत्। मुखस्य पाके शोथे च दाहतास
वक्त्रेषु च। दुर्बलो जीर्णभुक्तश्च क्षिप्तामूर्च्छामदा-
न्वितः। शिरोरुजार्त्तश्छर्दितः श्रान्तः पानक्लमान्वितः।
वर्हितः कर्णमूकी च नेत्ररोगी नवज्वरी। वर्ज्यं भेद्दन्त-
काष्ठन्तु हृदामययुतोऽपि च। अजीर्णभुक्तः न जीर्णं
भुक्तं यस्य सः। जिह्वानिर्लेखनं हैमं राजतं ताम्रजं
तथा। पाटितं मृदु तत् कार्यं मृदुपल्लवसंयं तथा। तत्
काष्ठं दन्तशोधनयोग्यं काष्ठम्। दशाङ्गुलं मृदु स्निग्धं
तेन जिह्वां लिखेत् सुखम्। तज्जिह्वामलवैरस्यदुर्गन्ध
जड़ताहरम्। गण्डूषमपि कुर्वीत शीतेन पयसा
शुद्धः। कफस्थानमलहरं मुखानःशुद्धिकारकम्।
मुखोष्णोदकगण्डूषः कफार्त्तिमलापहः। दन्त-
जाड्यहरश्चापि मुखलाघवकारकः। विषमूर्च्छामदा-
र्त्तानां शोषिणां रक्तपित्तिनाम्। कृपितास्रिमलक्षीण
रूक्षाणां स न शस्यते। मुखोष्णोदकगण्डूषो यथा
"मुखप्रक्षालनं शीतपयसा रक्तपित्तजित्। मुखस्य पीड़ि-
काशोथनीलिकाव्यङ्गनाशनम्। कुर्याद्वापि कटूष्णेन
पयसाक्षविशोधनम्। कफवातहरं स्निग्धं मुख-
शोषविनाशनम्। कटुतैलादि नस्यार्थे नित्याभ्यासेन
योजयेत्। प्रातः श्लेष्मणि मध्याह्ने पित्ते सायं समी-
रणे। सुगन्धवदनाः स्निग्धनिःसना विमलेन्द्रियाः।
निर्वलीपलितव्यङ्गा भवेयुर्नरयोषितः। सौवीरमञ्जनं
नित्यं हितमक्ष्णोस्ततो भजेत्। लोचने मलसंज्ञे न
मनाक्षे सूक्ष्मदर्शने। सौवीरं (श्वेतसुरमा) इति लोके
प्रसिद्धम्। लोतोऽञ्जनं मतं श्रेष्ठं विपुलं सिन्धुसम्भ-
वम्। दृष्टेः कण्डूयनहरं दाहक्लेदरुजापहम्।
अक्ष्णोरुपापहञ्चैव सङ्कते मारुतापहा। नेत्रे रोगा न
जायन्ते तस्मादञ्जनमाचरेत्। लोतोऽञ्जनं (कृष्णसुरमा)
इति लोके। विपुलं शोभनं विनापि। सिन्धुसम्भवम्
सिन्धुनाम पर्वतः तत्र सम्भवम्। रात्रौ जागरितः
श्रान्तः वर्हितो भुक्तवांस्तथा। ज्वरातुरः शिरःस्नातो
नाक्ष्णोरञ्जनमाचरेत्। पक्षरात्राच्छश्मश्रुकेशरोमाणि
कर्त्तयेत्। केशश्मश्रुनखादीनां कर्त्तनं सम्यसाधनम्।
पौष्टिकं धनमायुष्यं शौचकान्तिकरं परम्। सभ्य-
साधनम् शोभाजनकम्। उत्पाटयेत् लोमानि
नासायाः न कदाचन। तदुत्पाटनतो दृष्टेर्दौर्बल्यं
खरया भवेत्। केशयोर्यः प्रकृतीति प्रसाधन्या प्रसाधनम्।
केशप्रसाधनं केश्यं रञ्जोजन्तुमलापहम्। आदर्श-
लोकनं मेधा माङ्गल्यं कान्तिकारकम्। पौष्टिकं
बल्यमायुष्यं पापालक्ष्मीविनाशनम्। लाघवं कर्म-
सामर्थ्यं विभक्तघनगात्रता। दोषत्रयोऽग्निर्वर्द्धते
व्यायामादुपजायते। व्यायामे दृढगात्रस्य व्याधिर्नास्ति
कदाचन। विरुद्धं वा विदग्धं वा भुक्तं शीघ्रं विप-
द्यते। भवन्ति शीघ्रं नैतस्य देहे शिथिलतादयः। नचैनं
सहसाक्रम्य जरा समधिरोहति। न चास्ति सदृशस्तेन
किञ्चित् सौख्यापकर्षकम्। स सदा सुखमाधत्ते बलिनां
स्निग्धभोजिनाम्। वसन्ते शीतसमये शरदां स हितो
मतः। अन्यदापि च कर्त्तव्यो बलाद्वेन यथाबलम्।

हृदवस्तो यदा वायुर्ऊर्ध्वं शीघ्रं प्रधावते। सुखञ्च शोषं चमते तद् बलार्द्धस्य लक्षणम्। किं वा ललाटे नासायां नाभसन्धिषु कक्षयोः। यदा सञ्जायते स्वेदो बलार्द्धन्तु तदादिशेत्। भुक्तवान् क्षतसंयोगः कासी श्वासी क्षयः क्षयी। रक्तपित्ती क्षती शोषी न तं कुर्य्यात् कदाचन। अतिव्यायामतः कासो ज्वरः कृच्छ्रः श्रमः क्लमः। तृष्णा क्षयः प्रतमको रक्तपित्तञ्च जायते। अभ्यङ्गं कारयेत् स्निग्धं सर्वेष्वङ्गेषु पुष्टिदम्। शिरःश्रवणपादेषु तं विशेषेण शीलयेत्। सार्षपं गन्धतैलञ्च यत्तैलं पुष्पवासितम्। अन्यद्द्रव्ययुतं तैलं न दुष्यति कदाचन। गन्धतैलम् गन्धद्रव्याणामगुर्वादीनामग्नियोगेन निष्काशितः स्नेहः। अभ्यङ्गो वातकफहृच्छ्रमशान्तिबलं सुखम्। निद्रावर्णस्मृत्यायुः कुरुते देहपुष्टिकृत्। अभ्यङ्गः शीलितो मूर्ध्नि सकलेन्द्रियतर्पकः। दृष्टिपुष्टिकरो हन्ति शिरोभूमिगतान् गदान्। केशानां बहुतां दार्ढ्यं मृदुतां दीर्घतां तथा। कृष्णतां कुरुते कुर्याच्छिरसः पूर्णतामपि। न कर्णरोगाश्च मलं न च मन्दाश्रुतयश्च। नेत्रैःश्रुतिर्न व्याधिर्यं खालित्यं कर्णपूरणात्। रसाद्यैः पूरणं कर्णे भोजनात् प्राक् प्रशस्यते। तैलाद्यैः पूरणं कर्णे भास्करेऽस्तमुपागते। पादाभ्यङ्गच तत्रस्थैर्यं निद्रादृष्टिप्रसादकृत्। पादतलमि श्रमसम्भवसङ्कोचस्फुटनप्रणुत्। व्यायामक्लमखेदपङ्गुतां संमर्दितं तथा। व्याधयोनोपसर्पन्ति वैनतेयमिवोरगाः। लोमकूपं शिराजालं धमनीभिः कलेवरैः। तर्पयेद्वलमाधत्ते स्नेहयुक्तावगाहने। यद्भिः संसिक्तमूलानां तरूणाम्यद्भवादयः। वर्द्धन्ते हि तथा रूपां स्नेहसंसिक्तधातवः। नवज्वरी अजीर्णी च नाभ्यङ्गेत कदाचन। तथा विरिक्तो वान्तश्च निरूढो यश्च मानवः। निरूढः दत्तो निरूहवस्तिः यस्य सः। पूर्वयोः कृच्छ्रता व्याधेरसाध्यत्वमथापि वा। दोषाणां नस्यिह प्रोक्ता बस्तिसादादयो गदाः। पूर्वयोः तरुणज्वरिणोऽजीर्णिनश्च। उद्वर्त्तनङ्कफहरं मेदोघ्नं शुक्रदस्मरम्। बल्यं शोणितकृच्चापि त्वक्प्रसादकृदुत्तमम्। सुखस्पर्शात् दृढं चक्षुः पीनोगण्डकृत्वाननम्। कान्तमङ्गञ्च पिण्डितं भवेत्कमलसन्निभम्। दीपनं वृष्यमायुष्यं स्नानमोजो बलप्रदम्। कण्डूमलश्रमस्वेदतन्द्रादाहपाकनुत्। आशुचि सैकैः शीतादैरुष्णान्तर्याति पीड़ितः। नरस्य स्नातमात्रस्य दीयते तेन पावकः। शीतेन वपुषा स्नानं रक्तपित्तप्रशान्तिकृत्। तदेवोष्णेन तोयेन बल्यं वातकफापहम्। शिरःस्नानमक्षिपूयमस्रुण्यो नाम्नु सदा। वातश्लेष्मकोपे तु हितत्वञ्च प्रकीर्त्तितम्। "अशीतेनाम्बुना स्नानं पयःपानञ्च स्त्रियः। एतद्धि मानवा! पथ्यं स्निग्धमल्पञ्च भोजनम्।" हरिचन्द्रस्यैतत्। यः सदामलकैः स्नानं करोति स विनिश्चितम्। वलीपलितनिर्मुक्तो जीवेद्वर्षशतञ्चरः। स्नानं ज्वरेऽतिसारे च नेत्रकर्णातिसारिषु। आध्मानपीनसाजीर्णभुक्तवत्सु च गर्हितम्। स्नानस्यानन्तरं सम्यक्स्नेहाक्तस्य मार्जनम्। कान्तिप्रदं शरीरस्य कण्डूत्वमृदोषनाशनम्। कौशेयौर्णिकवस्त्रञ्च रक्तवस्त्रन्तथैव च। वातश्लेष्महरन्त्वन्तु शीतकाले विधारयेत्। कौशेयं षट्पदाम्बरम् तसरवस्त्रञ्च। मेध्यं सुशीतम्मित्तम्न कषायं वस्त्रमुच्यते। तद्वारयेदुष्णकाले तत्रापि लघु शस्यते। कषायं (कोसुकी) इति लोके कषायरागरक्तं वा। शुक्लन्तु शुभ्रं वस्त्रं शीतातपनिवारणम्। नवोष्णञ्च च वा शीतन्तत्तु वर्षासु धारयेत्। यशस्यञ्चाम्बमायुष्यं श्रीमदानन्दवर्द्धनम्। त्वच्यं वशीकरं रूच्यं नवं निर्मलमम्बरम्। काम्यं कामोद्दीपकम्। कदापि न जनैः सद्भिर्धार्य्यं मलिनमम्बरम्। तत्तु कण्डूकृमिकरं ग्लान्यलक्ष्मीकरमम्बरम्। अलक्ष्मीः अशोभा दारिद्र्यञ्च। कुङ्कुमञ्चन्दनञ्चापि कृष्णागुरु च मिश्रितम्। तृष्णां वातकफञ्चापि शीतकाले तदिष्यते। चन्दनं घनसारेण वालकेन च मिश्रितम्। सुगन्धि परमं शीतसृष्टकाले प्रशस्यते। घनसारः कर्पूरः वालकं क्षीवेरम्। चन्दनं घुसृणोपेतं सृगनाभिसमायुतम्। न चोष्णं नच वा शीतं वर्षाकाले तदिष्यते। घुसृणं कुङ्कुमम्। सृगनाभिः कस्तूरी। अनुलेपस्तृष्णामूर्च्छादुर्गन्धस्वेददाहजित्। सौभाग्यतेजस्तत्वर्णपीत्योजोबलवर्द्धनः। स स्नानानर्हलोकानामनुलेपोऽपि नो हितः। सुगन्धिपुष्पपत्राणां धारणङ्कान्तिकारकम्। पापरोगभयहरं कामदं श्रीविवर्द्धनम्। भूषणैर्भूषयेदङ्गं यथायोग्यं विधानतः। शुचिसौभाग्यसन्तोषदायकं काङ्क्षनं स्मृतम्। अहरिद्दिहरं पुष्टिकरं दुःस्वप्ननाशनम्। पापदौर्भाग्यशमनं रत्नाभरणधारणम्। माणिक्यन्तरक्षेः सुजात्यमलं सत्ताफलम् शीतगोर्म्मोक्षेयस्य च विद्रुमो निगदितः सौख्यस्य गारुत्मतम्। देवेज्यस्य च पुष्परागमसुराचार्य्यस्य वज्रं, शनेः नीलद्विर्भलमन्ययोश्च गदिते गोमेद-

वातरजोऽपहम्। स्निग्धं स्थिरत्वं च माङ्गल्यमपि कीर्त्तितम्। सत्योत्साहबलस्थैर्यधैर्यतेजोविवर्द्धनम्। अपदस्मकरत्वापि मध्यं दण्डधारणम्। कर्णाच्छादन संयुक्ता शिविका सर्ववल्लभा। तस्यामारोहणं नृणां त्रिदोषशमकं मतम्। वातश्लेष्मगदार्त्तानामहिता भ्रमकृत्तरिः। पित्तानिलकरो रूक्षो लघुप्रायुःपुष्टिवर्द्धनः। घोटकारोहणं वातपित्ताग्निश्रमकृन्मतम्। मेदोवर्द्धकफघ्नञ्च स्थिरं तद्वन्निनां परम्। श्रमतप्तस्वेदमूर्च्छाक्षपित्तदाहाङ्गमर्दमान्। दाहं विवर्णतां कृच्छ्रादेतान् जयो व्यपोहति। इतिदैवज्ञा स्थिरावस्था निद्रालस्यविधायिनी।"

**दिनज्योतिस्** न० ६त०। ज्योतिषे राजनि०।

**दिनदुःखित** पुंस्त्री० दिनेन दिवा दुःखितः उत्कण्ठितः। चक्रवाके शब्दर०। स्त्रियां ङीष्। रात्रौ हि स्त्रीविरहेण दिनार्द्धसुत्कण्ठायुक्तत्वात् तस्य तथात्वम्।

**दिनप** पु० दिनं पाति पा-क। १सूर्ये हारा० २अर्कवृक्षे ३सूर्य्यादिषु वारेषु च "दिनाब्दमासकोराणामधिपा न समाः कृतः" इति मयस्य प्रश्ने "मन्दादधः क्रमेण स्युस्तुर्या दिवसाधिपाः। वर्षाधिपतयस्तद्वत् तृतीयाश्च प्रकीर्त्तिताः" सू० सि०। "शनेः सकाशादधः क्रमेण चतुर्थसङ्ख्याका यहा दिनाधिपतयो वारेश्वरा भवन्ति यथा शनिरविचन्द्रभौमबुधगुरुशुक्रा इति तत्क्रमः" रङ्ग० "सूतकानां परिच्छेदो दिनसाम्याद्दशाहयो। मध्यमषड्भुक्तिसु सावनेनैव गृह्यते" सू०सि०।

**दिनपति** पु०६त०। १सूर्ये २अर्कवृक्षे च ३वारेशसूर्य्यादौ च दिनपशब्दे दृश्यम् दिननाथदिनेशादयोऽप्यत्र। ४दिनप्रवेशलग्नेशे दिनप्रवेशलग्नेश्वरादिषु मध्ये तल्लग्नदर्शिनि अधिकबलयुक्ते ५यहभेदे च दिनपशब्दे दृश्यम्। "दिननाथपूर्णशशिनोरसम्भवात्" माघः।

**दिनपात** पु० दिनस्य चान्द्रदिनस्य तिथेः पातः क्षयः। दिनक्षये "अधिमासे दिनपाते धनुषि रवौ मानुसङ्क्रान्ते मासि। चक्रिणि सुप्ते कुर्य्यान्न माङ्गल्यं विवाहञ्च" भीमपराक्रमः।

**दिनपिण्ड** पु० ६त०। ज्योतिषोक्ते अङ्कगणे।

**दिनप्रणी** पु०दिनं प्रणयति करोति प्र+नी+क्विप्। १सूर्ये २अर्कवृक्षे च।

**दिनप्रवेश** पु० ताजकोक्ते मासप्रवेशवत् वर्षमासलग्नजदिनानां प्रवेशे तत्प्रवेशकालाद्यानयनं नीलकण्ठोक्तं यथा "मासार्कस्य तदासन्नषड्लग्नार्केण सङ्गुणम्। कलीकृत्यार्कभक्तात्तु दिनाद्येन युतोनितम्। तत् षड्लिप्तस्थं वारपूर्वं मासार्केऽधिकहीनके। तदारादौ मासवेशो दिवसेऽप्येव भवेत्"। अयमर्थः मासार्कः वर्षप्रवेशकालीन एव राश्यंशकलाविकलादियुक्तः सूर्यः प्रथममासार्कः द्वितीयमासार्केषु तथाभूतार्क एकैकराशिभावयुक्तः। तस्य तदासन्नषड्लग्नार्केण पाश्चात्यदेशप्रचलितमकरन्दानुसारितिथिपत्रिकास्थस्पष्टयहसाधकषड्लिप्तस्थेन स्फुटार्केण यदन्तरं तत् कलात्मकं कृत्वा तद्विवसीयरविभक्त्वा तद्विवसीयस्फुट सूर्यगत्या हरणेन लब्धदिनाद्येन तत्षड्लिप्तस्थार्क! वारादिना युतमूनितं वा कार्यं तथा सति यदि मासार्कस्ततोऽधिको भवति तदा पूर्वोत्तरीत्या युते वारादौ मासप्रवेशे वारादिर्भवति यदि मासार्कस्ततो हीनो भवति तदा ऊनितं कार्यम् एवंकृते तथाभूते वारादिके मासप्रवेशो भवति। दिनप्रवेशे त्वयं भेदः। वर्षप्रवेशप्रथममासप्रवेशकालयोरैक्यमिव प्रथमदिनप्रवेशस्यापि तत्कालैक्यम्। द्वितीयादिदिनप्रवेशकालस्तु इत्थम् मासार्कस्थाने दिनार्क इति विपरिणमनीयम् तथा च मासार्के एकैकांशयोजने द्वितीयादिदिनार्को भवति तस्य पूर्ववत् मासलग्नषड्लिप्तस्थस्फुटार्केण यदन्तरं तत्कलात्मकं कृत्वा तद्विवसीयार्थगत्या हृते लब्धेन दिनाद्येन षड्लिप्तस्थार्ककालवारादिकं युतमूनितं वा कार्यं तथा सति यद् अंशादिकं भवति तत्षड्लिप्तस्थार्ककालीनवारादिषु हीनमधिकं कार्यं तथा कृते यद्भवति तत् द्वितीयादिदिनप्रवेशे वारादि ज्ञेयम् तथा च तादृक्समये यस्य राशेरुदयः तत् अंशादिसंहितं दिनप्रवेशलग्नम् इति।

दिनेशायनं च तत्रैवोक्तं यथा

"तत्र मासतनोर्नाथो लग्नेशोऽन्यपलग्नपः। त्रिराशिपो दिननिशोरवीन्दुभपतिस्तथा। यद्यप्रवेशलग्नेश एषु वीर्याधिकस्तनुम्। पश्यन् मासपतिर्वत्सरतो वाच्यं शुभाशुभम्। अपरे दिनलग्नेशं तथा प्राचुर्विचक्षणाः। मासपलग्नेशयोर्वाच्यं फलं वर्षेशवद्बुधैः" नी०क० इत्युपक्रमे दिनपतिनिर्णयस्तत्फलं च तत्रोक्तं यथा "दिनप्रवेशकालेऽपि खेटान् भावांश साधयेत्। चन्द्रलग्नांशकाभ्यां तु फलं तत्र वदेद्बुधः। चतुश्चक्रनिखेषादि दिनमासाब्दवत्क्रमात्। एषां बली तनुं पश्यन् दिनेशः परिकीर्त्तितः"। इत्यनिखेषादिचतुष्कम् दिनसुखेशः लग्न-

लग्नेशः, दिनरात्रिभेदेन दिने दिनप्रवेशे सूर्यः, रात्रौ दिनप्रवेशे चन्द्रः, एतच्चतुष्कं, दिनमासाब्दपाः दिनप्रवेशमासप्रवेशवर्षप्रवेशलग्नेशास्त्रयः इति सप्तानां मध्ये योऽधिकबलवान् दिनप्रवेशलग्नदर्शी च स दिनपतिरिति बोध्यम्। इदन्त्ववधेयं सन्ध्या हि रात्र्यादियुतं लग्नलग्नमेव सा च एकैकवर्षे एकैकराशिमतिक्रम्य राश्यन्तरे गच्छति तेन तत्सा मासे त्रैराशिकेन सार्द्धद्व्यंशभोगः दिने च पञ्चकलाभोगः तदनुसारेणैव सन्ध्यायाः राश्यादिकल्पनया तदधीशनिरूपणम्। "त्रिकोणकेन्द्रायगताः शुभाधेन्द्रात्तनोर्वा बलिनः खलास्तु। भङ्गन्यगास्तत्र दिने सुखानि विलासमानार्थयशोयुतानि। षड्डरिष्फोपगता दिनाब्दमासैर्निहेयाः खलखेटयुक्ताः। गदप्रदा मानयशोहराश्च केन्द्रत्रिकोणायगताः शुभाग्र्याः। लग्नांशपः सौम्यखगैः समेतो दृष्टोऽपि वा मित्रदृगेन्दुनापि। नैरुज्यराज्यादिशरीरपुष्टिमांगोक्तवद्दुःखमतोन्यथात्वे। यदंशपः सूर्ययुगोचितो वा स्त्रिग्धेक्षणाद्भावजसौख्यकृत् सः। दुःखप्रदः प्रोक्तवदन्यथात्वे सर्वेषु भावेष्विवमेव रीतिः। षडंशकः सौम्ययुतो रोगदः पापयुक् शुभः। व्ययांशः शुभयुग्दृष्टः सद्व्ययः पापसत्स्वसन्। आयांशः सौम्ययुग्दृष्टः स्वस्त्रीसौख्यविलासकृत्। पापैर्युतैः कलिर्दुःखं पापान्त्यस्थे मृतिं वदेत्। शुभमध्यस्थिते स्वर्क्षे बन्धुं कामिनीसुखम्। स्वस्थां रतिर्युतावन्यखगेऽन्यासु रतिं वदेत्। सूर्यर्क्षे सूर्युगैः सौम्यैर्युग्दृष्टे मरणं रणे। मिश्रैर्मिश्रं खलैः सौख्यं वर्षलग्नानुसारतः। द्विहृद्गे खला हानिं व्यये सौम्याः शुभव्ययम्। कर्त्तरी पापजा रोगं करोति शुभजा शुभम्। लग्नेऽष्टमे वा क्षीणेन्दुर्मृत्युदः पापदृग्युतः। रोगो वा यदृक्षं वापि रिपुतः, शस्त्रभीरपि। चन्द्रे सभौमे निधनारिसंस्थे स्त्रियां भयं शस्त्रकृतं पशोर्वा। पापैः सुखस्थैः पतनं गजाश्वयानात्ततः स्याद्बन्धना च पीड़ा। शुभा द्यूने विजयदा द्यूनार्द्धे सुखावहाः। नवमे धर्मभाग्यार्थराजगौरवकीर्त्तिदाः। दिनप्रवेशेऽस्ति विधुरवस्थायां तु यादृशि। तदवस्था तल्लग्नभौ फलं दत्ते न संशयः। विहाय रात्रिं चन्द्रस्य भागा द्विघ्नाः शरोद्धृताः। लब्धं गता अवस्थाः स्युर्भोग्यायाः फलमादिशेत्। प्रवासं प्रवासोपगते रात्रिनाथेऽर्थनाशस्तु नष्टोपगे मृत्युभीतिः। मृतावस्थिते स्वाब्ज्यायां जयस्तु विलासस्तु क्षीणोपगे कामिनीभिः। रतौ स्याद्रतिः क्रीड़िता सौख्यदात्री प्रसुप्ता च निद्रां कलिर्देत्यपीड़ाम्। भयं तापराशिः सुखं स्यात्तु भुक्ता ज्वराक्रान्तिता स्वित्तास्तु क्रमेण"।

**दिनबन्धु** पु० हृत०। १सूर्ये हेमच०। २चण्डेशे च

**दिनबल** पु०दिने बलं यस्य। १द्विपदराशिषु। ते च राशयः बृहज्जा० भट्टोत्पलयोरुक्ता यथा

"होरा स्वामिगुरुत्रयीचितयुता नान्त्यैश्च वीर्योत्कटाः केन्द्रस्था द्विपदादयोऽह्नि, निशि च प्राप्ते च सन्ध्याह्वये" मू० "वीर्योत्कटाः इत्यनुवर्त्तते द्विपदादयो द्विपदचतुष्पदकीटाः यथाक्रममह्नि, निशि, प्राप्ते च सन्ध्याह्वये वीर्योत्कटाः भवन्ति अह्नि दिने द्विपदा बलिनः, निशि रात्रौ चतुष्पदाः, सन्ध्याह्वये कीटाः। अत्र न केवलं दृष्टिकं कीटः यावदाद्याः कीटपङ्क्तयश्चैव ज्ञेयाः। तत्र च श्रीदेवकीर्तिः "मिथुनतुलाकुम्भकन्या दिवाबला धन्विनश्च पूर्वार्द्धम्। अजहरिसिंहा रात्रौ मृगहययोः पूर्वपक्षार्द्धे। वृश्चिकमीनकुलीरा मकरान्त्यार्द्धं च सन्ध्ययोरिति" भट्टो०। एवं स्थिते यद्भक्त० पञ्चषडादिराशीनां बलिन बलत्वं तन्मूलं चिन्त्यम्। दिने बलं यस्य। २सूर्यसुरगुरुषु यज्ञेषु यथाह बृहज्जा०"निशि शशिकुजसौराः सर्वदा क्षीणदृश्चि, चान्ये, बुधसहितगताः स्युः क्रूरसौम्याः क्रमेण" "शशिकुजसौराचन्द्रभौमशनयः निशि रात्रौ वीर्यवन्तो बलिनः, बुधः सर्वदा सर्वस्मिन् काले निशि दिने च बली, अन्ये परे रविगुरुसिता अह्नि दिने बलिनः" भट्टो०।

**दिनमणि** पु०दिने मणिरिव प्रकाशकत्वात्। १सूर्ये हारा०। २चण्डेशे च "दिनमणिमण्डलमण्डन! भवखण्डन!" गीतगो०। "महदहः किमहो रजनी तनुर्दिनमणौ मघकोत्तरगोलगे। नन्वतनुर्दिवसो महती निशा वद विचक्षण! दक्षिणदिग्गते" सि०शि०

**दिनमयूख** पु०दिने मयूखोऽस्य। १सूर्ये २चण्डेशे च दिनकिरणादयोऽप्यत्र।

**दिनमान** न० दिनस्य मानम्। सूर्यदर्शनकालस्य मानभेदे तन्मानभेदे कारणं सि०शि० उक्तं यथा

"अतश्च सौम्ये दिवसो महान् स्यात् रात्रिर्लघुर्याम्यमतश्च याम्ये। द्युरात्रखण्डे क्षितिजादधःस्थे रात्रिर्व्रतः स्याद्दिनमानमूर्द्धे। सदा समत्वं द्युनिशोर्निरक्षे नोन्मण्डलं तत्र कुजादृयतोऽन्यत्। षट्षष्टिभागाभ्यधिकाः पलांशा यत्राक्षतत्रान्यपरो विभेदः। लम्बाधिका क्रान्तिरुदक्

च यावत् तावद्दिनं सततमेव तत्र। यावच्च याम्यां सततं तमिस्रा ततश्च मेरौ सततं समार्द्धम्। विषुवद्वृत्तं द्युसदां क्षितिजस्थमितं तथा च दैत्यानाम्। उत्तरयाम्यौ क्रमशो मूर्ध्नोर्द्ध्वगतौ ध्रुवौ सतां तेषाम्। उत्तरगोले क्षितिजादूर्द्ध्वं परितो भ्रमन्नादित्यम्। सर्व्वं त्रिदशाः सततं पश्यन्त्यसुरा असव्यं याम्ये। दिनं दिनेशस्य यतोऽत्र दर्शने तमी तमोऽन्तरदर्शने सति। कुपूरुषाणां द्युनिशं यथा नृणां तथा पितॄणां शशिपूरुषाश्रिताम्। दिनं सुराणामवनं यदुत्तरं निशेतरत् सांक्षितिकैः प्रकीर्त्तितम्। दिनोन्मुखेऽर्के दिनमेव तन्मतं निशा तथा तत्फलकीर्त्तनाय तत्। इत्थान्मारोहति यैः क्रमेण तैरेव हीनैरवरोहतीनः। यतैव दृष्टः प्रथमं स देवैस्तत्रैव तिष्ठन् न विलोक्यते किम् ?। विधूर्ध्वभागे पितरो वसन्तः स्वाधः सुधादीधितिमामनन्ति। पश्यन्ति तेऽर्कं निजमस्तकोर्ध्वं दर्शे यतोऽस्माद् द्युदलं तदेषाम्। भाधोन्नरत्वात्र विधोरधःस्थं तस्माच्छशीवः खनु पौर्णमास्याम्। कृष्णे रविः पञ्चदशेऽभ्युदेति शुक्लेऽस्तमेत्यत्र एव सिद्धम्। यदतिदूरतो दृष्टिः क्षितेः सततमाप्लवं रविमीक्षते। भवति तावदयं शयितश्च तदुगमद्दक्षयुगं द्युनिशं विधेः। यो हि प्रदेशोऽपममण्डलस्य तिर्यक्स्थितो वालुदयं तयोस्तम्। सोऽल्पेन कालेन य ऊर्ध्वसंस्थोऽनल्पेन खोऽस्माद्दयां न तल्याः। व उन्नमे याम्यनता मस्माद्याः स्वस्यापमेनापि निरक्षदेशे। याम्याच्चतस्रोऽतिनतत्वमाप्ता उदयन्ति कालेन ततोऽल्पकेन। कर्कादयः सौम्यनता हि वेऽत्र ते यान्ति याम्याद्भवशाद्विलम्बम्। कालेन तस्माद्दक्षखोदयन्ते तदन्तरे खं चरषड्भमेव। अचक्रपादास्त्रिभनाड़िकाभिः पुरक् मसद्यन्ति निरक्षदेशे। चक्रार्धमाद्यं च तथा द्वितीयं सर्वत्र पूर्वास्त्रिदशामिरेव। मेषादेर्मिथुनान्तो नाड़ीभिस्त्रिंशिमताभिरुदेति। उदयति कुजे तदधःस्थे प्रथमं तामिश्रहोनाभिः। कन्यान्ताद्वृषोऽन्तस्त्रिंशिमितनाड़ीभिरुदेति। उदयति कुजे चोर्ध्वस्थे पश्चात् तामिस्रराढ्याभिः। तद्वर्त्तितस्त्रिंशद्भिः कन्यान्तो वा झषान्तो वा। चरषण्डेऽस्माद्याम्येन निरक्षोदयाः स्वदेशे स्युः। क्षितिजेऽर्कादिं कृत्वा गोलं भ्रमयन् प्रदर्शयेत् सर्वम्। उक्तमुक्तं चान्यच्छिष्याणां बोधनार्थम्। योऽभ्युदेति प्रथमेन तेन तत्प्रथमोऽस्तमेत्यपरेति तेन च। राशिर्यत्र मध्यमण्डलं कुजादर्धमेव सततं खतः स्थितम्। यत्र लग्नजलवा २४जिनोनकालतो नोदयचरादधश्चरम्। नान्यसंस्थिततयान्यथोदितं देव नैव विषयो नगोचरः। यत्र लग्नमपमण्डलं कुजे तद्भटाद्यमिह लग्नमुच्यते। प्राचि पश्चिमकुजेऽस्तलग्नकं मध्यलग्नमिति दक्षिणोत्तरे।

**दिनमुख** न० ६त०। सङ्गर्षे प्रभाते। [त्रिका०।

**दिनमूर्द्धन्** पु० दिनस्य मूर्द्धेवाद्यत्वात्। उदयाचले

**दिनयौवन** न० दिनस्य यौवनमिव। मध्याह्ने शब्दार्थचि०

**दिनरत्न** न० दिनस्य रत्नमिव प्रकाशकत्वात्। १सूर्ये हेमच० २सङ्कटके च।

**दिनराशि** पु०६त०। ज्योतिषोक्ते १सङ्गर्षे "यथास्वभगणा भ्यस्तो दिनराशिः कुवासरैः। विभाजितो मध्यगता भगणादिर्लवो भवेत्" सू०सि०। २दिनसंघाते दशादौ राशौ च राशिशब्दे दृश्यम्।

**दिनव्यास** पु०दिनस्य सङ्गोरात्रात्मककालस्यापकर्षस्य व्यासः। सू०सि० उक्ते सङ्गोरात्रवृत्तव्यासे "क्रान्तौ क्रमोत्क्रमवशे हे कृत्वा तत्रोत्क्रमक्रियया। हीनान्विता दिनव्यासदलं तद्दक्षिणोत्तरम्" भू० "दिनव्यासदलमसङ्गोरात्रवृत्तस्य व्यासार्धम्" रङ्ग०।

**दिनांश** पु०६त०। त्रिधा विभक्तस्य दिनस्य १प्रातर्मध्याह्नसायाह्नेषु भागेषु राजनि०। पञ्चधाविभक्तस्य दिनस्य २प्रातःसङ्गवादौ च "प्रातःकालो मुहूर्त्तांस्त्रीन् सङ्गवस्तावदेव तु। मध्याह्नस्त्रिमुहूर्त्तः स्यादपराह्णस्ततःपरम्। सायाह्नस्त्रिमुहूर्त्तः स्यात् सायाह्नं तत्र न कारयेत्" तिथित०।

**दिनागम** पु० ६त०। प्रभाते "यद्यद्दानुगमक्रूरः स कदाचिदुदिनागमे" हरिवं० ८अ०।

**दिनादि** पु० ६त०। प्रभातकाले राजनि०।

**दिनान्त** पु० ६त०। सायाह्ने "कृत्वा दिनान्ते निलयाय गन्तुम्" रघुः। दिनावसानादयोऽत्र। "दिनावसानोत्सुकबालवत्सा" रघुः। [त्रिका०।

**दिनान्तक** पु० दिनमन्तयति अन्त+णिच्-ण्वुल्। अन्धकारे

**दिनारम्भ** ६त०। प्रभाते

**दिनार्द्ध** पु०दिनस्य सूर्यकिरणप्रकाशात्मककालस्यार्द्धम्। दिवाभागस्यार्द्धे "एवं विषुवति छाया स्वदेशे या दिनार्द्धजा" सू०सि०।

**दिनिका** स्त्री दिनं तत्रत्तं कर्मतेतत्वा स्वत्व ठन्। दिने कर्मकरणभृतौ(एकदिनेरभजुरि) रत्नमाला।

**दिनेश** पु०६त०। १सूर्ये हेमच०। २सङ्कटके दिनमनेनयत्योजे दिनप्रवेशलग्ने आदिषु मध्ये अधिकमनयुते तत्र-

दर्शिनि २यज्ञे ४स्वर्गादौ वारंवे च दिनेश्वरादयोऽप्यत्र ।

**दिनेशात्मज** पु० ६त० । १यमौ २यमे ३कर्णे ४सुग्रीवे च ५तपत्यां ६यमुनायां च स्त्री ।

**दिन्भ** सघाते चु० आत्म० सक० सेट् । दिम्भयते अदिदिम्भत

**दिप्सु** त्रि० दम्भ-सन् उ-ह्रस्वः न भम् । दम्भेच्छौ । "न यं दिप्सन्ति दिप्सवः" ऋ०१।२५।१४। "लोके तु धिप्सन्ति धिप्सुः" इति भेदः । [दिम्भत्-त ।

**दिभ** लोदने चु० उभ०सक० सेट् इदित् । दिम्भयति-ते अदिदिम्भत्-त ।

**दिम्भ** संघाते चुरा० उभ० सक०सेट् । दिम्भयति ते अदिदिम्भत्-त । [८।१८।२७।

**दिय** त्रि० देव+पृषो० । देवे "भुवद्वसुर्दियानां पतिः" ऋ०

**दिरिपक** पु० कन्दुके त्रिका० ।

**दिलीप** पु० सूर्यवंश्ये १नृपभेदे । सूर्यवंशे दिलीपौ च द्वौ जातौ एकः अंशुमतः पुत्रः खट्वाङ्गपरनामा । अपरोऽनिदृष्टस्य पुत्रः रामदत्तप्रपितामहः यथोक्तं हरिवंशे १५अ० "सुतः पञ्चजनस्यासीत्कुमारस्य वीर्यवान् । दिलीपस्तनयस्तस्य खट्वाङ्ग इति विश्रुतः । येन स्वर्गादिहागत्य मुहूर्तं प्राप्य जीवितम् । त्वयोऽनुसन्धिता लोका दुष्प्रा बलेन चानघ !। दिलीपस्तु तु दायादो महाराजो भगीरथः" । "अनमित्रसुतो राजा विद्वान् दुलिदुहोऽभवत् । दिलीपस्तनयस्तस्य रामस्य प्रपितामहः । दीर्घबाहुर्दिलीपस्य रघुर्नाम्नाऽभवत्सुतः । अयोध्यायां महाराजो रघुरासीन्महाबलः । अजस्तु रघुतोजज्ञे अजाद्दशरथोऽभवत् । रामो दशरथाज्जज्ञे धर्मात्मा सुमहायशाः" हरिवं० १५अ०रामस्य प्रपितामहः तस्य दृढप्रपितामहः दृत्यर्थः । तत्र रघुपतिरि "दिलीप इति राजेन्दुरिन्दुः क्षीरनिधाविव" रघुः । [त्रिका० ।

**दिलीपराज्** पु० दिलीप एव राट् राजा । दिलीपस्यापे

**दिलीर** न०द्व-बा०रेर पृषो० । शिलीन्ध्रे हारा० । [नीत् ।

**दिव** क्रीतौ भ्वा० पर०सक० सेट् इदित् । दिव्यति अदिदिव

**दिव** जिगीषायां क्रीडायां च सक०पक्षे व्यवहारे द्युत्यायां स्तुतौ च सक०दिवा०पर०सक०सेट् । अस्य करणस्य वा कर्मणः संज्ञा । अक्षैरक्षान् वा दीव्यति अदेवीत् दिदेव । देवित्वा द्यूत्वा देवनं दिदिवान् द्युद्यूवान् "अदीव्यद्रौद्रमक्षैश्च" भट्टिः । "उवाच दीव्याव पुनर्वसुवित्तं मयाऽर्जितम्" भा०व०७८अ० "दिव्यामि शकुने ! तया" भा०व०७३अ० "ततस्तु वाते वाक्यं वै पुण्यश्लोकस्य दीव्यतः" भा०व०६१अ० "तदाऽदेवीत् पाण्डवोऽजातशत्रुः" भा०व०६५अ० आर्षे तु क्वचित् तङ् । "अन्यत्र्यायैव दीव्येत विना द्यूतादेविनम्" भा० वि० १८अ० "अजानन्वा पुनर्द्यूतमेहि दीव्यस्व भारत !" भा०स०७४अ० । "के तत्रान्ये कितवा दीव्यमाना विना राज्ञो धृतराष्ट्रस्य पुत्रैः" ५६० स्त्री० "दिवस्तदर्थस्य" पा० व्यवहारक्रीडार्थत्वेऽस्य कर्म्मणि षष्ठी शतस्य दीव्यति । तदर्थस्य किं आक्षाणं दीव्यति सौतीस्वर्यः त्रि० कौ० । द्यूतं जिगीषायामन्यत्र आद्युनः जिगीषान्यत्र इत्यर्थः । दिदेविषति द्युद्यूषति देवयति ते अदिदिवत् त । "तेनाद्युद्यूषद्राजं सूनेय सृगलोचना" भट्टिः । देदिवीति देदीति उपसर्गपूर्वस्य तत्तदुपसर्गद्योत्यार्थयुक्ते तदर्थे ।

**दिव** कूजने चु० आत्म० सक० सेट् । देवयते अदिदेवत ।

**दिव** खण्डे चु० उभ० सक०सेट् । देवयति ते अदीदिवत् त ।

**दिव्** स्त्री दीव्यत्यत्र दिव-बा० आधारे क्विप् । १स्वर्गे २आकाशे च अमरः । द्यौः दिवौ दिवः द्युभ्याम् द्युषु । ३दिने "द्यौरेव द्युनिशोर्वाममं" स्मृ०वि० "मनीषितं द्यौरपि येन दुग्धा" रघुः "य इत्थमक्ष्णोरुभयोर्दिवं दिवः" "दिवीव चक्षुराततम्" ऋ०१।२२।५

**दिव** न० दीव्यत्यत्र घञर्थे आधारे क । १स्वर्गे । दिवौकसः त्रिदिवः । २आकाशे मेदि० ३दिने ४वने च हेमच० । तत्र स्वर्गे "लोकपालैर्महाभागैर्दिवं देवगणैरिव" भा०व० १६१अ० दिने "शुभमेऽभ्यधिकं राजन् ! दिवं ज्योतिर्गणैरिव" हरिवं० ८२ अ० ।

**दिवक्रम** त्रि०दिवमाकाशं स्वर्गं वा गच्छति दिव-बा० खच् मुम् । १आकाशगामिनि । "दिवं प्रतिष्ठमानानामस्तु शब्दो दिवक्रमः" भा०व० ४८अ० । २स्वर्गगामिनि च "दिवक्रमं करोधाय मार्गं भीमस्य कारणात्" भा०व० १४६अ० ।

**दिवन्** न० दिव-बा० अप्रतिपूर्वादपि कनिन् उच्चत्व० । स्वर्गे त्रिदिवौकसः । अस्य भत्वे उपधाऽकोपस्य दीर्घविधौ स्थानिवत्त्वाभावात् दीर्घः दीव्ना दीव्ने इत्यादि

**दिवस** पु० दीव्यत्यत्र दिव-असच् किच्च । "नाडीप्रहितमज्ञत्र यावतो दिवसः स्मृतः । त्रिंशन्नाडीऽहोरात्रेषु दिवसः सौर उच्यते । चान्द्रस्तु तिथ्यवच्छिन्नो भौमो भूपरिवेष्टनैः" इत्युक्तेषु सावनादिषु दिनेषु । "दिवसाः परिणामस्य योगाः" शक्तः । "अयोजयत् स धर्मात्मा दिवसे दिवसेऽत्र च" । भा०व० १८२अ० ।

**दिवसकर** पु० दिवसे करोऽस्य दिवसं करोति क-अच्

वा। १स्वर्गे हेमच०२अर्कवृक्षे च। "दिवसकरस्तोऽस्तं ध्यानमनस्कं हेषु" माघः। क-क्विप् दिवसदेवतात्र पु०।

**दिवस्पति** पु० दिवः पतिः ऋतुक्स०रोःसत्वम्। १इन्द्रे अमरः। "इन्द्राणीमानयिष्यामो यदेच्छसि दिवस्पते!" भा०उ०११अ०।

**दिवस्पुत्र** पु० दिवः आकाशस्य पुत्रवत् प्रियः दिवः पुरु त्रायते वै-क पृषो०वा। १द्युलोकप्रिये २द्युलोकपालके वा स्वर्गे। "दिवस्पुत्राय स्वर्गाय शंसत" यजु० ४।३५ "दिवस्पुत्राय द्युलोकस्य पुत्रवत् प्रियाय द्युलोकादि स्वर्गो जायते दिवः पुरु त्रायते स इति दिवस्पुत्राय दिवःपालकायेति" वा वेददी०।

**दिवस्पृथिवी** स्त्री द्वि०व०द्यौश्च पृथिवी च "दिवस्पृथिव्याम्" पा० दिव इत्येव चात् द्यावा च आदेशे अकारोच्चारणं सकारस्य रुत्वं (क्वापि) वा भूदित्येतदर्थम्" सि०कौ०। रोदस्योः द्यावाभूम्योः हेमच० "तं देवा वृत्रे रजसः सदंसं दिवस्पृथिव्योररतिम्" ऋ० २।२।१

**दिवस्पृश्** पु० स्पृशति स्पृश-क्विन् ह्रस्वः। पादेन स्वर्गस्पर्शिनि १परमेश्वरे "दिवस्पृक् सर्वदृग्व्यासः" विष्णुस०। "दिवःस्पर्शनाद्दिवस्पृक्" भा० "पादोऽस्य सर्वाभूतानि त्रिपादस्यामृतं दिवि" छा०उ० तस्य पादस्य दिविस्थत्वात् त्रिविक्रमावतारे वा तथात्वात् तत्त्वम्। २आकाशस्पर्शिनि यन्त्रादौ च।

**दिवा** अव्य० दिव-का। दिवसे अमरः "दिवा भातर्युग्मचरणयुगलध्याननिरतः" कर्पूरस्तवः "यच्छिमान्तु समासीनो मलं हन्ति दिवाकृतम्" मनुः।

**दिवाकर** पु०दिवा करोति क-ट। १सूर्ये २अर्कवृक्षे च "दिवाकरकरैः पूतं दिवास्नानं प्रशस्यते" तिथ्य० "दिवाकराद्रक्षति यो गुहासु" "दिवाकरादुद्भविभूषणास्यदाम्" कुमा०।

**दिवाकरसुत** पु० ह्रस्व०। १शनौ २यमे ३कर्णे ४सुग्रीवे च ५वसुनायां तपत्यां च स्त्री। ऋरषालजत्वाद्ङीष्। "गङ्गादिवाकरसुताजनचारुहारम्" ह०सं०४१ अ०

**दिवाकीर्त्ति** पु० दिवैव कीर्त्तिः कर्म यस्य रात्रौ तुरकर्मनिषेधात्। १नापिते अमरः। २चण्डाले हेमच०। तस्य दिवाचरत्वात्तथात्वं दिवाचरशब्दे दृश्यम्। "दिवाकीर्त्तिसदक्षाच्च पतितं सूतिकां तथा। श्वपचं तत्सृष्टिनं स्पृष्ट्वा स्नानेनैव विशुध्यति" मनुना तत्स्पृश्यत्वोक्तम्। दिवाकीर्त्तिर्वृक्ष। उल्लूके मेदिनी हेमच०।

दिवा तस्य नामोच्चारणे हि तत्र मध्यह्नस्य तिथिता जायते इति लोकसिद्धत्वात् तत्रान्यो न दिवाकीर्त्तनीयता।

**दिवाकीर्त्य** न०दिवा दिवसे कीर्त्यं कीर्त्तनीयम्। वर्षसाध्ये गवामयने सत्रे द्वयोर्मासषट्कयोर्मध्ये विषुवच्छब्दे एकविंशस्तुनि गेये साममेदे तच्च ता०ब्रा० ४।६।१ दर्शितं यथा "विषुवानेष भवति पूर्वोत्तरयोः पक्षयोर्मध्येऽनुदेवं गवामयनस्य प्रधानभूतं विषुवदाख्यमहः प्रदर्शयति एष विषुवान् संवत्सरस्य मध्यतो भवतीत्युक्तमे चविंशस्तुनि सामानि विधत्ते" भा०। "दिवाकीर्त्यसामा भवति" ता०ब्रा० ४।६।१२। "दिवाकीर्त्यानि शक्वरीयाणि सामानि तत्रिन् प्रयुज्यन्ते इति दिवाकीर्त्यसामा खलु विषुवान् दिवाकीर्त्यसामा कार्यः" भा०। तस्य प्रशंसापूर्वकं तत्र गेयर्चः प्रतीकश्च दर्शितः यथा

"स्वर्भानुर्वा आसुर आदित्यमन्वविध्यत्तस्य देवा दिवाकीर्त्यैस्तमोऽपाघ्नन् यद्दिवाकीर्त्यानि भवन्ति तस्मादेवाख्यादपघ्नन्ति रक्षसो वा एत आदित्यस्य यद्दिवाकीर्त्यानि रश्मिभिरेव तदादित्यं साक्षादारभन्ते" ता०ब्रा० ४।६।१२ "आसुरेण स्वर्भानुना तमसाविद्धस्यादित्यस्य वाधकं तमोऽन्धकारं देवा दिवाकीर्त्यैः सामभिरपाघ्नन् व्यनाशयन् अतो यद्दिवाकीर्त्यान्यक्विन् भवन्ति तेन तस्मादेवाख्यादादित्यादपघ्नन्ति। कथमेषां साम्नां तमोघ्ननसामर्थ्यमिति चेत् उच्यते दिवाकीर्त्यसामानीति यत् एते आदित्यस्य रक्षसो वै रश्मिरूपा एव अत एषां युक्तमेव तमसो नाशकत्वं तत्तथासति रश्मिभिरेवादित्यं साक्षात् प्रत्यक्षमारभन्ते ये सक्विणो विष्टुतिं दिवाकीर्त्यानि प्रयुञ्जत इत्यर्थः। दिवाकीर्त्यसामभिस्तमोऽपघ्नन् सामान्येवोक्तं तदेव विवृणोति" भा० "भ्राजाभ्राजे पवमानसुखे भवतो रथन्तर एवास्य तमोऽपघ्नन्ति" ता०ब्रा० ४।६।१४। "पवमानसुखे माध्यन्दिनार्भवयोः पवमानयोर्मध्ये सुखे भ्राजाभ्राजे सामनी भवतः गायत्रस्य नित्यत्वात् ततः परस्तात् क्रमेण भवत इत्यर्थः। अस्य ब्रह्मासनुदूतमिति तृचे गातव्यं साम भ्राजं, तत्माध्यन्दिने पवमानसुखे, "परिष्कानोगिरिष्टा इत्यक्विन् गेयं साम भ्राभ्राजं तदार्भवपवमानसुखे" भा०

**दिवाचर** त्रि० दिवा दिवसे चरति भक्षार्थम् चर-ट। पक्षिभेदे स्त्रियां ङीप्। "दिवाचरो न सर्वेषां न च नक्तञ्चरो दिवा" ह०सं० ८अ० २चण्डाले तस्य रात्रौ ग्रामनगरे चारनिषेधेन दिवसे एव चारस्य मनुनावि-

स्थितत्वात् तथात्वं यथा "रात्रौ न विचरेयुस्ते यामेषु नगरेषु च। दिवा चरेयुः कार्य्यार्थं चिह्निता राजशासनैः" श्यामाशबलादौ च दिवाशब्दरूपेण दृश्यम्।

**दिवाचारिन्** त्रि॰ दिवा चरति चर–णिनि। दिवसञ्चारिणि भूते। "स्वाङ्गेत्यच बहिरङ्गम्" इत्युपक्रमे "सर्वेभ्यो भूतेभ्यो दिवाचारिभ्य इति दिवा" आह्निक॰ १।२।८स॰।

**दिवाटन** पुंस्त्री॰ दिवाऽटति अट–ल्यु। १काके शब्दार्थकल्प॰ स्त्रियां जातित्वात् ङीष्। २दिवाभ्रमणयुक्ते त्रि॰।

**दिवातन** त्रि॰ दिवा भवः टुञ् तट् च। दिवाभवे। "यथेन्द्र दिवातनस्य लेखा" कुमा॰। स्त्रियां ङीप्। "बहुजानां दिवातनीम्" भट्टिः।

**दिवातर** न॰ अतिशयेन दिवा प्रकाशकम् तरप्। अत्यन्तप्रकाशके दिवसे। "यः सुदर्शतरो दिवातरात्र मायुषे दिवातरात्" ऋ॰१।१२७।५

**दिवान्ध** पुंस्त्री॰ दिवा दिवसे अन्धः। १पेचके त्रिका॰२दिवान्धवायसभाषिणि च। "दिवान्धाः प्राणिनः केचित् रात्रावन्धास्तथाऽपरे" देवीभा॰२खल्गुलाख्ये स्त्री राजनि॰

**दिवान्धकी** स्त्री दिवान्ध–स्वार्थे क गौरा॰ ङीष्। कुकुन्द्यां पुराणम्।

**दिवाभीत** पुंस्त्री॰ दिवा दिवसे भीतः। १पेचके "क्षीणं दिवाभीतमिवान्धकारम्" कुमा॰। स्त्रियां जातित्वात् ङीष्। २कुपदाकरे ३चौरे च पु॰ मेदि॰।

**दिवाभीति** पु॰ दिवा भीतिरस्य। १पेचके शब्दर॰। २दिवसभीतियुक्ते त्रि॰। [इत्ये च।

**दिवामणि** पु॰ दिवा मणिरिव। १सूर्ये शब्दर॰ २सूर्यकान्तमणौ च।

**दिवामध्य** न॰ ६त॰। मध्याह्ने हेमच॰।

**दिवावसु** पु॰ दिवा वसुः किरणोऽस्य। १सूर्ये २सूर्यवंशे च द्योव्यति दिव–किप् द्यौः आवसुः हविरस्य दिवावसति वा+वस–उनु वा। ३द्योतमानविष्णौ २द्युलोकवासिनि वा इन्द्रे। "दिवं वय दिवावसो!" ऋ॰८।२४।१।

**दिवाशय** पु॰ दिवा दिवसे शेते–शी–अच् ७त॰। १दिवास्वापयुक्ते २दिवसेऽप्रकाशयुक्ते च "न मे दिवाशयाः पुत्रा न रात्रौ दधिभोजिनः। गुर्विणी नाहृणच्चति न भृग्नि रजखलाम्" जैमि॰ भारतम्। "आरुरोह कुपदाकरोपमां रात्रिजागरपरोदिवाशयः" रघुः।

**दिवासञ्चर** त्रि॰ दिवा दिवसे सञ्चरति सम्–चर–ट। दिवसचारिणि प्राणिभेदे तथाभूताः ह॰सं॰८८अ॰क्तिचिद्रात्रा यथा "शशमार्जारनकुलच्छुचुन्धिखीकर्मचकाङ्कवायसगृध्रकङ्कशरीटकशुकध्याङ्क्षाः कपोताश्वयः। भारद्वाजकुलालकुक्कुटखरा हारीतमद्गौ कपिः केटः कुक्कुटदर्पकूटचटकाघोका दिवासञ्चराः"।

**दिवास्वप्न** पु॰ दिवा दिवसे स्वप्नः। दिवानिद्रायाम्। तद्दोषादिकं दिनचर्य्याशब्दे भावप॰ उक्तमस्तम्। शुश्रुते च "सर्वेषु दिवास्वापः प्रतिषिद्धोऽन्यत्र ग्रीष्मात्। प्रतिषिद्धेऽपि तु खलूद्वस्त्रीकर्शितक्षतक्षीणमद्यनित्यवाग्वाहनाध्वकर्मपरिश्रान्तानामभुक्तवतां भेदःखेदकफरक्तक्षयाणामजीर्णिनाञ्च मुहूर्त्तं दिवास्वप्नप्रतिषिद्धं रात्रावपि जागरितवतां जागरितकालादर्द्धमिष्यते दिवास्वप्नः। पित्तप्रकृतिं दिवास्वप्नो नाम तस्य स्वपतामधर्मः सर्वदोषप्रकोपश्च तत्प्रकोपाच्च कामशोषप्रतिश्यायमिरोगौरवाङ्गमर्दारोचकज्वराग्निदौर्ब्बल्यानि भवन्ति"। "खगयाच्चो दिवास्वप्नः परीवादः स्त्रियोमदः। तौर्य्यत्रिकं द्यूतञ्च कामजो दशको गणः" व्यसनोक्तौ मनुः "रक्षाभियुक्तश्च वा दिवास्वप्नञ्च सेवते। अपक्षाद्यगते काले स्वयं दोषान् प्रकोपयेत्" भा॰आश्व॰१७अ॰

**दिवास्वाप** पु॰ ७त॰। १दिवसनिद्रायाम्। दिवास्वप्नशब्दे दृश्यम्। दिवास्वापोऽस्य। २उलूकादौ च तेषां रात्रिचारित्वेन दिवास्वापवत्त्वात् तथात्वम् यथोक्तं ह॰सं॰ ८८अ॰ "लोमाशिकाखिलुकाक्षिपिकास्यौ वल्गुल्लुकौ शशकश्च रात्रौ।" २खल्गुलीशब्दे स्त्री राजनि॰।

**दिवि** पु॰ दीव्यति दिव–बा॰ कि। आकाशे शब्दमा॰

**दिविचित्** त्रि॰ दिवि चयति वसति चि–क्विप् अलुक्स॰। स्वर्गवासिनि। "सूर्य्यासावीचरन्ता दिविचिता" ऋ॰ १०।८२।१२। "दिविचिता दिविश्रयौ" भा॰द्यौस्थाने वेदे ऋच्। "नम आदित्येभ्यश्च विश्वेभ्यश्च देवेभ्यो दिविचिद्भ्यो भोकचिद्भ्यः" शा॰ब्र॰

**दिविज** पु॰ दिवि जायते जन–ड अलुक्स॰। द्युलोकजाते "तामेवातिदूरे मधुकरीमिव सुमनस उपजिघ्रन्तीं दिविज मनुजमनोनयनाह्लाददुर्गतिविहारविनवावलोकसुखराचरायवैः भाग॰५।३।७ "व्युषा आवो दिविजा ऋते नाविष्कृणवाना" ऋ॰७।७५।१। "जे विभाषा" पा॰ पक्षे लुक् द्युजोऽप्यत्र

**दिविलत्** दीप्रिमत्+मतोः। दीप्रियुक्ते "मन्दारावे दिविलते" ऋ॰४।२१।११ "दिविलते दीप्रिमते" भा॰

**दिविता** स्त्री दीव–बा॰ इतच् मुमोः। दीप्तौ "यावाद्यो

वाचा दिविता दिविक्षता" ऋ०१०।७६।६ "दिविताया दीप्तिमत्तायाम्" भा० ।

दिवियज् पु० दिवि द्युलोकस्थितानीन्द्रादीन् यजते यज-क्विप् अलुक्स० । द्युलोकस्थितदेवयाजिनि "होतारो न दिवियजो मन्द्रतमाः" ऋ०८।६७।२६ "देवानिन्द्रादीन्स्तुवन्येवं दिवियजो दिवि द्युलोकस्थितानिन्द्रादीन् देवान् यजनः" भा०।

दिविरथ पु० पौरवे भूमन्युसुते ऋषभेदे "ततो दिविरथो नाम भूमन्योरभवत् सुतः" भा०आ०९४अ०२अङ्गराजपुत्र दधिवाहनपुत्रे ऋषभेदे च "अङ्गपुत्रो महानासीद् राजेन्द्रो दधिवाहनः । दधिवाहनपुत्रस्तु राजा दिविरथोऽभवत् । पुत्रो दिविरथस्यासीच्चक्रतुल्यपराक्रमः" हरिवं० २१अ० ।

दिविषद् पु० दिवि सीदति सद-क्विप् अलुक्स० वा षत्वम् । देवे अमरः । "पृथिवीसदं त्वान्तरिक्षसदं दिविषदं देवसदं नाकसदम्" यजु० ९।२ "खान्द्रानन्दपुरन्दरादिदिविषद्वृन्दैरमन्दादराद्" "इयद्दानवदूयमानदिविषद्दुर्वारदुःखापदाम्" गीतगो० ।

दिविष्टि स्त्री० दिवमिच्छति दिव-कर्त्तरि क्तिच् । द्युलोकेच्छायुक्ते "इमा उ वां दिविष्टयः" ऋ०७।७४।१ "दिविष्टयो दिवमिच्छन्त्यः" भा०

दिविष्ठ त्रि० दिवि तिष्ठति स्था-क अलुक्स० षत्वम् । १ऊर्ध्वलोकस्थे २स्वर्गस्थिते च "दिविष्ठस्य भुविष्ठस्य सर्वीभूतो मम प्रियः" भा०आ०६अ० ।

दिविसृज् त्रि० दिवि सृजति क्विप् "न रपरेति" पा०पर्वदासात् न षत्वम् । द्युलोकस्रष्टरि "या हि स्वाधो दिविसृजम्" ऋ०४।४६।४ क्विन्नलोपात् झलि पदान्ते च कुः

दिवो स्त्री दिव बा० ङीष् । उपलिप्तिकाकोटे हारा० ।

दिवेदिवे अव्य० दिव-बा० डे द्वित्वञ्च । दिवसे निरु० ।

दिवोकस् पु० द्यौः स्वर्गं आकाशो वा ओकोवस्य । १देवे २चातकखगे च मेदि० ।

दिवोजा त्रि० दिवो जायते जन-ड । बा० अलुक्स० । द्युलोकाज्जाते "एषा सा नो दुहिता दिवोजा" ऋ०६।६५।१

दिवोदास पु०दिवः स्वर्गात् दासोदानं यस्य । वध्रयश्व पुत्रभेदे "वध्र्यश्वानुमिथुनं यदे मेनकायामिति श्रुतिः । दिवोदासश्च राजर्षिरहल्या च यशस्विनी" हरिवं० १२अ० । मनुवंशे रिपुञ्जयाख्ये ऋषभेदे च तत्कथा काशीख०४७अ० "ततश्चिन्तयता सद्म दृष्टो राजर्षिसत्तमः । अविसक्तं महाजेते तपसश्चियवेन्द्रियः । मनोरन्वयजो वीरः क्षत्रोपेतः प्रतापवान् । रिपुञ्जयेति विख्यातो राजा परपुरञ्जयः । अथ ब्रह्मा तमासाद्य बहुगौरवपूर्वकम् । उवाच वचनं राजन् ! रिपुञ्जय ! महामते ! । इमां पालय भूपाल ! सप्तसद्मद्विजन्मनाम् । नागकन्यां नागराजः पत्न्यर्थन्ते प्रदास्यति । अनङ्गमोहिनीत्याख्या वासुकिः शीलभूषणाम् । दिवोऽपि देवादास्यन्ति रत्नानि कुलयानि च । प्रजापालनसन्तुष्टा महाराज ! प्रतिग्रहम् । दिवोदास इति ख्यातमतो नाम त्वमाप्स्यसि । मत्प्रसादाच्च ऋषते ! दिव्यं सामर्थ्यमस्तु ते । परमेष्ठिवचः श्रुत्वा ततोऽसौ राजसत्तमः । वेधसं बहुशः स्तुत्वा वाक्यमेतदुवाच ह । राजोवाच । पितामह ! महाभाग्य ! त्रिलोकीकरणक्षम ! । कथयान्ये च राजानो मे कवं कथ्यते त्वया । ब्रह्मोवाच त्वयि राज्यं प्रकुर्वाणे देवोऽवृष्टिं विधास्यति । वार्षणिष्ठे च वै राष्ट्रे न देवो वर्षते पुनः । राजोवाच यद्यहं पृथिवीनाथः सर्वलोकपितामह ! । तदा दिविसदो देवा दिवितिष्ठन्तु मा भुवि । देवेषु दिवि तिष्ठत्सु मयि तिष्ठति भूतले । अप्रपञ्चेन राज्येन प्रजा सौख्यमवाप्स्यति । तथेति विसृजन्मोक्षो दिवोदासो नरेश्वरः । षष्टिं घोषयात्मुक्ते दिवं देवा व्रजन्त्विति । मयि प्रयाति सौर्यां पुरः खस्था भवन्त्विति । नागाश्चन्त्विह वै नागा नराः सुस्था भवन्त्विति" इत्युपक्रमे दिवोदासस्य काशीनो निर्वाणनामकथा तत्र उत्तरेषु अध्यायेषु दृश्या । ३धन्वन्तरेरवतारे काशीराजभेदे आयुर्वेदशब्दे तत्कथा ७८६४० कृतप्रादुर्भावे भाव०प्र० उक्ता द्रष्टव्या ।

दिवोद्भव त्रि० दिवे स्वर्गे उद्भवति उद्+भू अच् । आकाशस्थगोजाते । २एलायां स्त्री राजनिर्घण्टः ।

दिवोल्का स्त्री दिवा जाता उल्का । दिवसजातायां नभसश्युतायामुल्कायाम् । "सधूमा न्यपतद् सार्चिर्दिवोल्का नभसश्युता" भा०उ०१०अ० ।

दिवौकस् पु० दिवं स्वर्गं ओकोवस्य दिवा ओकोवस्येति दिवनृशब्दे उदाहरणानि । देवे "यदि व्यजृम्भन्त दिवौकसामपि" । "वचोनिमग्नाधिपतेर्दिवौकसाम्" रघुः । "कोर्त्तयन्निव दिवौकसां प्रियम्" माघः "तारकेण दिवौकसः" कुमा० ।

दिवौकस पु० (ओकस) यद्दोऽदलोऽयलोलुक्यदन्तोक्तेः

दिवमोकसोऽस्य । देवे "वसुधामिह संप्राप्तैः सर्वैरेव दिवौकसैः" हरिवं० २१२अ० ।

**दिव्य** त्रि० दिवि भवः यत् । १स्वर्गभवे २आकाशभवे ३उत्पातभेदे पु० "संसूचयन्ति दिव्यानरीक्षभौमास्तदुत्पाताः" बृ० सं० उक्तम् उत्पातशब्दे ११२३६ पृष्ठे दृश्यम् । ४वर्णे ५गुग्गुलौ च पु० राजनि० । कालीविलासतन्त्रोक्ते ६भावभेदे "शृणु भावत्रयं देवि ! दिव्यवीरपशुक्रमात् । दिव्यस्तु देववत्प्रायो वीरश्चोद्धतमानसः । सत्यन्तेताद्यं पर्यन्तं दिव्यभावविनिर्णयः । तेताद्यापरपर्यन्तं वीरभाव इतीरितम् । मद्यं मत्स्यं तथा मांसं मुद्रां मैथुनमेव च । ब्रह्मज्ञानसाधनं भद्रे ! चित्तसाधनमेव च । एतत्ते कथितं सर्वं दिव्यवीरमतं प्रिये । दिव्यवीरमतं नास्ति कलिकाले सुलोचने !" । ७नायकभेदे रत्नमञ्जरी इन्द्रादयो दिव्यनायकाः । दक्षवङ्के न० मेदि० हरिचन्दने न० राजनि० । १० गङ्गाजलादिस्पर्शपूर्वकशपथभेदे "ब्राह्मणो वचनं श्रुत्वा ज्ञानेशोज्ञानिनां वरः । गङ्गातोयं करे कृत्वा स्वीकारञ्च चकार सः । गङ्गातोयस्पृशन् मिथ्या यदि वदेज्जनः । स याति कालसूत्रञ्च यावद्वै ब्रह्मणोवयः" । ब्रह्म० वै० प्र० अ० "तथा गङ्गोदकं ताम्रं गोमयं गोरजस्तथा । सत्यं वा यदि वाऽसत्यं यदि दिव्यं करोति यः । कर्त्ता च रौरवं याति तथा कारयिता प्रिये ! । उभयोः पुनराहुत्तिर्नरयोनिषु नास्ति वै । तस्मात्ति पुनराहुत्तिर्व्याघ्रशूकरयोनिषु । दिव्यं कर्त्तुः कारयितुर्जपपूजा तथा तथा । गायत्रीरक्षितस्यापि नरकस्योत्तरोत्तरम्" इति गायत्रीतन्त्रे ५पटः । व्यवहारे प्रतिज्ञातार्थसाधनाय वादिप्रतिवादिनोरन्यतराभ्यां कर्त्तव्ये ११लौकिकसाक्ष्यादिप्रमाणासद्भावे शपथादिपरीक्षाभेदे । तद्भेदादिः तत्र सामान्यविधिश्च वीरमि० दिव्यमातृकायां दर्शितो यथा

"तत्र दिव्यनाम मानुषप्रमाणाभावे यन्निर्णायकं यत् तदुच्यते । यत्तु स्मृतितत्त्वे एवकारस्थले अपिशब्दं दत्त्वा मानुषप्रमाणसत्त्वेऽपि यत्र दिव्याङ्गीकारस्तत्रापि सङ्गवतेति प्रयोजनसङ्गं तदयुक्तम् "एषामन्यतमाभावे दिव्यान्यतममिति"वदता याज्ञवल्क्येन "प्रमाणहीने वादे तु निर्दोषा दैविकी क्रियेति" वदता बृहस्पतिना च "युक्तिव्यक्षमर्थांस्तु शपथैरेनमर्दयेदिति" नारदेनापि मानुषप्रमाणासत्त्वे एव दिव्यस्य विधानात् । तत्र बृहस्पतिः दिव्यभेदानाह "घटोऽग्निरुदकञ्चैव विषं कोशस्तु पञ्चमः । षष्ठन्तु तण्डुलाः प्रोक्ताः सप्तमस्तप्तमाषकम् । अष्टमं फालमित्युक्तं नवमस्त्वम्बुजस्तथा । दिव्यान्येतानि सर्वाणि निर्दिष्टानि स्वयम्भुवेति" । नारदः "युक्तिव्यक्षमर्थांस्तु शपथैरेनमर्दयेत् । अर्थकालवशापेक्षमन्यत्वम्बुसुतादिभिः । घटोऽग्निरुदकं चैव विषं कोशस्तु पञ्चमः । उक्तान्येतानि दिव्यानि विशुद्ध्यर्थं महात्मभिः । सन्दिग्धेऽर्थेऽभियुक्तानां परीक्षार्थं महात्मनाम् । प्रोक्तानि नारदेनेह सत्यान्ततविशुद्धये" इति । अर्थदेत्यीक्षेत् । अर्थापेक्षत्वं सिसाधयिषितार्थस्यात्यन्तमहत्त्वानुरूपमित्यर्थः । नन्वेषामपि शपथानां मानुषप्रमाणाभाव एव निर्णायकत्वेन दिव्यत्वात् कथं दिव्यानि नवेत्यभिधानम् । तथा च शङ्खः "तत्र दिव्यं नाम तुलाधारणं विषाशनमग्निषु प्रवेशो लोहधारणमिष्टापूर्त्तप्रदानमन्यांश्च शपथान् कारयेदिति" । तांश्च शपथानाह बृहस्पतिः "सत्यवाहनशस्त्राणि गोबीजकनकानि च । देवब्राह्मणपादांश्च पुत्रदारशिरांसि च । एते च शपथाः प्रोक्ताः सत्यार्थं सुकराः सदेति" । नारदोऽपि "सत्यवाहनशस्त्राणि गोबीजकनकानि च । देवतापितृपादांश्च दत्तानि सुकृतानि च । स्पृशेच्छिरांसि पुत्राणां दाराणां सुहृदान्तथा । अभियोगेषु सर्वेषु कोशपानमथापि वा । इत्येते शपथाः प्रोक्ता मनुना स्वयमेव" इति । सत्यम् । अत्र समनन्तरभाविनिर्णयनिमित्तस्य दिव्यत्वेन विवक्षितत्वात् । तादृशत्वञ्च घटादीनामेव न तु शपथानान्तेषां कालान्तरभाविनिर्णयनिमित्तत्वात् । नन्वेवं कोशस्य कथन्तेषु पञ्चमत्वमिति चेत् सत्यम् । तस्य तेषु पाठोमहाभियोगविषयकत्वसाम्यात् सावष्टम्भाभियोगविषयत्वसाम्याच्च । वस्तुतस्तु शपथानामपि नारदादिवचनासुसारादृणवत्तीवर्दन्यायेन दिव्यत्वाभ्युपगमेन नवशब्दस्योपलक्षणत्वात् । तथाच नारदः "युक्तिव्यक्षमर्थांस्तु शपथैरेनमर्दयेत् । अर्थकालवशापेक्षमन्यत्वम्बुसुतादिभिः । घटोऽग्निरुदकञ्चैव विषं कोशस्तु पञ्चमः । उक्तान्येतानि दिव्यानि विशुद्ध्यर्थं महात्मभिः"। दिव्यं नाम तुलारोहणम् । विषाशनमग्निषु प्रवेशो लोहधारणमिष्टापूर्त्तप्रदानमन्यांश्च शपथान् कारयेत् । मनुः "साक्षिष्वेषु सर्वेषु निर्णये कारणेषु च । विवदमानयोः । अविदंस्तत्त्वतः सत्यं शपथेनापि लम्भयेत् । अग्निं वाहारयेदेनमप्सु चैनमवगाहयेत् । पुत्रदारस्य वाप्येनं शिरांसि स्पर्शयेत् पृथक् । यमाद्यैः प्रयुक्तानि सुकृतार्थं महात्मभिः । परस्परविशुद्ध्यर्थं

तस्माद्दिव्यानि नामतः"। असाक्षिकेष्विति मानुषप्रमाणरहितेष्वित्यर्थः। उद्दिष्टानां दिव्यानां मध्ये तुलादीनि महाभियोगे प्रयोक्तव्यानि तथा च याज्ञवल्क्यः "तुलाग्न्यापो विषं कोशो दिव्यानीह विशुद्धये। महाभियोगेष्वेतानि शीर्षकस्थेऽभियोक्तरि। इच्छया चान्यतरः कुर्यादितरो वर्त्तयेच्छरः"। अत्राग्निशब्देन तप्तायःपिण्डादयो गृह्यन्ते। शीर्षकं लक्षणया जयपराजयनिमित्तो दण्डः तत्प्रयुक्तदण्डभागित्वं वा इच्छया इच्छया। इतरः अभियुक्ताभियोक्तोरन्यतरः। इतरः शिरोवर्त्तयेत् दण्डं स्वीकुर्यादित्यर्थः। नन्वु "कोशमल्पेऽपि दापयेत्" इति स्वल्पाभियोगेऽपि कोशस्य विधानात् कथं महाभियोगेष्वेतानीति चेन्न तस्य तुलादिषु पाठोऽवश्याभियोगेऽपि प्राप्त्यर्थः। न तु महाभियोगेष्वेवेति नियमार्थः। "अन्यथा कोशस्य महाभियोग एव प्राप्तिः स्यात्। "अवश्याभियुक्तानां घटादीनि विनिर्दिशेत्। तण्डुलाश्चैव कोशश्च महाखेतौ नियोजयेत् इति पितामहस्मरणात्। अवश्यम् शीर्षकस्थः। अवश्योऽत्र निश्चय इति स्मृतितत्त्वे। यदा शीर्षकस्थोऽभियोक्ता न स्यात्तदा एतानि दिव्यानि न स्यादिति तथा च नारदः "शिरोवर्त्ती यदा न स्यात्तदा दिव्यं न दीयते" इति। दिव्यदाने नियममाह पितामहः "अभियोक्ता शिरःस्थाने दिव्येषु परिकीर्त्यते। अभियुक्ताय दातव्यं दिव्यं स्मृतिनिदर्शनात्"। कात्यायनोऽपि "न कश्चिदभियोक्तारं दिव्येषु विनियोजयेदिति"। अभियुक्ताय दातव्यमित्यस्यापवादं दर्शयन्नन्यतर इत्यनेनाह याज्ञवल्क्यः। नारदोऽपि "परियोक्ता शिरःस्थाने सर्वलोकः प्रकल्पितः। इच्छया त्वितरः कुर्यादितरो वर्त्तयेच्छरः" इति। क्वचिद्दिव्यविशेषे शिरोविनापि दिव्यं देयमित्याह याज्ञवल्क्यः "विनापि शीर्षकात् कुर्यात्नृपद्रोहेऽथ पातके" इति। शीर्षकादिनापि पराजयप्रयुक्तदण्डभागिनोऽभियोक्तुरभावेऽपि। पातके ब्रह्महत्यादौ। कात्यायनोऽपि "पार्षदैः शङ्कितानाञ्च निर्दिष्टानाञ्च दस्युभिः। आत्मशुद्धिपराणाञ्च दिव्यं देयं शिरो विनेति"। कालिकापुराणेऽपि "परदाराभिगमे च चौर्यागम्यागमेषु च। महापातकयुक्ते च स्मृद्दिव्यं न प्रयोजयेत्। विप्रतिपत्तौ विवादेऽर्थस्य स्थापने कृते। तत्रैव स्थापयेद्दिव्यं शिरःपूर्वं महीपतिः। परदाराभिमर्शे च बहवो यत्र वादिनः। शिरोहीनमयेद्दिव्यमात्मनः शुद्धिकारणादिति"। विप्रतिपत्तौ परदारगमनाद्यभियोगरूपायां, विवादे ऋणादानादिविषये अवश्योऽपवादः। परदाराभिमर्शे चेति चौर्यादीनामप्युपलक्षणम्। विष्णुः "राजद्रोहे साहसे च विना शीर्षप्रवर्त्तनादिति"। विषयविशेषेषु दिव्यविशेषानाह संग्रहकारः "घटादीनि विषाग्नानि गुरुकार्येषु दापयेत्"। पितामहोऽपि "अवश्याभियुक्तानां घटादीनि विनिर्दिशेत्। तण्डुलाश्चैव कोशश्च महाखेतौ नियोजयेत् इति"। कात्यायनः "महाविश्वाससम्बन्धे विभागे रिक्थिनां सदा। क्रियासमूहकर्त्तृत्वे घटादीनि विनिर्दिशेत्"। क्रियासमूहकर्त्तृत्वे सम्भूयैकक्रियाकारित्वे। पितामहोऽपि "विश्वस्ते सर्वमहासु सन्धिकार्ये तथैव च। एष कोशः प्रदातव्यो नित्यं चित्तविशुद्धये। शिरःस्थापि विहीनानि दिव्यादीनि विवर्द्धयेत्। घटादीनि विषाग्नानि कोश एकः शिरः स्मृतः" इति। तण्डुलानां विषयं स एवाह "चौर्ये तु तण्डुला देया नान्यत्रेति विनिश्चयः" इति। अन्यत्र स्त्रीसंग्रहादौ न तु दत्तापहरे "तदर्द्धं स्यात् तण्डुला" इति वक्ष्यमाणकात्यायनवचनेन तण्डुलदिव्यस्य विधानात्। एतदल्पचौर्यमहायां वेदितव्यम्। "चौर्येऽभिशङ्कायुक्तानां तप्तमाषो विधीयते" इति महाचौर्यमहायां तप्तमाषस्य तेनैव विधानात्। द्रव्यमहत्त्वया दिव्यविशेषानाह विष्णुः "अथ शपथक्रिया राजद्रोहादिषु यथाकामनिक्षेपर्णक्षेत्रवर्षप्रमाणादिति"। शपथो दिव्यम्। राजद्रोहादिषु यथाकामं राजोक्तानुरोधाद्दिव्यं निक्षेपादिषु धनतारतम्यादित्यर्थः। वस्त्रादिविषयविवादे तु तन्मूल्यद्रव्यपरिमाणं ग्राह्यम्। हरीतस्मृतिरपि "विषं महाखेऽपहृते पादोने च तुलाग्नयः। विभागोने च सन्दिग्धे देयो घटः सदा। धनुःशतादभियोगे तु दातव्यस्तप्तमाषकः। त्रिगते तण्डुला देयाः कोशश्चैव तदर्द्धके। शतक्षतेऽपहृते च दातव्यं धर्मशोधनम्। कोशस्य प्रदातव्यं सद्यः कालावलेखनम्। एवं महत्त्वा निकृष्टानां मध्यानां द्विगुणा स्मृता। चतुर्गुणोत्तमानान्तु कल्पनीया परीक्षकैरिति"। धर्मशोधनम्। धर्मश्च दिव्येन शोधनम्। निकृष्टानां जातिगुणधर्मैः मध्यमत्वमुत्तमत्वञ्च तैरेव। यत्तु "नाहसादुद्धरेत् कश्चिच्च

विषं न तुल्यं तथेति" शास्त्रप्रत्यक्षवचनं तन्मध्यमोत्तमपुरुषविषयम्। यत्तु "षड्भे तु घटं दद्यात् षड्भार्द्धं तथायसम्। अर्द्धाभार्द्धं तु सचिलं तस्यार्द्धं तु विषं स्मृतमिति" पितामहवचनं तदूनलाक्षाद्रव्यापहारे पातित्यं भवति तद्विषयम्। एतत्सोयसाष्टसविषयम् दत्तापह्नवे तु कात्यायनः"दत्तस्यापह्नवो यत्र प्रमाणं तत्र कल्पयेत्। सोयसाष्टसयोर्दिव्यं स्वल्पेऽप्यर्थे प्रदापयेत्। सर्वद्रव्यप्रमाणन्तु ज्ञात्वा क्षेम प्रकल्पयेत्। क्षेमप्रमाणयुक्तन्तु तदा दिव्यं प्रयोजयेत्। ज्ञात्वा सङ्ख्यां सुवर्णानां शतनाशे विषं स्मृतम्। अशीतेस्तु विनाशेऽथ दद्याच्चैव हुताशनम्। षष्ट्या नाशे जलं देयं चत्वारिंशति वै घटम्। विंशद्दशविनाशे तु कोशपानं विधीयते। षष्ट्यधिकस्य वा नाशे तदर्द्धस्य तण्डुलाः। ततोऽर्द्धार्द्धविनाशे हि स्मृतेस्तुलादिमस्तकात्। ततोऽर्द्धार्द्धविनाशे तु लौकिकस्य क्रिया स्मृता। एवं विचारयन् राजा धर्मार्थाभ्यां न हीयते" इति। अत्र सुवर्णशब्दः षोड़शमाषात्मकः। नाशोऽपह्नवः। विंशदृशविनाशे विंशद्विनाशेन इति स्मृतिचन्द्रिका। षष्ट्यधिकस्य षष्टेरभ्यधिकस्य षट्प्रभृतेरिति यावत्। तदर्द्धस्य सुवर्णप्रभृतेः। ततोऽर्द्धार्द्धस्य अष्टमाषोन सुवर्णार्द्धप्रभृतेः। ततोऽर्द्धार्द्धस्य विनाशे सार्द्धसप्तमाषो नसुवर्णार्द्धप्रभृतेर्विनाशे। लौकिकाच्च क्रियाः। अपह्नवे तव दशगुणो द्रव्यनाशो भविष्यतीत्यादिकाः। चशब्दः शास्त्रोक्तसमुच्चयार्थः। अतएवाह विष्णुः "सर्वेष्वेवार्थजातेषु मूल्यं कनकं कल्पयेत्। तत्र च कृष्णलोने सूक्ष्मं दूर्वाकरं शापयेत्, हिकृष्णलोने तिलकरम्, त्रिकृष्णलोने जलकरं चतःकृष्णलोने सुवर्णकरम्, पञ्चकृष्णलोने सीरोद्धृतमक्षीकरम्, तत्र सुवर्णार्द्धोने कोशो देयः सूक्ष्मस्य ततःपरं यथार्हं घटाम्बुदर्विधानामन्यतमं द्विगुणार्द्धं यथाभिहिता समयक्रिया। वैश्यस्य त्रिगुणेऽर्द्धे, राजन्यस्य कोशवर्जञ्चतुर्गुणेऽर्द्धे ब्राह्मणस्य कोशन्दद्यात् कन्यलागामिकालसमयनिबन्धनक्रियातः कोशस्थाने ब्राह्मणं सीरोद्धृतमक्षीकरमेव शापयेत्। प्राग्दृष्टदोषं स्वल्पेऽप्यर्थे दिव्यानामन्यतमदेव कारयेत्। यत्तु प्रथितं सचरितं न मङ्क्त्यर्थेऽपीति"। सीरोद्धृतमक्षीकरं लाङ्गलोद्धृतोदकस्थमित्यर्थः। अनपह्नवमधिके शापनिवृत्त्यर्थं शापे तु विशेषमाह मनुः "सत्येन शापयेद्विप्रं क्षत्रियं वाहनायुधैः। गोबीजकाञ्चनैर्वैश्यं शूद्रं सर्वैस्तु पातकैरिति" यदाऽसत्यापह्नवी स्यात् तदा सत्याभिधानधर्मो मम निष्फलः स्यादिति शपथकारिणं ब्राह्मणं वाचयेत्। एवं क्षत्रियादीनां वाहनादीनि निष्फलानि स्युरित्यादीत्यर्थः। पादस्पर्शादीनां विशेषः स्मृत्यन्तरे दर्शितः "निष्के तु सत्यवचनं द्विनिष्के पादस्पर्शनम्। अनन्तिके तु पुत्रं स्यात् कोशपानमतःपरम्" इति। अत्र निष्कशब्देन कर्षचतुर्थांशो सद्रासुद्रितः प्रतिपाद्यते क्वचिद्देशे तत्रापि निष्कव्यवहारात् न तु मनूक्तो निष्कः तस्य राजतपलात्मकत्वेन मूलकाञ्चनकर्षादधिकत्वात् तत्र सत्यवचनविधौ चतुर्गुणेऽर्थे ब्राह्मणस्येति विरोधः स्यात्। दिव्ये दण्डे च मनूक्तं परिमाणम् ग्राह्यमिति हरदत्तिराह "सङ्ख्या रश्मिरजोभूता मनुना सदृदाहृता। कार्षापणाद्या या दिव्ये नियोज्या विनये तथेति"। संख्या परिमाणं रश्मिरजोभूता त्रसरेण्वादिका। विनये दण्डे। तत्र परिमाणं प्रतिज्ञापूर्वकं मनुराह "लोकस्य व्यवहारार्थं याः संज्ञाः प्रथिता भुवि। ताम्रस्यसुवर्णानां ताः प्रवक्ष्याम्यशेषतः। जालान्तरगते भानौ यत् सूक्ष्मं दृश्यते रजः। प्रथमं तत्प्रमाणानान्त्रसरेणुमचक्षते। त्रसरेणवोऽष्टौ विज्ञेया लिक्षैका परिमाणतः। ता राजसर्षपस्त्रिस्ते त्रयो गौरसर्षपः। सर्षपाः षड्यवो मध्यस्त्रियवन्त्वेककृष्णलम्। पञ्चकृष्णलको माषस्ते सुवर्णस्तु षोडश। पलं सुवर्णाश्चत्वारः पलानि धरणन्दश। द्वे कृष्णले समधृते विज्ञेयो रौप्यमाषकः। ते षोडश स्याद्धरणं पुराणश्चैव राजतः। धरणानि दश ज्ञेयः शतमानस्तु राजतः। कार्षापणस्तु विज्ञेयः कार्षिकस्ताम्रिकः पणः। चतुःसौवर्णिको निष्को विज्ञेयस्तु प्रमाणतः" इति। अत्र ताम्रस्यसुवर्णानामिति ताम्रस्यैवरूप्यत्वात् प्राक्प्रदेशो न तु क्रमप्रदर्शनार्थः। पलानि धरणान्दशेत्यत्र सुवर्णपरिमाणाभिधानात्। चतुःसौवर्णिको निष्क इत्युक्तं रूप्यपरिमाणाभिधानम्। अवशिष्टेन ताम्रपरिमाणाभिधानम्। जालान्तरप्रविष्टे सूर्यरश्मौ यत् सूक्ष्मं रजो दृश्यते तत् त्रसरेणुसंज्ञकम् अष्टौ त्रसरेणवो लिक्षा ताश्चिस्रः राजसर्षपः। त्रयो राजसर्षपाः गौरसर्षपः। षड्गौरसर्षपा मध्यमो यवो न सूक्ष्मो न स्थूल इति। मध्यमयवस्य परिमाणसूक्तं मिताक्षरायाम् मध्यशब्दः पादपूरणार्थः। तथा च संपूर्णयवपरिमाणसूक्तमिति मनु-

भावेत्र। त्रयो यवाः कृष्णलम्। माषः पञ्च कृष्णलानि सुवर्णः षोडश माषाः। पलं सुवर्णचतुष्टयम्। धरणन्दश पलानि। रूप्यमाषो द्वे कृष्णले। राजतस्य धरणं षोडश रूप्यमाषाः। अस्य च पुराण इति संज्ञान्तरम्। राजतः शतमानः राजतदशधरणानि राजतपलसंज्ञायुक्तस्य भवति। "शतमानन्तु दशभिर्धरणैः पलमेव त्विति" याज्ञवल्क्यस्मरणात्। पूर्वोक्तसुवर्णचतुष्टयपरिमित एको राजतनिष्कः। कार्षिकः कर्षसंमितः ताम्रिकस्ताम्रविकारः कार्षापणो वित्तेयः। पण इति च संज्ञा अस्यैव विज्ञेयेत्यर्थः। चशब्दोऽध्याहार्यः। अतएव वृद्धशातिः "निष्कं सुवर्णाश्चत्वारः कार्षिकस्ताम्रिकः पणः"। ताम्रकर्षकृता वृद्धा विज्ञेयः कार्षिकः पणः। स एव चन्द्रिका प्रोक्ता ताम्रतस्तु धानकाः। ता द्वादश सुवर्णस्तु दीनाराख्यः स एव तु"। इति कर्षः पलचतुर्थांशः। "ते षोडशाद्यः कर्षोऽस्त्री पलतुर्यंचतुष्टयम् इत्यमरसिंहेनाभिधानात्। ते माषाः षोडशाद्यः कर्ष इति च संज्ञेत्यर्थः। तेनात्रकर्षशब्दोऽसुवर्णपरिमाणवचनत्वमित्यवगम्यते। याज्ञवल्क्यः पले विकल्पमाह "पलं सुवर्णाश्चत्वारः षड् वापि प्रकीर्त्तितम्"। इति तस्य षष्ठांशो विंशतिमाषा तत्परिमितः कार्षापणः। अतएव कात्यायनः "माषो विंशतिभागस्तु ज्ञेयः कार्षापणस्य तु। कार्षिकी तु चतुर्भागा मानकस्य पणस्य चेति"। राजतोऽपि कार्षापणोऽस्तीत्याह नारदः "कार्षापणो दक्षिणस्यान्दिशि रौप्यः प्रवर्त्तत"इति। व्यासस्तु निष्कस्य प्रमाणमाह "पलान्यष्टौ सुवर्णस्तु ते सुवर्णाश्चतुर्दश। एतत् निष्कप्रमाणन्तु व्यासेन परिकीर्त्तितम्"

वर्णभेदेन दिव्यव्यवस्थामाह नारदः "ब्राह्मणस्य घटो देयः क्षत्रियस्य ह्रदाग्नयः। वैश्यस्य सलिलं देयं शूद्रस्य विषमेव तु। साधारणः समस्तानां कोशः प्रोक्तो मनीषिभिः। विषं विना ब्राह्मणस्य सर्वेषां वा तुला स्मृता" इति। अनित्या चेयं व्यवस्था "राजन्येऽग्निघटं विषे वैश्ये तोयं नियोजयेत्। सर्वेषु सर्वदिव्यं वा विषवर्जं द्विजोत्तमे" इति कात्यायनस्मरणात्। व्यवस्थापके वयोविशेषादिना व्यवस्थापनीयम् तदाह नारदः "क्षीणान्नरान् सत्यक्षीणान् परितश्चार्दितान्नरान्। बालवृद्धातुरांश्चैव परीक्षेत घटं सदा। स्त्रीणान्तु न विषं प्रोक्तं न चापि सलिलं स्मृतम्। घटकोशादिभिक्षाभाजनलक्षणं विचारयेत्। नार्त्तानान्तोय

एव स्यात् न विषं पित्तरोगिणाम्। वित्तप्रव्रजनज्ञातीनां वाग्निकर्म विधीयते। न भक्षणीयाः स्त्रीबालाः धर्मशास्त्रविचक्षणैः। रोगिणो ये च वृद्धाः स्युः प्रमांसो ये च दुर्बलाः। निरुद्धाश्चान्यव्याधिक्षिप्तार्तांस्तोये विमज्जयेत्। यदि क्षिप्ते मज्जन्तः स्वल्पमात्रा हि ते स्मृताः। बालमेड्यान्मातानेतान्नैव तोये निमज्जयेत्। न चापि हारयेदग्निञ्च विज्ञेय विशोधयेत्" याज्ञवल्क्यः "तुला स्त्रीबालवृद्धान्धपङ्गुव्याधितरोगिणाम्। अग्निर्जलं वा शूद्रस्य यवाः सप्त विषस्य चेत"। स्त्रीमात्रजातिवयोऽवस्थाविशेषानादरेण। बाल आषोडशाद्वर्षाज्जातिविशेषानादरेण च। वृद्धोऽशीतिकावरः। अन्धो नेत्रविकलः। पङ्गुः पादविकलः। ब्राह्मणोजातिमात्रम्। रोगी व्याधितः।

एतेषां शोधनार्थं सर्वदिव्यसाधारणेषु धर्मेणैवं चेत्यनेन वाक्येषु स्त्र्यादीनां सर्वदिव्यप्रसक्तौ तुलैवेति नियम्यते न तु सर्वकाले स्त्रीणां तुलानियमः कोशादिविधानात्। अग्निकालस्तृतीयश्च क्षत्रियस्य। जलमेव वैश्यस्य। यवा एवार्धं शूद्रस्य विषस्य सप्तैव यवा उक्तप्रमाणलक्षणा भवन्तीत्यर्थः। ब्राह्मणस्य तुलाविधानात् अग्निर्जलं वेति क्षत्रियवैश्यविषयमित्यवगम्यते। अतएव पितामहः "ब्राह्मणस्य घटो देयः क्षत्रियस्य हुताशनः। वैश्यस्य सलिलं प्रोक्तं विषं शूद्रस्य दापयेत्" इति। कात्यायनोऽपि "न स्त्रीवृद्धिक्लिन्नानामग्निः सलिलं नाम्बुजेविनाम्। मन्त्रयोगविदाञ्चैव विषं दद्यात्तु न कचित्। तस्मात्तैर्न नियुञ्जीत व्रतिनं क्षयरोगिणाम्" इति। व्रतिनं पयोव्रतादिनियमस्थम्। क्षारीतोऽपि "कृशिनां वर्जयेदग्निं सलिलं श्वासकासिनाम्। पित्तश्लेष्मवतां नित्यं विषन्तु परिवर्जयेत्" इति।

विष्णुरपि "न स्त्रीभक्तारिष्टां व्याधितानां भीरूणां श्वासकासिकानामम्बुजेविनामृद्धं श्लेष्मक्षिशिरयोश्चेति" पितामहोऽपि "कृशिनां वर्जयेदग्निं सलिलं श्वासकासिनाम्। पित्तश्लेष्मवतां नित्यं विषन्तु परिवर्जयेत्। मद्यपस्त्रीव्यसनिनां क्षितानां तथैव च। कोशः प्राज्ञैर्न दातव्यो ये च नास्तिकदूषयः" इति। यत्तु पितामहेनोक्तम् "सव्रतानां श्रद्धालूनां व्याधितानां तपस्विनाम्। स्त्रीणाञ्च न भवेद्दिव्यं यदि धर्मस्त्वपेक्ष्यते" इति तुलेतरविषयं तदिति केचित् तदयुक्तम्। "घटकोशादिभिक्षाभाजनलक्षणं विचारयेदिति पूर्वोदाहृत-

नारदवचनेन स्त्रीणां कोशादेर्विधानात्। तदन्यम्बु-विषयमित्युक्तं विज्ञानेश्वराचार्यास्तु पुंस्त्रियोर्विवादे रुद्धा वान्यतरः कुर्यादित्यनेन पक्षे स्त्रीणामपि दिव्यप्रसक्तौ पुरुषस्यैव दिव्यं न स्त्रीणा-मित्येतत्परमिदम्। अन्यथा सर्वथा तासां दिव्यनिषेधे घटकोशादिभिस्तासामलत्वं विचारयेदित्यनेन विरोधः स्यादिति प्राहुः। कात्यायनः "गोरक्षकान् वाणिजकां-स्तथा कारुकुशीलवान्। प्रेष्यान् वार्द्धुषिकांश्चैव याचये-च्छूद्रवद्द्विजान्"। कात्यिकापुराणेऽपि "वर्णानामन्त्यः प्रत्यन्तः तस्येत्यर्थः। नारदोऽपि "महापराधे निर्द्वंदे कृतघ्ने क्लीवकुत्सिते। नास्तिके दृष्टदोषे च शपथान्तु विव-र्जयेत्" इति। कात्यायनोऽपि "मातापितृद्विज-गुरुस्त्रीबालघातिनाम्। महापातकयुक्तानां नास्ति-कानां विशेषतः। सिद्धिर्न प्रमदानाञ्च मन्त्रयोग-क्रियाविदाम्। वर्णसङ्करजातानां पापाभ्यासप्रवर्त्ति-नाम्। एतेष्वेवाभियोक्तृषु निन्द्येष्वेवं प्रवर्त्तितः। दिव्यं प्रकल्पयेच्चैव राजा धर्मपरायणः। एतैरेव नि-युक्तानां साधूनां दिव्यमर्हति। न सन्ति साधवो यत्र तत्र शोध्याः स्वकैनरैरिति"। साधूनां दिव्यमर्हति राजा कल्पयितुमिति शेषः। प्रतिनिधिद्वारा एतैर्दिव्यं कारयीयमिति दृढयितुमाह स एव "महापातक-युक्तेषु नास्तिकेषु विशेषतः। न देयं तेषु दिव्यन्तु पापाभ्यासरतेषु च। देयेषु पापेषु दिव्यानि कर्त्त-व्यानि प्रयत्नतः। तारयेत्सज्जनैस्तानि नाभियुक्तं त्यजेद्धर इति"। तारयेत् शोधयेत्। अभियोधनं प्रतिनिधिद्वारा शोधनमकारयित्वा न त्यजेदित्यर्थः। यत्तु तेनैवोक्तम् "अस्मृत्याधमदासानां म्लेच्छानां प्रापकारिणाम्। प्रातिलोम्यप्रसूतानां निष्ठयो न तु राजनि। तत्प्रसिद्धानि दिव्यानि संशये तेषु निर्दिशे-दिति"। तत्तैर्नियुक्तानां साधूनामभावे विज्ञेयम्। तत्-प्रसिद्धानि घटादीनि इति स्मृतितत्त्वे। साधूनामप्य-लाभे प्रतिनिधिमभ्युपजानाति स एव "काल-देशाविरोधे तु यथोक्तं प्रकल्पयेत्। अन्येन कारये-द्दिव्यं विधिरेष विपर्ययः"। सामर्थ्याभावे सर्ववर्णविषये विशेषमाह हारीतः, "राजन्येऽग्निं घटं विप्रे वैश्ये तोयञ्चियोजयेत्। न विषं ब्राह्मणे दद्याद्विषं वर्णान्तरे कृतम्। कोशतण्डुलयोर्नास्ति धर्मस्यैषोऽपमेव च। पुत्रदारादिशपथात् सर्ववर्णे प्रयोजयेत्" इति। अथ दिव्यकालः तत्र पितामहः "यो यस्य विहितः कालो विधिर्यस्य च यो यथा। तं प्रवक्ष्यामि तत्त्वेन वादि-नश्च बलाबलम्। चैत्रो मार्गशिरश्चैव वैशाखश्च तथैव च। एते साधारणा मासा दिव्यानामविरोधिनः। घटः सर्वर्तुकः प्रोक्तो वाते वाति विवर्जयेत्। अग्निः शिशिरहेमन्तवर्षासु परिकीर्त्तितः। शरदुष्णे च सलिलं हेमन्ते शिशिरे विषमिति"। विष्णुरपि स्त्री-ब्राह्मणविकलाङ्गसमर्थरोगिणां न तुला देया न वाति वायौ न कृच्छ्रसमर्थोल्काराधामग्निर्देयः शरदुष्णयोश्च न कृषिवैत्तिकब्राह्मणानां विषं देयं प्राहुर्षि च। न स्त्रैणिकाणां व्याधितानां भीरूणां स्वासकासिना-मम्बुजीविनासदकं हेमन्तशिशिरयोश्चेति। हेमन्त-निषेधोऽत्र पौषमासविषय एव न तु मार्गशीर्षविषयो-ऽपि। मार्गशीर्षस्य "चैत्रो मार्गशिरा इति पूर्वोदाहृत पितामहवचनेन सकलदिव्यसाधारणत्वाभिधानात्। नारदोऽपि "विचार्य धर्मनिपुणैर्धर्मशास्त्रविशारदैः। धर्मं सर्वर्तुकं प्रोक्तं पण्डितैर्घटधारणम्। वर्षासु समये वह्निर्हेमन्तशिशिरे तथा। ग्रीष्मे सलिलमित्युक्तं विषं काले तु शीतले। न शीते तोयशुद्धिः स्याद्रोष्ण-काले ऽग्नियोधनम्। न प्रावृषि विषं दद्यात् प्रवाते न तुलां तथा। नापराह्णे न सन्ध्यायां न मध्याह्ने कदा-चनेति"। मध्याह्ने दिव्यनिषेधो जलव्यतिरिक्तविषयः। अतएव पितामहः "पूर्वाह्णेऽग्निपरीक्षा स्यात् पूर्वाह्णे च घटो भवेत्। मध्याह्ने तु जलं देयं धर्मतत्त्वमभी-प्सता। दिवसस्य तु पूर्वाह्णे कोशशुद्धिर्विधीयते। रात्रौ तु पश्चिमे भागे विषं देयं सुशीतलमिति"। अत्र विषस्य वर्षासु निषेधात् शिंशिरवाक्येन परीक्षामात्र निषेधाच्च दिव्यान्तरं शिंशिरवर्षाण्यपि कुर्वन्ति। अतः "याज्ञवल्क्ये हरौ सुप्ते सर्वकर्माणि वर्जयेदित्यस्य न विष-यः। तथा च ज्योतिषे "सिंहस्थे मकरस्थे च जीवे वास्तमिते भृगौ। मलमासे न कर्त्तव्या परीक्षा जय-काङ्क्षिणा"। तथा "रविशुक्रौ गुरौ चैव न शुक्रे-ऽस्तंगते पुनः। सिंहस्थे च रवौ नैव परीक्षा शस्यते बुधैः। नाष्टम्यां न चतुर्दश्यां प्रायश्चित्तपरीक्षणे। न परीक्षाविधानस्य शनिभौमदिने भवेत्"। रविशुक्रौ गुरौ चेदित्यत्र शस्यत इति शेषः तथा च दीपिकायाम् "न शुक्रास्तेऽष्टमेऽर्के गुरुसहितरवौ जन्मनाड्यष्टमेऽह्नि

विष्टौ मासे मघाक्षे कुजशनिदिवसे जन्मतारासु चाथ। नाड़ीनक्षत्रहीने गुरुरविरजनीनाथताराविशुद्धौ प्रातः कार्या परीक्षा द्वितनुचरयुगांशोदये शस्तलग्ने"। इति। यद्यपि दिव्ये वारविशेषविधानाभावस्तथापि मिताचारादादित्यवारे दिव्यानि दातव्यानीति मिताक्षरायाम्। अथ दिव्यदेशाः तत्र पितामहः। "प्राङ्मुखो निश्चलः कार्यः शुचौ देशे घटः सदा। इन्द्रस्थाने सभायां वा राजद्वारे चतुष्पथे" इति। घटयुक्तं दिव्यान्तरक्षाण्युपलक्षणम्। इन्द्रस्थानयुक्तञ्च प्रसिद्ध-देवायतनान्तरक्षाण्युपलक्षणम्। अतएव दिव्यमात्र-सम्पक्रम्य नारदः "सभाराजकुलद्वारे देवायतनचत्वरे"। विषयविशेषे इन्द्रस्थानादीनां व्यवस्थामाह। कात्यायनः "इन्द्रस्थानेऽभिशस्तानां महापातकिनां तथा। नृप-द्रोहप्रवृत्तानां राजद्वारे प्रयोजयेत्। प्रातिलोम्यप्रवृ-त्तानां दिव्यं देयञ्चतुष्पथे। अतोऽन्येषु तु कार्येषु सभामध्ये विदुर्बुधाः" इति। इन्द्रस्थाने इन्द्रध्वजपूर्व-स्थाने। दिव्यदेशानादरे दिव्यं विसंवदतीत्याह, नारदः "अदेशकालदत्तानि बहिर्वासगृहाणि च। व्यभिचारं सदर्थेषु कुर्वन्तीह न संशयः"। वासो जननिवासगृहा-दहिष्कृतानि निर्जनप्रदेशगृहाणीति यावत्। अतएव पितामहः "ग्रन्थं दापयेद्दिव्यं राजा वाधिकृतोऽपि वा। ब्राह्मणानां श्रुतवतां प्रकृतीनां तथैव चेति"। ब्राह्मणानां प्रकृतयोऽमात्यास्तेषाञ्चेत्यर्थः।

अथ दिव्यसाधारणविधिरुक्तः तत्र स्मृतिः "क्षोभात् क्रोधाद्भयतो वा भेदमायान्ति साक्षिणः। विधिदत्तस्य दिव्यस्य न भेदो जायते क्वचिदिति"। विधिञ्च पितामहेन दर्शितः "दिव्येषु सर्वकार्येषु प्राङ्विवाकः समा-चरेत्। शुष्यतेषु यथाशुष्यं: सोपवासो नृपाज्ञया। तत आवाहयेद्देवान् विधिनानेन धर्मवित्। वादिन तुर्यघोषैश्च गन्धमाल्यानुलेपनैः। प्राङ्मुखः प्राञ्जलि-र्भूत्वा प्राङ्विवाकस्ततो वदेत्। एहीहि भगवन्धर्म! अस्मिन्दिव्ये समाविश। सहितो लोकपालैश्च वस्वा-दित्यमरुद्गणैः। आवाह्य तु घटे धर्मं पश्चाद्दानि विन्यसेत्"। सर्वकार्येषु साधारणेषु असाधारणेषु च ततस्तदुपयोगिसामग्रीसम्पादनानन्तरमित्यर्थः। घट-युक्तञ्चतत्र दिव्यमात्रोपलक्षणम्। अस्मिन्दिव्य इति मन्त्रविशेषादेतेषां धर्मादीनां दिव्यमात्रसाध्यत्व। "इमं मन्त्रविधिं कृत्स्नं सर्वदिव्येषु योजयेत्। आवाह्यञ्च देवानां तत्रैव परिकल्पयेत्" इत्युपसंहरता तेनैवोक्त-त्वाच्च। अङ्गानि कात्यायनाङ्गायां स एवाह, "इन्द्रं पूर्वे तु विन्यस्य प्रेतेशं दक्षिणे तथा। वरुणं पश्चिमे भागे कुबेरं चोत्तरे तथा। अग्न्यादिलोकपालांश्च कोणभागेषु विन्यसेत्। इन्द्रः पीतो यमः श्यामो वरुणः स्फटिकप्रभः। कुबेरस्तु सुवर्णाभः अग्निश्चैव सुवर्णभः। तथैव निर्ऋतिः श्यामो वायुर्धूम्रः प्रकी-र्त्तते। ईशानस्तु भवेद्रक्त एवं ध्यायेत्क्रमादिमान्। इन्द्रस्य दक्षिणे पार्श्वे वह्निमास्थापयेद्बुधः। धरोध्रुव-स्तथा सोम आपश्चैवानलोऽनिलः। प्रत्यूषश्च प्रभा-तस्तु वसवोऽष्टौ प्रकीर्त्तिताः। देवेशानयोर्मध्ये आदि-त्यानां तथाऽयनम्। धातार्यमा च मित्रश्च वरुणांशो भगस्तथा। इन्द्रो विवस्वान् पूषा च पर्जन्यो दशमः स्मृतः। ततस्त्वष्टा ततो विष्णुरजघन्यो जघन्यजः। एतेते द्वादशादित्या नामभिः परिकीर्त्तिताः। अग्नेः पश्चिमभागे तु रुद्रा एकादश स्मृताः। वीरभद्रश्च शम्भुश्च गिरिशश्च महायशाः। अजैकपादहिर्बुध्न्यः पिनाकी चापराजितः। भुवनाधीश्वरश्चैव कपाली च विशाम्पतिः। स्थाणुर्भवश्च भगवान् रुद्रास्त्वेकादश स्मृताः। प्रेतेशरक्षोमध्ये च मातृस्थानं प्रकल्पयेत्। ब्राह्मी माहेश्वरी चैव कौमारी वैष्णवी तथा। वाराही चैव माहेन्द्री चामुण्डा सप्तसंयुता। निर्ऋतेरुत्तरे भागे सप्तर्षीणामयतनं विदुः। वरुणस्योत्तरे भागे मरुतां स्थानमुच्यते। पवनः सूर्यनो वायुरनिलो मरुतस्तथा। प्राणाः प्राणेशजीवौ च मरुतोऽष्टौ प्रकीर्त्तिताः। घट-स्योत्तरभागे तु दुर्गामावाहयेद्बुधः। एतासां देवता-नान्तु स्वनाम्ना पूजनं विदुः। भूषावसानं धर्मादि दत्त्वा-र्घादिकं क्रमात्। अर्घादि पश्चादङ्गानां भूषान्तमुप-कल्पयेत्। गन्धादिकां निवेद्यान्तां परिचर्यां प्रकल्पयेत्। चतुर्दिक्षु तथा होमः कर्त्तव्यो वेदपारगैः। आज्येन हविषा चैव समिद्भिर्होमसाधनैः। सावित्र्या प्रणवे-नाथ स्वाहान्तेनैव होमयेत्"। अङ्गानाम् इन्द्रादि-दुर्गान्तानाम् अर्घादुपकल्पनञ्च न काण्डानुसमयेन। तथात्वे प्रयोगवचनावगताङ्गसङ्गभावबाधापत्तेः। किन्तु पदार्थानुसमयेन तथा च दुर्गायै भूषणं दत्त्वा धर्मेन्द्रा-दिदुर्गान्तानाञ्च गन्धादिपरिचर्यं विप्रकल्पयेदिति। गायत्रीं प्रणवादिकाञ्चाथ पुनः प्रणवं स्वाहाकारान्तञ्चार्थं समिदाज्यचरुभिः प्रत्येकमष्टोत्तरशतं जुहुयात्।

"अनुक्तसङ्ख्या यत्र स्यात् शतमष्टोत्तरं हुतमिति" स्मरणादित्यर्थः। होमानन्तरकर्त्तव्यं स एवाह "यमर्थमभियुक्तः स्वाङ्किखित्वा तन्तु पत्रके। मन्त्रेणानेन सहितनत् कार्यञ्च शिरः क्रमात्"। मन्त्रश्च, "आदित्यचन्द्रावनिलानलौ च द्यौर्भूमिरापो हृदयं यमश्च। अहश्च रात्रिश्च उभे च सन्ध्ये धर्मश्च जानाति नरस्य वृत्तमिति" एतत् सर्वं पूर्वाह्णे कर्त्तव्यम् तस्य प्रधानकालत्वात् तथा च नारदः "अहोरात्रोषिते स्नाते आर्द्रवाससि मानवे। पूर्वाह्णे सर्वदिव्यानां प्रदानमनुकीर्त्तितमिति"। एतत् प्राड्विवाकेनोपवासादिनियमपूर्वकं कर्त्तव्यम् तथा च नारदः "प्राड्विवाकस्ततो विप्रो वेदवेदाङ्गपारगः। श्रुतवृत्तोपसम्पन्नः शान्तचित्तो विमत्सरः। सत्यसन्धः शुचिर्दक्षः सर्वप्राणिहिते रतः। उपोषितवार्द्रवासाः कृतदन्तानुधावनः। सर्वासां देवतानाञ्च पूजां कृत्वा यथाविधि"। कर्त्तृत्वोपवासादिकमाह "त्रिरात्रोपोषितोयः स्यादेकरात्रोपोषितस्तु वा। नित्यं देवानि दिव्यानि शुचये सार्द्रवाससे" इति। याज्ञवल्क्योऽपि "सचेलं स्नातमाहूय सूर्य्योदय उपोषितम्। कारयेत् सर्वदिव्यानि नृपब्राह्मणसन्निधाविति"। अत्र सूर्य्योदयपदेन पूर्वाह्ण एव ग्राह्यः "पूर्वाह्णे सर्वदिव्यानां प्रदानमनुकीर्त्तितमिति" नारदवचनानुरोधात्। त्रिरात्रैकरात्रोपवासयोः शक्त्यशक्तिविषयत्वेन व्यवस्था ज्ञेया। दिव्यप्रयोगानन्तरं दक्षिणादानम् उक्तेन विधिना दिव्यप्रयोगं कारयितुः राज्ञः फलमाह पितामहः "सङ्घैः परिवृतो राजा शुद्धिमेतां प्रपूजयेत्। ऋत्विक्पुरोहिताचार्य्यान् दक्षिणाभिस्तु तोषयेत्। एवं कारयिता राजा भुक्त्वा भोगान्नरोत्तमान्। महतीं कीर्त्तिमाप्नोति ब्रह्मभूयाय कल्पते" इति। अथास्य विधिः सर्वदिव्यसाधारण इत्याह स एव "इमं मन्त्रविधिं कृत्स्नं सर्वदिव्येषु योजयेत्। आवाहनञ्च देवानां तत्रैव परिकीर्त्तितमिति"। सर्वदेवावाहनादि संक्षोभ्यशिरसि पत्रारोपणान्तं सर्वदिव्यसाधारणमित्यर्थः" दिव्यमालका। १२जलभेदे। "दिव्यं चतुर्विधं प्रोक्तं धाराजं करकाभवम्। तौषारञ्च तथा हैमं तेषु धारं गुणाधिकम्" भाव०प्र०। १३स्नानभेदे न० "अशक्तस्यौषधीरस्य कालशक्त्याद्ययेच्छया। मन्त्रस्नानादितः सप्त केचिदिच्छन्ति सूरयः। आग्नेयं भौमं तथाग्नेयं वायव्यं दिव्यमेव च। वारुणं मानसञ्चैव सप्तस्नानं प्रकीर्त्तितम्। "आपोहिष्ठेति" त्रैमान्त्रं, सदाशब्दान्तु पार्थिवम्। आग्नेयं भस्मना स्नानं, वायव्यं गोरजः स्मृतम्। यत्तु स्नातपवर्षेण स्नानं तद्दिव्यमुच्यते। वारुणस्त्रावगात्रञ्च, मानसं विष्णुचिन्तनम्। समस्तं स्नानमुद्दिष्टं मन्त्रस्नानक्रमेण तु। कालदोषादशक्त्यात् सर्वं तस्य फलं स्मृतम्" योगियाज्ञवल्क्यः। दिवि द्योतात्मके आदित्ये परमज्योतिषि वा ब्रह्मणि स्वस्वरूपे भवः यत्। "दिव्यश्च देवताप्रायः शुद्धान्तःकरणः सदा। इच्छातीतो वीतरागः सर्वभूतक्षमः क्षमी" इत्युक्ते १४तत्त्ववेत्तरि पु० १५आमलक्यां स्त्री मेदि०। १६बन्ध्याकर्कोटक्याम् १७शतावर्य्याम् १८मङ्गामेदायाम् १९ब्राह्म्याम् २०स्थूलजीरके २१श्वेतदूर्वायाम् २२हरीतक्याम् २३पुरायाम् २४गन्धवत्यान्च स्त्री राजनि०। २५दैवे दिने २६तदीये माने च न० दिव्यदिनदिव्यमानशब्दयोर्दृश्यम्। २७द्युलोकाज्जाते २८मनोज्ञे २९लोकातीते दिव्यदर्शी दिव्यचक्षुः त्रि०।

**दिव्यकट** न०प्रतीचीस्थे पुरभेदे "क्षत्रस्य पञ्चनदञ्चैव तथैवामरपर्वतम्। उत्तरज्योतिषञ्चैव तथा दिव्यकटं पुरम्" भा० स०३१अ० नकुलप्रतीचीजये।

**दिव्यकुण्ड** न० कामरूपपीठस्थलोमकशैलपूर्वभागस्थे कुण्डविशेषे। "यथा तद्दक्षिणे भागे शैलः लोमकनामतः। तस्मिन् गिरौ शिलापृष्ठे देवी व्यवस्थिता। पञ्चपुष्करिणी नाम्ना प्रस्रवोनिस्वरूपिणी। एकत्र पञ्चभिर्गां वोनिभिः पञ्चपङ्कजम्। स्थिता रमयितुं तत्र नित्यमेव हिमाद्रिजा। तच्छैलपूर्वभागात्तु कान्ता नाम महानदी। दक्षिणं सागरं याति प्रथमां चोत्तरस्रवा। दिव्यकुण्डं महाकुण्डं तच्छैलोपत्यकागतम्। संस्थितस्तत्र स्नात्वा तु तां देवीं परिपूजयेत्। दिव्यकुण्डे नरः स्नात्वा पञ्चपुष्करिणीं शिवाम्। यः पूजयेन्महाभागः स योनौ न हि जायते"। कालि०पु०८अ०

**दिव्यगन्ध** पु० कर्म०। १मनोज्ञे गन्धे। दिव्योगन्धोऽस्य। २गन्धके २खवृक्षे च न० ३स्थूलैलायां महाचञ्चत्यां च स्त्री राजनि०।

**दिव्यगायन** पु० कर्म०। गन्धर्वे अमरः।

**दिव्यचक्षुस्** पु०दिव्यं चक्षुर्यस्मात् ब०व०। १मर्कटे शब्दमाला। (चक्षसा) ख्याते २पदार्थे च २३गन्धभेदे ४शुक्लोचने च। दिव्यमन्तरीक्षभूतं चक्षुरस्य। ५यत्ने त्रि०मेदि०। कर्मधा०। ६यलौकिकपदार्थदर्शनयोग्ये नेत्रे न०"न च मां शक्यसे द्रष्टुमनेनैव स्वचक्षुषा। दिव्यं ददामि ते चक्षुः पश्य मे

योगमैश्वरम्" गीता। दिव्यमलौकिकार्थदर्शनसाधनं चक्षुरस्य। ७तथाभूतनेत्रयुक्ते त्रि०"त्वया नियम्या नन्दिव्यचक्षुषा" रघुः "नमस्तुभ्यं विरूपाक्ष ! नमस्ते दिव्यचक्षुषे" नीलकण्ठस्तवः।

**दिव्यतेजस्** स्त्री दिव्यं तेजो यस्याः ५ब०। १ब्राह्मीलतायाम्। २कृष्णतेजस्के त्रि०।

**दिव्यदर्शिन्** त्रि०दिव्यमलौकिकपदार्थं पश्यति दृश-णिनि। अतीन्द्रियार्थदर्शके। "व्याजहार सभामध्ये दिव्यदर्शी महातपाः" भा०आश्व० २०अ०। दृश-किप्। दिव्यदृगप्यत्र।

**दिव्यदिन** न० दिवि भवम् यत् कर्म०। दैवे दिने "मासैर्द्वादशभिर्वर्षं दिव्यं तदह उच्यते" स्मृ०सि०तन्मानसङ्क्रम्।

**दिव्यदोहद** न० "यत् दीयते न देवेभ्यो मनोराज्यस्य सिद्धये। उपयाचितकं दिव्यदोहदं तद्विदुर्बुधाः" हारा० उक्ते अभीष्टसिद्धये देवेभ्यो देये द्रव्ये।

**दिव्यनदी** स्त्री कर्म०। आकाशगङ्गायाम्।

**दिव्यनारी** स्त्री अप्सरःसु स्वर्वेश्यायाम् दिव्यस्त्री प्रभृतयोऽत्र। "दिव्यस्त्रीकरचारुचामरवरैः संवीज्यमानः कदा" गङ्गास्तवः।

**दिव्यपञ्चामृतम्** न० पञ्चानाममृतानां तत्तुल्यस्वादूनां समाहारः कर्म०। मिश्रितगव्याज्यदधिक्षीरमधुशर्कराख्ये पदार्थे राजनि०।

**दिव्यपुष्प** पु०दिव्यं मनोज्ञं पुष्पमस्य। १करवीरे २मन्दारवृक्षायां राजनि० संज्ञायां कन् कापि अतइत्त्वम्। दिव्यपुष्पिका रक्तपुष्पकार्कटक्षे स्त्री रत्नमाला।

**दिव्यप्रश्न** पु० कर्म०। अनागतज्ञापके प्रश्ने। "उज्ज्वलं दैवयुक्तं रहस्यं दिव्यप्रश्नाः शुभचक्राश्रयाः। क्षयं कृतान्तं कुरुक्षयानां निवेदयन्ते पाण्डवानां जयञ्च" भा०उ० ४७अ०।

**दिव्यमान** न० कर्म०। दैवे माने "सुरासुराणामन्योन्यमहोरात्रं विपर्ययात्। यत् प्रोक्तं तद्भवेद्दिव्यं मानो भेमसपूरणात्"। "युगानां त्रिघनं यातं तथा कृतयुगं त्विदम्। प्रोच्यन्ते सन्धयस्तत्र कालं पूर्वोक्तं दिव्यसंख्यया"। "ब्राह्मं दिव्यं तथा पित्र्यं प्राजापत्यं गुरोस्तथा। सौरं च सावनं चान्द्रमार्क्षं मानानि वै नव" स्मृ०सि०।

**दिव्ययमुना** स्त्री मित्रक०। कामरूपपीठस्थदमनिकाया नद्याः पूर्वभागस्थे नदीभेदे यथा "तस्या नद्याः पूर्वभागे गङ्गेव फलदायिनी। माघन्तु सकलं मासं तस्यां स्नात्वा नरोत्तमः। तथा दर्शनकायाञ्च परं निर्वाणमाप्नुयात्। ततः पूर्वे परा देवी नाम्ना सा सरिदुत्तमा। महती दिव्ययमुना यमुनावत्फलप्रदा। दक्षिणाद्रिसमुद्भूता दक्षिणोदधिगामिनी। तस्यान्तु कार्तिकं मासं स्नात्वा मोक्षमवाप्नुयात्" कालि०पु०८१अ०

**दिव्यरत्न** न०कर्म०। चिन्तामणौ मणौ शब्दार्थक०।

**दिव्यरथ** पु० कर्म०। व्योमयाने विमाने शब्दरत्ना०।

**दिव्यरस** पु० मित्रकर्म०। १पारदे राजनि०। २मनोज्ञे रसे पु०। दिव्योरसोऽस्य। ३रुचिररसयुक्ते त्रि०।

**दिव्यलता** स्त्री कर्म०। १मूर्वालतायाम् राजनि०। २मनोज्ञे लतामात्रे च।

**दिव्यवस्त्र** पु० दिव्यं वस्त्रं यस्मात्। १सूर्यप्रकाशे शब्दरत्ना०। ६त०। २भास्वरवस्त्रयुक्ते त्रि०कर्म०। ३मनोज्ञे वसने न०

**दिव्यसरित्** स्त्री कर्म० आकाशगङ्गायाम् "व्योम्नि दिव्यसरिदम्बु पङ्कतिः" माघः।

**दिव्यसानु** पु० १विश्वदेवभेदे "विश्वे चाग्निमुखा देवाः" इत्युपक्रमे "पार्थिवेभ्यस्समूहेभ्य दिव्यसानुमथैव च" भा०आनु० ९१अ०विश्वदेवोक्तौ। २दिव्यसानुके गिरौ च।

**दिव्यसार** पु० दिव्यः सारोऽस्य। शालवृक्षे राजनि०।

**दिव्यादिव्य** पु० दिव्यश्चादिव्यश्च कर्म०। नायकभेदे रसम० झरी यथा अर्जुनादयः। २नायिकाभेदे स्त्री यथा द्रौपद्यादयः। ३उपदेवीभेदे स्त्री शब्दार्थचि०।

**दिव्यासन** न० "अथ दिव्यासनं वक्ष्ये पृष्ठं हस्तेन बन्धयेत्। एकहस्तमधश्चैवं भूमिहस्तञ्च नासया" हठजा० उक्ते आसनभेदे।

**दिव्येलक** पु० सर्पभेदे "तयाणां वैकरञ्जानां पुनर्दिव्येलकश्वेतपुष्पकराजिचित्रिकाः पोटगलः पुष्पाभिकीर्णो दर्भपुष्पोत्तेजितकः सप्त तेषामाद्ययोराजिलवत् शेषा सस्तुलिवत्" सुश्रु०।

**दिव्योदक** न० कर्म०। १अन्तरीक्षभवे जले दिव्यशब्दे भाव० प्र० वाक्ये तद्भेदादि दृश्यम्। ऋग्वेदशब्दे विवृतिः।

**दिव्योपपादुक** पु० उपपद्यते मातृपित्रादिदृष्टकारणमनपेक्ष्यैव यदुत्पद्यते उप+पद-ण्वुल् कर्म० पिशाचादिव्यतिरिक्ते दिव्ये देवे विशेषणं तेषान्तु मातृपित्रादिदृष्टकारणापेक्षाभावेऽपि दिव्यत्वाभावात्तथात्वम्। देवे अमरः।

**दिव्यौघ** पु० तन्त्रोक्ते गुरुभेदे। "महादेवो महाकालश्चि-

पुरश्चैव भैरवः। दिव्यौघा गुरवः प्रोक्ताः सिद्धौघान् कथयामि ते"। इति शक्तिरत्नाकरतन्त्रम्। "अथ तारा-गुरून् वक्ष्ये दृष्टादृष्टफलप्रदान्। अर्द्धकेशो व्योमकेशो नीलकण्ठोऽथ ध्वजः। दिव्यौघान् सिद्धिदान् वत्स! शृणुष्वावहितो सदा"। "शृणु वत्स! महादेव! गुरून् दुर्गामनुब्रुवान्। परमात्मा परानन्दः परमेष्ठी शुभोदयः। कृष्णकाल! कालनाथो दिव्यौघा भैरवादि-काः" तन्त्रसारे देवताभेदात्तद्भेदा उक्ता २रुचिरौषधौ च

**दिव्यौषधि** स्त्री नित्यकर्म०। १मनःशिलायाम् शब्दार्थचि०।

**दिश** दाने आज्ञापने कथने च तु०उभ०सक०अनिट्। दिशति ते अदिक्षत् न दिदेश देष्टा दिष्टः दिष्टिः। दिक्षा आदिक्ष "सान्त्विषः सन्नि मेत्युक्ता दिशेत्युक्तो दिशेच्च यः" मनुः। दाने "दृष्टां गतिं तस्य सुरा दिशन्ति" भा० आनु०१८४श्लो० आज्ञापने "महादेवेन दिष्टं ते पुत्रजन्म नराधिप!" भा० व० १०६अ०। "दिदेश तस्मै प्रयतां तनूजाम्" कुमा०।

अति+अविषयसङ्कल्पान्यविषये उपदेशे सक० अतिदेशशब्दे १००पृ०दृश्यम्। "यथाकालोपपाते तद्दैवते तद्दैवतं हुत्वा तद्वातिदिशत्यानेन लुप्तयात्" कात्या०श्रौ० २५। २।४ उपदेशे च। "दत्तार्चितः स भगवानतिदिशत्यात्मनः पदम्" भाग०४।८।२८।

अनु+पश्चात्कथने। "यत्तं देवेभ्योऽनुदिशति" तैत्ति० सं० १।५।४।२ "रामश्चाथानुदिशताम्" रामा०बाला०८८सर्ग०

अप+क्षपणे यथार्थोक्तौ अपदेशशब्दे दृश्यम्। "पश्चिम-कृतविदा पुरोधसा रोगशान्तिमपदिश्य मन्त्रिणः। मन्थृते शिखिनि मूढमादधुः" "तस्य निर्दयरतिश्रमा-लसाः शिक्षितव्यमपदिश्य पार्श्वगाः" रघुः।

वि+अप+संज्ञाभेदे "भ्रातरं राजराजानं मनोहरसखं प्रभुम्। धनेश्वरं व्यपदिशन्" भा०व०२८०अ०। "शिवं च वां व्यपदिशत्परं च यासि" मृच्छक० "ईश्वर इति व्यपदिश्यते" वेदा०भा० "निमित्तसद्भावाद्विशिष्टोऽपदे-शोऽस्त्यब्यवहारोव्यपदेशः" परिभाषेन्दुशेखरोक्तेऽर्थे।

अभि+अभिमुखीकरणेऽपदेशे। "यां यामभ्यदिशत् सैनमकाम-यत" पञ्चविंशब्रा० १२।११।

आ+आज्ञायाम् उपदेशे "अघात आदेशो नेति" दु०उ० "आदिलदादीप्रकृत्यानुकूल्यम्" भट्टिः। आदेशशब्दे २१६ पृ० उक्ते अर्थे च "धातोः स्थाने इवादेशम्" रघुः।

अनु+आ+पश्चादादेशे उपदेशे च अन्वादेशशब्दे २१६ पृ० उक्ते अर्थे च।

प्रति+आ+निराकरणे "प्रत्यादेशो निराकृतिः" अमरः "कर्तु प्रथमक्रियायैव तन्त्री प्रत्यादिदेशैनमभाषमाणा" "अन्तः शरीरेष्वपि यः प्रजानां प्रत्यादिदेशाविनयं विनेता" रघुः "किमङ्गमेतं जलधरसमयं न प्रत्यादिशसि" विक्र०

वि+आ+विशेषे आदेशे। "सभीरवः प्रेरयिता भवेति व्यादिश्यते केन कृताशनस्य" कुमा०

सम्+आ+सम्यगादेशे। "समादिदेशैकवधूमवित्री" कुमा०।

उद्+अरूपकथने "उद्देशोलक्षणं विभागः परीक्षा चेति" न्यायसमयः। उद्देशशब्दे ११७०उक्तेऽर्थे च। तच्छब्दे उदा० प्रश्ने उद्देशकशब्दे दृश्यम्।

उप+अनुशासने उपदेशशब्दे १२१० पृ०उक्तेऽर्थे च। "उप-दिशति कामिनीनां यौवनमद एव ललितानि" सा०द० "उपदिष्टमिवेच्छामि तापसं वीतकल्मषाः" भा०उ०१७३अ०

प्रति-उप+उपदेशस्य प्रतिरूपोपदेशे "व्याप्तिं प्रति प्रत्युपदे-क्ष्यामः" तन्त्र० "यद्यत्प्रयोगविषये भाविकमुपदिश्यते मया तस्मै। तत्तद्विधेयकरणात् प्रत्युपदिशतीव मे वाक्" माल०मि

निर्+निर्देशेन देशने कथने च "ऋतपत् पीठमासन्ने निर-दिशच्च कार्त्तनम्" भट्टिः उच्चारणे च "निर्दिशत्यमा-त्यादेशा भवन्ति" व्या०परिभाषा "अज्ञानं निर्दिशत्यमा-नस्तज्ज्ञार्थमाषम्" नागेशभट्टः।

प्रति+निघ्+प्रकृतानुरूपनिर्देशे। "तदिति प्रकृतं भावलक्षणं प्रतिनिर्दिश्यते"। तेन पदेन उद्देश्यस्यैव पदेन पुनः-कथने। उद्देश्यप्रतिनिर्देश्ययोरेकपदप्रतिपाद्यत्वेऽपि न कथितपदत्वदोषः अन्यपदेन निर्देशे तु प्रकृत अन्यप्रकृष्य-तादोषः यथाह सा०द० "एवमुक्तो मन्त्रिसचिवैरावयः प्रत्यभाषत" अत्र वचधातुना प्रकान्तं प्रतिवचनमपि तेनैव यद्भुक्तं तेन रावयः प्रत्यवोचतेति पाठो युक्तः। एवञ्च सति न कथितपदत्वदोषः तस्योद्देश्यप्रति-निर्देश्यव्यतिरिक्तविषयत्वात्। दृश्यं हि वचनप्रति-वचनयोरुद्देश्यप्रतिनिर्देश्यत्वं यथा "उदेति सविता ताम्रस्ताम्र एवास्तमेति च" इत्यत्र। यदि पदान्तरेण स एवार्थः प्रतिपाद्यते तदान्योऽर्थ इव प्रतिभासमानः प्रतीतिं स्खलयति। यथा वा "ते हिमालयमासन्त्र्य पुनःप्रेक्ष्य च मुहिनम्। शिव-स्याङ्के निवेश्यार्थं तद्विदुषः वसदयुः" अत्र अङ्के

इति इदमा प्रक्रान्तस्य तेनैव तच्छब्दानाश्वसितदंदःशब्दाभ्यां वा परामर्शो युक्तो न तच्छब्देन। यथा वा "अहल्याच्छिन्ना भूः स च पतिरपां योजनशतम्" अत्र "सिता भूः पत्वापां स च पतिरपामिति" युक्तः पाठः। प्रति+प्रतिरूपदेशने। "भुजगगतिप्रतिदेशितात्मलक्ष्यः" भा० या० ३६७ अ०

सम्+सम्यक्कथने सम्यक्तयादेशे वाचा कथने च "अभिदूति काचिदिति संदिदिशे" माघः "ननु सन्दिशेति सुरशोदितया त्वया न किञ्चन किलाभिदधे" माघः "ददौ स दयितां स्वाते मालाञ्चाप्प्रां हिरण्मयीम्। राज्यं सन्दिश्य भोगांश्च ममार प्रथपीडितः" भट्टिः "अथ विज्ञातने गौरी सन्दिदेश सिधः सखीम्" कुमा०।

दिश् स्त्री दिशति दत्ताव्यकाशं दिश-क्विन्। आकाशायाम् प्राच्यादिव्यवहारहेतौ काशायाम्। "कालैकमवधिं तस्मादिदं पूर्वञ्च पश्चिमम्। इति निर्दिश्यते देशो यया सा दिगिति स्मृतेति" उक्तेस्तस्या दैशिकपरत्वापरत्वा समवायिकारणत्वम्। सा चैका नित्या विभ्वी चेति "कालस्तात्पादिशां सर्वगतत्वं परमं मतम्" भाषा०।

दिक्परीक्षा च कणाद सूत्रोपस्कारयोर्यथा

"इत इदमिति यतस्तद्दिश्यं लिङ्गम्" सू०। "काललिङ्गप्रकरणं समाप्य इदानीं दिग्लिङ्गप्रकरणमारभमाण आह। दिश इदं दिश्यं दिगनुमापकम् इतोऽल्पतरसंयुक्तसंयोगाश्रयादिदं बहुतरसंयुक्तसंयोगाधिकरणं परम् इतश्च संयुक्तसंयोगभूयस्त्वाधिकरणादिदं संयुक्तसंयोगाल्पीयस्त्वाधिकरणमपरमिति नियतदिग्देशयोः समानकालयोः पिण्डयोर्यतो द्रव्यान्तरत्वं भवति सा दिगित्यर्थः। न हि तादृशं द्रव्यमन्तरेण भूयसां संयुक्तसंयोगानामल्पीयसां वा पिण्डयोरुपनयनायकमन्यदस्ति न च तदुपनयमन्तरेण तत्तद्दिग्विशिष्टबुद्धिः न च तामन्तरेण परत्वापरत्वयोरुत्पत्तिः न च तदुत्पत्तिं विना तद्दिग्विशिष्टप्रत्ययव्यवहारौ। न च काल एव संयोगोपनायकोऽस्तु किं द्रव्यान्तरेणेति वाच्यं कालस्य नियतक्रियोपनायकत्वेनैव सिद्धेः, अनियतपरधर्मोपनायकत्वकल्पनायान्तु काश्मीरकुङ्कुमपङ्कराग कार्ष्णाटकामिनीकुचकलसं प्रत्युपनयेत् आकाशात्मनोरपि तथा परधर्मोपसंक्रामकत्वे स एव प्रसङ्गः, दिशस्तु अनियतपरधर्मोपसंक्रामकतयैव सिद्धत्वान्नातिप्रसङ्गः एवञ्च क्रियोपनायकात् कालात् संयोगोपनायिका दिक् पृथगेव। किञ्चाकाशात् पूर्वमिदम् अस्माद्दक्षिणमिदम् अस्मात्पश्चिमिदम् अस्मादुत्तरमिदम् अस्माद्दक्षिणपूर्वमिदम् अस्माद्दक्षिणपश्चिमिदम् अस्मात्पश्चिमोत्तरमिदम् अस्मादुत्तरपूर्वमिदम् अस्मादधस्तादिदम् अस्मादुपरिष्टादिदम् इत्येते प्रत्यया इत इदमिनोल्यनेन संगृहीताः एतेषां प्रत्ययानां निमित्तान्तरासम्भवात्। किञ्च नियतोपाध्युपायकः कालः अनियतोपाध्युपायिका दिक्, भवति हि यदपेक्षया यो वर्त्तमानः स तदपेक्षया वर्त्तमान एव, दिगुपाधौ तु नैवं नियमः यं प्रति या प्राची तं प्रत्येव कदाचित्तस्याः प्रतीचीत्वात् एवमुदीच्यादिष्वपि वाच्यम्, यदपेक्षया सूर्योदयाचलसन्निहिता या दिक् सा तदपेक्षया प्राची यदपेक्षया सूर्यास्ताचलसन्निहिता या दिक् सा तदपेक्षया प्रतीची, सन्निधानन्तु संयुक्तसंयोगाल्पीयस्त्वं ते च सूर्यसंयोगा अल्पीयांसो भूयांसो वा दिगुपनेयाः। एवं प्राच्यभिमुखपुरुषावयवप्रदेशावच्छिन्ना दिगुदीची, ताडशपुरुषदक्षिणभागावच्छिन्ना दिक् दक्षिणा, वामत्वदक्षिणत्वे तु शरीरावयवगतिजातिविशेषौ। गुरुत्वासमवायिकारणक्रियाजन्यसंयोगाश्रयोदिक् अधः। अहटदादात्मसंयोगजन्याग्निक्रियाजन्यसंयोगाश्रयोदिगूर्ध्वा। एवञ्चेन्द्राग्नियमनिर्ऋतिवरुणवायुसोमेशाननागब्रह्माधिष्ठानोपलक्षिता दश दिश इति व्यपदेशान्तरं प्राच्यादिव्यपदेशात्" उप०ह०। "द्रव्यत्वनित्यत्वे वायुना व्याख्याते" सू०। दिशो द्रव्यत्वं नित्यत्वञ्च वायुपरमाणुवदित्याह। "गुणवत्त्वाद्द्रव्यत्वम् अनाश्रितत्वाच्च नित्यत्वमित्यर्थः" ह०। एकत्वमतिदिशन्नाह। "तत्त्वभावेन" सू०। "दिग्लिङ्गाविशेषाद्विशेषलिङ्गाभावाच्च तत्त्ववदेकत्वं तदनुविधानादेकपृथक्त्वम्" ह०। ननु यदीकैव दिक् कथं तर्हि दश दिश इति प्रतीतिव्यवहारावित्यत आह। "कार्यविशेषेण नानात्वम्" सू०। "कार्यविशेषः कार्यभेदस्तेन नानात्वोपचार इत्यर्थः" ह०। तमेव कार्यभेदं दर्शयन्नाह। "आदित्यसंयोगाद्भूतपूर्वाद्भविष्यतो भूताच्च प्राची" सू०। "प्राक् यस्यां सविता यस्यतीति प्राची तथाच यस्यां दिशि मेरुप्रदक्षिणक्रमेण भ्रमत आदित्यस्य प्रथमं संयोगो भूतपूर्वो भविष्यन् वा सा दिक् प्राची अत्र पुरुषाभिसम्बन्धभेदमाश्रित्य कालत्रयोपवर्णनम्, भवति हि कस्यचित्पूर्वेद्युः प्रातरस्यां दिशि आदित्यसंयोगः प्रथमं इत्त इतीयं प्राचीति प्राचीव्यवहारः कस्यचिदपरेद्युरस्यां आदित्यसंयोगः प्रथमं भावीत्यभिसन्धाय प्राचीव्यवहारः

कस्यचिदिशामेव यस्याम् आदित्यसंयोगो भवत्यसौत्यभिसम्बन्धाय प्राचीव्यवहारः, भूतादिति आदिकर्म्मणि क्तप्रत्ययः तेनाभिसम्बन्धेरनियमात् यदाप्यादित्यसंयोगो नास्ति रात्रौ मध्याह्नादौ तत्रापि प्राचीव्यवहारानुगमः सिद्धतीति भावः" उप० ह०। दिगन्तरव्यवहारेऽपीममेव प्रकारमतिदिशन्नाह "तया दक्षिणा प्रतीची उदीची च" सू०। "तद्देव दक्षिणदिग्वर्त्तिनमादित्य सङ्कादित्यसंयोगाद्भूतपूर्वाद्विप्रकृतो भूताद्वा दक्षिणव्यवहारः एवं प्रतीच्युदीच्योरपि व्यवहार उन्नेयः। यावत्यदक्षिणत्वे निरूढे एव" उप० ह०। दिगन्तराख्यव्यवहारेऽपीममेव प्रकारमतिदिशन्नाह "एतेन दिगन्तराणि व्याख्यातानि" सू०। "प्राचीदक्षिणयोर्दिशोर्यत्कोणसङ्कर्षेण दक्षिणपूर्वा दिगिति व्यवहारः एवं दक्षिणपश्चिमा पश्चिमोत्तरोत्तरपूर्वेष्वूह्यम् एते चादित्यसंयोगा येन विभुना दृष्ट्योपनीयन्ते सा दिगिति कणादरहस्ये व्युत्पादितं विस्तरतः" उप० ह०। अस्तिपदान्ते च कुः। दिक्। "दिगदक्षिणा गन्धवहं सुखेन"। "प्रसक्तदिङ्मांशुविविक्तवातम्" कुमा०। सा चोपाधिभेदात् दशधा "पूर्वाग्नेयी दक्षिणा च नैर्ऋती पश्चिमा तथा। वायवी चोत्तरैशानी ऊर्द्धा चाधोदिशोदशेति" वराहपुराणम्। आशाशब्दे तत्त्वे प्रमाणं प्राच्यादिभेदे उपाधिस्वरूपञ्चाह८२५ पृ०८दशम्। "यया दिशा धावति वेधसः सृष्टा" नैष० "परस्परावापभिवामसत्ता दिशः" किरा० भागुरिमते वा टाप् दिशाख्यत्व। दिशागज दिशापालशब्दे दृश्यम् दिशाङ्ग यात्रादावुपयोगिसंज्ञाभेदः ज्यो० त० उक्तो यथा "अङ्गारिणी दिग्रविविग्रयुक्ता यस्यां रविस्तिष्ठति सा प्रदीप्ता। प्रधूमिता यास्यति यां दिनेशः शेषाः प्रशस्ताः शुभदाश्च ताः स्युः"। "यत्र पूर्वादिकाष्ठायां ग्रहराश्यादिगोरविः। सा दिगस्तमिता ज्ञेया शेषास्त्रिस्रः सदोदिताः। यात्रा युद्धं विवादश्च द्वारं प्रासादकर्म्मयोः। न कर्त्तव्यं शुभं चान्यदस्ताशाभिमुखं नरैः"। "यस्याशायां स्थितं यस्य नाम्नः प्रथममक्षरम्। स आर्त्तः सर्वकार्येषु त्रयोदैवज्ञतो नरः" ज्योति० त० दिक्करशब्दोक्ते २दन्तचते च वैजयन्ती १दशसंख्यायाम् ३तत्संख्यान्विते च। "दिग्भिर्गुणैरष्टभिः शरैर्वैः"नील० ना०। ५श्रोत्राधिष्ठातृदेवताभेदे "दिग्वातार्कप्रचेतोऽश्वि वह्नीन्द्रोपेन्द्रमित्रकाः"भारतादितत्त्वम्। कः प्रजापतिः दिशि भवं दिगा०यत्। दिश्य दिग्भवे त्रि०। दिशा निर्वृत्तम् ठञ्। दैशिक दिक्कृते त्रि० दैशिकपरत्वापरत्वे।

दिश त्रि०दिशति दिश-क। १देशके। २विष्णौ पु०"चतरको गभीरात्मा विदिशो ह्यादिशो दिशः" विष्णुस०।

दिशस् स्त्री दिश-बा० कसुन्। दिशि रभानाथः।

दिशागज पु० दिशायां स्थितो गजः। दिग्गजे "नागान् दिशागजसुतान् दिव्यानपि च भारत!" हरिवं०१४५अ०

दिशाचक्षुस् पु० गरुड़ात्मजभेदे। "वातवेगो दिशाचक्षुर्निमिषोऽनिमिषस्तथा" भा० उ० १०० गरुड़पुत्रोक्तौ।

दिशापाल पु०दिशां पालयति पालि-अण् उप०स०। इन्द्रादौ १दिक्पाले २ब्रह्मनियोजिते वैराजादिप्रजापतिसुते दिशां पालकभेदे च। दिग्भेदेन तेषां नियोजनकथा हरिवं०४ अ०यथा "एवं विभज्य राज्यानि क्रमेण स पितामहः। दिशापालानथ ततः स्थापयामास भारत!। पूर्व्वस्यां दिशि पुत्रन्तु वैराजस्य प्रजापतेः। दिशापालं सुधन्वानं राजानं सोऽभ्यषेचयेत्। दक्षिणस्यां महात्मानं कर्दमस्य प्रजापतेः। पुत्रं शङ्खपदं नाम राजानं सोऽभ्यषेचयेत्। पश्चिमायां दिशि तथा रजसः पुत्रमच्युतम्। केतुमन्तं महात्मानं राजानं सोऽभ्यषेचयेत्। तथा शिरसरोमाणं पर्जन्यस्य प्रजापतेः। उदीच्यां दिशि दुर्द्धर्षं राजानं सोऽभ्यषेचयेत्। तैरियं पृथिवी सर्वा सप्तद्वीपा सपत्तना। यथाप्रदेशमद्यापि धर्मेण परिपाल्यते"।

दिशोदण्ड पु० दिशमनादृत्य दण्डः अलुक् स०। दिशोऽनादरेण दण्डे त्रि० को०।

दिश्य त्रि० दिशि भवः दिगा० यत्। दिशि भवे। "ये सर्पाः पार्थिवा य आन्तरिक्षा ये दिव्या ये दिश्याक्षेभ्य इमं बलिमहार्षम्" आश्व० गृ० २।१।६।

दिष्ट त्रि०दिश-कर्म्मणि क्त। १उपदिष्टे २कथिते। संज्ञायां कर्त्तरि क्त। ३भाग्ये न० अमरः। "न दिष्टमिष्टं कुरुते न तिष्ठति तु पौरुषे" विष्णुपु०। ४कालेपु०अमरः। ५वैवस्वतमनोः पुत्रभेदे। "नरिष्यन्तोऽथ नाभागः सप्तमो दिष्ट उच्यते" भाग० ८।१३।२ वैवस्वतमनुपुत्रकथने। ६दारुहरिद्रायां शब्दमाला

दिष्टान्त पु० ६त०। १भाग्यसमाप्तौ तदुपलक्षिते २मरणे च। "ततो दिष्टान्तमापन्नः सर्वेषां दुःखमावहन्" भा० आ० ६६ अ० "दिष्टान्तमाप्स्यति भवानपि पुत्रशोकात्" रघुः

दिष्टि स्त्री दिश-भावे क्तिन् संज्ञायां कर्त्तरि क्तिच् वा। १दर्शे २परिमाणे च मेदि०। ३कथने उपदेशे ४तत्सत्वे "तथाचास्य दिष्टिद्विषिव शुश्राव" काद०। ५भाग्ये च"राजकुले दिष्टिद्विषस्य मोमुह्यानमूत्"काद०।

दिक्षा अव्य० दिश–सम्प्रदा०भावे क्विप् दिशं देशनं ख्यापयति ख्यै–ख्ये–वा क्विप्, अन्नाद्यादि०नि०वा। १कर्मणि २सम्प्रदाने भाग्यार्थकदिष्टिशब्दस्य ह्रस्वोयान्तश्च रूपमिष्यते तेन १भागेप्रेतेत्यर्थे। "अन्योऽन्यगतसौहार्दा दिष्टाद्दिष्टेव्रतिं चाचरन्" भा० आ० १२८अ०

दिक्षु त्रि० दा–क्सिक्षु। दातरि उणादि०।

दिक्ष लेपने अदा० उभ० सक० अनिट्। देग्धि दिग्धे अधिक्षत् अधिक्षत-अदिग्ध अधिक्षत अदिक्षत।। दिदेक्ष दिदिक्षे। देग्धा धेक्ष्यति दिग्धः। "अदिक्षन्मन्त्रैः शुभैः" भट्टिः। "स चन्दनोशीरलवाक्तदिग्धः" भट्टिः। उपसर्गपूर्वकस्य तत्तदुपसर्गद्योत्यार्थयुक्तलेपने। प्रतिदेग्धि "इलाक्षपसाभिदिग्धाः" अव०५।१८८ "इलरजसाव-देग्धि" कौ०त०ब्रा०२१ "कवचैः शोणितादिग्धैः" भा०भी० २२८४ श्लो० "ऊर्जं वा एतं रसं पृथिव्या उपदीका अदिदक्षन्ति यद्वल्मीकम्" तै०आ०५।२।८ "लोष्टानां च मणीनां च मलपङ्कोपदिग्धता" काम०नी० "शिरोगतं कफोपदिग्धम्" सुश्रु० "यथाधो भूमौ निदिग्धं तदस्या स्यादेवं तत्" शत०ब्रा० १।७।२।१२

दीक्ष वधे दि० आत्म० सक० अनिट्। दीक्षते अदीक्षत। दिदीक्षे दीक्षिष्यते। दीक्षः। उपसर्गपूर्वकस्य तत्तदुपसर्गद्योत्यार्थवधे "अघ मघोनो अवधा निरदीधम्" ऋ०४।२७।१ "आपो मन्द्रं हतमन्धं वज्रिणीः क्षयमत्कैः परिदीयन्ति यज्ञैः" ऋ०२। ३५।४

दीक्ष मौण्ड्ये चुरा० उभ० सक० सेट्। दीक्षयति ते। दीक्षते अदीक्षित। दिदीक्षे दीक्षिष्यते। "दीक्षस मद्र रामेण त्वरितं तुरगाध्वरे" भट्टिः "यत्तादृङ् वा एष पुनर्जायते यो दीक्षते" ऐत०ब्रा०२।२२ "कथं नोमध्ये दीक्षिष्ट" ऐत०ब्रा० २।३९ "ब्रह्मवर्चसेन दीक्षिष्यमाणः" भाग० २।१।६ क्वचित् भेदे पदव्यः "ते ह देवयजनं दिदीक्षुः पशुभी०ब्रा०२४।१८ णिच्। दीक्षयति "राजानं दीक्षयामासुः सर्वसत्रावये तदा" भा० आ० २०१७ श्लो०।

दीक्षण न० दीक्ष–भावे ल्युट्। यज्ञाद्यर्थनियमभेदे। "बन्ध मोक्षमन्त्रदीक्षणेऽपि" राजमार्त्तण्डः।

दीक्षणीय न० दीक्षणाय हितादि छ। दीक्षासाधने ऋत्वि-भेदे। "यो दीक्षते आग्नावैष्णवं हविर्यो दीक्षणीयं ऋत्वि-भवति" शत०ब्रा० ३।२।४।२१। १हविर्भेदे स्त्री "दीक्षणी-यामाग्नेयीमतिथ्यदेवता" कात्या०श्रौ०१।३।१०"दीक्षणी-यादीनां सकलानामिष्टीनां सदेवताकानामुपांशुत्वम्" कर्कः "वाग्नेय वा दीक्षणीयां० नोचैस्तरांनीचैस्तरा-मितरे" कात्या०श्रौ० ७।२।२१ "अथ वा वाग्नेय उच्च-मया वाचा उच्चैर्दीक्षणीयां कुर्युः इतरे ह्येते प्राय-णीयातिथ्ये नीचैस्तरां कर्तव्ये, दीक्षणीया उच्चैस्तरां, प्रायणीया तदपेक्षया नीचैस्तरां, तदपेक्षया नीचैस्तरा-मातिथ्येति" कर्कः। २सौमिके दृष्टिभेदे क्षेम०। ३याज-मेवाङ्गभूते दृष्टिभेदे। "याजमेव कुर्वन्तीनां यजतीनां दीक्षणीयाप्रायणीयादीनामादिषु सकृद्दृष्टहीतमाज्यं जुहोति" यजु० ६।५। वेददी०।

दीक्षा स्त्री दीक्ष–भावे अ। १नियमे २उपनयनसंस्कारे "दीयते विमलं ज्ञानं क्षीयते कर्मवासना। तेन दीक्षेति सा प्रोक्ता मुनिभिस्तत्त्वदर्शिभिः" इति तन्त्रोक्ते ३अभीष्ट-देवमन्त्रपरिष्कारे ४तदुपदेशे। यागाङ्गदीक्षा च द्वादशसंख्या स्वपरिमिता वा यथाह कात्या०श्रौ०७।३।२८सू० "द्वादश दीक्षाः" "अत्रास्मिन्होमे भवन्ति" कर्कः। "अपरमिता वा" द्वादशसंख्यातोऽतिप्रभेदेनाधिकसंख्या वा दीक्षा भवन्ति "अपरिमितं प्रमाणादभूत इति" परिशिष्टकारः अतश्चत्वारो दीक्षाप्रकाराः, "एका दीक्षा, तिस्रो दीक्षा, द्वादशदीक्षा अपरिमिता वा दीक्षेति" श्राद्धान्तरादेते दीक्षाप्रकाराः। आपस्तम्बः "दशाष्टभवरार्धं दीक्षितो भवति मासं संवत्सरं वा यदा क्रयः क्रीणादित्यपरं विद्या-यते च यदा वै दीक्षितः क्रयो भवत्यथ मेध्यो भवति यदाक्षिच्छ्लक्ष्णं किं चन भवत्यथ मेध्यो भवति यदास्य क्रयणं चक्षुषोर्नश्यत्यथ मेध्यो भवति यदास्य त्वचास्थि संधीयतेऽथ मेध्यो भवति पीवा दीक्षेत क्रयो यजेत यद-स्याङ्गानां क्षीयते जुहोत्येव तदिति विज्ञायते" इति। कर्कः "प्रख्याते दीक्षा क्रयः प्रसव उत्थानम्" १।सू० "तान्यत्र दीक्षा सोमक्रयः प्रसवः सुत्या उत्थानं समाप्तिः प्रख्याते विहितयोर्यागादिज्योतिःशास्त्रनिषेधवर्जिते दृष्टिने भवन्ति यतएवं स्मरन्ति 'आभ्युदयिकः सदार्थः प्रख्येऽहनि कर्तव्यः एतानि चाभ्युदयिकानीति" कर्कः। तान्त्रिकमन्त्रदीक्षाकालादि मल०त० उक्तं यथा "अथ दीक्षाकालः सा च मलमासे न कार्या यथा-ऽग्निष्वसंहितायाम् "यदा ददाति सन्तुष्टः प्रसन्नवदनो मनम्। क्रयमेव तदा वैद्यमिति कर्त्रभिधानक्रमः। वि-शुद्धदेशकालेषु शुद्धात्मा नियतो गुरुः। सङ्कल्पो शोपूर्वं कर्त्रभङ्गुरतोषणं सुने।। कृष्णेन्दोरुदयं

श्राद्धादौ च स्वस्तिवाचनम्। स्नात्वोक्तप्रकारेण तदेतद्विद्धीत वै। मधुमासे भवेद्दुःखं माधवे रत्नसञ्चयः। मरणं भवति ज्येष्ठे आषाढे बन्धुनाशनम्। सम्पद्विः श्रावणे नूनं भवेद्भाद्रपदे क्षयः। प्रज्ञानाश्विने मासि सर्वतः शुभमेव हि। स्नानं स्यात् कार्त्तिके सौख्यं मार्गशीर्षे भवत्यपि। पौषे ज्ञानक्षयो माघे भवेन्मेधाविवर्द्धनम्। फाल्गुनेऽपि विद्वद्भिः स्नानमेतत् विवर्जयेत्। गुरौ रवौ दिने शुक्रे कर्त्तव्यं बुधसोमयोः। अश्विनी भरणी स्वातिविशाखाद्रकमेषु च। ज्येष्ठोत्तरत्रयेष्वेवं कुर्यान्मन्त्राभिषेचनम्। शुक्लपक्षे च कृष्णे वा दीक्षा सर्वसुखावहा। पूर्णिमा पञ्चमी चैव द्वितीया सप्तमी तथा। त्रयोदशी च दशमी प्रशस्ता सर्वकामदा। पञ्चाङ्गशुद्धदिवसे षोडशे ग्रहितारयोः। गुरुशुक्रोदये शुद्धे लग्ने द्वादशशोधिते। चन्द्रतारानुकूले च शस्यते सर्वकर्मसु। सूर्यशुद्धकालेन समानो नास्ति कश्चन। तत्र यद्यत् कृतं सर्वमनन्तफलदं भवेत्। न मासतिथिवारादिशोधनं सूर्यवर्जिते। ददातीष्टं सदीक्षितं यत्तस्मिन् काले गुरोर्मुखे। सिद्धिर्भवति मन्त्रस्य विनायासेन सेवितः"। मनुं मन्त्रम्। अङ्कुरारोपणमासमग्रमिदम्। शुद्धकालत्वं दर्शयति मधुमासे इत्यादि। पञ्चाङ्गशुद्धदिवसे तिथिवारनक्षत्रकरणयोगशुद्धदिवसे। तथाच मङ्गाकपिलपञ्चरात्रम् "एवं नक्षत्रतिथ्यादौ करणे योगवासरे। मन्त्रोपदेशो गुरुणा साधकस्य शुभावहः"। षोडशे ग्रहितारयोरिति जन्मचन्द्राद्यतारयोरानुकूल्यसहिते गुरुशुक्रोदये गुरुशुक्रानस्तमये। एतत्तु समयशुद्ध्यनुरोधेनोक्तवचनम्। (अकालशब्दोक्ते "गुरोर्भोगोरस्तबाल्ये" इत्यादिके वचने "परीक्षारामकूपांच पुरश्चरणदीक्षणे" इत्यादिना अशुद्धकाले तस्यावर्जनीयत्वसत्त्वम्)। द्वादशशोधिते द्वादशांशशोधिते। स्नानभावाम् "रविसंक्रमणे चैव सूर्यस्य ग्रहणे तथा"। तथा "तत्र लग्नादिकं किञ्चिन्न विचार्यं कथञ्चन"। दीक्षातत्त्वे "यदैवेच्छा तदा दीक्षा गुरोराज्ञातुरूपतः। न तिथिर्न व्रतं होमो न स्नानं न जपः क्रिया। दीक्षायाः कारणं किञ्चित् स्वेच्छयाप्रे तु सद्गुरौ"। सद्गुरौ सिद्धमन्त्रगुरौ। दीपिकायाम् "ध्रुवस्थिरलग्नगणे रविशुभवासरेषु सत्तिथौ सद्गुरौ दीक्षा। स्थिरलग्ने शुभचन्द्रे केन्द्रे कोणे शुभे गुरौ धर्मे"। ध्रुवाणि त्रीण्युत्तराणि रोहिणी च। मृदूनि चित्रानुराधामृगशिरोरेवत्यः। केन्द्रं लग्नचतुर्थसप्तदशकम्। कोणं नवपञ्चकम्। धर्मो नवमः। गौरतन्त्रे "रोहिणी श्रवणार्द्रा च धनिष्ठा चोत्तरात्रयम्। पुष्यः शतभिषग्मूलं च दीक्षानक्षत्रमिष्यते"। अर्को रविः। रत्नावल्याम् "योगाश्च प्रीतिरायुष्मान् सौभाग्यः शोभनोधृतिः। वृद्धिर्ध्रुवः शुक्लसिद्धौ च साध्यः शुक्लश्च हर्षणः। वरीयांश्च शिवः सिद्धो ब्रह्मा इन्द्रश्च षोडश"। तथा। शुभानि करणानि स्युर्दीक्षायाञ्च विशेषतः। शकुन्यादीनि चत्वारि विशेषेण विवर्जयेत्"। शकुन्यादीनि शकुनिनागचतुष्पदकिन्तुघ्नानि। कृष्णेऽष्टम्यां चतुर्दश्यां पूर्वपक्षदिने तथा"। कृष्णे कृष्णपक्षे। कालोत्तरे "भूतिकामैः सिते सदा" मन्त्र दीक्षायां प्रतिप्रसवः "राक्षसमङ्गलसारसंज्ञके शिवभक्षिजन्मदिवसे संक्रान्तौ विषुवायने। सप्तीर्क्षेऽर्कविधुग्रासे तत्तदामनपर्वणोः। मन्त्रदीक्षां प्रकुर्वाणो मासमासादीन् न शोधयेत्"। तत्तत्पर्व परमेश्वरोपवीत दानतिथिः श्रावणी पूर्णिमा। दामनपर्व दमनभञ्जनतिथिश्चैत्रशुक्लचतुर्दशी। कूर्मपुराणे हिमालयं प्रति देवीवाक्यम् "यानि शास्त्राणि दग्धानि लोकेऽस्मिन् विविधानि च। श्रुतिस्मृतिविरुद्धानि तिक्ता तेषां हि तामसी। करालभैरवस्यापि यामलं वामसंश्रितम्। एवंविधानि चान्यानि मोहनार्थानि तानि तु। मया कृतानि चान्यानि मोहायैषां भवार्णवे"। तस्मात् सद्भिः श्रुतिस्मृतिविरुद्धे वर्त्मनि न कदाचित् पदं न्यस्तव्यम्। अथादिदुष्टमन्त्रप्रतीकारस्तु "एषु दोषेषु सर्वत्र मायां कामञ्च वापि वा। जिह्वा चादौ स्थितं दद्यात् तद्दुष्टत्वविमुक्तये। तारसंपुटितो वापि दुष्टमन्त्रो विशुध्यति। यस्य यत्र भवेद्भक्तिः सोऽपि मन्त्रोऽस्य सिद्ध्यति। भुवनेश्वरीपारिजातेऽपि "मायाबीजसमायुक्तः क्षिप्रं सिद्धिप्रदो भवेत्। पिण्डस्थे बैन्दवो मन्त्रो मायाबीजोज्झितीकृतः। मायाबीजात् भवेत् प्राणो बीजञ्चैतन्यरूपकम्"। नारदीये "यदृच्छया श्रुतं मन्त्रं जल्पनापि कुतेन वा। धत्तेचितं वा मायाञ्च तत्पेत्य त्वनर्थकृत्। प्रविश्य विधिवद्दीक्षामभिषेकावसानिकाम्"। अधिकं तन्त्रसारोक्तं देशाद्यनुपदं वक्ष्यते

तन्त्रसारे दीक्षाशब्दस्य व्युत्पत्तिप्रदर्शनपूर्वं कलावावश्यकता दर्शिता यथा

"दीक्षां विना जपस्य दुष्टत्वात् प्रथमं सा निरूप्यते "दिव्यं ज्ञानं यतो दद्यात् कुर्यात् पापस्य संक्ष-

यम्। तस्माद्दीक्षेति सा प्रोक्ता मुनिभिस्तन्त्रवेदिभिः। दीयते ज्ञानसंभारः क्षीयते पाशबन्धतः। ततो दीक्षेति सा प्रोक्ता मुनिभिस्तन्त्रवेदिभिः"। सर्वाध्वनेषु दीक्षाया आवश्यकत्वम् तथा च "दीक्षामूलं जपं सर्वं दीक्षामूलं परन्तपः। दीक्षामाश्रित्य निवसेत् यत्र कुत्राश्रमे वसन्"। शूद्रस्य निषेधमाह तन्त्रान्तरे "प्रणवाद्यं न दातव्यं मन्त्रं शूद्राय सर्वथा। आत्ममन्त्रं गुरोर्मन्त्रं मन्त्रराजमपंक्तिकम्। स्वाहाप्रणवसंयुक्तं शूद्रे मन्त्रं ददद्विजः। शूद्रो निरयमाप्नोति ब्राह्मणो वाप्यधोगतिम्"। वसिष्ठसंहितायां "सावित्रीं प्रणवं वज्रुंचक्रीं स्त्री शूद्रो यद्विजानीयात् स स्यादोधगच्छति"। वज्रीं लक्ष्मीमन्त्रम्। विशेषमाह वाराहीतन्त्रे "गोपालस्य मनुर्देवो मन्त्रेशस्यापि पादजे। तत् पत्न्यापि सूर्यस्य मन्त्रेशस्य मनुस्तथा"।

अदीक्षितस्य निन्दामाह तन्त्रसारे

"अदीक्षितायै कुर्वन्ति अपपूजादिकाः क्रियाः। न भवन्ति शिवे तेषां शिलायामुप्तबीजवत्। देवि! दीक्षाविहीनस्य न सिद्धिर्न च सद्गतिः। तस्मात् सर्वप्रयत्नेन गुरुणा दीक्षितो भवेत्। अदीक्षितोऽपि मरणे रौरवं नरकं व्रजेत्। तस्माद्दीक्षां प्रयत्नेन सदा कुर्याच्च तान्त्रिकात्। कल्पे ब्रह्मा तु मन्त्रं वै यो ददाति नराधमः। मन्वन्तरं नरकेषु निष्कृतिर्नैव जायते। नादीक्षितस्य कार्यं स्यात् तपोभिर्नियमव्रतैः। न तीर्थगमनेनापि न च शारीरयत्नयैः"। अतः सद्गुरोराश्रितदीक्षः सर्वकर्माण्यपि साधयेत्। गोविन्दचन्द्रागमे "अदीक्षितस्य मरणे प्रेतत्वं न विमुच्यति"। नवरत्नेश्वरः "सर्वांशमपि दीक्षायां शक्तिः फलमखण्डितम्। अविरोधाद्भवन्त्येव प्रासङ्गिक्यस्तु मुक्तयः"। दीक्षा काम्या च यथा कुलार्णवे "उपपातकसंज्ञानि महापातककोटयः। नश्यन्ति देवेशि! दीक्षा हि विधिना कृता। दीक्षाद्यागमोक्तागमपदार्थमाह यामले "आगतः शिववक्त्रेभ्यो गतश्च गिरिजानने। मतञ्च वासुदेवस्य तस्मादागम उच्यते। आगमोक्तविधानेन कलौ देवान् यजेत् सुधीः। न हि देवाः प्रसीदन्ति कलौ चान्यविधानतः। पञ्चवर्त्मभवेद्दीक्षा द्यागमोक्तैः शृणु प्रिये!। यां लब्ध्वा कलिकाले च सर्वान्कामानवाप्नुयात्" तन्त्रसा०

दीक्षाप्रकारश्च कलावतीग्रन्थे १७६२ पृ० द्रष्टव्यः।

अत्रत्य च दीक्षाशब्दव्युत्पत्त्यादिकथनं यथा रुद्रयामले "ददाति शिवतादात्म्यं क्षिणोति च मलत्रयम्। अतो दीक्षेति संप्रोक्ता दीक्षातन्त्रार्थवेदिभिः"। लघुकालोत्तरे च "दीयते परमं ज्ञानं क्षीयते पाशबन्धतः। तेन दीक्षेत्युच्यते तन्त्रे आगमार्थविचारणात्"। योगिनीतन्त्रे तृतीयभागे षष्ठपटलेऽपि "दीयते ज्ञानमत्यर्थं क्षीयते पाशबन्धनम्। अतो दीक्षेति देवेशि! कथिता तत्त्वचिन्तकैः। मनसा कर्मणा वाचा यत् पापं समुपार्जितम्। तेषां विक्षेपकरणी परमज्ञानदा यतः। तस्माद्दीक्षेति लोकेऽस्मिन् गीयते शास्त्रवेदकैः। विज्ञानफलदा चैव द्वितीया जयकारिणी। तृतीया मुक्तिदा चैव तस्माद्दीक्षेति गीयते"। विश्वसारतन्त्रे द्वितीयपटले च "जय दीक्षां प्रवक्ष्यामि शृणुष्व कमलानने!। यस्य विज्ञानमात्रेण देवत्वं लभते नरः। दिव्यज्ञानं यतो दद्यात् कुर्यात्पापक्षयं यतः। तस्माद्दीक्षेति सा प्रोक्ता सर्वतन्त्रस्य सम्मता"। अथ दीक्षामाहात्म्यम् रुद्रयामले पूर्वखण्डे तृतीयपटले "देवि! दीक्षाविहीनस्य न सिद्धिर्न च सद्गतिः। तस्मात् सर्वं प्रयत्नेन गुरुणा दीक्षितो भवेत्। अदीक्षितोऽपि मरणे रौरवं नरकं व्रजेत्। तस्माद्दीक्षां प्रयत्नेन सदा कुर्याच्च तान्त्रिकीम्" पञ्चदशपटले "अदीक्षिता ये कुर्वन्ति अपपूजादिकाः क्रियाः। न भवन्ति प्रिये! तेषां शिलायामप्तबीजवत्" कल्पलतटीकाधृतकुलार्णवतन्त्रे "रसेन्द्रेण यथा विद्धमयः सुवर्णतां व्रजेत्। दीक्षाविद्धस्तथैवात्मा शिवत्वं लभते प्रिये! दीक्षाग्निदग्धकर्मांशो पाशादिच्छिन्नबन्धनः। गतसङ्गः कर्मबन्धो निर्दोष शिवो भवेत्। गतं शूद्रस्य शूद्रत्वं विप्रस्यापि च विप्रता। दीक्षासंस्कारसंभिन्ने जातिभेदो न विद्यते। शिवलिङ्गे शिलाबुद्धिं कुर्वन् यत् पापमाप्नुयात्। दीक्षितस्यापि पूर्वत्वं स्मरन् तत् पापमाप्नुयात्। दार्वश्मलौहस्फटिकजातिलिङ्गं प्रतिष्ठितम्। यथोच्यते तथा शुद्धाः सर्वे वर्णाश्च दीक्षिताः। येन पूजितमात्रेण चात्मशुद्धभुवनान्तकम्। पूजितं तेन सर्वं स्याद्दीक्षितेन न संशयः। नादीक्षितस्य कार्यं स्यात्तपोभिर्नियमव्रतैः। न तीर्थगमनेनापि न च शारीरयत्नयैः"। पञ्चमखण्डे षष्ठोल्लासेऽपि "सर्वांसर्पिः शरीरस्थं न करोत्यात्मपोषणम्। स्वकर्म चरितं दत्तं पुनस्तामेव पोषयेत्। एवं सर्वशरीरस्थं सर्पिर्वत् परमेश्वरी। विना चोपासनाद्देवि! न ददाति फलं स्वयम्"। शारदातिलकोल्लासे प्रथमपटले "न च दीक्षा-

परं स्नानं न च दीक्षापरं तपः। न च दीक्षापरं ज्ञानं तस्माद्दीक्षा गरीयसी"

तत्र देशकालादि तन्त्रसारे निर्णीतं यथा

"ढये सिंहे च कन्यायां धनुर्मीनास्थतस्तके। चन्द्रतारातुकूले च कुर्याद्दीक्षाप्रवर्त्तनम्। स्थिरलग्नं विष्णुमन्त्रे शिवमन्त्रे चरः शुभः। द्विःस्वभावगतं लग्नं शक्तिमन्त्रे प्रशस्यते। त्रिषडायगताः पापाः शुभाः केन्द्रा त्रिकोणगाः। दीक्षायान्तु शुभाः सर्वे रन्ध्रस्थाः सर्वनाशकाः"। शुक्लपक्षे भवेद्दीक्षा कृष्णेऽप्या पञ्चमादिनात्"। निषिद्धमासेऽपि तत्तद्विशेषो मुनिभिरुदितः रत्नावल्याम् "षष्ठी भाद्रपदे मासि तथा कृष्णा चतुर्दशी। कार्त्तिके नवमी शुक्ला मार्गे शुक्ल तृतीयिका। पौषे च नवमी शुक्ला माघे शुक्लचतुर्थिका। फाल्गुने नवमी शुक्ला चैत्रे कामचतुर्दशी"। त्रयोदशीति केचित्। "वैशाखे साऽक्षया चैव ज्यैष्ठे दशहरा तिथिः। आषाढे नवमी शुक्ला श्रावणे कृष्णपञ्चमी। एतानि देवपर्वाणि तीर्थकोटिफलं लभेत्। अत्र दीक्षा प्रकर्त्तव्या न मासस्य परीक्षयेत्। न वारं न च नक्षत्रं न तिथ्यादिकदूषणम्। न योगकरणञ्चैव शङ्करेण च भाषितम्"। अन्यत्र। "चैत्रे त्रयोदशी शुक्ला वैशाखैकादशी सिता। ज्यैष्ठे चतुर्दशी कृष्णा आषाढे नागपञ्चमी। श्रावणैकादशी भाद्रे रोहिणीसंयुताष्टमी। आश्विने च महापुण्या महाष्टम्यर्द्धभीष्टदा। कार्त्तिके नवमी शुक्ला मार्गशीर्षे तथा सिता। षष्ठी चतुर्दशी पौषे माघेऽप्येकादशी सिता। फाल्गुने च सिता षष्ठी चेति कालविनिर्णयः"। योगिनीतन्त्रे "अयने विषुवे चैव षड्शे चन्द्रसूर्ययोः। रविसंक्रान्तिदिवसे युगाद्यायां सुरेश्वरि!। मन्वन्तरासु सर्वासु महापूजादिने तथा। चतुर्दी पञ्चमी चैव चतुर्दश्यष्टमी तथा। तिथयः शुभदाः प्रोक्ताः" इत्यादिवचनात् चतुर्दश्यष्टमीति शक्तिविषयम् चतुर्थीति गणेशविषयम् तत्तत्कल्पोक्तत्वात् "निन्दितेष्वपि कालेषु दीक्षोक्ता षड्शे शुभा। सूर्यषड्शकालस्य समानो नास्ति भूतले। विशेषतो महादेवि! दीक्षायां षड्शर्क्षगे। तत्र यद्यत्कृतं सर्वमनन्तफलदं भवेत्। रविसंक्रमणे चैव सूर्यस्य षड्शे तथा। तत्र जन्मादिकं किञ्चिन्न विचार्यं कदाचन। रविसंक्रमणे चैव नान्यदत्रोचितं भवेत्। न वारतिथिमासादियोधनं सूर्यपर्वणि"। एवं चन्द्रषड्शेऽपि तथा च रुद्रयामले "न कुर्याच्छाक्तिकीं दीक्षामुत्तरे विभावसौ। न कुर्याद्दक्षिणे तान्तु यदि चन्द्रमसो बलः"। एतच्च गोपालश्रीविद्येतरविषयम्। "अन्येषु पुण्ययोगेषु षड्शे चन्द्रसूर्ययोरिति" गौतमीयात्। सूर्यषड्शकाले तु नान्यदत्रोचितं भवेत्" इति योगिनीहृदयाच्च। वस्तुतस्तु "श्रीपराकालीक्रमादि गोपालादीनां च यो मनुः। सूर्यक्षोपपदे लब्धे कृष्णां शीघ्रफलप्रदः" उक्तवचनानुरोधात् पूर्ववचने शक्तिमन्त्रपदं श्रीविद्याद्यतिरिक्तशक्तिमन्त्रपरमिति सामयाचार्याः। "अमावास्या सोमवारे भौमवारे चतुर्थिका। सप्तमी रविवारे च सूर्यषड्शतैः समा। शिष्यानाहूय गुरुणा कृपया दीयते यदि। तदा जन्मादिकं किञ्चिन्न विचार्यं कदाचन। तथा "सर्वे वारा यदा सर्वे नक्षत्राणि च राशयः। यस्मिन्नहनि सन्तुष्टो गुरुः सर्वे शुभावहाः"। योगिनीतन्त्रे "षड्शे च महातीर्थे नास्ति कालस्य निर्णयः"। अथ वक्ष्यामि दीक्षायाः स्थानं तन्त्रानुसारतः। गोशालायां गुरोर्गेहे देवागारे च कानने। पुण्यक्षेत्रे तपोद्याने नदीतीरे च मन्त्रवित्। धात्रीबिल्वसमीपे च पर्वतायतनेषु च। गङ्गायास्तु तटे वापि कोटिकोटिगुणं भवेत्"। दीक्षायां निषिद्धदेशमाह "गयायां भास्करक्षेत्रे विरजे चन्द्रपर्वते। चण्डाले च मतङ्गे च तथा कन्याश्रमेषु च। न स्त्रीद्वीपात्ततो दीक्षां तीर्थेष्वेतेषु पार्वति!"। वाराहीतन्त्रे "शुक्रोऽस्तो यदि वा वृद्धो गुर्वादिस्थो भवेद्यदि। मेषवृश्चिकसिंहेषु तदा दोषो न विद्यते"। महाविद्यासु सर्वासु कालादिविचारो नास्ति तदुक्तं रुद्रयामलतन्त्रे "कालादिशोधनं नास्ति न चाभिचारादि दूषणम्"। पुरश्चर्यार्णवे च "विवाहदीक्षां निरवर्त्तयत् गुरुः" "विवाहदीक्षातिलकं चकार" रघुः नियमे "एतावान्यावतैव दीक्षा विप्रो वने वसेत्" मनुः।

**दीक्षागुरु** पुं० दीक्षायां गुररूपदेष्टा। मन्त्राद्युपदेष्टरि।

**दीक्षान्त** पुं० दीक्षायाः प्रधानयागस्य अन्तः अन्तोपलक्षितः तत्समाप्तो यागभेदः। अवभृथस्नानरूपे यागभेदे अमरः।

**दीक्षापति** पुं० ६त०। दीक्षापालके सोमे। "दीक्षां मे दीक्षापतिर्मन्यतामनु" यजु०५।६। "दीक्षायाः पतिः पालकः सोमः" वेददी०। दीक्षापालादयोऽत्र।

**दीक्षायूप** पुं०न० दीक्षाङ्गं यूपः। दीक्षाङ्गयूपादिसारयागे काष्ठमये पदार्थभेदे "रथवत्तदीक्षायूपेन" कात्०

दीक्षित त्रि०दीक्ष–कर्त्तरि क्त दीक्षा जाताऽस्य तारं०इतच् वा। १सोमादियागाङ्गव्रतभेदधारिणि २सँजाततन्त्रोक्त दीक्षे च दीक्षाशब्दे उदा०। "वर्षाणां ब्राह्मणस्यापि विप्रेषु दीक्षितो द्विजः" भा०अनु०६१८श्लो० "अवाच्यो दीक्षितो नाम्ना यज्ञीयानपि यो भवेत्। भोभवत्पूर्वकन्तेनमभिभाषेत धर्मवित्" "नाक्रामेत् कामतश्छायां बन्धुषो दीक्षितस्य च" मनुः। ३काम्बिजनगरस्थविप्रभेदे तत्कथा "आसीत् काम्बिजनगरे सोमयाजिकुलोद्भवः। दीक्षितो यज्ञदत्ताख्यो यज्ञविद्याविशारदः। वेदवेदाङ्ग वेदार्थवेदोक्ताचारचतुरः। राजमान्यो बहुधनो वदान्यः कीर्तिभाजनम्। अग्निशुश्रूषणरतो वेदाध्ययनतत्परः" काशीख० १३अ०। स दीक्षितः अयनं यज्ञाः गौरा० ङीष्। दीक्षितायनी तत्पत्न्यां स्त्री, "भर्त्रापतिव्रतां सम्यक् पत्नीं प्रोवाच तामथ। दीक्षितायनि! कुत्रासि क ते गुणनिधिः सुतः। अथ तिष्ठतु किन्नेन क सा मम सुखोर्मिका। अकृतोद्वर्तनकाले या त्वया मेऽङ्कुलिता कृता। नवरत्नमयीं शीघ्रं तामानीय प्रयच्छ मे। इति श्रुत्वाथ तद्वाक्यं भीता सा दीक्षितायनी" काशीख० १३अ० यज्ञमात्रे ४संजातदीक्षे च। "संयामाध्वरदीक्षितो नरपतिः पत्नी मदीयव्रता" वेणीसं० "दीक्षितो न ददाति" श्रुतिः।

दीक्षितृ त्रि०दीक्ष–शीलार्थे तृच् वाधित्वा इत्व। दीक्षाशीले

दीति स्त्री दीप–क्तिन् वेदे पक्षोपः। दीप्तौ "सुदीतिरश्वादिस्त्रेभ्यः" ता०ब्रा०१८।११ "सुदीतिः सुदीप्तिरसि" भा०।

दीदि पु० दीप वा० दि–प्रत्ये०। द्योतमाने। "अग्निना पिबतं मधु दीदाग्नी शुचिव्रता" ऋ० १।१५।१० दीदाग्नी द्योतमानाग्नियुक्तौ" भा०

दीदिवि पु० दिव–क्विन् अभ्यासे तस्य दीर्घः वसि वक्षोपः। १स्वर्गे २भद्रे च उज्ज्वल०। ३अग्नौ अग्नौ अमरः। पुनःपुनर्भृशं वा दीव्यति दिव–बहुलम् इन् न गुणः अभ्यासदीर्घः। ४पुनःपुनर्भृशं वा द्योतने त्रि० "राजन्नमध्वराणां गोपामृतस्य दीदिविम्" ऋ०१।१।८ "दीदिविम् पुनःपुनर्भृशं वा द्योतकम्" भा०

दीधिति स्त्री दीधी–क्तिन् यङादित्वादिट् "वीवर्णयोर्दीधिवेव्योः" पा० इकारलोपश्च। १किरणे "सलिलमये अग्निनि रवेर्दीधितयो मूर्च्छितास्त्रयोनैगम्। जायन्ति दर्पणोदरनिहिता इव मन्दिरस्थान्तः" भ०४० "पुरोष इव दीधितिः" ऋ०१०।१२७।१ "अस्तदीधितिरेव विदर्भजे!" नैष०। "साधःसुधादीधितिमानन्ति" शि०वि० २रघुनाथशिरोमणिकृते चिन्तामणिटीकाभेदे ३अङ्कुशे निघण्टुः।

दीधितिकृत् पु०दीधितिं क–क्विप्। चिन्तामणिटीकाभेदकारके रघुनाथशिरोमणिपण्डिते

दीधितिमत् पु० दीधितयः भूम्ना सन्त्यस्य मतुप्। १सूर्ये "सरसां सुप्तपद्मानां प्रातर्दीधितिमानिव"। "शरद्भानात् दीधितमानिवोच्चैः" कुमा०। २चन्द्रे च।

दीधी देवने दीप्तौ च अदा० जुहो० आत्म० अक० सेट्। दीधीते अदीधिष्ट। दीध्ये दीध्याञ्चक्रे। दीधिता दीधिष्यते दीधितिः। "दीधीवेवीसमः कश्चिद्गुणद्वयोरभाजनम्" सा० द०।

दीन त्रि० दी–क्त तस्य नः। १दुःखिते अमरः। २भीते च। ३शरपुङ्खे न० ४मूषिकायां स्त्री मेदि०। "बद्धासुदेवेनादीनमनादीनवमीरितम्" माघः। "दिनानि दीनोद्धरणोचितस्य" रघुः।

दीनदयालु पु० दीने दयालुः। दुःखिते १दयाले "दीनदयालुतयाऽवनिपालः" नैष०।

दीननाथ ६त०। दुःखितजनभर्त्तरि।

दीनार पु०दी–आरक् हुट् च। १स्वर्णभूमध्ये २सुद्रायां ३सुवर्णकर्षद्वये ४निष्कमाने अमरभरतौ। "दीनारोरोपकैरष्टाविंशत्या परिकीर्त्तितः। सुवर्णसप्ततिसोमागोरोपक उच्यते" विष्णुशुक्रोक्ते सप्तमांशाधिकद्वेसरत्तिकारूपरोपकैरष्टाविंशत्या परिमिते ५द्वात्रिंशद्गुञ्जात्तिकाघटिते रूप्ये च शब्दर०त० रघुः।

दीप दीप्तौ दि०आत्म०अक०सेट्। दीप्यते अदीपि–अदीपिष्ट। दिदीपे दीप्रः। णिच् अदीदिपत्–त अदिदीपत् त। दीप्रिः। दीपनं दीपकः दीप्रः। "दीप्यमानः स्वतेजसा" मनुः। "पुनर्ददीपे भगवद्विनम्रीः" रघुः "देवाङ्गवेत्रदीपिष्ट" "सधूमदीप्राग्निरुचीनि रेजुः" भट्टिः "ततः शकुनयो दीप्राः सृगाव क्रूरमाविशुः" हरिवं०१७१ अ०। "क्षिप्तेषु दीप्रास्त्रधरः कुमारः" भट्टिः "यावत् कर्माणि दीप्यन्ते तावत् संसारवासनाः" कुलार्ण०। उपसर्गपूर्वकस्य तत्तदुपसर्गद्योत्यार्थयुक्ते तदर्थे "आदित्यदादीप्रकृशानुकल्पम्" भट्टिः "यस्य यद्देवतः प्रथममुददीप्यत" ऐते०ब्रा० ३।२४ "क्रुध्यन्ति परिदीप्यन्ति भूमिजस्याधिदैवते" भा० आ० २०२६ श्लो० आर्षः पदव्यत्ययः। "ते शराः खसत्येन प्रदीप्तास्त्रिमायुना" भा० द्रो०१८१ अ०

दीप पु० दीपयति खं परञ्च दीप–णिच्–अच्। स्वपर-

प्रकाशके तैलादिस्नेहयोगेन वर्त्तिकादाहकशिखान्विते प्रदीपे कार्त्तिके तद्दानप्रशंसा पाद्मे उत्तरख० यथा "शृणु दीपस्य माहात्म्यं कार्त्तिके च हरिप्रिय !। यस्य श्रवणमात्रेण दीपदाने मतिर्भवेत्। सूर्य्यग्रहे कुरुक्षेत्रे नर्म्मदायां शशिग्रहे। तुलादानस्य यत् पुण्यं तदूर्ज्जे दीपदानतः। एतेन दीपकं यस्तु तिलतैलेन वा पुनः। ज्वालयेन्मुनिशार्दूल ! अश्वमेधेन तस्य किम्। तेनेष्टं क्रतुभिः सर्वं कृतं तीर्थावगाहनम्। दीपदानं कृतं येन कार्त्तिके केशवाग्रतः। तावद्भजन्ति पापानि देहेऽस्मिन्मुनिसत्तम !। यावत् कार्त्तिकमासे न दीपदानं कृतं भवेत्। तावद्भजन्ति पुण्यानि स्वर्गे मर्त्ये रसातले। यावत्तु ज्वलते दीपः कार्त्तिके केशवाग्रतः। मृतेऽत्रापि पितृभिर्गीता गीता महात्मने !। भविष्यन्ति कुलेऽस्माकं कदाचित्ते सुता भुवि। कार्त्तिके दीपदानैर्वै तोषयिष्यन्ति केशवम्। ऋषि नस्ते भविष्यन्ति कुले सुचरिता शुभैः। दीपदानं कार्त्तिके ये दीप्यन्ति हरितुष्टिदम्। मयायां पितृदानेन कृतं नः प्रीणनं सुतैः। वैशाखि कार्त्तिके दत्तो दीपस्तुष्टि करो हरेः। दीपं दास्यन्ति ये पुत्रास्तुलार्थं चक्रपाणिनः। कार्त्तिके तैर्वनिश्चेष्ट ! नरकाद्वयं मृता वयम्। मन्त्रहीनं क्रियाहीनं शुद्धिहीनं जनार्दन !। व्रतं सम्पूर्णतां यातु कार्त्तिके दीपदानतः। अनेनैव हि मन्त्रेण दीपं सङ्कल्पयेन्मुने !। मधुसूदनतुष्ट्यर्थं कार्त्तिके मुनिसत्तम !"। वामनपुराणे च "दास्यते देवदेवाय दीपधूपानुलेपनम्। ऋषि नः स कुले भूयादेकादश्यां तिथौ नरः। करिष्यत्युपवासन्तु सर्वपातकहानिदम्। इत्थं पितृणां वचनं श्रुत्वा ऋषिसत्तमः। दत्तौ च दीपान् विधिवत् विष्णोरायतने वह्निः। सुगन्धतैलसंपूर्णान् दीपान् सप्ततैलकान्। सर्वपक्ष कृतैलेन अष्टकालसमन्वितैः। दीपप्रदानाच्चरकानन्धतामिस्रसंज्ञकान्। तीर्त्वा स भार्यया ब्रह्मन् ! विष्णुलोकमगात्ततः" वराहपुराणे दीपं स्थापा वैधकर्मकरणे दोष उक्तो यथा

"दीपं स्थापा तु यो देवि ! मम कर्माणि कारयेत्। तस्यापराधाद्वै भूमे ! पापं प्राप्नोति मानवः। तच्छृणुष्व महाभागे ! कथ्यमानं मयानघे !। जायते यष्टिवर्षाणि कुष्ठी गात्रे परिप्लुतः। चाण्डालस्य गृहे तत्र एवमेव न संशयः। एवं भुक्ता तु तत्कर्म मम लोके ततो यदि। मनुष्यत्वं च लभते शुद्धे भारतवर्षके। प्राक्षित्तं प्रवक्ष्यामि दीपस्य स्थापनाद्भुवि। तरन्ति मनुजा येन कष्टं चाण्डालयोनिषु। यस्य कस्यापि मासस्य शुक्लपक्षे च द्वादशी। चतुर्वर्णसमाहारमाकाशशयने स्वपेत्। दीपं दत्त्वापराधाद्वै तरन्ति मनुजा भुवि। शुचिर्भूत्वा यथान्यायं मम कर्मपथे स्थितः। एतत्ते कथितं देवि ! स्थापनात् दीपकस्य तु। संसारशोधनञ्चैव यत् कृत्वा लभते शुभम्"। वर्त्तिस्नेहसमन्वितमग्निशिखा हि दीपः तदङ्गस्नेहादिनियमो यथा वह्निपुराणे "कृतं तैलञ्च दीपार्थे स्नेहान्यानि वर्जयेत्"। दीपभेदास्तद्गुणभेदाश्च कालिका० पु० हृदयं० उक्ता यथा "शुक्लरक्तसमायुक्तं दीपं शृणुष्व भैरव !। दीपेन लोकान् जयति दीपस्तेजोमयः कृतः। चतुर्वर्गप्रदोदीपस्तस्मादीपैर्यजेत् शिवे" इत्युपक्रम्य "एतद्दीपः प्रथमस्तिलतैलोद्भवस्ततः। सार्षपः फलनिर्यासजातो वा राजिकोद्भवः। दधिजश्चाक्षुजश्चैव प्रदीपाः सप्त कीर्त्तिताः। पद्मरत्नभवा दर्भा गर्भस्रवभवाश्च वा। शणजा वादरी वापि फलकोशोद्भवाश्च वा। वर्त्तिका दीपकार्य्येषु सदा पञ्चविधाः स्मृताः। तैजसं दारवं लौहं मार्त्तिकं नारिकेलजम्। रत्नभवोद्भवं वापि दीपपात्रं प्रशस्यते। दीपवृक्षाश्च कर्त्तव्या तैजसाद्यैश्च भैरव !। दत्त्वेषु दीपोदातव्यो न तु भूमौ कदाचन। सर्वंसहा वसुमती सहते न त्विदं द्वयम्। अकार्य्यपादघातञ्च दीपतापं तथैव च। तस्माद् यथा न पृथिवी तापं नाप्नोति वै तथा। दीपं दद्यान्महादेव्यै अन्येभ्योऽपि च भैरव !। कुर्वन्तं पृथिवीतापं यो दीप सत्कृजेश्वरः। स तावत्तापं नरकमाप्नोत्येव शतं समाः। सुवृत्तवर्त्तिसंस्नेहपात्रेऽभग्ने सुदर्शने। सूक्ष्मवे वस्त्रकोटौ तु दीपं दद्यात् प्रयत्नतः। लभ्यते यस्य तापस्तु दीपस्य चतुरङ्गुलात्। न स दीप इति ख्यातो लोपवह्निस्तु स स्मृतः। नेत्राह्लादकरः स्निग्धैर्दूरतापविवर्जितः। सुशिखः सुन्दरश्चित्रो निर्धूमो नातिवुस्वकः। दक्षिणावर्त्तवर्तिस्तु प्रदीपः श्रीविवर्द्धने। दीपवृक्षस्थिते पात्रे गुडस्नेहप्रपूरिते। दक्षिणावर्तवर्त्त्या तु चारुदीप्तः प्रदीपकः। उत्तमः प्रोच्यते पुत्र ! सर्वसिद्धिप्रदायकः। वस्त्रेण वर्जितो दीपो मध्यमः परिकीर्त्तितः। विहीनः पात्रतैलाभ्यामधमः परिकीर्त्तितः। शाणं वा वादरं वास्त्रं जीर्णं मलिनमेव वा। उपयुञ्जन्तु नो दद्यात् वर्तिकार्थन्तु साधकः। उपादद्यान्नूतनमेव सततं श्रीविवर्द्धने। कोद्रवं रोमजं वस्त्रं

वर्तिकार्थं न चादद्येत्। न मिश्रीकृत्य दद्यात्तु दीपं स्नेहान् हतादिकान्। कृत्वा मिश्रीकृतं स्नेहं तामिस्रं नरकं व्रजेत्। वसामज्जास्थिनिर्यासैः स्नेहैः प्राण्यङ्गसम्भवैः। प्रदीपं नैव कुर्य्यात्तु कृत्वा पङ्क्तिं विनाशयेत्। अस्थिपात्रेऽथ वा गर्त्ते दुर्गन्धाद्युपवासिनि। नैव दीपः प्रदातव्यो विबुधैः श्रोत्रियद्विजे। नैव निर्वापयेद्दीपं कदाचिदपि यत्नतः। सततं लक्षणोपेतं देवार्थमुपकल्पितम्। न क्षरेज्जलतो दीपं तथा लोभादिना नरः। दीपक्षयो भवेदस्य कामो निर्वापको भवेत्। उद्दीप्तदीपप्रतिमः कालकाङ्क्षसमुद्भवः। विस्फोटोद्गमेवाच दीपालाभे निवेदयेत्। उल्मुकं नैव दीपार्थे कदाचिदपि चोत्सृजेत्। प्रसङ्गार्थन्तु तं दद्यादुपचाराद्धविः कृतः। एवं वां कथितो दीपो धूपञ्च ब्रह्मणुतं सुतौ!"। आद्ये वस्त्रवर्तियुक्तदीपनिषेधो यथा "दीपं वर्जयेत् वस्त्रवर्त्तिप्रत्यक्षं तैलमेव च"। योगिनी॰त॰ २य भागे ५पटलः।

पुरश्चर्य्यायां दीपनिर्वापणे दोषो यथा। "दीपनिर्वापणात् पुंसः कृत्याङ्गच्छेदनात् स्त्रियः। अचिरेणैव कालेन वंशनाशो भवेद्ध्रुवम्" ति॰त॰। देवदत्तदीपस्तु निर्वापणम् विधानपारिजाते उक्तं यथा "स्वयं निर्वापितं दीपमालिङ्गन्ति सुरारयः। तस्मान्निर्वापयेद्दीपं देवानां प्रीणनाय वै"। कार्त्तिकस्नानचतुर्दश्यां नरकनिवृत्तये दीपदानं यथा "नरकाय प्रदातव्यो दीपः संपूज्य देवताः" तिथितत्त्वधृतविष्णुपुराणम्।

"स्नाने धूपे तथा दीपे नैवेद्ये भूषणे तथा। घण्टानादं प्रकुर्वीत तथा नीराजनेऽपि च। विधानपारिजातोक्तः दीपदाने घण्टानादोविधेयः। शिवालये दीपोद्दीपनमाहात्म्यं काशीख॰ १२अध्याये दृश्या दिङ्मात्रमत्रोच्यते "स दीपवासनायोगात् बहून् दीपान् प्रदीप्य वै। अलकायाः पतिर्भूदूरत्नदीपशिखाचयैः"। दीपवर्त्तिश्च कर्पूरगर्भिणी कार्य्या "वर्त्त्यो कर्पूर गर्भिण्या सर्पिषातिलजेन वा। आरोप्य दर्शवेद्दीपानुच्चैः सौरमथाग्निनः" शारदाति॰। तन्त्रसारे "कर्पूरादियुता वर्त्तिः सा च कार्पास। निर्मिता। सप्राह्वता सुसंक्लृप्तो दीपः स्याच्चतुरङ्गुलः" कार्त्तवीर्य्यप्रियार्थदीपविशेषस्तु कार्त्तवीर्यदीपशब्दे १६८४ पृ॰उक्तः। दीपदानफलादिकम् भा॰अनु॰६८अ॰उक्तं यथा

"दीपदाने प्रवक्ष्यामि फलयोगमनुत्तमम्। यथा येन यदा चैव प्रेया याऽयाच ते। ज्योतिस्तेजः प्रकाशं याऽयुर्ङ्गच्छापि वर्ण्यते। प्रदानं तेजसां तस्यात्तेजो वर्द्धयते नृणाम्। अन्धतमस्तमिस्रञ्च दक्षिणायनमेव च। उत्तरायणमेतस्माज्ज्योतिर्दानं प्रशस्यते। यस्मादुर्ङ्गमेतत्तु तमसश्चैव भेषजम्। तस्मादुर्ङ्गतेर्दाता भवेदुर्ङ्गेति निश्चयः। देवास्तेजस्विनो यस्मात् प्रभावन्तः प्रकाशकाः। तामसा राक्षसाश्चैव तस्माद्दीपः प्रदीयते। आलोकदानाच्चक्षुष्मान् प्रभायुक्तो भवेन्नरः। तान् दृष्ट्वा नोपक्षिपेत न क्षरेत्तोयमात्मवेत्। दीपक्षयो भवेदस्य तत्तेजोगतिरक्षयः। दीपप्रदः स्वर्गलोके दीपमालेव राजते। कपिला प्रथमः कल्पो द्वितीयश्चौषधीरसैः। वसामेदोऽस्थिनिर्यासैर्न कार्यः पुष्टिमिच्छता। गिरिप्रपाते गङ्गने चैत्यस्थाने चतुष्पथे। दीपदाता भवेच्चित्रं य इच्छेद्भूतिमात्मनः। कृत्वोद्योतो विशुद्धात्मा प्रकाशत्वञ्च गच्छति। ज्योतिषां खेव सालोक्यं दीपदाता नरः सदा" दीपस्य शुभाशुभलक्षणम् ह॰सं॰ ८३अ॰ उक्तं यथा

"वामावर्त्तो मलिनकिरणः सस्फुलिङ्गोऽल्पमूर्त्तिः क्षिप्रं नाशं व्रजति विमलस्नेहवर्त्त्यन्वितोऽपि। दीपः पापं क्षपयति फलं शब्दवान् वेपनश्च व्याकीर्णार्चिर्विशलभमरुद्यश्च नाशं प्रयाति। दीपः संहृतमूर्त्तिरायततनुर्निर्वेपनो दीप्तिमान् निःशब्दोरुचिरः प्रदक्षिणगतिर्दैर्घ्यं क्षेमद्युतिः। लक्ष्मीं क्षिप्रमभिव्यनक्ति रुचिरं यद्योद्यतं दीयते शेषं लक्षणमस्मिलक्षणसमं योज्यं यथायुक्तितः"

"प्रवर्तितो दीप इव प्रदीपात्" निर्वीजदीपाः कृष्णसा कृतत्विषः" रघुः। दीपयत्यर्थात् वा। २प्रकाशके यथा चित्रदीपादयः पदवाक्यम्।

**दीपक** पु॰क्लि॰दीपयति स्वं परञ्चार्थं दीपि-ण्वुल्। स्वपरप्रकाशके स्त्रियां टाप् अतइत्त्वम् दीपिका। षट्कर्मदीपिका ज्योतिषदीपिका २प्रदीपे पु॰३अलङ्कारभेदे अलङ्कारशब्दे १६६६पृ॰दृश्यम्। ४यमान्यां रत्नमाला ५ज्योत्स्नासके दृश्ये यद्धरत्ना॰ अनयोरग्निदीपकत्वात् तथात्वम् ६कङ्कुभे न॰। ७खगपक्षिणि(राज)(सिकरा) प्रसिद्धे खगे पुंस्त्री ह्रस्वच॰टाप्। ८मालाङ्गभेदे "तुरगैकशफाय सुनरेन्द्रमयाय। इह दीपकमेहि चतुर्मनसञ्चेहि" तद्ध्वजम्। ९रागभेदे पु॰ स च हनूमन्मते द्वितीयोरागः स्वर्णेत्वाङ्गितः षड्जस्वराश्रयः शीघ्रतौ मध्याह्ने गेयः। क्षुद्रोदीपःकीप्। स्वार्थे-क ह्रस्वः। दीपिका क्षुद्रदीपे "स शंवरारेर्वपिदीपिका इव" नैष॰।

**दीपकलिका** स्त्री दीपस्य कलिकेव। १दीपशिखायां शूलपाणिधृते २व्याख्यवल्क्यसंहिताटीकाभेदे च।

**दीपकिट्ट** न० ६त०। कज्जले शब्दार्थकल्पतरुः।

**दीपकूपी** स्त्री दीपस्य कूपीव। दीपवर्त्तिकायाम् दीपदशायाम् शब्दमा०।

**दीपखोरी** स्त्री खोर-गत्याघाते घिञ्-अच् गौरा० ङीष्। ६त०। दीपवर्त्तिकायां (शब्दते) शब्दमाला।

**दीपध्वज** पु० दीपस्य ध्वज इव। कज्जले जटाध०।

**दीपन** त्रि० दीप्यति वह्निम् दीप-णिच्-ल्यु। १तगरमूले रत्नमा० २कुङ्कुमे त्रिका०। ३मयूरशिखावृक्षे ४शालिहोत्रोक्ते च पु० शब्दच० ५कासमर्दे ६पलाण्डौ च पु० राजनि०। ७दीपकमात्रे त्रि०। भावे ल्युट्। ८प्रकाशने न० ९प्राङ्मन्त्रसंस्कारभेदे च "मन्त्राणां दश कथ्यन्ते संस्काराः सिद्धिदायिनः। जननं जीवनं पश्चात्ताडनं बोधनं तथा। अथाभिषेको विमलीकरणाप्यायने तथा। तर्पणं दीपनं गुप्तिर्दशैता मन्त्रसंस्क्रियाः। "तारमायारमायोगो मनोर्दीपनमुच्यते" शारदातिः। दीप्यतेऽनया दीपि-करणे ल्युट् ङीष्। दीपनी १०मेषिकायां ११पाठायां १२यवान्यान्तु स्त्री राजनि०। १३दीपनसाधने त्रि० स्त्रियां ङीष्। "त्रिफला कर्कपित्तघ्नो मेहकुष्ठविनाशिनी। चक्षुष्या दीपनी" "निहन्यादुदीपनं गुल्मपीनसाग्न्यसृतामपि"। "कटुकोदीपनः पाचनो रोचनः शोधनः" इति च सुश्रु०।

**दीपनीय** पु० दीपनाय जठरानलोद्दीपनाय हितः छ। १यवान्यां राजनि० औषधवर्गभेदे "पिप्पली पिप्पलीमूलं चव्यचित्रकनागरम्। दीपनीयः स्मृतो वर्गः कफानिलगदापहः" चक्रपाणिदत्तः। दीप-णिच-अनीयर्। २ज्वालनीये त्रि०।

**दीपपादप** पु० दीपस्य पादप इव आश्रयत्वात्। (पिलसुज) दीपाधारे शब्दार्थकल्प० दीपवृक्षादयोऽप्यत्र।

**दीपपुष्प** पु० दीपः तत्कलिकेव पुष्पमस्य। चम्पके राजनि०।

**दीपभाजन** न० ६त०। दीपपात्रे तज्ज्वालनतैलाधारे पात्रे "वामनार्चिरिव दीपभाजनम्" रघुः।

**दीपमाला** स्त्री दीपानां माला। श्रीघोभूते प्रदीपसंघे "उद्दुद्धां च जगद्गेहीं पूजयेद्दीपमालया" तिथितः।

**दीपवत्** त्रि० दीप+अस्त्यर्थे मतुप् मस्य वः। १दीपयुक्ते गृहादौ स्त्रियां ङीप् ङीवनः २कामरूपीपीठस्थे नदीभेदे "आम्रवती कथिता या तु नदी मत्स्यध्वजा सिता। तस्याः पूर्वे समाख्याता नदी दीपवती सता। एषा च हिमवज्जाता छिन्दन्ती दीपवत्तमः। तेन देवमनुष्येषु नदी दीपवती कृता। दीपवत्याः पूर्वतस्तु शङ्काटोनाम पर्वतः" कालिका०पु० ८२अ०

**दीपशत्रु** पु० ६त०। कीटभेदे (जोनाकीपोका) शारस्करनि०

**दीपशिखा** पु०६त०। १प्रदीपज्वालायाम् उपचारात् तज्जाते २कज्जले च शब्दार्थचन्द्रिका।

**दीपशृङ्खला** स्त्री दीपानां शृङ्खलेव। दीपावल्यां हारा०

**दीपान्वित** त्रि० ३त०। १दीपयुक्ते गृहादौ श्मशानचत्वरादिषु देवदीपयुक्तायां सख्यादिनस्य गौणकार्त्तिकस्य २अमावास्यायाम् स्त्री तत्कर्त्तव्यादि यथा भविष्यपुराणे "येयं दीपान्विता राजन्। ख्याता पञ्चदशी भुवि। तस्यां दद्यान्न चेद्दत्तं पितृणां वै महात्मने। प्रदोषसमये लक्ष्मीं पूजयित्वा यथाक्रमम्। दीपदानन्तथा कार्य्यं भक्त्या देवगृहेष्वपि। चतुष्पथे श्मशानेषु नदीपर्वतसानुषु। वृक्षमूलेषु गोष्ठेषु चत्वरेषु गृहेषु च। वस्त्रैः पुष्पैः शोभितव्याः क्रयविक्रयभूमयः। दीपमालापरिक्षिप्ते प्रदोषे तदनन्तरम्। ब्राह्मणान् भोजयित्वादौ विभज्य च बुभुक्षितान्। अनङ्गतेन भोक्तव्यं नवपक्वोपशोभिना। स्निग्धैर्मधुरैर्विदग्धैश्च बान्धवैर्भृत्यकैः सह" तिथित०।

निर्णयसिन्धौ तत्र विशेष उक्तो यथा कालादर्शे "प्रत्यूष अभ्रयुगदर्शे स्नताभ्यङ्गादिमङ्गलः। भक्त्या प्रपूजयेद्देवीमलक्ष्मीविनिवृत्तये" अस्य व्याख्याने आदिशब्दात्पञ्चपल्लवगुदकस्नानादेरुपसंग्रहः तदुक्तं पद्मपुराणे "स्नातस्त्रिते रवाविन्दुर्यदि स्नातिगतो भवेत्। पञ्चपल्लवगुदकस्नायी स्नताभ्यङ्गविधिर्नरः। नीराजितो महालक्ष्मीमर्चयेन्न श्रियमश्नुते। अभ्रयुगदर्श इति दर्शशब्दः प्रत्यूषे स्नातियुक्ततिथिपरः तदुक्तं ब्राह्मे "अर्के शुक्लद्वितीयायां तिथिषु स्नातिकर्त्तने। मानवो मङ्गलस्नायी नैव लक्ष्म्या वियुज्यते"। तत्रैव "दृष्टे भूते च दर्शे च कार्त्तिकप्रथमे दिने। यदा स्नातो तदाभ्यङ्गस्नानं कुर्याद्विशोदये"। कश्यपसंहितायां तु दीपावलिदर्शं प्रकृत्य "इन्दुक्षयेऽपि संक्रान्तौ रवौ याते दिनक्षये। तत्राभ्यङ्गो न दोषाय प्रातः पापापनुत्तये" इति। स्नातियोगं विनाप्यभ्यङ्ग उक्तः। मात्स्ये "दीपैर्नीराजनादत्र सैषा दीपावली स्मृता"। अत्र विशेषो हेमाद्रौ भविष्ये "दिवा तत्र न भोक्तव्यमृते बालातुराध्वनात्। प्रदोषसमये

लक्ष्मीं पूजयित्वा ततः क्रमात् । दीपदानञ्च दातव्याः शक्त्या देवगृहेषु च" तत्रैवाभ्युदयमभिधाय "एवं प्रभातसमये त्वमावास्यां नराधिप ! । कृत्वा तु पार्वणश्राद्धं दधिक्षीरहृतादिभिः । दीपान् दत्त्वा प्रदोषे तु लक्ष्मीं पूजय यथाविधि । खलङ्कृतेन भोक्तव्यं सितवस्त्रोपशोभिना" । अयं प्रदोषव्यापी ग्राह्यः "तुलासंस्थे सहस्रांशौ प्रदोषे भूतदर्शयोः । उल्काहस्ता नराः कुर्युः पितॄणां मार्गदर्शनम्" इति ज्योतिषोक्तेः "दिनद्वये तस्य सत्त्वे परः "दग्धैकरजनीयोगे दर्शः स्यात्तु परेऽहनि । तदा विहाय पूर्वेद्युः परेऽह्नि सुखरात्रिका" इति तिथितत्त्वे ज्योतिर्वचनात् । दिवोदासीये तु प्रदोषस्य कर्मकालत्वात् "अर्द्धरात्रे भवत्येव लक्ष्मीरात्रवितं गृहान् । अतः खलङ्कृता स्त्रिग्धा दीपैर्जांपज्जनोत्सवाः । सुधाधवलिताः कार्याः पुष्पमालोपशोभिताः"इति ब्राह्मोक्तेश्च । प्रदोषार्द्धरात्रव्यापिनी ग्राह्या, एकैकव्याप्तौ परैव । प्रदोषस्य सुखत्वादर्धरात्रेऽनुष्ठेयाभावाच्च । यत्तु "अपराह्णे प्रकर्त्तव्यं श्राद्धं पित्रपरायणैः । प्रदोषसमये राजन् ! कर्त्तव्या दीपमालिका"इति ब्रह्मः स सम्पूर्णतिथावेव प्राप्तेरनुवादो न विधिः । तत्तत्कर्मकालव्याप्तेर्बलवत्त्वात् सम्पूर्णतिथौ प्राप्त्या खण्डतिथावप्राप्त्या विध्यनुवादविरोधाच्चेत्युक्तम् । अत्रैव दर्शेऽपररात्रेऽलक्ष्मीनिःसारणमुक्तं भविष्ये "एवं गते निशीथे तु जने निद्रार्द्रलोचने । तावद्गरुनारीभिः सूर्पडिण्डिमवादनैः । निष्काश्यते बहुशाभिरलक्ष्मीः खण्डहाकृत्यात्" । दीपावली (देओयाली) इति ख्याता तत्रार्थे

दीपीय त्रि॰ दीप+छपूपा॰ हितार्थे पक्षे छ । दीपहिते पक्षे यत् । दीप्य तत्रार्थे त्रि॰ ।

दीपोत्सव पु॰ दीपैरुत्सवः । १दीपहेतुके उत्सवे उपचारात् २दीपान्वितामावास्यायाञ्च भविष्यउ॰ ।

दीप्त त्रि॰ दीप–क्त । १प्रकाशान्विते २सन्तप्तज्वलिते च मेदि॰ । "समिद्धरश्मा दीप्ता देहे सङ्गा मतेश्वरा" भट्टिः । ३स्वर्णे ४अग्निकृति च न॰राजनि॰ । ५निम्बूके पु॰ ६सिंहे पुंस्त्री॰ राजनि॰ स्त्रियां जातित्वात् ङीष् । ७ज्योतिष्मत्यां (मालती) स्त्रीरत्नमाला टाबन्तश्छन्दसि स्त्री टाप् । "शुण्ठी पादमिता कर्षमिता दीप्यायमान्योःक्रमात्" वैद्यकम् । १०नासारोगभेदे पु॰ "नासा प्रदीप्तेव च यस्य जन्तोर्व्याधिस्तु तं दीप्तसदाहरन्ति"सुश्रुतः नासारोगभेदोक्तौ । "दीप्ते रोगे पैत्तिकं संविधानं कुर्यात् सर्वं स्याद् यच्ची-तलञ्च" सुश्रुतः स्वार्थे क । दीप्तक स्वर्णे न॰ राजनि॰ ।

दीप्तकीर्त्ति त्रि॰ दीप्ता कीर्त्तिर्यस्य । १प्रकाशमानयशस्के २कार्त्तिकेये पु॰ । "अग्नेर्यथैव स्कन्दस्य दीप्तकीर्त्तिरनामयः" भा॰व॰ २३१अ॰ कार्त्तिकनामोक्तौ । कर्म॰ । ३दीप्ते यशसि स्त्री ।

दीप्तकेतु पु॰ १ऋषभेदे । "ऋतधेतुर्ऋतुकेतुर्दीप्तकेतुर्निरामयः" भा॰शा॰ १अ॰ नामान्तरोक्तौ । २दनुसावर्णिमनुपुत्रभेदे । "नवमो दनुसावर्णिर्मनुर्वरूथसम्भवः । ऋतधेतुर्दीप्तकेतुरित्याद्याश्चत्वारः सुता नृप !" । भाग॰८।१३।९ ३दीप्तः केतुरस्य । ३दीप्तध्वजके त्रि॰ कर्म॰ । ४दीप्ते ध्वजे पुंन॰

दीप्तजिह्व स्त्री दीप्ता जिह्वा यस्याः । उल्कासुख्यां मृगाख्यां हारा॰तस्यां रात्रौ जिह्वातोऽग्नेः सतः स्फुरणात्तथात्वम् ।

दीप्तपिङ्गल पुंस्त्री दीप्तं स्वर्णमिव पिङ्गलः जटाजूटः । स्वर्णपिङ्गलजटायुक्तत्वात् सिंहे राजनि॰स्त्रियां जातित्वात् ङीष् ।

दीप्तमूर्त्ति त्रि॰ दीप्ता मूर्त्तिरस्य । १प्रकाशान्वितमूर्त्तिके २विष्णौ पु॰। "विश्वमूर्त्तिर्महामूर्त्तिर्दीप्तमूर्त्तिरमूर्त्तिमान्" विष्णुस॰ "ज्ञानमयी स्वेच्छया वा तैजसी मूर्त्तिरस्येति" भा॰ । [रात्रौ स्वयं ज्वलनात्तस्य तथात्वम् ।

दीप्तरस पु॰ दीप्तो रसोऽस्य । किण्वुलके शब्दच॰ तद्रसश्च

दीप्तरोमन् पु॰ विश्वदेवभेदे । "जितात्मा सनिवर्यश्च दीप्तरोमा भयङ्करः" भा॰ अनु॰ ९१अ॰ विश्वदेवोक्तौ ।

दीप्तलोचन पुंस्त्री॰दीप्तं लोचनं यस्य । विड़ाले राजनि॰ । स्त्रियां जातित्वात् ङीष् । [२ज्वलिते २क्रोधे च ।

दीप्तलोह न॰ नित्यकर्म॰ । १कांस्ये राजनि॰ कर्म॰ ।

दीप्तवर्ण त्रि॰ दीप्तं स्वर्णमिव वर्णोऽस्य । १स्वर्णतुल्यवर्णके २कार्त्तिकेये पु॰ "शिशुः शोभः शुचिवर्णो दीप्तवर्णः शुभाननः" भा॰व॰ २३१अ॰ कार्त्तिकनामोक्तौ ।

दीप्तशक्ति त्रि॰ दीप्ता शक्तिरस्य । १प्रकाशमानशक्तिमति दीप्ता शक्तिरस्त्रविशेषोऽस्य । २कार्त्तिकेये पु॰। "दीप्तशक्तिः प्रशान्तात्मा भद्रकृत् कूटमोहनः" भा॰व॰ २३१अ॰ स्कन्दनामोक्तौ ।

दीप्तांशक पु॰ कर्म॰ । नाटकोक्ते सूर्य्यादेरंशभेदे । "तिष्यकौटनगाङ्गैलखचराः सूर्य्यादिदीप्तांशकाः" नील॰ता॰ रा५। चा२। मट। बु७। ह८ शु७।श८। सूर्य्यादेः एतदंशमध्यवर्त्तिनि यद्दानादियोगः, स्निग्धाद्यं-

नराले तु पर्वतशतानः तदूर्द्धं त्रैराशिकेन फलकल्पना।

दीप्तांशु पु० दीप्ता अंशवोऽस्य। १सूर्ये "यथा हि दिवि दीप्तांशुः प्रभासयति तेजसा" भा० आ० १७१ अ०। २अर्कवृक्षे च।

दीप्ताक्ष पुंस्त्री० दीप्ते अक्षिणी यस्य यच्। १विडाले त्रिका० स्त्रियां ङीष्। २दीप्तलोचनान्विते त्रि०। "बाहुः सुन्दरबंशानां दीप्ताक्षाणां पुरूरवाः" भा०उ० ७१अ० स्त्रियां ङीष्। "एतावान्याश्च दीप्ताक्ष्यः करभोरुकटमूर्द्धजाः" भा०व० २७६अ०

दीप्ताग्नि पु० दीप्तोऽग्निरस्य। १अगस्त्ये मुनौ त्रिका० तेन भक्षणीतमात्रेण च वातापिसमुद्रयोर्जठरानलेन जारणात् तस्य तथात्वम्। २दीप्तजठरानलयुक्ते त्रि० "बलिनः खरभक्ष्या ये ये च दीप्ताग्नयो नराः"। "सात्यतोऽस्यतया वापि दीप्ताग्नेस्तरणस्य च" शब्द० कर्म०। ३दीप्ते यज्ञौ पु० "सधूमदीप्ताग्निरुचीनि रेजुः" भट्टिः "शब्दान् दीप्ताग्निसङ्काशान्" भा०व०१७अ०।

दीप्ताङ्ग त्रि०दीप्तमङ्गमस्य। १दीप्तियुक्तदेहके। २मयूरे पुंस्त्री शब्दच० स्त्रियां जातित्वात् ङीष्।

दीप्ति स्त्री दीप-भावे क्तिन्। १विधि प्रभायाम् "एवं दीप्त्या योजनं भाति सन्ध्या" ह०सं०३१अ० २अभिव्यक्तौ च ज्ञानाभिव्यक्तिरूपदीप्तेः कारणानि पात०सू० भाष्ययोरुक्तानि यथा

"योगाङ्गानुष्ठानादशुद्धिक्षये ज्ञानदीप्तराविवेकख्यातेः" सू० "योगाङ्गान्यष्टावभिधायविपक्षभावनानि तेषामनुष्ठानात् पञ्चपर्वणो विपर्ययस्याशुद्धिरूपस्य क्षयोनाशस्ततक्षये सम्यग्ज्ञानस्याभिव्यक्तिर्यथा यथा च साधनान्यनुतिष्ठति तथा तथा तत्त्वमशुद्धिरापद्यते यथा यथा च क्षीयते तथा तथा चाक्षयक्रमानुरोधिनी ज्ञानस्यापि दीप्तिर्विवर्द्धते सा खल्वेषा विशुद्धिः प्रकर्षमनुभवति या विवेकख्यातेरा गुणपुरुषस्वरूपविज्ञानादित्यर्थः। "योगाङ्गानुष्ठानमशुद्धे र्वियोगकारणं यथा परशुः छेद्यस्य, विवेकख्यातेस्तु प्राप्तिकारणं यथा धर्मः सुखस्य, नान्यकारणम्। कति चैतानि कारणानि शास्त्रे भवन्ति नवैवेत्याह तद् यथा "उत्पत्तिस्थित्यभिव्यक्तिविकारप्रत्ययाप्ययः। वियोगान्यत्वकृतयः कारणं नवधा स्मृतम्" इति। तत्रोत्पत्तिकारणं मनोभवति ज्ञानस्य, स्थितिकारणं मनसः पुरुषार्थता शरीरस्येवाहार इति अभिव्यक्तिकारणं यथा रूपस्यालोकस्तथा रूपज्ञानम्। विकारकारणं मनसो विषयान्तरम् यथाग्निः पाक्यस्य, प्रत्ययकारणं धूमज्ञानमग्निज्ञानस्य, प्राप्तिकारणं योगाङ्गानुष्ठानं विवेकख्यातेः वियोगकारणं तदेवाशुद्धेः अन्यत्वकारणं, यथा सुवर्णकारः सुवर्णस्य, एवमेकस्य प्रत्ययस्याविद्यामूढत्वे द्वेषो, दुःखत्वे रागः, सुखत्वे तत्त्वज्ञानं माध्यस्थ्ये, धृतिकारणं शरीरमिन्द्रियाणां, तानि च तस्य महाभूतानि शरीराणां तानि च परस्परं सर्वेषाम्। तैर्यग्योनमानुषदैवतानि च परस्परार्थत्वादित्येवं नव कारणानि तानि च यथासम्भवं यदर्थान्तरेष्वपि योज्यानि" भा० स्त्रीणां यौवने अवयवसाध्ये गुणभेदरूपे १सत्त्वजेऽलङ्कारे च "यौवने सत्त्वजास्तासामष्टाविंशतिसंख्यकाः। अलङ्कारास्तत्र भावहावहेलास्तयोऽङ्गजाः। शोभा कान्तिश्च दीप्तिश्च माधुर्यञ्च प्रगल्भता" इत्युपक्रमे "रूपयौवनलालित्यभोगाढ्यैरङ्गभूषणम्। शोभा शोक्ता, सैव कान्तिर्मन्मथाप्यायिता द्युतिः। कान्तिरेवातिविस्तीर्णा दीप्तिरित्यभिधीयते" सा०द० सञ्चयित्वा उदाजहार यथा "तारुण्यस्य विलासः समधिकलावण्यसम्पदोल्लासः। धरणितलश्लाघ्यं युवजनमनसोवशीकरणम्"। दीपकर्त्तरि संज्ञायां क्तिच्। ४लाक्षायां ५कांस्ये च राजनि०। विश्वदेवभेदे पु० "उष्णीनाभो नभोदश्च विश्वायुर्दीप्तिरेव च" भा०अनु०९१अ० विश्वदेवोक्तौ।

दीप्तिक स्त्री दीप्ता कायति के-क। द्रव्यपाषाणवृक्षे राजनि०।

दीप्तिमत् पु० दीप्तिरस्त्यस्य मतप्। दीप्तियुक्ते "तद्योम्नि शतधा भिन्नं दृश्ये दीप्तिमदुच्यते" रघुः। उदक्स्थो दीप्तिमान् स्थूलो जयी याम्येऽपि यो बली" सू०सि० "दिवश्चरैर्भूरितदीप्तिमद्भिर्नक्षत्रसङ्घैर्गगनप्रदीप्तैः" भा०क०९४अ०। कृष्णस्य सत्यभामायां जाते २पुत्रभेदे पु० कृष्णशब्दे उपक्रमे "अक्षिरे सत्यभामायां भानुर्भीमरथः शुभः। रोहितो दीप्तिमांश्चैव ताम्रजाम्बो जलान्धकः" हरिवं०१६२ अ०।

दीप्तोद न० दीप्तमुदकं यत्र उदकस्योदात्तेः। तीर्थभेदे "गच्छ पुत्र! नदीं पुण्यां बधूसरकृताङ्गयाम्। ततोपस्पृश्य तीर्थेषु पुनर्वपुरवाप्स्यसि। दीप्तोदं नाम तत्तीर्थं यत्र ते प्रपितामहः। स्नपुर्देवयुगे राम! तत्रवानुत्तमं तपः। तत्तथा कृतवान् रामः कौन्तेय! वचनात् पितुः" भा०व० ८९अ० [कालमथौ (आतथौ) राजनि०।

दीप्तोपल पु०दीप्तः सूर्यकरसंसर्गात् उपलितः उपलः। सूर्य-

दीप्त त्रि॰दीप्राय दीपनाय हितम् गवा॰यत् । दीप्तिहिते ।
दीप्य पु॰ दीपाय अग्निदीपनाय हितम् अपूपा॰पक्वे यत् । १यमान्यां २जीरके च राजनि॰। १६६जटायाम् अमरः ४मदीपहितादौ त्रि॰ ।
दीप्यक पु॰दीप्य+संज्ञायां कन् स्वार्थे क वा । १यजमोदायां २यमान्यां ३मयूरशिखायां ४६जटायाञ्च मेदि॰ ।
दीप्र त्रि॰दीप-र । दीप्तिगुणे "क्रिंक्रेषु दीप्रास्तधरः कुमारः" "ब्रातीनव्याबदीप्रास्तः सुतनः परिपूजयन्" भट्टिः
दीर्घ पु॰ दृ-विदारे बा॰घञ् धस्य नेत्वम् । १आयते (लम्बा) परिमाणभेदयुते दीर्घत्वञ्च परिमाणभेदे इति कणादाः महत्त्वावान्तरभेद इति सांख्याः । तथा हि कणाद सू॰ उपस्कारकर्त्तो च परिमाणसत्तां व्यवस्थाय सकारणं महत्त्वादिकं व्यवस्थापितं यथा "अणोर्महतश्चोपलब्ध्यनुपलब्धी नित्ये व्याख्याते" सू॰ । "नित्ये इति विशेषेण विशिष्यं नित्यत्वप्रतिपादकं चतुर्थाध्यायसूत्रमुपलक्षयति उपलब्ध्यनुपलब्धी इति यथायोगमन्वयः "येन यस्याभिसम्बन्धो दूरस्थस्यापि तस्य सः" न्यायात् तदेवं स्थूलो नीलः कलस इति प्रात्यक्षिकप्रत्यये यथा नीलं रूपं विषयस्तथा परिमाणमपि तेन च परिमाणेन परमाणुपर्य्यन्तं परिमाणसङ्गीयते द्रव्यत्वाच्च किन्तु द्रव्यप्रत्यक्षतायां रूपवत् परिमाणमपि कारणं न हि महत्त्वमन्तरेण द्रव्यं प्रत्यक्षं भवति तथाच द्रव्यप्रत्यक्षकारणत्वेन स्वयञ्च प्रत्यक्षतया परिमाणं गुणोऽस्तीति निर्णीयते, यदि हि घटादिस्वरूपं परिमाणं स्यात् तदा महदानयेत्युक्ते घटमात्रमानयेत् तथा च प्रैषसंप्रतिपत्ती विरुद्धयेयाताम्, एवं घटपदात् परिमाणं प्रतीयेत परिमाणपदाद्वा घट इति । मानव्यवहारासाधारणकारणत्वं द्रव्यसाक्षात्कारकारणविषयनिष्ठसामान्यगुणत्वं वा महत्त्वं मानव्यवहारोऽत्र कुलवितस्त्यादिव्यवहारो न तु पलप्रस्थादिव्यवहारः । तच्च परिमाणत्रैविध्यं महत्त्वमणुत्वं दीर्घत्वं ह्रस्वत्वञ्च, तत्र परममहत्त्वपरमदीर्घत्वे विभुचतुष्टयवर्त्तिनी परमाणुत्वपरमह्रस्वत्वे परमाणुवर्त्तिनी अवान्तराणुत्वावान्तरह्रस्वत्वे द्व्यणुकवर्त्तिनी त्रसरेणुमारभ्य महापरिमाणविषयेऽन्त्यं महत्त्वदीर्घत्वे, । एवञ्च सर्वेष्वपि द्रव्येषु परिमाणद्वयवत्सु । विल्वामलकादावणुत्वव्यवहारःसमिदिक्षुदण्डादिषु च ह्रस्वत्वव्यवहारोभाक्तः, भक्तित्वात् प्रकर्षाभावाभावः । आमलके यः प्रकर्षाभावस्तदभावः कुवले, विल्वे यः प्रकर्षाभावस्तदभाव आमलके, स च गौणमुख्योभयभागित्वाद्भक्तिपदवाच्यः दीर्घत्वह्रस्वत्वे नित्ये न वर्त्तेते इत्येके, परिमाणे एव ते न भवत इत्यपरे, महत्तम दीर्घमानीयतामित्यत्र महत्तम वर्त्तुलं त्रिकोणमानीयतामिति निर्धारणबलाद्दर्त्तुलत्वादीनामव्याप्तेरिति तेषामाशयात् । इदानीं परिमाणकारणानि परिसङ्ख्यते "उप॰ह॰, "कारणवद्धत्वाच्च" सू॰ "चकारोमहत्त्वप्रचयौ समुच्चिनोति, परिमाणसत्त्वमुक्तं इति सूत्रशेषः, तत्र कारणवद्धत्वं केवलं त्र्यणुके महत्त्वदीर्घत्वे जनयति महत्त्वप्रचययोस्तत्कारणेऽभावात् तच्च बहुत्वमीश्वरापेक्षाबुद्धिजन्यं तद्बुद्धेरनेकविषयत्वेऽप्यदृष्टविशेषोपस्कृतेनियामकः । एवं परमाणुद्वयगतं द्वित्वं द्व्यणुके परिमाणोत्पादकं वक्ष्यते द्वाभ्यां तन्तुभ्यामपचिताभ्यामारब्धे पटे केवलं महत्त्वमेवासमवायिकारणं बहुत्वप्रचययोस्तत्राभावात् । यत्र च द्वाभ्यां तूलकपिञ्जाभ्यां तूलकपिञ्जारब्धस्तत्र परिमाणोत्कर्षदर्शनात् प्रचयः कारणं बहुत्वस्याभावात् महत्त्वस्य सत्त्वेऽपि परिमाणोत्कर्षं प्रत्यप्रयोजकत्वात् । एवञ्च सति यदि महत्त्वं तत्र कारणं तदा न दोषः तदुक्तम् "द्वाभ्यामेकेन सर्वैर्वा" इति । प्रचयस्य कारणकः संयोगः, स च स्वाभिसमवायिकिञ्चिदवयवासंयुक्तत्वे सति स्वाभिसमवायिकिञ्चिदवयवसंयोगजन्यः, स चावयवसंयोगः स्वावयवप्रतियोगिसंयोगापेक्षः परिमाणजनकः गुणकर्मारम्भे सापेक्ष इति वचनात्" उप॰ह॰ ।
"एतेन दीर्घत्वह्रस्वत्वे व्याख्याते" सू॰ "अणुत्वमहत्त्वप्रक्रियां दीर्घत्वह्रस्वत्वयोरतिदिशति । ह्रस्वत्वदीर्घत्वे अपि न ह्रस्वत्वदीर्घत्ववती । महत्त्वोत्पादकमेव दीर्घत्वोत्पादकमणुत्वोत्पादकमेव ह्रस्वत्वोत्पादकम्, कारणैक्यात् कथं कार्य्यभेद इति चेन्न प्रागभावभेदेन पाकजवदुपपत्तेः यत्रैव महत्त्वं तत्र दीर्घत्वं यत्राणुत्वं तत्र नित्यं ह्रस्वत्वमित्यादितिदेशार्थः" उप॰ह॰ । "अनित्येऽनित्यम्" सू॰ । "इदानीं विनाशक्रमाह एतच्चतुर्विधमपि परिमाणं विनाशिनि द्रव्ये वर्त्तमानमाश्रयनाशादेव नश्यति न तु विरोधिगुणान्तरात् । घटे सत्यपि तत्परिमाणं विनश्यति कथमन्यथा कम्बुग्रीवेऽपि स एवायं घट इति प्रत्यभिज्ञायते चेन्न आश्रयनाशेन तत्र घटनाशावश्यकत्वात् न हि परमाणुद्वयसंयोगनाशाद् द्व्यणुके नष्टे तदाश्रितस्य त्रसरेणोरुत्पादाश्रितस्य चूर्णशर्करादेरविनाश इति युक्तिरभ्युपगमो वा, कथं तर्हि प्रत्यभिज्ञेति चेत्,

सैवेयं दीपकलिकेति प्रत्यभिज्ञानवद्भ्रान्तित्वात्। प्रदीपमहत्त्वमित्याऽपि प्रमैव, ह्रस्वत्वदीर्घत्वे परस्परादविनाभाविनी इति चेन्न तद्विनाशस्याप्यविनाशमन्तरेणानुपपत्तेरुक्तत्वात्। तत् किं पार्थिवपरमाणुरूपादिवत् परमाणुगतमणुत्वं शब्दबुद्ध्यादिवदाकाशादिगतं महत्त्वमपि नश्यतीत्यत आह उप०ह०। "नित्ये नित्यम्" सू० "नित्येष्वाकाशादिषु परमाणुषु च यत् परिमाणं तन्नित्यं विनाशकाभावात्" उप० ह०।

सांख्यसूत्रभाष्ययोस्तु परिमाणद्वैविध्यं व्यवस्थापितं यथा "न परिमाणचातुर्विध्यं द्वाभ्यां तद्योगात्" सू०। "अणु महद्दीर्घं ह्रस्वमिति परिमाणचातुर्विध्यं नास्ति। द्वैविध्यं तु वर्त्तत एव द्वाभ्यां तद्योगात् द्वाभ्यामेवाणुमहत्परिमाणाभ्यां चातुर्विध्यसम्भवादित्यर्थः। महत्परिमाणस्यावान्तरभेदावेव हि ह्रस्वदीर्घौ। अन्यथा क्रवादिरूपैः परिमाणानन्त्यप्रसङ्गादिति। तत्राप्यत्रेऽणुपरिमाणमाकाशस्य कारणं गुणविशेषं वर्जयित्वा भूतेन्द्रियाणां मूलकारणेषु सत्त्वादिगुणेषु मन्तव्यम्। अन्यत्र यथायोग्यं मध्यमादिपरममहत्त्वान्तपरिमाणानि तानि च महत्त्वस्यैवावान्तरभेदा इति"।

दीर्घत्वे कारणन्तु पार्श्वतोयोजितायवबाहुल्यादिकम् स्थूलत्वे तु ऊर्द्धाधःस्थितावयवबाहुल्यादिकमिति भेदः। कालस्य दीर्घत्वप्रयोजकं तदुपाधेर्बहुकालस्थायित्वं तदभिप्रेत्यैव "दीर्घकालनैरन्तर्यादरसेवितात्" योगशास्त्रे "दीर्घयामा त्रियामा" इति काव्ये च प्रयोगः। २व्याकरणपरिभाषिते हिमात्रकालेनोच्चार्यं ( आ ई ऊ ) प्रभृतौ वर्णे च। "ऊकालोऽज्झ्रस्वदीर्घप्लुतः" पा० "एकमात्रो भवेद् ह्रस्वो द्विमात्रो दीर्घ उच्यते। त्रिमात्रस्तु प्लुतो ज्ञेयो व्यञ्जनं चार्द्धमात्रकम्" शिक्षा। "गुहानिबद्धप्रतिशब्ददीर्घम्" रघौ शब्दस्य गुणत्वेऽपि दीर्घत्वं बहुकालस्थायित्वेन भाक्तमेव। एवं "हृदयकुसुमशोभी दारुणोदीर्णशोकः" "सा दीर्घं रोदिति विक्षिपत्यत इतः श्यामा भुजाबल्लरीम्" सा०द० शोकरोदनयोर्दीर्घत्वं बहुकालस्थायित्वाद् भाक्तमेव। ३लताशालहके ४रत्कटे पु० रत्नमाला। ५रामशरे पु०ह्रस्वे पुंस्त्री० राजनि० स्त्रियां जातित्वात् ङीष्। "ह्रस्विकन्यास्तृगपतिवणिजो दीर्घाः" ज्यो०त० उक्तेषु ७सिंहकन्यातुलाद्यधिकराशिषु पु०।

**दीर्घकणा** स्त्री नित्यकर्म०। श्वेतजीरके राजनि०।

**दीर्घकण्टक** पु०दीर्घः कण्टको यस्य। बर्बुरे (बावला) राजनि०

**दीर्घकण्ठ** पुंस्त्री० दीर्घः कण्ठो यस्य। १पक्षे शब्दच० स्त्रियां जातित्वात् ङीष्। २दानवभेदे पु० ३आयतकण्ठकर्माढ्ये त्रि०"विश्वरोदीर्घकण्ठश्च मद्यपो भारताग्रनः" हरिवं०२४०अ० कर्म०। ४आयते कण्ठे पु०। व कप्। दीर्घकण्ठक। वकखगे शब्दच०

**दीर्घकन्द** न०दीर्घः कन्दोऽस्य। १मूलके। दीर्घः कन्दो यस्याः कप् अतइत्त्वम्। दीर्घकन्दिका २मूषल्याम् स्त्री राजनि०।

**दीर्घकन्धर** पुंस्त्री दीर्घः कन्धरोऽस्य। १पक्षिखगे राजनि०। स्त्रियां ङीष्। २दीर्घकन्धरयुक्ते त्रि० कर्म०। ३दीर्घे कन्धरे पु०।

**दीर्घकाण्ड** पु० दीर्घः काण्डोऽस्य। १गुरुडवृक्षे २पातालगरुडीलतायां ३तिलाङ्कायां स्त्री राजनि०।

**दीर्घकील** पु०दीर्घः कीलो यत्र। १अङ्कोटवृक्षे वा कप्। दीर्घकीलक तत्रैवार्थे कर्म०। २दीर्घे कीले पु०न०।

**दीर्घकूर** न०दीर्घं कूरम्। आम्रातेऽोड्रवे शालिभेदे राजान्ने राजनि०

**दीर्घकेश** पुंस्त्री०दीर्घः केश इव लोमास्य। १भल्लूके राजनि० स्त्रियां जातित्वात् ङीष्। २आयतकेशयुते त्रि० स्त्रियां स्वाङ्गत्वात् वा ङीष्। "दीर्घकेशी सुमध्या" हरिवाटकम् ह०सं०१४अ०कूर्मविभागे उक्ते पश्चिमोत्तरदिक्स्थे ३देशभेदे च यथा "एकविंशोचनशूचिकदीर्घपीवास्रकेशाश्च"।

**दीर्घकोशि(षि)का** स्त्री दीर्घः को(शो)शो यस्याः कप् अतइत्त्वम् (ह्रस्वश्च) दुर्गायाम् अमरः। तालव्यमध्योऽपि भरतः।

**दीर्घगति** पु०दीर्घा गतिरस्य। १उष्ट्रे राजनि० तस्य पादविक्षेपस्य बहुदेशान्तरितत्वात्तथात्वम्। [राजनि०।

**दीर्घग्रन्थि** पु० दीर्घो ग्रन्थिः पर्व यस्य। गजपिप्पल्याम्।

**दीर्घग्रीव** पुंस्त्री०दीर्घा ग्रीवा यस्य। १उष्ट्रे राजनि०२नीचक्रौञ्चे हेमच०। स्त्रियां जातित्वात् ङीष्। ३पश्चिमोत्तरदिक्स्थे देशभेदे पु० दीर्घकेशशब्दे दृश्यम्। [भावा।

**दीर्घघाटिक** पुंस्त्री० दीर्घा घाटाऽस्यास्य ठन्। १उष्ट्रे शब्द-

**दीर्घचञ्चु** पु० दीर्घा चञ्चुरस्य। खगभेदे पारस्करनि०।

**दीर्घच्छद** पु०दीर्घाच्छदा यस्य। १दक्षे शब्दार्थचि०। २दीर्घच्छदके त्रि० कर्म०। ३दीर्घे छदे पु०।

**दीर्घजङ्घल** पुंस्त्री० नित्यकर्म०। भङ्गानामत्स्ये (भाङ्गन) शब्दभावा स्त्रियां ङीष्।

**दीर्घजङ्घ** पुंस्त्री० दीर्घा जङ्घा यस्य। १दक्षे जटाध०।

२वके त्रिकाण्ड० स्त्रियां ङीष्। ३दीर्घजङ्घायुक्ते असुरादौ त्रि० कर्म०। ४दीर्घायां जङ्घायाम् स्त्री

**दीर्घजिह्व** पुंस्त्री० दीर्घा जिह्वा यस्य। १सर्पे हेमच०-स्त्रियां ङीष्। २दानवभेदे पु० "गविष्ठश्च वनायुश्च दीर्घजिह्वश्च दानवः" भा०आ० ६५अ० ३राक्षसभेदे स्त्रियां टाप्। "ह्रस्वौ कपर्दौ ललाटार्द्धौ दीर्घजिह्वामजिह्मिकाम्" भा०व० २७६ अ०। ५कुमारानुचरमातृगणभेदे "जाटालिका कामचरी दीर्घजिह्वा वलोत्कटा" भा०श० ४७अ० "दीर्घजिह्वी च छन्दसि" पा०नि०पुंस्यपि ङीष् ह्रस्वकुरे च "अप यान्तं त्वचिष्ट न सखायो दीर्घजिह्वम्" ऋ० ८।१०१।११।

**दीर्घजीविन्** त्रि० दीर्घं बहुकालं जीवति जीव-णिनि। बहुकालजीविनि। "तत्र कालेन जायन्ते मानवा दीर्घजीविनः" मनुः।

**दीर्घतन्तु** पु० दीर्घास्तन्तवः सूतयोऽस्य। प्रभूतसूतिके देवादौ "दीर्घतन्तुर्हविषा यमग्निः" ऋ० १०।६८।७ २दीर्घकालव्यापिसन्तानके। कर्म०। ३दीर्घे तन्तौ पु०।

**दीर्घतपस्** त्रि० दीर्घं बहुकालव्यापकं तपोऽस्य। १बहुकालव्यापकतपस्के २आयुर्वेद्ये नृपभेदे पु० "काश्यस्य काश्यपः पुत्रो राजा दीर्घतपास्तथा। धन्वन्तु दीर्घतपसो धन्वान्तरिः सुतः" हरिवं० २९ अ० आयुर्वेदोक्तौ।

**दीर्घतमस्** पु० उतथ्यदीर्घः पुत्रे गुरुशापात् अन्धतां प्राप्ते ऋषिभेदे तत्कथा उतथ्यशब्दे १०७५पृ० उक्ता दृश्या "स वै दीर्घतमा नाम शापाद्धिरजायत। ह्रस्वसंहतेर्ह्रस्वोत्तेर्ह्रस्वतिरिवौजसा। जात्यन्धो वेदवित् प्राज्ञः पत्नीं लेभे स विद्यया" भा०आ०१०४अ० "ऋषिर्दीर्घतमा नाम जात्यन्धो गुरुशापतः। त्वत्प्रसादाच्च चक्षुर्भ्यां क्षेन सत्येन मोक्षय" हरिवं० २६३अ० "दीर्घतमामातरेयो जजुर्यान् दशमे युगे" ऋ०१।१५८।६

**दीर्घतरु** पु० नित्यकर्म०। तालवृक्षे शब्दार्थकल्प०। २दीर्घे वृक्षमात्रे च। [शब्दमाला।

**दीर्घतिमिष** स्त्री तिम-बा किप्रत्। नित्यकर्म०। कर्कटशाम्

**दीर्घतुण्डा** स्त्री दीर्घं तुण्डमस्याः। १कुकुन्दर्यां भावप्र०। २दीर्घमुखयुक्ते गजादौ पुंस्त्री०। कर्म०। ३दीर्घे तुण्डे न०

**दीर्घतृण** पु० दीर्घं तृणमस्य। १पक्षिवाहे राजनि० कर्म०। २दीर्घे तृणे न०

**दीर्घदण्ड** पु०दीर्घो दण्ड इव काण्डेन। १एरण्डवृक्षे २गोरक्ष्यां स्त्री भावप्र०गौरा०ङीष्। ३गोरक्षीवृक्षे स्त्री टाप् राजनि०।

**दीर्घदर्शिन्** पु० दीर्घं दीर्घात् वा पश्यति दृश-णिनि। १भाविकार्य्यज्ञे २पण्डिते च अमरः। ३सर्पे पु०शब्दरत्ना०। ४भल्लूके राजनि०। ५दूरात् दर्शके त्रि०। "स हि धर्मं पुरस्कृत्य दीर्घदर्शी परं हितम्" भा०स० ४८अ० [येन श्व०। २दूरदर्शनयुक्ते वस्तुभेदे हला०

**दीर्घदृष्टि** पु०दीर्घा दृष्टिरस्य। १पण्डिते। दीर्घा दूरतो दृष्टि-

**दीर्घद्रु** पु०नित्यकर्म०। १तालवृक्षे शब्दच०कर्म०। २दीर्घे द्रुमे

**दीर्घद्रुम** पु० नित्यकर्म०। शालमलिवृक्षे (शिमुल) राजनि०।

**दीर्घनाद** पु० दीर्घो दूरगामित्वात् विस्तीर्णो नादोऽस्य शुभ्रा० न षत्वम्। १शङ्खे राजनि० २बहुकालस्थायिशब्दयुक्ते षष्टादौ त्रि०। कर्म०। ३शब्दे पु०।

**दीर्घनाल** पु० दीर्घं नालं यस्य। १तापसनले हेमच० गुण्डवृक्षे २दीर्घरोहिषके न० राजनि०।

**दीर्घनास** त्रि०दीर्घा नासाऽस्य। १दीर्घनासिकान्विते। "वक्ष्यति दीर्घनासो ददात् गां धवलप्रभाम्" ज्ञातातप्रेण तत्कर्मविपाक उक्तः। कर्म०। २दीर्घायां नासायां स्त्री

**दीर्घनिद्रा** स्त्री नित्यकर्म०। १मरणे कर्म०। २चिरकालव्यापिन्यां निद्रायाञ्च "अकाले बोधितो भ्राता प्रियस्त्रो वधा भवान्। रामेणाभिरतीवासौ दीर्घनिद्रां प्रवेशितः रघुः।

**दीर्घपत्र** पु० दीर्घौ पत्रौ यस्य। १कलिङ्गवृक्षे शब्दच०। २दीर्घपत्रयुक्ते वृक्षमात्रे पुंस्त्री०।

**दीर्घपटोलिका** स्त्री कुत्सिता पटोली कन् कर्म०। (घुँघुच) ख्यातायां लतायाम् राजवल्लभः।

**दीर्घपत्र** पु० दीर्घं पत्रं यस्य। १राजपत्रवृक्षे २विष्णुकन्दे ३हरिद्रे ४कन्दरे ५तालवृक्षे च राजनि० ६कृपीवौ भावप्र० कर्मसंज्ञायां कन् वा। दीर्घपत्रक ७रक्तशुने ८एरण्डे ९हिज्जले १०वेतसे च राजनि०। ११करीरवृक्षे शब्दच०१२शालशमधूके जटाध० १३लशुने हेमच० कापि अत इत्त्वम्। दीर्घपत्रिका १४श्वेतपत्रायां १५शालपर्ण्यां १६एतत्कुमार्याञ्च स्त्री राजनि०।

**दीर्घपत्रा** स्त्री दीर्घं पत्रं यस्याः। १चित्रपर्णिकायां (चाकुलिया) भेदे २क्षुद्रशाल्मलिवृक्षे रक्तमालायां ३गन्धपत्रायां ४केतक्यां ५टोरीवृक्षे च राजनि०। गौरा०ङीष् दीर्घपत्री ६पलाशीलतायां ७मञ्जिष्ठायाञ्च शब्दे स्त्री राजनि०।

**दीर्घपर्णी** स्त्री दीर्घं पर्णं यस्याः गौरा० ङीष्। पृश्निपर्ण्याम् राजनि०।

दीर्घपल्लव पु० दीर्घः पल्लवोऽस्य । १शणवृक्षे राजनि०२आयत पल्लवयुक्ते त्रि० । कर्म० । ३आयते पल्लवे पुंन० ।

दीर्घपाद् पु० दीर्घः पादोऽस्य अन्यलोपः समा० । कडुपचि शब्दर० समासान्तविधेरनित्यत्वात् दीर्घपादोऽप्यत्र हेमच० २दीर्घपादयुक्ते त्रि० । [कर्म० । ३दीर्घे वृक्षे पु० ।

दीर्घपादप पु० नित्यकर्म० । १तालवृक्षे २पूगे च राजनि० ।

दीर्घपृष्ठ पुंस्त्री०दीर्घं पृष्ठमस्य । सर्वे अमरः स्त्रियां ङीष् ।

दीर्घप्रज्ञ पु० १द्वापरयुगीये दृषपर्वासुरावतारे नृपभेदे "दृषपर्वेति विख्यातः श्रीमान् यस्तु महासुरः । दीर्घप्रज्ञ इति ख्यातः पृथिव्यां सोऽभवन्नृपः !" भा०आ०६७अ० "अभितोजसे तपोयाय क्षान्तिक्षमायाशुकाय च । दीर्घप्रज्ञाय शूराय रोचमानाय वा विभो !" भा०उ०३अ० । २दूरदर्शिनि त्रि० "कामरूपिधरः क्रूरः कालकल्पोऽय दृश्यत । तमुवाच ततो राजा दीर्घप्रज्ञो युधिष्ठिरः" भा० व०११ अ० ।

दीर्घफल पु० दीर्घाणि फलान्यस्य । १आरग्वधे (सोनाल) वृक्षायां कन् । दीर्घफलक । अगस्त्यवृक्षे पु० । वा कप् कापि अत इत्त्वम् । दीर्घफलिका १कपिलद्राक्षायां, २लतकायाञ्च स्त्री राजनि० [चमर्यां राजनि० ।

दीर्घबाली स्त्री दीर्घः बालः केशो यस्याः स्वाङ्गत्वात् ङीष् ।

दीर्घबाहु पु० दीर्घौ बाहू यस्य । १शिवानुचरभेदे "तस्याग्रे समवद्यन्त भूतसंघाः सहस्रशः" इत्युपक्रमे "दीर्घरोमा दीर्घभुजो दीर्घबाहुर्निरञ्जनः" हरिवं० २७७ अ० । २धृतराष्ट्रपुत्रभेदे "दीर्घबाहुर्महाबाहुर्व्यूढोरस्कः कनकाङ्गदः" भा०आ० ६७अ० । ३आयतबाहुयुक्ते त्रि० "दीर्घबाहुर्विलोपस्य रघुर्नाम्नाऽभवत् सुतः" हरिवं० १५अ०

दीर्घभुज पु० दीर्घौ भुजौ यस्य । १शिवानुचरभेदे दीर्घबाहु शब्दे दृश्यम् । २दीर्घबाहुयुक्ते त्रि०कर्म० । ३दीर्घे भुजे पु० ।

दीर्घमारुत पुंस्त्री दीर्घो मारुतो वेगवायुरस्य । गजे त्रिका० स्त्रियां जातित्वात् ङीष् ।

दीर्घमूल पु० दीर्घं मूलं यस्य । १भोरटालतायां, २बिल्वभेदे च राजनि० । ३क्षामलशके न० । कर्म०संज्ञायां कन् । ४मूलके राजनि० । ५ग्रन्थिपर्णतायां शालपर्ण्यां च स्त्री टाप् रत्नमाला । ६दुरालभायां स्त्री ङीष् शब्दमाला ।

दीर्घयज्ञ त्रि०दीर्घः बहुकालव्यापको यज्ञो यस्य । १बहुकालव्यापकयज्ञकारिणि । २द्वापरयुगीये अयोध्याधिप राजभेदे पु० "अयोध्यायान्तु धर्मज्ञं दीर्घयज्ञं महाबलम् । अजयत् पाण्डवश्रेष्ठो नातितीव्रेण कर्मणा" भा०२८अ० ।

दीर्घयाय त्रि० या-कर्मणि घ । दीर्घकालेन यातः गन्तव्यः । दीर्घकालेन गन्तव्ये "इयाऽहजत् पथिभिर्दीर्घयाथैः" ऋ०२ १८।२ "दीर्घायाथैर्दीर्घकालेन गन्तव्यैः" भा० ।

दीर्घरद पुंस्त्री० दीर्घौ रदौऽस्य । १शूकरे त्रिका० स्त्रियां ङीष् । २दीर्घदन्तयुते त्रि० कर्म० ३दीर्घौ दन्तौ पु० ।

दीर्घरसन पुंस्त्री० दीर्घा रसना जिह्वास्य । सर्पे शब्दच० स्त्रियां ङीष् । [च० हरिद्रायाम् राजनि० ।

दीर्घराग स्त्री दीर्घो बहुकालस्थायी रागो रञ्जनं यस्याः

दीर्घरात्र न० दीर्घो बहुरात्रयः सन्यत्र अर्थका० अच् । १चिरकाले त्रिका०कर्म० सम्बोधमते च समा० । २दीर्घायां रात्रौ "रात्राह्नाहाः पुंसि" पा०उक्तेः पुंस्त्वम् ।

दीर्घरोमन् पु०दीर्घाणि रोमाण्यस्य । १भल्लूके शब्दार्थकल्प० । २शिवानुचरभेदे दीर्घबाहुशब्दे दृश्यम् । ३धृतराष्ट्रपुत्रभेदे च "प्रमथश्च प्रमाथी च दीर्घरोमा च वीर्यवान्" भा०आ० ११७अ० अत्र सर्वे नाना अदनाः खुरित्युक्तेरदन्तताप्यस्य

दीर्घरोहिषक न०नित्यकर्म० कतृणे तृणशून्यदेशभेदे राजनि०

दीर्घलोचन त्रि० दीर्घमायतं लोचनमस्य । १आयतनेत्रके २शिवानुचरभेदे पु० "एते चान्ये च बहवो दीर्घौष्ठा दीर्घलोचनाः" हरिवं० २७अ० ३धृतराष्ट्रपुत्रभेदे पु० "अनाधृष्यः कुण्डभेदी विराजी दीर्घलोचनः" भा०आ० ६७अ० । धृतराष्ट्रपुत्रोक्तौ । कर्म० । ४आयते नेत्रे न० ।

दीर्घवंश पु० दीर्घो वंश इव । नलदृक्षे राजनि० कर्म० । २सन्तते कुले च ।

दीर्घवक्त्र पुंस्त्री० दीर्घं वक्त्रमस्य । १गजे शब्दमा० स्त्रियां जातित्वात् ङीष् । २आयतमुखयुक्ते त्रि० स्त्रियां स्वाङ्गत्वेऽपि टाप् कर्म० ३आयते मुखे न० ।

दीर्घवच्छिका स्त्री दीर्घवत् दीर्घेण तुल्यं शोकते सिद्धति शोक-क पृषो० ह्रस्वः । कुक्कुरे शब्दार्थकल्प० ।

दीर्घवर्षाभू पुंस्त्री०नित्यकर्म० श्वेतमनर्षवायाम् पारस्करनि०

दीर्घवल्ली स्त्री नित्यकर्म० । १पलाश्यां, २पातालगरुडौषतायां ३भार्गेन्द्रवारुण्याम् राजनि० कर्म० । ४आयतायां लतायाञ्च [स्करनिघण्टुः ।

दीर्घवृन्त पु० नित्यकर्म० । १आलवृक्षे २तालवृक्षे च पार-

दीर्घवृन्त(क) पु० दीर्घं वृन्तमस्य । श्योनाके वृक्षे । वा कप् । तत्रार्थे । २इन्द्रचिर्भटयां स्त्री टाप् अमरः । संज्ञायां कन् अत इत्त्वम् दीर्घवृन्तिका । एलापर्ण्याम् स्त्री रत्नमाला ।

दीर्घशर पु० नित्यकर्म० । वाणवृक्षे राजनि० ।

दीर्घशाख पु० दीर्घा शाखा यस्य । १शालवृक्षे संज्ञायां कन् टाप् च अत इत्वम् । २एलापर्णीम् स्त्री राजनि० । वा कप् अत इत्वम् । दीर्घशाखिका २शीलाम्रयाम् राजनि०।

दीर्घशिम्बिका स्त्री दीर्घा शिम्बी यस्य कप् हुस्वः । छवे (नाकछिम्बी) हृवे राजनि०।

दीर्घशूक पु० दीर्घः शूकोऽयमस्य । शालिभेदे संज्ञायां कन् । दीर्घशूके राजान्ने राजनि० कर्म० २दीर्घे शूके न०

दीर्घश्रवस् पु० दीर्घं श्रवोऽस्य । दीर्घतमसः पुत्रे ऋषिभेदे "औशिजाय वणिजे दीर्घश्रवसे" ऋ० १।११२।११ "उशिक् संज्ञा दीर्घतमसः पत्नी तस्याः पुत्रो दीर्घश्रवा-नाम ऋषिरग्निमाहृतौ जीवनार्थमकरोत् वाणिज्यम्" भा० २दीर्घकर्णयुक्ते त्रि० कर्म०। ३दीर्घे कर्णे न०।

दीर्घसत्र न०कर्म० । १दीर्घकालिके यज्ञभेदे हृव० । २तत्कर्तरि त्रि० । "इविषे दीर्घसत्रस्य सा चेदानीं प्रचेतसः" रघुः । दीर्घाणि सत्राणि कृतानि यत्र । ३तीर्घभेदे "ततो गच्छेत धर्मज्ञ! दीर्घसत्रं यथाक्रमम् । तत्र ब्रह्मादयो देवाः सिद्धाश्च परमर्षयः । दीर्घसत्रसुपासन्ते दीक्षिता नियत-व्रताः । गमनादेव राजेन्द्र ! दीर्घसत्रमरिन्दम ! । राज-सूयाश्वमेधाभ्यां फलं प्राप्नोति भारत !" भा०व०८२अ० । ४यावज्जीवकर्तव्ये अग्निहोत्रे न० "दीर्घसत्रं ह वा त उपयन्ति येऽग्निहोत्रं जुह्वतेऽहर्हे जरामर्यं सत्रं यदग्निहोत्रं जरया वा ह्येवास्मान्मुच्यन्ते मृत्युना वा" शत०ब्रा० १२।४।१।१

दीर्घसत्रिन् पु० दीर्घसत्रमस्यास्ति इनि । १बहुकालिकसत्र-कारके २यावज्जीवकर्तव्याग्निहोत्रिणि च, "यदेतस्य दीर्घ सत्रिणोऽग्निहोत्रं जुह्वतोऽन्तरेष्वाग्नो युक्तं वा विद्या-यात्" शत०ब्रा० १२।४।१।२

दीर्घसुरत पुंस्त्री०दीर्घं बहुकालव्यापकं सुरतमस्य ।१कुक्कुरे त्रिका० स्त्रियां जातित्वात् ङीष् । कर्म० । २रतिकाले न० ।

दीर्घसूत्र पु० कर्म० । शत०ब्रा० भाष्योक्ते प्राणायामभेदे तत्स्वरूपादि तत्रोक्तं यथा

"तस्मिन् सति श्वासप्रश्वासयोर्गतिविच्छेदः प्राणा-यामः" सू० । "सत्यासनजये बाह्यस्य वायोराचमनं श्वासः । कोष्ठस्य वायोर्निःसारणं प्रश्वासः तयोर्गति-विच्छेद उभयाभावः प्राणायामः" भा० । "बाह्या-भ्यन्तरस्तम्भवृत्तिर्देशकालसङ्ख्याभिः परिदृष्टोदीर्घसूक्ष्मः" सू० । "यत्र प्रश्वासपूर्वको गत्यभावः स बाह्यः यत्र श्वास-पूर्वको गत्यभावः स आभ्यन्तरः तृतीयस्तम्भवृत्तिर्यत्रोभ-याभावः सकृत्प्रयत्नाद् भवति यथा तप्ते न्यस्तसर्पिषि जलं सर्वतः सङ्कोचमापद्यते । तथा द्वयोर्युगपद्गत्यभावदृत्ति । तयोऽयंते देशेन परिदृष्टाः, द्वयानस्य विषयो देशदृति । कालेन परिदृष्टाः सङ्ख्यानाभियत्तावधारणेनावच्छिन्ना इत्यर्थः । सङ्ख्याभिः परिदृष्टाः एतावद्भिः श्वासप्रश्वासैः प्रथम उद्घातस्तावद्भिः द्वितीय उद्घातः एवं तृतीयः एवं मृदुरेवं मध्य एवं तीव्र इति सङ्ख्या-परिदृष्टः स खल्वयमेवमभ्यस्तो दीर्घसूक्ष्मः" भा० । "बाह्याभ्यन्तरविषयाक्षेपी चतुर्थः" सू० । "देशकाल-सङ्ख्याभिर्बाह्यविषयः परिदृष्ट आक्षिप्तः तथाभ्यन्तरविषयः परिदृष्ट आक्षिप्तः उभयथा दीर्घसूक्ष्मः ततपूर्वको भूमि-जयात् क्रमेणाभयोर्गत्यभावश्चतुर्थः प्राणायामः । तृती-यस्तु विषयानालोचितो गत्यभावः सकृदारब्धएव देश-कालसङ्ख्याभिः परिदृष्टोदीर्घसूक्ष्मश्चतुर्थस्तु श्वासप्रश्वासयो-र्विषयावधारणात् क्रमेण भूमिजयादुभयाक्षेपपूर्वको गत्यभावश्चतुर्थः प्राणायामः इत्ययं विशेषः" भा० ।

दीर्घसूत्र त्रि०दीर्घेण चिरकालेन सूत्रमीप्सितव्यापारो यस्य । १चिरकालेन प्रारब्धकर्मासुखातरि अमरः । "दीर्घसूत्रस्य यावत्प्राग्निरितिहासमुखेन" भा०आ०१३७अ०दर्शिता तथा "अनागतविधाता च प्रत्युत्पन्नमतिश्च यः । द्वावेव सुखमेधेते दीर्घसूत्रो विनश्यति । अलैव चेदमध्यप्य शृणुष्वाख्यानमुत्तमम् । दीर्घसूत्रमुपाश्रित्य कार्याकार्ये विनिश्चये । नातिगाधे जलाधारे सङ्कटः शकुनाश्रयः । प्रभूतमक्ष्णे कौन्तेय ! बभूवुः सङ्घचारिणः । तत्रैको दीर्घकालज्ञ उत्पन्नप्रतिभोऽपरः । दीर्घसूत्रश्च तत्रैक-श्चयाणां सङ्घचारिणाम् । कदाचित् तं जलाधारं मत्स्यबन्धाः समन्ततः । निःसावयामासुरथो निश्चेष्टु विविधैर्वधैः । प्रक्षीयमाणं तं दृष्ट्वा जलाधारं भयागमे । अब्रवीद्दीर्घसूत्री तु तावुभौ सङ्घटो तदा । इयमापत् सुतत्यक्ता सर्वेषां सन्निलौकसाम् । शीघ्रमन्यत्र गच्छामः पन्था यावन्न दुष्यति । अनागतमनर्थं हि सुनयैर्यः प्रबाधते । स न संशयमाप्नोति रोचतां मो व्रजामहे । दीर्घसूत्रस्तु यत्नाय सोऽब्रवीत् सम्यगुच्यते । न तु कार्या त्वरा तावदिति मे निश्चिता मतिः । अथ सम्प्रतिपन्नैतः प्राग्रवीद्दीर्घदर्शिनम् । प्राप्ते काले न मे किञ्चि-दपायतः परिहास्यते । एवं श्रुत्वा निरुत्साहो दीर्घ-सूत्रो मन्दमतिः । जगाम क्षोभ्यतां तेन गम्भीरं

ष्कलिजलाशयम्। ततः प्रभृततोयत्वं प्रसरोच्च जलाशयम्। बबन्धुर्वविधैर्बीजैर्मत्स्यान् मत्स्योपजीविनः विलोड्यमाने तस्मिंस्तु क्षुततोये जलाशये। अगच्छद्भ्यन्तं तत्र दीर्घसूत्रः सहायरैः। उद्यते क्रियमाणे तु मत्स्यानां तत्र रज्जुभिः। प्रविशन्नन्तरमेतेषां स्थितः सम्प्रतिपत्तिमान्। मत्स्यमेव तदुद्यन्तं मत्वा तं तथैव सः। सर्वानेव च तांस्तत्र ते विदुर्पंचितानिति। ततः प्रचाल्यमाणेषु मत्स्येषु विपुले जले। लब्ध्वा रज्जुं प्रसन्नोऽसौ शीघ्रं सम्प्रतिपत्तिमान्। दीर्घसूत्रस्तु मन्दात्मा हीनबुद्धिरचेतनः। मरणं प्राप्तवान् मूढो यथैवोपहतेन्द्रियः। एवं प्राप्ततमं कालं यो नोद्योगमनुष्यते। स विनश्यति दैवेन दीर्घसूत्रो यथा नरः। आदौ न कुरुते श्रेयः कृत्वोऽप्नोति यः पुमान्। स संशयमवाप्नोति यथा सम्प्रतिपत्तिमान्। अनागतविधाता च प्रत्युत्पन्नमतिश्च यः। द्वावेव सुखमेधेते दीर्घसूत्रो विनश्यति" कर्म०। २दीर्घे सूत्रे न०। ३दीर्घतन्तुके त्रि०"दीर्घसूत्रमकरोत् परिधानम्" माघः।

**दीर्घसूत्रिन्** त्रि० दीर्घं सूत्रं कर्तव्यव्यापारोऽस्यास्य इनि। चिरक्रियावति। "अयुक्तः प्राकृतः स्तब्धः शठो नैकृतिकोऽलसः। विषादी दीर्घसूत्री च कर्त्ता तामस उच्यते" गीता। "यदशक्यं कार्यं तत्सामेनापि यो न सम्पादयति स दीर्घसूत्री" क्षा०त० रघु०।

**दीर्घस्कन्ध** पु०दीर्घः स्कन्धः कायोऽस्य। तालवृक्षे राजनि०

**दीर्घा** स्त्री दीर्घ+टाप्। वृश्चिकपर्णीम् राजनि०।

**दीर्घाध्वग** पु० दीर्घमायतमध्वानं गच्छति गम-ड ह्रस्व०। (धावोडिया) स्थाते पत्रवाहकभेदे।

**दीर्घायु** त्रि०दीर्घमायुः यस्य। चिरकालजीविनि "जीवातुश्च दीर्घायुत्वं मे" यजु०१८।६ "दीर्घायुत्वाय शतं च आयुः" ऋ०८५६।७

**दीर्घायुध** पु० नित्यकर्म०। कुनाखे त्रिका०। दीर्घं दन्तरूपमायुधं यस्य दीर्घात् आयुध्यते आ+युध-क। १शूकरे पुंस्त्री शब्दमा०।

**दीर्घायुष** पु०दीर्घमायुष्यं यस्य। १श्वेतमन्दारवृक्षे २माकन्देवे च राजनि०। ३आयतायुर्युक्तेषु चिरजीविशब्दार्थोक्तेषु त्रि० कर्म०। ४दीर्घे बहुकालव्यापके आयुषि तत्कारणत्वात् मनुना। "ऋषयो दीर्घसन्ध्यत्वात् दीर्घमायुरवाप्नुयुः"।

**दीर्घायुस्** पु०दीर्घमायुरस्य। १दीर्घायुष्यवृक्षे २चिरजीविशब्दार्थोक्तार्थे च। "दीर्घायुस्ते ओषधे! खनिता" यजु० ।२।००

**दीर्घालर्क** पु० दीर्घोऽलर्क इव। श्वेतमन्दारवृक्षे राजनि०।

**दीर्घास्य** त्रि० दीर्घमास्यं यस्य। १आयतमुखे २कङ्किनि च शब्दरत्नावली। ३पश्चिमोत्तरदेशभेदे ह०सं०१४अ०वाक्यं दीर्घशीर्षशब्दे दृश्यम्।

**दीर्घाहन्** पु०दीर्घाण्यहानि यत्र। निदाघसमये ह०"कृन्ब्रह्मादि" पा० सुलोपे प्रत्ययलक्षणेन "रोऽसुपि" पा० रकारनिषेधेन रुत्वाभावसिद्धत्वात् न नान्तलक्षण उपधादीर्घः" वि०कौ०। दीर्घाह्ना दृश्यत "अह्नोऽदन्तात्" पा० नत्वम् कर्म०। "राजाहःसखिभ्यः टच्" पा० टच्। दीर्घाह दीर्घदिवसे पु०।

**दीर्घिका** स्त्री दीर्घैव स्वार्थे क काप्यि अत इत्वम्। १जलाशयभेदे तत्प्रमाणं जलाशयोत्सर्गतत्त्वे यथा मत्स्यसूक्तानलतत्त्वसिद्धः "शतेन धनुभिः पुष्करिणी। त्रिभिः शतैर्दीर्घिका, चतुर्भिर्द्रोणः पञ्चभिस्तडागः। द्रोणाद्दशगुणा वापी" इति संक्षिप्तायामनारदवचनेरत्रापि तथात्वमस्यते। तेन चतुर्दिक्षु पञ्चत्रिंशद्धस्तानूनतायां द्वादशशतहस्तान्तरानूनत्वेन दीर्घिका" "ह्रस्वाङ्गुलैः शतैर्योक्ता दीर्घिकायाम्" रघुः। २जलाशयमात्रे "सर्वदो सरदीर्घिका" अमरः दीर्घिकामिश्च पूर्णाभिस्तया पुष्करिणीभिर्हि" भा०आ० १२८अ०।

**दीर्घीकार** नित्यकर्म०। डङ्करीक्षतामेदे राजनि०। [४भवे च न०

**दीर्ण** त्रि० दृ-क्त। १विदारिते २भीते च भावे क्त। ३विदारे

**दीस** त्रि०दी-क्षये किए तां स्यति सो-क। क्षयनाशके गवादिगणे दीप्रेत्यत्र दीसेति पाठान्तरात् क्षितादौ यत्। दीस्य तद्वितादौ त्रि०।

**दु** गतौ भ्वा०पर०सक०अनिट्। दवति अदौषीत् केचित् वेदयमित्याह्लादेन अदावीदित्यपि। दुदाव वेट् कस्येऽपि लिटि नित्यमेट् दुदुविव। दूनः। "पिच्छेन दूने रचने सितापि" नैष०।

**दु** उपतापे स्वा०प०सक०सेट्। उपतापः पीडनम्। दुनोति-अदावीत् अदौषीत् लिटि नित्यमेट् दुदुविव। दुतः। "भ्रुदुतया दुतया" माघः। "दुनोति निर्गन्धतया स चेतः" कुमा०"स भक्षसाधुकारारीन् दुदाव च क्षतान्तवत्" भट्टिः "भद्रं दूयेत यदङ्गमर्पितम्" रघुः कर्मकर्तरि रूपं दु-खेदे दैवादिकस्य वा रूपम्।

दुःक(दुष्क)र्ण वि० वा नत्वम्। इतराङ्गुलभेदे "दुर्ग्रहश्चोद्दुर्ग्रहश्च दुष्कर्णः कर्ण एव च" भा० आ० ६७अ० तत्पुरुषोक्तौ।

दुःख दुःखकरणे कण्ड्वा० पर०अक० सेट्। दुःखति अदुःखीत् अदुःखीत्। [चदुदुःखत् त।

दुःख तत्क्रियायाम् भ्वा०-चु०उभ०अक० सेट्। दुःखयति ते

दुःख न० दुष्टानि खानि यस्मिन्, दुष्टं खनति खन-ड, दुःख-अच् वा। सांख्यादिमतसिद्धे प्रतिकूलवेदनीये रजःकार्ये चित्तादिधर्मभेदे। न्यायमते २आत्मधर्मभेदे "दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानां उत्तरोत्तरापाये तदनन्तरापायादपवर्गः" गौ० सू० "दुःखाद्विपर्ययतस्तदभावः" गौ० सू० "यज्जातीयस्य यस्यार्थस्य सन्निकर्षात् सुखमात्मोपलब्धवान्। तज्जातीयमेवार्थं पश्चात्पुनरादातुमिच्छति सेयमादातुमिच्छा एकस्मिन्नेकार्थदर्शिनोदर्शनप्रतिसन्धानाद् भवति लिङ्गमात्मनः, नियतविषये हि बुद्धिभेदमात्रे न सम्भवति देहान्तरवदिति। एवमेकस्मिन्नेकार्थदर्शिनोदर्शनप्रतिसन्धानादुदुःखहेतौ द्वेषः। यज्जातीयो यस्यार्थः सुखहेतुः प्रसिद्धस्तज्जातीयमर्थं पश्चादादातुम् प्रयतते, सोऽयम् प्रयत्न एकमनेकार्थदर्शिनं दर्शनप्रतिसन्धातारमन्तरेण न स्यात् नियतविषये बुद्धिभेदमात्रे न सम्भवति देहान्तरवदिति एतेन दुःखहेतौ प्रयत्नो व्याख्यातः। सुखदुःखसम्बन्धाभ्यां तत्साधनमाददानः सुखसम्पद्यते दुःखसम्पद्यते सुखदुःखे वेदयते पूर्वेभ्य एव हेतुभ्यः" भा० "द्वितीयसूत्रभाष्ये च "दोषैः प्रयुक्तः शरीरेण प्रवर्तमानो हिंसास्तेयप्रतिषिद्धपरद्रोहं परद्रव्याभीप्सा नास्तिक्यञ्चेति सेयं वाचायिका प्रवृत्तिरधर्माय" उक्तम्।

कणा०सूत्रे उपस्कारकृत्तौ च सुखदुःखयोः परस्परभेदः, ज्ञानाद्भेदश्च साधितो यथा

"इष्टानिष्टकारणविशेषाद्विरोधाच्च मिथः सुखदुःखयोरत्यन्तरभावः" सू०। "आत्मगुणानां कारणभेदव्युत्पादनं दशमाध्यायार्थः, तत्र "आत्मशरीरेन्द्रियार्थबुद्धिमनःप्रवृत्तिदोषप्रेत्यभावफलदुःखापवर्गास्तु प्रमेयम्" इति गौतमीये प्रमेयविभागसूत्रे सुखज्ञानमिधानात् दुःखाभिन्नमेव सुखमिति भ्रमनिरासार्थं सुखदुःखयोरेव प्रथमं भेदमाह। सुखदुःखयोर्मिथः परस्परमर्थान्तरभावोभेदो वैजात्यमिति यावत् कुत इत्यत आह इष्टानिष्टकारणविशेषात् इष्टम् इच्छाविषयं सुकृचन्दनवनितादि अनिष्टमनिच्छाविषयमहिकण्टकादि, तद्रूपं यत्कारणं तस्य विशेषाद्भेदात् कारणवैजात्याधीनं कार्यवैजात्यमावश्यकं यतः। भेदकान्तरमाह विरोधात् सहानवस्थानलक्षणात् नह्येकस्मिन्नात्मन्येकदा सुखदुःखयोरनुभवः। चकारादनयोः कार्यभेदं भेदकं समुच्चिनोति, तथाहि अनुपहताभिव्यक्तनयनप्रसादादि सुखस्य, दैन्यसन्तापादिन्यादि दुःखस्य कार्यमिति ततोऽप्यनयोर्भेदः। तदुक्तं प्रशस्तपादाचार्यैः "अनुपहतव्यक्तं सुखं समाधाभिधेतविषयसन्निधौ सति इष्टोत्पत्तिबुद्धीन्द्रियार्थसन्निकर्षाद्धर्माद्यपेक्षादात्ममनसोः संयोगाद्दृश्यदनुपहताभिव्यक्तनयनादिप्रसादजनकसत्त्वमुत्पद्यते तत् सुखम्" इति, तदिदमतीतेषु सुकृचन्दनादिषु स्मृतिजम्, अनागतेषु सङ्कल्पजम्, गौतमीये सूत्रे सुखापरिगणनं वैराग्याय, सुखमपि दुःखत्वेन भावयतो वैराग्यं स्यादेतदर्थमिति" उप०ह०। "सम्भवतां सुखदुःखे परस्परं भिन्ने, ज्ञानादभिन्ने स्यातां सुखमनुभवदित्यत आह उप०ह० "संशयनिर्णयान्तराभावश्च ज्ञानान्तरत्वे हेतुः" सू० "सुखदुःखयोर्ज्ञानान्तरत्वे ज्ञानभिन्नत्वे संशयनिर्णयान्तरत्वाभावो हेतुर्लिङ्गमित्यर्थः, तदयमर्थः सुखं दुःखं वा ज्ञानं भवत् संशयरूपं वा स्यात् निर्णयरूपं वा, नाद्यः कोटिद्वयानुल्लेखित्वात्, न द्वितीयः एककोट्यनुल्लेखित्वात्, तथा च यावद्विशेषबाधात् सामान्यबाधः, द्वावेव हि ज्ञानस्य विशेषौ संभवत्वं निर्णयत्वञ्च, तदुभयञ्च, सुखे दुःखे च बाधितमिति ज्ञानत्वमपि तत्र बाधितम्। चकारादनुभवबाधं समुच्चिनोति सुखदुःखयोरहं सुखी दुःखीति मानसोऽनुभवो नत्वहं ज्ञाने सन्देहेच्छा निश्चयोल्लेखाकारोऽनुभव इति। भेदकान्तरमाह उप०ह० "तयोर्निष्पत्तिः प्रत्यक्षैङ्गिकाभ्याम्" सू० "तयोः संशयनिर्णययोर्निष्पत्तिरुत्पत्तिः प्रत्यक्षाङ्गिङ्गाभ्यां सुखं दुःखं वा न प्रत्यक्षसामग्रीजन्यं न वा लिङ्गजन्यम्, चतुर्विधं हि सुखं वैषयिकं यातोरधिकम् आभिमानिकमाध्यात्मिकञ्च, तत्र तयाद्याभिन्द्रियसन्निकर्षप्रभवत्वं नास्त्येव। प्रथमभिन्द्रियार्थसन्निकर्षजन्यत्वात् ज्ञानं स्यादिति चेन्न सामग्र्यभेदेऽपि कार्यस्य सामान्यानाधाद्रूपत्वात् अन्यथा दिक्कालसाधारणेन सकलकार्यैकजन्यापत्तेः, किञ्च इन्द्रियार्थसन्निकर्षोत्पद्यमानं सुखं निर्विकल्पकं वा स्यात् सविकल्पकं

वा, नाद्यः अतीन्द्रियत्वप्रसङ्गात्, न द्वितीयः विशेष्यविशेषणभावेन द्वयोरनाकलनरूपत्वात्। किञ्च सुखदुःखयोरस्मत्संवेद्यत्वात् ज्ञानस्यास्मत्संवेद्यत्वेऽनवस्थाप्रसङ्गात्। लैङ्गिकमिति लिङ्गमेव वैषयिकवत्। इत्थन्तस्तु तयोर्ज्ञानसुखयोर्निष्पत्तिः प्रत्यक्षलैङ्गिकाभ्यां प्रत्यक्षलैङ्गिकज्ञानव्याख्यानाभ्यां व्याख्याता, प्रत्यक्षं ज्ञानमिन्द्रियजम्, लैङ्गिकन्तु लिङ्गजम्, सुखादिकन्तु नैतादृशमिति व्याचक्रुः" उप०ह०। "अभूदित्यपि" सू० "लैङ्गिकज्ञानाद्सुखादेः प्रकारभेदाधीनं भेदमाह इति शब्दः प्रकारे, अपिशब्दो भविष्यतीत्याकारान्तरसमुच्चये, तथाच पर्वते वह्निरभूद्भविष्यति वेति लैङ्गिके ज्ञानेऽतीतादिः प्रकारोऽवगम्यते न चैवं प्रकारं सुखं दुःखं वा उत्पद्यमानमुपलक्षयते" उप०ह०। "सति च कार्यदर्शनात्" सू० "चशब्दः भेदकान्तरं समुच्चिनोति। सति इन्द्रियार्थसन्निकर्षे सति च आत्मप्रयत्नधर्माधर्मादिप्रतिसन्धाने कार्यस्य सुखस्य दुःखस्य वाऽदर्शनात् न प्रत्यक्षमात्रं सुखं दुःखं वा न लैङ्गिकमात्रं वा, तदयमर्थः ज्ञानसामान्यं तावत् सुखदुःखे न भवत इत्युक्तं ज्ञानविशेषः प्रत्यक्षज्ञानं वा भवेदनुमितिरूपं वा इन्द्रियार्थसन्निकर्षे सत्यकन्दनादिप्रत्यक्षे सुखत्वानुभवाभावात्, न द्वितीयः चन्दनाद्यनुमितौ वज्रपाद्यनुमितौ वा सुखत्वदुःखत्वान्यतरानुभवात्। एवं प्रत्यक्षविशेषेऽनुमितिविशेषे वा सुखदुःखयोरनुभवाच्च तद्विशेषोऽपीति" उप०ह०। "एकार्थसमवायिकारणान्तरेषु दृष्टत्वात्" सू०। "भेदकान्तरमाह सुखदुःखयोरिति शेषः, सुखं प्रति एकार्थसमवेतानि सुखाधारत्वकारणानि, धर्मः, सुखे रागः, सुखकारणेच्छा, तदुपादानयत्नः, सुखचन्दनादिज्ञानम्। दुःखं प्रति तु अधर्मः, अनिष्टकण्टकादिज्ञानम्, एषु एकार्थसमवायिषु कारणेषु दृष्टत्वादित्यर्थः, ज्ञानन्तु निर्विकल्पकमेकार्थसमवेतमसाधारणकारणं नापेक्षत एव, सविकल्पकन्त्वपेक्षते विशेषज्ञानं तच्च कारणान्तरं स्वविजातीयं कारणं न भवति, मनःसंयोगस्तु साधारणत्वादविवक्षितः। यद्यपि स्मृतिः संस्कारमात्रसाधारणमपेक्षते तथापि तद्भेदः स्मृटसिद्ध एवेत्यनुभवमादाय भेदोक्तिनात्। लैङ्गिके यद्यपि व्याप्तिस्मृतिपक्षधर्मतादिज्ञानापेक्षा तथाप्यन्तरशब्देनैव तदुपन्यासः। तदयं प्रमाणयोगः सुखदुःखे यदनुभवमिच्छे यत्समानाधिकरणजातीयासाधारणकारणजन्यत्वात् स्मृतिवदात्मविशेषगुणत्वात्" उप० ह०।

सांख्यास्तु तस्य रजःकार्यत्वम् चित्तस्य विषयाद्याश्च धर्मत्वं तत्त्रैविध्यञ्चेररीचक्रुः। तथा हि "दुःखत्वयाभिघातादित्यादि" स० का० तत्त्वकौमुद्यामुक्तं यथा "दुःखानां त्रयं दुःखत्रयं तत् खलु त्रिविधम् आध्यात्मिकमाधिभौतिकमाधिदैविकञ्च तत्राध्यात्मिकं द्विविधं शारीरं मानसञ्च। शारीरं वातपित्तश्लेष्मणां वैषम्यनिमित्तं, मानसं कामक्रोधलोभमोहभयेर्ष्याविषादविषयविशेषादर्शननिबन्धनम्। सर्वं चैतदान्तरोपायसाध्यत्वादाध्यात्मिकं दुःखम्। बाह्योपायसाध्यञ्च दुःखं द्वेधा आधिभौतिकमाधिदैविकञ्च तत्राधिभौतिकं मानुषपशुपक्षिसरीसृपस्थावरनिमित्तम्। आधिदैविकं यक्षराक्षसविनायकग्रहावेशनिबन्धनम्। तदेतत् प्रत्याक्रन्देनीयं दुःखं रजःपरिणामभेदो न शक्यते प्रत्याख्यातुम्। तदनेन दुःखविवेकाभ्यासकरणवर्त्मना चेतनाशक्तेः प्रतिकूलतयाभिसम्बन्धोऽभिघातः इति। एतावता प्रतिकूलवेदनीयत्वं जिघांसाहेतुरुक्तः। यद्यपि न सन्निधत्ते दुःखं तथापि तदभिभवः शक्यः कर्तुमित्युपरिष्टाच्चिदधिष्यते"

"भोग्ये हि सुखदुःखे अनुकूलप्रतिकूलवेदनीये प्रत्यात्ममनुभूयेते तेनात्मोपरक्तानुकूलनीयेन प्रतिकूलनीयेन च केनचिदवश्यम्भावेन भवितव्यं नचानुकूलनीयाः प्रतिकूलनीया वा बुद्ध्यादयस्तेषां सुखदुःखाद्यात्मकत्वेन स्वात्मनि वृत्तिविरोधात्। तस्माद्योऽसुखाद्यात्मा सोऽनुकूलनीयः प्रतिकूलनीयो वा स चात्मेति" सा०प्र०भा०।

सर्वेषां त्रिगुणात्मत्वात् विषयस्यापि सुखदुःखात्मकत्वं त०कौ० व्यवस्थापितं यथा

"अत्र च सुखदुःखमोहाः परस्परविरोधिनः स्वात्मनुरूपाणि सुखदुःखमोहात्मकान्येव निमित्तानि कल्पयन्ति। तेषाञ्च परस्परमभिभाव्याभिभावकभावाद्भानात्मत्वम्। तद्यथा एकैव स्त्री रूपयौवनकुलशीलसम्पन्ना स्वामिनं सुखाकरोति तत्कस्य हेतोः? स्वामिनं प्रति तस्याः सुखरूपसत्त्वात्। सैव स्त्री सपत्नीर्दुःखाकरोति तत्कस्य हेतोः? ताः प्रति तस्या दुःखरूपसत्त्वात्। एवं पुरुषान्तरं तामविन्दत् सैव मोहयति तत्कस्य हेतोः? तं प्रति तस्या मोहरूपसत्त्वात्। अनया च क्रियया सर्वे भावा व्याख्याताः। तत्र यत्सुखहेतुकन्तत्सुखात्मकं सत्त्वं, यत् दुःखहेतुकन्तद्दुःखात्मकं रजः यन्मोहहेतुकन्मोहात्मकं तमः, संसर्गप्रकाशबाधवानां त्वेकत्रान्यान्यानुप्रवेशावविरोधः सदृशत्वात्। तस्मात् सुखदुःखमोहैरेव

विरोधिभिरेकैकगुणवृत्तिभिः सुखप्रकाशलाघवैर्न निमित्तभेदा लक्षीयन्ते एवं दुःखोपष्टम्भकप्रवर्त्तकत्वैरेवं मोहगुरुत्वावरणैरिति सिद्धं त्रैगुण्यमिति"।

दुःखादीनाञ्च सा० प्र० भा० विषयगतत्वं यद्दर्शितं तच्च ज्ञानन्द्रशब्दे ७२२ पृ० दृश्यम् "प्रीत्यप्रीतिविषादात्मकैर्गुणैर्ज्ञानामन्योन्यवैधर्म्यम्" सा० सू०

"गुणानां सत्वादिद्रव्यतयाज्ञानमन्योन्यं सुखदुःखविषादादीः साधर्म्यं कार्येषु तद्दर्शनादित्यर्थः। मोहादिकं च घटादेरपि रूपादिवदेव धर्मोऽन्योन्यकार्योपादानत्वादन्यकार्यान्यमित्युक्तम्। प्रीत्यादिशब्दप्राह्याः पञ्चशिखाचार्यैरुक्ताः यथा "सत्वं नाम प्रसादलाघवाभिष्वङ्गप्रीतिरितिच्छासन्तोषादिरूपानन्तभेदं समासतः सुखात्मकम्। एवं रजोऽपि शोकादिनानाभेदं समासतो दुःखात्मकम्" सा० प्रवचनभाष्यम्।

दुःखस्य चित्तवृत्तिविशेषरूपत्वम् शङ्करभाष्ये उक्तम् तच्च ज्ञानशब्दे ६४२ पृ० दर्शितम्।

कविकल्पलतायाञ्च लोकसिद्धानि कतिचित् दुःखकारणानि दर्शितानि यथा

पारतन्त्र्यं१ व्याधिः२ व्याधिः३ मानच्युतिः४ शत्रुः५ कुभार्य्या६ नैःस्वम्७ कुग्रामवासः८ कुस्त्रीसेवनम्९ बहुकन्याः१० दुष्टत्वं११ परगृहवासः१२ वर्षाप्रवासः१३ भार्य्याहृदयम्१४ कुभृत्यः१५ दुर्जनकरग्रकलधिः१६

वराहपुराणे दुःखतराणि कतिचिदुक्तानि यथा

"दुःखमेव प्रवक्ष्यामि तच्छृणुष्व वसुन्धरे!। उचितेनोपचारेण दुःखं मोक्षविनाशनम्। अहङ्कारकृतो नित्यं नरो मोक्षेण वाहृतः। ये मां नैव प्रपद्यन्ते ततो दुःखतरञ्च किम्। सर्वाशी सर्वविक्रेता नमस्कारविवर्जितः। ये च मां न प्रपद्यन्ते ततो दुःखतरञ्च किम्। सर्वज्ञानि तु सिद्धानि पाकभेदन्तु कारयेत्। अवैष्णवेषु योऽश्नाति ततो दुःखतरञ्च किम्। प्राप्तकाले वैष्णवेषु दत्तं क्षत्रतिथिमागतम्। अदत्वा तस्य यो भुङ्क्ते ततो दुःखतरञ्च किम्। असन्तुष्टस्तु वैषम्ये परदारांश्च मर्दकः। परोपतापी मन्दात्मा ततो दुःखतरञ्च किम्। अल्पायुर्बलं कर्म्म दृष्ट्वा संवर्द्धते नरः। अल्पकालवयं प्राप्तस्ततो दुःखतरञ्च किम्। कृच्छ्रचरणयानानि गच्छमानानि पश्यति। न वै तस्यायतः पुत्रे ततो दुःखतरञ्च किम्। अश्नन्ति पिण्डितं केचित् हतशालिसमन्वितम्। शुष्कान्नं केचिदश्नन्ति ततो दुःखतरञ्च किम्। वरवस्त्रावृतां शय्यां त्यजन्ति भूमितलाः। केचित् तृणेषु शेरते ततो दुःखतरञ्च किम्। विद्वान् सन् गुणवान् सर्वशास्त्रविशारदः। केचिन्मूर्खाश्च दृश्यन्ते ततो दुःखतरञ्च किम्। विद्यमाने धने केचित् तृष्णया भोगवर्जिताः। दरिद्रो जायते दाता ततो दुःखतरञ्च किम्। पुरुषस्य तु ये भार्य्ये तयोरेकां प्रसंसति। एकापि दुर्भगा तत्र ततो दुःखतरञ्च किम्। लब्ध्वा तु मानवीं संज्ञां पञ्चभूतसमन्विताम्। मामेव न प्रपद्यन्ते ततो दुःखतरञ्च किम्। लब्ध्वा ब्राह्मण्यभावन्तु त्रयो वर्णाः सुमध्यमे!। पापकर्म्मरता ह्यासंस्ततो दुःखतरञ्च किम्। एतत्ते कथितं भद्रे! दुःखकर्म विनिश्चितम्। सर्वभूतहितार्थाय यत्तत्त्वया परिपृच्छ्यते"। "अवाच्यवादांश्च बहून् वदिष्यन्ति तवार्हिताः। निन्दन्तस्तव सामर्थ्यं ततो दुःखतरञ्च किम्" गीता। "मा जीवन् यः परावज्ञादुःखदग्धोऽपि जीवति" माघः। "सुखं हि दुःखान्यनुभूय शोभते" रघुः। दुःखमनुभवति दुःख+क्यङ् दुःखायते दुःखमनुभवतीत्यर्थः। "दुःखायते जनः सर्वः सएवैकः सुखायते" भट्टिः।

दुःखग्राम पु० दुःखानां ग्रामोऽत्र। संसारे शब्दार्थचि०। ६त०। २दुःखसमुदाये च।

दुःखजात त्रि० जातं दुःखमस्य परनि०। संजातदुःखे "आतिकाजसुखादिभ्यः" इत्यादिना पा०अस्यान्तोदात्तता ६त०। २दुःखसमुदाये न०।

दुःखत्रय न० ६त०। आध्यात्मिकाधिभौतिकाधिदैविकरूपे दुःखत्रिके दुःखशब्दे वा०का० त०कौ०वाक्यं दृश्यम्।

दुःखदिर पु० दुष्टः खदिरः वा खत्वम्। भङ्गासारे खदिरभेदे शब्दार्थचि०। [छेमच०।

दुःखदोह्या स्त्री दुःखेन दोह्या। दुःखेन दोह्यायां गवि।

दुःखशील त्रि० दुःखं शीलयति शील-अण् उप०। दुःखानुभवशीलनकर्त्तरि "कामेकपत्नी व्रतदुःखशीलाम्" कुमा०।

दुःखित त्रि० दुःख+तार० इतच्। संजातदुःखे "दुःखिता यत्र दृश्यन्ते विक्लवाः पापकारिणः" मनुः।

दुःखिन् त्रि० दुःख+सुखा० मत्वर्थे इनि। दुःखान्विते

दुःशकुन न०दुष्टं शकुनं वा रोः यः। अशुभसूचके निमित्तभेदे "वन्ध्याचर्मतुषास्थि सर्पसवसाङ्गारभस्मकीशविट्तैलोन्मत्तखरौषधारिजटिलप्रव्राट्तक्षव्याधिताः सम्मार्ज्यक्षविसृष्टकेशपतित व्यङ्गक्षुधार्त्ता वहक् स्त्रीपुंसं मरटः खगेऽहदहनं मार्जारयुद्धं च तम्। कषायी गृह-

तैक्षणषड्विधयाः कृज्ञाः कुटुम्बे कलिर्व्रणादेः स्खलनं क्षुत्तापसमरं क्षणानि धान्यानि च। कार्पासं वमनञ्च गर्दभरवो दग्धेऽतिरूक्ष गर्भिणी क्षुण्णाङ्गाम्बरदुर्वचोभ्य वधिरोदक्या न दृष्टाः शुभाः। क्षणाम्बरा क्षणविलेपनाङ्गा क्षणसञ्जं मूर्द्धनि धारयन्ती। दृष्टा प्रकोपा यदि क्षणवर्णा नारी नरैक्षद्विपदो भवन्तीति गन्धर्वचित्रतवाक्यम्

दिग्भेदादिभिः शकुनभेदे फलभेदः दृ०सं०८३ अ०उक्तो यथा "अन्यजन्मान्तरकृतं कर्म पुंसां शुभाशुभम्। यत्तस्य शकुनः पाकं निवेदयति गच्छताम्। आसारण्याम्बुभूव्योमद्युनिशोभयचारिणः। कृतयात्रेक्षितोक्तेषु प्राह्याः स्त्रीपुन्नपुंसकाः। पृथग्जात्यनपत्यानादेयं व्यक्तिर्न लक्ष्यते। सामान्यलक्षणोद्देशे श्लोकाद्धिक्षतविमौ। पीनोन्नतविपुलांसाः पृथुग्रीवाः सुवक्षसः। खल्वगम्भीरविक्रान्ताः पुमांसः स्थिरविक्रमाः। तनूरक्तशिरोग्रीवाः सूक्ष्माक्षपदविक्रमाः। प्रसक्तसदृभाषिण्यः स्त्रियोऽतोऽन्यन्नपुंसकम्। आसारण्यप्रचाराद्यं लोकादेवोपलक्षयेत्। वक्ष्यिष्यसरहं वक्ष्मि यात्रामात्रप्रयोजनम्। यथाज्ञानं स्वयं मैत्र्ये पुरे चोद्दिश्य देवताम्। स्वार्थे प्रधानं साम्यं स्याज्ज्ञातिविद्यावयोऽधिकम्। शकुनाग्र्यैश्चदर्कासु फलं दिक्षु तथाविधम्। अङ्गारिदीप्तधूमिन्यस्ताश्च शान्तास्ततोऽपराः। तत्सङ्गमदिशां तुल्यं शुभं सैकाल्यमादिशेत्। परिशेषयोर्दिशोर्भव्यं यथासत्त्वं शुभाशुभम्। शीघ्रमासन्ननिम्नस्थैर्खराङ्गतदूरगैः। स्थानहस्तपघाताच्च तद्दृष्ट्वा यात्फलं पुनः। क्षणतिथ्युडुवाताकैर्दैवदीप्तो यथोत्तरम्। क्रियादीप्तो गतिस्थानभावस्वरविचेष्टितैः। दशधैवं प्रशान्तोऽपि सौम्यस्तत्फलाशनः। मांसासेध्याशनो रौद्रो विमिश्रोऽन्नाशनः स्मृतः। हर्म्यप्रासादमङ्गल्यमनोज्ञस्थानसंस्थिताः। श्वेता मधुरसक्षीरफलपुष्पद्रुमेषु च। स्वकाले गिरितोयस्था बलिनो दुर्निशाचराः। क्लीबस्त्रीपुरुषाद्यैषां बलिनः सूर्यगोत्तरम्। जवजातिबलस्थानहर्षसत्त्वस्वरान्विताः। स्वभूमावनुगोभाश्च तद्गुणाः स्युर्विपर्ययात्। कुक्कुटेभपरिल्लाश्च शिखिभृङ्गलिङ्करोः। बलिनः सिंहनादाश्च कूटपूरी च पूर्वतः। क्रोष्टुकोलूककारीतकाककोकर्क्षपिङ्गलाः। कपोतरुदिताक्रन्दक्रूरशब्दाश्च याम्यतः। गोमायुक्रौञ्चकोमायुहंसोत्क्रोशकपिञ्जलाः। विड्वराहोल्लवादित्यगीतत्रासाश्च वारुणाः। शतपत्रकुरङ्गाखुकृष्णैकशफकोकिलाः। चाष वल्गुकपृषत्प्राहघण्टाशब्दरवा उदक्। न प्राह्योऽरण्यगो याम्यो नारण्यो ग्रामसंस्थितः। दिग्चरो न चरो नक्तञ्चरो दिवा। हस्तरोगान्वितत्रस्ताः कलङ्कान्विताङ्गिणः। आपगान्तरिता मत्ता न प्राह्याः शकुनाः क्वचित्। रोहिताश्वाजवालेयकुरङ्गोष्ट्रमृगाः शुभाः। निष्फलाः शिशिरे श्येना वसन्ते काककोकिलौ। न तु भाद्रपदे प्राह्याः सूकरश्वहकादयः। शरद्यजादगोक्रौञ्चाः श्रावणे हंसचातकौ। व्याघ्रर्क्षवानरद्वीपिसिंहिषाः सर्विलेशयाः। हेमन्ते निष्फला श्येना प्राह्याः सर्वे विमानुषाः। ऐन्द्रानलदिशोर्मध्ये त्रिभागेषु व्यवस्थिताः। कोणाध्यक्षानलाजीवितपोषुक्षाः प्रदक्षिणम्। शिखी भिक्षुर्विरक्षा स्त्री यात्यानलदिगन्तरे। परतश्चापि मातङ्गोपधर्मसमाश्रयाः। नैर्ऋतीशार्क्षीमध्ये प्रमदाक्षतितस्कराः। शौण्डिकः शाकुनी हिंस्रो वायव्यपथिचान्तरे। विप्रघातकगोस्वामिकुक्कुटक्षात्रतः परम्। धनवानीक्षणिकश्च मालाकारः परं ततः। तैष्यवरकर्षश्च वाजिनां रक्षणे रतः। एवं ह्यत्रिंशतो भेदाः पूर्वदिग्भिः समोदिताः। राजा कुमारो नेता च दूतः श्रेष्ठी चरो द्विजः। गजाध्यक्षश्च पूर्वाद्याः क्षत्रियाद्याश्चतुर्दिशम्। गच्छतस्तिष्ठतो वापि दिशि यस्यां व्यवस्थितः। विरौति शकुनो वाच्यस्तद्दिग्जेन समागमः। भिन्नभैरवदीनार्तपरुषाभजर्जराः। स्वरा नेष्टाः शुभाः प्राप्ता हृष्टप्रकृतिपूरिताः। शिवा श्यामा रक्ता कृष्णा पिङ्गला सटङ्गोधिका। सूकरी वरपुष्टा च पुच्छामानश्च वामतः। स्रोमञ्जा भासभषककपिश्रोकर्क्षचिक्कराः। शिखिश्रोकखटपिश्रोकरुरुगन्धेभाश्च दक्षिणाः। स्वेडाश्रोटितपुष्पाट्टगीतशङ्खाम्बुनिःस्वनाः। सद्वर्णाध्ययनाः पुंवत् स्त्रीवदन्या गिरः शुभाः। यामौ मध्यमषड्जौ तु गान्धारर्षभौ शोभनाः। षड्जामध्यमगान्धारा ऋषभश्च स्वरा हिताः। कृतकीर्तनदृष्टेषु भारद्वाजवर्क्षिणः। धन्या नकुलचाषौ च सरटः पापदोऽन्यतः। जाट्टकाट्टिशयक्रोडगोधानां कीर्त्तनं शुभम्। कृतसन्दर्शनं नेष्टं प्रतीपं वानरर्क्षयोः। श्रोत्राः प्रदक्षिणं ग्रस्ता मृगाः सनकुलाखुजाः। चाषः सनकुलो वामो भृगुराट्टापराङ्गतः। शिक्करः कूटपूरी च पिरिल्ली चाग्नि दक्षिणा। ऋषभ्याः सदा ग्रस्ता दंष्ट्रिणः सर्विलेशयाः। श्वेते हयखिते प्राच्यां शवमांसे च दक्षिणे। कन्यकादधिनी पश्चादृग्गोविप्रसाधवः। आलम्बचरणौ नेष्टौ प्राग्यास्यौ शस्त्रघातकौ। पश्चादा सवशस्त्रो च

खलासनहलान्युदक्। कर्मसङ्क्रमयुद्धेषु प्रवेशे नष्टमार्गणे। यानव्यसगता यात्रा विशेषवात्र वक्ष्यते। दिवा प्रस्थानबहुयात्राः कुरङ्गरुरुवानराः। अङ्गव प्रथमे भागे चाषश्चञ्चुचकुण्टाः। पश्चिमे प्रहरीभागे नप्तृकोलकपिञ्जलाः। सर्व एव विपर्यस्ता यात्राः सार्धेषु योषिताम्। रूपसन्दर्शने यात्राः प्रवेशेऽपि प्रयाणवत्। शिवरात्र्यप्रवेशे च नदीनां चावगाहने। वामदक्षिणसौ शकुनौ यौ तु तावत्यन्तगौ। स्त्रियादीप्तौ विनाशाय यातुः परिघसञ्ज्ञितौ। तावेव तु यथाभागं प्रधानस्तचेष्टितौ। शकुनौ शकुनद्वारसञ्ज्ञितावर्थसिद्धये। केचित्तु शकुनद्वारमिच्छन्त्यभयतः स्थितैः। शकुनैरेकजातीयैः शान्तचेष्टाविरावभिः। विसर्जयति यद्दीप्त एकश्च प्रतिषेधति। स विरोधोऽशुभो यातुर्मोघो वा बलवत्तरः। पूर्वं प्रावेशिको भूत्वा पुनः प्रास्थानिको भवेत्। शकुनेन सिद्धिमाचष्टे प्रवेशे तद्विपर्ययः। विसर्ज्यं शकुनः पूर्वं स एव निरुणद्धि चेत्। प्राह यातुररेर्हन्तुं डमरं रोगमेव वा। अपसव्यास्तु शकुना दीप्ता भवनिवेदिनः। आरम्भे शकुनो दीप्तो वर्धमानस्वरद्युतिः। तिथिवाक्यर्क्षस्थानचेष्टादीप्ता यथाक्रमम्। धनसैन्यबलाङ्गेष्टकर्मणां स्युर्भयङ्कराः। जीमूतध्वनिदीप्तेषु भयं भवति मारुतात्। उभयोः सन्ध्ययोर्दीप्ताः शस्त्रोद्भवभयङ्कराः। चितिवृक्षकपालेषु स्वत्युबन्धवधप्रदाः। कण्टकीवाद्यभस्मस्थाः कलहायासदुःखदाः। व्याधिसिद्धिं भयं वापि निःसाराश्चाव्यवस्थिताः। कुर्वन्ति शकुना दीप्ताः शान्ता याच्यफलास्तु ते। ऋद्धिसिद्धिदौ शैवौ निर्दाहारकारिणौ। स्थानाद्व्रजेद्व्रजेद्यातो यंसते त्वन्यथागमम्। कलहः खरदीप्तेषु स्थानदीप्तेषु विग्रहः। उच्चादौ खरं कृत्वा नीचं पश्चाच्च शोषकृत्। एकस्थाने खरदीप्तः सम्प्राप्तादृश्यमघातकृत्। परदेशनरेन्द्राणामत्यहीयनवत्सरात्। सर्वं दुर्भिक्षकर्तारः स्वजातिपिशिताशनाः। सूर्यमूषिकमार्जारपृथुरोमविवर्जिताः। परयोनिषु गच्छन्तो मैथुनं देशनाशनाः। अन्यत्र वैसरोत्पत्तेर्ह्यां स्वाजातिमैथुनात्। वज्रघातभयानि स्युः पादोरुमस्तकान्तिगैः। अपसव्यपिशिताद्याः टैर्वधमोक्षक्षतयशाः। क्रूरोपदोषदुष्टैव प्रधानस्पष्टकैः। चिरकालेन दीप्ताद्याः शमो दिक्षु तदृक्षजम्। सद्रव्यो बलवांश्च स्याद्व्यागमो भवेत्। द्युतिमान् विनतग्रीवो दीप्तो दारुणदक्षजत्। दिक्स्थः शकुनो दीप्तो वामस्थेनानुवासितः। स्त्रियाः संग्रहणं प्राह तद्विगाख्यातयोनितः। शान्तः पशुमदीप्तेन विद्वतो विजयावहः। दिग्दाहागमकारी वा दोषकृत्तद्विपर्यये। वामसव्यस्तो मध्यः प्राह स्वपरयोर्भयम्। मरणं कथयन्त्येते सर्वे समविरावियः। दक्षाग्रमध्यमूलेषु राजाश्वरथिकागमः। दीर्घाङ्गसुषिताग्रेषु नरनौथिधिकागमः। शकटेनोन्नतस्थे च क्षायास्थे क्षतसंयुतः। एकत्रिपञ्चसप्ताहात् पूर्वाह्णान्तरात्तु च। सुरपतिद्युतवरुणयमनिर्ऋतिवरुणपवनेन्दुशङ्कराः। प्राच्यादीनां पतयो दिशः पुमांसोऽङ्गना विदिशः। तरुतालीविदलाम्बरसन्निभशरचर्मपट्टलेखाः स्युः। द्वात्रिंशत्रिभक्ते दिक्चक्रे तेषु कार्याणि। व्यायामश्लिष्टनिकूजितकलहाक्षोभनिमङ्गन्यगोशब्दाः। वर्णाश्च रक्तपीतकलक्ष्णसिताः क्रोष्टुगा शिवाः। चिह्नं ध्वजो दग्धशय श्मशानं दरी जलं पर्वतयज्ञधोषाः। एतेषु संयोगभयानि विन्द्यात् सन्यानि वा स्थानविकल्पितानि। स्त्रीणां विकल्पे दुहृती कुमारी व्यङ्गा विगन्धा लघ नीलवस्त्रा। कृष्णा प्रदीप्ता विधवा च ताश्च संयोगचिन्तापरिवेदिकाः स्युः। पृच्छासु रूक्षकनकातुरभामिनीनां मेषाश्वयानमखगोकुलसंश्रयासु। न्यग्रोधरक्ततरुलोध्रकपीचकाख्याश्चूतद्रुमाः खदिरबिल्वनसार्जुनाश्च"।

अन्यानि शुभाशुभशकुनानि तत्रोक्तानि तत्तच्छब्दे उक्तानि

**दुःशला** स्त्री धृतराष्ट्रकन्यायाम् या रोः प्रः। दुश्शलाप्यत्र "कृष्णजयिलकश्चैव दुःशला च मताधिका" भा० आ० ६७अ०। [दुःखेन श्लिष्यमाणे।

**दुःश्रास** त्रि० दुःखेन श्लिष्यतेऽसौ श्लास—कर्मणि घञ् खञ्।

**दुःश्रासन** त्रि० दुःखेन श्लिष्यतेऽसौ "भाषायां शासियुधि दृशिदृधिस्पृधिभ्यो युच्" पा० भाषायां युचो विधानात् कर्मणि युच्। दुःखेन श्लिष्यमाणे दुर्योधनादिमध्ये २धृतराष्ट्रपुत्रभेदे पु०। "दुर्योधनोयुयुत्सुश्च राजन्! दुःशासनस्तथा" भा०आ० ६७अ०

**दुः(श्री)श्रील** त्रि० दुष्टं श्रीलमस्य वा रोः प्रः। दुष्टशीले "पूर्वमप्यतिदुःश्रीलो न धैर्यं कर्तुमर्हति" भा०स०२०अ०

**दुःश्रोध** त्रि० दुर्+युध—कर्मणि खल्। दुःखेन श्रोधनीये प्रतीकार्ये च त्रि० "तथैव खलु दुःश्रोधान् श्रोधयेत् शारकर्मणा" सुश्रु०। [वा प्रः। दुष्टे सन्धौ

**दुः(दुष्ष)षन्धि** पु० दुष्टः सन्धिः सुप्रामा० षत्वे विसर्गस्य

**दुः(दुष्ष)षसम्** अव्य०दुष्टं सुषमत्र तिष्ठद्गु० अव्ययी० षत्वे

रोवां थः । मङ्गायाम् अमरः ६व० अतत्वम् । असम-ङ्गे त्रिका० ।

दुः(दुस्)सह त्रि० दुःखेन सह्यतेऽसौ सह-खल् वा रोः सः । १दुःखेन सोढव्ये "यो दुःसहासो वनुषा" ऋ० ८।६३।१० "तेषामापततां वेगः करिणां दुःसहोऽभवत्" भा०व०६५ अ० "दुःसहेन हृदये निशाचरी" रघुः "भवत्यनिष्टादपि नाम दुःसहात्" कुमा० । २नागदमन्यां स्त्री राजनि० । [भावे क्त । २दुष्टे खप्ने न०।

दुःष(सु)प्त त्रि० दुर्+स्वप-क्त-वा षत्वम् । १दुष्टस्वप्नयुक्ते

दुःपूति त्रि० दुष्टा पूतिः रोवां थः । दुष्टायां पूतौ ।

दुः(दुष्वि)षेध त्रि० दुर्-सिध-खल् सुषामा० षत्वे रोवां थः । सेद्धुमशक्ये । [दुष्टसक्थियुक्ते ।

दुःसक्थ(क्थि) त्रि० दुष्टं सक्थि यस्य वा अच् समा० ।

दुःसाध(ध्य) त्रि०दुःखेन साध्यतेऽसौ खल् तत्रार्थे यक् वा । साधयितुमशक्ये "अन्योन्यशक्तिदुःसाधा" माघः "किं नाम मम दुःसाध्यं यत्पुत्रा निर्मिते रथे" हरिवं० २६७अ०

दुःसाधिन् त्रि० दुष्टं साधयति साधि-णिनि । १दुष्टसाधके २दौवारिके पु० शब्दमाला ।

दुः(दु)स्त्री स्त्री दुष्टा स्त्री प्रा०स० वा विसर्गलोपः । दुष्टायां स्त्रियां तस्याभावः कर्म वा ष्यञ् । दौस्त्रीण्य तस्याभावे कर्मणि च न० ।

दुः(दु)स्थ त्रि०दुष्टं तिष्ठति स्था-क वा विसर्गलोपः । १दुर्गते २मूर्खे ३दुष्टं स्थिते च मेदि० ४लुब्धे शब्दार्थचि० । "दुःस्थं तिष्ठसि यच्च पथ्यमधुना कर्त्तासि तत् शोधय" अमरुश० ।

दुः(दु)स्पर्श त्रि० दुःखेन स्पृश्यतेऽसौ दुर्+स्पृश-कर्मणि खल् वा विसर्गलोपः । १स्पृष्टुमशक्ये मेदि० । "दुर्स्पर्शो रुक्षिणा वायुः दुस्पर्शः पाणिना शशी" भा०आनु०१३अ० २दुरालभायाम् स्त्री अमरः ३लताकरञ्जे राजनि० ४कपिकच्छ्वाम् ५आकाशवल्ल्यां ६कण्टकार्य्याम् च स्त्री राजनि० । [१कर्मणि खल् । २दुष्टे व्रणे च वाच्यादौ हेमच० ।

दुः(दु)स्फोट पु०दुष्टं स्फोटयति स्फुट-अच् वा विसर्गलोपः ।

दुःस्वप्न पु० दुष्टः स्वप्नः प्रा०स० । अशुभसूचके स्वप्नभेदे स च छान्दोग्यो० "अथ स्वप्ने अपदन्तं पुरुषं पश्यति सर्पन्तं कृष्णं" इत्युक्तः ।

कतिचित् दुःस्वप्नभेदाश्च ब्रह्मवैवर्तेऽन्यत्रश्च उक्ता यथा "सर्वं श्रुतं महाभाग ! दुःस्वप्नं कथय प्रभो ! ।। उवाच तत्र भगवान् ! शृण्वतामिति तद्वचः । श्रीभगवानुवाच स्वप्ने हसति यो हर्षाद्विवाहं यदि पश्यति । नर्त्तनं गीतमिष्टञ्च विपत्तिस्तस्य निश्चितम् । दन्तान् यस्य विशीर्यन्ते विचरन्तञ्च पश्यति । धनहानिर्भवेत्तस्य पीडा चापि शरीरजा । अभ्यक्तस्तु तैलेन यो गच्छेद्दक्षिणां दिशम् । खरोष्ट्रमहिषारूढो मृत्युस्तस्य न संशयः । स्वप्ने चूर्णं अवाप्नुयान्मयोकं करवीरकम् । विपत्तिस्तस्य तैलञ्च लवणं यदि पश्यति । नग्नां क्षपां छिन्नमाल्यां शूद्रस्य विधवां तथा । कपर्दकं तालफलं दृष्ट्वा शोकमवाप्नुयात् । स्वप्ने रुदं ब्राह्मणञ्च ब्राह्मणीं कोपसंयुताम् । विपत्तिश्च भवेत्तस्य लक्ष्मीर्याति सुदारुणम् । वनपुष्पं रक्तवर्णं पलाशञ्च सुपुष्पितम् । कार्पासं रक्तवस्त्रं च दृष्ट्वा दुःखमवाप्नुयात् । गायन्तीञ्च हसन्तीं वा कृष्णाम्बरधरां स्त्रियम् । दृष्ट्वा कृष्णाञ्च विधवां नरो मृत्युमवाप्नुयात् । देवता यत्र नृत्यन्ति गायन्ति च हसन्ति च । आस्फोटयन्ति धावन्ति तत्र देशो विनश्यति । वान्तं मूत्रं पुरीषञ्च रेतं रक्तं सुवर्णकम् । प्रत्यक्षमथ वा स्वप्ने जीवितं दशमासिकम् । कृष्णाम्बरधरां नारीं कृष्णमाल्यानुलेपनाम् । उपगूहति यः स्वप्ने तस्य मृत्युर्भविष्यति । मृतवत्सस्तु सुप्रस्तु मृतस्य वानरस्य वा । यः प्राप्नोत्यस्थिमालां च विपत्तिस्तस्य निश्चितम् । अभ्यक्तस्तु तैलेन कृष्णया मधुनापि वा । तक्रेणैव गुडेनापि पीडा तस्य विनिश्चितम् । पतितं मस्तकेशस्तु निर्माल्याङ्गारमेव च । भस्मचूर्णां चितां दृष्ट्वा लभते मृत्युमेव च । मसीञ्च किञ्चित् कृष्णां वा दृष्ट्वा दुःखं लभेद्ध्रुवम् । पादुकाफलकं रक्तपुष्पमाल्यं भयानकम् । मार्जारं मधुरं सर्पं वा दृष्ट्वा स्वप्ने नरं भवेत् । करटं खरटं काकं भल्लूकं वानरं खरम् । पूयशोणितमलं स्वप्ने केवलं व्याधिकारणम् । भस्मभाण्डं क्षतं शूद्रं वक्षतकुष्ठैश्च रोगिणम् । रक्ताम्बरञ्च जटिलं शूकरं महिषं खरम् । अट्टाहासं महाघोरं मृतजीवं भयङ्करम् । दृष्ट्वा स्वप्ने योनिलिङ्गं विपत्तिं लभते ध्रुवम् । कुबेरञ्च यमं स्वप्ने यमदूतं भयङ्करम् । पाशहस्तं पाशयन्तं दृष्ट्वा मृत्युं लभेन्नरः । ब्राह्मणो ब्राह्मणीं बालां बालको वा मृतः सुता । विदार्यं कुरुते कोपात् दृष्ट्वा दुःखमवाप्नुयात् । कृष्णवस्त्रञ्च तन्माल्यं भस्मशस्त्रास्त्रधारिणम् । स्वप्ने प्राप्तुं विकृताकारं दृष्ट्वा मृत्युं लभेद्ध्रुवम् । नाट्यञ्च नर्त्तनं गीतं गायनं रक्तवाससम् । मद्यकाद्यशनन्दृष्ट्वा दुःखं लभेद्ध्रुवम् ।

प्राणत्यक्तं सतं दृष्ट्वा मृत्युञ्च लभते ध्रुवम्। मृत्यादि-धारणं यो हि तदुभ्रातुर्मरणं भवेत्। छिन्नं भग्नञ्च वापि विकृतं सुप्तकेशिनम्। क्षिप्रं मृत्यञ्च कुर्वन्तं दृष्ट्वा मृत्युं लभेन्नरः। मृतो वापि मृता वापि क्षुण्णा म्लेच्छा भयानका। उपगूहति यं स्वप्ने तस्य मृत्युं विनिश्चितम्। उपगूहति यं स्वप्ने मृक्षिणो दंष्ट्रिणोऽपि वा। बालका मानवाश्चैव तस्य राजकुलाद्भयम्। छिन्नदन्तं पतन्तञ्च गिलाहर्दि तुषं चुरम्। रक्ताङ्गारं भस्महर्दि दृष्ट्वा दुःखमवाप्नुयात्। यदि पतन्तं शैलं वा धूमकेतुं भयानकम्। भग्नं स्खलं तरोर्वापि दृष्ट्वा दुःखमवाप्नुयात्। रथमेहस्तप्तशैलगोहस्तिहरगोऽम्बरात्। भूमौ पतति यत्स्वप्ने विपत्तिस्तस्य निश्चितम्। खड्गैः पतन्ति गर्त्तेषु भस्माङ्गारचितासु च। चारकुखण्डेषु चूर्णेषु मृत्युस्तेषां न संशयः। वस्त्राद्भ्रुह्यति दृष्ट्वा मृत्युञ्च यस्य मस्तकात्। पितुर्नाशो भवेत्तस्य गुरोर्वापि नृपस्य वा। सुरभी यस्य मेढ्राच्च याति लक्षा सवल्लिका। प्रयाति पालतस्तस्य लक्ष्मीरपि वसुन्धरा। पाशेन बद्ध्वा बद्धञ्च यं गृहीत्वा प्रयान्ति च। यमदूताश्च ये स्वप्ने तस्य मृत्युर्विनिश्चितम्। गणको ब्राह्मणो वापि ब्राह्मणी वा गुरुस्तथा। परिक्षिप्तः पतति यं विपत्तिस्तस्य निश्चितम्। विरोधिनश्च काकास्तु कङ्कुरा भल्लुकास्तथा। पतन्त्यागत्य यद्गात्रे तस्य मृत्युर्न संशयः। गृध्रिणा भल्लुका उष्ट्राः शूकरा महिषास्तथा। दृष्टा धावन्ति यं स्वप्ने स रोगी निश्चितं भवेत्"।

अस्य शान्तिस्तत्रोक्ता यथा

"रक्तचन्दनकाष्ठानि घृताक्तानि च यो जुहुयात्। गायत्र्या च सहस्रेण तेन शान्तिर्विधीयते। सहस्रधा जपेद्यो हि भक्त्या मां मधुसूदनम्। निष्पापो हि भवेत् सोऽपि दुःस्वप्नः सुस्वप्नो भवेत्। अच्युतं केशवं विष्णुं हरिं सत्यं जनार्दनम्। हंसं नारायणञ्चैव एतन्नामाष्टकं शुभम्। शुचिः पूर्वमुखः प्राज्ञो दशकृत्वश्च यो जपेत्। निष्पापो हि भवेत् सोऽपि दुःस्वप्नः सुस्वप्नो भवेत्"। स्वापसमयलग्ने दुःस्वप्नसूचकपदयोगभेदः सी०खं० उक्तो यथा

"सन्ध्यायामेऽर्कं तनुगेऽथ वाऽस्मिन् दुःस्वप्नमीक्षेत यथा खेविम्बम्। रक्ताम्बरं वह्निमथापि चन्द्रे दृष्ट्वेवमादि"।

"प्रोक्षते भक्षते वापि पिशाचासुरवायसैः। भूतैः प्रेतैः अभिर्द्धैर्गोमायुखरशूकरैः। खरैः करभैः कीशैः म्लेच्छैरक्षतरैर्ह्रकैः। स्वप्ने च जीवितं त्यक्त्वा वर्धान्ते यमभीक्षते। गन्धपुष्पांशुकैः शोभैः स्नातानुभूषिताम्बरः। यः पश्येत्तु स्वप्नसमये सोऽष्टौ मासाननिन्द्यहो" कालीख०अधिकं कालविवरणे १६६७पृ०दृश्यम्

दुकूल न० दु-ऊलच् कुक् च दुष्टं कूलति कूल-आवरणे क वा पृषो०। १क्षौमाम्बरे २रक्तवस्त्रे ३रक्तपट्टवस्त्रे च मेदि०। "गोपवधूटीदुकूलचौराय" भाषा० "अथ सवल्क दुकूलकुथादिभिः" भट्टिः। "वधूदुकूलं कलहंसलक्ष्मम्" कुमा०।

दुगूल न० दुकूल+पृषो०। दुकूलार्थे पट्टवस्त्रे हेमच०।

दुग्ध न०दुह-क्त। १पयसि क्षीरे स्त्रीजातिस्तननिष्पन्दिद्रव-द्रव्ये। कर्मणि क्त। २क्षतदोहायां धेन्वादौ स्त्री ३प्रपूरिते त्रि०मेदिनी०। भावे क्त। ४दोहने न० क्षीर-वर्गशब्दे २२७७पृ० अस्य विवृतिः। तत्रानुक्तं भावप्रकाशे किं चिदत्राभिधीयते

"रात्रौ चन्द्रगुणाधिक्याद्द्रव्यवाक्याकरणात्तथा। प्राभातिकं तदा प्रायः प्रादोषाद्गुरु शीतलम्। दिवाकरकराघातात् व्यायामानलसेवनात्। प्राभातिकान्तु प्रादोषं लघु वातकफापहम्"। अथ दुग्धसेवने समयादिविशेषे गुणमाह। "क्षीरं हृद्यं रसायनमग्निदीपनकरं पुंस्त्वशुक्रकरे पयो मध्याह्ने तु बलावहं कफहरं पित्तापहं दीपनम्। बाले वृद्धिकरं वये क्षयकरं वृद्धेषु रेतोवहम् रात्रौ पथ्यमनेकदोषशमनं क्षीरं सदा सेव्यते। यदन्नि मेयं निशि केवलं पयो भोज्यं न तेनेह सहौदनादिकम्। भवत्यजीर्णे निशि पीतशर्करा क्षीरान्नपानस्य न श्रेयस्तत्त्यजेत्। विदाहोन्मदपानानि दिवा भुक्त्वा हि यत्नरः। तद्विदाहप्रशान्त्यर्थं रात्रौ क्षीरं सदा पिबेत्। दीप्ताग्नये क्षये पुंसि वातरुद्धे पयःप्रिये। अतं हिततमं पथ्यं सद्यः शुक्रकरं यतः"। अथ महिषस्य दुग्धस्य गुणाः "क्षीरं गव्यमथाजं क्षोष्णं दग्धाऽऽहृतं पिबेत्। लघु हृद्यं ज्वरहरं वातपित्तकफापहम्"। अथ गोजदुग्धगुणाः "गोदुग्धमभवं किं वा आगोदुग्धसमुद्भवम्। तद्भवेच्च त्रिदोषघ्नं रोचनं बलवर्द्धनम्। वह्निवृद्धिकरं हृद्यं सद्यस्तृप्तिकरं लघु। अतीसारेऽग्निमान्द्ये च ज्वरे जीर्णे प्रशस्यते"। अथ निन्दितदुग्धम् "विवर्णं विरसं चास्रं दुर्गन्धं श्रथितं पयः। वर्जयेदल्पसत्त्वयुक्तं वृद्धाद्यहृद्यतः"। अजादिदुग्धगुणादिभेदादिकं तत्तच्छब्दे उक्तम्।

"छेऽप्यविकं पथ्यतमं ह्यतोष्णं क्षीरं त्वजानां ह्यतशीत माहुः। दोहान्मुहूर्तं महिषीपयस्यं गव्यन्तु धारोष्णमिदं प्रशस्तम्। इक्ष्वं दृंहणमग्निवर्द्धनकरं पूर्वाह्णपीतं पयो मध्याह्ने बलदायकं रतिकरं क्षुच्छ्रम विच्छेदनम्। बाल्ये वह्निकरं ततो बलकरं वीर्यप्रदं वार्द्धके रात्रौ क्षीरमनेकदोषशमनं सेव्यं ततः सर्वदा। क्षीरं सद्यो नवोद्धृतयोषितं यदतप्रमेतद्विकृतिं प्रयाति। श्लेष्मान्तु दोषं कुरुते तदुष्णं विशेषमं स्वादुयुतो दशानाम्। जीर्णज्वरे कफे क्षीणे क्षीरं स्वादस्तोपमम्। तदेव तरुणे पीतं विषवद्विनि मातुषम्"। क्षीरकाथगुणः। "चतुर्थभागं सलिलं निधाय यत्काढ् यदावर्त्तितसत्तमं तत्। सर्वामयघ्नं बलपुष्टिकारि वीर्यप्रदं क्षीरमति प्रशस्तम्। गव्यं पूर्वाह्णकाले स्वादपराह्णे तु माहिषम्। क्षीरं सशर्करं पथ्यं वह्नेः सात्म्यञ्च सर्वदा। क्षीरं न भुञ्जीत कदाप्यतप्तं तप्तञ्च नैतत्लवणेन सार्द्धम्। पिष्टान्नसन्धानकमाषसङ्कोशातकीकन्दफलादिकैश्च"। तथा "मत्स्यमांसगुडसङ्गमूलकैः कुष्ठमावहति सेवितं पयः। शाकजाम्बवरसैश्च सेवितं मारयत्यबुधमाशु सर्पवत्। स्निग्धं पीतं गुरु क्षीरं सर्वकालं न सेवयेत्। दीप्ताग्निं कुरुते मन्दं मन्दाग्निं नष्टमेव च। नित्यन्दीप्ताग्निना सेव्यं सुपक्वं माहिषं पयः। पुष्णन्ति धातवः सर्वं बलपुष्टिविवर्द्धनम्। क्षीरं गवाजकादेर्मधुरं क्षीरं नवप्रसूतानाम्। रूक्षञ्च पित्तदाहं करोति रक्तामयं कुरुते। मधुरं त्रिदोषशमनं क्षीरं मध्यप्रसूतानाम्। लवणं मधुरं क्षीरं विदाहजननं चिरप्रसूतानाम्। गुणहीनं निःसारं क्षीरं प्रथमप्रसूतानाम्। मध्यमवयसां सज्ञेयं दुर्बलन्तु डहानाम्। तासां मानुषवादृद्धं गुर्विणीनाञ्च यत् पयः। तद्धाति लवणं क्षीरं मधुरं पित्तशोषजित्। दुग्धाद्यं गोतनं स्वादु हृद्यं वर्ष्यकरं गुरु। वातपित्तापहं रूक्षं दृंहणं बलवर्द्धनम्" राजनि०।

**दुग्धतालीय** न० दुग्धस्य तालाय प्रतिष्ठायै हितं क। १दुग्धाक्ये २क्षीरफेने च मेदि०।

**दुग्धपाचन** न० दुग्धं पाच्यतेऽनेन पाचि-करणे ल्युट्। दुग्धपाकपात्रे हारा०।

**दुग्धपाषाण** पु० दुग्धं निर्यासः पाषाण इव यस्य। (शिरगोडा) ख्याते वृक्षभेदे राजनि०। स्वार्थे क। अत्रैवार्थे।

**दुग्धपुष्पी** स्त्री दुग्धमिव शुभ्रं पुष्पं मञ्जरी यस्याः गौरा० ङीष्। (दुधमेथा) ख्याते १वृक्षभेदे २सेवकाख्यौ शब्दच०।

**दुग्धफेन** ष०त०दुग्धस्य फेनो यत्र। शर्करासहिते क्षीरक्विथक्षीरे राजनि०। गौरा० ङीष्। दुग्धफेनी १क्षुपभेदे स्त्री। स्वार्थे क तत्रार्थे पु०

**दुग्धबन्ध** ष०त०दुग्धार्थं बन्धः। दुग्धदोहनार्थं गोबन्धे "पीतदुग्धा तु धेनुस्या संस्थिता दुग्धबन्धकैः" हेमच०।

**दुग्धबीजा** स्त्री दुग्धमिव बीजं शस्यबीजं यत्र। यावनालाद्यतरुक्षुवर्चिपिटे राजनि०।

**दुग्धसमुद्र** पु०ष०त०। दुग्धोदके क्षीरसमुद्रे त्रिका०। दुग्धसिन्धु प्रभृतयोऽप्यत्र। "अवध्यजलधिरादौ दुग्धसिन्धुश्च तस्मादमृतमप्यमृततरङ्गिं क्षीरं यस्मात् बभूव" सि०शि०

**दुग्धाङ्क** पु० दुग्धमिव शुभ्राङ्कः चिह्नभेदोऽस्य। उपलभेदे शब्दार्थक०। [दृषे राजनि०।

**दुग्धाश्मन्** पु० दुग्धं निर्यासः अश्मा इव। दुग्धपाषाणदुग्धाश्म न० दुग्धपक्वमाश्मम्। दुग्धतालीये राजनि०।

**दुग्धिका** स्त्री दुग्धं क्षीरमिव निर्यासोऽस्त्यस्याः ठन्। (दुधि (क्षीरा) इति ख्याते वृक्षभेदे। "दुग्धिकोष्णा गुरूरूक्षा वातला पुत्रदायिनी। स्वादुक्षीरा कटुक्षिप्ता रूक्षमूत्रमला पटुः। साही विष्टम्भिनी हृद्या कफकृद्रक्तपित्तजुत्" भावप्र०। २गव्यिका इति प्रसिद्धायामुत्तमफल्लिन्याम् युग्मफलायाम् रत्नमा०।

**दुग्धिनिका** स्त्री दुग्धमस्त्यस्य इनि दुग्धिनि निर्यासे काथति कै-क अनुकम्प०। रक्तापामार्गे राजनि०।

**दुग्धी** स्त्री दुग्धमिव निर्यासोऽस्त्यस्याः अर्श आद्यच् गौरा० ङीष्। १दुग्धिकायाम् (दुधि) २क्षीरवीजतायां मेदि०। २दुग्धपाषाणे राजनि०।

**दुघ** त्रि० दाग्धि-दुह-क हस्य घः। दोहनकर्त्तरि "कामदुघा गौः" सि०कौ०। अस्य कचिच्चिदुपपदे एव साधुत्वं नान्यथा। "कामदुघाङ्घ्रिपद्म" भाग० ३।२१।१५

**दुच्छक** पु० दु-सन्तापे सन्न० भावे किप् तस्मै उपतापाय तच्छिलत्वे शक्नोति शक-अच्। खरानामगन्धद्रव्ये विष्टाराह्वयकाशके च मेदि०।

**दुच्छुन्** पु० दुष्टः श्वा प्रा०स० पृषो०। दुष्टकुक्कुरे "क्षारेवोधस्य दुच्छुनाम्" यजु०१८।२८ "दुष्टाय ते श्वानश्च तेषाम्" वेददी०।

**दुच्छून** त्रि०दुष्ट उच्छूनः प्रा०स०। पृषो०। दुष्टे उच्छूने ततः भवा०क्यङ्। दुच्छुनायते बाधते इत्यर्थः। "किमस्मान् दुच्छुनायसे" ऋ०७।२५।३ "दुच्छूनायसे बाधसे" भा०।

**दुडि** स्त्री दुडि+कस्य डः। दुण्ड्याम् रायमुकुटः।

दुण्डुक त्रि॰ दुण्डुभ इव कायति कै-क पृषो॰ मलोपः। दुष्टचित्ते यद्वार्षकल्पतरुः।

दुण्डुभ पुंस्त्री॰ दुण्डुभ+पृषो॰। (ढोडा) सर्पभेदे अमरः। "शरभीनां सहारीद्रां प्राप्य शल्लीं दृढां दुण्डुभाम्। मज्जामांसमहापङ्कां कबन्धावर्जितोडुपाम्" भा॰द्रो॰१६६अ॰।

दुण्डुभि पु॰ दुन्दुभि+पृषो॰। दुन्दुभिशब्दार्थे "दुण्डुभेर्भूधिकायां च कीटानां कल्प एव च" इति स्वस्थाने प्रतिषाय शुश्रुतेन कल्पस्थाने दुन्दुभिस्वनीयाध्याय उक्तः अतस्तयोरेकार्थता।

दुत त्रि॰ टु उपतापे क्त। पीड़िते "स्फुटतया दुतया" माघः। दुगतौ दत्वस्य तु "दुस्वोर्धत्वं" पा॰ नत्वे दीर्घत्व दून दत्येव सि॰कौ॰।

दुत्थोत्सदवीर्य पु॰ नीलः ताजकोक्ते वर्षप्रवेशे योगभेदे "वीर्योन्नितौ कार्यविलम्बनाशौ स्वर्क्षादिकेनान्यतरोक्षुनक्ति। अन्यौ यदा हौ बलिनौ तदात्यसङ्घायतो वीर्य सशनि खलः" तद्वचनम्।

दुद पु॰पर्वतभेदे। "ऋक्षवान् मन्दरो नीलो निषधो दुर्दुदस्तथा" भा॰अनु॰१६५अ॰। दर्दुरस्तथा दत्येव पाठः साधुः

दुदुक्ष पु॰ अनुवंश्ये नृपभेदे। "अनोस्तु पुत्रोधर्मोऽभूदुशतस्तस्यात्मजोऽभवत्। उशतात्तु दुदुक्षो ऽभूत् प्रचेतास्तस्य चात्मजः" हरिवं॰ ३२अ॰

दुद्रुभ पु॰ दुद्रो द्रुमः मा॰स॰। हरितपत्रे पलाशवृक्षे अमरः।

दुध त्रिग्मने प्रेरणे च भ्वा॰पर॰सक॰सेट्। दोधति अदोधीत् दुदोध दुधितम् "नेशत्तमो दुधितं रोचत" ऋ॰ ४।१।१७ "दुधिः प्रेरण कर्मा" भा॰।

दुधि त्रि॰ दुधिर्हिंसाकर्मेति भाषवृत्तेः दुध-हिंसायां कि। हिंसके "क्षुभ स्टभे दुधयेर्व ! ते" ऋ॰६।२६।२ "दुधये हिंसकाय" भा॰ उपचारात् २दुर्धरे च "दुधेर्युक्तस्य द्रवतः सहानसा" ऋ॰ १०।३०२।६ दुधेर्दुर्धरस्य" भा॰

दुध्र त्रि॰ दुध-बा॰ रक् दुट् वा धारयति ध-मूल॰क पृषो॰। हिंसके २प्रेरके ३दुर्धरे ४दुर्द्धर्षे ५दुष्टानां व्यवस्थापके च। "दुध्र चाभूतु रामयश्चि दामनि" ऋ॰१।५६।२ "दुध्रः दुष्टानां धर्त्ता व्यवस्थापयिता वा" भा॰ "दुध्रक्षतो मरुतो मात्रादुदयः" ऋ॰१।६४।११ "दुध्रकत् दुध्रं दुष्टं नाम्नैर्दुर्द्धर्षं वा आत्मना" भा॰ "छिदये दुध्रवाचः" ऋ॰७।३१।२ "दुध्रवाचः दुर्द्धरवाचः" भा॰। [शब्दर॰।

दुन्दभ पु॰ दुन्द इत्यव्यक्तं शब्दं भषति भष-ड। दुन्दुभिवाद्ये

दुन्दु पु॰ १वसुदेवे त्रिका॰ २दुन्दुभिवाद्ये शब्दरत्ना॰।

दुन्दुभ पु॰ दुन्द इत्यव्यक्तं शब्दं भषति भष-ड। दुन्दुभिवाद्ये शब्दर॰। दुन्दुभ इति पाठान्तरम्।

दुन्दुभि पु॰ दुन्दु इत्यव्यक्तशब्दं नौभति पूरयति उभ-पूरणे कि शक॰। डक्कड्ढक्कायाम् अमरः। "दुन्दुभे! त्वं सपत्नानां घोषाद् हृदयकम्पनः" दुन्दुभिपूजामन्त्रः "विजय दुन्दुभितामयुरर्षयाः" रघुः "दुन्दुभिश्च तदा देवैस्ताडितो देवकिङ्करैः" भा॰अनु॰ २६श्लो॰। १वरुणे २दैत्यभेदे मेदि॰ ३राक्षसभेदे पु॰शब्दर॰ ४विषे हेमच॰ ५पाशके स्त्री अमरः स्वर्णझल्लादिभवे चतुःपार्श्वे बिन्दुयुक्ते द्यूतोपकरणे (पाशटी)ख्याते ६पदार्थे स्त्री ७गन्धर्वभेदे स्त्री वा ङीष्। "तेषां समस्तं गन्धर्वो दुन्दुभी नाम नामतः। ययाच वरदोदेवो गच्छ कार्यार्थसिद्धये। पितामहवचः श्रुत्वा गन्धर्वो दुन्दुभी ततः। मन्थरा मानुषे लोके कुब्जानामाभवत्तदा" भा॰व॰ २७५ अ॰ दुन्दुभिर्नामासुरभेदश्च मायाविनामासुरपिता तत्कथा रामा॰ कि॰ ६सर्गे "मायावी नाम तेजस्वी पूर्वजो दुन्दुभेः सुतः। तेन तस्य महद्वैरं बालिनः स्त्रीकृतं पुरा" "यदा तु दुन्दुभिं नाम दानवं महिषाकृतिम्। प्रतिकाङ्क्षयते बाली भयं प्रतिपर्वतम्। तदा विवेश महिषो मलयस्य गुहां प्रति। विवेश बाली तत्रापि भयं तस्मिंश्चिरन्नया" रामा॰ कि॰ ३६ अ॰ ३श्लो॰। "दुन्दुभिं नामेति अत्र दुन्दुभिशब्देन तत्पुत्रो मायाविनामा दानव उच्यते तद्वृत्तान्तस्यैवाग्रे वक्ष्यमाणत्वात् "मायावी नाम तेजस्वी दुन्दुभेः पूर्वजः सुतः" इति प्रोक्तेस्तस्य तत्पुत्रत्वं पितुर्महिषाकारत्वात् तत्पुत्रस्य तदाकारत्वमिति च बोध्यम्" तट्टीका

दुन्दुभिक पु॰ कीटभेदे कीटशब्दे दृश्यम्।

दुन्दुभिनिर्ह्राद पु॰ दुन्दुभेरिव निर्ह्रादोऽस्य। दानवभेदे स्कन्दपु॰। [नृपभेदे।

दुन्दुभिषेण पु॰ दुन्दुभिः सेनायां यस्य सुग्रीवा॰ बहुव्रीः।

दुन्दुभिस्वन पु॰ ६त॰। १दुन्दुभिशब्दे दुन्दुभेर्वाद्यभेदस्य स्वनो यत्र विषचिकित्सायाम्। सुश्रुतोक्ते विषचिकित्साभेदे "अथातो दुन्दुभिस्वनीयमध्यायं व्याख्यास्यामः धवाश्वकर्णतिनिशपलाशधिष्णसदृषाटलिपारिभद्रकाश्मन्तकोडुम्बरबदरघाटकार्जुनसप्तपर्णसर्जकपीतनक्तेषु ज्ञातकाढोठामलकप्रयग्रोधकुटजसप्तौकपित्थाक्षिनक्तकार्कोचिरविल्वभल्लातकाम्बष्ठारारामधुकमधुशिग्रुशाकसोजीपामूर्वातिच्छेक्षुरकशोणपद्मकारिभेदानां मक्षान्त्वाकृत्य गवां मूत्रेण क्षारकल्पेन परि-

खाद्य विषचेद्याशात विषपत्नीमूलतण्डुलीयकवराङ्गेरीकर्मञ्जिकाचरञ्जिकाकङ्क्षिविषपत्नीमरिचोत्पलधारिवाविडङ्गटङ्गणमाक्षिकलोमसरकावाल्लोकगुडाकोशाम्लश्वेतसर्षपरक्तसर्षपशुक्लसर्षपैर्मानवल्गुलपत्रश्वेतीसप्तपर्णदन्तशैलवालुकानागदन्त्यतिविषाभयाभद्रदारुकुष्ठहरिद्रावचाचूर्णानि लोहानाञ्च समभागानि ततः चारवद्रागतपाकमवतार्य लोहकल्पे निदध्यात्। अनेन दुन्दुभिं लिम्पेत् पताकातोरणानि च। अस्याहर्गणात् अहर्गात् विधात् सम्भवतिच्छत्रते। एष चारागदो नाम गर्दराक्षञ्जरीषुच। अर्शःसु वातगुल्मेषु कासगूलोदरेषु च। अजीर्णे यकृतीदोषे भक्तद्वेषे च दारुणे। एष सर्वविषाणां सर्वदैवोपयुज्यते। तथा तक्रकल्पस्यानाम्ल दर्पकुशोऽगदः"।

दुन्दुभ्य पु० दुन्दुभौ दानवभेदे विधे वाद्यभेदे वा भवः प्रस्थतो वा यत्। १रुद्रभेदे "नमो दुन्दुभ्याय वन्याय च" यजु० १६।३५ दुन्दुभये तद्वादनाय साधु यत्। २दुन्दुभिवादन साधने मन्त्रभेदे "ऐन्द्राः चत्रियस्य चक्रदुन्दुभ्याः" काल्या०श्रौ० १४।१।१२ "चत्रियस्य चक्रारोऽक्षे दुन्दुभेर्वादनमन्त्रा ऐन्द्रा भवन्ति" कर्कः।

दुन्दुमार पु० धुन्धुमार+पृषो०। धुन्धुमारदेशे शब्दार्थकल्प०।

दुष्कानिकृत्य न० नी० ता० उक्ते वर्णप्रवेशे योगभेदे तल्लक्षणं तत्रोक्तं यथा "मन्त्रः शुभोक्षादिपदस्थितश्चेत् पदेनशीघ्रेण कृतेत्यशालः। तत्रापि कार्यं भवतीति वाच्यं वक्त्रादिनिर्यैर्यपदेन चेत् स्यात्"।

दुम्बक पु० (दुम्बा) इति ख्याते मेषभेदे शब्दार्थचि०।

दुर(स्) अव्य०दु–ऋक् सुक् वा। १दुष्टे २निन्दायां शनिभेदे ४दुःखे च पुरुषोत्तमः ५ईप्सितार्थे हलक्षार्थे ७क्षये ८वसम्पत्तौ ९सङ्कटे च गरुर०दुर्जीवनः दुर्बलः दुर्दिनम् "दुदुरोरधिकरणे" पा०दुरुक्तम्। क्रियायोगेऽस्योपसर्गता उपसर्गशब्दे १२२६६० दृश्यम्।

दुर् स्त्री दृ–किप्। द्वारे "दुरोषुतान्यक्षरम्" ऋ०१।१८८।५ "या दुरः यज्ञसङ्द्वारः" भा० दुरो मानुषो देव आ च" ऋ०६।४५।१ "मानुषीर्मनुष्य सम्बन्धिनीर्दुरः द्वारः" भा०

दुर त्रि० दु–बा० कुर। दातरि "दुरो अश्वस्य दुर इन्द्र गोरसि दुरो यवस्य वसुन इत्यसि:" ऋ०१।५३।२ "दुरो दातासि" भा०

दुरज पु० दुष्टोऽजः प्रा०स०। १कपटपाशके २दुष्टनेत्रे च "अरयै दुरजस्यादि प्रयाजमेति ह स्माह वाभ्रवकल्पो दुरज इव ह्यास एवोदीक्षैवास्य दुरीका ते एवैतदनश्करोति यदश्वावनद्धि" शत०ब्रा० ३।१।२।१० "दुरजमेव अञ्जनेन नाशयति" भा०६अ०। दुष्टमजि यस्य अच् समा। ३तद्युक्ते त्रि० "अश्वः शुक्ल उ दुरजस्य एवाधोऽह दुरजोभावुकत्सम्" शत०ब्रा०७।३।२।१४ दुष्टोऽजो यत्र। ४दुष्टयुते

दुरतिक्रम त्रि०दुःखेनातिक्रम्यतेऽसौ दुर्+अति+क्रम–कर्मणि खल्। १दुःखेनातिक्रमणीये २दुर्लङ्घ्ये "सर्वन्तु तपसासाध्यं तपोहि दुरतिक्रमम्" मनुः। श्रविष्णौ पु०"समा इत्तो निहत्तात्मा दुर्जयो दुरतिक्रमः" विष्णु०सं० "भयहेतुत्वादशक्या स्वर्यादयोनातिक्रामन्तीति दुरतिक्रमः "भवादिन्द्रश्च वायुश्च सत्वधर्मेति पञ्चमः" इति मन्त्रवर्णात्" भा० "तस्माज्ञाया दुर्लङ्घ्यत्वात् तस्य तथात्वम्।

दुरत्यय त्रि०दुःखेनातीयते दुर्+अति–इ–खच्। १दुरतिक्रमणीये २दुस्तरे च। "स्वर्गमार्गपरिघो दुरत्ययः" रघुः।

दुरत्येतु त्रि० दुर+अति+इ–कर्मणि–तुन्। दुरतिक्रमणीये "ता भूरि पाशावबद्धस्य सेतुं दुरत्येतुं रिपवे मत्ताय" ऋ० ७।६५।२ "दुरत्येतुं दुरतिक्रमणीयौ" भा०

दुरदृष्ट न० दुष्टमदृष्टम् प्रा०स०। दुर्भाग्ये पापे।

दुरन्नो स्त्री अद–भावे मनिन् वा ङीप् दुष्टा अन्नमिः (नी) प्रा०स०। दुर्भोजने। "पाहि दुरन्न्या पाहि दुरिष्ट मः पाहि दुरस्यमं" यजु० २।२०। "अदनमन्नं दुष्टा अन्नं दुरन्नं दुर्भोजनम् ततः मां पाहि चतुर्थी पञ्चम्यर्थे" वेददी०।

दुरधिगम त्रि० दुःखेनाधिगम्यतेऽसौ दुर+अधि+गम–भा० कर्मणि ड। १दुष्प्राप्ये २दुर्ज्ञेये च। "दिव्यैश्चरैर्दुरधिगात्मभूः। विक्रियाभिः" भाग० ३।२१।८।

दुरधिगम त्रि० दुःखेनाधिगम्यते दुर्+अधि+गम–कर्मणि खल्। १दुष्प्राप्ये २दुर्ज्ञेये च। "द्रव्यदेशकालमन्त्रर्त्विग्दक्षिणाविधानयोगोपपत्त्या दुरधिगमोऽपि भगवान्" भाग०५।२२।२"इह दुरधिगमैः किञ्चिदेवागमैः" किरा०।

दुरधीत न० दुष्टमधीतम् प्रा०स०। वर्णानां यथास्थानातुच्चारणेन यथाक्षरातुच्चारणेन च अध्ययने "दुष्टः शब्दः स्वरतो वर्णतो वा मिथ्या प्रयुक्तो न तमर्थमाह। स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधादिति" दुष्टांस्त्यक्त्वा प्रयुञ्जीतेत्यर्थे व्याकरणम्" महाभाष्योक्तेः "यदधीतमविज्ञातं निगदेनैव शब्द्यते। अनग्नाविव शुष्कैधो न तज्ज्वलति कर्हिचित्" स्मृतेश्चाध्ययनस्य दुष्टत्वं बोध्यम्। [अन्ये तुल्यकर्मे

दुरध्याय त्रि० दुःखेनाधीयते कृच्छ्रार्थे दुर्+अधि+इ–खच्।

दुरध्व पु० दुष्टोऽध्वा प्रा०स०अच् समा०। दुष्टवर्त्मनि अमरः।

दुरन्त त्रि०दुष्टोऽन्तोऽवसानं यस्य प्रा०ब०। १क्षुद्रजनादूतपानादिषु व्यसनेषु शब्दार्थचि०। तानि हि प्रथमं सुखयित्वा अन्ते दुःखाकुर्वन्ति। "व्यसनानि दुरन्तानि प्रयत्नेन विवर्जयेत्" मनुः। दुष्टेऽन्तः परिच्छेदो यस्य। २दुष्टेऽन्ते ३गभीरे ४दुरतिक्रमणीये च "स्मरति युवतिजनेन समं सखि! विरहिजनस्य दुरन्ते" गीतगो०। कप्। दुरन्तक असह्यमर्य्यादे ५शिवे पु० "दुर्विज्ञेयो महादेवो दुरान्तो दुरन्तकः" भा० अनु०४१अ०।

दुरन्वय त्रि०दुःखेनान्वीयतेऽसौ दुर्+अन्व+इ-कर्मणि खल्। दुःखेनानुगमनीये "दुरन्वयं दुष्प्रधर्षं दुरापं दुरभिक्रमम्। सर्वं वै तपसाध्येति" भा०अनु० १२२अ०

दुरभिग्रह पु०दुःखेनाभिगृह्यतेऽसौ दुर्+अभि+ग्रह+खल्। १अपाभागे २दुःखेन ग्राह्ये त्रि०। ३दुराग्रहयायां४कपि कच्छाञ्च स्त्री राजनि०।

दुरवग्रह त्रि० दुःखेनावगृह्यते निगृह्यतेऽसौ दुर्+अव+ग्रह-कर्मणि खल्। क्षुद्रोपानिपाद्ये "वंशागतो रिपुर्वस्तु विचक्षेत दुरवग्रहः" कामन्दकी० [स्त्रियाम्।

दुरवस्था स्त्री दुष्टा अवस्था प्रा०स०। दारिद्र्यादौ दुष्टाव-

दुरस्य दुष्+क्यच् "दुरस्युर्द्रविणस्युर्धिषणस्यति" पा० वेदे नि०। दुष्टीभवने पर०अक० सेट्। दुरस्यति अदुरस्यीत्। "अभि घृतन्यन्नं तिरामि योनौ दुरस्यति" ऋग्०१।२८।२ लोके तु दुष्टीयति इत्येव। [उणादिको०।

दुराक पु० दुर्+अक+संज्ञायां कर्त्तरि घञ्। म्लेच्छदेशभेदे

दुराचर त्रि०दुःखेन आचर्य्यते दुर्+आ+चर-कर्मणि खल्। १क्षुद्रेणाचरणीये "सोऽयं चतुर्णामेतेषामाश्रमाणां दुराचरः" भा०शा०६५६श्लो०। आर्षत्वात् कर्तरि घञ्। दुष्टमाचरति अच्। २दुष्टाचारयुक्ते त्रि० "समीरणः श्रोत्रगतोऽन्यथाचरः। समन्ततः शून्यमतीव कर्णयोः। करोति दोषैश्च यथा श्रमाहतः स कर्णशूलो कथितो दुराचरः" सुश्रु०।

दुराचार पु० दुष्ट आचारः प्रा०स०। दुष्टे आचारे "प्राप्ते कलियुगे घोरे नराः पुण्यविवर्जिताः। दुराचाररताः सर्वे सत्यवार्त्तापराङ्मुखाः" अध्यात्मरामा०। घञ्र्थभावेक्रीडा वदनानमनादिकृत् दुराचारात्" मा०द०। दुष्ट आचारो यस्य प्रा०ब०। २दुष्टाचारयुक्ते त्रि०"लक्षणानि दुराचारा घोररूपाश्चक्रियाः" भट्टिः "दुराचारो हि पुरुषो लोके भवति निन्दितः" मनुः।

दुराढ्यङ्कर त्रि० दुःखेन आढ्यं क्रियते "कर्तृकर्मणोश्च भूकृञोः" पा०कर्तृकर्मणोरीयदादिषु च उपपदेषु भूकृञोः खल् स्यात् यथासङ्ख्यं नेष्यते कर्तृकर्मणी धातोरव्यवधानेन प्रयोक्तव्ये ईषदाद्यर्थे तु(ईषद् दुः सु)ततः प्राक्। "कर्तृकर्मणोश्च्व्यर्थयोरिति वाच्यम्" वार्त्ति० त्रि०को० कर्मणि उपपदे खल् स्यात्। दुःखेन अनाढ्ये आढ्ये करणीये

दुराढ्यम्भव न० दुःखेन अनाढ्येनाढ्येन भूयते दुर्+च्व्यर्थे आढ्ये कर्तरि उपपदे भावे खल् स्यात्। दुःखेन अनाढ्यादाढ्यभवने।

दुरात्मन् त्रि० दुष्ट आत्मा अन्तःकरणं यस्य। दुष्टान्तःकरणे "यस्तु धर्मेण कार्याणि मोहात् कुर्यात्तराधिपः। अचिरात्तं दुरात्मानं वशे कुर्वन्ति शत्रवः"। "यस्तु दोषवतीं कन्यामनाख्यायोपयच्छेत्। तस्य तत् वितथं कुर्यात् कन्यादातुर्दुरात्मनः" मनुः।

दुराधन पु० धृतराष्ट्रपुत्रभेदे। "अपराजितः पण्डितको विशालाक्षो दुराधनः" भा०आ० ६७अ० धृतराष्ट्रसुतोक्तौ

दुराधर पु० धृतराष्ट्रपुत्रभेदे। अपराजितः कुण्डशायी विशालाक्षो दुराधरः" भा०आ०६७अ० तत्पुत्रोक्तौ।

दुराधर्ष पु० दुष्टान् राजसान् आधर्षति दुर्+आ+धृष अच्। १श्वेतसर्षपे तत्क्षेपणे हि वेतालादीनामपसर्पणं श्रुतौ दर्शितम्। दुःखेन ईषदपि धर्षयितुमशक्यम् दुर्+आ+धृष-कर्मणि खल्। २धर्षयितुमशक्ये त्रि०। "जगन्नाथो दुराधर्षो गङ्गां भागीरथीं प्रति" भा०अनु० ५८अ० "स प्रभावात् दुराधर्षो महाबलपराक्रमः" भा०व० २०२अ०। ३कटुम्बिनीवृक्षे स्त्री राजनि०।

दुराधार पु० दुःखेनाधार्यते दुर्+आ-धारि-कर्मणि खल्। दुःखेन १आधारणीये २चिन्तनीये त्रि० ३महादेवे पु०। दुरन्तशब्दे दृश्यम्।

दुरानम त्रि० दुःखेनानम्यते दुर्+आ+नम-णिच्-कर्मणि खल्। दुःखेन आनमनीये। "स विचिन्त्य च धनुर्दुरानमम्" रघुः।

दुरापं त्रि० दुःखेनाप्यते दुर्+आप-खल्। १दुष्प्राप्ये। "इक्ष्वाकूणां दुरापेऽर्थे त्वदधीना हि सिद्धयः" रघुः "अङ्कं हरादाप्तवता दुरापम्" रघुः सम्यञ्चविवक्षया कर्तरि षष्ठी। भावे खल्। २दुष्प्राप्तौ न०।

दुरारिहा पु० दुष्टमियर्त्ति दुर्+ऋ-णिनि दुरारी दुर्गामी असुरः तं हन्ति हन्-क्विप्। विष्णौ "दुरावासो दुरारिहा" विष्णुसं० भाष्ये उक्तैव व्युत्पत्तिरुक्ता।

दुरारुह पु०दुःखेनारुह्यतेऽसौ दुर्+आ–रुह–कर्मणि क। १विल्वे २नारिकेलवृक्षे च। ३खर्जूर्यां स्त्री राजनि०। ४दुरारोहणीये त्रि० "सुपक्षितः खादफलः फलवान् स्यादुदारुहः" भा०आ० १४०अ०

दुरारोह पुंस्त्री० दुःखेनारुह्यते दुर्+आ+रुह–खल्। १सरटे स्त्रियां जातित्वात् ङीष्। २श्रीवल्ल्यां स्त्री राजनि० ३शालमलिवृक्षे स्त्री त्रिका०। ४दुरारोहणीये त्रि०। "दुरारोहं पदं राज्ञां सर्वलोकनमस्कृतम्" कामन्द० भावे खल्। ५दुःखेनारोहणे पु०।

दुरालभा(भ्भ)स्त्री दुःखेनालभ्यते लभ्यते वासौ दुर्+आ+लभ–खल् आगमविधेरनित्यत्वात् वा सम्। (आलजी) १लतायाम् राजनि०। "दुरालभा कटुस्तिक्ता चारोष्णा मधुरास्त्रिका। वातशुल्मप्रमेहार्शां नाशिनी परिकीर्तिता" राजनि०। "यवासस्य गुणैस्तुल्या बुधैरुक्ता दुरालभा" भावप्र० २दुःस्पर्शनीयमात्रे त्रि०। "चूर्णं श्यामा त्रिवृद्बीजी कटी तुल्या दुरालभा" सुश्रु० "तीक्ष्णवीर्यास्तु भूतानां दुरालभ्याः सकण्टकाः" भा०वन० ६८अ०। [कल्पतरुः।

दुरालाप पु० दुष्ट आलापः प्रा०स०। गर्हितवचने शब्दार्थ-

दुराव्य न०अव–गत्यादौ भावे यत् दुष्टमाव्यं मतिः प्रा०स०। दुष्टमतौ "सुचिरतस्य मनामहेऽतिसेतुं दुराव्यम्" ऋ० ६।४१।२ "दुराव्यं दुष्टमतिम्" भा०।

दुराशय पु०प्रा०स०। १दुष्टे आशये "स्फुटनिर्भिन्नदुराशयोऽधमः" माघः। दुष्ट आशयो यस्य प्रादि०ब०। २दुष्टाशयवृक्षे त्रि० "उपेक्षिवान् मूलमशेषमूलं दुराशयः कामदुघाङ्घ्रिपस्य" भाग० २।२।१५

दुराशा स्त्री प्रा०स०। दुष्प्रत्याशायाम्।

दुरासद त्रि० दुःखेनासद्यतेऽसौ दुर्+आ+सद–कर्मणि खल्। १दुष्प्राप्ये २दुर्गम्ये "त्रिलोचनैकांशतया दुरासदः" "स बभूव दुरासदः परैः" रघुः। "सम्यक्त्वानमपि यद्दुरासदम्" माघः। "पापाट्या दुरासदाया दवतः" नलोदयः।

दुरित न० दुष्टमितं गमनं नरकादिस्थानप्राप्तिरत्र। १पापे २तद्धेतौ त्रि० अमरः। "दुरितैरपि कर्तुमात्मसात् प्रयतन्ते नपसत्तमो हि यत्" रघुः "महानदीप्रवाहमिव सर्वदुरिततापहरम्" काद० "कामीवार्द्रापराधः स दहतु दुरितं भास्वतोवः शरारिः" अनर्घ्य०

दुरितदमनी स्त्री दुरितं दस्यतेऽनया दम–करणे ल्युट् ङीप्। १यमीडचे राजनि० २पापदमनसाधनमात्रे त्रि० स्त्रियां ङीप्।

दुरितारि पुन०। १दुरितनाशके। २जैनानां शासनदेवताभेदे च। "चक्रेश्वर्यजिता बाला दुरितारिश्च कालिका। महाकाली श्यामा शान्ता भृकुटिश्च सुतारका। अशोका मानवी चण्डा विदिता चाङ्कुशो तथा। कन्दर्पनिर्वाणबला धारिणी धरणप्रिया। नरदत्ताऽथ गान्धार्यम्बिका पद्मावती तथा। सिद्धायिका चेति जैन्यः क्रमाच्छासनदेवताः" हेमच०।

दुरिष्ट न० दुष्टमिष्टं यज्ञः। अभिचारार्थे यज्ञे। "देवद्विज पितृद्वेष्टा रत्नदूषयिता च यः। स याति क्रमिभक्षे वै क्रमीशे च दुरिष्टदृदिति" विष्णुप०

दुरिष्टि स्त्री दुष्टा इष्टिः प्रा०स०। अशास्त्रीये यागे "यादृङ् दुरिष्ट्यै" यजु०२।२०। षष्ठ्यर्थे चतुर्थी।

दुरीश पु० दुष्ट ईशः प्रा०स०। निन्दिते प्रभौ

दुरीषणा स्त्री दुष्टा ईषणा प्रा०स०। भावे शब्दार्थकल्पतरुः।

दुरु पु० पर्वतभेदे। "ह्रस्वत्वान् मन्दरो नीलो निषधोऽरुर्दुरुर्दशार्ण" भा०भीष्म०६६५अ०। दर्दुरक्षयेत्येव पाठः साधुः।

दुरुक्त न० दुष्टमुक्तं प्रा०स०। दुष्टवचने "दुरुक्तभाषाभिहितैः प्राप्नुवन्ति सुदुष्कृतम्" भा०वन०५०२श्लो०।

दुरुच्छेद त्रि० दुःखेन उच्छिद्यतेऽसौ दु+उद्+छिद–कर्मणि खल्। १दुर्वारे भावे खल्। २दुःखेन वारणे पु०।

दुरुत्तर त्रि० दुःखेनोत्तीर्यतेऽसौ दुर्+उद्+तॄ–कर्मणि खल्। १दुस्तरे "दुरुत्तरे पङ्क इवान्धकारे" भट्टिः। भावे खल्। २दुःखेन शरणे पु०। दुष्टमुत्तरम् प्रा०स०। ४दुष्टे उत्तरवाक्ये न०।

दुरुदाहर त्रि० दुःखेनोदाह्रियते दुर्+आ–हृ–कर्मणि खल। दुःखेन वचनीये "अनुज्झितार्थसम्बन्धः प्रबन्धो दुरुदाहरः" माघः। प्रा०स०। २दुष्टे उदाहरणे पु०

दुरुधुरा स्त्री जन्मकाले चन्द्रात् द्वितीयद्वादशस्थिते रवि भिन्नषडरूपे चान्द्रयोगभेदे तत्फलरूपभेदफलादिकं ज्योतिषोक्तं यथा

"छित्वार्कं सुनफाऽनफादुरुधुराः स्वान्योभयस्थैर्यदैः शीतांशोः कथितोऽन्यथा तु बहुभिः केमद्रुमोऽन्यैस्त्यजौ। केन्द्रे शीतकरेऽथ वा यदभवत् केमद्रुमो नेष्यते। केचित् केन्द्रनवांशकेषु च वदन्त्युक्तिः प्रसिद्धा न सा। लिंगत्रयरूपाः सुनफाऽनफाख्याः षष्टित्रयं दौरुधुरे प्रभेदाः। दृक्कालिकल्पैः क्रमशोभिनीय नीते निवृत्तिः पुनरन्यनीतिः" ज्योत्स्ना० "अथ सुनफानफादुरुधुराकेमद्रुमाख्यं योगचतुष्टयं

शार्दूलविक्रीडितेनाह स्थित्वार्कमिति। अर्कमादित्यं स्थित्वा त्यक्त्वा यदाऽन्यः कश्चिद्ग्रहो भौमादिकः शीतांशो चन्द्रात् स्वान्योभयस्थो भवति द्वितीयस्थो, द्वादशस्थो, वा द्वितीयद्वादशस्थो वा द्वौ भवतस्तदा सुनफाऽनफादुरुधुराख्यं योगत्रयं भवति एतदुक्तं भवति अर्कं स्थित्वा यदाऽन्योग्रहः कश्चिच्चन्द्रात् द्वितीयस्थाने भवति तदा सुनफानामयोगो भवति अर्कार्कं वर्जयित्वा चन्द्रात् द्वादशगो भवति कश्चित्तदा अनफानामयोगो भवति एवं चन्द्रात् द्वितीयद्वादशगौ ग्रहौ भवतस्तदा दुरुधुरानाम योगो भवति योगत्रयेऽप्यादित्यो यदि द्वितीये द्वादशे वा स्थाने भवति तदा योगभङ्गत्वं भवति। किन्तु योगकर्तृणां मध्ये न गण्यते। एते योगाः बहुभिराचार्यैः कथिताः अन्यथा तु बहुभिः केमद्रुमः उक्तः। अथास्य योगत्रयस्याभावे बहुभिराचार्यैः केमद्रुमाख्योयोगोऽभिहितः एतदुक्तं भवति चन्द्राच्च द्वितीये न द्वादशे कश्चिद्ग्रहो भवति तदा केमद्रुमाख्योयोगो भवति अन्यैस्त्वसाविति अन्येषां गर्गादीनामेवं मतं केन्द्रे जन्मलग्नकेन्द्रे शीतकरे चन्द्रे वा भौमादिग्रहयुते भौमादिग्रहविरहितयोरपि चन्द्राद्द्वितीयद्वादशस्थानयोः केमद्रुमो न भवति केन्द्रे ग्रहयुते इत्यत्र कैश्चिच्चन्द्रकेन्द्रमेव केवलं व्याख्यातम् तच्चायुक्तम् चन्द्रकेन्द्रे ग्रहयुते चन्द्रमसोऽपि योगोऽनभवति शीतकरे ग्रहयुते इत्येतदपार्थकं स्यात् अत्र च भगवान् गार्गिः "व्यर्थमेकेन्द्रगचन्द्रादिना भातं न चेद्ग्रहः। कश्चित् स्यात् वा विना चन्द्रलग्नात् केन्द्रगतोऽथ वा। योगः केमद्रुमो नाम तदा स्याद्गत्र गर्हिताः। भवन्ति निन्दिताचारा दारिद्र्यापत्तिसंयुताः" तथा च शारावल्याम् "सुनफानफा दुरुधुराः क्रमेण योगा भवन्ति रविरहितैः। वित्तान्योभयसंस्थैः कैरवबन्धवादिभिर्गैः" एतेन "यदा योगाः केन्द्रे ग्रहवर्जिताः शशाङ्कश्च। केमद्रुमोऽतिकष्टः क्षितिपे च सर्वग्रहाढ्ये"। अन्ये आचार्या नेच्छन्ति वराहमिहिरस्तु पुनरिच्छत्येव अस्मिन्नर्थे तस्यैव तद्ग्राह्यम् अन्यथा केमद्रुम इति एवसञ्ज्ञा परमतसङ्गम् अन्यैरसौ इति "केन्द्रे शीतकरेऽथवा ग्रहयुते केमद्रुमो नेष्यते" खल्पज्ञा तर्केऽपि। तेन सुनफानफादुरुधराऽभावे केमद्रुमभङ्गः तथा च "रविवर्जं द्वादशगैरनफा चन्द्रद्वितीयगैः सुनफा। उभयस्थितैर्दुरुधरा केमद्रुमसंज्ञकोऽतोऽन्यः"। अत्रापि सुनफानफादुरुधराभावे केमद्रुमः तथा च "सुनफा त्वनफायोगोदीरितचन्द्रसंस्थितेर्ग्रहात्। प्राक् पृष्ठतो यदेन्द्रैरमवर्गतैस्तेषु रविवर्जम्। केमद्रुमोऽत्र योगोऽन्यथा भवेद्यत्र गर्हितं जन्म" केचित् केन्द्रनवांशकेष्वितिं केचिदाचार्याः केन्द्रेषु केचिच्च नवांशकेष्वेतद्योगत्रयं वदन्ति यथा चन्द्राद्द्वितीयद्वादशोभयस्थैः ग्रहैः सुनफाद्या योगा व्याख्याताः तथा केचिच्छुतकीर्तिजीवशर्मप्रभृतिभिः केन्द्रवशाच्चनवांशकवशाच्च व्याख्याताः एतदुक्तं भवति तारास्थग्रहैश्चन्द्राच्चतुर्थस्थानस्थैः सुनफा दशमस्थानस्थैरनफा चतुर्थदशमस्थितैः दुरुधुरा अतोऽन्यथा केमद्रुमः तथा च श्रुतकीर्तिः "चन्द्राच्चतुर्थैः सुनफा दशमस्थितैः कीर्तितोऽनफा विहगैः। उभयस्थितैर्दुरुधरा केमद्रुमसंज्ञितोऽन्यथा योगः" केचिच्चनवांशकेषु यदन्ति यत्र तत्र राशौ यद्राशिसम्बन्धिनवांशके चन्द्रमा भवति तस्माद्राशेः यो द्वितीयो राशिः तत्र यदि तारास्थग्रहो भवति तदा सुनफा अथ चन्द्रनवांशकराशेर्द्वादशे तारास्थग्रहो भवति तदाऽनफा अथ चन्द्रनवांशकराशेः द्वितीये द्वादशे च यदा ग्रहौ भवतस्तदा दुरुधुरा अतोऽन्यथा केमद्रुमः। तथा च चन्द्रनवांशकराशितोद्विद्वादशराशौ यदि ग्रहरहितौ भवतः तदा केमद्रुमः तथा च जीवशर्मा "यद्राशिसंस्थे शीतांशुर्नवांशे जन्मजिन्मितः। तद्द्वितीयस्थितैर्योगः सुनफाख्यः प्रकीर्तितः। द्वादशैरनफा ज्ञेया ग्रहैर्द्वादशसंस्थितैः। प्रोक्तो दुरुधुरा योगोऽन्यथा केमद्रुमः स्मृतः"। उक्तिः प्रसिद्धा न वा येषामेवंविधं मतं तेषामुक्तिः लोके न प्रसिद्धा तन्मतं हृद्द्योतिप्रकैः नाङ्गीकृतमित्यर्थः। अथ सुनफानफा दुरुधुराख्यप्रकारत्रयसिद्ध्यर्थमाह त्रिंशल्लक्षरूपा इति सरूपाः सैकाः त्रिंशदेकत्रिंशत् सुनफाख्यायोगाः तावन्त एवानफाख्याः प्रतित्रयमयीत्यधिकं शतं दुरुधुराप्रभेदानाम् एषां पूर्वपद्धिकल्पगणितम्। इच्छाविकल्पैरित्यादि। एतच्छ्लोके लोष्टुकप्रकारः पूर्वमेव नामसयोगाध्याये व्याख्यातः इच्छाविकल्पैः क्रमशः परिपाट्याऽत्र लोष्टुकमभिनीय नीते निश्चितिः कार्या पुनः भूयोऽन्यनीतिरित्यत्र स्थानान्तरे चालनम्। अथ सुनफादयो भौमबुधगुरुसितासितैः पञ्चभिर्भिद्यन्ते तस्मादिच्छाविकल्पाः पञ्च तेषां न्यासः अत्र प्राग्वत् पूर्वेण पूर्वेण गणितेन युक्तस्थानं विनाऽन्यं प्रवदन्ति संख्यामिति कृत्वा जातम् ६ ४ २ २ १ अथवा प्राग्वत् सैव संख्या जाता। एव- १ २ २ ४ ६ मेकविकल्पाः पञ्च, द्विविकल्पा दश, त्रि-

कल्पा दश, चतुर्विकल्पाः पञ्च, पञ्चविकल्पाः एकः, एवमेकत्रिंशत् ५।१०।१०।५।१ तद्यथा द्वितीये चन्द्राङ्गोमः१ बुधः२ बृहस्पतिः३ शुक्रः४ शौरः५ एवमेकविकल्पाः पञ्च। अथ द्विविकल्पाः भौमबुधौ१ भौमजीवौ२ भौमशुक्रौ३ भौमशौरौ४ बुधजीवौ५ बुधशुक्रौ६ बुधशौरौ७ जीवशुक्रौ८ जीवशौरौ९ शुक्रशौरौ१० एवं द्विविकल्पाः दश। अथ त्रिविकल्पाः भौमबुधजीवाः१ भौमबुधशुक्राः २ भौमबुधशौराः ३ भौमजीवशुक्राः ४ भौमजीवशौराः ५ भौमशुक्रशौराः ६ बुधजीवशुक्राः ७ बुधजीवशौराः ८ बुधशुक्रशौराः ९ जीवशुक्रशौराः१० एवं त्रिविकल्पा दश १०। अथ चतुर्विकल्पाः भौमबुधजीवशुक्राः१ भौमबुधजीवशौराः२ भौमजीवशुक्रशौराः३ भौमबुधशुक्रशौराः४ बुधजीवशुक्रशौराः५ एवं चतुर्विकल्पाः पञ्च ५। अथ पञ्चविकल्पः भौमबुधजीवशुक्रशौराः१ एवं पञ्चविकल्प एक१। एवमेकत्रिंशत् ३१। सनफायोगाः उत्पादिता अनेनैव प्रकारेण। द्वादशस्थैः अनफाभेदाः एकत्रिंशत्। अथ दुरुधुराविकल्पाः एवं सोदुकवल्लाभावात् स्वबुद्ध्या इच्छाविकल्पैः क्रमयोजिनीयेति न्यायेन व्युत्पत्तिः। एको द्वितीये, द्वितीयो (अन्यः) द्वादशे, एको द्वादशे द्वितीयो (अन्यः) द्वितीये, यथा भौमबुधौ१ बुधभौमौ २। भौमजीवौ३ जीवभौमौ४ भौमशुक्रौ५ शुक्रभौमौ६ भौमशौरौ७ शौरभौमौ८ बुधजीवौ९ जीवबुधौ १० बुधशुक्रौ११ शुक्रबुधौ१२ बुधशौरौ१३ शौरबुधौ१४ जीवशुक्रौ१५ शुक्रजीवौ१६ जीवशौरौ१७ शौरजीवौ१८ शुक्रशौरौ१९ शौरशुक्रौ२०। अथैको द्वितीये द्वादशे द्वौ, द्वितीये द्व द्वादशे चैकः तद्यथा भौमः बुधजीवौ१ बुधजीवौ भौमः२। भौमः शुक्रबुधौ३ बुधशुक्रौ, भौमः४। भौमः, बुधशौरौ५, बुधशौरौ, भौमः६। भौमः जीवशुक्रौ७ जीवशुक्रौ, भौमः८। भौमः जीवशौरौ९ जीवशौरौ, भौमः१०। भौमः शुक्रशौरौ११ शुक्रशौरौ, भौमः१२। बुधः भौमजीवौ१३ भौमजीवौ, बुधः १४। बुधः भौमशुक्रौ१५ भौमशुक्रौ, बुधः१६। बुधः भौमशौरौ१७ भौमशौरौ, बुधः १८। बुधः जीवशुक्रौ१९ जीवशुक्रौ, बुधः२०। बुधः जीवशौरौ२१ जीवशौरौ, बुधः२२। बुधः शुक्रशौरौ२३ शुक्रशौरौ बुधः२४। जीवः भौमबुधौ२५ भौमबुधौ जीवः२६। जीवः, भौमशुक्रौ२७ भौमशुक्रौ, जीवः२८। जीवः भौमशौरौ २९ भौमशौरौ जीवः३०। जीवः बुधशुक्रौ३१ बुधशुक्रौ जीवः३२। जीवः बुधशौरौ३३ बुधशौरौ, जीवः३४। जीवः शुक्रशौरौ३५ शुक्रशौरौ, जीवः३६। शुक्रः भौमबुधौ३७ भौमबुधौ, शुक्रः३८। शुक्रः भौमजीवौ३९ भौमजीवौ, शुक्रः४०। शुक्रः भौमशौरौ४१ भौमशौरौ, शुक्रः४२। शुक्रः बुधजीवौ४३ बुधजीवौ, शुक्रः४४। शुक्रः बुधशौरौ४५ बुधशौरौ, शुक्रः४६। शुक्रः जीवशौरौ४७ जीवशौरौ शुक्रः ४८। शौरः भौमबुधौ४९ भौमबुधौ शौरः५०। शौरः भौमजीवौ५१ भौमजीवौ, शौरः५२। शौरः भौमशुक्रौ५३ भौमशुक्रौ शौरः५४। शौरः बुधजीवौ५५ बुधजीवौ, शौरः५६। शौरः बुधशुक्रौ५७ बुधशुक्रौ, शौरः५८। शौरः जीवशुक्रौ५९ जीवशुक्रौ शौरः६०। एवमेकत्र जाताः८०। अथैको द्वितीये, द्वादशे त्रयः, त्रयो द्वितीये, द्वादशे चैकः, तद्यथा भौमः बुधजीवशुक्राः१ बुधजीवशुक्राः भौमः२। भौमः बुधजीवशौराः३बुधजीवशौराः, भौमः४। भौमः बुधशुक्रशौराः५ बुधशुक्रशौराः, भौमः६। भौमः जीवशुक्रशौराः७जीवशुक्रशौराः,भौमः८। बुधः भौमजीवशुक्राः९ भौमजीवशुक्राः, बुधः१०। बुधः भौमजीवशौराः११ भौमजीवशौराः बुधः१२। बुधः भौमशुक्रशौराः१३ भौमशुक्रशौराः, बुधः१४। बुधः जीवशुक्रशौराः१५ जीवशुक्रशौराः बुधः१६। जीवः भौमबुधशुक्राः१७ भौमबुधशुक्राः, जीवः १८। जीवः भौमबुधशौराः१९ भौमबुधशौराः, जीवः२०। एकत्र १००। जीवः भौमशुक्रशौराः१ भौमशुक्रशौराः, जीवः२। जीवः बुधशुक्रशौराः३ बुधशुक्रशौराः, जीवः४। शुक्रः भौमबुधजीवाः५ भौमबुधजीवाः, शुक्रः६। शुक्रः भौमबुधशौराः७ भौमबुधशौराः, शुक्रः८। शुक्रः भौमजीवशौराः९ भौमजीवशौराः, शुक्रः१०। शुक्रः बुधजीवशौराः११ बुधजीवशौराः, शुक्रः१२। शौरः भौमबुधजीवाः१३ भौमबुधजीवाः, शौरः१४। शौरः भौमबुधशुक्राः १५ भौमबुधशुक्राः, शौरः१६। शौरः भौमजीवशुक्राः१७ भौमजीवशुक्राः, शौरः१८। शौरः बुधजीवशुक्राः१९ बुधजीवशुक्राः,शौरः२०। एवमेकत्र१२०। अथ द्वितीये एको द्वादशे चत्वारः, चत्वारो द्वितीये द्वादशे चैकः तद्यथा भौमः बुधजीवशुक्रशौराः१ बुधजीवशुक्रशौराः भौमः२। बुधः, भौमजीवशुक्रशौराः२ भौमजीवशुक्रशौराः, बुधः३। जीवः भौमबुधशुक्रशौराः४ भौमबुधशुक्रशौराः,जीवः५। शुक्रः भौमबुधजीवशौराः६ भौमबुधजीवशौराः,शुक्रः७।

वोरः भौमबुधजीवशुक्राः६ भौमबुधजीवशुक्राः, वोरः१०। एवमेकत्र १२०। अथ द्वौ द्वादशे, द्वावेव द्वितीये तदाया भौ०बु०,जो०शु०१ जी०शु०,भौ०बु०२। भौ०बु०,जी०सौ०३ जी०सौ०,भौ०बु०४। भौ०बु०, शु०सौ०५ शु०सौ०, भौ०बु०६। भौ०जी०, शु०बु०७ शु०बु०,भौ०जी०८। भौ०जी०, बु० सौ०९ बु०भौ०जी०सौ०१०। भौ०जी०, शु०सौ०११ शु० सौ०, भौ०जी०१२। भौ० शु०, बु०जी०१३ बु०जी०, भौ०शु०१४। भौ०शु०, बु०सौ०१५ बु०सौ०भौ०शु०१६। भौ०शु०, जी०सौ०१७ जी०सौ०, भौ०शु०१८। बु०जी०, भौ०सौ०१९ भौ०सौ०बु०जी०२०। एकमेकत्र १५०। भौ०सौ०,बु०शु०१ बु०शु०,भौ०सौ०२। भौ०सौ०,जी०शु०३ जी०शु०,भौ०सौ०४। बु०जी०,शु०सौ०५ शु०सौ०,बु०जी०६। बु०शु०, जी०सौ०७ जी०सौ०,बु०शु०८। जी०शु०,बु०सौ०९ बु०सौ०जी०शु०१०। एवमेकत्र १६०। द्वौ द्वितीये त्रयो द्वादशे, द्वादशे द्वौ त्रयो द्वितीये तदाया भौ०बु०, जी०शु०सौ०१ जी०शु०सौ०, भौ०बु०२। भौ०जी०, बु०शु०सौ०३ बु०शु०सौ०, भौ०जी०४। भौ०शु०, बु०जी०सौ०५ बु०जी०सौ०, भौ०शु०६। भौ०सौ०, बु०जी०शु०७। बु०जी०शु०, भौ० सौ०८। बु०जी०,भौ०शु०सौ०९। भौ०शु०सौ०,बु०जी०१०। एवमेकत्र १७०। बु०शु०, भौ०जी०सौ०१ भौ०जी०सौ०, बु० शु०२। बु०सौ०, भौ०जी०शु०३ भौ०जी०शु०, बु०सौ०४। जी०शु०, भौ०बु०सौ०५। भौ०बु०सौ०, जी०शु०६। जी०सौ०, भौ०बु०शु०७ भौ०बु०शु०, जी० सौ०८। शु०सौ०,भौ०बु०जी०९। भौ०बु०जी०,शु०सौ०१०। एवमेकत्र १८०।

एवं दुरुधुरायोगभेदाः शतमशीत्यधिकं प्रदर्शितम् भट्टो०। "सम्पन्नभोगसुखभुग्धनवाङ्नाढ्यरागान्वितो दुरुधुरा प्रभवः सुभत्यः। क्लेशङ्गमे मलिनदुःखितनीचनिःस्वाः प्रेष्याः खलाच खपतेरपि बंशजाताः" दुरुधुरा०। अस्य पुंस्त्वमपि। "प्रचुरधनसमेतो भोगसौख्यान्वितः स्याद्वजहयरथसख्यैर्वाङ्गनैरन्वितश्च। बहुवितरण लज्जाप्रापिताखण्डलद्दुर्दुरुधुरजनितो ना श्रूयवर्गैः प्रपूर्णः" जातकपद्धतौ पुंस्त्वोक्तेः। "दधतेव योगसुभय-षड्लानरक्षितिकारितं दुरुधुराख्यमिन्दुना" माघः।

दुरुफ पु० नी०ता० उक्ते योगभेदे। "तच्चोरकृत्वो दुरुफश्च योगाः स्युः षोडशैषां कथयामि चक्रम्" इत्युपक्रम्य "तस्मात् षष्ठेऽष्टमेऽन्त्ये रिपुरिष्टफलो वक्रगो नीच गामी क्रूरैर्दुःफोऽस्तगो वा यदि सपत्निकी क्रूरनीचा-रिभस्थैः। अनीक्षमाणस्तुमस्तभागे स्थितः शुभो-क्षादिपदैश्च शून्यः। क्रूरेक्षराफो न स वीर्यवृक्षः कार्यं विधातुं न विभुर्यतोऽसौ। चन्द्रः सूर्याद्द्वादशे द्वयि-काद्ये षष्ठे नेष्टोऽन्ये तनायां विशेषात्। राशीशेनाद-दृष्टमूर्तिर्न सैंहेंदो श्रेयः शून्यमार्गः पदोनः। चीथो भाग्ने नो शुभो जन्मकाले पृच्छायां वा चन्द्र एवं वि-चिन्त्यः। शुक्ले भौमः क्षणपक्षेऽर्कसुतः कृष्णे शुक्लो बुद्धिमान्नेष्टदो वा। शुक्ले दिवा लग्नहोराऽर्कसुतः शशाङ्कं लग्ने कुजो निशि समर्क्षगतः प्रपश्येत्। दोषा-स्तां वितनुतेऽपरथा बहुत्वम् प्रश्नेऽथ वा जनुषि बुद्धिमतोऽनीयम्"।

दुरूह त्रि० दुःखेन जह्यते दुर्+जह–कर्मणि खल्। दुर्वि-तर्क्ये। "जानीते जयदेव एव शरणः श्लाघ्ये दुरूहद्रुते" गीतगो०।

दुरेवा त्रि० दुर्+इ–वा० व। दुःखेन गम्ये "प्रादेवीर्मायाः सहन्ते दुरेवाः" ऋ०५।२।८। "दुरेवाः दुःखगमनाः" भा०।

दुरोक त्रि० दुष्ट ओकः समवायोऽस्य प्रा०ब०। दुःखेन "दुरो-कमस्मिन्नरायवे शुशोच" ऋ०७।४।२ "दुरोकं दुःखेनम्" भा०

दुरोण पु० गृहे निघण्टुः। "नि दुरोणे बसतो मर्त्यानां राजा ससाद विदथानि साधन्" ऋ०३।१।१८। २यज्ञगृहे च। "आध्वयो राजा नेषु ज्ञात्वा दक्षस्य दुरोणे" यजु०२२।७२ "दुरोणे यज्ञगृहे" वेददी० "अग्निं दिव-श्चायुर्दुरोणयुः" ऋ० ८।६०।१९ "दुरोणयुर्यजमान-गृहस्य मिथयिता" भा० यु–मिश्रणे वा० कु। "हंसः शुचिषद्वसुरन्तरिक्षसद्धोता वेदिषद्तिथिर्दुरोणसत्" कठोप०।

दुरोदर पु० दुष्टम् वा समन्तादुदरमस्य। १द्यूतकारे २पणे मेदि०। ३अक्षे ४द्यूते न० अमरः। "दुरोदरच्छद्मजितां समीक्षते नयेन जेतुं जगतीं सुयोधनः" किरा०। "न मृगयाऽभिरतिर्न दुरोदरम्" रघुः।

दुर्ग पुंन०दुःखेन गम्यतेऽसौ दुर्+गम–बा०ड। (गढ़) (किला) प्रसिद्धे राज्ञामाश्रयीये १कोट्टे। तत्प्रकरणमेदादिकं मत्स्यपुराणे २१६ अ० उक्तं यथा

"एवंविधं यथान्यायं राजा विषयमावसेत्। तत्र दुर्गं प्रयत्नेन कुर्यात् तस्यामेकतमं बुधः। धन्वदुर्गं महीदुर्गं नरदुर्गं तथैव च। वार्क्षं चैवाम्बुदुर्गं च गिरिदुर्गं च पार्थिव!। सर्वेषामेव दुर्गाणां गिरिदुर्गं प्रशस्यते। दुर्गं च परिखोपेतं सप्राकारकसंवृतम्। शत-

शीवन्मनुष्यैश्च शतशश्च समाहतम्। गोपुरं सकपाटञ्च तत्र स्यात् सुमनोहरम्। पताकाङ्कुजारूढो येन राजा विशेत् पुरम्। चतस्रश्च तथा तत्र कार्यास्त्वायतवीथयः। एकस्मिंस्तत्र वीथ्यर्धे देववेश्म भवेदृढम्। वीथ्यर्धे च द्वितीये च राजवेश्म विधीयते। धर्माधिकरणं कार्यं वीथ्यर्धे च तृतीयके। चतुर्थे, त्वथ वीथ्यर्धे गोपुरञ्च विधीयते। त्र्यायतञ्चतुरस्रं वा वृत्तं वा कारयेत् पुरम्। सक्रिड्डीनं त्रिकोणञ्च यवमध्यं तथैव च। त्र्यायतञ्चतुरस्रं वा वृत्तं वा कारयेत् पुरम्। अर्द्धचन्द्रं प्रशंसन्ति नदीतीरेषु तद्बुधाः। अन्यत्तत्र न कर्त्तव्यं प्रयत्नेन विजानता। राज्ञा कोशस्तदूर्द्धं कार्यं दक्षिणे राजवेश्मनः। तस्यापि दक्षिणे भागे गजस्थानं विधीयते। गजानां प्राङ्मुखो शाला कर्त्तव्या वायुदङ्मुखी। आग्नेये च तथा भागे आयुधागारमिष्यते। महानसञ्च धर्मज्ञ! कर्मशालास्तथापराः। दक्षं पुरोधसः कार्यं वामतो राजवेश्मनः। मन्त्रिवेदविदाञ्चैव चिकित्साकर्तृ-रेव च। तत्रैव च तथा भागे कोषागारं विधीयते। गवां स्थानं तथैवात्र तुरगाणां तथैव च। उत्तराभिमुखी श्रेष्ठी तुरगाणां विधीयते। दक्षिणाभिमुखी वाथ परिशिष्टास्तु गर्हिताः। तुरगास्ते तथा धार्याः प्रदीपैः सार्वरात्रिकैः। कुक्कुटान् वानरांश्चैव मर्कटांश्च विशेषतः। धारयेद्यशालासु वत्सां धेनुमेव च। अजाश्च धार्या यत्नेन तुरगाणां हितैषिणा। गोगजाश्वादिशालासु तत्पुरीषस्य निर्गमः। अस्तं गते न कर्त्तव्यो देवदेवे दिवाकरे। तत्र तत्र यथास्थानं राजा विन्यस्य सारतः। दद्यादावसथस्थानं सर्वेषामनुपूर्वशः। योधानां शिल्पिनाञ्चैव सर्वेषामविशेषतः। दद्यादावसथान् दुर्गे कालमन्त्रविदां शुभान्। गोवैद्यानश्ववैद्यांश्च गजवैद्यांस्तथैव च। आहरेत् भक्तं राजा दुर्गे हि प्रवला रुजः। कृशीबलानां विप्राणां दुर्गे स्थानं विधीयते। न बन्धनामतो दुर्गे विना कार्यं तथा भवेत्। दुर्गे च तत्र कर्त्तव्या नानाप्रहरणान्विताः। सहस्रघातिनो राजंस्तेषु रक्षा विधीयते। दुर्गे द्वाराणि गुप्तानि कार्याण्यत्रापि च भूभुजा। सञ्चयश्चात्र सर्वेषामायुधानां प्रशस्यते। धनुषां क्षेपणीयानान्तोमराणां च पार्थिव!। शराणामथ खड्गानां कवचानां तथैव च। शतघ्नीनां गुडानाञ्च ऋष्टीनां परिघैः सह। अश्मनाञ्च प्रभूतानां सदराणां तथैव च। त्रिशूलानां पट्टिशानां कुठाराणाञ्च पार्थिव!। प्रासानाञ्च सशूलानां शक्तीनाञ्च नरोत्तम!। परश्वधानां चक्राणां वर्मणाञ्चर्मभिः सह। कुद्दालचुरवेत्राणां पीठकानान्तथैव च। तृणाणाञ्चैव दात्राणामङ्गाराणाञ्च सञ्चयः। सर्वेषां शिल्पिभाण्डानां सञ्चयश्चात्र चेष्यते। यादित्राणाञ्च सर्वेषामौषधीनान्तथैव च। यवसानां प्रभूतानामिन्धनस्य च सञ्चयः। गुडस्य सर्वतैलानां गोरसानान्तथैव च। वसानामथ मज्जानां स्नायूनामस्थिभिः सह। गोचर्मपटलानाञ्च धान्यानां सर्वतस्तथा। तथैवाभ्रपटानाञ्च यवगोधूमयोरपि। रज्जूनां सर्ववल्काणां लोहानामथशेषतः। कलायसङ्गमाषाणाञ्चणकानां तिलैः सह। तथा च सर्वशस्यानां पांशुगोमययोरपि। अपसव्यरसं भूजं जतुलाक्षा च टङ्कणम्। राजा सञ्चिनुयाद्दुर्गे यच्चान्यदपि किञ्चन। कृष्णाशीविषैः कार्या व्यालसिंहादयस्तथा। नृगाश्च पक्षिणश्चैव रक्षार्थे च परस्परम्। स्थानानि च विरूढानां तृणगुल्मानि पृथक् पृथक्। कर्त्तव्यानि महाभाग! यत्नेन पृथिवीक्षिता। उक्तानि चाप्यनुक्तानि राजद्रव्याण्यशेषतः। तृणगुल्मानि पुरे कार्याण्यत्रानां हितकाम्यया। जीवकर्षभकाकोलमाषलक्ष्माटरूपकान्। शालपर्णीं पृश्निपर्णीं मुद्गपर्णीं तथैव च। माषपर्णीं मदौ द्वौ च सारिवे द्वे बलात्रयम्। वारा श्वसनी द्वया च द्वन्दी कण्टकारिका। ह्रस्वी ह्रस्वाटकी द्रोणी वर्षाभूर्भरेणुका। मधुपर्णी विदार्यौ द्वे महाशीरा महातपाः। धन्वनः सहदेवाद्वा कटुकैरण्डकं विषः। पर्णी शताह्वा ह्रस्वीका फलगुखर्जूरयष्टिकाः। शुक्रातिशुक्रकाश्मर्यं क्षत्रातिक्षत्रवीरणाः। इक्षुरिक्षुविकाराश्च फाणिताद्याश्च सत्तम!। किंशी च सहदेवी च विश्वदेवाश्वरोधकम्। मधुकं पुष्पसंज्ञाख्या शतपुष्पा मधूलिका। शतावरीमधूके च पिप्पलं तालमेव च। आकुशुप्ता कटुफलाख्या दार्विका राजशीर्षकी। राजसर्षप धान्याकसक्थ्योक्षा तथोत्कटा। कालशाकं पद्मबीजं गोवल्ली मधुवल्लिका। शीतपाकी कुबेराक्षी काकजिह्वोड्डुम्बिका। पर्वतत्रपुसी चोभौ शुक्लातकपुनर्नवे। कसेरु कारुकाक्षीरी वल्ली शालूककेसरम्। तृणधान्यानि सर्वाणि शमीधान्यानि चैव हि। क्षीरं क्षौद्रं तथा तक्रं तैलं मज्जा वसा घृतम्। नीपश्चारिष्टकाक्षोडवातामसोमवाणकम्। एवमादीनि चान्यानि विद्येयो मधुरोगणः। राजा सञ्चिनुयात्सर्वं पुरे निरवशेषतः। दाडिमाम्रातकौ चैव

तिन्तिडीकाम्लवेतसम्। भव्यकर्कन्धुरक्तकरमर्दकरूपकम्। बीजपूरकखर्जूरे मालतीराजबन्धुकम्। कोलकद्वयपर्णानि द्वयोराम्रातयोरपि। पारावतं नागरकं प्राचीनोलकमेव च। कपित्थामलकं चुक्रं फलं दन्तशठस्य च। आम्रं नवनीतञ्च सौवीरकरुणोदके। सुरासवञ्च मद्यानि मण्डतक्रदधीनि च। गुक्तानि चैव सर्वाणि क्षेयमाम्लगणं द्विज!। एवमादीनि चान्यानि राजा सञ्चिनुयात् पुरे। सैन्धवोद्भिदपाठेयपाक्यमासद्रवोमकम्। कृष्णसौवर्चलविड् वालकेयं यवागूकम्। और्वं क्षारं कालभक्ष विद्धेयो लवणोगणः। एवमादीनि चान्यानि राजा सञ्चिनुयात् पुरे। पिप्पली पिप्पलीमूलचव्यचित्रकनागरम्। कुबेरकं मरीचकं शिग्रुभल्लातसर्षपाः। कुठाजमोदाकिंशिही हिङ्गुमूलकधान्यकम्। कारवीकुञ्चिका याज्या शुष्का काकमाचिका। फणिज्झकोऽथ लशुनं भूस्तृणं सुरसस्तथा। कायस्था च वयस्था च हरितालं मनःशिला। अम्लता च रुदन्ती च रोहिषं कुडुमं तथा। जया एरण्डकाण्डीरं सल्लकी कुञ्जिका तथा। सर्वे पित्तानि मूलानि प्रायो हरितकानि च। फलानि चैव हि तथा कुच्छ्रेला हिङ्गुपत्रिका। एवमादीनि चान्यानि राजा सञ्चिनुयाद्दुर्गे प्रयत्नेन नरोत्तम! शुक्लं चन्दनहीवेरजतमालकदारवः। दरिद्रानलदोशीरनक्तमालकदम्बकम्। दूर्वा पटोलकटुका दीर्घत्वक् पत्रकं वचा। किरततिक्तभूनिम्बी विम्बा चातिविषा तथा। तालीशपत्रतगरसप्तपर्णविकटुताः। काकोदुम्बरिका दिव्या तथा चैव सुरोत्पवा। षड्ग्रन्था रोहिणी सांसी पर्पटस्याथ दन्तिका। रक्तोत्पलं षट्करराजपत्री परिपेलवम्। दुःस्पर्शगुरुणी कामा श्यामाकं गन्धनाकुली। रूपपर्णी व्याघ्रनखं मञ्जिष्ठा चतुरङ्गुला। रम्भा वैशाखुरास्फोता तालास्फोता हरेणुका। वेतसस्तुम्बी विषाणी लोध्रपुष्पिणी। मालतीकरञ्जाख्या इक्षिका जीविता तथा। पर्षिका च गुडूची च स गन्धस्त्रिकसंज्ञकः। एवमादीनि चान्यानि राजा सञ्चिनुयात् पुरे। अभयामलके चोभे तथैव च विभीतकम्। प्रियङ्गुधातकीपुष्पं मोचाम्रा चार्जुनास्तनाः। अनन्ता स्त्री तुवरिका श्योना च कटफलं तथा। भूर्जपत्रं शिलापत्रं पाटलापत्रलोध्रकम्। समङ्गा बिल्वतामलकापीसगैरिकाञ्जनम्। बिल्वं समधुयष्टिं कुम्भिका कुसदीत्पलम्। रक्तोदुम्बरराजवृक्षकिंशुकाः शिंशुपा शमी। प्रियालधौनुकाम्बारिगिरीषाः पद्मकं तथा। बिल्वोऽग्निमन्थः शुचिश्च श्यामाकश्च वको धनम्। राजादनं करीरश्च धान्यकं प्रियकस्तथा। कक्कोलाशोकबदराः कदम्बखदिरद्वयम्। एषां पत्राणि सारांणि मूलानि कुसुमानि च। एवमादीनि चान्यानि कषायाख्यो मतो रसः। प्रयत्नेन नृपश्रेष्ठो राजा सञ्चिनुयात् पुरे। कीटाश्च मारणे योज्या व्यङ्गतायां तथैव च। वातघ्नाश्च मार्गाण्यां दूषणानि तथैव च। धार्याणि पार्थिवैर्दुर्गे तानि वक्ष्यामि पार्थिव! विषाणां धारणं कार्यं प्रयत्नेन महीभुजा। विचित्राश्चाकृदा धार्या विषस्य शमनास्तथा। रक्षोभूतपिशाचघ्नाः पापघ्नाः पुष्टिवर्धनाः। कालवदिव पुरुषाः पुरे धार्याः प्रयत्नतः। भीतान् प्रमत्तान् कुपितांस्तथैव च विमानितान्। कुब्धान् पापधीनांश्च न राजा वासयेत् पुरे। यन्त्रायुधाट्टालचयोपपन्नं समस्तधान्यौषधिसम्प्रयुक्तम्। बलिप्रजनैश्च हतप्रवेशं दुर्गं सुगुप्तं नृपतिः सदैव। मनुरुवाच। रक्षोघ्नानि विषघ्नानि यानि धार्याणि भूभुजा। अगदानि समाचक्ष्व तानि धर्मभृतां वर! सत्र उवाच। विल्वाटको यवक्षारं पाटला वाह्लिकोषणाः। श्रीपर्णी शङ्खपुष्पी युक्तो निकाथः प्रोक्षणं परम्। सविषं प्रोक्षितं तेन सद्यो भवति निर्विषम्। यवसैन्धवपानीयवल्लशय्यासनोदकम्। कवचाभरणं क्षत्रं बालव्यजनवेश्मनाम्। शैलः पाटलातिविषा शिग्रुमूर्वा पुनर्नवा। समङ्गाष्टपमूलञ्च कपित्थदशशोणितम्। मङ्गादनशठक्षुद्र प्रोक्षणं विषनाशनम्। लाक्षाप्रियङ्गुमञ्जिष्ठा समभेला हरेणुका। वट्प्राङ्गा मधुरा चैव बभ्रुपित्तेन कल्पिता। निक्षिप्तेष्टोविधाणस्थं सप्तरात्रं मङ्गोतले। ततः कृत्वा मणिं हैमं बद्धं कण्ठेन धारयेत्। संदष्टं सविषं तेन सद्यो भवति निर्विषम्। मनोह्वया शमीपत्रं तुम्बिका श्वेतसर्षपाः। कपित्थकुष्ठमञ्जिष्ठाः पित्तेन कृष्णकल्पिताः। शुनो गोः कपिलायाश्च सोम्याक्षिप्रोऽपरोगदः। विषजित् परमं कार्यं मणिरत्नञ्च पूर्ववत्। मूषिका जतुका चापि हंसे बद्धा विषापहा। हरेणुर्मांसी मञ्जिष्ठा रजनी मधुका मधु। अञ्जत्वक् सुरसं लाक्षा श्वचित्तं पूर्ववद् भवि। वादित्राणि पताकाश्च पिष्टैरेतैः प्रलेपिताः। श्रुत्वा हंसा समाघ्राय सद्यो भवति निर्विषः। त्रपूषणं पद्मवर्षं मञ्जिष्ठा रजनीद्वयम्। कुच्छ्रैला बिल्वतापत्रं विडङ्गानीन्द्रवारुणी। मधुकं वेतसं चौद्रं विषाणे च

निधापयेत्। तस्मादुष्णाम्बुना मात्रं प्रायुक्तं योजयेत्ततः। शुक्लं सर्जरसोपेताः सर्षपा एलाबालुकैः। सुवेगा नक्तकरवीरैः कुसुमैरर्जुनस्य च। धूपो वासगृहे हन्ति विषं स्थावरजङ्गमम्। न तत्र कीटा न विषं दर्दुरा न सरीसृपाः। न ह्यत्याकर्मणाक्षापि धूपोऽयं यत्र दह्यते। कल्पितैश्चन्दनक्षीरमक्षाशङ्खसवल्कलैः। मूर्वैलावालुसरलानाकुलीतण्डुलीयकैः। क्वाथः स विषकार्येषु काकमाचीयुतो हितः। रोचनापत्रनेपालीकुङ्कुमैस्त्रिलकान् वहन्। विषैर्न बाध्यते स्वाङ्ग नरनारीनृपप्रियः। धूपैर्हरिद्रामञ्जिष्ठाकिणिहीकणनिम्बजैः। दिग्धं निर्विषतामेति मात्रं सर्वविषार्दितम्। शिरीषस्य फलं पत्रं पुष्पं त्वङ्मूलमेव च। गोमूत्रयुक्तं हन्त्यगदः सर्वकर्मकरः स्मृतः। एकवीर! महौषध्यः शृणु चातः परं नृप! वन्ध्या कर्कोटकी राजन्! विष्णुक्रान्ता तथोत्कटा। शतमूली सितानन्दा वला मोचा पटोलिका। सोमावल्ली निशा चैव तथा दग्धरुहा च या। स्थले कमलिनी या च विशाखी शङ्खपुष्पिका। चण्डाली हस्तिशण्डा गोजापर्णी करम्भिका। रक्ता चैव महारक्ता तथा वह्निशिखा च या। कोशातकी नक्तमालं प्रियालश्च सुलोचनी। वारुणी वसुगन्धा च तथा वै गन्धनाकुली। ईश्वरी शिवगन्धा च श्यामला वंशनालिका! जतुकाली महा श्वेता श्वेता च मधुयष्टिका। वज्रकः पारिभद्रश्च तथा वै सिन्धुवारकाः। जीवानन्दा वसुच्छिद्रा नतनागरकण्टका। नागश्च जाती जाती च तथा च पटपत्रिका। कार्तस्वरं महानीला कुन्दुरुर्हंसपादिका। मण्डूकपर्णी वाराही हे तथा तण्डुलीयके। सर्पाक्षी नवनी ब्राह्मी विश्वरूपा सुखाकरा। रुद्राक्षपत्रा हस्तिकरी तथा चैव विशल्यदा। पत्रिका रोहिणी चैव नक्तमाला महौषधी। तथामलकपत्राकं श्यामाचित्रफला च या। काकोली क्षीरकाकोली पीलुपर्णी तथैव च। केशिनी हस्तिकाली च महानागा शतावरी। गरुडी च तथा जेया जले कुसुदिनी तथा। स्थले चोत्पलिनी या च महाभूमिलता च या। उन्मादिनी सोमराजी सर्वरत्नानि पार्थिव!। विशेषान्नरकतानि कीटपत्रं विशेषतः। जीवजाताश्च मनवः सर्वे धार्याः प्रयत्नतः। रक्षोघ्नाश्च विषघ्नाश्च ह्यत्यावेशनाशनाः। विशेषाच्चर नागाश्च गोखरोष्ट्रसमुद्भवाः। सर्पतित्तिरगोमायुवस्त्रमण्डूकजाश्च ये। सिंहव्याघ्रमार्जारहीपिशानरसंभवाः। कपिच्छला गजा वाजिमच्छिद्रैणभवाश्च ये। एतैश्चमैतैः सकलैरुपेतद्रव्यैश्च सर्वैः सपुरं सुरक्षितम्। राजा वसेत्तत्र गृहं सुशुभं गुणान्वितं लक्षणसंयुक्तम्। मनुरुवाच "राजारक्षारक्षणानि यानि दुर्गे निधापयेत्। कारयेद्वा महीभर्ता ब्रूहि तत्त्वानि तानि च। मत्स्य उवाच। शिरीषोदुम्बरप्लक्षबीजपूरं धनञ्जयम्। जुद्योगः कथितो राजन्! मासार्द्धं तु पुरातनैः। कशेरुफलमूलानि इक्षुमूलं तथा बिसम्। दूर्वाक्षीरयुतैर्मण्डः सिद्धोऽयं मासिकः परः। नरं मद्यहतं प्राप्तो न तस्य मरणं भवेत्। कल्पमात्रेण तत्र जनयेत्तु विभावसुम्। गृहे विरचयन्तु क्रियते यत्र पार्थिव!। नान्योऽग्निर्दह्यते तत्र नात्र कार्या विचारणा। कार्पासास्थ्या भुजङ्गस्य तेन निर्मोचनं भवेत्। सर्पनिर्वासने धूपः प्रशस्तः सततं गृहे। सारङ्गसैन्धवयवा विडुद्भवा च मृत्तिका। तथानुलिप्तं यद्वेश्म नाग्निना दह्यते नृप!। दिवा च दुर्गे रक्षोऽग्नि र्वाति वाते विशेषतः। विषाश्च रक्षोघ्नपतिस्तत्र युक्तिं निबोध मे। क्रीडानिमित्तं नृपतिर्धारयेन्मृगपक्षिणः। वस्त्रं वै प्राक् परीक्षेत वह्नौ चान्यत्रे च। वस्त्रं पुष्पमलङ्कारं भोजनाच्छादनं तथा। नापरीक्षितपूर्वन्तु स्पृशेदपि महामतिः। स्वाङ्गात्तौ वक्त्रमन्यः सोद्वेगश्च निरीक्षते। विषदोषश्च विषं दत्तं यच्च तत्र परीक्षते। स्वस्योत्तरीयो विमनाः स्वाम्बुकुड्यादिभिस्तथा। प्रच्छादयति चात्मानं लल्लते त्वरते तथा। भुवं विलिखति क्षीवां तथा चालयते नृप!। कण्डूयति च मूर्द्धानं परिलोडाननस्तथा। क्रियासु त्वरितो राजन्! विपरीतासु च ध्रुवम्। एवमादीनि चिह्नानि विषदोषे परीक्षयेत्। समाप्तैर्विधिभेदज्ञैर्मद्यं त्वरयान्वितैः। इन्द्रायुधसवर्णन्तु रूपं क्षोटसमन्वितम्। एकावर्तन्तु दुर्गन्धि भ्रमघूर्णटचटायते। तद्भूमेर्वनाच्छन्नोः शिरोरोगश्च जायते। सविषेऽन्ने विलीयन्ते न च पार्थिव! मक्षिकाः। निलीनाश्च विपद्यन्ते संसृष्टे सविषे तथा। विरज्यति चकोरस्य दृष्टिः पार्थिवसत्तम!। विकृतिश्च स्वरो याति कोकिलस्य तथा नृप!। गतिः स्खलति हंसस्य भृङ्गराजश्च कूजति। क्रोष्टा मदमवाप्नोति ह्रस्वाक्रन्दं रौति च। विक्रोशति शुको राजन्! सारिका वमते ततः। चामीकरोऽन्यतो याति स्वल्पं कारण्डवस्तथा। मेहते वानरो राजन्! म्लायते जीवजीवकः। कृष्णरोमा भवेद्भृङ्गः प्लवतश्चैव रोदिति। हर्षं मायाति च

शिखी विषसन्दर्शनान्नृप ! अन्नञ्च सविषं राजन्निरेष च विपद्यते । तदा भवति निःस्वाद्यं पचपर्युषितोपमम् । व्यापन्नरसगन्धञ्च चन्द्रिकाभिस्तथायुतम् । व्यञ्जनानान्तु शुष्कत्वं द्रवाणां बहुदोद्भवः । सस्नेहानां द्रव्याणां जायते फेनमालिता । सस्यराजिश्च ताम्रा स्यात् नीला च पयसस्तथा । कोकिलाभा च मद्यस्य तोयस्य च नृपोत्तम ! धान्याम्लस्य तथा कृष्णा कपिला कोद्रवस्य च । मधुश्यामा च तक्रस्य नीला पीता तथैव च । इतस्तोदकसङ्काशा कपोताभा च सत्तनुः । क्षरिता माक्षिकस्यापि तैलस्य च तथाऽरुणा । फलानामप्यपक्वानां पाकः क्षिप्रं प्रजायते । प्रकोपश्चैव पक्वानां माल्यानां म्लानता तथा । मृदुता कठिनानां स्यात् मृदूनाञ्च विपर्ययः । सूक्ष्माणां रूपदर्शनं तथा चैवातिरूक्षता । श्यामसङ्कुलता चैव वस्त्राणां वै तथैव च । लोहानाञ्च मणीनाञ्च मलपङ्कोपदिग्धता । अनुलेपनगन्धानां माल्यानाञ्च नृपोत्तम ! । विगन्धता च विज्ञेया तथा राजन् ! जलस्य तु । दन्तकाष्ठत्वचः श्यामास्तनुसत्वास्तथैव च । एवमादीनि चिह्नानि विज्ञेयानि नृपोत्तम ! । तस्माद्राजा सदा तिष्ठेत् मन्त्रिमन्त्रौषधीगणैः । उक्तैः संरक्षितो राजा प्रमादपरिवर्जकः । प्रजातरोर्मूलमिहावनीशस्तद्रक्षणाद्राक्षसपैति हृद्धिम् । तस्मात् प्रयत्नेन नृपस्य रक्षा सर्वैश्च कार्या रविवंशचन्द्र !" दुर्गशुभाशुभलक्षणञ्च कालिकापुराणे ८६ अ० यथा

दुर्गांस्तु सततं कुर्यात् प्राकाराट्टालतोरणैः । भूमिताम्रगराड्राजा दुर्गे दुर्गाश्रयं चरेत् । दुर्गं वसेन्नृपाणान्तु नित्यं दुर्गं प्रशस्यते । शतमेको योधयति दुर्गस्थादी धनुर्धरः । शतं दशसहस्राणि तस्मात् दुर्गं प्रशस्यते । जलदुर्गं भूमिदुर्गं इष्टदुर्गं तथैव च । वरण्यवनदुर्गञ्च शैलजं परिखोद्भवम् । दुर्गं कार्यं नृपतिना यथायोग्यं स्वदेशतः । दुर्गं कुर्वन् पुरं कुर्यात् त्रिकोणं धनुराकृति । वर्तुलं वा चतुष्कोणं नान्यथा नगरं चरेत् । मृदङ्गाकृति दुर्गञ्च सततं कुलनाशनम् । यथा राक्षसराजस्य लङ्का दुर्गान्विता पुरा । वलेः पुरी श्रोणिताख्या तेजो दुर्गे प्रतिष्ठितम् । यतस्तत् व्यजनाकारमतो भटः श्रियो वलिः । सौभाग्यं शाल्वराजस्य नगरं पद्मकोषकम् । दिवि यद्वर्त्तते राजंस्तच्च भटं भविष्यति । यच्चायोध्याद्भुतं भूप ! पुरमिक्ष्वाकुभूभुजाम् । धनुराकृति तच्चापि ततोऽभूद्विजयप्रदम् । दुर्गभूमौ यजेद्दुर्गां दिक्पालांश्चैव द्वारतः । पूजयित्वा विधानेन जयं भूपः समाप्नुयात् । ततो दुर्गं नृपः कुर्यात् सततं जयवृद्धये" । अधिकं दुर्गकर्मशब्दे दृश्यम् २असुरभेदे तत्कथा काशीख० ७० अ०

"दुर्गोनाम महादैत्यो रुरुदैत्याङ्गजोऽभवत् । यतस्तेन तपस्तीव्रं पुंभ्योऽजेयत्वमाप्तवान् । ततस्तेनाखिला लोका भूर्भुवःस्वस्त्रयोऽपि । स्वसात्कृता विनिर्जित्य रणे स्वभुजसारतः !" ३देवीभेदे स्त्री

दुर्गासुरहननात् देव्या दुर्गेति नामाभूत् यथाह तत्रैव ७२ अ० "अद्य प्रभृति मे नाम दुर्गेति ख्यातिमेष्यति । दुर्गदैत्यस्य समरे घातनादतिदुर्गमात्" दुर्गासुरस्यैव नामान्तरं दुर्गम इति । "तत्रैव च वधिष्यामि दुर्गमाख्यं महासुरम् । दुर्गादेवीति विख्यातं तन्मे नाम भविष्यति" देवीमा० । तत्र-शाकम्बरीप्रादुर्भावयुगे स च वैवस्वतमन्वन्तरे चत्वारिंशत्तमयुगकालः यथोक्तं लक्ष्मीतन्त्रे वैवस्वतमन्वन्तरसङ्ग्रा "तस्मिंश्चैवान्तरे शक्र ! चत्वारिंशत्तमे युगे" शताक्षीशाकम्भर्योरवतारसङ्ग्रा तत्रैव दुर्गासुरवधेन दुर्गानामताप्राप्तिरुक्ता । तेन श्वेतवराहकल्पे साऽद्यापि न प्रादुर्भूता कल्पान्तरे तस्याः प्रादुर्भावेण तस्या इदानीमर्चनीयतेति बोध्यम् । दुर्गाशब्दस्यान्यापि निरुक्तिरन्यत्र दर्शिता प्रसङ्गादिहोच्यते यथा

"दुर्गा दैत्ये ४महाविघ्ने ५भवबन्धे ६दुष्कर्मणि । ७शोके ८दुःखे च ९नरके १०यमदण्डे च ११जन्मनि । १२महाभयेऽतिरोगे १३चाप्याशब्दो हन्तृवाचकः । एतान् हन्त्येव या देवी सा दुर्गा परिकीर्तिता" । अपिच "दैत्यनाशार्थवचनो दकारः परिकीर्त्तितः । उकारो विघ्ननाशस्य वाचको वेदसम्मतः । रेफो रोगघ्नवचनोगश्च पापघ्नवाचकः । भयशत्रुघ्नवचनश्चाकारः परिकीर्त्तितः । श्रवणात्कीर्त्तनाद्वा यस्या एते नश्यन्ति निश्चितम् । ततो दुर्गा हरेः शक्तिर्हरिणा परिकीर्तिता" । "दुर्गेति दैत्यवचनोऽप्याकारो नाशवाचकः । दुर्गं नाशयते या तु सा दुर्गा परिकीर्तिता" । विपत्तिवाचको दुर्गश्चाकारो नाशवाचकः । तं ननाश पुरा तेन वधे दुर्गा प्रकीर्त्तिता" । अस्याः स्थानं कृष्णावेणातङ्गभद्रयो र्मध्यभागे सह्याद्रेरीषत्प्राच्यां प्रसिद्धम् । "सर्वस्मृतिषु शक्तिः सा दुर्गेति च पठ्यते" यथा सप्तशतीमायाम् "भूतानि दुर्गा भुवनानि दुर्गा नराः स्त्रियश्चापि सुरा सुरादिकम् । यद्यद्धि दृश्यं खलु सैव दुर्गा दुर्गासह-

पादपरं न किञ्चिदिति" शब्दार्थचिन्तामणिधृतेषु महाविघ्नादिषु च पु० ३३गुग्गुलौ राजनि० ३४दुर्गसमाधौ त्रि० ३५दुर्गेऽये ३६परमेश्वरे पु० "दुर्गमो दुर्गमो दुर्गो दुरावासो दुरारिहः" विष्णुसं०। "अनरायप्रतिकृतैर्दुराप्यते इति दुर्गे" भा०

**दुर्गकर्मन्** न०दुर्गार्थं दुर्गे वा कर्म कार्यम्। भा०शा०८६अ० उक्ते दुर्गसाधनकर्मभेदे यथा

"तस्मात्ते वर्तयिष्यामि दुर्गकर्म विशेषतः। श्रुत्वा तथा विधातव्यमनुष्ठेयञ्च यत्नतः। षड्विधं दुर्गमास्थाय पुराण्यथ निवेशयेत्। सर्वसस्यप्रधानं यद्वाङ्ख्यञ्चापि सम्भवेत्। धन्वदुर्गं महीदुर्गं गिरिदुर्गं तथैव च। मनुष्यदुर्गं भूदुर्गं वनदुर्गञ्च तानि षट्। यत् पुरं दुर्गसम्पन्नं धान्यायुधसमन्वितम्। दृढप्राकारपरिखं कृत्स्नशस्त्रशतघ्नकम्। विद्वांसः शिल्पिनो यत्र निचयाश्च सुचिन्तिताः। धार्मिकश्च जनो यत्र दाक्षश्चोत्तमसंस्थितः। अर्जस्विनरनागाश्वं चतुरापणशोभितम्। प्रसिद्धव्यवहारञ्च प्रधानमकुतोभयम्। सुप्रभं शान्तनादञ्च सुप्रशस्तनिवेशनम्। शूराढ्यजनसम्पन्नं ब्रह्मघोषानुनादितम्। समाजोत्सवसम्पन्नं सदा पूजितदेवतम्। यद्यामात्यवतो राजा तत् पुरं स्वयमाविशेत्। तत्र कोषं बलं मित्रं व्यवहारञ्च वर्द्धयेत्। पुरे जनपदे चैव सर्वदोषाश्चिवर्त्तयेत्। भाण्डागारायुधागारं प्रयत्नेनाभिवर्द्धयेत्। निचयान् वर्द्धयेत् सर्वांस्तथा मन्त्रायुधावहान्। काष्ठलोहतुषाङ्गारदारुहङ्गास्थिवैद्यवान्। मज्जास्नेहवसाचोद्भौषधस्नायुमेव च। शस्त्रं सर्जरसस्नायुमायुधानि शरांस्तथा। चर्मस्नायुं तथा वेत्रं सज्जवल्लजबन्धनान्। आशयाश्चोदपानाश्च प्रभूता सलिलाकराः। निरोद्धव्याः सदा राज्ञा चोरिकाश्च मही[illegible]हाः। सत्कृताश्च प्रयत्नेन आचार्यर्त्विक्पुरोहिताः। महेष्वासाः स्वपतयः सांयुगरचिकित्सकाः। प्राज्ञा मेधाविनो दान्ता दक्षाः शूरा बहुश्रुताः। कुलीनाः सत्त्वसम्पन्ना युक्ताः सर्वेषु कर्मसु। पूजयेद्धार्मिकान् राजा निगृह्णीयादधार्मिकान्। नियुञ्ज्याच्च प्रयत्नेन सर्वस्थानेषु स्वकर्मसु। बाह्यमाभ्यन्तरञ्चैव पौरं जानपदं तथा। चारैः सुविदितं कृत्वा ततः कर्म प्रयोजयेत्। चरान् मन्त्रञ्च कोषञ्च दण्डञ्चैव विशेषतः। चतुर्तिष्ठेत् स्वयं राजा सर्वं ह्यत्र प्रतिष्ठितम्। उदासीनारिमित्राणां सर्वमेव त्रिकीर्त्तितम्। पुरे जनपदे चैव ज्ञातव्यं चारचक्षुषा। ततस्तेषां विधातव्यं सर्वमेवाप्रमादतः। भक्तान् पूजयता नित्यं द्विषतश्च निग्रहता। यज्ञैश्च क्रतुभिर्नित्यं दातव्यञ्चाप्यपीडया। प्रजानां रक्षणं कार्यं न कार्यं धर्मबाधकम्। क्षपणानाञ्च दीनानां विधवानाञ्च योषिताम्। योगक्षेमञ्च वृत्तिञ्च नित्यमेव प्रकल्पयेत्। आश्रमेषु यथाकालं चेलभाजनभोजनम्। सदैवोपकरेद्राजा सत्कृत्याभ्यर्च्य मान्य च। आत्मानं सर्वकार्येषु तापसे राष्ट्रमेव च। निवेदयेत् प्रयत्नेन तिष्ठेत् प्रह्वश्च सर्वदा। सर्वार्थत्यागिनां राजा कुले जातं बहुश्रुतम्। पूजयेत्तादृशं दृष्ट्वा शयनासनभोजनैः। तस्मिन् कुर्वीत विश्वासं राजा कस्याञ्चिदापदि। तापसेषु हि विश्वासमपि कुर्वन्ति दस्यवः। तस्मिन् निधीनादधीत मन्त्रां पर्यादधीत च। न चापि तीक्ष्णं सेवेत भृशं वा प्रतिपूजयेत्। अन्यः कार्यः स्वराष्ट्रेषु परराष्ट्रेषु चापरः। अटवीषु परः कार्यः सामन्तनगरेष्वपि। तेषु सत्कारमानाभ्यां संविभागांश्च कारयेत्। परराष्ट्राटवीस्थेषु यथा स्वविषये तथा। ते कस्याञ्चिदवस्थायां शरण्यं शरण्यार्थिने। राज्ञे दद्युर्यथाकामं तापसाः संशितव्रताः। एष ते लक्षणोद्देशः सङ्क्षेपेण प्रकीर्त्तितः। याहशे नगरे राजा स्वयमावस्तुमर्हति"।

**दुर्गकारक** पु० दुर्गं करोति वेष्टनेन कृ-ण्वुल्। १दुर्गभेदे। २दुर्गकर्त्तरि त्रि०।

**दुर्गत** त्रि० दुर्गच्छति दुर्+गम-कर्त्तरि क्त। १दरिद्रे २दैन्यङ्गते च अमरः। "समाश्वसिमि केनाहं कथं प्राप्तिस दुर्गतः" भट्टिः। "निधानकुम्भस्य यथैव दुर्गतः" सा०द०।

**दुर्गतरणी** स्त्री दुर्गं तीर्यतेऽनया तॄ-करणे ल्युट् ह्रस्व ङीप्। देवीभेदे "सावित्री दुर्गतरणी वीणा सप्तविधा तथा" भा०स०११अ०ब्रह्मस्वभावर्णने। २दुर्गतरणसाधने त्रि०

**दुर्गति** स्त्री दुष्टा गतिः प्रा०स०। १नरके अमरः। २दारिद्र्ये मेदि०। "न दुर्गतिमवाप्नोति स्वर्गलोकञ्च गच्छति" भा०शा० ५५८२श्लो० दुःस्थिता गतिरस्य प्रा०ब०। ३तद्युते त्रि०।

**दुर्गतिनाशिनी** स्त्री दुर्गतिं नाशयति नाश-णिनि ह्रस्व ङीप्। दुर्गादेव्याम्। "ब्रह्माण्डविजयस्यास्य कवचस्य प्रजापतिः। ऋषिश्छन्दश्च गायत्री देवी दुर्गतिनाशिनी" ब्रह्मवै०मखे०ख०। २दुर्गतिनाशके त्रि०स्त्रियां ङीप्।

**दुर्गन्ध** पु० दुःस्थितो गन्धोऽस्य प्रा०ब०। १सौवर्चलक्षारे हेम०। २दुष्टगन्धयुक्ते त्रि०। प्रा०स०। ३दुष्टे गन्धे "मांस-

मेदोऽस्थिदुर्गन्धा" हरिवं ५३अ० "सुगन्धं वेत्ति दुर्गन्धं दुर्गन्धस्य सुगन्धिताम्", सुश्रुतः।

दुर्गन्धाङ्ग त्रि०दुर्गन्धोऽङ्गे यस्य। पूतिगन्धान्वितदेहके स्त्रियां ङीप्। भावा० सौगन्धिकपुष्पाहरणेन तद्गन्धतेत्यु-क्तम् यथा "सौगन्धिकस्य हरणात् दुर्गन्धाङ्गः प्रजायते"

दुर्गन्धिन् त्रि० दुर्गन्धोऽस्यास्ति दुर्गन्ध+इनि "तेन न कर्म-धारयात् मत्वर्थीयो बहुव्रीहिर्दुर्गन्धप्रतिषेधकरः" इत्यस्य न प्रवृत्तिः। १दुष्टगन्धयुक्ते त्रि० राजनि०। "चर्मावनद्धं दुर्गन्धि पूर्णं मूत्रपुरीषयोः" मनुः। स्त्रियां ङीप्।

दुर्गपति पु० ६त०। १दुर्गरक्षके दुर्गाध्यक्षभेदे। २दुर्गस्वामिनि च। "वयं जयेम हेलाभिर्दस्यून् दुर्गपतिर्यथा" भाग० २।१४।१८

दुर्गपाल पु० दुर्गं दुर्गं वा पालयति पाल-अण् उप०स०। १दुर्गरक्षके "यद्वोऽसुराणामसि दुर्गपालो विश्वाभि-वन्द्यैरभिवन्दितार्हणः" भाग० ८।२२।५। २दुर्गरक्षके च

दुर्गपुष्पी स्त्री दुर्गं पुष्पमस्याः जातित्वात् ङीष्। (केशपुष्पा) ख्याते क्षुपभेदे शब्दच०।

दुर्गम पु० दुःखेन गम्यतेऽसौ दुर्+गम-कर्मणि खल्। १दुर्ग-नामासुरभेदे "दुर्गमाख्यं महासुरम्" देवीभा०। २दुर्गम-नीये त्रि०। "कान्तारोदकं दुर्गमम्" अमरः। ३दुर्गेऽपि च ४परमेश्वरे पु० दुर्गशब्दे दृश्यम् "दुःखेन गम्यते प्राप्यते इति दुर्गमः" भाष्ये तन्नामनिरुक्तिः।

दुर्गल पु० दुःस्थितो गलो यत्र बोकानाम्। देशभेदे "दुर्गलाः प्रतिमास्याश्च कुलत्थाः कोशलास्तथा" भा० भी० ६अ० जनपदोक्तौ। सोऽभिजनोऽस्य तस्य राज्ञो वा अण्। दौर्गल पित्रादिक्रमेण तद्देशवासिनि तद्भूमौ च। बहुषु अण्लुक्। दुर्गला इत्येव।

दुर्गलङ्घन पुंस्त्री० दुर्गं लङ्घ्यतेऽनेन लङ्घि-करणे ल्युट्। उद्दे हेमच० स्त्रियां जातित्वात् ङीष्।

दुर्गसंस्कार पु० ६त०। प्रतिपक्षस्य युद्धार्थोद्योगे राज्ञा स्वदु-र्गस्य भग्नप्रायस्य पुनर्नवीकरणे "अतो दुर्गसंस्कारे यत्नः कार्य्यो हि कौशदीमहोत्सवेन" इति सुहारा०

दुर्गसञ्चर पु० दुर्गं संचर्यतेऽनेन सम्+चर-करणे अप्। (सांको) संक्रमे हेमच०चक्र्। दुर्गसंञ्चारोऽत्र अमर-टीकायां क्षीरस्वामी

दुर्गसिंह पु० कलापपरिशिष्टकारे विद्वद्भेदे

दुर्गा स्त्री दुर्गशब्दोक्ते १देवीभेदे तच्चिरन्तनादिकं तत्र दर्शि-तम्। २नीलीवृक्षे मेदि०। ३अपराजितायाम् शब्दच० ४श्यामालतायां राजनि०। ५हिमालयकन्यायाञ्च "सा दुर्गा मेनकाकन्या दैत्यदुर्गतिनाशिनी" ब्रह्मवै०३०

दुर्गाठ त्रि० दुर्+गाह-कर्मणि क्त। कष्टेनावगाह्ये "दु-र्गाठो नवमार्गोऽयमित्याकुलाहिदोजनाः" हरिवं०२३६अ०

दुर्गाध्यक्ष पु० ६त०। दुर्गरक्षके सेनाभेदे "अनाद्यार्यश्च शूरश्च तथा प्राप्तः कुलोद्भवः। दुर्गाध्यक्षः स्मृतो राज्ञ उद्युक्तः सर्वकर्मसु" मत्स्यपु० तल्लक्षणमुक्तम्।

दुर्गानवमी स्त्री दुर्गाप्रिया तत्पूजाङ्गत्वात् नवमी। कार्तिकशुक्लपक्षीयनवम्याम्। दुर्गाया इयम् अण् ङीप्। दौर्गी तत्पूजयाङ्गनवमीतिथौ "श्रावणे दौर्गनवमी दुर्गा चैव हुताशनी। पूर्वविद्धैव कर्तव्या शिवरात्रिर्बलेर्दिनम्" ति०त०। तत्पूजाविधानादि दौर्गोतन्त्रे यथा

"कार्तिकेऽमलपक्षे च नवम्यान्तु विशेषतः। षट्पुत्रां तु जगद्धात्रीं पूजयेद् दीपमालया" तन्त्रान्तरे "त्रिकालं पूजयेद्दुर्गां मनुनैकाक्षरेण (दुं) च। नानाबलिविधानेन गीतवाद्यपुरःसरम्। कार्तिकस्य सिते पक्षे नवम्यान्तु विशेषतः। कृत्वैवं साधकश्रेष्ठो लभेद्राज्यमकण्टकम्" कुब्जिकातन्त्रे "कार्त्तिके शुक्लपक्षे तु नवम्यां जगद-म्बिकाम्। दुर्गां प्रपूजयेद् भक्त्या धर्मकामार्थसिद्धये। भक्तिसङ्गमतन्त्रे "कार्तिकस्य सिते पक्षे नवम्यां जगदी-श्वरीम्। त्रिकालमेककालं वा वर्षे वर्षे प्रपूजयेत्। निर्माय प्रतिमां भक्त्या जगद्धात्र्या विधानतः। पूज-यित्वा परदिने प्रतिमां तां विसर्जयेत्। एवं कृत्वा चक्र वर्त्ती भवेत् साधकसत्तमः। पुत्रपौत्रधनैश्वर्यैर्युतास्य भवेत् पुरी। दासदासीगणैर्युक्तो मुक्तः स्यात् पापसङ्कटात्। विशेषतः वत्सयुतां नवमीं प्राप्य सा-धकः। पूजयित्वा सुवर्णमयीं तां लभते वाञ्छितं फलम्" भविष्ये "मासैश्चतुर्भिर्यत् पुण्यं विधिनाऽऽपूज्य चण्डि-काम्। तत् फलं लभते धीर! नवम्यां कार्तिकस्य च"। अधिकं जगद्धात्रीशब्दे ३०७४पृ०दृश्यम्।

दुर्गास्मरण न० "दुर्गां जगदिदं सर्वं दुर्गा सर्वस्य कार-णम्। अतश्च दुर्गेत्येवं यत् तद्दुर्गास्मरणं विदुः" इत्युक्ते चिन्तनभेदे।

दुर्गाह्व पु० दुर्गा आह्वास्य। भूमिजसुमसुतौ राजनि०।

दुर्गृभि त्रि० दुःखेन गृह्यतेऽसौ दुर्+ग्रह-बा० कर्मणि कि सम्प्रसारणम् नेदे हस्य भः। दुर्गाह्वे यज्ञी-तमशब्दे "न ब्रह्मादविधाय दुर्गृभिः" ऋ० १।१४०।६ "हस्य व्रतमेषे दुर्गृभिवनः" १।५२।६ "दुर्गृभिवनः

दुर्ग(र्ग)व्यापनः" भा० ऋ० व्याप्तौ वा० वन भक्त०।

दुर्गोत्सव पु० ६त०। दुर्गाया देवीभेदस्य पूजानिमित्ते उत्सवे स च शारदिकः वासन्तिकश्च।

दुर्ग्रह त्रि० दुःखेन ग्रह्यतेऽसौ दुर्+ग्रह-कर्मणि खल्। १दुःखेन ग्राह्ये २दुर्ज्ञेये ३दुरासदे "दुर्गाणि दुर्ग्रहाण्यासन् तस्य रोद्धुरपि द्विषाम्" रघुः। ४अपामार्गे स्त्री शब्दार्थचि०।

दुर्ग्राह्य त्रि० दुर्+ग्रह-कर्मणि यत्। अतीतमशक्ये दुःखेन ग्राह्ये "जग्राह तद्धनूरत्नं दुर्ग्राह्यं दैवतैरपि" हरिवं० ८३अ०।

दुर्घट त्रि० दुर्+घट-कर्मणि खल्। घटयितुमशक्ये दुःसंपाद्ये। "कोऽन्वर्थो दुर्घट इव भवति खरूपहवाभावात्" भाग० ६।६।३४

दुर्घोष पुंस्त्री० दुष्टो घोषोऽस्य। १भङ्गुरे राजनि० स्त्रियां जातित्वात् ङीष्। २दुष्टशब्दयुक्ते त्रि० स्त्रियां टाप्। प्रा०स०। ३दुष्टे शब्दे पु०

दुर्जन पु०दुष्टो जनः प्रा०स०। खलपुरुषे "दुर्जनः परिहर्त्तव्यो विद्यया भूषितोऽपि सः। मणिना भूषितः सर्पः किमसौ न भयङ्करः" चाण०। "ग्राम्येतु प्रत्यपकारेण नोपकारेण दुर्जनः" कुमा०। "यानं दुर्जनसंसर्गः पत्या च विरहो वनम्" मनुः ऋगा०। दुर्+जन+ण्यर्थे क्विप्। दुर्जनायते यदुर्जनो दुर्जनो भवतीत्यर्थः।

दुर्जय त्रि०दुःखेन जीयतेऽसौ दुर्+जि-कर्मणि खल्। १जेतुमशक्ये दुःखेन जेतव्ये। २परमेश्वरे पु० "समाहतो निहत्तात्मा दुर्जयो दुरतिक्रमः" विष्णुसं०। "क्लेशांश्च विविधांस्तांस्तान् सह्यमेव च दुर्जयम्" मनुः ३कार्त्तवीर्यवंश्ये जनमेजयपुत्रे ऋषभेदे कूर्मपु०

दुर्जयन्त पु० ऋषभेदे। विष्णुपु०

दुर्जर त्रि० दुःखेन जीर्यति जॄ-अच्। दुःखेन जीर्यति "याहिषो वातला रूक्षा दुर्जरा तक्रकुक्षिका" सुश्रु० "कफप्रकोपि तन्नव्यं दुर्जरञ्च विशेषतः" सुश्रु०। २ज्योतिष्मतीलतायाम् स्त्री राजनि०

दुर्जात न० दुष्टं जातम् प्रा०स०। व्यसने "दुर्जातबन्धुरयमच्छरीरोरोमे" रघुः। २असम्यग्जाते त्रि०मेदि० ३असमञ्जसे त्रि० त्रिका०। "यो न यातयते वैरमत्यमर्षोद्यमः पुमान्। अफलं जन्म तस्याहं मन्ये दुर्जातजायिनः" भा०व० २५अ० "दुष्कुलेयस्तया मूढो दुर्जातः शक्र! दृश्यते" भा०शा० ८।२०श्लो०

दुर्जाति त्रि० दुःस्थिता जातिरस्य प्रा०ब०। निन्दितवंश्ये "दुर्जातेः सुतपुत्रस्य शकृनेः। सौवलस्य च" भा०उ० ४८अ०। दुःस्थिता जातिर्जन्म यस्य प्रा०ब०। २निन्दितजनिके त्रि० "रुदितमरथा दुर्जातीनां सहस्य रुषां फलम्" रामरुद्र० दुष्टा जातिः प्रा०स०। ३दुष्टायां जातौ तत्र भवः अ०। दुर्जातीय दुष्टजातिभवे। "दुर्जातयेन येन त्वमीदृशोजनितः सुतः" हरिवं० ८०अ०

दुर्जीव त्रि० दुःस्थितो जीवो जीवनोपायो यस्य प्रा०ब०। १परभक्षादुपजीविनि। "यथा च मन्ये दुर्जीवमेवं न सुकरं ध्रुवम्" रामा०२५६अ०। दुर्+जीव-भावे खल्। २निन्दितजीवने न० "सुजीवं तस्य तस्यैव यः परैरुपजीव्यते। राम! तस्य तु दुर्जीवं यः परानुपजीवति" रामा०२।१०५।५ दुःखं जीवति दुर्+जीव-क्विप्। ३परायत्ततया जीविनि त्रि० "सर्वं परवशं दुःखमिति" मनूक्तेः जीवनस्य पराधीनत्वे दुःखहेतुत्वात् तज्जीवनस्य तथात्वोक्तिः।

दुर्ज्ञेय त्रि० दुःखेन ज्ञायते ज्ञा+कर्मणि यत्। ज्ञातुमशक्ये दुःखेन ज्ञेये "उच्चावचेषु भूतेषु दुर्ज्ञेयामकृतात्मभिः" मनुः।

दुर्ण(र्न)य पु० दुष्टो नयः प्रा०स०। अन्यायम्। १दुष्टायां नीतौ दुःस्थितो नयोऽस्य प्रा०ब०। २तद्युते त्रि०। "चन्द्रज्योत्स्नेव दुर्नयस्य फलोदयः" हरिवं० ५१०अ० अत्राणत्वमेव न्याय्यम् पूर्वपदात् संज्ञायामेव णत्वविधानात् दुर्+नी-अचि तु णत्वमेव णत्वविधौ दुरः प्रतिषेधात्।

दुर्णग्न त्रि० दुःखेन नश्यति दुर्+नश-क्त बेदे णत्वम्। क्तस्येच नटे "परएकेन दुर्णशं चिदर्वाक्" ऋग० ५।११।७ लोके तु दुर्नश इत्येवाणत्वयुक्तः।

दु(र्णा)र्नामन् स्त्री दुःस्थितं नामास्य पूर्वपदात् संज्ञायां णत्वे प्राप्ते नुम्भादेराकृतिगणत्वात् न णत्वमिति केचिद् वेदे तु णत्वमध्यपाठो दृश्यते। दोषकोषिकायां (झिनुक) ख्याते १पदार्थे अमरः २ऋणरोगे च राजनि० तद्रोगस्यातिपातकत्वेनात्यन्तमेवाकीर्तनीयत्वेन निन्दितत्वात् तथात्वम् "ऋणो वा यस्ते गर्भं दुर्णामा योनिमाशये" ऋ० १०।१६२।३। "क्षणोम्यस्मै भेषजं वजं दुर्णामचातनम्"। "दुर्णामा च सुनामा चोभा संहतमिच्छतः" अथ०८।६।३। या डाप् दुर्नामा उपधालोपित्वात् पक्षे ङीष् उपधालोपे दुर्नाम्नी

दुर्दम त्रि० दुःखेन दम्यतेऽसौ दुर्+दम-कर्मणि खल्। दमयितुमशक्ये "सकृत्पाशावकीर्णास्ते न भविष्यन्ति दुर्दमाः" भा०शा०८८अ०। २रोहिणीगर्भजाते वसुदेवात्मजभेदे

"पौरवी रोहिणी नाम वाह्लीकस्यात्मजाऽभवत् । ज्येष्ठा पत्नी महाराज ! दयितानकदुन्दुभेः । जेभे ज्येष्ठं सुतं रामं शारणं शठमेव च । दुर्दमं दमनं श्वभ्रं पिण्डारकसुशीनरम् । चित्रां नाम कुमारीञ्च रोहिणी-तनयान् दश" हरिवं० ३६ अ०

**दुर्दमन** त्रि०दुःखेन दम्यतेऽसौ वा० युच् दुःखेन दमनं यस्य वा । १दुःखेन दमनीये २जनमेजयवंशजे कलियुगीये शतानीकात्मजे नृपभेदे । "तिमेर्हृदश्वसख्याच्छतानीकः सुदाश्वजः । शतानीकाद् दुर्दमनस्तस्यापत्यं महीनरः" भाग० ६। २२।२६

**दुर्दर्श** त्रि० दुःखेन दृश्यतेऽसौ दुर्+दृश–कर्मणि खल् । द्रष्टुमशक्ये दुःखेन दर्शनयोग्ये । "सुदुर्दर्शमिदं रूपं दृष्टवानसि यन्मम" गीता । "तं दुर्दर्शं गूढमनुप्रविष्टं गुहाहितं गह्वरेष्ठम् पुराणम्" कठो० वेदे तु दुःखेन दर्शोदर्शनमस्येत्येव वाक्यम "भाषायां शासियुधिदृशि-क्षिस्पृहिभ्यो युच्" पा० भाषायामेव युचो विधानात् । भाषायां तु युच् । दुर्दर्शन तत्रार्थे त्रि० "विशेषतस्तात दुर्दर्शनानि परुषाणि" सुश्रु० ।

**दुर्दान्त** त्रि० दुःखेन दान्तः दमितः दमि–क्त वा नि० । दुःखेन दमनीये १अशान्ते "एनसा युज्यते राजा दुर्दान्त इति चोच्यते" भा०शा०२४अ० । २कलहे ३वत्सतरे च राजनि० ४शिवे पु० "दीक्षितोऽदीक्षितः शान्तो दुर्दान्तोदान्तनाशनः" भा० शा० २८६अ० शिवनामोक्तौ

**दुर्दिन** न०दुःष्टं दिनम् प्रा०स०। १मेघाच्छन्ने २दिने अमरः दिनस्य प्रकाशकत्वेन मेघावरणेन तथात्वाभावात् तस्य दुष्टत्वम् । "१घनान्धकारे ४दुष्टौ च दुर्दिनं कवयो विदुः" साहसः । "दिनस्य अहोरात्रपरत्वेन च रात्रे-रपि दुर्दिनशब्दवाच्यता । तत्र घनान्धकारे "अनभिज्ञास्त्रियाणां दुर्दिनेष्वभिसारिकाः" कुमा० वर्णने "द्विषां विघ्नञ्च काकुत्स्थः तत्र नाराचदुर्दिनम्" । "न प्रसेहे निरुद्धार्कमधारावर्षदुर्दिनम्" रघुः ५दुष्टे दिनमात्रे "यदच्युतकथालापरसपीयूषवर्जितम् । तद्दिनं दुर्दिनं प्रोक्तं मेघाच्छन्नं न दुर्दिनम्" शब्दार्थचि०धृतम् ।

**दुर्दुरूट** त्रि० दुर्+दुल–उत्क्षेपणे कूट पृषो०णिलोपः तस्य रः । १नास्तिके जटा० "कुत्सितानि कुत्सनैः" पा० अस्य समासे परनिपातः मीमांसकदुर्दुरूटः नास्तिकमीमांसक इत्यर्थः तस्य ईश्वरप्रतिषेधेन नास्तिकत्वात् निन्दनीय-त्वेन तद्वाचकशब्दस्य परनिपातः ।

**दुर्द्रीक** न० दुर्+दृश–वा०कर्मणि ईकक् । दुर्दर्शनीये त्रिके "अजकायं सुदुर्द्रीकं तिरोदधे" ऋ०७,५०।२ "सुदुर्द्रीकं सुदुर्दर्शनम् त्रिषम्" भा०।

**दुर्दृष्ट** त्रि० दुष्टं दृष्टम् । रागादिदोषेण दृष्टे "दुर्दृष्टांस्तु पुनर्दृष्ट्वा व्यवहारान् न्यवेशयत् । सभ्यान् सञ्जयिनो दण्ड्यान् विवादाद्द्विगुणन्दमम्" याज्ञ० "दुर्दृष्टान् कृत्याचारप्राप्त धर्मोल्लङ्घनेन रागलोभादिभिरसम्यग्विचारि-तत्वेनाशङ्क्यमानान् व्यवहारान् पुनः स्वयं सम्यक् विचार्य निश्चितदोषाः पूर्वसभ्याः जयिसञ्ज्ञिताः प्रत्येकं विवादे यो दमः पराजितस्य तं द्विगुणन्दाप्याः । अप्राप्तजेत दण्डविधिपरत्वाद्वचनस्य रागाक्षोभादित्यादिश्लोकेन अपौनरुक्त्यम् । यदा पुनः साक्षिदोषेण व्यवहारस्य दुर्दृष्टता तदा साक्षिण एव दण्ड्याः न जयी नापि सभ्याः यदा तु राजानुमत्या व्यवहारस्य दुर्दृष्टत्वन्तदासर्वे एव राजसहिताः सभ्यादयो दण्डनीयाः । "पादो गच्छति कर्तारि पादः साक्षिणमृच्छति । पादः सभा-सदः सर्वान् पादो राजानमृच्छति" इति वचनात् । एतच्च प्रत्येकं राजादीनां दोषप्रतिपादनम् न पुनरेकस्यैव पापापूर्वस्य विभागाय, यतोऽक्तम् "कर्तृसमवायिफल-जननस्वभावत्वादपूर्वस्य" मिता० ।

**दुर्दैव** न० दुष्टं दैवम् । दुरदृष्टे दुर्भाग्ये पापे

**दुर्द्यूत** न० दुष्टं द्यूतम् प्रा०स०। १कपटद्यूतक्रीडायाम्। "भ्रातरं च विगर्हेत ज्येष्ठं दुर्द्यूतदेविनम्" भा०व०८०अ०"अहं हि तावत् सर्वेषां तेषां दुर्द्यूतदेविनाम्" भा०आश्व०८अ०

**दुर्द्रिता** स्त्री खण्डितलतायाम्भेदे जटा०

**दुर्द्रुम** पु० दुष्टो द्रुमः प्रा०स०। पलाशवृक्षे राजनि०

**दुर्धर** त्रि०दुःखेन धार्यते दुर्+धृ–कर्मणि खच् । १नरकभेदे २कष्टौषधौ मेदि० ३परादे ४असह्यातके राजनि०"दुर्धरं दुर्मुखञ्चैव शरैर्निघ्ने यमक्षयम्"देवीमा०उक्ते १,अक्षिणा-सुरसेनापतिभेदे पु०। ६परमेश्वरे पु० "दर्पहा दर्पदो दृप्तो दुर्धरोऽथापराजितः" विष्णुसं० "न शक्यधारणा यस्य प्रणिधानादिषु सर्वोपाधिनिर्मुक्तत्वात्तस्यापि तत्प्रसादतः कैश्चित् दुःखेन हृदये धार्यते जन्मान्तरसहस्रेषु भावना-योगात् तस्माद्दुर्धरः "क्लेशोऽधिकतरस्तेषामव्यक्तासक्तचे तसाम् । अव्यक्ता हि गतिर्दुःखं देहवद्भिरवाप्यते" भग-वद्वचनात्" भा०,"सुभुजो दुर्धरो वाग्मी" विष्णुसं० अस्य व्युत्पत्तिः भाष्ये दर्शिता यथा "पृथिव्यादीन्यपि लोकधारकाण्यन्यैर्धारयितुमशक्यानि धारयन्न केनापि

धारयितुं शक्यत इति दुर्द्धरः। दुःखेन ध्यानसमये सत्त्वभिर्हृदये धार्यत इति वा दुर्द्धरः" भा०। तेन व्युत्पत्तिभेदाश्रयभेदोपपत्तेः सङ्ख्यापूर्त्तिर्द्रष्टव्या। "वन्येभदानानिलगन्धदुर्द्धरा" माघः। "दक्षो हि शमङ्गेजो दुर्द्धरत्वाक्षतात्मभिः" रघुः।

**दुर्द्धरीतु** पु० दुर्+धृ-बा० कर्मणि ईतुन्। दुर्द्धरणीये। "अग्निमीळे भुजां यविष्ठं शासा मित्रं दुर्द्धरीतम्" ऋ०१०।२०।२ "दुर्द्धरीतम् दुर्द्धरणीयम्" भा०

**दुर्द्धर्म** त्रि०दुःस्थितो धर्मो यस्य प्रा०ब० समासान्तविधेरनित्यत्वात् अर्थे न क्वचित् अनिच्समा०। दुष्टधर्मयुक्ते "कर्कोटकान् वीरकांश्च दुर्द्धर्मांश्च विवर्जयेत्" भा० क० ४४ अ०। लोके तु अनिच्समा०। दुर्द्धर्मन् इत्येव तत्रार्थे

**दुर्द्धर्ष** त्रि० दुःखेन धृष्यतेऽसौ दुर्+धृष-कर्मणि खच्। १धर्षयितुमशक्ये दुःखेन धर्षणीये "संयितात्मा सुदुर्द्धर्षस्तप्ये तपसि वर्त्तते" भा०आ०७१अ० भाषायां तु युच् दुर्द्धर्षण तत्रार्थे त्रि०"सहि दुर्द्धर्षो वाली नित्यं समरकर्मसु" रामा०कि० ५५सो० २राजभेदे विन्दानुविन्दौ दुर्द्धर्षः सुबाहुः दुष्प्रधर्षणः" भा०आ० ६७अ०

**दुर्धा** स्त्री दुर्+धा-भावे क। दुष्टधाने। "दुर्धां दधाति परमे व्योमन्" ऋ० १०।१०६।४ "दुर्धां दुष्टौनम्" भा० व्योमन् व्योम्नि सप्तम्या लुकि न लोपः।

**दुर्धाव** त्रि० दुर्+धाव-खल्। दुःशोधनीये।

**दुर्हित** त्रि०दुर्+धा-कर्मणि क्त वेदे न धाञो हिः। दुष्टं स्थापिते "हृदग्ने सुधितं दुर्धितादधि" ऋ०१।१४०।११ "दुर्धितात् दुष्टं स्थापितात्" भा० लोके तु दुर्हित इत्येव तदर्थे त्रि०।

**दुर्धी** त्रि० दुःस्थिता धीर्यस्य प्रा०ब०। १दुष्टबुद्धियुक्ते "अनुत्थानवता चापि दुर्विनीतेन दुर्धिया" भा०उ०१३४अ० अत्र "गतिकारकेतरपूर्वस्य यण् नेष्यते" वार्त्ति० न यण्। "प्रादिभ्यो धातुजस्य वा चोत्तरपदलोपः" वार्त्ति०दुःस्थितशब्दस्य उत्तरपदलोपे दुरित्यस्य धीशब्दं प्रति गतित्वं नास्ति किन्तु सुप्सुस्थितशब्दं प्रति, अतोऽस्य गतिपूर्वकत्वाभावात् न यण् इति बोध्यम्। दुष्टं ध्यायति दुर्+ध्यै-क्विपि दुर्धीशब्दस्य गतिपूर्वकत्वात् यण् दुध्र्यां इत्यादि। अत्र संयोगपूर्वकत्वेऽपि धात्ववयवसंयोगपूर्वकत्वाभावात् न दृषदः प्रवृत्तिरिति बोध्यम्।

**दुर्द्धृ** त्रि० दुर्+धृष-हिंसने कर्मणि क्विप्। दुःखेन हिंस्ये "हया गावो न दुर्धृरः" ऋ० ५।५६।४ "दुर्धृरो दुःखेन हिंस्याः" भा०

**दुर्द्धृकृट** त्रि०दुर्+धृष-क्विप् कृटो०। युक्तिं विना शस्त्रवाक्यमनन्यमाने"मीमांसकदुर्धृकृट इति पाठान्तरे तत्त्वबोधनी दुर्धृकृट इति च तत्र पाठान्तरे दुष्टकर्मकर्त्तरि कृटोऽयं शब्दरत्नव्ये।

**दुर्नय** पु० दुर्+नी-अच्। १नीतिविरुद्धाचरणे दुष्टेडायां "अम्बिके! तव पौत्रस्य दुर्नयात् किल भारताः। मानुबन्धा विनङ्क्ष्यन्ति" भा०आ० १२८अ० "संचिन्त्य दुर्नयं घोरं सुतानां दूतजन्म यत्" भा०व० ५१०अ०।

**दुर्नामक** पु० दुष्टं नामास्य कप्। अर्शोरोगे अमरः।

**दुर्नामारि** पु० ६त०। अर्शोघ्ने सूरणे राजनि०।

**दुर्निमित** त्रि० दुर्+नि+मि-क्तेषणे क्त। दुष्टं चिप्रे सम्भ्रमादुत्क्षिप्रे "पदे पदे दुर्निमिता गलन्ती" कुमा०

**दुर्निमित्त** न० दुष्टं निमित्तम् प्रा०स०। भाविरिष्टसूचके शकुनभेदे "दृष्ट्वा तु दुर्निमित्तानि जरासन्धमदर्शयन्" भा०स० २०अ०।

**दुर्नियन्तु** त्रि० दुर्+नि-यम-तुन्। दुःखेन नियन्तव्ये। "खर्यस्येव रश्मयो दुर्नियन्तवो हस्तयोर्दुर्नियन्तवः" ऋ० १।१३५।८ "दुर्नियन्तवः दुःखेन नियन्तव्याः" भा०

**दुर्निष्प्रपतर** न० दुःखेन निष्प्रपतति दुर्+निर्+प्र+पत-अच्। अतिशयेन तत् तरप् वेदे तकारलोपः। दुःखेन निष्क्रान्ततरे। "अतो वै खलु दुर्निष्प्रपतरं भवति" ऋ० ७०। "दुर्निष्प्रपतरमिति तकारलोपको लुप्तो द्रष्टव्यः" भा०।

**दुर्नीत** न० दुर्+नी-भावे क्त। नीतिविरुद्धाचरणे "यस्य प्रसादाद् दुर्नीतं प्राप्तोऽसि भरतर्षभ!" भा०वि० २०अ० दुर्+नी-कर्त्तरि क्त। २तद्युक्ते त्रि०। भावे क्तिन्। दुर्नीति दुष्टे नये स्त्री।

**दुर्बद्ध** त्रि० दुष्टं बद्धः। यथादेशावस्थानात् दुष्टतया बद्धे। "दुर्बद्धेनानुभिश्चैव चित्रैर्यं भिन्नेतत्ववत्" सुश्रु०।

**दुर्बल** त्रि० दुःस्थितं बलमस्य प्रा०ब०। अल्पबलान्विते "मूले भक्ष्यानिवापक्षन् दुर्बलान् बलवत्तरान्" "योऽर्थार्थी दुर्बलेन्द्रियैः" मनुः "तक्रं नैव चते दद्यात् नोष्णकाले न दुर्बले" सुश्रु०। २क्षये शैथिल्ये च "स्वार्थोपपत्तिं प्रति दुर्बलाशः" रघुः। दुःस्थितं बलं यस्याः प्रा०ब०। ४अम्बुशिरीषिकायां स्त्री भावप्र०। दुर्बलस्य भावः ष्यञ्। दौर्बल्य न०, तल् दुर्बलता स्त्री, त्व दुर्बलत्व न० अल्पबलत्वे

**दुर्बाल** त्रि० दुष्टो बालोऽस्य। १दुष्टबालरोगयुक्ते २अबलतो

२कुटिलकेशे च मेधातिथिः "जटिलज्ञानधीवानं दुर्वाचं कितवं तथा" मनुव्याख्याने तथार्थत्वस्य तेनोक्तत्वात्।

**दुर्वीरण** न० दुष्टं वीरणम् प्रा०स०। दुष्टे वीरणे तृणभेदे "इक्षुगुण्डीपपत्त्याणि दुर्वीरणानि जायन्ते" शत०ब्रा० ११।४।१।६ "दुर्वीरणानि दुष्टवीरणानीवेति" सुप्रोपमा भा०

**दुर्वोध** त्रि० दुःखेन बुध्यते दुर्+बुध-कर्मणि खञ्। बोद्धुमशक्ये दुःखेन ज्ञेये "यतिदुर्बोधगिरः शिरोमणेः" गदाधरः "निसर्गदुर्बोधमबोधविक्लवाः" किरा०

**दुर्ब्राह्मण** पु० दुष्टो ब्राह्मणः प्रा०स०। "यस्य वेदश्च वेदी च उत्सन्नौ च त्रिपौरुषौ। स वै दुर्ब्राह्मणो ज्ञेयः, इति धूर्तस्वामिनोक्ते निन्दितब्राह्मणभेदे तस्य आवश्यकवेदपाठविच्छित्तकौमयोस्त्रिपुरुषसत्त्वात् दुष्टत्वम्। "ब्रह्मजन्मादुर्ब्राह्मणस्य ब्रह्मवर्चसकामस्य" आपस्तम्बः "यो दुर्ब्राह्मणः सोमं पिपासति" तैत्ति०सं०२।३।१०।१

**दुर्भग** त्रि० दुःस्थितो भगो भाग्यमस्य प्रा०ब०। दुष्टभाग्यान्विते "दुर्भगोऽयं जनस्तात किमर्थमनुशोचितः" हरिवं०१२६अ० पतिस्नेहशून्यायां (दुया) ख्यातायां २स्त्रियां स्त्री "कर्मभिः स्वकृतैः सा तु दुर्भगा समपद्यत" भा०आ०१६६ अ०। स्त्रियादिषु पाठात् एतत्किन्तु परे पूर्वस्थितस्त्रीलिङ्गशब्दस्य कर्मधारये न पुंवद्भावः।

**दुर्भाग्य** न०दुष्टं भाग्यम् प्रा०स०। १दुरदृष्टे पापे। दुःस्थितं भाग्यमस्य प्रा०ब०। २दुष्टभाग्यान्विते त्रि०

**दुर्भिक्ष** अव्य० भिक्षायाः अभावः। १भिक्षाया अभावे। दुर्लभा भिक्षा यत्र प्रा०ब०। यद्देशे यानि यस्यानि जायन्ते तद्देशे तद्द्रव्यस्योत्पत्त्या २तद्द्रव्याणामसमयभेदे न० तत्समयभेदस्यकाले पतिसंवत्सरान्तर्गता वर्षभेदाः ज्योति० त० भविष्यपु० उक्ताः संवत्सरा दर्शने यथा

"राष्ट्रभङ्गश्च दुर्भिक्षं तस्करैरुपपीडनम्। जानीयाद्विप्लवं घोरं प्रमाथिनि१२ वरानने!। "दुर्भिक्षं जायते घोरं सर्वोपद्रवसंयुतम्। अनावृष्टिः समाख्याता व्यये२० संवत्सरे प्रिये!"। "क्वचिद्वर्षति पर्जन्यो देशे संछिन्नसस्यकः। दुर्भिक्षं सर्वरीवर्षे २३ व्यवहारे विपर्ययः"। "दुर्भिक्षं जायते सर्वा मेदिनी दुष्यति प्रिये!। प्लवे२५ म्रियन्ति तोयानि पीडिता मानवा भुवि"। "दुर्भिक्षं जायते घोरं धान्यौषधिप्रपीडनम्। अनले२० च समाख्याता नात्र कार्या विचारणा"। "देशभङ्गः सुदुर्भिक्षं समासात् कथयाम्यहम्। पिङ्गले५१ चारु पद्माक्षि! दुर्भिक्षं नर्मदातटे"। "दुर्दिनं मध्यमं प्रोक्तं व्यवहारो न वर्तते। भवेद्वै मध्यमा वृष्टिर्दुर्भिक्षे ५५ सस्यसम्पत्तिः"। "दुर्भिक्षं मरणं घोरं धान्यौषधिप्रपीडनम्। पापरोगो भवेद्देवि! रक्षाक्षेऽष्टमरक्तनि"!। "रोगो मरणदुर्भिक्षं विरोधोपद्रवाकुलम्। क्रोधे५६ तु विषमं सर्वं समाख्यातं वरप्रिये!"। ५६ "मेदिनी चलते देवि! सर्वभूतं चराचरम्। देशभङ्गश्च दुर्भिक्षं क्षये संक्षोयते प्रजाः। सौराष्ट्रे मालवे देशे दक्षिणे कोङ्कणे तथा। दुर्भिक्षं जायते घोरं क्षये६० संवत्सरे प्रिये!"। क्वचिदद्भुतोत्पातेऽपि दुर्भिक्षं भवति यथा

"मांसास्थिनी समादाय श्मशानाद्वा सदैवयसः। या श्मशानोऽथ वा मध्ये पुरस्य प्रविशन्ति चेत्। विकिरन्ति सदाहौ च श्मशानं सा मही भवेत्। शौरेश्च क्रन्यते लोकः परचक्रसमागमः। संग्रामश्च महा घोरो दुर्भिक्षं मरकस्तथा। यद्ग्रामे फलपुष्पाणि देशविद्रवकारणम्" इति ज्योत०त०। तत्र कालेऽशौचिभ्यो भिक्षाग्रहणे दोषाभाव इति शूलपाणिप्रभृतयः। कौर्मे "सद्यःशौचं समाख्यातं दुर्भिक्षे चाप्युपप्लवे। डिम्बाहवे सतानाञ्च विद्युता पार्थिवैर्हिजैः। सद्यः शौचं समाख्यातं शापादिमरणे तथा" इति शु०त०। "दुर्भिक्षयुक्तराष्ट्रे च सूतके सूतकेऽपि वा। नियमाश्च न दुष्यन्ति दानधर्मरतेष्वपि। दीक्षितानाञ्चाभिषिक्तानां व्रतचौर्यपरास्तथा। दीक्षाकाले विवाहादौ देवब्रह्मणां निमन्त्रिते। पूर्वमङ्गीकृते चापि नाशौचं सूतसूतके" इति गारुडे २२६अ० "शकटः शाकिनी गावो जालमाक्रन्दनं वनम्। अनूपः पर्वतो राजा दुर्भिक्षे नव हेतवः" चाणक्याः "द्वाविमौ पुरुषौ लोके सूर्यमण्डलभेदिनौ। दाताचास्त्र तु दुर्भिक्षे सुभिक्षे वस्त्रभेदकः"। "एकग्रामे शतं शाले दुर्भिक्षे राष्ट्र विप्लवे। पतिना म्रियमाणायाः पुरःशुक्लो न दुष्यति" ज्यो० त०।

**दुर्भिद्** त्रि० दुःखेन भिद्यते दुर्+भिद्-कर्मणि क्यप् तुगर्थे क। दुर्भेद्ये भेत्तुमशक्ये। "गिरिमाभाद्य दुर्भिदम्" भा० द्रो० ३५अ०। खञ्। दुर्भेद तत्रार्थे त्रि० खत्। दुर्भेद्य तत्रार्थे त्रि०।

**दुर्भिषज्य** त्रि० दुर्+भिषज्-कण्ड्वा० यक् कर्मणि खञ् यलोपः। १दुःखेन चिकित्स्ये। भावे खञ्। दुःखेन २चिकित्सायाम् "दुर्भिषज्यं चाक्षै भवति यमेव न प्रतिपद्यते" छ०उ०"तस्मिन्द्विषद्वारदेशं यस्माद्दोषाच्छुक्लमादाय

प्रस्तत्वमिन्द्रियदेशमेव आत्मा पुनर्न प्रतिपद्यते । कदाचिद् व्यत्यासेनेन्द्रियमात्राः प्रवेशयति । तत आन्ध्यबाधिर्यादिदोषप्राप्तौ दुर्भिषज्यं दुःखमिष्वकुर्मता चाप्यै देहाय भवति दुःखेन चिकित्सनीयोऽसौ भवतीत्यर्थः"भा०

**दुर्मृत्य** पु० दुष्टोऽसन् मृत्यः । म्लेच्छजन्ये वक्ष्यमाणम्लेच्छगुणविहीने निन्द्ये भृत्ये तत्सहर्षं शुक्रनीतिशास्त्रपरिगृहीते २अ० उक्तं यथा

"विपरीतगुणैरेभिर्म्लेच्छकोनिन्द्य उच्यते । ये म्लेच्छादीनम्लेच्छतिका ये दण्डेन प्रकर्षिताः । शठाश्च कातरा लुब्धाः समये ऽप्रियवादिनः । मनोव्यसनिनश्चार्ता उत्कोचेटाश्च देविनः । नास्तिकादाम्भिकाश्चैव मत्सरोऽप्यसूयकाः । ये चापमानिता जेऽसह्याक्षैर्मर्मणि भेदिताः । रिपोर्मित्रस्य सेवकाश्च पूर्ववैरानुबन्धिनः । चण्डाः साहसिका धर्महीना नैते सुसेवकाः । नीचो विवर्द्धितो राज्ञा राज्यनाशाय संभवेत् । बीर्य्याधिको नीचकुलो दुःसङ्गेन समेधितः । महाजनैः सदा मानो म्लेच्छो राष्ट्रं सराजकम् । सदर्थवदनर्थं तु सदर्थं त्वथनर्थवत् । ज्ञात्वा स्वबुद्धिमाहात्म्यात् महान्तमपि निन्दति । वक्तुयित्वान्यसर्वज्ञं विद्वांसेनाहरत्नवत् । न नीचस्तुदुःखान् वक्तुं ब्रह्मापि खलु कातरः । संक्षेपतस्तु कथितं सदसद्भृत्यलक्षणम्" ।

**दुर्भ्रातृ** पु० दुष्टो भ्राता प्रा०स० । दुष्टे भ्रातरि "दुर्भ्रातुस्तस्य चोत्थस्य राजन् ! दुःशासनस्य च" भा०व० २७अ० तस्य भावः युवा० अण् । दौर्भ्रात्र तद्भावे न०

**दुर्मति** स्त्री दुष्टा मतिः । विवेकोत्पत्तिप्रतिबन्धकपापेन १मलिनबुद्धौ "निषीदन्तो यथा दुर्मतिं जहि" यजु० ११।३७। "देवीरपां मतिं दुर्मतिं बाधमानाः" १७।५४ दुःखिता मतिर्यस्य प्रा०ब० । २तद्युक्ते त्रि० "न साम्परायिकं तस्य दुर्मतेर्विद्यते फलम्" मनुः दुःखा मतिरत्र प्रा०त०। षष्टिवर्षमध्ये १वत्सरभेदे "दुर्भिक्षं मध्यमं प्रोक्तं व्यवहारो न वर्त्तते । भवेद्वै मध्यमा दृष्टिर्दुर्मतौ ५५ वसुपस्थिते" ज्योति०त० भवि०पु०

**दुर्मद** त्रि० दुष्टमितो मदो यस्य प्रा०ब० । उन्मत्ते "दुर्मदं गन्धर्वाप्सरोभ्यः" यजु० २०।८। "कुमारान् क्रीडमानांस्तान् दृष्ट्वा राजा च दुर्मदान्" भा०आ० १२६अ० २दुष्टराङ्गत्वभेदे "दुर्मदो दुःसहर्षश्च विविक्तसुविकटाननः" भा०आ० ६७अ० तत्पुत्रोक्तौ ।

**दुर्मनस्** त्रि० दुष्टं मनः प्रा०स० । १दुष्टे मनसि "प्राप्य दुर्मनसा वीर! सर्वेण च विशेषतः" रामा०अयो० ११।२० दुःखितं मनोऽस्य प्रा०ब० । २दुःखितमनस्के १व्याकुलचित्ते त्रि० "नापैति हृदयाद्बाणो दुर्मनाः स क्षणोऽभवत्" भा०आ०१६६ अ० ततो हर्षा० च्व्यर्थे क्यङ् सलोपश्च दुर्मनायते । [तस्य भावः" वा०१०।१२।६।

**दुर्मन्तु** त्रि० दुर्+मन-तुन् । दुष्टं मन्यमाने "दुर्मन्तवास्त-

**दुर्मन्त्रित** त्रि० दुर्+मन्त्र-क्त । १दुष्टं मन्त्रिते मन्त्रणाविषये "त्वया दुर्मन्त्रितं द्यूतं सौबलेन च भारत !"भा०उ०१२७ अ० । भावे क्त । २दुष्टमन्त्रणायां न० पराभवो ह्येतन्मे य आसीत् दुर्मन्त्रिते गोपयात्रागतानाम्"भा०उ०११७अ०

**दुर्मन्त्रिन्** पु० दुष्टो मन्त्री प्रा० स० । मन्त्रिलक्षणगुणरहिते दुष्टे मन्त्रिणि । मन्त्रिलक्षणञ्च क्षमात्यागशब्दे ३११ पृ० उक्तम् । तद्दौरीत्ये मन्त्रिणो दुष्टत्वम् । "म्लायन्ति कमपथ्यभुजं न रोगाः दुर्मन्त्रिणं कलयन्ति न नीतिदोषाः" पञ्चत०

**दुर्मर** त्रि० दुष्टो मरोऽस्युः प्रा०स० । १दुष्टे मृत्यौ दुःखेन म्रियते दुर्+मृ-अच् । २सेतदूर्वायाम् स्त्री राजनि० । ३दूर्वायां स्त्री जटाध० दुःखेन मरो मरणं यस्य । ४दुःखेन मृत्युयुक्ते त्रि० "दुर्मरत्वमहं मन्ये मृत्यां कृच्छ्रेऽपि वर्तताम् । यत्र कर्णं हृतं श्रुत्वा नात्यजत् जीवितं नृपः" भा०क०१अ० । ष्युट् । दुर्मरणमप्यत्र । मरणस्य दुष्टत्वं चण्डालादिहतत्वादिना भवति यथोक्तं नि० सि०

शङ्करः "चण्डालादुदकात्सर्पाद्ब्राह्मणाद्वैद्युतादपि । दंष्ट्रिभ्यश्च पशुभ्यश्च मरणं पापकर्मणाम् । उदकं पिण्डदानं च प्रेतेभ्यो यत्प्रदीयते । नोपतिष्ठति तत्सर्वमन्तरिक्षे विनश्यति"। अत्रिः "मन्नातेष्वेवम् ब्राह्मणेषु,"शृङ्गिदंष्ट्रिनखव्यालविषवह्निक्रियाजलैः"। व्याख्यागजः।"शृङ्गिरात्मरिक्षतव्यः कुर्वन् क्रीडां सतस्तु यः । नामानां विप्रियं कुर्वन् कृतशास्त्रश्च विद्युता । निन्दितः स्वयं राज्ञा चौर्यदोषेण कुत्रचित् । परदारान् हरन्नथ हेयात्तु पतिभिर्हृताः । यक्षमाणश्च सङ्घैर्यण्डालाद्यैश्च विग्रहम् । कृत्वा तैर्निहतास्तद्वच्चण्डालादीन् समाश्रिताः । शस्त्राग्निगरदाश्चैव पाशहस्ता क्रूरबुद्धयः । क्रोधात्प्राणं विषं वह्निं शस्त्रसङ्क्षयनं जलम् । गिरिद्रुमपपातं च ये कुर्वन्ति नराधमाः । कृपणस्त्रीपिनो ये च स्तूनालङ्कारधारिणः । सत्रे भगासु ये केचित् क्लीवप्राया नपुंसकाः । ब्रह्मदण्डहता ये च ये चापि ब्राह्मणै-

र्कीताः। महापातकिनो ये च पतिताश्च प्रकीर्तिताः। पतितानां न दाहः स्याद्गान्धेर्दिनौर्ध्वदेहिकम्। न चाशुपातः पिण्डो वा कार्यं श्राद्धादिकं क्वचित्। एतानि पतितानां तु यः करोति विमोहितः। तत्प्रेतत्वमवश्येनैव तस्य गच्छति नान्यथा"।

तत्र दुर्मरणनिमित्तं दानादि तल्लोक्तं यथा

"तत्र दुर्मरणनिमित्तं दानादिकार्यं तच्च विश्वप्रकाशादौ दर्शितं यथा

शातातपीये च "व्याघ्रेण निहते विप्रैर्विप्रकन्यां विवाहयेत्। सर्पदष्टे नागबलिर्हैमः सर्पश्च दापनः। चतुर्निष्कमितं हैमं गजं दद्याद्बलेर्हते। राज्ञा विनिहते दद्यात् पुरुषं तु हिरण्मयम्। चौरेण निहते धेनुं वैरिणा निहते वृषम्। वृषेण निहते दद्याद्वृषभं शक्त्या तु काञ्चनम्। शय्यास्थिते प्रदातव्या शय्या तूलीसमन्विता। निष्कमात्रसुवर्णस्य विष्णुना समधिष्ठिता। शौचस्थिते स्थिते चैव द्विनिष्कं स्वर्णजं हरिम्। संस्कारस्थिते च स्थिते कुमारसुपनाययेत्। निष्कत्रयसुवर्णमितं दद्यादश्वं हयाकृते। शुना हते क्षेत्रपालं स्थापयेद्विजशक्तितः। सूकरेण हते दद्यान्महिषं दक्षिणान्वितम्। क्रमिभिश्च हते दद्याद्गोधूमान् पञ्चखारिकाः। छत्रं छत्रहते दद्यात्सौवर्णं वस्त्रसंयुतम्। शकटेन हते दद्याद्गृहं कोपस्करान्वितम्। भग्नपातस्थिते चैव प्रदद्याद्गान्धर्वपर्वतम्। अग्निना निहते कार्यसुदपानं स्वशक्तितः। दारुणा निहते चैव कर्तव्या सदने सभा। यज्ञेन निहते दद्यान्महिषीं दक्षिणान्विताम्। यज्ञेन निहते दद्याद्वत्सां गां पयस्विनीम्। विषेण च स्थिते दद्यान्नेदिनीं हेमनिर्मिताम्। उदुम्बरेण च स्थिते कार्पं कनकनिर्मितम्। स्थिते जलेन वरुणं हैमं दद्याद्द्विनिष्कजम्। विषूचिकास्थिते स्वादु भोजयेच्च शतं द्विजान्। शतधेनुः प्रदातव्या कण्ठाद्यवरुद्धे स्थिते। कासरोगेण च स्थिते चरेत्। कृतिसारस्थिते जप्यं गायत्र्याः प्रयतो जपेत्। शाकिन्यादिगृहीते जपेद्वृद्धं यथोदितम्। विद्युत्पातेन निहते विद्यादानं समाचरेत्। अन्तरिक्षस्थिते कार्यं वेदपारायणं तथा। सच्चास्त्रपुस्तकं दद्यादक्षयस्वर्गतो स्थिते। पतिते च स्थिते कुर्यात् प्राजापत्यांस्तु षोडश। स्थिते चापत्यरहिते कृच्छ्राणां नवतिं चरेत्। एवं कृते विधाने तु विदध्यादौर्ध्वदेहिकम्"। अनलभट्टेन तु दुर्मरणप्रकाराश्चतुःषष्टि प्रकारा उक्ताश्च तत्कृतान्त्येष्टिपद्धतौ द्रष्टव्याः।

**दुर्मर्ष** पु० दुःखेन मृष्यते दुर्+मृष—कर्मणि घञ्। दुःखेन मर्षणीये दुःखेन सहनीये "यच्छ्रूद्या दृमं दृवं दुर्मर्षं चक्रिया उत" ऋ० ८।४६।१८

**दुर्मर्षण** पु० दुर्+मृष—भावायां ल्युटि बाधित्वा युच्। दुःखेन सहनीये २विष्णौ पु० "अजो दुर्मर्षणः शास्ता" विष्णुसं० मर्षितुं दानवादिभिर्न शक्यते इति दुर्मर्षणः" भा० शल्यराट्पुत्रभेदे "दुर्मर्षणो विकर्णश्च चित्रसेनो विविंशतिः" भा०आ०६२० तत्पुत्रोक्तौ

**दुर्म(ल्ली)ल्लिका** स्त्री दृश्यकाव्यरूपे उपरूपकभेदे सा०द०यथा "नाटिका त्रोटकं गोष्ठी सट्टकं नाट्यरासकम्। प्रस्थानोल्लाप्यकाव्यानि प्रेङ्खणं रासकं तथा। संलापकं श्रीगदितं शिल्पकञ्च विलासिका। दुर्मल्लिका प्रकरणी हल्लीशोभाणिकेति च। अष्टादश प्राहुरुपरूपकाणि मनीषिणः। विना विशेषं सर्वेषां लक्ष्म नाटकवन्मतम्" इत्युद्दिश्य तल्लक्षणमुक्तं यथा "दुर्मल्ली चतुरङ्का स्यात् कौशिकी भारती तथा। बहुभाः नागरनरा न्यूननायकभूषिता। त्रिनालिः प्रथमोऽङ्कोऽस्यां विटक्रीडाश्रयो भवेत्। पञ्चनालिर्द्वितीयोऽङ्को विदूषकविलासवान्। षण्णालिकस्तृतीयस्तु पीठमर्दविलासवान्। चतुर्थो दशनालिः स्यादङ्कः क्रीडितनायकः। यथा विन्दुमती"।

**दुर्मायु** त्रि० दुष्टान्यायुधानि सिन्वन्ति मि—क्षेपे उण्। दुष्टायुधक्षेपके "दुर्मायवोदुरेवासश्चर्सः" ऋ०१।२०।५

**दुर्मित्र** पु० दुष्टं मित्रम् प्रा०स० अमित्रवत् दुःस्थम्। विरोधिलक्षणया १अमित्रे शत्रौ। दुःस्थितं मित्रं यस्य २दुष्टमित्रके त्रि०। "दुर्मित्रासः प्रकल्पिषत मित्रासः" ऋ०७।१८।५ स्त्रियां टाप्। दुर्मित्रायाः अपत्यम् वाह्वा० दक्। दौर्मित्रि तदपत्ये पुंस्त्री०

**दुर्मित्रिय** त्रि० दुर्मित्राय अमित्रत्वाय साधु च। अमित्रत्वेनावस्थिते। "सुमित्रिया न आप ओषधयः सन्तु दुर्मित्रियास्तस्मै सन्तु" यजु०६।२२। "दुर्मित्रिया अमित्रत्वेनावस्थिताः" वेददी०

**दुर्मिलका** स्त्री मात्राछन्दःप्रभेदे यथा "द्वात्रिंशन्मात्रं कथितमिजलसितसकलविभूषणमुदक्तरम् दशवसुभुवनैर्यतिरत्र प्रभवति कविकुलहृदयानन्दकरम्। यदुदितमत्रच्छन्द गणनिर्मितपदमिति दुर्मिलकानामपरं नरपतिवरतोषच वन्दिविभूषणभुवनविदितसत्कीर्तिकरम्"।

दुर्मुख त्रि॰ दुष्टं मुखं तद्व्यापारो वाऽस्य प्रा॰ ब॰। १अप्रे क्षेमच॰। २वानरभेदे ३राक्षसभेदे "रक्षःपतिस्तदवोक्ष्य निकुम्भकुम्भघूम्राक्षदुर्मुखसुरान्तकनरान्तकादीन्" भाग॰६। १०।८ ४नागभेदे मेदि॰। "नागश्चैको दुर्मुखश्चाम्बरीषः स्वयं राजा वरुणश्चापि राजन्" भा॰मौस॰४अ॰ ५महिषासुरसेनानीभेदे "दुर्धरं दुर्मुखं चोभौ शरैर्निन्ये यमक्षयम्" देवीमा॰ ६शिवे "नन्दिमुखो भीमरुद्रः सुमुखोदुर्मुखोऽमुखः" भा॰शा॰२८६अ॰ शिवनामोक्तौ। ६धृतराष्ट्रपुत्रभेदे "दुःसहो दुःशलश्चैव दुर्मुखश्च तथा परः" भा॰आ॰६७अ॰। ७ऋषभेदे। "संग्रामजिद्दुर्मुखश्च उग्रसेनश्च वीर्यवान्" भा॰स॰४अ॰ युधिष्ठिरसभागतऋषौ ८यज्ञभेदे ब्रह्मप॰। १०ऋग्वेदादिनि त्रि॰। ११रामस्यान्तःपुरचारिणि चरभेदे "गुह्यान्तचारी दुर्मुखः स मया पौरजानपदानपसर्पितं प्रयुक्तः" उत्तररामच॰। १२उत्तरहारमण्डले ६०वर्षमध्ये १३वर्षभेदे "तृणधान्यजयो देवि! सर्वशस्यमहार्घता। व्यवहारास्तु मन्यन्ति दुर्मुखे दुर्मुखाः प्रजाः" ज्यो॰त॰भवि॰पु॰

दुर्मुहूर्त्त अ॰ निन्दितो मुहूर्तः प्रा॰स॰। बहुव्रीहौ मुहूर्ते "मघत्रे चासुरेऽन्ये दुस्थितौ दुर्मुहूर्तजाः। संपतन्त्यासुरीं योनिं यत्नप्रसवर्जिताः" भा॰शा॰१८०अ॰

दुर्मूल्य त्रि॰ दुःस्थितं मूल्यं प्रा॰स॰। १दुःस्थिते मूल्ये २महार्घे यस्य यन्मूल्यं क्रूरं तत आधिक्ये मूल्यस्य दुःस्थितत्वमिति बोध्यम् प्रा॰ब॰। २तद्युक्ते त्रि॰

दुर्मेधस् त्रि॰निन्दिता मेधास्य अस्ति अच् समा॰। १निन्दितमतौ विवेकासमर्थे २धारणवर्जितबुद्धिके "न किञ्चिदुक्ता दुर्मेधास्त्वौ किञ्चिदवाङ्मुखः" भा॰व॰ १०अ॰ "प्रत्याख्यातोऽपि दुर्मेधाः" २८।अ॰। आर्षे तु समानविधेरनित्यत्वात् क्वचिन्नासिच् समा॰। "तएव वेदा दुर्मेधैर्धार्यन्ते पुरुषैर्यथा" भाग॰ १।४।२५ "अल्पधानान् निःसत्वान् दुर्मेधान् क्षुत्सितायुषः" भाग॰१।४।१८

दुर्मोह पु॰ निन्दितं मुह्यत्यनेन मुह-करणे घञ्। १काकतण्ड्यां राजनि॰। २काकादन्यां स्त्री शब्दार्थचि॰।

दुर्य्य पु॰ दुरं द्वारं याति या-क दुरि द्वारे भवः यत् वा। १मठे "देवी दुर्ये आयुमा" यत॰ब्रा॰ ३।५।२।।८ "स्यं गोऽमावदतं देवी! दुर्ये" यजु॰५।।७। दुर्यशब्दो मठवाची "दुर्या वै मठाः" इति श्रुतेः वेददी॰। द्वारे भवेऽपि च। "निरेके पञ्चेषु सोमो दुर्यो न यूपः" ऋ॰१।५१।४

दुर्यश्स् न॰ निन्दितं यशः प्रा॰स॰। विरोधिलक्षणया १अकीर्त्तौ "त्वदपस्खलोत्सर्पिवः स कामिनोर्मनोभवः शोषयति दुर्यशःपटौ" नैष॰। दुःस्थितं यशोऽस्य प्रा॰ब॰। २दुष्टयशस्के त्रि॰

दुर्योग पु॰ दुष्टो योगः प्रा॰स॰। १दुर्भाग्यसूचके अशुभयोगभेदे २दुष्टकौशले च "दासीभूतास्मि दुर्योगात् सपत्न्याः पतगोत्तम!" भा॰ आ॰ २७अ॰ तस्या दास्ये च सर्पाणां यथा कौशलभेदः तथा तत्रैवाध्याये दृश्यः।

दुर्योण न॰ दुष्टा योनिः स्थानमस्यस्य अर्श॰ अच् संज्ञातात् षत्वम्। संग्रामे "नि दुर्योण आहवेऽक्षन्नमीमदन्त" ऋ॰५।२६।१० "दुर्योणः संग्रामः" भा॰ [योधनीये।

दुर्योध पु॰दुःखेन युध्यतेऽसौ दुर+युध-कर्मणि घञ्। दुःखेन

दुर्योधन पु॰ दुर+युध-भावायां युच्। १धृतराष्ट्रस्य ज्येष्ठे पुत्रे। "कलेरंशस्तु सञ्जज्ञे भुवि दुर्योधनो नृपः!। दुर्बुद्धिर्दुर्मतिश्चैव क्रूरश्चामर्षणस्तथा। जगतो यस्तु सर्वस्य विद्वेष्टा कलिपूरुषः। यः सर्वां घातयामास पृथिवीं पृथिवीपते!। उद्दीपितं वैर वैरं भूतान्तकरणं महत्" भा॰आ॰६७अ॰ "स जातमात्र एवाथ धृतराष्ट्रसुतो नृप!। रासभारावसदृशं सरावं ननाद च। तं खराः प्रत्यभाषन्त स्वभगोमायुवायसाः। वातायं प्रववुश्चापि दिग्दाहश्चाभवत्तदा। ततस्तु भीतवद्राजा धृतराष्ट्रोऽब्रवीदिदम्। समानीय बहून् विप्रान् भीष्मं विदुरमेव च। अन्यांश्च सुहृदो राजन्! कुरून् सर्वांस्तथैव च। युधिष्ठिरो राजपुत्रो ज्येष्ठोनः कुलवर्द्धनः। प्राप्तः स्वगुणतो राज्यं न तस्मिन् वाच्यमस्ति नः। अयन्त्वनन्तरस्त्वादपि राजा भविष्यति। एतद्धि श्रुत मे तथ्यं यदत्र भविता ध्रुवम्। वाक्यस्यैतस्य निधने दिशु सर्वासु भारत!। क्रव्यादाः प्राणदन् घोराः शिवाश्चाशिवदर्शिनः। लक्षयित्वा निमित्तानि तानि घोराणि सर्वशः। तेऽब्रुवन् ब्राह्मणा राजन्! विदुरस्य महामतेः। यद्येतानि निमित्तानि घोराणि मनुजाधिप!। उत्थितानि सुते जाते ज्येष्ठे तु पुरुषर्षभ!। व्यक्तं कुलान्तकरणो भवितैष सुतस्तव। तस्य शान्तिः परित्यागे सुप्रावपनयो महान्। शतमेकोनमस्तु पुत्राणान्ते महीपते!। त्यजेदेकं कुलस्यार्थे ग्रामस्यार्थे कुलं त्यजेत्। ग्रामं जनपदस्यार्थे आत्मार्थे पृथिवीं त्यजेत्। स तथा

विदुरेणोक्तसैन्य सर्वैर्हितोत्तमैः। न चकार तथा राजा पत्रलेखसमन्वितः" भा०आ०१३५ अ० २दुर्योधनीये त्रि०

दुर्योनि स्त्री निन्दिता योनिः प्रा०स०। १निन्दितायां जातौ दुःस्थिता योनिरस्य प्रा०ब०। २निन्दितजातिके त्रि० "न कथञ्चन दुर्योनिः प्रकृतिं स्वां नियच्छति" मनुः।

दुर्लतिका स्त्री दुष्टा लतैव स्वार्थे क प्रा०स०। १निन्दितायां लतायां २छन्दोभेदे च "वसुभिश्च रसैरथ दिग्भिरदीरितसद्वृत्तिका विदिता हि सगणाष्टकभूषितसद्वरचारुजितदुर्नय! दुर्लतिकेति तदा। फणभृत्कुलमङ्गलनामकनागवरस्थिता सुकृतां सुखदा यशवल्ल! धराधिप! गौडकुलोज्ज्वल! तामवधेहि हृदये सदा" ह०रत्ना०।

दुर्लभ त्रि० दुःखेन लभ्यते दुर्+लभ-कर्मणि खल्। १सुखुमलभ्ये कृच्छ्रेण लभ्ये २दुष्प्राप्ये मेदि० ३अतिप्रशस्ते भद्रर०४प्रिये हेमच०। "नरत्वं दुर्लभं लोके विद्या तत्र सुदुर्लभा" सा०द० "अप्रियस्य च पथ्यस्य वक्ता श्रोता च दुर्लभः" रामा० "दुर्लभं प्राकृतं वाक्यं दुर्लभः क्षेमकृत् नृतः। दुर्लभा सदृशी भार्या दुर्लभः स्वजनः प्रियः" चाणक्य० ५कचूरे पु० मेदि० ६कर्चूरे पु० राजनि० ७दुरालभायां दन्त्यैतकण्टकार्यां च स्त्री राजनि०। ८विष्णौ पु० "दुर्लभो दुर्जयो दुर्गः" विष्णुसं०। "दुर्लभया भक्त्या लभ्यत इति दुर्लभः "अन्यान्तरसङ्गेषु तपोध्यानसमाधिभिः। नराणां क्षीणपापानां कृष्णे भक्तिः प्रजायते" इति व्यासवचनात् "भक्त्या लभ्यस्त्वनन्यया"इत्यादिवचनात् भा०"आस्थोः शिवमभिवाञ्छन्नैनां मन्येत दुर्लभाम्" मनुः। "मत्परं दुर्लभं मत्वा नूनमात्मार्जितं मया" रघुः "कृतमायुधपत्रि! दुर्लभस्तव भर्त्ता न चिराद् भविष्यति" कुमा०।

दुर्ललित न०दुर्+लल-क्त। दुष्टेच्छायां दुर्लभवस्तुवाञ्छायाम् (आब्दार) तस्या अन्यलाभाविषयत्वेन दुष्टत्वम्। २दुश्चेष्टिते च "स शशाप ततो रोषान्मुनिर्दुर्ललितं तव। अतिदुर्ललितैः कन्या शत्रुकुलं गमिष्यति" हरिवं० १४६ अ०। कर्त्तरि क्त। ३तथाविधे च त्रि० ४दुश्चेष्टान्विते ५चपले च त्रि० "बालस्य मे प्रकृतिदुर्ललितस्य पापः पापं व्यवस्यति समक्षमदायुधोऽस्त्री" वेणी०।

दुर्ललित न० दुर्+लल-क्त। दुश्चेष्टायाम्।

दुर्लभ पु० दुर्+लभ-अच्। दुःखेन लाभे। "लोकद्वयेऽपि भविष्यं वदयानुखसागरम्" भा० द्रा० ३०३ अ०।

दुर्लेख्य न० दुष्टं लेख्यम्। गर्हिते लेख्यपत्रे। "देशान्तरस्थे दुर्लेख्ये नष्टोक्ते क्षुते तथा। भिन्ने दग्धे तथा छिन्ने लेख्यमन्यत्तु कारयेत्" नार० सर्वैरेतैर्विशेषणैर्व्यवहाराक्षमता विवक्षिता। दुष्टं लिप्यक्षरपरिक्षोपेणावाचकतया वा यल्लेख्यं तत्तु दुर्लेख्यं, नष्टं सर्वथा नाशमुपगतम् उन्मृष्टं मसीदोषादिना स्खलितलिप्यक्षरम्। यद्यपि दग्धमपि नष्टमेव तथापि कालमात्रकृता शीर्णता नष्टपदेनात्र विवक्षिता। पत्रान्तरकरणस्यार्थिप्रत्यर्थिनोः परस्परसम्मतिपत्तौ। विमतौ तु देशान्तरस्थपत्रानयनाय कालो देयोऽध्यक्षेणेत्यादि, व्यवहारो वाऽप्रवर्तनीयः दुर्लेख्यादौ तु सम्मतिपत्तौ पत्रान्तरकरणमन्यथा व्यवहार स्यामद्वत्तिरेवेत्यवसेयं साक्षिषु सत्सु तैरेव निर्णयः"। तथाच नारदः "लेख्ये देशान्तरस्थे तु शीर्णे दुर्लिखिते क्षुते। सतस्तत्कालकरणमसतो दृष्टदर्शनमिति" वीरमि०

दुर्व वधे भ्वा०पर०सक०सेट्। दूर्वति अदूर्वीत्। देदिर्व। दूर्त्तः

दुर्वच त्रि० दुःखेन उच्यते दुर्+वच-कर्मणि खल्। दुःखेन कथनीये वक्तुमशक्ये। "अपि वागधिपस्य दुर्वचं वचनं तद्विदधीत विक्लवम्" किरा०। खलर्थयोगे कर्त्तरि षष्ठ्या निषेधेन सम्बन्धविवक्षायाञ्च षष्ठी" सौभराजसुतेत्याद्यमयोर्द्वं दुर्वचं वचः" भा० उ० १७७ अ०।

दुर्वचस् न०दुष्टं वचः प्रा०स०। गर्हिते वचने वचसो दुष्टत्वमप्रियावेदकत्वेन "असत्यं दुर्वचो ज्ञातेर्भवान्नरितरौद्रवत्" उद्भ० "नारीं जित्वा विक्लवन्तो न च जल्पन्ति दुर्वचः" भा०द्रो० १४८ अ०। दुःखितं वचोऽस्य प्रा०ब०। २दुष्टवचनवक्तरि त्रि०।

दुर्वराह पुंस्त्री० गर्हितो वराहः प्रा०स०। १गर्हिते वराहे विड्वराहे ग्राम्यशूकरे स्त्रियां जातित्वात् ङीष्। "त्रयो ह वाग्रथोऽमेध्या दुर्वराहश्चैडकः श्वा" शत० ब्रा०१२।४।१।६

दुर्वर्ण न० निन्दितो हेमादेरया निकृष्टो वर्णोऽस्य। १रजते अमरः। "दुर्वर्णमिश्रितरिङ्ग सान्द्रसुधासवर्णा" माघः १एलवालुके मेदि०। ३निन्द्यवर्णयुक्ते त्रि०। "न तत्र कश्चिद्दुर्वर्णो व्याधितो वापि दृश्यते" भा०व० १८६ श्लो० ४श्वेतकुष्ठिनि तस्य रजतवर्णशुभत्वात् दुर्वर्णत्वम्। "दुर्वर्णः कुनखी कुष्ठी मायावी कुलकण्टकौ" भा० व० १८६ अ०। दुष्टोवर्णः प्रा०स०। ५निन्द्ये ब्राह्मणादिवर्णे च। "दुर्वर्णोऽस्य भ्रातव्यः" तैत्ति०ब्रा० २।२।३।६। दुष्टे ६अक्षरे पु०।

दुर्वर्त्तु त्रि॰ दुर्+वृत्-कर्म्मणि तन्। दुर्वारे "दुर्वर्तुः स्या भवति भीम यद्वान्" ऋ॰ ४।३८।८ "दुर्वर्तुः दुर्वारः" भा॰।

दुर्वस त्रि॰ दुःखेनोष्यतेऽत्र दुर्+वस-घा॰ आधारे खल्। लक्षेण वासयोग्ये वस्तुमयक्ये "त्रयोदशोऽयं संप्राप्तः लक्षात् परमदुर्वसः" भा॰वि॰१अ॰।

दुर्वसति स्त्री दुःखेन वसतिः। दुःखेनावस्थितौ "रोगोपसृष्टतनुदुर्वसतिं सस्तुः" रघुः।

दुर्वह त्रि॰ दुःखेनोह्यतेऽसौ दुर्+वह-कर्म्मणि खल्। दुःखेन वहनीये बोढुमयक्ये। "न दुर्वहश्रोणिपयोधरार्त्ताः" कुमा॰ "अनुप्रवेशादाद्यस्य पुंसस्तेनापि दुर्वहम्" रघुः। "दुर्वहो नियहो दण्डो हिरण्यवहलक्षया" भा॰शा॰ ६१८॰श्लो॰।

दुर्वाच् स्त्री गर्हिता वाक् प्रा॰स॰। १निन्द्ये वाक्ये दुःस्थिता वाग्यस्य प्रा॰व॰। २निन्द्यवचनान्विते त्रि॰ "यद्यानमनमलङ्कारमन्नपानमनार्यताम्। दुर्वाग्भरं रतिञ्चैव ददौ स्त्रीभ्यः प्रजापतिः" भा॰अनु॰४॰अ॰ "अतीव जल्पन् दुर्वाचो भवतीह विघेटकः" भा॰आ॰ २॰७६ श्लो॰।

दुर्वाच्य न॰ निन्द्यं वाच्यम् प्रा॰स॰। अपवादे १अकीर्त्तौ "क्रोडानिषिक्तं न श्रुत्वा दुर्वाच्यं न भविष्यति" रामा॰सु॰ १६२४श्लो॰। २कष्टेन वाच्ये च।

दुर्वाद पु॰ दुष्टो वादः प्रा॰स॰। अकीर्त्तौ स्तुतिपूर्वकाप्रियवाक्ये १अपवादे जटाध॰ २निन्दितवाक्ये च।

दुर्वान्त न॰ दुष्टं वान्तं प्रा॰स॰। १विधानातिक्रमेण वमने दुःस्थितं वान्तमस्य प्रा॰व॰। २दुष्टवमनयुक्ते त्रि॰। "दुर्वान्तस्य तु वस्तुतः क्षिप्ता दोषा व्याधयः शरीरं कण्डूश्वयथुकुष्ठपीडकाज्वराङ्गमर्दनिस्तोदादीनि कुर्वन्ति" सुश्रुतः।

दुर्वार त्रि॰ दुःखेन वार्यतेऽसौ दुर्+वारि-कर्म्मणि खल्। दुःखेन वारणीये वारयितुमयक्ये "किन्नायमरिर्दुर्वारः पाण्डौ पाशः प्रचेतसः" कुमा॰ "सा दुर्वारं कथमपि परित्यागदुःखं विवेद" रघुः।

दुर्वारण त्रि॰ दुःखेन वारणमस्य। १दुःखेन वारणीये "संरक्ष्य शरानस्मान् द्रोणं दुर्वारणं रणे" भा॰द्रो॰ १८३अ॰। २शिवे पु॰ दुर्विषहशब्दे दृश्यम्।

दुर्वारि त्रि॰ दुःखेन वारिर्वारणमस्य। कम्बोजदेशीये बोधभेदे "एते दुर्वारयो नाम कम्बोजा यदि ते श्रुताः" भा॰द्रो॰११२अ॰। [दुष्प्रकृतौ।

दुर्वार्त्ता स्त्री गर्हा वार्त्ता प्रा॰स॰। अधिक्षेपेदकवार्त्तायां

दुर्वासना स्त्री दुष्टा वासना प्रा॰स॰। पूरयितुमयक्ये आशायाम्

दुर्वासस् पु॰ मुनिभेदे स च शङ्करांशेनात्रेरनसूयागर्भजः। तदुद्भवकथा आत्रेयशब्दे ६८२ पृ॰दृश्या तत्रामनिरुक्तिश्च यथा "निगूढनिश्चयं धर्मं यं तं दुर्वासमं विदुः" भा॰ अनु॰ ४७अ॰। "समांशस्तु क्षितितले महाभागो द्विजोत्तमः। दुर्वासा इति विख्यातः स हि त्वां याजयिष्यति" भा॰आ॰ २२२अ॰ शिववाक्यम्। तस्य रुद्रांशजत्वेन क्रोधनत्वं यथाह "दुर्वासाः क्रोधनः श्येनश्चया दीर्घतमा मुनिः" भा॰स॰ ७अ॰ "शिष्यायुतसमोपेतो दुर्वासा नाम कामतः। तमागतमभिप्रेक्ष्य मुनिं परमकोपनम्" भा॰व॰२६१अ॰ तस्य क्रोधशीलत्वेन विशेषणम्। दुःसाध्यं वासः यस्य इति वा व्युत्पत्तिः। यस्य तदीयवासनस्य दुःसाध्यत्वात् दुर्वासस्त्वं यथोक्तं भा॰अनु॰१५८अ॰ यथा "अवमन्तुमे यस्ते तात! ब्राह्मणो हरिपिङ्गलः। चीरवासा विरूपाक्षो दीर्घश्मश्रुर्जटी महान्। दीर्घेभ्यश्च मनुष्येभ्यः प्रमाणादधिको भुवि। सर्वान् संस्मरते लोकान् ये दिव्या ये च मानुषाः। दमां गाथां गायमानश्चरत्यरेषु सभासु च। दुर्वासस वासयेत् को ब्राह्मणं सत्कृतं यस्ते। रोषणः सर्वभूतानां क्षुद्रोऽप्यपक्रमते क्रते। परिभाषाञ्च मे श्रुत्वा कोऽनुदद्यात् प्रतिश्रवम्। यो मां कश्चिदासयीत न स मां कोपयेदिति। यस्माच्चिद्यायते कश्चित्ततोऽहं समवासयम्। स च भुङ्क्ते सहस्राणां बहूनामन्नमेकदा। एकदाक्षात्सकृं भुङ्क्ते न चैवेति पुनर्मुहुः। अकस्माच्च प्रहसति तथाऽकस्मात् प्ररोदिति। न चास्य वयसा तुल्यः पृथिव्यामभवत्तदा। अथ स्नावसथं गत्वा स मयाक्षरयानि च। कन्याश्चाक्षुता दग्धा ततो व्यपगतः पुनः। अथ मामब्रवीद्भूयः स मुनिः संशितव्रतः। कृष्ण! पायसमिच्छामि भोक्तुमित्येव सत्वरः। तदैव तु मया तस्य चित्तज्ञेन मुहूर्त्ते जनः। सर्वाण्यन्नानि पानानि भक्ष्याण्योष्यानि चाज्ञया। भवन्तु मृक्षतामीह पूर्वमेव प्रचोदितः। ततोऽहं जायमानं वै पायसं प्रत्यवेदयम्। तं भुक्त्वैव तु स क्षिप्रं ततो वचनमब्रवीत्। क्षिप्रमङ्गानि लिम्पस्व पायसेनेति स च हृष्टः। अविस्मयन्नेव च ततः कृतवानस्मि तत्तथा। तेनोच्छिष्टेन गात्राणि शिरश्चैवाभ्यलिम्पयम्। स ददर्श तदाऽऽत्मानं मातरन्ते शुभानताम्। तामपि जायमानः स पायसेनाभ्यलेपयेत्। मुनिः पायसदिग्धाङ्गौ रथे तूर्णमयोजयत्। तमारुह्य रथञ्चैव निर्ययौ च मुहूर्त्तान्-

मम । अभिनर्योज्वलन् धीमान् स द्विजो रथधूर्यवत् । प्रतोदेनाहृदद्वाजां रुक्मिणीं मम पश्यतः । न च मे स्रोकमध्याभीद्दुःखमीषत्प्रकाशते तदा । तथा स राजमार्गेण महता निर्ययौ बहिः । तद्दृष्ट्वा महदाश्चर्यं दाशार्हा जातमन्यवः । तथाऽब्रुवन् मिथः केचित् समागम्य परस्परम् । ब्राह्मणा एव जायेरन् मान्यो वर्णः कथञ्चन । को ह्येनं रथमास्थाय जीवेदन्यः पुमानिह । ब्राह्मणीविषदग्धस्य नास्ति कश्चिच्चिकित्सकः । तस्मिन् व्रजति दुर्बुद्धौ प्रास्खलद्रुक्मिणी पथि । तत्रामर्षयत श्रीमांस्तत्सूर्यमचोदयत् । ततः परमसंक्रुद्धो रथात् प्रस्कन्द्य सद्विजः । पदातिरत्यवेगेन प्राद्रवद्यत्र रुक्मिणः । तमुत्पतन्तं धावन्तमन्वधावं द्विजोत्तमम् । तथैव पद्मपत्राक्षं प्रसीद भगवन्निति । ततो विलोक्य तेजस्वी ब्राह्मणो मामुवाच ह । जितः क्रोधस्त्वया ह्यद्य ! प्रसन्नश्चैव महाभुज ! । न तेऽपराधमिच्छामि दृष्टवानस्मि सुव्रत ! । प्रीतोऽस्मि तव गोविन्द ! वृणु कामान् यथेप्सितान्" ।

दुर्विगाह त्रि॰ दुर्+वि+गाह्–कर्मणि खल् । १दुःखेन गाहनीये २अतराष्ट्रपुत्रभेदे पु॰ "दुर्मदोदुर्विगाहश्च विविंशतिरविकटाननः" भा॰आ॰११७अ॰ ।

दुर्विदग्ध त्रि॰ दुष्टो विदग्धः प्रा॰स॰ । गर्विते "अशोकवेगदुर्विदग्धं गरुत्मन्तम्" काद॰ ।

दुर्विदत्र त्रि॰विद–लाभे विद्–ज्ञाने वा बा॰अत्र विदत्रं लभ्यं धनं ज्ञानं वा ततः प्रा॰ब॰। १दुर्धनके २दुर्ज्ञानके च "आरे मन्युं दुर्विदत्रस्य धीमहि" ऋ॰१०।२५।४। "दुर्विदत्रा निर्ऋतिर्नः" ऋ॰१०।३६।२।

दुर्विध त्रि॰ दुष्टा विधाऽस्य प्रा॰ब॰ । दरिद्रे अमरः । (दमयन्तीवचने) "अपि स्खलनमज्ञानाच्छिते विदधाते रुचिमर्मदुर्विधम्" नैष॰ "विविनक्ति न बुद्धिदुर्विधः" माघः । २खले मेदि॰ ३मूर्खे शब्दर॰ । "शास्त्रेष्वन्येषु कविषो विद्यमानेषु दुर्विधाः । बुद्धिमान्लोचिकी प्राप्य निरर्थान् प्रवदन्ति ते" रामा॰ २।१०८।२

दुर्विनय पु॰ दुर्+वि+नी–भावे अच् । विनयराहित्ये । दुर्+वि+नी–क्विप् । दुर्विनीति तत्रार्थे स्त्री

दुर्विनीत त्रि॰ दुर्+वि+नी–कर्त्तरि क्त । १विनयाकर्त्तरि विनयशून्ये २अधिक्षिप्तायां पुंस्त्री॰ हेमच॰ स्त्रियां जातित्वात् ङीष् ।

दुर्विमोचन त्रि॰ दुःखेन विमोचनं यस्य । १दुःखेन मोचनीये २अतराष्ट्रपुत्रभेदे पु॰ "चित्रयोधविचित्रयोधौ सुवर्मा दुर्विमोचनः" भा॰द्रो॰११७अ॰ । तत्पुत्रोक्तौ तु ६७अ॰ दुर्विरोचन इति पाठान्तरम् । सोऽपि तत्पुत्रभेदे

दुर्विवाह पु॰निन्दितो विवाहः प्रा॰स॰ । ब्राह्मप्राजापत्यार्षदैवगान्धर्वासुरेषु चतुर्षु विवाहेषु ब्राह्मप्राजापत्यार्षदैवेषु चतुर्षु विवाहेषु

दुर्व्यवहार पु॰ दुर्दो व्यवहारः प्रा॰स॰। दुर्दृष्टशब्ददर्शिते रागलोभादिनाऽसङ्ख्यनिर्णीते व्यवहारे तच्छब्दे दृश्यम्।

दुर्व्रजित न॰ गर्हितं व्रजितम् प्रा॰स॰। निन्दितगतौ "दुर्व्याहृताच्छङ्कमाना दुःस्थिता दुरवेक्षितात्। दुरासितात् दुर्व्रजितादिङ्गिताध्यासितादपि" भा॰व॰२३२अ॰

दुर्ह(ण)न त्रि॰ दुःखेनाहन्यतेऽसौ दुर्+हन–कर्मणि खल्। हन्तुमशक्ये दुःखेन हन्तव्ये "प्रकल्प्स्यति च तस्यार्थो निकृत्ये दुर्हने हते" भट्टिः वेदे तु षत्वम्। "मो षु णः परापरा निर्ऋतिर्दुर्हणा वधीत्" ऋ॰१।३८।६ "त्वं नो अस्या इन्द्र! दुर्हणायाः" ऋ॰१।१२१।१

दुर्हणायु त्रि॰ दुष्टं हननमिच्छति क्यच् दुर्हणाय–उन् वेदे षत्वम्। दुष्टहननेच्छौ "स्त्रियं यद्दुर्हणायुवम्" ऋ॰४।३०।८। "दुर्हणायुवं दुष्टहननमिच्छन्तीम्" भा॰ छान्दस उवङ्।

दुर्हणु त्रि॰ दुःखो हनुरस्य प्रा॰ब॰ दुर्+हन–उन् वा, वेदे षत्वम्। १दुःखेन हननीये २दुष्टहनुयुक्ते च "तदा रमस्व दुर्हणो!" ऋ॰ १०।१५५।३। लोके तु दुर्हनुरित्येव दुष्टहनुके त्रि॰।

दुर्हल(लि)त्रि॰दुष्टो हलिरस्य वा कप्समा॰। दुष्टहलियुक्ते

दुर्हित त्रि॰ निन्दितो हितः प्रा॰स॰। विरोधिलक्षणया शत्रौ "न दुर्हितः स्तादघे न पापया" ऋ॰८।१८।२६

दुर्हुत न॰ निन्दितं हुतम् प्रा॰स॰। अफलजनके होमे "सदैव याचमानेषु तथा दम्भान्वितेषु च। एतेषु दत्तिका दत्ता दावाग्नाविव दुर्हुतम्" भा॰शा॰१८अ॰

दुर्हृणायु त्रि॰ दुष्टं हृणीयते क्रुध्यति लज्जते वा दुर्+हृणी+क्रोधे लज्जायाञ्च कण्ड्वा॰ यक् तत उन् अल्लोपयलोपौ ह्रस्वो॰ वर्णव्यत्यासे ईकारस्याकारः, सगण्वा॰ वा नि॰। १दुष्टक्रोधने २दुष्टं लज्जमाने च।

"दुर्हृणायुस्तिरश्चितानि वसयो जिघांसति" ऋ॰७।५९।८ "दुर्हृणायुरशोभनं क्रुध्यन्" भा॰ "ऋतस्य शिमीवतो भामिनो दुर्हृणायून्" ऋ॰१।८४।१६

दुर्हृत् त्रि॰ दुष्टं हृदयमस्य प्रा॰ब॰ "सहृदुर्हृदौ मित्राऽमित्रयोः" पा॰ निपा॰। १अमित्रे शत्रौ। दुःस्थितं हृदस्य प्रा॰ब॰। २दुःस्थितहृदये त्रि॰ "अश्मसारमयं नूनं हृदयं मम दुर्हृदः" भा॰व॰ ११२अ॰। तस्य भावः युवा॰अण् द्विपदवृद्धिः दौर्हार्द दुष्टान्तःकरणत्वे शत्रुत्वे च न॰।

दुर्हृदय त्रि॰ दुःस्थं हृदयमस्य प्रा॰ब॰ अशत्रुत्वेन न निपा॰। १दुष्टान्तःकरणयुक्ते। दुष्टं हृदयम् प्रा॰स॰। २दुष्टे मनसि न॰।

दुल उत्क्षेपे (दोलान) चुरा॰उभ॰ सक॰ सेट्। दोलयतिते अदूदुलत्। "नारी पदद्वयं स्याच्च कान्तस्योरुद्वयोपरि। कटिं चेद्दोलयेदाशु बन्धः कन्दर्पसङ्कुलः" रतिमञ्जरी "आन्दोलत् क दोलने" कविकल्पद्रुमः। अस्य वा चुरारत्वमपि। दुल–कि "दुलिः अश्वा दुली नितत्नीरश्वयन्ती" तैत्ति॰ ४।४।५।१ दुलीति उत्क्षिपन्तीत्यर्थः।

दुलि पु॰ दुल–कि। १क्षत्रियभेदे शब्दार्थचि॰। २कच्छपस्त्रियां स्त्री वा ङीष्। ३उत्क्षेपके त्रि॰।

दुलिदुह पु॰ दिलीपन्दपपितरि अनमित्रसुते "अनमित्रसुतो राजा विद्वान् दुलिदुहोऽभवत्। दीलिपस्तनयस्तस्य रामस्य प्रपितामहः" हरिवं॰ १५अ॰ [शब्दार्थचि॰।

दुल्ल त्रि॰ दु+क्विप् दुतं लसति लस–कच्। रोमशे

दुवस् परिचरणे उपतापे च कण्ड्वा॰ नाम॰ यक् पर॰ सक॰ सेट्। दुवस्यति अदुवस्यीत् "अनेहसः सुभ इन्दो दुवस्यति" ऋ॰ ३।५१।३ "यामिर्विप्तजानिं दुवस्यथः" ऋ॰ १।११२।१५ "अभिद्विरग्निं नमसा दुवस्यन्" ऋ॰२।१।२

दुवस् न॰दुवस् परिचरणे कण्ड्वा॰दुवस्–क्विप् अल्लोपयलोपौ। १क्रियाभि २परिचरणे च "ऐभिरग्ने दुवोगिरोविश्वेभिः" ऋ॰१।१४।८ "दुवः परिचर्याम्" । दुव इच्छति क्यच् वा अनङि दुवस्यति "स त्वा भरिषो भरिषो दुवस्यसम्" ऋ॰४।४०।२। दुवः परिचरणमिच्छन्तः दुवस्याः तव सोदति दुवस्यसम्" भा॰ कर्मणि क्युट् अनङभावे पक्षे अल्लोपयलोपौ दुवसन परिचरणीये "श्येनासो न दुवसनासः" ऋ॰४।६।१०"दुवसनासः परिचरणीयाः"भा॰

दुवस्य त्रि॰नाम॰दुवस्–शक्यार्थे यत् अल्लोपयलोपौ। "परिचर्याहें "या यदुदुवस्याद्दुवसे न कारुः" ऋ॰ १।१६५।१४। "दुवस्यात् परिचर्याहात् दुवसे परिचरणाय" भा॰

दुवस्यु त्रि॰ दुवः परिचरणमिच्छति क्यच् "क्याच्छन्दसि" पा॰उन्। परिचरणेच्छायुक्ते "गोसूदुर्वति पर्वयं दुवस्युः" ऋ॰१०।१००।१२ वेदे क्वचिदस्त्रियामपि वङ्। "स न इळानया सह देवा अग्ने दुवस्यु वा"ऋ॰८।१०२।२

दुवस्वत् त्रि॰ दुवोऽस्मिः परिचरणं वाऽस्यास्ति मतुप् मस्य वः शान्तत्वात् न पदकार्यम्। १क्रियायुक्ते २परिचरणयुक्ते च "अवस्युरसि दुवस्वान्" यजु॰५।३२ "सोमनेत्रेभ्यो देवेभ्य उपरिसद्भ्यो दुवस्वद्भ्यः स्वाहा" ८।३५ "दुवस्वाञ्छर्म्मभिः" १८।४

दुचोयु त्रि॰ दुचः परिचर्यामिच्छति क्यचि वेदे वा पदकार्यम् उन्। परिचरणेच्छौ। "स त्वं शुधि शुत्वा यो दुचोयुः" ऋ॰ ६।२६।५। "दुचोयुरक्षदीयं परिचरणमात्मन इच्छन्" भा॰ पक्षे दुचस्यु तत्रार्थे

दुश्चर त्रि॰ दुःखेन चर्यते दुर्+चर–कर्मणि खल्। चरितुमशक्ये। १दुःखेन चरणीये "चरतः किल दुश्चरं तपः" रघुः "स्थाने तपो दुश्चरमेतदर्थम्" कुमा॰ "अहं प्रजाः सिसृक्षुस्तु तपस्तप्त्वा सुदुश्चरम्" मनुः। दुःखेन दुष्टं वा चरति चर्+अच्। २अम्बुके हारा॰ २भल्लूके पुंस्त्री॰ राजनि॰।

दुश्चरित न॰ दुष्टं चरितम् प्रा॰स॰। १दुष्कृते पापे "दृष्टदुश्चरितैः केचित् केचित् पूर्वकृतैस्तथा। प्रायुञ्जन्ति नरा रूपविपर्ययम्"। "यथा मत्स्यादनं प्राप्य विध्रं लोहं निमज्जति। तथा दुश्चरितं सर्वं वेदे विदति मज्जति" मनुः। दुःखेन चरितम्। २कृच्छ्रेण कृते त्रि॰ दुश्चं चरितं यस्य प्रा॰ब॰। ३तद्युक्ते त्रि॰।

दुश्चर्मन् पु॰ दुःस्थितं चर्म यत्र प्रा॰उ॰। १स्वभावतोऽनादृतभेदे रोगभेदे। "क्लेमकारी तु कुनखी दुश्चर्मा गुरुतल्पगः" याज्ञ॰। २कोढरोगे राजनि॰।

दुश्चारित्र न॰चरित्रमेव स्वार्थे अण् चारित्रं दुष्टं चारित्रम् प्रा॰स॰। दुष्टे चरित्रे पापे। दुःस्थितं चारित्रमस्य प्रा॰ब॰। १दुष्टचरित्रयुक्ते त्रि॰ "मूढो राजन्! भवति ब्रह्मबन्धुर्दुश्चारित्रोयज्ञ धर्मादपेतः" भा॰शा॰ १३अ॰।

दुश्चिकित्स्य त्रि॰ दुर्+कित–स्वार्थे सन् कर्मणि यत्। दुःखेन चिकित्सनीये प्रतिकार्ये रोगे। सुश्रुतोक्ताः ते च रोगा अवारणीयशब्दे ३४८पृ॰ दर्शिताः।

दुश्चिक्य न॰ चक्यात् ल्यतीये रात्रौ "लिलिकोयज्ञ तत्रयं दुश्चिक्यं स्यात् ल्यतीयकम्" ज्यो॰त॰

दुश्च्यवन पु॰ दुःखं च्यवनं चालनमस्य दुःसहच्यवनः शिवो येन वा प्रा॰ब॰, दुर्+च्यु–ल्यु, "छन्दसि गत्यर्थेभ्यः" पा॰ वुच् वा। इन्द्रे अमरः "इत्कारेण दुश्च्यवनेन ष्णुना" ऋ॰ १०।१०२।२ "दुश्च्यवनेनान्यैरविचाल्येन" भा॰ मन्वन्तरं तस्यात्यात् पतनात् तस्य तथात्वम्। एकैकमन्वन्तरे हि चतुर्दश इन्द्रा भवन्तीति एकसप्ततिमहायुगस्य मन्वन्तरकालस्य चतुर्दशोभागः किञ्चिदधिकषड्सहस्रयुगात्मकस्तत्कालस्तोऽन्तरं तस्य पतनात् तथात्वम्। चतुर्दश इन्द्राश्च कल्पभेदेन भिन्ननामानः इन्द्रशब्दे ८४५पृ॰ दर्शिताः। च्यवनेन ऋषेणाभिभूतत्वात् तस्य तथात्वम् "यस्यवतश्च शक्रस्य वज्रेण प्रहरिष्यतः। सवज्रं स्तम्भयामास तं बाहुं परिघोपमम्" भा॰अनु॰ १६०अ॰ "बाहुं सवज्रं शक्रस्य क्रुद्धस्तम्भयत् प्रभुः" मल्लिनाथधृतपुराणम्।

दुश्च्यव त्रि॰ दुःखेन च्याव्यतेऽसौ दुर्+च्यु–णिच् कर्मणि खल्। १दुःखेन च्यावनीये। २महादेवे पु॰ "दुश्च्यवश्च्यवनो जेता हन्ता ब्रह्मद्विषां हरः" भा॰क॰२४अ॰

दु(दुः)ग्रव न॰ दुःखेन श्रूयतेऽसौ दुर्+श्रु–खल् वा रेफस्य उत्वम्। श्रुतिदुःखावहे परुषवर्णयुक्ते काव्यदोषभेदे "दुःश्रवं त्रिविधाक्षोक्तानुचितार्थमयुक्तता" इत्युपक्रमे परुषवर्णतया श्रुतिदुःखावहत्वं दुःश्रवत्वमिति सा॰द॰ लक्षयित्वा यथा "कार्त्तार्थं यात तत्रत्री" इत्युदाहृतम्। तस्य चापरत्वम् श्रुतिकटुरिति चन्द्रालोके उक्तम् "भवेच्छ्रुतिकटुर्वर्णैः श्रवणोद्वेजने पटुः"। अत्र खटकवर्णस्यैव परुषत्वेन तद्घटितकाव्यस्य तथात्वं "पदे पदांशे वाक्योर्थे सम्भवन्ति रसेऽपि ते" सा॰द॰ सामान्यतो दोषाणां पक्षद्वयोक्तौ तेनेऽपि श्रुतिकटुदोषस्य पदतदंशवाक्येष्वेव सम्भवः इत्येव विशेषः।

दुष वैकृते दिवा॰पर॰अक॰ अनिट्। दुष्यति दूषति अदुषत् अदुषुत् इदोष दोष्टा दोक्ष्यति। "क्षुरगानेष्वपि तेजस्वी पावको नैव दुष्यति" मनुः। "भेदं प्रजापते रेतोऽदुषत्" ऐत॰ब्रा॰ २।२२ "राद्धे षट्कृत्वो च स्त्रीविद्धं न दुष्यति" स्मृतिः। वैकृतत्वं यस्य यथास्वरूपं तद्विपरीते, यथा हेतोः साध्यानुमापकत्वं तद्विपरीते दुष्टत्वम् अशुद्धत्वञ्च। यथा मद्यादिना दुग्धादेरशुद्धत्वम्। अशुद्धित्वं स्वरूपतः यथा मालिन्यादिना, शास्त्रविधुरकृत्ये दुरदृष्टजनकत्वेन वा। यथा नीलीवस्त्रादिधारणादेः शास्त्रनिषिद्धत्वात् तद्धारणे दुरदृष्टोत्पत्तेः तस्य दुष्टत्वम्। एवमन्यत्रापि बोध्यम् "दुषधातोरियाक्षोक्तं दोषसम्पत्तये गुणः" उद्भटः दोषः। दुष्टः। "अनेकदोषदुष्टोऽपि कायः कस्य न वल्लभः" पञ्चर॰ दोषी। णिचि। दूषयति चित्तविकारे तु दोषयति दूषयति वा चित्तम्। "न च किञ्चिदेवांशं काव्यस्य दूषयन्तः श्रुतिकटादयो दोषाः, किं तर्हि सर्वमेव काव्यम्" सा॰द॰। "दोषोविचारसहनो यदि दूष्यते तद् व्याख्या मम प्रथममेव न दूषणीया" काव्यप्र॰व्या॰ सङ्केश्वरः "यः सौहृदे पुरुषं स्थापयित्वा पश्चादेनं दूषयते स वालः" भा॰स॰ ६२ अ॰ "यथा ब्रह्मणु विप्राणां सोमपानं न दूषितम्" कुमा॰

षितत्वम् । दूषयन् दूषणीयः दूषितः दूषयित्वा संदूषय्र । उपसर्गपूर्वकः तत्तदुपसर्गद्योत्यार्थयुक्तविकारे

दुष्कर त्रि॰ दुःखेन क्रियते दुर्+कृ–कर्मणि खल् । कर्त्तुमशक्ये दुःखेन करणीये "अपि यत् सुकरं कर्म तदप्येकेन दुष्करम्" मनुः "सुखे ! दुष्करमेतदित्यतितरां सुकरं सङ्गमं बलात्" अमरश्च० । २आकाशे न० यज्ञार्थकत्वतरः तस्याऽन्यत्वेन दुष्करत्वात् । भावे खल् । ३दुःखेन करणे न० ।

दुष्कर्मन् न० दुष्टं कर्म प्रा०स० । १पापे । दुष्कर्मभिच नड्वलो नाम वासति दुर्मतिः" भा०उ० १२अ० "दुष्कर्मजान्यघां रोगा यानि चैव क्रमात् यमम् । जपैः सुरार्चनैर्होमैर्दानैस्तेषां क्षयोभवेत्" आतातपः । दुःस्थितं कर्माऽस्य प्रा०ब० २पापकर्मकारके त्रि॰ "ततो वसति दुष्कर्मा नरके शाश्वतीः समाः" भा०उ०१२१अ० ।

दुष्काल पु० दुष्टः कालः प्रा०स० । निन्दिते काले । यस्य यः कालोविहितस्तस्य ततो वैलक्षण्ये कालस्य दुष्टता २प्रलये च । दुःसहो कालः कलनमस्य प्रा०ब० । ३शिवे "अकालयातिकालश्च दुष्कालः कालएव च" भा०मा० २८६ अ०शिवनामोक्तौ ।

दुष्कुल न० दुष्टं कुलम् प्रा०स० । १निन्दिते कुले "अन्यादपि परं धर्मं स्त्रीरत्नं दुष्कुलादपि" मनुः । दुःस्थं कुलमस्य प्रा०ब० । २निन्दितकुलजाते त्रि॰ "मदमूर्खताभिमाना दुष्कुलतैश्वर्यसंयुक्ताः" स्त्रा०द० दुष्कुले भवः यत्रे ख । दुष्कुलीन, ढक् दौष्कुलेय निन्द्यकुलभवे त्रि॰

दुष्कृत न० दुष्टं कृतम् प्रा०स० । १पापे "दाक्षायत् दुष्कृतं किञ्चित् तत्सर्वं प्रतिपद्यते । निधानकर्त्तुः स्वात्मा तु दुष्कृतांशेन लिप्यते" मनुः २तज्जनके कर्मणि च "यथा यथा मनस्तस्य दुष्कृतं कर्म गर्हति" मनुः तदस्यास्ति इनि । दुष्कृतिन् तद्युक्ते "पुनःपुनर्दुष्कृतिनं निनिन्द" रघुः ।

दुष्कृति त्रि॰दुष्टा कृतिरस्य प्रा०ब० । दुष्कर्मकारके "पादस्पर्शंस्तु रक्षांसि दुष्कृतीनवधूननम्" मनुः प्रा०स० । २पापे स्त्री

दुष्क्रीत त्रि॰ दुष्टं क्रीतम् प्रा०स० । रूपसंख्यादिकमपरीक्ष्य क्रीते क्रीतानुशयगन्धे द्रव्यम् "क्रीत्वा मूल्येन यो द्रव्यं दुष्क्रीतं मन्यते क्रयी" नारदः । [अमरः ।

दुष्खदिर पु॰दुष्टः खदिरः प्रा०स० । कालस्कन्धे खुरखदिरभेदे

दुष्ट त्रि॰ दुष–क्त । १दुर्वृत्ते २अधमे विद्वः । ३दोषान्विते च दोषगन्धे वक्ष्यमाणव्यभिचारादीनामन्यतमयुक्ते ४क्षेत्रे । ५पित्तादिदोषयुक्ते व्रणकारणे नेत्रादौ यथा कथञ्चित् ६दोषयुक्ते च त्रि॰ ७कुष्ठे न० (कुड़) ख्याते शब्दच० । "व्याध्यो दुष्टः प्रियोऽभ्यासेत्" रघुः "दुष्टः शब्दः स्खलतो वर्णतो वा" महाभाष्यधृता श्रुतिः ।

दुष्टचारिन् त्रि॰ दुष्टं चरति चर–णिनि । दोषयुक्तकर्मकारिणि "अथ वत्सैनमासीनं षड्भिरेत्य दुष्टचारिणः" भा०वि०४अ० ।

दुष्टगज पु॰ निन्दकर्म० । गम्भीरवेदिनि गजे क्षेमच० ।

दुष्टनु त्रि॰ दुष्टा तनुरस्य प्रा०ब० वेदे बलम् । दुःस्थदेहयुक्ते "बुधा किल त्वा दुष्टनो ! जविष्ठानृत्स न ऊरुषः" ऋ० ४।७।२ लोके तु दुष्टतनु इत्येव तदार्थे

दुष्टयोग पु॰ कर्म० । वैषुवतिव्यतीपातादि योगे तस्य स्नानदानाद्यतिरिक्तकर्मत्वमशुभफलकत्वञ्च स्मृ॰सि॰नानास्थाने उक्तं यथा

"तत्सांगुजातसम्पर्कात् तयोस्तु प्रवहाहतः । तद्दक्कोधमयो वह्निर्लोकाभावाय जायते । विनाशयति पातोऽस्मिन् लोकानामखिलं यतः । व्यतीपातः प्रसिद्धोऽयं संज्ञाभेदेन वैधृतिः । स कण्ठो दारुणवपुर्लोहितार्क्षो महोदरः । सर्वानिष्टकरो रौद्रो भूयो भूयः प्रजायते । आद्यन्तकालयोर्मध्यः कालोऽन्ये योऽतिदारुणः । प्रज्वलज्ज्वलनाकारः सर्वकर्मसु गर्हितः । एकायनगतं यावदर्कसोमखडान्तरम् । सम्भवस्तावदेवास्य सर्वकर्मविनाशकृत् । व्यतीपातत्रयं घोरं सखण्डान्तरितं तथा । एतद् भसन्धितयं सर्वकर्मसु वर्जयेत्" २अरिष्टसूचके गोचरविलग्नादिस्थग्रहयोगभेदे च

दुष्ट(स्त)र त्रि॰ दुःखेन तीर्यतेऽसौ कर्मणि खल् वेदे सुषामादेराकृतिगणत्वात् षत्वम् । "चर्कृत्यं मरुतः पत्सु दुस्तरम्" ऋ०१।५४।१३ लोके तु न षत्वम् "तितीर्षुर्दुस्तरं मोहादुडुपेनास्मि सागरम्" रघुः ।

दुष्टरक्तदृक् त्रि॰ दुष्टा रक्ता च दृगस्य । पित्तादिदोषजरक्तनेत्रके । "दीक्षितः स्त्रीप्रसङ्गेन जायते दुष्टरक्तदृक्" आतातपेन तत्कर्मपाके उक्तः ।

दुष्टरीतु पु॰ दुर्+तॄ–तनु वेदे दृट् दीर्घश्च षत्वम् । दुःखेन तरणीयेऽङ्गिरसे "तविषीवे वज्रिवे दुष्टरीतवे" ऋ०२।२१। २। लोके तु दुस्तर्तु इत्येव ।

दुष्टवृष पु॰कर्म० । शक्तेऽपि अधर्षणीये वृषे (गड़िया) ख्याते क्षेमच० । [शब्दे द्रव्यम् ।

दुष्टव्रण पु॰ निन्दक० । अचिकित्सनीये व्रणभेदे द्विव्रणीय-

दुष्टसाक्षिन् पु॰ कर्म० । नारदादुक्ते असाक्षित्वप्रयोजकदोष

युक्ते साक्षिणि। साक्षिणोदोषाश्च नारदेनोक्ताः यथा "यस्मात्तदोषदुष्टत्वादस्य दण्ड उच्यते। स्थानात् स्थानान्तरं गच्छेदेकैकस्मात्तु धावति। कालत्यक्तश्च भृशमभीक्ष्णं निःश्वसित्यपि। विलिखत्यवनीं पद्भ्यामास्ये वासश्च धूनयेत्। भिद्यते सक्थ्यौष्ठ ललाटं खिद्यते तथा। शोषमागच्छतश्चोष्ठावूर्द्धं तिर्यक्किरीचते। त्वरमाणश्च दृष्टावद्रमदृष्टो बहु भाषते। कूटसाक्षी स विज्ञेयस्तं शापं विनयेदृग्भ्यम्"। अवद्रमसम्बद्धम्। विनयेच्छिक्षयेद्वा यथा कौटसाक्ष्यादुविभेतीत्यर्थः। न तु दण्डयेदित्यर्थः। प्राक्तनपैक्रतिकविकारविवेकस्य दुःशक्यत्वात् सम्भावनामात्रेण च दण्डनस्यान्याय्यत्वादिति मिता० उक्तम्। मदनरत्ने त्वाविद्धमिति पठित्वा आकुलमिति व्याख्यातम्। शङ्खलिखितावपि "मन्त्रिभिः शास्त्रसामर्थ्यादुदृष्टलक्षणं साक्षान्निर्वेदमपेक्षते समन्तादवलोकयति। अकस्मादुत्थानं पुरोधं विसृजति देशाद्देशं गच्छति पाणिना पाणिं पीडयति नखान्निलुनति सक्थ्यस्य विवर्णतामेति प्रस्विद्यति चास्य ललाटश्च चक्षुश्च वाचं प्रतिपूजयत्यकस्माद्ददाति, प्रशंसति पुनः पुनरन्यमपवदति बर्हिर्निरीक्षते शस्त्रं पराम्रशति शिरः प्रकम्पयत्योष्ठौ निर्भुनक्ति सक्थ्नी परिलेढि अतिविस्मितः कर्मक्षमश्चत्यपि भ्रुवौ संहरति तूष्णीं ध्यायति पूर्वोत्तरविरुद्धं व्याहरति एव मादिदुष्टलक्षणं क्रुद्धस्य च स्वामिनोऽन्यत्र प्रकृतिशीलादिति" अकस्मादिति तूष्णीमिति च यथायोगमनेकत्र सम्बन्धनीयम्। अन्यत्र प्रकृतिशीलादिति। प्रकृत्या स्वभावात् शीलनिर्वेक्षणादिधर्मो यस्य स तथोक्तस्तोऽन्यत्रैतानि दुष्टक्रुद्धलक्षणानि, एते चावान्तरवैलक्षण्यस्य दुर्ज्ञेयत्वादित्यवधानेन परीक्ष्य वस्तुतत्त्वानुसरणीयमिति सूचितम्" वीरमि०

सुनिवाक्ये अन्येऽपि साक्षिदोषा असाक्षिलक्षणोक्ता वीरमि० भट्टाद्यर्थिता यथा

मनुः "नार्थसम्बन्धिनो नाप्ता न सहाया न वैरिणः। न दृष्टदोषाः कर्त्तव्या न व्याध्यार्त्ता न दूषिताः। न साक्षी नृपतिः कार्यो न कारुकुशीलवौ। न श्रोत्रियो न लिङ्गस्थो न सङ्घेभ्यो विनिर्गतः। नाध्यधीनो न वक्तव्यो न दस्युर्न विकर्मकृत्। न वृद्धो न शिशुर्नैको नाप्तो न विकलेन्द्रियः। नार्त्तो न मत्तो नोन्मत्तो न क्षुत्तृष्णोपपीडितः। न श्रमार्त्तो न कामार्त्तो न क्रुद्धो नापि तस्करः" इति। "अत्र सर्वैर्विशेषणैरसत्यसम्भावना विस्मरणादिकमसाक्ष्यनिमित्तमुपलक्ष्यते। अतएव दृष्ट विकलेन्द्रियविकर्मकृतस्करादीनां गौडमन्यायेन पुनरुपादानम्। अत्र बहवः ग्रन्थाः ग्रन्थार्थाः। अन्ये मेधातिथ्यनुसारेण विरियन्ते। अर्थसम्बन्धिन उत्तमर्णाधमर्णाद्याः उत्तमर्णोऽधमर्णवचनेन पराजीयमान स्तदानीमेव रोषाविष्टोऽधमर्णं मत्प्रादात् प्रयतेनेति तच्चित्तानुवृत्तिरधमर्णस्य तदनुगुणकौटसाक्ष्यहेतुत्वेन संभाव्यते। उत्तमर्णो निर्धनेऽधमर्णे स्वसाक्षितया धनं प्राप्य स्वर्गं तदर्पयिष्यतीति बुद्ध्या तदनुगुणवादी सम्भाव्यते। तथार्थः प्रयोजनन्तत्सम्बन्धिनोर्वादिप्रतिवादिनोरन्यतरस्माद् ग्रेयं स्वप्रयोजनं सिसाधयिषितस्तेऽभ्युपकारगन्धाद् साक्ष्यार्थी इत्यादि। सर्वत्र कौटसाक्ष्यसम्भावनोद्देश्या। दृष्टदोषा अन्यत्र कृतकौटसाक्ष्याः। व्याध्यार्त्ता वचनविसंवादापादकव्याधिपीड़ावन्तः। दूषिता अभिशस्ताः। नृपतेरसाक्षित्वमकृताभिप्रायेभ्यो न प्राक्तनेनारदोक्तिविरोधः। लिङ्गस्थोऽपव्रतादिः। सङ्घेभ्यो विनिर्गतः परित्यक्तः पित्रादिगुरुजनसंसर्गात् दृष्टानुपसेवनादस्यार्थस्यसम्भावना। आध्यधीनो बन्धकीकृतः तस्य तदाधायत्तवर्त्तित्वात्। वक्तव्यो निन्द्यास्पदम् विकर्मकृत् अधर्मीभूतः। दृष्टविकलेन्द्रिययोर्बुद्धिकृतभावहेतुकेन्द्रियवैकल्येन भेदः। आर्त्तः शोकेन। नारदोऽपि "दासनैऋतिकाभृद्दण्डक्लीबचाक्रिकाः। मत्तोन्मत्तप्रमत्तार्त्त कितवापमयाजकाः। महापथिकसाहसिकव्रात्यप्रव्रजितातुराः। व्यङ्गैकश्रोत्रियाचारहीनक्लीवकुशीलवाः। नास्तिकव्रात्यदारान्नित्यागिनोऽयाज्ययाजकाः। एकस्यानीसङ्घाद्यारिचरप्रातिसनाभयः। प्राग्दृष्टदोषश्चैलूषविघलीव्यश्वित्रिकाः। गरदाग्निदकीनाशसूद्रापुत्रोपपातिनः। क्लान्तसाहसिकश्चान्तर्निर्भूताम्यवसायिनः। भिन्नदृत्तसमाहत्तजडतैलिकमूलिकाः। भूताविष्टन्यहिष्टवर्षनक्षत्रसूचकाः। अधर्मस्यात्मविक्रेतृहीनाङ्गमहत्तयः। कुनखी श्यावदन्तश्चित्री मित्रध्रुक्पशुपौरुषिकाः। ऐन्द्रजालिककुलोपत्रेषी गणविरोधिनः। वधक्षत्रियकृत् यज्ञी पतितः कूटकारकः। कुण्डकः प्रव्रजितस्त्रीस्करो राजपूरुषः। मनुष्यपशुमांसास्त्रिमधुक्षीराम्बुसर्पिषाम्। विक्रेता ब्राह्मणश्चैव द्विजो वार्धुषिकश्च यः। च्युतः स्वधर्मात्कुत्सितः स्वको हीनसेवकः। पित्रा विवदमानश्च भेदकश्चेत्यसाक्षिणः। श्रेष्ठ्यादिषु तु वर्गेषु कश्चिद्देषप्रतारितात्। तस्य तेभ्यो न साक्ष्यं

स्यादुद्वेष्टारः सर्व एव ते। नैकृतिकः परापकारशीलः। चाक्रिकस्तैलिकः। प्रमत्तः सदाऽनवहितः। महापथिको महापथगामी। मातृद्रविणव्यवहितवाही। एकः श्रोत्रियो द्वयोरनुमतः। एकः, श्रोत्रिय इति पृथग्वा प्रायश्चोक्तं च प्राग्येव तत्। अपरार्केण तु युग्मैकेति पठित्वा युग्मौ द्वाविति व्याख्यातम्। एकस्यालीसहाय एकपाकभोजीति। सहाय्यन्यतरसहाय्यकारी, मिश्रचरेश्वरौ। मदनरत्नाकरस्तु एकस्यालोः सहाय इति विशेषणद्वयं पृथक्कृत्य एकस्यालौ स्याल्यधिकरणकः पाकोलक्ष्यते। स एको यस्येत्येकस्यालीति व्याचख्यौ। समासान्तविधेरनित्यत्वादेकस्यालीत्यत्र "नद्यृतश्चेति" पा० न कप्। चर्द्दिपिप्पलीत्यादिवच्च ह्रस्व इति च समादधे। अरिचरः भूतपूर्वः शत्रुः। भूतपूर्वे चरट्। कल्पतरौ त्वस्वधर इति पठित्वा यज्ञधर इति व्याख्यातम्। भ्रातरः सगोत्राः सनाभयो मातृजतत्सुतमातृष्वस्रियादयः। शैलूषः स्त्रीणां नर्तयिता। कुशीलवस्तु रङ्गोपजीवी नट इति भेदः। विषजीवी विषक्रयजीवीति मदनरत्ने। विषवद्योपजीवीति रत्नाकरे। अहितुण्डिकः सर्पक्रीडोपजीवी व्यालग्राही। कीनाशः कर्षकः क्षुद्रो वा। अपण इति तु मदनरत्ने। उपपातिन उपपातकीति कल्पतरुः। मदनरत्ने तूपपातक इति पठितम्। उप समीपं पातकं यस्येति विग्रहेऽप पातकयुक्त इति व्याख्यातञ्च। क्लान्तोऽतिखिन्नः श्लान्तोऽनवरतकर्मकारीति मदनरत्ने। अग्लान इति पठित्वाऽश्लोम्यकर्मकारीति रत्नाकरे। निर्घृणो बान्धवैस्त्यक्त इति मदनरत्ने। यामराजकलञ्चेत्यादिभिर्निःसारित इति रत्नाकरे। मूलिकः लोकभयशून्य इति भरतेयः। मूलं विप्रलम्भत्कारीति तु युक्तम्। अपरार्केण तु पौषिक इति पठित्वा पोषिकः पृषादिक्रयीति व्याख्यातम्। वर्षशुष्को वर्षशकुनवेदी। नक्षत्रशुष्को ज्यौतिषिकः। अधर्मी परकीयपापप्रकाशकः। क्षीनाङ्ग उचितपरिमाणन्यूनाङ्गः। व्यङ्गस्तु छिन्नाङ्गत्वादिरिति भेदः। भगन्दरिभार्यादाक्षादिसम्भोगशुल्कोपजीवी अङ्गी छत्रमनर्त्तनजीवीति मदनरत्नरत्नाकरयोः। कुहको दाम्भिकः। प्रत्यवसितः प्रत्यवसादितुतः। कुक्किको राज्ञा व्यवहारपरिच्छेदकतया नियुक्तः। अस्य च साक्षित्वकरणे निषेधो, विधिस्तु कृतसाक्ष्य इति कल्पतरुः। मदनरत्ने तु कुकं ब्राह्मणादिगणस्तदधिकारी कुक्किक इति व्याख्यातम्। कूचको राज्ञा परदोषान्वेषणपूर्वकं स्वस्य तच्छेदने नियुक्तः। भेदकस्त्रिलादिप्रीतिभङ्गकर्त्ता। श्वेतादिचित्तस्यायमर्थः। वेषु श्वेतादिषु यस्त्वेकोऽपि हेयत्वं शत्रुतामापन्नदोषविवादे तच्छ्वेतादिनिविष्टाः सर्व एव न साक्षिणस्तत्र हेतुर्द्वेष्टारः सर्वएव त इति तच्छ्वेतान्तर्गतैकहेत्वनुरोधजतवैरनिर्यातनार्थमन्यथावादित्वसम्भवात्। अतएव नारदः "बालोऽज्ञानादसत्यात् स्त्री पाषाण्डात् स्याच्च कूटकृत्। विभूयादुबान्धवः श्वेताद्वैरनिर्यातनादरिरिति"। कात्यायनः "तदुक्तिजीविनो ये च तत्रैवाश्रितकारिणः। तदुबन्धु सुहृदो भक्ता आप्ताश्च न साक्षिणः। मातृष्वसुःसुताश्चैव पितृष्वसृसुतास्तथा। मातुलस्य सुताश्चैव गोदर्यसुतमातुलाः। एते सनाभयः प्रोक्ताः साक्ष्यन्तेषु न योजयेत्। कन्याः सम्बन्धिनश्चैव विवाहो भगिनीपतिः। पिता बन्धुः पितृव्य श्वशुरो गुरवस्तथा"। तथा व्यासस्मृतिः "मातुः पिता पितृव्यश्च भार्यायाश्चाप्यमातुलौ। भ्राता सखा च जामाता सर्वेऽप्येते न साक्षिणः। परस्त्रीपानसक्ताश्च कितवाः सर्वदूषकाः। उन्मत्तार्त्ताः साङ्कल्पिका नास्तिकाश्च न साक्षिणः" इति। अत्र मातृष्वस्रादिशब्दानां सम्बन्धिशब्दत्वादर्थप्रत्यर्थिनोरन्यतरस्य एतादृशसम्बन्धिनो न साक्षिणः सम्बन्धिनि द्वेषादन्यत्र वैरसम्भवादिति ध्येयम्। शङ्खलिखितौ "शुल्कशुल्काधिकृतौ दूतो वेष्टितशिराः स्त्रियोगुरुकुलवासिनः परिव्राजकब्रह्मचारिणः पाषण्डाः शङ्खिनः व्याधयाश्चिपः" इति अत्राऽसाक्षिणः इति प्रकृतम् शुल्काधिकृतः शुल्कग्रहणस्थानाधिकारी। शुल्कः स्वस्थाननिवेशितः पदातिसमूहस्तदधिकृतः। वेष्टितशिराः उष्णीषवेष्टितमूर्द्धा व्याधिभिभूतो वा इतरे प्रसिद्धा व्याख्याततराश्च। अनेन प्रपञ्चेन लोभादिकषायाश्रित्वनिमित्तमेव व्यङ्गीकृतम्। यथाह मनुः "लोभान्मोहाद्भयात् क्रोधान्मैत्र्यात्कामात्तथैव च। अज्ञानाद्बालभावाच्च साक्षी वितथ उच्यते" इति।

**दुष्ठु** अव्य०दुर्+ष्या—क सुणामा०थत्वम्। १निन्दायाम् अमरः। २अधिनीते त्रि० उणादिको० तनः उद्धात्वा० भावे अच्। दौष्ठव अधिनये न०।

**दुष्पतन** न०दुष्टं पतत्यनेन दुर्+पत—करणे ल्युट्। १अपशब्दे त्रिका०। अपशब्दप्रयोगस्य दुरदृष्टजनकतया पतनहेतुत्वात् तथात्वम्। "नापभाषितवै न लेच्छितवै म्लेच्छो ह वा नाम यदपशब्दः" इत्यादिश्रुत्या हि अपशब्दप्रयो-

गस्य निन्दितत्वेन तत्प्रयोगस्य पापजनकत्वं सूचितम्। भावे ल्युट्। २दुःखेन पतने न०।

दुष्पत्र प०दुःखं पत्रमस्य प्रा०ब०। चोरनामगन्धद्रव्ये अमरः

दुष्पद् त्रि० दुःखेन पद्यते दुर्+पद्-कर्मणि खल्। दुःखेन प्राप्ये प्राप्तुमशक्ये "सुतो वि चक्रेण रथा दुष्पदा हणक्" ऋ० १।५३।९ "दुष्पदा दुष्पदेन प्राप्तुमशक्येन चक्रेण" भा० श्रुतोयाख्याने छान्दस आच्।

दुष्पराजय त्रि० दुःखेन पराजीयतेऽसौ दुर्+परा+जि कर्मणि खल्। १जेतुमशक्ये दुःखेन जेतव्ये २धृतराष्ट्रपुत्रभेदे पु० "उग्रश्रवा उग्रसेनः सेनानीर्दुष्पराजयः" भा०आ० ११७अ० तत्पुत्रोक्तौ।

दुष्परिग्रह त्रि० दुःखेन परिगृह्यतेऽसौ दुर्+परि+ग्रह-कर्मणि खल्। १परिग्रहीतुमशक्ये "लोकाधाराः स्त्रियो राज्ञां दुरापा दुष्परिग्रहाः" कामन्द०। प्रा०स०। २निन्द्यभार्य्यायाञ्च। दुःस्थितः परिग्रहो भार्या यस्य प्रा०ब०। २दुष्टभार्य्यके पु०

दुष्परिहन्तु त्रि० दुर्+परि+हन-खलर्थे तुन्। १दुःखेन नाशयितव्ये २दुष्परिहार्ये च "यच्छता नो दुष्परिहन्तु शर्म" ऋ०२।२३।६ "दुष्परिहन्तु हन्तुमशक्यम्" भा०

दुष्पर्श त्रि० दुर्+स्पृश-कर्मणि खल् वा विसर्गलोपः। १दुःखेन स्पर्शनीये स्पृष्टुमशक्ये २दुरालभायां स्त्री अमरः तत्रार्थे प० भरतः।

दुष्पान त्रि० दुःखेन पीयतेऽसौ "पातेर्युच्" पा० खलर्थे कर्मणि युच्। दुःखेन पेये १पातुमशक्ये। भावे युच्। २दुःखेन पाने न०।

दुष्पुरुष प० प्रा०स०। निन्द्ये पुरुषे ततः ब्राह्मणा० स्वार्थे भावे कर्मणि वा ष्यञ्। दौष्पुरुष्य तदर्थे तद्भावे तत्कर्मणि तु न०।

दुष्पूर त्रि० दुर्+पूरि-कर्मणि खल्। १पूरयितुमशक्ये दुःखेन पूरणीये। "कामस्याग्निश्च दुष्पूरं दह्यमानमदान्वितः" गीता २अनियार्थे च "कामरूपेण कौन्तेय! दुष्पूरेणानलेन च" गीता

दुष्प्रकाश त्रि० दुष्टः प्रकाशः प्रा०स०। विरोधिलक्षणया अन्धकारे "पापस्य लोको निरयो दुष्प्रकाशो नित्यं दुःखं शोकमूर्जिछलेव" भा०शा० ७२अ०।

दुष्प्रकृति त्रि० दुःखा प्रकृतिरस्य प्रा०ब०। १दुष्टस्वभावे "त्वं तु दुष्प्रकृतिर्मूढो मद्भाग्यद्वेषवेदिटः" भा०क० १०अ०। प्रा०स०। २निन्दायां प्रकृतौ निन्द्ये स्वभावे स्त्री

दुष्प्रजस् त्रि० दुःखा प्रजाऽस्य असुच् समा०। १निन्द्यप्रजायुक्ते। प्रा०स०नासिच्। दुष्प्रजा २निन्द्यप्रजायां स्त्री

दुष्प्रज्ञान त्रि० दुःखेन प्रज्ञायतेऽसौ दुर्+प्र+ज्ञा-खलर्थे कर्मणि युच्। १ज्ञातुमशक्ये। दुष्टं प्रज्ञानं प्रा०स०। २निन्द्ये ज्ञाने न० "दुष्प्रज्ञानेन निरयाः बहवः समुदाहृताः" भा०शा० १२७अ०।

दुष्प्रधर्ष त्रि० दुष्करः प्रधर्षोऽस्य प्रा०ब०। १धर्षयितुमशक्ये दुःखेन धर्षणीये "सा दुष्प्रधर्षा मनसाऽन्यैरुच्चैः" रघुः। २दुरालभायां २खर्जूर्याञ्च स्त्री राजनि०। ३धृतराष्ट्रपुत्रभेदे पु० "दुर्मुखो दुष्प्रधर्षश्च विविंशतिरविकटः समः" भा०भी० ६४अ०। तत्र दुष्प्रकर्षश्चेति पाठान्तरम् भा०आ० ६४अ० तत्पुत्रोक्तौ तथोक्तेः

दुष्प्रधर्षण त्रि० दुर्+प्र+धृष-भावायां युच्। १दुःखेन धर्षणीये धर्षयितुमशक्ये। "विन्दानुविन्दौ दुर्धर्षः सुबाहुर्दुष्प्रधर्षणः" भा०आ० ६७ अ० २धृतराष्ट्रपुत्रभेदे पु० २दार्वीकाम् स्त्री अमरः गौरा० ङीष्।

दुष्प्रधर्षिणी स्त्री दुष्प्रधर्षोऽस्त्यस्याः इनि ङीप्। १कष्टकार्य्यां राजनि० २दुरालभाम् भावप्र०।

दुष्प्रवृत्ति स्त्री प्रा०स०। दुष्टायां प्रवृत्तौ वार्त्तायां "तेषां शूर्पणखे वैका दुष्प्रवृत्तिरभवत्" रघुः।

दुष्प्रवेश त्रि० दुष्करः प्रवेशोऽत्र प्रा०ब०। १दुःखेन प्रवेश्ये प्रवेष्टुमशक्ये "महर्षिगणसम्बाधं ब्राह्म्या लक्ष्म्या समन्वितम्। दुष्प्रवेशं महाराज! नरैर्धर्मबहिष्कृतैः" भा०व० १४५अ०। २कन्यारीढत्वे स्त्री राजनि०।

दुष्प्रहर्ष त्रि० दुष्करः प्रहर्षोऽस्य प्रा०ब०। १दुष्करप्रहर्षयुक्ते २धृतराष्ट्रपुत्रभेदे पु० दुर्मदो दुष्प्रहर्षश्च विविंशतिरविकटः समः" भा०आ० ६७अ०। तत्पुत्रोक्तौ

दुष्म(ष्य)न्त पु० १पौरवे भरतपितरि राजभेदे "उग्रदानवी सुतान् सेने चतुरस्त्रैचिकात्मजान्। दुष्मन्तमग्र सुग्रन्तं प्रवीरमनघं तथा। दुष्मन्तस्य तु दायादो भरतो नाम वीर्यवान्। स सर्वदमनो नाम नागायुतबलो महान्। चक्रवर्त्ती सुतोजज्ञे दुष्मन्तस्य महात्मनः। शकुन्तलायां भरतोयस्य नाम्ना स्म भारताः। दुष्मन्तं प्रति राजानं वागुवाचाशरीरिणी। माता भस्त्रा पितुः पुत्रो येन जातः सएव सः। भरस्व पुत्रं दुष्मन्त! मावमंस्थाः शकुन्तलाम्। रेतोधाः पुत्र उद्धवति नरदेव! यमक्षयात्। त्वद्धास्य धाता गर्भस्य सत्यमाह शकुन्तला" हरिवं० ३२अ०। अस्य शकुन्तलापरिवेदनकथा शकुन्तलाशब्दे दृश्या

तुर्वसुवंश्यमरुत्तकन्यायां सम्मतायां संवर्त्तेः जाते ऽनुपभेदे तत्कथा हरिवं० १२ अ०। तुर्वसुवंशवर्णने यथा "अन्वस्यावित्तो राजा मरुत्तः कथितस्तव। अनपत्योऽभवद्राजा यज्वा विपुलदक्षिणः। दुहिता सम्मता नाम तस्याकीर्त्त पृथिवीपतेः!। दक्षिणार्थं तु सा दत्ता संवर्त्ताय महात्मने। दुष्मन्तं पौरवञ्चापि लेभे पुत्रमकल्मषम्। एवं ययातेः शापेन जरासंक्रमणे तदा। पौरवं तुर्वसोर्वंशः प्रविवेश नृपोत्तम!। दुष्मन्तस्य तु दायादः करुत्थामः प्रजेश्वरः"। तस्यापत्यम् दुष्मन्ति भरते करुत्थाने च नृपभेदे

दु(दुः)स्थ त्रि० दुर्+स्था-क वा विसर्गलोपः। दुःखेन स्थिते "कल्याणदुःस्था वसुधा तवोर्व्वे" भट्टिः। कुकुटे २ कुक्कुरे च पुंस्त्री शब्दार्थचि० स्त्रियां जातित्वात् ङीष्।

दु(दुः)स्पृष्ट न० दुष्टं स्पृष्टम् प्रा०स०। वा विसर्गलोपः। जिह्वामूलीया वर्णोच्चारणस्थानस्य ईषत्स्पर्शरूपे आभ्यन्तरे वर्णोच्चारणप्रयत्ने तदस्यास्ति कारणत्वेन अच्। तेनोच्चार्यवर्णे च "अधोऽस्पृष्टायणस्तोषत् नेमस्पृष्टाः प्रकीर्त्तिताः" "दुस्पृष्टेति विसर्गो रकारः श्रुत एव च" पाणिनिशिक्षा। रकारस्य रकारादित्वेन दुस्पृष्टत्वमिति व्याकरे स्थितम्। [अदुष्टत्। दुदोह दुहितः।

दुह वधे भ्वा०पर०सक०सेट्। दोहति दरित् अदोहीत्

दुह दोहने अन्तःस्थितद्रव्यस्याकर्षणेन बहिर्निस्सारणे ऊम०अदा०द्विक०अनिट्। दोग्धि दुग्धे दुह्यात् अधोक् अदुग्ध। अधुक्षत् अदुग्ध अधुक्षन अधुक्षाञ्चि अदुक्षाञ्चि दुदोह। दुदोहिथ दुदुहिव दुदुहे। दुह्यात् धोक्षति ते। दोग्धव्यं दुग्धं दोहम्। दोग्धा दोहनं दुग्धम्। दोग्धुम् दुग्ध्वा संदुह्य। "यं सर्वभैक्षाः परिकल्प्य वत्सं मेरौ स्थिते दोग्धरि दोहदक्षे। भास्वन्ति रत्नानि महौषधीश्च पृथूपदिष्टां दुदुहुर्धरित्रीम्" कुमा० "यः पयो दोग्धि पाषाणम्" "पयोवटोर्द्धोरपि मा दुहन्ति" भट्टिः एककर्मविवक्षायाम् अप्येककर्मकत्वमपि "दुदोह यज्ञसिद्ध्यर्थं सम्यग्घृतमलोलुपः" मनुः "दुग्ध्वा पयः पत्रपुटे मदीयम्" रघुः। निःसारणमात्रे च "दुग्धेऽस्मै सर्वं कामं यो यागो दोहः" का०श्रौ० "न कर्मफलमाप्नोति योऽधर्मं दोग्धुमिच्छति" भा०व० ११६५ श्लो० "यत्र धर्मदुघा भूमिः सर्वकामदुघा सती। दोग्धि स्माभीप्सितानर्थान् यजमानस्य सर्वदा" भाग० ३।१८।७ दुघुक्षति। अस्य गौणकर्मणि लकारादि "प्रधानकर्मणाख्यातेऽनादीनामुद्दिश्यकर्मणाम्। अप्रधाने दुहादीनां यज्ञे कर्तुश्च कर्मणः" इत्युक्तेः। "तेषु तेषु तु पात्रेषु दुह्यमाना वसुन्धरा" हरिवं० ८१ श्लो० अस्य कर्मकर्त्तरि गौणकर्मणः कर्त्तृविवक्षायाम् केवलं तङ् न यक्। गौः पयो दुग्धे। वा चिण्। अदोहि अधुक्षत अदुग्ध मि०कौ०

दुहादि पु० गौणे कर्मणि लकारविधानार्थे धातुसमूहे स च "दुह्याच्पञ्चदुण्डृधिप्रच्छि चिब्रूशासुजिमन्थुषाम्। कर्मयुक् स्यादकथितं तथा स्यात् नीहृकृष्वहाम्" व्या० कारिकायां पठितः दुहप्रभृतिः सुषपर्यन्तः धातुसंघः। अस्य कस्यापि कारकसंज्ञाऽप्राप्तौ प्रधानकर्मोपयोगिनः कर्मसंज्ञा "दुह्याच्दण्डृधिप्रच्छिचिब्रूशासुजिमन्थुमुषां योगनिमित्तमपूर्वविधौ। अनुविधासि गुणेन च यत् मचते तदकीर्त्तितमाचरितं कविना" महाभाष्यकृतोक्तेः। [उदा०।

दुहि पु० दुह-धातुनिर्देशे रक्। दुहधातौ दुहादिशब्दे

दुहितृपति पु० हृत० षष्ठ्या वा अलुक् स०। जामातरि पक्षे लुक्। दुहितृपतिरयत्र।

दुहित स्त्री दुह-दह वा तृच्। "नप्तृनेष्टृत्वष्टृक्षत्तृहोतृपोतृप्रशास्तृजामातृमातृपितृदुहितृ" उणा० निः। अजन्तस्त्रियां स्त्रीत्वेऽनतो ऋदन्तत्वेऽपि स्वस्रादित्वात् न ङीप्। ऋनन्तत्वाभावात् सर्वनामस्थाने परे न इडिः दुहितरौ दुहितरः इत्यादि प्रियादिषु पाठात् अस्मिन् शब्दे परे पूर्वस्थितस्य उक्षन् पुंस्त्रीलिङ्गस्य विशेषणशब्दस्य न पुंवत् जातादुहितृकः। "मातृदुहितरः मेघस्तनाभ्य आतेऽन्वयः" याज्ञ०। "माता स्वसा दुहित्रा वा न विविक्तासनो भवेत्" मनुः। कन्याशब्देऽनुक्तं तद्दानपात्रफलादिकमधिकृत्यते।

"कृत्वा परीक्षां कान्तस्य दद्यात् कामिनी वरम्। वराय गुणहीनाय दुष्टाय ज्ञानिने तथा। दरिद्राय च मूर्खाय रोगिणे कुत्सिताय च। अल्पायुषेऽल्पभोगाय चाल्पदुर्भगाय च। जडाय चैव मूकाय क्लीवतुल्याय पापिने। ब्रह्महत्यां लभेत् सोऽपि यः सुकन्यां ददाति च। ज्ञानाय गुणिने चैव शूने च विदुषेऽपि च। वैद्याय कृतां दत्त्वा दशवापीफलं लभेत्"। कन्याविक्रये दोषो यथा "यः कन्यापालनं कृत्वा करोति विक्रयं यदि। विपत्तौ धनलोभेन कुम्भीपाकं स गच्छति। कन्यामूत्रपुरीषञ्च तत्र भक्षति पातकी। ऊर्ध्वमिदं गितः काकैर्यावदिन्द्राश्चतुर्दश। स्तनत्व व्याधयोनौ च स दुर्भेज्जन्म निश्चितम्। विक्रीणीत

मांसभारं वहत्येव दिवानिशम्" कन्यादानफलं यथा "दशवापीसमा कन्या दीयते ब्राह्मणाय या। वेदज्ञाय पवित्राय चाग्नितिसृशालिने। सन्ध्यावते वेद पाठकारिणे सत्यवादिने। अग्नै प्रदत्ता कन्या च दश वापीफलप्रदा। त्रिसन्ध्याकारिणे सत्यवादिने सदग्नशालिने। वेदज्ञाय च विप्राय दत्ताऽग्निफलदायिनी। अग्नितिसृष्टहीनाय सन्ध्याहीनाय नित्यशः। मूर्खाय दत्ता कन्या च सा चतुःफलदायिनी। परदारसृष्टहीनाय याजकाय द्विजाय च। शठाय सन्ध्याहीनाय वाप्येकफलदा सुता। लुप्तसन्ध्याय गायत्रीविहीनाय शठाय च। विप्रोद्वाय दत्ता सा वाप्यर्द्धफलदा सुता। पापिने शूद्रजातीय विप्रचेत्तोद्वाय च। दत्ता चाण्डालतुल्याय कन्या सा नरकप्रदा। विष्णुभक्ताय विदुषे विप्राय सत्यवादिने। जितेन्द्रियाय दत्ता या सिंहग्रहापीफलप्रदा। अष्टिवर्षसहस्राणि दिव्यरूपं विधाय च। एवम्भूताय दत्त्वा च मोदते विष्णुमन्दिरे। दत्त्वा कन्यां सुशीलाय हराय हरवेऽथ वा। नारायणस्वरूपश्च भवेदेव सुतो सुतम्। विष्णुभक्तो यदा कन्यां ददाति विष्णुप्रीतये। स लभेद्धरिदास्यञ्च ध्रुवं विप्रोद्वाय च" ब्रह्मवै०प्र०ख०।

दु(दोह्य त्रि० दुह-ण्यत् पक्षे यत्। १दोहनगौण्यकर्मणि गव्यादौ गौण्यकर्मविवक्षायां दोहनप्रधानकर्मणि २दुग्धादौ च।

दु(हु)ह्यु पु० शर्मिष्ठायां जाते ययातिपुत्रभेदे। "अन्यस्त्रीत्वात् प्रजां सर्वां ययातिरपराजितः। तस्य पुत्रा महेष्वासाः सर्वे समुदिता गुणैः। देवयान्यां महाराज! शर्मिष्ठायाञ्च जज्ञिरे। देवयान्यामजायेतां यदुस्तुर्वसुरेव च। दुह्युश्चानुश्च पूरुश्च शर्मिष्ठायां प्रजज्ञिरे" भा० आ० ७५अ० हरिवंशे तु ३०अ० दुह्युरिति अनुरिति पाठः। लिपिकरप्रमादात् द्विधा पाठः "तेषां ययातिः पञ्चानां विजित्य वसुधामिमाम्। देवयानीसुतसमः सुतां भार्यामवाप सः। शर्मिष्ठामासुरीञ्चैव तनयां वृषपर्वणः। यदुञ्च तुर्वसुञ्चैव देवयानी व्यजायत। दुह्युञ्चानुञ्च पूरुञ्च शर्मिष्ठा वार्षपर्वणी"।

तस्य राज्यदेशश्च तत्रैव अ० उक्तो यथा "सप्तद्वीपां ययातिस्तु जित्वा पृथ्वीं ससागराम्। व्यभजत् पञ्चधा राजा पुत्राणां नाडुषसदा। दिशि दक्षिणपूर्वस्यां तुर्वसुं मतिमान्नृपः। प्रतीच्यामुत्तरस्याञ्च दुह्युञ्चानुञ्च नाडुषः। दिशि पूर्वोत्तरस्यान्तु यदुं श्रेष्ठं न्ययोजयत्। मध्ये पूरुञ्च राजानमभ्यषिञ्चत् स नाडुषः। तैरियं पृथिवी सर्वा सप्तद्वीपा सपत्तना। ययातिदेशमद्यापि धर्मेण परिपाल्यते"। तद्वंशवर्णनञ्च तत्रैव ३२अ० यथा "दुह्योश्च तनयो राजन्! बभ्रुः सेतुश्च पार्थिवः। आङ्गारः सेतुपुत्रश्च मरुतां पतिरुच्यते। यौवनाश्वेन समरे जन्हुशेष निहतो बली। युद्धं सुमहदस्माकीन् मासान् परि चतुर्दश। आङ्गारश्च तु दायादो गान्धारो नाम पार्थिवः। ख्यायते यस्य नाम्ना वै गान्धारविषयो महान्। गान्धारदेशजाश्चैव तुरगा वाजिनां वराः" तस्य पितुर्ययातेर्जरायां अयत्नेषे शापकथा भा०आ० ८४अ० "ययातिरुवाच। "यत्त्वं मे हृदयाज्जातो वयः स्वं न प्रयच्छसि। तस्माद्दुह्यो! प्रियः कामो न ते सम्पत्स्यते क्वचित्। यत्राश्वरथसम्पन्नानश्वानां स्यादृतं न च। हस्तिनां पीठकानाञ्च गर्दभानाञ्चथैव च। वस्त्राणाञ्च गवाञ्चैव शिबिकायास्तथैव च। उडुपप्लवसञ्चारो यत्र नित्यं भविष्यति। अराजगन्धभाजनं तत्र प्राप्स्यसि सान्वयः"

दू खेदे दिवा०आत्म०अक०सेट्। दूयते अदविष्ट। दुदुवे। ओदित् दूनः कविकल्पद्रुमः पा० दुनोतेरेव नत्वदीर्घौ इति भेदः। "तया क्षीनं विधातर्मा कथं पश्यन् न दूयसे" रघुः। "न दूये सात्वतीस्नुर्यन्नाज्ञमपराध्यति" माघः। उपसर्गपूर्वकस्य सकः। "दूयते दीनं खलजनः दुर्गादासः।

दूडभ त्रि० दुःखेन दभ्यतेऽसौ दुर्+दभ्-कर्मणि खल्। "दुरो दाशनाशदभध्वक्त्वसुत्तरपदादेष्टुत्वञ्च" पृषो० पा० षत्वञ्च ओकारकर्म नि० नलोपः। दुःखेन दम्भनीये

दूडाश्व त्रि० दुःखेन दाश्यते दुर्+दाश्-कर्मणि खल्। दूडभशब्दोक्त पा०ग० सूत्रेण षिद्भम्। दुःखेन छिंसनीये

दूढी त्रि० दुष्टं ध्यायति दुर्+ध्यै-चिन्तायां कर्त्तरि सम्भावे वा क्विप्। दूडभशब्दोक्तकार्यम् पा०ग० सूत्रे ध्यायतेर्धातोर्निर्देशात्। १दुष्टं ध्यायिनि २दुष्टायां बुद्धौ स्त्री "अस्माकं शंसो अभ्यस्तु दूढ्यः" ऋ० १।८४।८। "बधेदुःशंसा अप दूढ्या अहिं ६)[ध्यम्। दुष्टं ध्यायिनि

दूढ्य त्रि० दुष्टं ध्यायति दुर्+ध्यै-क। दूडभशब्दवत् सा-

दूणाश्व त्रि० दुःखेन नाश्यते दुर्+नाशि-कर्मणि खल् दूडभशब्दवत् साध्यम्। १दुःखेन नाशनीये। "दूणाशेयं दक्षिणा पार्थिवानाम्" ऋ०६।२७।२८ "दूणाशा दुर्नाशा केनापि नाशयितुमशक्या" भा० २आत्मनेपदाङ्के तृतीये सप्तदशे उत्तरे अश्वमेधे पु० "हिमालोत्तरो बह्वहिरण्यो

दूषाशचेति" काला०औ०२२। ८।२६। "उत्तरस्तृतीयः सप्तदशः हिनामा भवति बहुश्चिरण्य दूत्येकं दूषाशच द्वितीयं नाम" संप्र०। तस्य च तथादक्षिणायुक्तत्वात् स्वार्थ० अचि तथात्वम्।

**दूत** त्रि० दु-गतौ "दुतनिभ्यां दीर्घश्च" उणा०त कित् दीर्घश्च दू-परितापे कर्त्तरि क्त वा दीर्घानस्य न नत्वम् "दुग्वो-दीर्घश्च" पा० सूत्रेण दुनोतेरेव नत्वदीर्घयोर्विधानात्। १सन्देशहरे अमरः। २उपतप्ते च

"चारेक्षणो दूतमुखः पुरुषःकोऽपि पार्थिवः" माघः तत्र साधारणदूतलक्षणं तद्भेदाश्च सा०द० उक्ता यथा निसृष्टार्थो मितार्थश्च तथा सन्देशहारकः। कार्य-प्रेष्यस्त्रिधा दूतो दुत्यापि तथाविधाः" तत्र कार्यप्रेष्यो दूत इति लक्षणम्। तत्र "उभयोर्भाषसन्धीय स्वयं वदति चोत्तरम्। सृष्टिं करुते कार्यं निसृष्टार्थस्तु स स्मृतः" उभयोरिति येन प्रेषितो यदन्तिकं प्रेषितश्च। "मितार्थभाषी कार्यस्य सिद्धिकारी मितार्थकः"।

नृपतिदूतलक्षणं युक्तिकल्पतरावुक्तं यथा

"परेङ्गितज्ञः परवाग्ग्रहग्रार्थस्यापि तत्त्ववित्। सदोत्पन्नमतिर्धीरो दूतः स्यात् पृथिवीपतेः। दूतस्त्वेव प्रकुर्वीत सर्वशास्त्रविशारदम्। इङ्गितज्ञं तथा सभ्यं दक्षं सत्कुलसम्भवम्। अनुरक्तः शुचिर्दक्षः स्मृतिमान्देशकालवित्। वपुष्मान् वीतभीर्वाग्मी दूतो राज्ञः प्रशस्यते। दूत एव हि सन्धत्ते भिनत्त्येव हि सङ्गतान्। विस्रब्धार्थो१ मितार्थश्च२ तथा शासनहारकः३। दूतास्त्रयोऽमात्यगुणैः समैः पादार्द्धवर्जितैः। विस्रब्धप्रार्थं कार्यत्वात् शासनं तु करोति यः१। मितार्थः२ कार्य-मात्रोक्तौ स कुर्यादुत्तरोत्तरम्। यथोक्तवादी सन्देश हारको लेखहारकः३। तत्र दूतो व्रजन्नेव चिन्तयेदु-त्तरोत्तरम्। वार्त्ताविशेषं भूपाय झटित्येवान्यवेश्मनि। दूतो हि न लिखेत् किञ्चित् लिखितो वा विनिर्णयम्। पृच्छ्यमानोपि न ब्रूयात् स्वामिनः क्वापि वैशसम्" कामन्द० शास्त्रे च राजदूतसन्देशहरलक्षणं चोक्तं यथा "श्रुतमन्त्रस्तु मन्त्रज्ञो मन्त्रिणां मन्त्रसम्मतम्। यात-व्याय प्रहिणुयाद्दूतं दूत्याभिमानिनम्। प्रगल्भः स्मृतिमान्वाग्मी शास्त्रे चास्त्रे च निष्ठितः। सभ्यस्त-कर्मा नृपतेर्दूतो भवितुमर्हति। निसृष्टार्थो१ मितार्थश्च२ तथा शासनवाहकः३। सामर्थ्यात्पादतो हीनो दूतस्तु त्रिविधः स्मृतः। स भर्तुः शासनाद्यच्छेदनुक्तमुक्तरो-त्तरम्। स्वराष्ट्रपरराष्ट्राभ्यामिति चेति च चिन्तयन्। अन्तःपालांस्तु कुर्वीत भित्राग्याटविकांस्तथा। जल-स्थलानि मार्गांश्च विद्यात् स्वबलसिद्धये। नाविज्ञातः पुरं शत्रोः प्रविशेच्च न संसदि। कालमीक्षेत कार्यार्थं-मनुज्ञातश्च निष्पतेत्। सारवत्ताच्च राष्ट्रस्य दुर्गं तद्दुग्रि-मेव च। छिद्रं शत्रोर्विजानीयात् कोशमित्रबलानि च। उद्यतेष्वपि शस्त्रेषु यथोक्तं शासनं वदेत्। रागापरागौ जानीयात् प्रकृतीनाञ्च भर्त्तरि। भृत्यपक्षस्य चा-यायं कुर्यादनतिलङ्घितः। पृच्छ्यमानोऽपि न ब्रूयात् स्वस्वामिप्रकृतिच्युतिम्। ब्रूयात् प्रस्तुतया वाचा सर्वं वेद भवानिति। फलेन नाम्ना द्रव्येण कर्म्मणा च सङ्गीयसा। कुर्याच्चतुर्विधं लोकं पक्षयोरुभयोरपि। विद्याशिल्पोपदेशेन संश्लिष्टोभवचेतनैः। भृत्यपक्षञ्च जानीयात्तद्वर्त्तञ्च विचेष्टितम्। तीर्थाश्रमाश्रयस्थाने शास्त्रविज्ञानहेतुना। तपस्विव्यञ्जनोपेतैः स्वचरैः सङ्ग संवसेत्। धनापं कुलमैश्वर्यं त्यागसत्यानसौष्ठवम्। अनुद्धतां भद्रताञ्च भर्तुर्भेद्येषु दर्शयेत्। सङ्केतानिष्ट-वचनं कामक्रोधञ्च वर्जयेत्। नान्यैः शपेत, भावं स्वं रक्षेद्विद्यात्परस्य च। काले व्रजति मेधावी न खिद्यो-त्तात्मसिद्धये। म्रियमाणञ्च बुध्येत कालं नानार्थ-लोभनैः। एतैश्चरैस्तु गच्छत्सु न तत्र पृथिवीपतेः। पश्यति व्यसनं किञ्चित्स्वयं वा कर्तुमिच्छति। स्वान्त:-प्रकोपमथ वा विनेतुं नीतिवित्तमः। सख्यादेः संग्रहं कर्तुं स्वदुर्गं दुर्गसत्क्रियाम्। स्वपक्षाभ्युदयाकाङ्क्षी देशकालावुदीक्षते। तत्र यात्रास्वयं चित्तमात्मास्त्रैव समीक्षते। यात्राकालक्षयार्थौ वा तत्र चायं विलम्बते। काले विक्रियमाणे तु तर्कयेदिति पण्डितः। कार्यकाल-विपत्तिञ्च व्यक्तां ज्ञात्वा विनिष्पतेत्। तिष्ठन् वार्त्ता-विशेषार्थान् भर्तुः सर्वाञ्चिवेदयेत्। रिपोः शल्यपरि-च्छेदः सद्वृत्तस्तुविभेदनम्। दुर्गकोषबलज्ञानं भृत्यपक्षोप-संग्रहः। राष्ट्रात् व्यपेतपक्षानामात्मसात्करणं तथा। युद्धापसारभूज्ञानं दूतकर्मेति कथ्यते। दूतेनैव नरेन्द्रस्तु कुर्वीतारिविकर्षणम्। स्वपक्षे च विजानीयात् परदूत-विचेष्टितम्। तर्केङ्गितज्ञः स्मृतिमान् सदुर्गभुपरिक्रमः। क्लेशायासक्षमो दक्षचरः स्यात् प्रतिपत्तिमान्। तपस्वि-क्षिङ्गिनो धूर्त्ताः पण्यस्त्रीशिल्पजीविकाः। चराश्चरेयुः परितः पिबन्तो जगतां मतम्। निर्गच्छेयुर्विशेषेषु सर्ववार्त्ताविदोऽन्वहम्। चराः सकाशाद्भृपतेश्चदुर्द्र-

तरं हि ते। स्वल्पं स्वप्नचारेण पश्येद्वै विनिचेष्टितम्। स्वप्नेऽपि च जागर्त्ति चारचक्षुर्महीपतिः। विवस्वानिव तेजोभिर्नभस्वानिव चेष्टितैः। राजा चरैर्जगत् कृत्स्नं व्याप्नुयाद्धोकसम्मतैः। चारचक्षुर्नरेन्द्रः स्यात्सम्यतेनेन भूयसा। अनेनासम्यतन्त्रौद्यात्मतत्यन्धः समेऽपि हि। सर्वमस्यक्षसदृशं सर्वावस्थाविचेष्टितम्। चरेण हिप्तां विद्यात्तद्देशग्रामादिकानि च। प्रकाशश्चाप्रकाशश्च चरस्तु द्विविधः स्मृतः। अप्रकाशोऽप्रसृष्टिः प्रकाशो दूत उच्यते। चरेण प्रचरेद्राजा सर्वेष्वर्त्तिनिवाध्वरे। दूते सन्धानमायाते चरचर्यां प्रतिष्ठिता। तीक्ष्णः प्रव्रजितश्चैव सत्री वनग एव च। एते ज्ञेयास्तु सञ्चाराः सर्वे नान्योन्यवेदिनः। संस्थानवत्तः संस्थाश्च कार्याः कार्यप्रसिद्धये। तिष्ठेयुः पार्श्वे सञ्चाराः परिचर्यापवादिनः। बालः क्षपोचलो लिङ्गी भिक्षुकोऽध्यापकस्तथा। संस्थाः सुचारसंस्थित्यै दत्तदायाः शुभाशयाः। सर्वेष्वेतेषु सञ्चारास्तिष्ठेयुश्चित्तवेदिनः। स्वचक्रे परचक्रे च यो हि वेद चिकीर्षितम्। आयदपि सुप्तोऽसौ न भूयः प्रतिबुध्यते। कारणाकारणज्ञ्रुद्धान् बुध्येत स्वपरिग्रहे। यापानकारणज्ञ्रुद्धांस्तूष्णीं दण्डेन साधयेत्। ये तु कारणतः क्रुद्धास्तान् वशीकृत्य संयमेत्। शमयेद्दानमानाभ्यां छिद्रेषु परिपूरयेत्। अथुनापि विजयते छिद्रेण बलवत्तरम्। निःश्रेयं मज्जयेद्राष्ट्रं यानपात्रमिवोदकम्। जडमूकान्धबधिरक्लीबान्धकाश्च या। किराता वामनाः कुब्जास्तद्विधा ये च कारकाः। भिक्षुकाधारणा दास्यो नानाकार्यकलाविदः। अन्तःपुरगतां वार्त्तामाहरेयुरलक्षिताः। स्नेहाभ्यञ्जनभङ्गारयानवाहनधारिणः। सङ्घामात्ये बहिर्वार्त्तां विदुरन्ये च तद्विधाः। स्नेहाभ्यञ्जनकर्त्तारस्तैलिका व्यवकाशया। प्रसाधका भोजकाश्च गात्रसंवाहका अपि। जलताम्बूलकुसुमगन्धभूषणदायकाः। कर्त्तव्याश्च सदा चैते ये चान्येऽध्यासपक्तिनः। सञ्जाताभिर्मूर्च्छितैर्लेखैराकारैरिङ्गितैरपि। सुसङ्गरेयुरव्यग्रावरार्चयां परस्परम्। समाप्तियन्तो जगतां मतानि जलानि भूमेरिव सूर्यपादाः। अनेकशिल्पाध्ययनप्रवीणाचरा चरेयुर्बहुभिङ्गिरूपाः। येन प्रकारेण परानुमेयात् परावरत्वञ्च सहङ्गितेतोः। तमात्मनि स्वस्यमतिस्तु तज्ज्ञैर्विबुध्यमानं परतो हि विद्यात्"। २प्रेष्यमात्रे त्रि० ततः भावे कर्मणि च "दूतवणिग्भ्यां च" पा० यत्। दूत्य तद्भावे तत्कर्मणि च "दूत्यं तद्भावकर्मणोः" अमरः। कामन्द० वाक्यै उदा० ष्यञ् दौत्य तत्रार्थे "न प्रयाति च दौत्येन" इतो० "द्विषां कर्मैर्दौत्यपथः क्षितीशतः" नैष०। शिङ्कविशिष्टपरिभाषया दूतीशब्दादपि यत् ष्यञ् च। दूत्य दौत्य दूतीनां कर्मणि भावे च। स्वार्थे क। दूतक तत्रार्थे स्त्रियां कापि अत इत्त्वम् दूतिका दूत्याम्। भावे क्त। ४उपतापे न०। [पृष्ठ्यां शब्दच०।

दूतघ्नी स्त्री दूतं खेदं हन्ति हन-टक् ङीप्। कदम्ब-

दूति स्त्री दु-बा० ति दीर्घश्च उज्ज्वल०। प्रेष्यायां स्त्रियां "तां कामिनो दूतिसदाहरन्ति" वर्णविवेकः वा ङीप् दूती तत्रार्थे "उत्तिष्ठ दूति! यामोयामो यातस्त्वयापि नायातः" सा०द० "रतिदूतिपदेषु कोकिलाम्" कुमा० "प्रतिकृतिरचनाभ्यो दूतिसंदर्शिताभ्यः" "तेन दूतिविदितं निवेदितम्" रघुः दूतीभेदलक्षणे सा०द०उक्ते "दूत्यः सखी नटी दासी धात्रेयी प्रतिवेशिनी। बाला प्रव्रजिता कारुः शिल्पिन्याद्याः स्वयं तथा। कला कौशलसत्ख्याती भङ्गिचित्तज्ञता स्मृतिः। माधुर्यं मर्मविज्ञानं वाग्मिता चेति तद्गुणाः। एता अपि यथौचित्यादुत्तमाधममध्यमाः"

दून पु० दु-उपतापे क्त "दुवोदीर्घश्च" पा०तस्य नः दीर्घश्च। सुख० दु-खेदे क्तोदित्त्वात् तस्य नः। १अध्वादिश्रान्ते २उपतप्ते ३दुःखिते च "पित्तेन दूने रसने सितापि तिक्तायते कंसकृतावतंस!" नैष०।

दूर(र) स्त्री दैप् शुद्धौ बा० कू। प्राणरूपे देवताभेदे "सा वा एषा देवता दूर्नाम दूरं ह्यस्मात्सदूरं ह वाऽस्मान्त्सदूर्भवति य एवं वेद" शत०ब्रा० १४।४।१० "उपासक शरीरस्था प्राणरूपा देवता दूर्नाम दूरित्येवं ख्याताऽतः शुद्धा" भा०अत्र शुद्धेति विशेषणात् दैप्धातो रूपमिति सूचितम्। ब्राह्मणे तु दूरसम्बन्धात् तत्सिद्धिरुक्ता तथा च दूरं करोति सदुपासकस्य दूर+ऋवर्थे णिच् बा० न दयादेशः क्विप् णिलोपः रान्तोऽयमिति तु युक्तम्।

दूर त्रि० दृ+दृण-"दृरीभ्यो मोपच" उणा० रक् धातो रिकारलोपे रेफे परे पूर्वाणो दीर्घः। १विप्रकृष्टे महाकालरेण स्थिते दैशिकपरत्वयुक्ते अमरः। "दूरान्तिकादिधीहेतुरेका नित्या दिगुच्यते" भाषा० "दूरत्वमन्तिकत्वञ्च दैशिकं परत्वमपरत्वं बोध्यम् तद्बुद्धेरसाधारणं बीजं दिगेव" सि०शि०। अतिदूरत्वञ्च प्रत्यक्षं नोत्पादयति यथाऽ

"अतिदूरात् सामीप्यादिन्द्रियघातान्मनोऽनवस्थानात्। सौक्ष्म्याद्व्यवधानादभिभवात् समानाभिहाराच्च" सा०का० "अनुपलब्धिरिति यच्छब्दार्थं सिंहावलोकितन्यायेनानुषञ्जनीयम् यथा उत्पतन् वियति पतत्री अतिदूरतया सन्नपि प्रत्यक्षेण नोपलभ्यते" त०कौ०। "त्वं दूरमपि गच्छन्तो हृदयं न जहासि मे" शक्र० "न खलु दूरगतोऽप्यतिवर्तते मरुमसाविति बन्धुजनोदितैः" माघः। भावप्राधान्यात् २दूरत्वे च "दूरान्तिकार्थैभ्यो द्वितीया च" पा० अस्तित्ववचने प्रातिपदिकार्थे एभ्योद्वितीया चात् पञ्चमीतसीले स्तः" सि०कौ० "यामस्य दूरं दूरात् दूरेण वा। अस्तित्ववचने किमुदाहरणमेवेह दूरः पन्थाः" सि०कौ० "रामादुद्धस्य यो दूरम्" सम्बन्धो० "नेत्रे दूरमनङ्गेन पुलकिता तन्वी तवेयं तनुः" सा०द० "या तस्य कर्मनिर्देशैः दूरं पश्चात् कृता फलैः" रघुः "दूरादपि क्रतुषु यज्वभिरिज्यते यः" माघः "दूरेण ह्यवरं कर्म बुद्धियोगात् धनञ्जय!" गीता "स्तुतिभ्योऽप्युत! रिच्यन्ते दूरेण चरितानि ते" रघुः एतच्छब्दयोगे पञ्चमी षष्ठी च। "दूरं यामस्य यामाद्वा" सि०कौ० अतिशायने इष्ठन् द्वादेशे दविष्ठ रेयसुन् दवीयस् अतिशयेन दूरस्थिते त्रि० रेयसुनि स्त्रियां ङीप्। "तेजस्विमध्ये तेजस्वी दवीयानपि गण्यते" माघः। दूरं करोति दूर+णिच् वादेशः दवयति। "दवयदतिरवेण प्राप्तवर्षीविभागम्" भट्टिः।

**दूरङ्गम** त्रि०दूरं गच्छति गम-खा० वेदे ख सुम् च। दूरगामिनि "दूरङ्गमं ज्योतिषां ज्योतिरेकम्" यजु०२३।१। लोके तु ड दूरग इत्येव

**दूरत्व** न० दूरस्य भावः त्व। दैशिके परत्वे तद्व्यवहारविशेषे कारणम् यथोक्तं "दोषोऽप्रमाणाजनकं प्रमाणास्तु गुणो भवेत्। पित्तदूरत्वादिरूपो दोषो नानाविधः स्मृतः" भाषा० "क्वचिच्छब्दादेः स्वल्पपरिमाणध्वनेर्दूरत्वं दोषः" सि०मुक्ता०।

**दूरदर्शन** पुंस्त्री०दूरात् पश्यति दृश-ल्यु। १स्वप्ने राजनि० जातित्वात् स्त्रियां ङीष्। २परिच्छिते पु० दृश-भावे ल्युट्। ३दूरतोवीक्षणे न०। दूरतो दृश्यतेऽनेन दृश-करणे ल्युट्। ४दूरवीक्षणे यन्त्रभेदे (दूरबीन)

**दूरदर्शिन्** त्रि० दूरात् पश्यति कार्योत्पत्तेः प्राक् पश्यति जानाति वा दृश-णिनि। १दूरदर्शके २परिच्छिते पु० अमरः २स्वप्ने पुंस्त्री० त्रिका० स्त्रियां ङीप्।

**दूरदृश्** त्रि०दूरात् पश्यति दृश-क्विन्। १दूरदर्शिनि २परिच्छिते शब्दर०३स्वप्ने हेमच०। किच्चित्वात् झलि पदान्ते च क्रुः।

**दूरमूल** पु०दूरपर्यन्तं मूलमस्य। शुङ्गवृक्षे (सुँज)। राजनि०

**दूरवेधिन्** पु० दूरात् वेधोऽस्य साध्यतया इनि। दूरात् लक्ष्यभेदके

**दूरापात** त्रि० दूरमापतति आ+पत-कर्त्तरि अच्वा० ष। दूरपातिनि अस्त्रे णिनि दूरापातिन् तत्रार्थे हेमच०।

**दूरूढा** स्त्री दुर्+रुह-क्त रेफे परे पूर्वस्यो दीर्घः। दुष्टतया रूढे जाते चुडूरोगशब्दे २३८ पृ०दृश्यम्।

**दूरेअमित्र** पु० दूरेअमित्रः अस्त्यर्थस्य वेदे सप्तम्याः अलुक् प्रकृतिभावः। एकोनपञ्चाशन्मरुद्गणेषु मरुद्गणे। ते च यजु० १७अ०। मन्त्रादौ ८० मन्त्रान्ते शुक्लज्योतिषेत्यादयोदर्शिताः। "अस्मिन्मित्रश्च दूरेअमित्रश्च गणः" ८म०

**दूरेत्य** त्रि० दूरे भवः त्य। दूरभवे

**दूरेपाक** त्रि० दूरे पचति पच-ण्य ण्यङ्वा० कुत्वम् सप्तम्या अलुक् स०। दूरे पाचके स्त्रियां टाप्। तत्रैव गर्भे स्त्रीलिङ्गेनापि निर्देशात् किञ्चिद्विशिष्टपरिभाषायां अनित्यत्वं ज्ञापितम्। [पाचके।

**दूरेपाकु** त्रि० पच-डण् ण्यङ्वा० कुत्वम् अलुक् स०। दूरे-

**दूरेदितीक्षण** त्रि० दूरे ईरितमीक्षणं येन। दूरपर्यन्तप्रेरितदर्शने बेकरे (टेरा) शब्दभाषा।

**दूरोह** पु० दुःखेन रुह्यतेऽसौ दुर्+रुह-कर्मणि खल् रेफे परे पूर्वस्यो दीर्घः। दुःखेन रोढुमशक्ये आदित्ये लोके तस्य निष्कामज्योतिष्टोमादियज्ञप्रयासजातज्ञानेन साध्यरोढृत्वात् दूरोहत्वम्। "असौ वै दूरोहो योऽसौ तपतीति" ऐत०४।१० श्रुतेरस्य तथात्वम्। २दूरारोहमात्रे त्रि०।

**दूरोहण** त्रि० दुःखारमारोहणमस्य प्रा०व०। आदित्ये दूरोह शब्दे तस्य तथात्वं दृश्यम् २छन्दोभेदे न०। "असौ वा आदित्यो दूरोहणं छन्दः" इति श्रुतिः। "दुरोहणं छन्दः" यजु०१०।५ छान्दसं ह्रीपत्वम्। ३दूरारोहणीये त्रि० दुःखेन रोहणं वा। ४दुःसाध्ये रोहणे ५तच्छन्दस्के मन्त्रब्राह्मणभेदे च यथोक्तं आश्व०श्रौतसूत्रे

"हंसः शुचिषदिति पञ्चोर्ध्वंशक्षिपद्या चतुर्थं मनवानसङ्गा प्रणुत्यावस्येत्। पुनस्क्षिपद्यार्ध्वंशः पञ्च एव सप्तमम्" ८।३।४ "एतास्वचमित्यं संपेत्। प्रथमं पञ्चः द्वितीयमर्धर्चशः। तृतीयं त्रिभिः पादैरवसाय उत्तमेन पादेन प्रणुत्य चतुर्थमनवानसङ्गा प्रणवेनावस्येत्। एतदारोहणम्। अथावरोहणम्। पुनस्क्षि-

पद्मोत्तवेमादिनोक्तं पञ्चमम् । अर्धचैत्यः षष्ठं, पुनः पञ्चः सप्तमम् । एतत् दूरोड्डयं भवति । सप्तमवाननियमेन सप्तत्वोऽभ्यस्ता दूरोड्डयमिति ज्ञापनार्थम् । एवकारः पौनर्वचनिकः" नारा० "एतत् दूरोड्डयम्" ८।२।१५ दूरोड्डयमिति प्रकृते पुनर्दूरोड्डयवचनं द्विविधं दूरोड्डयमस्तीति प्रदर्शनार्थं तेन स्वर्गकामस्य चतुरभ्यस्तेन दूरोड्डयं भवति" नारा०।

**दूर्य** न०दूरे उत्सार्यम् दूर+यत् । १धुरीये विशायाम् शब्दर० "ततः कल्यं समुत्थाय कुर्यान्नैत्यं नरेश्वर ! । नैकैकाभिषुविक्षेपमतीत्याभ्यधिकं भवेत्" विष्णुपु० तस्मेषुविक्षेपस्यानातिक्रमेण त्यागविधानेन दूरोत्सार्यत्वात् तथात्वम् । दूराय रोगदूरीकरणाय साधु यत् । २शस्त्राम् राजनि० ।

**दूर्वा** स्त्री दूर्वति रोगान् क्वनिप् वा दुर्व-क्विप्सायाम् क्वच् रेफे परे पूर्वाणो दीर्घः । १स्वनामख्याते घासभेदे तद्भेदादिकं भावप्र० उक्तं यथा

"नीलदूर्वा रुहाक्रान्ता भार्गवी शतपर्विका । शत्यं सहस्रवीर्या च शतह्नी च कीर्तिता । नीलदूर्वा त्रिदोषघ्नी मधुरा तुवरा हरेत् । कफपित्तास्रवीसर्पकृष्णादाहत्वगामयान्" । श्वेतदूर्वा "दूर्वा शुक्ला तु गोक्षीरी शतवीर्या च कथ्यते । श्वेतदूर्वा कषाया स्यात् स्वादी त्रिदोषा च जीवनी । तिक्ता त्रिदोषा विसर्पास्रदाहपित्तकफदाहकृत्" । गण्डदूर्वा

"गण्डदूर्वा तु गण्डाख्या मत्स्याक्षी शकुलाशकः । गण्ड दूर्वा त्रिदोषघ्नी व्याधिघ्नी लघुः । तिक्ता कषाया मधुरा वातघ्नी कटुपाकिनी । दाहक्षयास्रवीसर्पकृमिपित्तज्वरापहा" । तस्या उत्पत्तिकथा भविष्योत्तरे "क्षीरोदसागरे पूर्वं मथ्यमानेऽमृतार्थिना । विष्णुना बाहुजङ्घाभ्यां विधृत्य मन्दरं गिरिम् । भ्रमता तेन वेगेन क्षोभान्यापर्वितानि वै । ऊर्मिभिस्तानि रोमाणि क्षीरोत्क्षिप्तानि तटान्तरे । अजायत शुभा दूर्वा रम्या हरितशाद्वला । एवमेषा समुत्पन्ना दूर्वा विष्णुतनूद्भवा । तस्या उपरि विन्यस्तं मथितामृतसम्भवम् । देवदानवगन्धर्वयक्षविद्याधरोरगैः । तत्र येऽमृतकुम्भस्य निषेक्तारिविन्दवः । तैरियं समासाद्य दूर्वा चैवाजरामरा । वन्द्या पवित्रा देवैस्तु सर्वदाभ्यर्चिता तथा" । "दूर्वा दहति पापानि धात्री हरति पातकम् । हरीतकी हरेद्रोगं तुलसी हरते त्वघम्" विष्णुधर्मोत्तरे । दूर्वा पूज्यत्वेनास्यस्याम् अर्श० अच् । २भाद्रशुक्लाष्टम्यां तद्दिने दूर्वायाः पूजाविधानात् तस्याः तथात्वम् "श्रावणी दौर्गनवमी दूर्वा चैव हुताशनी । पूर्वविद्धैव कर्त्तव्या शिवरात्रिर्बलेर्दिनम्" कालमाधवीयधृतवाक्यम् व्रतशब्दे दूर्वाष्टमीव्रते तत्पूजाविधानं दृश्यम् । ततः समूहे कण्डच् । दूर्वाकाण्ड दूर्वासमूहे न० "दूर्वाकाण्डमिव श्यामा" भट्टिः । दूर्वया दुर्गापूजननिषेधः "अक्षतैर्नार्चयेत् विष्णुं न तुलस्या विनायकम् । न दूर्वया यजेत् दुर्गां नोन्मत्तेन दिवाकरम्" आगमः । दूर्वायै ऋष्यादिवर्त्तिदूर्वादानं तु न लिखितमिति तु तत्त्वम् । जनमेजयवंश्ये इन्द्रपमेदे पु० "ऋक्षश्रवसुतो दूर्वस्तस्मिन्नाख्यानिष्यति" भाग० ९।२२।२९

**दूर्वाक्षी** स्त्री वसुदेवभ्रातृभेदस्य देवकस्य पत्न्याम् "तस्योपकारमालादीन् दूर्वाक्ष्यां देवकादधे" भाग०९।२४। २२श्लो०

**दूर्वाघृत** न०चक्रदत्तोक्ते घृतभेदे तत्पाकविधिस्तत्रोक्तो यथा "दूर्वां सोत्पलकिञ्जल्कां मञ्जिष्ठां सैलवालुकाम् । सिता गीतसुशीरञ्च सुखं चन्दनपद्मकौ । विपचेत् कार्षिकैरेतैः सर्पिराजं सुखाग्निना । तच्चतुर्भाग्व्यजाक्षीरं दत्त्वा चैव चतुर्गुणम् । तत्पानं वमतो रक्तं स्रावणं नासिकागते । कर्णाभ्यां यस्य गच्छेत् तु तस्य कर्णे प्रपूरयेत् । चक्षुःस्रावणि रक्ते तु पूरयेत् तेन चक्षुषोः । मेढ्रपायुप्रवृत्ते तु वस्तिकर्मसु योजयेत् । रोमकूपप्रवृत्ते तु तदभ्यङ्गे प्रयोजयेत्" ।

**दूर्वाष्टमी** स्त्री दूर्वाप्रिया तत्पूजाङ्गत्वात् अष्टमी । भाद्रशुक्लाष्टम्याम् तस्या उभयदिनव्याप्तौ पूर्वदिने पूजा "श्रावणी दौर्गनवमी दूर्वा चैव हुताशनी । पूर्वविद्धैव कर्त्तव्या शिवरात्रिर्बलेर्दिनम्" ति०त० धृतवचनात् । दूर्वापूजाप्रकारश्च त्रिविधः हेमा० व्रतख० उक्तः व्रतशब्दे दृश्यः गौडदेशे तु भविष्योत्तरपुराणोक्तस्तत्प्रकारः प्रचलितः ।

**दूर्वासोम** पु० सुश्रुतोक्ते रसायनाङ्गे सोमलताभेदे यथोक्तं तत्र उत्तरतन्त्रे

"अंशुमान्शुक्रवांश्चैव चन्द्रमा रजतप्रभः । दूर्वासोमः कनीयांश्च श्वेताभः कनकप्रभः । प्रतानवांस्तालहस्तः करवीरोऽश्ववानपि । सप्तप्रभो महासोमो यश्चापि गरुडाहृतः । गायत्रस्त्रैष्टुभः पाङ्क्तो जागतः शाङ्करस्तथा । ऋग्भिष्टोमो रैवतश्च यथोक्त इति संक्षिप्तः । गायत्र्या त्रिपदा युक्तो यथोडुपतिरुच्यते । एते सोमाः समाख्याता वेदोक्तैर्नामभिः पुनः । सर्वेषामेव चैतेषामेको विधिरुपासने । सर्वे तुल्यगुणाश्चैव विधानं तेषु

वक्ष्यते"। "अतोऽन्यतमं सोमसुपयुञ्जः सर्वप्रकारपरिचारकोपेतः प्रशस्तदेशे लिहतमगारं कारयित्वा क्षुतदोषः प्रतिसंक्षुटः प्रशस्तेषु तिथिकरणमुहूर्त्तनक्षत्रेषु क्षुं-मलमादायाध्वरकल्पेनाहुतमभिघुतमभिहुतं चालरान्तराकृतमङ्कनः सोमकन्दं सुवर्णस्रुचा विदार्य्य पवोच्छ्रोयाच्छोवर्णे पात्रेऽञ्जलिमात्रं. ततः सकृदेवोपयुञ्जीत नासादयंस्ततउपस्तृ्य शेषमपस्रवसाद्य यमनियमाभ्यामात्मानं संयोज्य वाग्यतोऽभ्यन्तरतः सुहृद्भिरुपासमानो विहरेत्"।

**दूर्वेष्टका** स्त्री यज्ञाङ्गे चितिरूपेष्टकाभेदे "तमग्निरब्रवीत् । उपाहमायानीति केनेति पशुभिरिति तथेति पञ्चिष्टकयाच्छ तदुवाचैषा वाव पञ्चिष्टका यद्दूर्वेष्टका तस्मात् प्रथमायै स्वयमातृण्णायां चतस्रश्चिता दूर्वेष्टकोपधीयते तस्मादृश्रा चतस्रश्चिता ओषधयोऽतश्चिताः पशवो ऽतश्चितोऽग्निरतश्चितो ह्येष एतयोपैत्" शत० ब्रा० ६।२।३।२ ।

**दूलाग्र** त्रि० दूडाग्र+डस्य वा लः । दुःखेन छिन्ने ।

**दूली** स्त्री दूरं दूरताऽस्त्यस्याः अच्, दू-खेदे सम्प०भावे क्विप् तां राति ददाति वा रा-क रस्य लः दुरे खेदायलायते गच्छते वा-क घञर्थे क वा गौरा० ङीष् । नील्यां शब्दर० । "ह्रणुवेह महाबाहो नीलीरक्तस्य धारणात् । वाससोमलधार्दूल ! गदतो मम कृत्स्नशः । पालनाद्विक्रयाच्चैव तद्वृत्तेरुपजीवनात् । पतितस्तु भवेद्विप्रस्त्रिभिः कृच्छ्रैर्विशुध्यति" भविष्यपु० तस्यावपनक्रयादेर्निषेधेन दूरीकार्य्यत्वात् तथात्वम् तदुपजीवने च पापोत्पादनेन तस्याः दुःखहेतुत्वात् वा तथात्वम् । स्वार्थे क । दूलिका तत्रार्थे

**दूश्य** न० दू-खेदे सम्पदा०भावे क्विप् तां श्यावते शमयति अन्तर्भूतण्यर्थे श्यै-गतौ क । वस्त्रनिर्म्मिते गृहे (तंबु) शारसुन्दरी ।

**दूषक** त्रि० दुष-णिच्-ण्वुल् । १दोषजनके "दूषकतापीजानिरुक्तैः" सर्वदर्शनसंग्रहः "वेदविक्रयिणश्चैव वेदानां चैव दूषकाः । वेदानां निन्दकाश्चैव ते वै निरयगामिनः" भा०अनु० १६४३श्लो० । "पाषण्डाऽदूषकाश्चैव समजानाञ्च दूषकाः । ये प्रत्यवसितास्चैव ते वै निरयगामिनः" भा० अनु० १६४८श्लो० । "कूटशासनकर्त्तृंश्च प्रकृतीनाञ्च दूषकान्" (हन्यात्) मनुः । २खले च त्रिका०

**दूषण** न० दूषि-भावे ल्युट् । सदोषतासम्पादने "दूषणार्थं च परित्यागो महीयसः । अर्थस्य नीतितत्त्वज्ञैरर्थदूषणमुच्यते" काम०नी० दूषि-कर्त्तरि ल्यु । २दोषजनके त्रि० "पानं दुर्जनसंसर्गः पत्या च विरहोऽटनम् । स्वप्नोऽन्यगेहे वासो नारीणां दूषणानि च" मनुः । ३राक्षसभेदे पु० खरशब्दे २४६६ पृ० उदा०

**दूषणारि** पु० ६त० । श्रीरामे शब्दरत्ना० तस्य रामेण वधकथा खरशब्दे २४६६पृ० दृश्या ।

**दूषयित्नु**, त्रि० दूषि-शीलार्थे इत्नुच् । दूषणशीले [ङीप् ।

**दूषि(षी)** स्त्री दूषि-इन् । नेत्रमले (पिँचुटि) शब्दमा० वा

**दूषिका** स्त्री दूषि+स्वार्थे क ण्वुल् वा । १नेत्रमले (पिँचुटि) २तद्विकायां मेदि० । ३दूषणकर्त्र्यां स्त्रियाञ्च । दूषी+स्वार्थे क वा न ह्रस्वः । तत्रार्थे "वयसा प्रुषा अस्रुभिस्तादिनीर्दूषीकाभिः" । यजु० २५।८ "शालमली कण्टकप्रख्याः कफमारुतशोणितैः । जायन्ते पिडका यूनां वङ्क्षे वा सुखदूषिका" सुश्रुतः "स्त्रियास्तथाऽपचारिण्या निष्कृतिः स्याद्दूषिका"भा०शा० २४७० पुंसि तु ण्वुलि दूषक इत्येव । "नष्टशौचं प्रकृतिहीनं नारीं प्रकृतिदूषकः" हरिवं० १८६अ०

**दूषित** त्रि० दूषि-क्त । १दत्तदूषणे २प्राप्तदूषणे ३कृतिभ्रष्टे मैथुनापवादयुक्ते ४भ्रष्टकन्याभावायां स्त्रियां स्त्री शब्दरत्ना० ।

**दूषीविष** न० दूष्यति दूषि-बा० ई कर्म० । सुश्रुतोक्ते धातुदूषके विषभेदे यथा "यत् स्थावरं जङ्गमकृत्रिमं वा देहादशेषं यदनिर्गतं तत् । जीर्णं विषघ्नौषधिभिर्हृतं वा दावाग्निवातातपशोषितं वा । स्वभावतो वा गुणविप्रहीनं विषं हि दूषीविषतामुपैति । वीर्य्यल्पभावान्न निपातवेत्तत् कफाहतं वर्त्मगुणानुबन्धि । तेनाहितो भिन्नपुरीषवर्च्चा विगन्धवैरस्यतनुः पिपासी । मूर्च्छन् यमन् गद्गदवाग्विपक्षो भवेच्च दूषीदरिणक्रजुष्टः । आमाशयस्थे कफवातरोगी पक्वाशयस्थेऽनिलपित्तरोगी । भवेच्चरो ध्वस्रगिरोरुहाक्षो विलूनपक्षस्तु यथा विहङ्गः । स्थितं रसादिष्वथ वा यथोक्तान् करोति धातुप्रभवान् विकारान् । कोपस्तु शीतानिलदुर्दिनेषु वाय्वाशु पूर्वं ग्रहणं तत्र रूपम् । निद्रागुरुत्वञ्च विजृम्भणञ्च विश्लेषहर्षौवयवाङ्गमर्दैः । ततः करोत्यन्नमदाविपाकावरोचकं मण्डलकोठमेहान् । धातुक्षयं पादकराक्षिशोफं दकोदरं छर्दिमथातिसारम् । वैवर्ण्यमूर्च्छाविषमज्वरान्वा कृर्यात् प्रदुष्टा प्रबला दृशं वा । उन्मादमन्यज्जनयेत्तथान्यदानाहमन्यत् त्वपवेच्च शुक्रम् । प्रगाढमन्य-

व्यनक्ति च कुष्ठं तांस्तान् विकारांश्च बहुप्रकारान्। दूषितं देशकालाद्य दिवास्वप्नैरभीक्ष्णशः। यस्माद्दूष्यते धातून् तस्माद्दूषीविषं स्मृतम्"

दूष्य त्रि॰ दूषि–कर्मणि यत्। १दूषणीये "दूष्यं वधो मम पुनर्निपुणं विभाव्य" अनुमानदीधितिः। "राज्ञोपघातं कुर्वाणा ये पापाचारवल्लभाः। एकैकशः संहता वा दूष्यांस्तान् परिचक्षते" कामन्दकी॰उक्ते २राजोपघातके। २वस्त्रे ४वस्त्रमात्रे न॰ मेदि॰ ५पूये न॰ हेमच॰ ६दूषिवन्धरज्ज्वाम् स्त्री हेमच॰।

दृष्यदर न॰दूषिभिर्दोषैः कृतमुदरं तद्रोगः। सुश्रुतोक्ते दोषकृते उदररोगभेदे तन्निदानादि तत्रोक्तम् उदरशब्दे ११४६५॰दर्शितम् "प्रकीर्तितं दूष्योदरन्तु घोरम्" सुश्रुतः

दृ आदरे तु॰ आ॰ सक॰ अनिट्। द्रियते आदृत। अयमाङ्पूर्व एव प्रयुज्यते। "निषीय यस्य चितिरक्षिणः कवां तथाऽऽद्रियन्ते न बुधाः सुधामपि" नैष॰ आदृतः आदरः। "दरादराभ्यां दरकम्पिनौ घपे" नैष॰ "न जातहार्देन न विद्विषादरः" किरा॰ "आदृत्यर्त्विजेन इत्येन" भट्टिः।

दृ भये स्वादि॰ पर॰सक॰ अनिट्। दृणोति अदार्षीत् ददार स्वादिगणे छन्दसीत्यधिकारे "विचि जिरि दाश द–क्षिंसायाम्" पा॰ उक्तेः छान्दसोऽयम्। "क्षिणोतिभौंग्रामपीत्येके" सि॰कौ॰ उक्तेः अन्यस्यापि वस्तुविदारणायां प्रयोग इति गम्यते मत्स्यघातिनि धीवरे दाशशब्दप्रयोगात्। [संक्षिप्तसारे

दृक न॰ दृ+विदारे वा॰ कक् हुस्वश्च न कित्त्वम्। छिद्रे

दृक्काण न॰ज्योतिषोक्ते राशेस्तृतीये दशांशरूपे अंशे द्रेक्काणे "त्रिंशत्तमे विंशतिरुत्तमे से हृद्येऽलिचन्द्रादशकं दृक्काणे" नील॰ता॰ पञ्चवर्गीबलकथने दृक्काणशब्दे विवृतिः।

दृक्कर्ण पुंस्त्री॰ दृक् नेत्रमेव कर्णोऽस्य। सर्पे हेमच॰ स्त्रियां जातित्वात् ङीष्।

दृक्कर्मन् न॰ दृशर्थं दृश्यर्थं कर्म। यज्ञाद्यां दर्शनयोग्यतासाधनार्थे सं॰क्रि॰ उक्तेः कर्मभेदे तच्च यज्ञनक्षत्रयोगादुपयोगि संस्कारभेदरूपं यथाह तत्र

"नक्षत्रयज्ञयोगेषु यज्ञोदयसाधने। ग्रहोन्नतौ तु चन्द्रस्य दृक्कर्मादावितं स्मृतम्" स्मृतिः "अत्र निमित्तसप्तमी यज्ञनक्षत्राणां बहुत्वाद्बहुवचनम्। नक्षत्रयज्ञयोर्युग्मं नक्षत्रयज्ञयोरिदं इयं दृक्कर्म स्मृतं प्रागुक्तम् आदौ प्रथमं कार्यम्। ताभ्यामनन्तरं क्रिया कार्यैः। अत्र नक्षत्रयज्ञकाषायनदृक्कर्मसंस्कृतानामेवोन्नत्वादायनं दृक्कर्म न कार्यमिति ध्येयम्। यज्ञाद्यामस्योदयौ नित्यास्योदयौ सूर्यसान्निध्यजनितास्योदयौ च यज्ञाद्यासपनक्षत्रत्वाच्चलाद्यामपि। तयोः साधननिमित्तं यज्ञस्य नक्षत्रस्य वा ज्ञेयम्। अत्राद्यदृक्कर्मार्थं केवलः शरः साध्यः। न तु दिनमानरात्रिमाननतोन्नते साध्ये। क्षितिजसम्बन्धेन हग्यज्ञस्योदयास्तलग्नसाधकत्वेन क्षितिजातिरिक्तायनपरिणामस्य व्यर्थत्वात् क्रान्तौ तु सप्तमोत्तरदृक्के युगपद्दर्शनार्थं तत्परिणामसाधकत्वात्। ग्रहोन्नतिनिमित्तं चन्द्रस्य। तुकारः सप्तम्यर्थकत्वकारपरः। अत्रापि श्लोके पूर्वार्द्धोक्तमाद्यदृक्कर्म संस्कार्यमिति ध्येयम्"। रङ्गना॰

दृक्कर्म द्विविधम् आयनमयनञ्च तत्रायनदृक्कर्मायनशब्दे ७७१४॰ सि॰शि॰ उक्तं दर्शितम् अयनजं दृक्कर्मोच्यते

"इदानीमयनजं दृक्कर्माह प्रभि॰ "स्फुटास्फुटक्रान्तिजयोश्चरार्धयोः समान्तरदिक्के ऽन्तरयोगजावयवः। पलीकृतो भनभःसदां शरे भक्तश्चयाप्ते यदि वा स्फुरन्यथा। अथेष्टरज्ज्वलनेन हतो विभक्तो लम्बज्यया रविहृतोऽथभा हतो वा। लब्धं हतं त्रिभयुग्धेन हृतं द्युभौर्व्या स्फुटोऽयवः पलभवा अथ तैः शरे तु। याम्योत्तरे क्रमविलोमविधानलग्नं खेटात् कृतायनफलादुदयास्तलग्नम्। सौम्ये क्रमेण विपरीतमिषौ तु याम्ये भार्धाधिकात् शरतोऽस्तविलग्नमेवम्" सू॰। "यज्ञस्य स्फुटक्रान्तेरस्फुटक्रान्तेश्चरार्धे साध्ये। यदि स्फुटास्फुटक्रान्ती तुल्यदिके तदा चरार्धयोरन्तरं कार्यम्। यदि भिन्नदिके तदा योगः। एवं येऽसवो भवेयुस्ते पलीकृत्वा ज्ञेयाः। यज्ञस्य भस्य वा यदा महांस्तदैवम्। यदाल्पस्तदान्यथा वा पलीकृतासवः साध्याः। यज्ञस्य स्वदृग्शरोऽत्रज्वलनेन गुणो लम्बज्यया भाज्यः। अथ वा अक्षभया गुणितो द्वादशभिर्भाज्यः। यल्लब्धं तत् त्रिज्यया गुणं द्युज्यया भाज्यं फलं पलीकृत्वा असवो भवन्तीत्यनुकल्पः। अथ कृतायनदृक्कर्मकं यज्ञं रविं प्रकल्प्य तैः पलीकृतासुभिर्लग्नं साध्यम्। यदि यज्ञस्य याम्यः शरस्तदा क्रमविलग्नम्। यदि सौम्यस्तदा विलोमलग्नम्। एवं कृते सति यज्ञोदयलग्नं भवति। अथ तमेव यज्ञं सभार्धं रविं प्रकल्प्य तैरेवासुभिस्तरे शरे यत् क्रमलग्नं याम्ये विलोमं क्रियते तद्दृक्कर्मलग्नम्"। "अत्रोपपत्तिः। अत्र गोले विषु-

वन्नखण्डं खाङ्गैर्यावद्भामितं तावदुन्नखण्डसत्तरगोले क्षितिजादुपरि लगति याम्येऽधः। यतस्तत्रस्थो यष्टेः खचरार्धैर्नभिरुन्नतिं नतिं च गतः। अतश्चरार्धस्य या वासना सैव पलोन्नवासनाम्। स्फुटास्फुटक्रान्तिजयोश्चरार्धयोरन्तरे यावन्तोऽवयवास्तावन्तः शरभवा इत्यर्थोज्ञातम्। यतस्तयोरन्तरं शर एवं तुल्यदिक्के। यदा अहता शरेणान्यदिक्कं नीता क्रान्तिस्तदा शरस्त्रैकं खखस्वस्तरतोऽन्यद्दिग्भवतः। तयोर्योगे यतः शरो भवति। अतस्तज्जनितयोश्चरार्धयोर्योगे शरजनिताः पलोन्नवाग्रवः स्युः। एवं हि सति शरे। अथाग्रे। यष्टेः क्षितिजोत्तरगोल उत्तरत्व तस्य शरस्तदाग्रयमाच्छरेण यष्टेस्य तदुन्नमनं तत् त्रैराशिकेन साध्यते। यदि लम्बज्यया कोटिज्याऽवलनतुल्यो भुजस्तदा स्फुटशरतुल्यया किमिति। अत्र यत् फलं तदुपरिदृश्याद्वत्ते ज्यारूपं भवति। अथ वा लघुना चेत्रेणानुपातः। यदि द्वादशाङ्गुलकोटिज्या पञ्चभा भुजस्तदा स्फुटशरकोटिज्या किमिति। फलं तुल्यमेव। अथ त्रिज्याहृत्त परिणामायानुपातः। यदि दृग्ज्याहृत्त एतावती ज्या तदा त्रिज्याहृते कियतीति। फलस्य धनुः कर्तुं युज्यते। तच्छरस्याल्पत्वाच्चोपपद्यत इति न ज्ञातम्। आयनदृक्कर्मणस्फुटविक्षेपादग्रवः साधिताः इह तु स्फुटात्। तत्र कारणमुच्यते। तेन दृक्कर्मणा निरक्षदेशक्षितिजस्थो यष्टेः कृतः। तत् क्षितिजसमदेश उन्मण्डलम्। शरमूले यद्दृग्ज्याहृत्तं शराग्रे च यत् तयोर्दृग्ज्ययोरुन्मण्डले यावदन्तरं तावान् स्फुटः शरः। स तु कोटिरूपः। अतोऽत्र कोटिरूपेण पलोन्नवा अग्रवः साधिताः कृतायनदृक्कर्मको यष्टेरुच्चत्वात् प्रागुदित उदेष्यति वा तैरंशुभिस्तत्र पलोन्नवाख्याः। अथ याम्ये शरे तैरंशुभिः क्षितिजादधःस्थो यष्टेर्यावदुपरि क्षितिजं नीयते तावत् कृतायनदृक्कर्मयष्टादपतः क्रान्तिदृत्तं क्षितिजे लगति। यदि सौम्यः शरस्तदा तैरंशुभिः क्षितिजादुपरिस्थो यष्टेः क्षितिजं यावदधो नीयते तावत् कृतायनदृक्कर्मकादुपरिष्टात् पृष्ठतः क्रान्तिदृत्तं क्षितिजे लगति। अत उक्तं शरे याम्योत्तरे क्रमविलोमविधानलग्नमित्यादि। एवं कृते उदयलग्नं ज्ञातम्। अस्मादुदयलग्नसाधनाद्वक्ष्यमाणलग्नसाधनम्। यतो यैरंशुभिर्विक्षेपेण प्राच्यां यष्टेः क्षितिजादुन्नाम्यते तैरेव प्रतीच्यां नाम्यते। यैर्नाम्यते तैरेवोन्नाम्यते। अथ प्रतीच्यां यष्टेरस्तं गच्छति प्राच्यां यल्लग्नमुदेति तदस्तलग्नम्। अतो भार्धाधिकात् खचरत इत्युक्तम्। इदं सर्वं गोलोपरि व्यक्तमुदाहृतं"।

टङ्काण न॰ ल्यो॰ उक्ते रागेर्दशांशरूपे तृतीयांशे ट्रेक्काणे तथा च एकैकराशौ त्रयो ट्रेक्काणास्तेन द्वादशराशिषु ३६ ट्रेक्काणा भवन्ति मेषादिराशिस्थानां तेषां षट्त्रिंशतः-क्रमेण खरूपाणि दृष्ट्वा॰ ३६ श्लोकैरुक्तानि यथा "कन्यां सितवस्त्रवेष्टितः कृष्णः शक्र इवाभिरञ्जितम्। रौद्रः परशुं सशस्त्रं धत्ते रक्तविलोचनः पुमान्१। रक्ताम्बराभरणभक्ष्यचित्ता कुम्भाकृतिर्वाजिसखी तथार्त्ता। एकेन पादेन च मेषमध्ये ट्रेक्काणरूपं यवनोपदिष्टम्२। क्रूरः कलाशः कपिलः क्रियार्थी भग्नव्रतोऽभ्युद्यत दण्डहस्तः। रक्तानि वस्त्राणि बिभर्त्ति चक्षो मेषे तृतीयः कथितस्त्रिभागः३। कुञ्चितलूनकचा घटदेहा दग्धपटा तृषिताशनचित्ता। आभरणान्यभिवाञ्छति नारी रूपमिदं वृषभे प्रथमस्य४। क्षेत्रधान्यगृहधेनुकलाढ्यो लाङ्गले सगकटे कुशलश्च। स्तब्धसुदृष्टिरति गोपतितुल्यं चुल्लरोऽजदमो मलवासाः५। द्विपसमकायः पाण्डुरदंष्ट्रः भरभसमाक्षिः पिङ्गलमूर्तिः। अविनयलोभव्याकुलचित्तो वृषभवनस्य प्रान्तगतोयम्६। स्वच्छान्यं समभिवाञ्छति कर्म नारी रूपान्विता ऽऽभरणकार्यकृतादरा च। क्षीणप्रजोज्झितभुजर्द्वमती त्रिभागमाद्यं तृतीयभवनस्य वदन्ति तज्ज्ञाः७। उद्यानसंस्थः कवची धनुष्मान् शूरोऽस्तधारी गरुडाननश्च। क्रीडालजालकुरणार्थचिन्तां करोति मध्ये मिथुनस्य राशेः८। भूषितो वरुणवद्वरस्त्रो वह्नत्वकवचः सधनुष्कः। स्तब्धवादनकलाश्च विद्वान् काव्यकर्म्मिथुनराशिवसानेऽ। पत्रमूलफलभद्विपवाग्रः कानने मलयगः शरभाक्षिः। क्रोडतुल्यपदनो हयकण्ठः कर्कटे प्रथमरूपमुशन्ति॰। पद्मार्चिता मूर्द्धनि भोगियुक्ता स्त्री कर्कशारम्भगता विरौति। शाखां पलाशस्य समाश्रिता च मध्ये स्थिता कर्कटकस्य राशेः११। भार्याभरणार्थमर्थं नौस्थो गच्छति सर्पवेष्टितः। हैमेन युतो विभूषणेचिपिटाक्षोऽन्त्यगतश्च कर्कटे १२। शालूकवेऽपरि स्थप्रजम्बुको श्वा नरश्च मलिनाम्बरान्वितः। रौति मातृपितृविप्रयोजितः सिंहरूपमिदमाद्यसञ्ज्ञते १३। हयाकृतिः पाण्डुरमाल्यशेखरो बिभर्त्ति कण्ठाश्रितकम्बलं नरः। दुरासदः सिंह इवात्तकार्मुको मतापनाशो नृपराजमध्यगः१४।

ह्रस्वाननो वानरतुल्यचेष्टो विभर्त्ति दण्डं फलमामिषं च । कूर्ची मनुष्यः कुटिलैश्च केशैर्मङ्गेश्वरस्यान्नगतश्चिभागः१५ । पुष्पप्रपर्णेन घटेन कन्या मलप्रदिग्धाम्बरसंहताङ्गी । वस्त्रार्थसंयोगमभीप्समाना गुरोः कुलं वाञ्छति कन्यकाद्यः१६ । पुरुषः प्रस्फोटीतलेखनिः श्यामो वस्त्रशिरा व्यायतत् । विपुलं च विभर्त्ति कार्मुकं रोमव्याप्ततनुश्च मध्यमः१७ । गौरी सुधौतायप्रकूचगुप्ता सच्छिता कुम्भकटाहहस्ता । देवालयं स्त्री प्रवता प्रहस्ता वदन्ति कन्यान्त्यगतत्रिभागम्१८ । वीथ्यन्तरायगतः पुरुषस्तुलायातुन्मानमानकुशलः प्रतिमानहस्तः । भाण्डं विचिन्वति तस्य च मूल्यमेतद्रूपं वदन्ति यवनाः प्रथमं तुलायाः१९ । कलशं परिस्पृश्य विनिःपतितुं समभीप्सति स्फटिकस्रुवः पुरुषः । क्षुधितस्तृषितश्च कलत्रसुतान्नसैति तुलाधरमध्यगतः२० । विभीषयन् तिष्ठति रत्नचित्रितो वने मृगान् काञ्चनदण्डधर्मभृत् । फलाभिधं वानररूपभृद्वरस्तुलावसाने यवनैरुदाहृतः२१ । वस्त्रैर्विहीनाऽऽभरणैश्च नारी महासनस्थात् सहसैति कुम्भम् । स्थानच्युता सर्पनिबद्धपादा मनोरमा हस्तिकराभिपूर्वः । स्थानसुखान्यभिवाञ्छति नारी भर्तृकृते भुजगाहतदेहा । कच्छपकुम्भसमानशरीरा हस्तिकमध्यमरूपसमन्ति२२ । पृथुलचिपिटकूर्मतुल्यवक्त्रः सृमरवराहग्रहगालभीषकारी । ध्वनति च मलयाकरप्रदेशं मृगपतिरन्यगतस्य हस्तिकस्य २४ । मनुष्यवक्त्रोऽश्वसमानकायो धनुर्विमुक्तायतमाश्वमस्थः । क्रतुपयोज्यानि तपस्विनश्च ररक्ष पूर्वो धनुषश्चिभागः २५ । मनोरमा चम्पकहेमवर्णा भद्रासने तिष्ठति मध्यरूपा । सप्तरत्नानि विबुध्यन्ती मध्यत्रिभागो धनुषः प्रदिष्टः२६ । कूर्ची नरोष्ट्राटकचर्मकाभोवरासने दण्डधरो निषण्णः । कौशेयकाम्बुहरितेऽजिनं च तृतीयरूपं नवमस्य राशेः२७ । रोमचितोमकरोपमदंष्ट्रः स्फुरत्कायसमानशरीरः । योक्त्रकलाकलकञ्चनधारी रौद्रसखो मकरप्रथमस्तु२८ । कलास्वभिज्ञाजदलायताक्षो श्यामा विचित्राणि च मार्गभाषा । विभूषणालङ्कृतलोहकर्मा योषा प्रदिष्टा मकरस्य मध्ये२९ । किन्नरोपमतनुः सकम्बलस्तूणचापकवचैः समन्वितः । कुम्भसहस्थति रत्नचित्रितं स्कन्धगं मकरराशिपश्चिमः३० । स्फेडमद्यजलभोजनागमव्याकुलीकृतमनाः सकम्बलः । कोशकारवसनोऽजिनान्वितो स्फटिकस्रुवदनो घटादिगः३१ । दर्भे शकटे सयानभूमे डोहान्याङ्गरतेऽङ्गना वने । मलिनेन पटेन संहता भाण्डैर्मूर्ध्निगतैश्च मध्यमः३२ । श्यामः सरोमचरणः किरीटी त्वक्पत्रनिर्यासफलैर्विभर्ति । भाण्डानि लोहैरतिभिश्रितानि सञ्चारयत्यन्नगतो घटस्थ३३ । स्रुग्भाण्डसक्तामणिशङ्खभिन्ने व्याघ्रिप्रहस्तः सविभूषणश्च । भार्यार्थविभूषणार्थमपां निधानं नावा ध्रुवत्वादिगतो झषस्थ३४ । व्यत्युच्छितध्वजपताकसपैति योतं कूलं प्रयाति जलसेः परिवारयुक्ता । वर्षेण चम्पकसखा प्रमदा त्रिभागो मीनस्य चैष कथितो मुनिभिर्द्वितीयः३५ । स्रुभ्वान्विते सर्पनिवेष्टिताङ्गोवस्त्रैर्विहीनः पुरुषस्त्रटव्याम् । चौरानलव्याकुलितान्तरात्मा विक्रोशतेऽन्योपगतो झषस्थ३६ ।" एतेषां स्वरूपोत्कीर्त्तनेन नष्टजातकोद्धारः तत्रैव दर्शितः तथा षट्पञ्चाशिकायां चौरस्वरूपविज्ञानमपि एतदनुसारेण कार्यमित्युक्तम् यथा "अंगकाज् ज्ञायते द्रव्यं हक्काणैस्त्रिकराश्रया" "चौरानवांगप्रतिमं विलग्नं लग्नाद्रविर्वावति वा हकाणे । "तस्माद्देत्तावति वा विलग्नं प्रष्टुः प्रश्नताविह शास्त्रमाह" इडव्या० । राशिभेदे तदधिपाश्च "स्वपञ्चनवमानां ये राशीनामधिपाः स्मृताः । ते द्रेक्काणाधिपा राशौ द्रेक्काणास्त्रयएव हि" ज्यो०त० यथा मेषस्य स्वामी कुजः १द्रेक्काणेशः । तत्पञ्चम सिंहराशेः स्वामी रविः स मेषस्य २द्रेक्काणेशःमेषतः नवमो धनुराशिस्तस्येशः जीवः मेषस्य ३द्रेक्काणेशः एवं वृषादेरूह्यम् । द्रेक्काण द्रेक्काण द्रेक्काणा अपि तत्रार्वे

**टङ्क्षेप** पुं० । १डटिपाते स्फो०सि० उक्ते २दम्बूलजप्रान्तरालस्थशरीरूपे क्षेपे च यथा

"अथाभ्यासयुक्तं हक्षेपं लम्बनोपयुक्तां हन्मतिं चाह" रङ्ग० । "मध्योदयज्यया भक्ता त्रिज्याप्ता वर्गितं फलम् । मध्यज्यावर्गविश्लिष्टं हक्षेपः शेषतः पदम् । तत्त्रिज्यावर्गविश्लेषान्मूलं शङ्कुः स दृग्गतिः" मू० । पूर्वोक्तमध्यज्या पूर्वानीतोदयाभिधयोदयज्यया । अस्या ज्यारूपत्वाद्दृग्ज्यमेत्युक्तम् । गुणिता त्रिज्यया भक्ता फलं वर्गितं वर्गः सञ्जातो यस्य तत् । फलस्य वर्गः कार्य इत्यर्थः । मध्यज्यावा वर्गे विश्लिष्टं हीनं वर्गितं फलं कार्यम् । शेषान्मूलं हक्षेपः तत्त्रिज्यवोर्यौ वर्गौ तयोरन्तरान्मूलं शङ्कुः । स चानीतः शङ्कुर्दृग्गतिसञ्ज्ञो भवति । न तु शङ्कुमात्रम् । अतोपपत्तिः । त्रिभोनलग्नस्य दृग्ज्यानयनार्थं क्षेत्रम् । मध्यलग्नदृग्ज्या कर्णश्चिभोनलग्नस्य याम्योत्तरवृत्तात् प्राग्परस्थितत्वेन

तत्खस्वस्तिकान्तरस्थिततदीयदृग्वृत्तप्रदेशांशज्या कोटिः। मध्यलग्नत्रिभोनलग्नान्तरांशज्या क्रान्तिवृत्तस्थो भुजः। अत्र भुजानयनं चोदयलग्नस्यक्रान्तिवृत्तप्रदेशः। प्राक्स्वस्तिकात् तदप्यन्तरेणोत्तरदक्षिणो भवति। एवमस्तलग्नप्रदेशः परस्वस्तिकादक्षिणोत्तरः। तदुदयोधेन च त्रिभोनलग्नप्रदेशक्रान्तिवृत्तीययाम्योत्तरवृत्तरूपतदृग्वृत्तक्षितिजसम्पातात् तदप्यन्तरेण लग्नमवश्यं भवति। अतस्त्रिजग्रात्तुल्यमध्यलग्नदृगज्यया लग्नायातुल्यो भुजस्तदाभीष्टतदृदृगज्यया च दृत्यनुपातेन स फलज्यः। तद्गोनान्मध्यलग्नदृगज्यावर्गान्मूलं त्रिभोनलग्नस्य दृगज्या दृक्क्षेपाख्या। एतद्गोनात् त्रिज्यावर्गान्मूलं त्रिभोनलग्नभङ्गदृग्गतिसञ्ज्ञः। अत्रेदमवधेयम्। त्रिप्रश्नाधिकारोक्तप्रकारेण त्रिभोनलग्नस्य भङ्गदृगज्ये दृग्गति दृक्क्षेपतुल्ये न भवतः। किन्तु दृग्गतिदृक्क्षेपाभ्यां क्रमेण न्यूनाधिके भवतः सर्वदा ध्रुवीकर्मणानुभवात्। अत आनीतोऽयं दृक्क्षेपस्त्रिभोनलग्नभङ्गखस्थितोऽपि न त्रिज्यानुरुद्धः। किन्तु फलवर्गोनत्रिज्यावर्गपदरूपत्रिज्याभङ्गवृत्तव्यासार्धप्रमाणेन सिद्ध इति गम्यते। अतो दृग्ज्यावास्त्रिज्यानुरुद्धत्वेन त्रिज्याभङ्गपरिधितो दृक्क्षेपस्त्रिभोनलग्नस्य दृग्ज्या स्फुटदृक्क्षेपरूपा। अस्यास्त्रिज्यावर्गेत्यादिना दृग्गतिः स्फुटा त्रिभोनलग्नभङ्गरूपा। एतदनुक्तिः खल्पान्तरत्वाद्बुधितसुखार्थं क्रियानुगता। त्रिप्रश्नक्रियागौरवभियैतन्नागौन्नरं लाघवादुक्तमिति दिक्। अथ लाघवादृदृक्क्षेपदृग्गती गणितसुखार्थं श्लोकार्धेनाह" रङ्ग०"नतांशबाङ्कोटिज्ये स्फुटे दृक्क्षेपदृग्गती। एकज्यावर्गतश्छेदो लब्धं दृग्गतिजीवया"सू०। "दृग्मभावनतांशानां भुजकोट्योर्नतांशतदूनर्तुरूपयोरनयोर्ज्ये क्रमेण दृक्क्षेपदृग्गती स्फुटे स्यूते। यत्तु स्फुटे प्रागुक्ते दृक्क्षेपदृग्गती विहाय गणितलाघवार्थं दृग्मभावनतांशभुजकोट्योर्ज्ये" तत्स्थानापन्ने स्याताम्। तत्तूदयज्याभावे नतांशबाङ्कोटिज्ये दृक्क्षेपदृग्गती स्फुटे इति तच्च उक्तप्रकारेणैतल्लिङ्गेनत्कथनस्य व्यर्थत्वात्। अत्रोपपत्तिः। त्रिभोनलग्नस्य दृग्मभावासन्नत्वेन दृग्मभावस्य याम्योत्तरवृत्तस्थत्वेन लाघवार्थं दृग्मभावमेव त्रिभोनलग्नं प्रकल्प्य तन्नतांशज्या मध्यज्यारूपा त्रिभोनलग्नदृक्क्षेपः। उन्नतज्या भङ्गदृग्गतिः। इदमतिस्थूलम्। यैस्तु भगवतोक्तं मध्यलग्नं दृग्मभावपरतया व्याख्यातं तेषां मते एतदुक्तमिति सूक्ष्मम्। प्रयासाधितदृक्क्षेपदृग्गती प्रागुक्ते सूक्ष्मे अयतिस्थूले इति ध्येयम्। भास्कराचार्यैस्तु" "त्रिभोनलग्नस्य दिनार्धजाते नतोन्नतज्ये यदि वा सुखार्थम्"। इति यदुक्तं तदप्यत्सूक्ष्ममिति ध्येयम्" रङ्ग०। [तीर्थदृक्पदे" नैष०।

दृक्पथ पु० ६त०। दृष्टियोग्ये स्थाने। "क्रमेण तस्मिन्नय-

दृक्प्रसाद स्त्री दृशं प्रसादयति अङ्गनेन प्र+सद+णिच् ल्युट् दृशः प्रसादो यस्याः वा। कुलट्यायां राजनि० तदञ्जनेन नेत्रयोः प्रसादनात्तस्यास्तथात्वम्।

दृक्प्रिया स्त्री दृशं प्रीणाति प्री–क। शोभायां राजनि० शोभादर्शने हि, दृशोस्तद्द्वारात्मनः प्रीणनात्तस्यास्तथात्वम्

दृक्शक्ति स्त्री दृक् प्रकाशनमेव शक्तिः। १प्रकाशरूपे चैतन्ये २सद्युक्ते सर्वप्रकाशके चेतने पुरुषे च "दृग्दर्शनशक्त्योरेकात्मतेवास्मिता" पात०सू० "पुरुषोदृक्शक्तिर्बुद्धिर्दर्शनशक्तिः" भा०।

दृक्श्रुति पु० दृक् नेत्रमेव श्रुतिः श्रवणमस्य। चक्षुःश्रवसि सर्पे दत्रा०। [शिष्टाहत्वेन तदश्रुत्वम्।

दृगध्यक्ष पु० ६त०। दृश्ये शब्दार्थकल्पतरुः। तस्य नेत्रा-

दृगल न० दृशे दर्शनायालति अल–पचाद्यच्। शकले खण्डे "पुरा दृगलं प्रत्तमिन्द्राग्निभ्यः" आश्व०श्रौ० ६।७।२ "दृगलं शकलम्" नारा०।

दृग्गति स्त्री ६त०। १दृशोर्गतौ रू०सि० उक्ते यत्नसहोपयोगिनि २दृशोगतिभेदे दृक्क्षेपशब्दे दृश्यम्।

दृग्गोल न० खगोलान्तर्गते गोलभेदे यत्रोक्तं सि०शि०

"बहुा खगोले नलिकाहयं च ध्रुवहये तन्नलिकास्थमेव। बहिः खगोलाहिदधीत धीमान् दृग्गोलमेवं खलु वक्ष्यमाणम्। भगोलदत्तैः सहितः खगोलो दृग्गोलसंज्ञोऽयमभङ्गखाद्यैः। हिगोलजातं खलु दृश्यतेऽत्र चेलं हि दृग्गोलमतो वदन्ति। "तस्मिन् खगोले ध्रुवचक्रयोर्नलिकाहयं बहा तन्नलिकाधारमेव खगोलाद्बहिरङ्गुलत्रयान्तरे दृग्गोलं रचयेत्। कथितैः खगोलदत्तैरुक्तभागैर्भगोलदत्तैः क्रान्तिविभङ्गखाद्यैर्यो निबध्यते स दृग्गोलः। कथमस्य दृग्गोलसंज्ञेति तदर्थमाह। हिगोलजातमित्यादि। यतोऽयमुक्तासमभङ्गाद्यङ्गुलैरेवाहिगोलजातानि भगोलदत्तैः खगोलदत्तमितैस्तान्युत्पद्यन्ते। भिन्नगोलत्वे सम्यङ्नोपलभ्यन्त इति दृग्गोलः स्मृतः" ग्रन्थि०।

दृग्ज्या स्त्री सू०सि०उक्तायां दिनमानादिज्ञानार्थं भङ्गच्छायोपयोगिन्यां दृष्टियोग्यायां दृग्वृत्तचेलस्यजीवायाम् यत्रोक्तं

तत्र "त्रिज्योदक्चरजायुक्ता याम्यायां तद्विवर्जिता। अन्या नतोत्क्रमज्योना खाङ्गोरात्रार्द्धसङ्गुणा। त्रिज्याभक्ता भवेच्छेदो लम्बज्याघ्नोऽथ भाजितः। त्रिभज्यया भवेच्छङ्कुस्तद्वर्गं परिशोधयेत्। त्रिज्यावर्गात् पदं दृग्ज्या छायाकर्णौ तु पूर्ववत्" सू०सि० "उत्तरगोले चरोत्पन्नया लम्बया चरज्यवेत्यर्थः पूर्वचरानयने चरज्यायाश्चरजेति सङ्क्षोक्तेः। युक्ता त्रिज्यान्त्या स्यात्। याम्यगोले तया चरज्ययोना त्रिज्यान्त्या स्यात्। नतोत्क्रमज्योना सूर्योदयाद्दिनगतघटयो दिनशेषघटयो वा दिनार्धान्तर्गता उन्नतसंज्ञास्वाभिमुखं दिनार्धं नतसंज्ञो घटयात्मकस्तस्मात्सुधी त्रिज्यालम्बयमैरित्यादिविधिना सनयो रज्जुवत्तया ह्युक्तोत्क्रमज्याधिष्ठलंबज्यैर्नतोत्क्रमज्या। पञ्चदशघट्यधिकनते तु पञ्चदशघट्यूननतस्य क्रमज्याखण्डैः क्रमज्या तया युक्ता त्रिज्योत्क्रमज्या भवति। तया हीनेत्यर्थः। खाङ्गोरात्रार्द्धसङ्गुणा। स्वकीयचरज्यास्वसम्बन्धखाङ्गोरात्रदृक्तज्यार्धं द्युज्या तया गुणिता त्रिज्यया भक्ता फलं छेदसंज्ञः स्यात्। अथानन्तरं छेदो लम्बज्यया गुणितस्त्रिज्यया भाज्यः फलमिष्टकाले शङ्कुः स्यात्। तस्य शङ्कोर्वर्गं त्रिज्यावर्गाच्छोधयेत्। शेषस्य मूलं दृग्ज्या। याम्यां छायाकर्णौ तु पूर्ववत् पूर्वोक्तरीत्या भवतः। अत्र छायाकर्णौ त्रिति कोणच्छायाकर्णसाधनश्लोकान्तभागस्य यदृच्छात् तच्छ्लोकोक्तरीत्याभीष्टशङ्कुदृग्ज्याभ्यां छायाकर्णौ साध्यावित्युक्तम्। अलोपपत्तिः। याम्योत्तरदृक्तज्योर्द्भागषड्भाधिष्ठितद्युरात्रदृक्तज्यखण्डात् क्षितिजद्युरात्रदृक्तज्यखण्डात्तदयवद्धोदयासक्षितिजसम्बन्धयाम्योत्तरदृक्तज्यखण्डात्पर्यन्तमक्षोरात्रदृक्तं खं त्रिज्यात्रुटिरूपमन्या। सा उत्तरगोले चरज्यायुता त्रिज्या दक्षिणगोले चरज्ययोना त्रिज्या उन्मण्डलयाम्योत्तरखण्डावध्यक्षोरात्रदृक्तज्यार्धं त्रिज्यात्वात् उन्मण्डलयाम्योत्तरदक्षिणक्रमेण क्षितिजादूर्ध्वाधःस्थत्वेन तद्याम्योत्तरखण्डयोर्मध्ये चरज्यात्वाच्च। षड्भाक्षोरात्रदृक्ते याम्योत्तराक्षोरात्रदृक्तखण्डात्तदुभयत्र नतषष्ठ्यन्तरेण स्थाने तत्खण्डं नतकालस्य सम्पूर्णज्या। तन्मध्याद्दृक्तं प्ररूपं नतोत्क्रमज्या। तया हीनान्त्या षड्भस्थानादक्षोरात्रदृक्ते उदयास्तखण्डपर्यन्तखण्डं त्रिज्यात्रुटिरूपमिष्टान्त्या। तत्तुल्या याम्योत्तरोर्ध्वाधःखण्डान्तर्गता या द्युज्याप्रमाणाधिष्ठितदृक्तिः। द्युज्यागुणा त्रिज्याभक्ता फलं छेदः। अस्मात् त्रिज्याकर्णे लम्बज्या कोटिस्तदेष्टदृक्तिकर्णे कोटिरित्यनुपातेनेष्टशङ्कुः। अस्माद्दृङ्नज्याच्छायातत्कर्णौ उक्तरीत्या सिद्धनीत्युक्तसुपपन्नम्" रङ्गनाथः।

**दृग्लम्बन** न० सि०शि० उक्ते षड्भदर्शनोपयोगिनि दृक्क्षेत्रस्वलम्बभेदे यथा

"दृष्टापवर्तिता दृष्टौ कक्षे च ग्रहसूर्ययोः। भित्तौ विलिख्य तन्मध्ये तिर्यग्रेखां तयोर्ऋजुम्। तिर्यग्रेखायुतौ कक्ष्यं कक्षायां क्षितिजं तथा। ऊर्ध्वरेखायुतौ खार्धं दृग्ज्याचापांशकैर्नतौ। लम्बार्केन्दू समुत्पत्तिं लम्बनस्य प्रदर्शयेत्। एवं भूमध्यतः सूत्रं नयेद्भखांशुषड्डलम्। दृष्टुर्भूपृष्ठगादन्यद्दृष्टिसूत्रं तदुच्यते। कक्षायां सूत्रयोर्मध्ये यात्रा लम्बनविग्निका। गर्भसूत्रे सदा स्यातां चन्द्रार्कौ समविग्निकौ। दृक्सूत्राङ्कमितस्वन्द्रस्तेन तल्लम्बनं स्फुटम्। दृग्गर्भसूत्रयोरैक्यात् खमध्ये नास्ति लम्बनम्"। "यत्र तत्र नतादर्कोदधस्चन्द्रावलम्बनम्। तद्दृक्सूत्रे ऽन्तरं चन्द्रभागोः पूर्वापरं च तत्। पूर्वापरं च याम्योदग्जातं तेनान्तरहृयम्। कक्षापन्नभखण्डं प्राची तत्तिर्यग्दृक्षिणोत्तरा। यत् पूर्वापरभावेन लम्बनाख्यं तदन्तरम्। यदाम्योत्तरभावेन नतिसंज्ञं तदुच्यते। नतिविघ्ना भुजः कर्णौ दृग्लम्बनकलाक्षयोः। क्षयान्तरपदं कोटिः स्फुटलम्बनविग्निकाः। परलम्बनविघ्नाग्नी त्रिज्याघ्ना रविदृग्ज्यका। दृग्लम्बनकलाक्षाः स्युरेवं दृक्क्षेपतो नतिः। लम्बनान्तरजस्तिर्यग्गः परलम्बनविग्निका। नतियोजनतिर्यग्गः कुदलस्य यतो मितिः। स्फुटलम्बनकला नाड्यो लम्बनान्तरयोद्धृताः। प्राग्यतो रवेश्चन्द्रः पश्चात् पृष्ठे ऽवलम्बितः" सि०शि०।

**दृग्विष** पुंक्ली दृशि विषमस्य। दृष्टिविषे सर्पभेदे हेमच०। स्त्रियां जातित्वात् ङीष्।

**दृग्वृत्त** न०द्रष्टुः प्रचारस्थानं वृत्तमिव। वृत्ताकारे दृक्प्रचारस्थले। "दृग्वृत्तस्य कदम्बगोलवृत्ताकारत्वे क्रान्तिवृत्ते ततोऽन्तराभावाद् लम्बनाभावः। याम्योत्तरमन्तरं दृग्लम्बनं नतिरेवोत्पन्ना। दृग्वृत्ताकारक्रान्तिवृत्ते तु दृग्लम्बनमेव क्रान्तिवृत्ते तयोरन्तरमिति लम्बनसंस्कारं नलभावच्च। तथा च दृग्वृत्तस्य कदम्बगोलवृत्ताकारत्वे त्रिभोनलग्नस्थानेऽर्को भवति तद्वृत्तस्य क्रान्तिवृत्तयाम्योत्तरत्वे नोदयास्तलग्नमध्यवर्तित्वेन लग्नस्थानात् त्रिभान्तरितत्वात्" सू०सि०टी० रङ्गना० २।८।षड्भसंस्कारे च

तस्य खगोलबन्धप्रकारो दङ्मण्डलशब्दे वक्ष्यते

दृङ्नति स्त्री वि० मि० मि० यद्यष्टदर्शनोपयोगितया दर्शिते दृक्प्रचारस्य नतिविशेषे यथा

"त्रिभोनलग्नस्य रवेश्च भङ्कोर्वा दृग्ज्यायोर्वर्गवियोगमूलम्। स्याद्दृङ्नतिर्वेदगुणा त्रिभौर्व्या भक्ताथवा लम्बननाडिकाः स्युः" भू०"त्रिभोनलग्नस्य यः भङ्गः साधितस्तथा दर्शनकाले रवेः खोपकरणैर्यः भङ्ग उत्पद्यते तावन्तौ स्थापयित्वा तयोश्च दृग्ज्ये साध्ये। अथ तयोः भङ्कोर्यद्वर्गान्तरपदं तद्दृङ्नतिसंज्ञं भवति प्रथमप्रकारोऽयम्। अथ दङ्नतेर्द्वितीयः प्रकारः। तयोर्दृग्ज्ययोर्वर्गान्तरपदं दङ्नतिसंज्ञं भवति। अथ दङ्नतेर्लम्बनमुच्यते। दङ्नतिश्चतुर्गुणा त्रिज्यया भक्ता फलं लम्बननाडिकाः स्युः। अत्रोपपत्तिः सैव। यदा त्रिभोनलग्नं खमध्ये भवति तदा दङ्मण्डलमेव क्रान्तिवृत्तम्। त्रिभोनलग्नार्कयोर्यान्तरज्या सैव तदार्कस्य दृग्ज्या। सा चतुर्गुणा त्रिज्ययाप्ता मध्यं किल लम्बनं भवति। तदेव स्फुटम् ऊर्ध्वस्थितत्वात् क्रान्तिवृत्तस्य। अथ यदा त्रिभोनलग्नं खाधोवृत्तम् तिर्यक्स्थितत्वात् क्रान्तिवृत्तस्य, तदा तत् प्राच्यपरया स्फुटं लम्बनं कोटिरूपं भवति। तच्च त्रिभोनलग्नभङ्गानुपातेन तथा स्फुटं कोटिरूपं कृतम्। तत् कथमिति चेत् तदुच्यते। मध्यलम्बनानयने त्रिज्यैव त्रिभोनलग्नभङ्गः। ततः स्फुटत्वार्थं यः साधितो त्रिभोनलग्नभङ्गः स दृक्क्षेपमण्डले कोटिस्थदृग्ज्या भुजस्थिज्या कर्णः। त्रिभोनलग्नस्य यद्दृङ्मण्डलं तद्दृक्क्षेपमण्डलमिति गोले कथितम्। अतस्थिज्यापरिणतया नतज्यया यदानीतं तच्छातं कर्णरूपं तत् कोटिरूपस्य त्रिभोनलग्नभङ्गानुपातेन कोटित्वं नीतमित्युपपन्नम्। यदेव स्फुटलम्बनस्य कोटिरूपत्वमुपपन्नं तदेव प्रकारान्तरेणोपपादितम्। रवेर्दङ्मण्डले या दृग्ज्या सा कर्णरूपिणी। त्रिभोनलग्नस्य या दृग्ज्या स एव दृक्क्षेपः स भुजरूपः। यतः क्रान्तिमण्डलप्राच्याः सम्यग्दक्षिणोत्तरं खार्धादित्रिभोनलग्नोपरिगतं दृक्क्षेपमण्डलम्। तत्र त्रिभोनलग्नस्य या दृग्ज्या स दृक्क्षेपः। तज्ज्यानिता नतिकलाचन्द्रार्ककक्षयोर्याम्योत्तरमन्तरं यत्सर्वत्र तुल्यमेव दृष्टा पठ्यति। यदाह गोले।"कक्षयोरन्तरं यत् स्यादित्रिभे सर्वतोऽपि तत्" ततः"नतिलिप्ता भुजः कर्णो दृग्लम्बनकलास्तयोः। तत्यन्तरपदं कोटिः स्फुटलम्बनलिप्तिकाः"। "यत एवं लम्बनक्षेत्रमतो दृक्क्षेपार्कदृग्ज्ययोर्वर्गान्तरपदतुल्या दङ्नतिर्भवितुमर्हति। परं यथा स्थिते गोले क्षेत्रोपरीयं न दृश्यते। यतो त्रिभोनलग्नार्कयोरन्तरज्या त्रिभोनलग्नभङ्ग्यासार्धपरिणता सती दङ्नतिर्भवति। अत एवानेनापि प्रकारेण क्षितिजस्थेऽर्के परमा दङ्नतिर्विभोनलग्नभङ्गतुल्या भवति। अतोऽयमपि प्रकारः पूर्वतुल्य एव। किन्तु दृक्क्षेपार्कदृग्ज्ययोस्तुल्ये यस्मिन् भुजकर्णरूपे समायां भूमौ विन्यस्य तदन्तरे कोटिरूपां दङ्नतिं दर्शयेत्। एवमनेकविधान्युपपत्त्यनुसारेण क्षेत्राणि परिकल्प्य धूलीकर्मोपसंहारमार्याः कुर्वते। अथ प्रस्तुतमुच्यते। अत्र किल त्रिभोनलग्नस्य रवेश्च दृग्ज्ययोर्यद्वर्गान्तरपदं तावदेव तच्छङ्कोरपि भवति। तत् कथमिति चेत् तदुच्यते। अत्र खस्वस्तिकयाम्योत्तरवृत्तयोर्गोलीयौ त्रिज्यावर्गौ दृग्ज्यावर्गौ भवतः। तयोरन्तरे शेते त्रिज्यावर्गयोस्तुल्यत्वाद्वृत्तयोः भङ्गवर्गान्तरमेवावशिष्यते। एवं यत्र कुत्रचिद्भागार्धेऽपि भुजज्ययोर्वर्गान्तरतुल्यं तत्कोटिज्ययोर्वर्गान्तरं भवतीति। अत उक्तम् "त्रिभोनलग्नस्य रवेश्च भङ्कोर्वा दृग्ज्यायोरिति" दङ्नतितश्चिज्यानुपातेन लम्बनस्य घटीकरणम्" प्रमिता०। अत्रोपपत्तिरपि तत्रोक्ता यथा "अथ वाम्योत्तरायां तु भित्तौ पूर्वोक्तमालिखेत्। ये कक्षामण्डले तत्र क्षेत्रे दृक्क्षेपमण्डले। त्रिभोनलग्नदृग्ज्या या स दृक्क्षेपो द्वयोरपि। तच्छायांशैर्नतौ बिन्दू कृत्वा त्रिभसंज्ञकौ। तल्लम्बनकलाः प्राग्वज्ज्ञेयास्ता नतिलिप्तिकाः। कक्षयोरन्तरं यत् स्यादित्रिभे सर्वतोऽपि तत्। वाम्योत्तरं नतिः सा च दृक्क्षेपात् साध्यते ततः" "इदमेव क्षेत्रकं वाम्योत्तरायां भित्तौ पूर्वपार्श्वे लिखित्वा नत्युपपत्तिर्दर्शनीया। ये तत्र कक्षामण्डले ते दृक्क्षेपमण्डले। दर्शने त्रिभोनलग्नस्य या दृग्ज्या स दृक्क्षेपः द्वयोरपि तावत्। अक्षयुग्प्रमते तु तच्छायांशा त्रिभलग्नस्थरसंज्ञतावन्द्रदृक्क्षेपच्छायांशाः स्युः। तयोर्द्वयोः खार्द्धात् स्वस्वदृक्क्षेपच्छायांशैर्नतौ बिन्दू कार्यौ तौ च त्रिभसंज्ञौ। ततः प्राग्वद्भूमध्याद् भूपृष्ठाच्च खे प्रसार्ये लम्बनलिप्तिका ज्ञेयास्ता नतिलिप्तिकाः नतिनाम चन्द्रार्ककक्षयोर्याम्योत्तरमन्तरम्। तद्त्रिभलग्नस्थाने यावत् सर्वतोऽपि तावदेव भवति। अतो दृक्क्षेपात् साधिता नतिः"।

दृढ्मण्डल न०दृढः तत्प्रचारस्य मण्डलमिव । सि०शि० उक्ते गोलबन्धान्तर्गते वलयाकारे मण्डलभेदे यथोक्तं तत्र "जङ्घाधरखस्तिककीलयुग्मे प्रोतं ध्रुवं दृग्वलयं तदन्तः । कृत्वा परिभ्राम्य च तत्र तत्र नेयं यद्यो गच्छति यत्र यत्र । ज्ञेयं तदैवाखिलखेचराणां पृथक् पृथग्वा रचयेत् तथाष्टौ । दृङ्मण्डलं विलिप्तलग्नस्य दक्क्षेपदृक्ताख्यमिदं वदन्ति" खस्तिके चाग्रःखस्तिके चान्तःकीलकौ कृत्वा तयोः प्रोतं ध्रुवं दृग्वलयं कार्यम् । तत्तु पूर्वदृत्तेभ्यः किञ्चिन्न्यूनं कार्यम् । यथा खगोलान्तर्भवति । यद्येक एव यद्गोलसन्धैकमेव दृङ्मण्डलम् । यो यो यद्यो यत्र यत्र वर्तते तस्य तस्योपरीदमेव परिभ्राम्य विन्यस्य दृग्ज्ञानाय दृक्क्षेपादिकं दर्शनीयम् । अथ वा पृथक् पृथगष्टौ दृङ्मण्डलानि रचयेत् । तथाष्टमं विलिप्तलग्नस्य तच्च दृक्क्षेपमण्डलम्" दृग्वलयमप्यत्र

दृढ़ त्रि०दृह दृढि वा दृढौ क्तः "स्थूलबलयोः" दृढभावः दृढितोऽपि त्रि० नलोपः । १स्थूले २अग्निषिक्ते प्रगाढे श्वलवति च मेदि० ४कठिने अमरः ५लौहे न० शब्दच० । भावे क्त्व । ६अतिशये न० अमरः । क्रियाविशेषणत्वे अस्य क्रीवता "दृढभक्तिरिति जल्पके" रघुव्या० "दृढं भक्तिरस्येति विग्रहः" मल्लिना० । "दृढा भक्तिश्च केशवे" विष्णुस्मृतिः । दृढ़त्वं च कठिन्यं तच्च स्वर्णत्वव्याप्यं जातिभेदः, अग्निषिक्तावयवसंयोगभेदः, उपचारात् अतिशयश्च । "दृढकारी मृदुर्दान्तः क्रूराचारैरसंवसन्" मनुः "दृढपाणी करोमीति जप्यं जपति जापकः । न संपृष्टो न संयुक्तो निरयं सोऽनुगच्छति" भा०शा० १६७अ० दृढस्य भावः दृढिमन् दृढ्मन् तद्भावे पु० "बधान हृाभेव दृढिमरमणीयं परिकरम्" गङ्गालहरी त्व दृढत्व न० तल् दृढता स्त्री ष्यञ् दार्ढ्य न० स्त्रीत्वे अतिशये च । अतिशयेन दृढः दृढन् ऋतोरः दृढिष्ठ रैवसुन् दृढीयस् अतिशयेन दृढ़े त्रि० रैवसुनि स्त्रियां ङीप् । दृढं करोति णिच् ऋतोरः । दृढयति "वियोगो वैराग्यं दृढयति च" प्रबोधचन्द्रो० लयोदशमनोः रुचेः ७पुत्रभेदे पु० । "त्रयोदशस्य पुत्रास्ते विज्ञेयास्तु रुचेः सुताः । चित्रसेनो विचित्रश्च नयो धर्मभृतोभृतः । सुनेत्रः चलबुद्धिश्च सुतपा निर्भयो दृढः । रौच्यस्यैते मनोः पुत्रा अमरे तु त्रयोदशे" हरिवं० ७अ० दृष्टराष्ट्रपुत्रभेदे पु० "पुत्रास्तेऽभ्यर्दयन् भीमं दश दाशरथेः समाः । नागदत्तो दृढरथो वीरबाहुरयोभुजः । दृढः सुहस्तो विरजाः प्रमाथश्चोग्रयायपि । तान् दृष्ट्वा चुक्रुधे भीमोऽभक्षद्दे भारसाधनान् । एकमेकं गृहीत्वैव पातयामास मर्मसु । ते विद्धा व्यसवः पेतु स्यन्देभ्योऽमितौजसः" भा०द्रो० १५७अ० दृविष्णौ पु० "वेधाः स्वाङ्गोऽजितः कृष्णो दृढः सङ्कर्षणोऽच्युतः" विष्णुसं० "स्वरूपसामर्थ्ययोर्दैः प्रच्युत्यभावात् दृढः" भा० १०रूपकभेदे पु० "दृढः प्रौढोऽथ खचरो विभवश्चतुरक्रमः । निशारूकः प्रतिताद्यः कथिताः षण्ण रूपकाः" रत्नदृश्य "दृढाख्यः स्याद् लघुद्वन्द्वं ताले तत्र हंसलीलके । चतुर्दशाक्षरयुतः सङ्कीर्णे परिकीर्तितः" सङ्गीतदा० । लीला० उक्ते ११कुट्टकगणितभेदे कुट्टकशब्दे दृश्यम् । [ष्टकयुक्ते दृढभेदे शब्दर० ।

दृढकण्टक पु०दृढः कण्टकोऽस्य । (धला आकड़ा) चुद्रक-

दृढकाण्ड पु० दृढः कठिनः काण्डः स्कन्धोऽस्य । १वंशदण्डे २दीर्घरोहिषके च राजनि० ।

दृढव्रत पु० धृतराष्ट्रपुत्रभेदे "दृढवर्मा दृढक्षत्रः सोमकीर्तिरनूदरः" भा०आ० ६७अ० तत्पुत्रोक्तौ ।

दृढज्वरा स्त्री दृढं ज्वरोऽस्यां यस्याः । वल्लजायाम् दृश्यभेदे राजनि० ।

दृढगात्रिका स्त्री दृढं गात्रमस्याः कप् कापि अत इत्त्वम् । मत्स्यखण्डां फाणिते शब्दच० ।

दृढग्रन्थि पु०दृढो ग्रन्थिः ग्रन्थोऽस्य । १वंशे राजनि० २कठिनग्रन्थियुक्तमात्रे त्रि० ।

दृढच्छद न० दृढः छदोऽस्य । दीर्घरोहिषवेतसे राजनि० ।

दृढच्युत पु० परशुरामस्यन्दपात्मजायां जाते ऋचीकस्यसुनिपुत्रे रथ्वगाढ़ापरनामके सुनिभेदे "उपयेमे वीर्यपणां वैदर्भीं मलयध्वजः । युधि निर्जित्य राजन्यान् पाण्ड्यः परशुरङ्गयः । तस्यां संजनयामास कीर्तिमन्तं सुतं प्रभुम् । ततोऽभवन् महीपाला मलयध्वजवंशजाः । यवीयसः सप्त सुतान् सप्त द्रविडभूभृतः । ऋचीकस्य मागुदक्षितरसुपयेमे धृतव्रताम् । यस्यां दृढच्युतो जात रथ्वगाढ़ात्मजो मुनिः" भाग० ४।२८।२८। पादपूरणार्थः सन्धिरार्षः । अयं गोत्रप्रवरविशेषः प्रवराध्याये दृश्यः ।

दृढतरु पु० नित्यकर्म० । धववृक्षे राजनि० । दृढद्रुश्चोऽत्यत्व

दृढतृण पु० दृढं कठिनं तृणमस्य । १सुञ्जतृणे २वल्लजायां स्त्री राजनि० ।

दृढत्वच् पु० दृढा त्वगस्य । यावनाचरे राजनि० ।

दृढदंशक पुंस्त्री दृढं दंशति दंश-ण्वुल् । (डाङ्गर) ख्याते जलजन्तुभेदे शब्दार्थकल्प० । स्त्रियां ङीष् ।

ङीष्। २दृढदंशनकारिमात्रे त्रि० स्त्रियां टाप् कापि अतदृत्वमिति भेदः।

**दृढधन** पु० दृढं धनं निश्चयरूपा सम्पत्तिरस्य। शाक्यमुनौ बहुव्रीहिवि०। दृढधनुरप्यत्र। समासान्तविधेरनित्यात् नानङ्।

**दृढधन्वन्** पु० दृढं धनुरस्य अनङ् समा०। १दृढधनुष्के "राजानं दृढधन्वानं दिलीपं सत्यवादिनम्" भा०द्रो० ३१अ०। २पौरवे नृपभेदे "दक्षिणस्यच कम्बोजो दृढधन्वा च पौरवः" भा०आ० १८३अ०।

**दृढनिश्चय** पु० दृढः कृतकैरभिभवितुमशक्यतया स्थिरः निश्चयः अहमकर्त्ता भोक्तासंसारिसच्चिदानन्दाद्वितीयं ब्रह्मास्मीत्यध्यवसायोऽस्य। स्थिरप्रज्ञे संसारादुपरते अहं ब्रह्मास्मीत्यध्यवसायवति विदुषि।

**दृढनीर** पु० दृढं कालेन दृढतां प्राप्तं नीरं यस्य। नारिकेले राजनि०। तस्य जलस्यैव क्रमशः कठिनमसृणरूपेण परिणतत्वात् तथात्वम्।

**दृढनेमि** पु० अजमीढवंशजे सत्यधृतिनृपपुत्रे नृपभेदे। "अजमीढस्य दायादः" इत्युपक्रमे "अजे सत्यधृतेः पुत्रो दृढनेमिः प्रतापवान्" हरिवं० २०अ०। दृढा नेमिरस्य। २दृढनेमिके रथे पु०। [गौरा० ङीष्।

**दृढपत्र** पु०दृढं पत्रमस्य। १वंशे २वल्लजायां स्त्री राजनि०

**दृढपाद** त्रि०दृढः पादः पदं स्थानमस्य। १दृढनिश्चये २वेधसि पु०"बहुत्वाद्दृढपादश्च विश्वात्मा जगतां पतिः" हरिवं० २०४० श्लो०। दृढः पादोमूलमस्याः समासान्तविधेरनित्यत्वान्नान्यत्वोपः समा०। २यवतिक्तायां स्त्री ३भूम्यामलक्यां स्त्री राजनि० ङीष्।

**दृढप्ररोह** पु० दृढः प्ररोहः अङ्कुरोऽस्य। वटवृक्षे राजनि०

**दृढफल** पु० दृढानि फलानि यस्य। नारिकेले राजनि०।

**दृढबन्धिनी** स्त्री दृढं बध्नाति यद्बध्नाति स्नाय्वयं स्थिनि। १ग्रन्थिमालतायां शब्दच०। २स्नायुनिबन्धकारके त्रि०।

**दृढभूमि** पु० दृढा भूमिरवस्था यस्य। दीर्घकालनैरन्तर्यादरासेविते योगशास्त्रोक्ते मनसःस्थैर्यकरणार्थे अभ्यासभेदे "तत्र स्थितौ यत्नोऽभ्यासः" पात०सू०"चित्तस्याऽवृत्तिकस्य प्रशान्तवाहिता स्थितिः प्रयत्नः वीर्यसञ्जाहः तत्संपिपादयिषया तत्साधनानुष्ठानमभ्यासः" भा० "स तु दीर्घकालनैरन्तर्यसत्कारासेवितो दृढभूमिः" सू० "दीर्घकालासेवितः निरन्तरासेवितः तपसा ब्रह्मचर्येण विद्यया श्रद्धया च संपादितः सत्कारवान् दृढभूमिर्भवति। व्युत्थानसंस्कारेणानभिभूतविषय इत्यर्थः" भा० "ननु व्युत्थानसंस्कारेणादिपरिपन्थिना प्रतिबद्धोऽभ्यासः कथं स्थैर्यं कल्पत इत्यत आह स तु दीर्घकालनैरन्तर्यसत्कारासेवितो दृढभूमिः यथोक्तः सोऽयमभ्यासो विशेषेण एवं सम्पन्नः सन् दृढावस्थो न सहसा व्युत्थानसंस्कारैरभिभूतस्थितिरूपविषयो भवति यदि पुनरेवंभूतमभ्यासं कृत्वोपरमेत ततः कालपरिपाकेणाभिभवेत् तस्मिन्नोपरमिति भावः" विवरणम्

**दृढमुष्टि** पु० दृढो मुष्टिर्धारणेऽस्य। १खड्गादौ हेमच०। दृढं बद्धः दानार्थमप्रसारितो मुष्टिरस्य। २कृपणे त्रि० दृढोमुष्टिश्चटाचातोऽस्य। दृढमुष्ट्याघातकारिणि "निष्टङ्कोत्कः कबरायां शिशुना दृढमुष्टिना" हरिवं० २०अ०।

**दृढमूल** पु० दृढं मूलमस्य। १मुञ्जतृणे २मन्थानकतृणे च राजनि० ३नारिकेले शब्दार्थकल्प०।

**दृढरङ्गा** स्त्री दृढः रङ्गो रञ्जनं यस्याः ५त०। स्फट्यां (फटकिरी) राजनि०। तद्योगेन रागस्य स्थिरतेति तस्यास्तथात्वम्।

**दृढरथ** पु० १क्षत्रराष्ट्रभेदे "अभयो रौद्रकर्मा च तथा दृढरथश्च यः" भा०आ०६७अ० तत्पुत्रोक्तौ अस्यैव नामान्तरं दृढरथाश्रय इति तत्र पाठान्तरम्। २रुचे युवंश्वे नृपभेदे तद्वंशवर्णने "दृढव्रतास्तु राजेन्द्रो जनयामास वै सुतम्। नाम्ना जयद्रथं वीरं यस्माद्दृढरथो नृपः। आसीद्दृढरथस्यापि विश्वजिज्जनमेजय!" हरिवं० ३१अ०।

**दृढरुचि** स्त्री दृढा रुचिरस्य। १स्थिररागयुक्ते २कुशद्वीपपतेर्हिरण्यरेतसः प्रैयव्रतस्य पुत्रभेदे कुशद्वीपशब्दे २१४५ दृश्यम्।

**दृढलता** स्त्री नित्यकर्म०। पातालगरुडीलतायां राजनि०।

**दृढलोमन्** त्रि० दृढानि लोमान्यस्य। १कठिनलोमयुक्ते त्रि०स्त्रियां डाप् ङीष् वा दृढलोमा दृढलोम्नी। २शूकरे पु० शूकर्यां स्त्री शब्दच०।

**दृढवर्मन्** पु० दृढं वर्म यस्य। १दुर्भेदसन्नाहयुक्ते २क्षत्रराष्ट्रपुत्रभेदे दृढक्षत्रशब्दे दृश्यम्।

**दृढवल्कल** पु० दृढं वल्कलमस्य। १वृक्षे २चम्पकायां स्त्री तस्य दृढत्वचापि राजनि०। ३कठिनवल्कलयुक्ते त्रि०।

**दृढवल्का** स्त्री दृढं वल्कलमस्याः। चम्पकायां राजनि०।

**दृढवीज** पु० दृढं बीजमस्य। १वदरे २चक्रमर्दे ३वर्बुरे च

राजनि० एतेषां कठिनबीजकत्वात्तत्त्वात्वम् ४कठिनबीजयुक्ते त्रि० कर्म० । ५कठिने बीजे न० ।

दृढव्य पु० ऋषिभेदे "दृढव्यश्चोर्द्ध बाहुश्च तृणसोमाङ्गिरास्तथा" भा०अनु० १५०अ० ।

दृढव्रत त्रि० दृढं प्रतिपत्तैश्चालयितुमशक्यं व्रतमस्य । १अनन्यारैरचाल्यसङ्कल्पके फलपर्य्यन्तं प्रारब्धकर्म्मात्यागशीले भगवानेव भजनीयः स च एवंरूप एवेत्यत्राप्रामाण्यशङ्काशून्यसंकल्पके २विदुषि च । तत्र प्रथमार्थे "एवं दृढव्रतोनित्यं ब्रह्मचारी समाहितः' मनुः द्वितीयार्थे "अहिंसानिरतो यश्च सत्यवादी दृढव्रतः" भा०व० १८१०अ० श्स्थिरसङ्कल्पयुक्ते च "स्थेयान् निगूढमानोधीरोदात्तो दृढव्रतः कथितः" सा०द० ।

दृढसन्ध त्रि० दृढा सन्धाऽस्य । १स्थिरसन्धाने २धृतराष्ट्रपुत्रभेदे पु० "जरासन्धो दृढसन्धः सत्यसन्धः सहस्रवाक्" भा०आ० ६७अ० तत्पुत्रोक्तौ ।

दृढसन्धि त्रि० दृढः सन्धिः सन्धानं यस्य । निश्चिद्रतया संहते अमरः । [मूर्खजनतायाम् शब्दच० ।

दृढसूत्रिका स्त्री दृढं सूत्रं यस्याः कप अत इत्वम् ।

दृढसेन पु० कलियुगीये जनमेजयवंश्ये नृपभेदे "सेनोऽथ सुव्रतस्तस्माद्धर्म्मसूत्र समन्ततः । दृढसेनोऽथ सुमतिः सुबलो जनिता ततः" भाग० ६।२२।३० जनमेजयं प्रति तद्भविष्यवृत्तोक्तौ ।

दृढस्कन्ध पु० दृढः स्कन्धोऽस्य । वीरिद्वृक्षे जटाधरः ।

दृढस्यु पु० अगस्त्यवंशीयोपासुद्राग्नभजाते दृढवाहापरनामके ऋषिभेदे दृढवाहशब्दे ६२८४पृ०दृश्यम् ।

दृढहनु पु० आजमीढवंश्ये नृपभेदे "आजमीढादृढहदिषु तस्य पुत्रो दृढहनुः । दृढहत्कायस्तस्य पुत्रश्चासीत्सुवयद्रथः । तत्सुतोविशदस्तस्य सेनजित् समजायत । रुचिराश्वो दृढहनुः काश्यो वत्सश्च तत्सुताः" भाग० ९।२१।१७।

दृढहस्त पु० दृढः हस्तः हस्तव्यापारोऽस्य । १खड्गादिधारणे दृढहस्तके योधे २धृतराष्ट्रपुत्रभेदे पु० "दृढहस्तः सुहस्तश्च वातवेगसुवर्चसौ" भा०आ० ६७अ०तत्पुत्रोक्तौ

दृढाक्ष पु० राजभेदे "एकलव्यो दृढाक्षश्च चलधर्मा जयद्रथः" हरिवं० ३६अ०।

दृढाङ्ग त्रि०दृढमङ्गमस्य । १कठिनाङ्गयुक्ते २वीरके न०राजनि० तस्यावयवस्य इतरापेक्षयाऽतीव कठिनत्वात्तत्त्वात्वम् ।

दृढादि पु० "वर्षदृढादिभ्यः ष्ट्यञ् च" पा० "वातु इमनिच्" सि०कौ० उक्ते भावे ष्ट्यञ्इमनिचोर्निमित्ते शब्दगणे च गणः "दृढ दृढ परिदृढ भृश ज्रय ब्रह्म शुक्र चुक्र" आम्र लण्ड लवण ताम्र मीत उष्ण जड़ बधिर पण्डित मधुर मूर्ख मूक (वैयाकरणातिमतिमनःशारदानाम्) (समो मतिमनसोः) जवन" दृढादिः । गुणवचनत्वादेव सिद्धे इमनिजर्थं वचनम् ।

दृढायु पु० तृतीयमनोः सावर्णस्य पुत्रभेदे "संवर्त्तगः सुकर्म्मा च देवानीकः सुरुचयः । चेमधन्वा दृढायुश्च आदर्शः पञ्चको मनुः । सावर्णस्य तु पुत्रा वै तृतीयस्य नव स्मृताः" हरिवं० ७अ० उर्वशीगर्भजाते ऐलस्य पुत्रभेदे च "षट् सुता जज्ञिरे चैलादायुर्धीमानमायसुः । दृढायुश्च वनायुश्च शतायुश्चोर्वशीसुताः" भा०आ० ७४अ०

दृढायुध पु० दृढमायुधं तद्व्यापारोऽस्य । दृढायुधव्यापारके "दृढायुधो ध्रुवपातो युद्धे च कृतनिश्चयौ" (नकुलसहदेवौ) भा०व० ५१अ० । २धृतराष्ट्रपुत्रभेदे पु० "उग्रायुधो भीमशरः कनकायुर्दृढायुधः" भा०आ० ६७अ० तत्पुत्रोक्तौ ।

दृढाश्व पु० ध्रुवकुमारस्यपुत्रभेदे "धौन्यकारिर्दृढाश्वश्च हर्यश्वस्य चात्मजः" हरिवं० १२अ०।

दृढेयु पु० ऋषिभेदे "दृढेयुश्च ऋतेयुश्च परिव्याधश्च कीर्तिमान् । एकतश्च द्वितश्चैव त्रितश्चैवादित्यसन्निभाः" भा० अनु० १५०अ० ।

दृढेषुधि पु० दृढं बद्धं इषुधिर्येन । दृढतया बद्धतूणके १योधे २राजभेदे "अविक्षिच्छपतोर्व्वीरः कृतबन्धुर्दृढेषुधिः" भा० आ० १अ० ।

दृत त्रि० दृ+क्त १आदरयुक्ते आदृतः दृ-विदारे क्त वा हृस्वः । २विदीर्णे "दृते दृंह मानित्यस्य" यजु० ३६।१८"दृते दृ विदारे विदीर्णे जराजर्जरितेऽपि शरीरे" वेददी० ३क्षीरके स्त्री शब्दच० ।

दृति स्त्री दृ-विदारे ति कित् हृस्वश्च । १चर्म्मनयपात्रे २मनस्के च मेदि० । "इन्द्रियाणां तु सर्वेषां यद्येकं क्षरतीन्द्रियम् । तेनास्य क्षरति प्रज्ञा दृतेः पात्रादिवोदकम्" मनुः "कपाले यद्दृतौ स्यूते यदृतौ च यथा पयः । आत्मयस्यानदोषेण हन्तर्हीने तथा श्रुतम्" भा०शा०१२२अ श्लो० । दृतौ भवः ढञ् दार्त्तेय दृतिभवे स्त्रियां ङीप् । मत्स्ये "मांसादृतयुषा दृतिः" शब्दरत्नाव० धृतवाक्यम् । ३रोमश चर्म्मणि ४गलकम्बले च "सवत्सां धेनुरीं दत्त्वा दृतिकण्डामलङ्कृताम्" भा०अनु० ७६अ० "दृतिकण्डां

प्रकम्बगलकम्बलाम्" नीलकण्ठः "दृतिकण्ठमनड्वाहं सर्वरत्नैरलङ्कृतम्" तत्रैवाध्याये । ६मेधे निघण्टुः ६सत्रविशेषकारके यजमानभेदे दृतिवातवतोरयनशब्दे दृश्यम् ।

**दृतिधारक** दृतिं दृत्याकारं धारयति धारि-ण्वुल् ६त० । (आकनपात) स्याते वृक्षे शब्दच० ।

**दृतिवातवतीरयन** न०अनुक् स० । सत्रभेदे "दृतिवातवतीरयनमेकेनेष्टस्तोमेन मासं मासम्" कात्या०श्रौ०२४।२४।१६ "दृतिवातवतीरयनमिति सत्रस्य संज्ञा" कर्कः । तास्यब्रा०२५।२। २वाक्यादौ अस्य विहृतिः । "अथ दृतिवातवतीरयनमाह भा० "अतिरात्रस्त्रिवृता मासं, पञ्चदशेन मासं, सप्तदशेन मासमेकविंशेन मासं, त्रिणवेन मासं, त्रयस्त्रिंशेन मासं, महाव्रतं, त्रयस्त्रिंशेन मासं, त्रिणवेन मासमेकविंशेन मासं, सप्तदशेन मासं, पञ्चदशेन मासं, त्रिवृता मासमतिरात्रः" । १"प्रथमं प्रायणीयोऽतिरात्रस्तत्रस्त्रिवृदादित्रयस्त्रिंशान्ता आदितः षण्मासा आप्नव्याः त्रिणवतः स्थाने महाव्रतं भवति तत एव त्रिवृदादिमासा उत्तरस्मिन् पक्षे सप्तदशादिसप्तमासान्ताः षण्मासाः स्युः तत उदयनीयमहः एतानि त्रिष्वुत्तरयोरयनयोरहानि स्युः अधिकयोर्द्वयोरङ्गोः व्यवस्थाविषये सत्रकारः दृतिवातवतीरयने द्वावेकोनौ मासौ सनुयुस्त्रिवृतावितिं गौतमस्त्रयस्त्रिंशाविति धानञ्जयः उभौ वा त्रिंशिनौ स्यातां यथैतदाह्मणमिति त्रयस्त्रिंशावेकोनाविति कल्पकारस्य मतम् । अथैतदयनं कर्तृद्वारा प्रशंसति" भा० । "एतद्वै दृतिवातवन्तौ खाण्डव उपेतो विष्णुर्वति वातवानुत्तिष्ठति, समापयति दृतिरुत्तमात्तनीयांसोवातवता भूयांसो दार्त्नेयाः" ६"एतत् सत्रायणं दृतिश्च वातवांश्चेन्द्रौ यजमानौ खाण्डवे वने उपेतः अन्वतिष्ठतामित्यर्थः भूतकाले अत्ययेन वर्त्तमानप्रत्ययः एवमुत्तरयोरप्याख्यातयोर्द्रष्टव्यं तयोरनुष्ठानप्रयुक्तं किञ्चित् फलवैषम्यं वक्तुमाह वातवान् विष्णुर्वति महाव्रते समूर्णे उत्तिष्ठति उत्तिष्ठन् सत्रं समापितवान् दृतिस्तु द्वादशापि मासानास्थाय समापयन् यस्मादेवं तस्माद्वातवता वातवतोवंश्यात्तनीयांसः अत्यर्थं तनवः कृशा अभवन् दार्त्नेया दृतिवंश्यास्तु भूयांसो, बहुलत्वात्तुदानं प्रथमाक्षरवदित्यृक्षं भवति । अत्र विहृतिभिः ऋक्षम् इति वातवतोरयनमात्रिष्वेवास्त्रिवृद्वृद्धं उद्धरत्युक्थानि पञ्चदशेभ्यः शोडशिनमित्यादिकं द्रष्टव्यम्" ।

**दृतिहरि** पु० दृतिं चर्ममयं द्रव्यं हरति दृतौ+उपपदे हृ-पचो कर्त्तरि इन् । कङ्कुरेऽव्ज० । अयोरन्यत्र अच् दृतिहार चर्महारके ।

**दृत्य** त्रि० द-कर्मणि ष्यञ् । १आदरणीये भावे ष्यञ् । २आदरे न० आङि आदृत्य तत्रार्थे "आदृत्यक्तेन दृत्येन" भट्टिः ।

**दृप्र** न० गवां निर्गमनद्वाररोधके "ते गव्यता मनसा दृप्रमूर्वम्" ऋ० ४।१।१५ भाष्ये साधवः ।

**दृन्** अव्य० १हिंसायाम् सि०कौ० । २दृढार्थे शब्दार्थचि० ।

**दृन्फ** क्लेशे तु०प० अक०सेट् । दृफति दृम्फति अदम्फीत् । क्लेशने सक० । दृन्फूः सर्पजातिः

**दृन्फू** स्त्री दृन्फ-ऊ नि० न लोपः । १सर्पजातौ २वज्रे च मेदि० दृन्भू तत्रार्थे सि०कौ० ।

**दृन्भू** पु० दृ हिंसायां भवति भुवः क्विप् । १वज्रे २सर्पे हेमच० । ३दृप्रे शब्दच० ४अन्तके संक्षिप्तसार "दृनृकार पुनःपूर्वस्य भुवो यण् वक्तव्यः" वार्ति० अजादौ यण् । दृनृभौ दृनृभ इत्यादि दृभ्भू तत्रार्थे सि०कौ० [कन्दर्पः

**दृप** बाधने तु० पर० सक० सेट् । दृपति अदर्पीत् । ददर्प । दृप हर्षमोहनयोश्च चुरा०उभ०पक्षे भ्वा०पर०सक०सेट् । दर्पयति ते दर्पति । अदीदपत्-त अददर्पत्-त अदर्पीत् ।

**दृप** हर्षे गर्वे च अक०दिवा०सेट् दृप्यति "दृप्यद्दानवदृप्यमानदितिसुदृप्तदुर्वारदुःखोपमाम्" गीतगो० इरित् अदृपत् अदृप्षीत् अदर्पीत् केचिदिमं ऋदितं मन्यन्ते दर्पिष्यति द्रप्स्यति अस्य रधादित्वात् सेट्कत्वम् । तेन रूपे न वैलक्षण्यम् दर्पः दृप्रः । औणा० दृप्रः । शब्दस्तोमे अदित्त्वोक्तिः मतभेदेन ।

**दृप्त** त्रि० दृप-गर्वे हर्षे च वर्त्तमाने क्त । १गर्वान्विते २हर्षान्विते च शब्दरत्ना० पु० "दर्पदो दर्पको दृप्तोदुर्द्धरोऽन्यापराजितः" विष्णुसं० "दृप्तबालाकिर्हानूचानो गार्ग्य आस" शत०ब्रा० १४।५।१।१

**दृप्र** त्रि० दृप-बाधने रक् । बलयुक्ते उणादि० ।

**दृभ** क्लेशे तुदा० सुचादि० अक०पर० सेट् । दम्भति अदभीत् क्लेशने सक० राजा चौरं दम्भति क्लिश्नातीत्यर्थः ।

**दृभ्र** त्रि०दभ-यन्यने कर्मणि क्र । १यत्किते त्रि०अमरः । दभ-भये कर्त्तरि क्र । २भीते भावे क्र । ३यत्तनेऽभये च न० दृभ यत्तने वा चुरा०उभ०पक्षे तु०पर०सक०सेट् । दर्भयति ते दृभति अदीदभत्-त अददर्भत् त अदर्भीत् । ईदित् । दृब्धः दृब्धवान् । दर्भः

दृभ भये वा चुरा॰उभ॰पक्षे भ्वा॰पर॰अक॰सेट्। दर्भयति-ते दर्भति। अदीदभत् त अददर्भत् त। अदर्भीत् दैदित् दब्धः दब्धवान्।

दृभीक पु॰ दभ–वा॰ ईकङ्। असुरभेदे "अध्वर्यवो यो दभीकम्" ऋ॰ २।१४।२ "दभीको नामासुरः" भा॰

दृमिचण्डेश्वर न॰ मत्स्यपुराणोक्ते शिवलिङ्गभेदे

दृवन् त्रि॰ दृ–विदारे कनिन् वा॰ वेदे क्षुरः। विदारके "दवाणि रव्याणि क्षुराणि" यजु॰१०।८

दृश्‌ चाक्षुषज्ञाने भ्वा॰पर॰सक॰ अनिट्। पश्यति इरित् अदर्शत् अद्राक्षीत्। ददर्श ददर्शिथ दद्रष्ठ ददर्शिव द्रष्टा द्रक्ष्यात् द्रक्ष्यति। दर्शनीयं द्रष्टव्यं दृश्यः द्रष्टा दृष्टः द्रष्टुं दृष्टिः दृक् दृक्षा प्रदृश्र। "ततोऽपश्यन् विहङ्गान्तराणाः" भट्टिः पश्यतो हरः। "न तु मां शक्यसे द्रष्टुमनेनैव स्वचक्षुषा। दिव्यं ददामि ते चक्षुः पश्य मे योगमैश्वरम्"। "अपश्यद्दु देवदेवस्य शरीरे पाण्डवस्तदा" गीता "ददर्श दूनः स्वतपद्मिनीं नलः" नैष॰ मानसज्ञाने च "शान्तोदान्त उपरतस्तितिक्षुः श्रद्धावान् समाहितोभूत्वा आत्मन्यात्मानं पश्यति" श्रुतिः "आत्मा वा अरे द्रष्टव्यः" इ॰उ॰ श्रुतिः अस्मत् "तं विप्रदर्शं ऋतचावयन्ता" भट्टिः "दृशेरनालोचने कङ् च" पा॰ कर्त्तरि कङ् अन्यादृशः कीदृशः क्वातिन् क्स च अन्यादृक् अन्यादृक्षः। श पश्यः "अपाश्च पश्यं निजदृशखेटात्" नीलक॰ता॰ "उपसमग्राकुलेऽरण्ये" भट्टिः दर्शयति ते अददर्शत् अदीदृशत् त। णिचि कर्मणः कर्त्तृत्वे तङ् दर्शयते भवो भक्तान् भक्तैर्वा आत्मानमिति शेषः। एवं विषये दृशेः कर्तृवा कर्मसंज्ञा "सीतां रामेण चात्मानमदर्शयत लक्ष्मणम्" रघुवंशे॰ सनि तङ् दिदृक्षते। "दिदृक्षमाणः परितः ससीतं रामं यदा नैक्षत लक्ष्मणस्तु"। भट्टिः दिदृक्षा कर्मणि दृश्यते "एकधा बहुधा चैव दृश्यते जलचन्द्रवत्" श्रुतिः "जाम्बूनदरागते भानौ यत् सूक्ष्मं दृश्यते रजः" मनुः "अदर्शि सङ्गोप्य कदाप्यवीक्षितः" "रूपमदर्शि हृतोऽपि यदर्शम्" नैष॰ अस्यार्थे क्वचित्तङपि। "यं यं हि दृशे सेयं तं तं मेने नलं नृपम्" भा॰व॰२२०२श्लो॰। दर्शनयोग्ये प्रकाशे च चक॰ "मधुरात्मानमदर्शयत् पुरः" कुमा॰। दर्शनार्थत्वे तङ् स्यादिति बोध्यम्।

अनु+अनुरूपदर्शने "रवे विलम्बाविव चन्द्रसूर्यौ धनान्तरेणानुददर्श लोकः" भा॰वि॰ १६श्लो॰ इयङ्गन्ते धात॰सूत्रे उदा॰ दृशम्। "बहुविधमनुदृश्य चार्थहेतोः क्षपयमिहार्यमनार्यमाश्रयन्तम्" भा॰मा॰ १७६ अ॰

अभि+आभिमुख्येन समन्ताद्वा दर्शने "तदा पश्यति कौन्तेय! नरा गिरिमिमं सदा। नाशक्नुवन्नभिद्रष्टुं कृतएवाधिरोहितुम्" भा॰व॰६६८२श्लो॰

अव+नीचतया दर्शने "यथा जलस्य आभासः स्वलस्थेनावदृश्यते। स्वाभासेन यथा सूर्यो जलस्थेन दिविस्थितः" भाग॰ ३।२७।१२

आ+आभिमुख्येन समन्ताद्वा दर्शने आदर्शः। "उत्कलादार्शितपथः कलिङ्गाभिमुखो ययौ" रघुः।

उद्+नीचस्थलोन्नतया दृष्टौ उत्प्रेक्षणे च

उप+सामीप्येन दर्शने। "चतुष्पाद् व्यवहारोऽयं विवादेषूपदर्शितः" याज्ञ॰।

नि+दृष्टान्ततया साक्षात्कारेण वा दर्शने। "द्रष्टुमिच्छामि ते रूपमैश्वरं त्वं निदर्शय" भा॰आश्व॰ १५८८ श्लो॰ निदर्शनालङ्कारः "निदर्शनामास विशेषदृश्यम्" रघुः

परा+विपरीतदर्शने यस्य यथारूपं ततोऽन्यरूपेण दर्शने "धूममग्निं पराददृश्रा मित्राकृत्वा दधतां भवम्" ऋग्॰ ८।८।२। "स्त्रीनृ क्षनातुमेयुक्तं पराददृशुः। द्वौ क्षना उपेयुक्तद्वेदीवसः पराददृशुः" शत॰ ब्रा॰ ६।५।१।२।४।

परि+परितः समन्ताद्वा दर्शने "परिदृष्टानि तीर्थानि गङ्गाचैव मया नृप!" भा॰आश्र॰७२अ॰ परिच्छिन्नतया दर्शने च। "बाह्याभ्यन्तरसम्भूतिर्दैकालसंख्याभिः परिदृष्टो दीर्घसूक्ष्मः" पा॰सू॰। दीर्घसूक्ष्मशब्दे २६१४पृ॰ दृश्यम्।

प्र+सम्यग्दर्शने "मनसैव प्रदोषेण सङ्कल्पात्मा प्रदृश्यते" भा॰आश्व॰ १६अ॰ "अद्यो ह्यवाद्य विषेषु भक्तिरागः प्रदर्शितः" भा॰अनु॰ ७२।१श्लो॰ एकदेशदर्शने च। प्रदर्शनार्थमिदमुदाहरणम्। "योगेश्वरत्वं लक्ष्येण यत्र राज्ञां प्रदर्शितम्" भा॰आ॰५१० श्लो॰।

प्रति+तुल्यरूपदर्शने "क्षताभ्यङ्गः शोणितेन रुद्रवत् प्रतिदृश्यत" भा॰भी॰ ४६७६श्लो॰ "निमित्तलक्षणं ज्ञानं शाकुनं स्वप्नदर्शनम्। अवश्यं सुखदुःखेषु नराणां प्रतिदृश्यते" रामा॰अयो॰ ५८।५श्लो॰

वि+विशेषेण दर्शने "विदर्शयन्तोविविधान् भूमिधरांश्च निर्झरान्" रामा॰अयो॰ ४८अ॰ १२श्लो॰

सम्+सम्यग्दर्शने "संदृश्यन्ति नराश्चात्र रूपेण विनाशनम्" भा॰शा॰ १०६८ श्लो॰

दृश् त्रि॰ कस्मिंश्चिदुपपदे दृश–क्विन् झलि पदान्ते च कुः। १तत्तत्पदार्थदर्शके "वायुमच्चो दिवा तिष्ठन् रात्रिं नीत्वापसु स्वर्वहक्" याज्ञ॰ "ऐन्द्रद्युम्ने ! यत्तदग्राह्यं विष्णो वै जनकेन्द्रं दिदृक्षू" भा॰ व॰ १०६२४श्लो॰ अनुपपदेऽपि क्विन्। २द्रष्टरि "दृग्दर्शनशक्त्योरेकात्मतेवास्मिता" पात॰सू॰। भावे क्विन्। ३दर्शने ४ज्ञानमात्रे च स्त्री "प्रतिबन्धदृशः प्रतिबद्धज्ञानमनुमानम्" सां॰सू॰ "प्रतिबन्धोव्याप्त्यंशदर्शनात् व्यापकज्ञानमनुमानम्" भाष्यम्। करणे क्विन्। ५नेत्रे स्त्री "दृशा दृशं मनसिजं जीवयन्ति दृशैव याः" सा॰द॰। "चक्रकोपदृङ्मार्गिषं ततः सन्दधे दृशदृश्यतारकाम्" रघुः ६द्वित्वसंख्यायाञ्च।

दृशति स्त्री दृश–बा॰ भावे अतिक्। दर्शने "खरो न यस्य दृशतिररेपाः" ऋ॰ ६।३।२ "दृशतिर्दर्शनम्" भा॰

दृशद् स्त्री दृषद्+पृषो॰। शिलायाममरे पाटान्तरम् "तथा दृशत्पुत्रश्च" गोभिलः "दृशत् पेष्याधारशिला, पुत्रं पेष्यकरणरूपप्रस्तरस्तदुभयं पूर्ववदुपसादयतीत्यर्थः" सं॰त॰ रघु॰।

दृशद्वती स्त्री दृषद्वती+पृषो॰। १आर्य्यावर्त्तसीमास्थे नदीभेदे २कात्यायन्याञ्च मेदि॰। [काङ्क्षम्।

दृशा स्त्री दृश्+क्विब्लत्वात् वा टाप्। नेत्रे शब्दच॰ दृशाकाङ्क्ष त्रि॰ दृशया आकाङ्क्षम्। पद्मे शब्दच॰।

दृशान पु॰ दृश–आनच् किच्च। १लोकपाले उज्ज्वल॰ २विरोचने पु॰ ३ज्योतिषि न॰ मेदि॰। ४आचार्ये पु॰ उणादिकोषः। ५ब्राह्मणे हेमाध्याये च पु॰ संक्षिप्तसारः।

दृशि(शी) स्त्री दृश–भावे किवा ङीप्। १दृष्टौ २प्रकाशे च "द्रष्टा दृशिमात्रः शुद्धोऽपि प्रत्ययानुपश्यः" पात॰सू॰। "दृशिमात्रेति दृक्शक्तिरेव विशेषणेन परामृष्टेत्यर्थः। स पुरुषो बुद्धेः प्रतिसंवेदी बुद्धेर्न सरूपोनात्मत्वं विरूप इति न तावत् सरूपः कस्मात् ? ज्ञाताज्ञातविषयत्वात् परिणामिनी हि बुद्धिस्तस्याश्च विषयोपरागादिर्घटादि ज्ञातवाज्ञातश्चेति परिणामित्वं दर्शयति। कस्मात् ? न हि बुद्धिश्च नाम पुरुषविषयश्च स्यादन्यहीता चेति सिद्धं पुरुषस्य सदा ज्ञातविषयत्वं ततश्चापरिणामित्वमिति। किञ्च परार्था बुद्धिः संहत्यकारित्वात् स्वार्थः पुरुष इति। तथा सर्वार्थाध्यवसायकत्वात् त्रिगुणा बुद्धिस्त्रिगुणत्वाच्चेतनेति गुणानान्तु पद्रष्टा पुरुष इत्यतो न सरूपः। अस्तु तर्हि विरूप इति नात्यन्तं विरूपः, कस्मात् ? शुद्धोऽप्यसौ पदग्रहणदाक्षादि तदाकार इव प्रत्यवभासते। तथा चोक्तम् अपरिणामिनी हि भोक्तृशक्तिरप्रतिसंक्रमा च परिणामिन्यर्थे प्रतिसंक्रम्येव तद्वृत्तिमनुपतति। तस्माच्च प्राप्तचेतनानुपश्यरूपाया बुद्धिवृत्तेरनुकारमात्रतया बुद्धिस्थविशिष्टा हि ज्ञानवृत्तिरित्याख्यायते" भा॰। सूर्यप्रकाशयोरिव दृष्टृदृश्यो र्धर्मधर्मिणोरैक्यात् चेतने पुरुषे च "दृशिस्वरूपो ममनोपमोमतः"। "तदभावात् संयोगाभावोहानं तद् दृशेः कैवल्यम्" पात॰सू॰ "मिथ्यादर्शनस्याभावात् बुद्धिपुरुषसंयोगाभावः आत्यन्तिको बन्धोपरम इत्यर्थः एतद्धानं तद् दृशेः कैवल्यं पुरुषस्याभिश्चीभावः पुनरसंयोगो गुणैरित्यर्थः। दुःखकारणनिवृत्तौ दुःखोपरमो हानं तदा सरूपप्रतिष्ठः पुरुष इत्युक्तम्" भा॰ दृश–क्विप्। ४दृशधातौ "दृशेरनालोचने कङ् च" पा॰

दृशीक त्रि॰ दृश–कर्मणि बा॰ईकक्। १दर्शनीये २शोभने च "क्षोमं रुद्राय दृशीकम्" ऋ॰ १।२७।१० "दृशीकं दर्शनीयं समीचीनम्" भा॰

दृशेन्य त्रि॰ दृश–कर्मणि केन्यन्। दर्शनीये "दृशेन्यो महिना सभिद्वः" ऋ॰ १०।८८।७ "दृशेन्यः दर्शनीयः" भा॰

दृशोपम न॰ दृशाया उपमा यत्र। श्वेतपद्मे शब्दमाला।

दृश्य त्रि॰ दृश–कर्मणि क्यप्। १दर्शनीये २समीचीने च "चित्रं तदा कुलिङ्गनयेशिनः सा नलस्य मूर्त्तिर्वहते न दृश्या। बभूव तच्चित्रतरन्त्वयापि विश्वैकदृश्यैव वदस्य मूर्त्तिः"। "आस्तामनङ्गीकरणाद्भवेन दृश्यः खरो नेति पुराणवाणी" नैष॰ "तमेकदृश्यं नयनैः पिबन्त्योनार्यो न जग्मुर्विषयान्तराणि" कुमा॰ "निदर्शयामास विशेषदृश्यमिन्दुं नवोत्थानमिव" रघुः। ३ज्ञेयमात्रे ४प्रकाशे च "दृष्टृदृश्ययोः संयोगो हेयहेतुः" पात॰सू॰ "दृष्टा बुद्धेः प्रतिसंवेदी पुरुषः, दृश्या बुद्धिसत्त्वोपारूढा सर्वे धर्माः, तदेतद् दृश्यमयस्कान्तमणिकल्पं सन्निधिमात्रोपकारि दृश्यत्वेन स्वभवति पुरुषस्य दृशिरूपस्य स्वामिनः। अनुभवरूपविषयतामापन्नमन्यस्वरूपेण प्रतिलब्धात्मकं स्वतन्त्रमपि तदधीनत्वात् परतन्त्रम् उभयोर्दृग्दर्शनशक्त्योरनादिरयंकृतः संयोगो हेयहेतुर्दुःखस्य कारणमित्यर्थः" भा॰ "प्रकाशक्रियास्थिति शीलं भूतेन्द्रियात्मकं भोगापवर्गार्थं दृश्यम्" पात॰सू॰ "प्रकाशशीलं सत्त्वं, क्रियाशीलं रजः। स्थितिशीलं तम इति एते गुणाः परस्परोपरक्तप्रविभागाः परिणा-

मिनः संयोगविभागधर्माणः इतरेतरोपाश्रयेणोर्ज्जित मूर्त्तयः परस्परानुप्राणित्वेऽप्यसङ्किन्नशक्तिप्रविभागात्तुल्य जातीयाऽतुल्यातीयशक्तिभेदानुपातिनः। प्रधानवेलायामुपदर्शितसन्निधाना गुणत्वेऽपि च व्यापारमात्रेणाप्रधानान्नीतानुभितास्तिताः पुरुषार्थकर्त्तव्या व्यवस्थानमणिकल्पाः प्रत्ययमन्तरेण एकतमस्य वृत्तिमनुवर्त्तमानाः प्रधानशब्दवाच्या भवन्ति। एतदृष्टयभ्रमित्युच्यते। तदेतद्भूतेन्द्रियात्मकं भूतभावेन पृथिव्यादिना सूक्ष्मस्थूलेन परिणमते तथेन्द्रियभावेन श्रोत्रादिना सूक्ष्मस्थूलेन परिणमत इति। तत्तु नाप्रयोजनम् अपि तु प्रयोजनमुद्दिश्य प्रवर्त्तत इति भोगापवर्गार्थं हि तत् दृश्यं पुरुषस्येति तत्रेष्टानिष्टगुणरूपावधारणम् अविभागापन्नं भोगोभोक्तुः स्वरूपावधारणमपवर्ग इति द्वयोरतिरिक्तमन्यद्दर्शनं नास्ति" भा० यज्ञाणां नक्षत्राणां च कालांशविशेषेण सूर्यसान्निध्ये अदृश्यत्वं सू० सि० उक्तम् अस्तशब्दे ५६२४०दर्शितम् उदयशब्दे ११३४।४५ पृ० दृश्यत्वं च दर्शितं ततएवावगन्तव्यम्।

**दृश्य(ष्ट)** जाति न० स्त्रीत्व० उक्ते दृष्टकर्मरूपे गणितभेदे दृष्टकर्मन् शब्दे ६६७ पृ० तत्प्रकारो दृश्यः।

**दृश्यादृश्य** त्रि० दृश्यश्च अदृश्यश्च द्वन्द्व०। १दृश्ये अदृश्ये च "अदादृशतात्र्यस्ताद्दृशांग्राः स्त्रोदयास्तुभिः। विभज्य लग्नाः खेलांशैस्तैर्दृग्राड्दृग्रताथ वा" सू० सि०। "दृग्रा चासौ अदृग्रा च" कर्म०। "सा दृष्टेन्दुः सिनीवाली" अमरोक्तेः किञ्चिदंशेन दृग्रचन्द्रायाम् किञ्चिदंशेन अदृग्रचन्द्रायाञ्च २सिनीवाल्यां स्त्री तस्यां चन्द्रस्य दर्शनादर्शनयोः सत्त्वात् तथात्वम्। ३तदभिमानिदेवतायाञ्च सा च अङ्गिरसस्तृतीयकन्या यथाह भा०व० २१७अ० "यां कपर्दिसुतामाहुर्दृग्राड्दृग्रेति दैक्षिनः। ततस्त्वात् सा सिनीवाली तृतीयाऽङ्गिरसः सुता"

**दृशन्** त्रि० दृश-क्विनिप्। दर्शके "विवेकदृग्रत्वसमात् सुराणाम्" भट्टिः "अनाद्यदृश्य विषयैर्विद्यानां पारदृश्वनः"। "सुवर्णमर्थी श्रुतपारदृश्वा" रघुः।

**दृषत्सार** न० दृषदः सारमिव। स्फटिकाख्ये राजनि०।

**दृषद्** स्त्री दृ-अदि षुक् च। १शिलायां २मेषशृङ्गिकायाञ्च मेदि० तत्र शिलायां "गुर्वीरजस्रं दृषदः समन्तात्" माघः। "दृषदो वासितोत्सङ्गा निषण्णसृगनाभिभिः" कुमा० "तत्र व्यक्तं दृषदि चरणन्यासमर्द्धेन्दुमौलेः" मेघ० मेषशृङ्गिकायाम् "यद्यादन्ते दृषदमश्नान् प्रतिष्ठाय" आश्व० श्रौ० १।७।२ "अपामग्नेः सुरेशस्य दृषदोलूखलस्य च। चतुर्दंष्ट्राणि चत्वारि द्वाराणि विदुषश्च ते" हरिवं० ११६अ०। दृषदोलूखलमिश्रत्व राजदन्ता० पूर्वनि०। दृषदि पिष्टाः अण्। दार्षद, दृषदि पिष्टे त्रि०

**दृषदिमाषक** पु० माषः शुल्कत्वेन दीयते कन् दृषदि पेषणव्यवहारे राज्ञे देयः माषकः "कारनाम्नि च प्राचां ह्रस्वादौ" पा० अनुक् समा०। पेषणव्यवहारे राजदेये माषरूपे करे।

**दृषद्वत्** त्रि० दृषदः सन्त्यस्मिन् भूम्ना मतुप् मस्य वः। १दृषदाढ्ये स्त्रियां ङीप्। सा च २नदीभेदे "सरस्वतीदृषद्वत्योर्देवनद्योर्यदन्तरम्। तं देवनिर्मितं देशं ब्रह्मावर्तं प्रचक्षते" मनुः "प्रययुर्ज्जाङ्गलीकूलात् कुरुक्षेत्रं सहानुगाः। सरस्वतीदृषद्वत्यौ यत्तनाच्च निषेव्य ते। ययुर्वनेनैव वनं सततं पश्चिमां दिशम्" भा०व० ५अ०। "कौशिकी मन्दाकिनी यमुना सरस्वती दृषद्वती गोमती" भाग० ५।१६।१८ भारतवर्षस्थमहानदीकथने। "दक्षिणेन सरस्वत्यादृषद्वत्युत्तरेण च। ये वसन्ति कुरुक्षेत्रे ते वसन्ति त्रिविष्टपे" भा०व० ८३अ०। ३वृषभेदे पु० "संयातिः खलु दृषद्वतो दुहितरं वरार्हां नामोपयेमे तस्यामस्य जज्ञे सार्वभौमः" भा०आ० ९५अ०। विश्वामित्रस्य ४पत्नीभेदे स्त्री "दृषद्वतीसुतत्वापि विश्वामित्रात्तथाऽष्टकः। अष्टकस्य सुतो लौहिः प्रोक्तो जङ्घुगणो मया" हरिवं० २७अ०

**दृष्ट** त्रि० दृश-कर्मणि क्त। १दर्शनकर्मणि विलोकिते "दृष्टदोषेऽपि विषये समत्वाद्दृष्टसेवनः" देवीभा० "दूतमेतत् पुराकल्पे दृष्टं वैरकरं महत्" "तस्मे ह भामिनी दृष्टा बीजौ जोत्तिकएव च" मनुः २ज्ञातमात्रे च "दृष्टवदानुश्रविकः स ह्यविशुद्धिक्षयातिशययुक्तः" सां० का० "दृष्टानुश्रविकविषयवितृष्णा वशीकारसंज्ञा वैराग्यम्" पात० सू० "दृष्टं श्रुतञ्चेत्युपासीत" छा० उप०। भावे क्त। ३दर्शने ४राज्ञां स्वराड्त्वात् चौरादेर्भये ५पररा-ष्ट्रात् दाढ्यविलोपादेर्भये च न० अमरः। ६साक्षात्कारे न० "दृष्टमनुमानमाप्तवचनं च सर्वप्रमाणसिद्धत्वात्। त्रिविधं प्रमाणमिष्टम्" सां०का० उद्दिश्य तल्लक्षितं यथा

"प्रतिविषयाध्यवसायो दृष्टं, त्रिविधमनुमानमाख्यातम्" सां०का० "अत्र दृष्टमिति लक्षणनिर्द्देशः परिशिष्टस्तु लक्षणं समानासमानजातीयव्यवच्छेदोलक्षणार्थः। अवयवार्थस्तु विषयन्ति विषयिणस्तनुवन्ति

स्वेन रूपेण निरूपणीयं कुर्वन्तीति यावत् विषयाः पृथिव्यादयः सुखादयश्च चक्षुरादीनामविषयाश्च तन्मात्रलक्षणा योगिनामूर्द्ध्वस्रोतसाञ्च विषयाः। विषयं विषयं प्रति वर्त्तते इति प्रतिविषयमिन्द्रियवृत्तिश्च सन्निकर्षः अर्थसन्निकृष्टमिन्द्रियमित्यर्थः तस्मिन्नध्यवसायस्तदाश्रितत्वमर्थः अध्यवसायश्च बुद्धिव्यापारो ज्ञानम्। उपात्तविषयाणामिन्द्रियाणां हत्तौ सत्यां बुद्धेस्तमोऽभिभवे सति यः सत्यसत्तैकः सोऽध्यवसायइति वृत्तिरिति ज्ञानमिति चाख्यायते इदं तावत् प्रमाणम्। अनेन यच्चेतनाग्रहेरनुपरक्तत् फलं प्रमाबोधः। बुद्धितत्त्वं हि प्राकृतत्वादचेतनमिति तदीयोऽध्यवसायोऽप्यचेतनो घटादिवत्, एवं बुद्धितत्त्वस्य सुखादयोऽपि परिणामभेदा अचेतनाः। पुरुषस्तु सुखाद्यनुषङ्गी चेतनः सोऽयं बुद्धितत्त्ववर्त्तिना ज्ञानसुखादिना तत्प्रतिबिम्बितस्तच्छायापन्नश्च ज्ञानसुखादिमानिव भवतीति चेतनोऽनुगृह्यते चितिच्छायापन्नश्च चाचेतनापि बुद्धिस्तदध्यवसायोऽपि चेतन इव भवतीति। तथा च वक्ष्यति "तस्माच्चसंयोगादचेतनं चेतनावदिव लिङ्गम्। गुणकर्त्तृत्वेऽपि तथा कर्त्तेव भवत्युदासीनः" इति। अत्राध्यवसायग्रहणेन संशयं व्यवच्छिनत्ति संशयस्य अनवस्थितग्रहणेनानिश्चितरूपत्वात् निश्चयोऽध्यवसाय इत्यनर्थान्तरम्। विपर्ययग्रहणेन चासद्विषयं विपर्ययमपाकरोति, प्रतिग्रहणेन चेन्द्रियार्थसन्निकर्षसूचनादनुमानस्मृत्यादयः परास्ता भवन्ति। तदेवं समानासमानजातीयव्यवच्छेदकत्वात् प्रतिविषयाध्यवसाय इति दृष्टस्य सम्पूर्णं लक्षणम्" तत्त्वकौ०।

**दृष्टदोष** त्रि० दृष्टो दोषः रागलोभादिर्यस्य। ज्ञातरागलोभादिरूपदोषके "न दृष्टदोषाः कर्त्तव्या न व्याधार्त्ता न दूषिताः" याज्ञिकरक्षानिषेधे मनुः। दृष्टो दोषो मिथ्याज्ञानजन्यवासना यत्र। ज्ञातमिथ्याज्ञानजन्यवासनायुक्तविषये "दृष्टदोषेऽपि विषये ममत्वाकृष्टचेतनः" देवीभा० दृष्टो ज्ञातो दोषोयेन। शङ्कितापराधके रिपौ

**दृष्टपृष्ठ** त्रि० दृष्टम् प्रतियोधैः पृष्टमस्य। पलायमाने शत्रावपि० रक्षात् पराङ्मुखस्य शत्रुभिः पृष्ठस्य दर्शनात् तथात्वम्।

**दृष्टप्रत्यय** त्रि० दृष्टेन दर्शनेन प्रत्ययः विश्वासो यस्य। अन्यत्र दर्शनेन कृतदृढनिश्चये।

**दृष्टरजस्** स्त्री दृष्टं रजो यस्यां सा। ३दृष्टरजस्कायां नार्याम् अमरः। ४तदुपलक्षितायां मध्यमायां प्रौढ़ायाम् स्त्रियां राजनि०।

**दृष्टान्त** पु० दृष्टोऽन्तः विषयपरिच्छेदोयत्र। गौ० सूत्रोक्तेषु षोडशसु पदार्थेषु मध्ये पदार्थभेदे तल्लक्षणं तत्रोक्तं यथा "लौकिकपरीक्षकाणां यस्मिन्नर्थे बुद्धिसाम्यं स दृष्टान्तः" सू० "लोकसामान्यमतीता लौकिका नैसर्गिकं वैनयिकं बुद्धातिशयमप्राप्ताश्चेहपरीताः परीक्षकास्तर्केण प्रमाणैरर्थं परीक्षितुमर्हन्तीति, यथा यमर्थं लौकिका बुध्यन्ते तथा परीक्षका अपि सोऽर्थो दृष्टान्तः। दृष्टान्तविरोधेन हि प्रतिषेद्धव्या भवन्तीति। दृष्टान्तसमाधिना च स्वपक्षाः स्थापनीया भवन्तीति तदुक्तावयवेषु चोदाहरणाय कल्पत इति" वात्स्या० भा०। ४तत्रोक्तावयवमध्ये उदाहरणे च तल्लक्षणं तत्रोक्तं तच्च उदाहरणशब्दे ११६४ पृ० दर्शितम् अधिकमत्र तत्सूत्रभाष्यं प्रदर्श्यते यथा "साध्यसाधर्म्यात् तद्धर्मभावी दृष्टान्त उदाहरणम्" गौ०सू० "साध्येन साधर्म्यं समानधर्मता साध्यसाधर्म्यात् कारणात् तद्धर्मभावो दृष्टान्त इति तस्य धर्मं लक्षयति तद्धर्मभावः तस्य साध्यस्य, साध्यञ्च द्विविधम् धर्मिविशिष्टो वा धर्मः शब्दस्यानित्यत्वम्। धर्मविशिष्टो वा धर्मी अनित्यः शब्द इति, दृष्टोत्तरमनुवर्त्तयति इति कस्मात्? पृथगधर्म्मवचनात्। तस्य धर्मं लक्षयति तस्य भावस्तद्धर्मभावः स यस्मिन् दृष्टान्ते वर्त्तते स दृष्टान्तः साध्यसाधर्म्यात् तद्धर्मभावो भवति स चोदाहरणमिष्यते तत्र यदुत्पद्यते तदुत्पत्तिधर्मकम् यच्च भूत्वा न भवति चात्मानं जहाति निरुध्यत इत्यनित्यम्। एवमुत्पत्तिधर्मकत्वं साधनमनित्यत्वं साध्यं सोऽयमेकस्मिन् द्वयोर्धर्म्मयोः साध्यसाधनभावः साधर्म्याद्व्यवस्थित उपलभ्यते तं दृष्टान्ते उपलभमानः शब्देऽप्यनुमिनोति शब्दोऽप्युत्पत्तिधर्मकत्वादनित्यः स्थाल्यादिवदित्युदाहियते तेन धर्मयोः साध्यसाधनभाव इत्युदाहरणम्" भा० "तद्विपर्ययाद्वा विपरीतम्" गौ०सू० "दृष्टान्त उदाहरणमिति प्रकृतं, साधर्म्यवैधर्म्यात् तद्धर्मभावो दृष्टान्त उदाहरणमिति। अनित्यः शब्द उत्पत्तिधर्मकत्वात् यथा अनुत्पत्तिधर्मकं नित्यमात्मादि सोऽयमात्मादिदृष्टान्तः साध्यवैधर्म्यादनुत्पत्तिधर्मकत्वादतद्धर्मभावो योऽसौ साध्यस्य धर्मोऽनित्यत्वं स तस्मिन् भवतीति। अनित्यात्मादौ दृष्टान्ते उत्पत्तिधर्मकत्वस्याभावादनित्यत्वं न भवतीति उपलभमानः शब्दे विपर्ययमनुमिनोति उत्पत्तिधर्मकत्वस्य भावादनित्यः शब्द इति साध-

र्म्यौक्तस्य हेतोः साध्यसाधर्म्यात् तद्धर्मभावो दृष्टान्त उदाहरणम् वैधर्म्यौक्तस्य हेतोः साध्यवैधर्म्यात्तद्धर्मभावो दृष्टान्त उदाहरणम् । पूर्वस्मिन् दृष्टान्ते यौ तौ धर्मौ साध्यसाधनभूतौ पश्यति साध्येऽपि तयोः साध्यसाधनभावमनुमिनोति । उत्तरस्मिन् दृष्टान्ते यथोर्धर्मयोरेकस्याभावादितरस्याभावं पश्यति तयोरेकस्याभावादितरस्याभावं साध्ये अनुमिनोतीति, तदेतद्धेत्वाभासेषु न सम्भवतीत्यहेतवो हेत्वाभासाः तदिदं हेतूदाहरणयोः साधर्म्यं परमसूक्ष्मं दुःखबोधं पण्डितैरुपवेदनीयमिति" भाष्यम् । अन्यत्र च "वादिप्रतिवादिनोः संप्रतिपत्तिविषयोऽर्थो दृष्टान्तः । यथा पर्वतो वह्निमान् धूमात् महानसवदित्यादौ महानसो दृष्टान्तः । स द्विविधः साधर्म्यदृष्टान्तः वैधर्म्यदृष्टान्तः । आद्यः पर्वते वह्निसाधने धूमवत्त्वस्य हेतोर्महानसः । द्वितीयः तत्रैव धूमवत्त्वस्य हेतोर्महाह्रदः । २अर्थालङ्कारभेदे अलङ्कारशब्दे १८८ पृ०दृश्यम् "दृष्टान्तोऽत्र महार्थवः" माघः ४आश्वे ५मरणे च मेदि०

दृष्टि स्त्री दृश-भावे क्तिन् । १दर्शने चाक्षुषज्ञाने "नान्यादृष्टा चक्षुषतामनुपलम्भः" सा०सू०।अक्षिपटलशब्दे ४३पृ० अक्षिशब्दे ४५पृष्ठे च दृश्यम् । २ज्ञानमात्रे मेदि० "तत्राथैकतरदृष्टा एकतरस्मिन्नोपलाभः" । "विदितबन्धकारणस्य दृष्टा तद्रूपम्" सा०सू० । ३प्रकाशे च "न दृष्टुर्दृष्टेर्विपरिलोपोऽस्ति" श्रुतिः । षड्दृष्टिभेदादिकं षड्दृष्टिशब्दे २७५२।५३ पृ० दृश्यम् । करणे क्तिन् । ४नेत्रे अमरः । "अक्ष्णोस्तावनृजुरूपचितैर्दृष्टिरानुप्यते मे" मेघ० "दृष्टिर्मोदनिमीलिता न विकला नाभ्यन्तरे चक्षुना" सूच्य० "दृष्ट्वा प्रसादामलया कुमारं प्रत्यग्रहीत्" रघुः "दृष्टा दृष्टिमधो ददाति" सा०द० ।

दृष्टिकृत् त्रि० दृष्टिं करोति कृ-क्विप् । २दर्शके २स्त्रियां ङीप् न० शब्दच० । तस्य सोमया लोकानां दृष्टिसम्पादकत्वात् तथात्वम् ।

दृष्टिकृत न० दृष्टिर्लोकानां दृष्टिः कृता येन निष्ठान्तस्य परनिपातः । १स्त्रियां शब्दरत्नावली । २कृतदर्शने त्रि० ।

दृष्टिक्षेप पु०दृष्टेः क्षेपः । १दृष्टिपाते ।

दृष्टिगत पु० दृष्टिं गतः विषयतया प्राप्तः । १नेत्रविषये । ७त० । २नेत्रगते रोगभेदे अक्षिपटलशब्दे ४३पृ०दृश्यम् ।

दृष्टिगुण पु० दृष्ट्या गुण्यतेऽभ्यस्यतेऽत्र गुण-अभ्यासे आधारे अच् । १नाथादिलब्धे शब्दभाङ्गा तस्य दृष्ट्यैव शरादिक्षेपणाभ्यासनात् तथात्वम् ६त० । २नेत्रगुणे रूपादौ ।

दृष्टिप पु० दृष्टिं पिबति पा-क । देवगणभेदे "गणा देवानां भृग्वपाः सोमपाश्च, लोकाः सुवामास्तुषिता ब्रह्मकायाः । आभास्वरा गन्धपा दृष्टिपाश्च" भा०आनु० १८अ०

दृष्टिबन्धु पु०दृष्टेर्नेत्रस्य बन्धुरिव साहाय्यापादनात् । १खद्योते शब्दर० अक्षिपटलशब्दे ४३ पृ० उक्तेन "खद्योतविस्फुलिङ्गाभामिति" सुश्रुतवाक्येन दृष्टेस्तत्तुल्यत्वस्योत्कीर्तनेन तस्य तत्साहाय्यापादकतया तथात्वम् ।

दृष्टिवाद पु० हेमच० उक्ते पञ्चात्मके बौद्धानां वादरूपकथाभेदे "दृष्टिवादो द्वादशाङ्गी स्याद्ग्रन्थिपिटकाह्वया । प्रति कर्मस्वलपूर्वानुयोगो पूर्वगतचूलिकाः । पञ्च स्युर्दृष्टिवादभेदाः पूर्वाणि चतुर्दशापि पूर्वगते" ।

दृष्टिविक्षेप पु० दृष्टिस्तदेकदेशस्य विक्षेपः । १कटाक्षदर्शने हला० ६त० । २दृष्टिपाते ३दर्शनान्तराले च

दृष्टिविभ्रम दृष्टेर्विभ्रमः विलासभेदः । नेत्रविलासभेदे "विवर्तितभ्रूरियमद्य प्रियते भयादकामापि हि दृष्टिविभ्रमम्" शकु० २दर्शनभ्रान्तौ च

दृष्टिविष पुंस्त्री दृष्टौ विषोऽस्य । १सर्पभेदे स्त्रियां जातित्वात् ङीष् । "दृष्टीविषैः सप्तशतैर्वृतं भोगिभिरद्भुतैः" भा०व०२२४अ० । दृष्टीविषैरित्यत्र आर्षो दीर्घः । "ते चाब्रुवन् नहुषो घोररूपो दृष्टीविषस्तस्य बिभीम देव !" भा०उ० १५अ० ।

दृह दृढौ भ्वा०पर०अक०सेट् । दर्हति अदर्हीत् ददर्ह । अयमिदित्त्वे तत्र दंहति अदंहीत् । "तमेतैः सोमैः सप्तदशैरदंहन्" ताण्ड०ब्रा०४।५।८ इदित्त्वात् नलोपाभावः दंहते दंहितः "दिवे दंह दंहिता दंहसेन" नैरु० २।८३।८ "दंहणाय त्वनामसि" यजु० ६।१२६।१ अनिदित्त्वे तु दृह्यते दृढ्हितः इत्यादि ।

दृ भये भ्वा० पर० सक० सेट् । दरति अदारीत् बहु० णिच् दरयति । ददार दरीता दरिता । दीर्णः ।

दृ विदारे दिवा० पर०सक० सेट् । दीर्यति अदारीत् । ददार दरीता दरिता दीर्णः । [दरिता । दीर्णः । भगन्दरः

दृ विदारे क्र्या०प्रा०पर०अक०सेट् । दृणाति अदारीत् दरीता

दे पालने भ्वा० आत्म०सक० अनिट् । दयते अदास्त दत्ते दाता दास्यते दातुम् दत्तः ।

देय त्रि०दा-कर्मणि यत् । १दातव्ये "स्वं कुटुम्बाविरोधेन देयं दारसुताद्यते । नान्यत्वे सति सर्वस्वं यज्ञान्यस्मै प्रतिश्रुतम्"

याज्ञ० वचनोक्तनिषिद्धभिन्ने २दानार्हे दत्तापदानिक-शब्दे ३४५।५६ पृ० दृश्यम् ।

**देव** देवने भ्वा० आत्म० अक० सेट् । देवते अदेविष्ट । अदेविढम् अदेवि(ड्ढ्)ध्वम् दिदेवे अदित् । देवयति ते अदिदेवत् त । देवनमिह रोदनमिति भट्टभङ्गः । परि+विलापे । "विलापः परिदेवनम्" अमरः । "खरदूषणयोर्भ्रातोः पर्य्यदेविष सा पुरः" भट्टिः ।

**देव** पु० दिव-अच् । १अमरे सुरे नाट्योक्तौ २राजनि अमरः । ३रूपे ४मेघे पु० ५इन्द्रिये न० मेदिनि० ६पारदे पु० राजनि० । ७ब्राह्मणानासुपाधिभेदे "ततश्च नाम कुर्वीत पितैव दशमेऽहनि । देवपूर्वं नराख्यं हि शर्मवर्मादि संयुतम्" इति भवि०पु० । "नरमाचष्टे इति नराख्यं नरनाम, देवात् पूर्वं तच्च विशिष्टं शर्मयुतम् । "शर्मा देवश्च विप्रस्य वर्मा त्राता च भूभुजः । भूतिगुप्तश्च वैश्यस्य दासः शूद्रस्य कारयेत्" इति यमवचने सप्तम्युपलब्धेः । "शर्मान्तं ब्राह्मणस्य स्यात्" इति भातातपीयेन शर्मान्तता च । ८देवदारुणि शब्दार्थचि० । ९पूज्ये १०दीप्ते च त्रि० ११परात्मनि पु० "एकोदेवः सर्वभूतेषु गूढः" श्रुतिः । "भर्गोदेवस्य" गायत्री "दीव्यते क्रीडते यस्मात् रोचते द्योतते दिवि । तस्मादेव इति प्रोक्तः स्तूयते सर्वदेवतैः" योगियाज्ञ० "उद्भवः क्षोभणो देवः" विष्णुसं० "यतः क्रीडति सर्गादिभिर्लिंगीयते शब्दैः, व्यवहरति सर्वभूतेषु आत्मतया, द्योतते स्तूयते स्तुत्यैः सर्वत्र गच्छतीति तस्मात् देवः" भा० । सुराश्च यद्यपि बहवस्तथापि प्राधान्यात् त्रयस्त्रिंशत्संख्यया त्रयस्त्रिंशत्पतिशब्दे ३२५६ पृ० दृश्याः तत्र सुरे "देवा अस्य रूपस्य नित्यं दर्शनकाङ्क्षिणः" गीता । "देवान्पीत् मनुष्यांश्च पितॄन् सदृशाच्च देवताः" मनुः । रूपे "देवाकर्णय सुस्तेन चरकस्योक्तेन जानेऽखिलम्" नैष० नाट्योक्तौ रूपे "यथाऽऽज्ञापयति देवः" भूरिनाटकेषु । मेघे देवो गर्जति देवगर्जनम् देवे वर्षति । "देवाश्च आजानदेवाः कर्मदेवाश्च" कर्मदेवशब्दे १७२८ पृ० दृश्यम् ।

**देवकल्प** पु० नित्यकर्म० प्रकृतिवद्भावः । कश्यपकन्यायां धर्मस्य पत्नीभेदे भानौ जाते पुत्रे दशधर्मोक्तेषूपक्रमे "भानुर्लम्बा ककुब्जामिर्विश्वा साध्या मरुत्वती । वसुर्मुहूर्त्ता सङ्कल्पो धर्मपत्न्यः सुतान् शृणु । भानोस्तु देवकल्पस्य इन्द्रसेनस्ततो नृप !" भा० ६।६।४।५

**देवकल्पि** पु० देवानास्थिः, पृज्ञवत्वात् प्रकृतिवद्भावो वा । देवर्षौ नारदादौ "अथ देवर्षी राजन् ! संप्रेषतं रूपात्मजम्" भाग० ६।१६।१ पक्षे देवर्षिरयत्र । इक्ष्वाकुरतेर्ष्टकोक्तेर्देवर्षेर्विद्धि भारत" भा०आ० ६७अ० ।

**देवक** त्रि० दिव-एवुल् । १क्रीडके २गन्धर्वपतिभेदे ३श्रीकृष्णस्य मातामहे आहुकपुत्रे रूपभेदे च पु० "यस्यासीद्देवको नाम देवराजसमद्युतिः । स गन्धर्वपतिर्ख्यातो जज्ञे नराधिपः" भा० आ०६७अ० तस्यैव देवकनाम्नः कलावतारः इत्यर्थः । "आहुकस्य तु काश्यायां द्वौ पुत्रौ समभूवताम् । देवकश्चोग्रसेनश्च देवगर्भसमावुभौ । देवकस्याभवन् पुत्राश्चत्वारस्त्रिदशोपमाः । देववानुपदेवश्च सुदेवो देवरक्षितः । कुमार्यः सप्त चाप्यासन् वसुदेवाय ता ददौ । देवकी शान्तिदेवा च सुदेवा देवरक्षिता । धृतदेव्युपदेवी च सुनाम्नी चैव सप्तमी" हरिवं० २८अ० । ४तत्कन्यायां स्त्री ङीष् । देवकीशब्दे दृश्यम्

**देवकर्दम** पु० देवप्रियः कर्दम इव । श्रीखण्डागुरुकर्पूरकुङ्कुमैर्मिलितैः कृते कर्दमरूपे गन्धद्रव्यभेदे राजनि० ।

**देवकात्मजा** स्त्री ६त० । देवकन्यपत्नतायां देवक्यां प्राधान्यात् शब्दरत्ना० ।

**देवकार्य** न० देवप्रियार्थं कार्यम् । १देवप्रियार्थे होमपूजादौ कार्ये "देवकार्यात् द्विजातीनां पित्रकार्यं विशेष्यते" मनुः । देवानामभिलषितं कार्यम् । २देवाभिलषिते कार्ये च "ऋतुश्चितदेवकार्यम्" रघुः ऋतुरावश्यकधर्मादिरूपदेवकार्यमित्यर्थः । देवकर्मादयोऽप्यत्र "देवकर्मऋतश्चैव युक्ताः कामेन कर्मसु" भा०आ०१६७अ० ।

**देवकाष्ठ** न० देवप्रियं काष्ठमस्य । देवदारुवृक्षे रत्ना० । "मनःशिला देवकाष्ठं रजन्यौ लिम्बपोषम्" सुश्रु० ।

**देवकिरी** स्त्री मेघरागस्य भार्याभेदे रागिणीभेदे तद्रागस्य रागिणीभेदाः तत्स्वरूपञ्च सङ्गीतदा० उक्तं यथा "ललिता मालती गौरी नाटी देवकिरी तथा । मेघरागस्य रागिण्यो भवन्तीमाः सुमध्यमाः" । अस्या स्वरूपं यथा "भ्रमन्ती नन्दने श्यामा पुष्पप्रचयतत्परा । ख्याता देवकिरी क्षौमा करार्पितसखीकरा" देवगिरीति वा पाठः ।

**देवकिल्बिष** न० देवेन कृतं किल्बिषमनिष्टकर्म । देवकृते अनिष्टे कार्ये यथा वरुणकृतपाशबन्धनं यमकृतपादबन्धनमित्यादि । "सुक्रन्तु मा यमस्यादधो वरुणस्यादुत । अधो यमस्य पड्वीशात् सर्वस्माद्देवकिल्बिषात्" ऋ०१०।६७।१६।

**देवकी** स्त्री देवक+पुंयोगे ङीष् पुंयोगश्च न केवल दा-

स्यजनकत्वात् किन्तु जन्यजनकत्वादिरूपोऽपीति फलदत्तः तेन जेकयीति सिद्धम्। देवकराजकन्याभेदे देवकशब्दे दृश्यम्। देवकी च कश्यपपत्न्या अदितेरवतारः यथोक्तं हरिवं० ५६अ० "तस्य (कश्यपस्य)भार्याद्वयञ्चैव अदितिः सुरभिस्तथा। देवकी रोहिणी चैव वसुदेवस्य धीमतः"

**देवकीनन्दन** पु० ६त०। वसुदेवपत्न्या देवक्यानन्दने श्रीकृष्णे। "नन्दगोपस्य जायैका वसुदेवस्य चापरा। तुल्यकालं हि गर्भिण्यौ यशोदा देवकी तथा। देवक्यजनयद्विष्णुं यशोदा तान्तु कन्यकाम्। सङ्क्रान्तेऽभिजिते प्राप्ते सार्द्धरात्रे विभूषिते" हरिवं०। ६०अ० "देवकीनन्दनः स्रष्टा जितोऽयं पापनाशनः" विष्णुसं० "सङ्कीर्त्य हरणं प्राप्ते कृष्णे देवकिनन्दने" भा०आ० १अ० संज्ञात्वात् ङीषो लुक्। [तुगिष्टः कुक् च। देवसम्बन्धिनि।

**देवकीय** त्रि० देवस्येदम् गङ्गा० छ "देवस्य च" पा०ग०तद्०

**देवकीपुत्र** पु० ६त०। १श्रीकृष्णे "वत्सयाम्येव दास्यामि देवकीपुत्रमाश्रितः" हरिवं० १४२अ०। २सुरूपयज्ञदर्शनविद्यायां घोरनामकाङ्गिरसश्च शिष्यभूते कृष्णे च। यज्ञदर्शनसुपक्रम्य "तद्धैतद्घोर आङ्गिरसः कृष्णाय देवकीपुत्रायोक्त्वोवाचाऽपिपास एव स बभूव सोऽन्तवेलायामेतत्त्रयं प्रतिपद्येताक्षितमस्यच्युतमसि प्राणसंशितमसीति" छा०उ० ३।१७।६ "तद्धैतत् यज्ञदर्शनं घोरोनामतः, आङ्गिरसो गोत्रतः कृष्णाय देवकीपुत्राय शिष्यायोक्त्वोवाच तदेतत्त्रयमित्यादि व्यवच्छिन्नेन सम्बन्धः। स चैतद्दर्शनं श्रुत्वाऽपिपास एवान्याभ्यो विद्याभ्यो बभूव। इत्यञ्च विशिष्टेयं विद्या यत् कृष्णश्च देवकीपुत्रश्चाभ्यां विद्यां प्रति गुरुशिष्यभेदकरीति पुरुषयज्ञविद्यां श्रौतीं घोर आङ्गिरसः कृष्णायोक्तेमां विद्यां किमुवाचेति तदाह स एवं यथोक्तयज्ञविदनवेलायां मरणकाल एतन्मन्त्रत्रयं प्रतिपद्येत अपेदित्यर्थः। किं तत् अक्षितमस्योषमच्युतं वाऽसीत्येकं यजुः" भा०आत्र परमेश्वरस्य वासुदेवाख्यैकेश्वरस्य अन्यशिष्यत्वानुपपत्तौ इह तदन्यस्यैव शिष्यत्वम्। श्रुतौ रूढेः अनादिप्रवाहरूपतया वासुदेवस्य शिष्यत्वकल्पनया जनकयाज्ञवल्क्ययोरिव कल्पान्तरस्थयोरियमाख्यायिका सुखबोधत्वात्। देवकीसुतादयोऽपि वासुदेवे। "अथ भाद्रपदे मासि कृष्णाष्टम्यां कलौ युगे। अष्टाविंशतिमे जातः कृष्णोऽसौ देवकीसुतः" ति०त० ब्रह्मपु० "त्र्याधाधिपातासम्भिदेवकीसुतम्" माघः।

**देवकीमात** पु०देवकी माता यस्य समासान्तविधेरनित्यत्वात् न कप्, देवकीं मिनोति प्रक्षपतित्वेन मा-डच् वा। वासुदेवे श्रीकृष्णे। "यशोदातान् देवकीमातर्गृह्णन्द्य संयुगे" भा०द्रो० १८अ० प्रथमे विग्रहे सर्वनामस्थाने परे गुणः देवकीमातरमित्यादि द्वितीये देवकीमातारमिति भेदः।

**देवकुण्ड** न० देवकृतं कुण्डम्। देवखातके शुभूतिः

**देवकुरुवा** स्त्री मद्राङ्गेषु राजनि०।

**देवकुल** न० कृत-संज्ञतौ क देवार्थं कुलमल्पद्वारतया संज्ञतम्। अल्पसङ्घे (देउल) ख्याते देवगृहभेदे हारा०। देवानां २वंशे ३समूहे च

**देवकुल्या** स्त्री देवकृता कुल्या अल्पसरित्। १देवसरिति गङ्गायाम् ६त०। मरीचेः कन्यायाः पूर्णिमासः २कन्यायाञ्च "पत्नी मरीचेस्तु कला सुषुवे कर्दमात्मजा। कश्यपं पूर्णमासञ्च ययोरापूरितं जगत्। पूर्णिमासत विरजं विश्वगञ्च परन्तप। देवकुल्यां हरेः पादशौचाद्यामभूत् सरिद्दिवः" भाग०४।१।१२। सा च भरतवंशप्रसूभूम्नः पत्नीभेदः यथाह भाग०५।१५।६ "भरतस्यात्मजः सुमतिर्नाम" इत्युपक्रमे "प्रतिकृतेः सुत्यामजभूमानावजनिषाताम्। भूम्न ऋषिकुल्यायासङ्गोदः ततः प्रस्तारो देवकुल्यायाम्"।

**देवकुसुम** न० देवप्रियं कुसुमम्। लवङ्गे अमरः।

**देवकूट** न० वशिष्ठाश्रमसन्निकृष्टस्थे तीर्थभेदे "तत्राश्रमो वशिष्ठस्य त्रिषु लोकेषु विश्रुतः। तत्राभिषेकं कुर्वाणो वाजपेयमवाप्नुयात्। देवकूटं समासाद्य देवर्षिगणसेवितम्" भा०व० ८३अ०।

**देवक्षत्र** पु० क्रोष्टुवंश्ये नृपभेदे "तस्मात् करम्भः कारम्भिर्देवरातोऽभवन्नृपः!। देवक्षत्रोऽभवत्तस्य देवक्षत्रिर्महायशाः। देवगर्भसमो जज्ञे देवक्षत्रस्य नन्दनः" हरिवं० ३७अ०। देवानां क्षत्रं बलं यत्र। २यज्ञे च "उच्छन्त्यां मे यजता देवक्षत्रे रुशद्गवि" ऋ० ५।६४।७ "देवक्षत्रे यज्ञे" भा०।

**देवखात** न० देवेन खातं खन-क्त। १कृत्रिमे २जलाशये ७त०। २देवसमीपस्थे खाते च "नदीषु देवखातेषु तडागेषु सरित्सु च। स्नानं समाचरेन्नित्यं गर्त्तप्रस्रवणेषु च" मनुः स्वार्थे क तत्रार्थे अमरः। ३शुद्धायां भरतः।

**देवखातविल** पु० नित्यकर्म०। शुद्धायाम् अमरः।

**देवगण** पु०६त०। १देवसमूहे "उदर्कस्तव कल्याणि! तुष्टो देवगणेश्वरः" भा०भी० १२अ०। देवगणाय त्वयक्षिंशत्यतिशब्दे २३।८ पृ० उक्ताः वस्वादीनुक्ता "त्वयक्षिंशत

दृश्यते देवास्तेषामहं तव। अथवं संप्रवक्ष्यामि पञ्चयः कृत्तो गयात्" इत्युपक्रमे "एते देवगया राजन्! कीर्तितास्तेऽनुपूर्वशः" भा०आ०६६अ० उक्ताः। देवसंज्ञकोगणः। २नक्षत्रभेदे उपयमशब्दे १२५० पृ० गणकूटे दृश्यम् इत०। ३देवपक्षे ४देवानुचरादौ

देवगणग्रह पु० सुश्रुतोक्ते देवादिगणरूपे ग्रहे देवानाञ्च शुद्धस्वभावत्वात् अरुत्वासम्भवमाशङ्क्य तद्गणानामेव अरुत्वं च तत्रोक्तं यथा

"शुद्धानागतविज्ञानसत्त्वस्था सहिष्णुता। क्रिया वाऽप्राहुषी यस्मिन् स अरुः परिकीर्त्यते। अशुचिं भिक्षमर्यादं क्षतं वा यदि वाऽक्षतम्। हिंसुहिंसाविहारार्थं सत्कारार्थमथापि च। कर्मक्षेत्रेवा अरुगणा अरुाधिपतयस्तु ये। व्यश्नते विविधाकारा भिद्यन्ते ते तथाऽथा। देवास्तथा शत्रुगणाश्च तेषां गन्धर्वयक्षाः पितरो भुजङ्गाः। रक्षांसि या चापि पिशाचजातिरेषोऽष्टधा देवगणग्रहाख्यः। मन्तुरः शुचिरपि चेष्टगन्धमाल्यो निस्तन्द्रो ह्रीतिघृणसंवृततमाथो। तेजस्वीस्थिरनयनो वरप्रदाता ब्रह्मण्यो भवति च यः स देवजुष्टः। संखेदी द्विजगुरुदेवोपपन्नो जिह्मायो विगतभयो विमार्गदृष्टिः। मन्तुरो भवति न चान्नपानजातैर्दुष्टात्मा भवति च देवशत्रुजुष्टः। क्षुद्रात्मा पुलिनवनान्तरोपसेवी स्वाचारः प्रियपरिगीतगन्धमाल्यः। क्षयत्वं वा ग्रहसति चारु चाल्पशब्दं गन्धर्वयक्षपरिपीडितो मनुष्यः। ताम्राक्षः प्रियतनुरक्तवस्त्रधारी गम्भीरोद्भुतगतिरल्पवाक् सहिष्णुः। तेजस्वी वदति च किं दादिभि कर्मै यो यक्षग्रहपरिपीडितो मनुष्यः। प्रेतेभ्यो विलुजति संस्करेषु प्रियज्ञान् शालात्मा जलमपि चाप्यवस्थः। मांसेक्षुक्षिलगुडपायसाभिकामस्तद्भक्तो भवति पितृयक्षाभिभूतः। भूमौ यः प्रसरति सर्पवत्कदाचित् स्तब्धस्थो विलिखति जिह्वया प्रसक्तम्। निद्रालुर्गुडदधुदक्षपायसेषुर्विज्ञेयो भवति भुजङ्गमेन जुष्टः। मांसास्रुग्विविधसुराविकारजिष्णुर्निर्ह्रीको दृढमतिनिष्ठुरोऽतिशूरः। क्रोधालुर्विपुलबलो निशाविहारी श्रौचद्विड्भवति च रक्षसा गृहीतः। उद्वस्तः क्षपणपरश्चिरप्रलापी दुर्गन्धो भृशमशुचिस्त्वतिलोलः। यक्षाणी विजनगिरिमाम्बुरात्रिसेवी व्याचेष्टं भवति रुदन् पिशाचजुष्टः। स्खलितगतिः स्खलत्यनेकशो ह्रीनिद्रालुः पतति च कम्पते च वेपति। यश्चाद्रिद्विरदनगादिविच्युतःसन् संक्षतो न भवति वाह्यकेन जुष्टः। देवग्रहाः पौर्णमास्यामासुराः सन्ध्ययोरपि। गन्धर्वः प्रायशोऽष्टम्यां यक्षाश्च प्रतिपद्यथ। कृष्णपक्षे च पितरः पञ्चम्यामपि चोरगाः। रक्षांसि निशि पैशाचाश्चतुर्दश्यां विशन्ति च। दर्पणादीन् यथा छाया शीतोष्णं प्राणिनो यथा। स्वमण्डिभास्कराचिंश्च यथा देहं च देहिनः। विशन्ति च न दृश्यन्ते यक्षास्तद्वच्चरीरिणम्। तपांसि तीव्राणि तथैव दानव्रतानि धर्मो नियमश्च सत्यम्। गुणास्तथाऽन्येऽपि तेषु नित्या व्यक्ताः समस्ताश्च यथाप्रभावम्। न ते मनुष्यैः सह संविशन्ति नवा मनुष्यान् क्वचिदाविशन्ति। ये चाविशन्तीति वदन्ति मोहात्ते भूतविद्याविषयादपोह्याः। तेषां यक्षाणां परिचारका ये कोटीसहस्रायुतपद्मसंख्याः। कल्पद्रुमाणां सभुजः सुभीमा निशाविहाराश्च तमाविशन्ति। निशाचराणां तेषां हि ये देवगणसंश्रिताः। ते तु तत्कल्पसंसर्गाद्विशेषास्तु तदन्वयाः। देवग्रहा इति पुनः प्रोच्यन्ते शुचयश्च ये। देववत् ते नमस्यन्ते प्रार्थ्यन्ते च देववत्"।

देवगणिका स्त्री इत०। स्वर्वेश्यायामप्सरःसु।

देवगन्धर्व पु० देवानां गन्धर्वः गायनः। १देवसमीपे गायने गन्धर्वभेदे। देवगन्धर्वाश्च मौनेयाः प्राधेयाश्च गन्धर्वशब्दे २५२८ पृ० उक्ताः। [राजनि०।

देवगन्धा स्त्री देवप्रियोगन्धोऽस्याः। मङ्गल्योदयाओषधौ

देवगर्भ पु०देवात् गर्भोयस्य। देवाहितगर्भके देवपुत्रे १नरादौ "प्रतिजग्राह तं राधा विधिवद्दिव्यरूपिणम्। पुत्रं कमलगर्भाभं देवगर्भं श्रियावृतम्" भा०व०३०८अ०। "देवकश्चोग्रसेनश्च देवगर्भसमावुभौ" हरिवं० ३८अ० "स तस्यां जनयामास देवगर्भोपमं सुतम्" ११८अ० २कुशद्वीपस्य २नदीभेदे स्त्री "रसकुल्या मधुकुल्या मित्राविन्दा श्रुतविन्दा देवगर्भा सत्यम्भरेति यासां पयोभिः कुशद्वीपौकसः" भाग० ५।२०।११

देवगान्धार पु० देवप्रियः देवयोग्यो वा गान्धारः। स्वरभेदे "ततस्तु देवगान्धारं ऋषिभ्यं वरणाहतम्। भौमस्त्रियः प्रजगिरे मनःश्रोत्रसुखावहम्" हरिवं० १५२अ० २श्रीरागस्य रागिणीभेदे स्त्री "गान्धारी देवगान्धारी सालवी श्रीव सारवी। राम(गि)क्रिर्ये पि रागिण्यः श्रीरागस्य प्रिया इमाः" सङ्गीत०दा०

देवगायन पु० इत०। गन्धर्वे हेमच०।

देवगिरि पु० देवानां प्रियः गिरिः। १पर्वतभेदे स च

भारतवर्षीयः स्वनामख्यातो गिरिः "भारतेऽप्यक्षिन् वर्षे सरिच्छैलाः सन्ति बहवः इत्युपक्रमे "सह्यो देवगिरिर्ऋष्यमूकः श्रीशैलः" भाग०५।१९।१७ उक्तेः श्रीरागस्य २रागिणीविशेषे स्त्री ङीप् देवगान्धारीशब्दे दृश्यम् ।

देवगुरु पु० ६त०। सुराचार्ये बृहस्पतौ हेमच० देवानां पितरि २कश्यपे च "अपश्यत् कश्यपं तत्र मुनिं दीप्तं तपोनिधिम् । आद्यं देवगुरुं देवम्" हरिवं० २५७ अ०

देवगुही स्त्री गुह–बा० कि ङीप् देववत् गुहो गुहा । सरस्वत्याम् "देवगुहां सरस्वत्यां सार्वभौम इति प्रभुः" भाग०८।१३।८।

देवगुह्य त्रि० ६त०। देवानामतिरहस्ये । "एकमासीनमेकान्ते देवगुह्यधरं प्रभुम्" हरिवं० ११६अ० "श्रुतार्थौ देवगुह्यस्य भवान् यत्र वयं स्थिताः" तत्रैवाध्याये "तस्मिन् श्रुतार्थां विषये देवगुह्ये" भा०आ० १अ० २मरुधे न० । गुह्यार्थेचि० । तद्धि प्राणिनां वैराग्यानुत्पादाय देवैर्गोप्यते इति तस्य तथात्वम् ।

देवगृह न० ६त०। देवानामे तल्लक्षणं गरुड़पु० ४७अ० यथा "चतुःषष्टिपदं कृत्वा दिग्विदिग्भूपलक्षितम्। चतुष्कोणं चतुर्भित्ति द्वाराणि सूर्यसंख्यया। चत्वारिंशाष्टभिर्वैव भित्तीनां कल्पना भवेत्। जङ्घोच्छ्रयसमा जङ्घा जङ्घार्द्धं द्विगुणं भवेत्। गर्भविस्तारविस्तीर्णा शुकाया च विधीयते। तत्त्रिभागेण कर्तव्या पञ्चभागेन वा पुनः। निर्गमस्तु शुकायाश्च उच्छ्रयः शिखरार्द्धतः। चतुर्धा शिखरं कृत्वा त्रिभागे वेदिबन्धनम्। चतुर्थे पुनरश्चैव कण्ठस्य मूलसारकम्। अथ वापि समं वास्तुं कृत्वा षोडशभागिकम्। तस्य मध्ये चतुर्भागमादौ गर्भन्तु कारयेत्। भागद्वादशकां भित्तिं ततस्तु परिकल्पयेत्। चतुर्भागेण भित्तीनामुच्छ्रयः स्यात् प्रमाणतः। द्विगुणः शिखरोच्छ्रायो भित्त्युच्छ्रायाच्च मानतः। शिखरार्द्धस्य चार्द्धेन विधेयास्तु प्रदक्षिणाः। चतुर्दिक्षु तथा ज्ञेयो निर्गमस्तु तथा बुधैः। पञ्चभागेन संभक्त्य गर्भमानं विचक्षणः। भागमेकं गृहीत्वा तु निर्गमं कल्पयेत् पुनः। गर्भस्तम्भसमो भागादधतो मण्डपच्छदः। एतत् सामान्यमुद्दिष्टं प्रासादस्य हि लक्षणम्। जिह्मानमथो पक्षे पीठो जिह्मसमो भवेत्। द्विगुणेन भवेद्गर्भः समनाक्षौनक! ध्रुवम्। तद्विधा च भवेद्भित्तिर्जङ्घा तद्विस्तरार्द्धगा। द्विगुणं शिखरं प्रोक्तं जङ्घायाश्चैव शौनक!। पीठं गर्भोदरं कुर्यात् तन्मानेन शुकाकृतम्। निर्गमस्तु समाख्यातः शेषं मूलवदेव तु। जिह्मानं स्यात् तु तत् द्वारमानमथोच्यते। कराग्रं वेदवत् कृत्वा द्वारं भागाष्टकं भवेत्। विस्तारेण समाख्यातं द्विगुणं वेधसंख्या भवेत्। द्वारवत् पीठमध्ये तु शेषं शुषिरकं भवेत्। पादिकं भैत्तिकं भित्तिर्द्वारार्द्धेन परिग्रहात्। तद्विस्तारसमा जङ्घा शिखरं द्विगुणं भवेत्। शुकाया पूर्ववज्ज्ञेया निर्गमोच्छ्रायकं भवेत्। मण्डले मानमेतत्तु स्वरूपञ्चापरं वदे। त्रैवेदं कारयेत् क्षेत्रं यत्र तिष्ठन्ति देवताः। इत्थं कृतेन मानेन बाह्यभागं विनिर्गतम्। नेमिः पादेन विस्तीर्णा प्रासादस्य समन्ततः। गर्भन्तु द्विगुणं कुर्यात् नेम्यामानं भवेदिह। स एव भित्तेरुत्सेधो द्विगुणः शिखरो मतः। प्रासादानाञ्च वक्ष्यामि मानं योनिञ्च नामतः। वैराजः पुष्पकाख्यश्च कैलासो मालकाह्वयः। त्रिपिष्टः पञ्च पञ्चैते प्रासादाः सर्वयोनयः। प्रथमश्चतुरस्रो हि द्वितीयस्तु तदायतः। इत्तो दृत्तायतश्चान्योऽष्टास्रश्चेह च पञ्चमः। एतेभ्य एव सम्भूताः प्रासादाः क्रमशोऽपराः। सर्वप्रकृतिभूतेभ्यश्चत्वारिंशच्च पञ्च च। मेरुश्च मन्दरश्चैव विमानश्च तथाऽपरः। भद्रकः सर्वतोभद्रो! रुचकोनन्दनस्तथा। नन्दिवर्द्धनसंज्ञश्च श्रीवत्सश्च नवेत्यमी। चतुरस्रात् समुद्भूता वैराजादिति गम्यताम्। वडभी मेरुराजश्च श्रीवाम्टस्तु मन्दिरम्। विशालश्च तथा ज्ञेयो मन्दिरं भवनं तथा। उत्तमं शिविका वेश्म नवैते पुष्पकोद्भवाः। वलयो दुन्दुभिः पद्मो भद्रपद्मस्तथाऽपरः। वर्द्धनोऽन्य उपीथश्च शङ्खश्च कलसस्तथा। खपूरश्चक्रकान्यो दृत्ताः कैलाससम्भवाः। गजोऽथ हंसो गरुडः सिंहनामकः। वृषभो भूधरश्चैव श्रीजयः पृथिवीधरः। दृत्तायतसमुद्भूता नवैते मालकाह्वयात्। वज्रं चक्रं तथान्यच्च स्वस्तिकं वज्रसंज्ञितम्। चित्रस्वस्तिकखड्गौ च गदा श्रीदत्त एव च। विजयो नामतश्चैते त्रिपिष्टपसमुद्भवाः। त्रिकोणपत्रभद्रेन्दु चतुष्कोणं द्विरष्टकम्। यत्र तत्र विधातव्यं संस्थानं मण्डपस्य तु। राज्यञ्च विजयश्चैवमायुर्वर्द्धनमेव च। पुत्रलाभः श्रियः पुष्टिस्त्रिकोणादिक्रमाद्भवेत्। कुर्यात् ध्वजादिसंख्यां वा द्वारि गर्भस्तथा। मण्डपः सप्त संख्याभिर्युक्तितः स्वतस्तथा। मण्डपस्य चतुर्थांशाद्भद्रः कार्यो विजानता। सार्द्धांगवाक्कोपेतो निर्गमाच्चोच्च वा भवेत्। सार्द्धभित्तिप्रमाणेन भित्तिमाने-

न वा पुनः। भित्तेर्द्वैगुण्यतो वापि कर्तव्या मण्डपाः क्वचित्। प्रासादे मञ्जुरी कार्या चित्रा विषमभूमिका। परिमाणनिरोधेन रेखा वैषम्यभूमिका। आधारस्तु चतुर्द्वारचतुर्भद्रप्रशोभितः। शतभद्रसमायुक्तो मेरुप्रासाद उत्तमः। मण्डपास्तस्य कर्तव्या भद्रैस्त्रिभिरलङ्कृताः। घटनाकारमानानां भिन्ना भिन्ना भवन्ति ये। कियन्तोयेषु साधारानिराधाराश्च केचन। प्रतिच्छन्दक्रमेदेन प्रासादाः समुदीरिताः। अन्योन्यसङ्करात्तेषां घटना नामभेदतः। देवतानां विशेषाय प्रासादा बहवः स्मृताः। प्रासादे नियमो नास्ति देवानां च स्वयम्भुवाम्। तान्येव देवतानाञ्च पूर्वमानेन कारयेत्। चतुरस्रायतास्तत्र चतुष्कोणसमन्विताः। चन्द्रशालान्विताः कार्या भेरीशिखरसंयुता। पुरतो वाह्यनाम्नाञ्च कर्तव्या लघुमण्डपाः। नाट्यशाला च कर्तव्या द्वारदेशसमाश्रया। प्रासादा देवतानाञ्च कार्या दिक्षु विदिक्ष्वपि। द्वारपालाश्च कर्तव्या स्वस्वाङ्गत्वात् पृथक् पृथक्। किञ्चिद्दिदूरतः कार्या मठास्तत्रोपजीविनाम्। प्राङ्गणा जगती कार्या फलपुष्पजलान्विता। प्रासादेषु सुरान् स्वान्य पूजाभिः पूजयेन्नरः। वास्तुदेवे सर्वदेवान् स्वर्गभाक् तद्गृहादिह"

प्रासादसामान्यलक्षणमग्निपुराणे १०४अ० यथा

"ईश्वर उवाच वक्ष्ये प्रासादसामान्यलक्षणं ते शिखिध्वज!। चतुर्भागीकृते क्षेत्रे भित्तेर्भागेन विस्तरात्। त्रिभागेण गर्भः स्यात् पिण्डिका पादविस्तरात्। पञ्चभागीकृते क्षेत्रे द्वान्तर्भागेतु पिण्डिका। सुषिरं भागविस्तीर्णं भित्तयो भागविस्तरात्। भागौ द्वौ मध्यमे गर्भे ज्येष्ठभागद्वयेन तु। त्रिभिस्तु कन्यसोगर्भः श्रेष्ठो भित्तिरिति क्वचित्। शोडशभक्तेऽथ वा क्षेत्रे भित्तिर्भागैकविस्तरात्। गर्भो भागेन विस्तीर्णो भागद्वयेन पिण्डिका। विस्तारात् द्विगुणो वापि सपादद्विगुणोऽपि वा। अर्द्धार्द्धद्विगुणो वापि त्रिगुणः क्वचिदुच्छ्रयः। जगती विस्तरार्द्धेन त्रिभागेण क्वचिद्भवेत्। नेमिः पादोनविस्तीर्णा प्रासादस्य समन्ततः। परिधिस्त्रंशको मध्ये रथकांस्तत्र कारयेत्। चतुरश्रमैवं तेषु नाट्यशं च निवेशयेत्। प्रासादार्द्धेन देवानामष्टौ वा चतुरोऽपि वा। प्रदक्षिणं बहिः कुर्यात् प्रासादादिषु वा न वा। आदित्याः पूर्वतः स्थाप्याः स्कन्दोऽग्निर्वायुगोचरे। एवं ब्रह्मादयो न्यास्याः स्वस्वां स्वस्वां दिशि स्थिताः। चतुर्द्वारं शिखरं कृत्वा शुकनासां हिभागिकां। ततोवे वेदिकां त्यक्त्वा मण्डपा मण्डलारकः। वैराजः पुष्पकश्चान्यः कैलासो मानकस्तथा। त्रिविष्टपश्च पञ्चैव मेरुमूर्द्धनि संस्थिताः। चतुरस्रस्तु तत्राद्यो द्वितीयोऽपि तदायतः। वृत्तो वृत्तायतश्चान्यो ह्यष्टास्रश्चापि पञ्चमः। एकैको नवधा भेदैश्चत्वारिंशच्च पञ्च च। प्रासादः प्रथमो मेरुर्द्वितीयो मन्दरस्तथा। विमानश्च तथा भद्रः सर्वतोभद्र एव च। रुचको नन्दको नन्दिवर्द्धनश्च तथापरः। श्रीवत्सश्चेति वैराजान्वयाश्चे च समुत्थिताः। वलभी रुचकश्च श्रीवृक्षश्च मन्दिरम्। विशालश्च तथा ब्रह्ममन्दिरं भुवनस्तथा। उत्तमः शिविका वेश्म नवैते पुष्पकोद्भवाः। वलयो दुन्दुभिः पद्मो महापद्मक एव च। वर्द्धनो वान्य उष्णीषः सङ्घश्च कलशस्तथा। खपूरश्चक्रकान्योऽष्टौ कैलासस्यसम्भवाः। गजोऽथ वृषभो हंसो गरुडान् सिंहनामकः। भूमुखो भूधरश्चान्यः श्रीजयः पृथिवीधरः। वृत्तायतात् समुद्भूता नवैते मानकाह्वयात्। वज्रं चक्रं तथा चान्यत् स्वस्तिकं वज्रस्वस्तिकम्। चित्रं स्वस्तिकखड्गश्च गदा श्रीवृक्ष एव च। विजयो नामतश्चैते त्रिविष्टपसमुद्भवाः। नगराणामिमाः संज्ञा लाटादीनामिमास्तथा। श्रीवाहोत्तरतश्चूलं पृथुलश्च विभागतः। दशधा वेदिकां कृत्वा पञ्चभिः स्कन्धविस्तरः। त्रिभिः कण्ठं तु कर्तव्यं चतुर्भिस्तु तदण्डकम्। दिक्षु द्वाराणि कार्याणि न विदिक्षु कदाचन। पिण्डिका कोणविस्तीर्णा मध्यमाना च दार्वृता। क्वचित् पञ्चमभागेन मध्यमं गर्भमादृतः। उच्छ्राया द्विगुणात्तेषामन्यथा वा निगद्यते। षड्भाधिकात् समारभ्य यावदेकोनविंशतादिह। उत्तमान्यपि चत्वारि द्वाराणि दशहानितः। त्रीण्येव मध्यमानि स्युस्त्रीण्येव कन्यसान्यतः। उच्छ्रायार्द्धेन विस्तारो ह्युच्छ्रायोऽभ्यधिकस्त्रिधा। चतुर्भिरष्टभिर्वापि दशभिरङ्गुलैस्ततः। उच्छ्रायात् पादविस्तीर्णा विशाखास्तदुदुम्बरे। विस्तरार्द्धेन बाहुल्यं सर्वेषामेव कीर्तितम्। द्विपञ्चसप्तनवभिः शाखाभिर्हारमिष्टदम्। अधः शाखा चतुर्थांशे प्रतोहारौ निवेशयेत्। मिथुनैरश्ववल्लीभिः शाखाग्रेषं विभूषयेत्। सप्तविद्धेऽल्पता स्यात् दृष्टविद्धे त्वभूतिता। कूपविद्धे भयं पूगद्रुविद्धे धनक्षयः। प्रासादस्तम्भशालादिभागविद्धेषु बन्धनम्। सभाविद्धे तु दारिद्र्यं वर्णविद्धे निराकृतिः। उलूखले च दारिद्र्यं शिलाविद्धे तु शत्रुता। छायाविद्धे

त दारिद्र्यं वेधदोषे हि जायते। छेदादुत्पाटनाद्वापि तथा प्राकारलङ्घनात्। सीमाया द्विगुणत्यागाद्धु वेधदोषो न जायते"।

देवप्रतिरूपप्रासादे विशेषस्तत्र ४२ अ० उक्तो यथा "मानेन प्रतिमाया वा प्रासादमपरं शृणु। प्रतिमायाः प्रमाणेन कर्तव्या पिण्डिका शुभा। गर्भस्तु पिण्डिकार्द्धेन गर्भमानात्तु भित्तयः। भित्तेरायाममानेन उत्सेधन्तु प्रकल्पयेत्। भित्त्युच्छ्रायात्तु द्विगुणं शिखरं कल्पयेद् बुधः। शिखरस्य तु तुर्येण भ्रमणं परिकल्पयेत्। शिखरस्य चतुर्थेन ग्रथतो मुखमण्डपम्। अष्टमांशेन गर्भस्य रथकानान्तु निर्गमः। परिधेर्दशभागेन रथकांस्तत्र कल्पयेत्। तत्तृतीयेन वा कुर्याद्रथकानान्तु निर्गमम्। वामवं स्थापनीयं रथकल्पितये सदा। शिखरार्थं हि कर्तव्याणि चत्वारि विनिपातयेत्। शुकनासोर्द्धतः कृत्वं तिर्यग्भूतं निपातयेत्। शिखरस्यार्द्धभागस्य सिंहं तत्र तु कारयेत्। शुकनासां स्थिरीकृत्य मध्यसन्धौ निधापयेत्। तदूर्द्धन्तु भवेद्वेदी सकण्ठा मस्तारकम्। स्कन्धमस्तं न कर्तव्यं विकरालं तथैव च। ऊर्द्धं च वेदिकामानात् कलसं परिकल्पयेत्। विस्तारादुद्विगुणं द्वारं कर्तव्यं तु सुशोभनम्। उदुम्बरौ तदूर्द्धन्तु न्यसेच्छाखां समङ्गलैः। द्वारस्य तु चतुर्थांशे कार्यौ चण्डप्रचण्डकौ। विष्वक्सेनवत्तदण्डौ शिखोर्द्धोर्द्धुम्बरे श्रियम्। दिग्गजैः स्नाप्यमानान्तां घटैः साखां सरूपिकाम्। प्रासादस्य चतुर्थांशैः प्राकारस्योच्छ्रयो भवेत्। प्रासादात् पादहीनस्तु गोपुरस्योच्छ्रयो भवेत्। पञ्चहस्तस्य देवस्य एकहस्ता तु पीठिका। गारुडं मण्डपं चाग्रे एकं भौमादिधाम च। कुर्याद्धि प्रतिमायान्तु दिशु चाष्टासु चोपरि। पूर्वं वराहं दक्षे च नृसिंहं चोत्तरं जले। उत्तरे तु हयग्रीवमाग्नेय्यां जामदग्न्यकम्। नैर्ऋत्यां रामकं वायौ वामनं वासुदेवकम्। दैशे प्रासादरचना देया वस्वर्कादिभिः। द्वारस्य चाष्टमादंशं त्यक्त्वा वेधो न दोषभाक्"।

ह०सं० ५७अ० कपिद्विपेऽष्टमोक्तो यथा "त्यक्त्वा प्रभूतं खचितसारामान् विनिवेशय च। देवतायतनं कुर्याद्यशोधर्माभिवृद्धये। दृष्टपूर्वेण कर्तव्यो ये लोकास्तान् बुभूषता। देवानामालयः कार्यो हयमध्यत इष्यते। सचित्रोद्यानयुक्तेषु क्रतेष्वक्रतवेषु च। स्थानेष्वेतेषु सान्निध्यमुपगच्छन्ति देवताः। सरःसु नलिनोच्छन्नेषु निरुत्सरविरिञ्चिषु। हंसांसाचिप्रकूजारवोचीविमलवारिषु। हंसकारण्डवक्रौञ्चचक्रवाकविराविषु। पर्वतनिचुलच्छायाविश्रान्तजलचारिषु। क्रौञ्चकाञ्चीकलापाश्च कलहंसकलस्वनाः। नद्यस्तोयांशुका यत्र शफरीरुतमेखलाः। फुल्लतीरद्रुशोभांशाः सङ्गमश्रोणिमण्डलाः। पुलिनाभ्युन्नता रम्या हंसहासाश्च निम्नगाः। वनोपान्तनदीशैलनिर्झरोपान्तभूमिषु। रमन्ते देवता नित्यं पुरेषूद्यानवत्सु च। भूमयो ब्राह्मणादीनां याः प्रोक्ता वास्तुकर्मणि। ता एव तेषां शस्यन्ते देवतायतनेष्वपि। चतुःषष्टिपदं कार्यं देवतायतनं सदा। द्वारं च मध्यमं तत्र समदिक्स्थं प्रशस्यते। यो विस्तारो भवेद्यस्य द्विगुणा तत्समुन्नतिः। उच्छ्रायाद्यस्तृतीयोंऽशस्तेन तुल्या कटिर्भवेत्। विस्तारार्धं भवेद्भौ भित्तयोऽन्याः समन्ततः। गर्भपादेन विस्तीर्णं द्वारद्विगुणसुच्छ्रितम्। उच्छ्रायात्पादविस्तीर्णा शाखा तद्दुदुम्बरः। विस्तारपादप्रतिमं बाहुल्यं शाखयोः कृतम्। त्रिपञ्चसप्तनवभिः शाखाभिस्तत्प्रशस्यते। अधःशाखाचतुर्भागे प्रतीहारौ निवेशयेत्। शेषं मङ्गल्यविहगैः श्रीवत्सस्वस्तिकैर्घटैः। मिथुनैः पत्रवल्लीभिः प्रमथैश्चोपशोभयेत्। द्वारमानाष्टभागोना प्रतिमा स्यात्पिण्डिका। द्वौ भागौ प्रतिमा तत्र तृतीयांशश्च पिण्डिका। मेरुमन्दरकैलासविमानच्छन्दनन्दनाः। सप्तषट्पञ्चगरुडनन्दिवर्द्धनकुञ्जराः। स्वस्तिकोऽथ हयो हंसः सर्वतोभद्रको घटः। सिंहो दत्तश्चतुष्कोणः षोडशाष्टाश्रयस्तथा। इत्येते विंशतिः प्रोक्ताः प्रासादाः संग्रहा मया। यथोक्तानुक्रमेणैव लक्षणानि वदाम्यतः। तत्र षडश्रिभैरुदयौभौ विचित्रकुञ्जरश्च। द्वारैर्युक्तश्चतुर्भिर्हास्त्रिंशद्धस्तविस्तीर्णः। त्रिंशत्तायामो दशभौमो मन्दरः शिखरयुक्तः। कैलासोऽपि शिखरवान् चतुर्विंशोऽष्टभौमश्च। त्रिंशगवाक्षकयुक्तो विमानसंज्ञस्त्रिंशत्प्रकायामः। नन्दन इति षड्भौमो द्वात्रिंशः षोडशाश्रयुतः। दत्तः सप्तनामा पद्मः पद्माकृतिः शयानश्च। षट्त्रिंशैकेन भवेदेकैव च भूमिका तस्य। गरुडाकृतिश्च गरुडो नन्दीति च षट्चतुष्कविस्तीर्णः। कार्यश्च सप्तभौमो विभूषितोऽष्टभिश्च विंशत्या। कुञ्जर इति गजपृष्ठः षोडशहस्तः समन्ततो भूयात्। षट्हस्तोऽष्टभौमः षोडशकश्चित्रचन्द्रशाला भवेद्दशभौ। इष्ट एकभूमिषट्को द्वादशहस्तः समन्ततो दत्तः। हंसो हंसाकारो घटोऽष्टहस्तः कलसरूपः। द्वारैर्युक्तश्चतुर्भिर्वृत्तशिखरो भ-

वति सर्वतोभद्रः। वज्ररुचिरचन्द्रशालः षड्विंशः पञ्चौजसच। सिंहः सिंहाक्रान्तो द्वादशकोष्ठोऽष्टहस्तविस्तीर्णः। चत्वारोऽङ्गनरूपाः पञ्चाशद्युतस्तु चतुरस्रः। भूमिकाङ्गमानेन मयखाष्टोत्तरं शतम्। सार्धं हस्तत्रयं चैव कथितं विश्वकर्मणा। प्राङ्मुखं स्वपतयद्वास्तु मतमेकं विपश्चितः। कपोतपालिसंयुक्ता न्यूना गच्छन्ति तल्पताम्। प्रासादलक्षणमिदं कथितं समासाद्गर्गेण यद्विरचितं तदिहास्ति सर्वम्। मन्वादिभिर्विरचितानि पृथूनि यानि तन्नास्ति प्रति मयात्र कृतोऽधिकारः"। तत्प्रतिष्ठाविधिश्च मठप्रतिष्ठाशब्दे वक्ष्यते।

**देवग्रह** पु० देवगणशब्दे सुश्रुतोक्ते यक्षभेदे।

"यः यक्षति नरो देवान् जापदा यजितोऽपि वा। तस्मादाति स तु क्षिप्रं तन्तु देवग्रहं विदुः"भा०व०१४५अ०

**देवङ्गम** त्रि० देवं गच्छति गम–वेदे ख। देवगामिनि "यस्यां राज्ञोऽग्नि होत्रायां देवङ्गमाय" शत०ब्रा० ११।६।१।१२ लोके तु णिनि देवगामीत्येव।

**देवचक्र** न० सत्राङ्गे १अभिप्लवभेदे "परि यद्वा एतद्देवचक्रं यदभिप्लवः" ऐत०ब्रा० ४।१५ "देवचक्रे वा एते पृष्ठ्यप्रतिष्ठिते। यजमानस्य यात्मानं तं कृतो परिक्रामेते य यो चैवं विदुषां दीक्षितानां यापकं सत्रे कीर्तयन्तेऽस्य देवचक्रे शिरन्छिन्द्यो दशरात्र उद्भिः पृष्ठ्याभिप्लवौ चक्रे" शत०ब्रा० १२।२।२।२ यागलोके देवताभेदोपास्यतायागके २चक्रभेदे यथा

"पूर्वपश्चिमभेदेन षष्टरेखां समालिखेत्। यामादि दक्षिणान्तञ्च रेखा दश समालिखेत्। पञ्चगेहे पुरकाङ्कः सर्वाधोद्धारकाङ्ककान्। तन्मध्ये रचवेदाङ्कं देवताष्टकसंयुतम्। पुरकाङ्कमाद्यगेहे सप्तर्षियुतमालिखेत्। तद्दक्षिणे द्वादशञ्च दत्ते च नवमन्यथा। तद्दक्षेऽष्टादशकं तद्दक्षे षोडशकं ततः। पुरकाङ्कं तले लेख्य इन्द्राद्यङ्कञ्च दक्षतः। इन्द्रगेहे च शतकं विधिविद्याफलप्रदम्। धर्मगेहे शून्यसप्तयुगलं विलिखेत् बुधः। अनन्तमन्दिरे नाथ! शून्याष्टवसुरेव च। कालीगेहे शून्यवेदरामाङ्कं विलिखेत्ततः। धूमावतीमन्दिरे च शून्यखेषुनिशापतीन्। इन्द्राधो दक्षतो लेख्या अङ्कावन्द्राधिदेवता। शून्यषडब्धिसंयुक्तं सर्वत्र दक्षतो लिखेत्। तथाश्विनीकुमारौ च शून्यान् नयुगमेरकौ। ततपश्चात् सूर्यगेहे च सङ्काश्च समन्वितम्। तारिणीमन्दिरस्याङ्कं शून्यवेदषडात्मकम्। वगलाया गेहस्थं शून्याष्टचन्द्रसंयुतम्। ततश्चन्द्रगृहस्याधो वायुगेहं मनोरमम्। रन्ध्रवेदात्मकं गेहं सर्वसिद्धिप्रदायकम्। राहुगेहं महापापं शून्य शून्यमधिप्रियम्। पश्चादर्कगृहस्यैव खशून्ययुगलात्मकम्। षोडशीमन्दिरे शून्यषडब्धिसमाहितम्। मातङ्गीमन्दिरे शून्यरन्ध्रचन्द्रसमन्वितम्। वायोरधोवरुणस्य गृहं सप्तर्षिप्रियम्। तारिणीगेहमध्ये च शून्याष्टकसमन्वितम्। बुधगेहस्थिताङ्कञ्च शून्यचन्द्रयुगात्मकम्। भुवनेशीमन्दिरस्थं शून्याष्टचन्द्रमण्डलम्। प्रत्यङ्गिरामन्दिरस्थं शून्यषडर्षिप्रियम्। वरुणाधः कुबेरस्य गृहस्थं षडयुग्मकम्। आनन्दभैरवीगेहे दशकं परिकीर्तितम्। धरणीगृहमध्ये च शून्ययुग्मेन्दुसंयुतम्। भैरवीगृहमध्यस्थं शून्यं युगलचन्द्रकम्। बालागृहस्थं शून्यब्धिचन्द्रमण्डलसंयुतम्। कुबेराधः सुखं चक्रस्थिताङ्कं सर्वसिद्धिदम्। ऐशानस्य गृहस्यैव सप्तशून्ययुगात्मकम्। तिरस्करिण्या गेहस्थं सङ्काङ्कसमन्वितम्। सिद्धिलीमन्दिरं पश्चादष्टचन्द्रसमन्वितम्। छिन्नमस्तागृहं पश्चात् शून्याष्टचन्द्रमण्डलम्। वागीश्वरीगृहं पश्चात् खसप्तचन्द्रमण्डलम्। महाफलप्रदातारं धर्मं धरति तस्य न। ऐशानस्य ह्यधोगेहे वटुकस्य गृहं ततः। शून्याष्टमाद्यं खगृहं धर्मार्थकाममोक्षदम्। तत्पश्चात् डाकिनीगेहं खशून्य मुनिसंयुतम्। कृत्तिसाधकसख्यं हि चक्रादेव न संशयः। खगृहे खीयमन्त्रञ्च फलदं परिकीर्तितम्। भीमादेवी गृहं पश्चात् खसप्तचन्द्रमण्डलम्। भयदं सर्वदेशे तु वर्जयेत्तु गृहान्तरम्। सचर्णं लिखेत् शेषगृहयोः पण्डितोत्तमः। इन्द्रगेहावधि धीरो ककारादिकवर्णकम्। चकारान्तं लिखेत् तत्र गणयेत् साधकोऽन्ततः। पुरकाङ्कमूर्ध्वदेशे ह्यारकाङ्कमधोलिखेत्। निजनामाक्षरं यत्र तत्कोष्ठाङ्कं महेश्वर!। नीत्वा च पूरवेद्विद्वान् खखगेहोर्ध्वदेशकैः। यङ्कैस्ततो हरेन्नाथ! यधोऽङ्के ह्यार्यशेषकम्। विन्यासरूपे देवतानां तदङ्कः शुभदः स्मृतः। अत्यल्पशुभदः प्रोक्तः साधकस्यातिखावहः। एकाक्षरे महाविद्यं तत्रापि गणयेच्च च। स्त्रीयाङ्कः शून्यगामी च देवताङ्कं ततः प्रभो!। तदा नैव शुभं विद्यादशुभाय प्रकल्पते। एके धनमवाप्नोति द्वितीये राजवल्लभः। तृतीये जयसिद्धिः स्यात् चतुर्थे मरणं ध्रुवम्। पञ्चमे पञ्चवाणः स्यात् षष्ठे दुःखोत्कटानि च। दैवानां शक्तिवर्णाश्चाभिलङ्काः परिकीर्तिताः। वैष्णवानां विशेषो-

ञ्च पञ्चमाङ्को निषेधकः । येषां वासां देवतानामिच्छा तिष्ठति चेतसि । तन्नामग्रहणादेव यष्टैश्वर्ययुतो भवेत् । यद्देवताश्रितायै तु तदृष्टद्वारं करन्ति ते । जह्वाङ्कुरेण पूरयित्वाज्यधोङ्कुरेण करेत् सदा" ।

**देवचर्य्या** स्त्री ६त० । १देवचरिते अद्भुते २देवार्थे चरणे होमादौ च "श्रिया युतमनिर्देश्यं देवचर्योपशोभितम्" (आश्रमम्) भा०व० १४५ अ० ।

**देवचिकित्सक** पु० द्वि०व० ६त० । स्वर्वैद्ययोरश्विनीकुमारयोः हेमा० । आयुर्वेदशब्दे ७७६ पृ०तयोस्तद्वात्मकथा दक्षा । २द्वित्वसंख्यायां तदधिष्ठातृके २अश्विनीनक्षत्रे च

**देवच्छन्द** पु० देवैश्छन्द्यते प्रार्थ्यते छन्द्-कर्मणि घञ् । शतवर्षिके क्षारे अमरः । "शतमष्टयुतं क्षारो देवच्छन्दोऽयमीतिरेकयुता" इन्द्र०सं० उक्ते २क्षारे च ।

**देवच्छन्दस** न० देवप्रियं छन्दः टच् समा० । वैदिके श्रोत्रिये छन्दोभेदे ।

**देवज** त्रि० देवाज्जायते जन-ड । १देवजाते २सामभेदे न० । "तस्मादाहुः सर्वं साम देवजं सामेति" शत०ब्रा०२।४। २।१६। ऋषाङ्सहोदरे सूर्यवंश्ये २संयमनदपुत्रभेदे पु० । "तत्पुत्रात् संयमादासीत् ऋषाश्वः सहदेवजः" भाग० ६। २।२२ देवजेन सह वर्त्तमानः ऋषाश्वः । सूर्यसम्भादिते ४ऋतौ पु०"सप्तधमाङ्करेकजं षड्द्वियमा ऋषयो देवजाः" ऋ० १।१६४।५। "सप्तानामृतूनां मध्ये सप्तधं सप्तमऋतुम् । "षट् च छन्दसि" पा० इति षट् । एकजमेकेनोत्पन्नमाङ्कः कालतत्त्वविदः । चैत्रादीनां द्वादशानां मासानां द्वयमेकेन वसन्तादयः षड्ऋतवो भवन्ति । अधिकमासेनैक उत्पद्यते सप्तमर्तुः । न च तादृशो मास एव नास्तीति मन्तव्यम् । "अस्ति त्रयोदशो मास इत्याङ्कुरिति"श्रुतेः । तदेवोच्यते । षड्द्वि यमाः । इच्छब्द एव कारार्थः । षडेव ऋतवो मासद्वयरूपा ऋषयो मन्त्रारः । ते च देवजाः । देवादित्याज्जाता इत्येवमाङ्कः । सप्तमधारस्य त्रयोदशस्य मासस्य देवाभावः । "निः सूर्यो ऽधिकमासो हि मण्डलं तपते रवेरित्यादि"श्रुतेः । तस्मात् षडेव देवजाः ऋदेवज एकः" भा० "सूर्यसंक्रान्तिरहितत्वान्निःसूर्यकत्वं तेन ऋतूनां चान्द्रत्वमपि गम्यते ।

**देवजग्ध** त्रि० ६त० । १देवभक्षिते २कटुके न० हेमच०अल्पार्थे कन् । देवजग्धकम् अल्पकटुके अमरः ।

**देवजन** पु० देवरूपोजनः । देवरूपे जने "भक्षयित्वाभ्यात्मनः स्वधा निनयते त्रिः सर्वदेवजनेभ्यः स्वाहेति"आश्व० श्रौ०२।४।१२। देवानां जनः । २यज्ञदेवे तदुपकरणभूते गन्धर्वादौ । [शब्दार्थचि०।

**देवजनविद्या** स्त्री ६त० । गन्धर्वविद्यायां नृत्यगीत्यादौ

**देवजात** त्रि० १देवेभ्यो जातः । देवेभ्यो जाते "यद्वाजिनो देवजातस्य सप्तेः" ऋ०।२६।१ ६त० । २देवानां गणे न० "यान्येतानि देवजातानि गणश आख्यायन्ते वसवो रुद्रा आदित्या विश्वेदेवा मरुतः इति" शत०ब्रा० १४।४।२।२६

**देवजामि** स्त्री देवानां जामिरिव । १देववन्धौ "अयामि घोष इन्द्र ! देवजामिरिरज्यन्" ऋ० ७,२१।२ "देवजामिर्देवानां बन्धुः" भा० । ६त० । २देवानां बन्धौ च "विश्वे ते सख्र ! जनिम देवजामीनां पुत्रोऽसि यमस्य करणः" यजु० ६।४६।२

**देवट** त्रि० दिव-अटन् । शिल्पिनि उणादिकोषः

**देवट्टी** स्त्री देवं देवशब्दमट्टते अतिक्रामति अट्ट-अण् उप०स० अक० गौरा० ङीष् । गङ्गाचिल्लाम् शब्दार० ।

**देवतर** त्रि० अतिशयेन देवः दीप्तः देवको वा तरप् । १अतिशयदीप्ते २अतिदेवके च ततः शुभ्रा० ढक् । दैवतरेय तदपत्ये पुंस्त्री० स्त्रियां ङीप् ।

**देवतरु** पु० देवप्रियस्तरुः । १मन्दारादिवृक्षे "पञ्चैते देवतरवः मन्दारः पारिजातकः । सन्तानः कल्पवृक्षश्च पुंसि वा हरिचन्दनम्" अमरः २चैत्यवृक्षे च शब्दार्थचि०

**देवता** स्त्री देव+स्वार्थे तल् "क्वचित् स्वार्थिका अपि प्रत्ययाः प्रकृतितो लिङ्गवचनान्यतिवर्तन्ते" भाष्योक्तेः पुंस्त्वातिक्रमेण स्त्रीत्वम् । देवे निर्जरे । देवतात्वञ्च "वेदमेवलक्षणोद्देश्यत्वम् उद्देश्यत्वञ्च तस्योद्दिश्यारोपस्थानविषयत्वमिति" आद्यविवेकः । तच्च मन्त्रस्तुत्यत्वं वा । तदुभयं पितृनामप्यस्तीति आद्यादौ तेषां देवतात्वम् । मन्त्रेण द्योत्यत्वं वा देवतात्वं यथाह ऋग्वेदभाष्योपोद्घाते साधवः "तथा देवनार्थदीव्यतिधातुनिमित्तो देवशब्द इत्येतदाख्यायते । "देवनाद्दैवोऽभूदिति तद्देवानां देवत्वमिति" । यतो द्योत्यतीति देवः मन्त्रेण द्योत्यत इत्यर्थः । "यस्य यस्य हि मन्त्रस्य उद्दिष्टा देवता हि या । तदाकारं भवेत्तस्य देवत्वं देवतोच्यते"योगियाज्ञ० । वैदिकमन्त्रभेदे देवताभेदाः सर्वानुक्रमिकायामुक्तास्तत्रैवावसेयाः । तन्मूलं हेमा०व्र०ख० उक्तमिह विस्तरभयानोद्धृतम् । मन्त्राणां तज्ज्ञाने फलमज्ञाने निन्दामाह हेमा०व्र० योगियाज्ञ० "ऋषिं छन्दो दैवतञ्च विनियोगञ्चवै च । वेदितव्यं

प्रयत्नेन ब्राह्मणेन विशेषतः। अविदित्वा तु यः कुर्याद् यजनाध्ययनं जपम्। होममन्नजले दानं तस्य चाल्पफलं भवेत्"। तथा "यो विजानाति मन्त्राणामार्षं छन्दश्च दैवतम्। विनियोगं ब्राह्मणञ्च मन्त्रार्थं ज्ञानकर्म च। एकैकस्य ऋचेः सोऽपि मन्त्रोक्तातिथिवद्भवेत्। देवतायाश्च सायुज्यं गच्छत्यत्र न संशयः। पूर्वोक्तेन प्रकारेण ऋष्यादीन् वेत्ति यो द्विजः। अधिकारो भवेत्तस्य रुद्रस्यादिषु कर्मसु"। ब्राह्मणेन मन्त्रेतरवेदभागेन सह वेदितव्यमित्यर्थः उत्तरत्र विनियोगब्राह्मणयोर्नैयत्येन निर्देशात्। तद्विरुद्धिरपि तेनैवोत्तरत्र दर्शिता यथा "नैरुक्तं यस्य मन्त्रस्य विनियोगं प्रयोजनम्। प्रतिष्ठानं स्तुतिश्चैव ब्राह्मणं तदिहोच्यते। एवं पञ्चविधं योगं जपकाले समुच्चरेत्। होमे चान्नजले योगे स्वाध्याये यजने तथा" इति। २प्रदेवद्रव्यस्वाधिपत्यौ च दानशब्दे ३६१६ पृ० तद्विशेषो दृश्यः। देवताभेदाश्च निरुक्ते दैवतकाण्डे उक्ता यथा

"अग्न्यादिदेवपत्न्यन्ता देवताकाण्डसञ्ज्ञिताः। वाय्वादयो भगान्ताः स्युरन्तरिक्षस्थदेवताः। सूर्यादिदेवपत्न्यन्ता द्युस्थाना देवता इति"। त्रयस्त्रिंशत्पतिशब्दे ३३५६ पृ० देवतानां प्राधान्यतस्त्रयस्त्रिंशत्त्वमुक्तं किन्तु स्वस्वगणपत्नीसहितानां तासां त्रयस्त्रिंशत्कोटिसंख्यात्वं यथोक्तं पद्मपु० उत्तरख० "सदारा विबुधाः सर्वे स्वानां स्वानां गणैः सह। त्रैलोक्ये तेत्रयस्त्रिंशत्कोटिसंख्यतयाऽभवन्"। तेषां गणभेदाश्च गणदेवताशब्दे २५०२ पृ० उक्ताः दृश्याः। तन्मध्येऽधिकारिभेदेन देवताभेदा यथा "या यस्याभिमता पुंसः सा हि तस्यैव देवता। किन्तु कार्यविशेषेण पूजिता चेष्टदा नृणाम्। विशेषात् सर्वदा नार्या नियमोल्लङ्घनं त्यज नृप!। नृपाणां दैवतं विष्णुस्तथैव च पुरन्दरः। विप्राणामग्निरादित्यो ब्रह्मा चैव पिनाकधृक्। देवानां दैवतं विष्णुर्दानवानां त्रिशूलभृत्। गन्धर्वाणां तथा सोमो यक्षाणामपि कथ्यते। विद्याधराणां वाग्देवी साध्यानां भगवान् हरिः। रक्षसां शङ्करो रुद्रः किन्नराणाञ्च पार्वती। ऋषीणां दैवतं ब्रह्मा महादेवश्च शूलभृत्। मनूनां स्वायुवा देवी तथा विष्णुः सभास्करः। रुद्रस्थानाञ्च सर्वे स्युर्ब्रह्मा वै ब्रह्मचारिणाम्। वैखानसस्थानिका स्याद् यतीनाञ्च महेश्वरः। भूतानां भगवान् रुद्रः कुमाराणां विनायकः। सर्वेषां भगवान् ब्रह्मा देवदेवः प्रजापतिः। इत्येवं भगवान् ब्रह्मा स्वयं देवोऽभ्यभाषत" इति कूर्म० पु०। देवानां वर्षभेदा भा० शा० मोक्षधर्मे

"आदित्याः क्षत्रियास्तेषां विशश्च मरुतस्तथा। अश्विनौ च स्मृतौ शूद्रौ तपस्युग्रे समास्थितौ। स्मृतास्त्रिरसा देवा ब्राह्मणा इति निश्चयः। इत्येतत् सर्वदेवानां चातुर्वर्ण्यं प्रकीर्तितम्"। वैष्णवानां गणेशाद्यनन्तरं सनकादिवैष्णवानां पूज्यत्वेन देवतात्वमुक्तं यथा

"यत्र यत्र सुराः पूज्या गणेशाद्यास्तु कर्मिणाम्। विष्णुर्चने तत्र तत्र वैष्णवानां हि वैष्णवाः। विष्वक्सेनं ससनकं सनातनमतःपरम्। सनन्दं सनत्कुमारञ्च पञ्चैवं पूजयेत्ततः" पद्म० उत्तरख०। देवषट्कं यथा "गणेशञ्च दिनेशञ्च वह्निं विष्णुं शिवं शिवाम्। देवषट्कञ्च संपूज्य नमस्कृत्य विचक्षणः" ब्रह्मवै० प्रक्र०। मासविशेषे देवताभेदपूजा मन्त्रमहोदधावुक्ता यथा

"अन्येष्वप्युपरागार्द्धोदयवास्यायनादिषु। कुर्यादन्नभयोगेषु विशेषाद्देवतार्चनम्। यथा यथेष्टदेवेषु श्रद्धा भक्तिः समेधते। प्राप्यते तैरयत्नेन मनोऽभीष्टं तथा तथा। शुचौ तत्तद्दले कुर्यादेवप्रस्थापनोत्सवम्। अर्चे तथैव देवानामत्थापनविधिं बुधः। माघकृष्णचतुर्दश्यां विशेषाच्छिवपूजनम्। आश्विनाद्यनवाहेषु दुर्गां पूजां यथाविधि। गोपालं पूजयेद्विद्वान्नभःकृष्णाष्टमीदिने। रामं चैत्रे सिते पक्षे नवम्यामर्चयेत् सुधीः। वैशाखादि चतुर्दश्यां नरसिंहं प्रपूजयेत्। यजेच्चक्रं चतुर्थ्यान्तु गणेशं भाद्रमाधवोः। महालक्ष्मीं यजेद्विद्वान् भाद्रकृष्णाष्टमीदिने। माघस्य शुक्लसप्तम्यां विशेषाद्दिननायकम्। या काचित् सप्तमी शुक्ला रविवारयुता यदि। तस्यां दिनेशं संपूज्य दद्यादर्घं प्ररोदितम्। तत्तत्कल्पोदितानन्यान् देवतामीतिवर्द्धनान्। विशेषनियमान् कृत्वा भजेद्देवमनन्यधीः। आषाढोकार्त्तिकीमध्ये किञ्चिन्नियममाचरेत्। देवसम्प्रीतये विद्वान् जपपूजादितत्परः। एवं यो भजते विष्णुं रुद्रं दुर्गां गणाधिपम्। भास्करं श्रद्धया नित्यं स कदाचिन्न सीदति"।

देशनादेशितचतुर्थ्यन्तपदनिर्देश्यत्वं देवतात्वम् अग्नये स्वाहेत्यादिमन्त्रएव देवतेति मीमांसकाः। तन्मतञ्च पूर्वपक्षविधया शब्दचि० उक्ता दूषितं तच्च अविषहशब्दे ४५६ पृ० दर्शितम्। देवतानां चैतन्ये विषहत्वे वा मन्त्राणामेव देवतात्वं श्राद्धवि० समर्थितं यथा "विषहत्वं चेन्द्रादीनामपि तिर्यगधिकरणे दर्शितं देव-

तात्वं हि तथाविधानां नेष्टमिति । नन्विन्द्रादीनां विग्रहवत्त्वे किं प्रमाणम् ? अर्थवाद इति चेन्न तस्य सिद्धेऽर्थेऽप्रामाण्यात् । कथं वा विग्रहवतामदेवतात्वम् ? ऐन्द्रं ऋषिरित्यादौ तद्धितादिभिः प्रकृत्यर्थस्य देवतात्वबोधनात् इन्द्रादिपदानि च सहस्रचक्षुरादिमतीषु व्यक्तिषु सख्यानि मन्त्रपरत्वे लक्षणाप्रसङ्गात् । उच्यते ऐन्द्रादिपदकामाधिकारिकविधिवाक्यस्वकामितुतिरत्न प्रमाणम् अन्यथा स्वर्गिणरोरेऽयनाद्यासः स्यात् । यत्राप्यर्थवादादैन्द्रादिपदप्राप्त्यवगतिः तत्रापि तत्फलपरत्वे रात्रिसत्रन्यायेनैव प्रमाणं विग्रहवतामिन्द्रादीनां सन्निधानस्य प्रत्यक्षबाधितत्वेन तथाविधानां पुज्यत्वासम्भवात् अगत्या तदाकारतया ध्यातस्य मन्त्रस्य लक्षितस्य देवतात्वमिति रहस्यम् । इन्द्राकारतया ध्यानादिन्द्रप्रीतिरभ्युपपन्ना । तथा च योगियाज्ञवल्क्यः "यस्य यस्य तु मन्त्रस्य उद्दिष्टा या च देवता । तदाकारं भवेत्तस्य दैवतं दैवतोच्यते" इति । नन्वेवं देवानां विग्रहवत्त्वे तेषामेवाराधितानां फलदातृत्वं कुतो न भवेत् ? अलमपूर्वकल्पनया । तथा च भविष्यपुराणे "यद्यद्द्रव्यं नरोऽरुष्टमादित्याय प्रयच्छति । तत्तस्य शतसाहस्रलाभादयति भास्करः" याज्ञवल्क्यः "आयुः पुत्रां धनं विद्यां स्वर्गं मोक्षं सुखानि च । प्रयच्छन्ति तथा राज्यं प्रीता नृणां पितामहाः" । तथा च देवताधिकरणसिद्धान्तविरोधः स्यात् । उच्यते देवानामिन्द्रादीनां पितॄणां यक्षादीनां युगमन्वन्तरादिभेदेन नानात्वावगमात् फलोदयकाले पूर्वेषां च्युताधिकारत्वेन फलदातृत्वायोगात् । अन्यस्य चानाराधितत्वेन फलदातृत्वायोगात् तत्तत्पूर्वं शब्दशक्तौ वाचकशब्दसद्भावात् सर्वत्रैव तदभिधानम् अतएव काम्ये क्रत्वर्थशक्तिलिङादिर्नित्ये निषेधे चापूर्वमाक्षेप्तुमुक्तम् । एवञ्चापूर्वानुप्रवेशात् सहकारितया यदि देवतापि फलदात्री न कचित् कोऽपि विरोधः" ।

**देवताजित्** पु॰देवतां जयति जि–क्विप् । १देवजयिनि असुरादौ भरतपुत्रसुमतेः २पुत्रभेदे च "भरतस्यात्मजः सुमतिर्नाम" इत्युपक्रमे "तस्याहङ्कारेणायां देवताजिन्नाम पुत्रोऽभूत्" भाग॰ ५।१५।२।

**देवताड** पु॰ देवः दीप्तः तालः डस्य लः । (देवताड) १स्थाते १द्वचे अमरः । २घोषकलतायाम् विश्वः । देवौ आदित्यचन्द्रौ ताडयति ताडि अच् उप॰स॰ । ३राहौ । देवनाय दीपनाय ताद्यतेऽसौ ताडि–कर्मणि अच् । ४यक्षौ च मेदि॰ । तस्योद्दीपनाय ताद्यमानत्वात् तथात्वम् । देवताडक स्वार्थे क । देवताडडक्के रत्नमाला ।

**देवतात** पु॰तन–क्त वा ङा ततएव तातः स्वार्थे अण् वा देवार्थं ततं १यज्ञे निघ॰"एषा देव देवतातेषवस्व" ऋ॰ ६।६७।२७। ६त॰ । २देवजनके कश्यपे च । तेनादित्यामादित्यादीनासुत्पादनात्तथात्वम् । ३मरीच्यादिषु "एते (मरीच्यादयः) मनूंस्तु सप्तान्यानसृजन् भूरितेजसः । देवान् देवनिकायांश्च महर्षींश्चामितौजसः" मनुः । ४हिरण्यगर्भे च "कर्मात्मनां च देवानां सोऽसृजत् प्राणिनां प्रभुः । साध्यानाञ्च गणं सृक्ष्मम्" मनुः ।

**देवतालि** पु॰ देव+स्वार्थे तालिच् । देवे "स आवह देवतातिं यविष्ठ !" ऋ॰ १।४६।४ देवतातिं देवं स्वार्थे तातिल्" भा॰

**देवताधिकरण** न॰ देवता कर्मसु तदधिकारित्वमनधिकारित्वं वाधिक्रियते विचार्यतेऽत्र अधि+कृ–आधारे ल्युट् । देवतानां यज्ञादावधिकारित्वतदभावयोरन्यतरसाधके न्यायभेदे । यज्ञादौ देवतानामनधिकारः इति मीमांसकाः । तत्र जै॰सू॰ भाष्यवार्तिकं यथा

"फलार्थत्वात् कर्मणः शास्त्रं सर्वाधिकारं स्यात्" सू॰ "इदमामनन्ति, दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत, ज्योतिष्टोमेन स्वर्गकामो यजेत" इत्येवमादि । तत्र सन्देहः किं यावत्किञ्चित् सत्वं, तत् सर्वम् अधिकृत्य एतदुच्यते, उत समर्थम् अधिकृत्य ? इति । किं प्राप्तम् ? सर्वाधिकारः, अविशेषात् । नन्वचेतनाद्यो न किञ्चित् कामयन्ते, कथम् तेषाम् अधिकारः स्यात् ? उच्यते, मा भूत् अचेतनानाम्, तिरश्चस्तु अधिकृत्य यजेत इति ब्रूयात् । नन्वेवं तिर्यञ्चोऽपि न किञ्चित् कामयन्ते । न इति ब्रूमः, कामयन्ते सुखम्, एवं हि श्रूयते, धर्मौपयिकाः छायाम् उपसर्पन्ति, शीतेन पीडिताः आतपम् । आह, ननु तिर्यञ्च आसन्नं फलं चेतयन्ते, न कालान्तरफलं प्रार्थयन्ते, कालान्तरफलानि च कर्माणि । उच्यते, कालान्तरेऽपि फलं कामयमाना लक्ष्यन्ते, यथा चतुर्ग्रामान् उपवसतः पशुग्रामः, ग्रामेभ्यश्च अष्टग्रामान् । न चैषां व्याप्यव्यापकता, नियतनिमित्तत्वात्, न अनाहाराणामपि तस्मिन् काले दर्शनात्, समानाहाराणामपि अन्यस्मिन् काले अदर्शनात् । लिङ्गानि च वेदे भवन्ति, देवा वै सत्रमासत इत्येवमादीनि "देवतानाम् ऋणीणां वनस्पतीनाम् अधिकारं दर्शयन्ति । ननु कात्स्न्र्येन विधिम् उपसंहर्तुम् न शक्नुवन्ति इति अनधिकृताः ।

उच्यते, यागं कर्तुम् शक्नुवन्ति केचित्, तस्मात् यजेत इत्येवमादीनि अधिकरिष्यन्ति शक्नुवतः, विष्णुक्रमादिवचनानि तु अशक्तान् न अधिकरिष्यन्ति। तत्र योऽनुपदिष्टविष्णुक्रमादिकः स केवलं यागं करिष्यति, कः तत्र दोषः ?। द्रव्यपरिग्रहोऽपि देवयामः, हविष्यामः, अग्नये यामः इति उपचारात् अग्नेरेव तस्मात् अमनुष्याणामपि शक्नुवताम् अधिकार इति" भा० "कर्तृवा श्रुतिसंयोगाद्विधिः कात्स्न्र्येन गम्यते" सु० वाशब्दः पक्षं व्यावर्तयति। न चैतदस्ति, तिर्यगादीनामपि अधिकारः इति। कस्य तर्हि ?। यः समर्थः कृत्स्नं कर्म अभिनिर्वर्त्तयितुम्। न चैते, शक्नुवन्ति तिर्यगादयः कृत्स्नं कर्माभिनिर्वर्तयितुम्, तस्मात् एषां न सुखस्याभ्युपायः कर्म इति, कथं यो न शक्यते कर्तुम्, सोऽभ्युपायः स्यात् ? इति। न देवानां, देवतान्तराभावात्, न हि आत्मानम्, उद्दिश्य त्यागः सम्भवति, त्याग एवासौ न स्यात्, न ऋषीणाम्, अर्थित्वाभावात्, न ऋग्वादयो ऋग्वादिभिः सगोत्रा भवन्ति, न चैषां सामर्थ्यं प्रत्यक्षम्" (देवानां देवतान्तरभावादिति येषां शब्द एव देवताभिप्रेता, तेषामयमभ्युपगमो यन्यः, शक्यते स्त्रीन्द्रे चापीन्द्रशब्दोच्चारणेन हविष्यत्वम्। तस्मात् कर्मैव देवतामभिप्रेत्य एतद्वाभ्यधिति तन्नरत्नम्)। यानि पुनर्लिङ्गानि, देवा वै सत्रमासत इत्येवमादीनि, अर्थवादाः ते विधिप्ररोचनार्थाः। विद्यते हि विधिरन्यः तेषु सर्वेषु, न च विधेर्विधिनैकवाक्यभावो भवति, वचनव्यक्तिभेदात्। स्तुतिस्तु सा, इत्यं नाम सत्राणि आसितव्यानि, यत् कृतवन्त्या अपि आसते देवाः, आसन्नचेतना अपि तिर्यञ्चः, अचेतना अपि वनस्पतयः, किमङ्ग पुनर्विद्वांसो मनुष्याः" भा०

देवानामधिकारित्वं विशेषतो ब्रह्मविद्यानेऽधिकारित्वमिति वेदान्तिनः तच्च भा०सु० भाष्याभ्यां समर्थितम् तच्च ऋषिशब्दे ४५५ पृ० दृश्यम्।

**देवतानुक्रम** क्ली० इत०। देवानामुद्देशे "नामधेयानि मन्त्राश्च दक्षिणाश्च व्रतानि च। देवतानुक्रमः कृत्स्नः संकल्पस्तन्त्रमेव च" भाग० २।६।२६

**देवताप्रतिमा** स्त्री इत०। देवतानां प्रतिमूर्त्तौ तदङ्गमानभेदादिकं सामान्यविशेषतः इ०सं०५८अ०उक्तं यथा "देवागारद्वारस्याष्टांशोनस्य यत्तृतीयोंऽशः। तत्सिद्धिका प्रमाणं प्रतिमा तद्द्विगुणपरिभाषा। खैरङ्गुलप्रमाणैर्हीदशविस्तीर्णमायतं च सूत्रम्। नग्नजिता तु चतुर्दश दैर्घ्येण द्राविडं कथितम्। नासाललाटचिबुकग्रीवाश्रवणकुलास्तथा कर्णौ। हे अङ्गुले च हनुके चिबुकं द्व्यङ्गुलं विस्तृतम्। अष्टाङ्गुलं ललाटं विस्तारात् द्व्यङ्गुलात्परे शङ्खौ। चतुरङ्गुलौ तु शङ्खौ कर्णौ तु द्व्यङ्गुलं पृथुलौ। कर्णोपान्तः कार्योऽर्द्धपञ्चमेभ्रूसमेन सूत्रेण। कर्णश्रोतः शुकनासकं च नयनप्रलम्बसमम्। चतुरङ्गुलं वसिष्ठः कथयति नेत्रान्तकर्णयोर्विवरम्। अधरोऽङ्गुलप्रमाणस्तस्यार्धेनोत्तरोष्ठश्च। अर्धाङ्गुला तु गोच्छा वक्त्रं चतुरङ्गुलायतं कार्यम्। विपुलं तु सार्द्धमङ्गुलं मध्यात्तच्चद्व्यङ्गुलं व्यात्तम्। द्व्यङ्गुलतुल्यौ नासापुटौ च नासा पुटापतो ज्ञेया। स्याद् द्व्यङ्गुलसच्छ्रायचतुरङ्गुलमन्तरं चाक्ष्णोः। द्व्यङ्गुलमितोऽक्षिकोशो हे नेत्रे तन्निभासिका तारा। दृक् तारापङ्क्तांशोनेत्रविकाशोऽङ्गुलं भवति। पर्यन्तात्पर्यन्तं दश भ्रुवोऽङ्गुलं भ्रुवोर्लेखा। भ्रूमध्यं द्व्यङ्गुलकं भ्रूर्दैर्घ्येणाङ्गुलचतुष्कम्। कार्या तु केशरेखा भ्रूवत्त्वसमाङ्गुलार्द्धविस्तीर्णा। नेत्रान्ते करवीरकसुपत्त्रसदृङ्मितम्। द्वात्रिंशत्परिणाहाच्चतुर्दशायामतोऽङ्गुलानि शिरः। द्वादश तु चिबुकमेषि दृश्यन्ते विंशतिरङ्गुलाः। खात्रं सकेशनिचयं षोडश दैर्घ्येण नग्नजित्प्रोक्तम्। ग्रीवा दशविस्तीर्णा परिणाहाद्विंशतिः सैका। कण्ठाद्द्वादश हृदयं हृदयात्त्रिंशत्तत्प्रमाणेन। नाभीमध्यान्मेढ्रान्तरं च तत्तुल्यमेवोक्तम्। ऊरू चाङ्गुलमानैश्चतुर्युता विंशतिस्तथा जङ्घे। जानुकपिण्डे चतुरङ्गुले च पादौ च तत्तुल्यौ। द्वादशदीर्घौ षट् पृथुतया च पादौ त्रिकायताङ्गुलौ। पञ्चाङ्गुलपरिणाहौ प्रदेशिनी त्र्यङ्गुलं दीर्घा। अष्टांशाष्टांशोनाः शेषाङ्गुलयः क्रमेण कर्तव्याः। स चतुर्थभागसमङ्गुलसत्सेधोऽङ्गुलकस्योक्तः। अङ्गुलस्य नखः कथितश्चतुर्थभागोनमङ्गुलं तज्ज्ञैः। शेषनखानामङ्गुलं क्रमात् किञ्चिदूनं वा। अङ्गुल्ये परिणाहश्चतुर्दशोक्तस्तु विस्तरः पञ्च। मध्ये तु सप्त विपुला परिणाहात्त्रिगुणिताः सप्त। अष्टौ तु जानुमध्ये वैपुल्यं त्र्यष्टकं तु परिणाहः। विपुलौ चतुर्दशोरू मध्ये द्विगुणश्च तत्परिधिः। कटिरष्टादशविपुला चत्वारिंशच्चतुर्युता परिधौ। अङ्गुलमेकं नाभिर्वेधेन तथा प्रमाणेन। चत्वारिंशद् द्विगुणा नाभी मध्येन मध्यपरिणाहः। स्तनयोः षोडश चान्तरमूर्द्धं कचे षडङ्गुलिके। कार्यावष्टावंसौ द्वादश बाहू तथा प्रबाहू

च। बाहू षड्विंशौ प्रतिबाहू त्रयोदशचतुष्कम्। षोडश बाह्वमूले परिणाहोदरादशाष्टसप्ते च। विस्तारेण करतलं षडङ्गुलं सप्त दैर्घ्येण च। पञ्चाङ्गुलानि मध्या प्रदेशिनी मध्यपर्वद्वयहीना। अनया तुल्या चानामिका कनिष्ठा तु पर्वोना। पर्वद्वयमङ्गुष्ठः शेषाङ्गुलयस्त्रिभिस्त्रिभिः कार्याः। नखपरिमाणं कार्यं सर्वासां पर्वणोऽर्धेन। देशानुरूपभूषणवेषालङ्कारमूर्तिभिः कार्या। प्रतिमा लक्षणयुक्ता सन्निहिता इष्टिदा भवति। दशरत्नतनयो रामोवत्सश्च वैरोचनिः शतं विंशम्। द्वादशाङ्गुल्या शेषाः प्रवरसमन्यूनपरिमाणाः। कार्योऽष्टभुजो भगवांश्चतुर्भुजो द्विभुज एव वा विष्णुः। श्रीवत्साङ्कितवक्षाः कौस्तुभमणिभूषितोरस्कः। वनमालीकृतसमग्रामः पीताम्बरनिवसनः प्रसन्नमुखः। कृष्णकिरीटधारी पीनगभीरःस्थलांसभुजः। खड्गगदाशरपाणिर्दक्षिणतः शान्तिदचतुर्थकरः। वामकरेषु च कार्मुकखेटकचक्राणि शङ्खश्च। अथ च चतुर्भुजमिच्छति शान्तिद एको गदाधरवान्यः। दक्षिणपार्श्वे खेटं वामे शङ्खश्च चक्रञ्च। द्विभुजस्तु शान्तिकरो दक्षिणहस्तोऽपरश्च शङ्खधरः। एवं विष्णोः प्रतिमा कर्तव्या भूतिमिच्छद्भिः। बलदेवो हलपाणिर्मदविभ्रमलोचनश्च कर्तव्यः। बिभ्रत् कृष्णलमेकं शङ्खेन्दुमृणालगौरवपुः। एकोनांशा कार्या देवी बलदेवलक्ष्मणयोर्मध्ये। कटिसंस्थितवामकरा सरोजमितरेण चोद्वहती। कार्या चतुर्भुजा सा वामकराभ्यां सपुष्पकं कमलम्। द्राभ्यां दक्षिणपार्श्वे वरमक्षिश्चचक्रं च। वामेष्वष्टभुजायाः कमण्डलुचापमम्बुजं शास्त्रम्। वरशरदर्शयुक्ताः सव्यभुजाः साक्षसूत्राश्च। शाम्बश्च गदाहस्तः प्रद्युम्नश्चापभृत् सुरूपश्च। अनयोः स्त्रियौ च कार्ये खेटकनिस्त्रिंशधारिण्यौ। ब्रह्मा कमण्डलुकरचतुर्मुखः पद्मजासनस्थश्च। स्कन्दः कुमाररूपः शक्तिधरो बर्हिकेतुश्च। एकश्चतुर्विंशाखो द्विपो महेन्द्रश्च वज्रपाणित्वञ्च। तिर्यग्ललाटसंस्थं तृतीयमपि लोचनं चिह्नम्। यमोः शिरसीन्दुकला दण्डध्वजोऽपि च तृतीयमूर्ध्वम्। शूलं धनुः पिनाकं वामार्धे वा गिरिसुतार्धम्। पद्माङ्कितकरचरणः प्रसन्नमूर्तिः सुनीलवेषश्च। पद्मासनोपविष्टः पितेव जगतो भवेद्बुद्धः। आजानुलम्बबाहुः श्रीवत्साङ्कः प्रशान्तमूर्तिश्च। दिग्वासास्तरुणो रूपवांश्च कार्योऽर्हतां देवः। नासाललाटजङ्घोदरगण्डवक्षांसि चोन्नतानि रवेः। कुर्यादुदीच्यवेषं गूढं पादावृतौ यावत्। बिभ्राणः सकरद्वये पार्श्वयोः पद्मजे सकुटधारी। कृष्णलभूषितवदनः प्रलम्बहारो वियद्वृतः। कमलोदरद्युतिसमः कम्बुकसुग्रः स्थितप्रसन्नमुखः। रत्नोज्ज्वलप्रभामण्डलश्च कर्तुः शुभकरोऽर्कः। सौम्या तु हस्तमात्रा वसुदा हस्तद्वयोच्छ्रिता प्रतिमा। क्षेमसुभिक्षाय भवेत् त्रिचतुर्हस्तप्रमाणायाम्। रूपमयमत्यङ्गायां हीनाङ्गायामकल्पता कर्तुः। शातोदर्यां पुत्रक्षयम् अर्थविनाशः क्रशायां च। मरणं तु सप्ततायां शस्त्रनिपातेन निर्दिशेत्कर्तुः। वामावनता पत्नी दक्षिणविनता छिनच्त्यायुः। अन्यत्वमूर्ध्वदृष्ट्या करोति चिन्तामधोमुखी दृष्टिः। सर्वप्रतिमास्वेवं शुभाशुभं भास्करोक्तसमम्। सिक्थ्न इस्तपरिधिं दैर्घ्येणाष्टत्रं तत् त्रिधा विभजेत्। मूले तत्तुहरत्नं मध्ये त्वष्टाभि हस्तमतः। चतुरस्रमवनिघाते मध्यं कार्यं तु पिण्डिकाकाण्डे। दण्डोच्छ्रायेण समा समन्ततः पिण्डिका श्रेष्ठात्। क्रमदीर्घं देवघ्नं पार्श्वविहीनं पुरस्य नाशाय। यस्य चतं भवेन्मस्तके विनाशाय तद्विङ्गम्। मालधरः कर्तव्यः स्वनामदेवानुरूपकृतचिह्नः। रैवतोऽश्वारूढो मृगयाक्रीडादिपरिवारः। दण्डी यमो महिषगो हंसारूढश्च पाशभृद्वरश्चः। नरवाहनः कुबेरो वामः किरीटी हस्तकुक्षिः। प्रमथाधिपो गजमुखः प्रलम्बजठरः कुठारधारी स्यात्। एकविंशाखो बिल्वमूलककन्दं सुनीलकन्दम्"।

देवभेदेन मूर्त्तिभेदलक्षणानि अग्निपु० १०४ अ० उक्तानि तत्राङ्गभेदमानानि यथा

"भगवानुवाच। वासुदेवादिप्रतिमालक्षणं प्रवदामि ते। प्रासादस्योत्तरे पूर्वस्यां वा चोत्तराननाम्। संस्थाप्य पूज्य च बलिं दत्त्वाथो मध्यसूत्रकम्। शिलां शिल्पी तु नवधा विभज्य नवभेऽशके। सूर्यभक्तैः शिलायां तु भागं स्यात्कुलसञ्ज्ञके। द्वयङ्गुलं गोलकं नाम्ना कालनेत्रं तदुच्यते। भागमेकं त्रिधा भक्त्वा पार्ष्णिभागं प्रकल्पयेत्। भागमेकं तथा जानौ ग्रीवायां भागमेव च। सकुटं तालमात्रं स्यात्तालमात्रं तथा मुखम्। तालेनैकेन कण्ठन्तु तालेन हृदयं तथा। नाभिमेढ्रान्तरन्नालं हितालावूरुकौ तथा। तालद्वयेन जङ्घा स्यात् सक्थ्नि सार्द्धतम्। कार्यं सक्थ्नि पादे जङ्घामध्ये तथापरम्। जानौ सक्थ्नि कार्यमूरुमध्ये तथापरम्। मेढ्रे तथापरं कार्यं कट्यां सूत्रन्तथापरम्। मेखला-

वन्यसिद्धार्थं नाभ्यां चैवापरन्यथा। हृदये च तथा कार्य्यं कण्ठे सूत्रद्वयं तथा। ललाटे चापरं कार्य्यं मस्तके च तथापरम्। सकटोपरि कर्त्तव्यं सूत्रमेकं विचक्षणैः। सूत्राग्रमूर्द्धं प्रदेयानि सप्तैव कमलोद्भव!। कक्षात्रिकान्तरेष्वेव षट् सूत्राणि प्रदापयेत्। मध्यसूत्रं तु सर्व्वत्र सूत्राग्रेष्वेव निवेशयेत्। ललाटं नासिका वक्त्रं कर्त्तव्यञ्चतुरङ्गुलम्। ग्रीवाकर्णौ तु कर्त्तव्यौ व्यायामाच्चतुरङ्गुलौ। द्व्यङ्गुले हनुके कार्य्ये विस्तारात्त्रिगुणे तथा। अष्टाङ्गुलं ललाटन्तु विस्तारेण प्रकीर्त्तितम्। परेण द्व्यङ्गुलौ शङ्खौ कर्त्तव्यावलकान्वितौ। चतुरङ्गुलमाख्यातमनन्तरं कर्णनेत्रयोः। द्व्यङ्गुलौ पृथुलौ कर्णौ कर्णपाङ्क्तार्द्ध पञ्चमे। भ्रूसमेन तु सूत्रेण कर्णस्रोतः प्रकीर्त्तितम्। विद्धं षड्ङ्गुलं कर्णमविद्धं तुरङ्गुलम्। चिबुकेन समं विद्धमविद्धं वा षडङ्गुलम्। गन्धपात्रं तथावर्त्तं शङ्खौ कल्पयेत्तथा। द्व्यङ्गुलेनाधरः कार्य्यस्तस्यार्द्धेनोत्तराधरः। अर्द्धाङ्गुलं तथा नेत्रं वक्त्रन्तु चतुरङ्गुलम्। आयामेन तु वैपुल्यात् सार्द्धमङ्गुलमुच्यते। व्यक्तमेवं स्फुटं व्यक्तं त्र्यङ्गुलमुच्यते। नासावंशसमुच्छ्रायं मूले त्र्येकाङ्गुलं मतम्। उच्छ्रायो द्व्यङ्गुलं चाग्रे करवीरोपमा सुता। अन्तरं चक्षुषोः कार्यं चतुरङ्गुलमानतः। द्व्यङ्गुलं चाक्षिकोषं च द्व्यङ्गुलं चान्तरं तयोः। तारा नेत्रत्रिभागेन ह्रस्वा तारापक्ष्मणिका। त्र्यङ्गुलं नेत्रविस्तारं द्रोणी चार्द्धाङ्गुला मता। तत्प्रमाणा भ्रुवोर्लेखा भ्रुवौ चैव समे मते। भ्रूमध्यं द्व्यङ्गुलं कार्यं भ्रूदैर्घ्यं चतुरङ्गुलम्। षट्त्रिंशदङ्गुलायामस्मश्रुकस्य तु वेष्टनम्। मूर्द्धानां केशवादीनां द्वात्रिंशद्वेष्टनं भवेत्। पञ्चनेत्रा त्वधोग्रीवा विस्ताराद्वेष्टनं पुनः। त्रिगुणं तु भवेद्दैर्घ्यं विस्तृताष्टाङ्गुलं पुनः। ग्रीवात्रिगुणमायामं ग्रीवाबाह्वन्तरं भवेत्। स्कन्धावष्टाङ्गुलौ कार्यौ त्रिकलावंसकौ शुभौ। सप्तनेत्रौ सुतौ बाह्वं प्रबाह्वं षोड़शाङ्गुलौ। त्रिकलौ विस्तृतौ बाह्वं प्रबाह्वं चापि तत्समौ। बाह्वदण्डोर्द्वतो ज्ञेयः परिणाहः कला नव। सप्तदशाङ्गुलो मध्ये कूर्परोर्द्धे च षोड़श। कूर्परस्य भवेन्नाहः त्रिगुणः कमलोद्भव!। नाहः प्रबाहुमध्ये तु षोड़शाङ्गुल उच्यते। मणिबन्धे परीणाहो द्वादशाङ्गुल उच्यते। विस्तारेण करतलं कीर्त्तितं तु षड़ङ्गुलम्। दैर्घ्यं सप्ताङ्गुलं कार्यं मध्या पञ्चाङ्गुला मता। तर्जन्यनामिका चैव तस्माद्द्व्यङ्गुलं विना। कनिष्ठाङ्गुष्ठकौ कार्यौ चतुरङ्गुलसम्मितौ। द्विपर्व्वाङ्गुष्ठकः कार्यः शेषाङ्गुल्यस्त्रिपर्व्विकाः। सर्व्वासां पर्व्वणोऽर्द्धेन नखमानं विधीयते। वक्षसो यत् प्रमाणन्तु जठरं तत्प्रमाणतः। षड्ङ्गुलैकं भवेन्नाभी वेधेन च प्रमाणतः। ततो मेढ्रान्तरं कार्यं तालमात्रं प्रमाणतः। नाभिमध्ये परीणाहो द्विचत्वारिंशदङ्गुलैः। अन्तरं सनयोः कार्य्यं तालमात्रं प्रमाणतः। चिबुकौ यवमानौ तु मङ्गल्यं द्विपदं भवेत्। चतुःषष्टयङ्गुलं कार्यं वेष्टनं वक्षसः स्फुटम्। चतुर्व्वक्त्रस्य तदधोवेष्टनं परिकीर्त्तितम्। परिणाहस्तथा कक्षां चतुःपञ्चाशदङ्गुलैः। विस्तारोरुमूले तु प्रोच्यते द्वादशाङ्गुलः। तस्मादभ्यधिकं मध्ये ततो निम्नतरं क्रमात्। विस्तृताष्टाङ्गुलं जानुत्रिगुणा परिणाहतः। जङ्घामध्ये तु विस्तारः सप्ताङ्गुल उदाहृतः। त्रिगुणः परिणाहस्तु जङ्घायं पञ्चविस्तरम्। त्रिगुणः परिणाहस्तु पादौ तालप्रमाणकौ। आयामादुत्थितौ पादौ चतुरङ्गुलमेव च। गुल्फात् पूर्वं तु कर्त्तव्यं प्रमाणाच्चतुरङ्गुलम्। त्रिकलं विस्तृतौ पादौ त्र्यङ्गुलौ गुल्फकः सुतः। पद्माङ्गुलस्तु नाहोऽस्य दीर्घा तद्वत् प्रदेशिनी। अष्टमाद्यंशतोन्यूनाः शेषाङ्गुल्यः क्रमेण तु। सपादाङ्गुलसत्सेधमङ्गुष्ठस्य प्रकीर्त्तितम्। यवोनमङ्गुलं कार्यमङ्गुष्ठस्य नखं तथा। अर्द्धाङ्गुलं तथान्यासां क्रमात् न्यूनं तु कारयेत्। त्र्यङ्गुलौ हस्तौ कार्यौ मेढ्रं तु चतुरङ्गुलम्। परिणाहोऽत्र कोषाग्रं कर्त्तव्यञ्चतुरङ्गुलम्। षड़ङ्गुलपरीणाहौ वृषणौ परिकीर्त्तितौ। प्रतिमा भूषणाद्या स्यादेतद्देवलक्षणम्। अनयैव दिशा कार्यं लोके दृष्टा तु लक्षणम्"।

वासुदेवस्य "दक्षिणे तु करे चक्रमधस्तात् पद्ममेव च। वामे शङ्खं गदाधस्ताद्वासुदेवस्य लक्षणम्। श्रीवृक्षो वापि कर्त्तव्यो वनमालाकरान्वितः। जटामालोच्छ्रितायामे नानाविद्याधरौ तथा। प्रभामण्डलसंस्थौ तौ प्रभा कृष्णादिभूषणौ। पद्मासनं पादपीठन्तु प्रतिमास्ववधारयेत्"।

मत्स्यादिलक्षणानि तत्र ४६अ० उक्तानि यथा

भगवानुवाच "दशावतारं मत्स्यादिलक्षणं प्रवदामि ते। मत्स्याकारस्तु मत्स्यः स्यात् कूर्मः कूर्माकृतिर्भवेत्। नराङ्गो वाथ कर्त्तव्यो मुखराङ्गो गदादिभृत्। दक्षिणे

वामके शङ्खं चक्रीर्वा पद्मनेव वा । श्रीर्वामकूर्परस्था तु ज्ञानन्तौ चरणानुगौ । वराहस्यावतारोऽयं भवान्तिरस्थं भवेत् । नरसिंहो विहस्ताख्यो वामोरूपतदानवः । तद्वदोरुवधश्चाथो स्फुरच्चक्रगदाधरः । अथो दण्डी वामनः स्यादथवा स्याच्चतुर्भुजः । रामश्चापेषुहस्तः स्यात् खड्गी परशुनान्वितः । रामश्चापी शरी खड्गी शङ्खी वा द्विभुजः स्मृतः । गदाशार्ङ्गधरो रामो वाथ चतुर्भुजः । वामोर्द्धे शार्ङ्गं दद्यादधः शङ्खं सुशोभनम् । सव्यं दक्षिणोर्द्धे तु चक्रञ्चाधः सुशोभनम् । शान्तात्मा सम्वर्त्तश्च गौराङ्गश्चाम्बराहृतः । जटामुकुटसंयुतो बुद्धो वरदाभयदायकः । धनुस्तूणान्वितः कल्की खड्गोल्काकरो द्विजः । अथवाश्वस्थितः खड्गी शङ्खचक्रशरान्वितः" । "अथवं वासुदेवादिनवकस्य वदामि ते । दक्षिणोर्द्धे गदा वामे वामोर्द्धे चक्रमुत्तमम् । ब्रह्मणो पार्श्वगौ नित्यं वासुदेवोऽस्ति पूर्ववत् । शङ्खी च वरदो वाथ द्विभुजो वा चतुर्भुजः । जाङ्घली मुषली रामो गदापद्मधरः स्मृतः । प्रद्युम्नो दक्षिणे वज्रं शङ्खं भागे धनुः करे । गदाभ्याहृतः प्रोक्तो प्रद्युम्नो वा धनुःशरी । चतुर्भुजोऽनिरुद्धः स्यात्तथा नारायणो विभुः । चतुर्मुखश्चतुर्बाहुश्चतुरास्यश्चतुष्करः । सम्बूर्द्धो जटायुक्तो ब्रह्मा हंसाधवाहनः । दक्षिणे चाक्षसूत्रञ्च स्रुवं वामे तु कुण्डिकाम् । आद्यस्थानी सरस्वती सावित्री वामदक्षिणे । विष्णुरष्टभुजश्चार्द्धं करे खड्गस्तु दक्षिणे । गदा शरश्च वरदो वामे कार्मुकखेटके । चक्रशङ्खौ चतुर्बाहुर्नरसिंहश्चतुर्भुजः । शङ्खचक्रधरो वापि विदारितमहासुरः । चतुर्बाहुर्वराहस्तु श्वेतः पार्श्वितले धृतः । धारयन् वामदंष्ट्रायां वामेन कमलाधरः । पादन्यस्ता धरा कार्या पद्मा सव्योर्व्यवस्थिता । त्रैलोक्यमोहनश्चार्द्धं चतुर्बाहुस्तु दक्षिणे । चक्रं खड्गं च सव्यं च वामके करे । शङ्खशार्ङ्गगदापाशा पद्मवीणासमन्विते । लक्ष्मीः सरस्वती कार्द्धं विष्वक्सेनोऽथ दक्षिणे । सुदर्शनं च तथा पाशं शक्तिश्चर्मं धरे करे । वामे शङ्खञ्च शार्ङ्गञ्च गदां पाशं च तोमरम् । खड्गं परशुं दण्डं कुरिकां चर्मचेषुधम् । सिंहवाहचतुर्बाहो दक्षिणस्योऽथ वामके । त्रिनेत्रो वामपार्श्वेन यतिनो जलशायिपि । श्रिया भूम्नैकचरणो विमलाद्याभिरीडितः । नाभिपद्मचतुर्वक्त्रो हरिशङ्करको हरिः । शूलदिधारी दण्डे च गदाचक्रधरः परे । वह्नेश्चयवनश्चाङ्को गौरीलक्ष्मीसमन्वितः । शङ्खचक्रगदाबेदपाणिश्चार्द्धशिरा हरिः । वामपादधृतः शेषो दक्षिणः कूर्मपृष्ठगः । दत्तात्रेयो द्विबाहुः स्याद्वामोत्सङ्गे श्रिया सह । विष्वक्सेनश्चक्रगदो हली शङ्खी हरेर्गणः" ।

देवीप्रतिमालक्षणानि तत्रैव ५०अ० उक्तानि यथा

"भगवानुवाच चण्डी विंशतिबाहुः स्याद्विभ्रती दक्षिणैः करैः । शूलासिशक्तिचक्राणि पाशं खेटायुधाभयम् । डमरुं शक्तिकां वामैर्बाणपाशञ्च खेटकम् । कुठाराङ्कुशचापांश्च घण्टाध्वजगदास्तथा । आदर्शसुदरान् कृत्वा चण्डी वा दशबाहुका । तदधो महिषन्विच्छन्मूर्द्धां पातितमस्तकः । शस्त्रोद्यतकरः क्रुद्धस्तदृपोवासम्भवः पुमान् । शूलहस्तो वमद्रक्तो रक्तभूर्द्धजेक्षणः । सिंहेनास्याद्यमानस्तु पाशबद्धो गले भृशम् । याम्याङ्घ्र्याक्रान्तसिंहा च सव्याङ्घ्रिर्नीचगासुरे । चक्रिकेयं त्रिनेत्रा च सशस्त्रा रिपुमर्द्दिनी । नवपद्मात्मके ख्याते पूज्या दुर्गा समूर्त्तितः । आदौ मध्ये च तन्त्रादौ नवतत्त्वात्मभिः क्रमात् । अष्टादशभुजैका तु दक्षे खड्गं च खेटकम् । आदर्शतर्जनीचापं ध्वजं डमरुकं तथा । पाशं वामे बिभ्रती च शक्तिसुदरशूलकम् । वज्रखड्गाङ्कुशशरान् चक्रन्देवी शलाकया । एतैरेवायुधैर्युक्ता शेषाः षोड्शबाहुकाः । डमरुं तर्जनीं त्यक्त्वा रुद्रचण्डादयो नव । रुद्रचण्डा प्रचण्डा च चण्डोग्रा चण्डनायिका । चण्डा चण्डवती चैव चण्डरूपातिचण्डिका । उग्रचण्डा च मध्यस्था रोचनामाऽरुणाऽसिता । नीला शुक्ला धूम्रिका च पीता श्वेता च सिंहगाः । महिषोऽथ पुमान् शस्त्री तत्कबन्धहृत्शिराः । आलीढा नव दुर्गाः स्युः स्वाद्याः पूर्वादिदिक्षये । तथा गौरी चण्डिकाद्या कृष्णशररदाग्निधृक् । सैव रम्भावने सिंहाऽग्निहोना लक्षिता तथा । स्कन्धमूर्द्धकरा वामे हीतरे धृतदर्पणा । याम्ये फलाक्षसिद्धिस्था सौभाग्या तत्र चोर्द्धिका । लक्ष्मीर्याम्यकराम्भोजा वामे श्रीफलसंयुता । पुस्तालमालिकाहस्ता वीणाहस्ता सरस्वती । कुम्भाजहस्ता श्वेताभा मकरोपरि जाह्नवी । कूर्मगा यमुना कुम्भकरा श्यामा च पूज्यते । सवीक्षस्तुम्बुरुः शुक्लः शूली मालपतो दये । गौरी चतुर्मुखी ब्राह्मी कथमानाक्षसूत्रान्विता । कृष्णाजपाक्षिणी वामे हंसगा माहुरी सिता । शरचापौ दक्षिणेऽस्त्रा वामे चक्रं

धनुर्दधे। कौमारी शिखिगा रक्ता शक्तिरुक्ता द्विबाहुका। चक्रशङ्खधरा सव्ये वामे चर्मौगदाञ्जधृक्। दण्डशङ्खाक्षिगदया वाराही महिषस्थिता। ऐन्द्री वामे वज्रहस्ता सहस्राक्षी तु सिद्धये। चामुण्डा कोटराक्षी स्यादिर्मांसा तु त्रिलोचना। निर्मांसा चर्मिसारा वा ऊर्ध्वकेशी जगोदरी। द्वीपिचर्मधरा वामे कपालं पट्टिशं करे। मूलं कर्णौ दक्षिणेऽस्याः शवारूढास्थिभूषणा। विनायको नराकारो दन्तत्रुटितशानानः। दन्तक्षुण्णो स्रुपवीति सर्वं सम्पकलं भवेत्। विस्तारार्द्धैर्ध्वतश्चैव मुखं षट्त्रिंशदङ्गुलम्। कला द्वादश नाडी तु ग्रीवा सार्द्धकलोच्छ्रिता। षट्त्रिंशदङ्गुलं कण्ठं मुखमध्यर्द्धमङ्गुलम्। नाभिरुरू द्वादश च जङ्घे पादे तु दक्षिणे। खदनं परशुं वामे लड्डुकस्योत्पलं भवे। सव्यकी च विडालाक्षी पार्श्वे स्कन्दो मयूरगः। स्वामी शाखी विशाखश्च द्विभुजो बालरूपधृक्। दण्डे शक्तिः कुक्कुटोऽथ एकवक्त्रोऽथ षण्मुखः। षड्भुजो वा द्वादशभिर्भोमेऽरण्ये द्विबाहुकः। शक्तीषुपाशनिस्त्रिंशतोमरोत्पलजैनीयुतः। शक्त्या दक्षिणषट्कोषु षट्सु वामे करे तथा। शिखिपिच्छन्यसुः खेटं पताकाभयकुक्कुटे। कपालकर्तरीशूलपाशभट्टाभ्यसौम्ययोः। मजचर्मभृदूर्ध्वांसपादा स्यात् रुद्रचण्डिका। सैव चाष्टभुजा देवी शिरोडमरुकान्विता। तेन सा रुद्रचामुण्डा नाट्येश्वर्यथ कथ्यते। इयमेव महालक्ष्मीरुपविष्टा चतुर्भुजा। वराभिमहिषेभांश्च खादनी च करे स्थितान्। दण्डाक्षस्रिनेत्रा च यक्षासिडमरूत्पलम्। बिभ्रती दक्षिणे हस्ते वामे घण्टां च खेटकम्। खट्वाङ्गं च त्रिशूलञ्च सिद्धचामुण्डकाह्वया। सिद्धयोगेश्वरी देवी सर्वसिद्धिप्रदायिका। एतद्रूपा भवेदन्या पाशाङ्कुशयुताह्वया। भैरवीरूपविद्या तु भुजैर्द्वादशभिर्युता। यताः शूलाभयजा रौद्र्योऽम्बाष्टकमिदं स्मृतम्। चण्डा शिवाहता रक्ता द्विभुजा विकताननाः। दन्तुरा भेषकारी स्याद्भ्रूभौ जानुकरा स्थिता। वक्षिणस्तनदीर्घाङ्गाः शाकिन्यो वक्रदृष्टयः। पिङ्गाक्ष्यः शुभंकारस्या रुधिरोष्ठरसः सदा। शाम्भवी त्रिशूली च नन्दीशो द्वारपालकः। महाकालाक्षिसहितो स्याच्छूलखेटकवांसया। क्रमो भद्री च स्वयम् वै कुब्जाषडस्यूर्ध्वसर्ववान्। मजगोकर्षणक्षाद्या वीरभद्रादयो मथाः। षष्टाकर्षोद्वादशदोः पापरोगं विदारयन्। वज्राभिदण्डचक्रेषुसप्तकाङ्कुशसद्धरान्। दक्षिणे तर्जनीं खेटं शक्तिं सव्यकेषु पाशकम्। चापं घण्टां कुठारञ्च हाभ्यान्त्रैव त्रिशूलकम्। घण्टामालाकुलो देवो विघ्नोटङ्कविमर्दनः"।

सूर्यादिप्रतिमालक्षणानि ५१अ० तत्रोक्तानि यथा

"भगवानुवाच। समप्राग्रे सैकचक्रे रथे सूर्यो द्विपद्मधृक्। मसीभाजनलेखन्यौ बिभ्रत् कृष्णौ तु दक्षिणे। वामे तु पिङ्गलो हारि दण्डभृत् स रवेर्मथः। बालव्यजनधारिण्यौ पार्श्वे राज्ञी च निष्प्रभा। अश्ववाश्वसमारूढः कार्य एकस्तु भास्करः। वरदा द्वाक्षिनः सर्वे दिक्पालास्त्रकराः क्रमात्। सप्तरज्जुचक्राब्जभृतोऽन्यादिविदिक्स्थिताः। सूर्यादयग्रादिरक्षोन्तायतहंसा द्विपद्मदे। वरुणः सूर्यनामा च सहस्रांशुस्त्रयापरः। धाता तपनसंज्ञश्च सविताथ गभस्तिमान्। रविश्चैवाथ पर्जन्यस्त्वष्टा मित्रोऽथ विष्णुकः। मेषादिराशिसंस्थाश्च मार्गादिकार्तिकान्तगाः। श्यामो रक्तो मनायक्तः पीतः पाण्डुरकः सितः। कपिलः पीतवर्णश्च शुक्लाभो भवलक्षया। धूम्रो नीलः क्रमादुक्तवर्णाः शक्तयः केसरात्मनाः। इडा सुषुम्णा विश्वार्चिरिन्दुसंज्ञा प्रमर्दिनी। प्रहर्षिणी महाकाली कपिला च प्रबोधनी। नीलाम्बरा धनाला च स्वस्ताख्या च शक्तयः। वरुणादेव तद्वर्णाः केसरायेषु विन्यसेत्। तेजश्चण्डो महावक्त्रो द्विभुजः पद्मखड्गभृत्। कुक्षिकाजथमालोन्दुः कुजः शक्त्यक्षमालिकः। बुधश्चाक्षवाक्षिः स्याक्षीवः कृष्णाक्षमालिकः। शुक्रः कृष्णाक्षमाली स्यात् किङ्किणीस्त्रवाक्शनिः। चर्मचन्द्रधरो राहुः केतुः खड्गी च दीपभृत्। अनलस्त्रक्षकः कर्कः पद्मो महाजः शङ्खकः। कुलिकः स्त्रिशः सर्वे शक्षवक्त्रा महाप्रभाः। इन्द्रो वज्री गजारूढश्चागलोऽग्निश्च शक्तिमान्। यमो दण्डी च महिषे नैर्ऋतः खड्गवान् खरे। मकरे वरुणः पाशी वायुर्ध्वजधरो मृगे। नदी कुबेरो मेषस्थ ईशानश्च जटी वृषे। द्विबाहवो लोकपाला विश्वकर्मांशसदृशभृत्। हनूमान् वज्रहस्तः स्यात् पद्मपां सम्मोदिताश्रयः। पीताक्षाः किन्नराः श्मश्रुमौलाविद्याधराश्च ते। दुर्वक्त्राक्षाः पिशाचाः स्युर्वेतालाः विकताननाः। क्षेत्रपालाः शूलवन्तः प्रेता महोदराः क्रमाः"।

६४योगिनी प्रतिमालक्षणं ५२अ०

"भगवानुवाच योगिन्यष्टाङ्कं वक्ष्ये ऐन्द्रादीयान्तकः क्र-

मात्। अघोरा कपर्दी च राक्षसी चण्डया तथा। पिङ्गाक्षी वाचया चेमा वाला लीला जया तथा। लोला लङ्का च लङ्केशी लासया विमला पुनः। ऊर्ध्वाया च विमलाक्षी ऊर्ध्वारा वडवामुखी। हारहारा महाकूरा क्रोधना तु भयानना। सर्वज्ञा तरला तारा क्षया चैव क्षयानना। तथैव रससङ्ख्याक्षी शवरा तालुजिह्विका। रक्ताक्षी शुभदिक्षा तु विद्युज्जिह्वा करङ्किणी। मेघनादा प्रचण्डोग्रा कालकर्णी वरप्रदा। चन्द्रावली चन्द्रकान्ता प्रभद्रा प्रलयान्तिका। शिशुवक्त्रा पिशाची च पिशिताशा च लोलुपा। धमनी तपनी चैव वामनी विश्ततानना। वायुवेगा हरत्कुक्षिर्विश्रुता विश्वरूपिका। यमजिह्वा जयन्ती च दुर्जया च यमान्तिका। विडाली रेवती चैव पूतना विजयन्तिका। षट्त्रिंशद्वर्गसंख्या इच्छाद्याः सर्वसिद्धिदाः"।

भैरवप्रतिमालक्षणानि यथा ५२अ०

"भैरवश्चार्कवक्त्रः स्यात् कूर्परास्यो जटेन्दुभृत्। खड्गाङ्कुशशठारेषुविश्वाभयधरेक्षतः। चापत्रिशूलखट्वाङ्गपाशकार्द्धवरोद्यतः। गजचर्मधरो ह्याभ्यां ऋत्विवाशोक्षिभूषितः। प्रेतासनो मातृमध्ये पूज्यः षड्वाननोऽथ वा। अविलोमाग्निपर्यन्तं दीर्घाष्टकैकभेदितम्। तत् षडङ्गानि आत्मन्तैरन्वितं च क्रमाद् यजेत्। मन्त्रिराज्ञिदवाक्रूढं सुवर्णरसकान्वितम्। नादबिन्दिन्दुसंयुक्तं मातृनाथाङ्गदीपितम्। वीरभद्रो हयारूढो मातृपे स चतुर्भुजः। गौरी तु द्विभुजा स्रक्वा शूलिनी दर्पणान्विता। शूलं गजनिका कल्की वरदा च चतुर्भुजा। चक्रस्था खलिता खड्गगदार्दर्शशलाकया। चक्रिका दण्डरूपा स्यात् खड्गशूलारिशक्तिकम्। दक्षे वामे नागपाशं चर्माङ्कुशकठारकम्। धनुः सिंहे च मक्षिपः शूलेन प्रहतोद्यतः"।

लिङ्गलक्षणवक्तं तत्र ५३अ०

"भगवानुवाच। लिङ्गादिलक्षणं वक्ष्ये कमलोद्भव! तच्छृणु। दैर्घ्यार्द्धं वसुभिर्भक्त्वा त्यक्त्वा भागत्रयं ततः। विष्कम्भं भूतभागैस्तु चतुरस्रन्तु कारयेत्। आयामं मूर्तिभिर्भक्त्वा एकद्वित्रिक्रमान् न्यसेत्। ब्रह्मविष्णुशिवांशेषु वर्द्धमानोऽवसज्यते। चतुरस्रेऽस्य वर्णार्द्धं शुद्धत्रिकोणेषु साधयेत्। षडश्रं वैष्णवं भागं सिध्यत्येव न संशयः। षोडशास्रं ततः कुर्याद्वात्रिंशास्रं ततः पुनः। चतुःषष्ट्यस्रकं कृत्वा वर्त्तुलं साधयेत्ततः। कर्तयेदथ लिङ्गस्य शिरो वै देवि-कोत्तमः। विस्तारमथ लिङ्गस्य षड्धा संविभाजयेत्। भागार्द्धेन्तु सन्त्यज्य कलाकारं शिरो भवेत्। त्रिषु भागेषु षड्यमादामं यस्य विस्तरम्। तद्विभागसमं लिङ्गं सर्वकामफलप्रदम्। दैर्घ्यस्य तु चतुर्थेन विष्कम्भं देवपूजिते। सर्वेषामेव लिङ्गानां लक्षणं शृणु साम्प्रतम्। मध्यसूत्रं समासाद्य ब्रह्मसूत्रान्विते बुधः। षोडशाङ्गुलविस्तृस्य षड्भागैर्भोजितो यथा। तद्वै ब्रह्मसूत्राभ्यां मानमन्तरसूच्यते। यवाष्टसूत्रे कार्ये शेषाणां यवहानितः। अधोभागं त्रिधा कृत्वा तदेकं परित्यजेत्। चतुर्धा तद्द्वयं कृत्वा ऊर्ध्वभागत्रयं त्यजेत्। ऊर्द्धन्तु षड्भागाद् भाग्य रेखां प्रलम्बयेत्। भागमेकं परित्यज्य सूक्ष्मं कारयेत्तयोः। एतत् साधारणं प्रोक्तं लिङ्गानां लक्षणं मया। सर्वसाधारणं वक्ष्ये पिण्डिकानां निबोध मे। ब्रह्मभागप्रवेशन्तु ज्ञात्वा लिङ्गस्य चोच्छ्रयम्। न्यसेद् ब्रह्मशिलां विद्वान् सम्यक्कर्मशिलोपरि। तथा सप्तोच्छ्रयं ज्ञात्वा पिण्डिकां प्रविभाजयेत्। द्विभागोच्छ्रितं पीठं विस्तरं लिङ्गसम्मितम्। त्रिभागं मध्यतः खातं कृत्वा पीठं विभाजयेत्। क्षमार्द्धत्रिभागेन बाहुल्यं परिकल्पयेत्। बाहुल्यस्य त्रिभागेन मेखलामथ कल्पयेत्। खातं स्यान्मेखलातुल्यं क्रमाच्चिन्यन्तु कारयेत्। मेखला षोडशांशेन खातं वा तत्प्रमाणतः। उच्छ्रायं तस्य पीठस्य विकाराङ्गं तु कारयेत्। भूमौ प्रविष्टमेकं तु भागमेकेन पिण्डिका। कण्ठं भागैस्त्रिभिः कार्यं भागेनैकेन पट्टिका। इंद्रग्रेन चोर्द्ध पट्टन्तु एकांशाः शेषपट्टिकाः। भागं भागं प्रविष्टन्तु यावत् कण्ठं ततः पुनः। निर्गमं भागमेकं तु यावद्वै शेषपट्टिका। प्रणालस्य त्रिभागेन निर्गमस्तु त्रिभागतः। मूलेऽङ्गुलप्रविस्तारमग्रे त्र्यंशेन चार्द्धतः। दैर्घ्यत्रिभन्तु कुर्वीत खातं तच्चोत्तरेण वै। पिण्डिकासहितं लिङ्गमेतत् साधारणं स्मृतम्"।

लिङ्गभेदादिकथनं तत्रैव ५४ अ०

"भगवानुवाच। वक्ष्याम्यन्यप्रकारेण लिङ्गमानादिकं शृणु। वक्ष्ये लक्षणजं लिङ्गं एतज्जं बुद्धिवर्द्धनम्। भूतये वस्तुलिङ्गन्तु लिङ्गन्नात्कालिकं विदुः। एकापक्वं मृण्मयं स्यादपक्वात् पक्वजं वरम्। ततो दारुमयं पुण्यं दारुजात् शैलजं वरम्। शैलाद्दरं तु रत्नाजं ततो लौहं सुवर्णजम्। राजतं कीर्तितं ताम्रं पैत्तलं मुक्तिसञ्जिदम्। रत्नजं रत्नलिङ्गञ्च मुक्तिसञ्जिदं वरम्।

रसजं रसशोडादिरत्नगर्भन्तु वर्द्धयेत्। मानादि नेष्टं सिद्धादि स्थापितेऽप्य स्वयम्भुवि। वामे च खेच्छया तेषां पीठप्रासादकल्पना। पूजयेत् सर्वविघ्नस्थं दर्पणे प्रतिबिम्बितम्। पूज्यो हरस्तु सर्वत्र सिङ्के पूर्वार्चनं भवेत्। हस्तोत्तरविधं शैलं दारुजं तदृदेव हि। चतुर्भङ्गुलमानेन हारगर्भकरैः स्थितम्। अङ्गुलाद् षट्सिङ्कं स्याद् यावत् पञ्चदशाङ्गुलम्। हारमानात् त्रिसङ्ख्याकं नवधा गर्भमानतः। नवधा गर्भमानेन सिङ्कं धात्रि च पूजयेत्। एवं सिङ्कानि षट्त्रिंशत् श्रेयांसि ज्ञेयमानतः। मध्यमानेन षट्त्रिंशत् षट्त्रिंशदधमेन च। इत्थमेकोन सिङ्कानां शतमष्टोत्तरं भवेत्। एकाङ्गुलादिपञ्चान्तं कन्यसञ्जनसञ्ज्ञितं। षडादिदशपर्यन्तञ्चलं सिङ्कञ्च मध्यमम्। एकादशाङ्गुलादि स्यात् ज्येष्ठं पञ्चदशान्तकम्। षडङ्गुलं महारत्ने रत्नैरन्यैर्नवाङ्गुलम्। रविभिर्हैमसारोत्थं सिङ्कं शैलैश्चिपञ्चभिः। षोडशांशे च वेदांशे युगं खुप्रोर्ध्वदेशतः। द्वात्रिंशत् षोडशांशांश कोणयोस्तु विलोपयेत्। चतुर्निवेशनात् कण्ठो विंशतिस्त्रियुगैस्तथा। पार्श्वाभ्यां तु विलुप्ताभ्यां चलसिङ्कं भवेद्वरम्। धात्रो युगर्तुनागांशैर्हारं हीनादितः क्रमात्। सिङ्कहारोच्छ्रयादर्धांग भवेत् पादोनतः क्रमात्। गर्भार्द्धेनाधमं सिङ्कं भूतांशैः स्यात् त्रिभिर्वरम्। तयोर्मध्ये च खत्रयि सप्त सम्यातयेत् समम्। एवं खुनेव खत्रयि भूतखत्रैव मध्यमम्। द्वन्नरो वामवामश्च सिङ्कानां दीर्घता नव। हस्तादिवर्द्धते हस्तो यावत् खुनेव पाणयः। हीनमध्योत्तमं सिङ्कं त्रिविधं त्रिविधात्मकम्। एकैकसिङ्कमध्येषु त्रीणि त्रीणि च पादशः। सिङ्कानि षटयेद्वीमान् षट्सु चाष्टोत्तरेषु च। स्थिरदीर्घप्रभेदात्तु हारगर्भकरात्मिका। भाग्येशशुभ्रा-भ्यनीशश्च देवेज्यन्तुल्यसंज्ञितम्। चत्वारि सिङ्कहस्तानि विष्कम्भेण तु कारयेत्। दीर्घमायान्वितं कृत्वा सिङ्कं कुर्यात् त्रिरूपकम्। चतुरष्टाष्टतत्त्वं तत्त्वत्रयगुणात्मकम्। सिङ्कानामीप्सितं दैर्घ्यं तेन कृत्वाङ्गुलानि वै। ध्वजादायैः शरैर्भूतैः शिखिभिर्वा हरेत् क्रमात्। तान्याङ्गुलानि यत्नेन कारयेच्च शुभाशुभम्। ध्वजादा ध्वजसिंहेभवृषाः श्रेष्ठाः परे शुभाः। शरेषु षड्ज-गान्धारपञ्चमाः शुभदायकाः। भूतेषु च शुभा भूः स्यादग्निर्जाश्वनीयकः। उच्छ्रायमस्य चार्धांशे नागांशैर्भाजिते क्रमात्। रसभूतांशषडंशपञ्चांशाधिकशरैर्भक्ते। अष्टाष्टाष्टाष्टशरैर्भाज्यान्यान्यान्तरखता। पञ्चमं वर्द्धमानाख्यं व्यासाच्चाङ्गुलद्वितः। द्विधा भेदो बहुत्वञ्च वक्ष्यते विश्वकर्मतः। षडादीनां त्रिधा स्यौल्याद्यवधूतं तदृदधा। त्रिधा हस्ताच्चिनाख्यञ्च युक्तं सर्वसमेन च। पञ्चविंशतिसिङ्कानि नादो देवार्चिते तथा। पञ्चसप्तभिरेकत्वाच्चिनैर्भङ्गैर्भवन्ति हि। चतुर्दश सहस्राणि चतुर्दश शतानि च। इत्थमङ्गुलविस्तारो नवैकैकरगर्भतः। तेषां कोष्ठार्द्धकोष्ठस्थैः सिङ्केत् कोष्ठानि खण्डकैः। विस्तारं मध्यतः कृत्वा स्वार्थं वा मध्यतस्त्रयम्। विभागाद्दूर्ध्वमष्टाको ह्यूर्ध्वाक्षः स्याच्छिवांशकः। पादाच्छान्वनको ब्रह्मा नाभ्यन्तो विष्णुरित्यतः। मूर्ध्वान्तो भूतभागेशो व्यक्तेऽव्यक्ते च तद्वति। पञ्चसिङ्कव्यवस्थायां शिरो वर्तुलमुच्यते। कलाभं कुक्कुटाभं वा बालेन्दुप्रतिमाकृति। एकैकस्य चतुर्भेदैः कार्यभेदात् फलं वदे। सिङ्कमस्तकविस्तारं वसुभक्तन्तु कारयेत्। अर्द्धभागं चतुर्द्धा तु विस्तारोच्छ्रायतो भजेत्। चत्वारि तत्र खत्रयि भागभागानुपातनात्। प्रखरीकरन्तु भागेन विशालाख्यं हिलोपनात्। त्रिभातनात्तु श्रीवत्सं शलुकहृदलोपनात्। शिरः सर्वसमे श्रेष्ठं कुक्कुटाभं तुराङ्कवे। चतुर्भागात्मके सिङ्के त्रापुषं हयलोपनात्। अनादास्य शिरः प्रोक्तमर्द्धचन्द्रं शिरः स्मृतं। खंशात् प्राग्वे युगांशैश्च त्वेकैकान्यान्मुखात्मकम्। पूर्वबालेन्दुकुसुदं द्वित्रिवेदत्रयात् क्रमात्। चतुश्चिरेकवदनं सुखसिङ्कमतः स्मृतं। पूजाभागं प्रकर्तव्यं मूर्त्यभिपदलक्षितम्। अर्कांशं पूर्ववत् त्यक्त्वा षट् स्थानानि विवर्तयेत्। शिरोद्धतिः प्रकर्तव्या ललाटं नासिका ततः। वदनं चिबुकं ग्रीवा युगभागैर्भुजाक्षिभिः। कराभ्यां सकलीकृत्य प्रतिमायाः प्रमाणतः। मुखं प्रति समः कार्यो विस्तारादष्टमांशतः। चतुर्मुखं मया प्रोक्तं त्रिमुखञ्चोच्यते स्मृतं। कर्णपादाधिकारस्य ललाटादीनि निर्दिशेत्। भुजौ चतुर्भिर्भागैस्तु कर्तव्यौ पञ्चमोर्जितम्। विस्तारादष्टमांशेन सुखानां प्रतिनिर्गमः। एकवक्त्रं तथा कार्यं पूर्वस्यां सौम्यलोचनम्। ललाटनासिकावक्त्रग्रीवायाञ्च विवर्तयेत्। भुजाञ्च पञ्चमांशेन भुजहीनं विवर्तयेत्। विस्तारस्य षडंशेन मुखैर्निर्गमनं हितम्। सर्वेषां मुखसिङ्कानां त्रापुषं वाथ कुक्कुटम्।

विशेषेण देवतादीनां मूर्तिलक्षणं हेमाद्रिव्रतखण्डे विष्णुध०

गणेशस्य "विनायकस्तु कर्त्तव्यो गजवक्त्रश्चतुर्भुजः। स्वदन्तञ्चाक्षमाला च तस्य दक्षिणहस्तयोः। पात्रञ्चोदकपूर्णञ्च परशुश्चैव वामतः। दन्तस्तस्य न कर्त्तव्यो वामे रिपुनिसूदन!। पादपीठगतः पाद एक आसनगो भवेत्। पूर्णं चोदकपात्रे च करापत्नस्य कारयेत्। लम्बोदरत्वाकार्य्यस्तस्यकर्णश्च यादव। व्याघ्रचर्माम्बरधरः सर्पयज्ञोपवीतवान्"। स्वस्वर्क, गजदन्ताकारम्।

सरस्वत्याः "देवी सरस्वती कार्य्या सर्वाभरणभूषिता। चतुर्भुजा सा कर्त्तव्या तथैव च ससंस्थिता"। (ससंस्थिता, जङ्घा) पुस्तकञ्चाक्षमाला च तस्या दक्षिणहस्तयोः। वामयोश्च तथा कार्य्या वैष्णवी च कमण्डलुः। समपादप्रतिष्ठा च कार्य्या सौम्यमुखी तथा"। वैष्णवी, वीणा

लक्ष्म्याः "हरेः समीपे कर्त्तव्या लक्ष्मीस्तु द्विभुजा नृप!। दिव्यरूपाम्बरधरा सर्वाभरणभूषिता। गौरी शुक्लाम्बरा देवी रूपेणाप्रतिमा भुवि। पृथक् चतुर्भुजा कार्य्या देवी सिंहासना शुभा। सिंहासनस्या कर्त्तव्यं कमलञ्चारुकर्णिकम्। अष्टपत्रं महाभाग! कर्णिकायान्तु सा स्थिता। विनायकवदासीना देवी कार्य्या महाभुजा। दक्षञ्चाक्षदूरे कार्य्यं तस्याश्च कमलं शुभम्। दक्षिणे यादवश्रेष्ठ! केयूरं भालसंस्थितम्। वामेऽक्षतघटः कार्य्यस्तथा राजन्! मनोहरः। तस्याश्च हौ करौ कार्य्यौ बिल्वशङ्खधरौ द्विज!। वामार्जितघटं कार्यं तत्पृष्ठेकुङ्कुरद्वयम्। देव्याश्च मस्तके पद्मं तथा कार्यं मनोहरम्"।

श्रियः "पद्मस्था पद्महस्ता च गजोत्क्षिप्तप्रकटस्मृता। श्रीः पद्ममालिनी चैव कालिकाकृतिरेव च"।

लक्ष्मीलक्ष्म्याः विश्वकर्मशास्त्रे "क्षेत्रे कोलापुरादग्ने महालक्ष्मीर्यदोच्यते। लक्ष्मीवत् सा तदा कार्या" रूपाभरणभूषिता। दक्षिणाधःकरे पात्रमूर्द्धं कौमोदकी ततः। वामोर्द्धं खेटकं धत्ते श्रीफलन्तदधः करे। बिभ्रती मस्तके लिङ्गं पूजनीया विभूतये"।

भद्रकाल्याः विष्णुधर्मोत्तरे "अष्टादशभुजा कार्या भद्रकाली मनोहरा। वामोदक्षासनस्था च चतःसिंहे रथे स्थिता। अक्षमाला त्रिशूलञ्च खड्गचन्द्रश्च यादव!। वामचापे च कर्त्तव्ये शङ्खपद्मौ तथैव च। स्रुक्स्रुवौ च तथा कार्य्यौ तथोदककमण्डलू। दण्डशक्ती च कर्त्तव्ये कृष्णाजिनञ्चतामनौ। कृपाणं भद्रकाल्यास्तु भवेत् पाणिकरः करः। एकश्चैव तु कार्य्यस्तु रक्तपात्रधरो भवेत्"।

चण्डिकायाः "निगद्यते त्रयो वर्गो देवाना सा स्वरूपिणी। त्रिनेत्रा यौवनस्था च क्रुद्धा चोर्द्धस्थिता मता। त्रिगमध्या विशालाक्षी चारुपीनपयोधरा। एकवक्त्रा तु सग्रीवा वाहुविंशतिसंयुता। शूलासिशङ्खचक्राणि बाणशक्तिधनूंषि। अभयखड्गमरुञ्चैव कर्त्तिकां दक्षिणे करे। ऊर्ध्वादिक्रमयोगेन बिभ्रती सा सदा शुभा। नागपाशलघा खेटं कुठाराङ्कुशकार्मुकम्। घण्टा, ध्वज, गदादण्डौ, सद्वरं वामु एव च। तदधोमहिषस्थिन्नमूर्द्धा पतितमुक्तकः। प्रस्खोद्यतकरत्नासः तदृग्रोवासम्भवः पुमान्। शूलभिन्नो वमद्रक्तोरक्षभूमूर्द्धजेक्षणः। सिंहेन खाद्यमानश्च पाशबद्धो गले स्वयम्। वामाङ्घ्र्याक्रान्तसिंहा च सव्याङ्घ्र्याक्रीडगासुरे। चण्डी चोद्यतयत्नेवङ्घायेषरिपुनाशिनी" (असुरे, महिषे)

दुर्गायाः "शक्तिं वामे तथा शूलं खड्गञ्चक्रञ्च दक्षिणे। चन्द्रबिम्बमधो वामे खेटमूर्द्धं कपालकम्। शूलं चक्रञ्च बिभ्राणा सिंहारूढा च दिग्भुजा। एषा देवी समाख्याता दुर्गा दुर्गोपहारिणी"। दिग्भुजा, दशभुजा

नन्दायाः "नन्दा भगवती देवी भारद्वाजाभिनन्दजा। वरमाला ध्वजा-जानि बिभ्रती च चतुर्भुजा"।

"गौरवर्णा गजस्था वा खड्ग खेटवराभया"।

अम्बायाः "अम्बा कुसुदवर्णाभा पाशाङ्काभीतिपालिनी"।

सर्वमङ्गलायाः "चतुर्बाहुः प्रकर्त्तव्या सिंहस्था सर्वमङ्गला वरहस्तं कुजं दद्यं शूलकुण्डीधरोत्तरे"।

कालरात्रेः "एकवीरा जया कर्णपूरा नग्ना खरस्थिता। वज्रोत्पा कर्णिकाकर्षी तैलाभ्यक्तशरीरिणी। वामपादे लसल्लोहलतकण्टकभूषणा। वर्द्धयन्मूर्द्धजाकृष्टा कालरात्रिर्भयङ्करी"।

ललितायाः "शङ्खसन्धकरादर्शं बिभ्रती वामपार्श्वतः। दास्ये फलाक्षमालिङ्गा ललितोर्द्धा शुभप्रभा"।

ज्येष्ठायाः "तुङ्गनासा च लम्बोष्ठी लम्बमानस्तनोदरी। कालोज्झिता क्षुता क्षेत्रपा ज्येष्ठा लक्ष्मीरिति श्रिये। खट्वाङ्गाभयहस्तेयं द्विभुजा वीरवन्दिता"।

ज्येष्ठाभेदस्य "रक्तज्येष्ठा च नीला च भूतलार्पितपादिका। भूतलं स्पृशते दोर्भ्यां द्विभुजा वीरवन्दिता"।

गौर्याः "गौरी कुमारिकारूपा ध्यायमाना महेश्वरैः।

वरदाभयहस्ता सा द्विभुजा श्रेयसे सदा। अक्षसूत्राभये पद्मं तस्याश्च कमण्डलुः। गौर्यां मूर्तिचतुर्बाहुः कर्तव्या कमलासना"।

भूतमातृः "श्यामवर्णा विशालाक्षी चीरारुणनिभानना। द्विभुजा बिभ्रती खड्गं चर्म शस्तन्तु दक्षिणे। सिंहासनोपविष्टेयं सुक्ताभरणभूषिता। भूतप्रेतपिशाचाद्यैः सेविता तु विशेषतः। इन्द्रस्यैव तान्त्रैः सिद्धविद्याधरादिभिः। अक्षसूत्राधरो देवी भूतमातेति विश्रुता"।

सुरभेः "सुरभिर्गोसखी देवी सुरूपा सर्वभूषणा। वासस्यृद्धिं तथा कुर्यात् बिभ्राणा भूतिपुष्टिदा"।

योगनिद्रायाः "निद्रा तु शयनारूढा सुसौम्या सकलेक्षणा। पानपात्रधरा चेयं द्विभुजा परिकीर्तिता"।

मातृणाम् "अथातः सम्प्रवक्ष्यामि मातृरूपाणि ते शृणु"।

ब्राह्म्याः "तत्र ब्राह्मी चतुर्वक्त्रा षड्भुजा हंससंस्थिता। पिङ्गला भूषणोपेता मृगचर्मोत्तरीयका। वरं स्रुवं धत्ते दक्षबाहुद्वये क्रमात्। वामे तु पुस्तकं कुर्यात् बिभ्राणा चाभयप्रदा"।

माहेश्वर्याः "माहेश्वरी वृषारूढा शूलवक्त्रा त्रिलोचना। शुक्लेन्दुबद्धजटाजूटा शुक्ला सर्वसुखप्रदा। षड्भुजा वरदा दक्षे शूलं डमरुकं तथा। शूलवराढ्याभयं वामे सैव धत्ते महाभुजा।

कौमार्याः "कौमारी रक्तवर्णा स्यात् षड्वक्त्रा शार्ङ्गलोचना। रविबालेन्दुभूषुरस्था वरदा शक्तिधारिणी। पताकां बिभ्रती दक्षबाहुपार्श्वं च दक्षिणे। वामे चापमथो घण्टां कमलं कुक्कुटं त्वधः। परशुं बिभ्रती तीक्ष्णं तदधस्त्वभयान्विता"।

वैष्णव्याः "वैष्णवी तार्क्ष्यगा श्यामा षड्भुजा वनमालिनी। वरदा गदिनी दक्षे बिभ्रती चाम्बुजशङ्खम्। शङ्खचक्राभया वामे सा चेयं विलसद्भुजा"।

वाराह्याः "कृष्णवर्णा तु वाराही शूकरास्या महोदरी। वरदा दक्षिणी खड्गं बिभ्रती दक्षिणे सदा। खेटपाशाभया वामे सैव चापि लसद्भुजा"।

ऐन्द्र्याः ऐन्द्री सहस्राक्षी सौम्यदेहाभा गजसंस्थिता। वरदा खलिनी वज्रं बिभ्रत्यूर्ध्वं तु दक्षिणे। वामे तु कलशं पात्रं त्वभयं तदधः करे"।

चामुण्डायाः "चामुण्डा प्रेतगा रक्ता विकृतास्याक्षिभूषणा। दंष्ट्राग्रा घोरदेहा च मुण्डमालाविभूषणी। दिग्बाहुः शूलकृत्तिश्च मुसलं कवचं शरम्। खड्गं बिभ्रती खड्गं दक्षिणे त्वथ वामतः। खेटं पाशञ्चतुर्दण्डं कुठारं चेति बिभ्रती"।

चण्डिकायाः "चण्डिका श्वेतवर्णा स्यात् शवारूढा च षड्भुजा। जटिला वर्द्धमानाढ्या वरदा शूलधारिणी। बर्हिकां बिभ्रती दक्षे पानपात्राभयान्वितः। इत्येवं मातरः प्रोक्ता रूपभेदव्यवस्थया"।

नान्दीमुखमातृणाम् गौर्यादिमातरस्तु भविष्यत्पुराणे निरूपिताः। "गौरी पद्मा-शची-मेधा सावित्री विजया जया। देवसेना स्वधा स्वाहा तथान्या लोकमातरः। धृतिः पुष्टिस्तथा तुष्टिरात्मदेवतया सह। पूज्या हि लोकवृद्ध्यर्थं वरदाऽभयपाणयः"।

नवदुर्गाणाम् "नवपद्मान्विते स्थाने पूज्या दुर्गाः क्रमूर्त्तितः। आदौ मध्ये तथेन्द्रादौ नवतत्त्वाक्षरैः क्रमात्। अष्टादशभुजैका तु पीनवक्षोरुहोरुका। सर्वालङ्कारसंयुक्ता सर्वसिद्धिप्रदायिनी। मूर्द्धजं खेटकं घण्टासादर्थं तर्जनीं धनुः। ध्वजं डमरुकं पार्श्वं बिभ्रती वामपाणिभिः। शक्तिमुद्गरशूलानि वज्रं शङ्खमथाङ्कुशम्। पलाकां मार्गणं चक्रं दधाना दक्षिणैः करैः। त्रयमिच्छुद्विरित्येताः पूजनीया महात्मभिः। शेषाः षोडशहस्ताश्च पलाकां मार्गणं विना। रक्तचण्डा प्रचण्डा च चण्डोग्रा चण्डनायिका। चण्डा चण्डवती चैव चण्डरूपातिचण्डिका। नवमी चोग्रचण्डा च मध्यस्था वह्निसन्निभा। रोचनाभाऽरुणा कृष्णा नीला शुक्ला च धूम्रिका। पीता च पाण्डुरा श्वेता आवीडस्था हरिस्थिता। महिषस्था सगरुडा दैत्यमूर्द्धजसुस्थिता। पद्मासनगता रथ स्थाप्या इत्युक्तं स्कन्दयामले"।

वामायाः "हस्तस्था जटिला त्रस्ता वह्निज्वालासमप्रभा। कपालाभयहस्तोग्रा वामा वामफलप्रदा। द्विबाहुरेकवक्त्रैषा विधातव्या विपश्चिता"।

ज्येष्ठायाः "पाठलाभा भवेद्देवी कपालशरधारिणी। उग्रा सहावला भूत्वा शत्रुघ्नी शेषपूर्वजा"।

रौद्र्याः "रक्तवक्त्रा तथा रौद्री कपालचमरीकरा। शेषपूर्वा तु विज्ञेया कृष्णवक्त्रा सुभीषणा"।

काल्याः "घनश्यामा ततः काली ताम्ररक्तनिभानना। कपाल कर्त्रिकाहस्ता विज्ञेया भयनाशिनी"।

कलविकरणिकायाः "नीलशुभ्रा महादेवी विकर्णी कलपूर्विका। कपालशक्तिहस्तेयं भयहृच्च शुभप्रदा"।

बलविकरणिकायाः "श्वेतवर्णा विशालाक्षी कपालं जपमालिकाम्।

विभ्राणा शालिदा भूत्वै बलपूर्वा विकर्णिका"।

बलप्रमथन्याः "ताम्राभा श्वेतवर्णा स्यात् बलप्रमथनी शुभा। कपालपाणिनी चेयं सर्वशत्रुक्षयङ्करी"।

सर्वभूतदमन्याः "जवाकुसुमवर्णाभा दंष्ट्रिणी च मनोदरी। कपालवह्निणी भूत्वै सर्वपूर्विका"।

मनोन्मन्याः विश्वकर्मशास्त्रात् "नीलताम्बारुणाभासा पृथुवक्त्रा मनोन्मनी। कपालखड्गिनी भूत्वै शत्रूणां भयवर्द्धनी"।

क्षमायाः मार्कण्डेयपुराणे "अक्षसूत्रञ्च कुम्भं च हृदयाग्रे पुटाञ्जलिम्। पद्माग्निकुण्डमध्यस्था क्षमालामनुधारयेत्"

उमायाः "अक्षसूत्रञ्च कमलं दण्डञ्च कमण्डलुम्। उमा बिभर्त्ति हस्तेषु पूजिता त्रिदशैरपि"।

पार्वत्याः "अक्षसूत्रं शिवं देवगणाध्यक्षं कमण्डलुम्। अग्निगुणद्वयं पार्श्वे पार्वती पर्वतोद्भवा"।

महाकाल्याः विष्णुधर्मोत्तरात् "सा भिन्नाञ्जनसङ्काशा दंष्ट्राङ्कितवदनना। विशाललोचना नारी बभूव तनुमध्यमा। खड्ग, पात्र-शिरः खेटैरलङ्कृतचतुर्भुजा। कबन्धहारं शिरसा बिभ्राणा हि शिरःस्रजम्"।

वारुणीचामुण्डायाः विष्णुधर्मोत्तरे "लम्बोदरी तु कर्त्तव्या रक्ताम्बरपयोधरा। शूलहस्ता महाभागा भुजप्रहरणा तथा। कार्पासकुक्षा देवी वारुणी चातिसुन्दरी। हस्तस्था च कर्त्तव्या वज्रदण्डस्तथैव च। चामुण्डा कथिता चैव सर्वसत्त्वभयङ्करी"।

शिवदूत्याः मत्स्यपुराणे "तथैवार्त्तसखी शुष्का शुष्ककाया विशेषतः। वज्रदण्डयुता देवी भुजगैः परिवेष्टिता। कपालमालिनी भीमा तथा खट्वाङ्गधारिणी। शिवदूती तु कर्त्तव्या मृगालवदना शुभा। आलीढासनसंस्थाना तथा राजच्चतुर्भुजा। अक्षकपालधरा देवी खड्गशूलधरा तथा। चतुर्थस्तु करस्तस्यावाचार्थस्तु शान्तिदः"

कात्यायन्याः मयदीपिकायाम् "कात्यायन्याः प्रवक्ष्यामि रूपं दशभुजं तथा। तयाक्षमपि देवानामनुकारानुकारिणीम्। जटाजूटसमायुक्तामर्धेन्दुकृतलक्षणाम्। लोचनत्रयसंयुक्तां पूर्णेन्दुसदृशाननाम्। अतसीपुष्पसङ्काशां सुप्रतिष्ठां सुलोचनाम्। नवयौवनसम्पन्नां सर्वाभरणभूषिताम्। सुचारुदर्शनां, तनुमध्यां पीनोन्नतपयोधराम्। त्रिभङ्गस्थानसंस्थानां महिषासुरमर्द्दिनीम्। त्रिशूलं दक्षिणे ध्यात्वा खड्गमुक्तं तथैव च। तीक्ष्णधारं तथा शक्तिं वामतो विनिवेशयेत्। खेटकं पूर्णपात्रञ्च पाशमङ्कुशमेव च। घण्टाञ्च परशुञ्चापि चामरं सन्निवेशयेत्। अधस्ताच्छिरं विद्याद्विशिरस्कं प्रदर्शयेत्। शिरश्छेदोद्भवं तद्वद्दानवं खड्गपाणिनम्। हृदि शूलेन निर्भिन्नं निर्यदन्त्रं विभूषणम्। रक्तरञ्जितताङ्गञ्च रक्तविस्फारितेक्षणम्। वेष्टितं नागपाशेन भृकुटीभीषणाननम्। सपाशवामहस्तेन धृतकेशञ्च दुर्धरा। वमद्रुधिरवक्त्रञ्च देव्याः सिंहं प्रदर्शयेत्"।

कम्बिकायाः लक्षणसङ्ग्रहे "सिंहारूढाम्बिका त्र्यक्षा भूषिता दर्पणोद्वहा"। (वामभुजे दर्पणोद्वहा दक्षिणे वरयुक्ता चतुर्भुजम्। "दक्षिणे तु करे प्रोक्तोवरः साधारणः सदा") खड्गखेटधरा ह्याभ्यां कर्त्तव्या च चतुर्भुजा"।

योगेश्वर्याः "दशबाहुस्त्रिनेत्रा च शवस्थशक्त्रसिंहासनम्। बिभ्रती दक्षिणे हस्ते वामे चर्मासि खेटकम्। खट्वाङ्गञ्च त्रिशूलञ्च देवी योगेश्वरी मता"।

भैरव्याः विश्वकर्मशास्त्रात् "एवंरूपा भवेद्भव्या पाशाङ्कुशयुतास्या। भैरव्याख्या यदीष्टा तु भुजैर्द्वादशभिर्युता"।

रम्भायाः देवीपुराणे "कमण्डलुलसत्करे च बिभ्रती वज्रमङ्कुशम्। गजासनस्थिता रम्भा सुरूपा सर्वकामदा"।

शिवायाः "शिवा शवासना कार्या त्रिनेत्रा वरपाशिका। डमरूरवधारी च त्रिशूलाऽभयदायिका"।

कीर्त्तेः "सुमध्याङ्कारयेत् कीर्त्तिं नीलोत्पलव्यवस्थिताम्। सर्वाभरणभूषाढ्यां कलशोत्पलधारिणीम्। मदिरौदनगन्धाढ्या महार्घमणिभूषणा"।

सिद्धेः "सिद्धिर्देवी प्रकर्त्तव्या सिद्धार्थकवरप्रदा। सितचन्दनगन्धाढ्या सितपङ्कजभूषिता। सितासनस्थिता देवी प्रतिहारोपशोभिता।

ऋद्धेः "सुन्दरीङ्कारवेदर्द्धिं पर्यङ्कासनसंस्थिताम्। दर्पणालोकसुरतां तिलकाङ्ककभूषिताम्। मालाचामरशोभाढ्यां वेणुवीणासदाप्रियाम्"।

क्षमायाः "क्षमा तु सुसखी कार्या योगपट्टोत्तरीयका। पद्मासनकृताधारा वरदोद्यतपाणिका। शूलमेखलसंयुक्ता प्रमाणा योगसंस्थिता"।

वैष्णव्याः "सुसिद्धा वैष्णवी कार्या शङ्खचक्रगदाम्बुजा। नवनागाकृतापीडा पीतवस्त्रा सुशोभिता"।

ऐन्द्र्याः "ऐन्द्री सुरवराध्यक्षा गजराजोपरिस्थिता। वज्राङ्कुशधरा देवी हारकेयूरभूषिता"।

याम्यायाः "वैवस्वती प्रकर्त्तव्या दुर्द्धरा महिषोपरि। शुक्लराक्षा कपालेऽस्क् पिबन्ती दण्डधारिणी"।

दीप्तेः "तेजोऽधिका प्रकर्तव्या दीप्तिचन्द्रासनस्थिता"।
रतेः "कमनीया रतिः कार्या वसनोज्ज्वलभूषणा। रत्यमाना शुभा देवी समस्ताभरणैर्युता। वीणावादनशीला च मदकर्पूरचर्चिता। दण्डाक्षसूत्रधरा च व्रतस्थायोगसंस्थिता"।
श्वेतायाः "श्वेता पूर्णेन्दुसदृशा श्वेतपङ्कजसंस्थिता"।
भद्रायाः "भद्रा सुभद्रा कर्तव्या भद्रासनव्यवस्थिता। नीलोत्पलफलहस्ता शूलखट्वाङ्गधारिणी"।
भद्रकालायाः "सिंहासनस्थिता देवी जटासकुटमण्डिता। शूलाक्षखट्वधरा च वरदाभयचापधृक्। दर्पणं शरखेटञ्च खड्गचन्द्रधरा शिवा। सुरूपा नवयौवनोपेता सुकनी चारुहासिनी। सर्वाभरणभूषाढ्यो सर्वशोभासमन्विता"।
जयाविजययोः "जयाञ्च विजयां कुर्यात् शूलपट्वाङ्गधारिणीम्। वरोद्यताञ्च सिंहस्थां सर्वकर्मप्रसाधिनीम्"।
काल्याः "काली करालरूपा च चण्डपाशोद्यता भवेत्"।
षष्टाकर्ण्याः "षष्टाकर्णी प्रकर्तव्या षष्टाब्दिशूलधारिणी"।
जयन्त्याः "जयन्ती सुन्दरी कार्या कुलशूलासिधारिणी। खेटकव्यग्रहस्ता च पूजनीया शुभान्वितैः"।
दितेः "दितिर्दैत्यनुता देवी सदा पूज्या महासने !। दण्डासनस्थिता भद्रा सर्वाभरणभूषिता। फलनीलोत्पलकरा चोत्सङ्गनिधृभूषिता"।
अरुन्धत्याः "अक्रोधाऽरुन्धती देवी सितवस्त्रा व्रतस्थिता। पद्मपुष्पोदकरा चन्दनेन सुचर्चिता"।
अपराजितायाः "अपराजिता च कर्तव्या सिंहारूढा महाबला। पिनाकेषुकरा चैव खड्गखेटकधारिणी। त्रिनेत्रेन्दुजटाभारा ज्वलत्पावकसन्निभा"।
कौमार्याः "कौमारी चैव कर्तव्या मयूरासनसंस्थिता। त्रिदण्डीकालरूपा च रक्तमाल्या सकुक्कुटा"।
चतुःप्रतियोगिनीरूपाणि मयदीपिकायां
१अजोभ्यायाः "वज्राख्याऽभयहस्ताग्रे करे सा खेटभृत्ततः। हेमभूषणभूषा स्यादजोभ्या करिसंस्थिता"।
२अजकर्ण्याः "अजकर्णी तु गौराङ्गी कम्बुबाणाभयावहा। धनुःकपालभृत् सौम्ये अजस्या तर्जनीस्थिता"।
३राक्षस्याः "राक्षसी हेमवर्णा स्याद्वारुणाक्षी वृषस्थिता। कुठाराग्निभृद्याम्ये वामे पाशाङ्कुशान्विता"।
४अपर्णायाः "अपर्णा चम्पकच्छाया दक्षिणे सुहराङ्कुशौ। कपालञ्च फलं सव्ये धत्ते कृष्णास्थिसंस्थिता"।
५अजायाः "अजा कूर्मस्थिता गौरी अपस्या सा घटान्विता। वामे कपालपिण्डाभृत्सव्यांसेऽङ्कारभूषिता"। (अपस्या अपरा)
६पिङ्गाक्ष्याः "पिङ्गाक्षी स्याद्वभ्रुवर्णा त्रिनेत्रा च कृशस्थिता। कौशेयपाशभृद्याम्ये वामे चाङ्कुशखेटिनी"।
७अजयायाः "अजया हेमवर्णा स्याद्वारुणाक्षी वृकस्थिता। कुठारखड्गभृद्याम्ये वामे पाशाङ्कुशान्विता"।
८अजेभायाः "अजेभा तु शवगा पीता शक्तिभिन्दीधनुःकरा। याम्ये डमरुशूलेषुवक्षभृत् स्कन्धसंस्थिता"।
९अजानायाः "शक्तिखड्गधरा त्वजा खेटपाशकपालिनी। रक्ता वह्निस्थिता बाला क्रीड़न्ती दनुभिः सह"।
१०लोलायाः "लोला लोलावती रक्ता दक्षपाणिजयान्विता। विभ्राणा पट्टिशस्याग्रं वामे मस्ताङ्गमम्बुजम्"।
११जयायाः "वृषारूढा जया रक्ता याम्ये दण्डासिधारिणी। कर्त्तरीकाङ्गभृद्वामे तर्जन्यासक्तसिक्थका"।
१२लोलायाः "कर्तरी मार्जनी याम्ये सौम्ये पीडनकद्वरे। शूलं रुरुयुतं धत्ते लोला तु खरगा सदा"।
१३लङ्घायाः "वामे लुलापखण्डञ्च तत् पिबन्त्यसृक्करङ्किका। लङ्घोरःस्थिता लङ्घा खादन्ती विग्रितङ्कनम्"।
१४लङ्घेश्वर्याः "त्रिफलाशाकखेटोदामोदकाशी च दक्षिणे। शोणा लङ्घेश्वरी कुक्षे डिम्बस्तुचौ बिभ्रती"।
१५लालसायाः "दक्षिणे वरदं चक्रं वामे कङ्कणकङ्करे। बिभ्राणा कोलगा रक्ता लालासृग्लालसा मता"।
१६विमलायाः "द्वीपिस्था विमला रक्ता त्वजाऽलङ्कारभूषिता। कर्तरीकुम्भभृद्याम्ये वामे पाशकपालिनी"।
१७अजितागनायाः "कृष्णा अजितागनाजस्था ज्वालिनी दक्षिणे शुभा। वामे त्वभयहस्ता स्याद्विटराज्यघटान्विता"।
१८विशालाक्ष्याः "शूकरास्या विशालाक्षी त्रिसन्ध्यस्था सितेतरा। घण्टापाशधरा सौम्ये याम्ये कर्तरिकाभया"।
१९अङ्कारायाः "अङ्कारा मीनवक्त्रा स्यात् मीनगा साक्षमालिनी। सृणिं बिभ्रती वामे सौम्ये तु फलपल्लवौ"।
२०अङ्गवासुख्याः "अङ्काभ्यां बिभ्रती वालौ पर्यङ्के अङ्गवासुखी। समस्तस्कन्धभृद्याम्ये कृष्णा नीलधरान्वितः"।
२१हाहारवायाः "तर्जन्यभयभृत्सौम्ये याम्ये दण्डकपालिनी। कृष्णा हाहारवा क्रूरा रासभस्था खरस्थिता"।
२२महाक्रूरायाः "लुलापास्या लुलापस्था महाक्रूरा सितेतरा। वामेऽस्याः पाशमालाञ्च दक्षिणे दण्डलेखनी"।
२३क्रोधनायाः "खड्गिता क्रोधना याम्ये खादन्ती मांसमङ्गकम्। वामे विद्युज्जिह्वा क्रूरा सव्ये सीरकपालिनी" चक्रस्थाऽऽकण्ठमदिरां बिभ्रती जम्बुकस्थिता"।

२४भवाननायाः "कृष्णा भवानना खट्वाङ्गेष्वास्त्रिविभूषणा। वामे स्यात् शिखरं शूलं खर्परं खेलिकान्यतः"।

२५सर्वज्ञायाः "त्रिशूलपुरुषभ्रद्वामे सव्यं डमरुकं यवम्। विभ्राणा भाजनं हाभ्यां सर्वज्ञा प्रेतमाश्रिता"।

२६तरलायाः "जानुचिप्रौ करौ कृत्वा उद्यन्ती तरलायते। शूलडमरुहस्ता च गोधास्या तरलाश्रिता"।

२७तारायाः "तारा तारगुणैर्युक्ता कौशिकस्या सितेतरा। धत्ते शवार्द्धके सौम्ये शूलखट्वरमन्यतः"।

२८कृष्णायाः "कृष्णा पद्मस्थिता दत्ते ज्ञानमुद्राक्षमालिनी। वामेदं वामतो धत्ते पुस्तकञ्च कमण्डलुम्"।

२९हयाननायाः "रौद्री कृष्णा तुरङ्गास्या कबन्धस्था हयानना। खड्गखर्परधरा वाम्ये सौम्ये संहारिकाङ्कभृत्"।

३०रक्तसंध्याख्याः "छिन्नहस्ता शवारूढा धारा स्यूता जटाधरा। खट्वाङ्गं डमरुं सौम्ये शूलोत्कृत्तं बिभ्रती ततः। शवस्था रक्तसंध्याख्या स्यात्तनौ जटिलाश्रिता। कृपाणान् चक्रकङ्कालान् बिभ्रती चर्मवाससी"।

३१शवरायाः "सवेदनहिजानक्षा वरिष्ठा शवराश्रिभा। वामे करोपधानाग्निधरा उल्काधरान्यतः"।

३२तालुजिह्विकायाः "स्फटिकाभा शरत्कस्था सुकाना तालुजिह्विका। शङ्खखेटकहस्तापा वाम्ये खड्गिकखड्गभृत्"।

३३रक्ताख्याः "रक्ताची वाहमारूढा रक्तपाना शशिप्रभा। गदाखड्गधरा वाम्ये वामे पाशकपालभृत्"। [इत्यम्।

३४सुप्रसिद्धायारूपवाक्यं सहितपुस्तके पतितं मयदीपिकायां

३५विद्युज्जिह्वायाः "विद्युज्जिह्वाश्रिता क्रूरा सव्ये शोरकपालिनी। चक्रस्था चक्रकर्तरीधारिणी दक्षिणे करे"।

३६करङ्किण्याः "पाशस्था चामरव्यग्रभद्रदृतिद्वयसंयुता। कुम्भपाशधरा श्वेता क्रोधयुक्ता करङ्किणी"।

३७मेघनादायाः "मेघनादा तु चन्द्राभा खड्गखेटकधारिणी। जालैर्दंता घनारूढा तडिन्मण्डलसन्निभा"।

३८प्रचण्डोग्रायाः "प्रचण्डोग्रा तु नक्रस्था वाम्येऽस्याः कर्त्तरीफलम्। कपालं सव्यभन्यत्र शङ्खो स्फटिकप्रभा"।

३९कालकर्ण्याः "शुक्ला दंष्ट्राकरा रौद्री बिभ्रत्यजाचर्मकृत्तकम्। कालकर्णी जगत्ख्याता कर्त्रिकारविभूषणा"।

४०चन्द्रावल्याः "चन्द्रावली तु हेमाभा हेमसिंहासनस्थिता। वाम्येऽक्षमाला मालाभृत् सव्येऽब्ज-ध्वजधारिणी"।

४१चन्द्रकालायाः "चन्द्रकाला स्थिता गौरी वेदाक्षा दोर्द्वयोः क्रमात्। कमण्डलुं शुभ्रमणा मन्त्रमालाक्षुकान्विता"।

४२वरप्रदायाः "कर्त्तरीमभयं वाम्ये धत्ते श्वेता वरप्रदा। दण्डंशवसमारूढा पूर्णपात्रधरान्यतः"।

४३प्रपञ्चिकायाः "फलखड्गान्विता वाम्ये कृत्त-कण्ठोधरान्यतः। रौद्रमाला प्रपञ्चाख्या गौरी विश्वप्रपञ्चिका।

४४प्रलयान्तायाः "मस्तकस्था प्रलयान्ता बिभ्रती करयोर्द्वयोः। खादन्त्याचफलं कृष्टा गौराङ्गी वानरानना"।

४५शिशुवक्त्रायाः "शिशुवक्त्रा मृगारूढा पिङ्गाभा वाम्यसौम्ययोः। भिन्दीपालकखेटाभ्यां पाशाक्षिभ्याञ्च संयुता।

४६पिशाच्याः "काकास्या श्येनगा गौरी पिशाची रक्तमण्डिता। कङ्काल-कर्त्तरीखड्गं बिभ्रती वाम्यसौम्ययोः"।

४७पिशिताशायाः "फल-तृणधरा वामे सौम्ये-शस्त्रासिधारिणी। खड्गस्था बन्धुवर्गा स्यात् पिशिताशातिदुर्वहा"।

४८लोलुपायाः "खट्वाङ्गी लोलुपा पीना खरस्था वाम्यसौम्ययोः। खड्गडमरुकर्त्तरीः पाशञ्चैव तु बिभ्रती"।

४९धमन्याः "धमनी पुष्पकस्था स्यात् गौरी यज्ञगणान्विता। गदापट्टिशखड्गौम्ये स्थूलतोमरिणी ततः"।

५०तपन्याः "तपनी सर्पगा गौरी वराङ्गी पद्मानना। खट्वाङ्गवानयोर्भोगे न्यस्तहस्तोपरूपिणी"।

५१वामन्याः "पीता महाकुशा सा स्यात् वामनी बिभ्रती करे। कुठारं खगुडं वामेऽक्षमालां वनस्थतः"।

५२विकटाननायाः "शूलभिन्दिपालपाशा सिंहाक्रूरशरीरिणी। जिह्वे हे बिभ्रती चैव चतुर्दंष्ट्रविकटानना"।

५३वायुवेगायाः "शङ्खपूरणिका हाभ्यां हस्ताभयधरा हयोः। द्विनिष्ठरथसंस्था स्यात्तारा वायुवेगिका"।

५४कटपूतनायाः "भासस्थिता कटपूतनिः सौम्ये खड्गकपालभृत्। गौरी महातनुर्याम्ये कर्त्तरीपट्टिकाधरा"।

५५विकटायाः "उष्ट्रस्था विकटा गौरी भयङ्करिकानना। तृणञ्च डमरुं वाम्ये सौम्ये खड्गार्द्धमस्तकम्"।

५६विश्वरूपिजायाः "खेटक खड्गभद्रामे गदा-चक्रास्त्रभृत्ततः। वनमालावती पीता तार्क्ष्यस्था विश्वरूपिका"।

५७यमजिह्वायाः "खड्गं खट्वरं वाम्ये परशुम्बन्धनं ततः। बिभ्रती यमजिह्वा स्यात् कराला महिषस्थिता"।

५८जयन्त्याः "खट्वाङ्गी खरगा श्वेता वाम्ये डमरुतृणभृत्। सदैत्यशैलखण्डोग्रा जयन्ती वामहस्तयोः"।

५९दुर्जयायाः "व्याघ्रारूढा दुर्जया श्वेता रौद्री भूतगणावृता। खड्गशूलोद्यतकरा दुर्गकाननवासिनी"।

६०यमानिकायाः "असक्रत् खेटिनी दोर्भ्यां चतुर्दोर्व्यस्तसौम्ययोः। शूलवाणधरा याम्ये धनुःशक्तिकरान्यतः। भ्रकटस्त्रातिघोरास्या घोरवर्णा यमानिका"।

६१विडाल्याः "मार्ज्जारस्या विडाली च विडालाक्षी भवेत् सिता"।

६२रेवत्याः "वामे ढक्कञ्च खट्वाङ्गं शूलं टङ्कञ्च बिभ्रती। क्षया पिशाचवक्त्रोया कपालस्था च रेवती"।

६३पूतनायाः "कुशूलयष्टिहस्ते भिन्नीपात्रकपालभृत्। कृष्णाभा पूतना लम्बा विकृतास्या ग्रवस्थिता"।

६४विजयन्तिकायाः "कर्त्तरीशूलभृद्याम्ये वामे खड्गकपालिनी। श्वेतवर्णा हयारूढा विजया विजयप्रदा"।

ब्रह्मणः विष्णुधर्मोत्तरात् "ब्रह्माणं कारयेद्विद्वान् देवं सौम्यं चतुर्भुजम्। वज्रपद्मासनन्तुष्टं तथा कृष्णाजिनाम्बरम्। जटाधरं चतुर्वक्त्रं सप्तहंसरथस्थितम्। वामे न्यस्तेतरकरन्यस्तैकन्दोर्युगं भवेत्। एतच्चिन्तु दक्षिणे पाणावक्षमाला तथा शुभा। कमण्डलुं द्वितीये च सर्वाभरणधारिणम्। सर्वलक्षणयुक्तस्य ग्रालिरूपस्य पार्थिव!। पद्मपत्रदलाभाभं ध्यानसंभीलितेक्षणम्। ब्रह्मेत्यङ्कारवेदेवं चित्रे वा वास्तुकर्मणि"।

ग्रादित्यपुराणे तु "पद्मपत्रासनस्थस्य ब्रह्मा कार्यश्चतुर्मुखः। सावित्री तस्य कर्त्तव्या वामोत्सङ्गगता तथा"।

प्रजापतेः "ग्रादित्यवर्णं धर्मज्ञ! साक्षमालाकरं तथा। रूपं पूर्वोदितं कार्यं रूपमन्यच्च्यवतेः"।

लोकपालब्रह्मणः "हंसयानेन कर्त्तव्यो न कार्यश्च चतुर्मुखः। ब्रह्माख्यमपरं रूपं सर्वकार्यं प्रजापतेः। कमण्डलुं पुस्तकञ्च धत्ते पद्मं कमण्डलुम्। चतुर्वक्त्रा तु सावित्री श्रोत्रियाणां गृहे स्थिता"।

विश्वकर्मणः "विश्वकर्मा तु कर्त्तव्यः सुरसूत्रधरः प्रभुः। वन्दनग्रपाणिर्हिभुजश्चेजोमूर्तिधरो महान्"।

धर्मस्य "चतुर्वक्त्रश्चतुष्पादवृषाङ्कः सिताम्बरः। सर्वाभरणवान् श्वेतो धर्मः कार्यो विजानता। दक्षिणे चाक्षमाला च तस्य वामे च पुस्तकम्। मूर्तिमान् व्यवसायस्तु कार्यो दक्षिणभागतः। वामभागे ततः कार्यो दण्डः परमरूपवान्। कार्यौ पद्मकरौ मूर्ध्नि विन्यस्तौ तु तथा तयोः"।

ऋग्वेदस्य विश्वकर्मशास्त्रात् "ऋग्वेदः श्वेतवर्णः स्यात् द्विभुजो रासभाननः। वामे माला धरः सौम्यः प्रीतश्चाध्ययनोद्यतः"।

सामवेदस्य "नीलोत्पलदलाभासः सामवेदो हयाननः। ग्रक्षमालान्वितो दक्षे वामे कम्बूधरः स्मृतः"।

यजुर्वेदस्य "यजुषः पीतवर्णः स्यात् यजुर्वेदोऽष्टबाहुकः। वामे कुलिशपाशिस्तु भूतिदो मङ्गलप्रदः"।

ग्रथर्ववेदस्य "ग्राथर्वणाभिधो वेदो धवलो मर्कटाननः। ग्रक्षसूत्रञ्च खट्वाङ्गं बिभ्राणोऽयं जयप्रियः"।

शिक्षायाः "शिक्षा शुभ्राभयकरा ज्ञानसङ्घान्विता शुभा। साक्षसूत्रा सकुण्डीका द्विभुजा दण्डपङ्कजा"।

कल्पस्य "कल्पस्तु कृष्णदाभासो वायसास्यो महोदरः। दण्डी कुण्डीधरोऽजस्रो मेखलाकुण्डलान्वितः"।

व्याकरणस्य "सितं व्याकरणं देवं मयूरास्यं घटोदरम्। वीणाकलान्वितं दिव्यं दिव्यवस्त्रविभूषितम्"।

निरुक्तस्य "इन्दुवह्निर्मलं भान्तं वकवक्त्रं जगोदरम्। पाशपङ्कजहस्तं स्याज्जानसूत्रं सपुस्तकम्। नरुक्तमिति निर्द्दीतं छन्दोनिर्द्दीपतेऽधुना"।

छन्दसः "जवाकुसुमसंकाशं छन्दो देवं विपश्चिता। चकोरासङ्गपाशान्तु शक्तिं बिभ्रच्छिखान्विताम्। कोष्ठकुण्डलकोमेतं प्रवालसदृशकुण्डलम्"।

ज्योतिषस्य "ज्योतिषं तु विडालास्यमिन्द्रगोपनिभं शुभम्। ग्रक्षसूत्रं कलं बिभ्रद्वस्त्रोदरचमत्कृतः"।

मीमांसायाः "सोमकान्तिसमाभासं मीमांसाख्यसत्तमम्। ग्रक्षसूत्रं दधद्धस्ते सुधापूर्णघटं करे"।

न्यायस्य "ग्रतसीपुष्पसङ्काशो न्यायो देवो विपश्चिता। सिंहास्यो दक्षिणे सूत्रं ध्वजं वामकरे दधत्"।

धर्मशास्त्रस्य "धर्मशास्त्रं सितं भान्तं चाक्षवक्त्रं कजासनम्। सक्रोडपाशभद्धस्ते तथाऽङ्कुशन्तु वामतः"।

पुराणस्य "पुराणं चम्पकाभासं शुकवक्त्रं चतुर्दलम्। ग्रक्षसूत्रं हये देवं नानाभरणभूषितम्"।

इतिहासस्य "इतिहासः कजाभासः शूकरास्यो महोदरः। ग्रक्षसूत्रं घटं बिभ्रत् पल्लवाभरणान्वितः"।

धनुर्वेदस्य "पीतवर्णो धनुर्वेदः शिखिवक्त्रो महातनुः। रत्नमालावलिं धत्ते मस्तके भूषिता जटा"।

ग्रायुर्वेदस्य "ग्रायुर्वेदो हरिद्राभो वानरास्यो विशालदृक्। ग्रक्षसूत्रं सुधाकुम्भं बिभ्रदारोग्यदो भृशम्"।

शल्यशास्त्रस्य "शल्यशास्त्रं सितं रम्यं शूकरवक्त्रं जटाधरम्। ग्रक्षसूत्रं त्रिशूलञ्च बिभ्राणञ्च त्रिलोचनम्"।

पञ्चरात्रस्य "पञ्चरात्राभिधं शास्त्रं धवलं हयाननम्। ग्रक्षसूत्रं स्रुवं धत्ते वनमालाविभूषितम्"।

पाशुपतस्य "शास्त्रं पाशुपतं शुभ्रं व्यालवक्त्रं जगोदरम्। खट्वापधरं भीमं व्याघ्रचर्माम्बरावृतम्"।

पातञ्जलस्य "पातञ्जलाभिधं रक्तं सर्पवक्त्रं सतेजसम्। चक्रस्थं पृदाकुञ्च धारयन् कुण्डलान्वितम्"। (पृदाकुः सर्पः)।

साङ्ख्यस्य "साङ्ख्यं तत् कपिलं वक्त्रं सुज्वलतुन्दिलम्। जाग्रदक्षधरं दीर्घनखलोमजटाधरम्"।

अर्थशास्त्रस्य "अर्थशास्त्रं भवेद्गौरं सारिकावदनं शुभम्। चक्रस्थं फलं बिभ्रदङ्कारं कमण्डलुम्"।

प्रसङ्गाद्देवादीनामधिदेवताः तल्लक्षणानि प्रदर्श्यन्ते विष्णुधर्मोत्तरात् "ऋग्वेदस्तु स्मृतो ब्रह्मा यजुर्वेदस्तु वासवः। सामवेदस्तथा विष्णुः शम्भुराथर्वणो भवेत्। शिक्षा प्रजापतिर्ज्ञेयः कल्पो ब्रह्मा प्रकीर्तितः। सरस्वती व्याकरणं निरुक्तं वरुणः प्रभुः। छन्दो विष्णुस्तथैवाग्निर्ज्योतिषं भगवान् रविः। मीमांसा भगवान् सोमो न्यायदेवः समीरणः। धर्मश्च धर्मशास्त्राणि पुराणञ्च तथा मनुः। इतिहासः प्रजाध्यक्षो धनुर्वेदः शतक्रतुः। आयुर्वेदस्तथा साक्षाद्देवो धन्वन्तरिः प्रभुः। कलावेदो मही देवी शल्यशास्त्रं महेश्वरः। सङ्कर्षणः पञ्चरात्रं रुद्रः पाशुपतं तथा। पातञ्जलमनन्तश्च साङ्ख्यञ्च कपिलो मुनिः। अर्थशास्त्राणि सर्वाणि धनाध्यक्षः प्रकीर्तितः। कलाशास्त्राणि सर्वाणि कामदेवो जगद्गुरुः। अन्यानि यानि शास्त्राणि यत् कर्माणि प्रचक्षते। स एव देवता तस्य शास्त्रं कार्यञ्च देववत्"।

ऋषीणाम् मयसंपन्ने "उदासीना सोपवीताः कमण्डलुचक्षस्त्रिणः। जटिलाः श्मश्रुलाः शान्ताः आसीना ध्यानतत्पराः। अग्निवेशो वसिष्ठश्च कार्यो भार्यासमन्वितः। गौतमश्च भरद्वाजो विश्वामित्रश्च कश्यपः। जमदग्निर्वसिष्ठोऽत्रिः सप्त वैवस्वतेऽन्तरे। मरीचिरत्र्यङ्गिरसौ पुलस्त्यः पुलहः क्रतुः। प्रचेताश्च वसिष्ठश्च भृगुर्नारद एव च। जटिलाः श्मश्रुलाः शान्ताः ऊर्ध्वा धमनिसन्ततः। कुशमालाधराः कार्या मुनयो हिमजा दश"।

नारदस्य "नारदो देवगन्धर्वः साक्षसूत्रकमण्डलुः। सेव्यो वै वीणया वामभुजमूलोपगूढया"।

मुनीनाम् भविष्योत्तरात् "प्रक्षाल्य काञ्चनं कृत्वा यथा शक्त्या तु शोभितम्। पुरुषाकृतिं प्रधानञ्च जटामण्डलधारिणम्। कमण्डलुकरं शिष्यैर्वृतञ्च परिवारितम्। सत्यधर्मसमाचारं दर्भहस्तं वरं मुनिम्"।

भृगूणाम् "कर्तव्याः शक्रलक्ष्मेण भृगवो नाम देवताः। भुवनो भावनश्चैव सुजन्यः सुजनस्तथा। क्रतुः शुचिः सुमुनीम व्रजश्च व्रतमस्तथा। प्रसवश्चाव्ययश्चैव दक्षो द्वादशकस्तथा। भृगवो नामनिर्दिष्टा देवा द्वादश यज्ञियाः"।

अङ्गिरसः "जीवरूपेण कर्तव्या देवाश्चाङ्गिरसस्तथा। आत्मा ह्यायुर्मनो दक्षः परमाणस्तथैव च। हविश्च गविश्च ऋतः सत्यश्च तेजसः"।

विष्णोः विष्णुधर्मोत्तरात् "देवदेवं यथा विष्णुं कारयेद्वरलक्षितम्। कौस्तुभोद्भासितोरस्कं सर्वाभरणधारिणम्। सजलाम्बुदसच्छायं पीतदिव्याम्बरं तथा। सुखानि चास्य चत्वारि बाहवो दिगुणास्तथा। सौम्येन्दुवदनं पूर्वं नारसिंहन्तु दक्षिणम्। कपिलं पश्चिमं वक्त्रं तथा वाराहमुत्तमम्। तस्य दक्षिणहस्तेषु बाणारिसुखाभयम्। चर्मशीरवराबिन्दुर्वामे च वनमालिनः। कार्याणि विष्णोर्हे मैत्र! वामहस्तेषु क्रमात्"। (अरि, चक्रं इन्दुः शङ्खः)।

लोकपालविष्णोः "एकवक्त्रो द्विबाहुश्च गदाचक्रधरः प्रभुः।

वासुदेवस्य "एकवक्त्रश्चतुर्बाहुः सौम्यरूपः सुदर्शनः। पीताम्बरश्च मेघाभः सर्वाभरणभूषितः। कण्ठेन शुभदेशेन कम्बुतुल्येन राजता। वराभरणयुक्तेन कुण्डलोत्तरभूषिणा। अङ्गदी बद्धकेयूरो वनमालाविभूषणः। उरसा कौस्तुभं बिभ्रत् किरीटं शिरसा तथा। शिरःपद्मस्तथैवास्य कर्तव्यश्चारुकर्णिकः। पुष्टिश्लिष्टावतभुजसन्तुलाक्षनखाङ्गुलिः। मध्येन त्रिवलीभङ्गशोभितेन सुचारुणा। स्त्रीरूपधारिणी शोभा कार्या तत्पादमध्यगा। तत्करस्थाङ्घ्रियुगला देवः कार्यो जनार्दनः। तालामरपदन्यासः किञ्चिन्निष्क्रान्तदक्षिणः। अनुद्धता मही कार्या देवदर्शितविग्रहा। देवश्च कटिवासेन कार्यो जान्ववलम्बिना। वनमाला च कर्तव्या देवजान्ववलम्बिनी। यज्ञोपवीतं कर्तव्यं नाभिदेशसमागतम्। उत्फुल्लकमलं पाणौ कुर्याद्देवस्य दक्षिणे। वामपार्श्वगतं शङ्खं शङ्खाकारन्तु कारयेत्। दक्षिणे तु गदा देवी तनुमध्या सुलोचना। स्त्रीरूपधारिणी सुभ्रूः सर्वाभरणभूषिता। पद्मस्थौ देवदेवेशं कार्यौ चामरधारिणौ। कुर्यात्तनूर्ध्वं विन्यस्तं देवहस्तन्तु दक्षिणम्। वामभागगतश्चक्रः कार्यो जम्बोदरस्तथा। सर्वाभरणसंयुक्तो दत्तविस्फारितेक्षणः। कर्तव्यश्चामरकरो देवीक्षणतत्परः। कुर्यात् देवकरं वामं विन्यस्तं तस्य मूर्धनि।

सङ्कर्षणस्य "वासुदेवसदृक्ष्मेण कार्यः सङ्कर्षणः प्रभुः। स तु

शुक्लवपुः कार्यो नीलवासा वदूत्तम ! । गदास्थाने च खड्गस्थाने च साङ्कुशम् । कर्त्तव्यौ तनुमध्यौ तु रूपौ रूपसंयुतौ" ।

प्रद्युम्नस्य "वासुदेवस्वरूपेण प्रद्युम्नश्च तथा भवेत् । स तु दूर्वाङ्कुरश्यामः सितवासा विधीयते । चक्रस्थाने भवेच्चापो गदास्थाने तथा शरः । तथाविधौ तौ कर्त्तव्यौ यथा खड्गचाङ्कुशौ" ।

अनिरुद्धस्य "एतदेव तथा रूपमनिरुद्धस्य कारयेत् । पद्मपत्राभवपुषो रक्ताम्बरधरस्य तु । चक्रस्थाने भवेद्धर्म गदास्थानेऽसिरेव च । चर्म स्याच्चक्ररूपेण प्रांशुः खड्गो विधीयते । चक्रादीनां स्वरूपाणि किञ्चित्पूर्वं सुदर्शयेत् । रत्नाख्यायुधरूपाणि चक्रादीन्येव यादव ! । वामपार्श्वगताः कार्या देवानां प्रवराध्वजाः । सुपताकायुता राजन् ! यष्टिस्थास्ते यथेरितम्" ।

लक्ष्मीनारायणयोः विश्वकर्मशास्त्रात् "लक्ष्मीनारायणौ कार्यौ संयुक्तौ दिव्यरूपिणौ । दक्षिणस्था विभोर्मूर्त्तिर्लक्ष्मीमूर्तिस्तु वामतः । दक्षिणः करजस्तोऽस्या वामो हस्तः सरोजभृत् । विभोर्वामकरो लक्ष्म्याः कुक्षिभागस्थितः सदा । सर्वावयवसंपूर्णौ सर्वालङ्कारभूषितौ । सुनेत्रकपोलास्या रूपयौवनसंयुता । सिद्धिः कार्या समीपस्था चामरव्याकृतौ शुभा । कर्त्तव्यं वाहनं सव्ये देवाधोभागगं सदा । शङ्खचक्रधरौ तस्य द्वौ कार्यौ पुरुषौ पुरः । वामनौ हारकेयूरकिरीटमणिभूषणौ । उपासकौ समीपस्थौ प्रभोर्जङ्घान्वितौ शुभौ । रत्नानां योगपट्टश्च शिखामञ्जरिमास्थितौ" ।

योगेश्वरस्य सिद्धार्थसंहितायाम् "पद्मासनसमासीनः किञ्चिन्मीलितलोचनः । योगाख्ये दक्षदोर्दण्डे श्वेतपद्मोपरिस्थितः । वामदक्षिणगौ हस्तौ उत्तानावेकभागगौ । तत्करद्वयपार्श्वस्थे पङ्केरुहमहागदे । ऊर्द्धे करद्वये तस्य पाञ्चजन्यः सुदर्शनः । योगस्वामी स विज्ञेयः पूज्यो मोक्षार्थियोगिभिः" । [तिमूर्त्तिशब्दे २८७८पृ० दर्शितानि चतुर्विंशतिमूर्त्तीनां लक्षणानि विष्णुधर्मोत्तरे उक्तानि चतुर्विंशहंसमत्स्यकूर्माणाम् "हंसोमत्स्यस्तथा कूर्मः कार्यास्तद्रूपधारिणः । ब्रह्मा मत्स्यस्तु कर्त्तव्यो देवदेवो जनार्दनः" ।

"वराहस्य "ऐश्वर्यसंनिरुद्धश्च वराहो भगवान् हरिः । ऐश्वर्यशक्त्या दंष्ट्राग्रसंदष्टधरणीश्वरः । स्थवराहोऽथ वा कार्यः श्रेष्ठोपरिगतः प्रभुः । श्रेष्ठचतुर्भुजः कार्यः शार्ङ्गरत्नकृपान्वितः । आश्वर्योत्फुल्लनयनो देवीवामतत्परः । कर्त्तव्यौ शोरसश्चौ करयोस्तस्य यादव ! । सर्पभोगश्च कर्त्तव्यस्तथैव रचिताञ्जलिः । आसीदस्थानसंस्थानस्तृतीये भगवान् भवेत् । वामारत्निगता तस्य योषिद्रूपा वसुन्धरा । नमस्कारपरा तस्य कर्त्तव्या द्विभुजा शुभा । यस्मिन् भुजे धरा देवी तत्र शङ्खकरो भवेत् । अन्ये तस्य कराः कार्याः पद्मचक्रगदाधराः । हिरण्याक्षशिरश्छेदचक्रोद्धृतकरोऽथ वा । स्मृतोद्धृतहिरण्याक्षः सुखो भगवान् भवेत् । मूर्त्तिमन्तमनैश्वर्यं हिरण्याक्षं विदुर्बुधाः । ऐश्वर्येणाविनाभूतेन स निरस्तोऽरिमर्दनः । स्थवराहोऽथ वा कार्यो ध्याने कपिलवत् स्थितः । द्विभुजस्तस्य वा कार्यः पिशङ्गनिर्वपनोद्यतः । समग्रक्रोडरूपेण बहुदानवमध्यगः । स्थवराहोवराहश्च कर्त्तव्यः शास्त्रविदारथः" ।

नरसिंहस्य "य एवं भगवान्विष्णुर्नरसिंहवपुर्द्धरः । ध्यानविधिः स एवोक्तः परमस्थानवर्द्धनः । पीनस्कन्धकटिग्रीवः शूरमध्यः शुभोदरः । सिंहाननो महादंष्ट्रश्च नीलवासाः प्रभान्वितः । आसीदत्स्थानसंस्थानः सर्वाभरणभूषितः । ज्वालामालाकुलमुखो ज्वालाकेसरमण्डितः । हिरण्यकशिपोर्वक्षःपाटयन्नखरैः खरैः । नोनोत्साहः कर्त्तव्यो दैवज्ञानुगतस्तथा । हिरण्यकशिपुर्दैत्यस्तमज्ञानं विदुर्बुधाः" ।

वामनस्य "कर्त्तव्यो वामनो देवः सद्भुजैर्मौञ्जपर्वभिः । पीनगात्रश्च कर्त्तव्यो दण्डी चाध्ययनोद्यतः । दूर्वाश्यामश्च कर्त्तव्यः शुक्लाजिनधरस्तथा" ।

त्रिविक्रमस्य "सजलाम्बुदसङ्काशस्तथा कार्यस्त्रिविक्रमः । दण्डप्राग्रधरः कार्यः शङ्खचक्रगदाधरः । शङ्खचक्रगदापद्माः कार्यास्तस्य सरूपिणः । निर्देशास्ते न कर्त्तव्या शेषं कार्यन्तु पूर्ववत् । एकोर्द्ध वदनः कार्यो देवो विस्फारितेक्षणः" ।

परशुरामस्य "कार्यस्तु भार्गवो रामो जटामण्डलदुर्दृशः । स्कन्धेऽस्य परशुः कार्यः शुक्लाजिनधरस्य तु" ।

रामादीनाम् "रामो दाशरथिः कार्यो राजलक्षणलक्षितः । भरतो लक्ष्मणश्चैव शत्रुघ्नश्च सहायगाः । तथैव सर्वे कर्त्तव्याः किन्तु मौलिविवर्जिताः" ।

लक्ष्मणस्य "लक्ष्मणश्चक्रधरः कार्यो नीलोत्पलदलच्छविः । इन्दीवरधरा कार्या तस्य साक्षाच्च रुक्मिणी" ।

बलभद्रस्य "सीरपाणिर्बलः कार्यो मुसली चैव कुण्डली । श्वेतोऽतिनीलवसनो मदाघूर्णितलोचनः" ।

प्रद्युम्नस्य "चापबाणधरः कार्यः प्रद्युम्नश्च सुदर्शनः। राजचिन्द्रमणिश्यामः श्वेतवासा मदोत्कटः"।

कामस्य "कामदेवस्तु कर्तव्यो रूपेणाप्रतिमो भुवि। अष्टबाहुः प्रकर्त्तव्यः शङ्खपद्मविभूषणः। चापबाणकरश्चैव मदाघूर्णितलोचनः। रतिः प्रीतिस्तथा शक्तिर्भद्रशक्तिस्तथोच्यते। चतस्रस्तस्य कर्त्तव्याः पत्न्यो रूपमनोहराः। चत्वारश्च करास्तस्य कार्या भार्यासमोपमाः। केतुश्च मकरः कार्यः पद्मगर्भसमोऽहान्"।

अनिरुद्धसाम्बयोः "कर्त्तव्यश्चानिरुद्धोऽपि खड्गचर्मधरः प्रभुः। साम्बः कार्यो गदाहस्तः सुरूपश्च विशेषतः। साम्बानिरुद्धौ कर्तव्यौ पद्माभौ रक्तवाससौ"।

देवक्याः "पद्मपत्रायतैराभा कर्तव्या देवकी तथा"।

यशोदायाः "मधूकपुष्पसङ्काशा यशोदापि सदा भवेत्"।

गोपालस्य "गोपालप्रतिमां कुर्यात् वेणुवादनतत्पराम्। बर्हापीड़ां घनश्यामां द्विभुजामूर्ध्वसंस्थिताम्"।

बुधस्य "काषायवस्त्रसंवीतः स्वस्त्यसंस्थश्चीवरः। पद्मासनस्थो द्विभुजो ध्यानी बुधः प्रकीर्तितः"।

कल्किनः "खड्गोद्यतकरः क्रुद्धो हयारूढो महाबलः। खेटकोच्छेदकरः कल्की द्विभुजः परिकीर्तितः"।

नरनारायणहरिरूपाणाम् "दूर्वाश्यामो नरः कार्यो द्विभुजश्च महाबलः। नारायणश्चतुर्बाहुर्नीलोत्पलदलच्छविः। तयोर्मध्ये तु बदरी कार्या फलविभूषणा। बदर्यामवनौ कार्यावृक्षमालाधरावुभौ। अष्टचक्रे स्थितौ याने भूतयुक्ते मनोरमे। कृष्णाजिनधरौ दान्तौ जटामण्डलधारिणौ। पादेन चैकेन रथस्थितेन पादेन चैकेन च जानुगेन। कार्यौ हरिश्च नरेण हस्तः कृष्णोऽपि नारायणतत्त्वमूर्तिः"।

हयशीर्षस्य "मूर्तिमान् पृथिवीरूपस्त्रिपादः सितच्छविः। नीलाम्बरधरः कार्यो देवो हयशिरोधरः। विन्द्यात् सङ्ख्यांशेन देवो हयशिरोधरः। कर्तव्योऽष्टभुजो देवः तत्करेषु चतुर्वपि। शङ्खं चक्रं गदां पद्मं खाकारोद्वारयेद्बुधः। चत्वारश्च कराः कार्या वेदानां देहधारिणाम्। देवेन मूर्ध्नि विन्यस्ताः सर्वाभरणधारिणः"।

कपिलस्य "प्रद्युम्नं विद्धि वैराग्यात् कापिलीं तनुमास्थितः। मध्ये तु करकः कार्यस्तस्योर्ध्वकृतः परः। दोर्युगं चापरं तस्य शङ्खचक्रधरं भवेत्। पद्मासनोपविष्टश्च ध्यानसंमीलितेक्षणः। कर्तव्यः कपिलो देवो जटामण्डलमण्डितः। बाहुसंरोधपीनांसः पद्माङ्कचरणद्वयः। मृगाजिनधरो राजन्! श्मश्रुवद्मोपवीतवान्। विभुर्मन्त्रमङ्गापद्मकर्णिकासंस्थितः प्रभुः। वैराग्यभावेन महातेजाः ध्यानस्थितः खमव्ययं यदन्तत्। ध्यायंस्तथात्मो भुवनस्य योन्या शाङ्ख्यप्रवक्ता पुरुषः पुराणः"।

व्यासस्य "ऊर्ध्वः कृष्णतनुर्व्यासः पिङ्गलोऽतिजटाधरः। सुमन्तुर्जैमिनिः पैलो वैशम्पायन एव च। तस्य शिष्याश्च कर्तव्याश्चत्वारः पारिशार्द्विकाः"।

वाल्मीकेः "गौरस्तु कार्यो वाल्मीकिस्तेजोमण्डलदुर्दृशः। तपश्चरितः श्रान्तो न क्षयो न च पीवरः"।

दत्तात्रेयस्य "वाल्मीकिरूपं सकलं दत्तात्रेयस्य कारयेत्"।

धन्वन्तरेः "धन्वन्तरिः प्रकर्तव्यः सुरूपः प्रियदर्शनः। करद्वयगतश्चास्य शास्त्रतः कलशो भवेत्।

जलशायिनः "जलमध्यगतः कार्यः शेषपर्यङ्गतल्पगः। फणाषट्कसमाकारदुर्निरीक्ष्यशिरोधरः। देवदेवस्तु कर्तव्यश्चतुष्पाद्भुजः। तथापरश्च कर्तव्यः शेषभोगाङ्कसंस्थितः। एकपादोऽस्य कर्तव्यो वक्षस्युत्सङ्गगतः प्रभोः। तथापरश्च कर्तव्यश्चतुर्भागो प्रसारितः। कर्तव्यो नाभिदेशस्थश्चतुर्थो तस्यापरः करः। तथैवान्यः करः कार्यो देवस्य तु शिरोधरः। सन्तानमञ्जरीधारी तथैवान्यापरो भवेत्। नाभीसरसिसम्भूते कमले तस्य वादय!। सर्वपृथ्वीमयो देवः प्राग्वत्कार्यः पितामहः। नागकन्यौ च कर्तव्यौ पद्मश्च मधुकैटभौ। स्वरूपधारीण्यपि भुजङ्गमस्य कार्याण्यष्टावष्टावपि तथा समीपे। एतत्तवाग्रे यदुपुङ्गवोक्तं देवस्य रूपं परमस्य तस्य"।

गरुड़स्य विष्णुधर्मोत्तरात् "ताक्ष्यो मरकतप्रख्यः कौशिकाकारनासिकः। चतुर्भुजस्तु कर्तव्यो हस्तनेत्रसमन्वितः। स्कन्धोरुजानुचरणः पक्षद्वयविभूषितः। प्रभासंस्थानसौवर्णकलापेन विराजितः। खन्तु पूर्णकुम्भञ्च करयोस्तस्य कारयेत्। करद्वयन्तु कर्तव्यं तथा विरचिताञ्जलि। यदास्य भगवान् पृष्ठे ध्वजकुम्भधरौ करौ। न कर्तव्यौ तु कर्तव्यौ देवपादधरौ शुभौ। किञ्चिदूर्ध्वोदरः कार्यः सर्वाभरणभूषितः"।

रुद्रस्य "देवदेवं महादेवं वृषारूढन्तु कारयेत्। तस्य वक्त्राणि कार्याणि पञ्च यादवनन्दन!। सर्वाणि सौम्यरूपाणि दक्षिणं विकटं सप्तम्। कपालमालिकं भीमं जगद्धारकारकम्। त्रिनेत्राणि तु सर्वाणि वदनं त्वग्रं विना। जटाकलापे मूर्धनि तस्य चन्द्रकला भवेत्। तस्योपरि-

शाहृदनं पञ्चमन्तु विधीयते। यज्ञोपवीतं च तथा वासुकिं तस्य कारयेत्। दशबाहुसमा कार्यो देवदेवो महेश्वरः। अक्षमालात्रिशूलञ्च चर्मदण्डमथोत्पलम्। तस्य दक्षिणहस्तेषु कर्तव्यानि महाभुज!। वामे च मातुलाङ्गञ्च चापादर्शं कमण्डलुम्। तथा चर्म च कर्तव्यं देवदेवस्य शूलिनः। वर्षस्तवास्य कर्तव्यश्चन्द्रांशु सदृशप्रभः"।

ईशानादीनाम् "ईशस्तत्पुरुषाघोरवामजातक्रमेण तु। सितपीतलसद्रक्तश्यामवर्णाः प्रकीर्तिताः। पञ्चवक्त्राः स्मृताः सर्वे दशदोर्दण्डभूषिताः। खड्गखेटधनुर्बाणकमण्डल्वक्षसत्रिणः। वराभयकरोपेताः शूलपङ्कजपाशयः"। वामो, वामदेवः। जातः, सद्योजातः।

मूर्त्यष्टकस्य "शर्वो भीमो महादेवः रुद्रः पशुपतिर्भवः। उग्र ईशान इत्यष्टौ मूर्तयः शिवसम्भिताः। स्रगाङ्कुपट्टामणयो जटामण्डलमण्डिताः। त्रिनेत्रा वरखट्वाङ्गत्रिशूलवरपाणयः"।

अर्द्धनारीश्वरस्य "अर्द्धं देवस्य नारी तु कर्तव्या शुभलक्षणा। अर्द्धन्तु पुरुषः कार्यः सर्वलक्षणभूषितः। ईश्वरार्द्धे जटाजूटं कर्तव्यं चन्द्रभूषितम्। उमार्द्धे तिलकं कुर्यात् सीमन्तमथकं तथा। भस्मोद्धूलितमर्द्धन्तु अर्द्धं कुङ्कुमभूषितम्। नागोपवीतिनं चार्द्धमर्द्धं हारविभूषितम्। वामार्द्धे तु स्तनं कुर्यात् घनं पीनं सुवर्त्तुलम्। उमार्द्धे तु प्रकर्तव्यं सुवस्त्रेण च वेष्टितम्। मेखलां दापयेत्तत्र वज्रवैदूर्यभूषिताम्। अर्द्धमिङ्गं महेशार्द्धं सर्पमेखलमण्डितम्। पादश्च देवदेवस्य समपद्मोपरिस्थितम्। वामाङ्गकं स्मृतं वामभङ्गेन विभूषितम्। त्रिशूलमक्षसूत्रञ्च भुजयोः सव्ययोः स्मृतम्। दर्पणोत्पलं कार्यं भुजयोरपसव्ययोः"।

दक्षिणामूर्तेः "दक्षेण सुद्रां प्रतिपादयन्तं सिताक्षसूत्रं च तथोर्द्धभागे। वामे च पुस्तामखिलागमाद्यां विद्याधरूपेण सुधाधरं च। सिताम्बुजस्थं सितवर्णभोगं सिताम्बरालेपनमिन्दुमौलिम्। ज्ञानं मुनिभ्यः प्रतिपादयन्तं तं दक्षिणामूर्तिमुदाहरन्ति"।

उमामहेश्वरयोः "युग्मं स्त्रीपुरुषं कार्यं उमेशौ दिव्यरूपिणौ। अष्टवक्त्रं तु देवेशं जटाचन्द्रार्द्धभूषितम्। द्विपाणिं द्विभुजां देवीं सुमध्यां सुपयोधराम्। वामपाणिन्तु देवस्य देव्याः स्कन्धे नियोजयेत्। दक्षिणन्तु करं शम्भोरुत्पलेन विभूषितम्। देव्यास्तु दक्षिणं पाणिं स्कन्धे देवस्य कारयेत्। वामपाणौ तथा देव्या दर्पणं दापयेच्छुभम्"।

हरिहरस्य "कार्यं हरिहरस्यापि दक्षिणार्द्धं सदा शिवः। वामभागं मुरारेश्च श्रीवत्सनीलाकृतिः क्रमात्। वरत्रिशूलचक्राब्जधारिणो बाहवः क्रमात्। दक्षिणे डमरुः पार्श्वे वामभागे विहङ्गराडिति"।

विश्वेश्वराख्याम् विश्वकर्मशास्त्रात् "दिग्वस्त्रा जटिलाः सर्वाः शरत्त्रिशूलधारिणः। पुटाञ्जलिकराः सर्वे विश्वेशार्चैकवक्त्रकाः। अनन्तश्च त्रिमूर्तिश्च सूक्ष्मः श्रीकण्ठ एव च। शिवः शिवस्त्रयोऽनेत्र एकरुद्रश्च ते क्रमात्"।

रुद्रभेदानां तल्लक्षम् "अथ रुद्रान् प्रवक्ष्यामि बाहुशोऽष्टकान्वितान्। अजनामा महारुद्रो धत्ते शूलमथाङ्कुशम्। कपालं डमरुं सर्पं सुद्रस्तु सुदर्शनम्। अक्षसूत्रमथो दण्डे तथा वामे करादिके। तर्जनीमूर्द्धतस्तस्य खट्वाङ्गन्तदधः करे। गदां च पट्टिशं घण्टां शक्तिपरशुकस्त्रिकाः"।

२एकपादस्य "एकपादाभिधो विभ्रत् खेडादिः स्याद्दहन् शरम्। चक्रं डमरुकं शूलं सुद्रं तदधोवरम्। अक्षसूत्रमधो वामे खट्वाङ्गोर्द्धकादिके। धनुर्घण्टां कपालञ्च कौसदीं तर्जनीं घटम्। परशुञ्चक्रमाधत्ते क्रमाद् बाहुष्टके त्विति। अनेकभोगसम्पत्तिं कुरुते यजनात् सदा"।

३अहिर्बुध्नस्य "अहिर्बुध्नो गदां चक्रं चासिं डमरुसुद्रौ। शूलाङ्कुशाक्षमालाश्च दक्षोर्द्धाधःकरैः क्रमात्। तोमरं पट्टिशं चर्म कपालं तर्जनीं घटम्। शक्तिं परशुकं वामे दक्षबाहारयत्यसिम्"।

४विरूपाक्षस्य "विरूपाक्षस्ततः खड्गं शूलं डमरुकाङ्कुशौ। सर्पं चक्रं गदामक्षसूत्रं बिभृत् करादिके। खेटं खट्वाङ्गकं शक्तिं परशुं तर्जनीं घटम्। घण्टाकपोलकौ चेति वामोर्द्धादिकराष्टके"।

५रेवतस्य "रेवतो दक्षिणे चापं खड्गशूलं गदामसिम्। चक्राङ्कुशाक्षमालासु धारयन्नूर्द्धबाहितः। धनुः खेटञ्च खट्वाङ्गं घण्टातर्जनिकां ततः। परशुं पट्टिशं पाशं वामबाह्वष्टकेऽर्कवत्। सर्वसम्पत्करोल्लेख लायते बाह्वनाङ्कुशम्"।

६हरस्य "हराख्यो सुद्रस्त्वेव डमरुं शूलमङ्कुशम्। गदासर्पाक्षसूत्राणि धारयन् दक्षिणोर्द्धतः। पट्टिशन्तोमरं शक्तिं परशुं तर्जनीं घटम्। खट्वाङ्गं पट्टिकाख्येति वामोर्द्धादिक्रमेण तु"।

७बहुरूपस्य "बहुरूपोदयहचे डमरुञ्च सुदर्शनम्। सर्पं

शूलाङ्कुशौ चैव कौमोदीं जपमालिकाम् । खट्वाङ्गपात्र-खट्वाङ्गं तर्जनीं कुक्षिकां घतुः । परशुं पट्टिशं चैव वामोर्ध्वादिकराष्टके" ।

त्र्यम्बकस्य "त्र्यम्बकोऽपि दधद्वक्त्रं डमरुं शुद्धं शरम् । शूलाङ्कुशाक्षिजाप्यस्रु दक्षोर्ध्वादिक्रमेण हि । गदाखट्वाङ्गपात्राणि कार्मुकं तर्जनीयुतौ । परशुं पट्टिशं चेति वामोर्ध्वादिकराष्टके" ।

हरेश्वरस्य "हरेश्वरोऽपि डमरुं चक्रं शूलाङ्कुशावपि । शरञ्च शुद्धं चापं दक्षबाह्वष्टके स्थिति । पद्मजं परशुं घण्टां पट्टिशं तर्जनीं घतुः । खट्वाङ्गं कारयेत्पात्रं वामेऽष्टकरपङ्कवे" ।

जयन्तस्य "जयन्तो दशमो रुद्रोऽप्यङ्कुशं चक्रशुद्धरौ । शूलाक्षिडमरुं बाणमक्षसूत्रं यमे स्थिति । गदा-खट्वाङ्ग-परशुं कपालं शक्तिं तर्जनीम् । धनुः कुक्षौ-मधोर्ध्वादि वामबाह्वष्टके दधत्" ।

अपराजितस्य "अथापराजितो दक्षे तोमरं खड्गमङ्कुशम् । शूलाक्षिचक्रडमरुमक्षमालां दधत् क्रमात् । शक्तिं खेटं गदां पात्रं तर्जनीं पट्टिशङ्कजम् । घण्टाक्षत्तरतश्चाथ धारयच्चूर्ध्वमादितः । अजैकपादहिर्बुध्नः विरूपाक्षश्च रेवतः । हरश्च बहुरूपश्च त्र्यम्बकश्च हरेश्वरः । रुद्रा एकादश प्रोक्ता जयन्त्यापराजितः" ।

स्कन्दस्य विष्णुधर्मोत्तरात् "कुमारः षण्मुखः कार्यः शिखण्डकविभूषणः । रक्ताम्बरधरः कार्यो मयूरवरवाहनः । कुक्कुटश्च तथा घण्टा तस्य दक्षिणवामयोः । पताका वैजयन्ती च शक्तिः कार्या च वामयोः" ।

भैरवस्य "अथातो रूपनिर्माणं वक्ष्येऽहं भैरवस्य तु । लम्बोदरन्तु कर्तव्यं ऊर्ध्वपिङ्गललोचनम् । दंष्ट्राकरालवदनं फुल्लनासापुटन्तथा । कपालमालिनं रौद्रं सर्वतः सर्पभूषणम् । व्याघ्रेण त्वासयन्तञ्च देवीं पर्वतनन्दिनीम् । सजलाम्बुदसङ्काशं गजचर्मोत्तरच्छदम् । बहुभिर्बाहुभिर्व्याप्तं सर्वायुधविभूषणम् । दृष्ट्वा साक्षात्प्रतीकाशैस्तथा नीलनखैः शुभैः । साचीकृतमिदं रूपं भैरवस्य प्रकीर्तितम्" ।

महाकालस्य "महाकालस्य कथितमेतद्वै भैरवं शुभम् । देवीत्रासनकर्त्राश्च करे कार्यश्च पन्नगः । न चास्य पुरतः कार्या देवी पर्वतनन्दिनी । शुक्ला न कार्याश्च तथा न रक्ता सभीपतो मातृगणप्रधाने । कार्यं तथा वपुः परिवर्हमस्य गणाश्च कार्या बहुरूपरूपकाः" ।

नन्दिनः "नन्दी कार्यस्त्रिनेत्रस्तु चतुर्बाहुर्महाभुजः । सिन्दूरारुणसङ्काशो व्याघ्रचर्मपरिच्छदः । त्रिशूलभिन्दिपालौ च करयोस्तस्य कारयेत् । शिरोगतं हस्तयुग्मं तर्जयन्तं तथापरम् । आलोकयानं कर्तव्यं दूरादागमिनं नृत्यनम्" ।

वीरभद्रस्य "अनेनैव तु रूपेण वीरभद्रं विदुर्बुधाः" ।

ज्वरस्य विश्वकर्मशास्त्रात् "ज्वरस्त्रिपादः कर्तव्यस्त्रिनेत्रैर्दशनैस्त्रिभिः । भल्लप्रहरणो रक्तस्त्रिवाह्वर्व्याकुलेक्षणः" ।

विष्णूनां विश्वकर्मशास्त्रात् तत्र धरस्य "अथातः संप्रवक्ष्यामि वसुरूपाणि ते जय ! । पद्माक्ष-मालिके तस्य दक्षवामकरद्वये । वीरयष्टी दधानोऽयं धराख्यो वसुरादिमः । २ध्रुवस्य "मालां पुष्करबीजोत्थां चक्रं शक्तिं कमण्डलुम् । दक्षाधरादिसिक्थेन यस्य स्युः स ध्रुवो मतः" ।

३सोमस्य "सुधाफलकृतामाला पङ्कजं शक्तिरङ्कुशः । स वसुः कीर्तितो यस्य सोमनामेति वै बुधैः" ।

४आपस्य "सव्यशोर्ध्वगो यस्य करौ स्तः शक्तिसंयुतौ । वीराङ्कुशान्वितौ चाधः स भवेदापसंज्ञकः" ।

५अनिलस्य "अक्षमालोपवीत्यूर्ध्वं ऋक्षिशक्तिकरावधः । यस्य स्तः सोऽनिलाख्यः स्याच्छुभदः पद्मजो वसुः" ।

६अनलस्य "स्रुवाक्षमालिके दक्षे वामे शक्तिकपालभृत् । सव्योर्ध्वादिक्रमाद्योऽसौ अनलाख्यस्तु वसुः स्मृतः" ।

७प्रत्यूषस्य "खट्वाङ्गधरः सव्ये शक्तिखेटकरोऽन्यतः । प्रत्यूषाख्यो वसुश्चायं सप्तमः परिकीर्तितः" ।

८प्रभासस्य "सव्ये दण्डकपालोऽसौ वामे तु ऋक्षशक्तिकः । शुभदः कीर्तितश्चायं प्रभासो-वसुरष्टमः । एते सर्वे समाख्याता नवकाञ्चनसन्निभाः । धरोध्रुवश्च सोमः स्यादापश्चैवानिलो अनलः । प्रत्यूषश्च प्रभासश्च वसवोऽष्टौ प्रकीर्तिताः" ।

द्वादशादित्यानाम् "शृणु वत्स ! प्रवक्ष्यामि स्वर्भेदांस्तु ते जय ! । यावत् प्रकाशकः सूर्यो जायते मूर्तिभिर्यथा" ।

१धातुः "दक्षिणे पौष्करी माला करे वामे कमण्डलुः । पद्माभ्यां शोभितकरा सा धात्री प्रथमा स्मृता" ।

२मित्रस्य "शूलं वामकरे चाक्षाः दक्षिणे सोम एव च । मैत्री नाम त्रिनयना कुशेशयविभूषिता" ।

३अर्यमणः "प्रथमे तु करे चक्रं तथा वामे च कौक्षुदी । मूर्तिरार्यमणी श्वेता सपद्मैः पाणिपल्लवैः" ।

४रुद्रस्य "अक्षमाला करे सव्ये चक्रं वामे प्रतिष्ठितम् । सा मूर्त्तिः रौद्री ज्ञातव्या प्रधाना पद्मभूषिता" ।

५वरुणस्य "चक्रं तु दक्षिणे यस्या वामे पाशः सुशोभनः। सा वारुणी भवेन्मूर्तिः पद्मव्यग्रकरद्वया"।

६सूर्यस्य "कमण्डलुर्दक्षिणतो माला चाक्षमयी भवेत्। सा भवेत् सम्मता सूर्यमूर्तिः पद्मविभूषिता"।

७भगस्य "यस्या दक्षिणतः शुक्लं वामहस्ते सुदर्शनः। भगमूर्तिः समाख्याता पद्महस्ता शुभा जय!"।

८विवस्वतः "अथ वामकरे माला त्रिशूलं दक्षिणे स्रुतम्। विवस्वन्मूर्तिरेषा स्यात् पद्मलाञ्छनलक्षिता"।

९पूष्णः "पूषाख्यस्य भवेन्मूर्त्तिर्द्विभुजा पद्मलाञ्छिता। सर्वे पापहरा श्रेया सर्वलक्षणलक्षिता"।

१०सवितुः "दक्षिणे तु गदा यस्या वामे चैव सुदर्शनः। पद्मव्यग्रा तु सावित्री मूर्तिः सर्वार्थसाधनी"।

११त्वष्टुः "शुक्लं च दक्षिणे हस्ते वामे क्षोमत्रकालिकाम्। मूर्तिस्त्वाष्ट्री भजेत् सा स्यात् पद्मस्रुक्करद्वया"।

१२विष्णोः "सुदर्शनकरा सव्ये पद्महस्ता तु वामतः। एषा स्यात् द्वादशी मूर्तिर्विष्णोरमिततेजसः। धाता मित्रोऽर्यमा रुद्रो वरुणः सूर्य एव च। भगो विवस्वान् पूषा च सविता दशमः स्मृतः। एकादशस्तथा त्वष्टा विष्णुर्द्वादश उच्यते"।

मरुताम् "अथातः संप्रवक्ष्यामि रूपाणि मरुतां तव"।

१३वसनस्य "अक्षमालाम्बुजे दक्षे वामे कुण्डीध्वजान्वितः। वसनाख्यो भवेदेवं साधकानां सुसिद्धिदः"।

२सुदर्शनस्य "चक्राक्षमालिकापात्रध्वजयुक् सुदर्शनाभिधः"।

३वायोः "कपालध्वजपाशाङ्कधारको वायुनामकः"।

४मातरिश्वनः "मातरिश्वा कपालाङ्कध्वजपात्रकरो मतः"।

५मृदागतेः "ध्वजाक्षस्रुवपात्राङ्क विभ्राणः स्यान्मृदागतिः।

६मरुद्गवस्य "ध्वजाखिखेटपात्राणि धारयंस्तु मरुद्गवः"।

७बलवर्द्धनस्य "ध्वजपाशकपालाङ्किसंयुतो बलवर्द्धनः"।

८पृषदश्वस्य "पात्राक्षस्रुवपाशाङ्कधारकः पृषदश्वकः"।

९गन्धवहस्य "अक्षस्रुवगदाकम्बुध्वजी गन्धवहाभिधः"।

१०गन्धवाहकस्य "कपालध्वजपात्राङ्कहस्तको गन्धवाहकः"

११अनिलस्य "ज्ञानमुद्राक्षस्रुवाङ्कध्वजहस्तोऽनिलो मतः"।

१२आशुगस्य "अक्षमालासुनीलाङ्क-ध्वज-कम्बुभृगाशुगः"।

१३सुसूक्ष्मस्य "ध्वजवामधनुःकुण्डीकरयुक् सुसूक्ष्मो भवेत्"।

१४कर्करस्य "ध्वजाङ्कपात्रमुद्राक्ष धारयेत् कर्कराभिधः"।

१५समीरणस्य "अक्षाङ्कमालिकापात्रध्वजहस्तः समीरणः"।

१६समीरकस्य "ध्वजपात्रघनाङ्कानि बिभ्राणस्तु समीरकः"।

१७अनुत्तमस्य "अक्षस्रुवध्वजाङ्कानि मुण्डं बिभ्रत्यनुत्तमः।

१८मारुतस्य "अक्षमालाध्वजाङ्कानि धारयन्मारुताभिधः"।

१९नागयोनिजस्य "पव्यक्षस्रुवपाशाङ्कसंयुतो नागयोनिजः"।

२०जगत्प्राणस्य "ध्वजमुण्डाङ्कपाशी स्याज्जगत्प्राणाभिधः स्मृतः"।

२१पवनस्य "ध्वजस्रुवपाशाङ्कसंयुतः पवनाभिधः"।

२२वातस्य "खट्वाङ्कध्वजखेटानि बिभ्राणो वातसंज्ञकः"।

२३प्रभञ्जनस्य "ध्वजाक्षमृगपात्राणि धारयंस्तु प्रभञ्जनः"।

२४पवस्य "अक्षस्रुवध्वजाङ्काङ्किपाणियुक् पवनामकः"।

२५नभस्वतः "शूलाङ्कध्वजपात्राणि नभस्वानिति धारयन्"।

२६अतिबलस्य "ध्वजाङ्कुशाक्षमुण्डानि बिभ्राणोऽतिबलो मतः"

२७तरस्विनः "शुभ्रजाम्बुजपात्राङ्कस्रक्की नाम कीर्त्तितः"।

२८द्रावणस्य "दण्डमुण्डध्वजाङ्कानि धारयन् द्रावणो मतः"।

२९देवयज्वनस्य "ध्वजाक्षतर्जनीपात्रपाणियुग् देवयज्वकः"।

३०गात्रजाङ्कस्य "अक्षमालाकठाराङ्कध्वजयुग्गात्रजाङ्ककः"।

३१अधरस्य "घण्टाक्षध्वजमुण्डानि धारयन्नधराभिधः"।

३२अर्द्धदण्डः "बोधिपल्लवस्रुवाङ्कध्वजहस्तः सदोर्द्धदृक्"।

३३गतिरोधनस्य "अक्षस्रुवध्वजाशोकपात्रयुक् गतिरोधनः"।

३४पाशिकस्य "पाशिको नाम विज्ञेयो वाणाक्षध्वजमुण्डयुक्"।

३५साधकस्य "ध्वजाक्षघटपात्राणि धारयन् साधको मतः"।

३६विश्वपूरकस्य "बीजपूरध्वजाङ्कसंयुतो विश्वपूरकः"।

३७जगदाश्रयस्य "घण्टाक्षध्वजमालाभिः संयुतो जगदाश्रयः"

३८विश्वातिरिक्तस्य "विश्वातिरिक्तको नाम ध्वजाक्षस्रुवपाशयुक्"

३९कुजागरस्य "अक्षमालाकजे घण्टाध्वजौ बिभ्रत् कुजागरः"

४०विश्रोदरस्य "विश्रोदरो भवेदेष शङ्खशूलघटध्वजी"।

४१अपहस्य "अपहो नाम विज्ञेयो हस्तबाणधनुर्घटी"।

४२तीव्रस्य "श्रीफलाङ्काक्षपात्राणि धारयंस्तीव्रको मतः"।

४३सुवहस्य "शक्तिमुण्डध्वजपाणी सुवहोऽयं प्रकीर्तितः"।

४४बीजवर्द्धनस्य "अक्षस्रुवध्वजपाशपात्रयुक् बीजवर्द्धनः"।

४५भद्रजवस्य "ध्वजपाश-कपालाङ्कैर्युतो भद्रजवो मतः"।

४६पुष्करोद्भवस्य "दण्डपाश-ध्वजाङ्कानि धारयन् पुष्करोद्भवः"।

४७अग्निनीपतेः "पलाशपत्रपाशाङ्कध्वजहस्तोऽग्निनीपतिः"।

४८व्यक्तमूर्त्तेः "जम्बुबीज-ध्वजा-ङ्कपाणियुग्व्यक्तमूर्तिकः"।

४९विश्वगस्य "परिघाक्षध्वजाङ्कानि धारयन् विश्वगो मतः।

सर्वे चतुर्भुजा श्रेया युवानः कुटिलभ्रुवः। सव्योर्द्धदक्षिणोत्तरोर्द्धाक्षमेषायुधधारिणः। रक्ताश्चाथ मरुद्गवौ द्वौ सर्वभूषणभूषिताः। धूम्रवर्णौ मृगारूढाः सर्वे ते शबलांशुकाः। इति तेऽत्र समाख्याता शुभदास्तु मरुद्गणाः। संख्यैकेनपञ्चाशत् सर्वरोगापनुत्तये"। स्कन्दपुरा०

साध्यानां ब्रह्माण्डपुराणे "साध्याः पद्मासनगताः कमण्डलुस्रुवस्रुचिणः। धर्मपुत्रा महात्मानो द्वादशामरपूजिताः"

विष्णुधर्मोत्तरे "मनोनुमन्ता प्राणश्च नरयानश्च वीर्यवान्। वित्तिर्हयो, नयश्चैव हंसो नारायणस्तथा। प्रभवो विष्णुविश्वश्च साध्या द्वादश जज्ञिरे"।

अश्विनोः "पद्मपत्रसवर्णौ तौ पद्मपत्रसमाम्बरौ। द्विभुजौ देवभिषजौ कर्तव्यौ देहसंयुतौ। सर्वाभरणसम्पन्नौ विश्वेषाङ्गारलोचनौ। तयोरौषधयः कार्या दिव्या दक्षिणहस्तयोः। वामयोः पुस्तके कार्ये दर्शनीये तथा नृप!। एकस्य दक्षिणे पार्श्वे वामे चान्यस्य यादव!। नारीयुगं प्रकर्तव्यं सुरूपाङ्गारदर्शनम्। तयोश्च नामनी प्रोक्ते रूपसम्पत् तथाकृतिः। मधुरूपसङ्गाश रूपसम्पत् प्रकीर्तिता। आकृतिः कथिता लोके शरकाण्डनिभा तथा। रक्तभाण्डकरे कार्ये चन्द्रशुक्लाम्बरे तथा"।

रेवन्तस्य "पृष्ठस्थः सूर्यवत् कार्यो रेवन्तश्च तथा प्रभुः"।

यक्षाणां मयसंग्रहे "तुन्दिला द्विभुजाः कार्या निधिहस्तो महोत्कटः। गदी वैश्रवणः प्रेतो रूपालस्वस्तथा वरः। सिद्धार्थो मणिभद्रश्च सुमना नन्दनो यमाः। कण्डूतिः पाशुकः शङ्खो मणिमान् पद्मरामकौ। सर्वत्रभोजी पिङ्गाक्षश्चतुरो मन्दराश्रयः। सुभद्रचन्द्रप्रद्योतमेघवर्णजयावहाः। द्युतिमान् केतुमान् तेजोमौलिमान् विजयाकृतिः। पद्मवर्ण-महाभास-पद्मदन्ताः सुदर्शनाः। पूर्णभद्र-हिरण्याक्ष-मतल्लिश्च वलाहकाः। वलाकविपुलौ पद्मनाभः कुसुदवीरकौ। सुमनश्च दृश्यश्च यक्षाणामेषां राजा धनाधिपः"।

राक्षसादीनां मयदीपिकायाम् "रक्तवस्त्रधराः कृष्णा नखदीर्घाः सुदंष्ट्रिकाः। कर्त्तीखट्वाङ्गहस्ताश्च राक्षसा घोररूपिणः। क्षेतिः प्रक्षेतिः यज्ञघ्नः शङ्कुश्च सुनिबन्धनः। विद्युत्सर्जमनुष्यादपौरुषेयसुकेशिनः। उग्रसालोत्थसी प्रोक्ताः प्रधाना राक्षसा जिन। भूतास्तथैव दानाश्च दीर्घयक्षाः पिशाचकाः"।

गन्धर्वरूपमाह विष्णुधर्मो "वरदो भक्तलोकानां किरीटी कुण्डली गदी। कार्यस्तु रूपी गन्धर्वो वीणावाद्यरतस्तथा"।

वासुकेस्तक्षस्य "धनुषो रक्तकायश्च सितपङ्कजमालिकः। शतसाहस्रभोगोऽहिः शिरःकुवलयान्वितः"।

तक्षकादिनागरूपमाह मयः "श्वेतदेहश्च कर्तव्यः स्फुरन्मौक्तिकसन्निभः। रक्ताङ्गः स्फटिकोपेतः सुतेजास्तक्षको महान्। कृष्णः कर्कोटक कण्ठे शुक्लरेखालयान्वितः। रक्तपद्मनिभः पद्मः शिरःशुक्लः सविद्रुधः। शङ्खवर्णो महापद्मो मस्तके कृष्णमूलकः। हेमाभः शङ्खपालः स्यात् सितरेखाधरो गले। कुलिको रक्तदेहस्तु चन्द्रार्द्धकृतमस्तकः। द्विजिह्वा वाङ्कवत्सप्रफणामणिसमन्विताः। सर्वलक्षधराः सर्वे कुण्डिकाकुक्षसंयुताः। एकभोगास्त्रिभोगाश्च श्वेतज्ञाताः सुतादयः"।

पितृणाम् विष्णुधर्मोत्तरे "कृष्णपद्मविहस्ताः पितरः पिण्डपालिनः"। ते च वायुपुराणोक्ता यथा

"आभास्वरा बर्हिषदो अग्निष्वात्तास्तथैव च। क्रव्यादाः सोमपाश्चैव काव्यपाश्च सुकालिनः"।

विश्वेदेवानाम् "ऋतुर्दक्षो वसुः सत्यः कालको पुरिलोचनौ। पुरूरवा माद्रवाश्च विश्वे देवा दश स्मृताः। विदेहास्तु प्रकर्तव्या दक्षिणे वामपार्श्वयः। कर्तव्या वामभागे तु शरासनपरायणाः"।

षडङ्गादस्त्ररूपाण्यपि तत्र विष्णुकर्मोक्तानि यथा

"षड्विंशदङ्गुले खड्गयष्टी तालाधिकौ मतौ। शूलपाशौ पद्मयष्टी तालमात्रौ प्रकीर्तितौ। गदा हितालतो पाशश्च गोलकोऽष्टप्रमाणतः। वाणो हितालको दण्डो द्विगुणो द्वादशाङ्गुलः। कपालं षड्डुलं चर्म पार्श्वे खड्गोऽङ्गुलो मतः। डमरुस्तुलना घण्टा छुरिका षोडशाङ्गुला। वज्रं तत् पुरुषस्थूलं षट्त्रिंशोऽतिदण्डो बली। शक्तिस्तु योषिदाकारा लोहिताङ्गी सुकान्विता। दण्डोऽपि पुरुषः कृष्णो घोरो लोहितलोचनः। खड्गश्च पुरुषः श्यामशरीरः क्रुद्धलोचनः। पाशः सप्तफणः सर्पपुरुषः पुच्छसंयुतः। ध्वजस्तु पुरुषः पीतो व्याहताक्षो महाबलः। गदा पीतप्रभा कन्या सुपीनजघनस्थला। त्रिशूलं पुरुषो दिव्यः सभ्रूः श्यामकलेवरः। शङ्खोऽपि पुरुषो दिव्यः शुक्लाङ्गः शुभलोचनः। क्षेतिर्बङ्कतिथी सा स्त्री भिन्दिः श्यामतनुः पुमान्। शरः स्यात् पुरुषो दिव्यो रक्ताङ्गो दिव्यलोचनः। धनुः स्त्री पद्मरक्ताभा मूर्ध्नि पूरितचापभृत्। एवमस्त्राणि पूतानि जानीयात् परमेश्वरे। उक्तानां चैव सर्वेषां मूर्ध्नि स्यायुधलक्षणम्। भुजौ द्वौ तु प्रकर्तव्यौ स्कन्धलग्नौ सदा बुधैः"।

धर्मज्ञानवैराग्यैश्वर्याणाम् "धर्मं ज्ञानं च वैराग्यमैश्वर्यं च तथैव हि। सितरक्तपीतकृष्णसिंहरूपाः प्रकीर्तिताः"।

पृथ्व्याः विष्णुधर्मोत्तरे "शुक्लवर्णा मही कार्या दिव्याभर-

ऋभूषिता। चतुर्भुजा सौम्यवपुश्चन्द्रांशुसदृशाम्बराः। रत्नपात्रं सस्यपात्रं पात्रमोषधिसंयुतम्। पद्मं करे च कर्तव्यं भुवो यादवनन्दन!। दिग्गजानां चतुर्णां तु कार्या पृष्ठगता तथा। सर्वौषधियुता देवी शुक्लवर्णा ततः स्मृता"।

क्षयोदस्य "क्षयोदः प्रकर्तव्यो द्विभुजः सर्वसिद्धये। धत्तेऽक्षमालिकां दक्षे वामे पात्रं तु रत्नभृत्। सोत्तरीयो पवती च पाटलाभः सुवस्त्रधृक्। बर्हिःपवित्रपाणिस्तु लाभदो भूतिभूषितः"।

क्षीरोदस्य "क्षीरोदः श्वेतवर्णस्तु द्विभुजो रत्नकुण्डलः। मकरस्थोऽम्बुजन्दक्षे वामे तु कलसं दधत्"।

दधिमण्डोदस्य "दधिमण्डोद एवात्र विज्ञेयो वारिलासनः। दण्डं शङ्खं च बिभ्राणो द्विभुजोऽसौ जटायुतः"।

घृतोदस्य "घृतोदः कपिलो ज्ञेयः कुलीरस्थो जटाधरः। कमण्डलुयुतं पात्रञ्च घटं बिभ्रत्तु दोर्द्वये"।

इक्षूदस्य "इक्षूदोऽत्र प्रकर्तव्यो गोमूत्रसदृशच्छविः। दर्भस्थो घटं दण्डं बिभ्राणो नीलकुण्डलः"।

सुरोदस्य "सुरोदो गण्डकान्तस्थो ज्ञेयो गोमेदसन्निभः। सुरां कुम्भकां बिभ्रद् द्विभुजो भूतिवर्द्धनः"।

स्वादूदस्य "स्वादूदो मौक्तिकाभाषो दर्दुरस्थो सुवेषधृक्। सक्षारलाजपात्रे च धारयन् सर्वभूषणः। वैदूर्यसदृशाः सर्वे द्विभुजाः कलशान्विताः। पङ्कजस्थाः प्रकर्तव्याः देवतारूपनाय तु"।

द्वीपादीनाम् विष्णुधर्मोत्तरात् "द्वीपवर्षनगाः सर्वे कामरूपधरा यतः। प्रेक्षायुधान्विताः कार्याः स्वस्वचिह्नधरा नराः"।

दिशाम् "पूर्वा गजगता बाला रक्तवर्णा तु दिग् भवेत्। पङ्कजस्था प्रतीच्येषा करेणुगतकृष्णका। कृष्णवर्णा कृतकाया पद्माभा पूर्वदक्षिणा२। रथस्था दक्षिणा२ पीता तथा स्यात् प्राग्नवौवना। सप्तमा कृष्णपीता च तरुणी याम्यपश्चिमा३। यौवनाद्विच्युता कृष्णा पश्चिमा४ तुरगस्थिता। आसन्नपचिता नीला मृगगा तदनन्तरा५। श्वेता नरगता कृष्णा तथा भवति चोत्तरा७। अतिवृद्धा कृशा च शुक्ला पूर्वोत्तराट् भवेत्। अधस्तात्६ पृथिवीतुल्या चोर्द्धा१० गगनसन्निभा"।

दिक्पतीनाम् तत्रेन्द्रस्य "चतुर्दन्ते गजे सक्तः श्वेतः कार्यः सुरेश्वरः। वामोत्सङ्गगता कार्या तस्य भार्या शची शुभा। नीलवस्त्रा सुवर्णाभा सर्वाभरणभूषिता। तिर्यग् ललाटकस्थार्द्धः कर्तव्यश्च विभूषितः। शक्रवत्तूर्णजः कार्यो द्विभुजा च तथा शची। पद्माङ्कुशौ च कर्तव्यौ वामदक्षिणहस्तयोः। वामं शचीपृष्ठगतं द्वितीयं वज्रसंयुतम्। वामे शच्याः करे कार्या रम्याः सन्तानमञ्जरी। दक्षिणं पृष्ठविन्यस्तं देवराजस्य कारयेत्"।

२अग्नेः "रक्तं जटाधरं वह्निं कारयेद्धूम्रवाससम्। ज्वालामालाकुलं सौम्यं त्रिनेत्रं शक्तिधारिणम्। चतुर्बाहुं चतुर्दंष्ट्रं देवेशं वायुसारथिम्। चतुर्भिश्च शुकैर्युक्तं धूमचिह्नरथे स्थितम्। वामोत्सङ्गगता स्वाहा शक्तेश्च शची भवेत्। रत्नपात्रकरा देवी वह्नेर्दक्षिणहस्तयोः। ज्वालात्रिशूले कर्तव्ये त्वक्षमालस्तु वामके"।

३यमस्य "सजलाम्बुदसच्छायः तप्तचामीकराम्बरः। महिषस्थश्च कर्तव्यः सर्वाभरणवान् यमः। नीलोत्पलाभां धूम्रोर्णां वामोत्सङ्गे च कारयेत्। धूम्रोर्णा द्विभुजा कार्या यमः कार्यश्चतुर्भुजः। दण्डखड्गावुभौ कार्यौ यमदक्षिणहस्तयोः। ज्वाला त्रिशूला कर्तव्या त्वक्षमाला च वामके। दण्डोपरि सुखं कार्यं ज्वालामालाविभूषणम्। धूम्रोर्णादक्षिणो हस्तो यमपृष्ठगतो भवेत्। वामे तस्याः करे कार्यं भातृलाङ्गं सुदर्शनम्। पार्श्वे तु दक्षिणे तस्य चित्रगुप्तं तु कारयेत्। कापीच्यावेषं स्वाकारं द्विभुजं सौम्यदर्शनम्। दक्षिणे लेखनी तस्य वामे पत्रं तु कारयेत्। वामे पाशधरः कार्यः कालो विकटदर्शनः"।

निर्ऋतेः "विरूपाक्षो विवृत्तास्यः प्रांशुदंष्ट्रोज्वलाननः। ऊर्द्धकेशी खरस्थश्च द्विबाहुर्भीषणाननः। कर्णेन कृष्णरक्ताक्षः कृष्णाम्बरवरस्रजा। सर्वाभरणवान् दंष्ट्रासङ्गैर्दण्डधरस्तथा। भार्यावतस्तः कर्तव्या देवी च निर्ऋतिस्तथा। कृष्णाङ्गी कृष्णवदना पाशहस्ता तु वामतः"।

वरुणस्य "सप्तहंसे रथे कार्यो वरुणो यादसाम्पतिः। स्निग्धवैदूर्यसंकाशः श्वेताम्बरधरस्तथा। किञ्चित्प्रलम्बजठरो सक्षाहारविभूषितः। सर्वाभरणवान् राजन्! महादेवचतुर्भुजः। वामभागगतं केतुं मकरं तस्य कारयेत्। छत्रं तु सुषिरं मूर्ध्नि भार्या सर्वाङ्गसुन्दरी। वामोत्सङ्गगता कार्या मध्ये तु द्विभुजा शुभा!। उत्पलं कारयेत् वामे दक्षिणे देवपृष्ठगम्। पद्मपाशौ करे कार्यौ देवदक्षिणहस्तयोः। शङ्खञ्च रत्नपात्रञ्च वामयोस्तस्य कारयेत्। भागे तु दक्षिणे गङ्गा मकरस्था सचामरा। देवी पद्मकरा कार्या चन्द्रगौरी वरानना। वामे तु

यतुना कार्या कूर्मसंस्था सचामरा। नीलोत्पलकरा सौम्या नीलनीरजसन्निभाः"।

वायोः "वायुरम्बरवर्णस्तु तदाकाराम्बरो भवेत्। काष्ठपुरितचक्रस्तु द्विभुजो रूपसंयुतः। गमनेच्छुः शिवा भार्या तस्य कार्या च वामतः। कार्यो ध्वजीतचक्राङ्कः कराभ्यां यमनो द्विजः। तथैव देवी कर्त्तव्या शिवा परमसुन्दरी। व्याहृतास्त्रकृता कार्यो देवोव्याकुलमूर्द्धजः"।

धनदस्य विष्णुधर्मोत्तरात् "कर्तव्यः पद्मपत्राभो वरदो नरवाहनः। चामीकराभो वरदः सर्वाभरणभूषितः। लम्बोदरवृतवांछुर्वामपिङ्गललोचनः। आपीच्यवेषः कवची हारभारी मनोहरः। हे च दंष्ट्रे सुखे तस्य कर्तव्ये शस्त्रधारिणः। वामेन विमला कार्या भौक्तिकाहारिमर्दन!। वामोत्सङ्गगता कार्या द्वद्विर्देवी वरप्रदा। देवपृष्ठगतं पाणिं द्विभुजायास्तु दक्षिणम्। रत्नपात्रधरं कुर्यात् वामं रिपुनिकृन्तन!। गदाशक्तो च कर्तव्ये तस्य दक्षिणवामयोः। सिंहार्कचक्रं केतुं, शिविकामपि पादयोः। शङ्खपद्मनिधी कार्यौ सरूपौ निधिसंस्थितौ। शङ्खपद्माङ्कितक्रान्तं वदनं तस्य पार्श्वयोः"

आकाशस्य "नीलोत्पलाभं गगनं तदाम्बरधारि च। चन्द्रार्कचक्रं कर्तव्यं द्विभुजं सौम्यदर्शनम्"।

व्योम्नः "चतुरस्रं भवेन्मूलं ततो वृत्तं महाभुज। तत्तुल्यचतुरस्रञ्च मेरुवत् संस्थितं शुभम्। भद्रपीठमयः प्रोक्तो व्योमभागस्तृतीयकः। तत्प्रमाणचतुरस्रञ्च मध्यभागः प्रकीर्तितः। भद्रपीठवदन्यच्च तत्र पद्मं निवेशयेत्। शुभाष्टपत्रं तन्मध्ये कर्णिकायां दिवाकरः। पत्राष्टके न्यसेत्तस्य दिक्पालान् सर्वतोदिशः"।

ध्रुवस्य "विष्णुरूपधरः कार्यो ध्रुवो यज्ञगणेश्वरः। चक्ररश्मिकरः श्रीमान् द्विभुजः सौम्यदर्शनः"।

रवेः मत्स्यपुराणात् "रविः कार्यः शुभश्मश्रुः सिन्दूरारुणसप्रभः। आपीच्यवेषः साकारः सर्वाभरणभूषितः। चतुर्वांछुर्महातेजा कवचेनाभिसंवृतः। कर्तव्या रशना चास्य पार्श्वीयाङ्गेति संज्ञिताः। रक्तयज्ञस्य कर्तव्या वामदक्षिणहस्तयोः। जानुं खड्गासंस्थाना सर्वपुष्पचिता शुभा। खड्गवरः साकारो दण्डः कार्योऽस्य वामतः। दक्षिणे पिङ्गले भागे कर्तव्यश्चातिपिङ्गलः। आपीच्यवेषौ कर्तव्यौ तावुभावपि यादव!। तयोर्मध्ये च विन्यस्तौ करौ कार्यौ विभावसोः। लेखनीपत्रके कार्ये पिङ्गलश्चातिपिङ्गलः। चर्मशृङ्गधरो देवस्तथा यज्ञादिधीयते। सिंहो ध्वजश्च कर्तव्यस्तथा सूर्यस्य वामतः। चत्वारश्चास्य कर्तव्यास्तनवास्त्राश्च पार्श्वयोः। रेवन्तश्च यमश्चैव मनुहितयमेव च। यष्टिराजो रविः कार्यो यष्टिभिः परिवारितः। राज्ञी सवर्णा छाया च तथा देवी सुवर्चसा। चतस्रश्चास्य कर्तव्याः पत्न्यश्च परिपार्श्वयोः। एकचक्रे च सप्ताश्वे षडश्वे वा रथोत्तरे। उपविष्टस्तु कर्तव्यो देवोष्टारुणसारथिः"।

विष्णुधर्मोत्तरे तु "पद्मासनः पद्मकरः पद्मगर्भदलद्युतिः। सप्ताश्वरथसंस्थश्च द्विभुजश्च सदागतिः"।

चन्द्रस्य मत्स्यपुराणे "चन्द्रः श्वेतवपुः कार्यः श्वेताम्बरधरः प्रभुः। चतुर्वांछुर्महातेजाः सर्वाभरणभूषितः। कुमुदौ च सितौ कार्यौ तस्य देवस्य हस्तयोः। कान्तिर्मूर्त्तिमती कार्या तस्य पार्श्वे तु दक्षिणे। वामे शोभा तथा कार्या रूपेणाप्रतिमा भुवि। चिह्नं तथास्य सिंहाङ्कं वामपार्श्वेऽर्कवल्लवेत्! दशाश्वे च रथे कार्योऽहिचक्रे वरसारथौ"। विष्णुधर्मोत्तरे तु

"श्वेतः श्वेताम्बरधरः श्वेताश्वः श्वेतभूषणः। गदापाणिर्द्विबांछुश्च कर्तव्यो वरदः शशी"।

भौमस्य मत्स्यपुराणात् "भौमोऽग्नितुल्यः कर्तव्यस्त्वष्टास्त्रे काञ्चने रथे"। विष्णुधर्मोत्तरे

"रक्तमाल्याम्बरधरः शक्तिशूलगदाधरः। चतुर्भुजो मेषगमो वरदः स्याद्वरासुतः"।

बुधस्य "विष्णुतुल्यो बुधः कार्यो भौमतुल्ये तथा रथे"।

गुरोः "तप्तजाम्बूनदाकारो द्विभुजश्च दृढव्रतिः। पुस्तकं चाक्षमालाञ्च करयोस्तस्य कारयेत्। सर्वाभरणयुक्तश्च तथा पीताम्बरो गुरुः"।

शुक्रस्य "अष्टाश्वे काञ्चने दिव्ये रथे हरिमनोरमे। शुक्रः श्वेतवपुः कार्यः श्वेताम्बरधरस्तथा। द्वौ करौ कथितौ तस्य निधिपुस्तकसंयुतौ। दशाश्वे वा रथे कार्यो राजते भृगुनन्दनः"।

शनेः "कृष्णवासास्तथा कृष्णः शनिः कार्योऽसितानतः। दण्डाक्षमालासंयुक्तः करद्वितयभूषणः। कार्ष्णायसे रथे कार्यस्त्रैवाहतरङ्गमे"।

राहोः "रौद्रे रथे तथाष्टाश्वे राहुः कार्यो विचक्षणैः। कम्बलं पुस्तकं कार्यं भुजनैकेन संयुतम्। करमेकन्तु कर्त्तव्यं शस्त्रशून्यन्तु दक्षिणम्"।

केतोः "विष्णुकर्मणाख्यातं "भौमवच्च तथा रूपं केतोः कार्यं

विजानता। केवलं चास्य कर्तव्याः दश राजंस्तुरङ्गमाः"।
शुक्लपक्षस्य प्रतिपदः "तिथयोऽधुनोच्यन्ते प्रतिपद् द्विभुजा-
रूपा। मेषगा शक्तिपात्रा सा सितपद्मादिमा मता"।
द्वितीयायाः "द्वितीया हंसगा शुभ्रा पात्रपुस्तकधारिणी"।
तृतीयायाः "तृतीया वृषगा गौरी शूलपात्रधरा मता"।
चतुर्थ्याः "नीलोत्पलदलाभासा चतुर्थी मूषकस्थिता। परशुं
बिभ्रती पात्रं पीतवस्त्राङ्गिसंयुता"।
पञ्चम्याः "पङ्कजस्था प्रवालाभा कृष्णमस्तकभूषणा। शङ्ख
सद्मां तथा पार्श्वं बिभ्राणा पञ्चमी मता"।
षष्ठ्याः "मयूरगारूढा श्वेतो पात्रकुक्कुटधारिणी"।
सप्तम्याः "ताम्रवर्णांशुपात्रा सा वृषस्था सप्तमी मता"।
अष्टम्याः "घण्टापात्रधरा गोस्था गोक्षीरधवलाऽष्टमी"।
नवम्याः "नवमी सिंहगा शुभ्रा पाशपात्रधरा शुभा"।
दशम्याः "कृष्णवर्णा लुलापस्था दशमी दण्डपात्रिणी"।
एकादश्याः "एकादशी मृगाजस्था तुला-कर्त्तरिकायुता।
सिंहाननाऽरुणगला-तन्द्रिला लासिनी परा"।
द्वादश्याः "द्वादशी गरुडारूढा मेघवर्णोरुपात्रिणी"अरं, चक्रम्
त्रयोदश्याः "चापबाणधरा गौरी मकरस्था त्रयोदशी"।
चतुर्दश्याः "वज्रस्था पाटलाभा सा गदापात्रपुरःसृता।
नीलकण्ठेन्द्रगोपाभलोचनेयं चतुर्दशी"।
पौर्णमास्याः "वृषगा पूर्णिमा शुभ्रा मौक्तिकाभरणान्विता।
सुधापूर्णघटा धीर! वामदक्षिणबाहुका"।
कृष्णप्रतिपदः "धूसरा कृष्णपक्षाद्या मारस्था चतुर्भुजा।
वामोर्ध्वं स्रुवं पुस्तौ पात्रं धत्ते चतुर्भुजा"। [खिड्का"।
कृष्णद्वितीयायाः "द्वितीया कृष्णदाभासा कृष्णस्था सायुक्त-
कृष्णतृतीयायाः "तृतीया तार्क्ष्यगा नीला शङ्खपात्रधरा
द्विदोः"। [धत्तेऽक्षमालिकां दण्डं पार्श्वं पात्रञ्च दंष्ट्रिणी"।
कृष्णचतुर्थ्याः "चतुर्थी कज्जलाभा सा महिषस्था चतुर्भुजा।
कृष्णपञ्चम्याः "पाटलस्था चन्द्रगौराभा पञ्चमी सायुक्तखिड्का"।
कृष्णषष्ठ्याः "अग्रेची मयूरगा रक्ता शक्तिकुक्कुटधारिणी।
राकास्था द्विभुजा श्वेती रक्तवस्त्रा शुभूषणा। नीलकण्ठल-
कण्ठा सा जटाखण्डेन्दुभूषिता"।
कृष्णसप्तम्याः "हंसस्था सप्तमी गौरी द्विभुजा वज्रपात्रिणी"।
कृष्णाष्टम्याः "प्रेतगा चाष्टमी रक्ता कृष्णयोषा सितांशुका।
वामे खड्गं तथा खेटं पात्रं धत्ते चतुर्भुजा"।
कृष्णनवम्याः "सर्पगा नवमी नीला दंष्ट्रिणी पात्रतर्जनी"।
कृष्णदशम्याः "सिंहासनस्थिता शुभ्रा दशमी पीतकुण्डला।
आनतुद्राक्षपात्रेयं पीतवस्त्राऽजमालिनी"।
कृष्णैकादश्याः "एकादशी वृषस्थाऽजनीलशुभ्रारुणत्विषी"।
कृष्णद्वादश्याः "ताम्रवर्णा रथारूढा पात्रखेटाक्षिपङ्कजा।
द्वादशी शुभ्रवस्त्रेयं नीलकुण्डलभूषिता"।
कृष्णत्रयोदश्याः "अशोककलिकाबाणचापपात्रा त्रयोदशी।
मेचकाऽजासना श्यामा हरिद्वस्त्रा मदालसा। गदापात्र-
धरा गौरी निधिस्था वा त्रयोदशी"।
कृष्णचतुर्दश्याः "द्विभुजा तुरगारूढा कृष्णवर्णा चतुर्दशी।
खड्गमङ्कधरा नीलकुण्डलांशुकभूषणा"।
अमावस्यायाः "अमावास्या विधातव्या हिरण्मरकतप्रभा।
दर्भासनस्थिता चेयं दर्भपिण्डधरा कृशा"।
नक्षत्राणाम् अश्विन्याः "अथ नक्षत्ररूपाणि कथयामि समासतः। तत्रादावश्विनी ज्ञेया पद्मपत्रनिभा शुभा।
अश्ववक्त्राम्बुजारूढा द्विभुजा च सिताम्बरा। दक्षे
दिव्यौषधीपात्रं बिभ्रती वामकं करे"।
भरण्याः "भरणी महिषारूढा गजवक्त्राञ्जनप्रभा। दण्ड-
पाशधरालुप्ता रक्तदृक् परिकीर्तिता"।
कृत्तिकायाः "छागस्था छागवक्त्रासा पिङ्गभ्रूकेशलोचना। खड्गं शक्तिञ्च बिभ्राणा पीनाङ्गजठराऽरुणा। कृत्तिका कीर्तिता
चेयं सर्वाभरणभूषणा"।
रोहिण्याः "रोहिणी तन्द्रिनाभासा सर्पवक्त्रा तु कृंगगा।
खड्गकुण्डीधरा देवी कीर्तिता हारभूषणा"।
मृगशीर्षायाः "मृगानना कृष्णवर्णा या नागवक्त्राऽऽयुधायुधी।
गदास्था चन्द्रगौराभकुण्डिकाक्षवमालिनी"।
आर्द्रायाः "शुक्लवर्णा तु रक्ताक्षी शूलपाणिनी। नील-
वस्त्रा वृषारूढा चास्थिमालाविभूषणा"।
पुनर्वसोः "शूकराक्षो विडालाक्षो गौरवर्णः पुनर्वसुः। खड्ग-
वज्राङ्कुशाभीतीर्बिभ्राणः परिकीर्तितः"।
पुष्यस्य "छागारूढश्च मेघाभः पुष्योऽयं मधुपिङ्गदृक्। अक्ष-
चक्रासनीकृत्तौ दधानोऽत्र चतुर्भुजः"।
अश्लेषायाः "कोकाक्षा या विडालाक्षा रक्ताऽऽश्लेषा चतुर्भुजा।
अक्षकुण्डीधरा हाभ्यां सर्पाङ्किनधारिणी"।
मघायाः "कपिवक्त्रा मघा श्यामा छागाङ्गी च महोदरा।
दर्भपिण्डधराऽजस्था द्विभुजेयमुदीरिता"।
पूर्वफाल्गुन्याः "पूर्वा कृष्णसिता रक्तस्या शुकनासाहवाऽ-
रुणा"। रक्तः खड्गः चक्रं वा।
उत्तरफाल्गुन्याः "व्याघ्रानना उत्तरा गोस्था शुभ्रवर्णा चतुर्भुजा।
द्वयक्षिणी खड्ग-खट्वाङ्गधारिणी परिकीर्तिता"।
हस्तस्य "गौराक्षो लुलापास्यो हस्तनामा हयस्थितः।

अक्षवज्रभुजद्वन्द्वो भूषितः परिकीर्तितः"। कृत्तिकाया मङ्गिणः चित्रायाः "व्याघ्रास्या मङ्गिणारूढा चित्रा गौरी चतुर्भुजा। अक्षकुम्भौ सपुत्री च सुधापूर्णघटान्विताः"। स्वात्याः "महिषस्था रुणारूढा गौरी श्यामाथवा मता। पीना चतुर्भुजा स्वात्याढ्यगुच्छजपालिनी"। विशाखायाः कृष्णवदना रक्ता नाभिपादान्तदेहभा। मेषच्छागस्थिता सेव्या विशाखाङ्घ्रयब्जिनी। वामे, मङ्गिमधः पात्रं विभ्राणा हेममूषणा"। अनुराधायाः "हरिस्था च विशालाक्षा द्विभुजाम्बुजवज्रिणी। मूर्धादिनाभिपादान्तश्यामगौरी क्रमेण तु। अनुराधा परिज्ञेया पद्मरागविभूषणा"। ज्येष्ठायाः "श्वेतवर्णा गजारूढा भङ्गास्या वा रुणानना। अक्षस्रजं प्रविभ्रत्ते वामे ज्येष्ठाङ्घ्रयं यजे"। मूलस्य "मूलरूपं विधातव्यं श्यामं कृष्णपदाहनम्। खड्गखेटधरं सौम्यं द्विभुजञ्च शुकाननम्"। पूर्वाषाढायाः "कृष्णीरवदना नीला मर्कटस्था चतुर्भुजा। अक्षस्रजं कजं पाशं पात्रं वा बिभ्रती सदा। पूर्वाषाढा समुद्दिष्टा पीतवस्त्राजभूषणा"। उत्तराषाढायाः "सर्पगा चोत्तराषाढा गौरवर्णा सुरूपिणी। नागवद्भटाजूट-सर्पकुण्डलभूषिता। अक्षनागधरा दक्षे वामे पुत्री सकुण्डिका"। अभिजितः "अभिजित् कुशदाभासा नक्रयुक्ता तु हंसगा। वरस्रक्पुस्तकाभीतिसंयुतैर्या चतुर्भुजा"। श्रवणस्य "गोवक्त्रं तुरगारूढः श्रवणो मर्कटाननः। शङ्खचक्रगदाजानि बिभ्राणः स्वर्णभूषणः"। धनिष्ठायाः "तप्तचामीकराभासा निधिस्था पद्मजानना। पक्वबिम्बाधरा तन्वी पीनोन्नतपयोधरा। दीर्घवेणी सपुष्पा सा मौक्तिकाभरणान्विता। वामनेत्रा सुवेषाढ्या द्विभुजा वसनाढ्या। वराभयान्विता सौम्या धनिष्ठा परिकीर्तिता"। शततारायाः "शुभ्रा मकरगाऽशुभ्रा द्विभुजा पाशपालिनी। शाटला वस्त्रसंयुक्ता कीर्तिता शततारका"। पूर्वभाद्रपदायाः "पूर्वा भाद्रपदा शुभ्रा गोवक्त्रा जागगामिनी। मेषशीर्षधरा सेव्या सीधुपात्रञ्च बिभ्रती"। उत्तरभाद्रपदायाः "गजभास्या गणारूढा सिता भाद्रपदोत्तरा। पात्रञ्च डमरुन्वत्ते द्विभुजेयमुदीरिता"। रेवत्याः "रेवती करभास्या स्यात् द्विभुजा कलिंगगामिनी। कमलं कुक्षिकां धत्ते श्वेतवर्णा महाननां"।

योगानां विष्कुम्भस्य "विष्कुम्भः प्रथमो ज्ञेयः पीतवर्णस्तु षड्भुजः। रक्तास्यो नीलकण्ठस्तु दक्षनेत्रः सुभीषणः। विशालभालो दीर्घाङ्गस्तुङ्गनासो जटाधरः। सव्यकर्णेन्द्रनीलोत्पलस्वर्णरत्नजकुण्डलः। सुवर्णोद्वेन्द्रगोपाभवसनः स्वर्णभूषणः। खड्गं प्रथमे दक्षे द्वितीये कर्त्तरीमिह। तृतीये कुलिशं पाशौ वामाद्ये टङ्कमेव च। श्वेतपुष्पं द्वितीये च तृतीये चाक्षतं घटम्। विभ्राणः पूजनीयोऽयं पीतपुष्पैः सुगन्धिभिः। कार्यसिद्धत्वे नूनमन्यथा विघ्नदायकः"।

प्रीतेः "प्रीतिनामा द्वितीयस्तु जवाकुसुमसन्निभः। श्वेतवस्त्रो विशालाक्षो सव्यकर्णेन्दुकुण्डलः। भालेऽर्द्धेन्दुतिलकोपेतः सौम्यो रक्ताविभूषणः। श्वेतवस्त्रो जटामौलिरष्टबाहुर्वृकोदरः। बन्धुजीवोत्पलपुष्पाङ्गभक्तिकाभादिमे क्रमे। द्वितीये मोदकं पाशौ तृतीये कदलीफलम्। चतुर्थे षड्भुजश्चैव वामाद्ये चाक्षतं घटम्। द्वितीये चाक्षतं वै पात्रं सोमपूर्णं मनोहरम्। तृतीये कुलिशं दक्षे चतुर्थे चाक्षतं वैध्वजम्। दधानो भूतये प्रीतौ सर्वतापनिवृत्तये"।

आयुष्मतः "आयुष्मांस्तु तृतीयोऽयं मौक्तिकाभोऽक्षोदरः। क्षौमवस्त्रान्वितश्चैव रक्तास्यौवर्णभूषणः। द्विभुजः प्रथमे दक्षे चाक्षस्रजञ्च मौक्तिकम्। दूर्वांकुरं द्वितीये तृतीये चूतपल्लवम्। चतुर्थे षड्भुजश्चैव पद्मे चाक्षस्रजं क्रमम्। सुधाकुम्भन्तु वामाद्ये बीजपूरविधानकम्। पात्रं दध्यक्षतोपेतं द्वितीये करपद्मके। तृतीये श्रीफलं दक्षे चतुर्थे पनिमेव च। पद्मे चामरं दक्षे स्वर्णदण्डं सितं शुभम्। धारयन्नेष वै पूज्यो भोगायुष्यविवृद्धये"।

सौभाग्यस्य "सौभाग्याख्यचतुर्थोऽत्र स्फटिकाभस्त्रिलोचनः। स्कन्धारूढो महासत्वः सुन्दरः कुशदाम्बरः। दधद्वामद्वयेनाद्यौ (वमे)प्रथमे श्रीफलं करे। अक्षस्रजं प्रवालोत्थं द्वितीये करपद्मके। तृतीये कमलं दक्षे चतुर्थे वाक्षवारकम्। पद्मे मङ्गिमथैव वामाद्ये पात्रमेव च। द्वितीये चाक्षतं कुम्भं तृतीये तु प्रकीर्णकम्। चतुर्थे दर्पणं दक्षे वेणुदण्डञ्च पद्मके। बिभ्राणः सौम्य सौभाग्यवृद्धये चायुषे श्रिये"। (पूजनीय इति शेषः)

शोभनस्य "शोभनः प्रथमो योगः श्वेतवस्त्रो वशी बली। श्वेतास्यः खगारूढश्च प्रवालसदृशकुण्डलः। शोणशुक्लाम्बरश्चैव शुक्लाविद्रुमभूषणः। अक्षस्रजं सुहोत्थं प्रथमे दक्षिणे करे। द्वितीये पद्मजं दक्षे तृतीये श्रीफलं यजे। तुर्ये मङ्गिं कराम्भोजे वामाद्ये वै कमण्डलुम्।

द्वितीये स्वर्णजं पात्रं तृतीये चैव दर्पणम्। चतुर्थे चामरं पाणौ धारयद्भद्रदोरिति। पूजनीयो महाभक्त्या सौख्यसौभाग्यदृष्टये"।

अतिगण्डस्य "अतिगण्डाभिधश्चाथ षष्ठो योगः प्रतीयते। गण्डारूपान्वितः क्रूरः कृष्णवक्त्रोऽर्कभूषणः। स्थूलो विद्रुमतिलुङ्गनासिकोऽरुणभूषणः। पिङ्गलश्मश्रुजटाभौलिः षड्भुजः कटिसूत्रवान्। अक्षसूत्रं यमादित्ये तोडजं करपङ्कजे। एणं शृंगं द्वितीये च तृतीये चैव वारिजम्। पात्रं वामादिमे पाणौ द्वितीये शक्तिमेव च। पताकान्तु तृतीये वै दधानः कृष्णलोहिताम्। पूजनीयो महाभक्त्या दुष्टभीतिनिवृत्तये"।

सुकर्मणः "चतुर्भुजः सुकर्मा वै श्वेतबाहुदरद्युतिः। नीलशुभ्रांशुकोपेतः स्वर्णनीलविभूषणः। रुद्राक्षमालिकामार्कीं (यमे दक्षे) प्रथमे करपङ्कजे। द्वितीये कमलं पाणौ वामादौ दण्डमेव च। पताकामथ वै हस्ते द्वितीये सुमनोहरा। विघ्नध्वंसाय दृष्टये नृणां कर्मारम्भशुभप्रदः"।

धृतेः "धृत्याख्यश्चाष्टमो योगः कथ्यते वसुवाहुकः। भानुरारुणस्तु सर्वाङ्गे श्वेतवर्णोऽरुणाम्बरः। स्वर्णसङ्कोन्द्रनीलाढ्यो विद्रुमान्वितभूषणः। रुद्राक्षमालिकां दक्षे प्रथमे रत्नसंज्ञिके। द्वितीये श्रीफलं पाणौ तृतीयेऽक्षोकपङ्कजम्। चतुर्थे हेमजं दण्डं वामाद्ये वै कमण्डलुम्। द्वितीये चास्तृतं पात्रं तृतीये चाम्बुजं करे। पताकामथ वै तुर्ये बिभ्राणः श्रीविवृद्धये"।

शूलस्य "नवमः शूलनामाथ कथ्यते व्यक्तभागतः। ताम्राक्षगलवश्चैव श्वेतदंष्ट्रः कृशोदरः। भानुरेखात्रयश्चैव त्रिजटो नीलकुन्तलः। अर्कदक्षो यमादित्ये त्रिशूलं त्वतिभीषणम्। द्वितीये सुदरं पाणौ तृतीये चाक्षसूत्रकम्। चतुर्थे शङ्खनामाथ पञ्चमे दण्डमेव च। षष्ठे चैवाम्बुजं पाणौ कपालं चोत्तरादिमे। टङ्कं द्वितीयके चैव तृतीये वै कमण्डलुम्। सन्दंशन्तु करे तुर्ये पञ्चमे चैव दर्पणम्। पताकामथ वै षष्ठे धारयन्नेव पूजितः। भवेदनिष्टनाशाय वैरिविध्वंसये नृणाम्"।

दण्डस्य "गण्डाख्यः कथ्यते योगो दशमः सोऽयमत्र हि। गण्डः शुभ्रारुणाङ्गस्तु षड्भुजो मेघकाम्बरः। हरिन्मणिविभूषाढ्यो नीलविद्रुमकुण्डलः। अक्षसूत्रं यमादित्ये द्वितीये चन्द्रहासकम्। तृतीये वारिजं नीलं वामादौ वै कमण्डलुम्। द्वितीये खेटकं हस्ते पताकान्तु तृतीयके। दधानो यज्ञनस्तुत्यै रोगानिष्टनिवृत्तये"।

दृढेः "एकादशस्तु दृढाख्यः कथ्यते हरसत्तमः। पादारुणोऽपरश्वेतो भानुविस्फीर्णमण्डलः। विचित्रवसनोपेतो सुक्ताभोवर्णभूषणः। अक्षसूत्रं यमादित्ये द्वितीये चास्तृतं घटम्। तृतीये नन्दकं पाणौ चतुर्थे बाणमेव च। पञ्चमे सुदरश्चैव षष्ठे सन्दंशमेव च। सप्तमे कम्बुमत्रैव पङ्कजञ्चाष्टमे शये। कृष्णिकामादिमे वामे द्वितीये पात्रमेव च। तृतीये खेटकं हस्ते चतुर्थे चैव कार्मुकम्। पञ्चमे टङ्कमत्रैव षष्ठे चैणविषाणकम्। सप्तमे चापमत्रैव पताकामष्टमे करे। बिभ्राणः श्रेयसो वृद्धौ चायुर्गोत्रधनस्य च"।

ध्रुवस्य "द्वादशो ध्रुवनामा वै योगश्चात्रैव कथ्यते। वक्त्रःस्वकारुण्यवर्णश्च श्वेतसर्वाङ्ग एव च। माञ्जिष्ठवसनोपेतो हेमसुक्ताविभूषणः। चतुर्दशभुजोपेतो दक्षिणाद्योऽक्षसूत्रकम्। द्वितीये तु कजं खड्गं तृतीये चैव सुदरम्। चतुर्थे सायकं हस्ते पञ्चमे चैव पङ्कजम्। षष्ठे मनोहरं शङ्खं सप्तमे चामरं शये। पात्रं सौम्यादिमे पाणौ द्वितीये चैव खेटकम्। टङ्कं तृतीयके हस्ते चतुर्थे चैव कार्मुकम्। पताकामथ वै हस्ते पञ्चमे वरलक्षणे। षष्ठे मनोहरादर्शं सप्तमे चक्रमादधत्। पूजनीयो महाभक्त्या लक्ष्मीस्वर्थादिहेतवे"।

व्याघातस्य "कथ्यते चाधुना योगो व्याघाताख्यस्त्रयोदशः। नाभ्यूर्ध्वं लोहितश्यावं श्वेतपूर्वस्त्रिलोचनः। खण्डश्वेतारुणप्रालवसनः सूर्यकुण्डलः। गले स्फटिकमालोऽसौ शेषरुद्राक्षभूषणः। मणिबन्धेऽखिलवर्णस्तु षड्भुजः कुटिलाननः। पङ्कजं प्रथमे दक्षे द्वितीये परशुं शये। तृतीये चास्तृतं पात्रं वामे पात्रमिहादिमे। द्वितीये चास्तृतं कुम्भं तृतीये चाङ्कुशं शये। बिभ्राणोऽयं महापूज्यः कार्यभ्रंशनिवृत्तये"।

हर्षणस्य "अधुना कथ्यते योगो हर्षणाख्यश्चतुर्दशः। जानूर्ध्वं लोहितश्यावं ततःपूर्वं श्वेतएव च। पाटलाभांशुकोपेतो सुक्तावैदूर्यभूषणः। भुजद्वादशकोपेतो रक्तकर्णो विशालदृक्। कौमुदं प्रथमे दक्षे द्वितीये चास्तृतं घटम्। तृतीये पङ्कजं हस्ते चतुर्थे बाणमेव च। पञ्चमे शङ्खमत्रैव षष्ठे पाशं कराम्बुजे। वामादिमे करे पात्रं द्वितीये चास्तृतं घटम्। तृतीये परशुं हस्ते चतुर्थे चैव कार्मुकम्। पञ्चमे तु करे चक्रं षष्ठे चैवाङ्कुशं शये। बिभ्राणः श्रेयसे भूत्यै मानोन्नत्यै सुखाय च"।

वज्रस्य "अथ पञ्चदशो योगः कथ्यते वज्रसंज्ञकः। श्वेताङ्गि-

कार्द्धौ विभ्राणः ऊर्ध्वयोरुत्थाननः। रोचनावसनो-पेतो विद्रुमर्क्षस्निलोचनः। वज्रवैदूर्यभूषाढ्यः कटि-सूत्रसमन्वितः। जटां त्रिवलयां बिभ्रत् दिग्भुजः प-रितो वृतौ। अक्षसूत्रं यमादिस्थे द्वितीये वामसेव च। तृतीये पङ्कजं हस्ते चतुर्थे कुलिशं शये। पञ्चमे परशुं पाणौ वामाद्ये चामृतं घटम्। द्वितीये कार्मुकं चैव तृतीये पाशसत्तमम्। चतुर्थे कुलिशं चैव पञ्चमे पाशमेव च। विघ्नविजयसौख्याय लक्ष्मीसन्तानहेतवे"।

सिद्धेः "कथ्यते चाधुना योगः सिद्धिनामा तु षोडशः। पाद-जङ्घोरुकटीर्द्धे श्वेतवर्णः शुभाननः। दिग्भुजो लो-हितश्मश्रुः लोहितनिहिताम्बरः। सुधाहारमणि-स्वर्णभूषणः सोमकुण्डलः। श्रीफलं प्रथमे दले द्वितीये चैव षड्रुजम्। तृतीये पुस्तकं हस्ते चतुर्थे वामसेव च। पञ्चमे च ध्वजं हस्ते वामे पाशमिहादिशे। द्वितीये चामृतं कुम्भं तृतीये चैव चामरम्। चतुर्थे चैव कोदण्डं पताकामिह पञ्चमे। दधानः सिद्धये नृणां वाञ्छितार्थस्य सिद्धिदः"। (अस्याङ्गलिङ्गपरनाम)

व्यतीपातस्य "व्यतीपाताभिधश्चैव योगः सप्तदशस्त्विह। क-ण्ठेन लोहितश्चायं श्वेतश्मश्रुविभाननः। शुद्धमा-ञ्जिष्ठवसनो नीलस्वर्णजभूषणः। अष्टादशभुजो देवो भ्रुकुटीकुटिलाननः। दात्रमाद्यादिमे हस्ते द्वितीये खेट भेदनम्। अक्षसूत्रं तृतीये तु तुर्ये बाणं मनोहरम्। पञ्चमे शङ्खनां खौर्द्धे षष्ठे कवचमेव च। सप्तमे मु-द्गरं हस्ते पङ्कजं चाष्टमे करे। कुठारं नवमे हस्ते शक्तिकामादिमोत्तरे। पात्रं द्वितीयके चैव स्वर्णकुम्भं तृतीयके। चतुर्थे कार्मुकं पाणौ पञ्चमे कर्त्रिकामिह। मुसलन्तु करे षष्ठे सप्तमे टङ्कमेव च। अष्टमे च ध्वजं हस्ते नवमे प्राङ्मुखं शये। दधानो वैरिवर्गस्य ध्वंसाये चैव सत्वरे। यज्ञानः पुत्रसन्तत्यै लक्ष्मीभोगसुखाय च

वरीयसः "अष्टादशो वरीयांश्च कथ्यते योग उत्तमः। श्या-मकण्ठशुभ्रवर्णस्तु लोहितश्मश्रुरेव च। श्वेतवस्त्रो वि-शालाक्षो लम्बकर्णोऽर्ककुण्डलः। स्वर्णोरस्थभूषाढ्यो लक्ष्मणानेकसंयुतः। अक्षसूत्रं यमादिस्थे द्वितीये बीज-पूरकम्। चन्द्रहासं तृतीये तु तुर्ये बाणं कराम्बुजे। पञ्चमे शङ्खमेव षष्ठे परशुमेव च। सप्तमे मुद्गरं हस्ते चाष्टमे दात्रमेव च। नवमे पात्रं वै शङ्खं दशमे कमलं करे। एकादशे पविज्ञात्र द्वादशे हलमेव च। दण्डं त्रयोदशे हस्ते शक्तिमस्त्रं चतुर्दशे। कलं पञ्च-दशे हस्ते षोडशेऽप्य त्रिशूलकम्। घटं वामादिमे पाणौ पात्रमत्र द्वितीयके। तृतीये खेटकञ्चैव तुर्ये कार्मुकमेव च। चक्रन्तु पञ्चमे हस्ते षष्ठे चैव कुठारकम्। सप्तमे टङ्कमत्रैव चामरञ्चाष्टमे शये। नवमे डमरुञ्चैव दशमे पात्र वह्निकीम्। एकादशे मुसलञ्चैव द्वादशे मुसलं शये। त्रयोदशे तु वै पाशं गदामत्र चतुर्दशे। दर्पणं तिथिमे हस्ते ध्वजमत्रैव षोडशे। दधानः श्रेयसे भूयै सर्वभोगसुखाय च"।

परिघस्य "एकोनविंशकस्थात्र कथ्यते परिघोऽनघ!। पाद-जानुनखोऽसौ श्वेतवस्त्रो जटाधरः। मध्यास्थोदरे नीलरेखासंयुत एव च। नीलाम्बरो महासत्वो हेम-रत्नजकुण्डलः। सुवर्णभूषणोमेतो षड्भुजः क्रूर-दर्शनः। गदामाद्यादिमे हस्ते द्वितीये परिघं शये। तृतीये कमलं पाणौ वामाद्ये पात्रमेव च। द्वितीये पट्टिशं हस्ते तृतीये चात्र वै ध्वजम्। विघ्नाघः शत्रु-नाशाय दुष्टभीतिनिवृत्तये"।

शिवस्य "अथ विंशतिमो योगः शिवाख्यस्यात्र कथ्यते। शुभ्रवर्णस्त्रिनेत्रस्तु मौक्तिकाभरणान्वितः। दक्षिणे प्र-थमे हस्ते बीजपूरं मनोहरम्। अक्षसूत्रं द्वितीये च तृतीये कम्बुमेव च। चतुर्थे सायकं हस्ते पञ्चमे चन्द्रहासकम्। सद्गरञ्च करे षष्ठे सप्तमे परशुं शये। कुठारमष्टमे पाणौ नवमे दात्रमेव च। दशमे पात्र वै शङ्खं पविमेकादशे त्विह। द्वादशे पशुशाखां वै खेटभेदनमेव च। त्रयोदशे हलञ्चैव शक्तिमस्त्रं चतुर्दशे। करे पञ्चदशे दण्डं षोडशे चाम्बुजं त्विह। त्रिशूलं सुनिचन्द्रे(१७) च वसुचन्द्रे(१८) च तोमरम्। वामादिमे शये पात्रं द्वितीये चामृतं घटम्। तृतीये चक्रमत्रैव चतुर्थे वै शरासनम्। पञ्चमे खेटकं हस्ते षष्ठे टङ्कं कराम्बुजे। कुठारं सप्तमे पाणौ प्राङ्मुट-ङ्काष्टमे त्विह। नवमे चामरं शुभ्रं दशमे डमरुन्त्विह। एकादशे हस्ते द्वादशे चैव दर्पणम्। अष्टादशे शये कुलं विघ्नाघः शान्तिहेतवे"। (अत्र त्रयोदशादिसप्त-दशान्तवामहस्तानां चिह्नवाक्यानि सङ्क्षिप्तपुस्तके पतितानि विघ्नकर्मशास्त्रे दृश्यानि)।

सिद्धस्य "एकविंशोऽधुना योगः सिद्धनामाभिधीयते। जवा-कुसुमसङ्काशः शुभ्ररेखात्रयोदरः। जटाभिरभिलम्बस्थ सकटः खण्डचन्द्रयुक्। शोणशुभ्रांशुकोपेतः स्फाटि-काभरणान्वितः। वसुपञ्चभुजः२८ सौम्यस्तुन्दिलः सर्व-

भवणः। तोमरञ्चादिमे दण्डे द्वितीयेऽत्र त्रिशूलकम्। तृतीये पङ्कजं पाणौ तुर्ये दण्डं सुवर्णजम्। पञ्चमे तु करे शक्तिं षष्ठे वै कार्मुकं शुभे। सप्तमे कुलिशं दक्षे शङ्खमत्रैव चाष्टमे। नवमे दात्रमत्रैव दशमे तु परश्वधम्। सप्तरं रुद्रदक्षे वै द्वादशे चन्द्रहासकम्। त्रयोदशे शुभे बाणं शङ्खमत्र चतुर्दशे। कुम्भं वामादिमे दक्षे द्वितीये डमरुं शुभे। पात्रन्तु नवमे दक्षे दशमे वै कुठारकम्। टङ्कमेकादशे दक्षे द्वादशे चैव खेटकम्। त्रयोदशे शुभे चापं चक्रमत्र चतुर्दशे। धारयन् पूजनीयोऽसौ भोगमोक्षश्रिये जवैं। (अत्र तृतीयाद्यष्टमान्तवामहस्तचिह्नवाक्यानि सुद्रितपुस्तके पतितानि शिल्पकर्मशास्त्रे दृश्यानि)।

साध्यस्य "साध्यो द्वात्रिंशकश्चैव कथ्यते योग एव सः। शुभ्रवर्णो विशालाक्षो वज्रिरेखगलाननः। कौसुम्भवसनोपेतो वज्रवैदूर्यकुण्डलः। वेदवक्त्रिभुजोपेतो मेखलानेकरत्नयुक्। अक्षसूत्रं यमादिस्थे द्वितीये बीजपूरकम्। तृतीये शक्तिमत्रैव तुर्ये चैव त्रिशूलकम्। पञ्चमे सायकं दक्षे षष्ठे वज्रं कराम्बुजे। सप्तमे पङ्कजं पाणौ दण्डमत्रैव चाष्टमे। नवमे तोमरं पाणौ दशमे शक्तिमेव च। एकादशे दक्षं दक्षे द्वादशे शङ्खमेव च। त्रयोदशे शुभे खड्गं परशुन्तु चतुर्दशे। करे पञ्चदशे रम्ये सुदरं कठिनाकृतौ। षोडशे दात्रमत्रैव शङ्खं सप्तदशे त्विह। वामादिमे करे कुण्डीं द्वितीये पात्रमेव च। तृतीये चाभयं दक्षे तुर्ये डमरुमेव च। पञ्चमे कार्मुकं पाणौ षष्ठे चैवाङ्कुशं शुभे। सप्तमे तु ध्वजं दिव्यमष्टमे पाशमेव च। नवमे कुलमत्रैव दशमे तु गदामिह। सप्तमं रुद्रदक्षे वै द्वादशे चैव चामरम्। त्रयोदशे करे खेटं कुठारन्तु चतुर्दशे। टङ्कं पञ्चदशे पाणौ षोड़शे चैव दर्पणम्। चक्रं सप्तदशे दक्षे दधानः श्रीविवृद्धये"।

शुभस्य "शुभनामा त्रयोविंशो योगश्चात्रैव कथ्यते। शीतकालिकशोभस्तु मौक्तिकाभश्चिलोचनः। शोणरेखाङ्कितग्रीवः शोणशुभांशुकावृतः। सुक्ताविद्रुममाणिक्यभूषणः स्वर्णकुण्डलः। द्वात्रिंशद्बाहुसंयुक्तो जटाकपिलमण्डलः। वरं यमादिमे पाणौ द्वितीये चाक्षसूत्रकम्। तृतीये च त्रिशूलं वै तुर्ये बाणं कराम्बुजे। पञ्चमे पङ्कजं चैव षष्ठे कुलिशमेव च। सप्तमे शक्तिमत्रैव दण्डं वै चाष्टमे करे। नवमे तोमरं दक्षे दशमे शक्तिकामिह। दक्षमेकादशे चैव द्वादशे खड्गमत्र हि। दात्रं त्रयोदशे दक्षे सुदरं च चतुर्दशे। शङ्खं पञ्चदशे पाणौ षोड़शे तु परश्वधम्। अभयं वामादिमे वामे द्वितीये वै कमण्डलुम्। तृतीये पात्रमत्रैव तुर्ये कार्मुकमेव च। पञ्चमे डमरुं पाणौ षष्ठे चाङ्कुशमेव च। सप्तमे बीजपूरं वै ध्वजं वै चाष्टमे करे। नवमे पानपात्रञ्च दशमे कुलमेव च। गदामेकादशे दक्षे द्वादशे चैव खेटकम्। चामरं मध्यमे १३ पाणौ टङ्कमत्र चतुर्दशे। चक्रं पञ्चदशे चैव षोड़शे तु कुठारकम्। बिभ्राणो मुक्तये पुंसः सौन्दर्याय सुखाय च"।

शुक्लस्य "चतुर्विंशतिमश्चात्र शुक्लाख्यः कथ्यतेऽधुना। चिबुके लोहितश्मश्रुः चन्द्रगौरस्त्रिलोचनः। जटासुकुटखण्डेन्दुरेखासुधाधरः। सिन्दूरवदनोपेतो मालातिलकाङ्कितः। प्रवालमौक्तिकस्वर्णभूषणः कण्ठकौस्तुभः। खवक्त्रि२बाहुसंयुक्तो रत्नसङ्घासमन्वितः। शूर्पाक्षमालिकां वाम्ये प्रथमे करपङ्कजे। द्वितीये च त्रिशूलं वै तृतीये बाणमेव च। परश्वधं करे तुर्ये पञ्चमे शङ्खमेव च। सुदरं चात्र वै षष्ठे सप्तमे दात्रमेव च। खड्गे तु करे खड्गं नवमे चैव चाङ्कुशम्। दशमे शङ्खमत्रैव तोमरं रुद्रसम्मिते। द्वादशे तु करे दण्डं शक्तिमत्र त्रयोदशे। चतुर्दशे शुभे वज्रं करे पञ्चदशे कलम्। बीजपूरन्तु वामाद्ये द्वितीये पात्रमेव च। तृतीये कार्मुकं पाणौ तुर्ये चैव कुठारकम्। पञ्चमे चक्रमत्रैव षष्ठे टङ्कं कराम्बुजे। सप्तमे चामरं पाणौ खेटकं चाष्टमे शुभे। नवमे तु गदामत्र दशमे चाङ्कुशं घटम्। कुलमेकादशे दक्षे द्वादशे पात्रमेव च। त्रयोदशे ऋष्टिं चैव दर्पणञ्च चतुर्दशे। ध्वजं पञ्चदशे दक्षे दधानस्तु सदाय च"।

ब्रह्मणः "पञ्चविंशतिमो योगो ब्रह्मनामा प्रतीयते। गोगोरः पाण्डुराभेशचन्द्रगौरस्त्रिलोचनः। मौक्तिकालिकशोभस्तु ग्रीवास्वर्णस्त्रिरेखिकः। जटाक्षयग्रन्थोऽसौ सौम्यः प्रहसिताननः। ताम्रवर्णांशुकोपेतः कण्ठरुद्राक्षमालिकः। सुक्तामाणिक्यहेमोत्थभूषणः सोमकुण्डलः। वियद्बाणा५भुजोपेतः किङ्किणीजालमेखलः। सौम्याक्षमालिकां दक्षे प्रथमे तत्सुशोभने। द्वितीये तु वरं पाणौ खड्गमत्र त्रयोदशे। दक्षं चतुर्दशे दक्षे ऋष्टिं पञ्चदशे त्विह। षोड़शे चैव सोष्णीषं सुनिरत्नं च तोमरम्। सप्तदशे शुभे दण्डं शक्तिमेको-

नविंशके । करे विंशतिमे चक्रं त्वेकविंशे शये कजम् । द्वाविंशे चमसं हस्ते त्रयोविंशे शये ऽर्बुदम् । चतुर्विंशतिमे पाणौ सुदृढं लोष्टभेदनम् । पञ्चविंशे तु रत्नाख्यं वामाद्ये वै कमण्डलुम् । द्वितीये चाभयं हस्ते तृतीये चात्र वै ध्रुवम् । तुर्ये खड्गाक्षमेवेह कुठारं चैव पञ्चमे । षष्ठे शरासनं पाणौ सप्तमे कवचं शये । अष्टमे पट्टिशं हस्ते नवमे वै सुदर्शनम् । दशमे बीजपूरं वै पाशमेकादशे करे । द्वादशे चात्र वै टङ्कं खेटमत्र त्रयोदशे । चतुर्दशे कुठाराख्यं डमरुन्त्विषसंज्ञिते । षोडशे चामरं हस्ते कुम्भं सप्तदशे लिङ्ग । अष्टादशे गदामत्र मुसलं नन्दचन्द्राङ्के । खड्गं विंशके हस्ते पाशञ्चैवैकविंशके । द्वाविंशके ध्वजं शुभ्रं वीरभद्रन्त्रिपञ्चमे । जिने२४ मुनिमितादशं पञ्चविंशेऽजिनं शये । दक्षानो यज्ञनो गोत्रपरमायुर्विद्वद्वये" । (अत्र हतीयादिसवोदशान्तदक्षहस्तचिह्नवाक्यानि सङ्क्षिप्तपुस्तके पतितानि विश्वकर्मशास्त्रे दृश्यानि) ।

इन्द्रस्य "इन्द्रः षड्विंशकवात्र कथ्यते तव साम्प्रतम् । हस्तपादारुणच्छायं मेघशुभ्रायतेक्षणः । धम्मिल्लमल्लिकामाल्यचन्दनाद्यनुलेपनः । भासादितिलकश्चैव कर्णकुण्डलमेचकः । सङ्काशारोज्ज्वलोरस्कः सर्वरत्नविभूषणः । शुभ्रशोणेन्द्रनीलाभवसनः सर्वलक्षणः । युग्मबाणद्वयभुजोमेतो मनागरुणलोचनः । शक्तिमाद्यादिमे हस्ते हितीये मौक्तिकस्रजम् । तृतीये कमलं पाणौ चतुर्थं शुक्तिकालिङ्ग । स्रुवन्तु पञ्चमे पाणौ षष्ठे चात्र त्रिशूलकम् । सप्तमे चैव लोहासिं कुठारं चाष्टमे करे । नवमे पत्रिकाञ्चैव दशमे चन्द्रहासकम् । एकादशे हलं हस्ते द्वादशे मुद्गरमेव च । तोमरं मन्मथे१३ पाणौ दण्डं चैव चतुर्दशे । करे पञ्चदशे शक्तिं षोडशे कुलिशं शये । चक्रञ्च मुनिचन्द्राङ्के१७ वसुचन्द्रे१८ परश्वधम् । एकोनविंशके कम्बुं विंशके मुसलं लिङ्ग । विष्टरं त्वेकविंशे वै द्वाविंशे चैव मुद्गरम् । चमसन्तु त्रयोविंशे चतुर्विंशे त्विषार्बुदम् । पञ्चविंशतिमे हस्ते लोष्टभेदनमेव च । षड्विंशे च तुरङ्गास्यं वामाद्ये चाभयं शये । द्वितीये कुण्डिकामत्र तृतीये बीजपूरकम् । तुर्ये वामे स्रुवं पात्रं पञ्चमे स्रुवमेव हि । षष्ठे खट्वाङ्गमेवेह सप्तमे डमरुं शये । अष्टमे प्राङ्मुखं पाणौ नवमे चैव कार्मुकम् । दशमे खेटकं हस्ते खड्गे चैव कुठारकम् । द्वादशे चामरं हस्ते कुलमत्र त्रयोदशे । गदां चतुर्दशे चैव मुसलन्त्विषसंमिते । खड्गं षोडशे हस्ते पाशं सप्तदशे करे । पट्टिशं वसुचन्द्राङ्के१८ चक्रमत्र कोनविंशके । कवचं विंशके चैव द्वाविंशैवैकविंशके । द्वाविंशके तु वै टङ्कं त्रयोविंशे ध्वजन्त्विह । वीरभद्रं चतुर्विंशे पञ्चविंशे तु दर्पणम् । अजिनं चात्र षड्विंशे विभाषः श्रोविद्वद्वये" ।

वैष्णवेः "वैष्णव्याख्यन्तु वै योगः सप्तविंशतिमस्त्विह । शुभ्रवर्णो महारौद्रो योगाभोगः सितानतः । जटाधरः प्रसन्नस्तु मेचकारुणकुण्डलः । नीलशोणसुवर्णोत्थभूषणो मेचकाम्बरः । वेदबाणद्वयभुजोमेतो दक्षसुकुक्षिः सुमन्थरः । अक्षसूत्रं यमादिक्षे हितीये वरमेव च । तृतीये चैव सन्दंशं तुर्ये शुक्तिं सुदृग्जाम् । पञ्चमे पङ्कजं पाणौ षष्ठे चात्र स्रुवन्तथा । सप्तमे सायकं पाणौ प्रानखड्गमिहाष्टमे । नवमे चैव कुठारं दशमे च त्रिशूलकम् । शक्तिमेकादशे हस्ते द्वादशे हलमेव च । त्रयोदशे तु वै खड्गं तोमरन्तु चतुर्दशे । करे पञ्चदशे दण्डं षोडशे शक्तिमेव च । वज्रं सप्तदशे पाणौ कवचं वसुचन्द्रमे१८ । परशुं नन्दचन्द्राङ्के१९ विंशके चार्बुदं करे । एकविंशे शये चैव लोष्टभेदनमेव च । द्वाविंशे वै तुरङ्गास्यं त्रयोविंशे तु शङ्खकम् । पुस्तकन्तु चतुर्विंशे पञ्चविंशे तु विष्टरम् । षड्विंशे मुद्गरं पाणौ चमसं सप्तविंशके । वामादिमे करे कुण्डीमभयन्तु हितीयके । मीनं तृतीयके हस्ते चतुर्थे बीजपूरकम् । पञ्चमे पात्रमत्रैव षष्ठे चैव स्रुवं करे । सप्तमे कार्मुकं पाणौ डमरुं चाष्टमे करे । नवमे प्राङ्मुखं हस्ते खट्वाङ्गञ्चैव दिक्करे । चामरं दशमे चैव द्वादशेऽत्र कुठारकम् । खेटं त्रयोदशे चैव कुलमत्र चतुर्दशे । गदां पञ्चदशे पाणौ षोडशे मुसलन्त्विह । ऋष्टिं सप्तदशे हस्ते पाशमष्टादशे करे । पट्टिशं नन्दचन्द्राङ्के१९ वीरभद्रन्तु विंशके । एकविंशे शये टङ्कं द्वाविंशे चाजिनं करे । त्रयोविंशे तु वै चक्रं कवचं जिन२४हस्तके । पञ्चविंशे तु वै पात्रं षड्विंशे दर्पणं शुभम् । सप्तविंशे ध्वजं हस्ते धारयन् दुष्टसाधकः" ।

करणानां वयञ्च "करणानामथो वक्ष्ये रूपलक्षणसंयुतम् । वक्त्राभिधन्तु वै पीतं जटिलं रत्नकुण्डलम् । नीलवस्त्रन्तु रुद्राक्षभूषणं कण्ठपाण्डुरम् । चतुर्दशभुजोपेतं त्रिभूलोचनसंयुतं । वरं यमादिमे हस्ते हितीये बाण-

मेव च। तृतीये कुलिशं पाशौ चतुर्थे चैव पङ्कजम्। सदुगरं पञ्चमे चैव षष्ठे सन्दंशमेव च। सप्तमे चाङ्कुशं दिव्यं पद्मशाखे मनोदरे। प्रथमे चामरं वामे द्वितीये तु शरासनम्। तृतीये पुस्तकं हस्ते चतुर्थे सुकरं शये। टङ्कन्तु पञ्चमे पाशौ षष्ठे कर्तरिकामिह। करे तु सप्तमे पात्रं नागपाशं दधच्छिवे"।

वालवश्य "बालवाख्यन्तु वै रक्तं नीलयोवं मनोदरम्। श्वेतवस्त्रं जटाभारं पिङ्गलं तङ्गनासिकम्। कण्ठरुद्राक्षमालं तङ्गतिमत्कालपाण्डुरम्। रसचन्द्रैःकरोमेतं कपालमकरण्डकम्। प्रथमे मोदकं हस्ते दक्षिणे सुमनोहरे। द्वितीये केतकीपत्रं तृतीये शक्तिमेव च। चतुर्थे पङ्कजं पाशौ पञ्चमे वै सुदर्शनम्। षष्ठे सर्पायसं बाणं सप्तमे कुलिशं करे। सन्दंशमष्टमे हस्ते पात्रं वामादिमे त्विह। द्वितीये कुलिशकामल तृतीये चैव पट्टिशम्। बीजपूरं करे तुर्ये पञ्चमे शङ्खमेव च। कोदण्डमल वै षष्ठे सप्तमे कुलिशङ्करे। अष्टमे पुस्तकं विभ्रद्ग्राय विजयाय च"।

कौलवश्य "श्वेताङ्कर्णिकाभासं तृतीयं कौलयाभिधम्। रक्तकण्ठं पिकाक्षं वै नीलखेतारुणाम्बरम्। सत्कारुद्राक्षकोवर्णभूषणं खेन्द्रनीलकम्। अष्टादशभुजोपेतं किङ्किणीकटिसूत्रकम्। वरं वामादिमे हस्ते द्वितीये चाक्षसूत्रकम्। तृतीये स्वर्णजं दण्डं चतुर्थे चैव पुस्तकम्। पञ्चमे मोदकं हस्ते षष्ठे सन्दंशमेव च। सप्तमे डमरुं पाशौ वज्रमल्लैव चाष्टमे। नवमे शक्तिकामल शोणगुञ्जाद्यनामिकाम्। अभयं चादिमे वामे द्वितीये वै कमण्डलुम्। तृतीये चासवं पात्रं तुर्ये चाम्बोजसन्नभम्। पञ्चमे चामरं शुभ्रं षष्ठे दात्रं कराम्बुजे। सप्तमे वज्रकीमल मुष्टिं चैवाष्टमे करे। नवमे कदलीपत्रं दधत् सम्पत्सुखाय च"।

तैतिलवश्य "चतुर्थं तैतिलं नाम श्यामवर्णं क्षणोदरम्। शोणवस्त्रं जवापुष्पनासिकं तैत्तिराननम्। विंशत्यष्ट२० भुजोपेतं षण्ढावदनितम्बकम्। प्रथमे दक्षिणे हस्ते श्रीफलं सुमनोहरम्। अक्षगमल द्वितीये वै तृतीये चैव पुस्तकम्। अक्षसूत्रं करे तुर्ये पञ्चमे वाममेव च। षष्ठे सुदर्शनं दिव्यं सप्तमे कुलिशं त्विह। अष्टमे तु स्रुवं पाशौ नवमे चैव सद्गुरम्। दशमे चाङ्कुशं हस्ते पात्रं वामादिमे करे। द्वितीये खेटकं चैव तृतीये वारिजं शुभम्। चतुर्थे कुलिशकामल पञ्चमे चैव कार्मुकम्। षष्ठे मनोहरं शङ्खं सप्तमे चामरं सितम्। स्रुवं चैवाष्टमे हस्ते नवमे टङ्कमल त्विह। दशमे तु करे पाशं विभ्राणं यज्वनः प्रिये"।

गरुड "पञ्चमं पात्र विद्येयं करणन्तु गरादिधम्। गोलवं चित्रितग्रीवं धूसरं लोहिताम्बरम्। पञ्चपञ्च२२भुजोपेतं लतपद्माक्षभूषणम्। चादिमे दक्षिणे शक्तिं द्वितीये चक्रमेव च। तृतीये श्रीफलं हस्ते चतुर्थे चैव षड्जजम्। पञ्चमे पुस्तकं रम्यं षष्ठे बाणं मनोहरम्। सप्तमे गोदण्डं शङ्खं कुलिशं चाष्टमे करे। नवमे वज्रकीमल दशमे वीरभद्रकम्। एकादशे तु सन्दंशं पद्मशाखे मनोहरे। अभीतिसुत्तरादिस्थे द्वितीये शङ्खमल त्विह। पात्रमल तृतीये वै चतुर्थे चैव चामरम्। पञ्चमे डमरुं हस्ते षष्ठे चैव शरासनम्। सप्तमे कुलिशकामल चाष्टमे दण्डचक्रकम्। नवमे तु करे वंशं दशमे चैव दर्पणम्। एकादशे तु रुद्राक्षं बिभ्रत् कीर्तिसुखाप्तिये"।

वणिजः "वानराक्षं वणिक् धूम्रं पीतवस्त्रं हयासनम्। जिन२४वाङ्कयुतं चेदं षष्ठं कनकभूषणम्। वरमाक्षादिमे हस्ते द्वितीये चाक्षसूत्रकम्। तृतीये शुक्तिकामल मोदकन्तु चतुर्थके। पञ्चमे कुलिशं हस्ते षष्ठे शक्तिं कराम्बुजे। सप्तमे वैष्णवं दण्डं खड्गमल चैव चाष्टमे। नवमे पाशमल चैव दशमे चैव वै ध्वजम्। एकादशे तरुरक्षं द्वादशे वै सुदर्शनम्। सौम्यादिमे करेऽभीतिं द्वितीये वै कमण्डलुम्। बीजपूरं तृतीयेऽत्र पानपात्रं चतुर्थके। पञ्चमे पद्मशङ्खाद्यं षष्ठे चैव तु पट्टिशम्। सप्तमे चामरं हस्ते खेटकं चाष्टमे शये। नवमे चाङ्कुशं पाशौ दशमे हलमेव च। एकादशे करे रम्यं दर्पणं चातिनिर्मलम्। द्वादशे धारयत् शङ्खं लक्ष्मीसौभाग्यवर्द्धये"। (पद्मशङ्खाद्य पद्मसुखरुद्राक्षम्)

भद्रायाः "व्याघ्रचर्माम्बरा भद्रा खेताभा गर्दभानना। सप्तबाहुसमायुक्ता त्रिपदा षोडशभूषणा। कर्तिकामादिमे दक्षे द्वितीये तु गदायुधम्। तृतीये सायकं हस्ते चतुर्थे चन्द्रहासकम्। खेटमूर्द्धकरे वामे तदधश्चैव कार्मुकम्। पात्रमस्यादधो वामे धारयन्ती रिपोर्भिये"

शक्रनेः "अष्टमं शकुनिप्रख्यं करणं हरितप्रभम्। प्रवालभूषणोपेतं शक्रगोपनिभाम्बरम्। रसपञ्च२६भुजोपेतमेरावतं डकोदरम्। चादिमे रविजे चक्रं द्वितीये वरमेव च। अक्षसूत्रं तृतीये तु तुर्ये चैव तु पङ्कजम्। प-

ङ्गमे मोदकं हस्ते षष्ठे वज्रं कराम्बुजे। सप्तमे तोमरं पाशौ शक्तिमत्रैव चाष्टमे। नवमे हस्तिजन्दन्तं दशमे चन्द्रहासकम्। एकादशे करे बाणं द्वादशे चाङ्कुशं भवेत्। त्रयोदशे गदामत्र शङ्खं वामादिमे करे। अभयन्तु द्वितीयेऽत्र तृतीये वै कमण्डलुम्। बीजपूरं करे तुर्ये पञ्चमे पात्रमेव च। षष्ठे कराम्बुजे शङ्खं सप्तमे कुन्तमेव च। परिघं चाष्टमे हस्ते दण्डन्तु नवमे करे। खेटकं दशमे पाशौ धनुरेकादशे भवेत्। द्वादशे पात्रमत्रैव त्रिशूलन्तु त्रयोदशे। दधानं श्रेयसे भूत्यै विजयाय सुखाय च। तापाय चैव शत्रूणां विघ्नेशेन समर्चितम्"।

चतुष्पदस्य "चतुष्पदाभिधं चात्र नवमं कथ्यते जय!। कथ्यवर्षं चतुष्पादं चतुरास्यं जटान्वितम्। मनुष्याकारन्तु पूर्वं दक्षिणं चैव गोमुखम्। अजास्यं पश्चिमन्तस्य चोत्तरं शूकराननम्। मनुष्याकारवत् सर्वं लिकपुच्छविनिर्गतम्। पीतवस्त्रं दृढत्कुक्षि नीलसक्तविभूषणम्। वसुपञ्चाष्टभुजोपेतं दोर्घनासं महाजवम्। दक्षिणाद्ये करे शक्तिं द्वितीये चाक्षसूत्रकम्। सुदर्शनं तृतीये तु चतुर्थे चैव पङ्कजम्। पञ्चमे मुद्गरं चैव षष्ठे मोदकमेव च। सप्तमे तु गदां पाशावष्टमे चाङ्कुशं भवेत्। नवमे तु करे बाणं दशमे खड्गमेव च। एकादशे करे दन्तं द्वादशे शुक्तिमत्र हि। त्रयोदशे भवेत् चात्र तोमरं सुदृढं शुभम्। चतुर्दशे तु वै वज्रं वामादोर्भीतिमेव च। कमण्डलुं द्वितीये वै तृतीये शङ्खमेव च। चतुर्थे बीजपूरं वै पञ्चमे टङ्कमेव च। षष्ठे पात्रं सुधापूर्णं सप्तमे च त्रिशूलकम्। अष्टमे पात्रमत्रैव नवमे धनुरेव च। दशमे खेटकं हस्ते दण्डमेकादशे करे। द्वादशे पट्टिशं पाशौ कुन्तमत्र त्रयोदशे। शङ्खं चतुर्दशे विघ्नदृगोत्पन्नौ सुपूजितम्"।

नागस्य "नागाख्यं दशमं रक्तं नीलवस्त्रं जटाधरम्। मनुष्याकारमेवैतन्मस्तकन्यस्ततत्फणम्। विंशद्भुजोपेतं सक्तारुद्राक्षभूषणम्। प्रथमे मोदकं दत्ते द्वितीये चैव पङ्कजम्। अक्षसूत्रं तृतीयेऽत्र वरन्तुर्ये कराम्बुजे। पञ्चमे तु करे चक्रं षष्ठे वज्रन्तु वै भवेत्। सप्तमे तोमरं पाशौ शक्तिमत्रैव चाष्टमे। नवमे शोभनं दन्तं दशमे चन्द्रहासकम्। बाणमेकादशे हस्ते द्वादशे चाङ्कुशं भवेत्। त्रयोदशे गदामत्र तरुष्काख्यं चतुर्दशे। करे पञ्चदशे दात्रं वामे पात्रन्तु चादिमे। बीजपूरं द्वितीयेऽत्र तृतीये वै कमण्डलुम्। चतुर्थे चाभयं हस्ते पञ्चमे शङ्खमेव च। षष्ठे कराम्बुजे शङ्खं सप्तमे कुन्तसुत्तमम्। पट्टिशं चाष्टमे हस्ते नवमे दण्डमत्र हि। दशमे खेटकञ्चैव धनुरेकादशे करे। द्वादशे पाशमत्रैव त्रिशूलञ्च त्रयोदशे। चतुर्दशे दशास्यं वै करे पञ्चदशेऽर्बुदम्। दधानं विजयारोग्यं कुर्वीताभयदं नृणाम्"। (दशास्य दशमुखरुद्राक्षम)

किन्तुघ्नस्य "एकादशन्तु किन्तुघ्नं करणं कथ्यतेऽधुना। गोक्षीरधवलं चैतत्पीतवस्त्रं हयाननम्। सर्वाभरणसंयुक्तं द्वात्रिंशद्बाहुसंयुतम्। वरञ्चैवादिमे दद्ये द्वितीये चाक्षसूत्रकम्। तृतीये सोज्ज्वलं चक्रं तुर्ये चाजं कराम्बुजे। पञ्चमे मोदकं हस्ते षष्ठे वै कुलिशं भवेत्। सप्तमे तोमरं पाशौ शक्तिमत्रैव चाष्टमे। नवमे गजदन्तञ्च दशमे खड्गसुत्तमम्। एकादशे तु वै बाणं द्वादशे ऋष्टिमेव च। त्रयोदशे गदामत्र डमरुञ्च चतुर्दशे। करे पञ्चदशे पुर्वी परशुञ्चैव षोडशे। अभयञ्चादिमे वामे द्वितीये वै कमण्डलुम्। शङ्खमत्र तृतीये वै चतुर्थे बीजपूरकम्। पञ्चमे चासवं पात्रं षष्ठे शङ्खं मनोहरम्। सप्तमे कुन्तमत्रैव चाष्टमे पट्टिशं भवेत्। नवमे वैणवं दण्डं दशमे खेटमेव च। चापमेकादशे पाशौ द्वादशे पात्रमत्र हि। त्रयोदशे त्रिशूलं वै टङ्कमत्र चतुर्दशे। वीणाभिन्दुःपुस्तके च ध्वजञ्चैव तु षोडशे। धारयद्भैरिणां ध्वस्यै पूजनीयं विपश्चिता। विद्यालाभाय सन्तुष्टिविजयादिसुखार्थिना"। किंस्तुघ्नमिति वा पाठः।

राक्षसानां मेषस्य विष्णुधर्मोत्तरात् "मेषवक्त्रो नरो रक्तो द्विभुजः पङ्कजासनः। ज्ञानमुद्राकरः पीतवसनः कनकाङ्गदी"।

वृषस्य "वृषाननो नरः शुभ्रो रक्तवस्त्राक्षकुण्डलः"।

मिथुनस्य "पुमान् गदी सवीणा च योषिच्च मिथुनं स्मितम्"।

कर्कटस्य "कर्कटः कपिलः श्यामः कूर्मसद्दाधरो नरः"।

सिंहस्य "सिंहवक्त्रोऽरुणोऽजस्रो द्विभुजोऽभयपात्रयुक्"।

कन्यायाः "शुक्लाम्बरा सिता कन्या द्विभुजा पङ्कजासना"।

तुलायाः "तुलाधरो नरो गौरः पिङ्गकेशः कृताननः"।

वृश्चिकस्य "वृश्चिकस्थो नरः पिङ्गो द्विभुजो मर्कटाननः।
दद्ये वृश्चिकमाबाहुक् वामे पात्रं सुरायुतम्"।

धनुषः "अश्ववक्त्रो नरश्यामो व्याघ्रचर्मकरद्विषः"।

मकरस्य "मकराक्षोऽसितोऽजस्थो रिक्तकुम्भो नरो घटः"।

कुम्भस्य "मकराक्षोऽसितोऽजस्थो रिक्तकुम्भो नरो घटः"।

मीनस्य "मत्स्ययुग्मस्थितः श्यामो मत्स्यवक्त्रो महोदरः। मत्स्यवक्त्रो नरो मीनो हरिश्चक्षिविभूषणः"।

कालस्य विश्वकर्मशास्त्रात् "कालः करालवदनो नित्यमत्र विभीषणः। पाशदण्डस्तु कर्तव्यः सर्पडक्किरोमवान्"।

निमेषस्य "निमेषस्तु भवेदत्र मेचकाभोऽर्द्धमीलदृक्। ऋजुस्थितं करे दण्डं ज्ञानसङ्ग्रामयोत्तरे। दधानो योगसंसिद्धैश्च पूजनीयो विपश्चिता"।

काणायाः "मीलवर्णा भवेत् काणा पीतवस्त्रा त्रिलोचना। अष्टादशभुजोपेता ज्ञानमुद्रासमन्विता"।

कलायाः "शुक्लवर्णा कला ज्ञेया नीलवस्त्रा त्रिलोचना। ओषधजाङ्कुरद्राक्षकण्ठसन्धितमालिका। सङ्काशमालिकादण्डा वामपङ्कजसंयुता। पूजनीया विशेषेण ज्ञानविज्ञानहेतवे"।

क्षणस्य "क्षणाभिधो भवेत् पीतः सुमित्रः सुमौक्तिकः। जटामौक्तिकोपेतचन्दनालिकपाण्डुरः। सङ्काशदक्षिणकरोऽयं वामे स्वर्णकमण्डलुः"।

१मुहूर्त्तानां तत्र दिनेरौद्रस्य "मुहूर्त्तानधुना वक्ष्मि नामलक्षणपूर्वकम्। तत्रादिमस्तु रौद्राख्यः श्यामश्चतुरणेक्षणः। श्वेतवस्त्रो महाशङ्खो दक्षिणे सर्पमादधत्। वामे पात्रं सुधापूर्णं चतुष्कर्मसिद्धये"।

२मित्रस्य "मिताभिधो द्वितीयस्तु श्वेतवर्णो महोदयः। श्वेतशोणाभवस्त्रोऽयं श्वेतसङ्काशविभूषणः। दक्षिणे पङ्कजं शुभ्रं वामे चैव कमण्डलुम्। दधानस्तु श्रियै पूज्यो योगसङ्घैश्च सुखाय च"।

३ऋतधस्य "तृतीयोऽजापाख्यस्तु कृष्णः शुभ्रो महाततुः। दक्षिणे पङ्कजं नीलं वामे सर्पं महाफणम्। बिभ्रद्विपुलभोगाय पूजनीयो महाधियां"।

४आर्यभटस्य "तुर्य आर्यभटाख्यस्तु नीलः शुभ्रो महोदरः। दक्षिणे पुस्तकं हस्ते वामे चैव त्रिशूलकम्। दधानः श्रेयसे भूत्वै विजयाय सुखाय च"।

५सावित्रस्य "अधुना चैव सावित्रः पञ्चमः कथ्यते जय!। श्वेतवर्णोऽक्षवस्त्रस्तु मेचकवसनान्वितः। पुस्तकं दक्षिणे हस्ते वामे कृष्णन्तु निर्व्रणम्। दवद्रोगविनाशाय पूजनीयोऽक्षनिर्मलम्"।

६वैराजस्य "वैराजस्यात्र वै षष्ठः श्यामवर्णो जटाधरः। दक्षिणे तु करे दण्डं वामे चैव स्रुवं करे। बिभ्रद्दण्डञ्च सौख्याय पूजनीयोऽतिभक्तितः"।

७गन्धर्वस्य "सप्तमस्यात्र गन्धर्वस्याक्षवर्णः क्षयोदरः। दक्षिणे वल्कलं पार्श्वे वामे शक्तिञ्च धारयन्। सौख्यदञ्च यशोदञ्च पूजनीयो विपश्चिता"।

८अभिजितः (कृतयुगे) "अधुना चाभिजिन्नाम कथ्यतेऽष्टमः शुभः। पीतवर्णोऽतिहृस्वस्तु ताम्रवर्णो महोदरः। तृणदण्डद्वयोपेतः पूजनीयः सुखाप्तये। स एव कृतयो नाम विज्ञातव्यो मनीषिभिः। पितृणां तृप्तिदश्चैव पिण्डदस्योऽयवाप्तये"।

९रौहिणेयस्य "नवमो रौहिणेयाख्यो सङ्कर्षः कथ्यते जय!। शुभ्रवर्णो विशालाक्षो नीलवस्त्रोऽभ्रकुण्डलः। दक्षिणे पङ्कजं पार्श्वे वामे मोदकमेव च। दधानः सुखसम्पत्त्यै विजयारोग्यहेतवे"।

१०बलस्य "अधुना कथ्यते वत्स! दशमस्तु बलाभिधः। गौरवर्णोऽरुणः श्वेतवसनः स्वर्णकुण्डलः। दक्षिणे तु करे शङ्खं वामे पङ्कजमादधत्"।

११विजयस्य "एकादशोऽधुना ज्ञेयो सङ्कर्षो विजयाभिधः। हेमवर्णो हरिद्वासः कृष्णश्वेतारुणांशुकः। ऋजुस्थं करे दण्डे वामे चैव कमण्डलुम्। दधत् प्रजासुखार्थाय पूजनीयो विपश्चिता"।

१२नैर्ऋतस्य "नैर्ऋताख्योऽधुना ज्ञेयो द्वादशस्तु सङ्कर्षकः। नीलवर्णोत्पलमौलिः पीतवस्त्रो महाबलः। दक्षिणे तु करे चक्रं वामे चाभयमादधत्"।

१३सन्मनस्य "त्रयोदशो भवेत्र रक्तः सन्मनसाभिधः। ताम्रवस्त्रो महौजस्को रत्नहेमजकुण्डलः। शोषपङ्कजदण्डस्तु वामकुण्डीसमन्वितः"।

१४वरुणस्य "सङ्कर्षः कथ्यते चात्र वरुणाख्यश्चतुर्दशः। सुक्काफलनिभश्चैव सङ्काशविभूषणः। धनुर्बाणधरश्चैव पूजनीयः सुखाप्तये"।

१५सुभगस्य "अथ पञ्चदशो ज्ञेयः सुभगस्तु हरित्प्रभः"।

१रात्रौ अतिरौद्रस्य "अथो निशाचरान् वक्ष्मो सङ्कर्षान् तिथिसंख्यकान्। तत्रादिमोऽतिरौद्राख्यः कृष्णवर्णोऽरुणांशुकः। चतुर्भुजोमहाक्रूरः साक्षिसङ्घटकोबलः। आदिमे दक्षिणे बिभ्रत् कौशिकञ्चातिभीषणम्। द्वितीये तु करे सर्पं वामोर्द्धे त्वथ वै करे। सन्दंशं तदधः पात्रं बिभ्राणः सर्वविघ्नहा"।

२महागन्धर्वराजस्य "महागन्धर्वराजाख्यो द्वितीयस्तत्र वै हि। कृष्णशुभ्रारुणपीतो नीलवस्त्रो महाबलः। चतुर्भुजो विशालाक्षो गौरवर्णो जटाधरः। आदिमे दक्षिणे शङ्खं द्वितीये चैव पङ्कजम्। वामोर्द्धे वीरं

तदधस्ते तु पातकम्। धारयन्निष्टसम्पत्त्यै पूजनीयो विचक्षणैः"।

३इविषस्य "तृतीयः कथ्यते चाथ राशिजो इविषाभिधः। तप्तचामीकराभासः कृष्णनीलारुणांशुकः। दक्षिणे प्रथमे पद्मं क्षेमलब्धातिशोभनम्। द्वितीये तु करे वीणां वामोर्द्धे बीजपूरकम्। दधानः सर्वसम्पत्तिसुखायुः-श्रीविवृद्धये"।

४आवयस्य "आवयाख्यस्ततस्तुर्यो नीलवर्णोऽर्ककुण्डलः। नीलारुणांशुकोपेतः कण्ठनीलाब्जमालिकः। दक्षिणाद्ये करे खड्गं द्वितीये चैव पङ्कजम्। वह्नीमूर्द्धगे वामे पात्रमक्षादधःस्थिते। दधानः पूजनीयोऽयं ज्ञानविज्ञान-सिद्धये"।

५वायोः "सुकर्तः कथ्यते चायो वायुसंज्ञस्तु पञ्चमः। हरि-द्वर्णो जवाकर्णः श्वेतवस्त्रो महाबलः। कौरमाख्यादिमे हस्ते द्वितीये तु ध्वजं भये। वामोर्द्धगे करे क्षीरं द्वितीये पात्रमादधत्"।

६अग्नेः "अग्निसंज्ञस्ततः षष्ठो जवाकुसुमसन्निभः। कृष्ण-नीलांशुकोपेतः शिखारुद्राक्षसंयुतः। दक्षिणाद्ये करे पात्रं द्वितीये शक्तिमेव च। वामादिमे करे क्षीरं द्वितीये क्षीरमेव च। दधानः कीर्तये भुक्त्यै विज-यायुःप्रहृद्धये"।

७राक्षसस्य "अधुना कथ्यते वत्स! राक्षसाख्यस्तु सप्तमः। लालवर्णोऽर्कदंष्ट्रस्तु नीलशुभ्रारुणांशुकः। दक्षिणाद्ये करे पद्मं द्वितीये तु त्रिशूलकम्। खट्वाङ्गसुतरे वामे पात्रमक्षादधःस्थिते। दधद्भैरविघाताय पूजनीयस्तु साधकैः।

८धातुः "धाता चैवाष्टमः पीतवर्णः पाटलभांशुकः। कर्ण-स्फाटिकसौवर्णकुण्डलः कम्बुकन्धरः। शुक्लीमाक्ष्यादिमे हस्ते द्वितीये चैव विष्टरम्। वामादिमे करे दण्डं द्वितीये स्वर्णकुण्डलम्। दधानः प्रीतये भुक्त्यै विज-याय सुखाय च"।

९सौम्यस्य "नवमः सौम्यनामाथ शुभवर्णो विशालदृक्। पीत-वस्त्रो महातेजा शुक्लाम्बरविभूषणः। आदिमे दक्षिणे पद्मं द्वितीये चैव पङ्कजम्। वामादिमे करे पात्रं द्वितीये क्षीरमेव च। दधानस्तुष्टये भुक्त्यै पूजनीयस्तु ऋद्धिदः"।

१०ब्रह्मणः "दशमश्चात्र विज्ञेयो सङ्क्रान्तो ब्रह्मसंज्ञकः। पीत-वर्णः शुक्लवस्त्रो जटाशुद्धांशुसंयुतः। कण्ठरुद्राक्षमालोऽयं भालपाण्डुरचन्दनः। सुवर्णकुण्डलोपेतः कटिसूत्रो-त्तरीयवान्। अक्षस्रक् यमादिस्थे द्वितीये चैव पङ्कजम्। वामोर्द्धे तु स्रुवं हस्ते पुस्तकन्नदधःकरे। दधत् सौवर्णशुक्लानां लाभाय विजयाय च"।

११ वाक्पतेः "एकादशोऽधुना श्रेयो वाक्पतिर्नाम नामतः। सुवर्णवर्ण एवायं कृष्णशुभ्रांशुकान्वितः। कृष्णोमाक्ष्यादिहस्ते तु द्वितीये क्षीरमेव च। वामादिमे करे क्षीरं द्वितीये क्षीरज दधत्। प्रजालाभकरश्चैव कार्यसिद्धिसाधकः"।

१२शौक्रस्य "द्वादशश्चात्र विज्ञेयो शौक्रनामा सुलोहितः। पीत-वस्त्रो जटामौलिर्नितम्बलम्बततनुतिः। कुण्डिलः सोप-वीती च नीलकीलकपाण्डुरः। दक्षादिमे करे बीज पूरकं शुभवर्णकम्। द्वितीये वारिजं पात्रं वामादिमे करे। वन्दंजन्तु द्वितीयेऽयं धारयन् वैरि-तापदः"।

१३वैकुण्ठस्य "जयाधुनात्र वै कथ्यो वैकुण्ठाख्यस्ततोदयः। पाट-लाम्बरशुभ्रोऽयं कण्ठान्तारुणवर्णकः। अक्षिवर्णश्च केशान्तं कृष्णवानेकरत्नजः। दक्षिणाद्ये करे स्रुक्-मम्बुजन्तु द्वितीयके। वेकिविष्कन्तु वामाद्ये द्वितीये चातपत्रकम्। दधानः कीर्तये भुक्त्यै पूजनीयः सिता-म्बुजैः"।

१४समीरस्य "चतुर्दशोऽधुना श्रेयो नामतस्तु समीरणः। जलनीलनिभश्चैव शुभसारकतद्युतिः। पीतनीलारुण-प्रान्तवसनः स्निग्धलोचनः। तालपत्रं यमादिस्थे द्वितीये नीलनीरजम्। वामादिमे करे पात्रं द्वितीये नीलरत्न-लम्। दधानो वज्रतो भूत्यै बालत्वैत्र सुखाय च"।

१५ नैर्ऋतस्य "अथ पञ्चदशो श्रेयो सङ्क्रान्तो नैर्ऋतोऽरुणः। मेचकाभनिभश्चैव दंष्ट्रावान् वसनारुणः। स्वर्णेन्द्र-नीलभूषाढ्यः शोणाक्षितिलकान्वितः। आदिमे दक्षिणे बाणं द्वितीये कमलं करे। वामादिस्थे धनुश्चैव द्वितीये चैव वारिजम्। दधच्छान्त्यै सुभोगाय बलाय विज-याय च"।

१६अहोरात्रस्य "एते निशाचराः ख्याता सङ्क्रान्तिः सकलास्तव। अहोरात्राभिधश्चात्र कृष्णपीतादिमूर्त्तिजः। कण्ठपादा-न्तगुह्येऽयं द्विभुजो दीर्घलोधिकः। सार्द्धचन्द्रजटा-मौलिः पिङ्गलश्मश्रुलोचनः। नक्षत्रमालिकोपेतः कृष्णशुभ्रांशुकान्वितः। अर्कं दक्षे दधानोऽयं वामे चैव विषुन्तदम्। दृष्टादृष्टप्रसिद्ध्यर्थं पूजनीयो मनीषिभिः"।

शुक्लपक्षस्य "शुक्लपक्षो नरः शुक्लो जटाकुटसंयुतः। शोभनवस्त्रो विशालाक्षो भालार्जितिलकान्वितः। स्रुवमालौ दधानोऽयं वामे चन्द्रजविम्बकम्। पूजनीयो महाभक्त्या प्रतिपत्तं दिने दिने। अस्य द्वादश भेदाः सुविज्ञेया वर्णभेदतः। पूजनीयावबोधाय प्रतिमासन्तु भेदतः"।

कृष्णपक्षस्य "शुक्लाभः कृष्णपक्षस्तु सितशोभाम्बरो बली। सूर्यबिम्बं यमे बिम्बहस्ते दार्पं सशब्दकम्। पूजनीयो बलाढ्यार्थं प्रतिमासन्तु भेदतः। इत्यस्यार्कप्रभेदाः स्युर्भपक्षादिजनामतः"।

भानुस्य "खनामतस्तु भानुः स्यात् द्विवर्णस्तु द्विदोरिति। लाम्बूदरः श्वेतजटः पिङ्गलोचनमूर्जजः। सूर्यचन्द्रान्वितः सोऽयं प्रतिमासन्तु पूजयेत्। खनामपूर्वकैर्मन्त्रैर्होममपूजावसानकैः"।

अतूनां हेमनस्य "ऋतुषट्कमथो ब्रूमोलक्षनामशुक्लकैः। हेमनाख्यस्तु तत्राद्यः कपिलः पिङ्गकुण्डलः। पीतवस्त्रसमायुक्तस्त्रिजटः कृष्णगोधिकः। (गोधिर्गलाटम् धान्यमञ्जरिकाख्यस्तु वामपात्रविधानकः। पूजनीयोऽभिमन्त्रं धान्यसम्मितहस्तये"।

शिशिरस्य "शिशिराख्यो द्वितीयस्तु हरित्पीतनिभाकृतिः। पीतकुण्डलकर्णस्तु कण्ठविद्रुमभालिकः। मधुद्रुमस्रुवाक्षपात्रमालौ कराम्बुजे। वामे धान्यशरावन्तु धारयन्निष्टहस्तये"।

वसन्तस्य "विष्णुपर्करणोक्तस्तु ज्ञातव्योऽत्र वसन्तकः"।

ग्रीष्मस्य "ग्रीष्माभिधस्तृतीयस्तु धूमरो रक्तमालकः। अक्षस्रुवार्कदण्डस्तु वामे शुभ्रातपत्रयुक्। रोमशत्वापनाशाय पूजनीयोऽरिपक्षहा"।

वर्षाणां: "पद्मसंज्ञोयदर्तुस्तु हरिद्वर्णोऽरुणेक्षणः। ताम्रवर्णांशुकोपेतः कृष्णविद्रुमकुण्डलः। नीलमालौ दधानोऽयं तोयपूर्णघटं परे। मेघमालाहतश्चैव विद्युद्वलनदीप्तिमान्। हरितान्विदलैः पूज्यो पुष्टिवन्तुष्टिहस्तये"।

शरदः "शरदृतुरथो षष्ठश्चन्द्रगौरः सुलोचनः। कण्ठमौक्तिकमालस्तु कर्णचन्द्रकुण्डलौ। चन्द्रबिम्बं करे दक्षे वामे चास्रतजं घटम्। दधानः पूजनीयोऽयमायुष्टुत्यै सुखाय च"।

दक्षिणायनस्य "दक्षिणायनसंज्ञोऽत्र श्यामः सोमेन्द्रलोचनः। पीतवस्त्रो हरिद्वस्त्रः कर्णिकारदलस्रुतिः। बीजाङ्कुरयरावार्किः खनिलोत्तरहस्तकः। पूजितः स्थिरमे नित्यं धनधान्यसमृद्धये"।

उत्तरायणस्य "उत्तरायणसंज्ञोऽत्र शुभ्रवर्णो विशालदृक्। मञ्जिष्ठवसनोपेतः स्वर्णसन्नाभिभूषणः। पुस्तकं दक्षिणे हस्ते वामे तु रविबिम्बकम्। दधद्भुक्त्यै सदा चैव पूजनीयस्तु कीर्तये"।

११ प्रभवस्य "अथ संवत्सरान् ब्रूमो नामलक्षणकानि तैः। प्रभवाख्योभवेदाद्यः पीतवर्णो महोदरः। नीलवस्त्रसमायुक्तो दक्षे काञ्चनकुण्डलः। वामे स्फाटिकवर्णस्तु पृष्ठलम्बिजटालयः। दक्षिणे प्रथमे भक्तिं पङ्कजन्तु द्वितीयके। वामादिमे शरावन्तु बीजपूर्णं कराम्बुजे। द्वितीये चैव सन्दंशं दधानः पुष्टिहस्तये"।

१२ विभवस्य "विभवाख्यो द्वितीयस्तु नीलपीतारुणच्छविः। पीतशुभ्रान्तवस्त्रोऽयं कण्ठे पद्माक्षमालिकः। दक्षिणाद्ये शरं पाशं द्वितीये नीलपङ्कजम्। सन्दंशस्रुक्तरादिस्थे द्वितीये चैव कार्मुकम्। दधद्विभूतये नित्यं पूजनीयो विपश्चिता"।

१३ शुक्लस्य "शुक्लनामा तृतीयस्तु श्वेतपङ्कजसन्निभः। कण्ठपद्माक्षमालोऽयं शुभ्रवस्त्रान्तिवस्त्रकृक्। दक्षिणाद्ये शरान्तु द्वितीये पाशमेव च। दर्भणस्रोत्तरादिस्थे द्वितीये चैव कार्मुकम्। दधानो भूतये सर्वैः पूजनीयः कृतात्मभिः"।

१४ प्रमोदस्य "प्रमोदाख्यश्चतुर्थस्तु नीलश्मश्रुर्महोदरः। श्वेतवस्त्रोऽक्षसङ्काशो योगपट्टोत्तरीयवान्। दक्षिणाद्ये तु सन्दंशं द्वितीये सीरमेव च। वामादिमे शरावन्तु द्वितीये नीलपङ्कजम्। दधत् सौख्याय भोगाय विजयाय महाय च"।

१५ प्रजापतेः "प्रजापत्याख्य एवात्र पञ्चमः स्वर्णसन्निभः। श्मश्रुभूषणवस्त्राढ्यस्तुन्दिलो गौरपाण्डुरः। अक्षस्रुवं यमादिस्थे द्वितीये परशुं करे। शरावस्रुत्तरादिस्थे द्वितीये पुस्तकं दधत्। प्रजाहस्तये विभूत्यै च पूजनीयोविजानता"।

१६ अङ्गिरसः "अङ्गिराख्यस्ततः षष्ठो वर्णशुभ्रोऽतिलोमशः। ताम्रवस्त्रो महातेजा द्वादशाक्षसचन्दनः। पवित्रदर्भपाणिस्तु जटामण्डितमस्तकः। प्राणखड्गन्तु दक्षादौ द्वितीये समिधङ्करे। वामादिमे शरावन्तु ब्रह्मदण्डं द्वितीयके। दधत् सुपूजितो भूत्यै श्रेयसे च सुखाय च"।

१७ श्रीसुखस्य "सप्तमः श्रीसुखाख्यस्तु पीतवर्णो विशालदृक्। पाटलावसनोपेतो दीर्घकर्णालकान्वितः। सुवर्णरत्नभूषाढ्यः सुवर्णर्द्धिविधातकृत्। श्रीफलं दक्षिणादिस्थे द्वितीये चैव पङ्कजम्। दक्षकर्णोर्ध्वगे वामे तदक्षस्तु

शरावकम् । दधानः पुत्रये लक्ष्म्यै चन्दनादिभिरर्चितः"।

१।८भावस्य "भावाभिधोऽष्टमस्तात नीलशुक्लारुणच्छविः । पीतक्षणारुणप्रान्तवसनश्चित्रकुण्डलः । सक्ताक्षिद्वयमालोड्यं जटाधिङ्काच्च एव च । दक्षिणे प्रथमे पुस्तमंशकन्तु द्वितीयके । वामोर्द्वगे करे शूलं तदधः पात्रमासवम् । बिभ्रत्पूजनीयस्तु धान्यलाभाय वै श्रिये" ।

१।९वूनः "नवमोऽत्र युवाख्यस्तु पाटलाभोऽरुणेक्षणः । नीलवस्त्रजटोत्तुङ्गो रत्नमेचककुण्डलः । दक्षिणे प्रथमे शङ्खं द्वितीये तु सुदर्शनम् । वामादिमे करे पात्रं द्वितीये नीलपङ्कजम् । बिभ्राणः कान्तये पूज्यो लक्ष्मीसौभाग्यवृद्धये" ।

१।१०धातुः "धाता चैव प्रवित्रेयो दशमः पिङ्गलोचनः । रक्तशुभ्रारुणप्रान्तवसनः श्वेतकुण्डलः । शरावमादिमे दक्षे द्वितीये बीजपूरकम् । वामोर्द्वगे करे पुस्तं नीलमिन्दीवरन्त्वधः । जयाय पुत्रसम्पत्त्यै पूजनीयः सुभक्तितः" । (दवदिति शेषः)

२।११ईश्वरस्य "ईश्वराभिध एवात्र त्रयेयेकादशोऽभवत् । कैरवाभस्त्रिनेत्रस्तु जटाखण्डेन्दुमौलिकः । सक्ताक्षाटिकरुद्राक्षभूषणस्तुङ्गनासिकः । त्रिशूलमादिमे दक्षे द्वितीये सोरमेव च । शरावमादिमे वामे द्वितीये चैव पुस्तकम् । बिभ्रत् सौख्याय पूज्योऽसौ योगवृद्धयै सुताप्तये" ।

२।१२बहुधान्यस्य "द्वादशो बहुधान्याख्यः पीतनीलारुणच्छविः । पीतवस्त्रो विशालाक्षस्तुन्दिलोदीर्घगोधिकः । जवाकुसुमालोऽयं कवची गजकुण्डलः । दक्षिणाद्ये करे कुम्भं सौवर्णं सर्वधान्यकम् । बीजपूरविधानन्तत् खचितानेकरत्नकम् । द्वितीये डमरुं वामे चोर्द्वे नीलकनीरजम् । द्वितीये तु करे सीरं दधानः सर्वधान्यकम् । सिद्धये पूजितो नित्यं स्वनामाढ्यैस्तु संस्कृतः" ।

२।१३विक्रमिणः "विक्रमाख्यो द्वितीयस्तु नीलशुभ्रो महोदरः । पीतवस्त्रो हरिद्वाभः कण्ठभौक्तिकालिकः । आदिमे दक्षिणे शङ्खं द्वितीये चैव पङ्कजम् । वामादिमे करे पात्रं पाशमत्र द्वितीयके । दधानोऽतिबलायाथ पूजनीयस्तु यत्नतः" ।

२।१४वृषस्य "वृषाभिधस्तृतीयस्तु श्वेतगौरो विशालदृक् । स्मेरोमाऽतिसंहृष्टः केतकीदलकर्णयुक् । पीतप्रान्तारुणोपेतवसनः कटिवेष्टकः । आदिमे दक्षिणे पात्रं द्वितीये शङ्खमेव च । वामादिमे करे पात्रं द्वितीये शूलमेव च । धनधान्यपदद्वयं पूजनीयोऽतिसादरम्" ।

२।१५चित्रभानोः "चतुर्दशश्चित्रभान्वाख्यश्चित्रयोऽरुणांशुकः । सक्ताक्षमेनिभश्चैव वरदः स्वर्णकुण्डलः । सक्ताक्षजन्तु दक्षाद्ये द्वितीये चैव पाशकम् । वामादिमे करे कम्बुं द्वितीये पङ्कजं शुभम् । बिभ्रदानन्दसम्पत्त्यै प्रतापार्थविवृद्धये" ।

२।१६सुभानोः "पञ्चमस्तु सुभान्वाख्यः शुभ्रगोरुरुचिः शुभः । कण्ठलिरेखाशोभस्तु जटाकाञ्चनसन्निभः । आदिमे दक्षिणे पद्मं द्वितीये शङ्खसज्ज्वलम् । वामोर्द्वं तु करे पात्रं तदधःस्थे शरेऽङ्कुशम् । बिभ्राणः सुखदः सान्त्यै रिपुपक्षक्षयाय च" ।

२।१७तारणस्य "अत्र संवत्सरः षष्ठस्तारणाख्यः सिताम्बरः । श्वेतनीलारुणश्चैव स्वर्णकुण्डलभूषणः । प्रथमे दक्षिणे कुम्भं द्वितीये चैव पङ्कजम् । उत्तरार्द्ध करे पात्रं द्वितीये शङ्खमादधत् । दुर्गत्वनेकनाशाय भूतये विजयाय च" ।

२।१८पार्थिवस्य "सप्तमः पार्थिवाख्यस्तु तप्तकाञ्चनसन्निभः । पीतशोणाम्बरश्चैव कृष्णपीतोऽतिसुन्दरः । सर्वरत्नविभूषाढ्यः केतकीदलमस्तकः । आदिमे दक्षिणे पात्रं द्वितीये चैव पङ्कजम् । कार्तकृत्तोत्तरादिस्थे द्वितीये शङ्खमेव च । दधद्राज्यादिलाभाय पूजनीयः प्रयत्नतः ।

२।१९अव्ययस्य "अव्ययाख्योऽष्टमश्चात्र कैरवारुणसन्निभः । कृष्णनीलारुणश्वेतवसनश्चित्रकुण्डलः । कौरमाक्षादिमे हस्ते द्वितीये सीरमेव च । शङ्खं वामादिमे हस्ते द्वितीये पाशमादधत् । यज्ञवृद्धिभूतये नित्यं हृद्ये चायुषे श्रिये" ।

२।२०सर्वजित्तः "सर्वजित्त्रयोऽभ्यत्र श्वेतनीलोऽसितप्रभः । नीलवस्त्रजटोत्तुङ्गः कृष्णनीरजकुण्डलः । दक्षादिमे करे बाणं द्वितीये चैव पुस्तकम् । वामादिमे करे पात्रं द्वितीये पात्रमेव च । दधानः पूजनीयोऽयं विजयाय सुखाय च" ।

२।२१सर्वधारकस्य "अधुना कथ्यते वत्स ! दशमः सर्वधारकः । कङ्कपत्रनिभश्चैव पाटलावसनान्वितः । नीलपङ्कजवर्णस्तु सक्ताहारविभूषणः । पात्रं दक्षादिमे हस्ते द्वितीये केतकीदलम् । शङ्खश्चैवोत्तरादिस्थे द्वितीये चैव पुस्तकम् । दधानो विजयारोग्यवृद्धये चैव यज्वनः" ।

२।११विरोधिनः "एकादशोऽधुना ज्ञेयो विरोधी नाम वत्सरः। कृष्णपाण्डुरदेहस्तु वरदो नीलकुण्डलः। कृष्णप्रान्तारुणश्चैव वसनप्रान्तभूषणः। बिम्बीफलन्तु दक्षाद्ये द्वितीये श्वेतपङ्कजम्। वामादिमे करे सर्पं द्वितीये पाशमादधत्। पूजनीयोऽरिघाताय बलदर्पौ च यज्वनः"।

२।१२विक्रतस्य "द्वादशो विक्रताख्यस्तु धूसरः पिङ्गलोचनः। नीलशुभ्रांशुकोपेतो मेषग्रहकृतकुण्डलः। दक्षिणाद्ये करे पाशं द्वितीये मेषग्रहकम्। वामोर्द्धगे करे शङ्खं पाशमक्षादधः करे। दधानो रोगनाशाय दुष्टशत्रुविघातकृत्"।

२।१खरस्य "खराभिधानसंज्ञाद्यो रक्तवर्णो मकोदरः। नीलवस्त्रो दृढस्कन्धो घनवर्वरमूर्द्धजः। दक्षिणाद्ये करे शक्तिं द्वितीये खड्गमेव च। वामादिमे करे पात्रं द्वितीये चामरन्दधत्। शत्रुतापाय पुष्योऽसौ विजयायैव यज्वनः"।

२।२नन्दनस्य "नन्दनाख्यो द्वितीयस्तु पीतगोधाननो बली। शुभ्रवस्त्रो जटाजम्बी दीर्घकर्णः कलाशनः। पङ्कजन्तु यमादिस्थे द्वितीये शक्तिमेव च। वज्रं वामादिमे पाशौ द्वितीये चाङ्कुशं भवे। दधानः श्रेयसे भूत्वै पूजनीयोमकोदयः"।

२।१विजयस्य "विजयाख्यस्तृतीयस्तु श्वेतपीतारुणच्छविः। कृष्णवस्त्रः कृशोत्तुङ्गजटारुद्राक्षमालिकः। कुक्कुटं यमादिस्थे द्वितीये कुलिशं करे। शक्तिं वामादिमे हस्ते द्वितीये चैव पङ्कजम्। दधानो विजयारोग्यदत्वै चैव पूजितः"।

२।४जयस्य "जयाभिधश्चतुर्थोऽत्र पीतगोधः शुचिः सुखी। पीतवस्त्रो जटैकस्तु पीतरुक्मेणवेष्टितः। पुस्तकं प्रथमे दक्षे द्वितीये नीलपङ्कजम्। वामादिमे करे वज्रं द्वितीये शक्तिमेव च। दधानः शुभमाङ्गल्यदत्वै चैव पूजितः"

२।५मन्मथस्य "पञ्चमो मन्मथाख्यस्तु नीलगोधशुचिः शुभः। स्वर्णकुण्डलसंयुक्तः कीरपत्ननिभांशुकः। मल्लिकाधन्यवाचस्तु मूर्वापुष्पसजमालिकः। दण्डन्तु दक्षिणे हस्ते द्वितीये चैव पङ्कजम्। वामादिमे करे पुस्तौ द्वितीये शक्तिमेव च। दधानः सिद्धये भूत्वै योगिहर्षवशीकृतौ"।

२।६दुर्मुखस्य "षष्ठश्चैवात्र विज्ञेयो वत्सरो दुर्मुखाभिधः। शुकचञ्चुनिभश्चैव नीलकुण्डलसम्वरः। दक्षिणाद्ये करे शक्तिं द्वितीये वज्रमेव च। शुकं वामादिमे पाशौ द्वितीये सर्पमादधत्। पूजनीयो विधानेन भ्रूकुटीकुटिलाननः। दुष्टशत्रुविनाशाय सर्वरोगोपशान्तये"।

२।७हेमलम्बस्य "सप्तमो हेमलम्बाख्यो रक्तपीतनिभच्छविः। पद्मपत्रांशुकश्चैव रक्तकुण्डलभूषणः। हेमजं पङ्कजं दक्षे प्रथमे करपल्लवे। द्वितीये कुलिशं पाशौ वामाद्यौ पात्रसत्तमम्। द्वितीये तु करे शक्तिं दधानो सुखाय जय!"।

२।८विलम्बस्य "अष्टमस्तु विलम्बाख्यः पाटलाभः कृशोदरः। पीतवस्त्रो दृढस्कन्धो जटाखण्डेन्दुभूषणः। प्रथमे दक्षिणे सर्पं द्वितीये शक्तिमेव च। वामादिमे करे पात्रं द्वितीये चैव पङ्कजम्। दधानः शत्रुघाताय पूजनीयोविशेषतः"।

२।९विकारिणः "विकारी नवमश्चाथ कृष्णनीलारुणच्छविः। ताम्रकुण्डलवस्त्राद्यः कण्ठशोणसिरेखिकः। दक्षिणाद्ये करे वाणं द्वितीये चैव पुस्तकम्। वामादिमे धनुर्हस्ते द्वितीये शक्तिमादधत्। पूजनीयोविशेषेण सर्वरोगोपशान्तये"।

२।१०शार्वरिणः "दशमः शार्वरिप्रख्यः कृष्णशुभारुणच्छविः। श्रोणवस्त्रोऽतिदीर्घाङ्गः स्थूलवर्वरमूर्द्धजः। दक्षिणाद्ये करे सर्पं द्वितीये शालमलीदलम्। कौशिकक्षौत्तरादिस्थे द्वितीये शक्तिमेव च। दधानः कीर्त्तये पुष्ट्यै शत्रुभङ्गाय पूजितः"।

२।११प्लवस्य "एकादशः प्लवाख्यस्तु शशकर्णनिभच्छविः। दर्दुराभाम्बरोपेतो लोहकुण्डलसंयुतः। खादिमे दक्षिणे हस्ते दर्दुरं मणिसंयुतम्। द्वितीये तु करे शक्तिं पात्रं वामादिमे करे। द्वितीये पङ्कजं बिभ्रत् पूजनीयोऽभिलक्षणा"।

२।१२ शुभकृतः "शुभकृत् द्वादशोऽत्यन्तं नागजाभः सुलोचनः। पाटलावसनोपेतः कृष्णकुण्डलभूषणः। दक्षिणे भीषणां शक्तिं प्रथमे करपल्लवे। द्वितीये हेमजं पद्मं वामाद्यौ चैव दर्पणम्। द्वितीये कुलिशं हस्ते दधत्यौख्याय सम्पदे"।

३।१ शुभकृतः "शुभकृत् पीतधूम्रस्तु प्रथमो नीलवाम्बरः। नीलभूषणसंयुक्तो रक्तसद्राकराकृतिः। घटं दक्षादिमे हस्ते द्वितीये चैव पुस्तकम्। वामादिमे करे पात्रं द्वितीये ध्वजमेव च। दधानः श्रेयसे पुष्ट्यै पूजनीयोजयाय च"।

३।२ क्रोधिनः "क्रोधिसंज्ञो द्वितीयस्तु नीलशुभ्रः कृशोदरः।

मेचकाम्बरसंयुक्तस्तुङ्गनासाक्षिपाण्डुरः। पद्मं दक्षादिमे हस्ते द्वितीये ध्वजमेव च। वामादिमे कजं पाशो द्वितीये सीरमेव च। दधानो वैरिनाशाय लक्षणैः सुपूजितः"।

४।२ विद्यावक्त्रः "विद्यावक्त्रस्तृतीयस्तु लक्षणीयः सुलोहितः। लक्षणुभ्रारुणप्रान्तवसनश्चित्रकुण्डलः। ध्वजं दक्षादिमे पाशो द्वितीये कलिशं तथे। दधानो भुक्तये प्रीत्यै नानाभोगफलाप्तये"।

४।३पराभवस्य "पराभवस्तुर्यस्तु धूसरोऽरुणाम्बरः। नीलोत्पलद्युतिश्चैव लुब्धचिष्टकमेखलः। नीलोत्पलन्तु दक्षाद्यो द्वितीये ध्वजमेव च। वामादिमे करे पात्रं सन्दंशं तु द्वितीयके। धारयन्नरिघाताय पूजनीयो विपश्चिता"।

४।४ध्रुवस्य "पञ्चमस्तु ध्रुवाख्यो हरिद्याभिजनप्रभः। मेघोदराभवस्त्रोऽयं संवृतः कृष्णकम्बरः। दक्षिणाद्यो ध्वजं पाशो द्वितीये मेघसङ्कलम्। वामादिमे करे पात्रं द्वितीये पाशमेव च। दधानो भूतये भुक्त्यै पूजनीयः सदा नृभिः"।

४।५ कीलकस्य "कीलकाख्यस्ततः षष्ठः कृष्णवर्णोऽतिदीर्घदृक्। नीलवस्त्रो जटाभारः कृष्णकुण्डलभूषणः। कीलकं दक्षिणादिस्थे द्वितीये ध्वजमेव च। वामादिमे करे पात्रं सन्दंशन्तु द्वितीयके। दधानो विजयारोग्यहृदये चैव पूजितः"।

४।६सौम्यस्य "सप्तमः सौम्यनामाथ कीर्त्यते वत्सरः शुभः। नीलपीतजटायुक्तो रक्तादलनिभांशुकः। सर्वपत्रद्युतिश्चैव कण्ठपद्मजमालिकः। चन्द्रभाक्षादिमे हस्ते द्वितीये केतकीदलम्। वामादिमे ध्वजं हस्ते द्वितीये नीरजं शुभम्। बिभ्रत्सौभाग्ययोगाय पूजनीयः शुभक्षितः"।

४।७ साधारणस्य "साधारणोऽष्टमो ज्ञेयो नीलगौरारुणच्छविः। पीतशोणान्तवस्त्रोऽयं सर्वकुण्डलरत्नयुक्। चन्द्रहासं यमादिस्थे द्वितीये चैव कीलकम्। वामादिमे ध्वजं पाशो सन्दंशश्चोत्तरे दधत्। धनहृद्यै सुखाप्त्यर्थं पूजनीयः सिताम्बुजैः"।

४।८ विरोधकृतः "विरोधकृच्च विघ्नेशो नवमो वत्सरो जय!। पिङ्गाभः शुक्लवस्त्रोऽयं पिङ्गश्मश्रुजटेक्षणः। दक्षिणाद्यो करे शङ्खं द्वितीये चैव वै ध्वजम्। चन्द्रहासन्तु वामाद्यो द्वितीये परशुं तथे। बिभ्राणो रोगनाशाय शत्रुनाशकृत् जय!।"

४।९ परिधाविनः "परिधावी तु विघ्नेशो दशमश्चैव वत्सरः। इन्दीवरारुणद्युतेः कृष्णपीतनिभांशुकः। शङ्खप्रसवकर्णस्तु कण्ठपद्मजमालिकः। पिङ्गाक्ष्यादिमे हस्ते द्वितीये ध्वजमेव च। खट्वां वामादिमे पाशो द्वितीये चैव मुद्गरम्। दधानो हृद्ये चैव श्रेयोभूतिसुखायुषाम्"।

४।११प्रमादिनः "प्रमादी चापि विघ्नेशो रुद्रसङ्ख्योऽपि वत्सरः। अतसीपुष्पसङ्काशो हरिनीलारुणाम्बरः। मदघूर्णितनेत्रस्तु तन्त्रीभूतध्वजस्थः। दण्डमाक्ष्यादिमे हस्ते द्वितीये दण्डमेव च। वामादिमे करे पात्रं द्वितीये विघिनीदलम्। दधानो रोगविच्छित्त्यै शत्रुभङ्गाय यज्वनः"।

४।१२आनन्दस्य "आनन्दाख्यः सितः पीतवसनो द्वादशोऽब्दहृ। शङ्खेन्द्रनीलसौवर्णभूषणो नीलकुण्डलः। पद्मं दक्षिणादिस्थे द्वितीये केतकीदलम्। वामोर्ध्वगे ध्वजं पाशो तदधस्थे तु मोदकम्। योविघ्नघ्नाय कंपूज्यो गन्धपुष्पाक्षतादिभिः"।

५।१राक्षसस्य "तामसानां भवेदाद्यो राक्षसो नाम वत्सरः। इन्दीवरदलाभासो क्षेमवस्त्रोऽर्कभूषणः। चर्कमाक्ष्यादिमे हस्ते द्वितीये स्रुचिमेव च। नीलोत्पलन्तु वामाद्यो द्वितीये कलिशं तथे। दधद्रोगादिनाशाय पूज्यः स्याद्भिरेव सः"।

५।२अनलस्य "अनलाख्यो द्वितीयस्तु नीलशुभ्रारुणच्छविः। पीतप्रान्ताक्षिवस्त्रस्तु वज्रकुण्डलभूषणः। चन्द्रहासं यमादिस्थे द्वितीये चार्ककन्दुरे। पिशितञ्चोत्तरादिस्थे परे चैव परश्वधम्। दधत् सुखसम्पदेऽरीणां विजयायैव यज्वनः"।

५।३पिङ्गलस्य "पिङ्गलाख्यस्तृतीयोऽब्द कुलटारुणसन्निभः। श्वेतप्रान्तारुणानीलवसनः स्वर्णभूषणः। आदिमे पिशितं याम्ये द्वितीये सीरमेव च। कलिशञ्चैव वामाद्यो सन्दंशन्तु द्वितीयके। विभ्राणो विजयारोग्यहृदये चैव पूजितः"।

५।४कालयुक्तस्य "कालयुक्ताभिधस्तुर्यो नीलकण्ठो दरोदरः। पीतारुणांशुकोपेतो नीलस्वर्णजभूषणः। यमादिमे करे सर्पं द्वितीये सीरमेव च। शीघ्रपात्रन्तु वामाद्यो द्वितीये कीलमेव च। पूजनीयो विघ्नेशं यज्वनो वैरिशान्तये"।

५।५सिद्धार्थस्य "अधुना कीर्त्यते वत्स! सिद्धार्थो नाम पञ्चमः।

सप्तकाञ्चनसङ्काशो नीलशुभ्रांशुकः। नीलकुण्डल-संयुक्तो रुक्माविद्रुमभूषणः। सौवर्णं कलशं वाम्ये प्रथमे करपद्मके। इन्दीवरं परे चैव कलिशञ्चोत्तरोर्द्धगे। बीजपूरमधस्तस्माद्धानः श्रेयसे सदे"।

६।६रौद्रस्य "रौद्राभिधस्ततः षष्ठः पिङ्गलः कृष्णलोचितः। पाटलावसनोपेतो हस्तवर्वरमूर्द्धजः। कीरमाक्षौदिमे हस्ते द्वितीये हस्तमादधत्। कृष्णौभिन्द्रादिमे पार्श्वौ परे कृष्णजिनं शवे। रोगनाशाय संभुक्त्यै पूज्योऽयं परिपन्थिषु"। (इन्द्रो वामः)

६।७दुर्मतेः "सप्तमः कथ्यते चायं मेचकाभः स दुर्मतिः। शङ्ख-माक्षौदिमे हस्ते खर्परमेचकरत्नजम्। खर्परम द्वितीये वै कृष्णौभिन्द्रादिमे शवे। द्वितीये पुस्तकं पार्श्वौ दधद्विद्वेषकृद्विषोः"। (इन्द्रो वामः)

६।८दुन्दुभेः "अष्टमो दुन्दुभिप्रख्यो नीलश्यामो विशालदृक्। सोमवर्णः सिताम्भोजवसनः कृष्णगोधिकः। जटाशकुट भाभोऽयं खर्परद्युतिः शुभः। कदलीफलमाक्षौद्यो द्वितीये शङ्खमेव च। बीजपूरन्तु वामाद्ये द्वितीये वज्रमङ्कुशम्। विभ्राणो धनधान्याय पूजनीयः सदा नृभिः"।

६।६रुधिरोद्गारिणः "नवमो रुधिरोद्गारी नीलश्यामो बलिदेहयुक्। कृष्णप्रान्तारुणश्वेतवसनो नीलभूषणः। लोहिताक्षो जटापिङ्गः शोणचन्दनचर्चितः। रक्तोत्पलं वामादिस्थे द्वितीये कलिशं शवे। पिशितञ्चोत्तरादिस्थे द्वितीये चाङ्कुशं दधत्। वैरिभङ्गाय वै पूज्यो वाञ्छद्भी हि यज्वनः"।

६।१०रक्ताक्षस्य "दशमश्चैव रक्ताक्षो नीलकण्ठः कृशोदरः। पीतनीलततुश्चैव नीलश्यामाम्बरः। शरमाक्षौदिमे पार्श्वौ द्वितीये चैव पङ्कजम्। सौरमिन्द्रादिमे हस्ते द्वितीये चैव कर्तरीम्। दधद्वैरिविघाताय पूजनीयः प्रयत्नतः"।

६।११क्रोधनस्य "एकादशोऽधुना वक्ष्ये! क्रोधनाख्यो निगद्यते। सजलाम्बुदसङ्काशः पीतशोणाम्बरान्वितः। लोहभूषणसंयुक्तः केशबध्नपङ्कजः। दक्षिणाद्ये करे शूलं पद्मपुष्पाक्षसंयुतम्। द्वितीये कर्तरीमत्र वामाद्ये पात्रमासवम्। सन्दधन्तु द्वितीये वै दधानो वैरिरक्तवे"।

६।१२क्षयस्य "क्षयाभिधो भवेदत्र द्वादशो वत्सरो जव!। कृष्णपीतः सुनीलाक्षो रक्तनेत्रो जटाधरः। मेचकास्त्रवस्त्रस्तु नीलकाञ्चनशोभितः। आदिमे दक्षिणे खर्परं द्वितीये चैव पाशकम्। विपक्षघ्नन्तु वामाद्ये द्वितीये चैव केतनम्"। एवं षड्विंशदधिकशतराशां मूर्त्तयः।

यासां देवतानां प्रतिमानां यथारूपनिर्माणमुक्तं तासां तथारूपेणैव ध्येयता। अतानुक्तदेवतानां ध्यान-भेदा ध्यानशब्दे वक्ष्यन्ते। देवताप्रतिमूर्त्त्यादयोऽप्यत्र। प्रतिमानिर्माणे द्रव्यभेदा मत्स्यपु॰उक्ताः ते च देवताप्रतिष्ठा शब्दे वक्ष्यते

**देवताप्रतिष्ठा** स्त्री इत॰। देवताप्रतिमानां विधानेन तत्-वाच्चिध्यापादके अर्चे वक्ष्यमाणनिरूपितयुक्ते संस्कार-भेदे देवप्रतिष्ठादयोऽप्यत्र। तद्विधानादि देवप्रतिष्ठातत्त्वे संक्षेपेणोक्तं यथा मत्स्यपु॰

"सौवर्णी राजती वापि ताम्री रत्नमयी तथा। शैल-दारुमयी वापि लौहशङ्खमयी तथा। रीतिकाधातु-युक्ता च ताम्रकांस्यमयी तथा। शुभदारुमयी वापि देवतार्च्चा प्रशस्यते। कनिष्ठपर्व चारभ्य वितस्तिं यावदेव तु। सप्तेषु प्रतिमा कार्य्या नाधिका यजते बुधैः"। रीतिका पित्तलं शुभदारुमयी यज्ञियकाष्ठसम्भवा। अर्च्चा प्रतिमा सप्तेषु सप्तसु। "प्रासादेष्वधिका शुभेति" वच-नात् तदाधिक्येऽपि शैलजा सप्ते शुभदा। तन्मानरेऽ-प्युक्तम् "चिन्मयस्याद्वितीयस्य निष्कलस्याशरीरिणः। उपासकानां कार्य्यार्थं ब्रह्मणोरूपकल्पना"। रूपक-ल्पना रूपस्थानां देवतानां पुंस्त्रग्यादिकल्पना। मौत-मोयतन्त्रे "काश्मीरी चानदा प्रोक्ता सर्वजापि विस्फु-लिङ्गा। तेजोदा दारुजा चैव रैत्तिकी धातुनाशिनी। ताम्री धर्म्मविवृद्धिञ्च करोति बहुसौख्यदा। सुदे च सप्त-मयी प्रोक्ता प्रतिमा शुभलक्षणा। भोगदा मोक्षदा सा तु प्रतिमा कथिता तव"। वराहपुराणे "कृष्णे लेख्ये च मे कचित् पटे कचिच्च मानवः। पूजयेद् यदि वा चक्रे मम तेजोऽंशसम्भवे"। कृष्णे लेख्ये भित्तौ लिखिते तथा पटे च लिखिते। चक्रे मण्डलचक्रे। मत्स्यपुराणे विष्णुमभिधाय "एवं रत्नमयं कुर्य्यात् स्फा-टिकं पार्थिवं तथा। शुभदारुमयं वापि यद्वा मनसि रोचते। चैत्रे वा फाल्गुने वापि ज्यैष्ठे वा माधवे तथा। माघे वा सर्वदेवानां प्रतिष्ठा शुभदा भवेत्। प्राप्य पक्षं शुभं शुक्लमतीते चोत्तरायणे"। अतीते हस्ते "प्रतिपच्च द्वितीया च तृतीया सप्तमी तथा। दशमी पौर्णमासी च तथा श्रेष्ठा त्रयोदशी। तासु प्रतिष्ठा विधिवत् कृता बहुफला भवेत्"। व्यवहारसप्तके

"प्रतिष्ठा सर्वदेवानां ज्येष्ठस्य विशेषतः। उत्तरायणमापन्ने शुक्लपक्षे शुभे दिने। कृष्णपक्षे च पञ्चम्याम् षष्ठ्याञ्चैव शस्यते"। भुजबलभीमे "युगादावयने पुण्ये कर्त्तव्या विषुवद्वये। चन्द्रसूर्यग्रहे वापि दिने पुण्येऽथ पर्वसु। या तिथिर्यस्य देवस्य तस्यां वा तस्य कीर्तिता। स्वागमविशेषेण प्रतिष्ठा सम्भवादिनी"। पद्मपुराणे "प्रतिपद्नवदर्शोक्ता पवित्रारोहणे तिथिः। शिवोदेव्या द्वितीया च तिथीनामुत्तमा स्मृता। तृतीया तु भवान्याश्च चतुर्थी तत्सुतस्य च। पञ्चमी नागराजस्य षष्ठी प्रोक्ता गुहस्य च। सप्तमी भास्करे प्रोक्ता भैरवस्याष्टमी तथा। दुर्गाया नवमी प्रोक्ता दशमी वासुकेस्तथा। एकादशी ऋषीणाञ्च द्वादशी चक्रपाणिनः। त्रयोदशी स्मरस्यैव शिवस्योक्ता चतुर्दशी। मम चैव सनिश्चैव! पौर्णमासी तिथिः स्मृता"। चक्रपाणिन इति पद्म व्यवहारे दृश्यस्मृतिनिर्णयः "मत्स्यभागुरहन्त्राद्य प्रतिष्ठा दक्षिणायने"। कल्पतरौ देवीपुराणम् "यस्य देवस्य यः कालः प्रतिष्ठाध्वजरोपणे। गर्त्तापूरणिलान्यासे शुभदस्तस्य पूजितः"। यस्य देवस्य प्रतिष्ठा ध्वजारोपणे यः कालः शुभदस्तस्य गर्त्तापूरणिलान्यासे स्मृद्धारम्भे स कालः पूजित इत्यर्थः। प्रतिष्ठासमुच्चये "माघेऽथ फाल्गुने वापि चैत्रवैशाखयोरपि। ज्येष्ठाषाढकयोर्वापि प्रतिष्ठा शुभदा भवेत्"। भविष्ये "सोमोऽङ्गारस्तिथैव शुक्रश्चैव तथा बुधः। एते सौम्यग्रहाः प्रोक्ताः प्रतिष्ठा यत्रकर्मणि"। एतद्वारेषु प्रतिष्ठा कर्त्तव्या इत्यर्थः। मत्स्यपुराणम् "आषाढे हे तथा मूलत्तरात्रयमेव च। ज्येष्ठा श्रवणरोहिण्यः पूर्वभाद्रपदस्तथा। हस्ताश्विनी रेवती च पुष्योऽनुत्तरफल्गुनी। अनुराधा तथा स्वाती प्रतिष्ठादिषु शस्यते"। दीपिकायाम् "प्राजेशवासवकरादितिमाश्विनीषु पौष्णाम्बरेज्यवसुभेषु तथोत्तरासु। कर्त्तुः शुभे शशिनि जैवदृशे च जीवे कार्या हरेः शुभतिथौ विधिवत् प्रतिष्ठा"। देवीपुराणम् "तथा द्वादशगे जीवे षष्ठमे वाथ भास्करे। प्रतिष्ठा कारिता विष्णोर्महाभयकरी मता"। कल्पतरौ देवीपुराणम् "चतुर्थ्यैकादशी विष्णुः प्रतिष्ठाप्यः सुखार्थिभिः"। कालिकापुराणम् "प्रतिमायाः कपोलौ द्वौ स्पृष्ट्वा दक्षिणपाणिना। प्राणप्रतिष्ठां कुर्वीत तस्या देवस्य वा हरेः। कृतायां प्रतिष्ठायां प्राणानां प्रतिष्ठासु च। यथापूर्वं तथाभावः स्वर्णादीनां न विद्युता। अन्येषामपि देवानां प्रतिमासु च पार्थिव!। प्राणप्रतिष्ठा कर्त्तव्या तस्यां दैवत्वसिद्धये"। प्रतिष्ठा ब्राह्मणद्वारैव कर्त्तव्या। यथा हयशीर्षपञ्चरात्रे भगवद्वाक्यं "कर्त्तुमिच्छति यः पुण्यां मम मूर्तिं प्रतिष्ठया। अन्वेषणीयस्त्वाचार्यस्तेन लक्षणसंयुतः। ब्राह्मणः सर्ववर्णानां पञ्चरात्रविशारदः। ब्राह्मणानामभावे तु क्षत्रियोवैश्यशूद्रयोः। क्षत्रियाणामभावे तु वैश्यः शूद्रस्य कल्पितः। कदाचिदपि शूद्रस्तु न चाचार्यत्वमर्हति"। हरिभक्तिविलासे "नमेद् यः शूद्रसंस्पृष्टं लिङ्गं वा हरिमेव वा। स सर्वयातनाभोगी यावदाभूतसंप्लवम्"। आभूतसंप्लवं प्रलयपर्यन्तम्। तथा "स्त्रीणामनुपनीतानां शूद्राणाञ्च जनेश्वर!। अग्नौ नाधिकारोऽस्ति विष्णौ वा शङ्करेऽपि वा"। कर्मादौ तु नवग्रहपूजामाह मत्स्यपुराणम् "नवग्रहमखं कृत्वा ततः कर्म समारभेत्। अन्यथा फलदं पुंसां न कार्य्यं जायते क्वचित्"। प्रतिष्ठाप्रकारस्तु विस्तरेण मत्स्यपुराणादावुक्तः। तदसम्भवे विद्याकरवाजपेयिसम्मतोभविष्यादावुक्तो ग्राह्यः यथा भविष्यपुराणम् "स्नपनादि यथाशक्ति कृत्वा तन्मूलमन्त्रकम्। विन्यसेद्धृदयाम्भोजे प्रतिष्ठा सुकृता भवेत्"। आदिपदात् पूजोत्सवहोमादि महाकपिलपञ्चरात्रोक्तकर्म च कर्त्तव्यं तदुक्तं यथा "सपुष्पं सकुशं पाणिं न्यसेद्देवस्य मस्तके। पञ्चवारं जपेन्मूलमष्टोत्तरशतोत्तरम्। ततो मूलेन मूर्त्तादिपीठान्तं संस्पृशेदिति। तत्त्वन्यासं लिपिन्यासं मन्त्रन्यासञ्च विन्यसेत्। पूजाञ्च महतीं कुर्य्यात् स्वतन्त्रोक्तां यथाविधि। प्राणप्रतिष्ठामन्त्रेण प्राणस्थापनमाचरेत्"। लिपिन्यासः मातृकान्यासः। उक्तञ्च "जपादौ सर्वमन्त्राणां विन्यासेन लिपिं विना। कृतं तत्सिद्धिदं विद्यात् तस्मात् पूर्वं लिपिं न्यसेत्"। कादिमतेऽपि "मातृकायाः षडङ्गञ्च मातृकान्यासमेव च। सर्वासां प्रथमं कृत्वा पश्चान्मन्त्रोदितं न्यसेत्"। एतद्वचनाच्च पूर्वं मातृकान्यासः पश्चात्तत्त्वन्यासः। क्रमदीपिकायामप्येवं क्रमः। मन्त्रन्यासश्च तत्तन्मन्त्रविशेषोक्त पदवर्णन्यासः। तदभावे शिरसि मूलमन्त्रेण च तत्त्वन्यासः। तत्त्वन्यासस्तु विष्णुविषयक एव न्यासप्रमाणानि शारदाक्रमदीपिकोक्तान्यनुसन्धेयानि। प्राणप्रतिष्ठामन्त्रस्तु शारदात्रयोविंशतिपटलोक्तः यथा "आद्याद्युगपटा शक्तिर्वायुर्बिन्दुविभूषितः। आद्याः सप्त स्वकारान्ता ओम सबिन्दुसंयुतम्। तदन्ते हंसमन्त्रः स्यात्त-

तोऽसुपञ्च पदं वदेत्। प्राणा इति वदेत् पदादिह प्राणास्ततःपरम्। असुपञ्च जीव इह च स्थितोऽसुपञ्चपदं वदेत्। सर्वेन्द्रियाण्यसुपञ्चाग्ने वाङ्मनश्चक्षुरन्ततः। श्रोत्रघ्राणपदे प्राणा इहागत्य सुखं चिरम्। तिष्ठन्त्वग्निवधूरन्ते प्रणवमन्त्रोऽयमीरितः। अत्रासुपञ्चपदात् पूर्वं पाशाद्यानि नियोजयेत्। प्रयोगेषु समाख्यातः प्राणमन्त्रो मनीषिभिः"। पाशाङ्कुशघण्टा शक्तिरित्यनेन प्रथमं पाशबीजं व्रां, ततः शक्तिबीजं ह्रीं, ततोऽङ्कुशबीजं क्रों", वायुर्यकारः बिन्दुविभूषितः तेन यं, वाद्याः सप्त सकारान्ता उद्धृतयकारानुवादेन सप्त न तु तद्भिन्नं बीजं, पूर्णं पृथगुद्धारस्तु वर्णसप्तानामपि सबिन्दुत्वाख्यापनाय। अन्यत्रापि "अङ्कुशवाञ्चनलावनीयरूपबीजान्युक्तानि अत्र वायुबीजस्यैकत्वं बीजत्वेन सर्वेषां सबिन्दुत्वं व्यक्तं राघवभट्टोऽप्येवम्। अन्यस्तु वाद्यौ बिन्दुविभूषिताः इत्युक्त्वा नादबिन्दुविभूषिता इति व्याख्याय वाद्या इत्यस्य विशेषणं वदति। व्योम हकारः सत्यओकारः इन्दुर्बिन्दुः तेन होम् अतएव "पाशाङ्कुशान्तरितशक्तिमनोः पुरस्तादुद्धार्य वादिसनिवर्णसुखं सहंसमिति" प्रपञ्चसारोऽप्याह। सुखमित्यनेन होमिति पद्मपादाचार्यैर्व्याख्यातम् अग्निवधूः स्वाहा। तेनायं मन्त्रः व्रां ह्रीं क्रों यं रं लं वं शं षं सं हों हंसः असुपञ्च प्राणा इह प्राणाः। आमित्यादि असुपञ्च जीव इह स्थितः। आमित्यादि असुपञ्च सर्वेन्द्रियाणि। आमित्यादि असुपञ्च वाङ्मनश्चक्षुःश्रोत्रघ्राणप्राणा इहागत्य सुखं चिरं तिष्ठन्तु स्वाहा। असुपञ्चेति षड्जदेवतानामोपलक्षणम् "यदः पदं हि यद्रूपं यत्र मन्त्रे हि दृश्यते। साध्याभिधानं तद्रूपं तत्र स्थाने नियोजयेत्" इति नारदीयात्। वशिष्ठसंहितायाम् "हृदि हस्तं समादाय मूलमन्त्रञ्च संजपेत्"। मूलमन्त्रं तत्तद्देवतामन्त्रं स च वैदिकः तान्त्रिकश्च "ओङ्कारादिचतुर्थ्यन्तं नमस्कारान्तमीरितम्। स्वनाम सर्वमन्त्राणां मन्त्र इत्यभिधीयते" इति ब्रह्मपुराणीयेन ओङ्कारादिचतुर्थ्यन्ततत्तद्देवतानामरूपो वा। कालिकापुराणेऽपि "प्रतिमायाः कपोलौ द्वौ स्पृष्ट्वा दक्षिणपाणिना। प्राणप्रतिष्ठां कुर्वीत तस्या देवस्य वा हरेः। वासुदेवस्य बीजेन तद्विष्णोरित्यनेन(१)च। तथैवाङ्गाङ्गिमन्त्राभ्यां प्रतिष्ठामाचरेद्धरेः। तथैव हृदयेऽङ्गुष्ठं दत्त्वा शक्तञ्च मन्त्रवित्। एभिर्मन्त्रैः प्रतिष्ठान्तु हृदयेऽपि समाचरेत्। अस्यै प्राणाः प्रतिष्ठन्तु अस्यै प्राणाः चरन्तु च। अस्यै देवत्वसंख्यायै स्वाहेति यजुरीरयन्। अङ्गमन्त्रैरङ्गिमन्त्रैर्वैदिकैरित्यनेन च। प्राणप्रतिष्ठां सर्वत्र प्रतिमासु समाचरेत्"। देवीप्रतिष्ठायाम् अस्या इत्यत्र अस्यै देवत्वसंख्यायै इत्युद्धारसारस्वत्यां मेधां प्राणा इत्यत्र प्राणै इत्युद्धरवत्। अङ्गमन्त्रैरङ्गन्यासमन्त्रैः अङ्गिमन्त्रैः प्रधानमन्त्रैः वैदिकैः ओं मनोजूतिर्जुषतामित्यादि(२)मन्त्रैः। (यजु०२।१२)। स्नपनात् पूर्वं वल्मीकमृत्तिकादिभिस्तिभिः स्नानमाह हयशीर्षपञ्चरात्रम् "वल्मीकमृत्तिकाभिस्तु गोमयेन सुभस्मना। स्नानयेत् शिल्पिसंस्पर्शदोषाणामुपशान्तये। स्नापयेद्वस्त्रतोयेन गुडवत्या तु देशिकः। नमस्तेऽस्तु सुरेशानि! प्रणीते विश्वकर्मणा। प्रभावितार्चेपञ्चगव्यादि! तुभ्यं नमोनमः। त्वयि संपूजयाम्यीशे! नारायणमनामयम्। रहिता शिल्पिदोषैस्तु शुद्धियुक्ता सदा भव"। तेन च यथाशक्ति स्नपनादीतिकर्तव्यताकः प्रतिमाहृदये तन्मूलमन्त्रविन्यासोदेवताविशेषसन्निधिः प्रतिष्ठेति। राघवभट्टधृतमहाकपिलपञ्चरात्रेऽपि "प्रतिष्ठाशब्दसंसिद्धिः प्रतिपूर्वात्तु तिष्ठतेः। बहुत्वात्क्षिपातानां संस्कारादौ प्रतेः स्थितिः। अर्थस्तदयमेतस्य गीयते शास्त्रिकैर्जनैः। विशेषसन्निधेर्या तु क्रियते व्यापकस्य तु। तन्मूर्तौ भावना मन्त्रैः प्रतिष्ठा सा विधीयते"। सुभस्मना गोमयभस्मना गन्धतोयेन चन्दनादियुक्ततोयेन। देवताङ्गानीवद्रव्यपरिमाणमाह ब्रह्मपुराणम् "शतोत्तरं पलशतं स्नाने देयञ्च सर्वदा"। पलमाह मनुः "पञ्च कृष्णलको माषस्ते सुवर्णस्तु षोडश। पलं सुवर्णाश्चत्वारः" इति। ततश्चाष्टोत्तरकाधिकलौकिकमाषद्वयाधिकतोलकत्वेन। ३।२।८। वैधपलं भवति एवं तत्राविधाष्टोत्तरशतपलपरिमितेन लौकिकषष्ट्यधिकशतत्रयतोलकाः ३६० इति। एवं वल्मीकमृत्तिकादिस्नाने सर्वाङ्गीणजलस्पर्शनस्नानरूपत्वात्तत्रापि शतोत्तरं शतपलमिति वदन्ति। वल्मीकमृदादिस्नाने मन्त्रविशेषानुपादानात् "मन्त्रानादेये गायत्रीति" न्यूनपाणिलिखितात् गायत्र्या तत्तन्मूलमन्त्रेण वा स्नानं कारयितव्यम्। गन्धोदकस्नाने तु गुडवत्या(३) एतोन्विन्द्रमित्यादि ऋक्त्रयात्मिकया। देशिको यजमानोगुरुर्वा विप्रः। नमस्ते इत्यादि विज्ञापनमन्त्रे देवतान्तरे च नारायणमित्यत्र तत्तद्देवतानामोल्लेखः। शिवलिङ्गस्यार्च्यत्वात् अर्चाविशेषणत्वात् स्त्रीलिङ्गमविरुद्धम्। यमः "कृत्वा देवगृहं सर्वं प्रतिष्ठाप्य च देवताम्। विधाय विधिवत् पूजां तल्लोकं विन्दते ध्रु-

वम्"। नारसिंहे "प्रतिमां लक्षणोपेतां नरसिंहस्य कारयेत्। सर्वपापानि संत्यज्य स तु विष्णुपुरं व्रजेत्। प्रतिष्ठां नरसिंहस्य यः करोति यथाविधि। निष्कामो नरशार्दूल! देहबन्धात् प्रमुच्यते। सकामो नरसिंहस्य पुरं प्राप्य प्रमोदते। विधिवत् स्नापयेद् यस्तु कारयित्वा जनार्दनम्। न जातु निर्गमस्तस्य विष्णुलोकात् कदाचन"। नरसिंहस्य विष्णोः उपसंहारे तथा दर्शनात्। माधवीयामे "देवस्य प्रतिमायास्तु यावन्तः परमाणवः। तावद्वर्षसहस्राणि विष्णुलोके महीयते। राजमार्त्तण्डे "पुत्रोत्पत्तौ तथा श्राद्धमन्नप्राशनिके तथा। चूडाकर्मव्रते चैव नान्दि पुंसवनेषु च। याज्ञिकपक्षे प्रतिष्ठायां प्रवेशे नववेश्मनः। एतदृद्धिकरं नाम स्टद्धस्य विधीयते"। वृद्धिकरं श्राद्धमित्यन्वयः। सूत उवाच "कलौ चैकाहसाध्येन प्रतिष्ठां मन्त्रवित्तवान्। मध्यमेनाधमेनापि प्रकुर्यात्तान्त्रिकोत्तमः। नित्यं नित्यं मतिमान् कुर्यादभ्युदयन्नतः। विप्रान् संभोजयेच्छाय ततो यागगृहं व्रजेत्। गणेशमग्नदिक्पालान् प्रतिकुम्भेषु पूजयेत्। स्थण्डिले पूजयेद्विष्णुं परिवारगणं व्रजेत्। स्नापयेत् प्रथमं देवं तोयैः पञ्चविधैरपि। पञ्चामृतैः पञ्चगव्यैः पञ्चसूत्रविधृतकैरपि। तिलतैलैस्तथा स्नेहैः कषायैरपि सप्तभिः"। तथा "जम्बुशालमलिशाखान्तं वदरं बकुलं तथा। एतेषां वल्कलरसः कषायः परिकीर्तितः। पञ्चपल्लोदकैर्वापि त्रिपत्रैरपि सप्तभिः। तुलसीकन्दमालूरपत्राण्याहृत्य पञ्चकम्। चम्पकाम्रमधोपद्मकरवीरञ्च पञ्चकम्। मृत्तिका करिदन्तस्य पर्वताद्वृषभस्य च। कुशवल्मीकसम्भूता मृत्पञ्चकमितीरितम्। गोमूत्रं गोमयं क्षीरं दधिसर्पिः कुशोदकम्। कुर्यात् प्राग्वत्प्रतिष्ठाङ्गं होमं कुर्याद् यथाविधि। दक्षिणां विधिवत् कुर्यात् पूर्णार्घ्यं तदनन्तरम्"। इति भविष्यपुराणे तृतीयभागे नवमोऽध्यायः। नरसिंहपुराणे "पञ्चगव्येन देवेशं यः स्नापयति भक्तितः। ब्रह्मकूर्चविधानेन विष्णुलोके महीयते"। ब्रह्मकूर्चविधानेन कुशोदकयुक्तेन पञ्चगव्येन। स्नानीयानुलेपने तदुद्वर्तने फलमाह तत्रैव "यवगोधूमजैश्चूर्णैर्बहत्यौष्णेन वारिणा। प्रक्षाल्य देवदेवेशं वारुणं लोकमाप्नुयात्"। स्मृतिः "चतुरङ्गुलविस्तारा दीर्घा हस्तद्वयावधि। पताका लोकपालानां दशानां परिकीर्तितः"। पञ्चहस्तस्य वै दण्डः पताकानां प्रकीर्तितः। ज्योतिषे "दुग्धं सशर्करञ्चैव घृतं दधि तथा मधु। पञ्चामृतमिदं प्रोक्तं विष्णोः सर्वकर्मसु"। प्रतिष्ठानन्तरं मातृके "ततः सहस्रं विप्राणामथ वाष्टशतं तथा। भोजयेच्च यथाशक्त्या पञ्चाशद्वाथ विंशतिम्"। षोडशोपचाराः "आसनं स्वागतं पाद्यमर्घ्यमाचमनीयकम्। मधुपर्कंचमस्नानवसनाभरणानि च। गन्धपुष्पे धूपदीपौ नैवेद्यं वन्दनं तथा"। दशोपचारास्तु "पाद्यार्घ्याचमनीयं मधुपर्कंचमने अपि। गन्धादिपञ्चकञ्चेति उपचारा दशोदिताः"। पञ्चोपचारास्तु "गन्धादयोनैवेद्यान्ताः पूजा पञ्चोपचारिका"। उपचारद्रव्याणि शारदायाम् "पाद्यं ग्रामाकदुर्वाजविष्णुक्रान्ताभिरीरितम्"। विष्णुक्रान्ता अपराजिता एतद्द्रव्ययुक्तं जलमिति शेषः। "गन्धपुष्पाक्षतबकुलाग्रफलसर्षपैः। सदूर्वैः सर्वदेवानामेतदर्घ्यं-मुदीरितम्"। एतद्युक्तं जलमित्यर्थः। "जातीलवङ्गकङ्कोलैर्जलमाचमनीयकम्। काश्यं दधि मधून्मिश्रं मधुपर्कं निवेदयेत्"। कात्यायनः "मधुपर्कं दधिघृतमधु मिश्रितं कांस्य कांस्येन"। मधुपर्केति स्थाने स्नानीयेति पाठः पूर्वोक्तद्रव्ययुक्तं जलमात्रं वा "गन्धचन्दनकर्पूरकालानुरुभिरीरितः"। राघवभट्टधृतम् "शङ्खपात्रस्थितं गन्धं मन्त्रैः कुर्यात् कनिष्ठया। कनिष्ठाङ्गुष्ठसंयुक्ता मन्त्रमुद्रा प्रकीर्तिता"। पुष्पाणि तत्तद्देवदेवानि "अगुरुश्रीरगुग्गुलुमधुपर्ककुचन्दनैः। धूपवेदाख्यसंमिश्रैश्चूर्णैर्देवस्य दैशिकः। तत्र तत्र जलं दद्यात् उपचारान्तरान्तरे"। राघवभट्टधृतम् "सर्वोपचारवस्तूनामभावे भावनैव हि। निर्मलेनोदकेनाथ पूर्णतेत्याह नारदः"। नारसिंहे "पञ्चगव्येन देवेशं यः स्नापयति भक्तितः। ब्रह्मकूर्चविधानेन विष्णुलोके महीयते"। ब्रह्मकूर्चविधानेन कुशोदकयुक्तेन पञ्चगव्येन। ब्रह्मपुराणे "देवानां प्रतिमा यत्र स्नाप्यश्चेन्नमा भवेत्। पलानि तत्र देवानि शतया पञ्चविंशतिम्। अष्टोत्तरशतं स्नाने पलं देवस्य सर्वदा। यवगोधूमजैश्चूर्णैर्बहत्यौष्णेन वारिणा। प्रक्षाल्य देवदेवेशं वारुणं लोकमाप्नुयात्। पादपीठन्तु यो दद्यात् बिल्वपत्रैर्निधर्षयेत्। उष्णाम्बुना च प्रक्षाल्य सर्वपापैः प्रमुच्यते" देवीपुराणम् "होमीयकादिपूजायां शतमष्टोत्तरं भवेत्। अष्टाविंशतिरष्टौ वा यथाशक्ति विधीयते"। कात्यायनः "श्राद्धद्रव्यमनादेशे जुहोतिषु विधीयते"। कालिकापुराणम् "बलीयते च देवेभ्यो गन्धपुष्पादिकं तथा।

अर्घ्यपात्रस्थितैस्तोयैरभिषिच्य तदुत्सृजेत्"। नरसिंह-पुराणम् "स्नाने वस्त्रे च नैवेद्ये दद्यादाचमनीयकम्। अत्र नीराजनविधिः पूजारत्नाकरे देवीपुराणे "भक्त्या पिष्टप्रदीपाद्यैश्चूतपत्रादिपल्लवैः। ओषधीभिश्च मेध्याभिः सर्वबीजैर्यवादिभिः। नवम्यां पर्वकालेषु यात्राकाले विशेषतः। यः कुर्याच्छ्रद्धया वीर! देव्या नीराजनं नरः। शत्रुभेदादिनिर्दग्धैर्जयशब्दैश्च पुष्कलैः। यावतोदिवसान् वीर! देव्यानीराजनं कृतम्। तावद्वर्षसहस्राणि स्वर्गलोके महीयते। यस्तु कुर्यात् प्रदीपेन सूर्यलोकं स गच्छति"। पर्वकाले उत्सवकाले। देव्या इति स्त्रीत्वमविवक्षितम्। अथ प्रतिष्ठितमूर्त्तौ कदाचित् पूजाऽभावे महाकपिलपञ्चरात्रम् "एकाहं पूजाविरहितौ कुर्यादूर्द्धगुणमर्चनम्। त्रिरात्रे तु महापूजा संप्रोक्षणमतःपरम्। मासादूर्द्धमनेकाहं पूजनं चेद्विहन्यते। प्रतिष्ठैवोच्यते केचित् केचित् संप्रोक्षणक्रमः"। संप्रोक्षणक्रमः "संप्रोक्षणन्तु देवस्य देवस्त्वेति(४)पूर्ववत्। गवां रसैश्च संस्नाप्य दर्भतोयैर्विशोध्य च। प्रोक्षयेत् प्रोक्षणीतोयैर्मूलेनाष्टोत्तरं शतम्। सप्तधा मकुटं पार्श्वं न्यसेद्देवस्य मस्तके। पञ्चवारं जपेन्मूलमष्टोत्तरशतं तथा। ततो मूलेन मूर्द्धादि पीठान्तं चैव संस्पृशेत्"। इति "तत्त्वन्यासं विधिन्यासं मन्त्रन्यासञ्च विन्यसेत्। प्राणप्रतिष्ठामन्त्रेण प्राणस्थापनमाचरेत्। पूजाञ्च महतीं कुर्यात् स्वतन्त्रोक्तां यथाविधि। यात्रादीनादिशब्दात् संक्षेपेण विधिः स्मृतः"। अथास्यृग्यस्मर्षणे तु बौधायनः "द्रव्यवत् कृतशौचानां देवार्चानां भूयः प्रतिष्ठापनमिति"। देवार्चा देवताप्रतिमा। तासामस्यृग्यस्मृष्टानां प्रकृतिद्रव्यस्य ताभ्यां देयेष्टं शौचं कृत्वा पुनः प्रतिष्ठापनात् पूजात्वमित्यर्थः इति। रत्नाकरे वह्निपुराणे "स्फुटिते स्फुटिते दग्धे भग्ने स्थानविवर्जिते। यागशीले पशुस्पृष्टे पतिते दुष्टभूमिषु। अन्यमन्त्रार्चिते चैव पतित स्पर्शदूषिते। दग्धक्षेत्रेषु नो चक्रुः सन्निधानं दिवौकसः। इति सर्वगतो विष्णुः परिभाषामुवाच ह"। अत्र वह्निभाङ्होमौ त्वावश्यकौ यथाशक्तीत्यभिधानात् इति कश्चित्। तथा चाल्पधनानां यत्नं विनाऽपि पूजनमाह विष्णुधर्मोत्तरे प्रथमकाण्डम् "पूजाकर्म बहिर्वेद्यां श्रद्धया भृगुनन्दन!। न त्वत्प्रतिष्ठितैर्यत्नैर्यजेरन् कदाचन। विष्णुदेवनिकायस्य यथाश्रद्धमरिन्दम!। तथा पूजयेन्नित्यं यथादल्पधनो नरः"। यदोक्ते वास्तुयागमहोत्सवौ तदा तन्त्रेण वह्निभाङ्होमं कुर्यात् तथा एकस्मिन्नहो होमत्रयं विधेयं एकाग्नावनेकहोमकरणे एकं परिसमूहनादिकमाह गोभिलः। "गणेज्येकं परिसमूहनमिध्मबर्हिः पर्युक्षणमाज्यभागाविति"। पूजादिकं प्रत्येकमेव"।

तत्र प्रतीकस्थितामन्त्राः क्रमेण यथा

(१) तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः। दिवीव चक्षुराततम्" ऋ० १।२२।

(२) "मनो जूतिर्जुषतामज्यस्य बृहस्पतिर्यज्ञमिमं तनोत्वरिष्टं यज्ञं समिमं दधातु विश्वे देवास इहमादयन्तामों प्रतिष्ठ" यजु० २।१२

(३) अत्र गुहवत्या गुहपदवत्या तावे तिस्र ऋचः ऋ०८।८७ सूक्तास्थिता यथा

"एतोन्विन्द्रं स्तवाम शुद्धं शुद्धेन साम्ना। शुद्धैरुक्थैर्वावृध्यासं शुद्ध आशीर्वान् ममत्तु।७। इन्द्र! शुद्धो न आगहि शुद्धः शुद्धाभिरूतिभिः। शुद्धोरयिं नि धारय शुद्धो ममद्धि सोम्यः। ८। इन्द्र! शुद्धो हि नो रयिं शुद्धो रत्नानि दाशुषे। शुद्धो वृत्राणि जिघ्नसे शुद्धो वाजं सिषासति। ९।

(४) "देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां प्रतिगृह्णामि" यजु०१।१०

विस्तरस्तु अग्निपु० ५६ अ०आदौ उक्तो यथा

"प्रतिष्ठापञ्चकं वक्ष्ये प्रतिमात्मा तु पुरुषः। प्रकृतिः पिण्डिका ज्ञेया प्रतिष्ठा योगकर्मयोः। दृष्टादृष्टफलार्थिभिस्तस्मात् प्रतिष्ठा क्रियते नरैः। गर्भन्यासं तु निःसार्य प्रासादस्यापतो गुरुः। अष्टषोडशविंशानां मण्डपप्रमाणमादिकम्। स्नानार्थं कलसार्थञ्च यागद्रव्यार्थमर्हतः। त्रिभागेणार्द्धभागेन वेदिं कुर्यात्तु शोभनाम्। कलसैर्वेष्टकाभिश्च वितानाद्यैश्च भूषयेत्। पञ्चगव्येन सम्प्रोक्ष्य सर्वद्रव्याणि धारयेत्। अनड्वृतो गुरुर्विष्णुं ध्यात्वात्मानं प्रपूजयेत्। अङ्गुष्ठोदयमन्त्रैस्तु मूर्त्तिपान् वस्त्रयादिभिः। कुम्भे कुम्भे स्थापयेच्च मूर्त्तिपांश्चात्र पारगान्" (मूर्तिपान् मूर्तिनिर्माणविधिज्ञान्)। "चतुष्कोणे चार्द्धकोणे वर्तुले पद्मसन्निभे। पूर्वादौ तोरणार्थन्तु पिप्पलौदुम्बरौ वटम्। प्लक्षं शुभोदयं पूर्वं शुभद्रं दक्षतोरणम्। शुक्रं च कुशोत्तरं आग्नेये सौम्ये सप्तच्छदम्। पञ्चकृत्तं तु

संस्थाप्य स्रोतोमृत्तिकि(१) पूजयेत्। तोरणस्तम्भमूले तु कलशान्कङ्कलाङ्कुरान्। प्रदद्यादुपरिष्टाच्च कुर्याच्चक्रं सुदर्शनम्। पञ्चहस्तप्रमाणन्तु ध्वजं कुर्याद्विचक्षणः। वैपुल्यं चास्य कुर्वीत षोडशाङ्गुलसम्मितम्। सप्तहस्तोच्छ्रितं चास्य कुर्यात् दण्डं समाहितः। अरुणोऽग्नि निभश्चैव कृष्णः शुक्लोऽथ पीतकः। रक्तवर्णस्तथा श्वेतः कृष्णवर्णः क्रमाद् ध्वजाः। कुसुदः कुसुदाक्षश्च पुण्डरीकोऽथ वामनः। शङ्कुकर्णः सर्वनेत्रः सुमुखः सुप्रतिष्ठितः। पूज्याः कोटिगुणैर्युक्ताः पूर्वाद्या ध्वजदेवताः। जलाढकसुपूरास्तु पक्वबिम्बोपमा घटाः। अष्टाविंशाधिकशतं कालमण्डलवर्जिताः। सच्छिद्रगला वस्त्रकण्ठाः क्षीरकाक्षीरवर्जिताः। घटाः स्थाप्याश्च पूर्वादौ वेदिकायाश्च कोणगान्। चतुरः स्थापयेत् कुम्भानाजिघ्रेति (२) च मन्त्रतः। कुम्भेष्वावाह्य शक्रादीन् पूर्वादौ पूजयेत् क्रमात्। इन्द्रागच्छ देवराज! वज्रहस्त! गजस्थित!। पूर्वद्वारञ्च मे रक्ष देवैः सह नमोऽस्तु ते!। त्रातारमिन्द्रमन्त्रेण (३) अर्चयित्वा यजेद् बुधः। अग्नागच्छाग्ने! शक्तियुत! छागस्थ! बलसंयुत!। रक्षाग्नेयीं दिशं देवैः पूजां गृह्ण नमोऽस्तु ते। अग्निर्मूर्द्धेति (४) मन्त्रेण यजेद्वा अग्नये नमः२। महिषस्थ! यमागच्छ दण्डहस्त! महाबल!। रक्ष त्वं दक्षिणद्वारं वैवस्वत! नमोऽस्तु ते। वैवस्वतं सङ्गमनमित्यनेन (५) यजेद् यमम्३। नैर्ऋतागच्छ खड्गाढ्य! बलवाहनसंयुत!। इदमर्घ्यमिदं पाद्यं रक्ष त्वं नैर्ऋतीं दिशम्। एष ते इति (६) मन्त्रेण यजेदर्घ्यादिभिर्नरः ४। मकरारूढ! वरुण! पाशहस्त! महाबल!। आगच्छ पश्चिमं द्वारं रक्ष रक्ष नमोऽस्तु ते। उरुं हि राजा(७) वरुणं यजेदर्घ्यादिभिर्मुदः ५। आगच्छ वायो! सबल! ध्वजहस्त! सवाहन!। पाद्यं रक्ष देवैस्त्वं समरुद्भिर्नमोऽस्तु ते। वात (८) इत्यादिभिश्चार्चेदोम्नमो वायवेऽपि वा ६। आगच्छ सोम! सबल! गदाहस्त! सवाहन!। रक्ष त्वमुत्तरद्वारं सकुबेर! नमोऽस्तु ते। सोमं राजानमिति (९) वा यजेत्सोमाय वै नमः ७। आगच्छेशान! सबल! शूलहस्त! वृषस्थित!। यक्षसमूहपश्चैनां दिशं रक्ष नमोऽस्तु ते। ईशानादस्येति (१०) यजेदीशानाय नमोऽपि वा ८। ब्रह्मन्नागच्छ हंसस्थ! स्रुक्स्रुवव्यग्रपङ्कज!। सलोकोर्द्धां दिशं रक्ष यज्ञस्याज्ञ नमोऽस्तु ते। हिरण्यगर्भेति (११) यजेन्नमस्ते ब्रह्मणेऽपि वा ९। अनन्तागच्छ चक्राढ्य! कूर्मस्थाधिगणेश्वर!। अधोदिशं रक्ष रक्ष अनन्तेश! नमोऽस्तु ते। नमोऽस्तु सर्पेति (११) यजेदनन्ताय नमोऽपि वा १० ५६ अ०।

(अत्राध्याये प्रतीकसूचिता मन्त्राः क्रमेण दर्शयन्ते यथा

(१) "स्योना पृथिवि नो भवानृक्षरा निवेशनी। यच्छानः शर्म सप्रथाः" यजु०३५।२१। ऋग्वेदे तु पृथिवी इति पाठः

(२) "आजिघ्र कलशं मह्या त्वा विशन्त्विन्दवः। पुनरूर्जा निवर्तस्व सहस्रं धुक्षोरुधारा पयस्वती पुनर्मा विशताद्रयिः" यजु० ८।४२

(३) "त्रातारमिन्द्रमवितारमिन्द्रं हवे हवे सुहवं शूरमिन्द्रम्। ह्वयामि शक्रं पुरुहूतमिन्द्रं स्वस्ति नो मघवा धात्विन्द्रः" यजु० २०।५०

(४) "अग्निर्मूर्द्धा दिवः ककुत्पतिः पृथिव्या अयम्। अपां रेतांसि जिन्वति" यजु० ३।१२

(५) "वैवस्वतं सङ्गमनं जनानां यमं राजानं हविषा दुवस्य" ऋ०१०।१४।१ अर्धर्चम्।

(६) "एष ते निर्ऋते! भागस्तं जुषस्व स्वाहा" यजु०६।३५

(७) "उरुं हि राजा वरुणश्चकार सूर्याय पन्थामन्वेत वा उ। अपदे पादा प्रतिधातवेऽकरुतापवक्ता हृदयाविधश्चित्" ऋ० १।२४।८

(८) "वात आ वातु भेषजं शम्भु मयोभु नो हृदे। प्र ण आयूंषि तारिषत्" ऋ०१०।१८६।१

(९) "सोमं राजानमवसेऽग्निं गीर्भिर्हवामहे। आदित्यान् विष्णुं सूर्यं ब्रह्माणञ्च बृहस्पतिम्" ऋ०१०।१४१।३।

(१०) "ईशानादस्य भुवनस्य भूरेर्न वा उ। यो यज्ञुर्द्रादसूर्यम्" ऋ०२।३२।६ अर्धर्चम्

(११) "हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत्। स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम" ऋ०१०।१२१।१

(१२) "नमोऽस्तु सर्पेभ्यो ये के च पृथिवीमनु। ये अन्तरिक्षे ये च दिवि तेभ्यः सर्पेभ्यो नमः" यजु०१३।६)

"भूमेः परिग्रहं कुर्यात् त्रिपेद्रीर्हरिं सर्षपान्। नारसिंहेन रक्षोघ्नान् प्रोक्षयेत् पञ्चगव्यतः। भूमिं घटे तु संपूज्य सरत्ने साङ्कुरं हरिम्। अस्त्रमन्त्रेण कवचं तत्र चाष्टशतं यजेत्। अच्छिद्रधारया सिञ्चन् प्रोक्षीन् संस्थाप्य धारयेत्। प्रदक्षिणं परिभ्राम्य कलशं

विकिरोपरि । सवस्त्रे कलसे भूयः पूजयेदच्युतं श्रियम् । योगे योगेति मन्त्रेण (१) न्यसेच्छत्रान्त मण्डले । कुशोपरि तण्डिकाञ्च यथावां दिग्विदिक्षु च । विद्याधिपान् वजेद्विष्णुं मधुघातं त्रिविक्रमम् । वामनं दिक्षु वाय्वादौ श्रीधरञ्च हृषीकपम् । पद्मनाभं दामोदरमैशान्यां स्नानमण्डपे । अभ्यर्च्य पश्चादैशान्यां चतुष्कुम्भे सवेदिके । स्नानमण्डपके सर्वद्रव्याण्यानीय निःक्षिपेत् । स्नानकुम्भेषु कुम्भांस्तांचतुर्दिक्षधिवासयेत् । कलसाः स्थापनीयास्तु अभिषेकार्थमादरात् । वटोदुम्बरकाश्वत्थांश्चम्पकाशोकश्रीद्रुमान् । पलाशार्जुनशमीश्चांस्तु कदम्बवकुलाम्रकान् । पल्लवांस्तु समानीय पूर्वकुम्भे विनिःक्षिपेत् । पद्मकं रोचनां दूर्वां दर्भपिञ्जूलमेव च । जातीपुष्पं कुन्दपुष्पञ्चन्दनं रक्तचन्दनम् । सिद्धार्थं तगरञ्चैव तण्डुलं चाथ न्यसेत् । सुवर्णं रजतञ्चैव कुलहयञ्चदन्तथा । नद्याः सप्तदशाभिख्या विशेषात् जाह्नवीमृदम् । गोमयञ्च यवान् शालींस्तिलांश्चैवापरे न्यसेत् । विष्णुपर्णीं श्यामलतां भृङ्गराजं शतावरीम् । सहदेवीं महादेवीं बलां व्याघ्रीं सलक्ष्मणाम् । ऐशान्यामपरे कुम्भे माङ्गल्यान्निनिवेशयेत् । वल्मीकमृत्तिकां सम्प्रस्थानोत्थामपरे न्यसेत् । जाह्नवीवालुकातोयं विन्यसेदपरे घटे । वराहदशनागेन्द्रविषाणोद्धृतमृत्तिकाम् । मृत्तिकां पद्ममूलस्य कुशस्य त्वपरे न्यसेत् । तीर्थपर्वतमृद्विच युक्तमप्यपरे न्यसेत् । नागकेशरपुष्पञ्च काश्मीरमपरे न्यसेत् । वैदूर्यं विद्रुमं मुक्तां स्फटिकं वज्रमेव च । एतान्येकत्र निःक्षिप्य स्थापयेद्वेदवित्तमम् । नदीनदतडागानां सलिलैरपरं न्यसेत् । एकाशीतिपदे चान्यान्मण्डले कलसान् न्यसेत् । गन्धोदकाद्यैः सम्पूर्णान् श्रीसूक्तं (२)नाभिमन्त्रयेत् । यवं सिद्धार्थकं गन्धं कुशाग्रं चाक्षतं तथा । तिलान् फलं तथा पुष्पमर्घ्यार्थं पूर्वतो न्यसेत् । पद्मं श्यामलतां दूर्वां विष्णुपर्णीं कुशांस्तथा । पाद्यार्थं दक्षिणे भागे मधुपर्कं तु दक्षिणे । कङ्कोलकं लवङ्गं च तथा जातीफलं शुभम् । उत्तरे ह्याचमनाय चम्पकं दूर्वाक्षतान्वितम् । पात्रं नीराजनार्थं च तथोद्वर्तनमानिले । गन्धपुष्पान्वितं पात्रमैशान्यां पात्रके न्यसेत् । सुरामांसीं चामलकं सहदेवीं निशाद्वयम् । यष्टिदीपाय्यसेदग्नौ न्यसेच्चोराजनाय च । शङ्खं चक्रञ्च श्रीवत्सं कलिशं पङ्कजादिकम् । हेमादिपात्रे कृत्वा तु नानावर्णादिपुष्पकम्" ५७च०

(१) ("योगे योगे तवस्तरां वाजे वाजे हवामहे । सखाय इन्द्रमूतये" ऋ०१।३०।७)

(२) श्रीसूक्तं हिरण्यवर्णामित्यादि पञ्चदशर्चं सम्पुट परिशिष्टोक्तं तुलादाना० १६५ पृष्ठादौ द्रष्टव्यम् ।

"ऐशान्यां जनयेत् कुम्भं गुरुर्वह्निञ्च वैष्णवम् । गायत्र्याष्टशतं जप्त्वा सम्यगविधिना घटान् । प्रोक्षयेत् कारुशालायां शिल्पिभिर्मूर्तिपैर्व्रजेत् । तूर्यशब्दैः कौतुकञ्च बन्धयेद्दक्षिणे करे । विष्णवे शिपिविष्टाय (१) ऋगाद्यैस्त्रयेण सर्षपैः । पट्टवस्त्रेण कर्तव्यं दैशिकस्यापि कौतुकम् । मण्डपे प्रतिमां स्थाप्य सवस्त्रां पूजितां स्नुवन् । नमस्तेऽर्चे ! सुरेशानि ! प्रपीते ! विश्वकर्मणा । प्रभावितार्चेषजगद्धात्रि ! तुभ्यं नमो नमः । त्वयि सम्पूजयामीशे नारायणमनामयम् । रक्षिता शिल्पिदोषेभ्यस्सद्भियुक्ता सदा भव । एवं विज्ञाप्य प्रतिमां नयेत्तां स्नानमण्डपम् । शिल्पिनन्तोषयेद्द्रव्यैर्गुरवे गां प्रदापयेत् । चित्रं देवेति (२) मन्त्रेण नेत्रे चोन्मीलयेत्ततः । अग्निर्ज्योतीति (३) हृदिस्थं दद्याद्वै भद्रपीठके । ततः शुक्लानि पुष्पाणि हृतं सिद्धार्थकं तथा । दूर्वां कुशाग्रं देवस्य दद्याच्छिरसि दैशिकः । मधुवातेति (४) मन्त्रेण नेत्रे चाभ्यञ्जयेद् गुरुः । हिरण्यगर्भमन्त्रेण(५) इमं मेति(६) च कीर्तयेत् । हृतेनाभ्यञ्जयेत् पश्चात् पठन् हृतवतीं (७)पुनः । मस्तूरपिष्टनोद्वर्त्य ततो देवेति(८) कीर्तयन् । स्नापयेदुष्णतोयेन सप्त तेऽग्ने ति(९) दैशिकः । द्रुपदादि(१०)वेत्यनुस्निभ्येदापो हि ष्ठेति (११)वेचयेत् । नदीजैस्तीर्थजैः स्नानं पावमानीति(१२) रत्नजैः । सप्तद्रं गच्छ (१३) चन्दनैस्तीर्थसूत्कलसेन च । शन्नो देवीः (१४) स्नापयेच्च गायत्र्याप्युषारिषा । पञ्चब्रह्मभिरग्नेति (१५) स्नापयेत्परमेश्वरम् । सिकताद्भिरिमं मेति(१६) वल्मीकोदघटेन च । तद्विष्णोरित्यो (१७) पश्यद्भिर्यां ओषधीति (१८) मन्त्रतः । यज्ञायज्ञेति (१९) काषायैः पञ्चभिर्मध्यकैस्ततः । पयः पृथिव्यां (२०) मन्त्रेण याः फलिनी (२१) फलाम्बुभिः । विश्वतश्चक्षुः (२२) सौम्येन पूर्वेण कलसेन च । सोमं राजानमित्येव (२३) विष्णोररादं (२४) दधतः । हंसः शुचिः (२५) पश्चिमेन कुर्याद्दुहर्तनं हरेः । मूर्धानन्दिवो (२६) मन्त्रेण धात्रीं मांसीं च के दधेत् । मानस्तोकेति (२७) मन्त्रेण गन्धद्वारेति (२८) गन्धकैः । इदमापेति (२९) च घटैरेकादीतिपदस्थितैः । एह्येहि भगवन् ! विष्णो ! लोका-

तयत्कारक !। वज्रभागं मदीयेभं वासुदेव ! नमोऽस्तु ते। अनेनावाह्य देवेशं कुर्यात् कौतुकमोचनम्। सख्यामि त्वेति (२०) सूक्तेन देशिकस्यापि मोचयेत्। पाद्यं हिरण्यवर्णार्घ्यं (२१)मतो देवेति(२२) चार्घ्यकम्। मधुवाता(२३)मधुपर्कं मयि मदीयामि(२४) चाचमेत्। अक्षन्नमीमदन्तेति(२५)किरेदुदुर्वाक्षतं बुधः। काण्डात्(२६)निर्मञ्छनं कुर्याद्गन्धं गन्धवतीति(२७)च। तत्त्वा यामीति(२८)माल्यञ्च इदं विष्णुः(२९)पवित्रकम्। इदंसते (३०) वस्त्रयुग्मं वेदाहमित्युत्तरीयकम्। (३१) मदाम्रतेन(३२)सकलौ पुष्पं चौषधयः(३३)क्षिपेत्। धूपं दद्याद्धूरसीति (३४) विभ्राट्सूक्तेन (३५) चाञ्जनम्। युञ्जतीति (३६)च तिलकं दीर्घायुष्टेति(३७)माल्यकम्। इन्द्रं विश्वेति (३८)इत्रन्तु चादर्शन्तु विराजतः। (३९) चामरन्तु विकर्णेन भूषां रत्नतरेण(४०) च। व्यजनं वायुदैवत्यैर्मयीति त्वेति (४१) पुष्पकम्। वेदादीः संस्तुतिं कुर्याद्वरैः पुरुषसूक्ततः। सर्वमेतत्समं कुर्यात् पिण्डिकादौ हरादिके। देवस्नोत्थानसमये सौपर्णं (४२) सूक्तमुच्चरेत्। उत्तिष्ठेति(४३)मन्त्रेणाथ प्रथाया मण्डपे नयेत्। शाकुनेनैव सूक्तेन देवं मञ्चरथादिना। (४४) अतो देवेति (४५) सूक्तेन प्रतिमां पिण्डिकां तथा। श्रीसूक्तेन च प्रथायां विष्णोरंसकलीकृतिः। सुदर्शनं हयं नागं व्यजनं कलसं तथा। वैजयन्तीं तथा भेरीं दीपमित्यष्टमन्त्रकम्। दर्शवेदशसूक्तेन (४६) पाददेशे त्रिपादिति (४७)। उषां पिधानकं पात्रमन्दिरां दर्विकां दर्शेत्। सुवलोलूखलं दद्याच्छिलां सम्मार्जनीं तथा। तथा भोजनभाण्डानि सूदोपकरणानि च। शिरोदेशे च निद्राख्यं वस्त्ररत्नयुतं घटम्। अक्षतखाद्यैः पूरयित्वा स्नपनस्य विधिः स्मृतः" ५८अ० (५८अ० प्रतीकसूचितमन्त्राः यथा

(१) "पिण्डाय गिरिविष्टाय स्वाहा" यजु०२०।२२

(२) "चित्रं देवानामुदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः। आप्राद्यावा पृथिवी अन्तरिक्षं सूर्य आत्मा जगतस्तस्थुषश्च" ऋ० १।११५।१।

(३) "अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहा! सूर्यो ज्योतिर्ज्योतिः सूर्यः स्वाहा! अग्निर्वर्चो ज्योतिर्वर्चः स्वाहा! सूर्यो वर्चो ज्योतिर्वर्चः स्वाहा! ज्योतिः सूर्यः सूर्यो ज्योतिः स्वाहा" यजु० ३।९

(४) "मधुवाता ऋतायते मधु क्षरन्ति सिन्धवः। माध्वीर्नः सन्त्वोषधीः" यजु० १३।२७ अत्र एकैव ऋक् पाद्या।

(५) "हिरण्यगर्भः समवर्तताग्रे इत्यादि प्राग्वत्।

(६) "इमं मे वरुण! श्रुधी हवमद्या च मृडय। त्वामवस्युराचके" यजु० २१।१

(७) "इतश्चती भुवनानामभिश्रियोर्वी पृथ्वी मधुदुघे सुपेशसा" यजु० २४।३५

(८) अतो देवा अवन्तु नः इत्यादि प्राग्वत्।

(९) "अग्न आयाहि वीतये! गृणानो हव्यदातये। निहोता सत्सि बर्हिषि" यजु०१७।७९

(१०) द्रुपदादिव मुमुचानः स्विन्नः स्नातो मलादिव। पूतं पवित्रेणेवाज्यमापः शुन्धन्तु मैनसः" यजु०२५।२०

(११) "आपोहि ष्ठा मयोभुवस्तान ऊर्जे दधातन। महे रणाय चक्षसे" ऋ०१०।९।१

(१२) "पावमानस्सूक्तम् स्वादिष्ठयेत्यादि हिरण्मीत्यन्तम् पञ्चर्चसूक्तात्मकम् मन्त्रकृत ऋषादानादिपञ्चतो १६७ अवधि १८५ पृष्ठ० पर्यन्ते द्रष्टव्यम्। यजुर्वेदोक्तं इमन्तु पितर इत्यादि नवर्चं तत्रैव २०६ पृष्ठ०द्रष्टव्यम्

(१३) मरुद्भ्यः गच्छ स्वाहा। अन्तरिक्षं गच्छ स्वाहा दिवं सवितारं गच्छ स्वाहा। यजु० ६।२१

(१४) "शन्नोदेवीरभीष्टय आपो भवन्तु पीतये। शंयोरभिस्रवन्तु नः" ऋ० १०।९।४

(१५) "हिरण्यगर्भः समवर्तताग्रे इत्यादि प्राग्वत्।

(१६) "इमं मे गङ्गे यमुने! सरस्वति! शुतुद्रि! स्तोमं सचताऽरुणय्या। असिक्न्या मरुद्वृधे वितस्तयाऽऽर्जीकीये शृणुह्या सुषोमया" ऋ०१०।७५।५

(१७) "तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः। दिवीव चक्षुराततम्" ऋ०१।२२।२०

(१८) "याओषधीः सोमराज्ञीर्बह्वीः शतविचक्षणाः। ताश्चासि त्वमुत्तमारं कामाय शं हृदे" यजु०१२।८२

(१९) "यत्तावद्या वो अग्नये गिरा गिरा च दक्षसे। प्रप्र वयमसृतं जातवेदसं प्रियं मित्रं न शंसिषम्" ऋ०६।४८।१

(२०) "पयः पृथिव्यां पय ओषधीषु पयो दिव्यन्तरिक्षे पयोधाः। पयस्वतीः प्रदिशः सन्तु मह्यम्" ऋ०१८।३६

(२१) "याः फलिनीर्या अफला अपुष्पा याश्च पुष्पिणीः। बृहस्पतिप्रसूतास्ता नोमुञ्चन्त्वंहसः" यजु०१२।८९

(२२) "विश्वतश्चक्षुरुत विश्वतोमुखो विश्वतोबाहुरुत विश्वतस्पात्। सं बाहुभ्यां धमति सं पतत्रैर्द्यावाभूमी जन-

यन् देवएवः" ऋ०१० मण्डले ८सूक्ते ।।२ ऋक् ।

(२३) सोमं राजानमित्यादि प्राग्वत् ।

(२४) "विष्णोरराटमसि विष्णोः श्नप्त्रे स्थः । विष्णोः स्यूरसि विष्णोर्ध्रुवोऽसि । वैष्णवमसि विष्णवे त्वा" यजु० ५।२१।

(२५) "हंसः शुचिषद्वसुरन्तरिक्षसद्धोता वेदिषदतिथिर्दुरोणसत् । नृषद्वरसदृतसद् व्योमसदब्जागोजा ऋतजा अद्रिजा ऋतं बृहत्" यजु० १०।२४

(२६) "मूर्द्धानं दिवो अरतिं पृथिव्या वैश्वानरमृत आजातमग्निम् । कविं सम्राजमतिथिं जनानामासन्नापात्रं जनयन्त देवाः" यजु०७।२४

(२७) "मा न स्तोके तनये मा न आयुषि मा नो गोषु मा नो अश्वेषु रीरिषः । मा नो वीरान् रुद्र ! भामिनो वधीर्हविष्मन्तः सदामित्त्वा हवामहे" यजु०१६।१६

(२८) "गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम् । ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम्" श्रीसूक्ते ८मन्त्रः

(२९) "इदमापः प्रवहत यत्किञ्च दुरितं मयि । यद्वाहमभिदुद्रोह यद्वा शेष उतानृतम्" ऋ०१।२३।२२

(३०) "सञ्जामि त्वा हविषा जीवनाय कमज्ञातयक्ष्मादुत राजयक्ष्मात् । याड्जीजनोऽव यदि वैतदेनं तस्या इन्द्राग्नी प्रमुमुक्तमेनम् ।१ यदि क्षितायुर्यदि वा परेतो यदि मृत्योरन्तिकं नीत एव । तमाहरामि निर्ऋतेरुपस्थादस्पार्षमेनं शतशारदाय ।२ सहस्राक्षेण शतशारदेन शतायुषा हविषाहार्षमेनम् । शतं यथेमं शरदो न मासीन्द्रो विश्वस्य दुरितस्य पारम् ।३ शतं जीव शरदो वर्द्धमानः शतं हेमन्तान् शतमु वसन्तान् । शतमिन्द्राग्नी सवितो बृहस्पतिः शतायुषा हविषेमं पुनर्दुः । ४ आहार्षं त्वाविदं त्वा पुनरागां पुनर्नवः । सर्वाङ्ग ! सर्वं ते चक्षुः सर्वमायुष्यतेऽविदम्"५सू०१०।१६१

(३१) "अतो देवा अवन्तु नः इत्यादि प्राग्वत् ।

(३२) "हिरण्मयेन पात्रेण सत्यस्यापिहितं मुखम् । योऽसावादित्ये पुरुषः सोऽसावहम्" यजु०४०।१७

(३३) मधुवाता इत्यादि प्राग्वत् ऋगेका ।

(३४) मयि सृजाग्ने ! अग्निं रायस्पोषाय सुप्रजास्त्वाय सुवीर्याय मामु देवताः सचन्ताम्" यजु०१२।१

(३५) "अक्षन्नमीमदन्त ह्यवप्रिया अधूषत । अस्तोषत स्वभानवो विप्रा न विष्टया मतीयोजान्विन्द्र ! ते हरी" ऋ० २।८।२

(३६) "काण्डात् काण्डात् प्ररोहन्ती परुषः परुषस्परि । एवा नो दूर्वे प्रतनु सहस्रेण शतेन च" यजु०१३।२०

(३७) गन्धवती गन्धद्वारामित्यादि प्राग्वत् ।

(३८) "तत्त्वा यामि ब्रह्मणा वन्दमानस्तदा शास्ते यजमानो हविर्भिः । अहेडमानो वरुणस्य बोध्युरुशंस मा न आयुः प्रमोषीः" ऋ० १।२४।११

(३९) "इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम् । समूढमस्य पांसुरे" ऋ०१।२२।१७

(४०) "इहेमते ! अति यदर्यो अर्हाद् द्युमद्विभाति क्रतुमज्जनेषु । यद्दीदयच्छवस ऋतप्रजात तदस्मासु द्रविणं धेहि चित्रम्" यजु० २६।२

(४१) "वेदाहमेतं पुरुषं महान्तमादित्यवर्णं तमसः परस्तात् । तमेव विदित्वाऽतिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय" यजु० ३१।१८

(४२) महाव्रतं यद्वर्चो हिरण्यस्येत्यस्मादृचि गेयं साम

(४३) "ओषधयः समवदन्त सोमेन सह राज्ञा । यस्मै कृणोति ब्राह्मणस्तं राजन् पारयामसि" यजु० १२।८६

(४४) धूरसि धूर्वन्तं धूर्व तं योऽस्मान् धूर्वति तं धूर्व यं वयं धूर्वामः । देवानामसि वह्नितमं सस्नितमं पप्रितमं जुष्टतमं देवहूतमम्" यजु० १।८

(४५) "विभ्राट् सृक्कं सम्प्रदर्शं विभ्राड बृहत् पिबतु सोम्यम्, इत्यादि करतां नः सुराधसः इत्यन्तम्" यजु० २२।१० मन्त्रावधि ४६ मन्त्र पर्यन्तं मतृक्ततत्तुलादानादि पद्धतौ १२२ पत्रावधि ११२ पत्रपर्यन्ते द्रष्टव्यम् ।

(४६) "युञ्जन्ति ब्रध्नमरुषं चरन्तं परितस्थुषः । रोचन्ते रोचना दिवि" यजु०२३।५

(४७) दीर्घायुष्ट ओषधे ! खनिता यस्मै च त्वा खनाम्यहम् । अथो त्वं दीर्घायुर्भूत्वा शतवल्शा विरोहतम्" यजु०१२।१००

(४८) "इन्द्रं विश्वा अवीवृधन्त्समुद्रव्यचसं गिरः । रथीतमं रथीनां राजानं सत्पतिं पतिम्" ऋ०१।११।१

(४९) "ततो विराडजायत विराजो अधिपूरुषः । स जातो अत्यरिच्यत पश्चाद्भूमिमथो पुरः" यजु०३१।५

(५०) रथन्तरं साम अभि त्वा शूर इत्यस्मादृचि गेयं तच्च मतृक्ततत्तुलादानादिपद्धतौ १६२।६२ पत्रे द्रष्टव्यम् ।

(५१) सञ्जामि त्वा इत्यादि प्राग्वत् ऋगेका ।

(५२) सौपर्णं सूक्तम् ऋग्वेदप्रसिद्धम् ।

(५३) "उक्तिश ब्रह्मणस्पते ! देवयन्त्वेमहे । उपप्रयन्तु

मरुतः सुदानव इन्द्र ! प्रागूर्भवा सचा" यजु०२४।५६

(५४) ब्रह्मरथं सामभेदः ।

(५५) अतो देवा इत्यादि षड्ऋचम् ऋ०१।२२। तच्च मतृ-ल्लत तुलादानादि पद्धतौ ८८।८६ पत्रे दृश्यम्।

(५६) अक्षसूक्तम् ऋग्वेद प्रसिद्धम् ।

(५७) त्रिपादूर्ध्व उदैत् पुरुषः पादोऽस्येहाभवत् पुनः । ततो विष्वङ् व्यक्रामत् साशनानशने अभि यजु०३१।४)

"हरेः सान्निध्यकरणमधिवासनमुच्यते। सर्वत्तं सर्वगं ध्यात्वा आत्मानं पुरुषोत्तमम्। ओङ्कारेण समायोज्य चिच्छक्तिमभिमानिनीम्। निःसार्यात्मैकतां कृत्वा तस्मिन् सर्वगते विभौ । योजयेन्मरुता पृथ्वीं यङ्बीजेन दीपयेत् । संहरेद्वायुना चाग्निं वायुमाकाशतो नयेत् । अधिभूतादिदेवैस्तु साध्याख्यैर्विभवैः सह । तन्मात्रपात्रकान् कृत्वा संहरेत्तत्क्रमाद् बुधः । आकाशं मनसाकृत्य मनोऽहङ्करणे क्षिपेत् । अहङ्कारन्तु महति तच्चाव्याकृते नयेत् । अव्याकृतं ज्ञानरूपे वासुदेवः स ईरितः । स तामव्याकृतां मायामवष्टभ्य स्वलक्षया । सङ्कर्षणाख्यः शब्दात्मा सर्गाख्यमसृजत् प्रभुः । ओभ्य मायां स प्रद्युम्नं तेजोरूपं स चासृजत् । अनिरुद्धं रसमात्रं ब्रह्माणं गन्धरूपकम् । अनिरुद्धः स च ब्रह्मा अप आदौ ससर्ज ह । तस्मिन् हिरण्मयब्रह्माण्डं सोऽसृजत् पञ्चभूतवत् । तस्मिन् संक्रामिते जीवे शक्तिराओपसंहृता । प्राणो जीवेन संयुक्तो वृत्तिमानिति शब्द्यते । जीवो व्याहृतिसंज्ञस्तु प्राणेष्वाध्यात्मिकः स्मृतः । प्राणैर्युक्ता ततो बुद्धिः सञ्जाता चाष्टमूर्तिकी । अहङ्कारस्ततो जज्ञे मनस्तस्मादजायत । अर्थाः प्रजज्ञिरे पञ्च सङ्कल्पादियुतास्ततः । शब्दः स्पर्शश्च रूपञ्च रसो गन्ध इति स्मृताः । ज्ञानशक्तियुतान्येतैरारब्धानीन्द्रियाणि तु । त्वक्श्रोत्रघ्राणचक्षूंषि जिह्वाबुद्धीन्द्रियाणि तु । पादौ पायुस्तथा पाणी वागुपस्थश्च पञ्चमः । कर्मेन्द्रियाणि चैतानि पञ्चभूतान्यतः शृणु । आकाशवायुतेजांसि सलिलं पृथिवी तथा । स्थूलभेदैः शरीरन्तु सर्वाधारं प्रजायते । एतेषां वाचका मन्त्रा न्यासायोच्यन्त उत्तमाः । जीवभूतं मकारन्तु जीवोपाधिगतं न्यसेत् । हृदयस्थं बकारन्तु बुद्धितत्त्वं न्यसेत् बुधः । फकारमपि तत्रैव अहङ्कारमयं न्यसेत् । मनस्तत्त्वं पकारन्तु न्यसेत् संकल्पसम्भवम् । शब्दतन्मात्रतत्त्वन्तु नकारं मस्तके न्यसेत् । स्पर्शात्मकं धकारन्तु वक्त्रदेशे तु विन्यसेत् । टकारं रूपतत्त्वन्तु हृद्देशे विनिवेशयेत् । ठकारं वस्ति-देशे तु रसतन्मात्रकं न्यसेत् । डकारं गन्धतन्मात्रं जङ्घयोर्विनिवेशयेत् । ढकारं श्रोत्रयोर्न्यस्य णकारं वि-न्यसेत्त्वचि । तकारं नेत्रयुग्मे तु रसनायां थकार-कम् । दकारं नासिकावान्तु धकारं वाचि विन्यसेत् । नकारं करयोर्न्यस्य पाणितत्त्वं विचक्षणः । पकारं पादयोर्न्यस्य फं पायौ चोपपत्त्वके । विन्यसेत् पृथिवीतत्त्वं भकारं पादयुग्मके । वक्षौ मकारं यं तत्त्वं तेजसं हृदि विन्यसेत् । रकारं वायुतत्त्वन्तु नासिकायां निवे-शयेत् । लकारं विन्यसेच्चित्तं खतत्त्वं मस्तके बुधः । हृत्पुण्डरीके विन्यस्य मकारं सूर्यदैवतम् । ह्रासप्रति-सङ्हाभि हृदयादभिनिःसृताः । कलाषोडशसंयुक्तं अकारं तत्र विन्यसेत् । तन्मध्ये चिन्तयेन्मन्त्री विन्दुं व-ह्नेस्तु मण्डलम् । सकारं विन्यसेत्तत्र प्रणवेन सुरोत्तम ! । ओं यं परमेष्ठात्मने रं नमः पुरुषात्मने । लं नमोविद्यात्मने न्यस्य वं निवृत्त्यात्मने नमः । ओं शं नमः सर्वात्मने इत्युक्ताः पञ्च शक्तयः । स्थाने तु प्रथमा योज्या द्वितीया आसने मता । तृतीये शयने तद्वत्तुर्थी पानकर्मणि । प्रत्यर्चायां पञ्चमी स्यात्पञ्चोपनिषदः स्मृताः । हकारं विन्यसेन्मध्ये ध्यात्वा मन्त्र-मयं हरिम् । यां मूर्तिं स्थापयेत्तस्या मूलमन्त्रं न्यसेत्ततः । ओं नमो भगवते वासुदेवायेति च मूलकम् । शि-रोभ्राणललाटेषु मुखकण्ठहृदि क्रमात् । भुजयोर्जङ्घ-योरङ्घ्र्योः केशवं शिरसि न्यसेत् । नारायणं न्यसेद्वक्षो गोवायां माधवं न्यसेत् । गोविन्दं भुजयोर्न्यस्य विष्णुं च हृदये न्यसेत् । मधुसूदनकं पृष्ठे वामनं जठरे न्यसेत् । कक्षान्त्रिविक्रमं न्यस्य जङ्घायां श्रीधरं न्यसेत् । हृषीकेशं दक्षिणायां पद्मनाभं तु गुल्फके । दामोदरं पादयोश्च हृदयादिषडङ्गकम् । एतत् साधारणं प्रोक्त-मादिमूर्तेस्तु सत्तम ! । अथ वा यस्य देवस्य मारब्धं स्था-पनं भवेत् । तस्यैव मूलमन्त्रेण सजीवकरणं भवेत् । यस्या मूर्तेस्तु यन्नाम तस्यास्यं चाक्षरं च यत् । तत् स्वरैर्हादशैर्भेद्य षडङ्गानि परिकल्पयेत् । हृदयादीनि देवेश-मूलञ्च दशमाक्षरम् । यथा देवे तथा देहे तत्त्वानि विनि योजयेत् । चक्राब्जमण्डले विष्णुं यजेद्वस्त्रादिना तथा । पूर्ववच्चासनं दद्यात् सपात्रं सपरिच्छदम् । शुभचक्रं द्वादशारं हृत्परिष्ठाद्विचिन्तयेत् । त्रिनाभि चक्रं द्विनेमि स्वरैश्च समन्वितम् । पृष्ठदेशे ततः प्राच्यः प्रकृत्यादी-

न्यिवेशयेत्। पूजयेदारकापेषु सूर्यं द्वादशधा पुनः। कलाषोडशसंयुक्तं सोमनत्व विचिन्तयेत्। सवर्णं तितयं नाभौ चिन्तयेद्देशिकोत्तमः। पद्मन्तु द्वादशदलं पद्ममध्ये विचिन्तयेत्। तन्मध्ये पौरुषीं शक्तिं ध्यात्वाभ्यर्च्य च देशिकः। प्रतिमायां हरिं न्यस्य तत्र तं पूजयेत् सुरम्। गन्धपुष्पादिभिः सम्यक् साङ्गं सावरणं क्रमात्। द्वादशाक्षरवीजैस्तु केशवादीन् समर्चयेत्। द्वादशारे मण्डले तु लोकपालादिकं क्रमात्। प्रतिमासन्निधेयेत् पद्माद्यन्यपुष्पादिभिर्द्विजः। पौरुषेण तु सूक्तेन (१) श्रियाः सूक्तेन (२) पिण्डिकाम्। जनकादिक्रमात् पश्चाज्जनयेद्वैष्णवानलम्। हुत्वाग्नि वैष्णवैर्मन्त्रैः कुर्याच्छान्त्युदकं बुधः। तत् सिक्ता प्रतिमामूर्ध्नि यज्ञियमयनं चरेत्। दक्षिणेऽग्निं दूतमिति (३) कृण्वेऽग्निं प्रणवेद्बुधः। अग्निनाग्निश्च (४) पूर्वं च कृण्वेऽग्निं प्रणवेद् बुधः। उत्तरे प्रणवेदग्निमग्निं दूतं हवीमभिः (५)। अग्निप्रणयने मन्त्रस्त्वमग्ने (६) द्युभिरुच्यते। पलाशसमिधानान्तु अष्टोत्तरसहस्रकम्। कृण्वे कृण्वे होमयेच्च व्रीहीन् वेदादि कैस्तथा। साज्यांस्तिलान् व्याहृतिभिर्मूलमन्त्रेण वै हुतम्। कुर्यात्ततः शान्तिहोमं मधुरत्रितयेन च। द्वादशार्घैः सृचेत् पादौ नाभिं हृन्मस्तकं ततः। हुतं दधि पयो हुत्वा सृचेन्मूर्ध्न्यथो ततः। स्रुवा शिरोनाभिपादांश्चतस्रः स्थापयेच्चदोः। गङ्गा च यमुना गोदा क्रमाद्वाम्ना सरस्वती। दक्षेषु विष्णुगायत्र्या (७) गायत्र्या अपयेच्चरुम्। होमयेच्च बलिं दद्यात्तदन्ते भोजयेद्द्विजान्। सामाधिपानां तदृत्वर्थं हेम गां गुरवे ददेत्। दिक्पतिभ्यो बलिं दत्वा रात्रौ कुर्याच्च जागरम्। ब्रह्मगीतादिशब्देन सर्वभागधिवासनात्" ५८ अ०।

५८ अ० प्रतीकरूपचिताभन्त्राः यथा [१-१६

(१) ("पौरुषसूक्तं सहस्रशीर्षेत्यादि षोडशार्चम्" यजु०३१।

(२) श्रीसूक्तं हिरण्यवर्णामित्यादि ऋग्वेदपरिशिष्टोक्तं पञ्चदशर्चम् तन्नादानां १६५ पत्रे दृश्यम्।

(३) "अग्निं दूतं पुरोदधे हव्यवाहमुपब्रुवे। देवाँ आसादयादिह" यजु० २२।१७

(४) "अग्निनाग्निः समिध्यते कविर्गृहपतिर्युवा। हव्यवाड् जुह्वास्यः" सामसं ४।१।१।१

(५) "अग्निमग्निं हवीमभिः सदा हवन्त विश्पतिम्। हव्यवाहं पुरुप्रियम्" ऋ० १।१२।२

(६) त्वमग्ने द्युभिस्त्वमाशुशुक्षणिस्त्वमद्भ्यस्त्वमश्मनस्परि। त्वं वनेभ्यस्त्वमोषधिभ्यस्त्वं नृणां नृपते जायसे शुचिः यजु० ११।२७

(७) तद्विष्णोः परमं पदमित्यादि प्राग्वत् वैष्णवी गायत्री।)

"पिण्डिकास्थापनार्थन्तु गर्भागारं तु सप्तधा। विभजेद् ब्रह्मभागे तु प्रतिमां स्थापयेद् बुधः। देवमानुषपैशाचभागेषु न कदाचन। ब्रह्मभागं परित्यज्य किञ्चिदाश्रित्य चालयेत्। देवमानुषभागाभ्यां स्थाप्या यद्यात्तु पिण्डिका। नपुंसकशिलायान्तु रत्नन्यासं समाचरेत्। नारसिंहेन हुत्वाथ कुर्यात् न्यासं च तेन वै। व्रीहीन् रत्नविधातुंश्च षोडादींश्चन्दनादिकान्। पूर्वादिक्रमगर्तेषु न्यसेन्मध्ये यथारुचि। अथ चेन्द्रादिमन्त्रैश्च गर्तौ गुग्गुलुनाहतः। रत्नन्यासविधिं कृत्वा प्रतिमामालभेद्गुरुः। सशलाकैर्दर्भपुञ्जैः सहदेवैः समन्वितैः। सवाक्शान्तैश्च संकल्प्य पञ्चगव्येन शोधयेत्। प्रोक्षयेद्धेनुतोयेन नदीतीर्थोदकेन च। होमार्थं स्थण्डिलं कुर्यात् सिकताभिः समन्ततः। सार्द्धहस्तप्रमाणं तु चतुरस्रं सुशोभनम्। अष्टदिक्षु यथान्यासं कलशानपि विन्यसेत्। पूर्वादिक्रमवर्णेन अग्निमानीय संस्कृतम्। त्वमग्ने! द्युभिरिति च (१) गायत्र्या समिधो हुनेत्। अष्टार्घेनाष्टशतकं साज्यं पूर्णां प्रदापयेत्। शान्त्युदकमाचार्यैः मूलेन शतमन्त्रितम्। सिञ्चेद्देवस्य तन्मूर्ध्नि श्रीश्च ते (२) हुनया ऋचा। ब्रह्मयानेन चोद्धृत्य उत्तिष्ठ ब्रह्मणस्पते (३)। तद्विष्णोरिति (४) मन्त्रेण प्रासादाभिमुखं नयेत्। शिबिकायां हरिं स्थाप्य श्वामयीत पुरादिकम्। गीतवेदादिशब्दैश्च प्रासादद्वारि धारयेत्। स्त्रीभिर्विप्रैर्मङ्गलाष्टघटैः संस्नापयेद्धरिम्। ततो गन्धादिनाभ्यर्च्य मूलमन्त्रेण देशिकः। अतो देवेति (५) मन्त्राद्यमष्टाङ्गार्घ्यं निवेद्य च। स्थिरे लग्ने पिण्डिकायां देवस्य स्थेति (६) धारयेत्। यो नो त्रैलोक्यविक्रान्ताय नमस्तेऽस्तु त्रिविक्रम!। संस्थाप्य पिण्डिकायान्तु स्थिरं कुर्याद्विचक्षणः। ध्रुवा द्यौरिति (७) मन्त्रेण विश्वतश्चक्षुरित्यपि (८)। पञ्चगव्येन संस्नाप्याचार्य्य गन्धोदकेन च। पूजयेत् सकलीकृत्य साङ्गं सावरणं हरिम्। ध्यायेत् चं तस्य मूर्तिन्तु पृथिवीं तस्य पीठिकाम्। कल्पयेद्विग्रहं तस्य तेजसैः परमाणुभिः। जीवभावाद्विभ्यामि पञ्चविंशतितत्त्वगम्। चैतन्यं परमानन्दं जाग्रत्स्वप्नविवर्जितम्। देहेन्द्रियमनोबुद्धिप्राणाहङ्कारवर्जि-

तम्। ब्रह्मादिस्तम्बपर्यन्तं हृदयेषु अवस्थितम्। हृदयात् प्रतिमाबिम्बे स्थिरो भव परेश्वर!। सजीवं कुरु बिम्बं त्वं सर्वात्माभ्यन्तरस्थितः। अङ्गुष्ठमात्रः पुरुषो देहोपाधिषु संस्थितः। ज्योतिर्ज्ञानं परं ब्रह्म एकमेवाद्वितीयकम्। सजीवीकरणं कृत्वा प्रणवेन निबोधयेत्। सन्निधीकरणञ्चाम हृदयं सृष्ट्या वै जपेत्। कल्पन्तु पौरुषं श्यावन् इदं गुह्यमतुं जपेत्। नमस्कोऽस्तु सुरेशाय सन्तोषविभवात्मने। ज्ञानविज्ञानरूपाय ब्रह्मतेजोऽनुयायिने। गुणातिक्रान्तवेशाय पुरुषाय महात्मने। कल्पाय पुराणाय विष्णो! सन्निहितो भव। यच्च ते परमं तत्त्वं यच्च ज्ञानमयं वपुः। तत् सर्वमेकतो लीनमस्मिन्देहे विवर्द्धताम्। आत्मानं सन्निधीकृत्य ब्रह्मादिपरिवारकान्। खनास्त्रा स्थापयेदन्यानायुधादीन् खसद्रवा। यात्रावर्णादिकं दत्वा क्षेत्रः सन्निहितो हरिः। नत्वा स्तुत्वा खवाद्यैश्च जप्त्वा चाष्टाक्षरादिकम्। चण्डप्रचण्डौ द्वारस्थौ निर्गत्याभ्यर्चयेद्गुरुः। अग्निमण्डलमासाद्य गरुडं स्थाप्य पूजयेत्। दिगीशान् दिशि दिक्षु च स्थाप्य सम्पूज्य देशिकः। विष्वक्सेनं तु संस्थाप्य शङ्खचक्रादि पूजयेत्। सर्वपार्षदेभ्यश्च बलिं भूतेषु चार्पयेत्। ग्रामक्षत्रसुवर्णादि गुरवे दक्षिणां ददेत्। यागोपयोगि द्रव्याद्यमाचार्याय निरोर्पयेत्। आचार्यदक्षिणार्द्धन्तु ऋत्विग्भ्यो दक्षिणां ददेत्। अन्येभ्यो दक्षिणां दद्याद्भोजयेद् ब्राह्मणांस्ततः। अवारितफलान् दद्याद्यजमानाय वै गुरुः। विष्णुं नयेत् प्रतिष्ठाता चात्मना सकलं कृतम्। सर्वेषामेव देवानामेष साधारणो विधिः। मूलमन्त्राः पृथक् तेषां शेषं कार्यं समानकम् इ०अ०।

( इ०अ० प्रतीकसूचिता मन्त्रा यथा

(१) त्वमग्ने द्युभिरित्यादि प्राग्वत्।

(२) "श्रीश्च ते लक्ष्मीश्च ते पत्न्यावहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तम्। इष्णन्निषाणामुं मऽइषाण सर्वलोकं मऽइषाण" यजु० ३१।२२

(३) उत्तिष्ठ ब्रह्मणस्पते इत्यादि प्राग्वत्।

(४) तद्विष्णोः परमं पदमित्यादि प्राग्वत्।

(५) यतो देवा अवन्तु व इत्यादि प्राग्वत्।

(६) देवस्य त्वा इत्यादि प्राग्वत्।

(७) "ध्रुवा द्यौर्ध्रुवा पृथिवी ध्रुवासः पर्वतादमे। ध्रुवं विश्वमिदं जगद् ध्रुवो राजा विशामयम्" ऋ०१०।१७३।४

(८) विश्वतश्चक्षुरित्यादि ३७०८ पृष्ठे प्रदर्शितम्)।

प्रतिष्ठामयूखादौ तत्प्रयोगो दृश्यः। प्रतिष्ठायाः पूज्यतायोजकता कृतमाङ्कौ हरिदासौ वै च व्यवस्थापिता यथा "कथञ्च प्रतिमादौ प्रतिष्ठादेरुपयोगः तथा च प्रतिष्ठाजन्या शक्तिश्चाखण्डाद्यादिस्वर्गजनिका पूज्यतायोजिका स्वीकार्या इत्यत्राह हरिः "निमित्तभेदसंसर्गोद्भवाद्भवादयः। देवताः सन्निधानेन प्रत्यभिज्ञानतोऽपि वा" मु०। "निमित्तभेदः अदृष्टभेदः। देवताः प्रतिष्ठाविधिना सन्निधानेनाहङ्कारममकारादिना आराधनीयतामासादयन्ति प्रतिष्ठाविधिना देवतानां प्रतिमादौ अहङ्कारममकारौ चाखण्डाद्यादिस्वर्गे च तादृशाभिमानाभावः। देवताचैतन्यविवादेऽपि यथार्थपूजितत्वधीः प्रतिष्ठितत्वधीश्च चाखण्डाद्यादिस्वर्गाभावविशिष्टा पूज्यतानियामिका तत्र चोपयोगिनी प्रतिष्ठा। वस्तुतस्तु प्रतिष्ठाकालीनयावदस्थ्यस्थ्यर्गनादिसंसर्गाभावः प्रतिष्ठाध्वंसकालीनः पूज्यतायोजकः प्रतिष्ठितं पूजयेदितिवाक्येन प्रतिष्ठाध्वंसस्यैव प्राप्तेरिति हरिदासः। प्रतिमादौ प्रतिष्ठाजन्या पूज्यतायोजिका शक्तिरुत्पद्यते इति मीमांसकाभ्युपगतमनुमानचिन्तामण्यौ शक्तिवादे निराकृतं यथा

"अथ प्रतिमादौ प्रतिष्ठाजन्यं न यजमानादृष्टं पूज्यत्वप्रयोजकं भोगादिना तत्रापेऽपि पूज्यत्वात् तत्सत्त्वेऽपि चाखण्डाद्यादिस्वर्गेणापूज्यत्वात् अन्यधर्मं प्रत्यन्यधर्मस्यानुपयोगाच्च न प्रतिष्ठाध्वंसस्तथा, ततएव उपजीव्यप्रतिष्ठाप्रयोजकत्वभङ्गापत्तेः। तस्मात् प्रतिष्ठाजन्याऽस्थ्यस्थ्यर्गादिनाश्या प्रतिमादिनिष्ठा शक्तिरभ्युपेयेति चेत् प्रतिष्ठाविधिना प्रतिमादौ देवतासन्निधिरहङ्कारममकाररूपः क्रियते खसदृशदर्शनचित्रादाविव, ज्ञानस्य नाशेऽपि संस्कारसत्त्वात् अस्थ्यस्थ्यर्गादिना तु तच्चाशः अचेतनदेवतापक्षे च यथार्थप्रतिष्ठितत्वप्रत्यभिज्ञानस्यास्थ्यस्थ्यर्गादिविरहसहकृतस्य तथात्वं प्रतिष्ठितं पूजयेदिति विधिबलात्तत्प्रतिसन्धानस्यावश्यकत्वादिति प्राहुः। नव्यास्तु प्रतिष्ठाविधिनैव तत्राधेयशक्तिवदपूर्वान्तरं जन्यते तददृष्टवदाक्षसंयोगाश्रयपूज्यत्वम् अस्थ्यस्थ्यर्गेण तत्राशे चापूज्यत्वमित्याहुः। वयन्तु ब्रूमः प्रतिष्ठितं पूजयेदिति विधिवाक्येन प्रतिष्ठायाः कारणत्वं न बोध्यते किन्तु भूतार्थं ज्ञानुशासनादतीतप्रतिष्ठे पूज्यत्वं बोध्यते तथा च प्रतिष्ठाध्वंसः प्रतिष्ठाकालीनयावदस्थ्यादिप्रतियोगिकानादिसंसर्गाभावस-

स्थितः पूज्यत्वप्रयोजकः स च प्रासभाषोऽत्यन्ताभावश्च क्वचित्"। देवप्रतिष्ठादयोऽप्यत्र

तत्र विहितनक्षत्रलग्नादिकं सङ्क्षिप्योक्तं यथा

"जलाशयारामसुरप्रतिष्ठा सौम्यायने जीवशशाङ्कशुक्रे। दग्धे, भद्रुक्षिप्रचरध्रुवे स्थात्पक्षे सिते सृक्षतिथिस्थे वा। रिक्तावर्जे दिवसेऽतिशस्ता शशाङ्कपापैस्त्रिभवाङ्कसंस्थैः। व्यष्टान्यगैः सत्खचरैस्त्रिगेन्द्रे सूर्यौ, घटे को, युवतौ च विष्णुः। शिवो नयुग्मे, हितगौ च देव्यः, चुड्वारे, सर्वदमे स्थिरर्क्षे। पुण्ये यङ्गा, विष्णयज्ञसर्पभूतादयोऽन्ये, त्रयस्ते जिनवत्"।

"देवप्रतिष्ठायां तु विशेषस्तत्र वशिष्ठः "अथ प्रतिष्ठां कथयामि सम्यक् शिवस्य विष्णोस्त्वथ वा परेषाम्। सौम्यायने देवगुरौ च शुक्रे सन्दृश्यमाने परिचारकाणाम्"। शिव विष्णुपक्षं प्राधान्यख्यापनार्थम्। अत्र सौम्यप्रकृतीनां देवानामुत्तरायणे स्थापनसङ्गा उग्रप्रकृतीनां दक्षिणायनेऽपि कार्यं तदुक्तं वैखानससंहितायाम् "मातृभैरववाराहनारसिंहत्रिविक्रमाः। महिषासुरहन्त्री च स्थाप्या वै दक्षिणायने"। इति शैवसिद्धान्तशेखरे तु "श्रेष्ठोत्तरे प्रतिष्ठा स्यादयने सङ्क्रमिच्छताम्। दक्षिणे तु शुक्लपक्षां मलमासे न सा द्वयोरिति" दत्युक्तम्। अत्र दक्षिणे तु शुक्लपक्षमित्यपि मातृभैरवेत्यादिपरतया योज्यमन्यथा प्रतिपदं मासगणना वशिष्ठादिषु न युज्येत यदाह वसिष्ठः "मासे तपस्ये तपसि प्रतिष्ठा धनायुरारोग्यकरी च कर्तुः। चैत्रे महारुग्भयदा च शुक्ले समाधवे पुत्रधनाप्तये स्यात्"। नारदोऽपि "विचैत्रेष्वेव मासेषु माघादिषु च पञ्चसु"। वसिष्ठः "आषाढमासादिचतुष्टयेऽपि कलत्रसन्तानविनाशदा स्यात्। अर्जे च कर्तुर्निधनप्रदा च सौम्ये सपौषेऽखिलदुःखदा स्यात्। वसन्तपक्षः शुभदः समस्तः स दैव तत्रादृतं विहाय। अन्यत्रिभागं परिहृत्य कृष्णपक्षोऽपि प्रशस्तः खलु पक्षयोश्च। रिक्तावमल्यक्षदिनेष्वनिन्द्ययोगेषु वैनाशकवर्जितेषु। दिने महादोषविवर्जिते च शशाङ्कतारावलसंयुते च"। वैनाशकनक्षत्राणि नारदेनोक्तानि "जन्मभाद्दशमं कर्म सङ्घातर्क्षं तु षोडशम्। अष्टादशं समुदयं त्रयोविंशं विनाशभम्। मानवं पञ्चविंशं नाचरेच्छुभमेषु तु"। इति अथ तिथीनाह नारदः। "यद्दिनं यस्य देवस्य तद्दिने तस्य संस्थितिः। द्वितीयादिद्वयोः पञ्चम्यादितस्त्रिषु क्रमात्। दशम्यादि चतसृषु पौर्णमास्यां विशेषतः। सङ्क्षतिथ्यसम्भवे उक्ततिथौ स्थापनं कार्यम्"इत्यर्थः। अथ वारानाह नारदः "कुजवर्जितवारेषु कर्तुः सूर्ये बलप्रदे। चन्द्रताराबलोपेते पूर्वाह्णे शोभने दिने"। इति प्रत्येकं वारफलमाह वसिष्ठः "कीर्तिप्रदं सोमकरं क्रमात्सुभयप्रदं दृढिकरं दृढं च। लक्ष्मीकरं सुस्थिरदं त्रिनादिवारेषु संस्थापनमामनन्ति"। अथ देवप्रतिष्ठानक्षत्राणि "हस्तत्रये मित्रहरित्रये च पौष्णद्वयादित्यसुरेज्यभेषु। स्वादुत्तराधाशशाङ्कभेषु सर्वामरस्थापनसत्तमं स्यात्"। अत्र षोडशभानि ध्रुवमृदुक्षिप्रलघुरूपाणि एवोक्तानि तत्र यत्कर्त्रा जलाशयारामसुरप्रतिष्ठा नक्षत्राणि बहुधातुत्वात्तदेतानि उक्तानि द्विनाणि तु भिन्नानि तान्युक्तविशेषवचनेभ्योऽवसेयानि। देवताघटनसङ्कर्तस्तु उच्यते मया तत्र दीपिका "ध्रुवमृदुक्षिप्रवर्गे वारुणे विष्णुदैवे मरुददितिधनिषे शोभने वासरे च। त्रिदशमदनजन्मैकादशे शा१०।७।१।११। शीतरश्मौ विबुधगुरुतिरिष्टा नाडिनक्षत्रक्षीणे" इति। नाडिनक्षत्राणि वैनाशिकनक्षत्राणि। अथ देवताप्रतिष्ठायां सामान्यतो लग्नशुद्धिं देवताविशेषे च तथा। पादोनोपजातिकाभ्यामाह शशाङ्केति। जलाशयप्रतिष्ठायामारामप्रतिष्ठायां च सलग्नमात्रं विचार्यं देवप्रतिष्ठायां शशाङ्कचन्द्रः पापाः सूर्यभौमशनिराहुकेतवस्त्रिभवाङ्कसंस्थैस्त्रितीयषष्ठैकादशस्थानस्थितैरुपलक्षिते लग्ने। तथा सत्खचरैः सोमबुधगुरुशुक्रैर्व्यष्टान्यगैरष्टमहादशव्यतिरिक्तखिलस्थानस्थैः सङ्क्षिप्तदेवप्रतिष्ठातिथिस्था तदुक्तं रत्नमालायाम्। "चेन्द्रत्रिकोणभवमूर्तिषु सद्ग्रहेषु चन्द्रार्कभौमशनिषु त्रिषडायगेषु। सान्निध्यमेति नियतं प्रतिमासु देवः कर्तुः सुखार्थसुतसम्पदरोगता च। सौम्या लग्नाद्याश्रिता मूर्तिपूर्वान् भावान् वीर्यैरुत्कटावर्धयन्ति। यत्तं क्षित्वा भावमेते हि तत्र यत्नध्वंसं कर्तुमुत्पादयन्ति"। शनिषष्ठं राहुकेत्वोरष्टषष्ठं यदाह वसिष्ठः "सूर्येन्दुभौमार्किकेतवश्च लग्नस्थितानैधनदाश्च भर्तुः। सौम्यग्रहा लग्नगतास्तदैव ह्रासुर्बलारोग्यकराश्च नूनम्"। अन्यच्च तत्रैव "सर्वे षडष्टैधनदास्त्रलग्नं सौम्या यसौम्याः खलु सत्प्रसंस्थाः" इति अथ प्रसङ्गात्रवांशविचारः तत्र स्थिरद्विस्वभावनवांशयोर्ग्रहा न चरांशस्तत्रापि तृतांशः साधीयान् यदाह वसिष्ठः "षड्भेटकैः जीवशशाङ्कसूर्यसुरूपैः सौम्यनवांशयुक्तैः लग्ने

स्थिरे चोभयराशियुक्ते नवांशके चोभयगे स्थिरे वा"। उभयगे द्विस्वभावे "चरोदये लग्नगते न कार्यं संस्थापनं नैव चरांशकेऽपि। चरोऽपि लग्नः सप्तलांशकश्च यदा स्यादुत्वात् सुरसद्मिवेशे" इति स्यादुत्वाच्छुभस्वामिकत्वात् नारदोऽपि "शुभलग्ने शुभांशे च कर्तुश्चन्द्रबलोदये। राशयः सकलाः सेव्याः शुभषड्वर्गतेक्षिताः" इति यत्र लग्नदौष्ट्येऽपवादो वसिष्ठेनोक्तः "एकोऽपि जीवो बलवान् तनुस्थः सितोऽपि सौम्योऽथवा बली चेत्। दोषानशेषान्विनिहन्ति सद्यः क्रुद्धो यथा तारकदैत्यवर्गमिति" नारदः "शुक्राधिकतरे लग्ने दोषोऽल्पतरे यदि। सुराणां स्थापनं तत्र कर्तुरिष्टार्थसिद्धिदम्"। सुगेन्द्र इति स्वौ सुगेन्द्रे सिंहलग्ने स्थाप्यः, तथा कोत्रह्मा घटे कुम्भलग्ने, विष्णुर्वृषतौ कन्यालग्ने। शिवो महादेवोऽद्युग्मे मिथुनलग्ने च, पुनर्हितनौ मिथुनकन्याधनुर्मीनलग्नेषु देव्यो दुर्गादिशिवामूर्त्यादयः। स्थिरे मेषकर्कतुलामकरलग्नेषु क्षुद्रादेव्यश्चतुःषष्टियोगिन्यो प्रभृतयः। सर्व इमे उक्ता अनुक्ताश्च देवा इत्यर्थः। उक्ता महादेवादयः अनुक्ता इन्द्रादयः ते स्थिरर्क्षे दुर्गासिंहद्विककुम्भलग्नेषु स्थाप्याः यदाह श्रीपतिः "सिंहोदये दिनकरो, मिथुने, महेशो, नारायणश्च युवतौ, घटभे विधाता। देव्यो द्विमूर्तिभवने च निवेशनीयाः क्षुद्राश्चरे स्थिरगृहे निखिलाश्च देवाः"। इति पुष्ये यत्र इति यत्राचन्द्रादयोऽष्टौ पुष्यनक्षत्रे स्थाप्या इत्यर्थः। उपलक्षणं चैतत् तत्र सूर्यस्य हस्तनक्षत्रे स्थापनं, महादेवब्रह्मणोः पुष्यश्रवणाभिजितश्च स्थापनं, कुबेरस्कन्दयोरनुराधायां, दुर्गाप्रभृतीनां मूले स्थापनं, सप्तर्षीणां स्वाधिष्ठितनक्षत्रे लक्ष्मीव्यासबालमीकिगरुडानामपि सप्तर्षिधिष्ठितनक्षत्रे स्थापनम् उक्तञ्च रत्नमालायां "पुष्यश्रुतभिजित्सु, चेश्वरकयोर्विष्णाधिपस्कन्दयोर्मैत्रे तिग्मरुचेः करे, निर्ऋतिभे दुर्गादिकानां शुभम्"। कोत्रह्मा तथा "सप्तर्षयो यत्र चरन्ति धिष्ण्ये कार्या प्रतिष्ठा खलु तत्र तेषाम्। श्रीव्यासबालमीकिघटोद्भवानां तथा सूता वाक्पतिभे यथाक्षमिति"। सप्तर्षयस्तु कश्यपोऽत्रिर्भरद्वाजो-विश्वामित्रोऽथ गौतमः। जमदग्निर्वसिष्ठश्च सप्तैते ऋषयः स्मृताः" इति स्मृतेस्ते यस्मिन्नक्षत्रे सञ्चरन्तो दृश्यन्ते तस्मिन्नक्षत्रे तेषां स्थापनम्। श्रीव्यासबालमीकिघटोद्भवानां तथा सप्तर्षिधिष्ठितनक्षत्रे। यथाक्षमिति वाक्पतिभे पुष्ये घटोद्भवोऽगस्त्यः। विघ्नेति विघ्नपो गणेशः यत्तो देवयोनिः सर्पो वासुक्यादयः भूतो देवयोनिः "विद्याधराप्सरोयक्षरक्षोगन्धर्वकिन्नराः। पिशाचो गुह्यकः सिद्धो भूतोऽमी देवयोनयः" इत्यभिधानात् आदिशब्देन राक्षसासुरप्रमथसरस्वतीप्रभृतयो गृह्यन्ते ते देवत्वां स्थाप्याः। तथा अश्वे अश्वयुक्तनक्षत्रे जिनो बुद्धः स्थाप्यः। उपलक्षणं चैतत् इन्द्रकुबेरवर्जितानां लोकपालानां धनिष्ठायां स्थापनम्, इतोऽवशिष्टानां देवतानामुत्तरोत्तरोक्तिषीषु स्थापनं बोध्यं आदित्यैः एतदर्थकं रत्नमालायाम् "गणपरिवृढरक्षोयक्षभूतासुराणां प्रमथफणिसरस्वत्यादिकानां च पौष्णे २७। अवसि सुगतनाम्नो वासवे लोकपानां निगदितमखिलानां स्थापनं हि स्थिरेष्विति"। परिवृढः स्वामी। "प्रभौ परिवृढ" इति साधुः गणपरिवृढो गणेशः। प्रमथा महादेवस्य पारिषदाः। अवसि अश्वयुक्तनक्षत्रे सुगतो बुद्धः "सर्वज्ञः सुगतो बुद्धः इत्यमरः स्थिरेषु रोहिणीत्तराखित्यर्थः" धी॰धा॰।

**देवतामय** त्रि॰देवतात्मकं देवता+मयट्। १देवतात्मके स्त्रियां ङीप्। २हिरण्यगर्भरूपे देवताभेदे च स्त्री ङीप् "या प्राणेन सम्भवत्यदितिर्देवतामयी। गुहां प्रविश्य तिष्ठन्ती या भूतेभिर्व्यजायत" कठोप॰। ४।७। "या देवतामयी सर्वदेवतात्मिका प्राणेन हिरण्यगर्भरूपेण परमात्मा ब्रह्मणः सम्भवति शब्दादीनामदनात् अदितिर्मां पूर्ववत् गुहां (सर्वप्राणगुहां हृदयाकाशम्) प्रविश्य तिष्ठतीत्यदितिम्। या भूतेभिर्भूतैः समन्विता व्यजायत उत्पन्नेत्यर्थः" भा॰।

**देवतायतन** न॰ ६त॰। देवगृहे "सीमासन्धिषु कार्याणि देवतायतनानि च" मनुः "रूपेणाप्रतिमेन सम्पन्नां (रुक्मिणीं) देवतायतनान्तिके" हरिवं॰ ११७अ॰ देवतात्वादयोऽत्र "उद्यानदेवतालयपिङ्गवनवल्मीक मार्गचितिजाताः" बृ॰सं॰ ४२अ॰

**देव(वा)तिथि** पु॰ पृषो॰ अलुक्स॰ अक्रोधनपुत्रे ऋषिभेदे "अक्रोधनः खलु कालिङ्गीं करम्भां नामोपयेमे तस्यामस्य जज्ञे देव(वा)तिथिः" भा॰आ॰८५अ॰ "ततश्चाक्रोधनस्तस्मात् देव(वा)तिथिरजस्य च" भाग॰ ९।२२।८ देवातिथिरित्येव पाठः बहुषु पुस्तकेषु क्वचित् देवतिथिरिति पाठः।

**देवत्रा** अव्य॰देवाय देवं करोति सम्पद्यते वा "देवे त्रा च" पा॰क्रादियोगे त्रा। करणादिविशिष्टे देवाय १देवे २तदधीने

च । देवं वन्दे देवे रमे वा द्वितीयान्तात् सप्तम्यन्तात् वा देवशब्दात् ला । २वन्दनादिकर्मणि देवे ४रमणविषये देवे च "देवत्रा यन्तमवसे" यजु०६।२० "देवान् प्रति वन्तं गच्छन्तम्" वेददी०उक्ते ५देवतां प्रतीत्यर्थे च "ता देवीर्देव त्रेयं यज्ञं नयत" यजु० ६।२५ देवान् त्रायते ला—क । ६देवरक्षके त्रि० "देव एव सविता अपयति वर्षिष्ठेऽधिनाक इति देवलो एतदाह" शत०ब्रा० १।२।२।१४

**देवदण्ड** स्त्री देवात् मेघात् दण्डो यस्याः । नागबलायां राजनि० ।

**देवदत्त** पु० देवा एनं देयासुः संज्ञायां क्त । संज्ञाशब्दप्रतिपादे १नरभेदे "ब्राह्मणार्थो यथा नास्ति कश्चित् ब्राह्मण कस्यचित् । देवदत्तादयो वाक्ये तथैव स्मृतिरर्थकाः" हरिः २त०।२देवेन दत्ते त्रि० "देवदत्तां पतिर्भार्यां विन्दते नेच्छयात्मनः । तां साध्वीं बिभ्रदास्थित्यम् देवानां प्रियमाचरन्" मनुः "भगोऽर्यमा सविता पुरन्धिर्मह्यं वोढुर्गार्हपत्याय देवाः" इत्यादि मन्त्रलिङ्गात् या देवदत्ता भार्या तां पतिर्लभते न तु स्वेच्छया तां सतीं देवानां प्रियं कुर्वन् बिभृयात्" कुल्लू० ३युद्धानुजे पु० त्रिका० ४अर्जुनशङ्ख शब्दार्थकल्पतरुः । "पाञ्चजन्यं हृषीकेशो देवदत्तं धनञ्जयः" गीता । ५देहस्थे जृम्भणकरे वायुभेदे "विजृम्भणे देवदत्तः शुद्धस्फटिकसन्निभः" शारदातिलकटीकायां राघवभट्टधृतशाक्तम् । देवाय दत्तम् । ६देवार्थोत्सृष्टे यागादौ त्रि० ।

**देवदत्तक** पु० देवदत्तो स्वम्य एषाम् "स एषां ग्रामणीः" पा०कन् । १देवदत्तप्रधानकेषु ब०व०अनुकम्पितो देवदत्तः । बह्वचो मनुष्यनाम्नष्ठञ् वा घनिलञौ" पा० ठञ् घन् इलच् पक्षे कन् । २अनुकम्पिते देवदत्ते "ठाजादावूर्ध्वं द्वितीयादचः" पा० द्वितीयादचः परं सर्वं लुप्यते इति देविक देविय देविल इति रूपत्रयं तत्रार्थे तेषामजादित्वात् कनस्तु तदभावात् न लोपः । "अजादौ च विभाषा लोपोवक्तव्यः" वा० देवक इत्यपि तत्रार्थे "लोपः पूर्वपदस्य च" वा० दत्तिक दत्तिल दत्तिय दत्तक इत्येतेऽपि तत्रार्थे ।

**देवदत्ताग्रज** पु० ६त० । बुद्धे त्रिका० ।

**देवदर्श** त्रि० देवं पश्यति दृश—क्विप् उप०स० । १देवतादर्शके देवं दृष्टेत्यर्थे घञन्त० ।

**देवदर्शन** त्रि०देवं पश्यति दृश—ल्युट् । १देवदर्शके २क्षविभेदे पु०तेन प्रोक्तमधीयते शौनका० णिनि । देवदर्शनिन् तत्प्रोक्ताध्यापिषु ब०व०दृश—भावे ल्युट् ६त० । ३देवतानां दर्शने न० ।

**देवदानी** स्त्री देवानामिव दानं शुद्धिरस्याः देव—शोधे भावे ल्युट् गौरा० ङीष् । कस्तिशोधनतायां रत्नमा० ।

**देवदारु** न० देवानां दारु तत्प्रियं काष्ठं चन्दनमस्य । स्वनामख्याते वृक्षभेदे अमरः । अस्य पुंस्त्वमपि "अस्तं परः पश्यसि देवदारुम्" रघुः "पारिजातान् कोविदारान् देवदारुद्रुमांस्तथा" भा०व० १५८अ० । "बोढा सङ्कः कम्पितदेवदारुः" कुमा० "देवदारु लघु स्निग्धं तिक्तोष्णं कटुपाकि च । विबन्धाध्मानशोथामतन्द्राश्लिष्मज्वरास्रजित् । प्रमेहपीनसश्वासकण्डूमीरत्नुत्" भावप्र० ।

**देवदालिका** स्त्री देवदालीव कायति दृश्यते कन् कोऽधो ह्रस्वः । महाकालवृक्षे राजनि० ।

**देवदाली** स्त्री देवेन मेघशब्देन दालेदलनमस्या गौरा० ङीष् । (घघरबेल) ख्याते लताभेदे "देवदाली रसे तिक्ता कफार्शःशोफपाण्डुता । नाशयेद् वमनी तिक्ता त्वक्क्षिकालग्निज्वरान् । गीता परा खरस्पर्शा विष्मूत्री गरनाशनी" भावप्र० । देवदालीफलं तिक्तं कृमिरोगघ्न विषापहम् । स्वंसनं गुल्मप्लीहघ्नमर्शोघ्नं वातजित् परम् । देवदालीदलं तक्रे क्षौद्रं खण्डेन संयुतम् श्वासम् । वेसवारयुते साज्ये भर्जितं क्षिप्तना दृढम् तत्रैव ।

**देवदास** पु० ६त० । देवानां दासे स्त्रियां ङीप् ।

**देवदासी** स्त्री देवमिन्द्रियं दास्नोति दास—बधे क्विप् । १वनबीजपूरके राजनि० । देवाय क्रीड़ार्थे दासीव । २वेश्यायाञ्च शब्दार्थकल्प० । ६त० । ३देवानां परिचारिकायाम् ।

**देवदीप** पु० देवार्थो दीपः । १देवार्थे दीपे देवं दीप्रशीलमालोकसंयुक्तं दीपयति दीप—क्विप्—अण् उप० स० । २लोचने शब्दरत्ना० ।

**देवदुन्दुभि** पु० देवानां दुन्दुभिरिव हर्षप्रदत्वात् । १रक्तलवङ्गाम् । ६त० । २देवढक्कायाम् रत्नमा० । "देवदुन्दुभयो नेदुर्नन्दतुश्चाप्सरोगणाः" भूरिप्रयोगः ।

**देवदूती** स्त्री देवा इन्द्रियाणि द्रवन्ते खिद्यन्तेऽनया दू—क्विप् ङीप् । वनबीजपूरके राजनि० ।

**देवदेव** पु० देवेषु मध्ये दीव्यति दिव—अच् । १महादेवे "अयाचितारं न हि देवदेवमद्रिः सुतां याचितुं गताक" कुमा० २ब्रह्मणि च शब्दरत्ना० देवानां देवः स्वामी ३विष्णौ । "द्वौपद्याः सदृशं ज्ञात्वा देवदेवो

जगत्पतिः। पार्श्वस्थां रुक्मिणीं लक्ष्मीं कृत्वा केशवः शयने प्रभुः" भा०प०२६२अ०।

**देवदेवेश** पु० देवप्रकारः देवदेवः तस्येशः। कृष्णादेवे "यदि मे भगवान् प्रीतः सर्वलोकनमस्कृत!। अयं मां देवदेवेश! याजयस्व सुरेश्वर!" भा०आ० २२३अ०।

**देवदोल** पु० दैवैः दृष्टव्यो दोलः। प्रातःकरणीये दोलोत्सवे दोलशब्दे दृश्यम्।

**देवद्युम्न** पु० भरतवंश्ये देवाजितोऽपत्ये नृपभेदे "अथा सूर्यां तनयो देवद्युम्नः" भाग० ५।१६।३

**देवद्रोणी** स्त्री ङीप्। १देवयात्रायां द्वारा०। २स्वयम्भूलिङ्गाद्यधिष्ठानगह्वरे च "देवद्रोण्यां विहारे च कूपेष्वायतनेषु च। एषु गोषु विषन्नासु प्रायश्चित्तं न विद्यते" संवर्तः। "देवद्रोणी स्वयम्भूलिङ्गाद्यधिष्ठानगह्वरम्" प्रा०त० रघु०।

**देवद्रुच्** त्रि० देवमञ्चति पूजयति अञ्च-क्विन् देवस्य दारुः अद्रुादेशः। १देवपूजके अमरः। गत्यर्थाञ्चतेस्तु नलोपः। देवद्रुच् देवगन्तरि। सर्वनामस्थाने परे उभयत्र देवद्रुङ् देवद्रुञ्चौ अन्यत्राजादौ देवद्रीचः देवद्रुञ्च इत्यादिभेदः।

**देवधन** न० देवार्थं धनम्। १देवोद्देशेनोत्सृष्टे धने देवतानां चेतनत्वपक्षे २देवस्वामिके धने च।

**देवधानी** स्त्री देवा धीयन्तेऽस्याम् धा-आधारे ल्युट् ङीप्। इन्द्रपुर्यां "तस्मिन्नैन्द्री पुर्यामरेर्देवधानी नाम" भाग० ५।२१।१० [ हेमच०।

**देवधान्य** न० देवानां योग्यं धान्यम्। (देधान) धान्यभेदे।

**देवधूप** पु० देवानां प्रियो धूपः। गुग्गुलौ रत्नमा०।

**देवन्** पु० दिव-बा० अनि। पत्यु रनुजाते भ्रातरि हेम०।

**देवन** पु० दीव्यत्यनेन दिव-करणे ल्युट्। १पाशके। भावे ल्युट्। २क्रीडायां ३दीप्तौ ४व्यवहारे ५जिगीषायां ६स्तुतौ च न०। दीव्यत्यत्र दिव-आधारे ल्युट्। ७क्रीडोद्याने ८पद्मे च।

**देवनदी** स्त्री ङीप्। गङ्गायाम् अमरः। "अर्घवाहा देवनदी खगसङ्घादिनी शुभा" भा०आदि०चैत्ररथपर्व। "इरावती वितस्ता च सिन्धुर्देवनदी तथा" भा०आ०६अ०। "स्नातुं गताम् देवनद्यां दुर्वासःप्रमुखान् मुनीन् मुनीन्" भा० व०२६२अ० २देवस्नातनदीमात्रे च "सरस्वतीदृषद्वत्योर्देवनद्योर्यदन्तरम्" मनुः। [ द्वारपाले हेमच०।

**देवनन्दिन्** पु० देवं शक्रं नन्दयति नन्दि-णिनि। इन्द्रदेवे नन्दयतीति नन्दि-णिनि। महानन्दे स्थूलदक्षे नन्दभेदे राजनि०।

**देवनामन्** पु० कुशद्वीपपतिस्थिरण्यरेतसः पुत्रभेदे कुशद्वीपशब्दे २१४५ पृ० दृश्यम्। [ २विलापे च।

**देवना** स्त्री च० दिव-भावे युच्। १क्रीडायां शब्दरत्ना०।

**देवनामक** पु०देवेति नाम यस्य कप्। देवयोनौ विद्याधरादौ हेमचन्द्रे देवनारक इति पाठः नरश्च नारा ततः स्वार्थे क देवरूपनरः। देवजन इति तत्स्वार्थः सोऽपि तत्रार्थे।

**देवनाल** पु० नलश्च नालः स्वार्थे कप् देव इव श्रेष्ठत्वात् नालः। नलोत्तमे राजनि०।

**देवनिद्** त्रि० देवं निन्दति निन्द-क्विप् तुक्। देवनिन्दके "देवनिदोऽप्रथमा अजुर्यन्" ऋ० १।१६२।२

**देवनिर्मित** त्रि० तुक्। १दैवे रचिते। "द्वीपेषु दिक्षु पूर्वादि नगर्यो देवनिर्मिताः" स्कन्दे। २गृहोद्याने स्त्री शब्दार्थचि०।

**देवपति** पु० तुक्। इन्द्रे हेमच०।

**देवपत्नी** स्त्री देवः पतिर्यस्याः। मनुष्यत्वात् वा ङीप् च। १देवभार्यायाम्। "उत या अन्तु देवपत्नीः" ऋ०५।४६।८ "देवपत्नी देवकन्या देवमातर एव च" भा०अनु०१३अ० २शब्दार्थचि० मध्यलुकि।

**देवपथ** पु० तुक्। १छायापथे आकाशस्थिते छायाकारे पथि देवपथ इव कन् तस्य देवपथादिः लुक्। २तत्सदृशे च ३देवयाने अर्चिरादिमार्गे च। देवयानशब्दे दृश्यम्। देवस्थानगमनार्थः पन्थाः। ४देवस्थानगमनार्थे मार्गे च। स च अन्यैर्नरैर्गन्तुमशक्य इति हनुमता तस्य द्वारनिरोधः कृतः यथाह भा०व० १४८अ०।

"अयञ्च मार्गो मर्त्यानामगम्यः कुरुनन्दन!। ततोऽहं रुद्धवान् मार्गं तवेमं देवसेवितम्। धर्मज्ञेहा मयेहापि मा कश्चिदिति भारत। दिव्यो देवपथोह्येष नात्र गच्छन्ति मानुषाः"।

**देवपथादि** पु०"दृषे प्रतिकृतौ" पा०कनो लुक् निमित्ते शब्दे मणे सच गणः पा०ग०सू० उक्तो यथा

देवपथ हंसपथ वारिपथ रथपथ स्थलपथ करिपथ खलपथ राजपथ शतपथ शङ्खपथ सिन्धुपथ सिद्धिमति उष्ट्रग्रीव वायरज्जु कृत्त इन्द्रदत्त पथ मत्स्य।

**देवपर** त्रि० देवः परोऽस्य। यद्विधौ देवायत्तसिद्धिर्विचिन्त्यते आपद्धारार्थं पौरुषवेदारहिते।

**देवपर्ण** न० देवप्रियं पर्णमस्य। सुरपर्णे राजनि०।

**देवपशु** पु० देवाय उत्सृष्टः पशुः । देवोद्देशेन उत्सृष्टे पशौ । "अनिर्दशाङ्गां गां सूतां दशान् देवपशूंश्चया । सपालान् वा विपालान् वा न दशुरब्रवीत्" मनुः । भिन्नत्वेन २देवोपासके च । "अथ योऽन्यां देवतामुपास्ते अन्योऽसावन्योऽहमस्मि न स वेद यथा पशुरेव स देवानाम्" इति श्रुतौ तस्य देवोपकरणतुल्यतया पशुत्वप्रतिपादनात्तथात्वम् ।

**देवपात्र** न०ई०त० । देवैः पीयतेऽत्र पा–आधारे ष्ट्रन् । अग्नौ "आसुपात्रं जुह्वर्देवानामिति देवपात्रं वा एष यदग्निस्तस्मादग्नौ सर्वेभ्यो देवेभ्यो जुह्वति" शत०ब्रा० १।४।२।१० "आसरूपं पात्रमासात्रम् । अग्नौ प्रक्षिप्तस्य हविषो देवैरद्यमानत्वादग्नेर्देवपात्रत्वम्" भा०

**देवपान** पु० देवैः पीयतेऽनेन पा–करणे ल्युट् । चमसे सोमपानपात्रभेदे "चमसो देवपान इति चमसेन ह वा एतेन भूतेन देवा अभक्षयन्ति तस्मादाह चमसो देवपान इति" शत०ब्रा० १।४।२।१४

**देवपाल** पु० शाकद्वीपस्थ वर्षपर्वतभेदे । शाकद्वीपोपक्रमे "एतस्य वर्षस्यर्यादागिरयो नद्यश्च सप्त सप्तैव । ईशानउरुशृङ्गो बलभद्रः शतकेसरः सहस्रस्रोता देवपालो महानसः" इतिभाग० ५।२०।१६

**देवपालित** त्रि० देवेन मेघाख्येन पालितः । १देवभक्ते देशे २सुररक्षिते च । देवाएनं पालयन्तीति अधिपि संज्ञायां क्त । ३संज्ञाभेदे तत्र च "कारकाद्दत्तश्रुतयोरेवेति नियमात् न अन्योदात्तता

**देवपीयु** पु० देवान् पीयति हिनस्ति पीय–उन् । देवद्वेषिणि असुरे । "अमेतोऽस्तु गयोऽशुभ्यां देवपीयवः" यजु० २५।१ "देवपीयवः देवद्विषः" वेददीपः

**देवपुत्र** पु० ई०त० । १देवकुमारे "देवपुत्रोपमौ वीरौ बालाविव हुताशनौ" हरिवं० ८४अ० देवस्य पुत्रीव प्रियत्वात् । २एलायां स्त्री जटाधरः । ई०त० । ३देवकन्यायाञ्च स्त्री स्वार्थे क । देवपुत्रिका तत्रार्थे राजनि० स्त्री

**देवपुर** स्त्री ई०त० समासान्तविधेरनित्यत्वात् न टच् । अमरावत्याम् पुरशब्देन ई०त० स० । देवपुर तत्रार्थे न० ।

**देवपुरी** स्त्री पुरीशब्देन ई०त० स० । अमरावत्याम् ।

**देवपूज्य** पु० ई०त० । सुराचार्ये उशनसौ ।

**देवप्रतिकृति** स्त्री ई०त० । १देवप्रतिमायाम् देवतानां जीविकार्थं २देवप्रतिमायाञ्च ।

**देवप्रतिमा** स्त्री ई०त० । देवमूर्तौ देवतामूर्तिशब्दे दृश्यम् ।

**देवप्रश्न** पु० देवानुद्दिश्य प्रश्नः । देवान् प्रति शुभाशुभविषयप्रश्ने उपस्तुतौ हेमच० । उपस्तुतिशब्दे दृश्यम् ।

**देवप्रस्थ** पु० सेनाविन्दुरूपपुरे । "स देवप्रस्थमासाद्य सेनाविन्दोः पुरं प्रति" भा०स० २६अ०

**देवप्रिय** पु० ई०त० । १पीतभद्रराजे २वकवृक्षे च राजनि० । तत्पुष्पस्य देवप्रियत्वात् तथात्वम् ।

**देवबधू** पु० ई०त० । अप्सरसि ।

**देवबला** स्त्री देवानामिव बलं यस्या ५त० । १सहदेव्यां २लायमाषाभाञ्च राजनि० ।

**देवबलि** पु० देवार्थं बलिः वर्ष–इन् बल्यादेशः । देवार्थे उपहारे ।

**देवबाहु** पु० यदुवंशजे हृदीकपुत्रभेदे "निमित्तमात्रं सर्वं भोजो हृदीकसुतस्ततो मतः । देवबाहुः शतधनुः कृतवर्मेति तत्सुताः" भाग० ६।२४।२६ ऋषिभेदे च "गार्ग्यः पृथुस्तथैवाग्र्यो ज्याग्नो वामन एव च । देवबाह्वयदुश्च एते पर्जन्यस्यैव सोमजाः" हरिवं० २६।अ०।

**देवब्रह्मन्** पु० देव इव ब्रह्मा । नारदे त्रिका० ।

**देवब्राह्मण** पु० देवपूजकः ब्राह्मणः । देवले देवोपजीवके उपजीविकार्थं देवपूजके ।

**देवभवन** न०देवानां भवनमिव । १अश्वत्थवृक्षे । ई०त० । २स्वर्गे शब्दच० । ३देवप्रतिमालये च ।

**देवभाग** पु० ई०त० । स्व०सि० उक्ते सवनसमुद्रात् उत्तरस्थिते उत्तरगोलरूपे पदार्थे "ततः समन्तात् परिधिः क्रमेणायं मयार्णवः । मेरुमेव स्थितो धात्रा देवासुरविभागकृत्" स्व०सि० "तेन समुद्रादुत्तरं भूगोलस्यार्द्धं जम्बूद्वीपं देवानां, समुद्राद्दक्षिणं समुद्रात्तिरिक्तं भूगोलस्यार्द्धं लवणद्वीपषट्समुद्रोभयात्मकं दैत्यानामिति सिद्धम् मेरुदण्डानुबद्धभूगोलमध्ये परिधिरूपो लवणसमुद्रोऽस्ति । उत्तरगोलार्द्धं दक्षिणभूगोलार्धान्तर्गत समुद्रस्य प्रान्तपरिधिस्पृष्टमिति मेरुलायां कक्षाधःस्थितत्वेन तात्पर्यार्थः" रङ्ग० ।

"मेरादौ देवभागस्थो देवानां याति दर्शनम् । देवभागे सुराणां च क्षेमन्ते मन्दतान्यथा । धनुर्भगस्थः सविता देवभागे न दृश्यते । देवभागेऽसुराणां तु दृश्यते भचतुष्टये । भूमध्यकक्षात् पञ्चदशभागे देवेऽथ वाऽऽसुरे" सू०सि० ।

देवाय देवो भागः । देवार्थं देवे २धनादिभागभेदे च ।

**देवभीति** स्त्री ५त० । १देवेभ्यो भये । ई०त० । २देवानां भये च तत्र पूर्वपदप्रकृतिस्वरः ।

**देवभू** स्त्री ६त०। १स्वर्गे देवं देवत्वं भवते भू-प्राप्तौ क्विप्। २देवत्वप्राप्तिरभावे क्विप्। तदेवत्वप्राप्तौ शब्दर०।

**देवभूति** स्त्री देवेषु भूतिः प्राप्तिरस्याः। १मन्दाकिन्याम् शब्दरत्ना०। ६त०। २देवानामैश्वर्ये च।

**देवभूमि** स्त्री ६त०। १स्वर्गे। २देवप्रियभूमौ च

**देवभूय** न० भू-भावे क्यप् ६त०। देवभावे देवत्वे अमरः।

**देवभृत्** पु०देवं बिभर्ति पालयति भृ-क्विप्। १इन्द्रे २विष्णौ च "देवेशो देवभृद्गुरुः" विष्णुसं०। "देवभृत् शक्रस्तस्य गुरुः शास्तेति" भाष्यम् एकनाम। नामद्वयपक्षे तु भिन्नं पदम् देवभृद् गुरुः।

**देवभ्राज्** पु० देवेषु भ्राजते भ्राज-क्विप्। स्वर्वंशभेदे देवभेदे "पुरा विवस्वतः सर्वे मनुस्तेषां तथावरः। देवभ्राट् तनयस्तस्य सुधामिति ततः स्मृतः" भा०आ० १अ०

**देवमणि** पु०देव इव मणिः देवप्रियो वा मणिः देवेषु मणिरिव वा। १स्वर्गे २कौस्तुभमणौ ३अश्वरोमावर्तभेदे च मेदि०। "सम्पन्नदेवमणयो भूतरम्भागाः" माघः। "सम्पन्नाः समग्राः देवमणयो निगालाबद्धाः कौस्तुभादि दिव्यमणयश्च येषान्ते "आवर्त्तो रोमजो देवमणिस्त्वेष निगालजः" मल्लिनाथधृतकोशः।

**देवमत** त्रि० ६त०। १देवसम्मते। २ऋषिभेदे पु० "ऋतायुदाढ्यरन्तीभमितिहासं पुरातनम्। नारदस्य च संवादमृषेर्देवमतस्य च" भा०आश्व० २४अ०।

**देवमातृ** स्त्री ६त०। १सुराणां मातरि "देवकन्या देवपत्न्यो देवमातर एव च" भा०अनु० १४अ०। २अदित्यां च। ३दाक्षायण्यां मनुस्मृ०।

**देवमातृक** पु० देवः मेघवर्षः मातेव पालकत्वात् यस्य कप्। १वर्षाम्बुसम्पन्नक्षेत्रे क्षेत्रिपालिते देशे अमरः। तदुपलक्षिते २क्षत्रियादौ च "कच्चिद्राष्ट्रे तडागानि पूर्णानि च दृढानि च। भागशो विनिविष्टानि न क्षत्रियैर्देवमातृका" भा०स० ५अ०।

**देवमान** न० देवानां मानं कालपरिच्छेदभेदः। १दिव्यमाने मानुषसौरवर्षात्मके एकस्मिन् दैवे दिने तच्चिह्नयन्त्रिते तदीये "मासे तद्दीप्ता तेषां वर्षे च "संक्रान्त्या सौर उच्यते। मासैर्द्वादशभिर्वर्षं दिव्यं तदहरुच्यते। सुरासुराणामन्योन्यमहोरात्रं विपर्ययात्। तत् षष्टिषड्गुणा दिव्यं वर्षमासुरमेव च" सू०सि०। "ब्राह्मं दिव्यं तथा पित्र्यं प्राजापत्यं गुरोस्तथा। सौरञ्च सावनं चान्द्रमार्क्षं मानानि वै नव" सू०सि० "द्वितीयं दिव्यं देवमानम्। तच्च पूर्वोक्तम्" रङ्गना०। देवेषु मानोऽस्य रमणीयत्वात्। २देवयोग्ये मेरुहादौ च "वेश्म परिष्कृतं देवमानेव चित्रम्" ऋ० १०।१०७।१० देवमानेव देवमानमिव रमणीयमिति भा० प्रथमाख्याने आकारादेशश्छान्दसः।

**देवमानक** पु० देवेषु मानोऽस्य कप् संज्ञायां कन् वा। कौस्तुभमणौ देवमणौ शब्दरत्ना०।

**देवमाया** स्त्री ६त०। अविद्यायाम् बन्धहेतौ परमेश्वरमायायाम् "ते दुस्तरामतितरन्ति च देवमायाम्" भाग०२।७।४०

**देवमार्ग** पु०देवोपलक्षितो मार्गः। अर्चिरादयभिमानिदेवाधिष्ठिते देवयाने पथि। १देवाधिष्ठितपथमात्रे च। "ते (वानरा) विक्रष्टास्तु बाहुभ्यां देवमार्गं च दर्शिताः" रामा० सु०६१।४

**देवमास** पु० दीव्यत्यत्र दिव-आधारे घञ् कर्म०। गर्भाधिके अष्टमे मासि त्रिका० तत्र हि क्षतेरोजसश्च प्रादुर्भावात् गर्भस्य देवनाच्चास्यस्य तथात्वं यथाह याज्ञ०

"सप्तमे चाष्टमे मासि त्वङ्मासक्षतिमानपि। पुनर्धातौ पुनर्गर्भमोजस्तस्य प्रधावति। अष्टमे मासतो गर्भौजातः प्राणैर्वियुज्यते" "अनेनौजःस्थितिरेव जीवनहेतुरिति दर्शयति तत्स्वरूपञ्च स्वयमेव दर्शितम् "हृदि तिष्ठति यत् शुद्धमीषदुष्णं सपीतकम्। ओजः शरीरे संख्यातं तन्नाशान्नाश उच्यते" मिता० ६त०। २देवानां मासे सौरत्रिंशद्दर्शात्मके मासे च।

**देवमित्र** पु० देवो मित्रमस्य। संज्ञाभेदयुक्ते मनुष्यादौ "संज्ञायां मित्रामित्रयोः" पा०बहु० अन्योदात्तता। कुमारानुचरमातृभेदे स्त्री "कण्डूतिः कालिका चैव देवमित्रा च भारत!" भा०शल्य० ४७अ० मातृगणोक्तौ

**देवमीढ** पु० यदुवंश्ये नृपभेदे "यदोरभूदन्वयाये देवमीढ इति श्रुतः। यादवस्यस्य तु सुतः शूरस्त्वैलोक्यसम्मतः। शूरस्य भोजिर्हृदिको वसुदेवो महायशाः" भा०द्रो०१४४अ०

**देवमीढुष** पु० क्षुदीकस्य पुत्रभेदे "तस्यापि (क्षुदीकस्यापि) शतधनुर्देवमीढुषाद्याः पुत्रा बभूवुः" श्रीधरधृत पराशरः। २देवमीढे वसुदेवपितामहे च "अश्मक्यां जनयामास शूरं वै देवमीढुषः। मरिष्यां जज्ञिरे शूराज्जोज्यायां पुरुषा दश। वसुदेवो महाबाहुः पूर्वमानक दुन्दुभिः" इत्यादि हरिवं० ३५अ०।

क्रोष्टुवंश्ये नृपभेदे "गान्धारी चैव माद्री च क्रोष्टोर्भार्ये बभूवतुः। गान्धारी जनयामास अनमित्रं महाबलम्। माद्री युधाजितं पुत्रं ततोऽन्यं देवमीढुष-

यम् । तेषां वंशस्त्रिधा भूतो दृष्णीनां कुलवर्द्धनः" हरिवं० ३५ अ०।

**देवमुनि** पुं० देव इव मुनिः । देवर्षौ नारदादौ । "तुराच्छे ऋषौ च "एतेन वै तुरो देवमुनिः सर्वांस्त्रिमार्ष्टि" पञ्चविंशब्रा० २५।१४

**देवयज्** पुं० देवा इज्यन्तेऽत्र यज–आधारे क्विप् । देवयजन योग्ये वह्निभेदे "अपाग्ने ! अग्निमाददे हि निष्क्रव्याद सेध वा देवयजं वह" यजु० १।१७ "तत्र त्रयोऽग्नयः सन्ति । एकः आमात् । आममपक्वमत्तीत्यामाद्लौकिकोऽग्निः । द्वितीयः क्रव्यात् शवदाहे क्रव्यं मांसमत्तीति क्रव्यात् चिताग्निः । तृतीयो यागयोग्यः । तथाविधांस्त्रीनङ्गारान् गार्हपत्यात् प्राग्भागे पृथक् कृत्व तेषां मध्ये यागयोग्यताहीनौ द्वावग्नी आमात् क्रव्यात्संज्ञौ त्याजयित्वा गार्हपत्यं प्रत्युच्यते" वेददी०

**देवयजन** न० देवा इज्यन्तेऽत्र यज–आधारे ल्युट् । वेदिस्थाने "अपावर्ं पृथिव्यै देवयजनाद् वध्यासम्" यजु० १।१५ २पृथिव्यां स्त्री ङीप् । "पृथिवि ! देव यजन्योषध्यास्ते मूलं मा हिंसिषम्" १।२४ हे देवयजनि हे पृथिवि इत्यर्थः । श्यागाधिकरणस्थानमात्रे च "स यदस्यै पृथिव्या अनामृतं देवयजनमासीत्तच्चन्द्रमस्यदधत तदेतच्चन्द्रमसि कृष्णं तस्मादाहुश्चन्द्रमसस्यै पृथिव्यै देवयजनमित्यपि ह वा अस्यै तस्मिन् देवयजन इष्टं भवति तस्माद्वै प्रतिमार्ष्टि" शत०ब्रा० १।२।५।१८ "वेदीमार्जनप्रशंसार्थमितिहासमाह । यो समन्तात् मृतं सर्वदा नश्वरमामृतं तद्विपरीतं यद्देवयागाधिकरणभूतं स्थानम्" भा० तत् स्थानं विशिनष्टि कात्या०श्रौ० २०।४।४ "निम्नोदकं देवयजनं पुरस्तात्"सू०"पुरस्तात् प्राच्यां दिशि निम्नं सदा स्याद्यदुदकं यत्र तद् देवयजनमध्वर्यवेऽम्" कर्कः ।

**देवयजि** पुं० देवं यजते यज–इन् । देवयाजके "अग्नो द्विजान् देवयजीन् निबन्धः" भट्टिः ।

**देवयज्ञ** पुं० ६त० । देवानां यज्ञे पञ्चयज्ञान्तर्गते होमरूपे गृहस्थनित्यकर्त्तव्ये यज्ञभेदे । "अथातः पञ्च यज्ञाः"देवयज्ञो भूतयज्ञः पितृयज्ञो ब्रह्मयज्ञो मनुष्ययज्ञ" इति । "तदग्नौ जुहोति स देवयज्ञो यदग्निहोत्रं स भूतयज्ञो यत् पितृभ्यो ददाति स पितृयज्ञो यत् स्वाध्याय मधीयते स ब्रह्मयज्ञो यन्मनुष्येभ्यो ददाति स मनुष्ययज्ञ इति" आश्वा० गृ० सू० ३।१,२,१, "अध्यापनं ब्रह्मयज्ञः पितृयज्ञस्तु तर्पणम् । होमो दैवो बलिर्भौतो नृयज्ञोऽतिथिपूजनम् । पञ्चैतान् यो महायज्ञान् न हापयति शक्तितः । स गृहेऽपि वसन्नित्यं सूनादोषैर्न लिप्यते" मनुः । तत्र होमस्य देवता मनुनोक्ता यथा "आभ्यः कुर्याद्देवताभ्यो ब्राह्मणो होममन्वहम् । अग्नेः सोमस्य चैवादौ तयोश्चैव समस्तयोः । विश्वेभ्यश्चैव देवेभ्यो धन्वन्तरय एव च । कुह्वै चैवानुमत्यै च प्रजापतयएव च । सह द्यावापृथिव्योश्च तथा स्विष्टकृतेऽन्ततः" । "तत्र च यज्ञशब्दो महच्छब्दश्च गौणः" इति कुल्लू० ।

**देवयज्य** स्त्री देवानां यज्ञः यागः । "ऋन्दसि निष्क्र्योः" इत्यादि" नि० य । देवार्थयागक्रियायाम् दर्शादिकायाम् । "दैव्याय कर्मणे शुन्धध्वम् देवयज्यायै" यजु० १।१२। "देवयज्यायै देवसम्बन्धिन्यै यागक्रियायै दर्शादिकार्य्यै" वेददी० । "अगन्म ते मतिं देवयज्यया" ऋ० १।१४।१ "वयं देवयज्यया देवयागेन तद्वैलक्षण्येन यज्ञेनागन्म" भा० ।

**देवयाजिन्** पुं० देवं यजते यज–णिनि । आत्मभेदेन देवार्थयागकारके । "अथ ह स देवयाजी यो वेद देवानेवाहमिदं यज्ञे देवानात्मन्यर्थीभीति स यथा श्रेयसे पापीयान् बलिं हरेद्वैगुण्यो वा राज्ञे बलिं हरेदेवं स ह न तावन्तं लोकं जयति यावन्मितरः" शत०ब्रा०११।२।६।१३ आत्माभेदेन साध्यप्रेक्षया तस्य निकृष्टत्वसत्त्वम् आत्मयाजी श्रेयान् देवयाजी इत्युपक्रम्य तथा वर्णनात् । २कुमारसैन्यभेदे च "यज्ञबाहुः प्रबाहुश्च देवयाजी च सोमपाः" भा०शल्य० ७६अ० तन्नामोक्तौ

**देवयात** त्रि० देवं देवत्वं यातः । देवत्वप्राप्ते तस्य विषयो देशः राजन्या० बुञ् । दैवयातक तस्य विषये देशे । अत्र दैवयातव इति पाठान्तरं देवं देवत्वं याति या–तन् देवयातः स्वार्थे अण् । दैवयातव देवत्वप्राप्तरि ततः राजन्या० बुञ् । दैवयातवक तस्य विषये देशे ।

**देवयात्रा** स्त्री देवानां यात्रा । देवोत्सवादौ देवप्रतिमानां स्थानान्तरनयनरूपमतौ ।

**देवयाविन्** पुं० दानवभेदे "सोमपो देवयावी च प्रवरो वीर मर्दनः" हरिवं० २४०अ० ।

**देवयान** न० यायतेऽनेन या–करणे ल्युट् ६त० । १सुराणां गतिसाधने रथभेदे विमाने । देवो परेशः यायतेऽनेन मार्गेण या–करणे ल्युट् । २अर्चिरादिमार्गरूपे पथिभेदे

पु० अर्चिरादिमार्गशब्दे ३६४ पृ० दर्शितछान्दोग्य वाक्यम्। "स एनान् ब्रह्म गमयतीत्येष देवयानः पन्थाः देवपथो ब्रह्मपथ इत्यपि तत्र स्थानान्तरे पाठः। तत्र सच्चिवेशाद्यधिकारदेवभेदादिकं शा० सू० भा० दर्शितं यथा "अर्चिरादिना तत्प्रथितेः" शा० सू०।

"आह्लादुपक्रमात् समानोत्क्रान्तिरित्युक्तम्। श्रुतिस्तु स्वस्थानरेखनेकधा श्रूयते। नाड़ीरश्मिसम्बन्धेनैका "अथैतैरेव रश्मिभिरूर्द्धं आक्रमते, इति। अर्चिरादिकैका "तेऽर्चिषमभिसम्भवन्त्यर्चिषोऽहः" इति। "स एतं देवयानं पन्थानमापद्याग्निलोकमागच्छति" इत्यन्या। "यदा वै पुरुषोऽस्माल्लोकात् प्रैति स वायुमागच्छति" इत्यपरा। "सूर्यद्वारेण ते विरजाः प्रयान्ति" इति चापरा। तत्र संशयः किं परस्परं भिन्ना एताः श्रुतयः किं वैकैवानेकविशेषेति। तत्र प्राप्तं तावद्भिन्ना एवैताः श्रुतय इति, भिन्नप्रकरणस्थितत्वाद्भिन्नोपासनशेषत्वाच्च। अपि च "अथैतैरेव रश्मिभिः" इत्यवधारणमर्चिरादिमेधायासुपरुध्येत, त्वरावचनञ्च पीड्येत "स यावत् क्षिप्येन्मनस्तावदादित्यङ्गच्छति" इति तस्माद्भिन्ना एवैते पन्थान इत्येवं प्राप्तेऽभिदधुमहे। अर्चिरादिनेति। सर्वा ब्रह्मप्राप्तुरर्चिरादिनैवाध्वना रंहतीति प्रतिजानीमहे। कुतः? तत्प्रथितेः। प्रथितो ह्येष मार्गः सर्वेषां विदुषाम्। तथाहि पञ्चाग्निविद्याप्रकरणे "ये चामी अरण्ये श्रद्धां सत्यमुपासते" इति विद्यान्तरशेषिनामप्यर्चिरादिका श्रुतिः श्राव्यते। स्यादेतत् यासु विद्यासु न काचिद्गतिरुच्यते तास्वेवेयमर्चिरादिकोपनिषत्ताम् यासु त्वन्याऽन्या श्राव्यते तासु किमर्चिरादाश्रयणम्? इति। अत्रोच्यते, भवेदेतदेवं यद्यन्यभिन्ना एवैताः श्रुतयः स्युः, एकैव त्वेषा श्रुतिरनेकविशेषणा ब्रह्मलोकप्रतिपादनी क्वचित् कैश्चित् द्विशेषणैरुपलक्षितेति वदामः, सर्वत्रैकदेशप्रत्यभिज्ञानादितरेतरविशेषणविशेष्यभावोपपत्तेः। प्रकरणभेदेऽपि तु विद्यैकत्वे भवतीतरेतरविशेषणोपसंहारवद्गतिविशेषणानामप्युपसंहारः। विद्याभेदेऽपि गत्यैकदेशप्रत्यभिज्ञानाद्गत्यभेदाच्च गत्यभेद एव। तथाहि "ते तेषु ब्रह्मलोकेषु पराः परावतो वसन्ति" "तस्मिन् वसति शाश्वतीः समाः" "सा या ब्रह्मणो जितिर्यां व्यष्टिं जितिं जयति तां व्यष्टिं व्यश्नुते" "तदा एवैतं ब्रह्मलोकं ब्रह्मचर्येणानुविन्दति" इति तत्र च तदेवैकं फलं ब्रह्मलोकप्राप्तिलक्षणं प्रदर्श्यते। यत्त्वेतैरेवेत्यवधारणमर्चिरादाश्रयणे न स्यादिति। नैष दोषः, रश्मिसाम्यपरत्वादस्य। न ह्येक एवशब्दो रश्मीन्येव प्रापयितुमर्हति, अर्चिरादीन्येव व्यावर्तयितुम्। तस्माद्रश्मिसम्बन्ध एवायमवधार्यते इति द्रष्टव्यम्। त्वरावचनं त्वर्चिरादापेक्षायामपि क्षेप्रार्थत्वाच्चोपरुध्यते यथा निमिषमात्रेणाल्पागम्यत इति। अपि च "अथैतयोः पथोर्न कतरेण चेति" मार्गद्वयसम्बन्धानां कटं कर्तीयं स्थानमाचक्षाणा पिङ्गवाक्यव्यतिरिक्तमेकमेव देवयानमर्चिरादिपर्वाणं पन्थानं प्रवदति। भूयांसि चार्चिरादिश्रुतौ मार्गपर्वाणि, अल्पीयांसि त्वन्यत्र, भूयसाञ्चानुगुण्येनाल्पीयसाञ्च नयनं न्याय्यमिच्छतोऽपि अर्चिरादिना तत्प्रथितेरित्युक्तम्" भा०।

"वायुमब्दादविशेषाविशेषाभ्याम्" सू०।

"केन पुनः सच्चिवेशविशेषेण मतिविशेषाणामितरेतरविशेषणविशेष्यभाव? इति तदेतत् सूत्रकृत्वाऽऽचार्यो दर्शयति "स एतं देवयानं पन्थानमापद्याग्निलोकमागच्छति स वायुलोकं स वरुणलोकं स इन्द्रलोकं स प्रजापतिलोकं स ब्रह्मलोकं इति कौषितकिनां देवयानः पन्थाः पठ्यते। तत्रार्चिरग्निलोकशब्दौ तावदेकार्थौ ज्वलनवचनत्वादिति नात्र सच्चिवेशक्रमः कश्चिदन्वेष्यः, वायुस्त्वर्चिरादिवर्त्म न्यस्तः कतमस्मिन् स्थाने सच्चिवेशयितव्य इति। उच्यते, "तेऽर्चिषमभिसम्भवन्ति अर्चिषोऽहरह्न आपूर्यमाणपक्षमापूर्यमाणपक्षाद्यान् षण्मासानुदङ्मासेति मासांस्तान्, मासेभ्यः संवत्सरं, संवत्सरादादित्यम् इत्यत्र संवत्सरात् परस्तादादित्यादर्वाङ्मं वायुमभिसम्भवन्ति, कस्मात् क्वचिद्विशेषविशेषाभ्याम्। तथाहि "स वायुलोकम् इत्यत्राविशेषोपदिष्टस्य वायोः श्रुत्यन्तरे विशेषोपदेशो दृश्यते "यदा वै पुरुषोऽस्माल्लोकात् प्रैति स वायुमागच्छति तस्मै स तत्र विजिहीते यथा रथचक्रस्य खखेन स ऊर्द्धं आक्रमते स आदित्यमागच्छति" इति एतस्मादादित्यादायोः पूर्वत्वदर्शनाद्विशेषादवटादित्यनयोरन्तराले वायुर्निवेशयितव्यः। कस्मात् पुनरग्नेः परत्वदर्शनाद्विशेषादर्चिषोऽनन्तरं वायुर्न निवेश्यते। नैषोऽस्ति विशेष इति। वदामः। ननूदाहृता श्रुतिः "स एतं

देवयानं पन्थानमापद्याग्निलोकमागच्छति, स वायुलोकम् इति। उच्यते, केवलोऽत्र पाठः पौर्वापर्येणावस्थितो नात्र क्रमवचनः कश्चिच्छब्दोऽस्ति। पदार्थोपदर्शनमात्रं ह्यत्र क्रियते "एतच्चैतच्च स गच्छति" इति उत्तरत्र पुनर्वीप्सयेन रथचक्रमात्रेण छिद्रेणोर्ध्वं आक्रम्यादित्यमागच्छतीत्यवगम्यते क्रमः तस्मात् सूक्तमविशेषविशेषाभ्यामिति। वाजसनेयिनस्तु "मासेभ्यो देवलोकं देवलोकादादित्यम्" इति समामनन्ति, तत्रादित्यानन्तरौव देवलोकाद्वायुमभिसम्बध्नन्ति। वायुमब्दादिति तु छान्दोग्यसूत्रमेतयोरुक्तम्। छान्दोग्यवाजसनेययोस्त्वेकत्र देवलोको न विद्यते परत्र संवत्सरः, तत्र श्रुतिद्वयप्रत्ययाद्वयोरप्युभयत्र पठितयोः, तत्रापि मासस्सम्बन्धात् संवत्सरः पूर्वः पठितो देवलोक इति विवेक्तव्यम्" भा०।

"तडितोऽधिवरुणः सम्बन्धात्" सू०।

"आदित्याच्चन्द्रमसं चन्द्रमसो विद्युतम्" इत्यस्यां विद्युत उपरिष्टात् वरुणलोकभित्यं वरुणः सम्बध्यते। अस्ति हि सम्बन्धो विद्युद्वरुणयोः। "यदा हि विशाला विद्युतस्तीव्रस्तनितनिर्घोषाः जीमूतोदरेषु प्रन्वन्ति अद्भ्यः प्रपतन्ति विद्योतते स्तनयति वर्षिष्यति वा" इति च ब्राह्मणम्। अपाञ्चाधिपतिर्वरुण इति स्मृतिस्मृतिप्रसिद्धिः। वरुणाद्वाधीन्द्रप्रजापती स्थानान्तराभावात् पाठसामर्थ्याच्चागन्तुकत्वादपि वरुणादीनामन्त एव निवेशः। वैद्युतिकस्थानाभावात् विद्युच्चान्याऽधिरादौ वर्त्मनि" भा०।

"आतिवाहिकास्तल्लिङ्गात्" सू०।

इत्यादि सूत्रभाष्यन्तु आतिवाहिकशब्दे ६५२ पृ०दर्शितम्

"कार्यं बादरिरस्य गत्युपपत्तेः" सू०। "स एनान् ब्रह्म गमयति" इत्यत्र विचिकित्स्यते, किं कार्यमपरं ब्रह्म गमयति आहोस्विन् परमेवाविकृतं सत्यं ज्ञानमनन्तं ब्रह्मेति। कुतः संशयः, ब्रह्मशब्दप्रयोगात् गतिश्रुतेश्च। तत्र कार्यमेव सगुणमपरं ब्रह्म नयत्येतान्मानवः पुरुष इति बादरिराचार्यो मन्यते। कुतः? अस्य गत्युपपत्तेः। अस्य हि कार्यब्रह्मणो गन्तव्यत्वमुपपद्यते प्रदेशवत्त्वात्, न तु परस्मिन् ब्रह्मणि गन्तृत्वं गन्तव्यत्वं गतिर्वाऽवकल्पते सर्वगतत्वाद्व प्रत्यगात्मत्वाच्च गन्तॄणाम्" भा०।

"विशेषितत्वाच्च" सू०। "ब्रह्मलोकान् गमयति" "ते तेषु ब्रह्मलोकेषु पराः परावतो वसन्ति" इति श्रुत्यन्तरे विशेषितत्वात् कार्यब्रह्मविषयैव गतिरित्यवगम्यते। न हि बहुवचनेन विशेषणं परस्मिन् ब्रह्मण्यवकल्पते। कार्ये त्वस्याभेदोपपत्तेः सम्भवति बहुवचनम्। लोकश्रुतिरपि विकारगोचरायामेव सन्निवेशविशिष्टायां भोगभूमावाङ्क्षी, गौणी त्वन्यत्र "ब्रह्मैव लोक एव सम्राट्" इत्यादिषु। अधिकरणाधिकर्तव्यनिर्देशोऽपि परस्मिन् ब्रह्मणि नाङ्कुशः स्यात्, तस्मात् कार्यविषयमेवेदं नयनम्" भा०।

"ननु कार्यविषयेऽपि ब्रह्मशब्दो नोपपद्यते समस्तस्य हि जगतो जन्मादिकारणं ब्रह्मेति प्रतिष्ठापितमित्युच्यते"। "स्वामीप्यात्तु तद्व्यपदेशः" सू०।

"तुशब्द आक्षेपाव्यावर्त्यार्थः। परब्रह्मस्वामीप्यादपरस्य ब्रह्मणस्तस्मिन्नपि ब्रह्मशब्दप्रयोगो न विरुध्यते। परमेव हि ब्रह्म विशुद्धोपाधिसम्बन्धात् क्वचित् कैश्चिदिकारधर्मैर्मनोमयत्वादिभिरुपासनायोपदिश्यमानमपरमिति स्थितिः। ननु कार्यं प्राप्यावनाद्वत्तिश्रवणं न लभ्यते। न हि परस्मात् ब्रह्मणोऽन्यत्र क्वचित् निलयता सम्भवति। दर्शयति च देवयानपथप्रस्तुत्यानामनाद्वत्तिं "एतेन प्रतिपद्यमाना इमं मानवमावर्तं नावर्तन्ते" इति। "तेषामिह न पुनराद्वत्तिरस्ति तयोर्ध्वमायन्नमृतत्वमेतीति" चेति। अत्र ब्रूमः" भा०।

"कार्यात्यये तदध्यक्षेण सहातः परमभिधानात्" सू०।

"कार्यब्रह्मलोकप्रलयप्रस्तुपस्याने सति तत्रैवोत्पन्नसम्यग्दर्शनाः सन्तस्तदध्यक्षेण हिरण्यगर्भेण सहातः परं परिशुद्धं विष्णोः परं पदं प्रतिपद्यन्त इति। इत्यं क्रमसन्निरनाद्वत्त्यादिश्रुत्यभिधानेभ्योऽभ्युपगन्तव्या। न ह्यक्षरस्यैव गतिपूर्विका परप्राप्तिः सम्भवति इत्युपपादितम्" भा० "स्मृतेश्च" सू०। "स्मृतिरप्येतमर्थमनुजानाति ब्रह्मणा सह ते सर्वे संप्राप्ते प्रतिसञ्चरे। परस्यान्ते कृतात्मानः प्रविशन्ति परं पदम्' इति। तस्मात् कार्यब्रह्मविषया गतिः श्रूयत इति सिद्धान्तः" भा० भाष्यम्।

**देवयानी** स्त्री शुक्राचार्यस्य कन्यायां सा हि कचशापात् क्षत्रियेण ययातिनोढा तत्कथा भा० आ० ७५।७७अ०।

"देवयान्याच्च संयोगं ययातेर्नाहुषस्य च"। देवयानीञ्च दयितां सुतां तस्य महात्मनः। देवयान्यामजावेतां यदुस्तुर्वसुरेव च" ७५अ०।

**देवयावन्** त्रि॰ देवं याति या–वनिप्। देवं प्रति गन्तरि "द्रवद्दूतो देवयावा वनिष्ठः" ऋ॰७।१०।२

**देवयिष्ट** त्रि॰ चु॰ दिव–परिदेवने क्विप्। परिदेवके

**देवयु** त्रि॰ देवं याति या–खुगञ्चा॰ नि॰ कु। १धार्मिके। देवं द्योतनस्वभावं विष्णुभावमात्मन इच्छति क्यच्–तत उन्। २स्वात्मनो द्योतनस्वभावेच्छौ च "नरो यत्र देवयवोमदन्ति" ऋ॰१।१४५।५। ३श्लोकयात्रिके मेदि॰ ४देवे पु॰ देवं यौति यु–मिश्रणे क्विप् अनित्यसमासतुशासनमिति न तुक्। ४वज्रादिना देवानां मिश्रीकारके "सुधातुं यज्ञपतिं देवयुवम्" यजु॰१।१२ छान्दस उवङ्।

**देवयुग** पु॰देवप्रियं युगम्। सत्ययुगे "पुरा देवयुगे ब्रह्मन् प्रजापतिसुते शुभे आस्तां भगिन्यौ "ते भार्ये" कश्यपस्यास्तां कद्रूश्च विनता तथा" भा॰आ॰१६अ॰। "पुरा देवयुगे तात! देवेन्द्रेषु महात्मनः" भा॰अनु॰ ८३अ॰।

**देवयोनि** पु॰ देवानामिव कामिचारित्वात् योनिः यस्य। १विद्याधरादौ ते च अमरोक्ता यथा "विद्याधरोऽप्सरो यक्षोरक्षोगन्धर्वकिन्नराः। पिशाचो गुह्यकः सिद्धो भूतोऽमी देवयोनयः"।२देवजातौ स्त्री "हे वै योनी इति ब्रूयात् देवयोनिरन्यो मनुष्ययोनिरन्यः" शत॰ब्रा॰७।४।२।१०

**देवयोषा** ६त॰। अप्सरसि। "सप्तचूर्देवयोषाश्च पुण्यवर्षमनुत्तमम्" भा॰शल्य॰ ४७अ॰। "शुभे कुन्ती च माद्री च देवयोषोपमे भुवि" हरिवं॰ ५४अ॰

**देवर** पु॰ दीव्यतेऽनेन दिव–करणे अरच्। भर्तृरनुजे भ्रातरि। "पतिश्वशुरता ज्येष्ठे पतिदेवरतानुजे" उद्भटः पितृभिर्भ्रातृभिश्चैताः पतिभिर्देवरैस्तथा" मनुः २भर्तृभ्रातृमात्रे च "देवराद्वा सपिण्डाद्वा स्त्रिया सम्यङ्नियुक्तया" मनुः अत्र देवरशब्दः भर्तुः ज्येष्ठकनिष्ठोभयपरः। उत्तरत्र "विधवायां नियोगार्थे निर्वृत्ते तु यथाविधि। गुरुवच्च स्नुषावच्च वर्त्तेयातां परस्परम्" कनिष्ठस्य पूर्वज पत्नीत्वेन गुरुतुल्यत्वस्य ज्येष्ठस्य च कनिष्ठपत्न्याः स्नुषातुल्यत्वस्योक्तेः। स्वार्थे क तत्रार्थे। "देवा देवरकोमतः" उज्ज्वलद॰ धृतकोषः।

**देवरक्षित** त्रि॰ ६त॰। १देवेन २रक्षिते देवकल्पपुत्रभेदे पु॰ तत्कन्यायां स्त्री "देवकस्याभवन् पुत्राश्चत्वारोऽमरोपमाः। देवानुपदेवश्च सुदेवो देवरक्षितः। कुमार्यः सप्त चास्यासन् वसुदेवाय ता ददौ। देवकी शान्तिदेवी च सुदेवा देवरक्षिता। धृतदेव्युपदेवी च सप्तमी चैव सप्तमी" हरिवं॰ २८अ॰

**देवरथ** न॰ देवस्यादित्यस्य रथः। सूर्यरथे "द्वात्रिंशतं वै देवरथाङ्गान्यस्य" शत॰ब्रा॰ १४।६।२।२ देव "आदित्यस्य रथो देवरथः तस्य गत्वा एकेनाङ्गेन यावद्देशपरिमाणं परिच्छिद्यते तदेकं देवरथाङ्गम्यम् तद् द्वात्रिंशद्गुणितम् तावत् परिमाणोऽयं लोकः" भा॰ २प्रवरान्तर्गतर्षिभेदे ततः फिञ्। दैवरथायनि तदपत्ये पुंस्त्री। ३देवानां याने विमाने च

**देवरहस्य** न॰ देवानामपि रहस्यम्। अतिगोप्ये "श्रुतं देवरहस्यं ते नारदाद्देवदर्शनात्" भा॰आश्व॰२६अ॰

**देवराज्** पु॰ देवेषु राजते राज–क्विप्। इन्द्रे "हत्वा देवराट् त्रैष्टभाग् वै" भा॰अनु॰ १अ॰

**देवराज** पु॰ देवानां राजा–टच् समा॰। सुरराजे इन्द्रे "यस्त्वाशीर्देवको नाम देवराजसमद्युतिः" भा॰आ॰६७अ॰ "देवराजः महानुजः" ह॰सं॰४०अ॰ "ततः कुलालादि॰ वुञ्। देवराजक तत्कृते त्रि॰।

**देवरात** पु॰ देवात्तनं रायाशुः संज्ञायां क्त।१विष्णुना देवेन रक्षिते परिरक्षिते नृपे परिरक्षितशब्दे तत्कथा दृश्या २विश्वामित्रपुत्रभेदे "विश्वामित्रस्य च सुता देवरातादयः स्मृताः" हरिवं॰ २७अ॰। "पार्थिवा देवरातश्च शालङ्कायनबन्धनम्" हरिवं २७अ॰। ३द्वापरयुगोद्भवे राजभेदे च "चानूद्देवरातश्च भोजो भीमरथश्च यः" "उपासते सभायां त कुन्तीपुत्रं युधिष्ठिरम्" भा॰सभा॰४अ॰ उपसंस्कारे युधिष्ठिरसभासत्त्वेन तस्योक्तेः न तस्य परिरक्षितादिरूपत्वम्। ततः काश्यादि॰ ठञ् ञिट् च। दैवरातिक तदपत्यादौ त्रि॰। ठञि स्त्रियां ङीप् इति भेदः।

**देवर्षि** पु॰ देव इव ऋषिः देवानामपि ऋषि पूज्यत्वात्। १नारदादौ न्यायादिकर्तरि कणादादौ च "देवर्षिरचितं गाम्यं! ऋषातेवचिकित्सितम्। न्यायतन्त्राण्यनेकानि तैस्तैरुक्तानि वादिभिः" भा॰शा॰ २१०अ॰ "ब्रह्मणा भुवनात् लोका देवर्षिपितृमानवः। तृप्यन्तु पितरः सर्वे मातृमातामहादयः" तर्पणमन्त्रः।

**देवल** पु॰ देव–डघा॰ कलच्। १धार्मिके २देवद्रव्योपजीविनि ब्राह्मणे च "चिकित्सकान् देवलकान् मांसविक्रयिणस्तथा। विप्रघ्नेन च जीवन्तो विद्यात्तान् ब्रह्मघातकान्" मनुः "देवलः देवप्रतिमापरिचारकः वर्तनार्थत्वेनैतत्कर्मणोऽयं निषेधः न धर्मार्थं "देवकोषोपजीवी च नास्ना देवलको भवेत्" देवलस्मरणात्, कुत्सि॰। ३ऋषिभेदे "ऋतूक्षस्य विदुः पुत्रमृषिं नाम्ना तु देवलम्" हरिवं॰

३य०। वसिष्ठसूनेरपत्ये ४ऋषिभेदे। स च रम्भाशापेनाऽवज्ञतया बभूव ब्रह्मवै०पु०"वसिष्ठपुत्रत्वात् तत्सङ्कारस्थले "वसिष्ठो देवलो व्यासः" इत्यादौ तस्यैव बोधः। स च स्मृतिकर्त्ता यथाह हेमा०व्र०ख० मनुः।

"विष्णुः पराशरो दक्षः संवर्त्तव्यासहारिताः। शातातपो वसिष्ठश्च यमापस्तम्बगौतमाः। देवलः शङ्खलिखितौ भरद्वाजोशनोऽत्रयः। गौतमो याज्ञवल्क्यश्च दशैते स्मृतिकारिणः"। ५धौम्यवैरेयजभ्रातरि च "यवीयान् देवलस्तेन वने भ्राता तपस्यति। धौम्य उत्कोचके तीर्थे तं द्रष्टुमीष्व यदीच्छथ" भा०आ० १८२ अ० तस्य धौम्यायज्ञतोक्ता। ६नारदसुतौ त्रिका० ७देवरे शब्दरत्ना०। देवं याति या—क। लौकिकार्थं देवप्रतिमायाः स्थानान्तरनायके च। स्वार्थे क। देवलक तत्रार्थे।

**देवलता** स्त्री देवप्रिया लता या० त०। १नवमल्लिकायाम् शब्दच०। देवस्य भावः तल्। २देवत्वे उपजीविकार्थं देवपूजने स्त्री।

**देवलाङ्गुलिका** स्त्री देवयत्नवत्या चु० देव—परिदेवने करणे अच कर्म०। इक्षिकालिकायां (पिञ्जाति) राजनि०।

**देवलाति** स्त्री देवानां तत्प्रतिमानां ज्ञातिः यत्नणम् ६त०। देवप्रतिमायत्नणे तस्य दासीभारादित्वात् तत्पुरुषे पूर्वपदप्रकृतिस्वरत्वम्।

**देवलोक** पु० देवानां लोकः। १स्वर्गे त्रिका०। "आचार्य्यो ब्रह्मलोकेशः प्राजापत्ये पिता प्रभुः। अतिथिस्त्विन्द्रलोकेशो देवलोकस्य चर्त्विजः" मनुः। भूर्लोकोऽथ भुवर्लोकः स्वर्लोकोऽथ महर्जनः। तपः सत्यञ्च सप्तैते देवलोकाः प्रकीर्तिताः"भत्स्यपु०उक्तेषु २भूर्लोकादिषु च

**देववक्त्र** न० देवानां वक्त्रं मुखमिव। वह्नौ तस्य मुखत्वेन देवैरुक्तात् तस्य तन्मुखत्वम्।

**देववर्त्मन्** ६त०। सुरवर्त्मनि यज्ञाग्ने हेमच०।

**देववर्द्धकि** पु० ६त०। विश्वकर्मणि हेमच०।

**देववर्द्धन** पु० देवकल्पपुत्रभेदे "चत्वारो देवकात्मजाः। देववानुपदेवश्च सुदेवो देववर्द्धनः" भाग० ९।२१।१२

**देववल्लभ** त्रि० ६त०। १देवानामिष्टे २सुरपद्माग्ने पु० अमरः।

**देववात** पु० दैवैर्वातः वा—गतिगन्धयोः कर्मणि क्त ६त०। दैवैरिष्यमाणतया प्राप्ते ऋषिभेदे। "अमन्थिष्टां भारता रेवदग्निं देववता देववातः सुदक्षम्" ऋ०३।२३।२।

**देववायु** पु० द्वादशमनोः पुत्रभेदे "देववायुरुरुश्च देवश्रेष्ठो विदूरथः। मित्राविन्मित्रदेवश्च मित्रसेनश्च मित्रजित्। मित्रवाहः सुचर्चाश्च द्वादशस्य मनोः सुताः" हरिवं० ७ अ०।

**देववाहन** पु० देवान् हवींषि वाहयति प्रापयति वह—णिच्—ल्यु। १यज्ञे "हुतो अग्निः समिध्यते अश्वो न देववाहनम्" ऋ०१।२७।१४ ६त०। २देवानां वाहने न०।

**देवविद्या** स्त्री देवज्ञानार्थां विद्या। निरुक्तविद्यायाम् "नाम वा ऋग्वेदो यजुर्वेदः सामवेद आथर्वणश्चतुर्थ इतिहासपुराणपञ्चमो वेदानां वेदः पित्र्यो राशिर्दैवं निधिर्वाकोवाक्यमेकायनं देवविद्या ब्रह्मविद्या भूतविद्या क्षत्रविद्या नक्षत्रविद्या सर्पदेवजनविद्या नामैवैतन्नामोपास्वेति" छा०उ०"ऋग्वेदं भगवोऽध्येमि यजुर्वेदं सामवेदमाथर्वणं चतुर्थमितिहासपुराणं पञ्चमं वेदानां वेदं पित्र्यं राशिं दैवं निधिं वाकोवाक्यमेकायनं देवविद्यां ब्रह्मविद्यां भूतविद्यां क्षत्रविद्यां नक्षत्रविद्यां सर्पदेवजनविद्यां

**देवव्यचस्** त्रि॰ वि+अञ्च गतौ असुन् ३त॰। देवैर्व्याप्ते "स्तृणीमहि देवव्यचा विवक्षिः" ऋ २।४।४।

**देवव्रत** पु॰ १भीष्मे त्रिका॰ "गाङ्गं देवव्रतं नाम पुत्रं सोऽजनयत् प्रभुः। स तु भीष्म इति ख्यातः कौरवाणां पितामहः" हरिवं॰२अ॰। २अग्निपते ऋग्यजुःसामभेदे च तानि तदुक्तानि त्रीणि सामानि। ६त॰। ३देवत्वसाधने व्रते न॰।

**देवव्रतिन्** त्रि॰ देवतार्थं व्रतमस्यास्य इनि। देवार्थव्रतयुक्ते "देवव्रती स्नाहयमाप्रदाने" भा॰आनु॰ ७।अ॰।

**देवशत्रु** पु॰ ६त॰। १देवारौ असुरे "स देवशत्रुनिव देवराजः" भा॰ द्रो॰ १४६ अ॰। २सप्तसोत्ते देवगणयहभेदे तदाविष्टनरलक्षणं तत्रोक्तं यथा "संक्लेदी हिज गुरुदेवदोषवक्ता जिह्माक्षो विगतभयो विमार्गदृष्टिः। सन्तुष्टो भवति च न चान्नपानजातैर्दुष्टात्मा भवति च देवशत्रुजुष्टः"।

**देवशर्मन्** पु॰देव इव शर्मा अशुभनाशकः,कर्म॰या। १ब्राह्मणस्योपनामनि "ततश्च नाम कुर्वीत पितैव दशमेऽहनि। देवपूर्वं नराख्यं हि शर्मवर्मादिसंयुतम्" विष्णुपु॰। "नरमाचष्टे नराख्यं नरनाम। देवपूर्वं देवात् पूर्वं तच्च विशिष्टं शर्मयुतं तच्चान्ते" ग्रहणाति छिनत्त्यशुभ ग्र—मनिन् शर्मा। देवपदं हि विप्राणां नाममात्रसमन्वितम्" शु॰त॰। "शर्मा देवश्च विप्रस्य शर्मा त्राता च भूभुजः। भूतिर्दत्तश्च वैश्यस्य दासः शूद्रस्य कारयेत्" यमवचने शर्मादेवयोः क्रमेण निर्देशेऽपि "शर्मान्तं ब्राह्मणस्य स्यात् वर्मान्तं क्षत्रियस्य तु" शातातपोक्तेः शर्मान्तमेव नामनि श्रेष्ठं अतएव तर्पणप्रयोगे "अमुकगोत्रः पिता अमुकदेवशर्मा तृप्यतामेतत्तिलोदकं तस्मै स्वधेति" आ॰ त॰। "शर्मवर्मादिके कार्ये शर्मा तर्पणकर्मणि" गोभिलेन च शर्मान्तता उक्ता। २ऋषिभेदे "देवशर्मा च धौम्यश्च हस्तिकाश्यप एव च" भा॰ अनु॰ १६५।

**देवशस्** अव्य॰देव+वा॰ शस्। देवेभ्यस्यर्थे "त्वचि प्रति तान् देवशो विद्धि" ऋ॰ ३। १।५।

**देवशिल्पिन्** पु॰ ६त॰। विश्वकर्मणि।

**देवशुनी** स्त्री देव इव प्रभावान्विता शुनी। देवतुल्यप्रभावान्वितायां शुन्यां सरमायाम्। "पणिभिरसुरैर्निगूढागा अन्वेतुं सरमां देवशुनीमिन्द्रेण प्रहितामयुग्भिः पथ्यो निर्ऋतेर्जनीः प्रोचुरिति" ऋ॰१।६।५ भा॰ श्रुता श्रुतिः "तच्छ्रुत्वा तस्य माता सरमा पुत्रदुःखार्ता तत्सत्रमुपागम्यैतत्स जनमेजयः सह भ्रातृभिर्दीर्घं सत्रमुपास्ते। स तया क्रुद्धया तत्रोक्तोऽयं मे पुत्रो न किञ्चिदपराध्यति नावेक्षते चक्षुषापि नावलेढि किमर्थमभिशप्त इति। न किञ्चिदुक्तवत्यस्मै सा तानुवाच यस्मादयमभिशप्तोऽनपकारी तस्मादस्मत्तो भयमागमिष्यतीति" भा॰आ॰३अ॰।

**देवशेखर** पु॰दीव्यतीति देवः शेखरोऽस्य। १दमनकवृक्षे ६त॰। २देवानां शेखरे पु॰ न॰।

**देवश्रवस्** पु॰ १विश्वामित्रपुत्रभेदे "देवश्रवाः कृतश्चैव यस्मात्कात्यायनाः स्मृताः" हरिवं॰ २० अ॰ विश्वामित्रपुत्रकथने। २वसुदेवभ्रातरि "वसुदेवं देवभागं देवश्रवसमानकम्। कङ्कञ्च शमीकं कङ्कं समीकं वत्सकं हकम्" भाग॰ ६।२४।१७। "कंसवत्यां देवश्रवसः सुवीर इषुमांस्तथा" २३ स्कं॰

**देवश्री** पु॰ देवान् श्रयति श्रि+क्विप्। यज्ञे "दैव्याय धर्त्रे ओष्ट्रे देवश्रीः" यजु॰ १७।५६। ६त॰। २देवानां लक्ष्म्यां स्त्री।

**देवश्रुत्** त्रि॰ देवेषु श्रूयते श्रु—क्विप् तुक्। देवेषु विख्याते। "देवश्रुतौ देवेष्वाघोषतम्" यजु॰५।१७ "निषाभ्यां स्थ देवश्रुतमर्पयत मा" यजु॰ ६।२०

**देवश्रुत** पु॰ देवेषु श्रुतः विख्यातः। १हरौ २नारदे ३शास्त्रे च शब्दार्थकल्प॰। ४जिनभेदे॰हेमच॰। "स्वयंप्रभश्च सर्वानुभूतिदेवश्रुतौ च यौ"। अवसर्पिण्यां जिनोक्तौ।

**देवश्रेणी** स्त्री देवानां श्रेणीव। १भूवौलतायां राजनि॰ ६त॰। २देवतापङ्क्तौ च।

**देवश्रेष्ठ** पु॰ द्वादशमनोः पुत्रभेदे। "देवापायुरहरश्च देवश्रेष्ठो विदूरथः" हरिवं॰ ७अ॰। तत्सुतोक्तौ।

**देवसदन** त्रि॰ सीदत्यत्र सद—आधारे ल्युट। देवानामाधारे। "बर्हिर्देवसदनम्" श्रुतिः। "अग्नयो देवसदनस्तृतीयस्यामितो दिवि" ऋ॰.५।४।३।

**देवसभा** स्त्री ६त॰। १देवानां सभायां सुधर्मायाम् अमरः। २राजसभायाञ्च।

**देवसभ्य** त्रि॰देवेन देवः क्रीड़ा तस्य सभा तत्र सीदति यत्। क्रीड़ार्थसभागते सभिके त्रिका॰।

**देवसर्षप** पु॰ दीव्यति द्योतते दिव—अच् निपा॰। अश्वाख्ये रक्तमूलके क्षुद्रसर्षपे क्षुद्रभेदे राजनि॰।

**देवसह** न॰ देवं सहते सह—अच्। १भिक्षाक्षुत्रभेदे २दक्षोत्पत्तौ यज्ञे विघ्नः। ३सोमाकरे पर्वतभेदे पु॰ "हिमवत्पर्वते सह्ये महेन्द्रमलये तथा। श्रीपर्वते देव

गिरौ गिरौ देवसङ्घे तथा। पारियात्रे च विन्ध्रे च देवसन्दे हृदे तथा। उत्तरेण वितस्तायाः प्रवहाये मङ्कीधराः। यत्र तेषामधोमध्ये सिन्धुर्नाम महानदः। हठवत् प्रवते तत्र चन्द्रभाः सोमसत्तमः" सुश्रुतः।

**देवसात्** अव्य० देवाधीनं करोति कातन्त्रेण सम्पद्यते क्रादियोगे, दिवे वा देव+साति। कातन्त्रेण देवाधीने सम्पन्ने २देवाय देये च। "हता वा देवसात् भूत्वा लोकान् प्राप्स्यथ पुष्कलान्" भा० द्रो० १६० अ०

**देवसायुज्य** न० युज-सम्प० भावे क्यिप् युक् योगः तया सह वर्त्तते सहशब्दस्य सादेशे सयुक् तस्य भावः ष्यञ् इत्०। देवत्वे अमरः।

**देव(वेद)सावर्णि** पु० मनुभेदे स च त्रयोदशो मनुः। यथा "मनुस्त्रयोदशो भव्यो वेद (देव) सावर्णिरात्मवान्। चित्रसेनविचित्राद्या वेद (देव) सावर्णि देहजाः। सुकर्मसुत्रामसंज्ञा देवा इन्द्रो दिवस्पतिः। निर्मोकतत्त्वदर्शाद्या भविष्यन्त्यृषयस्तदा। देवहोत्रस्य तनय उपहूतो दिवस्पतेः। योगेश्वरो हरेरंशो बृहत्यां संभविष्यति" भाग० ८।१३।१४

**देवसुन्द** पु० सोमाकारहृदभेदे सुश्रुतः देवसङ्घशब्दे दृश्यम्।

**देवसुषि** पु० देवैः प्राणादित्यादिभिः रक्ष्यमाणः सुषिः द्वारम्। प्राणादित्यादिभिः रक्ष्यमाणे हृदयस्य द्वारभेदे। स च पञ्चसंख्याकः छा० उ० श्रूयते यथा "तस्य ह वा हृदयस्य पञ्च देवसुषयः स योऽस्य प्राङ्सुषिः स प्राणस्तच्चक्षुः स आदित्यस्तदेतत्तेजोऽन्नाद्यमित्युपासीत तेजस्व्यन्नादो भवति य एवं वेद" "अथ योऽस्य दक्षिणः सुषिः स व्यानस्तच्छ्रोत्रं स चन्द्रमास्तदेतच्छ्रीश्च यशश्चेत्युपासीत श्रीमान् यशस्वी भवति य एवं वेद" "अथ योऽस्य प्रत्यङ्सुषिः सोऽपानः सा वाक् सोऽग्निस्तदेतद्ब्रह्मवर्चसमन्नाद्यमित्युपासीत ब्रह्मवर्चस्व्यन्नादो भवति य एवं वेद" "अथ योऽस्योदङ्सुषिः स समानस्तन्मनः स पर्जन्यः तदेतत्कीर्तिश्च व्युष्टिश्चेत्युपासीत कीर्तिमान् व्युष्टिमान् भवति य एवं वेद" "अथ योऽस्योर्ध्वः सुषिः स उदानः स वायुः स आकाशस्तदेतदोजश्च सहश्चेत्युपासीत ओजस्वी सहस्वान् भवति य एवं वेद" "ते वा एते पञ्च ब्रह्मपुरुषाः स्वर्गस्य लोकस्य द्वारपाः स य एतानेवं पञ्च ब्रह्मपुरुषान् स्वर्गस्य लोकस्य द्वारपान् वेदास्य कुले वीरो जायते प्रतिपद्यते स्वर्गं लोकं य एतानेवं पञ्च ब्रह्मपुरुषान् स्वर्गस्य लोकस्य द्वारपान् वेद" "तस्य ह वा इत्यादिना गायत्र्याख्यस्य ब्रह्मण उपासनाङ्गत्वेन द्वारपालादिगुणविधानार्थमारभ्यते। तस्येति प्रकृतस्य हृदयस्येत्यर्थः। एतस्यानन्तरनिर्दिष्टस्य। पञ्च पञ्चसंख्याका देवानां सुषयो देवसुषयः स्वर्गलोकप्राप्तिद्वारच्छिद्राणि देवैः प्राणादित्यादिभिरक्ष्यमाणानीत्यतो देवसुषयस्तस्य स्वर्गलोकभवनस्य हृदयस्याश्च यः प्राङ्सुषिः पूर्वाभिमुखस्य प्रागगतं यच्छिद्रं द्वारं स प्राणः हृत्पुण्डरीकेण द्वारेण यः सञ्चरति वायुविशेषः स प्रागनितीति प्राणः। तेनैव सम्बन्धव्यतिरिक्तं तच्चक्षुरधिष्ठानमादित्यः "आदित्यो ह वै बाह्यप्राण इति श्रुतेः" "चक्षूरूपप्रतिष्ठाक्रमेण हृदि स्थितः। "स आदित्यः कस्मिन् प्रतिष्ठित इति चक्षुरित्यादि" वाजसनेयके। प्राणवायुदेवतैव श्लोका चक्षुरादित्यश्च सङ्घात्येन। वक्ष्यति च "प्राणाय स्वाहेति हुतं हविः सर्वमेतत्तर्पयतीति"। तदेतत्प्राणाख्यं स्वर्गलोकद्वारत्वाद्ब्रह्म" "स्वर्गलोकं प्रतिपित्सुस्तच्चक्षुरादित्यस्वरूपेणान्नादत्वाच्च सवितुस्तेजोऽन्नाद्यमित्याभ्यां गुणाभ्यामुपासीत। ततस्तेजस्व्यन्नादश्चामयावित्वरहितो भवति य एवं वेद तस्यैतद्गुणफलम्। उपासनेन वशीकृतो द्वारपः स्वर्गलोकप्राप्तिहेतुर्भवतीति सख्यञ्च फलम्" "अथ योऽस्य दक्षिणः सुषिः तत्स्थो वायुविशेषः स वीर्यवत्कर्म कुर्वन्निष्टश्च वा प्राणापानौ नाना वाऽनितीति व्यानस्तत्सम्बन्धमेव च तच्छ्रोत्राभिन्द्रियं तथा स चन्द्रमाः" "श्रोत्रेण सृष्टा दिशश्चन्द्रमासेति" श्रुतेः। सङ्घात्यौ पूर्ववत्तदेतच्छ्रीश्च विभूतिः श्रोत्रचन्द्रमसोर्ज्ञानाङ्गहेतुत्वमतस्ताभ्यां श्रोत्रज्ञानाच्चयतश्च यशः ख्यातिर्भवतीति यशोहेतुत्वाद्यशस्त्वमतस्ताभ्यां गुणाभ्यामुपासीतेत्यादि समानम्" "अथ योऽस्य प्रत्यङ्सुषिः पश्चिमस्तत्स्थो वायुविशेषः स मूत्रपुरीषाद्यपनयनधोऽनितीत्यपानः सा तथा सा वाक्" "तत्सम्बन्धात्तस्मिंस्तदेतद्ब्रह्मवर्चसं हुतसाध्यायनिमित्तं तेजो ब्रह्मवर्चसम् अग्निसम्बन्धाद्धुतसाध्यायस्य। अन्नप्रसवहेतुत्वादपानस्यान्नाद्यत्वम्। समानमन्यत्। अथो योऽस्योदङ्सुषिरुदङ्कृतः सुषिस्तत्स्थो वायुविशेषः सोऽशितपीते समं नयतीति समानः। तत्सम्बद्धं मनोऽन्तःकरणं स पर्जन्यो देवात्मको देवः, पर्जन्यनिमित्ताश्चापः" इति। "मनसा

स्रष्टा आपश्च वरुणश्चेति" श्रुतेस्तदेतत्कीर्त्तिश्च मनसो ज्ञानस्य कीर्त्तिहेतुत्वात्। आत्मपरोक्षं विद्युतत्वं कीर्तिर्यशः स्वकरणमनेद्यं विद्युतत्वं व्युष्टिः कान्तिर्देहगतं लावण्यम्। ततश्च कीर्त्तिसम्भवात्कीर्त्तिश्चेति। समानमन्यत्" "अथ योऽयोर्ह्नः सुधिः स उदान आपादतलादारभ्योर्ह्नसत्क्रमणादुत्क्रमांश्च कर्म कुर्वन्नित्युदानः स वायुस्तदाधारत्वाकाशस्तदेतत्। वाय्वाकाशयोरोजोहेतुत्वादोजो बलं महत्त्वाच्च महः इति। समानमन्यत्। ते वै एते यथोक्ताः पञ्च सुधिसम्बन्धात्पञ्च ब्रह्मणो हार्दस्य पुरुषा राजपुरुषा इव द्वारस्थाः स्वर्गस्य हार्दस्य लोकस्य द्वारपालाः। एतैर्हि चक्षुःश्रोत्रवाङ्मनःप्राणैर्विषयैः सम्बद्धैस्तैर्ब्रह्मणो हार्दस्य प्राग्द्वाराणि निरुद्धानि। प्रत्यक्षं ह्येतदञ्जितकरणतया बाह्यविषयासङ्गासक्तत्वाच्च हार्दब्रह्मणि मनसि इति। तस्मात्पञ्चसङ्क्रमेते पञ्च ब्रह्मपुरुषाः स्वर्गस्य लोकस्य द्वारया इति। अतः स य एतानेवं यथोक्तगुणविशिष्टान् स्वर्गस्य लोकस्य द्वारपान्वेदोपास्ते उपासनया वशीकरोति स राजद्वारपालानिवोपासनेन वशीकृत्य तैरनिवारितः प्रतिपद्यते स्वर्गं लोकं राजानमिव हार्दं ब्रह्म। किञ्चास्य विदुषः कुले वीरः पुत्रो जायते वीरदुरुपसेवनात्। तस्य चास्योपाकरणेन ब्रह्मोपासनप्रवृत्तिहेतुत्वम्। ततश्च स्वर्गलोकप्रतिपत्तये पारम्पर्येण भवतीति स्वर्गलोकप्रतिपत्तिरेवैकं फलम्" भाष्यम्।

**देवसु** पु० द्युवन्ति अनुजानन्ति द्यु-किप् देवाश्च ते सुवश्चेति कर्म०। अनुज्ञाकर्तृदेवभेदे। "स वै दीक्षते। स उपवसथेऽग्नीषोमीयं पशुमालभते तस्य वपया प्रचर्याग्नीषोमीयमेकादशकपालं पुरोडाशं निर्वपति तदनुदेवसुवां हवींषि निरूप्यते" श्रुत०ब्रा० ५।२।३।१ "देवसुवां हवींषि विधित्सुस्तेषामग्नीषोमीयपशुपुरोडाशानन्तरभावित्वं वक्तुमाह उपवसथ इति उपवसथः सुत्यादिवसात् पूर्वमहः। तदनु देवसुवां हवींषि निर्वपति द्युवन्त्यनुजानन्तीति द्युवः देवाश्च ते सुवश्चेति देवसुवः तेषां देवसुवाम् "द्योः द्युपीति" पा०यखदेशः। प्रसविष्टत्वं चैषामाम्नायते "देवसुवामेतानि हवींषि भवन्ति एतावन्तो वै देवानां सवाः त एवास्मै सवान् प्रयच्छन्ति त एनं सुवत इति" भा०तत्तत्कर्मसु अधिपत्यादिकरणायानुज्ञाकर्त्तारश्च सवित्रादयो वरुणान्ता अष्टौ देवा यजुः ९।३९ "सविता त्वा सवानां सुवतामग्निर्गृहपतीनां सोमो वनस्पतीनाम्। बृहस्पतिर्वाचं इन्द्रो ज्यैष्ठ्याय रुद्रः पशुभ्योमित्रः सत्यो वरुणो धर्मपतीनाम्" "सविता सवानां प्रसवानामाज्ञानामाधिपत्ये हे यजमान! त्वा त्वां सुवतां प्रेरयतु सर्वेषामाज्ञादानेऽधिकारी भवेत्यर्थः। अग्निः गृहपतीनां गृहस्थानामाधिपत्ये त्वां सुवताम्। सोमो वनस्पतीनां वृक्षाणामाधिपत्ये त्वां सुवतां वृक्षाः सर्वे तवोपकारकाः भवन्त्वित्यर्थः। बृहस्पतिर्वागर्थं त्वां सुवतां पाण्डित्याय प्रेरयतु यद्वा यज्ञार्थं चतुर्धा वाचं व्याधिपत्ये सुवताम्। इन्द्रोदेवो ज्यैष्ठ्याय ज्येष्ठभावाय त्वां सुवताम्। रुद्रः त्वां सुवताम्। मित्रो देव सत्यः सुपां सुलुगित्यादिना षा० चतुर्थ्याः सु आदेशः सत्याय सत्यवाक्याय सत्यं वदितुं त्वां सुवताम्। वरुणो धर्मपतीनां धर्मेश्वराणां धर्मशीलानामाधिपत्ये त्वां सुवताम्। सवित्रादयोऽष्टौ देवस्तर्विषां देवास्त्वां नानाधिपत्यानि ददतिति वाक्यार्थः" वेददी०।

**देवसृष्ट** त्रि० ३त०। देवेन सृष्टे "देवसृष्टो वा एषेष्टिर्यदाप्रयणेष्टिरनया" श्रुत०१।२।२।६ देवसृष्टा उ इति च्छेदः "देवसृष्टो वा एषेष्टिर्यत् सौत्रामाण्यनया" ५।५। ३।१३ महिरिकायां स्त्री हेमच०।

**देवसेना** स्त्री ६त०। १सुराणां सैन्ये। "देवसेनां दानवैर्हि भग्नां दृष्ट्वा महाबलः" भा०व०२२२अ०। २प्रजापतेः कन्याभेदे सा च स्कन्दस्य भार्य्या बभूवेति प्रथिता तत्कथा भा०व०२२३अ० "अहं प्रजापतेः कन्या देवसेनेति विश्रुता। भगिनी मे दैत्यसेना सा पूर्वं केशिना हृता" "सदैवावां भगिन्यौ तु सखीभिः सह मानसम्। आगच्छावेह रत्नवंमनुज्ञाप्य प्रजापतिम्। निस्तुङ्गावां प्रार्थयते हर्त्तुं केशी महासुरः। दृष्ट्वाऽनेन दैत्यसेना न चाहं पाकशासन। सा हृताऽनेन भगवन्! सङ्गाहं त्वद्बलेन तु। त्वया देवेन्द्र! निर्हिष्टं पतिमिच्छामि दुर्जयम्" इन्द्र उवाच "मम मातृष्वसेया त्वं माता दाक्षायणी मम। आख्यातन्यङ्कमिच्छामि स्वयमात्मवरं त्वया" कन्योवाच "अबलाऽहं महाबाहो! पतिस्तु बलवान्मम। वरदानात् पितुर्भावी सुरासुरनमस्कृतः" इन्द्र उवाच "क्रीडन्तु बलं देवि! पत्युस्तव भविष्यति। एतदिच्छाम्यहं श्रोतुं तव वाक्यमनिन्दिते!" कन्योवाच "देवदानवयक्षाणां किन्नरोरगरक्षसाम्। जेता यो दुष्टदैत्यानां महावीर्यो महाबलः। यस्तु सर्वाणि भूतानि त्वया सह विजेष्यति। स हि मे भविता

भर्त्ता ब्रह्मणः कीर्तिवर्द्धनः" मार्कण्डेय उवाच "इन्द्रस्य वचःश्रुत्वा दुःखितोऽचिन्तयद्भृशम् । अस्या देव्याः पतिर्नास्ति यादृशं संप्रभाषते" । इत्युपक्रमे ब्रह्मणा उपदेशेन स्कन्दस्य तत्तत्तावधारणे स्कन्दोत्पत्तिसुपवर्णितं "चकार तां देवसेनां या सा तेन विमोचिता । स्वयं तस्याः पतिर्नूनं विहितो ब्रह्मणा स्वयम् । इति चिन्तयामास देवसेनामनङ्गताम् । स्कन्दं प्रोवाच बलभिदियं कन्या सुरोत्तम ! । यजाते त्वयि निर्दिष्टा तव पत्नी स्वयम्भुवा । तस्मात्त्वमस्या विधिवत् पाणिं मन्त्रपुरस्कृतम् । गृह्णीष्व दक्षिणं देव्या पाणिना पद्मवर्चसा । एवमुक्तः स जग्राह तस्याः पाणिं यथाविधि । हृष्टस्तिर्मन्त्रविद्वि जजाप च जुहाव च । एवं स्कन्दस्य महिषी देवसेना विदुर्जनाः । षष्ठी या ब्राह्मणाः प्राहुर्लक्ष्मीभासां सुखप्रदाम् । सिनीवाली कुहूश्चैव सद्वृत्तिमपराजिताम । यदा स्कन्दः पतिर्लब्धः शास्त्रतो देवसेनया । तदा तमाश्रयच्छ्रीः स्वयं देवी शरीरिणी । श्रीजुष्टः षड्गुणी स्कन्दस्तस्माच्छ्रीषष्ठमी स्मृता । अस्यां कृतार्थोऽभूद्यस्मात्तस्मात् षष्ठी महातिथिः" भा०व० २२८अ०।

**देवसेनापति** पु० ६त० । कार्त्तिकेये शब्दार्थ० । तस्य तत्पतित्वकथा देवसेनाशब्दे दृश्या "देवसेनापतिः स्कन्दो मातरो लोकमातरः" यजमानाभिषेकमन्त्राः ।

**देवस्थान** पु० देवानां स्थानमिव स्थानमस्य । ऋषिभेदे "द्वैपायनो नारदश्च देवलश्च महामुनिः । देवस्थानश्च कण्वश्च तेषां शिष्याश्च सत्तमाः" भा०शा०१अ० । ६त० । २स्थाने न० ।

**देवस्यत्वक** पु० देवस्यत्वेति यादृशब्दोऽस्यत्वानुवाके अध्याये वा गोपदा० वुन् । देवस्यत्वेत्यादिप्रतीकयुक्ते अध्याये अनुवाके च ।

**देवस्व** न० ६त० । देवपतिमार्ज्जनतत्कृष्टे धने । "ब्रह्मस्वञ्च गुरोर्द्रव्यं देवस्वञ्च हरेन्तु यः । कन्यां ददाति शुल्केन स प्रेतो जायते स्नुषः" भा० पञ्चप्रेतोपाख्याने "देवस्वं ब्राह्मणस्वं च लोभेनोपहिनस्ति यः" मनुः "यज्ञनं यज्ञशीलानां देवस्वं तद्विदुर्बुधाः" मनूक्ते श्रयज्ञशीलधने च । [चित्रहेवहविः" यजु० ६।१०

**देवहविस्** न० ६त० । घृते "आपो देवीः सदन्तु स्वाहा

**देवहव्य** पु० देवाय हव्यं यस्य । ऋषिभेदे "संवर्त्तो देवहव्यश्च विष्वक्सेनश्च वीर्यवान्" भा०स०७अ०यक्षसभ्योक्तौ ।

**देवहित** त्रि० ६त० । १देवानां हिते श्त० । २देवैः स्थापिते च "नाना हि वां देवहितं सदस्कृतम्" यजु० १६।७

**देवहू** स्त्री देवाह्वयन्त्यत्र हू-सम्प्र०भावे क्विप्, कर्त्तरि वा क्विप् । १देवाह्वाने "देवहूर्यज्ञं वां च वक्षत्" यजु० १८।६२। २देवाह्वानकर्त्तरि त्रि० "दक्षा हि देवहूतमो अर्यमा अग्ने रथीरिव" ऋ० ८।४।१।४ श्रयज्ञार्थं व्रीहिपूर्णे शकटे च "पवित्रं जुष्टतमं देवहूतमम्" यजु० १।८ देवानामतिशयेनाह्वाहे यज्ञार्थं व्रीहिपूर्णं शकटं हृदा देवा आहूता इव शीघ्रमागच्छन्ति" वेददी० । ४यज्ञकर्त्तरि "आपश्च व्यवहारोऽत्र चित्रमन्यो बहूदनम् । पितृदेवत्यः कर्मः उत्तरो देवहूः स्मृतः" भाग०४।२६।१३। ५ऋषिभेदे ततः गर्गा० यञ् । दैवहव्य तदपत्ये पुंस्त्री०

**देवहूति** स्त्री स्वायम्भुवमनोर्मध्यमायां कन्यायाम् "यस्तु तत्र पुमान् सोऽभून्मनुः स्वायम्भुवः स्वराट् । स्त्री-यासीत् शतरूपाख्या महिष्यस्य महात्मनः । तदा मिथुन धर्मेण प्रजा ह्येधांबभूविरे । स चापि शतरूपायां पञ्चापत्यान्यजीजनत् । प्रियव्रतोत्तानपादौ तिस्रः कन्याश्च भारत ! । आकूतिर्देवहूतिश्च प्रसूतिरिति सत्तम ! । आकूतिं रुचये प्रादात् कर्दमाय तु मध्यमाम्" भाग० ३।१२।३८ सा च कपिलरूपस्य भगवतोमाता यथाह तत्रैव

"अत्रे च कर्दमगृहे हिज्ञ ! देवहूत्यां स्त्रीभिः समं नवभिरात्मगतिं स्वमात्रे । उचे यमाह्यगमनं गुणसङ्ग पङ्कमखिलं विधुय कपिलस्य गतिं प्रपेदे" भाग०३।३।४ तदुपदेशप्रकारश्च कपिलशब्दे भागवतवाक्योक्तः १६६२ पृष्ठादौ दर्शितः ।

**देवह्वय** पु० देवा ह्वयन्त्यसुरैः यत्र आधारे घञ० क्यप् । १देवासुरसंग्रामे "अहूर्ण्वो वा च देवह्वये" ऋ०७।८५।३। भावे क्यप् । २देवानामाह्वाने न० "ते वा एत ऋतवः । देवाः पितरः समो ह्येव विद्वान्देवाः पितरः इति ह्वयत्याहास्य देवा देवह्वं गच्छन्त्या पितरः पितृह्वयमवन्ति हैनं देवा देवह्वेऽवन्ति पितरः पितृह्वये य एवं विद्वान् देवाः पितर इति ह्वयति"शत०ब्रा०२।१।३।२ "ऋत्वादीनां देवपित्रात्मनां द्वेधा विभागमाह यस्मा इत्युपक्रम्य य एवमृतूनां देवत्वं पितृत्वं च विद्वांस्तानृतून् देवाः पितर इति ह्वयति व्यवहरेत् अस्माह्वाहः

देवकृत्यं देवस्थानं प्रति देवा आगच्छन्ति आगताश्च ते यस्मिन्वर्त्ते कर्मणि एतस्मिन्नि" भा०

**देवहेडन** न० हेड–भावे ल्युट् हृत० लस्य डः। देवानामवहेलनरूपे अपराधे "यद्देवा देवहेडनं देवासुरमाश्रयम्" यजु० २०।१४

**देवहोत्र** पु० त्रयोदशे मन्वन्तरे योगेश्वररूपस्य हरेरंशस्य पितरि। त्रयोदशमनूपक्रमे "देवहोत्रस्य तनय उपहर्त्ता दिवस्पतेः। योगेश्वरो हरेरंशो बृहत्यां संभविष्यति" भाग० ८।१३।१४

**देवह्रद** पु० श्रीपर्वतस्थे तीर्थभेदे "श्रीपर्वते महादेवो देव्या सह महाद्युतिः। न्यवसत् परमप्रीतो ब्रह्मा च त्रिदशैः सह। तत्र देवह्रदे स्नात्वा शुचिः प्रयतमानसः। अश्वमेधमवाप्नोति परां सिद्धिञ्च गच्छति" भा० व० ८५ अ०। [ गङ्गाञ्च शब्दच०।

**देवा** स्त्री दिव–अच्। १पद्मचारिण्यां लतायाम् २यमुनप-

**देवाक्रीड** पु० देवा आक्रीड्यन्त्र आ+क्रीड–आधारे घञ् हृत०। १देवोद्याने इन्द्रारामे "देवराजाभ्यनुज्ञातो रत्नैश्च प्रतिपूजितः। वैनतेयं समारुह्य सहितः सत्यभामया। देवाक्रीड़ं परिक्रामन् पूज्यमानः सुरर्षिभिः। स ददर्श महावाडुराक्रीड़ं वासवस्य च" हरिवं० १२३अ०

**देवागारिक** त्रि० देवागारे नियुक्तः कुमारालत्वात् ठन्। देवागारे परिचरणार्थं नियुक्ते।

**देवाची** स्त्री देवानञ्चति व्रजे वा०नलोपः नाङ्ग्रादेशश्च ङीप्। १देवान् प्रति गच्छन्त्यां २देवानां पूजिकायां च "देवान् प्रत्यक्षया ऋषेति" यास्कोक्तेः देवान् प्रत्यक्षतया सामर्थ्यलक्षणायां ३ऋषायाञ्च "य ऊर्द्ध्या ऋधरो देवाच्या कृपा" ऋ०१। १२७।१ "कृपा ऋषेति" भा०

**देवाजीव** त्रि० देवं देवप्रतिमाद्रव्यमाजीवति जीव–अण् उपस०। (पूजारी) देवले। णिनि देवाजीवोत्यपत्र।

**देवाट** त्रि० देवा अटन्त्यत्र अट–आधारे घञ्। देवगत्याधारे पाटलिपुत्रादुत्तरस्यां गङ्गापारे वर्त्तमाने १हरिहरक्षेत्रे "यदा नन्दो मूलपाणिर्गोधनेन पुरस्कृतः। स्थितवान् तद्दिनादेव क्षेत्रं हरिहरात्मकम्। देवानामटनाच्चैव देवाट इति संज्ञितम्" वराहपु०। देवानटन्ति अट–अण् उप०स०। देवान् प्रति २गन्तरि त्रि०।

**देवातिथि** पु० गौरवन्यूपभेदे "ततश्चाक्रोधनस्तस्माद्देवातिथि रभूद्गुरुः" भाग० ६।२२।८

**देवातिदेव** पु० देवानतिक्रम्य दीव्यति अति+दिव–अच्। विष्णौ "देवातिदेवो भगवान् प्रस्तारेऽस्मिन् हरिर्यज्ञ जगत्प्रभेता" हरिवं० १५४अ०।

**देवात्मन्** पु० देव आत्मा यस्य। १अश्वत्थवृक्षे अश्वत्थशब्दे दृश्यम् कर्म०। २देवस्वरूपे च।

**देवाधिदेव** पु० देवानामधिदेवः। १सर्वेश्वरे परमेश्वरे २महादेवे च ३जिनदेवभेदे हेमच०।

**देवाधिप** पु०देवानामप्यधिपः। १सर्वनियन्तरि परमेश्वरे २द्वापरयुगीयबुद्धरूपभेदे स च त्रिकुम्भासुरनाशात् द्वापरे भूभावतार यथाह भा०स्या०६७अ०"त्रिकुम्भादजितः संख्ये महामतिरजायत। भूमौ भूमिपतिश्चेति देवाधिप इति स्मृतः"। ३इन्द्रे च "बलिं बद्ध्वा महादैत्यं शक्रो देवाधिपः कृतः" भा०उ० ६अ०

**देवानांप्रिय** त्रि० हृत०। "देवानां प्रिय इति च मूर्खे" वा० अनुक्रम०। १मूर्खे "पशवो हि देवानां प्रीतिं जनयन्ति इति तेषां प्रियास्तथा च तत्प्रियत्वेन पशुतुल्यता प्रतीयते इत्यतः पशुवन्मूर्ख इति तदर्थः" तत्त्ववो०। २छागे पुंस्त्री त्रिका०।

**देवानीक** पु० सावर्णस्य मनोर्मनोः पुत्रभेदे "संवर्त्तनः सुधर्मा च देवानीकः पृथुश्रवः" हरिवं०७अ० तत्पुत्रौ। सगरवंश्ये ३नृपभेदे च "क्षेमधन्वसुतस्त्वासीत् देवानीकः प्रतापवान्" हरिवं० १५अ०। हृत०। १देवानां सैन्ये न० "उग्रं तच्च महानादं देवानीकं महाप्रभम्" भा०द्रो० २२६अ०।

**देवानुक्रम** पु०वैदिकमन्त्राणां देवताज्ञापनायानुक्रमो यत्र। वैदिकमन्त्राणां देवताज्ञापके ग्रन्थभेदे। सामान्यतः छन्दोविशेषाणां देवताभेदाः सर्वानुक्रमणिकायामुक्ताः तत्र देवताशब्दे २६८२ पृ० "गायत्र्या ऋग्निरुष्णिहः सवितेत्यादि" वाक्यम् दर्शितम्।

**देवानुचर** त्रि० देवाननुचरति अनु+चर–ट। १देवपदाङ्कायिनि विद्याधरादौ उपदेवे "निशम्य देवानुचरस्य वाचं मनुष्यदेवः पुनरप्युवाच" रघुः। देवानुयायिनि देवानुगप्रभृतयोऽप्यत्र।

**देवान्तक** पु० हृत०। १राक्षसभेदे २दैत्यभेदे च।

**देवान्धस्** न० देवानामन्धस इव दर्शनेन प्रीतिकरम्। १अमृते हेमच०। देवाह्लादयोऽप्यत्र। देवयोग्यमन्नम्। २देवनैवेद्यार्थं श्रकल्पितेऽन्ने च "अनुपाकृतमांसानि देवान्नानि हवींषि च" मनुः।

**देवापि** पु० गौरवे प्रतीपराजपुत्रे नृपभेदे "प्रतीपस्य

अयः पुत्रा अजायन्त भरतर्षभ ! । देवापिः शान्तनुश्चैव बाह्लीकश्च महारथः । देवापिश्च प्रव्रव्राज तेषां धर्मेच्छितेऽप्यया" भा०आ० ९४अ० "कृतस्तस्य दिवीषोऽभूत् प्रतीपस्तस्य चात्मजः । देवापिः शान्तनुस्तस्य बाह्लीक इति चात्मजाः । पितुराज्यं परित्यज्य देवापिस्तु वनं गतः" भाग० ९।२२।११ "देवापिर्योगमास्थाय कलाप ग्राममास्थितः । सोमवंशे कलौ नष्टे कृतादौ स्थापयिष्यति" तत्रैव [ शब्दच० ।

**देवाभीष्ट** त्रि० ६त० । १देवानामभिलषिते २ताम्बूल्यां स्त्री

**देवायतन** न० ६त० । देवप्रतिमाश्रये "न देवायतनं गच्छेत् कदाचिदाऽप्रदक्षिणम् । न पीढ़येद्वा वस्त्राणि न देवायतनेष्वपि" कूर्मपु० "न जीर्णदेवायतने न वल्मीके कदाचन" मनुना तत्र मूलोत्सर्गः प्रतिषिद्धः ।

**देवायुध** न० ६त० । इन्द्रधनुषि सूर्यप्रतिकूलदिशि सजलजलधरयुक्ते गगने सूर्यकिरणप्रतिबिम्बेन जाते धनुराकारे पदार्थे हेम०इन्द्रायुधशब्दे ९५४पृ० दर्शितं तदुत्पत्तिकारणं द्रव्यम् । ६त० । २देवानामायुधे वज्रादौ च ।

**देवायुस्** न० ६त० ऋच् समा० । देवानां जीवनकाले "मन्त्रेणाऽऽहवनीये निर्वपति सुवीर्यस्य गार्हपत्ये द्राघीयो हि देवायुषम्" शत० ब्रा० ७।२।१।१०

**देवारण्य** न०देवप्रियं देवभूयिष्ठं वा अरण्यम् । १तीर्थभेदे "प्रयागे देवरण्ये देवारण्येषु चैव ह । भोगवत्यां महाराज ! कौशिक्यामथ्रमे तथा" भा०व०१८७अ० । ६त० । २देवनामारामे च "अलक्षद्योतयामासुर्देवारण्यमलंबिवर्तवः" रघुः ।

**देवारि** पु० ६त० । १असुरे "येन देवारयः सर्वे महायुधि निपातिताः" भा०द्रो० ८अ० ।

**देवार्पण** न० देवेषु अर्पणम् । देवोद्देशेन देयद्रव्यस्य तद्दानजन्यफलस्य वा त्यागे । देवेभ्योऽर्थ्यो यैः अर्पिकरणे ल्युट् । २ऋग्वेदादौ "पृथग्भूतानि चान्यानि यानि देवार्पणानि वै" भा० अनु०८ ६त० । "देवार्पणानि स्वयंभुवामानि पृथग्भूतानि मूर्तिमन्तीत्यर्थः" नीलक० ।

**देवार्य** पु० ऋद्वग्भेदे "अरिष्टनेमिस्तु नेमिर्धीरश्वरमतीर्थकृत् । महावीरो वर्द्धमानो देवार्यौ ज्ञातनन्दनः । गणा नवास्यर्षिसंघा एकादश गणाधिपाः" हेमच० ।

**देवार्ह** त्रि०देवानर्हति दाने अर्ह–अण् उप०स० । १देवाय दानयोग्ये २सुरपर्णे न० राजनि० ।

**देवालय** न० ६त० । १स्वर्गे २देवप्रतिमाभवने च शब्दार्थकल्प० । ३सहदेवीलतायां स्त्री राजनि० । [ कल्प० ।

**देवाला** स्त्री देव इवालति अल–अच् । रागिणीभेदे

**देवावास** पु० ६त० । १अश्वत्थवृक्षे त्रि० । २स्वर्गे ३देवप्रतिमाश्रये ४सुमेरौ च "देवावासः शुभः पुण्यो गिरिराजो हिरण्मयः" हरिवं० २३६अ०

**देवावी** पु० देवानवति अव–ईषणे औणादिक ई । १देवतर्पके सोमे "देवेभ्यस्त्वा देवाव्यं सृजामि" यजु० ७।२२। देवा अव्यन्ते तर्प्यन्तेऽस्मिन् आधारे ई । २देवतर्पणाधारे यज्ञे च "इमं नो देव ! सवितर्यज्ञं प्रणय देवाव्यम्" यजु० ११।८।

**देवावृध्** पु०देवा वर्द्धन्तेऽत्र वृध–क्विप् पूर्वपददीर्घः । पर्वतभेदे "देवावृत् पर्वतश्चैव तथा वै वालुको गिरिः" हरिवं० २३६अ० ।

**देवावृध** पु०देवा वर्द्धन्तेऽनेन वृध–करणे घञर्थे क दीर्घः । साल्वते नृपभेदे "सात्वतान् सत्वसम्पन्नान् कौशल्या सुषुवे सुतान् । भजिनं भजमानञ्च दिव्यं देवावृधं नृपम्" हरिवं० ३८अ० "ऊर्जं देवावृधो दत्त्वा सराष्ट्रोऽभ्यपतद्दिवम्" भा०आ० २३४अ०

**देवाश्व** पु० देवश्च मकरश्चाश्वः । उच्चैःश्रवसि अश्वे

**देवाहार** पु० देवयोग्य आहारः । १देवार्हे आहारे ६त० । २अमृते हेमच० ।

**देवाह्वय** पु० नृपभेदे "देवाह्वयः सुप्रतिमः सुप्रतीको बृहद्रथः" भा० आ० १अ० नानान्वयोक्तौ

**देविक** पु०अनुकम्पितो देवदत्तः मनुष्यनामवज्ञचकत्वेन ठन् । द्वितीयादेचः परस्य लोपः । १अनुकम्पिते देवदत्ते । दीव्यति दिव–ण्वुल् कापि अतइत्त्वम् । २नदीभेदे स्त्री "अर्द्धयोजनविस्तारां पञ्चयोजनमायताम् । एतावद्देविकामाहुर्देवर्षिपरिसेविताम्" पद्मपु० ३भुवनूरे भावप्र० देविकायां भवः अण् । एत आत् दाविक तत्रभवे त्रि० ।

**देविन्** त्रि० दिव–णिनि । क्रीडाकारके "राज्ञा सचिह्नं निर्वाह्याः कूटाक्षोपधिदेविनः" याज्ञ० ।

**देविय** पु० अनुकाम्पितो देवदत्तः वज्ञचकमनुष्यनामत्वात् च द्वितीयादेचः परस्य लोपः । अनुकम्पिते देवदत्ते ।

**देविल** त्रि० देव देवने इलच् । १धार्मिके । अनुकम्पितो देवदत्तः इलच् देवियवत् । २अनुकम्पिते देवदत्ते पु०

**देवी** स्त्री देवयति प्रवृत्तिनिवृत्त्युपदेशेन यथाधिकारं व्यवहारयति सर्वान् देव–णिच् अच् ङीप्, दीव्यति दिव–अच् पचादौ देवट् इति निर्देशात् टित्त्वात् ङीप्

देवस्य पत्नी ङीष् वा। ३देवपत्न्यां "देवीनां दक्षिणायने" स्मृतिः। देवसेनाशब्दे उदा० दृश्यम्। २दुर्गायाञ्च धरणी "नमोदेव्यै महादेव्यै शिवायै सततं नमः" "देव्या यया ततमिदं जगदात्मशक्त्या" इति च देवीमाहात्म्यम्। "सकृत् कृत्वा महा पूजां देवीपादजलं पिबेत्। न जातु जननीगर्भं गच्छेदिति विनिश्चयः" देवीभाग० "अपराधं परं कृत्वा देवीभक्तस्य को नरः। सुखं लभेत यदपि भवेत् त्राता शिवः स्वयं" इति देवीभाग० शक्रताभिषेकायां राजमहिष्याम् अमरः। ४मूर्वायां ५पृक्कायां च मेदि०। ६द्विजस्त्रीणामुपाधिभेदे "देव्यन्ताश्च स्त्रियः सर्वा दास्यन्ताः शूद्रयोनयः" कर्मविपाकः। ७आदित्यभक्तायां दक्षिदुहित्यां दनुभ्याकर्कोटक्यां १०शालपर्ण्यां ११महाद्रोण्यां १२पाठायां १३नामरसुस्रायाम्। १४ऋगेवोक्तायां १५हरीतक्याम् १६अतस्यां १७श्यामानामखगे च स्त्री राजनि०। १८रविसंक्रान्तौ तत्कालस्य यथा देवीस्वरूपत्वम् तथा एकादशीतिथिरपि यथा "अतीतानागतो भोगो नाड्याः पञ्चदश स्मृताः। सान्निध्यन्तु भवेत् तत्र यड्नाड्यां संक्रमे रवेः। व्यवहारो भवेल्लोके चन्द्रसूर्यौपलक्षितः। काले विकल्पते सर्वं ब्रह्माण्डं सचराचरम्। पुण्यपापविभागेन फलं देवो प्रयच्छति। एकाधिकक्रतं तस्मिन् कोटिकोटिगुणं भवेत्। धर्माद्विवर्द्धते ह्यायूराज्यं पुत्रसुखादि च। अधर्माद्व्याधिशोकादि विष्णुवायणसन्निधौ। विष्णुवेषु च यद्दत्तं अग्नं भवति चाक्षयम्। एवं विष्णुपदे चैव शुक्लोतिसुखेषु च" देवीपु०। "भोगोव्याप्तिः सङ्क्रमणकालसन्निधाने पुण्यतमत्वमिति यावदिति कल्पतरुः। वस्तुतस्तु भुज्यत इति भोगो भोग्यः रविसंक्रमणे अतीतानागतः कालो भोग्यत्वन्निमित्तपुण्यपापजननयोग्य इति यावत्। अतएव पुण्यपापविभागेन फलमित्युपसंहृतम्। स कालः क्रियानिष्पाद्य। नाड्याः पञ्चदशेति उभयतः पञ्चदशदण्डपुण्यत्वं दिवा विष्णुपदीविषयमिति तिथितत्त्वे वक्ष्यते। सान्निध्यमित्यादिना तस्यैव कालस्य स्तुतिः। विकल्पते स्वभावात् प्रच्यवते। देवी संक्रान्तिकालस्वरूपा संक्रान्त्युपक्रमे देवीपुराण एव "समायनस्तुलार्कांशः पञ्चोक्त्र क्रमेण तु। स्थूलसूक्ष्मविभागेन देवी सर्वगता विभो!"। इत्यभिधानात् "कलाकाष्ठादिरूपेण परिणामप्रदायिनी" इति मार्कण्डेयपुराणाच्च रघु०। तत्र कृताभिषेकायां राजमहिष्याम् "स्नातोऽनुलिप्तः सुरभिः सुवासी सुचिरभूषणः। स्नातां विगुह्यवसनां गच्छेद्देवीं सुभूषणाम्। न हि देवीगृहं गच्छेदात्मोयात् सन्निवेशनात्। अत्यर्थवल्लभोऽपीह विश्वासं स्त्रीषु न व्रजेत्। देवीसद्मगतं भ्राता भद्रसेनमसारयत्। मातुःशय्यान्तरे क्षीणं कारुण्यक्रोरवं सुतम्। राजान् विश्वेष संयोज्य मधुनेति विलोडितः। देवी तु कामीराजेन्द्रं निजधान रहोगतम्" कामन्दकीनीति०।

**देवीकोट** पु० शोणितपुरे बाणासुरपुरे त्रिका०।

**देवीन्धियक** पु० देवीं धियं इत्याद्यृतीकशब्दोऽस्ति अत्र अनुवाके अध्याये वा गोपदा० ठञ्। देवीं धियेत्याद्यृतीकयुक्ते अनुवाके अध्याये च।

**देवीपुराण** न० देव्यामाहात्म्यादियुक्ते उपपुराणभेदे

**देवीभागवत** न० देव्या माहात्म्यवेदकं भागवताख्यं पुराणम्। पुराणभेदे तद्धोपपुराणं कल्यान्तरे महापुराणं वेति उपपुराणशब्दे निर्णीतं तत्र द्रष्टव्यम्।

**देवीमाहात्म्य** न० दुर्ग०। मार्कण्डेयपुराणान्तर्गते "सावर्णिः सूर्यतनय इत्यादिके सावर्णिमन्वन्तरोत्पत्तिप्रतिपादके त्रयोदशाध्यायात्मके ग्रन्थभेदे "श्रोष्यन्ति चैव ये भक्त्या देवीमाहात्म्यमुत्तमम्" मत्स्यपु०।

**देवीरापसक** पु० देवीराप इत्याद्यृतीकमस्त्यस्यानुवाकस्य अध्यायस्य वा गोपदा० ठञ्। देवीराप इत्याद्यृतीकयुक्ते अध्याये अनुवाके च।

**देवीसूक्त** न० देव्याः तद्देवताकं सूक्तसूक्तसमुदायः। ऋग्वेदे शाकलसंहितायामतिप्रसिद्धे देवीदेवताके १सूक्तभेदे "रात्रिसूक्तं जपेदादौ मध्ये सप्तशतीं जपेत्। प्रान्ते तु जपनीयं वै देवीसूक्तमिति क्रमात्" मरीचिकल्पः। तत्रैव पुरश्चरणप्रकरणे "कृष्णाष्टमीं समारभ्य यावत् कृष्णचतुर्दशीम्। इह्यैकोत्तरमाज्ञाप्य पूर्वसंपुटितं तत्। एवं देव्या यथा प्रोक्तः पौरश्चरणिकः क्रमः। तदन्ते हवनं कुर्यात् प्रतिश्लोकेन पायसम्। रात्रिसूक्तं प्रति सूक्तं तथा देव्याश्च सूक्तकम्। कृत्वान्ते भजयेत् सोमादौ पूजादिकं सुते!" अत्र सुप्रभातीकारा आहुः। "पूर्वसंपुटितम् पूर्वाभ्यां पूर्वोक्ताभ्यां रात्रिसूक्तदेवीसूक्ताभ्यां संपुटितम्" प्रतिश्लोकेनेति मन्त्रविभागोपलक्षणम् कात्यायन्यादितन्त्रोक्तसप्तशतीविभागमन्त्रस्य हवनादिविधिं प्रति वाक्यशेषत्वेन तेनैव वैधपदार्थनिर्णयावश्यम्भावात्। रात्रिसूक्तदेवीसूक्ते च ऋग्वेदे

शाक्तसंहितायां प्रसिद्धे । तथेत्यनेन जपे क्रमः संपुटाकारो निर्दिश्यते तच्चाद्य पूर्वपरामर्शित्वात् । तस्य श्लोकपूरणमात्रार्थत्वं तु न न्याय्यम् । द्वाभ्यामपि सूक्ताभ्यां त्रिरावृत्तसप्तशतीश्लोमोत्तरमेव पाठक्रमानुसारेण होमः । "विश्वेश्वरीं जगद्धात्रीमिति" स्तवो रात्रिसूक्तम् । "नमोदेव्यै महादेव्यै इति" स्तवो देवीसूक्तमिति कश्चित् तन्न "प्रतिश्लोकं प्रतिऋचमिति" प्रतिनियतनिर्देशविरोधात् ऋक्सूक्तादिशब्दानां वैदिकमन्त्रेष्वेव रूढत्वप्रसिद्धेः । मत्स्यसूक्तमित्यादि काचित्कतान्त्रिकव्यवहारस्य केवलयौगिकत्वेनोपपत्तेः । तेन ऋक्पदस्य श्लोके लक्षणेत्यु क्तिरपि साहसमात्रम् । मसङ्गमनोध्यानादिविधौ ऋक्सूक्तयन्त्रपदयोः प्रतिनियतनिर्देशबलादेव लक्षणाव्यवस्थाया एव प्रकृते क्रुप्राया एव शक्तेर्व्यवस्थादार्ढ्यस्य कैमुतिकन्यायेनैव सिद्धेः । यदि त्वेवमालोच्यते "विश्वेश्वर्यादिकं सूक्तं दृष्टं तद्ब्रह्मणा पुरा । स्तुतये योगनिद्राया मम देव्याः पुरन्दर ! ॥ महिषासुरमारीसूक्तं सर्वसिद्धिप्रदं तथा । देव्या यशादिकं दिव्यं दृष्टं देवैः सहर्षिभिः । देवि ! प्रपन्नार्तिहरे ! प्रसीदेत्यादिकं तथा । नारायणीस्तुतिर्नाम सूक्तं परमशोभनम् । अस्याः स्तुतये दृष्टं ब्रह्माद्यैः सकलैः सुरैः । नमो देव्यादिकं सूक्तं सर्वकामफलप्रदम्" इति विशेषविहितवेषेण पाञ्चरात्रलक्ष्मीतन्त्रे व्यवहारदर्शनादेतेषां स्तोत्राणां मयौरुषेयत्वस्य सिद्धान्ततत्वाच्च सूक्तत्वव्यवहारो युज्यत एवेति । तदा कात्यायनीतन्त्रमते विश्वेश्वरीमिति श्लोकात् पूर्वं ब्रह्मोवाचेत्यस्य पाठाभावात्तदुत्तरमेव ततूपाठाच्च । त्वं स्वाहेत्यारभ्यैव स्तोत्रारम्भः तस्य च योगनिद्राप्रकरणादिदैवतत्वात् मरीचितन्त्रे रात्रिसूक्तपदेन निर्देश इति मनसि धेयं परं त्वेतत्तन्त्रमनुसरता विश्वेश्वरीमिति श्लोकेऽङ्गहोमदशायां न होतव्यम् । स्तोत्रान्तिमश्लोकस्य द्वेधा विभागोऽपि न कार्यः । देवीसूक्तेऽपि त्रेधा विभागोऽङ्गहोमे न विधेयः प्रधानविधिशेषत्वाङ्गविधावन्वयेन प्रतिऋचमिति पदे लक्षणाकल्पने मानाभावादित्यवधेयम्" । "नमोदेव्यै महादेव्यै इत्यादिके देवीमाहात्म्यस्य पञ्चमाध्यायस्थे देव्याः स्तुतिरूपे मान्त्रमन्त्रे च "स च तैस्यस्तपक्षेपे देवीसूक्तं परं जपन्" देवीभाग० तत्र गुप्तवतीकाराश्चाहुः "देवीसूक्तं बह्वृचेष्वतिप्रसिद्धमेकं, विश्वेश्वरीमित्यादीत्येके श्रीसूक्तमाथर्वणप्रसिद्धमित्यन्ये । वस्तुतस्तु देवीसूक्तं नमोदेव्या इत्यादिकं पञ्चमाध्यायस्थं स्तुतिरूपं तच्च सर्वदेवताकूटस्थाया महालक्ष्म्याः स्तोत्रं शुम्भादिवधार्थिभिर्ब्रह्मादिभिर्दत्तैः सर्वकोशपरिहारैश्चण्डीफलकं तत्कामाभ्यां ताभ्यां जप्यम् अनुपदं श्रुतत्वात् बुद्धिसन्निहितत्वाच्चेदमेव देवीसूक्तपदेनात्र गृहीतमुचितं लक्ष्मीतन्त्रसम्मतत्वायमर्थः इति प्रागेव निरूपितमित्यपरे "प्राणाधः संस्थितं बीजं व्योम बीजं हुताशनः । त्रिकोणबिन्दुनादाढ्यं प्रणवादि नमोऽन्तकम् । अस्त्रिकास्त्रिदिगं त्रेयं देवीसूक्तं परं श्रुतम्" इति क्वचित्पठिते ३मन्त्रभेदे च ।

**देव** पु० दिव–क्त । देवरे स्वामिनः कनिष्ठभ्रातरि अमरः ।

**देवेज्** पु० देवं यजते यज–क्विप् । देवयष्टरि

**देवेज्य** पु० देवानामिज्यः पूज्यः । सुराचार्ये जीवे शब्दर० ।

**देवेन्द्र** पु० ६त० । सुरेन्द्रे शक्रे "त्वमेव देवेन्द्र ! सदा निगद्यसे" रघुः ।

**देवेश** पु० ६त० । १देवनियन्तरि परमेश्वरे २महादेवे च "भगवांश्चापि देवेशो यत्र देवी च कीर्त्यते" भा० आ० ६२अ० । २तत्पत्न्यां स्त्री ङीष् । "देवेशि ! भक्तसुलभे ! परिवारसमन्विते ! । यावत्त्वां पूजयिष्यामि तावत्त्वं सुस्थिरा भव" तन्त्रसारः । ३विष्णौ पु० "देवेशो देवभृद्गुरुः" विष्णुस० देवेश्वरादयोऽत्र ।

**देवेशय** पु० देवे अधिष्ठातृतया शेते शी–अच् अलुक्स० । देवेषु अधिष्ठातृतया वासिनि १परमेश्वरे २विष्णौ च "अम्बुतेशय ! हिरण्येशय ! देवेशय ! कृशेशय !" भा० शा० ३४० अ० । [ शुशुचौ च पु० राजनि० ।

**देवेष्ट** त्रि० देवानामिष्टः । १देवानामभिलषिते २महादेवायां

**देवोद्यान** न० ६त० । देवानामुद्याने तद्भेदश्च नन्दनं चैत्ररथं वैभ्राजं सर्वतोभद्रमिति चत्वारि, त्रिकाण्डे तु वैभ्राजं मिश्रकं सिद्धसारथं चैत्ररथमिति उक्तामीति भेदः ।

**देवोकस्** न० ६त० । देवस्थाने सुमेरौ "राजमाल्यदेवौकःशैलयोर्मध्यखण्डगाः । रोहितकमवन्ती च तथा सन्निहितं सरः" सूर्यसि० ।

**देव्य** न० देवस्य भावः यञ् वेदे वा० न वृद्धिः । देवत्वे "महत्तद्दोदेव्यस्य प्रवाचनम्" ऋ० ४।३६।१ "देव्यस्य देवत्वस्य प्रवाचनं प्रख्यापकम्" भा० ।

**देश** पु० दिशति दिश–क्विप् । भूगोलान्तर्गते विभागभेदे जनपदशब्दे विवृतिः । विस्तरस्तु देशावलीमन्थस्य प्रामाण्ये

तत्र दृश्यः। [ष्ठेमच०। देश+स्वार्थे क। २देशशब्दार्थे
देशक त्रि० दिश–कर्त्तरि ण्वुल्। १उपदेष्टरि अनुशास्तरि
देशकारा(री) स्त्री रागिणीभेदे सङ्गीतशास्त्रम्। इयं च मेघरागस्य भार्य्या
देशधर्म्म पु० देशादृरूपः धर्मः। देशोचितधर्मे स च "अस्मिन् देशे य आचारः पारम्पर्यक्रमागतः" मनूक्तः "देशधर्मान् जातिधर्मान् कुलधर्मांश्च शाश्वतान्। पाषण्डगणधर्मांश्च शास्त्रेऽस्मिन्नुक्तवान् मनुः" मनुः शास्त्रविरोधस्थले देशधर्मः परित्याज्यः यथाह आ०ष्ट० सू० १।७ १ नारायणोपाध्यायः "वैदेहेषु सदाएव व्यवायोदृष्टः सच्छो तु "ब्रह्मचारिणौ स्त्रिरात्रमिति" ब्रह्मचर्यं विहितं तत्सच्छोक्तमेव कर्म कुर्य्यात् न देशधर्ममिति"।
देशना स्त्री दिश–णिच्–युच्। नियोगे विध्यादौ "एकोद्दिष्टादिश्राद्धादौ च्छासश्राद्धादि देशना" ति०त०व्यासः।
देशपरिच्छिन्न त्रि० ष०त०। अधिकरणैकदेशवर्तिनि सर्वाव्यापिनि। यथा संयोगादि।
देशभाषा स्त्री देशप्रचलिता भाषा श०त०। तत्तद्देशेषु प्रचलितभाषायाम् साधुभाषायाम्। "कृत्वा देशभाषाश्च जल्पन्तोऽन्योन्यमीश्वराः" भा०श० ४६ अ०।
देशराजचरित न०गद्यपद्यमयात्मके चम्पूभेदे सा०द०
देशरूप न० दिश–कर्म्मणि घञ् देशस्य दिग्भागस्य उचितस्य रूपम्। उचिते समञ्जसे अमरः "अधुना देशरूपेण यत्नयोगेन भारत!" भा०शा०१०७अ०। देश+प्रशंसायाम् रूपप्। २प्रशंसिते देशे च।
देशाखो स्त्री रागिणीभेदे सा च हिन्दोलरागस्य द्वितीय भार्य्या संगीतशास्त्रम्।
देशान्तर न० अन्योदेशः मयूर०स०। १देशभेदे तच्च स्फुटं परिभाषितं यथाह ब्रह्मसनुः

"वाक्षो यत्र विभिद्यन्ते गिरिर्वा व्यवधायकः। महानद्यन्तरं वापि तद्देशान्तरमुच्यते। देशनामनदीभेदात्निकटोऽपि भवेद् यदि। तत्तु देशान्तरं प्रोक्तं स्वयमेव व्यवस्थया। दशरात्रेण या वार्त्ता न श्रूयेताथवा पुनः"। ब्रह्मस्फुतिः "देशान्तरं वदन्त्येके षष्टियोजनमायतम्। चत्वारिंशद्वदन्त्येके त्रिंशदेके तथैव च" "द्व्युत्तरसप्तशतयवचनोक्तयामादियोजनादिभेदसामञ्जस्यार्थमेवं व्याख्यायते त्रिंशद्वैशिष्ट्ये त्रिंशद् योजनाभ्यन्तरे, द्वितीयवैशिष्ट्ये तदुपरि, एकवैशिष्ट्ये चत्वारिंशद्योजनोपरि, वाक्षोगिरिमहानद्यन्तरितत्वभेदाभावेऽपि व्यवधायकोपरि, वैदेश्यमिति शुद्धिचिन्तामणिः" शु०त०रघु०। "देशान्तरगते प्रेते" शु०त० "क्लीवे देशान्तरगते पण्डिते भिक्षुकेऽपि वा। योगशास्त्राभियुक्ते च न दोषः परिवेदने" उ०त०शातातपः
भूगोलस्थमध्यरेखातः पूर्वापरस्थे उत्तरदक्षिणस्थे वा योजनविशेषान्तररूपे चरसंज्ञके, २पदार्थे तत्स्वरूपं सि०शि० उक्तं तच्च चरशब्दे ८६८पृ० दर्शितम्। अधिकमत्र सि०शि० उक्तं तत्प्रदर्शितं दृश्यते

"यल्लङ्कोज्जयिनीपुरोपरि कुरुक्षेत्रादिदेशान् स्पृशत् सूत्रं मेरुगतं बुधैर्निगदिता सा मध्यरेखा भुवः" भू०"अक्षोपपत्तिर्गोले इदानीं देशान्तरमाह" ग्रन्थि० "यत्र रेखापुरे स्वाक्षतुल्यः पलभाद्विजस्यस्थानमध्यस्थितैर्योजनैः। खेटभुक्तिर्हृता स्वभूवेष्टनेनोद्धृता प्राग्घटं स्वं तु पश्चाद् घटे" भू० "अक्षोपपत्तिस्त्रैराशिकेन गोलेऽभिहिता च। इदानीं देशान्तरघटिका चाह" ग्रन्थि० "प्राग्भूविभागे गणितोत्थकालादनन्तरं प्रग्रहणं विधोः स्यात्। यादौ हि पश्चाद्विवरे तयोर्वा भवन्ति देशान्तरनाडिकास्ताः। तद्वृत्तं स्फुटं घटिहृतं कुदत्तं भवन्ति देशान्तरयोजनानि। घटीगुणा घटिहृता दोर्भुक्तिः स्वर्णं यदे चोक्तवदेव कार्यम्। अर्कोदयादूर्द्धमथ ताभिः प्राच्यां प्रतीच्यां दिनप्रग्रहस्तिः। अर्द्धं तथाधस्थरनाडिकाभी रवावुदग्दक्षिणगोलयाते" भू०। "यः किल मध्यरेखाया अपरिज्ञानात् ततः प्राक् पश्चाद्वा स्थितोऽस्मीति न वेत्ति तेनैवं ज्ञातव्यम्। विधुग्रहणदिने घटिकायन्त्रेण स्पर्शकाले रात्रिगतं ज्ञेयम्। अथ च गणितेन स्पर्शकालो ज्ञेयः। गणितोत्थकालादनन्तरं ग्रग्रहणं यदि दृष्टं तदा दृष्टा रेखातः प्राग्भूविभागे। यतो दृष्टा यथा यथा रेखातः प्राग्व्रजति तथा तथा रेखोदयात् प्रागेवार्कोदयं पश्यति। इतोऽन्यथा चेत् तदा पश्चाद् दृष्टा। इमं पैग्रहणग्रग्रहणकालयोरन्तरं देशान्तरघटिकाभिर्गुणं घटया हृतं स्वभूवेष्टनम्। एवमनुपातादेशान्तरयोजनानि। अथ वा किं योजनैः। यदि घटीग्रहया गतिर्लभ्यते तदा देशान्तरघटीभिः किमिति। एवं यत् फलमुत्पद्यते तत् प्राग्घटं पश्चाद्दृनमिति युक्तमुक्तम्। तथा प्राच्यां ताभिर्घटीभिर्दिनचारग्रहस्तिरर्कोदयादूर्द्धं भवति। प्रतीच्यां तु तथाधः। यतो ब्रह्मोदये वारादिः। अतएव च रवावुत्तरगोलस्थे चरार्द्धघटिकाभिरूर्द्धम्। यतस्तदोन्मण्डलं क्षितिजादूर्द्धम्। दक्षिणे

त्वधोऽतस्तत्तोदयादधो धारयद्वत्तिरिति सर्वं निरवद्यम्" धर्मि० ।

**देशिक** त्रि० देशे प्रभितः ठन् । १पथिके हेमच० । देश उपदेशः तत्र प्रभितः । २गुर्वादौ "धर्मार्थां देशिकः साक्षात् स भविष्यति धर्मभाक्" भा०व०१४७अ० ।

**देशिन्** त्रि०दिशति दिश–णिनि । १देशके स्त्रियां ङीप् मा च २तत्पर्य्यायां शब्दच०"कनिष्ठादेशिन्यङ्गुष्ठमूलान्तयं करस्य च । प्रजापतिपितृब्रह्मदेवतीर्थान्यनुक्रमात्" याज्ञ०

**देशी** स्त्री रागिणीभेदे सा च दीपकरागस्य भार्य्या

**देशीय** त्रि० देशे भवः छ० । देशभवे "इति पाश्चात्य देशीयाः पठन्ति" रघु० "स्मरते कर्षमूलेषु यच्च देशीय भाषया । दम्पत्योर्जल्पितं मन्दं मन्मनं तद्विदुर्बुधाः" कामशास्त्रम् ।

**देशित** त्रि० दिश–णिच् कर्मणि क्त । उपदेशप्रेरिते "काकेभ्यो रक्ष्यतामन्नमिति बालोऽपि देशितः । उपघातप्रधानत्वान्न शादिभ्योऽपि रक्षति" मीमांसाकारिका ।

**देशीयवराडी** पु० रागिणीभेदे "देशीयवराडीरूपकतालेन गीयते" गीतगो०

**देश्य** त्रि० दिश–कर्मणि यत् । १उपदेश्ये २पूर्वपदे न० शब्दरत्ना० देशे भवः दिगा० यत् । ३देशभवे त्रि० यस्य यकर्मधारये तत्पुरुषे उत्तरपदस्यस्य वर्ज्यो० वाद्युदात्तता ।

**देष्ठ** त्रि० अतिशयेन दाता दाह+अतिशायने इष्ठन् ज्यो०लोपे गुणः । दातृतमे "वसुदेष्ठः श्रुष्टये भुवः" ऋ०८।६।६

**देष्णु** त्रि० दा–इष्णुच् गुणः । दातरि उज्ज्वल०

**देह** पु०न० दिह–घञ् । १शरीरे च च स्थूलसूक्ष्मकारणभेदात् त्रिविधः । अङ्गशब्दे मात्रशब्दे च विवृतिः सूक्ष्मदेहस्यैव भोगो ब्रह्मवैवर्त्ते० दर्शितो यथा

तत्र यमं प्रति सावित्र्याः "सूक्ष्मदेहे भवसाङ्गते यानि लोकान्तरं नराः । केन देहेन वा भोगं भुञ्जते च शुभाशुभम् । देहो वा कियिधो ब्रह्मन् ! तन्मे व्याख्यातुमर्हसि" तत्र यमस्योत्तरम् "शृणु देहविचारणं कथयामि यथागमम् । पृथिवी वायुराकाशस्तेजश्चोक्तमिति स्फुटम् । देहिनां देहबीजञ्च सृष्टेः सृष्टिविधौ परम् । पृथिव्यादिपञ्चभूतैर्यो देहो निर्मितो भवेत् । स क्षत्रियो नश्वरश्च भक्षसाङ्गो भवेदिह । इङ्गालकुक्कुटप्रख्यश्च यो जीवः पुरुषः स्मृतः । बिभर्त्ति सूक्ष्मदेहन्तं तद्रूपं भोगहेतवे । स देहो न भवेद्ब्रह्मन् ज्वलदग्नौ यमालये । जलेन नष्टो देहो वा प्रहारे क्षुचिरे कृते । न शस्त्रे च न चास्त्रे च न तीक्ष्णकण्टके तथा । तप्तभ्रष्टे तप्तकीले तप्तपाषाण एव च । तप्तप्रतिमाङ्गेऽप्यत्यन्तं पतनेऽपि च । न च दग्धो न भस्मत्व भुक्तेऽसंशयमेव च । कथितं देहसंस्थानकारणञ्च यथागमम् स्थूलञ्च नश्वरः । "जन्मवन्त इमे देहा नित्यस्योक्ताः शरीरिणः" गीता । सूक्ष्मादिवैविध्यं सां०का०त०कौ०

"सूक्ष्मा मातापितृजाः सह प्रभूतैस्त्रिधा विशेषाः स्युः । सूक्ष्मास्तेषां नियताः मातापितृजा निवर्त्तन्ते" सां०का० "त्रिधा विशेषाः स्युः । तानू विशेषप्रकारानाह सूक्ष्मा इत्यादि सूक्ष्मदेहाः परिकल्पिताः (१) मातापितृजाः षाट्कौशिकाः तत्र मातृतो लोमशोणितमांसानि, पितृतस्तु स्नाय्वस्थिमज्जान इति षट्कोशगणः । प्रकृतानि महान्ति भूतानि प्रभूतानि तैः सह सूक्ष्मशरीरमेकोविशेषः मातापितृजो द्वितीयः महाभूतानि तृतीयः । महाभूतवर्गे च षडादीनां निवेशः इति । सूक्ष्ममातापितृजयोर्द्वयोर्विशेषमाह सूक्ष्मास्तेषां विशेषाणां मध्ये ये, ते नियताः, नित्याः मातापितृजा निवर्त्तन्ते रसान्ना वा भक्षान्ना वा विड्ना वेति सूक्ष्मशरीरं विभजते" त०कौ०

"पूर्वोत्पन्नम(ण)सक्तं नियतं महदादिसूक्ष्मपर्यन्तम् । संसरति निरुपभोगं भावैरधिवासितं लिङ्गम्" सां०का० प्रधानेनादिसर्गे प्रतिपुरुषमेकैकमुत्पादितम् चस(ण)मव्याकृतं शिलामयमनुविशति नियतम् या 'वादिसर्गात् या च महाप्रलयादवतिष्ठते । महदादिसूक्ष्मपर्यन्तं महदहङ्कारैकादशेन्द्रियपञ्चतन्मात्रपर्यन्तम् एषां समुदायः सूक्ष्मशरीरं शान्तघोरमूढैरिन्द्रियैरन्वितत्वाद्विशेषः । नन्वस्त्येतदेव शरीरं भोगायतनं पुरुषस्य, कृतं दशप्रमाणेन षाट्कौशिकेन शरीरेणेत्यत आह संसरतीति उपात्तस्य पात्तं षाट्कौशिकं शरीरं जहाति छायं छायं चोपादत्ते कस्मात् ? निरुपभोगं यतः, षाट्कौशिकं शरीरं विना सूक्ष्मं शरीरं निरुपभोगं, तस्मात्संसरति । ननु धर्माधर्मनिमित्तः संसारः न च सूक्ष्मशरीरस्यास्ति सम्भोगः, तत्कथं संसरतीत्यत आह भावैरधिवासितं धर्माधर्मज्ञानाज्ञानवैराग्यावैराग्यैश्वर्यानैश्वर्याणि भावास्तदन्विता बुद्धिः तदन्वितञ्च सूक्ष्मशरीरमिति तदपि भावैरधिवासितं यथा सुरभिचन्दनसम्पर्कादुदकं तदामोदवासितमवति तथाद्भावैरेवाधिवासितत्वात्संसरति । कस्मात्पुनः प्रधानमिव महाप्रलयेऽपि तच्छरीरं न तिष्ठतीत्यत आह

लिङ्गम् नयं गच्छतीति लिङ्गं हेतुमत्त्वेन चास्य लिङ्गत्वमिति भावः" त०कौ०। परिकल्पिता इत्यस्य अनुमिता इत्यर्थः तत्प्रयोगश्च परलोके कर्मफलभोगः सूक्ष्मदेहं विनाऽनुपपन्नः भोगत्वात् स्थूलसदेहारब्धकर्मादिजनितस्य यस्य स्वदेहेनैव भोगवत् यद्यत् स्वदेहारब्धं कर्मफलं तत्तत् स्वदेहेनैव भोग्यं नेतरेण अन्यथा कृतहान्यकृताभ्यागमप्रसङ्ग इत्यादि तर्कशास्त्रानुसन्धातव्यः।

"किन्तु देहमयोनिजम्" भाषा० "देहात्प्रलयो यद्वत् प्रमाणत्वेन कल्पितः" या०भा०कारिका "देहिनोऽस्मिन् यथा देहे कौमारं यौवनं जरा। तथा देहान्तरप्राप्तिः" गीता। उत्पत्तिस्थानभेदैः देहचतुर्विधः "देहचतुर्विधोत्पत्तौ जलोद्भवोत्पत्तिभेदतः। उद्भिज्जः स्वेदजोऽण्डोत्थजरायुजः" राघवभट्टधृतवाक्यम्। ज्योतिषोक्ते २लग्ने च "देहाधीशः स्वगेहे बुधगुरुकविभिः संयुतो वीक्षितो वा" जातका०। दिह-भावे क्विप्। ३क्षेपणे पु०

देहकर्तृ त्रि० देहं करोति कृ-तृच्। १देहकारके पृथिव्यादिभूते २ईश्वरे ३सूर्ये च पु० कर्मसाक्षित्वात्तयोक्तथात्वम् "देहकर्त्ता प्रधानात्मा विश्वात्मा विश्वतोमुखः" भा०व० ३अ०। सूर्यनामोक्तौ।

देहकृत् त्रि० देहं करोति कृ-क्विप्। १देहकारके पृथिव्यादिभूते। २परमेश्वरे पु० "स एष भगवान् देवः" इत्युपक्रमे "देहकृत् देहभृत् देही" भा०अनु० १६अ० देवस्तुतिः। (पाखा) शब्दच०।

देहकोष पु० देहस्य कोष इव। देहाकारके खगानां पक्षे

देहक्षय पु०देहस्य क्षयो यस्मात्। १रोगे शब्दच०। २मृत०। २देहस्य नाशे च।

देहज पु० देहात् जायते जन-ड। १तनुजे पुत्रे "द्वैपायनादनवरो महित्वे तस्य देहजः"। २पुत्र्यां स्त्री। ३देहजातमात्रे त्रि० "अहितो देहजो व्याधिर्हितमारण्यमौषधम्" उद्भटः।

देहद पु० देहं दायति शोधयति देहं देहपुष्टिं ददाति रसायनेन वा दै-शोधने दा-दाने वा क। १पारदे राजनि०। २देहदातरि त्रि०।

देहधारक न० देहं धारयति धारि-ण्वुल्। १अस्थि देहधारिणि २शरीरिमात्रे त्रि०। णिनि। देहधारिन् तत्रार्थे स्त्रियां ङीप्। "संस्थिता परमा माया देहिनां देहधारिणी" ति०त० स्कं०प्रभा०ख०।

देहधि पु० देहोधीयतेऽत्र धा-आधारे कि। देहाधारे खगानां देहावरके पक्षे (पाखा) शब्दचन्द्रिकाकोषः।

देहधृज् पु० धृज-गतौ क्विन्। प्राणवायौ "वायुर्यो वक्षसञ्चारी स प्राणो नाम देहधृक्" सुश्रु०। २देहधारकमात्रे मनुष्यादौ त्रि०।

देहभुग् त्रि० देहे भुङ्क्ते कर्मफलानि भुज-क्विन्। १देहाभिमानिनि जीवे। देहं भुङ्क्ते भोजयति कर्मसाक्षित्वात् भुज-अनभूतप्रथमार्थे क्विन्। २सूर्ये पु० "देहभुग् देहिनां गतिः" भा० अनु० १६ अ० सूर्यनामोक्तौ।

देहभृत् पु० देहं बिभर्त्ति स्वकर्म्मानुसारेण भृ-क्विप्। स्वस्वकर्म्मानुसारेण देहाधिष्ठातरि कर्म्मात्मनि १जीवे। "कर्म्मात्मा त्वपरो योऽसौ बन्धमोक्षैः संयुज्यते" सा०प० भा०धृतवाक्ये तस्य कर्मयोगेन देहसम्बन्धरूपस्य बन्धस्योक्तेश्चाद्यत्वम्। "धिगमां देहभृतामसारताम्" रघुः।

"मनुष्योऽहं ब्राह्मणोऽहं स्थूलोऽहमित्याद्यभिमानेनाबाधितेन देहं कर्माधिकारहेतुं वर्णाश्रमादिरूपं कर्तृत्वभोक्तृत्वाद्याश्रयं स्थूलसूक्ष्मशरीरेन्द्रियसङ्घातं बिभर्त्ति अनाद्यविद्यावासनावशात् व्यवहारयोग्यत्वेन, कल्पितमसत्यमपि सत्यतया स्वभिन्नमपि स्वाभिन्नतया पश्यन् धारयति पोषयति वेति देहभृत्। २विवेकज्ञानशून्ये अविद्यावति कर्तृत्वाभिमानिनि। स च त्रिविधः। रागादिदोषप्राबल्यात् काम्यनिषिद्धादिवर्जनेष्टकर्मानुष्ठायी भोगशास्त्राधिकार्येकः १। अपरस्तु यः प्राक्तनः सुकृतवशात् किञ्चित् प्रक्षीणरागादिदोषः सर्वाणि कर्माणि त्यक्तुमशक्नुवन् निषिद्धानि काम्यानि च परित्यज्य नित्यानि नैमित्तिकानि च कर्माणि फलाभिसन्धित्यागेन सत्त्वशुद्धयेऽनुतिष्ठन् मोक्षशास्त्राधिकारी द्वितीयः २। ततो नित्यनैमित्तिककर्मानुष्ठानेनान्तःकरणशुद्धौ सत्युपजातविविदिषः श्रवणादिना वेदनं मोक्षसाधनं सम्यग्वेदयिषुः सर्वाणि कर्माणि विधितः परित्यज्य ब्रह्मनिष्ठं गुरुमुपसर्पति विविदिषासन्यासिसमाख्यस्तृतीयः ३।

देहभर त्रि० देहं बिभर्त्ति भृ-वा० खच् मुम् च। देहपोषके "जनेषु देहम्भरवार्तिकेषु" भाग०५।५।४

देहयात्रा स्त्री देहस्य लोकान्तरे यात्रा, देहरक्षार्थं यात्रा उद्यमादि वा। १यमपुर्यादिगमने मरणे २देहरक्षार्थं भोजनादौ च मेदि० "अयं देहयात्रामात्रार्थमिच्छानिच्छापरेच्छाप्रापितानि सुखदुःखसञ्चयान्यारब्धफलान्य-

नुभवन्" वेदान्तसा० "क्षतीव भर्तुर्मृतधर्मनिष्ठया शुश्रूषया चार्यया देहयात्रया" भाग०४।२२।७ आर्षः टाप्।

**देहला** स्त्री देहं भृतिभेदं राति ददाति सेवनात् रा–क रस्य लः। मद्ये शब्दच०।

**देहलि(ली)** स्त्री देहं सेवनं लाति गृह्णाति आधारत्वेन ला–बा० कि वा ङीप्। द्वारपिण्डयाम् (देओयाल) शब्दर०। "विन्यस्यन्ती भुवि गगनया देहलीदत्तपुष्पैः" मेघदू०। अमरादौ क्षुद्रान्तपाठः स च पुं।

**देहवत्** त्रि० देह+अस्त्यर्थे मतुप् मस्य वः। देहाभिमानिनि जीवे "अव्यक्ता हि गतिर्दुःखं देहवद्भिरवाप्यते" गीता।

**देहवायु** पु० देहस्थो वायुः। प्राणादिवायुपञ्चके तिका०।

**देहसाम्य** न० ६त०। अङ्गानां समत्वे। तल्लक्षणञ्च यथा "अङ्गानां समतां विद्यात् समे ब्रह्मणि लीयते। नो चेद्वैषम्यमानत्वमृजुं शुष्कद्रुवत्" शब्दार्थचि० धृतवाक्ये।

**देहसार** पु० ६त०। मज्जनि धातौ राजनि०।

**देहातीत** पु० देहं देहाध्यासमतीतः। घटादिवत् देहस्य दृश्यत्वेन तदभिमानशून्ये विदुषि।

**देहात्मवादिन्** पु० देहमात्मानं वदति वद–णिनि। चार्वाके तस्य यथा देहात्मवादित्वं तथा चार्वाकशब्दे २६२१ पृ० दर्शितम्।

**देहात्मप्रत्यय** पु० देहस्यात्मतया प्रत्ययः। देहे आत्मत्वेन अभिमाने "देहात्मप्रत्ययो यद्वत् प्रमाणत्वेन कल्पितः। लौकिकं तद्वदेवेदं प्रमाणं स्वाऽऽत्मनिश्चयात्" या०भा०धृ० कारिका

**देहाध्यास** पु० देहस्य तद्धर्मस्य वा आत्मतया तद्धर्मतया वा अध्यासः भ्रमः। देहधर्मस्य मनुष्यत्वादेरात्मधर्मतया बोधे। यथा मनुष्योऽहं क्षत्रियोऽहं गौरोऽहमित्यादि देहधर्मस्य आत्मनि भ्रमः।

**देहिका** स्त्री दिह–ण्वुल्। कीटभेदे उपजिह्विकायां तिका०

**देहिन्** स्त्री देहाः सर्वे भूतभविष्यद्वर्त्तमाना अनन्तब्रह्मवर्तिनोऽस्य सन्तीति इनि। १देहतादात्म्याध्यासापन्ने जीवे, एकस्यैव विभुत्वेन सर्वदेहयोगित्वाद्विभुदेहोपाधिरात्मा देहीत्युच्यते। २देहाभिन्नात्मदर्शिनि च। जीवन्न विद्वांस्तेन प्रकारेण परमेष्ठे तत्पूजापरिभवादिभिरप्रदुष्टप्रज्ञविगीदन्नहङ्कारममकारशून्यस्तिष्ठति। यतो हि देहतादात्म्याभिमानाद् देहमात्मतयाऽभिमन्यमानः देहाधिकरणमेवात्मनोऽधिकरणं मन्यमानो मन्दे भूमावासने वाऽहमासे इति मन्यते न तु देहे क्वापि इति "देहिनामदृढयोगमंहसाम्" माघः।

**दै** शोधने भ्वा०पर०सक० शुद्धौ अक० अनिट् पित् तेन न वुसंज्ञा। दायति अदासीत् ददौ दायात् दायते दातः। दातिः। [ क्षितौ गौरः" अमरः।

**अव+दै** तीभावे अक० अवदायति शुक्लीभवति "अवदातः

**दैतेय** पुंस्त्री दितेरपत्यं ढक्। दितेरपत्ये असुरे अमरः। "दैतेयाश्चाप्यदैतेयाः परस्परजयैषिणः" हरिवं०२१४ अ०। स्त्रियां ङीप्। "दैतेयी चासुरी प्रजा" भा०आ० २२७अ०।

**दैत्य** पु० दितेरपत्यं यत्। दितेरपत्ये अमरः। "दैत्यदानवयक्षाणां गन्धर्वोरगरक्षसाम् मनुः। योषधत्वात् जातावपि स्त्रियां टाप्। [दैत्यगुरुस्तुतौ" ह०सं० १०४अ०।

**दैत्यगुरु** पु० ६त०। शुक्राचार्ये अमरः। "शत्रुक्षयान्

**दैत्यदेव** पु० ६त०। १वरुणे त्रिका०। २गयौ हेम०।

**दैत्यद्वीप** पु० गरुडात्मजभेदे "दैत्यद्वीपः परिद्वीपः सारसः पद्मकेतनः" भा०उ० १०० अ० गरुडात्मजोक्तौ

**दैत्यधूमिनी** स्त्री तारादेव्यर्चनाङ्गे सङ्घभेदे "तारार्चने विशेषास्तु कथ्यन्ते पञ्च सङ्घिकाः। योनिश्च भूतिनी चैव बीलाख्या दैत्यधूमिनी। खेचिरानेति संयोक्ताः पञ्च सङ्घा विलोकिताः" तन्त्रसारे उद्धृत "दानवधूमकेत्यपरनामतया सा लक्षिता यथा "परिवर्त्त्य करौ सव्यौ कनिष्ठाङ्गुष्ठमध्यमे। अनामायुगलं चाधस्तर्ज्जनीयुगलं पृथक्। अन्योऽन्यं निविडां बद्धाङ्गुष्ठाग्रे ऽनामिकां ततः। दानवधूमकेत्याख्या सङ्घैषा कथिता प्रिये!"।

**दैत्यनिसूदन** पु० दैत्यान् निसूदयति क्षिणोति नि+सूदि–णिच–ल्यु। विष्णौ तस्य दानवारित्वात्तथात्वम्।

**दैत्यपति** पु० ६त०। हिरण्यकशिपौ। "प्राणच्छिदां दैत्यपतेर्नखानाम्" माघः।

**दैत्यपुरोधस्** पु० ६त०। शुक्राचार्ये हारा० "जिगीषया ततो देवावब्रिरेऽङ्गिरसं सुनिम्। पौरोहित्येन याज्यार्थे काव्यं त्वशनसं परे" भा०आ० ७६अ० तस्यासुरपौरोहित्यवरणसङ्गम्। दैत्यपुरोहितादयोऽप्यत्र।

**दैत्यपूज्य** पु० ६त०। शुक्राचार्ये "कनकनिकषगौरे व्याधयो दैत्यपूज्ये" ह०सं० ६अ०।

**दैत्यमातृ** स्त्री ६त०। कश्यपपत्नीनां कवत्वे १दितौ उपचारात् तेषां विमातृषु २अदित्यादिषु तत्कवत्वेषु च "अदितिर्दितिर्दनुश्चैव सिंहिका दैत्यमातरः" हरिवं० १६८अ०।

दैत्यमेदज पु० दैत्यस्य मेदाज्जायते जन–ड । १गुग्गुलौ २पृथिव्यां स्त्री राजनि०मधुकैटभमेदजातत्वात्तस्याक्षयात्वम्

दैत्ययुग न० ६त० । दैवयुगवत् द्वादशसहस्रमितवर्षेषु ब्रह्मवैवर्तकल्पतरुः । दैवयुगशब्दे दृश्यम् ।

दैत्या स्त्री दितेरियम् यञ टाप् । १सुरायां त्रिका० २सुरानामगन्धद्रव्ये अमरः । ३चक्षुरोषधौ मेदि० वोपधत्वात् जातावपि टाप् । ४दैत्यजातिस्त्रियाम् । [मेदि० ।

दैत्यारि पु० ६त० । १विष्णौ अमरः । २देवतामात्रे च

दैत्याहोरात्र पु० ६त० । मानुषे वर्षे ब्रह्मवैवर्तकल्पतरुः तन्मानस्य देवमानतुल्यत्वात्तथात्वम् ।

दैत्येज्य पु० ६त० । दैत्यगुरौ शुक्राचार्ये । [भवे त्रि० ।

दैन न० दीनस्य भावः । १दीनत्वे दिने भवः अण् । २दिन-

दैनन्दिन त्रि० दिनं दिनं भवः वीप्सायां द्वित्वम् अत्वन्-संयोगे द्वितीया ततो भवार्थे अण् अचि परे द्वितीय विभक्तेर्लुक् मध्यस्थायास्तु प्रत्ययपरत्वाभावान्न लुक् । दिने दिने भवे प्रलये "एष दैनन्दिनः सर्गो ब्राह्म स्त्रैलोक्यवर्तनः । तिर्यक्नृपितृदेवानां सम्भवोयत्र कर्मभिः" भाग० ३।११।२७।

दैनन्दिनप्रलय पु० ६त० । ब्रह्मणः स्वमानानुसारेण प्रतिदिनावसाने सर्वसृष्टवस्तूनां क्षये प्रलयविशेषे "चतुर्दशेन्द्रावच्छिन्नं ब्रह्मणो दिनमुच्यते । तावती ब्रह्मणो रात्रिः सा च ब्राह्मी निशा नृप ! । कालरात्रिश्च सा प्रोक्ता वेदेषु परिकीर्तिता । एवं सप्रकल्पजीवी मार्कण्डेयो महातपाः । ब्रह्मलोकादधः सर्वे लोका दग्धाश्च तत्र वै । उत्थितेनैव महसा सङ्कर्षणमुखाग्निना । चन्द्रार्कब्रह्मपुत्राश्च ब्रह्मलोकं गता द्रुतम् । ब्रह्मरात्रे व्यतीते तु पुनश्च सृष्टये विधिः । तस्य ब्राह्म्यां निशायाञ्च क्षुद्रप्रलयसम्भवः । एवं त्रिंशद्दिवारात्रैर्ब्रह्मणो मास एव च । वर्षं द्वादशमासैश्च ब्रह्मसम्बन्धि चैव हि । एवं परिमितात्तेऽब्दे च गते च ब्रह्मणो नृप । दैनन्दिनस्तु प्रलयो वेदेषु परिकीर्तितः । अहोरात्रश्च स प्रोक्तो वेदविद्भिः पुरातनैः । तत्र सर्वे प्रनष्टाश्च चन्द्रार्कादिदिगीश्वराः । आदित्यावसवो रुद्रा मन्विन्द्रा मानवादयः । ऋषयो मनवश्चैव गन्धर्वा राक्षसादयः । मार्कण्डेयो लोमशश्च मेधक-विरजोविनः । इन्द्रद्युम्नश्च नृपतिश्चाकूपारश्च कच्छपः । नाडीजङ्घो वकश्चैव सर्वे नष्टाश्च तत्र वै । ब्रह्मलोकादधः सर्वे लोका नाशालयात्तथा । ब्रह्मलोकं ययुः सर्वे ब्रह्मलोकादधस्तथा । गते दैनन्दिने ब्रह्मा लोकांश्च सृजते पुनः । एवं शतायुःपर्यन्तं परमायुश्च ब्रह्मणः" ब्र०वै०प्र० ।

दैनिक त्रि० दिने भवः "कालाट् ठञ्" पा० ठञ् । दिनभवे स्त्रियां ङीप् । सा च दिने क्रियमाणकर्मभृतौ अमरः ।

दैर्घवरत्र पु० दीर्घरत्रेण निर्वृत्तः कूपः अण् । दीर्घरज्ज्वाकृष्टदण्डखननेन निष्पादिते कूपे ।

दैर्घ्य न० दीर्घस्य भावः ष्यञ् । दीर्घतायाम् ।

दैन्य न० दीनस्य भावः ष्यञ् । १दीनत्वे, कार्पण्ये च । "दौर्गत्यादौरनौत्सर्गं दैन्यं मलिनतादि कृत्" सा०द० उक्ते २व्यभिचारिगुणभेदे च "दैन्यचिन्तामुनिश्वासवैवर्णौच्छ्वसितादिकृत्" सा०द० "इन्दोर्दैन्यं त्वदनुसरणक्लिष्ट कान्तेर्विभर्त्ति" मेघ० ।

दैलीपि पु० दिलीपस्यापत्यम् इञ् । दिलीपापत्ये ततः तौल्वला० युवप्रत्ययस्य फको न लुक् । दैलीपायन-स्तदीय युवापत्ये ।

दैव त्रि० देवादागतः अण् । १भाग्ये फलोन्मुखे शुभाशुभकर्मणि "दैवाधीनं जगत्सर्वं जन्मकर्म शुभाशुभम् । संयोगाश्च वियोगाश्च न च दैवात् परं बलम् । लक्षायत्तञ्च तद्दैवं स दैवात् परतस्ततः । भजन्ति सततं भक्ताः परमात्मानमीश्वरम् । दैवं वर्द्धयितुं शक्तुं क्षयं कर्तुं खलीलया । न दैवबद्धस्यक्षयवाधिनाशी च निर्गुणः" इति ब्र०वै०मते० । मनुरुवाच । "दैवे पुरुषकारे च किं ज्यायस्त्वदुच्यतां हि मे । अत्र मे संशयो देव ! छेत्तुमर्हस्यशेषतः" मत्स्य उवाच "स्वमेव कर्म दैवाख्यं विद्धि देहान्तरार्जितम् । तस्मात् पौरुषमेवेह श्रेष्ठमाहुर्मनीषिणः । प्रतिकूलं तथा दैवं पौरुषेण विहन्यते । मङ्गलाचारयुक्तानां नित्यमुत्थान शीलिनाम् । तेषां पूर्वकृतं कर्म सात्विकं मनुजोत्तम ! । पौरुषेण विना तेषां क्षयाद्विद्धि प्रजायते फलम् । कर्मणा जायते लोके राजसस्य तथा फलम् । कृच्छ्रेण कर्मणा विद्धि तामसस्य तथा फलम् । पौरुषेणाप्यते राजन् ! मार्गितव्यं फलं नरैः । दैवमेव विजानन्ति नराः पौरुष वर्जिताः । तस्माद्धि कालसंयुक्तं दैवेन सफलं भवेत् । पौरुषं दैवसम्पत्त्या काले फलति पार्थिव ! । दैवं पुरुष कारश्च कालश्च मनुजोत्तम ! । त्रयमेव मनुष्यस्य सिद्धेः स्यात् फलावहम् । क्षणेर्द्दित्समायोगात् क्षणे फलसिद्धयः । तासु काले प्रदक्षणे नैवाकाले कथञ्चन । तस्मात् सदैव कर्तव्यं स्वधर्मपौरुषं नृभिः । एवन्ते

प्राप्नुवन्तीह परलोके फलं ध्रुवम्। नास्तिकाः प्राप्नुवन्त्यर्थांश्च दैवपरायणाः। तस्मात् सदैव यत्नेन पौरुषे यत्नमाचरेत्। लक्षणवान् दैवपरान् मनुष्यानुत्थानयुक्तान् पुरुषान् हि लक्ष्मीः। अस्मिन्नर्थे यत्नादुदाहरन्ति न्यपेन्द्रं तस्मात् सदोत्थानवता हि भाव्यम्" मत्स्यपु०१८६अ०"तृणं बलायते नूनं वज्रं चैव तृणायते। बलवान् बलहीनश्च दैवस्य गतिरीदृशी" "उद्योगिनं पुरुषसिंहमुपैति लक्ष्मीर्दैवेन देयमिति कापुरुषा वदन्ति" नीतिमाला "दैवायत्तं कुले जन्म ममायत्तं हि पौरुषम्" वेणीसं०देवशब्देदम् दिवाद्यञ्लौ पा०यञ्। २दैवसम्बन्धिनि स्त्रियां ङीप्। "दैवी ह्येषा गुणमयी मम माया दुरत्यया" गीता। "दैवी विचित्रा गतिः" उद्भटः। ३गीतोक्ते सम्पद्भेदे स्त्री "अभयं सत्वसंशुद्धिर्ज्ञानयोगव्यवस्थितिः। दानं दमश्च यज्ञश्च स्वाध्यायस्तप आर्जवम्। अहिंसा सत्यमक्रोधस्त्यागः शान्तिरपैशुनम्। दया भूतेष्वलोलुप्त्वं मार्दवं ह्रीरचापलम्। तेजः क्षमा धृतिः शौच मद्रोहोनातिमानिता। भवन्ति सम्पदं दैवीमभिजातस्य भारत!। देवी सम्पद् विमोक्षाय निबन्धायासुरी मता" गीता देवस्वेवायम् यञ्। ४मनूक्ते विवाहभेदे पु० "ब्राह्मो दैवस्तथैवार्षः प्राजापत्यस्तथाऽऽसुरः। गान्धर्वो राक्षसश्चैव पैशाचश्चाष्टमोऽधमः" इत्युद्दिश्य "यज्ञे तु वितते सम्यगृत्विजे कर्म कुर्वते। अलङ्कृत्य सुतादानं दैवं धर्मं प्रचक्षते" इति लक्षितम् "सुतादानं तन्निमित्त यद्धर्ममिति तात्पर्यार्थः। विवाहानां ब्रह्मदेवादिदेवताकत्वाऽभावेन स्वार्थगर्भितार्थकता कुल्लूकभट्टेनोक्ता। देवो देवताऽस्य यञ्। ५मनूक्ते अङ्गुल्यग्ररूपे आचमनाङ्गे तीर्थभेदे आचमनोपक्रमे "अङ्गुष्ठमूलस्यतले ब्राह्मं तीर्थं प्रचक्षते। कायमङ्गुलिमूलेऽग्रे दैवतीर्थं तयोरधः" कनिष्ठादेशिन्यङ्गुष्ठमूलान्यग्रं करस्य च। प्राजापतिपितृब्राह्म दैवतीर्थान्यनुक्रमात्" याज्ञवल्क्यैकवाक्यत्वात् अङ्गुल्यग्रमेव तथात्वम्। ६दमर्षे यञ्। ६देवसम्बन्धिनि देवसर्गरूपे सर्गभेदे दैवसर्गश्चाष्टविधो "विबुधाः१ पितरो२ ऽसुराः३ गन्धर्वाप्सरसः सिद्धा४ यक्षरक्षांसि चारणाः५ भूतप्रेतपिशाचाश्च ६ विद्याधाः७ किन्नरादयः८ भाग०२। ६०।२६ उक्तः ब्राह्मप्रजापत्यकौबेरसौम्यान्त्य विधैवाष्टविधतोक्ता यथा "अष्टविकल्पो दैवस्तिर्य्यग्योनश्च पञ्चधा भवति। मानुष्यश्चैकविधः समासतो भौतिकः सर्गः" सा० का० "ब्राह्मप्राजापत्यैन्द्रगान्धर्वराक्षसपैशाच इत्यष्टविधो दैवः सर्गः" त०कौ०। देवोदेवभेदो देवताऽस्य यञ्। ७श्राद्धभेदे देवताभेदोद्देशेन कर्त्तव्ये श्राद्धभेदे स०। तस्य पितृश्राद्धात् पूर्वं कर्त्तव्यता मनूक्ता यथा "दैवकार्य्यात् द्विजातीनां पितृकार्यं विशेष्यते। दैवं हि पितृकार्यस्य पूर्वमाप्यायनं स्मृतम्। तेषामारब्धभूतं तु पूर्वं दैवं नियोजयेत्। रक्षांसि हि विलुम्पन्ति श्राद्धमारब्धवर्जितम्। दैवाद्यन्तं तदीक्षेत पैत्राद्यन्तं न तद्भवेत्। पैत्राद्यन्तं त्वीक्षमाणः क्षिप्रं नश्यति सान्वयः"। देवतोऽपि "यत्तत्र क्रियते कर्म पैत्रके श्राद्धान् प्रति। तत्पूर्वं तत्र कर्त्तव्यं वैश्वदेविकपूर्विकम्" आसनगन्धादिदाने दैवपूर्वकतां पैत्रश्राद्धे विधत्ते स्म। श्राद्धभेदे देवताभेदाश्च नि०सि० निरूपिताः कस्यचिच्छ्राद्धस्य चादैवपूर्वकता चोक्ता यथा

हेमाद्रौ यद्भट्टस्मृतौ "दर्शश्राद्धे क्रतुदक्षौ सत्यो नान्दीमुखे वसुः। नैमित्तिके कामकालौ काम्ये च पुरुरोचनौ। पुरूरवार्द्रवौ चैव पार्वणे वसुदाहृतौ" तत्रैव "उत्पत्तिं नाम चैतेषां न विदुर्ऋषयो द्विजातयः। ऋषयश्चारणीयत्तैः श्लोकैः श्रद्धासमन्वितैः। आगच्छन्तु महाभागा विश्वेदेवा महाबलाः। ये यत्र विहिताः श्राद्धे सावधाना भवन्तु ते" इति। दर्शश्राद्धं प्रतिरुचिविहितमित्युक्तमिति कल्पतरुः। आधानादिकर्माङ्गमित्यन्ये। नैमित्तिकमेकोद्दिष्टम् "एकोद्दिष्टन्तु यच्छ्राद्धं तन्नैमित्तिकमुच्यते" भविष्योक्तेः एतद् यद्यपि "एकोद्दिष्टं दैवहीनमिति" तत्र वैश्वदेवनिषेधस्तथापि "नवश्राद्धे द्वादशमासिके च कामकालौ स्मृतौ "नवश्राद्धं दशाहानि नवमिश्रन्तु षड्क्रतून्। अतःपरं पुराणं वै त्रिविधं श्राद्धमुच्यते। यस्मिन्नेव पुराणे वा विश्वेदेवा न सेविरे। आसुरं तद्भवेच्छ्राद्धं दत्तं मन्त्रवर्जितम्" इति वह्निपुराणात्। एतच्च बह्वृचानामेव। तेन तेषामेवोक्तेः अन्येषां तु नात्र विश्वेदेवा कात्यायनोक्तेस्त्रिषेध एवेति पृथ्वीचन्द्रोदयः। अन्ये तु नैमित्तिकं सपिण्डीकरणमाहुः। भविष्ये यद्यप्येकोद्दिष्टं तच्छ्राद्धेनोक्तं तथापि "तदप्येवं कर्त्तव्यमयुग्मान् भोजयेद्विजानिति" तत्रैव विश्वेदेवनिषेधात्। यद्यपि सपिण्डीकरणेऽपि एकोद्दिष्टत्वं तथापि "सपिण्डीकरणं श्राद्धं दैवपूर्वं नियोजयेदिति" वचनात्तत्परत्वम्। हेमाद्रावादित्यपुराणे "विश्वेदेवौ क्रतुर्दक्षः सपौरुरवसौ स्मृतौ। नित्यं नान्दीमुखे श्राद्धे वसुसत्यौ च पैतृके। नवाह्निकश्राद्धे देवौ

कामकालौ सदैव हि। अपि कन्यागते सूर्ये काम्ये च धुरिलोचनौ। पुष्करवार्द्धौ चैव विश्वेदेवौ तु पार्वणे"। क्वचित् विश्वेदेवापवादमाह हेमाद्रौ आतातपः "नित्यं श्राद्धमदैवं स्यादैकोद्दिष्टं तदैव च। मातुः श्राद्धं च युग्मेः स्याददैवं प्राङ्मुखैः पृथक्। योजयेद्दैवपूर्वाणि श्राद्धान्यन्यानि यत्नतः" नान्दीश्राद्धे भिन्नप्रयोगपक्षे मातुः श्राद्धमदैवमिति हेमाद्रिः। तत्र देवसम्बन्धिनि। "होमोदैवो बलिर्भौतो नित्यन्तोऽतिथिपूजनम्" मनुः। दिवि भवः अण्। ८व्याकाशभवे त्रि०।

दैवक पु० दैवएव दैवः स्वार्थे क। १देवे "सर्वभूतानि सदैवकानि प्रस्थेऽजवत् खाण्डवे सव्यमाची" भा०व०४०अ० देवकस्यापत्यं स्त्री अण् ङीप्। २देवकन्यपत्यापत्यस्त्रियां वसुदेवपत्नीभेदे श्रीकृष्णस्य मातरि स्त्री। [ऽन्यत्र।

दैवकीनन्दन पु० ६त०। वासुदेवे श्रीकृष्णे देवकीसुतादेवो-

दैवकोविद त्रि० दैवे शुभाशुभज्ञापकहेतौ कोविदः। दैवज्ञे शब्दरत्ना० स्त्रियां टाप्।

दैवक्षत्रि पु० क्रोष्टुवंश्ये देवक्षत्रात्मजे नृपभेदे "तस्मात् करम्भः कारम्भिर्देवरातोऽभवन्नृपः। देवक्षत्रः सुतस्तस्य दैवक्षत्रिर्महायशाः" हरिवं० ३७अ०।

दैवचिन्तक पु० दैवं लक्षणेन शुभाशुभं चिन्तयति चिन्ति-ण्वुल्। दैवज्ञे तल्लक्षणादिकं ज्यो०सं० २अ० उक्तं तच्च २६८० पृ० गणकशब्दे दर्शितम् दैवविदादयोऽत्र।

दैवज्ञ त्रि० दैवं जानाति ज्ञा-क। १दैवचिन्तके ग्रहादिना शुभाशुभनिरूपिण्यां विप्रस्त्रियां स्त्री २सङ्कीर्णजातिभेदे गणकशब्दे २५८२पृ०दृश्यम् तज्जातिप्राप्तिहेतव ब्रह्मवै० प्र० खण्डे उक्तो यथा

"लाक्षालोहादिव्यापारी रसादिविक्रयी च यः। स याति नामवैदृश्यं नामैवैदित एव च। वसेत् खलोम मानाब्दं तत्रैव नागदंशितः। ततो भवेत् स गणको वैद्यश्च सप्तजन्मसु। गोपश्च चर्मकारश्च रङ्गकारस्ततः शुचिः" स च अपकृष्टब्राह्मणः "अब्राह्मणो भवेद्दैवज्ञादि" प्रा०वि० अब्राह्मणशब्दे दृश्यम् तस्य च नक्षत्रसूचकत्वदोषेण दूषितत्वादपकृष्टत्वम्।

दैवत न० देवतैव स्वार्थे अण्। देवतायां "दैवतैरपकृष्यन्ते शूद्रूरमतिवेगिताः" स्मृ० वि० "किमेकं दैवतं लोके" विष्णुसं० "ब्राह्मणो दैवतं महत्" मनुः "ब्राह्मणाः सम्भवेनैव देवानामपि दैवतम्" मनुः। अस्य अमरे पुंनपुंसकतोक्तावपि कविभिः पुंस्त्वेनाप्रयुक्तत्वात् तत्प्रयोगे अप्रयुक्ततारूपः काव्यदोष इति काव्य०आद्ध अ यथा "यथार्यं दारुणाचारः सर्वदैव विभाव्यते। तथान्ये दैवतोऽस्य पिशाचो राक्षसोऽथवा" अत्र दैवतशब्दः "दैवतानि पुंसि वा" इत्यमरातोऽपि न केनचित् प्रयुज्यते। "आर्षं छन्दो दैवतञ्च विनियोगस्तथैव च" इत्युद्देशे योगियाज्ञ० "यस्य यस्य तु मन्त्रस्य उद्दिष्टा देवता तु या। तदाकारं भवेत्तस्य दैवतं देवतोच्यते" अथातो दैवतम् तद्यानि नामानि प्राधान्यस्तुतीनां देवतानां तद्दैवतमित्याचक्षते" निरु० देवतामधिकृत्योक्तः ग्रन्थः अण्। निरुक्तस्य शतृतीये काण्डे तस्य दैवताधिकारेण कृतत्वात्। "आद्यं नैघण्टुकं काण्डं द्वितीयं नैगमं तथा। तृतीयं दैवतञ्चेति समाम्नायस्त्रिधा मतः" यास्कोक्तः तत्र "ऋग्यादिदैवपत्न्यन्तं देवताकाण्डमुच्यते" इति तत्रोक्तम्। देवतानां समूहः अण्। ३देवतासमूहे न० देवताया इदम् अण्। ४देवतासम्बन्धिनि प्रतिमादौ "इदं गां दैवतं विप्रं इतं मधु चतुष्पथम्। प्रदक्षिणानि कुर्वीत प्रज्ञातांश्च वनस्पतीन्" मनुः।

दैवतन्त्र त्रि० दैवं भाग्यं तन्त्रं प्रधानं यस्य। भाग्याधीने "किन्तु पुरा हरिश्चन्द्ररामचन्द्रसुखा महीन्द्रा ऐश्वर्योपमितमहेन्द्रा दैवतन्त्रं दुःखयन्त्रं सम्यगनुभूय पश्चादनेक कालञ्जिजराज्यमकुर्वन्" दश०कु०।

दैवतरस पु० प्रवरर्षिभेदे और्वतकामकायनानां वैश्वामित्र दैवश्रवस दैवतरसेति" आश्व० श्रौ० १२।१४।२

दैवतरेय पुंस्त्री० दैवतरस्य श्रेष्ठदेवस्यापत्यं शुभा० ढक्। श्रेष्ठदेवस्यापत्ये स्त्रियां ङीप्।

दैवति पुंस्त्री दैवतस्यापत्यम् इञ्। देवतापत्ये ततः यूनि फक्। दैवतायन तस्य युन्यपत्ये तौल्वल्या०तस्य न लुक्।

दैवत्य त्रि० देवता स्वार्थे यञ्। देवतायाम् "स्वार्थे छन्दश्च दैवत्यम्" यास्क० "ऋग्वेदो देवदैवत्यः यजुर्वेदस्तु मध्यमः" मनुः।

दैवदत्त त्रि० देवदत्तस्य ज्ञाता "या नामधेयस्य कृतसंज्ञा वक्तव्याः" वार्त्ति० कृत्याभावपक्षे अण्। १देवदत्तज्ञातादौ। देवदत्तः भक्तिरस्य क्वचित्त्वाभावात् न ठक् किन्तु अण्। २देवदत्तभक्तियुक्ते त्रि० अपत्ये तु इञ् देवदत्ति तदपत्ये पुंस्त्री भवार्थे काश्या० ठञ्जिठौ दैवदत्तिक तद्भवार्थे। स्त्रियां ठञि ङीप् जिठि टाप्।

दैवदर्शनिन् पु० ब०व०। देवदर्शनेनर्षिणा दृष्टमधीयते औ-नक्षा० णिनि। देवदर्शनप्रोक्तछन्दोऽध्यायिषु।

**दैवदारव** त्रि॰ देवदारोर्विकारः "ओरञ्" पा॰ अञ्। देवदारुवृक्षविकारे यूपादौ

**दैवदीप** पु॰ दैवेन दीप इव। नेत्रे त्रिका॰। तस्य दीपवदर्थप्रकाशकत्वात् तत्तुल्यत्वं दैवाधीनतदैवास्तित्वादिशून्यत्वेन दीपतुल्यत्वमिति तस्य तथात्वम्।

**दैवन्त्यायन** पु॰ देवन्त+ष्या॰ गोत्रे यञ्, ततोयूनि फक्। तत्प्रार्षेयगोत्रप्रवरभेदे "याज्ञवाधौलमौनमौकमार्करावित्तार्टिसावर्णिशालङ्कायनजैमिनिदैवन्त्यायनानां भार्गवैतहव्यसावेतसेति" आश्व॰श्रौ॰ १२।१० "अयं गण" तत्प्रार्षेयः। प्रवरेषु क्वचिच्छास्त्रान्तरवशात् पदविपर्यासोवर्णविपर्यासो वा पदान्यत्वं वाऽस्ति न तेन प्रवरान्यत्वं भवतीति मन्तव्यम्" नारा॰

**दैवपर** त्रि॰ देवं भाग्यं परं चिन्त्यं यस्य। कार्यसिद्धौ भाग्यस्य प्रधानतया चिन्तके यद्वविप्रे क्षेम॰ "सम्पत्तौ च विपत्तौ च दैवमेव हि कारणम्। इति दैवपरो ध्यायन्नात्मना न विचेष्टते" काम॰ नी॰।

**दैवप्रश्न** पु॰ दिवि आकाशे भवः दैवः कर्म॰। "नक्षं निगमेत्य यत्किञ्चिच्छुभाशुभकरं वचः। श्रूयते तद्विदुर्धीरा दैवप्रश्नमुपश्रुतिम्" हारा॰ उक्ते शुभाशुभसूचनार्थे आकाशभवे वाक्यभेदे उपश्रुतौ आकाशवाण्याम्।

**दैवमति** पुंस्त्री॰ देवमतस्यर्षेरपत्यम् इञ्। देवमतस्यर्षेरपत्ये स्त्रियां वा ङीप्। ततोयूनि फक्। दैवमतायन तदीये यून्यपत्ये तस्य तौल्व॰न फको लुक्। अत्र दैवमिति इति तौल्वल्या॰ गणे पाठान्तरं च च देवमितस्यापत्ये अन्यत् दैवमतिवत्।

**दैवयज्ञि** पुंस्त्री॰ द्वौ देवार्थौ यज्ञौ यस्य तस्यापत्यम् इञ्। देवार्थयज्ञकारकस्यापत्ये स्त्रियां वा ङीप्। ततोयून्यपत्ये फक्। दैवयज्ञायन तदीये यून्यपत्ये। अत्र तौल्व॰ न फको लुक्।

**दैवयुग** न॰ देवस्येदम् अण् कर्म॰। दिव्ये युगे देवमानेन द्वादशसहस्रवर्षमितकाले "यदेतत् परिसंख्यातमादावेव चतुर्युगम्। एतत् द्वादशसाहस्रं देवानां युगमुच्यते मनुः "सुरासुराणामन्योऽन्यमहोरात्रो विपर्ययात्। तत्र षष्टिः षड्गुणा दिव्यं वर्षमासुरमेव च" सू॰सि॰ "देवदैत्यानां बहुत्वाद्बहुवचनम्। अन्योऽन्यम् परस्परम् विपर्ययात् व्यत्यासात् अहोरात्रः। अयमर्थः। देवानां यद्दिनं तदसुराणां रात्रिः। देवानां या रात्रिस्तदसुराणां दिनम्। दैत्यानां यद्दिनं तद्देवानां रात्रिः। दैत्यानां या रात्रिस्तद्देवानां दिनमिति। तथा च दैवदैत्ययोर्दिनरात्रयोरेव व्यत्यासाद्भेदो न मानेनेति। तयोरहोरात्रस्यैक्याद्देवाहोरात्रमानकथनेनैव दैत्याहोरात्रमानसङ्गतिमिति भावः" रङ्ग॰। "तद्वादशसहस्राणि चतुर्युगमुदाहृतम्। सूर्यांशुसङ्ख्यया दिव्यं सागरैरयुताहतैः। सन्ध्यासन्ध्यांशसहितं विज्ञेयं तच्चतुर्युगम्। कृतादीनां व्यवस्थेयं धर्मपादव्यवस्थया" सू॰सि॰। [फलोन्मुखतया सम्बन्धे।

**दैवयोग** पु॰दैवस्य योगः फलोन्मुखतया सम्बन्धः। भाग्यस्य

**दैवराजिक** त्रि॰ देवराजे भवादि काश्या॰ ठञ् ञिठ् वा। देवराजभवे स्त्रियां ठञि ङीप् ञिठि टाप्।

**दैवराति** पुंस्त्री॰ देवरातस्यापत्यम् इञ्। १देवरातस्यापत्ये २जनकराजपितरि च जनकस्य दैवरातित्वम् भा॰शा॰ ३१२अ॰ उक्तेः यथा "याज्ञवल्क्यस्तथेवेदं दैवरातिर्महायशाः। पप्रच्छ जनको राजा प्रश्नं प्रश्नविदां वरम्" दैवरातशब्दे दृश्यम्।

**दैवल** पु॰ देवलस्यापत्यं शिवा॰ अण्। देवलस्यर्षेरपत्ये सच शाण्डिल्यगोत्रस्य प्रवर्षिभेदः यथाह आश्व॰श्रौ॰१२।१४। ७।८ "शाण्डिलानां शाण्डिलासितदैवलेति" "कश्यपासितदैवलेति वा"।

**दैवलक** पु॰ देवं दैवयोनिं लाति श्लाति पूजयति ला—क स्वार्थे कन्नितार्थे क वा। १भूतसेवके हारा॰ देवलकस्येदम् अण्। २देवलसम्बन्धिनि त्रि॰। [त्रिका॰।

**दैवलेखक** पु॰ दैवं लिखति लिख—ण्वुल्। मौहूर्त्तिके

**दैववंश** पु॰ देवानामयम् अण् कर्म॰। देवानां वंशे तद्वंशवर्णनञ्च वायुपु॰ २१अ॰ यथा "पितृवंशप्रसङ्गेन कथाश्चेया प्रकीर्तिता। पितृणामानुपूर्व्येण देवानु वक्ष्यामि यतःपरम्। त्रेतायुगमुखे पूर्वमासन् स्वायम्भुवेऽन्तरे। देवा यामा इति ख्याताः पूर्वं ये यज्ञसूनवः। यजिता ब्रह्मणः पुत्रा जिताजिदजिताश्च ये। पुत्राः स्वायम्भुवस्यैते शुक्रनाम्ना तु मानसाः। तस्मिन्मन्वन्तरे ह्येते देवानान्तु त्रयः स्मृताः। छन्दोगास्तु त्रयस्त्रिंशत् सर्वे स्वायम्भुवस्य ह। यदुर्वसातिर्हौत्रश्च दीक्षितः सवनो मतिः। विभासश्च क्रतुश्चैव प्रजातिर्विंशतोद्युतिः। वायवो मङ्गलश्चैव यामा द्वादश कीर्तिताः। अग्निमन्तुरुग्रदृष्टिः समयोऽथ शुचिश्रवाः। केवलो विश्वरूपश्च सुपक्षो मधुपक्षया। तुरीयो निर्हृतश्चैव युक्तोष्पावाग्निस्तु ते। यमिनो विश्वदेवाद्यो वसिष्ठोऽस्मत्कुलानपि।

अजिरो विभविभावश्च मृत्युकोऽथ विदेहकः। ऋतुध्वजो हरश्चक्रोदेवा द्वादश कीर्तिताः। आसन् स्वायम्भुवस्यैते अन्तरे सोमपायिनः। त्रिषष्टिमन्वो गन्धर्वा ह्येते वीर्यवन्तो महाबलाः। तेषामिन्द्रः सदा ह्यासीद् विश्वभुक् प्रथमो विभुः। असुरा ये तदा तेषामासन् दायाद बान्धवाः। सुपर्णयक्षगन्धर्वाः पिशाचोरगराक्षसाः। अष्टौ पितृभिः सार्द्धं ते नासत्या देवयोनयः"।

**दैववाणी** स्त्री कर्म०। १दैवप्रश्ने उपस्तुतौ २संस्कृतवाक्ये "संस्कृतानाम दैवी वाक्" काव्यादर्शः।

**दैवशर्मि** पुंस्त्री० देवशर्मणोऽपत्यम् वाह्वा०इञ्। देवशर्मणोऽपत्ये ततः गर्गादि०यञादौ ञि०

**दैवसर्ग** पु० कर्म०। देवादिसर्गभेदे देवशब्दे दृश्यम्।

**दैवसृष्टि** स्त्री देवस्येयम् अण देवी कर्म०। स्वयम्भूतायां देवानां सृष्टौ। तत्प्रकारश्च वायुपु० ६अ० उक्तो यथा "सृष्ट्वा सुरांस्तु देवेशस्तनुमन्वामपद्यत। अरक्षां सत्त्वबहुलां ततस्तां सोऽभ्ययूयुजत्। ततस्तां युक्ततस्यास्य प्रियमासीत् प्रभोः किल। ततो सत्त्वे वसत्यस्मा दीव्यतस्य देवताः। यतोऽस्य दीव्यतो जातास्तेन देवाः प्रकीर्तिताः। धातुर्दिवीति यः प्रोक्तः क्रीड़ायां स विभाव्यते। तस्मान्मन्वन्त दिव्यावां ऋषिरे तेन देवताः"।

**दैवस्थानि** पुंस्त्री० देवस्थानस्वर्गेरपत्यम् इञ्। १देवस्थानस्वर्गेरपत्ये स्त्रियां वा ङीप्। ततः यूनि फक् तस्य पैला० लुक्। २देवस्थानि तदीये त्र्यपत्ये च।

**दैवह्व** पु० ब०व०। देवह्वस्य देवह्वनामकर्षेरपत्यस्य जाताः कश्या० अण् यञो लुप्। देवह्वस्य जातेषु।

**दैवहीन** त्रि० दैवेन भाग्येन हीनः। शुभभाग्यहीने तदनुभावकक्षेतवश्च दोषिकायासक्ता यथा "व्यसनी विनष्ट धर्मा त्रिविधोत्पातपीड़ितोयश्च। दुष्टः स दैवहीनः कथितो दैवान्वितोऽन्यः। दैवहीनं रिपुं जेतुं यावा दैवान्वितो नृपः। योज्यो दैवान्वितामात्या दैवहीने तथात्मनि तत्रैव।

**दैवागारिक** त्रि० देवागारे नियुक्तः "तत्र नियुक्तः" इत्यधिकारे ठगारन्तात् ठक्। देवागारनियुक्ते देवागारिक इति क्वचित् पाठदर्शनात् ठना निष्पन्नमित्युक्तं प्राक्।

**दैवात्** अव्य० दैवादित्यर्थे शब्दार्थचि०।

**दैवात्यय** पु० दैवक्तोऽत्यय उत्पातः। दैवक्ते उत्पाते "अन्यत्र दैवात्ययात्" इ०सं०२अ०। दिव्यान्तरिक्षभूमिजेषूत्पातेषु वज्राशनि अशुभं स दैवात्यय इत्यर्थः।

**दैवादिक** पु० दिवादिगणे पठितः ठक्। दिवादिगणे पठिते धातौ "सेवेति यवादिर्देवो दैवादिकनिदर्शनार्थः" मनो०।

**दैवारिप** पु० देवारीन् असुरान् पाति आश्रयदानेन पा-क देवारिपः वसुरूपत्वात् भवः अण्। शङ्के तस्य वसुरूपजातत्वात् तथात्वम् "भैरवं शब्दमन्यं वानरश्च कुर्वतः। दैवारिपात् शङ्कात् भैरवं शब्दं कुर्वतः इत्यर्थः" नीलक०।

**दैवासुर** न०देवासुरस्य वैरम् इत्यात् वैरे बुद्धिप्राप्ते "न वैरे देवासुरादिभ्यः" वार्त्ति०तच्छिषेध अण्। १देवासुरयोर्वैरे। देवासुरशब्दोऽस्यां अनुवादे अध्याये वा विवक्षा०अण्। देवासुरशब्दयुक्ते २अनुवादे ३अध्याये च पु०।

**दैवाहोरात्र** पु० कर्म०। देवानां सम्मानेन दिनरूपे मानुषे वर्षाब्दके काले।

**दैविक** त्रि० देवस्येदम् देवानुद्दिश्य प्रवृत्तः वा० ठक्। देवमाल्होद्देशेन कर्तव्ये श्राद्धे। "देवानुद्दिश्य यच्छ्राद्धं तत्तु दैविकमुच्यते। कृष्णेन विधिना सम्यगादिष्टं यत्नतः" भविष्यपु०। दैवशब्दोऽपि तत्रार्थे। "सम्यक्समिक्षभ्युदये दैवे कृचितमित्यपि" मनुना देवमाल्होद्देशक श्राद्धे ऽग्निप्रश्ने कृचितशब्दस्य वक्ष्यमाणोक्तेः दैवशब्दस्य निरमेक्षदेवमाल्होद्देशकश्राद्धपरत्वावगतेः। २देवसम्बन्धिनि त्रि०। "अहोरात्रे विभजते सूर्यो मानुषदैविके। दैविकानां युगानान्तु सहस्रपरिसङ्ख्यया। यत् प्राक् द्वादशसाहस्रमुदितं दैविकं युगम्"। "द्वापरादौ ततस्तोये दैविके नाम्नि नियतः" इति च मनुः।

**दैवी** स्त्री देवस्येयम् अण् अञ् वा। १देवसम्बन्धिन्यां स्त्रियां "दैवी सम्पद् विमोक्षाय" गीता। "कालो मे भगवतश्चेष्टनगहना दैवी सतां यातना" शान्तिक०। २देवविवाहेनोढायां स्त्रियां "ब्राह्मीपुत्रः पुरुषानेकविंशति पूयते दैवीपुत्रश्चतुर्दश आर्षीपुत्रः सप्त" विष्णुसं०।

**दैवोदास** पु० दिवोदासे भवः अण्। १दिवोदासभवे तत्रापत्यं शिवादाण्। २तदपत्ये स च प्रवरभेदः यथाह आश्व०औ० १२।१०।१२ भिक्षवुवां वाभ्रवेति "त्रिप्रवरं भार्गवदैवोदासवाभ्रवेति" दिवोदासेनाङ्क्ष्यमानः अण। ३दिवोदासेनाङ्क्ष्यमाने वज्रो च "दैवोदासो अग्निर्देवा अकृण्वन्न मज्मना" ऋ० ८।१०३।२ "दैवोदासः दिवोदासेनाङ्क्ष्यमानोऽग्निः" भा० तत्रापत्यम् दृञ्। दैवोदासि इत्येव स च प्रवरभेदेन।

दैव्य न० देवस्येदम् "देवात् यञञौ" पा० यञ्। १देवसम्बन्धिनि २भाग्ये च "ब्रूमे नमसा दैव्यं जनम्" ऋ० २।३०।१।

दैशिक त्रि०देशेन निर्वृत्तः तस्येदम् वा ठञ्। १देशजाते २देशसम्बन्धिनि च स्त्रियां ङीप्। "परत्वञ्चापरत्वञ्च द्विविधं परिकीर्तितम्। दैशिकं कालिकञ्चापि मूर्त एव तु दैशिकम्"। परत्वं सूर्यसंयोगभूयस्त्वज्ञानतो भवेत्। अपरत्वं तदल्पत्वबुद्धितः स्मादितीरितम्। तयोरसमवायी तु दिक्संयोगस्तदाश्रये। दिवाकरपरिस्पन्द पूर्वोत्पन्नत्वबुद्धितः। परत्वमपरत्वन्तु तदनन्तरबुद्धितः। अत्र त्वसमवायी स्यात् संयोगः कालपिण्डयोः। अपेक्षाबुद्धिनाशेन नाशस्तेषामुदाहृतः" भाषा०। "दैशिकपरत्वं बहुतर सूर्यसंयोगान्तरितत्वज्ञानादुत्पद्यते। एवं तदल्पीयस्त्वज्ञानादपरत्वमुत्पद्यते। अत्रावधित्वार्थं द्वितीयामपेक्षा। यथा पाटलिपुत्रात् काशीमपेक्ष्य प्रयागः परः। पाटलिपुत्रात् कुरुक्षेत्रमपेक्ष्य प्रयागोऽपर इति। तयोर्दैशिकपरत्वापरत्वयोः। असमवायी असमवायिकारणम्। तदाश्रये दैशिकपरत्वापरत्वाश्रये। दिवाकरेति। अत्र परत्वं अपरत्वञ्च कालिकं ग्राह्यम्। यस्य सूर्यपरिस्पन्दापेक्षया यस्य सूर्यपरिस्पन्दोऽधिकः स ज्येष्ठः यस्य न्यूनः स कनिष्ठः। कालिकपरत्वापरत्वे जन्यद्रव्य एव। अत्र कालिकपरत्वापरत्वयोः। एषां कालिकदैशिकपरत्वापरत्वानाम्" सि०मु०। [ सम्बन्धभेदे।

दैशिकविशेषणता स्त्री कर्म०। देशजाते स्वभावीयस्वरूप-

दैष्टिक त्रि० दिष्टं भाग्यमिति मतिरस्य "अस्ति नास्ति दिष्टं मतिः" पा० ठक्। भाग्यप्रमाणके दैवपरे। "नालम्बते दैष्टिकतां न निर्वीदति पौरुषे" माघः।

दैहिक त्रि० देहे भवः तस्येदं वा ठक्। १देहभवे २देहसम्बन्धिनि च "दैहिकानां मलानां च शुद्धिषु द्वादशस्वपि। वसाशुक्रमसृङ्मज्जामूत्रविड् घ्राणकर्णविट्। श्लेष्मास्रदूषिका स्वेदो द्वादशैते स्मृता मलाः" मनुः "एष हि ब्रह्मबन्धूनां वधो नान्योऽस्ति दैहिकः" भाग० १।७।६६। स्त्रियां ङीप्। "प्रजाः ससर्ज कतिधा दैहिकीर्मानसीर्विभुः" भाग० २।१०।१

दैह्य त्रि० देहे भवः यञ्। देहभवे जीवे। "अथापि बत मे दैह्यो ह्यात्मा चैवात्मना विभुः" भाग० ११।४।२० "सूर्योऽग्निरापो मरुदेवः सोमः सन्ध्याहनी दिवा। कंकुः खमर्क इति ह्येते दैह्यस्य साक्षिणः" भाग० ६।१।२८।

दो छेदे दिव०पर०सक०अनिट्। दाति अदात् दितः दितिः।

दोःशिखर न० ६त०। स्कन्धे राजनि०।

दोःसहस्रभृत् पु०दोःसहस्रं बाहुसहस्रं बिभर्त्ति भृ-क्विप्। १कार्त्तवीर्य्यार्जुने २बाणासुरे च "सहस्रभुजभृत् श्रीमान् कार्त्तवीर्य्योऽभवत् प्रभुः" भा०अनु० १५२अ० कार्त्तवीर्यस्य तवात्यद्भुतम् "अथ वीर्यमदोत्सिक्तो बाणो बाहुसहस्रवान्" हरिवं० १७५अ० बाणस्य सहस्रबाहुतोक्ता।

दोग्धृ त्रि० दुह-तृच्। १दोहनकर्त्तरि २गोपाले ३वत्से ४अर्थोपजीविनि ५यज्ञे ६दोहनशीले च मेदि० "मेरौ स्थिते दोग्धरि दोहदक्षे" कुमा०स्त्रियां ङीप्। सा च ७धेन्वाम्। "दोहावसाने पुनरेव दोग्ध्रीम्" रघुः "अचला ह्यचया भूमिर्दोग्ध्री कामानिवोत्तमान्। दोग्ध्री वासांसि रत्नानि पशून् क्षीरान् यवांस्तथा" भा०अनु० ६२अ०। शीलार्थत्वेनतत्वाच्च कर्मणि षष्ठी।

दोघ पु० दुह-अच् वेदे नि० हस्य घः। दोग्धरि "उक्षं दीघं धरुणं देवरायः" ऋ०५।१५।५। "दोघं कामानां दोग्धारम्" भा०।

दोड़ी स्त्री दोह-अच् गौरा० ङीष् हस्य डः। (दाखी) फलप्रधाने द्राक्षभेदे तस्याः फलम् अण्। कुरोतक्षा० लुक्। दोडी तत् फलेऽपि स्त्री।

दोध पु० दुह-घञ् बा० हस्य धः। गोपाले "देव! सदोध कदम्बतरुस्थ! श्रीधर! तावकनामपदं मे" कन्दोम०।

दोधक न० एकादशाक्षरपादके वर्णवृत्तभेदे "दोधकवृत्तमिदं भभभाद् गौ" वृत्तर०।

दोर पु०डोर+डस्य रः। (डोर) इति ख्यातायां रज्ज्वाम्।

दोरक न० डोरक+डस्य रः। बाणावबन्धनतन्तौ "ततस्तदुद्धृतं छिरस्थं सूत्रं दोरकेण बध्नाति" (कात्या०श्रौ०७।६।११

दोर्गन्तु पु० दोषा बाहुना गन्तुः कुत्सितः। कुत्सितबाहुके कार्य्यासमर्थत्वाद्यौ तिका०।

दोर्ग्रह पु० ६त०। १बाहुस्तम्भे रोगभेदे। दोर्ग्रहात्यङनेन करणे घञ्। २बलवति त्रिका०।

दोर्ज्या स्त्री स०त्रि० उक्तायां भुजकारज्यायाम् "दोर्ज्यान्तरसुधाभुक्तिसक्तनेत्रोद्धृता पुनः" भू० "दोर्ज्यान्तरसुधा भुजज्यानयनावसरे यत् ज्यापिण्डान्तरं तेन सुधिता" रङ्गना०।

दोर्मूल न० ६त०। भुजमूले कक्षे हेम०।

दोल पु० दुल-घञ्। दोलने श्रीकृष्णस्य स्वनामख्याते उत्सवभेदे च फाल्गुनपौर्णमास्यां कर्त्तव्यः स च स्मृतिषौ

तस्य कृत्य खण्डे कर्तव्यता तद्र दोलोत्सवतत्त्वे उक्तं यथा "यदा अरुणोदयकाले पौर्णमासीलाभस्तदा तत्रैव दोल यात्रा। उभयदिने अरुणोदयकाले पौर्णमासीलाभे पूर्वदिने सङ्गवमध्याह्नकालव्यापित्वात् त्रिसन्ध्यव्यापित्वेन तिथेर्बलवत्त्वाच्च। यदा तिथिक्षयवशादरुणोदयकाले न पौर्णमासीलाभस्तदा कदाचित् सङ्गवभावेन चतुर्दश्यादरः। एतेन पूर्वदिने अरुणोदयं विना पूर्वाह्णे पौर्णमासीलाभः परदिने सङ्गवान्यूनतिथिलाभस्तदा फाल्गुन्यः पूर्वदिने युग्मवचनानुरोधादिति निरस्तम् उभयदिने कर्मयोग्यप्रशस्तकालप्राप्तितिथिसन्देह एव युग्मवचनप्रवृत्तेः। एवं पञ्चमीपर्यन्तासु तिथिषु तत्करणे अनयैव दिशा व्यवस्थोन्नेयेति" दोलयात्रातत्त्वम् "विशेषतः कलियुगे दोलोत्सवो विधीयते। फाल्गुने च चतुर्दश्या अष्टमे यामसंयुते। अथ वा पौर्णमास्यान्तु प्रतिपत्सन्धिसंस्थितौ। पूजयेद्विधिवत् भक्त्या फाल्गुचूर्णैश्चतुर्विधैः। सितरक्तैर्गौरपीतैः कर्पूरादिविमिश्रितैः। हरिद्राचारयोगाच्च रक्तरम्यैर्मनोहरैः। अन्यैर्वा रक्तरम्यैश्च गीणयेत् परमेश्वरम्। एकादश्यां समारभ्य पञ्चम्यन्तं समाचरेत्। पञ्चाह्नानि तत्राह्नानि स्युर्दोलोत्सवो विधीयते। दक्षिणाभिमुखं कृष्णं दोलयानं सकृत्सरः। द्वापराधनिचयैर्मुक्तास्ते नात्र संशयः" पाद्मे पातालखण्डे। "जैमिनिरुवाच फाल्गुने मासि कुर्वीत दोलारोहणमुत्तमम्। यत्र क्रीडति गोविन्दो लोकानुग्रहणाय वै। प्रत्यहं देवदेवस्य गोविन्दाख्यान्तु कारयेत्। प्रासादं पुरतः कुर्यात् षोडशस्तम्भसंयुतम्। चतुरस्रं चतुर्द्वारं मण्डपं वेदिकान्वितम्। चारुचन्द्रातपं माल्यचामरध्वजशोभितम्। भद्रासनं वेदिकायां श्रीपर्णीकाष्ठनिर्मितम्। फाल्गुत्सवं प्रकुर्वीत पञ्चाह्नानि तत्राह्नानि वै। फाल्गुन्याः पूर्वतो विप्राश्चतुर्दश्यां निशामुखे। यज्ञोत्सवं प्रकुर्वीत दोलमण्डपपूर्वतः। गोविन्दानुग्रहोत्तन्तु यात्राङ्गं तत् प्रकीर्तितम्। आचार्यवरणं कृत्वा वह्निं निर्मथनोद्भवम्। भूमिं संशुद्ध्य विधिवत् तत्परागिं समुच्छ्रितम्। सपशुं कारयित्वा तु वह्निं तत्र विनिःक्षिपेत्। पूजयित्वा विधानेन कुण्डाग्निविधिनाग्निमेत्। गोविन्दं पूजयित्वा तु भ्रामयेत् सप्तधा विभुम्। तस्मिन् काले हरिं दृष्ट्वा सर्वपापैः प्रमुच्यते। यत्रास्तं रचयेद्वह्निं यावद् यात्रा समाप्यते। प्रान्तयामे चतुर्दश्यां गोविन्दप्रतिमां शुभाम्। वासयित्वा हरेरग्रे पूजयेत् पुरुषोत्तमम्। उपचारविशिष्टैस्तु प्रत्यहंमपि पूजयेत्। ततो वरञ्च वसनं साक्षाच्च द्विजसत्तमाः। अर्चायां विन्यसेन् मन्त्रं परं ज्योतिर्विभावयन्। ततश्च प्रतिमा साक्षात् जायते पुरुषोत्तमः। रत्नान्दोलिकया तां वै नयेत् स्नानस्य मण्डपम्। नानातूर्यनिनादैश्च शङ्खध्वनिपुरःसरम्। जयशब्दैस्तथा स्तोत्रैः पुष्पवृष्टिभिरेव च। छत्रध्वजपताकाभिश्चामरव्यजनैस्तथा। निरन्तरं दीपिकाभिस्तथा कुर्यान्महोत्सवम्। आगच्छन्ति तदा देवाः पितामहपुरोगमाः। द्रष्टुमृषिगणैः सार्द्धं गोविन्दस्य महोत्सवम्। भद्रासनेऽधिवास्यैनं पूजयेदुपचारकैः। महास्नानस्य विधिना स्नपनं तस्य कारयेत्। पञ्चामृतैश्च वै सर्वैः तेषामन्यतमेन वा। स्नानान्ते गन्धतोयेन श्रीसूक्तेनाभिषेचयेत्। संशोष्य भूषयेद्देवं वस्त्राभरणमाल्यकैः। नीराजयित्वा संपूज्य प्रासादं परिवेशयेत्। सम्प्रदत्तस्ततो देवं दोलमण्डपमानयेत्। सुसंस्कृतायां रथ्यायां पताकातोरणादिभिः। अधोदेशे मण्डपं तं सम्प्रोक्षामयेत्ततः। ऊर्द्धदेशे पुनस्तद्वत् सम्प्रोक्षयेच्छान्त सम्प्रवै। यात्रावसाने च पुनर्भ्रामयेदेकविंशतिम्। एवं लीला भगवतः पितामहसुखेरिता" स्कन्दे उत्कलखण्डे। गारुडे "चैत्रे मासि सिते पक्षे दक्षिणाभिमुखं हरिम्। दोलारूढं समभ्यर्च्य मासमान्दोलयेत् कलौ" तन्त्रिखता च पद्मपुराणे "ऊर्जे रथं मधौ दोलां चावणे तन्तुपर्व च। चैत्रे मदनकारोपमकुर्वाणो व्रजत्यधः। विष्णुं दोलास्थितं दृष्ट्वा लोक्यस्तोत्सवो भवेत्। तस्मात् कार्यमतं यत्नाद्दोलाहे उत्सवं कुरु"। दोलोत्सवविधिः "चैत्रस्य शुक्लादश्यां प्रातःकृत्यं समाप्य च। नित्यपूजां विधायाथ कुर्याद्दोलोत्सवं व्रती। तदर्थञ्च विशेषेण नैवेद्यादिकमर्पयेत्। संमान्य वैष्णवांस्तत्र गीतनृत्यादि कारयेत्। महानीराजनं कृत्वा प्रक्षिपेदच्युतोपरि। गन्धानुलेपचूर्णानि विचित्राणि विभागशः। सन्तोष्य वैष्णवांस्तत्र गीतनृत्यादिभिः प्रभुः। नत्वास्तव्यर्थाऽप्रमत्तः सन् दोलामारोहयेच्छुभाम्। नीत्वा वह्निं दैविकायासुत्तुङ्गायां यथाविधि। अभ्यर्च्यान्दोलयेत् कृष्णं सर्वलोकावलोकितम्। एवमभ्यर्चयन् यामे यामे त्वान्दोलयन् प्रभुम्। महोत्सवेन समयेद्दिनं रात्रिञ्च यत्नतः। एवं जागरणं कृत्वा वैष्णवैः सह वैष्णवः। प्रणम्य प्रार्थ्य निमज्ज्य कृष्णं स्नापयमानयेत्। चैत्रे मासि सिते पक्षे

तृतीयायां रमापतिम्। दोलारूढं समभ्यर्च्च मासमान्दोलयेत् क्रमो। यत् फाल्गुनस्य राकादावुत्तरा फल्गुनी यदा। तदा दोलोत्सवः कार्य्यस्तत्र त्रीन्रूपोत्तमे" इति हरिभक्तिविलासः।

**दोला** स्त्री दुल-अच् ष वा टाप्। (डोली) १यानभेदे, २उद्यानादौ क्रीड़ार्थं दोलनयन्त्रे च। स्वार्थे क। दोलिका तत्रार्थे अमरः। ३खेदनार्थे यन्त्रभेदे शब्दार्थचि०। दोलां करोति क्याङ् दोलायते यदोलायिष्ट "मतिर्दोलायते न्यूनं सतामपि सलोकिभिः" रितो० "दोलायमानं गोविन्दं मत्वस्थं मधुसूदनम्। रथस्थं वामनं दृष्ट्वा पुनर्जन्म न विद्यते" स्क०पु०उत्क०।

**दोलायुद्ध** न० दोलेव युद्धम्। अनियतजयपराजययुतयुद्धे। दोलाया यथा दोलनेनान्यतरपार्श्वे स्थितिरनियता एवं जयपराजययोरेकतरपक्षे अनियततया स्थितिर्यत्र तादृशं युद्धं दोलायुद्धमिति व्यपदिश्यते। "दोलायुद्धं कृतगुरुतरध्वानमौद्धत्यभाजाम्" माघः।

**दोली** स्त्री दोल्यतेऽनया दुल-बा० करणे ङीष् वा ङीप्। (डुली) ख्याते यानभेदे वाल्मखट्टायाम् हारा०।

**दोष** पु०दुष-भावे करणे वा घञ्। १अपकर्षप्रयोजके वस्तुनिष्ठे धर्मभेदे। यथा काव्यदोषा श्रुतिकटुत्वादयः हेत्वदोषाः व्यभिचारादयः क्षमदोषाः पित्तादयः। २दूषणे "दोषो विचारसुलभो यदि दुष्यते तत् व्याख्या मम प्रथममेव न दूषणीया" भट्टेश्वरः। "एको हि दोषो गुणसन्निपाते निमज्जतीन्दोः किरणेष्विवाङ्कः" कुमा० "अदाता वंशदोषेण कर्मदोषात् दरिद्रता। उन्मादो मातृदोषेण पितृदोषेण मूर्खता"। काव्यदोषास्तु काव्य०प्र०उक्ता यथा "मुख्यार्थहतिर्दोषो रसस्य मुख्यस्तदाश्रयाद्याङ्याः। उभयोपयोगिनः स्युः शब्दाद्यास्तेन तेष्वपि सः" इतिरुक्तेः। "दुष्टं पदं श्रुतिकटु च्युतसंस्कृत्यप्रयुक्तमसमर्थम्। निहतार्थमनुचितार्थं निरर्थकमवाचकं त्रिधाऽश्लीलम्। सन्दिग्धमप्रतीतम् व्याख्यं नेयार्थमथ भवेत् क्लिष्टम्। अविसृष्टविधेयांशं विरुद्धमतिकृत् समासगतमेव"। तत्र श्रुतिकटु परुषवर्णरूपम् १दुष्टम्। २च्युतसंस्कृति व्याकरणलक्षणहीनम्। ३अप्रयुक्तं तथाम्नातमपि कविभिर्नादृतम्। यथा दैवतशब्दः पुंस्याम्नातोऽपि न केनचित् प्रयुज्यते। ४असमर्थं यत्तदर्थं पदते न च तत्राऽस्य शक्तिः यथा हन्तीति गमनार्थम्। ५निहतार्थं यदुभयार्थेतरप्रसिद्ध्यर्थं प्रयुक्तम्। यथा लोहितशब्दस्य रक्तार्थे। ६अनुचितार्थं यथा, पशुपदं कातरताभिव्यञ्जकीत्यनुचितार्थम्। ७निरर्थकं पादपूरणमात्रप्रयोजनं चादिपदम्। ८अवाचकं यथा जन्तुपदमदातर्यर्थे प्रयुक्तं न च तस्याभिधायकम्। यद्वोपसर्गसंसर्गाद्यार्थान्तरगतम्। यथा दधात्यर्थे विदधातीति पदम्। ९त्रिधेति व्रीड़ाजुगुप्सामङ्गलव्यञ्जकत्वात् श्लीलम्। यथा साधनवायुविनाशशब्दा व्रीड़ादिव्यञ्जकाः। १२सन्दिग्धं यथा वन्द्याभिति किं स्तुतमहिलायां किं वा नमस्याभिति सन्देहः। १३अप्रतीतं यत् केवले शास्त्रे प्रसिद्धम्। यथा काश्यपशब्दः योगशास्त्रादावेव वासनार्थो नान्यत्र। १४व्याख्यं यत् केवले लोके स्थितम्। यथा कक्षादिशब्दाः। १५ नेयार्थम् "निरूढा लक्षणाः काश्चित् सामर्थ्यादभिधानवत्। क्रियन्ते शास्त्रतं काश्चित् काश्चित्त्वैव स्वयंकृताः" इति यन्निरूढं लाक्षणिकम् यथा चपेटापातनेन निर्जितत्वं लक्ष्यते। १६ क्लिष्टं यत्तात्पर्यतिपत्तिर्व्यवहिता यथा अत्रिनेत्रज्योतिरुद्गमभासिशब्दस्य कृत्तदार्थपरत्वे क्लिष्टत्वम्। १७अविसृष्टः प्राधान्येनानिर्दिष्टो विधेयांशो यत्र तत्। यत्र अनुवाद्यमतज्ज्ञा प्रथमं विधेयनिर्देशः यथा न्यक्कारोऽयमेवैतत्र अनुवाद्यविधेययोरक्रमेण निर्देशो यत्र। समासान्तर्गतत्वेन विधेयांशस्य अटित्वबोधोऽपि यत्र। यथा तत्रैव पद्ये दृशोरूनैरित्यत्र दृशात्वसङ्ख्यत्वे विधेयं तच्च समासान्तर्गततया नाशु बोध्यते। १८विरुद्धमतिकृत्। यथा भवानीपतिशब्दस्य भवान्याःपत्यन्तरप्रतीतिकारित्वम्। "अपास्य च्युतसंस्कारमसमर्थं निरर्थकम्। वाक्येऽपि दोषाः सन्त्येते पदस्यांशेऽपि केचन"। वाक्यमात्रगतादोषास्तु।

"प्रतिकूलवर्णसंपृक्तत्वप्रविसर्गे विसन्धि हतवृत्तम्। न्यूनाधिकत्वचितपदम् अभवन्मतयोगमनभिहितवाच्यम्। अपदस्थपदसमासं सङ्कीर्णं गर्भितं प्रसिद्धिहतम्। भग्नप्रक्रममक्रमम् अमतपरार्थं च वाक्यमेव तथा" रसानुगुणत्वं वर्णानां वक्ष्यते तद्विपरीतं १प्रतिकूलवर्णम् यथा रङ्कारे टवर्गादि रौद्रे मधुरवर्णादि। २ उपहत उत्वं प्राप्तो लुप्तो वा विसर्गो यत्र तत् एतच्च असकृत्प्रयोगे एव दोषो न सकृत्प्रयोगे। ३ विसन्धिः सन्धेरैक्यं विश्लेषोऽश्लीलत्वं कष्टत्वञ्च। संहितां न करोमीति स्वेच्छया सकृदपि दोषः प्रस्तुतादिहेतुकत्वे तु असकृत्। तत्र चक्षुरागरचेष्टितमित्यादौ अश्लीलता तर्वोत्वादौ कष्टतेति बोध्यम्।

३कृतं लक्षणानुसरणेऽप्यशक्यं समाप्तपुनरुक्तभावान्नलक्षणं रसानुगुणत्वञ्च इत्तं यत्र तत् कृतदृत्तम्। ५न्यूनपदं यथा "सुचिरसुषितं वल्कलधरैरिति" वेणीसंहारपदो अक्षाभिरिति विशेष्यं पदं न्यूनम्। तथा तत्रैव पदो "गुरुः खेदं खिन्ने मयीत्यत्र" खिन्ने इत्यस्मात् पूर्वं इत्यमिति पदं च न्यूनम्। ६अधिकं यथा स्फटिकाद्रितिनिर्मल इत्यस्माद्रितिपदमधिकम्। ७कथितपदं यथा एकत्र पदो एकस्यैव कोशादिशब्दस्य द्विधा प्रयोगे। ८पतत्प्रकर्षम्। यत्रादौ गाढबन्धरूपप्रकर्षः क्वचे तु तद्धीनता तत्। ९समाप्तपुनरात्तम्। क्रियायैव वाक्यसमाप्तेर्नियमात् क्रियाप्रयोगादनन्तरं यत्र तत्क्रियासमाप्तेरुत्तरादिप्रयोगः तत्र समाप्तपुनरात्तत्वम्। १० द्वितीयार्द्धगतैकवाक्यप्रथमार्द्धम्। द्वितीयार्द्धगतमेकं पदं प्रथमार्द्धस्य समापकं यत्र तथाभूतं वाक्यं दुष्टमित्यर्थः। ११ न भवत् मतः दृष्टः योगः सम्बन्धः यत्र तत्। १२अपशब्दं वक्ष्यमाणलक्षम्। १३अस्थानस्थपदम्। १४अस्थानस्थसमासत्वं। १५संकीर्णं यत्र वाक्यान्तरस्थ पदानि वाक्यान्तरमनुप्रविशन्ति। १६गर्भितं यत्र वाक्यस्य मध्ये वाक्यान्तरमनुप्रविशति। १७प्रसिद्धिसीमातिक्रान्तं यथा रथो मञ्चकादिषु प्रसिद्धो, न तु सिंहादिनादे। १८भग्नः प्रक्रमः प्रस्तावो यत्र तत्। १९अविद्यमानः क्रमो यत्र तदक्रमम्। २०अमतः प्रकृतविरुद्धः परार्थो यत्र। अर्थदोषास्तु। अर्थोऽपुष्टः कष्टोव्याहतपुनरुक्तदुष्क्रमग्राम्याः। सन्दिग्धो निर्हेतुः प्रसिद्धिविद्याविरुद्धश्च। अनवीकृतः सनियमाऽनियमविशेषाविशेषपरिवृत्तयः। वाक्यार्थोऽपदयुक्तः सङ्करसन्दिग्धः प्रकाशितविरुद्धः। विध्यनुवादायुक्तस्यश्च पुनः स्वीकृतोऽस्वीकृतः। यत्नातिविततत्वादयोऽनुपादानेऽपि प्रतीयमानमर्थं न बाधन्त इत्यपुष्टार्थत्वं, न त्वसङ्गताः पुनरुक्ता वा।

रसदोषास्तु "व्यभिचारिरसस्थायिभावानां शब्दवाच्यता। कष्टकल्पनया व्यञ्जनमभावविभावयोः। प्रतिकूलविभावादिपदो दीप्तिः पुनःपुनः। अकाण्डे प्रथनच्छेदौ रसस्याथ प्रतिष्ठितिः। अङ्गिनोऽनुसन्धानं प्रकृतीनां विपर्ययः। अनङ्गस्याभिधानञ्च रसे दोषाः ध्रुवोदिताः"।

चन्द्रालोके तु दोषसामान्यविशेषलक्षणान्युक्त्वा दिङ्मात्रमुदाहृतं यथा

"ग्राम्येणोद्विजता येन सकला रमणीयता। शब्देऽर्थे च क्लमोत्थं दोषसङ्घमयन्ति तम्। भवेच्छ्रुतिकटुर्वर्णैः अवक्षेदेहजने पटुः। विख्यायते व्याकरणविरुद्धं च्युतसंस्कृतिः। अप्रयुक्तं च दैवादौ शब्दे पुंल्लिङ्गतादिकम्। असमर्थत्वं छन्दादेः प्रयोगो गमनादिषु। स छन्नि छन्न कान्तारे कान्तः कुटिलकुन्तलः। सिद्धतार्थं शोणितादौ शोणितादिप्रयोगतः। एकाक्षरं विना भूभृच्छ्रादिकं खलतादिवत्। अनलङ्कृतिरुचितार्थं यत्पदमाडम्बरदेव तत्। रसस्यङ्गतयाऽनवस्थितिकौतुकवानरी। निरर्थकं तु हीत्यादि पूरणैकप्रयोजनम्। अर्थे विदधदित्यादौ दधदादामवाचकम्। धत्ते नभस्वत्सं भाखानरुचं तरुणैः करैः। अश्लीलं त्रिविधं व्रीडाजुगुप्साऽमङ्गलात्मना। व्याहतोदसाधनं वायुः कालानाग्ने भवेत् कथम्। स्यादूहार्थं सिद्ध सन्दिग्धं न द्यां यानि पतत्त्रिणः। स्यादप्रतीतं शास्त्रैकगम्यं वीताऽतुमादिवत्। श्रिविलं, श्रयने लिखे मच्चित्तं ते श्रमित्रियि। सत्पुष्कटीलोऽगच्छादि याम्यसच्यते। नेयार्थं लक्षणात्यन्तप्रसरादमनोहरम्। क्लिष्टमर्थो यदीयोऽर्थस्तेषितः श्लेषिसच्छति। हरिप्रियाधिष्ठवारप्रवाहप्रतिमं वचः। अविमृष्टविधेयांशः समासेषिष्ठिते विधौ। विशन्ति विधिरुद्धाया कटाक्षाः कामिनां हृदि। अपराधीन इत्यादिविरुद्धमतिलक्षणम्। अन्यसङ्गतसत्कृङ्कारशोभिपयोधरा। रसादनुचिते वर्णे प्रतिकूलाक्षरं विदुः। न मामङ्क! जानासि रावणं रणदारुणम्। यत्किञ्चुपहतो लुप्तो विसर्गं दृष्ट तत्तथा। कुसन्धिः पटवामश्च विसन्धिः क्षपती दमौ। छतदृत्तमनुल्लोऽपि छन्दोदोषवकासि चेत्। विशालशोचने! यच्चाऽम्बरं तारातरङ्गितम्। न्यूनं स्वतन्त्रसम्भूतयोः पुष्पं नभस्वतम्। अधिकं भवतः शत्रून् दयत्यखिलताक्षयी। कथितं पुनरुक्ता वाक् ग्रामाजग्राम्यशोचना। विक्षतं दरविक्षतैरयकः कुक्षराः पुरम्। पतत्प्रकर्षहीनाऽनुप्रासादित्वे यथोत्तरम्। गम्भीरारम्भदम्भोलिपाणिरेष समागतः। समाप्तपुनरात्तं स्यादेष पीयूषभाजनम्। नेत्रानन्दी तुषारांशुरेत्यन्वितिवान्वयः। अङ्गान्तरपदापेक्षि क्रीड़ान्तर्वेषु सक्षितम्। मेघारम्भं स्तुमः शम्भुमर्द्धरात्रोद्विषद्वसम्। अभवन्नतयोगः स्याद्य चेदभिमतोऽन्वयः। येन बद्धोऽम्बुधिर्येन रामस्यानुचरा वयम्। स एष लङ्काहङ्कारं रावणं हन्तुमुद्यतः। हिमां सम्पदमाक्रिष्ट यः शत्रून् क्षमपूरयत्। अस्थानस्थसमासं नविद्वज्जनमनोरमम्।

मिथः पृथग्वाक्यपदैः सङ्कीर्णं यत्तदेव तत्। यद्वोष्ण भ्राजते रात्रिः कान्ता चन्द्रेण राजते। ब्रह्मास्त्रं त्वद्यशः पूरगर्भितं भूमिभूषणम्। आकर्णय पयः पूर्ण-सुवर्णकलशायते। भग्नप्रक्रममारब्धमसन्निर्वाहहीनता। अक्रमः क्षण! पृच्छन्ति स्वामनाराध्य देवताः। अमतार्थान्तरं सख्येऽसख्ये वार्थे विरोधवत्। अलङ्कारान्तरः कृत्वा योजनाविच्छिताऽङ्गना। अपुष्टार्थो विशेष्ये चेन्न विशेषोविशेषणात्। विशन्ति हृदयं कान्ताकटाक्षाः खड्गनस्त्रिंशः। कष्टः कष्टावबोधार्थमज्ञो वाच्यसन्निभः। आहतश्चेद्विरोधः स्यान्मिथः पूर्वापरार्थयोः। सङ्कल्पत्वमित्रं ते यद्वक्त्रं केनोपमीयते। कृतसत्योपमा यत्र पुनरुक्तः सुधाकरः। दुःक्रमस्याव्यसन्दिग्धाक्षयो दोषाः क्रमादमी। त्वद्वक्त्रः क्षण! गच्छेयं नरकं स्वर्गमेव वा। एकं मे चुम्बनं देहि तव दास्यामि कञ्चुकम्। ब्रूत किं मेव्यतां चन्द्रसखीचन्द्रकिरीटयोः। अनौचित्यं कीर्त्यतां तरङ्गवति यः सदा। प्रसिद्धा विद्यया वापि विरुद्धं द्विविधं मतम्। त्वत्तेयं पश्य कन्दर्प-प्रतापधवलद्युतिः। केतकी शेखरे शम्भोर्धत्ते चन्द्रकलातुलाम्। सामान्यपरिवृत्तिः स्यात् कृष्णत्वच्छविविग्रहा। विशेषपरिवृत्तिः स्याद्विद्या मम चेतसि। हे खः सङ्करोऽचारुविरुद्धान्योन्यसङ्गतौ। ध्वाङ्क्षः सन्तप तनयं त्वं परञ्च न जानते। सरोजनेत्र! पुत्रस्य सखेन्दुमवलोकय। पालयिष्यति ते गोत्रमसौ नरपुरन्दरः। यदे तद्गे वाक्यांशे वाक्ये वाक्यस्यके। यथानुसारमन्यच्छेदुदोषान् ग्रन्थार्थसम्भवान्"। श्यादत्तिव्यवहारान्यतरप्रयोजनविघटके धर्मभेदे स च दोषस्त्रिविधः। अव्याप्तिः अतिव्याप्तिः असम्भवः। ४विध्यतिक्रमजनिते इष्टभेदे मीमांसकाः। ५गुरुतल्पगमनाभक्ष्यभक्षणादिजनिते पापे भेदि०। दुष—वैकल्ये करणे घञ्। ६वातपित्तकफेषु यथाह भाव०प०अस्य दोषाः प्रवक्ष्यन्ति इत्युपक्रमे दोषस्वरूपमाह वाग्भटः "वायुः पित्तं कफश्चेति त्रयो दोषाः समासतः। विकृताऽविकृता देहं घ्नन्ति ते वर्त्तयन्ति च। ते व्यापिनोऽपि हृन्नाभ्योरधोमध्योर्ध्वसंश्रयाः। वयोऽहोरात्रिभुक्तानामन्तमध्यादिगाः क्रमात्" दोषशब्दस्य निरुक्तिमाह "धातवश्च मलाश्चापि दुष्यन्त्येभिर्यतस्ततः। वातपित्तकफा एते त्रयो दोषा इति स्मृताः" दोषा इत्यत्र दुष वैकल्ये इति दुष्यधातोः दुष्यन्त्येभिरिति वाक्ये अवर्णेरि च कारके संज्ञायां घञ्। ७तेषां विकारे च। गो०श्रौ० प्रवृत्तिप्रयोजके रागद्वेषमोहात्मके ८धर्मभेदे तल्लक्षणादिकं स्व०भा० उक्तं यथा

"प्रवर्त्तनालक्षणा दोषाः" सू०"प्रवर्त्तना प्रवृत्तिहेतुत्वम् तातारं हि रागादयः प्रवर्त्तयन्ति सुखे पापे वा। यत्र मिथ्याज्ञानं तत्र रागद्वेषाविति प्रत्यात्मवेदनीया ह्येते दोषाः कस्मात्? लक्षणतो निर्दिश्यन्त इति कर्मलक्षणाः खलु रक्तद्विष्टमूढाः रक्तो हि तत्कर्म कुरुते येन कर्मणा सुखं दुःखं वा भजते, तथा द्विष्टस्तथा मूढ इति दोषा रागद्वेषमोहा इत्युच्यमाने वक्तव्योक्तं भवतीति भा० विवृतमेतत् तद्वृत्तौ यथा "दोषं लक्षयति। दोषा इति बहुवचनं रागद्वेषमोहात्मकलक्षणत्रयप्रापणाय प्रवर्त्तना प्रवृत्तिजनकत्वं तदेव लक्षणं येषाम् यद्यपीदं शरीराद्यपेक्षादावतिव्याप्तं तथापि लौकिकप्रत्यक्षविषयत्वे सतीति विशेषणीयं रागादिगोचरप्रमाभावरक्षाय प्रमान्यत्वे सतीति विशेषयन्ति"।

तद्भेदाश्च सु० भा० ४अ० १आक्षिप्ते उक्ता यथा

"तत्र दोषाः" सू० "परीक्षिता इति बुद्धिमानाप्तत्वादाप्तगुणाः, प्रवृत्तिहेतुत्वात् पुनर्भवप्रतिसन्धानसामर्थ्याच्च संसारहेतवः, संसारस्यानादित्वादनादिना प्रबन्धेन प्रवर्त्तन्ते, मिथ्याज्ञाननिमित्तत्वलक्षणत्वात् तन्निवृत्तौ रागद्वेषप्रबन्धोच्छेदेऽपवर्ग इति प्रादुर्भावनिरोधधर्मका इत्येवमाद्युक्तं दोषाधामिति प्रवर्त्तनालक्षणा दोषा इत्युक्तं तथा चैते मानेर्ष्यास्पृहाविचिकित्साभक्तरादयः ते कस्मात्रोपसङ्ख्यायन्ते इत्यत आह" भा०।

"तत्त्वैराग्यं रागद्वेषमोहार्थान्तरभावात्" सू० "तेषां दोषाणां त्रयोराग्रयलक्षणाः पक्षाः। रागपक्षाः—कामो मत्सरः स्पृहा तृष्णा लोभ इति। द्वेषपक्षाः—क्रोधः ईर्ष्यास्पृहा द्वेषोऽसूया इति। मोहपक्षाः—मिथ्याज्ञानं विचिकित्सा मानः प्रमादः इति। तैराग्र्यात्रोपसङ्ख्यायन्ते इति, लक्षणस्य तद्भेदात् त्रित्वमनुपपन्नम्, नानुपपन्नं रागद्वेषमोहार्थान्तरभावात् आसक्तिलक्षणो रागः, असूयालक्षणो द्वेषः, मिथ्याप्रतिपत्तिलक्षणो मोह इति। एतत् प्रत्यात्मवेदनीयं सर्वशरीरिणाम्, विज्ञानाश्रयं शरीरी रागवत्त्वम्, अस्ति मेऽध्यात्मं रागधर्म इति। विरागस्तु विजानाति नास्ति मेऽध्यात्मं रागधर्म इति। एवमितरयोरपीति। मानेर्ष्यास्पृहाप्रभृतयस्तु तैराग्र्यमनुपतिता इति नोपसङ्ख्यायन्ते" भा०। विवृतमेतत् वृत्तौ

"तेषां दोषाणां त्रयो राशयः त्रयः यथा न तु रागद्वेषमोहानामेकैकत्वं तेषामर्थान्तरभावात् अवान्तरभेदवत्त्वात् तथा च भयशोकमानादीनामेवेवान्तर्भावाच्च विभागन्यूनत्वं इच्छात्वद्वेषत्वमिथ्याज्ञानत्वरूपविरुद्धधर्मवत्त्वाच्च विभागाधिक्यम् इच्छात्वादिकन्तु रागादावनुभवसिद्धं तत्र रागपक्षः कामो मत्सरः स्पृहा तृष्णा लोभो माया दम्भ इति कामो रिरंसा। रतिश्च विजातीयस्त्रीसंयोगः। नारीमतामिलाष इति तु न युक्तं स्त्रियाः कामेऽव्याप्तेः। मत्सरः स्वप्रयोजनप्रतिसन्धानं विना परामिभूतनिवारणेच्छा यथा राजकीयाद्दूषणाच्चोदकं मेयम् इत्यादि। एवं परगुणनिवारणेच्छाऽपि। स्पृहा धर्मविरोधेन प्राप्तीच्छा। तृष्णा इदं मे न चीयतामितीच्छा चरितव्याकरणेनापि धनरक्षणेच्छारूपं कार्पण्यमपि तृष्णाभेद एव। धर्मविरोधेन परद्रव्येच्छा लोभः। परवञ्चनेच्छा माया कपटेन धार्मिकत्वादिना स्वोत्कर्षख्यापनेच्छा दम्भः। द्वेषपक्षाः क्रोध ईर्ष्याऽसूया द्रोहोऽमर्षोऽभिमान इति क्रोधो नेत्रलौहित्यादिहेतुर्दीप्तिविशेषः। ईर्ष्या साधारणे वस्तुनि परस्वत्वात्तदुपरीतरि द्वेषः यथा दुरन्तदायादानाम्। असूया परगुणादौ द्वेषः द्रोहो नाशाय द्वेषः हिंसा तु दोषजन्या। परे तु तान्द्रोहं मन्यते। अमर्षः कृतापराधे असमर्थस्य द्वेषः अभिमानोऽप्यकारणकिञ्चित्करस्वात्मनि द्वेषः। मोहपक्षा विपर्ययसंशयतर्कमानप्रमादभयशोकाः। विपर्ययो मिथ्याज्ञानापरपर्यायोऽयथार्थनिश्चयः एकधर्मिकविरुद्धभावाभावज्ञानं संशयः स एव विचिकित्सेत्युच्यते व्याप्यारोपाद्व्यापकप्रसञ्जनं तर्कः आत्मन्यविद्यमानगुणारोपेणोत्कर्षधीर्मानः गुणवति निर्गुणत्वधीरुपक्षयोऽपि मानेऽन्तर्भवति। प्रमादः पूर्वकर्तव्यतया निश्चितेऽकर्तव्यताधीः एवं वैपरीत्येऽपि भयमनिष्टहेतूपनिपाते तत्परित्यागानर्हता ज्ञानं शोक इष्टवियोगे तल्लाभानर्हताज्ञानम्" इमिथ्याज्ञानजन्यवासनायां दुःखजन्यप्रवृत्तिदोषा मिथ्याज्ञानानामिति सूत्रतश्च चरमे दोषशब्दस्य तथार्थत्वाभिधानात्। १०वसुपूतभेदे द्रोणशब्दे दृश्यम् भ्रमजनकादोषास्तु पित्तादयः भावापरिच्छेदे उक्ता यथा "दोषोऽप्रमाया जनकः प्रमायास्तु गुणो भवेत्। पित्तदूरत्वादिरूपो दोषो नानाविधः स्मृतः।" "अप्रमां प्रति दोषः जनकः कारणम्। प्रमां प्रति गुणः कारणम्। तत्रापि पित्तादिरूपा दोषा अननुगताः। तेषां कारणत्वम् अन्वयव्यतिरेकाभ्यामेव सिद्धम्। गुणस्य प्रमाजनकत्वन्तु अनुमानात् सिद्धम्। यथा प्रमा ज्ञानसाधारणकारणभिन्नकारणजन्या अन्यज्ञानत्वात् अप्रमावत्। न च दोषाभाव एव कारणमस्तिति वाच्यम् पीतः शङ्ख इति ज्ञानस्थले पित्तदोषसत्त्वाच्छङ्खत्वप्रमानुत्पत्तिप्रसङ्गात्। विनिगमनाविरहात् अनन्तदोषाभावस्य कारणत्वमपेक्ष्य गुणकारणतायां न्याय्यत्वात्। न च गुणसत्त्वेऽपि पित्तप्रतिबन्धाच्छङ्खे न सैत्यज्ञानम्। अतः पित्तादिदोषाभावानां कारणत्वमवश्यं वाच्यं तथा च किं गुणस्य हेतुत्वकल्पनयेति वाच्यम् तथान्वयव्यतिरेकाभ्यां गुणस्यापि हेतुत्वसिद्धेः। एवं भ्रमं प्रति गुणाभावः कारणमित्यस्यापि सुवचत्वाच्च। तत्र दोषाः के इत्याकाङ्क्षायामाह। पित्तेति। क्वचित् पीतादिभ्रमे पित्तं दोषः। क्वचिद्दन्तादेः स्वल्पपरिमाणभ्रमे दूरत्वं दोषः। क्वचिच्च वंशीरजभ्रमे मरुऊषरसाञ्जनमित्येवं दोषा भ्रान्तिजनका इत्यर्थः। ११मोवत्ते। स्वार्थे क। दोषक तत्रार्थे। "वातपित्तकफा दोषाः दुष्प्राः स्युः समधातवः" भा० चि० दोषलक्षणसूत्रं ज्ञानादिकं सुश्रुते सूत्रस्थाने १६अ० उक्तं तत्रैव दृश्यम्। न्यायमतसिद्धहेत्वाभासाख्याः हेतुदोषाश्च हेत्वाभासशब्दे वक्ष्यन्ते तत्सामान्यलक्षणं च यादृशविशिष्टविषयकत्वेन ज्ञानस्यानुमितितत्कारणीभूतज्ञानप्रतिबन्धकत्वं तत्त्वम्। तत्प्रयुक्ततत्साध्यकानुमितौ यावन्तोदोषाः सम्भवन्ति तावदन्यतमत्वम् वा "दुष्यतीरिवाक्षाकं दोषसम्पत्तये गुणः" उद्भ०

**दोषग्राहिन्** त्रि० दोषं गृह्णाति ग्रह-णिनि। खले ज्ञाने०। "विहाय सदृशं दोषान् गुणान् गृह्णन्ति साधवः। दोषग्राही गुणत्यागी चालनीव हि दुर्जनः" उद्भटः।

**दोषघ्न** त्रि० दोषं वातादिविकारं हन्ति हन-टक्। धातुवैषम्यरूपदोषनाशके औषधादौ "दोषघ्ना ग्रहणी पाण्डुरोगार्शः कुष्ठनाशनाः" सुश्रुतः।

**दोषज्ञ** त्रि० दोषं कर्त्तव्याकरणे दोषं जानाति ज्ञा-क। १पण्डिते अमरः। "अथ प्रदोषे दोषज्ञः संवेशाय विशां पतिम्" रघुः। २परकीयदोषज्ञातमात्रे त्रि०। "अज्ञातदोषैर्दोषज्ञैः" माघः।

**दोषण्य** त्रि० दोषाणि भवः दोष+यत् दोषाद्देयः "ये चाभावकर्मणोः" पक्षतिवद्भावः। वाहुलके "यज्ञं दोषण्यसंसाभ्याम्" ऋ० १०।१६३।२

**दोषत्रय** न० ६त०। वातपित्तकफानां त्रिके राजनि०।

**दोषभेद** पु० ६त०। द्विषट्प्रकारे दोषभेदे स च सुश्रुते उक्तो यथा

अथातो दोषभेदविकल्पनामाध्यायं व्याख्यास्यामः।

"द्विषट्दोषभेदा ये पुरस्तात्परिकीर्तिताः। कति तत्रैकशो ज्ञेया द्विशो वाप्यथ वा त्रिशः। तस्य तद्वचनं श्रुत्वा संशयच्छिन्नकृतयाः। प्रीतात्मा ऋषयो दृष्ट्वः सुश्रुतायाह तत्त्वतः। त्रयो दोषा धातवश्च पुरीषं मूत्रमेव च। देहं सम्धारयन्त्येते ज्ञात्वापद्भा रसैर्हितैः। पुरुषः षोडशकलः प्राणश्चैकादशेन्द्रियः। रोगाणामन्तु सप्तकं यक्ष्मतं विंशतिरेव च। त्रयश्च पञ्च द्रव्याणां त्रिसप्तत्यधिकोत्तरम्। व्याप्तः कीर्त्तितं तद्धि भिन्नदोषास्त्रयोगुणाः। द्विषट्विधा वदन्त्येते भूविज्ञमिति निश्चयः। त्रयएव पृथक् दोषा द्विशो नव समाधिकैः। त्रयोदशाधिकैकद्विसमभ्योत्त्वैस्त्रिशः। पञ्चाशदेवन्तु सप्त भवन्ति त्रयमागतैः। त्रीणमध्याधिकत्रीणत्रीणद्वैत्रयापरैः। द्वादशैवं समाख्यातास्त्रयो दोषा द्विषट्विधा। भिन्नधातुमलैर्दोषा यान्त्यसंख्येयतां पुनः। तस्मात्प्रसङ्गं संयम्य दोषभेदविकल्पनैः। रोगं विदित्वोपचरेद्भिषग्भेदैर्यथेरितैः। भिषक् कर्त्ता च कारणं रसा दोषास्तु कारणम्। कार्यमारोग्यमेवैकमनारोग्यमतोऽन्यथा"।

**दोषल** त्रि० दोष+मत्वर्थे लच्। दोषयुक्ते "केदारं मधुरं प्रोक्तं विपाके गुरु दोषलम्। तद्वत् पाल्वलसद्दिष्टं विशेषाद्दोषलन्तु तत्" सुश्रुतः। [अष्ट०१६।४६

**दोषस्** क्ली दुष-असुन्। रात्रौ "सक्थ्योर्यो दोषसश्च"

**दोषा** अव्य० दुष्यत्यत्र दुष-घा० आधारे वा खरा०। रात्रावित्यर्थे "दोषाऽपि नूनमङ्गिनां गुरवो विलेति" माघः दोषापि रात्रावपीत्यर्थः। दिवाभूता रात्रिः दोषाभूतमहः इति भाष्यप्रयोगात् अस्यप्यर्थेऽपि तस्य इत्तिता। ततः ष्ण्यत् टच्। दोषातन रात्रिभवे त्रि० "दोषातनं बुधश्चङ्क्रमतियोगदृश्यः" रघुः। (अव्ययीभावः) अस्य टाबन्तस्त्रीत्वमपि "धर्मकालदिवस इव क्षयितदोषः" काद०। दोषाशब्दस्य टाबन्तत्वे एव गौरे सुखसम्भवः अव्ययत्वे न तत्सम्भवः इति बोध्यम्। दोस्+भासुरिमते स्त्रियां टाप्। २रात्रौ स्त्री शब्दार्थचि०।

**दोषाकर** पु० दोषा रात्रौ करोऽस्य। १चन्द्रे "दोषितवेध विहितानपराध्य दोषान् दोषाकरः सुखमनेकविधं विधत्ते" ज्योत्स्ना० ६त०। २दोषाणामाकरे च।

**दोषाक्ली** स्त्री दोषां रात्रिं क्लिश्नाति क्लिश-अण् गौरा० ङीष्। वनवर्त्तुरिकायां राजनि०।

**दोषाङ्कुश** पु० दोषाणां काव्यदोषाणामङ्कुश इव निरासकत्वात्। चन्द्रालोकोक्ते काव्यदोषनिवारके काव्यधर्मभेदे तल्लक्षणादि तत्रोक्तं यथा

"दोषमापतितं स्खलं प्रसरन्तं विग्रहङ्गमम्। निवारयति यद्धेधा दोषाङ्कुशमुशन्ति तम्। दोषो गुणत्वं तनुते दोषत्वं वा निरस्यति। भवन्नमथ वा दोषं नयत्यत्यन्ततामसौ। सुखं चन्द्रश्रियं धत्ते श्वेतश्लक्ष्णकराङ्कुरैः। अत्र क्षारसरोद्देशे पाथस्त्वं गुणतां गतम्। तव दुग्धाब्धिसम्भूतेः कथं जाता कलङ्किता। कवीनां समयाद्दिव्यविद्वद्दोषतां गतः। दधार गौरी हृदये देवं हि मकराङ्कितम्। अत्र क्षेपोदयाद्यैव त्याज्यं क्षीति निरर्थकम्"।

**दोषातिलक** पु० दोषा रात्रेस्तिलक इव। प्रदीपे त्रिका०

**दोषास्य** पु० दोषा व्याप्तमिव प्रकटदीप्तिसाधनं वा यस्य। प्रदीपे शब्दच०। [रोगे शब्दच०।

**दोषिक** त्रि० दोषः वातादिविकारः कारणतयाऽस्यास्य ठन्।

**दोषिन्** त्रि० दुष-णिनि। दोषयुक्ते शब्दस्तुभे दोषशब्दात् अस्त्यर्थे इनिकल्पनं "सैकाचरात् क्षतो जातेः सप्रत्ययाच्च न तौ स्फतौ" इत्यनुशासनविरुद्धम् (तौ। इनिठनौ)। सति च मत्वन्तरे अभियुक्तप्रयोगे तस्य सङ्कोचकल्पनस्य कादाचित्कत्वम् भाष्यकृता व्यवस्थापितम् यथा रसिक इत्यादिप्रयोगदर्शनात् न सर्वत्र।

**दोषैकदृश्** त्रि० दोषमेवैकं पश्यति दोषैकशब्दयोः कर्मधारये एकशब्दस्य पूर्वकालैकेत्यादि पा० परनिपाते तत्पूर्वकात् दृशः क्विप्। खले अमरः। दोषे एकस्मिन् दर्शनं यस्येति विग्रहं वदन् भरतः भ्रान्तएव सति मत्वन्तरे व्यधिकरणबहुव्रीहेरसाधुत्वनियमात्।

**दोस्** पु०न० दश्यतेऽनेन दृश-डोसि अङ्गेचा०। बाहौ "नूनमस्मद्विनाशाय विधिना दोः प्रसारितः" रामा०सुन्दा० १२१ "दोर्भ तस्य तथा विधस्य भजते" भट्टिनाथधृतवाक्यम् "कक्षदोष्णी" इति भट्टभाष्यप्रयोगे अस्य स्त्रीत्वता "तस्यपार्श्ववदुद्यस्य दक्षिणं दोर्निशाचरः" रघुः। "दोर्दण्डेन शरैःशरैररिशिरस्तेनापि भूमण्डलम्" सुवन्धुः। "दुहितरमनुकम्प्यामद्रिरादाय दोर्भ्याम्" कुमा०। अस्य भस्ये याजादौ तद्धिते च वा दोषादेशः। पुंसि दोः दोषौ दोषः स्त्रीत्वे दोः दोषस्यौ दोष्णी दोर्णि अस्यादौ तु दोर्णि दोषणि दोष्णा दोषा दोषभ्यां दोर्भ्यामित्यादि।

**दोह्य** पु॰ दोहि दोह्यौपारे तिप्रति स्वा—क वा रोर्लोपः। १सेवके २क्रीड़के च त्रिका॰ उपचारात् ३क्रीड़यामृ ४सेवायाञ्च त्रिका॰ ५वाच्यलिङ्गे त्रि॰।

**दोह** पु॰ दुह—भावे घञ्। १दोहने "दुग्धेऽल्पे सर्वान् कामान् यो वाचोदोहः" ज्ञा॰च॰ "मेरौ स्थिते दोग्धरि दोहदक्षे" कुमा॰ "दोहावसाने पुनरेव दोग्ध्रीम्" रघुः। आधारे घञ्। २दोहनपात्रे शब्दच॰। कर्मणि घञ्। ३दुग्धे शब्दार्थचि॰।

**दोहज** त्रि॰ दोहात् दोहनात्जायते जन—ड। १दोहनजाते २दुग्धे न॰ शब्दार्थकल्प॰।

**दोहड़िका** स्त्री मात्रावृत्तभेदे (दोहा) तल्लक्षणादि छन्दोम॰ शब्दे यथा "मात्रालयोदशकं यदि पूर्वं चतुष्कविरामि। पष्ठ पुनरेदादशकं दोहड़िका द्विगुणेन"

**दोहद** पु॰न॰ दोहमाकर्षं ददाति दा—क। १गर्भे २वालसामान्ये ३गर्भिण्या अभिलाषे च मे॰। सुश्रुते तु दौ॰ह(ह्)दमिति पठित्वा तदुपलक्षां दोषादिकलुषं यथा "द्विहृदयास्तु नारीं दौह्(ह)दिनीमाचक्षते। दौह्(ह)दविमाननात् कृशं कृशिं खञ्जं जड़ं वामनं विकृताङ्गजातं वा नारी सुतं जनयति। तस्मात् सा यदादिक्षेत्तत्तस्यै दापयेत्। तज्जदौ(ह्)हृदा हि वीर्यवन्तं चिरायुषञ्च पुत्रं जनयति"। भवन्ति चात्र "इन्द्रियार्थान्तु यान् यान् सा भोक्तुमिच्छति गर्भिणी। गर्भोपघातभयात्तांस्तान् भिषगाहृत्य दापयेत्। सा प्राप्तदौ(ह्)हृदा पुत्रं जनयेत् सुखान्वितम्। अलब्धदौ(ह्)हृदा गर्भं लभेदाशु वा भयम्। येषु येष्विन्द्रियार्थेषु दौह्(ह्)दं वै विमानना। प्रजायेत सुतस्यार्त्तिस्तस्यां तस्यामथेन्द्रिये। राजसन्दर्शने यस्या दौह्(ह्)दं जायते स्त्रियाः। अर्थवन्तं महाभागं कुमारं सा प्रसूयते। दुकूलपट्टकौशेयभूषणादिषु दौ(ह्)हृदात्। अलङ्कारैश्चितं पुत्रं ललितं सा प्रसूयते। आश्रमे संयतात्मानं धर्मशीलं प्रसूयते। देवतापितृभक्तान्तु प्रसूते पार्थदोपमम्। दर्शने व्यालजातीनां हिंसाशीलं प्रसूयते। गोधाभांसाशने पुत्रं सुप्तसुप्तधारणात्मकम्। गवां मांसे च बलिनं सर्वक्लेशसहं तथा। माहिषे दौ(ह्)हृदाच्छूरं रक्ताक्षं लोमसंयुतम्। वराहमांसात् खड्गाख्यं शूरं सञ्जनयेत् सुतम्। मार्गाहिकालक्षणकं यदा वनचरं सुतम्। सूकराहिममांसं च भक्षितं च तैस्तिरात्। अतोऽन्यत्रेषु वा नारी यमभिध्यायति दौ(ह्)हृदम्। अरीराचारशीलैः सा समानं जनयिष्यति। कर्मणा चोदितं जन्तोर्भवितव्यं पुनर्भवेत्। यथा तथा दैवयोगाद्दौ(ह्)हृदं जनयेद्यदि"। यात्रायां दिग्भेदे दोषशान्त्यर्थे ४सेव्यपदार्थे यवाद्य स॰चि॰ "शाल्यं तिलौदनं मत्स्यं पयसापि यथाक्रमम्। मक्षयेद्दोहृदं दिग्भागार्थं पूर्वादिकां व्रजेत्। रसालां पायसं काश्मीं घृतं दुग्धं तथा दधि। पयोऽघृतं तिलाक्तं च भक्षयेद्दारदोहृदम्। पद्मादितोऽर्कदलतश्चतुरश्रिसर्षिः स्नाग्वाहविध्यमपि हेमलवं तपूपम्। भुक्त्वा व्रजेद्दुग्धमनु च धेनुमूलं यावत्पयसगुडान्नक्षमत्रसङ्गान्" स॰ चि॰ अथ दिग्दोहृदमतदुभाह शाल्यमिति। शाल्यं घृतं पूर्वस्याम्। तिलौदनं तिलमिश्रौदनं दक्षिणस्याम्। मत्स्यं प्रसिद्धं पश्चिमायाम्, पयोदुग्धसहितरस्याम्। एतद्यात्राकर्मं दिग्भ्रमभीतदिग्भवं दौहृदं भक्षयेत्ततः पूर्वादिकामाशां जिगमिषितां दिशां व्रजेत्। यदाह श्रीपतिः "शाल्यं तिलौदनं मत्स्यं पयः प्राक्प्रभृतिक्रमात्। भुङ्क्तेति शेषः नारदेन स्वन्यधोक्तं "घृताक्तं तिलमिश्रान्नं मत्स्याक्तं घृतपायसम्। प्राग्दादिक्रमशो भुक्त्वा याति राजा जयश्रीरिति"। वसिष्ठेनापि "घृताक्तं क्षत्रान्नं च मत्स्याक्तं घृतपायसम्। पूर्वादिषु क्रमाद्भुक्त्वा यात्रा सिद्धिमवाप्नुयात्" इति। अत्रैवं विरोधे विकल्पो यथादेशाचारं वा व्यवस्था। अथ दारदोहृदमतदुभाह रसालामिति। रसाला शर्करादधिमरीचकर्पूरैश्च संयुता लोके शिखरिणीति प्रसिद्धा तां रविवारे। पायसकाश्मीं प्रसिद्धे सोममङ्गलवारयोः। घृतं यत्र दुग्धं वृषे, घृतं पाक इति साधु। तत्रापि क्षीरकृशरेति वार्तिकात् प्रस्तुते क्षीरे साधुत्वम्। दधि प्रसिद्धं गुरुवारे। अघृतमपक्वं दुग्धं शुक्रे, तिलाक्तं तिलमिश्रमोदनं शनौ। एतद्दारदोहृदं रविवारादौ क्रमेण भक्षयेत्। यदाह श्रीपतिः "मल्लिकां सघृतपायसं तथा काश्मिकं घृतपयोऽदधि क्रमात्। क्षीरमाममथ तत्र खचितं तिलौदनं वारदोहृदविधिर्बुधैः कृतः "इति वसिष्ठनारदाभ्यां दुग्धस्य पक्वापक्वविशेषो नाभ्यधायि "मल्लिकां परमान्नं च काश्मिकं च पयोदधि। क्षीरं तिलौदनं भुक्त्वा भानुवारादिषु क्रमादिति"। मल्लिका रसाला। "स्यादसाला तु मल्लिका" इत्यभिधानात्। गुरुस्तु विशेषमाह "सूर्यवारे घृतं प्राश्यं चन्द्रवारे पयस्तथा। गुरुभृगुवारके वारे बुधवारे तिलानपि। गुरुवारे दधि प्राश्यं शुक्रवारे यवानपि। यावान् भुङ्क्ते

मनेर्वारे मूले मक्षत्रदोषभागिति"। अथ तिथिदोहदं वसन्ततिलकाच्छन्दसाह पञ्चादित इति। पञ्चादिः प्रतिपत्तस्याः स्यप्लोपे पञ्चमी। प्रतिपदादिपञ्चदशतिथिषु क्रमेण तिथिदोहदं भुङ्क्ता व्रजेत्। यथा प्रतिपदि अर्कस्य दधिविषेधस्य दशानि पर्णानि। द्वितीयायां तण्डुलवारिप्लावितततण्डुलजलम्। तृतीयायां घर्षितं तम्। चतुर्थ्यां आद्या यवागूः। पञ्चम्यां हविष्यं तद्दादि। षष्ठ्यां क्षेमजलं प्रक्षालिततण्डुलजलम्। सप्तम्यामपूपम्। अष्टम्यां दधकं बीजपूरफलम्। "फलपूरो बीजपूरो दधको मातुलिङ्गके" इत्यमरः। नवम्यामम्बु जलम्। दशम्यां वेतमूलं क्षीरवीमूलं न तु इक्षुमूलं वेतुशब्दपरत्वात्। एकादश्यां यावाद्यं यवविकारम्। द्वादश्यां पायसम्। त्रयोदश्यां गुडमिश्रविकारं, चतुर्दश्यामसृक् रुधिरम्। पञ्चदश्यामन्नसहानोदनमिश्रितसहान्। यदाह इन्दुमतिः "अर्कपत्रं भवेद्यावत् प्रथमायान्तु भक्षयम्। द्वितीयायां भवेद्यावद्भक्ष्यं तण्डुलोदकम्। तृतीयायां तथा सर्षिर्यवागूः स्यात्ततः परम्। पञ्चम्यां तद्धविष्यं स्यात् षष्ठ्यां वा क्षेमतोदकम्। सप्तमष्टम्यां बीजपूरकम्। नवम्यां तोयपानं स्याद्दोमूलन्तु ततःपरम्। एकादश्यां यवानद्यात् द्वादश्यां पायसं पिबेत्। त्रयोदश्यां गुडं लेह्यं रुधिरं स्याच्चतुर्दशे। सहौदनं भवेद्भोज्यं पञ्चदश्यां वियावतः। पञ्चयोरुभयोरेवं यात्रा योगे विधिः स्मृतः" इति। दैवज्ञमनोहरेऽपि क्वचिद्भेदः। यथा "अर्कदलतण्डुलोदकसर्षीषि हविष्यदधिसुवर्चयः। तिलवारिबीजपूरकमध्याह्नकमूलपिष्टिकाद्यापि। तिलपिष्टकदम्बमूलानि शाकमथ शस्यशूकपर्णानि प्रतिपत्प्रभृतिषु भुङ्क्ता प्रस्थाता सिद्धिमाप्नोतीति"। नन्दु "आलभ्यालभ्य भक्ष्यान् वा कृत्वा दद्याच्च तान् व्रजेत्। दत्त्वा वा सिद्धिमाप्नोति दुष्टभादिषु भूपतिरिति" मुहूर्त्तदुष्टवारादिषु दोहदाभिधानं सार्थकम्। विहितेषु पुनर्नक्षत्रतिथिवारादिषु दोहदाभिधानं व्यर्थम्। दोषनिवारणफलको हि दोहदस्तदभावे वैयर्थ्यप्रसङ्गात्। उच्यते। दुष्टभादिषु भूपतिरित्यत्र दुष्टत्वं किञ्चैवंविधस्तावत् अहितनक्षत्रेऽपि क्रूरषडक्षादित्यादिदोषान् दोषः सम्भावितोऽस्ति तदपाकरणाय दोहदाभिधानं सार्थकम् एवं सर्वत्रापि पारिशेष्यात् विहितताराक्रूरषडक्षादित्यादिमहादोषनिवारणाय दोहदोक्तेः सार्थक्याच्च। एवं विहिततिथिदोहदाभिधानं योगित्वादिदोषनाशार्थम्। "सक्रूररागेरशुभा तिथिः स्यात्" इत्तेतद्दोषनिवारणार्थं च। तद्दोषाभिधानं च रत्नमालायाम्। "आद्याचतस्रः क्रियपूर्वकाद्यां मेषाद्यतस्तिसृषु षष्ठमी स्यात्। पराः परेषां परतस्तथैव सक्रूररागेरशुभा तिथिः स्यात्" इति। एवं वारदोहदोक्तिरपि वक्रिषष्ठवारमूलादिदोषहान्या सार्थिका दिग्दोहोक्तिरपि तिथिपतिबुधप्रतिशुक्रपतिभौमादिदोषहान्या सार्थिका" पी०धा०

तत्र गर्भे "सुदक्षिणा दोहदलक्षणं दधौ" रघुः। अभिलाषे "उदकक्रीडादोहदागतानाञ्च" काद० गर्भिण्यभिलाषे "प्रजावती दोहदसंज्ञिनी ते" रघुः ६पुष्पोद्गमेऽपि च "कुसुमं नवदोहदस्त्रिया यदशोकोऽयमुदीरयिष्यति" रघुः "काङ्क्षत्यन्योदनमदिरादोहदक्लमनाशाः" मेघः अशोकवकुलयोः स्त्रीपदताडनगण्डूषमदिरे दोहदमिति प्रसिद्धिः। "स्त्रीणां अशोकः प्रियकुर्विकसति बकुलः शीधुगण्डूषसेकात् पादाघाताद्वशोकस्तिलककुरवको वीक्षणालिङ्गनाभ्याम्। मन्दारो नर्मवाक्यात् पटुमृदुहसनात् चम्पको वक्त्रवातात् चूतो गीतान्नमेरुर्विकसति च पुरोनर्तनात् कर्णिकारः" भट्टि० ४तवाक्यम्

**दोहदलक्षण** न० दोहदस्य गर्भस्य लक्षणं यत्र। १वयःस्थौ हृतः। २गर्भलक्षणे च।

**दोहदवती** स्त्री दोहद+अर्शआद्यच् मतुप् मस्य वः। द्रव्यविशेषाभिलाषवत्यां गर्भिण्याम् अमरः। दोहदान्विताया-मत्र ङीप च०।

**दोहन** न० दुह-भावे ल्युट्। १क्षन्नःस्रितद्रवद्रव्यस्य वह्निभिःसारणरूपे व्यापारे (दोओया) करणे ल्युट् क्लीप्। २दोहनसाधनपात्रेऽपि शब्दरत्ना०।

**दोहल** पु० दोहमाकर्षं लाति ला-क। १रक्षायां २दोहदशब्दार्थे च शब्दार्थकल्प०। "अशोक! यदि सद्यस्त्वं सकुसुमैर्न सम्पत्स्यसे वृथा वहसि दोहलं ललितकामिषाधारत्वम्" मालविका० ततः अर्शआद्यच् मतुप् मस्य वः। ङीप् दोहलवती १दोहदवत्यां स्त्रियां शब्दार्थचि०। २अशोकवृक्षे स्त्री राजनि० गौरा० ङीष् दोहली।

**दोहस्** पु०दुह-भावे असुन्। दोहने प्रचारणे "दधा क्षत्रे समूहे दोहसा दिवः" ऋ०१०।११।१"दोहसा दोहनेन" भा०

**दोहसे** अव्य०दुह-तुमर्थे "सेसेनसेन" इत्यादि पा० ३।४।९ सू० तुमर्थे असेन्। दोग्धुमित्यर्थे "अर्त्तेऽन्यहोऽर्थे"

ऋ० ६।६६।१ "मक्षु न वेषु दोहसे" ऋ० ६।६६।५ "दोहसे कामान् दोग्धुम्" भाष्यम्।

दोहा स्त्री मात्रावृत्तभेदे "षट्कलत्रयगौ त्रिकलमपि विषमपदे विनिधेहि। समपादान्ते चैकलमिति दोहामव" धेहि" तद्लक्षणम्। [दुग्धे त्रिका०।

दोहापनय पु० दोहमपनयति खनिःसरणेन अप+नी-अच्।

दोहित त्रि० दोह+तार० इतच्। सञ्जातदोहे [ङीप्।

दोहिन् त्रि० दुह-णीलार्थे घिनुण्। दोहनशीले स्त्रियां

दोहीयस् त्रि० दोग्धृ+अतिशायने "तुश्छन्दसि" इयसुन् तृचोलोपः। अतिशयेन दोग्धरि। स्त्रियां ङीप् दोहीयसी एवं इयसुन् दोहित तत्रार्थे त्रि० स्त्रियां टाप्। शब्दकल्पद्रुमे अस्य दोहिनृशब्दप्रकृतिकत्वकल्पनं भ्रामादिकमेव।

दोह्य त्रि० दुह-कर्मणि वा यत्। १दोहनीये २दुग्धे ३धेन्वादौ स्त्री। "ऐडबन्धंसदुहां यतः" पा० अस्यादुदात्तता। "बीजायोधाङ्गरत्नस्त्रीदोह्य पुंसां परीक्षणम्" याज्ञ०। [त्रि०।

दौःसाधिक पु० दुष्टः साधः तत्र नियुक्तः ठक्। द्वारपाले

दौकूल पु० दुकूलेन परिवृतो रथः अण्। दुकूलेन परिवृते रथे अमरः पृथो० दौकूल तत्रार्थे हेमच०।

दौगर्ह पु० अर्थे निरु०।

दौत्य न० दूतस्य भावः कर्म वा ष्यञ्। १दूतकर्मणि २तद्भावे च "हनूमदादयैर्यस्य मया पुनर्हिंसा कृतैर्दौत्यपथः स्थितैरतः" नैष० "दौत्यं तवैतत् घोरे विषये जनमेजय!" हरिवं० १७३अ० "भगवन् श्रूयतां वाक्यं दौत्येनाहमिहागता" हरिवं० १७७अ०।

दौरात्म्य न० दुष्ट आत्मा यत्रः धृतिः बुद्धिः स्वभावः शरीरं वा यस्य तस्य भावः ष्यञ्। निन्दितयत्नादौ "दौरात्म्यात्राद्यचमसां तु नाशस्त्वाः अदृष्टः पशवः" रघुः।

दौर्ग न० दुर्गस्य दुर्गाया वा इदम् अण्। १दुर्गसम्बन्धिनि २दुर्गासम्बन्धिनि च "आश्वयुजे दौर्गनवमी दुर्गा चैव कृताशनी। पूर्वविद्धैव कर्तव्या शिवरात्रिर्बलेर्दिनम्" कालमा० धृतवाक्यम्।

दौर्गत्य न० दुर्गतस्य भावः ष्यञ्। १दारिद्र्ये २दुःखित्वे च "दौर्गत्यादौरनौजस्यं दैन्यं मलिनतादिकृत्" सा०द० "भर्तुः कुर्वन्ति दौर्गत्यात् सोऽनर्थः सुमहान् कृतः" भा० स० ६अ०।

दौर्गन्ध्य न० दुष्टो गन्धोऽस्य ततो भावे ष्यञ्। दुष्टगन्धयोगे। "बधु तृणाहरं यच्चाक्षेदुर्गन्ध्यनाशनम्" सुश्रुतः। गात्रे दौर्गन्ध्यकारत्वञ्च अनुशासने उक्तं तच्च १७६२पृ० दर्शितम्।

दौर्गह पु० दुर्गहस्यापत्यम् शिवा० अण्। १दुर्गहस्यापत्ये पुरुकुत्से स्त्री "सप्त स्त्रियो दौर्गहे बध्यमाने" ऋ०४।४२ ८। "पुरुकुत्सस्य महिषी दौर्गहे बन्धने स्थिते। पत्यावराजकं दृष्ट्वा राष्ट्रं पुत्रस्य शिष्यवत्" भा० शृतवाक्यम् २अत्रे निरु० दौर्गहे स्थाने पाठान्तरम्।

दौर्गह पु० दुःखेन यहो यस्य बहुव्रीहौ अच्। तत्साध्यो यागः अण्। अश्वमेधे "तेन ह पुरुकुत्सो दौर्गहेणेजे" शत० ब्रा० १३।५।४। दौर्गहेणाश्वमेधेन संहतेन क्रतुना अश्वमेधेनेजे इत्यर्थः" भा०।

दौर्गाायण पु० दुर्गस्यापत्यं नडा० फक्। दुर्गस्यापत्ये

दौर्जन्य न० दुर्जनस्य भावः ष्यञ्। दुर्जनत्वे "तदिदं सम दौर्जन्यं वालिशस्य महीयसि" भाग० ६।६८।५२

दौर्बल्य न० दुर्बलस्य भावः ष्यञ्। दुर्बलत्वे "अनादेयस्य चादानात् आदेयस्य च वर्जनात्। दौर्बल्यं ख्याप्यते राज्ञः" मनुः "पपात भूमौ दौर्बल्यात्" भा० शा० ५२अ०।

दौर्भागिनेय पुंस्त्री० दुर्भगाया अपत्यं कल्या० ढक् ढिनङ् च वृद्धगेत्यादिना द्विपदवृद्धिः। दुर्भगाया अपत्ये।

दौर्भाग्य न० दुर्भगाया दुर्भगस्य वा भावः ष्यञ् द्विपदवृद्धिः। दुर्भाग्यान्वितत्वे "भुङ्क्ते पिण्डमदृष्टे नारी भुङ्क्ते स्वामिमदृष्टे यदि। दौर्भाग्यं जायते तस्याः पतन्ति कुलदेवताः" इति ज्योति०त० "यत्ते केशेषु दौर्भाग्यं सीमन्ते च मूर्धनि। ललाटे कर्णयोरक्ष्णोरापस्तद्घ्नन्तु सर्वदा" याज्ञ० "अद्य केकेयि! दौर्भाग्यं राज्ञा ते ख्यापितं महत्" भा० व० २७६अ० तत्कारत्वञ्च अनुशासनोक्तम् १७६१ पृ० दर्शितम्। [ख्यातृत्वे।

दौर्भाग्य न० दुष्टोभ्राता तस्य भावः युवा० अण्। दुष्ट-

दौर्मनस्य न० दुष्टं मनोऽस्य तस्य भावः ष्यञ्। खेदादिनिमित्ते चित्तस्य दौस्थ्ये दुष्टमनोयुक्तत्वे "तेषां क्षते मे निश्वासो दौर्मनस्यञ्च जायते" देवीभा० "क्षतक्षतिः प्रोषितदौर्मनस्यम्" कु० सं० ७अ०।

दौर्वासस न० दुर्वाससा प्रोक्तम् अण्। शिवधर्मोक्ते उपपुराणभेदे उपपुराणशब्दे दृश्यम्। [मेदि०।

दौर्वीण न० दूर्वाया इदम् खञ्। १दूर्वारसे २दृष्टपर्णे च

दौर्व्रत्य न० दुष्टं व्रतनोक्तननादि व्रतं यस्य तस्य भावः

ष्यञ्। दुष्टत्वतत्वे "मित्रं सौत्रत्वेन दुष्टं दौर्हृत्वेन" यजु०२९।६

दौर्ह(ह)द न० दुर्हृदो भावः अण् वा न द्विपदवृद्धिः। दोहृद+स्वार्थे अण् वा। दोहृदशब्दार्थे दोहृदशब्दे दृष्टान्तवाक्यं दृश्यम्।

दौर्हार्द न० दुर्हृदो भावः युवा० अण् द्विपदवृद्धिः। शत्रुत्वे

दौर्हृदय न० दुर्हृदयस्य दुष्टहृदययुक्तस्य भावः युवा० अण् न द्विपदवृद्धिः। दुष्टचित्तत्वे। [कच्छमे हेमच०।

दौलेय पु० दुलेरपत्यम् "इतश्चानिञः" पा० ढक्। दुलेरपत्ये

दौल्मि पु० दुल्म+अपत्ये इञ्। इन्द्रे शब्दार्थकल्प०।

दौवारिक पु०द्वारे नियुक्तः ठक् द्वारा० व्याभ्यां प्राक् ऐच्। १द्वारनियुक्ते २द्वारपाले ३प्रतीहार्यां स्त्री ङीप्। "दौवारिकी देवरूपमेत्य" रघुः "प्रविश्य दौवारिकः" शकु०। दौवारिकलक्षणं मत्स्यपु० उक्तं यथा "प्रांशुः शुरूपोदक्षश्च प्रियवादी न चोद्धतः। चित्तज्ञश्च सर्वेषां प्रतीहारः स उच्यते"। औशनसनीतिशास्त्रपरिशिष्टे तु अन्यथोक्तं यथा "शस्त्रास्त्रकुशलो यस्तु दृढाङ्गश्च निरामयः। यथायोग्यं समाज्ञयात् स ज्ञेयः प्रतिहारकः"। "इङ्गिताकारतत्त्वज्ञो बलवान् प्रियदर्शनः। अप्रमादी समो दक्षः स प्रतीहार उच्यते" चाणक्यः। ह०सं०उक्ते २एकाशीतिपदस्थे वास्तुदेवभेदे च "पितृदौवारिकसुग्रीवकुसुमदन्तास्त्वपत्यहराः"।

दौवालिक पु० देशभेदे तत्रत्यराजादिषु ब०व०। "दौवालिकाः सागरकाः पत्रोर्णाः शैशिरास्तथा। कर्णप्रावरणाश्चैव बहवस्त्वत्र भारत!। तत्रस्था द्वारपालेषु प्रोच्यन्ते राजशासनात्। ज्ञातकाला: सुबलयस्ततो द्वारमवाप्स्यथ" भा०स०५१अ०।

दौश्शील्य न० दुश्शीलो भावः ष्यञ्। स्वभावतोऽनाहृत भेदत्वे "ब्रह्महा चपरोगित्वं दौश्शील्यं गुरुतल्पगः" मनुः।

दौष्क त्रि० दोषा चरति "दोष उपसंख्यानम्" वार्त्ति० ठण् "दृषः षः" पा० षत्वम्। वाङ्मयां चारिणि।

दौष्कुल दुष्टं कुलमस्य दुष्कुलः स्वार्थे अण्। दुष्टकुलयुक्ते "न दुर्जने दौष्कुलेा वा व्रतैर्यो वा न संस्कृतः" भा०शा० २६अ०।

दौष्कुलेय पु०दुष्कुलस्यापत्यं तत्र भवो वा "दुष्कुलाड्ढक्" पा० पक्षे ढक्। दुष्कुलजाते "कुलेजाताश्च स्त्रियस्ते दौष्कुलेयवशानुगाः" भा०व० १६२अ०।

दौष्कुल्य त्रि० दुष्कुल+स्वार्थे ष्यञ्। दुष्टकुलयुक्ते "दौष्कुल्या व्याधिबद्धाश्च दुरात्मानोऽप्रतापिनः" भा०व० १८२ अ०।

दौष्ठव न० दुष्टोः अविनीतस्य भावः उङ्ग०अण्। अविनीतत्वे

दौष्पुरुष्य न० दुष्टः पुरुषः तस्य भावः स्वार्थे वा ब्राह्मणा० ष्यञ्। १दुष्टे पुरुषे २तद्भावे च।

दौष्मन्त(न्ति) पु० दुष्मन्तस्यापत्यम् शिवा० अण् इञ् वा। दुष्मन्तदृषद्यापत्ये भरते "दौष्मन्तिं भरतं चापि श्रुतं सृञ्जय! शुश्रुमः" भा०द्रो०६७अ०। "भरतश्चैव दौष्मन्तिं श्रुतं सृञ्जय! शुश्रुमः" भा०शा०२९अ०। अस्य विसर्गमध्यता मध्यन्यतापि "तेन चैतेन भरतो दौःषन्तिरीजे" शत०ब्रा० १३।५।४८ अत्र पृषो०मस्य लोप इति बोध्यम् यमध्यो दौष्मन्तिरित्यपत्र "रूपौदार्य्यगुणोपेतं दौष्मन्तिं जनमेजय!" भा०आ०७४अ०।

दौष्मन्त्य त्रि० दुष्मन्तस्यायम् यत्र। दुष्मन्तसम्बन्धिनि "सत्यवत्यचिन्तयन्ना दौष्मन्त्यो वंश उच्छेदं व्रजेदिति" भा० आ० ९५अ०। [भावे।

दौस्त्र न० दुष्टा स्त्री तस्याः भावः युवा० अण्। दुष्टस्त्रिया

दौहिक दोहं नित्यमर्हति ठञ्। नित्यं दोहार्हे

दौहित्र पुंस्त्री० दुहितुरपत्यम् विदा० अञ्। दुहितुरपत्ये स्त्रियां ङीप्। "पौत्रदौहित्रयोर्लोके विशेषो नास्ति कश्चन। तयोर्हि मातापितरौ सम्भूतौ तस्य देहतः" मनुः "दौहित्रोऽपि त्रायते नं सन्तारयति पौत्रवत्।" मनुः। २खड्गादौ न०। "दौहित्रं खड्गमित्याहुरपत्यं दुहितुस्तथा:। कपिलायास्तथा चैव दौहित्रमिति चोच्यते" भार्कण्डेयपु० "त्रीणि श्राद्धे प्रशस्तानि दौहित्रं कुतपस्तिलाः" तत्रैव। "त्रीणि श्राद्धे पवित्राणि दौहित्रः कुतपस्तिलाः। त्रयस्त्वमपि दौहित्रं श्राद्धे यत्नेन भोजयेत्। कुतपस्त्वासने दद्यात् तिलैश्च विकिरेन् महीम्" मनुः "कुतपं नेपालकम्बलम्" इति कुल्लूकभट्टः। "ब्राह्मविवाहेनोढायाः कन्याया पुत्रोत्पत्तिं विना तदुत्पन्नभोजने दोषोऽभिहितः" वह्निपु०।

"कन्यायां ब्रह्मदेयायामभुञ्जन् सुखमश्नुते। अथ भुञ्जीत यो मोहात् भुक्त्वा स नरकं व्रजेत्। अपत्यायाञ्च कन्यायां न भुञ्जीयात् कदाचन। दौहित्रस्य सुखं दृष्ट्वा किमर्थमनुशोचसि। महामत्स्यसमाकीर्णात् नास्ति ते नरकाद्भयम्। तीर्णस्त्वं सर्वदुःखेभ्यः परं स्वर्गमवाप्स्यसि। दौहित्रस्य तु दानेन नन्दन्ति पितरः

सदा। यत्किञ्चित् कुरुते दानं तदानन्त्याय कल्पते"

दौहित्रायण पुंस्त्री० दुहितुरपत्यं युवा विदा० फिञ् ञ्यङ्क्यजनत्वात् यूनि फरितां फक्। दुहितुर्यून्यपत्ये।

द्यविद्यवी स्त्री दिवसे निरु०।

द्यावाक्षमा स्त्री द्वि०व० द्यौश्च क्षमा च दिवो द्यावादेशः। स्वर्गपृथिव्योः शेमच०। एवं द्यावापृथिवीद्यावाभूमि शब्दावपि तत्रार्थे द्वि०व० "द्यावापृथिवीयम्" शत०ब्रा० ११।५।२ द्यावापृथिव्योरिदम् वैश्वदेवं तत्सम्बन्धि इत्यर्थः। "द्यावापृथिवी इह ज्यैष्ठे" शत०१२।५।१।११ "वार्त्तत्वात् एकवचनानुक्तता। "द्यावाभूमी जनयन् देव एक आस्ते विश्वस्य कर्त्ता भुवनस्य गोप्ता" अनुमानचिन्तामणिधृतश्रुतिः।

द्यु अभिगमने कदा०पर०सक०अनिट्। द्यौति अद्यौषीत्। दुद्याव। "गुहाया निरगात् वाची विन्दो स्वर्गमिव द्युवन्" भट्टिः।

द्यु न० दिव-उनु किच्च वा०वलोपश्च। १दिने २गगने ३स्वर्गे च विश्वः ४यज्ञे पु० मेदि०।

द्युच्च त्रि० दिवि द्युनि चरति चि-निवासे ड। १स्वर्गलोकवासिनि त्रिका० "द्युचो राजा गिरामाक्षितोतिः" ऋ०६।२४।१ "द्युचो द्युलोक निवासी" भा० २दीप्तियुक्ते च "द्युचमर्यमणं भगम्" ऋ०१।१३६।६ "द्युचं दीप्तिमन्तम्" भा०।

द्युग पुंस्त्री० द्युनि दिवि वा आकाशे गच्छति गम-ड। १पक्षिणि राजनि०। स्त्रियां जातित्वात् ङीष्। २आकाशगामिमात्रे त्रि० स्त्रियां टाप्।

द्युगण पु० द्युनां दिवां वा दिनानां गणः। सङ्ख्यायां मध्यगतिसाधनाङ्के दिनसङ्घे अङ्कगणशब्दे ५७७ पृ०तदानयनादि दृश्यम्। "रविदिनानामधिकमासकैः क्रतदिनैः सहितो द्युगणो विधोः" सि०शि०।

द्युगत् न० दिव+गम-क्विप्। शीघ्रे निरु० "यतस्वा सीभिर्द्युगदिन्द्र!" ऋ० ८।८६।४

द्युचर त्रि० दिवि द्युनि वा आकाशे चरति चर-ड। १पक्षिणि २पक्षिणि च "द्यौश्चाद्य तदा राजन्! द्युचराश्च सहस्रशः" हरिवं० १२७अ०।

द्युज्या स्त्री ह्रस्व०। द्युहस्वाक्षोपान्तहस्तस्य दलरूपायां ज्यायाम्। "क्रान्तेः क्रमोत्क्रमज्ये हे कृत्वा तत्रोत्क्रमज्यया। हीना त्रिज्या दिनव्याधदलं तद्दक्षिणोत्तरम्" सि०शि० "अदक्रान्तेः क्रमोत्क्रमज्ये हे अपि प्रकाश्य तत्र तत्राद्ये क्रान्त्युत्क्रमज्यया त्रिज्या हीना, दिनव्याधदलमहोरात्रहस्तस्य व्याधार्द्धं द्युज्ये द्वे स्यातः" रङ्ग०। "क्रान्तिज्या भुजः त्रिज्या कर्णस्तदर्द्धान्तरपदमहोरात्रहस्तस्यार्द्धं खेट द्युज्या" सि०शि० व्याख्यायां प्रमिता०।

द्युत दीप्तौ भा०चक०आत्म०सेट्। द्योतते खद्योतत्वात् कर्त्तरि प०अद्युतत् अद्योतिष्ट। दिद्युते। द्योतनः "अद्युतच्चन्द्रमाश्चयम्" भट्टिः उपसर्गपूर्वकस्य तत्तदुपसर्गद्योत्यार्थयुक्ते द्योतने। "व्यद्योतिष्ट सभावेद्यामसौ नरशिखित्रयी" माघः। "विद्युद्युते बाडवजातवेदसाम्" माघः २शोभायाञ्च "पद्मैरनल्पीतवधूमुखद्युतः" माघः क्विपि द्योतयति प्रकाशने व्यञ्जनादित्वा बोधने च द्योत्यार्थः अकृप्रयोः

द्युत् पु०द्युत-क्विप्। १किरणे हेमच०। २द्योतमाने त्रि० "य ईं द्युता विद्युता वेति साम" ऋ०१०।६६।२। "द्युता द्योतमानेन" भा०।

द्युत त्रि० द्युत-क। द्योतमाने कदाचरति क्विप् द्युतति अद्युतीत्। "द्युतद्यामानं हरसोन्नतेन" ऋ०५।८०।१

द्युतान त्रि० द्युत-शानच् वेदे गणव्यत्ययात् शपोलुक्। द्योतनशीले "द्युतानस्त्वा मारुतो मिनोतु" यजु० ५।२७ "द्युतानः दीप्यमानः" वेददी०।

द्युति स्त्री द्युत-इन्। १दीप्तौ २शोभायाम् "सुवर्णपङ्कद्युतिरञ्जिताङ्गुलिः" रघुः। "रूपयौवनलालित्य भोगाढ्यैरङ्गभूषणम्। शोभा प्रोक्ता सैव कान्तिसंज्ञयाप्यायिता द्युतिः। कान्तिरेवातिदीप्तौस्त्री दीप्तिरित्यभिधीयते" सा०द० तत्सामान्यावान्तरभेदकथनेन स्त्रीत्वं सात्त्विकालङ्कारतया उक्ते २अर्थे। "देहजा कान्तिर्द्युतिरित्याचार्य्या मन्यन्ते।

द्युतित न०द्युत-भावे क्त वा न गुणः। १दीप्तौ पक्षे गुणः द्योतितमप्यत्र। २कर्त्तरि क्त। २दीप्तियुते त्रि०।

द्युतिधर पु० द्युतिं देहगतां कान्तिं धारयति धृञ् भूतसंज्ञायां ट-अच्। विष्णौ "तेजो द्युतिधरः" विष्णुसं० "द्युतिमङ्गगतां कान्तिं धारयन् द्युतिधरः" भा० "ओजस्तेजो द्युतिधरः" विष्णुसं०नामान्तरं तद्व्युत्पत्तिर्भाष्ये अन्यथा दर्शिता यथा "ज्ञानशक्तिं दीप्तिं धारयन् द्युतिधरः" इति। तेनोभयविधयोगार्थत्वात् तस्य नामद्वयमित्यधौनरुक्त्यम्।

द्युतिमत् त्रि० द्युतिः प्रशंसायामस्त्यर्थे मतुप्। १प्रशस्तकान्तियुक्ते "यस्योतत्रासो द्युतिमान्" भा०व्या०६६अ०"द्युतिमतां निकरेण महास्वनाम्" किरा०। स्त्रियां ङीप्। स्वायम्भुवस्य मनोः २पुत्रभेदे पु०। तदुपक्रमे "ज्योति-

मान् द्युतिमान् इव्यः सवर्णायुत्र एव च" हरिवं०७अ०। मेरुसावर्णिमन्वन्तरे २सप्तर्षिभेदे च। तदुपक्रमे "ज्योतिष्मान् भार्गवश्चैव द्युतिमानङ्गिरास्तथा" तत्रैवाध्याये। मद्रराज ४ऋषभेदे "सङ्गदेवोऽपि माद्रीमेव स्वयंवरे विजयां नामोपयेमे मद्रराजस्य द्युतिमतोदुहितरम्" भा०आ० ९५अ०। ५शाल्वदेशऋषभेदे च "नाम्ना च द्युतिमान्नाम शाल्वराजः प्रतापवान्" भा०भी०२३४अ०। ६मदिराश्वऋषपुत्रे च "मदिराश्वस्य पुत्रोऽभूत् द्युतिमान्नाम पार्थिवः। पुत्रोद्युतिमतस्त्वासीद्राजा परमधार्मिकः" भा०अनु० २अ०।

द्युतिला स्त्री द्युतिं लाति ला-क। ओषधिभेदे रत्नमाला

द्युधुनि स्त्री इत०। स्वर्गनद्यां गङ्गायाम् "विद्वैर्नुतो द्युधुनि पातमिवस्वनाच्च" भाग०२।२३।१७ द्युनद्यादयोऽप्यत्र।

द्युन न० छम्बावधिके सप्तमस्थाने "द्युनं द्यूनं तथास्याख्यं षट्कोणं रिपुमन्दिरम्" ज्यो०त०।

द्युनिवास पु० दिवि द्यु नि वा निवासोऽस्य। देवे "गोकाग्निनाऽगात् द्युनिवासभूयम्" भट्टिः। [इन्द्रे च।

द्युपति पु० इत०। १इन्द्रे हेमच०। २दिनपतौ सूर्ये ३ऋक्

द्युम त्रि० द्यु+अस्त्यर्थे म। दिनादिविशिष्टे [इन्द्रे च।

द्युमणि पु०दिवः स्वर्गस्य मणिरिव। १सूर्ये अमरः। २ऋक्

द्युमत्सेन पु० शाल्वमहीपतिभेदे सत्यवतः पितरि "द्युमत्सेनसुतं वीरं सत्यवन्तमनिन्दिता" भा०वि०२०अ०। "आसीच्छाल्वेषु धर्मात्मा क्षत्रियः पृथिवीपतिः। द्युमत्सेन इति ख्यातः पश्चाच्चान्धो बभूव ह। विनष्टचक्षुषस्तस्य बालपुत्रस्य धीमतः। मात्रीयेण गतं राज्यं जिह्मेऽक्षिणि पूर्ववैरिणा। स बालत्वाच्चया सार्द्धं भार्यया प्रस्थितोवनम्। महारण्यं गतश्चापि तपस्तेपे महाव्रतः। तस्य पुत्रः पुरे जातः संवृद्धश्च तपोवने। सत्यवानसुरूपो मे भर्तेति मनसा वृतः" भा०व०२८१अ०सावित्र्युक्तिः।

द्युमत् त्रि० द्यौः कान्तिरस्यास्ति दिव-मतुप् दिव उत्त्वम्। कान्तियुक्ते "वीतिहोत्रं त्वा कवे! द्युमन्तम्" यजु० २।४ "द्युमत्मा शुतीकस्य सूनोः" २७।११

द्युमद्दान न० दानमानभेदे।

द्युमयी स्त्री विश्वकर्मकन्यायां सूर्यभार्यायाम् "सरेणुर्द्युमयी त्वाष्ट्री प्रिये चैते विभावसोः" त्रिका०।

द्युम्न न० दिवं दीप्तिं मनति मन्-क। १धने अमरः। २वले निघण्टुः। ३द्युभः।

द्युलोक पु० द्यौरेव लोकः दिव उत्त्वम्। स्वर्गलोके

द्युवन् पु० द्यु-क्विनि उवङ्। सूर्ये उज्ज्वल०।

द्युष(स)द् पु० दिवि सीदति सद-क्विप् पूर्वपदात् सन्दिवि षत्वम् लोकेऽपि षत्वम्। १देवे २यज्ञे च "मनःसु वेषां द्युषदां न्यधीयत" माघः।

द्यू त्रि० दिव्यति दिव-क्विप् ऊठ्। देवके अजद्यूः।

द्यूत न० दिव-भावे क्त ऊठ् आर्द्धधा०। १देवने क्रीडाभेदे २विवादपदभेदे च तत्स्वरूपादिकं वीर०मि० निरूपितम् "अक्षवभ्रगलाकाद्यैर्देवनं जिह्मकारितम्। पणक्रीडा वयोभिश्च पदन्यूनसमाह्वयमिति नारदः। अक्षाः पाशाः। वभ्रश्चर्मपट्टिका। गलाका दन्तादिमय्यो दीर्घचतुरस्राः। आद्यपदाच्चतुरङ्गादिक्रीडासाधनं करितुरगादिकं गृह्यते। तेरप्राणिभिर्द्यूतं पणपूर्विका क्रीडा। तथा वयोभिः पक्षिभिः पारावतादिभिः चषकाक्षमेषादिभिश्च प्राणिभिर्द्यूतं पणपूर्विका क्रीडा क्रियते तदुभयं यथाक्रमन्यूनसमाह्वयाख्यं व्यवहारपदमित्यर्थः। द्यूतस्य समाह्वयश्च द्यूतसमाह्वयम्। अतएव मनुः। "यत्प्राणिभिर्यत्क्रियते तल्लोके द्यूतमुच्यते। प्राणिभिः क्रियमाणस्तु विज्ञेयः समाह्वयः" इति। तत्र सभिकं गलाह नारदः "सभिकः कारयेद्यूतन्देयं दद्याच्च तत्कृतम्। दृष्ट्वा तु कितवो राज्ञे दत्त्वा भागं यथोदितम्। प्रकाशन्देवनं कुर्यादेवं दोषो न विद्यते" इति। तस्य वृत्तिमाह याज्ञवल्क्यः "गलके यतिकद्वृत्तेषु सभिकः पञ्चकं शतम्। सङ्ग्रीयाद्भूर्लिखितवादितराद्दशकं शतमिति"। परस्परं सम्मतिपत्त्या कितवैः परिकल्पितः पणोगलकः गलके तदाश्रया शतपरिमिता तदधिकपरिमिता वा वृद्धिर्यस्यासौ यतिकद्वृद्धिस्तस्मात्कितवात्पञ्चकं शतं जितस्य गलकस्याद्दश्यं विंशतितमं भागं सङ्ग्रीयादित्यर्थः। पञ्चकं शतं पञ्चपणा आयो यस्मिन् शते तत्पञ्चकं "तदस्मिन् वृद्धेति"पा०ठन्। सभापतिस्तु कल्पिताद्यादिभिश्चिह्नकीडोपकरणैस्तदुचितद्रव्योपजीवी रत्नरत्नादपूर्वशतवृद्धेः कितवाद्दशकं शतङ्गृह्णीयात्तस्य दशमभागं सङ्ग्रीयादित्यर्थः। एवं कृप्रवृत्तेः सभिकस्य यत्कर्त्तव्यं तदाह स एव "स सभ्यैः पालितो दद्यात् राज्ञे भागं यथाकृतम्। जितमर्द्याद्दवेल्लेखे दद्यात्तत्र वचः क्षमीति"। यः कृप्रवृत्तिर्द्यूताधिकारी स राज्ञा द्यूतकितवेभ्योरक्षित-

काले राज्ञे यथाप्रतिपन्नभंगं दद्यात्। तथा जितं द्रव्यं पराजितसकाशादासेधादिना उद्धृत्य जेत्रे जयिने दद्यात्। तथा सभी भूत्वा द्यूतकारिणोऽतिविश्वासार्थं सत्यं वचो वदेदित्यर्थः। नारदोऽपि "सभिकः कारयेत् द्यूतं देयं दद्याच्च तत्कृतमिति"। हरीतस्मृतिरपि "सभिको याचकस्तत्र दद्याज्जेत्रे नृपाय वेति" द्यूतपराजितकितवानां बन्धनादिना पणयाचको भवेत्। पणयाचकात् प्रागेव स्वकीयं द्रव्यं जेत्रे नृपाय च यथाभागं सभिको दद्यादित्यर्थः। तथा च कात्यायनः "जेतुर्दद्यात् स्वकं द्रव्यं जितं याच्यं त्रिपक्षिकम्। सद्यो वा कितवेनैव सभिकात्तु न संशयः" इति। त्रिपक्षिकमित्यनेन यथा सामर्थ्यमा त्रिपक्षात्कालो देय इति दर्शितमिति स्मृतिचन्द्रिकायाम्। यदा तु जेत्रे जितं द्रव्यं सभिको दापयितुमशक्तस्तदा राजा दापयेदित्याह याज्ञवल्क्यः "प्राप्ते नृपतिना भागे प्रसिद्धे धूर्त्तसंसदि। जितं ससभिके स्थाने दापयेदन्यथा न त्विति" प्रसिद्धे अन्यथा प्रच्छन्ने सभिकरहितेऽन्तराजभागे द्यूते जित एष जेत्रे न दापयेदित्यर्थः। प्राणिद्यूते प्राणिनां जयपराजयौ तत्स्वामिनोरित्याह हरीतस्मृतिः "हस्तयुद्धेन यः कश्चिदवसादमवाप्नुयात्। तत्स्वामिना पणो देयो यस्तत्र परिकल्पितः" इति। पणपरिकल्पनं कृताकृतमित्याह नारदः "परिज्ञातकृतं यच्च यच्चाप्यविदितं नृपे। तत्रापि नाप्नुयात्कामममथ वाऽनुमतं तयोरिति"। काम्यत इति कामः पणः। अत्र जयपराजयविप्रतिपत्तौ निर्णयप्रकारमाह याज्ञवल्क्यः "द्रष्टारो व्यवहाराणां साक्षिणश्च त एव हीति"। द्यूतव्यवहाराणां द्रष्टारः सभ्याः त एव कितवा एव निर्वोढव्या राज्ञा। न तत्र श्रुताध्ययनसम्पन्ना इत्याद्युक्तनियमोऽस्ति। साक्षिणोऽपि त एव द्यूते द्यूतकरा एव कार्याः न तत्र स्त्रीबालद्विजकितवेत्यादिसाक्षिनिरूपणोक्तनिषेधोऽस्तीत्यर्थः। विष्णुरपि "कितवेष्वेव तिष्ठेरन् कितवाः संशयं प्रति। य एव तत्र द्रष्टारस्त एवैषान्तु साक्षिणः" इति। साक्षिणां परस्परविरोधे आह हरीतस्मृतिः "उभयोरपि सन्दिग्धे कितवाः स्युः परीक्षकाः। यदा विद्वेषिणस्ते तु तदा राजा विचारयेदिति।" अनियुक्तद्यूतकारिणो दण्डमाह नारदः "अनिर्दिष्टस्तु यो राज्ञा द्यूतं कुर्वीत मानवः। न स तं प्राप्नुयात्कामं विनयञ्चैव सोऽर्हतीति"। ये तु कूटं द्यूतं कुर्वन्ति तेषां दण्डमाह याज्ञवल्क्यः "राज्ञा सचिह्नं निर्वास्याः कूटाक्षोपधिदेविनः" इति। कूटैरक्षादिभिः उपधिना मणिमन्त्रादिना मतिवञ्चनेन च ये दीव्यन्ति तान् स्वपदादिनाऽङ्कयित्वा राजा स्वराष्ट्रान्निर्वासयेदित्यर्थः। निर्वासने विशेषमाह नारदः "कूटाक्षदेविनः पापान् राजा राष्ट्रान्निवासयेत्। कण्ठेऽक्षमालामासज्य स ह्येषां विनयः स्मृतः" इति। दण्डने विशेषमाह विष्णुः। "द्यूते कूटाक्षदेविनां करच्छेदः उपधिदेविनामाच्छेदः" इति। यानि तु द्यूतनिषेधकानि मनुवचनानि "द्यूतं समाह्वयञ्चैव यः कुर्य्यात्कारयेत वा। तान् सर्वान् घातयेद्राजा शूद्रांश्च द्विजलिङ्गिनः। प्रकाशमेतत्तास्कर्य्यं यद्देवन समाह्वयौ। तयोर्निग्रहं प्रतीघाते नृपतिर्यत्नवान् भवेत्। द्यूतं समाह्वयञ्चैव राजा राज्ये निवारयेत्" इत्यादीनि तानि कूटाक्षदेवनविषयतया राजाध्यक्षसभिकरहिततया वा योज्यानि। अतएव हरीतस्मृतिः "द्यूतं निषिद्धं मनुना सत्यशौचधनापहम्। अभ्यनुज्ञातमन्यस्मिन् राजभागसमन्वितम्। सभिकाधिष्ठितं कार्यं तस्करज्ञानहेतुकम्" इति। याज्ञवल्क्योऽपि "द्यूतमेकमुखं कार्यं तस्करज्ञानकारणादिति" राज्ञा द्यूतम् एकं मुखं प्रधानं यस्य तत् तथोक्तं कार्यम्। राजाध्यक्षाधिष्ठितं राज्ञा कारयितव्यमित्यर्थः। तस्करज्ञानकारणात्। ल्युट्शेषे पञ्चमी। तस्करज्ञानरूपं प्रयोजनं पर्य्यालोच्येत्यर्थः। प्रायशश्चौर्य्यार्जितधना एव कितवा भवन्त्यतश्चौरविज्ञानार्थमेकमुखं कार्यमित्याशयः"

**द्यूतकर** त्रि॰ द्यूतं करोति क-ट। (जुआरी) द्यूतकारके शब्दर॰।

**द्यूतकार** त्रि॰ द्यूतं करोति क-अण् कारयति कारि-अण् वा। १द्यूतकरे द्यूतस्य कारयितरि २सभिके च अमरः स्वार्थे क। कारि ण्वुल् वा। द्यूतकारक तत्रार्थे त्रि॰।

**द्यूतकृत्** त्रि॰ द्यूतं करोति क-क्विप्। द्यूतकरे त्रिका॰।

**द्यूतपूर्णिमा** स्त्री द्यूतार्थां पूर्णिमा। कोजागरपूर्णिमायां आश्विनपौर्णमास्यां त्रिका॰ कोजागरशब्दे तत्र द्यूतविधानसङ्गम्। द्यूतपौर्णमासी तत्रार्थे।

**द्यूतप्रतिपद्(दा)** द्यूतार्थां प्रतिपद् वा टाप्। कार्त्तिकशुक्लप्रतिपदि तत्र द्यूतविधानं तिथितत्त्वं यथा ब्रह्मपु॰ "शङ्करश्च पुरा द्यूतं ससर्ज्ज सुमनोहरम्। कार्त्तिके शुक्लपक्षे तु प्रथमेऽहनि भूपते!। जितश्च शङ्करस्तत्र जयं लेभे च पार्वती। अतोऽयंशङ्करो दुःखी गौरी नित्यं

सुखोचिता । तस्मात् द्यूतं प्रकर्त्तव्यं प्रभाते तव मानवैः" । "द्यूतप्रतिपदा नाम तव भावी महोत्सवः" इति०त० धृतं बलिं प्रति भगवद्वाक्यम् । [त्रिका० ।

द्यूतवीज न० द्यूतस्य बीजं साधनम् । कपर्दके ( कडि )

द्यूतवृत्ति पु० द्यूतं वृत्तिर्जीविका यस्य । सभिके तस्य यथा द्यूतोपजीवित्वं तथा द्यूतशब्दे उक्तम् "भिक्षुक द्यूतवृत्तिश्च पुरोधार्य्यस्तथैव" मनुना तस्य हव्यकव्यदानाऽयोग्यतोक्ता ।

द्यून न० लग्नात् सप्तमस्थाने द्यूनशब्दे दृश्यम् "द्यूनजन्मरिपुलाभखलिगखन्द्रमाः शुभफलप्रदस्तथा" ज्यो०त०

द्यै व्यक्तकरणे भा०सक०अनिट् । द्यायति अद्यासीत् दद्यौ

द्यौ स्त्री द्योतन्ते देवा अत्र द्युत–बा० आधारे डो । १स्वर्गे २आकाशे च अमरः । "धराविवरद्यौसलिलेषु विस्तृतम्" भा०क०६०अ० द्योषद् द्यौभूमिः । सर्वनामस्थाने परे तस्य ओरौत् द्यौः द्यावौ द्यावः ।

द्यौकार त्रि० द्यौतल्यान् प्रासादादीन् करोति ञ–अण् । प्रासादादिकरे शिल्पिभेदे "एवं शिल्पिदायादास्तत्र तत्र परिस्तृताः । द्यौकारश्चेमकारादिर्जातिं नित्यं समाश्रिताः" भा०आ०४६अ०तत्र द्यौकारेति ज्यौकारेति वा पाठान्तरम् । द्यौकारः द्यौष्कारः ज्यौकारो धनुष्कार इत्यर्थः ।

द्यौत पु० द्युत–भावे घञ् । १प्रकाशे २आतपे अमरः । खद्योतः "चन्द्रार्कैरिव द्यौतम्" हरिवं०४२अ० "विद्युद्द्यौतनिकाशेन सकुटेनार्कवर्चसा" हरिवं० २४१अ० । तत्करो द्यौत उद्द्यौतः "निरवद्यविद्योद्द्यौतेन द्यौतितत्तत्त्वतोऽयमर्थः" दायभा०

द्यौतन त्रि० द्युत–णौचार्थे युच् । १द्यौतनशीले "विलोक्य द्यौतनं चन्द्रं सलक्ष्मणं शोचनोऽवदत्" भट्टिः २दीपे पु० ३अक्षणि स्त्री निरु० भावे ल्युट् । ४प्रकाशे न० "द्यौतनाद्देवः" इति कृञू० द्युत–णिच–ल्यु । ५प्रकाशके त्रि० । भावे ल्युट् । ६प्रकाशने न० ।

द्यौतनि त्रि० द्युत–णिच्–अनि । प्रकाशके "या द्यौतनिं वहति शुभ्रयाम्" ऋ०२।५८।१ "द्यौतनिं प्रकाशकं सूर्य्यम्" भा०

द्यौतिरिङ्गण पु० द्यौतिरिङ्ग+पृषो० । खद्योते हेमच० ।

द्यौभूमि पु० द्यौराकाशो भूमिर्गतिस्थानं यस्य । १पक्षिणि शब्दच० । द्यौश्च भूमिश्च द्व० । २द्यावापृथिव्योः स्त्री द्वि०व०

द्यौषद् पु०द्यवि सीदति सद–क्विप् षत्वम् । देवे शब्दरत्ना० । ग्रहादौ अषत्वम् द्यौसदित्येव ।

द्यौव न० "दिवेर्द्युं च" उणा० दिव–इन् द्युरादेशः डिच्च । ज्योतिःपदार्थे उज्ज्वलदर्शके ।

द्यौर्लोक पु० द्यौरेव लोकः द्यौलोक+पृषो० । द्युलोके स्वर्गे "किं तामिर्लभ्यते पृथिवीलोकमेव पुरोऽनुवाक्यया जयत्यन्तरिक्षलोकं याज्यया द्यौर्लोकं शस्त्या" शत०ब्रा०

द्रगड़ पु०द्रेति गर्जति गड–अच् । वाद्यभेदे (दगड़ काड़ा) त्रिका०।

द्रङ्क्षण न० तोलके शब्दभाजा ।

द्रङ्ग पु० पुरीभेदे हेमच० । स च "कर्वटादधमोद्रङ्गः पत्तनाद्दुत्तमश्च सः" वाचस्पत्युक्तलक्षणः ।

द्रढि नामधातुः दृढं करोति दृढ+कृतौ णिच् ऋतो रः दृढीकरणे सक०उभ०सेट् । द्रढयति ते । द्रढयन् द्रढयितुम्

द्रढिमन् पु०दृढस्य भावः इमनिच् ऋतो रः । दृढत्वे "बधान द्रागेव द्रढिमरमणीयं परिकरम्" गङ्गालहरी । "हृदयमरिबधोद्यादुद्भटद्रढिम दधातु पुनःपुरन्दरस्य" माघः ।

द्रधस् स्त्री रोदस्योः "द्वे द्रधसी सततौ यस्य एकः केशी विश्वा भुवनानि विद्वान्" तैत्ति०सं० १।२।२।२

द्रप्स न०दृप्यति कफोऽनेन दृप–बा०क्स ऋतो रः । घनेतरदभ्रे(जलोदके) अमरः पृषो०द्रंप्स द्राप्स इत्यपि तत्रार्थे अमरटीकायां भरतः । २रसे पु० "भुवनानामूर्मिर्द्रप्सो अपामसि" यजु०१४।२ "द्रप्सो रसः" वेददी० "यस्ते द्रप्स स्कन्दति यस्ते अंशुरिति यो लोकः । स्कन्दति स द्रप्सस्तत्साह यस्ते अंशुरिति तदंशुमाह यावच्युतः" शत० ब्रा० ४।२।४।२ "सोऽस्यौ द्रप्सान् गर्भ्यं भवत्ते ऽस्यौ वसवोऽस्रजन्न तानस्रासुपादधात्" शत० ब्रा०६।१।२।६। ३द्रुतगतियुक्ते च "अनुद्रप्सास इन्दवः" ऋ०८।६।४ "द्रप्सासः द्रुतगतयः" भा०

द्रम गतौ भ्वा०पर०सक०सेट् । द्रमति अद्रमीत् द्रद्राम "यान रा दद्रसुश्चाथ संग्रामं च शशंसिरे" भट्टिः यङि दंद्रम्यते "दंद्रम्यमाणः परियन्ति मूढाः" कठोप० दंद्रमाणः

द्रमिल पु० देशभेदे । तत्र भवः अण् । द्रामिल चाणक्ये पु० तत्र भवे त्रि० हेम० ।

द्रम्म पु० लोहा० उक्ते षोडशपणे "वराटकानां दशकद्वयं यत् सा काकिणी तास्च पणश्चतस्रः । ते षोडश द्रम्म इहापि कीर्तितो द्रम्मैस्तथा षोडशभिश्च निष्कः"

द्रव पु० द्रु गतौ भावे अप् । १द्रवणे २पलायने ३परीक्षणे अमरः । ४गतौ ५आसवे । ६वेगे च द्रु–अच् । ७क्षरण

युक्ते त्रि०। षड्द्रवत्वगुणयुक्तमात्रे त्रि० "आत्मिय काचिद्द्रवरागमेव" कुमा० "द्रवः सङ्घातकठिनः" कुमा० "सर्पांषि द्रवाणि चदङ्खखेन जुहोति" श्रुतिः "गण्ड-स्थलाघर्षगलन्मदोदकद्रवदुमस्कन्धनिलायिनोऽलयः" "म-दोदकद्रवकटभित्तिसङ्गिभिः" माघः न्यायोक्ते षड्द्रवत्व-रूपे गुणभेदे "द्वयोर्नैमित्तिकोद्रवः" भाषा० द्रवत्वशब्दे दृश्यम्। शीते च।

द्रवक त्रि० द्रु-शीलार्थे ण्वुल् तस्य अक०। १पलायनशीले २चरण-

द्रवज पु० द्रवाज् जायते जन-ड। १गुडे राजनि०। २द्रव-जातमात्रे त्रि०। द्रुते राजनि०।

द्रवत्पत्री स्त्री द्रवत् पत्रं यस्याः गौरा०ङीष्। शिखण्डी-

द्रवत् उपभोगे अक०पर०सेट् द्रुस् इत्यत्र गणरत्ने कण्ड्वा० गणे पाठान्तरम्। द्रवत्यति। अद्रवत्सीत्।

द्रवत् त्रि० द्रु-शतृ। १चरणयुक्ते २शीघ्रे न० निरु०

द्रवत्व न०द्रवस्य भावः। न्यायोक्ते संयोगजे गुणभेदे भाषा० "सांसिद्धिकद्रवत्वं स्यान्नैमित्तिकमथापरम्। सांसिद्धि-कन्तु सलिले द्वितीयं क्षितितेजसोः। परमाणौ जले नित्य-मन्यत्रानित्यमुच्यते। नैमित्तिकं पक्वियोगात्तपनीयतादि-षु। द्रवत्वं स्यन्दने हेतुर्नैमित्तं संयुते तु तत्" भाषा० "द्रवत्वन्निरूपयति सांसिद्धिकमिति। द्रवत्वं द्विविधं सांसिद्धिकं नैमित्तिकञ्चेति। द्वितीयं नैमित्तिकं पर-माणावेवेति। जलपरमाणौ द्रवत्वं नित्यम्। अन्यत्र पृथिवीपरमाण्वादौ जलद्वयणुकादौ च अनित्यम्। कुत्रचित्तेजसि कुत्रचित् पृथिव्यान्तु नैमित्तिकं द्रवत्वम्। तत्र को वा नैमित्तिकन्तद्वर्णयति नैमित्तिकमिति। यद्भीतिपदन्तोऽर्थकम्। तथा च तेजःसंयोगादग्निसं-योगजन्यं नैमित्तिकं द्रवत्वम्। तच्च सुवर्णादिरूपे तेजसि घृतजतुप्रभृतिपृथिव्यां च वर्तत इत्यर्थः। द्रवत्वं स्यन्दने हेतुरिति असमवायिकारणमित्यर्थः। संयुते सङ्कादिसंयोगविशेषे तद्द्रवत्वं स्नेहसहितमिति बोद्ध-व्यम्" सप्ता०। तच्च द्रवताप्यत्र स्त्री "न च न द्रवता द्रवता परितो द्विषद्भानक्षता न क्षता क्वचन" भट्टिः।

द्रवद्रव्य न० द्रवतीति द्रवं कर्म०। १दुग्धदध्याज्यतक्रासवजल तैलादिषु २दैहिकभूतादिषु च।

द्रवन्ती त्रि० द्रु-शतृ ङीप्। १द्रवयुक्तस्त्रियां स्त्री च २स्रवन्त्यां नद्यां ३भूम्निकपर्ण्यां च राजनि०।

द्रवरस त्रि० द्रवयुक्तो रसो यस्य। १सार्द्ररसे २खाद्यायां स्त्री राजनि०।

द्रवस् उपभोगे कण्ड्वा० पर० सेट्। द्रवस्यति अद्रवस्सीत्।

द्रवाधार पु० ६त०। १द्रवद्रव्याधारे २चषुलके च शब्दार्थक०

द्रवाय्य त्रि० द्रु-आय्य। द्रुतिशीले सुश्रुतः।

द्रवि त्रि० द्रावयति अन्तर्भूतण्यर्थे द्रु-इन्। स्वर्णादिद्रावके स्वर्णकारे "द्रविन्दं द्रावयति दारु धत्तम्" ऋ०६।२।५

द्रविड पु० खनामख्याते देशभेदे स च देशः द्र०सं० कूर्मवि-भागे १४अ० नैर्ऋत्यासक्तः "नैर्ऋत्यां दिशि देशाः" इत्यु-पक्रमे "हेमगिरिसिन्धुकालकरैवतकसुराष्ट्रवादर द्रविडाः" तेषां राजा सोऽभिजनोऽस्य वा अण्। द्राविड तद्देश-स्थे पित्रादिक्रमेण तत्रवासिनि च। बहुषु अर्थो लुक्। २ब्राह्मणभेदे सच "आन्ध्राः कर्णाटकाश्चैव गुर्जरा द्रवि-डास्तथा। महाराष्ट्रा इति ख्याताः पञ्चैते द्रविडाः स्मृताः" वायुरसंहिता। ३सवर्णायां ब्रात्यक्षत्रियजाते क्षत्रियभेदे यथाह मनुः "झल्लोमल्लश्च राजन्यात् व्रात्यान्निच्छिविरेव च। नटश्च करणश्चैव खसो द्रविड एव च"। जातिदन्यमयेन क्षत्रियधर्मत्यागेन वृष-लत्वं प्राप्ते तद्देशीये ४क्षत्रिये च यथाह भा०आश्व०२६ अ० "ततस्तु क्षत्रियाः केचिज्जातिदन्यमयार्दिताः। विविशुर्गिरिदुर्गाणि मृगाः सिंहार्दिता इव। तेषां स्वविहितं कर्म तद्भयान्नानुतिष्ठताम्। प्रजा वृषलतां प्राप्ता ब्राह्मणानामदर्शनात्। एवं ते द्रविडाभीराः पुण्ड्राश्च शबरैः सह। वृषलत्वं परिगता व्युत्थानात् क्षत्रधर्मिणः" ४रागिणीभेदे स्त्री गौरा० ङीष्।

द्रविण न० द्रु-इनन्। १धने २काञ्चने मेदि०। ३बले ४पराक्रमे च निघ०। "द्रविणं परिमितमधिकव्ययिनं जन-माकुलीकुरुते" उद्भ० "क्षत्रियो द्रविणं दत्त्वा कन्यार्थे चैव शक्तितः" मनुः। "तेषां सदश्वमूयिष्ठास्तुङ्गाद्रविणराश-यः" रघुः। ५पुष्पवृक्षपुत्रभेदे पु० "अन्यस्तु वीर्यमहतामि-त्युपक्रमे "पुत्रानुत्पादयामास पञ्चार्चिष्मान् प्रजापतीन्। विजिताश्वं धूम्रकेशं वृषयश्वं द्रविणं हरिम्" भाग०४। २२।५० तत्र बले "बलेः पुत्रो महावीर्यो बाणोद्रविड वत्तरः" हरिवं०१६।अ०पराक्रमे "बभूवतुस्ततस्तस्य पञ्चो द्रविणवत्तरौ" भा०उद्यो० ११२अ०। ५वाक्षिप्ते च द्रविणप्रदशब्दे दृश्यम्। ६क्रौञ्चद्वीपस्थे वर्षपुरुषभेदे पु० "क्रौञ्चद्वीपस्यवर्षनदीना मम्भः पवित्रममल-मुपयुञ्जानाः पुरुषर्षभद्रविणदेवक संज्ञाः" भाग० ५।२०।१६

द्रविणक पु० १वसुतनूजे: पुत्रभेदे "अन्ये भौत्यां वसोर्धारा

पत्रो द्रविणकादयः" भाग०६।६।१२शो० द्रविण+स्वार्थे क। २द्रविणशब्दार्थे न०।

**द्रविणनाशक** न० द्रविणं नाशयति नाशि-ल्यु। शोभाञ्जने शब्दरत्ना० तत्सेवने धननाशकत्वात्तस्य तथात्वम् अतः क्षतौ शोभाञ्जनभक्षणनिषेधोऽप्यफलकएव।

**द्रविणप्रद** त्रि० द्रविणं प्रददाति प्र+दा-क। १धनदायके २विष्णौ पु०। तस्य वाञ्छितप्रदत्वात् तथात्वम् "सुधन्वा खण्डपरशुर्दारुणो द्रविणप्रदः" विष्णुस० वाञ्छितप्रदत्वेन तस्य तथात्वम् भाष्ये उक्तम्।

**द्रविणस्** त्रि० द्रावयमिच्छति लालसायां क्यचि सुक् द्रविणस्यति ततः सम्प० भावे क्विपि अतो लोपे कौ नुप्रे न स्यादिवद्भवतीति यलोपः। धनेच्छायाम् "द्रविणोदा द्रविणसः यावच्छसाः" ऋ०१।१५।७ भाष्ये च उक्ता व्युत्पत्तिर्दर्शिता। "द्रविणस्वन्त इह सन्त्विन्दवः" ऋ० ६।८५।१। "द्रविणस्वनो धनवन्तः" इति भाष्योक्तेः द्रविणशब्दात् कर्मसाधनात् धनवचनात् मतुप्।

**द्रविणस्यु** त्रि० द्रविणमात्मनो लालसयेच्छति क्यचि सुक् द्रविणस्य-उन्। लालसया धनकामिनि "द्रविणस्युर्द्रविणसश्चकानः" ऋ०१०।६५।१६ "छन्दस्येव हुवरसुद्रविणस्युः" इत्यादिना पा० क्यचि निपातनम्। लोके तु द्रविणीयुरित्येव।

**द्रविणोदस्** त्रि० १धनदातरि "द्रविणोदाः धनप्रदम्" ऋ०१।१५।७ "धनप्रदोऽग्निः सोमं पिबत्विति शेषः। तमेतं मन्त्रं यास्क एवं निर्वक्ति। नि०८।१ "द्रविणोदाः कस्माद्धनं द्रविणसच्यते यदेनदभिद्रवन्ति वसु वा द्रविणं यदेने नाभिद्रवन्ति तस्य दाता द्रविणोदास्तस्यैषा भवति। द्रविणोदा द्रविणस" इत्यादि। सोऽयं यास्कोक्तो निर्वचनप्रपञ्चस्तत्रैव ग्रन्थेऽवगन्तव्यः। द्रविणोदाः। "हुदृक्षिभ्यामिनन्" उ०२।५१। निपूर्वाद्दादुदात्तो द्रविणशब्दः। तद्ददातीति द्रविणोदाः। "क्विप् चेति" पा० क्विप्। पूर्वपदस्य सकारोपजनश्छान्दसः स्वोक्त्वे। ह्रस्वान्तरपदप्रकृतिस्वरत्वम्। देवविशेषणत्वे नैकवाक्यतापक्षे द्वितीयायाः स्वादेशः। अथ वा द्रविणमात्मन इच्छन्ति द्रविणस्यन्ति। सुप आत्मनः क्यच्। "सर्वप्रातिपदिकेभ्यो लालसायां सुग्वक्तव्यः" वार्ति० क्यचि परतः सुगागमः। द्रविणस्यतेः सम्पदादित्वाद्भावे क्विप्। अतोलोपः। "कौ नुप्रं न स्यादिवद्भवति" पा० इति तस्य स्यादिवत्त्वप्रतिषेधाद्यलोपः। एवं द्रविणस् शब्दो धनेच्छावचनः। द्रविणेच्छां दत्ते यद्वेष्टधनप्रदानेनोपतप्यतीत्यर्थे दद उपपदे ह्रस्वश्चादन्तश्चांवितण्यर्थात् "क्विप् चेति" पा० क्विप्। एवं द्रविणोदःशब्दः सकारान्तो भवति। तथा द्राविणोदसाः प्रवादा भवन्तीति नैरुक्तो व्यवहार उपपद्यते। अतो द्रविणोदस् शब्दो भिन्नवाक्यत्वे स्वार्थे प्रथमा एकवाक्यत्वे तु व्यत्ययेन द्वितीया भवति। द्रविणस ह्रस्वत्वापिवाक्यभेदपक्षे द्रविणसः सोमसेत्यर्थे न सकारोपजनश्छान्दसः। आद्युदात्तत्वं तु नियमेन स्थितम्। ऋत्विग्विशेषणत्वे नैकवाक्यत्वपक्षे तु क्यजन्तात् क्विप्। अतो लोपादि पूर्ववत्। अत्र द्रविणोदाशब्दोऽपि तत्रार्थे। २स्वर्णे च "द्रविणं धनमित्युक्तं वसवश्च द्रविणं ऋतम्। ददाति तद्वानेव द्रविणोदास्ततोभवान्" वराहपु०।

**द्रविल्लु** त्रि० द्रु-गतौ इल्लु। गतिशीले "यविष्ठस्य द्रविल्लवः" ऋ०८।७३।१४। "रथमस्तस्य द्रविल्लुम्" ऋ० १०।११।६

**द्रव्य** न०द्रोर्विकारः द्रोरिति यत् "द्रव्यञ्च भव्ये" पा०निपा०। १पित्तले २वित्ते ३पृथिव्यादिषु नवसु। ४विलेपने न० ५भेषजे ६द्रुमविकारे ७तत्सम्बन्धिनि च त्रि० मेदि०। ८जतुनि ९विनये न० हेम०। १०मद्रे न० राजनि०। द्रव्यलक्षणमौलुक्यशब्दे १५८६ पृ० उक्तं तद्भेदाश्च नव "पृथिव्यापस्तेजो वायुराकाशं कालोदिगात्मा इति द्रव्याणि" कणा० सू० "इदानीमपवर्गभागितया सर्वपदार्थांश्रयतया च प्रथमोद्दिष्टस्य द्रव्यपदार्थस्य विभागं विशेषोद्देशञ्च कुर्वन्नाह पृथिव्याप इति इतिकारोऽवधारणार्थः तेन नवैव द्रव्याणि नाधिकानि न न्यूनानि वेत्यर्थः। ननु विभागलक्षणादेव नूनाधिकसङ्ख्याव्यवच्छेदसिद्धौ किमितिकारेणेति चेत् उद्देशमात्रपरतयाऽपि सूत्रस्य विभागतात्पर्यस्फोरणार्थतयैवेतिकारोऽभिधानात् सुवर्णादीनामीश्वरस्य चातैवान्तर्भावात् अन्वकारस्य चाधिकत्वेनाशङ्कामात्रस्याभावस्यव्युत्पादनादेतदध्यवसेयम्। अस्मासकरणन्तु सर्वेषां प्राधान्यप्रदर्शनाय" उप०ह०। वैद्यके तु तस्य पञ्चविधतोक्ता यथा "रसोगुणस्तथा वीर्यं विपाकः प्रकृतिरेव च। पञ्चानां यः समाहारस्तद्द्रव्यमिति कीर्त्यते" इति भिषग्वराः। प्रकारान्तरेण च पञ्चविधम् अत्यन्तकठिनकठिनार्द्रकोत्थद्रवद्रव्यभेदात्। द्रव्यभेदानां गुणवत्तावधिश्च वैद्यकोक्तः यथा "गुणहीनं भवेद्द्रव्यं दुर्द्रव्यं तद्रूपमौषधम्। नासहायात् तथा

चूर्णं लभते क्षीनवीर्य्यताम् । क्षीनत्वं गुटिका लेहो लभते वत्सरात् परम् । क्षीणाः क्षुर्ततैलाद्या चतुर्मासाधिकास्त्रया । क्षततैलाद्या इति वागभिधेयम् । चतुर्मासाधिकाः संवत्सरादुपरि चत्वारोमासा अधिका येषां ते । "क्षतमद्यात् परं पक्वं क्षीनवीर्य्यत्वमाप्नुयात् । तैलं पक्वमपक्वं वा चिरस्थायि गुणाधिकम् । तदपि षोड़शमासाभ्यन्तरे पक्वतैलं गुणाधिकं बोद्धव्यम् । "क्षोधध्रो लघुपाकाः क्षुर्निर्वीर्या वत्सरात्परम्" । क्षोधध्रो धान्यादयः । लघुपाकाः क्षीघ्रपाकाः "निर्वीर्याः क्षुर्गुणैर्युक्ता आसवा धातवोरसाः" ।

सामान्यतो वैद्यकेऽभिनवानामेव गुणवत्ता ह्रतादीनां पक्वानामपि केषाञ्चित् गुणवत्ता उक्ता यथा "द्रव्याण्यभिनवान्येव प्रशस्तानि क्रियाविधौ । क्वाते गुडहतक्षौद्रधान्यक्षणाविडङ्गतः" रसादिमध्येऽपि द्रव्यस्यैव स्तुते प्रधानत्वसूक्तं यथा

"अथातो द्रव्यरसगुणवीर्यविपाकविज्ञानीयमध्यायं व्याख्यास्यामः । केचिदाचार्या ब्रुवते द्रव्यं प्रधानं कस्माद्द्रव्यस्थितत्वादिह खलु द्रव्यं व्यवस्थितं न रसादयो यथाऽऽमे फले ये रसादयस्ते पक्वे न सन्ति । नित्यत्वाच्च नित्यं हि द्रव्यमनित्या गुणा यथा कलकादिप्रविभागः स एव सम्पन्नरसगन्धो व्यापन्नरसगन्धो वा भवति । स्वलक्षणत्वस्थानाच्च यथा हि पार्थिवं द्रव्यमन्यभावं न गच्छत्येवं शेषाणि । पञ्चेन्द्रियग्रहणाच्च पञ्चभिरिन्द्रियैर्गृह्यते द्रव्यं न रसादयः । आश्रयत्वाच्च द्रव्यमाश्रिता रसादयो भवन्ति । आरम्भसामर्थ्याच्च द्रव्याश्रित आरम्भो यथा विदारिगन्धादिभाङ्क्ष्य सङ्क्षुद्य विपचेदित्येवमादिषु न रसादिद्वारम्भः । शास्त्रप्रामाण्याच्च शास्त्रे हि द्रव्यं प्रधानमुपदेशे हि योगानां यथा मातुलुङ्गाग्निमन्थौ चेति न रसादय उपदिश्यन्ते । क्रमापेक्षितत्वाच्च रसादीनां रसादयो हि द्रव्य क्रममपेक्षन्ते यथा तरुणे तरुणाः सम्भूयें सम्भूयां इति । एकदेशसाध्यत्वाच्च द्रव्याण्येकदेशतोऽपि व्याधयः साधयन्ते यथा महाद्यचोरेत्येति तस्माद्द्रव्यं प्रधानं द्रव्यलक्षणन्तु क्रियागुणवत्समवायिकारणमिति । नेत्याङ्गरन्ये रसास्तु प्रधानं कस्मादागमादागमोहि शास्त्रमुच्यते शास्त्रे हि रसा अधिकृता यथा रसायत्त आहार इति तस्मिंश्च प्रायाः । उपदेशाच्चोपदिश्यन्ते हि रसा यथा मधुराम्ललवणा वातं शमयन्ति । अनुमानाच्च रसैन ह्यनुमीयते द्रव्यं यथा मधुरमिति । ऋषिवचनाच्च ऋषिवचनं वेदो यथा किञ्चिदिश्यार्थं मधुरमाहरेदिति । तस्माद्रसाः प्रधानं रसेषु गुणसंज्ञा । रसलक्षणमन्यतोपदेक्ष्यामः । नेत्याङ्गरन्ये । वीर्य्यं प्रधानमिति कस्मात्तद्धेतोरौषधकर्म्मनिष्पत्तेः । दृष्टौषधकर्म्माणि हि शोधनशमनसंग्रहणाग्निदीपनप्रपीड़नलेखनभ्रंहणरसायनवाजीकरणस्नेहयमुष्करणविलयनदहनदारणादहनप्राणोन्नविप्रघ्नशमनानि वीर्य्यप्राधान्यादुच्यन्ति । तच्च वीर्य्यं द्विविधमुष्णं शीतं चाग्नीषोमीयत्वाज्जगतः । केचिदष्टविधमाङ्गरुष्यं शीतं स्निग्धं रूक्षं विशदं पिच्छिलं मृदु तीक्ष्णं चेत्येतानि वीर्य्याणि स्वबलगुणोत्कर्षादुभयमभिभूयात्मकर्म कुर्वन्ति यथा तावत्कृतमूलं कषायं तिक्तानुरसं वातं शमयेदुष्णवीर्य्यत्वात् तथा कुलत्थः कषायः कटुकः पलाण्डुः स्नेहभावाच्च । मधुरस्त्वेचुरसो वातं वर्द्धयति शीतवीर्य्यत्वात् । कटुका पिप्पली पित्तं शमयति मृदुशीतवीर्य्यत्वादम्लमामलकं लवणं सैन्धवञ्च । तिक्ता काकमाची पित्तं वर्द्धयत्युष्णवीर्य्यत्वान्मधुरा मत्स्याद्य । कटुकं मूलकं श्लेष्माणं वर्द्धयति स्निग्धवीर्य्यत्वात् । अम्लं कपित्थं श्लेष्माणं शमयति रूक्षवीर्य्यत्वान्मधुरं क्षौद्रञ्च । तदेतद्दर्शनमात्रसूक्तम् भवन्ति चात्र "ये रसा वातशमना भवन्ति यदि तेषु वै । रौक्ष्यलाघवशैत्यानि न ते कुर्युः समीरणम् । ये रसाः पित्तशमना भवन्ति यदि तेषु वै । तैक्ष्ण्यौष्ण्यलघुतायैव न ते तत्कर्म्मकारिणः । ये रसाः श्लेष्मशमना भवन्ति यदि तेषु वै । स्नेहगौरवशैत्यानि बलासं वर्द्धयन्ति ते" तस्माद्वीर्य्यं प्रधानमिति । नेत्याङ्गरन्ये । विपाकः प्रधानमिति कस्मात् सम्यङ्मिथ्याविपाकत्वादिह सर्वद्रव्याण्यभ्यवहृतानि सम्यक् विपक्वानि गुणं दोषं वा जनयन्ति । तस्माङ्गरन्ये प्रतिरसं पाक इति । केचित्त्रिविधमिच्छन्ति मधुरमम्लं कटुकं चेति तन्तु न सम्यक् भूतगुणादानमात्रान्तो विपाको नास्ति पित्तं हि विदग्धमम्लतामुपैत्यम्ले मन्दत्वात् । यद्येवं लवणोऽप्यन्यः पाको भविष्यति श्लेष्मा हि विदग्धो लवणमुपैति मधुरो मधुरस्यान्योऽम्लस्यैवं सर्वेषामिति केचिदाङ्गरुष्टान्तं चोपदिश्यन्ति यथा तावत् क्षीरस्यालोडितमभिषच्यमानं मधुरमेव स्यात्तथा शालिषष्टादयः प्रकीर्णाः स्वभावसुत्तरकालेऽपि न परित्यजन्ति तद्वदिति । केचिद्वदन्त्यवस्थावतो बलवतां पञ्चभावान्ती-

लेवमनवस्थितिस्तस्मादविद्वान् एव। आगमे हि द्विविध एव पाको मधुरः कटुकश्च तयोर्मधुराख्यो गुरुः कटुकाख्यो लघुरिति तत्र पृथिव्यग्नेयोराकाशानां द्वैविध्यं भवति गुणसाधर्म्यादुगुरुता लघुता च पृथिव्याश्च गुर्व्यः शेषाणि लघूनि तस्मादुविविध एव पाक इति। भवन्ति चात्र। द्रव्येषु पच्यमानेषु वेद्यम्बुपृथिवीगुणाः। निर्वर्त्यन्तेऽधिकास्तत्र पाको मधुर उच्यते। तेजोऽनिलाकाशगुणाः पच्यमानेषु वेषु तु। निर्वर्त्यन्तेऽधिकास्तत्र पाकः कटुक उच्यते। पृथक्त्वदर्शनामेष वादिनां वादसंग्रहः। चतुर्णामपि सामर्थ्यमिच्छन्त्यत्र विपश्चितः। तद्द्रव्यमाश्रिता किञ्चित्किञ्चिद्वीर्यं च सेवितम्। किञ्चिद्गुरुविपाकाभ्यां दोषं हन्ति करोति वा। पाको नास्ति विना वीर्याद्वीर्यं नास्ति विना रसात्। रसो नास्ति विना द्रव्याद्द्रव्यं चेष्टमतः स्मृतम्। जन्म तु द्रव्यरसयोरन्योऽन्यामेचकं स्मृतम्। अन्योऽन्यामेचकं जन्म यथा स्याद्धेदेहिनोः। वीर्यसंज्ञा गुणा येऽष्टौ तेऽपि द्रव्याश्रयाः स्मृताः। रसेषु न वसन्त्येते निर्गुणास्तु गुणाः स्मृताः। द्रव्ये द्रव्याणि यस्मादि विपच्यन्ते न षड्रसाः। अतः द्रव्यमतो ज्ञेयं शेषा भावास्तदाश्रयाः। अमीभांस्तान्यचिन्त्यानि प्रसिद्धानि स्वभावतः। आगमेनोपयोज्यानि भेषजानि विचक्षणैः। प्रत्यक्षलक्षणफलाः प्रसिद्धाश्च स्वभावतः। नौषधीर्हेतुभिर्विद्वान् परीक्षेत कथञ्चन। सहस्रेणापि हेतूनां नाम्नवादिर्विरेचयेत्। तस्मात्सिद्धेन्तु मतिमानागमेन तु हेतुषु"। "वस्तूपलक्षणं यत्र सर्वनाम प्रयुज्यते। द्रव्यमित्युच्यते सोऽर्थो भेदात्तेन व्यवस्थितः" इत्यिना परिभाषिते ३।१वस्तुपदार्थे च। "स्वार्थो द्रव्यञ्च लिङ्गञ्च संख्या कर्मादिरेव च" इतिः लिङ्गसंख्यानन्वयित्वेन सत्त्वरूपतया च तस्य तथात्वम्। "क्रिया न युज्यते लिङ्गक्रियानाधारकारकैः। असत्त्वभूतता तस्या इत्यमेवावधार्यताम्" इतिः। क्रियानाधारकारकत्वेन युज्यते इत्यर्थः। तेन लिङ्गसंख्याकारकत्वशून्यत्वं सत्त्वमेव द्रव्यत्वम्। "लक्षभिहितो भावो द्रव्यवत् प्रकाशते" इति भाष्यम्। द्रव्यविशेषहस्तादौ उच्छिष्टदोषादिशुद्धिभेद उक्तः कूर्मपु॰ "उच्छावचान्नपानेषु द्रव्यहस्तो भवेन्नरः। भूमौ निःक्षिप्य तद्द्रव्यमाचम्याभ्युक्षयेत्तु तत्। तैजसं वै समादाय यदुच्छिष्टो भवेद्द्विजः। भूमौ निःक्षिप्य तद्द्रव्यमाचम्याभ्युक्षयेत्तु तत्। यदाद्रद्रव्यं करे कृत्वा भवेदुच्छेषवान्वितः। व्यानिधायेतरद्द्रव्यमाचान्तः शुचितामियात्। यस्यादिषु विकल्पः स्यात् न तत्सृष्टाचमेदिह। अरण्येऽनुदके रात्रौ चौरव्याघ्राकुले पथि। कृत्वा मूत्रपुरीषं वा दुष्टहस्तो न दुष्यति"।

**द्रव्यक** त्रि॰ द्रव्यं हरति वहति आवहति वा द्रव्य+कन्। १द्रव्यहारके २तद्वाहके ३द्रव्यावाहके च।

**द्रव्यकल्क** पु॰ "द्रव्यकल्कः पञ्चधा स्यात् कल्कं चूर्णं रसक्रिया। तैलमष्टिः क्रमाज्ज्ञेयं यथोत्तरगुणं प्रिये! वैद्यलोके कल्कादिपञ्चके।

**द्रव्यगण** पु॰। ६त॰। सुश्रुतोक्ते ओषधिविशेषाणां सप्तत्रिंशन्मितानां गणभेदे ते च तत्र दर्शिता यथा "द्रव्यसंग्रहणीयमध्यायं व्याख्यास्यामः

अथातः समासेन सप्तत्रिंशद्द्रव्यगणा भवन्ति, तद्यथा। विदारीगन्धा विदारी सहदेवा विश्वदेवा स्वदंष्ट्रा पृथक्पर्णी शतावरी सारिवा कृष्णसारिवा जीवकर्षभकौ महासहा क्षुद्रसहाहस्त्यौ पुनर्नवैरण्डो हंसपदी वृश्चिकाल्यृषभौ चेति। "विदारीगन्धादिरयं गणः पित्तानिलापहः। शोषगुल्मार्शमर्दौष्ठश्वासकासविनाशनः॥ खारगवधमदनगोपधोण्टाकुटजपाठाकरञ्जकीपाटलामूर्वेन्द्रयवसप्तपर्णनिम्बकुरण्टकदासीकुरण्टककुडुचीचित्रकभार्ङ्गीटाकरञ्जहयपटोलकिराततिक्तकानि सुश्रुते चेति। खारगवधादिरित्येष गणः श्लेष्मविषापहः। मेषकुक्कुरवस्त्रीकखण्डो व्रणशोधनः२। वरुणार्कगजशिग्रुतकारीमेषशृङ्गीपूतीकनक्तमालशोरटाग्निमन्थसैरीयकहयविम्बीवसुकवसिरचित्रकशतावरीविल्वाजशृङ्गीदर्भा इक्षुतीक्ष्णयष्टीति। वरुणादिर्गणोऽयं कफमेदोनिवारणः। विनिहन्ति शिरःशूलं गुल्माभ्यन्तरविद्रधीन्३। वीरतरुसहचरहयमर्दकादनीगुन्द्रानक्तकृमिकाशाश्मभेदकाग्निमन्थशोरटावसुकवसिरभल्लूककुरण्टकेन्द्रीवरकपोतवङ्काः स्वदंष्ट्रा चेति। वीरतरवादिरित्येष गणो वातविकारनुत्। कण्टकारीगर्दभाण्डमहाश्वेताजापयः४। सालसाराजकर्णखदिरकदरकालस्कन्धकसकभूर्जमेषशृङ्गीतिनिशचन्दनशिंशपाशिरीषासनधवार्जुनतालशाकनक्तमालपूतीकाश्वकर्णगुरुचि काकोलीयकश्चेति। सालसारादिरित्येष गणः कुष्ठविनाशनः। मेषपाखुमयकरः कफमेदोविशोषणः५। रोध्रसावररोध्रपलाशकुटजटाशोककङ्कोटफलैलवालुकवल्लकीजिङ्गिनीकदम्बसाला: कदली चेति। एष रोध्रादिरित्युक्तो मेदःकफहरो गणः।

योनिदोषहरः स्तन्यो व्रणयो विषविनाशनः६। कर्कोलकर्कारुहवनागदनीमयूरकभार्गीराखेन्द्रपुष्पीक्षुद्रश्वेतामहाश्वेताहविकाल्पलवणास्रापसहचरेति। कर्कादिको गणो हृद्य कफमेदोविषापहः। क्रमिकुष्ठप्रशमनो विशेषाद्व्रणशोधनः७। सुरसाश्वेतसुरसाफणिज्झकार्जकमूलसृक्वशुगन्धकसुषवकालमालकासमर्दचक्रवरपुष्पाविडङ्गकट्फलसुरसोनिर्गुण्डीकृष्णाकृष्णोन्दुरकार्षिकाफल्गीप्राचीबलाकाकमाच्यो विषसृष्टिकरेति। सुरसादिर्गणो हृद्य कफहृत् क्रिमिसूदनः। प्रतिश्यायारुचिश्वासकासघ्नो व्रणशोधनः८। सुक्तकपलाशधवचित्रकमदनहरिंगपावज्रवृक्षाक्षिफला चेति। सुक्तकादिर्गणो हृद्य मेदोघ्नः शुक्रदोषहृत्। मेहार्शःपाण्डुरोगघ्नः शर्कराश्मरिनाशनः९। पिप्पलीपिप्पलीमूलचव्यचित्रकशृङ्गवेरमरिचहस्तिपिप्पलीहरेणुकैलाजमोदेन्द्रयवपाठाजीरकसर्षपमहानिम्बफलहिङ्गुभार्गीमधुरसातिविषावचाविडङ्गानि कटुरोहिणी चेति। पिप्पल्यादिः कफहरः प्रतिश्यायानिलारुचीः निहन्याद्दीपनो गुल्मप्लीहघ्नश्चामपाचनः१०। एलात्वगरकुङ्कुमांसीध्यामकत्वक्पत्रनागपुष्पप्रियङ्गुहरेणुकाव्याघ्रनखशुक्तिचण्डास्थौणेयकश्वेतवेष्टकचोचचोरकबालकगुग्गुलुसर्जरसतरुष्ककुन्दुरुकाऽगुरुस्रुक्कोशीरभद्रदारुकुष्ठभागकेशरश्चेति। एलादिको वातकफौ निहन्याद्विषमेव च। वर्षाप्रसादनः कण्ठ्यः पिडकाकोठनाशनः११। वचाहपुस्तातिविषाभयाभद्रदारुहपि नागकेशरश्चेति १२। हरिद्राद्वारुहरिद्राकल्कशोकुटजबीजानि मधुकं चेति१३। एतौ वचाहरिद्रादी गणौ स्तन्यविशोधनौ। श्यामातीसारशमनौ विशेषाद्दोषपाचनौ १२।१३। श्यामात्रिवृच्छ्यामाद्वयद्वल्लीयष्टिनीतिल्वकत्रिभण्डीकरम्यकत्रिवृत्पत्रैर्वीगवाक्षीराजदन्तकरञ्जद्वयगुडूचीसप्तलाच्छगलान्त्रीसुधाः सुवर्चलीरी चेति। उक्तः श्यामादिरित्येष गणो गुल्मविषापहः। व्याधोदरविबन्धेदी तद्दोषवर्चोनाशनः१४। इक्ष्वतीकण्टकारिकाकुटजफलपाठा मधुकश्चेति। पाचनीयो इक्ष्वादिर्गणः पित्तानिलापहः। कफारोचकच्छर्द्यास्यमूत्रकृच्छ्रजापहः१५। पटोलचन्दनकुचन्दनमूर्वागुडूचीपाठाः कटुरोहिणी चेति। पटोलादिर्गणः पित्तकफारोचकनाशनः। ज्वरोपशमनो व्रणस्वर्दिकण्डूविषापहः १६। काकोलीक्षीरकाकोलीजीवकर्षभकसंज्ञकर्द्धीभाषपर्णीमेदामहामेदाक्षिरुहाकर्कटशृङ्गीशतावरीगोपकन्यग्रोधरोहिणीकर्कटिकाहीकाजीवन्त्यो मधुकश्चेति। काकोल्यादिरयं पित्तशोणितानिलनाशनः। जीवनो हृंहणो हृद्यः स्तन्यश्चेति गणः स्मृतः१७। जम्बूकसैन्धवधात्रीलवणाम्लवेतसबिल्वदाडिमानि तत्कश्चेति। जम्बूकादिः कफं हन्ति गणो मेदोविशोषणः। अक्षरीशर्करामूलक्षुद्रमधुकाशनः१८। सारिवामधुकचन्दनकुचन्दनपद्मकाक्षरीफलमधूकपुष्पाणयुशीरश्चेति। सारिवादिः पिपासाघ्नो रक्तपित्तहरो गणः। पित्तज्वरप्रशमनो विशेषाद्दाहनाशनः१९। अञ्जनरसाञ्जननागपुष्पप्रियङ्गुनीलोत्पलनलदनलिनकेशराणि मधुकश्चेति। अञ्जनादिर्गणो हृद्य रक्तपित्तनिबर्हणः। विशेषशमनो दाहं निहन्त्याभ्यन्तरं तथा२०। परूषकाद्राक्षाकट्फलदाडिम्राजादनकतकफलशाकफलानि त्रिफला चेति। परूषकादिरित्येष गणोऽनिलविनाशनः। मूत्रदोषहरो हृद्यः पिपासाघ्नो रुचिप्रदः२१। प्रियङ्गुसमङ्गाधातकीपद्माम्रवरुक्षचन्दनकुचन्दनमोचरसरसाञ्जनकुम्भीकस्रोतोऽञ्जनपद्मकेशरयोजनवल्लो दीर्घमूला चेति २२। अम्बष्ठाधातकीकुसुमसमङ्गाकदम्बमधुकबिल्वपेयिकारोध्रसावररोध्रपलाशनन्दीवृक्षपद्मकेशराणि चेति २३। गणौ प्रियङ्ग्वम्बष्ठादी पक्वातीसारनाशनौ। सन्धानीयौ स्थितौ पित्ते ज्वरानाह्यपि रौपधौ२२।२३। न्यग्रोधोदुम्बराश्वत्थप्लक्षमधूककपीतनकभाम्रकोशाम्रचोरकपल्लम्बूद्वयपियालमधूकरोहिणीवञ्जुलकदम्बवदरीतिन्दुकोसङ्कीरोध्रसावररोध्रभल्लातकपलाशा नन्दीवृक्षश्चेति। न्यग्रोधादिर्गणो व्रणशोथाक्षी भग्नशोधकः। रक्तपित्तहरो दाहमेदोघ्नो योनिदोषहृत्२४। गुडूचीनिम्बकटुम्बुरुचन्दनानि पद्मकश्चेति। एष सर्वज्वरान् हन्ति गुडूच्यादिस्तु दीपनः। हृल्लासारोचकवमीपिपासादाहनाशनः २५। उत्पलरक्तोत्पलकुसुदसौगन्धिककुवलयपुष्करीकाणि मधुकश्चेति। उत्पलादिरयं दाहपित्तरक्तविनाशनः। पिपासागरविषच्छर्दिमूर्च्छाहरो गणः२६। उक्ताहरिद्रादारुहरिद्राहरीतक्यामलकविभीतककुरुण्टैरवतीवचापाठाकटुरोहिण्योशीराङ्गेष्टातिविषाद्राविडीभल्लातकानि चित्रकश्चेति। एष कुष्ठादिको नाम्ना गणः श्लेष्मनिषूदनः। योनिदोषहरः स्तन्यशोधनः पाचनस्तथा२७। हरितक्यामलकविभीतकानि त्रिफला। त्रिफला कफपित्तघ्नी मेहकृमिविनाशिनी। चक्षुष्या दीपनी चैव विषमज्वरनाशिनी२८। पिप्पलीमरिचशृङ्गवेराणि त्रिकटुकम्। त्रयूषणं कफमेदोघ्नं मेहकृमित्रणापहम्। निहन्याद्दीपनं गुल्म-

पीनसाग्न्यसतामपि२८। आमलकीहरीतकीपिप्पल्यविलकचेति। आमलक्यादिरित्येष गणः सर्वज्वरापहः। चतुष्को दीपनो हृद्यः कफारोचकनाशनः३०। त्रपुसीसताम्रारजतकृष्णलोहसुवर्णानि लोहमलश्चेति। गणस्त्रपादिरित्येष मरक्रिमिहरः परः। पिपासाविषकृद्रोगपाण्डुमेहहरस्त्रपा३१। क्षारेवतकुटजाऽऽम्रभारकट्फलहरिद्राद्वयनिम्बसप्तच्छदमालत्यस्त्रायमाणा चेति। कषायस्तिक्तमधुरः कफपित्तार्शिनाशनः। कृमिक्रिमिहरश्चैव दुष्टव्रणविशोधनः३२। पञ्च पञ्चमूलान्यत ऊर्द्धं वक्ष्यामः। तत्र त्रिकण्टकदहतीद्वयपृथक्पर्णयो विदारीगन्धा चेति कनीयः१। कषायतिक्तमधुरं कनीयः पञ्चमूलकम्। वातघ्नं पित्तशमनं दृंहणं बलवर्द्धनम्३२। बिल्वाग्निमन्थटुण्टुकपाटलाकाश्मर्यश्चेति महत्२। "सतिक्तं कफवातघ्नं पाके लघ्वग्निदीपनम्। मधुरानुरसत्वैव पञ्चमूलं महत् स्मृतम्३३। अनयोर्दशमूलमुच्यते। "गणः श्वासहरोऽयं कफपित्तानिलापहः। आमस्य पाचनश्चैव सर्वज्वरविनाशनः३४। विदारीसारिवारजनीगुडूच्योऽजश्रृङ्गी चेति बृंहणीयः १। करमर्दत्रिकण्टकशैरीयकयतावरीस्पन्दनस्य इति कण्टकसंज्ञः ४। रक्तपित्तहरौ द्वौ तौ शोफत्रयविनाशनौ। सर्वमेहहरौ चैव शुक्रदोषविनाशनौ३५।३६। कुशकाशानलदर्भकाण्डेक्षुका इति तृणसंज्ञकः ५। मूत्रदोषविकारघ्न रक्तपित्त तथैव च। अन्यः प्रयुक्तः क्षीरेण शीघ्रमेव विनाशयेत्। एषां वातहरावाद्यावन्त्यः पित्तविनाशनः। पञ्चको श्लेष्मशमनावितरौ परिकीर्तितौ" ३७त्रिवृतादिकमन्यत्रोपदेक्ष्यामः। "समासेन गणा ह्येते प्रोक्तास्तेषान्तु विस्तरम्। चिकित्सितेषु वक्ष्यामि ज्ञात्वा दोषबलाबलम्। एभिर्जलेषान्तु कषायञ्च तैलं सर्पींषि पानकान्। प्रविभज्य यथान्यायं कुर्वीत मतिमान् भिषक्। धूमवर्त्तिनिलक्लेदैः सर्वर्तुष्वनभिद्रुते। आकृष्य स्टष्टे न्यस्तेद्विधिनौषधसंपदम्। समीक्ष्य दोषभेदांश्च गणान् भिन्नान् प्रयोजयेत्। पृथङ्भिन्नान् समस्तान्वा गणं वा व्यस्तसंज्ञितम्"।

द्रव्यगुण पु० द्रव्यस्य गुणः प्रतिपादकतया यत्र। द्रव्याणां ज्ञापके ग्रन्थभेदे यथा भावप्र० द्रव्याणां गुणज्ञापकभाग इत्यादि।

द्रव्यपति पु० द्रव्यभेदानां पतिः। ह०सं० ४१अ० उक्ते द्रव्यभेदानां महार्घतादिप्रयोजके पत्यौ मेषादिराशौ यथा "ये मेषं द्रव्याधमधिपतयो राशयः सप्तदृष्टाः। तेभिः शुभाशुभार्थं तानागमतः प्रवक्ष्यामि। वस्त्राविकृतपानां मक्षरगोधूमरालकयवानाम्। स्नेहस्नायौषधीनां कनकस्य च कीर्तितो मेषः। गवि वस्त्रकृतसगोधूमशालियवमक्षिकसुरभितनयाः स्युः। मिथुनेऽपि धान्यशारदवल्लीशालूककर्पासाः। कर्किणि कोद्रवकदलोदुम्बरफलकन्दपत्रशोचानि। सिंहे तृणधान्यरसाः सिंहादीनां त्वचः सगुडाः। कन्यातसीकुलायाः कुलत्थगोधूमसक्तुनिष्पावाः। सप्तमराशौ माषा गोधूमाः सर्षपाः सयवाः। अष्टमराशाविक्षुः सैन्धं लोहान्यजाविकं चापि। नवमे तु तगरलवणाम्बरास्थतिलधान्यमूलानि। मकरे तरुगुल्मादां सैन्धे क्षुसुवर्णकृष्णलोहानि। कुम्भे सलिलजफलकुसुमरत्नचित्राणि रूपाणि। मीने कपालसम्भवरत्नान्यम्बूद्भवानि वस्त्राणि। स्नेहाश्च नैकरूपा व्याख्याता सप्तजातं च। राशेरष्टांशावसप्तनवपञ्चमस्थितो लोकः। द्वादशदशषष्ठाष्टमेषु शशिजश्च दृष्टिकरः। षट्सप्तमगो हानिं दृष्टिं शुक्रः करोति शेषेषु। उपचयसंस्थाः क्रूराः शुभदाः शेषेषु हानिकराः। राशेर्यस्य क्रूराः पीडास्थानेषु संस्थिता बलिनः। तत्प्रोक्तद्रव्याणां महार्घता दुर्लभत्वं च। दृष्टस्थाने सौम्या बलिनो देयां भवन्ति राशीनाम्। तद्द्रव्याणां दृष्टिः सामान्यं सुदुर्लभत्वं च। लोचरपीडायामपि राशिबलिभिः शुभयुक्तैर्दृष्टः। पीडां न करोति तथा क्रूरैरेवं विपर्यासः"।

द्रव्यमय त्रि० द्रव्य+प्राच्युर्थे मयट्। साधनतया द्रव्यप्रचुरे यज्ञे द्रव्यसाधनके यज्ञादौ "द्रव्ययज्ञास्तपोयज्ञा योगयज्ञास्तथापरे। स्वाध्यायज्ञानयज्ञाश्च इत्युक्तमे "श्रेयान् द्रव्यमयात् यज्ञात् ज्ञानयज्ञः परन्तप!। सर्वकर्माखिलं पार्थ! ज्ञाने परिसमाप्यते" गीता।

द्रव्यविशेष पु० सुश्रुतोक्ते धर्मविशेषेण द्रव्याणां पार्थिवत्वादिविशेषे यथा

"अथातो द्रव्यविशेषविज्ञानीयमध्यायं व्याख्यास्यामः। पृथिव्यप्तेजोवायव्याकाशानां बहुदायाद्द्रव्याभिनिर्वृत्तिरुत्कर्षस्तभिव्यञ्जको भवतीदं पार्थिवमिदमाप्यमिदं तैजसमिदं वायव्यमिदमाकाशीयमिति। तत्र स्थूलसारस्थान्द्रमन्दस्थिरखरगुरुकठिनगन्धबहुलमौषत्कषायं प्रायशो मधुरमितिपार्थिवं तत् स्थैर्य्य बलसङ्घातोपचयकरं विशेषतश्चाधोगतिस्वभावमिति। शीतस्निग्धगुरुसरसान्द्रमृदुपिच्छिलरसबहुलमौषत्कषायास्लवणं म-

धुररसप्रायमाद्यं तत् क्लेदनप्रह्लादनक्लेदनबन्धनविष्यन्दनकरमिति। उष्णतोष्णसूक्ष्मरूक्षखरलघुविशदं रूपगुणबहुलमीषदम्ललवणं कटुकरसप्रायं विशेषतश्चोर्द्धगतिस्वभावमिति तैजसं तद्दहनपचनधारणतापनप्रकाशनप्रभावर्णकरमिति। रूक्षरूक्षखरशिशिरलघुविशदं स्पर्शबहुलमीषत्तिक्तं विशेषतः कषायमिति वायवीयं तद्वैशद्यलाघवस्पन्दनविरूक्षणविचारणकरमिति। सूक्ष्मश्लक्ष्णमृदुव्यवायिविविक्तमव्यक्तरसं शब्दबहुलमाकाशीयं तन्मार्दवगौरिव्यलाघवकरमिति"।

द्रव्यशुद्धि स्त्री ६त०। द्रव्याणां प्रक्षालनादिना मलादेरपनयने। द्रव्यविशेषस्य शुद्धिभेदा १७६ पृष्ठादौ दृश्याः "प्रेतशुद्धिं प्रवक्ष्यामि द्रव्यशुद्धिं तथैव च" मनुः

द्रष्टव्य त्रि० दृश–तव्य। साक्षात्कर्त्तव्ये "आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः" इ०उ०।

द्रष्टृ त्रि० दृश–तृच्। १दर्शके २साक्षात्कारके ३प्रकाशके च "नान्योतोऽस्ति द्रष्टा" श्रुतिः "द्रष्टारोव्यवहाराणां साक्षित्वञ्च तथैव हि" याज्ञ०। "दृश्यदृष्टृसंयोगो हेयहेतुः" योगसू० "चक्षुर्जन्यमनोवृत्तिर्विद्युक्ता रूपभासिका। दृष्टिरित्युच्यते दृष्टा दृष्टिकर्त्रेति चोच्यते शब्दार्थचि० धृतवाक्यम्।

सांख्यमते यथा पुरुषस्य दृष्टृत्वं तथा सां०सू० निरूपायि यथा "दृष्टृत्वादिरात्मनः करणत्वमिन्द्रियाणाम् दृष्टृत्वादिपञ्चकं यज्ञृत्वादिपञ्चकं सङ्घातपरार्थत्वं चात्मनः पुरुषस्य, दर्शनादिवृत्तौ करणत्वं त्विन्द्रियाणामित्यर्थः। नन्वेवं दृष्टृत्वभोक्तृत्वादिकं कदाचिदनुभवे पर्यवसानात् पुरुषस्याविकारिणोऽपि घटतां यज्ञृतादिकं क्रियामात्रं तत्कथं कूटस्थस्य घटतामिति चेन्न अयस्कान्तवत् सान्निध्यमात्रेण दर्शनादिवृत्तिकर्त्तृत्वस्यैवात्र दृष्टृत्वादिशब्दार्थत्वात्। यथा हि महाराजः स्वयमव्याप्रियमाणोऽपि सैन्येन करणेन योद्धा भवत्यात्मामात्रेण प्रेरकत्वात् तथा कूटस्थोऽपि पुरुषश्चक्षुरादीन्द्रियकरणैर्द्रष्टा यज्ञा सङ्घातयिता चेत्येवमादिर्भवति संयोगाख्यसान्निध्यमात्रेणैव तेषां प्रेरकत्वादयस्कान्तमणिवदिति। कर्तृत्वं चात्र कारकचक्रप्रयोक्तृत्वं करणत्वं क्रियाहेतुव्यापारवत्त्वं तन्नाधकतमत्वं वा कुठारादिवत्। यत्तु शास्त्रेषु पुरुषे दर्शनादिकर्तृत्वं निषिध्यते तदतुच्छातिमत्त्वं तत्तत्क्रियावत्त्वं वा। तथा चोक्तम् "अत आत्मनि कर्तृत्वमकर्तृत्वं च संस्थितम्। निरिच्छत्वादकर्त्तासौ कर्त्ता सन्निधिमात्रतः" इति अतएव कारकचक्रप्रयोक्तृतायाश्चेतनस्वरूपतया दृष्टृत्वयज्ञृत्वादिकमात्मनो नित्यमिति ऋते। "न दृष्टुर्दृष्टेर्विपरिलोपो विद्यते न श्रोतुःश्रुतेर्विपरिलोपो विद्यत इत्यादिनेति"। नन्वेवं प्रमाणविभागे प्रत्यक्षादिवृत्तीनामेव करणत्वलक्षणमस्य कथमिन्द्रियस्योक्तमत इति चेन्न अत्र दर्शनादिरूपासु चक्षुरादिद्वारकवृत्तिवृत्तिष्वेवेन्द्रियाणां करणत्ववचनात्। तत्र पुरुषनिष्ठे बोधाख्यफले इत्तीनां करणत्वस्योक्तत्वादिति" प्र० भाष्यम्।

सा०का० तत्त्वकौमुद्योरप्येवं व्यवस्थापितं यथा "तस्माच्च विपर्य्ययात्सिद्धं साक्षित्वमस्य पुरुषस्य। कैवल्यं माध्यस्थ्यं द्रष्टृत्वमकर्त्तृभावश्च" "तत्र चेतनत्वेन विषयत्वेन च साक्षित्वदृष्टृत्वे दर्शिते चेतनोहि द्रष्टा भवति नाचेतनः। साक्षी च दर्शितविषयो भवति यस्मै प्रदर्श्यते विषयः स साक्षी यथा हि लोके खड्गिप्रत्यर्थिनौ विवादविषयं साक्षिणे दर्शयतः एवं प्रकृतिरपि स्वचरितं विषयं पुरुषाय दर्शयतीति पुरुषः साक्षी। न चाचेतनोविषयो वा शक्नोविषयं दर्शयितुमिति चैतन्यादविषयत्वाच्च भवति साक्षी अतएव द्रष्टापि भवति" त०कौ० न्यायमते च दर्शनादिज्ञानाश्रयत्वादात्मनोद्रष्टृत्वं सुव्यक्तमिति भेदः।

द्रह पु० द्रुद+ड्रहो०। अगाधजले ह्रदे हेमच०।

द्रह्यत् त्रि० दंह–शत्रे वेदे निपा०। दृढीकुर्वति। "दृंहत् गोमं पाहि दृह्यदिन्द्र!" ऋ०२।११।१५ "दृंहत् दृंहते रिदं रूपं दृढीकुर्वत्" भा०।

द्रा स्वप्ने पलायने अदा०अक० अनिट्। द्राति अद्रासीत्। दद्रौ पलायनं वञ्चनायासेन गतिः तत्र सक०। "मतयोदक्ष दद्रुः" ऋ०१।६२।११। द्रापयति "एष वै तं द्रापयति यं दिद्रापयिषति" शत० ब्रा०६।१।२।३। अप+अपसरणे "अप द्राह्यवीरहः" अथ०६।१४।२ "माप द्रान्त्वरातयः" ६।१२६।१

नि+मेध्यानाड्रोसंयोगरूपनिद्रायाम् अक०। "तदा निद्रावृपपन्नं खगः" नैष०।

प्र+प्रकर्षेण पलायने प्रद्राणः

द्राक् अव्य० द्रा–बा०कु। द्रुते शीघ्रे झटितीत्यर्थे अमरः "द्राक्पर्यस्तकपालसम्पुटमिलदित्यादि" वीरच० "धनस्य द्राग्विनियुक्ता" कामन्द०"साक्षात्कृति कृतिषु निरस्तानन्दमिन्द्रादिषु द्राक्" नैष० ६स०।

**द्राघ** आङ्क्षायां भा॰ पर॰ सक॰ सेट् इदित्। द्राङ्क्षति अद्राङ्क्षीत्। दद्राङ्क्ष दद्राङ्क्षतुः।

**द्राक्षा** स्त्री द्राघि-क्ष वा॰ नलोपः। गुच्छीकायां गोस्तन्यां (किसमिस) अमरः। "द्राक्षा मृद्वी मधुरसा गोस्तनी चतुरा हृद्या। खाडुपाकरसा स्वर्या तुवरा रुष्टमूत्रविट्। शीतमारुतदृड् हृद्या कफपित्तविषप्रदा। हन्ति क्षयाध्वरक्षावातवातासृक्कासमदान्। क्षुत्क्षान्तिपित्तस्वस्थोद्दाहशोषमदात्ययान्। द्राक्षा खाडूत्तमा सुधी सैवाम्ला रक्तपित्तजित्। इक्षा खादु गोस्तनी द्राक्षा सुधी च कफपित्तहृत्। अवीक्षान्या खल्पतरा गोस्तनीसदृशी गुणैः। द्राक्षा पर्वतजा सक्षी वाऽम्ला श्लेष्मास्रपित्तजित्। द्राक्षा पर्वतजा याहक् तादृशी करभदिका" इति भावप्र॰ तस्याः फलम् अण् कृरीत॰ लुप्। तत्फलेऽपि स्त्री। "द्राक्षे! दृक्षन्ति के त्वामहत! ऋतमसि" गीतगो॰ "आक्षीर्णाजिनरत्नासु द्राक्षावलयभूमिषु" रघुः "द्राक्षागतालीबडलं द्राक्षारसघनं क्वचित्" हरिवं॰ ११४अ॰ अग्राणिपञ्चलात् परस्य द्राक्षाशब्दस्य तत्पुरुषे चूर्णा॰ आद्युदात्तता। प्रस्थशब्दे परे मासादित्वात् पूर्वपदमाद्युदात्तम् द्राक्षाप्रस्थः। वया॰मतोर्लुक् न षः। द्राक्षामान्

**द्राक्षाघृत** न॰ द्राक्षाभिश्चतेन पक्वं घृतम्। "पुराणसर्पिषः प्रस्थो द्राक्षार्द्धप्रस्थसाधितः। कासश्वासक्षयपाण्डुहृत्पित्तज्वरमेहोदरापहः" चक्रदत्तोक्ते घृतभेदे

**द्राख** शोषणे सक॰ अनुदात्तेत् अक॰भा॰पर॰ सेट्। द्राखति अद्राखीत्। ऋदित् णिचि चङि अदद्राखत् त। दद्राख अयं वर्षेऽपि।

**द्राघ** आयासे शब्दे च भ्वा॰पर॰ सक॰ सेट्। द्राघति अद्राघीत्। ऋदित् णिचि चङि अदद्राघत् त। दद्राघ केचित् अस्य ऋदित्त्वमपीच्छन्ति द्राङ्क्षति अद्राङ्क्षीत्।

**द्राघि** नामधातुः दीर्घीकरणे दीर्घं करोति दीर्घ+कृतौ णिच्-द्राघादेशः सक॰ उभ॰ सेट्। द्राघयति ते अदिद्राघत् त। "द्राघयन्ति हि मे शोकं कर्यमाणागुणास्तव" भट्टिः

**द्राघिमन्** पु॰ दीर्घस्य भावः इमनिच् द्राघादेशः। दीर्घत्वे "वासांसि च द्राघिमवन्त्युदूढः" भट्टिः "वर्षिमा च मे द्राघिमा च मे" यजु॰१८।४

**द्राघिष्ठ** त्रि॰ अतिशयेन दीर्घः इष्ठन् द्राघादेशः। अतिदीर्घे देवतनू द्राघीयस् तत्रार्थे त्रि॰ स्त्रियां ङीप्।

**द्राघमन्** पु॰ द्राघिमन्+वेदे पृषो॰ इकारस्याकारः। दीर्घत्वे "दोषो द्राघ्मा शरभि भूरण्यो" ऋ॰१०।७०।४ तृतीयास्थाने याच् अनोऽङ्गोभे रूपसिद्धिः द्राघम्ना द्राघिम्ना इत्यर्थः।

**द्राड** विभेदे भ्वा॰आ॰ सक॰सेट्। द्राडते अद्राडिष्ट। दद्राडे

**द्राण** त्रि॰ द्रा-कर्त्तरि ल्युट तस्य नः। १शीघ्रे २पलायिते च। भावे ल्युट्। ३शीघ्रे पलायने च न॰ अमरः।

**द्राप** पु॰ द्रा-णिच्-पुक् अच्। १पङ्के २आकाशे ३वपर्दिनि ४मूर्खे च शब्दकल्पतरुः।

**द्रापि** त्रि॰ द्रापयति कुत्सितां गतिं प्रापयति प्रापिनम् द्रा-णिच् पुक् इन्। कुत्सितगतिप्रापके वृद्धे "द्रापे! अन्धसस्ते! दरिद्र! नीललोहित!" यजु॰१६।४७। २कवचे च "विद्युद्द्रापिं हिरण्ययं वस्वो वसु निर्षेजम्" ऋ॰१।२५।१२ "द्रापिं कवचम्" भा॰

**द्रामिल** पु॰द्रमिलो देशोऽभिजनोऽस्य अण्। १चाषपक्षे हेमच॰ २पित्वादिक्रमेण तद्देशवासिनि त्रि॰ बहुत्वे अणो लुक्। द्रमिलाः। [तामे च।

**द्राव** पु॰ द्रु-गतौ स्रुतौ भावे घञ्। १गतौ २द्रवणे ३क्षरणे

**द्रावक** पु॰ द्रवति चन्द्रकरसम्पर्कात् द्रु-ण्वुल्। १चन्द्रकान्तमणौ २विदग्धे ३शोषके च मेदि॰। ४पिङ्गले क्षारे शब्दमाला। द्रावयति द्रु-णिच् ण्वुल्। ५द्रवकारके हृद्रुदयग्राहिणि त्रि॰ धरणिः। ७रसभेदे टङ्कणे पु॰ शब्दमाला। ८लाक्षायां स्त्री टाप् अत इत्त्वम् शब्दरत्ना॰ ९द्रौणीद्राद्यौषधभेदे पु॰। १०सिक्थके न॰ राजनि॰।

**द्रावककन्द** पु॰ द्रावकः कन्दोऽस्य। तैलकन्दे राजनि॰।

**द्रावकर** न॰ द्रावं द्रवं करोति अर्शादिं अमम्पर्केण क-ताच्छील्ये ट। श्वेतटङ्कणे राजनि॰ अण्। द्रावकार द्रवकारके त्रि॰।

**द्रावण** न॰ द्रावयति जलमलं स्वसंयोगात् द्रु-णिच् ल्युट्। १जलकफले (निर्मौल्य) रत्नमाला। २पलायनकारके त्रि॰। "त्रैलोक्यद्रावणं क्रूरं दुराचारं भयावहम्" (रावणम्) हरिवं॰ ३अ॰।

**द्रावयित्नु** त्रि॰ द्रु-णिच्-इत्नुच् नुकरणेनैवेटिरूपसिद्धौ इत्नुचकरणं वा॰अन्योभ्यापि इत्नुच् भवतीति ज्ञापितम्। द्रावणशीले "सूर्यस्येव रश्मयो द्रावयित्नवः" ऋ॰९।६९।६।

**द्राविड** त्रि॰ द्रविडोदेशोऽभिजनोऽस्य अण्। पित्वादिक्रमेण द्रविडदेशवासिनि। बहुषु अणो लुक्। द्रविडाः क्वचिदार्षे न लुक्। "कर्णाटाश्चैव तैलङ्गा गुर्जरा राष्ट्रवासिनः। आन्ध्राश्च द्राविडाः पञ्च विन्ध्यदक्षिणवासिनः" स्कन्दपु॰।

द्राविडक न० द्रविडे भवः अण् संज्ञायां कन्। १विड्जपदे (जियतपत्री) ख्याते २वेधसख्यजे पु० अमरः।

द्राविड़मूतिक पु० द्राविडी भूतिरुत्पत्तिर्यस्य कप्। विड्-जपदे शब्दरत्ना०।

द्राविडी स्त्री द्रविडे भवा अण् ङीप्। एलायां राजनि०।

द्राह जागरे भ्वा० आत्म० अक० सेट्। द्राहते अद्राहिष्ट दद्राहे अदित् घिच् चङि अदद्राहत् त।

द्राह्मायण पु० द्रह्मस्यैर्गोत्रापत्यं युवा यञ् यूनि फक्। सामगानां कल्पसूत्रकारके ऋषिभेदे।

द्रु गतौ भ्वा० पर० सक० अनिट्। द्रवति स्मार्थे चङ् अदु-द्रवत्। घिचि चङि तु अदि(दु)द्रवत् त। दुद्रुवे। गतिसंयोगानुकूलव्यापारः द्रवद्रव्यायां दूरप्रसरण-रूपं स्यन्दनं च "द्रवत्वात् स्यन्दनम्" कणा० सूत्रम् "स्यन्दनं द्रव्यत्वादसमवायिकारणादुत्पद्यते। तथा हि पतितानामपां बिन्दूनां परस्परं संयोगेन महत् जलस्रोतोयज्जायते तस्य यत् स्यन्दनं दूरप्रसरणं तत् द्रवत्वादसमवायिकारणादुत्पद्यते गुरुत्वान्निमित्तकारणाद-पस्तु समवायिकारणेषु" उप०। इत्तिः घिचः सनि दि(दु)-द्रावयिषति। तत्र गतौ "सस्रुर्मेघाभिसृष्टा द्रवन्ति" गीता "ततः किरीटी सहसा पाञ्चालान् समरेऽद्रवत्" भा०आ०५४ ७८श्लो० "तं दुद्रावाहिहा कपिः" भट्टिः

द्रु अनुतापे स्वा०पर० सक० अनिट्। द्रुणोति अद्रौणीत्। वधे च "स भक्षयात् चकारारीन् दुद्राव च ऋतानवत्" भट्टिः।

द्रु पु०द्रवत्यूर्ध्वं द्रु-वा० डु। १वृक्षे २शाखायाञ्च। ३गतौ स्त्री। "ऋदादीताथ षड्भागं द्रुशाखमधुसर्पिषाम्" मनुः द्रुवधः। ४वृक्षविकारे न० "द्रुण द्रङ्गतिमूदिम" ऋ०१। १६१।१ "द्रुणो द्रुमविकारस्य" भा० विकारे प्रकृति-शब्दः ततश्च तत्स्थः तच्छब्द इति च तत्र न्यायोक्तिः। ५द्रवयुक्ते त्रि०। "द्रुणा सधस्थमासदत्" ऋ० ९।१।२ "द्रुणा द्रोणकलसेन" भा० तत्र पुंस्त्वमपि "आ द्रु पित्र्य-रिमौ द्रोरुपस्थे" ऋ०१०।१०१।१० "द्रोर्द्रुमविकार-स्य" भा० [कर्म०। देवदारुवृक्षे अमरः।

द्रुकिलिम न०किलति किल-श्लेष्मक्रीड़नयोः बा०किमच्।

द्रुघण पु० द्रुः दृढः संसारगतिर्वा हन्यतेऽनेन द्रु-हन करणे ल्युट् घनादेशो वलोपश्च। १मुद्गरे लौहमुद्गरे खनि-धारादीनां मुद्गराकारे लौहमयास्त्रभेदे २कुठारे ३वज्रधृचि च मेदि० ४भूमिचम्पके शब्दचन्द्रिका पूर्वपदात् संज्ञाया-मिति चत्वे विहिते शब्दकल्पद्रुमे दन्त्यमध्यतोक्तिः ग्रामादिकी ५द्रुसमूहे घने च "काशाया मध्ये द्रुघणं प्रयान्तम्" ऋ०१०।१०२।६ "द्रुघणं द्रुसमूहवत्" भा० ज्ञान्दसोऽसंज्ञातेऽपि चत्वम्। [द्रुक्रोड। द्रुडः।

द्रुड मज्जने तु०क्र०पर० सक० सेट्। द्रुडति अद्रोडीत्।

द्रुण कुटिलीभवने तु० पर० अक० सेट् कुटादि। द्रुणति अद्रुणीत्। द्रुणोच। यतौ कुटिलीचरणे हिंसा-यान्तु सक० या०।

द्रुण न० द्रुणति छिनत्ति कुटिलीभवति वा द्रुण-क। धनुषि २खड्गे च हेमच०२द्रुणिवत् ३अङ्के च पुंस्त्री० स्त्रियां जातित्वात् ङीष्। ५पिशुने त्रि० शब्दमाला।

द्रुणस त्रि० द्रुरिव दीर्घो नासिकाऽस्य अच् समा० नसादेशः पूर्वपदात् संज्ञायां चत्वम्। दीर्घनासायुक्ते शब्दलोमे द्रुणस् इति हलन्तोक्तिः सङ्ग्रहादेशात्।

द्रुणह पु० द्रुणं खड्गं जहाति त्यजत्यनेन हा-क। खड्गनिधाने हारा०।

द्रुणा स्त्री द्रुणाति कुटिलीक्रियतेऽनया द्रु-नजर्थे क। ज्यायां मौर्व्यां हेमच०।

द्रुणि स्त्री द्रोणी-पृषो०। १द्रोण्यां भरतः वा ङीप्। २कर्ष-जलौकसि २कक्ष्यायां ५काशाम्बुवाहिन्यान्तु भरतः।

द्रुत त्रि० द्रु-क्त। १जातद्रवे द्रवसंस्कारौ "द्रुतं द्रुतं वह्निसमागतं मतम्" भट्टिः "द्रुतयातकृष्णनिभमंशुमतः" माघः। २शीघ्रे न० ३शीघ्रतायुक्ते त्रि०। "सखस्मृमेन्द्र-द्रुतपातितार्गलाः" काव्यप्र० "द्रुतपदमिति मा वयस्य! वादीः" माघः। ४विलासे मेदि०

द्रुतपद न०द्रुतं शीघ्रगामि पदम्। १शीघ्रगामिपदे। ह्रस्व। २तद्युक्ते त्रि०। "द्रुतपदं भवति नभनयाश्चेत्" छन्तर० उक्ते द्वादशाक्षरपादके वर्णवृत्तभेदे।

द्रुतमध्या स्त्री "भवयमोजगतं गुरुणौ चेद् युजि च नजौ ज्यवुतौ द्रुतमध्या" छन्दो० उक्ते अर्द्धसमाक्षरे वर्णवृ-त्तभेदे।

द्रुतविलम्बित न० "द्रुतविलम्बितमाह नभौ भरौ" छन्तर० उक्ते द्वादशाक्षरपादके १वर्णवृत्तभेदे "किञ्चित् द्रुतञ्च विलम्बितञ्च किञ्चित्। २किञ्चिच्छीघ्रे किञ्चिद्विलम्बिते च "तरणिजापुलिने नवयञ्जरीपरिमदा सह केलि-कुतूहलात्। द्रुतविलम्बितचारुविहारिणं हरिमहं हृदयेन सदा वहे"। छन्दोमञ्जरी।

द्रुति स्त्री द्रु-भावे क्तिन्। १द्रवे २गतौ च।

द्रुनख पु॰द्रोर्नख इव नखोऽस्त्रेऽपि यत्वम्। ।कण्टके त्रिका॰

द्रुपद पु॰ पञ्चालानामधिपे यज्ञसेनापरनामके नृपभेदे

"गच्छताद्यैव पाञ्चालान् द्रुपदस्य निवेशने। स्वयंवरो महांस्तत्र भविता सुमहाधनः। एवमुक्ताः प्रयातास्ते पाञ्चाल्या जनमेजय!। राज्ञा दक्षिणपाञ्चालान् द्रुपदेनाभिरक्षितान्" भा॰आ॰ १८४अ॰ स च महद्वंशाख्यातः यथाह भा॰आ॰६७अ॰ "बाह्लिकिः सत्यसन्धश्च योऽसौ दक्षिणकोद्भवः। पश्चात् स जज्ञे भरतां देवाना मरिमर्दनः। द्रुपदोऽपि राजर्षिस्तत एवाभवद्बलात्। मानुषे नृपलोकेऽस्मिन् सर्वशस्त्रभृतांवरः" स च भरद्वाजसख्य घृतनदपुत्रः यथोक्तं भा॰आ॰ १२०अ॰ "भरद्वाजसखा चासीत् पृषतो नाम पार्थिवः। तस्यापि द्रुपदो नाम तदा समभवत् सुतः। स नित्यमाश्रमं गत्वा द्रोणेन सह पार्थिवः। चिक्रीडाध्ययनञ्चैव चकार क्षत्रियर्षभः। ततो व्यतीते पृषते स राजा द्रुपदोऽभवत्। पाञ्चालेषु महाबाहुरुत्तरेषु नरेश्वर!" तस्य द्रोणेन बालसख्येऽपि पश्चात् वैरं जातं यथोक्तं भा॰आ॰१३१अ॰ "ततो द्रुपदमासाद्य भारद्वाजः प्रतापवान्। अब्रवीत् पार्थिवं राजन्! सखायं विद्धि मामिह। इत्येवमुक्तः सख्या च प्रीतिपूर्वं जनेश्वरः। भारद्वाजेन पाञ्चाल्यो नामृष्यत वचोऽस्य तत्। सक्रोधामर्षजिह्मभ्रूः कषायोक्षतलोचनः। ऐश्वर्यमदसम्मत्तो द्रोणं राजाऽब्रवीदिदम्। द्रुपद उवाच। अज्ञतेयं तव प्रज्ञा ब्रह्मन्नतिसमञ्जसी। यस्त्वां ब्रवीति प्रसभं सखा तेऽहमिति द्विज। न हि राज्ञासदीर्शानामेवं भूतैर्नरैः क्वचित्। सख्यं भवति मन्दात्मन्! श्रिया हीनैर्धनच्युतैः। सौहृदं मे त्वया ह्यासीत् पूर्वं सामर्थ्यबन्धनम्। न सख्यमजरं लोके हृदि तिष्ठति कस्यचित्। वाग्वोऽनं विहरति क्रोधो वैनं हरत्युत। मैवं जीर्णसुपास्यं त्वं सख्यं भवत्यापद्यपि। ह्यासीत् सख्यं द्विजश्रेष्ठ! त्वया मेऽर्थनिबन्धनम्। दरिद्रो न वसुमतो नाविद्वान् विदुषः सखा। न शूरस्य सखा क्लीवः सक्तिपूर्वं किमिष्यते। ययोरेव समं वित्तं ययोरेव समं श्रुतम्। तयोर्विवाहः सख्यञ्च नेतरेतरयोनिषु। श्रोत्रियस्य हि श्रोत्रियस्य नाराजी राजिनः सखा। नाराजा पार्थिवस्यापि सक्तिपूर्वं किमिष्यते। वैशम्पायन उवाच। द्रुपदेनैवमुक्तस्तु भारद्वाजः प्रतापवान्। मुहूर्तं चिन्तयित्वा तु मन्युनाऽभिपरिप्लुतः। स विनिश्चित्य मनसा पाञ्चाल्यं प्रति बुद्धिमान्। जगाम कुरुमुख्यानां नगरं नागसाह्वयम्" द्रोणशब्दे आदौ शिष्यान् कृत्वा तद्द्वारा द्रुपदं पराजित्य बध्यमानाय राज्यार्द्धं दत्वापूर्वकं द्रुपदेन पुनः सख्यं यथास्थितमकरोत् यथाह भा॰आ॰१३८अ॰ "ते यज्ञसेनं द्रुपदं गृहीत्वा रथमूर्द्धनि। उपाजह्रुः सहामात्यं द्रोणाय भरतर्षभ!। मन्यमानं हृतधनं तं तथा वशमागतम्। स वैरं मनसा ध्यात्वा द्रोणो द्रुपदमब्रवीत्। विक्रम्य तरसा राष्ट्रं पुरन्ते हृदितो मया। प्राप्य जीवं रिपुवशं सक्तिपूर्वं किमिष्यते। एवमुक्त्वा प्रहस्यैवं किञ्चित् स पुनरब्रवीत्। मा भैः प्राणभयाद्वीर! ऋषिणो ब्राह्मणा वयम्। ह्यावयोः क्रीडितं यत्तु त्वया बाल्ये मया सह। तेन संवर्द्धितः स्नेहः प्रीतिश्च क्षत्रियर्षभ!। प्रार्थयेयं त्वया सख्यं पुनरेव जनाधिप!। वरं ददामि ते राजन्! राज्यस्यार्द्धमवाप्नुहि। अराजा किल नो राष्ट्रः सखा भवितुमर्हति। अतः प्रयतितं राज्ये यज्ञसेन! मया तव। राजासि दक्षिणे कूले भागीरथ्याः सहस्रशः। सखायं मां विजानीहि पाञ्चाल! यदि मन्यसे। द्रुपद उवाच। अनार्यमिदं ब्रह्मन्! विक्रान्तेषु महात्मसु। प्रीये त्वयाहं त्वत्तश्च प्रीतिमिच्छामि शाश्वतीम्। वैशम्पायन उवाच। एवमुक्तः स तं द्रोणो मोक्षयामास भारत!। मतञ्च चैनं प्रीतात्मा राज्यार्द्धं प्रत्यपादयत्। माकन्दीमथ गङ्गायास्तीरे जनपदायुताम्। सोऽध्यावसद्दीनमनाः काम्पिल्यञ्च पुरोत्तमम्। दक्षिणांश्चापि पाञ्चालान् यावच्चर्मण्वतीं नदीम्। द्रोणेन चैवं द्रुपदः परिभूयाथ पाञ्चितः। ह्यात्मनश्च बलेनाथ नापश्यत् स पराजयम्। क्षीणं विदित्वा चात्मानं ब्राह्मेण च बलेन तु। पुत्रजन्म परीप्सन् वै पृथिवीमन्वसञ्चरत्। ऋषिपक्षस्य विषयं द्रोणः समभियद्यत। एवं राजन्! क्षिप्त्वा पुरी जनपदायुता। युधि निर्जित्य पार्षेन द्रोणाय प्रतिपादिता" हृत॰। २द्रोणःकाश्यस्य देशभेदे "ह्यादित्यं द्रुपदेषु वह्निम्" ऋ॰१।२४।१२ "द्रोणः काश्यस्य पदेषु यूपस्य प्रदेशविशेषेषु" भा॰द्रुमयं काश्यमयं पदम्। ३काश्यपाङ्कायाम् "द्रुपदादिव मुञ्चतानः" यजु॰२०।२० "द्रुस्तरुस्तन्मयं पदं पादुका तस्मात् मुञ्चतानः पृथग्भवन्। यथा पादुकादोषैरसम्बद्धोभवति" वेददी॰ द्रुपदं तच्छब्दोऽस्त्यस्मादिति अच्। ४द्रुपदयन्त्रयुक्तायामस्त्रियां स्त्री "गायत्रगुप्तवक्त्रं त द्रुपदां वा यतं जपेत्"

भा॰स॰। साच ऋक् "द्रुपदादिव मुमुचानः" इत्यादिका वसु॰२०।२०"द्रुपदान्तु ततोऽप्त्वा जलमादाय पाणिना" काशी॰ २५ अ॰

**द्रुपदात्मज** पु॰ ६त॰। १द्रुपदस्य राज्ञो नन्दने शिखण्डिनि २धृष्टद्युम्ने ३याज्ञसेन्यां स्त्री। शिखण्डी च स्त्रीरूपेण पूर्वं जातः पश्चात् स्त्रीत्वत्यागेन पुंस्त्वमाप तत्कथा भा॰उद्यो॰१९२।९१ अ॰ दृश्या "एवमेव महाराज! स्त्रीपुमान् द्रुपदात्मजः। स सम्भूतः कुरुश्रेष्ठ! शिखण्डी भरतर्षभ!" इत्यत्र पूर्वं द्रुपदशब्दे दर्शिते द्रोणद्रुपदयो र्वैरे जाते तन्मूलनिर्वेदात् द्रुपदस्य द्रोणालकपुत्रेच्छया याजोपयाजाभ्यां यज्ञस्य करणे अग्निमध्यात् धृष्टद्युम्न कृष्णयोरुत्पत्तिकथा भा॰आ॰ १६७अ॰

"द्रोणाद्विशिष्टमासाद्य भवन्तं ब्रह्मवित्तमम्। द्रोणालकमहं पुत्रं लभेयं बुधि दुर्जयम्। तत् कर्म कुरु मे याज! वितरामि तवेदं गवाम्। तथेत्युक्त्वा तु तं याजो याज्यार्थमुपकल्पयन्। गुर्वर्थं इति चाकामसुपयाजमथोदयत्। याजो द्रोणविनाशाय प्रतिजज्ञे तथा च सः। ततस्तस्य नरेन्द्रस्य उपयाजो महातपाः। आचख्यौ कर्म तत्तस्य तदा पुत्रफलाय वै। स च सुतो महावीर्यो महातेजा महाबलः। दृश्यते यज्ञियो राजन्! भविता ते तथाविधः। भारद्वाजस्य कर्मारं सोऽभिसन्धाय भूपतिः। याजस्तु तत्तथा सर्वं द्रुपदः कर्मसिद्धये। यागस्य समवस्थाने देवीमाज्ञापयत्तदा। प्रेहि मां राज्ञि पृषति! भिषजं त्वासुपस्थितम्। राजुरुवाच। अवलिप्तं सखं ब्रह्मन्! दिव्यान् गन्धान् बिभर्मि च। सुतार्थे नोपसर्प्यास्मि तिष्ठ याज मम प्रिये। याज उवाच। याजेन यमितं कृत्यमुपयाजाभिसन्धितम्। कथं कामं न सन्दध्यात् सा त्वं विप्रैहि तिष्ठ वा। ब्राह्मण उवाच। एवमुक्ता तु याजेन हुते हविषि संस्कृते। उत्तस्थौ पावकात्तस्मात् कुमारो देवसन्निभः। ज्वालावर्णो घोररूपः किरीटी वर्म चोत्तमम्। बिभ्रत् सखड्गः सशरो धनुष्मान् विनदन्मुहुः। सोऽध्यारोहद्रथवरं तेन च प्रययौ तदा। ततः प्रमुदिताः पाञ्चालाः प्रहृष्टाः साधु साध्विति। कुमारीसंस्तवैस्तावद्येषे वसुन्धरा। भयापहो राजसुतः पाञ्चालानां यशस्करः। राज्ञः शोकापहो जात एष द्रोणवधाय वै। इत्युवाच महद्भूतमदृश्यं खेचरं तदा। कुमारी चापि पाञ्चाली वेदीमध्यात् समुत्थिता। सुभगा दर्शनीयाङ्गी श्यामा पद्मपलाशाक्षी नीलकुञ्चितमूर्द्धजा। ताम्रतुङ्गनखी श्लक्ष्णा चारुपीनपयोधरा। मानुषं विग्रहं कृत्वा साक्षादमरवर्णिनी। नीलोत्पलसमो गन्धो यस्याः क्रोशात् प्रधावति। या बिभर्त्ति परं रूपं यस्या नास्त्युपमा भुवि। देवदानवयक्षाणामीप्सिता देवरूपिणी। तस्यापि जातां सुश्रोणीं वासुदेवाग्रजोरिणी। सर्वयोधिहरा कृष्णा निनीषुः चक्रियान् क्षयम्। सुरकार्यमिदं काले करिष्यति सुमध्यमा। यस्या हेतोः कौरवाणां महदुत्पत्स्यते भयम्। तं श्रुत्वा सर्वपाञ्चालाः प्रमोदुः सिंहसङ्घवत्। न चैतान् हर्षसम्भूर्त्तियं सेहे वसुन्धरा। तौ दृष्ट्वा पार्षती वाक्यं प्रमोदे वै सुतार्थिनी। न वै मदन्यां जननीं जानीयातामिमाविति। तमेत्युवाच तां याजो राज्ञः प्रियचिकीर्षया। तयोश्च नामनी चक्रुर्द्विजाः सम्भूयमानसाः। धृष्टमादतिधृष्णुत्वाद्युम्नादुत्सन्नवादपि। धृष्टद्युम्नः कुमारोऽयं द्रुपदस्य भवत्विति। कृष्णत्वेवाब्रुवन् कृष्णां कृष्णाभूत् सा हि वर्णतः। तथा तन्मिथुनं जज्ञे द्रुपदस्य महामखे। धृष्टद्युम्नन्तु पाञ्चाल्यमानीय स्वं निवेशनम्। उपाकरोदस्त्रहेतोर्भारद्वाजः प्रतापवान्। अमोघचीर्यं दैवं हि भावि मत्वा महामतिः। तथा तत् कृतवान् द्रोण आत्मकीर्त्त्यनुरक्षणात्" । द्रुपदसुतादयोऽप्यत्र ।

**द्रुपदी** स्त्री द्रुरिव दीर्घः पादोऽस्याः कृष्मपद्या॰ ङीपि पक्षावः। द्रुमतुल्यपादयुक्तायां स्त्रियाम्।

**द्रुपदादित्य** पु॰ काशीस्थे द्रौपद्याः स्थापिते आदित्यविग्रहभेदे तदाविर्भवकथा काशीख॰ ४९अ॰

"आकर्णय मुने। पूर्वं पद्मपद्मो हरेः स्वयम्। पृथिव्यां पद्मधा भूत्वा प्रादुरासीज्जगद्धितः। उमापि च जगद्धात्री द्रुपदस्य महीभुजः। यजतो वह्निकुण्डात्तु पाटवक्त्रेऽतिसुन्दरी। पञ्चापि पाण्डुतनयाः साक्षाद्वज्रधरादराः। अवतेरुरिह स्वर्गाद् दुष्टसंहारकारिणः। नारायणोऽपि कृष्णत्वं प्राप्य तत्साहचर्य्यकृत्। दुर्वृत्तदुष्टशमनः सद्वृत्तस्थितिकारकः। प्रतपन्तः पृथिव्यान्ते पार्थाश्चेरुः पृथक् पृथक्। दृष्ट्वातुदयौ तत्रिनु सम्पदां विपदामपि। कदाचित्ते महावीरा भ्रातृज्यप्रतिपादिताम्। विपत्तिमाप्य महतीं बभूवुः काननौकसः। पाञ्चाल्यपि च तत्पत्नी पतिव्यसनकर्शिता। धर्म्मं प्राप्य मन्यङ्गी ब्रह्मणाराधयद्भृशम्। आराधितोऽथ सविता तया द्रुपदकन्यया। सदर्शं सविधानाच्च

स्वानिष्टामवद्यवान्दद्यौ। उवाच च प्रसन्नात्मा भास्करो द्रुपदात्मजाम्। आराधयन्नीं भावेन सर्वत्र शुचिमानसाम्। स्वाख्यैतया महाभागे! यावन्नोऽर्थिनोजनाः। तावन्तस्तृप्तिमाप्स्यन्ति यावद्वं न भोक्ष्यसे। भुक्तायां त्वयि रिक्तैषा पूर्णभक्ष्या भविष्यति। रसवद्भक्षननिधिरिक्षाभक्ष्यप्रदायिनी। इत्यं वरस्तया लब्धः कामादादित्यतो सने!। अपरच्च वरो दत्तस्तस्यै देवेन भास्वता। रविरुवाच। विप्रेभ्याहूचिषे भागे यो मां त्वत्पुरतःस्थितम्। आराधयिष्यति नरः क्षुदुबाधा तस्य नश्यति। अन्यच्च मे वरो दत्तो विप्रेभ्येन पतिव्रते!। तपसा परितुष्टेन तं निशामय वच्मि ते। प्राप्ये! त्वां समाराध्य यो मां द्रक्ष्यति मानवः। तस्य त्वं दुःखतिमिरमपाहृद निजैः करैः। अतो धर्मप्रिये! नित्यं प्राप्य विप्रेश्वराहरम्। काम्यैस्थितानां जन्तूनां नाशयास्यघसञ्चयम्। ये नामत्र भजिष्यन्ति मानवाः श्रद्धयान्विताः। त्वद्वरोद्यतपाणिञ्च तेषां दास्यामि चिन्तितम्। भवतीं मत्समीपस्थां युधिष्ठिरपतिव्रताम्। विप्रेभ्याहूचिषे भागे दक्षपार्श्वेः समीपतः। येऽर्च्यं विभ्रन्ति भावेन पुरुषा वा स्त्रियोऽपि वा। तेषां कदाचिन्नो भावि भयं प्रियवियोगजाम्। न व्याधिजं भयं क्वापि न क्षुत्तृड्रोगसम्भवम्। द्रौपदीत्वयतः काम्यां तव धर्मप्रियेऽनघे!। इति दत्त्वा वरान्देव आदित्यः सर्वदः सताम्। अभ्यमाराधयामास धर्मं द्रौपद्युपायवौ। आदित्यस्य कथामेतां द्रौपद्याराधितस्य वै। यः शृणोति नरो भक्त्या तस्यैनः कथमेष्यति। स्कन्द उवाच। द्रौपदादित्यमाहात्म्यं संक्षेपात् कथितं मया। मयूखादित्यमाहात्म्यं शृणु दानीं घटोद्भव!" "चतुर्थो द्रुपदादित्यः" काशीख० ३६अ० द्रौपदादित्योऽभवत्। "इदानीं द्रौपदादित्यं कथयिष्यामि तेऽनघ" तत्र।

**द्रुम** पु० द्रुः शाखास्त्यस्य म। १वृक्षे अमरः। २पारिजाते ३कुबेरे च मेदि०। "बहुपल्लवपुटाञ्जलिं द्रुमम्" रघुः। "तस्य तद्वर्द्धते नित्यं सिच्यमान इव द्रुमः" मनुः ४किम्पुरुषाधीशभेदे "द्रुमः किम्पुरुषेशश्च उपास्ते धनदेश्वरम्" भा०स० ४१०स्त्री० "किंपुरुषाधिराजमिव सुनिजनस्टस्रोतजलकलशपरिषिच्यमानद्रुमम्" कादं० कृष्णपत्नियां रुक्मिण्यां जाते १पुत्रभेदे "प्रद्युम्नः प्रथमं लक्ष्मे शंबरान्तकरः सुतः। द्वितीयश्चारुदेष्णश्च सुषेणश्चारुगुप्तकः। चारुभद्रश्चारुगर्भः सुचारुर्द्रुम एव च" हरिवं० १६२अ०। शिबिनामदैत्यांशजाते द्वापरयुगीये १नृपभेदे "यस्तु राजञ्छिबिर्नाम दैत्येशः परिकीर्तितः। द्रुम इत्यभिविख्यातः स आसीद्भुवि पार्थिवः" भा०आ० ६७अ०७प्राचीने नृपवरभेदे "यवीनरः ततश्चयः कद्रो द्रुहिद्रुहो द्रुमः" भा०आ०१अ०प्राचीनवंशोक्तौ।

**द्रुमनख** पु० द्रुमस्य नख इव कंण्डालेऽपि न खत्वम्। कण्टके शब्दरत्ना०।

**द्रुममय** पु० नि०। द्रुम+विकारे मयट्। दारुविकारे यूपादौ

**द्रुममर** पु०द्रुमोत्थितेऽनेन सह-करणे खप्। कण्टके त्रिका०।

**द्रुमव्याधि** पु० द्रुमस्य व्याधिरिव। द्रुमाश्रये १छायायाम् राजनि०। ६त०। २दारुरोगे च

**द्रुमशीर्ष** न० द्रुमस्य शीर्षमिव शीर्षमस्य। दारुतुल्यायुक्ते कृत्रिमभेदे "कपिशीर्षं द्रुमशीर्षं तथा चाखोट शीर्षकम्। इति कृत्रिमभेदाः स्युः शास्त्रिकैः सप्तदाकृताः" शब्दर०। ६त०। २दारुतुल्ये न०। [शब्दार्थक०।

**द्रुमश्रेष्ठ** पु० द्रुमेषु श्रेष्ठः। १प्रधानदारुवृक्षे २तालवृक्षे च

**द्रुमषण्ड** न० द्रुमाणां समूहः द्रुम+षण्डच्। दारुसमूहे "जलेषु जलजैश्चित्रं स्थलेषु स्थलजैरपि। पद्मजैर्द्रुमषण्डैश्च सर्वतः प्रतिभूषितम्" हरिवं०९७अ०

**द्रुमसेन** पु० राजभेदे सच गन्धिष्ठासुरांशाज्जातः द्वापरयुगीयो नृपभेदः "गन्धिस्तु महातेजा यः प्रख्यातो महासुरः। द्रुमसेन इति ख्यातः पृथिव्यां सोऽभवन्नृपः" भा०आ० ६७अ०। [दारुरोगे च।

**द्रुमामय** पु० द्रुमस्यामय इव। छायायां अमरः। ६त०।

**द्रुमारि** पु०६त०। १वृक्षिणि गजे राजनि०२दारुनाशकमात्रे च

**द्रुमाश्रय** त्रि० द्रुम आश्रयो यस्य। १दारुस्थिते २सरटे पुंस्त्री० राजनि०। स्त्रियां जातित्वात् ङीष्।

**द्रुमिणी** स्त्री द्रुमाणां समूहः अण+समूहे इनि ङीप्। दारुसमूहे।

**द्रुमेश्वर** पु० द्रुमेषु ईश्वर इव श्रेष्ठत्वात्। १तालवृक्षे शब्दार्थक०। २द्रुमाणां श्रेष्ठे च "स्वर्गादिज्ञानयित्वा च पारिजातं द्रुमेश्वरम्" हरिवं०१२६अ०। ३ओषधीशे चन्द्रे च

**द्रुमोत्पल** पु०द्रुमे उत्पलमिव पुष्पमस्य। कर्णिकारवृक्षे अमरः

**द्रुह्म** मतौ भ्वा०पर०सक० सेट् निघण्टुः। द्रुह्मति अद्रुहीत् दद्रुह्म। निघण्टौ दृह्मेति पाठान्तरम्।

**द्रुव्य** पु० "द्रोव्य माने वयः" पा०द्रु+माने वय। माने अमरः।

**द्रुसक्तक** पु० द्रुषु सक्तक इव। पियालवृक्षे शब्दर०।

**द्रुह** जिघांसायां दिवा०पर०सक०सेट्। द्रुह्यति अद्रौक्षीत्-

अभ्युक्तृ। द्रोढिता द्रोग्धा द्रोढा द्रोक्ष्यति द्रोक्षति। भ्रुक् भ्रुट्। "क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोपः" पा० कोपविषयस्य सम्प्रदानता। यत्ते द्रुह्यति। उपरुष्टस्य तस्य सम्प्रदानस्य कर्मता अत्यमभिद्रुह्यति। "न यजमानाय द्रुह्यति" शत०ब्रा० २।२।४।२८। "मा द्रुमेभ्यो महाभाग! दीनेभ्यो द्रोग्धुमर्हसि!" भाग०६।४।७ "नाभि द्रुह्यति भृत्येभ्यः" भाग०४।२०।२ आर्षत्वात् न कर्मता। "मातरञ्चाभिद्रुह्यन्ति मनसा कर्मणा च ये" भा०शा० "भवांस्तानभिद्रुह्येत" कामन्दकी० यत्र तङ् असाधुः।

द्रुह् त्रि०द्रुह-क्विप्। द्रोहकारके मित्रभ्रुक्ट्।

द्रुह त्रि०द्रुह-कर्तरि क। १द्रोहकारके "द्रुहा तन्वं गूहमाना" ऋ०७।१०४।१७। २पुत्रे शब्दार्थकल्प०। पुत्रस्य विशेष वा पितरनिष्टचिन्तनस्य प्रायशः सम्भावनात् तथात्वम्। ३द्रुहितरि स्त्री ङीष् शब्दार्थकल्प०।

द्रुहण पु० द्रुं संसारगतिं हन्ति-हन ल्यु "पूर्वपदात् संज्ञायाम्" पा०णत्वम्। ब्रह्मणि। द्रुहणेन निर्दिष्टादि अरीषादि० वुञ्। द्रौहणक तद्विहितादौ त्रि०।

द्रुहिण पु० द्रुह्यति कामक्रोधादिभ्यो दुष्टेभ्यो वा द्रुह-बा० इनन् किच्च। चतुर्मुखे ब्रह्मणि अमरः "दुरालभा दानशीला द्राविणी द्रुहिणसुता" काशीख०२८अ० गङ्गासहस्रनाम। २विष्णौ च "महादेव! देवसुत! द्रुहिण! अनल! विश्वकर्मन् नमस्तायस्वेति" हरिवं० २५८अ०।

द्रुह्य त्रि० शिवादिगणे द्रुह्यतीति पाठात् द्रुह-न यत् किन्तु क्यप्। द्रोहविषये तस्यापत्यम् शिवा०अण् द्रौह्य तदपत्ये बह्वादि० यञो लुक्। द्रुह्या इत्येव।

द्रुह्यु पु० ययातेर्नृपस्य शर्मिष्ठायां जाते तृतीयभेदे तुर्वसुशब्दे दृश्यम्। तत्रैव ययातिशापकथा "ययातिरुवाच "द्रुह्यो! त्वं प्रतिपद्यस्व वर्षरूपविनाशिनीम्। जरां वर्षसहस्रं मे यौवनं स्वन्ददस्व च। पूर्णे वर्षसहस्रे तु पुनर्दास्यामि यौवनम्। स्वं चादास्यामि भूयोऽहं पाप्मानं जरया सह। द्रुह्युरुवाच। न गजं न रथं नाश्वं जीर्णो भुङ्क्ते न च स्त्रियम्। वाग्भङ्गश्चास्य भवति तां जरां नाभिकामये। ययातिरुवाच। यस्त्वं मे हृदयाज्जातो वयः स्वं न प्रयच्छसि। तस्माद्द्रुह्यो! प्रियः कामो न ते सम्पत्स्यते क्वचित्। यस्माच्चरथसख्यानामश्वानां स्याद्गतं न च। हस्तिनां पीठकानाञ्च गर्दभानान्तथैव च। वस्त्राणाञ्च गवाञ्चैव शिबिकायास्तथैव च। उडुपप्लवनारो यत्र नित्यं भविष्यति। अराजभाजशब्दन्तं तत्र प्राप्स्यसि सान्वयः" भा०आ०८४अ०।

द्रू गतौ वधे च स्वा०क्र्या० च उ०सक०सेट्। द्रूणोति द्रूणुते द्रूणाति द्रूणीते अद्रावीत् अद्रविष्ट। द्रुद्राव। द्रुद्रुवे। द्रविता द्रविष्यति।

द्रू पु० द्रू-क्विप्। क्षिरण्ये उज्ज्वट०।

द्रूघण पु० द्रुवक्ष+घृणो० दीर्घः। मुद्गरे द्विरूपकोषः।

द्रूण पु० द्रू-क्विंसायाम् बा० नक्। दस्यिके शब्दार्थकल्प०।

द्रेक सने उल्लाघे च भ्वा०आत्म०सक० सेट्। द्रेकते अद्रेकिष्ट। अदित् णिचि चङि अदिद्रेकत् त।

द्रेक्क पु० द्रेक्काण+घृणो०। द्रेक्काणे राशेस्तृतीयांशे।

द्रेक्काण पु० "स्वपञ्चनवमानां ये राशीनामधिपा यदाः। एते द्रेक्काणपाराशौ द्रेक्काणास्त्रय एव हि" ज्यो०त०उक्ते राशेस्तृतीयाभागे तदधिपाश्च यक्षादिशास्त्रेयाः। द्रेक्काणशब्दे दृश्यम्।

द्रेश्य त्रि० दृश-कर्मणि क्यप् वेदे घृणो०। दृश्ये "यत्तद्द्रेश्यमग्राह्यमगोत्रमवर्णमचक्षुःश्रोत्रम्" सर्वज्ञको०। "यद्द्रेश्यम् यद्दृश्यं सर्वेषां बुद्धीन्द्रियाणामगम्यमित्यर्थः तत् दृशेर्वक्ष्यमाणस्य यञ्चेन्द्रियवाचकत्वात्" भा०

द्रेष्काण पु० द्रेक्काण+घृणो०। द्रेक्काणे राशेस्तृतीये भागे।

द्रोघ त्रि० द्रुह-कर्मणि घञ् बा० वेदे कुत्वम्। द्रोहविषये "द्रोघमित्राय" ऋ०१०।८६।१२ "द्रोघमित्रान् द्रुग्धानि मित्राणि यैः ते द्रोघमित्राः" भा०। करणे घञ्। द्रोहसूचकवाक्यादौ "द्रोघाय चित्तद्रुह आवयाय" ऋ० ६।६२।६ "द्रोघावातिद्रोहाद्भावाय वचसे" भा० "द्रोघवाचस्ते निर्ऋतं वचनाम्" ऋ०७।१०४।१४

द्रोण पु० द्रोणः कलशः उत्पत्तिस्थानत्वेनास्यास्य अच्। भारद्वाजे कौरवाणां धनुर्वेदाचार्ये तदुत्पत्तिकथा

"गङ्गाद्वारं प्रति महान् बभूव भगवान् ऋषिः। भरद्वाज इति ख्यातः सततं संशितव्रतः। सोऽभिषेक्तुं ततो गङ्गां पूर्वमेवागमत्तदीम्। महर्षिभिर्भरद्वाजो हविर्द्धाने वरन् पुरा। ददर्शाप्सरसां साक्षात् घृताचीं प्राप्तयौवनाम्। रूपयौवनसम्पन्नां मदप्रां मदालसाम्। तस्याः पुनर्नदीतीरे वसनं पर्यवर्तत। व्यपकृष्टाम्बरां दृष्ट्वा तामृषिश्चकमे ततः। तत्र संसक्तमनसो भरद्वाजस्य धीमतः। ततोऽस्य रेतश्चस्कन्द तद्द्रोणे न्यदधे। ततः समभवद्द्रोणः कलशे तस्य धीमतः। अध्यगीष्ट स वेदांश्च वेदाङ्गानि च सर्वशः। अस्मिन्नेवं महाभागं

भारद्वाजः प्रतापवान् । अल्पादयदाग्नेयमस्त्रमस्त्र विदां वरः । अग्नेस्तु जातः स तनिस्तो भरतसत्तम !। भारद्वाजं तदाग्नेयं महास्त्रं प्रत्यपादयत्" भा० द्रो० १२०अ० । (डाँडकाक) २दण्डकाके पुं स्त्री० स्त्रियां ङीष् भेदि० २दण्डिके राजनि० । चतुःशतधनुः परिमिते ४जलाशये "शतेन धनुषां पुष्करिणी त्रिभिः दीर्घिका चतुर्भिर्द्रोणः" अमरः० । द्रु+क द्रु+न किप्वा । ५मेघनायकभेदे तदानयनादि ज्यो० त० यथा "त्रियुते शाकवर्षे तु चतुर्भिः शेषिते क्रमात् । आवर्तं विद्धि संवर्तं पुष्करं द्रोणमम्बुदम् । आवर्तो निर्जलो मेघः संवर्तस्त्वरघोदकः । पुष्करो दुष्करजलो द्रोणः सस्यप्रपूरकः" । "कोऽयमेवंविधे काले कालपाशस्थिते मयि । अनाहूतेऽहते यज्ञे द्रोणमेघ इवोत्थितः" स्फुट० "केयमभ्युद्यते यज्ञे सत्युपक्रान्तके मयि । अनाहूतेऽहते यज्ञे द्रोणवृष्टिरिवागता" स्फुट० (चलचचिया) ६पुष्पप्रधाने द्रव्ये । "ब्रह्मविष्णुशिवादीनां द्रोणपुष्पं सदा प्रियम्" दुर्गाशब्दप्रयोगः । ७आढके पु० न० टआढकचतुष्टये च (१२ सेर) "द्रोणस्तु खार्याः खलु षोडशांशः" लीला० उक्ते द्रोणस्य षोडशभागे । आढकशब्दे ६५६पृ० दृश्यम् । "धान्यद्रोणस्तु मासिकः" मनुः "दशद्रोणा भवेत् खारी कुम्भोऽपि द्रोण विंशतिः" १०उच्यमाने "अष्टमुष्टिर्भवेत् कुञ्चिः कुञ्चयोऽष्टौ तु पुष्कलम् । पुष्कलानि च चत्वारि आढकः परिकीर्तितः । चतुराढको भवेत् द्रोण इत्येतन्मानलक्षणम्" कल्पतरौ ह्रासप्रस्तुतिभिः कुडवस्त्रतुर्थांशोत्तरप्रस्थाढकद्रोण इत्युक्तं कुडवचतुर्थांशादष्टाचत्वारिंशत्प्रस्तुतिभिः प्रस्थस्त्रतुर्थांशादष्टिनवत्यधिकशतेन प्रस्तुतिभिराढकः । तस्त्रतुर्थांशादष्टशतसप्तत्यधिकसप्तशतप्रस्तुतिभिर्द्रोणः" प्रा० त० रघु० । गोपद्मबीजाक्षयस्त्र "द्वात्रिंशत् पलिकं प्रस्थस्त्रं स्यमवर्षया । आढकस्तु चतुःप्रस्थस्त्रतुर्भिर्द्रोण आढकैः" एषां [कार्यविशेषे परिभाषाभेदाव्यवस्थाया । मानार्थे अयमर्द्धर्चादिः । ११द्रु मे द्रव्यमाने । द्रोणस्य गोत्रापत्यम् वा फक् पक्षे दञ् । द्रौणायन द्रौणि तदपत्ये "अनादिरिह द्रोणः अश्वत्थान्ध्रनन्तरे ऽपचारात्" सि० कौ० एतच्च पाणिनेर्द्रौणात् प्राचीनत्वस्थापनायोक्तं वस्तुतः कुर्वादि दृष्यश्वकादीनां बह्वां पा० सूत्रे कीर्तनात् ततोऽर्वाचीनत्वं पाणिनेर्व्यक्तं प्रतिभाति सर्वानादित्व कल्पने मानाभावात् इत्यवधारितं सरलाख्यव्याख्यानेऽपक्रमेऽस्माभिः "द्रौणस्त्रविप्रुडिदं यदङ्गम" भाग० । कुशद्वीपस्थे १२वर्षपर्वतभेदे "चतुर्थः पर्वतो द्रोणो यत्रौषध्यो महागिरौ । विशल्यकरणी चैव सुवर्णीवनी तथा" मत्स्यपु० १२१अ० स्वार्थे क । द्रोणक तत्रार्थे ।

**द्रोणकलश** पु० द्रोण इव कलशः । द्रुमये यज्ञपात्रभेदे "आहवनीयं गच्छन्नादाय स्रावद्रोणकलशौ सपात्राणि" कात्या० श्रौ० ८।७।५। पञ्चपात्राण्यभिप्रवार्याणि ते च पूर्वमभिप्रवणे स्थापिता अपि वचनात्तत्र आनीयन्ते संस्कारार्थं द्रोणकलशः द्रुमयः कलशाकारोवैकङ्कतः यस्योपरिधारायष्टा स्थाप्यते" कर्कः । यज्ञपात्रभेदे "स्रुचश्च मे चमसाश्च मे वायव्यानि च मे द्रोणकलशश्च मे" यजु० १८।२१।

**द्रोणकाक** पुंस्त्री० कर्म० । (डाँडकाक) ख्याते दण्डकाके काकभेदे अमरः । [गवि अमरः ।

**द्रोणक्षीरा** स्त्री द्रोणमितं क्षीरमस्याः । द्रोणमितदुग्धवत्यां

**द्रोणगन्धिका** स्त्री द्रोणस्य तन्नामपुष्पस्य गन्ध इव गन्धो यस्याः कप् अत इत्वम् । राजायां जटा० [शब्दच० ।

**द्रोणघा** स्त्री द्रोणदुघा+पृषो० । द्रोणमितदुग्धवत्यां गवि

**द्रोणचित्** पु० यज्ञिये अग्निभेदे "एतया विद्वत्वान्यां चितिं चिन्वन्ति द्रोणचिदूवचक्रचित्कडुचित्प्रउगचिदुभयतः सस्रुस्रा पुरीषः" कात्या० श्रौ० १६।५।८। "एते अग्निविशेषाः" कर्कः "तं केचे एतया विद्वत्वाभिमन्यान्यां चितिं चिन्वन्ति द्रोणचितं वा रथचक्रचितं वा कडुचितं वा प्रउगचितं वा" शत० ब्रा० ६।७।२।८

**द्रोणदुग्धा** स्त्री द्रोणमितं दुग्धं यस्याः । द्रोणमितक्षीरायां द्रोणदुघायां गवि हेमच० [द्रोणमितदुग्धायां गवि अमरः ।

**द्रोणदुघा** स्त्री द्रोणमितं दोग्धि दुह-क षत्वान्तादेशः । द्रो-

**द्रोणपदी** स्त्री द्रोण इव पादोऽस्याः कुम्भपद्या० ङीषि पादोऽन्यतोमे पद्भावः । द्रोणतुल्यपादयुक्तायां स्त्रियाम् ।

**द्रोणपर्णी** स्त्री द्रोणस्य द्रव्यभेदस्य पर्णमिव पर्णमस्याः जातित्वात् ङीष् । भूमिकदल्याम् शब्दार्थ० ।

**द्रोणपुष्पी** स्त्री द्रोणस्य पुष्पमिव पुष्पमस्याः जातित्वात् ङीष् । (गुमफ) इति ख्याते क्षुपभेदे "द्रोणपुष्पी गुरुः स्वादु रूक्षोष्णा वातपित्तजित् । सा व्रणरुजया स्वादुपाका कटुश्च भेदिनी । कफवैकारिकश्वासशोथतमक नाशनस्तुजित्" भावप्र० । २द्रोणवृक्षे रत्नमाला । "द्रोणपुष्पीदलं स्वादु रूक्षं गुरु च पित्तजित् । भेदकं कफवाशोथमेहपूयहरं कटु" वैद्यकम् ।

द्रोणमाना स्त्री द्रोणो मानं दुग्धेऽस्याः। द्रोणदुग्धायां गवि गन्दच०। द्रोणो मानं यस्याः। द्रोणमिते द्रव्यादौ त्रि०

द्रोणमुखम् न० चतुःशतग्रामनीकरग्रामे कारा०।

द्रोणशर्म्मपद न० तीर्थभेदे "शरस्तम्बे कुशस्तम्बे द्रोणशर्म्मपदे तथा। ऋषां प्रपतनासेवी सेव्यते योऽप्सरो गणैः" भा०अनु० २५अ०।

द्रोणसाच त्रि० द्रोणं द्रोणकलशं सचते सच-क्विप्। द्रोणकलशसेवके। "एवा पतिं द्रोणसाचमचेतसम्" ऋ०१०। ४४।४ "द्रोणसाचं द्रोणकलशस्य सेवितारम्" भा०

द्रोणा स्त्री।द्रोणाम् २द्रोणपुष्पायां गन्धार्थ०।

द्रोणाचार्य्य पु० कर्म०। कौरवाणां शस्त्रशिक्षके भारद्वाजे

द्रोणाहाव पु० आहवन्त्यत्र पानार्थं बलीवर्द्दान् आहावो जलाधारः जलाशयभेदः द्रोणमयः द्रुमयः आहावः। द्रुमये जलाधारभेदे "द्रोणाहावमपतमन्यचक्रम्" ऋ०१०। १०१।७।

द्रोणि(णी) स्त्री द्रवति गच्छति जलम् द्रु-नि वा ङीप्। १काष्ठाम्बुवाहिन्याम् अमरः। (डोङ्गा) २जलाधारे कदलीत्वगादि निर्म्मिते यानभेदे "तैलपूर्णे कटाहे वा द्रोण्यां वा शाययेत् नृपम्" स्मृतेः "भरद्वाजस्य च स्कन्नं शुक्रं द्रोण्यामवर्द्धत" भा०शा०६२अ० ३काष्ठमये स्नानपात्रे ४पर्वतानामभ्यन्तरे देशभेदे च "शैलानामन्तरे द्रोण्यः सिद्धचारणसेविताः" गन्धर्वादि० धृतवाक्यम्। "पूर्णन्नां पयसा नद्यो द्रोण्यश्च विपुलायताः" हरिवं० ७४अ०। द्रोणस्य पत्नी ङीप्। ७द्रोणपत्न्यां स्त्री दहिस्वर्णपरिमाणे वैद्यकभाषा टकदत्यां मेदि०। १०नीलीवृक्षे शब्दरत्ना० ११शैलसन्धौ हेमच० १२इन्द्रचिर्भक्यां १३द्रोणीजलवृक्षे च राजनि०१४नदीभेदे उणादिको०१५द्रुते च

द्रोणीदल पु० द्रोणीव दलमस्य। जेतकीवृक्षे कारा०

द्रोणीलवण न० द्रोण्यां भवं लवणम्। उपकर्णोटदेशभवे लवणे राजनि०। "विशेषं द्रोणीलवणं पाके नात्युष्णतां गतम्। अविदाहि भेदकञ्च स्निग्धं स्मृतिविनाशनम्। अल्पपित्तकरं चैव भिषग्भिः सप्तदाहृतम्" राजनि०।

द्रोण्य त्रि० द्रोणं द्रुमयं यूपमर्हति यत्। द्रुमययूपार्हे पश्वादौ "दृषद्वद् द्रोण्यः पशुः" ऋ०५।३०।४। "द्रोण्यः यूपार्हः पशुः" भा०

द्रोण्यश्व त्रि० द्रोणिं द्रुतमश्नुते अश-व्याप्तौ वा० य। द्रुतव्यापके "द्रोण्यश्वास इरम्मे एतं वा" ऋ०१०८६।४ "द्रोण्यश्वासः द्रुतव्यापनाः" भा०।

द्रोमिल पु० चाषक्ये मुनौ हेमच० द्रामिल इति वा तत्र पाठः। अन्यतरस्य ग्रामादिकत्वं सदादोषात्।

द्रोह पु०द्रुह-भावे घञ्। १अनिष्टचिन्तने २क्रूरबधे ३हिंसा मात्रे च। "पैशून्यं साहसं द्रोह ईर्ष्यासूयार्थदूषणम्। वाग्दण्डजञ्च पारुष्यं क्रोधजोऽपि गणोऽष्टकः" मनुः द्रोहश्चक्रूरबधः" कुल्लू०। "द्रोहो जिघांसा" भ०त० रघु० "विनापि शीर्षकात् कुर्य्यात् नृपद्रोहे तु पातके" मनुः अत्र द्रुन्तुभिच्छा अनिष्टचिन्तनं वा द्रोहपदार्थः। "द्रोहोद्रेकतरङ्गभैरुरमदा मन्दाकिनी मन्दताम्" काव्यप्र० द्रोहः जातोऽस्य तारका० इतच्। द्रोहित जातद्रोहे त्रि०। [अमरः।

द्रोहचिन्तन न० द्रोहार्थं चिन्तनम्। परानिष्टचिन्तने

दोहाट त्रि०द्रोहेणाटति अट-अच्। १वैड़ालव्रतिके क्रूरना परहिंसार्थं व्रतधारिणि २क्रूरगरुत्मके ३वेदशाखाग्रभेदे पु० मेदि०।

द्रोण त्रि० द्रोणं सम्भवति अवकिरति पचति वा अण् पचे ठञ्। द्रोणमितधान्यादेः स्वामिनि १समावेशके २तदपहारके ३तत्पाचके च स्त्रियां ङीप्। पचे ठनि द्रौणिक तत्रार्थे स्त्रियां टाप्। तत्रार्थे द्रौणिक इति शब्दकल्पन प्रागादिकमेव ठनि ढञ्रेरप्रसङ्गः।

द्रौणीज न० द्रोण्यां जायते जन-ड। १द्रोणीजाते लवणे राजनि०। २द्रोण्यां जाते द्रोणाचार्य्ये द्रोणस्य पत्नी ङीप् द्रोणी तस्यां जाते ३अश्वत्थाग्नि च।

द्रौणायन पु० अश्वत्थाग्नि द्रोणशब्दे उदाहरणम् द्रौणिरण्यत्र।

द्रौणायनि पु०द्रोणस्यापत्यं बा०फिञ्। अश्वत्थाग्नि "सकर्ण दुर्य्योधनशाल्वशल्यद्रौणायनिकृपहृदीषकाः" भा०आ० १८७अ०। "द्रौणायने! अलमत्यर्थमात्मानं शोकानले प्रक्षेप्तुम्" वेणीसं०

द्रौणिक त्रि० द्रोणस्य वापः क्षेत्रम् ठञ्। द्रोणमितबीजवपनयोग्ये १क्षेत्रादौ अमरः। तेन क्रीतमित्यादार्थे समासे ठञ्। २द्रोणक्रीतादौ, समासे तु निष्का० ठञ्। खरे भेदः।

द्रौपद पुंस्त्री० द्रुपदस्यापत्यं शिवा० अण्। १द्रुपदराजपुत्रे तत्कन्यायां २कृष्णायां स्त्री। द्रुपदात्मजशब्दे उदाहरणम् "द्रौपद्या च महातेजाःकथैवच शुभद्रया" हरिवं०१२५अ० "द्रौपदी त्वयसंजज्ञे शचीभागादनिन्दिता। नातिह्रस्वा न महती नीलोत्पलसुगन्धिनी। पद्मायताक्षी सुश्रोणी कुञ्चितार्द्धितमूर्द्धजा। सर्वलक्षणसम्पूर्णा वैदूर्य

नक्षिसम्भवा । पञ्चानां पुरुषेन्द्राणां चित्तप्रसविनी रहः" भा०आ० ६७अ० तस्याः पञ्चपतिकत्वकारणं भा०आ० १६८।६६ अ० उक्ता दिङ्मात्रमत्रोच्यते तत्र द्रौपद्याः पूर्वजन्मवृत्तान्तकथनेन पञ्चपतिकत्वनिरूपणाय "व्यास उवाच आसीत्पुरोवने काचिदृषेः कन्या महात्मनः । नाध्यगच्छत् पतिं सा तु कन्या रूपवती सती । तोषयामास तपसा सा किलोग्रेण शङ्करम् । तामुवाचेश्वरः प्रीतो ब्रूहि काममिति स्वयम् । सैवमुक्ताऽब्रवीत् कन्या देवं वरदमीश्वरम् । पतिं सर्वगुणोपेतमिच्छामीति पुनः पुनः । ददौ तस्यै स देवेशस्तं वरं प्रीतमानसः पञ्च ते पतयो भद्रे ! भविष्यन्तीति शङ्करः । सा प्रसादयती देवमिदं भूयोऽभ्यभाषत । एकं पतिं गुणोपेतं त्वत्तोऽहमीप्सेय शङ्कर !। तां देवदेवः प्रीतात्मा पुनः प्राह शुभं वचः । पञ्चकृत्वस्त्वयोक्तोऽहं पतिं देहीति वै पुनः । तत्तथा भविता भद्रे ! वचस्तद्गुप्तमस्तु ते । देहमन्यं गतायास्ते सर्वमेतद्भविष्यति । द्रौपदीयं हि सा जज्ञे सुता वै देवरूपिणी । पञ्चानां विदिता पत्नी कृष्णा याज्ञसेन्यनिन्दिता । स्वर्गस्त्रीः पाण्डवार्थन्तु समुत्पन्ना महामखे । सेह तप्त्वा तपो घोरं दुश्चिन्त्यं तपागता । सैषा देवी रुचिरा देवजुष्टा पञ्चानामेका स्वजनेनेह कर्मणा । सृष्टा स्वयं देवपत्नी स्वयम्भुवा राजन् ! द्रुपदेष्टं कुरुष्व" । ब्रह्मवैवर्ते तु जन्मखण्डे ११५अ० अन्यथा वर्णितं यथा "वह्निरुवाच हरे राम ! महाभाग ! सीताशोधनं कुरु । सप्ताहाभ्यन्तरे चैव रावणो दुष्टराक्षसः । दुर्निवार्यः प्राक्तनेन जानकीञ्च हरिष्यति । राम उवाच । सीतां सृष्ट्वा त्वं गच्छ छायायामेव तु तिष्ठ । कलङ्कवर्जनं कर्म सर्वेषाञ्च जुगुप्सितम् । सीतां सृष्ट्वा प्रययौ रुदन्तीञ्च रुताशनः । सीतायाः सदृशी छाया तस्थौ श्रीरामसन्निधौ । सा च छाया हृता पूर्वं रावणेन बलीयसा । ससृहधार तां रामो निहत्य तं सबान्धवम् । वह्नौ परीक्षाकाले च छाया वह्नौ विवेश ह । अग्निश्छायाञ्च संरक्ष्य ददौ रामाय जानकीम् । सा च छाया तपश्चक्रे नारायणसरोवरे । तपश्चकार दिव्यञ्च शतवर्षञ्च मूलिनः । वरं ब्रूहि भद्रे ! त्यब्रवीच्च शङ्करश्च ताम् । उवाच तां शिवं व्यक्तं भर्तुर्दुःखेन दुःखिता । पतिन्देहि पतिं सा वरं वव्रे त्रिलोचनम् । सर्वसम्पत्प्रदस्तुष्टस्तस्यै वरं ददौ । महादेव उवाच । साध्वि ! त्वं पञ्चधा ब्रूहि पतिन्देहीति व्याकुला । पञ्चेन्द्राश्च हरेरंशा भविष्यन्ति शिवाज्ञया । ते च सर्वे च पञ्चेन्द्राश्चाधुना पञ्च पाण्डवाः । सा च छाया द्रौपदी च यज्ञकुण्डसमुद्भवा । त्रेते युगे वेदवती त्रेतायां जनकात्मजा । द्वापरे द्रौपदी छाया तेन कृष्णा त्रिकायणी । वैष्णवी कृष्णभक्ता च तेन कृष्णा प्रकीर्तिता । स्वर्गलक्ष्मीर्भवेन्द्राणां सा च पञ्चाङ्गविग्रहा । राजा ददौ फाल्गुनाय कन्यावाच स्वयंवरे । यमश्च मातरं वीरो वस्तु प्राप्तं मयाधुना । तस्यवाच स्वयं माता सृष्टाश्च भ्रातृभिः सह । शम्भोर्वरेण पूर्वञ्च परत्र मातराज्ञया । द्रौपद्याः स्वामिनस्तेन हेतुना पञ्चपाण्डवाः । चतुर्थ्यानामिन्द्राणां पञ्चेन्द्राः पञ्चपाण्डवाः" "अहल्या द्रौपदी कुन्ती तारा मन्दोदरी तथा । पञ्च कन्याः स्मरेन्नित्यं महापातकनाशनम्" प्रातःस्मरणीयकीर्त्तने । [इन निर्द्देशादौ ।

**द्रौपदायनि** स्त्री० द्रुपदेन निर्द्दत्तादि कर्त्ता० फिञ् । द्रुपदापत्ये ।

**द्रौपदेय** पु० द्रौपद्या अपत्यम् ढक् । युधिष्ठिरादीनां द्रौपद्यास्तत्पुत्रे प्रतिविन्ध्यादौ ते च विश्वदेवगणांशेनोत्पन्नाः यथाह भा० आ०६७अ० । "द्रौपदेयाश्च ये पञ्च बभुवुर्भरतर्षभ ! । विद्धि तान् देवगणान् विद्धि सङ्घातान् भरतर्षभ ! । प्रतिविन्ध्यः सुतसोमः श्रुतकर्मा तथा परः । नाकुलिस्तु शतानीकः श्रुतसेनश्च वीर्यवान् । पाञ्चाल्यपि तु पञ्चभ्यः पतिभ्यः शुभलक्षणा । लेभे पञ्च सुतान् वीरान् श्रेष्ठान् पञ्चाचलानिव । युधिष्ठिरात् प्रतिविन्ध्यं सुतसोमं वृकोदरात् । अर्जुनाच्छ्रुतकर्माणं शतानीकञ्च नाकुलिम् । सहदेवाच्छ्रुतसेनमेतान् पञ्च महारथान् । पाञ्चाली सुषुवे वीरानादित्यानदितिर्यथा । पाञ्चालः प्रतिविन्ध्यन्तमुवाचाथ युधिष्ठिरम् । मत्प्रसूतस्य राज्ञे प्रतिविन्ध्यो भवत्वयम् । सुते सोमसुते तु सोमार्कसमतेजसम् । सुतसोमं महेष्वासं सुषुवे भीमसेनतः । श्रुतं कर्म महत् कृत्वा निहत्तेन किरीटिना । जातः श्रुतस्तस्यैवं श्रुतकर्मा ततोऽभवत् । शतानीकञ्च राजर्षेः कौरवस्य महात्मनः । चक्रे पुत्रं सनामानं नकुलः कीर्तिवर्द्धनम् । तनयञ्जीवनत् कृष्णा नकुले वह्निदैवते । सहदेवात् सुतं तस्मात् श्रुतसेनेति यं विदुः । एकवर्षान्नरास्ते ते द्रौपदेया यशस्विनः" भा० आ० २२२अ० ।

**द्रौहिक** त्रि० द्रोहं नित्यमर्हति वेदा०ठञ् । नित्यं द्रोहार्हे ।

**द्रौह्य** त्रि० द्रुघ्नस्यापत्यं शिवा०यञ् । द्रुघ्नस्यापत्ये

द्वन्द्व न० द्वन्द्व+पृषो० बलोपः । द्वन्द्वशब्दार्थे त्रिकाण्डशेषः ।

द्वन्द्व न० द्वौ द्वौ समाभिव्यक्तौ "द्वन्द्वं रहस्यमर्यादावचनव्युत्क्रमणयज्ञपात्रप्रयोगाभिव्यक्तिषु" पा० द्विगुशब्दस्य द्विवचनं पूर्वपदस्यामावोऽत्त्वमुत्तरपदस्य नपुंसकत्वञ्च निपात्यते एकवद्भावेषु" सि०कौ० उक्ते रहस्यादौ "तत्र रहस्यं द्वन्द्वशब्दस्य वाच्यम् इतरे विषयभूताः । द्वन्द्वमन्त्रवते रहस्यमित्यर्थः । मर्य्यादा स्त्रियमतिक्रमः । चाचतरं स्त्रीमे पशवो द्वन्द्वं मिथुनावन्ते माता पुत्रेण मिथुनं मन्यते पौत्रेण प्रपौत्रेणापीति मर्य्यादार्थः । व्युत्क्रमणं पृथगवस्थानम् । द्वन्द्वं व्युत्क्रान्ताः द्विवर्गसम्बन्धेन पृथगवस्थिताः । द्वन्द्वं यज्ञपात्राणि प्रयुनक्ति द्वन्द्वं संकर्षणवासुदेवौ । अभिव्यक्तौ साकाङ्क्षत्वेनेत्यर्थः । योगविभागादन्यत्रापि द्वन्द्व दृश्यते" सि०कौ०"अत्र अन्यत्रापि तेन द्वन्द्वयुद्धान्यवर्त्तन्तेत्यादि सिद्धं द्वयोर्द्वयोर्युद्धान्यवर्त्तन्तेत्यर्थः वीप्सायां द्विर्वचनेऽप्यनेन तस्य रूपनिष्पत्तिः । द्वन्द्वसमाहारादौ तु द्वन्द्वशब्दप्रयोगः रूढ्या उत्या अवयवार्थराहित्येनाव्युत्पन्नत्वादिति बोध्यम्" शब्देन्दु० । तत्र रहस्यं द्वाभ्यामेव ज्ञेयम् । २कलहे १मिथुने स्त्रीपुंसयोर्द्वये ३युगले च मेदि०१रोगभेदे ६समाहारभेदे च पु० सच द्विधा समाहारेतरेतरयोगभेदात् तत्र सङ्ख्यातिप्राधान्ये समाहारद्वन्द्वः संख्यमानप्राधान्ये इतरेतरयोगः इति वैयाकरणाः इतरेतरयोगशब्दे ८२२ पृ० दृश्यम् शब्दश०म० अन्यथा निरूपायि यथा

"यद्यदर्थकयद्वाभव्यूहो यद्यत्प्रकारके । बोधे समर्थः स द्वन्द्वः समासस्तावदर्थकः ।" "यद्यद्बोधस्यापकस्य क्रमिकयाद्यनामस्तोमस्य निश्चयस्तत्तदर्थप्रकारकान्वयबोधं प्रति तत्त्वेन समर्थस्ताद्यनामनिष्ठ एव तावदर्थको द्वन्द्वसमासः । पाणिपादं वादय धवखदिरौ छिन्धीत्यादौ हि कर्मत्वादौ करचरणादिप्रकारकान्वयबोधं प्रत्यमादिधर्मिकः करचरणाद्युपस्थापकस्य पाणिपादादिक्रमिकनामस्तोमस्याव्यवहितोत्तरत्वसम्बन्धेन निश्चयः कारणम् अतः पाणिपादादिसमुदायः करचरणादितत्तदर्थे द्वन्द्वः। यत्तु पाणिपादमित्यादौ समाहारद्वन्द्वे सर्वत्रोत्तरपदे पाणिपादादिराहित्ये लक्षणा अतएव नित्यं नत्रैकवचनं समाहारस्यैकत्वात् पदान्तरन्तु ताद्यसङ्ख्यायाविशिष्टत्वसम्बादकं तथाविधसाहित्यस्य च स्वाश्रयनिष्ठत्वादिसम्बन्धेनैव द्वितीयाद्यर्थकर्मत्वादौ साकाङ्क्षत्वात् पाणिपादं वादयेत्यादेरौचित्यमिति प्राच्यैरुक्तं तन्न युक्तं तत्तत्पदैकक्रियान्वयित्वं बुद्धिविशेषविशेष्यत्वं वा पाणिपादयोः साहित्यं तस्य च नानात्वसम्बन्धेन तद्बहित्वादिबोधार्थं समाहारद्वन्द्वादपि द्विवचनाद्यापत्तेर्दुर्वारत्वात् । साहित्यस्य द्वित्वेऽपि न समाहारद्वन्द्वस्य द्विवचनादिसाकाङ्क्षत्वं तादृशद्विगोरिवेति चेत् तर्हि पाणिपादप्रभृतीनां नानात्वेऽपि न तदर्थकस्य द्वन्द्वस्य द्विवचनाद्याकाङ्क्षत्वमित्येव वक्तुमुचितं लक्षणा साहित्यभङ्ग्या रूक्षं धनमित्यादेरयोग्यतायां दुर्वारतापाताच्च नामार्थयोर्भेदान्वयस्याव्युत्पन्नत्वेन रूक्षिनामज्ञानात् साहित्यस्य स्वाश्रयत्वादिसम्बन्धेन धनादावन्वयायोगात् तादृशसाहित्ये धनादेरभेदविरहाच्च । समाहारपरिभाषा तु स्त्रीत्वविशिष्टत्वनित्यैकवचनत्वादिपदसंस्कारोपयोगितयैवोपपन्ना न द्वन्द्वस्यार्थव्यवस्थापिका । एतेन धवखदिरावित्यादावितरेतरद्वन्द्वेऽप्युत्तरपदे धवखदिरसाहित्यान्वये लक्षणा अन्यथा द्विवचनादेः प्रकृत्यर्थतावच्छेदकत्वेन पर्य्याप्तिसम्बन्धेन स्वार्थद्वित्वाद्यनुभावकत्वव्युत्पत्तेर्धवखदिरावित्यतो धवद्वयस्य खदिरद्वयस्य च प्रतीत्यापत्तेरिति मीमांसकानामप्यतमप्यपास्तं तत्तत्पदैकक्रियान्वयित्वं धवखदिरविशेष्यकधीविशेष्यत्वं वा धवखदिरयोः साहित्यं तदाश्रयत्वं धवद्वयादिरपीति तादृशसाहित्याश्रयत्वलक्षणापक्षेऽपि धवखदिरावित्यतो धवद्वयादिबोधस्य दुर्वारतापत्तेः । न च त्रितयाविशेष्यकधवखदिरधर्मिकधीविशेष्यत्वमेव प्रकृते धवखदिरयोः साहित्यं तच्च न धवद्वयादेरिति वाच्यं तादृशसाहित्यान्वयस्यानुभवेनासम्भवात् तस्माद्यत्र नानाधर्मीणां प्रकृत्यर्थतावच्छेदकत्वं तत्र तत्तद्धर्मावच्छिन्ने सत्त्वादि एव पर्य्याप्तिसम्बन्धेन द्वित्वादिबोधने द्विवचनादिकं साकाङ्क्षं न तु तादृशैकधर्मावच्छिन्नं परित्यज्य तथाविधापरधर्मावच्छिन्ने, यतो धवखदिरावित्यादितो धवयोः खदिरयोश्च नावबोधप्रसङ्ग इति तत्त्वम् । घटघटेत्यादिकस्य घटकलशेत्यादिकस्य घटपटेत्यादिकस्य च क्रमिकनामस्तोमस्य निश्चयत्वेन घटादेरन्वयबोधं प्रत्येकत्वमतो न ताद्रूप्यनिष्ठो घटाद्यर्थे द्वन्द्वः । अतएव समस्यमानपदार्थयोस्तत्तावच्छेदकयोर्यत्र मिथोभेदस्तत्रैव द्वन्द्वस्य साधुत्वसूचनाय "चार्थे द्वन्द्वः" इति पाणिनिः प्राह । अतएव भेदगर्भसङ्ख्यार्थकं यच्छब्दमन्तर्भाव्य धवश्च खदिरश्चेत्यादिकं विग्रहमस्य प्रयुञ्जते विद्वांसः, सङ्गच्छतेऽपि तत्र मिथोभेदप्राप्त्यर्थत्वेनकारहत्यं, पीतत्वटोस्वादात्म्यमित्यादौ तत्पटादेः पीतादाभिन्नत्वेऽपि पीतत्व-

तत्पटत्वाद्योः पदार्थतावच्छेदकयोरप्येव भेदः सुवर्णस्तु हित्वं न तत्र प्रकारत्वेऽन्वेति पर्य्याप्तिसम्बन्धेन पीततत्पटे तस्य बाधात् सुवर्णहित्वादेस्तादृशसम्बन्धेनैव प्रकारत्वसाकाङ्क्षत्वात् परन्तु प्रकारत्वतावच्छेदकयोः पीतत्वतत्पटत्वयोरेव व्युत्पत्तिवैचित्र्यात्। अतएव द्व्यणुकारम्भकसंयोगनाशेभ्यः कार्यद्रव्यं नश्यतीति भाष्यस्य योग्यतासम्पत्तये सुवर्णैकत्वस्य कार्यद्रव्यत्वेऽन्वयमभिधित्सुनाचार्येण जात्यभिप्रायकमेकवचनमिति सुधाकरिप्रावल्यमभिहितम्। अतएव च "श्वश्रूः श्वशुरस्तयोः पत्न्याः स्वामिनो देवृदेवरौ" इत्यत्र च द्विवचनमङ्गीकृत्य स्वामिनो भ्राता देवृ देवरोभवपदाच्च इत्यर्थः सुभूत्यादिसिद्धः सङ्गच्छते। यदि च पटद्वयसत्त्वेऽपि भूतले पीतपटाविति आदिकः प्रयोगः स्यात् पीतत्वपटत्वोभयाश्रयस्य तस्य सत्त्वादेवं पीतपटयोरभेद इत्यादितः शुक्लपटत्वादेरबोधप्रसङ्गश्च तदंशे सुवर्णहित्वस्य प्रकारत्वादिति आदिरुच्यमीक्ष्यते तदा गोदौ याम इत्यादाविव साधुत्वार्थमेव तत्र द्विवचनमिति वदन्ति। विद्युतेविन्दतिविनत्तीनामनिट् इत्यत्र विद्युत इत्यादिशब्दो न विदधातुत्वेनोपस्थापकः किन्तु सत्ताद्यर्थकतादृशधातुत्वेनैव। अगपाखरयोः पदार्थयोर्भेदेऽपि फरिखफरिखाविति प्रयोगात्। समानशब्दयोर्हि नृहप्रसङ्गावेकशेषोत्पत्तिसिद्धत्वेन फरिखावित्यत्र लुप्तताभ्यामेव फरिखपदाभ्यामुपस्थितयोर्ह्यगपाखरयोर्बोधः फरी नमस्खावित्यत्राप्युक्तरीत्यैव फरिपदाभ्यां विष्णुचन्द्रयोरवगतिः। अन्यथा फरिफरी नमस्खावित्यपि प्रयोगापत्तेः फरी च फरयश्चेति विग्रहस्थले यत्र फरय इत्यादितः समस्तमानपदार्थानामवान्तरसंख्यावगमस्तत्र तत्तत्संख्यावच्छिन्नस्वार्थलक्षकस्य लुप्तस्य फर्य्यादिपदस्योत्तरत्वेन प्रतिसंहितमेव फर्य्यादिपदं तथाविधस्वार्थस्य लक्षणया बोधकं तदप्रतिसन्धाने तु श्रुतमेव फरिपदं विष्णुद्वयोः शिंशपायस्य चैकया लक्षणया शक्तिभ्रान्त्यैव वा। नच विग्रहस्थसुवर्णस्य हित्वादेः समभिव्याहृतपदार्थान्वयानियमात्तथाविधहित्वत्वित्वान्तभावेन इनृहप्रसङ्गासाधुत्वादुक्तप्रकारेणैकशेषो न युक्तः, यलाकापरि इक्षमभिलादौ अभिचारेणोक्तनियमस्यासत्त्वात् एकत्वे चैकत्वानि चेति विग्रहे च एकत्वादीत्येकशेषस्य सुधाकरिप्रावल्यमाचार्यैरभिहितत्वाच्च। हंसश्च हंसी च इत्यर्थे हंसहंस्यादिवाक्यप्रयोगात् तत्रापि "पुंसा स्त्रियाः सादृश्ये" इत्युक्तविशेषेणैकशेषस्य लोपे हंसादिवत् लुप्तमेव हंसीपदमनुसन्धाय स्त्रीपुंसयोर्बोधः तल्लोपमज्ञानतस्तु हंसपदे स्त्रीहंसत्वपुरुषहंसत्वाभ्यां विभिन्नरूपाभ्यामेकस्याः शक्तेर्लक्षणया वा पर्य्यवसानात्। वस्तु तत्र हंसपदमेव लक्षणया हंसीत्वेन शक्त्या च हंसत्वेन बोधकं सुवर्णस्तु पुंस्त्वं हंस एवान्वेति न तु हंसाभयोर्व्यत्वात् इति मतं तत्र तथासति स्त्रीहंसत्वहंसत्वयोः पदार्थतावच्छेदकयोर्भिन्नोभेदविरहेण हनृहाप्रसङ्गावेकशेषस्य हंसश्च हंसी च इत्यस्य दुष्करत्वापत्तेः। अन्यथा घटतदृटाविवापि हनृहप्रसङ्गात् हंसौ च हंसाश्चेति विग्रहेऽपि हंसा इत्यतो हंसहंसत्वयोः प्रागुक्तरीत्यागमः। दुन्दुभी च दुन्दुभिश्चेति विग्रहे दुन्दुभी इन्द्रावित्यत्राभेदबोधनस्थले पुंलिङ्गस्यैव दुन्दुभिशब्दस्य शिष्टतया तद्विशेषत्वादेव इन्द्रादेः पुंस्त्वम्। युवा च युवतिश्च इत्यर्थे युवानावित्यत्राप्युक्तरीत्यैव युवतीयौवनवतोर्बोधः वरटाहंसौ लक्षणासारस्याविवादादौ तु स्त्रीपुंसयोर्हनृहेऽपि पदसादृश्यविरहान्नैकशेषः दम्पत्यैनमकरिष्ये ब्राह्मणावानयेदित्यत्रापि ब्राह्मणश्च ब्राह्मणी च इति विग्रहे प्रागुक्तदिशा ब्राह्मणभार्यापत्योरवगमः। एकश्चैका चेत्यत्र एको, द्वौ च द्वे चेत्यत्र द्वौ, उभे चोभौ चेत्यत्र उभौ त्रयश्च तिस्रश्च इत्यत्र च विग्रहे त्रय इत्यादिरेकशेष इष्यत एव। यास्यानेकशफेवतरुषेषु स्त्रीपुंसयोर्बहुत्वमनभीप्स्य सादृश्येण हनृहस्थले तु पुंस एव लुक् तेन मेषश्च मेषाश्चेत्यर्थे मेषा इत्यत्रापि लुप्तं बहुमेषार्थकं लक्षणं मेषपदं प्रतिसन्धत एव बहुमेषाभानेकमेषीणाञ्चावगमः। एवं मक्षिकाश्च मक्षिकाश्चेत्यर्थे मक्षिका इत्यत्रापि मक्षिकपदं बहूनां मक्षिकाणां, मृगाश्च मृग्यश्चेत्यर्थे मृगा इत्यत्र तु मृगादेरयाम्यत्वात्र पुंसो लुक् परन्तु स्त्रियाः। तथा गर्दभाश्च गर्दभ्यश्चेत्यर्थे गर्दभा इत्यत्रापि खराणामेकशफत्वात् वर्करायश्च वर्कर्यश्च इत्यर्थे वर्करा इत्यत्रापि तदर्थकत्वात्। स्वसा च भ्राता चेत्यर्थे भ्रातराविति पुत्रश्च दुहिता चेत्यर्थे पुत्राविति च विरुद्धैकशेषेऽपि स्वसृपदं दुहितृपदञ्च लुप्तं प्रतिसन्धायैव भ्रातृभगिन्योः पुत्रकन्ययोरवगमः। "ज्येष्ठपुत्रदुहितृश्च ज्यैष्ठे भागिनं कारयेत्" इत्यादिकन्तु प्रयोगः परिचिन्तनीयः। स च मैत्रश्चेति विग्रहे त्वदादिना तदन्यस्य इनृहे लुकि तावित्यत्रापि लुप्तं मैत्रादिपदमनुसन्धत एव मैत्रावित्यवगमः स च त्वच्चेत्यादि विग्रहेऽपि किंपदान्यत्वदादिद्वयगर्भहनृहे तु पूर्वस्यैव वा लुक् अन्यस्यैव वा त्वदादेर्लुकि

युवामित्यत्र त्यादावप्युक्तक्रमेणैव तदर्थयुष्मदर्थयोर्बोधः स च स चेत्यत्रापि विभिन्नार्थयोर्विग्रहे स्वपूर्वांगखितोऽपि तदादिः स्रोत्तरापठित एव "तत्तन्नामसमूहबोधनो यद्यद्विद्यातिनिर्ग्रहेत्यादौ तु न यदादिगणेन इन्द्रः परन्तु तदाद्यन्तेन यथा "तत्तन्नामसमूहभीनव" इत्यादौ यत्तदादिव्यतिरिक्तानामेवाव्ययानां सरूपैकशेषस्य व्युत्पन्नत्वात् प्रयोगानुरोधित्वात् कल्पनायाः। कच त्यच्छेत्यादिविग्रहेषु किंवा तादग्रहनृहे तु तदन्यस्यैव त्यदादेर्नुकि कावित्यादिक एव प्रयोगः चैत्रस्य पितरावित्यत्रापि विरूपैकशेषे लुप्तस्य मातृपदस्य स्मरणान्मातृरवगमः तदस्मरतस्तु पितृपदे जनकशरीरत्वेन सादृश्यया मातापित्रोरवगतिरिति प्राहुः। कौमारास्तु माता पितर्हनृहे माता पितृभ्यां मातारपितराभ्यामिति प्रयोगहयीदर्शनाच्चैत्रस्य पितरावित्यत्र नैकशेषः परन्तु पुष्यवन्नादिपदवन्मातरपितृत्वाभ्यां विभिन्नरूपाभ्यामेकशक्तिमदेव नियतद्विवचनाकाङ्क्षं पितृपदं प्रकृत्यन्तरम्। एवं श्वश्रूश्च श्वशुरश्चेत्यर्थे श्वशुरावित्यत्र श्वशुरपदमपि श्वश्रू श्वशुरस्य इन्द्रे श्वश्रूश्वशुरावित्येव प्रयोगादित्याहुः"। इन्द्रं विभजते। "द्वौ भेदावस्य शास्त्रौक्तौ समाहारेतरेतरौ। एकान्यवचनाकाङ्क्षाक्षीनोपादानतश्च तौ"। "अस्य इन्द्रस्य द्वौ भेदौ समाहार इतरेतरश्च शास्त्रसिद्धौ तत्रैकवचनान्यसुबाकाङ्क्षाविक्षीनः समाहारः तथाविधबहुवाकाङ्क्षत्वेतरेतरः पाणिपादं हस्त्यश्वमित्यादितो हि करचरणादीनां बहूनामप्यगतावेकवचनमेव प्रमाणं ध्वखदिरादित्यादौ द्विवचनादेः पदिरुन्दिखिदेर्दीत्यादौ तु पदिरुन्दिभ्यां सहितः खिदिरिति विग्रहे मध्यपदलोपी कर्मधारयो यथा श्येनाग्नीत्याग्नेरिति भविष्यन्नादौ"।

केचित् पदभेदे इन्द्रमिच्छन्तः "अथैकदन्तेरस्य लम्बोदरगलाननाः" इत्यादाजहुः तत्र समीचीनम् चोऽवधारणे इत्यादिवत् एकदन्तादिगणानामेवात्र पदार्थत्वात् तथाभूतगणानाञ्च विभिन्नानुपूर्वीकत्वेन भिन्नत्वात् एते गणा गणेशे इत्तिमन्त इत्येवं कोषादावन्वयबोधात्। षटकलसयोरभेद इत्यादौ तु षटपदकलसपदप्रतिपाद्यत्वरूपपदार्थतावच्छेदकभेदात् न हन्नानुपपत्तिरिति दिक् "देवताहनृटे" "चार्थे हन्द्वः" पा०"हन्द्वः समाहिकस्य च" गीता। तत्र युगले "हन्त ते मन्दचेता यदि जपति जनोवारमेकं कदाचित्"कर्पूरस्तवः। "विरूढविधुरकोकहन्यायेन विभिन्नम्" उद्भटः। मिथुनम् स्त्रीपुंसयोर्द्वित्वम् तत्र "इन्द्वानि भावं क्रियया विमृज्य"कुमा०"मृगहन्द्वेषु पश्यन्तौ स्यन्दनावरूढदृष्टिषु" रघुः। "क्षुत्पिपासे शोकमोहौ रागद्वेषौ तथैव च। लाभालाभौ च शीतोष्णे तथा मानापमानकौ। कामक्रोधप्रभृतयोः इन्द्वशब्देन वर्णिता" इत्युक्ते परस्परविरुद्धस्वभावे शीतोष्णादौ "न इन्द्वःखमिह किञ्चिदकिञ्चनोऽपि" माघः "तितिक्षा शीतोष्णादिहन्द्वसहिष्णुता"वेदान्तसा०"इन्द्वातीतो विमत्सरः" गीता। आसनजये च इन्द्वदुःखैरनभिभवः योगसू०चक्रः "ततो इन्द्वानभिघातः" "शीतोष्णादिभिर्इन्द्वैरासनजयान्नाभिभूयते" भा०।

७दुर्गे युक्तिकल्प० तद्विशेषादिकं तत्रोक्तं यथा "राज्ञोबलं न हि बलं इन्द्वहमेव बलं बलम्। अबलबलवान् राजा स्थिरो इन्द्वबलाद्भवेत्" तथा च "एकः शतं योधयति प्राकारस्थो धनुर्धरः। शतं दशसहस्राणि तस्माद्दुर्गं विशिष्यते। अकृत्रिमं कृत्रिमञ्च तत् पुनर्द्विविधं भवेत्। यद्वैवस्वचितं इन्द्वं गिरिनद्यादि संचितम्। अकृत्रिममिदं ज्ञेयं दुर्लङ्घ्यमरिभूभुजाम्। प्राकारपरिखारण्यसंचयं यद्भवेदिह। कृत्रिमं नामविज्ञेयं लङ्घ्यालङ्घ्यन्तु वैरिणाम्" तत्राकृत्रिमइन्द्वसङ्कं तत्रैव यथा "अत्युच्चविस्तीर्णशिरा दुरारोहः सकाननः। सजलाशयसम्भारभोज्यद्रव्यसमाश्रयः। सुखनिःसरणो इन्द्वः पर्वताख्यो महीभुजाम्। नद्योगभीरविस्तीर्णखतदिक्षु व्यवस्थिताः। तन्मध्ये भूप्रदेशो यो नदीइन्द्वः स उच्यते। यदन्यच्चिरकालीनं दुर्लङ्घ्यं विपिनादिकम्। तन्मध्यरचिता भूमिर्इन्द्वत्वेनोपतिष्ठते। वनइन्द्वमिति ख्यातं यथापूर्वं महत्तरम्" कृत्रिमइन्द्वसङ्कं तत्रैव यथा "यस्मिन् राज्ये गिरिर्नास्ति नद्यो वा महदोदकाः। तस्य मध्ये महीपालः कृत्रिमं इन्द्वमारभेत्। गजैरलङ्घ्या विस्तीर्णा गम्भीराः पूर्णवारयः। इन्द्वत्वेन समादिष्टाः परिखा बहवोऽसकः। विशालशालं सुघनं बहुकण्टकिसङ्कटम्। इन्द्वत्वेन समादिष्टं विस्तीर्णं विषमं वनम्। अधोऽधोबध्यमानोऽपि कन्दरोऽल्पजलंखवन्। इन्द्वत्वेन समादिष्टः दुर्लङ्घ्यो हि स भूभुजा। सर्वतः परिखां कृत्वा निवसेदुपरिकन्दरम्। तज्ज्ञास्तु तदीयत्वात् जलइन्द्वं तदुच्यते। एषामभावे निम्नस्य भूप्रदेशस्य बन्धनात्। वर्षासु भवते वारि जलइन्द्वं ततोभवेत्। एतयोरपि संमिश्रात् संमिश्रं इन्द्वमाचरेत्। आश्रित्य कृत्रिमं इन्द्वं बलवद्-

वैरिणो दिशि । अन्यत्र द्वन्द्वं द्वन्द्वं त्यक्त्वा मरयति वैरिणं वेत्ति । रथपतिर्यदा वैरी अश्वद्वन्द्वं तदाचरेत् । गजाश्वनाथयोर्वैरी अश्वद्वन्द्वं तदाचरेत् । गिरिद्वन्द्वं नृपः सेवेत यस्य स्याद् द्विविधो रिपुः । सर्वो हि त्रिविधो युद्धः समासाद्यपदिश्यते । प्रतिराजस्य राज्ञाने प्रकटे गुप्त एव च । राज्ञाने सैनिकान् रक्षेत् प्रकटे निवसेत् स्वयम् । गुप्तेऽस्त्रकोषसम्भारं संरक्षेदिति निश्चयः" । तस्य सामान्यतो गुणा नीतिशास्त्रोक्ताः यथा "सप्तवेशापसरणं द्वन्द्वसप्तमसप्तते । अन्यत्र बन्दिग्राहेण न ताडयेत्त्वयमात्मवेत् । धनुर्द्वन्द्वं महीद्वन्द्वं गिरिद्वन्द्वं तथैव च । मनुष्यद्वन्द्वमित्याहुर्योद्वृद्वन्द्वं प्रकीर्तितम् । योद्वृद्वन्द्वं हि यत् द्वन्द्वं सतकायसमं हि तत्" । अन्यत्र च "यावत् प्रमाणं नगरं हि राज्ञां ततो भवेदुत्तममध्यमानम् । त्रिंशत्तदर्धेन गुणोत्तरेण त्रिदेशजानां धरणीपतीनाम्" मनुस्तु "यदन्यद् द्विविधं द्वन्द्वं श्रयते धरणीभुजाम् । ताभ्यामेवातिरिच्येत मल्लद्वन्द्वं विशेषतः । अन्येषु दैवात् भिन्नेषु मल्लद्वन्द्वात् जयेन्नृपः । मल्लद्वन्द्वे हि भिन्ने हि न चान्यत् कार्यकारकम्" । भोजः "तदेव वैरिदुर्लक्ष्यं विस्रोर्यविषमस्तु तत् । सप्तवेशापसरणं तद्वन्द्वसप्तमं विदुः" ।

द्वन्द्वमद् पु० द्वन्द्वरूपो मदः । रागद्वेषादिरूपे रोगे । "अहं हरिः सर्वमिदं जनार्दनो नान्यं ततः कारणकारणं यतम् । ईदङ्मनो यस्य न तस्य भूयो भवोद्भवा दुर्गदा भवन्ति" विष्णुपु० ।

द्वन्द्वचर पुंस्त्री द्वन्द्वीभूय मिथुनीभूय चरति चर–ट । चक्रवाके स्त्रियां जातित्वात् ङीप् । "शशिना पुनरेति शर्वरी दयिता द्वन्द्वचरं पतत्त्रिणम्" रघुः । णिनि द्वन्द्वचारिन् अन्यत्र त्रिका० स्त्रियां ङीप् ।

द्वन्द्वज त्रि०द्वन्द्वात् जायते जन–ड । वातपित्तश्लेष्मणां मध्ये द्वाभ्यां दोषाभ्यां जाते १रोगादौ माधवनिदानम् २कलहात् जाते च ।

द्वन्द्वयुद्ध न० द्वयोर्द्वयोर्युद्धम् । द्वयोर्द्वयोर्युद्धे "कैराते द्वन्द्वयुद्धे च यदिदं समवर्तत" भा०उ०१८५अ०। "वज्रिन् भूयि चित्राणि द्वन्द्वयुद्धानि वज्रय !" भा०द्रो० १२अ०

द्वय न०अवयवम् द्वि–अवयवे तयप् तस्य वा अयच् । १द्वयोरवयवे २द्वित्वे अत्र स्त्रीत्वमपि ङीप् । "अतद्गुणीभूतवस्तुद्वयानामेव" मैघ० "कुसुमस्तवकस्येव द्वयी वृत्तिर्मनस्विनः" भा०र० द्वे अवयवे यस्य अयच् । २द्वित्वान्विते त्रि० अवयवः तयप्स्थानिकत्वात् जसि सर्वनामता "द्वयेऽप्यक्षत्र विनीतमार्गाः" माघः "व्यां द्वयेषामपि मेदिनी भृतामिति" माघे द्वयेषामित्यत्र केचित्तु द्वयं द्वित्वमिच्छन्ति दृश–क्विप् तेषामिति समर्थनीये । स्त्रियां ङीप् । "द्वयीषु निःक्षेप इवार्पितं द्वयम्" कुमा० अत्र द्वयेऽपीति पाठान्तरम् ।

द्वयाग्नि पु०द्वयः द्विरूपोऽग्निरत्र । पाठिद्वमे चित्रके (चिता) इति भाषा इत्ते यद्च०तस्य प्रचुराग्निरूपत्वात्तथात्वम् ।

द्वयातिग त्रि० द्वयं रजस्तमसो द्वित्वमतिगच्छति अति+गम–ड । रजस्तमोभ्यामनभिभूतसत्त्वगुणयुक्ते अमरः ।

द्वयाविन् त्रि० द्वयमस्यास्ति वेदे "वष्टुवं छन्दसि" मत्वर्थे विनि "छन्दोविनृप्रकरणे ओजोमेखलाद्वयोभयरूपा हृदयानां दीर्घत्वेति वक्तव्यम्" वार्ति०विनि पूर्वपददीर्घश्च । द्वित्वयुक्ते स्त्रियां ङीप् ।

द्वयु पु०द्वाभ्यां प्रकाराभ्यां युक्ता द्वि+यु–ज–डु पृषो० । प्रस्वतो स्त्रितवादिनि परोक्षतोऽस्त्रितवादिनि एवं द्विप्रकारयुते यत्नौ "दुर्द्वया वा उपहयुः" ऋ०८।१८।१३माधवभा०

द्वर त्रि० द्व–आहतौ अच् । आवरणकारके द्व–ऽन् । हरि तत्रार्थे "स हि हरो हरिषु यत्ने" ऋ०१।५२।२

द्वा:(द्वा)स्थ पु० द्वारि तिष्ठति स्था–क वा विसर्गलोपः । द्वारपाले अमरः । "ते वप्रभि गिरेर्नीतात् दुर्लक्ष्यद्वाःस्थवीक्षिताः" कुमा० "विद्वानपि तयोर्द्वाःस्थः समयं बुबुधेऽभितम्" रघुः । [अमरः ।

द्वा:(द्वा)स्थित द्वारि स्थितः वा विसर्गलोपः । द्वारपाले

द्वा(द्वि)चत्वारिंश त्रि० द्वा(द्वि)चत्वारिंशतः पूरणः डट् । येन द्वाचत्वारिंत् संख्या पूर्यते तस्मिन् । स्त्रियां ङीप् ।

द्वा(द्वि)चत्वारिंशत् स्त्री द्व्यधिका चत्वारिंशत् द्विशब्दस्य वा द्वात्वम् । द्व्यधिकचत्वारिंशत्संख्यायाम् तदन्विते च । सप्तमाष्टमनवन्तात् डट् । द्वा(द्वि)चत्वारिंशतिक तत्प्रमाणे त्रि० पूरणे तमप् द्वा(द्वि)चत्वारिंशत्तम तत्संख्यापूरणे त्रि० ।

द्वाज पु० द्वाभ्यां जायते जन–ड पृषो० । द्वाभ्यां जाते "नाम निर्वचनं तस्य श्लोकमेकं पुरा जगुः । मूढ ! भर द्वाजमिमं भरद्वाजं वृहस्पते ! । यातौ यदुक्ता पितरौ भरद्वाजमथाब्रुवत्" भाग०९।२०।१५ "तत्र प्रथमं पुत्रं त्यक्त्वा यान्तीं ममतां वृहस्पतिराह हे मूढे ! इमं पुत्रं भर पुषाण । भर्तुर्विभेमीति चेत्तत्राह द्वाजम् एकस्य क्षेत्रे अन्यस्य बीजेनोत्पादितरूपं द्वाभ्यां जातं अतस्तस्यायं पुत्र इति तस्मात् न भयशङ्केत्यर्थः । एवमुक्ता सती तं

प्रवाह है इङ्गयते ! त्वमिमं भर यतो द्वाजं द्वाभ्यां आवाभ्याम् अन्यावतो जातं यतो नाङ्गमेकाकिनी भरामीत्यर्थः। यद्यप्यादित्यसङ्घा पितरौ मनसाङ्गयतो विवदमानौ पुत्रं परित्यज्य यातौ ततो हेतोरयं भरद्वाज इति" श्रीधरस्वामी।

द्वात्रिंशत् स्त्री द्वाधिका त्रिंशत द्वादेशः। २द्वाधिकत्रिंशत संख्यायां ३तद्वन्तिते। तस्याः पूरणः डट्। द्वात्रिंशत्तम द्वात्रिंशत्तम तत्संख्यापूरणे त्रि० स्त्रियां ङीप्।

द्वात्रिंशदपराध पु० कर्म०। भक्तानामीश्वरविषये द्वात्रिंशत संख्यकेषु अपराधेषु। ते च अपराधाः तन्त्रसारे दर्शिता यथा "तन्त्रान्तरे यानेवां पादुकाभिर्वा यानं भगवतो मद्दे। दैवोत्सवेष्वसेवा च अप्रणामस्तदग्रतः। उच्छिष्टे चैव चाशौचे भगवद्वन्दनादिकम्। एकहस्तप्रणामश्च तत्पुरस्तात् प्रदक्षिणम्। पादप्रसारणञ्चाग्रे तथा पर्य्यङ्कबन्धनम्। शयनञ्चापि मिथ्याभाषणमेव च। उच्चैर्भाषो मिथो जल्पो रोदनानि च विग्रहः। निग्रहानुग्रहौ चैव स्त्रीषु च क्रूरभाषणम्। कम्बलावरणञ्चैव परकीर्त्तेरपक्षतिः। अशौचभाषणञ्चैव अधोवायुविमोक्षणम्। अग्नौ गौणोऽपचारश्च अनिवेदितभक्षणम्। तत्तत्कालभवानाञ्च फलादीनामनर्पणम्। विनियुक्तावशिष्टस्य प्रदानं व्यञ्जनस्य यत्। अदीक्षितावलोकश्चैव परनिन्दा परस्तुतिः। गुरौ मौनं विलम्बश्च देवतानिन्दनं तथा। अपराधाश्चया विष्णोर्द्वात्रिंशत् परिकीर्त्तिताः"।

द्वात्रिंशल्लक्षण पु० द्वात्रिंशत् संख्यानि शुभलक्षणानि यस्य। शुभलक्षणान्विते महापुरुषलक्षणयुते नरे। कामी० ङ० ।। ब०। "पञ्चदीर्घः पञ्चसूक्ष्मः सप्तरक्तः षडुन्नतः। त्रिपृथुगम्भीरोद्वात्रिंशल्लक्षण्यश्चिति" "पञ्च दीर्घाणि शस्तानि यथा दीर्घौष्ठबाहू वै। भुजौ नेत्रे कनू नासा-पक्षौ तनवस्त्वचः। सप्तैते शोभनाः पञ्चाङ्गुलिदशनाः पञ्चाङ्गुलयोऽपि जान्वपि। तस्यास्य पञ्च सूक्ष्माणि दिक्पालपदभाक् यथा। पादतलं करतलनेत्रान्तं तालुजिह्वाधरौष्ठकम्। सप्तारक्तस्य वनखमणिनं राज्ञस्तलपदम्। कक्षा कक्षान्तिकस्कन्धकरपृष्ठं षडुन्नतम्। तथास्य दृश्यते वक्षे यत्तदैश्वर्यभाग् यथा। ललाटकटिवक्षोभि स्त्रिविस्तीर्णो यथाक्रमो। सर्वतोज्योतिमैश्यं तथा प्राप्नुवति नान्यथा। ग्रीवाजङ्घामेढ्रनैव त्रिभिर्हस्वोऽयमीड्यितः। स्वरेण सत्त्वाभिख्या त्रिगम्भीरः त्रिधुः शुभः।"

द्वादश त्रि० द्वादशानां पूरणः द्वादशन्+डट्। द्वादशसंख्यापूरणे स्त्रियां ङीप्। सा च द्वादश्याः चन्द्रकलायाः सूर्यकिरणप्रवेशनिर्गमयोर्म्यायां स्त्रियाङ्कपायां तदुपलक्षित कालरूपायां वा तिथौ तस्यां व्रतकालनिर्णयः कालमा०उक्तो यथा "अथ द्वादशी निर्णीयते। सा च युग्मादिभेदेन पूर्वविद्धा पराह्णा। स्कन्दपुराणेऽपि "द्वादशी च प्रकर्त्तव्या एकादश्या युता विभो !। सदा कार्या च विद्वद्भिर्विष्णु भक्तैश्च मानवैः" इति। उत्तरविद्धां प्रतिषेधति इङ्गङ्गिरः। "द्वितीया पञ्चमी षष्ठी दशमी च त्रयोदशी। चतुर्दशी षोडशी च कन्युः पूर्वोत्तरे तिथी" इति। नन्वेवं सत्यमेकादश्युपवासो द्वादश्युपवासश्चेत्युभयमेकस्मिन्दिने प्राप्नोति सत्यम् तथापि चोभयस्यान्योऽन्यं विरोधाभावात् सङ्कोचानुष्ठानं भविष्यति। नन्वेवं व्रतसमाप्य व्रतान्तरमनुष्ठातुमशक्यम्। "असमाप्ते व्रते पूर्वे नैव कुर्यादुव्रतान्तरम्" इति शास्त्रात् नैवम् इदं हि शास्त्रमेकव्रतस्य मध्ये व्रतान्तरोपक्रमं निषेधति प्रकृते तु व्रतद्वयस्यापि सङ्कोचोपक्रम इति तन्त्रेष्वानुष्ठानं भविष्यति। नन्वेवं चयस्तिथौ, सम्पूर्णतिथौ त्वेकादशी द्वादश्युपवासौ द्वौ नैरन्तर्येण प्राप्नुतः। तत्र पारयन्नरेण प्रथमोपवासस्यासमाप्तत्वात्। द्वितीयोपवासस्य प्रक्रमो न सम्भवतीति चेत् नैवम् शक्तिः पारयं कृत्वा द्वितीयोपवासस्य प्रक्रमयितुं शक्यत्वात्। तादृशं तु पारयमसिद्धानसिद्धोभयात्मकम्। तत्रासिद्धरूपत्वात् पूर्वोपवासं परिसमापयति। अनसिद्धरूपत्वेनोत्तरोपवासं न विरुन्धि। एतच्च शास्त्रकृत्यं दर्शपूर्णमासप्रकरणे याजमानब्राह्मणे श्रूयते "यदानश्नुपवसेत् क्षौधुकः स्यादश्नीयात् स्त्रोत्य पशूनभिमन्त्रयेतोऽश्नाति तच्चैवाग्निं न क्षौधुको भवति नास्य स्त्रः पशूनभिमन्त्रयते" इति। तस्मादुदकपारयेणोपवासद्वयनिर्वाहः। एतच्च सर्वतिथिसाधारणम्। प्रकृते स्त्रैकादशीद्वादश्योर्दैवतैक्यादुदकपारयमन्तरेणापि न कश्चिद्दोषः। अतएव स्मर्यते "एकादशीमुपोष्यैव द्वादशीं यस्तुपोषयेत्। न तस्य विद्यते पुण्यं मासयोर्दैवतं हरिः" इति। उपवासद्वयासक्तौ केवलद्वादश्युपवासेनोभयोः फलं सिध्यति तथा च स्मृतिः "एवमेकादशीं स्त्रक्ता द्वादशीं यस्तुपोषयेत्। पूर्वोपवासजं पुण्यं सर्वं प्राप्नोत्यसंशयम्" इति। द्वादश्यां तु काम्योपवासो मार्कण्डेयेन दर्शितः "द्वादश्यामुपवासेन विद्यार्थी मूढ ! सर्वगः।

चक्रवर्तित्वमतुलं संप्राप्य अतुलाः श्रियः" इति। अयाष्टौ महाद्वादश्यः, शुक्लैकादशीयुता द्वादशी उन्मीलिनीसंज्ञा ।द्वादश्येव शुद्धाधिका वर्द्धते चेत्सा वञ्जुलीरः वासरत्रयस्पर्शिनी त्रिस्पृशाः अये पर्वेषः सम्पूर्णोदिकले पक्षवर्द्धिनीः। जयादयश्चतस्र इत्यष्टौ निर्णः सि॰ उक्ता जयादिकाश्चतस्र हेमा॰ब्र॰ उक्ता यथा "जयाः च विजयाः चैव जयन्तीः पापनाशिनीः। सर्वपापहरा चैता कर्तव्या फलकाङ्क्षिभिः। एकादश्यां शुक्लपक्षे यदा स्यात् पुनर्वसुः। सा नाम्ना च जयाः ख्याता तिथीनामुत्तमा तिथिः। सकृपोष्य व्रती पापात् मुच्यते नात्र संशयः। अग्निष्टोमस्य यज्ञस्य फलमाप्नोति मानवः। यदा शुक्ले तु द्वादश्यां नक्षत्रं श्रवणं भवेत्। विजयाः सा तथा प्रोक्ता तिथीनामुत्तमा तिथिः। तस्यां स्नातः सर्वतीर्थे स्नातो भवति मानवः। दानं सुरक्षसुचितं तथा चैव यथोदितम्। होमजपोपवासैश्च सुलभा फलं लभेत्। यदा च शुक्लद्वादश्यां रोहिणी च प्रजायते। जयन्तीः नाम सा प्रोक्ता सर्वपापहरा तिथिः। सप्तजन्मकृतं पापं स्वल्पं वा यदि वा बहु। तत् क्षालयति गोविन्दस्तस्यामभ्यर्चितस्तथा। यदा च शुक्लद्वादश्या पुष्यं भवति कर्हिचित्। तदा सा तिथिमुख्या कथिता पापनाशिनीः। यो ददाति च यत्पुण्यं नित्यं संवत्सरे नरः। उपवासन्तु तस्यां च यः करोति महत्फलम्। तस्यां जगत्पतिर्देवः सर्वलोकेश्वरो हरिः। प्रत्यक्षतां प्रयात्याशु तदनन्तफलं स्मृतम्" एकादशीव्रतयोः बाहुल्यादौ पारणे च विशेषः नि॰सि॰ उक्तो यथा

"एकादशीद्वादश्योरेकत्वे तन्त्रेणोपवासः पार्थक्ये तु प्रत्येकोपवासद्वयम् "एकादशीसपोष्यैव द्वादशीं सकृपोषयेत्" इति विष्णुरहस्यात् क्वचित्तु द्वादश्यामेव "एवमेकादशीं त्यक्त्वा द्वादशीं सकृपोषयेत्। पूर्ववासरजं पुण्यं सर्वं प्राप्नोत्यसंशयम्" इति तत्रैवोक्तेः यदात्यक्त्वा द्वादशी तदोक्तं मात्स्ये "यदा भवति सम्पूर्णा द्वादशी पारणादिने। अरुणोदये इयं कुर्यात् प्रातर्माध्याह्निकं तदा" नारदीयेऽपि "सम्पूर्णायामथ विप्रेन्द्र! द्वादश्यामरुणोदये। स्नानार्चनक्रियाः कार्याः दानहोमादि संयुताः" इति सङ्कटे तु माधवीये देवलः "संकटे विषमे प्राप्ते द्वादश्यां पारयेत्क्वयम्। अविस्तु पारणं कुर्यात् पुनर्भक्तं न दोषकृत्" इति सङ्कटे त्रयोदशीयाम-प्रदोषादौ यत्र केचिदाहुः "अपकर्षवाक्यान्यत्राग्निविष्वपि अग्निहोत्रादीनां श्रौतत्वेनापकर्षायोगादिति। द्वादश्यां च प्रथमपादमतिक्रम्य पारणं कार्यम् "द्वादश्याः प्रथमः पादो घटिकाषटसंमितः। तमतिक्रम्य कुर्वीत पारणं विष्णुतत्परः" इति निर्णयाब्धौ पद्मपुराणे च विष्णुधर्मोक्तेः। यत्र केचित् सङ्किरन्ते "यदा भवेत्तौ द्वादशी तदापि प्रातर्ह्यरुणोदये पारणं कार्यम् "सर्वैकादशपवासानां प्रातरेव हि पारणमिति वचनादिति"। तच्छङ्कुरत्वेन वक्तुमपि कर्मकालानां विना कारणं बाधायोगेः प्रागुदयवचनेन चास्तद्वादश्यामेवापकर्षविधानादपराह्ण एव कार्यम् प्रातः शब्दस्तु "सायं प्रातर्हि जातीनामहनं श्रुतिचोदितमिति" वदपराह्णाभिप्रायेणेत्युपपन्नः न च वाक्यवैयर्थ्यं पुनर्भोजनसायंपारणनिरुत्यर्थत्वात्तस्येत्याहुः। प्रमादेन एकादश्युपवासातिक्रमे अपराह्णे पराह्णे "एकादशी विद्धा चेद्द्वादशी परतःस्थिता। उपोष्या द्वादशी तत्र यदीच्छेत्परमं पदम्" । नि॰सि॰ स्थानान्तरे भाद्रपदशुक्लद्वादश्यां श्रवणयोगरहितायां पारणं कुर्यात् व्यासाद्यास्तिपक्षेत्यिति दिवोदासोदाहृतवचनात्।

"उपोष्यैकादशीं मोहात् पारणं त्वत्यये यदि। करोति स्फुटं तत्पुण्यं द्वादशद्वादशीभवम्" इति तत्रैव स्कान्दात्। अस्य तत्रैव प्रतिप्रसवः मार्कण्डेयोक्तः "विप्रेषेव महीपाल! त्वत्यये यदि। तिथिद्वयेऽपि भोक्तव्यं द्वादशीं सकृपेत्र हि"इति। केचित्तु यदा त्वपरिहार्यौ योगस्तदा त्वत्यये त्रेधाविभक्ते मध्यमविंशतिघटिकायोगं त्यक्त्वा पारणं कार्यं तदुक्तं विष्णुधर्मे "स्तेय मध्ये परिवर्तमेति सुश्रियनोधपरिवर्तनमभ्युवर्ज्यमिति"। केचित्तथा विभक्ते मध्यपादद्वयं वर्जयन्माहुः अत्र मूलं चिन्त्यम्। अत्रैव विष्णुपरिवर्तनोक्तं कुर्यात्। मध्यायां विष्णुं संपूज्य प्रार्थयेत मन्त्रस्तु तिथितत्त्वे उक्तः। सो "वासुदेव! जगन्नाथ! प्राप्तेयं द्वादशी तव। प्राप्तेन परिवर्तेन सुखं कृपिहि माधव!" इति तत्रैव यत्कथ्योत्थापनसङ्कल्पपरार्थे मन्त्रेण "द्वादश्यां तु स्थिते पद्मे यावि प्रौष्ठपदे तथा। यत्कृतत्यापनेदाज्ञा विष्णुव्रतधरा-धरे" इत्यनेन श्रवणद्वादशी तत्रैकादश्यां द्वादशीश्रवणयोगे सैवोपोष्या "एकादशी द्वादशी च वैष्णव्यर्क्षयुता यदि तत्र चेत्। तद्विष्णुशङ्खसं नाम विष्णुसायुज्यकृद्भवेत्" इति विष्णुधर्मोक्तेः नारदीयेऽपि "संयुक्ता

दशमी राजन् द्वादशी यदि संस्पृशेत् । अवश्यं ज्योतिषां श्रेष्ठं ब्रह्महत्यां व्यपोहति । द्वादशी अवश्यस्पृशा स्पृशेदेकादशीं यदि । स एव वैष्णवो योगो विष्णुरुद्वासंज्ञितः" इति हेमाद्रौ दिनद्वये द्वादशीअवश्ययोगेऽपि पूर्वा, निर्णयामृते त्वस्य पूर्वार्द्धमन्यथा पठितम् । "द्वादशी अवश्यं च स्पृशेदेकादशीं यदि" इति तेन हेमाद्रिमते एकादश्याः अवश्ययोगाभावेऽपि तद्युक्त द्वादशीयोगमात्रेण विष्णुरुद्वासं भवति निर्णयामृतमते तु अवश्यत्वैकादशीद्वादशीभ्यां योग एव विष्णुरुद्वासं नान्यथेति । यदा निशीथानन्तरं सूर्योदयावधि द्विघटिकामात्रमपि अवश्यं भवति तदापि पूर्वैव तदुक्तं तत्रैव नारदीये इमां प्रस्तुत्य "तिथिनक्षत्रयोर्योगो योगश्चैव नराधिप ! । द्विघटो यदि लभ्येत स श्रेयो ह्यहयात्मिकः" इति "द्वादशी अवश्यस्पृशा कृत्स्ना पुण्यप्रदा तिथिः । न तु सा तेन संयुक्ता तावत्येव प्रशस्यते" इति मदनरत्ने मात्स्याच्च । दिवोदासीये तु "रात्रेः प्रथमपादे चेच्छ्रवणं हरिवासरे । तदा पूर्वोपवसेत्प्रातर्भोक्ते च पारणम्" इत्युक्तम् । इदं तु निर्मूलत्वात् पूर्वविरोधाच्चोपेक्ष्यं एवं बुधवारेऽतिप्रशस्ता "बुधश्रवणसंयुक्ता सैव चेद्द्वादशी भवेत् । अत्यन्तमहती सा स्याद्दत्तं भवति चाक्षयम्" इति हेमाद्रौ स्कान्दात् । यानि तु पठन्ति "उत्तराषाढसंयुक्ता श्रोणामध्याङ्गगापि वा । आसुरी सैव तारा स्याद्दत्ते पुण्यं पुराकृतम् । उदयव्यापिनी पाह्ना श्रोणाद्यधिका युता । विष्णर्क्षसंयुता सा च नैवोपोष्या शुभेप्सुभिः" इत्यादीनि विष्णुधर्मस्कान्दभविष्यादीनि वचनानि तानि निर्मूलानि । यदपि श्रावणसारे उदयव्यापिनी पाह्नेत्युक्तं यच्च हरिहारदीये "उदयव्यापिनी पाह्ना श्रवणद्वादशीव्रते" इति तदपि शुद्धाधिका द्वादशी परदिन एकोदये श्रवणयोगः पूर्वेद्युश्च तद्दिने काले योगस्तत्परम् । दिनद्वये उदययोगे पूर्वैव वह्निकर्मकालव्याप्तेरित्युक्तं मदनरत्ने । यदा त्वेकादश्यैव श्रवणयुता न द्वादशी तदापि पूर्वैव "यदा न प्राप्यते ह्यर्क्षं द्वादश्यां वैष्णवं क्वचित् । एकादशी तदोपोष्या पापघ्नी श्रवणान्विता" इति मदनरत्ने नारदीयोक्तेः यदा परैवयुता तदा परा तत्र यत्नेनोपवासदयं कार्यम् "एकादशीमुपोष्यैव द्वादशीं समुपोषयेत् । न चात्र विधिलोपः स्याद्दमयोर्दैवतं हरिः" इति भविष्योक्तेः यत्तु विष्णुधर्मे "पारयान्तं व्रतं श्रेयं व्रतान्ते विप्रभोजनम् । यस्माद्व्रते पूर्वे नैव कुर्याद्व्रतान्तरम्" इति तदेतद्विष्णपरम् अत्र गौडाः "श्रयु राजन् परं काम्यं श्रवणद्वादशीव्रतम्" इति सूत्रगौर्वचनात् काम्यमेवेदम् तेनाशक्तस्य नित्यैकादशीव्रतमेवेति मन्यन्ते "द्वादश्यामुपवासेन शुद्धाका रूप सर्वगः । चक्रवर्तित्वमतुलं संप्राप्नोत्युत्तमां श्रियम्" इति गौडनिबन्धे मार्कण्डेयोक्तेश्च । दाक्षिणात्यास्तु "एकादश्यां नरो भुक्त्वा द्वादश्यां वसुपोषणात् । व्रतद्वयस्य पुण्यं च सर्वं प्राप्नोत्यसंशयम्" इति वराहवचनपुराणोक्तेः श्रवणद्वादशीव्रतमेवेत्याहुः भुक्त्वेति फलाद्याहारपरम् नक्तपरम् "नक्तान्नितानि पापानीति" निषेधात् "उपवासदयं कर्तुं न शक्नोति नरो यदि । श्रवणेऽर्क्षे फलाहारो निराहारो परेऽहनि" इति दिवोदासीये भविष्योक्तेश्च अयञ्च तु स्मृतीतैकादशीव्रतोपवासं प्रत्युक्तं मातृस्वे "द्वादश्यां शुक्लपक्षे तु नक्षत्रं श्रवणं यदि । उपोष्यैकादशीं तत्र द्वादश्यां पूजयेद्धरिम्" इति पूजायेव तूपवासेऽन्वयः । अस्मत्स्मृतैकादशीव्रतत्वेऽप्येकादश्यां भुक्त्वा द्वादश्यामुपवसेत् "एवमेकादशीं भुक्त्वा द्वादशीं समुपोषयेत् । पूर्ववासरजं पुण्यं सर्वं प्राप्नोत्यसंशयम्" इति नारदीयोक्तेः । पारणं तूभयान्येऽह्यतरगते वा कुर्यात् "तिथिनक्षत्रनियमे तिथिभाने च पारणमिति" स्कान्दात् "तिथिनक्षत्रसंयोगे उपवासो यदा भवेत् । पारणं तु न कर्तव्यं यावत्तैकस्य संक्षयः" इति नारदीयादिति हेमाद्रिः । यद्यप्यत्र नक्षत्रमात्रान्तेऽपि पारणं प्रतिभाति तथापि तिथिभात्रान्ते श्रेयम् नक्षत्रान्ते तिथिमध्येऽपि "याः काश्चित्क्षयवृद्धाः प्रोक्ताः पुण्या नक्षत्रयोगतः । अन्ते पारणं कुर्याद्विना श्रवणरोहिणीम्" इति विष्णुधर्मे श्रवणान्तमात्रे पारणनिषेधात् "रोहिण्यान्तु भाने कुर्यात्तिथेर्वापि" इति वह्निपुराणात् तदन्येष्वस्तु न त्वत्रैवमस्तीति न, अन्यान्योऽनुकल्प इति मदनरत्ने । अस्मन्मते तु "तिथ्यन्ते तिथिभाने वा पारणं यत्र चोदितम् । यामत्रयोर्ध्वगामिन्यां प्रातरेव हि पारणम्" इति श्रेयम् । यत्तु मदनरत्ने द्वादशीह्रासे श्रवणह्रासे वा श्रवणान्त एव पारणं कुर्यात् "पारणं तिथिह्रासे तु द्वादश्यामुपवासयात् । ह्रासे कुर्यात्त्रयोदश्यां तत्र दोषो न विद्यते" इति वह्निपुराणादित्युक्तम् तत्प्रकरणादेतत्स्थानेष एव श्रवणयुक्तैकादश्यां विहितविजयैकादशीव्रतपरं न तु श्रवण-

द्वादशीपरमिति मदनरत्ने। गौडास्तु अवद्वादशीपरमाहुः अत्रविधिर्मदनरत्ने विष्णुधर्मे "तस्मिन् दिने तथा स्नानं यत्र क्वचन सङ्गमे। दध्योदनयुतं तस्यां जलपूर्णं घटं हिजे। वस्त्रसंवेष्टितं दत्त्वा ऋणोपान्नमेव च। न दुर्गतिमवाप्नोति गतिमग्र्यां च विन्दति"।

दशावतारद्वादश्यो हेमा॰ब्र॰ उक्तो यथा विष्णुपु॰ "मार्गशीर्षे सिते पक्षे द्वादश्यां समजायत। मत्स्यो विष्णुः समाख्यातस्तस्येष्टेयं सदा तिथिः। एकादश्यामुपोष्यादौ पठन् मत्स्यावतारकम्। श्रृण्वन् सौवर्णं मत्स्यं च कारयित्वा वदेदिदम्।' विष्णुर्मे प्रीयतां मत्स्यरूपधृक्। आचार्याय तम्। यो दद्यात् स सुखी भूत्वा विष्णुलोकं व्रजेच्छुभम्। पौषे मासि सिते पक्षे द्वादश्यां समजायत। कूर्मरूपी स भगवान् तस्येष्टेयं सदा तिथिः। एकादश्युपोष्यादौ पठन् कूर्मस्य तारकम्। श्रृण्वन् सौवर्णं कूर्मस्य कारयित्वा वदेदिदम्। विष्णुर्मे प्रीयतां कूर्मरूपधृक्। आचार्याय तम्। यो दद्यात् सुखी भूत्वा विष्णुलोके महीयते। यो मासौ माघशुक्लस्य द्वादश्यां तु विशेषतः। उपोष्य भक्त्या वाभ्यर्च्य वराहं रुक्मनिर्मितम्। दद्यात्पठेच्च चरितं वाराहं हरिसत्तमम्। वराहजन्मदिवसे विप्राय श्रद्धयान्वितः। सुरभितं समासाद्य मोदते कालमक्षयम्। वराहविष्णुप्रीतिश्च कूर्मवेवं यथातथम्। नारसिंहं फाल्गुने तु एकादश्यां सिते शुचिः। उपोष्याभ्यर्चयेद्भक्त्या नारसिंहभवे दिने। सौवर्णं नारसिंहं च कृत्वा भक्त्या द्विजाय तु। दद्याच्चरितमिदं श्रृण्वन् पठेच्च वा। भूत्वा विजित्य च श्रीं प्राप्य नित्यं नरोत्तमः। पातालस्वर्गमाप्नोति नागदैत्यार्चनायुतम्। चैत्रे मासि सिते पक्षे एकादश्युपोषितः। वामनस्य दिनेऽभ्यर्च्य वामनं पुरुषोत्तमम्। सौवर्णं वामनं दद्यात् पठेद्भक्त्या च यो नरः। स चिरं वामनस्येदं श्रृण्वाद्याप्युपोषितः। स धनैरन्वितो भुक्त्वा भोगानिह च मानुषान्। ब्रह्मलोकमवाप्नोति विद्यान्वितः। वैशाखशुक्लैकादश्यामुपोष्याभ्यर्चयेच्छुचिः। जामदग्न्यं तथा रामं दद्याद्विप्राय रुक्मजम्। ज्यैष्ठशुक्लैकादश्यामुपोष्य द्वादशीदिने। रामं दाशरथिं रौक्मं पूजयेद्भक्तिभावतः। इदं च रामचरितं श्रृण्वाद्वा पठेन्नरः। रामस्य जन्मदिवसे (कल्पभेदादविरुद्धम्) तथा दाशरथेर्हिजः। सीतारामन्तु सौवर्णं यो विप्राय प्रयच्छति। द्वादश्यां रामचरितमिदं श्रृण्वन् पठेच्च वा। स इन्द्रलोकं लभते रामस्यैव प्रसादतः। इह कीर्तिमवाप्नोति धनं पुत्रांश्च जीवितम्। आषाढमासि शुक्लां य उपोष्यैकादशीं द्विजः। द्वादश्यामर्चयेद्रामं रौक्मिणेयं महाबलम्। रौक्मिणेयस्य रामस्य तिथौ जन्मनि सूक्तमे। सौवर्णं श्राद्धमाप्नोति रामं दद्यात्सपात्रकम्। स नागलोकमाप्नोति यावदिन्द्राश्चतुर्दश। इह स्त्रीभोगमाप्नोति बलवान्नीरुजो भवेत्। श्रावणे मासि शुक्लां य उपोष्यैकादशीं द्विजः। द्वादश्यामर्चयेत् कृष्णं रुक्मिणीसहितं शुचिः। रुक्मनिर्मितं कृत्वा दद्याच्च ब्राह्मणाय च। पठेच्च कृष्णचरितं कृष्णजन्मदिने (कल्पभेदादविरुद्धम्) शुचिः। श्रावणे श्रवणयाद्यापि य इदं पुरुषोत्तमः। स सद्यस्तेऽखिलात् संसारात् मुक्त्वा भोगमनुत्तमम्। यस्तु भाद्रपदे मासि एकादश्युपोषितः। शुक्लायामर्चयेत् कल्किं विष्णुं सौवर्णमच्युतम्। द्वादश्यां जन्मदिवसे कल्किविष्णुः सुरेश्वरः। दद्याद्विप्राय तं यापि भक्त्यानुग्रहतो सदा। पठेदिदं कल्किविष्णोश्चरितं श्रृण्वतस्ततः। अनन्तलोकमवाप्नोति ऋते जन्म लभेद्युगे। तस्मिन् सर्वेषु दिवसे दत्तं विष्णुव्रतारकम्। अर्चयन्तु सुराः सर्वे भवेयुः सर्वदार्चिताः'। ति॰त॰ नारदीये 'वैशाखशुक्लपक्षे तु द्वादशी वैष्णवी तिथिः। तस्यां शीतलतोयेन स्नापयेत् केशवं शुचिः'। इयं विधीतकी द्वादशी। अत्र 'भक्तोद्धमेता कर्तव्या सप्तमी नाष्टमीयुता। पतङ्गोपासनावेह षष्ठ्यामाङ्गरूपोषणम्। एकादश्यां प्रकुर्वन्ति उपवासं मनीषिणः। उपासनाय द्वादश्यां विष्णोर्यदुदितं तथा'। इति भविष्यपुराणेन एकादश्युपवासानन्तरं द्वादश्यां विष्णूपासनाया उक्तत्वादत्रापि तथा व्यवहरन्तीति नात्र युष्मादरः। द्वादशीस्पर्शेतूपवासानन्तर्यं विनापि पूजेति। इयं पूर्ववचनोक्तषष्ठीयुता सप्तमीयुता। आषाढद्वादश्यादिषु शयनादिकं प्रायुक्तवचनात् भविष्योत्तरे 'द्वादशी श्रवणोपेता सर्वपापहरा तिथिः। बुधवारसमायुक्ता ततः शतगुणा भवेत्। तासूपोष्य समाप्नोति द्वादशद्वादशीफलम्'। उभयदिने तल्लाभे तु एकादशीयुता ग्राह्या। 'द्वादशी च प्रकर्तव्या एकादश्यायुता विभो। सदा कार्या च विद्वद्भिर्विष्णुभक्तैश्च मानवैः" इति स्कान्दात्। यदा त्वेकादश्यामेव श्रवणा तदा तासूपवसेत् तथाच नारदः "याः काश्चित्तिथयः प्रोक्ताः पुण्या नक्षत्रयोगतः। तास्वेव तदृक्षं कुर्यात्

अवश्यद्वादशीं विना'। भविष्योत्तरे 'एकादशी यदा तु स्यात् अरुणेन समन्विता। विजया सा तदा प्रोक्ता भक्तानां विजयप्रदा। तिथिनक्षत्रसंयोगे उपवासो यदा भवेत्। तावदेव न भोक्तव्यं यावदैक्यस्य संभवः। विशेषेण महीपाल! अरुणं वर्द्धते यदि। तिथिद्वयेऽपि भोक्तव्यं द्वादशीं नैव लङ्घयेत्'। तिथिद्वयेऽपि एकादशीद्वयेऽपि भोक्तव्यं द्वादश्यां पारणेदित्यर्थः। अत्र हेतुः द्वादशीमित्यादिः। यदा त्वेकादश्युपवासदिने अरुणं नास्ति परदिने द्वादश्यां तत् तदोपवासद्वयमाह ब्रह्मवैवर्तः 'एकादशीत्रयोपेतं द्वादशीं सप्तपोषवेत्। न चात्र विधिलोपः स्याद्भयोर्देवता हरिः'। अत्र च 'असमाप्ते व्रते पूर्वे नैव कुर्यात् व्रतान्तरम्' इति स्मृतेः पारणाकरणेन पूर्वोपवासासमाप्तावुपवासान्तरारम्भे विधिलोपोऽत्र भवेदित्यर्थः। हेतुमाह उभयोरित्यादिः। उभयोपवासासामर्थ्ये तु अरुणद्वादशेत्रयोपोष्या तथाच स्मृतिः। 'वरमेकादशीं भुक्त्वा द्वादशीं सप्तपोषवेत्। पूर्वोपवासजं पुण्यं सर्वं प्राप्नोत्यसंशयः'। तथा 'त्रयोपेतं द्वादशीं पुण्यां विष्णुप्रीत्यै संयुताम्। एकादश्युद्भवं पुण्यं नरः प्राप्नोत्यसंशयम्'। द्वादश्युपवासःकाम्यः। तथाच मार्कण्डेयः 'द्वादशोपवासेन विद्वान्नरूप सर्वशः। चक्रवर्त्तित्वमतुलं संप्राप्नोत्यतुलां श्रियम्'' लिखित-क्षिद्विशेषोऽनयोर्दैवभेदादव्यवस्था।

मासभेदे द्वादशद्वादशीव्रतभेदा अग्निपु०।८८अ०उक्ता यथा अग्निरुवाच। द्वादशीव्रतकं वक्ष्ये भुक्तिमुक्तिप्रदायकम्। एकभक्तेन नक्तेन तथैवायाचितेन च। उपवासेन भैक्षेण चैवं द्वादशिकव्रती। चैत्रे मासि सिते पक्षे द्वादश्यां मदनं हरिम्। पूजयेद् भुक्तिमुक्त्यर्थी मदनद्वादशीव्रती१। माधवे तु द्वादश्यां भीमद्वादशिकव्रती। नमो नारायणायेति यजेद्विष्णुं स सर्वभाक्२। फाल्गुने च सिते पक्षे गोविन्दद्वादशीव्रती३। विशोकद्वादशीकारी यजेदाम्रयुजे हरिम्४। समग्रं मार्गशीर्षे५ तु कृष्णमभ्यर्च्य यो नरः। ददाति शुक्लद्वादश्यां स सर्वरसदायकः। गोवत्सं पूजयेद् भाद्रे गोवत्सद्वादशीव्रती६। माघ्यान्तु समतीतायां अरुणेन तु संयुता। द्वादशी७ या भवेत् कृष्णा प्रोक्ता सा तिलद्वादशी। तिलैः स्नानन्तिलैर्होमो नैवेद्यन्तिलमोदकम्। दीपश्च तिलतैलेन तथा देयं तिलोदकम्। तिलाश्च देया विप्रेभ्यः फलं होमोपवासतः। ओं नमो भगवतेऽधो वासुदेवाय वै यजेत्। सकृत्सः स्वर्गमाप्नोति धृतिर्द्वादशीव्रती। मनोरथद्वादशीव्रतन्तु फाल्गुने तु सिते[ऽर्च्चयेद्८। नामद्वादशीव्रतन्तु केशवादीश्च नामभिः। वर्षं यजेद्धरिं स्वर्गी न भवेन्नारकी नरः। फाल्गुनस्य सितेऽभ्यर्च्य सुमतिद्वादशीव्रतीह९। माघि भाद्रपदे शुक्ले१० अनन्तद्वादशीव्रती। स्वर्णेपर्णे तु मूले वा माघे११ कृष्णाय वै नमः। यजेत्तिलांश्च जुहुयात्तिलद्वादशीव्रतः। सुगतिद्वादशीकारी फाल्गुने तु सिते यजेत्। अत्र कृष्ण नमस्तुभ्यं वर्षं स्याद् भुक्तिसङ्गिनः। पौषशुक्ले तु द्वादश्यां१२ सम्प्राप्तिद्वादशीव्रती"।

द्वादशीनियमा तद्भेदनिषेधाश्च एका०त० उक्ता यथा "द्वादशीनियमाः। द्वादश्यामपि विष्णुपूजनम् "एकादश्यां प्रकुर्वन्ति उपवासं मनीषिणः। उपासनाय द्वादश्यां विष्णोर्वृद्धिदियन्तथा" इति भविष्यपुराणात्। यद्यत् यथा द्वादश्यां विष्णूपासनाय एकादश्यामुपवासं प्रकुर्वन्ति तथा द्वयमपि यद्योक्ता सप्तमी उपोष्या सप्तम्यां सूर्य्योपासनायेत्यर्थः। तत्र ब्रह्मवैवर्तपुराणम्। "कांस्यं मांसं सुरां चौद्रं क्षौमं वितथभाषणम्। आयासञ्च व्यायञ्च दिवास्वप्नं तथाञ्जनम्। अभिघातं मक्षरांश्च द्वादशैतानि वैष्णवः। द्वादश्यां वर्ज्जयेन्नित्यं सर्वपापैः प्रमुच्यते। पुनर्भोजनमध्वानं यानमायासमैथुने, उपवासफलं हन्युर्दिवा निद्रा च पञ्चमी"। ब्रह्मशातातपः "उपवासं द्विजः कृत्वा ततोब्राह्मणभोजनम्। कुर्यात्तथा सकृच्च उपवासो हि जायते"। सकृत्सः साङ्गः। नारायणमन्त्रजपश्च पारात्यनिर्णयास्यते बालायनः "मिथ्यावादे दिवास्वप्ने वह्नयोजनसेवने। अष्टाक्षरं व्रती जप्त्वा शतमष्टोत्तरं शुचिः" तथा "मन्त्रं निवेद्य हरये निवेद्योपोषणं व्रती। द्वादश्यां पारणं कुर्याद्देवं[त्वा व्युपोदकीम्"। उपोदकीम् घृतिकाख्याकम्। कूर्मपुराणे "कांस्यं मांसं सुरां चौद्रं हिंसां तैलसमन्वताम्। द्यूतक्रीड़ां दिवानिद्रां व्यायामं क्रोधमैथुनम्। द्वादश्यां द्वादशैतानि वैष्णवः परिवर्जयेत्"। संवत्सरप्रदीपे "अभ्यङ्गञ्च परान्नञ्च तैलं निर्मोल्यलङ्घनम्। तप्तपीडनं द्यूतं पुनर्भोजनमेव च। वस्तपीड़ां तथा क्षारं द्वादश्यां वर्ज्जयेद्बुधः"। अभ्यङ्गोऽन्येनाप्यन्यैरपि तैलं तिलतैलं माषादिभिरपि निषिद्धम्। स्मृतिः

"एतच्च सार्द्धं तैलं यत्तैलं पुष्यवासितम्। यदुक्तं पक्वतैलच्च स्नानाभ्यङ्गेषु नित्यशः" इति वैद्यकोक्तो द्वादशीतरपरः। नित्यश्च इति पर्ववारादावपि। वारे द्रव्यदानेनापि प्रतिप्रसवमाह स्मृतिः "रवौ पुष्पं गुरौ दूर्वां भूमिं भूमिजवासरे। मार्गवे गोमयं दद्यात्तैलदोषोपशान्तये"। दद्यात्तैले इति शेषः। स्मृत्यन्तरोक्ते "कांस्यं मांसं मसूरञ्च चणकं कोरदूषकम्। शाकं मधु परान्नञ्च त्यजेदपत्यवान् स्त्रियम्"। निर्मांसत्वलक्षणमन्यत्रापि निषिद्धमत्राधिकदोषकरं व्रतहानिकरं वा। वारं वक्ष्यते। "मन्दमङ्गलशनीषु द्वादश्यां श्राद्धवासरे। यस्यां वारसंयोगोदृश्यासप्तमं कुलम्"। इति यमवचनात्"।

**द्वादशक** त्रि॰ द्वादश संख्याऽस्य कन्। १द्वादशसंख्यान्विते यथारूपे दक्षादौ "वैश्ये द्वादशकं प्रशस्यमूढे द्वादशोदयः" मनुः द्वादशानां संख्या कन्। २द्वादशसंख्यावाचि "ब्राह्मणस्य परित्राणात् गवां द्वादशकस्य च" मनुः

**द्वादशकर** पु॰द्वादश करा भुजा यस्य। १कार्त्तिकेये त्रिका॰ "स्वामी शाखो विशाखश्च द्विभुजो बालरूप धृक्। दण्डे शक्तिः कुक्कुटोऽथ एकवक्त्रोऽथ षण्मुखः। षड्भुजो वा द्वादशभिर्भोगैरस्थे द्विषाक्षकः। शक्तीषुचापशक्तिं खेटं परशुं दधत्तोदोर्द्वादशीयुतः। शक्त्या दक्षिणषट्केषु, षट्सु, वामे करे तथा। शिखिपिच्छं धनुः खेटं पताकाभयकुक्कुटे। कमण्डलुतरीशूलपाशघण्टायास्य सौम्ययोः" हेमा॰ब्र॰। २भूतयोगे १३ऋक्षयोगे च तयोर्द्वादशत्वात्तत्वम् १७६पृ॰ दृश्यम्। द्वादशभुजादयोऽत्र। ३कुमारानुचरभेदे "अनन्तो द्वादशभुजस्तथा कृष्णोऽक्षयकौ" भा॰शल्य॰ ४६अ॰ तद्गणोक्तौ। द्वादशकराः किरणा यस्य। ५द्वादशार्चिषि जीवे "ध्यात्वा पीताम्बरं पीतं वरोजस्कं चतुर्भुजम्" इत्युक्तेश्चतुर्भुजत्वस्यैव प्रतीतेर्नाकरस्य हस्तपरता "भैरवीरूपविद्या च भुजैर्द्वादशभिर्युताः" हेमा॰पु॰उक्ते ६भैरवीभेदे स्त्री।

**द्वादशन्** त्रि॰नौ च दश च सङ्ख्या वा दश। १सङ्ख्यायां द्विगुतायां वा दशसंख्यायां २तद्युते च "द्वादश प्रतिमासानि चादौ स्नाप्यानि चैव तत्" ति॰त॰

**द्वादशपत्र** न॰द्वादशाक्षराणि पत्राणीव यस्य। "वैशाखादिरूपतया कल्पित द्वादशाक्षरयुक्ते भगवतो मन्त्रभेदे स च मन्त्रः ओं नमो भगवते वासुदेवाय" उक्तो वामनपु॰ "पितामहोऽपि तं पुत्रं साध्यं सहितये ददौ। सनत्कुमारं प्रोवाच योगं द्वादशपत्रकम्। शिखासंस्थस्तु ओंकारो मेधोऽस्य शिरसि स्थितः। भालो वैशाखनामा च प्रथमं पत्रकं स्मृतम्। मकारः शिरसि प्रोक्तो दक्षोऽस्य शिरसि स्थितः। ज्यैष्ठमासश्च तत्पत्रं द्वितीयं परिकीर्तितम्। मोकारो भुजयोर्युग्मं मिथुनं तत्र संस्थितम्। मास आषाढनामा च तृतीयं पत्रकं स्मृतम्। धकारं नेत्रयुगलं कर्कटस्तत्र संस्थितः। मासः श्रावश्च दक्षुल्लश्च तुर्यं पत्रकं स्मृतम्। मकारं हृदयं प्रोक्तं सिंहो वसति तत्र च। भाद्रो भाद्रपदश्चैव प्रोक्तः पञ्चमं पत्रकं स्मृतम्। यकारं कवचं विद्यात् कन्या तत्र प्रतिष्ठिता। आसश्चाश्वयुजो नाम षष्ठं तत्पत्रकं स्मृतम्। तेकारमस्त्रमाहुश्च दुष्टारिशिक्षितास्त्रवः। मासश्च कार्तिको नाम सप्तमं पत्रकं स्मृतम्। वाकारं नाभिसंयुक्तं स्थितं तत्र च वृश्चिकः। मार्गो मार्गशिरो नाम अष्टकं पत्रकं स्मृतम्। सुकारं जघनं प्रोक्तं तत्रस्थश्च धनुर्धरः। पुष्येति गदितो मासो नवमं परिकीर्तितम्। देकारमोरुयुगलं मकरस्तत्र संस्थितः। माघो निगदितो मासः पत्रकं दशमं स्मृतम्। वाकारो जानुयुगलं कुम्भस्तत्रापि संस्थितः। पत्रकं फाल्गुनं प्रोक्तं तदेकादशमुत्तमम्। यादौ यकारो मीनो हि स पैत्ते च वसेत् सदा। इदन्तु द्वादशं प्रोक्तं पत्रं वै केशवस्य हि। द्वादशारमथो चक्रं यस्याभिर्द्विभुजस्तथा। विष्णुरूपस्वमूर्त्तिश्च तयोक्तः परमेश्वरः। एतत्तयोक्तं देवस्य रूपं द्वादशपत्रकम्। यस्मिन् याते शनिश्चेद्द। न भूयो मरणं भवेत्"

**द्वादशपुत्र** पु॰ब॰। संख्यातात् कर्म॰। औरसादिद्वादशविधेषु पुत्रेषु यथाह विष्णुः॰

"अथ द्वादश पुत्राभवन्ति। स्वे क्षेत्रे संस्कृतायामुत्पादितः स्वयमौरसः प्रथमः१। नियुक्तायां सपिण्डोक्तसमवर्णेन वोत्पादितः क्षेत्रजोद्वितीयः२। पुत्रिकापुत्रस्तृतीयः३। यस्यस्याः पुत्रः स मे पुत्रोभवेदिति वा पित्रा दत्ता सा पुत्रिका। पुत्रिकाविधिना प्रतिपादितो पिण्डस्वादपिण्डीना पुत्रिकैव। पौनर्भवश्चतुर्थः४। क्षतया भूयःसंस्कृता, पुनर्भूः भूयस्संस्कृतापि पूर्वपूर्वा। कानीनः पञ्चमः५। पित्रुत्सृष्टेऽसंस्कृतयैवोत्पादितः। स च पाणिग्राहस्य। सहोढे च गूढोत्पन्नः षष्ठः६। यस्य तल्पजस्वासौ। सहोढः सप्तमः७। गर्भिणी वा संक्रियते तस्याः पुत्रः। स च पाणिग्राहस्य। दत्तकस्त्वष्टमः८। स च मातापित्रोर्यस्य दत्तः। क्रीतश्च नवमः९।

स च येन क्रीतः। स्वयमुपगतोदशमः१०। स च यस्योपगतः। अपविद्धस्त्वेकादशः११। पिता माता च परित्यक्तः। स च येन स्वीकृतः। यत्र क्वचनोत्पादितश्च दादशः१२। एतेषां पूर्वः पूर्वः श्रेयान्। स एव दायहरः'।

'वङ्गीनां दादश क्षेत्र पुत्राः पुराणदृष्टाः। स्वयमुत्पादितः क्षेत्रे संस्कृतायां प्रथमः१ तदभावे नियुक्तायां क्षेत्रजो द्वितीयः२। तृतीयः३ पुत्रिका विज्ञायते अभ्रातृका पुत्रः विद्वत्सभेति प्रतीचीनं गच्छति पुत्रत्वम्। श्लोकः। अभ्रातृकां प्रदास्यामि तुभ्यं कन्यामलङ्कृताम्। अस्यां यो जायते पुत्रः स मे पुत्रोभवेदिति। पौनर्भवश्चतुर्थः४ पुनर्भूः कौमारं भर्त्तारमुत्सृज्यान्यैः सह चरित्वा तस्यैव कुटुम्बमाश्रयति सा पुनर्भूर्भवति। या च क्लीवं पतितमुन्मत्तं वा भर्त्तारमुत्सृज्यान्यं पतिं विन्दति कृते वा, सा पुनर्भूर्भवति। कानीनः पञ्चमो या पितृगेहेऽसंस्कृता कामादुत्पादयेन्मातामहस्य पुत्रोभवतीत्याहुः। अथाप्युदाहरन्ति। अप्रत्ता दुहिता यस्य पुत्रं विन्दति तुल्यतः। पुत्री मातामहस्तेन दद्यात् पिण्डं हरेदनमिति। गूढे च गूढोत्पन्नः षष्ठ इत्येते दायादा बान्धवाश्चातारोभवतोभयादित्याहुः। अथादायादात्तत्र सहोढएव प्रथमो या गर्भिणी संक्रियते तस्यां जातः सहोढः पुत्रोभवति। दत्तकोदितीयो यं मातापितरौ दद्याताम्। क्रीतस्तृतीयस्तच्छुनःशेफेन व्याख्यातं हरिश्चन्द्रोह वै राजा सोऽजीगर्त्तंश्च सोपवर्त्तैः पुत्रं विक्राय स्वयं क्रीतवान्। स्वयमुपागतश्चतुर्थः तच्छुनःशेफेन व्याख्यातं शुनःशेफो ह वै यूपे नियुक्तो देवतास्तुष्टाव तस्मै ह देवताः पापं विसृजतु नस्त्वित्यजञ्चुभमैवार्यं पुत्रोऽस्त्विति तानाह न सम्प्रे ते सम्प्रदायासुरेष एव वं कामयेत तस्य पुत्रोऽस्त्विति तस्मै ह विश्वामित्रोऽजीतावीत्तस्य पुत्रत्वमियाय। अपविद्धः पञ्चमो यं मातापितृभ्यामपास्तं प्रतिगृह्णीयात्। गूढाः पुत्रएव षष्ठोभवतीत्याहुरित्येतेऽदायादा बान्धवाः। अथाप्युदाहरन्ति। यस्य पूर्वेषां वर्णानां न कस्मिंश्चादायादः स्यादेते तस्यापहरन्ति' वसिष्ठसंहिता १७अ०। अत्र कानीनस्य मातामहसुतत्वमुक्तं विष्णु- क्षत्रे च पाणिग्राहस्य पुत्रत्वं शिवःसमयभेदेनात्र व्यवस्था

**दादशप्रसृत** त्रि० दादश प्रसृतयः सन्त्यत्र अच्। दादशप्रसृतियुक्ते सुवर्णोक्ते वस्तिभेदे यथा "दत्त्वादौ सैन्धवस्याथ मधुनः प्रसृतिद्वयम्। विनिर्मथ्य ततो दद्यात्क्षेत्रस्य प्रसृतित्रयम्। एकीभूते ततः क्षेत्रे कल्कस्य प्रसृतिं क्षिपेत्। संमूर्च्छिते कषायस्य चतुःप्रसृतिसम्मितम्। वितरेच्च तदावापमन्ते द्विप्रसृतोन्मितम्। एवं प्रकल्पितो वस्तिर्दादशप्रसृतो भवेत्। ज्येष्ठायाः खलु मात्रायाः प्रमाणमिदमीरितम्। अपत्ताये भिषक्छ्रेष्ठैस्तद्दादशप्रसृतिज्ञापनम्। यथावयो निरूहाणां कल्पनेयमुदाहृता। सैन्धवादिद्रव्यानानां सिद्धिकामैर्भिषग्वरैः"।

**दादशभाव** पु० दादशसंख्यितो भावः। ज्यो०शास्त्रोक्तेषु तन्वादिषु दादशसु भावेषु तदानयनादि तत्स्थितयुक्तफलञ्च नीलकण्ठोक्तं यथा "पूर्वं नतं खाहिनरात्रिखण्डं दिनानिशोरिष्टघटीविहीनम्। दिनानिशोरिष्टघटीषु शुद्धं द्युरात्रिखण्डं त्वपरं नतं स्यात्। तत्कालके लग्ननवांशभुक्तभोग्याऽयसंशुद्धात्। खोदयात् खाग्निहतं यत् भुक्तं भोग्यं रवेस्त्यजेत्। इष्टनाड़ीपलेभ्यश्च गतगम्याच्चिजोदयात्। शेषं खखाग्निहतं भक्तमण्डेन लवादिकम्। अण्डशुद्धे हीनयुक् तत्तुर्य्यनवांशकम्। एवं सङ्घोदयैर्भुक्तं भोग्यं शोध्यं पलीकृतात्। पूर्वपश्चात्तादन्यत् प्राग्वत्तद्दशमं भवेत्। षष्ठाद्भे लग्नके जायातुर्य्यौ लग्नोनतुर्य्यतः। षष्ठांशयुक् ततः सन्धिरयं षष्ठांशयोजनात्। त्रयः सप्तन्यवोभावाः षष्ठांशैनैकयुक् सुखात्। अन्ये त्रयः षडेवं ते भार्द्धयुक्ताः परेऽपि षट्। खेटे भावसमे पूर्वं फलं सन्धिसमे तु यत्। हीनेऽधिके द्विसन्धिभ्यां भावे पूर्वापरे फलम्। भुक्तं भोग्यं खेटकालात् शुद्धात् लिप्तविहीनाद्भोदयाप्तं लवादयम्। हीनं युक्तं भास्करे तत्तुः खाद्यालौ लग्नं भार्द्धयुक्ताद्रवेस्तु। खेटे सन्धिदयान्तःस्थे फलं तद्भावजं भवेत्। हीनेऽधिके द्विसन्धिभ्यां भावे पूर्वापरे फलम्। षड्लग्नन्यन्तरं कार्य्यं विंशत्या गुणितं भवेत्। भावसन्ध्यन्तरेणाप्तं फलं विंशोपकाः स्मृताः"। अयमर्थः। मेषादिराशीनामुदयकालोलग्नं तस्य च लिप्तदंशरूपतया जन्मकाले मेषादीनां यतमोऽंशो गतः तदारभ्य तदुत्तरराशेस्ततोऽर्वाचीनांशान्तः तनुभावः एवं धनभावादि एवं तत्तद्दादशभावास्तेषां सन्धयोऽपि तत्रैव ज्ञेयाः। राशिमात्रगणनया फलं स्थूलं भावगणनया तु सूक्ष्मं फलादिकं भवतीति ज्ञेयम्। ते च तनुभावः, धनभावः, सहजभावः, बन्धुभावः, पुत्रभावः, रिपुभावः, कलत्रभावः, मृत्युभावः, धर्मभावः, कर्मभावः, आयभावः, व्ययभावश्चेति द्वादश। तेषां सन्धयश्च द्वादशैवावधेयम्।

**द्वादशमद्य** न० द्वादशविधं मद्यम्। "पानसं द्राक्षमाध्वीकं खार्जूरं तालमैक्षवम्। माध्वीकं द्वयमाध्वीकं मैरेयं नारिकेलजम्। समानानि विकाराय मद्यान्येकादशैव तु। द्वादशं तु सुरामद्यं सर्वेषामधमं स्मृतम्" पुलस्त्योक्ते द्वादशविधे मद्ये।

**द्वादशमल** पु० द्वादशसुखितो मलः। "वसाशुक्रमसृङ्मज्जं मूत्रविट्कर्णविड्नखाः। स्वेदास्थि दूषिका स्वेदो द्वादशैते नृणां मलाः" अत्रिसंहितोक्ते नृणां द्वादशविधे मले। तत्र "धस्रां धस्रां क्रमेणैव शुद्धिरुक्ता मनीषिभिः। मृद्वारिभिश्च पूर्वेषामुत्तरेषान्तु वारिभिः" शुद्धिप्रकारमाह तत्रैव।

**द्वादशमास** पु० द्वादशसुखितो मासः। १चैत्रवैशाखज्यैष्ठाषाढश्रावणभाद्राश्विनकार्तिकमार्गशीर्षपौषमाघफाल्गुनसंज्ञकेषु द्वादशसु मासेषु "क्वचित् द्वादश मासाः संवत्सरः क्वचित् त्रयोदश मासाः" स्मृतिः ६व०। २वर्षे पु०

**द्वादशमासकर्मन्** न० द्वादशसु मासेषु कर्तव्यं कर्म। विष्णुस० उक्ते मार्गादिमासेषु तिथिभेदे दानहोमादिकर्मभेदे यथा

"मार्गशीर्षशुक्लपक्षद्वादश्यां श्रवणशिरःसंयुक्तायां पूर्वाह्ने सुवर्णनाम प्रस्थमेकं चन्द्रोदये ब्राह्मणाय प्रदापयेत्। अनेन कर्मणा रूपवतीभाग्यवानभिजायते। घोषी चेत् पुष्ययुक्ता स्यात्तस्यां गोरसमेकलोहपात्रितशरीरो गव्यघृतपूर्णकुम्भेनाभिषिञ्चः सर्वौषधीभिः सर्वगन्धैः सर्वबीजैश्च स्नातो घृतेन मण्डलं वासुदेवं स्थापयित्वा गन्धाद्यैरुपदीपनैवेद्यादिभिश्चार्च्य वेणुवैः शङ्कवोंऽशुलैश्च मन्त्रैः पावके हुत्वा सप्तवर्णेन घृतेन ब्राह्मणान् स्वस्ति वाचयेत्। वासोयुगं कर्त्रे दद्यात्। अनेन कर्मणा प्रजते। माघी मघायुता चेत्स्यात् तिलैः श्राद्धं कृत्वा पूतोभवति। फाल्गुनी फल्गुनीयुता चेत्प्राप्तस्यां ब्राह्मणाय सुसंस्कृतं साक्षीर्षं भोजनं निवेद्य भार्यां मनोज्ञां रूपवतीं श्रविष्ठवतीञ्चाप्नोति। भार्यापि भर्तारम्। चैत्री चित्रायुता स्यात्तस्यां चित्रवस्त्रप्रदानेन सौभाग्यमाप्नोति। वैशाखी विशाखायुता चेत्तस्यां ब्राह्मणसप्तकं क्षौद्रयुक्तैस्तिलैः सन्तर्प्य धर्मराजानं प्रीणयित्वा पापेभ्यः पूतोभवति। ज्यैष्ठी ज्येष्ठायुता चेत्तस्यां क्षीरोपानहप्रदानेन गवामाधिपत्यं प्राप्नोति। आषाढ्यामाषाढायुक्तायामन्नपानदानेन तदैश्वर्यमाप्नोति। श्रावण्यां श्रवणयुक्तायां जलधेनुं स्वर्णां वासोयुगाच्छादितां दत्त्वा स्वर्गमाप्नोति। प्रौष्ठपद्यां प्रौष्ठपदायुक्तायां गोदानेन सर्वपापविनिर्मुक्तो भवति। आश्वयुज्यामश्विनीगते चन्द्रमसि हेतपूर्णं भाजनं सुवर्णयुतं विप्राय दत्त्वा दीप्ताग्निर्भवति। कार्त्तिकी कृत्तिकायुता चेत्स्यात् सितसुवाससमन्वर्णं वा शशाङ्कोदये सर्वशस्यरत्नगन्धोपेतं दीपमध्ये ब्राह्मणाय दत्त्वा कान्तारभयं नश्यति। वैशाखशुक्लद्वादशीवायासुपोषितोऽच्युतैर्बाहुदैवमभ्यर्च्य तानेव हुत्वा दत्त्वा च सर्वपापेभ्यः पूतोभवति। यच्च तस्मिन्नहनि प्रयच्छति तदक्षयमाप्नोति। पौष्यां समतीतायां कृष्णपक्षद्वादश्यां सोपवासस्तिलैः स्नातस्तिलोदकं दत्त्वा तिलैर्बाहुदैवमभ्यर्च्य तानेव हुत्वा दत्त्वा भुक्त्वा च पापेभ्यः पूतोभवति। माघ्यां समतीतायां कृष्णद्वादश्यां सोपवासः श्रवणं प्राप्य वासुदेवायतोमङ्गावर्त्तिद्वयेन दीपद्वयं दद्यात्। दक्षिणपार्श्वे भङ्गारजतरूपेण समवेष्य वाससा सततन्तुमष्टाधिकां दत्त्वा वामपार्श्वे तिलतैलपूर्णां पात्रीं दत्त्वा श्वेतेन समवेष्य वाससा एतत्कृत्वा कृतकृत्योयस्मिन् राष्ट्रेऽभिजायते यस्मिन् देशे यस्मिन् कुले स कृतोद्वहो भवति। आश्विनं सकलं मासं ब्राह्मणेभ्यः प्रत्यहं एतं प्रदद्यादश्विनौ प्रीणयित्वा रूपभाग्भवति। तस्मिन्नेव मासि प्रत्यहं गोरसैर्ब्राह्मणान् भोजयित्वा राजभाग्भवति। प्रतिमासं रेवतीयुते चन्द्रमसि मधुघृतयुतं रेवतीप्रीत्यै परमान्नं ब्राह्मणान् भोजयित्वा रेवतीं प्रीणयित्वा रूपभाग्भवति। माघे मासेऽस्मिन् प्रत्यहं तिलैर्हुत्वा सघृतं कृसरान्नं ब्राह्मणान् भोजयित्वा दीप्ताग्निर्भवति। सर्वां चतुर्दशीं नदीजले स्नात्वा धर्मराजानं पूजयित्वा सर्वपापेभ्यः पूतोभवति। यदिच्छेदिष्टान् भोगान् चन्द्रसूर्यसमप्रभान्। प्रातःस्नायी भवेन्नित्यं द्वौ मासौ माघफाल्गुनौ"। कृत्यतत्त्वे दर्शितानि अन्यानि च मासभेदकार्य्याणि द्रष्टव्यानि।

**द्वादशमासिक** न० मासिभवं ठञ् मासिकम् कर्म०। मृतदिनावधिद्वादशसंख्यापूरणे मासे कर्तव्ये प्रेतोद्देश्यके श्राद्धभेदे।

**द्वादशयात्रा** स्त्री द्वादशसु मासेषु द्वादशविधा यात्रा। यात्रातत्त्वे स्कन्दपुराणोक्ते मासभेदे देवोद्देश्ये यात्राभेदे तां च तत्र दर्शिता यथा

"इन्द्रद्युम्न उवाच वैशाखादिषु मासेषु यात्रापूजाविधिं मुने!। श्रोतुमिच्छामि देवेशे यथावद्वक्तुमर्हसि। जैमिनिरुवाच। वैशाखादिषु मासेषु देवदेवस्य शार्ङ्गिणः।

या या द्वादश यात्राः स्युस्ता हि वक्ष्यामि ते शृणु। वैशाखे चान्द्री यात्रा ज्यैष्ठे स्नापन्युदीरिता। आषाढे रथयात्रा स्यात् श्रावणे शयनी तथा। भाद्रे दक्षिणपार्श्वी सा आश्विने वामपार्श्विका। उत्थानी कार्तिके मासि द्वादनी मार्गशीर्षके। पौषे पुष्याभिषेकः स्याद्माघे माघोदनी तथा। फाल्गुने दोलयात्रा स्यात् चैत्रे मदनभञ्जिका। एकैका कुरुते सर्वां धर्मकामार्थसाधनाः"। तद्विधिस्तु तत्रैव दृश्यः।

**द्वादशराजमण्डल** न० द्वादशानां राज्ञां मण्डलम् उत्तरपदलोपिगुः। द्वादशानां राज्ञां मण्डले तच्च चक्रभिद० २२६अ० उक्तं यथा

"राम उवाच। मण्डलं चिन्तयेत् सम्यं राजा द्वादशराजकम्। अरिभिर्मित्रमरिभिर्मित्रमित्रमतः परम्। तथारिमित्रमित्रञ्च विजिगीषोः पुरः स्थिताः। पार्ष्णिग्राहः स्थितः पश्चादाक्रन्दस्तदनन्तरम्। आसारावनयोश्चैवं विजिगीषोश्च मण्डलम्। अरेश्च विजिगीषोश्च मध्यमो भूम्यनन्तरः। चतुष्पदे संस्थितयोर्द्विपदे व्यवयोः प्रभुः। मण्डलाद्बहिरेतेषामदासीनो बलाधिकः। चतुष्पदे संस्थितानां व्यक्तानां च वधे प्रभुः"।

**द्वादशरात्र** पु०द्वादशभिः रात्रिभिः निर्वृत्तः तद्धितार्थदिगुः अच् समा०। द्वादशदिनसाध्ये १द्वादशाहनामके अहीनयागभेदे २रात्रिसत्रभेदे स च यागः कात्यायनेनोक्तः "ज्योतिष्टोमधर्मा एकाहद्वादशाहयोरुदृग्वदर्शनात्" कात्या०श्रौ०१२।१। "द्वादशाहः सत्रमहीनञ्च" ४सू० "अत्र विशेषमाह द्वादशाहस्यद्विकामा उपेयुरिति"। "तथा त्रयोदशरात्रमासीरन्निति सत्रविकृम् द्वादशाहेन प्रजाकामं यजेतेत्यहीनविकृम्। अन्नातुकत्वमन्नयोजनम्, सत्रे सत्रात्मको धर्मो दात्यन्तेन प्रवर्तते, अहीने चाहीनात्मकः" कर्कः "उक्ता अहीनाः इदानीं सत्राण्यभिधीयन्ते" कर्कः "द्वादशरात्रादीनि रात्रिसत्राणि" कात्या०श्रौ०२३।१।१ "रात्रिसत्राणि इति नाम तच्च द्वादशरात्रप्रभृतीनाम् पूर्वपदप्रधानोऽयं बहुव्रीहिः एकोऽहेन चत्वारिंशदन्यानि। तत्र द्वादशरात्रं द्वादशाह एव सत्रात्मकः स च पूर्वसत्र एव ततो द्वादशरात्रादारभ्य एकैकाहवृद्ध्या चत्वारिंशद्रात्रान्तानि सत्राणि भवन्ति" कर्कः। द्वादशानां रात्रीणां समा० दि० अच् समा०। १समाहृतासु द्वादशरात्रिषु न०"अत ऊर्द्धं त्रिरात्रं द्वादशरात्रं वा" आश्व०श्र०१।१।८।११ "अतः षट्प्रभेदमीयज्ञोमादूर्द्धं त्रिरात्रं द्वादशरात्रं वा नियतो"नारा० द्वादश रात्रयः साधनकालत्वेन सन्त्यस्य अर्श आद्यच्। ३द्वादशरात्रिसाध्ये सत्रभेदे त्रदा० पूर्वसत्रम्।

**द्वादशलोचन** पु०द्वादश लोचनान्यस्य। कार्तिकेये त्रिका० तस्य षड्वक्त्रत्वात् तथात्वम्।

**द्वादशवर्गी** स्त्री द्वादशानां वर्गाणां समाहारः समा०ङीप्। नीलकण्ठताजकोक्ते वर्षकाले षड्वर्गाणां बलसाधने द्वादशमिते वर्गे सा च

"क्षेत्रं होरा त्रयञ्चिपड्वाङ्कसप्तवसुद्वाग्नेयार्कभागाः क्रमेण। विज्ञातव्या लग्नसंस्थाः शुभानां वर्गाः श्रेष्ठाः पापवर्गा अनिष्टाः। ओजे रवीन्दोः सम इन्दुरव्योर्होरे सप्तार्द्धमिते विचिन्त्ये। द्रेष्काणपाः खेषुनवर्तुनाद्यास्तुर्यांशपाः सप्तजवेन्द्रनाथाः। ओजर्क्षे षड्भांशेशाः कुजार्कीज्यसमभागेवाः। समभे व्यत्ययाज्ज्ञेया द्वादशांशाः स्वभात् स्मृताः। नवीक्षतो व्योमचरोऽङ्गनैवस्वद्वादियुद्वसुधः खरामैः। भक्तो गजार्कनखाष्टनन्दद्विषुद्विभागाः क्रमुतात् क्रियात् स्युः। एवं द्वादशवर्गी स्यात् षड्वर्गाणां बलस्थिवये। स्वोच्चमित्रशुभाः श्रेष्ठाः नीचारिक्रूरखोऽशुभाः। एवं षड्वर्गाणां शुभपापवर्गषड्लिङ्गयं बोध्य शुभाधिक्ये। दशाफलं भावफलं च वाच्यं शुभं त्वनिष्टं खशुभाधिक्ये। क्रूरोऽपि सौम्याधिकवर्गगश्चेत् शुभोऽतिसौम्यः शुभखेचरश्चेत्। सौम्योऽपि पापाधिकवर्गयोगाच्चेष्टोऽतिनिन्द्यः खलु पापखेटः। राशीशमित्रोच्चरिपुक्रमेण चिन्त्यं तनोरप्यनयैव रीत्या। भावेषु सर्वेष्वपि वर्गचक्रं विलोक्य तत्तत् फलमूहनीयम्" इति द्वादशवर्गी।

**द्वादशवार्षिक** त्रि० द्वादश वर्षान् अधीष्टः भृतो भूतो वा उत्तरपदवृद्धिः। द्वादश वर्षान् व्याप्य १अधीष्टे सत्कृत्य नियोजिते २भृते कर्मकरे ३भूते व्यवस्तव्याप्यके ब्रह्मचर्य्यनोदके व्रतभेदे च तच्च प्रा०वि० दर्शितं यथा

तत्र मनुः "ब्रह्मचर्यं द्वादशवर्षाणि कृत्वा वने वसेत्। भैक्षाश्यात्मविशुद्ध्यर्थं कृत्वा सर्वशिरोध्वजम्"। संवर्त्तः "ब्रह्मचर्यं तु वर्षं गत्वा वनवासी जटी ध्वजी। वन्यान्येव फलान्यश्नन् सर्वकामविवर्जितः। भिक्षार्थी विचरेद्ग्रामं वन्यैर्यदि न जीवति। चातुर्वर्ण्यं चरेद्भैक्षं षट्कर्मी संयतः शुभान्। भिक्षित्वैवं समादाय वनं गच्छेत्ततः पुनः। वनवासी स पापात्मा सदाकाल

मतन्द्रितः। श्लाघयन्नेव तत् पापं ब्रह्मघ्नः पापकृत्तमः। अनेनैव विधानेन द्वादशाब्दं समाचरेत्"। "तस्माद्गुरुनिष्कृतिकेष्वपि प्राजापत्यादयो द्वौद्वौ नीयाः। तत्र द्वादशवार्षिकव्रते द्वादशदिनात्मके चैकं प्राजापत्यम्परिकल्प्य गम्यमाने प्राजापत्यानां षष्ट्यधिकशततयं द्वादशवार्षिकवैकल्यिकमनुष्ठेयं भवति। तदशक्तौ तावतो वा धेनवोदातव्याः" इति०। रघु०मते तदर्द्धमिति भेदः। भाविनि तु "वर्षद्वादशविधति" या० मोतरपदवृद्धिः। द्वादशवर्षिक द्वादशवर्षान् भाविनि ज्वरादौ

**द्वादशशुद्धि** स्त्री द्वादशशुद्धिता शुद्धिः। तन्त्रसारोक्ते वैष्णवानां कार्षिकादिद्वादशशुद्धिभेदे "अथ द्वादशशुद्धिर्वै वैष्णवानामिहोच्यते। स्नेहोपसर्पणञ्चैव तथा चागमनं हरेः। भक्त्या प्रदक्षिणञ्चैव पादयोः शोधनं पुनः। पूजार्थं पत्रपुष्पाद्यां भक्त्यैवोत्तोलनं हरेः। करयोः सर्वशुद्धीनामियं शुद्धिर्विधिष्यते। तन्नामकीर्त्तनञ्चैव शुद्धानामपि कीर्त्तनम्। भक्त्या श्रीकृष्ण देवस्य वचसः शुद्धिरिष्यते। तत्कथाश्रवणञ्चैव तस्योत्सवनिरीक्षणम्। श्रोत्रयोर्नेत्रयोश्चैव शुद्धिः सम्यगिहोच्यते। पादोदकस्य निर्माल्यमाघ्राणमपि धारणम्। उच्यते शिरसः शुद्धिः प्रणतस्य हरेः पुरः। आघ्राणञ्चन्दनपुष्पादेर्निर्माल्यस्य तपोधन!। विष्णोः शुद्धिः स्नानस्य आघ्राणापि विधीयते। पत्रपुष्पादिकं यच्च लक्ष्मणादर्पितम्। तदेकं पावनं लोके तद्धि सर्वं विशोधयेत्। ललाटे च सदा कार्य्या मृत्तिः चापं हरांसया। नन्दकञ्चैव हस्ताभ्यां वक्षं चक्रं भुजद्वये। यस्तु चक्रान्वितो विप्रः प्रयागे म्रियते यदि। प्रयागे वा गतिः प्रोक्ता सा गतिस्तस्य गौतम!"।

**द्वादशशोधित** न० द्वादशं व्यवस्थानं अक्षरादित्वेन शोधितम्। व्यवस्थाने अक्षरादित्वेन शुद्धियुक्ते वर्णे "शुक्लोदये शुद्धवर्णे द्वादशशोधिते" दीक्षातत्त्वम्।

**द्वादशसंग्राम** द्वादशविधः संग्रामः। देवानामसुरैः सह द्वादशविधे युद्धे ते च संग्रामभेदा अग्निपु० २७५ अ० उक्ता यथा "देवासुराणां सङ्ग्रामा द्वादशाऽभवन्। प्रथमो नारसिंहस्तु द्वितीयो वामनो रणः। सङ्ग्रामस्तत्र वाराहस्तृतीयोऽमृतमन्थनः। तारकामयसङ्ग्रामः५ षष्ठो ह्यान्धकोऽद्भुतः। त्रैपुरश्चाग्नकश्चैव वधोत्थश्च नवमो जलन्धरः। त्रितो०। ज्वालाकेशः११ चाथ घोरः कोलाहलो १२ रणः। त्रिरथ-क्रियोशोरोविदार्य्यं च नखैः पुरा। नारसिंहो देवपालः प्रह्लादं ह्रतवान् नृपम्। देवासुरे२ वामनश्च छलित्वा बलिभूर्जितम्। महेन्द्राय ददौ राज्यं इत्थोऽदितिसुश्रवः। वराहस्तु३ हिरण्याक्षं हत्वा देवानपालयत्। उज्जहार भुवं मग्नां देवदेवैरभिष्टुतः। मन्थानं मन्दरं कृत्वा नेत्रं कृत्वा तु वासुकिम्। सुरासुरैश्च मथितं देवेभ्यश्चामृतं ददौ४। तारकामयसङ्ग्रामे५ तदा देवाश्च पालिताः। निवार्येन्द्रं गुरून् देवान् दानवान् शोमवंशजान्। विश्वामित्रवशिष्ठाद्यैरक्षयच्च रणे सुरान्। कपालयन्नि वार्यैव रागद्वेषादिदानवान्६। पृथोरणे भक्षयन्तुरीयश्च धरणो हरिः। ददाह त्रिपुरं देवपालको दैत्यमर्दनः७। गौरीं जिघीर्षुणा रुद्रमन्धकेनार्दितं हरिः। अन्धरूपश्च रेवन्तां चक्रे चान्धासुरार्दनभृद्८। सर्वां फेनमयो भूत्वा देवासुररणे हरन्। दग्धं देवहरं विष्णुर्देवधर्मानपालयत्९। शाल्वादीन् दानवान् जित्वा हरिः परशुरामकः। अपालयत् सुरादींश्च दुष्टघ्नं निहत्य च१०। कालाकेशं११ विषं दैत्यं निराकृत्य महेश्वरात्। भयं निर्णाशयामास देवानां मधुसूदनः। देवासुरे रणे यश्च दैत्यः कोलाहलो जितः१२। पालिताश्च सुराः सर्वे विष्णुना धर्मपालनात्। राजानो राजपुत्राश्च सुतयो देवता हरिः। यदुक्तं यच्च नैवोक्तमवतारा हरेरिमे"।

**द्वादशसप्तमीव्रत** न० ज्ञेया०व० भविष्यपुराणोक्ते माघादिमासेषु द्वादशसु सप्तम्योः कर्त्तव्ये सूर्य्यव्रतभेदे "अथाग्नेय प्रवक्ष्यामि सप्तमीकल्पमुत्तमम्। माघमासात् समारभ्य शुक्लपक्षे युधिष्ठिर!। सप्तम्यां व्रतवान् नक्तो वर्षमेकं व्रती भवेत्। वत्सरं माघमासे तु भानुं संपूज्य कारयेत्। ब्रह्मकूर्चविधानेन यथा ब्रह्मा नृपोत्तम!। षष्ठ्यां भोजयेद्विप्रान् तिलपिष्टगुडोदनैः। अग्निदोषस्य यत्पुण्यं तत्पुण्यमवाप्यते। तपनं फाल्गुने मासि सूर्य्यमित्यभिपूजयेत्। वाजपेयस्य यत्पुण्यं फलं प्राप्नोति दुर्लभम्। सप्तम्यां चैत्रमासे तु मेदांगुरिति पूजयेत्। षष्ठ्याश्चरमं पुण्यं नरः प्राप्नोत्यसंशयम्। वैशाखस्य तु सप्तम्यां धाता इत्यभिपूजयेत्। पयस्यश्चरं पुण्यं सम्यक् प्राप्नोति मानवः। सप्तम्यां ज्येष्ठमासस्य इन्द्रमित्यभिपूजयेत्। अश्वमेधफलावाप्तिर्जायते नात्र संशयः। तथाषाढस्य सप्तम्यां पूजयित्वा दिवाकरम्। वज्रसंज्ञस्य यत्पुण्यं फलं प्राप्नोति पुण्य-

लम्। श्रावणे मासि सप्तम्यामर्यमाणं प्रपूजयेत्। बीजामपीफलं प्राप्य ! नरः प्राप्नोति भक्तितः। रविं भाद्रपदे मासि सप्तम्यार्चयेच्छुचिः। तत्तापुरुषदानस्य फलमाप्नुयात्। आश्वयुक्शुक्लसप्तम्यां सवितारं प्रपूजयेत्। गोसहस्रप्रदानस्य फलमाप्नोति भक्तितः। कार्तिके शुक्लसप्तम्यां सप्तार्चं नाम पूजयेत्। योऽभ्यर्चयति पुण्डरीकं फलं लभेत्। मार्गशीर्षे तथा भानुं पूजयित्वा विधानतः। राजसूयस्य यज्ञस्य फलमाप्नोति वै नरः। भास्करं पुष्यमासे तु पूजयित्वा विधानतः। चतुर्णामपि वेदानां स्वाध्यायस्य फलं लभेत्। तथैव माघसप्तम्यां नामपूजादिकन्तु यः। सौपवासः प्रयत्नेन वर्षमेकं समाचरेत्। पारिते नियमे चाथ सूर्ययागं समारभेत्"।

**द्वादशसाहस्र** त्रि॰ द्वादश च सहस्राणि परिमाणमस्य अण् उत्तरपदवृद्धिः। द्वादशसहस्रसंख्यायुक्ते "एतद् द्वादशसाहस्रं देवानां युगमुच्यते"। "यत् प्राक् द्वादशसाहस्रस्य दितं दैविकं युगम्" इति च मनुः। स्त्रियां ङीप्। द्वादशसाहस्री संहिता। अत्र पक्षे ठञ्। द्वादशसाहस्रिक तत्रार्थे।

**द्वादशांशु** पु॰ द्वादश अंशवोऽस्य। इन्द्रस्तौ "शुक्रः षोडशरश्मिस्तु यस्तु देवो द्वयोमयः। षोडितो नवरश्मिस्तु स्थानमाप्नुत तस्य वै। इन्द्रद्वादशरश्मीकं हरिद्वाभन्तु वेधसः। अष्टरश्मिः शनिश्चन्तु कृष्णं वृत्तमयक्षयम्" मत्स्यपु॰ १२७अ०। द्वादशरश्मिप्रभृतयोऽप्यत्र लिङ्गा०।

**द्वादशाक्ष** पु॰ द्वादशाक्षीव यस्य अच् समा०। १कार्तिकेये। द्वादश मनोबुद्धिसहितानीन्द्रियादीनि अक्षिणीव यस्य। २बुद्धे च हेमच०। "एकाक्षो द्वादशाक्षश्च तथा चैकजटः प्रभुः" भा॰ग॰३६अ॰उक्ते १कुमारानुचरभेदे च।

**द्वादशाक्षर** पु॰ द्वादश अक्षराणि अस्य। द्वादशाक्षरयुक्ते मन्त्रभेदे यथा विष्णोः "ॐ नमो भगवते वासुदेवाय" "नमो भगवते वासुदेवायोद्धारपूर्वकम्। मन्त्रमन्त्रमिदं प्राहुस्तत्त्वज्ञा द्वादशाक्षरमिति" पद्म॰पु॰क्रिया॰। अस्य ॐ क्लीं गोपीजनवल्लभाय स्वाहा" इत्येवं रूपावल्यां शक्तिविषयविद्यायां स्त्री गौरा॰ङीप्। ४द्वादशाक्षरयुक्तपादके जगतीच्छन्दसि न॰ "विश्वे देवा द्वादशाक्षरेण जगतीसदृशं स्तुत्वेमम्" यजु॰८।२१

**द्वादशाक्ष्य** पु॰ द्वादश ज्ञानकर्मेन्द्रियमनोबुद्धिरूपाः पदार्थाः पूजनीयत्वेनाख्याति आ+ख्या-क। बुद्धे हेमच०। बौद्धशब्दे द्वादशायतनशब्दे च विस्तरतो दृश्यम्।

**द्वादशाङ्गी** स्त्री द्वादशानामङ्गानां समाहारः ङीप्। १जिनाभिमते आचाराङ्गादौकादशोपाङ्गसहिते दृष्टिवादरूपे द्वादशानामङ्गानां समाहारे "आचाराङ्गं सूत्रकृतं स्थानाङ्गं समवाययुक्। पञ्चमं भगवत्यङ्गं ज्ञाता धर्मकथापि च। उपासकाऽन्तकृद्दशोत्तरोपपातिकादश। प्रश्नव्याकरणं चैव विपाकश्रुतमेव च। इत्येकादश सोपाङ्गान्यङ्गानि द्वादश पुनः। दृष्टिवादो द्वादशाङ्गी स्याद्गणिपिटकाह्वया" हेमच०। दृष्टिवादश्च पञ्चविधः दृष्टिवादशब्दे दर्शितः। द्वादशाङ्गान्यस्य। २धूपभेदे पु॰ "गुग्गुलुचन्दनं पत्रं कुन्दुरुकुङ्कुमम्। जातीकोशञ्च कर्पूरं जटामांसी च वालकम्। त्वगुशीरञ्च धूपोऽसौ द्वादशाङ्गः प्रकीर्तितः" तन्त्रम्।

**द्वादशाङ्गुल** पु॰ द्वादश अङ्गुलयः प्रमाणमस्य तद्धितार्थे द्वि॰ "द्विगोर्लुगनपत्ये" लुक् च समा०। वितस्तौ परिमाणभेदे अमरः।

**द्वादशात्मन्** पु॰ द्वादशात्मानो मूर्तयो यस्य। सूर्ये। आदित्यशब्दे ६८६पृ॰ धातादयो विष्णुपर्यन्ताः तस्य मूर्तय उक्ताः। द्वादशमेषादिराशयश्चास्य मूर्तयः स्व॰सि॰ उक्ता यथा सूर्य एव पक्षभेदे "पुनर्द्वादशधात्मानं विभजन् राशिसंक्रमम्"। २अर्कवृक्षे च।

**द्वादशादित्य** पु॰ संज्ञायां कर्म॰। १धातादिषु विष्णुपर्यन्तेषु द्वादशसु आदित्येषु २काश्यां स्थेषु द्वादशसु लोलार्कादिषु च "इति काश्यां प्रभावस्तोलम्बसङ्कटमोहदः। कृत्वा द्वादशधात्मानं काशीपुर्यां व्यवस्थितः। लोलार्कं उत्तरार्कञ्च साम्बादित्यमथैव च। चतुर्थो द्रुपदादित्यो मयूखादित्य एव च। खखोल्कशाम्बादित्यो वृद्धकेशवसंज्ञकौ। दशमो विमलादित्यो गङ्गादित्यस्तथैव च। द्वादशश्च रमादित्यः काशीपुर्यां घटोद्भव !। तमोऽधिकेभ्योऽघेभ्यः पाठं रक्षन्त्यमी सदा" काशी॰ख॰३६अ॰

**द्वादशाध्यायी** स्त्री द्वादशानामध्यायानां समाहारः ङीप्। जैमिनीयसूत्ररूपायां द्वादशलक्षणायाम् "धर्मो द्वादशलक्षण्यां व्युत्पादयत्न लक्षणैः। प्रमाणभेदप्रभेदत्वप्रयुक्तिं क्रमसंगतः। अधिकारोऽतिदेशश्च सामान्येन विशेषतः। अङ्गोऽबाधश्च तन्त्रं च प्रसङ्गश्चोदिताः क्रमात्" जैमिनीयन्यायमाला जैमिनिशब्दे २१४६पृ॰द्रष्टव्यम्। द्वादशलक्षणत्वत्व। २मन्वादिसंहितायाञ्च तत्रोद्वादशाध्यायात्मकत्वात्तथात्वम्।

**द्वादशान्त्रिक** त्रि० द्वादश अन्ये अन्यथाभूता अपपाठा जाता अस्य "कर्मण्यध्ययने वृत्तम्" इत्युपक्रमे "बहुच् पूर्वपदाट्ठञ्" पा० ठञ्। जातद्वादशापपाठके कृत्ति-नाध्ययन कर्त्तरि भेदे।

**द्वादशायतन** न० द्वादशविधमायतनम्। बौद्धमतसिद्धेषु द्वादशसु पूजास्थानेषु मनोबुद्ध्यादिषु यथा "अर्थानुपार्ज्य बहुशो द्वादशायतनानि वै। परितः पूजनीयानि किमन्यैरिह पूजितैः। ज्ञानेन्द्रियाणि षट्चैव तथा कर्मेन्द्रियाणि च। मनो बुद्धिरिति प्रोक्तं द्वादशायतनं बुधैरिति"।

**द्वादशायुस्** पु० द्वादश वर्षाः आयुःकालोऽस्य। कुक्कुरे शब्द-माला। आयुश्शब्दे ७६२४० पृष्ठे उक्तमेतत्।

**द्वादशार** न० द्वादश अरा रथाङ्गावयवभेदा इव यस्य। १द्वादशकोष्ठे राशिचक्रादौ "द्वादशारं न हि तज्जराय वर्त्तति चक्रं परि द्यामृतस्य" ऋ०१।१६३।११ "ऋतस्यो-दकस्य सत्यात्मकस्य वादित्यस्य चक्रं पुनःपुनः क्रमण-शीलं मण्डलाख्यं रथचक्रं वर्त्तति पुनःपुनर्वर्त्तते। सञ्चरति। कुत्र। द्यां परि। द्युलोकस्यान्तरिक्षस्य प-रितः। कीदृशं तत्। द्वादशारम्। द्वादशसंख्याकै-र्मेषादिराशिरूपाङ्गैरे रथाङ्गावयवैर्युक्तम्" भा० २तन्त्रोक्ते सुषुम्णानाडीमध्ये हृदयस्थे ककारादिठान्त द्वादशवर्णयुक्ते द्वादशदलकमले च द्वादशदलादयोऽस्यत्र।

**द्वादशाशन** न० द्वादशविधमशनम् शाक० त०। सुश्रुतोक्ते अधि-कारिभेदेन द्वादशविधे अशनभेदे यथोक्तं तत्र उत्तरतन्त्रे।

"अत ऊर्द्धं द्वादशाशनप्रविभागान्व्याख्यास्यामः। तत्र श्लोतोष्णस्निग्धरूक्षद्रवगुरुसूक्ष्मैककालिकद्विकालिकौषधयुक्त-मात्राहीनदोषप्रशमनदृष्टार्थाः। तत्रोष्णमर्दोदावर्त्तान् रक्तपित्तविप्रातुरान्। मूर्च्छितान् स्त्रीषु च क्षीणान् शीतैरन्नैरुपाचरेत्। कफवातामयाविष्टान् विरिक्तान् रूक्षैरुपायिनः। प्रक्लिन्नदेहांश्च नरानुष्णैरन्नैरुपाचरेत्। वातिकान् रूक्षदेहांश्च व्यायामोपहतांस्तथा। व्यवा-यिनश्चापि नरान् स्निग्धैरन्नैरुपाचरेत्। मेदसाभि-परीतांस्तु स्थूलान्क्षुधातुरानपि। कफाभिपन्नदेहांश्च रूक्षैरन्नैरुपाचरेत्। शुष्कदेहान् पिपासार्त्तान् दुर्ब-लानपि च द्रवैः ५। प्रक्लिन्नकायान् व्रणिनः शुष्कै-र्मांसैरिनमेव च। एककालं० भवेद्येषां दुर्बलाग्नि-र्विदह्यते। समाग्नये तथाहारो देवः कालसमो-भयम् ८। क्षीणधर्दोग्निषु देवस्तथौषधसमावृतः ९। मन्दाग्नये रोगिणे च मात्राहीनः १० प्रशस्यते। यथा-र्थदत्तस्त्वाहारो दोषप्रशमनः ११ स्मृतः। अतःपरन्तु स्वस्थानां वृत्तार्थं १२ सर्वमेव च। द्वादशाशप्रविचारा-नेतानेव प्रचक्षते"।

**द्वादशाह** पु० द्वादशभिरहोभिर्निर्वृत्तः ठञ् तस्य लुक्, द्वादशमहः कर्म०, द्वादशानामहां समाहारो वा टच् समा० अह्नादेशान्तत्वात् पुंस्त्वम्। १द्वादशभिरहोभिः साध्ये यागभेदे द्वादशरात्रशब्दे दृश्यम्। २द्वादशे दिने "द्वादशाहः प्रशस्यते" स्मृतिः। ३द्वादशदिनसमा-हारे "सूत्र्यं प्राह्णं मासि मासि अपर्व्याप्राह्णं प्रति। द्वादशाहेन वा कुर्य्यादेकाहे द्वादशाथ वा" ति०त०। अत्र अपर्वणि तृतीया द्वादशानां ग्राह्णाणां मध्ये प्रत्य-हमेकैककरणेन द्वादशदिनव्यापकता बोध्या" द्वादश दि-नानि च आद्यमासमम्बन्धीनि याह्यग्राह्णीति बोध्यम्। द्वादशाहमधीष्टो भूतोभूतो भावी वा" पा० ठञ् तस्य लुक्। द्वादशदिनं व्याप्य ४सत्रसाध्ययागनियोजिते ५भृते कर्मकरे स्वसत्तया तद्व्यापके ६यागादौ ७तत्र भाविनि ज्वरादौ च "ऐकाहिकेषु विकारेषु द्वादशाहिकेषु च व्य-र्थार्थं प्रयोगः" काल्या० त्रौ० १२।६।२५ सूत्रे कर्क०।

**द्वापर** पु० द्वौ परौ प्रकारौ विषयौ यस्य पृषो०। १संयवे। द्वाभ्यां सत्यत्रेताभ्यां परः पृषो०। २सत्यत्रेतायुगानन्तरे युगभेदे च। ३द्वाङ्संख्यान्वितपार्श्वकषायके न० अय-शब्दे ३१४ पृ० दृश्यम्। द्वापरयुगमानन्तु "अष्टौ शतसहस्राणि वर्षाणां मानुषाणि तु। चतुःषष्टिः सहस्राणि वर्षाणां द्वापरं युगम्" मत्स्यपु० १४१अ०। तद्धर्मभेदश्च तत्र १४३अ०उक्तो यथा

"अत ऊर्द्धं प्रवक्ष्यामि द्वापरस्य विधिं पुनः। तत्र त्रेतायुगे क्षीणे द्वापरं प्रतिपद्यते। द्वापरादौ प्रजानान्तु विद्धि त्रेतायुगे तु वा। परिवृत्ते युगे तस्मिंस्ततः सा वै प्रणश्यति। ततः प्रवर्त्तते तासां प्रजानां द्वापरे पुनः। लोभोष्टतिर्बहुगुणं तत्त्वा-नामविनिश्चयः। ध्वंसश्चैव वर्णानां कर्मणान्तु विपर्य-र्ययः। यात्रा वधः परोदर्शो मानोदर्पोऽक्षमा बलम्। तथा रजसमोभूतः प्रवृत्ते द्वापरे पुनः। आद्ये कृते ना-धर्मोऽस्ति स त्रेतायां प्रवर्त्तितः। द्वापरे व्याकुलीभूत्वा कलौ धर्मः प्रणश्यति। वर्णानां द्वापरे धर्माः सङ्कीर्यन्ते

तथाऽऽश्रमाः। दैवमुत्पद्यते चैव युगे तस्मिन् स्मृतिस्मृतौ। द्विधा स्मृतिः स्मृतिर्यत्र निश्चयो नाधिगम्यते। अनिश्चयागमनाद्धर्मतत्त्वं न विद्यते। धर्मतत्त्वे तु विघ्नाते मतिभेदस्तु जायते। परस्परं विभिद्यन्ते दृष्टीनां विभ्रमेण तु। अतो दृष्टिविभिन्नैस्तैः क्रतमत्याकुलमिदम्। एको वेदश्चतुष्पादः संकृत्य तु पुनः पुनः। संचे पादायुषश्चैव व्यस्यते द्वापरेत्विह। वेदश्चैवचतुर्धा तु व्यस्यते द्वापरादिषु। ऋषिपुत्रैः पुनर्वेदा भिद्यन्ते दृष्टिविभ्रमैः। ते तु ब्राह्मणविन्यासैः स्वरक्रमविपर्ययैः। संहिता ऋग्यजुःसाम्नां संहितास्तैर्महर्षिभिः। सामान्याद्दैवतात्त्वैव दृष्टिभिश्चैः क्वचित् क्वचित्। ब्राह्मणं कल्पसूत्राणि भाष्यविद्यास्तथैव च। अन्ये तु प्रस्थितास्तान्वै केचित्तान् मन्यवस्थिताः। द्वापरेषु प्रवर्तन्ते भिन्नदर्शैस्तैः स्वदर्शनैः। एकमाध्वर्यवं पूर्वमासीद्दैवन्तु तत् पुनः। सामान्यविपरीतार्थैः कृतं ब्राह्मणकल्पितम्। आध्वर्यवन्तु मन्त्राणां षड्धा व्याकृतीकृतम्। तथैवाऽऽर्ग्वेदां साम्नां विकल्पैः सप्त संस्तरैः। व्याकृतो द्वापरेऽर्थैः क्रियते भिन्नदर्शनैः। द्वापरे सन्निवृत्ते तु वेदा नश्यन्ति वै कलौ। तेषां विपर्ययोत्पन्ना भवन्ति द्वापरे पुनः। अल्पदृष्टिभिरत्यर्थं क्षयं तथैव व्याधयश्च। मानसः कर्मभिर्दुःखैर्निर्वेदो जायते नरः। निर्वेदाज्जायते तेषां दुःखमोक्षविचारणा। विचारणायां वैराग्यं वैराग्याद्दोषदर्शनम्। दोषाणां दर्शनाच्चैव ज्ञानोत्पत्तिस्तु जायते। तेषां मायाविनां पूर्वं सर्वं स्वायम्भुवेऽन्तरे। उत्पत्स्यन्तीह शास्त्राणां द्वापरे परिपन्थिनः। आयुर्वेदविकल्पाश्च मन्त्राणां ज्योतिषस्य च। धर्मशास्त्रविकल्पाश्च वेदशास्त्रविकल्पनम्। प्रक्रिया कल्पसूत्राणां भाष्यविद्याविकल्पनम्। स्मृतिशास्त्रप्रभेदाश्च प्रस्थानानि पृथक् पृथक्। द्वापरेष्वभिवर्त्तन्ते मतिभेदात्तथा नृणाम्। मनसा कर्मणा वाचा तच्छास्त्रार्थान् प्रसिध्यति। द्वापरे सर्वभूतानां कालः क्रोधपरः स्मृतः। लोभो धृतिर्विभिद्युद्यन्तस्यानामविनिश्चयः। वेदशास्त्रप्रणयनं वर्णानां सङ्करस्तथा। वर्णाऽऽश्रमपरिध्वंसः कामहेतौ तथैव च।

"कारिष्यते परिभवः कश्चिना नरस्य। तां द्वापरस्य सूनूनमहनोत् पुरस्तात्। भैमीनकोपयमनं विष्णो स्त्रेते न द्वापरः किल कश्चिद युगे जगाम" नैष०

द्वापराय पु० पाशकस्य द्वादशसंख्यान्विते पार्श्वे द्वापरं तस्य अयं उक्तानतया पतनम्। द्यूतभेदे द्यूतान्वितपार्श्वकपाशकस्योत्तानतया पतने अवयवे २२४ पृ० दृश्यम्।

द्वामुष्यायण पु० द्वयोः प्रायण+ष्फञो०। द्वयोः पुत्रे द्यूतप्रायणे अवयवे दृश्यम् २७द्यूतके गौतमे सूत्रे च शब्दार्थचि०।

द्वार् स्त्री द्वारयति क्विब्वचीत्या० उक्षा० क्विप्। १मुखनिर्गमनस्थाने अमरः। २उपाये च "आद्यशेवृता तद्द्वारा" सां०सू०"मरुद्भ्य इति तु द्वारि" मनुः"विदयत्र निम्नपतानि नियता द्वारि वेश्मनः" याज्ञ०"वि अयन्नास्रतादधो द्वारो देवीरसश्चतः" ऋ०१।१२।६ "यथाविद्युतावां द्वारि द्वारा प्रपद्येत"शत०ब्रा०११।१।१२२द्वाःस्थ द्वाःस्थितः अमरः। उपाये ज्ञानद्वारा भवेन्मुक्तिः" ज्ञानशब्दे दृश्यम्।

द्वार न० हृ-घिञ् वच्। १मुखनिर्गमस्थाने। मुखभेदे द्वारभेदादस्तत्फलभेदाश्च मुखशब्दे २६१७ पृ० उक्ताः "मनोनवद्वारनिभिद्वदत्ति" कुमा० "मुखजद्वारशोधिभिः" रघुः। २गृहे च"भुजङ्गपिहितद्वारं पातालमधितिष्ठति" रघुः। ३शरीरे अङ्गे च "शान्तःकरणा बुद्धिः सर्वं विषयमवगाहते यस्मात्। तस्मात् त्रिविधं करणं द्वारि द्वारराणि शेषाणि" सां०का० "द्वारि प्रधानं, शेषाणि करणानि बाह्येन्द्रियाणि तैरुपनीतं सर्वं विषयं मनोमुखद्वारा बुद्धिर्यस्माद्व्यवस्यति तस्माद् बाह्येन्द्रियाणि द्वाराणि द्वारवती च शान्तःकरणा बुद्धिरिति" त०कौ०। "तद् (व्याकरणम्) द्वारमपवर्गस्य वाङ्मलानां चिकित्सितम्" हरिः। (त्रिका०।

द्वारक न० द्वारेण प्रवेशेन कायति कै-क। द्वारकापुर्याम्

द्वारकण्टक पु०न०। द्वारस्य कण्टक इव। कपाटे त्रिका०

द्वारका स्त्री प्रवेशेन द्वारेण कायते कै-क टाप् धातुस्वरूपपूर्वत्वात् न ह्रस्वत्वम्। द्वारवत्यां पुर्य्यां द्वारवतीशब्दे दृश्यम् "प्रेक्षको तीर्थतल्या सा किं तीर्थं द्वारका परम्" सर्वतीर्थपरा श्रेष्ठा द्वारका बहुपुण्यदा। यस्याः प्रवेशमात्रेण नराणां कल्मषक्षयम्। दानञ्च द्वारका यात्रा श्राद्धञ्च देवपूजनम्। चतुर्णामपि तीर्थानां गङ्गादीनाञ्च भूमिप!" ब्रह्मवै०श्रीकृष्णजन्मखण्डे।

द्वारगोप पु०द्वारं गोपायति गुप-अच्। द्वारपाले

द्वारकेश्म पु० हृत०। वासुदेवे शब्दच० द्वारकानाथादयोऽप्यत्र

द्वारदातृ द्वारं ददाति दा-तृच्। भूमीसङ्कटके भावप्र०

द्वारप पु० द्वारं पाति पा-क। १द्वारपाले "सर्वस्य लोकस्य द्वारपाः" ज्ञा०उ०२विष्णौ पु० "विष्णुर्देवानां द्वारपः" श्रुतिः।

द्वारपाल त्रि॰ द्वारं पालयति पालि–अण्। द्वाररक्षके दौवारिकशब्दे १७७। पु॰ अस्य लक्षणम् "ततो मद्गुकं गत्वा द्वारपालं महाबलम्। तं वज्रमभिवाद्यैव मोक्षदुःखं फलं लभेत्" भा॰ व॰ ८३अ॰। ततोऽर्घपालं विन्यस्य द्वारपालान् समर्चयेत्" तन्त्रसा॰ देवताभेदे द्वारपालभेदाः तत्र तत्र प्रकरणे तन्नोक्ता ज्ञेयाः। २तीर्थभेदे च "ततो गच्छेत राजेन्द्र! द्वारपालं तरक्षकम्। तत्र तीर्थं सरस्वत्यां वसेन्द्रस्य महात्मनः। तत्स्नात्वा नरो राजन्नभिलोमफलं लभेत्" भा॰ व॰ ८३अ॰ स्त्रियां ङीप्। अस्या अपत्यं रेवत्या॰ ठक् न ठक्। द्वारपालिक द्वारपाल्या अपत्ये पुंस्त्री॰। स्त्रियां ङीत् [टाप्।

द्वारपालक त्रि॰ द्वारं पालयति ण्वुल्। दौवारिके स्त्रियां

द्वारपिण्डी स्त्री द्वारस्य पिण्डीव। देहस्थां जटा॰।

द्वारबलिभुज् पु॰ द्वारदत्तं बलिं भुङ्क्ते भुज–क्विप्। वक्षसि शिवा॰। [पदार्थे ङेमच॰।

द्वारयन्त्रं द्वारे स्थितं यन्त्रम्। (ताला) (कुलुप) ख्याते

द्वार(रा)वती स्त्री द्वाराणि चतुर्वर्णमोक्षद्वाराणि प्रशस्तान्यत्र मतुप् मस्य वः संज्ञायां वा पूर्वपददीर्घः। श्रीवासुदेवनिर्मिते पुरीभेदे तत्पुरी निर्माणप्रकारस्थानादिकं हरिवं॰ विस्तरतो वर्ण्यते तत्सारमत्रोच्यते।

"यानूरं विष्णुराजस्य प्रभेदुर्यदुपुङ्गवाः। ते तत्र रमणीयेषु विषयेषु सुखप्रियाः। सहदुर्यादवाः सर्वे देवाः स्वर्गगता यथा। पुरवास्तु विचिन्वन् स कृष्णस्तु परवीरहा। ददर्श विपुलं देशं सागरानूपशोभितम्। वाहनानां क्षितस्यैव सिकतास्वहस्तिकम्। पुरत्नचयसम्पन्नं क्रतास्त्रदमिव श्रिया। सागरानिलसंवीजं सागराम्बुनिषेवितम्। विषयं विष्णुराजस्य शोभितं पुरत्नचयैः। तत्र रैवतको नाम पर्वतोनातिदूरतः। मन्दरोदारशिखरः सर्वतोऽभिविराजते। तत्रैकलव्यसंवासो द्रोणेनाध्युषितश्चिरम्। प्रभूतद्रुमोपेतः सर्वरत्नसमाकुलः। विहारभूमिस्तत्रैव तस्य राज्ञः सुनिर्मिता। नाम्ना द्वारवती नाम स्वायत्ताऽऽप्तदोषभा। केशवेन मतिस्तत्र पुर्यर्थे विनिवेशिता। निवेशं तत्र सैन्यानां रोचयन्ति स्म यादवाः। ते रक्षकृत्यै दिवसे तत्र यादवपुङ्गवाः। सेनाप्रमाणं सङ्ख्यां चक्रुः स्वस्वावारनिवेशनम्। ध्रुवाय तत्र न्यवसत् केशवः सह यादवैः। देशे पुरनिवेशाय स वृद्ध प्रवरो विभुः। तस्यास्तु विविधं नाम वास्तूनि च महात्मनः। निर्ममे पुरुषश्रेष्ठो मनसा यादवोत्तमः। एवं द्वारावतीञ्चैव पुरीं प्राप्य सयादवाः"। हरिवं॰ ११३ अ॰। "इयं द्वारावती नाम पृथिव्यां निर्मिता मया। भविष्यति पुरी रम्या शक्रस्येवामरावती। तान्येवाख्याः कारयिष्ये चित्रान्यायतनानि च। चत्वरान् राजमार्गांश्च समानन्तःपुराणि च। देवा इवात्र भोदन्तां वसनो विगतज्वराः। बाधमाना रिपुव्याधुपसेनपुरोगमाः। सङ्ग्रान्तां सङ्घवास्तूनि कार्यन्तां त्रिकचत्वरान्। सीयन्तां राजमार्गांश्च प्राकारस्य च या मतिः। प्रेष्यन्तां शिल्पिसङ्घा वै नियुक्ता वेश्मकर्मसु। नियुज्यन्तान्च देशेषु प्रेष्यकर्मकराजनाः। एवमुक्तास्तु वदो सङ्घशः सङ्घतत्पराः। यथानिवेशं संजग्मुश्चक्रुर्वास्तुपरिग्रहम्। स्वलङ्कृतोऽथ भगवान् चक्रुर्यादवपुङ्गवाः। पुण्येऽहनि महाराज! द्विजातीन् प्रतिपूज्य च। वास्तुदेवतकर्माणि विधिनाऽकारयत्ततः। स्थपतीनथ गोविन्दस्तत्रोवाच महामतिः। अत्रार्थे सुविचिन्तं क्रियतामत्र मन्दिरम्। विभक्तचत्वरपथं सुनिविष्टसुदैवतम्। ते तथेति महाबाहुसङ्घा स्थपतयस्तदा। दुर्गकर्मणि सम्भारानुपलभ्य यथाविधि। यथान्यायं निर्ममिरे द्वाराण्यायतनानि च। स्थानानि विदधुस्तत्रां ब्रह्मादीनां यथाक्रमम्। अथाग्नेः सुरेशस्य हृषीकेशस्य च। चतुर्दैवानि चत्वारि द्वाराणि विदधुश्च ते। गुहाचन्द्रं भल्लाटं मुख्यमन्तं तथैव च। ते वेश्मसु युक्तेषु यादवेषु महात्मसु। पुर्याः क्षिप्रं प्रवेशार्थं चिन्तयामास माधवः। तस्य दैवोत्थिता बुद्धिर्विमला क्षिप्रकारिणी। पुर्याः क्षा वै क्षियकरी यदूनामभिवर्द्धनी। शिल्पिसङ्घस्तु देवानां प्रजापतिसुतः प्रभुः। विश्वकर्मा क्षमत्या वै पुरीं संस्थापयिष्यति। मनसा समनुध्याय तस्यागमनकारणात्। त्रिदशाभिसुखः कृष्णो विविक्ते क्षमपद्यत। तस्मिन्नेव ततः काले शिल्पाचार्यो महामतिः। विश्वकर्मा सुरश्रेष्ठः कृष्णस्य पुरतः स्थितः। यदीक्षेत क्षामरः किञ्चिदुत्सृष्टुमिह तोयराट्। ततः क्षायतसङ्घाता पुरी स्यात् पुरुषोत्तम!। एवमुक्तस्ततः कृष्णः प्राग्वेव कृतनिश्चयः। सागरं सरितां नाथमुवाच वदतां वरः। सलिल! दश च द्वे च योजनानि जलाशये। प्रतिसंहृयतामाशा यद्यस्ति मयि

मान्यता। अवकाशे त्वया दत्ते पुरीयं मामके बले। पर्य्याप्तविष्यवाराभा समग्रं विधक्ष्यिष्यते। ततः कृष्णस्य वचनं श्रुत्वा नदनदीपतिः। समाहितेन योगेन उत्ससर्ज्ज जलाशयम्। विश्वकर्मा ततः प्रीतः पुर्य्याः संहृत्य वास्तु तत्। गोविन्दे चैव सम्मानं सागरः कृतवां स्तदा" हरिव० ११६ अ० ततो देवस्य चोलासंवरणानन्तरं तत्कलत्रादीनां ततोऽपगमने सत्वरेण तत्पुर्य्याः प्लावनं कृतम् तत्कथा भा०मौ०७ अ०। "निर्याते तु जने तस्मिन् सागरो मकरालयः। द्वारकां रत्नसम्पूर्णां जलेनाप्लावयत्तदा। यदाहि पुरुषव्याघ्रो भूमेस्तस्या व्यसृजत। तत्तत् संप्लावयामास सलिलेन स सागरः। तद्भुतमभिप्रेक्ष्य द्वारकावासिनो जनाः। तूर्णात्तूर्णतरं जग्मुरूचो देवमचाब्रुवन्" "काशी काञ्ची च मायाख्या त्वयोध्या द्वारवत्यपि। मथुराऽवन्तिका चैव सप्त पुर्य्योऽत्र मोक्षदाः। श्रीशैलः मोक्षदः सर्वः केदारोऽपि ततोऽधिकः। श्रीशैलाच्चापि केदारात् प्रयागं मोक्षदं परम्। प्रयागादपि तीर्थाग्र्यादविमुक्तं विशिष्यते। यथाऽविमुक्ते निर्वाणं न तथान्यत्र कुत्रचित्। अन्यानि मुक्तिक्षेत्राणि काशीप्राप्तिकराणि च। काशीं प्राप्य विमुच्येत नान्यथा तीर्थकोटिभिः" काशी० ७अ० निधिद्वयमपि तप्तमुद्रादिधारणञ्च तन्माहात्म्यकथनात् तत्र विहितं तन्नाम निर्वचनञ्चोक्तं काशीख०७अ०

"सप्तरात्रमुषित्वा तु ययौ द्वारावतीं प्रति। चतुर्थांमपि वर्षाणां यत्र द्वाराणि सर्वतः। अतो द्वारवतीत्युक्ता विद्वद्भिस्तत्त्ववेदिभिः। अस्मीत्यपि च जन्तूनां यत्र चक्राङ्कितान्यहो। किं चित्रं यत्र तत्र स्युः शङ्खचक्राङ्किताः करैः। अन्तकः शिक्षयत्येवं निजदूतान् सुदुर्मुखः। ते त्याज्या वैष्णवैरत्या नामापि परिगृह्यते। श्रीखण्डे क्व स आमोदः स्वर्गे वर्षाः क्व तादृशः। तत् पवित्रं क्व वै तीर्थं, तद्गोपीचन्दने यथा। दूताः! शृणुत सद्भालं गोपीचन्दनलाञ्छितम्। ज्वलदिव्यनवत् सोऽपि दूरे त्याज्यः प्रयत्नतः। तुलस्या लङ्कृताये ये तुलसीनामजापकाः। तुलसीवनमालाये ते त्याज्या दूरतोभटाः। पवित्राणां च सर्वेषां सुपवित्रा वलाधिका। तुलां स्तुति यतस्तस्मात्तुलसीति निरुच्यते। युगे युगे द्वारवत्यारत्नानि परितोमुमुचुः। अद्यीरत्नाकरोऽद्यापि लोकेषु परिगीयते। द्वारवत्यां स्त्रियलोके जनवः कालचोदिताः। चतुर्भुजाः सुर्वैकण्ठे ते पीताम्बरधारिणः। तत्रापि सन्तर्प्य पितॄन् सत्कर्मवर्षि मानवान्। तत्र तेषु च तीर्थेषु सस्नौ सर्वेषु तन्त्रितः" दीर्घे द्वारावती तत्रार्घे "अयोध्या मथुरा माया काशी काञ्ची अवन्तिका। पुरी द्वारावती चैव सप्तैता मोक्षदायिकाः। एतासु पृथिवीमध्ये न गच्छन्ति कदाचन। पुरी द्वारावती विष्णोः प्राक्सनन्योपरिस्थिता। सन्निहा गणिता एताः सर्वाश्च मानिताः सुरैः। यानि कानि च क्षेत्राणि काशीप्राप्तिकराणि वट्" इति भूतशुद्धितन्त्रम्।

**द्वारशाखा** स्त्री ६त०। द्वारस्थावयवे (वाजु) शब्दार्थक०।

**द्वारस्तम्भ** पु० ६त०। द्वाराङ्गस्तम्भे शब्दार्थक०।

**द्वारस्थ** त्रि० द्वारे तिष्ठति स्था–क। १द्वारपाले शब्दक० २द्वारस्थितमात्रे च।

**द्वारादि** "द्वारादीनाञ्च" व्याख्यां पूर्वमेजागमनिमित्ते पा०ग०सू०उक्ते शब्दगणे च गणः"द्वार खर खाध्याय व्यङ्कश खस्ति खर् स्फ्राजत खादुखदु खस् ख" द्वारे नियुक्तः ठक्। दौवारिकः।

**द्वाराध्यक्ष** पु० द्वारेऽध्यक्षः। प्रतीहारे "वेश्यासक्त इवाच द्वाराध्यक्षो विशां पते!" भा०स०२०अ०

**द्वारिक** त्रि० द्वारं पाल्यतयाऽस्त्यस्य ठन्। द्वारपाले द्वारसुन्दरी प्रभृतीनि चत्वारि द्वाराणि सन्त्यस्यां ठन् टाप्। द्वारिका २द्वारवत्यां स्त्री शब्दरत्ना०।

**द्वारिन्** त्रि० द्वारं पाल्यत्वेनाऽस्त्यस्य इनि। १द्वारपाले २द्वारयुते त्रि० द्वारशब्दे ३य्यम्।

**द्वार्य्य** त्रि० द्वारि भवः यत्। द्वारिभवे "द्वार्यं स्यूषे देवी द्वारौ" आश्व०श्रौ० ४।१२।१ द्वारिभवे द्वार्यं स्यूषे" नारा० इष्टिः "चतुर्दंष्ट्रीतं शालाद्वार्यं जुहोति" कात्या० श्रौ०८।१।२६

**द्वा(द्वि)विंश** त्रि० द्वा(द्वि)विंशतेः पूरणः डट्। द्वाविंशति संख्यापूरणे स्त्रियां ङीप्। द्वा(द्वि)विंशत्या युतं शतादि ड। २तद्युते शतादौ त्रि०।

**द्वा(द्वि)विंशति** स्त्री द्वाधिका विंशतिः द्वौ च विंशतिश्च या द्वात् बहुत्वेऽपि एकव०। (बारह) १द्व्यधिकविंशतिसंख्यायां २तत्संख्यायुते च "कर्णौ द्वाविंशतिं भल्लान्" भा० द्रो०४७अ० द्वा(द्वि)विंशतिः प्रमाणमस्य ठन्। द्वा(द्वि)विंशतिक तत्संख्यान्विते त्रि० पूरणे तमप्। द्वा(द्वि)विंशतितम द्वाविंशतिसंख्यापूरणे त्रि०। एवं द्वा(द्वि)त्रिंशद्द्वा(द्वि)चत्वारिंशदादयोऽपि तत्तत्संख्यायां

तत्संख्यान्विते स्त्री एकव०पूरणे ङ तयपौ उच्चैौ ठन्। एवं ङ। द्वा(द्वि)त्रिंशादि तद्युते शतादौ त्रि०सा परिमाणमस्य ठन्। द्वा(द्वि)त्रिंशतिकादि तत्तत्संख्यापरिमाणके त्रि०।

द्वा(द्वि)षष्टि स्त्री द्व्यधिका षष्टिः द्वौ च षष्टिश्च वा वा व्यात् एकव०। १द्व्यधिकषष्टिसंख्यायां २तद्युते च। पक्षे द्विषष्टिरप्यत्र तया युतं शतादि ङ। द्वा(द्वि)षष्ट तद्युते शतादौ। सा परिमाणमस्य ठन्। द्वा(द्वि)षष्टिक तत्परिमाणके त्रि० पूरणे तमप्। द्वा(द्वि)षष्टितम ङट्, द्वा(द्वि)षष्ट तत्संख्यापूरणे ङटि स्त्रियां ङीप्।

द्वा(द्वि)सप्तति स्त्री द्व्यधिका सप्ततिः द्वौ च सप्ततिश्च वा वा व्यात् एकव०। १द्व्यधिकसप्ततिसंख्यायां २तत्संख्याते च "द्वासप्ततिर्मृदुत्वसे पादाक्षे द्वादश क्रमात्" व्यो०त०। द्विसप्ततिरप्यत्र। तया युतं शतादि ङ। द्वा(द्वि)सप्तत तद्युते शतादौ त्रि० तस्याः पूरणे तमप्। द्वा(द्वि)सप्ततितम ङट्। द्वा(द्वि)सप्तत तत्संख्यापूरणे त्रि० स्त्रियां ङटि ङीप्।

द्वि त्रि० द्वि०व०। द्वु-ड। १द्वित्वसंख्यायां "द्वौ कवोर्द्विवचनैकवचने" पा० द्वित्वार्थकतायां भाष्यप्रामाण्यात्। २द्वित्वसंख्यान्विते च। सर्वनामकार्यं तस्य जसादिप्राप्त्यभावात् त्यदादित्वात् अत्वम्। द्वौ द्वे। द्वयोः स्त्रियोः पुंसः द्विपुंस इत्यादौ सर्वनामत्वात् इत्तिमात्वे पुंवद्भावः। अकच्। द्वके इत्यादि। स्वार्थे कैनोपपत्तौ चित्स्वरार्थमकच्।

द्विक त्रि० द्वि०व०। द्वि-अकच्। १द्वित्वसंख्यायां तद्युते त्रि० स्त्रियां टेरकचि द्वके इत्येव स्वार्थे के तु प्रत्ययस्वकात् पूर्वमत इत्त्वम् द्विके इति भेदः। द्वयोरवयवः द्वौ अवयवौ वा यस्य कन्। २द्वित्वे न० एकव०। ३तद्युते त्रि० "एकं द्विकं त्रिकं चैव चतुष्कं पञ्चकं तथा। अमी पञ्चैव सिद्धार्थाः" भर्तृहरिः। द्वौ दीव्यते दशादिना अच् शतादौ कन्। ४दशादिना दीव्यमानद्विरूपकादिके शतादौ। "द्विकं शतं वा षट्कीवात् सतां धर्ममनुस्मरन्" "द्विकं शतस्य षट्कानो न भवत्यर्थकिल्विषी" मनुः द्वौ को ककारौ वाचकशब्दे यस्य। ५काके ६कोके च पुंस्त्री० मेदि०। तयोर्वाचकशब्दे ककारद्वयस्य सत्त्वात् तथात्वम्। स्त्रियां जातित्वात् ङीप्।

द्विककुद् पुं०द्वे ककुदे यस्य अन्यपदोपः समा०। उष्ट्रे हेमच०

द्विकर त्रि० द्वौ करोति संख्यापूर्वकत्वात् अङ्येत्यादौ क-ट। १द्विसंख्यान्वितकारके। द्वौ करौ यस्य २द्विभुजे च। द्वयोः करयोः समाहारः। ३करद्वये "वृभुक्षितः किं? द्विकरेण भुङ्क्ते" उद्भटः।

द्विकार्षापण(णिक) त्रि० द्वाभ्यां कार्षापणाभ्यां क्रीतं ठक् तस्य वा लुक्। द्वाभ्यां कार्षापणाभ्यां क्रीते पक्षे ठकोऽलोपे। द्विकार्षापणिक तत्रार्थे।

द्विकौडविक त्रि० द्वौ कुडवौ प्रयोजनमस्य ठञ्, द्वाभ्यां कुडवाभ्यां क्रीतं वा ठक् न तस्य लुक्। उत्तरपदवृद्धिः। १द्विकुडवप्रयोजनके २द्वाभ्यां कुडवाभ्यां क्रीते च।

द्विगु त्रि० द्वौ गावौ यस्य मौघत्वात् गोर्लुक्। १द्वयोर्गवोः समन्विनि द्विगवस्वामिके पुरुषे। "इन्द्रो द्विगुरपि चाहं सततमसदृष्टये व्ययीभावः" उद्भटः। व्याकरणोक्ते तत्पुरुषान्तर्गते पा० स्वरोक्ते २समासभेदे पुं स च स्त्रि०ङी० मनोरमादौ च दर्शितो यथा "दिक्संख्ये संज्ञायाम्" २।१।५०। पा० "समानाधिकरणेनेत्यापादपरिसमाप्तेरधिकारः। संज्ञायामेवेति नियमार्थं सूत्रम्। पूर्वेणैकार्थेऽपि। समर्थैः। नेह उत्तरा इत्याः। पञ्च ब्राह्मणाः" स्त्रि०ङी०। "तद्धितार्थोत्तरपदसमाहारे च" पा० २।१।५१। पा०"तद्धितार्थे विषये उत्तरपदे च परतः समाहारे च वाच्ये दिक्संख्ये प्राग्वत्। पूर्वस्यां शालायामभवः। पौर्वशालः। समासे कृते दिक्पूर्वपदादसंज्ञायां अट्रति ञः। सर्वनाम्नो वृत्तिमात्रे पुंवद्भावः। आपरशालः। पूर्वशाला प्रिया यस्येति त्रिपदे बहुव्रीहौ कृते प्रियाशब्दे उत्तरपदे पूर्ववोत्तरपुरुषः तेन शालाशब्दे आकार उदात्तः। पूर्वशालाप्रियः। द्विगु समाहारो नाम्नानभिधानात्। संख्यावाचकद्वितार्थे परस्यां मातृश्यामपत्यम् श्राण्मातुरः। पञ्च गावो धनं यस्येति त्रिपदे बहुव्रीहावन्तरतत्पुरुषस्य विकल्पे प्राप्ते द्वन्तत्पुरुषयोरुत्तरपदे नित्यसमासवचनम्" स्त्रि०ङी० "नियमार्थमिति विशेषणं विशेष्येणेत्यनेनैव सिद्धे तत्पुरुषे संज्ञायामेव दिक्संख्ये समस्येते नान्यत्रेति नियमकमिदमिति भावः। त्रिलोकनाथ इत्यादौ तु उत्तरपदद्विगुरिति व्यस्तकत्वेऽपि न क्षतिः। पूर्वसूत्रमित्यादौ संज्ञाभावेऽपि कालवाचकत्वात् समासो, न चात्र दिग्विशेषबोध उदयगिर्यादिसम्बन्धाया एव दिक्त्वात् एवं देशवाचकेनापि समास इति वृद-

वम्" मनो०। "तद्धितार्थोत्तरेत्यादिसूत्रे वैषयिके आधारे सप्तमी। विषयत्वज्ञानेकविधमित्याह तद्धितार्थे विषये इत्यादि तद्धितार्थे वाच्ये इति तु नोक्तं पञ्चनापितिरित्यादौ समासेनोक्तत्वात्तदुत्तरं तद्धितानुत्पत्तिप्रसङ्गात्। अतएव द्विगोस्तद्धितस्य लुग्वचनं चरितार्थमन्यथा तदर्थस्य समासेनोक्ततयाऽप्रयोगात् तदुत्पत्तौ कथं लोपः स्यात्"। "समाहारः समूहः स चावयवाभिन्नो बुद्धिकल्पितभेदवान्। अतएव समूहं प्रति तस्योपसर्जनत्वं तेन पञ्चखट्वीत्यादिसिद्धिः तत्र खट्वाशब्दस्योपसर्जनत्वेन ह्रस्वे कृते एवादन्तत्वे सत्येव लोपः प्रकृतेरित्यत्र विस्तरः। अत्रेदं बोध्यं सामूहिकस्य तद्धितस्य लुकि पञ्चगवमित्यत्र गोरतद्धितलुकीति टच्न स्यादिति विषये इत्युक्तमेवंतु समाहारे वाच्ये इति तस्य पृथग्यत्नकरणसामर्थ्यादेव समाहारे इत्यावश्यकेन वाच्ये इति व्याख्यातमिति" "तथाच समासेनैव समाहारस्योक्तत्वात् न सामूहिकतद्धितोत्पत्तिरिति भावः" मनो०"एतद्वार्त्तिकसूत्तरपूर्वेत्यादिदिङ्मात्रमेवग्रन्थमारभ्यणीयं तेन प्रकृते पुंवद्भावेनोपपत्तावपि न विफलतेति बोध्यम्" "उदात्त इति अवति त्वदान्तरतत्पुरुषे पूर्वपदप्रकृतिस्वरेण पूर्वपदप्रकृत्यादुदात्तत्वमेव स्यादिति भावः" मनो० "प्राग्भातुर इति "भातुरत् संख्यासंभद्रपूर्वायाः" पा० इत्युदादेशः अनपत्य इत्युक्तेर्द्विगोर्लुगिति न लुक्" "विकल्पे प्राप्ते इति सङ्घाविभाषयेति शेषः। ततश्च टजभावे पञ्चगोधन इत्यपि स्यादिति भावः" "एतच्चोभयत्रापि नित्यतावोधकमिति बोध्यम् अतएवैतद्वार्त्तिकसूत्रा सप्तदायवत्तावयवानां कदाचिदप्यवृत्तिर्मा भूदिति प्रयोजनसूत्रं भाष्ये" "इन्द्रोत्तरतत्पुरुषोदाहरणन्तु वाक्यं इषच्च प्रिये अस्य वाग्रहपदप्रिय एवं स्त्रीप्रानड्प्रिय इत्र त्रिपदे बहुव्रीहौ कर्तव्ये पूर्वं नित्यसमासेन समासान्तोऽपि नित्य एव" मनो०।

यद्यप्यत्रिप्रकाशिकायामेतल्लक्षणादिकसूत्रं यथा

"द्विगुं लक्षयति। संख्याशब्दयुतं नाम तदलक्ष्यार्थबोधकम्। अभेदेनैव यत्स्वार्थं स द्विगुस्त्रिविधो मतः। संख्यावच्छिन्नसमूहं यत्पदोत्तरत्वविशिष्टं यद्नाम स्वार्थधर्मिकं तादात्म्येन तदलक्ष्यार्थस्यान्वयबोधं प्रति समर्थं तन्नामोत्तरतापन्नं तन्नामैव तदलक्ष्यार्थाभिन्नस्वार्थे द्विगुरुच्यते। त्रिकटु त्रिभुवन चतुर्युग चतुर्वर्ग पञ्चगव्य पञ्चामृत षड्रस षट्पदार्थ सप्तर्षि अष्टनाग अष्टवसु नवरस नवग्रह दशमूल एकादशरुद्र एकादशेन्द्रिय द्वादशादित्य इत्यादिकस्तु कर्मधारयः शुक्लत्रादिपदोत्तरत्वावच्छिन्नबोधकतया न पूर्वपदलक्ष्यार्थस्य बोधकत्वेकटुप्रभृतिभ्यः कटुत्वादिसामान्यस्यापतीतेः। पञ्चमूलीत्यादौ तु मूलपञ्चकत्वेनैव मूलविशेषेषु तात्पर्यं नतु विशेषरूपेणापि अतएव "कण्टकार्यादिकं मूलं गाम्भार्यादि च यत्पञ्चकं तदुभयं दशमूलमदाहृतमित्यादिकत्ताद्रूप्येण बोधस्यलीयः प्रयोगः। "वर्षाकाले मघर्क्षेण युक्ता चापि त्रयोदशी" इत्यादिवदेकवचनस्य साधुत्वसम्भवात् द्वयोरुपस्थित्याद्यर्थं द्विरूपादिपदं नाभेदेन द्विरुक्तेरनुभावकम्। एकसंख्याया विशिष्टं बोधयदपि एकपदं न पर्याप्तिसंसर्गेण तदवच्छिन्नस्य बोधकं, द्वितयादिपदं पर्याप्त्या द्वित्वावच्छिन्नं प्रतिपादयदपि न तत्र शक्तं वाक्यत्वादतोनेकघटद्वितयघटेत्यादिकर्मधारयेऽतिप्रसङ्गः। सप्तगती पञ्चतारामित्यादौ च यद्यपि यते धर्मिणि सप्तानामभेदेन नान्वयः बाधितत्वात्तापि सप्तपदलक्षितस्य, द्विगुत्वङ्गाप्यत्तेः तथापि अतपदार्थैकदेशे अतत्संख्यायां तस्याः सप्तत्वसम्भवादिति वदन्ति। द्विगार्यं गच्छत इत्याद्यव्ययीभावस्तु पूर्ववत्। स चायं द्विगुस्त्रिविधः तद्धितार्थोत्तरपदसमाहारभेदात्। तत्र तद्धितार्थं द्विगुं लक्षयति। तद्धितार्थान्वितस्वार्थस्तद्धितार्थद्विगुर्मतः। तद्धितार्थं लाक्षणिकस्वान्त्यनामा तत्पुरुषः। यो द्विगुः स्वोत्तरतद्धितार्थान्वितस्वार्थकः स तद्धितार्थद्विगुः। द्विखुरो दृष्ट इत्यादौ द्वाभ्यां खुराभ्यां क्रीतस्य द्विखुरो गौरित्यादौ द्वाभ्यां वर्षाभ्यामभिव्रजितस्य द्विदमं पवित्रमित्यादौ द्वाभ्यां दमाभ्यां निर्मितस्य, द्विगुणं स्वर्णमित्यादौ द्वाभ्यां गुणाभ्यां तुलितस्य, त्रिकाण्डः पुरुष इत्यादौ त्रिभिः काण्डैः परिमितस्य, पञ्चकपालपुरोडाशादौ पञ्चभिः कपालैः संस्कृतस्य, बोधने लुप्तस्यैव ठगादितद्धितस्य क्रीताद्यभिधायकत्वात्, परिमितत्वाप्रतीतेनेदम्। उक्तप्रयोगेषु द्विगोरन्तिमस्यैव क्रीतादिरूपार्थो लक्ष्यते नतु लुप्तमादिरप्यपेक्ष्यतेऽतस्तद्धितार्थत्वाच्चाक्षणिकस्वान्त्यनामको द्विगुरेव तद्धितार्थद्विगुरिति फक्किकाप्रामाण्यमतन्तु न युक्तम् अनर्थकत्वात् पाञ्चनापितिरित्यादौ पञ्चानां पुरुषाणामपत्यस्य पञ्चगार्ग्यरूपो गौरित्यादौ पञ्चानां गर्गाणां भूतपूर्वस्य बोधने तद्धितेनैव स्वार्थस्यापत्यभूतेरुपस्थापनात् द्विरुक्तेश्चरुः प्रयु-

रित्यादावुत्तरपदस्य शक्तिविरहेण क्रीतादर्थे लाक्षणिकत्वायोगात्। उत्तरपदद्विगुं लक्षयति। स्वान्तर्निविष्टशब्दाभ्यां शब्दान्तरसमासगः। यो द्विगुः शाब्दिकैरुक्तः स उत्तरपदद्विगुः। यो द्विगुः स्वघटकनामभ्यां सह स्वाकाङ्क्षनामान्तरेण समासस्यान्तर्गतः स उत्तरपदद्विगुः यथा पञ्च गावो धनमस्येत्यादिविग्रहे पञ्चगवधनः पुरुष इत्यादौ बहुव्रीह्यादिनिविष्टः पञ्चगवादिः। समाहारद्विगुं लक्षयति। स्वार्थान्वितसमाहारलक्षकस्यान्त्यशब्दकः। उक्ताभ्यामितरः किं वा समाहारद्विगुर्द्विगुः। स्त्रीपक्षाश्रयार्थस्य समाहारलक्षको यदीयान्त्यशब्दः स द्विगुः समाहारद्विगुः पञ्चपूलीत्यत्र हि योगलभ्यानां पञ्चानिन्नपूलानां समाहारः परस्वपूलशब्देन लक्ष्यते न तु तत्र द्विगोः शक्तिरन्यलभ्ये शक्त्ययोगात् अतएव न लक्षणापि शक्यसम्बन्धस्यैव लक्षणात्वेन वाक्ये तदसम्भवात्। यदि च पञ्चपूलीत्यतः पञ्चानां पूलानामेव बोधो न तु तत्समाहारस्यापि अतएव पञ्चपूलीं छिनत्ति इत्यादिकः प्रयोगः प्रमाणम् अन्यथा समूहालम्बनः समाहारस्य छिदाद्यसम्भवेन तदयोग्यत्वापत्तेः पुनादैर्हित्वबहुत्वेऽप्येकवचनस्यानुशासनिकं दारादैर्बहुवचनवदुपपद्यते। न च द्रव्यप्राधान्ये पञ्चखट्वीत्यादौ स्त्रीलो न स्यात् गोशब्दस्येव स्त्रीप्रत्ययस्यापि समासान्तस्योपसर्जनस्यैव तद्विधानादिति वाच्यं समाहारसंज्ञकद्विगोरन्यस्य स्त्रीप्रत्ययस्य पुंवदेव लुक्त्वविधेर्बलवत्त्वात् प्रयोगानुसारित्वात् कल्पनायाः, पञ्चपाचकीत्यादावव्याप्तिश्च तत्रोत्तरपदस्य वाक्यत्वेन लक्षकत्वायोगादिति सूक्ष्मेक्षिकया लक्ष्यते तदा पूर्वनिरुक्ताभ्यां तद्धितार्थोत्तरपदद्विगुभ्यां भिन्नोद्विगुरेव समाहारद्विगुर्बाह्यः। एवञ्च द्विगोः कर्मधारयान्तर्गतत्वेऽपि न क्षतिरिति हृदि विभावनीयम्"।

**द्विगुण** त्रि० द्वाभ्यां गुण्यते गुण-कर्मणि खच्। द्वाभ्यां गुणिते "एतच्चौचं स्मृतिस्थानां द्विगुणं ब्रह्मचारिणाम्" "समममाङ्गणे दानं द्विगुणं ब्राह्मणव्रुवे"दिति मनुः।

**द्विगुणीकृ** द्विगुण+च्वि-कृ-क्त्वार्थे ड्याच् द्विगुणकर्मणिकरणे सक० उभ० अनिट्। द्विगुणीकरोति क्षेत्रकर्मणि द्विगुणवर्षणं करोतीत्यर्थः सि० कौ०

**द्विगुणाकर्ण** त्रि० द्विगुणौ कर्णौ लक्षणमस्य "कर्णे लक्षणस्य" पा० कर्णशब्दे परे पूर्वस्य दीर्घः। द्विगुणकर्णरूपलक्षणान्विते।

**द्विगुणित** त्रि० द्वाभ्यां गुणितः। द्वाभ्यां गुणिते, द्विगुणितसान्द्रतराच्छिपक्ष्मभाजा" माघः "क्षेत्रस्य यस्य वदनं मदनारितुल्यं दिग्वस्त्रा द्विगुणिता" नीला०

**द्विचरण** त्रि० द्वौ चरणौ यस्य। १द्विपादे मनुष्यादौ "गतः कालो यत्र द्विचरणपशूनां क्षितिभुजां पुरः स्त्रीलुब्धा विषयसुखमास्वादितमहो" शान्तिश० द्विचरणा अपि पशवः पशुतुल्याः पशूनां चतुश्चरणत्वे प्रसिद्धेऽपि नृणां द्विपदत्वेन पशुतुल्यत्वात् अपूर्णपशुत्वमिति गम्यते। २राशिभेदे द्विपदशब्दे दृश्यम्। ३पदद्वये न०

**द्विज** पु० द्विर्जायते सुलभे इत्यौ द्विशब्दः जन-ड। १संस्कृते ब्राह्मणे "जन्मना जायते शूद्रः संस्कारैर्द्विज उच्यते" स्मृतिः। २ब्राह्मणक्षत्रियवैश्येषु च "मातुर्यदग्रे जायन्ते द्वितीयं मौञ्जीबन्धनात्। ब्राह्मणक्षत्रियविशस्तस्मा देते द्विजाः स्मृताः" याज्ञ०। ३दन्ते तस्योत्पन्नस्य पतने पुनर्जन्मनो लोकप्रसिद्धेः। ४अण्डजे च अमरः। प्रसवानन्तरं पुनरण्डात् तस्य प्रकाशरूपोत्पत्तेर्द्विजत्वम्। ५तरुवृक्षे राजनि०। ६द्विर्जातमात्रे त्रि०। तत्र दन्ते "द्विजावलीवासनिशाकरांशुभिः शुचिस्मितां वाचमयोच्चयुतः" माघः विप्रे अण्डजे च "स्मितसुन्दरचन्द्रसुन्दरः सपद्मको मदयन् द्विजान् जनितमीनकेतनः" माघः।

**द्विजकुत्सित** पु० द्विजैः कुत्सितः। क्षेत्रजातकक्षे (नोनाघाता) राजनि०। द्विजानामन्त्यजत्वनिषेधात् तथात्वम्।

**द्विजदास** पु० ६त०। शूद्रे राजनि०।

**द्विजन्मन्** पु० द्वे जन्मनी यस्य। द्विजशब्दार्थे "वैदिकैः कर्मभिः पुण्यैर्निषेकादिर्द्विजन्मनाम्। कार्यः शरीरसंस्कारः पावनः प्रेत्यचेह च" मनुः

**द्विजपति** पु० ६त०। १चन्द्रे त्रिका०। "द्विजानामौषधीनाञ्च सोमं राज्येऽभ्यषेचयत्" हरिवं० २२७अ०। २कर्पूरे च अमरः। ३द्विजश्रेष्ठे "प्रधानोपहृतं परिपूर्णं द्विजमण्डलचनाचमूं"काद०। ४पक्षिश्रेष्ठे ५गरुडे च [त्रिका०।

**द्विजप्रपा** स्त्री द्विजार्थं पक्षिणसहिता प्रपा। आलबाले

**द्विजप्रिया** स्त्री ६त०। १सोमलतायां राजनि० तस्याश्च द्विजानां सोमयागाङ्गसाधनत्वात् तथात्वम्। २द्विजप्रियभार्यायां त्रि०।

**द्विजबन्धु** पु० द्विजस्य बन्धुरिव। अब्राह्मणे भक्तदेवत्वादौ अपकृष्टद्विजे। "स्त्रीशूद्रद्विजबन्धूनां त्रयी न श्रुतिगोचरा" स्मृतिः।

**द्विजब्रुव** पु० द्विजमात्मानं आत्मा ब्रूते ब्रू-क। जातिमात्रेण द्विजातिमानिनि द्विजविहितकर्माकारके द्विजे

ब्राह्मणमनुवोऽध्यत्र। "समग्रब्राह्मणे दानं द्विगुणं ब्राह्मणमुवे। अधीते शतसाहस्रमनन्तं वेदपारगे" मनुः

द्विजराज पु० ६त० टच् समा०। १चन्द्रे अमरः। द्विजपतिशब्दे दृश्यम्। "इत्थं द्विजेन द्विजराजकान्तिः" रघुः। २कर्पूरे ३द्विजश्रेष्ठे ४द्विजोत्तमे विप्रे ५पक्षीन्द्रे गरुडे च।

द्विजलिङ्गिन् पु० द्विजस्य लिङ्गमस्यस्य इनि। १क्षत्रिये त्रिका०। २विप्रवेशधारिणि च। "तान् सर्वान् घातयेद्राजा मूढांस्तु द्विजलिङ्गिनः" मनुः।

द्विजवाहन पु० द्विजः गरुडो वाहनमस्य। नारायणे "एवं त्वमसि देवानां मन्मानां द्विजवाहनः। तच्छरीरं यतं ब्रह्मन्! जगत्प्रकरणं त्विदम्" हरिवं ७६अ०

द्विजव्रण पु०न० ६त०। दन्तार्बुदे दन्तरोगभेदे राजनि०।

द्विजश्रप्त पु० श०। राजमाषे (बरबटि) शब्दच०। तस्य द्विजैर्भोजनस्य निषिद्धत्वात् तथात्वम्।

द्विजसेवक पु०६त०। शूद्रे शब्दक०। २द्विजसेविमात्रे त्रि०।

द्विजा स्त्री द्विजायते जन-ड। १रेणुकानामगन्धद्रव्ये अमरः २भार्य्यां मेदि०। ३पालङ्क्यां (पालङ) शाकभेदे शब्दच०। तासां कर्तनेऽपि पुनर्जायमानत्वात् तथात्वम्। ४द्विजजातिस्त्रियां ४तत्कन्यां च स्त्री ङीप्।

द्विजाग्र्य पु० द्विजेषु अग्र्यः। विप्रे "अद्भिरेव द्विजाग्र्याणां कन्यादानं विशिष्यते"। "ब्राह्मं हुतं द्विजाग्र्यायां प्राशितं पितृतर्पणम्" मनुः। [कटुत्वात् राजनि०।

द्विजाङ्गी स्त्री द्विजस्य दन्तस्याङ्गमिव मूलमस्या० ङीप्।

द्विजाति पु० द्विः जातिर्जन्म यस्य। १जन्मद्वये अमरः। २ब्राह्मणक्षत्रियवैश्येषु। "अद्भिर्द्विजातिभिर्ज्ञातो न भूयोभागमर्हति" स्मृतिः "ब्राह्मणक्षत्रियविशस्त्रयोवर्णा द्विजातयः। चतुर्थ एकजातिस्तु शूद्रो नास्ति तु पञ्चमः" मनुः। तेषां द्विर्जन्मत्वं द्विजशब्दे दृश्यम्। ३क्षत्रजे मेदि०। ४दन्ते च

द्विजानि पु०ङे जाया यस्य निङ्। द्विभार्य्यके "अनर्वोनेव चरति द्विजानिः" ऋ०१०।१०१।११

द्विजायनी स्त्री द्विजः अयते ज्ञायतेऽनया अय-गतौ गत्यर्थस्य ज्ञानार्थत्वात् ल्युट् ङीप्। यज्ञोपवीते त्रिका०।

द्विजालय पु० ६त०। १दन्तस्थे खगालये कोटरे शब्दच० २नीडे। ३द्विजानां गृहे च।

द्विजिह्व पुंस्त्री० द्वे जिह्वे यस्य। सर्पे स्त्रियां जातित्वात् ङीप्। तेषां द्विजिह्वत्वकथा भा० आ० ३३अ० यथा

"अथ सर्पानुवाचेदं सर्वान् परमहृष्टवत्। इदमामीतमस्तं निक्षेप्स्यामि कुरुष्वं वः। स्वाता मङ्गलसंयुक्ताश्चतः प्राप्नीत पन्नगाः!। भवद्भिरिदमाशीर्भिर्दृढं तद्धि मतादा। अदाशी चैव मातेयमद्यप्रभृति चास्तु मे। यथोक्तं भवतामेतद्यो मे प्रतिपादितम्। ततः स्वातं गताः सर्पाः प्रहृष्टा तं तथेत्युत। अथोऽप्यस्तमादित्य जगाम दिवं पुनः। अथागतास्तद्वेगं सर्पाः सुधार्थिनस्तदा। स्वाताश्च कृतजप्याश्च प्रहृष्टाः कृतमङ्गलाः। यत्रैतदस्तं चापि स्थापितं कुशसंस्तरे। तद्विज्ञाय कृतं सर्पाः प्रतिमायाश्चतत्र तत्। सोमस्यानभिषं चेति दर्भांस्ते लिलिहुस्तदा। ततो द्विधाकृता जिह्वा सर्पाणां तेन कर्मणा। अमृतस्यामृतस्यार्हभीक्षेऽथ पवित्रियः। एवं तदस्तं तेन हुतमा हुतमेव च। द्विजिह्वाश्च कृताः सर्पा गरुडेन महात्मना"। २सूचके च त्रि० अमरः। ३खले मेदि०। ४चौरे ५दुःसाध्ये च शब्दर०। तेषां सर्पतुल्यमर्माविधत्वात्तथात्वम्। "परस्य मर्माविधसूचकतां निजस्य द्विजिह्वतादोषमजिह्मगामिभिः"। "तमिहमाराधयिषुं सकर्णकैः कुलैर्न भेजे फणिनां भुजङ्गता" माघः।

द्विजेन्द्र पु० द्विज इन्द्र इव उपमितसमा०। १द्विजश्रेष्ठे ६त०। २चन्द्रे ३कर्पूरे च "द्विजेन्द्रकान्तं श्रितवत्यसंश्रिया" माघः।

द्विजेय पु० ६त०। १गरुडे २चन्द्रे ३हेमच० ४कर्पूरे च। द्विजेश्वरादयोऽप्यत्र। "तस्यत्ययोगाद्गुगतं शिशिरांशुं द्विजेश्वरम्" हरिवं० ४५अ०।

द्विजोपासक पु० द्विजस्योपासके उप+आस-ण्वुल्। द्विजसेवके शूद्रे शारस्करनिघ०।

द्विजोत्तम पु० द्विजेषु उत्तमः। विप्रे।

द्विठ पु० द्वौ ठकारौ लेखनाकारे यस्य। १विसर्गे तस्य लेखनाकारस्य द्विठकाराकारत्वात्तथात्वम् शारदातिलक व्याख्याने राघवभट्टः। लक्षितलक्षणया २स्त्रोतायाम् तस्याः विसर्गशब्दवाच्यत्वागार्थकत्वात् तथात्वम् समा० द्विगुः। ३ठकारद्वये न०। [दृश्यम्।

द्वित पु० १देवभेदे २ऋषिभेदे च एकशब्दे १३६५।६६८० द्वितय न० द्वयोरवयवः संख्याया अवयवे तयप्। द्वित्वसंख्यायां "प्रकार्य सूत्रद्वितयं तयोर्वेत्ति युतिर्भवेत्। "दृश्यन्ते पञ्चदशभिराम्नाढादितयं तथा"। "कटाद्वितयलेव संपुटं गोलकाकृति" सू०सि० द्वावयवावस्य।

२द्वित्वसंख्याविशिष्टे त्रि० अस्य जसि वा सर्वनामता द्वितये द्वितयाः। "द्वुभसानुभतोः किमन्तरं यदि वायौ द्वितयेऽपि तेऽचलाः" किरा० "अधिकं गुणभे शुभंयुना द्वितयेन हयमेव सङ्गतम्। पदसङ्गमजेन पैङ्कं विनयेनास्य नवञ्च यौवनम्" रघुः। अस्य स्त्रीत्वमपि उभयत्र ङीप्।

**द्वितीय** त्रि० द्वयोः पूरणः तीय। द्वित्वसंख्यापूरणे तस्याः डित्त्वं वा सर्वनामकर्म। "एकमेवाद्वितीयं ब्रह्म" श्रुतिः। "द्वितीयमाभी न हि शब्द एष नः" रघुः "मातरस्येऽधिजननं द्वितीयं मौञ्जिबन्धनात्" मनुः २यत्रे पु० त्रिका०। २भार्य्यायां स्त्री टाप् अमरः। चन्द्रस्य द्वितीयकलायाः सूर्य्यकिरणप्रवेशनिर्गमयोर्मध्ये क्रियारूपे तदुपलक्षिते कालभेदे वा ५तिथिभेदे स्त्री तस्याः व्रताद्युत्कालनिर्णयः कालमा० दर्शितो यथा "प्रथमद्वितीयादीनां पञ्चदशकलानां क्रमेण चन्द्रमण्डलप्रवेशनिर्गमनाभ्यां शुक्लकृष्णपक्षयोः प्रतिपद्द्वितीयादिनामधेयास्तिथयो भवन्ति। तत्र प्रतिपदि योनिर्णयः पूर्वप्रकरणेऽभिहितः स एवोत्तरासु सर्वासु तिथिषु साम्येन सञ्चारयितव्यः। विशेषांस्तु तत्र तत्राभिधास्ये। प्रतिपदि दैवं पित्र्यं च व्यवस्थापितम्। दैवं षड्विधम् उपवासैकभक्तनक्तायाचित दानव्रतभेदेन, नीराजनजपहोमादयस्तु व्रतशब्देनैव संगृहीताः। पित्र्यं द्विविधम्। एकोद्दिष्टं पार्वणं चेति। तत्र सर्वत्र कर्मकालव्याप्तियुक्ताया एव तिथेरनुष्ठानाङ्गत्वं स्मृतिष्वभिप्रेतम्। कर्मकालश्च द्विविधः मुख्यो गौणश्चेति। तद्यथा एकभक्ते मध्याह्नो मुख्यः। व्यायामवर्जितो गौणः। तिथिव्याप्तिर्द्विविधा स्वाभाविकतिथिव्याप्तिः साकल्यापादिततिथिव्याप्तिश्चेति। यदा सङ्गवपर्य्यन्तामावास्या तदानीन्तनपरिजनो मध्याह्नोमुख्यायैव प्रतिपदा व्याप्ता भवति। यदा त्वपराह्णादिमारभ्य तिथिक्षयवशात्परेद्युः सङ्गवान्ता प्रतिपद्भवति। तदा पूर्वेद्युर्गौणकालव्याप्तिमुपजीव्यैकभक्तानुष्ठानस्वीकारे सति मध्याह्ने तथैवानुष्ठेयत्वात्तत्र स्वाभाविकप्रतिपद्व्याप्त्यभावेऽपि साकल्यवचनापादितप्रतिपद्व्याप्तिः स्वीकृता। एवं च सति कर्मकालव्याप्तौ सर्वस्मृतीनामत्यन्तनिर्बन्धदर्शनात् कर्मकालव्याप्तिशास्त्रमितरेभ्यः प्रबलमिति निश्चीयते। तदनुसारेण द्वितीयाद्या अपि तिथय उपवासादौ दैवे, एकोद्दिष्टादौ पैत्र्ये च कर्मकालव्याप्तियुक्ताः स्वीकर्त्तव्याः। उपवासस्तु सर्वतिथिषु नारदीये दर्शितः। "शुक्लान् वा यदि वा कृष्णान् प्रतिपत्प्रभृतीस्तिथीन्। उपोष्यैव बलिं दत्त्वा विधिनेत्यपरे दिने। ब्राह्मणान् भोजयित्वा तु सर्वपापैः प्रमुच्यते" इति। उपवासस्याहोरात्रः कर्मकालः। तस्मात्तद्व्यापिनी तिथिर्ग्राह्या। तदसम्भवे खण्डतिथिर्ग्राह्येति निरूप्यते। तत्र च सूर्य्योदयेत्रिमुहूर्त्ता ततोऽधिका वा प्रतिपद्भवति। उत्तरदिने चास्तमयादर्वाक् त्रिमुहूर्त्ता ततोऽधिका वा तृतीया भवति सेयमुभयविद्धा द्वितीया। तत्र वेधकृतिथेरुदयेऽस्तमये वा त्रिमुहूर्त्तत्वं वेधप्रयोजकं न तु ततोन्यूनत्वं तदेव पैठीनसिवाक्येन पूर्वमुदाहृतम्। वेध्यतिथेश्च त्रिमुहूर्त्तं सद्भावोऽपेक्षित इति "द्विमुहूर्त्तं त्रिरङ्गवेत्यनेन सुमन्तुवचनेन दर्शितम्। उदयास्तमयवोरेव वेधे इत्ययमर्थः "उदये सा तिथिर्ग्राह्या विपरीता तु पैत्र्यके" इत्यादिभिः कात्यायनवचनैरवगन्तव्यः। एवञ्च सति यथोदाहृते पूर्वविद्धोत्तरविद्धे ये द्वितीये तयोरुत्तरविद्धा द्वितीयोपोष्या युग्मान्निवाक्येनान्वयव्यतिरेकाभ्यामुत्तरविद्धायाः प्राशस्त्याभिधानात्। यद्यप्युपोष्यत्वं साक्षान्नाभिहितं तथापि कर्मान्तरविशेषस्यानुपादानात् उपवासविषयत्वं परिशिष्यते। तथाहि। न तावत्पित्र्यविषयत्वं सम्भवति व्यासेन युग्मादि शास्त्रस्य सूर्य्यादिशास्त्रस्य च दैवपित्र्यविषयत्वेन व्यवस्थापितत्वात्। नाप्येकभक्तनक्तविषयत्वं तयोर्मध्याह्नप्रदोषव्याप्त्यधीनत्वेन युग्मादिशास्त्रानधीनत्वात्। यदाचितस्य तूपवासवदनुष्ठेयत्वेन न पृथग्विषयत्वं नच दानादिविषयत्वम् दानादेः पौर्वाह्णिकतिथौ कर्त्तव्यतया निर्णीतत्वात्। अत उपवासविषयत्वं परिशिष्यते। कदाचिदेकभक्तादितिथौ युग्मादिशास्त्रस्य संवादो भवति। तदा तच्छास्त्रमुपोद्बालकं भवतु। न वयं वारयामः। वचनान्तरे तु युग्मादितिथेरुपोष्यत्वं साक्षात् प्रतीयते। तथा च प्रतिपत्प्रकरणे प्रतिपदमावास्यायुग्मस्योपोष्यत्ववचनमुदाहृतम्। तत्रापि युग्माभिप्रायेणैव द्वितीयायाः परविद्धायाः उपोष्यत्वं भगुरुक्तितिथ्युधर्मोत्तराभ्यां दर्शितम्। "एकादश्यष्टमी षष्ठी द्वितीया च चतुर्दशी। त्रयोदशी चतुर्थी च उपोष्याः स्युः परान्विताः" इति। यदा पूर्वेद्युरुदयमारभ्य परेद्युरुदयस्योपरि त्रिमुहूर्त्तं वर्धते। तदा

पूर्वेद्युरेवोपवासः। न चोदाहृतेन परान्विता इति वचनेन विरोधः शङ्कनीयः परान्वितापूर्वान्वितयोः प्रकृतयोः सत्योरस्य वचनस्य नियामकत्वात्। नचात्र परान्वितत्वं प्रसक्तमस्ति। पूर्वस्य दिनस्य सम्पूर्णतिथित्वात् सम्पूर्णखण्डयोः सम्पूर्णसामर्थ्येकत्वेन प्रवलत्वात्। अतस्तातत्त्विकविरोधित्वकृतस्त्रकर्मकालव्याप्तिभ्यां पूर्वदिनस्यैव प्राबल्यम्। तस्मात्तत्रैवोपवासः। ननु पूर्वोपवासं प्रतिषेधति व्यासः "द्वितीयया युता कार्या द्वितीया न तु पूर्वया" नैवम् अस्य वचनस्य खण्डतिथि विधयत्वेन संपूर्णतिथावप्रवृत्तेः। खण्डतिथिविधेयत्वञ्च पूर्वया युता नैव कार्येत्यभिधानादवगम्यते। ननु खण्डतिथावपि द्वितीया पूर्वविद्धैवोपोष्या "प्रतिपत्सहिता या स्याद्द्वितीया प्रतिपद्युता" इत्यापस्तम्बेन प्रतिपद्विद्धाया द्वितीयायाः निषेधस्य त्वाभिधानात्। एतदेव वचनमुपजीव्य क्वचित्पूर्वविद्धैवोपोष्येति पूर्वं निर्णीतं तर्हि द्वितीयापि क्वचित्पूर्वविद्धा भवतु तदुक्तं स्कन्दपुराणे "प्रतिपत्सम्मुखी कार्या या भवेदपराह्णिकी। पूर्वाह्णिकी च कर्त्तव्या द्वितीया तादृशी विभो!" इति। तादृशी सम्मुखी पूर्वयुतेत्यर्थः। पूर्वेद्युरुदये सकलं परित्यज्यावशिष्टपूर्वाह्णसम्बन्धिनी यदा भवति तदा बेधकारिण्याः पूर्वतिथेः सकलत्वाभावेन बेद्धुं सामर्थ्यात्खण्डापि सती सम्पूर्णवत्पूर्वैवोपवासे युज्यते। अत्र द्वितीया नवधा भिद्यते पूर्वेद्युरुदयमारभ्य प्रवृत्ता प्रातरुदयं परित्यज्य प्रवृत्ता२ पूर्वाह्णं सर्वं परित्यज्य प्रवृत्तेति३ त्रयोभेदास्त्रयाणामेकस्य परेद्युरुषसि सकलत्वतत्प्रातरुत्पन्नत्वेत्यनयोर्विधये कति मिलित्वा नवविधत्वं सम्पद्यते। अत्र पूर्वेद्युरुदयमारभ्य प्रवृत्तायाः सम्पूर्णत्वेन परेद्युर्मुहूर्त्तत्रयवत्तत्प्रातरुत्पन्नत्वेषु त्रिष्वपि पक्षेषु विधादाधिक्यत्वात् पूर्वत्रैवोपवासोयुक्तः। उदयं परित्यज्य कियत्यांशे भागं प्रक्रम्य प्रवृत्तायाः परेद्युरुषसि मुहूर्त्तत्रयात्पूर्वं सत्यपि परयुतोपवासस्तम्भे तां परित्यज्य पौर्वाह्णिकवचनेन पूर्वेद्युरेवोपवासो विधीयते। परेद्युरुषसि मुहूर्त्तत्रयोत्पन्नत्वे तु बेधकारित्वात्तृतीयायाः सत्यपि बेद्धुं सामर्थ्ये बेध्यायाः द्वितीयायास्तिसृभिर्मुहूर्त्तत्रयाभावेन बेधयोग्यत्वाभावात् तत्रोपवासो न प्रसक्तः। अतः परित्यागात् पूर्वाह्णवाक्याच्च पूर्वत्रैवोपवासः। पूर्वेद्युः पूर्वाह्णं सर्वं परित्यज्य प्रवृत्तायाः परेद्युरुषसि मुहूर्त्तत्रयोभयत्र विधिसत्त्वात् कृत्योपवास इति सम्प्रदाये इति व्याख्येयोत्तर विधानात् पूर्वदिनविधाङ्गेत्तरत्रोपवासः। न चात्र शुक्लकृष्णव्यवस्था शङ्कनीया। युग्मवाक्ये शुक्लकृष्णपक्ष साधारण्येन परदिनविधानात् कृष्णपक्षेऽपि तत्प्रवृत्तौ बाधाभावाच्च। अन्ययोस्तु पक्षयोः पूर्ववद्देधानर्हत्वेन पूर्वेद्युः पौर्वाह्णिकत्वाभावेऽपि परित्यागादपक्षयोरुक्त युग्मवाक्याच्च पूर्वत्रोपवास इति स्थितम्। एकभक्तादिपार्वणश्राद्धान्तेषु कर्मसु द्वितीयायामुक्तस्य विशेषस्य क्वचिदप्यस्मरणात् पूर्वोक्तन्यायो बोद्धव्यः"।

सा च अश्विनीकुमारयोर्जन्मतिथिः। यथाह वराहपु०

तयोर्जन्मोपमक्रमे "एतत् सर्वं द्वितीयायामश्विभ्यां ब्रह्मणा पुरा। दत्तं यस्मात्ततस्तेषां तिथीनामुत्तमा तिथिः। एतस्यां रूपकामस्तु पुमान्नारी भवेन्नरः। संवत्सरं शुचिर्नित्यं सुखरूपो भवेन्नरः। अश्विभ्यां ये सुताः प्रोक्तास्ते तस्यामपि भवन्ति च"। मनोरप्यदितौ वा श्रवणशुक्लद्वितीया। "मनोरप्यदितोर्यायां दिवा वासुदिवार्द्धनम् रात्रौ चन्द्रोदयेऽर्घ्यदानं नक्तं भोजनादिकमुक्तम् तिथ्यं विष्णुधर्मोत्तरे "देवमभ्यर्च्य पश्चात्सु धूपदीपानुलेपनैः। वस्त्रकृतच वालेन्दोर्दर्शनं समाचितः। नक्तं भुञ्जीत च नरो यावत्तिष्ठति चन्द्रमाः। अस्तं गते न भुञ्जीत व्रतभङ्गभयान्नरः"। स्कन्दपु० "आषाढस्य सिते पक्षे द्वितीया पुष्यसंयुता। तस्यां रथे समारोप्य रामं मां भद्रया सह। यात्रोत्सवं प्रकुर्वीत प्रीयतेत्र हिजाद्वहन्। श्रवणाभावे तिथौ कार्या सदा सा प्रीतये मम"रथद्वितीया।

भाद्रद्वितीया विष्णुपुराणे "कार्त्तिके तु द्वितीयायां शुक्लायां भ्रातृपूजनम्। या न कुर्यादिनस्यन्ति भ्रातरः स्वसृजन्मनि"। तस्यां इति शेषः। भविष्यत्पर्वणि "कार्त्तिके शुक्लपक्षे तु द्वितीयायां युधिष्ठिर!। यमो यमुनया पूर्वं भोजितः स्वगृहे स्वयम्। तस्यां निजगृहे पार्थ! न भोक्तव्यमतो बुधैः। यत्नेन भगिनीहस्ताद्भोक्तव्यं पुष्टिवर्द्धनम्। दानानि च प्रदेयानि भगिनीभ्यो विशेषतः"। तथा "यमश्च चित्रगुप्तश्च यमदूताश्च पूजयेत्। अर्घदाने प्रदातव्यो यमाय सहजादयैः"। "अत्र भोक्तव्यं पुष्टिवर्द्धनमिति समभिव्याहृतफलश्रुत्या भोजननियमस्य प्राधान्यात् तस्य सध्यकालोऽष्टधाविभक्तदिनस्य पञ्चमांशोत्तरः "पञ्चमे च तथा भागे संविभागो यथार्हतः पितृदेवमनुष्याणामित्यादि" दक्षोक्तेः अत्र

भोजनस्य रागप्राप्तेऽपि तत्कालस्य "अहनि च तथा तमस्विन्यां सार्द्धप्रहरयामान्तः" इति कात्यायनीयेन निषेधितत्वात् वैधत्वेन शास्त्रीयत्वेन सामान्यशास्त्रप्राप्तुपजीविषर्थुदासावङ्गतिरिति। ङ०त० (तेन नातिप्रगे नातिसायमित्यत्र नञर्थः पर्युदासः) "तथा यमद्वितीयायां यात्रायां मरणं भवेत्"। अनध्यायद्वितीया यथा "प्रेतोत्थेचा द्वितीयासाः प्रेतपक्षे मते तु या। या च कोजागरे जाते चैत्रावल्याः परेऽपि या। चातुर्मास्ये समाप्ते च द्वितीया या भवेत् तिथिः। पराख्येतास्त्वनध्यायः पुराणैः परिकीर्त्तितः ति० त०। "मार्गं च फाल्गुने चैव आषाढे कार्तिके तथा। पक्षयोर्भाद्रमासस्य द्वितीयां परिवर्जयेत्" मल०त० अयज्ञपवनविषयः। पक्षयोरित्यस्योत्तरत्र श्रुतस्य सर्वत्रान्वयः। "द्वितीया मीनधनुषोः" ज्योति०त०उक्तेः रविचन्द्रयोर्मीनधनुषोः स्थितयोस्सत्या दग्धत्वम्। चन्द्रमास्थितत्वे चन्द्रदग्धत्वं केचिदिच्छन्ति "द्वितीया ह्यादयो यत्रे" ज्यो०त० उक्तेस्सप्तम्युत्तरस्यां दिशि योगिनी।

**द्वितीयक** न० द्वितीयेन रूपेण षड्ग्रहम् "तावतियं षड्ग्रहमिति लुप्" पा० कन् पूरणप्रत्ययस्य तो लुक्। चैत्रादेर्द्वितीयरूपेण षड्ग्रहे। पञ्चतीयमासस्य लुकि द्विकमप्यत्र। द्वितीयेऽह्नि भवः कन्। २द्वितीयदिनभवे रोगे पु०

**द्वितीयतिफला** स्त्री द्वितीया तिथिरिव फलं यस्याः। गाम्भार्यां (गाम्भार) शब्दच०।

**द्वितीयाव्रत** त्रि० द्वितीयं व्रतम् द्वितीय+ङाच् व्र-क्त। द्वितीयव्यारब्धषष्ठकर्मणि चैत्रादौ।

**द्वितीयाभा** स्त्री द्वितीयेन रूपेण हरिद्रायाः आभाति आ+भा-क। दारुहरिद्रायां शब्दच०।

**द्वितीयायम** पु० कर्म०। द्वितीये भ्रातृस्वे आश्रमे "द्वितीयमायुषो भागं कृतदारो गृहे वसेत्" मनुः "कालोऽयं सङ्क्रमितुं द्वितीयं वर्णोपकारस्तमसाश्रमं ते" रघुः।

**द्वितीयिक** त्रि० द्वितीयः द्वयोरयमुक्तोपपदाद्रूपः पदार्थो दीयते "पूरणार्थाट्ठक्" पा० ठक् द्वयादिरूपेण दीयते द्वितीयो यस्मिन् तस्मिन् पदार्थे

**द्वितीयिन्** त्रि० द्वितीयो भागो यात्रतयाऽस्यास्ति इनि। अर्द्धभागयाचके अर्द्धिनि अर्द्धिन्शब्दे ३७८पृ०दृश्यम्। "षोडश षोडश द्वितीयिभ्यः" याज्ञ०श्रौ० ६।३।६ "द्वितीयिभ्यः अर्द्धिभ्यः अर्द्धमेषाक्षौद्रर्द्धिनेभ्यः" नारा०

**द्वित्र** त्रि० ब०व०। द्वौ वा त्रयो वा विकल्पार्थे बहु० संख्येयार्थत्वे ङ। द्वौ त्रयोवेत्यर्थे। "द्वित्राण्यहर्ह्येव बोढुमर्हन्!" रघुः "देवेनाप्रतिपत्तिमूढमनसा द्वित्राः स्थितं नाडिकाः" सा०द०

**द्वित्व** न० द्वयोर्भावः। अवयवेऽवयवेऽवयविन इत्यनेकैकत्वबोधरूपापेक्षाबोधजन्ये द्रव्यनिष्ठे गुणभेदे। तच्च समवायेन वस्तुद्वये प्रत्येकं तिष्ठति, पर्य्याप्तिसम्बन्धेन तु द्वयोरेव तिष्ठति न प्रत्येकम्। तदेवापेक्षाबुद्धिजन्यम् तेनैव द्वौ द्वावित्यादि व्यवहारः। समवायेन प्रत्येकं द्वित्वसत्त्वेऽपि न तेन तथा व्यवहारः। औलुक्यशब्दे १६८७पृ०तदुत्पत्तिविनाशप्रकारश्च दृश्यः।

"द्वित्वादयः परार्द्धान्ता अपेक्षाबुद्धिजा मताः। अनेकाश्रयपर्य्याप्ता एते तु परिकीर्त्तिताः। अपेक्षाबुद्धिनाशाच्च नाशस्तेषां निरूपितः। अनेकैकत्वबुद्धिर्या साऽपेक्षाबुद्धिरुच्यते" भाषा० "द्वित्वादयो व्याख्यवृत्तिसंख्या अपेक्षाबुद्धिजन्या"। "अनेकेति। यद्यपि द्वित्वादिसमवायः प्रत्येकं घटादावपि वर्त्तते तथाप्येको द्वाविति प्रत्ययाभावात् एको न द्वाविति प्रत्ययसम्भवाच्च द्वित्वादीनां पर्य्याप्तिसम्बन्धोऽनेकाश्रयोऽभ्युपगम्यते। अपेक्षाबुद्धिनाशादिति। प्रथममपेक्षाबुद्धिस्ततो द्वित्वोत्पत्तिः। ततो विशेषणज्ञानं द्वित्वनिर्विकल्पकरूपम्। ततो द्वित्वविशिष्टप्रत्यक्षम्। अपेक्षाबुद्धिनाशे ततो द्वित्वनाश इति। यद्यपि ज्ञानान्तरं न किमपि विशेषणत्वादि योग्यविभुविशेषगुणानां स्वोत्तरवर्त्तिगुणनाश्यत्वात् तथाप्यपेक्षाबुद्धेस्तिरश्चस्त्वादित्वं कल्प्यते अन्यथा निर्विकल्पके अपेक्षाबुद्धिनाशात् अनन्तरं द्वित्वस्यैव नाशः स्यात् न तु द्वित्वप्रत्यक्षं तदानीं विषयाभावात् विद्यमानस्यैव चक्षुरादिना ज्ञानजननोपगमात्। तस्माद् द्वित्वप्रत्यक्षादिसमपेक्षाबुद्धेर्नाशकं कल्प्यते। न चापेक्षाबुद्धिनाशात् कथं द्वित्वनाश इति वाच्यम्। कालान्तरेद्वित्वप्रत्यक्षाभावात्। अपेक्षाबुद्धित्वादिका तत्राश्रयत्वाश्रयक इति कल्पनात्। अतएव तत्पुरुषीयापेक्षाबुद्धिजन्यद्वित्वादिकं तेनैव नष्टमत इति कल्प्यते। न चापेक्षाबुद्धेर्द्वित्वप्रत्यक्षकारणत्वमस्तीति वाच्यम्। लाघवेन द्वित्वं प्रति कारणत्वस्यैवोचितत्वात्। अतीन्द्रिये द्व्यणुकादावपेक्षाबुद्धेर्नाशानाम्। मनोदिकालीनपरमाण्वादावीश्वरीयापेक्षाबुद्धिर्नाश्यान्तरवर्त्तियोगिनामपेक्षाबुद्धिर्वा द्वित्वादिकारणमिति"। "अपेक्षाबुद्धिः

क्षेत्यत आह। अनेकेति। अयमेकः अयमेकः। इत्याकारिका इत्यर्थः। इदन्तु बोध्यं वस्तानियतैकत्वज्ञानं तत्र दित्वादिभिन्ना बहुत्वसंख्योत्पद्यते। यथा सेनावनादाविति कन्दलीकारः। आचार्यास्तु त्रित्वादिकमेव बहुत्वं मन्यन्ते। तथा च त्रित्वत्वादिव्याप्या बहुत्वत्वजातिः। सेनादौ चोत्पन्ने त्रित्वादौ त्रित्वत्वाद्यपहो दोषात्। इत्थञ्च इतरतो बहुलेयं सेनेति प्रतीतिरुपपद्यते बहुत्वस्य संख्यान्तरत्वे तत्तारतम्याभावादित्यवधेयम्" इति।

उप० इत्तौ विशेषः कश्चिदुक्तो यथा

"तदयं दित्वाद्युत्पादविनाशक्रमः। समानजातीययोरसमानजातीययोर्द्रव्ययोरुत्तरसंयोगे सति तद्विभक्तैकत्वसंख्ययोर्यत्सामान्यमेकत्वं तयोर्निर्विकल्पकानन्तरं तद्विशिष्टगुणबुद्धिरुत्पद्यते सैव चापेक्षाबुद्धिरुच्यते तयोर्द्रव्ययोर्द्वित्वमुत्पद्यते, उत्पन्नस्य च द्वित्वस्य यत्सामान्यं द्वित्वत्वं तदालोचनेनापेक्षाबुद्धेर्नाशो द्वित्वत्वविशिष्टद्वित्वगुणविषया विशिष्टबुद्धिश्चैकदा भवति, तदग्रिमक्षणे च द्वित्वगुणस्यापेक्षाबुद्धिविनाशः द्वे द्रव्ये इति द्वित्वविशिष्टद्रव्यज्ञानञ्च युगपदुत्पद्यते, ततस्तस्माद् द्वित्वविशिष्टद्रव्यज्ञानात् संस्कारः। तदयं संक्षेपः उत्पत्तिक्षणानद्वित्वाधारेणेन्द्रियसन्निकर्षस्तत एकत्वगुणगतसामान्यज्ञानं ततः एकत्वसामान्यविशिष्टैकत्वगुणसमूहालम्बनरूपापेक्षाबुद्धितो द्वित्वगुणोत्पत्तिस्ततस्तद्गतसामान्यस्य ज्ञानं ततस्तत्सामान्यविशिष्टद्वित्वगुणज्ञानं ततो द्वित्वगुणविशिष्टद्रव्यज्ञानं ततः संस्कार इतीन्द्रियसन्निकर्षमारभ्य संस्कारपर्यन्तमष्टौ क्षणाः। विनाशक्रमस्तु एकत्वसामान्यज्ञानक्षणापेक्षाबुद्धितोविनाशः द्वित्वसामान्यज्ञानादपेक्षाबुद्धेर्विनाशः द्वित्वसामान्यज्ञानस्य च द्वित्वगुणबुद्धितोविनाशः द्वित्वगुणबुद्धेश्च द्वित्वविशिष्टद्रव्यज्ञानात् तस्य च संस्कारात् विषयान्तरज्ञानादेति। नन्वेकत्वज्ञानात्तद्विशिष्टद्रव्यज्ञानमेव कथं नोत्पद्यते तत्सामग्रीसत्त्वात् न हि गुणज्ञाने सति द्रव्यज्ञाने विलम्बोऽस्ति तथा च तत एवापेक्षाबुद्धेर्विनाशे तद्भावाच्च तदग्रिमक्षण एव द्वित्वनाश इति द्वे द्रव्ये इति विशिष्टज्ञानपूर्वक्षण एव द्वित्वविनाशापत्त्या द्वित्वविशिष्टद्रव्यज्ञानस्यानुत्पत्तिरेवेति चेन्न द्वित्वादुत्पत्तिसामग्र्यनभिभूताया एवापेक्षाबुद्धेर्द्रव्यविशिष्टज्ञानजनकत्वनियमात् क्रमवत्त्वेन कल्पकल्पनात्। ननु तथापि स्वजनितसंस्कारेणैवापेक्षाबुद्धिविनाशे पुनः स दोषस्तदवस्थ एव, द्वित्वविशिष्टज्ञानपूर्वक्षण एव द्वित्वनाशस्य सम्भवादिति चेन्न केवलगुणज्ञानस्य संस्काराजनकत्वात् न हि केवलोगुणः क्वापि दृश्यते, सर्वत्र द्रव्योपरागेणैव गुणग्रहणात्, ननु भवत्वेवं तथापि विशिष्टबुद्धिकालेऽपि द्वित्वनाशे विशिष्टप्रतीत्यनुदयस्तदवस्थ एव न हि वर्त्तमानावभासिनी विशिष्टप्रतीतिर्विशेषणनाशकाले सम्भवति तथादर्शनादिति चेन्न विशेषणज्ञानविशेष्येन्द्रियसन्निकर्षतदुभयासंसर्गाग्रहस्य विशिष्टज्ञानसामग्र्याः प्रकृतेऽपि सम्भवात्। यदि तु विशेषेणेन्द्रियसन्निकर्षोऽपि क्लृप्यते तदा पूर्वक्षणे तस्यापि सत्त्वात् पूर्वक्षणवर्त्तिन एव सन्निकर्षस्य कारणत्वेनाभ्युपगमात्, विशेषणं विशिष्टज्ञानागोचरोऽपि सम्भवति, विशिष्टज्ञानजनकज्ञानविषयत्वमात्रमेव हि विशेषणत्वे तन्त्रं नतु विशिष्टज्ञानविषयत्वमपि। उपलक्षणञ्चार्थे विशेषणत्वापत्तिरिति चेन्नाप्रत्याय्यव्यावृत्तिसामानाधिकरण्यस्य विशेषणत्वे तन्त्रत्वात् उपलक्षणन्तु तदव्यधिकरणम्, एवं यदा दैवदत्तस्टहे काकवत्ता तदा काकोविशेषणं, यदा तु उपरिभ्रमन् यस्तु तदोपलक्षणम्। एवं सति रूपवति रस इत्यादौ रूपादेरपि विशेषणत्वापत्तिरिति चेन्न दृष्टत्वात्, तर्हि तत्रापि रसोवर्त्तेतेति चेन्न विशिष्टबुद्धेर्विशेषणवृत्तित्वानावश्यकत्वात् न हि विशेषणं विशिष्टमतावेकं तन्त्रम्। द्वित्वनाशकाले विशेषणसम्बन्धो नास्ति कुतोविशिष्टप्रलय इति चेन्न क्षतदृष्यादृत्तेरेव वैशिष्ट्यपदार्थत्वात्, तद्ज्ञानन्तु तत्रापेक्षते न किञ्चिदनुपपन्नमित्याचार्याः। एवं द्वित्वोत्पत्तिविनाशवत् त्रित्वोत्पत्तिविनाशावप्यूह्यौ। द्वित्वमपेक्षाबुद्धिनाशनाश्यम्, आश्रयनाशविरोधिगुणान्तराभावे गुणस्य सतोऽविनाशित्वात् चरमज्ञानवत् चरमज्ञानस्यादृष्टनाशनाश्यत्वात्। क्वचिदाश्रयनाशादपि नश्यति यत्र द्वित्वाधारावयवकर्मसमकालैकत्वसामान्यज्ञानम्, तद्यथा अवयवकर्मसामान्यज्ञाने विभागापेक्षाबुद्धी संयोगनाशगुणोत्पत्ती द्रव्यनाशाद्द्वित्वसामान्यज्ञाने तत्र द्रव्यनाशाद्द्वित्वनाशः, सामान्यज्ञानादपेक्षाबुद्धिनाशः, अपेक्षाबुद्धिनाशस्य द्वित्वनाशसमानकालत्वात् कार्यकारणसमानभावात्। यदा तु द्वित्वाधारावयवकर्मापेक्षाबुद्धयोर्युगपद्यं तदा द्राभ्यामाश्रयनाशापे-

बुद्धिनाभ्यां द्वित्वनाशः, तद्यथा अवयवकर्मापेक्षाबुद्धौ विभागोत्पत्तौ संयोगनाशाद्द्वित्वसामान्यज्ञाने द्रव्यनाशापेक्षाबुद्धिनाशौ ताभ्यां द्वित्वनाशः प्रत्येकं सामर्थ्यात्। एवञ्च प्रक्रिया ज्ञानयोर्बध्यघातकत्वपक्षे परस्परपक्षते स एव च पक्षः प्रामाणिकः। ननु द्वित्वत्रित्वादीनां सामग्रीकार्ये कथं कार्यवैलक्षण्यं, द्वाभ्यामेकत्वाभ्यां द्वित्वं, त्रिभिरेकत्वैस्त्रित्वमिति चेन्न एकत्वे द्वित्वाद्यभावात्, समवायिकारणगतमेव द्वित्वत्रित्वादिकं तन्निमित्तं चेन्न द्वित्वाद्युत्पत्तेः पूर्वं तत्र द्वित्वाद्यभावात् तत्रापि कारणचिन्तायां अनिवारणात् अपेक्षाबुद्धावेकत्वेषु च तादृशविशेषस्याद्यापनस्याबाधितत्वात् फलबलेन तत्कल्पने वा द्वित्वादिव्यवहारोऽपि तत एवास्तु किं द्वित्वादिना, अदृष्टविशेषादिशेष इति चेदेवं सति द्वित्वारम्भकयोरपि सामग्र्या कदाचित्त्रित्वं चतुस्त्वोत्पत्तेस्तन्नियमप्रसङ्गः इति चेत् अत्रोच्यते प्रागभावविशेषादिशेषोपपत्तेः। द्वयेषां सामग्र्या पाकजानां रूपरसगन्धस्पर्शानामिव। प्रागभावोऽपि साधारण एवेति चेन्न अस्य प्रागभावस्यैव कार्यं प्रति कारणत्वावधारणात्। यदा युगपदपेक्षाबुद्ध्या द्वित्वं द्वित्वसङ्ख्यया त्रित्वमिति नेयम्, (अव्यवस्था) शतं विंशोत्तिकानां मया कृतमित्यादौ, समवायिकारणाभावे द्वित्वं तावन्नोत्पद्यते तथा च नोत्पन्नस्य संख्याव्यवहारोद्देश्यः। सेनावनादौ नियतापेक्षाबुद्ध्यभावाद्बहुत्वमात्रमुत्पद्यते न तु शतसङ्ख्यादिसंख्येति श्रीधराचार्याः। एवं सति शतसङ्ख्यादिकोटिरूपस्य संख्यो न स्यात् न स्याच्च महती बहुतरा सेनेति नैयमिकोदयनाचार्याः। अत्रैवमालोचनीयं त्रित्वादिपरार्द्धपर्य्यन्ता संख्यैव बहुत्वम्, तद्भिन्नं वा संख्यान्तरम्, नाद्यः सेनादावपि शतबहुत्वादिसंख्योत्पत्तिनियमात्, न द्वितीयः त्रित्वादिविशेषस्य बहुत्वज्ञानजन्यत्वात् तथा च प्रतिनिवर्त्तकत्वानावश्यकापेक्षाबुद्धिजनितशतादिसंख्यैव बहुत्वं शतादिभिव्यक्तिरूपं तत्र न भवति तादृशव्यङ्ग्याभावात्। वयन्तु ब्रूमः त्रित्वादिसमानाधिकरणं संख्यान्तरमेव बहुत्वं त्रित्वादिजनकापेक्षाबुद्धिजन्यं प्रागभावभेदादेव भिद्यते कथमन्यथा बहुत्ववान् वनि शतं वा बहुत्वं नेति विभज्य न जानीम इति। यत्रैकद्रव्ये महत्त्वं दीर्घत्वञ्च तत्रैकत्वैकाधिकरणे त्रित्वादिकं बहुत्वञ्च भवति हि शतं वा बहुत्वं वा चूतफलान्यानयानीति प्रश्ने बहुत्ववदानीयन्तां किं विशेषजिज्ञासयेति। एवञ्च द्वित्वसङ्कलितापेक्षाबुद्ध्या त्रित्वं त्रित्वसङ्कलितापेक्षाबुद्ध्या चतुष्टयमेवमुत्तरोत्तरम्। बहुत्वोत्पत्तौ तु नापेक्षाबुद्धौ पूर्वपूर्वसंख्याविशिष्टत्वनियमः, अतएव सेनावनादिषु बहुत्वमात्रमुत्पद्यते न तु संख्यान्तरं संख्यासत्कोटिकोऽपि भवत्येवेति"।

**द्विदण्डि** अव्य॰ द्वौ दण्डौ यस्मिन् प्रहरणे इच् समा॰। दण्डद्वयवति प्रहरणे। तिष्ठद्वादिगणे इच् प्रत्ययः समासान्त इत्युक्तेः बहुव्रीह्यर्थे अव्ययीभावात् अव्ययत्वम् तेन न द्विदण्डेति प्रकृतिरिति। न वा प्रहरणे इत्युक्तेः शालादौ वाच्येऽपि अव्ययीभावः।

**द्विदण्ड्यादि** पु॰ प्रहरणार्थे इचसमासान्तनिमित्ते पा॰ न॰ उक्ते शब्दगणभेदे स च तत्रोक्तो यथा "द्विदण्डि द्विसन्धि उभयाङ्गि उभयाङ्गि उभादण्डि उभयादण्डि उभाङ्गि उभयाङ्गि उभाकर्षि उभयाकर्षि उभापाणि उभयापाणि उभाबाहु उभयाबाहु एकपदि प्रोक्षपदि काण्डपदि वपदि निष्कण्ठकर्षि संहतपुच्छि अनेवाहि"। (पक्षचित्तवयस्के इषादौ स्त्रियां ङीप्।

**द्विदत्** त्रि॰ द्वौ दन्तावस्य वयसि दन्तस्य दलादेशः। द्विदन्तो-

**द्विदल** त्रि॰ द्वे दले यस्य। द्विगावाद्युक्ते इदमर्थविलादौ "अक्षस्य दारवं पात्रं द्विदलात् रेणुकात् वक्त्रं" हरिवं॰ २द्विपलयुक्ते कमले तच्च क्षुद्रमृणालादीमध्ये भ्रूमध्यस्थितं (इच) पर्णयुक्तं सूक्ष्मकमलम् आज्ञाख्यं चक्रम्। द्विःपलादयोऽत्यल्पे "द्विःपले षोडशारे द्विदशदशदले द्वादशार्द्धे चतुष्के" तन्त्रम् आज्ञाचक्रशब्दे ६४२ पृ॰ दृश्यम्। द्विधा दलति दल-घञर्थे क। (डाल) ख्याते शब्दार्थे पु॰।

**द्विदश** त्रि॰ दशाधिका द्विसङ्ख्या वा दशसंख्या येषाम् "संख्यायाश्चयासञ्ज्ञादूराधिकसंख्याः सञ्ज्ञेये" पा॰ संज्ञेयार्थत्वात् डच् समा॰। "द्वित्रेः संख्यायामबहुव्रीहावीयोः" पा॰ अबहुव्रीहौ ईयुक्ते न स्यात्। द्विसङ्ख्यित दशसंख्यायुते। "द्विःपले षोडशारे द्विदशदशदले" तन्त्रम्

**द्विदाम्नी** द्वे दाम्नी बन्धनसाधने अश्वा मनस्त्वात् ङीपो-निषेधे पक्षे डापः प्राप्तौ "दामहायनान्ताच्चेति पा॰ ङीबेव। द्विरज्जुबन्धनयोग्यायां दुष्टायां स्त्रियां गवि।

**द्विदिव** पु॰ द्वाभ्यां दिवा दिनाभ्यां निर्वृत्तादि तद्धितार्थे द्विगुः "कालाट्ठञ्" तस्य लुक् लुप्तः। द्विदिनसाध्ये द्विरात्रयागभेदे "द्वितीये द्विदिवाख्योद्यदः" कात्या॰

औ० २२।७।६। "द्वितीये पर्वस्थाने ह्रस्वो भवति द्वि-दिव इत्याख्या तस्य" कर्कः।

द्विदेवत त्रि० द्वे देवते यस्य ब० व०। द्विदेवताके चरौ दो "द्विदेवतोऽपि नियमसामर्थ्यात्" कात्या०श्रौ०५।१।८।१० "द्विदेवतोऽपि पौष्णचरुः पशिष्टनामैव भवति तत्र पौन्द्रसंज्ञितस्य पुष्णो देवतात्वम् तत्र पुष्णो नियमेन पिष्टम् प्राप्नोति (चदलत्वात्) इतरस्यैन्द्रस्यानियमः" कर्कः इति पूर्वपक्षे "सर्वं पिष्टं चोभयसामर्थ्यात्"।१।८।"पुष्णः पिष्टस्य इतरस्यापिष्टमिति विज्ञायते तण्डुलेषु पिष्टानामभावात् करिष्यते यतः पाकहेधं नाशङ्कम्" कर्कः। इन्द्राग्नि-देवताके २विशाखानक्षत्रे च द्विदेवादयोऽप्यत्र। "त्रिको-त्तरावाकृष्यनैर्ऋतेन्द्रपूर्वोत्तरयज्ञभुवस्तदैव। मध्यानि नेष्टान्यनलानिलेशद्विदैवाचलाद्भिमधान्यकानि" वसिष्ठः

द्विदेह पु० द्वाभ्यां देहोऽस्य। गजानने गणेशे त्रिका०। द्विभाननशब्दे ६८१ पृ० दृश्यम्। चराक्षरद्यात्मकेषु २मिथुनकन्याधनुर्मीनाख्यराशिषु। राशिविशेषाणां द्व्यात्मकत्वं द्व्यात्मकशब्दे दृश्यम्। द्वितत्वादयोऽप्यत्र।

द्विद्वादश पु० द्वितीयः द्वादश च वरकन्ययोः राशिभेदः दो-ष्यसाधनमत्र इत्तौ संख्याशब्दस्य परार्थत्वं त्रिभाग-श्रेणादिवत् ज्ञेयम्। वरकन्याराश्योर्द्वितीयद्वादशान्यतर-रूपे वैवाहिके चतुर्भकूटदोषभेदे उपयमशब्दे १२३।पृ० दृश्यम्। "धनपत्यता त्रिकोणे द्विद्वादशे च दारिद्र्यमिति दीपिका तत्र वरराशेरुपेक्षया कन्याया द्वादशराशि-त्वे तत् दोषः। "कन्यायाः द्वादशे भर्तुः भर्तुः कन्या द्वितीयगा। द्विद्वादशं विजानीयात् वर्जितं त्रिद-शैरपि" विशिष्य निषेधात् "द्विद्वादशे धनस्थाने धनहा च कन्या रिष्फे स्थिता धनवती पतिवल्लभा च" ज्यो०त० प्रतिप्रसवात्। समाहारद्विगुः। २द्वितीये धनस्थाने द्वादशे व्ययस्थाने च न०। "द्विद्वादशे खला ज्ञातिम्" नी० ता०।

द्विधा अव्य०द्वि+प्रकारे धाच्। द्विप्रकारे "अङ्गसंवादिनीः केचा द्विधा भिन्नाः शिखण्डिभिः"। "द्विधेव भिन्नं मलिने विवस्वतः" रघुः। [क्षीरे पु० हेमच०।

द्विधागति त्रि०द्विधा गतिरस्य। १द्विप्रकारगतियुक्ते। २क-

द्विधातु त्रि० द्वौ धातू यत्र। १धात्वादयघटिते कांस्यरैत्यादौ २गणेशे शब्दरत्ना०। तस्य देवगजदेहद्वयघटितत्वात् तथात्वम्। [शब्दच० २द्विरूपभावेषु मिथुनादिराशिषु पु०।

द्विधात्मक पु०न० द्विधा आत्मा यस्य कप्। १जातीकोषे

द्विधालेख्य त्रि० द्विधा लेख्यम्। १द्विप्रकारे लेखनीये २द्वि-नामद्वये पु० राजनि०। [रोगयुते हेमच०।

द्विनम्नक पु० द्विः नम्नकः। स्वाभाविकानाढतमेदे दुर्धर्म-

द्वि(द्वा)नवति स्त्री द्व्यधिका नवतिः वा यात्। १द्व्यधिक-नवतिसंख्यायां २तद्युक्ते च। ततः पूरणे डट् द्वि(द्वा)-नवत, तमप्, द्वि(द्वा)नवतितम २तत्संख्यापूरणे त्रि० ङीप्।

द्विनिष्क त्रि० द्वाभ्यां निष्काभ्यां क्रीतम् तद्धितार्थेद्विगुः ततः ठञ् तस्य लित्वं लुकि प्राप्ते" "द्विलिपूर्वोत्तिष्कात्" पा० तस्य वा लुक्। द्वाभ्यां निष्काभ्यां क्रीते पक्षे ठञः श्रवणे "परिमाणान्तास्संज्ञायामयोः" पा० उत्तरप-दवृद्धिः। द्वैनिष्किक तत्रार्थे, द्वौ निष्कौ परिमाण-मस्य वस्तुनस्तस्य लुक्। २द्विनिष्कतत्परिमाणयुते त्रि०।

द्विप पुंस्त्री० द्वाभ्यां सक्थ्यण्डाभ्यां पिबति पा-क। १गजे अमरः। "विपूर्व्यभाषश्रवणोदरं द्विपाः" माघः। "स्कन्दनार्थैः समे युध्येदनूपे नौद्विपैस्तथा" मनुः २नागकेशरे पु०।

द्विपच पुंस्त्री० द्वौ पचौ यस्य। १खजभावे २भावे पु०

द्विपञ्चमूली स्त्री द्विधा पञ्चमूली। दशमूले "द्विपञ्चमूली क्षीरतगरभद्रदारुसरिवमधुविडङ्गकुष्ठाग्निमन्थाश्विदम्" सुश्रु०। दशमूलं च दशमूलशब्दे ३३८२ पृ० दृश्यम्।

द्वि(द्वा)पञ्चाशत् स्त्री द्व्यधिका पञ्चाशत् वा यात्। १द्व्यधिकपञ्चाशत्संख्यायां २तदन्विते च। ततः पूरणे डट् द्वि(द्वा) पञ्चाश, तमप् द्वि(द्वा) पञ्चाशत्तम तत् संख्यापूरणे त्रि० स्त्रियां ङीप्।

द्विपण्य त्रि० द्वाभ्यां पणाभ्यां क्रीतं "पणपादमाषशताद्यत्" पा० यत्। द्वाभ्यां पणाभ्यां क्रीते

द्विपत्रक पु० द्वे पत्रे यस्य संज्ञायां कन्। १पण्डालकन्दे पारस्करनिघण्टुः २द्विदलकमात्रे वा कप्।

द्विपथ न० द्वयोः पथोः समाहारः समा०द्वि० अच्समा०। (दोआबाआप) १द्वयोः पथोः समाहारे। द्वौ पन्थानौ यत्र। २मार्गद्वययुक्ते देशादौ त्रि०।

द्विपद पु० द्वे पदे यस्य। "द्विपदे च चतुर्भेदा ब्रह्मैवपक्षि राक्षसाः" १ब्रह्मसारोक्ते मनुष्यादौ। २द्विपदघटिते समासे पु०। ३राशिभेदे च "मिथुनतुलाघटकन्या द्विपदाख्याश्चा-पूर्वभागाश्च" ज्यो०त०"द्विपदवणाः सर्वे सिंहे द्विस्वभावे चतुष्पदाः" ज्यो०त०। समा०द्वि०। ४पदद्वये न०। ५पदद्व-यात्मके वास्तुमण्डलस्थे कोष्ठभेदे।

**द्विपदा** स्त्री द्वौ पादावस्य "संख्यासुपूर्वस्ये"ति पा०पादस्यान्त्यलोपः"टाङसिङसामि"ति टापि पादः पद्भावः। द्विपादयुक्तायाम्।

**द्विपदिका** स्त्री द्वौ पादौ दण्डो यत्र वुन् स्त्रीत्वम्। द्वौ पादौ यत्र दण्डः इतार्थे "द्वौ पादौ दक्षिणतो द्विपदिकां व्यवस्यति द्विगुणं ददातीत्यर्थः" वि०कौ० यत्र पादशब्दस्य गुणवाचित्वाभिप्रायेण द्विगुणमित्युक्तमिति बोध्यम्। द्विपदी स्वार्थे क वुञः। २गीतिभेदे "गुडा द्विपदिका गीतिर्लम्बेत्यभिधीयते" भरतः। "द्विपदिकया दिशोऽवलोक्य निःसृत्य सायम्" विक्रमो०।

**द्विपदी** स्त्री द्वौ पादौ यस्याः पादः अन्त्यलोपे कृन्मयत्वा० ङीप् पद्भावः। ऋगभिधे १द्विपदयुक्तगीतिभेदे २मात्राछन्दोभेदे च "आदौ षट्कलयुक्तमेतत् तदनु पञ्चचतुष्कम् गुर्वन्तं द्विपदी भवतीह विंशत्यष्टकलं दलम्" तच्चतुष्कम्। "गायत्र्यनुष्कपदी द्विपदी त्रिपदी चतुष्पदादि न हि पद्यमि" भट्टः भा० १४ ८।५।१०। लौकिकात्मकपादैरेकपदी भवति लौकिकरूपपादैश्च त्रिपदी" भा०। तेन अवयवरूपचरणवाचित्वाभावात् टाङसिङसामि न प्रवृत्तिः यत्राक्षिपादत्वात् इति बध्यम्।

**द्विपर्णी** स्त्री द्वे पर्णे यस्याः जातित्वात् ङीप्। १वनकोल्यां रत्नमा० २पर्णद्वययुक्ते त्रि० स्त्रियां टाप्।

**द्विपमद** पु० ६त०। १कस्तिमदे २गन्धद्रव्यभेदे च राजनि०।

**द्विपात्र** न० द्वयोः पात्रयोः समाहारः समा० ह्रि० पात्रा० न ङीप्। पात्रद्वये। तद् हरति आवहति वा "दिगोर्ढञ्"पा० ढञ् पक्षे च द्विपात्रिक द्विपात्रीय यत्रे ठञ् तस्य अध्यर्धेति लुकि द्विगोरिति ङीपि प्राप्ते पात्रादित्वात् न ङीप्। द्विपात्रहारके तदावाहके च।

**द्विपाद** पु० द्वौ पादौ यस्य भेदे नान्त्यलोपः। वानरादौ पशुभेदे "तदो द्विपादाः पशवस्तैरेवैनदेतदध्यवहरति" शत० ब्रा० ६।८।२।५। २यक्षभेदे "एकपादा द्विपादाश्च तथा द्विशिरसोऽपरे" हरिवं०१६८अ० नानायक्षोक्तौ। क्वचित् तु अन्त्यलोपः द्विपाद् इत्येव। पादद्वययुक्ते मनुष्यादौ।

**द्विपाद्य** त्रि० द्वौ पादौ परिमाणमस्य "पथमाणपादशतादाद्यत्" पा० यत् पादः पदिति न, खण्डोपस्य स्थानिवत्त्वात् "पद्यत्यतदर्थे" पा० इत्यपि न प्रातिपदिकस्यैव तत्र ग्रहणात्। १द्विपादपरिमाणयुते दण्डप्रायश्चित्तादौ २द्विगुणदण्डे अमरः। तत्र पादशब्दस्य गुणवाचित्वात् द्विगुणपरतेति बोध्यम्।

**द्विपाधिप** पु०६त०। १ऐरावते २गजश्रेष्ठे च "तत्पूर्वमंशद्वयं द्विपाधिपाः" माघः गजाधिपादश्चेत्यत्र।

**द्विपायिन्** पु० द्वाभ्यां सक्थ्यक्ष्णाभ्यां पिबति पा–णिनि। गले द्वारा० स्त्रियां ङीप्।

**द्विपास्य** पु० द्विपस्यास्यमेवास्यमस्य। गणेशे। (स्करन्दि०।

**द्विपुट** पु० द्वे पुटे यस्य। मृदङ्गभेदे तदुपजीवके तद्वाद्यभेदे पार-

**द्विपुरुष** त्रि० द्वौ पुरुषौ प्रमाणमस्य तद्धितार्थे द्विगुः "प्रमाणे द्वयसज्दघ्नञ्मात्रचो लुक्। पुरुषद्वयप्रमाणयुक्ते स्त्रियां वा ङीप् द्विपुरुषी (या) वा परिखा।

**द्विपृष्ठ** पु० ब्रह्मसम्बन्धे राजभेदे हेमच०।

**द्विबन्धु** पु० द्वयोर्बन्धुयोर्बन्धुः। द्वयोर्बन्धुयोर्बन्धौ बद्धौ। "न द्विबन्धुर्नैतरः" ऋ०१०।६१।७

**द्विभाव** त्रि० द्वौ भावौ यस्य। द्विरूपभावयुक्ते ततः ब्राह्मणा० भावे कर्मणि च ष्यञ्। द्वैभाव्य द्वित्वे न०।

**द्विभूम** त्रि० द्वे भूमी यस्य बहुव्री०। भूमिद्वययुक्ते प्रासादादौ (दोतला)

**द्विमात** पु० द्वे मातरौ यस्य बहुव्रीहावविधेरनित्यत्वात् न कप्। १गणेशे हेमच०। कप् द्विमातृकोऽप्यत्र। २जरासन्धे च

**द्विमातृज** पु० द्वाभ्यां मातृभ्यां जायते जन–ड। १गणेशे द्वैमातुरशब्दे दृश्यम्। २जरासन्धवधे च जरासन्धशब्दे २०६० पृ० दृश्यम्।

**द्विमात्र** पु० द्वे मात्रे उच्चारणकालभेदोऽस्य। दीर्घस्वरे वा द्वे इत्यादौ "एकमात्रो भवेद्ह्रस्वो द्विमात्रो दीर्घ उच्यते" शिक्षा। [वृक्षे।

**द्विमाथ** त्रि० द्वौ माथौ प्रमाणमस्य यत्। माथद्वयपरिमाणे

**द्विमास्य** त्रि० द्वौ मासौ भूतः "द्विगोर्यप्" पा० यप्। मासद्वयं व्याप्य १भूते २तथाभूतवयस्के च।

**द्विमीढ** पु० कस्तिनापुरकारककस्तिनदेवसुतभेदे "त्रिनेदं निर्मितं पूर्वं कस्तिनापुरमुत्तमम्। कस्तिनश्चापि दायादास्त्रयः परमधार्मिकाः। आजमीढो द्विमीढश्च पुरुमीढस्तथैव च" हरिवं० २०अ०

**द्विमुख** पुंस्त्री० द्वे मुखे यस्य। १मुखद्वययुक्ते राजसर्पे फणा०। २मुखद्वययुक्ते त्रि० स्त्रियां स्वाङ्गत्वात् वा ङीप्। ३क्रॉञ्चरोगभेदे पु० "क्रौञ्चो द्विमुखाख्यश्च यत्रैवैते पुरीषजाः" सुश्रुतः। ४उभयतोमुखाभिधप्रस्तावायां धेन्वां स्त्री। उभयतोमुखशब्दे १२६२ पृ० दृश्यम् "द्विमुखीगोप्रदातारः कपिलादानतत्पराः" काशीख० ५जलौकायां स्त्री टाप्।

हिमनि अव्य० हो सनी पाणिनिकात्यायनौ संज्ञौ। "संख्या-संज्ञेन" पा० अव्ययी०। तत्पुरुषविद्यायुक्तसप्तम्यन्तेऽहवे। "हिमनि व्याकरणस्य, विद्याविद्यावतारभेदात् हिमनि व्याकरणमित्यपि साधु" सि०कौ०

हिमूषलि अव्य० हे मूषले यत्र प्रहरणे अव्ययी० हिदण्डा० रच् समा०। मूषलहतयुक्ते प्रहरणे।

हिमूर्द्ध त्रि० हो मूर्द्धानावस्य बहु समा०। द्वीमूर्द्धयुक्ते "बहुमूर्द्धो हिमूर्द्धांश्च त्रिमूर्द्धांश्चाहतां स्तवे" भट्टिः अस्योत्तरपदात्तत्वम् स्त्रियां ङीष्। संज्ञायान्तु क्वचित् न समा०। हिमूर्द्धन् दनुपुत्रभेदे "बलवन् दनुपुत्राश्च दनुपुत्रसमे "हिमूर्द्धो शकुनिश्चैव तथा बहुशिराः प्रभुः" हरिवं० ४अ०।

हियजुस् स्त्री हे यजुषी उपधाने अस्याः। १दृष्टकाभेदे हे यजुषी इव शरीरे अस्य। २यजमाने च यथोक्तं शत०ब्रा० "अथ हियजुषमुपदधाति। इन्द्राग्नी अकामयेतां स्वर्गं लोकमियावेति तावेतामिष्टकामपश्यतां हियजुषमिमामेव तामुपादधातां तामुपधायास्तां प्रतिष्ठायै स्वर्गं लोकमैतां तथैवैतद्यजमानो यद्दियजुषमुपदधाति येन रूपेण यत् कर्म कृत्वेन्द्राग्नी स्वर्गं लोकमैतां तेन रूपेण तत्कर्म कृत्वा स्वर्गं लोकमयानीति वा यद्दियजुर्नाम हे ह्येतां देवते अपश्यतां यद्वै हियजुषमुपदधाति यजमानो वै हियजुः तदाहुः। यदसावेव यजमानो योऽसौ हिरण्मयः पुरुषोऽथ कतमदस्येदं रूपमिति दैवो वाऽस्य स आत्मानुषोऽयं तदात्म हिरण्मयो भवत्यमृतं वा अस्य तद्रूपं देवरूपममृतं हिरण्मयमथ यदियं स्रुदः स्रुता भवति मानुषं ह्यस्येदं रूपम्। स यदमूमेवोपदध्यात्। नेममपरिक्षयात्क्षिये क्षायाल्लोकादजमानः प्रेयादथ यदि मामपक्षिनष्टि यदेवास्येदं मानुषं रूपं तदस्यैतदपक्षिनष्टि तथेडानेनात्मना सर्वमायुरेति" शत०ब्रा० ७।४।२।१६ "यतो ह्ये देवते एतामपश्यतामत एव हाभ्यां यजुर्भ्यामुपधीयते। स हिरण्मयः पुरुषोऽस्य यजमानस्य दैवः प्रयुक्त आत्मा शरीरम्। हियजुरिष्टका मनुष्यत्वप्रयुक्त आत्मेत्यतः हिरण्मयत्वात् पुरुषस्य दैवशरीरत्वं सत्यत्वाद् हियजुषो मानुषशरीरात्मत्वम्" भा०। ते च यजुषी शत०ब्रा० ७।४।२।२१ उक्ते "वास्ते अग्ने! स्वर्वे रुचः"१। "वाच देवाः! स्वर्वे रुचः"२। इति।

हियमुन अव्य० हयोर्यमुनयोः समाहारः "नदीभिश्च" पा० "नदीभिः संज्ञा प्राग्वत् समाहारे वायमिष्यते" सि०कौ० "समाहारे चेति" पा०सूत्रे चकार एवकारार्थकः समाहारान्यत्वव्यवच्छेदसूत्रेण द्विगोरयमपवादोऽव्ययीभावः" मनो०। हयोर्यमुनयोः समाहारे।

हिर पु० हौ रौ रेफौ वाचकशब्दोऽस्य। रेफद्वयघटितस्वरशब्दवाच्ये १मधुकरे २वर्वरे च।

हिरद पु० हौ रदौ प्रधानतया यस्य। १गजे अमरः २नागकेसरे च "समेव समाक्रान्तं हयं हिरदगामिना" रघुः "दृष्ट्यैरिव क्षितिभृतां हिरदैरुदारम्" माघः।

हिरदान्तक पुंस्त्री० इत०। सिंहे राजनि० स्त्रियां जातित्वात् ङीष्। [२सिंहे च।

हिरदारति पु० इत०। १शरभे अष्टापदे जन्तुभेदे पारि०नि०

हिरदाशन पुंस्त्री० हिरदमश्नाति अश-भोजने ल्यु। सिंहे पारि०नि० स्त्रियां जातित्वात् ङीष्।

हिरभ्यस्त त्रि० हिरोरभ्यस्तः। हिरुच्यते हिरक्षे।

हिरशन न० हिरोरशनम्। हिरारभोजने "सनिभिर्हिरशनं प्रोक्तं विप्राणां मद्यवासिनां नित्यम्। कृच्छ्रे च तथा तस्मिन्नार्द्रं प्रहरयामासुः" कात्यायनसं०

हिरसन पुंस्त्री हे रसने जिह्वे अस्य। द्विजिह्वे सर्पे द्वारा० स्त्रियां जातित्वात् ङीष्।

हिरागमन न० हिर्हिरागमनम्। विवाहात्, परन्तु पितृगेहात् पतिगृहे वध्वाः पुनरागमने। तत्र लग्नादि तत्स्वरूपञ्च ज्यो०त० उक्तं यथा

"श्रीपतिसंस्थितायां प्रचेताः "पञ्चादित्यत्रयीरुद्रादितिवसुस्वात्युत्तरारेवतीतारानायकरोडिषीषु शुभदामेषालिकुम्भे रवौ। वारेज्यस्थितेन्दुवित्तशुभदे तारे प्रशस्ते विधौ कन्यामन्त्रयमीनतोलिमगभे स्यादृक्षनाद्यागमः"। नारदवचनन्तु "इते पाणिग्रहे नेहात् पितुः पतिगृहं प्रति। पुनरागमनं वध्वाः स्मृतं हिरागमनं विदुः" ज्योतिःसारसंग्रहे "विवाहमासि प्रथमं वध्वा नागमनं यदि। तदा सर्वविदं चिन्त्यं युग्मादावृद्धं विचक्षणैः" तत्त्वचिन्तामणौ "अब्दं कन्यादिमे वर्षे वधूरत्र दशाब्दके। संप्राप्ते द्वादशे वर्षे पतिं हन्ति हिरागमे" मत्स्यसूक्ते "भुक्ता पितृगृहे कन्या भुङ्क्ते श्वशुरके यदि। दौर्भाग्यं जायते तस्याः प्रयान्ति कुलनाशिकाः"

अथ विहितनक्षत्रादि सङ्क्षेपो० उक्तं यथा

"धरेदशोजत्रायने घटाखिमेषगे रवौ रवीज्यशुद्धियोगतः शुभग्रहस्य वासरे। त्रयुग्मगोनजन्मभात्तृतीयषष्ठगे विधु-

म्भके द्विरागमं नवधूवे चरेऽस्मे मृदुदुनि। दैत्येज्यो-ऽभिमुखदर्शिषे यदि स्याद्भर्तृसंस्थे हि गिरुगर्भिणी नवोढाः। वामचेत् व्रजति विपद्यते नवोढा चेदुबन्ध्या भवति च गर्भिणी त्वगर्भा। नगरप्रवेशविषयाद्युपद्रवे करपीडने विबुधतीर्थयात्रयोः। ऋपपीडने नववधूप्रवेशने प्रतिमार्गवो भवति दोषकृच्छुद्धि। पित्र्ये मृदे चेत् कृष्णपुष्पसम्भवः स्त्रीणां न दोषः प्रतिशुक्रसम्भवः। भग्वङ्गिरोवच्यवनिष्ठकश्यपानीचां भरद्वाजस्यैः कृते तथा"स्तं० चि० "पूर्वं नववधूप्रवेशे जाते तदनन्तरं परादत्यापि पितृमृदृक्षप्राप्तावपि वध्वा यद्येष्टवर्षाणि स्थितायाः पुनर्भर्तृमृदृक्षप्रवेशो द्विरागमशब्दवाच्यः। अयंचाचारः प्राच्योदीच्यपाश्चात्यानामेवेति। चरेदिति। अथ वधू-प्रवेशकथनानन्तरं पुनर्वधूप्रवेशं द्विरागमनं वक्ष्यमाण-नक्षत्रादिषु चरेत् कर्यात्कदा ? ओजर्क्षावने विषमवर्षे प्रथमे तृतीये पञ्चमे वा वर्षे सति। तथा घटाजिमेषगे कुम्भतुलिकमेषस्थिते रवौ। तथा वरस्य रवीज्यशुद्धिः रवेः सूर्यस्य वरस्य गुरोः शुद्धिस्तयोर्मतः। शुभयुक्तस्य सौम्यबुधगुरुशुक्राणामन्यतमस्य वासरे सति। मिथुनमी-नकन्यातुलाद्यगाणामन्यतमे लग्ने शुभयुक्तावलोकिते शुभयुक्ते वा सति। लघून्यश्विनीपुष्यहस्ताः ध्रुवाणि प्रसिद्धानि चराणि स्वात्यादित्रयपुनर्वसुश्रवाणाः अक्षपोरा-अमृदुं मृदुं क्षिप्रं प्रसिद्धानि एषु भेषु द्विरागमः प्रशस्त इत्यर्थः। यदाह भट्टोत्पलः "तिष्यादित्यसमी-रणादितिवसुत्वाष्ट्रोत्तराफल्गुनीरोहिणयः शुभदाश्च वर्षमसमं मेषालिकुम्भे रविः। कन्यामन्मथमीनमे नव-वधूयानं शुभे तौलिके देवाचार्यसितेन्दुसौम्यदिवसे शुद्धे गुरौ भास्करे" इति। यन्मदनात्रं कानिचिद्ग्रन्थाधिकानि उक्तानि तानि राजमार्तण्डेनोक्तानि। "नीहारांशु धनोत्तरादितिगुरुब्राह्मानुराधाश्विनीमूलाहस्करवास्वा-निलहरित्वाष्ट्रेषु शस्ते तिथौ। कुम्भाजालिगते रवौ शुभकरे प्राग्प्रोदये भार्गवे सूर्ये कीटघटालगे शुभ-दिने पक्षे च कृष्णेतरे। स्थित्वा दिक्प्रतिलोमगो बुध-सितौ यावाटगं दिक्पतिं चानीता शुभशालिनी नव-वधूर्निस्योत्सवैर्मन्दिरम्"। यावाटगान् यात्रायां व-क्ष्यति। शुक्रास्तनिषेधस्तु सामान्यतो वाप्यारोपेत्या-दिनोक्त एवेति न पुनरुक्तः। यद्यपि प्राक् सामान्येन बालशुद्धिरुक्ता तथाप्यावश्यकत्वे। "चैत्रे पौषे फरि-ल्गुने गुरोरस्ते भविष्यति। नवोढागमनं नैव ऋते पञ्च-त्वमाप्नुयादिति" बादरायणवाक्यात्रैव वधूप्रवेशः कार्यः। दैत्येज्य इति। यदि दैत्येज्यः शुक्रोऽभिमुखदर्शिषे गन्तव्यदिगभिमुखे गन्तुर्दक्षिणदिग्भागे वा स्थितः स्यात्तदा गिरुर्बालः गर्भिणी गर्भवती नवोढा नूतनपरिणीता व्रजेत्तदा बालः विपद्यते म्रियते। गर्भिणी त्वगर्भा गर्भ-रहिता स्यात् गर्भस्रावयती भवेत्। नूतनपरिणीता नवोढा बन्ध्या अपत्यसम्भवरहिता स्यात्। यदाह बा-दरायणः "अस्तङ्गते भर्गोः पुत्रे तथा सम्मुखमागते। नष्टे जीवे निरंशे वा नैव सञ्जायतेऽर्भकः। गर्भिणी वा-लकेनापि नववध्वा द्विरागमे। पदमेकं न गन्तव्यं शुक्रे सम्मुखदर्शिषे। गुर्विणी स्रवते गर्भं बालो वा मरणं व्रजेत्। नवा वधूर्भवेद्बन्ध्या शुक्रे सम्मुखदर्शिषे"। यदि शुक्रः पूर्वस्यामुदितस्तदा पूर्वदिशि गन्तुः सम्मुख एव पश्चिमां गन्तुः पृष्ठे, दक्षिणां गन्तुर्वामे, उत्तरां गन्तुर्दक्षिणे स्यात्। तदा पूर्वोत्तरे दिशौ न गच्छेत् किन्तु पश्चिमदक्षिणे दिशौ गच्छेत्। यदि पश्चिमायामुदितः शुक्रः तदा पश्चिमां गन्तुः सम्मुख एव दक्षिणां गन्तुः दक्षिणः। पूर्वां गन्तुः पृष्ठे उत्तरां गन्तुर्वामः। तदा पश्चिमदक्षिणे दिशौ न यायात्। किन्तु पूर्वोत्तरे दिशौ गच्छेत्। "पृष्ठे भर्गो पतत्यत्रौ प्रयाणे कान्तां कुलीनां सुभगां करोति। अग्रे सुखो वै विदधाति शुक्रो वैधव्ययोगौ खलु वामसंस्थः शुक्रः" इति। केचिद्द्वीपोत्सवप्रतिपदि नक्षत्रादिनियमं विनैव वधूप्रवेशं वाञ्छन्ति। उक्तञ्च "अस्तङ्गते गुरौ शुक्रे सिंहस्थे वा बृहस्पतौ। दोषोत्सववलेनैव कन्या भर्तृगृहं विशेत्" इति तदेतच्छिष्टाचारतो ज्ञेयम्। अत्र लग्नशुद्धिमाह बादरायणः "क्षयमुपगते जीवे भर्गौ केन्द्रमुपागते। शुद्धे लग्ने शुभाक्रान्ते गन्तव्यं भर्तृ-मन्दिरम्" नगरप्रवेशे, विषयोदेशः आदिशब्देन यात्रः। तथोपद्रवे चान्यराजकृतोपद्रवे सति दुर्भिक्षादिना वोपद्रवे सति। गन्तव्यदिशि प्रतिशुक्रकटोषो नास्ति। करपी-डने विवाहोद्देशेन यात्रायां सत्यां विबुधा देवानां यात्रा नगरकोटयात्रा देवयात्रा तीर्थयात्रा प्रयागादि-यात्रा तयोः। ऋपपीडने ऋपादाप्तेः सकाशात्पी-ड्यां दण्डादिकृतायां सत्याम् नववधूप्रवेशने नूतन-परिणीतायाः कन्यायाः भर्तृगृहप्रवेशे एतेषामन्यतम-भावे सति भार्गवः सम्मुखदोषकृद्भवति। यथाह बादं-रायणः "स्वभवनपुरप्रवेशो देशानां विप्लवे तथोद्वाहे।

नूतनवध्वागमने प्रतिशुक्रो न दुष्यतीति"। नूतनवधूनां स्वामिसङ्गमनं प्रतिशुक्रयात्रायां महान्दोषः। तदाह्यं प्रागुक्तम्। अथ प्रौढस्त्रीणां दिरागमने तथा गोत्रभेदपरत्वेन प्रतिशुक्रापवादान्तरमाह पित्रेत्र इति। पित्रिदं पित्रम्। तस्मिन् पित्रे मृते कुचौ स्तनौ पुंसस्ततः तत्सम्भवः स्यात्तदा स्त्रीणां प्रतिशुक्रसम्भवो दोषो नास्ति। उपनयनयज्ञादूर्ध्वं स्वयंगुरुगुरिराश्लिसम्भवेऽपि दोषो नास्तीति। तदुक्तं चण्डेश्वरेण "पित्रामारे कुचकुसुमयोः सम्भवो वा यदि स्यात्यूः शुद्धिर्न भवति रवेः सम्मुखो वाथ शुक्रः। लग्ने लग्ने गुणवति तिथौ चन्द्रतारानुकूले स्त्रीणां यात्रा भवति सफला सेवितुं स्वामिसङ्गम्" इति। वाशब्दाद्गुरुगुद्धिरपि चेत्र भवतीत्यर्थः। अथ भरद्वाङ्गिरोवत्सवसिष्ठकश्यपात्रिभरद्वाजगोत्रोत्पन्नानामपि प्रतिशुक्रसम्भवो दोषो नास्ति। यदाह बादरायणः "कश्यपेषु वसिष्ठेषु चात्रिभरद्वाङ्गिरःसु च। भारद्वाजेषु वात्सेषु प्रतिशुक्रो न दुष्यति" इति। अयं चापवादो यात्रामात्रसाधारणः" न दिरागमने, सम्मतिवाक्ये विशेषानुक्तेः। एवं प्राक्पद्योक्तोऽप्यपवादोज्ञेयः। केचित्त्वमं तेषामाहुः। यदाह मण्डेश्वरः "सो तेषां प्रतिशुक्रपातमशुभं ये वत्सभरद्वाङ्गिरोभारद्वाजवसिष्ठकश्यपकुलोत्पन्नाश्चाद्यात्रेः कुले। देशानां विषयाणां च निवर्तनं न स्यादिवाहे तथा तीर्थानां गमने तथैकनगरे ग्रामे च सौम्ये तथेति"। सोमस्यापत्यं सौम्यो बुधः। बुधसांमुख्येऽपि भरद्वाजादिगोत्रोत्पन्नानामपि तथा यानमशुभं नास्तीत्यर्थः तच्चिन्त्यं मूलवाक्यस्थापवादरूपस्यानुपलम्भात्। किं च यथा साधारण्येन यस्यां कस्यांचिद्दिशि यात्रायां शुक्राधिष्ठितादिनिषिद्धा सा च बादरायणादिवाक्यैरपोह्यते। तथा बुधसांमुख्ये गमननिषेधानुल्लेखेऽपवादस्यानुक्तत्वदर्शनात्। ननु "प्रतिशुक्रं प्रतिबुधं प्रतिसौम्यं गतो नृपः। बलेन शक्रतुल्योऽपि हृतसैन्यो निवर्तते" इति वसिष्ठोक्तिरेव बुधसांमुख्यदोषनिषेधबोधिकास्तीति। किं च "कुजाय दृषभं दद्यात् स्वर्णं दद्याद्बुधाय च। तत्तत् सम्मुखजो दोषस्तत्क्षणादेव नश्यति" इति बुधसांमुख्यदोषनिराकरणाच्चौ अपि तद्दोषवत्तौ प्रमाणमिति चेत्। सत्यम्। प्रतिशुक्रं प्रतिबुधं इत्यादिवाक्यैर्बुधसांमुख्यमपि दोषावहमेवेति प्रतीयते। अत्रार्थवादोऽयमपि श्रीपतिना "प्रतीन्दुजं भूमिसुतेर्मतस्य नान्येषु कार्येष्वविधौ समर्थाः" इति। तत्त्वं रत्नम्। नारदेनापि "प्रतीन्दुजातं दोषं हन्तुं ब्रह्मा प्रभुर्न हि" इति। तत्र गोत्रादिविषयत्वेन परिहारो योऽभिहितः स शुक्रसांमुख्ये एव नतु बुधसांमुख्ये गोत्रपरिहारस्तु दोषकरवाक्यान्ते प्रतिशुक्रं न विद्यते इत्युक्तम्। ननु प्रतिशुक्रमित्यादिवाक्योपात्तस्य प्रतिबुधस्यायं परिहारोऽस्तु दोषकथनानन्तरमेव तस्याभिधानात् प्रतिशुक्रपदं तु सख्यतां स्मरयितुम् उपात्तं तदभिप्रायेण सौम्ये तथेति मण्डेश्वरोक्तिः साधीयसीति चेन्न यदोषोऽभिमतः स्यात् सौम्ये तथेतिवक्ष्यमे तथेति वक्तव्यं स्यात्। तन्न युक्तम्। किं च प्रतिशुक्रपदं सख्यतां स्मरयितुम् उपात्तमित्युक्तं तदप्ययुक्तम्। कुतः "शुक्रास्तदोषस्य महत्त्वोक्तेरादित्यवत्तोऽयं गोत्रादिपरिहारः। "कामं व्रजेद्वा प्रतिशुक्रमस्तङ्गते च यायान्न जिगीषुरत्रेति" श्रीपत्युक्तेः शुक्रास्तदोषस्यापवादो बुधास्तकूलत्वमपि तेनैव "अस्तङ्गतेऽप्यास्फुजिति प्रयायाद्बुधो यदि स्यादनुकूलवर्त्मनीति"। अनुकूलवर्त्मनी सातव्यादिगीष्टवर्त्मनी। बुधप्रतिकूल्यं तु महादोषावहमेतद्वाक्यं तैरपि प्रायशोऽभिहितम्। परन्तु बुधास्तः समीचीनो न तेति न वचनं युक्तिपदवीं वा काञ्चिदध्यधायि। तस्माद्वाचनिकेऽर्थे न युक्तिः प्रभवेदिति। बुधसांमुख्ये गोत्रादिपरिहारो न शिरोमणिपदवीमारोहति। आदिशब्दात् "स्वभवनपुरप्रवेशे देशानां विप्लवे तथोद्वाहे। नूतनवध्वागमने प्रतिशुक्रविचारणा नास्ति" "एकयामे पुरे वापि दुर्भिक्षे राष्ट्रविप्लवे। विवाहे तीर्थयात्रायां प्रतिशुक्रो न दुष्यति" इति। तस्मान्यायलाञ्छनसांमुख्येऽपि विशिष्टार्थवचनाभावात्। किन्तु शुक्रसांमुख्य एव स परिहारः। सोऽपि सर्वेषां यात्रामात्रसाधारणः। परन्तु शिशुगर्भिणीनवधूनां "अस्तङ्गते भृगोः पुत्रे" इत्यादिना बादरायणादिवाक्यात्तु विशेषफलावगतिमात्रे तत्रैषां शिष्टादीनां बुधसांमुख्यविचारस्तु दुराधर्ष एवेत्यलमतिप्रसङ्गेनेति शिवम्" श्रीधा॰

द्वागमदिरागमवादोऽत्र।

दिरात्र त्रि॰ द्वाभ्यां रात्रिभ्यां निर्वृत्तः तद्धितार्थदि॰ ठक्। तस्य लुक् अच समा॰। [1]राविद्वयसाध्ये श्यामवेदे प॰ "एकरात्रो दिरात्रः ः" ऋव॰१।१८।१॰ "द्युदि

दिरात्रः" काल्या० १।८।२२। २व्रतभेदे न०। समा० द्विगुः अच् समा०। ३रात्रिद्वये न०।

दिरात्रीण त्रि० द्वाभ्यां रात्रिभ्यां निर्वृत्तादि छ तस्य न लुक्। रात्रिद्वयसाध्ये पक्षे ठञ्। द्वैरात्रिक तत्रार्थे

दिराप पुंस्त्री० द्विः दिवारात्रमापिबति आ+पा-क। रात्रिदिनशब्दस्य पुंवद्भावेन प्रथमयानोत्तरं सप्तमेन यानात् दिवारात्रापित्वात् तथात्वम् स्त्रियां ङीष्।

दिराषाढ पु० "माघवादिषु षट्केषु मासि दर्शद्वयं यदा। दिराषाढः स विज्ञेयः शेते हि चावधेऽच्युतः" मिथि रोक्ते मिथुनस्थरव्यारब्धशुक्लप्रतिपदादिदर्शान्तमासद्वये। स चाषाढमलमासे भवति यदा "मिथुनस्थो यदा भानुरमावस्याद्वयं स्पृशेत्। दिराषाढः स विज्ञेयो विष्णुः स्वपिति कर्कटे। पौर्णमास्यद्वयं यत्र पूर्वाषाढाद्वयं स्पृशेत्। दिराषाढः स विज्ञेयो विष्णुः स्वपिति कर्कटे" माधवोक्ते मासभेदे च।

दिरुक्त त्रि०द्विः दिवारुक्तः। १अभ्यस्ते द्वित्वप्राप्ते धात्वादौ २द्विवारं कथिते च।

दिरूढा स्त्री द्विवारमूढा वह-कर्मणि क्त। द्विवारविवाह वृतायां पुनर्भूस्त्रियाम् हेमच०।

दिरेतस् पु० द्वे रेतसी कारणमस्य। द्वाभ्यां पशुभ्यां रासभाश्वाभ्यां जाते १अश्वतरे गोऽजाभ्यां २जाते गर्दभे च "तदेतमेकं पशुं द्वाभ्यां पशुभ्यां प्रत्यपद्यन् रासभं गोदावेव तद्यदेतमेकं पशुं द्वाभ्यां पशुभ्यां प्रत्यपद्यंस्तस्मादेवैकः सन्दिरेताः" शत०ब्रा० ६।२।१।२१। अत्र गर्दभस्य तथात्वसत्त्वेऽश्वतरस्य तथात्वं च लोकप्रसिद्धम्।

दिरेफ पु० द्वौ रेफौ वाचकशब्दोऽस्य। द्विरेफयुक्तभ्रमरशब्दवाच्ये १मधुकरे भ्रमरः २वर्णरे हेमच०"मधु द्विरेफः कुसुमैकपात्रे" द्विरेफमालाः सन्निषेव्यसङ्गाः" कुमा०।

द्विर्वचन न० द्विरुच्यते वच-कर्मणि ल्युट्। १द्विरुक्तौ द्विरुच्यते अभ्यस्ते धात्वादौ च "द्विर्वचनेऽचि" पा० "न पदान्तद्विर्वचनेत्यादि" पा०।

द्विलक्षण त्रि० द्वे लक्षणे प्रकारौ यस्य। प्रकारद्वयवृते द्विधाभिन्ने "समानवानकर्मा च विपरीतस्तथैव च। तदात्वावतिथ्ययुक्तः सम्बन्धी द्विलक्षणः" मनुः। द्विलक्षणः द्विप्रकारः" कुल्लू०।

द्विवक्त्र पु० द्वे वक्त्रे अस्य। १सप्तद्वयवृते राजर्षि २दानवभेदे "एकवक्त्रो महावक्त्रो द्विवक्त्रः कालसन्निभः" हरिवं० २६३अ० नानादानवनामसहस्रगणुक्तौ।

द्विवचन न० द्वौ द्वित्वमुच्येते अनेन वच-करणे ल्युट् कर्मण्या समासः। द्वित्वबोधके पा० परिभाषिते औश्यादिन्यादौ तसुवस्प्रभृतौ च। "द्वयोर्द्विवचनैकवचने बहुषु बहुवचनमिति" पा०।

द्विवल्लक पु० द्विगुणितः वल्लः संज्ञायां कन्। षोडशकोषे स्टङ्भेदे "वल्लोऽष्टाभिर्द्विवल्लको द्विगुणः" ह०सं० ५३अ०।

द्विवर्ष त्रि० द्वे वर्षे वयोमानमस्य ठक् तस्य लुक्। १द्विवर्षवयस्के गवादौ स्त्रियां टाप्। द्वे वर्षे अधीतो भृतो भूतो भावी वा ठञ् तस्य चित्त्वति नित्यं लुक्। द्विवर्षं २मूल्यत्वे नियोजिते ३भृते कर्मकरे ४स्वस्वत्वव्याप्ये ५भाविनि च। अचेतने तु "वर्षाल्लुक् च" पा० लुक् पक्षे च ठञ् च। द्विवर्षे द्विवर्षीण अचेतने व्याधादौ भविष्यति तु "वर्षस्याभविष्यतीति" पा० उत्तरपदवृद्धिः। द्वैवार्षिक द्विवर्षभृते धान्यादौ वासादौ च भविष्यति तु नोत्तरपदवृद्धिः। द्वैवार्षिक इत्येव। "अनद्वार्षिकं प्रेतं निदध्युर्बान्धवा बहिः" मनुवाक्ये चित्त्वत्वापि न लुक् आर्षत्वात् बोध्यम्। स्वार्थे क। द्विवर्षवयस्के त्रि० स्त्रियां टापि अतइत्वं द्विवर्षिका तत्रार्थे हेमच०

द्विवाहिका स्त्री द्विप्रकारं वाहयति वाह्-ण्वुल्। दोलायां शब्दमा० तया उभयपार्श्वयोः स्कन्धस्य वाह्यात्तथात्वम्।

द्विविंशतिकीन न० द्वाविंशतिकमर्हति तत्परिमाणमस्य वा ख। द्वाविंशतिकार्हे तत्संख्यापरिमिते

द्विविद पु० १वानरभेदे स च रामसेनान्तर्गतः। "मैन्दश्च द्विविदश्चापि सुग्रीवसचिवौ स्मृतौ। जाम्बवान्ऋक्षराजश्च सुषेणप्रमुखास्तथा" भा०व० २७६अ०। द्वापरयुगीये सौभद्वारस्थे २वानरभेदे च "सौभद्वारे वानरेन्द्रो द्विविदो नाम नामतः" भा०उ० १२६अ०। "वानरो हि महावीर्यो मैन्दोद्विविद एव च। विजितो युवतद्वर्यौ जाम्बवांश्चापराजितः" हरिवं० १७४अ०। "वसुदेवोत्तरे गोत्रे द्विविदो नाम वानरः। ऐडाविकस्वरं कृत्वा तस्य नामानुकीर्तनात्"।

द्विविध त्रि० द्वे विधे अस्य। द्विप्रकारे "निकामतप्ता द्विविधेन वह्निना तमश्चरेवेन्धनसम्भृतेन च" कुमा०

द्विविन्दु पु० द्वौ विन्दू वेखनाकारोऽस्य। विसर्गे वर्णभेदे।

द्विविस्त त्रि० द्वे विस्ते अर्हति परिमाणमस्य वा आर्हीयः ठक् तस्य वा लुक्। विस्तद्वयार्हे तत्परिमिते पक्षे ठकोऽलुक्। द्वैविस्तिक तत्रार्थे। [श्यायिनि

**द्विवेद** त्रि० द्वौ वेदावधीते वेद वा अण् तस्य लुक्। द्विवेदा-
**द्विवेयरा** स्त्री द्वौ वेयौ यानस्थानरूपौ राति ददाति रा-क। लघुरथे नरवाह्यावां गम्यां ङीरा०।

**द्विव्रण** पु० द्विविधो व्रणः शाक०त०। सुश्रुतोक्ते शारीरे आगन्तुके च द्विविधे व्रणे। तस्येदमृ छ। द्विव्रणीय तदधिकारेण चिकित्सितादौ। द्विविधाव्रणतद्भेदनिदानादि सुश्रुते दर्शितं यथा "अथातो द्विव्रणीयचिकित्सितं व्याख्यास्यामः। द्वौ व्रणौ भवतः शारीर आगन्तुश्चेति। तयोः शारीरः पवनपित्तकफशोणितसन्निपातनिमित्तः। आगन्तुरपि पुरुषपशुपक्षिव्यालसरीसृपप्रपतनपीडनप्रहारास्निचारविषतीक्ष्णौषधशस्त्रकरपादमुष्टिचक्रेषुपरशुयष्टिकुन्ताद्यायुधाभिघातनिमित्तः। तत्र तत्रेत्र व्रणसामान्ये द्विकारणोत्थानप्रयोजनसामर्थ्याद्द्विद्विव्रणीय इत्युच्यते। सर्वशस्त्रेष्वागन्तु व्रणे तत्कालमेव सुतोष्णः प्रभूतस्रोपशमार्थं पित्तवच्छीतक्रियावधारणविधिर्विशेषः सन्धानार्थस्तु मधुघृतप्रयोग इत्येतद्द्विकारणोत्थानप्रयोजनमुत्तरकालन्तु दोषोपप्लवविशेषाच्छारीरवत्प्रतीकारः। दोषोपप्लवविशेषः पुनः समासतः पञ्चदशप्रकारः प्रसरणसामर्थ्यादयोक्तो व्रणप्राधिकारे गुरुत्वात् षोडशप्रकार इत्येके। तत्र तत्त्रयं द्विविधं सामान्यं वैशेषिकञ्च। तत्र सामान्यं रुक्, व्रण गात्रविचूर्णने व्रणतीति व्रणः। विशेषस्त्रयं पुनर्वातादिभिस्त्रिभिर्विशेषः। तत्र श्यावारुणाभस्तनुः शीतपिच्छिलाल्पस्रावी रूक्षस्फुटनचटनायनशीलः स्फुरणायामतोदभेदवेदनाबहुलो निर्मांसश्चेति वातात्। स्निग्धः पीतनीलाभः किंशुकोदकाभोष्णस्रावी दाहपाकरागविकारो पीतपिडकाजुष्टश्चेति पित्तात्। प्रततचण्डकण्डूबहुलः स्थूलो घनः स्वल्पस्थिरास्रावुत्सन्नावततः कठिनः पाण्डुवभासो मन्दवेदनः शुक्लशीतस्निग्धपिच्छिलस्रावी गुरुश्चेति कफात्। प्रवालदलनिचयप्रकाशः श्लक्ष्णस्फोटपिडकाजालोपचितस्फुरक्तस्थानगन्धः सवेदनो धूमायनशीलो रक्तस्रावी पित्तविकुर्वेति रक्तात्। तोददाहधूमायनप्रायः पीतारुणाभासस्तदूर्ध्वस्रावी चेति वातपित्ताभ्याम्। कण्डूयनशीलः सन्नितोदो दारुणो बहुरुक्षः शीतपिच्छिलस्रावी चेति वातश्लेष्मभ्याम्। गुरुः सदाह उष्णः पीतः पाण्डुस्रावी चेति पित्तश्लेष्मभ्याम्। रूक्षस्फुटनतोदबहुलः सुप्त इव च रक्तारुणाभस्तदूर्ध्वस्रावी चेति वातशोणिताभ्याम्। ग्रथितश्यावाभो शीतघावनतोयसन्निभस्तदूर्ध्वस्रावी चेति पित्तशोणिताभ्याम्। रक्तोगुरुः पिच्छिलः कण्डूप्रायः स्थिरः सरक्तपाण्डुस्रावी चेति श्लेष्मशोणिताभ्याम्। स्फुरणतोददाहधूमायनप्रायः पीततनुरक्तस्रावी चेति वातपित्तशोणितेभ्यः। कण्डूस्फुरणचूषणधूमायनप्रायः पाण्डुघनरक्तस्रावी चेति वातपित्तश्लेष्मशोणितेभ्यः। दाहपाकरागकण्डूप्रायः पाण्डुघनरक्तस्रावी चेति श्लेष्मपित्तशोणितेभ्यः। त्रिविधवर्णवेदनास्रावविशेषोपेतः पवनपित्तकफेभ्यः। निर्दलननिर्मथनस्फुरणतोददाहपाकरागकण्डूस्रावबहुलोनानावर्णवेदनास्रावविशेषोपेतः पवनपित्तकफशोणितेभ्यः। स्निग्धातलाभो मृदुः स्निग्धः श्लक्ष्णो विगतवेदनः सुखवस्थितो निरास्रावश्चेति शुद्धो व्रण इति।"

**द्विशत** न० द्विगुणं शतम्। शतदये। पूरणे ङ। शतसंख्यापूरणे त्रि०। ततस्समप् द्विशततम तत्संख्यापूरणे त्रि०। द्विशतेन क्रीतम् कन्। "शताच्च ठन्यतावशते" पा० अशतमात्र इति विशेषणात् न ठन्यतौ द्विशतक। तत्क्रीते त्रि० द्वयोः शतयोः समाहारः ङीप्। २द्विशती शतद्वयसमाहारे स्त्री।

**द्विशतिका** द्वे द्वे शते ददाति "पादशतस्य संख्यादेर्वीप्सायां वुन्" पा० वुन् वुञ्च्लं स्त्रियामेव। द्विद्विशतदाने

**द्विशत्य** त्रि० द्विशतेन क्रीतम् "पक्षपादमाषशताद्यत्" पा० यत्। द्विशतेन क्रीते।

**द्विशफ** पुंस्त्री द्वौ शफौ यस्य। द्विखुरे द्विखुरे पशुभेदे "गौरजो महिषः कृष्णः शूकरो गवयो रुरुः। द्विशफाः पशवश्चैते अविरुष्ट्र सप्तमः" भाग०३।१०।२ "कापोषकौटजोर्णानां द्विशफैकशफस्य च" मनुः।

**द्विशरीर** पु० द्वे चरस्थिरात्मके शरीरे अवयवे यस्य। चरस्थिरात्मके मिथुनकन्याधनुर्मीनरूपे राशिभेदे तेषां च प्रथमार्द्धस्य स्थिरसान्निध्यात् स्थिरात्मकत्वं चरमार्द्धस्य चरसान्निध्याच्चरत्वम्। द्वितनुद्विदेहादयोऽप्यत्र।

**द्विशस्** अव्य० द्वौ द्वौ ददाति करोति वा शस्। एकक्रियया द्वयोर्व्याप्तौ। "द्विशः पात्राणि संसादयति" कात्या०श्रौ० २।३।६

**द्विशाण** त्रि० द्वाभ्यां शाणाभ्यां क्रीतम्। "द्विस्त्रिपूर्वादण् च" पा० ठञ् तस्यैव "अध्यर्द्धपूर्वेति" पा० लुक्। शाणद्वय क्रीते पक्षे अण् "परिमाणान्तस्यासंज्ञाशाणयोरिति" पा० पर्युदासादादिवृद्धिः। वैशाण पक्षे यत्। द्विशाण्य तत्रार्घे

**द्विशीर्ष** पु० द्वे शीर्षे यस्य। बहौ यद्वत्।

**द्विशूर्प** त्रि॰ द्वाभ्यां शूर्पाभ्यां क्रीतम् "शूर्पादञन्यतरस्याम्" पा॰ ञञ्ठञौ वा "अध्यर्धपूर्वद्विगोर्लुक्" पा॰ तयोः लुक्। द्वाभ्यां शूर्पाभ्यां क्रीते, द्वयोः शूर्पयोः समाहारः। द्विशूर्पी तया क्रीतमिति विग्रहे ठञेव न ञञ् शूर्पान्तत्वेऽपि प्रत्ययविधौ तदन्तयङ्ग्रहणनिषेधात्। ठञेव न लुक् तस्य द्विगुनिमित्तत्वाभावात् "परिमाणान्तस्येति" पा॰ उत्तरपदवृद्धिः। द्विशौर्पिक तत्रार्थे त्रि॰ स्त्रियां ङीप्।

**द्विशृङ्गिका** स्त्री द्वे शृङ्गे इव फले अस्याः कप् अतइत्त्वम्। मेढ्वल्लतां पारस्करनिघ॰।

**द्विष** वैरे अदा॰ उभ॰ सक॰ अनिट्। द्वेष्टि द्विष्टे—अद्विषत्—अद्विषुः। अद्विक्षत् त द्विक्षेष द्विद्विक्षे। "यः सर्वत्रानभिस्नेहस्तत्तत् प्राप्य शुभाशुभम्। नाभिनन्दति न द्वेष्टि" "न द्वेष्टि कुशलं कर्म कुशले नानुषज्यते" गीता "ततोऽद्विषुर्निराशोके स्वेभ्योऽन्येभ्यश्च राक्षसाः" भट्टिः "संवत्सरं प्रतीक्षेत द्विषन्तीं योषितं पतिम्" मनुः आर्षत्वात् तुस्।

**द्विष्** त्रि॰ द्वेष्टि द्विष—क्विप्। शत्रौ अमरः। "रन्ध्रान्वेषणदक्षाणां द्विषामामिषतां ययौ" रघुः।

**द्विष** त्रि॰ द्विष—कर्त्तरि क। द्वेषकारके शत्रौ "तन्निमित्तपूजातद्गरिद्विषतम्" ह॰सं॰७८अ॰।

**द्विषत्** त्रि॰ "द्विषोऽमित्रे" पा॰ प्रथमासामानाधिकरण्येऽपि द्विष—शतृ। द्वेषकारके शत्रौ अमरः "पार्श्वेनाव द्विषन्नृसदम्" माघः।

**द्विषन्तप** त्रि॰ द्विषन्तं तापयति "द्विषत्परयोस्तापेः खच्" पा॰ खचि हृस्वः "अरुर्द्विषदजन्तस्य" पा॰ मुम् संयोगान्यतकारस्य लोपः। शत्रुतापके। घटघटीयङ्ग्रहणाद्धिकविशिष्टपरिभाषा अनित्या तेन द्विषन्तीं तापयतीत्यादौ न खच् किन्तु खष्। द्विषतीताप इत्येव सि॰ कौ

**द्विषष्** त्रि॰ ब॰व॰। द्विगुणिताः षट्। द्वादशसु "द्वादशायां तोयमापद्योऽजनयद्दादशात्मजान्। इत्युपक्रमे सुदेवोरोचनौ द्विषट्" भाग॰ ३।१।७

**द्विषाष्टिक** त्रि॰ द्वे षष्टी अधीष्टो भृतो भावी वा ठञ् उत्तरपदवृद्धिः। द्वे षष्टी दिनानि व्याप्य भृते २भूते ३भाविनि च। [ उदा॰ दक्षम्।

**द्विषेण्य** त्रि॰ द्विष—एण्यत् किच्च। द्वेषशीले अद्विषेण्यशब्दे

**द्विष्ट** त्रि॰ द्विष—कर्मणि क्त। द्वेषविषये "निष्ठासिद्धे भवेद्वेषात् द्विष्टसाधनताधियः" भाषा॰ द्वेषशब्दे दृश्यम्। द्विष+पृषो॰। २ताचे न॰ शारसुन्दरी।

**द्विष्ठ** त्रि॰ द्वयोस्तिष्ठति स्था—क "अव्यावेति" पा॰ षत्वम्। १द्वयोः स्थिते संयोगविभागादौ २स्थानद्वयस्थिते "द्विष्ठास्त्रिषष्टयाभ्यस्ताश्चान्द्रवासरभाजिताः" सूर्य॰सि॰। द्विः द्विवारं स्थितम् वा विसर्गलोपे न षत्वम। द्विस्थ द्विवारस्थिते त्रि॰ "त्रिभुजे भुजयोर्योगस्तदन्तरगुणो भुवा हृतो लब्धा द्विस्था भूरूनयुता दलिता बाधे तयोः स्याताम्" लीला॰।

**द्विस्** अव्य॰ क्रियागणने द्वि+सुच्। द्विवारक्रियादौ "द्विः शरं नाभिसन्धत्ते द्विः स्थापयति नाश्रितान्। द्विर्ददाति न चार्थिभ्यो राजा द्विर्नैव भाषते"। "त्रिःप्राश्यापो द्विरभ्युक्ष्य सुखमेतान्युपस्पृशेत्" ति॰त॰ "द्विःप्रसह्याक्षतोऽक्षम्" मनुः।

**द्विसम** त्रि॰ द्वे समे परिमाणमस्य ठञ् तस्य लुक्। १द्विवर्षपरिमाणे। द्विसममधीष्ट इत्यादौ ठञ् "परिमाणान्तस्या संज्ञाशाणयोः" पा॰सू॰कालपरिमाणस्यापदस्यम् "संख्यायां संवत्सरस्य च" पा॰ संवत्सरस्य पृथग्ग्रहणात् नोत्तरपदवृद्धिः, अध्यर्धेत्यादिना न लुक् अस्य ठञो द्विगुनिमित्तत्वाभावात्। द्वैसमिक द्विसमव्यापके ज्वरादौ।

**द्विस(सा)हस्र** त्रि॰ द्वाभ्यां सहस्राभ्यां क्रीतम् द्वे सहस्रे परिमाणमस्य वा अण्। ठञादेरपवादः तस्य वा लुक्। १द्विसहस्रक्रीते २द्विसहस्रपरिमिते च। द्विसहस्रपरोदायः स्त्रियै देयो धनस्य तु" दायभा॰। २द्विगुणितसहस्रे च

**द्विसहस्राह्व** पु॰ द्विराहृतं सहस्रं आक॰ न॰ द्विसहस्रं द्विगुणसहस्रमर्थेऽपि यस्य अच् समा॰। अनन्ते क्षेम॰ तस्य सहस्रवक्त्रत्वेन प्रतिमुखं द्विद्विनेत्रत्वात् तथात्वम्।

**द्विसांवत्सरिक** त्रि॰ द्विवत्सरं भूतादि ठञ्। "संख्यायां संवत्सरसंख्यस्य च" पा॰ उत्तरपदवृद्धिः। द्विवर्षं व्याप्य भूतादौ। [ द्विसप्तति व्याप्य भूतादौ।

**द्विसाप्ततिक** त्रि॰ द्विसप्तिं भूतादि ठञ् उत्तरपदवृद्धिः

**द्विसीत्य** त्रि॰द्विवारं सीतया हलेन समितं "नौवयोधर्मेत्यादिना" पा॰ यत्। द्विवारं कृष्टक्षेत्रे।

**द्विसुवर्ण** त्रि॰ द्वाभ्यां सुवर्णाभ्यां क्रीतं ठक् अध्यर्धेति लुक् १द्वाभ्यां सुवर्णाभ्यां क्रीते। द्विसुवर्णेन क्रीतमिति विग्रहे ठ न लुक् ठको द्विगुनिमित्तत्वाभावात् परिमाणान्तत्वादुत्तरपदवृद्धिः। द्विसौवर्णिक द्विसुवर्णेन क्रीते। समाहारद्विगुः। २सुवर्णद्वये स्त्री ङीप्।

**द्विस्तना** स्त्री द्वौ स्तनाविव स्तदवयवौ यस्याः अच्समासत्वात् ङीप्। दृष्टकाष्ठतिभेदे सा च काल्या॰ श्रौ॰ १६।४ सूत्रे दर्शिता। दृष्टकाशब्दे ८६२ पृ॰ दृश्यम्। "स्तनाविवाधोमुखयति द्विस्तनामष्टस्तनामिके" काल्या॰श्रौ॰१६।३।१०।२।

द्विस्तावा स्त्री द्विर्द्विगुणिता तावती । "द्विस्तावा त्रिस्तावा वेदिः" पा० नि० । प्रकृतौ यावती वेदिः ततो द्विगुणायां वेद्यां स्त्रि० कौ० ।

द्वि(द्विः)स्त्रिंश न० द्विवारं त्रिंशत् इतौ सङ्ख्यायां द्विशब्दः विसर्गयुक्तो न सञ्जातः । द्विवारपके तण्डुले (उभना चाउल) एकवारं धान्यावस्थायां तण्डु त्रिंशता द्वितीयवारं तण्डुलावस्थायामिति द्विःत्रिंशत्तमम् । द्वि(द्विः)त्रिंशत्तमं पूरणे त्रि० । द्वात्रिंशद्वर्षदेशीये । नात्यन्तयज्ञे विप्राणां भोजने च निवेदने । न भक्ष्यं तदृतीनाञ्च विधवाब्रह्मचारिणाम् । ताम्बूलञ्च यथा ब्रह्मन् ! तथैते वस्तुनी ध्रुवम् ब्रह्मवै० पु० ब्रह्मख० । इत्तिनि शब्दर० ।

द्विहन् पु० द्वि+हन्-क्विप् इतौ सङ्ख्यायां द्विशब्दः ।

द्विहस्त त्रि० हस्तस्य कर्षे यत् द्विवारं हस्तः । द्विवारं हस्तलक्षणक्षेत्रे (दोचसा भूमि) अमरः ।

द्विहायन त्रि० द्वौ हायनौ वयःकालो यस्य । द्विवर्षे यस्यादौ स्त्रियां हायनान्तत्वात् ङीप् । "द्विहायनी दिवर्षा गौः" अमरः । समाहारद्वि० । २वर्षहये न० पाला० न ङीप् । "शुक्लं द्विहायनं वस्त्रं क्रौतं चैला त्रिहायनम्" मनुः । द्विहायनं व्याप्य व्रतं कुर्यात् इत्यर्थः ।

द्विहीन त्रि० द्वाभ्यां स्त्रीपुंसाभ्यां हीनम् । क्लीवलिङ्गशब्दे "द्विहीनं प्रसवे सर्वं हरीतक्यादयः स्त्रियाम्" अमरः ।

द्विहृदया स्त्री द्वे हृदये यस्याः । सर्भिण्याम् दोहदशब्दे २७६८ पृ० दृश्यम् ।

द्वीन्द्रियग्राह्य त्रि० द्वाभ्यामिन्द्रियाभ्यां चक्षुषा त्वचा च ग्राह्यः उत्तरपदद्विगुः । "संख्यादिरपरत्वान्नो द्वन्द्वं स्त्रीक्लीबयोश्च । एते तु द्वीन्द्रियग्राह्याः" भाषा० उक्ते त्वक्चक्षुषोर्ग्रहणयोग्ये पदार्थे ।

द्वीप पु० न० अर्द्धयो० द्विर्गता द्वयोर्वा दिशोर्गता आपोऽत्र च सर्वा० "ह्यत्तरपदसर्वेभ्योऽप इत्" पा० ईत् । जलमध्यस्थस्थलभेदे वारिवेष्टिते तटभेदे अन्तरीपे अमरः । भूम्यां प्रधानद्वीपाश्च नवैव तेषां नाम स्थानभेदाश्च त्रि० त्रि० उक्ता यथा "भूमेर्द्वे द्वारविन्ध्यो रुदक्स्थं जम्बूद्वीपं भारुराचार्यवर्यः । अर्द्धेऽन्यस्मिन् द्वीपषट्कस्य याम्ये चारक्षीरादाम्बुधीनां निवेशः । प्राक् ततः प्राग्वत्समत्वं क्रौञ्चं क्रौञ्चस्य सोमेदकस्करे च" । जम्बुद्वीपशब्दे १०४२ पृ० दृश्यम् । "द्वीपान्तरानीतवसूपयोग्यम्" अन्येऽपि उपद्वीपा रमणकादयः सन्ति तेऽपि नव लिखिता अष्टादश । "अष्टादशद्वीपनिखातयूपः" रघुः "नवद्वयद्वीपपृथग्जयश्रियाम्" नैष० तोयोत्थिते २पुलिनमात्रे च हैपायनशब्दे दृश्यम् । "कूर्मपाङ्क्तमाकीर्णां विपुलद्वीपशोभिताम्" भा० व० ६३अ० । सप्तसङ्ख्या द्वीपपूरणे २सप्तसङ्ख्यानस्थाने च । "द्वकोदरः सव्यसाची यमौ च कोऽत्र द्वीपः क्षात्रसुते वसदाशीः" भा० स० ६१अ० । "यदैषामभवत् द्वीपः कृत्स्नोऽसौ द्वकोदरः" भा० उ० ३८अ० । द्वौ वर्णौ रैवते रै-वा० पक् । ३व्याघ्रवर्णेऽपि न० भरतः । तदस्यास्ति अच् । ५स्था । त्रे पु० । [राजनि० ।

द्वीपकपूर पु० द्वीपस्य द्वीपान्तरस्य कर्पूरः । चीनकर्पूरे

द्वीपखर्जूर न० द्वीपस्य द्वीपान्तरस्य खर्जूरम् । मङ्गापारे राजनि० । [राजनि० ।

द्वीपज न० द्वीपे द्वीपान्तरे जायते जन ड । मङ्गापारे

द्वीपवती स्त्री द्वीपोऽस्त्यस्याम् मतुप् मस्य वः ङीप् । १भूम्यां २नद्याञ्च "यस्यद्वृतं द्वीपवत्या वाचिन्वा रसनारया" भा० आ० १६७ अ० । [राजनि० ।

द्वीप(पि)शत्रु पु० द्वी(पिः)पस्य व्याघ्रस्य शत्रुरिव । शतावर्याम् राजनि० ।

द्वीपिका स्त्री द्वीपः व्याघ्रः व्याघ्रतयाऽस्त्यस्याः ठन् । शतावर्याम् राजनि० ।

द्वीपिन् पु० द्वौ वर्णौ रैवते रैङ् यतौ वा० पक् द्वीपं चर्म तदस्यास्ति इनि । १व्याघ्रे (चिता बाघ) २चित्रके "सिंहद्वीपिकरव्याघ्रमक्षिपैव क्षणेन तम्" भा० व० ६३ अ० । व्याघ्रे "द्वीपिचर्माहतकटीम्" तन्त्रम् ।

द्वीपिनख पु० द्वीपिनो नख इव । व्याघ्रनखे ।

द्वीप्य त्रि० द्वीपे जलान्तर्वर्त्तिनि स्थलभूमौ भवः यत् । १द्वीपभवे २रङ्गे पु० "नादेयाय च द्वीप्याय च" यजु० १६।२१।

द्वीश्य त्रि० द्वौ ईशौ यस्य । १द्विदैवत्ये चर्यादौ २विशाखानक्षत्रे च तस्य इन्द्राग्निदेवताकत्वात् तथात्वम् ।

दृ(हृ)च पु० दृ अर्चौ यत् च समा० । वा० दा सञ्ज्ञायाम् । ऋग्वेदयजुस्सामाथर्वभेदे "तुभ्यमृक्सामयजुषा शतक्रतो विश्वे देवासो अदुहन्नवस्यवः" ऋक्० । मन्त्रभाग, स्तोत्रात्मा ऋग्वेदविशिष्टः, यज्ञा नो यज्ञं वनुषां वरेण्यः प्रत्नं नो यज्ञं वनुषां वरेण्यः प्रत्नं पितरमिडया धमन्ते विश्वामित्रस्य रक्षति ब्रह्मेदं भारतं जनम् । ऋचो अक्षरे परमे व्योमन् यस्मिन् देवा अधि विश्वे निषेदुः यस्तन्न वेद किमृचा करिष्यति य इत्तद्विदुस्त इमे समासते राजन्नहं हविरिति द्वृचाः" आश्व० श्रौ० ३।५।७ "एते वा ऋचाः" नारद० "पतङ्गमक्षमधुरस्य मायया वो नः स हव्यो अभिदासदग्ने भवानो अग्ने सुमना उपेतावित द्वृचाः" आश्व० श्रौ० ४।६।१ ।

द्वेष पु० द्विष–भावे घञ्। न्यायमते आत्मवृत्तौ गुणभेदे स च "दृष्टाद्वेषप्रयत्नसुखदुःखज्ञानान्यात्मनो लिङ्गम्" गौ०सू० दर्शितः "यज्जातीयस्यार्थस्य सन्निकर्षात् दुःखमात्मोपलब्धवान् तज्जातीयमेवार्थं पश्चात् हातुमिच्छति सैषं हातुमिच्छा द्वेषः। एकस्मिन्नर्थेऽर्थदर्शिनो दर्शनप्रतिसन्धानात् दुःखहेतौ द्वेषः इति भाष्यप्रशस्तोऽर्थः। तत्र दुःखं प्रतिकूलवेदनीयतया स्वतोद्वेषविषयः तत्साधनन्तु द्विष्टसाधनताज्ञानात्। "अधर्मजन्यं दुःखं स्यात् प्रतिकूलं सचेतसाम्"। भाषा० "प्रतिकूलमिति दुःखत्वज्ञानादेव सर्वेषां स्वभावतो विषय इत्यर्थः" सङ्गा०। "द्विष्टसाधनताबुद्धिर्भवेत् द्वेषस्य कारणम्" भाषा०।

"द्वेषं प्रति द्विष्टसाधनताज्ञानं कारणम्। बलवदिष्टसाधनताज्ञानञ्च प्रतिबन्धकं तेन बालरोगदुःखजनके पाकादौ न द्वेषः" सङ्गा०। द्वेषो द्विष्टसाधनताज्ञानञ्च निवृत्तिकारणम् "निवृत्तिस्तु भवेत् द्वेषात् द्विष्टसाधनताधियः" तर्कोक्तेः "स्वयमर्थः दुःखे निवृत्तिर्द्वेषात् तदुपाये निवृत्तिस्तु द्विष्टसाधनत्वज्ञानात् द्विष्टसाधनताज्ञानस्य दुःखसाधनविषयकनिवृत्तिं प्रति जनकत्वमन्वयव्यतिरेकाभ्यां स्थितम्" इति सङ्गावली।

"सुखेच्छाद्वेषनिमित्तत्वादारम्भनिवृत्तेः" गौ० सू०। "अयं खलु जानीते तावत् इदं मे सुखसाधनमिदं मे दुःखसाधनमिति ज्ञातं सुखसाधनमाप्तुमिच्छति दुःखसाधनं हातुमिच्छति। आप्तुमिच्छाप्रयुक्तस्य सुखसाधनावाप्तये समीहाविशेष आरम्भः। जिहासाप्रयुक्तस्य दुःखसाधनपरिवर्जनं निवृत्तिरेव ज्ञानेच्छाप्रयुक्तस्य दुःखानामेवोत्पिप्सयाऽसाधारणः एककर्तृकत्वं ज्ञानेच्छा प्रवृत्तीनां समानाश्रयत्वञ्च तस्माज्ज्ञानेच्छा द्वेषप्रयत्नसुखदुःखानि धर्मः नाचेतनस्येति आरम्भनिवृत्तेश्च प्रत्यगात्मनि दृष्टत्वात् परत्रानुमानं वेदितव्यमिति" भा०। सांख्यादिमते बुद्धिधर्मभेदे। सांख्यादिमतन्तु द्वेषः अष्टादशविधः तामिस्रशब्दे १२७२ पृ० दर्शितः स च बुद्धिधर्मः क्लेशविशेषः अविद्यास्मितारागद्वेषाभिनिवेशाः पञ्च क्लेशाः" इत्युद्दिश्य "दुःखानुशयी द्वेषः" इति लक्षितम्। "दुःखाभिज्ञस्य दुःखानुस्मृतिपूर्वो दुःखे तत्साधने वा प्रतिघो मन्युरित्यासां क्रोधः स द्वेष इति" भाष्यम्। दुःखमनुशेते कश्चित्तत्कारणसंस्कारभेदः तमोऽनुशतपरिणामः दैवात् सर्वदा मे मा भूदित्येवं हृदयं दुःखानुशयीति भाष्यार्थः। "अनभिज्ञस्य स्मृतेरभावात् दुःखाभिज्ञस्येत्युक्तं अयं भावे दुःखे द्वेषः दुःखानुस्मृतिपूर्वकः, अनुभूयमाने तु दुःखे नानुस्मृतिमपेक्षते। तत्साधने तु अयं भावे अनुभूयमाने वा दुःखानुस्मृतिपूर्वक एव द्वेषः अनुभवमानं हि दुःखसाधनं तज्जातीयस्य दुःखहेतुत्वं स्मृत्वा तज्जातीयतया चास्य दुःखहेतुत्वमनुमाय द्वेष्टि। प्रतिहन्तीति प्रतिघः द्वेषस्य प्रवृत्तेः प्रतिहननात् प्रतिघत्वम्" विव०। तच्च शत्रुव्याघ्रादिषु सत्सु न निवारयितुं शक्यम्। न च सर्वे ते दुःखहेतवो हन्तुं शक्याः ततः स द्वेषः सदा हृदयं दहति। यदा तु स्वस्येव परेषां सर्वेषामपि दुःखं मा भूदिति करुणा दुःखिषु भावयेत् तदा तैर्वादिद्वेषनिवृत्तौ चित्तं प्रसीदति। यदाऽसौ सुखसुहृत्सु स्पर्धितां भावयेत् तदा तदासनाभावात् स्वयमेवाप्रसक्तोऽसूया अन्ये दुःखे प्रवर्त्तते। तथा पापसुहृत्सेवेर्ष्यां भावयन् स्वयमपि तदासनाभावात् पापाद्विवर्त्तते। ततश्च सुखाकरत्वापकरणनिमित्तस्य पश्चात्तापस्याभावे चित्तं प्रसीदति। एवं सुखिषु मैत्रीं भावयतो न केवलं रागो निवर्त्तते। किन्त्वसूयेर्ष्यादयोऽपि निवर्त्तन्ते। तथा दुःखिषु करुणां भावयतः शत्रुवधादिकरो द्वेषो यदा निवर्त्तते तदा दुःखिप्रतियोगिकःसुखित्वप्रयुक्तो दर्पोऽपि निवर्त्तते। एवं दोषान्तरनिवृत्तिरप्यूहनीया। दुःखे तत्साधने च इदं मे मा भूदिति व्यूढाविरोधिनी चित्तवृत्तिः क्रोध इति द्वैष्ट्रेति वोच्यते। "इन्द्रियस्येन्द्रियस्यार्थे रागद्वेषौ व्यवस्थितौ" गीता।

द्वेषण त्रि० द्विष–युच्। द्वेषौ अमरः "मानपो द्वेषणः क्रोधी निर्घृणः पक्षपक्षजा" भा० शा० १६८अ०।

द्वेषपक्ष पु० ६त०। द्वेषान्तरभेदेषु "द्वेषपक्षाः क्रोध ईर्ष्या द्रोहोऽमर्ष इति" न्यायभाष्यम्।

द्वेष्टृ न० द्विष–कर्त्तरि क्विप्। द्वेष्टरि। "बाधनां द्वेषो अभयं कृणोतु" ऋ० ६।४७।१२। "द्वेषोद्वेष्टृन्" भा०

द्वेषस् न० द्विष–कर्मणि असुन्। द्वेषे पापादौ "द्वेषोयुतमाविवासन्ति" ऋ० ४।३३।५ द्वेषसो पापस्य युतं पापयुतम्" भा०।

द्वेषिन् त्रि० द्विष–णिनि। द्वेषकारके। "तथापि यद्यस्य तस्य तत्कारि द्वेषिणो वयः" रघुः। "मद्भाजो मद्गुरद्वेषी मद्द्वेषी मद्गुरप्रियः। उभौ तौ नरकं यातस्त्रिसप्तरज्जू घटाविव" पुरा० सारः।

भावे अनुत्। २द्वेषे २अप्रीतौ च पु०। "द्वेषोयुतो न दुरितं" ऋ०५।०।३।६। द्वेषोयुतः अप्रीतियुतः भा०।

द्वेष्य त्रि०द्विष्टमर्हः यत् कर्मणि ण्यत्। १द्वेषविषये २द्वेषार्हे च। "द्वेष्योऽपि सम्मतः शिष्टस्वार्थस्य यशोधनम्" रघुः। "यथा यमः प्रियद्वेष्यौ प्राप्ते काले नियच्छति" मनुः। स्वहितापकारमपेक्षापकारकर्त्तरि अनर्हत्वे २अप्रीतौ च।

द्वै च० हृ—वा० डै। वितर्के चादिगणः।

द्वैगुणिक त्रि० द्विगुणार्थं द्विगुणं "तत् प्रयच्छति गर्ह्यम्" वा ठक्। द्विगुणलाभाय धनप्रयोक्तरि दुष्टाजीवे वाङ्मात्रौ।

द्वैत न०द्विधा इतं ज्ञातं तस्य भावः स्वार्थे वा अण्। द्वैधीभावे २द्वये युगले च। द्वैताद्वैतयोरुभयोरपि सप्रमाणकत्वात् न्यायादिमते द्वैतम् वेदान्तिमते अद्वैतं रामानुजमते विशिष्टाद्वैतमित्येव स्थितम्। अन्ये शुद्धाद्वैतमिच्छन्ति। वल्लाचार्यास्त्वेवमाहुः। "अद्वैतमेव सत्यं तस्मिन् द्वैतं न सत्यमध्यस्तम्। रजतमिव शुक्तिकायां मृगतृष्णायामिवोदकस्फुरणम्। आरोपितं यदि स्यादद्वैतं वस्त्ववस्तुनि द्वैते। युक्तं नैव तदा स्यात् सत्यैश्वर्यासो भवत्सत्यानाम्। यद्यारोपस्तत्सत्योल्लङ्घनातिरिक्तस्य कस्यचिद्भावः। आरोपश्च न शून्ये तस्माद्द्वैतसत्यता याच्या। प्रत्यक्षानुपलभ्यं श्रुत्या प्रतिपाद्यमद्वैतम्। द्वैतं न प्रतिपाद्यं तस्य स्वयमेव लोकसिद्धत्वादिति। प्रपञ्चो यदि विद्येत निवर्त्तेत न संशयः। मायामात्रमिदं द्वैतमद्वैतं परमार्थतः।"

द्वैतवन न०द्वे शोकमोहादिके इते यस्मात् द्वीतं स्वार्थे अण् कर्म०। १तपोवनभेदे "युधिष्ठिरं द्वैतवने वनेचरः" किरा०। २तादृशवनोपलक्षिते सरोवरभेदे च। "इदं द्वैतवनं नाम सरः पुण्यजनोचितम्।" "गच्छामः पुण्यं विख्यातं महद्द्वैतवनं सरः" भा० व० २४ अ०। "तेन हैतेन ध्वसा द्वैतवने हिंजे मातृको राजा यत्रैतद्द्वैतवनं सरस्तदेतद्राजयाभिगीतं चतुर्दश द्वैतवने राजा संग्रामजिद्यान् इन्द्राय शत्रून्नोऽजनात् तस्माद्द्वैतवनं सरः" शत० ब्रा० १२।५।।८।

द्वैतवाद पु० द्वैतमधिकृत्य वादः। गौतमादिप्रणीते जीवेश्वरविभेदनिर्णायके १कथाग्रन्थभेदे कपिलादिप्रणीते नानाजीवनिर्णायके २कथाभेदे च। तत्र सांख्यमते यथा जीवानां परस्परभेदस्तथा सां० का० तत्त्वकौ० उक्तो यथा "जन्ममरणकरणानां प्रतिनियमादयुगपत्प्रवृत्तेश्च। पुरुषबहुत्वं सिद्धं त्रैगुण्यविपर्ययाच्चैव" सां० का०। "पुरुषबहुत्वं सिद्धं जन्ममरणकरणानां प्रतिनियमात् निकायविशिष्टाभिरपूर्वाभिर्देहेन्द्रियमनोऽहङ्कारबुद्धिवेदनाभिः पुरुषस्याभिसम्बन्धोजन्म न तु पुरुषस्य परिणामस्तस्यापरिणामित्वात् तेषामेव च देहादीनामुपात्तानां परित्यागो मरणं न त्वात्मनोविनाशः तस्य कूटस्थनित्यत्वात्। करणानि बुद्ध्यादीनि त्रयोदश तेषां जन्ममरणकरणानां प्रतिनियमोव्यवस्था वा यस्मिन् सर्वशरीरेष्वेकस्मिन् पुरुषे नोपपद्यते तदा सर्वेकस्मिन् जायमाने सर्वे जायेरन् म्रियमाणे च म्रियेरन् अन्धादौ चैकस्मिन् सर्वे एवान्धादयः विचित्रे चैकस्मिन् सर्व एव विचित्राः स्युरित्यव्यवस्था स्यात् प्रतिक्षेत्रं पुरुषभेदे तु भवति व्यवस्था। नचैकस्यापि पुरुषस्य देहोपाधानभेदाद्व्यवस्थेति युक्तं वाग्मिनाद्युपाधिभेदेनापि जन्ममरणादिव्यवस्थाप्रसङ्गात्। न हि वाग्मी शूरे, जाते वा जनादौ भङ्गव्यवस्थे, युवतिजाता मृता वा भवतीति। इतश्च प्रतिक्षेत्रं पुरुषभेद इत्याह त्रयुगपत्प्रवृत्तेश्च प्रवृत्तिः प्रयत्नस्तस्या यद्यप्यन्तःकरणवर्त्तिनी तथापि पुरुषे उपचर्यते तथा च तस्मिन्नेकस्मिन् शरीरे प्रयतमाने स एव सर्वशरीरेष्वेक इति सर्वत्र प्रयतेत सर्वाण्येव शरीराणि युगपच्चालयेत् नानात्वे तु नायं दोष इति। इतश्च पुरुषभेद इत्याह त्रैगुण्यविपर्ययाच्चैव एवकारोभिन्नक्रमः सिद्धमित्यनन्तरं द्रष्टव्यः सिद्धमेव नासिद्धम्। त्रयोगुणास्त्रैगुण्यं तस्य विपर्ययोऽन्यथाभावः, केचित् खलु सत्वनिकायाः सत्वबहुलाः यथोर्ध्वस्रोतसः केचिद्रजोबहुलाः यथा मनुष्याः। केचित्तमोबहुलाः यथा तिर्य्यग्योनयः। सोऽयमीदृशस्त्रैगुण्यविपर्ययोऽन्यथाभावस्तेषु सत्वनिकायेषु न भवेत् यदीकः पुरुषः स्याद्भेदे त्वयं दोष इति" तत्त्वकौ०। "जन्मादिव्यवस्थातः पुरुषबहुत्वम्" नाद्वैत श्रुतिविरोधेः जातिपरत्वात्" सां० सू०।

द्वैतवादिन् त्रि० द्वैतं जीवभेदं जीवेश्वरयोर्भेदं वा वदति वद-णिनि। जीवभेदवादिनि जीवेश्वरयोर्भेदवादिनि च नैयायिकादौ।

द्वैताद्वैत न० द्वैतञ्चाद्वैतञ्च। जीवेश्वरयोर्भेदाभेदयोः। "अद्वैतञ्च तथाद्वैतं द्वैताद्वैतं तथैव च। न द्वैतं नापि चाद्वैतमित्येतत् पारमार्थिकम्। न हि नैयायिकसम्बन्धो ब्रह्मभावेन भावितः। द्वैताद्वाभावस्यायानार्थं परमं पदम्। द्वैतपक्षाः समाख्याता वेदद्वैते तु व्यवस्थिताः"।

द्वैतिन् त्रि० द्वैतं भेदः सम्बततयाऽस्त्यस्य इनि। द्वैतवादिनि नैयायिकादौ। "स्वसिद्धान्तव्यवस्थासु द्वैतिनो निश्चिता दृढम्। परस्परं विरुध्यन्ते तैरियं न विरुध्यते"। "अद्वैतं परमार्थो हि द्वैतं तद्भेद उच्यते। तेषामुभयथाद्वैतं तेनायं न विरुध्यते"।

द्वैतीयीक त्रि० द्वितीय+स्वार्थे ठक्। द्वितीये "द्वैतीयीकतया मितोऽयमनमत् तस्य प्रबन्धे मङ्गा" इत्यादि नैष०।

द्वैधम् अव्य० द्वि+प्रकारे धसञ्। प्रकारद्वये एकेन सन्धिरपरेण विपद इत्येवं प्रकारद्वयमित्यादि। "श्रुतिर्द्वैधं यत्र तु स्यात्तत्र धर्मावुभौ स्मृतौ" मनुः। "बलस्य स्वामिनश्चैव स्थितिः कार्य्यैसिद्धये। द्विविधं कीर्त्यते द्वैधं षाड्गुण्यगुणवेदिभिः" मनुः।

द्वैध त्रि० धसञ्जन्तात् स्वार्थे वार्त्ति० स्वार्थे ड। १द्विप्रकारे। "बलस्थं परिमृष्टांशात् साधिद्वैधे नराधिपः" मनुः। "ततः साधिबलं साधु द्वैधवादकृतं भवेत्" भा० आ० ८१ अ०। राज्ञां सन्ध्यादिषु षट्सु गुणेषु २गुणभेदे "सन्धिर्नो विपदो यानमासनं द्वैधमाश्रयः" अमरः।

द्वैधीभाव पु० अद्वैधस्य द्वैधस्य भावः। द्वैध-चि भूप्रयोगः भावे घञ्। १द्विधाभावे षाड्गुण्यान्तर्गते २द्वैधरूपे भावे च। स च बाह्ये एकप्रकारः आभ्यन्तरे अन्यप्रकार इत्येवं द्विप्रकाररूपः यथोक्तं वह्निपु० षाड्गुण्योक्तौ "बलिनोर्द्विषतोर्मध्ये वाचात्मानं समर्पयेत्। द्वैधीभावेन तिष्ठेत्तु काकाक्षिवदलक्षितः"। २द्विधा भवने "अक्षरञ्च क्षरञ्चैव द्वैधीभावोऽयमात्मनः" भा० आश्व० २८ अ०।

द्वैप त्रि० द्वीपिनो विकारः "प्राणिरजतादिभ्योऽञ्" पा० अञ्। १व्याघ्रविकारे २तद्धर्मयुक्ते च। द्वैपेन चर्मणा परिवृतो रथः "द्वैपवैयाघ्रादञ्" पा० पुनरञ्। २द्वीपिचर्मपरिवृते रथे पु० द्वीपिन इदम् अण्। ३तत्सम्बन्धिनि त्रि०।

द्वैपक पु० द्वीपे भवः घूमा० वुञ्। द्वीपान्तरभवे।

द्वैपदिक पु० द्विपदाऽर्हं वेदं अधीते वा उक्था० ठक्। १द्विपदाध्यायिनि २तदर्हे त्रि च।

द्वैपायन पु० स्त्री द्वीपस्य गोत्रापत्यम् नडा० फक्। १द्वीपजे गोत्रापत्ये। द्वीपः अवनं जन्मभूमिर्यस्य स्वार्थे प्रज्ञा० वा अण्। २व्यासे "इति सत्यवती हृष्टा श्रुत्वा वरमनुत्तमम्। पराशरेण संयुक्ता सद्यो गर्भं सुषाव सा। जज्ञे च यमुनाद्वीपे पाराशर्यः स वीर्य्यवान्। स मातरमनुज्ञाप्य तपस्येव मनो दधे। स्मृतोऽहं दर्शयिष्यामि कार्य्येष्विति च सोऽब्रवीत्। एवं द्वैपायनो जज्ञे सत्यवत्यां पराशरात्। न्यस्तो द्वीपे स यद्बालस्तस्माद् द्वैपायनः स्मृतः" भा० आ० ६३ अ०। "द्वैपायनो विरहकातर आजुहाव" भाग० १।१ "तमहमरागमक्षणं कृष्णद्वैपायनं वन्दे" वेणीसं०।

द्वैपायनिक पु० द्वयोः पारायणयोः समाहारः द्विपारायणं वर्त्तयति ठञ् प्रत्ययविधौ तदन्तग्रहणप्रतिषेधेऽपि "इतः अर्हन्तु संख्यापूर्वपदानां तदन्तग्रहणं प्राग्वतेरिष्यते तच्चानुकि" सि० कौ० उक्तेः संख्यापूर्वस्य तदन्तग्रहणम्। पारायणद्वयावर्तिनि।

द्वैमातुर पु० द्वयोर्मात्रोरपत्यं "मातरुत् संख्यासुपूर्वेति" पा० अण् रपरत्वम्। १द्विमातृजे गणेशे २जरासन्धे नृपे च। वरेणन्द्रपजायायुग्मकागर्भजातत्वात् दीपवत्सत्यापालितत्वाच्च गणेशस्य द्विमातृकत्वं तत्कथा स्कं० पु० गणेशखण्डे यथा। "आविर्भविष्यो सदने वरेन्द्रस्य महीपतेः। त्रैलोक्यरक्षणार्थाय विघ्नस्यास्य प्रशान्तये। पालनाय स्वभक्तानां साधुत्राणाय भूसुराः। शिव उवाच। इत्युक्त्वा युग्मकागर्भं प्रविवेश तदैव सः। आगते नवमे मासि प्रासूत युग्मका शिशुम्। चतुर्बाहुमिभास्यं च दन्तुरं सुन्दरेक्षणम्। आयुधानि च चत्वारि बिभ्रतं तेजसान्वितम्। दृष्ट्वा सा क्रन्दनं चक्रेऽरिष्टमेतत् किमागतम्। श्रुत्वा चाक्रन्दनं तस्याः वरेन्द्रप्रमुखो ययौ। ददर्श बालकं सोऽपि विस्मितः षड् तैर्गणैः। उवाच सेवकान् राजा त्यजतैनं सरोवरे। शिशुमादाय ते याताः पार्श्वस्थैवाश्रमे शुभे। कामारे तं शिशुं त्यक्त्वा ययुः सर्वे निजं पुरम्। अपरस्मिन् दिनेपार्श्वमुनिः स्नानाय आगतः। तदैव ददृशे तेन बालकोऽङ्गुष्ठदर्शनः। आश्चर्यमकरोत्तत्र भयभीतस्तदाऽभवत्। आश्रमे केन मे त्यक्तमरिष्टसुखदायिनीम्। तपसा तु फलं दातुमीदृशी कृतवांस्तनुम्। रक्षितुं सर्वलोकानां परमात्मा निजेच्छया। सुन्दरो बालकः केन त्यक्तोऽवनीदृशो वह्निः। नीत्वा स्वाश्रमं चैनं पालयिष्ये प्रयत्नतः। इत्युक्त्वा जग्रहे बालमाखिलिङ्ग मुदा मुनिः। तमानीतं मुनेः पत्नी ददर्श दीपवत्सला। उवाच निजभर्त्तारं सुप्रसन्ननाम्बुजा। दीपवत्युवाच। किमानीतं महत् स्वामिन्! श्रूयमाश्चर्यकारकम्। इदं दैनायकं रूपं समाभाति द्विजर्षभ!। इदमेव श्रियः स्थानं इदमेव तपःफलम्। इदमेव परं ब्रह्म योगिध्येयं सनातनम्। इदमेव परं तेज आ-

दिव्ये यदधिष्ठितम्। इदमेव हि वेदान्ता नेतिनेति प्रचक्षते। शिव उवाच। दत्त्वा हर्षसमन्वा भर्तुरादाय बालकम्। स्तनपानं ददौ तस्मै ततः सा दीपवत्सला। द्वितीयाचन्द्रवद्बालो ववृधे यातो दिने दिने"। जरासन्धशब्दे तस्य द्वैमातुरत्वं दृश्यम्। "इते द्विड्भरिष्वा रात्रि द्वैमातुरे युधि" माघः।

द्वैमातुरक पु० द्वे मातरावित्र पालिके अस्य द्विमातृक ततः स्वार्थे अण्। यदीदृष्टिजलजनितस्वरूपालिते देवे राजनि०।

द्वैयहकाल्य त्रि० अहरूपः कालो वस्य तस्य भावः ष्यञ्। पदान्ताभ्यां स्याभ्यां पूर्वमेच्। अहकालजातस्य भावे। "द्वैयहकाल्ये त यथान्यायम्" जै० स्० "द्वैयहकाल्ये क्रियमाणे यथान्यायं ज्ञातं भवति तस्मात् द्वैयहकाल्यं स्यात्। चोदकः तथा अनुमदतीतो भवति प्रकृतौ हि श्रूयते। "पूर्वेद्युः अग्निं मरुद्भ्यो उत्तरमहर्दैवतां यजेत्" इति। तस्मात् अहकालस्य एकमभिनिर्वर्त्य तदहरेवोपक्रम्याऽपरेद्युः परिसमापयेत् भा० "वचनादहर्द्वैयहकाल्यं स्यात्" सू० "नैतदेवं अहकाला विकृतयो भवेयुः इति यद्यहकालाः स्युः" शबरभा०।

द्वैयह्निक त्रि० द्वयोरह्नोर्भवः "द्विगोर्वा राजाहःसंवत्सराच्च" पा० पक्षे ठञ् समासान्तविधेरनित्यत्वात् न टच् तस्य राजाहरिति सान्तत्वेन निर्देशात् ङिच्च० औ०। अङ्गादेशः। द्वयोरह्नोर्भवे। [ष्ठिच्। द्वयोरहावयोर्भवे।

द्वैयाहाविक त्रि० द्वयोरहावयोर्निर्वृत्तादयोर्भवः धूमा० ठञ्

द्वैरथ न० द्वौ रथौ यत्र युद्धे स्वार्थे अण्। द्वाभ्यामेव रथाभ्यामुपलक्षिते युद्धे। "द्वैरथेनास्तु वै शालिस्त्व च मम वा रुप!" भा० व० ७८ अ०। "चिकीर्षन् द्वैरथं युद्धमभ्ययान्मधुसूदनम्" हरिवं० ११८ अ०।

द्वैरात्रिक त्रि० द्वयो रात्र्योर्भवः "द्विगोर्वा राजाहःसंवत्सराच्च" पक्षे ठञ्। द्वयोरात्र्योर्भवे। अत्रापि समासान्तविधेरनित्यत्वात् न समासान्तः अत्र रात्रीति निर्देशात् पक्षे च द्विरात्रीय तत्रार्थे त्रि०।

द्वैराश्य न० द्वौ राशी यस्य तस्य भावः ष्यञ्। द्विविधराशियुक्तत्वे।

द्वैविध्य न० द्विविधस्य भावः ष्यञ्। प्रकारद्वये "द्वैविध्यं त भवेद्व्याप्तेरव्यभिचारतः" भाषा०।

द्वैषणीया स्त्री द्वेषणमेव स्वार्थे अण् ङीप् द्वैषं तद्हेतिश्च। नागवल्लीभेदे राजनि०।

द्वैसमिक त्रि० द्वयोः समयोर्वर्षयोर्भवः समावा० यत् "द्विगोश्च" पा० प्रक्षे ठञ्। वर्षद्वयभवे।

द्वैहायन न० द्विहायनस्य भावः युवा० अण्। द्विवर्षवयस्कभावे

द्व्यंश न० द्वयोरंशयोः समाहारः पात्रा० न ङीप्। भागद्वये "वैश्याशुल्को हरेद्द्व्यंशम्" मनुः। "द्व्यंशहरो ह्यर्धहरो वा धनविभाजनात् पिता" दायभा०।

द्व्यक्ष त्रि० द्वे अक्षिणी यस्य ब० समा०। नेत्रद्वययुते स्त्रियां ङीप्। "द्व्यक्षौ त्र्यक्षौ बलादाधीमृ" भौ०व०२७८ अ०। नानाराज्ञुश्नौ।

द्व्यक्षर न० द्वे अक्षरे यत्र। १वर्णद्वयात्मके मन्त्रभेदे अस्मिन्मन्त्ररूपायां २विद्यायां स्त्री गौरा० ङीप्। "रामेति द्व्यक्षरं नाम मानभङ्गः पिनाकिनः"। "वज्रेवि द्व्यक्षरं द्व्यक्षरो वषट्कारः" तैत्ति० सं० ३।६।२।

द्व्यङ्गुल त्रि० द्वे अङ्गुली प्रमाणमस्य तद्विस्तार्यहिस्तः प्रमाणार्थकमात्रचः "प्रमाणे द्वयसज्दघ्नञ्मात्रचः" पा० तुक् अच् समा०। १अङ्गुलीद्वयमिते। द्वयोरङ्गुल्योः समाहारः अच् समा०। २अङ्गुलीद्वये न०। "अस्ति द्व्यङ्गुलान्तरे" कालि० औ०८५।२५। "अर्काङ्कुरा तु सप्तला काशी द्व्यङ्गुलमूलिका" स्त्री० त०।

द्व्यङ्गुल त्रि० द्वयोरङ्गुल्योः समाहारः ब० समा०। १अङ्गुलिद्वये। द्वाभ्यामङ्गुलिभ्यां क्रीतः ठञ् तस्य अध्यर्धपूर्वेत्यादिना लुकि न च समा०। प्रमाणे खोहिगोर्निलम् वार्त्ति० लुपि तु वा अच्। २अङ्गुलिद्वयमिते त्रि० "प्रत्तं जलं द्व्यङ्गुलमात्रनिवेऽपाम्" भट्टिः।

द्व्यणुक न० द्वौ अणू कारणे यस्य कप्। परमाणुद्वयारब्धे कार्यद्रव्यभेदे "विभवोद्व्यणुकादिषु ब्रह्मज्ञान यदा-हृतः" भाषा० कारणवादशब्दे ७६७ पृ० दृश्यम्।

द्व्यर्थ त्रि० द्वौ अर्थौ यस्य। १अर्थद्वययुते शब्दादौ "द्व्यर्थः पचिः" महाभाष्यम्। २द्विप्रयोजनके कार्यभेदे च "आत्मन्य सिक्तः पितरश्च तृप्ता एका क्रिया द्व्यर्थकरीह लोके" वायुपु०। समाहारद्वि० मात्रा०। अर्थद्वये न०।

द्व्यशीति स्त्री द्व्यधिका अशीतिः अशीतिशब्दादाद्यात् न आत्। १द्व्यधिकाशीतिसंख्यायां २तदन्विते च त्रिका० ततः पूरणे कृत् द्व्यशीतितम तत्पूरणे त्रि०। डटि स्त्रियां ङीप्। द्व्यशीतियुते शतादि ड। द्व्यशीत द्व्यशीतियुते शतादौ त्रि०।

द्व्यष्ट न० द्वे त्रैरूप्ये अश्नुते व्याप्नोति अश-क्त। स्वार्थे अमरः। [द्व्यक्षम्। द्विनवे।

द्वाह पु० समाहारद्विगु टच्समा०। "अह्नान्नाः ङौ" पा० द्वयहीन त्रि० द्वाभ्यामहर्भ्यां निर्वृत्तादि। "द्विगोर्वा रात्र्यहः संवत्सराच्च" वा च खञ् अहरिति निर्देशात् न टच्। २दिनद्वयसाध्ये २कृतभेदे पु० द्विरात्रशब्दे दृश्यम्।

द्वाचायण पु०अग्निभेदे। तस्य विषयो देशः ऐषुकाभक्षञ्। द्वाचायणभक्ष तदीये विषये देशे।

द्वाचित त्रि० द्वे याचिते सम्भवति अवहरति पचति वा "याडकाचितपात्रात् खोऽन्यतरस्याम्" पा०। द्विगोरेव वनौ पचे ठञ् तस्य लुक्यर्द्धेति लुक्। याचितद्वयस्य १खचिनि समावेशके २अवहारके च २पाचके च। स्त्रियां द्विगोरिति पा०ङीप्। पचे च। द्वाचितीन तदर्थे त्रि०पचे वनि। द्वाचितिक तदर्थे त्रित्वात् स्त्रियां ङीष् इति भेदः।

द्वाटक त्रि० द्वाचितवत् सर्वं साधनादि। याटकद्वयस्य खचिनि १समावेशके २तदवहारके तत्पाचके च। स्त्रियां द्विगोरिति पा० ङीप्। पचे च। द्वाटकीन वनि। द्वाटकिक तदर्थे त्रि० स्त्रियां त्रित्वात् ङीष्।

द्वात्रिंशक पु०द्वौ त्रिंशौ द्वात्रिंशावयव कप्। द्विगुभावे राशिभेदे "चरस्थिरद्वात्रिंशकनामधेया मेषादयोऽमी क्रमशः प्रदिष्टाः" ज्यो०त०। तस्य द्विगुभावत्वेऽपि च पूर्वार्द्धम् चरसन्निध्यात् चरात्मकम् परार्द्धन्तु स्थिरसन्निध्यात् स्थिरात्मकमिति द्विगुभावत्वम् इतस्तुद्विगुभावादयोऽयत्र।

द्वामुष्यायण पु०अनुज्ञ प्रसिद्धस्यापत्यम् फक् यस्यानुज्ञायथः द्वयोरनुज्ञायथः हृत०। "उभयोरयशो रिक्थी पिण्डदाता च धर्मतः" इत्युक्ते तव, मम चायमिति द्वयेन परिगृहीते १द्वयभेदे। "देवदत्तको जनकेन प्रतिपन्नोऽयमेव दत्तस्तथैव पुत्रः। द्वामुष्यायणस्तु जनकप्रतिपन्नोऽस्मावयोरयमिति ब्रुवन्नितरः स उभयोरपि पुत्रः" मिता०। विद्वद्भिर्दत्तकपत्रे दृश्या।

द्वायुष न० समाहारद्विगु वयसष्टखादि वयसमा०। द्विगुचितायुःकाले।

द्वाराव न० समा० द्वि० पाला०। याडावद्वये निशानद्वये।

द्वाहिक त्रि० द्वाहे भवः ठञ् वा० न ऐच्। द्वाहजाते ज्वरे पारस्करनिघण्टुः।

द्वैक त्रि० दौ वा एको वा वार्थे बहु०ड समा०। (दुइ वा एक) इति ख्याते पदार्थे "द्वैकान्तरातृतीयानां धर्म्यं विद्यादिदं विधिम्" मनुः।

द्वोग पु० द्वयोर्योगयोः समाहारः द्विगौ०। योगद्वये पञ्चभीष्मा०।

द्वोपश्य पु० दृश्यतेऽसौ या+उप+शे-ड योपयं श्यङ् दे योपशे यस्य। यमौ "द्वोपशमिव द्यामृ" ऋ०१।१७१।६। "संसुता भवन्ति तस्मात् द्वोपशाः पशवः" पञ्चभीब्रा० १३।४।२। योपशयशब्दार्थस्तु पूर्वं प्रमादान्न लिखितः अत्र लिखित इति बोध्यम्।

इति श्रीतारानाथतर्कवाचस्पति सङ्कलिते वाचस्पत्ये दकारादिशब्दार्थसङ्कलनम्।

---

## धारकाशब्दात् परम् ३८०८ पृष्ठस्य क्रोड़पत्रम्।

धारकाशिला स्त्री धारकोद्भवा शिला। एकादिचक्रयुक्तायां धारकोद्भवशिलायां शालग्रामशिलावत् तस्याः पूज्यता तच्चक्रं पूजनादौ माहात्म्यञ्च नानास्थानात् प्रदर्श्यते पुराणधारे धारकाकार्त्तिकेयाख्याने "चक्रमेकं मध्यभागे श्वेतभागे खुराङ्किता। शिवनाभिरिति ख्याता भुक्तिमुक्तिफलप्रदा"। खुराङ्किता गोचिह्नयुक्ता। ब्रह्माण्डपुराणे "कूर्माकृतिरधोभागे सिङ्गभागे खुराङ्किता। शिवनाभिरिति ख्याता भुक्तिमुक्तिफलप्रदा"। स्कन्दपुराणे "कूर्मचक्रमधोभागे श्वेतभागे खुराङ्किता। शिवनाभिरिति ख्याता भुक्तिमुक्तिफलप्रदा। यत्पात्रसुवर्णः स्याद् यवार्द्धं सिङ्गसञ्ज्ञितं। शिवनाभिरिति ख्यातस्त्रिषु लोकेषु दुर्लभः" शिवनाभिलक्षणम्। ब्रह्माण्डपुराणे "जटाभाजो घनोरा वा मस्तिभिर्यदि मूर्द्धिता। शेषवर्णजटायुक्ता शेषबिन्दुसमन्विता। मस्तकेऽधोखुरा तावद्वक्त्रनाभसमन्विता। सद्योजाताभिधा श्वेता सुखसौभाग्यधनप्रदा" इति सद्योजातलक्षणम्। तत्रैव "शिरोमध्ये रक्तवर्णा त्रैनेत्रचन्द्रजटायुता। वामदेवाभिधाख्याता मस्तिभिः पूजिता सदा" इति वामदेवलक्षणम्। तत्रैव "सितोत्पलविभासंयुक्ता ब्रह्मणीशजटायुता। पार्श्वरेखासमुपेता ऐशानीशक्तिदा भवेत्" इति ऐशानलक्षणम्। "सूर्यविद्युत्समनिभा पार्श्वदेशे जटाग्रभी।

तत्पुरुषाभिधा सा स्यात् दुर्लभा सर्वकामदा" इति तत्पुरुषलक्षणम्। "द्विलिङ्गो वा त्रिलीङ्गो वा चतुरश्रादिलिङ्गवान्। तापिञ्छकरकाकारो देवदेवः सदाशिवः" इति सदाशिवलक्षणम्। दत्तधोरादिपञ्चकलक्षणम्। प्रयोगपारिजाते वराहपु० "द्विनाभिचक्ररूपा वा भवेद्धरिहरात्मिका। नाभौ लिङ्गेन युक्ता वा श्वेत भागे खुरान्विता। शिवनाभिरिति ख्याता भुक्तिमुक्तिफलप्रदा। वासुदेवमयं क्षेत्रं लिङ्गं शिवमयं स्मृतम्। तस्माद्धरिहरक्षेत्रे पूजयेत् शङ्कराच्युतम्। भवेच्चिन्ताशतैः शस्ता चतुर्वर्गफलप्रदा"। तथा माहात्म्यम् स्कन्दपुराणे "हाराधक्रयिका देवि! भद्रावास समन्विता। तत् पात्रसहितं यत् स्यात् तीर्थं द्वादशयोजनम्। स्वेच्छादेशे शुभे वापि चक्राङ्को यत्र तिष्ठति। योजनानि तथा त्रीणि मम क्षेत्रं वसुन्धरे!। तन्मध्ये म्रियते यस्तु पूजकः क्षमसमन्वितः। शतबाधाविनिर्मुक्तो न पुनः सोऽपि जायते। चक्राङ्कितस्य सान्निध्ये यत्कर्म क्रियते नरैः। स्नानं दानं तपो होमः सर्वं भवति चाक्षयम्। संवत्सरन्तु यत् पापं मनसा कर्मणा कृतम्। तत्सर्वं नश्यते पुंसां चक्राङ्काङ्क दर्शनात्। ज्वरदाहो विषञ्चैव व्यग्निचौरभयं तथा। सर्वं ते प्रशमं यान्ति चक्राङ्काङ्कमार्जनात्। भूतप्रेतपिशाचाश्च डाकिन्यश्च वसुन्धरे!। सर्वं ते प्रलयं यान्ति पञ्चचक्रान्वितं न्यसेत्। भक्त्या वा यदि वाऽभक्त्या चक्राङ्कं पूजयेन्नरः। यदि चेत् सुदुराचारो म्रियते नात्र संशयः। संवत्सरन्तु यः कुर्यात् पूजास्नपनं दर्शनम्। विना साङ्ख्येन योगेन म्रियते नात्र संशयः"। द्वारकाशिलावर्णविशेषलक्षणम् पद्मपुराणे "क्षणा स्वल्पप्रदा नित्यं कपिला तु भयावहा। पीनाक्ष्यं कर्बुरा दद्यात् पीता धनविनाशिनी। धूम्राभा पुत्रनाशाय भग्ना भार्याधनापहा। श्वेताश्चिताः सुसंपूर्णाः सर्वकामार्थदायिकाः। खण्डिताचक्रा सा पूजा दुःखदारिद्र्यनाशिनी। वर्तुला चतुरस्रा च पूजिता सिद्धिदायिका। सुखदा समचक्रा च विषमा दुःखदा भवेत्। निश्छिद्रशिलापि तत्रैव "छिद्रा भग्ना विकोणा च तथा विषमचक्रिका। खण्डेन्द्वाकृतिर्वा च पूजासाधन भवन्ति हि"। प्रयोगपारिजाते तु विशेषः "भिन्नचैवार्थनाशाय स्यूलो बुद्धिविनाशकः। दीर्घवायुहरो ज्ञेयो रूक्ष व्याधिविनाशकृत्। शुक्लवर्णा शुभा श्वेता दत्तचक्रा तथैव च"। चक्रभेदे मूर्तिभेदोऽग्निपुराणे उक्तो यथा "सुदर्शनस्त्वेकचक्रे लक्ष्मीनारायणौ द्वये। अच्युतः शार्ङ्गतूणिकेषु युतो देवस्त्रिविक्रमः"। जनार्दनश्चतुश्चक्रो वासुदेवश्च षड्भिः। षट्चक्रश्चैव प्रद्युम्नः संकर्षणश्च सप्तभिः। पुरुषोत्तमश्चाष्टचक्रो नवव्यूहो नवात्मकः। दशावतारो दशभिर्दशैवानिरुद्धकः। द्वादशात्मा द्वादशभिरत ऊर्ध्वमनन्तकः"। गरुडपुराणे तु चतुश्चक्रश्चतुर्भुज इति विशेषः। चक्रभेदेन विशेषोऽपि तत्रैव। "एकचक्रशिला पूज्या भुक्तिमुक्तिफलप्रदा। द्विचक्रश्चाच्युतो देवो देवेन्द्रत्व फलप्रदः। श्रीप्रदो रिपुहन्ता च चतुश्चक्रो जनार्दनः। पूजयेद्भक्तिसंयुक्तः सुगन्धैः कुसुमादिभिः। षड्भिर्वासुदेवः स्यात् प्रभुश्चक्रैः सदार्चितः। जन्मस्थल्युभयात्माता भवेच्चैवात्र संशयः। षड्भिश्चक्रैश्च प्रद्युम्नो लक्ष्मीकीर्तिप्रदो भवेत्। पूजितो भक्तिभावेन चक्रतीर्थशिलोद्भवः। वनमद्रशिला श्रेया सप्तचक्राङ्किता खग!। पूजितस्तुष्यते देवः पुत्रपौत्रप्रदो भवेत्। वाञ्छितं वसुभिश्चक्रैर्ददाति पुरुषोत्तमः। नवव्यूहो नवचक्रो दुर्लभं यत् सुरैरपि। पूजितः केशवस्तस्य ददाति स्वात्मसत्तमम्। राज्यदो दशभिश्चक्रैर्दशावतारसंज्ञकः। दशावतारपूजा स्याद्भक्त्याश्च पूजनात्। एकादशभिरैश्वर्यमधिकञ्च प्रयच्छति। पूजितो भक्तिभावेन चक्रतीर्थशिलोद्भवः। तत्रैव प्राप्यते देवश्चक्रैर्द्वादशभिर्युतः। पूजितः सर्वकामानामनन्तफलदायकः। द्वादशात्मा स विष्णो भुक्तिमुक्तिप्रदोऽर्चितः। अत ऊर्ध्वं परात्मासौ सदा प्रीतिविवर्द्धनः। पूजितः सर्वलोकात्मा विष्णुलोकप्रदायकः इति चक्राङ्कितशिलाः कथिताः कुलनामतः"। एकचक्रादिभेदे विशेषस्तु प्रयोगपारिजाते "एकचक्रे विशेषोऽस्ति तद्विशेषमथोच्यते। शुक्लरक्तं तथा रक्तं द्विवर्णं बहुवर्णकम्। यद्येकचक्रिणः स्युश्च तेषां संज्ञा भवेत् क्रमात्। पुण्डरीकः प्रद्युम्नो रामो वैकुण्ठ एव च। विश्वेश्वर इति ब्रह्मन् तेषां पूजाफलं शृणु। मोक्षं स्वल्पं विवादश्च दारिद्र्यं परतन्त्रताम्। ददाति पूजकश्चासौ तस्मात्तां परिवर्जयेत्"।

(6) Vol III



## ध

धकारः तवर्गीयः पञ्चमः व्यञ्जनवर्णभेदः। तस्योच्चारणस्थानं दन्तमूलं "दन्त्या वृत्तुलसाः स्मृताः" इति तवर्गस्य दन्त्यत्वोक्तिः दन्तमूलपरत्वेन, अन्यथा भस्मदन्तस्य तवर्गोच्चारणानुपपत्तेः। व्यञ्जनवर्णत्वादर्द्धमात्रत्वम् तस्य। तस्योच्चारणे आभ्यन्तरप्रयत्नः स्पृष्टता जिह्वायाश्च दन्तमूलस्य सम्यक्-स्पर्शेन तस्योच्चारणात् तथात्वम्। बाह्यप्रयत्नाश्च संवार-नादघोषा महाप्राणश्च, त्रि० को० मूलं द्रष्टव्यम्। अस्य वाचकशब्दा वर्णाभिधानतन्त्रोक्ता यथा "धो धनार्थी रुचिः स्थाणुः सात्वतो योगिनीप्रियः। मीनेशः प्रक्षिणी तोयं नागेशो विद्युपावनी। धिषणा धारणा चिन्ता नेत्रयुग्मं प्रियो मतिः। पीतवासाश्चिवर्णी च धात्री धर्मः ध्रुवक्रमः। सन्दर्शो मोहनो लज्जा वज्र-तुण्डः शकन्धरा। वामपादाङ्गुलीमूलं ज्येष्ठा सुर पुरं भवः। स्वर्गात्मा दीर्घजङ्घा च धनेशो धनसञ्चयः" अस्य मातृकान्यासे वामपादाङ्गुलिमूले न्यासता। अस्याधिष्ठातृदेवताया ध्येयरूपम्। "षड्भुजां मेघवर्णाञ्च रक्ताम्बरधरां पराम्। वरदां शोभनां रम्यां चतुर्वर्ग-प्रदायिनीम्। एवं ध्यात्वा धकारन्तु तन्मन्त्रं दशधा जपेत्" अस्य स्वरूपञ्च। "धकारं परमेशानि! कुण्डली मोक्षरूपिणी। आत्मादितत्त्वसंयुक्तं पञ्चदेवमयं सदा। पञ्चप्राणमयं देवि! विसिनीसहितं सदा। त्रिबिन्दुसहितं वर्णं धकारं यदि भावयेत्। पीत-विद्युल्लताकारं चतुर्वर्गप्रदायकम्" कामधेनुः। अस्य काव्यादौ प्रयोगन्यासफलं ह० र० टीकायामुक्तं यथा "दोधः सौख्यं सदं नः"।

**ध** पुं० दधाति धा–डः। १धर्म्मे २कुबेरे ३ब्रह्मणि च। ४धने न० मेदि०। ५धकारवर्णे "धोधनार्थी रुचिः स्थाणुः" वर्णाभिधानम्।

**धक्क** नाशने चुरा०उभ०सक०सेट्। धक्कयति-ते अदधक्कत्-त।

**धट** पुं० धन-शब्दे "इंसि धः" पा० नस्य टः। १तक्रायाम् उन्मानार्थं मानदण्डभेदे अमरः। तदुपलक्षिते २तक्रारागौ "सिंहो हयश्च मेषश्च कन्या धन्वी घटो घटः। कर्कादीनां त्रिकोणानि मूलानि राशयः क्रमात्" ज्यो० त०। ३परीक्षाभेदे तल्लिङ्गम् पितामहेन दर्शिता यथा धकाराङ्कसंयुक्तं टकारात् कुटिलं नरम्। धृतं धारयते यस्मात् घटस्तेनाभिधीयते"। तक्रशब्दे ३१२१ पृष्ठादौ द्रष्टव्यम्। "घटोऽग्निरुदकञ्चैव विषं कोशस्तु पञ्चमः। षष्ठन्तु तण्डुलाः प्रोक्ताः सप्तमं तप्तमाषकम्। अष्टमं फालमित्युक्तं नवमं धर्मजं तथा। दिव्यान्येतानि सर्वाणि निर्दिष्टानि स्वयम्भुवेति" हरीतस्मृतिः। परी-क्षायां नक्षत्रादिपरीक्षाशब्दे द्रष्टव्यम्। घटपरीक्षायां कालविशेषनिषेधो "तुला स्यात् सर्वकालिकी" इति "वाते वाति विवर्जयेत्" च पितामहेनोक्तौ।

**घटक** पुं० "तुल्या यवाभ्यां कथितात्र गुञ्जा वल्लस्तिगुञ्जो धरणं च तेऽष्टौ। सद्यानकस्तद्द्वयमिन्द्रतुल्यैर्वल्लैस्त्रयैर्वो घटकः प्रदिष्टः" लीला० उक्ते द्वात्रिंशद्गुञ्जापरिमाणे

**घटकर्कट** पुं० ६त०। तुलायाः शिक्षाधारे रैप्यदृक्के कर्कट-शृङ्गनिभे लोहसङ्गीलकभेदे दिव्यत० रघु०। "कक्षच्छेदे तुलाभङ्गे घटकर्कटयोस्त्रया" हरीतस्मृतिः।

**घटिका** स्त्री "द्व्यक्षेन्दुसंख्यैर्घटकैस्तु सेरकैः पञ्चभिः स्याद्-घटिका च तामिः" लीला० उक्ते पञ्चसेरात्मके (घाडा पयरी) इति प्रसिद्धे परिमाणे। घटी स्वार्थे क। १चीरवस्त्रे २कौपीने (घड़ा)।

**घटी** स्त्री धन० रवे अच् नस्य टः गौरा० ङीष्। १कौपीने २चीरवस्त्रे मेदि० गर्भाधानोत्तरं स्त्रियै देवे ३वस्त्रभेदे तद्धारणे नक्षत्रादि यथा "मूलश्रवश्चरुक्षेषु पुष्यादि-स्रोत्तरासु च। सुतपौष्णे घटी देया सौम्यवारे शुभे तिथौ" ज्यो० सा०।

**घटिन्** त्रि० घटोऽस्यास्ति इनि। १तुलाधारके २तुलारागौ ३शिवे च पुं० "घण्टोऽघण्टो घटी घण्टी चरचेली शिखी-शिखी" भा०शा०२८६अ०। लोलकण्ठेन तु घटीति तत्र पठित्वा व्याख्यातम् "घटयति कर्मफलैर्योजयति नरा-निति घटी इति" रुद्रादीपात् घटीत्यपपाठः। [दधाथ।

**धण** शब्दे भ्वा०प०अक०सेट्। धणति अधाणीत् अधणीत्।

**धत्तूर** पुं० धयति धाठत् धा–जर पृषो०। धुस्तूरे। हेमच०

**धन** धान्योत्पादने जुहो० पर० सेट्। दधनि अधानीत् अधनीत् दधान। स्टक्षीतकर्मकत्वात् सकर्मकत्वम्। तेन दधनि भूमिः धान्यसुत्पादयतीत्यर्थः, वैदिकोऽयम्।

**धन** शब्दे भ्वा०पर० अक०सेट्। धनति अधानीत् अधनीत्।

**धन** न०धन–अच्। १शोधने २वित्ते च मेदि०। ३स्वेदपात्रे शब्दर० ४धनिष्ठानक्षत्रे ज्योतिषम्। अर्थशब्दे ३६७पृ० धनभेदादिकमुक्तं विशेषस्तु क्वचित् मुद्रित० उक्तो यथा "धनं तु त्रिविधं ज्ञेयं शुक्लं प्रवलमेव च। कृष्णञ्च तस्य विज्ञेयो विभागः सप्तधा पृथक्। क्रमायातं पैतृदायं

प्राप्नुयु सह भार्यया । अविशेषेण सर्वेषां वर्णानां त्रिविधं धनम् । वैशेषिकं धनं दृष्टं ब्राह्मणस्य त्रिलक्षणम् । याजनाध्यापने नित्यं विशुद्धाच्च प्रतिग्रहः । त्रिविधं क्षत्रियस्यापि ब्राह्मवैशेषिकं धनम् । युद्धार्धलब्धं करजं दण्डव्यवहारतः । वैशेषिकं धनं दृष्टं वैश्यस्यापि त्रिलक्षणम् । क्षत्रियोरक्षवाणिज्यं शूद्रस्त्वन्यस्तृतीयकात् । कुसीदक्षत्रियवाणिज्यं प्रकुर्वीत स्वयंकृतम् । आपत्काले स्वयं कुर्वन्नैनसा युज्यते द्विजः" । तामसादिभेदेन तस्य त्रैविध्यं नारदेन उक्तं यथा "पार्श्विकद्यूतचौर्यार्त्तिप्रतिरूपकसाहसैः । व्याजेनोपार्जितं यत्तु तत् क्षुद्रं तमसादृतम्" । पार्श्विकः पाशतया योऽर्जयति । चौर्यं परपीड़या प्रतिरूपकेण कृत्रिमरत्नादिना । साहसेन समुद्रयानगिर्योरोहणादिना । व्याजेन ब्राह्मणवेषेण शूद्रादिना । क्षुद्रं तामसम् । राजसधनं यथा "कुसीदक्षत्रियवाणिज्यशुल्कगानानुवृत्तिभिः । कृतोपकारादाप्तं राजसं समुदाहृतम्" । अनुवृत्त्या सेवया । सात्त्विकधनं यथा । "श्रुतशौर्यतपःकन्याशिष्ययाज्यान्वयागतम् । धनं सप्तविधं शुद्धं मुनिभिः समुदाहृतम्" । श्रुतेनाध्ययनेन शौर्येण जयादिना । तपसा जपहोमदेवार्चादिना । कन्यागतं कन्यया सहागतं श्वशुरादिलब्धम् । शिष्यागतं गुरुदक्षिणादिना । याज्यागतं ऋत्विक्त्वलब्धम् । शुद्धं सात्त्विकम्" शुद्धित्वदम् । उक्तं हि योज्ञे च "क्षोद्यापहृता भगवैः प्राक्सुखं यानि यद्गृहाः । तत् तेषु धनमित्युक्तमूर्ध्वं पश्चात्सुखेषु तु" स्व० सि० । "क्षोद्यजीवाकर्षिता यद्गाः पूर्वोभिसुखं भगवैः राशिभिर्भगोलस्य क्रान्तिदत्तानुसृतस्वाक्षगोलान्तर्गतक्रान्तिवृत्ते द्वादशराश्यात्मके यद्राशिविभागैरित्यर्थः । यदात्मकद्वाशितं गच्छन्ति तत्तत्सङ्क्रामितं भागादिकं फलरूपं तेषु पूर्वागतपञ्चराश्यादिभोगेषु धनं योज्यम्" रङ्ग० । तस्मात् द्वितीयस्थाने तत्र जन्मलग्नात् द्वितीयस्थाने चिन्त्यपदार्थो यद्भयोगभेदेन शुभाशुभं च ज्ञातव्यमुक्तं यथा "सुवर्णरत्नविक्रयवस्त्राद्य कोशसंग्रहः । धनाभिधानमन्दिरे बुधैर्विचिन्त्य चादरात् । समस्तपापखेचरैर्युतेक्षितं धनाभिधम् । दरिद्रतादिधावकं विशेषतः लग्नात् । गुरुः शनिर्धनगतो धनिनं करोति दृष्टो बुधेन रविजान्यगमयदृष्टः । सूर्योऽपि, सौम्यखचरा धनगा धनानि नानाविधानि नयदा खलदृष्टेक्षाः । बुधगुरुकवयश्चेद्वित्तगा वित्तलाभं विदधति यदि दृष्टाः सोमसौम्येन्दुपुत्रैः । क्रमश, दृष्ट कविश्चेत् सौम्यगेहे धनाप्तौ भवति शुभखगानां दृष्टितो मानवस्य । सौम्यः शशी शुभेन विलोकितोऽर्धं पूर्वार्जितार्थस्य विनाशदः स्यात् । नवीनवित्तागमरोधको च धने कुजेन्दू त्वर्धे दोषदौ स्तः । रविर्धनेऽत्यधिमित्रे कुजोऽङ्के षड्विंशके भूमेधननाशदः स्यात् । भावे विधुः षोडशभक्तिराज्य भूपेऽल्पतायाञ्च कविः षडब्दे । द्वितीयस्थ पतिर्नैसर्गिको शुक्रमतादिह । सेन्दुशुक्रोऽष्टषडान्त्यस्थितो रात्रौ न्यूनश्च यः । सप्तर्क्षः शुक्रलग्नेशो जातस्त्वायकल्पते । एभिः पित्रादिभावेशैर्युक्तश्चेत्तदान्यकृत् । सशुक्रलग्नपश्चेत् स्याच्चेत्तयोर्विपरीत्यकृत् । भावाधीशः शुभैर्युक्तः केन्द्रकोणे शुभप्रदः" ।

वर्षलग्नात् द्वितीयस्थग्रहयोगादिफलम् नी०ता०उक्तं यथा "वित्ताधिपो जन्मनि वित्तगोऽब्दे क्षीणो यदा लग्नपतीत्यशाली । तदा धनाप्तिः सकलेऽपि वर्षे क्रूरेक्षराशे धनधान्यहानिः । जन्मन्यर्धोनक्षीणोऽब्देऽब्दपोऽब्दे बलवान् यदा । तदा धनाप्तिर्बहुला विनायासेन जायते । एवं यद्भावगोजन्मन्यब्दे तद्भावगो गुरुः । लग्नेशेनेत्थशाली चेत्तद्भावजसुखं भवेत् । यदा जन्मनि यं पश्येत् भावभब्देऽब्दपो गुरुः । तदा तद्भावजं सौख्यसङ्घं ताजकवेदिभिः । जन्मषष्ठाधिपः सौम्यः षष्ठोऽब्दे स्वल्पलाभदः । पापार्दिते गुरौ रन्ध्रेऽपवाद उपजायते । गुरुर्वित्ते शुभैर्दृष्टयुतो राज्यार्थसौख्यदः । जन्मन्यब्दे च सुखहाराप्तिं पश्यन् विशेषतः । एवं स्थितेऽब्दपे भूरिधनं धान्यं च जायते । वित्तलग्नेशयोगो वित्त सौख्यफलप्रदः । एवं बुधे सप्तमेऽब्दार्धे वित्तलाभदाः । लाभसङ्गनि वित्ते वा बुधेऽब्दसितसंयुते । तैर्वा दृष्टे धनं भूरि सकले राज्यमाप्नुयात् । अर्थार्धसप्तमेशौ चेत् शुभैर्भिन्नदृशेक्षितौ । बलिनौ सुखतो लाभप्रदौ यत्नादरेहया । भिन्नदृष्टा सुखभिन्नेऽर्थयोः सुखतो धनम् । तयोर्मूढरिपे वित्तनाशदुर्जनभीतयः । जन्मनीज्योऽस्ति यद्राशौ तद्राशिवर्षलग्नगः । शुभस्वामीक्षितयुतो नैरुज्यसाम्यवित्तदः । क्षतौ लग्ने रविर्वर्षे धनस्थो धनसौख्यदः । धनौ वित्ते कार्यनाशो लाभोऽल्पोऽब्द धनव्ययः । भावसौख्यं गुरुयुते भूतयः खुः शुभेक्षणात् । क्रूरक्षेणेक्षणात् सर्वं विपरीतं फलं वदेत् । वित्तेशो

जन्मनि गुरुर्वर्षे वर्षेशतं दधत्। यद्भावगस्तमाश्रित्य
भामदो धनमात्मनः। वित्ते सुवर्णरौप्यादेः स्वात्मादेः
सङ्गजन्मगः। पितृमातृत्तमादिभ्यो वित्तं सङ्गदि
पञ्चमे। सङ्गत्तनवपञ्चेऽरिवर्गाद्धानिप्रभीतिदः। स्त्रीभ्यो
द्यूनेऽष्टमे मृत्युर्वर्षेत्तुर्यशोऽङ्गने। खे नृपादेर्न्यप-
कृतादायेऽन्त्ये व्ययदो भवेत्। इत्थं विस्तरशः सुधिया
वाच्यमित्यपरे जगुः"। तद्भावानयनं द्वादशभावशब्दोक्त-
दिशावसेयम्। बीजगणितोक्ते ऽव्यक्तभिन्ने च। तत्र
धनर्णसङ्कलनादिप्रकारस्तत्रोक्तो यथा
"धनर्णसङ्कलने करणसूत्रं हृत्तार्द्धम् योगे युतिः
स्यात्तयोः स्वयोर्वा धनर्णयोरन्तरमेव योगः।
उदाहरणम्। रूपत्रयं रूपचतुष्टयं च क्वचिद्धनं वा
रहितं वदाशु। सर्वं क्वचिद्धं च पृथक् पृथङ्मे
धनर्णयोः सङ्कलनामवेधि। अत्र रूपाद्यामव्यक्तानां
चाद्याक्षरान्यव्यक्तवर्णार्थं लेख्यानि यानि व्यक्तगतानि
तान्यूर्ध्वं विन्दूनि च।
न्यासः रू ३ रू ४ योगे जातं रू ७
न्यासः रू १ रू ४ योगे जातं रू ७
न्यासः रू १ रू ४ योगे जातं रू १
न्यासः रू ३ रू ४ योगे जातं रू १
एवं विभिन्नेऽपि। धनर्णव्यवकलने करणसूत्रं हृत्तार्द्धम् संशोध्यमानं खण्डयुतमेति स्वत्वं क्षयस्तद्युति-
रूक्षवच्च। उदाहरणम्। त्वयादृश्यं स्यात् खण्डया-
दृश्यं च व्यक्तं च संशोध्य वदाशु शेषम्।
न्यासः रू १ रू २ अन्तरे जातं रू १
न्यासः रू ३ रू २ अन्तरे जातं रू १
न्यासः रू १ रू २ अन्तरे जातं रू १
न्यासः रू ३ रू २ अन्तरे जातं रू १
। इति धनर्णसङ्कलनव्यवकलने।
गुणने करणसूत्रं हृत्तार्द्धम् स्वयोरस्वयोः स्वं धन
स्वर्णघाते क्षयोभागहारेऽपि चैवं निरुक्तमिति। उदाहरणम्। रूपा-
ष्टकं रूपचतुष्टयेन धनं धनेनर्णखण्डेन भक्तम्। लब्धं
धनेन खण्डेन किं स्याद् द्रुतं वदैतं यदि बोद्धुधीषि।
न्यासः रू ८ रू ४ धनं धनहृतं धनं स्यादिति
जातं रू २। न्यासः रू ८ रू ४ ऋणऋणहृतं
धनं स्यादिति जातं रू २ न्यासः रू ८ रू ४ ऋणं
धनहृतं ऋणं स्यादिति जातं रू २। न्यासः रू ८
रू ४ धनऋणहृतऋणं स्यादिति जातं रू २। इति
धनर्णभागहारः। वर्गे करणसूत्रं हृत्तार्द्धम्। "क्षतिः
स्वर्णयोः स्वं स्वमूले धनर्णे,न मूलं क्षयस्यास्ति तस्मात्क्षति-
त्वात्। उदाहरणम्। धनस्य रूपत्रितयस्य वर्गं
क्षयस्य च ब्रूहि सखे! ममाशु। न्यासः रू ३ रू ३
जातौ वर्गौ रू ९ रू ९ मूलोदाहरणम्। धनात्मका-
नामधनात्मकानां मूलं नवानां च पृथग्वदाशु। ८।
न्यासः रू ९ मूलं रू ३ वा रू ३ न्यासः रू ९ एषा-
मवर्गत्वान्मूलं नास्ति। धन-रवे यच्। ८ शब्दे च।

**धनक** पु० धनस्य कामः इच्छा धन+कन्। १धनस्येच्छायाम्। २क्षतवीर्यजनके नृपभेदे "धनकः क्षतवीर्यस्तु" भाग०९।२३।७

**धनकेलि** पु० धनेन केलिरस्य। कुबेरे त्रिका०।

**धनक्षू** स्त्री धनं क्षुणोति नाशयति क्षु-क। करेटुकायाम्। त्रिका०।

**धनञ्जय** धनं जयति सम्पादयति जि-खच् मुम्। १अर्जुने "धनमिच्छेत् क्षतात्रनात्" इत्युक्तेरस्य धनदत्वात्तथात्वम् २चित्रकवृक्षे च अमरः। "सर्वान् जनपदान् जित्वा वित्तमादाय केवलम्। मध्ये धनस्य तिष्ठामि तेनाहं धनञ्जयम्" भा० विरा० ४४ अ० उत्तरं प्रति अर्जुनेन स्वनामनिर्वचनयुक्ते ३अर्जुने "पाञ्चजन्यं हृषीकेशो देव-दत्तं धनञ्जयः" गीता। "विजित्य यः प्राच्यमयच्छदुत्त-रान् कुरूनकुण्ठं वसु वासवोपमः। स वल्कलवासांसि तवाधुना हरन् करोति मन्युं न कथं धनञ्जयः" किरा०। ४तन्नामनामके अर्जुनवृक्षे रत्नमा०। ५विष्णौ च। "अनिर्देश्यवपुर्विष्णुरीशनो धनञ्जयः" विष्णुसं०। धन-रवे यच् धनस्य शब्दस्य जयनात् शब्दायाच्यत्वात् तस्य तथात्वम् "धनञ्जयस्तथा घोषे सङ्कारजतवर्णकः। ललाटे घोरषि स्कन्धे हृदि नाभौ त्वगादिषु" योगार्णवोक्ते हृदेशस्थे वायुभेदे। ७नागभेदे च "श्वेतः प्रथमतो जातः वासुकिस्तदनन्तरम्। ऐरावतस्तक्षकश्च कर्कोटकधनञ्जयौ" भा०आ० ३५ अ०।

**धनद** पु० धनं ददाति दा–दाने वा क ।१कुबेरे अमरः ।२धनदातरि त्रि०मेदि०३देवीभेदे स्त्री ङीष् धनदायिकाऽपि तत्र । "ध्यायेत् कल्पतरोर्मूले देवीं तां धनदायिकाम्" । तन्त्रसारे तन्मन्त्रध्यानादिकं दृश्यम् । कुबेरस्य पुलस्त्यपुत्रस्य विश्रवसः पुत्रः तत्कथा रामा० उ० २अ० उक्ता । "अथ पुत्रः पुलस्त्यस्य विश्रवा मुनिपुङ्गवः । अचिरेणैव कालेन पितेव तपसि स्थितः । सत्यवान् शीलवान् दान्तः स्वाध्यायनिरतः शुचिः । सर्वभोगेष्व संसक्तो नित्यं धर्मपरायणः । ज्ञात्वा तस्य तु तद्वृत्तं भारद्वाजो महामुनिः । ददौ विश्रवसे भार्यां स्वसुतां देववर्णिनीम् । प्रतिगृह्य तु धर्मेण भरद्वाजसुतां तदा । मुदा परमया युक्तो विश्रवा मुनिपुङ्गवः । स तस्यां वीर्यसम्पन्नमपत्यं परमाद्भुतम् । जनयामास धर्मज्ञः सर्वैर्ब्रह्मगुणैर्वृतम् । तस्मिन् जाते तु संहृष्टः संबभूव पितामहः । दृष्ट्वा चैवस्थरीं बुद्धिं धनाध्यक्षो भविष्यति । नाम चास्याकरोत् प्रीतः सार्धं देवर्षिभिस्तदा । यक्षाधिश्रवसोऽपत्यं साक्षाद्धनदा इव । तस्माद्वैश्रवणो नाम भविष्यत्येष विश्रुतः" "स तु वैश्रवणस्तत्र तपोवनगतस्तदा । ववर्धताद्भुतिष्ठतो महातेजा यथाऽनलः । तस्याश्रमपदस्थस्य बुद्धिर्जज्ञे महात्मनः । चरिष्ये परमं धर्मं धर्मो हि परमा गतिः । स तु वर्षसहस्राणि तपस्तप्त्वा महावने । यन्नियतो नियमैरुग्रैश्चकार सुमहत्तपः । पूर्णे वर्षसहस्रान्ते तं तं विधिमकल्पयत् । जलाशी मारुताहारो निराहारस्तथैव च । एवं वर्षसहस्राणि जग्मुस्त्रीण्येकवर्षवत् । अथ प्रीतो महातेजाः सेन्द्रैः सुरगणैः सह । गत्वा तस्याश्रमपदं ब्रह्मोदं वाक्यमब्रवीत् । परितुष्टोऽस्मि ते वत्स ! कर्मणानेन सुव्रत ! । वरं वृणीष्व भद्रन्ते वरार्हस्त्वं मतो मम ।। अथाब्रवीद्वैश्रवणः पितामहमुपस्थितम् । भगवन् ! लोकपालत्वमिच्छेयं लोकरक्षणम् । अथाब्रवीद्वैश्रवणं वादमित्येव हृष्टवत् । अहं वै लोकपालानां चतुर्थं हृष्टमानसः । यमेन्द्रवरुणानां च यदेतत्तव चेप्सितम् । तद्भवान् वत्स ! धर्मज्ञ ! निधीशत्वमवाप्नुहि । यक्षाम्बुपदमानां च चतुर्थस्त्वं भविष्यसि । एतच्च पुष्पकं नाम विमानं सूर्यसन्निभम् । प्रतिगृह्णीष्व वामार्थं त्रिदशैः समतां व्रज । स्वस्ति तेऽस्तु गमिष्यामः सर्व एव यथागतम् । कृतकृत्यावयं तात ! दत्त्वा तव वरद्वयम् । इत्युक्त्वा स गतो ब्रह्मा स्वस्थानं त्रिदशैः सह । गतेषु ब्रह्मपूर्वेषु देवेष्वथ नमस्यतम् । धनेशः पितरं प्राह प्राञ्जलिः प्रयताक्षवान् । भगवन् ! लब्धवानस्मि वरमिष्टं पितामहात् । निवासनं न मे देवो विदधे स प्रजापतिः । तं पश्य भगवन् ! कञ्चिन्निवासं साधु मे प्रभो ! । न च पीड़ा भवेत्काल प्राणिनो यस्य कस्यचित् । एवमुक्तस्तु पुत्रेण विश्रवा मुनिपुङ्गवः । वचनं प्राह धर्मज्ञ ! शृणुतामिति सत्तम ! । दक्षिणस्यो-दधेस्तीरे त्रिकूटो नाम पर्वतः । तस्याधे तु विशाला सा मह्येन्द्रस्य पुरी यथा । लङ्का नाम पुरी रम्या निर्मिता विश्वकर्मणा । राक्षसानां निवासार्थं यथेन्द्रस्यामरावती । तत्र त्वं वस भद्रन्ते लङ्कायां नात्र संशयः" । तस्य धनाध्यक्षत्वात् धनदत्वम् । "यथा साधारणीभूतं नामास्य धनदस्य च" रघुः । ४धनञ्जयरूपे वायौ पु० धनपतिशब्दे दृश्यम् । ५वङ्गौ हेमचन्द्रकोषे च पु० ।

**धनदण्ड** पु० धनेन दण्डः । मनूक्ते धनसम्बन्धिदण्डे "वाग्दण्डं प्रथमं कुर्यात् धिग्दण्डं तदनन्तरम् । तृतीयं धनदण्डं तु वधदण्डमतःपरम्" ।

**धनदात्री** स्त्री धनदस्य कुबेरस्याचीव पिङ्गलं पुष्पमस्याः अच्समा०ङीष् । कुबेराचीवतायां वताकरञ्जे राजनि० ।

**धनदानुज** पु० इत० । १रावणे शब्दच० २कुम्भकर्णादौ च "तेषां विश्रवसः कैकसीतो जातत्वात् तथात्वं तत्कथा । "सा त्वं सुनिवरं श्रेष्ठं प्रजापतिकुलोद्वहम् । भज विश्रवसं पुत्रि पौलस्त्यं वरय स्वयम् । दैवज्ञास्ते भविष्यन्ति पुत्राः पुत्रि ! न संशयः । तेजसा भास्करसमो वाङ्मोऽयं धनेश्वरः । सा तु तद्वचनं श्रुत्वा कन्यका पितृगौरवात् । तत्र गत्वा च सा तस्थौ विश्रवा यत्र तप्यते" । "कन्यया त्वेवमुक्तस्तु विश्रवा मुनिपुङ्गवः । उवाच कैकसीं भूयः पूर्णेन्दुरिव रोहिणीम् । पश्चिमो यस्तवसुतो भविष्यति शुभानने ! । मम वंशानुरूपः स धर्मात्मा च न संशयः । एवमुक्ता तु सा कन्या राम ! कालेन केनचित् । जनयामास वीभत्सं रक्षोरूपं सुदारुणम् । दशग्रीवं महादंष्ट्रं नीलाञ्जनचयोपमम् । ताम्रोष्ठं विंशतिभुजं महास्यं दीप्तमूर्धजम्" "तस्य त्वनन्तरं जातः कुम्भकर्णो महाबलः । प्रमाणाद्यस्य विपुलं प्रमाणं नेह विद्यते । ततः शूर्पणखा नाम संजज्ञे विकृताननी । विभीषणश्च धर्मात्मा कैकस्याः पश्चिमः सुतः" "भुजमूर्जोर्ध्वबाहुत्वात् एकोऽपि धनदानुजः" रघुः ।

**धनदायिन्** त्रि॰ धनं ददाति दा–णिनि ह्रस्वः। १धनदातरि २वणिजौ पु॰ शब्दरत्ना॰ "धनमिच्छेत् हुताशनात्" इत्युक्तेस्तस्य तथात्वम्।

**धनदेश्वर** पु॰ काशीस्थे कुबेरस्थापिते शिवलिङ्गभेदे।

**धनन्ददा** स्त्री धनं ददते दद–बा॰ खच् सुम्। बुद्धशक्तिभेदे त्रिका॰।

**धनपति** पु॰ ६त॰। १कुबेरे "धन्येयं मे वर धनपतिकोप विश्लेषितस्य" "नत्वा देवं धनपतिसखं यत्र साक्षाद्वसन्तम्" मेघ॰। २धनाध्यक्षे देवस्थे वायुभेदे च तस्य धनपतित्वकथा "शृणु चान्यां वसुपतेरुत्पत्तिं पापनाशिनीम्। यथा वायुः शरीरस्थो धनदः संबभूव ह। यादां शरीरं यत्रस्थिन् वायुरन्तःस्थितोऽभवत्। प्रयोजनात् मूर्त्तिमत्त्वमादिशत् चेलदेवताः। तत्रामूर्त्तस्य वायोस्तु ऊत्पत्तिः कीर्त्यते मया। तां शृणुष्व महाभाग! कथयाना मयाऽनघ!। ब्रह्मणः सृजतः सृष्टिं सखाद्वायुर्विनिर्ययौ। प्रचण्डशर्करावर्षी तं ब्रह्मा प्रत्यषेधयत्। मूर्त्तौ भवस्व शान्तश्च तत्रोक्तो मूर्त्तिमान् भवन्। सर्वेषाञ्चैव देवानां वह्नित्वं फलमेव च। तत् सर्वं पाहि येनोक्तं तस्माद्धनपतिर्भव। तस्य ब्रह्मा ददौ तुष्टस्त्रिषिमेकादशीं प्रभुः। तस्यामनग्निपक्वाशी यो भवेत्त्रियतः शुचिः। तस्यै तु धनदो देवस्तुष्टः सर्वं प्रयच्छति। एषा धनपतेर्मूर्त्तिः सर्वकिल्बिषनाशिनी" वराह॰ पु॰। (खाताग्नि) २धनाध्यक्षे त्रि॰।

**धनपाल** त्रि॰ धनं पालयति पालि–अण्। १धनरक्षके २कुबेरे पु॰।

**धनपिशाची** स्त्री धने पिशाचीव। अतिशयधनतृष्णायां स्वार्थे क। धनपिशाचिकाऽप्यत्र दारा॰।

**धनप्रयोग** पु॰ धनस्य वृद्ध्यर्थं प्रयोगः। ऋणरूपेण अधमर्णाय धनस्य दानरूपे प्रयोगे। तच्चलादि मुहूर्त्तचिन्तामणौ पीयूषधारायामुक्तं यथा

"स्वात्यादित्यमृदुक्षिप्रदैवयुक्ष्मे कर्णत्रयार्के चरे लग्ने धर्मसुताष्टशुद्धिसहिते द्रव्यप्रयोगः शुभः। नारे याम्यऋणं तु संक्रमदिने हृद्धे करेऽर्केऽङ्गि यत तद्देयेषु भवेदृणं न च बुधे देयं कदाचिद्धनम्"। "स्वात्यादित्येति। स्वातीपुनर्वसुचित्रानुराधास्वगरेवतीविशाखापुष्यश्रवणधनिष्ठाशततारकाश्विनीरूपेकादशसु नक्षत्रेषु द्रव्यप्रयोगः शुभः द्रव्यं परस्मै ऋणत्वेन देयं यदाह भीमपराक्रमः "मृदुक्षिप्राश्विनी चैव विशाखाश्रवणत्रयम्। पुनर्वसौ च शंसन्ति धनादिनिधिवर्त्तनम्। वर्त्तनऋणादिरूपेण दानं मिश्रनक्षत्रत्वादिशाखानिषेधे प्राप्ते ऋणदाने एव न निषेध इति विशेषः। द्यूतनष्टादौ तु निषिद्धैव। अथ लग्ने चरे मेषकर्कतुलामकराणामन्यतमे धर्मो नवमं सुतः पञ्चमम् अष्टशब्देन लग्नचयाष्टमस्थानमुच्यते तेषां शुद्धिः नवमपञ्चमस्थानयोः शुभग्रहसत्त्वं पापग्रहराहित्यञ्च अष्टमे तूभयराहित्यमित्यर्थः। एवं रूपया शुद्धा सहिते लग्ने ऋणं देयम्। उक्तञ्च रत्नमालायां "शुद्धेषु धर्मात्मजनैधनेषु चरे विलग्ने द्रविणप्रयोगः" इति। अथाऽऽरे मङ्गलवारे ऋणं न दाप्यं बृहज्ज्योतिःप्रकाशे "ऋणं भौमे न मृष्टोऽन्यं देयं बुधवासरे। ऋणच्छेदं कुजे कुर्यात् सङ्ग्रहं सोमनन्दने"। अत्र तुल्यिशेषे संक्रमः संक्रान्तिः तद्दिवसे, हृद्धौ हृद्दिवोगे करेऽर्केऽङ्गि हस्तनक्षत्रसहिते रविवारे हस्तार्के इति यावत्तत्रापि ऋणं न दाप्यमिति प्रत्येकं सम्बन्धः। ननु कुतो न दाप्यमित्यत आह यदिति यद्यस्माद्देयोक्तदृणं तद्देयेषु ऋणग्रहीतृकुलेषु भवेत् तदृणं तत्पुत्रपौत्रादिभिरपि परिहर्त्तुमशक्यमित्यर्थः ऋणदेषु भौमसंक्रान्त्यादिदिनेषु ऋणमवश्यं परिहर्त्तव्यमिति निष्कृष्टोर्थः। "हस्तेऽर्कवारे संक्रान्तौ यदृणं स्यात् कुजेषु तत्। हृद्दिवोगे तथा श्रेयस्तच्छेदं तु कारयेदिति" ज्योतिःप्रकाशकारोक्तेश्च। अथ बुधे बुधवारे कदाचिदप्यृणं न देयम्। "न देयं बुधवासरे" इत्यधुनैवोक्तत्वात्। पी॰धा॰ तत्र निषिद्धनक्षत्रादि तत्रैवोक्तं यथा

"तीक्ष्णमिश्रध्रुवोग्रैर्यद्द्रव्यं दत्तं निवेशितम्। प्रयुक्तञ्च विनष्टञ्च विष्ट्यां याते न याप्यते" स॰ चि॰ "तीक्ष्णेति तीक्ष्णमिश्रध्रुवोग्रसंज्ञकैर्नक्षत्रैर्यद्द्रव्यं सुवर्णादि दत्तं कालान्तरं विनैव दत्तं न तु स्वत्वपरित्यागेन, तद्दत्तमित्युच्यते निवेशितं खेटसमीपे प्रत्यर्पणार्थं स्थापितं प्रयुक्तं कालान्तरीतिपुरःसरोत्तमर्णाधमर्णव्यवहारेण कस्मै चिद्दत्तं, विनष्टं चौरादिना हृतं क्षयमेव वा कचित्यक्तं तद्द्रव्यं निखनेन कदाचिदपि नाप्यते तथा विष्ट्यां भद्रायां याते व्यतीपाते महापाते वा हृतं द्रव्यं न प्राप्यते चकाराद्व्यक्षयेऽपि न देयमिति व्याख्येयं वसिष्ठवाक्यस्मरणात् उक्तञ्च वसिष्ठेन "ध्रुवोग्रसाधारणदारुणर्क्षे निक्षिप्तमर्थं त्वय वा प्रनष्टम्। चौरैर्हृतं दत्तमुपद्रवे वा विष्ट्याञ्च याते न च लभ्यते तत्"। उपद्रवे यज्ञे। यत्तु केचिद्व्याकुर्वते "निखनेन चौरहृतस्य द्रव्यस्य

प्राप्तप्राप्तिविचारोऽन्वकादिनक्षत्रैरेव बालाधोऽन्धके निबट एव कृतस्य चौरैरित्युक्तत्वात्। चोरानिर्धवेत्यनेनैव विचारः" तच्चिन्त्यं वसिष्ठवाक्येऽपि चौरैर्हृतमिति बालाद्यौरपदोपादानाद्येन केनापि विचारः कर्त्तव्य इति युक्तत्वप्रयामः। एवं चोरानिर्धवेऽपि स्वेच्छया विचारः तत्रोभयैक्ये प्राप्तप्राप्तिनिश्चय एव उभयैक्याभावे तु प्रयत्नेनेति"।

**धनप्रिया** स्त्री काकजङ्घवृक्षे राजनि०।

**धनर्च** पु० धनार्थमर्चा यस्य वेदे मक०। धनार्थोपयुक्ते यज्ञे "नार्वाङ् धनर्चम्" यजु० १०।३६।६।

**धनवत्** त्रि० धन+अस्यर्थे मतुप् मस्य वः। धनस्वामिनि "रूपसत्त्वगुणोपेता धनवन्तो यशस्विनः" "धनवन्तं प्रजावन्तं सात्विकं धार्मिकं तथा" मनुः स्त्रियां ङीप्। सा च २धनिष्ठानक्षत्रे जटा०। तस्य च धनदेवताकत्वात् तथात्वम्।

**धनसनि** त्रि० सन-अन्यतौ इन् ह्रस्व०। धनलाभयुक्ते "तद्य इमे वीणायां गायन्त्येतं ते गायन्ति। तस्मात्ते धनसनयः" छा० उ०। "धनसनयो धनलाभयुक्ता धनवन्तः" भा०। [स्याने।

**धनस्थान** न० धनचिन्तनार्थं स्थानम्। जन्मात् द्वितीय-

**धनस्य** नामधातुः लालसया धनमिच्छति धन+क्यच् लालसायां सुक् अक० प० सेट्। धनस्यति अधनस्यीत्। पक्षे असुक् धनायति इति भेदस्तत्रार्थे।

**धनस्यक** त्रि० धनस्य नामधातुः ण्वुल्। १लालसया धनेच्छौ २मोक्षुरे पु० शब्दच०।

**धनहर** त्रि० धनं हरति हृ-ताच्छील्यादौ ट। १धनहरणशीले चोरे स्त्रियां ङीप् सा च २चोरनामगन्धद्रव्ये स्त्री अमरः तस्या धनहरचोरनामतुल्यनामकत्वात्तथात्वम्। [२चण्डालकन्दे पु० पारस्करनि०।

**धनहृत्** त्रि० धनं हरति हृ-क्विप् तुक्। १धनहारिणि

**धनाधिकारिन्** त्रि० धनमधिकरोति अधि+कृ-णिनि इत०। धनाध्यक्षे (तहविलदार) ख्याते कोशाध्यक्षे। अधि+कृ-क्विप् तुक्। धनाधिकृदप्यत्र।

**धनाधिगोप्तृ** त्रि० धनमधिगोपायति अधि-गुप-तृच् आयादेशे तृच्। १धनपालके (खाजाञ्चि) ख्याते कोशाध्यक्षे स्त्रियां ङीप्। २कुबेरे पु०। "स तदुच्चैरुरो-धरि वर्त्तमान आलोक्यासाद्य धनाधिगोप्ता" भा० उ० १८२ अ०।

**धनाधिप** त्रि०धनमधिपाति अधि+पा-रक्षणे क इत०। १धनरक्षके (खाजाञ्चि) कोशाध्यक्षे २कुबेरे पु०अमरः। "धनाधिपेन विहस्य अन्तर्हादस्थ संवृते" हरिवं० २५१ अ०।

**धनाधिपति** पु० इत०। १कुबेरे "अनुचरेण धनाधिपतेरशोनगविलोकनविस्मितमानसः" किरा०। "कौबेरं प्रययौ तीर्थं यत्र तप्ता महत्तपः। धनाधिपत्यं संप्राप्तो राजराजेश्वरः प्रभुः" भा० आ० १८ अ०। अधिपतेर्भावः ष्यञ् आधिपत्यम् धनस्याधिपत्यमित्यर्थः।

**धनाध्यक्ष** त्रि० इत०। (खाजाञ्चि) १कोशाध्यक्षे "कोष्ठवस्त्राजिनादीनां रत्नानाञ्च विधानवित्। विज्ञाता कल्पुशाराधामनाद्यार्थः शुचिः सदा। निपुणश्चाप्रमत्तश्च धनाध्यक्षः प्रकीर्त्तितः। आयव्ययेषु सर्वेषु धनाध्यक्ष समा नराः। व्ययव्ययेषु च तथा कर्त्तव्याः पृथिवीपतिना इति मत्स्यपु०२१७ अ० तत्तुल्यगुणयुक्ते २कुबेरे पु०

**धनाय** नामधातुः आत्मनो धनमिच्छति क्यच् गर्हार्थे नि०। गर्हेण धनेच्छायाम्। परo अक० सेट्। धनायति अधनायीत्। "शूद्रा यदर्थंजारा न कोशाय धनायति" यजु० २३।३०। "आनन्तर्य्यात्प्रभवते न प्राणानां धनायते" ना० ता० १२२ अ०। आर्द्धधातुक्। अगर्हे तु धनीयतीत्येव।

**धनायु** पु० ऋषभेदे विष्णुपु०।

**धनार्थिन्** त्रि० धनमर्थयते अर्थ+णिनि इत०। धनप्रार्थके "न ताडयं भवत्येनो मृगपक्षिहनुर्धनार्थिनः" मनुः।

**धनाशा** स्त्री इत०। धनलोभे "जीर्य्यन्ति जीर्य्यतः केशा दन्ता जीर्य्यन्ति जीर्य्यतः। धनाशा जीविताशा च जीर्य्यतोऽपि न जीर्य्यति" हरिवं० ३० अ०।

**धनाश्री** स्त्री रागिणीभेदे (धानसी) सा च हनुमन्मते श्रीरागस्य तृतीया भार्य्या। कल्पनाथमते मेघरागस्य चतुर्थी भार्य्या।

**धनिक** त्रि० धनमादेयत्वेनाऽस्यास्य ठन्। उत्तमर्णे अधमर्णसकाशात् स्वप्रयुक्तधनप्राप्तके। "एकच्छायाश्रितेष्वेषु धनिकस्य यथारुचि" याज्ञ०। २साधौ वणिजि। धन-वा० इक। ३धनाढ्ये पु० मेदि० राजनि०क्लीवत्वम्। ४धने स्वामिनि पु० हेमच०। धनी स्वार्थे क। धनिका ५धनिकभार्य्यायां वणिक् स्त्रियां स्त्री मेदि०। ६वध्वाम् हेमच० ७युवत्यां शब्दरत्ना० ८प्रियङ्गुवृक्षे स्त्री शब्दच०। ९शङ्खपद्मव्याख्यातरि ६विष्णुसूनौ विदङ्गदे पु०

**धनिन्** त्रि० धनमस्यास्य धन+इनि। धनवति "धनिनः श्रो-

त्रियो राजा नदी वैद्यश्च पञ्चमः" चाणक्यः। "अङ्गायच्चे धनिन्यार्थे निःक्षेपं निःक्षेपेदुबुधः" मनुः।

**धनिष्ठ** त्रि० अतिशयेन धनी इवन् इनो लोपः। १अतिशयधनयुक्ते स्त्रियां टाप् सा च अश्विन्यादिमध्ये २३योविंशे नक्षत्रे स्त्री तस्या वसुदेवताकत्वात् तथात्वम्। अस्येदं मध्ये तत्स्वरूपादिकं ज्ञेयम्। तत्र धनिष्ठा पञ्चतारा इत्येव पाठः सङ्ग्रहादौ पञ्चतारेति त्रुटितम्। "मस्तकोपरिसंभागते धने मर्दलाकृतिनि पञ्चतारके। यानि यानिमति मेषलग्नतः सारसाश्विरसवस्विग्निकाः" काश्यपः।

**धनी** स्त्री धनमस्त्यस्याः अच् गौरा० ङीष्। १युवत्यां स्वार्थे कापि वा न ह्रस्वः। धनीकापि तत्रार्थे शब्दच०।

**धनीय** नामधातुः आत्मनोऽस्येमेन धनमिच्छति क्यच् प० अक० सेट्। धनीयति अधनयीत्। सर्वं तु धनायतीत्येव

**धनीयक** न० धनाय हितः छ संज्ञायां कन्। धन्याके रत्नमा०।

**धनु** पु० धन-उन्। १शिवकृतेऽसुरे २धनुर्द्धरे त्रि० मेदि०। ३शीघ्रगन्तरि च "अव्याङ्गरी धनुतरौ" ऋ० ४।३५।५। "धनुतरौ शीघ्रगन्तृतरौ" भा०। ४धनुषि च धन्वन्तरिः।

**धनुःपट** पु० धनुष इव पटो विस्तारोदेशे यस्य। (पियासाल) वृक्षे वा तत्र धनुष्पटोऽप्यत्र अमरः।

**धनुःशाखा** स्त्री धनुषः शाखा यस्याः। १मूर्वायाम् शब्दच०। धनुरवयव इव शाखा यस्याः। २पियालतरौ शब्दच०

**धनुःश्रेणी** स्त्री धनुषः श्रेणीव। १मङ्गेन्द्रवारुण्यां २मूर्वायाञ्च। राजनि०।

**धनुर्गुण** पु०ङ्त०। १भौर्व्यां जीवायां शब्दच०। धनुषो गुणो यस्याः सकाशात् ५ब०। २ मूर्वायां स्त्री शब्दर०।

**धनुर्ग्रह** पु० धनुस्+ग्रहणमने अच्-अच्। धनुर्द्धरे तद्व्याख्याने तु अच् धनुर्ग्रह इत्येव। २धृतराष्ट्रपुत्रभेदे। "कवची निषङ्गी दक्षी दक्षधारी धनुर्ग्रहः" भा० आ० ६७अ० तत्पुत्रोक्तौ। ग्रह-भावे अप् ङ्त०। धनुर्विद्यायाम् "गान्धर्वं नारदो वेदं भरद्वाजो धनुर्ग्रहम्" भा० शा० २१० अ०। ग्रहेर्ज्ञानार्थत्वात् तथात्वम्।

**धनुर्द्रुमः** पु० धनुषः साधनं द्रुमः। वंशवृक्षे राजनि०। तस्य धनुःसाधनत्वात् तथात्वम्।

**धनुर्द्धर** पु० धनुर्धरति धृञ् अच् ङ्त०। धानुष्के धन्विनि अमरः "धनुर्द्धरः केशरिणं ददर्श" "क्षितावभूदेकधनुर्द्धरोऽपि सः" रघुः। २धृतराष्ट्रपुत्रभेदे "कवची क्रथनः कुण्डी कुण्डधारी धनुर्द्धरः" भा० आ० ११७ तत्पुत्रोक्तौ। ३विष्णौ पु०। "धनुर्द्धरो धनुर्वेदः" विष्णुसं०।

**धनुर्द्धारिन्** त्रि० धरति धृ-णिनि ङ्त०। धानुष्के। "शूरश्च रथदक्षश्च गजाश्वरथकोविदः। धनुर्द्धारी भवेद्राजा सर्वक्लेशसहः शुचिः" मत्स्यपु० २१४ अ० तस्य लक्षणमुक्तम्।

**धनुर्भृत्** पु० बिभर्त्ति भृ-कर्त्तरि क्विप् तुक् ङ्त०। धनुर्द्धरे धानुष्के। "धनुर्भृतोऽस्य दवार्द्रभावम्" धनुर्भृतामग्रत एव रक्षियाम्" रघुः।

**धनुर्मख** पु० धनुरुपलक्षितो मखः। क्षत्रियाङ्गानार्थं कंसेन कृतः क्षते यज्ञभेदे। "राजा धनुर्मखं नाम कारयिष्यति वै तदा" हरिवं० ७६ अ०। धनुर्यागादयोऽप्यत्र। "आरभ्यतां धनुर्यागशतदंक्षाम् यथाविधि। विशन्तु पशून् मेध्यान् भूतराजाय भीतुवे" भाग०१०।३६।२२। "यद्धनुषस्य कंसस्य मविष्यति धनुर्मखः" हरिवं०८अ०।

**धनुर्मध्य** न० ङ्त०। धनुषो मध्यभागे कृष्णवे धन्विभिर्यत्र धनुर्गृह्यते तस्मिन् स्थाने अमरः।

**धनुर्माला** स्त्री धनुषो मालः सम्बन्धो यस्याः। मूर्वायाम् शब्दच०।

**धनुर्यास** पु० धनुरिव यासः। दुरालभायां राजनि०।

**धनुर्लता** स्त्री धनुरवयवयोग्या लता। सोमवल्ल्यां राजनि०।

**धनुर्वक्त्र** पु० धनुरिव वक्त्रमस्य। कुमारानुचरभेदे। "विद्युताक्षो धनुर्वक्त्रो जाठरोभारताशनः" भा० श० ४६ अ० तदनुचरोक्तौ।

**धनुर्विद्या** स्त्री धनुषो विद्या। धनुरादीनां प्रयोगसंहारज्ञापके विद्याभेदे तदारम्भनक्षत्रादि दीपिकायामुक्तं यथा "अदितिगुरुयमार्कस्वातिचित्रान्त्यपित्र्यप्रभुवरुणसमूलाश्वीन्दुभाग्यान्त्यभेषु। विशतिशशिबुधाङ्गे विष्णुबोधे विपौषे सुखमयतिथियोगे चापविद्याप्रदानमिति"।

**धनुर्वृक्ष** पु० धनुः साधनं धनुरिव वा वृक्षः। १वंशे २धन्वनवृक्षे ३भल्लातकवृक्षे ४अश्वत्थवृक्षे च राजनि०।

**धनुर्वेद** पु० धनूंषि तदादीन्यस्त्राणि विद्यन्ते ज्ञायन्तेऽनेन विद-ज्ञाने करणे घञ्। यजुर्वेदस्योपवेदभेदे स च शुक्लप्रायः अग्निपु० तत्र प्रतिपद्यविषयादिरुक्तं यथा "अग्निरुवाच। चतुष्पादं धनुर्वेदं वदे पञ्चविधं द्विज!। रथनागाश्वपत्तीनां योधांश्चाश्रित्य कीर्त्तितम्। मन्त्रमुक्तं प्रयोक्तृणां२ मुक्तममुक्तमेव च। मुक्तं३ बाहुयुद्धञ्च पञ्चधा तत् प्रकीर्त्तितम्। तत्र यन्त्रास्त्र-

सम्यक्त्वा द्विविधं परिकीर्त्तितम्। ऋजुमायाविभेदेन भूयो द्विविधमुच्यते। क्षेपणीचापयन्त्राद्यैर्वक्त्रसङ्गं, प्रकीर्त्तितम्। शिलातोमरपत्त्राद्यं पाणिसङ्गं २ प्रकीर्त्तितम्। सङ्गसन्धारितं श्रेयं प्रासाद्यमपि यद्भवेत्। खड्गादिकमसङ्गञ्च नियुद्धं विगतायुधम्१। कृत्याद्योन्यानि पात्राणि योद्धुमिच्छुस्त्यजेत्तमः। धनुःश्रेष्ठानि युद्धानि प्रासमध्यानि तानि च। तानि खड्गजघन्यानि बाहुप्रच्यवनानि च। धनुर्वेदे गुरुविप्रः प्रोक्तो वर्णहयश्च च। युद्धाधिकारः शूद्रस्य स्वयं वापदि शिक्षया। देशस्थैः सङ्करैः राज्ञः कार्य्या युद्धे सहायता। अकुण्ठगुल्फपार्ष्ण्यङ्घ्रि, शिष्टाः स्युः सहिता यदि। दण्डं समपदं स्थानमेतद्धनुषतस्तथा। बाह्याकुक्षिस्थितौ पादौ सव्यजानुवलावुभौ। लिखितस्वन्तरास्थानमेतद्वैशाखमुच्यते। हंसपक्षप्रतीकाशमेते दण्डे तु जानुनी। चतुर्वितस्तिविच्छिन्ने तदेतन्मण्डलं स्मृतम्। कृतालीढसमं यच्च सव्यजानूरुदक्षिणम्। वितस्त्योः पञ्च विस्तारे तदालीढं प्रकीर्त्तितम्। एतदेव विपर्य्यस्तं प्रत्यालीढमिति स्मृतम्। तिर्य्यग्भूतो भवेद्बाहो दक्षिणोऽपि भवेदृजुः। गुल्फौ पार्ष्णिपदौ चैव स्थितौ पञ्चाङ्गुलान्तरौ। स्थानं जातं भवेदेतद् द्वादशाङ्गुलमायतम्। ऋजुजातुर्भवेद्बाहो दक्षिणः सुप्रसारितः। अथ वा दक्षिणश्चापि कृत्वं भवति निश्चलम्। दण्डायतो भवेदेष चरणः सह जानुना। एवं विकटसंहिष्टं द्विहस्तान्तरमायतम्। जानुनी द्विगुणे स्यातामुत्तानौ चरणावुभौ। अनेन विधियोगेन सम्मुढं परिकीर्त्तितम्। किञ्चिद्विवर्त्तितौ पादौ समदण्डायनौ स्थिरौ। दृष्टमेव यथान्यायं षोड़शाङ्गुलमायतम्। स्खलितेनात्र कुर्वीत प्रमाणं प्रथमं द्विज!। कार्ष्णकं मुष्टिवाणेन वाणं दक्षिणकेन तु। वैशाखे यदि वा जाते स्थितौ वामथ वायतौ। गुणान्तन्तु ततः कृत्वा कार्ष्णके प्रियकार्ष्णकः। अधःकटिन्तु धनुषः फलदेशन्तु पत्रिणः। धरण्यां स्थापयित्वा तु तोलयित्वा तथैव च। भुजाभ्यामत्र कुब्जाभ्यां प्रकोष्ठाभ्यां शुभव्रत!। यस्य वाणं धनुःश्रेष्ठं शुङ्गदेशे च पत्रिणः। विन्यासो धनुषश्चैव दशाङ्गुलमनन्तरम्। अथवा विशिष्टः कर्त्तव्यो नातिहीनो न चाधिकः। निवेश्य कार्ष्णकं नाभ्यां नितम्बे शरसञ्चयम्। ऊर्द्ध्वमेकोत्थितं हस्तमन्तरेणाक्षवर्त्मनोः। पूर्वं च सहिता पाङ्गं सनाथे दक्षिणे शरः। हरन्तु ततः कृत्वा शीघ्रं पूर्वं प्रसारयेत्। नाभ्यन्तरा नैव बाह्या नोर्द्धगा नाधरा तथा। न च कुब्जा न चोत्तानान चला नातिवेष्टिता। समा श्लक्ष्णगुणोपेता मौर्वी दण्डमिव स्थिता। आदधित्वा ततो लक्ष्यं पूर्ववानेन सहिना। उरसा तुल्यितो यत्ना त्रिकोणविनतस्थितः। लक्ष्याङ्गो विषमग्रीवो मयूराञ्चितमस्तकः। ललाटनासावक्त्रांसाः कुर्युरक्षसमन्यसेत्। अन्तरं तत्प्रकुर्वीत श्रेयं चिबुकस्कन्धकस्य च। प्रथमन्तत्प्रकुर्वं श्रेयं द्वितीये द्वयङ्गुलं स्मृतम्। तृतीये कुक्षिसंहिष्टमायतञ्चिबुकांसयोः। मुष्टीत्वा सायकं पृष्ठात्तर्जन्यङ्गुष्ठकेन तु। ललाटमा पुनर्मुष्टि तथा मध्यमयापि च। तावदाकर्णयेद्बाणं यावद्बाहुः सुपूरितः। एवंविधसुपक्रम्य मोक्तव्यं विधिवत् खगम्। दृष्टसुदृष्टिहृतं लक्ष्यं भिन्द्याद्बाणेन सुव्रत!। सङ्गा तु पश्चिमं हस्तं चिपेद्देहेन पृष्ठतः। एतदुक्तं दमिच्छन्ति ज्ञातव्यं हि त्वया द्विज!। कूपरन्तदधः कार्य्यमाकृष्य तु धनुष्मता। ऊर्द्धं विसृजते कार्य्यं लक्षचिह्नन्तु मध्यमम्। श्रेष्ठं प्रकृष्टं विज्ञेयं धनुःशास्त्रविशारदैः। ज्येष्ठस्तु सायको ज्ञेयो भवेद्द्वादशसुष्टयः। एकादश तथा मध्यः कनीयान्दश सुष्टयः। चतुर्हस्तं धनुःश्रेष्ठं त्रयः सार्द्धास्तु मध्यमम्। कनीयस्तु हयं प्रोक्तं नित्यमेव पदातिनः। अश्वे रथे गजे श्रेष्ठे तदेव परिकीर्त्तितम्" २४८अ०। अग्निरुवाच। "पृष्ठीयतं द्विजः कृत्वा ततो मांसैर्गदायुधान्। सुनिर्धौतं धनुः कृत्वा रङ्गभूमौ निधापयेत्। ततो वाणं समाश्लक्ष्य दंशितः सुसमाहितः। तूणमासाद्य वल्गेद्दृढां कक्षाञ्च दक्षिणाम्। विलक्ष्यमपि तद्वाणं तत्र चैव सुसंस्थितम्। ततः सहहरेद्बाणं तूणाद्दक्षिणपाणिना। तेनैव सहितं मध्ये शरं सङ्कृष्य धारयेत्। वामकक्षेन वै कक्षां धनुस्सन्धाय सहरेत्। अविभ्रमतिर्भूत्वा मुखे पुङ्खं निवेशयेत्। सम्पीड्य सिंहकर्णेन पुङ्खेनापि समेदृढः। वामकर्णोपविष्टञ्च फलं वामस्य धारयेत्। यथोक्तं मध्यमया तत्र वामाङ्गुल्या च धारयेत्। मनो लक्ष्यगतं कृत्वा सहिना च विधानवित्। दक्षिणे गात्रभागे तु कृत्वा बाणं विमोचयेत्। ललाटपुटसंस्थानं दण्डं लक्ष्ये निवेशयेत्। आकर्णं ताड़येत्तत्र चन्द्रकं षोड़शाङ्गुलम्। सङ्गा बाणं ततः पश्चादुत्थायाभिमुखादा तथा। निष्कम्पीयान्मध्यमया ततोऽङ्गुल्या पुनः पुनः। अविलक्ष्यं चिपेत्तूणात्तरत्तञ्च दक्षिणम्। चतुरङ्ग-

मतं वेध्यमभ्यसेच्छादितः स्थितः। तस्मादनन्तरं तीक्ष्णं पराङ्मुखं गतञ्च यत्। निम्नसन्नतवेधञ्च अभ्यसेत् चिप्रकलतः। वेध्यस्थानेष्वनेतेषु सभ्यस्य षट्कं धनुः। इत्याषायतचित्तैस्तैर्वेदुद्धरैरपि। तस्मिन् वेध्यगते विप्र! हे वेध्ये दृढसञ्ज्ञके। हे वेध्ये दुष्करे वेध्ये हे तथा चिलदुष्करे। ननिम्नञ्च तीक्ष्णञ्च दृढवेध्ये प्रकीर्त्तिते। निम्नं दुष्करसंज्ञितं वेध्यमूर्द्धगतञ्च यत्। सत्तकायनमध्ये तु चिलदुष्करसञ्ज्ञके। एवं वेध्यगुणज्ञात्वा दक्षिणेनेतरेण च। आरोहेत् प्रथमं वीरो जितचित्तस्ततो नरः। एष एवंविधः प्रोक्तस्तत्र दृष्टः प्रयोक्तृभिः। अधिकं भ्रमणं तस्य तस्माद्वेध्यात् प्रकीर्त्तितम्। सभ्यं संयोजयेत्तत्र पतिपत्रगतं दृढम्। भ्रान्तं प्रचलितञ्चैव स्थिरं यच्च भवेदिति। समन्नात्साढ़येद् भिन्द्यात्तच्छेदयेद्यत्नवेदपि। कर्मणां संविधानज्ञो शास्त्रवैं विधिमाचरेत्। मनसा चक्षुषा दृष्ट्वा योगविद्युः श्रमं जयेत् २४६ अ० "अग्निरुवाच। जितहस्तो जितमतिर्जितदृक् जितसाधकः। नियतां सिद्धिमाप्नोति ततो वाहनमारुहेत्। दशहस्तो भवेत् पाशो दृढः करसमस्तया। गुणकार्पाससङ्घानां भङ्गत्राव्यर्द्धवर्मिणाम्। अन्येषां चर्मदानाञ्च कृतं परिवेष्टितम्। तथा त्रिंशत्समं पाशं बुधः कुर्य्यात् सुवर्त्तितम्। कर्त्तव्यं शिक्षकैस्तस्य स्थानं कक्षासु वै तदा। वामहस्तेन सङ्गृह्य दक्षिणेनोद्धरेत्ततः। कण्डलस्याकृतिं कृत्वा भ्राम्यैकं मस्तकोपरि। क्षिपेत् तूष्णमये तूर्णं पुरुषे चर्मवेष्टिते। वल्गिते च द्रुते चैव तथा प्रव्रजितेषु च। सम्यग्योगविधिं ज्ञात्वा प्रयुञ्जीत सुशिक्षितम्। विजित्य तु यथान्यायं ततो वध्यं समाचरेत्। कट्याम्बद्ध्वा ततः खड्गं वामपार्श्वावलम्बितम्। दृढं निगडहस्तं वामेन निष्कर्षेद्दक्षिणेन तु। षड्हस्तपरीणाहं सप्तहस्तसमुच्छ्रितम्। अयोमयः शलाकाश्च वर्माणि विविधानि च। अर्द्धहस्ते समे चैव तिर्य्यगूर्द्धगतं तथा। योजयेद्विधिना येन तथा त्वङ्गदतः शृणु। तूणचर्मावनद्धाङ्गं स्थापयित्वा नवं दृढम्। करेणादाय शरुडं दक्षिणाकुचकं नवम्। उद्यम्य घातवेद्यस्य नाशस्तेन रिपोर्दृढम्। उभाभ्यामथ हस्ताभ्यां कुर्य्यादस्य निपातनम्। अङ्गेषेन ततः कुर्वन् वधे सिद्धिः प्रकीर्त्तिता। बाहूनां श्रमकरणं प्रचारार्थं पुरा तवं २५० "अग्निरुवाच। श्रान्तस्तब्धश्लानमाविद्धमाकुलं विप्लुतं स्खलम्। सम्यक् सन्दीर्णञ्च स्खेनपातमथाकुलम्। उद्भूतमवधूतञ्च सभ्यं दक्षिणमेव च। अनाकलितविस्फोटौ करालेन्द्रमहाह्वौ। विकरालनिपातौ च विभीषणभयानकौ। समार्द्धतीर्यगपादपादार्द्धवारिजाः। प्रत्यालीढमथालीढं वराहं लुलितन्तथा। इति द्वात्रिंशतो ज्ञेयाः खड्गचर्मविधौ रणे। पराङ्मुखमपाङ्मुखं मण्डलीतं लघुसञ्ज्ञितम्। ऊर्द्धोत्क्षिप्तमधःक्षिप्तं सन्धारितविधारितम्। स्खेनपातं गजपातं पार्श्वाच्छादनमेव च। एवमेकादशविधा ज्ञेयाः पार्श्वविधा रणाः। ऊरुन्नावतं विद्यान्नञ्च तिर्य्यग्भ्रामितमेव च। पञ्चकर्म विनिर्दिष्टं व्यस्तं पार्श्वे महात्मभिः। छेदनं भेदनं घातो भ्रमणं श्रमणं तथा। विकर्त्तनं कर्त्तनञ्च चक्रकर्मेदमेव च। कास्फोटः स्फोटनं भेदस्त्रासान्दोलितकौ तथा। मूलकर्माणि जानीहि षडभ्याघातसञ्ज्ञितम्। दृष्टिघातं भुजाघातं पार्श्वघातं द्विजोत्तम!। ऋजुपक्षे समाघातं तोमरस्य प्रकीर्त्तितम्। आहतं विद्धतं चैव प्रभूतहतासनम्। ततोऽर्द्धगात्रं नमितं वामदक्षिणमेव च। आहतञ्च पराङ्मुखं पादोद्धूतमवप्लुतम्। खंडभागं विमर्दञ्च गदाकर्म प्रकीर्त्तितम्। करालमवधातञ्च दंशोपप्लुतमेव च। क्षिप्तहस्तं स्खलितं शून्यं परोक्षु विनिर्दिशेत्। ताड़नं छेदनं विप्र! तथा चूर्णनमेव च। शरस्य तु कर्माणि तथा प्लवनपातनम्। संधानमथ विज्ञानं मोक्षिसर्गं सुदुर्द्धरम्। भिन्दिपालस्य कर्माणि लगुड़स्य च वान्यपि। अन्यं मध्यं पराङ्मुखं निर्देशान्तं द्विजोत्तम!। वज्रस्येतानि कर्माणि षट्त्रिंशस्य च तान्यपि। छुरस्य छेदनं घातो वल्लीद्वारणमायतम्। क्षुरपाणकर्म निर्दिष्टं पातनं स्फोटनं तथा। त्रासनं रज्जुघातो वल्लीद्वरणमायतम्। शेषणीकर्म निर्दिष्टं यन्त्रकर्मैतदेव तु। सन्त्यागमदंशस्य पराङ्मुखमूतकं तथा। इत्यावहस्तमाचीनमेकहस्तावहस्तके। द्विहस्तबाहुपाशे च कटिरेचितकोहते। उरोललाटघाते च भुजाविधमनन्तथा। करोद्धूतं विमानञ्च पादाकृति विपाटितम्। गात्रसंज्ञेभयं ज्ञात्वा तथा गात्रविपर्य्ययः। अर्द्धप्रहारं घातञ्च गोमूत्रं सव्यदक्षिणे। पारकन्तारकं गण्डं कवचं विधमाकुलम्। तिर्य्यगूर्द्धमपाशार्गं भीमवेगं सुदर्शनम्। सिंहाक्रान्तं गजाक्रान्तं गर्दभाक्रान्तमेव च। गदाकर्माणि जानीयाद्विपुलस्याथ कर्म च। आकर्षणं विकर्षञ्च बाहूनां

मूलमेव च। श्रीवाविपरिवर्त्तञ्च पृष्ठभङ्गं सुदारुणम्। पर्य्यासनविपर्य्यासौ पशुसारमजाविकम्। पादप्रहारमास्फोटं कटिरेचितकन्यथा। गात्रावक्षेपं स्कन्धगतं मक्षोव्याजनमेव च। उरोललाटघातञ्च विस्रष्टकरचलनथा। उद्भूतमवधूतञ्च तिर्य्यङ्मार्गगतं यथा। गजस्कन्धमवक्षेपमपराङ्मुखमेव च। देवमार्गमधोमार्गमसमार्गगमनाकुलम्। यष्टिघातमवक्षेपो वसुधादारणथा। जानुबन्धं भुजाबन्धं गात्रबन्धं सुदारुणम्। विपृष्ठं सोदकं शस्त्रं भुजावेष्टितमेव च। सङ्घैः संयुगे भाव्यं सप्तभिस्तैर्गजादिभिः। वराङ्गुधरौ चौभौ एको श्रीवागतोऽपरः। स्कन्धगौ द्वौ च धानुष्कौ द्वौ च खड्गधरौ गजे। रथे रथे गजे चैव तुरङ्गाणां त्रयं त्रयम्। धानुष्काणान्त्रयं प्रोक्तं रक्षार्थं तुरगस्य च। धन्विनो रक्षणार्थाय चर्मिणस्तु नियोजयेत्। स्वमन्त्रैः शस्त्रमभ्यर्च्य शास्त्रमन्त्रैश्चोक्षमोक्षणम्। यो युद्धे याति स जयेदरीन् सम्यग्विवेद्धुवम्"।

धनूञि धनुषः प्रयोगोपसंहारान् वेत्ति जानाति विद–अण् उप० स०। २धानुष्के त्रि० ३विद्यौ पु०। "धनुर्वेदो धनुर्वेदः" विष्णुसं०। भावे घञ्। ४विद्याभेदे अष्टादशविद्याशब्दे ६४२ पृ० दृश्यम्।

धनुष पु० धन–बा० उषन्। ऋषिभेदे "धनुषाख्योऽथ रैभ्यश्च ऋषावसुपरावसू" भा० आ० ३२८ अ०।

धनुषाच्च पु० ऋषिभेदे "आससाद महावीर्यं धनुषाचं मनीषिणम्" भा० व० १२५ अ०।

धनुष्कपाल पु० धनुषः कपालमिव इसुसोः सामर्थ्ये अत्वम्। धनुरवयवे। कच्चादिषु पाठस्तु अवामर्थ्यार्थः।

धनुष्कार त्रि० धनुः करेऽस्य इसुसोः सामर्थ्ये अत्वम्। धनुर्हस्ते १धानुष्के। धनुः करोति क–ट। २चापकारके शिल्पिभेदे त्रि०। अड्डेत्यादौ तु अण् धनुष्कार। तत्करमात्रे त्रि०। "इषुकारं क्षेत्रे धनुष्कारं कर्मणे ज्याकारं दिष्टाय" वसु० २०।७।

धनुष्पाणि त्रि० धनुः पाणौ यस्य इसुसोः सामर्थ्ये अत्वम्। धनुर्हस्ते "युवजानिर्धनुष्पाणिः" भट्टिः।

धनुष्मत् त्रि०धनुः धार्य्यतेनास्यास्य मतुप्। धनुर्द्धरे अमरः। "भीमो धनुष्मानुपजाग्यरत्निः। (जामदग्न्यः) भट्टिः।

धनुस् न० धन–अच्छे उसि। १चापे शरनिक्षेपवत्यभेदे अमरः। ज्याकर्षणोत्पत्यच्छब्दयोगात्तस्य तथात्वम्। रङ्गचयम्। "धनुस्तु द्विविधं प्रोक्तं शार्ङ्गं सारंग तथैव च। कोमलं वर्षवृद्धता तयोर्गुरु च उदाहृतः। सुखसम्पत्तिकरणं समसृष्टायतं धनुः। विपदो सृष्टिवैषम्ये तदङ्गे भङ्गमावहेत्" युक्तिकल्पतरुः। धनुर्वेदशब्दे तल्लक्षणादि दृश्यम्। २पित्राह्वदेवे पु० मेषावधिके नवमे राशौ "नासत्यभाः शैवसमोदयोऽतिशब्दोदिनं प्राक् उदक्सुच्छ्रयीतः। रक्षोघ्नपित्तो धनुरत्यसृतिसङ्को हिमर्त्तिर्दिपदोन्मिरूपः" नी० ना०। अयञ्च राशिः २१६०० कलात्मकस्य राशिचक्रस्य १४४०० कलोत्तरं १८०० कलात्मकः मूलपूर्वाषाढोत्तराषाढा प्रथमचरणात्मकः। "मूलं पूर्वाषाढा प्रथमचाध्यतारांशको धनौ" ज्यो०त०। अस्य स्वरूपं "चापी नरोऽश्व जघनः" वृहज्जा०। "अश्वतुल्यजघनः नरस्तेन चतुष्पादित्यर्थः। यवनेश्वरः। "धन्वी मनुष्यो हयपश्चिमार्द्धसमाङ्गः" भट्टोत्पलः। ४चतुर्हस्तमाने क्रोशशब्दे २२४०पृ० दृश्यम्। ५धनुर्द्धरे त्रि० शब्दार्णवि० गोलक्षेत्रस्य व्यासार्द्धात् न्यूने ६कंशभेदे चापशब्दे क्षेत्रशब्दे च दृश्यम्। "ज्यां प्रोज्झ्य शेषं तत्त्वाश्विहतं तद्विवरोद्धृतम्। सङ्क्रान्तत्त्वाश्विसंवर्गं संयोज्य धनुरुच्यते" सू० सि०। "यस्य धनुः कर्णमितं तच्चिन्न शुद्धपूर्वं ज्यापिण्डं न्यूनीकृत्य शेषं षड्भक्तमितगुणं तद्विवरोद्धृतं तयोः शुद्धाशुद्धपिण्डयोरन्तरेण भक्तं फलं शुद्धज्या यतस्ततमसङ्क्रान्तत्त्वाश्विनोः संवर्गे भाते संयोज्य खिलं धनुः कथ्यते। अत्रोपपत्तिः। ज्या यतस्ता शुद्धाति ततश्चापकलायास्ततमसङ्क्रान्तगुणिततत्त्वाश्विनः ज्यान्तरेण तत्त्वाश्विलब्धात्तदा शेषज्यायाः केवलानुपातागतफलयुता इति वैपरीत्येन सुगमतरा" रङ्ग०। डङ्ग० अनङ्। धृतधन्वा इत्यादि धन्वन शब्देनैव तत्प्रयोगोपपत्तौ धृतधनुरित्यादिप्रयोगनिरासार्थमनङ्विधानम्।

धनुस्तम्भ पु० सुश्रुतोक्ते विकृते वायुभेदे। "धनुस्तुल्यं नमेदास्तु स धनुस्तम्भसंज्ञकः" तत्र दृश्यम्।

धनू स्त्री धन–क्त। धनुषि उज्ज्व०।

धनेयक न० धन्याक+पृषो०। धन्याके भरतः।

धनेश पु० ६त०। १कुबेरे "दमे चैवाष्टकन्यायाः निधीनामंशसम्भवाः। कन्यया राजराजस्य धनेशस्य महात्मनः" हरिवं० १०८। २तस्मात् द्वितीयस्थानपतौ च। धनेश्वरादयोऽप्यत्र। "धनेश्वरस्यानुचरो वरदोऽस्मि नृपात्मजे" भा०उ० १६२अ०। "भाग्ये धराजे धनेश्वराभिधेकोऽपि चन्द्रादि केन्द्रवर्त्ती। स्वपुत्रजायाधिपतिर्युवे दृश्यश्चसामाज्यपति-

स्वमेति ज्यो०त०। ३विष्णौ "रत्नगर्भो धनेश्वरः" विष्णुस०।

**धन्य** न० धन-या-ध। अल्पाकारे त्रिका०। स्वार्थे अण् धान्यमप्यत्रार्थे त्रिका०।

**धन्य** त्रि० धनं लब्धा "धनगणं लब्धा" पा०यत्। धनस्य निमित्तं संयोग उत्पातो वा "गोद्व्यच्" पा०यत्। धनाय हितं वा यत्। १धनस्य लब्धरि २धननिमित्ते संयोगादौ ३धनप्रयोजनके ४धनाय हिते ५श्राद्धे च। ६शुक्लकर्णवृक्षे पु० राजनि० ७सुखवति दक्षुक्षतिनि त्रि० अमरः। "धन्याणि वेदर्भि! गुणैरुदारैः" नैष०। "धन्यास्ता गुणरत्नरोहणभुवो धन्या सदन्यैव सा" सा० द०। "धन्योऽसि यस्य हरिरेष समक्ष एव" माघः। "धन्यं यशस्यमायुष्यं स्वर्ग्यं चातिथिपूजनम्" मनुः। ८शतार्थे त्रि०। १०विष्णौ पु० "सुमेधा मेधजो धन्यः" विष्णुस०। "धन्यः शतार्थः" भा०। ११श्यामलक्यां धात्र्याम् १२उपमातरि मेदि० १३पिण्डारकवनदेवतामेदे च स्त्री १४धन्याके स्त्री हेमच०। [ व्रतभेदे।

**धन्यव्रत** न० धनाय हितं यत् धन्यं कर्म०। वराहपु० उक्ते

**धन्याक** पु० धन्यते भक्षार्थिभिः धन्याकादि० नि०। (धनिया) ख्याते पदार्थे "शिलायां साधुसंस्थितं धन्याकं वस्त्रगालितम्। शर्करोदकसंमिश्रं कर्पूरादिसुसंस्कृतम्। नवीने मृण्मये पात्रे स्थितं पित्तहरं परम्" भावप्र०।

**धन्व** गतौ भौ० भ्वा०प०सक० सेट्। धन्वति अधन्वीत् दधन्व। "राजाय धन्वाय धन्वसि" ऋ० ६।८६।३१ "परिष्च्यमानाः चयं सुवीरं धन्वन्तु सोमाः" ६।६७।२६।

**धन्व** न० धन्व-अच्। १चापे भरतः। "धनुर्द्धराय देवाय प्रियधन्वाय धन्विने" भा० द्रो० १०३ अ०। २धन्वन्तरिपितरि राजभेदे "काश्यस्य काश्यपः पुत्रो राजा दीर्घतपास्तथा। धन्वस्तु दीर्घतपसो धन्वात् धन्वन्तरिः सुतः" हरिवं० २९ अ०।

**धन्वङ्ग** पु० धनोः धनुषोऽङ्गमिवाङ्गमस्य। (धामनि) ख्याते वृक्षभेदे "धन्वङ्गः कफपित्तास्रकासहृत् हवरो मधुः। दंष्ट्रिणो वल्लजद्रूचः सन्धिजद् व्रणरोपणः" भावप्र०।

**धन्वचर** त्रि० धन्वना धनुषा सह चरति चर-ट। १धानुष्के। "धन्वचरो न वंसगः" ऋ० ५।३६।१।

**धन्वज** धन्वनि मरुदेशे जायते जन-ड। १मरुभवे "जङ्गलानां धन्वजानाञ्च पिप्पल्यास्तथैव च" सुश्रुतः।

**धन्वदुर्ग** न० धन्वना हतं दुर्गम्। चतुर्दिशं षड्योजनमरुवेष्टिते दुर्गभेदे दुर्गशब्दे दृश्यम्।

**धन्वन्** पु० धनि-कनिन्। १अम्भोदकदेशे मरुदेशे अमरः। धन्वति शरोऽस्मात् अपादाने कनिन्। २चापे १स्थलमात्रे च मेदि०। ४आकाशे माधवः "धन्वच्युत इवाम्भो न यामनि" ऋ०१।१६८।५। धन्वच्युतः आकाशच्युतः धन्वनशब्दोऽन्तरीक्षस्य वचनः तेन तत्स्थसदकं लक्ष्यते" भा०।

**धन्वन** पु० धन्व-भौ० ल्यु। (धामनि) ख्याते धन्वङ्गवृक्षे रत्नमाला। "चन्दनैः स्यन्दनैः साखैः सरलैर्देवदारुभिः। वेतसैर्धन्वनैश्चापि वे चान्ये वसवत्तराः" भा० शा० ११६ अ०।

**धन्वन्तर** न० चतुर्हस्तमिते दण्डरूपे परिमाणभेदे। "वितस्तिः स्यादतो द्राभ्यां हस्तः स्यात्तच्चतुष्टयम्। दण्डो धन्वन्तरं तच्च सङ्ख्यहितयेन तु" (क्रोशः) त्रिका०।

**धन्वन्तरि** पु० धनोः तद्विभित्तशस्त्रस्यान्तं पारमृच्छति ऋतौ इन् किच्च। १असुरोत्थिते देववैद्यभेदे। धन्वन्तरिरतो देवोवपुष्मानुदतिष्ठत" भा० आ० १८ अ०। द्वापरे तस्योत्पत्तिकथा हरिवं० १९ अ० यथा।

"धन्वन्तरेः समुद्रोऽयं श्रूयतां भरतर्षभ!। स समुद्भूतः समुद्रात्तु मथ्यमानेऽमृते पुरा। तत्पद्मः कलशात् पूर्वं पर्वतस्तु श्रिया हृतः। अध्यसन् सिद्धिकार्य्यं हि विष्णुं दृष्ट्वा हि तस्थिवान्। यज्ञस्तमिति होवाच तस्माद्-ज्ञस्तु स स्मृतः। यज्ञः प्रोवाच विष्णुं वै तनयोऽस्मि तव प्रभो!। विधत्स्व भागं स्थानञ्च मम लोकेश्वरेश्वर!। एवमुक्ता स तद्वा वै तथ्यं प्रोवाच तं प्रभुः। ततो यज्ञ विभागो हि यज्ञियैर्हि सुरैः पुरा। देवेषु विनियुक्तश्च विधिदृष्टं महर्षिभिः। न शक्यस्तपहोमो वै तुभ्यं कर्तुं कदाचन। अवांगभूतोऽसि देवानां पुरुषस्त्वं हि महीश्वरः। द्वितीयायान्तु संभूत्यां लोके ख्यातिं गमिष्यसि। ऋषिमादिश्य ते सिद्धिर्गमेष्यसि भविष्यति। तेनैव त्वं शरीरेण देवत्वं प्राप्स्यसे प्रभो!। चरुमन्त्रैर्व्रतैर्जप्यैर्यज्ञन्ति त्वां द्विजातयः। यष्टा त्वं पुनरेवं वायुर्वेदं विधास्यसि। अवश्यम्भावी ह्यर्थोऽयं पुराऽदृष्टस्वजोनिना। द्वितीये द्वापरे प्राप्ते सौनहोत्रिः स काशिराट्। पुत्रकामस्तपस्तेपे धन्वो दीर्घं महत्तदा। प्रपद्ये देवतां तान्तु या मे पुत्रं प्रदास्यति। यज्ञं देवं स पुत्रार्थे तदाराधितवान्नृपः। ततस्तुष्टः स भगवान्नृपः प्रोवाच तं नृपम्। ब्रूहि यद्यस्ति वरं ब्रूहि तत्ते दास्यामि सुव्रत!। तप

उवाच। भगवन्! यदि तुष्टस्त्वं प्रभो मे ख्यातिमान् भव। तथेति समनुज्ञाय तत्रैवान्तरधीयत। तस्य गेहे सप्तत्यब्दो देवो धन्वन्तरिस्सदा। काशिराजो महाराजः सर्वरोगप्रणाशनः। आयुर्वेदं भरद्वाजात् प्राप्येह स भिषक्क्रियम्। तमष्टधा पुनर्व्यस्य शिष्येभ्यः प्रत्यपादयत्। धन्वन्तरेस्तु तनयः केतुमानिति विश्रुतः। अथ केतुमतः पुत्रो वीरो भीमरथः स्मृतः। पुत्रो भीमरथस्यापि दिवोदासः प्रजेश्वरः। दिवोदासस्तु धर्मात्मा वाराणस्यधिपोऽभवत्" आयुर्वेदगब्दर्शित वाक्ये काशिराजस्य दिवोदासस्य धन्वन्तरितोक्तिः तदपत्ये उपचारात् अतो न विरोधः। 'धन्वन्तरिश्च भगवान् स्वयमेव कीर्तिनौक्षा ख्यातम् इक्ष्वाकां रज आशु इन्ति। यत्ते च भागमस्मृतायुरवावरुन्ध आयुश्चवेद मनुष्यास्यवतीर्य लोके" भाग०२।७।२२। "स वै भगवतः साक्षात् विष्णोरंशांशसम्भवः। धन्वन्तरिरिति ख्यात आयुर्वेददृगिज्यभाक्"। "नारायणांशो भगवान् स्वयं धन्वन्तरिर्नृणाम्। पुरा समुद्रमथने समुत्तस्थौ महोदधेः। सर्ववेदेषु निष्णातो मन्त्रतन्त्रविशारदः। शिष्यो हि वैनतेयस्य महरूपोपशिष्यकः" ब्रह्म० वैष्णव श्रीकृष्ण जन्मखण्डे ५१ अ०।

२दिवोदासे त्रिका०। विक्रमादित्यसभास्थनवरत्नान्तर्गते कविभेदे ज्योतिर्वि०। "धन्वन्तरिक्षपणकामरसिंहशङ्कु-वेतालभट्टघटकर्परकालिदासाः। ख्यातो वराहमिहिरो नृपतेः सभायां रत्नानि वै वररुचिर्नव विक्रमस्य"। अत्र वराहमिहिरौ इति शब्दकल्पद्रुमे द्विवचनान्ततया पाठः प्रामादिक एव द्विवचनान्तत्वे नवसंख्यानुपपत्तेः वराहो मिहिर इति विग्रहः दृष्टज्ञातकटीकायां भट्टोत्पलेनोक्तः। अतएव "वराहमिहिरात्मजेन पृथुयशसा" तत्पुत्रजतपट्पञ्चाशिकायामुक्तं वराहमिहिरात्मजत्वमात्रस्य विशेषणमुपपद्यते वराहमिहिरयोर्भिन्नत्वे तदनुपपत्तेः इति सूक्ष्मेक्षिणीयम्।

धन्वन्तरिव्रस्ता स्त्री ङीप्त०। कटुक्यां राजनि०।

धन्वन्य त्रि० धन्वनि मरुदेशे भवः यत्। मरुदेशभवे "ग्रंनो आपो धन्वन्याः शमनः सन्वनूथाः" यजु०१।६।४।

धन्वपति पु० ६त०। मरुदेशपतौ। तत इदमर्थादौ अञ्यत्या० यञ्। धान्वपत तत्सम्बन्धिनि त्रि०।

धन्वयवास पु० ६त०। मरुभवे यवासभेदे इरालभाभेदे भरतः स्वार्थे क। धन्वयवासक तत्रार्थे राजनि०। धन्वयास तत्रार्थे अमरः। ["धन्वसहा नीवते" ऋ०१।१२७।१।

धन्वसह पु० धन्वं धनुर्यहं सहते सह-क्विप्। धनुर्द्धरे

धन्वायन त्रि० धन्वा मरुदेशोऽयनेन करणे ल्युट्। मरुदेशगमनसाधने स्त्रियां ङीप्। "भीमधन्वायनी सेना दृष्टद्युम्नेन पालिता" भा० उ० १८७ अ०।

धन्वायिन् त्रि० धन्वना सह एति गच्छति इ-णिनि ६त०। १धनुर्द्धरे २रुद्रभेदे पु० "इषुमद्भ्यो धन्वाविभ्यश्च वो नमो नमः" यजु० १६।२२।

धन्विन् त्रि० धन्वं चापोऽस्यास्त्रीत्वा० इनि। धनुर्द्धरे अमरः। "आकर्णकृष्टमपि कामितया स धन्वी" रघुः। "दुर्भिन्नं कैरपि धन्विभिरन्यवन्ध्यं" माघः। २विदूरथे ३अर्जुने पु० विश्वः ४अर्जुनवृक्षे ५दुरालभायां ६वकुलवृक्षे च पु०राजनि०। ७विष्णौ पु०"ईश्वरो विक्रमी धन्वी" विष्णुस०८तामसमनोःपुत्रभेदे पु०"तपोरतिरकल्मषस्तन्वी धन्वी परन्तपः। तामसस्य मनोरेते दश पुत्रा महाबलाः" हरिवं० ७ अ०। ६धनूराशौ च धनुश्शब्दे दृश्यम्।

धन्विन पुंस्त्री धन्व-वा० इनन्। शूकरे "दिष्ट्या धन्विन उक्षो वोऽद्य स्यात् शूकरो मौरुसाः" हरिवं० ८८ अ०।

धन्विस्थान न० ६त०। "वैक्लवं समपादञ्च वैशाखं मण्डलं तथा। प्रत्यालीढं तथालीढं स्थानान्येतानि धन्विनाम्" इत्युक्तेषु धानुष्कस्थितिभेदेषु। धनुर्वेदशब्दे दृश्यम्।

धम ध्माने भौ० पर० सक० सेट्। धमति अधमीत् दधाम। "वायुना धम्यमानोऽत्र दह्यतेऽग्निः क्वचित् क्वचित्" भा० व० २८५ अ०। "ते वाद्यभ्यां धमितमग्निमारुनि" ऋ० १।२४।७ "अयं वधेऽपि वरुणोऽधमत्" ताण्ड्यब्रा०। "विक्रम्य विधमिष्यामि निवर्त्तध्वं महासुराः" हरिवं० २५१ अ०। [कर्त्तरि च।

धम त्रि० धम-घञ्। १शब्दकर्त्तरि २अग्निसंयोग-

धमक त्रि० ध्मा-कन् धमादेशश्च। ध्मानकरे उज्ज्वल०।

धमधम पु० धम+प्रकारे द्वित्वम्। पार्वत्याः क्रोधसंभूते कुमारानुचरगणभेदे। "उल्कामाली धमधमो ज्वालाजिह्वः प्रमर्दनः" हरिवं० १६८ अ०। कुमारानुचरमातृभेदे स्त्री "ख्याता दृढदृढा चैव तथा धमधमा नृप!" भा०श०४७अ०।

धमन त्रि० धम-ध्माने भौ० युच्। १मस्त्राध्मायके २क्रूरे च मेदि० ३नले तृणभेदे अमरः।

धमनि(नी) स्त्री धम-भौ० करणे अनि वा ङीप्। नाड़ीभेदे शिराभेदे। २कृत्तिकास्थिन्याम् अमरः। ३हरिद्रायां ४गोधायाम् हेमच० ५शुक्रिपर्णां राजनि०।

ङ्गाङ्किरायां शाकभेदे भावप्र०। ७शाके त्रि०। सुश्रुते धमनीभेदकाय्यादिकसूत्रं तच्च कायशब्दे १८१६ पृष्ठादौ दृश्यम्। ततः सिध्मा० अच्। धमनीव तद्युक्ते त्रि०।

धम्मिल्ल पु० सौ० धम-विच् मिल-क पृषो० कर्म०। संयतेषु केशेषु (खोँपा)। कुसुमगर्भमौक्तिकादिना बहिर्बद्धे केशकलापे भरतः। "धम्मिल्ले नवमल्लिका सहृदयो हत्ते सिताम्भोरुहम्" "धम्मिल्लमर्द्धसूत्रं कलयति तिलकं तथा शकलम्" सा० द०। पृषो० धम्मल्ल धम्मिलावप्यत्र शब्दच०।

धय त्रि० धेट-श। पानकर्त्तरि धेटश्चित्वात् स्त्रियां ङीपि-प्राप्ते खशोऽन्यत्र नेच्यते इति हरदत्तोक्तेः न ङीप्।

धर त्रि०भृ-अच्। १धारके "रथचरणधराङ्गनाकराजैः" माघः गदाधरः चक्रधरः। २पर्वते ३कूर्मराजे ४वसुभेदे च मेदि०। "उत्कं धरं द्रष्टुमवेक्ष्य गौरिम्" माघः। कूर्मराजस्य भूमिधारकत्वात् तथात्वम्। "धरो ध्रुवश्च सोमश्च अहश्चैवानिलोऽनलः। प्रत्यूषश्च प्रभासश्च वसवोऽष्टाविति स्मृताः" भा० आ० ६६ अ०।

धरण त्रि० भृ-युच्। १धारके २अद्रिपतौ ३लोके ४अन्ने ५सूर्य्ये च पु०हेमच०। ७अर्कवृक्षे ८सेतौ त्रिका०। "तल्या यवाभ्यां कविताऽस्य मुष्का वल्लिमुष्को धरणं च तेऽष्टौ" जीका० उक्ते ६चतुर्विंशतिरत्तिकाभिते मानभेदे न०। "पलं सुवर्णाश्चत्वारः पलानि धरणं दशेति" मनूक्ते १०दशपलमिततेऽपि ११पलस्य दशमांशे वैद्यकपरिभाषा "मावैश्चतुर्भिः प्रायः स्यात् धरणः स निगद्यते। सुश्रुतोक्ते १२चतुर्माषकपरिमाणे पु०। भावे ल्युट्। १३धारणे न०। "सारं धरित्रीधरणक्षमस्य" कुमा०।

धरणप्रिया स्त्री जिनानां शासनदेवताभेदे हेमच०।

धरणि(णी) स्त्री भृ-अनि। १पृथिव्यां अमरः वा ङीप्। ङीबपि २शालमलिवृक्षे शब्दच०। ३कन्दभेदे राजनि०।

धरणि(णी)ज धरणितो जायते जन-ड। १मङ्गले २नरकासुरे च ३धरणिजातमात्रे त्रि० "धरणिजे चतुर्थगे ज्वरजठराश्मगुल्लवः" ह०स० १०४ अ०। ४सीतायां स्त्री।

धरणि(णी)धर पु० धरणिं(णीं) धरति भृ-अच् ह्रस्वः। १पर्वते २कच्छपे च राजनि०। ३विष्णौ हरिवा० गोवर्द्धनधारित्वात्तस्य तथात्वं "स हि संवर्त्तको वह्निरनिलो धरणीधरः" विष्णुस०। "श्रेयदिग्गजादिरूपेण धरणीं धरतीति" भा०। "परमर्षिजनभुवनपतिः धरणिधरः स्तुतिविनयविधिः" भा०आ०२४८अ०। पर्वते "धरणीधरदुर्दिनं" माघः। ६शिवे "प्रभवं सर्वभूतानां धारणं धरणीधरम्" भा० आश्व० ८ अ० शिवसहस्रे

धरणि(णी)रुह पु० धरण्यां रोहति रुह-क ७तः। वृक्षे "धरणिरुहाधिरूढो बधूर्नतायाः" माघः।

धरणीकन्द पु० धरणीनामकः कन्दः। १कन्दभेदे कन्दाच्चौ धाराकन्दे राजनि०।

धरणीकीलक पु० धरण्याः कीलक इव। पर्वते शब्दर०।

धरणि(णी)धृत् पु० धरणिं(णीं) धरति धृ-क्विप् तुक्। १पर्वते २अनन्ते देवे च "माहात्म्यं श्रोतुमिच्छामि। शेषस्य धरणीधृतः" हरिवं० १२० अ०।

धरणीपुर पु० धरणाकारं पुरम्। धराकारे चतुरस्रे मण्डले न०। धरणीसदनादयोऽप्यत्र।

धरणीप्लव पु० धरण्याः प्लवो यस्मात्। वृक्षे त्रि०।

धरणीभृत् पु० धरणीं बिभर्त्ति भृ-क्विप् तुक् च। १पर्वते २विष्णौ ३अनन्ते च। "माद्यधीवातिदष्टानि भूकम्पाधि धरणीभृताम्" हरिवं० २४६ अ०।

धरणीश्वर पु० ६त०। १शिवे शब्दरत्ना० २भूमिपतौ ३विष्णौ च

धरणीसुत पु० ६त०। १मङ्गले अवनेयशब्दे दृश्यम्। २नरकासुरे कुजशब्दे दृश्यम्। ३सीतायां स्त्री कालिकापु० २७ अ० तत्कथा दृश्या।

धरा स्त्री धरति विश्वं भृ-अच्। १पृथिव्यां अमरः २गर्भांशये ३मेदसि च मेदि० ४नाड्यां राजनि०। "धरायां तस्य संरम्भं सीताप्रत्यर्पणैषिणः" रघुः।

दानार्थकल्पितायां सुवर्णमयधरायां तद्विधानादि मत्स्यपुराणोक्तं हेमाद्रिदानखण्डे दर्शितं यथा

"मत्स्य उवाच। अथातः सम्प्रवक्ष्यामि धरादानमनुत्तमम्। पापक्षयकरं नृणामसङ्ख्यविनाशनम्। कारयेत् पृथिवीं हैमीं जम्बुद्वीपानुकारिणीम्। सपर्वतवतीं मध्ये मेरुसमन्वितां। लोकपालाष्टकोपेतां नववर्षसमन्वितां। नदीनदशतोपेतामन्ते सागरवेष्टितां" "जम्बुकारिणीम् सदृशीमित्यर्थः। इह हि जम्बुद्वीपसदृशीं कुर्य्यादित्युक्तेः निखिलनगनगरसरोवरवनाद्यन्वितभूमेरावश्यकत्वे प्राप्ते सपर्वतवतीमित्यादिना तावन्मात्रान्वितधरण्यनुकार इति गम्यते। इतरथा सामान्येनैव तदवगतेर्विशेषानर्थक्यप्रसङ्गात्, तदयमर्थः हैमीं पृथ्वीं कुर्य्यादित्युक्ते सप्तद्वीपवत्याः प्रसङ्गे जम्बुद्वीपानुकारिणीमित्युच्यते तत्रापि नानापर्वतानुकारप्रसङ्गे सपर्वतवतीमिति" तथा सति मेरोरनुकरणप्राप्तौ मध्ये मेरुसमन्वितामिति

नानादेवगणव्याप्तत्वं लोकपालाष्टकोपेतामिति। एवं च षडंशेषपक्षाश्रयणे पुराणान्तरोपदर्शितवर्षचतुष्टयादिपञ्चपरिपञ्चद्वयाधिक्यार्थं नववर्षसमन्वितामित्युच्यते। तत्र जम्बुद्वीपसप्तपर्वितं विष्णुपुराणे" हेमा०दा०। "नवखण्डन्तु मैत्रेय! जम्बुद्वीपमिदं मया। लक्षयोजनविस्तारं संक्षेपात् कथितं तव। जम्बुद्वीपं समाहत्य लक्षयोजनविस्तरः। मैत्रेय! वलयाकारः स्थितः क्षारोदधिर्बहिः। जम्बुद्वीपः समस्तानां द्वीपानां मध्यतः स्थितः। तस्यापि मेरुर्मैत्रेय! मध्ये कनकपर्वतः। चतुरशीतिसाहस्रयोजनैरस्य चोच्छ्रयः। प्रतिष्ठा षोड़शाधस्ताद्वात्रिंशन्मूर्ध्नि विस्तृतः। मूले षोड़शसाहस्रो विस्तारस्तस्य सर्वतः" पुराणान्तरे तु, अष्टषष्टियोजनेच्छ्रय इत्युक्तम्। तथा "मेरोस्तवर्दिशं तत्र नवसाहस्रविस्तृतम्। इलावृतं महाभाग! चत्वारश्चात्र पर्वताः। विष्कम्भा रचिता मेरोर्योजनायुतसच्छ्रिताः। पूर्वेण मन्दरोनाम दक्षिणे गन्धमादनः। वैभ्राजः पश्चिमे पार्श्वे सुपार्श्वश्चोत्तरे स्मृतः" मर्य्यादापर्वतास्तु, ब्रह्माण्डपुराणे दर्शिताः" "जाठरो देवकूटश्च पूर्वस्यान्दिशि पर्वतौ। तौ दक्षिणोत्तरायामावानीलनिषधायतौ। कैलासोहिमवांश्चैव दक्षिणे वर्षपर्वतौ। पूर्वपश्चायतावेतावर्णवान्तव्यवस्थितौ। त्रिशृङ्गो जारुधिश्चैव उत्तरौ वर्षपर्वतौ। पूर्वपश्चायतावेतावर्णवान्तव्यवस्थितौ। निषधः पारियात्र(पा)श्च पश्चिमौ वर्षपर्वतौ। तौ दक्षिणोत्तरायामावानीलनिषधायतौ"। नीलनिषधपर्वतौ तु, अग्रे वक्ष्येते। "लोकपालाष्टकोपेतामिति, लोकपाला इन्द्राद्योऽष्टौ, तेषां लक्षणं पूर्वसूक्तं ब्रह्माण्डदाने" तच्चिन्तेयाच्च मेरोरुपरि प्रदक्षिणक्रमेण पूर्वादिदिक्षु कर्त्तव्याः। नवखण्डसमन्विताभिति। वर्षोपवर्षनद्य, ब्रह्माण्डपुराणे "उत्तरं तत्समुद्रस्य हिमाद्रेश्चैव दक्षिणम्। एतद्वै भारतं नाम भारती यत्र सन्ततिः। भारतं प्रथमं वर्षं ततः किंपुरुषं स्मृतम्। हरिवर्षं तथैवान्यं मेरोर्दक्षिणतो द्विज!। रम्यकं चोत्तरे वर्षं तस्यैवानु हिरण्मयम्। उत्तराः कुरवश्चैव यथा वै भारतं तथा। मेरोः पूर्वेण भद्राश्वं केतुमालं च पश्चिमे। वर्षं ह्येतत् तु समाख्यातं नवभेदमिलावृतम्। नवसाहस्रमेतेषामेकैकं द्विजसत्तम!" तथा। "हिमवान् हेमकूटश्च निषधश्चैव दक्षिणे। नीलः श्वेतश्च शृङ्गी च उत्तरे वर्षपर्वताः। सहस्रदितयोच्छ्रायास्तावद्विस्तारिणश्च ते। लक्षप्रमाणौ द्वौ मध्ये दशहीनास्तदापरे" "लक्षप्रमाणविस्तार इलावृतस्योभयपार्श्ववर्त्तिनौ नीलनिषधौ द्वौ पर्वतौ दैर्घ्येण लक्षमुखौ विज्ञेयौ, तद्बाह्यवर्त्तिनौ श्वेतशृङ्गिणौ नवतिसहस्रयोजनप्रमाणौ विज्ञेयौ, तथा तद्बाह्यस्थितौ हरिहिमवन्तौ अशीतिसहस्रयोजनप्रमाणाविलर्थः। अत्र युक्तिरुक्ता मत्स्यपुराणे, "द्वीपस्य मण्डलीभावात् छायाद्वैविध्यं प्रकीर्त्तितेति"। ब्रह्माण्डपुराणे "मेरोस्तु पश्चिमे भागे नवसाहस्रसंस्थिते। चतुस्त्रिंशत्सहस्राणि गन्धमादनपर्वतः। चत्वारिंशत्सहस्राणि परिहद्दो महीतलात्। सहस्रनवगाढ़े तु मति द्विगुणविस्तरः। पूर्वेण माल्यवान् शैलस्तत्प्रमाणः प्रकीर्त्तितः" "अत्र शतसहस्रादियोजनपरिमाणानां प्रसिद्ध्यादीनां कर्त्तुमशक्यत्वात् योजनसहस्रस्थाने चद्वाङ्कुलादिमानं परिकल्प्य यथोक्तसंख्यातारतम्यमनुक्रमेयम्। नदीनदसमोपेतमिति, नद्यो भागीरथीऽलकनन्दाः, नदाः शोणादयः, तेषां सार्वत्रिकेण विधातुमशक्यत्वात् यावच्छक्यमनुकारः कर्त्तव्यः। अन्ते सागरवेष्टितमिति, यद्यपि यावत्परिमाणा पृथ्वी तावानेव सागरः तथाप्यनुकारमात्रोपदेशात् शक्यानुकारमात्रमाचरणीयम्" हेमा०"मन्दारत्नसमाकीर्णां वसुरुद्रार्कसंयुताम्। हेम्नः पद्मसहस्रेण तदर्द्धं वाथ शक्तितः। शतपत्रेण वा कुर्यात् हिमतेन शतेन वा। कुर्यात्सङ्ख्यामदूर्द्धमप्यशक्तोऽपि विचक्षणः। तुलापुरुषवत् कुर्यात् लोकेशावाहनस्तुधः। अस्थिरद्रव्यखण्डसंस्कारभूषणाच्छादनादिकम्। वेद्यां कृष्णाजिनं कृत्वा तिलानास्तृणीत् न्यसेत्। तथाष्टादश धान्यानि रत्नानि लवणादिकान्। तथाष्टौ पूर्णकलशान् रत्नलात् परिकल्पयेत्। वितानञ्च कौशेयं फलानि विविधानि च। तथांशुकानि रम्याणि श्रीखण्डशकलानि च। इत्येवं रचयित्वा तामधिवासनपूर्वकम्। शुक्लमाल्याम्बरधरः शुक्लाभरणभूषितः। प्रदक्षिणं ततः कृत्वाष्टकृत्वो नमस्कृतिः" मत्स्यपु० "मन्दारत्नेत्यादि, मन्दारत्नानि, माणिक्यप्रभृतीनि परिभाषायां, दर्शितानि, वसुरुद्रार्कसंख्यकं ब्रह्माण्डदाने, आच्छादनादिकमित्यादिशब्देन देशकालवद्धित्यादेवादिपूजाब्राह्मणवाचनाधिवासनादिकं तत्तत्पुराणोक्तमनुक्रमेयं, पूर्णकलशान् सगन्धपल्लवरत्नदूर्वाक्षतपञ्चवान्वितानित्यवधेयं, वितानं पञ्चवर्णमिति। प्रदक्षिणं कृत्वेति, स्त्रिःप्रदक्षिणमाचार्य्येत्यर्थः, प्रदक्षिणादिकं च द्वितीयदिवसे पूर्वोक्तमनुक्रम-

शेषसमाप्तौ सर्वौषधिस्नानानन्तरमनुवेषम्" इमा "नमस्ते सर्वदेवानां त्वमेकं भवनं यतः। धात्री च सर्वभूतानामतः पाहि वसुन्धरे!। वसून् धारयसे यस्मात् वसु चातीव निर्मलम्। वसुन्धरा ततोजाता तस्मात्पाहि भवादृशम्। चतुर्खोऽपि नोगच्छेद्यस्मादन्तं तवाचले। अनन्तायै नमस्तस्मात् पाहि संसारकर्दमात्। त्वमेव कच्छोगोविन्दे शिवे गौरीति संस्थिता। गावतो ब्रह्मणः पार्श्वे ज्योत्स्ना चन्द्रे रवौ प्रभा। बुद्धिर्बृहस्पतौ ख्याता मेधा सनिषु संस्थिता। विश्वं व्याप्य स्थिता यस्मात्ततोविश्वम्भरा मता। क्षितिः क्षितिः क्षमा क्षोणी पृथ्वी वसुमती रसा। एताभिर्मूर्त्तिभिः पाहि देवि! ससारसागरात्। एवस्तुत्यां तां देवीं ब्राह्मणेभ्यो निवेदयेत्। धरार्द्धं वा चतुर्भागं गुरवे प्रतिपादयेत्। शेषञ्चैवाथ ऋत्विग्भ्यः प्रविभज्य विसर्जयेत्" मत्स्यपु० अत्रापि पूर्ववद्दानवाक्यसङ्ख्यं जलपूर्वं दानमाचार्य्यातुज्ञया अन्येभ्योपि दानं दीनानाथादिभ्यः। स्वल्पे त्वेकास्मिन्विधानं, भूमिपतिकर्त्तव्ये कर्म्मणि यामादिदक्षिणादानम् अयमकर्त्तृके यथाशक्ति सुवर्णदक्षिणादानमित्यनुसन्धेयम्। अथ ब्राह्मणवाचनानन्तरं देवतापूजनविसर्जनानि कुर्य्यात्"। इमा०आर्यधर्मगोपथब्राह्मणे,"अथ रोहिण्यां संकल्पोषितो ब्रह्मा यवाबीजरसरत्नगन्धवकीर्णतोयोदकपूर्णकलशमभिसृष्टाभिषेकमन्त्रैर्यथोक्तदातारमभिषिञ्चति।"व्रतेन त्वं व्रतपते" इति व्रतसुपैत्यायाचितायनावधःशायिनौ भवतो, व्रतोपचरं यथाशक्त्रेकरात्रं षड्रात्रं वा द्वादशरात्रं व्रतञ्चरित्वा क्षीभूते तन्त्रमाज्यभागान्तं कृत्वान्वारभ्याचार्य्यं जुहुयात् कामसूक्तं कालसूक्तं पुरुषसूक्तमित्यव सुवर्णमयीं भूमिं भूमेः प्रकृतिं गोचर्ममात्रां कृत्वानीय वेद्युत्तरां वेदिमित्युपस्थाय "गिरयस्ते पर्वता" इति पर्वतानवस्थाय स्फिरण्यरजतमणिसङ्खप्रवालकादिभिरुपशोभयेद्यदृच्छः संप्रयतोरिति (सामछन्दसा नेति नदीः कल्पयित्वा रसेन परिपूरयेत् "अपरमपमसि मसद्रन्त्वाभ्यवसृजामीति मसद्रान्) वनस्पतिः सह देवैर्नेत्रापयन्निति "इन्द्रस्तिर्नेति" वनस्पतीनन्यांश्च यत्नेत्वा मनसा सङ्कल्पयेन्मनसा सङ्कल्पवतोऽ भवति निधीन् बिभ्रतीति नमस्कारयित्वा सर्वं इन्द्रस्तत्वनुवाकीये देवासोदिव्येकादशस्थेति, पुण्याहं वाचयेत् संस्थापयेच्च दिवो देवव्रतेनेत्यभिमन्त्र्य ब्राह्मणेभ्यो दद्याद्दातुरेषाकौरोहिणीकामं निकामं वा दुःखं इति।"यद्वा रोहिणि बीजानि इलाजटे मही तले। एवं कामाः प्ररोहन्ति प्रेत्येह मनसा सदा। सर्वेषामेव दानानां यत्फलं समुदाहृतम्। तत् प्राप्नोति च विप्रेभ्यो दत्त्वा भूमिं यथाविधि"। मत्स्यपुराणे "अनेन विधिना यस्तु दद्याद्वेमधरां शुभाम्। पुण्यकालेऽभिसंप्राप्ते स पदं याति वैष्णवम्। विमानेनार्कवर्णेन किङ्किणीजालमालिना। नारायणपुरङ्कृत्वा कल्पत्रयमथो वसेत्। पुत्रपौत्रप्रपौत्रांश्च तारयेदेकविंशतिम्। इति पठति य इत्थं यः शृणोति प्रसङ्गादपि कलुषविताने र्मुक्तदेहः समन्तात्। दिवमरवधूभिर्याति संप्रार्थ्यमानः पदममरसहस्रैः सेवितं चन्द्रमौलेः"क्षितिपु०चक्रविधिस्तु तत्र खण्डे द्रष्टव्यः।

**धराकदम्ब** पु० धराजातः कदम्बः। धाराकदम्बे शब्दे०।

**धराङ्कुर** पु० धराया अङ्कुर इव। वायुफले शोकरे शब्दर०।

**धरात्मज** पु० ६त०। १मङ्गलग्रहे २नरकासुरे च ३स्त्रीनाम्नां स्त्री तत्कथा कालिकापु० ३७ अ० द्रष्टव्या। धरापुत्रादयोऽप्यत्र।

**धराधर** पु०धरां धरति धृ-अच्। १पर्वते २अनन्ते ३विष्णौ च। "सत्त्वमेधो। धराधरः" विष्णुस०। "अ-शैरशेषैः शेषाद्यैरशेषं धारयन् धराम्" भाष्यकृतवाक्ये तच्छब्दैः।

**धराधिप** पु० ६त०। नृपे "माहेश्वरीमथ सभां समासाद्य धराधिपः" भा०व०४८अ०। धराधिनाथधराधीशादयोऽत्र

**धरामर** पु० धरायामर इव। १भूदेवे ब्राह्मणे धरासुरादयोऽप्यत्र।

**धरित्री** स्त्री धृ-इत्र गौरा० ङीष्। भूमौ अमरः "सारं धरित्रीधरणक्षमस्व" कुमा०। "गुरुर्धरित्री क्रियतेतरां त्वया" माघः।

**धरिमन्** पु० धृ-इमनिच्। तुलापरिमाणे निरु०। "तथाधरिमभेदानां शतादभ्यधिके वधः" मनुः।

**धरीमन्** पु० धरिमन्+छान्दसो दीर्घः। १सारभूते वेदिरूपे स्थाने। "स्वं जातो मनुषो धरीमणि" ऋ० १।१२८।१ "धरीमणि सारभूते वेदिरूपे स्थाने"भा० २धारके त्रि०। "अक्षयन् पयसा धरीमणि" ऋ० ८।८६।३ "धरीमणि धारके" भा०।

**धरुण** त्रि० धृ-उनन्। धारके "धरुणोऽस्य पानाय" तारुण्य ब्रा० ८।१।६। "धरुणोऽसि सर्वधारकोऽसि अपानेन मे-ऽवयवोः शरीरं धारयात् धारयिता अपानः"भा०।स्त्रियां गौरा० ङीष् वा। "धरुणसि धाले! इन्द्रस्यन्दा पूतिधारयः" अथ०३।१२।१ पक्षे टाप् च। "धरासि धरुण-

कृता विश्वकर्मणो" यजु० १२।६६ २उदके निघण्टुः २धर्त्रो च "उपस्तृणन् धरुणं मात्रे धरुणो मातरं धयन्" यजु०८।५१ "धारयतीति धरुणोऽग्निः" वेददी० ४धारायाञ्च "अपामतिष्ठद्धरुणश्चरम्" ऋ० १।६४।१० धरुणशब्दो धारावचनः धरुणश्चरम् धारानिपातकम्" भा० ५एकविंशतौ ङ्यादित्वे च तयोस्सवर्णं च शतब्रा० ८।४।१।१२ उक्तं यथा "धरुण एकविंशतिः" इति। य एवैकविंशस्तोमस्तं तदुपदधाति। तद्यत्तमाह धरुण इति प्रतिष्ठा वै धरुणः प्रतिष्ठैकविंशोऽथो खल्वा आदित्यो धरुण एकविंशस्यैष द्वादश मासाः पञ्चर्तवस्त्रय इमे लोका असावेवादित्यो धरुण एकविंशस्तत्समाह धरुण इति यदाह्येवैषोऽस्तमेत्यथेदं सर्वं प्रियते आदित्योऽभूत्वा पशवस्तस्मै तदेव तदूपमुपदधात्यथ संवत्सररूपाण्युपदधाति" "धरुणमधिरुहं" यजु०।।।८ ७अक्षणि ८स्वर्गे पु० ९नीरे १०सञ्चते त्रि० मेदि०।

**धर्णसि** पु०ष्ट-वा०नसि। १वज्रे निघण्टुः। २धर्त्तव्ये वज्रादौ च "नि शुष्ण इन्द्र धर्णसिं वज्रम्" ऋ०८।६।१४। "धर्णसिं धर्त्तव्यम्" ३धारके च "पृचादि धर्णसिम्" ऋ०।।।।।

**धर्णि** त्रि० ष्ट-नि। "धारके "अग्निरीशे वसूनां शुचिर्धर्णिरेषाम्" ।।१२७।७ "धर्णिः धारणकृत्सः" भा०।

**धर्त्तूर** पु० धुस्तुर+पृषो०। धुस्तुरे पारस्करनि०।

**धर्त्र** न० ष्ट-त्र। १यज्ञे २यज्ञे ३धर्मे च उणादिको० ४धारके त्रि० "पशूनां त्वा वातानां यन्त्राय धर्त्राय गृह्णामि" तैत्ति० सं० १।६।।।२ "धर्त्रमसि दिवं द्यंह ब्रह्मवनि त्वाय" यजु० १।।८। धर्त्रं धारकम्" वेददी०।

**धर्म्म** पु०न०ऋ०ऋं०प्रियते लोकोऽनेन धरति लोकं वा ष्ट-मन्। "चोदनालक्षणोऽर्थोधर्मः" जै० सूत्रलक्षिते पदार्थे तत्र धर्मशब्दस्य यागादिपरत्वम् भाष्यसम्मतमन्यमते स्वर्गसाधनादृष्टभेदपरत्वं तथाहि "अथातो धर्मजिज्ञासेति" सूत्रभाष्ये "धर्माय जिज्ञासा धर्मजिज्ञासा, सा हि तस्य ज्ञातुमिच्छा। स कथं जिज्ञासितव्यः? को धर्मः, कथंलक्षणः, कान्यस्य साधनानि कानि साधनाभासानि, किंपरश्चेति। तत्र को धर्मः, कथंलक्षणः—इति एतदेव सूत्रेण व्याख्यातं—'चोदनालक्षणोऽर्थो धर्मः'—इति। कानि अस्य साधनानि, कानि साधनाभासानि, किंपरश्चेति शेषलक्षणेन व्याख्यातं, क पुरुषपरत्वं क वा पुरुषो गुणभूतः?—इत्येतासां प्रतिज्ञानां पिण्डसूत्रं 'अथातोधर्मजिज्ञासा'—इति। धर्मः प्रसिद्धो वा स्यात्, अप्रसिद्धो वा? स चेत् प्रसिद्धः, न जिज्ञासितव्यः; अथाप्रसिद्धः, नतरां; तदेतदनर्थकं धर्मजिज्ञासाप्रकरणं, अथवार्थवत्?"। धर्मं प्रति हि विप्रतिपन्ना बहुविदः,—केचिदन्यं धर्मभाजः, केचिदन्यं, सोऽयमविचार्य प्रवर्त्तमानः कञ्चिदेवोपादत्ते विहन्येताथात् अनर्थं च ऋच्छेत्, तस्माद्धर्मो जिज्ञासितव्य इति, स हि निःश्रेयसेन पुरुषं संयुनक्तीति प्रतिजानीमहे" भा० "तदभिधीयते चोदनालक्षणोऽर्थो धर्मः। २ सूत्र० "चोदना"—इति क्रियायाः प्रवर्त्तकं वचनमाहुः, आचार्यश्चोदितः करोतीति हि दृश्यते। लक्ष्यते येन तल्लक्षणं धूमो लक्षयमग्नेरिति हि वदन्ति। तया यो लक्ष्यते, सोऽर्थः पुरुषं निःश्रेयसेन संयुनक्तीति प्रतिजानीमहे। चोदना हि भूतं, भवन्तं, भविष्यन्तं, सूक्ष्मं, व्यवहितं, विप्रकृष्टमित्येवंजातीयकमर्थं शक्नोत्यवगमयितुं, नान्यत् किञ्चनेन्द्रियम्," य एव श्रेयस्करः, स एव धर्मशब्देनोच्यते। कथमवगम्यतां?। यो हि यागमनुतिष्ठति, तं 'धार्मिकः'—इति समाचक्षते, यच्च यस्य कर्त्तुः स तेन व्यपदिश्यते, यथा पाचकः, लावक इति। तेन यः पुरुषं निःश्रेयसेन संयुनक्ति, स धर्मशब्देनोच्यते। न केवलं लोके, वेदेऽपि 'यज्ञेन यज्ञमयजन्त देवाः, तानि धर्माणि प्रथमान्यासन्'—इति यजतिशब्दवाच्यमेव धर्मं समामनन्ति। उभयथापि चोदनया लक्ष्यते, अर्थोऽनर्थश्च इति, कोऽर्थः? यो निःश्रेयसाय, ज्योतिष्टोमादिः। कोऽनर्थः? यः प्रत्यवायाय, श्येनो, वज्रः, इषुरित्येवमादिः। कथं पुनरसावनर्थः?। हिंसा हि सा, सा मा भूत् इति चानर्थरूपम्।"शाबरभाष्यम्

एतन्मतानुसारेण लौगाक्षिभास्करेणोक्तं यथा "अथ को धर्मः किं तस्य लक्षणमिति चेदुच्यते। यागादिरेव धर्मः। तल्लक्षणस्तु वेदप्रतिपाद्यप्रयोजनवदर्थो धर्मः। प्रयोजनेऽतिव्याप्तिवारणाय प्रयोजनवदिति। भोजनादावतिव्याप्तिवारणाय वेदप्रतिपाद्येति। अनर्थफलकत्वादनर्थभूते श्येनयागादावतिव्याप्तिवारणायार्थ इति। न च चोदनालक्षणोऽर्थो धर्म इति सौत्रधर्मलक्षणविरोधः चोदनाशब्दस्य तत्र विधिरूपवेदैकदेशपरत्वादिति वाच्यम्। सर्ववेदस्य तात्पर्येण धर्मप्रतिपादकत्वात्। स चायागादिः। "यजेत स्वर्गकामः" इत्यादि वाक्येन स्वर्गसहित्य पुरुषं प्रति विधीयते"।

अन्यमते तु अदृष्टविशेषस्यैव धर्मत्वं तत्त्वबोधिन्यां तदुभयमतं संक्षिप्य दर्शितं यथा

"चोदनालक्षणोऽर्थो धर्मः" इति। चोदनैव लक्षणं प्रमाणं यस्य तादृशो योऽर्थः स धर्मः चोदना प्रवर्त्तको वेदो विधिरूपः। चुद प्रेरणे इत्यस्माद्भावादिकधातोः वेदमात्रस्यैवेयं परिभाषेत्यपरे। तथा च वेदैकप्रमाणगम्योऽर्थः पुरुषनामाऽदृष्टविशेषः धर्मः कार्य्यापूर्वापरनामा तथा च तार्किकाः "विहितक्रियया साध्यो धर्मः पुंसो गुणो मतः। प्रतिषिद्धक्रियासाध्यः स गुणोऽधर्म उच्यते"। भविष्ये "धर्मः श्रेयः सहितं श्रेयोऽभ्युदयसाधनम्"। तैत्तिरीयश्रुतिरपि "धर्मो विश्वस्य जगतः प्रतिष्ठा लोके धर्मिष्ठं प्रजा उपसर्पन्ति धर्मेण पापमपनुदतीति" प्रशंसाभिदधती श्रेयोऽभ्युदयसाधनं धर्मं इति प्रतिपादयति। भाष्यमपि "कोऽर्थो योऽभ्युदयाय"। मुख्यमते विधेरपूर्वं यज्ञाद्यपूर्वस्य विधिवाच्यत्वात् वेदगम्यत्वं रूपपन्नमेव। अदृष्टोपयोगित्वस्य प्रामाण्यरूपत्वाद्वेदमात्रगम्यत्वमपूर्वस्य। अन्येषां मते तु यागादेरिष्टसाधनत्वान्यथानुपपत्त्या कल्पनीयत्वेऽप्यपूर्वस्य, वेदस्य प्रवर्त्तकत्वान्यथानुपपत्त्या कल्पनीयत्वेन वेदमूलकत्वात् वेदप्रमाणकत्वम्। भट्टमते तु चोदना प्रेरणा यत्कर्मभावना चिकीर्षाद्यर्थाभिधारूपा तया च कर्त्रा कर्त्तुमित्याकाङ्क्षितत्वाच्च लक्ष्यते आश्रीयते कर्त्तव्यत्वेन बोध्यते यः करणीभूतो भावार्थयागादिः स धर्म इत्यर्थः तथाच विश्वामित्रः "यमार्थाः क्रियमाणं हि शंसन्त्यागमवेदिनः। स धर्मोऽयं विगर्हन्ति तमधर्मं प्रचक्षते" इति। अतएव "चोदनागम्योऽग्निहोत्रादिर्धर्मो नातल्लक्षणश्चैत्यवन्दनादिरिति" आख्यदीपिका। तत्र चोदनागम्यो वेदबोधितकर्त्तव्यताक इत्यर्थः। अत्र मते धर्मशब्दो निरूढलाक्षणिकः अदृष्ट एव तस्य शक्तेः "साद्धर्मस्त्रियां पुण्यश्रेयसी सुकृतं दृषः" इत्यु्क्त्या "शक्तश्चायं त्रिषु द्रव्ये पापं पुण्यं सुखादि च" इत्यमरोक्तेः द्रव्ये तत्साधके धर्मेऽपि त्रिषु वाच्यलिङ्गमित्यर्थः। अतएव भट्टवार्त्तिकं "द्रव्यक्रियागुणादीनां धर्मत्वं स्थाप्यते। तेषामैन्द्रियकत्वेऽपि न तादृश्येव धर्मता श्रेयःसाधनता स्त्रीणां नित्यं वेदात् प्रतीयते। तादृश्येव च धर्मत्वं तस्मान्नेन्द्रियगोचरः" इति। यद्यपि पुरुषनामाऽदृष्टविशेष एव धर्मस्तदर्थत्वात्यापि द्रव्यक्रियादीनामपि धर्मत्वं व्यवस्थाप्यते तेषां धर्मजनकतया कारणे कार्य्यतोपचारात् तेषु धर्मव्यपदेश इति भावः। न तादृश्येव न स्वरूपतः, अपि तु धर्मजनकतयेति शेषः। धर्मजनकत्वे मानमाह श्रेय इति "श्रेयोऽभ्युदयसाधनम्" इत्यभियुक्तवचनात् तत्र साक्षात् स्वर्गादिसाधनमदृष्टं तत्साधनता यागादेरित्यर्थः तादृश्येव स्वरूपतः। अत्र च वेदमात्रप्रमाणकत्वस्तुत्यर्थं लक्षणं शुद्धविशेषस्य स्वरूपं, द्वितीयमते वेदैकप्रमितकर्त्तव्यताकार्थत्वं लक्षणं द्रव्यक्रियागुणादयः स्वरूपम् उभयत्र वेदप्रामाण्यादेव प्रामाण्यम्।

तद्भेदादिकं हेमाद्रिव्रतखण्डे उक्तं यथा भविष्यपु० "वर्णधर्मः श्रुतस्त्वेक आश्रमाणामतः परम्। वर्णाश्रमस्मृतीयस्तु गौणो नैमित्तिकस्तथा। वर्णत्वमेकमाश्रित्य यो धर्मः सम्प्रवर्त्तते। वर्णधर्मः स उक्तस्तु यथोपनयनं नृप। आश्रमञ्च समाश्रित्य यो धर्मः सम्प्रवर्त्तते। स ज्ञेयाश्रमधर्मस्तु भिक्षादण्डादिको यथा। वर्णत्वमाश्रमत्वञ्च योऽधिकृत्य प्रवर्त्तते। स वर्णाश्रमधर्मस्तु स्नानौञ्जी मेखला यथा। यो गुणेन प्रवर्त्तते गुणधर्मः स उच्यते। यथा भूमौभिषिक्तस्य प्रजानां परिपालनम्। निमित्तमेकमाश्रित्य यो धर्मः सम्प्रवर्तते। नैमित्तिकः स विज्ञेयः प्रायश्चित्तविधिर्यथा" "वर्णत्वमेकमाश्रित्येति एकशब्दो वस्तुमात्रोभयनिमित्तव्याहृत्तिपरः, वस्तुमात्रधर्मभिन्नत्वात् कथं त्वाश्रमत्वमनपेक्ष्य वर्णत्वनिमित्तकोऽतः सत्वाभ्युपनयनस्यादवर्णत्वाद्यपेक्षायां नैकशब्दविरोध इति। अथवा वीप्सायामेकशब्दः ततश्चैकैकं वर्णत्वमाश्रित्य यो विधीयते स वर्णधर्म इति अतएवादवर्णादिशब्दैरनेकवर्णत्वोद्देशेन विधीयमानस्योपनयनं दृष्टान्तीकृतम्। निमित्तमेकमाश्रित्येत्यत्र प्रायश्चित्तस्य नित्यकाम्यवैधर्म्यमात्रेण नैमित्तिकत्वं न तु राड्दर्शननिमित्तस्नानादिवदकरणजनितदोषपरिहारार्थं तथा, निषिद्धकर्मकृताधर्मपरिहारार्थत्वेव तद्विधानोपपत्तेः। न च जातेष्टिवदुभयार्थत्वं, तत्र फलनिमित्तयोरुभयोरुपात्तत्वात्र त्विह तथेति। साधारणधर्मस्तु महाभारते। "श्राद्धकर्म तपश्चैव सत्यमक्रोध एव च। स्वेषु दारेषु सन्तोषः शौचं विद्यानसूयिता। आत्मज्ञानं तितिक्षा च धर्मः साधारणो नृप!" चातुर्वर्ण्यस्येति शेषः। "तपश्चान्द्रायणादि। यदाह देवलः "व्रतोपवासनियमैः शरीरोत्तापनं तपः"। व्रतशब्दोऽत्र स्नानदानजपहोमपूजादिपरः। एतेन व्रतखण्डप्रतिपाद्यानां धर्माणामपि साधारणत्वं सूचितम्। आत्म-

ज्ञानमित्यनेन मोक्षसाधनप्रतिपाद्यानामपि धर्माणां साधारण्यत्वम्। न च शूद्राधिकरणन्यायेन शूद्राणां विद्यायामनधिकार इति कथं मोक्षधर्माणां साधारण्यमिति वाच्यम् तेषामुपनयनाभावेनाध्ययनासम्भवाद्वेदवाक्यविचार एवानधिकारः न पुनर्वैदिके "आत्मवेत्तृतरोवर्णानिति" शूद्राणामपि यज्ञयज्ञादिवत् पुराणश्रुतिप्रतिपाद्यविद्योपदेशदर्शनात्। ननु तथापि कथं वेदान्तवाक्यविचारजनितज्ञानाभावे शूद्राणां मोक्षधर्माधिकार इति चेत् मैवम् मोक्षसाधनस्य ज्ञानस्य तदेकसाध्यत्वसिद्धेः, तथा च श्रुतिः "तरति शोकमात्मवित् ब्रह्म वेद ब्रह्मैव भवति ब्रह्मविदाप्नोति परं विद्यावान्हृतत्वमश्नुते" इति, मोक्षस्यात्मज्ञानसाध्यतां वदति। आत्मज्ञानस्य च पुराणादिवचनविचारपरिचयादद्युपपत्तेः श्रोतव्य इत्यादिवाक्यानां तु विचारनियमविधित्वानङ्गीकारात् अङ्गीकारे वा तस्य द्विजातिनियततया "आत्मवेत्तृतरोवर्णानित्यादिपुराणवचनविषयविधेरध्ययनविधिपरिग्रहविचारपर्यन्ततासु ततश्च यथा द्रव्यसाध्यत्वाविशेषेऽपि क्रतूनामन्यदर्थविहितोपांशुयाजादिनियतद्रव्यसाध्यत्वम् एवमात्मज्ञानसाध्यत्वाविशेषेऽपि मोक्षस्य तदुपायविशेषजनितज्ञानसाध्यत्वमिति सर्वमनवद्यम्" तथा चोक्तं भागवते "स्त्रीशूद्रद्विजबन्धूनां त्रयी न श्रुतिगोचरः। इति भारतमाख्यानं कृपया मुनिना कृतम्"। महाभारतेऽपि "मामुपाश्रित्य तु कौन्तेय! येऽपि स्युः पापयोनयः। स्त्रियो वैश्यास्तथा शूद्रास्तेऽपि यान्ति परां गतिम्"। विष्णुः। "क्षमा सत्यं दमः शौचं दानमिन्द्रियसंयमः। अहिंसा गुरुशुश्रूषा तीर्थानुसरणं दया। आर्जवं लोभशून्यत्वं देव, ब्राह्मणपूजनम्। अनभ्यसूया च तथा धर्मः सामान्य उच्यते इति"। ब्रह्मवैवर्ते "विद्या, दया, दमः, शौचं, सत्यमक्रोधता तपः। जितेन्द्रियत्वमक्रोधो लज्जा धर्मः इति स्मृतिः"। विष्णुधर्मोत्तरे "तस्य द्वाराणि यजनं तपोदानं दया क्षमा। ब्रह्मचर्यं तथा सत्यं तीर्थानुसरणं शुभम्। स्वाध्यायश्चैव साधूनां सङ्गवाञ्छा सुरार्चनम्। गुरूणां चैव शुश्रूषा ब्राह्मणानाञ्च पूजनम्। इन्द्रियाणां दमश्चैव ब्रह्मचर्यमनश्वरम्। सङ्गात्त्यागो हरेर्देवो विप्रपूजात्मचिन्तनम्। ध्यानं नारायणस्यैतत् संक्षेपाद्धर्मलक्षणम्" "दानमित्यनेन दानस्वरूपप्रतिपाद्यानाम्, तीर्थानुसरणमित्यनेनापि तीर्थस्वरूपप्रतिपाद्यानाम् देवब्राह्मणपूजनमित्यनेनापि परिशेषस्वरूपप्रतिपाद्यानाम् देवतापूजनादिधर्माणां साधारण्यत्वम्"। इत्यस्मृतिः "दया, क्षमाऽनसूया, च शौचानायासमङ्गलम्। अकार्पण्यमस्पृहत्वं सर्वसाधारणानि च। घरे वा बन्धुवर्गे वा मित्रे द्वेष्टरि वा सदा। आपन्ने रक्षितव्यं तु दयेषा परिकीर्त्तिता। बाह्ये वाऽऽध्यात्मिके चैव दुःखे चोत्पातिके क्वचित्। न कुप्यति न वा हन्ति सा क्षमा परिकीर्त्तिता। न सुखान् सुखिनो हन्ति नौति मन्दसुखानपि। नान्यदोषेषु रमते साऽनसूया प्रकीर्त्तिता। अमङ्गलपरिहारश्च संसर्गेणाथनिन्दितैः। अधर्मे च व्यवस्थानं शौचमेतत् प्रकीर्त्तितम्। शरीरं पीड्यते येन शुभेनापि कर्मणा। अनायासः स उच्यते। प्रशस्ताचरणं नित्यमप्रशस्तविवर्जनम्। एतद्धि मङ्गलं प्रोक्तमृषिभिस्तत्त्वदर्शिभिः। लोकादद्युपकर्त्तव्यमदीनेनान्तरात्मना। अकृत्यकृति यत्किञ्चित् अकार्पण्यं हि तत् स्मृतम्। यथोपपन्ने सन्तोषः कर्त्तव्योऽत्यल्पवस्तुनि। परस्व चिन्तावर्जं साऽस्पृहा परिकीर्त्तिता"। तदेवं निरूपिताः षट्प्रकारा धर्माः। अन्यत्राऽपि तद्भेदस्तत्रैवोक्तो यथा

विश्वामित्रः "यमाद्याः क्रियमाणं हि शंसन्त्यागमवेदिनः। स धर्मो यं विगर्हन्ति तमधर्मं प्रचक्षते"। स्मृतिः "ब्रह्मस्तम्ब निबन्धस्तु द्विविधं कर्म वैदिकम्। सर्गादौ सृजता सृष्टं ब्रह्मणा वेदरूपिणा। ब्रह्मस्तम्बात्मको धर्मो मुच्यतस्त्रिविधोभवेत्। सात्त्विको राजसश्चैव तामसश्चेति भेदतः। काम्यबुद्ध्या च यत् कर्म मोक्षेऽपि फलवर्जितम्। क्रियते द्विज! कर्मैव तत् सात्त्विकमुदाहृतम्। मोक्षार्थेदं करोमीति सङ्कल्प्य क्रियते तु यत्। तत् कर्म राजसं प्रोक्तं न साक्षान्मोक्षसाधनम्। कार्यबुद्ध्यानपेक्षं यत् कर्मविध्यनपेक्षया। क्रियते द्विजवर्य्यैह तत्तामसमुदाहृतम्"।

धर्माधिकारदेवस्योत्पत्तिः तत्र स्वर्गे वराहपुराणे दर्शिता यथा "अथोत्पत्तिं प्रवक्ष्यामि धर्मस्य महतीं नृप!। माहात्म्येन समायुक्तं विस्तरेण नराधिप!। पूर्वं ब्रह्माव्ययः शुद्धः परादपरसंज्ञितः। स सिसृक्षुः प्रजास्तादौ पालनं तास्वचिन्तयत्। तस्य चिन्तयतस्त्वङ्मूर्द्धिबाहुतः। प्रादुर्बभूव पुरुषः श्वेतमाल्यानुलेपनः। तं दृष्ट्वोवाच भगवांश्चतुर्वक्त्रादहं ब्रह्म-

तिम्। पालयेमाः प्रजाः पुत्र! त्वं ज्येष्ठो जगतो भव। इत्युक्तः स सप्तस्थो चतुष्पादः कृते युगे। त्रेतायां स त्रिभिः पादैर्द्वाभ्यां वै द्वापरेऽभवत्। कलावेकेन पादेन प्रजाः पालयते विभुः। षड्भेदो ब्राह्मणानां स मेधा चले व्यवस्थितः। हेधा वैश्येषु शूद्रेषु त्वेकधा जगतः प्रभुः। रसातलेषु सर्वेषु द्वापरेषु स्वयम्भुवः। चतुःसहस्रक्षिप्राच्चैव द्विशिराः सप्तसप्तवान्। त्रिधैव बहो विप्राणां सुखमः पालयन् प्रजाः"।

भाग० ४।१। अ०। तत्पत्नीपुत्रादिभेदा दर्शिता यथा "त्रयोदशाऽदाद्धर्माय तथैकामग्नये विभुः। पितृभ्य एकां युक्तेभ्यो भवायैकां भवच्छिदे। श्रद्धा मैत्री दया शान्तिस्तुष्टिः पुष्टिः क्रियोन्नतिः। बुद्धिर्मेधा तितिक्षा ह्रीर्मूर्त्तिर्धर्मस्य पत्नयः। श्रद्धासुत शुभं मैत्री प्रसादमभयं दया। शान्तिः सुखं सुदं तुष्टिः स्मयं पुष्टिरसूयत। योगं क्रियोन्नतिर्दर्पमर्थं बुद्धिरसूयत। मेधा स्मृतिं तितिक्षा तु क्षेमं ह्रीः प्रश्रयं सुतम्। मूर्त्तिः सर्वगुणोपेतो नरनारायणाऽवयो। यवोर्जन्मन्यदोविश्वमभ्यनन्दत् सुनिर्वृतम्"।

वामनपुरा० अन्येऽपि तस्य भार्यापुत्रा उक्ता यथा "धर्मस्य भार्याऽहिंसाख्या तस्यां पुत्रचतुष्टयम्। तस्माद्गृणिष्वार्दूल! योगशास्त्रविचारकम्। ज्येष्ठः सनत्कुमारोऽभूत् द्वितीयश्च सनातनः। तृतीयः सनको नाम चतुर्थश्च सनन्दनः। सांख्यप्रवेत्तारमपरं कपिलं योदुमाशुरिम्। ब्रह्मा पञ्चशिखं श्रेष्ठं योगयुक्तं तपोनिधिम्। ज्ञानयोगं न ते दद्युर्जीवां सोऽपि कनीयसाम्"। दैवादिभेदेन धर्मभेदा वामनपु० ११ अ० उक्ता यथा "किंस्वभावो भवेद्धर्मः किमाचरणसत्क्रियः। यमाश्रित्य न मोदन्ति देवाद्यास्तु तदुच्यताम् ब्रह्मन उचुः। देवानां परमो धर्मः सदा यज्ञादिकाः क्रियाः। स्वाध्यायवेदवेत्तृत्वं विष्णुपूजारतिः स्मृतिः। दैत्यानां बाहुशालित्वं मातृभक्तं युद्धसत्क्रिया। विन्दनं नीतिशास्त्राणां हरभक्तिरुदाहृता २। विद्यानासुदितो धर्मो योगयुक्तिरनुत्तमा। स्वाध्यायो ब्रह्मविद्यानं भक्तिर्द्वाभ्यामपि स्थिरा ३। उत्तमोपासनं क्षेयं मध्यमाद्येषु वादिता। सरस्वत्यां स्थिरा भक्तिर्मोक्षवेत्ता धर्म उच्यते ४। विद्याधरत्वमतुलं विद्यानं पौरुषे मतिः। विद्याधराणां धर्मोऽयं भवान्यां भक्तिरेव च ५। गान्धर्वविद्यावेदित्वं भक्तिः स्वाध्यौ तथा स्थिरा। कौशल्यं सर्वशिल्पेषु धर्मः कैम्पुरुषः स्मृतः६। ब्रह्मचर्य्यं समानित्वं योगाभ्यासरतिर्दृढा। सर्वत्र कामचारित्वं धर्मोऽयं पैङ्गलः स्मृतः ७। ब्रह्मचर्य्यं यताग्नित्वं जप्यज्ञानञ्च राक्षस!। नियमोधर्मवेदित्वमार्षं धर्मं प्रचक्षते ८। स्वाध्यायो ब्रह्मचर्य्यञ्च दानं यजनमेव च। स्वकार्पण्यमनायासं दयाक्षिंसामादयः। जितेन्द्रियत्वं शौचञ्च माङ्गल्यं भक्तिरुच्यते। शङ्करे भास्करे दैव्यां धर्मोऽयं मानवः स्मृतः ९। धनाधिपत्यं भोगाय स्वाध्यायः शङ्करार्चनम्। अहङ्कारमयोचञ्च धर्मोऽयं गुह्यकेशिति १०। परदारामिमर्शित्वं परार्थेऽपि च लोलुपा। स्वाध्यायस्तम्बके भक्तिर्धर्मोऽयं राक्षसः स्मृतः ११। अविवेकताथाऽज्ञानं शौचज्ञानिरसत्यता। पिशाचानामयं धर्मः सदा चामिषभुग्नता १२। योनयस्तु ह्यादशैताः सद्धर्माश्च राक्षस!। ब्रह्मणा कथिताः पुरा ह्यादशैव गतिप्रदाः"। २धनुषि २यमे ४सोमपे च पु० भेदि० ५सत्सङ्गे ६अर्हति जिने च पु० ७मत्वर्थे ८क्षमावे ९आचारे १०उपमायां ११क्रतौ १२अहिंसायाम्। १३उपनिषदि भेदि०पु०न०। १४आत्मनि तस्य सर्वस्य स्वस्मिन् धारणात् १५जीवे देहप्राणादेर्धारणात् १६षट्कलप्रत्यये प्रथमयुक्तेऽन्यत्रयुक्तचतुष्टयके द्वादशभेदे। १७भाग्याख्ये लग्नेन्दुभ्यां नवमस्थाने तद्भावानवनं द्वादशभावशब्दोक्तदिशा बोध्यम्। तत्र चिन्त्यपदार्थो जन्मकाले तद्भावस्थग्रहयोगादिकफलं जातकपद्धतावुक्तं यथा "विहाय भावान् सकलान् प्रयत्नाद्भाग्याभिधं दैवविदा विचिन्त्यम्। भाग्यान्वितो नो यदि भीलभिद्याः कुलं तदायुश्च भवेत् सुधन्यम्। लग्नाच्चन्द्रात् यद्भवेदङ्कसंख्यं भाग्यस्थानं प्राज्ञनैः कीर्त्तितं तत्। चिन्त्यो वीर्याढ्यात्तयोक्तपतिः कः कस्मिन् भावे कीदृशः कारको वा। भाग्यालयं स्वामियुतेक्षितं चेत् स्वदेशतो भाग्यविवृद्धिदं तत्। अन्येन दृष्टं त्वथ वा युतं चेदन्यत्र देशे फलदानदक्षम्। भाग्येशे शुभखगा मिलिताः शुराज्यदा न रिपुनीचसंस्थे चेत्। धर्मधाम्नश्चक्षुर्विकराश्च स्वायुषः स्थिरधनस्य च दृष्ट्रै। नीचारिसंस्थाश्च न सौम्यदृष्टाः पापाश्च भाग्ये न शुभप्रदाः स्युः। क्रूरा अपि स्वे भवने शुभाः स्युर्विशेषतः सद्दृग्युते वीक्षितार्थेचेत्। पूर्णेन्दुसंस्थितं शुभदृग्भं चेत् स्यात् प्रधानपुरुषः पुरुषोऽसौ। खेचरेशसमागमयुक्तं सद्गुरोस्तु युतितोऽतिविशेषात्। क्षोद्भवितः सर्वनभश्च

रेन्द्राः शुभाः शुभस्थानगता विदध्युः। नरं सम्यङ् शुभदृष्टेक्षा भूमं कृतारिं सुशरीरकीर्त्तिम्। तत्रादि खेचरयुतिश्च भाग्यभे भूपतिं हि जनयेत् बुधोनिता। शौरिभूसुतगुरूनिता नरं कामकीर्त्तिधनसौख्यवर्जितम्। धर्मे तु तीर्थं दिनकृच्चवाद्दे चन्द्रा नखेः० वातमरुक् च भक्रे१४। मातस्मृतिर्भौङ्कुयुगे२६ कविर्मां तिथ्यब्दके १५ तातस्मृतिं गुरुश्च"।

धर्मघ्नात् धर्मभावफलं भौ० ता० उक्तं यथा "भौमेऽब्दपे त्रिनवगे क्रूरायुक्ते बलान्विते। सुखावरुद्धादा मार्गविरं कार्यं स्थिरं तनु। त्रिधर्मस्थोऽब्दपः कुर्यः कन्दलीमार्गसौख्यदः। अन्यभेशयुतयानं स्यात् स चेन्नाधिबलो भवेत्। शुक्रेऽब्दपे त्रिनवगे मार्गसौख्यं विलोमगे। अस्ते वा कुगतिः सौख्ये देवयात्रा तथाविधे। क्रूरादिते कुयानं स्यात् गुरावेवं विचिन्तयेत्। इत्यग्नाथे धर्मपत्योर्यात्राऽस्यचिन्तिता। धर्मेशो धर्मपे यच्चन् स्वं मङ्गचिन्तिताध्वगः। एवं धर्माब्दयोर्योगे सुखदाक्षपयोरपि। गुरुस्थाने कुजे धर्मे मदुयात्रा भव्यवित्तदा। अस्थाने धर्मपो भौमो दृष्टः स्थानसौख्यदः। स्वस्थानगो हि बलवान् धर्मदर्शी सुखानदः। जन्माधिकारी शो मन्दस्थाने क्रूरयुतो यदा। धर्मा रिपोः स्वकटकाद्रुग्शुक्रेन्दुजीवयोः। धर्मे शनिर्नाधिकारी धर्मस्थानमशुभं वदेत्। इत्थं गुरो दूरयात्रा रूपसङ्गस्ततो सुखः। कुजेऽब्दपे नष्टबले खलनाद्दूरतो गतिः। शुनैश्चिरा धर्मे इन्दौ सबलेऽध्वा विदेशजः। वर्षेशो बलवान् पापायुतः केन्द्रेऽधिकारवान्। अधिकारे गतिः कष्टे सेनापत्येऽपि वा वदेत्। एवंविधे कुजे जीवे युतेऽकौंद्विर्गते पुनः। परसैन्योपरिगतिजयख्यातिसुखावहा। जीवाद्यवर्गे भौमे शुभां यात्रां नृपां वदेत्। १८ आधेये खदृक्षिपदार्थे "धर्मादनिच् केवलात्" पा०वक्तु०अनिच्। विधर्मा सुधर्मा केवलादित्युक्तेः परमः स्रोधर्मो यस्येति बहुव्रीहौ न। सन्दिग्धसाध्यधर्मा इत्यादौ तु कर्मधारयपूर्वपदो बहुव्रीहिः समानविभक्तिकपदपूर्वकेतरत्वस्यैव केवलशब्दार्थत्वात् निवृत्तिधर्मा अनुच्छित्तिधर्मा इत्यादौ अनिच्।

**धर्मकर्मन्** न० धर्मस्य धर्मार्थं कर्म। धर्मप्रतिपादककर्मभेदे "वेदप्रविहितं धर्मकर्म तन्मङ्गलं परम्" ब्रह्मवै० पु०। धर्मकार्य्यं धर्मक्रियादयोऽप्यत्र।

**धर्मकवादरिद्र** पु० धर्मार्थकयाचां दरिद्रः। कलिकाले जातमानवे कलौ नृणां धर्मकथाशून्यत्वात् तथात्वम्।

**धर्मकाम** पु० धर्मं कामयते कनाननिसन्धानेन कम-घञ् उप०स०। कर्त्तव्यबुद्ध्या धर्मकारके "अथ ते (तव) यदि धर्मविचिकित्सा इतिविचिकित्सा वा स्यात्। ये तत्र ब्राह्मणा सम्यग्दर्शनयुक्ता आयुक्ता अलूक्षा धर्मकामाः स्युः" एका० धृता तैत्तिरीयश्रुतिः। "धर्मकामाः जीवन्मुक्तवत् कर्मण्प्रोदासीन्यमकुर्वाणाः" एका०रघु०।

**धर्मकाय** पु० धर्मस्य धर्मार्थं कायोऽस्य। बुद्धे त्रिका०।

**धर्मकील** पु० धर्मस्य कील इव। राजशासने त्रिका०। संज्ञायां कन्। धर्मकीलक ब्रह्मशासने शब्दर०।

**धर्मकृत्** त्रि० धर्मं धर्मसाधनं कर्म करोति कृ-क्विप् तुक्। १धर्मसाधनकर्मकरे। "व्यवहारे च न बद्धमित्रः सन्तुष्टो धर्मकृत् प्रचुरकोषः" हु० सं०। २विष्णौ पु० धर्मग्रप् "धर्मकृद्धर्मी" विष्णुस०। "धर्माधर्मविहीनोऽपि धर्ममर्य्यादास्थापनार्थं धर्ममेव करोतीति धर्मकृत्" भा०।

**धर्मकेतु** पु० धर्मः अहिंसारूपकर्म केतुर्यस्य। १बुद्धे भट्टा० तस्याहिंसारूपपरमधर्मकृत्त्वात् तथात्वम्। काश्यपवंश्ये २सुकेतुतनयभेदे। "सुकेतुतनयश्चापि धर्मकेतुरिति स्मृतः" हरिवं० २९ अ०। "अजकौत् सन्ततिस्तस्मात् सुनीतोऽथ निकेतनः। धर्मकेतुःसुतस्तस्मात् सत्यकेतुरजायत" भाग० ९।१७।६ ३निकेतनपुत्रे नृपभेदे च। धर्मः केतुरिवास्य। ४धर्मध्वजे त्रि०।

**धर्मकोष** पु० धर्मः कोष इव धर्मस्य कोषः समूहो वा। धर्मरूपे रत्नाधारे १वस्तुनि २धर्मसमूहे च "ब्राह्मणो जायमानो हि पृथिव्यामधिजायते। ईश्वरः सर्वभूतानां धर्मकोषस्य गुप्तये मनुः।

**धर्मक्षेत्र** न० तत्०। धर्माजनार्थक्षेत्रे कर्मभूमौ भारतवर्षे। धर्मस्य पूर्वमविद्यमानस्योत्पत्तेः विद्यमानस्य च दृढे-र्निमित्ते यज्ञस्येव २स्थानभेदे च "धर्मक्षेत्रे कुरुक्षेत्रे समवेता युयुत्सवः" गीता। कुरुक्षेत्रञ्च श्रुतिस्मृतिप्रसिद्धं देवयजनस्थानमविलुप्तं वा कुरुक्षेत्रशब्दे दर्शितं तद्व्याहत्तये धर्मक्षेत्रमिति विशेषणम्। "तस्मिन् याताः पाण्डवाः पूर्वविधिधार्मिका यदि पञ्चवयंहिंसानिमित्ता दधर्माद्भीता निवर्त्तेरन् ततः प्राप्तराज्या एव मम सुताः अथ वा धर्मक्षेत्रमाहात्म्येन पापिनामपि मनुष्याणां कदाचित् चित्तप्रसादः स्यात्तदा च तेऽनुतप्ताः कपटोपात्तं राज्यं पाण्डवेभ्यो यदि दद्युरहिं विनापि युद्धं हृता एवेति स्वप्तराज्यलाभे पाण्डवराज्यलाभे च

इतरसुपायमपश्यतो मङ्गानुद्देश एव मन्त्रबीजम् मधुसू०

**धर्मगुप्** त्रि० धर्मं गोपायति गुप–आयाभावपक्षे क्विप् ह्रस्व०। १धर्मरक्षके २विष्णौ पु० "धर्मगुप् धर्मकृत् धर्मी" विष्णुस० । "धर्मसंरक्षणार्थाय सम्भवामि युगे युगे" गीतायां तस्य धर्मरक्षार्थमावितीर्भावस्योक्तेस्तस्य तथात्वम् ।

**धर्मघट** पु० धर्मार्थं देवो घटः । कौरवैशाखे प्रत्यहं धर्मार्थं दीयमाने गन्धोदकभोज्यादिसहिते घटे। तद्विधानादि भविष्यपु० उक्तं यथा "विनिष्क्रान्ते ततश्चैत्रे यदा मेषगतो रविः। दोषादिरहिते काले चतुर्वर्षं समाचरेत्। तत्र नित्यं घटं दद्यात् मासमेकं सभोज्यकम्। चन्दनेन समालिप्तं दध्यक्षतादिभिरन्वितम्। व्रतमेतत् समाख्यातं यावत् वर्षचतुष्टयम्"। इदन्तु व्रतरूपं दानम्। हेमाद्रिदानखण्डे तु अन्यविधं धर्मार्घ्यघटस्य दानमुक्तं यथा "अथ धर्मघटदानमाह विष्णुः "शीतलेन सुगन्धेन वारिणा पूरितं घटम्। शुक्लचन्दनदिग्धाङ्गं पुष्पदामोपशोभितम्। दध्योदनयुतं कृत्वाङ्करावं तस्य चोपरि। उपानच्छत्रसंयुक्तं धर्मार्घ्यं कल्पयेद्घटम्। पुष्पाक्षतं गृहीत्वा तु इमं मन्त्रमुदीरयेत्। ओं नमो विष्णुरूपाय नमः सागरसम्भव!। अपांपूर्णोदराधारं दुःखसंसारसागरात्। उद्धरस्व यथा दत्तो घटोऽद्ये दिने दिने। उदकुम्भप्रदानेन प्रीयतां मधुसूदनः"। भविष्योत्तरे "प्रत्यहं धर्मघटको वस्त्रसंवेष्टितानतः। ब्राह्मणस्य गृहे नेयः शीतामलजलः शुचिः। वस्त्रान्वीह्ययोर्मध्ये यः पानीयं प्रयच्छति। पले पले सुवर्णस्य फलमाप्नोति मानवः। मार्गशीर्षात् समारभ्य उदकुम्भन्तु यः क्षिपेत्। दिने दिने सहस्रस्य गवां पुण्यफलं लभेत्। तस्यैवोद्यापनं कार्य्यं माघे माघि नरोत्तम। मण्डलावेष्टकाभिश्च पक्वान्नैः सार्वकामिकैः। ब्रह्मेशं शङ्करं विष्णुं ब्रह्माणमथवा पितॄन्। अतिथिं प्रोक्षयित्वा तु मन्त्रेणानेन मानवः। एष धर्मघटो दत्तो ब्रह्मविष्णुशिवात्मकः। अस्य प्रदानात् सततं मम सन्तु मनोरथाः। अनेन विधिना यस्तु धर्मकुम्भं प्रयच्छति। वस्त्रे शीतसमये प्रपादानफलं लभेत्। प्रपादानफलं सोऽपि प्राप्नोतीह न संशयः"। एतत् परमेव "दद्युर्धर्मघटांश्चापि सुगन्धोदकपूरितान्" काशीख० १२ अ० वचनम्। धर्मकुम्भादयोऽप्यत्र।

**धर्मचक्र** न० ६त०। धर्मस्य चक्रे। "भीष्मेण विहितं राज्ञे धर्मचक्रमवर्त्तत" भा० आ० १०६ अ०। "यत्र पूर्वाभिसर्गे वै धर्मचक्रं प्रवर्त्तितम्" भा० शा० १६७ अ०। धर्मस्य चक्रं यत्र। २बुद्धे पु० त्रिका०।

**धर्मचक्रभृत्** पु० धर्मचक्रं बिभर्त्ति भृ–क्विप् तुक्। १जिने धरणिः २धर्मसम्भृद्धारके त्रि०।

**धर्मचारिन्** त्रि० धर्मं तत्साधनकर्म चरति चर–णिनि ६त०। १धर्मसाधनकर्मकारके। "स चेत् स्वयं कर्म्म धर्मचारिणां त्वमन्तरायो भवसि च्युतो विधेः" रघुः। स्त्रियां ङीप्। सा च २सद्धर्मकारिण्यां जायायां शब्दरत्ना०। "ज्येष्ठायां धर्मचारिण्यां भक्तिमद्भ्यां गर्भमादधे" भा० व० २८ अ०। [हेमच०।

**धर्मचिन्तन** न० चिन्ति–भावे ल्युट् ६त०। धर्मस्य चिन्तायां

**धर्मचिन्ता** स्त्री चिन्ति–भावे अ ६त०। धर्मस्य चिन्तने उपायौ अमरः।

**धर्मज** पु० धर्मार्थं जायते जन–ड। १औरसे प्रथमे पुत्रे "यस्मिन्नृणं सन्नयति येन चानन्त्यमश्नुते। स एव धर्मजः पुत्रः कामजानितरान् विदुः" मनुः। धर्मात् जायते जन–ड। २धर्मपुत्रे युधिष्ठिरे। "एवं सञ्चिन्त्य भगवान् स्वराज्ये स्वाप्य धर्मजम्। नन्दयामास सुहृदः साधूनां वर्त्म दर्शयन्" भाग० १।१। १७। युधिष्ठिरस्य धर्मतो जन्मकथा भा० आ० १२३अ०। "संवत्सरधृते गर्भे गान्धार्यां जनमेजय!। आजुहावाथ वै कुन्ती गर्भार्थं धर्ममच्युतम्। सा बलिं चरिता देवी धर्मायोपजहार ह। अजाय विधिवज्ज्ञाय दत्तं दुर्वाससा पुरा। आजगाम ततो देवो धर्मो मन्त्रबलात्ततः। विमाने सूर्य्यसङ्काशे कुन्ती बल जपस्थिता। विहस्य तां ततो ब्रूयाः कुन्ति! किन्ते ददाम्यहम्। सा तं विहसमानाऽपि पुत्रं देह्यवदीदम्। संयुक्ता सा हि धर्मेण योगमूर्त्तिधरेण ह। लेभे पुत्रं वरारोहा सर्वप्राणभृतां हितम्। ऐन्द्रे १८ चन्द्रसमायुक्ते सङ्क्षणेऽभिजितेऽह्नि। दिवामध्यगते सूर्य्ये तिथौ पूर्णेऽतिपूजिते। सम्भृतयशसं कुन्ती सुषाव प्रवरं सुतम्। जातमात्रे सुते तस्मिन् वागुवाचाशरीरिणी। एष धर्मभृतां श्रेष्ठो भविष्यति नरोत्तमः। विक्रान्तः सत्यवाक् चैव राजा पृथ्व्यां भविष्यति। युधिष्ठिर इति ख्यातः पाण्डोः प्रथमजः सुतः"। ३बुद्धभेदे ४दिव्यभेदे न० घटशब्दे दृश्यम्। ५धर्मतो जातमात्रे त्रि०। ६नरनारायणयोः पु० हि० व०। धर्मशब्दे तयोर्मूर्त्तिरूपधर्म्मपत्नीजन्मकथा दृश्या।

धर्मजन्मन् पु० धर्मतो जन्म यस्य। युधिष्ठिरे "वीक्ष्य धर्मसुत धर्मजन्मना" माघः।

धर्मजन्य त्रि० धर्मेण जन्यः। धर्मतो जाते सुखे "सुखं तु जगतामेव काम्यं धर्मेण जन्यते" भाषायां तस्य तथोक्ते स्वार्थतम्।

धर्मजिज्ञासा स्त्री धर्मार्थं धर्माचरणाय जिज्ञासा। वेदवाक्यविचारे धर्मसन्देहे वेदवाक्यानां विषयेत्यादिरूपयुक्ते विचारभेदे धर्ममीमांसायाम् "अथातोधर्मजिज्ञासा" जै० सू० धर्ममीमांसाकर्ममीमांसायाश्चोभयोः समानार्थतया धर्मशब्दोपक्रमे तल्लक्षणनिर्देशाय प्रवृत्ते "चोदनालक्षणोऽर्थो धर्म" इति जै०१२ सूत्रे धर्मशब्दस्य कर्मपरत्वं भाष्यकृतम् युक्तम् न तु पुण्यपरत्वमिति।

धर्मजीवन पु० याजनप्रतिग्रहादिना परस्य धर्मस्यादाय जीवति जीव-ल्यु। याजनादिना परस्य धर्मोपादानेन जीवनोपायवति ब्राह्मणभेदे। "यद्यपि धर्मसमयात् प्रच्युतो धर्मजीवनः" मनुव्याख्याने कुल्लू०।

धर्मज्ञ त्रि० धर्मं जानाति ज्ञा-क। यथं धर्म इति ज्ञानयुते। "धर्मज्ञः सत्यवादी च" "समात्मसत्यं धर्मज्ञं प्राप्तं दक्षं कुलोद्गतम्" मनुः।

धर्मण पु० धर्माय नम्यते नम-घञ् कर्मणि ड। (धामनि) ख्याते ईश्वरभेदे। (डेमना) ख्याते ऋषभेदे च मेदि०।

धर्मतीर्थ न०धर्मरूपं तीर्थम्। तीर्थभेदे "ततो गच्छेत्कुरुराज! धर्मतीर्थमनुत्तमम्। यत्र धर्मो महाभागस्तपश्चानुत्तमं तपः। तेन तीर्थं कृतं पुण्यं स्वेन कर्मणा च विश्रुतम्। तत्र स्नात्वा नरो राजन्! धर्मशीलः प्रजायते। आत्मानं कुलञ्चैव पुनीते नात्र संशयः" भा० व० ८४ अ०।

धर्मद पु० धर्मं स्वधर्मफलं ददाति अन्यस्मै संक्रामयति दा-क। १स्वधर्मफलस्य अन्यस्मिन् संक्रामके २धर्मोत्पादके च "एतदेव मतं धार्यं धर्मिष्ठे धर्मदं तथा" हरिवं०१२४अ०। ३कुमारानुचरभेदे पु०। "धर्मदोमन्त्रवत्सः सुवीरश्चैव वीर्यवान्" भा० आ० ६६अ० तदनुचरोक्तौ।

धर्मदान न० "पात्रेभ्यो दीयते नित्यमनपेक्ष्य प्रयोजनम्। केवलं धर्मबुद्धा यत् धर्मदानं प्रचक्षते" देवोक्ते प्रयोजनाद्यनुद्देशेन दाने

धर्मदार पु० ब०व० धर्मार्थमन्याधानाद्यर्थम् दाराः। धर्मार्थदारेषु। "धर्मदारान् वने त्यक्त्वा परकर्मकरोऽभवत्" आनन्दकीय नीतिशास्त्रम्।

धर्मदीपिका स्त्री गौडप्रसिद्धे मीमांसाग्रन्थभेदे।

धर्मदुघा स्त्री धर्मान् दोग्धि आधारत्वविवक्षया कर्त्तरि दुह-क टाबाद्यादेशः। धर्मदानस्थाने बर्हिर्वेद्याम् शब्दार्थचि०।

धर्मदेश पु० धर्मसाधनं देशः। "स्वभावात् यत्र चरति कृष्णसारः सदा मृगः। धर्मदेश स विज्ञेयो द्विजानां धर्मसाधनम्" संवर्त्तोक्ते देशभेदे। हेमाद्रिब्र० विस्तारः।

धर्मद्रवी स्त्री धर्मजनको द्रवो यस्याः गौरा० ङीष्। "विष्णुपादाब्जसम्भूते! गङ्गे त्रिपथगामिनि!। धर्मद्रवीति विख्याते! पापं मे हर जाह्नवि!। इत्युक्तायां गङ्गायाम् भा० त० दृश्यम्।

धर्मद्रोहिन् पु० धर्माय परस्य धर्माचरणाय द्रुह्यति द्रुह-णिनि अत०। राक्षसे। [वुद्धे हेमच०।

धर्मधातु पु० धर्मसंज्ञकं परमं धर्मं दधाति धा-तुन्।

धर्मध्वजिन् पु० धर्मो ध्वज इव चिह्नमिवास्यास्य इनि। लोके निजधार्मिकत्वख्यापनार्थं धर्मकारके धर्मचारिणि लिङ्गिनि "धर्मध्वजी सदालुब्धश्छाद्मिको लोकदम्भकः" मनुः।

धर्मन् पु० धृ-मनिन्। १धर्मे पुण्ये शुभादृष्टभेदे "प्रेतिरस्यधर्मणे त्वा धर्म्मं जिन्व" तारुक्ष्यामा० १।८२। "धर्मणे धर्माय" भा०। "निर्मुक्तत्वान्न चित्रमो" सां०सू०। ज्ञानस्यो निर्मुक्तत्वान्न तस्य चित् धर्मा धर्म इत्यर्थः। "ज्ञानं नैवात्मनो धर्मः" इति सां०प्र०श्रुतवाक्यात् तथात्वम्। धर्मिशब्दे दृश्यम्। २धारके त्रि०। "प्रियं तु स्तोमं मरुतो धर्माणं नविष्ठम्" ऋ० १।१८७।१ "मरुतो मरुत्वन्तं धर्माणं सर्वस्य धारकम्" भा०। अनेनैवोपपत्तौ बहुव्रीहौ "धर्मादनिच केवलात्" पा० अनिच्प्रत्ययं चित्स्वरार्थं धर्मशब्दान्तत्वं प्रयोगनिरासार्थञ्च। [धर्मसुतादयोऽप्यत्र।

धर्मनन्दन पु० कृत०। युधिष्ठिरे धर्मजशब्दे दृश्यम्।

धर्मनाभ पु० धर्मः नाभिरिवास्य अच् समा०। विष्णौ हेमच०

धर्मनेत्र पु०१यदुवंशजे क्रैष्टयस्य पुत्रे। यदुवंशोपक्रमे "क्रैष्टयस्याभवत् पुत्रो धर्मनेत्र इति श्रुतः" हरिवं० ३२ अ०। २प्रत्यूवंशजे नृपभेदे। "पार्थराष्ट्रसुतान् चाङ्गस्तोनेतान् प्रसृतान् भुवि। प्रतीपं धर्मनेत्रं च सुनेत्रं चापि भारत!" भा० आ० ९७ अ०। अयञ्च प्रसिद्धात् धृतराष्ट्रात् भिन्नतः धृतराष्ट्रस्य पितुः शान्तनोः प्रतीपपुत्र तया तत्र कीर्तनात्। "प्रतीपस्य त्रयः पुत्रा जज्ञिरे भरतर्षभ। देवापिः शान्तनुश्चैव बाह्लीकश्च महारथ"। ३पौरवंशजातंसुन्धपुत्रभेदे च "तंसोः सुषोधो राजर्षिर्धर्मनेत्रः प्रतापवान्" हरिवं०३२अ०

**धर्मनैपुण्यकाम** पु० धर्मस्य नैपुण्यमतिशयं कामयते कम-अण्। पूर्वं सट्टीतवेदप्राये पश्चाद् अध्ययनजन्याऽदृष्टविशेषेच्छौ। "नित्यानध्याय एव स्याद् ग्रामेषु नगरेषु च। धर्मनैपुण्यकामानां प्रतिगन्धे च सर्वदा" मनुः। "नैपुण्यमतिशयः धर्मातिशयार्थिनो ग्रामनगरयोः सर्वदानध्यायः स्यात्। कृत्सितगन्धे च सर्वस्मिन्नपि गम्यमाने। धर्मनैपुण्यकामं प्रत्ययं नित्यानध्यायोपदेशो, विद्यानैपुण्यकामस्य कदाचिदध्ययनमनुजानाति। ये शिष्टाः केचिद् सट्टीतवेदप्राया अध्ययननियमजन्या दृष्टेच्छवस्ते धर्मनैपुण्यकामाः। केचित् प्रथमाध्येतारो विद्यातिशयमात्रार्थिनस्ते विद्यानैपुण्यकामाः" कुल्लू०।

**धर्मप(ट्ट)त्तन** न० ६त० सं० १४ ब० कूर्मविभागे दक्षिणस्थाञ्चले देशभेदे "वैदूर्यगङ्गसङ्गालिवारिचरधर्मपट्टनद्वीपाः" २श्रावन्त्यां धर्मपुर्याम्। त्रिका०। तत् कारणतयाऽस्यास्ति अच्। ३मरिचे न० अमरः।

**धर्मपति** पु० धर्मस्य पतिर्यस्मात्। १धर्माधिपत्यसाधने वरुणे "अथ वरुणाय धर्मपतये। वारुणं यवमयं चरुं निर्वपति तदेनं वरुण एव धर्मपतिर्धर्मस्य पतिं करोति परमता वै सा यो धर्मस्य पतिरसद्यो हि परमतां गच्छति तं हि धर्म उपयन्ति तस्माद् वरुणाय धर्मपतये" श्रौतत्रा० ५।२।२६। धर्मः पतिरिव यस्य। २धर्मशीले च "वरुणो धर्मपतीनाम्" यजु० ६।२६। "वरुणो धर्मपतीनां धर्मेश्वराणां धर्मशीलानामाधिपत्ये त्वां सुवताम्" वेददी०।

**धर्मपत्नी** स्त्री धर्मार्थं पत्नी। निर्दोषायां पत्न्याम्। "प्रथमा धर्मपत्नी च द्वितीया रतिवर्द्धनी। दृष्टमेव फलं तस्या नादृष्टमुपजायते। धर्मपत्नी समाख्याता निर्दोषा यदि सा भवेत्" दक्षसं०। "पतिव्रता धर्मपत्नी पितृपूजन तत्परा। मध्यमन्तु ततः पिण्डमद्यात् सम्यक् सुतार्थिनी" मनुः। "औरसो धर्मपत्नीजस्तत्समः पुत्रिकासुतः" याज्ञ०। १धर्मदेवस्य पत्नीषु दक्षकन्यारूपासु। "नामतो धर्मपत्न्यस्ताः कीर्त्यमाना निबोध मे। कीर्त्तिर्लक्ष्मीर्धृतिर्मेधा पुष्टिः श्रद्धा क्रिया तथा। बुद्धिर्लज्जा मतिश्चैव पत्न्यो धर्मस्य ता दश" भा० आ० ६६ अ०।

**धर्मपत्र** न० धर्मसाधनं पत्रमस्य। यज्ञोदुम्बरे शब्दच०।

**धर्मपर** त्रि० धर्मः परो यस्य। धर्मप्रधानके धर्मासक्ते "जितेन्द्रियो धर्मपरः" भा० व० २०५ अ०। धर्मपरायणोऽत्र।

**धर्मपरिणाम** पु० धर्मरूपः परिणामः। पातञ्जलोक्ते चित्तस्य धर्मिणः व्युत्थाननिरोधयोर्धर्मयोरभिभवप्रादुर्भावरूपे परिणामभेदे यथाह तत्र

"एतेन भूतेन्द्रियेषु धर्मलक्षणावस्थापरिणामा व्याख्याताः" पात० सू०।

"एतेन पूर्वोक्तेन चित्तपरिणामेन धर्मलक्षणावस्थारूपेषु भूतेन्द्रियेषु धर्मपरिणामो लक्षणपरिणामोऽवस्थापरिणामश्चोक्तोवेदितव्यः तत्र व्युत्थाननिरोधयोर्धर्मयोरभिभवप्रादुर्भावौ धर्मिणि धर्मपरिणामः। लक्षणपरिणामश्च निरोधक्षिप्तलक्षणः त्रिभिरध्वभिर्युक्तः स खल्वनागतलक्षणमध्वानं प्रथमं हित्वा धर्मत्वमनतिक्रान्तो वर्त्तमानं लक्षणं प्रतिपद्यते। यत्रास्य स्वरूपेणाभिव्यक्तिरेषोऽस्य द्वितीयोऽध्वा न चातीतानागताभ्यां वियुक्तः। तथा व्युत्थानं क्षिप्तलक्षणं त्रिभिरध्वभिर्युक्तं वर्त्तमानं लक्षणं हित्वा धर्मत्वमनतिक्रान्तमतीतलक्षणं प्रतिपद्यमानोऽस्य तृतीयोऽध्वा नचानागतवर्त्तमानाभ्यां लक्षणाभ्यां वियुक्तः। एवं पुनर्व्युत्थानसुपसम्पद्यमानमनागतलक्षणं हित्वा धर्मत्वमनतिक्रान्तं वर्त्तमानं लक्षणं प्रतिपन्नं यत्रास्य स्वरूपाभिव्यक्तौ सत्यां व्यापार एषोऽस्य द्वितीयोऽध्वा न चातीतानागताभ्यां लक्षणाभ्यां वियुक्तमित्येवं पुनर्निरोध एवं पुनर्व्युत्थानमिति। तथाऽवस्थापरिणामो निरोधलक्षणेषु निरोधसंस्कारा बलवन्तो भवन्ति दुर्बला व्युत्थानसंस्कारा इत्येष धर्माणामवस्थापरिणामः तत्र धर्मिणोधर्मैः परिणामो धर्माणाम् अध्वभिर्लक्षणैः परिणामो लक्षणानामवस्थाभिः परिणाम इत्येवं धर्मलक्षणावस्थापरिणामैः स्थूलं न किञ्चिदपि गुणवृत्तमवतिष्ठते। चलन्तु गुणवृत्तं गुणस्वाभाव्यन्तु प्रवृत्तिकारणमुक्तं गुणानामिति। एतेन भूतेन्द्रियेषु धर्मधर्मिभेदात् त्रिविधपरिणामो वेदितव्यः। परमार्थतस्त्वेक एव परिणामो धर्मिस्वरूपमात्रो हि धर्मोधर्मिविक्रियैवेह धर्मद्वारा प्रपञ्च्यते इति तत्र धर्मस्य धर्मिणि वर्त्तमानस्यैवाध्वसतीतानागतवर्त्तमानेषु भावान्यथात्वं भवति न द्रव्यान्यथात्वं यथा सुवर्णभाजनस्य भित्त्वाऽन्यथा क्रियमाणस्य भावान्यथात्वमिति।" भा०

"ननु चित्तपरिणतिमात्रमुक्तं न तु तत्प्रकारा धर्मलक्षणावस्थापरिणामास्तत् कथं तेषामतिदेश इत्यत आह। तत्र व्युत्थाननिरुद्धयोरिति। धर्मलक्षणावस्थाशब्दाः परं नोच्चारिताः न तु धर्मलक्षणावस्था

परिणामा नोक्ता इति संक्षेपार्थः। तथा हि व्युत्थान निरोधसंस्कारयोरित्यत्रैव सूत्रे धर्मपरिणाम उक्तः इदानं धर्मपरिणामं दर्शयता तेनैव धर्मिव्यतिरिक्तो लक्षणपरिणामोऽपि तेन सूचित एवेत्याह लक्षणपरिणाम इति लक्ष्यते अनेनेति लक्षणं कालभेदः लक्षितवस्तु वस्त्वन्तरेभ्यः कालान्तरयुक्तेभ्योव्यवच्छिद्यत इति। निरोधस्त्रिलक्षणः सूत्रेव व्याख्यानं त्रिभिरध्वभिर्युक्तः अध्वशब्दः कालवचनः स चानागतलक्षणमध्वानं हित्वा तत् किमध्वत् धर्मनिरोधत्वमप्यतिपतति नेत्याह धर्मत्वमनतिक्रान्तो वर्त्तमानं लक्षणं प्रतिपद्य यत्र निरोधोऽनागत आसीत् स एव सम्प्रति वर्त्तमानो नतु निरोधोऽनिरोध इत्यर्थः। वर्त्तमानतास्वरूपव्याख्यानं यत्रास्य स्वरूपेण स्रोचितार्थक्रियाकारित्वाऽभिव्यक्तिः सत्तदाचारः एषोऽस्य प्रथममनागतमध्वानमपेक्ष्य द्वितीयोऽद्धा। स्यादेतत् अनागतमध्वानं हित्वा चेद्वर्त्तमानतामापद्यतेत्याह हित्वा अतीततामापद्यते इन्न भोः अध्वनासत्पादविनाशौ स्यातां न चेष्यते नह्यसत उत्पादो नापि सतोविनाश इत्यत आह नचातीतानागताभ्यां सामान्यात्मनावस्थिताभ्यां वियुक्तइति। अनागतस्य निरोधस्य वर्त्तमानतालक्षणं दर्शयित्वा वर्त्तमानव्युत्थानस्यातीतां दशामध्वानमाह तथा व्युत्थानमिति तत् किं निरोध एवानागतो न व्युत्थानं नेत्याह। एवं पुनर्व्युत्थानमिति व्युत्थान आत्मलाभेच्छया पुनर्भावः न व्यक्तरूपेच्छया न ह्यतीतं पुनर्भवतीति। स्वरूपाभिव्यक्तिरर्थक्रियाचमत्कारविभावः सचैवं लक्षणपरिणाम उक्तः तज्जातीयेषु पौनःपुन्येन वर्त्तत इत्याह। एवं पुनरिति धर्मपरिणामसूचितमेवावस्थापरिणाममाह तथेति धर्माणां वर्त्तमानाध्वनां बलवत्त्वावबलवत्त्वाऽवस्था तस्याः प्रतिक्षणं तारतम्येन परिणामः। उपसंहरति एष इति परिणामभेदानां सम्बन्धिभेदाद्भिद्यते तन्मानुभवानुसारात् धर्मिण इति। तत् किमेष परिणामो गुणानां कादाचित्को नेत्याह। एवमिति कस्मात्? पुनरयं परिणामः सदातन इत्यत आह। चलश्चेति चोऽवधारणे इत्थं प्रकारः एतदेव कुत इत्यत आह। गुणस्वभावश्चेति उक्तमत्रैव पुरस्तात्। सोऽयं त्रिविधोऽपि चित्तपरिणामः भूतेन्द्रियेषु स्वकारेण निर्दिष्ट इत्याह एतेनेति। एष धर्मधर्मिभेदो धर्मैर्धर्मिणोभेदमात्रञ्च तत्र भूतानां पृथिव्यादीनां धर्मिणां शान्तोदितावयपदेश्यधर्मिणां शान्तोदितावयपदेश्यधर्मिणां शान्तोदितावयपदेश्यध

र्द्धोच्च द्वि॰ व॰ धर्मशब्दे दृश्यम्। धर्मतः कृतः पुत्रः। २धर्मतः कृते पुत्रे। "यावद्भ्रियेत जठिधर्मपुत्र (परशुराम) परशुक्षुण्णक्षत्रियक्षेत्रोद्भवितपित्रिका वसुमतो कोऽश्नामधास्यत् पदम्" भट्टाना॰। धर्मसुतादयोऽप्यत्र। धर्मजः पुत्रः। २क्षेत्रे औरसे धर्मपत्नीजे पुत्रे च। धर्मजशब्दे मनुवाक्यं दृश्यम्।

**धर्मप्रतिरूपक** पु॰ धर्मस्य प्रतिरूपमिव कायति कै-क। "शक्तः परजने दाता स्वजने दुःखदायिनि। मध्यापातो विषास्वादः स धर्मप्रतिरूपकः" मनूक्तलक्षणयुक्ते धर्माभासे "यो बन्धुधनत्वाद्दानशक्तः सन् अवश्यभरणीये पितृमात्रादिदातिजने दौर्मनस्यात् दुःखोपेते सति यशोऽर्थमन्येभ्यो ददाति स तस्य दानविशेषो धर्मप्रतिरूपको न तु धर्म एव मध्यापातो मधुरोपक्रमः प्रथमं वशस्कारत्वात् विषास्वादवान्ते नरकफलत्वात् तस्मादेतद्न कार्य्यम्" कुल्लू॰।

**धर्मप्रवक्तृ** पु॰ धर्मं सन्दिग्धार्थं स्वयं धर्मं इति प्रवक्ति प्र+वच-तृच्। धर्मनिर्णायके राज्ञां व्यवहारस्थानस्थे सभ्यभेदे। स च ब्राह्मण एव तदभावे क्षत्रियवैश्यौ न शूद्रः यथाह मनुः "आतिमात्रोपजीवी वा कामं स्याद्ब्राह्मणव्रुवः। धर्मप्रवक्ता नृपतेर्न तु शूद्रः कथञ्चन। यस्य शूद्रस्तु कुरुते राज्ञो धर्मविवेचनम्। तस्य सीदति तद्राष्ट्रं पङ्के गौरिव पश्यतः" "ब्राह्मणो धर्मप्रवक्तेति विधानादेव शूद्रनिवृत्तिः सिद्धा पुनर्न तु शूद्र इति शूद्रनिषेधो योग्यब्राह्मणाभावे क्षत्रियवैश्ययोरप्यनुज्ञानार्थः। अतएव कात्यायनः "यत्र विप्रो न विद्वान् स्यात् क्षत्रियं तत्र योजयेत्। वैश्यं वा धर्मशास्त्रज्ञं शूद्रं यत्नेन वर्जयेत्" कुल्लू॰।

**धर्मप्रवचन** पु॰ धर्मं प्रवक्ति प्र+वच-ल्युट्। शाक्यमुनौ शब्दार्थचि॰।

**धर्मप्रस्थ** पु॰ तीर्थभेदे "ततो गच्छेत राजेन्द्र! धर्मप्रस्थं समाहितः। तत्र धर्मो महाराज! नित्यमास्ते युधिष्ठिर!। तत्र कूपोदकं कृत्वा ततः स्नातः शुचिव्रतः। पितॄन् देवांस्तु सन्तर्प्य सक्तुपापोदिवं व्रजेत्" भा॰ व॰ ८४ अ॰।

**धर्मवाणिजिक** त्रि॰ धर्मे वाणिजिक इव। फलकामनया कर्मकरे तस्य फलकामनया कृतत्वेन धर्मं दत्त्वा फलस्य ग्रहणात् वाणिजिकतुल्यत्वम्। "धर्मवाणिजिकामूढाः फलकामाः नराधमाः। स्वर्गयन्ति जगन्नाथं ते कामान्नाप्नुवन्त्युत" भक्ति॰ त॰ विष्णुकर्मोत्तर॰।

**धर्मभगिनी** स्त्री धर्मतः कृता भगिनी। १धर्मतः कृतायां भगिन्यां २गुरुकन्यायाञ्च। [पाठके शब्दच॰।

**धर्मभाणक** पु॰ धर्मं धर्मार्थं भणति पठति। भारतादिपाठके शब्दच॰।

**धर्मभिक्षुक** पु॰ धर्मार्थं भिक्षते भिक्ष-उक। मनूक्ते नवविधे धर्मार्थभिक्षाजीवे। "स्नानानिकं यज्ञसाधनमध्वगं सर्ववेदवित्। गुर्वर्थपितृमात्रर्थं स्वाध्यायार्थ्युपतापिनः। नैतान् स्नातकान् विद्याद्ब्राह्मणान् धर्मभिक्षुकान् निःस्वेभ्यो देयमेतेभ्यो दानं विद्याविशेषतः" मनुः। "स्नानप्रयोजनत्वाद्विवाहस्य, स्नानिको विवाहादौ यज्ञसाधनो व्यवश्यकर्त्तव्यज्योतिष्टोमादियागं चिकीर्षुः अध्वगः यान्यः सर्ववेदसः क्रतुसर्वस्वदक्षिणाविशिष्टदुधागः, विद्यासुरोपसाक्षात्कारादिरर्थः प्रयोजनं यस्य स गुर्वर्थः एवं पितृमात्रर्थोऽपि स्वाध्यायार्थी स्वाध्यायाध्ययनकालीनस्वाद्यर्थी ब्रह्मचारी, उपतापी रोगी एतान्न ब्राह्मणान् धर्मभिक्षायोग्यान् स्नातकान् जानीयात्। एतेभ्यो निर्द्धनेभ्यो गोक्षिरण्यादि दीयत इति दानविद्याविशेषमनुरूपेण दद्यात्" कुल्लू॰।

**धर्मभृत्** त्रि॰ धर्मं बिभर्त्ति भृ-क्विप् तुक्। धर्मधारके "एष धर्मभृतां श्रेष्ठो भविष्यति नरोत्तमः" भा॰ व॰ १२१ अ॰।

**धर्मभूत** त्रि॰ धर्मो भूतो येन। १रक्षितधर्मके २त्रयोदशस्य मनोः पुत्रभेदे पु॰। "त्रयोदशस्तु पुत्राणां विश्वेयास्तु रुचेः सुताः। चित्रसेनो विचित्रश्च नयो धर्मभृतो मताः" हरिवं॰ ७ अ॰।

**धर्मभ्रातृ** पु॰ धर्मतः कृतो भ्राता। १गुरुपुत्रादौ २भ्रातृत्वेन प्रतिपन्ने एकाश्रमिणि च "दानग्रस्वयतिब्रह्मचारिणामृत्विजामपि। क्रमेणाचार्य्यसच्छिष्यधर्मभ्रातृकतीर्थिनः" याज्ञ॰। "धर्मभ्राता प्रतिपन्नो भ्राता तीर्थशब्दस्याश्रमवाचित्वादेकतीर्थ्यं काश्रमी। धर्मभ्राता चासावेकतीर्थी चेत्यर्थः" वीर॰मि॰।

**धर्ममूल** न॰ तत्॰। धर्मस्य प्रमाणे, तानि च मन्वादिभिर्दर्शितानि। तत्र मनुः "वेदोऽखिलो धर्ममूलं स्मृतिशीले च तद्विदाम्। आचारश्चैव साधूनामात्मनस्तुष्टिरेव च"। विधिर्विधेय स्तर्कश्च वेदाङ्गानि षडेव चेति" विधिरम्नातप्रयोगो वेदभागः विधेयोमन्त्रः तर्कोमीमांसा। अङ्गान्याह देवलः "शिक्षाव्याकरणनिरुक्तच्छन्दःकल्पज्योतींषीति वेदाङ्गानि" "शुचौ च चरिते शौचमित्याचारश्चैव

शीलत्वाभिधानात् कथं पृथगुपादानम्। न चाचर्य्यानुष्ठानलक्षणक्रियारूपत्वादाचारस्य स्वरूपविशेषत्वाच्छीलस्य व्यक्त एव भेदः। "शुचौ तु चरिते शीलमिति" शीलस्य चरितविशेषहेतुत्वादुपचारेण चरितत्वाभिधानम्। अथ शीलं कस्य धर्मतां प्रमापयति। आत्मन एव पुरुषविशेषस्वभावोऽन्यथानुपपद्यमानः स्वस्य श्रेयः साधनतां बोधयति। तथा च ब्राह्मणग्रन्थेत्यादिहारीतवचने भावप्रत्ययान्ततयाभिधानं शीलस्य क्रियाव्यतिरेकितां बोधयत् स्वभावतामेव ज्ञापयति यदाह हारीतः "ब्राह्मण्यता देवपितृभक्तता सौम्यता अपरोपतापिता अनसूयता मृदुता अपारुष्यं मित्रता प्रियवादित्वमुदारत्वं। क्षतत्राणं शरण्यता प्रमाणित्व चेति त्रयोदशविधं शीलम्"। आचारो विवाहादौ कर्तव्यतया नियतानुष्ठानम्। आत्मतुष्टिरत्र धर्मसन्देहे वैदिकसंस्कारवासितान्तःकरणानां साधूनामेकत्र पक्षे मनः परितोषः। याज्ञवल्क्यः "श्रुतिः स्मृतिः सदाचारः स्वस्य च प्रियमात्मनः। सम्यक् सङ्कल्पजः कामो धर्ममूलमिदं स्मृतम्। पुराणन्यायमीमांसा धर्मशास्त्राङ्गमिश्रिताः। वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश"।

**धर्ममेघ** पु० धर्मात् मेहति वर्षति मिह—क्विप् सलोपादेशः ह्रस्वः। पातञ्जलोक्ते असंप्रज्ञातसमाधौ। तल्लक्षणादि पात० सूत्रभाष्यविवृतिशब्दे यथा "प्रसङ्ख्यानेऽप्यकुसीदस्य सर्वथा विवेकख्यातेर्धर्ममेघः समाधिः" सूत्रं।

"यदायं ब्राह्मणः प्रसङ्ख्यानेऽप्यकुसीदस्ततोऽपि न किञ्चित् प्रार्थयते तदापि विरक्तस्य सर्वथा विवेकख्यातिरेव भवतीति संस्कारबीजक्षयाद्यस्य प्रत्ययान्तराण्युत्पद्यन्ते तदास्य धर्ममेघोनाम समाधिर्भवति" भा०

"ततः प्रसङ्ख्यानाच्चकिञ्चित् सर्वभावाधिष्ठातृत्वादि प्रार्थयते प्रत्युत तत्रापि विरक्तः सर्वथा विवेकख्यातेरेव भवति एतदेव विवृणोति तत्रापीति यदा व्युत्थानप्रत्यया भवेयुः तदा नायं ब्राह्मणः सर्वथा विवेकख्यातिः यतस्तस्य प्रत्ययान्तराण्यपि न भवन्ति ततः सर्वथा यदा विवेकख्यातिरिति तदास्य धर्ममेघःसमाधिर्भवति। एतदुक्तं भवति प्रसङ्ख्याने विरक्तस्तन्निरोधमिच्छन् धर्ममेघं समाधिमुपाश्रीत तदुपाश्रये च सर्वथा विवेकख्यातिर्भवति" विवृतिः।

"ततः क्लेशकर्मनिवृत्तिः" सूत्रं।

"तस्माच्चाविद्यादयः क्लेशाः समूलकाण्डं कषिता भवन्ति कृतबुद्धयश्च कर्माशयाः समूलघातं हता भवन्ति क्लेशकर्मनिवृत्तौ जीवन्नेव विद्वान् विमुक्तो भवति कस्मात् यस्मादविद्यादयो भवस्य कारणं, न हि बीजविपर्ययः कचित् केनचित् कदाचिज्ज्ञानेन दह्यते इति" भा०।

"अग्निरोढुं पारयतीति तस्य च प्रयोजनमाह। ततः। कस्मात् पुनर्जीवन्नेव विद्वान् विमुक्तोभवति उत्तरं यस्मादिति क्लेशकर्मवासनेहः किल कर्माशयो जात्यादिनिदानं, न चासति निदाने निदानी भवितुमर्हति यथाहात्र भगवान्पादः "वीतरागजन्मादर्शनादिति" विवृतिः।

"तदा सर्वावरणमलापेतस्य ज्ञानस्यानन्त्यात् ज्ञेयमल्पम्।" सू०

"सर्वैः क्लेशकर्मावरणैर्विमुक्तस्य ज्ञानस्यानन्त्यं भवति तमसाभिभूतमाहतं ज्ञानस्यत्वं क्वचिदेव रजसा प्रवर्त्तितम् उद्घाटितं यत्किञ्चित्समर्थं भवति तत्र यदा सर्वैरावरणमलैरपगतमलं भवति तदा भवत्यनन्त्यं ज्ञानस्यानन्त्यात् ज्ञेयमल्पं सम्पद्यते यथाकाशे खद्योतः, यत्पुनरुक्तम् 'अल्पोऽग्निरविधूमवत्तमनकुत्सिरत्यायवत्। अणीयस्यं प्रत्यक्षत्वमजिह्मोभ्यर्जयादिति" भा०।

"अथैवं धर्ममेघे सति कीदृशं चित्तमित्याह। तदेति आम्रियते चित्तसत्वमेभिरिति आवरणानि मलाः क्लेशकर्माणि सर्वे च ते आवरणमलाश्चेति सर्वावरणमलाः तेभ्योऽपेतस्य ज्ञानस्य चित्तसत्वस्य ज्ञायतेऽनेनेति ज्ञानमनया व्युत्पत्त्या, ज्ञानस्यानन्त्यादपरिमेयत्वात् ज्ञेयमल्पम्। यथा हि शरदि घनपटलमुक्तस्य चन्द्रार्च्चिषः शारदः प्रद्योतमानस्य प्रकाशानन्त्यात् प्रकाश्याः घटादयोऽल्पाः प्रकाशन्ते एवमपगतरजस्तमसश्चित्तसत्वस्य प्रकाशानन्त्यादल्पं प्रकाश्यमिति तदेतदाह सर्वैरिति एतदेव व्यतिरेकमुखेन स्फोरयति आवरणेषु तमसाभिभूतमिति क्रियाशीलेन रजसा प्रवर्त्तितमतएवोद्घाटितं तमरजस्कं। अतएव सर्वान् धर्मान् क्लेशान् मेहति वर्षति प्रकाशनेनेति धर्ममेघ इत्युच्यते। नन्वयमस्तु धर्ममेघः समाधिः सर्वासवक्लेशकर्माशयप्रशमहेतुः सर्व तत्त्वप्रथिन् कस्मात् न जायते पुनर्जन्तुः इत्यत आह। यत्तेदमुक्तमिति कारणसमुच्छेदेऽपि चेत् कार्यं क्रियते इत्न भोः मणिवेधादयोऽन्यादिभ्यो भवेयुः प्रत्यक्षाः, तस्मात् आनुपपत्त्यार्थतायामाभाषको लौकिक उपपत्त्यार्थः स्यात्। यविध्यदत्त्योषधिरिति यावत् यथितवान्, प्रत्य-

सञ्चत् पिनद्धवान्, अभ्यपूजयत् स्तुतवानिति" विद्वतिः। "ततः कृतार्थानां परिणामक्रमसमाप्तिर्गुणानाम्।" सू० "तस्य धर्ममेघस्योदयात् कृतार्थानां गुणानां परिणामक्रमः परिसमाप्यते नहि कृतभोगापवर्गाः परिसमाप्यन्ते क्रमाः क्षणमप्यवस्थातुमुत्सहन्ते।" भा०

"ननु धर्ममेघस्य परा काष्ठा ज्ञानप्रसादमात्रं परं वैराग्यं समूलघातमपहन्तु व्युत्थानसमाधिः संस्कारान् सङ्क्लेशकर्माशयान्, गुणास्तु स्वतएव विकारहेतवः कस्मात्ताटस्थमपि पुरुषं प्रति देहेन्द्रियादि नारभन्ते इत्यत आह। ततो—गुणानाम्। यौवमिदं गुणानां यं प्रति कृतार्थांस्प्रति न प्रवर्त्तन्ते इति भावः" विद्वतिः। [शब्दच०।

**धर्म्मयु** त्रि० धर्म+अस्यर्थे मा०यु। धर्मविशिष्टे धार्मिके

**धर्म्मयुग** न० धर्मप्रधानं युगं मध्य० त०। सत्ययुगे "नास्यधर्मं धार्मिकस्तस्य स हि धर्मयुगेऽभवत्" हरिवं० १२अ०। (वः अकपुत्रो वाह्नः)।

**धर्म्मयुज्** त्रि० धर्मेण युज्यते युज–कर्मणि क्विप्। १धर्मयुक्ते २न्यायार्जितद्रव्ये न०। "दाता प्रतिग्रहीता च श्रद्धा देयञ्च धर्मयुक्। देशकालौ च दानानामङ्गान्येतानि षड्विदुः देवताः।" धर्मयुक् न्यायार्जितद्रव्यमुद्धितः रघुः तथाच विष्णुधः "देशे काले तथा पात्रे धर्मं न्यायागतं तथा। यद्दत्तं ब्राह्मणश्रेष्ठास्तद्दानं तत् प्रकीर्त्तितम्"

**धर्म्मयूप** पु० धर्मस्य यूप इव। विष्णौ। "धर्मयूपो महाक्रतुः" विष्णुस०। "यूपे पशुवत् भगवत्समाराधनात्मका धर्मास्तत्र बध्यन्तेऽतो धर्माणां यूपः" भा० यथा यूपः पशूनां नियोजनस्थानमेवं विष्णुः स्वसमाराधनात्मकानां धर्माणां स्थानमित्यर्थः।

**धर्म्मरत्न** न० जीमूतवाहनकृते स्मृतिनिबन्धभेदे।

**धर्म्मरथ** पु० सगरस्यपुत्रभेदे स च कपिलमुनिनेत्राग्निदग्धाबयेप्रितानां वंशकराणां चतुर्णां मध्ये एकतमः। यथाह हरिवं० १३ अ०। "स धर्मविजयी राजा विजित्येमां वसुन्धराम्। अश्वं प्रचारयामास वाजिमेधाय दीक्षितः। तस्य चारयतः सोऽश्वः प्रसह्य पूर्वदक्षिणे। वेलामवीमेऽवहतो भूमिच्छिद्रं प्रवेशितः। तं तं देशं तदा पुत्रैः खानयामास पार्थिवः। आसेदुस्ते तदा तत्र खन्यमाने महार्णवे। नमादिदेवं पुरुषं हरिं कृष्णं प्रजापतिम्। विष्णुं कपिलरूपेण शयानं पुरुषोत्तमम्। तस्य चक्षुःसमुत्थेन तेजसा प्रतिबुध्यतः। दग्धास्ते वै महाराज चत्वारस्त्वत्पितामहाः। सगरेतुः सुकेतुश्च तथा धर्मरथो नृपः। सूरः पञ्चजनो नाम तस्य वंशकरा नृप। प्रादाच्च तस्मै भगवान् हरिर्नारायणो वरम्। अक्षयं वंशमिच्छाकोः! कीर्त्तिञ्चाप्यनिवर्त्तिनीम्। पुत्रं वसुद्रञ्च विभुः स्वर्गं वासमथाऽक्षयम्। इत्याचां चाक्षयान् लोकान् तस्य ये चक्षुषा हृताः। वसुद्रश्चार्घमादाय ववन्दे तं महीपतिम्। सागरत्वञ्च लेभे स कर्मणा तेन तस्य वै। तस्मात्तमेधिकं सोऽश्वं वसुद्रादुपलब्धवान्। आजह्रारात्मेधानां शतं स सुमहायशाः। इत्याचाञ्च सङ्ख्यातिं भविष्यन्तीति नः श्रुतम्।"

२अनुवंशस्य दिविरथस्य पुत्रभेदे च। "खनमानोऽङ्गदो जज्ञे तस्माद्दिविरथस्ततः। सुतो धर्मरथो यस्य जज्ञे चित्ररथोऽप्रजाः" रोमपाद इति ख्यातः भाग० ९।२१।१

**धर्म्मराज्** पु० धर्मेण राजते राज–क्विप्। १यमे "सोऽग्निर्भवति वायुश्च सोऽर्कः सोमश्च धर्मराट्" मनुः। २धर्मेण राजमाने धार्मिके त्रि०। "अथोपविष्टं शयने गौतमं धर्मराट् तदा" भा० शा० १७०अ०। धर्मराट् इति नाड़ीजङ्घस्य विशेषणम्।

**धर्म्मराज** पु० धर्मेण राजते राज–अच् ३त०। धर्माणां राजा ईश्वरो वा ६तत्स०। १जिने २यमे च अमरः। ३स्थपे ४युधिष्ठिरे च शब्दरत्ना०। तत्र जिनस्य अहिंसारूपपरमधर्मेण राजनात् तथात्वं यमस्य च तथात्वमुक्तम् भा० व० २६६ अ०। "विश्रुतस्त्वं तनयः प्रतापवांस्ततो हि वैश्रुत इत्युशन्ति बुधैः। समेन धर्मेण चरन्ति ताः प्रजास्ततस्त्वेवेश्वर धर्मराजता" "तमेत्युक्त्वा तु तं पार्थं सङ्गा वैश्रुतो यमः। धर्मराजः प्रहृष्टात्मा सान्त्वयन्निदमब्रवीत्" इत्यादौ तथात्वञ्च "इन्द्रानलयमाकाशामग्नेव वरुणस्य च। चन्द्रवित्तेशयोश्चैव मात्रा सिद्धेन धारणी। यस्मादेषां सुरेन्द्राणां मात्राभ्यो निर्मिता नृपाः" मनुना यममात्रातोनिर्माणश्लोकैः धर्मराजवद् स्वधर्मरतानां नराणां नियमनाद्धा तथात्वम् बोध्यम्। युधिष्ठिरस्य धर्मप्रधानत्वात् तथात्वम्। "सङ्गायमध्वरे धुरां धर्मराजो विवक्षते" माघः। समासान्तविधेरनित्यत्वात् क्वचिदार्षे न टच्समा०। "जयाशीर्भिश्च तं विप्रो धर्मराजानमार्जयत्" भा० स० ६ अ०।

**धर्म्मराज्ञ** त्रि० धर्मं राति ददाति रा–तृच्। धर्मदातरि स्त्रियां ङीप् स च २च०सु "आपो ह्येव ऋषीणां विश्वरात्रो

दिव्यामदन्योयाः ग्रहराः धर्मराजाः" हरिवं० १२८ अ०

**धर्मलक्षण** न० धर्मो लक्ष्यते ज्ञायतेऽनेन लक्ष-करणे ल्युट्। १धर्मप्रमापके वेदादौ। धर्ममूलग्रन्थे ह्यम्। २मीमांसायां स्त्री ङीप्। भावे ल्युट् ६त०। चोदनालक्षणोऽर्थो धर्मः" जै० सूत्रोक्ते १धर्मस्य लक्षणे इतरभेदानुमापके धर्मस्वरूपादौ च धर्मग्रन्थे ह्यम्। "धृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः। धीर्विद्या सत्यमक्रोधो दशकं धर्मलक्षणम्" इति मनूक्ते। "पात्रे दानं मतिः कृष्णे मातापित्रोश्च पूजनम्। अद्या बलिर्गवां त्रासः षड्विधं धर्मलक्षणम्" इत्युक्ते च १धर्मस्य साधने च।

**धर्मवत्** त्रि० धर्म+अस्यर्थे मतुप् मस्य वः। धर्मयुक्ते धार्मिके। "मित्रावरुणवन्त ऋत धर्मवन्तः" ऋ० ५।६५।१२

**धर्मवर्मन्** त्रि० धर्म वर्म इव यस्य। १धर्मस्यावरकत्वेन धारके २धर्मे कवचत्वेनाभिमन्यमाने। धर्मश्च वर्मेव। ३धर्मरक्षके न०। "ब्रूहि योगेश्वरे कृष्णे ब्रह्मण्ये धर्मवर्मणि" भाग० १।१।२ [त्रिका०।

**धर्मवासर** पु०धर्मस्य तत्साधनस्य वासरः। पौर्णमास्यां

**धर्मवाहन** पु० धर्मं वाहयति प्रापयति नरान् वाह्-ल्यु। १शिवे त्रिका०। भावे ल्युट्। धर्मस्य २प्रापणे न०। ६त०। धर्मस्य धर्मराजस्य वाने ३सङ्गिमे।

**धर्मविद्** त्रि० धर्मं वेत्ति विद्-क्विप्। धर्मज्ञे। "ऋङ्निर्णीतेन धर्मविद्" मनुः। [विष्णुस०।

**धर्मविदुत्तम** पु० ६त०। विष्णौ "धर्मो धर्मविदुत्तमः"

**धर्मविद्या** स्त्री ६त०। १मीमांसादिविद्यायां २तदुपबृंहिते शास्त्रे च। ततः कृत्वा० ठक्। धार्मविद्यिक तद्वेत्तरि तदुपजीव्याध्येतरि च।

**धर्मविप्लव** पु० ६त०। धर्मस्य व्यतिक्रमे।

**धर्मविवेक** धर्मस्य विवेकोऽत्र। कल्पायुधक्ते धर्मनिबन्धभेदे

**धर्मवीर** पु० वीरभेदे "स च दानधर्मयुद्धैर्दयया च समन्वित चतुर्धा स्यात्" सा०द० उक्ते १वीररसभेदे २तद्युक्ते च "धर्मवीरो युधिष्ठिरादिः" सा० द०।

**धर्मवृद्ध** त्रि० धर्मेण वृद्धः। धर्मेण वृद्धे श्रेष्ठे अतिशयधर्मयुक्ते "न धर्मवृद्धेषु वयः समीक्ष्यते" कुमा०। २व्यादे अक्रूरस्यातृभेदे पु०। "सफल्कचित्रकश्चैव गान्दिन्यान्तु सफल्कतः। अक्रूरप्रमुखा आसन् पुत्रा द्वादश विश्रुताः। धर्मवृद्धः सुकर्मा च चेलोऽपश्चोऽरिमर्दनः" भाग० ६।२४।६।

**धर्मवैतंसिक** पु०धर्मे वैतांसिक इव आत्मनो धार्मिकत्व ख्यापनाय दातरि। "धर्मवैतंसिको वस्तु पापात्मा पुरुषस्तथा। ददाति दानं विप्रेभ्यो लोकविश्वासकारणम्। पापेन कर्मणा विप्रो धनं लब्ध्वा निरङ्कुशः। रागमोहान्वितोऽशान्तः कलुषीं योनिमाप्नुयात्" वह्निपु०।

**धर्मव्याध** पु० धर्मप्रधानो व्याधः शाक०। धार्मिके व्याधभेदे तत्कथा भा० व० २१४ अध्यायादौ दृश्या। तस्य व्याधस्य ब्राह्मणं प्रति स्वकर्मविपाकसूचको यथा "शृणु सर्वमिदं वृत्तं पूर्वदेहे ममानघ!। अहं हि ब्राह्मणः पूर्वमासं द्विजवरात्मजः। वेदाध्यायी सुकृशो वेदाङ्गानाञ्च पारगः। आत्मदोषकृतैर्ब्रह्मन्नवस्थामाप्नवानिमाम्। कौशिको नाम सखा धनुर्वेदपरायणः। संसर्गाद्दुष्टमतिरभवं द्विज!। एतस्मिन्नेव काले तु मृगयानिर्गतो नृपः। वृष्टितो बोधितश्चैव मन्त्रिभिश्च स संवृतः। ततोऽभ्यहनमृगांस्तत्र सुबहूनाश्रमं प्रति। अथ क्षिप्रः शरो घोरो मयाऽपि द्विजसत्तम!। ताडितश्च ऋषिस्तेन शरेणाऽऽतपवर्षिणा। भूमौ निपतितो ब्रह्मन्नुवाच प्रतिनादयन्। नापराध्याम्यहं किञ्चित् केन पापमिदं कृतम्। मन्यानस्तं मृगत्राणं सम्प्राप्तः सहसा विभो!। अपश्यं तमृषिं विद्धं शरेणातपवर्षिणा। अकार्यकरणाच्चापि भयं मे विपुलं मनः। तमुग्रतपसं विप्रं निहतवान् मदोत्कटे। अजानता कृतमिदं मयेत्यहमथाब्रुवम्। अन्तुमर्हसि मे सर्वमिति प्रोक्तो मया मुनिः। ततः प्रत्यब्रवीद्वाक्यमृषिर्मां क्रोधमूर्च्छितः। व्याधस्त्वं भविता क्रूरः शूद्रयोनाविति द्विज!। २१४ अ०। व्याध उवाच। एवं शप्तोऽहमृषिणा तदा द्विजवरोत्तम। अभिप्रसादयन्नृषिं गिरा ब्राह्मीति मां तदा। अजानता मयाऽकार्यमिदमद्य कृतं मुने!। अन्तुमर्हसि तत्सर्वं प्रसीद भवचिन्तिति। ऋषिरुवाच। नान्यथा भविता शाप एवमेतदसंशयम्। आत्मसंस्थात्त्वहं किञ्चित्कर्त्तोऽनुग्रहमद्य ते। शूद्रयोन्यां वर्त्तमानो धर्मज्ञो हि भविष्यसि। मातापित्रोश्च शुश्रूषां करिष्यसि न संशयः। तया शुश्रूषया सिद्धिं महत्त्वं समवाप्स्यसि। जातिस्मरत्वं भविता स्वर्गञ्चैव गमिष्यसि। शापश्चैवं निहत्ते तु भविताऽसि पुनर्द्विजः। एवं शप्तः पुरा तेन ऋषिणाऽमिततेजसा। प्रसादञ्च कृतवान् ममैव द्विपदांवर!। २१५ अ०।"

**धर्मव्रत** त्रि॰ धर्मे व्रतं संकल्पविशेषोयस्य॰ बहु॰। १धर्मरते। २धर्मश्च विश्वरूपाख्यपत्न्यां जातायां कन्यायां मरीचिकल्पे स्त्री तत्कथा यथा॰ "आसीद्धर्मो महातेजाः सर्वविद्यानपारगः। विश्वरूपा च तत्पत्नी भर्तृव्रतपरायणा। तस्यां धर्मात् समुत्पन्ना कन्या धर्मव्रता सती। सर्वलक्षणसम्पन्ना लक्ष्मीरिव कुलाधिका" इत्युपक्रमे "मरीचेर्वचनं श्रुत्वा कन्या प्रोवाच तं मुनिम्। अहं धर्मव्रतानाम धर्मपत्नी तपोन्विता। पतिव्रतार्थं विप्रेन्द्र! चरामि परमं तपः। धर्मव्रतां मरीचिस्तामुवाच प्रीतिपूर्वकम्। पतिव्रता दर्शनान्मे भविष्यसि शुभव्रते!। पतिव्रतेच्छया पृथ्वीं विचरामि तवाऽन्तिकम्। त्वञ्चेत् पतिव्रता जाता भज त्वं भज मां वरम्। लोके न त्वादृशी कन्या मम तुल्यो न ते वरः। धर्मव्रते! धर्मपत्नि! तस्मात् त्वं भज माधुना। धर्मव्रता मुनिं प्राह धर्मं याचय सुव्रत! तत् श्रुत्वा धर्ममगमन्मुनिं धर्मोददर्श ह। तेजःपुञ्जवरं नत्वा ह्यासनाद्यैर्दिनार्चयत्। किमर्थमागतः पृष्टो मरीचिर्धर्ममब्रवीत्। कन्यार्थं भ्रमता पृथ्वीं दृष्टा ते कन्यका वरा। मह्यं कन्यास्तु तां देहि श्रेयस्तव भविष्यति। अर्घ्यादिना समभ्यर्च्य धर्मः प्राचेतसेरितम्। धर्मव्रतां समानीय ददावांङ्गां मरीचये। धर्मश्च व्रतम्। हेमाद्रिः उक्ते २व्रतभेदे न॰ व्रतशब्दे दृश्यम्।

**धर्मशाला** स्त्री धर्मार्थं शाला। धर्मार्थमन्नादिदानाधिकरणशालायाम्। धर्मशब्दादोऽत्र।

**धर्मशासन** न॰ शास–भावे ल्युट् ६त॰। १धर्मस्यानुशासने। करणे ल्युट्। २धर्मशास्त्रे च "मरीरक्षत् प्राणदाता यस्य चान्नानि भुञ्जते। क्रमेणैते त्रयोऽश्नुवाः पितरो धर्मशासने" भा॰ आ॰ ७२ अ॰।

**धर्मशास्त्र** न॰ शिष्यतेऽनेन शास–करणे ष्ट्रन् ६त॰। धर्मशासने मन्वादिप्रणीते धर्मप्रतिपादके ग्रन्थभेदे स्मृतिशास्त्रे तस्य कर्त्तारश्च हेमाद्रिव्रतखण्डे दर्शिता यथा "शङ्खलिखितौ स्मृतयो धर्मशास्त्राणि तेषां प्रणेतारोमनुविष्णुयमदक्षाङ्गिरोऽत्रिहारीतयाज्ञवल्क्यप्राचेतसादयः। यमः "मनुर्यमोवसिष्ठोऽत्रिः दक्षो विष्णुस्तथाङ्गिराः। उशना बाक्पतिर्व्यासः आपस्तम्बोऽथ गौतमः। कात्यायनो नारदश्च याज्ञवल्क्यः पराशरः। संवर्त्तश्चैव शङ्खश्च हारीतो लिखितस्तथा। एतैर्यानि प्रणीतानि धर्मशास्त्राणि वै पुरा। तान्येवाति प्रमाणानि न कुत्सितानि हेतुभिः" "आदिशब्दाच्च बृहद्वैष्णवसोमसदग्निप्रजापतिविश्वामित्रबृहद्यातातपपैठीनसिपितामहौशनसच्छागलेयजाबालिव्यवनमरीचिकश्यपाः" तथा हि भविष्यपुराणे "अष्टादशपुराणेषु यानि वाक्यानि पुत्रक!। तान्यालोड्य महाबाहो! तथा कृतयुगेषु च। मन्वादिस्मृतयो याश्च षड्विंशत् परिकीर्त्तिताः। तासां वाक्यानि क्रमशः समालोक्य ब्रवीमि ते" इति। मन्वादिस्मृतीनां षड्विंशत्सङ्ख्यम्, तज्ज्ञानन्तरोक्ताभिरेव पूर्य्यते। यानि पुनर्महाभारतरामायणविष्णुधर्मशिवधर्मभृतीनि स्मृतिपरिशिष्टानि च तानि च कृतयुगेषु चेत्थमेवोक्तानि तथा चोक्तं भविष्यपुराणे "अष्टादश पुराणानि रामस्य चरितं तथा। विष्णुधर्माश्च शास्त्राणि शिवधर्माश्च भारत!। कार्ष्णञ्च यदुदेवो यन्महाभारतं कृतम्। सोराश्च धर्मा राजेन्द्र! मानवोक्ता महीपते!। जयेति नाम चैतेषां प्रवदन्ति मनीषिण इति" "तदपि कृतयुगेष्वेवमेवं परिस्फुटीतं वेदितव्यम्" हेमाद्रिः व्र॰।

**धर्मशील** त्रि॰ धर्मः धर्मसाधनं शीलमस्य धर्मं शीलयति शील–अण् वा। १धर्मस्वभावे २धर्मतत्परे। "तत्र स्नात्वा नरो राजन्! धर्मशीलः समाहितः" भा॰व॰ ८३अ॰।

**धर्मसंहिता** स्त्री धर्मशास्त्रिका संहिता, धर्मः संहितो निरूपितो यत्र वा। धर्मशास्त्रे अमरः।

**धर्मसहाय** पु॰ धर्मे सहायः। सहाया इत्युपक्रमे "ऋत्विक्पुरोधसः स्नुर्धर्मविद् द्विजतापसास्तथा धर्मे" मा॰ द॰ उक्ते ऋत्विगादौ।

**धर्मसार** पु॰ धर्मेषु सारः। १श्रेष्ठपुण्यकर्मणि २ततत्साधने च स च गरुड़पु॰ २२५ अ॰ विस्तरेणोक्तः।

**धर्मसारथि** पु॰ धर्मः सारथिरिवास्य। धर्मसंचरसहायके "शुद्धस्ततः शुचिस्तस्मात् चित्रकूर्धर्मसारथिः! भाग॰ ६।१७।८

**धर्मसावर्णि** पु॰ एकादशे मनुभेदे। "मनुर्वै धर्मसावर्णिरेकादशम आत्मवान्। अनागतास्तृतीयाच सत्यधर्मादवोदश" भा॰८।१३।१२

**धर्मसू** स्त्री धर्मं सुनोति सू–क्विप्। १धूम्राटवृक्षे शब्दरत्ना॰। २धर्मप्रेरके त्रि॰ "सोमो राजा वरुणः देवा धर्मसूवः" तैत्ति॰ ब्रा॰ ३।७।८।१।

**धर्मसूत्र** न॰ धर्मः सूत्रप्रतेऽनेन करणे क्यच् ६त॰। धर्म-

निर्णयार्थं जैमिनीप्रणीते धर्ममीमांसारूपे ग्रन्थभेदे।

**धर्मसेतु** पु० धर्मस्य सेतुरिव धारकत्वात्। धर्मरक्षके "राजा दशरथो नाम धर्मसेतुरिवाचलः" रामा०आर०६२अ०। एकादशमन्वन्तरे आर्यकस्य सुते २हरेरंशभेदे च। तदुपक्रमे "आर्यकस्य सुतस्त्वत्र धर्मसेतुरिति श्रुतः। विष्टावां हरेरंशस्त्रिलोकीं धारयिष्यति" भाग० ८।१३।१२

**धर्मस्कन्ध** पु० आर्हतमतसिद्धे धर्मास्तिकायपदार्थे अर्हत् शब्दे दृश्यम्। [ङीष्।

**धर्माङ्गी** स्त्री धर्म इव शुद्धमङ्गमस्याः। वके निघण्टुः स्त्रियां

**धर्माचार्य्य** पु० धर्मे आचार्यः। १धर्मशिक्षके गुरुभेदे ऋग्वेदिनां तर्पणीये २ऋषिभेदे च "सनन्तुजैमिनि वैशम्पायनपैलसूत्रभाष्यभारतमहाभारतधर्माचार्यां स्तर्पयामि ये चान्ये आचार्यास्ते सर्वे तृप्यन्विति" आश्व० स्त०२।४।४। धर्माचार्यश्च नैमित्तिकादिप्रवयोत्तरं वैदिकधर्माचारयोः शिक्षार्थं बीजीभूता धर्मप्रवर्त्तका ऋषिभेदाः यद्वाह मिता० या० अध्याये

"ननु नैमित्तिकादिप्रतिपत्तेरखिलाध्यापकप्रवचनादविदितवेदास्तस्रोत्रियतनूजाताः कथमग्निहोत्रादिकं कर्म करिष्यन्ति। कथन्तराञ्जातकर्माणः स्वर्गमार्गमधिरोक्ष्यन्तीत्यत आह "तत्राष्टाशीतिसाहस्रा सनयो ब्रह्मवेधिनः। पुनरावर्त्तिनो बीजभूता धर्मप्रवर्त्तकाः" याज्ञ०। तत्र पितृयाने अष्टाशीतिसहस्रसंख्या सनयो ब्रह्मवेधसः ऊर्ध्वरेतसः पुनरावृत्तिधर्माणः सर्गादौ वेदस्रोतउपदेशकतया धर्मतरुप्ररोहे बीजभूताः सन्तोऽग्निहोत्रादिधर्मप्रवर्त्तका अतो न प्राग्दृष्टदोषसमागमः। किञ्च। "सप्तर्षिणामवोध्यन्तर्वसोर्वंशं समाश्रिताः। तावन्त एव सनयः सर्वारम्भविवर्जिताः। तपसा ब्रह्मचर्येण सङ्गत्यागेन मेधया। तत्र गत्वावतिष्ठन्ते यावदाभूतसंप्लवम्" याज्ञ०। सप्तर्षयः प्रसिद्धा नागवीथ्यैरावतपथः तदन्तराले तावन्त एवाष्टाशीतिसहस्रसंख्या सनयः सर्वारम्भविवर्जिताः केवलज्ञाननिष्ठास्तपोब्रह्मचर्यसुक्तास्त्रासङ्गत्यागिनो देवलोकं समाश्रिताः। आभूतसंप्लवमाभूतप्रलयपर्य्यन्तमवतिष्ठन्ते। तत्र च स्थिताः सृष्ट्यादावाध्यात्मिकधर्माणां प्रवर्त्तकाः। कथम्भूतास्ते सनय इत्यत आह "यतो वेदाः पुराणानि विद्योपनिषदस्तथा। श्लोकाः सूत्राणि भाष्याणि यच्च किञ्चन वाङ्मयम्" याज्ञ०। यतो द्विविधादपि सनिसनूत्पन्नाश्चत्वारो वेदाः पुराणाङ्गविद्योपनिषदश्च नित्यभूता एवाध्येतृपरम्परायातास्तद्वक्तारस्तथा श्लोका इतिहासाख्याः सूत्राणि च शब्दानुशासनमीमांसागोचराणि। भाष्याणि च सूत्रव्याख्यारूपाणि यदन्यदायुर्विद्यादिकं वाङ्मयं तदपि यत् सकाशात्प्रवृत्तं तथाविधास्ते सनयो धर्मप्रवर्त्तकाः। एवं सति वेदस्यापि नानित्यतादोषप्रसङ्गः"।

**धर्मात्मन्** पु० धर्मः आत्मा स्वभावो यस्य। धर्मशीले "स तानुवाच धर्मात्मा महर्षीन् मानवो भृगुः" मनुः।

**धर्माधर्म** पु० द्वि०व० धर्मश्चाधर्मश्च द०। १पुण्यपापयोः "धर्माधर्मौ गुणा एते आत्मनः सुखदुर्दम" भाषा०। धर्माधर्मौ परीक्षणीयतयाऽस्त्यस्याः ऋच्। धर्मरूपे दिव्यभेदे तद्विधानं वीरमित्रोदये यथा

"तत्र पितामहः "अधुना सम्प्रवक्ष्यामि धर्माधर्मपरीक्षणम्। कृच्छ्रं यां याचमानानां प्रायश्चित्तार्थिनां स्मृतामिति"। कृच्छ्रां याचमानानामित्यर्थाभियोगेषु, याचमानानामित्यर्थाभियोगेषु, प्रायश्चित्तार्थिनां स्मृतामिति घातकाभियोगेषु एतद्दिव्यं भवतीति सूचितम्। धर्माधर्मदिव्यप्रकारमाह स एव "राजतद्वारवेद्धर्मधर्मौ शोधकायत्वम्। लिखेद्भूर्जे पटे वापि धर्माधर्मौ सितासितौ। अभ्युक्ष्य पञ्चगव्येन मन्त्रमाद्यैः समर्चयेत्। सितपुष्पस्तु धर्मः स्यादधर्मोऽसितपुष्पकः। एवंविधायोपलिप्य पिण्डयोस्तौ निधापयेत्। गोमयेन सदा वापि पिण्डौ कार्यौ समन्ततः। मृद्भाण्डके उपस्कृते स्याथो चानुपलक्षितौ। उपलिप्ते शुचौ देशे देवब्राह्मणसन्निधौ। आवाहयेत्ततो देवान् लोकपालांश्च पूर्ववत्। धर्माधर्मनपूर्वन्तु प्रतिज्ञापत्रकं लिखेत्। यदि पापविशुद्धोऽहं धर्मस्यायातु मे करे" इति मन्त्रं त्रिरुच्चार्य्य। कृच्छ्रमिति मन्त्रलिङ्गात्। कृच्छ्रसंज्ञितिरपि "पत्रद्वये लेखनीयौ धर्माधर्मौ सितासितौ। जीवदानादिकैर्मन्त्रैर्मोक्षत्रादौच सामभिः। आमन्त्र्य पूजयेद्धर्म्यैः कुसुमैश्च सितासितैः। अभ्युक्ष्य पञ्चगव्येन मृत्पिण्डान्तरितौ ततः। धर्मो क्षिप्त्वा नये कुम्भे स्याथौ चानुपलक्षितौ। ततः कुमारिपिण्डमेकं प्रस्फोटीतानुयाचितः। धर्मं मुञ्चेति शुद्धः स्यात् सम्भूज्य परीक्षकैरिति" जीवदानादिकैर्मन्त्रैः, मा प्र गामपथोवयमित्यादि" ऋ०१०।५७।१ सूक्तपठितषड्ऋचैः अन्यैर्वा आगमोक्तैः प्राग्वत्रतिज्ञामन्त्रैरित्यर्थः। ते च प्रारदातिलके उक्ताः"।

**धर्माधर्मविद्** पु० धर्माधर्मौ वेत्ति विद्-क्विप् तत्०। १मीमांसके स हि विधिनिषेधमयो धर्माधर्मौ तत्त्वतो

जानातीति तस्य तथात्वम्। २तद्धेतुभूतविहितकर्मणि-होमादिनिषिद्धकर्महिंसादिवेत्तरि च।

**धर्माधिकरण** न० धर्मोऽधिक्रियतेऽत्र अधि+कृ-आधारे ल्युट्। न्यायां तच्चियुक्तानाञ्च व्यवहारदर्शनयोग्ये स्थानभेदे। तत्स्वरूपभेदादिकं वीरमि० उक्तं यथा बृहस्पतिः "दुर्गमध्ये गृहं कुर्याल्लक्षणान्वितं पृथक्। प्राग्दिशि प्राङ्मुखीन्यस्य लक्षण्याङ्गुलवेत्रभाम्। माल्यभूषासनोपेतां वीजरत्नसमन्विताम्"। लक्षण्यां वास्तुशास्त्रोक्तलक्षणेन तु लक्षिताम्। सभायां धर्माधिकरणत्वं च "धर्मशास्त्रानुसारेण सर्वशास्त्रविवेचनम्। यत्राधिक्रियते स्थाने धर्माधिकरणं हि तदिति" उक्तेः। तत्र सभ्योपवेशनमाह मनुः "यस्मिन्देशे निषीदन्ति विप्रा वेदविदस्त्रयः। राज्ञश्चाधिकृतोविद्वान् ब्राह्मणस्तां सभां विदुरिति" तत्र दशुपलक्षणम् "अधिकानामपि कृतत्वात्। तच्च वक्ष्यते। अधिकृतो विद्वान् ब्राह्मणः। अत्र "सभामेव प्रविशेत्" इत्यादिवचनात् सभा मुख्यं व्यवहारदर्शनस्थानम्। अन्यान्यप्रकृष्टानि नानावचनादवगन्तव्यानि "ईशस्थानानि वादानां पञ्च चैवाग्रवीद्गुरुः। निर्णयं येन गच्छन्ति विवादं प्राप्य वादिनः। चारणास्तु गणैः कृत्स्नैः सार्थिकाः सार्थिकैस्तथा। सैनिकाः सैनिकैरेव ग्रामेऽभ्युभयवासिभिः। उभयानुमतश्चैव गृहीते स्थानमीप्सितम्। कुलिकाः सार्थसङ्घाश्च पुरग्रामनिवासिनः। ग्रामपौरगणश्चेति यथावद्विद्धि वर्गिणः। कुलानि कुलिकाश्चैव नियुक्ता नृपतिस्तथेति" गणैश्चारणगणैः ग्रामेऽग्रोत्थविशब्दाद्यो ग्रामेऽरण्यादौ च निवसन्ति ते उभयवासिभिर्निर्णयं कृत्स्नैरुभयव्यवहाराभिज्ञत्वात्तेषाम्। कुलिकाः कुलश्रेष्ठाः। सार्थो ग्रामदेवतादौ मिलितो जनसङ्घः तन्मुख्याः सार्थिकादयः। पुरं मुख्यनगरम्। तस्मादवांचीनो ग्राम इति पुरग्रामनिवासिनोभेदः। कुलिकादीनि पञ्च स्थानानि तानि चारणव्रजादीनामेव ग्रामादीनि दश स्थानानि साधारणानि। ग्रामो ग्रामाकारेणावस्थितोजनः। पौरः पुरवासिनां समूहः। श्रेणयो रजकाद्या हीनजातयः। चातुर्विद्याः आन्वीक्षिक्यादिविद्याचतुष्टयोपेताः। वर्गिणो गणप्रभृतयः"। तत् अर्हत्वेनास्यास्त्यत्र। २तत्र नियुक्ते प्राड्विवेकादौ पु०। "समः शत्रौ च मित्रे च सर्वत्राक्षविशारदः। विप्रमुख्यः कुलीनश्च धर्माधिकरणो भवेत्" मत्स्यपु० "पुरुषान्तरतत्त्वज्ञाः प्रांशवश्चाप्यलोलुपाः। धर्माधिकरणे कार्या जनाङ्गानकरानराः इति मत्स्यपु०।

**धर्माधिकरणिन्** पु० धर्माधिकरणं नियोगस्थानतयाऽस्त्यस्य इनि। विचारके प्राड्विवेकादौ धर्माध्यक्षे हेमच०।

**धर्माधिकारिन्** पु० धर्मं व्यवहारे तच्चिर्णयमधिकरोति अधि+कृ-णिनि ह्रस्वः। प्राड्विवेकादौ।

**धर्माध्यक्ष** पु० धर्मे व्यवहारे धर्मनिर्णये अध्यक्षः। १प्राड्विवेकादौ। "कुलशीलगुणोपेतः सर्वकर्मपरायणः। प्रवीणः प्रेक्षणाध्यक्षो धर्माध्यक्षोऽभिधीयते" चाणक्यः। २विष्णौ च "लोकाध्यक्षः सुराध्यक्षो धर्माध्यक्षः क्षताक्षतः" विष्णुस०। "धर्माधर्मौ साक्षादीक्षते तदनुरूपं फलं दातुं तस्माद्धर्माध्यक्षः" भा०। अत्र धर्मपदं लक्षणया धर्माधर्मपदं तदभिप्रायेण धर्माधर्मौ दृश्यतेऽस्मिन्।

**धर्मान्धु** पु० धर्मक्षतोऽन्धुः कूपः। तीर्थभेदे स्कन्दपु०।

**धर्माभास** पु० धर्म इवाभासते भा+भास-अच्। श्रुतिस्मृतीतरशास्त्रोक्ते असद्धर्मे। "श्रुतिस्मृतिभ्यामुदितोयः स धर्मः प्रकीर्तितः। अन्यशास्त्रेषु यः प्रोक्तो धर्माभासः स उच्यते" देवीभागवतम्।

**धर्मारण्य** न० तीर्थभेदे तदाविर्भावकथा वराहपु० यथा "सर्वधर्मैः परीक्षितः सर्वैः सोमेनाद्भुतकर्मणा। तारां जिघृक्षता पत्नीं स्वात्मरश्मिरसस्य च। सोऽध्वयाद्भोमितस्तेन बलिना क्रूरकर्मणा। अरण्यं सङ्कटं घोरं प्रविवेश तदा प्रभुः" ब्रह्मोवाच। "यज्ञारण्यमिदं धर्म ! त्वयाऽद्याप्तं चिरं विभो !। नाम्ना भविष्यति ह्येतद्धर्मारण्यमिति प्रभो !" गयास्थे २तीर्थभेदे "प्रथमेऽह्नि विधिःप्रोक्तो द्वितीयदिवसे व्रजेत्। धर्मारण्यं तत्र धर्मो यज्ञात् यज्ञमकारयत्" वायुपु० गयामाहात्म्ये "गया च फल्गुतीर्थञ्च धर्मारण्यं सुरर्षभम्। तथा देवनदीपुण्या सरश्च ब्रह्म निर्मितम्" भा० आनु० १६५ अ०। ३धर्मसाधने अरण्यमात्रे च "तैरुक्तो यज्ञियान् देशान् धर्मारण्यं तथैव च" भा० आश्व० ८२ अ०। ४भ०म०१३अ० कूर्मविभागोक्ते मध्यभागस्थे देशभेदे न० ४भागुरकोषज्योतिषधर्मारण्यानि शूरसेनाश्च स्त्र्युपक्रमे मध्यभेदभिन्नुक्तम्।

**धर्मासन** न० धर्मार्थं धर्मविचारार्हमासनम्। विचारनिर्णयार्थे आसनभेदे। "धर्मासनमधिष्ठाय संवीताङ्गः समाहितः" मनुः।

**धर्मास्तिकाय** पु० आर्हतमतसिद्धे जीवाजीवधर्माधर्म-

पुरुषास्त्रिशायमध्ये पदार्थभेदे कर्हृशब्दे दृश्यम् ।

धर्मिक त्रि॰ धर्मोऽस्यास्य ठन् । धर्मयुक्ते । ततः पुरोहिता॰ तस्य कर्मभावादौ यक् । धार्मिक्य तद्भावे न॰ ।

धर्मिन् त्रि॰ धर्मोऽस्यास्य इनि । १धर्मविशिष्टे स्त्रियां ङीप् । वा च २आधाराम् । "त्रिगुणमचेतनं प्रसवधर्मि" सा॰का॰ । ३आधारे च सुखदुःखमोहधर्मिणी बुद्धिः सुखदुःखमोहधर्मकद्रव्यजन्या" सां॰ प्र॰ भा॰ । "नित्यत्वाच्च चित्धर्मौ" सा॰ सू॰ भाष्ये पुरुषस्य प्रकाशरूपत्वे सिद्धे तत्सम्बन्धमात्रेणान्यव्यवहारोपपत्तौ प्रकाशात्मकधर्मकल्पना गौरवमित्यपि बोध्यम् । तेजसस्य प्रकाशात्मकरूपविशेषाग्रहेऽपि सर्वपुरस्कारेण ग्रहात् प्रकाशतेजसोर्भेदः सिद्ध्यति । आत्मनस्तु ज्ञानाख्यप्रकाशाग्रहकाले ग्रहणं नास्तीत्यतो लाघवात् धर्मधर्मिभावशून्यं प्रकाशरूपमेवात्मद्रव्यं कल्प्यते" "धर्म्यंशे सर्वमज्ञानं प्रकारे च विपर्ययः" न्यायका॰ । धर्माः श्रोतस्मार्त्ता कर्त्तव्यत्वेन सन्त्यस्य । ४धार्मिके त्रि॰ स्त्रियां ङीप् । धर्मः प्राप्यत्वेनास्त्यस्य इनि ५विष्णौ पु॰ । "धर्मगुप् धर्मकृत् धर्मी" विष्णुस॰ ।

धर्मिष्ठ त्रि॰ अतिशयेन धर्मवान् इष्ठन् मतुपो लोपः । १अतिशयेन धार्मिके । २विष्णौ पु॰ ।

धर्मेन्द्र पु॰ धर्मे इन्द्र इव रक्षकत्वात् । धर्मराजे यमे "पितृणामिव धर्मेन्द्रो यादसामिव चाम्बुराट्" भा॰द्रो॰ ६अ॰ । धर्मेशधर्मेश्वरादयोऽप्यत्र ।

धर्मेयु पु॰ पौरववंश्यस्य रौद्राश्वस्य पुत्रभेदे । "धर्मेयुः सन्नतेयुश्च दशमो देवविक्रमः" भा॰ आ॰ ९४ अ॰ । तत्पुत्रौ

धर्मोत्तर त्रि॰ धर्म उत्तरः प्रधानमस्य । धर्मप्रधाने ।

धर्मोपदेश पु॰ धर्म उपदिश्यतेऽनेन उप+दिश-करणे घञ् इत॰ । १धर्मशास्त्रे मन्वादिशास्त्रे "आर्षं धर्मोपदेशञ्च वेदशास्त्राविरोधिना । यस्तर्केणानुसन्धत्ते स धर्मं वेद नेतरः" मनुः । भावे घञ् । २धर्मस्य उपदेशे "धर्मोपदेशं दर्पेण विप्राणामस्य कुर्वतः । तप्तमासेचयेत् तैलं वक्त्रे श्रोत्रे च पार्थिवः" मनुः ।

धर्मोपदेशक त्रि॰ धर्मसुपदिशति उप-दिश ण्वुल् इत॰ । १धर्मस्योपदेशकर्त्तरि २गुरौ पु॰ ।

धर्म्य त्रि॰ धर्मादनपेतः "धर्मपथ्यर्थन्यायादनपेते" पा॰ यत् । धर्मेण प्राप्यः "तौरयोधर्मेत्यादिना" पा॰यत् वा । १धर्मयुक्ते धर्मादबहिर्भूते २धर्मेण प्राप्ये च "न दृष्ट्वाधर्मविज्ञाय विधिं धर्म्यं प्रतिपद्यते मनुः । ब्राह्माद्यष्टविवाहो पक्रमे "यो यस्य धर्म्यो वर्णस्य गुणदोषौ च यस्य यौ । तद्दः सर्वं प्रवक्ष्यामि प्रसवे च गुणागुणान् । षड्नुपूर्व्या विप्रस्य त्रयस्य चतुरोऽवरान् । विट्शूद्रयोस्तु तानेव विद्याद्धर्म्यांश्च राक्षसान् । चतुरो ब्राह्मणस्याद्यान् प्रशस्तान् कवयो विदुः । राक्षसं क्षत्रियस्यैकमासुरं वैश्यशूद्रयोः । पञ्चानान्तु त्रयोधर्म्या द्वावधर्म्यौ स्मृताविह । पैशाचश्चासुरश्चैव न कर्त्तव्यौ कदाचन । पृथक् पृथग्वा मिश्रौ वा विवाहौ पूर्वचोदितौ । गन्धर्वो राक्षसश्चैव धर्म्यौ क्षत्रस्य तौ स्मृतौ" ।

धर्ष पु॰ धृष-भावे घञ् । १प्रागल्भ्ये २क्षमायै ३शक्तिबन्धने ४संहतौ ५हिंसायाञ्च शब्दच॰ ।

धर्षक त्रि॰ धृष-ण्वुल् । १परिभवकारके २प्रगल्भे ३क्षमाहने च ४नटे पु॰ शब्दरत्ना॰ ।

धर्षकारिन् त्रि॰ धर्षं करोति कृ-णिनि इत॰ । १परिभवकर्त्तरि २प्रागल्भ्यकारके च ३दूषितायाम् अस्यां स्त्री स्त्रियां ङीप् शब्दर॰ ।

धर्षण न॰ धृष-भावे ल्युट् । १परिभवे २क्षमाहने ३धर्षशब्दार्थे च । कर्मणि ल्युट् । ४अभिसारिकायां स्त्रियाम् स्त्री ङीप् । मेदि॰ । कर्त्तरि ल्यु । ५धर्षकारके त्रि॰ । ६शिवे पु॰ । "अधर्षणो धर्षणात्मा यत्तदा कामनाशकः" भा॰ अनु॰ १७ अ॰ शिवसहस्रनामोक्तौ पु॰ धृष-भावे युच् । ७धर्षणे स्त्री "श्रुत्वेमां धर्षणां तात ! तव तेन दुरात्मना" भा॰ स्त्री॰ ३१ अ॰ ।

धर्षणि(णी) स्त्री धृष्यतेऽसौ धृष-कर्मणि अनि । अस्त्रियां वन्यक्याम् उणादिवृत्तिः वा ङीप् तत्रार्थे भरतः ।

धर्षित त्रि॰ धृष-कर्मणि क्त इट् गुणच । १परिभूते अस्त्रियां २कुलटायां स्त्री शब्दरत्न॰ । भावे क्त । २अभिहसने ३मैथुने च न॰ त्रिका॰ । ५परिभवे च ।

धलण्ड पु॰ दधाति धा-ड तं खण्डयति खडि-अच्खण्डे अच् । (धला आकड़) इक्षौ शब्दच॰ । ण्वुल् । धलण्डक तत्रार्थे तस्य कण्टकाद्यतत्वेन धारकक्षोत्पेषणात्तथात्वम् ।

धव गतौ भ्वा॰ प॰ सक॰ सेट् इदित् । धवति अधवीत् । इदित्त्वात् कर्मणि धव्यते धव्यातोऽन्यत्र धव्यते इति भेदः ।

धव त्रि॰ धवति धुवति धुनोति धूनाति वा कर्त्तरि अच् । १कम्पनकारके २पत्यौ स्वामिनि ३नरे पु॰ अमरः ४धूर्त्ते त्रि॰ मेदि॰ । (धला आकड़ा) ख्याते वृक्षे पु॰ रत्नमा॰ । "धवः शीतः प्रमेहार्शःपाण्डुपित्तकफापहा । मधुरस्तु-

वरस्य फलत्व मधुरं मनाक् भावप्र०। "विल्वार्क-खदिराकीर्णं कपित्थधवसङ्कुलम्" भा० आ० ६८ अ०। "मा विद्या च हरेः प्रोक्ता तस्या दैशो यतो भवान्। तस्मान्नाधवनामासि धवः स्वामीति सञ्जितः" हरिवं० २७८ अ०। भावे अप्। ६कम्पने ७विधूनने च पु०।

**धवनि** स्त्री धू-करणे अनि। ऊनत्वे परस्करनि०।

**धवल** पु० धाव-डला० कल वा०हुस्वः धवं कर्म्म लाति ला-क वा। "धवलः ।सिन्दूरे २सिते। ३मङ्गोले चाथ धवली ४औरभ्यां सहदाहृता" विश्वः। औरभ्यामेव गौरा०ङीष्। श्वेतवर्णयुक्ते त्रि० अमरः। स्त्रियां टाप्। "नीता तेन निशा प्रमाणुधवला" उद्भटः। ५निर्मले त्रि० त्रिका०। "क्रियते धवलः खलूच्चकैर्धवलैरेव कितैरवैरधः" माघः। ६धवतरौ ७चीनकर्पूरे स्त्री। पक्षेतमरिचे न० राजनि०। ८रागभेदे स च भरतमते हिन्दोलरागस्य षष्ठः पुत्रः सङ्गीतशास्त्रम्। १०खनभेदे "धवलः पाण्डुरहितो रक्तपित्तहरो हिमः। रसे पाके च मधुरः संग्राही वातशान्तिकृत्" भावप्र०। ११छन्दोभेदे तल्लक्षणं यथा "द्विजवर! नवनुगसनगयुग नवयुगलकं विमलबलवसपि च कलय सकलजनसुखम्। "कविपतिवरमखिलमनसिज हितं विमलकविसुहृदिव खचितमिति भुवि विदितम्"।

**धवलगिरि** पु० कर्म०। खनामख्याते पर्वतभेदे।

**धवलपक्ष** पुंस्त्री धवलौ पक्षौ यस्य। हंसे राजनि० स्त्रियां जातित्वात् ङीष्। "धवलपक्षविहङ्गमकूजितैः" माघः। कर्मधा०।१चान्द्रमासघटके पञ्चदशतिथ्यात्मके २शुक्ले पक्षे पु०

**धवलपट्टिनी** स्त्री कर्म०। श्वेतपाटलिकायाम् राजनि०।

**धवलमृत्तिका** स्त्री कर्म०। (खड़ि) खटिन्यां राजनि०।

**धवलवावानल** पु० कर्म०। श्वेतवावानले वायनाख्यभेदे राजनि०।

**धवला** स्त्री धवदाक्तत्वात् कीष्। शुक्लवर्णायां स्त्रियाम्। अमरः। [धवलिम्ना मूलपाथेरभिख्याम्" माघः।

**धवलिमन्** पु० धवलस्य भावः इमनिच्। श्वेतत्वे "अधिगतधवलोत्पल न० कर्म०। कुष्ठे राजनि०।

**धवाषक** पु० धुनोति दुष्टान्दोषान् धू-आषक। वायौ उज्ज्वल०

**धविल** न० धू-करणे इल। खनर्थमवक्षालने अमरः। "शुद्धवेदं धविलाधि करिष्यौद" आत्मा०ब्रो०२६।२।१०। "धुनोत्येनिरिति धविलाधि ऊर्ध्वालिनखखनिर्भिदाखयो व्यञ्जनाः" हेमचन्द्रः।

**धस्** त्रि० धा-कसुन्। १धारके रेतोधाः पुरोधाः। २मङ्गलि पु० मेदि०। ३ब्रह्मणौ च धा०।

**धा** धारणे पोषणे दाने च जुहो० उभ० सक० अनिट्। दधाति धत्ते धत्से दध्यात् दधात् धेहि अदधात् अधत्त। धधात् धधित। दधौ दधे। दधिव दधाव। दधिम दधाम। धाता धास्यति। धीयते धधावि अधाधिषाताम् धधिषाताम्। हित्वा हितिः। "त्वं सुधाधि! विनैव कञ्चुकिकया धत्से मनोहारिणीम्" सा० द०। "इमं नो यज्ञमवतेषु धेहि" ऋ० ३।२१।१ "तत्त्वा देवा सविता दधातु" ऋ० १०।१७।३ "धर्मं दध्यात् सदा सुधीः" मनुः। "निवेशाय मनो दधुः" भा० ब० ६५ अ०। "न नाशमधिगच्छेयुरिति मे धीयते मतिः" भा० विरा० २८ अ०। "हिंसाहिंसे मृदुक्रूरे धर्माधर्मावृतानृते। यद् यस्य सोऽदधात् सर्गे तस्य स्वयमाविशत्" मनुः। "यद्यापमाश्रमनमस्यं हेयं भवेदन्यदुपेक्षणम्" भट्टिः। "नामधास्त् कवं नामो ब्रह्मात्मद्भिः कवैः" कुमा० धापयति धित्सति। "त्वं वह्निं कृष्ण धित्सवः" ऋ० १।४६।६

**अति+अतिक्रम** धारणे अतिशयधारणे च "आयुर्भक्ते अतिहितं पराचैः" ऋ० ७।५२।२।

**अधि+आधिक्येन** धारणे "यस्मादेवाय भवते अध्यधत्तम्" ऋ० १।११७।८।

**अनु+पश्चाद्धारणे**। "अन्वान् (तस्कुलान) कृतास्त्रावत्तीषु समित्सु अनुदधीरन्" आश्वा० ४।६।१४।

**अन्तर्+आच्छादने** वस्त्रान्तरेण व्यवधाने। "उदुम्बरयाज्ञान्तर्धाभिधिक्षति" ऐ० ब्रा० ८।७। तिरोधाने "ते चान्तर्दधिरे नागाः" भा० आ० १२६ अ०।

**अपि+तिरोधाने** आच्छादने। "धनेनाधर्म्म कर्म्मेण यच्छिद्रमपिधीयते" भा० उ०३४अ०। वा अतो लोपः "पिधानमपिधानम्" अमरः।

**अभि+कथने** "साक्षात् सङ्केतितं योऽर्थमभिधत्ते स वाचकः" का० प्र०। "मयनव्यवहारे तु हेतुः संज्ञाभिधीयते" भाषा०।

**प्रति+अभि+प्रत्युत्तरकथने**। "मया च प्रत्यभिहितं देवकार्यादपैदर्शनात्" भा० उ० १६ अ०।

**अव+मनःसंयोगविशेषे** अभिनिवेशे "अवधानपरे चकार सा" कुमा०। अधःस्थापने पातने च "यां ते जत्वां कूपे अवदधुः" ऋ० ६।६१।७। "वितः कूपेऽवहितः" ऋ० १।१०५।१७

वि+आ+आच्छादने (ढाकों) अपवारणे। "प्रेक्ष्य स्थितां सङ्करीं व्यवधाय देहम्" रघुः। "व्यदधाति दर्भपिञ्जूलानि" सांख्यत्रा० १८।८। "अन्तर्द्धौ व्यवधा पुंसि अन्तर्द्धिरपवारणम्" अमरः। "उदयाचलव्यवहितेन्दु वपुः" माघः।

आ+आरोहे आरोपणे स्थापने च। सद्व्यस्य ऋणशोधनकालपर्य्यन्तं धनिकसमीपे स्थापने आधिः आहितः। अग्न्यादेः संस्कारभेदे अग्न्याधानम्। "जनपदे न गदः पदमादधौ" रघुः। "आदध्यात् संभारान् दर्भान् दीर्घान् गर्भांश्च" ह० स० ४८। "गर्भमाधत्त राज्ञी" रघुः। "ज्ञेयावां धर्मचारिण्यां भविष्यां गर्भमादधे" भा० व० २६२ अ०।

अति+आ+मर्य्यादानिक्षेपे धारणे। "कार्य्यमत्याहितं भविष्यति" प्रबोधच०। "यदि त्वादिश्य गोविन्दो नैतदत्याहितं भवेत्" हरिवं० १७१ अ०।

अनु+आ+पश्चादाधाने। यदेकस्य निहितं द्रव्यं तेनापि अनु पश्चादन्यस्य हस्ते स्वामिने देहीति समयेन समर्पणे च। अन्वाहितशब्दे दृश्यम्।

अभि+आ+साभ्युखेन स्थापने "अभ्यादध्युश्च काष्ठानि तत्र दक्षेन पापकृत्" मनुः।

उप+आ+धर्मचिन्तायाम् "उपाधिनौ धर्मचिन्ता" काम०। सामीप्येनाधाने अग्न्युत्पाते मेदि०। "अग्न्युत्पात उपाहितः" अमरः। संयोजने च अमरः। "तस्य नित्यं उपाहित आस" शत० ब्रा० ११।४।१।१

निर्+आ+निराकरणे "यः कृच्छ्राद्दं निरादधत्" ऋग्० १२।२।३६।

परि+आ०परितः स्थापने। "ऋचा कुम्भीमध्यन्वो अवाभ्या सिञ्चोदकमवपेद्धेनम्। पर्य्याधत्ताग्निना" ऋग्० ६।६५

वि+आ+विशेषेणाधौ पीड़ायाम्। व्याधिः "अद्यातना प्रजया वा व्याधीयेत" श्रुतिः "यतद्वै परमं तपो यद्व्याहितस्तप्यते" शत०ब्रा०१४।८।१।१

सम्+आ+पूर्वमाहितस्य दोषस्य निराकरणे "समाहितः समाधिस्थोऽयं कविद्वान् व्याहित" मेदि० उक्तेः च विद्वान्तोक्त्या दोषसमाधाने। सम्यक्चित्तस्य ईश्वरादौ संस्थापने समाधिः। "अथ चित्तं समाधातुं न शक्नोषि मयि स्थिरम्" गीता। सम्यगारोपणे "सोऽहं भारं समाधास्ये त्वयि त्वं वोढुमर्हसि" भा० द्रो० ११ अ०। "ब्रह्मास्त्रमन्त्रं राक्षसे सन्दिदेश समादधुः" रघुः।

आविस्+आविर्भवने प्रकाशने "आविर्हितस्तनुयुगं च हि सत्यवत्याम्" भाग० २।७।२।

उप+सामीप्येन स्थापने उपलक्षणतया स्थापने च। "क्रिया हि वस्तूपहिता प्रसीदति" रघुः। "एतदुपहितचैतन्यम्" वेदा०सा०। "यदिन्द्रियैस्तूपहितं परस्तात् प्राप्तान् सुखान् न स्मरते विराय" भा० भा० ७३।७ श्लो०। अनेन स्वरूपप्रच्छादने उपधयन्ध्यत्रैतदभिप्रायमरोक्तेः।

तिरस्+अन्तर्द्धाने प्रच्छादने। "इति वाङ्मात्र विबुधान् विबुधोनिस्तिरोदधे" कथा०।

नि+स्थापने अज्ञातस्वामिकतया द्रव्यस्य स्थितौ स्थापने च "अनिधायैव तद्द्रव्यमाचम्य शुचितामियात्" मनुः। "शिरसि निदधानोऽञ्जलिपुटम्" सा०द०। "यत्नं प्रयत्नेन वा तत्र वा निधाः पदं पदव्यां सगरस्य सन्ततेः" रघुः। "यस्तु पक्षेक्षिप्तं राजा पुराणं निक्षिपं क्षितौ" मनुः।

प्र+नि+ऐकाग्र्येण मनसः स्थापने। "ईश्वरप्रणिधानाद्वा" पात०सू०। "प्रणिधानं भक्तिविशेषः" भा०। प्रेरणे च "नीधिं प्रति प्रणिक्षिते तु करे प्रियेण" सा० द०। मनोऽभिवेशने च "किमिन्द्याद्विदुषां मनः प्रणिदधे हुतम्" भट्टिः।

प्रति+नि+तुल्यरूपतया करणादौ प्रतिनिधिः। "द्रव्येऽविद्यमाने यत् सामान्यतमं मन्येत तत्प्रतिनिदध्यात्" सा० शौ० २।२०।८ प्रतिनिधिशब्दे दृश्यम्।

सम्+नि+सम्यगनिधाने। "मेघेभ्यूर्द्धं सन्निधत्ते प्राणानां पवनः पतिः। तच्च मेघगतं वारि अजो वर्षति भारत।" भा० अनु० ६८०। "दूरादाकृष्य समिधः संनिदध्याद्विधानवित्" मनुः। नैकट्येन सम्बन्धे "समवेशं न कुर्वीत नोच्चैः सन्निहितो वसेत्" भा० वि० ४ अ०। "गुरो गुरौ सन्निहिते गुरुवद्वृत्तिमाचरेत्" मनुः। "अस्मिन् जनाममरूपे सन्निहितया त्वया भाव्यम्" शकु०। "भगवान् हरिरद्यापि तत्स्थानां निजजनानां वात्सल्येन सन्निधायत इच्छारूपेण" भाग० ५।७।८। नैकट्येन स्थापने तु शक०। "स चाहं सङ्ख्या धनमिवेष तत्र संन्यधिषि" दशकुमा०।

परि+वेष्टने आच्छादने। "यं परिधिं पर्य्यधात्" यजु० २।१७। "येनेन्द्रस्य हविषातितर्वांसः पर्य्यधात्" यजुर्भा० २।२ "वासस्य परिधापनेऽस्" भा० वि० ६ अ०। "परिहिते प्रावरणवाससि" मा० शौ० ६।८।१। "इष्टिं परिदधे कृष्णे रौहिणेये च दारुणाम्" हरिवं० ७१ अ०।

वि+परि+परिवर्त्तनेन आच्छादने। "आचान्तः पुनराचामेत् वासो विपरिधाय च" याज्ञ०।

पुरस्+अयतः स्थापने। पुरोहितः। "तुराषाहं पुरोधाय धाम साध्यमुवं ययुः" कुमा०।

प्र+प्रकर्षेण धारणे। "दिशश्चतस्रः सहसा प्रधापिताः" भाग० २० अ०। प्रधानम्।

प्रति+प्रक्षेपे "तदग्ने चक्षुः प्रतिधेहि रेभैः" ऋ०१०।८७।१२। प्रतीकारार्थे विधाने "दुष्टदैवतनाशाय वज्रो ध्यान समाधिना। सर्वलाञ्छनविक्षेपात् मालिकं प्रतिधास्यति" भक्तिर० प्रतिविधाने।

वि+करणे "तस्य तस्याचलां श्रद्धां तामेव विदधाम्यहम्" गीता। "विदधाति विभक्तेषु कर्म पूर्वकृतं नृणाम्" भा० व० यज्ञान्यदपि कर्त्तव्यं तद्विधत्तस्व महामते" स० ७६ अ०। कर्त्तव्यतोपदेशे "यत्तद्विधानं होतृत्व यतामस्मं विधीयते" मनुः। "चिकीर्षाकृतिसाध्यत्वेष्टसाधनविषयो विधिः" भक्ति० य० विधिशब्दे उक्तम्। "न वैतृयाग्निको होमो लौकिकेऽग्नौ विधीयते" मनुः।

अनु+वि+तुल्यरूपाचरणे पश्चात्करणे च। "आनुपूर्व्येण च विधां दैवत ऋक्षैरयांशुनाथां चाध्वर्युमनुविदधीत" सांख्य०श्रौ० १३१।२ "इष्टिं च तेभ्योऽनुविधाय काञ्चित्" भा०व०२६ अ०। "उपतिष्ठति तिष्ठन्तं गच्छन्तमनुगच्छति। करोति कुर्वतः कर्म छायेवानुविधीयते" भा० आ० १८१। "इन्द्रियाणां हि चरतां यन्मनोऽनुविधीयते" गीता।

प्रति+वि+प्रतिरूपाचरणे "क्षिप्रमक्षिरक्षाय चारः प्रतिविधीयताम्" राजा०सन्द० प्रतीकारे च "क्षिप्रमेव कलाद्य प्रतिविहितमार्यैर्यः" सङ्गारा० चन्द्रगुप्तोक्तिः "न चारितं प्रतिविधा तुम्" तत्रैव चाणक्योक्तिः।

अद्+आदरे विश्वासे च। "अद्धाति च दृष्ट्वेह न साक्षात्" नैष०।

सम्+सम्यग्विधाने योजने क्षेपणे अभिसन्धौ। "मनस्येतानि सन्धाय मनसा सम्यगारवेत्" भा० आश्व० ४२ अ०। "यथा स्थाणौ वासः संदध्यात्" ऐ० ब्रा० ८२।४८। "धनुष्यभीषं समधत्त सायकम्" कुमा०। "संदधे धनुषि वायुदैवतम्" रघुः। "भवति कृतसन्धानमिव तत्" शकु०। लेखने "सकृद्दृष्टं यो हि लिखं पुनः सन्धातुमिच्छति" चाणक्यः।

अति+सम्+अतिशयेन शस्त्रादिना व्यथने संयोजने। "त्वया चन्द्रमसा च विद्वत्तमीयाभ्यामतिसन्धीयते जामिजनार्थः" शकु०।

अनु+सम्+अनुसन्धाने विचारजन्यज्ञानभेदे अनुचिन्तने "आर्षं धर्मोपदेशञ्च वेदशास्त्राविरोधिना। यस्तर्केणानुसन्धत्ते स धर्मं वेद नेतरः" मनुः। अन्वेषणे च "दुर्गमनुसन्धेहि" हितो०।

अभि+सम्+तात्पर्य्ये अभिप्रायभेदे। "अभिसन्धाय तु फलं दम्भार्थमपि चैव यत्" गीता। "भवन्तमभिसन्धाय जिघांसन्ति भवन्तं प्रियम्" भा०आ०२१०५ श्लो०। "आत्मानि चैव कुर्वन्ति फलाभावं सदा नराः। अभिसन्धाय पितरं पितृंश्च पितरं तथा" हरिवं०१६ अ० "गूढ़मभिसन्धिः अद्भुते" जगदीशः। "अभिसन्ध्यादिषु चैवम्" भा० शु०।

प्रति+सम्+प्रतिरूपसन्धाने। "प्रतिसन्धाय चास्त्राणि तेऽन्योन्यस्य विशाम्यते!। ससृजुः पाण्डवायैव कौरवाय महास्त्रवे" भा० भी० ७१ अ०। "यस्मात्तः प्रतिसन्धाय विध्यतः सव्यसाचिनः" भा० वि० ६१ अ०।

धाक्क त्रि० धा-ण्वुल्+क तस्य नेत्त्वम्। १धारके २ब्रह्मणि पु० मेदि०। २वधे ३व्याहारे च ५यज्ञे ६स्तम्भे च संक्षिप्त सा० उणादिवृत्तिः।

धा(घा)टी स्त्री घट्यते चिन्वतेऽत्र घट-चिन्तायां आधारे अच् गौरा० ङीष्। पृषो० घस्य घः घाटी वा तस्य पाठः। अध्यवस्यन्दने शब्दे सम्भ्रमगमने क्षेमच०।

धाणक्क पु० धा-आणक्। दीनारभागे परिमाणभेदे। उज्ज्वलद०।

धातक्क पु० धातुं करोति णिच् टिलोपः ण्वुल्। पुष्करद्वीपस्थापतेः वीतहोत्रस्य १पुत्रभेदे "तद्वीपस्याधिपतिः प्रैयव्रतो वीतिहोत्रो नाम तस्यात्मजौ रमणधातकनामानौ वर्षपती नियुक्त" भाग० ५।२०।२२। गौरा० ङीष्। (धाड्फुल्ल) २धातुपुष्पाम् राजनि०। "धातकी कटुका शीता मदजित् तुवरा लघुः। तृष्णातीसारपित्तास्र विषक्रमिविसर्पजित्" भावप्र०तद्गुणाः। ३तीर्थभेदे शिवपु०।

धातक्यादिलेह चक्रदत्तोक्ते लेहभेदे "धातकीबिल्वधन्वाकलोध्रेन्द्रयवबालकैः। लेहः सौद्रेण बालानां ज्वरातीसारवान्तिजित्" चक्र०।

धातु पु०धीयते सर्वं निःक्षिप्यते क्षुभ्नादित्वात् साधुः डुधाञ् धा-आधारे तुन्। १परमाणुनि। "स एव विद्धातुः"श्रुतिः। दधाति शब्दान्। २सर्वेषां नाम्नां प्रकृतिभूते भूपञ्चतो तस्य लक्षणविभागादिकं शब्दमहार्णवेऽस्माभिर्दर्शितं यथा

"धातुर्नाम क्रियावाचकोगणादिपठितः शब्दविशेषः क्रिया च पूर्वोक्तफलधातुकूलो व्यापार एव सर्वेषाञ्च कार-

कालान्वयोपपत्तये कालान्वयोपपत्तये च धातूनां क्रियावाचकत्वाङ्गीकारात्। तथाहि। "क्रियाभेदाय कालस्तु संख्या सर्वत्र भेदिकेति" वाक्यपदीये कालानां क्रियाभेदकत्वसङ्गतञ्च तेनैव "क्रिया नियतसाधना" इत्यादिना साधनानां क्रियाकाङ्क्षित्वं तत्र यदि धातुभिः क्रिया न बोध्येत क तदा तेषामन्वयो विशेषवत्त्वं वा भवेदतोऽवश्यं सर्वेषां क्रियावाचकत्वं स्वीकार्यं धातूनां फलमात्रवाचकत्वे आख्यातानां व्यापारार्थकत्वे ह्रदादिस्थले आख्याताभावेन कारकान्वयानुपपत्तेः नापि क्रियामात्रवाचकत्वं त्यजिगम्योः पर्यायतापत्तेः। तथाच फलवाचकत्वञ्च तेषां प्रायोगिकपाठे एव उक्तत्वात् न तदंशे विवादः। किन्तु फलावच्छिन्नक्रियायाः पृथक्शक्त्या विशिष्टशक्त्या वा धात्वर्थत्वाभावे सकर्मकाकर्मकविभागोच्छेदः स्यात् स्याच्च फलमात्रधात्वर्थत्वे सर्वेषां कारकाणां तत्रानन्वयः तत्रैव कालान्वयोपगमे च व्यापारविगमकालेऽपि फलसत्त्वेन वर्त्तमानत्वादिप्रयोगापत्तिः। अतोऽवश्यं क्रियावाचकत्वं स्वीकार्यमतएव "धातोरर्थः क्रियोच्यते" इत्यनेन धात्वर्थत्वेनैव क्रियात्वस्वीकारः। अतएव च "भूवादयोधातवः" इतिपाणिनीयसूत्रमपि क्रियावाचकत्वं धातुमात्राणां प्रतिपादयति। तथाहि भूश्च वा च भूवौ आदिरादिश्चादी भूवौ आदी येषां ते धातवइति तथा चात्र प्रथम आदिशब्दोव्यवस्थावाची भूधा सह तदन्वयात् भूप्रभृतयइत्यर्थलाभः द्वितीयआदिशब्दः सादृश्यवाची वाधातुना तदन्वयेन वासदृशा इत्यर्थलाभः तत्सादृश्यञ्च क्रियावाचित्वेन वाधातोर्गत्यर्थतया क्रियावाचित्वप्रसिद्धेश्चया च भूप्रभृतयः क्रियावाचित्वेन वासदृशा धातव इत्येव फलितम्। भवत्यादित्वं गणपाठापेक्षया तस्य च क्रियावाचकत्वं पूर्वोक्तयुक्तेरिति संक्षेपः। अत्र क्रियावाचित्वात्तौ गणपठितत्वेन सर्वनामाव्ययादीनामपि धातुत्वापत्तिः तन्मात्रोक्तौ च छिदादिव्यवानां क्रियावाचित्वेन धातुत्वापत्तिरत उभयमुक्तम्। उक्तञ्च "किन्तु क्रियावाचकतां विना धातुत्वमेव नो। सर्वनामाव्ययादीनां वादीनां प्रसङ्गतः। न हि तत्पाठमात्रेण युक्तमित्याकरे स्फुटमिति"। तत्पाठः गणपाठः। विदि अवयवे गदि वदनैकदेशे इत्यादिद्रव्यवाचिनामपि तत्साधनक्रियावाचित्वमक्षत्वे कालकारकादान्वयानुरोधात् तत्फलस्य द्रव्यरूपत्वेऽपि न क्षतिः। यद्यादीवादिपदेन फलसंसर्गावच्छेदकत्वं तेन स्तौत्यादयां स्तृभृप्रभृतीनां स्नादबोधातव इत्यादीनाञ्च प्रत्ययान्तानां धातुत्वमव्याहतमेव दर्शितयुक्तेः तत्रापि क्रियावाचित्वादेरवश्यं स्वीकाराच्च नाप्रसङ्गइति दिक्।

ते च सर्वेऽपि धातवः सकर्मकाकर्मकभेदेन द्विविधः। तत्र व्यापाराधिकरणफलावृत्तिफलवाचकः सकर्मकः पचादेः व्यापाराधिकरणावृत्तिविक्लित्तिरूपफलस्य बोधकतया सकर्मकत्वं कर्तृकर्मोभयनिष्ठफलबोधकत्वापि गम्यादेः व्यापाराधिकरणफलावृत्तिफलबोधकतया सकर्मकत्वम्। भूप्रभृतीनां तु व्यापाराधिकरणफलावृत्तिफलबोधकतया न सकर्मकत्वं फलस्य सत्तायास्तत्सम्बन्धरूपव्याश्रयस्यैकस्मिन्नेव धर्मिणि घटादौ सत्त्वात्। उक्तञ्च वाक्यपदीये "आत्मानमात्मना विभज्योति व्यपदिश्यते। अन्यभावाच्च तेनासौ कर्मणा न सकर्मकः" इति। अस्यायमर्थः आत्मानं स्वरूपं विभज्य आत्मधारणानुकूलव्यापारात्मवः अस्तीविपदेन समानाधिकरणतया व्यपदिश्यते तद्भेदबोधनाय तिङादिकं प्रयुज्यतेइति यावत् तेनात्मनात्मरूपेण कर्मणा धारणकर्मणा धातुः न सकर्मकः। अत्र हेत्वन्तभावाच्च धात्वर्थ एव तस्य कर्मणः प्रवेशाच्च आत्मधारणानुकूलव्यापाररूपधात्वर्थेनात्मनउपसंग्रहादित्यर्थः। अथ वा अन्तरेव व्यापाराधिकरण एव भावात् फलस्य सत्त्वात् व्यापारसामानाधिकरण्यादित्यर्थः तेन भुवादेरत्यन्तानुकूलव्यापारवाचितया धात्वर्थीयसंसृष्टीतकर्मकत्वाभावेऽपि फलसमानाधिकरणव्यापारवाचित्वादकर्मकत्वम्। अतएव "फलव्यापारयोरेकनिष्ठतायामकर्मकः। धातू स्वयोर्धर्मिभेदे सकर्मकवदाहृत" इति फलसामानाधिकरण्यादिलताकर्मकसकर्मकविभागोऽभिहितः। एकनिष्ठतायामेकमात्रवृत्तितायामित्यर्थः तेन गम्यादेर्व्यापाराधिकरणावृत्तिफलवाचित्वेऽपि नाकर्मकत्वमिति धर्मिभेदेऽधिकरणान्तत्वे इत्यर्थः। एवमेव शब्दकौस्तुभकारादयः। एतन्मते सकर्मकाकर्मकशब्दौ पारिभाषिकाविति द्रष्टव्यम्। मञ्जूषाकृतस्तु "कर्मणा सहेति नास्ति कर्म यस्येति व्युत्पत्त्या सकर्मकाकर्मकशब्दौ यौगिकौ अत्र साकाङ्क्षित्वं तदन्वितस्वार्थबोधकत्वम् अन्वयश्च पृथक्पदोपस्थाप्ययोः सम्बन्धरूपोआकाङ्क्षया जीवत्यादीनां प्राणधारणानुकूलव्यापारार्थकतया तत्कर्मणः प्राणादेर्धात्वर्थमध्यपाताच्च न सकर्मकत्वं धात्वर्थीयसंसृष्टीतकर्मकत्वे नाकर्मकत्वात्। कर्म च व्याकरणया-

क्षीरपरिभाषाविशिष्टकर्मसंज्ञाविशिष्टमुच्यते तेनाधिश्रयत्यत्र प्रासादस्थाद्यौ कर्मणि डकारोपपत्तिः अधिश्रेतेः कर्मसंज्ञाविशिष्टान्वितस्वार्थबोधकत्वात् अन्यथा पूर्वसूत्रे तस्य फलसमानाधिकरणव्यापारबोधकतयाऽकर्मकत्वेन "भावे चाकर्मकेभ्यः" इति भाव एव डकारापत्तेः। भवति च पक्वं गच्छतीत्यादौ गत्यादिः धैर्यशिततमत्वेन कर्मसंज्ञकविशिष्टेन पृथग्भूतेन यामेषान्वितं स्वार्थं बोधयन् सकर्मकः, अधिश्रयतिस्तु अधिकरणत्वेन कर्मसंज्ञाविशिष्टेनेति विवेकः" इति प्राहुः। युक्तश्चैतत् धात्वर्थोपसर्जनीभूतकर्मकार्थां व्यापारश्रयाधिकरणफलवाचितया पूर्वकर्त्रे सकर्मकत्वापत्तेः तत्तद्विशेषत्वेन निवेशे गौरवं तस्य कर्मणोऽविवक्षायां गत्यादेरपि अकर्मकत्वस्वीकारेण अविवक्षाविशिष्टत्वेन निवेशे गौरवञ्च। एतन्मते तु कर्मणाभावादेव तदन्वितस्वार्थबोधकत्वाभावाद्धात्वर्थकर्मफलाश्रितिरिति सूक्ष्ममीक्षणीयम्। अत्र पक्षे अकर्मकस्तु तदन्वितस्वार्थबोधकइति बोध्यम्।

सकर्मकाश्च द्विविधाः एककर्मका द्विकर्मकाश्च। एककर्मान्वितस्वार्थबोधकाः गत्यादयः एककर्मकाः। द्विकर्मकाश्चापि द्विविधाः द्विकर्मान्वितैकव्यापारार्थकाः द्विकर्मान्वितद्विव्यापारार्थकाश्च। तत्राद्या दुह्यादयः। न च ते द्विव्यापारार्थकाः तथात्वे धैर्यशिततमाख्यामेव कर्मभ्यां व्यापारद्वैविध्यसम्बन्धेन द्विधीवाद्युत्पत्तौ "अकथितञ्चे"ति सूत्रेण दुह्यादीनां कारकान्तरसंज्ञानायत्नस्याकथितस्य कर्मसंज्ञाविधानानौचित्यात्। दर्शयिष्यते च दुह्यादीनामेकव्यापारार्थकता। यदा पुनः क्वचिं द्विव्यापारार्थकता विवक्षिता तदा धैर्यशिततमसूत्रेणैव कर्मसंज्ञायां जातायां द्विकर्मान्वितद्विव्यापारार्थका एव ते विज्यादिवदिति बोध्यम्। द्विकर्मान्वितद्विव्यापारार्थकाश्च विज्यादयः तत्र च धात्वनुपात्तेन एकव्यापारोऽभिधीयते इतीयस्तु विशेषः, तद्व्यापारद्वये च धैर्यशिततमत्वेन प्रयोज्यकर्तृरूपकर्मणश्च यथाक्रमसम्बन्धः। अयमत्रत्यः गत्यादीनामपि बोध्यः। पाच्यादीनां तु नैवं, तद्योगे प्रयोज्यकर्तुः कर्मसंज्ञायामेव व्यापारद्वैविध्यसम्बन्धाभावात्। नच पाच्यादेः क्रियाफलाश्रयत्वेनोद्देश्यतया प्रयोज्यकर्तुः कर्मसंज्ञा भविष्यतीति गत्यादिद्वारयोगेनैव तद्विधेयमात्। उक्तञ्च हरिणा "शुद्धक्रियायां स्वातन्त्र्यं प्रधाने कर्मतां गतम्। नियमात् कर्मसंज्ञायाः स्वर्गेणाभिधीयते" इति। किन्तु गतिबुद्धिप्रत्यवसानार्थशब्दकर्मकाणामकर्मकाणाञ्च णेरनुपसर्गात्" इति सूत्रे भाष्ये "अकर्मकाणां कर्तृसंज्ञा कर्मसंज्ञा च दृश्यते" इति कैयटेन गत्यादीनां कर्मसंज्ञाया उक्तत्वात्। अत्र केचित् "गत्यादीनां कर्मसंज्ञा तु न भवति, तेषां धैर्यशिततमत्वाभावात्। न च तेषां कर्मसंज्ञाविधानं व्यर्थं, तेषां कर्मसंज्ञायां सत्यां तत्कर्मणः प्रयोज्यकर्तुः कर्मसंज्ञाविधानार्थत्वात्" इति वदन्ति। तन्न, "कर्तुरीप्सिततमं कर्म" इति सूत्रे "कर्तुः क्रियाव्याप्यं कर्म" इति भाष्यात्। तत्र हि "कर्तुः क्रियया यदाप्तुमिष्टतमं तत्कारकं कर्मसंज्ञं भवति" इति कैयटः। अत्र च क्रियाव्याप्यत्वं फलाश्रयत्वं, तच्च गत्यादीनामपि। अत एव "गत्यर्थाकर्मके"ति सूत्रे "गत्यर्थानां कर्मसंज्ञा वक्तव्या" इति वार्तिकं भाष्ये प्रत्याख्यातम्

रूपेणान्वयविवक्षया यस्य कर्मसंज्ञा तेन रूपेणान्वयविवक्षाभावः। तत्र क्वचित् कर्मत्वोऽविवक्षया यथा पच्यते दत्यादौ, क्वचिच्च कर्मत्वविवक्षया यथा मातः स्मर्यते दत्यादौ। अत्र मातः कर्मत्वेनैव स्मरणान्वये कर्मसंज्ञा न पुनः सम्बन्धत्वेन, तथा विवक्षाभावेन कर्मणि षष्ठीविधानात् स्मरणादेः कर्मान्वयसत्त्वेऽपि कर्मत्वेन तदन्वयाभावात्कर्मकत्वं तेन भावे क्तकारादय इति बोध्यम्। क्वचित्तु कार्यग्रहणविवेक्षावाभविवक्षा यथादिवचा। यथा कृतपूर्वी कटम् सुकृपूर्वी ओदनमित्यादौ। तथाहि कृतं पूर्वमनेनेति विग्रहे तत्कृतमनेनेति पूर्वकृतादिनिमयमुक्ते कृपूर्वीत्वे विद्यमान पूर्वेण पूर्वशब्दादपि इनिर्विहितः तत्र यदि कृतमिति कर्मणि क्तः स्यात्तदा तस्य कटादिरूपकर्मविशेषणतया सापेक्षत्वेन समासादिवृत्तिर्न स्यात् एकत्र विशेषणत्वेनोपस्थितस्यान्यत्र विशेषणतयान्वयायोगात् इत्थिताम जायते भाव्यादिषु तथाप्रयोगाद्दोऽवश्यं प्रथमं कर्माविवक्षयाऽकर्मकत्वेन भावि क्रियत्वे विक्षिते तदन्तेन पूर्वादिभिः सुपसुपेति समासे च कृते कृतपूर्वात् पूर्वशब्दात् कर्तरि इनिप्रत्ययोभवति। पश्चाच्च कर्तृकृतक्रियायाः कर्मविशेषाकाङ्क्षायां कटादिकर्मणोऽन्वयः। उक्तञ्च हरिणा "अकर्मत्वे सत्येव ज्ञाने भावाभिधायिनि। पश्चात् क्रियावता कर्त्रा योगो भवति कर्मणाम्। अविग्रहा गतादिस्था यथा यामादिकर्मभिः। क्रिया सम्बध्यते सद्भिः कृतपूर्व्यादिषु स्थितेति"। क्रियावच्चेनेन क्रियाद्वारैव कर्मणोऽन्वय इति द्योतितम् क्रियायाश्च क्तिशब्दैकदेशतयाऽनन्वयशङ्कायामाह्याविग्रहेति। नास्ति विग्रहेण षष्ठ्युक्तानं यस्याः सा पृथगुपस्थित्यभावेन ज्ञातृमगत्यर्थः गतादिस्था कर्तृबोधकनिष्ठानन्तगतपदोपस्थाप्यसमनकर्तृरूपार्थप्रविष्टापि यथा यामं गतदत्यादौ विभिन्नपदोपात्तैरपि यामादिकर्मभिः क्रिया सम्बध्यते तथेत्यर्थः समुदायशक्तिस्वीकारे एकदेशान्वयाभ्युपगमादवयवशक्तिस्वीकारे तु तदनुपगमे क्तान्तभावादिति भावः। कृतपूर्व्यादिष्विवादिपदेनाध्वरेष्विष्टोत्यादयोऽत्रान्ते तत्रापि इष्टादिभ्यश्चेत्यनेन कर्तरि इनिविधानात्। अतएव बोध्यं "निष्पत्तिमात्रे कर्तृत्वं सर्वत्रैवास्ति कारके" इत्युक्तेः कर्मणोऽपि स्वव्यापारद्वारा क्रियानिष्पत्तिहेतुत्वेन कर्तृत्वे स्थिते तद्व्यापारस्य धात्वर्थत्वविवक्षायां धात्वर्थक्रियान्वयत्वेन तस्य कर्तृत्वं समानानुपूर्वीकसंख्यार्थबोधकधातूपात्तफलाश्रयत्वेन च कर्मत्वमित्येकस्यैव कर्मकर्तृता एवञ्च तत्र धात्वोरर्थान्तरे इक्तेरेवाकर्मकत्वम्। तथाहि अत्रं पच्यते स्वयमेवेत्यादौ विक्लित्तिस्तदनुकूलो व्यापारश्च तद्विशिष्टो वा पच्यर्थः तयोः फलव्यापारयोरेकनिष्ठतया तद्बोधकधात्वोरकर्मकत्वं तेन अत्रेन पच्यते स्वयमेवेत्यादौ भावे लकारोपपत्तिः। द्विकर्मकाणान्तु एककर्मणः कर्तृत्वविवक्षया ऽपरस्याविवक्षयैवाकर्मकत्वं पचिदुहोस्तु कर्मान्तरसत्त्वेऽपि कर्मवद्भावविधानात् सकर्मकत्वं तेन तयोर्भावे क्तकारादयः किन्तु कर्मणेऽत्र तेन दुह्यते गवा दुग्धं स्वयमेवेत्यादि। एवञ्च सर्वेषामेव धातूनां कर्मणः कर्तृत्वविवक्षायां कर्मवद्भावे प्राप्ते धातुविशेषयोग एव कर्मवत्कार्यातिदेशे न सर्व धातुयोगे तेन गम्यादियोगे कर्तरि वाच्ये न कर्मवद्भावः किन्तु कर्तृवत्कार्यं भावे तु दृश्यते एव कर्मवत्कार्यम्। पच्यादियोगे तु कर्तरि भावे च वाच्ये कर्मवद्भाव इति विवेकः। उक्तञ्च "कर्मस्थेऽपि च धात्वर्थे कर्मवत्तां च कर्मवत्। कर्तृस्थेऽपि च धात्वर्थे कर्मवत्तां च कर्तृवदिति"। कर्मवत् कर्मवत्कार्यं कर्मत्वमित्यर्थः अतएव "कर्मवत् कर्मणा तुल्यक्रियः" इति सूत्रे कर्मपदेन कर्मस्थक्रिया सूचिता भाष्यकारैरेवेन कर्मस्थक्रियातुल्यक्रियावति कर्तरि कर्मवत् कार्यमित्यर्थः क्रिययोस्तुल्यत्वञ्च एकाधिकरणमात्रवृत्तित्वेन तथाच कर्मस्थक्रियया फलेन व्यापारस्य सामानाधिकरण्येन एव कर्मवद्भावविधानात् पच्यादेरुक्तधात्वर्थकतया कर्तरि कर्मवत्कार्यं, गम्यादेस्तु व्यापारस्योक्तफलसामानाधिकरण्याभावात् कर्तृस्थभावकत्वमिति विवेकः। तथा तुल्यक्रिये कर्तरीत्यभिधानेन गम्यादीनामपि भावे कर्मवत्कार्यं यामादि भवत्येव। यद्यपि सर्वेषामेवाकर्मकाणां फलव्यापारयोः सामानाधिकरण्यबोधकतया कर्मवद्भावापत्तिस्तथापि सूत्रे कर्मणा तुल्येति निर्देशात् येषां धातूनां सख्यार्थवाचिनां सकर्मकत्वं तेषामेव कर्मवद्भाव इति गम्यते अस्त्यादेः सत्तादिरूपसंख्यार्थ सकर्मकत्वाभावात् न तत्प्रसङ्गः। अस्तेस्तु आत्मनेपदानुभवार्थे कर्तृगतस्य सकर्मकत्वेऽपि तस्याश्रयसंख्यार्थे तदात्वाभावान्न प्रसङ्गः। एवञ्च सर्वेषामेव सकर्मकाणां कर्तृकर्मोभयस्वभावकत्वेनाव्यवस्थायां हरिणा क्रियाजातविशेषेण व्यवस्था दर्शिता यथा "विशेष-

दर्शनं बल क्रिया तत्र व्यवस्थिता। शब्दप्रवृत्तिरन्येषां शब्दैरेव प्रकल्पितेति"। बल कर्मणि कर्तरि वा विशेषः क्रियाजातेऽसाधारणधर्मो दृश्यते तत्रैव क्रिया व्यवस्थितेत्यर्थः भावकर्मणोः फलव्यापाररूपयोः क्रिययोरभयनिष्ठत्वेऽपि तत्तज्जविशेषादेव तन्निष्ठत्वव्यवहार इति भावः। विशेषश्च द्विविधः धात्वपस्थाप्यश्च तदनपस्थाप्यश्च तत्राभ्यर्हितत्वेन उपस्थितत्वेन च धात्वपात्तविशेषस्यैव प्रथमं ग्रहणं तदप्राप्तौ तु अपरस्येति विवेकः। तेन पच्यादयः स्वोपस्थाप्यस्य कर्तृमेदेनाऽसाधारणधर्मस्य व्यापाररूपक्रियाजातस्य विक्लित्तिरूपफलस्य बोधकाः कर्मस्थभावकाएव गम्यादयस्तु नैवं तदुपस्थाप्यफलस्य संयोगादेरुभयनिष्ठतया साधारण्यात् धात्वनुपस्थाप्यविशेषात्त्वात् धात्वनुपस्थाप्यस्य क्रियाजातस्य श्रमादिरूपस्यासाधारणधर्मस्य ग्रहणं तस्य च कर्तरि दर्शनात् कर्तृस्थत्वम्। एवञ्च कर्तृस्थादिविभाग एतन्मते न्यायमूल एव। अन्येषां मते पुनः शब्दप्रवृत्तिः कर्मस्थक्रियार्थं प्रवृत्तिः शब्दैरेव नियामकशक्तिरेव प्रकल्पितेति द्रष्टव्यम्। तच्च शास्त्रं यथा "कर्मस्थाः पचतेर्भावः कर्मस्थाच्च भिदादयः। कर्तृस्थो बुद्ध्यतेर्भावः कर्तृस्थाच्च गमादयः" इति कर्मस्थाः कर्मस्थक्रियार्थका इत्यर्थः; एवमन्योऽपि। सम्प्रदायविदस्तु एतच्छास्त्रमपि न्यायमूलकं पूर्वोक्तरीत्या एतेषां कर्मस्थत्वादिव्यवस्थापनात् अन्यथा प्रातिस्विकरूपेण तद्ग्रहणस्य कर्तुमशक्यत्वाऽव्यवस्थापत्तेरित्याहुः। एवञ्च क्रियाजातविशेषेणैव क्रियाव्यवस्थेति पक्षमवलम्ब्य "निर्वर्त्ये च विकार्ये च कर्मत्वभाव इष्यते। तत्र प्राप्ये कर्मणि तु सिद्धान्तोऽयं व्यवस्थितः" इत्यभियुक्तैर्व्यवस्था भङ्ग्यन्तरेण दर्शिता। तथा च निवर्त्यविकार्ययोरेव क्रियाजातस्य चतुष्पत्त्यादिरूपस्य विशेषस्य सत्त्वात्, प्राप्ये तदसत्त्वाच्च तेषु कर्मत्वाभावो बोध्यो। "क्रियाजातविशेषाणां सिद्धिर्यत्र व तिष्ठति" इत्यधिकप्राप्यकर्मलक्षणे प्राप्यस्य क्रियाजातविशेषाभावकथनात् व्यतिरेकेण निर्वर्त्यविकार्ययोस्तत्सत्त्वमर्थादायातमित्यन्ये विदुरेव। अनन्तधात्वनां धात्वर्थैक्यार्थकत्वेन कर्तृस्थत्वेऽपि तत्प्रकृतीभूतधात्वोरेव कर्मस्थकर्तृस्थभावकतया व्यवस्था तत्प्रकृतेराख्यानेपदादिना तदाख्यातानेपदादिवदिति द्रष्टव्यम्' बोधस्तु कर्मकर्तरि कर्तरीव यथा ओदनः पच्यते स्वयमेवेत्यादौ ओदनाभिन्नैकाश्रयकविक्लित्यनुकूलस्वाख्यातादिसंयोगरूपोव्यापारः। अपरे तु कर्तुराश्रयांशे विशेषणत्ववत् व्युत्पत्तिवैचित्र्येण फलेऽपि विशेषणत्वमङ्गीचक्रुरङ्गीचक्रुश्चात्र नामार्थधात्वर्थयोरपि साध्यत्वमयम्। वस्तुतस्तु तिङर्थाश्रयस्यैव व्युत्पत्तिवैचित्र्येणोभयत्रान्वय इति द्रष्टव्यम्, अकर्मकत्वेन प्रसिद्धाः सत्तादयोऽर्था अभियुक्तैरन्यत्र संदृब्धा यथा "सत्ताजीवनदर्पभीतिशयनक्रीडानिवासक्षयाव्यक्तध्यानभोगगतिस्थितिजराच्छ्राप्रमादोक्षे। मोहे खेदनवेगयुद्धदहनख्यातिश्चरोत्थादके शुद्धिखेदपलायनभ्रमणकेधानौ द्रुतौ सज्वने। द्रष्टौ जागरशोषवक्रगमनोत्साहे स्मृतौ संशये स्थानौ मन्दमतौ च म्लपयतने चेष्टाक्रुधौ रोदने। दृक्षौ क्षावणतौ च सिद्धिविरतौ वर्षोपवेशे बले कम्पोद्वेगनिमेषभक्षयतनार्थे धातवोऽकर्मकाः। दौर्बल्यादिषु चार्थेषु वर्त्तमानास्तु धातवः। वाचका भावमात्रस्य यतस्तस्मादकर्मकाः। कौटिल्यादिषु चार्थेषु भोक्तारो ये ते तु धातवः। तद्भावेऽकर्मकाः स्युस्तद्वत्त्वात्तु सकर्मकाः। क्रियावाचित्वमाख्यातं प्रसिद्धोऽर्थः प्रदर्शितः। प्रयोगतोऽन्ये मन्तव्या अनेकार्था हि धातवः" इति। १व्यक्ताद्यादिमहाभूतेषु ४इन्द्रियेषु ५शब्दाद्याकाशादिगुणेषु। ६देहस्थेषु "रसासृङ्मांसमेदोऽस्थिमज्जाशुक्राणि धातव इत्युक्तेषु ७रसादिषु। ७मनःशिलाद्यस्विकारे। ८कफादौ अमरः। सुश्रुतस्तु "ते धातवोऽपि विदङ्गिमेदिता देहप्रधारणाय। विसर्गादानविधैः सोमसूर्यानिला यथा। धारयन्ति जगद्देहं कफपित्तानिलास्तथेति"। ९व्यक्ते। १०स्वर्णादौ तत्राष्टधातवो यथा "स्थिरण्यं रजतं कांस्यं ताम्रं सीसकमेव च। रङ्गमाक्षरैश्चैव धातवोऽष्टौ प्रकीर्त्तिता" इति दानसागरः। "सुवर्णं रजतं ताम्रं रौद्रं कृष्णञ्च पारदम्। रङ्गञ्च सीसकञ्चैव दृश्यन्ते देवसम्मताः" इति वैद्यकम्। सप्तधातवो यथा। "स्वर्णं रूप्यञ्च ताम्रञ्च रङ्गं यस्तदमेव च। सीसं लोहञ्च सप्तैते धातवो गिरिसम्भवाः" इति भावप्र०। "बद्धोपवितस्थविलकाक्षोवल्लशरासवान्। निधार्य देहं दधति स्वर्णा तद्धातवो यथा। "सुवर्णरूप्य ताम्राणि क्षरितालमनःशिला। गैरिकाञ्जनकाक्षीवसीसलोहाः सकङ्कुलाः। गन्धकोऽभ्रकमित्याद्या धातवो गिरिसम्भवाः"। नव धातवो यथा "हेमतारारनागाख्य ताम्ररङ्गे च सीसकम्। कांस्यं कान्तलौहञ्च धातवो नव कीर्त्तिताः"। माक्षिकं तुत्थिकाभ्रे च नीलाञ्जनशिलाऽस्रकाः। रङ्गकर्षेति

विज्ञेया एते सप्तोपधातवः। शरीरस्थसप्तधातुभवत्वात् सप्तोपधातवो यथा। "क्षत्वं रजश्च नारीणां काले भवति गच्छति। शुद्धमांसभवस्नेहो यः सा सङ्घीर्त्यते यथा। स्वेदोदन्तास्तथा केशास्तथैवौजश्च सप्तमम्। इति धातुभवाश्चैवा एते सप्तोपधातवः" इति सुश्रुतबोधः। ११लोकेषु १२वस्तुनि शब्दार्थचि०।

रसादेर्धातुवाच्यतायां निरुक्तिस्तत्कर्माणि च भावप्र० उक्तानि यथा "एते सप्तरयं स्थित्वा देहं दधति यद्गुणाम्। रसासृङ्मांसमेदोऽस्थिमज्जाशुक्राणि धातवः। प्रीणनं जीवनं लेपः स्नेहो धारणपूरणे। गर्भोत्पादश्च कर्माणि धातूनां कथितानि च। रसादीनां धातूनां क्रमेण प्रीणनादिकर्माणीति बोध्यम्। एतेषाञ्च पूर्वपूर्वोत्तरोत्तरहेतुत्वं तच्च कायशब्दे १६०८ पृ० दर्शितम्। उपधातवः तद्गुणाश्च भावप्र० अन्यथोक्ताः यथा

"सप्तोपधातवः स्वर्णमाक्षिकं तारमाक्षिकम्। हरितं कांसकञ्च रीतिश्च सिन्दूरं च शिलाजतु। उपधातुषु सर्वेषु तत्तद्धातुगुणा अपि। सन्ति किन्त्वेषु तेऽल्पोनाल्पतदंशाल्पभावतः"। तत्र स्वर्णादिधातौ "दह्यन्ते ध्मायमानानां धातूनां हि यथा मलाः" मनुः। उपधातवश्च गौणधातवस्तेन तत्रापि धातुशब्दप्रवृत्तिः। अतएव उपधात्वभिप्रायेण गैरिकादीनां धातुशब्दवाच्यता दृश्यते यथा "न्यस्ताक्षरा धातुरसेन यत्र" "अक्षुब्धसन्ध्याभिव धातुमत्ताम्" कुमा०। "यद्वर्णयन्ति तत् कूटानु यद्भूतैर्धातुरेणुभिः" रघुः। "त्वामालिख्य प्रणयकुपितां धातुरागैः शिलायाम्" मेघ०। "अद्रीणामिव कूटानि धातुरत्नानि रेरते" भा० आ० १६ अ०। १२देहादिधारके आत्मनि "स्त्रीपुंसयोस्तु संयोगे विशुद्धे शुक्रशोणिते। यच्च धातून् स्वयं षड्भः आदत्ते युगपत् प्रभुः" याज्ञ०। "यच्च धातून् पृथिव्यादिपञ्चभूतानि शरीरारम्भकतया षड्विधातुरात्मा प्रभुः शरीरारम्भकाष्टकर्मयोगितया समर्थः युगपदादत्ते भोगायतनत्वेन स्वीकरोति" मिता० आकाशादौ "तदव्ययमनुद्रिक्तं सर्वव्यापि ध्रुवं स्थिरम्। नवद्वारं पुरं विद्यात् त्रिगुणं पञ्चधातुकम्" भा० आश्व० २६ अ०। "भूतेषु धातवः पञ्च ब्रह्मा तानसृजत् पुरा। आहृता यैरिमे लोकाः सहभूतानिसंज्ञिताः" भा० आ० १८३ अ०। "यन्मथितं क्षेधा विधीयते तच्च यः स्रवितो धातुरुक्तः पुरीषम्" सा०उप०। प्रकृतौ "धातोः स्थाने इवादेशे इवीव संज्ञावेशवत्"। "अवेक्ष्य धातोर्गमनार्थमर्थवित्" रघुः। रसादौ "शरीरधातवो दृश्य मांसं रुधिरमेव च। नेदृग्रूपं क्वचिन्नित्यं दृश्यते न च भक्ष्याद्यदृश्यते" भा० व० २८६ अ०। परमेश्वरे "अनादिनिधनो धाता विधाता धातुरुत्तमः" विष्णुस०। धातुर्विरिञ्चो रत्नेश इति वा नामद्वयं कार्यकरणात् प्रपञ्चधारणात् वा चिद्धातुः" भा०। "वायुं पूर्वमयो स्रष्टा यो धातुर्धातुसत्तमः। धारणाद्धारणत्वञ्च धन्ये लोकसंश्रितम्" हरिवं० २० अ०। केशमुखधातौ "काकपदमक्षिका केशधातुयुक्तानि शर्करादिरुद्धम्" सु० सं० ८० अ०। १४धारके। "अत्यं हविः सपते स्वे दमे धाः पातरिश्वागाहः" ऋ० १।७४।२। "धाः धारकम्" भा०। ५प्रकारे "त्रिधातवः परमा यस्य गावः" ऋ० १।१६०।४ "त्रिधातुः प्रपथहिभूम" त्रिधातुः त्रिप्रकारः" भा०

**धातुकासीस** न० धातुरूपं कासीसम्। कासीसे उपधाद्वयभेदे हेमच०। [२दैत्यभेदे च। २कूर्मविभागशब्दे दृश्यम्।

**धातुकुशल** त्रि० धातुषु कुशलः। १धातुक्रियायां कुशले।

**धातुक्षय** पु० धातूनां क्षयो यत्र। कासरोगभेदे।

**धातुघ्न** त्रि० धातुं स्वर्णादि हन्ति हन-टक्। १धातुनाशने शीशे २काञ्चिके न० हेमच०। तस्य पारदादिधातुमारकत्वात् तथात्वम्।

**धातुद्रावक** पु० धातुं द्रावयति द्रु-णिच्-ण्वुल्। धातुद्रुतिकारके (सोहागा) ख्याते पदार्थे पारस्करनि०।

**धातुनाशन** त्रि० धातुं नाशयति नश-णिच् ल्यु। स्वर्णादिधातुमारके २काञ्चिके न० त्रिका०।

**धातुप** पु० धातुं पाति रक्षति पा-क। रसरूपे प्रथमधातौ शब्दच०। "आरुह्य धमनीर्गत्वा धातून् सर्वानयं रसः। पुष्णाति, तदनु स्त्रीर्यान्प्रेति च ततुं गुणैः" भावप्र० तस्य सर्वधातुपोषकत्वोक्तेस्तथात्वम्। "रसस्तु हृदयं याति समानमरुतेरितः। स तु व्यानेन विक्षिप्तः सर्वान् धातून् विवर्द्धयेत्। केदारेषु यथा कुल्याः पुष्णन्ति विविधौषधीः। तथा कलेवरे धातून् सर्वान् वर्द्धयते रसः" भावप्र०।

**धातुपाठ** पु० धातूनां पाठो यत्र धातवः पठ्यन्तेऽत्र आधारे घञ् वा। पाणिन्यादिप्रणीते धातूनामर्थबोधकग्रन्थभेदे। "धातुपाठैः स्वदाद्यक्रमादन्यादिसक्रमः "धातवः पठिताः पाठैस्तत्तोऽगमस्थिताः" इति च कविकल्पद्रुमः। एवं पाणिनीयः भूवृत्तायागिल्यादिधातुपाठोऽन्येषः।

**धातुपारायण** पु० धातूनां पारायणं यत्र । धातुप्रतिपादकग्रन्थभेदे ।

**धातुपुष्पी** स्त्री धातुरिव पुष्पं यस्या जातित्वात् ङीप् । (धाइफुल) ख्याते धातुपुष्प्यां भावप्र० । बहु० वा कप् अत इत्त्वम् । धातुद्वयिकाऽप्यत्र शब्दरत्ना० । धातकीशब्दे तद्गुणा दृश्याः । [ इत० । पर्वते त्रिका० ।

**धातुभृत्** पु०धातुं गैरिकादिरसरूपधातुं बिभर्त्ति भृ–क्विप् तुक्

**धातुमल** पु० इत० । धातूनां रसादीनां पाकतो जायमाने केशादौ कफपित्तमलाः केशः श्मश्रूदो नखरोम च । नेत्रविट् चक्षुषः श्लेष्मा धातूनां क्रमशोमलाः" सुश्रुतः । शुक्रस्य तु मलोनास्ति यतोऽत्र भावप्र० ।

"ज्ञाग्निभिः पच्यमानेषु मलाः षट्सु रसादिषु । षटसु धातुषु जायन्ते मलानि मुनयो जगुः । यथा सङ्घर्षणाद्धाने न मलं किञ्चन जायते । तथा रसे सुखः पक्वे न मलं शुक्रतामृते" । "आर्त्तवस्य रसः सारः सारस्त्रीणो मलद्रवः । विरामित्तच्चलं नीतं वस्तौ मूलत्वमाप्नुयात्" भावप्र० । अष्टकरशब्दे ५५९ पृ० तत्पाकप्रकारो दृश्यः ।

**धातुमाक्षिक** न० धातुरूपधातुरूपं माक्षिकम् । माक्षिके उपधातुभेदे राजनि० ।

**धातुमारिणी** धातुं मारयति मृ–णिच्–ल्युनि ङीप् । (सोहागा) सर्जिकायां शब्दच० ।

**धातुराजक** न० धातुषु राजते राज–ण्वुल् धातूनां राजा टच्समा० स्वार्थे क वा । शुक्रे तस्य च सर्वधातूनां चरमत्वात् तथात्वम् ।

**धातुवल्लभ** न० इत० । टङ्कणे राजवल्लभः ।

**धातुवादिन्** धातुं वदति उपायान्तरेण कर्त्तुं शक्यमे कौशलभेदेन रसायनादिना स्वर्णरौप्यादिकरे वेदा० ।

**धातुवैरिन्** पु० इत० । गन्धके शब्दच० ।

**धातुश्रेखर** न० धातूनामुपधातूनां श्रेखरमिव । काशीसे उपधातुभेदे हेमच० । [(खड़ि) वेदा०

**धातूपल** पु० धातुरूपधातुरूप उपलः । कठिनिकायां

**धात्र** त्रि० धा–ष्ट्रन् । १धारके २पोषके ३ब्रह्मणि पु० अमरः "सूर्य्याचन्द्रमसौ धाता यथापूर्वमकल्पयत्" सन्धाकर्त्ता ४विष्णौ । "अनादिनिधनो धाता" विष्णुस० । धातृशब्दे उदा० दृश्यम् । ५आत्मनि ६वायुभेदेऽनिलशब्दे १६६ पृ० दृश्यम् । ७आदित्यभेदे आदित्यशब्दे ६८५ पृ० दृश्यम् । तत्रादित्यभेदे "कौशल्या सुषुवे रामं धातारमदितिर्यथा" रामा० बाल०८२ स० । ८ब्रह्मणः पुत्रभेदे "द्वौ पुत्रौ ब्रह्मणस्तस्य यवीयिष्ठति नश्चयम् । लोके धाता विधाता च यौ स्थितौ मनुना सह" भा० आ० ६६अ० । ९भृगुसुतभेदे "भृगुः ख्यात्यां महाभागः पत्न्यां पुत्रानजीजनत् । धातारञ्च विधातारं श्रियञ्च भगवत्परम्" भाग०४।१।२५ १०प्रजासर्गकारकेषु सप्तर्षिषु "सर्गस्येषस्य वक्तारं धातारमपि नारदम् । पुरातनाः पुराविद्भिः धातार इति कीर्त्तिताः" कुमा० ।

**धात्रपुत्र** पु० इत० । ब्रह्मणः पुत्रे सनत्कुमारे शब्दर० ।

**धात्रपुष्पी** स्त्री धात्र इदिकर्त्तुं पुष्पमस्याः ङीप् । (धाइफुल) धातक्यामे अमरः । वा कप् अत इत्त्वम् । धातृपुष्पिकातत्रार्थे अमरः ।

**धात्र** न० धीयतेऽन्नादिकमत्र धा–आधारे ष्ट्रन् । १भाजने उणादिवृत्तिः । धाता ब्रह्मा आदित्यो वा देवताऽस्य अण् २आदित्यदेवताके ३ब्रह्मदेवताके च हादशकपालसंस्कृते पुरोडाशादौ त्रि० । "स यः स धाताऽसौ स आदित्यः । अथ यत्तद्दिवं परमं व्योमेतत्तद्यदिमेऽक्षे एतत् प्रतिष्ठितमपति । स यः स धातायमेव स धात्रः हादशकपालः पुरोडाशो हादशकपालो हादश मासाः संवत्सरः संवत्सरः प्रजापतिः प्रजापतिर्धात्रा" शतब्रा०६।५।१।२८। "अनुमतिराकाशिनीवाक्कुह्वश्चरवो धात्रो हादशकपालः सर्वेऽहतः" काल्या० श्रौ० १८।६।२१ ।

**धात्री** स्त्री धीयते पीयते धेट–कर्म्मणि ष्ट्रन् धीयन्ते पुरुषार्थाः अनया वा धा–करणे ष्ट्रन्, विच्वं वा दधाति ष्ट्रन् पित्त्वात् ङीप् ह्रच् ङीष् वा । १उपमातरि (धाइमा) ।

भावप्र० धात्रीलक्षणादि "धीताय (पानाय) यदि बालस्य विदध्यादुपमातरम् । सविचार्य्य गुणान् दोषान् कुर्य्याद्धात्रीं तदेदृशीम् । सवर्णां मध्यवयसं सच्छीलां सुदितां सदा । गुडदुग्धान्नभक्षीरां सवत्सप्रसवित्सवाम् । स्नाधीनामलसन्तुष्टां कुलीनां बध्यबालजाम् । कैतवेनापरिज्ञातां निजपुत्रवदं शिशौ । अथ निन्दितां धात्रीमाह । शोकातुरा क्षुधार्त्ता च चाला ध्याधिमती सदा । अत्युच्चानितरां नीचा स्थूलातीव कृशाङ्गना । गर्भिणी क्षरिणी चापि बन्ध्योच्छ्वासप्रबोधरा । अजीर्णभोजिनी चापि तथा पक्षयविवर्जिता । आसक्ता क्षुद्रकार्य्येषु दुःखार्त्ता चञ्चलापि च । एतासां स्तन्यपानेन शिशुर्भवति रोगयुः । अथ बालस्य स्तन्यपानविधिः । तत्र माता प्रथमाङ्गो धात्रपक्षा पुत्रोत्सुकी । उपविश्यासा-

स्ने सम्यग्दक्षिणं स्तनमङ्गुना। प्रक्षाल्येषत् परिस्राव्य मन्त्राभ्यामभिमन्त्रितम्। उदङ्मुखं शिशुं क्रोडे शनैः सन्धार्य पाययेत्। मातेवोपलक्षणं धात्री च ईषत्-परिस्राव्य। अन्यथा वैगुण्यमाह सुश्रुतः। अक्षालितं स्तनं बालः पिबन् स्तन्येन भूयसा। पूर्णकोष्ठो वमीकाय श्वासैर्भवति पीड़ितः। अभिमन्त्रणमाह। क्षीरनोर-निधिस्तेऽस्तु स्तनयोः क्षीरपूरकः। सदैव सुभगो बालो भवत्वेष महाबलः। पयोऽस्तसमं पीत्वा कुमारस्तो शुभानने। दीर्घमायुरवाप्नोतु देवाः प्राणामृतं यथा। मन्त्रो च पितृस्थानेन ब्राह्मणेन पठनीयो। यावत् मन्त्र पाठस्तावन्मात्रा धात्र्या वा दक्षिणकरेण सूर्यः कार्य्यः" "उवाच धात्र्या प्रथमोदितं वचः" रघुः। "धात्र्-ङ्गुलीभिः प्रतिसार्य्यमाणः" कुमा०। २चितौ च तस्या विश्वधारणात्। "मेखलेव स्थिता धात्र्या देवासुर-विभागजत्" भट्ट० शि०। ३धारणकर्त्र्यां स्त्रियां। ४आमलक्यां च मेदि०। तस्याः धारणादेः पुरुषार्थ-साधनत्वात् तथात्वम्। आमलकीशब्दे ७६४पृ० तद्गुणा उक्ताः। तस्या उत्पत्तिर्माहात्म्यञ्च पाद्मोत्तरख० १२७ अ०उक्तं यथा "अथ विप्रेभ्यो बीजेभ्यो वनस्पत्यः स्त्रियोऽभवन्। धात्री च मालती चैव तुलसी च नरोत्तम!। स्वधाभवा सुता धात्री मालती मालती तथा। गौरी-भवा च तुलसी तमःसत्त्वरजोगुणा" स्थानान्तरे तत्रैवतन्माहात्म्यं यथा "शृणुष्व धात्रीमाहात्म्यं सर्वपापहरं शुभम्। यत् पुरा हरिणा प्रोक्तं वशिष्ठं प्रति नारद!। धात्री वत्स! नृणां धात्री मातृवत् कुरुते कृपाम्। दद्यादायुः पयः पानात् स्नानाद्वै धर्मसञ्चयम्। अलक्ष्मीनाशनं सद्यो-ऽघ्नन्ते निर्वाणमेव च। विघ्नानि नैव जायन्ते धात्री-स्नानेन वै नृणाम्। तस्मात् त्वं कुरु विप्रेन्द्र! धात्री-स्नानं हि यत्नतः। प्रयागादपि हरेर्धाम देवत्वं प्राप्य-नारद!। यत्र यत्र सुनिश्रेष्ठ! धात्रीस्नानं समाचरेत्। तीर्थे वापि गृहे वापि तत्र तत्र स्थियः स्थिताः। धात्री-स्नानादि दिवसे यस्यास्थीनि कलेवरे। प्रक्षालितानि विप्रेन्द्र! न स याद्गर्भसम्भवः। धात्रीफलेन विप्रेन्द्र! ये नराः केशवं रक्षिताः। ते नराः केशवं यान्ति नास्य-त्वा कलेवरम्। धात्रीफलं महापुण्यं स्नाने पुण्य-तरं स्मृतम्। पुण्यात् पुण्यतरं वत्स! भक्षणे सुनि-श्रेष्ठ!। न गङ्गा न गया पुण्या न काशी न च पुष्करम्। एकैव च यदा पुण्या धात्री माधववासरे। कार्त्तिके मासि विप्रेन्द्र! धात्रीस्नानं समाचरेत्। यत् तज्जलमश्नीयात् सोऽश्वमेधमवाप्नुयात्। धात्रीफलं स्मरेद्यस्तु सदैव मुनिसत्तम!। प्राग्जन्मनि कृतात् पा-पात् मुच्यते नात्र संशयः। संस्मरेद्यस्तु धात्रीं तामङ्ग-न्यङ्गनि मानवः। मुच्यते पातकैः सर्वैर्मनोवाक्कायस-म्भवैः। धात्रीफलान्यभावाद्वामष्टमीनवमीषु च। र-विवारे च संक्रान्तौ संस्मरेत् मुनिपुङ्गव!। यस्य गेहे मुनिश्रेष्ठ! धात्री तिष्ठति सर्वदा। तस्य गेहं न ग-च्छन्ति प्रेतकुष्माण्डराक्षसाः। धात्रीस्नाने हरेर्नाम्नि जागरे हरिवासरे। जन्मबन्धो विनश्येत हयमेधा-युतं फलम्। स्नायादामलकैर्यस्तु कार्त्तिके हरिवल्लभे!। परितोषं समाप्नोति तस्य वै माधवः स्वयम्। धात्री-छायां समासाद्य कुर्य्यात् श्राद्धन्तु यो नरः!। मुक्तिं प्रयान्ति पितरः प्रसादात्तस्य वै हरेः। मूर्द्धि धात्र्यो मुखे कण्ठे देहे च मुनिसत्तम!। धत्ते धात्रीफलं यस्तु स महात्मा च पुण्यभाक्। धात्रीफलविलिप्ताङ्गो धात्रीफलविभूषितः। धात्रीफलव्रताहारो नरो नारा-यणो भवेत्। यः कश्चिदेष्यतो लोके धत्ते धात्रीफलं मुने!। प्रियो भवति विष्णोः स मनुष्याणान्तु का कथा। धात्रीफलानि यो नित्यं वहते करसंपुटे। तस्य नारा-यणो देवो वरमेकं प्रयच्छति। धात्रीफलं न मोक्तव्यं कदाचित् करसंपुटात्। य इच्छेदिप्सितान् भोगानन्ते यो मुक्तिमिच्छति। धात्रीफलव्रतं मासं कण्ठस्थां यो वहेन्नरः हि। स वैष्णवो न विघ्नेशो विष्णुभक्ति परोऽपि च। न त्याज्या तुलसीमाला धात्रीमाला वि-शेषतः। तथा रुद्राक्षमालापि धर्मकामार्थमिच्छता। यावद्भुवति कण्ठस्था धात्रीमाला नरस्य हि। तावन्-मानसि दुष्टोऽपि सदा लुठति केशवः। यावद्दिनानि वहते धात्रीमालां करे नरः। तावद्युगसहस्राणि वै-कुण्ठे वसतिर्भवेत्। सर्वदेवमयी धात्री वासुदेवमनः-प्रिया। आरोपयीया सेव्या च सेवनीया सदा बुधैः। एतत्ते सर्वमाख्यातं धात्र्या माहात्म्यमुत्तमम्। श्रोत-व्यञ्च सदा सद्भिरतुर्वर्गफलदम्" अधिकमामलकीशब्दे द्रष्टव्यम्। २जनन्यां त्रिका०। "पुनर्धात्रीं पुनर्गर्भमोजस्तस्य प्रधावति" वाग्भ०। [हृत०। आमलक्याः पत्रे।

**धात्रीपत्र** न० धात्र्या इव पत्रमस्य। तालीशपत्रे राजनि०।

**धात्रीपुत्र** पु० हृत०। उपमातुः सुते हेमच०।

धात्रीफल न० ६त०। आमलकीफले तस्य पाकविशेषगुणाः। "अङ्गारपाकस्नदयत्रसुपाचितानि सिन्धूत्थचिञ्चमरिचादिसमन्वितानि। तप्ते घृते पुनरपि प्रतिभर्जितानि धात्रीफलानि जनयन्ति हि जाठराग्निम्" वैद्यके उक्ताः।

धात्रेयी स्त्री धात्र्या अपत्यम् स्त्री स्वार्थे वा ढक् ङीप्। १धात्र्याः स्त्र्यपत्ये २धात्र्याश्च। "दूत्यः सखी नटी दासी धात्रेयी प्रतिवेशिनी" सा०द०। स्वार्थे क तत्रार्थे। "अतस्तत्स्थौ चन्द्रन्तु प्रभाटाद्दीचते यदि। पठेद्धात्रेयिकावाक्यं प्राङ्मुखो वाप्युदङ्मुखः" ति० त०। धात्रेयिकावाक्यञ्च "सिंहः प्रसेनमवधीत् सिंहो जाम्बवता हतः। सुकुमारक! मा रोदीस्तव ह्येष स्यमन्तकः" विष्णुपु० "अन्यं हृद्यं च तं मत्वा न सा देवी जगाम ह। स्नान्तु धात्रेयिकां तस्यै हृद्याय प्राहिणोत् तदा"। "अथमत्य टदौ मूढा गूढां धात्रेयिकां मम" भा० वा० १०५ अ०।

धात्र्यरिष्ट पु०"धात्रीफलसहस्रे द्वे पीडयित्वा रसं भिषक्। चौद्राष्टभागं पिप्पल्याचूर्णार्द्धकुडवान्वितम्। शर्करार्द्धतुलोन्मिश्रं पक्वं स्निग्धघटे स्थितम्। प्रपिबेत् पाण्डुरोगार्त्तो जीर्णे हितमिताशनः। कामलापाण्डुहृद्रोगवातासृग्विषमज्वरान्। कासहिक्काऽरुचिश्वासानेषोऽरिष्टः प्रणाशयेत्" चक्रदत्तोक्ते धात्र्यारसपक्वे रिष्टनाम्नके पदार्थे।

धान न० धा–भावे ल्युट्। १धारणे २पोषणे च आधारे ल्युट्। ३धारणाधारे स्त्रियां ङीप् राजधानी मत्स्यधानी

धानक न० धान्याक+पृषो०। १धान्याके राजनि० २मानभेदे पु० भावप्र०। "षड्भिस्तु रक्तिकाभिः स्यात् माषको हेमधानकौ"। अत्र हेमधामकौ पाठान्तरम्।

धाना स्त्री व० व०। धा–न टाप्। (चबेरी) ख्याते १भृष्टयवे अमरः। २धान्याके ३अभिनवोद्भिन्ने अङ्कुरे ४चूर्णमङ्कुरे च मेदि०। "यवास्तु निस्तुषा भृष्टाः शुष्का धाना इति स्त्रियाम्। धानाः स्युर्जर्जरा रूक्षास्तृट्प्रदा गुरवश्च ताः। तथा मेदःकफक्लेदनाशिन्यः सक्तकीर्त्तिताः" राजनि०। "धाना मत्स्यान् पयोमांसं शाकञ्चैव न निर्णुदेत्" मनुः। स्वार्थे क धानाका तत्रार्थे व०व० शब्दर०।

धानाचूर्ण न० ६त०। सक्तुषु।

धानी स्त्री धा–आधारे ल्युट् ङीप्। १आधारे राजधानी २पीलुवृक्षे स्त्री राजनि०। स्वार्थे क धानिका तत्रार्थे "अङ्गारधानिका" अमरः।

धानुर्दण्डिक पु० धनुर्दण्ड इव तेन जीवति वेतना० ठक्। धनुरुपजीविनि धानुष्के।

धानुष्क पु० धनुःप्रहरणमस्य धनुषा जीवति वा वेतना० ठक् रक्षत्यस्मात् ठञ् वा कः। १धनुषा युध्यमाने २धनुषा जीविनि च अमरः। "पारश्वधिकधानुष्कयाक्षीकप्राश्निकान्वितौ" भट्टिः। धनुरिवावयवोऽस्य वा०ठक्। ३अयनमार्गे स्त्री शब्दच०।

धानुष्य व० धनुषि साधुः वा० ञ्य। वंशे राजनि०।

धानेय न० धानैव स्वार्थे ढक्। धान्याके राजनि० स्वार्थे क धानेयक तत्रार्थे न० जटाधरः।

धान्धा स्त्री (एलादृच) एलायां शब्दच०।

धान्य न० धाने पोषणे साधु यत्। १सतुषे (धान) ख्याते श्रीव्रीह्यादौ "शस्यं क्षेत्रयतं प्रोक्तं सतुषं धान्यसञ्ज्ञितं" श्रुतिः। धान्यवर्गः सगुणोऽभिहितो भावप्र० यथा "शालिधान्यं व्रीहिधान्यं शूकधान्यं तृतीयकम्। शिम्बीधान्यं क्षुद्रधान्यमित्युक्तं धान्यपञ्चकम्। शालयो रक्तशाल्याद्या व्रीहयः षष्टिकादयः। यवादिकं शूकधान्यं सप्तधा शिम्बिधान्यकम्। कङ्गुादिकं क्षुद्रधान्यं दशधान्यञ्च तत् स्मृतम्"। तत्र शालिधान्यस्य लक्षणं गुणाश्च "कण्डनेन विना शुक्ला हैमनाः" "शालयः स्मृताः"। अथ शालीनां नामानि। रक्तशालिः सकलमः पाण्डुकः शकुनाहृतः। सुगन्धकः कर्दमको महाशालिश्च दूषकः। पुष्पाण्डकः पुण्डरीकस्तथा महिषमस्तकः। दीर्घशूकः काञ्चनको ह्रायनो लोध्रपुष्पकः। इत्याद्याः शालयः सन्ति बहवो बहुदेशजाः। ग्रन्थविस्तरभीतेस्ते समस्ता नात्र भाषिताः"।

अथ तेषां गुणाः "शालयो मधुराः स्निग्धा बल्या बद्धाल्पवर्चसः। कषाया लघवो रूक्ष्याः स्वर्या हृद्याश्च दुर्हृद्याः। वल्यानिलकफाः शीताः पित्तघ्ना मूत्रशालया। शालयो दग्धसञ्ज्ञाताः कषाया लघुपाकिनः। सूटमूत्रपुरीषाश्च रूक्षाः श्लेष्मापकर्षणाः। कैदारा वातपित्तघ्नाः गुरवः कफशुक्रलाः। कषाया अल्पवर्चस्का मेध्याश्चैते बलावहाः"। कैदाराः जटचेलजाः उप्राः। "स्वलजाः स्वादवः पित्तकफघ्ना वातपित्तदाः। किञ्चित्क्षाराः कषायाश्च विपाके कटुका अपि। स्वलजाः ऊषटभूमिजाताः स्वयंजाता। वापिता मधुरा हृद्या बल्याः पित्तप्रशमनाः। श्लेष्मलाल्पवर्चस्काः कषाया गुरवो हिमाः"। वापिताः जटचेले ऊषटचेले

च। "वापितेभ्यो गुणैः किञ्चित् हीनाः प्रोक्ता यवापिताः"। अटचैले यवटचैले वा। 'रोपितास्तु नवा ह्रस्वाः पुराणा लघवः स्मृताः। तेभ्यस्तु रोपिता भूयः शीघ्रपाका गुणाधिकाः। स्निग्धरूक्षाः स्थिरा रूक्षा बल्याः पित्तकफापहाः। बद्धविट्काः कषायाश्च लघवश्चाल्पतिक्तकाः"।

अथ रक्तशालेर्गुणाः "रक्तशालिर्वरस्तेषु बल्यो वर्ण्यस्त्रिदोषजित्। चक्षुष्यो मूत्रलःस्वर्यः शुक्रलस्तृड्ज्वरापहः। विषप्रणष्टाग्निकासदाहक्षुद्रुग्विदोषहृत्। तस्मादल्पान्तरगुणाः शालयो महदादयः"। रक्तशालिः (दाउदखानी) इति लोके मगधदेशे प्रसिद्धः।

अथ व्रीहिधान्यस्य लक्षणं गुणाश्च। "वार्षिकाः कथिताः शुक्ला व्रीहयश्चिरपाकिनः। कृष्णव्रीहिः पाटलश्च कुक्कुटाण्डक इत्यपि। शालयश्च जतुश्चेति इत्याद्याः व्रीहयः स्मृताः। कृष्णव्रीहिः स विज्ञेयो यः कृष्णतुषतण्डुलः। पाटलः पाटलापुष्पवर्णको व्रीहिरुच्यते। कुक्कुटाण्डाकृतिर्व्रीहिः कुक्कटाण्डकउच्यते। शालाश्च; कृष्णशूकः कृष्णतण्डुल उच्यते। लालावर्णं तुषं यस्य श्वेतो जतुरुच्यते सः। व्रीहयः कथिताः पाके मधुरा वीर्यतो हिताः। अल्पाभिष्यन्दिनो बद्धवर्चस्काः षष्टिकैः समाः। कृष्णव्रीहिर्वरस्तेषां तस्मादल्पगुणाः परे"।

अथ षष्टिकानां लक्षणं गुणाश्च। "गर्भेक्षा एव ये पाकं यान्ति ते षष्टिका मताः"। अथ षष्टिकानां नामानि। "षष्टिका शतपुष्पश्च प्रमोदकसुकन्दकौ। महाषष्टिक इत्याद्याः षष्टिकाः सप्तदाहृताः। एतेऽपि व्रीहयः प्रोक्ता व्रीहिलक्षणदर्शनात्। षष्टिका मधुराः शीता लघवो बद्धवर्चसः। वातपित्तप्रशमनाः शालिभिः सदृशाः गुणैः"।

तत्र षष्टिकाया गुणाः। "षष्टिका प्रवरा तेषां लघ्वी स्निग्धा त्रिदोषजित्। स्वादी मदी सारिणी च बलदा ज्वरहारिणी। रक्तशालिगुणैस्तुल्या ततः स्वल्पगुणाः परे। षष्टिका (साठी) इति लोके।

अथ शूकधान्यानि। तेषु यवाः प्रसिद्धाः। अतियवः पीतशूकः कृष्णारुणवर्णौ यवः। लोको हरितो निःशूकः श्वेतो यवः यवेति प्रसिद्धः। तेषां नामानि गुणाश्च। "यवस्तु पीतशूकः स्यान्निःशूकोऽतियवः स्मृतः। लोकश्चहरितश्चेतः श्वेतश्च कीर्त्तितः। यवः कषायो मधुरः शीतलो लेखनो मृदुः। व्रणेषु तिलवत् पथ्यो रूक्षो मेधाग्निबर्द्धनः। कटुपाकोऽनभिष्यन्दी सर्वौ बलकरौ गुरुः। बद्धवातमलो वर्ष्यस्त्र्यूषकारी च पिच्छिलः। कण्ठत्वगामयश्लेष्मपित्तमेदःप्रणाशनः। पीनसश्वासकासोरुस्तम्भकोष्ठितलट्प्रणुत्। अक्षादतियवो न्यूनस्तोक्तो न्यूनतरस्ततः।

अथ गोधूमस्य नामानि लक्षणं गुणाश्च। "गोधूमः सुमनोऽपि स्यात् विविधः स च कीर्त्तितः। महागोधूम इत्याख्यः पश्चाद्देशात् समागतः। महागोधूमः। (बड़गोहुम) इति लोके। "मधूली तु ततः किञ्चिदल्पा सा मध्यदेशजा। निःशूको दीर्घगोधूमः क्वचिन्नन्दीमुखाभिधः। गोधूमो मधुरःशीतो वातपित्तहरो गुरुः। कफशुक्रप्रदो बल्यः स्निग्धः सन्धानकृत् सरः। जीवनो हृंह्यो वर्ण्यो ब्रण्यो रुच्यः स्थिरत्वकृत्। कफप्रदो नवीनो नतु पुराणः। पुराणयवगोधूमचुटूजाङ्गलशूकभागिति" वाग्भटेन बल्ये स्वहीतत्वात्। "मधूली शीतला स्निग्धा पित्तघ्नी मधुरा लघुः। शुक्रला हृंह्यो पथ्या तदन्यन्दीमुखः स्मृतः"।

अथ शिम्बीधान्यानि तत्पर्य्यायांश्चाह। "शमीजाः शिम्बिजाः शिम्बीभवाः सूत्र्याश्च वैदलाः। तेषां गुणाः। "वैदलामधुरा रूक्षाः कषायाः कटुपाकिनः। वातलाः कफपित्तघ्नबद्धमूत्रमलाः स्मृताः। अते सदृशशूकराभ्यामन्ये त्वाध्मानकारिणः। सदृशशूकरयोरनाध्मानकारित्वमन्यवैदलापेक्षया न तु सर्वथा एतयोरपि किञ्चिदाध्मानकारित्वात्।

तत्र सदृशस्य गुणाः। "हृद्यो रूक्षो बद्धविट्को कफपित्तहरोऽग्निमः। स्वादुरल्पानिलो नेत्र्यो ज्वरघ्नो वनजस्तथा। सदृशो बहुविधः श्यामो हरितः पीतकस्तथा। श्वेतो रक्तश्च तेषान्तु पूर्वः पूर्वो लघुः स्मृतः। सदृशेन पुनः प्रोक्तो हरितः प्रवरो गुणैः। चरकादिभिरप्युक्त एव एव गुणाधिकः।

अथ माषः (उरद)। माषो गुरुः स्वादुपाकः स्निग्धो रूक्षोऽनिलापहः। संधानस्तर्पणो बल्यः शुक्रलो हृंह्यः परः। भिन्नमूत्रमलस्नेहो मेदःपित्तकफप्रदः। गुदकीलार्हितश्वासपङ्क्तिशूलानि नाशयेत्। कफपित्तकरा माषा इत्यादं कफपित्तकृत्"।

अथ राजमाषस्य (बरबटी) राजमाषो महामाषश्च लक्षणं गुणाः। राजमाषो गुरुःस्वादुस्तुवरस्तर्पणः

सरः। रूक्षो वातकरो रुच्यः स्तन्यो भूरिबलप्रदः। श्वेतो रक्तसमा ज्ञेयस्त्रिविधः स प्रकीर्त्तितः। यो मक्षांस्तेषु भवति स एवोक्तो गुणाधिकः"।

अथ निष्पावः। स तु राजशिम्बीबीजं (भेटवासु) इति लोके। "निष्पावो राजशिम्बिः स्याद्बल्लकः श्वेतशिम्बिकः। निष्पावो मधुरो रूक्षो विपाकेऽम्लो गुरुः सरः। कषायःस्तन्यपित्तास्रमूत्रवातविबन्धजित्। विदाह्युष्णो विष्टम्भशोथहृच्छुक्रनाशनः"।

अथ मकुष्ठः। मकुष्ठोवनसूद्गः स्यान्मकुष्ठकसकुष्ठकौ। मकुष्ठो वातलो ग्राही कफपित्तहरो लघुः। वह्निजिन् मधुरः पाके क्रमिक्लेश्वरनाशनः"।

अथ मसूरः। "मङ्गल्यको मसूरः स्यान्मङ्गल्या च मसूरिका। मसूरो मधुरः पाके संग्राही शीतलो लघुः। कफपित्तास्रजिद्रूक्षो वातलो ज्वरनाशनः।

अथ आढकी (रहरी)। "आढकी तुवरी चापि सा प्रोक्ता शणपुष्पिका। आढकी तुवरा रूक्षा मधुरा शीतला लघुः। ग्राहिणी वातजननी वर्ण्या पित्तकफास्रजित्"।

अथ चणकः (छोला)। "चणको हरिमन्थः स्यात् सकलप्रिय इत्यपि। चणकः शीतलो रूक्षः पित्तरक्तकफापहः। लघुः कषायो विष्टम्भी वातलो ज्वरनाशनः। स चाङ्गारेण सम्भृष्टस्त्रिभष्टस्य तद्गुणः। आर्द्रभृष्टो बलकरो रोचनश्च प्रकीर्त्तितः। शुष्कभृष्टोऽतिरूक्षश्च वातकृत्प्रकोपणः। स्निग्धः पित्तकफं हन्यात् स्रपः क्षोभकरो मतः। आर्द्रोऽति कोमलो रुच्यः पित्तशुक्रहरो हिमः। कषायो वातलो ग्राही कफपित्तहरो लघुः।

कलायः (केराव)। कलायो वर्त्तुलः प्रोक्तः सतीनश्च हरेणुकः। कलायो मधुरः स्वादुः पाके रूक्षश्च शीतलः।

अथ त्रिपुटः (खेसारी)। त्रिपुटः खण्डिकोऽपि स्यात् कषायान्ने तद्गुणा अथ। त्रिपुटो मधुरस्निग्ध स्तुवरो रूक्षपो भृशम्। कफपित्तहरो रुच्यो ग्राहकः शीतलस्तथा। किन्तु खञ्जत्वपङ्गुत्वकारी वातातिकोपनः।

अथ कुलत्थी। कुलत्थिका कुलत्थश्च कषायान्ने तद्गुणा अथ। कुलत्थः कटुकः पाके कषायः पित्तरक्तकृत्। लघुर्विदाही वीर्योष्णः श्वासकासकफानिलान्। हन्ति शिलाश्मरीशुक्रदाहानाहान् सपीनसान्। स्वेदसंग्राहको मेदोज्वरक्रमिहरः परः।

अथ तिलः। तिलः कृष्णः सितो रक्तः स वर्ण्योऽम्लतिलः स्मृतः। तिलो रसे कटुस्निग्धो मधुरस्तुवरो गुरुः। विपाके कटुकः स्वादुः स्निग्धोष्णः कफपित्तहृत्। बल्यः केश्यो हिमस्पर्शस्त्वच्यः स्तन्यो व्रणे हितः। दन्त्योऽक्षिमूत्रकृद् ग्राही वातघ्नोऽग्निसृतिप्रदः। कृष्णः श्वेतमस्तेषु शुक्लो मध्यमः सितः। अन्ये हीनतराः प्रोक्तास्तज्ज्ञैरक्षादयस्त्रिधा।

अथ अतसी (तिसि)। अतसी नीलपुष्पी च पार्वती स्यादुमा क्षुमा। अतसी मधुरा तिक्ता स्निग्धा पाके कटुर्गुरुः। उष्णास्रश्लेष्मवातघ्नी कफपित्तविनाशिनी।

अथ तुवरी (तोरी तोड़ीति) लोके। तुवरी ग्राहिणी प्रोक्ता लघ्वी कफविषास्रजित्। तीक्ष्णोष्णा वह्निदा कण्डूकुष्ठकोठक्रमिप्रणुत्।

अथ सर्षप (रक्तसरीसो पिवरी सरीसो)। सर्षपः कटुकः स्नेहस्तुन्दुभश्च कदम्बकः। गौरस्तु सर्षपः प्राज्ञैः सिद्धार्थ इति कथ्यते। सर्षपस्तु रसे पाके कटुः स्निग्धः सनिष्टकः। तीक्ष्णोष्णः कफवातघ्नो रक्तपित्ताग्निवर्द्धनः। रक्तोहरो जयेत् कण्डूं कुष्ठकोठक्रमिग्रहान्। यथा रक्तसमा गौरः किन्तु गौरो वरो मतः।

अथ राजी (क्षुद्रा राइ)। राजी तु राजिका तीक्ष्णगन्धा कृष्णनिकासुरी। सवः सवाभिजनकः क्रमिजित् कृष्णसर्षपः। राजिका कफपित्तघ्नी तीक्ष्णोष्णा रक्तपित्तजित्। किञ्चिद्वातप्रदा कण्डूकुष्ठकोठक्रमीन् हरेत्। अतितीक्ष्णा विशेषेण तद्वत् कृष्णापि राजिका।

अथ क्षुद्रधान्यम्। क्षुद्रधान्यं कुधान्यञ्च हेयधान्यमिति कृतम्। क्षुद्रधान्यमनुष्णं स्यात् कषायं लघु शेखनम्। मधुरं कटुकं पाके रूक्षञ्च क्लेदशोषकम्। वातलत् बद्धविट्कञ्च पित्तरक्तकफापहम्।

तत्र कङ्गुः (काङ्नी)। स्त्रियां कङ्गुप्रियङ्गू द्वे कृष्णा रक्ता सिता तथा। पीता चतुर्विधा कङ्गुस्तासामीता वराकृता। कङ्गुस्तु मन्थसन्धानवातलत् दंहणी गुरुः। रूक्षा श्लेष्महरातीव वाजिनां गुणकृद् भृशम्।

अथ चीना। चीनाकः कङ्गुभेदोऽस्ति स प्रोक्तः कङ्गुवद्गुणैः। [पित्तहृत्।

अथ श्यामा। श्यामाकः शोषणो रूक्षो वातलः कफ-

अथ कोद्रवः। कोद्रवः कोरदूषः स्यादुद्दालो वनकोद्रवः। कोद्रवो वातलो ग्राही हिमपित्तकफापहः। उद्दालस्तु भवेदुष्णो ग्राही वातकरो भृशम्।

अथ शारदकः (सरवीज)। शारदकः सरबीजः स्यात्

कथ्यते तद्गुणा अथ। चाङ्को मधुरो रूक्षो रक्तपित्तकफापहः। श्रीवेष्टो लघुरुष्णश्च कषायो वातकोपनः।

अथ वंशबीजम्। यवा वंशभवा रूक्षाः कषायाः कटुपाकिनः। बद्धमूत्राः कफघ्नाश्च वातपित्तकराः सराः।

अथ कुरुम्बबीजम्। कुरुम्बबीजं वरटा सैव प्रोक्ता वरट्टिका। वरटा मधुरा स्निग्धा रक्तपित्तकफापहा। कषाया शीतला गुर्वी स्वादुपाकाऽनिलापहा।

अथ गवेधुका (गरहेडुका)। गवेधुका तु विड्वद्भिर्गवेधुः कथिता स्त्रियाम्। गवेधुः कटुका स्वादी कार्श्यकृत् कफनाशिनी।

अथ नीवारः। प्रस्थाधिका तु नीवारसंज्ञधान्यमिति कृतम्। नीवारः शीतलो याही स्निग्धः कफवातजित्।

अथ (वुनेरा)। वनजाकोद्भिदः स्वादुर्दीपितः क्षेप्ता पित्तजित्। कङ्कुष्ठस्तुवरो रूक्षः क्लेदजित् कथितो लघुः। धान्यं सर्वं नवं स्वादु गुरु क्षेप्तकरं कृतम्। तत्तु वर्षौषितं पथ्यं यतो लघुतरं स्थितम्। वर्षौषितं सर्वधान्यं गौरवं परिमुञ्चति। न तु त्यजति वीर्यं स्वं क्रमान्नक्लेदतः परम्। एतेषु यवगोधूमतिलमाषा नवा स्थिताः। पुराणा विरसा रूक्षा न तथा गुणकारिणः। पुराणा वर्षद्वयादुपरिस्थिताः। यवादयो नवाः स्वस्थान् प्रति स्थिताः। पथ्याशिनान्तु पुराणा स्थिताः। "पुराणयवगोधूमशौव्रजाङ्गलशूल्यमुक्तिति वक्ष्ये वाग्भटेनोक्तत्वात्"।

आर्त्तादिकर्मोपयोगिधान्यभेदाश्च क्षेमा० दा० उक्ता यथा मार्कण्डेयपुराणे "जज्ञिरे तानि बीजानि धान्यारण्याभिधानि च। ओषध्यः फलपाकान्ताः सर्वे सप्तदश स्मृताः। व्रीहयश्च यवाश्चैव गोधूमाः कङ्गुकास्तिलाः। प्रियङ्गवः कोविदाराः कोरदूषाः सतीनकाः। माषकुलत्थसक्तवश्च निष्पावाः सकुलीत्थकाः। आढक्यश्चणकाश्चैव चीनाः सप्तदश स्मृताः। इक्षवो ओषधीनान्तु ग्राम्याणां जातयः स्मृताः। ओषध्यो यज्ञिया ज्ञेया ग्राम्यारण्याश्चतुर्दश। व्रीहयश्च यवाश्चैव गोधूमाः कङ्गुसर्षपाः। माषाणुकाः सप्तमाश्च षष्टमाश्च कुलोत्थकाः। ग्राम्याकाश्चैव नीवारा जर्तिलाः सप्तमेधुकाः। कोविदारसमायुक्तास्तथा वेणुयवाश्च ते। आरण्याः स्मृता ज्ञेया ओषध्यश्च चतुर्दश" "स्कन्दपुराणे "यवगोधूमधान्यानि तिलाः कङ्कुकुलोत्थकाः। माषाणुकाश्चणकाश्च निष्पावाः ग्राम्यसर्षपाः। गवेधुकाश्च नीवारा आढक्योऽथ सतीनकाः। चणकाश्चीनकाश्चैव धान्यान्यष्टादशैव तु" धान्यानि व्रीहयः। नीवाराः, आरण्यव्रीहयः। सतीनका वर्षुकशकायाः। चीनकाः शष्टिकविशेषाः। षट्त्रिंशन्मतात् "यवा गोधूमधान्यानि तिलाः कङ्कुलथैव च। ग्राम्याकश्चीनकश्चैव सप्तधान्यस्तदाकृतम्"।

"एकादशाहं विशेषेण क्षारमात्रं परित्यजेत्। फलं मूलं शाकादीनि किञ्चिदूनं प्रकल्पयेत्। अन्नं तु धान्यसम्भूतं गिरिजे! भुवि जायते। धान्यानि विविधानीह जगत्यां भुवि तान्यथ। ग्राम्याग्राम्यमरण्यञ्च धान्यकोद्भव सर्वथा। मकुष्ठो राजमाषश्च तुवरोजुमरक्तथा। यव गोधूमतण्डुल तिलकङ्कुकुलत्थकाः। गवेधुकाश्च नीवारा आढक्यश्च कलायकाः। माषकुलो वल्लको रङ्गः कोद्रवको वरकलत्था। तिलकाश्चणकाश्चैव धान्यानि कथितानि वै। एतद्धान्य सप्तकृतमन्नं भवति शोभने!। अन्नत्यागे व्रते भक्ष्यमेतदेव विवर्जयेत्" पाद्मोत्तरखण्डम्।

धान्यमानन्तु क्षेमा० दा० उक्तं यथा भविष्यपुराणे "पलद्वयन्तु प्रस्थं स्याद्द्विगुणं कुडवं मतम्। चतुर्भिः कुडवैः प्रस्थः प्रस्थाश्चत्वार आढकः। आढकैस्तैश्चतुर्भिश्च द्रोणस्तु कथितो बुधैः। कुम्भो द्रोणद्वयं ज्ञेयः खारी द्रोणास्तु षोडश"। विष्णुधर्मोत्तरे "पलञ्च कुडवः प्रस्थ आढको द्रोण एव च। धान्यमानेषु बोद्धव्याः क्रमशोऽयी चतुर्गुणाः। द्रोणैः षोडशभिः खारी विंशत्या कुम्भ उच्यते। कुम्भैस्तु दशभिर्वाहो धान्यसंख्या प्रकीर्त्तिता"। वाराहपुराणे "पलद्वयन्तु प्रस्थं स्यादिदं पक्वं कृतम्। अष्टसृष्टिर्भवेत् कुडवः कुडवोऽष्टौ तु पुष्कलम्। पुष्कलानि च चत्वारि आढकः परिकीर्त्तितः। चतुराढको भवेद्द्रोण इत्येतन्मानलक्षणम्। चतुर्भिः सेतिकाभिस्तु प्रस्थ एकः प्रकीर्तितः" सृष्टिर्यजमानश्चेति केचित्। पाद्मे "चतुर्भिः कुडवैः प्रस्थः प्रस्थैश्चतुर्भिराढकः। चतुराढको भवेद्द्रोण इत्येतन्मानलक्षणम्"। अथ गोपवज्राङ्गे। "पञ्चकृष्णलको माषस्तैश्चतुःषष्टिभिः पलम्। पलैर्द्वात्रिंशद्भिःप्रस्थो मागधेषु प्रकीर्त्तितः। आढकस्तैः चतुर्भिश्च द्रोणः स्याच्चतुराढकः"।

धान्यच्छेदनादिविहितनक्षत्रादि ज्योऽ० उक्तं दीपिकायां "धान्यानां पादविधनानलतोयक्रचित्रतरेषु च कुजार्कवारवर्जम्। मूलेन्दुयोगकरणेषु तिथौ विरिक्ते धा-

व्यक्तिदिः स्थिरनरर्क्षमृगोदयेषु । बलभद्रः "रेवतीहस्तमूलेषु श्रवणे नागयाम्ययोः । पितृदैवे तथा सौम्ये धान्यच्छेदं मृगोदये" अथ धान्यच्छेदनप्रकारः । "वपत्नौ मासमद्रौ च यवधान्ये सकाण्डके । छिन्द्यात्तिलञ्च निष्पन्नमेतत् पाराशरं मतम्" पराशरः । "न कृष्टिपक्वं कुर्वात् कदाचिद्दर्शपौर्णयोः । ईशाने स्वपनं कुर्वात् सार्द्रसृष्टिदयं शुचिः । पौष्णे पुण्ये शुभाहे वा पूजयित्वेष्टदेवताम् । अस्यविघ्नप्रशान्त्यर्थं क्षेत्रे वा कृष्य भोजनम्" । कौथायनः "रक्तशुगजधान्यानां गवां चैव रजः शुभम् । अथाश्वस्य समूहिन्याः शाजाविखर वायुसाम्" । समूहिनी संमार्जनी । अत्यग्निमाणवौ-मेधिरुक्ता यथा । "वटश्च सप्तपर्णश्च गाम्भारी शाल्मली तथा औदुम्बरी तथा धात्री या चान्या क्षीरधारिणी । स्त्रीनाम्नी कर्मकैर्नित्यं मेधिः कार्या फलप्रदा" । अधिकं क्रियाशब्दे दृश्यम् ।

**धान्यकोष्ठक** न० ६त० । धान्यस्थापनार्थे मृद्भे (गोला) कृत्रा० ।

**धान्यचमस** पु० चम्यते चम-कर्मणि असन् । धान्यविकारभेद एव चमसः । चिपिटके त्रिका० ।

**धान्यत्वच** स्त्री ६त० । तुषे अमरः ।

**धान्यधेनु** स्त्री दानार्थं धान्यकल्पितायां गव्याम् । तद्विधिः "विषुवे चायने वापि कार्त्तिक्यान्तु विशेषतः । तदिदानीं प्रवक्ष्यामि धान्यधेनुविधिं परम् । यां दत्वा सर्वपापेभ्यः प्रयाति रुद्र राजवत्" (मुच्यते इति शेषः) । दशधेनुप्रदानेन यत्फलं राजसत्तम ! । तत्सर्वमेव प्राप्नोति त्रीव्रिधेनुप्रदो नरः । कृष्णाजिनं ततः कृत्वा प्राग्वदुत्संख्यवेदुधः । गोमयेनानुलिप्ताङ्गीं शोभनां वत्ससंयुताम् । पूजयेद्दिमध्ये शाद्रोणैश्चापि चतुष्टयैः । मध्यमा च तदर्द्धेन विप्रशार्दूलं न कारयेत् । चतुर्थांशेन धेनवै वत्सन्तु परिकल्पयेत् । कर्त्तव्ये रुक्मशृङ्गे तु राजतक्षुरसंयुता । शोलूधः पूर्ववदुत्पाद्य गुरुचन्दनलया । सुक्ताफलमया दत्ता शतशौद्रमवं शुभम् । प्रशस्तपत्रश्रवणा कांस्यदोहसमन्विता । इक्षुयष्टिमयाः पादाः शौमपुच्छसमन्विता । नानाफलसमोपेता रत्नगर्भसमन्विता । पाद्मकोपानहौ-छत्रे भाजनं दर्पणं तथा । इत्येवं रचयित्वा तां कृत्वा दीपाचनादिकम् । पुण्यकालञ्च संप्राप्य स्नातः शुक्लाम्बरो मही । निःप्रदक्षिणमादत्त मन्त्रेणानेन कीर्त्तयेत् । तव विप्र ! मुखाभाग ! वेदवेदाङ्गपारग ! । या मेतादृ यया दत्तां गृहीत्वं त्वं द्विजोत्तम ! प्रीयतां मम देवेशो भगवान् मधुसूदनः । त्वमेका सर्वलोकानां विन्दे स्वाहा चासि विभावसोः । शक्रे शचीव विख्याता मेधा त्वयिष्टु सत्तमा । तस्मात् सर्वमयी देवी धान्यरूपेण संस्थिता । एवमुच्चार्य्य तां धेनुं ब्राह्मणाय निवेदयेत् । दत्वा प्रदक्षिणं कृत्वा तं नमस्य द्विजोत्तमम् । यावन्न पृथिवी सर्वा वसुरत्नानि भूपते ! । तावत् पुण्यमवाप्नोति त्रीव्रिधेनोश्च तत्फलम् । तस्माद्धेरेन्द्र ! दातव्या भुक्तिमुक्तिफलप्रदा । इह लोके च सौभाग्यमायुरारोग्यवर्द्धनम् । विमानेनार्कवर्णेन किङ्किणीरत्नमालिना । स्तूयमानोऽप्सरोभिश्च प्रयाति शिवमन्दिरम् । यावच्च कुरते जन्म तावत् स्वर्गे महीयते । ततः स्वर्गात् परिभ्रष्टो जम्बुद्वीपपतिर्भवेत् । एवं फलेश्च प्रोद्दामैर्यं श्रुत्वा वाक्यं नरोत्तमः । सर्वपापविशुद्धात्मा रुद्रलोके महीयते" । वराहपुराणोक्तः ।

**धान्यपञ्चक** न० ६त० । भावप्र० उक्ते धान्यविशेषाणां पञ्चके । धान्यशब्दे भावप्र० वाक्यं दृश्यम् । २अतिसारे पाचनविशेषे यथा "धान्यपञ्चकविल्वाभ्यां नागरैः साधितं जलम् । चामशूलविबन्धघ्नं पाचनं नित्यसेवितमिति" भावमिश्रः ।

**धान्यमात्र** त्रि० धान्यं मिति मा-ट्रच् । धान्यमापके "मात्रट् संख्यासंभद्रपूर्वाया मा० ब्रुवे पूर्वाया इति स्त्रीत्वनिर्देशात् स्त्रीत्वविशिष्टमात्रशब्दश्चैव ब्रुत् नेतरश्चेति सि०कौ० । तेन धान्यमात्ररूपत्वम् धान्यमात्र इत्येव

**धान्यमाय** त्रि० धान्यं मिति मा-क्यप् युक् । धान्यमानकारके २तद्विकेतरि च तस्य धान्यमानेनैव विक्रेतृत्वात् ।

**धान्यराज** पु० धान्यानां राजा-टच् समा० । यवे राजनि० ।

**धान्यवनि** पु० धान्यस्य वनिः राशिः । धान्यराशौ अमरः ।

**धान्यवर्द्धन** न० धान्यस्य वर्द्धनायुक्ततया वर्द्धनं यत्र । (वाड़ी) इड्डिभेदे त्रिका० ।

**धान्यवीर** पु० धान्येषु वीर इव बलहेतुत्वात् । माषे (कलाइ) ।

**धान्यशोषक** न० ६त० । धान्यस्य मञ्जर्याम् धान्यादयोऽप्यत्र । शटाधरः ।

**धान्यशैल** पु० दानार्थकल्पिते धान्यमये पर्वते तद्विधानादि हेमा० दा० पद्मपु० उक्तं यथा ।

"तत्राद्विधानं वक्ष्यामि पर्वतानामनुत्तमम् । प्रथमो धान्यशैलः स्यात् द्वितीयो लवणाचलः । गुडाचलस्तृतीयस्तु चतुर्थो हेमपर्वतः । पञ्चमस्तिलशैलः स्यात् षष्ठः कार्पासपर्वतः । सप्तमो घृतशैलश्च रत्नशैलस्तथाष्टमः ।

राजतो नवमस्तद्वद्गमः शर्करार्चलः। वक्ष्ये विधान मेतेषां यथावदनुपूर्वशः। अयने विषुवे चैव व्यतीपाते दिनक्षये। शुक्लपक्षे तृतीयायामुपरागे शशिक्षये। विवाहोत्सवयज्ञे वा द्वादश्यामथ वा पुनः। शुक्लायां पञ्चदश्यां वा पुण्यर्क्षे च विधानतः। धान्यशैलादयो देया यथाश्रद्धं विधानतः। तीर्थे वायतने वापि गोष्ठे वापि भवाङ्गणे। मण्डपं कारयेद्वृत्ता चतुरस्रसुदङ्मुखम्। प्रागुदक्प्रवणं तद्वत्प्राङ्मुखं वा विधानतः"। मण्डपलक्षणन्तु, परिभाषायां प्रतिपादितम्। अत्र चायं विधानक्रमः दानदिवसात् पूर्वेद्युः पूर्वाह्णे कृत स्नानादिक्रियो यजमानः अमुकपर्वतदानमहं यः करिष्ये इति कृतसंकल्पो दक्षिणाङ्गमभ्युदयकं विधाय पूर्ववत् पुण्याहवाचनं कुर्यात्, तदनन्तरम् अद्य अमुकस्मिन् देशे अमुकस्मिन् काले अमुकपर्वतदानेनाहं यज्ञे तत्र तदङ्गभूतहोमादिके अमुकशर्माणं अमुकवेदाध्यायिनम् ऋत्विजं त्वामहं वृणे इति। पुराणवेदविदाद्यन्तर्ऋत्विजां वरणं, तथा ओम् अद्य अमुकस्मिन् देशे अमुकस्मिन् काले अमुकपर्वतदानेनाहं यज्ञे तत्र तदङ्गभूतानि कर्माणि कर्तुं कारयितुं च अमुकगोत्रं अमुकशर्माणं अमुकवेदाध्यायिनं गुरुं त्वामहं वृणे इत्याचार्यं वृणुयात् वृतोऽस्मीति सर्वत्र प्रतिवचनं तत्र तावत् मधुपर्कोत्तरं वेदितिसर्वपर्वतदानसाधारणोऽयं विधिः। "गोमयेनोपलिप्तायां भूमावास्तीर्य वै कुशान्। तन्मध्ये पर्वतं कुर्यात् विष्कम्भपर्वतान्वितम्। धान्यद्रोणसहस्रेण भवेद्धिरिरिहोत्तमः। मध्यमः पञ्चतिलः कनिष्ठः स्यात् तिभिः शतैः"। द्रोणलक्षणन्तु परिभाषायाम्। प्रमाणस्थकरचरणस्य पुंसो द्वादशभिः प्रस्तृतिभिः कुडवो भवति अनेन कुडवेन चतुर्गुणोत्तरं प्रस्थाढकद्रोणा भवन्ति अतः चतुःषष्ट्या कुडवैर्द्रोणो भवतीति कल्पतरुधृता व्याख्यातम्। "मेरुर्मन्दारो हिमयस्तु मध्ये सुवर्णशृङ्गवयसंयुतः स्यात्। पूर्वेण सङ्काफलवज्रयुक्तो याम्येन गोमेदकपुष्परागैः। पश्चात्तु गारुत्मतनीलरत्नैः सौम्येन वैदूर्यसरोजरागैः। श्रीखण्डखण्डैरभितः प्रवालवल्लीवितानैः सुकृतिभिर्वितानः स्यात्। ब्रह्मात्र विष्णुर्भगवान् पुरारिर्दिवाकरोऽत्रास्य हिरण्मयः स्यात्। मूर्ध्व्यवस्था गतमन्यरेष कार्यः सुवर्णेन तथा द्विजौघाः। चत्वारि शृङ्गाणि च राजतानि नितम्बभागेऽपि राजतः स्यात्। आदेर्जुवंशाष्टतरुन्दरस्तु दक्षोदकः प्रस्रवणश्च दिक्षु। शुक्लाम्बराश्चम्बुधरावली स्यात् पूर्वेण पीतानि च दक्षिणेन। वासांसि पश्चादथ कर्बुराणि रक्तानि चैवोत्तरतोधनाली। रौप्यान्मुखेन्द्रप्रसृतानधाटौ संस्थाप्य लोकाधिपतीन् क्रमेण। नानाफलाली च समन्ततः स्यात् मनोरमं माल्यविलेपनं च। वितानकं चोपरि पञ्चवर्णमनल्पमुक्ताभरणं सितञ्च"। मेरुरित्यादि, मन्दारोऽयो, राजान्यशैलयः, दक्षतरुसंयुत, इति दक्षिणे मन्दारः, उत्तरे पारिजातो, मध्ये कल्पतरुरिति दक्षतरुं, तथा पूर्वतो हरिचन्दनं, पश्चिमे सन्तान इति तरुद्वयं च कुर्यात्, एते सर्वपर्वतेषु कर्त्तव्या इति शर्कराचले वक्ष्यमाणत्वात् सर्वेषान्तु पञ्चशाखत्वमवधेयमिति। वज्रं, हीरकं। गारुत्मतं, मरकतं। सरोजरागः, पद्मरागः। सङ्काफलादीनि च यथादिशं वक्ष्यमाणराजतशृङ्गेषु निवेशनीयानि। पुरारिः, महेश्वरः। ब्रह्मादिलक्षणन्तु ब्रह्माण्डदाने। मूर्ध्व्यवस्था उपरिदेयस्थिताः। गतमन्यरेण, चित्तशरहितेन। द्विजौघाः, पक्षिसमूहाः। दिवौका इति क्वचित्पाठः। तत्र चादित्यावसवोरुद्रा दिवौकाः। तेषु, वक्ष्यादिलक्षणन्तु ब्रह्माण्डदाने, रुद्रलक्षणं विष्णुचक्रे। इक्षुरेव वंशः, वृतमेवोदकं, वस्त्राण्येव मेघसमूहाः कर्बुराणि, चित्राणि। लोकपाललक्षणन्तु ब्रह्माण्डदाने। "इत्थं निवेश्याभरणैश्चमध्यं मेरोश्च विष्कम्भगिरीन् क्रमेण। तुरीयभागेण चतुर्दिशन्तु संस्थापयेत् पुष्पविलेपनाढ्यान्। पूर्वेण मन्दारमनेकफलैश्च युक्तं युक्तं गन्धैः कनकभृङ्गदम्बचिह्नम्। कामेन काञ्चनमयेन विराजमानमाकारयेत् कुसुमवस्त्रविलेपनाढ्यम्। क्षीरार्णोदसरसाश्च वनेन चैव रौप्येण शक्तिघटितेन विराजमानम्। याम्येन गन्धमदनञ्च निवेशनीयो गोधूमसञ्चयमयः कलधौतजम्बा। हैमेन यज्ञपतिना हृतमानसेन वस्त्रैश्च राजतवनेन च संयुतः स्यात्। पश्चात्तिलाचलमनेकसुगन्धिपुष्पसौवर्ण पिप्पल-हिरण्मयहंसयुक्तम्। आकारयेद्वृतपुष्पवनेन तद्वद्दक्षान्वितं दधिसितोदसरस्तथाप्ये। संस्थाप्य तं विपुलशैलमथोत्तरेण शैलं सुपार्श्वमपि माषमयं सवस्त्रम्। पुष्पैश्च हेमघटपादपशेखरन्नमाकारयेत्कनकपेतुविराजमानम्। माक्षीकभृङ्गसरसा च वनेन तद्वद्रौप्येण भास्करवता च युतं विधाय"। इत्यन्निवेश्येत्यादि, एवं मेरुं निवेश्य तच्चतुर्थभागपरिमितेन पृथगद्रव्येण एकैकं विष्कम्भगिरिं कुर्यात् न तु

चतुर्थभागेन चतुरोऽपीति, तथाच वचनाचले वक्ष्यति "चतुर्थांशेन विष्कम्भपर्वतान् कारयेत्, पृथगिति"। पूर्वेण मन्दरमिति, सन्निधानान्मन्दरोऽपि व्रीहिमय एव, गणैर्युक्तमिति, पुरुषाकृतिगणवत्त्वान्वितमित्यर्थः। अनेकफलाढ्यीयुक्तं यवैरिति क्वचित्पाठः। तस्य समत्वे यवानुष्ठानमपि कार्यम्। कनकघटितेन भद्रकदम्बाख्येन हंसेन लक्षितम्। कामलक्षणमाह विष्णुधर्मे "चापबाणधरः कामो रतिप्रेयान् सुमध्यमः। आलीढो नन्दनो वाजी चापवान् विषमादकः" इति। क्षीरपूरितेन, क्षरणोदसंज्ञितेन क्षीरघटितेन, सरसा वनेनापि क्षीरघटितेन विराजमानमिति सम्बन्धः। याम्येनेत्यादि, गन्धमादनो, गन्धमादनः, कलधौतजं वेति, सुवर्णजम्बुवृक्षेण। यत्तपतिरूपसूक्तं श्रीप्रश्ने "हस्तमापिङ्गाक्षञ्च गदिनं पीतविग्रहम्। पुष्पकस्थन्धनाध्यक्षं ध्यायेत् शिवसखं सदेति"। हतमानसेनेति हतपूरितेन मानसाभिधानेन राजतेन सरसा। पश्चादिति, पश्चिमदेशे दधिपूरितक्षितोदं नाम राजतनिर्मितं सर इति, विपुलशैलं, विपुलं नाम पर्वतं माक्षीकभद्रसरसेति, माक्षीकं, मधु तत्पूरितेन राजतमयेन भद्राभिधानेन सरसा युतमित्यर्थः। अत्र च कामदेवस्य प्रत्यङ्मुखत्वं हंसस्य प्राङ्मुखत्वं कनकधेनोर्दक्षिणासुखत्वं यत्तपतेरुदङ्मुखत्वं च शर्कराचलस्थितदिग्विभागेषामेष्यं दैवतेषु सर्वत्रैवेषु वेदितव्यं, चरमव्यवस्था कृतोऽपि शास्त्राद्व्यवस्थितिरिति। एते च कामदेवादयः कदम्बादीनां निजपर्वतवृक्षाणामधस्तात्कर्त्तव्याः। "होमैश्चतुर्भिरथ वेदपुराणविद्भिर्दान्तैरनिन्द्यचरितान्वितभिर्द्विजेन्द्रैः। पूर्वेण वृक्षमितमत्र विधाय कुण्डं कार्यस्त्रिभिर्यवहतेन समित्कुशैश्च। रात्रौ च जागरमहद्भुतगीतवृद्धैरावाहनञ्च कथयामि शिलोञ्छयानाम्"। पूर्वेणेत्यादि मण्डपस्य पूर्वभागे वृक्षमात्रं कुण्डं विधाय तस्य पूर्वोत्तरदिग्विभागे तत्पुरुषोक्तलक्षणौ देवतावेदिं कृत्वा तत्र विनायकादिदेवताभ्यः पूर्ववत् पूजां विदध्यात् अनन्तरञ्चाग्निस्थापनान्ते यज्ञार्थं लोकपालानामित्यादिवक्ष्यमाण देवताभ्यस्तत्तन्मूलमन्त्रैस्तिलादिद्रव्येण होमं कुर्युः। "सहस्रे अथ होतव्ये कुर्यात् कुण्डं करात्मकम्" इत्युक्तेरत्र हस्तपरिमितकुण्डोपदेशादष्टोत्तरसहस्रं होतव्यमिति दानविवेककारः। अत्र विनायकादयो 'द्वात्रिंशद्देवा, द्वादशादित्याः, एकादशरुद्राः, दश लोकपालाः, अष्टौ वसवः, ब्रह्म-विष्णु-शिव-सूर्याश्चत्वारः काम-धनद-हंस-कामधेनव श्चत्वारः इत्येवमेकाशीतिसंख्यकेभ्यो देवेभ्यः यज्ञादीनां प्रतिदैवतं त्रयोदशाहुतिहोमे त्रिपञ्चाशदधिकमाहुतिसहस्रं सम्पद्यते। अष्टशतन्तु होतव्यमिति ब्रह्माण्डपुराणे वक्ष्यति। तिलादीनि चत्वार्येव हविर्द्रव्याणि हतान्नानीत्यवगन्तव्यम्। समिधः, साधारणाद्वुदुम्बरस्य। होमादनन्तरं पुष्पोपहारानादाय वक्ष्यमाणमन्त्रैर्यवाक्रमं पर्वतानावाहयेत्, तत्र मेरोरावाहनमन्त्रः। "त्वं सर्वदेवगणधामनिधे! विरुद्धमस्मादृष्टेऽध्वरपर्वत! नाशयाशु। क्षेमं विधत्स्व कुरुशान्तिमनुत्तमां नः सम्मूजितः परमभक्तिमता मया हि। त्वमेव भगवानीशो ब्रह्मा विष्णुर्दिवाकरः। मूर्त्तामूर्त्तं परं बीजमतः पाहि सनातनः। यस्मात्त्वं लोकपालानां विश्वमूर्त्तेश्च मन्दिरम्। रुद्रादित्यवसूनाञ्च तस्माच्छान्तिं प्रयच्छ मे। यस्मादन्यसमरैर्नारीभिश्च समं तथा। तस्मान्नाशुद्वरायेण्डुःखसंसारसागरात्। एवमभ्यर्च्य तं मेरुं मन्दरञ्चाभिपूजयेत्। अथ मन्दरस्य। यस्माच्चैरवतेन त्वं भद्राश्ववर्षकेण च। शोभसे मन्दर! क्षिप्रमतः पुष्टिकरो भव। अथ गन्धमादनस्य। यस्माज्जाम्बूनदजम्बुद्वीपे त्वं गन्धमादन!। गन्धर्वगणशोभावानतः कीर्त्तिर्दृढास्तु मे। अथ विपुलपर्वतस्य। यस्मात्त्वं केतुमालेन वैभ्राजेन वनेन च। हिरण्मयात्सत्यशिवसखात् पुष्टिर्ध्रुवास्तु मे। अथ सुपार्श्वस्य। उत्तरैः कुरुभिर्यस्मात् सावित्रेण वनेन च। सुपार्श्व! राजसे नित्यमतः श्रीरचलास्तु मे। एवमामन्त्र्य तान् सर्वान् प्रभाते विमले पुनः। स्नात्वाथ गुरवे दद्यात् मध्यमं पर्वतोत्तमम्। विष्कम्भपर्वतान् दद्यादत्विग्भ्यः क्रमशो नृप। गावोदद्याच्चतुर्विंशादथ वा दश पार्थिव!। शक्तितः सप्त वाष्टौ वा पञ्च दद्यादशक्तिमान्। एकां वा गुरवे दद्यात् कपिलाञ्च पयस्विनीम्"। एवमामन्त्र्येति, दानदिनात् पूर्वदिवसे सर्वमिदमामन्त्रणादि विधाय गीतवादित्रादिभिर्निशामतिवाह्य ततः प्रभाते गुरुप्रभृतयो विहितस्नानादिक्रियाः पूर्णाहुतिपर्यन्तं सकलकर्म्मशेषं समाप्य कुण्डसमीपस्थापितकलसजलेन पूर्ववद्यजमानं स्नपयेयुः। यजमानोऽपि शुक्लाम्बरपरिधानः प्रदक्षिणीकृत्य वक्ष्यमाणमन्त्रेण यथाक्रमं पर्वतान् प्रतिपादयेत्।

"पर्वतानामशेषाणामेष एव विधिः स्मृतः। त एव पूजने मन्त्राः त एवोपस्कराः स्मृताः। यज्ञार्थं लोकपालानां ब्रह्मादीनाञ्च सर्वशः। स्वमन्त्रेणैव सर्वेषु होमः सं-

लेषु पठ्यते। उपवासो भवेद्विप्रमयज्ञो नक्तमिष्यते" सर्वत्राचारलक्षणमश्नीयादिति वक्ष्यमाणत्वादाचारलक्षणं नक्तं वेदितव्यम्" "विधानं सर्वधैवानां क्रमशः शृणु पार्थिव! दानकालेषु ये मन्त्रा पर्वतेषु च यत्फलम्" अथ मन्त्रः "अन्नं ब्रह्म यतः प्रोक्तमन्ने प्राणाः प्रतिष्ठिताः। अन्नाद्भवन्ति भूतानि जगदन्नेन वर्त्तते। अन्नमेव यतोऽच्छोरन्नमेव जनार्दनः। धान्यपर्वतरूपेण पाहि तस्मान्नमोनमः"। एवमाचार्यादीन्, सम्पूज्य तदनुज्ञया अन्येभ्योऽपि दद्यात् ततोऽजमानो वेद्यां पूर्ववद्देवताः सम्पूज्य नमस्कुर्यात्। गुरुस्तान्विसर्जयेत्, ततो यथाशक्ति ब्राह्मणभोजनम् कृतोपवासस्य यजमानस्य दानदिने क्षारलवणवर्जनं सर्वपर्वतोपस्कराच्च ब्राह्मणसङ्ख्यापर्यं शर्करायावलोक्यं सर्वत्र द्रष्टव्यम्। "अनेन विधिना यस्तु दद्याद्धान्यमयद्विरिम्। अन्वन्तरशतं सार्द्धं देवलोके महीयते। अप्सरोगणगन्धर्वैराकीर्णेन विराजितः। विमानेन दिवः पृष्ठमायाति सुरसेवितः। कर्मक्षयाद्राजराज्यं प्राप्नोतीह न संशयः"। इत्यमेव मत्स्यपु०। धान्यपर्वतादयोऽत्यत्र। ब्रह्माण्डभविष्यपुराणोक्तो विधिश्च ततःपरं तत्र द्रष्टव्यः।

**धान्या** स्त्री धान्याक+पृषो०। (धनिया)ख्याते पदार्थे हेमच०।

**धान्याक** न० धान्याक+स्वार्थे अण्। धान्यमकति अक-कुत्सितायां गतौ अण् उप०स०वा। (धनिया) ख्याते पदार्थे "धान्याकं तुवरं स्निग्धमदृश्यं मूत्रलं लघु। तिक्तं कटुष्णवीर्यञ्च दीपनं पाचनं स्मृतम्। ज्वरघ्नं रोचनं ग्राहि स्वादु पाके, त्रिदोषनुत्। तृष्णादाहश्वसिक्लासकासामार्शःश्रमिप्रणुत्। आर्द्रन्तु तद्गुणं स्वादु विशेषात् पित्तनाशनम्" भावप्र०।

**धान्याकृत्** त्रि० धान्यं कर्मणादिना करोति कृ-क्विप् वेदे पूर्वपददीर्घः। कर्मके "रूपन्तु बीजमिव धान्याकृतः" ऋ० १०।९४।१२।

**धान्यास्त्र** न० "पादांशशालिसंयुक्तमस्त्रं ब्रह्मार्च कल्पते। तिरात्रं स्थापयेद्वीरे तत् क्विन्नं मर्दयेत् करैः। कल्कवद्भावितं शुष्कं वालुकारहितञ्च यत्। तद्धान्यास्त्रमिति प्रोक्तमस्त्रमारणसिद्धये" भावप्र० उक्ते अस्त्रमारणोपयोगिवस्तुभेदे।

**धान्यास्थि** न० धान्येष्वभिषुतमस्थि। काञ्जिके (आमानि)। "धान्यास्थि शालिचूर्णोत्थं कोद्रवादिकृतं भवेत्। धान्यास्थं धान्ययोनित्वात् प्रीणनं लघु दीपनम्। रूक्षौ वातरोगेषु सर्वेष्वास्थापने हितम्" भावप्र०।

**धान्यायन** द्वंस्त्री० धान्यस्य गोत्रापत्यम् कण्वा० फक्। धान्यगोत्रापत्ये।

**धान्यारि** पु० ६त०। धान्यशत्रौ अग्निवर्धे यद्धरुस्यदुमे त्रिविक्रुतोक्तिः ग्रामादिको अरिशब्दस्य ङंविक्रुत्वेन "परवल्लिङ्" इत्यतत्पुरुषयोः" पा० सूत्रेण तत्पुरुषे परवल्लिङ्गत्वेनानुशासनात्।

**धान्यार्थिन्** त्रि० "अर्थोज्ञासन्निधिते" पा० "तदस्माच्च" वार्त्ति० उक्तेः पुष्करा० अस्यर्थे इनि। धान्यरूपार्थविशिष्टे स्त्रियां ङीप्। "कालत इत्यासन्निधिर्न देशतः" तस्मात्रे अस्तीत्यधिकरणान्वयाभावात् न इनिप्रसक्तिः।

**धान्यास्थि** न० ६त०। तुषे।

**धान्योत्तम** पु० धान्येषूत्तमः। शालिधान्ये राजनि०।

**धान्व** पु० धन्वदेशे भवः अण् वोपधत्वेऽपि वेदे त्रि० टिलोपः। धन्वदेशोद्भवे। "असितो धान्वो राजेत्याह" शत० ब्रा० १३।४।१४। लोके तु धान्वन इत्येव "उदकं पार्वतं वार्क्षमैरिणं धान्वनं तथा" कामन्दकी०।

**धान्वन्तर्य** त्रि० धन्वन्तरिर्देवताऽस्य वा० यत्। धन्वन्तरिदेवताके होमादौ "अग्नीषोमं वैश्वदेवं धान्वन्तर्यमनन्तरम्। प्रजानां पतये चैव पृथक् होमो विधीयते" भा० आनु० ९७ अ०।

**धाम** पु० धा-बा० मनु। यज्ञदेवभेदे "देवाः साध्यास्तथा विश्वे तथैव च महर्षयः। यामा धामाश्च सौद्रल्या गन्धर्वाप्सरोगणाः" भा० व० २६ अ०। "पितरो जगतः श्रेष्ठो देवानामपि देवताः। तेऽपि तत्र समाजग्मुर्यामा धामाश्च सर्वशः" भा० अ० ४५ अ०।

**धामक** पु० धानक+पृषो०। मागधपरिमाणे भावप्र० हेमधानकौ इत्यत्र हेमधामकौ इति पाठान्तरम् धानकशब्दे दृश्यम्।

**धामकेशिन्** पु० धाम ज्योतीरूपः केशोऽस्यस्य इनि। ज्योतिर्मयकिरणयुक्ते सूर्ये "दिवाकरः सप्तसप्तिर्धामकेशी विरोचनः" भा० व० ३ अ०।

**धामच्छद** पु० धामानि छादयति छद-क्विप् तुक्। न्यूनानां पूरके अतिरिक्तानां समीकारके। "धामच्छदग्निरिन्द्रः" यजु० १८।७६। "वाग् वा ऋतच्छद् वाग धामच्छद्वाचैवास्य तदाप्नोति" शत०ब्रा०१०।१।२।१०।

**धामन्** न० धा-मनिन्। तेजसि २देहे ३स्थितौ ४प्रभावे अमरः। ५रश्मौ ६स्थाने ७जन्मनि मेदि०। "आ ते धामानि दिव्यानि तस्थुः" ऋ० १०।१२। १"पुत्रं जनय तुभ्यपि धाम क्षत्रियतेजसाम्" भा० आ० १२२ अ०।

दतेजसि "कार्शानवं धाम पतङ्गकान्तेः"। "पतत्यधो धाम विसारि सर्वतः" माघः। तत्र स्थाने "योगधारणयाऽन्येषां दग्धा धामाविशत् खलम्" भाग०।१।३।६। इदामोपलक्षिते च "धाम्नो धाम्नो राजंस्ततो वरुण! नो मुञ्च" यजु० ६।२२। १०परमेश्वरे न०। "गुरुर्गुरुतमो धाम" विष्णुस०। "धाम ज्योतिः "नारायणः परं ज्योतिरिति" मन्त्रवर्णात्" भा० ११धने च "धामसाचमभियाचं खर्विदम्" ऋ०२।१५।१।२। "धाम धनं तदर्थिभिः सह योजयितारम्" भा०।

**धामनिका** स्त्री धामन्शब्दे स्वार्थे क+। धमन्याम् रत्नमाला। धमनी स्वार्थे अण् ङीप्। धामनी धमन्यां शब्दच०।

**धामनिधि** पु० धामानि निधीयन्तेऽस्मिन् नि+धा-आधारे किप् ह्रस्व०। सूर्य्ये जटाधरः।

**धामभाज्** पु० धाम यज्ञस्थानं भजते भज-क्विप् ह्रस्व०। यज्ञस्थानभागिनि देवे। "धामभाजो देवाः पाथोभाग् वनस्पतिः। धाम वै देवा यज्ञस्याभजन्त पाथः पितरः" सांख्यश्रा०१०।६।

**धामशस्** अव्य० धाम्नि धाम्नि इत्यर्थे शस्। स्थाने स्थाने इत्यर्थे "तेषामिष्टानि विहितानि धामशः" ऋ०१।१६३।१५

**धामार्गव** पु० धाम्नोऽर्गं याति-या क। १अपामार्गे अमरः २पीतशोणायाम्, मेदि०१शोणके च रत्नमा०। "धामार्गवस्यापि मदनफलमल्लवदुपयोगो विशेषतस्तु परं गुल्मोदरकासश्वासच्छर्द्यामयेषु" सुश्रुतः।

**धाय** त्रि० धा-घञ्। धारके "दद्दैर्दुःखस्य भाङ्मध्यो धायैरामोदसत्तमम्" भट्टिः। "अनित्यत्वात् न क्रत्योगे घञी दुःखस्य धायैः पोषकैरित्यन्ये वा" जयमङ्गलः।

**धायस्** त्रि० वसेर्धिति तोऽनुवृत्तौ "बहिर्हाधाञ्भ्यश्छन्दसि" उणा० असुन् युक् साधवः।१धारके "भूरसि भूमिरस्यदितिरसि विश्वधायाः विश्वस्य भुवनस्य धर्त्री" यजु० १३।१८। धेट-भावे असुन्।२पाने च "तुविष्टमाय धायसे" ऋ०१।१३०।२ "तुविष्टमाय प्रभूताय पानाय धायसे" भा०। [ १।३०।७।

**धायु** त्रि० धा-उण् युक्। धारके "यस्मै धायुरदधाः" ऋ०

**धार्य्य** पु०धा-कर्मणि यत् युक्।१पुरोडाशे धीयते समिदनया करणे नि० यत्। २सामधेन्यामृचि स्त्री ततो दिगा० भवादौ वत् यलोपाद्धोपौ। ३धार्य्य तत्र भवे त्रि० "यजेति धायाद्रूपं प्रगाथा यजामहाः" यजु०१८।२४।

**धार** न० धारया दृदम् अण्।१वर्षौद्भवजले दिव्यपानीयप्रभेदे। तद्गुणभेदादि भावप्र० उक्तं यथा "धाराभिः पतितं तोयं ग्रहीतं स्फीतवाससा। शिलायां वसुधायां वा धौतायां पतितञ्च यत्। सौवर्णे राजते ताम्रे स्फाटिके काचनिर्मिते। भाजने मृण्मये वापि स्थापितं धारसञ्ज्ञिते। धारं नीरं त्रिदोषघ्नमनिर्देश्यरसं लघु। सौम्यं रसायनं वल्यं तर्पणं चक्षुषां हितम्। पाचनं मतिजन्मूष्णां तन्द्रादाह श्रमक्लमान्। लघ्वी क्षरति तत् पथ्यं विशेषात् प्राङ्मुखं ऋतम्। राजनि० तु अन्ययोक्तं यथा "यदा स्वादाश्विने मासि सूर्य्यः स्वातीविशाखयोः। तदाम्बुजलदैर्मुक्तं गाङ्गसङ्गं मनीषिभिः। अन्यदा मृगशीर्षादिनक्षत्रेषु यदम्बुदैः। अभिवृष्टमिदं तोयं सासद्भूमिति संज्ञितम्। तयोर्गुणाः। "गाङ्गं जलं स्वादु सुगीतलञ्च रुचिप्रदं पित्तकफापहञ्च। त्रिदोषघ्नमिदं लघु तच्च नित्यं सुखाधिकं व्योम्नि सङ्गृहीतमाहुः। सासद्भूसलिलं प्रीतं कफवातकरं गुरु। चित्रायामाश्विने तच्च सुखाढ्यं गाङ्गवद्भवेत्। पतितं भुवि तत्तोयं गाङ्गं सासद्भूमेव वा। सस्याम्रवणवाटुगच्छेदन्यदन्यद्वृषादिकम्"। ४-क्विप् अच्। २धारावान्तरे ३खड्गे च मेदि० भावे अप्। ४जलधारावर्षणे हेमच०। ५खड्गादेरन्तभागे ६गम्भीरे पु० शब्दा०।

**धारक** त्रि० धारयति धारि-ण्वुल्। १धर्मणि २धारणकर्त्तरि च। ३कलसे तस्य नामनिरुक्तिः देवीपु० "यस्मात् धारयते यस्मात् मातरादिविधास्तथा। दुरितानि च निघ्नन्ति तेन ते धारकाः स्मृताः" ४यौनौ स्त्री कापि वेदे धत इत्वं न। "निगलगलीति धारका" यजु०२१।२२ "धरति शिक्षं धारका योनिः" वेददी०।

**धारण** न० धारि-ल्युट्। १धरणे २विचारणे भावे युच्। ३बुद्धिभेदे ४राज्ञां न्यायपथस्थितौ च स्त्री अमरः। ५योगाङ्गभेदे स्त्री तल्लक्षणादिकं पात०सू०भा० उक्तं यथा "योगाङ्गानुष्ठानन्तु विधैव कारणत्वं लभते इति योगाङ्गान्यवधार्य्यन्ते" भा० "यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधयोऽष्टावङ्गानि" पा०सू०। "यथाक्रमं एतेषाम् अनुष्ठानं स्वरूपञ्च वक्ष्यामः" भा० इति उद्देशक्रमेण तेषां मध्ये पञ्चानां लक्षणानि पात० सू० समाधिपादे दर्शयित्वा धारणादेर्लक्षणानि विभूतिपादे उक्तानि तत्र धारणायाः लक्षणं दर्शितं यथा "उक्तानि पञ्च बहिरङ्गानि साधनानि धारणा वक्तव्या" भा० आभासः।

"देशबन्धश्चित्तस्य धारणा" पा० सू०।

"नाभिचक्रे हृदयपुण्डरीके मूर्द्ध्नि ज्योतिषि नासिकाग्रे जिह्वाग्रे इत्येवमादिषु देशेषु बाह्ये वा विषये

चित्तस्य हृत्तिमात्रेण बन्ध इति बन्धोधारणा" भा० । "प्रथमद्वितीयपादाभ्यां समाधिसाधनं चोक्तम् तृतीयपादे तत्प्रसङ्गेनानुषङ्गाः अङ्गोत्पादहेतवो विभूतयो वक्तव्याः ताश्च संयमसाध्याः संयमश्च धारणाध्यान समाधिसमुदाय इति विभूतिसाधनतया पञ्चमस्य योगाङ्गेभ्यो बहिरङ्गेभ्योऽन्तरङ्गतया विशेषज्ञापनार्थमत्र त्रयस्योपन्यासः तत्रापि च धारणाध्यानसमाधीनां कार्यकारणभावेन नियतपौर्वापर्यत्वात्तदनुरोधेनोपन्यासक्रम इति प्रथमं धारणा लक्षयीवेत्याह उक्तानीति देशेति" आध्यात्मिकदेशमाह । नाभिचक्र इति । आदिशब्देन तालादयो बाह्याः बन्धः सम्बन्धः । बाह्यदेशमाह बाह्यइति । बाह्ये च न स्वरूपेण चित्तस्य सम्बन्धः सम्भवतीत्युक्तं हृत्तिमात्रेण इति यत्रापि पुराणम् "प्राणायामेन पवनं प्रत्याहारेण चेन्द्रियम् । वशीकृत्य ततः कुर्याच्चित्तस्थानं शुभाश्रये शुभाश्रया बाह्या स्थिरगन्धर्वासवप्रजापति प्रभृतयः दृश्यं तत्रोक्तम् । "मूर्त्तं भगवतोरूपं सर्वौपाश्रयनिष्पृहम् । एषा वै धारणा ज्ञेया यच्चित्तं तत्र धार्यते । तच्च मूर्त्तं हरेरूपं तद्विचिन्त्य नराधिप ! । तत् श्रूयतामनाधारा धारणा नोपपद्यते । प्रसन्नवदनं चारु पद्मपत्रनिभेक्षणम् । सुकपोलं सुविस्तीर्णललाट फलकोज्वलम् । समकर्णान्वितस्निग्धकुण्डलभूषणम् । कम्बुग्रीवं सुविस्तीर्णं श्रीवत्साङ्कितवक्षसम् । वलीविभङ्गिना मग्ननाभिना चोदरेण च । प्रलम्बाष्टभुजं विष्णुं अथ वापि चतुर्भुजम् । समस्थितोरुजङ्घञ्च सन्निकार्द्धकराम्बुजम् । चिन्तयेद् ब्रह्मभूतं तं पीतनिर्मलवाससम् । किरीटहारकेयूरकटकादिविभूषितम् । शार्ङ्गचक्रगदाखड्गशङ्खाब्जवनमालान्वितम् । चिन्तयेत्तन्मयो योगी समाधायात्ममानसम् । तावत् यावत् दृढीभूता तत्रैव रूप ! धारणा । एतदातिष्ठतोऽन्यद्वा स्वेच्छया कर्म कुर्वतः । नापयाति यदा चित्तं सिद्धां मन्येत तां तदेति" विष्णुः ।

सां० सूत्रोक्ते पूरकरेचककुम्भकाख्यप्राणनिरोधरूपे चित्तवशीकरणे प्राणायामभेदे च । यथा "ध्यानस्यापि साधनान्याह" भा० "धारणासनसत्कर्मणा तत्सिद्धिः" सां० सू० "वक्ष्यमाणेन धारणादित्रयेण ध्यानं भवतीत्यर्थः । धारणादित्रयं क्रमात् सूत्रत्रयेण लक्षयति । "निरोधश्छर्दिविधारणाभ्याम्" सू० "प्राणस्येति प्रसिद्ध्या लभ्यते । प्रच्छर्दनविधारणाभ्यां वा प्राणस्येति योगसूत्रे भाष्यकारेण प्राणायामस्य व्याख्यातत्वात् । छर्दिश्च वमनम् । विधारणं त्याग इति यावत् । तेन पूरकरेचनयोर्लाभः । धारणश्च कुम्भकम् । तथा च प्राणस्य पूरकरेचककुम्भकैर्यो निरोधो वशीकरणं सा धारणेत्यर्थः । आसनादेः स्वशब्देन पश्चाल्लक्षणीयतयासूत्रे परिशेषत एव धारणायालक्ष्यत्वलाभाद्धारणापदं नोपात्तम् । चित्तस्य धारणा तु समाधिवद्ग्रानशब्देनैव सङ्गृहीतेत्युक्तम्" प्र० भा० ।

"धारयेत्तत्र चात्मानं धारणां धारयन् बुधः" याज्ञ० प्राणायामविशेषरूपस्य धारणात्मकत्वसङ्गम् व्याख्यातञ्चैतत् "तत्र च हृत्पद्मात्मानं मनोगोचरतया धारयेत् । तथा धारणाश्च धारयेद्धारणास्वरूपञ्च जान्वग्रभ्रमणेन छोटिकादानकालोमात्रा ताभिः पञ्चदशमात्राभिरधमः प्राणायामस्त्रिंशद्भिर्मध्यमः । पञ्चचत्वारिंशद्भिरुत्तम इत्येवम्प्राणायाममात्रयात्मिकैका धारणा । तास्तिस्रो योगशब्दवाच्यास्तांश्च धारयेत् । यथोक्तमन्यत्र "संभाव्य छोटिकान्दद्यात्करापङ्क्तानुभयत्रले । मात्राभिः पञ्चदशभिः प्राणायामोऽधमः स्मृतः । मध्यमोद्विगुणः श्रेष्ठस्त्रिगुणोधारणा तथा । तिसृभिस्तिसृभिः स्मृतैकैका ताभिर्योगस्तथैव चेति" । धारणात्मकयोगाभ्यासे प्रयोजनमाह "श्रवनद्वानं स्मृतिः कान्तिर्दृष्टिः श्रोत्रतता तथा । निजं शरीरसृष्टिश्च परकायप्रवेशनम् । स्वर्यानाच्छन्दतः मृत्युर्योगसिद्धेश्च लक्षणम् । सिद्धे योगे त्वजन्देहमक्षतत्वाय कल्पते" मिताक्षरा धृता ।

वह्निपु० धारणास्वरूपभेदादिकमन्यत्रोक्तं यथा अग्निरुवाच "धारणा मनसोध्येये संस्थितिर्ध्यानवद्द्विधा । मूर्त्तामूर्त्तहरिध्यानं मनोधारणतो हरौ । यद्यद्भावस्थितं लक्ष्यं तस्मात्र चलते मनः । तावत् कालं प्रदेशेषु धारणा मनसि स्थितिः । कालावधि परिच्छिन्नं देहे संस्थापितं मनः । न प्रच्यवति यद्यस्माद्धारणा साऽभिधीयते । धारणा द्वादशायामा ध्यानं द्वादश धारणाः । ध्यानं द्वादशकं यावत्समाधिरभिधीयते । धारणाभ्याससंयुक्तात्मा यदि प्राणैर्वियुज्यते । कुलैकविंशसुत्तार्थं स्वर्याति परमं पदम् । यस्मिन् यस्मिन् भवेदङ्गे योगिनां व्याधिसम्भवः । तत्तदङ्गं धिया ध्यात्वा धारयेत्तत्त्वधारणम् । आग्नेयी वारुणी चैव ऐशानी चामृतात्मिका । सान्निः शिखा फडन्ता च विष्णोः

दावां द्विजोत्तम!। नाड़ीभिर्विकटं दिव्यं भूताद्यं वेधवेच्छुभम्। पादाङ्गुष्ठात् कपालान्तं रश्मिमण्डल-साहतम्। तिर्यक् चाधोर्द्ध भागेभ्यः प्रधान्योऽतीव तेजसा। चिन्तयेत् साधकेन्द्रस्तं यावत् सर्वं महाशने!। भस्मीभूतं शरीरं स्वन्तत्त्वैर्योपसंहरेत्। भीतस्तेऽतादय स्वापा विनश्यन्ति द्विजाऽसमाः। शिरोग्रीवाकरे चैव कण्ठे चोरोमुखे करेत्। ध्यायेदक्षिप्तचित्तात्मा पयो भूतेन चात्मना। क्षुरक्षीरकर्पूरप्रभूते हिमगा-म्बुभिः। धाराभिरखिलं विश्वमापूर्य्य भुवि चिन्तयेत्। ब्रह्मरन्ध्राच्च संक्षोभाद्यावदाधारमण्डलम्। क्षुण्मृणान्त-मेतो भूत्वा संपूर्णेन्दुसताशयम्। संस्राव्य हिमसंस्पर्श-तोयेनाखतमूर्त्तिना। क्षुत्पिपासाक्लमग्लायसन्तापपरिपी-ड़ितः। धारयेद्वारुणीं मन्त्री तदर्थं चाप्ततन्त्रितः। वारुणी धारणा प्रोक्ता ऐशानीं धारणां शृणु। व्योम्नि ब्रह्मबले पद्मे प्राणापाने जयङ्कते। प्रसादं चिन्तयेद् विष्णोर्यावच्चिन्ता क्षयं गता। संहारारूढमेतं सर्वं ततो व्यापक ईश्वरः। अर्द्धेन्दुं परमं ध्यानं निराभास-मिरञ्जनम्। अखिलं ग्रसमानाति तावत्सर्वं चरा-चरम्। यावत् ब्रह्मन्द्रूपन्तु न दृष्टं गुरुवक्त्रतः। दृष्टे तस्मिन् परे तत्त्वे ग्रासक्ष सचराचरम्। प्रमा-त्मानमेवन्तु ध्यानकृत्पद्मसम्भवम्। मातृभोदनजत् सर्वं जपहोमार्चनादिकम्। विष्णुमन्त्रेण वा कुर्य्यादस्तां धारणां वदेत्। संपूर्णेन्दुनिभं ध्यायेत् कमलं तन्निमू-र्त्तिकम्। शिरःस्थं चिन्तयेद् यत्राच्छगाङ्गायुतवर्षसम्। सम्पूर्णमण्डलं व्योम्नि शिवक्षोभपूर्णितम्। तथा कृत-कमले ध्यायेत्तन्मध्ये स्वतन्तं करेत्। साधको विगतक्लेशो जायते धारणादिभिः"। १७३अ०।

कालीख० ४२ अ० विशेषोऽन्योक्तो यथा "प्राणायामद्विषट्केन प्रत्याहार उदाहृतः। प्रत्या-हारैर्द्वादशभिर्धारणा परिकीर्त्तिता। भवेदीश्वरसङ्गत्वै ध्यानं द्वादशधारणम्" "प्रत्याहारेण सम्पन्नो धारणा-मथ चाभ्यसेत्। कृत्वे पञ्चभूतानां धारणं यत् पृथक् पृथक्। मनसो निश्चलत्वेन धारणा साऽभिधीयते। चतुरस्रनिभां भूमिं सालङ्कारां समेधसम्। चतुष्कोणां हृदि ध्यायेदेषा स्यात् क्षितिधारणा। कण्ठेऽम्बु तत्त्वमर्द्धेन्दुनिभं विष्णुसमन्वितम्। वकारबीजं कुन्दाभं ध्यायेत्तस्तु जयेदिति। तालुस्थमिन्द्रगोपाभं त्रि-कोणं रेफसंयुतम्। रुद्रेणाधिष्ठितं तेजोध्याता वह्निं जयेदिति। वायुतत्त्वं भ्रुवोर्मध्ये हत्तमञ्जनसन्निभम्। यं बीजमीशदैवत्यं ध्यायेद्वायुं जयेदिति। आकाशञ्च मरीचिधारसदृशं यद्ब्रह्मरन्ध्रस्थितं यन्नाथेन सदाशिवेन सहितं शान्तं हकाराक्षरम्। प्राणं तत्र विलीय पञ्च-घटिकं चिन्तान्वितं धारयेदेषा मोक्षकपाटनपटुः प्रोक्ता नभोधारणा। तस्मात्तु प्रावनी चैव शोषणी दाहनी तथा। मारणी च भवन्त्येता भूतानां पञ्च धारणाः" इ०सं०तन्त्रे जलसूत्रके वायुविशेषधारणाद्याख्याने ह्योगभेदे च "तत्रैवस्थितेऽस्याद्याश्चत्वारो वायुधारणादिवशाः। ब्रह्मरुद्रपवनाः शक्राः स्निग्धवनस्वगितगगनाश्च। तत्रैव स्याद्यादौ दृष्टे भवतृष्णे क्रमान्नाशाः। श्रावणपूर्वा ग्नेयाः परिकृता धारणाश्चाः क्षुः। यदि ताः क्षुरेक-रूपाः शुभास्ततः सान्तरासु न शिवाश्च। तत्करभवदाः प्रोक्ताः शोकाद्याश्चल वासिष्ठाः। सविद्युतः सधूमतः सपांशूत्करमारुताः। सार्कचन्द्रपरिच्छन्ना धारणाः शुभ-धारणाः। यदा तु विद्युतः क्रोडाः शुभाशामल्युप-स्थिताः। तदापि सर्वसत्त्वानां दृष्टिं म्रुवादिचक्षणः। सपांशुवर्षाः सापाश्च शुभा वाक्रिया अपि। पक्षिणां शुक्रारा वाचः क्रीडा पांशुजलादिषु। रविचन्द्रपरि-वेषाः स्निग्धा नात्यन्तदूषिताः। दृष्टिस्तादापि विज्ञेया सर्वसत्त्वाभिवृद्धये। मेघाः स्निग्धा संहताश्च प्रदक्षिणगति-क्रियाः। तदा ह्यात्मकृती दृष्टिः सर्वसत्त्वार्थसाधिका" २२अ०

**धारणी** स्त्री धारि-ल्युट्। १स्वार्थे "शारीरिकधारणी शिखिनाम्" दशक०। २नाड़िकायां ३तुद्राणां मन्त्रभेदे मेदि० ४श्लेष्मणि हेमच०। [पु० राजनि०।

**धारणीय** त्रि०धारि-कर्मणि अनीयर्। १धार्य्ये २धरणीकर्त्ते

**धारणीययन्त्र** न० धार्य्यते धारि-कर्मणि अनीयर् कर्म०। धार्य्ये देवताभेदानां यन्त्रभेदे तच्च पूजायन्त्रादिशब्दे सारदायां २४ पटले दृश्यम्। तद्धेखनद्रव्यादि तत्रोक्तं यथा "काश्मीररोचनाकाश्मीरगेरुमदचन्दनैः। विलि-खेद्धेखेत्तथा यन्त्राण्येतानि देशिकः"। निषिद्धयन्त्रसङ्ख्यम् "भूमिस्पृष्टं शवस्पृष्टं दग्धं निर्माल्यसङ्गतम्। विशीर्णं लङ्घितं मन्त्री यन्त्रं जातु न धारयेत्" मन्त्रमहोदधौ १८ तरङ्गे। तद्धेखनप्रकारद्रव्यादिकन्तत्र तत्रैव दृश्यम्। विस्तरभयात् न लिखितं, कर्मभेदे सामान्यतोलेखनद्र-व्यादिकं २५तरङ्गे तत्रोक्तं यथा "चन्दनं रोचना रात्रि-र्मृगधूमवितामवः। अष्टगन्धोऽष्टविधाधोति शान्त्यादौ यन्त्रलेखने। पूर्वोक्तलेखनद्रव्यं मन्त्रशोधनेऽपि ध्रुवम्।

पिप्पलं मरिचं शुण्ठी श्लेष्मविषाय चिन्तकः। शटः धूमोद्गारशो ज्वरघ्नश्च विषाटकम्। शाली वल्ले लिखेद्भूर्जे स्तम्भने हीपिचर्मणि। खरचर्मणि विद्वेषे उच्चाटे ध्वजवाससि। नराश्वनि लिखेद्यन्त्रं मारणे मन्त्रवित्तमः। ये त्वाधाराः कृता बन्धतरङ्गे तेऽपि सम्मताः"।

धारय त्रि॰ धारि–च। धारके "धारयेः कृष्णमोर्णीयाम्" भट्टिः।

धारयिष्ठ त्रि॰ धारि–तृच्। धारणकर्त्तरि "त्वं हि धारयिता त्रेष्ठ! कृष्णां कृष्णसत्तम!" भा॰ स॰ ८३अ॰। स्त्रियां ङीप्। धा च २पृथिव्यां स्त्री मेदिनी।

धारयिष्णु त्रि॰ धृ–णिच् बेदे नि॰ इष्णुच्। धारणशीले "इषदः धारयिष्णवः" वि॰को॰ लोकेऽपि क्वचित् इष्णुच्। "शास्त्रं प्रज्ञा धृतिर्दाक्ष्यं प्रागल्भ्यं धारयिष्णुता। उत्साहो वाग्मिता दार्ढ्यमापत्क्लेशसहिष्णुता। प्रभावः शुचिता मैत्री त्यागः सत्यं कृतज्ञता। दया क्षीलं दमश्चेति गुणाः सम्पत्तिहेतवः" काम॰।

धारयु त्रि॰ धारमभिप्रवमिच्छति क्यच् बेदे॰ नि॰ न दीर्घः "क्यस्वन्दन्धि" पा॰ उ। १अभिप्रवणकामे "त्वं सोमाधि धारयुर्मन्द्रः" ऋ॰ ८।६७।१ "धारयुरभिप्रवणकामः" भा॰ धारयुधौरादात् मत्वर्थीयोयुरिति भाष्ये पद्माकरे व्याख्यानात् २धारावति च।

धारवाक त्रि॰ धार्य्यते धारि–कर्मणि अच् धारो धार्य्यो वाकः क्षोत्रं येन। क्षोत्रधारके ऋत्विगादौ "धारवाकेष्वजुनाय" ऋ॰५।३३।५।

धारा स्त्री धार्य्यन्ते यद्वा अत्र जलयो वा धारि–अच्। व्यवधानं १गतिभेदे अमरः। अव्ययशब्दे दृश्यम् अन्यत्र च "व्यवधानान्तु गतिधारा विभिन्ना सा च पञ्चधा। आस्यन्दितं धौरितकं रेचितं वल्गितं प्लुतम्। धौरितं वल्गितं धाराप्लुतसञ्ज्ञितं क्रमात्। उत्तारितं चेति यत्र शिक्षयेत् तुरगं गतौ:। उत्तेरितोऽतिवेगाढ्यो न ऋच्छति न पश्यति। धौरितं गतिभागे यदुद्योजितं वल्गितं पुरः। व्यत्ययायसहत्वात् कुत्सितार्थं गतक्रियम्। उत्तेजितं मध्यवेगं योजनं त्रयवल्गया। पूर्वापरोल्लम्बनतः क्रमादुत्तारणं प्लुतम्" अश्वशास्त्रे तु संज्ञान्तरेणोक्ताः। गतिः प्लुता चतुष्का च तद्वन्मध्या जवा परा। पूर्ववेगा तथा चान्या पञ्च धारा प्रकीर्त्तिताः। एकैका त्रिविधा धारा कथयिष्यादिधौ मता। ह्रस्वो मध्या तथा दीर्घा चालनैता योजयेत् क्रमादिति" "धाराः प्रसाधयितुमव्यतिकीर्णरूपाः" माघः। २सैन्यविशेषरचने ३अविच्छिन्नसन्तत्या द्रवद्रव्यस्य प्रपाते ४खड्गादेर्निशितत्वे ५पाषाणभेदे ७ऋषौ च पु॰ मेदि॰। ८यमधि ९व्यतिहारौ १०समूहे च शब्दरत्ना॰ ११प्रधाने १२वज्रवर्षे १३रथचक्रे स्त्री हेम॰। १४दाक्षिणात्यद्रुमभेदे स्त्री "विश्वा उत त्वया वयं धारा उदन्या इव" ऋ॰२।७।१। "इतश्च धारा उपयन्ति विश्वतः" ऋ॰ १।१२५।४। "धारां शितां रामपरश्वधस्य" रघुः। "ध्रुवं स नीलोत्पलपत्रधारया शमीलतां छेत्तुमृषिर्व्यवस्यति" शकु॰। "धारा शरेण पतिता जलदोदरेभ्यः" स्फुट॰। "तौ हन्यमानौ नाराचैर्धाराभिरिव पर्वतौ" रामा॰ ६।१८अ॰। "अथ माहेश्वरीं धारां शमयाद्य धराधिपः" भा॰ व॰ ८अ॰। "वज्रोः पविस्तमसि यत्तधारम्" यजु॰ १।२ धाराधरशब्दे दृश्यम्। १५जलप्रवाहे १६वाणि निघ॰ ह्रया॰ आशुदात्ता १७वर्षणे धृ॰ धारयुः।

धाराकदम्ब पु॰ धाराकालोपलक्षितः कदम्बः। प्रावृट्काले पुष्पवति कदम्बभेदे हेमच॰।

धारागृह न॰ जलधारायुक्तं गृहम्। (फोवारा) जलस्रावयन्त्रयुक्ते गृहे "धाराग्टहेष्वातपस्त्रिमन्तः" रघुः। "धाराग्टहे प्रगलितोदकदुर्दिनाभे क्लान्तः श्रयेत सलिलानिलशीतलत्वौ" सुश्रुतः।

धाराङ्कुर पु॰ धारायां अङ्कुर इव। १भीकरे २करकाख्ये घनोपले ३नाभीरे च मेदि॰। [हेमच॰

धाराङ्क पु॰ धारा अङ्कमिवास्य। १खड्गे २तीर्थभेदे च

धाराट पुंस्त्री धारायै अटति धारया वा अटति अट–अच्। १जातकरणे २अश्वे च स्त्रियां जातित्वात् ङीष्। ३मेघे पु॰ च शब्दरत्ना॰।

धाराधर पु॰ धारां धरति धृ–अच्। १मेघे २खड्गे च मेदि॰। "धाराधर! धरा वारिधारया परिपूर्य्यते। अगच्छन् पुटपोषीपूरये तव कः श्रमः" पातकाष्टकम्। "प्रत्यब्दञ्चात् प्रहृष्टात्मा धाराधरमिवाचलः" भा॰ वि॰ ६अ॰ [क्रमात्यध्यवर्षन् सुखानि" मेघ॰।

धारापात पु॰ ६त॰। जलधारायाः पतने। "धारापातैस्त्वमिव

धारापूप न॰ धाराख्यम् अपूपम्। अपूपभेदे "घृतमिश्रा कणिक्या वा दुग्धेनाक्षोड़िता तु सा। धाराख्यापूपकं प्राज्ञे प्रकं खण्डेन योजयेत्। धारापूपं गुरुमधुरं दृष्यं पित्तहरं परम्। स्निग्धं रोचनं हृद्यमत्यर्थं वातनाशनम्" भावप्र॰।

धाराफल पु० धारा वर्षिधारेव फलेऽस्य। मदनवृक्षे राजनि०
धारायन्त्र न० धारावा जलधारायाः प्रस्रवार्थं यन्त्रम्। (फोआरा) इति ख्याते जलस्रववन्त्रभेदे "धारायन्त्र-जलाभिषेककलुषे धौताङ्गने लोचने" अमरुशतकम्।
धाराल त्रि० धारा अस्त्यस्य लच्। धारायुक्ते खड्गादौ
धारावनि स्त्री धारायां अवनिरिव। वावौ त्रिका०। मरुवद्विङ्कृत्वात् स्त्रीत्वमेव युक्तं ङीत्वोक्तिः प्रामादिकी।
धारावर पु० धारया जलधारया वारयोत्साकाशम् इ-अच् ऋत०। मेघे "धारावरा मरुतो धृष्णुजसः" ऋ० २।३४।१।
धारावर्ष पु० धारया जलत्या अविच्छेदेन वर्षः। अविच्छेदेन वर्षणे। "अधारावर्षदुर्दिनम्" रघुः।
धारावाहिन् त्रि० धारया जलत्या वहति वह-णिनि। १जलत्या प्राह्वके क्रमेणाविच्छेदेन २आयमाने च। स्वार्थे क। धारावाहिकोऽप्यत्रार्थे "किन्तु सिद्धान्ते धारावाहिकबुद्धिस्तवे न ज्ञानभेदः" वेदान्तप०।
धाराविष पु० धारायां विषमस्य धारैव विषमस्य प्राचुर्यकारकत्वात् वा। खड्गे त्रिका०। [ञिक्षुवर्गभेदे अमरः।
धारासम्पात पु० धाराणां सम्यक् पातः। महावृष्टौ अवि-
धारास्रुही स्त्री धारायुता स्रुही शाकत०। तिधारायां स्रुह्याम् (तेकाँटा सिज)। राजनि०।
धारिन् पु० धृ-णिनि। १पीलुवृक्षे। २धारणकर्त्तरि। जटाधरः। ३अन्यार्थधारणयुक्ते च त्रि० "अन्येभ्यो धारिणः श्रेष्ठाग्न्यग्निभ्यो धारिणो वराः" मनुः। स्त्रियां ङीप्। वा च ४धरण्यां शब्दर०। ५आत्मभीरुवृक्षे स्त्री शब्दच०। धार अस्त्यस्य शोभ्यत्वेन इति। ६अघमर्षे त्रि० स्त्रियां ङीप्।
धारु त्रि० धेट-रु। पानशीले जटाधरः।
धारेश्वरी स्त्री धाराख्यपुर्यां देवी। धारापुरीस्थे देवीभेदे
धारोष्ण न० धारायां दोहनेन निर्गमकाले उष्णम्। "दोहनेनोष्णधारया यदाः प्रतिते दुग्धे। "धारोष्णन्त्वहनं पयो भ्रमहरं निद्राकरं कान्तिदं दुग्धं दुष्टमस्मिन्वर्त्तनमतिस्वादु त्रिदोषापहमिति" राजनि०।
धार्त्तराज्ञ पुंस्त्री धृतराष्ट्रोऽपत्यम् अण् उपधालोपः। धृतराष्ट्रापत्ये स्त्रियां ङीप्।
धार्त्तराष्ट्र पुंस्त्री धृतराष्ट्रस्यापत्यम् अण्। १दुर्योधनादौ २दुःशलायां स्त्री ङीप्। ३धृतराष्ट्रवर्षवंशोद्भवे नागभेदे पु० स्त्री। धृतराष्ट्रे राजदेये भवः अण्। ४क्षणवर्षचक्षुधरण-युते श्वेतवर्षे हंसभेदे पु०स्त्री (गँङ्होँस) अमरः वर्त्तः स्त्रियां ङीप्। "सतृष्णा मधुरगिरः प्रसाधिताशा मदोद्धतारम्भाः। निपतन्ति धार्त्तराष्ट्राः कालवशान्नेदिनीपृष्ठे" वेणीसं। अत्र "भरतसमवर्षनामसंज्ञया हंसा धार्त्तराष्ट्रा इति व्यपदिश्यन्ते" वेणी० दुर्योधनादयश्चात्र व्यङ्ग्यार्थाः। "धृतराष्ट्रस्य पुत्राणामानुपूर्व्येण कीर्त्तनं" इति जयमेजयप्रश्ने "दुर्योधनोयुयुत्सुश्च वैकर्त्तनोऽथ युयुत्सुश्च धार्त्तराष्ट्राः शतादिकाः। एतदेकशतं राजन्! कन्या चैका प्रकीर्त्तिता" भा०आ०६७अ०। उक्तेऽर्थे तत्तच्छब्दम्।
धार्त्तराष्ट्रपदी स्त्री धार्त्तराष्ट्रस्य हंसभेदस्य पादइव मूलमस्याः अन्तोदात्तो कृभ्वा० ङीषि पक्षावः। हंसपदीलतायां राजनि०।
धार्त्तेय पुंस्त्री धृतायाः अपत्यम् "ह्रादयः" पा० ढक्। धृतायाः अपत्ये स्त्रियां ङीप्। ततः यौधेयादि० स्वार्थे अञ्। तत्रार्थे
धार्म्म त्रि० धर्म्मस्येदम् अण्। १धर्मसम्बन्धिनि स्त्रियां ङीप् "धार्म्मी तनुरविक्लिबी" भा० आ० ६० अ०। प्राचुर्य्ये अण्। २धर्ममये च। "यत्रादाय यस्मिन् धर्मे तेजोमयोऽमृतमयः पुरुषो यत्रायमध्यात्मं धर्मस्तेजोमयोऽमृतमयः पुरुषः" शत० ब्रा० १४।५।५।११।
धार्म्मपत त्रि० धर्मपतेरपत्यादि अत्रपत्या० अण्। १धर्मपतिसम्बन्धिनि स्त्रियां ङीप्। [मन्यद्रव्ये न० ङेमच०।
धार्म्मपत्तन त्रि० तत्र भवः अण्। १धर्मपत्तनभवे २कोलके
धार्मिक त्रि० धर्मं वेद तच्छास्त्रमधीते वा धर्मं चरति वा-सेवते वा ठक्। १धर्मज्ञे २धर्मसेवके। "चरणमिश्रासेवा तेन दैवयशात् धर्मे ग्रहस्तोऽपि दुर्दशो न धार्मिक इति" सि०कौ०। "विभागशीलो यो नित्यं क्षमायुक्तोदया परः। देवतातिथिभक्तश्च स्मृतस्यः स तु धार्मिकः" इति दक्षोक्तलक्षणयुक्तत्वे धर्मिकपदवाच्यत्वनिर्णयः। "आचार्य्यतः १शुश्रू २शानदो३धार्मिकः४ शुचिः ५प्राप्तः ६क्षमो७दः दक्षाधुः स्त्रो१०ऽध्यापा दश धर्मतः" मनुः। ततः पुरोहिता०भावे यक्। धार्मिक्य धर्मानुशीलने न०।
धार्मिण न० धर्मिणां समूहः भिक्षादित्वे धर्मन् धर्मिन् इति पाठान्तरस्य सत्त्वात् अण् "इनस्त्रनपत्ये" पा० इनः प्रकृतिभावे न लोपः। धर्मवतां समूहे।
धार्मिणेय पुंस्त्री धर्मिण्याः अपत्यम् शुभ्रा० ढक्। धर्मिण्याः अपत्ये स्त्रियां ङीप्।
धार्म्यायण पुंस्त्री धर्म्मस्य गोत्रापत्यम् अश्व० फक्। धर्म्मस्य गोत्रापत्ये स्त्रियां गोत्रत्वेन जातित्वात् ङीप्।

धार्य्य त्रि० धारि-ण्यत्। धारणीये "धार्य्यः कथङ्कारमहं भवत्या विवहिष्यामीति वसुधैकगत्या" नैष०। "कार्य्यञ्च तस्य दशधा कार्य्यं धार्य्यं प्रकाश्यञ्च" सा० का० "एवं धार्य्यम् अध्यन्तःकरणादिविकल्पं प्राणादिलक्षणया इत्त्या शरीरं तच्च पार्थिवादि पाञ्चभौतिकं शब्दादीनां पञ्चानां समूहः पृथिवीति ते च पञ्च दिव्यादिभेदतया दशेति धार्य्यमपि दशधा" सा० कौ०।

धार्य्य न०धृष्ण भावः कर्म वा यञ्। प्रागल्भ्ये निर्लज्जत्वे। "धार्य्यमेतत्तयोर्विप्र! मत्तो यत्तु करग्रहः। अहो धार्य्यमहो धार्य्यं तयोः क्षत्रियवीरयोः" हरिवं०२०६अ०

धार्ष्णिक न० धृष्णोर्दक्षस्य पुत्रभेदे "धृष्णोस्तु धार्ष्णिकं जज्ञे रक्षे धृष्टं बभूव ह" हरिवं०१३ अ०।

धाव जवे शुद्धौ अक० शुद्धीकरणे संशोधने च सक० भ्वा० उभ० सेट्। धावतिते पा०। धावति धावते अधावीत् अधाविष्ट दधाव-वे। सार्वधातुके प्रतः वेगगतौ सर्व्वादेशस्तु पर०। अनेनैवोपपत्तौ तदादेशविधानं वेगगतौ धरतेः सार्वधातुके प्रयोगपरत्वार्थं शब्दस्तोमे आत्मनेपदत्वोक्तिः सुब्दोषात्। "गच्छति पुरःशरीरं धावति पश्चादसंस्थितं चेतः" भर्तृ०। "रेतः सिक्तमधावत्" ऐ०ब्रा०। "अधावीच्चारिसंसक्तम्" भट्टिः। "यथा पराङ्मं धावन्तमनुविपश्येत्" शत०ब्रा०२।२।१।२६। "दिवस्पृष्टे धावमानं सुपर्णम्" अथ०१३।२।२७ "सततं धावमानस्य चिन्तमानो विशाम्यते!" भा० व० १८८ अ०। जवे अस्य न उदित्त्वम् तेन धावित्वा धावित इत्यादि "दिग्भ्यतः सहसा प्रधाविताः" भा० भ० २० अ०। "वनान्तरे तोयमिति प्रधाविताः"। अतुसं० अन्यत्रार्थे उदित् धावित्वा धौत्वा धौत इत्यादि। "बाह्वोद्यानस्थित हरशिरश्चन्द्रिकाधौतहर्म्या" "धौताघाङ्गं हरशिरश्चा" मेघ०। "तुषारस्नुतिधौतरक्तम्" कुमा०। प्रादुपसर्गपूर्वकस्तु तत्तदुपसर्गद्योतार्थयुक्ते धावने।

धावक पु० धावति वस्त्रादिकं साधु धाव-ण्वुल्। १रजके २वस्त्रादिप्रक्षालके ३शीघ्रगामिनि (घाउड़िया) च त्रि० ४नागानन्दरत्नावलीकारके कविभेदे पु० "श्रीहर्षादेर्धावकादीनामिव धनम्" काव्यप्र०। "प्रथितयशसां धावकसौमिल्ल कविपुत्रादीनां प्रबन्धानतिक्रम्येति" साहित्यदर्पणे मिश्रम्।

धावन न० धाव-भावे ल्युट्। १शीघ्रगमने २प्रक्षालने च। "सुरवादिहितत्वात्र धावने पूरणे तथा" सुश्रुतः। "उच्छिष्टं नैव भुञ्जीयान्न कुर्य्यात् पादधावनम्" भा०व० ६५ अ०।

धावनि स्त्री धाव-अनि। १दृष्टिप्रक्षालने अमरः। २कण्ट-कार्य्यां राजनि०। स्वार्थे क धावनिका तत्रार्थे रत्नमा० वा ङीप्। धावनी तयोरर्थयोः मेदि०२धात्र्यां राजनि०

धासस् पु० धा-"वहिहाधाञ्भ्यस्कन्दिभ्यः" उणा० असुन् "पचिवचिभ्यां सुट् च" उणा०युटोऽनुदात्तिः उज्ज्वलदत्तः साधवस्तु "वसेश्चित्" उणा० डित्वतो णितोऽनुदात्तिमाह न युट इति भेदः तेन तन्मते धायस् इत्येव। धायसूब्दे उग्रम्। पर्वते उज्ज्वलदत्तः।

धासि पु० धारयति प्राणान् धा-वा असि। अन्ने निघ० यद्यविद्या दुदुहे भूरि धासेः" ऋ०१।५७।१ "धासेरन्नस्य" भा० "मर्द्दी मित्रस्य वरुणस्य धासिम्" १०।३०।१।

धि धृतौ तु०पर०सक०अनिट्। धियति अधैषीत्। दिधाय।

धिक् अव्य० धक्ष-नाशने धा-धारणे वा वा० डिकन्। १अपकारशब्दैर्भर्त्सनोत्पादने २निर्भर्त्सने ३निन्द्यायाञ्च। एतद्योगे निन्दाविषयवाचकशब्दात् द्वितीया। "धिक् धिक् शक्रजितं प्रबोधितवता किं कुम्भकर्णेन वा" सा० द०। "धिगस्तु तस्यातरलं मनस्विनः" नैष०। निन्दनीयत्वरूपे न द्वितीया किन्तु प्रथमैव। "धिङ्माता मम कैकेयी यया पापमिदं कृतम्" रामा० अयो० ८२ स०।

धिक्कृ धिक्+निन्दने कृ-करणे आदिक० उभ० सक०अनिट्। धिक्करोति धिगकार्षीत् धिक्चकार। धिक्कृतः (तिरस्कृतः) धिक्कारः धिक्क्रिया इत्यादि।

धिच्च सन्दीपने सक० क्षये जीवने अक० भ्वा० आत्म० सेट्। धिच्चते अधिच्चिष्ट दिधिच्चे।

धिग्दण्ड पु० धिगिति दण्डः। निर्भर्त्सनरूपे दण्डे "वाग्दण्डं प्रथमं कुर्य्यात् धिग्दण्डं तदनन्तरम्" मनुः।

धिग्वण पुंस्त्री मनूक्ते वह्वीर्थजातिभेदे "ब्राह्मण्यादायकन्यायां माहतो नाम जायते। आभीरोऽम्बष्ठकन्यायामायोगव्यान्तु धिग्वणः" मनुः। "शूद्रेण वैश्यायामुत्पन्ना आयोगवी तस्यां ब्राह्मण्याद्धिग्वणो जायते" कुल्लू०। "धिग्वणानां चर्म कार्य्यं वेणानां भाण्डवादनम्" मनुना तदुक्तिरुक्ता।

धित त्रि० धा-क्त छान्दसो न डिः। हिते निहिते। "सुदीतानं धितावानम्" ऋ० २।२७। २धृते च।

धिति स्त्री धि-धृतौ क्तिन्। धारणे

धिषिषु त्रि०दनुभ-सन् इडभावश्चन्दसे "दम्भ इच्च अभ्यासलोपः" ततः उ। दम्भितुमिच्छौ वञ्चयितुमिच्छौ "नूयन्तं धिषिषुमाहव राजपुत्रं दिदम्भिषुः" भट्टिः।

**धियसान** त्रि० धि–धारणे वेदे वा० असानच् किच्च । धारके "स त्वं न इन्द्र धियसानः" ऋ०५।३३।२ "धियसानः धारयन्" भा० ।

**धियाम्पति** पु० ६त० अलुक्समा० । इन्द्रपत्नौ त्रिका० ।

**धियायत्** त्रि०ई–काम्यौ (इच्छायाम्)शतृ यत् ३त० छान्दसः अलुक्समा० । कर्मणा इच्छति "एष पुरू धियायते इन्द्राय देवतातये" ऋ० ९।१५।२ "धियायते कर्मणा इच्छते द्वितीयार्थे चतुर्थ्यायाः छान्दसोऽलुक्" भा० ।

**धियायु** त्रि०धि–धारणे धीयते त्रायते अनया धि–वा० करणे यु धिया तां प्रज्ञामात्मनः इच्छति क्यच् "क्यचश्छन्दसि" पा०उ । आत्मनः प्रज्ञाकामयीते । "विप्रासो वा धियायवः" ऋ० १।८।६ ।

**धियावसु** त्रि०धिया कर्मणा वसु यस्मात् वेदे अलुक्स० । कर्मणा वसुनिमित्ते देवभेदे सरस्वतीरूपा देवतैव धियावसुः । "यत्तं वट्टु धियावसुः"ऋ०१।३।१० "कर्महेतुधननिमित्तभूतायां वाग्देवतायामस्यामविधं धननिमित्तत्वमारण्यकाख्ये" "वाग्वै धियावसुः" श्रुत्या व्याख्यातम्" भा० ।

**धिव** प्रीणने गतौ च भ्वा० पर० सेट् इदित् / सार्वधातुके धिः आदेशः । धिनोति अधिन्वीत दिधिन्व । इदित् धिन्वन्ति ।"धान्यमसि धिनुहि देवान्" यजु०१।१० "भगैस्त्वर्णो रुधिरैर्धिनोमि" प्रबोधच० । "धिनोति नाशान् जनजैन पूजा" जैन० ।

**धिष** शब्दे जु० पर० अक० सेट् । दिधेष्टि अधेषीत् दिधेष । वैदिकोऽयम् । "स्तरीविदादि धिषा वेषि जनान्" ऋ० १।७२।८ "धिषा यदि धिषणन्तः सरण्यान्मृदन्तो अद्रिभोधिजस्य गोत्रे" ऋ० ४।२१।६ ।

**धिषण** पु०धृष्णोति धृष–"धृषोधिष च संज्ञायाम्"उणा०क्यु । इन्द्रपत्नौ । धृष्णोत्यनया करणे ल्यु । २बुद्धौ स्त्री अमरः "परावत धिषणाभ्यः" ऋ० ८।५८।२ । "आर्यपुत्रार्य-धिषण ! प्राघनाथ ! शुभव्रत" काशीख० १० अ० । ३स्तुतौ ४वाचि ५पृथिव्याञ्च निघ० ६स्थाने च "तदा विकृष्टधिषणात्तयोर्निपतमानयोः" भाग० २।१६।२२ । "ये पारमेष्ठ्यं धिषणमधितिष्ठन्न कञ्चन प्रत्युत्तिष्ठेदिति ब्रह्मधर्मं ते न परं विदुः" भाग०६।७।१२ ।

**धिषणाधिप** पु० ६त० । १वाक्पतौ सुराचार्ये मत्स्यपु०

**धिषण्य** धिषणामिच्छति क्यच् छान्दसदीर्घाभावेऽल्लोपः आत्मनःस्तुतीच्छौ अक०प०सेट् । धिषण्यति अधिषण्यीत् "धिषा यदि धिषणन्तः" ऋ०४।२१।६

**धिष्ण्य** न० धिष–अधृषा० नि० । धिष्णशब्दार्थे शब्दः

**धिष्ण्य** न० धिष–"सानसिधर्षसीत्यादि" उणा० नि० । १स्थाने २यज्ञे ३नक्षत्रे च अमरः ४अग्नौ ६शक्रौ च पु० मेदि० ६शुक्राचार्ये । तत्र स्थाने "न भौमान्येव धिष्ण्यानि स्थिरा ज्योतिर्मयान्यपि" रघुः । "स्वर्गे लोके स्रवतां नास्ति धिष्ण्यम्" भा० मद्दा० १ अ० । नक्षत्रे "भवन्त्यतीतधिष्ण्यानां भोगसिद्धायुता ध्रुवाः" सू०सि० । ७प्राणाभिमानिदेवे च "देवा अचिषे धिष्ण्या येऽ"ऋ०१।२२।१ "धिष्ण्यं वह्नयुपस्थितं देहसम्बन्धि उष्णी-कुर्वन्ति धिष्ण्याः प्राणाभिमानिनो देवाः उष–दाहे "सानसिधर्षसीत्यादि" उणा० नि० यत् खड्डागमः धात्वादिलोपोपपदस्वराः"भा० धिष्ण्यं स्थानमर्हति यत् यलोपाङ्लोपौ । स्थानार्हे स्तुत्ये त्रि० "को धिष्ण्यां प्रति वाकं पपाद"ऋ०१०।११४।६"धिष्ण्यार्हे स्तुत्यर्हे"भा० स्तुत्यस्य स्थानार्हत्वात् तथात्वम् । "आविवासन् रोदसी धिष्ण्येभ्र मे" ऋ० ७।७२।१ । "रोदसी धिष्ण्ये धिष्ण्यार्हे स्तुत्ये" भा० । उष–दाहे इति धात्वर्था-नुगमात् । १०लुब्धकभेदे स्त्री ह० स० १२अ० "दिवि मुक्तशुभफलानां पततां रूपाणि यानि तान्लुब्धाः । धिष्ण्योल्काशनिविद्युत्तारा इति षड्धा भिन्नाः" । "उल्का षड्वेग फलं तद्वद्धिष्ण्याशनिस्थिभिः षड्वैः" । "तारा फलपादकरी फलार्धदात्री प्रकीर्त्तिता धिष्ण्या" सा च "धिष्ण्या ज्ञयाल्पपुच्छा धनूंषि दश दश्यतेऽ-नाश्रयधिकम् । ज्वलिताङ्गारनिकाशा ह्रस्वो हस्तो सा प्रमाणेन" कथिता ।

**धी** अनादरे आराधने च दिवा० आत्म० सक० अनिट् । धीयते अधेष्ट । दिध्ये ओदित् धीनः । "सत्यं परं धीमहि" भाग०१।१।१ कातन्त्रमतेऽस्य ओदित्त्वं नास्ति धीत इति । वेदे तु न ओदित् "धीतः विद्वान्यद्विना-युधं प्रधीतान्यमन्मम्" ऋ०८।८।० "सधीयते संधीत-मन्नुतम्" ८।४०।३। आधारे अक०इत्यन्ये ।

**धी** स्त्री धे सम्प० भावे–क्विप् संप्रसारणञ्च । १बुद्धौ ज्ञाने अमरः । "प्रसीद कथयात्मानं न धियां पथि । वर्त्तसे" कुमा० । २मानसवृत्तिभेदे "तत्त्वात्मानं धिया मध्ये-दाभासात्तु घटः स्फुरेत्" वेदान्त० "धियो योनः प्रचोदयात्" गायत्री सा च न्यायनये आत्मवृत्तिः । "बुद्ध्यादि षट्कं संख्यादिषट्कं भावना तथा । धर्मा-धर्मौ गुणा एते आत्मनः स्युश्चतुर्दश" भाषा० । वेदान्तमते

मनोवृत्तिः। "कामः संकल्पो विचिकित्सा श्रद्धाऽश्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरित्येतत्सर्वं मन एव" श्रुतिः। ४कर्मणि च "उधः स धियायदञ्जनः" ऋ० ५।११।१६। "धियां कर्मणाम्" भा० "धीभिश्चन मनसा स्वेभिरक्षभिः" ऋ० १।१२६।२ ५मनसि च "धीजवनोऽसि सोम!" ऋ० ९।८८।२ "धीजवनः मनोवेगः" भा० धीगुणशब्दे दृश्यम्।

धीच दीक्षायाँ भ्वा०आत्म०सक०सेट्। धीचते अधीचिष्ट दिधीचे "स वै धीचते वाचे हि धीचते यज्ञाय हि धीचते यज्ञो हि वाग् धीचितोऽह वै नामैतद्यद्दीचते" शत०३।२।२३०। अयञ्च वैदिकः दीक्षमानार्थकः। लोके तु दीक्षतेरित्यादि

धीगुण पु० ६०। "शुश्रूषा श्रवणञ्चैव ग्रहणं धारणं तथा। ऊहापोहार्थविज्ञानं तत्त्वज्ञानं च धीगुणाः" कामन्दकोक्तेषु अष्टसु बुद्धिधर्मेषु "धियां समष्टेः स गुणैरुदारधीः" रघुः।

धीत त्रि० धे-क्त। १पीते धी-क्त। धीनः लोके। २मे च धीतः। २ज्ञानाहते ३आराधिते च त्रि०।

धीति स्त्री धे-क्तिन्। १पाने २विषयायां क्षेमच०। ३ज्ञानादरे ४आराधने च ५अङ्गुलौ निघ०। "तमीं हिन्वन्ति धीतयो दश क्षिपः" ऋ०१।१४४।५ "धीतयो दशसंख्यका अङ्गुलयः" भा०। "धीतिरूक्थाय शस्यते" ऋ० १।११०।१

धीदा स्त्री धियं ददाति दा-क। १मनीषायां २कन्यायां क्षेम० २बुद्धिदातरि त्रि०। [३१५१ पृ० दृश्यम्।

धीन्द्रिय न० धीजनकमिन्द्रियम्। श्रोत्रादौ ज्ञानेन्द्रियशब्दे

धीमत् पु० धीः प्रज्ञास्यास्त मतुप्। १ऽहङ्कर्तरि २बुद्धिमति पण्डितादौ त्रि०। "स्यात्स्थगे मतुर्धीमानिदं ग्राह्यमकल्मषवत्" महः स्त्रियां ङीप्। [पृ०दृश्यम्।

धीर अवज्ञायाम् नित्यमवपूर्वकोऽयम् अवधीरयत् तच्छब्दे४२७

धीर त्रि० धियं राति रा-क। धियमीरयति ईर-अण् वा उप०स०। १पण्डिते २धैर्य्यान्विते अचञ्चले ३क्षमे मेदि०। ४वलयुते शब्दर०। ५मन्त्रे त्रिका० ६विनीते संक्षिप्त०। ७कङ्कुभे न०मेदि०। ८अश्वमौषधौ पु० राजनि०। ९बलिराजे पु०शब्दच०। १०चिदाभासद्वारा बुद्धिवृत्तिप्रेरके चिदात्मनि पु०। ११मनोहरे त्रि० "धीरसमीरे यमुनातीरे वसति वने वनमाली" गीतगो० "गम्भीरमन्द्रास्वनधीरनादः" भाग०। "सदङ्गधीरध्वनिमन्वगच्छत्" रघुः। "अथोचदेनं गगनस्पृगा रथः खरेण धीरेण निवर्तयन्निव" रघुः। तत्र पण्डिते "धीरैर्धीरोद्धतः कथितः" सा० द०।

"सोपधानान्वियं धीराः स्वेयमीं वहन्ति वे" भागः। १२काकोल्यां १३महाज्योतिष्मत्यां स्त्री राजनि० १४मानयुतायां मध्यायां प्रगल्भायां च नायिकायां स्त्री। तल्लक्षणभेदादिकं रसमञ्जर्यामुक्तं यथा

"मध्याप्रगल्भे मानवत्यायां प्रत्येकं त्रिविधे धीरा अधीरा धीराधीरा च व्यङ्ग्यकोपप्रकाशिका धीरा। अव्यङ्ग्यकोपप्रकाशिका अधीरा। व्यङ्ग्याव्यङ्ग्यकोपप्रकाशिका धीराधीरा। इयांस्तु विशेषः। मध्यायाधीरायाः कोपस्य गोपनशिक्षा। अधीरायाः पश्चात्। धीराधीरायास्तु वदनरुदिते कोपप्रकाशके। प्रौढ़ायाः धीरायास्तु रत्यौदास्यम्। अधीरायास्तु तर्जनताड़नादिः। धीराधीरायास्तु रत्यौदास्यतर्जनताड़नादि च कोपस्य प्रकाशकम्। यत्तु धीराभेदः स्त्रीवायामेव न तु परकीयायामिति प्राचीनलिखनम् तदाग्रहमात्रं धीरत्वमधीरत्वं तदुभयं वा मानलिपतं परकीयाया अपि मानचेत्तत्तासामप्यावश्यकम्। मानश्च स्त्रीवायामेव न तु परकीयाया इति वक्तुं न शक्यते"।

साहित्यदर्पणे तु अन्यथोक्तम् यथा

"ते धीरा चाप्यधीरा च धीराधीरेति च त्रिधा। ते मध्या प्रगल्भे तत्र। "प्रियं सोत्प्रासवक्रोक्त्या मध्या धीरा दृशेदुणा। धीराधीरा तु रुदितैरधीरा परुषोक्तिभिः। तत्र मध्याधीरा यथा "तदवितथमवादीर्यन्नृशंस त्वं प्रियेति प्रियजनपरिभुक्तं यद्दुकूलं दधानः। अदधिवचनतिमात्राः, कामिनां मण्डनश्रीर्जनति हि सफलत्वं वल्लभालोकनेन"। प्रगल्भा यदि धीरा स्यात्सकोपाकृतिस्तदा। उदासे सरते तत्र दर्शयन्त्यादरान् बहिः। तत्र प्रिये। "एकशयनसंस्थितिः परिचुता प्रसुप्तमाहु दूरतस्ताम्बूलानयनच्छलेन रभसाऽऽश्लेषो संविग्नितः। आलापोऽपि न भिश्रितः परिजनं व्यापारयन्त्यान्निके कान्तं प्रत्युपचारचतुरया कोपः कृतार्थीकृतः"। प्रत्येकं ता अपि त्रिधा। कनिष्ठाज्येष्ठारूपत्वात्तायकप्रथमं प्रति"।

धीरता स्त्री धीरस्य भावः। १अचाञ्चल्ये २धैर्य्ये ३पाण्डित्ये च "सहजामपपद्यस्व धीरताम्" रघुः। "प्रत्यादेशान्न खलु भवतो धीरतां तर्कयामि" मेघ०। त्वधीरत्व तत्रार्थे न० तत्र नायकयोर्गुणभेदे। "प्रागल्भ्यौदार्य्यमाधुर्य्यं शोभा धीरत्वकान्तयः। दीप्तिश्चायत्नजाभावश्चावस्थाः स्त्रियोऽङ्गजाः। अङ्गहारात्तु भावश्चावस्थास्तयोऽङ्गजाः।

शोभा कान्तिश्च दीप्तिश्च माधुर्य्यञ्च प्रगल्भता। औदार्य्यं धैर्य्यमित्येते सप्तैव स्युरवस्तुजाः। पूर्वे भावादयो धैर्य्यान्ता दश नायकानामपि सम्भवन्ति किन्तु सर्वेऽप्यमी नायिकान्विता एव विच्छित्तिविशेषं पुष्णन्ति" तद्यथासदाहरणं च तत्रैव। "सङ्गात्सङ्घना धैर्य्यं मनोऽवस्तिरचञ्चला। यथा "ज्वलतु गगने रात्रौ रात्राव खण्डकलः शशी दहतु मदनः किं वा भूयोः परेण विधास्यति। मम तु दयितः श्राघ्यस्तातो जनस्यमलान्यया कुलममलिनं न त्वेवायं जनो न च जीवितम्"

धीरपत्नी स्त्री धीरं मनोहरं पत्रमस्याः ङीप्। १धरणीकन्दे राजनि० २मनोहरपत्रयुक्ते त्रि०स्त्रियां टाप्।

धीरप्रशान्त पु०"सामान्यगुणैर्भूयान् हिलादिको धीरप्रशान्तः स्यात्" सा०द०लक्षिते नायकभेदे यथा मालतीमाधवादौ माधवादिः।

धीरललित पु० "निश्चिन्तो मृदुरनिशं कलाधरो धीरललितः स्यात्" सा० द० १लक्षिते नायकभेदे यथा रत्नावल्यादौ वत्सराजादि। २षोड़शाक्षरपादके छन्दोभेदे स्त्री "संकलिता भरौ नरनगाग धीरललिता" छ०र०टी०।

धीरस्कन्ध पुंस्त्री धीरः अचञ्चलः स्कन्धोऽवयवोऽस्यात्। मल्लिक्के हेमच०।

धीराधीरा स्त्री "धीराधीरा (मध्या) तु वदितैरधीरा परुषोक्तिभिः" "धीराधीरा (प्रगल्भा) तु बोद्धुलब्धमानितैः खेदयेदसम्" सा० द० उक्ते नायिकाभेदे अस्तं नायकम् यथा "अनलङ्कृतोऽपि सुन्दर! स्फुरसि मनो मे यतः प्रसभम्। किं पुनरलङ्कृतस्त्वं संप्रति नखरचनैस्तस्याः"। [ शशाङ्के नैषधेऽष्टमसर्गे।

धीरावी स्त्री धीरमवति अव-ग्रीष्मने अण् ङीप्। शिं-

धीरोदात्त पु०"अविकत्थनः क्षमावानतिगम्भीरो महासत्त्वः। स्थैर्यान् निगूढमानो धीरोदात्तो दृढव्रतः कथितः" सा०द० लक्षिते नायकभेदे "अविकत्थनोऽनात्मश्लाघाकरः महासत्त्वो दुर्मर्शोकाद्यनभिभूतस्वभावः। निगूढमानो विनयच्छन्नगर्वः। दृढव्रतोऽङ्गीकृतनिर्वाहकः" सा०द० यथा रामयुधिष्ठिरादि।

धीरोद्धत पु० "मायापरः प्रचण्डश्चपलोऽहङ्कारदर्पभूयिष्ठः। आत्मश्लाघानिरतो धीरैर्धीरोद्धतः कथितः" सा०द०लक्षिते १नायकभेदे यथा भीमसेनादिः। कर्म० २धैर्य्यान्वितोद्धते च "धीरोद्धतः पापकारी व्यसनी प्रतिनायकः" सा०द०

धीरोष्णिन् त्रिश्वदेवभेदे। "यैस्तामः परमक्रोधी धीरोष्णी भूपतिस्तथा" भा० अनु०८। अ०। विश्वदेवनामोक्तौ

धीर्य्य त्रि० धीरे भवः "भवे छन्दसीति" पा० यत्। कातरे माघवः "याक्षा चिदस्यो धीर्याः" ऋ० २।२७।१। "धीर्याः कातराः" इति भाष्यम्।

धीलटि स्त्री लट-बाहुलकात् इन् धिया कर्मणा लटिः। कर्मणा बाहुलकात्युतायाम्। दुश्चरित्रे शब्दार०।

धीवत् त्रि०धीरस्यास्त्यर्थे मतुप् वेदे मस्य वः। बुद्धियुक्ते "धीवतो धीवतः सखा" ऋ० ६।५५।२ "धिया धीवन्तो अमृतत्वमायन्" ऋ० ७।८२।८।

धीवन् त्रि० ध्यै-कनिप् संप्रसारणम्। १ध्यानयुक्ते २कर्मयुते उणादिकोषः। स्त्रियां "वनो र च" पा० ङीप् रेफान्तादेशः। धीवरी बहुव्रीहौ ङीप् रेफश्च। बहुधीवरी बहुधीवा।

धीवर पुंस्त्री दधाति मत्स्यान् जित्वरेत्यादिना नि०। १कैवर्त्ते २तद्भार्य्यायां स्त्री ङीप्। सा च बुद्धिकर्म्मभ्यां युतस्त्रियाम् धीवरशब्दे दृश्यम्।

धीशक्ति स्त्री ६त० बुद्धेर्युक्ते अमरः धीयुक्तशब्दे दृश्यम्।

धीसचिव पु० धियि बुद्धौ मन्त्रणादौ सचिवः धीप्रधानः सधीवो वा शाकल०। मन्त्रधानियुक्ते मन्त्रिणि धीसखा धीसहायादयोऽप्यत्र।

धु कम्पने अक०याचने सक०स्वादि०उभ०सनिट्। धुनोति धुनुते पर०सिचि इट् सुग्ध०। अधावीत् पा०नित् दुधाव दुधुविव दुधोथ दुधुविव दुधुवे। धोष्यति "धूनोति चम्मवनानि धूनोत्यधोकम्" कविरहस्यम्। अयं दीर्घान्तोऽपि स वेट् प० सिचि नित्यवेट् पा० अधावीत् अधविष्ट अधोष्ट ऋदादिनियमात् क्ति क्तिडि नित्यनिट् दुधुविव। यदि तु दुधविथ दुधोथ। धविष्यति ते धोष्यति ते। उभयोः धू(धु)तः। "धुन्वन् सर्वपदीनं खे वितानं पक्षयोरसौ" "तानधावीत् समाहृतान्" भट्टिः। "अधं धुन्वन्ति कार्ष्ण्येन" भाग० ६।१।१५। णिचि धावयति दीर्घान्तस्य धूनयति "आ धेनवो धुनयन्तामशिश्वीः" ऋ०१।५५।१६। "तुलस्थान्दृक्षः" भा०"निशान्तनारीपरिधानधूनस्फुटागसाऽधूरुरु लोलचक्षुषः" माघः। दोधूयते तत्र कम्पने भवने "दोधूयमानाश्च मरुत्पताकाः" भा० भी० ६० अ०।

उपसर्गपूर्वकस्तु तत्तदुपसर्गद्योत्यार्थमुते कम्पने चाहने च

धु स्त्री धु-कम्पने वा० भावे डु। कम्पने एकाक्षरकोषः।

धुच छन्दोग्रौ क्लेशे जीवने च अक० आत्म०। धुचते अनु-

क्षिप्ट दुधुक्षे। णिचि धुनयति ते "निर्वीर्यमविद्यमधाक्ष वीर्यं संधुनयन्तीव वसुर्गुणेन" "करेण भानोर्वडवावसाने संधुक्षमाणेव शशाङ्कलेखा' कुमा० "सत्वं समदुधुक्षत" भट्टिः।

धुनु पु० धुन्व-अच् पृषो०। पक्षिभेदे अजादेराकृतिगणत्वात् स्त्रियां टाप्। "दिशां कङ्को धुनुर्ग्रामेयी" यजु०२४।३१

धुत त्रि० धु-क्त। १त्यक्ते २विधूते च मेदि०।

धुन त्रि० धूनयति धूनि अच् पृषो०। कम्पके। "धुनेतयः सुप्रकेतम्" ऋ० ४।५०।२

धुनि(नी) स्त्री धुनोति वेतसादीन् धु-निक् धूनयति वेतसान् धूनि-इन् पृषो० ह्रस्वो वा ङीप् वा। १नदीमात्रे अमरः। "दिवे दिवे धुनयो यन्त्यर्थम्" ऋ०२।३०।२ "धुनयोनद्यः" भा०। "क्षुभ्यन्मुद्भसि सा पतती निमार्ष्टि" भाग० ८।२१।६ २असुरभेदे पु० "अग्नेनाभ्युप चुसुरिं धुनिञ्च" २।१५।६। "चुसुरिं धुनिम् एतन्नामासुरे" भा० २कम्पके त्रि० ४जलप्रतिरोधके असुरभेदे पु० "त्वं धुनिरिन्द्र! धुनिमतीः" ऋ०१।१७५।६ "हे इन्द्र! त्वं धुनिः कम्पयिता शत्रूणामसि अतो धुनिमतीः कम्पनोपेततरङ्गवती। अथ वा धुनिर्नाम जलप्रतिरोधकार्यसुरः स एव प्रतिरोधकतयास्ति यासां ताद्शीरपः" भा०तत्रैव कम्पनवत्त्वात् धुनित्वम्। धूनयति धू-णिच्-नक् इन् पृषो०ह्रस्वः। मरुतां मध्ये ५मरुद्भेदे। ते च मरुतः "उत्यद्या भीमद२ धानस्य२ धुनिस्व४। सासह्वांइदाभियुग्वाहे च विक्षिप:७ स्वाहा" यजु० २९।७ उक्ताः।

धुनीनाथ ६त० मरुद्भे राजनि०। धुनीपत्यादयोऽप्यत्र।

धुन्धु पु० मधुराजसखापत्ये "उतङ्क उवाच। भवता रक्षणं कार्यं तत्तावत् कर्तुमर्हसि। निरुद्विग्नमनपवर्तं न हि शक्नोमि पार्थिव!। समाश्रमसमीपे वै समेषु मरुधन्वसु। सप्तद्रो वालुकापूर्ण उत्सानक इति श्रुतः। देवतानामवध्यश्च महाकायो महाबलः। खन्तर्भूमिगतस्तत्र वालुकान्तर्हितो महान्। राजसश्च मधोः पुत्रो धन्धुर्नाम महासुरः। शेते लोकविनाशाय तप आस्थाय दारुणम्। संवत्सरस्य पर्य्यन्ते स निश्वासं विमुञ्चति। यदा तदा भूरुचलति सपैश्चवनकानना। तस्य निश्वासवातेन रज उद्धूयते महत्। आदित्यपथमाहत्य सप्ताहं भूमिकम्पनम्। सविस्फुलिङ्गं साङ्गारं धूमवमतिदारुणम्। तेन तात! न शक्नोमि तस्मिन् स्थातुं स आश्रमे। तं मारय महाकायं लोकानां हितकाम्यया। लोकाः सुस्था भवन्त्वद्य तस्मिन् विनिहते त्वया। त्वं हि तस्य वधायैकः समर्थः पृथिवीपते!। विष्णुना च वरो दत्तो मह्यं पूर्वयुगेऽनघ!। यत्तं महासुरं रौद्रं हनिष्यति महाबलम्। तस्य त्वं वरदानेन तेज आधास्यसि। न हि धुन्धुर्महातेजास्तेजसाऽन्येन शक्यते। निर्दग्धुं पृथिवीपाल! दिव्यवर्षशतैरपि। वीर्यं हि सुमहत्तस्य देवैरपि सुरासदम्। स एवमुक्तो राजर्षिस्तदुतङ्केन महात्मना। कुवलाश्वं सुतं प्रादात्तस्मिन् धन्धुविनर्हणे हरिवं०।।अ०

धुन्धुमार पु० धुन्धु मारयति मारि-अण् उप०स०। राजभेदे "राजा हि वीर्यवांस्तात! इक्ष्वाकुरपराजितः। दृढाश्व इति ख्यातो भविष्यति महीपतिः। तस्य पुत्रः शुचिर्दान्तः कुवलाश्व इति श्रुतः। स योगबलमास्थाय मामकम् पार्थिवोत्तमः। आसनात्तव विप्रर्षे! धुन्धुमारो भविष्यति" भा०व०२००अ०।

"दृढाश्व उवाच। भगवन्! न्यसशस्त्रोऽहमद्यन्तु तनयो मम। भविष्यति द्विजश्रेष्ठ! धुन्धुमारो न संशयः। स तं व्यादिश्य तनयं राजर्षिर्दृढाश्वारण्ये। जगाम पर्वतायैव तपसे संशितव्रतः। कुवलाश्वस्तु पुत्राणां शतेन सह पार्थिवः। प्रायादुतङ्कसहितो धुन्धोर्वधनिवर्हणे। तमाविशत्तदा विष्णुस्तेजसा भगवान् प्रभुः। उतङ्कस्य नियोगाद्वै लोकानां हितकाम्यया। तस्मिन् प्रयाते दुर्धर्षे दिवि शब्दो महानभूत्। एष श्रीमानुतङ्कोऽद्य धुन्धुमारो भविष्यति। दिव्यैर्माल्यैश्च तं देवाः समन्तात् समवाकिरन्। देवदुन्दुभयश्चैव प्रणेदुर्भरतर्षभ!। स मत्वा जयतां श्रेष्ठस्तनयैः सह वीर्यवान्। सप्तद्रं खानयामास वालुकापूर्णमव्ययम्। नारायणेन कौरव्य! तेजसाऽप्यायितस्तदा। स बभूव महातेजा भूयो बलसमन्वितः। तस्य पुत्रैः खनद्भिश्च वालुकान्तर्हितस्तदा। धुन्धुरासादितो राजन्! दिशमाहत्य पश्चिमाम्। सप्तभिर्वदनैर्वह्निः क्रोधाल्लोकानुपर्त्तयन्निव। वारि सुस्राव वेगेन महोदधिरिवोद्वे। सोमश्च, भरतश्रेष्ठ! धारोर्मिकलिलं महत्। तस्य पुत्रशतं दग्धं त्रिभिरुन्नत्तु रक्षसा। ततः स राजा कौरव्य! राक्षसं तं महाबलम्। आससाद महातेजा धुन्धुं धुन्धुनिवर्हणः। तस्य वारिमयं वेगमपिबत् स नराधिपः। योगी योगेन वह्निं स शमयामास वारिणा। निर्दह्य तं महा-

कार्यं बलेनोद्धराचरम्। उतद्धं दर्शयामास क्रतकर्मा नराधिपः" हरिवं॰ ११ अ॰ २१४।इदे कुवलाश्वशब्दे अस्य चरितानीति यत् लिखितं तत् प्रमादात् किन्तु धुन्धुमारशब्दे तच्चरितानि इत्येव तत्र पाठो बोध्यः। एतच्छब्दे च हरिवं॰ तच्चरितादिकथाश्लोका २शक्रगोत्रे श्रेष्ठधूम्रे ४पदार्थिके च मेदि॰।

धुर् स्त्री धुर्व–क्विप् वा टाप्। १चिन्तायाम्, २रथाद्ययमाने, ३यानसक्थे ४भारे च अमरः "धुर्यांयां च धुरो मोक्षम्" रघुः। ५अग्रे न॰ "अपांगुलानां धुरि कीर्तनीया" रघुः। "गौरिव गुरुणा नित्यं धूर्वं नियोज्यमानः" भा॰ आ॰ २३अ॰ "तेन धूर्जगतो गुर्वी सचिवेषु निचिक्षिपे" रघुः। समासे च समा॰ "न गर्दभा वाजिधुरां वहन्ति" सुश्रु॰। "अवस्रुभिर्युक्तधुरं तुरङ्गैः" रघुः। नञ्समा॰ न च समा॰। "न मामधुरि राजेन्द्र! नियोक्तुं त्वमिहार्हसि" भा॰ व॰ १२अ॰। अव्यय त न च समा॰। अवधूः। "प्रतिष्टब्धाच्चधुरावनन्ति" का॰ श्रौ॰ १८।२।२२। ५हिंसके त्रि॰। "दश धुरो दशयुक्तम् वहन्ग्राम्" ऋ॰ १०।६४।७ "धुरोधूर्भिर्हिंसितभिः शतीवार्धं प्रथमा" भा॰ अर्धच्छायायामपि ढाबन्तस्य क्वचित् तत्पुरुषे ङ्याप्योरिति हुस्वः। "ताक्ष्यं मारुतं रक्षोभिर्वाजिभि धुरवाहिभिः" भा॰ द्रो॰ ६६अ॰ भावे क्विप्। ६क्षीणायां च।

धुरन्धर त्रि॰ धुरं धारयति खच् खचि हुस्वः। १भारवाहके इषादौ "यस्माद्देवगणाः सर्वे स्थावराणि चराणि च। धुरन्धराङ्के तिष्ठन्ति तस्मात् भक्तिः शिवेऽस्तु मे" हेमा॰दा॰। २अवश्ये पु॰ मेदि॰। ३तत्तत्कर्मनिर्वाहरूप भारवाहे च। "सन्त एव सतां नित्यमापद्धुरधुरन्धराः। गजानां पङ्कमग्नानां गजा एव धुरन्धराः" हितो॰। ४श्रेष्ठे च। "धुरन्धरः पुण्यकृदेष तापसः" भा॰ उ॰ १७अ॰।

धुरीण त्रि॰ धुरं वहति सर्वधुरादित्वात् पा॰ योगविभागात् ख। १भारवाहके अमरः। २श्रेष्ठे यद्धच॰।

धुरीय त्रि॰ धुरमर्हति छ। इषे राजनि॰।

धुर्य्य त्रि॰ धुरं वहति "धुरो यड्ढकौ" पा॰ यत्। तद्धितवपरत्वाच्च दीर्घः। १धुर्वहे इषादौ २कार्यनिर्वाहके "प्रागल्भसमात्मा धुरि धुर्य्यवाग्मिनम्" किरा॰। "धुर्यः कर्मनिर्वाहकः" भट्टि॰। "समस्तकार्यधुरं गतेन धुर्य्यताम्" माघः। ३भारवाहके अमरः। ४श्रेष्ठे यद्धार्थच॰। ५इषभे ६ऋषभौषधौ च पु॰ राजनि॰ इषादौ "नाविनीतैर्व्रजेद्धुर्यैः" मनुः। "येनेदं ध्रियते विश्वं धुर्य्यैर्योनिमिवाध्वनि" कुमा॰। "रात्रिर्गता मतिमतां वर! त्यज शय्यां धात्रा द्विधैव नतु धूर्जगतो विभक्ता। तामेकतस्तव विभर्त्ति गुरुर्विनिद्रो यस्या भवानपरधुर्यपदावलम्बी" रघुः। ७विष्णौ पु॰। "स्कन्दः स्कन्दधरो धुर्य्यः" विष्णु॰। समस्तजन्तुजन्मादिनश्वरकार्यनिर्वाहकत्वात्तस्य तथात्वम् भाष्ये उक्तम्।

धुर्व हिंसे भ्वा॰ पर॰ सक॰ सेट्। धूर्वति अधूर्वीत्। दुधूर्व। ईदित् धूर्क्षः। "अधूर्वन् भूधरैर्भयम्" भट्टिः।

धुवक त्रि॰ धू–कन्। १गर्भमोचके उज्ज्वल॰। (धुया) ख्यातायां २गीतिभेदे स्त्री। ह्रस्वकाः पाठान्तरे न टापि अत इत्त्वम्। ततः चतुरस्यां प्रेङ्खादि॰ इनि धुविकिन्। तत्सन्निहितदेशादौ त्रि॰। ततः पिञ्छा॰ अस्यर्थे इलच्। धुविकिल धुवकयुक्ते त्रि॰।

धुवन पु॰ धु–धू–वा क्युन्। १यज्ञौ उज्ज्वलद॰ "ये यज्ञे धुवनं तन्वते" शत॰ ब्रा॰ १३।२।८।५। २चालकमात्रे त्रि॰। "अयमञ्जति पञ्चशराद्गुचरो नवनीपवनीधुवनः पवनः" सा॰ द॰ टी॰।

धुवित्र न॰ धूयते अनेन कुटा॰ धु–विधूनने इत्र। यज्ञियसंधुक्षणाय ऋग्यजुर्मादिरचिते याज्ञिकानां १व्यजने २तालवृन्तके अमरः।

धुस्तु(स्तू)र पु॰ धूस्तूर+पृषो॰। (धुतरा) ख्याते इक्षे अमरः

धू कम्पने भ्वा॰ उभ॰ सक॰ वेट्। धवति ते अधावीत् अधौषीत् सुधव॰पा॰मते प॰सिचि नित्यमेट्इतिभेदः अधवविष्ट अधोष्ट। दुधाव। "यत् कानने धवति चन्दनशाखरीव" कविर॰।

धू कम्पने वा॰ चुरा॰ उभ॰ पक्षे तुदा॰ कु॰ पर॰ सक॰ सेट्। धूनयति ते धुवति अदूधुनत् अधुवीत्। धूनयाम् बभूव आस चकार दुधाव। दुधुविथ "चूतं धुनाति धुवति स्फुरितातिसक्तम्। वायुर्विधूनयति केशरशुक्लरेणून्" कविरहस्यम्।

धू कम्पने स्वा॰ क्र्यादि॰ पर॰ सेट्। धूनोति धूनुते धुनाति धुनीते। अधावीत् अधौषीत् अधविष्ट अधोष्ट "धूनोति चम्पकवतानि धुनोत्यशोकं चूतं धुनाति धुवति स्फुरितातिसक्तम्" कविरहस्यम्।

धू स्त्री धू–क्विप्। विधूनने मेदि॰।

धूःपति पु॰ धुरः पतिः अक्षरादित्वात् पत्वादौ प्रत्वरत्वोपाध्मानीया वा। भारपतौ भारवहे पक्षे धुष्मति धूंषति धुंषति तत्रार्थे

धूक्ष पु० धुनोति उच्चादीन् धु-कन् दीर्घश्च। १वायौ उज्ज्वलद०। २धूर्त्ते ३काले संक्षिप्तसा०।

धूत त्रि० धू-क्त। १त्यक्ते २कम्पिते ३भर्त्सिते मेदि०।४तर्किते धरणिः "पवनश्च धूतनवनीपवनः" माघः। "पादानतः कोपनयाऽवधूतः" कुमा०।

धूतपाप त्रि० धूतं त्यक्तं पापं येन। १त्यक्तपापे २वेदशिरसो मुनेः शुचिनामाप्सरोजातायां कन्यायां स्त्री तस्या एव धर्मशापेन चन्द्रशिलात्वकतया नदीरूपेण प्रादुर्भावात् तद्रूपायां काशीस्थायां ३नद्यान्च स्त्री तत्कथा। काशीखण्ड ५१ अ० यथा

"पुरा वेदशिरा नाम मुनिरासीन्महातपाः। भृगुवंशसमुत्पन्नो मूर्त्तो वेद इवापरः। तपस्तप्तस्य मुनेः पुरोदग्गोचरं गता। शुचिरप्सरसां श्रेष्ठा रूपलावण्यशालिनी। तस्यादर्शनमात्रेण परिजग्मुः मुनेर्मनः। चस्कन्द स मुनिस्तूर्णं साध्वभीता वराप्सराः" इत्युपक्रम्य "इदानीं शृणु कल्याणि! कर्त्तव्यं यत् त्वया शुचे। ऋषीणां वीजा हि वयं तद्वीजसरसीकृतम्। एतस्मिन् रक्षिते वीर्य्ये परिरक्षे त्वदीक्षणात्। त्वमावां भवितासि कन्यारत्नं महाशुभे!। इत्युक्ता तेन मुनिना पुनर्जातेव साप्सराः। महाप्रसाद इत्युक्ता मुनेः शुक्रमजीगिलत्। अथ कालेन दिव्यस्त्री कन्यारत्नमजीजनत्। अतीव नयनानन्दि निधानं रूपसंपदाम्। शुचिरप्सरसां श्रेष्ठा जगाम त्रिदशालयम्। तान्तु वेदशिराः कन्यां स्नेहेन समवर्द्धयत्। क्षीरेण, स्नानसन्ध्यायां करिष्यन्ती करिष्यति। मुनिर्नाम ददौ तस्यै धूतपापेति चार्थवत्"। ततः पितृरूपदेशेन तपश्चरणे तस्या ब्रह्मतो वरप्राप्तिः धर्मशापेन नदीभावप्राप्तिरित्यादि कथा तत्रैवाध्याये यथा

"धूतपापोवाच। पितामह! वरो मह्यं यदि देयो वरप्रद!। सर्वेभ्यः पावनेभ्योऽपि कुरु मामतिपावनीम्। श्रुत्वा तदिष्टमाकर्ण्य पितरं तुष्टमानसः। प्रत्युवाच च तां बालां विमलां विमलेक्षिणीम्। ब्रह्मोवाच धूतपापे! पवित्राणि स्थानानि सन्त्यत्र सर्वतः। तेभ्यः परिश्रमतरं त्वमेधि वरतो मम। तिस्रः कोट्यर्द्धकोटी च सन्तीर्थान्यनेकशः। दिवि भुव्यन्तरीक्षे च पावनान्युत्तरोत्तरम्। तानि सर्वाणि तीर्थानि त्वत्तो प्रतिलोमं वै। रमन्तु मम वाक्येन भव सर्वातिपावनी। इत्युक्तान्तर्धे वेधाः सापि निर्धूतकल्मषा। धूतपापोऽभवं प्राप्ता-ऽथोवेदशिरसः पितुः। कदाचित्तां समालोक्य खेलन्तीसटजाजिरे। धर्मस्तत्पपा हृष्टः प्रार्थयामास कन्यकाम्। धर्म उवाच। शृणुश्रोणि! विशालाक्षि! चारुमोदरि! शुभानने!। क्रीतः स्वरूपसम्पत्त्या त्वयाहं देहि मे रतिम्। नितरां बाधते कामस्त्वत्कृते मां सुलोचने!। इत्थं सुसान्त्वा सा तेन प्रार्थितेत्यसकृद्गुरुः। उवाच सा पिता दाता तं प्रार्थय सुदुर्मते!। पितृप्रदेया यत् कन्या स्मृतिरेषा सनातनी। निशम्येति वचो धर्मो भाविनोऽर्थस्य गौरवात्। पुनर्निर्बन्धयाञ्चक्रेऽपश्यन्तिष्ठन्तिथान्तिनीम्। धर्म उवाच। न प्रार्थयेऽहं सुभगे! पितरं तवसुन्दरि!। गान्धर्वेण विवाहेन कुरु मे त्वं समीहितम्। इति निर्बन्धवद्वाक्यं सा निशम्य कुमारिका। पितुः कन्या फलं दित्सुः पुनराहेति तं द्विजम्। अरे जडमते! मा त्वं पुनर्ब्रूहीति याचतः। इत्युक्तोऽपि कुमार्य्या-न नातिबन्धदनातुरः। ततः शशाप तं बाला प्रबला तपोबलात्। जड़ोऽस्यतितरां यस्माच्छिलाधारो नदो भव। इति शप्तस्या सोऽथ तां शशाप क्रुधान्वितः। क्रूरोरूढवे! त्वं तु शिला भव सुदुर्मते! स्कन्द उवाच। इत्यन्योऽन्यस्य शापेन सुते! धर्मनदोऽभवत्। अविमुक्ते महाक्षेत्रे ख्यातो धर्मनदो महान्। साध्वाच्च पितरं त्यक्त्वा स्वशिलात्वस्य कारणम्। ध्यानेन धर्मं विज्ञाय मुनिः कन्यामथाब्रवीत्। मा भैः पुत्रि! करिष्यामि तव सर्वं शुभोदयम्। तच्छापो नान्यथा भूयाच्छन्द्रकान्तशिला भव। चन्द्रोदयमनुप्राप्य द्रवीभूता ततुत्तम। नदीभव सुते! साध्वि! धूतपापेति विश्रुता। स च धर्मो नदो कन्ये! तव भक्त्या सुशोभनः। तैर्गुणैः परिपूर्णाङ्गी ते गुणाः प्रार्थितास्त्वया। अन्यच्च शृणु सद्वृत्ते! ममापि तपसोबलात्। ईदृश्यं भवतोभूवि प्राक्तत्त्व दुस्तरम्। इत्याश्वास्य पिता तां तु धूतपापां परन्तपः। चन्द्रकान्तशिलाभूतामनुजग्राह बुद्धिमान्। तदारभ्य सुते! काश्यां ख्यातो धर्मनदो शुभः। धर्मोद्भवस्वरूपेण महापातकनाशनः। धुनी च धूतपापा सा सर्वतीर्थमयी शुभा"। "किरणा धूतपापा च तस्मिन् धर्मनदे शुभे। अवन्त्यौ पापसंक्षत्र्यौ वाराणस्यां शुभद्रवे। ततो भागीरथी प्राप्ता तेन दैवोपिना सह। भागीरथ्या सहायाता यमुना च सरस्वती। किरणा धूतपापा च पुण्यतीर्थे सरस्वती। गङ्गा च यमुना चैव पञ्च नद्यः प्रकीर्त्तिताः"। "करीषिणीं चित्रवहां चित्रसेनाङ्ग

निम्नगाम्। गोमतीं धूतपापाञ्च गण्डकीञ्च महानदीम्
भा० भी० ६ अ०। [ दृश्यम्।

धूति स्त्री धू–क्तिन् १विधूनने २हठयोगाङ्गभेदे हठयोगशब्दे

धून त्रि० धू–क्त स्वादि० तस्य नः। कम्पिते

धूनक पु० धूनयति संधुक्षयति वह्निम् चु० धू–ण्वुल् तुगागमः। (धुना) ख्याते यज्ञधूपे त्रिका० २चामरके त्रि०।

धूनन न० धू–णिच् भावे ल्युट्। चालने विधूनने।

धूनि स्त्री धू–भावे क्तिन् स्वादि० तस्य नः। कम्पने।

धूप दीप्तौ चुरा० उभ० अक० दीपने सक० सेट्। धूपयति-ते अदूधुपत्-त। धूपयाम् बभूव आस चकार। धूपितः। "वसवस्त्वा धूपयन्ति" यजु० ११।६ धूपशब्दे उदा०

धूप तापे अक० तापने सक० भ्वा० पर० सेट्। धूपायति अधूपायीत् अधूपीत्। धूपायाम् बभूव आस चकार दुधूप। धूपायितः धूपितः। "धूपायतीव पटलैर्नवनीरदानाम्" माघः।

धूप पु० धूपयति रोगान् दोषान् वा धूप-अच्। १गुग्गुलुप्रभृति सुगन्धद्रव्योत्थे धूमे, २ततसाधनद्रव्ये च तल्लिङ्गिर्यथा "धूताग्नेयमङ्गादोषपूतिगन्धः प्रभावतः। परमानन्दजननाद्धूप इत्यभिधीयते" धूपद्रव्यभेदः प्रपञ्चसारे "गुग्गुलुश्वेतसरलकोशीरसिताज्यमधुचन्दनैः। सारागुरुभिर्विनिर्मितैर्मन्त्री पीठैः प्रधूपयेत्"। योगिनीतन्त्रे "कृष्णागुरु सकर्पूरं चन्दनं सिल्हकं तथा। भगवत्यै नरो यस्तु इदं दत्त्वा महेश्वरः। इह कामवरान्प्राप्नोति दुर्गालोके महीयते"। आह्निक० वामनपुराणे

"रुचिकाख्यं कणं दारु सिल्हकं सागुरुं सितम्। शल्लो लातीफलं त्रीशे धूपानि स्युः प्रियाणि वै। रुचिका मांसी कनो मल्लिकाख्यगुग्गुलुः सितं कर्पूरं सितेति पाठे सिता शर्करा। शल्लो नखी। त्रीशे विष्णौ। विष्णुधर्मोत्तरे "धूपदः सर्वमाप्नोति धूपदः सर्वमश्नुते" वामनपुराणेऽस्य स्तोत्रतार्थी।

तन्त्रसारे विशेषः शारदायां "गुग्गुलुसुरकोशीरशर्करा मधुचन्दनैः। धूपवेदाज्यसंमिश्रैर्नीलैर्देवस्य दैशिकः"। विशेषस्तु तन्त्रान्तरे "सिताज्यमधुसंमिश्रं गुग्गुल्वगुरुचन्दनम्। षड्ङ्गं धूपमेतत्तु सर्वदेवप्रियं सदा"। तथा "गुग्गुलुं सरलं दारु पत्रं मलयसम्भवम्। क्षीवेरमगुरुं कुष्ठं गुडं सर्जरसं घनम्। हरीतकीं नखीं जाह्नां जटामांसीञ्च शैवलम्। शोड़शाङ्गं विदुर्धूपं दैवे पैत्रे च कर्मणि"। "मधु सुरा घृतं गन्धो गुग्गुल्वगुरुशैवलम्। सरलं सिल्ह सिद्धार्थं दशाङ्गो धूप इष्यते"। रोगारोगकरःरोगदःरोगाः दारुःजाहुःचतुष्पत्रविशेषाः वक्रविवर्जितःवारिजसुद्रा।"धूपवर्त्तिरिह सुन्दरिः भद्रा" अस्यार्थः कुड़ा हरीतकीः गुड़ःजटामांसीः देवदारुः लाक्षाः चतुरः तेजपत्रः सरलः नखी।"

"यथा गन्धं तथा देवि धूपं दद्याद्विचक्षणः। मध्यमानामिकाभ्यान्तु मध्यपर्वणि दैशिकः अङ्गुष्ठाग्रेण देवेशि! हृत्वा धूपं निवेदयेत्। तथा समर्पयेद्धूपं घण्टावाद्यजयस्वनैः"। तथा "धूपभाजनमस्त्रेण(फट्)प्रोक्ष्याभ्यर्च्य हृदाणुना(नमः)। अस्त्रेण पूजितां घण्टां वादयन् गुग्गुलुं दहेत्। ग्रामादौ तु भुवनेश्वरी बीजं पूर्वं दत्त्वा इमं मन्त्रं पठित्वार्पयेत्। "तथा जयध्वनिमन्त्रमातः! खाहेत्युदीर्य च। अभ्यर्च्य वादयेद् घण्टां धूपैर्धूपयेत्ततः"। तन्त्रान्तरे "धूपस्थानं समभ्यर्च्य तर्जन्या वामया स्पृशन्। धूपभाजनमस्त्रेण प्रोक्ष्याभ्यर्च्य हृदाणुना। एवं दीपदानेऽपि घण्टावादनमिति। तथाच गौतमीये "उत्तार्द्धदृष्टिपर्य्यन्तं घण्टां वामदिशि स्थिताम्। वादयन् वामहस्तेन दक्षहस्तेन चार्चयेत्"। यामले "निवेदयेत् पुरोभागे गन्धं पुष्पं च धूपयम्। दीपं दक्षिणतो दद्यात् पुरतो वा न वामतः। वामतस्तु तथा धूपमग्ने वा न तु दक्षिणे। नैवेद्यं दक्षिणे भागे पुरतो वा न पृष्ठतः"। वामदक्षिणभागस्तु देवतायां एव न तु साधकस्य। "धूपदीपौ सुभोज्यञ्च देवतायै निवेदयेदिति" दर्शनात् तिथितत्त्वे स्मृतिः "मधु सुरा घृतं गन्धो गुग्गुल्वगुरु शैवलम्। सरलं सिल्हसिद्धार्थौ दशाङ्गो धूप इष्यते। दशाङ्गो दशघटितः शैवलं खनामख्यातं सिद्धार्थः श्वेतसर्षपः। "तरुष्कं पन्थिकर्पूरनागरागुरु कुङ्कुमैः। सरामांसीसितामिश्रं धूपं दद्यान् मधु प्लुतम्"। तरुष्कं सिल्हकं पन्थिः (गाँठीयाल्लोति) ख्याता। सिता शर्करा नागरः शुण्ठी। भविष्ये "जलहीने तु दुर्भिक्षं गन्धहीने धनक्षयम्। धूपहीने तथोद्वेगं वस्त्रहीने धनक्षयम्" प्राह्वादिति शेषः कालिकापुराणे ६८अ० यथा "एवं वां कथितो दीपो धूपश्च ह्यधुतं श्रुतौ!। नासाद्विरम्बुसुखदः सुगन्धोऽतिमनोहरः। दह्यमानस्य काष्ठस्य प्रयत्नेतरस्य वा। परागसाद्य वा धूमो निस्तापो यस्य जायते। स धूप इति विज्ञेयो देवानां तुष्टिदायकः। राशीकृतैर्न चैकत्र तैर्द्रव्यैः परिधूपयेत्। तथाग्निवत्तथा

ह्रत्वा न तत् फलमवाप्नुयात्। श्रीचन्दनञ्च सरलः सालः कालागुरुस्तथा। उदयः सुरभः कन्दो रक्त विद्रुम एव च। पीतसालः परिमलो विमर्दीकाऽमनस्तथा। नमेरुर्देवदारुश्च बिल्वसारोऽथ खादिरः। सन्तानः पारिजातश्च हरिचन्दनवह्नयौ। इत्येषु धूपाः सर्वेषां प्रीतिदाः परिकीर्तिताः। अराल: सप्त सप्तैव श्रीवासः पटवासकः। कर्पूरः श्रीकरश्चैव परागः श्रीहरामलौ। सर्वौषधिरजोजातो वाराहः चूर्ण उत्कटः। जातीकोषस्य चूर्णञ्च गन्धः कस्तूरिका तथा। ओदे इत्ते च गदिता धूपा एते उदाहृताः। यक्षधूपो हकधूपः श्रीपिटोऽगुरु भर्भरः। पत्रिवाहः पिण्डधूपः सुगोलकण्ठ एव च। अन्योन्ययोग निर्यासा धूपा एते प्रकीर्तिताः। एतैर्विधूपयेद्देवान् धूपिभिः कृष्णवर्त्मना। येषां धूपोद्भवैर्ग्रासैस्तुष्टिं गच्छन्ति जन्तवः। निर्यासश्च परागश्च काष्ठं गन्धस्तथैव च। कल्पितश्चेति पञ्चैते धूपाः प्रीतिकरा मताः। न यक्षधूपं वितरेत् माधवाय कदाचन। न रक्तविद्रुमं सद्म सुरभः स्कन्दिने तथा। यक्षधूपः पत्रिवाहः पिण्डधूपः सुगोलकः। कृष्णागुरुः सकर्पूरो महामायाप्रियः स्मृतः। यक्षधूपेन वा देवीं महामायां प्रपूजयेत्। भेदोमज्जासमायुक्तान् न धूपान् विनिवेदयेत्। परकीयांस्तथा भ्रातान् क्लेशोत्पत्त्याभिमर्दितान्। धूपं धूपञ्च गन्धञ्च उपचारांस्तथा परान्। भ्रातान्विच्छेद्य देवेभ्यो नरो नरकमाप्नुयात्। न भूमौ वितरेत् धूपं नासने न घटे तथा। यथातथाधारगतं ह्रत्वा तदिनिवेदयेत्। रक्तविद्रुमसालौ च सुरभः सरलस्तथा। सन्तानको नमेरुश्च कालागुरुसमन्वितः। जातीकोषाद्यसंयुक्तो धूपः कामेश्वरीप्रियः। त्रिपुरा वासुदेवार्यं मातृणामपि नित्यशः। सर्वेषां पीठदेवानां कान्त्यादीनाञ्च पुत्रकौ। एष वां कथितो धूपः शृणु तं नेत्ररञ्जनम्"

क्षेत्रपालार्चायां षोड़शाङ्गादिधूपा यथा

"सुक्तं गुग्गुलुः कुष्ठं कर्पूरं मलयोद्भवम्। देवदारु जटामांसी जातीकोषञ्च वालकम्। सरा मांसी त्वगुरुकं त्वगुशीरञ्च केशरम्। एला तथा तेजपत्रं सर्वमेतद् घृताक्तकम्। धूपोऽयं षोड़शाङ्गः स्याद्भोविन्दप्रीतिकारकः"।

द्वादशाङ्गो यथा "गुग्गुलुश्चन्दनं पत्रं कुष्ठञ्चागुरु कट्टुमम्। जातीकोषञ्च कर्पूरं जटामांसी च वालकम्। त्वगुशीरञ्च धूपोऽसौ द्वादशाङ्गः प्रकीर्त्तितः।

दशाङ्गो यथा "कर्पूरं कुष्ठमगुरु गुग्गुलुर्मलयोद्भवम्। केशरं वालकं पत्रं त्वग्जातीकोषसंयुतम्। सर्वमेतद् घृताभ्यक्तं दशाङ्गो धूप ईरितः"।

अष्टाङ्गो यथा "गुग्गुल्वगुरुकं तेजपत्रं मलयसम्भवम्। कर्पूरं वालकं कुष्ठं नूतनं कट्टुमं तथा। अष्टाङ्गः कथितो धूपो गोविन्दप्रीतिदः शुभः"।

षडङ्गो यथा "चन्दनं कट्टुमं नूत्नं कर्पूरं गुग्गुलोऽगुरु। धूपोऽयं घृतसंयुक्तः षडङ्गः सप्तदाहृतः"।

विष्णुधूपे वर्जनीयद्रव्यम् यथा "ऐक्षवं सालनिर्यासं पद्मकं सरलं जतु। यवा मधूलिका तैलं गन्धकाष्ठं कलम्बकम्। गन्धकं टङ्कणं तालं हिङ्गुलञ्च मनःशिला। कङ्कोलमूषरं दार्वी गन्धमाद्री रसाञ्जनम्। अष्टवर्गः शठी मेथी शिलाजिद् गन्धचन्दनम्। कुन्दुरु रेणुकं रास्नाऽजमोदा शतपुष्पिका। हरिद्रा जीरकं श्वेतचीरञ्च रक्तचन्दनम्। कर्पूरकं सरलकं यवानी पत्रिका तथा। भैषजं धातकीपुष्पं नखी मोचरसादिकम्। शुक्लन्धूपे देवर्षे! सर्वमेतद्विवर्जयेत्" पाद्मोत्तरखण्डे

श्राद्धदेयो धूपो यथा ब्राह्मे "चन्दनागुरुणी चोभे तथैवोशीरपद्मकम्। तुरुष्कं गुग्गुलुश्चैव घृताक्तं युगपद् दहेत्"। "उशीरं वीरणमूलं तुरुष्कं सिल्हकम्" श्राद्धान्तरविष्णुधर्मे "धूपस्तु गुग्गुलुर्देयस्तथा चन्दनसारजः। अगुरुश्च सकर्पूरस्तुरुष्कस्तद्वत् च। विष्णुः "घृतमधुयुक्तं गुग्गुलुं श्रीखण्ड देवदारु सरलादि दद्यादिति"। देवलः "ये हि प्राणक्रियाधूपा हस्तवाताहृताश्च ये। न ते श्राद्धे नियोक्तव्या ये च के चोपगन्धयः। घृतं न केवलं दद्याद्दुष्टं वा घृतगुग्गुलुम्" निर्णयसिं०।

"अदत्त्वा गन्धमाल्यानि यो मे धूपं प्रयच्छति। कृष्णपो जायते भूमे! यातुधानो न संशयः। वर्षाणि चैकविंशानि नमस्कारनिरासकः। तिष्ठतेऽत्र महाभागे! एवमेतत् न संशयः" वराहपुराणम्।

विष्णुधूपो यथा "सक्तुः सार्जरसोपेतः सर्षपा एलवालुकैः। सुवर्णातस्करतरोः कुसुमैरनुलेपनः। धूपो वासयते क्षिप्रं स्थावरजङ्गमम्। न तत्र कीटा न विषं न दुर्दुरसरीसृपाः। न ह्रत्पाकभ्रमश्चात्र धूपोऽयं यत्र दह्यते" मत्स्यपु०।

धूपान्तरं तत्रैव "कार्पासास्थि भुजङ्गस्य तथा निर्मोचनं भवेत्। सर्पनिर्मोचनो धूपः प्रयुक्तः सततं गृहे

रोगनाशकधूपो यथा "कूर्ममत्स्याखुमक्षिकगोधागोधा-खाश्ववानराः। विड़ालवर्हिकाकाश्च वराहोलूककुक्कुटाः। हंस एषाञ्च विण्मूत्रं मांसं वा रोमयोषितम्। धूपं दद्याच्छरार्त्तेषु उन्मत्तेष्वथ शान्तये। एतान्यौषध-जातानि धूपितानि महेश्वर!। निघ्नन्ति रोगजातानि दक्षमिन्द्राशनिर्यथा" गारुड़ः।

"धूपोद्गमा त्यजितमार्द्रभावम्" कुमा० "दोहदधूपिनि द्रुमे" नैष० श्रन्नापके त्रि० "सुस्रुवुः सधूपात्" भट्टिः

**धूपन** पु० धूप-ल्यु। १यत्तधूमे (धुना) शब्दमाला २धूपे च "धूपनाङ्गैश्च धूपयेत्" सुश्रु० भावे ल्युट्। ३सन्तापने ४धूपकरणे च "परीक्षिताः स्त्रियश्चैनं व्यजनोदक धूपनैः" मनुः।

**धूपपात्र** न० ६त०। (धुनची) ख्याते धूपाधारे पात्रभेदे धूपभाजनादयोऽप्यत्र। "धूपभाजनमस्त्रेच प्रोक्षाभ्यच्च कृदाणुना" तन्त्रसारः।

**धूपमुद्रा** स्त्री धूपप्रदानार्थं मुद्रा। देवपूजाङ्गे धूपदा-नार्थं दर्शनीये मुद्राभेदे स च धूपशब्दोक्ते "मध्यमाना-मिकाभ्यान्तु" इत्यादि तन्त्रवाक्ये दर्शितः।

**धूपवास** पु० धूपेन वासः सुगन्धिकरणम्। स्नानोत्तरं धूपोद्गमा आर्द्रीभावमोचनेन सुगन्धीकरणे "स्नाना-र्द्रयुक्तेऽथधूपवासम्" रघुः।

**धूपसूच्च** पु० धूपसाधनं सूच्चः या०त०। सरलदृक्षे त्रिका० स्वार्थे क। धूपसूचक तत्रार्थे शब्दर०।

**धूपागुरु** न० धूपाय तदर्थं दाह्यम् अगुरु या०त०। दाह्ये अगुरुभेदे राजनि०। [२धूपाङ्गे न०।

**धूपाङ्ग** पु० धूपसाधनमङ्गमस्य। १सरलदृक्षे राजनि०। ६त०।

**धूपार्ह** न० धूपाय अर्हति पूज्यते अर्ह-कर्मणि घञ्। १लक्षागुरुणि राजनि०। धूपमर्हति अर्ह-अण्। उप०स०। धूपदानयोग्ये त्रि०।

**धूपित** त्रि० धूप-आयाभावपक्षे क्त। १सन्नद्धे २अध्वादि-श्रान्ते अमरः। "यवादिना दोहदधूपितो द्रुमः" इत्यायुर्वेदः। आवपक्षे धूपायित तत्रार्थे। "प्रदीप परिदीपिते विविधधूपधूपायिते" तन्त्रम्। धूप+ तारः। इतच्। ३दत्तधूपे इत्यादौ त्रि०।

**धूम** पु० धूनीते धू-कर्मणि मक्। वार्द्रेन्धनवह्निजाते मेघा-ञ्जनयोजनके (धुँआ) ख्याते पदार्थे "सङ्गजमलिनवक्र-भावभाजां भवति भवः प्रभवात्प्रनाशहेतुः। जलधर पदवीमवाप्य धूमोज्ज्वलनविनाशमेव याति नाशम्" प्रबो०

"धूपदीप्राग्निरुचोनि रेजुः" भट्टिः "धूमज्योतिः-सलिलमरुतां सन्निपातः क्व मेघः" मेघ० "घनानं पवनो-द्धुतैर्धूमैराङ्कतिगन्धिभिः" रघुः। भीमो भीमसेनवत् धूम-केतुशब्दोत्तरपदलोपः। २धूमकेतौ ३उल्कापाते च "त्रिदिनं धूमे पञ्च दिनानि गर्गः"। ४अग्निमान्द्यदूषके वायुभेदे (चोकोंवा ढेकुर) "धूमोद्गारे तथा वान्ते क्षुर-कर्मणि मैथुने" आह्निकत०। जाठराग्नेर्मान्द्ये हि अन्न-पाकस्यासम्यक्त्वात् जठरानलस्य दीप्त्यभावेन ततो धूम इवोद्गीर्यते इति लोकप्रसिद्धिः। सुश्रुतोक्ते धूमपाने च धूमपानशब्दे दृश्यम्। ६ऋषिभेदे ततः गर्गा० गोत्रे यञ्। तस्य धूमपिगोत्रापत्ये पुंस्त्री। स च युधि-ष्ठिरस्य पुरोहितः धौम्यशब्दे दृश्यम्। अश्वा० फञ्। धौमायन तद्गोत्रापत्ये पुंस्त्री०। ७देशभेदे। देशवाचिन-स्ततः धूमा० भवार्थे वुञ्। धौमक तत्र भवे त्रि०।

**धूमकेतन** पु० धूमः केतनं लिङ्गमस्यानुमाने। १वह्नौ वह्नेर्धूमलिङ्गेनानुमानात् तथात्वम्। २धूमकेतौ च मेदि० "निष्प्रभश्च रिपुरासु भूभृतां धूमयेव इव धूमकेतनः" रघुः

**धूमकेतु** पु० धूमः केतुर्लिङ्गमस्य। १वह्नौ अमरः २धूमाभ-तारकाभेदे उत्पातविभेदे केतुशब्दे दृश्यम्। "उपप्लवाय लोकानां धूमकेतुरिवोत्थितः" कुमा०। ३पक्षभेदे विश्वः केतुशब्दे २२१० पृष्ठादौ दृश्यम्। "केतुना धूमकेतोस्तु नक्षत्राणि त्रयोदश। भरण्यादीनि भिन्नानि नानुयान्ति निशाकरम्" हरिवं० ८०अ०।

**धूमगन्धि** न० धूमस्येव गन्धोऽस्य इव समा०। १रोहिषतृणे धूमेन गन्धयते गन्ध्यतेऽसौ गन्ध-इन् ३त०। २धूमेनानु मीयमाने वह्नौ "भाग्निर्धूमयोर्धूमगन्धिः" ऋ०१।१६२।१५

**धूमज** पु० धूमाज्जायते जन-ड। १मेघे २सञ्जके च।

**धूमजाङ्गज** न० धूमजस्य मेघस्य अङ्गात् अङ्गरूपात् वज्रात् जायते जन-ड। वज्रसारे राजनि०।

**धूमदर्शिन्** त्रि० धूमं धूमाक्तं पश्यति दृश-णिनि। सुश्रु-तोक्ते पित्तेन कफेन च विदग्धदर्शने मानवे। "तथा नरः पित्तविदग्धदृष्टिः कफेन चान्यस्य धूमदर्शी"

**धूमध्वज** पु० धूमः ध्वज इव यस्य। वह्नौ हेमच०।

**धूमप** त्रि० धूमं धूममात्रं पिबति पा-क। तपस्यार्थं धूममात्रपायिनि तपस्विभेदे "पृष्टनामान्वयो राज्ञा स किलाचष्ट धूमपः" रघुः। "पिबन्ति सनवो यत्र ऊ-र्ध्वमस्य धूमपा" भा०उ०१०७अ० "उष्मपाः सोमपाश्चैव धूमपा आज्यपास्तथा" भा०शा० २८अ०

धूमपथ पु० धूमोपलक्षितः पन्थाः ष ष० स० । इष्टियाने कर्मप्राप्यमार्गे "अगच्छं सामभिर्यत्र गिरा गिरिष्ठं धूमपथमक्षरम् (दक्षम्)" भाग० ४।४।११। पितृयानशब्दे दृश्यम् । धूममार्गादयोऽत्र । २धूमप्रचारमार्गे गवाक्षादौ च ।

धूमपान न० क्लीव० । सुश्रुतोक्ते नेत्ररोगादिरोगहरे धूमविशेषस्य पाने तद्विधिस्तत्रोक्तो यथा

"अथातो धूमनस्यकवलग्रहविधिविधिं व्याख्यास्यामः । धूमः षड्विधो भवति । तद्यथा प्रायोगिकः स्नेहनो वैरेचनः कासघ्नो वामनीयश्चेति । तत्रैतादिना कृततगरवर्ष्यौ च कुष्ठपिष्टेन द्वादशाङ्गुलं शरकाण्डं स्नौमेणाष्टाङ्गुलं वेष्टयित्वा लेपयेदेषा वर्त्तिः प्रायोगिके । स्नेहफलसारमधूच्छिष्टसर्जरसगुग्गुलुभ्रष्टतिभिः स्नेहनिकैः स्नेहने । सिराविरेचनद्रव्यैर्वैरेचने । इक्षुतो कण्टकारिकाबिल्वकुटकाकमर्दहिंस्रिबृहतीत्वङ्मनःशिलाञ्जिस्वरक्षारकर्कटशृङ्गीप्रभृतिभिः कासघ्नैश्च कासघ्ने । स्नायुचर्मखुरशृङ्गकर्कटकास्थिगुल्मतरुणवल्लूरकसिंहप्रभृतिभिर्वामनीयैश्च वामनीये । तत्र वक्ष्यिनेत्रद्रव्यैर्धूमनेत्रद्रव्याणि व्याख्यातानि भवन्ति । धूमनेत्रन्तु कनिष्ठिकापरिणाहमये कलायमात्रं स्रोतोमूलेऽङ्गुष्ठपरिणाहं धूमवर्त्तिप्रवेशस्रोतोऽङ्गुलान्यष्टचत्वारिंशत् प्रायोगिके । द्वात्रिंशत् स्नेहने । चतुर्विंशतिर्वैरेचने । षोड़शाङ्गुलं कासघ्ने वामनीये च । एते एव कोलास्थिमात्रच्छिद्रे भवतः । त्रयनेत्रमष्टाङ्गुलं त्रयधूमनार्मं कलायपरिमण्डलं कुलत्थपरिच्छिद्रमिति । अथ सुखोपविष्टः सुमनाश्चक्षुषोऽहितरन्द्रितः स्नेहाक्तां प्रदीप्तां वर्त्तिं (प्रदीप्य) नेत्रस्रोतसि धूमं पिबेत् । सुखेन तं पिबेत्पूर्वं नासिकाभ्यां ततः पिबेत् । सुखपीतं सुखेनैव वमेत्पीतञ्च नास्या । सुखेन धूममादाय नासिकाभ्यां न निर्हरेत् । तेन हि प्रतिलोमेन दृष्टिस्तत्र विहन्यते । विशेषतस्तु प्रायोगिकं प्रायेणादद्यात्, स्नेहनं सुखनासाभ्यां, नासिकया वैरेचनं, सुखेनेतरे । तत्र प्रायोगिके वर्त्तिं व्यपगतशरकाण्डां निर्वातातपशुष्कामङ्गारेष्वदीप्य नेत्रमूलस्रोतसि प्रयुज्य धूममाहरेति ब्रूयात् । एवं स्नेहनं वैरेचनिकञ्च कुर्य्यादिति । इतरयोर्व्यपेत धूमाङ्गारस्थिरे समाहिते शरावे प्रक्षिप्य वर्त्तिं मूलच्छिद्रेणान्येन शरावेण पिधाय तच्छिद्रे नेत्रमूलं संयोज्य धूममाहरेत् । प्रधाने धूमे वर्त्तिमवधिप्रां प्रक्षिप्य पुनरपि धूमं पाययेदादोषविशुद्धेरेष धूमपानोपायविधिः । तत्र शोकश्रमभयमद्यस्त्रीविषरक्तपित्तमदमूर्च्छादाहपिपासापाण्डुरोगतालुशोषच्छर्द्दिगिरोऽभिघातोद्धारापतर्पितक्षिरःप्रमेहोदरार्शोनेत्रवातार्त्तो बालवृद्धदुर्बलविरिक्ताश्चापित्तागरितगर्भिणीक्षतक्षीणक्षतोरक्षमधुघृतदधिदुग्धमत्स्यमद्यवसागूपीतात्यकफाश्च न धूमपानैरेरन् । अकालपीतः कुरुते श्रममूर्च्छाशिरोरुजः । प्राक्शोषाक्षिकिञ्जानाक्षपघातञ्च दारुणम् । आद्यास्तु त्रयो धूमा द्वादशस्तु कालेषूपादेयाः । तद्यथा घृतदग्धान्नभक्षणनस्यस्नानभोजनदिवास्वप्नमैथुनच्छर्दिमूत्रोद्धारदूषितशस्त्रकर्मोत्थिते । तत्र मूत्रोद्धारक्षवथुदूषितमैथुनान्तेषु स्नैहिकः स्नानच्छर्दनदिवास्वप्नान्तेषु वैरेचनः । दग्धान्नभक्षणनस्यस्नानभोजनशस्त्रकर्मान्तेषु प्रायोगिक इति । तत्र स्नेहनो वातं शमयति स्नेहादुपशेषाच्च वैरेचनः श्लेष्माणञ्चतत्रस्थं शमयति रौक्ष्यात्तैक्ष्ण्यादौष्ण्याद्वैशद्याच्च । प्रायोगिकः श्लेष्माणञ्चतत्रस्थं शमयत्युत्क्लिष्टं चापकर्षति साधारणत्वात् पूर्वाभ्यामिति । भवति चात्र नरो धूमोपयोगाच्च प्रसन्नेन्द्रियवाङ्मनाः । दृढकेशदन्तश्मश्रुसुगन्धिविशदाननः । कासश्वासारोचकास्योपलेपस्वरभेदसुप्तास्यावयवमधुतन्द्रानिद्राक्षवमन्वाक्षम्यपीनसशिरोरोगकर्णाक्षिशूलवातकफनिस्तोदाश्च सुखरोगा न भवन्ति । तत्र योगातियोगौ विज्ञातव्यौ तत्र योगो रोगप्रशमनोऽतियोगो रोगान् प्रशमनश्चालुगलशोषपरिदाहपिपासामूर्च्छाभ्रममदकर्णाक्षिदृष्टिनासारोगदौर्बल्यानीत्यतियोगो जनयति । प्रायोगिकं त्रींश्चोच्छ्वासानाददीत । सुखनासिकाभ्याञ्च पर्य्यायांश्चतुरो वेति । स्नैहिकं यावद्वमनवृत्तिः । वैरेचनिकादोषदर्शनात् । तिलतण्डुलयवागूपीतेन पातव्यो वामनीयः । आसान्तरेषु कासघ्न इति । त्रयधूमं शरावसम्पुटोपनीतेन नेत्रेण वृत्तमानवेत् धूमनाद्दोषशमो वृत्तवैगद्यासाधोपशमश्च भवति" ।

"शोकक्षवथुजायुक्तान् धूमपानैर्विशोधयेत्" सुश्रुतः ।

धूमप्रभा पुंस्त्री धूमस्य प्रभेव प्रभा यस्याः । धूमान्धकारयुक्तायां नरकभेदभूमौ हेमच० । "घनोदधिमहावाततनुवाततमःस्थिताः । रत्नप्रभाकराबालुकापङ्कधूमतमःप्रभाः । महातमःप्रभा चेत्यधोधो नरकभूमयः" हेमच० । २धूमवर्णे त्रि० ।

धूमप्राय त्रि० धूमं प्राप्नोति प्र+अय–अच् । धूमसदृशे

तपक्षिभेदे। "धूमप्राग्रैरुग्रपैः क्षीरपैश्च सङ्कुलम् ब्राह्मणेन्द्रैः समन्तात्" भा० अनु० १४ अ०।

धूमलहिषी स्त्री धूमस्य महिषीव। कृष्णटिकायाम् लिका०

धूमयोनि पु० धूमो योनिरुत्पत्तिस्थानं यस्य। १मेघे २तत्सदृशे च तत्र धूमविशेषजमेघफलं पुराणान्तरे उक्तं यथा "यज्ञश्च भोज्यं सभ्यं हिजानाञ्च हितं सदा। दावाग्निधूमसम्भूतमभ्रं धनहितं स्मृतम्। स्मृतधूमोद्भवं सभ्रमशुभाय भविष्यति। अभिचाराग्निधूमोत्थं भूतनाशाय वै द्विजाः!"। [ वर्षे २तहति त्रि० अमरः।

धूमल पु० धूमं धूमवर्णं लाति ला-क। १कृष्णलोहितभे

धूमसी स्त्री निसुधमाषाद्यां चूर्णे "माषाणां दलयं क्षीरे स्थापितास्यक्कथुकाः। खातपे शोषिताः पात्रे [illegible]टाक्षा धूमसी स्मृता। धूमसी रचिता सैव भोक्ता भुर्भुरिका बुधैः। भुर्भुरी कफपित्तघ्नी किञ्चिद्वातकरी स्मृता" भावप्र०।

धूमाक्ष पु० धूम इव अक्षि यस्य अच् समा०। धूमतुल्यनेत्रयुक्ते त्रि० स्त्रियां विस्वात् ङीष्। "धूमाक्षो संयतश्च कर्णौ च क्रोशतः" अच० १।१।७

धूमाङ्ग पु० धूम इवाङ्गमस्य। १शिंशपावृक्षे नैचण्टुपार०। २धूमतुल्याङ्गयुक्ते त्रि० स्त्रियां ङीष्।

धूमाग्नि पु० धूमयोगेऽग्निः शाक०त०। "विज्ञाको यो धूमशिखो धूमाग्निः स उदाहृतः" इत्युक्ते वह्निभेदे

धूमादि "धूमादिभ्यश्च" पा०वुञ् प्रत्ययनिमित्ते पा०ग० सूत्रोक्ते देशवाचकशब्दगणे स च यथः "धूम यवख यशादन अर्जुनाव माहकस्यनी आनकस्यनी माहिषस्यनी मानस्यनी अट्टस्यनी मद्रुकस्यनी ससद्रुस्यनी दाक्षायनस्यनी राजस्यनी विदेह राजन्यह सालासाह अश्व मित्रवर्द्ध मत्तानी मद्रकुल आजीकुल ग्रामाह्राव त्रिगर्त्त संस्कीय वर्वर वर्ण्य गर्त्त आनर्त्त माठर पाचेय क्रोष पद्मीआरात्री धार्त्तरात्री आवय तीर्थ (कुलात्थीवीरेषु) (ससद्रात्रावि मनुष्ये च)। कृचि अन्तरीय द्वीप अरुण उल्लयनी पट्टार दक्षिणापथ साकेत"। धौमकः

धूमाभ पु०धूम इव आभाति भा+भा-क। १धूमवर्णे शब्दमाला २तद्वति त्रि०।

धूमाय अधूमो धूमो भवति धूमा० चूर्णे क्यङ् नामधातुः आत्म०अक०सेट्। धूमायते "अकस्मात् नगरोद्याने कथं धूमायते चिता" हास्यार्णवः। क्युट्। धूमायनम् "उद्गारोपपरिदाहधूमायनानि पित्तस्य" सुश्रुतः। अत्र धूमशब्दः अग्निमान्द्यसूचकवायुभेदः तद्भवन धूमायनम्। (चोकाँया ढेकुर)

धूमावती धूम इव वर्णोऽस्यस्याः मतुप् मस्य वः धरा० पूर्वपददीर्घः संज्ञायाम्। दशमहाविद्यान्तर्गते देवीभेदे महाविद्याशब्दे दृश्यम्। "विद्या धूमावती तथा" तन्त्रसारः। तद्ध्यानं यथा "विवर्णा चञ्चला दुष्टा दीर्घा च मलिनाम्बरा। विमुक्तकुन्तला रूक्षा विधवा विरलद्विजा। काकध्वजरथारूढा विलम्बितपयोधरा। सूर्पहस्तातिरूक्षाक्षी धूतहस्ता वरान्विता। प्रवृद्धघोणा तु भृशं कुटिला कुटिलेक्षणा। क्षुत्पिपासार्दिता नित्यं भयदा कलहास्पदा। जपेत् सप्तशतदृश्यां पुरश्चरणसिद्धये" तन्त्रसारः। तन्मन्त्रादिकं तन्त्रसारे दृश्यम्।

धूमिका स्त्री धूमोऽस्यस्याः ठन्। कृष्णटिकायां लिका०।

धूमित त्रि० धूम-जातोऽस्य तारः इतच्। १संजातधूमे "अविमृष्यव्यसनेन धूमिताम्" कुमा० २दीप्तणीयमन्त्रभेदे पु० "षडक्षरोजीवपदीनः सार्द्धसप्ताक्षरो महः। सार्द्धाद्दशवर्णो वा धूमितः स तु निन्दितः" तन्त्रसा०३खर्यगस्य दिग्भेदे स्त्री प्रधूमितशब्दे दृश्यम्।

धूमिन् त्रि० धूमोऽस्यास्य वाच्छल्येन "नैकाचरात् अतो आतेः सम्प्रसारणं न तौ स्मृतौ" इत्युक्तेः इनिठनौजातिवाचकात् निषेधेऽपि भूम्नि तस्यानिषेधात् इनि। १वाच्छल्येन धूमवति अवाच्छल्ये तु मतुवेव धूमवान् इत्येव। स्त्रियां ङीष्। सा च अजभीडस्य २पत्नीभेदे "अजभीडस्य पत्न्यस्तु तिस्रो वै यशसान्विताः। नीली च केशिनी चैव धूमिनी च वराङ्गनाः" हरिवं०३२अ०। ३वह्नेर्जिह्वाभेदे स्त्री धूम्रवर्णशब्दे दृश्यम्।

धूमोत्थ न० धूमादुत्तिष्ठति परम्परया उद्-स्था-क। १वज्रक्षारे राजनि० तस्य धूमयोनिमेघाज्जातत्वात् तत्पन्नत्वात् परम्परया तज्जातत्वम्। २धूमजातमात्रे त्रि०।

धूमोद्गार पु० ६त०। १धूमनिर्गमे "धूमोद्गारानुकृतिनिपुणा जर्जरानिष्पतन्ति" मेघ०। २धूमस्य जाठराग्निमान्द्यसूचकपदार्थस्य उद्गारे (चोकाँ याढेकुर) "धूमोद्गारे तथा वान्ते चुरकर्मणि मैथुने" वाक्ष्मि०त०

धूमोपहत पु० ३त०। सुश्रुतोक्ते धूमजतोपद्रवरूपरोगभेदे तल्लक्षणादि तत्रोक्तं यथा "अत ऊर्द्धं प्रवक्ष्यामि धूमोपहतलक्षणम्। श्वसिति क्षौति चात्यर्थमत्यापमति कासते। चक्षुषोः परिदाहश्च रागश्चैवोपजायते धूमकं निःश्वसिति श्रोत्रमन्धत्वञ्चेति च। तथैव च

रवान् सर्वान् स्तुतिशास्त्रोपहन्यते। तस्मादाहवरयुतः सीदत्यव च मूर्च्छति। धूमोपहत इत्येवं ह्यनुतस्य चिकित्सितम्"।

**धूमोर्णा** स्त्री यमपत्न्याम् त्रिका०। "यक्षः यक्षोपतिर्देवो यमो धूमोर्णया सह। वरुणः सह गौर्या च सह्या च धनेश्वरः" भा०अनु० १६५अ०। २मार्कण्डेयपत्न्याञ्च "मार्कण्डेयस्य धूमोर्णा ऋद्धिर्वैश्रवणस्य च" १४५ अ० अत्र मार्त्तण्डेयस्येत्येव युक्तः पाठः। मार्त्तण्डपत्न्या अपत्यम् ढक्। मार्त्तण्डेयो यमः पूर्वोक्तैकवाक्यात्।

**धूमोर्णापति** पु० ६त०। यमे हारा०।

**धूम्या** स्त्री धूमानां समूहः यागादि० य। १धूमसमूहे धूमाय हितं यत्। २धूमसाधने त्रि०

**धूम्याट** पु० धूम्या इव अटति अट-अच्। (फिङ्गा) पक्षिभेदे अमरः स्त्रियां जातित्वात् ङीष्। धूम्याट इति पाठान्तरं तत्रार्थे

**धूम्र** पु०धूमं तद्वर्णं राति रा-कपृ०। १सिन्धुके शब्दरत्नावल्यां २कृष्णलोहिते वर्णे च शतहति त्रि०"धूम्रधूम्रो वसागन्धिर्ज्वालाबभ्रुशिरोरुहः" रघुः। कृष्णलोहितश्च कृष्णवर्णमिश्रो लोहितवर्णः "धूम्रा बभ्रुनीकाशाः पितृणाम्" यजु०२४।१८ "धूम्राः कृष्णवर्णमिश्रा लोहितवर्णाः" वेददी० "भूरेखयो नभसि नक्षत्रपथोद्यत्काश्चकीवदङ्गरुहधूम्रशो विसस्रुः" माघः। पुंसि "विलोहितस्य धूम्रस्य नीलग्रीवाय वै नमः" भा०शा० २८६अ० ६मेघे "अजो धूम्रो न गोधूमैः" यजु० २१।२८ "धूम्रः मेघः" वेददी० ७कुमारानुचरभेदे "धूम्रः श्वेतः कलिन्दश्च सिद्धार्थो वरदस्तथा" भा०द्रो० ४६अ० तदनुचरोक्तौ। ८बलिराजसेनाधिपासुरभेदे "सक्रोधो रभसश्चण्डो धूम्रश्चैव प्रियङ्करः" हरिवं२४०अ० बलिसेनाधिपोक्तौ। एतेषां धूम्रवर्णत्वात् तथात्वम्। सङ्क्रान्तिचि०उक्ते आनन्दादिषु रव्यादिवारेऽनक्षत्रविशेषेषु योगभेदे यथा "आनन्दाख्यः१ कालदण्डश्च२ धूम्रो३ धाता४ सौम्यो५ ध्वाङ्क्ष६ केतु७ क्रमेण। श्रीवत्साख्योऽष्टमश्चैव वज्रदण्ड८ सुदुरत्या० ऋक्षं ११ मित्रं १२ मानसं१३ पद्म१४ लुम्बी१५। छत्राट१६ मुद्गर१७ किल काण१८ खिड्गी१९ शुभो२० ऽमृताख्यो२१ सुघर२२ गदश२३। मातङ्ग२४ रक्ष२५ चर२६ सुस्थिराख्य२७ ध्रुवर्क्षमानाः२८ फलदाः क्षणाम्। दानार्कर्क्षे, मृगादिन्दौ, सार्पाङ्कौमे, करादबुधे। मैत्रात् गुरौ, मृगे वैश्वाङ्कख्या मन्दे च वारुणात् ऋक्षार्थः सामितृकैः अष्टाविंशतिनक्षत्रैरष्टाविंशतियोगाः दृष्टनक्षत्रं रविवारे अश्वनीतो गणने यत्संख्यकं ततसंख्यकः योगभवति एवं सोमे रोहिणीतोऽयतसंख्यमृक्षं ततसंख्योयोग इति एवमन्यत्राप्युह्यम्। तत्र वर्ज्यं नाडीः तत्रैवाह। "घाङ्क्षे वज्रे मुद्गरे चेषुनाड्यो, वर्ज्या, वेदाः४ पञ्चभुक्ष्वे, गदेऽष्टाः८ धूम्रे काणे मौषले भूर्दशं, दे, रक्षोमत्स्यूटकानाञ्च सर्वे"। १०ध्रुवनामकयोगान्तरि स्त्री "धूम्रायाञ्च धरापुत्रो ब्रह्मविद्यो ध्रुवस्तथा" भा० श्रा० ६६अ० वसुवंशोक्तौ। शार० उक्ते आदित्यस्य द्वादशकलामध्ये ११कलाभेदे स्त्री "तपिनीः तापिनी२ धूम्रा३ मरीचिः८र्ज्वलिनी९ रुचिः६। सुषुम्णा७ भोगदा८ विश्वा९ बोधिनी१०धारिणी ११ क्षमा १२"। १२ शशाङ्कस्त्रां स्त्री राजनि०।

**धूम्रक** पु० धूम्र इव कायति कै-क। उष्ट्रे जटाधरः स्त्रियां ङीष्।

**धूम्रकेतु** पु० भरतस्यपश्चात्तनभेदे "भरतस्तु महाभागवतो यदा भगवताऽवनितलपरिपालनाय संचिन्तितः तदनुशासनपरः पञ्चजनीं विश्वरूपदुहितरमुपयेमे। तस्यां सुहात्रजान् कार्त्स्न्येनात्मरूपानात्मनः पञ्च जनयामास भूतादिरिव भूतसूक्ष्माणि। सुमतिं राष्ट्रभृतं सुदर्शनमावरणं धूम्रकेतुमिति" भाग० ५।७।३।२ २दक्षबिन्दोः पुत्रभेदे "विशालः शरबिन्दुश्च धूम्रकेतुश्च तत्सुताः" भा० ६।२।२ तत्सुताः दक्षबिन्दोः सुताः। ३धूम्रवर्णध्वजयुक्ते त्रि०।

**धूम्रकेश** पु० पृथुराजस्य पुत्रभेदे "वैन्यस्तु पृथ्वीं जगतामित्युपक्रमे "पुत्रानुत्पादयामास पञ्चार्चिषोऽत्मसंभितान्। विजिताश्वं हर्यक्षं धूम्रकेशं द्रविणकमकम्" भाग०४।२२ ५०"विजिताश्वोधिराजासीत् पृथुपुत्रः पृथुश्रवाः। यवीयोभ्योऽददात् काष्ठा भ्रातृभ्यो भ्रातृवत्सलः। हर्यक्षायादिशत् प्राचीं धूम्रकेशाय दक्षिणाम्। प्रतीचीं वृकसंज्ञाय तुर्यां द्रविणसे विभुः" २४।३।२ शशाङ्कस्यार्चिषि भार्यायां जातपुत्रे च। "शशाङ्कोऽर्चिषि भार्यायां धूम्रकेशमजीजनत्" भाग० ६।६।१८।४ ३धूम्रवर्णकेशयुक्ते त्रि० आकृत्वात् वा स्त्रियां ङीष्।

**धूम्रपत्रा** स्त्री धूम्रं पत्रमस्याः जातित्वेऽपि अजादेराकृति गणत्वात् टाप्। स्वयम्भुवायां द्युपभेदे राजनि० १धूम्रवर्णपत्रयुक्ते त्रि०। [मूलीतृणे राजनि०।

**धूम्रमूलिका** स्त्री धूम्रं मूलं यस्याः कप् अत इत्त्वम्।

**धूम्ररोहित** पु० "वर्णो वर्णेन" पा० कर्म०। १धूम्रवर्ण-

विश्चितरक्तवर्णे तद्वति त्रि०। "रोहितो धूम्रो रोहितः कर्बुरोहितस्ते सौम्याः" यजु० २३।२।

**धूम्रलोचन** त्रि० धूम्रं लोचनमस्य। १धूम्रनेत्रयुक्ते स्त्रियां स्वाङ्गत्वेऽपि बहुत्वात् टाप्। २शुम्भासुरसेनापतिभेदे पु०। "हे धूम्रलोचनाशु त्वं स्वसैन्यपरिवारितः। तामानय बलाद्दुष्टां केशाकर्षणविह्वलाम्" देवीमा०।

**धूम्रलोहित** पु० "वर्णो वर्णेन" पा० कर्म०। १कृष्णवर्णमिश्रितरक्तवर्णे २तद्वति त्रि० ३शिवे पु०। "गौरः श्यामस्तथा कृष्णः पाण्डुरो धूम्रलोहितः" भा० अनु०१४अ० शिवनामोक्तौ।

**धूम्रवर्ण** पु०कर्म०। १कृष्णलोहितवर्णे २तद्वति त्रि०। ३तरुक्षे विल्वके न० राजनि०। ४चन्दनेः सप्तजिह्वान्तर्गतजिह्वाभेदे स्त्री जटा० मा०ति० ६पटले "विन्यसेदात्मनो देहे मन्त्रैर्जिह्वा हविर्भुजः" इत्युपक्रमे "जिह्वास्ताश्चिविधाः प्रोक्ता शुभभेदेन कर्मसु। हिरण्याः गगनाः रक्ताः कृष्णाश्चन्द्रा सुप्रभाः मता। बहुरूपाश्चातिरक्ता च सातिम्रो यागकर्मसु"। "पद्मरागाः सुवर्णाश्चन्द्रा तृतीया महलोहिताः। लोहिताश्चन्दनवर्णं श्वेताः धूम्रिनीः च कराजिनीः। राजसो रसनाद्यङ्गे-विहिता काम्यकर्मसु"। "विश्वमूर्त्तिश्च विश्वरूपिन्यौ धूम्रवर्णाः मनोजवाः। लोहितन्यन्या करालाख्याः कालीः तामस्य ईरिताः" जिह्वाशब्दे २।२१पृ०दर्शिते कालीकरालीकेत्यादिस्तुतिवाक्ये सामान्यतोऽग्निजिह्वाभिहितेति इति बोध्यम्। ६धूम्निन्यां जाते अजमीढस्य ४पुत्रभेदे पु० "धूम्निन्या स तया देव्या अजमीढः समीयिवान्। ऋक्षं संजनयामास धूम्रवर्णं सुदर्शनम्" हरिवं०३२ अ०।

**धूम्रशूक** पुंस्त्री धूम्राः शूक इव रोमास्य। अहे हारा०। स्त्रियां जातित्वात् ङीष्।

**धूम्राक्ष** त्रि० धूम्रमक्षि यस्य बहुव्री०। १धूम्रवर्णनेत्रयुक्ते स्त्रियां स्वित्वात् ङीष्। २तृणबिन्दुवंशजे हेमचन्द्रनृपभेदे पु०। "हेमचन्द्रः सुतस्तस्य धूम्राक्षस्य चात्मजः" भाग० ९।२।२२। ३रावणसैन्यान्तर्गते राक्षसभेदे। "तं दृष्ट्वा निहतं सङ्ख्ये प्रहस्तं चण्डविक्रमम्। अभिदुद्राव धूम्राक्षो वेगेन महता कपीन्" "ततस्तमतिकोपेन सायं सरथसारथिम्। धूम्राक्षमवधीत् क्रुद्धो हनूमान् मारुतात्मजः" भा०व० २८९अ०।

**धूम्रानीक** पु० शाकद्वीपाधिपमेधातिथेः १पुत्रभेदे तन्नामके २तत्तत्सवर्षे च। विस्तरेणोक्तं भाग० ५।२०।१६ वाक्यं द्रष्टव्यम् तत्रैव ५।१। भाग० वाक्ये भागवताङ्गत्वतः।

**धूम्रायण** पु० गोत्रप्रवरर्षिभेदे प्रवराध्यायः

**धूम्रार्चिस्** स्त्री मा०ति० उक्ते वह्नेर्दशकलात्मकते कलाभेदे "धूम्रार्चिरूष्मा२ ज्वलिनी३ ज्वालिनी४ विस्फुलिङ्गिनी५। सुश्रीः६ सुरूपा७ कपिलाट हव्यकव्यवहे (८।१०)पि। यादीनां दशवर्णानां कला धर्मदया इमाः।

**धूम्राङ्गा** स्त्री धूम्रं वर्णमाङ्गयते अर्द्यते या+अङ्ग-क"। धूम्रवर्णायां स्वयम्भुवायां सुपभेदे राजनि०।

**धूर्** वधे गतौ च दि०पा०सक० सेट्। धूर्यते अधूरिष्ट। दुधूरे। दैदित् धूर्त्तः।

**धूर्जटि** पु० जट-संघाते इन् धुरश्चैलोक्यचिन्तायां जटिः सङ्घातोऽस्य। शिवे अमरः भा०द्रो०२०३अ० तु अन्यथा तन्निरुक्तिर्यथा "धूजटेरपत्यं यत्तस्य धूर्जटिरेव च" अत्रिः पचे धूजटेरपत्यं जटिः सङ्घातोऽस्य पृषो०।

**धूर्त्त** पु० धूर्व-धूर-वा क्त उपधा० तन् वा। १धूस्तूरवृक्षे (धुतुरा)अमरः २चोरवृक्षे राजनि०। ३कैतवकिते न० हेमच०। ४विल्ववृक्षे न० राजनि० भावे क्त। ५छिन्ने तदस्त्यस्त्यर्थ० अच् उपधा० तन् वा। ६वञ्चके ७मायाविनि दद्यूतकरे त्रि० हेमच०। दशठनायके शठवन्द्ये तत्रत्यं दृश्यम् "धार्ष्टं मनोरथतैस्तव धूर्त्त! काला सैव स्थिता मनसि जन्मिमङ्गवरस्य"। "दृष्टे कामनसंस्थिते प्रियतमे पश्चादुपेत्यादराद् एकस्था नयने पिधाय विहित-क्रीडातुबन्धच्छलः। दैवज्ञेन कलस्वरः सपुलकः प्रेम्णोल्लसन्मानसाम् अन्तर्हासलसत्कपोलफलकां धूर्त्तोऽपरां चुम्बति" सा० तत्र द्यूतकरे "प्राप्ते न्यपतिना भागे प्रसिद्धे धूर्त्तमण्डले" मल्लीयाद्धूर्त्तकितवादितराद्दम्भकं शतम्" याज्ञ०। वञ्चके "नराणां नापितो धूर्त्तः पक्षिणां चैव वायसः। दंष्ट्रिणां च शृगालस्तु श्वेतभिक्षुस्तपस्विनाम्" पद्मत० "धर्मकारः धर्मवणिक् कायस्थश्च व्रजेश्वर!। नरेषु मध्ये ते धूर्त्ताः कृपाहीना महीतले। हृदयं क्षुरधाराभं तेषां च नास्ति सादरम्। यतेषु सज्जनः कोऽपि कायस्थो नेतरौ च तौ। सुबुद्धिः शिवभक्तश्च शास्त्रज्ञो धर्ममानसः। न विश्वसेत् तेषु तात। स्वात्मकल्याणहेतवे" ब्रह्मवैवर्त्ते जन्मख० ८५अ०। "प्रियाश्च धूर्त्ता मम सेविनः सदा" भा०वि० ७अ०। धूर्त्तशब्देन जातिवाचकस्य समासे पोटायुवतीत्यादि पा० परनिपाते वकधूर्त्त शृगालधूर्त्त कठधूर्त्त इत्यादि गौरादि०७ङी०। अत्रधूर्त्तैः। धूर्व कर्मणि क्त। दर्शिते त्रि०।

धूर्त्तक पु० धूर्त्त इव वञ्चक इव स्वार्थे कन्। १श्रृगाले शब्दर० स्त्रियां जातित्वात् ङीष्। कौरव्यकुलजे २नागभेदे। तदुपक्रमे "बालकः श्रृङ्गेरव धूर्त्तक प्रति वातकौ" भा०आ०७अ०। स्वार्थे क। धूर्त्तशब्दार्थे। "स्त्री-धूर्त्तं कितवे भीरौ चण्डे पुरुषमानिनि। चौरे क्लीबे विश्वासो न कार्य्यो न च नास्तिके" भा०उ० ३८अ०।

धूर्त्तकृत् पु० धूर्त्त-भावे त धूर्त्तं हिंसनं करोति कृ+क्विप् ६त०। १धूस्तूरे शब्दमा० २हिंसके त्रि०।

धूर्त्तचरित न० धूर्त्तस्य चरितं वर्णनमत्रास्त्यत्र अच्। बृहत्कथांशे १नाटकग्रन्थभेदे शा०द०। ६त०। २धूर्त्तानां चरिते च। [तायाः लोकसिद्धत्वात्।

धूर्त्तजन्तु पु० निलक०। मानुषे शब्दच० तस्यलोर्धूर्त्त-

धूर्त्तमानुषा स्त्री धूर्त्तो हिंसितोमानुषो यया। १राक्षस्यां शब्दच० २हिंसितमानुषके त्रि०।

धूर्त्ति पु० धुर्वी हिंसायां क्तिच्। १हिंसने "मीनः सं देव धरस्पो धूर्त्तिः" ऋ०।।।८।१ "धूर्त्तिर्हिंसकः" भा० भावे क्तिन्। २हिंसायां स्त्री

धूर्द्धर त्रि० धुरोधरः। धुरन्धरे रवादौ रत्नमालायः

धूर्वह त्रि० धुरं वहति वह-अच्। धुरन्धरशब्दार्थे

धूर्वी स्त्री धुरमर्हति अर्ह-क्विप् अर्होधीभावः स्वार्थे ङीषच०।

धूलक न० धू-बा० कन् धूलिराकारतयाऽस्त्यत्र अच् संज्ञायां कन् वा। विल्वे शब्दच०।

धूलि स्त्री धू-लिङ् वा ङीष्। धू-संं क्विप् धुवा लीयते श्लि-कि लादेशे आङ्लोपः। १रजसि परागे अमरः। रेणूनां पवनचालनेन लीयमानत्वात्तथात्वम्। "गोपैर्यच्छा हतानां खुरपुटदलिता या तु धूलिर्दिनान्ते" ह०सं० १०२अ०। गोधूलिशब्दे दृश्यम्। "अनीता पङ्कतां धूली-शुद्धकं नावतिष्ठते" "अधूरिव धूलीशुद्धिवत्" माघः "धूलिः परस्परादपि" नीतिसारः "धूलीपटले धूम-स्यभ्रमात् तत्रासता धूमत्वेनेत्यादि" अनुमानदीधितिः। २व्याकृतीभावे अव्य० उभ्यां०उप०स०। "धूलीलव्य व्याकृतीलव्य" भरतटी०। [शब्दर०।

धूलिका स्त्री धूलिरिव कायति कै-क। कुड्यकुटिकायाम्

धूलिकुट्टिम न० धूलीनां कुट्टिमभिव। केदारे क्षेत्रे शब्दार्थकल्प०। तस्य कर्षणादिजातधूलिमत्त्वात्तथात्वम्

धूलिकेदार पु० धूलिप्रधानः केदारः मा०त०। क्षेत्रे केदारे त्रिका० तस्य कर्षणजातधूलिमत्त्वात्तथात्वम्।

धूलिगुच्छक पु० धूलीनां गुच्छ इव स्वार्थे कन्। कलगु-चूर्णे (फाग) त्रिका०।

धूलिध्वज पु० धूलिरेव ध्वजोऽस्य। वाते त्रिका०

धूलिपुष्पी स्त्री धूलिप्रचुरं पुष्पमस्या ङीष्। केतक्याम्। स्वार्थे क ह्रस्वः। धूलिपुष्पिका तत्रार्थे राजनि०।

धूलीकदम्ब पु० धूलीनां कदम्बं यत्र। १कदम्बवृक्षे २वरुण-वृक्षे ३तन्निर्यासवृक्षे च मेदि०। ६त०। ४धूलीसमूहे न०

धूश(ष)(स) शोभने चुरा०उभ० सक०सेट्। धूशय(ष)(स)यति ते अदूधुश(ष)(स)त् त।

धूसर पुंस्त्री धू-सर किच्च नलम्। १गर्दभे २वङ्गे ३कपोते राजनि०स्त्रियां ङीष्। ४तैलकारे पु० हेम० धूस-रक्। ५रेणत्यादुत्वर्णे ऋणशोधे तवर्णे शुक्लपीतवर्णे च पु० ६तदति त्रि० अमरः। "क्लान्तं रजोधूसरकेतुसैन्यम्" उत्क्लान्त-वर्णक्रमधूसराणाम्" रघुः। "किरणपरिचयधूसरप्रदो-षाम्"। "सन्ध्याटिकाचन्दनधूसराङ्गी" कुमा०। ७पा-ण्डुरफलीतुपे स्त्री राजनिः टाप्। पक्षिसरीभेदे स्त्री मेदि० गौरा० ङीष्।

धूसरच्छदा स्त्री धूसरः छदो यस्याः। श्वेतच्छायां रत्नमा०

धूसरपत्रिका स्त्री धूसरं पत्रमस्याः कप् कापि अत इत्त्वम्। हस्तिशुण्डीतुपे (हातशुंडा) राजनि०।

धूसी अव्य० धूस-बा० दै। विस्तारे गणरत्नम्। अर्य्यादि० धूसीलव्य विस्तार्य्येत्यर्थः।

धूस्तरा(मा) स्त्री अतिशयेन धूः तरप् तमप् वा। "क्षुद्रा-त्तादौ तन्निते" पा० क्षुद्रादेव सत्वविधानात् न सत्वम्। अतिशयभारे। [(धूतरा) ख्याते वृक्षे अमरः।

धूस्तूर पु० धूस-क्विप् तुरेर्त्ति तुर-तूरच् क कर्म०।

धूस्तूर पु० धूस-क्विप् तूरी गतिहिंसयोः क कर्म-धायः स०। (धूतरा) ख्याते वृक्षे अमरे पाठान्तरम्। "धूस्तूर। धूर्त्त! तत्रेन्दुनिवासयोग्यस्थाने पित्राचार्य-तिना विनिवेशितोऽसि। किं कैरवाणि विकसन्ति तमः प्रयाति किं वार्द्धिरुल्लसति किं हसदः स्रवन्ति" चण्डटः। "धूस्तूरो मदयत्यौन्मिवातलज्वरकृच्छ्रहृत्। कषायो मधुरस्निग्धो व्रणकिलासविनाशकः। उष्णो गुरुर्वृष्य-श्लेष्मकण्डूमिविषापहः" भावप्र०।

धृ स्थितौ भ्वा०धृतौ सक०उभ०भा०अनिट्। धरति ते अधार्षीत् अधृत। दधार दध्रे। धृतः धृतिः। "ततो दधार वा देवी गर्भम्" भा०उ०७१६६अ०। धर्त्ता धरिष्यति ते [धरिष्यते।

धृ पतने भ्वा०आत्म०अक०अनिट्। धरते अधृत। दध्रे अधार्षी

धृ स्थितौ चक० धारणे सक०तुदा० आत्म० अनिट्। ध्रियते अधृत। दध्रे धर्त्ता करिष्यते। स्थितौ "ध्रियते यावदेकोऽपि रिपुस्तावत् कुतः सुखम्" माघः "ग्राम्येष्वतिक्रान्तेषु शरीरं श्रयितुमध्रियत" दं०उप०धारणे "ध्रियते कुसुमप्रसाधनम्" कुमा०"धाष्टर्येणातपत्रेण च ध्रियमाणेन मूर्द्धनि" भा० उ० १८६ अ०।

उद्+उत्तोल्य धारणे "चरणं त्विदमुद्धृतम्" वेणीस०। "यदसद्धृतसङ्गिनी" कुमा०। "ग्रसमोद्धृतारि" रघुः।

धृ धारणे चुरा०उभ० सक० सेट्। धारयति ते अदीधरत्—त। धारयाम् बभूव आस चकार। "वैष्णवीं धारयेद्यष्टिं स्रोदकं च कमण्डलुम्" मनुः "समकायशिरोग्रीवं धारयन्नचलः स्थिरः" गीता। सर्वेषां धार्य्यः पूर्वेषां गतः एतस्य अधो यत् इति भेदः धार्य्यशब्दे उदा०"धारेरुत्तमर्णः" पा० एतद्योगे उत्तमर्णस्य सम्प्रदानता। चैत्रस्य व्रतं धारयति।

धृज गतौ भ्वा० पर० सक० सेट् इदित्। धृङ्क्षति अधृङ्क्षीत्। दधृङ्क्ष इदित् धृङ्क्षते। अस्य अनिदित्त्वमपि दृश्यते। धर्ङ्क्षति अधर्ङ्क्षीत् दधर्ङ्क्ष। "हरो मरुद्वरश्चैव नृकपालिः पिनाकधृग्" शिवपूजायां तन्त्रान्तरविशेषोक्तौ।

धृत न० धृ-स्थितौ यतने च भावे क्त। १यतने २स्थितौ च। धृ-धारणे कर्मणि क्त। ऋतधारणे ३सत्कृतेत्रि० भावे क्त। ४धारणे यज्ञसूत्रे न०। "धृतस्रुचा-मधुव्रतं खगः" "रूपमदर्शि धृतोऽपि यदर्थम्" नैष०। ५त्रयोदशमनोःपुत्रभेदे पु०। "त्रयोदशस्य धृतास्ते विश्रेयास्तु रुचेः सुताः। चित्रसेनो विचित्रश्च नयो धर्मधृतो धृतः" हरिवं० ७अ०। ६कुरुवंश्ये धर्मभृते राजभेदे "दुष्टोऽथ तनयो बभ्रुः सेतुस्तस्मात्तनूनपात्। आरब्धस्तस्य गान्धारस्तस्य धर्मभृतो धृतः" भा० ९।२२।४ अत्र धृत इति पाठान्तरम्।

धृतदेवा स्त्री "चत्वारो देवकात्तनयाः। देववानुपदेवश्च सुदेवो-देववर्द्धनः। तेषां स्वसारः सप्तासन् धृतदेवादयो नृप!" भाग० ९।२४।१२ उक्ते देवकात्मजभेदे "त्रिष्टुभो धृतदेवायामेक आनकदुन्दुभेः" २५श्लो०।

धृतराजन् पु० धृतो राजा प्रायस्त्वेन येन। सुराग्नि देवे तत्र भवः अण् उपधालोपः। धार्त्तराष्ट्र तत्र भवे त्रि०

धृतराष्ट्र पु० धृतं राष्ट्रं सुपाल्यतया यत्र। १सुराग्नि देवे २नागभेदे च मेदि०। ३कौरव्ये धृतराष्ट्रश्च बलिनां वीर्य्यवान्" भा० आ० २५ अ०। नागनामोक्तौ "धृतराष्ट्रकुले जातान् पश्य नागान् यथातथम्" ५७अ०। ४गन्धर्वराजभेदे "गन्धर्वराजो यो धीमान् धृतराष्ट्र इति श्रुतः। स सर्व मानुषो लोके धृतराष्ट्रः पतिस्तव" भा० आश्व० ११ अ०। विचित्रवीर्य्यक्षेत्रे सत्यवत्या नियोगेन व्यासेनोत्पादिते स्वनामख्याते कौरवे ऽन्धभेदे "शान्तनुः खलु गङ्गां भागीरथीमुपयेमे तस्यामस्य जज्ञे देवव्रतो नाम यमाद्यभीष्मामिति। भीष्मः खलु पितुः प्रियचिकीर्षया सत्यवतीं भ्रातरमुद्वाहयत् यामाहुर्गन्धकालीमिति। तस्यां पूर्वं कानीनो गर्भः पराशरादृषेः पायनोऽभवत्। तस्यामेव शान्तनोरन्यौ द्वौ पुत्रौ बभूवतुः। विचित्रवीर्य्यश्चित्राङ्गदश्च तयोरप्राप्तयौवन एव चित्राङ्गदो गन्धर्वैर्हतः विचित्रवीर्य्यस्तु राजासीत्। विचित्रवीर्य्यः खलु काशिराजदुहितरावुपयेमे। विचित्रवीर्य्यस्तनयत्व एव विदेहत्वं प्राप्तः। ततः सत्यवत्यभिनयज्ञा दौष्यन्तो वंशं उच्छेदं मन्येदिति। सा द्वैपायनमृषिं मनसा चिन्तयामास। स तस्याः पुरतः स्थितः किङ्करवाणीति। सा तमुपयाच भ्राता तवानपत्य एव म्रियतो विचित्रवीर्य्यः क्षेत्रपत्यं तस्योत्पादयेति। स तथेत्युक्त्वा त्रीन् पुत्रानुत्पादयामास। धृतराष्ट्रं पाण्डुं विदुरञ्चेति" भा० आ० ९५अ०। अस्य धर्मत्वादिकथा भा० आ० ११ अ० द्रष्टव्या। ७पक्षिभेदे हंसे पुंस्त्री हेमच० तस्य धृतराष्ट्री-जातत्वात् तथात्वम् स्त्रियां ङीप्। सा च कश्यपस्य ताम्रायां पत्न्यां जाते ६कन्याभेदे "काकीं श्येनीं तथा भासीं धृतराष्ट्रीं तथा शुकीम्। ताम्रा तु सुषुवे देवी पञ्चैता लोकविश्रुताः" "धृतराष्ट्री तु हंसांश्च कलहंसांश्च सर्वशः" भा० आ० ६६ अ०। ताम्रा तु दक्षकन्या कश्यपपत्नी ताम्रयन्त्रात्तत्कोः अलोप्यते "सुरभिर्विनता चैव ताम्रा क्रोधवशा इरा। कद्रूश्चैनिच राजेन्द्र! ताम्रपत्न्यः मे श्रुणु" हरिवं० ३अ०।

धृतवर्म्मन् पु० धृतं वर्म येन। १सन्नद्धकवचे २भारतप्रसिद्धे त्रिगर्तराजकेतुवर्म्मतुल्ये ऋषभेदे "केतुवर्मा तु तेजस्वी तस्यैवावरजो युवा। युयुधे भ्रातुरर्थाय पाण्डवेन यशस्विना। तमापतन्तं सम्प्रेक्ष्य केतुवर्मा महारथः। अभ्यर्दयन्निशितैर्बाणैर्भीमं परवीरहा। केतुवर्मणमभिद्रुते धृतवर्मा महारथः। रथेनाशु समुत्पत्य शरैर्जिष्णुमवाकिरत्" भा० आ० ७३ अ०।

धृतव्रत त्रि०धृतं व्रतं येन। १सन्नद्धव्रते "संवर्त्तश्च धृतव्रतः" भा० आ० ६६ अ०। २पुरुवंश्ये जयद्रथपुत्रविजयरूप-

पौत्रे नृपभेदे। "विजयस्य धृतिः पुत्रस्तस्य पुत्रो धृतव्रतः" हरिवं०२१अ०। धृतिशब्दे दृश्यम्।

धृतात्मन् त्रि० धृत आत्मा येन। धैर्य्यान्वितचित्ते २विष्णौ पु०। "धृतात्मा नियमो यमः" विष्णुस०। एकरूपेण ब्रह्मादिरहिततया स्थित आत्मास्येति भा०।

धृति स्त्री धृ-क्तिन्। १धारणे २तुष्टौ ३धैर्य्ये "धृतिरक्षमिता रतिश्च्युता" रघुः "धृतिर्धैर्यं प्रीतिर्वा" मल्लि०। विष्कम्भादिमध्ये ४अष्टमे योगभेदे मेदि०। "अतिगण्डः सुकर्मा च धृतिः शूलं तथैव च" ज्यो०। ५सुखे हेमच०। गौर्य्यादिषोडशमातृमध्ये ६मातृकाभेदे। मातृकाशब्दे दृश्यम्। अष्टादशाक्षरपादकछन्दोभाते चतुरादिचतुष्कमे धृतिरतिधृतिश्चैव कृतिः प्रकृतिराकृतिः" छ० र०। ७मानसधारणाभेदे 'धृतिरधृतिर्हीर्धीर्नीरित्येतत् सर्वं मनएव" श्रुतिः। सा च सात्विकादिभेदेन त्रिधा यथाह गीतासु "धृत्या यया धारयते मनः प्राणेन्द्रियक्रियाः। योगेनाव्यभिचारिण्या धृतिः सा पार्थ। सात्विकी। यया तु धर्मकामार्थान् धृत्या धारयतेऽर्जुन!। प्रसङ्गेन फलाकाङ्क्षी धृतिः सा पार्थ! राजसी। यया स्वप्नं भयं शोकं विषादं मदमेव च। न विमुञ्चति दुर्मेधा धृतिः सा पार्थ। तामसी"। ८दक्षसुताकृपधर्मपत्नीभेदे "ददौ स दश धर्माय" हरिवं पुराणोक्ते धर्मपत्नीशब्दे उक्ते वाक्ये ३८५७पृ०दृश्यम्। ९जयद्रथनृपस्य पौत्रे पु०जयद्रथस्तु राजेन्द्र! यशोदेव्यां व्यजायत। ब्रह्मबलोत्तरः सत्यां विजयो नाम विश्रुतः। विजयस्य धृतिः पुत्रः" हरिवं० २१अ०। १०मैथिले राजभेदे पु० तत्पुत्रके "सुनक्षत्रसुतो जज्ञे वीतिहव्यो धृतिस्ततः" भाग० ९।१३।१६। ११विश्वेदेवभेदे पु० तन्नामोपक्रमे "वसुः धृतिर्विभावसुश्च पुरुषवत् पावनसखा" भा०अनु०९१अ०। सा०द० उक्ते ३३व्यभिचारिभावभेदे। सा च "सधृतिचपलतास्खलितचिन्तावितर्काः" इत्युद्दिश्य तत्र लक्षिता यथा "ज्ञानाभीष्टागमाद्यैस्तु संपूर्णस्तृप्तता धृतिः। सौहित्यवचनोल्लासमहाद्य प्रतिभादिकृत्" उदाहृतं च "ज्ञात्वा दीनजिघीर्षतां निजजने वह्वा वधोद्विग्नहृम् नैराश्योच्च गरीयसीरपि चिरादाशङ्किनीर्यातनाः। द्रव्यौघाः परिरक्षिताः खलु मया यस्याः कृते साम्प्रतं नीवाराञ्जलिनापि वेवलमहो सेयं कृताघी तनुः" सा०द०। "तत्र धृतिरक्षि गतानि सञ्चरतीयम्" भाषः। "स्थिता कर्म मैत्रजनाशने धृतिः" किरा० "सम्भरान्नधृतेः" मा०सू० १४गुरुत्ववतां पतनाभावे हरिदासः "कार्य्यौदोजन धृत्यादेः पदात् प्रत्ययतः श्रुतेः। वाक्यात् सङ्ख्याविशेषाच्च साध्यो विश्वविदव्ययः कुसुमा०। धृतीति ब्रह्माण्डादि पतनप्रतिबन्धकी भूतप्रयत्नवदधिष्ठितं धृतिमन्त्वात् विवति विकङ्कमधृतकाष्ठवत् धृतिश्च गुरुत्ववतां पतनाभावः" हरिदासः। मनसो भूतपञ्चकारब्धत्वात् क्षित्यंशधारणवत्त्वात् धृतिमत्त्वं बोध्यम्। धृतेर्भूमिगुणत्वञ्च भा० शा० २५५ अ० उक्तं यथा "भूमेः स्थैर्यं गुरुत्वं च काठिन्यं प्रसवार्थता। गन्धोगुरुत्वं भक्ष्यश्च संघातः स्थापना धृतिः"। "स्थैर्यमचाञ्चल्यं गुरुत्वं पतनप्रतियोगी गुणः प्रसवो धान्याद्युत्पत्तिस्तदर्थता, गुरुत्वं प्रथिमा विष्कम्भः अक्षिगोलकषडवामर्थं सङ्कुचितः क्षिप्तावयवत्वम् स्थापना मनुष्यप्राद्याश्रयत्वं धृतिः पाञ्चभौतिके मनसि यो धृत्यंशः स पार्थिवः स्थैर्यशब्देनोपात्त इति धृतिशब्दे नात्र भूतान्तरप्रवेशस्थानत्वमुच्यते" नीलकण्ठव्याख्या। तच्छन्दोऽष्टादशसंख्यकत्वात्तत्तुल्यसंख्यायुते अष्टादशसंख्यायुक्ते च। १६ विपुलाक्ष विष्णुस्थपर्वतस्थे वनभेदे विष्णुस्थपर्वतोपक्रमे "वनं तथा चैत्ररथं विचित्रं तेष्वप्सरो नन्दननन्दनञ्च। इत्याद्भुतं यद् धृतिकृत् सुराणां भास्विष्णु वैभ्राजमिति प्रसिद्धम्" त्रि०शि०। "विपुलश्चैवमक्षश्च केतुदण्डो वटो धृतिर्वनं सङ्काशः सरः" प्रमिता०।

धृतिमत् त्रि० धृतिरस्त्यस्य मतुप्। धैर्य्यान्विते "क्षतत्रं धृतिमन्तञ्च क्षत्रमाक्षरिरं बुधाः" मनुः स्त्रियां ङीप्। "प्रस्तुतां धृतिमतीं भरतो यवन्हे" "धृतिमतीरूपकालमपि स्त्रियः" पञ्चसमनोः २रैवतस्य पुत्रभेदे पु० "अथ पुत्रानिमांस्तस्य निबोध गदतो मम। धृतिमानव्ययो युक्तस्तत्त्वदर्शी निरुत्सुकः" हरिवं० ७अ०। अजमीढपुत्रस्य पौत्रे ऋक्षभेदे पु० "अजमीढस्य दायादो विद्वान् राजा जयी नरः। धृतिमांस्तस्य पुत्रस्तु, हरिवं०२०अ०। ४कुशद्वीपस्थे वर्षभेदे न० कुशद्वीपोपक्रमे "धृतिमत् पद्मं वर्षं यत् वर्षं प्रभाकरम्" भा०भी० १२अ०। ५अग्निभेदे पु० "विष्णुर्नामेह योऽग्निस्तु धृतिमान् नाम षोऽङ्गिराः" भा०व०२२०अ० स च अग्निर्धृतिहोमाङ्गम् धृतिहोमशब्दे दृश्यम्।

६त्रयोदशमन्वन्तरे सप्तर्षिमध्ये ऋङ्गिरोऽपत्यभेदे। "त्रयो-

दर्शे तु पर्य्याये भाव्ये मन्वन्तरे मनोः। अङ्गिरावेव धृतिमान् पौलहो व्यापकस्तथा"।

**धृतिहोम** पु० धृत्याद्यष्टकोद्देशेको होमः। विवाहाङ्गे होमभेदे "उत्थाप्य कुमारं ध्रुवा आज्याहुतीर्जुहोति" सोमिलः "अष्टाविह धृतिहोमाः ध्रुवा आवश्यकाः। कथञ्चिद् भङ्गेऽष्टहोमसमनाभावेऽपि चतुरष्टके निवासेऽपि अवश्यं होतव्याः इति। अत्र "इह धृतिः स्वाहा" इत्यादिप्रयोगः। न तु स्वाहायोगे चतुर्थी "धृतिहोमे न प्रयुञ्ज्यात् गोनामसु तथाष्टसु। चतुर्थीमत्र इत्येतन्नोनामसु हि श्रुतेः इति छन्दोगपरिशिष्टात्। धृतिहोमे धृत्यष्टकहोमे स०क्षा० त०रघु०। स च तत्पद्धतौ भवदेवोक्तो यथा "ततः पतिः कुमारसुत्थाप्य पूर्ववत् कुशण्डिकोक्तविधाने धृतिनामानमग्निं संस्थाप्य समित्प्रक्षेपान्तं व्यस्तसमस्तमष्टाज्याहुतिहोमं कृत्वा अष्टाहुतीर्जुहुयात्। अष्टानां मन्त्राणाम् ऋष्यादयः साधारण्याः। प्रजापतिर्ऋषिर्ब्रह्मी छन्दो वधूर्देवता धृतिहोमे विनियोगः। ओं इह धृतिः स्वाहा१। ओं इह स्वधृतिः स्वाहा२। ओं इह रतिः स्वाहा३। ओं इह रमस्व स्वाहा४। ओं मयि धृतिः स्वाहा५। ओं मयि स्वधृतिः स्वाहा६। ओं मयि रतिः स्वाहा७। ओं मयि रमस्व स्वाहा८"।

**धृत्वन्** पु० धृ-क्वनिप् तुक्। १विष्णौ उज्ज्वल०। २धर्मे ३गगने ४सप्तर्षौ ५मेधाविनि ६विप्रे संज्ञिप्रसारे उणा०। ७धारके त्रि० स्त्रियां "वनो र च" ङीप् रवान्तादेशः। धृत्वरी इति च दभ्रौ संज्ञिप्रसारे उणा०।

**धृष** संहतौ अक० क्षिपे सक० भ्वा० पर० सेट्। धर्षति अधर्षीत्। दधर्ष ददित् धर्षित्वा धृष्टा। "धृषशसी वैयात्ये" पा० वैयात्ये एव अनिटोविधानात् क्त्वो वेट्कत्वेऽपि संहत्यर्थे वधार्थे च नित्यमिट्। धर्षितः

**धृष** प्रागल्भ्ये स्वा० पर० अक० सेट्। धृष्णोति अधर्षीत्। दधर्ष। "धृषशसी वैयात्ये" पा० निशायामनिट्। धृष्टः अस्मा आत्मं चित्त्यप्रयोजनमिति रु। भावादि कर्मणोर्वैयात्ये धृष्निर्ज्ञेति अतएव नियमार्थमिदं क्त्वमिति नित्यतार्थमित्याचक्षाण धृषिर्नाशीति तदर्थः" तत्त्व०। "आलोकवत् स काकुत्स्थमधृष्णोत् घोरमध्वनः" भट्टिः। "तान् दृप्तादिदृप्तान् धृष्टान् प्राप्तान् परिदृप्तान्नया" भट्टिः।

**धृष** सामर्थ्यवचने चुरा० आत्म० अक० सेट्। धर्षयते अदीधृषत अदधर्षत। धर्षयाम् बभूव आस चक्रे "कस्त्वा धर्षयितुं शक्तः" हरिवं० २१५१ श्लो०।

**धृष** क्रोधे अभिभवे च वा चु०उभ०पक्षे भ्वा०प०सक० सेट्। धर्षयति ते धर्षति अदीधृषत त अदधर्षत त अधर्षीत्। धर्षयाम् भूव आस चकार दधर्ष। "प्रहस्तस्य पुरोऽमात्यान् जिघ्रिंसुर्दधृषुस्तथा" भट्टिः। दधृषुरभिभूतवन्तः।

**धृषज्** त्रि० धृष-अभिभवे वा० कञ्जिन्। १धर्षके २अभिभवे च। "ता अस्य संधृषजो न तिग्माः" ऋ०५।१८।५

**धृषट्** त्रि०धृष-अभिभवे वा०कर्तरि अदिक्। धर्षके "धृषद्वर्णं दिवे दिवे" ऋ०१०।८७।२ "धृषद्वर्णं धर्षकरूपम्" भा० "अभूत्योजा अवसि धृषन्मनः" ऋ०१।१५२।५२ धृषन्मनः धर्षकमनाः" भा०। भावे अदिक्। २धर्षणायाम् "ते यामन्ना धृषदिनः" ऋ०१।५२।२ "धृषद्दिनः धर्षणावन्तः" भाष्यम्

**धृषु** त्रि० धृष-कु। १प्रगल्भे २दक्षे ३सङ्घाते पु० संज्ञिप्रसारोक्ता०।

**धृष्ट** त्रि०धृष-वैयात्ये क्त। १निर्लज्जे २प्रगल्भे ३निर्दये च। ४नायकभेदे पु० तल्लक्षणोदाहरणे सा०द० उक्ते यथा "कृतागा अपि निःशङ्कस्तर्जितोऽपि न लज्जितः। दृष्टोऽपि मिथ्यावाक् कथितो धृष्टनायकः" "शोणं वीक्ष्य सखं विचुम्बितुमहं यातः समीपं ततः पादेन प्रहृतं तया सपदि तं धृत्वा सखासे मयि। किञ्चित् तत्र विधातुमक्षमतया वाष्पं व्रजन्त्याः सखे! श्वातस्तेऽस्ति कौतुकं वितनुते कोपोऽपि वामभ्रुवः"। "भूयोनिःशङ्कः कृतदोषोऽपि भूयोनिवारितोऽपि प्रश्रयपरायणः" रसमञ्जर्यां तल्लक्षणसङ्गम्। विदर्भराजसुतकुन्तेः ५पुत्रभेदे पु० "भीमो विदर्भस्य सुतः कुन्तिस्तस्मात्तजोऽभवत्। कुन्तेर्धृष्टः सुतो जज्ञे" हरिवं० ३७अ०। ६वन्दकाम् अस्त्रियां स्त्री शब्दरत्ना०। तस्य भावः तल् धृष्टता स्त्री त्व धृष्टत्व न० अज् धार्ष्ट्य न०। निर्लज्जत्वे प्रागल्भ्ये च "गुरुस्त्वं वागमत्यव धृष्टताम्" माघः।

**धृष्टकेतु** पु० चेदितिराजवंश्ये शूरकुमारस्य १पुत्रभेदे "शूरकुमारस्य दायादो धृष्टकेतुः सुधार्मिकः" हरिवं० २८अ०। नवम मनोः रोहितस्य २पुत्रभेदे च "दक्षपुत्रस्य पुत्रस्य रोहितस्य प्रजापतेः। मनोः पुत्रो धृष्टकेतुः पञ्चशैलो निराकृतिः" हरिवं०७अ०। ३जनकवंश्ये क्षितिसुते पु० "सुधृतेर्धृष्टकेतुर्वै हर्य्यश्वोऽथ मरुत्ततः" भाग० ९।१३।१२ ४कैकये नृपभेदे च "कैकयो धृष्टकेतुश्च श्रुतकीर्त्तिम-

विन्दत" भाग०९।२३।२१। काशेय ५सत्यकेतुसुते "धर्मकेतुः सुतस्तस्मात् सत्यकेतुरजायत। धृष्टकेतुः सुतस्तस्मात्" भाग०९।१७। धृष्टद्युम्नस्य ६पुत्रभेदे च "धृष्टद्युम्नःसुतस्तस्य (द्रुपदस्य) धृष्टकेतुश्च तत्सुतः" हरिवं०२१ अ० "धृष्टकेतुश्चेकितानः काशिराजश्च वीर्यवान्" गीता।

धृष्टद्युम्न पु०द्रुपदस्य पुत्रभेदे तदुत्पत्तिकथा "तत्रैव धृष्टद्युम्नोऽपि साक्षादग्निसमद्युतिः। वैताने कर्मणि तात! पावकात् समजायत। वीरो द्रोणविनाशाय धनुरादाय वीर्यवान्" भा०आ०६२अ०। "द्रोणात्मकमहं पुत्रं जन्मेयं बुधि दुर्जयम्। तत्कर्म कुरु मे याज! वितरास्यर्तु दक्षिणाम्। तथेत्युक्ता तु तं याजो याज्यार्थमुपकल्पयत्। सुवर्णं इति चाकाममुपयाजमचोदयत्। याजो द्रोण विनाशाय प्रतिजज्ञे तथा च सः। ततस्तस्य नरेन्द्रस्य उपयाजो महातपाः। आचख्यौ कर्म वैतानं तदा पुत्रफलाय वै। स च पुत्रो महावीर्यो महातेजा महाबलः। दृश्यते यद्विधो राजन्! भविता ते तथाविधः। भरद्वाजस्य फल्गां सोऽभिसन्धाय भूपतिः। याजस्तु तत्तथा सर्वं द्रुपदः कर्मसिद्धये। याजस्तु हवनस्थाने देवीमाज्ञापयत्तदा। मैत्रि मां रात्रि! प्रसूति! मिथुनं त्वामुपस्थितम्। राजुवाच। अवबिभ्रं सुखं ब्रह्मन्! दिष्ट्यान् गच्छानृ विभर्मि च। सुतार्थेनोपयाजाऽस्मि तिष्ठ याज! मत्प्रिय!। याज उवाच। याजेन अपितं हव्यमुपयाजाभिमन्त्रितम्। सुखं कामं न सन्दध्यात्मा त्वं विप्रैहि तिष्ठ वा। आङ्गच उवाच। एवमुक्ता तु याजेन हुते हविषि यत्नतः। उत्तस्थौ पावकात् तस्मात् कुमारो देवसन्निभः। ज्वालावर्णो घोररूपः किरीटी वर्म चोत्तमम्। बिभ्रत् सखड्गः शरो धनुष्मान्निनदन्मुहुः। तथेत्युवाच तं याजो राज्ञः प्रियचिकीर्षया। तयोश्च नामनी चक्रुर्दिजाः संपूर्णमानसाः। धृष्टमादतिधृष्णुत्वाद्द्युम्नाद्युम्नित्वादपि। धृष्टद्युम्नः कुमारोऽयं द्रुपदस्य भवत्विति"

धृष्टरथ पु०ऋषभेदे "ध्रुवनो जनकश्चैव तथा धृष्टरथो नृपः" भा०अनु० १३२अ० नानान्दपोक्तौ।

धृष्टि पु० धृष-क्तिच्। हिरण्यकशिपोर्जेष्ठस्य हिरण्याक्षासुरस्य पुत्रभेदे "हिरण्यकशिपुभ्रातुः संपरेतस्य दुःखितः। कृत्वा कटोदकादीनि भ्रातृपुत्रानसान्त्वयत्। अकालिं संवरं धृष्टिं मृतस्नापनं हकम्" भा०७।२।१६ २प्रगल्भे त्रि०। "धृष्टिरसि" यजु०१।१७ "हे उपवेष! त्वं धृष्टिरसि प्रगल्भोऽसि। तीव्राक्षाराद्याभिसंस्कृतस्वाङ्गत्वात्पाचकत्वादस्य प्रागल्भ्यम्" वेददी०१यज्ञिये उपवेषरूपे पात्रभेदे पु० उपवेषशब्दे १३२०पृष्ठे दृश्यम्। यज्ञपात्रोपक्रमे "धृष्टी शतमाने" कात्या०श्रौ० २६।२।१० "धृष्टी उपवेषौ चौदम्बरौ तत्र एकं रजतशतमानं द्वितीयं सुवर्णशतमानमिति" कर्कः "धृष्टिरसीत्युपवेषमादाय" कात्या०श्रौ०२।४।२६ "पलाशशाखाया मूलदेशे छित्त्वा काष्ठमाश उपवेषः" कर्कः। पलाशशाखाया इति यज्ञविशेषे "सामान्यतस्तु औदम्बर इति पूर्वापरमीमांसा। धृष्टिरसीति मन्त्रेणोपादीयमानत्वात् उपवेषस्य धृष्टित्वमित्याशयेन "धृष्टी शतमाने" इत्युक्तम्। "धृष्टिभ्यां मन्त्राभ्यां परिक्रीयाङ्गारैश्च" कात्या०श्रौ० २६।३।८ [दृश्यम्।

धृष्ण पु० यादवतंशे भजमानपुत्रभेदे क्रोष्टृशब्दे २२०४पृ०

धृष्णुज त्रि०धृष-नजिङ्।१धृष्टे २प्रगल्भे ३निर्लज्जे अमरः।

धृष्णि पु० धृष-वा० नि। किरणे अमरः।

धृष्णु त्रि० धृष-क्नु। १धृष्टे २प्रगल्भे त्रिका०३कक्षुकायां पु० शब्दच०। ४रुद्रभेदे पु० "नमस्तक्षभ्यो रथकारेभ्यश्च वो नमो नमः कुलालेभ्यः कर्मारेभ्यश्च वो नमो नमो धृष्णवे" यजु० १६।१४ "धृष्णवे धर्मणेऽधीवरिति हन्तं प्रगल्भाय" वेददी०। सावर्णिमनोः ५पुत्रभेदे पु० "सावर्णस्य मनोः पुत्राः" इत्युपक्रमे "चरिष्णुरथौ धृष्णुश्च राजन्! सुमतिरेव च" हरिवं०७अ०। वैवस्वत मनोः ६पुत्रभेदे पु० तदंशोपक्रमे "इक्ष्वाकुश्चैव नाभागो धृष्णुः शर्यातिरेव च" हरिवं० १० अ०। यादवतंशे क्रोष्टुकुलोत्पन्ने ७ऋषभेदे "कुकुरस्य सुतो धृष्णुर्धृष्णोस्तु तनयस्तथा" हरिवं० ३८ अ०। दर्पितामहपुत्रकविसुतभेदे "पितामहस्त्वपत्यं वै कविं जज्ञाह तत्त्ववित्। तदा स वारुणः ख्यातो भृगुः प्रसवकर्मकृत्। ब्रह्मणस्तु कवेः पुत्रा वारुणास्ते उदाहृताः। चत्वारः प्रसवज्ञेर्युक्ता गुणैर्ब्रह्मविदः शुभाः। कविः काव्यश्च धृष्णुश्च बुद्धिमानुशनास्तथा। भृगुश्च विरजाश्चैव त्रयो चोपश्च धर्मवित्। चत्वारो कविसुताश्चैते सर्वमेभिर्जगत्कृतम्" भा० आनु० ८५अ०। वेदे बहुषु स्थाने यथा "प्रधृष्णुया नमति वस्त्रो अक्षू" ऋ०३।२१।३ "धृष्णुया धृष्णुः" भा० "भ्राजन्ती यन्ति धृष्णुया" ऋ०५।१०।५। "धृष्णुया धृष्णवः" भा०।

धृष्णुक पु० वैवस्वतमनुवंशे ऋषभेदे "धृष्णुकाम्बरीषश्च दण्डकश्चेति ते त्रयः" हरिवं० १अ० तदंशोक्तौ

धृष्णोजस् पु०कार्तवीर्यऋषभेदे "शूरसेनश्च शूरश्च धृष्णोजाः

ऋषय एव च। जयध्वजस्य नाम्नाभीदावन्त्यो नृपतिर्भविष्यति। कार्तवीर्यस्य तनया वीर्यवन्तो महाबलाः" हरिवं० २४अ०।

धृष्य त्रि० धृष–कर्मणि क्यप्। धर्षणीये "भूतानामिह यो वै त्वां मया विनिहितां सतीम्। यथा हन्यात् स मे धृष्यः" भा०आ० २२५अ० "पश्यन्नदूरात् मनसाप्यधृष्यम्" कुमा०।

धे पाने भ्वा० प० सक० अनिट् टित्। धयति अदधत् अधासीत्। दधौ धास्यति। खच् स्तनन्धयः स्त्रियां टित्त्वात् ङीप् हरदत्तोक्तेः खच्येव ङीप्। स्तनन्धयी अन्यत्र टाप्।

धेन पु० धयन्ति धे–ननि इच्च ।१सप्तर्षे २गवे च १गव्यां स्त्री टित्त्वेऽपि खच्येव ङीप् इति हरदत्तोक्तेः न ङीप्। ३वाचि स्त्री निघण्टु "वायो भव प्रसूतो देवेभ्यो अमृतदाशुषे" ऋ०१।२।२ "धेना वाक्" भा०। ४धन्याके स्त्री गौरा० ङीष्। स्वार्थे क तत्रार्थे भावप्र०।

धेनु स्त्री धयति सुतान्, धीयते पीयते वत्सैर्वा धेट्–नु इच्च। १गोमात्रे वत्सस्य धयनात् तस्यास्तथात्वम्। २नवसूतिकायाम् सवत्सायां गवि स्त्री अमरः वत्सैः पीयमानक्षीरत्वात् तस्यास्तथात्वम्।

गोमात्रभेदाः दशविधा यथा हरि०पु०उत्तरखण्डे १५०अ० "गवां जातीसु वक्ष्यामि शृणुष्वैकमना द्विज!। प्रथमा गौरकपिला द्वितीया गौरपिङ्गला। तृतीया रक्तकपिला चतुर्थी नीलपिङ्गला। पञ्चमी शुक्लपिङ्गाक्षी षष्ठी तु शुक्लपिङ्गला। सप्तमी चित्रपिङ्गाक्षी अष्टमी बभ्रुरोहिणी। नवमी श्वेतपिङ्गाक्षी दशमी श्वेतपिङ्गला। तादृशास्तेऽपत्यजाताः कपिलासु प्रकीर्त्तिताः"। ३दानार्थकल्पिते धेन्वाकारे गुडादिपदार्थे यथाह हेमा०दा०

"अत्र यद्यपि धेनुशब्देन स्वरूपतो गौरेवाभिधीयते तथापि धेनुशब्दाधारत्वादिह प्रकरणे गुडधेन्वादीनामपि धेनिवेशो युक्तः तेन च क्रमेण निरूप्यमाणत्वात् "दशमी स्यात् स्वरूपतः" इति स्वरूपधेनोरन्ते स्थितत्वात् गुडधेन्वादय एव प्रथमतो निरूप्यन्ते। तदुक्तं मत्स्यपुराणे "यासु पापविनाशिन्यः पठ्यन्ते दश धेनवः। तासां स्वरूपं वक्ष्यामि नामानि च नराधिप!। प्रथमा गुडधेनुः स्यात् घृतधेनुस्तथापि च। तिलधेनुश्च तृतीया च चतुर्थी जलसंज्ञिका। क्षीरधेनुश्च विख्याता मधुधेनुस्तथापि च। सप्तमी शर्करा धेनुरष्टमी दधिधेनुका। रसधेनुश्च नवमी दशमी स्यात् स्वरूपतः"। "कन्याः स्नुषैवधेनूनामितरासान्तु राशयः"। "सुवर्णधेनुमन्यत्र केचिदिच्छन्ति मानवाः" तत्तच्छब्दे दृश्यम्। यशोधनोधेनुमन्त्रेर्ऽमोच। "ऋषिस्तां नन्दिनी नाम धेनुरावहते वनात्" रघुः।

धेनुक पु० धेनुरिव "इवे प्रतिकृतौ" पा० कन्। १असुरभेदे "खर इत्युच्यते दैत्यो धेनुकः सोऽसुरोत्तमः" हरिवं० ६५अ०। "दारुणो धेनुको नाम दैत्यो गर्दभरूपवान्। खरयूथेन महताऽवृतो बलवतां वरः। स तु तालवनं घोरं गर्दभः परिरक्षति। ऋषिशापादगम्यांस्तालयत्नतिदर्पितः" हरिवं० ७०अ०। २रतिबन्धभेदे तद्ग्रन्थं रतिमञ्जर्यामुक्तं यथा "व्यत्यस्तजघनयुगला निजे पदे योषिदेति कटिरूढ़वल्लभा। अयतो यदि शनैरधोऽधो धेनुकं हयवदुच्यते प्रिये!।" "सुप्तां स्त्रियं समाक्रम्य स्वयं सुप्तोरमेत् पुनः। स्यु स्त्रियं चालयेद्यो वल्गोऽयं धेनुकः स्मृतः"। ३स्त्रीभेदे स्त्री। वंशायां कन्। ४धन्याके स्त्री मेदि०।

धेनुकसूदन पु० धेनुकमसुरपदोत्तमसुरं सूदयति सूदि–ल्यु। बलभद्रे तच्छिसूदनकथा हरिवं० ७०अ० यथा "रौहिणेयं खरो दृष्ट्वा सोऽदशद्दशनायुधः। पद्भ्यामाभ्यान्तु पुनः पश्चिमाभ्यां पराङ्मुखः। जघानोरसि दैत्योऽसौ रौहिणेयं निरायुधम्। ताभ्यामेव च जघान पद्भ्यां तं दैत्यगर्दभम्। आवर्जितखरस्कन्धं प्रेरयंस्तालमूर्द्धनि। स भग्नोरुकटीपीठो भग्नपृष्ठोदराकृतिः। खरस्तालफलैः सार्द्धं पपात धरणीतले। तं मृतासुं गतश्रीकं पतितं वीक्ष्य गर्दभम्। प्रार्थीतोऽपरांस्तत्र हयराजनि सोऽक्षिपत्" हरिवं० ७०अ० "पूतनाधेनुकारिष्टकेशिचानूरसूदनः" त्रिकाण्डशेषे विष्णुनामपर्य्याये धेनुसूदनोक्तिः रामस्य विष्णोरवतारत्वात् इति बोध्यम् रामद्वारा तस्य हननात् तस्य तथात्वम्। भाग० १०।१५ अ० अपि बलरामेणैव तस्य हननकथान्ते "नैतच्चित्रं भगवति ह्यनन्ते जगदीश्वरे" इत्यनेन परमेश्वरकर्त्तृकस्य तद्धननस्य न चित्रत्वमित्युक्तम्। बलरामेण तद्धननेऽपि तस्य तद्वारा तद्धनकर्त्तृत्वमस्त्येवेति बोध्यम् धेनुकारिप्रभृतयोऽपि बलरामे।

धेनुदुग्ध न० धेनोर्दुग्धमिव स्वादु फलमस्य। १बिल्वे राजनि० ङीप्। २धेन्वाः क्षीरे च।

धेनुदुग्धकर पु० धेनोर्दुग्धमिव किरति क–अच् धेनो दुग्धं

करोति वर्द्धयति क्त-अच् वा। गर्जरे (गाँजर) राजनि०। तत्पाने धेनोर्दुग्धस्य वर्द्धनात्तस्य तथात्वम्।

धेनुमत् त्रि० धेनुरस्त्रस्य मतुप्। १धेनुस्वामिनि स्त्रियां ङीप्। सा च भरतवंशप्रदेवद्युम्नस्य २भार्य्यावाम् "देवद्युम्नततो धेनुमत्यां सुतः परमेष्ठी" भाग०५।१५।१

धेनुमूल्य न० ६त०। प्रायश्चित्तरूपधेनुदानस्य विक्रयरूपे मूल्यभेदे तस्य प्रायश्चित्ततत्त्वे व्यवस्थापितं यथा

"अथ धेनुमूल्यव्यवस्था। संवर्त्तः "प्राजापत्यव्रताशक्तौ धेनुं दद्यात् पयस्विनीम्। धेनोरभावे दातव्यं तत्त्वं मूल्यं न संशयः"। पयस्विनीमिति विशेषणं दुग्धोपयोगाय सा च वत्सं विना न सम्भवति। अतः सवत्साया एव दानं सुखं तदभावे यथोचितं तन्मूल्यं तदभावे पुराणवचनम्। "द्वात्रिंशत्पणिका गावोवत्सः पौराणिको भवेत्" कात्यायनवचनात्। षट्त्रिंशन्मतमिति कृत्वा पठन्ति "धेनुः पञ्चभिराख्यानां मध्यानां त्रिपुराणिकी। कार्षापणैकमूल्या हि दरिद्राणां प्रकीर्त्तिता"। अत्र पुराणवचनस्थं गोतमोक्तं हिरण्यादिकमेव देयं तद् यथा "हिरण्यं गौर्वासोऽश्वोभूमिस्तिला घृतमन्नमिति देयानि"। एतान्येवानादेशे विकल्पेन क्रियेरन्निति अन्यथा इदमनर्थकं स्यात् इति" प्रायश्चित्तविवेकः। तच्चिन्त्यं हिरण्यं गौरित्यादिना गोर्विकल्पकत्वेन हिरण्यादिकस्य न तु गोमूल्यत्वेन ततश्च। "द्वात्रिंशत्पणिका गावः" इत्यादिवचनात् कार्षापणत्रयदानमेव युक्तम्। तत्र "त्राणिकः कार्षिकः पणः" इति याज्ञवल्क्यवचनेन "शुक्लाः पञ्चाद्यमाषकः। ते षोड़शाद्यः कर्षोऽस्त्री पलं कर्षचतुष्टयं" इत्यमरसिंहोक्तेन अशीतिरत्तिकापरिमितताम्रे पणशब्दः सङ्केतितः। स च तावत्संख्यकवराटकैर्लभ्यत इति वराटकेष्वपि तथा व्यवहारः। एतन्मूलकं भविष्यमत्स्यसूक्तयोर्वचनम्। "अशीतिभिर्वराटकैः पण इत्यभिधीयते। पुराणं ते षोड़शभिः रजतं सप्तभिस्तु तैः"। गोतमोक्तपरिगणनोपनियमस्तु अनादिष्टे प्रायश्चिकल्पाय आदिष्टे तत्तद्द्रव्यप्राधान्यं हिरण्यादेरानुकल्पिकत्वमिति विशेषः। अतएव यमेन सामान्यतो दानसूक्तं यथा "शोधनेन शरीरस्य तपसाऽध्ययनेन च। पापकृन्मुच्यते पापात् दानेन च दमेन च"। अतः कार्षापणत्रयलभ्यं रजतादि दीयते। यत्तु मिताक्षरायाम् "गवामभावे निष्कः स्यात्तदर्द्धं पादएव च" इति स्मरणात्तिष्कादिकसूक्तं तच्चक्षुतमाद्यपेक्षया तत्रापि "चतुःसौवर्णिको निष्कः" इति मनूक्तनिष्कस्य न यद्दृष्टम् अत्यन्तविसदृशमूल्यत्वात् साष्टशतसुवर्णनिष्कवत्। किन्तु दीनारनिष्कस्य यद्दृष्टं तथा चामरः। "साष्टे शते सुवर्णानां हेमन्युरोभूषणे पले" दीनारेऽपि च निष्कोऽस्त्री" इति। दीनार उक्तो विष्णुगुप्तेन "दीनारोरोपकैरष्टाविंशत्या परिकीर्त्तितः। सुवर्णसप्ततितमो भागोरोपक उच्यते"। सुवर्णस्यैवंतिरत्तिकापरिमितं हेम। तथा च मनुः। "पञ्चकृष्णलको माषस्ते सुवर्णस्तु षोड़श" इति अत्र कार्षापणं व्याख्यामाङ्गामरसिंहः। "सुवर्णविंशो हेमनोऽक्षः" इति। एवञ्च सप्तमांशाधिकहेमरत्तिका रोपकः तदष्टाविंशत्या द्वात्रिंशद्रत्तिकापरिमितोदीनारो निष्कः" प्रा०त० रघु०।

धेनुम्भव्या स्त्री भव्या धेनुः "धेनोर्भव्यायाम्" गर्गसूत्रनिर्देशात् परनिपातः समु च। भवद्भव्यां धेन्वाम्

धेनुष्टरी स्त्री अतिशयेन धेनुः तरप् ङीप् धारस्करादेराकृतिगणत्वात् ष्टुत्वञ्च। प्रशस्तधेन्वाम्। "धारस्करीं धेनुष्टरीमालभेत" कठशाखाश्रुतिः।

धेनुष्या स्त्री धेनु-संज्ञायां यत् सुक् च। क्षयशोधनार्थस्तत्तत्कर्मैव बन्धकत्वेन दीयमानायां धेनौ अमरः। "गौर्महिषी वा या दुग्धबन्धके स्थिता सा धेनुष्येति" उद्वाहः। सा संज्ञातोऽस्त्री तारः ष्टत्वञ्च। धेनुभिः क्रीत उत्तमर्णे

धेय त्रि० धा-कर्मणि यत् १धार्य्ये २पोष्ये च। स आदिः स मध्यः स चान्तः प्रजानां स धाता स धेयः स कर्त्ता स कार्य्यम्" भा० शा० २४२अ० ईश्वरस्यैव सर्वरूपत्वात् तथात्वम्। धे-यत्। ३पेये त्रि०। भावे यत्। ४धारणे ५पोषणे ६पाने च।

धेष्ठ त्रि० अतिशयेन धाता दृन् तस्य ष्ठो ष्ठे शुधः। धारकतमे "मित्रार्यो मित्रपतिर्धेष्ठः" ऋ०१।१७०।५ "धेष्ठः अतिशयेन धारकः" भा०। नामधेयादौ स्त्रार्थे धेयप्रत्ययः।

धैनव पुंस्त्री धेनोरपत्यम् उक्षा० विदा० वा अञ्। धेन्वपत्ये स्त्रियां ङीप्।

धैनुक न० धेनूनां समूहः "अचित्तहस्तिधेनोष्ठक्" पा० ठक् "दृसृसुकृतान्नात् कः" पा० ठस्य कः। १धेनुसमूहदाने स्त्रीणां २करणभेदे च मेदि०।

धैर्य्य न० धीरस्य भावः कर्म वा ष्यञ्। १धृतौ "स्थिरा चित्तोन्नतिर्यातु तद्धैर्य्यमिति संज्ञितमिति" भूपालकोषः। २अप्रमादे ३अव्याकुलत्वे ४विघ्नादुपस्थितावपि प्रारब्धा-

परित्यागहेतावन्तःकरणवृत्तिविशेषे। ५निर्विकारचित्तत्वे। "मनसो निर्विकारत्वं धैर्यं सत्स्वपि हेतुषु" एतदभिप्रायेण "विकारहेतौ सति विक्रियन्ते येषां न चेतांसि त एव धीराः" इति कुमा० उक्तम्। "कुर्यां हरस्यापि पिनाकपाणेर्धैर्यच्युतिं के मम धन्विनोऽन्ये" कुमा०। "अवधीर्य धैर्यकलिता दयितम्" माघः। ६नायकयोर्गुणभेदे धीरताशब्दे दृश्यम्। ७पुरुषगुणभेदे यथा "शोभा विलासो माधुर्यं गाम्भीर्यं धैर्यं तेजसी। ललितौदार्यस्थिरत्वे सत्त्वजाः पौरुषा गुणाः" रत्नदृश्य "व्यवसायाद्चलनं धैर्यं विघ्ने महत्यपि" सा० द० लक्षितम् उदाहृतञ्च "श्रुतापसरोगोतिरपि सखेऽस्मिन् हरः प्रसंख्यानपरो बभूव। आकेश्वराणां न हि जातु विघ्नाः समाधिभेदप्रभवो भवन्ति"। स्वार्थे अण्। पुरश्चर्यामेधयज्ञे दक्षौम्यदेवभेदे पु०। तदुपक्रमे "मेधायै रथकारं धैर्याय तक्षाणम्" यजु० ३०।७

धैवत पु० धीमतामयम् अण् प्रत्ये०। तन्त्रोक्तषष्ठोत्थित सप्तस्वरेषु षष्ठे स्वरे तल्लक्षणं यथा "गत्वा नाभेरधोभागं वह्निं प्राप्योर्द्धगः पुनः। धावद्भिव च यो याति कण्ठं देशं स धैवतः" सङ्गीतदामो "षड्जस्तु धैवतं रौति" सङ्गीतशास्त्राक्तेरस्याश्वस्वरतुल्यत्वम्। अस्य च वायुभवत्वेऽपि आकाशगुणत्वम् भा० शा० १८४ अ० उक्तं यथा "तत्रैकगुणमाकाशं शब्द स्पर्श एव तु स्मृतम्। तस्य शब्दस्य वक्ष्यामि विस्तरं विविधात्मकम्। षड्जऋषभगान्धारौ मध्यमो धैवतस्तथा। पञ्चमश्चापि विज्ञेयस्तथा चापि निषादवान्। एष सप्तविधः प्रोक्तो गुण आकाशसम्भवः। ऐश्वर्यं च तु सर्वत्र स्थितोऽपि षट्पदादिषु। मृदङ्गभेरीशङ्खानां स्तनयित्नोरथस्य च। यः कश्चिच्छ्रूयते शब्दः प्राणिनोऽप्राणिनोऽपि वा। एतेषामेव सर्वेषां विषये संप्रकीर्त्तितः। एवं बहुविधाकारः शब्द आकाशसम्भवः। आकाशजं शब्दमाहुरेभिर्वायुगुणैः सह। अध्याहतैश्चेतयते न वेत्ति विषमस्थितैः"। [तः। धीवोभावे।

धैवत्य न० धीवोभावः यञ् दाक्षिणात्यनेत्यादि० नि० नञ्

धैवर पुंस्त्री धीवरस्यापत्यं वा० अत इञ् बाधित्वा वेदे अण्। धीवरापत्ये "सरोभ्यो धैवरम्" यजु० ३०।१६ लोके तु इञ् धैवरिरित्येव।

धोयी पु० कविभेदे "धोयी कविः क्ष्मापतिः" गीतगो०

धोड़ पुंस्त्री धुर-वधे अच् रस्य लत्वस्य डः। (ढोँड़ा) सर्पभेदे डुधुक्ष्मे शब्दर० स्त्रियां जातित्वात् ङीष्।

धोर गतौ सक०चातुर्थे अक०भ्वा० पर०सेट्। धोरति अधोरीत्। दुधोर अदित् णिच् चङि अदुधोरत् त।

धोरण न० धोर-गतौ करणे ल्युट्। १यानभाण्डे हस्त्यश्वरथादौ त्रिका०। भावे ल्युट्। २गतौ।

धोरणि(णी) स्त्री धोर-अनि वा ङीप्। परमेश्वरस्य जटाधरः। "यैर्मौकन्दवने मनोज्ञपवने सद्यःस्खलन्माधुरीधाराधोरणिधौतधामनि धराधीशत्वमालम्ब्यते। तेषां नित्यविनोदिनां सुकृतिनां माधीकपानां पुनः कालः किल करोति केतकि! यतस्त्वय्यपि केतकीस्वजो"उद्भटः।

धोरित न० धुर-धोर-वा भावे क्त। १वधे २गतौ २अश्वगतिभेदे हेमच०। स्वार्थे क। तत्रार्थे अमरः।

धौत त्रि० धाव-क्त अट्। १प्रक्षालिते २मार्जिते ३शोधिते हेम० "रेणुद्धौतं स्त्रिया धौतं यद्धौतं रजकेन च। अधौतं तत् विजानीयात् दशा दक्षिणपश्चिमे" कर्मलोचनम्। "धौतोत्तरीयप्रतिमच्छवीनि" "परितश्च धौतहरस्मविलसदक्षिणांशुमखखजाः" माघः। ४रौप्ये न० राजनि०। भावे क्त। ५प्रक्षालने न०।

धौतकट पु० नित्यकर्म०। स्वनिर्मितपात्रभेदे (धोकड़ा)लटा०

धौतकोपज न०धौतं प्रक्षालितं कोपजं नित्यक०। कृमिकोषजाते वस्त्रभेदे शब्दर०। [वस्त्रे अमरः।

धौतकौपेय न० नित्यकर्म०। प्रक्षालिते कृमिकोषजाते

धौतबली स्त्री धौताङ्ग्यां ल्यङ्लुटि शिवभेदे शब्दर०।

धौतमूलक पु०१चीनराजभेदे "यवकेच यवीहानां चीनानां धौतमूलकः" भा०उ० ७३अ०। धौतं मूलं यस्य कप्। २प्रक्षालितमूलयुक्ते त्रि०।

धौतय न०धौतमिव वर्त्म याति या-क। सैन्धवे नैषधटुप्रका०

धौतरि त्रि० धूतमेव धौतं कर्मनक्षत्यति क्ष-कि। कर्मनकारके स्त्रियां ङीप्। "स सवान्तूर्णोनाभिर्धौतरीभिः" ऋ०६।४४।७ "धौतरीभिः कर्मनकारीभिः" भा०।

धौतशिल न० धौता शिला यस्य। स्फटिके त्रिका०।

धौताङ्गी स्त्री ल्यङ्लुटि शिवभेदे मेदि०।

धौती स्त्री धू-कर्तरि क्तिच् स्वार्थे अण् ङीप्। क्षालनकर्तरि "योधौतीनामहिहस्तारिरक् पयः" ऋ०२।१३।५ "धौतीनां कर्मनीनाम्" भा०। धूति-स्वार्थे अण् ङीप्। २हठयोगाङ्गभेदे हठयोगशब्दे दृश्यम्।

धौन्धुमार न० धुन्धुमारमधिकृत्य कृतो ग्रन्थः अण्। भारत वनपर्वान्तर्गतोपाख्यानभेदे "ऐन्द्रद्युम्नसुपाख्यानं धौन्धु-

मारं तत्रैव च भा०आ०१अ०। तच्च वनपर्वणि २००अध्यायावधौ २०२ अध्यायान्ते दृश्यम्। [देशभवे।

धौमक पु० धूमे तत्प्रधानदेशे भवः धूमा० वुञ्। धूमप्रधान-

धौमतायन पु० राजभेदे। तेन निर्वृत्तादि अरीहणादि० चतुरर्थ्यां वुञ्। धौमतायनक तद्विर्वृत्ते नगरादौ

धौमायनक त्रि० धौमायनेन निर्वृत्तादि अरीहणादि० चतुरर्थ्यां वुञ्। धौमायननिर्वृत्तादौ।

धौमीय त्रि० धूमेन निर्वृत्तादि० चतुरर्थ्यां कृयाद्वा०छण्। धूमनिर्वृत्तादौ।

धौम्य त्रि० धूमस्यापत्यं गर्गा० यञ्। १धूम्रवर्णेऽपत्ये स च युधिष्ठिरपुरोहितः यथा

"गन्धर्व उवाच यथोद्यान् देवलश्चैव वने भ्राता तपस्यति। धौम्य उत्कोचके तीर्थे तं शुश्रुध्वं यदीच्छथ"। "तत उत्कोचकं तीर्थं गत्वा धौम्याश्रमन्तु ते। तं वव्रुः पाण्डवा धौम्यं पौरोहित्याय भारत!। तान् धौम्यः प्रतिजग्राह सर्ववेदविदांवरः। वन्येन फलमूलेन पौरहित्येन चैव ह" भा०आ० १८३अ०। व्याघ्रपादऋषेः पुत्रभेदे २उपमन्योरनुजे च।

"पुरा कृतयुगे तात! ऋषिरासीन्महातपाः। व्याघ्रपाद इति ख्यातो वेदवेदाङ्गपारगः। तस्याऽऽत्मभवं पुत्रो धौम्यश्चापि ममानुजः। कस्यचित्त्वथ कालस्य धौम्येन सह माधवः" भा०आनु०१४अ०। पश्चिमदिग्वासिते ३ऋषिभेदे च "उपमन्युः कवषो धौम्यः परिव्याधश्च वीर्यवान्। एकतश्च द्वितश्चैव त्रितश्चैव महर्षयः। अत्रेः पुत्रश्च भगवांस्तथा सारस्वतः प्रभुः। एते चैव महात्मानः पश्चिमामाश्रिता दिशम्" भा०भी० २०८अ०

धौम्र पु० धूम्रएव स्वार्थे अण्। ऋषिभेदे "धौम्यो विभाण्डो माण्डव्यो धौम्रः कृष्णानुभौतिकः" भा०आ० ४७अ०। स्वार्थे अण्। २धूम्रवर्णे ३तद्वति त्रि० भावे अण्। ४धूम्रवर्णत्वे धूम्रोदेवताऽस्य अण्। ५वास्तुस्थानभेदे पु०

धौम्रायण पुंस्त्री० धूम्रस्य गोत्रापत्यं अश्वा० फञ्। धूम्रस्य गोत्रापत्ये।

धौरादित्य पु० तीर्थभेदे शिवपु०।

धौरित न० धौरितमेव स्वार्थे अण्। "धौरितं गतिमात्रं यद्योजितं वल्गितं पुनः। अप्रकाशसहाशत्वात् कुत्सितार्थं मतल्लिकम्" इत्युक्ते अश्वगतिभेदे। स्वार्थे क धौरितक तत्रार्थे अमरः। [अमरः। २धुर्ये वृषे पु० राजनि०]

धौरेय त्रि० धुरं वहति "धुरो यड्ढकौ" पा० ढक्। १धूर्वहे

धौर्त्तक न० धूर्तस्य भावः मनोज्ञा० वुञ्। धूर्तत्वे शाठ्ये

धौर्त्तेय पुंस्त्री धूर्तांया अपत्यं "स्त्रीभ्यो ढक्" पा० ढक्। धूर्तांया अपत्ये बहुवचने यौधेयादि० ततः प्रत्ययस्य न लुक्।

धौर्त्य न० धूर्तस्य भावः कर्म वा ब्राह्मणा० ष्यञ्। १धूर्तत्वे २धूर्तकर्मणि च। "वेट शोट धौर्त्यं पूर्वभावे" कण्ड्वादिगणसूत्रम्।

धौर्य्य न०धोर-धुर-वा यत्। १अश्वगतिभेदे धोरणे क्षेम०।

धौवकि पुंस्त्री धुवकाया अपत्यं स्त्रीभ्यो ढकं बाधित्वा बाह्वादि० इञ्। धुवकाया अपत्ये।

धा ऋन्निसंयुतो दीर्घश्चासहेतुके शब्दभेदे चक० तादृशशब्देन वादने सक०भ्वा०पर० अनिट्। धमति अध्मासीत्। दध्मौ ध्मातः। १मापयति "सुखेनैव धमेदग्निं सुखादग्निः प्रजायते" संस्कारतत्त्वम् "शङ्खान् दध्मुः पृथक् पृथक्" गीता। ध्मायते। अध्माषि। "दह्यन्ते ध्मायमानानां धातूनां हि यथा मलाः" मनुः। "वाय्वग्निभ्यां यथा लोकं ध्मातं त्रायति वै मरुत्" भाग० १।२८।४०। धा-स्फीततायाम् आधानशब्दे दृश्यम्।

धाकार पु० धा-शब्दव्यक्तशब्दस्य कारः। १(धा) इति शब्दकरणे। क-कर्त्तरि अण्। २लोहकारके पु० मेदिनीकरः

धा(ध्वा)क्ष आकाङ्क्षे सक० घोररवे अक० भ्वा० पर० सेट् इदित्। धा(ध्वा)क्षति। अधा(ध्वा)क्षीत्। दधा(ध्वा)क्ष। पा० मते वोपधः।

धा(ध्वा)क्ष पुंस्त्री धा(ध्वा)क्ष-अण्। १काके २मतस्यभक्षके पक्षिभेदे अमरः। ३भिक्षुके ४तस्करे च मेदि० ५वल्गोलिकायां स्त्री गौ०ङीष्।

धा(ध्वा)क्षजङ्घा धा(ध्वा)क्षस्येव जङ्घा यस्याः। काकजङ्घायाम् राजनि०। [राजनि०।

धा(ध्वा)क्षजम्बु स्त्री धा(ध्वा)क्षप्रिया जम्बुः। काकजम्बां

धा(ध्वा)क्षतुण्डी धा(ध्वा)क्षस्येव तुण्डमस्याः ङीष्। काकनासाख्यतायां राजनि०।

धा(ध्वा)क्षदन्ती स्त्री धा(ध्वा)क्षस्येव दन्ता अवयवोऽस्याः ङीष्। काकतुण्डीलतायां राजनि०।

धा(ध्वा)क्षनखी स्त्री धा(ध्वा)क्षस्येव नखा अस्या ङीष्। काकतुण्डां राजनि०।

धा(ध्वा)क्षनाम्नी स्त्री धा(ध्वा)क्षं नामयति प्रियत्वात् नामि वा० मनि। काकोदुम्बरिकायां राजनि०।

धा(ध्वा)क्षनासिनी स्त्री इत०। क्षुद्रायां भावप्र०

ध्मा(ध्वा)ङ्क्षनासा स्त्री ध्मा(ध्वा)ङ्क्षेव नासा यस्याः। काकनासिकायाम् राजनि०। वा कप् अत इत्त्वम् ध्मा(ध्वा)ङ्क्षनासिकाऽपि तत्रार्थे। [आतिस्वात् ङीष्।

ध्मा(ध्वा)ङ्क्षपुष्ट त्रि० ३त०। कोकिले हारा० स्त्रियां

ध्मा(ध्वा)ङ्क्षमाचो ध्मा(ध्वा)ङ्क्षमचते मच-क्विप् काकमाचीवत् साध्यम्। काकमाच्यां राजनि०। [राजनि०।

ध्मा(ध्वा)ङ्क्षवल्ली स्त्री तन्नामा वल्ली। काकनासायाम्

ध्मा(ध्वा)ङ्क्षादनी स्त्री काकादनीवत् साध्यम्। काकतरुण्यां राजनि०। [प्रभृतयोऽपि तत्रार्थे।

ध्मा(ध्वा)ङ्क्षारारि पु० ६त०। मेचके हारा०। तदरिध्मा(ध्वा)ङ्क्षी स्त्री जातौ ङीष्। १काक्यां २काकोलिकायां च मेदि०। [राजनि०।

ध्मा(ध्वा)ङ्क्षोली स्त्री काकोलीवत् साध्यम्। काकोल्यां

ध्मात त्रि० ध्मा-क्त। १संधुक्षिते शब्दभूविष्ठतया दीर्घभावेन २शब्दमात्रे वर्णे च। ३शब्दिते ४वादिते च।

ध्मापन न० ध्मा-णिच् भावे ल्युट्। ङंकृते शब्दार्थचि०।

ध्मापित त्रि० ध्मापि-क्त। ङंकृते कृष्णलीकृते शब्दार्थचि०।

ध्यात त्रि० ध्यै-क्त। चिन्तिते ध्यानविषयीभूते "तदात्मना ध्यातधिया रते च का" नैष०।

ध्यान न० ध्यै-भावे ल्युट्। १चिन्तने २चिन्तितवस्तुनि विक्षिप्तविक्षिप्तान्तरिन्द्रियवृत्तिप्रवाहे। "शास्त्रोक्तदेवताद्यालम्बनेऽवयवो भिन्नजातीयैरनन्तरितः प्रत्ययेनान एकायतेति समाङ्गरिति" भाष्योक्तेः ३ध्येयप्रत्ययैकतानत्वे। एकत्र धृतस्य चित्तस्य भगवदाकार वृत्तिप्रवाहोत्तरोत्तराऽन्याकारप्रत्ययाव्यवहिते ४निदिध्यासनसंज्ञे चित्तस्यात्माकारताहेतौ। "ब्रह्मैवाऽस्मीति बुद्ध्या निरालम्बतया स्थितिः। ध्यानशब्देन विख्याता परमानन्ददायिनी" इत्युक्तेः ५परमात्मचिन्तने। धारणानिरूढस्य त्रिनेत्रपद्मवक्त्राद्याकारविषयायां ६चिन्तायाम्। "चिन्ता तद्विषया ध्यानमित्युक्तेः।" "तत्र प्रत्ययैकतानता ध्यानम्" पा०सू० तत्र तस्मिन् देशे यत्र चित्तं धृतं तत्र प्रत्ययस्य ध्यानस्य चैकतानता विसदृशपरिणामपरिहारेण यथैव धारणायामवलम्बनीकृतम् तदालम्बनतयैव निरन्तरवृत्तिप्रवाहः सा ध्यानशब्द्यते। ध्यानपदनिरुक्त्यादिकथनं षड्विधानिर्णयतन्त्रे यथा "ध्यै चिन्तायां क्षतो धातुः चिन्ता तत्त्वेन निश्चला। एतद् ध्यानमिह प्रोक्तं सगुणं निर्गुणं द्विधा। सगुणं मन्त्रभेदेन निर्गुणं केवलं मतम्" इति। अपि च "ध्यानं तु द्विविधं प्रोक्तं सरूपारूपभेदतः। अरूपं तत्र यद् ध्यानमवाङ्मनसगोचरम्। अव्यक्तं सर्वतो व्याप्तमिदमित्यविवर्जितम्। अगम्यं योगिभिर्गम्यं ब्रह्मैवंरूपसमाधिभिः। मनसो धारणार्थाय शीघ्रं स्वाभीष्टसिद्धये। सरूपध्यानप्रबोधाय स्थूलध्यानं वदामि ते। अरूपायाः कालिकायाः कालमातुर्महाद्युतेः। गुणक्रियानुसारेण क्रियते रूपकल्पना" ब्रह्मचिन्तायां यथा

"ब्रह्मात्मचिन्ता ध्यानं स्यात् धारणा मनसो धृतिः। अहं ब्रह्मेत्यवस्थानं समाधिर्ब्रह्मणः स्थितिः" इति गारुडे ४६अ०। तत्कालभेदश्च "प्राणायामैर्दशभिर्वावत् कालं स्थितो भवेत्। यस्तावत्कालपर्यन्तं मनो ब्रह्मणि धारयेत्। तस्यैव ब्रह्मणा प्रोक्तं ध्यानं द्वादश धारणाः। द्वादशध्यानपर्यन्तं मनो ब्रह्मणि यो नरः। तिष्ठेत स यतो मुक्तः समाधिः सोऽभिधीयते। ध्येयाद्यत्र चलते यस्य मनोऽभिध्यायतो भृशम्। प्राणायामैर्दशकृतं कालं यावत् स धारणा स्मृता। ध्येयसक्तं मनो यस्य ध्येयमेवानुपश्यति। नान्यं पदार्थं जानाति ध्यानमेतत् प्रकीर्तितम्। ध्येये मनो निश्चलतां याति ध्येयं विचिन्तयन्। तद्ध्यानं परं प्रोक्तं मुनिभिर्ध्यानचिन्तकैः। ध्येयमेव हि सर्वत्र ध्याता तन्मयतां गतः। पश्यति द्वैतरहितं समाधिः सोऽभिधीयते" इति गारुडे २४०अ० अग्निपुराणे च तद्विरुद्धप्रादिकमुक्तं यथा "अग्निरुवाच। ध्यै चिन्तायां क्षतो धातुर्विष्णुचिन्ता सदर्थकः। अनाछिन्नेन मनसा ध्यानमित्यभिधीयते। आत्मनः समनस्कस्य सत्ताग्रेषोपधस्य च। ब्रह्मचिन्ता समासक्तिर्ध्यानं नाम तदुच्यते। ध्येयालम्बनसंस्थस्य सदृशप्रत्ययस्य च। प्रत्ययान्तरनिर्मुक्तः प्रत्ययो ध्यानमुच्यते। ध्येयावस्थितचित्तस्य प्रदेशे यत्र कुत्रचित्। ध्यानमेतत्समुद्दिष्टं प्रत्ययैकतानता। एवं ध्यानसमायुक्तः स्वदेहं यः परित्यजेत्। कृत्स्नं स्खलनमित्याहि सद्यो मुच्य हरिर्भवेत्। एवं मुहूर्तमर्धं वा ध्यायेद् यः श्रद्धया हरिम्। सोऽपि यां गतिमाप्नोति न तां सर्वैर्महामखैः। ध्याता ध्यानं तथा ध्येयं यच्च ध्यानप्रयोजनम्। एतच्चतुष्टयं ज्ञात्वा योगं युञ्जीत तत्त्ववित्। योगाभ्यासाद्भवेन्मुक्तिरैश्वर्यं ह्यष्टधा महत्। ज्ञानवैराग्यसम्पन्नः श्रद्धानः क्षमान्वितः। विष्णुभक्तः सदोत्साही ध्यातेत्यं पुरुषः स्मृतः। मूर्तामूर्तं परं ब्रह्म हरेर्ध्यानं हि चिन्तनम्। सकलो निष्कलो ज्ञेयः सर्वज्ञः परमो हरिः। अणिमादिगुणैश्वर्यं सच्चि-

ध्यानप्रयोजनम्। फलेन योजको विष्णुरतो ध्यायेत् परेश्वरम्। गच्छंस्तिष्ठन् स्वपन् जाग्रदुन्मिषन् निमिषन्नपि। शुचिर्वाप्यशुचिर्वापि ध्यायेत् सततमीश्वरम्। स्वदेहायतनस्थाने मनसि स्थाप्य केशवम्। हृत्पद्मपीठिकामध्ये ध्यानयोगेन पूजयेत्। ध्यानयज्ञः परः शुद्धः सर्वदोषविवर्जितः। तेनेहा सुखमाप्नोति बाह्या-शुद्धैश्च नाध्वरैः। हिंसादोषविसक्तित्वाद्विशुद्धिश्चित्त-साधनः। ध्यानयज्ञः परस्त्वाद्यपवर्गफलप्रदः। तस्मा-दशुद्धं सन्त्यज्य शुचित्वं बाह्यसाधनम्। यस्माद्यं कर्म सन्त्यज्य योगमत्यर्थमभ्यसेत्। विकारसङ्गमभ्यक्तं भोग्य-भोगसमन्वितम्। चिन्तयेद्धृदये पूर्वं क्रमाद्यादौ गुण-त्रयम्। तमः प्रक्षाद्य रजसा सत्वेन रजसस्तथा। ध्यायेच्चित्तमखण्डं पूर्वं कृष्णं रक्तं सितं क्रमात्। सत्वो-पाधिगुणातीतः पुरुषः पञ्चविंशकः। ध्येयमेतदशुद्धत्व-त्यक्त्वा शुद्धं विचिन्तयेत्। ऐश्वर्यं पङ्कजं दिव्यं पुरुषो-परि संस्थितम्। द्वादशाङ्गुलविस्तीर्णं शुद्धं विकसितं सितम्। नालमष्टाङ्गुलं तस्य नाभिकन्दसमुद्भवम्। पद्मपत्राष्टकं श्वेतमष्टसिद्ध्याष्टकम्। कर्णिकाकेसरं नालं ज्ञानवैराग्यसंयुतम्। विष्णुधर्मेण तत्कन्दमिति पद्मं विचिन्तयेत्। तद्धर्मज्ञानवैराग्यं शिवैश्वर्यमयं परम्। ज्ञात्वा पद्मासनं सर्वं सर्वदुःखात्मशान्तये। तत् पद्मकर्णिकामध्ये शुद्धदीपशिखाकृतिम्। अङ्गुष्ठ-मात्रसमलं ध्यायेदोङ्कारमीश्वरम्। कदम्बगोलकाकारं तारं रूपमिव स्थितम्। ध्यायेद्वा रश्मिजालेन दीप्य-मानं ज्वलन्तः। प्रधानं पुरुषातीतं स्थितं पद्मस्थमीश्व-रम्। ध्यायेज्जपेच्च सततमोङ्कारं परमक्षरम्। मनः-स्थित्यर्थमित्यनि स्वध्यानमनुक्रमात्। तद्भूतं नि-श्चलीभूतं लभेत् सूक्ष्मेऽपि संस्थितिम्। नाभिकन्दे स्थितं नालं दशाङ्गुलसमायतम्। नालेनाष्टदलं पद्मं द्वादशा-ङ्गुलविस्तृतम्। सकर्णिके केसरालं सूर्यसोमाग्निमण्ड-लम्। अग्निमण्डलमध्यस्थः शङ्खचक्रगदाधरः। पद्मी चतुर्भुजो विष्णुरथ वाष्टभुजो हरिः। शार्ङ्गेषुवसय-धरः पाशाङ्कुशधरः परः। सूर्यवर्णः श्वेतवर्णः सत्त्वोद्भवः सकौस्तुभः। वनमाली सूर्यहारी स्फुरन्मकरकुण्डलः। रत्नोज्ज्वलकिरीटश्च पीताम्बरधरो महान्। सर्वाभरण-भूषाढ्यो वितस्तिर्वा यथेच्छया। अहं ब्रह्म ज्योतिरात्मा वासुदेवो विमुक्त ओम्। ध्यानाच्छान्तो जपेन्नित्यं जपाच्छान्तश्च चिन्तयेत्। जपध्यानादियुक्तस्य विष्णुः शीघ्रं प्रसीदति। जपश्चतुर्विधो यज्ञात् कर्ता नार्हन्ति षोडशीम्। जपिनं नोपसर्पन्ति व्याधयश्चाधयो यज्ञात्। मुक्तिर्भुक्तिर्भवेत्तुजयो जपेन प्राप्नुयात् फलम्' १७१ अ०।

ध्यानप्रकारादिकञ्च मिताक्षरायां यथा

"ऋजुस्थोत्तानचरणः सम्यङ् न्यस्येतरं करम्। उत्तानं किञ्चिदुन्नाम्य सव्यं विष्टभ्य चोरसा। निमीलिताक्षः सत्वस्थो दन्तैर्दन्तानसंस्पृशन्। तालुस्थाचलजिह्वश्च संवृताक्षः सुनिश्चलः। संनिरुद्धेन्द्रियग्रामं नातिनीचोच्छ्रितासनः। द्विगुणं त्रिगुणं वापि प्राणायामसुपक्रमेत्। ततो ध्येयः स्थितो योऽसौ हृदये दीपवत् प्रभुः। धारयेत्तत्र चात्मानं धारणां धारयन् बुधः" याज्ञ०। "ऋजुस्थानुत्तानचरणौ यस्य स तथोक्तो बद्धपद्मासनः। तथो-त्ताने सव्यकरे दक्षिणहस्तानं न्यस्य सम्यक् किञ्चिदुन्नाम्यो रसा च विष्टभ्य सम्यग्विन्यस्य तथा निमीलिताक्षः सत्वस्थः कामक्रोधादिरहितो दन्तैर्दन्तानसंस्पर्शयन्। तथा तालुनि स्थिता अचला जिह्वा यस्य स तथोक्तः संवृता-क्षः पिहितानन: सुनिश्चलो निष्प्रकम्पस्तथा सम्यगि-न्द्रियग्रामं विषयेभ्यः प्रत्याहृत्य नातिनीचासनो नात्यु-च्छ्रितासनो यथा चित्तविक्षेपो न भवति तथोपविष्टः सन् द्विगुणं त्रिगुणं वा प्राणायामाभ्याससमुपक्रमेत्। ततो यथोक्ततपवनेन योगिना योऽसौ हृदये दीपवद-प्रकम्प्यः प्रभुः स्थितोऽसौ ध्यातव्यः तत्र च हृदयात्मानं मनोगोचरतया धारयेत्। तथा धारयाच्च धारयेत्। धारयाश्चरूपञ्च आत्मप्रमाणेन त्रोटिकादानकालो मात्रा। तासिः षड्दशमात्राभिरधमः प्राणायामस्त्रिभि-र्द्विभिर्मध्यमः। षड्चत्वारिंशद्भिरुत्तम इत्येवं प्राणायामस्य-वाप्येकैका धारणा। तास्त्रिको योगशब्दवाच्यांश्च धारयेत्। यथोक्तमत्र "संभाव्य त्रोटिकां दद्यात् करायङ्गानुमण्डले। मात्राभिः षड्दशभिः प्राणायामो-ऽधमः स्मृतः। मध्यमो द्विगुणः श्रेष्ठस्त्रिगुणो धारणा तथा। त्रिभिस्त्रिभिः स्मृतैकैका तासियोगस्तथैव चेति" मिता०। "हृदयस्थस्य योगेन देवदेवस्य दर्शनम्। ध्यानं मोक्षं प्रवक्ष्यामि सर्वज्ञात् योगतः शुभम्" हृदिस्था देवताः सर्वा हृदि प्राणाः प्रतिष्ठिताः। हृदि ज्योतींषि भूयश्च हृदि सर्वं प्रतिष्ठितम्। स्वदेहमरणिं कृत्वा प्रणवञ्चोत्तारणिम्। ध्याननिर्मथनाभ्यासात् विष्णुं पश्येद्धृदि स्थितम्। हृदयान्तश्चन्द्रमाः सूर्यः सोममध्ये हुताशनः। तेजोमध्ये स्थितं तत्त्वं तत्त्वमध्ये स्थितो-

परित्यागहेतावन्तःकरणवृत्तिविशेषे। ६निर्विकारचित्तत्वे। "मनसो निर्विकारत्वं धैर्यं सत्स्वपि हेतुषु" एतदभिप्रायेण "विकारहेतौ सति विक्रियन्ते येषां न चेतांसि तएव धीराः" इति कुमा० उक्तम्। "कुर्यात् क्षरस्यापि पिनाकपाणेर्धैर्यच्युतिं के मम धन्विनोऽन्ये" कुमा०। "अवधीर्य धैर्यकलिता दयितम्" माघः। ७नायकयोर्युग्मभेदे धीरताशब्दे दृश्यम्। ८पुरुषगुणभेदे यथा "शोभा विलासो माधुर्यं गाम्भीर्यं धैर्यं तेजसी। ललितौदार्यमित्यष्टौ सत्त्वजाः पौरुषा गुणाः" इत्युद्भिन्न "व्यवसायादचलनं धैर्यं विघ्ने महत्यपि" सा० द० लक्षितम् उदाहृतञ्च "श्रुताप्सरोगोतिरपि चखेऽक्षिन् क्षरः प्रसंख्यानपरो बभूव। आत्मेश्वराणां न हि जातु विघ्नाः समाधिभेदप्रभवो भवन्ति"। स्वार्थे अण्। पुरुषमेधयज्ञे दक्षौम्यदेवभेदे पु०। तदुपक्रमे "मेधायै रभसं धैर्याय तक्षाणम्" यजु० ३०।७

धैवत पु० धीमतामयम् अण् वृधो०। तन्त्रीकण्ठोत्थित सप्तस्वरेषु षष्ठे स्वरे तल्लक्षणं यथा "गत्वा नाभेरधोभागं वह्निं प्राप्योर्द्ध्वगः पुनः। धावद्भिव च यो याति कण्ठं देशं स धैवतः" सङ्गीतदामो "अश्वस्तु धैवतं रौति" सङ्गीतशास्त्रोक्तेस्वाश्वस्वरत्वात्तथात्वम्। अस्य च वायुभवत्वेऽपि आकाशगुणत्वम् भा० शा० १८४ अ० उक्तं यथा "तत्रैकगुणमाकाशं शब्द इत्येव तत् श्रुतम्। तस्य शब्दस्य वक्ष्यामि विस्तरं विविधात्मकम्। षड्जऋषभगान्धारौ मध्यमो धैवतस्तथा। पञ्चमश्चापि विज्ञेयस्तथा चापि निषादवान्। एष सप्तविधः प्रोक्तो गुण आकाशसम्भवः। ऐश्वर्येण तु सर्वत्र स्थितोऽपि षट्स्वादिषु। स्वदङ्गभेरीशङ्खानां स्तनयित्नोरथस्य च। यः कश्चिच्छ्रूयते शब्दः प्राणिनोऽप्राणिनोऽपि वा। एतेषामेव सर्वेषां विषये संप्रकीर्त्तितः। एवं बहुविधाकारः शब्द आकाशसम्भवः। आकाशजं शब्दमाहुरेभिर्गुणैः सह। अव्याहतैश्चेतयते न वेत्ति विप्रमस्थितैः"। [तः। धीवोभावे।

धैवत्य न० धीवोभावः यञ् दाक्षिणायनेत्यादि० नि० नञ्

धैवर पुंस्त्री धीवरस्यापत्यं वा० अत इञ् बाधित्वा वेदे अण्। धीवरापत्ये "सरोभ्यो धैवरम्" यजु० ३०।१६ लोके तु इञ् धैवरिरित्येव।

धोयी पु० कविभेदे "धोयी कविः क्ष्मापतिः" गीतगो०

धोड पुंस्त्री धुर्-वधे अच् रस्य लत्वञ्च डः। (ढोंड़ा) सर्पभेदे डुधुक्ष्भे शब्दर० स्त्रियां जातित्वात् ङीष्।

धोर गतौ सक०चात्रर्थे अक०भ्वा० पर०सेट्। धोरति अधोरीत्। दुधोर अदित् खिष् चङि अदुधोरत् त।

धोरण न० धोर-गतौ करणे ल्युट्। १यानमात्रे हरिवंशरथादौ स्त्रियां टाप्। भावे ल्युट्। २गतौ।

धोरणि(णी) स्त्री धोर-अनि वा ङीप्। परम्परायाम् जटाधरः। "यैर्मांकन्दवने मनोभ्रपवने सद्यःस्खलन्माधुरीधाराधोरणिधौतधामनि धराधीशत्वमालम्ब्यते। तेषां नित्यविनोदिनां सुकृतिनां माधीकपानां पुनः कालः किञ्च करोति केतकि! यतस्त्वञ्चापि वेत्सीत्वलो" उद्भटः।

धोरित न० धुर-धोर-वा भावे क्त। १वधे २गतौ ३अश्वगतिभेदे हेमच०। स्वार्थे क। तत्रार्थे अमरः।

धौत त्रि० धाव-क्त ऊठ्। १प्रक्षालिते २मार्जिते ३शोधिते हेम० "ईषद्धौतं स्त्रिया धौतं यद्धौतं रजकेन च। अधौतं तत् विजानीयात् दशा दक्षिणपश्चिमे" कर्मलोचनम्। "धौतोत्तरीयप्रतिमच्छवीनि" "परितश्च धौतसुरकुविलसदस्थिमांसुमण्डलाः" माघः। ४रौप्ये न० राजनि०। भावे क्त। ५प्रक्षालने न०।

धौतकट पु० नित्यकर्म०। स्नानार्थं निर्मितपात्रभेदे (धोकड़ा) जटा०

धौतकोषज न० धौतं प्रक्षालितं कोषजं नित्यक०। कृमिकोषजाते वस्त्रभेदे शब्दर०। [वस्त्रे अमरः।

धौतकौषेय न० नित्यकर्म०। प्रक्षालिते कृमिकोषजाते

धौतवली स्त्री धौताङ्गन्यां ल्याह्रटे शिक्यभेदे त्रिका०।

धौतमूलक पु० १चीनराजभेदे "अर्कजश्च बलीहानां चीनानां धौतमूलकः" भा०उ० ७३अ०। धौतं मूलं यस्य कप्। २प्रक्षालितमूलयुक्ते त्रि०।

धौतय न० धौतमिव वर्णं याति या-क। सैन्धवे नैघण्टुकप्रका०

धौतरि त्रि० धूतमेव धौतं कर्मणश्छति छ-कि। कर्मन कारके स्त्रियां ङीप्। "स यानान्तुलौघाभिर्धौतरीभिः" ऋ०६।४४।७ "धौतरीभिः कर्मनकारीभिः" भा०।

धौतशिल न० धौता शिला यस्य। स्फटिके त्रिका०।

धौताङ्गनी स्त्री ल्याह्रटे शिक्यभेदे मेदि०।

धौती स्त्री धू-कर्तरि क्विच् स्वार्थे अण् ङीप्। क्षालनकर्तरि "योधौतीनामक्षिकृच्चारिषक् पथः" ऋ०२।३३।२ "धौतीनां कर्मनीनाम्" भा०। धूति-स्वार्थे अण् ङीप्। २हठयोगाङ्गभेदे हठयोगशब्दे दृश्यम्।

धौन्धुमार न० धुन्धुमारसम्बन्धिन्यं कृतो ग्रन्थः अण्। भारतवनपर्वान्तर्गतोपाख्यानभेदे "ऐन्द्रद्युम्नमुपाख्यानं धौन्धु-

मारं तथैव च भा०आ०१अ०। तच्च वनपर्वणि २००अध्यायावधौ २०२ अध्यायान्ते दृश्यम्। [देशभवे।

धौमक पु० धूमे तत्प्रधानदेशे भवः धूमा० वुञ्। धूमप्रधान-

धौमतायन पु० राजभेदे। तेन निर्वृत्तादि अरीहणादि० चतुरर्थ्यां वुञ्। धौमतायनक तद्विर्वृत्ते नगरादौ

धौमायनक त्रि० धौमायनेन निर्वृत्तादि अरीहणादि० चतुरर्थ्यां वुञ्। धौमायननिर्वृत्तादौ।

धौमीय त्रि० धूमेन निर्वृत्तादि० चतुरर्थ्यां कृशाश्वा०छण्। धूमनिर्वृत्तादौ।

धौम्य त्रि० धूमस्यापत्यं गर्गा० यञ्। १धूमवर्णेरपत्ये स च युधिष्ठिरपुरोहितः यथा

"गन्धर्व उवाच यवीयान् देवलस्यैष वने भ्राता तपस्यति। धौम्य उत्कोचके तीर्थे तं हनुध्वं यदीच्छथ"। "तत उत्कोचकं तीर्थं गत्वा धौम्यात्रमन्तु ते। तं वव्रुः पाण्डवा धौम्यं पौरोहित्याय भारत!। तान् धौम्यः प्रतिजग्राह सर्ववेदविदांवरः। वन्येन फलमूलेन पौरहित्येन चैव ह" भा०आ०१८२अ०। व्याघ्रपादऋषेः पुत्रभेदे २उपमन्योरनुजे च।

"इरा क्रतुयुगे तात! ऋषिरासीन्महातपाः। व्याघ्रपाद इति ख्यातो वेदवेदाङ्गपारगः। तस्याङ्गमभवं पुत्रो धौम्यश्चापि ममानुजः। कस्यचित्त्वथ कालस्य धौम्येन सह माधवः" भा०आनु०१३अ०। पश्चिमदिग्वासिते ३ऋषिभेदे च "उशङ्गः कवषो धौम्यः परिव्याधश्च वीर्यवान्। एकतश्च द्वितश्चैव त्रितश्चैव महर्षयः। अत्रेः पुत्रश्च भगवांस्तथा सारस्वतः प्रभुः। एते चैव महात्मानः पश्चिमामाश्रिता दिशम्" भा०शा० २०८अ०

धौम्र पु० धूमएव स्वार्थे अण्। ऋषिभेदे "धौम्यो विभाण्डो माण्डव्यो धौम्यः कृष्णानुभौतिकः" भा०शा० ४७अ०। स्वार्थे अण्। २धूम्रवर्णे ३तद्वति त्रि० भावे अण्। ३धूम्रवर्णत्वे धूम्रोदेवताऽस्य अण्। ५वास्तुस्थानभेदे पु०

धौम्रायण पुंस्त्री० धूम्रस्य गोत्रापत्यं अश्वा० फञ्। धूम्रर्षेः गोत्रापत्ये।

धौरादित्य पु० तीर्थभेदे शिवपु०।

धौरित न० धौरितमेव स्वार्थे अण्। "धौरितं गतिमात्रं यदोजितं वल्गितं पुनः। अप्रकायसङ्घाताद् कुञ्चितायं गतत्रिकम्" इत्युक्ते अश्वगतिभेदे। स्वार्थे क धौरितक तत्रार्थे अमरः। [अमरः। २धुर्ये वहे पु० राजनि०।

धौरेय त्रि० धुरं वहति "धुरो यड्ढकौ" पा० ढक्। १धूर्वहे

धौर्त्तक न० धूर्तस्य भावः मनोज्ञा० वुञ्। धूर्त्तत्वे आर्षे

धौर्त्तेय पुंस्त्री धूर्ताया अपत्यं "स्त्रीभ्यो ढक्" पा० ढक्। धूर्ताया अपत्ये बहुवचने योधेयादि० ततः प्रत्ययस्य न लुक्।

धौर्त्य न० धूर्तस्य भावः कर्म वा ब्राह्मणा० ष्यञ्। १धूर्त्तत्वे २धूर्त्तकर्मणि च। "सेट सोढ धौर्त्ये पूर्वभावे" कण्ड्वादिगणसूत्रम्।

धौर्य्य न०धोर-धुर-या ष्यञ्। १अश्वगतिभेदे धोरणे हेम०।

धौवकि पुंस्त्री धुवकाया अपत्यं स्त्रीभ्यो ढक्यं बाधित्वा बाह्वादि० इञ्। धुवकाया अपत्ये।

ध्मा ऊष्मिसंयुतो दीर्घश्चासहेतुके शब्दभेदे चक्र० ताडनशब्देन वादने भक्र०भ्वा०पर० अनिट्। धमति अध्मासीत्। दध्मौ ध्मातः। १मापयति "सुखेनैव धमेदग्निं सुखादग्निः प्रजायते" संस्कारतत्त्वम् "शङ्खान् दध्मुः पृथक् पृथक्" गीता। ध्मायते। अध्मायि। "दह्यन्ते ध्मायमानानां धातूनां हि यथा मलाः" स्मृतेः। "वाय्वग्निभ्यां यथा लोहं ध्मातं त्यजति वै मलम्" भाग० ३।२८।३०। ध्मा-स्फोतनायाम् आध्मानशब्दे दृश्यम्।

ध्माकार पु० ध्मा-इत्यव्यक्तशब्दस्य कारः।१(ध्मा) इति शब्दकरणे। क-कर्त्तरि अण्। २तोडकारके पु० नैघण्टुप०

ध्मा(ध्वा)ङ्क्ष आकाङ्क्षे सक० शोररवे अक० भ्वा० पर० सेट् इदित्। ध्मा(ध्वा)ङ्क्षति। अध्मा(ध्वा)ङ्क्षीत्। दध्मा(ध्वा)ङ्क्ष। पा० मते वोपधः।

ध्मा(ध्वा)ङ्क्ष पुंस्त्री ध्मा(ध्वा)ङ्क्षि-क्विप्। १काके २मत्सभक्षके पक्षिभेदे अमरः। ३भिक्षुके ४तस्करे च मेदि० ५कङ्कोलिकायां स्त्री गौ०ङीष्।

ध्मा(ध्वा)ङ्क्षजङ्घा ध्मा(ध्वा)ङ्क्षस्येव जङ्घा यस्याः। काकजङ्घायाम् राजनि०। [राजनि०।

ध्मा(ध्वा)ङ्क्षजम्बू स्त्री ध्मा(ध्वा)ङ्क्षप्रिया जम्बूः। काकजम्बां

ध्मा(ध्वा)ङ्क्षतुण्डी ध्मा(ध्वा)ङ्क्षस्येव तुण्डमस्याः ङीष्। काकनासायुक्तायां राजनि०।

ध्मा(ध्वा)ङ्क्षदन्ती स्त्री ध्मा(ध्वा)ङ्क्षस्येव दन्ता अवयवोऽस्याः ङीष्। काकतुण्डीयुक्तायां राजनि०।

ध्मा(ध्वा)ङ्क्षनखी स्त्री ध्मा(ध्वा)ङ्क्षस्येव नखा अस्या ङीष्। काकतुण्डां राजनि०।

ध्मा(ध्वा)ङ्क्षनासी स्त्री ध्मा(ध्वा)ङ्क्षं नासयति क्षिपत्यात् नासि वा० अनि। काकोदुम्बरिकायां राजनि०।

ध्मा(ध्वा)ङ्क्षनाग्निनी स्त्री ङ्त०। कृष्णायां भावप्र०

**धा(ध्वा)ङ्क्षनासा** स्त्री धा(ध्वा)ङ्क्षेव नासा यस्याः। काकनासिकायाम् राजनि०। वा कप् अत इत्त्वम् धा(ध्वा)ङ्क्षनासिकाऽपि तत्रार्थे। [जातित्वात् ङीष्।

**धा(ध्वा)ङ्क्षपुष्ट** त्रि० ६त०। कोकिले हारा०। स्त्रियां

**धा(ध्वा)ङ्क्षमाचो** धा(ध्वा)ङ्क्षवचते मच-क्विप् काकमाचोवत् साध्यम्। काकमाच्यां राजनि०। [राजनि०।

**धा(ध्वा)ङ्क्षवल्ली** स्त्री तन्नामा वल्ली। काकनासायाम्

**धा(ध्वा)ङ्क्षादनी** स्त्री काकादनीवत् साध्यम्। काकदण्ड्यां राजनि०। [प्रभृतयोऽपि तत्रार्थे।

**धा(ध्वा)ङ्क्षारारि** पु० ६त०। मेचके हारा०। तदरि-

**धा(ध्वा)ङ्क्षी** स्त्री जातौ ङीष्। १काक्यां २काकोलिकायां च मेदि०। [राजनि०।

**धा(ध्वा)ङ्क्षोली** स्त्री काकोलीवत् साध्यम्। काकोल्यां

**धात** त्रि० धा-क्त। १संधुक्षिते श्वासभूयिष्ठतया दीर्घभावेन २वर्द्धमाने वर्षे च। ३शब्दिते ४वादिते च।

**धापन** न० धा-णिच् भावे ल्युट्। ह्रस्वे शब्दार्थचि०।

**धापित** त्रि० धापि-क्त। ह्रस्विते वङ्गीकृते शब्दार्थचि०।

**धात** त्रि० ध्यै-क्त। चिन्तिते ध्यानविषयीभूते "तदात्मना धातधवा रते च का" नैष०।

**ध्यान** न० ध्यै-भावे ल्युट्। १चिन्तने २अद्वितीयवस्तुनि विक्षिप्तविक्षिप्तान्तरिन्द्रियवृत्तिप्रवाहे। "शास्त्रोक्तदेवताद्यालम्बनेष्वचलो भिन्नजातीयैरनन्तरितः प्रत्ययस्तान एकायतेति यमाष्टरिति" भाष्योक्तेः ३ध्येयप्रत्ययैकतानत्वे। एकत्र धृतस्य चित्तस्य भगवदाकार इत्थिवाङ्गोत्तरोत्तराऽन्याकारप्रत्ययाव्यवहिते ४निदिध्यासनसंज्ञे चित्तस्यात्माकाराहवाद्वत्तौ। "ब्रह्मैवाऽस्मीति बहुत्वा निराकाङ्क्षतया स्थितिः। ध्यानशब्देन विख्याता परमानन्ददायिनी" इत्युक्तेः ५परमात्मचिन्तने। धारणा निरूढस्य त्रिनेत्रपद्मवक्त्राद्याकारविषयायां ६चिन्तायाम्। "चिन्ता तद्विषया ध्यानमित्युक्तेः।" "तत्र प्रत्ययैकतानता ध्यानम्" पा० सू० तत्र तस्मिन् देशे यत्र चित्तं धृतं तत्र प्रत्ययस्य ध्यानस्य चैकतानता विसदृशपरिणामपरिहारेण यदैव धारणयावलम्बनीकृतम् तदालम्बनतयैव निरन्तरवृत्तिः सा ध्यानमुच्यते। ध्यानपदनिरुक्त्यादिकन्तु ब्रह्मानिर्वाणतन्त्रे यथा "ध्यै चिन्तायां धातो धातुः चिन्ता तत्त्वेन निश्चला। एतद् ध्यानमिह प्रोक्तं सगुणं निर्गुणं द्विधा। सगुणं मन्त्रभेदेन निर्गुणं केवलं मतम्" इति। अपि च "ध्यानं तु द्विविधं प्रोक्तं सरूपारूपभेदतः। अरूपं तत्र यद् ध्यानमवाङ्मनसगोचरम्। अव्यक्तं सर्वतो व्याप्तमिदमित्यविवर्जितम्। अगम्यं योगिभिर्गम्यं ब्रह्मवेदसमाधिभिः। मनसो धारणार्थाय शीघ्रं लाभोऽखिलस्य। सूक्ष्मध्यानप्रबोधाय स्थूलध्यानं वदामि ते। अरूपायाः कालिकायाः कालमातुमहाद्युतेः। गुरुक्रियानुसारेण क्रियते रूपकल्पना" ब्रह्मचिन्तायां यथा

"ब्रह्मालम्बिना ध्यानं स्यात् धारणा मनसो धृतिः। अहं ब्रह्मेत्यवस्थानं समाधिर्ब्रह्मणः स्थितिः" इति गारुडे ४६अ०। तत्कालभेदश्च "प्राणायामैर्दादशभिर्यावत् कालं स्थितो भवेत्। यस्मात्तत्कालपर्यन्तं मनो ब्रह्मणि धारयेत्। तस्यैव ब्रह्मणा प्रोक्तं ध्यानं द्वादश धारणाः। द्वादशध्यानपर्यन्तं मनो ब्रह्मणि यो नरः। तिष्ठेत स यतो मुक्तः समाधिः सोऽभिधीयते। ध्येयाद्य चलते यस्य मनोऽभिध्यायतो भृशम्। प्राणायामैर्द्वादशभिः कालं यावत् सा धारणा स्मृता। ध्येयमात्रं मनो यस्य ध्येयमेवानुपश्यति। नान्यं पदार्थं जानाति ध्यानमेतत् प्रकीर्तितम्। ध्येये मनो निश्चलतां याति ध्येयं विचिन्तयन्। यत्तद्ध्यानं परं प्रोक्तं मुनिभिर्ध्यानचिन्तकैः। ध्येयमेव हि सर्वत्र ध्याता तन्मयतां गतः। पश्यति ह्येतरहितं समाधिः सोऽभिधीयते" इति गारुडे २४०अ० अग्निपुराणे च तद्विरुद्धप्रादिकमुक्तं यथा

"अग्निरुवाच। ध्यै चिन्तायां स्मृतो धातुर्विष्णुचिन्ता स्वरूपकः। अनाविद्धेन मनसा ध्यानमित्यभिधीयते। आत्मनः सगुणस्यैव मुक्तायेवोपयस्य च। ब्रह्मचिन्ता समासक्तिर्ध्यानं नाम तदुच्यते। ध्येयालम्बनसंस्थस्य सदृशप्रत्ययस्य च। प्रत्ययान्तरनिर्मुक्तः प्रत्ययो ध्यानमुच्यते। ध्येयावस्थितचित्तस्य प्रदेशे यत्र कुत्रचित्। ध्यानमेतत्समुद्दिष्टं प्रत्ययैकतानता। एवं ध्यानसमायुक्तः स्वदेहं यः परित्यजेत्। कुलं स्वजनमित्रादि सप्तद्वीपं हरिर्भवेत्। एवं मुहूर्तमर्धं वा ध्यायेद् यः श्रद्धया हरिम्। सोऽपि यां गतिमाप्नोति न तां सर्वैर्मखैरपि। ध्याता ध्यानं तथा ध्येयं यत्र ध्यानप्रयोजनम्। एतच्चतुष्टयं ज्ञात्वा योगं युञ्जीत तत्त्ववित्। योगाभ्यासाद्भवेन्मुक्तिरैश्वर्यं ज्ञाष्टधा महत्। ज्ञानवैराग्यसम्पन्नः श्रद्धानः क्षमान्वितः। विष्णुभक्तः सदोत्साही ध्यातेत्थं पुरुषः स्मृतः। मूर्तामूर्तं परं ब्रह्म हरेर्ध्यानं हि चिन्तनम्। सकलो निष्कलो ज्ञेयः सर्वज्ञः परमो हरिः। अणिमादिगुणैश्वर्यं मुक्ति-

ध्यानप्रयोजनम्। फलेन योजको विष्णुरतो ध्यायेत् परेश्वरम्। गच्छंस्तिष्ठन् स्वपन् जाग्रदुन्मिषन् निमिषन्नपि। शुचिर्वाप्यशुचिर्वापि ध्यायेत् सततमीश्वरम्। स्वदेहायतनस्थान्तं मनसि स्थाप्य केशवम्। कृत्वापीठिकामध्ये ध्यानयोगेन पूजयेत्। ध्यानयज्ञः परः शुद्धः सर्वदोषविवर्जितः। तेनेहा सुक्तिमाप्नोति बाह्या-शुद्धैश्च नाध्वरैः। हिंसादोषविशुद्धित्वाद्विशुद्धिश्चित्त-साधनः। ध्यानयज्ञः परस्तस्मादपवर्गफलप्रदः। तस्मा-दशुद्धं सन्त्यज्य क्षणिकं बाह्यसाधनम्। यस्मादयं कर्म सन्त्यज्य योगमत्यर्थमभ्यसेत्। विकारसङ्गमव्यक्तं भोग्य-भोगसमन्वितम्। चिन्तयेद्धृदये पूर्वं क्रमादादौ गुण-त्रयम्। तमः प्रच्छाद्य रजसा सत्वेन छादयेद्रजः। ध्यायेच्चित्रमखण्डं पूर्वं कृष्णं रक्तं सितं क्रमात्। सत्वो-पाधिगुणातीतः पुरुषः पञ्चविंशकः। ध्रुवमेतदशुद्धत्व-मुक्त्वा शुद्धं विचिन्तयेत्। ऐश्वर्यं पङ्कजं दिव्यं पुरुषो-परि संस्थितम्। द्वादशाङ्गुलविस्तीर्णं शुद्धं विकसितं सितम्। नालमष्टाङ्गुलं तस्य नाभिकन्दसमुद्भवम्। पद्मपत्राष्टकं श्रेयमणिमादिगुणाष्टकम्। कर्णिकाकेसरं नालं ज्ञानवैराग्यसंयुतम्। विष्णुधर्मश्च तत्कन्दमिति पद्मं विचिन्तयेत्। तद्धर्मज्ञानवैराग्यं शिवैश्वर्यमयं परम्। ज्ञात्वा पद्मासनं सर्वं सर्वदुःखात्प्रमुच्यते। तत् पद्मकर्णिकामध्ये शुद्धदीपशिखाकृतिम्। अङ्गुष्ठ-मात्रममलं ध्यायेदोङ्कारमीश्वरम्। कदम्बगोलकाकारं तारं रूपमिव स्थितम्। ध्यायेद्वा रश्मिजालेन दीप्य-मानं समन्ततः। प्रधानं पुरुषातीतं स्थितं पद्मस्थमीश्व-रम्। ध्यायेत्प्रणवं सततमोङ्कारं परमक्षरम्। मनः-स्थित्यर्थमिच्छन्ति स्वध्यानमनुक्रमात्। तद्भूतं नि-श्चलीभूतं लभेत् सूक्ष्मेऽपि संस्थितिम्। नाभिकन्दे स्थितं नालं दशाङ्गुलसमावृतम्। नालेनाष्टदलं पद्मं द्वादशा-ङ्गुलविस्तृतम्। सकर्णिके केसराले सूर्यसोमाग्निमण्ड-लम्। अग्निमण्डलमध्यस्थः शङ्खचक्रगदाधरः। पद्मी चतुर्भुजो विष्णुरथ वाष्टभुजो हरिः। शार्ङ्गशङ्खवज्र-धरः पाशाङ्कुशधरः परः। खड्गवर्षः शेतवर्षः सशीवत्सः सकौस्तुभः। वनमाली सपीताम्बरकटिसूत्रकः। रत्नोज्ज्वलकिरीटश्च पीताम्बरधरो महान्। सर्वाभरण-भूषाढ्यो वितस्तिर्वा यथेच्छया। अहं ब्रह्म ज्योतिरात्मा वासुदेवो विमुक्त ओम्। ध्यानाच्छान्तो जपेन्नित्यं जपाच्छान्तश्च चिन्तयेत्। जपध्यानादियुक्तस्य विष्णुः शीघ्रं प्रसीदति। जपस्तस्य वै यज्ञाः कर्त्ता नार्हन्ति षोडशीम्। जपिनं सोपसर्पन्ति व्याधयश्चाधयो यक्षाः। मुक्तिर्भुक्तिर्भवेत्तस्य जपेन प्राप्नुयात् फलम्" १७१ अ०।

ध्यानप्रकारादिकञ्च मिताक्षरायां यथा

"ऊरूत्तानचरणः सव्ये न्यसेतरं करम्। उत्तानं किञ्चिदुन्नाम्य सव्यं विष्टभ्य चोरसा। निमीलिताक्षः सत्वस्थो दन्तैर्दन्तानसंस्पृशन्। तालुस्थाचलजिह्वश्च संवृताक्षः सुनिश्चलः। संनिरुद्धेन्द्रियग्रामं नातिनीचोच्छ्रितासनः। द्विगुणं त्रिगुणं वापि प्राणायामसमुपक्रमेत्। ततो ध्येयः स्थितो योऽसौ हृदये दीपवत् प्रभुः। धारयेत्तत्र चात्मानं धारणां धारयन् बुधः" याज्ञ०। "ऊरुस्थापितचरणौ यस्य स तथोक्तो वज्रपद्मासनः। तथो-त्ताने सव्यकरे दक्षिणहस्तानं न्यस्य सव्यञ्च किञ्चिदुन्नाम्यो रसा च विष्टभ्य साम्यंयित्वा तथा निमीलिताक्षः सत्वस्थः कामक्रोधादिरहितो दन्तैर्दन्तानसंस्पर्शयन्। तथा तालुनि स्थिता अचला जिह्वा यस्य स तथोक्तः संवृता-क्षः पिहितानन: सुनिश्चलो निष्प्रकम्पस्तथा सम्यगि-न्द्रियसमूहं विषयेभ्यः प्रत्याकृष्य नातिनीचासनो नात्यु-च्छ्रितासनो यथा चित्तविक्षेपो न भवति तथोपविष्टः सन् द्विगुणं त्रिगुणं वा प्राणायामाभ्यासमुपक्रमेत्। ततो यमीकृतपवनेन योगिना योऽसौ हृदये दीपवद-प्रकम्पः प्रभुः स्थितोऽसौ ध्यातव्यः तत्र च हृदयात्मानं मनोगोचरतया धारयेत्। तथा धारणाश्च धारयेत्। धारणास्वरूपञ्च जाम्बवाख्यमुनिना कोटिदानकाले आत्मा। तस्मिः पञ्चदशमात्राभिरधमः प्राणायामस्त्रिभि-र्मध्यमः। पञ्चचत्वारिंशद्भिरुत्तम इत्येवं प्राणायामस्त्र-यात्मिकैका धारणा। तास्तिस्रो योगशब्दवाच्याश्चित्त धारयेत्। यथोक्तमन्यत्र "संभाव्य कोटिकां दद्यात् करायङ्गानुमन्त्रयेत्। मात्राभिः पञ्चदशभिः प्राणायामो-ऽधमः स्मृतः। मध्यमो द्विगुणः श्रेष्ठस्त्रिगुणो धारणा तथा। त्रिभिस्त्रिभिः स्मृतैकैका ताभिर्योगस्त्रयेव चेति" मिता०। "हृदयस्थस्य योगेन देवदेवस्य दर्शनम्। ध्यानं प्रोक्तं प्रवक्ष्यामि सर्वपापात् योगतः शृणु"। "हृदिस्था देवताः सर्वा हृदि प्राणाः प्रतिष्ठिताः। हृदि ज्योतींषि भूयश्च हृदि सर्वं प्रतिष्ठितम्। स्वदेहमरणिं कृत्वा प्रणवञ्चोत्तरारणिम्। ध्याननिर्मथनाभ्यासात् विष्णुं पश्येद्धृदि स्थितम्। हृत्पद्मचन्द्रमाः सूर्यः सोममध्ये हुताशनः। तेजोमध्ये स्थितं तत्त्वं तत्त्वमध्ये स्थितो-

च्युतः। अणोरणीयान् महतो महीयानात्मास्य जन्तोर्निहितो गुहायाम्। तमक्रतुं पश्यति वीतशोको धातुः प्रसादान्महिमानमात्मनः" श्रुतिः। "प्राणायामदिष्टेन प्रत्याहार उदाहृतः। प्रत्याहारैर्दृढ़ंदमिन्द्रियाणां परिकीर्त्तिता। भवेदीश्वरसङ्कल्पो ध्यानं द्वादशधारणम्" काशीख० ४१अ०। "समाहितेन मनसा चैतन्यान्तरवर्त्तिना। आत्मनोऽभीष्टदेवानां ध्यानं ध्यानविदो विदुः" भा०ति०। ध्यायतेऽनेन ध्यै-करणे ल्युट्। देवानां तद्ध्येयरूपभेदे "ध्यानमस्याः प्रवक्ष्यामि यथा ध्यात्वार्चयेदिमाम्" तन्त्रसारः। "तत्र (षट्चक्रे)ध्यानं त्रिधा प्रोक्तं सात्त्विकादिप्रभेदतः" तत्र सात्त्विकं यथा "वन्दे बालं स्फटिकसदृशं कुन्देन्दूज्ज्वलाङ्गं दिव्याकल्पैर्नवमणिमयैः किङ्किणीनूपुरादैः। दीप्ताकारं विशदवसनं सुप्रसन्नं त्रिनेत्रं हस्ताब्जाभ्यां वटुकमनिशं शूलदण्डौ दधानम्"। राजसं यथा "उद्यद्भास्करसन्निभं त्रिनयनं रक्ताङ्गरागज्वलम् कोरास्यं वरदं कपालमभयं शूलं दधानं करैः। नीलग्रीवसुहारभूषणयुतं श्रीतांशुचूड़ोज्ज्वलं वन्दे भास्करभासकं भयहरं देवं सदा भावये" तन्त्रसा० तामसध्यानं तु तामसग्रन्थे दृ० उक्तम् देवानां तद्रूपभेदेन ध्येयत्वात् तद्रूपस्य ध्यानत्वम्। देवताप्रतिमाशब्दे च २६८५पृ० तेषां मूर्त्तिभेदा यथा दर्शिताः तथैव तेषां ध्येयता। अन्यदेवताध्यानं तु तन्त्रसार कालिकापुराणादौ दृश्यम् विस्तरभयात् न लिखितम्। "ध्यानात् ध्यानं विशिष्यते। ध्यानात् कर्मफलत्यागः गीता। "आगमेनानुमानेन ध्यानाभ्यासरसेन च। त्रिधा प्रकल्पयेत् प्रज्ञां लभते योगमुत्तमम्" श्रुतिः। "इति विज्ञापितो राज्ञा ध्यानस्तिमितलोचनः रघुः "सर्वदेवाः प्रातिलोका वायवो मूर्तिधारिणः। अहमात्मा नित्यदेहो भक्तध्यानात्तरूपतः" ब्रह्मवै० अन्यत्र०। ८उपनिषद्भेदे उपनिषच्छब्दे १२२२ पृ० दृश्यम्।

**ध्यानजप्य** पु० विश्वामित्रवंश्ये ऋषिभेदे "याचिनो बभ्रवश्चैव ध्यानजप्याश्चैव च" हरिवं० २७अ० विश्वामित्रवंश्यर्षिकथने।

**ध्यानयोग** पु० ध्यानमेव योगः। ध्यानरूपे योगे योगाङ्गभेदे "ते ध्यानयोगानुगता अपश्यन्" श्वेताश्वतरोप०-"ध्यानं नाम चित्तैकाग्र्यं तदेव योगो युज्यतेऽनेन इति ध्यातव्यस्वीकारोपायस्तमनुगताः समाहिता अपश्यन्" भा० "ध्यानयोगेन संपश्येद् गतिमस्यान्तरात्मनः" मनुः।

**ध्यानाभ्यास** पु० ध्यानानामभ्यासः। समाधौ "ध्यानाद्यङ्गैरेव समाधिरभिधीयते" काशीख० ४२अ० यत्नोः समाधेर्ध्यानाभ्यासरूपत्वम्। "आगमेनानुमानेन ध्यानाभ्यासरसेन च। त्रिधा प्रकल्पयेत् प्रज्ञां लभते योगमुत्तमम्" श्रुतिः।

**ध्यानिक** त्रि० ध्यानेन निर्वृत्तं ठक्। ध्यानसाध्ये "ध्यानिकं सर्वमेवैतत् यदेतदभिशब्दितम्" मनुः।

**ध्याम** न० ध्यायते पशुभिः ध्यै-कर्मणि मन्। १गन्धद्रव्ये २मदनद्रव्ये च संज्ञायां कन्। ध्यामक। रोहिषद्रव्ये राजनि०।

**ध्यामन्** पु० ध्यै-मनिन्। १परिमाणे २तेजसि च उज्ज्वलद्भावे मनिन्। चिन्तायां न० उणादिकोषः।

**ध्येय** त्रि० ध्यै-कर्मणि यत्। ध्यातव्ये "ध्येयः सदा सवितृमण्डलमध्यवर्त्ती" विष्णुध्यानम् "वेद्यञ्च वेदिता चापि ध्याता ध्येयञ्च यत्परम्" कृष्ण० ध्यानशब्दे उदा०।

**ध्यै** चिन्तने भ्वा०पर० सक० अनिट्। ध्यायति अध्यासीत्। दध्यौ "ध्यायतीव लेलायतीव" श्रुतिः। ध्यानशब्दे उदा०। "ध्यायेत् नित्यं महेशम्" शिवध्यानम्।

**ध्र** त्रि० क्विन्निदुपपदे धृ-मूलविभुजा० क। धारके महीध्रः कुध्र इत्यादि।

**ध्रज** गतौ भ्वा० पर० सक० सेट्। ध्रजति अध्राजीत् अध्रजीत् अवभिदिव ध्रञ्जति अधञ्जीत्। दध्राज दध्रञ्ज। ध्रज्यते ध्रञ्जते। "उपध्रजन्नमदूयो विधक्षित्" ऋ०१।१३८।१ "इषा न यो ध्रजसा पत्मना" ऋ०६।२।७ ध्रज-असुन्। "ध्रजसा गतिशीलेन" भा०।

**ध्रजि** त्रि०ध्रज-गतौ इन्। गतौ ततः अस्त्यर्थे मतुप् ध्रजिमत् गतियुक्ते त्रि०। "धुनिर्वात इव ध्रजीमान्" ऋ०१।७६।१ दीर्घस्वा ह्रस्वः। अस्य यवादिगणे पाठेऽन्त्यस्य यो जनः मादुपधत्वाभावेनस्वाप्रसक्तेः। [त्रीत् दध्राथ।

**ध्रण** ध्वाने भ्वा० पर० अक० सेट्। ध्रणति अध्रणीत् अध्राणीत्।

**ध्रस** कत्थने आदाने क्र्या०पर० सक० सेट्। ध्रस्नाति अध्रसीत् अध्रासीत् दध्राध। ध्रदित् ध्रसित्वा ध्रस्ता। ध्रस्तः।

**ध्र(ध्रा)** गतौ निघण्टुः। भ्वा०पर० सक०सेट् धा अनिट्। ध्रति ध्राति अध्रीत् अध्रासीत्। दध्र दध्रौ "ध्रयति ध्रायति" इति तत्र निर्देशात् ध्रे धै इत्यपि धात्व गतौ भ्वा० पर० अनिटौ। तत्र ध्रे ध्रयति ध्रै ध्रायति इति आर्द्धधातुके ध्रायत्।

**ध्राज** आर्द्रे घोररवे च भ्वा० पर० सक० सेट् रदित्। ध्राङ्क्ति अध्राङ्क्षीत्। दध्राङ्क रदित् ध्राङ्क्यते।

घ्राता स्त्री घ्राङ् भावे अङ्_ यवादिगणसूत्रे घ्राचेति निर्देशात् उपधालोपः। २मतौ ततोऽस्यर्थे मतुप् यवा०न मस्य वः। घ्राघामत् गतियुक्ते त्रि०ख्रियां ङीप्

घ्राप्त शोषणे अवमर्शे च स्वा० पर० सक० सेट्। घ्राप्यति अघ्राप्सीत् दघ्राप्त। ऋदित् चङि अदघ्राप्सत् त। अवमर्शः पर्यालिङ्गनं तत्र अक०।

घ्राघ गन्धे भ्वा० आत्म० अक० सेट्। घ्राघते अघ्राघिष्ट। दघ्राघे। ऋदित् चङि अदघ्राघत् त।

घ्राजि त्रि० घ्रज-गतौ वा० भावे रक्। गतौ "घ्राजिरेकस्य दद्मे न रूपम्" ऋ० ।६३।३३ "घ्राजिर्गतिः" भा० णिच् कर्त्तरि रन्। १टन्यादेर्वेगगतिकारके २वातभेदे (धुरच्या वाताश्च) उणादिकोषः।

घ्राड विभेदे भ्वा० आत्म० सक० सेट्। घ्राड्ते अघ्राडिष्ट। दघ्राडे। ऋदित् चङि अदघ्राडत् त।

घ्राडि पु० घ्राड-इन्। ध्वजवंशे उणादिकोषः।

घ्रिज गतौ भ्वा०पर०सक० सेट्। अघ्रेजति अघ्रेजीत् दिघ्रेज

घ्रु स्थैर्य्ये अक० सर्पणे सक० तु०क० पर० अनिट्। घ्रुवति अघ्रुवीत् दुघ्राव। अयं जीत् घ्रुतो वर्त्तते। "बुद्धिपूर्वं घ्रुवच्च त्वा राजहत्या पिता स्वयम्" भट्टिः मतौ "स्तुतोऽगदया चारिं तं दुघ्रावाद्रिया कपिः" भट्टिः "न स स्रो दलो वरुण! घ्रुतिः" ऋ०७,८६।६ "घ्रुतिः दैवगतिः" भा०

घ्रु गतौ स्वा० प० अनिट् निगरणे। घ्रुवति अघ्रौषीत् दुघ्राव।

घ्रुव त्रि० कु० घ्रु-कच्। १स्थिरे २निश्चिते ३क्षेमे० ४सत्ये ५आश्रिते ६तर्के न० मेदि०। ७गगने न० हेम०। ८अङ्गौ ९विष्णौ १०वटे ११उत्तानपादपुत्रभेदे पु०मेदि० १२वसुभेदे विष्णुस्थादिषु १३दाक्षे योगे पु० मेदि०। १४स्थाणौ पु० अमरः १५शरारिरिक्षे पुंस्त्री० त्रिका०। १६ध्रुवके (धुवा)ख्याते पदार्थे पु० संगीतदा०। १७आकाशस्थिते ताराख्ये च पु०। ते च सर्वेषां नक्षत्रादीनामाधारभूते उत्तरदक्षिणयोः स्थिते खगोलस्थे उक्ते यथा "मेरोरुभयतो मध्ये ध्रुवतारे नभःस्थिते। निरक्षदेशसंस्थानामुदयास्तमये क्षितिजाश्रये" भू०। "मेरोरुभयतो दक्षिणोत्तरयोराकाशस्थिते ध्रुवतारे दक्षिणोत्तरे क्रमेण मध्याकाशमध्ये भवतः। निरक्षदेशसंस्थानां प्रायुक्तनगरस्थितमनुष्याणामुदये दक्षिणोत्तरे ध्रुवतारे क्षितिजाश्रये तद्भूगर्भक्षितिजवृत्तस्थे मेषादौ दृश्यर्थः।" रङ्गना०। अतएव हेयक्षांशाभावस्वक्षांशपरमत्वमिति वदन् मेरावक्षांशपरमत्वमभिप्रेत्याह "अतो नाक्षोच्चयस्तस्य ध्रुवयोः क्षितिजस्थयोः। नवतिर्लम्बकांशास्तु मेरावक्षांशकास्तथा" भू०। "तारुक्षनगरीषु। अत उभये क्षितिजाश्रये इति कारणात् अक्षोच्चयो ध्रुवौक्षांश इति तदभावात् तदभाव इति भावः। तुकाराद् तन्नगरीषु ध्रुवयोः क्षितिजस्थयोः सतोर्लम्बांशा नवतिः स्युस्तथांशोनानवतेर्लम्बांशत्वात्। खमध्याद्ध्रुवयोः क्षितिजस्य लम्बांशस्वरूपत्वाच्च मेरावक्षांशास्तथा नवतिः, ध्रुवस्य परमोन्नत्वात्। यथा निरक्षदेशेऽक्षांशाभावात्तुल्यांशाः परमास्तथा मेरावक्षांशपरमत्वात्तुल्यांशाभाव इत्यर्थसिद्धम्।" रङ्गनाथः। "निरक्षदेशक्षितिजखखोपगौ ध्रुवौ नरः पश्यति दक्षिणोत्तरौ। तदाश्रितं खे भ्रमयन्नवत् तथा भमण्डलचक्रं निजमस्तकोपरि। तदग्रदिग्यातियथा यथा नरस्तथा तथा स्वात्मतलस्थखस्थितम्। तदग् ध्रुवं पश्यति चोत्तरं क्षितेस्तदन्तरे योजनजाः पलांशकाः। योजनसंख्याभांशैर्युक्ता अपरिक्षिप्ता भवन्त्यंशाः। भूमौ कक्षायां वा भागेभ्यो योजनानि च व्यस्तम्। सौम्यं ध्रुवं मेरुगताः खमध्ये यास्यं च दैवा निजमस्तकोर्द्धे। सव्यापसव्यं भ्रमदब्जचक्रं विलोकयन्ति क्षितिजप्रसक्तम्" सि०शि०। विष्णुरेव उत्तानपादस्यपुत्रस्तथैव तद्विज्ञानं तथाभूतपदलाभकथा च कामीच०

"विष्णुरुवाच अयि! वाच! विशालाक्ष! ध्रुव! ध्रुवपते! ऽनघ!। परिज्ञातो मया सम्यक् तव कृत्स्नो मनोरथः। अक्षाद् भवसि भूतानि दृष्टेरक्षवदक्षरः। तद्दृष्टेः कारणं सूर्यः सूर्याधारो ध्रुवो विभो!। ज्योतिश्चक्रस्य सर्वस्य यच्चाहेः समन्ततः। गगने भ्रमतो नित्यं त्वमाधारो भविष्यसि। मेधीभूतः स वै सर्वान् वायुपाशैर्नियन्त्रितान्। आकल्पं तत्पदे तिष्ठन् भ्रामयन् ज्योतिषाङ्गणान्। आराध्य चौमकादेवं पुरा पदमिदं मया। आसादि यत्तदेतत्ते तपसा प्रतिपादितम्। केचिच्छतयुगं यावत् केचिन्मन्वन्तरं ध्रुव!। तिष्ठन्ति स्वन्तुवै कल्पं पदमेतत् प्रशाधि च। मत्तोऽपि न यत् प्राप्तिं मन्यन्ते मानवा ध्रुव!। तत्पदं विहितं वत्स! भद्रात्ते रपि दुर्लभम्। अन्यान् वरान् प्रवक्ष्यामि सर्वेनानेन तोषितः। सुनीतिरपि ते माता स्वतपोभिः प्रविष्यति" भाग० ४।२२ अ० अनिलोकपर्यन्तवर्णनान्ते "अत्र तत्रापि परतस्त्रयोदश सहस्रयोजनान्तरतोऽवस्थितिमतो

परमं पदमभिवन्दन्ति। यत्र महाभागवतो ध्रुव औत्तानपादिरग्निनेत्रेण प्रजापतिना कश्यपेन धर्मेण च समकालयुगभिः। सहस्रयुगपर्यन्तं दक्षिणतः क्रियमाण एतदनीमपि कल्पजीविनामाजीव्य उपास्ते तस्य महानुभाव उपवर्णितः। य हि सर्वेषां ज्योतिर्गणानां ग्रहनक्षत्रादीनाम् अनिमिषेणाव्यक्तरंहसा भगवता कालेन भ्राम्यमाणानां स्थाणुरिवावष्टम्भ ईश्वरेण विहितः सकृदृश्यते। यथा मेधीस्तम्भ आक्रमणपशवः संयोजिता स्त्रिभिः सवनैर्यथा स्थानमण्डलानि चरन्ति। एवं भगणा महादय एतस्मिन्नबहिर्योगेन कालचक्र आयोजिता ध्रुवमेवाश्रित्य वायुनोदीर्यमाणा आकल्पान्तं परितः क्रामन्ति। नभसि यथा मेघाः श्येनादयो वायुवशाः कर्मसारथयः परिवर्तन्ते। एवं ज्योतिर्गणाः प्रकृतिपुरुषसंयोगात्सृष्टीताः कर्मनिर्मितगतयो भुवि न पतन्ति।" "सर्वे ध्रुवे निबद्धाक्षे निबद्धा वातरश्मिभिः। ते वै भ्राम्यमाणास्ते यथायोगं वहन्ति वै। वायव्याभिरदभ्राभिः प्रबद्धा वातरश्मिभिः। परिभ्रमन्ति तद्वद्ब्रह्मन्द्रक्ष्यसेऽधरादिषि। यावत्तमनुपर्येति ध्रुवं वै ज्योतिषाङ्गणः। यथा मदुदके नौस्तु वदहेन सहीयते। तथा देवमहाणि ध्रुवक्षाने वातरंहसा। तस्माद्यानि ग्रहन्यन्ते व्योम्नि दैवपहा इति। यावन्त्यश्चैव ताराः ध्रुवाबन्ध्योऽस्य मरीचयः। सर्वा ध्रुवनिबद्धास्ता भ्रमन्त्यो भ्राम्यन्ति च। तैलपीड़े यथा चक्रं भ्राम्यते भ्रामयन्ति वै। तथा भ्रमन्ति ज्योतींषि वातबद्धानि सर्वशः। अक्षातचक्रवद्यानि वातचक्रेरितानि तु। यस्मात् प्रवहते तावि प्रवहस्तेन स स्मृतः। एवं ध्रुवे नियुक्तोऽसौ भ्रमते ज्योतिषाङ्गणः। एष तारामयः प्रोक्तः शिशुमारो ध्रुवो दिवि" मत्स्यपु० १२६अ०

वसुभेदश्च "धरो ध्रुवश्च सोमश्च अहश्चैवानिलोऽनलः। प्रत्यूषश्च प्रभासश्च वसवोऽष्टाविति स्मृताः" भा० आ० ६६अ०। औत्तानपादिकथा "प्रियव्रतोत्तानपादौ मनोः स्वायम्भुवस्य तु। द्वौ सुतौ समकायौर्यौ धर्मज्ञौ कथितौ तव। तयोरुत्तानपादस्य सुरुच्यामुत्तमः सुतः। अतीवावाभवद्ब्रह्मन्! पितुरत्यन्तवल्लभः। सुनीतिर्नाम या राज्ञस्तस्यामूत्पूर्वजो द्विज!। स त्वयोऽप्रीतिमांस्तस्यां तस्यामासीद्ध्रुवः सुतः" विष्णुपु०११अ०।

ज्ञानाङ्गे "ध्रुवादि नाक्षत्र प्राणाः" तच्छब्दे दृश्यम्। रोमावर्त्तभेदे "आवर्त्ता नाम्यादावर्त्तौ रोमसंस्थानभङ्गि-नाम्" ते च दशधा "द्वावुरस्यौ शिरस्यौ द्वौ द्वौ चरन्त्रयो परन्त्रयोः। एको भाले ललाटे च दशावर्त्ता ध्रुवाः स्मृताः" शब्दार्थचि०"तयः पूर्वभाद्रपदो ध्रुवगच्छतीष्वुत्तराणि स्वभूः ज्यो० उक्ते १६उत्तराषाढरोहिणीषु नक्षत्रेषु "मित्र ध्रुवक्षिप्रमैत्रे" रु०चि०। "ध्रुवगुरुकरमूलापौष्णभान्यर्कवारे" ज्यो० त०। २०नारायणभागे "अरुन्धती भवेज्जिष्णो ध्रुवो नारायणस्तथा। विष्णोः पदानि भ्रूमध्यं नेत्रयोर्मण्डलद्वयम्" कालीख० ४१अ० "अरुन्धतीं ध्रुवञ्चैव विष्णोस्त्रीणि पदानि च। आसन्नस्थलनोपश्येत् चतुर्थं मानसं स्मरेत्" तत्रैव। तत्र वितर्के उत्प्रेक्षा तत्र "ध्रुवं स नीलोत्पलपत्र धारया ग्रसीतसीं क्षेत्तुरसिर्व्यवस्यति" शकु० स्थिरे "ध्रुवमपाये" या०। "अपाये यदुदासीनं चलं वा यदि वाऽचलम्। ध्रुवमेवातदावेशात्" हरिका० लिखिते "क्षे ध्रुवाणि परित्यज्य अध्रुवाणि विचिन्वते। ध्रुवाणि तस्य नश्यन्ति अध्रुवं नष्टमेव च" हितो०। विष्णौ "व्यवसायो व्यवस्थानः संस्थानः स्थानदो ध्रुवः" विष्णुस०। २१वत्सरे अहपालभेदे पु०। "ततो अहश्चहश्चमाध्रुवात्" काल्या० श्रौ० ७,६।७ "आध्रुवमहश्चहश्चात्" कर्कः। २२चहनक्षत्राद्यानवनोपयोगिनि अष्टमेदे तत्र नक्षत्रध्रुवः शु० वि० उक्तः खगोलशब्दे २४२३ पृ०दर्शितः। संक्षेपस्तु शि० शि० ग्रहितावरोक्तः २४२५ पृ० दर्शितः। अहध्रुवानवनन्त "कल्पश्चक्रकृतास्तु गतास्तदाः कल्पसमाविकृता भगणाद्याः। ध्रुवध्रुवका दिनकल्पमध्यान्ते यातमदृष्टचलोडुखगानाम्" शु०चि०। अत्र स्वार्थे क। ध्रुवनक्षत्रे "ऊर्ध्वोत्थायोपनिष्क्रम्य ध्रुवं दर्शयति" गो०सू० "ध्रुवं नक्षत्रविशेषं दर्शयति पतिः" सं०त०रघु०। "अरुन्धतसहस्रैर्ज्योतिर्भिः विभावर्यं इव ध्रुवम्" रघुः। "स्फुटतरसुपरिदृश्यमूर्त्तेर्ध्रुवस्य स्फुरति सुरसनीनां मण्डलं व्यक्तमेतत्" माघः। २३खावयवके धृतिरोगभेदे दर्शित गोभिलवाक्ये "ध्रुवा आङ्गुलीर्जुहोति"। "अष्टकामाध्यश्वुदवाक्षीर्यपालोपस्तवः। पितृव्यामतिरेकोऽयं मासिकात्मात् ध्रुवः स्मृतः" देवीपु० "मासिकाद्धात् श्रमावस्याश्राद्धादतिरेकः अष्टकादिश्राद्धगणो ध्रुव आवश्यकः" श्रा०त० रघु०। आवश्यकत्वञ्च अवश्यकर्त्तव्यत्वं तेनाकरणे प्रत्यवायजनकत्वात् नित्यत्वमिति स्फुटितम्। मनते लिखिते "जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य च" गीता "यदावगच्छेदायत्यामाधिक्यं ध्रुवमात्मनः" मनुः

स्थिरे "ध्रुवोऽसि पृथिवीं दृंह ध्रुवक्षितिरसि" यजु०५। ११ "ध्रुवे स्थिरे यत्ते चीयति निवसति इति ध्रुवचित्" वेददी० २४सोमभेदे "उपयामगृहीतोऽसि ध्रुवोऽसि ध्रुवक्षितिर्ध्रुवाणां ध्रुवतमोऽच्युतानामच्युतक्षिततमः" यजु० ७।२५ "हे सोम! त्वदुपयामेन पात्रेण गृहीतोऽसि ध्रुवनामकोऽसि कोदनस्त्वम् ध्रुवा स्थिरा क्षितिर्निवासो यस्य स ध्रुवक्षितिः" वेददी०। २५ शकुन्यादिकरणतुल्ये न०"ध्रुवाणि शकुनिनागं चतुष्पदम्। किंस्तुघ्नं च चतुर्व्याः कृष्णायाश्चापराह्णतः" स्मृ०चि०।

ध्रुवक पु० ध्रुव–कन् स्वार्थे को वा। १ध्रुवशब्दार्थे २गीताक्षरविशेषे च स्त्रियां ङीप्। उक्तम: षट्पदः प्रोक्तो मध्यमः पञ्चमः स्मृतः। कनिष्ठश्च चतुर्भिः स्याद् ध्रुवकोऽयं मयोदितः। उक्तं द्विखण्डसद्भावे द्विखण्डे ध्रुवके मतम्। ततो द्विखण्डसाभोगे तालमानरसैः सह। साभोगे कविनाम स्यात् तथा नायकनाम च। उद्ग्राहं प्रथमं गीत्वा ध्रुवं गायेत् ततःपरम्। ततोऽन्तरा ध्रुवस्यादाभोगध्रुवकौ ततः। उद्ग्राहः प्रथमः पादः कथितः पूर्वसूरिभिः। गीत्वा पूर्वपदं न्यासो यत्र च ध्रुवको मतः। यत्रैव कविनाम स्यात् स आभोग इतीरितः। ध्रुवकादिषु सर्वेषु भवेदेवं विधिः क्रमः"। स च षोढ़धा यथा "जयन्तो भैरवोल्लासो मधुरो निर्मलस्तथा। कुलजः कमलश्चैव सानन्दश्चन्द्रशेखरः। सुखदः कुलदो लासी कन्दर्पो जयमण्डलः। तिलकोल्लसितश्चेति ध्रुवकाः षोढ़श स्मृताः। एकादशाक्षरपदादेकैकाक्षरवर्द्धितैः। सप्तकैर्ध्रुवाः षोढ़श स्युः षड्विंशत्यक्षरावधि। द्विगुणैरक्षरैरेव पदमेकमिहेष्यते। उद्ग्राहध्रुवकाभोगैरियं षट्पदनिर्णयः। पञ्चपादे तु ध्रुवके पदैर्मेलेन तद्ध्रुवः। चतुष्पादे तु ध्रुवके ध्रुवद् नाख्येव तद्ध्रुवः" इति सङ्गीतदा०। ध्रुवशब्दार्थे ध्रुवशब्ददर्शिते यज्ञार्थां खण्डोपयोगिनि २यज्ञभेदे खनोलशब्दे २४२१। २५ पृ० इध्मम् ध्रुवशब्दे स्मृ०चि० वाच्यवस्तुम्। स्त्रियां ङीषि का० कापि न यत इत्वम्। ततः पित्रा० स्वार्थे इदच्। ध्रुवकिन् तद्युक्ते त्रि०। ततोऽस्यास्तीति इनि स्त्रीभ्योढकं बाधित्वा वाह्या० ठञ्। प्रौवकि ध्रुवकायुक्ते पुंस्त्री ततः चतुरर्थी प्रेक्षा० ठनि। ध्रुवकिन् ध्रुवकानिर्वृत्तादौ त्रि०। [प्रमाणाकृतिर्भवति विध्रुक् ह० सं० १३ अ०।

ध्रुवकेतु पु० केतुभेदे केतुशब्दे दृश्यम् "ध्रुवकेतुरियतमति

ध्रुवरात्रा स्त्री कुमारानुचरमातृभेदे "जयावती भागतिका ध्रुवरात्रा भयङ्करी" भा०श० ४७अ० कुमारानुचरमातृकोक्तौ। [आख्यभेदे।

ध्रुवलोक पु० ध्रुवाधिष्ठितोलोकः। सप्तलोकान्तर्गते ध्रुव-

ध्रुवसन्धि पु० कुशवंश्ये हिरण्यनाभस्य पौत्रे "पुष्पो हिरण्यनाभस्य ध्रुवसन्धिस्ततोऽभवत्" भाग०९।१२।५

ध्रुवस् त्रि० कु० ध्रु–असुन्। ध्रुवनिवासे "वत्सेदमु ध्रुवसे न योनिम्" ऋ०७।७०।१। "ध्रुवसे ध्रुवाय निवासाय" भा०।

ध्रुवा स्त्री कृ० ध्रु–क्वप्। १यज्ञपात्रभेदे "साधारण्यात्र ध्रुवायां स्यात्" जै० १।५।६ सू०। "उपांशुयाजार्थं जुहूतो यत् ध्रुवायां स्रिष्टं तच्छेषभूतम्" भा० "अवत्तत्वाच्च जुह्वां तस्य च होमसंयोगात्" ७ जै० "ध्रुवायां तस्य नास्ति शेषः" भाष्यम्। ध्रुवा च जुहूतो भिन्ना "तस्येयमेव जुहूरियत्तपभृदात्मैव ध्रुवा आत्मन एवैतानि सर्वाण्यङ्गानि प्रभवन्ति तस्माद् ध्रुवाया एव सर्वो यज्ञः प्रभवति। प्राण एव ध्रुवः। सोऽयं प्राणः सर्वाण्यङ्गान्यनुसञ्चरति तस्माद्ध्रुवः सर्वा अन्या ध्रुवाः सञ्चरति। तस्मादाहवेव द्यौर्जुह्वः। अयमेवात्मन्रिक्षमुपभृदियमेव ध्रुवा तद्वा अन्या एवैते सर्वे लोकाः प्रभवन्ति तस्माद् ध्रुवाया एव सर्वो यज्ञः प्रभवति" शत०ब्रा० १।१।२।२ "अथ जुहूपभृद्ध्रुवाखेतस्याज्यस्य स्रुवेण यद्यं विधित्सेत्तत्तदादाय पुरुषावयवकल्पनया स्रुवार्थं तत्साध्यस्य यज्ञस्य पुरुषतादात्म्यमाह तादृशयवयवकृत्रिमभिनयेन दर्शयति। या जुहूः सैवमयं दक्षिणो बाहुः योपभृत् सैवं वामबाहुः ध्रुवा आत्मा देहमध्यः। तस्माद् ध्रुवाया एव सर्वो यज्ञः सर्वयागसाधारणम्" भा०। अत्र जुहूतो ध्रुवाया भिन्नत्वं स्पष्टमवगम्यते "ध्रुवाखदिरमाह आपस्तम्बः "खादिरः स्रुवः पर्णमयी जुहूराश्वत्थ्यौ पलाशावुपभृद्ध्रुवौ कार्ये" मानवे "खादिरं स्रुवमेवं पालाशी जुहूराश्वत्थ्यौ पलाशावुपभृद्ध्रुवौ"। काठके खदिरमाली स्रुमन्विहोत्रहवणी पालाशी सामान्यतया निर्वपणखिततरासाम् बाहुमात्राः स्रुग्दण्डाः प्रहरणमात्राणि प्रसवनान्यर्धपरिमाणानि पात्राणि पालाशी जुहूराश्वत्थ्यौ पलाशावुपभृद्ध्रुवौ यमीमूर्जमयो वा स्यात्तोविला हंसमुखो भवतीति" कात्या०श्रौ० १।३।२५ कर्कस्तु "ध्रुवा तु द्वैकङ्कुती भवति द्वैकङ्कुतानि पत्रशोभनेनैव स्रुवादाभावात् होमसा-

धनत्वाच्च तथा हि सन्निष्टवजुर्हूयते "तिष्ठन् ध्रुवया सन्निष्टवजुर्जुहोतीति" शाखान्तरश्रुतेः अवएव मैत्रकठाधस्तम्बसूत्रेषु "वैकङ्कती ध्रुवेति" पठ्यते तेषां हि वैकङ्कतानि पलाशीति सामान्यवचनं नास्ति" कर्क०। अतः कोषान्तरे यस्य जुहूर्वकताक्षयनं प्रामादिकमेव। ३मूर्खायां ४आढ्यां ५शालपर्ण्यां (ध्रुवा) ख्याते हृगीतिभेदे च मेदि०। ७साध्व्यां स्त्रियां शब्दर०।

ध्रुवावर्त्त पु० ध्रुव संज्ञक आवर्त्तः रोमसंस्थानभेदः। ध्रुवशब्दोक्तः। अश्वानां रोमसंस्थानभेदे तस्य स्थानविशेषेण फलं ह०सं० ६६अ० उक्तं यथा

"अक्षुपात कृतगण्डकूटयोः प्रोथ गण्डकटिवस्ति जानुनि। तुल्यनाभिकुदे तथा गुदे सव्यकुक्षिचरणेषु चाशुभाः। ये प्रपाद्यगलकर्णसंस्थिताः पृष्ठमध्यनयनोपरिस्थिताः। स्रोतकक्षिभुजकुक्षिपार्श्वगास्ते ललाटसहिताः शुभोदयाः। तेषां प्रपाद्य एको ललाटजेषु च ध्रुवावर्त्तः। रज्ज्वोपरज्जुमूर्धनि यद्यपि चेति कृतौ द्वौ द्वौ"।

ध्रुवाश्व पु० इक्ष्वाकुभेदे भत्स्यपु०। [भवन्तु क०।२५।८

ध्रुवि त्रि० कु० भ्रु-इन्। १ध्रुवेस्थिरे "शं नः पर्वताः ध्रुवयो

ध्रेक उल्लासे शब्दे च भ्वा०आत्म०अक०सेट्। ध्रेकते अध्रेकिष्ट। दिध्रेके अदित् चङि अदिध्रेकत् त।

ध्रै इत्नौ भ्वा०पर० अक०अनिट्। ध्रायति अध्रासीत्। दध्रौ गतौ तु धृधातौ इत्नः।

ध्रौव त्रि०ध्रुवायां गृहीतम् अण्। ध्रुवाया गृहीते आज्यादौ "तस्मात् आधारणं ध्रौवमाज्यमिति "यस्माय गृह्यते यत् ध्रुवायामाज्यम्" श्रुतेः जै० २।५। ६स्रु० भाष्यम्। "क भूतलं क च ध्रौवं स्थानं यत् प्राप्तवान् ध्रुवः" मार्क०पु०। २आढ्यायाम् २ध्रुवकायां स्त्री शब्दार्थचि०।

ध्रौव्य न०ध्रुवस्य भावः यञ्। १स्थिरत्वे "ध्रौव्यगत्वैत्यादि" सुग्ध०। "तत्कारणयोरविद्याकामयोश्चलत्वात् ततक्षय-ध्रौव्योपपत्तेः" इ०च०भा०। आर्द्धे त्राह्म०यञ्। २स्थिरे त्रि० "ध्रौव्ये दमरात्रावरार्द्धे" सांख्यसू० २।१६।१। ध्रुवाय हितम् यञ्। ३ध्रुवस्थानप्रापके त्रि० "सम्यं ध्रौव्यं शोभनञ्च प्रशस्यमधर्मघ्नम्। तुल्यमेतत् (ध्रुव-चरितम्) प्रयतोऽभीक्ष्णमच्युतप्रियचेष्टितम्" भा० ४।१२।१७।

ध्वंस पु०धनुस-भावे घञ्। विनाशे अभावभेदे। "जन्याभावत्वं ध्वंसत्वमिति" शक्तिवादी। जन्यत्वञ्च प्रागेव दुर्ज्ञेयत्वात् अभावत्वज्ञाप्यः अवच्छेदोपाधिरिति नव्यनैयायिकाः। यत्कार्य्यादिभते तिरोभाव एव ध्वंस इति भेदः। "ध्रुवं ध्वंसो भावी जलनिधिकक्षीवैसचरिताम्" "तन्तूनां पञ्चानां लोम्नां खाद् ध्वंसश्च विनाशयात्" कामन्दकी०

ध्वंसकला अव्य० ध्वंसं करोति कृ-डा अव्यां०। हिंसायां गर्हर०टी०। ध्वंसकलाशब्दे हिंसित्वे तद्वत्।

ध्वंसन न० ध्वनुस-भावे ल्युट्। १नाशे ध्वनुस-णिच्-ल्यु। २ध्वंसकारके त्रि० "माहेन्द्रमिव शत्रूणां ध्वंसनं शरदृष्टिभिः" भा० उ० १५६ भावे ल्युट्। २ध्वंसकरणे "कंसध्वंसनधूमकेतुरवतु त्वां देवकीनन्दनः" गीतगो०। ध्वनुस-भावे ल्युट्। ४ध्वंसे ५अधःपतने च।

ध्वंसिन् त्रि०ध्वनुस-णिनि। नाशप्रतियोगिनि "जातोत्पन्नं ध्वंसि" तर्कभा०। अक्षरेषु च ध्वंसः" वैद्यकप० ध्वंसीति अक्षरेषु विशेषणम् अतः शब्दकल्प० अस्य अक्षरेषुपरिमाणार्थतोक्तिः प्रामादिकी। ध्वनुस-णिच्-णिनि। नाशकारके त्रि०। "क्रतुध्वंसी दृषध्वजः" अमरः।

ध्वज गतौ भ्वा०पर०सक०सेट्। ध्वजति अध्वजीत् अध्वाजीत् दध्वाज अवमिदिदपि। धक्षति अध्वक्षीत् दध्वक्ष ध्वक्षतः।

ध्वज पु० ध्वज-अच्। १सौखिके (सुखिकोपकरणभेदे) २भेदे ३चिह्ने ४सङ्केते भेदि०। ५गर्वे ६दर्पे च शब्दर०। ७पूर्वदिक्स्थे गृहे हेमच०। ८चतुष्कोणाकारे वंशदण्डोपरिस्थे वस्त्रखण्डभेदे च विधानपा० ९पताकायां पु०न० अमरः। उक्तोभयवस्त्रयुक्ते १०दण्डभेदे च सामान्यतोऽस्य निर्माणप्रकारः युक्तिकल्पतरावुक्तो यथा "सेनाचिह्नं चितीशानां दण्डो ध्वज इति स्मृतः। स पताको निष्पताकः स च त्रेधा द्विविधो बुधैः। पताका बाहुदैर्घ्येण समा तु पृथिवीभुजाम्। सपताकध्वजस्यापे तदा दण्डं परित्यजेत्। जयदण्डोध्वजोनाम नैनं सामान्यमर्हति। वंशोऽथ जाङ्घिकः शालः पालाशपाशमयस्तथा। नैपो नैम्बोऽथ वा दण्डस्तथा वैराजवारणः। अवहादिकसंज्ञानां वर्णरूपमकाशितः। सर्वेषामेव वंशस्तु दण्डः सम्पत्तिकारकः। क क च ट त प यथाः। पताकाय पताकास्तु चतस्रोऽथ प्रकाशिताः। पञ्चहस्तायता हस्तपरिणाहा जयाभिधाः। जयाश्च विजयाश्च भीमाश्च चपलाश्च वैजयन्तिकाश्च। दीर्घा। विशाला।२ लोला।२ च भेदा हस्तैकविंशतिः। परिणाहे पादहीनत्वं वर्णस्य निर्णयः। रक्तः श्वेतोऽरुणः पीतश्चित्रोनीलोऽथ कर्बुरः। जयश्चेति पताकानां वर्णरूपः

प्रकाशितः। अथवाद्विकसंज्ञानामष्टानामष्टकत्रयम्। कलशोदर्पणवन्दूः पद्मं कोशो यवाङ्कुशम्। ब्रह्मक्षत्रिय विट्शूद्रजातीनां संप्रकाशितः। गजादियुक्ता सा प्रोक्ता जयन्ती सर्वमङ्गला। गजो हंसादिसंयुक्तो राज्ञां सैवाष्टमङ्गला। हंसः केकी शुकश्चाथो ब्रह्मादीनां यथाक्रमम्। चामरादिसमायुक्ता सा ज्ञेया सर्वसुखिदा। चामरत्वमपक्षाणि चित्रवस्त्रं तथा स्मृतम्। चतुर्थां वेदनयनपक्षेन्द्रगणितक्रमात्। तदधे यदि विन्यस्तं पताका द्वितीया भवेत्। इयं हि सर्वभोगदा पताका चक्रवर्त्तिनः। तदर्धः पूर्वजन्मोक्तैः प्रमाणं विधिबोधितम्। कनकं रजतं ताम्रं नानाधातुमयं क्रमात्। कृष्णादिकं प्रयंसन्ति पताकाग्रे महीभुजाम्। तत्रापि रक्तविन्यासो विशेषो राजतक्रमः। चतुर्भिर्मकराद्यैर्युक्ता चेत् सर्वसिद्धिदा। तदा चेद्यस्करीनाम सा पताका विजायते। मकरोऽथ गजः सिंहो व्याघ्रो वाजी मृगः शुकः। शुकश्चेति यथादिष्टमादिस्त्रादिदशभुजाम्। इति प्रोक्तः पताकानां निर्णयः पृथिवीभुजाम्"।

देवादिप्रतिष्ठाक्रमयन्त्रपात्रगतध्वजमहाध्वजयोर्लक्षणादिकं कृत्यकल्पे उक्तं यथा "ध्वजान् द्विहस्तायतिकांश्च पञ्चहस्तान् सपीतारुणकृष्णनीलान्। श्वेतांश्चित्रेतचित्तान् दिगीशवाहान् वहेत् दिक्करवंशयोर्धे" मू०। "ध्वजान् द्विहस्तमितायामान् पञ्चहस्तदीर्घान् पीतारुणकृष्णनीलश्वेतवर्णश्वेतान् मैरिकादिखिलदिक्प्राणवाहनान् दशहस्तवंशमस्तके योजितान् "हस्तद्वयनिखातांश्च ध्वजांस्त्वा अपि पूर्वतः" इति वक्ष्यमाणत्वात्। प्राच्यादितः वहेद्वारवेदिति" व्याख्या। प्रतिष्ठासारसंग्रहे "पीतरक्तादिवर्णाश्च पञ्चहस्ताध्वजाः स्मृताः। द्विपञ्चहस्तैर्दण्डैस्ते वंशजैः संयुता मताः" इति। क्रियासारे "मातङ्गवस्त्रमहिषान् सिंहमत्स्यौ च वाजिनः। इषभं च यथान्यायं ध्वजमध्ये क्रमाल्लिखेत्" पञ्चमांशं निखनेदिति। अकरणे दोषः पञ्चरात्रे "चिन्नयन्त्यक्षरश्चेत्वा ध्वजहीनं सुराश्रयम्। ध्वजेन रहितं ब्रह्मन्नखण्डं तु इदा भवेत्। पूजायागादिकं सर्वं जपाद्यं यत्कृतं नृभिरिति" ध्वजारोपफलं तत्रैव "यं कृत्वा पुरुषः सम्यक् समस्तफलमाप्नुयादिति"। अथ पताकानिवेशनं महाध्वजानिवेशनं च नवमकुम्भपताकानिवेशनं तत्रोक्तं यथा "लोकेशवर्णांशयुताः पताकाः शैलेन्दुदैर्घ्यायतिकाश्च मध्ये। चित्रं ध्वजं दिक्करदैर्घ्यवंशलिदोत्तमं प्राग्गकिङ्किणीकम्। श्वेतां च नवमीं पूर्वेशानयोर्मध्यतो बुधः। विन्यसेत्तु पताकां च ध्वजांस्त्वा अपि पूर्वतः" सू० "लोकेशानां लोकपालानां ये वर्णाः पीतादयः पूर्वश्लोकोक्ताः मैरिकादिखिलवज्रयक्षिदण्डषड्गपाशाङ्कुशगदाखिभूषाणि तैर्युताः षड्हस्तदीर्घा एकहस्तविस्तृताः पताका दशहस्तवंशगीर्मगाः। चित्रं ध्वजं लिहस्तविस्तृतं प्राग्ये वर्त्तमानकिङ्किणीकं शीर्षे चचामरं दशहस्तदैर्घ्यं वंशञ्च ताडयं तं मध्ये विन्यसेत्। पूर्वादितः पताकाश्च विन्यसेदित्युत्तरश्लोकेनान्वयः। नवमीं पताकां पूर्वेशानयोर्मध्ये श्वेतां ताडयीमेवाचार्य्यकुम्भे विन्यसेत् ध्वजांस्त्वा अपि पताकाश्च पूर्वादिक्रमेण भूमौ पञ्चांगरोपणेन विन्यसेदिति"। "हस्तद्वयोर्ध्वपञ्चरात्रम्। "ध्वजवंशः प्रकर्त्तव्यो निर्व्रणः सगुणो दृढः। तदूर्द्धे ताम्रजं चक्रं कृष्णं कुर्याद्द्विजोत्तमः। प्रासादस्य च विस्तारो मानं दण्डस्य कीर्त्तितम्। ध्वजयष्टिर्वसुहस्ते ऐशान्यां दिशि देशिकैः। स्थापनीयाच वायव्ये साक्षतं ध्वजमुच्यते। पङ्कपार्श्वशोभाढ्यं कुर्यात् सुशोभनम्। एकवर्णं विचित्रं वा यष्टाष्टाक्षरभूषितम्। किङ्किणीजालकोपेतं वर्हिपल्लविभूषितम्। गुह्यादिवर्णैर्विप्रादिक्रमादा कारयेत् ध्वजम्। दण्डाष्टाङ्गुलवर्णी यावत् हस्तैकं विस्तरेच्च तु। महाध्वजन्तु विख्यातं सर्वकामप्रदं शुभम्। ध्वजेन रहितो विप्र! प्रासादस्तु इदा भवेत्। पूजाहोमादिकं सर्वं जपाद्यं यत् कृतं नरैः"। शिवसर्वज्ञे "देवेभ्यश्च महं दद्याद्दाहनैरुपशोभितम्। तुरङ्गमेण सूर्यस्य, करस्य इषचिह्नितम्। विष्णवे मकराङ्कन्तु, दुर्गायै सिंहचिह्नितम्। कार्य्यं ध्वजपताकाश्च अन्यथा न कथञ्चन"। वह्नि० पु० ५८अ०। "प्रासादस्य तु विस्तारो मानं दण्डस्य कीर्त्तितम्। त्रिभागेन वा कुर्यात् त्रयोदशांशेन वा पुनः। द्वारशाखादिसुचितं दण्डं वा परिकल्पयेत्। ध्वजयष्टिर्वसुहस्ते ऐशान्यां वापवेऽथवा। नानावर्णं ध्वजं कुर्यात्त्रिचित्रं वैकवर्णकम्। अष्टाष्टाक्षरकिङ्किणीका भूषितं घण्टानादनम्। दण्डाष्टाङ्गुलवर्णी यावत् हस्तैकं विस्तरेच्च तु"। इन्द्रध्वजयष्टे तल्लक्षणं दृश्यम्। क्षेमचन्द्रे पूर्वदिग्मन्त्रे इन्द्रयष्टौल्लिः ध्वजमंत्रकल्पायस्य पूर्वदिक्स्थितस्यामिप्रायेण मन्त्रमहोदधे २६२५ पृ० "ध्वजो धूमो हरिः श्वा

मोः चरेऽौ वायवोऽष्टमः। पूर्वादीनान्तु काष्ठानां ध्वजादीनामवस्थितिः इत्युक्तेः ध्वजरूपायस्य पूर्वदिक्स्थत्वस्य कीर्त्तनात्। वस्तुतः ध्वजशब्द आयविशेषार्थं एव परिभाषितो न तु पूर्वदिगुद्दिष्टे। तत्र शुल्किकोपकरणे "दशभूनासमं चक्रं दशचक्रसमो ध्वजः" मनुः। "भूनादिशब्दैरुद्दाहृतपञ्चाशते दशभूनावत्सु यावान् दोषस्तावानेकस्मिन् चक्रवति तैजसिके। यावान् दशसु तैजसिकेषु दोषः तावानेकध्वजवति शौल्किके" कुल्लू०। चिह्ने "तं वज्रे वाहनं विष्णुगरुत्मन्तं महाबलम्। ध्वजं चक्रे च भगवानुपरि स्थास्यतीति तम्" भा०आ०२२अ०। "ध्वजेनो वज्रं सुगन्धागो नन्द्यावर्तो घटोऽपि च। भूमौ नीलोत्पलं मत्स्यः फणी सिंहोऽर्हतां ध्वजाः" हेमच०। "मरेण चक्रस्य महागणिध्वजम्" रघुः "ब्रह्महा द्वादशसमाः कुटीं कृत्वा वने वसेत्। भैक्षाश्लात्मविशुद्ध्यर्थं कृत्वा शवशिरो ध्वजम्" मनुः। इषध्वजः मकरध्वजः धूमध्वज इत्यादि ततो वाह्वा० इच्। ध्वजिनि तत्सम्बन्धिनि त्रि०।

ध्वजगृह पु०ध्वजायधुक्तं गृहं मा०त०। ध्वजरूपायधुक्ते गृहे "यथो खमेव भवनं यत्र ध्वजगृहं महत्" हरिवं०१७२अ०

ध्वजग्रीव पु०ध्वज इव ग्रीवास्य। राक्षसभेदे रामा०सु०१२२स०

ध्वजद्रुम पुः ध्वज इव दीर्घकाण्डो द्रुमः। तालवृक्षे राजनि० ध्वजवृक्षादयोऽत्र।

ध्वजप्रहरण पु० ध्वजं प्रहरति प्र+हृ-ल्युट्। वायौ शब्दर०

ध्वजभङ्ग पु० ध्वजस्य मेढ्रस्य भङ्गः। चरकोक्ते क्लीवताप्रयोजके रोगभेदे यथा "अत्यम्ललवणक्षारविरुद्धाशनभोजनात्। तथाम्बुपानादिवमात् पिष्टान्नगुरुभोजनात्। दधिक्षीरानूपमांसासेवनाद्व्याधिकर्षणात्। कण्ड्वाधोगमनाच्चापि विद्योनिगमनादपि। दीर्घरोमस्त्रियं चिरोत्सृष्टां तथैव च परिप्लुताम्। दैवयोगं प्रमदां भोक्तुं यदि गच्छति मानवः। चतुःपदाभिगमनाच्छेफसश्चाभिघाततः। अधावनाच्च मेढ्रस्य प्रस्कन्दननखक्षतात्। काष्ठप्रहारनिष्पेषप्रभुक्तानाञ्च निषेवणात्। रेतसश्च प्रतीघातात् ध्वजभङ्गः प्रवर्त्तते। चरकः। तस्य चिह्नं यथा "शुक्रेऽचिरात् प्रसिच्येत शुक्रं शोणितमेव वा। तोदोऽल्पं ध्वजयोर्भेदं घृणावतीव च" इति वाभटः।

ध्वजवत् त्रि० ध्वजविशिष्टमस्त्यस्य मतुप् मस्य वः। चिह्नयुक्ते "शिरःकपाली ध्वजवान् भिक्षायी कर्म वेदयन्" "कृत्वा शवशिरो ध्वजमिति" मनूक्तेः "कृतब्राह्मणवधादरूपचिह्नवान् इत्यर्थः" भिता०। स्त्रियां ङीप्। सा च २रुचिमेधसः कन्यायाम् "अत्र ध्वजवती नाम कुमारी रुचिमेधसः" भा०उ०१०६अ०। ध्वजः शुल्किकोपकरणभेदः अस्त्यस्य मतुप् मस्य वः। २शौल्किके "भूनावतां ध्वजवतां नेमेनैव च जीवताम्" मनुः

ध्वजारोपण न० ६त०। ध्वजस्य देवप्रासादादौ आरोपणे तद्विधिः अग्निपु० १०२अ० यथा "चूडके ध्वजदण्डे च ध्वजे देवकुले तथा। प्रतिष्ठा च यथोद्दिष्टा तथा स्कन्द! वदामि ते। तडागार्द्धप्रवेशादा यदा सर्वार्द्धवेशनात्। रैवते दारुजः मूलः शैलजे धान्नि शैलजः। वैष्णवादौ च चक्राढ्यः कुम्भः स्वान्मूर्त्तिमानतः। स च त्रिभूमयुक्तस्तु अपभूताभिधो मतः। द्वियभूतः समाख्यातो मूर्द्धि लिङ्गसमन्वितः। बीजपूरकयुक्तो वा शिवशास्त्रेषु तद्विधः। चित्रो ध्वजश्च जङ्घातो यथा जङ्घार्द्धतो भवेत्। भवेद्वा दण्डमानस्तु यदि वा तद्यदृच्छया। महाध्वजः समाख्यातो वस्तु पीठस्य वै डकः। यक्षैः।४पर्वकैरष्टरसैर्वापि वृत्तैर्दण्डस्तु सम्मितः। उत्तमादिक्रमेणैव विज्ञेयः सूरिभिस्ततः। वंशजः शालजादिर्वा स दण्डः सर्वकामदः" इत्युपक्रमे तत्र दर्शितः

ध्वजाहृत पु० ध्वजेन तद्युपलक्षितसंग्रामेणाहृतः। दासभेदे "ध्वजाहृतो भक्तदासो गृहजः क्रीतदत्रिमौ। पैत्रिकोदण्डदासश्च सप्तैते दासयोनयः" मनुः। "ध्वजाहृतः ध्वजे संग्रामे स्वामिसकाशात् जितः" कुल्लू० २त्रिभाष्यधनभेदे न० "संग्रामादाहृतं यत्तु विजित्य द्विषतां धनम्। स्वाम्यर्थं जीवितं त्यक्त्वा तद्ध्वजाहृतमुच्यते" दायभा० कात्यायनः। "ध्वजाहृतं भवेद्यत्तु विभाज्यं नैव तद्भवेत्" स्मृतिः।

ध्वजिन् त्रि० ध्वजोऽस्त्यस्य इनि। १ध्वजयुक्ते "सुरापाना पनस्यर्थं वाससा जटी ध्वजी" मनुः "उलूकपक्षि ध्वजिभिर्देवतायतनैर्वृतम्" भा०आ० १३१अ० स्त्रियां ङीप् सा च २सेनायाम् अमरः। "सर्वैः प्रहरणध्वजिनी रजांसि" रघुः। ३पर्वते ४रथे ५सर्षे ६वृक्षे ७ब्राह्मणे पु० मेदि०। ८मयूरे राजनि०। १०शुल्किके हेमच०। "प्रतिपक्षे भूनौ चक्री ध्वजी वेद्या नराधिपः" मनुः।

ध्वजोत्थान न० इन्द्रध्वजस्य उत्थानम्। १शक्रध्वजोत्थाने तद्युपलक्षिते २उत्सवे च तिका०। इन्द्रध्वजशब्दे ८४७पृ० दृश्यम्।

ध्वण ध्वाने भ्वा० अक० पर० सेट्। ध्वणति अध्वाणीत् अध्वणीत् दध्वाण।

ध्वन रवे भ्वा० पर० अक० सेट्। ध्वनति अध्वानीत् अध्वनीत् दध्वान। णित् वा घटादि ध्वनयति ध्वानयति।

ध्वन शब्दे चुरा० उभ० सक० सेट्। ध्वनयति ते अदिध्वनत् अध्वनयीत्। शब्द इह अव्यक्तध्वनिरूपः। ऋदङ्गः ध्वनयति" इत्यादि।

ध्वन पु० चु० "ध्वन" पा० एरच् भावे अच्। अव्यक्तशब्दे

ध्वनन न०ध्वन्यते व्यज्यतेऽर्थोऽनेन घटा०ध्वनि-करणे ल्युट्। १अलङ्कारोक्ते वाच्यलक्ष्यभिन्नार्थस्य बोधनाजनके व्यञ्जनावृत्तिरूपे शब्दनिष्ठे व्यापारभेदे "विरतास्त्वभिधाद्यास्तु यत्रार्थो बोध्यतेऽपरः। सा वृत्तिर्व्यञ्जना नाम शब्दस्यार्थादिकस्य च"। "वृत्तिर्व्यञ्जनध्वननमनप्रत्यायनादि व्यपदेशविषया व्यञ्जना नाम" सा०द०। भावे ल्युट्। २अव्यक्तशब्दकरणे "पापकं गन्धमाघ्रायाविघ्नन्हे कर्णं ध्वनने च" आश्व० श्रौ० १।६।८

ध्वनमोदिन् पु० ध्वनेन ध्वानेन मोदयति मुद-णिच्-णिनि। १भ्रमरे शब्दरत्ना०। २मधुकर्यां स्त्री ङीप्

ध्वनि पु० ध्वन-इन्। १ऋदङ्गादिशब्दे "शब्दो ध्वनिश्च वर्णश्च ऋदङ्गादिभवो ध्वनिः। कण्ठसंयोगजन्मानो वर्णास्ते च कादयो मताः" भाषा०। शब्दविशेषस्य ध्वन्यात्मकता शब्दार्थरत्ने ऽस्माभिर्व्यवस्थापिता यथा "स च शब्दः द्विविधः बुद्धिहेतुरबुद्धिहेतुश्च। तत्राबुद्धिहेतुर्यो वर्णादिशब्दः बुद्धिहेतुश्च द्विविधः। स्वाभाविकः कार्यनिकश्च उभयत्रापि ध्वनेरुपकारकत्वात् ध्वन्यात्मकता। तत्र स्वाभाविको वर्णविशेषानभिव्यञ्जको रुदितरुदितादिरूपः प्राणिमात्रसाधारणः। कार्यनिकोऽपि त्रिविधः वाद्यादिशब्दः गीतिरूपः वर्णात्मकश्च। तत्र भेरीशब्दादिरूपोवाद्यरूपः वाद्यवादिरागाभिव्यञ्जकध्वनिवादादिस्वरूपो गीतिरूपः ध्वनिविशेषस्वरूपतत्कण्ठतालाद्याभिघातजन्यश्च वर्णात्मकः। "ध्वनिर्नाम यो दूरादाकर्णयतो वर्णविशेषमनधिगच्छतः कर्णपथमवतरति प्रत्याशीदतश्च तारत्वादिविशेषमवगमयतीति" शारीरकभाष्योक्ते तारत्वादिधीहेतुर्ध्वनिरित्यवसेयम्। जिह्वाया ईषदन्तरपाते वर्णानामनुत्पत्तेर्ध्वनेरुपलम्भात् रुदितरुदितादौ वर्णोत्पत्तिमन्तरेणैव तत्प्रतीतेश्च वर्णशब्दजनकता ध्वनेरवगीयते।"

शब्देदृक्त्वादिकं तत्रैव स्थानान्तरेऽस्माभिर्निर्णीतं यथा "तस्य स्फोटस्याभिव्यक्तौ प्राकृतस्य ध्वनेः कारणत्वं चिरचिरतरस्थितौ तु प्राकृतध्वनिजातवैकृतध्वनेरिति विवेकः। तथा च वाक्यपदीये "स्फोटस्य यद्गुणे हेतुः प्राकृतो ध्वनिरिष्यते" इति। "स्थितिभेदे निमित्तत्वं वैकृतः प्रतिपद्यते" इति च। स्थितिभेदे चिरचिरतरकालस्थितौ ध्वनिस्तु पूर्वचर्चितः। तस्य च स्फोटस्य नित्यतया ध्वनिगतह्रस्वदीर्घादिकालस्य तत्रोपचारः। प्रतिपादितश्च तत्रैव वाक्यपदीये "स्फोटस्याभिव्यक्तिकालस्य ध्वनिकालानुपातिनः। स्वभावतस्तु नित्यत्वात् ह्रस्वदीर्घप्लुतादिषु। प्राकृतस्य ध्वनेः कालः शब्दस्येत्युपचर्यते"। शब्दस्य स्फोटस्य नित्यतया अभिव्यक्तिकालस्य ह्रस्वदीर्घादिषु प्राकृतध्वनेः कालः तारत्वादिधीहेतुरुपचर्यते इति तदर्थः। एवञ्च विलम्बितोच्चारणजन्ये तत्तदर्थानां तद्बोधजनितसंस्काराणां वा बहुक्षणपर्यन्तस्थायित्वकल्पनामपेक्ष्य एकस्यैव शब्दस्याभिव्यक्त्यनन्तरं जायमानेन वैकृतेन ध्वनिना बहुकालस्थितिकल्पने लाघवमित्यपि द्रष्टव्यम्। भेरीशब्दादौ च ध्वन्यभिव्यक्त्यनन्तरं जायमानप्राकृतध्वनेर्बहुकालस्थायित्वदर्शनेन व्यञ्जकापि तथाकल्पनौचित्यात्। अतएव महाभाष्ये "एवं तर्हि स्फोटः शब्दोध्वनिः शब्दगुणस्तत्कादिना ऽभिव्यक्त्युपकारकत्वेन ध्वनेः स्फोटरूपशब्दगुणत्वमभिहितमभिहितञ्च ध्वनेर्ह्रस्वदीर्घत्वेनापि भानम्। यथा "ध्वनिः स्फोटश्च शब्दानां ध्वनिस्तु खलु लक्ष्यते। ह्रस्वोमङ्गाँश्च केषाञ्चित् स्वयं नैव स्वभावतः" इति। न स्वभावतस्तद्रूपेण स्फोटोलक्ष्यतइत्यर्थः। ध्वनिविकारे च वायुसंयोगविशेषस्य हेतुत्वं तस्य बहुकालस्थायित्वे विलम्बितत्वम् अल्पकालस्थायित्वे द्रुतत्वमिति विवेकः।

२दशमकाव्ये "इदमुत्तममतिशयिनि व्यङ्ग्ये वाच्याद्ध्वनिर्बुधैः कथितः" काव्यप्रका०

"इदं काव्यं बुधैर्वैयाकरणैः प्रधानभूतस्फोटरूपव्यङ्ग्यव्यञ्जकस्य शब्दस्य ध्वनिरिति व्यवहारः कृतः ततस्तन्मतानुसारिभिरन्यैरपि व्यञ्जकत्वाच्यव्यङ्ग्यव्यञ्जनक्षमस्य शब्दार्थयुगलस्य" वृत्तिः। "इदमिति वाच्यादतिशयिनि वाच्यादधिकात्मनि व्यङ्ग्ये सति इदं काव्यमुत्तमं तदेव च बुधैर्ध्वनिः कथित इत्यर्थः। ननु ध्वनिपरिभाषा क्वापि केनापि न कृता तत्कथमलङ्कारग्रन्थे सा कृतेति चाकाङ्क्षायां वैयाकरणरूपबुधसंवादं दर्शयन् व्याचष्टे बुधैः वैयाकरणैरिति एवञ्च सैवं

कारिकास्वनुपपदमाख्येत्यवधेयम्। अत्रायमर्थः अनेकवर्णात्मकस्य कलसादिपदस्य प्रत्यक्षं न सम्भवति क्षणविनाशिनां क्रमिकाणां वर्णानां मेलकाभावेन तत्रैकात्मनः पदस्य ग्रहीतुमशक्यत्वात्। न च प्रत्येकवर्णानुभवजन्यसंस्कारैः सकलवर्णात्मनः पदस्य समूहालम्बनस्मृतिरेव नैयायिकमतसिद्धास्तीति वाच्यं वर्णपदयोरेकदेशैकदेशिभावेन भिन्नत्वात् वर्णविषयसंस्कारैः पदस्मरणजननस्यायुक्तत्वादित्यभिप्रायवद्भिर्वैयाकरणैः पूर्वपूर्ववर्णानुभवजनितसंस्कारसहितेनानुभूयमानचरमवर्णेन श्रोत्रे व्यञ्जनाख्योव्यापारोजन्यते तेनैव व्यापारेण नष्टवर्णघटितमपि पदं स्फोटपरिभाषितं श्रोत्रेण साक्षात् क्रियते इत्युच्यते। तदाह बुधैः वैयाकरणैरिति अर्थप्रत्यायकत्वादेकदेशित्वाच्च पदं वर्णमेवया प्रधानभूतं स्फोटसंज्ञकम्। तदूपव्यङ्ग्यव्यञ्जकस्य शब्दस्यान्त्यवर्णात्मन इत्यर्थः। अतस्तन्मतेऽपि चरमवर्णात्मनि शब्दे तेषां ध्वनिव्यवहारः आलङ्कारिकाणामपि काव्यात्मनि शब्दे ध्वनिव्यवहार इति शब्दे व्यवहारसाम्यान्नूनमतानुसरणम् मल्लेश्वरः।

ध्वनिभेदाश्च काव्यशब्दे २० २४।२५ पृ० दृश्याः।

शब्दभेदध्वन्यादुत्पत्तिप्रकारादिकं शारदाति० उक्तं यथा "सा प्रसूते कुण्डलिनी शब्दब्रह्ममयी विभुः। शक्तिं ततो ध्वनिस्तस्मादक्षरोधिका। ततोऽर्द्धेन्दुस्ततो विन्दुस्तस्मादासीत् परा ततः। पश्यन्ती मध्यमा वाचां वैखरी प्राणजन्मभूः"। सा कुण्डलिनी शक्तिं प्रसूते। ततः शक्तेर्ध्वनिरासीत् ततस्तस्माद्ध्वनेर्नाद इत्यादि ज्ञेयम्। सत्वप्रविष्टा चित् शक्तिशब्दवाच्या परमाकाशावस्था सैव सत्वप्रविष्टा रजोऽनुविद्धा सती ध्वनिशब्दवाच्या अक्षरावस्था, सैव तमोऽनुविद्धा नादशब्दवाच्या अव्यक्तावस्था सैव तमःप्राचुर्यात् निरोधिकाशब्दवाच्या सैव सत्वप्राचुर्यात् अर्द्धेन्दुशब्दवाच्या तदुभयसंयोगादिन्दुशब्दवाच्यः सएव विन्दुः स्थानान्तरगतः पराख्यो भवति। तत्र परा मूलाधारे, पश्यन्ती स्वाधिष्ठाने, मध्यमा हृदये, वैखरी मुखे। तदुक्तं "सूक्ष्मा कुण्डलिनी मध्ये ज्योतिर्मात्रस्वरूपिणी। स्वयंप्रकाशा पश्यन्ती सुषुम्णामाश्रिता भवेत्। अन्तःस्थविषया तस्मादुद्भूतत्वूर्द्धगामिनी। ततः संकल्पमात्रात् स्याद्देवि! तत्तोर्द्धगामिनी। सैव हृत्पङ्कजं प्राप्य मध्यमा नादरूपिणी। सैवोरःकण्ठतालुस्था शिरोघ्राणरदादिगा। जिह्वामूलोष्ठनिष्ठाता सैव वर्णपरिग्रहा। शब्दब्रह्मजननी श्रोत्रग्राह्या तु वैखरी" पदार्थः राघवभट्टः।

"ध्वनिश्चता निश्चताक्षरसञ्ज्ञेन" माधः।

**ध्वनिकाव्य** न० कर्म०। उत्तमकाव्ये काव्यशब्दे १०२४पृ०दृश्यम्

**ध्वनिकृत्** पु० ध्वनिं तत्प्रतिपादकं ग्रन्थं करोति कृ-क्विप् तुक् ६त०। अलङ्कारग्रन्थभेदकारके पण्डितभेदे "तदुक्तं ध्वनिकृता" सा० द०।

**ध्वनिग्रह** पु० ध्वनिं ध्वन्यात्मकं शब्दं गृह्णात्यनेन ग्रह-करणे अप्। कर्णे श्रोत्रेन्द्रिये त्रिका०।

**ध्वनिनाला** स्त्री ध्वनेः ध्वन्यात्मकशब्दस्य नालेव। वेणौ १वंशीभेदे २काहलवाद्ये च मेदि०।

**ध्वनिबोधक** पु० ध्वनिं बोधयति बुध-णिच्-ण्वुल्। रोहिषतृणे नैघण्टुप्रकाशिका।

**ध्वनिविकार** पु० ६त०। श्रोत्रग्राह्यादिना ध्वनेरन्यथाभावे १काकौ २भेदच०। २विकृतध्वनौ च।

**ध्वन्य** त्रि० घटादि० ध्वन-कर्मणि यत्। १ध्वननीये व्यङ्ग्यार्थे काव्येदृश्यत्वे २लक्षणग्रन्थप्रसाद्यत्वे पु० "उत त्वे मा ध्वन्यस्य जुष्टा लक्षण्यस्य सरचोयतानाः" ऋ० ५।१२।१० "ध्वन्यस्य तन्त्रामकस्य लक्षणस्य लक्षणग्रन्थप्रपञ्चस्य" भा०

**ध्वन्स** गतौ सक०अनि० भ्वा० आत्म० सेट्। ध्वंसते दध्वंसे-दध्वंसे। लुदित् अध्वसत। उदित् ध्वंसित्वा ध्वस्ता। ध्वस्तः। ध्वंसस्यातीतत्वाऽभावेऽपि तदुत्पत्त्यनुकूलव्यापारस्य कारणविशेषसंयोगस्य अतीतत्वात् तथा व्यवहारः। वैयाकरणमते सर्वत्र "फलव्यापारयोर्धातुः" इत्युक्तेः फलव्यापारयोर्धात्वर्थत्वात् तयोश्च सामानाधिकरण्ये धातोरकर्मकत्वम् नाशस्य प्रतियोगितया कारणसमवधानस्य एकत्र घटादौ सत्त्वादकर्मकत्वम् "फलव्यापारयोरेकनिष्ठतायामकर्मकः" इति एतन्मते "आश्रये तु तिङः स्मृताः" इत्युक्तेः आश्रयरूपार्थस्य कर्तृत्वं तच्च निरूढव्यापाराश्रयत्वेन घटादावव्याहतमेव तिङर्थवर्त्तमानत्वादेः कारणसमवधानरूपव्यापारेऽन्वयसम्भवाच्च काचिदनुपपत्तिः। नैयायिकमते नाशमात्रस्यैव धात्वर्थत्वेऽपि तदुत्पत्तौ क्षणस्य तदुत्पत्तिस्य यादृक्षणसम्बन्धस्य यातीतत्वादिनैव ध्वस्तः ध्वंसते इत्यादि प्रयोगः। अस्य कर्तृत्वं प्रतियोगित्वं च नाशान्वयि तथा च वर्त्तमानाद्युत्पत्तिक्षणनाशप्रतियोगी घटादिरिति बोधः। व्युत्पत्तिवैचित्र्याच्च उत्पत्तेर्नाश एवान्वयः न प्रतियोगिनि इति बोध्यम्। सां

ख्यादिसत्कार्यवादे नाशः तिरोहितावस्थेति भेदः। "तदप्यध्वसदासाद्य माहेन्द्रं जक्षणेरितम्" प्राप्या दध्वंसिरे गात्रं तस्मञ्चे च प्रिये हते" भट्टिः। आर्षे क्वचित् प० "भूतो देवानामग्रोदुग्रस्रपो ध्वंसेत्युच्चै स्त्रिःप्लुतेन स्वरेण" भा०आ० ७६अ०। मालिन्यादिभावे च "क्षणा विवर्णा मलिना पांशुध्वस्तशिरोरुहा" भा० व० ६४अ० "रविजेन वुधे ध्वस्ते" इ०सं० १७अ०

ध्वसन् त्रि० अनर्भूतणर्थे ध्वंस्—कनिन्। ध्वंसकारके। "तेन हेतेन ध्वसा हैतवनरैजे" शत०ब्रा० १२।५।४।६ "ध्वसा पापध्वंसनः" भा०

ध्वसन न० ध्वंसतेऽत्र ध्वंस वा० आधारे क्यु। ध्वंसनस्थाने "आयुं ध्वसनावधिश्रिताः" ऋ० १।१६४।२६

ध्वसन्ति पु० ध्वंस्—झिच् किच्च। ऋग्वेदप्रसिद्धे ऋषिभेदे "याभिर्ध्वसन्तिं पुरुषन्तिमारतम्" ऋ०१।१२१।६ "ध्वसन्तिमेतत्संज्ञं पुरुषन्तिमेतत्सामानं च ऋषिमारतम्" भा०

ध्वसिर त्रि० ध्वंस्—किरच्। नाशप्रतियोगिनि "सं भस्या अना ध्वसिरा अदत्त" ऋ०७।८३।२ "ध्वसिराः सैनिकैर्ध्वस्ताः" भा०।

ध्वस्त त्रि० ध्वंस्—कर्त्तरि क्त। १नाशप्रतियोगिनि अधः-२पतिते २च्युते गलिते च अमरः। "येन ध्वस्तमनोभुवा" सा०द०। ध्वंसधातोः उदा०।

ध्वस्ति स्त्री ध्वंस्—भावे क्तिन्। ध्वंसे नाशे। कर्मणि ध्वंसतेऽत्र आधारे क्तिन्। कर्मत्वाधारे विद्याभेदे। "कर्मणां शुभदुष्टानां आयते फलसंचयः। ध्वंसोऽपक्वफलावस्था यत्र सा ध्वस्तिरुच्यते" मार्कण्डेयपु०

ध्वस्मन् त्रि० अनर्भूतणर्थे ध्वंस्—वा० मनिन् किच्च। ध्वंसके "न ध्वस्मानस्वो रेप आधुः" ऋ०४।६।६ "ध्वस्मानो ध्वंसकाः" भा० भावे मनिन् कित्। २ध्वंसे ध्वस्मन्वत्।

ध्वस्मन्वत् त्रि० ध्वस्मा ध्वंसोऽस्यास्ति मतुप्। १ध्वंसवति "स त्वा ध्वस्मन्वदभ्येतु" ऋ०७।४।६। २ध्वंसे निघ०।

ध्वस्र त्रि० ध्वंस्—रक्। १नष्टे अनर्भूतणर्थे ध्वंस्—रक्। ध्वंसके "कस्य ध्वस्रा भवथः कस्य वा नराः" ऋ०१०।४०।३। "ध्वस्रा ध्वंसको भवतः" भा० औत्सर्गे आच्। "ध्वस्रा अधिक्षन् युवतीर्ऋतज्ञाः" ऋ०४।१६।७ "ध्वस्राः कुलध्वंसिका युवतीः" भा०। २राजभेदे पु० "ध्वस्रयोः पुरुमन्यो वा यदध्वाधि" ऋ० ६।५८।२ "ध्वस्रः क्वचिद्राजा पुरुमन्निव क्वचित्, तयोः। अत्रेतरेतरयोगविवक्षया द्विवचनम्" भा०।

ध्वान पु० ध्वन्—भावे घञ्। १शब्दे अमरः। "ध्वानेन घोषांशु वा पत्नीः संवाजयन्ति" आपस्तम्बश्रु०। पत्नीसंयाज प्रकरण कात्या० श्रौ० २।७।१ कण्ड्वादौ दृश्यः।

ध्वानायन पुंस्त्री ध्वनगर्गगोत्रापत्यम् अश्वा० फञ्। ध्वनगर्गगोत्रापत्ये स्त्रियां ङीप्।

ध्वान्त न० ध्वन्—क्त। चुरश्चान्तेत्वादिना पा०अन्तकारे नि०। १तमसि अमरः। अन्यत्र ध्वनित इत्येव शब्दयुक्ते। ध्वान्तमस्यस्य अच्। २तमःप्रधाने नरकभेदे च शब्दार्थचि० ३मरुद्भेदे धुनिशब्दे यजु०वाक्यं दृश्यम् "ध्वान्तारिं सर्वपापघ्नं प्रणतोऽस्मि दिवाकरम्" स्तुतिः।

ध्वान्तवित्त पु० ध्वान्ते वित्तः प्रथितः। खद्योते शब्दरत्ना०

ध्वान्तशात्रव पु०ध्वान्तस्यान्धकारस्य शात्रवः। १सूर्ये शब्दार्थ० २अग्नौ ३चन्द्रे च शब्दार्थचि०। तद्रूपवर्णे ४श्वेतवर्णे पु० शब्दच०। ध्वान्तारातिप्रभृतयोऽपि सूर्यादौ। "ध्वान्तारिं सर्वपापघ्नम्" स्तुतिः। [हारा०।

ध्वान्तोन्मेष पु० ध्वान्ते उन्मिषति उद्—मिष अच्। खद्योते

ध्वृ कौटिल्ये भा०पर०अक०अनिट्। ध्वरति अध्वार्षीत् दध्वार दध्वर्व। "ध्वृषीका युधि मायाभिः" भट्टिः "कुटिलीकरणे सक०" भावव्यमेवैतया ध्वरति" तैत्ति०स०२।५।८।६

ध्वृण शब्दे ध्वणवत् सर्वम्।

इति श्रीतारानाथतर्कवाचस्पतिभट्टाचार्य्य सङ्कलिते वाचस्पत्ये धकारादिशब्दार्थसङ्कलनम्।

## न

नकारः व्यञ्जनवर्णभेदः तवर्गीयपञ्चमवर्णः ओष्ठोच्चार्यस्थानं दन्तमूलं नासिका च। "दन्त्यौष्ठतुल्यसाः कृताः" "अधोऽनुनासिका नस्तौ" इति च शिक्षोक्तेः। तस्योच्चारणे बाह्यान्तरप्रयत्नः जिह्वाग्रे च दन्तमूलस्य सम्यक्स्पर्शः। अत एव व्यञ्जनानां स्पर्शवर्णत्वव्यवहारः। बाह्यप्रयत्नाच्च संवारनादघोषा अल्पप्राणाश्च "खयां यमाः खयः+कं पौ विसर्गः खर एव च। एते श्वासानुप्रदाना अघोषाश्च विदुर्बुधाः। कण्ठम्, अन्ये तु घोषाः स्युः संवारा नादभागिनः। अयुग्मा वर्गयमगा यणश्चाल्पासवः कृताः" शिक्षा अस्य वाचकशब्दा वर्णाभिधानतन्त्रे उक्ता यथा "नो गर्जिनी क्षमा सौरिर्वीरुधो विश्वपावनी। मेषश्च सविता नेत्रं दन्तुरो नारदोऽङ्गनः। अर्द्धांगाभो हिरण्यश्च वामपादाङ्गुलेर्नखः। वैनतेयः स्रुतिर्वत्सभवाऽनर्घो निरागमः। वामनो ज्वालिनी दीर्घो निरीहः सुगतिर्वियत्। शब्दात्मा दीर्घघोषा च रुक्मिनाडुरमेचकौ। गिरिनायकनीलौ च शिवोऽनादिर्महामतिः"। अस्य ध्यानं यथा "ध्यानमस्य नकारस्य वक्ष्यते शृणु भाविनि!। दलिताञ्जनवर्णाभां लसल्लिङ्गां शुभोदयाम्। चतुर्भुजां कोटराक्षीं चारुचन्दनचर्चिताम्। शुक्लाम्बरपरीधानामीषद्धास्यसमन्विताम्। एवं ध्यात्वा नकारन्तु तन्मन्त्रं दशधा जपेत्" तत्स्वरूपं यथा "नकारं शृणु चार्वङ्गि! कोटिविद्युल्लताकृतिम्। पञ्चदेवमयं वर्णं स्वयं परमकुण्डली। पञ्चप्राणात्मकं वर्णं क्षुदि भावय पार्वति!" कामधेनुतन्त्रम्। बाह्यकावर्णन्यासे अस्य वामपादाङ्गुलिनखे न्यासता। काम्यादौ प्रथमप्रयोगे फलं यथा "दोषः सौख्यं सदं नः" ह०व० टीकोक्तम्।

धातुपाठे ये आदितया पठितास्ते प्रयोगकाले नादिपूर्वका भवन्ति, यति निमित्ते पुनर्णत्वमापद्यन्ते। ये च नादितया पठितास्ते न णत्वमापद्यन्ते इति विवेकः।

न अव्य०नह-बन्धने नञ नार्थे-वा ड। १निषेधे २उपमायां च मेदि० ३नञर्थे च। अस्य समासे नलोपः सुडागमश्च न भवति। "संयामे नातिकोविदम्" भा० वि०४अ०। नञा समासे तु अनतिकोविदमिति स्यात्। एकयोना विंशतिरित्यादिवाक्ये एकाद्यविंशतिः एकाद्यविंशतिरित्यादि। नासत्यौ नाकदत्यादौ च नञ्शब्दसमासेऽपि प्रकृतिवद्भावविधानात् न नलोपादि। नैकधानाराचनान्तरीयकादयस्तु नञ्शब्देन "सह सुपेति" पा० समासात् सिद्धा सि०कौ०। गणरत्ने अयं चादिषु पठितः। "किंचित् प्रत्युत यच्च कञ्चन न कं धत्ता समंसाक्षमः" इति तट्टीकायां "नेति निषेधोपमानयोरित्युक्ता उदाहृतम् "नैकः सुप्तेषु जागृयात्"। "तिष्ठा देवो न सविता" इति न सविता सवितेवेत्यर्थः" इति। ४नकारस्वरूपवर्णे पु०। "दोषः सौख्यं सदं" न इति ह०र०टीका "नोगर्जिनी क्षमा" इत्यादिवर्णोक्तिधानम्। नञर्थश्च नञ्शब्दे वक्ष्यते। भावे बा० ड। ५बन्धे पु०। नम-कर्तरि कर्मणि वा ड। ६सुप्ते ७क्षिप्ते च पु० दस्तुते त्रि० मेदि०। ८रत्ने पु०। एकाक्षरकोषः।

नंशुक त्रि० "पचिनश्योर्णुकन् कतौ च" उणा० णुकन् तुमागमश्च। अर्थौ उज्ज्वलद०। यावत्पर्यन्तं गत्वाभावो विनश्यति तावत्परिमाणे।

नं दृ त्रि०नञ-दृ क्विप् तुम् च। नाशप्रतियोगिनि पदे नञ्शब्दतत्त्वार्थं स्त्रियां ङीप्।

नःक्षुद्र त्रि० नसा क्षुद्रः। क्षुद्रनासिके हेम०।

नक् अव्य० नञ-क्विप् वा० कुत्वम्। रात्रौ "अपक्षतुरक्षसो नक्तञ्चिदीते" ऋ०७।७१।१। स्वरादिगणे ओक् ओक् नक् कमिति क्वचित् पाठो दृश्यते। सि०कौ० गणरत्ने च ओक् नक् च न दृश्यते।

नकिञ्चन त्रि० नास्ति किञ्चन यस्य नञर्थस्य नञ्शब्दस्य "सह सुपेति" पा० समासः। अकिञ्चने दरिद्रे "सर्वकामरसैर्हीनाः स्यानभ्रष्टा नकिञ्चनाः" भा०उ०१२२अ०। नञा मयू० समासे नञो नलोपे अकिञ्चन इत्येव। "स्याने भवानेकनराधिपः सन्नकिञ्चनत्वं मखजं व्यनक्ति" रघुः। "अकिञ्चने किञ्चन नायिकाङ्के किमारकूटाभरणेन न स्त्रियः" नैष०।

नकिम् अव्य० न किम् च चादिपाठात् अव्ययत्वं नञ्शब्देन समासः। वर्जनार्थे मनोरमा। एवं पृषो० नकिम् न किर् नकीम् एतेऽपि वर्जने मनोरमा

नकुच पु० न कुचति कुच-सङ्कोचे नञ्शब्देन समासः। (भान्दार) डड्डहक्षे अमरः। [यङ्लुगा०।

नकुट न० न कुटति कुट-क नञ्शब्देन समासः। नासिकायां

नकुल पुंस्त्री नास्ति कुलमस्य "नञ्सुभ्याम्" इत्यादिना कप्। सर्पशत्रौ मार्जारे च। "नञ्सुभ्याम्" पा० नञो न नलोपादि। (वेजी) ख्याते १जन्तुभेदे स्त्रियां

ङीष्। "नकुलः पित्तिको वातनाशी श्लेष्मकफिलश्च" राजनि॰ तन्मांसगुण उक्तः। २षष्ठीतः शेषे मातृग्रामस्विनीकुमारार्य्यां जाते ग्रहभेदे "ततो मातृो विचार्य्यैवं जगाम मनसाऽस्विनौ। तावागम्य सुतौ तस्यां जनयामासतुर्यमौ। नकुलं सहदेवञ्च रूपेणा प्रतिमौ भुवि" "पूर्वजं नकुलेत्येवं सहदेवेति चापरम्। मातृीपुत्रावकथयंस्ते विप्राः प्रीतमानसाः" भा॰ आ॰ १२४अ॰। २पुत्रे पु॰ मद्रमाता। ४गिवे च "युधिष्ठिरस्य या कन्या नकुलेन विवाहिता" विष्णुस्त॰। ५कुक्करहितमात्रे त्रि॰ गौरा॰ ङीष् नकुली इकुकुरां ७अटामांसां स्त्री मेदि॰। ८अस्थिन्यां स्त्री इकुकुरे हेमच॰ जातौ ङीष्। १०नकुलजातिस्त्रियाञ्च।

**नकुलाख्या** स्त्री नकुलाद्या। गन्धनाकुल्यां राजनि॰।

**नकुलान्धता** स्त्री नकुलस्येवान्धता। सुश्रुतोक्ते नेत्रविकाररूपरोगभेदे "यो नकुलान्धो नकुलान्धता च नक्तीरसंज्ञा च तथैव दृष्टिः" इत्युदिश्य "विद्योतते या तु नरस्य दृष्टिर्दोषाभिपन्ना नकुलस्य यद्वत्। चिलाषि रूपाणि दिवा स पश्येत् स वै विकारो नकुलान्ध्यसंज्ञः" इति लक्षिता नकुलान्ध्यमध्यत्र।

**नकुलीश** पु॰ काशीपीठस्थे भैरवभेदे "नकुलीशः कालिपीठे दक्षपादाङ्गुली मता" पीठमाला २कारे वर्णाभिधानम्। "नकुलीशोऽग्निमारूढो वामनेत्रार्द्धचन्द्रभृत्" तन्त्रसारे (ह्रौं) बीजोद्धारः। नकुलेश्वरादयोऽप्यत्र। [त्रि॰।

**नकुलेष्टा** स्त्री इत॰। १राज्ञायां अमरः। २नकुलस्य प्रिये

**नक्क** नाशने चुरा॰ उभ॰ सक॰ सेट्। नक्कयति ते अनन्नक्कत्। लोपदेशत्वाभावात् अनक्कति इत्यादौ न अत्वम्।

**नक्त** न॰ नज्–क्त। रात्रौ "रूपहृते दृशे नक्तया चित्" ऋ॰४।१।१। "नक्तया चिद् रात्रावपि" भा॰ सप्तमीस्थाने याच्। तत् अकृत्वेनाव्ययत्वं अच्। २व्रतभेदे तद्व्रतकालादि कालमाधवीये निर्णीतं यथा "अथ नक्तं निर्णीयते। तत्र वाराहपुराणे धान्यव्रते पठ्यते "मार्गशीर्षे सिते पक्षे प्रतिपद्दा तिथिर्भवेत्। तस्यां नक्तं प्रकुर्वीत रात्रौ विष्णुं प्रपूजयेदिति"। अत्र नक्तशब्दो भोजनपरः कालपरत्वे प्रकुर्वीतेत्यस्यानन्वयात्। न हि कालः केनचित्कर्त्तुं शक्यते। तस्य भोजनस्य रात्राविति कालविधिः। अतो दिवाभोजनरहितत्वे सति रात्रिभोजनं व्रतस्य स्वरूपम्। अन्यथा स्वतःप्राप्तस्य रात्रिभोजनस्य विधानवैयर्थ्यात्। तस्य च नक्तभोजनस्य विष्णुपूजनमङ्गम् तत्सन्निधौ पठितत्वात्। तथा होमोऽपि तदङ्गम् "होमं च तत्र कुर्वीत" इत्यभिधानात्। एवं च सति प्रधानाविरोधेन पूजा होमयोरङ्गयोर्दिवानुष्ठानसङ्गः भवति। प्रधानस्य च नक्तस्य कालद्वयं भविष्यत्पुराणे दर्शितम् "सङ्ध्यर्क्षेनं दिनं नक्तं प्रवदन्ति मनीषिणः। नक्षत्रदर्शनान्नक्तमहं मन्ये गणाधिप!" इति। अस्य च कालद्वयस्याधिकारिभेदेन व्यवस्थामाह देवलः "नक्षत्रदर्शनान्नक्तं षट्त्रिंशस्य बुधैः स्मृतम्। यतेर्दिनाष्टमे भागे तस्य रात्रौ निषिध्यते" इति। अन्यत्रापि "नक्तं निशायां कुर्वीत षट्त्रिंशो विधिसंयुतः। यतिश्च विधवा चैव कुर्यातु सदिवाकरम्। सदिवाकरं तु तत्प्रोक्तमन्यत्र घटिकाद्वये। निशानक्तं तु विप्रेयं यामार्द्धं प्रथमे सदेति" रात्रिनक्तभोजने व्यासः "त्रिमुहूर्त्तः प्रदोषः स्याद्भानावस्तंगते सति। नक्तं तत्र कर्त्तव्यमिति शास्त्रविनिश्चयः" इति तदेवं नक्तव्रतकालौ व्यवस्थितौ। तत्र नक्तं प्रदोषव्यापिन्यां तिथौ कार्य्यम् तदाह यमः "प्रदोषव्यापिनी ग्राह्या तिथिर्नक्तव्रते सदा। एकादशीं विना सर्वां शुक्ले कृष्णे तथा सुता" इति। एकादश्यां तु यन्नक्तं तत्तदुदयव्यापिनी तिथिर्ग्राह्या तदुक्तं स्कन्दपुराणे "प्रदोषव्यापिनी ग्राह्या सदा नक्तव्रते तिथिः। उदयस्था सदा पूज्या हरिनक्तव्रते तिथिः" इति। चतुर्थ्येकभक्तन्यायेन षोढ़शविधभेदा उत्तरत्रोपयोगाः। मध्याह्नप्रदोषयोरेव भिन्नत्वात्। पूर्वेद्युरेव प्रदोषव्याप्तौ पूर्वतिथिर्ग्राह्या। परेद्युरेव प्रदोषव्याप्तौ परतिथिः। उभयत्र प्रदोषव्याप्तौ परतिथिरेव तदाह जाबालिः "सदैव तिथ्योरुभयोः प्रदोषव्यापिनी तिथिः। तत्रोत्तरत्र नक्तं स्यादुभयत्रापि सायतः" इति। उभयत्रापि दिवारात्रौ च सा तिथिर्विद्यते यत इत्यर्थः। उभयत्र प्रदोषव्याप्त्यभावेऽपि परैव तदाह जाबालिः "अतयात्वे परत्र स्यादस्तादर्वाक् यतो हि सेति"। प्रदोषे तदभावेऽप्यस्तमयादर्वाग्गतः सा विद्यते ततः सा ग्राह्येत्यर्थः। अस्य च दिवारात्रव्रतत्वेन प्रदोषव्याप्तिर्वह्न्यायङ्गत्वव्याप्तिरपि निर्णयहेतुर्भवतीत्यनेनाभिप्रायेणाङ्गस्तमयादित्युक्तम्। दिवारात्रिव्रतत्वं च कूर्मपुराणेऽभिहितम् "प्रदोषव्यापिनी यत्र त्रिमुहूर्त्ता यदा दिवा। तदा नक्षत्रतं कुर्य्यात् स्वाध्यायस्य निषेधवत्" इति। यद्यत्र प्रदोषकालस्यायङ्गत्वौ द्वावेव प्रयोजकौ प्रतिभासेते

तथापि प्रदोषव्याप्तिर्मुख्यः कल्पः। सायङ्कालव्याप्तिरनुकल्प इति आषाढिवचनादवगम्यते। तत्र ज्ञातत्वात् इति प्रदोषव्याप्त्यभावमनूद्य तादृक्त्वाप्तिषेधांशस्ते व्यर्थांशादृवत इति हेत्वपन्यासात्। दैवज्ञे विषये षट्कस्योऽपि यतिवद्दिवा नक्तमाचरेत् तदुक्तं स्कन्दपुराणे "प्रदोषव्यापिनी न स्याद्दिवा नक्तं विधीयते। आत्मनो हिंसुषच्छायामतिक्रामति भास्करे। तत्रक्तं नक्तमित्याहुर्न नक्तं निशि भोजनम्। एवं ज्ञात्वा ततो विद्वान् सायाह्ने तु भुजिक्रियाम्। कुर्यान्नक्तव्रती नक्तफलं भवति निश्चितमिति"। यत्तु सप्तमीभानुवासरादौ सौरनक्तं विहितं तत्र पूर्वोक्तविपर्ययेण सायङ्कालव्याप्तिर्मुख्यः कल्पः। प्रदोषव्याप्तिरनुकल्पः। एतदेवाभिप्रेत्य स्मरन्तः "त्रिमुहूर्त्तस्तु गोधाह्नि निशि वै तावती तिथिः। तस्यां सौरं भवेन्नक्तमहन्येव तु भोजनमिति" अत्र सायंव्याप्तेर्मुख्यकालत्वात् प्रथमतो निर्देशः। प्रदोषव्याप्तेरनुकल्पत्वात् पश्चान्निर्देशः। इतरनक्तेषु तु प्रदोषव्याप्तेरनुकल्पत्वादुदाहृतकूर्मपुराणवचने सैव प्रथमं निर्दिष्टा सायंकालव्याप्तिः पश्चान्निर्दिष्टेति विवेकः। तेष्वितरनक्तेषु प्रदोषव्यापितिथिषट्कयोऽपि भानुवासरसंक्रान्त्यादिना षट्कस्यापि यदा रात्रिभोजननिषेधः तदा दिवैव नक्तं कुर्यात् तथा च भविष्योत्तरपुराणे "ये त्वादित्यदिने मूढा नक्तव्रतं कुर्वन्ति मानवाः। दिनान्ते तेऽपि मुञ्जीरन् निषेधाद्रात्रिभोजने" इति। तस्मिंश्च दिवाभोजन उत्तमोऽस्तमयो मुहूर्त्तौ, मध्यम उपान्त्यः, ततः प्राचीनो जघन्यः। एवं च सत्यस्तमयागतिमुहूर्त्तवचनान्युपपद्यन्ते रात्रिभोजनेऽपि घटिकात्रयमुत्तमः कालः। घटिकाषट्कं मध्यमः कालः एतदेवाभिप्रेत्य वचनं कार्य्यते "प्रदोषोऽस्तमयादूर्द्धं घटिकात्रयमिष्यते" इति। "त्रिमुहूर्त्तः प्रदोषः स्याद्दिवावस्तं गते रवौ" इति। निशीथपर्य्यन्तो जघन्यः कालः। "नक्तं प्रकुर्वीत रात्राविति" सामान्येनाभिधानात्। अथौर नक्तेषु साम्येन वैषम्येण वा दिनद्वये प्रदोषैकदेशव्याप्तौ परेद्युरेव नक्तं कार्य्यम् सायंकालस्य गौणस्य तत्तिथिव्याप्तत्वात्। अत्राप्येकभक्तवदन्याङ्गं नक्तोपवासस्थानीयनक्तयोर्निर्णयो द्रष्टव्यः। यथोक्तलक्षणलक्षितयोरेकभक्तनक्तयोरेकस्मिन् दिने यदा प्रसक्तिस्तदा कार्यं कर्त्तव्यम्। न चैताद्दशी प्रसक्तिरेव नास्तीति शङ्कनीयम्। भविष्योत्तरपुराणोक्ते रथसप्तमीव्रते कदाचित्तत्प्रसक्तेः। तथाहि तत्र तृतीयादिषु सप्तस्वन्तेषु पञ्चसु दिनेषु क्रमेणैकभक्तनक्तायाचितोपवासपारणानि विहितानि। तत्र यदा तृतीया यामत्रयपरिमिता तत उर्द्धं चतुर्थी तदा मध्याह्नव्यापित्वात् तृतीयैकभक्तं तत्र प्राप्तं प्रदोषव्यापित्वाच्चतुर्थीनक्तमपि तत्रैव तथा सति परस्परविरोधो दुःपरिहरः। अत्रोच्यते। एकभक्तस्य प्राधान्यात् प्रबलत्वेन तस्मिन्मुख्यकल्प एवानुष्ठेयस्तद्विरोधिनि तु नक्तेऽनुकल्पः। स च द्विविधः दिनान्तरानुष्ठानात् कर्त्तृन्तरानुष्ठानाच्च। यदा चतुर्थी परेद्युर्द्वा सायंकालं व्याप्नोति तदा तस्य गौणकालव्यापित्वादेक एव कर्त्ता दिनभेदेन व्रतद्वयमनुतिष्ठेत्। यदा चतुर्थी समा क्षीणा च। तदा गौणकालस्याप्राप्तत्वेन पूर्वेद्युरेव भार्यापुत्रादिना कर्त्तृन्तरेण तन्नक्तं कारणीयम्।" "अहःसु तिसृषु प्रायः कर्म्मानुष्ठानतो दिवा। नक्तव्रतादितयोगे तु रात्रियोगो विधिष्यते" इति॰त॰ सामान्योक्तिः एकविषयपरिहारेण प्रवर्त्तनीया। अस्य प्रशंसा देवीपु॰ यथा

"उपवासात् परं भैक्ष्यं भिक्षापरमयाचितम्। अयाचितात् परं नक्तं तस्मान्नक्तेन वर्त्तयेत्। देवैस्तु भुक्तं पूर्वाह्णे मध्याह्ने ऋषिभिस्तथा। परार्द्धे पितृभिर्भुक्तं सन्ध्यायां गुह्यकादिभिः। सर्ववेलामतिक्रम्य नक्ते भुक्तमभोजनम्। वामाचारे सदादेव! नक्तमेवोद्धरेच्छ्रियम्" विष्णुधर्म्म २यण्डभेदे "विभोरस्यास्तु पृथुषेणः तस्य नक्तं चाक्षुष्यां जज्ञे नक्तादतिबलो मयो राजर्षिप्रवरः" भाग॰ ६।१५। ४लक्ष्यते लि॰। [टीकायां भरतः

**नक्तक** पु॰ नक्त इव कायति कै–क। (नेकड़ा) कर्कटे अमर॰

**नक्तचारिन्** पु॰ नक्ते रात्रौ चरति चर–णिनि ७त॰। १विड़ाले २पेचके त्रिका॰ रात्रिचारिमात्रे त्रि॰। नक्तचरादयोऽप्यत्र "अवेक्षन्नक्तचरान् सर्वान् स्वपरोक्षित धूर्गतः" भा॰श्रा॰ १॰अ॰।

**नक्तञ्चर** पुंस्त्री नक्तं रात्रौ चरति चर–ट ७त॰। १राक्षसे हला॰ स्त्रियां ङीप्। २गुग्गुलौ जटा॰। ३चौरे ४पेचके शब्दार्थचि॰। ५रात्रिचरमात्रे त्रि॰

**नक्तञ्चर्या** स्त्री नक्तं चर्या चरणम्। रात्रौ चरणादौ "नक्तञ्चर्यां दिवास्वप्नमालस्यं पैशुनं मदम्। अतियोगमयोगञ्च त्रयोऽर्थी परिवर्जयेत्" भा॰श्रा॰२८६अ॰।

**नक्तञ्चारिन्** त्रि॰ नक्तं चरति चर–णिनि। रात्रिचारिमात्रे "दिवाचरेभ्यो भूतेभ्यो नक्तञ्चारिभ्यएव च" मनुः।

**नक्तञ्जात** त्रि॰नक्तं रात्रौ जातः। १रात्रिजाते २ओषधिभेदे स्त्री "नक्तञ्जातया ओषधे! रामे कृष्णे असिक्ने च" अथ॰ १।२३।४। नक्तप्रभवादयोऽप्यत्र

**नक्तन्** न॰ नञ-क्त॰ तनिन्। रात्रौ "वयो ये भूतो यतयन्ति नक्तभिः" ऋ॰७।१०४।१८ "नक्तभिः रात्रिभिः" भा॰

**नक्तन्तन** त्रि॰ नक्तम् रात्रौ भवः ध्रुव॰ टट् च। रात्रिभवे "इदं नक्तन्तनं दाम पौष्णमेतद्विचातनम्" भट्टिः। स्त्रियां ङीप्।

**नक्तन्दिव** न॰ नक्तं रात्रौ च दिवा दिने च समाहारे द्वन्द्वोः द्वन्द्वः अचतुरेत्यादिना नि॰ अच्। रात्रौ दिनेचेत्यर्थे। "विभज्य नक्तन्दिवमक्षतन्द्रिणा" किरा॰

**नक्तभोजिन्** त्रि॰ नक्तं रात्रौ भुङ्क्ते भुज-णिनि। व्रतार्थं दिवाऽभोजनेन रात्रिभोजिनि दिवाभोजनाभावविशिष्टरात्रिभोजनकर्त्तरि "हविष्यभोजनं स्नानं सत्यमाहारलाघवम्। अग्निकार्यमधः शय्यां नक्तभोजी घडाचरेत्" भविष्यपु॰।

**नक्तम्** अव्य॰नञ-क्त॰ ब्रीडे वा॰ तस्। रात्रौ अमरः। "तुषार मूर्त्तेरिव नक्तमंशवः" माघः। "महोषधीर्नक्तमिवात्मभासः" कुमा॰।

**नक्तमाल** पु॰ नक्तम् रात्रौ या अलति अल-अच्। करञ्जवृक्षे अमरः। "मरुद्विरानर्त्तितनक्तमाले" रघुः।

**नक्तमुखा** स्त्री नक्तं नक्तव्रताङ्गं मुखमाद्यभागोऽस्याः। रात्रौ हुना॰ यथा रात्रिप्रथमभागस्य नक्तव्रताङ्गं तथा नक्तशब्दे उक्तं दृश्यम्।

**नक्तव्रत** न॰ "नक्तं निशायां कुर्वीत स्नेहस्थो विधिसंयुतः। निशि व्रतं तु विज्ञेयं यामार्द्धे प्रथमे सदा" इत्युक्तलक्षणे दिवाभोजनाभावविशिष्टे रात्रौ प्रथमयामार्द्धे भोजनरूपे व्रते नक्तशब्दे दृश्यम्। [कलिकायां राजनि॰।

**नक्ता** स्त्री नञ-क्त॰ ब्रीडे क वा॰ तस्य नः। (रैंशलाङ्गली)

**नक्तान्ध्य** न॰नक्ते अन्ध्यम्। भावप्र॰उक्ते रात्रौ दृष्टिरोधित्वात्पादके नेत्ररोगभेदे "कृष्णे श्वेता दृष्टौ पटलत्रयकृतो नक्तान्ध्यं करोतीत्याह त्रिषु स्थितोऽयः पटलेषु दोषो नक्तान्ध्यमापादयति प्रसह्य। दिवा न पश्यत्यथ वेत्ति दृष्टिः प्रयत्नेतु तु रूपाणि कफात्प्रभावात्"। दोषोऽत्र कफजः कफस्योपक्रान्तत्वात्। नक्तान्ध्यञ्च श्लेष्मविदग्धदृष्टावन्तर्भावात् न पृथग् गणना। "रैम्भ" इत्यादर्शे नक्तान्ध्यकाचाज्ञीलीरोगं तैमिरं चाञ्जनेन" सुश्रुतः। तद्युक्तमानवे नक्तान्ध्य एवेत्र "आगन्तुं नाशिनीतोत्थं नक्तान्धानां प्रशस्यते" सुश्रुतः। नेत्ररोगशब्दे दृश्यम्।

**नक्र** पुंस्त्री न क्राम्यति दूरस्थत्वम् क्रम-ड नञ्वाडित्यादिना नञः प्रकृतिभावः। १कुम्भीरे अमरः स्त्रियां जातित्वात् ङीष्। (झषकाट) २हारयष्ट्याद्यवदाकृतिे ३नासिकायाञ्च न॰ मेदि॰। "हृदा प्रसन्ना इव गूढनक्राः" "ग्राहाविभिन्नामपगूढनक्राम्" रघुः। "अष्टजाः पक्षिणः सर्पा नक्राः मत्स्याश्च कच्छपाः" मनुः नासिकायां स्त्री शब्दमाला। ४जलजन्तुभेदे मकरादौ च "तथा चेन्नाचरेयं नयेत नक्रकेतनः अथैनैकेनाकीर्त्तनीयां दशां जनश्चैनम्" काद॰। "नक्रकेतनः मकरध्वजः" इत्यर्थः।

**नक्रराज** पु॰ ६त॰ टच् समा॰। जलजन्तुप्रधाने (हाङ्गर) ख्याते जलजन्तुभेदे हारा॰।

**नक्रहारक** पु॰ नक्रमपि हरति हृ-ण्वुल् ६त॰। (हाङ्गर) ख्याते जलजन्तुभेदे हारा॰।

**नच** गतौ भ्वा॰ पर॰ सक॰ सेट् निघण्टुः। नचति अनची ननच। "नचद्भामं ततुरिं पर्वतेषां" ऋ॰ ६।२२। "नि त्वा नच्य! विशपते! शुम्नम्" ७।१६।७ "ये नच्य उपगम्य नचतिर्गतिकर्मा" भा॰

**नचत्र** न॰नच-अत्रन् न चीयते चरते वा-वा॰ नि॰नञ्वाडित्यादिनिपा॰ नञः प्रकृतिभावः। अश्विन्यादिषु सप्तविंशतितारासु नक्षत्राभिमानिदेवताश्च अश्विन्यादयः दक्षसुताः चन्द्रकक्षत्वाच्च तत्कथा कालिकापु॰२०अ॰ कालिकापु॰ शब्दे २०१३ पृ॰ दृश्यम्। ताश्च "अश्विनी भरणी चैव कृत्तिका रोहिणी तथा। मृगशीर्षं तथैवार्द्रा तथा चैव पुनर्वसुः। पुष्याश्लेषासघा पूर्वफल्गुन्युत्तरफल्गुनी। हस्तास्चित्रास्वातयश्च विशाखा अनुराधिका। ज्येष्ठा मूला तथा पूर्वोत्तराषाढे ततःपरम्। श्रवणा च धनिष्ठा च तथा शतभिषाह्वया। पूर्वोत्तरे भाद्रपदे रेवती च भसंज्ञकाः" ज्यो॰ तत्त्वानि अश्विनक्षत्रशब्दे पृ॰ दृश्यम्। २सङ्कामयवहारभेदे स च नक्षत्रसंख्यया सप्तविंशत्यारचितः। "नक्षत्रमालाभरणमिव मदनद्विपस्य" काद॰। नक्षत्रं च २१६००कलात्मकस्य राशिचक्रस्य सप्तषष्टिकलात्मकम् "भोगोऽष्टशती सिप्रा" सू॰सि॰ तन्नोः युक्तश्चैतत् २१६०० कलात्मकस्य तस्य २७ विंशत्या भागे ८०० शतान्येन कला लभ्यन्ते। तेषां योगतारारूपादिकमस्तेषाशब्दे ४८७पृ॰ उक्तम् विक्षेपादयश्च खगोलशब्दे २४२४।२५ पृ॰ उक्ताः। तेषां प्रयोगे विशेषभेदश्च यथा "हस्तास्वातिश्रवणा

अक्षीवे सृगशिरा न दृंसि स्यात्। दृंसि पुनर्वसुपुष्यौ मूलश्लेषायां श्रेषाः स्त्रियां बोध्याः" इदं प्राधिकम्।

**नक्षत्रकान्तिविस्तार** पु० नक्षत्रकान्तीनां विस्तारो यत्र। धवलद्यावनाले राजनि०।

**नक्षत्रगण** पु० नक्षत्रघटितो गणः षड्दायभेदः। ह०सं० उक्ते नक्षत्रविशेषाणां समूहात्मके गणभेदे। तत्र गणभेदस्य संज्ञाभेदाःकार्यविशेषोपयोगिसं च ह०सं०९८अ०उक्तं यथा "त्रीण्युत्तराणि तेषां रौहिण्यश्च ध्रुवाणि। तैः कुर्यात्। अभिषेकयात्रोत्तरनगरधर्मबीजध्रुवारम्भान्। मूलशिवाजभुजगाधिपानि तीक्ष्णानि। तेषु सिद्ध्यन्ति। अभिघातमन्त्रवेताडवन्धवधभेदसम्बन्धाः। उग्राणि। पूर्वभरण्यौपित्र्याण्युग्रसादनाग्न्याधेयेषु। योज्यानि बन्धविषदहनयन्त्रघातादिषु च सिद्ध्यै। मृदूनि। हस्ताश्विनपुष्याः पशुरतिस्नानभूषणकलासु। शिल्पौषधयानादिषु सिद्धिकराणि प्रदिष्टानि। मृदुतीक्ष्णक्षिप्रसंज्ञानि। क्षुरतविधिस्त्रभूषणमङ्गलगीतेषु च हितानि। क्रौरभुजं सविषाखं मृदुतीक्ष्णं तद्विमिश्रफलकारि"। ह्रत०। २ताराचक्रे च।

**नक्षत्रचक्र** न०नक्षत्राणां चक्रं यत्र। १राशिचक्रे २तन्त्रोक्ते दीक्षोपयोगिचक्रभेदे चक्रशब्दे २८०९पृ० दृश्यम्।

**नक्षत्रजात** न० नक्षत्रे तद्विशेषे जातं जन्म। ह०सं० उक्ते नक्षत्रविशेषे जन्मनि। तत्फलचिन्तफलं तत्रोक्तं यथा "प्रियभूषणः सुरूपः सुभगो दक्षोऽश्विनीषु मतिमांश्च। ऋतनिश्चयसत्यारुग् दक्षः सुखितश्च भरणीषु। बहुभुक् परदाररतश्चेज्ञो ऋक्षेषु विख्यातः। रोहिण्यां सत्यशुचिः प्रियंवदः स्थिरसुरूपश्च। चपलश्चतुरो भीरुः पटुरुत्साही धनी सृगे भोगी। अटगर्वितचण्डऋतघ्नहिंस्रपापश्च रौद्रर्क्षे। दान्तः सुखी सुशीलो दुर्मेधा रोगभाक् पिशाचश्च। बालेन च सन्तुष्टः पुनर्वसौ जायते मनुजः। शान्तात्मा सुभगः पण्डितो धनी धर्मसंश्रितः पुष्ये। अटगर्वमत्सरापः ऋतघ्नधूर्तश्च औष्णर्क्षे। बहुभक्षधनो भोगी सुरपित्रभक्तो महोद्यमः पित्र्ये१०। प्रियवाग्दाता द्युतिमान् चटनो रूपसेवको भाग्ये११। सुभगो विद्याधनो भोगी सुखभाग् हितीयफल्गुन्याम्। उत्साही धृष्टः पानपोऽस्थो तस्करो हस्ते। चित्राम्बरमाल्यधरः सुलोचनाङ्गश्च भवति चित्रायाम्। दान्तो वणिक् कृपालुः प्रियवाग् धर्मान्वितः स्वातौ। दैर्घ्यनुन्नो द्युतिमान् वचनपटुः कलहकृद्विशाखासु। आशो विदेशवासी क्षुधालुरटनोऽनुराधासु। ज्येष्ठासु न बन्धुमित्रः सन्तुष्टो धर्मकृत् प्रचुरकोपः। मूले मानी धनवान् सुखी न हिंस्रः स्थिरो भोगी। दृढानन्दकलो वीरो दृढर्क्षेऽदृढ जलदेवे २०। वैश्वे २१ विनीतधार्मिको बन्धुमित्रकृतज्ञसुभगश्च। श्रीभाग्ध्रुवे श्रुतवान् उदारदारो धनान्वितः ख्यातः। दाताऽश्वरगीतप्रियो धनिष्ठासु धनलुब्धः। स्फुटवाग्व्यसनी रिपुर्वा वाडवाग्नेऽसृगभिघासु दुर्धाद्यः। मदूपदास्तद्दिग्मः क्षीजितधनपटुर्दाता च। वक्त्रा सुखी प्रजावान् जितश्रमुर्धार्मिको हितीयासु२६। सम्भूर्धाङ्गः सुभगः स्थिरधीरर्थवान् पौष्णे २७"।

**नक्षत्रदर्श** त्रि० नक्षत्रं पश्यति दृश-अण् उप०स०। १नक्षत्रवीक्षके। नक्षत्रं तत्फलं दर्शयति दृश-णिच्-अण्। २गणके ज्योतिर्विद्भेदे "प्रधानाय नक्षत्रदर्शम्" यजु० २०।१०पुरुषमेधे प्रधानोद्देशकमेध्यपशुबन्धने

**नक्षत्रदान** न० नक्षत्रभेदे दानम्। नक्षत्रभेदे द्रव्यभेदस्य दाने तत्र हेमा० दा० उक्तं यथा भारते

"नारद उवाच ऋक्षेषु महाभाग! पावनेन सदर्पिषा। सर्वार्थं प्राप्नुयान् साधून् लोकान् प्राप्नोत्यनुत्तमान्। रोहिण्यां पायसन्त्रेष्ठ! माषैरन्नेन सर्पिषा। पयोनुपानाद्दातव्यमान्द्यखार्थं द्विजातये। दोग्ध्रीं सवत्सान्तु नरो नक्षत्रे सोमदैवते ५। दत्त्वादित्यविमानस्थः स्वर्गं प्राप्नोत्यनुत्तमम्" सोमदैवतं नक्षत्रं, मृगशीर्षम्। "आर्द्रायां क्षरं दत्त्वा तिलमिश्रं समाहितः। नरस्तरति दुर्गाणि क्षुरधारांश्च पर्वतान्। पूपं पुनर्वसौ दत्त्वा घृतपूर्णं सुपाचितम्। यशस्वी रूपसम्पन्नो ब्रह्मणे जायते कुले। पुष्ये तु काञ्चनं दत्त्वा क्षतं चाक्षतमेव च। अनालोकेषु लोकेषु सोमवत् स विराजते"। क्षतं घटितम् अक्षतमघटितम्। "अश्लेषासु तथा रौप्यं घृतभं यः प्रयच्छति। स सर्वभयनिर्मुक्तः शास्त्रवानभिजायते। मघासु तिलपूर्णानि वर्द्धमानानि मानवः। प्रदाय पशुमांश्चैव पुत्रवांश्च प्रजायते। फाल्गुनीपूर्वसमये आक्षणानासुपोषितः। मक्षान् फाणितसंयुक्तान् दत्त्वा सौभाग्यमश्नुते। घृतक्षीरसमायुक्तं विधिवत् पद्मिकौदनम्। उत्तराविषये दत्त्वा स्वर्गलोके महीयते। ब्रह्मा प्रदीयते दानमुत्तराविषये नरैः। सदा फलमनन्तञ्च भवतीह विनिश्चयः"। फाल्गुनीपूर्वसमये, पूर्वफल्गुनीसमय इत्यर्थः। फाणितं गुडविकारः उत्तरा-

विषये उत्तरफाल्गुनीसमय इत्यर्थः। "हस्ते हस्तिरथं दत्त्वा चतुर्युक्तसुपोषितः। नरस्तरति दुर्गाणि सुरद्वारांच पर्वतान्"। चतुर्युक्तं, चतुर्भिर्हस्तिभिर्युक्तम्। "चित्रायां हयमं दत्त्वा पुण्याङ्गाङ्गां च भारत!। चरत्यप्सरसां लोके रमते नन्दने वने"। पुण्याङ्गाङ्गामिति शुभलक्षणचित्तशरीरां धेनुमित्यर्थः। "स्वातीष्वश्व धनं दत्त्वा वदिष्टतममात्मनः। प्राप्नोति लोकान् सुभगानिह चैव महद्यशः। विशाखायामनड्वाहं धेनुं दत्त्वाथ दुग्धदाम्। सप्तासङ्गञ्च शकटं सधान्यं वस्त्रसंयुतम्"। प्रासङ्गो युगान्तरकाष्ठम्। "पितॄन् देवांच प्रीणाति प्रेत्य चानन्त्यमश्नुते। न च दुर्गाण्यवाप्नोति स्वर्गलोकं च गच्छति। दत्त्वा यथोक्तं विप्रेभ्यो इष्टमिष्टां स विन्दति। नारकीयांच स क्लेशान्नाप्नोतीति विनिश्चयः। अनुराधासु प्रावारवस्त्रोत्तरसुपोषितः। दत्त्वा युगशतं वापि नरः स्वर्गे महीयते"। प्रावारः प्रवारपटः, वस्त्रोत्तरं परिधानवस्त्रादिकम्। "कालशाकन्तु विप्रेभ्यो दत्त्वा मर्त्यः समूलकम्। ज्येष्ठायां मृत्युसुत्सृज्य गतिमिष्टाञ्च गच्छति। मूले मूलफलं दत्त्वा ब्राह्मणेभ्यः समाहितः। स्वपितॄन् प्रीणयेदेव गतिमिष्टाञ्च गच्छति। अथ पूर्वाषाढासु दधिपात्राण्युपोषितः। कुलवृत्तोपसम्पन्ने ब्राह्मणे वेदपारगे। प्रदाय जायते श्रेष्ठकुले बहुगुणाकुले। पुत्रपौत्रैः परिवृतः पशुमान् धनवांस्तथा। उदमन्थं सर्पिष्कं प्रसृतसुपक्वान्वितम्। दत्त्वोत्तराषाढासु सर्वलोकानवाप्नुयात्"। उदमन्थः उदकमिश्राः सक्तवः। क्वाथितं दुग्धखण्डविकारः। "दुग्धन्त्वभिजितो योगे दत्त्वा मधुघृतप्लुतम्। धर्मनिष्ठो मनीषिभ्यः स्वर्गलोके महीयते"। अयमर्थः। उत्तराषाढानक्षत्रचतुर्थपादः अवणस्याद्यघटिकाचतुष्टयमभिजिद्योगः। "अवणे कम्बलं दत्त्वा वस्त्रान्तरितमेव च। श्वेतेन याति यानेन स्वर्गलोकानसंशयान्। गोप्रयुक्तं धनिष्ठासु यानं दत्त्वा समाहितः। वस्त्रमश्विन्यं दत्त्वा प्रेत्य राज्यं प्रपद्यते। मन्थं शतभिषायोगे दत्त्वा वायुरचन्दनम्। प्राप्नोत्यप्सरसां लोकं प्रेत्य मन्थांच शाश्वतान्। पूर्वभाद्रपदायोगे राजमाषान् प्रदाय वै। सर्वभक्ष्यफलोपेतः स वै प्रेत्य सुखी भवेत्। क्षौरभक्तरायोगे यस्तु मांसं प्रयच्छति। पितॄन् प्रीणाति सकलान् प्रेत्यानन्त्यं समश्नुते"। उरभ्रो, मेषस्तस्य मांसमौरभ्रम्। "कांस्योपदोहनीं धेनुं रेवत्यां यः प्रयच्छति। स प्रेत्य कामानादाय दातारमुपतिष्ठति। रथमश्वसमायुक्तं दत्त्वाश्विन्यां नरोत्तमः। हस्त्यश्वरथसम्पन्ने वर्चस्वी जायते कुले। भरणीषु द्विजातिभ्यस्तिलधेनुं प्रदाय वै। गाः प्रसूताश्च प्राप्नोति नरः प्रेत्य यशस्विनः। भीष्म उवाच। इत्येष नक्षत्रयोहेयः प्रोक्तो नक्षत्रयोगतः। देवक्या नारदेनेह सुतार्थः साऽग्रयीदिदम्"। विष्णुधर्मोत्तरे "कृत्तिकासु सुवर्णस्य दानं बहुफलं स्मृतम्। रक्तवस्त्रस्य रोहिण्यां सौम्ये मे वस्त्रस्य च। कृशरस्य तथार्द्रायामादित्ये रजतस्य च। घृतस्य तु तथा पुष्ये गन्धानामथ सर्पिषः। तिलानान्तु तथा पैत्ये प्रियगोर्भगदैवते। आर्यमृक्षे घृतपूपानां वाह्निये पायसस्य तु। चित्रायां चित्रवस्त्राणां सक्तूनां वायुदैवते। ऐन्द्राग्न्ये चैव लोहानां मैत्रे माल्यफलस्य च। वस्त्रस्य च तथा त्राक्षे मूले मूलफलस्य च। शैलस्य मधुयुक्तस्य दानमाहुः महाफलम्। विश्वेदेवे उदपानस्य श्रवणे वसनस्य च। धान्यस्य वारुणे विप्रा वारुणे चौषधस्य च। याजे पुराणबीजानां सस्यानां तदनन्तरे। गोरसानां तथा पौष्णे स्नानानामथ वासवे। तिलानान्तु सदा दानं भरणीषु महाफलम्"।

**नक्षत्रनाथ** पु० ६त०। १चन्द्रे "नक्षत्रनाथः सस्पाजगाम" हरिवं० २१७ अ० "नक्षत्रनाथांशुरिवारविन्दे" रघुः। तस्य नक्षत्राधिष्ठातृदक्षसुतात्वादिकथात्वात् तथात्वम्।

**नक्षत्रनेमि** पु० नक्षत्रस्य तद्भस्य नेमिरिव। १ध्रुवतारके २चन्द्रे ३रेवत्यां च हेमच०। ४विष्णौ "नक्षत्रनेमिर्नक्षत्री क्षमः क्षामः समीहनः" विष्णुस०। "शिशुमारस्य ज्योतिश्चक्रस्य नेमिवत् प्रवर्त्तको हृदयस्थिता विष्णुरिति कथितो नक्षत्रनेमिः शिशुमारवर्णने "विष्णुर्हृदयमिति स्तुतेः" भा०

**नक्षत्रपति** पु० नक्षत्रं पाति पा-डति। चन्द्रे शब्दार्थचि०। नक्षत्रपत्यादयोऽप्यत्र।

**नक्षत्रपथ** पु० नक्षत्रोपलक्षितः पन्थाः षच् समा०। नक्षत्रचक्रस्य भ्रमणमार्गे। नक्षत्रमार्गादयोऽप्यत्र "व्यतीतनक्षत्रपथानि यत्र" माघः। स्वर्गोत्तमशब्दे दृश्यम्।

**नक्षत्रपदयोग** पु० "मेषगे भास्करे यत्र शीतगौ लोहगे यमे। नक्षत्रपदयोगोऽयं यत्र मेषादिलोचया" ज्यो०उक्ते राशेर्युद्धयात्राङ्गयोगभेदे।

**नक्षत्रपुरुष** पु० नक्षत्रदेवाङ्गविशेषैः पुरुष इव। नक्षत्रविशेषैरङ्गविशेषात्मकैः तन्नामव्रताङ्गे पुरुषे यस्य व्रताङ्गता व्रतनिमित्तकालस्य ह०सं०१०५अ० उक्तो यथा

"पादौ मूलं, जङ्घे च रोहिणी तथाश्विनः। जङ्घाषाढाद्वयमथ वृत्तं फाल्गुनीयुग्मम्। कटिरपि च कृत्तिकाः, पार्श्वयोश्च मघका भवन्ति भाद्रपदाः। कुक्षिस्था रेवत्यो, विशेषतश्चरो ऽनुराधा च। पृष्ठं विद्धि धनिष्ठा, भुजौ विशाखा, स्तनौ करौ हस्तः। अङ्गुल्यश्च पुनर्वसुरश्लेषार्द्रसंज्ञिताश्च नखाः। ग्रीवा ज्येष्ठा, अवयौ अवयवः, मुखं मृगशिरा नेत्रे। चित्रा ललाटसंस्था, शिरो भरण्यः, शिरोरुहाश्चार्द्रा। नक्षत्रपुरुषको ऽयं कर्तव्यो रूपभिज्ञैः। चैत्रस्य शुक्लपक्षे प्रातर्मूलसंस्थे चन्द्रे। उपवासः कर्तव्यो विष्णुं सम्पूज्य विप्रांश्च। दद्याद्धेते समाप्ते धेनूर्धं भाजनं सुवर्णयुतम्। विप्राय कांस्यविदुषे सरत्नवस्त्रं सयज्ञोपवीतं वा"। वामनपु० ७७अ० विस्तारो ऽन्यः।

**नक्षत्रभोग** पु० राशिचक्रस्थनक्षत्रायामैकैकदिने भोगः। २१६०० कलात्मकस्य सप्तविंशत्या सम भिन्नस्य ८००शतकलात्मके भोगे "भभोगोऽष्टशती छिन्ना" सू०सि०।

**नक्षत्रमान** न० ष० वि० उक्ते दिनादिमानभेदे अहर्गणशब्दे ६७६पृ० नाक्षत्रमानशब्दे च दृश्यम्।

**नक्षत्रमाला** स्त्री नक्षत्रसंख्यिका माला। १सप्तविंशतिमौक्तिकादिरचितमालायाम् अमरः। ह्तत्। २नक्षत्रसंख्यौ च "यावन्नक्षत्रमाला विचरति गगने भूमयन्नीव भासा" ह०सं०१०१अ०। ३स्फटिकनां मालाभेदे च "निशार्द्धसमयेनैव परिस्फुरत्सार्द्धचन्द्रनक्षत्रमालेन" काद० (गन्धस्फटिका)

**नक्षत्रयाजक** पु० नक्षत्रनिमित्तं दक्षार्थं याजयति यज-णिच्-ण्वुल्। नक्षत्रनिमित्तदोषोद्भावनेन शान्तिकारके अपकृष्टब्राह्मणे "याङ्गायका देवलका नक्षत्रयाजकाः। एते ब्राह्मणचाण्डाला महापथिक पञ्चमाः" भा०शा० ७६अ० तस्य निन्द्यता

**नक्षत्रयोग** पु०नक्षत्रभेदे योगः क्रूरयुक्तादिभिर्योगः। नक्षत्रव्यूहशब्दे वक्तव्ये नक्षत्रेषु क्रूरादियुक्तयोगे "सांवत्सरा ज्योतिषि चाग्नियुक्ताः नक्षत्रयोगेषु च निष्ठयन्नाः" भा०उ०४७ अ०

**नक्षत्रयोगिनी** स्त्री नक्षत्रैरभिमानितया युज्यते युज-घिनुण्। दाक्षायणीषु अश्विन्यादिषु "तस्यै नक्षत्रयोगिन्यः सप्तविंशतिरुत्तमाः। रोहिणीप्रमुखाः कन्या दक्षः प्राचेतसो ददौ" हरिवं० २२६अ०। रोहिण्याश्चन्द्रस्यातिप्रियत्वात् तन्नक्षत्रयुक्तर्क्षमिति बोध्यम्।

**नक्षत्रयोनि** स्त्री ६त०। विवाहादौ योनिकूटे उपवर्णशब्दे १२६०पृ०दृश्यम्। [अन्ये ज्योतिर्गणा दृश्य भा०शा०२६अ०

**नक्षत्रराज** पु० ६त० टच् समा०। चन्द्रे "नक्षत्रराजे वर्धमाने

**नक्षत्रलोक** पु० ६त०। नक्षत्राधिष्ठितलोकभेदे "कश्चिच्चन्द्रलोका श्रोताश्च प्रोताश्च नक्षत्रलोकेषु नागेति कश्चित्तु नक्षत्रलोका श्रोताश्च प्रोताश्च देवलोकेषु" मत०ब्रा० १४।६।६।। तल्लोकस्थानादिकं च काशीख०अ०उक्तं यथा

"दक्षः प्रजाविनिर्माणे दक्षो जातः प्रजापतिः। षष्टिर्दुहितरस्तस्य रूपलावण्यभूषणाः। सर्वा लावण्यवाहिन्यो रोहिणीप्रमुखाः स्मृताः। ताभिस्तदा तपस्तीव्रं प्राप्य वैद्येश्वरीं पुरीम्। आराधितो महादेवः सोमः(उमया सहितः)सोमविभूषणः। भवतोऽपि महादेव! भव! तापहरो हि यः। रूपेण भवता तुल्यः स भोक्ता भवतीति। सिद्धं संस्थाप्य तमहन्नक्षत्रेश्वरसंज्ञितम्। वरणायाग्नटे रम्ये सङ्गमेश्वरसन्निधौ। दिव्यं वर्षसहस्रन्तु पुरुषायितसंज्ञितम्। तपस्तप्तं महत्ताभिः पुरुषैरपि दुष्करम्। ततस्तुष्टो हि विश्वेशोऽत्यन्तरहस्यतमम्। सर्वासामेकचित्तीनामेकार्थस्थिरचेतसाम्। श्रीविश्वेश्वर उवाच। न ज्ञातं हि तपोऽत्युग्रमेतदन्याभिरीदृशम्। पुराऽवन्ताभिलक्षाहोनाम नक्षत्रमत्र वै। पुरुषायितसंज्ञेन तप्तं यत्तपसाऽधुना। भवतीभिस्ततः पुंस्त्वमिच्छया वो भविष्यति। ज्योतिश्चक्रे समस्तेऽस्मिन्नक्षत्रता भविष्यथ। मेषादीनाञ्च राशीनां योनयो यूयमुत्तमाः। ओषधीनां सुधायाश्च ब्राह्मणानाञ्च यः पतिः। पतिमन्यो भवत्योऽपि तेन पत्या शुभानना:!। भवतीनामिदं सिद्धं नक्षत्रेश्वरसंज्ञितम्। पूजयित्वा नरो गत्वा नक्षत्रलोकमुत्तमम्। उपरिष्टान्मृगाद्यस्य लोको वसु भविष्यति। सर्वासां तारकाणाञ्च मध्ये स्थान्या भविष्यथ। नक्षत्रपूजका ये च नक्षत्रव्रतचारिणः। ते यो लोके वसिष्यन्ति नक्षत्रसदृशप्रभाः। नक्षत्रयक्षराशीनां बाधा तेषां कदाचन। न भविष्यति ये काश्यां नक्षत्रेश्वरपूजकाः"।

**नक्षत्रविद्या** स्त्री नक्षत्राणां तत्रस्थितयक्षादीनां चारज्ञानाय विद्या। ज्योतिषविद्यायाम् "न चेत्तातनिमित्ताभ्यां न नक्षत्राङ्गविद्यया। मानुषाश्रवणाभ्यां भिक्षां लिप्सेत कर्हिचित्" मनुः। "विज्ञानेन वा ऋग्वेदं विजानाति" इत्युपक्रमे "ब्रह्मविद्यां भूतविद्यां क्षत्रविद्यां नक्षत्रविद्याम्" छा०उ०।

**नक्षत्रवीथि** स्त्री नक्षत्रैरङ्कितैर्देशैः कृता वीथिः शा०त०। गगनस्थाने नक्षत्रविशेषकृतायां वीथौ तद्भेदादिकं ह०सं० ६५० उक्तं यथा

"नागगजैरावतहयगोजरद्वयमृगालदहनाख्याः। अश्विन्याद्याः कैश्चित् त्रिभाः क्रमादीरिताः कथिताः। नागा ह पवनवाय्यानलानि, पैतामहात्त्रिभाश्चिस्रः। गोवीथ्यामश्विन्यः पौष्णं हे चापि भाद्रपदे। जारद्व्यां श्रवणात् त्रिभं मृगाख्या त्रिभं च मैत्राद्यम्। कृत्तिकाद्यास्वाद्याक्षजेत्यषाढाहयं दहना। तिसृभिश्चित्राद्यां क्रमादुदङ्मध्ययाम्यमार्गस्थाः। तासामभ्युत्तरमध्यदक्षिणस्थितैकैका। वीथीमार्गानपरे कवयन्ति यथा स्थिता भमार्गस्य। नक्षत्राद्यां तारा याम्योत्तरमध्यमाश्रितः। उत्तरमार्गो याम्यादिरभिजितो मध्यमस्तु भाग्याद्याः१०। दक्षिणमार्गोऽषाढादिः कैश्चिदेवं कृता मार्गाः। ज्योतिषमार्गमशास्त्रं विप्रतिपत्तौ न योग्यमस्माकम्। स्वयमेव विकल्पयितुं किन्तु बहूनां मतं वक्ष्ये। उत्तरवीथिषु शुक्रः शुभाशुभस्थितकृत्तिकाहृदयं वा। मध्यासु मध्यफलदः कटफलो दक्षिणस्थासु। अत्युत्तमोत्तमोभं सममध्यन्यूनमधमकटफलम्। कटतमं सौम्यादासु वीथिषु यथाक्रमं ब्रूयात्"।

**नक्षत्रव्यूह** पु०ष०सं०१५ उक्ते नक्षत्रविशेषस्य क्रूरादिवेधेन पुरुषविशेषाणां दृश्यभेदानां च शुभाशुभसूचके नक्षत्रसमूहे यथा "आग्नेयेऽसितकृत्तिकाहितास्मिन्नक्षत्रप्रसवभाग्नराः। आकरिकनापितद्विजघटकारपुरोहिताद्यन्नराः। रोहिण्यां स्थपतिपशूपधनियोगयुक्तयाकटिकाः। गोष्ठपजलचरकर्मणिकोद्यैश्वर्यसम्पन्नाः। मृगशिरसि सुरभिवस्त्राङ्गकृत्तमफलरत्नवनचरविचक्षणाः। मृगसोमपीथियान्वयवैद्यासका सेवकाश्च। रौद्रेऽस्मिन् वधबन्धनान्ततपरदारस्तेयाद्यभेदरताः। तृणधान्यतीक्ष्णमन्त्राभिचारवेतालकर्मज्ञाः। आदित्ये ऽमर्यादार्थशौचकृतरूपधीयशोऽर्थयुताः। उत्तमधान्या वणिजः सेवाभिरताः सचित्रिजनाः। पुष्ये यवगोधूमाः शाल्यो द्युवनानि मन्त्रिणो भूपाः। सन्धिकोपजीविनः साधवश्च यत्नेष्टसङ्गाश्च। अहिदेवेऽतिमकन्दमूलफलकीटपन्नगविषाणि। मघधनधरणाभिरतास्तृणधान्यं सर्वमिषजश्च। पित्र्ये१०धनधान्याद्यं कोठागाराणि पर्वताश्रयिणः। पित्तभक्षवचिक्कूराः क्रव्यादाः स्त्रीद्विषो मनुजाः। प्राक्फल्गुनीषु नटयुवतिसुभगगान्धर्वशिल्पिपण्यानि। कर्षासक्षवयमाषिकतैलानि कुमारकाश्चापि। आर्यम्ण्ये१२ मार्दवशौचविनयपाषण्डिदानशास्त्ररताः। शोभनधान्यमङ्गधनधर्मासुरताः समस्तजेन्द्राः। हस्ते तस्करकङ्कररक्षिकमङ्गामात्रशिल्पिपण्यानि। तृणधान्यं स्तनयुक्ता वणिजस्तोयुनाश्वाश्च। त्वाष्ट्रे१३ भूषणमणिरामवेश्मगान्धर्वगन्धयुक्तिज्ञाः। गणितपटुतन्तुवायाः शास्त्राक्षाराजधान्यानि। स्वातौ यमस्तुरगा वणिजो धान्यानि वातवस्त्राणि। अग्निरसौक्षुद्रधुस्तवतापसाः पण्यकुशलाश्च। इन्द्राग्निदैवते१६ रक्तपुष्पफलशाखिनः सतिलसङ्गाः। कर्षासमाषचणकाः पुरन्दरक्षत्राश्रमज्ञाश्च। मैत्रे१७ शौर्यसमेता गणनायकसाधुगोद्विजानरताः। ये साधवश्च लोके सर्वं च परस्वसत्त्वम्। मौरन्दरे१८ प्रतिशूराः कुलविक्षयशोऽन्विताः परस्वहृतः। विजिगीषवो नरेन्द्राः सेनानां चापि नेतारः। मूले भेषजभिषजो गणसख्याः कुसुममूलफलवार्ताः। वीजान्यतिधनयुक्ताः फलमूलैर्वै च वर्त्तन्ते। आपे२० स्थदशो जलमार्गगामिनः सत्यशौचधनयुक्ताः। सेतुकरवारिजीवकफलकुसुमान्यम्बुजातानि। विश्वेदेवे२१ महामात्रमल्लकरितुरगदेवताभक्ताः। स्थावरयोधा भोगान्विताश्च ये चौजसा युक्ताः। श्रवणे मायापटवो स्वलोद्युक्ताश्च कर्मसु समर्थाः। उत्साहिनः सधर्मा भागवताः सत्यवचनाश्च। वसुभे२३मानोन्मुक्ताः क्लीवास्त्रसौहृदाः स्त्रियां दृप्ताः। दानाभिरता बद्धचित्तसंयुताः शस्त्रपराश्च नराः। वरुणेऽस्मे२४ याधिकमत्स्यबन्धजलजानि जलचरा जीवाः। सौकरिकरजकशौण्डिकशाकुनिकाद्याश्च वर्मेऽस्मिन्। आजे२५ तस्करपशुपालहिंसकीनाशनीचशठचेष्टाः। धर्मव्रतैर्विरहिता नियुद्धकुशलाश्च ये मनुजाः। आहिर्बुध्न्ये२६ विप्राः क्रतुदानतपोयुता महाविभवाः। आश्वयिषः प्राग्रखा नरेश्वराः शारदधान्यं च। पौष्णे २७ सचित्रजफलकुसुमवस्त्रमणिशङ्खमौक्तिकाजानि। सुरभिकुसुमानि गन्धा वणिजो नौकर्णधाराश्च। अश्विन्यामश्वखराः सेनापतिवैद्यसेवकास्तुरगाः। तुरगारोहाश्च वणिग्पोषेतास्तुरगरक्षाः। याम्ये२८स्तृकपिशितमुजः क्रूरा वधबन्धताडनासक्ताः। तृणधान्यं शौचकृतोद्भवा विक्षीणाश्च सत्त्वेन। पूर्वात्रयं ज्ञानवरुणयजानां राज्ञां तु पुष्ये च ब्रह्मोत्तराणि। सपौष्ण२७मैत्रं१७ पित्र्ये१०दैवतं१०च प्रजापतेर्भे४ च क्रमीवज्ञानाम्। आदित्य७हस्ताभिजिदश्विनानि वणिग्-

जनानां प्रवदन्ति भानि । मूलश्लिनेत्रा ६ निऋ १५ वारु-
णानि२१ भान्युत्तराजातेः प्रभविष्णुतायाम् । सौम्यै५
न्द्राग्नचित्रावसु२२दैवतानि सेवाजनक्षाम्यसुपागतानि ।
सार्पं६ विशाखा त्रयणो भरण्यत्रयखड्गान्त्यजातेरिति
निर्दिशन्ति । रविरश्विसुतयोगभागतं क्षितिसुतभेदनवक्र-
दूषितम् । यदृक्षगतमथोक्तया कृतं नियतसुपाकर-
णीक्षितं च यत् । तदुपकृतमिति प्रचक्षते प्रकृति-
विपर्ययवशादमेव वा । निगदितपरिवर्गदूषणं कथितवि-
पर्ययगं समुद्भवे" ।

**नक्षत्रव्रत** न० नक्षत्रनिमित्तं व्रतम् शा०त० । नक्षत्रनिमित्ते
व्रतभेदे तत्र सामान्यतः कालनिर्णयः ति०त० उक्तो यथा
"नक्षत्रदर्शे तु बौधायनमार्कण्डेयौ "तन्नक्षत्रमहोरात्रं
यस्मिन्नस्तं गतोरविः । यस्मिन्नुदेति सविता तन्नक्षत्रं
दिनं स्मृतम्" पूर्वाह्णमहोरात्रसाध्योपवासनक्षत्रैकभक्तेषु
"तत्रैवोपवसेद्यत्र निशीथादधोभवेत् । उपवासे यदन्नं
स्यात् तद्धि नक्षत्रैकभक्तयोः" इति स्कन्दपुराणात् निशी-
थादध इत्यनेन अहोरात्रपूर्वकालत्वेन सूर्यास्तसमयकाल-
स्यापि लाभात् । "उपोषितव्यं नक्षत्रं येनास्तं याति भास्करः । यत्र वा युज्यते राम ! निशीथे प्रथिना सह"
इति विष्णुधर्मोत्तरात्च उपवासयक्षत्रव्रतादीनामहोरा-
त्रसाध्यता अहोरात्रसाध्यभोजनदयस्यैकतरपरित्याग-
लक्षितकालविशेषनियामकत्वात् । यस्मिन्नुदेतीति तु
दिवसकर्त्तव्यस्नानदानादाविति बोध्यं, पितृकार्येऽपि शु-
क्लकृष्णपक्षाभ्यां व्यवस्थामाह बौधायनः "सा तिथिस्तच्च
नक्षत्रं यस्मिन्नभ्युदितो रविः । वर्द्धमानस्य पक्षस्य क्षीने-
त्वसमयं प्रति" क्षीने चन्द्रस्य क्षीणत्वात् कृष्णपक्षे वर्द्ध-
मानस्य चन्द्रस्य वर्द्धमानत्वेन शुक्लपक्षस्य । कालमाधवी-
योऽप्येवम् ति०त० रघु० ।

तद्व्रतानि च हेमा० नृ० भविष्यपु० उक्तानि यथा
"इत्येते कथिताः कृष्ण ! तिथियोगा मया तव । नक्षत्र-
देवताः सर्वाः नक्षत्रेषु व्यवस्थिताः । दत्तान् कामान्
प्रयच्छन्ति यथास्थानं सुरेश्वर ! । चन्द्रमा यत्र नक्षत्रे
यदा समधितिष्ठति । उक्तस्तु देवयज्ञस्तु तदा स सफलो
भवेत् । देवताश्च प्रवक्ष्यामि नक्षत्राणां यथातथम् ।
नक्षत्राणि च सर्वाणि यत्रत्रैव पृथक् पृथक् । अश्विन्या-
मश्विनाविज्या दीर्घायुर्जायते नरः । व्याधिभिर्मुच्यते
क्षिप्रं योऽत्रार्थं व्याधिपीडितः । भरण्यां यमराडिष्टः
कृत्तिकैरग्निदैवतैः शुभैः । तथा गन्धादिभिः शुभ्रैरपनुद्यु
विमोचयेत् । अनघः कृत्तिकायान्तु ऋद्धिं संपूजितः
पराम् । रक्तमाल्यादिभिर्दद्याद्धुतहोमेन च ध्रुवम् ।
प्रजाः प्रजापतिः प्रीत दृष्टो दद्यात्पशूंस्तथा । रो-
हिण्यां देवशार्दूल ! गोजन्मज्ञा जगत्पते ! । मृगशीर्षे
तथा सोमं जातिसारोग्यमेव च । आर्द्रायान्तु शिवं
पूज्य पशून् विजयमेव च । पितैः पद्मादिभिर्दिव्यैर्दैवत्यं
पयसा च वै । पुत्रान् पुनर्वसौ दद्याच्छस्या तर्पिता-
ऽदितिः । तिष्ये हरस्तितुष्टिं विपुलं सुखमेव तु ।
भोगान् गन्धादिभिर्नागा अश्लेषायां प्रपूजिताः । तर्पि-
ताश्च प्रयच्छन्ति भक्ष्यान्नैर्मधुरैः शुभैः । मघासु पितरः
पुष्टिं हतपापास्ततर्पिताः । पूर्वायां तु विजयं दद्याद्भगो
देवः सुतर्पितः । भक्त्या प्रपूजितो दद्यादुत्तरायां२२ तथार्य-
मा । भर्तारमीप्सितं नार्याः पुंसश्च वरयोषितम् ।
नीरोगत्वं तथायुष्यं सम्यदं चारुरूपताम् । पुष्य-
वस्त्रार्चितो हस्ते दद्यात्तेजोनिधिस्तथा । चित्रासु
पूजितस्त्वष्टा दद्यादारोग्यमेव च । स्वात्यां संपूजितो
वायुः पुत्रानिष्टान् प्रयच्छति । इन्द्राग्नी तु विशाखायां
पीतरत्नैः प्रपूज्य च । धनं राज्यञ्च सख्येन तेजस्वी
निवसेत्सदा । रत्नैर्मित्रमनूराधास्वेवं संपूज्य भक्तितः ।
प्रियो जनानां सर्वेषां चिरञ्जीवति सर्वदा । ज्येष्ठायां
पूर्ववत्त्विन्द्रमिष्ट्वा पुष्टिमवाप्नुयात् । गुरुः सर्वैस्तु संपूर्णः
कर्मणा वचनेन च । मूले निर्ऋतिमिष्ट्वा च भक्ष्यैस्तु
पयसादिभिः । पूर्ववत् फलमाप्नोति स्वस्थाने च ध्रुवो
भवेत् । अप इद्धा जले २० चैतैर्हुत्वा तत्रैव पूर्ववत् ।
स्नानपान्नुच्यते क्षिप्रं शारीरान्मानसात्तथा । आषाढासु
तथा विश्वं विरिञ्चिं श्रवणोत्तरयोगतः । संपूज्य श्रियमाप्नोति
परं विजयमेव तु । श्रवणे पूजितो विष्णुः सर्वान् कामान् प्रयच्छति । धनिष्ठासु वसूनिष्ट्वा न भयं प्राप्नु-
यात् क्वचित् । शतभिषास्वर्च्य व्याधिभिर्मुच्यते नरः ।
अजं भाद्रपदायान्तु२५ शुद्धस्फटिकसन्निभम् । संपूज्य मुक्ति-
माप्नोति नात्र कार्या विचारणा । उत्तरायां२६ महिर्बुध्नं
परां प्रीतिमवाप्नुयात् । रेवत्यां पूजितः पूषा ददाति
विविधान् पशून् । पितैः पुष्यैश्च दीपैर्धूपैर्विजय-
वर्द्धनैः । य एते वै समाख्याता यज्ञाः संक्षेपतो मया ।
नक्षत्रदेवतानां हि साधकानां हिताय वै । तस्मादित्ता-
नुसारेण भवन्ति फलदायकाः । गन्तुमिच्छेद्दूरदान्यत्र
क्रियारम्भ एव च । नक्षत्रदेवतायज्ञं कृत्वादौ

सर्वमाचरेत्। एवं कृते हि तत्सर्वं यात्राफलमवाप्नुयात्। क्रियाफलन्तु संपूर्णमिच्छुकं भानुना स्वयम्।"

**नक्षत्रशूल** पु॰"ज्येष्ठा पूर्वा भाद्रपदा रोहिण्युत्तरफाल्गुनी। पूर्वादिषु क्रमाच्छूलाः यात्रायां मरणप्रदाः" ज्योति॰ उक्ते यात्रायां निषिद्धे पूर्वादिदिक्षु नक्षत्रभेदे तस्य शूलतुल्यमरणप्रदत्वात् शूलत्वम्।

**नक्षत्रसत्र** न॰ नक्षत्रनिमित्तं सत्रम्। नक्षत्रनिमित्ते सत्रभेदे। तत्र नाक्षत्रमासयज्ञत्वम् विष्णुध॰ उक्तं यथा "नक्षत्रसत्राण्यृतवादि चेन्दोर्मासेन कुर्याद्गणयात्रकेन" "नक्षत्रसत्राणि नाक्षत्रमासाध्ययागभेदाः यास्त्रिकप्रसिद्धाः" समयप्रदीपः।

**नक्षत्रसन्धि** पु॰ नक्षत्रयोः सन्धिः। पूर्वनक्षत्रादुत्तरनक्षत्रे चन्द्रादेर्यत्र वा गतिरूपसंक्रान्तौ। तिथिसन्धिशब्दे दृश्यम्।

**नक्षत्रसाधन** न॰ नक्षत्रं साध्यते ज्ञायतेऽनेन साधि–करणे ल्युट्। सि॰शि॰ उक्ते यन्त्राद्यां नक्षत्रमानसाधने गणन भेदे तच्च वाक्यं तिथिशब्दे २२८७ पृ॰ दर्शितम्।

**नक्षत्रसूचक** पु॰ नक्षत्राणि शुभाशुभतया सूचयति सूच–ण्वुल्। "अविदित्वैव यः शास्त्रं दैवज्ञत्वं प्रपद्यते। स पङ्गुश्छिद्रुषकः पापी श्रेयो नक्षत्रसूचकः" इति ज्यो॰सं॰१अ॰ "तिथ्युत्पत्तिं न जानन्ति यद्यपां नैव साधनम्। परवाक्येन वर्त्तन्ते ते वै नक्षत्रसूचकाः" इत्युक्ते च सिद्धान्तानभिज्ञे ज्योतिर्विदि। त्रिषु नक्षत्रसूचीशब्दश्च।

**नक्षत्रामृत** न॰ वारभेदे नक्षत्रयोगजाते अमृतयोगे अमृतशब्दे २२४ पृ॰ दृश्यम्।

**नक्षत्रिन्** पु॰ नक्षत्रमस्यास्ति स्वाम्येन नियम्यतया वा इनि। १चन्द्रे २विष्णौ च "नक्षत्रेभिर्नक्षत्री श्यामः शामः शमीकृतः" विष्णुसं॰। "नक्षत्राणामहं शशीति" गीतोक्ते नक्षत्रेशरूपेण स्थितत्वात् तस्य तथात्वम्।

**नक्षत्रिय** पु॰ नक्षत्राय हितः घ। नक्षत्राधिष्ठातृदेवभेदे। "नक्षत्रेभ्यः स्वाहा नक्षत्रियेभ्यः स्वाहा" यजु॰२२।२८। नक्षत्रेण "सहयुपा" पा॰ स॰। २नक्षत्रियभिन्ने च।

**नक्षत्रेश** पु॰ईत॰। चन्द्रे अमरः। "नक्षत्रेशबलेर्यज्ञो गिरिशुरौ गङ्गां रुचिं धारयन्" (उमावल्लभः) सा॰द॰।

**नक्षत्रेश्वर** पु॰ ईत॰। १चन्द्रे नक्षत्राधिष्ठातृदेवताभिः काश्यपादिभिः स्थापिते २शिवलिङ्गभेदे न॰ नक्षत्रलोकशब्दे दृश्यम्। [दृष्टिभेदे

**नक्षत्रेष्टि** स्त्री नक्षत्रनिमित्ता इष्टिः ष॰त॰। नक्षत्रनिमित्तके

**नक्षत्रेष्टका** स्त्री इष्टकाभेदे तैत्तिरीयसंहिता ५।४।।२

**नख** सर्पणे भ्वा॰पर॰सक॰सेट्। नखति अनखीत् अनाखीत् ननाख नेखतुः। अयोपदेशत्वात् न धातवं ग्रनखति।

**नख** पु॰न॰ न खं "छिद्रमत्र नभ्राडित्यादि" पा॰ नञो न नखोपः नखन्यते खन–ड वा नङ् वन्वने "नखेलोपश्च" ख वा उपधा॰। १करजे करास्थ्यग्रस्थे कण्टके अमरः। "कामिनामनिष्टतान्यपि रम्यास्तम्भोमलतेषु नखानि" माघः "न छिन्द्यात्सलोमानि दन्तैर्नोत्पाटयेन्नखान्" मनुः "नखलतानीव वनस्थलीनाम्" कुमा॰ "ऐन्द्रः किल नखैस्तस्या विददार स्तनौ द्विजः" रघुः "न नखैर्विलिखेद्भूमिम्" कूर्मपु॰। स्वाङ्गुलेरपि उपसर्जने क्रोडा॰ स्त्रियां ङीषोनिषेधे संज्ञायां "नखमुखात् संज्ञायाम्" नियमात् ङीष्। शूर्पणखा गोरसखा असंज्ञायान्तु ताचनखी कन्या सि॰कौ॰। नखस्य मूलं वर्षा॰ आङ्च्। नखाङ्ग तन्मूले न॰ "लोहमहीं दृषच्छेदो नखखादी च यो नरः" मनुना तस्य दन्तेन खादनं निषिद्धम्। २खड्गे पु॰ हेम॰ ३शुक्तिकायां गन्धद्रव्यभेदे न॰स्त्री॰ स्त्रियां बहु॰ ङीप्। "द्विधा शङ्खनखाख्यान्या शुक्त्याख्या बदरीच्छदा" रत्नमा॰ "स्वल्पतस्तसौ शुक्तिर्नखरी बदरच्छदा। महांस्तसौ शङ्खनखः शङ्खाख्यो गन्धसारणः" शब्दार्णवे। "नखदयं यवक्षेत्रमवाटासज्वरकृच्छ्रुत्। मधुरं शुक्लं वर्ण्यं स्वादु त्रयविधापहम्। अनच्छोत्तरदोर्गन्ध्यकृत् पाकरसयोः कटु" भाव॰ तद्भेदा उक्ताः। [त्रिका॰]

**नखकुट्ट** पु॰ नखं कुट्टति कुट्ट–क्विप् उप॰स॰। नापिते

**नखगुच्छफला** स्त्री नख इव गुच्छः फलं च यस्याः। निम्बवृक्षभेदे राजनि॰।

**नखदारण** न॰ नखं दार्यतेऽनेन दारि–करणे ल्युट्। नखनिकृन्तने नापिताद्यस्त्रभेदे (नरुन)।

**नखनिकृन्तन** न॰ निकृन्तत्यनेन कृत–ल्युट् वा॰ सम् ईत॰। नखच्छेदनार्थे नापिताद्यस्त्रभेदे (नरुन) तत्साधनत्वात् २लोहमात्रेऽपि "यथा सोम्यैकेन नखनिकृन्तनेन विज्ञातेन सर्वं कार्ष्णायसं विज्ञातं स्यात् वाचाऽऽरम्भणं विकारो नामधेयं कार्ष्णायसमित्येव सत्यम्" छा॰उ॰

**नखनिष्पाव** पु॰ नखं तत्तुल्यफलतया निष्पुनाति निष्कौषाति निस्+पु–घञ्। नखफलिन्याम् राजनि॰।

**नखपर्णी** स्त्री नख इव पर्णमस्या ङीप्। इक्षिकाभिद्युपभेदे राजनि॰।

**नखपुष्पी** स्त्री नख इव पुष्पमस्या ङीप्। पृक्कायां राजनि०

**नखप्रच** न० नखैः प्रचितञ्च मयू०नि०। नखप्रचितयोः।

**नखफलिनी** स्त्री नख इव फलमस्यस्य बाहुलकेन भूम्नि इनि ङीप्। नखनिष्पावहक्षे राजनि०।

**नखमुच** त्रि० नखं मुञ्चति मुच-मूलविभु० क। नखमोचके धनुषि संचिप्रसार०।

**नखम्पच** त्रि०नखं पचति तापयति नख+पच-खश् मुम् च। १नखतापके "कथमप्यभवत् क्षारानलोष्णः स्तनभारो न नखम्पचः प्रियस्य" माघः। २यवाग्वां स्त्री शब्दार्थचि०।

**नखर** पु०न० नखं राति रा-क नख-वा० थ्या० अर वा १नखे अर्द्धचा०। "सकम्मनर्दिनखरा मुखानि परस्वधाः" भा०द्रो० १३१८श्लो०"किं पुनरक्षतस्त्वं सख्यं नखरक्षतैस्तस्याः" भा०द०। नखशब्देन "सह सुपा" पा० स०। २खरभिन्ने त्रि०।

**नखरजनी** स्त्री नखो रज्यतेऽनया रञ्ज-करणे ल्युट् नखोपः ङीप्। (मेरँदी) प्रसिद्धे क्षुपे तस्याः फलम् अण् ङरोतश्चा० अणो लुप् प्रकृतिलिङ्गत्वात् तत्फलेऽपि स्त्री

**नखरञ्जनी** स्त्री नखं रञ्जयति रञ्ज-णिच्-ल्यु गौरा० ङीष्। नखनिञ्जने नापितास्त्रभेदे (नरहन) "खनन-खरखोपानचारिणी मनहारिणी। पुनर्भवच्छेदकरी गङ्गेव नखरञ्जनी" उद्भटः।

**नखरायुध** पुंस्त्री नखर एवायुधं यस्य। १सिंहे २व्याघ्रे १कङ्कुरे च राजनि०। स्त्रियां जातित्वात् ङीष्।

**नखराह्व** पु० नखरमाह्वयते अर्द्यते आकारेण आ+ह्वे-क। करवीरे राजनि०।

**नखरी** स्त्री नखरः पुष्पाकारेणास्त्यस्य अच् गौरा०ङीष्। १नखीनामगन्धद्रव्ये शब्दमाला। २क्षुद्रनख्यां रत्नमा०।

**नखलेखक** त्रि० नखं लिखति जीविकार्थं "शिल्पिसंज्ञयोरपूर्वस्यापि" उपा० लिख-ण्वुल् नित्यक०। जीविकार्थदन्तलेखनशिल्पकारके। अस्य "नित्यं क्रीडाजीविकयोः" पा०समासे "अके जीविकार्थे" पा० आद्युदात्तता

**नखविष** पुंस्त्री नखे विषमस्य। नरादौ क्षेमच० "नागाः स्युर्दन्तविषा लूनविषास्तु दंष्ट्रिकादयः। व्याघ्रादयो मोमविषा नखविषा नरादयः। लालाविषास्तु लूताद्याः कालान्तरविषाः पुनः। मूषिकाद्याः" क्षेमच०। जङ्गमविषशब्दे ३०१२ पृ० आदिपदमात्रं दृश्यम्।

**नखविष्किर** पुंस्त्री० नखैर्विकिरति वि+कॄ-क "विष्किरः शकुनिर्विकिरो वा" पा० षुट् षत्वञ्च। नखैर्विकीर्य्य-भक्षके गृध्रादौ "प्रतुदान् जालपादांश्च कोयष्टिनख-विष्किरान्" अभक्ष्यमांसोक्तौ मनुः "नखविष्किरान् नखैर्विकीर्य्य ये भक्षयन्ति तानप्यनुघ्नातारक्ष्यकङ्कटाटिव्यति-रिक्तान् गृध्रेनादीन्" कुल्लू०। [राजनि०।

**नखशुद्ध** पु० नखति नख-सर्पणे अच् नित्यक०। नीलशुद्धे

**नखशङ्क** पु० नख इव शङ्कुः। क्षुद्रशङ्कौ शब्दर०।

**नखाघात** पु० नखैराघातः। नर्म्मार्थं सुरते नायकेन नायिकाङ्गे तदिपर्य्येण वा नखैराघाते तत्स्थानानि कामशास्त्रे उक्तानि यथा "नखाघातः प्रदातव्यो यत्र स्थानानि नर्म्मसु। पार्श्वयोः स्तनयोश्चैव जघने चैव नितम्बके। कक्षप्रदेशे च कक्षान्ते कपोले बाहुमूलके। ग्रीवायां कण्ठदेशे च नखाघातं समाचरेत्। तथा सर्वशरीरेषु नखं दद्याच्चनैः शनैः" इति। नखपदनख-क्षतादयोऽप्यत्र "नवनखपदमङ्गे गोपयसंशुकेन" सा०द० "नखक्षतानीव वनस्थलीनाम्" कुमा० २युद्धार्थं नखै-राघाते च। [स्वाङ्गः। २नखाघातचिह्ने च पु०।

**नखाङ्क** पु०नखमङ्क इव यस्य। १व्याघ्रनख्याम् शब्दर०नख-

**नखाङ्क** न० नख इवाङ्कमस्य। नख्यां रत्नमाला।

**नखानखि** अव्य० नखैश्च नखैश्च प्रहृत्य कृतं युद्धम् "इच् कर्म्मव्यतिहारे" पा०इच् समा०। परस्परनखाघातेन प्रवृत्ते युद्धे "कथाकचि युद्धमासीत् दन्तादन्ति नखानखि" भा०क० ४८अ०। [रक्कुरे च राजनि०।

**नखायुध** पुंस्त्री नख आयुधमिव यस्य। १व्याघ्रे २सिंहे

**नखालि** इ० नखानामालिरत्र। १क्षुद्रशङ्खे शब्दच० ह्रस्व०। २नखपङ्क्तौ च। [नीलशुद्धे राजनि०।

**नखालु** पु० नख इव आलुः नख-सर्पणे वा०आलुच् वा।

**नखाशिन्** पु० नखमश्नाति अश-णिनि ह्रस्व०। १पेचके त्रिका०। २नखखादिनि त्रि०।

**नखि** पु० नखति सर्पति नख-इन्। १सर्पके। उच्चनखदस्तु नखेनातिक्रामति नख+खि-नक्षयति "अच इः" उपा० इ। २नखेनातिक्रामके इत्याद्य०। इदं चिन्त्यं इक्षिनातिक्रामतीत्यादौ अतिइक्षयतीतिवत् नखेनाति-क्रामतीति वाक्ये अतिनखयतीत्येव स्यात् न नक्षयतीति

**नखिन्** पु० नखः अस्त्यस्य, प्राशस्त्येन वा इनि। १सिंहे राजनि०। २व्याघ्रे ३मङ्गानखयुक्तमात्रे त्रि०। "नखि-नाञ्च नदीनाञ्च शृङ्गिणां शस्त्रपाणिनाम्। विश्वासो नैव कर्त्तव्यः स्त्रीषु राजकुलेषु च" चाणक्यः। "भल्ला केशरिणां सिंहा व्याघ्राश्च नखिनां वराः" हरिवं०७३अ०।

नखी स्त्री नख आकारत्वेनास्त्यस्य अच् गौरा० ङीष् नख+ अर्शा० ङीष् वा। खनामख्याते गन्धद्रव्ये अमरः धूपशब्दे उदा० दृश्यम्।

नग पु० न गच्छति गम–ड "नगोऽप्राणिषु" पा० नञो न लोपः। १पर्वते २वृक्षे च अमरः। "नगजा नगजा दयिता दयिताः" भट्टिः "नगाङ्गयो नाम नगाधिरूढतः" भा०वि० ३८अ०। अप्राणिन्यिल्युक्तेः अगो ढक्यिकः प्रीतेनेत्यादौ नलोपः इति बोध्यम्।

नगज त्रि० नगाज्जायते जन–ड ६त०। १पर्वतजातमात्रे "नगजा नगजाः" भट्टिः २स्त्रियां च। हिमादिकन्यायां १पार्वत्यां ४क्षुद्रपाषाणभेदालतायां स्त्री राजनि०।

नगनदी स्त्री नगजाता नदी मा०त०। पर्वतनिःसृतनद्याम्। "विश्रान्तः सन् व्रज नगनदीतीरजातानि सिञ्चन्" मेघ०

नगनन्दिनी स्त्री ६त०। हिमालयजातायां दुर्गायां शब्द०।

नगपति पु० ६त०। १हिमालये त्रिका० यथोक्तं ब्रह्माण्डपु० "शैलानाम् हिमवानञ्च नदीनाञ्चैव सागरम्। गन्धर्वाणामधिपतिश्चक्रे चित्ररथम् विभुः" नगानां द्रुजातीनां पत्यौ २चन्द्रे च तस्य वनस्पतीयत्वम् ओषधीयशब्दे दृश्यम्।

नगभिद् पु० नगं भिनत्ति भिद–क्विप् ६त०। १पाषाणभेदनामभेदे राजनि०। २इन्द्रे च तस्य तथात्वं शैलभिदुशब्दे २६८८ पृ० दृश्यम्।

नगभू पु० नगे भवति भू–क्विप् ७त०। १क्षुद्रपाषाणभेदायां राजनि०। २पर्वतजातमात्रे त्रि० ६त०। ३पर्वतभूमौ स्त्री

नगर न० नगा इव प्राकाराः सन्त्यत्र वा० र। "पण्यक्रियादिनिष्पत्तैश्चातुर्वर्ण्यजनैर्युतम्। अनेकजातिसम्बद्धं नैकशिल्पिसमाकुलम्। सर्वदैवतसंबद्धं नगरं त्वभिधीयते" इत्युक्तलक्षणे १पुरभेदे। गौरा० ङीष्। नगरीत्यत्र अमरः। तस्य लक्षणं भविष्योत्तरे "दीर्घं वा चतुरस्रं वा नगरं कारयेन्नृपः। नक्षत्रवृक्षं वापि कदाचिदपि कारयेत्। दीर्घं पादैकप्रसरं चतुरस्रं समोचितम्। त्रिभिः पादैः समं त्रस्रं वर्तुलं वलयाकृति। दीर्घं ज्ञाहीर्घकुलसुखसम्पत्तिहेतवे। चतुरस्रं चतुर्वर्गफलाय पृथिवीभुजः। त्रस्रं त्रिवर्गसिद्धाय वर्तुलं बहुरोगकृत्। राज्ञः सप्तभिर्हस्तैर्दशभी राजहस्तकैरुदाहृतः। राजहस्तैश्च दशभी राजदण्ड उदाहृतः। राजदण्डैश्च दशभी राजक्रोशस्तदाहृतम्। राजक्रोशैश्च दशभी राजक्रोश उदाहृतः। राजक्रोशैश्च दशभी राजयोजन उच्यते। राजधानी तु कथिता दशभी राजयोजनैः। राजधानी दशगुणा राजक्षेत्रमुदाहृतम्। सप्तैव परिखाश्चात्र प्रोक्तानि पुरवासने। भयस्त्रीभोगसम्पत्तिभर्तृकीर्त्तिसुखार्थिनाम्। राजक्षेत्रे नरपतिः पुरवासनमारभेत्। लक्ष्मीर्जयः क्षमा सौख्यं पक्षत्वं भक्त एकता। सप्तविधित्तं नाथस्य सङ्गस्त्वं सर्वं चयम्। साम्राज्यं भोगसम्पत्तिरिति षोड्श कीर्त्तिताः। यथार्थसंज्ञा नगरे सत्यिना तत्त्ववेदिना" इति युक्तिकल्पतरुः। "नगवासपुरी प्रोक्ता विशाम्पुरमपीष्यते। एकतो यत्र तु ग्रामो नगरञ्चैकतः स्थितम्। मिश्रन्तु खर्वटं नाम नदीगिरिग्रामाश्रयम्। विप्राद्य विप्रभट्टाद्य यत्र चैव वसन्ति हि। स तु ग्राम इति प्रोक्तः शूद्राणां वास एव च। पण्यक्रियादिनिष्पत्तैश्चातुर्वर्ण्यजनैर्युतम्। अनेकजातिसम्बद्धं नैकशिल्पिसमाकुलम्। सर्वदैवतसम्बद्धं नगरन्त्वभिधीयते" इति विष्णु० पु० टीकायां श्रीधरस्वामिधृतवचनम्। "नगरं सर्वतो भद्रं कर्त्तव्यं रोधकं हि वा। स्थलिकं मध्यगं कार्य्यं कुमारीपुरमेव वा। चतुरश्रयतद्युक्तं षड्वाकारसुखावहम्। किष्कुकर्णं द्विषड्वस्तु दुःस्थितं क्षयदुर्बलम्। नगरं न प्रशंसन्ति गर्तविद्धं विभेदितम्। अयतः स्तम्भप्राकारं किष्कुकर्णं विदुर्बुधाः। द्विषड्वं कर्णकीलन्तु क्षयमध्यं क्षयं विदुः। दुःस्थितं निम्नयाम्यन्तु नैर्ऋतं धनदुर्बलम्। क्षौम्यं सर्वसुखाच्छादपूरितं वारुणं बलम्। ग्राम्यमायुः प्रदं पूर्वनगरं प्रीतिवर्द्धनम्। दैवयाम्यसंपूर्णं सर्वारोग्यसुखप्रदम्। मध्यस्थतुल्यमर्थोपेतं नच तत् पीड़येत् क्वचित्। ब्रह्मस्थानं स्थितं विप्र! शिवस्थानं सदा स्थितः। सप्तर्षिं यतिनाञ्चैव स्कन्धावश्यं परम्। यत्र मध्यं प्रशंसन्ति सुश्रोत्तरविवर्द्धितम्। अग्र किष्कुशतात्पूर्वे प्राङ्मुखं निवेशनम्। नगरार्द्धन्तु विप्राणां क्षेत्रं ग्रामं ततोऽर्द्धतः। नगरार्द्धमितं क्षेत्रं क्षेत्रार्द्धं ग्रामोऽर्द्धयोजनः। द्विक्रोशं परमा सीमा क्षेत्रसीमा चतुर्गुणः। त्रिगव्यूतिं विजीयीत देशमार्गस्तु तैः कृतः। त्रिगव्यूतिर्ग्रामसीमा सीमामार्गो द्वयेन तु। धनूंषि दश विष्कोष्टः श्रीमान्राजपथः कृतः। नवाक्षिरत्नमानाभसम्बाधं सुसञ्चरः। धनूंषि चैव चत्वारि ग्रामाख्यास्तु निर्मिताः। त्रिकराश्चोपरथ्यास्तु द्विकराश्चापरथ्यिकाः। जङ्घापथाश्चतुष्पादास्त्रिपादश्च श्वद्वारम्। द्वतीयपादस्त्वर्द्धपादः ग्राम्यंशपादकः स्मृतः" देवी पु०। नगरसन्निवेशशब्दे दृश्यम्। नगरनिर्माणकालश्च "स्थिरराशिगते भानौ

चन्द्रे च स्थिरभोदये। गृहे काले दिने चैव नगरं कारयेन्नृपः" ज्यो० "सनगरं नगरस्त्रक्करौजसः" रघुः। नगरे काकः पात्रे समि० ७त० स०। नगरकाक नगरस्थिते काकतुल्याचारवति एवं ७त०। नगरवायस तत्रार्थे युक्तरोद्धा० तयोराद्युदात्तता।

**नगरकीर्त्तन** न० नगरे हरेर्नामकीर्त्तनम्। नगरे भ्रमः खेन हरिनामकीर्त्तने "नाचारो नाधिकारो वा न स्नान नियमस्तथा। ग्रामे वा नगरे साधुर्वने वा कीर्त्तयेद्धरिम्" हरिनामप्राङ्काक्रे।

**नगरघात** पु०नगरं हनि अमनुष्यकर्त्तृकत्वेन टक् वधित्वा अत् उपस०। १हस्तिनि गजे त्रि०कौ०। हन–भावे घञ् ६त०। २नगरस्यलोकस्य हनने च।

**नगरमर्दिन्** त्रि० नगरं मृद्नाति मृद–णिनि ३त०। १नगरावमर्दके २मत्तगजे पु०। ततः बाह्वा० अपत्यादौ इञ्। नागरमर्दिनि तदपत्यादौ।

**नगरमार्ग** पु० ६त०। राजमार्गे तत्करणप्रकारादि शोभनमुक्तं परिशिष्टे यथा "राजमार्गास्तु कर्त्तव्या चतुर्दिक्षु सुपालयात्। उत्तमो राजमार्गस्तु त्रिंशद्धस्तसमितो भवेत्। मध्यमो विंशतिकरो दशपञ्चकरोऽधमः। ग्रामस्यमार्गास्तथा चैत्ये पुरग्रामादिषु स्थिताः। करत्रयान्विता पद्या रथ्याः पञ्चकरान्विता। मार्गो दशकरः प्रोक्तो ग्रामेषु नगरेषु च। प्राक्पश्चाद्विंशोदकस्थान् ग्राममध्यात् प्रकल्पयेत्। पुरं दद्या राजमार्गान् सर्वतः कल्पयेन्नृपः। न रोधिं न च पद्यां हि राजमार्गान्तु प्रकल्पयेत्। षड्योजनान्तरेऽरण्ये राजमार्गान्तु शोभनम्। कल्पयेद् मध्यमं मध्ये तयोर्मध्ये तथाऽधमम्। दशहस्तात्मकं नित्यं ग्रामे ग्रामे नियोजयेत्। कूर्म्मपृष्ठा मार्गभूमिः कार्य्या सम्यैः सुशोभना। कुर्य्यान्मार्गान् पार्श्वखातान् निर्गमार्थं जलस्य च। राजमार्गसमानि स्युर्न्यूनानि कदाचन्यपि। षट्हस्तैर्वा सदा रोधिं वज्रनिर्द्वरणस्थलम्। पङ्क्तिद्वयसमायोगे गृहाणि कारयेत् तथा। मार्गान् सुधाकर्करैर्वा घटितान् प्रतिवत्सरम्। अभियुक्तनिरूढैर्वा कुर्य्याद्ग्रामजनैर्नृपः। ग्रामद्वयान्तरे चैव पान्थशालां प्रकल्पयेत्। नित्यं सम्मार्जितां चैव ग्रामपैश्च सुशोपिताम्। तत्रागतं तु संपृच्छेत् पान्थं शालाधिपः सदा। प्रयातोऽसि कुतः स्थानात् क्व गमिष्यसि तद् वद। समस्तायोऽसमस्तायो वा सप्तरात्रः किमधिकः। का जातिः किं कुलं नाम स्थितिः कुत्रासि ते थिरम्। इति पृष्ट्वा लिखेत् सर्वं शस्त्रं तस्य प्रदद्या च। सावधानमना भूत्वा सर्वं कुर्वीत सर्वदा। तत्रस्थान् गणयित्वा तु शालाद्वारं पिधाय च। संरक्षयेद् यामिकैस्तु प्रभाते तान् प्रबोधयेत्। अजानरङ्गाश्वोष्ट्रगजेभ्यः क्रमतो हरेत्। अतिं पथार्द्धदद्या तु रक्षार्थं मार्गशालयोः। शस्त्रं दद्याच्च गणयेद् द्वारसङ्ख्यां मोचयेत्। कुर्य्यात् सहायं सीमान्तं तेषां ग्रामजनं सदा"।

**नगरस्त्रकर** पु० नगरस्य क्रौञ्चस्य स्त्रं करोति क–ट ६त०। कार्त्तिकेये क्रौञ्चदारणशब्दे दृश्यम्। "सनगरं नगरस्त्रकरौजसः" रघुः।

**नगरादिसन्निवेश** पु० १०६त० अग्निपु० उक्तप्रकारे नगरादिस्थापने यथा

"ईश्वर उवाच नगरादिकवास्तुञ्च राज्ञादिकविधत्ते। योजनं योजनार्द्धं वा तदर्द्धं स्थानमाश्रयेत्। कृत्वर्च्च वास्तुनगरं प्राकाराद्यन्तु कारयेत्। ऐशादिक्षिं शतपदके पूर्वद्वारं च कारयेत्। मध्यवीथ्यां दक्षिणे शालाद्वारे पश्चिमे तथा। सौम्यद्वारं सौम्यपदे कार्यां चट्टाः सुविस्तराः। येनेभादि सुखं गच्छेत् कुर्याद्द्वारं तु षट्करम्। छिद्रकर्णं विभिन्नञ्च चन्द्राहीभं पुरं न हि। वज्रशूचीमुखं नेष्टं सकटं द्विसमागमम्। चापाभं वज्रनागाभं पुरारम्भे हि वर्जयेत्। प्राच्यं विष्णुहराकादीन् स्थापयेद्दद्याद् बलिं बली। आग्नेये स्वर्णकारान् पुरस्य विनिवेशयेत्। दक्षिणे लवणक्षीरान् वेश्याक्षौद्यां गृहाणि च। नटानाञ्चक्रिकादीनां कैवर्त्तां देव नैर्ऋते। रजकानायुधानाञ्च जलयानाञ्च वारुणे। शौण्डिकाः कर्मकाराश्च वायव्ये परिकर्मिणः। ब्राह्मणा यतयः सिद्धाः पुण्यस्त्रन्तु चोत्तरे। फलाद्याद्विविधं चैशाने च वणिग्जनाः। पूर्वतश्च शालाध्यक्षा आग्नेये विविधं बलम्। स्त्रीणामादेशिनो दक्षे कायस्थोराक्षकर्कते न्यसेत्। पश्चिमे च महामात्यान् कोषपालांश्च कारुकान्। उत्तरे दण्डनायांश्च नायकद्विजसङ्घकान्। पूर्वतः क्षत्रियान् दक्षे वैश्यान् शूद्रांश्च पश्चिमे। दिक्षु वैद्यान् वाजिनश्च बलानि च चतुर्दिशम्। पूर्वेण सुरसिद्धादीन् ब्रह्मणादीनि दक्षिणे। पश्चिमे सोधनाद्यञ्च कारयेत्तूत्तरे। न्यसेत् खेचांश्च कोष्ठेषु पौरादिषु तथा स्थितिम्। श्रियं वैश्रवणं द्वारि पूर्वे तो पक्षतां श्रियम्। देवादीनां पश्चिमतः पूर्वा-

स्थानि सप्तापि हि। पूर्वतः पश्चिमास्थानि दक्षिणे चोत्तरानना। नाकेशविष्ण्वादिधाम रक्षार्थं नगरस्य च। निर्हेवतन्तु नगरमामदुर्गसप्तादिकम्। भुज्यते तत् पिशाचाद्यैरोगाद्यैः परिभूयते। नगरादि सदैवं हि जयदं भुक्तिमुक्तिदम्। पूर्वायां श्रीप्रदं प्रोक्तमाग्नेय्यां वै महानसम्। शयनं दक्षिणस्यान्तु नैर्ऋत्यामायुधाश्रयम्। भोजनं पश्चिमायान्तु वायव्यां धान्यसङ्ग्रहः। उत्तरे द्रव्यसंस्थानमैशान्यां देवतागृहम्। चतुःशालं त्रिशालं वा द्विशालं चैकशालकम्। चतुःशालसप्तस्थान्तु शालाभिन्दकभेदतः। शतद्वयन्तु जायन्ते पञ्चाशत् पञ्च तेष्वपि। त्रिशालानि तु चत्वारि द्विशालानि तु षड्धा। एकशालानि चत्वारि एकाभिन्दानि वच्मि च। अष्टाविंशदभिन्दानि सप्तानि नगराणि च। चतुर्भिः सप्तभिश्चैव षड्भिः पञ्चाशदेव तु। षडभिन्दानि विंशच्च अष्टाभिर्विंशदेव हि। अष्टाभिन्दं भवेदेवं नगरादौ सप्तादिषु" गृहशब्दे दृश्यम्।

**नगराध्यक्ष** पु० नगरे राज्ञा नियोजितः अध्यक्षः। राज्ञा नियोजिते नगररक्षार्थम् अधिकारिभेदे "नगरे नगरे वा स्यादेकः सर्वार्थचिन्तकः। उच्चैः स्थाने घोररूपो नक्षत्राणामिव सप्तर्षिः। भवेत्, स तान् परिक्रामेत् सर्वानेव सभासदः" भा०शा० ८७अ०। २नगररक्षके च "उग्रसेनो नरपतिर्वसुदेवश्च भारत!। निक्षिप्तौ नगराध्यक्षौ शेषाः सर्वे विनिर्गताः" हरिवं० १४७अ०।

**नगरीकाक** पुंस्त्री नगर्याः काक इव। वञ्चके त्रिका० स्त्रियां जातित्वात् ङीष्।

**नगरीत्थ** त्रि० नगरादुत्तिष्ठति उद्+स्था-क षुक्तः। १नगरोत्पन्ने २नागरस्तत्सदृशे स्त्री राजनि०। [वा ङीष्।

**नगरीषधि(धी)** स्त्री नगरजाता ओषधिः। कदल्यां शब्दच०

**नगाटन** पुंस्त्री नगे वृक्षे अटनमस्य। १वानरे त्रिका० स्त्रियां जातित्वात् ङीष्। ७तत्०। २पर्वतवृक्षयोरटने गतौ च

**नगाधिप** पु० नगानामधिपः। १हिमालयपर्वते जटाधरः। तस्य तथात्वम् नगपतिशब्दे दृश्यम्। २सुमेरौ च नगाधिराजादवोऽण्यत्र। "हिमालयो नाम नगाधिराजः" कुमा०।

**नगानिका** स्त्री "हित्वर्क्षके गुरुर्यदा नगानिका भवेत्तदा" इत्युक्तलक्षणे चतुरुत्तरपादके छन्दोभेदे।

**नगारि** पु० ६त०। पर्वतपक्षभेदकत्वात् तदरौ इन्द्रे "नगाद्वयो नाम नगारिसूनुः" भा०वि० २८अ०।

**नगाश्रय** पु० नगः पर्वतः आश्रयोऽस्य। १वृक्षिकन्दवृक्षे राजनि०। २पर्वतवृक्षयोर्वासिनि त्रि०।

**नगेन्द्र** पु०नग इन्द्र इव श्रेष्ठत्वात्। १हिमालये २पर्वतश्रेष्ठे च "रक्षिप्तविषादाय नगेन्द्रसक्ताम्" रघुः "नानाचेष्टैर्जलदललितैर्निर्विशेस्त्वं नगेन्द्रम्" (कैलासम्) मेघ०

**नगौकस्** पु० नगो वृक्षः पर्वतो वा ओकः निवासस्थानमस्य। १खगमात्रे अमरः। २सरभे २सिंहे च मेदि०। ४काके शब्दच०। ५वृक्षपर्वतयोर्वासिनि त्रि०।

**नग्न** त्रि०ओनजी व्रीडे कर्त्तरि क्त तस्य नः। १विवस्त्रे २कषायवस्त्रधारिणि कौपीनाद्यते सक्तकच्छे दिगम्बरे जैनभेदे पु० नग्नभेदमाह भट्टः "विकच्छोऽनुत्तरीयश्च नग्नश्चायस्त्र एव वा। औतं स्मार्त्तं तथा कर्म न नग्नश्चिन्नयेदपि"। "विकच्छः परिधानासंयतकच्छः" तथा च योगियाज्ञवल्क्यः "परिधानाद्बहिः कक्षा निबद्धा शातुरी भवेत्" स्मृतिः "वामे पृष्ठे तथा नाभौ कक्षात्रयसदाकृतम्। एभिः कक्षैः परीयत्ते यो विप्रः स शुचिः स्मृतः" बौधायनः "नाभौ धृतञ्च यद्वस्त्रमाकक्षादवति जानुनी। अन्तरीयं प्रशस्तं तदाकक्षन्तूभयोस्तयोः" आचारचन्द्रिकायाम्। "विकच्छः कक्षगेयश्च सक्तकक्षस्तथैव च। एकवासा अवासाश्च नग्नः पञ्चविधः स्मृतः" आह्निकत० "न नग्नां स्त्रियमीक्षेत पुरुषं वा कदाचन। न च मूत्रं पुरीषं वा न वै संसृष्टमैथुनम्। नोच्छिष्टं संविशेत् नित्यं न नग्नः स्नानमाचरेत्। न गच्छेच्च पठेद्वापि न चैव स्त्रगिरः स्पृशेत्" इति कूर्मपु०१५अ०। ३पारिभाषिकनग्ने च "शैवं कुलं न वेदोऽस्ति न शास्त्रं नैव च श्रुतम्। ते नग्नाः कीर्त्तिताः सद्भिः शैवानां सत्यं विगर्हितम्" इति मार्कण्डेयपु० सदाचाराध्यायः "ऋग्यजुःसामसंज्ञैर्यं त्रयी वर्णाश्रितिर्द्विजः। एतास्त्यजति यो मोहात् स नग्नः पातकी स्मृतः। यस्तु संत्यज्य गार्हस्थ्यं वानप्रस्थो न जायते। परिव्राडपि मैत्रेय! स नग्नः पापजन्तरः" इत्यादिना परिभाषिताः "नग्नो मुण्डः कपालेन भिक्षार्थं क्षुत्पिपासितः। अग्नः शत्रुकुलं गच्छेत् यः शास्त्रमनृतं वदेत्" मनुना अनृतसाक्ष्युक्तेः फलं नग्नतादिकसप्तकम्।

**नग्नकरण** न० अनग्नः नग्नः क्रियतेऽनेन कृ-ल्युट् सम् च। अनग्नस्य नग्नतया करणसाधने।

**नग्नजित्** पु०राजभेदे "नग्नजिद्नाम कौशल्य आसीद्राजाति धार्मिकः। तस्य सत्याऽभवत् कन्या नाम्ना नाग्नजिती

रूप !" भाग १०।५८।२१श्लो० "प्रीतिमनुभवसि नग्नजितः" भाघः २वास्तुपन्थकारके विद्वद्भेदे च "नग्नजिता तु चतुर्दशदैर्घ्यैश्च द्राविडं कथितम्" "आस्यं सवेशनिचयं प्रोड्डशदैर्घ्यैश्च नग्नजित् प्रोक्तम्" बृ०सं०५८अ०। नग्नजितोऽपि राजभेदे "वैदेहान्यवकम्बोजास्तथा नग्नजितास्तु ये" भा०क०७६अ०। तदपत्ये ब०व०। पुंयोगे केकयीतिवत् तदपत्येऽपि स्त्रियां ङीप्। २सत्यभामायां कृष्णकलत्रभेदे स्त्री "कालिन्दीं मित्रविन्दाञ्च सत्यां नग्नजितीं तथा" हरिवं०१४८अ०। अपत्ये अण् ङीप्। नाग्नजितीत्वपि सत्यभामायां दर्शितभागवतश्लोके उदा०।

**नग्नसुषित** त्रि० सुषितो नग्नः राजद०। धनाद्यपहरणेन नग्नतापन्ने "को नग्नसुषितप्रख्यं वक्तुमर्हत्येतं राघवम्" भट्टिः।

**नग्नभविष्णु** पु० अनग्नोनग्नो भवति भू-चरे इष्णुच् समृ च। अनग्ने नग्ने भविष्णौ। तत्रार्थे खुकञ् नग्नम्भावुक तत्रार्थे त्रि०।

**नग्नहु(ह्व)** पु०नग्नं ह्वयति करोत्यनेन सेवनात् ह्वे-बा०क डू वा। षड्विंशतिद्रव्यभक्षते सुरावीजे किरणे अमरमाला "आतिथ्यरूपं मासरं महावीरस्य नग्नहुः" यजु०१९।१४ "सर्जत्वगादिषड्विंशतिवस्तून्येकीकृतानि नग्नहुः" कर्कः सर्जादीनि च "सर्जस्त्वक्२ निर्यासः३ गुग्गुलु४ पुनर्नवा५ चतुर्जातक६।१पिप्पली१२ गजपिप्पली१३शंभा१४वका१५ कट्फला१६चित्रके१७न्द्रवारुण्या१८दन्तिका१९धान्यक२० यवानी२१जीरकद्वय२२ हरिद्राद्वय२५विल्वदयवल्लीद्वय२६ एकीकृता नग्नहुः" "शुष्यतोऽम्लाजनग्नहूं दधिशुक्तारेऽग्निसंस्कृतं नीत्वा" यजु० १९।१ नग्ने वेददी०।

**नग्नाट** पु० नग्न एवाटति घट-अच् "सह सुपा" स०। दिगम्बरे शुक्लवस्त्रे जैनभेदे कृतायुधः। स्वार्थे क घट-ष्वुल् वा। नग्नाटक तत्रार्थे चारा०।

**नग्निका** स्त्री नग्ना+संज्ञायां कन्। अनागतार्त्तवायाम् अजातरजस्कायां स्त्रियाम् अमरः "त्रिंशद्वर्षां दशवर्षां भार्यां विन्देत नग्निकाम्" भा०अनु० ४५अ०।

**नग्नमार** पु० नग्न-क बा० कुत्वं घः नग्नं मारयति घञ्-खिच-अण्। कुष्ठरोगे "ब्रीहि ते कुष्ठ! नामानि नग्नमारो नग्नारिको नग्नायं पुरुषः" अथ०१९। ३६।२। एवं नग्नारिश नग्नाय इत्यपि तत्रार्थे

**नग्नुघ** पु० नग्नुघ+पृषो०। नग्नुघन्धवे मैत्रोप०। [उपपतौ जटा०

**नङ्ग** पु० नं वस्त्रं गच्छति गम-ड बा० सुम् च। जारे

**नचिकेतस्** पु० वाजश्रवसः पुत्रे १ऋषिभेदे २अग्नौ च। "उशन् ह वै वाजश्रवसः सर्ववेदसं ददौ तस्य ह नचिकेतानाम पुत्र आस" कठोप० "सर्वे सामा यदनाः स्युः" इत्युक्तेर्नचिरेतोऽग्न्यर्थं "मृत्युप्रोक्तां नचिकेतोऽथ लब्ध्वा विद्यामेतां योगविधिञ्च कृत्स्नम्" कठोप० उपसंहारे। "तवैव नाम्ना भवितोऽयमग्निं सृङ्कां चेमामनेकरूपां गृहाण"। "एतमग्निं तवैव नाम्ना प्रवक्ष्यन्ति जनासः" इति च कठोप० तत्र मृत्युदत्तद्वितीयवरकथने। "यएवं विद्वांश्चिनुते नचिकेतम्" कठोप०। स्वार्थे अण् नाचिकेतोऽप्युक्तार्थे "त्रिभिर्माचिकेतस्त्रयमेतद् विदित्वा" कठोप० "त्रिभिर्माचिकेतस्त्रिभिरेत्य सन्धिम्" कठोप० "छायातपौ ब्रह्मविदो वदन्ति पञ्चाग्नयो ये च त्रिणाचिकेताः" भा०भा० स्तुतिस्तुतिः। सर्वत्र "पूर्वपदात् संज्ञायामिति" पा० णत्वम्। नाचिकेतश्च ब्राह्मणकर्मैः पुत्रः स च पित्रा कारणान्तरात् क्रुद्धो यमलोकं गत्वा पुनरागतः इत्यादिः तत्कथा भा०आ० ७।अ० नाचिकेतोपाख्याने दृश्या। तेन वाजश्रवसोनामान्तरसहितक इति गम्यते।

**नचिर** न० नञ्शब्देन "सह सुपा" पा०स०। शीघ्रकाले "यथा नचिरकालं नो निष्कृतिः स्यात्तिलोकने" भा०आ०६६अ० "योगयुक्तो मुनिर्ब्रह्म नचिरेणाधिगच्छति"। "भवति नचिरात् पार्थ! मय्यावेशितचेतसाम्" गीता। नञा समासे अचिरशब्देव स्यात्। अचिरशब्दे ८२४८-दृश्यम्।

**नच्युत** त्रि० नञ्शब्देन "सह सुपा" पा०स०। च्युतभिन्ने मुग्धबोधकारस्तु "रात्रेः कृति विभाषा" पा० ६।३।७२ सूत्रात् विभाषानुवृत्तिं मन्यमानः "नञो जरमर०"७२सूत्रात् नुडचि"७४ इत्यादि सूत्रारब्धेऽपि विभाषापराधीति अभिसन्धाय "नञोऽनौ वाच्यश्चो" सूत्रेण विभाषया अचि अनादेशं भसि च अदित्वादेशं विदधौ नञ्वाडिचादि पा०७५ सूत्रञ्च नञः प्रकृतिवद्भावविधायकं ननलोपादिनियमपरमिति तन्मतयः। पाणिनीयास्तु न विभाषामनुवर्त्तयन्ति नान्तरीयकादौ तु नञ्शब्देनैव समास इति प्रतिभेदिरे।

**नज** क्रीडायां भ्वा० आ० अक० सेट्। नजते अनजिष्ट। ननाज नेजतुः। इदित् खोदित्व नम्रः। अयोपदेशत्वात् निमित्ते सति न णत्वं प्रनजति।

**नञ्** अव्य०न+बा०अञ्न जित् जिदनुबन्धो नञो नलोपनुडर्थः अजितस्तु ननलोपादि नान्तरीयकनैकधेत्यादि सि०कौ० "नञभावे १निषेधेन स्वरूपार्थे २ऽप्यतिक्रमेण३ ईषदर्थे३

च सादृश्ये५ तद्विरुद्धतदन्ययोः" ।६।७ इति मेदिनी निषेधेन काक्षा निषेधेन स्वरूपार्थे प्रकृतार्थे इत्येकम् तेनाभावेन न यौनरुक्त्यम् । "सङ्गामि कौरवयतं समरे न कोपात्" वेणी० । "द्वौ नञौ प्रकृतमर्थं गमयतः" यथा "नाविष्णुः कीर्त्तयेद्विष्णुं नाविष्णुर्विष्णुमर्चयेत् । नाविष्णुः संस्मरेद्विष्णुं नाविष्णुर्विष्णुमाप्नुयात्" इति महाभारतम् । असन्देहार्थं "नञ्" पा० "तत्पुरुषो नञ्कर्मधारयः" पा० निर्देशाद्वा पदलेऽपि न कृत्यम् । "तिङ्ङि चोदात्तवति" पा०च पचसि जालम् इत्यादौ असमासेऽपि नञो नलोपः ।

मसस्त्यादिनञर्थनिर्णयादिकं वैयाकरणभूषणसारे यथा "नञ्समासे चापरस्य प्राधान्यात्सर्वनामता । आरोपितत्वं नञ्द्योत्यं नञ्सोऽप्यतिसर्ववत्" । नञ्समासे अपरस्य उत्तरपदार्थस्य प्रधान्यात्सर्वनामता सिध्यतीति शेषः । अत एव आरोपितत्वमेव नञ्द्योत्यमित्यभ्युपेयमिति शेषः । असर्वइत्यादावारोपितः सर्वइत्यर्थे सर्वशब्दस्य प्रधान्याऽबाधात्सर्वनामता सिद्धति । अन्यथा अतिसर्वइत्यत्रैव सा न स्यात् । घटोनास्तीत्यादावभावविषयकबोधे तस्य विशेष्यतायाएव दर्शनात् । अवधार्य च स आर्थोबोधो मानसः । तथा चान्यघाऽसर्वश्चै इत्यादिसिद्धिप्रसङ्गइति । अत्रचारोपितत्वमारोपविषयत्वम् आरोपमात्रं वार्थो विषयत्वं संसर्गइति निष्कर्षः । द्योत्यत्वोक्तिर्निपातानां द्योतकत्वमभिप्रेत्य । घटोनास्ति अत्राह्मण इत्यादावारोपबोधस्य सर्वानुभवविरुद्धत्वात्तच्चान्तरमाह । "अभावो वा तदर्थोऽस्तु भाष्यस्य हि तदाशयात् । विशेषणं विशेष्योवा न्यायतस्त्ववधार्यताम्" । तदर्थोनञर्थः अर्थपदं द्योत्यवाच्यत्वप्रत्ययोः साधारण्येन कीर्त्तनाय । भाष्यस्येति । तथाच नञ्सूत्रे महाभाष्यम् । "निवृत्तप्रधानकः" इति । निवृत्तं पदार्थो यस्य "नपुंसके भावे क्तः" पा०इति क्त अभावार्थकइत्यर्थः । यत्तु निवृत्तः पदार्थोयस्मिन्नित्यर्थः सादृश्यादिनाध्यारोपितब्राह्मण्यात् क्षत्रियादयोऽर्था यस्येत्यर्थइति कैयटः तन्न आरोपितब्राह्मण्यस्य क्षत्रियादेरनञ्वाच्यत्वात् । अन्यथा सादृश्यादेरपि वाच्यतापत्तेः । यत्तूक्तं "तत्सादृश्यमभावश्च तदन्यत्वं तदल्पता । अप्राशस्त्यं विरोधश्च नञर्थाः षट् प्रकीर्त्तिताः" इति पठित्वा अत्राह्मणः अपापम् अनड्वान् अनुदरा कन्या अपशवोवा अन्येभ्योऽन्येभ्यः अधर्म्म इत्युदाहरन्ति तच्चार्थिकार्थमभिप्रेत्येति भ्रष्टमन्यत्र । विशेषणमिति प्रतियोगिनीति शेषः । तथा च सर्वपदे सर्वनामसंज्ञा । "अनेकमन्यपदार्थे" पा० "सेव्यतेऽनेकया सङ्ख्यताप्राकृत्या" इत्यादावेकशब्दार्थप्राधान्यादेकवचननियमः । अत्राह्मण इत्यादावुत्तरपदार्थप्राधान्यात्तत्पुरुषत्वम्, चत्वं भवसि अनड्वं भवामीत्यादौ युष्मदवचना द्विष्वस्था चोपपद्यते अन्यथा त्वदभावोमदभावइतिवद्भावार्थे युष्मदस्मदोरन्वादेश युष्मत्सामानाधिकरण्यस्य तिङ्सत्त्वात्प्रकृष्यवस्था न स्यात् । अवधार्यते च भेदप्रतियोगित्वदभिन्नाश्रयिका भवनक्रियेत्यन्वयात्सामानाधिकरण्यं नानुपपन्नमिति भावः । विशेषणमिति प्रतियोगिन इति शेषः । अयं भावः । गौरत्वेऽपि नञ्समासे "एतत्तदोः सुलोपोऽकोरनञ्समासे हलीति" पा० ज्ञापकात्सर्वनामसंज्ञा नानुपपन्ना । अतः शिव इत्यत्र सुलोपवारणायानञ्समास इति हि विशेषणम् । नच तत्र तच्छब्दस्य सर्वनामतात्रि गौरत्वात् । अकोरित्यकञ्व्याहृत्या सर्वनाम्नोरेव तत्र सङ्ग्रहलाभात्तज्ज्ञापकानञ्समास इति ज्ञापकं सुवचम् । "अनेकमन्यपदार्थे" पा०इत्यादावेकवचनं विशेष्यानुरोधात् । "सुबामन्त्रिते पराङ्गवत् स्वरे" पा० इत्यतोऽनुवर्त्तमानसुब्ग्रहणात् विशेष्यमेकवचनान्तमेव । किञ्चानेकशब्दात् द्विवचनोपादाने बहूनां, बहुवचनोपादाने द्वयोः बहुत्वीयेन सिध्येदित्युभयसंग्रहायैकवचनं लाक्षणिकप्रायमौत्सर्गिकं वा । सेव्यतेऽनेकयेत्यत्रापि योग्यतेति विशेष्यानुरोधात्स्त्रीत्वं स्त्रीत्वान्वयबोधनाय चैकवचनं न त्वुत्तरपदार्थप्राधान्यप्रयुक्तम् । अतएव "एतन्यनेके जलधेरिवोर्मय" इत्यादिकमपि रूपपादम् । चत्वं भवसीत्यादौ युष्मदर्थभिन्ने लक्षणा नञ् द्योतकः तथा च भिन्नेन युष्मदर्थेन तिङः सामानाधिकरण्यात्प्रकृष्यवस्था । त्वद्भिन्नाभिन्नाश्रयिका भवनक्रियेति शाब्दबोधः । एवं न त्वं पचसि इत्यत्र त्वदभिन्नाश्रयकप्राकाङ्क्षकुलभावनाभावः घटोनास्तीत्यत्र घटाभिन्नाश्रयकास्तित्वाभाव इति रीत्या बोधः असमस्तनञः क्रियायामेवान्वयात् । सचाभावोऽत्यन्ताभावत्वान्योन्याभावत्वरूपेण भक्त्यः तत्तद्रूपेण बोधादित्याद्यन्यत्र विस्तरः" ।

शब्दचिन्तामणौ तु अभावएव नञो लक्ष्यार्थ इति समर्थितम् यथा

"नञ्समासेऽब्राह्मणमानयेत्यत्र पर्युदासे पूर्वपदे नञ्युत्तरपदार्थसम्बन्धिनि क्षत्रिये लक्षणा अघटः पट इत्यादौ प्रसज्यप्रतिषेधार्थे नञि सामानाधिकरण्यादभाववल्लक्षणा व्यासेऽपि न घटः पटइत्यादौ यथा शुक्लपटः इत्यत्र

शुक्लवद्व्यवस्था। न पचतीत्यादौ क्रियासम्बन्धे, भूतले न घटइत्यादौ प्रसज्यप्रतिषेधे नञो सख्यार्थता, सुबन्तसम्बन्धेऽपि न समासः विभाषाधिकाराद्विकल्पेन समासानुशासनात्। यजतिषु येयजामहं करोति नानुयाजेष्वित्यत्र पर्युदासे नञ्, तेनायमर्थः यजतिषु नानुयाजेषु अनुयाजव्यतिरिक्तेषु येजामहे इति मन्त्रं करोति। अथ नानुयाजेष्वित्यत्र न पर्युदासे नञ् तदा हि पदद्वयस्यान्यपरत्वं स्यात् समासापत्तिश्च तस्मादनुषङ्गात् करोतिना नञोऽन्वयात् प्रसज्यप्रतिषेधः तेनानुयाजेषु ये यजामहे इति मन्त्रं न करोतीत्यर्थः एवञ्च नानुयाजेष्विति पदद्वयस्यान्यपरता न वा नञो सख्यार्थत्वागः। समासाभावे न साधुता चेति चेत् न समासस्यानित्यत्वात् नानुयाजेष्विति वाक्ये पर्युदासे नञ्। न चैवं वाक्यवृत्तिपदस्थनञोऽन्यपरत्वाभावः गौर्वाङ्कि इत्यादौ वाक्येऽपि गवादिपदस्यान्यपरत्वात्। यदि च प्रसज्यप्रतिषेधे नञ् तदा मन्त्रविधायकतद्विधेयोर्भिन्नार्थत्वेन वाक्यभेदापत्तिः तस्मात् प्रतीतैकवाक्यत्वबलात् एकवाक्यत्वे सम्भवति वाक्यभेदस्यान्याय्यत्वात् नञ्पदे लक्षणा कल्प्यते न तु नञ्पदसख्यार्थानुरोधादेकवाक्यत्वत्यागः न हि पदार्थानुरोधेन वाक्यार्थकल्पना किन्तु वाक्यार्थानुरोधात् पदार्थकल्पना नपदञ्च केवलं नास्त्येव नञ्पदादेव सर्वत्र समासानित्यत्वेन प्रयोगोपपत्तेः अन्यथा प्रसज्यप्रतिषेधे नञ् न स्यादेव नपदेनैव चरितार्थत्वात् समानोनाद्यपदमेव निषेधवाचकं समासवाक्यभेदेन नञो द्वैविध्याद्वा तथाभिधानम्"।

अभावमात्रं नञोर्थः इति नञ्वादे शिरोमणिनोक्तं यथा

(१) "संसर्गाभावोऽन्योऽन्याभावश्च नञोऽर्थः। [वस्तुसिद्धम्

(२) तत्र चान्वयितावच्छेदकावच्छिन्नप्रतियोगिताकत्वं व्युत्पत्ति-

(३) नीलघटवति घटो नास्तीति नीलो घटो न घट इत्याद्यव्यवहाराच्च इह पीतघटवति न नीलः घटः, पीतो घटो न नीलघट इत्यादि व्यवहाराच्च।

(४) प्रतियोग्यभावान्वयौ च तुल्ययोगक्षेमौ तेन यत्पदोपस्थापितस्य प्रतियोगिनोऽनुयोगिन्याधाराधेयसम्बन्धे नैवान्वयबोधः तत्र तत्संसर्गाभावस्यापि। यथा पचति चैत्रो न पचति चैत्रः। चैत्रस्येदं नेदं चैत्रस्य इत्यादि।

(५) तिङाद्यर्थस्य कृत्यादेः प्रथमान्तपदोपस्थापिते एव तत्र यत्रैव, तदभावस्यापि तथा।

(६) नञ्यादेव चैत्रादिनिरूपितं स्वत्वादिकमर्थो न तद्विशिष्टं स्वामित्वादि तस्य धनाद्यवृत्तित्वेन चैत्रीयेऽपि धने नेदं चैत्रस्येति प्रसङ्गात् निरूपकत्वादेः सम्बन्धस्य प्रतियोगितानवच्छेदकत्वादेश्च दिक्।

(७) यत्र चाधारधेयभावो न सम्बन्धमर्यादाभ्यस्तत्रानुयोगिनि सप्रम्यर्थेच्छा। यथा भूतले घटो न भूतले घट इत्यादि तत्र च तात्पर्यवशात् क्वचित् भूतलादौ घटाभावः क्वचिच्च घटादौ भूतलवृत्तित्वाभावः प्रतीयते।

(८) अतएव पृथिव्यां गन्धो न जले इत्यादौ प्रतीतेरेकविशेषत्वानुभवः।

(९) केचित्तु सर्वत्र विशेष्ये विशेषणस्याभावो नञा प्रत्याय्यते अतएव भूतले घटो नास्तीत्यादौ वचनैक्यनियमः इति प्राहुः।

(१०) तैर्न जातौ सत्तेत्यत्र गतिर्विचिनीया जातिसमवेतत्वस्याप्रसिद्धत्वात् सम्बन्धान्तरेण जातिवृत्तित्वस्य सत्तायामपि सत्त्वात्। [इत्यपि क्वचित्।

(११) सप्रम्यर्थान्वितायाश्च विशेषणतया प्रतियोगिन्यन्वयः यत्र विशेषणविशेष्ययोरभेदेनान्वयो व्युत्पन्नस्तत्रान्योन्याभावो नञा बोध्यते। यथायं घटो नीलो नायं घटो नील इति। तत्र च विशेषणविशेष्ययोः समानविभक्तिकत्वं निरुक्तविभक्तिकत्वविरहो वा तन्त्रम्।

(१२) अतएव यजतिषु ये यजामहं कुर्यान्नानुयाजेष्वित्यादौ एकवाक्यत्वानुरोधात् [भेदो बोध्यते।

(१३) ये यजामहमित्यादेरनुषङ्गगौरवाच्च यजतिष्वनुयाज-

(१४) विशेषणविभक्तिस्तु प्रयोगसाधुत्वार्था।

(१५) नामार्थयोर्भेदेनान्वयबोध एव प्रकारीभूतविभक्त्यर्थोपस्थितेस्तन्त्रत्वात् लाघवेन तयोरन्वयमात्र एव तात्पर्यम्।

(१६) विशेषणविभक्तिस्त्वभेदार्थिका। [मिति मते—

(१७) नीलोत्पलं चित्रगुरित्यादौ लुप्ताया विभक्तेरनुसन्धान-

(१८) न राज्ञ इत्यत्र षष्ठ्यर्थस्य स्वत्वस्वेवात्रापि सप्रम्यर्थस्य तयोरभेदस्याभावो बोध्यताम्।

(१९) यत्तु करणनिषेधेविकल्पापत्तेः भेदपरतेति तदसत्

(२०) विशेषनिषेधे सामान्यविधेस्तदितरपरतायाः ब्राह्मणेभ्यो दधि दातव्यं न कौण्डिन्याय दातव्यमित्यादौ व्युत्पत्तिसिद्धत्वेन विकल्पानवकाशात्।

(२१) न च तत्रापि कौण्डिन्यभेदो बोध्यः कौण्डिन्यपदस्य विरुद्धैकवचनावरुद्धत्वात्।

(२२) न खलु महतो राज्ञो न महतो राज्ञ इत्यत्रैव महतां राज्ञां न महतां राज्ञ इत्यत्रापि राजनि महद-

भेदाभेदौ प्रतीयेते एकोनद्वाविंशादिवत् कथञ्चित् तत्समर्थनेऽपि द्वितीयस्य दातव्यमित्यत्रानन्वयप्रसङ्गात् ।

(२१) अतएव रात्रौ श्राद्धं न कुर्वीतेत्यादौ क्रियानिषेधेऽपि न विकल्पावकाशः ।

(२४) न हि तत्रापि रात्रीतरपरता,

(२५) रात्रिभिन्ने श्राद्धविधावपि अमावस्यायां पितॄन्योदद्यादित्यादौ रात्रौ श्राद्धप्रसक्तेर्दुर्वारत्वात् ।

(२६) न खलु क्रियारहितमपि श्राद्धविधायकं वाक्यान्तरमपि येनेदं तेन समभेकवाक्यतामासादयेत् ।

(२७) नापीदं नानुयाजेष्वितिवत् पृथक् क्रियारहितम् ।

(२८) अथ रात्रौ श्राद्धस्य प्रसक्तौ विकल्पापत्तिः अप्रसक्तौ कथं निषेधः प्रसक्तं हि प्रतिषिध्यते इति चेत् साधीयानयं मन्त्रपाठः कृदे दहनो नाक्नीत्यादौ शाब्दबोधेऽपि परप्रयत्नेन तत्र दहनप्रसक्तिरूपादीयेत ।

(२९) निषेधविधैयर्थ्यमिति चेत् तात्पर्यानवबोधात् रात्रिश्राद्धकरणवारणस्य तदर्थत्वात् । [विकल्पः ।

(३०) एकविषयतया पुनरनन्यगत्या षोढशिग्रहणाग्रहणयो-

(३१) तत्र च षोढशिग्रहणं नेष्टसाधनमित्यादिकं नार्थः ग्रहणविधिविरोधात् अपि तु षोढशिग्रहणाभाव इष्टसाधनमित्यादि । [भङ्गप्रशंस्यम् ।

(३२) व्युत्पन्नस्य नञ्समभिव्याहृतधात्वर्थाभावेऽपि वि-

(३३) अतएव प्राभाकराः न कलञ्जं भक्षयेदिति श्रुतेः कलञ्जभक्षणाभावविषयकं कार्यमर्थमाहुः ।

(३४) नियमस्तु तात्पर्यवशात् । [स्वमविरुद्धम् ।

(३५) सुख्यफलाजनकत्वेऽपि चाङ्गस्य परमापूर्वरूपेष्टसाधन-

(३६) ग्रहणविध्यन्यथानुपपत्त्या च षोढशिग्रहणादतिशयितं परमापूर्वं तत्राज्ञातिशयितं सुख्यं फलं कल्प्यते इति सर्वसमञ्जसम् ।

(३७) प्रतियोग्यनुयोगिभावः प्रतियोग्यनुयोगिरूपाभावाधिकरणयो राधाराधेयभावश्च सम्बन्धविधया भासते ।

(३८) 'निपातातिरिक्तस्त्व एव प्रातिपदिकार्थयोर्भेदेनान्वये प्रकारीभूतविभक्त्यर्थोपस्थितेस्तन्नत्वात् ।

(३९) अतएव द्रव्याद्यर्थान्वये न षष्ठ्याद्यर्थेच्छा

(४०) अघटं भूतलम् अतलोदेश्य द्रव्यादौ समासे सामानाधिकरण्याद्यनुरोधात् नञोऽभावतत्परता ।

(४१) केचित्तु प्रतियोगिपदोत्तरस्य सुपः प्रतियोगित्वम्

(४२) अनुयोगित्वं वा नञुत्तरस्य चार्थिकत्वं वार्थः

(४३) नञो वाऽभावत्वेति कथना ।

(४४) विभक्त्यर्थानुयोगिसमानविभक्तिकार्थयोरन्योन्याभावसंसर्गाभावबोधने नञोऽसामर्थ्यम् ।

(४५) तेन न पचति न राम इत्यादौ क्रियादेरन्योन्याभावो भूतलं न घट इत्यादौ घटादेः संसर्गाभावो न प्रतीयते इत्याहुः" ।

अस्य गदाधरादिव्याख्याहृदयमनुसृत्योऽयमर्थः । अभावत्वम् अन्योन्याभावत्वञ्च नञ्पदशक्यतावच्छेदकम् । अभावत्वं च ध्वंसादिसाधारणमखण्डोपाधिः एवमन्योन्याभावत्वमपि तदेतत् गदाधरादिभिः समर्थितं यथा

(१) अथ घटो नास्तीत्यादिवाक्यात् घटत्वादिरूपसामान्यधर्मावच्छिन्नप्रतियोगिताकत्वबोधने तच्छून्ययोर्ध्वंसप्रागभावयोरन्वयितावच्छेदकावच्छिन्नप्रतियोगिताकत्वविरहेणाप्रत्ययाद् ध्वंसप्रागभावसाधारणं नञ्पदशक्यतावच्छेदकं सम्भवतीति चेत् न ध्वंसप्रागभावयोरत्यन्ताभावविरोधितामते घनरा श्यामे रक्तं रूपं नास्तीत्यादिव्यवहारानुरोधेन ध्वंसप्रागभावयोरपि समयविशेषावच्छेदेन सामान्यावच्छिन्नप्रतियोगिकत्वोपगमस्यावश्यकत्वात् तयोरपि नञा प्रतिपादनात् व्युत्पत्तिविरोधेन तयोरनभिप्रतिपादनेऽपि सदातनत्वघटितात्यन्ताभावत्वापेक्षया ध्वंसादिसाधारण्याभावत्वस्य लाघवेन सदातनभावरूपाभावाभावसाधारण्यानुरोधेन प्रवृत्तिनिमित्ततया तयोरपि नञ्पदवाच्यत्वोपपत्तेः । न चात्यन्ताभावत्वमखण्डधर्मान्तरं अनुयोगिताविशेषरूपं वा न सदातनत्वघटितमिति न गौरश्वादिकमिति वाच्यं तादृशधर्मान्तरे मानाभावात् तद्वृत्तिनाशीत्यादि वाक्यात्तत्तद्वृत्तित्वावच्छिन्नप्रतियोगिताकयोर्ध्वंसप्रागभावयोर्बोधनाच्च ध्वंसप्रागभावसाधारण्यशक्तेरावश्यकत्वात् । न च ध्वंसप्रागभावयोरत्यन्ताभावविरोधस्यात्राप्यानाधिकतया तद्वृत्तित्वावच्छिन्नध्वंसाद्यधिकरणे तादृशात्यन्ताभावसत्त्वात् स एव उक्तवाक्यात् प्रतीयत इति वाच्यं ध्वंसाद्यधिकरणे तादृशात्यन्ताभावस्यात्राप्रामाणिकत्वात्" गदाधरः ।

"एवम् अन्योन्याभावत्वमप्यखण्डोपाधिः । न तु तादात्म्यसम्बन्धावच्छिन्नप्रतियोगिताकाभाववत्वम् । तत्तत्संयोगितादात्म्यस्य संयोगरूपतया संयोगिनोऽत्यन्ताभावेऽतिव्याप्तेः । सम्बन्धविधया तादात्म्यनिवेशेऽपि संयोगसम्बन्धावच्छिन्नसंयोगावच्छिन्नप्रतियोगिताकाभावेऽतिव्याप्तेर्दुष्परिहरत्वादिति वस्तुतस्तु अन्योन्याभावस्य प्रतियोगितावच्छेदकसम्बन्धे मानाभावे-

न तादात्म्यस्य तत्प्रतियोगितावच्छेदकसम्बन्धत्वाभावात्ताडशलक्षणसम्भवदुक्तिकमेव। न चैवमभावमात्रस्यैव प्रतियोगितावच्छेदकसम्बन्धसङ्गावे प्रमाणाभाव इति वाच्यम्। अत्यन्ताभावस्य प्रतियोगितावच्छेदकसम्बन्धानङ्गीकारे बाधबुद्धिप्रतिबध्यतावच्छेदकनिर्वचनानुपपत्तेः। तथाहि घटाभावप्रकारकज्ञानस्य प्रतिबध्यतावच्छेदकं हि न घटप्रकारकज्ञानत्वम्। घटाभाववत्ताज्ञानकाले कदाचित् केन चित् सम्बन्धेन घटप्रकारकज्ञानसत्त्वापत्तेश्च ताडशनियमानुरोधेन तेन सम्बन्धेन तत्प्रकारकबुद्धिं प्रति तत्सम्बन्धावच्छिन्नतद्भिन्नप्रतियोगिताकाभाववत्तानिर्णयस्य प्रतिबन्धकतया यावच्चक्रान्वयित्वेनात्यन्ताभावप्रतियोगितावच्छेदकसम्बन्धसिद्धिः। न चैवमन्योन्याभावस्यापि तत्सिद्धौ युक्तिस्तुल्येति वाच्यम्। घटत्वप्रकारकबुद्धिं प्रति घटान्योन्याभावत्तानिर्णयस्यैव विरोधित्वकल्पनेन सामञ्जस्ये विनान्योन्याभावप्रतियोगितावच्छेदकसम्बन्धं प्रतिबध्यप्रतिबन्धकभावानुपपत्तिरूपबाधकाभावेन युक्तेरतौल्यात्। ननूभयधर्मस्य नञ्शक्यतावच्छेदकत्वे गौरवेण लाघवादभावत्वरूपैकधर्मस्यैव तदवच्छेदकत्वस्वीकार उचित इति चेन्न्योन्याभावे त्यादि यन्योऽनन्यक इति चेन्न। घटो नास्तीत्यादौ संसर्गाभावत्वप्रकारकबोधानुभवानुरोधेन घटः पटो नेत्यादौ त्वन्योन्याभावत्वप्रकारकबोधानुभवानुरोधेन च तथोक्तत्वात्" रघुदेवः।

(२) तत्र चेति तत्र नञर्थे संसर्गाभावे भेदे च अन्वितावच्छेदकावच्छिन्नप्रतियोगिताकत्वमिति येन रूपेण प्रतियोगिनोऽभावांशे विशेषणता तद्धर्मपर्याप्तप्रयोगितावच्छेदकताकत्वम्। व्युत्पत्तिवलतस्त्वमिति अपदार्थोऽपि तद्भावच्छिन्नोपस्थापकशब्दविशेषसमभिव्याहारलक्षणाद्बलात् प्रतियोगिसंसर्गविधया लभ्यमित्यर्थः। घटत्वाद्यवच्छिन्नप्रतियोगिताकत्वञ्च घटत्वाद्यवच्छिन्नप्रतियोगितानिरूपितत्वविशेषिता अनुयोगिता सा च घटादिरूपविशेषणप्रतियोगिकेति तत्सम्बन्धतया भासते नञ्पदार्थतावच्छेदकानुयोगिताया घटादेरन्वयोपगमे तु तत्र ताडशप्रतियोगितानिरूपितत्वमेव सम्बन्धः घटादिनिष्ठप्रतियोगितानियोगिकनिरूप्यत्वं घटादिरूपप्रतियोगिप्रतियोगिकमपि इति तस्य घटादिसम्बन्धता" गदाधरः।

(३) "अन्वितावच्छेदकावच्छिन्नत्वाविशेषितायाः प्रतियोगितायाः नञ्पदार्थे संसर्गाभावे प्रतियोगिसम्बन्धत्वोपगमे बाधकं दर्शयति नीलघटवतीति न घट इति इत्यादौ व्यवहारात् इत्यनेन सम्बध्यते। ताडश्याः प्रतियोगितायाः नञर्थे भेदे प्रतियोगिसम्बन्धत्वे बाधकमाह नीलो घट इति अव्यवहारादिति व्यवहारस्य प्रमाणत्वाभावादित्यर्थः शुद्धप्रतियोगितायाश्च सम्बन्धत्वे अबाधितविशेषान्तराभावबोधकतया तत्तद्वाक्यानां प्रामाण्यस्य दुर्वारतया व्युत्पन्नैरपि तथा प्रयुज्येतेति भावः। तद्भूपविशिष्टप्रतियोगिविशेषिते धर्मिणि शुद्धतद्भूपविशिष्टप्रतियोगिविशेषितधर्मिणि शुद्धतद्भूपविशिष्टप्रतियोगिविशेषितसंसर्गाभावस्य तद्भूपविशिष्टे प्रतियोगिनि शुद्धतद्भूपावच्छिन्नप्रतियोगिविशेषितभेदस्य च बोधने नञोऽसामर्थ्योपगमेन दर्शितप्रयोगवारणसम्भवेऽपि वस्तुगत्या नीलघटवति नीलघटादौ "अत्र न घटः इत्यादिप्रयोगस्य प्रामाण्यापत्तौ दुर्वार इति बोध्यम्" गदाधरः।

(४) "एवं भूतले न घट इत्यादौ भूतलादौ घटसंसर्गाभावाधिकरणतावद् घटभेदाधिकरणता कुतो न प्रतीयते इत्यत आह प्रतियोग्यभावान्वयौ चेति अधिकरणे इत्यादिः अभावपदं संसर्गाभावपरं तथा चाधिकरणे यादृशपदोपस्थाप्यस्य प्रतियोगिनः प्रतियोगितावच्छेदकसम्बन्धस्य भानं यादृशञ्च अधिकरणबोधकं यादृशपदसमभिव्याहारसामेत्यं च तादृशपदोपस्थाप्यप्रतियोग्यन्विताभावस्यापि आधाराधेयभावरूपसम्बन्धस्य भानं तादृशम् अधिकरणबोधकं तादृशबोधकपदसामेत्यञ्चेत्यर्थः। अनुयोगिनि यादृशपदोपस्थाप्ये इत्यादिः आधाराधेयभावसम्बन्धेनान्वय इति आधाराधेयभावनियामकप्रतियोगितावच्छेदकसम्बन्धस्य संयोगादेः संसर्गमर्यादया भानमित्यर्थः तत्संसर्गाभावस्यापि तथेति। तत्पदोपस्थाप्यप्रतियोगिविशेषिततत्सम्बन्धावच्छिन्नाभावस्यापि आधारतासम्बन्धोऽपि तादृशपदोपस्थाप्ये अनुयोगिनि सम्बन्धमर्यादया भासते इत्यर्थः" गदाधरः।

(५) "तिङादयश्चेति नञोऽसत्त्व इत्यादिः आदिपदात् सुप्परिग्रहः ल्यादेरित्यादिना तिङर्थाश्रयत्वादेः सुवर्थस्वत्वादेश्च परिग्रहः। प्रथमान्तपदोपस्थाप्यस्य विशेष्यतानियामकत्वाभिधानं तिङ्प्रत्यये चैत्रस्य धनं पचतीत्यादौ द्वितीयाद्यन्तपदोपस्थाप्येनापि धनादिना षष्ठ्याद्यर्थस्वत्वान्वयात् सुवर्थविशेष्यतयाऽन्वये प्रथमान्तपदोपस्थाप्यत्वस्यानियामकत्वात् सुपश्च कारकपदोत्तरस्य योऽर्थस्तद्विशे-

अत्र धातूपस्थाप्यत्वं नियामकं शेषषष्ठ्यर्थस्य विशेष्यत्वे च प्रातिपदिकोपस्थाप्यत्वं प्रत्ययान्योपस्थाप्यत्वं वा, "गुरु विप्रतपस्विदर्शनानां प्रतिकुर्वीत" इत्यादौ प्रतीकारादिक्रियायामपि तदन्वयात् । उपपदविभक्तयश्च यद्यत्पदयोगे यावा विहितास्तत्तदर्थविशेष्यत्वे तत्तत्पदोपस्थाप्यत्वं, यथा चैत्रादन्य इत्यादावन्यादिपदप्रयोगेऽनुशिष्टानां पञ्चम्यादीनामर्थस्य प्रतियोगित्वादेर्विशेष्यत्वे अन्यत्वादिनिष्ठे अन्यादिपदोपस्थाप्यत्वं, (तन्त्रम्) तत्रेत्यनुयोगिनीत्यर्थः तथा आधाराधेयतासम्बन्धेनान्वयः इत्यर्थः । तदभावस्यापि निङाद्युपस्थापितत्वाद्यभावस्यापि तत्र तथा प्रत्ययाद्यन्यपदोपस्थाप्ये आधाराधेयभावसम्बन्धेनान्वय इत्यर्थः । न पचति चैत्रेत्येवादितश्चैत्रादौ नञर्थस्याभावस्य विशेष्यत्वेनानन्वयात् चैत्रेण पाकक्रियानिरूपितत्वेन चैत्रेण पचतीत्यादितश्चैत्रादिवृत्तित्वप्रकारेण पाकजन्यत्वाद्यभावस्यापि बोधाच्चेति भावः" गदाधरः ।

(६) "चैत्रस्य धनमित्यादौ षष्ठ्यादिर्यः स्वामित्वादिकं तच्च प्रकृत्यर्थचैत्रादिविशेष्यतया भासते स्वामित्वप्रकारेण चैत्रादेरेव धनादौ स्वत्वादिसम्बन्धेनान्वयः विभक्त्यर्थविशेष्यतापन्नप्रातिपदिकार्थस्य प्रातिपदिकार्थे साक्षादपि भेदान्वयबोधोपगमात् नामार्थयोर्भेदेनान्वये प्रकारीभूतविभक्त्यर्थोपस्थितेरुक्तत्वात् । अथ वा षष्ठ्यादिर्यः स्वामित्वादिकं प्रकृत्यर्थविशेष्यतयैव भासते धनादेस्तदनाश्रयत्वेऽपि तन्निरूपकतया निरूपकतासम्बन्धेन तत्र तदन्वय इति प्राचामुक्तं दूषयति षष्ठ्यादेर्येति आदिपदात् द्वितीयातृतीयापरिग्रहः । चैत्रादिनिरूपितमिति । स्वामित्वादिकमित्यादिना कर्मत्वक्रियाजन्यत्वादिपरिग्रहः निरूपितत्वसम्बन्धेन चैत्रादिरूपप्रकृत्यर्थान्वयीत्यर्थः । तन्निष्ठमिति आश्रयतासम्बन्धेन विशेष्यतया चैत्रादन्यत्रे आधेयतासम्बन्धेन चैत्रादिरूपविशेष्येणान्वयि नेत्यर्थः । स्वामित्वमित्यादिना कर्तृत्वकर्मत्वादिपरिग्रहः । तस्येति चैत्रस्य चैत्रनिष्ठस्वामित्वादेरित्यर्थः । धनाद्यवृत्तित्वेनेति । उक्तनियामकस्वत्वनिरूपकत्वादिसम्बन्धेन धनादिसम्बन्धत्वेऽपि धनाद्यवृत्तितयेत्यर्थः । धनादौ आश्रयतासम्बन्धेन चैत्रादेस्तन्निष्ठस्वामित्वादेश्चाभावसत्त्वेनेति शेषः इति प्रसङ्गात् भवन्मते अवाधितताद्दशचैत्राद्यभावबोधकस्य इत्यादिप्रयोगस्य प्रामाण्यप्रसङ्गात् । ननु स्वामित्वादेः प्रकृत्यर्थविशेष्यतापन्ने स्वामित्वादेर्निरूपकतासम्बन्धावच्छिन्नाभावस्यैव प्रकृत्यर्थविशेष्यतापन्ने तद्विशिष्टप्रकृत्यर्थचैत्रादेः स्वत्वादिसम्बन्धावच्छिन्नाभावस्य नञा प्रत्यायनोपगमात्र तत्रातिप्रसङ्गावकाशः तादृशाभावस्य धनादौ बाधात् इत्यत आह निरूपकत्वादेरिति आदिपदात् स्वत्वादिपरिग्रहः । प्रतियोगितानवच्छेदकत्वादिति उक्तनियामकतयेत्यादिः । उक्तनियामकसम्बन्धावच्छिन्नसंसर्गाभावस्याप्राप्तिकत्वात् येन सम्बन्धेनायमिह इतिप्रत्ययस्तत्सम्बन्धमादायैव नायमिति प्रत्ययः, निरूपकतासम्बन्धेनात्र स्वामित्वमिति प्रत्ययाभावात् तेन सम्बन्धेन नात्र स्वामित्वमितिप्रत्ययस्याभावः । अतएव धनमात्रे स्वामित्वमात्रस्याश्रयतासम्बन्धावच्छिन्नाभावसत्त्वेन चैत्रीयधने चैत्रनिष्ठस्वामित्वमिति धनेषु चैत्रीयत्वस्य स्वामित्वे च चैत्रनिष्ठस्वाश्रयतासम्बन्धावच्छिन्नाभावसत्त्वेन चैत्रीयधने चैत्रनिष्ठस्वामित्वमिति धनेषु चैत्रीयत्वस्य स्वामित्वे च चैत्रनिष्ठस्वाश्रयतासम्बन्धावच्छेकतया न व्यवच्छिद्यते अपि तु धने न स्वामित्वमित्येवम् अन्यथा निरूपकतासम्बन्धावच्छिन्नस्वामित्वाभावतात्पर्येण तथा व्यवहारस्य दुर्वारतापत्तेः । अतएव कृतिमत्त्वनिरूपकर्तृत्वसम्बन्धस्य उक्तनियामकतया न पचतीत्यत्र तत्सम्बन्धावच्छिन्नक्रियाभाववबोधसम्भवेन पचतीत्यादौ कृतिमत्त्वसम्बन्धेन पाकादेः कर्त्तृत्वान्वयबोधं नोपजगाम । उपजगाम तु जानातीत्यादावाश्रयतासम्बन्धेन ज्ञानादेरिति भावः" गदाधरः ।

(७) "यत्र चेति ययोरित्यर्थः । न संसर्गमर्यादया लभ्य इति भेदान्वये निराकृतत्वेत्यादिः तादृशौ च प्रातिपदिकार्थौ तत्रेति तत्पदार्थे तत्पदार्थसंसर्गाभावबोधे चतुर्योगिनि चतुर्योगिवाचकपदोत्तरं सप्तम्यर्थेचेति । तत्राभावस्वस्वस्वाधारतारूपस्य संसर्गतासम्बन्धेन तदर्थकविभक्तिं विना तद्भानासम्भवादिति भावः । ननु सप्तम्यन्तभूतत्वादिपदेन नञर्थाभावे आश्रयतासम्बन्धेन भूतत्वादिवृत्तित्वबोधवत् तादृशपदेनेदं चैत्रस्येत्यादौ षष्ठ्याद्यन्तपदेनैव प्रथमान्तार्थविशेष्यक नञर्थाभावेऽपि कदाचित् प्रतियोगितया स्वार्थान्वयबोधस्य जननात् घटाद्याभावो भूतले, भूतलवृत्तित्वाभाववान् घट इति द्विविध एव भूतले न घटइत्यादिवाक्यजन्यबोधः । एवञ्च तादृशवाक्यात् कदाचित् प्रथमबोधः कदाचिच्च द्वितीय इत्यत्र किं नियामकमित्याकाङ्क्षायां तात्पर्यभेदस्य तन्नियामकत्वमित्याह तत्र चेति तत्र भूतले न घट इतत्यादिस्थले" गदा०।

(८) "ननु सर्वत्र सप्तम्यन्तार्थसंसर्गाभावनिष्ठतयैवान्वयोऽस्तु न तु कदाचिदपि तत्प्रतियोगितया विनिगमकाभावे व्यक्तीभविष्यतीत्यत आह अतएवेति कदाचित् सप्त-

स्यनार्थप्रतियोगिकाभावस्यापि नञा बोधनादेवेत्यर्थः। पृथिव्यां गन्धे न जले इत्यादौ इत्यादिद्विविधवाक्ये प्रतीतेरेकविशेष्यकत्वानुभवः गन्धाद्येकविशेष्यकप्रतीतिजनकत्वानुभवः न जले इत्यतो गन्धाभावस्यैव जलवृत्तित्वबोधोपगमे तत्प्रतीतावभावस्यैव विशेष्यतया पृथिव्यां गन्ध इत्यतश्च तद्विशेष्यकबोधानुत्पत्त्या तयोरेक विशेष्यक बोधजनकत्वानुभवो विरुध्यतेति भावः" गदा०।

(२) "नञर्थाभावनिष्ठाधेयतावोधकत्वं सप्तम्याः खण्डयतां मतमुपन्यस्यति केचित्त्विति विशेषे विशेषणस्याभाव इति नञोऽसत्त्वे यत्पदार्थे यत्पदार्थो विशेषणतया यत्र भासते तत्र नञा तत्पदार्थं तत्पदार्थाभावो विशेषणतया प्रत्याय्यते इत्यर्थः। तथा च भूतले घट इत्यतो घटे भूतलवृत्तित्वस्य विशेषणतया बोधात् भूतले न घट इत्यतोऽपि घटे भूतलवृत्तित्वाभाव एव विशेषणतया प्रतीयते न तु घटाभावे भूतलवृत्तित्वम् एकाकारवाक्यस्य द्विविधबोधजनकत्वोपगमे नञ्पदे सप्तम्यन्तभूतलादिपदसमभिव्याहारस्यानस्य द्विविधकारणत्वकल्पनापत्तेः। उभयसाधारणतत्कार्यतावच्छेदकैकस्य सम्भवेऽपि तादृशवाक्य धर्मिकद्विविधवाक्यार्थतात्पर्यज्ञानस्य पृथक्कारणतया तत्कारणताधिक्यस्य दुर्वारत्वादिति भावः। एतन्मते युक्त्यन्तरमाह अतएवेति घटो नास्तीत्यादाविवेत्यादिना घटौ न स्तः घटा न सन्तीत्यादिपरिग्रहः वचनैक्यनियम इति विशेष्यविशेषणपदयोः समानवचनत्वनियमेन सुप्तिङोर्वचनसाम्ये नियम इत्यर्थः भूतले घटोऽस्तीत्यादौ भूतलाद्यस्तित्वविशेष्यत्वे तदैक्येन तद्घटोऽस्तीत्यादौ भावस्य भूतलाद्यस्तित्वविशेष्यत्वे घटौ न स्तइत्यादौ द्विवचनाद्यनुपपत्तेरिति भावः" गदाधरः।

(१०) "गतिश्चिन्तनीया सत्ताशब्दस्य सत्तासमवाये सत्ताप्रतियोगिकत्वविशिष्टसमवायानुयोगित्वे वा लक्षणया उपपत्तिप्रकारश्चिन्तनीयः। यथाश्रुतार्थेऽनुपपत्तिं दर्शयति जातीति अप्रसिद्धेरिति तदभावस्य सत्तायां नञा बोधयितुमशक्यत्वादिति शेषः। इदञ्चात्र समवायेन इत्तेः सप्तम्यर्थत्वे बोध्यम्। वृत्तिसामान्यस्य सप्तम्यर्थतोपगमेऽप्रसिद्धिविरहेण तत्पदे बाधमाह सम्बन्धान्तरेणेति एकार्थसमवायेनेत्यर्थः" गदाधरः।

(११) "मतान्तरमाह सप्तम्यर्थेति भूतले घटो नास्ति, जातौ न सत्ताऽस्तीत्यादौ भूतलजात्याद्यस्तित्वरूपसप्तमीसमभिव्याहृतक्रियापदपर्यन्ताकाङ्क्षाश्चदृशतात्पर्यो बोऽभावः प्रतियोगितासम्बन्धेन प्रकारीभवतस्तस्य विशेष्यतया प्रतियोगी भासत इत्यर्थः एवञ्च परम्परया क्रियाविशेष्य प्रतियोगिवाचकघटादिसमानवचनत्वं क्रियापदस्य निर्वक्तीति द्रष्टव्यम्। येन रूपेण प्रतियोगिनो विशेषणत्वं तद्रूपावच्छिन्नविशेष्यितैव प्रतियोगिता सम्बन्धतया भासते अतो घटादिमति विशेष्याभावमादायात्र घटो नास्तीत्यादयो व्यवहाराः" गदाधरः।

(१२) "यजति ये यजामहं नानुयाजेष्वित्यादौ अनुयाजाख्ययागविशेषभिन्नयागेषु ये यजामहे पदवन्तं मन्त्रं करोति उच्चारयतीत्याकारकबोध उत्पद्यत इत्यर्थः कारणसत्त्वे कार्योत्पादस्यावश्यं भावादिति भावः। अत्र नञा निषेधबोधने बाधकमाह एकवाक्यत्वेति एकविधेयार्थकत्वानुरोधादित्यर्थः। अत्र नञान्योन्याभावबोधनेऽनुयाजभिन्नेषु यागेषु ये यजामहेपदवन्मन्त्रकरणरूपैकार्थविधानसम्भवेनैकविधेयार्थकत्वरूपैकवाक्यत्वं सम्भवति तत्र नञा निषेधबोधने च नैवं यागेषु ये यजामहेपदवन्मन्त्रविधानं अनुयाजेषु तन्निषेधविधानमिति विधेयीभूतार्थद्वैविध्यात् एकविधेयीभूतैकार्थत्वस्य सम्भवे नानाविधेयार्थकत्वरूपविभिन्नवाक्यत्वकल्पनाया अन्याय्यत्वेन तत्रेष्टापत्तिकरस्याश्रयत्वादिति भावः" रघुदेवः।

(१३) "तत्र च नञा निषेधबोधने दूषणान्तरमाह ये यजामहमित्यादेरित्यादि। तत्पदेन करोतेः क्रियात्वेन कारकबोधाहरोधात् करोतिपदस्य ये यजामहमिति पदस्य चानुषङ्गकल्पने गौरवाच्चेति। तथा चात्र नञा निषेधबोधने यागेषु ये यजामहं करोति, नानुयाजेषु येयजामहं करोतीत्यर्थः। अनुषङ्गकल्पनं विना तु तादृशबोधो न सम्भवति। यजतुश्चरितेत्यादि व्युत्पत्तिभङ्गप्रसङ्गादिति भावः" रघुदेवः।

(१४) "नन्वत्र नञा निषेधबोधने नानुयाजेष्वित्यत्र सप्तम्यर्थान्वयो भवति अनुयाजाधिकरणतादृशनिषेधस्य बोधात्। अन्योन्याभावबोधने च न तथेति सप्तम्यर्थान्वयभङ्गेन पूर्वोक्तदोषद्वयमभ्युपेत्यात्र नञा निषेधबोधकत्वमवश्यमभ्युपेयमित्यत आह विशेषणविभक्तिश्चेति तथा चात्र नञान्योन्याभावबोधनेऽपि विशेषणविभक्तेः प्रयोगसाधुत्वरूपप्रयोजनसम्भवेन न वैरर्थ्यमिति भावः" रघुदेवः।

(१५) "ननु सर्वत्र विशेषणविभक्तेः प्रयोगसाधुत्वे नीलो घट इत्यादावभेदसम्बन्धेनैव घटे नीलस्यान्वयबोधः स च न

सम्भवति नामार्थयोः साक्षादन्वयस्याव्युत्पन्नत्वादित्यत आह नामार्थयोरित्यादि भेदेन स्वभेदादितिरिक्त सम्बन्धेन तन्त्रत्वात् हेतुत्वात् तथा चाभेदातिरिक्तसम्बन्धावच्छिन्ननामार्थनिष्ठप्रकारतानिरूपितविशेष्यतासम्बन्धेन शाब्दबुद्धिं प्रति विषयतासम्बन्धेन विभक्त्यर्थदत्तानजन्योपस्थितेर्हेतुत्वस्य कल्पनाच्चोक्तानुपपत्तिः। तत्ताभेदसम्बन्धेनैकनामार्थोपस्थापरनामार्थस्य प्रकारतया ताडशशाब्दबोधस्योक्तकार्यतावच्छेदकसम्बन्धेन तत्रोत्पत्त्यभावात्। मतान्तरमाह लाघवेनेत्यादि लाघवञ्च तत्र जनकतावच्छेदकोटावभेदातिरिक्तसम्बन्धावच्छिन्नत्वानिवेशेन तयोः नामार्थयोः तत्तात्वम् विभक्त्यजन्योपस्थितेस्तन्त्रत्वम्" रघुदेवः।

(१६) "नन्वेवं सति नीलो घट इत्यादौ कथं विशेषणविभक्त्यजन्योपस्थितिं विनाप्यभेदान्वयबोधसत्त्वाह विशेषणविभक्तिरिति स्वभेदार्थिका सर्वत्राभेदार्थिका तथा च तत्र विभक्त्यजन्याभेदोपस्थितिं विनाऽभेदानङ्गीकार इति भावः" रघुदेवः।

(१७) "ननु यत्र विशेषणविभक्तेरभावस्तत्र का गतिरित्यत आह नीलोत्पलमित्यादि तथा च तत्रापि यावत् लुप्तविभक्तेरनुसन्धानं नास्ति तत्र तावत् नाङ्गीक्रियत एव शाब्दबोध इति भावः। मतेत्यित्यनेनाक्षरसः सूचितः स च तन्मतेऽपि नीलोत्पलमित्यादौ लुप्तविभक्तेरनुसन्धानं विनाप्यनुभवसिद्धस्य शाब्दबोधस्यापलापो द्रष्टव्यः" रघुदेवः

(१८) "न राज्ञ इत्यादि। न राज्ञः पुरुष इत्यादौ यथा पुरुषे षष्ठ्यर्थस्वत्वस्याभावः प्रतीयते तथात्रापि(नानुयाजेष्वित्यत्र) प्रयोगे सप्तम्यर्थस्याभेदाभावः प्रतीयत इत्यर्थः। न चैवं सति एतन्मते नञोऽन्योन्याभावत्वेन शक्तिकल्पनमनर्थकम् सर्वत्र संसर्गाभावशक्तित एव नञ् जन्यशाब्दबोधनिर्वाहात् भूतलं न घट इत्यादौ विशेषणविभक्त्यर्थाभेदस्य संसर्गाभाव एव नञा प्रत्याय्यत इत्यभ्युपगमादिति वाच्यम्। तत्र भेदत्वप्रकारकशाब्दबोधस्यानुभवसिद्धतया उपपादयितुं च निराकरणासम्भवेन तेन रूपेणापि नञः शक्तिकल्पनस्यावश्यकत्वादिति" रघुदेवः।

(१९) "केचित्तु यजतिषु ये यजामहं करोति नानुयाजेष्वित्यादौ नञो निषेधबोधकत्वे ऽनुयाजेषु येयजामहेवन्नञ्त्व विरुद्धापत्तिः यजतिषु येयजामहं करोतीत्यनेन यागसामान्ये तत्प्राप्त्या, तदन्तर्गतानुयाजेष्वपि प्राप्तत्वात् नानुयाजेष्वित्यनेन तत्र तस्य प्रतिषिद्धत्वाच्चेति, तत्र नञ न प्रतिषेधबोधकत्वं किन्तु भेदबोधकत्वमिति नानुयाजेष्वित्यादौ नञो भेदबोधकत्वे युक्तिमाहुः तन्नतं दूषयितुमुपन्यस्यति यत्त्विति करणनिषेध इति। नानुयाजेष्वित्यादौ नञा येयजामहेपदवन्नञ्त्वकरणनिषेधबोधने इत्यर्थः विरुद्धापत्तेरिति अनुयाजेषु तादृशमन्त्रकरणाकरणापत्तेरित्यर्थः उपदर्शितरीत्या तादृशमन्त्रकरणस्य विहितनिषिद्धत्वादिति भावः" रघुदेवः।

(२०) "विशेषनिषेध इत्यादि ब्राह्मणेभ्यो दधि दातव्यं न कौण्डिन्याय दातव्यमित्यादौ विशेषनिषेधस्थलीयस्य ब्राह्मणेभ्यो दधि दातव्यमितिसामान्यविधेः कौण्डिन्यातिरिक्तब्राह्मणसम्प्रदानकदधिदानबोधकत्वव्यवस्थापनं प्रकृतेऽपि यजतिषु येयजामहं करोतीति सामान्यविधेरप्यनुयागातिरिक्तयागे ये यजामहेपदवन्नञ्त्वकरणप्रतिपादकत्वेनानुयाजे तादृशमन्त्रकरणस्यामाप्त्या विकल्पासम्भवादिति भावः" रघुदेवः।

(२१) "ननु ब्राह्मणेभ्यो दधि दातव्यं न कौण्डिन्याय दातव्यमित्यादावपि सामान्यविधेर्न विशेषेतरपरत्वम्। न च तथा सति कौण्डिन्यस्य दधिदानप्रसक्त्या विकल्पापत्तिरिति वाच्यं तत्र नञोभेदबोधकत्वमभ्युपेत्य वाक्यैकवाक्यतया कौण्डिन्यान्यब्राह्मणसंप्रदानकदधिदानप्रतिपादनाभ्युपगमेन कौण्डिन्यस्य तदप्राप्त्या तन्निषेधाप्राप्त्या च विकल्पानवकाशात् तत्र सामान्यविधेर्विशेषेतरपरत्वकल्पनस्य निर्युक्तिकत्वात् प्रकृतस्थले नञोनिषेधबोधकत्वेन विकल्पापत्तिदुर्वारेत्यत आह न चेति। विरुद्धैकवचनत्वादिति। यथैकनामार्थेऽपरनामार्थान्योन्याभावबोधकनञ्स्थले विशेषणविशेष्यवाचकपदयोः समानविभक्तिकत्वं तन्त्रम्। तथा समानवचनत्वस्यापि तन्त्रत्वेन प्रकृते तदभावात्तथा बोधासम्भवादिति भावः" रघुदेवः।

(२२) "नन्वेकनामार्थेऽपरनामार्थस्यान्योन्याभावबोधे विशेषणवाचकपदविशेष्यवाचकपदयोः समानवचनस्य तन्त्रत्वे प्रमाणाभाव इत्यत आह न हि खल्वित्यादि। नामार्थयोरभेदान्वयबोधे विशेषणबोधकपदविशेष्यबोधकपदयोः समानवचनत्वस्य तन्त्रत्व एव नञ्जन्यान्योन्याभावबोधे तयोस्तदायाति नञ् जन्यान्योन्याभावविषयकशाब्दबोधं प्रत्येकपदार्थेऽपरपदार्थस्याभेदान्वयबोधकैकपदसमभिव्याहृतापरपदे नञ्समभिव्याहारज्ञानस्य हेतुत्वादित्यतस्तत्प्रदर्शितं महतो राज्ञ इत्यनेन। नन्वेकपदार्थेऽपरपदार्थान्योन्याभावविषयकशाब्दबुद्धिं प्रति वि-

शेषत्वबोधकपदविशेष्यबोधकपदयोः समानवचनत्वनियामकत्वकल्पने एकोनद्वाविंशादौ नञोऽन्योन्याभावविशेषकशाब्दबोधानुदयप्रसङ्ग इति तत्र तदनभ्युपगम आवश्यकतया च ब्राह्मणेभ्यो दधि दातव्यं न कौण्डिन्यायेत्यादौ नञान्योन्याभावबोधने बाधकाभाव इत्यतः पूर्वोक्तदोषोद्धारपरःपरं दोषान्तरमाह एको न द्वाविंशादिवदित्यादिना। अत्र च नित्यद्विवचनाद्यन्वयव्यतिरिक्तस्थले तथाविधनियमस्वीकारे तु पूर्वोक्तदोषस्यैव दुरुद्धरतेति सूचनार्थमुक्तं कथञ्चिदिति। ब्राह्मणेभ्यो दधि दातव्यं न कौण्डिन्यायेत्यादिनैव कौण्डिन्यभिन्नब्राह्मणसम्प्रदानकदधिदानबोधसम्भवात् द्वितीयदातव्यपदं निरर्थकमिति भावः" रघुदेवः।

(२३) "अतएवेति। यतएव विशेषनिषेधस्थले सामान्यविधेर्विशेषेतरपरत्वम् अतएवेत्यर्थः। अन्यथाऽभावाख्यायां पितृभ्यो दद्यादित्यनेन रात्रौ श्राद्धकरणप्राप्त्या रात्रौ श्राद्धं न कुर्वीतेत्यनेन तत्र श्राद्धकरणनिषेधस्य च प्राप्त्या तत्र तत्करणस्य विहितप्रतिषिद्धत्वाभ्यां विकल्पापत्तेर्दुर्वारत्वादिति भावः" रघुदेवः।

(२४) "नन्वत्राप्यन्योन्याभावार्थकतया रात्रीतरकाले श्राद्धकरणस्य विधानसम्भवेन सर्वसामञ्जस्ये व्यर्थं तत्र नञो निषेधार्थकत्वकल्पनमित्यत आह न चेति तत्रापि रात्रौ श्राद्धं न कुर्वीतेत्यत्रापि रात्रीतरपरता नञोन्यान्याभावार्थकतया रात्रीतरकाले श्राद्धकरणस्य बोधकतेत्यर्थः। तथा च व्यर्थं प्रतिषेधार्थकत्वकल्पनमिति भावः" रघुदेवः।

(२५) "रात्रिभिन्न इत्यादि। रात्रौ श्राद्धं न कुर्वीतेत्यादौ नञो न्योन्याभावार्थकतया रात्रीतरकाले श्राद्धकरणविधानाभ्युपगमेऽभावाख्यायां पितृभ्यो दद्यादित्यनेन रात्रौ श्राद्धप्रसक्तेस्तत्करणापत्तेर्दुर्वारत्वादित्यर्थः" रघुदेवः।

(२६) "नन्वेवं तथाविधवाक्ययोर्वाक्यैक्यवाक्यतया रात्रीतराभावाख्यायां कुर्वीतेत्यर्थकत्वाभ्युपगमे न पूर्वोक्तकल्पोक्तदोष इत्यत आह न चेत्यादि। रात्रौ श्राद्धं न कुर्वीतेत्यतो भिन्नं वाक्यान्तरमस्ति। तेन क्रियारहितश्राद्धविधायकवाक्येन" रघुदेवः।

(२७) "नापीदम्। इदं रात्रौ श्राद्धं न कुर्वीतेति वाक्यम्। पृथक्क्रियारहितम्। अनुषङ्गिककियातिरिक्तक्रियारहितम्। केवलं क्रियारहितमित्युक्तौ नानुयाजेष्वितिवाक्यमपि तथा, तत्रानुषङ्गिककरोतिक्रियासत्त्वादतः पृथगित्युक्तम्। तथा च तयोरेकवाक्यतासम्भवे रात्रीतरवाक्यं क्रियारहितं भवति अन्यथा तयोरेकतरवाक्ये क्रियापदस्य वैयर्थ्यापत्तेः। श्राद्धकरणप्रापकवाक्यान्तरस्याभावेन प्रकृतवाक्यद्वयस्यैव क्रियापदवत्तयैकवाक्यत्वाभावेन पूर्वोक्तदोषो दुर्द्धर एवेति भावः रघुदेवः।

(२८) "ननु रात्रौ श्राद्धं न कुर्वीतेत्यादौ नञोनिषेधबोधकत्वं न सम्भवति त्वन्मते विशेषनिषेधस्थले सामान्यविधेर्विशेषेतरपरत्वनियमेनाभावाख्यायां पितृभ्यो दद्यादित्यादि सामान्यविधेः रात्रीतराभावाख्याकाले श्राद्धकरणस्य विधायकत्वेन तत्र श्राद्धकरणप्रापकवाक्यान्तरस्य चाभावेन तत्र तस्याप्रसक्तत्वाद्दर्शितसामान्यविधेर्विशेषान्तरपरत्वं नाभ्युपगम्यते चेत्तदा तत्र तत्प्राप्तौ तु विकल्पापत्तिरित्याशङ्क्यते अथ रात्रावित्यादिना। उपन्यासपूर्वकं समाधानमाह साधीयानिति। तथा च प्रसक्तं हि प्रतिषिध्यत इति नियमे प्रसक्त्याभावेनाप्रसक्तस्यापि निषेधे बाधकाभावेन रात्रौ श्राद्धं न कुर्वीतेत्यादौ नञोनिषेधबोधकत्वाभ्युपगमे चतिविरुद्ध इति भावः" रघुदेवः।

(२९) "निषेधविधेरिति। तादृशनियमस्वीकृत्याप्रसक्तस्यापि निषेधाभ्युपगमे इत्यादि पूरणीयम्। वैयर्थ्यमिति प्रसक्तस्यैव प्रतिषिद्धत्वमिति नियमे तु तत्र तत्करणस्यैव निषेधविधेः प्रयोजनत्वसम्भव इति तादृशनियमाभ्युपगमोऽत्यावश्यकस्य च विशेषविशेषनियन्त्रितत्वान्न दोष इति भावः। तात्पर्यानवबोधादिति। रात्रीतराभावाख्याकालाधिकरणश्राद्धकरणबोधतात्पर्यऽनिर्णयप्रसङ्गं यद् रात्रिश्राद्धकरणं तद्दारणस्य तत्प्रयोजनत्वादित्यर्थः। रात्रौ श्राद्धकरणनिषेधबोधकवाक्याभावेऽभावाख्यायां पितृभ्यो दद्यादित्यादिवाक्यतो रात्रीतराभावाख्याकाले श्राद्धकरणस्य बोधासम्भवः तथाविधतात्पर्यनिर्णयाभावात् तथा च रात्रावपि श्राद्धकरणं प्रसज्येत रात्रौ श्राद्धकरणस्य निषेधविधौ तु तथाविधवाक्यार्थपर्यालोचनक्रमेण तथाविधविधेरुपदर्शितार्थे तात्पर्यनिर्णयसम्भवेन तस्मात् तादृशबोधसम्भवेन रात्रौ तदप्राप्तौ तत्र तत्करणाप्रसक्तिरिति भावः" रघुदेवः।

(३०) "एवं सति विकल्पस्यापि दुर्लभत्वापत्तिरित्यत आह एकविधयतयेत्यादि। अनन्यगतिकतया विकल्पं विना गत्यन्तराभावतया तथा च तत्र विकल्पं विना प्रकारान्तरासम्भवेनावश्यं तत्र विकल्पस्वीकारेण न विकल्पस्यापि दुर्लभत्वापत्तिरिति भावः" रघुदेवः।

(२१) "ननु नातिरात्रे षोड़शिनं गृह्णातीत्यत्र नञा इष्टसाधनत्वस्यैवाभावः प्रतीयते प्रकारान्तरस्याभावात् तच्च न सम्भवति षोड़शिग्रहणविधिविरोधादित्याशङ्क्य उपपादयति अत्र चेति न षोड़शिनं गृह्णातीत्यत्र चेत्यर्थः" रघुदेवः ।

(२२) "ननु धात्वर्थान्विते एव विभक्त्यर्थे नञर्थाभावस्यैवान्वयो व्युत्पन्न इत्यतआह व्युत्पत्तेश्चेति तथा च तादृशव्युत्पत्तिकल्पने प्रमाणाभाव इति भावः" रघुदेवः ।

(२३) "अतएव तादृशव्युत्पत्तेरभावादेव" रघुदेवः ।

(२४) "ननु क्वचिद्धात्वर्थेऽपि विभक्त्यर्थप्रतियोगिकस्याभावस्य क्वचिद्व धात्वर्थाभावे विभक्त्यर्थान्वय इति नियामकाभाव इत्यत आह नियमस्त्वित्यादि तथा च यत्र धात्वर्थे विभक्त्यर्थाभावबोधे तात्पर्यं तिङादेरपि नास्ति तत्र तथा बोधः । यत्र तु धात्वर्थाभावे विभक्त्यर्थान्वयबोधे तात्पर्यं तत्र तथैवान्वयबोध इति नियम इति भावः" रघुदेवः ।

(२५) "ननु षोड़शिग्रहणस्याङ्गत्वेन इष्टसाधनत्वाभावात् नातिरात्रे षोड़शिनं गृह्णातीत्यादौ षोड़शिग्रहणे इष्टसाधनत्वाभावबोधनेऽपि न ग्रहणविरोधः किन्तु बाधेन तत्रेष्टसाधनत्वस्यान्वयबोधासम्भवः तथा च कथं तत्र ग्रहणविधिविरोधेन धात्वर्थाभावे इष्टसाधनत्वान्वयबोधाङ्गीकार इत्यत आह सुखफलाजनकत्वेऽपि चेत्यादि तथा च तत्रेष्टसाधनत्वाभावान्वयबोधस्य स्वीकारे ग्रहणनिषेधविरोधोदुरपह्नव इति भावः" रघुदेवः ।

(२६) "ननु ग्रहणाग्रहणयोस्तुल्यफलजनकत्वे कथं बहुदुःखसाध्ये षोड़शिग्रहणे प्रवृत्तिरित्यत आह ग्रहणविध्यन्यथानुपपत्त्या चेति । तथा च तयोस्तुल्यफलाभावेन नोक्तशङ्काया अवकाश इति भावः" रघुदेवः ।

(२७) 'प्रतियोग्यनुयोगिभावः प्रतियोगित्वमनुयोगित्वम् आधाराधेयभावः आधारत्वमाधेयत्वम् उभयत्रोभयोल्लेखं तुल्यविभक्तिवेद्यत्वाभिप्रायेण" रघुदेवः ।

(२८) "ननु नञोऽभावार्थकत्वे कथं भूतले न घटः भूतलं न घट इत्यादौ भूतलेऽधिकरणतासम्बन्धेन नञर्थाभावस्यान्वयोऽन्योन्याभावे च प्रतियोगितासम्बन्धेन घटादेरन्वयो नामार्थयोर्भेदेनान्वयबोधानङ्गीकारादित्यत आह निपातेति । अव्ययनिपातातिरिक्तेत्यर्थः । तथा च फलबलाच्चिपाता अव्ययजन्यशाब्दबोधं प्रति प्रकारीभूतविभक्त्यर्थोपस्थितेर्हेतुत्वाकल्पनेनानुपपत्त्यभाव इति भावः" रघुदेवः ।

(२९) "अतएवेति यतएव फलबलान्निपाताव्ययजन्यशाब्दबोधं प्रति प्रकारीभूतविभक्त्यर्थोपस्थितेर्न हेतुत्वमतएवेत्यर्थः । इवाद्यर्थान्वयबोधे चन्द्र इव मुखमित्यादाविवाद्यर्थान्वयबोधे आदिना नञतिरिक्तनिपातमात्रपरिग्रहः" रघुदेवः ।

(३०) "ननु नञोऽभावार्थकत्वेऽघट भूतलमित्यादौ कथं नानाधर्माभ्यामेकधर्मिबोधकत्वरूपसामानाधिकरण्योपपत्तिरित्यत आह अघटं भूतलमित्यादि। संसर्गाभावाऽन्योन्याभावार्थकनञ्भेदेनोदाहरणद्वयम् । अघटमित्यत्र नपुंसकलिङ्गनिर्देशस्तु न विद्यते घटो यत्रेति बहुव्रीहिसमासस्यटीकरणाय अन्यथाऽघट इत्युक्ते न घटोऽघट इति नञ्तत्पुरुषेऽपि तथा प्रयोगसम्भवे तत्र च नञोऽन्योन्याभाववत्परतया घटसंसर्गाभाववच्चाव्ययनञ उदाहरणासम्भव इति ध्येयम् । तत्र अभाववत्परता भाववद्बोधकता" रघुदेवः ।

(३१) "यैस्तु निपातजन्यशाब्दबुद्धिं प्रत्यपि प्रकारीभूतविभक्त्यर्थोपस्थितेर्हेतुत्वमपेक्ष्यते तन्मतमाह केचित्त्विति प्रतियोगिपदोत्तरस्य सुप इति भूतले न घट इत्यादौ घटादिबोधकपदोत्तरसुप इत्यर्थः" रघुदेवः ।

(३२) "ननु सर्वत्र प्रतियोगित्वस्य नञ्समभिव्याहृतप्रतियोगिबोधकपदोत्तरसुवर्थत्वे घटीयोऽभावो न घटश्चेति प्रयोगापत्तिः तत्रापि घटनिष्ठप्रतियोगित्वस्य स्वरूपसम्बन्धेनाभावस्य घटाभावे विद्यमानत्वात् न च न घटश्चेत्यत्र निरूपकत्वसम्बन्धावच्छिन्नघटनिष्ठप्रतियोगितानिष्ठप्रतियोगिताकाभावबोधाभ्युपगमाच्च तथा प्रयोगः घटनिष्ठप्रतियोगितायां निरूपकतासम्बन्धेन घटाभावे विद्यमानत्वादिति वाच्यम् । इत्यनियामकसंसर्गस्याभावप्रतियोगितावच्छेदकत्वाभावेन तथोल्लेखस्यकत्वादित्यत आह अनुयोगित्वं वेति वाकारो व्यवस्थितविकल्पसम्भावकः तथा च क्वचित् प्रतियोगित्वं तत्राविवक्षुवर्थः क्वचिदनुयोगित्वं वेति लक्ष्यम् । अतएव घटो न घटाभावश्चेत्यादौ घटे घटाभावप्रतियोगित्वाभावबोधस्यानुभवोऽपि उपपाद इति ध्येयम्" रघुदेवः ।

(३३) "नञुत्तरसुपोऽधिकरणात्वर्थकत्वे सर्वत्र नञुत्तरसुपोऽनुसन्धानकल्पनं तत्र लक्षणाकल्पनं चेत्युभयकल्पने गौरवम् तदपेक्षया नञ एवाभाववति लक्षणाकरणकल्पनमुचितमित्याशयेनाह नञो वेति" रघुदेवः ।

(३४) "ननु नञोऽन्योन्याभावबोधने विशेषणवाचकपदविशेष्य-

वाचकपदयोर्विरुद्धविभक्तिराहित्यं तन्त्रमिति पूर्वसङ्गम् तत्र च विरुद्धविभक्तिकत्वं विरुद्धार्थप्रतिपादकविभक्तिकत्वम् अन्यथा व्यत्ययानुशासनस्यले कर्मत्वाद्यर्थकप्रथमान्तपदार्थसाम्याभावेऽपि एकत्वाद्यर्थप्रथमान्तत्वसाम्येनान्वयबोधापत्तेः। तथा च प्रतियोगिवाचकपदोत्तरसुपः प्रतियोगित्वाद्यर्थकत्वे न न घट इत्यादौ नञोऽन्योन्याभावबोधकत्वासम्भवः तस्य विशेष्यवाचकपदात् भिन्नत्वेन तत्प्रतिपादकविभक्तेर्विशेषणवाचकपदोत्तरविभक्त्यर्थप्रतियोगित्वादिति भवताक्षोकारात् एवं नञर्थसंसर्गाभावे भेदेनेतरपदार्थान्वयानुभवेऽनुयोगिवाचकपदोत्तरं सप्तम्यमेवेति यत्पूर्वसङ्गं तदपि न नञुत्तरसुपोऽधिकरणत्वे लक्षणया भवति। एवं नञोऽभावबुद्धावाश्रयिकत्वे तत्कल्पे तथाविधभेदान्वयबोधापत्तौ तथाविधाभेदान्वयबोधे तु तादृशसप्तम्यन्तापेक्षा न सम्भवति घटं भूतलमित्यादौ तदभावात् एवञ्च क्वचिन्नञान्योन्याभावः प्रतिपाद्यते क्वचित् संसर्गाभावः प्रतिपाद्यते इत्यत्र नियामकाभावः सर्वत्र तदुभयबोधप्रसङ्गात् इत्यत आह विभक्त्यर्थेति विभक्त्यर्थस्यान्योन्याभावबोधने अनुयोगिवाचकपदसमानविभक्तिकपदार्थस्य, संसर्गाभावबोधने च नञोऽसामार्थ्यमित्यर्थः तथा च फलानुरोधेन तत्र तत्तदानुपूर्वीज्ञानस्य हेतुत्वकल्पनान्नानियमप्रसङ्ग इति भावः" रघुदेवः।

(३९) "तथाविधकार्यकारणभावकल्पनं पूर्वमतेऽप्यावश्यकमित्याह तेनेति। तथाविधासामर्थ्यकल्पनेनेत्यर्थः। संसर्गाभावः संसर्गाभावबुद्धेर्हेतुर्न प्रतीयते। तथा च तादृशकार्यकारणभावाकल्पने पूर्वमतेऽप्येतेषु स्थलेषु तत्तदन्वयबोधापत्तिर्दुर्वारेति तादृशकार्यकारणभावकल्पनावश्यकत्वमिति भावः" रघुदेवः।

दृष्टसाधनत्वाभावेऽपि प्राप्तिपूर्वकत्वाद्विधेयत्वेति मीमांसकैर्मन्यते तेषामाशयः क्षुद्रे दक्षिणो नास्तीत्यादौ प्रत्यक्षे अभावज्ञानस्य प्रतियोगिज्ञानसापेक्षतया प्रतियोगिनश्च ज्ञानलक्षणादिना पूर्वं ज्ञायमानत्वेन तस्याभावो क्षुद्रे भोजनेऽपि प्राप्तस्य ज्ञातस्य दक्षिणस्य अन्यत्र प्रसक्तावपि क्षुद्रे वायौरूपवत् निषेधो न विरुध्यते। शास्त्रीये तु निषेधे विधीयमानो निषेधः प्राप्तिसापेक्षोऽपि प्राप्तिश्च रागतोऽतिदेशशास्त्रतो वा। तत्र न कलञ्जं भक्षयेदित्यादौ रागप्राप्तस्य निषेधः। अतिदेशतः प्राप्तयोः "न स्त्रीं गच्छेत्" इत्यादौ अघाराज्यभागयोः पशुयागे निषेधः। अतिदेशशास्त्रस्यान्यत्र चरितार्थत्वेन अतुल्यबलत्वात् नात्र विकल्पः। किन्तु एकविषयतयाऽनयोर्भोक्तृभिन्नदक्षिणाप्रदक्षिणयोर्विकल्पः इति भेदः। अप्राप्तस्य विधीयमाननिषेधस्य प्राप्तिश्च प्रतियोगिप्राप्तेरित्येव तत्र प्राप्तिपूर्वकत्वम्। तत्र च पर्युदासः यथा "न तौ पशौ करोति" इत्यादौ करोतीत्यादेरनुवादत्वेन नानर्थक्यम् "सम्बन्धे नान्यतरवैयर्थ्यमिति" न्यायात् तेन आघाराज्यभागकरणानुवादेन पशुयागभिन्नत्वमात्रं विधेयम् एवं रात्रौ श्राद्धं न कुर्वीतेति वाक्येऽपि क्रियापदस्यानुवादत्वेन तस्य वैयर्थ्याभावात् तत्र श्राद्धकरणानुवादेन रात्रिभिन्नकालत्वं विधेयम्। यथा वा दध्ना जुहोत्यादौ होमसम्बन्धेन दधिद्रव्यकरणकत्वमात्रं विधीयते एवं श्राद्धकरणसम्बन्धेन रात्रीतरकालरूपद्रव्यविधाने लक्षभावः। अन्यथा कुत्र रात्रीतरकालो विधीयेत। अतः न रात्रौ श्राद्धं कुर्वीतेत्यादि वाक्यस्य श्राद्धकरणनिषेधपरताव्यवस्थापनं न युक्तिसहं "न कलञ्जं भक्षयेदित्यादाविव पदव्यापूर्वकल्पनाया तदतिक्रमे दुरदृष्टसाधनत्वकल्पनायाश्चापत्तेर्दुर्वारत्वात् सकलशिष्टाचारसम्मततस्य रात्रौ श्राद्धकरणेऽनिष्टाभावस्य विरोधापत्तेश्च। किञ्च इदं वाक्यं न केवलश्राद्धानुवादेन रात्रीतरकालविधानं किन्तु यावच्छ्राद्धानुवादेन रात्रीतरकालविधानपरमित्यपि मन्तव्यम्। यद्यपि अष्टकासु अघासु चेति बहुवचने अष्टकादिपदस्य बहुवचनान्ततया निर्देशेन तद्विरुद्धैकवचनावरुद्धत्वात् भेदपरता सम्भवति पूर्वोक्तव्युत्पत्तिविरोधात् तथापि सामान्ये न औत्सर्गिकमेकवचनं लाक्षभिप्रायमिति न विरोध इत्यवधेयम्।

क्रियायामिव विभक्त्यर्थेऽपि नञर्थाभावान्वय इति यदुक्तं तत्र न कलञ्जं भक्षयेदित्यादौ धात्वर्थे बलवदनिष्टानुत्पित्सारूपविध्यर्थस्य" एकादश्यां न भुञ्जीतेत्यादौ भोजनाभाव एव विध्यर्थेष्टसाधनत्वस्य च बोध इति विषयभेदेन व्यवस्था। अतएव न कलञ्जं भक्षयेदित्यादि निषेधवाक्यम् एकादश्यां न भुञ्जीतेत्यादि निषेधविधिवाक्यमिति भेदः। तदेतत् शब्दशक्तिकाशिकायां समर्थितम्। "बहुः सखड्डं न तरेदित्यादौ नञादिना सखड्डतरत्वादेः, बहुप्रभृतिकृतिसाध्यत्वनिषेधबोधानुरोधादवश्यं कृतिसाध्यत्वं लिङर्थः तथा लक्षिकाभोजनं न ताड्येदित्यादौ लक्षिकामेष्टसाधनत्वस्य, न कलञ्जं भुञ्जीतेत्यादौ च कलञ्जभक्षणादेः बलवदनिष्टजनकत्वेऽपीष्टसाधनत्वस्य निषेधा-

नुपपत्त्या दृष्टसाधनत्वादिकमपि (यथायथम्)। न चाङ्गो रात्रावच्छेद्यभोजननिवृत्तिरूपस्योपवासस्य क्रत्वसाध्यत्वादृष्ट्यासपयसेदिति विधेर्बाधः क्रत्वधीनसमयसम्बन्धरूपस्य नैमित्तिकक्रतिसाध्यत्वस्य नित्येऽप्यनपायात्, तादृशप्रयोगे भोजनादिप्रतिकूलव्यापारस्यैव वा धात्वर्थत्वात्" इति। मीमांसकमतानुसारेण कलञ्जाधिकरणशब्दे १७७७ पृ० नञर्थादिको दर्शितः। आत्मायस्य क्रियार्थत्वमित्येकात्मा-श्रयणे दोषकथनावसरे शा०भा०रत्नप्रभयोक्त अत्यन्ताभाव एव नञः शक्तिर्भेदादौ लक्षणेत्युक्तं यथा

"अपि च ब्राह्मणो न हन्तव्यः इति चैवमाद्या निवृत्तिरुपदिश्यते। न च सा क्रिया नापि क्रियासाधनम् इत्यतो निवृत्त्युपदेशानामानर्थक्यं प्राप्तं तच्चानिष्टम्। न च स्वभावप्राप्तहन्त्यर्थानुरागेण नञः शक्यमप्राप्तक्रियार्थत्वं कल्पयितुं हननक्रियानिवृत्त्यौदासीन्यव्यतिरेकेण। नञर्थेन स्वभावो यत् स्वसम्बन्धिनोऽभावं बोधयति अभावश्चौदासीन्यकारणं सा च दग्धेन्धनाग्निवत् स्वयमेवोपशास्यति तस्मात् प्रसक्तक्रियानिवृत्त्यौदासीन्यमेव ब्राह्मणो न हन्तव्य इत्यादिषु प्रतिषेधार्थं मन्यामहे अन्यत्र प्रजापतिव्रतादिभ्यः" शा०भा०।

"नञः प्रत्ययार्थेन सम्बन्धात् हननाभावो नञर्थः दृष्टसाधनत्वं तव्यादिप्रत्ययार्थः दृष्टाच्च नरकदुःखाभावः तत्परिपालको हननाभाव इति निषेधवाक्यार्थः। हननाभावो दुःखाभावहेतुरित्युक्तावर्थाद्धननस्य दुःखसाधनत्वधिया पुरुषो निवर्त्तते। नात्र नियोगः कश्चिदस्ति तस्य (नियोगस्य) क्रियातत्साधनदध्यादिविषयत्वात्। न च हननाभावरूपा नञ्वाच्या निवृत्तिः क्रिया अभावत्वाच्चापि क्रियासाधनम् अभावस्य भावाहेतुत्वादुतस्य सत्त्वरूपत्वाभावाच्चेत्यर्थः। अतो निषेधशास्त्रस्य सिद्धार्थे प्रामाण्यमिति भावः। विपक्षे दण्डमाह न च सा क्रियेति। ननु स्वभावतो रागतः प्राप्तेन हन्त्यर्थेनानुरागेण नञ्सम्बन्धेन हेतुना हननविरोधिनी काचित्क्रिया बोध्यते। सा च नञर्थरूपा तत्प्राप्तत्वाद्विधीयते अहननं कार्य्यात् इति। तथाच कार्य्यार्थमिदं वाक्यमित्याशङ्क्य निषेधति न चेति औदासीन्यं हननाभाव इति यावत् तद्व्यतिरेकेण नञः क्रियार्थत्वं कल्पयितुं न च शक्यमिति योजना सुखार्थस्य भावस्य नञर्थत्वसम्भवे तद्विरोधिक्रियाबोधकत्वापत्त्या अन्वाख्यातात् निषेधवाक्यस्यापि कार्य्यान्तरे विधिनिषेधभेद-विप्लवापत्तेश्चेति भावः। ननु तदभावयुक्तदन्यतद्विरुद्धयोरपि नञः शक्तिः किं न स्यात् अब्राह्मणः अधर्म इति प्रयोगदर्शनादिति चेत् न अनेकार्थत्वस्यान्याय्यत्वादित्याह नञश्चेति गवादिशब्दानान्तु अनन्ता नानार्थत्वं स्वर्गेष्वाग्नेयवज्रादीनां शक्यपशुसम्बन्धाभावेन लक्षणानवतारात्। अन्यविरुद्धयोस्तु लक्षत्वं युक्तं शक्यसम्बन्धात् ब्राह्मणादन्यस्मिन् क्षत्रियादौ धर्मविरुद्धे वा पापे ब्राह्मणाद्यभावस्य नञ् शक्यस्य सम्बन्धात् प्रकृते च आख्यातयोगात् नञ्प्रसज्यप्रतिषेध एव न पर्य्युदासलक्षकमिति मन्तव्यम्। यद्वा नञः प्रकृत्या न सम्बन्धः प्रकृतेः प्रत्ययार्थोपसर्जनत्वात् प्रधानसम्बन्धाच्चाप्रधानानां, किन्तु प्रकृत्यर्थनिष्ठेन प्रत्ययार्थनिष्टसाधनत्वेन सम्बन्धोनञः। दृष्टञ्च स्वापेक्षया बलवदनिष्टानुबन्धि यत्तदेव न तात्कालिकसुखमात्रं विषयमयुक्तं निषिद्धाच्चभोगस्यापि दृष्टत्वापत्तेः तथाच न हन्तव्यः हननं बलवदनिष्टासाधनत्वे सति दृष्टसाधनं न भवतीत्यर्थः। अत्र हन्तव्यः इति हनने विशिष्टेष्टसाधनत्वं भ्रान्तिप्राप्तमनूद्य नेत्यभावबोधने बलवदनिष्टसाधनं हननमिति बुद्धिर्भवति हनने तात्कालिकेष्टसाधनत्वरूपविशेष्यसत्त्वेऽपि विशिष्टाभावबुद्धेर्विशेष्याभावपर्य्यवसानात् विशेष्यं बलवदनिष्टासाधनत्वमिति तदभावोबलवदनिष्टसाधनत्वं नञर्थ इति पर्य्यवसन्नम्। तद्बुद्धिरौदासीन्यपरिपालिकेत्याह। अभावेति। औदासीन्यं यथान्तरद्योती प्रकृत्यर्थाभावबुद्धिवत् प्रत्ययार्थाभावबुद्धिरपीत्यर्थः बुद्धेः क्षणिकत्वात्तदभावे सत्यौदासीन्यात् प्रच्युतिरूपा हनादौ प्रवृत्तिः स्यात् इति तत्राह सा चेति। यथाग्निरिन्धनं दग्ध्वा शाम्यति एवं सा नञर्थाभावबुद्धिः हननादाविष्टसाधनत्वभ्रान्तिमूलं रागेन्धनं दग्ध्वैव शाम्यतीत्यक्षरार्थः। रागनाशे कृते प्रच्युतिरिति भावः। यद्वा रागतः प्राप्ता सा क्रिया रागनाशे स्वयमेव शाम्यतीत्यर्थः। परपक्षे तु हननविरोधिक्रिया कार्य्येत्युक्तेऽपि, हननस्येष्टसाधनत्वान्यनिरासात् प्रच्युतिर्दुर्वारा। तस्मात्तदभाव एव नञर्थ इत्युपसंहरति तस्मादिति। भावार्थाभावेन तद्विषयकृत्यभावात् कार्य्याभावस्तच्छब्दार्थः। यद्वेत्युक्तपक्षे निवृत्त्युपलक्षितमौदासीन्यं यत्तद्विशिष्टभावापन्नमेवेति-व्याख्येयं अतः सिद्धमौदासीन्यस्य नञर्थत्वाभ्युपगमार्थं निवृत्त्युपलक्षितत्वमिति ध्येयम्।" तस्य

वटोर्द्वैतमित्यनुक्तेर्वक्रियावाचिना प्रतयत्नेन कार्यं समुपक्रम्य "नेत्तोद्यत्नमादित्यम्" इति प्रजापतिव्रतसूत्रम् यत उपक्रमवत्त्वात्तत्र नञर्थस्यविरोधिसङ्कल्पक्रियाया एवाश्रयीकृता। एवमगौरसुरा अधर्म इत्यादीनामप्यर्थयुक्तस्य नञः प्रतिषेधवाचित्वायोगात् अन्यविरुद्धवाचकत्वम्। एतेभ्यः प्रजापतिव्रतादिभ्योऽन्यत्रामावस्यैव नञर्थता इत्यर्थः" रत्नप्रभा०।

नञः प्रसज्यप्रतिषेधाद्यर्थाभिधाने नियमविशेषस्मरणपूर्वकं सा०द० नञर्थौ निर्णीतो यथा

"असत्ता भवता नाथ! सङ्गत्वमपि सा पुरा"। अत्राप्युक्तेरत्र नञः प्रसज्यप्रतिषेधार्थत्वमिति विधेयत्वमेवोचितम्। यदाहुः "अप्राधान्यं विधेर्यत्र प्रतिषेधे प्रधानता। प्रसज्यप्रतिषेधोऽसौ क्रियया सह यत्र नञ्"। तथा "नवलवणरुचः सङ्गोऽयं नटप्रतिभाचरः"। अत्रोदाहरणे तत्पुरुषसमासे गुणीभावे नञः पर्युदासतया निषेधस्य विधेयतानवगमः। यदाहुः। "प्राधान्यं विधेर्यत्र प्रतिषेधेऽप्रधानता। पर्युदासः स विज्ञेयो यत्रोत्तरपदेन नञ्"। तेन "जुगोपात्मानमत्रस्तो भेजे धर्ममनातुरः। अदयद्भुवादद्दे सोऽर्थानसङ्गः सुखमन्वभूत्"। अत्रातत्त्वादितामनूद्यात्मगोप्रनादयेव विधेयमिति नञः पर्युदासतया गुणभावो युक्तः। अन्यत्राश्नाभोजी ब्राह्मणः, असूर्यम्पश्या राजदारा इत्यादिवत् असङ्गेत्यत्रापि प्रसज्यप्रतिषेधो भविष्यतीति चेन्न अत्रापि यदि भोजनादिरूपक्रियायोगेन नञः सम्बन्धः स्यात्तदैव तत्र प्रसज्यप्रतिषेधत्वं वक्तुं शक्यं न च तथा, विशेषणतया प्रधानेन तद्भोजिनार्थेन कर्त्रंशेनैव नञः सम्बन्धात्। यदाहुः "आश्नाभोजनशीलो हि यतः कर्त्ता प्रतीयते। न तद्भोजनमात्रं तु कर्त्तरीनेविधानतः" इति। असङ्गेत्यत्र तु क्रियायैव सह सम्बन्ध इति दोष एव"।

अश्नाभोजीत्यादौ अवनर्थसमासं वैयाकरणा मन्यन्ते "सुब्नपुंसकस्य" पा०सूत्रे नपुंसकस्य नेत्यर्थस्य भाष्यादावुक्तत्वात् सामर्थ्याभावेऽपि समास इति हि तेषां राद्धान्तः

साक्षिकनञर्थनिर्णयः शब्दशक्तिप्रकाशिकायां यथा "अतएवाघटः पट इत्यादावन्यस्य, असुरोदैत्य इत्यादौ विरोधिनः, अनिधुः शरः इत्यादौ सदृशस्य, अब्राह्मणो ब्राह्मणेति इत्यादावपकृष्टस्य, अनुदरसुदरन्नरुग्या इत्यादौ स्वल्पस्य बोधकेन नञ्निपातेन स्वार्थे प्रतियोगित्वादि सम्बन्धेनैव घटादेरनुभावनेऽपि तत्तत्तत्पुरुषे नाव्याप्तिः। पटस्याभाव इत्यर्थे प्रसज्यनञा अव्ययीभाव एव समासः प्रमाणं, तेनापटं वर्त्तते इत्यादौ तत्र प्रयोगसत्पुरुषस्योत्तरपदनिष्कृष्टत्वनियमात् इति दिक्"। प्रसज्यनञाश्रयपट इत्यादिस्तत्पुरुष एव साधुर्नाव्ययीभावः नञ्तत्पुरुषविधेस्तदपवादकत्वात् अतएव वादिनामविवाद इत्यादिकः किरणावल्यादौ पुंसि प्रयोग इति तु पक्षधरमिश्राः"।

अत्रायं विशेषः प्रसज्यनञा तत्पुरुषः भावक्तदन्तपदयोग एव न घटादिपदयोगे वादिनामविवाद इत्यादुदाहरणेषु भावक्तदन्तस्यैवोत्तरपदत्वादिति सम्प्रदायविदः।

नञर्थं तिङर्थान्वयश्च शब्दश० प्र० दर्शितो यथा "न च पचत्यपि चैत्रे नाकं पचतीति प्रयोगः स्यादर्त्तमानायाः पाकक्रियातैरभावस्य समयान्तरावच्छेदेन चैत्रे सत्त्वादिति वाच्यं तत्र नञर्थ एव लडर्थवर्त्तमानत्वस्यान्वयेन वर्त्तमानकालावच्छेदस्य पाकक्रियाभाववत्त्वस्य चैत्रे बाधेन तदसम्भवात् गुरुमते न दोषः अभक्षयदित्यादौ, अभक्षयतेऽत्यतिरात्रे षोडशिनं न गृह्णाति इत्यादौ नञर्थेऽपि तिङर्थान्वयस्य व्युत्पन्नत्वात्। एतेन भाविदिने चैत्रो नापाक्षीदतीतदिने चैत्रो न पक्ष्यतीत्यपि शाब्दाविदिनादौ चैत्रेऽतीतपाकक्रियादेरभावसत्त्वादित्यपि समाहितं तत्राप्यतीतादिकालस्य नञर्थ एवान्वयेनातीतादिकालावच्छेदात्तविशिष्टस्य पापक्रियाभावस्य भाव्यादिदिनावच्छेदेन चैत्रादावसत्त्वादेव तादृशप्रयोगात्। अतएव च नित्यसम्बन्धं न पक्ष्यतीत्यादौ नित्यसम्बन्धकर्मकभाविक्रियातैरप्रसिद्धावपि न क्षतिः भविष्यत्कालावच्छेदेन तादृशसम्बन्धकर्मकपाकक्रियातैरभावस्य तत्र बोध्यत्वादिति युक्तसत्पक्षामः"। किलशब्दोत्तरत्वेऽप्यानुषङ्गार्थता किलशब्दमुपक्रम्य "न नु इत्येताभ्यां संप्रयुज्यतेऽनुदृष्टे न किलैवं ननु किलैवमिति" निरुक्तकारोक्तेः

**नट** घट धातुवत् सर्वं विशेषस्तु घटधातौ २।६ पृ० द्रष्टव्यः। नट अवस्कन्दने (नटत्यवे) णिचि नाटयति अनुकरोतीत्यर्थः "नयनमवनलेखाध्वाममध्याभिरामैः स्फटिकघटकभूमीर्नाटयत्येष शैलैः" माघः। [नटत् त न चत्वम्।

**नट** भृंशे तिपि चु० उभ० अक० सेट्। नाटयति ते अनीन-

**नट** पुंस्त्री नम–उणा०अटन्–नट–ऋच् वा। शैलूषे स्त्रियां गौरा० ङीष्। "नटी विदूषको वापि पारिपार्श्विक एव वा" सा०द०। २नलीनामगन्धद्रव्ये स्त्री ङीष्।

वेशग्रायां च भट्टर०। ४दृश्यकाव्यार्थाभिनयकर्त्तरि नर्त्तके त्रि० "प्रकृतेर्विभुत्वयोगाच्चटवद् व्यवतिष्ठते लिङ्गम्" सा०का० "यथा नटस्तां तां भूमिकां विधाय रामो वा अजातशत्रुर्वा वत्सराजो वा भवति एवं तत्तत्स्थूलशरीरपरिग्रहात् देवो वा मनुष्यो पशुर्वा वनस्पतिर्वा भवति सूक्ष्मशरीरम्" तत्त्वकौ०। ५गोनाकृतिके पु० अमरः। "गौचिक्यां गौण्डिकाज्जातो नटो वृषिड एव च" पराशरपद्धत्युक्ते ६वर्णसङ्करजातिभेदे पुंस्त्री स्त्रियां जातित्वात् ङीष्। "नटी कपिञ्जिनी वेश्या कुनटा नापिताङ्गना" तन्त्रसा०। "झल्लो मल्लश्च राजन्यात् व्रात्यात् निच्छिविरेव च। नटश्च करणश्चैव खसो द्रविड एव च" मनूक्ते व्रात्यक्षत्रियजाते ७व्रात्यक्षत्रियभेदे पुंस्त्री०। ८व्यगोकृतिके पु० मेदि०। ९किञ्चुपर्वणि नलाख्ये वृक्षेपु० जटा०। दीपकरागस्य १०रागिणीभेदे स्त्री।

**नटकमेलक** न० काव्यरसप्रधाने दृश्यकाव्यभेदे तच्च सङ्कीर्णाख्यम् "वृत्तं वस्तूनां बहूनां सङ्कीर्णं केचिदूचिरे। तत्पुनर्भवति हृद्यमथ वैकाङ्कनिर्मितम्" तल्लक्षणम्। "तच्च नटकमेलकादि" सा०द०।

**नटचर्य्या** स्त्री इत०। नटस्य कर्त्तव्ये वाक्यार्थाभिनये अभिनेयपदार्थानुकारे "नामानि रूपाणि मनोवचोभिः संतन्वतो नटचर्यामिवास्य" भाग० १।३।२८

**नटन** न० नट–भावे ल्युट्। अङ्गविक्षेपरूपे कर्त्तव्ये अमरः।

**नटनारायण** पु० रागभेदे सङ्गीतशास्त्रम्।

**नटभूषण** पु०नटान् भूषयति भूषि–ल्यु। हरितालेरत्नमा०।

**नटमण्डन** पु०नटं मण्डयति मण्डि–ल्यु। हरितालेअमरः

**नटसंज्ञक** न० नटस्य संज्ञा सम्यक् ज्ञानं यस्मात् कप् "जेऽपः" पा० ह्रस्वः। १गोदन्ताख्यहरितालेत्रिका०। नटेतिशब्दः संज्ञा यस्य कप्। २नटे।

**नटसूत्र** न० नटस्य तत्कर्त्तव्यस्य ज्ञापकं सूत्रम् भा०त०। शिलालिना रचिते नटकर्त्तव्यज्ञापके ग्रन्थभेदे "पाराशर्य्यशिलालिभ्यां भिक्षुनटसूत्रयोः" पा०।

**नटान्तिका** स्त्री नटस्य नटकर्त्तव्यस्यान्तोयस्याः कप् आपि अत इत्वम्। कर्त्तव्यायां मेदि०। कर्त्तव्यायां सत्यां नटकर्त्तव्यासम्भवात् तद्व्याप्यत्व च तत्सम्भवात् तस्यास्तथात्वम्।

**नटेश्वर** पु० इत०। शिवे हेमच० तस्य नृत्यप्रियत्वात् तत्क्रियायां तस्य निपुणत्वाच्च तथात्वम्।

**नटा** स्त्री नटानां समूहः पाशा० यं। नटसमूहे।

**नड** बंधे चुरा०उभ०अक०सेट्। नाडयति ते अनीनडत् त। अधोपदेशत्वात् सति निमित्ते न णत्वम् प्रनाडयति।

**नड(ल)** पु०नल–बन्धे अच् वा डस्य लः। १गोत्रप्रवर्त्तकर्षिभेदे पु० तस्य गोत्रापत्यम् नडादि० फक्। नाडायन तद्गोत्रापत्ये पुंस्त्री०। २नलवृक्षे च।

**नडक** न० नल बन्धे अच् संज्ञायां कन्। अंसयोर्मध्ये वर्त्तमाने नलाकारे कस्थिभेदे "हृदयं जिह्वा क्लोमं सव्य सक्थि पूर्वनडकम्" "दक्षिणसक्थि पूर्वनडकम्" काल्या० औ० ६।७।२।४। [कुक् च। बहुलनडयुक्ते।

**नडकीय** त्रि० नडाः सन्त्यत्र "नडादीनां कुक्च" पा० छ

**नडप्राय** पु० नडः प्रायेण यत्र। नडबहुले देशे अमरः।

**नडभक्त** न० नडस्य विषयो देशः ऐषुका० भक्तच्। नडविषये

**नड(ल)मीन** पु० नड(ल) स्थितो मीनः। नलमध्यस्थिते (चिङ्गिडो) मत्स्ये अमरः।

**नडश** त्रि० नड+अस्त्यर्थे लच्छा० श। नडयुक्ते

**नडागिरि** पु० नडप्रधानो गिरिः किंशुका० संज्ञायां पूर्वस्य दीर्घः। नडप्रधाने गिरिभेदे असंज्ञायां तु नडगिरिरित्येव

**नडादि** पु० "नडादिभ्यः फक्" पा० गोत्रे फक्प्रत्ययनिमित्ते पा०ग० उक्ते १शब्दसमूहे स च गणः

नड चर वक सक्त दृतिक दृतिय उपक एक खमक शलङ्क शलङ्कु सप्तल वाजप तिक अलियर्मन् इण(गणे) प्राण नर सायक दास मित्र होप पिङ्गल पिङ्गल किङ्कर किङ्कल कातर कातल काश्यप काश्य काव्य खज असुर्य क्षणरणौ (ब्राह्मण वार्षिके) अमित्र मित्र चित्र कुमार क्रोष्टु क्रोष्टृ लोह दुर्ग खन्म शिंशपा अश्व हस्त शकट सुमनस् सुमत मिमत कच् जलन्धर खर्पर युगन्धर हंसक दण्डिन् हस्तिन् पिङ्ग पङ्गु चमसिन् सुलभ स्थिरक ब्राह्मण चटक वदर अश्वत्थ खदिर वङ्ग दत्त काश्य कासुक ब्रह्मदत्त उदुम्बर गोष्ठ अधोक्ष दण्डप" । नाडायनः चारायणः इत्यादि।

"नडादीनां कुक्च" पा० उक्ते अपत्यवृद्धागमनिमित्ते २शब्दगणे च। स च गणः पा०ग०सू० उक्तो यथा

नडशुच विल्व वेणु वेत्र वेतस दृक्षु काश कपोत हस्त क्रुञ्चा (क्रुञ्चत्व) तच्चन् नडकीयः।

**नडिनी** स्त्री नडाः सन्त्यस्यां "पुष्कारिभ्यो देशे" पा० इनि। नडयुक्तनद्याम् देशत्वात् "देशो नदीभूधरकन्दरादिः" इत्युक्तेः तेन भूधरे नडिनः पु० देशभिन्ने तु नड्वान् भूमिभागः इत्यादि। स्यादौ।

**नडिल** त्रि० नड्लादूरदेशादि काश्या० इल। नड्लसमीप०

**नड्वा** स्त्री नडानां समूहः षष्ठा० य । नडसमूहे अमरः । तत्र गणे नटेत्यत्र नडेति पाठान्तरम् ।

**नड्वत्** त्रि० नडाः सन्ति प्रशंसायां "कुमुदनडवेतसेभ्यो ड्वतुप्" मा० ड्वतुप् । बहुनलनडयुक्ते

**नड्वल** त्रि०नडाः प्रशंसेषु सन्त्यत्र "नडशादाड् ड्वलच्" पा० ड्वलच् । बहुनलनडयुते देशे "यो नड्वलानीव बलानि गजः परेषाम्" रघुः । वैराजस्य मनोः २पत्नीभेदे स्त्री "मनोरजायन्त दश नड्वलायां महौजसः । कन्यायां भरतश्रेष्ठ ! वैराजस्य प्रजापतेः" हरिवं०२अ० । नड्वलः स्थानत्वेन अभिमतत्वेनास्त्यस्या अच् । ३नड्वलस्थे ४तदभिमानिनि च देवताभेदे स्त्री "नड्वलाभ्यः शौष्कलम् पाराय मार्गारम्" यजु०२०।१६ पुरुषमेधीयपशुक्तौ

**नत** त्रि० नम–कर्त्तरि क्त । १नम्रीभूते २कुटिले च मेदि० । "नतभ्रुवो नव्यजनापनेयः" भट्टिः । स्त्री० ङीप् प्रणिता० उक्ते येन कालेन मध्याह्नतोरविस्तावद्दे २कालभेदे उन्नतशब्दे १८८८६ पृ० दृश्यम् "पूर्वं नतं खाहिनरात्रिखण्डं दिवानिशोरिष्टघटीविहीनम् । दिवानिशोरिष्टघटीषु शुद्धं शुरात्रिखण्डं त्वपरं नतं स्यात्" सी०ता० उक्ते २इष्टघटीहीने दिवारात्रार्द्धकाले इष्टघटीतो वा हीने ३तथाभूते काले च ज्ञायते दिनज्ञानार्थे ५यन्त्रभेदे च सच क्ष० त्रि० रङ्गनाथाख्यां दर्शितो यथा

"मध्यच्छाया भुजक्षेत्रे गुणिता त्रिभभौर्विका । स्वकर्णांशा धनुर्लिप्ता नतांशा दक्षिणे भुजे । उत्तरार्द्धोत्तरे याम्यांशाः स्वर्यक्रान्तिलिप्तिकाः । दिग्भेदे मिश्रिताः सौम्ये विश्लिष्टाश्चान्यलिप्तिकाः" क्ष०त्रि०"अभीष्टदिने माध्याह्निकी छाया भुजसंज्ञा ज्ञेया । तेन भुजेन त्रिज्या गुणिता मध्याह्नच्छायाकर्णेन भक्ता फलस्य धनुःकला नता नतसंज्ञाकाः नतकला दक्षिणे भुजे मध्याह्नच्छायारूपभुजे प्राच्यापरक्षेत्रमध्याह्नदिक्स्थे सति उत्तरदिक्का, उत्तरे भुजे दक्षिणाः । चो विषयव्यवस्थार्थकः । ता नतकलाः स्वर्यक्रान्तिनतकलाः प्रागुक्ताः, दिग्भेदस्वदिशोर्भिन्नत्वे मिश्रिताः संयुक्ताः सत्यो भिन्नदिक्के विश्लिष्टा अन्तरिताः । द्वादशाङ्गुलशङ्कुकोटौ मध्याह्नच्छायाकर्णे या मध्यच्छाया भुजसंज्ञा सा स्वस्मिन्नक्षमध्याह्नकाले सूर्यस्य याम्योत्तरवृत्ते यदन्तरेण नतत्वं तां नतकलासंज्ञां नतांशसंज्ञां मध्याह्नोन्नतांशज्यारूपशङ्कौ त्रिज्याकर्णे वा भुज इति मध्याह्नच्छायाकर्णे मध्याह्नच्छाया भुजस्तदा त्रिज्याकर्णे को भुज इत्यनुपातेन नतज्या तद्भुजरूप कलात्मकत्वान्नतकलास्ता यदसम्बद्धा इति ज्ञायादिग्विपरीतदिक्काः । अथ क्रान्त्यंशाचांशयोरेकदिक्के योगेन नतांशा इति दक्षिणा नतकला दक्षिणक्रान्तिकलाभिर्हीना ऋक्षांशा भवन्ति । क्रान्त्यंशाचांशयोर्भिन्नदिक्के ऽन्तरेण नतांशा यदि दक्षिणास्तदा क्रान्त्यूनाचांशस्य नतत्वादुत्तरक्रान्तियुता ऋक्षांशाः यदि त्वुत्तरास्तदाचोनक्रान्तेर्नतत्वात्ततोनोत्तरक्रान्तिरेव इति सम्यगुपपन्नम् रङ्ग० । अधिकं नतिशब्दे द्रष्टव्यम् ।

**नतद्रुम** पु० नित्यक० । लताशाले रत्नमा० । [अमरः ।

**नतनासिक** त्रि०नता नासिकाऽस्य । (खाँदा) नतनासायुक्ते

**नतराम्** अव्य० न+अत्यु तरप् । १अतिशयनञर्थे प्रतियोग्यसमानाधिकरणे अभावे २नितराभिन्नार्थे च "तस्मादेतयोः सतोर्नतरां चन्द्रमा भाति" शत०ब्रा०११।८।२।१

**नताङ्गी** स्त्री नतमङ्गमस्या ङीष् । नार्य्यां राजनि० ।

**नति** स्त्री नम–भावे क्तिन् । नमने स्वापकर्षबोधकव्यापारभेदे करशिरःसंयोगादौ । नमस्कारभेदाश्च कालीपु०यथा "त्रिकोणश्चैव षट्कोणश्चर्द्धचन्द्रं२ प्रदक्षिणम्३ । दण्डश्चाष्टाङ्ग४ इत्युक्तः सप्तधा नतिलक्षणम् । ऐशानी वायव्या कौबेरी दिक् कामाख्याप्रपूजने । प्रथमा स्वस्तिकादौ च सर्वमन्त्रेषु सर्वतः । त्रिकोणादिव्यवस्थाश्च यदि पूर्वसखो भवेत् । पश्चिमाशाश्रयीं गत्वा व्यवस्थां निर्दिशेत् तदा । यदोत्तरासखः कुर्यात् साधको देवपूजनम् । तदा याम्यात्तु वायव्यां गत्वा कुर्यात्तु संस्थितिम् । दक्षिणादायवीं गत्वा दिशं तस्माच्च याम्यगीम् । ततोऽपि दक्षिणं गत्वा नमस्कारस्त्रिकोणवत् । त्रिकोणो यो नमस्कारस्त्रिपुराप्रीतिदायकः१ । दक्षिणादायवीं गत्वा तां त्यक्त्वाग्नौ प्रविश्य च । अग्नितो राक्षसीं गत्वा ततश्चाप्युत्तरां दिशम् । उत्तराच्च तथाग्नेयीं भ्रमणं द्वित्रिकोण(६)वत् । षट्कोणो यो नमस्कारः प्रीतिदः शिवदुर्गयोः२ । दक्षिणादायवीं गत्वा तस्माच्याद्दत्य दक्षिणाम् । गत्वा योऽसौ नमस्कारः सोऽर्द्धचन्द्रः प्रकीर्त्तितः३ । सकृत् प्रदक्षिणं कृत्वा वर्त्तनाकृति साधकः । नमस्कारः कथ्यतेऽसौ प्रदक्षिण इति द्विजैः४ । त्यक्त्वा स्वासनस्थानं पश्चाद्गत्वा नमस्कृतिः । प्रदक्षिणं विना या तु निपत्य भुवि दण्डवत् । दण्ड इत्युच्यते देवैः सर्वदेवोपमोददः५ । पूर्ववद्दण्डवद्भूमौ निपत्य हृदयेन तु । शिरसेन मुखेनाथ

नासया हनुकेन च। ब्रह्मरन्ध्रेण कर्णाभ्यां यद् भूमिस्पर्शनं क्रमात्। तदष्टाङ्ग इति प्रोक्तो नमस्कारो मनीषिभिः६। प्रदक्षिणत्रयं कृत्वा साधको वर्त्तुलाकृति। ब्रह्मरन्ध्रेण संस्पर्शः क्षितेर्यैः स्यान्नमस्कृतौ। स उप्त इति देवौघैरुच्यते विष्णुतुष्टिदः७। नदीनां सागरो यादृग् द्विपदां ब्राह्मणो यथा। नदीनां जाह्नवी यादृग् देवानामिव चक्रधृक्। नमस्कारेषु सर्वेषु तथैवोप्यः प्रशस्यते। त्रिकोणाद्यैर्नमस्कारैः कृतैरेव तु भक्तितः। चतुर्वर्गं लभेद् भक्तो नचिरादेव साधकः। नमस्कारो महायज्ञः प्रीतिदः सर्वतः सदा। सर्वेषामपि देवानामन्येषामपि भैरव!। योऽसावुक्तो नमस्कारः प्रीतिदः सततं हरेः। महामायाप्रीतिकरः स नमस्कारोत्तमः"। नतिविशेषस्तु यामले "त्रिकोणाकारा सर्वत्र नतिः शक्तेः समीरिता। दक्षिणाद्यावर्तीं गत्वादिशं तस्माच्च याम्यतीम्। ततश्च दक्षिणं गत्वा नमस्कारस्त्रिकोणवत्। अर्द्धचन्द्रं महेशस्य पृष्ठतश्च समीरितम्। शिवप्रदक्षिणे मन्त्री अर्द्धचन्द्रं क्रमेण तु। व्यासव्यक्रमेणैव सोमसूत्रं न लङ्घयेत्। (सोमसूत्रं जलनिःसरणस्थानम्) "प्रसार्य दक्षिणं हस्तं स्वयं नम्रशिराः पुनः। दर्शयेद्दक्षिणं पार्श्वं मनसापि च दक्षिणः। त्रिधा च वेष्टयेत् सम्यक् देवतायाः प्रदक्षिणम्। एकहस्तमथार्द्धं च एकयोपि प्रदक्षिणम्"।

"गन्धर्वतन्त्रे देवमानुषगन्धर्वा यक्षराक्षसपन्नगाः। नमस्कारेण तुष्यन्ति महात्मानः समन्ततः। नमस्कारेण लभते चतुर्वर्गं महोदयम्। सर्वत्र सर्वसिद्ध्यर्थं नतिरेका प्रवर्त्तते। नत्वा विजयते लोकान् नत्वा धर्मः प्रवर्त्तते। नमस्कारेण दीर्घायुरक्षिप्रा लभते प्रजाः। चतुर्वर्गं लभेद्भक्तो नचिरादेव साधकः। नमस्कारो महायज्ञः प्रीतिदः सर्वतः सदा। नमस्कुरु महादेवीं प्रदक्षिणपुरःसरम्"। योगिनीतन्त्रे पूर्वखण्डेऽष्टमपटले "प्रदक्षिणत्रयं कुर्यात् पद्माकारं नमेत्ततः। दक्षिणादुत्तरं गत्वा देवस्य च महेश्वरि!" प्रदक्षिणत्रयम् आदि मध्यावसाने ज्ञेयम्। तथाच कुमारीपूजामधिकृत्य रुद्रयामले उत्तरखण्डे षष्ठपटले "प्रदक्षिणत्रयं कुर्यादादौ मध्ये तथान्ततः। यद्वापि दक्षिणां कुर्यात् रजतैः स्वर्णमौक्तिकैः"। "कृताञ्जलिं ततो बद्ध्वा भ्रामयित्वा नमेत्ततः। प्रत्येकमथवा देवि! दण्डवत् प्रणिपातयेत्। योनौ नमेद्भ्रमित्वा तु अपराधो भवेत्तदा। अथवा झटिना यस्तु नमस्कारं करोति यः। सोऽन्धकारे नरके पच्यते नात्र संशयः। पातान्तरे न प्रणमेन्मूर्ध्ना न च क्षितिं स्पृशेत्। अपि देवतास्तस्य विफलं तत् प्रकीर्त्तितम्। प्रणामे देवदेवस्य यावत्यो रोमकूपिकाः प्रिये!। शरीरे या महेशानि! तस्य पुण्यफलं शृणु। यावन्तो रेणवस्तस्य यावत् कालस्य तिष्ठति। तावद्वर्षसहस्राणि ब्रह्मलोके महीयते"। योगिनीतन्त्रे "कायिको वाङ्मयश्चैव मानसस्त्रिविधः स्मृतः। नमस्काराच्च विप्रेन्द्रा उत्तमाधममध्यमाः। कायिकैस्तु नमस्कारैर्देवास्तुष्यन्ति सर्वदा। नमस्कारेषु सर्वेषु कायिकः प्रथमः स्मृतः। जानुभ्यामवनीं गत्वा संस्पृश्य शिरसा क्षितिम्। क्रियते यो नमस्कारः प्रोच्यते कायिकस्तु सः। पुटीकृत्य करौ शीर्षे सर्वधर्मार्थसाधनम्। प्रसार्य दक्षिणं हस्तं स्वयं नम्रशिराः पुनः। दर्शयन् दक्षिणं पार्श्वं भक्तिश्रद्धासमन्वितः। सकृत् प्रदक्षिणं कृत्वा वर्त्तुलाकृति साधकः। स तु प्रदक्षिणो ज्ञेयः सर्वदेवैकतुष्टिदः। ऊर्ध्वोत्तरगतं यस्तु देव्याः कुर्यात् प्रदक्षिणम्। स सर्वकाममासाद्य पश्चान्मोक्षमवाप्नुयात्। त्रिकोणमथ षट्कोणमर्द्धचन्द्रं प्रदक्षिणम्। दण्डमष्टाङ्गसंपन्नं सप्तधा नतिलक्षणम्। दक्षिणाद्यावर्तीं गत्वा तस्माद्याम्यं दक्षिणम्। गत्वा योऽसौ नमस्कारः सोऽर्द्धचन्द्रो मम प्रियः। नमस्कारेषु जानीयादासां प्राकृतमङ्गिजे!। त्यक्त्वा स्वमासनस्थानं पश्चाद्गत्वा नमस्कृतौ। निपत्य दण्डवद्भूमौ दण्ड इत्युच्यते बुधैः। तथैव दण्डवद्भूमौ निपत्य हृदयेन च। चिबुकेन मुखेनाथ नासया हनुकेन च। चक्षुषा चार्धकर्णाभ्यां ब्रह्मरन्ध्रेण चैव हि। तदष्टाङ्गमिति प्रोक्तं यद्भूमिं स्पृशते क्रमात्। मेरुतन्त्रे "हस्ताभ्यां चरणाभ्यां च जानुभ्यां वक्षसा तथा। मूर्ध्ना दृष्ट्या तथा वाचा चित्तेनाष्टाङ्ग ईरितः। हस्तजानुशिरोवाक्यधीभिः पञ्चाङ्ग ईरितः"। गन्धर्वतन्त्रे ब्रह्मरन्ध्रेण संस्पर्शः क्षितेर्यैः स्यात् नमस्कृतौ। स उप्त इति विप्रेन्द्रो विष्णोस्तुष्टिप्रदायकः। या स्वयं गद्यपद्याभ्यां घटिताभ्यां नमस्कृतिः। क्रियते भक्तियुक्तेन वाचिकस्तूत्तमः स्मृतः। पौराणिकैर्वैदिकैर्वा तान्त्रिकैः क्रियते नतिः। स मध्यमो नमस्कारो भवेदाचारतः सदा। परेषां गद्यपद्याभ्यां नमस्कारो यदा भवेत्। स वाचिकोऽधमो ज्ञेयो नमस्कारेषु सर्वतः। इष्टमध्यानिष्टगतैर्मनोभिस्त्रिविधं भवेत्। नमनं मानसं प्रोक्तमुत्तमाधममध्यमम्॥

त्रिविधे च नमस्कारे कायिकश्रेष्ठतमः स्मृतः"। अन्यत्र विस्तरः २ऊर्द्धस्थितस्रोतःपतनानुकूलक्रियाभेदे(नीचोचा) ३चन्द्रार्ककक्षयोर्याम्योत्तरयोरन्तरे यथोक्तं सि० शि० प्रमिता० "यत् पूर्वापरभावेन लम्बनाख्यं तदन्तरम्। यद् याम्योत्तरभावेन नतिसंज्ञं तदुच्यते" सि०शि० "अथ याम्योत्तरायां तु भित्तौ पूर्वोक्तमालिखेत्। ये कक्षामण्डले तत्र भूमे ढङ्क्षेपमण्डले। त्रिभोनलग्न दृग्ज्या वा स ढङ्क्षेपो द्वयोरपि। तज्ज्यांशैर्नतौ विन्दू कृत्वा विम्बिमसंज्ञकौ। तल्लम्बनकलाः प्राग्वज्ज्ञेयास्ता नतिलिप्तिकाः। कक्षयोरन्तरं यत् स्याद् विम्बिभे सर्वतोऽपि तत्। याम्योत्तरं नतिः सात्र ढङ्क्षेपात् साध्यते ततः" सि० शि०। "तयोर्दक्षिणयोः साध्यात् स्वस्वढङ्क्षेप चापांशैर्नतौ विन्दू कार्यौ। तौ च विम्बिमसंज्ञौ। ततः प्राग्वद् भूमध्याद् भूपृष्ठाच्च स्वस्वे प्रसार्य लम्बनलिप्तिका ज्ञेयास्ता नतिलिप्तिकाः। नतिर्नाम चन्द्रार्ककक्षयोर्याम्योत्तरमन्तरम् तद्विम्बभग्नस्थाने यावत् सर्वतोऽपि तावदेव भवति। अतो ढङ्क्षेपात् साधिता नतिः"प्रमिता०

**नद** अर्चायाम् निघण्टुः स्तुतौ निरु०। भ्वा०पर०सक० सेट्। नदति अनत्(ना)दीत् ननाद। यद यन्द इत्यस्य योपदेशत्वात् यति निमित्ते यत्वं नाश्रेति भेदः। अधिनदति

**नद** सन्तोषे भ्वा०पर० सक० सेट् इदित्। नन्दति अनन्दीत् ढित्। नन्दथुः "यस्यासौ तस्य नन्दथुः" भट्टिः। अयोपदेशत्वात् न यत्वम् अनिन्दति।

**नद** पु० नदति यन्दायते पचा० अच्। भिदौ शोणसिन्धुभैरवदामोदरब्रह्मपुत्रादौ जलप्रवाहभेदे २सरिद्भेदे च। नदश्च अलक्षितातिक्रान्तजलप्रवाहः पुंस्त्वान्वितः।"अष्टसप्तिसु तीर्थानि नदाश्च तत्र कोटयः" पद्मपु०। नद–स्तुतौ कर्मणि अच्। २ऋषौ पु०"ऋषिर्नदो भवति नदतेः स्तुतिकर्मणः" निरु०।

**नदथु** पु० नद–अन्यतरस्यां वा० अथुच्। इषभक्षुजिते। "निनदमिव नदथुमिवाग्नेर्ज्वलन उपश्रृणोति" का०श्रौ० "नदथुमिव इषभक्षुजितमिव" भा०।

**नदनु** पु० नद–अनु।१मेघे उणादिकोषः।२सिंहे शब्दार्थचि० भावे अनु। ३शब्दे "तविष्यतो नदनुमा अजोषी" ऋ० ६।८।२ "नदनुमान् शब्दवान्" भा०

**नदर** त्रि० नदस्यादूरदेशादि अश्वा० र। १नदसन्निकृष्टदेशादौ नास्ति दरो भयं यस्य। २भयशून्ये त्रि०।

**नदराज** पु० ६त० टच् समा०। सप्तर्षे "प्रथमं प्रबुद्धनदराज-

स्तावदनेन्दुनेव तुहिनद्युतिना"माघः। नदपत्न्यादयोऽप्यत्र

**नदाल** त्रि०नद वा०आल। भाग्ययुक्ते। अस्य भगालवाचित्वात् तत्पुरुषे प्रकृतिस्वरः तेन कुम्भीनदालमित्यत्र मध्योदात्तताऽस्य सि० कौ०

**नदी** स्त्री नद–अच् पचाद्यच वा नदट् इति निर्देशात् टित्त्वेन ङीप्। अष्टसङ्ख्यधनुरन्यूनदेशव्यापिजलायामक्षतिमायां जलप्रवाहरूपायां गङ्गाप्रभेदौ। "धनुः सहस्राण्यष्टौ च गतिर्यासां न विद्यते। न ता नदीशब्दवहा गङ्गांस्तु परिकीर्त्तिताः" छन्दोगप० उक्तपरिमाणवतीष्वेव नदीशब्दो रूढः। द्वीपभेदे नदीभेदास्तद्द्वीपशब्दे द्रष्टव्याः। जम्बूद्वीपस्था नदीभेदाश्च विस्तरेण जम्बूद्वीपशब्दे १०३६पृ०भा०भौ० पर्वोक्ता दर्शिताः। काश्चिन्नदीनामुत्पत्तिस्थानादिकं मत्स्यपुराणोक्तं प्रदर्श्यते।

"प्रागुत्तरेण कैलासाद्दिव्यं सौवर्णिकं गिरिम्। सर्वधातुमयं दिव्यं शुभ्रं पर्वतं प्रति। चन्द्रप्रभो नाम गिरिः स शुभ्रो रजतप्रभः। तस्मीमे सरो दिव्यमक्षोदं नाम विश्रुतम्। तस्मात् प्रभवते दिव्या नदी ह्यक्षोदिका शुभा। तस्यासीरे वनं दिव्यं मङ्कणैरवं शुभम्"। "कैलासाद्दक्षिणप्राच्यां शिवं सर्वौषधिं गिरिम्। मनःशिलामयं दिव्यं शुभ्रं पर्वतं प्रति। सोक्षितो हेमशृङ्गस्तु गिरिः सूर्यप्रभो महान्। तस्य पादे महद्दिव्यं सोक्षितं सुमहत्सरः। तस्मात् प्रभवते पुण्या सौक्षित्यश्च नदो महान्। दिव्यारण्यं विशोकञ्च तस्य तीरे महद्वनम्"। "कैलासात् पश्चिमोदीच्यां कङ्कमानौषधीगिरिः। कङ्कयति च रुद्रस्य उत्पत्तिश्च कङ्कयिनः। तदङ्गनं त्वैकशृङ्गं शैलन्त्वेकशृङ्गं प्रति। सर्वधातुमयस्तत्र सुमहान् वैदुतो गिरिः। तस्य पादे महद्दिव्यं मानसं सिद्धसेवितम्। तस्मात् प्रभवते पुण्या सरयूर्लोकपावनी। तस्यासीरे वनं दिव्यं वैश्वाखं नाम विश्रुतम्" "कैलासात् पश्चिमायां तु दिव्यः सर्वौषधिर्गिरिः। अरुणः पर्वतश्रेष्ठो रक्तधातुविभूषितः। भवस्य दयितः श्रीमान् पर्वतो हेमसन्निभः। ज्ञातकौमुदमयैर्दिव्यैः शिलाजालैः समाचितः। शतसंख्यैस्तापनीयैः शृङ्गैर्दिवमिवोल्लिखन्। शृङ्गवान् सुमहादिव्यो दुर्गः शैलो महाचितः। तस्मिन् गिरौ निवसति गिरिशो धूम्रलोचनः। तस्य पादात् प्रभवति शैलोदं नाम तत्सरः। तस्मात् प्रभवते पुण्या नदी शैलोदका शुभा। सा चक्षुःशीतयोर्मध्ये प्रविष्टा पश्चिमोदधिम्। अस्यु-

सरेण कैलासाच्छिवः सर्वौषधिर्गिरिः। गौरन्तु पर्वतश्रेष्ठं हरितालमयं प्रति। हिरण्यशृङ्गः सुमहान् दिव्यौषधिमयो गिरिः। तस्य पादे महद्दिव्यं सरः काञ्चनवालुकम्। रम्यं बिन्दुसरो नाम यत्र राजा भगीरथः। गङ्गार्थे स तु राजर्षिरवास बहुलाः समाः" "दक्षते भासुरा रात्रौ देवी त्रिपथगा तु सा। अन्तरिक्षं दिवं चैव भावयित्वा भुवङ्गता। भवोत्तमाङ्गे पतिता संरुद्धा योगमायया। तस्या ये बिन्दवः केचित् स्खलायाः पतिता भुवि। ऋतन्तु तैर्बृहत्सरस्ततो बिन्दुसरः स्मृतः"। "तीर्थे प्राचोमभिसृतं प्रतीचीन्तीर्थमेव तु। स्रोतांसि त्रिपथायास्तु प्रत्यपद्यन्त सप्रभा। नलिनी ह्लादिनी चैव पावनी चैव प्राच्यगा। सीता चक्षुश्च सिन्धुश्च तिस्रस्ता वै प्रतीच्यगाः। सप्तमी त्वनुगा तासां दक्षिणेन भगीरथम्। तस्मात् भागीरथी सा वै प्रविष्टा दक्षिणोदधिम्। सप्त चैताः स्रावयन्ति वर्धन्तु हिमसाङ्गवम्। प्रसूताः सप्त नद्यस्तु शुभा बिन्दुसरोद्भवाः। तान् देशान् स्रावयन्ति स्म म्लेच्छप्रायांश्च सर्वशः। सर्वेषान् कुकुरान् रौधान् बर्बरान् यवनान् खसान्। पुलिन्दांश्च कुलत्थांश्च कङ्कोलाम्बरांश्च यान्। कृत्वा द्विधा हिमवन्तं प्रविष्टा दक्षिणोदधिम्। अथ वीरमरुंश्चैव कालिकांश्चैव मूलिकान्। दुर्धरान् बर्बरानङ्गानसुरान् पारदान् शकान्। एतान् जनपदांसर्वः स्रावयित्वोदधिङ्गता। दरदोर्जगुडांश्चैव माम्बारानौरसान् कुरून्। शिबीरानिन्द्रमरून् वसतीन् समतेजसा। सैन्धवानुर्वसान् वर्षान् कृपथान् भीमरोमकान्। शुनासुखांश्चोर्ध्वमरून् सिन्धुदेशाश्रिये वते। गन्धर्वान् किन्नरान् यक्षान् रक्षोविद्याधरोरगान्। कलापग्रामकांश्चैव तथा किंपुरुषाञ्चरान्। किरातांश्च पुलिन्दांश्च कुरून् वै भारतानपि। पाञ्चालान् कौशिकान् मत्स्यान् मागधाङ्गांस्तथैव च। ब्रह्मोत्तरांश्च वङ्गांश्च ताम्रलिप्तांस्तथैव च। एतान् जनपदानार्यान् गङ्गा भावयते शुभा। ततः प्रतिहता विन्ध्ये प्रविष्टा दक्षिणोदधिम्। ततस्तु ह्लादिनी पुण्या प्राचीनाभिमुखा ययौ। स्रावयन्त्युत्कांश्चैव निषादानपि सर्वशः। धीवरान्धिवकांश्चैव तथा नीलमुखानपि। केकरानेकर्णांश्च किरातानपि चैव हि। कालिन्दगतिकांश्चैव कृमिकान् स्वर्गभीमकान्। सा मण्डले समुद्रस्य तोरे भूत्वा तु सर्वशः। ऋतस्तु नलिनी चापि प्राचीमेव दिशं ययौ। कुपथान् स्रावयन्ती सा इन्द्रद्युम्नसरांस्यपि। तथा खरपथान् देशान् वेत्रयङ्कुपथानपि। मध्येनोज्झानकमरून् कुथप्रावरणान् ययौ। इन्द्रद्वीपसमीपे तु प्रविष्टा लवणोदधिम्। ततस्तु पावनी प्रायात् प्राचीमाशाङ्गवेन तु। तोमरान् स्रावयन्ती च हंसमार्गान् समूहकान्। पूर्वान्देशांश्च सेवन्ती भित्त्वा सा बहुधा गिरिम्। वर्षेप्रावरणान् प्राप्य गता वाशसुखानपि। सिक्ता पर्वतमेरुं सा गत्वा विद्याधरानपि। शैलिमण्डलकोष्णन्तु सा प्रविष्टा महत्सरः। तासां नद्युपनद्योऽन्याः शतशोऽथ सहस्रशः। उपगच्छन्ति ता नद्यो यतो वर्षति वासवः" "हेमकूटस्य पृष्ठे तु सर्वासां तत् सरः स्मृतम्। सरस्वती प्रभवति तस्माज्ज्योतिष्मती तु या। अवगाढे तु भूयस्तु सप्तधा पूर्वपश्चिमौ। सरो विष्णुपदं नाम निषधे पर्वतोत्तमे। यस्मादपि प्रभवति गन्धमादनकुले च ते। मेरोः पार्श्वात् प्रभवति ह्रदश्चन्द्रप्रभो महान्। जम्बूश्चैव नदी पुण्या यस्यां जाम्बूनदं स्मृतम्। पयोदस्तु ह्रदो नीलः स शुभः पुण्डरीकवान्। पुण्डरीकात् पयोदाच्च तस्माद्वै संप्रसूयतः। सरसस्तु सरस्वेतत् स्मृतसुत्तरमानसम्। सप्त च सप्तकानां च तस्माद्वै सम्प्रसूयतः। ह्रदाः कुरुषु विख्याताः पद्ममीनकुलाकुलाः। नाम्ना ते वै जया नाम द्वादशी दक्षिणाश्रिता। तेभ्यः स्रोतांसि याम्यानि तेषु देवी न वर्षति। उद्भिदान्युदकान्यत्र प्रवहन्ति सरिद्वराः। यस्माच्चकम्य अथभो यक्षो मैनाक एव च। विनिविष्टाः प्रतिदिशं निमग्ना लवणाम्बुधिम्"

भारतवर्षे नदीभेदाः वराहपु० उक्ता यथा "गङ्गा सिन्धुः सरस्वती शतद्रुः वितस्ता विपाशा चन्द्रभागा सरयूः यमुना इरावती देविका कुहूः गोमती धूतपापा बाहुदा दृषद्वती कौशिकी निःक्षीरा गण्डकी चक्षुमती लोहिता च रथ्येता हिमवत्पादनिर्गताः। वेदस्मृती वेदवती सिन्धुः अपर्णा चन्दना सदाचरा रोहितारा चर्मण्वती विदिशा वेदवती वत्सवी च रथ्येताः पारियात्रोद्भवाः। शोणा ज्योतीरथा नर्मदा सुरसा मन्दाकिनी दशार्णा चित्रकूटा तमसा पिप्पलसा करतोया पिशाचिका चित्रोत्पला विमला वञ्जुला वालुकावाहिनी शुक्तिमती विरजा पङ्किनीरिषी च रथ्येता ऋक्षपर्वतप्रसूताः। मणिजाला शुभा तापी पयोष्णी

शोणोदा रेवा विपाशा वैतरणी वेदीपाला कुसुदती तोया दुर्गा चन्द्रगिरा च एता विन्ध्यपादोद्भवाः। गोदावरी भीमरथी कृष्णा वेणा पञ्चगङ्गा तुङ्गभद्रा सप्तयोगा ब्रह्मकावेरी शतमाला ताम्रपर्णी पुष्पावती उत्पलावती च इत्येता मलयभवाः। त्रियामा ऋषिकुल्या वङ्कुरा त्रिविदा लोकपूजिनी पंचवरा महेन्द्रतनया ऋषिकाऽऽनुमती मन्दगामिनी पलाशिनी च इत्येताः शुक्तिमत्प्रभवाः। एताः प्राधान्येन कुलाचलनद्यः। शेषाः क्षुद्रनद्यः" वराहपुराणे कूर्मं दृश्यम्।

"कैलासपादसम्भूतं पुण्यं शीतजलं शुभम्। मन्दोदकं नाम सरः पयस्तु दधिसन्निभम्। तस्मात् प्रभवते दिव्या नदी मन्दाकिनी शुभा। दिव्यञ्च चन्दनलतं तस्याक्षीरे महद्वनम्" कालिकापु०।

तत्रैव स्थानान्तरे प्रधानसप्तनदीप्रादुर्भावकथा यथा "एवं विवाह्य विधिवत् सोमवंशे मानसाचले। ऊरुन्वतीं वशिष्ठस्तु मोदमाप तया सह। तत्र यत् पतितं तोयं मानसाचलकन्दरे। विवाहावभृथार्थाय तीर्थत्वं बहुधा कृतम्। ब्रह्मविष्णुमहादेवर्षिभिः सप्तदीरितम्। ततोयं सप्तधा भूत्वा पतितं मानसाचलात्। हेमाद्रेः कन्दरे सानौ सरस्यान्तु पृथक् पृथक्। ततोयं पतितं सिप्रे देवभोग्ये सरोवरे। तेन सिप्रा नदी जाता विष्णुना प्रेरिता क्षितिम्। महाकोशीप्रपाते च यद्वारि पतितन्तु तैः। कोशिकी२ नाम सा जाता विश्वामित्रावतारिता। चमाचेले यत् पतितं तोयं तेन महानदी। कावेरी३ नाम सा जाता तदा कौवेरसंस्कृता। महाकाले सरःश्रेष्ठे पतितं तज्जलं शिवेः। हिमाद्रेः पार्श्वभागे तु दक्षिणे ब्रह्मसन्निधौ। गोमद्भिर्नाम शैलोता नदी गोमत्४ दीरिता बुधैः। मैनाको नाम यः पुत्रः शैलराजस्य च प्रियः। यस्तु तस्मिन् सरस्तस्मिन् मेनकोदरतः पुरा। यत्तत्र पतितं तोयं तस्माज्जाता महानदी। देविकाख्या५ महादेवप्रेरिता सागरं प्रति। ततोयं महता हंसैरितं वाडवसन्निधौ। तेनाभूत् सरयूनाम्ना नदी पुण्यतमा शुभा। याम्यभागे महापार्श्वे खाण्डवारण्यसन्निधौ। हिमवत्कन्दरे याम्ये इरावद्भ्यूहमध्यतः। इरावती७ नाम नदी तैस्तु जाता सरिद्वरा। एताः सर्वाः स्नानपानात् सरयूर्जाह्नवी यथा। फलं ददति मर्त्यानां दक्षिणोदधिगाः सदा। धर्मार्थकाममोक्षाणां बीजभूताः सदा च ताः। महानद्यस्तु सप्तैताः सर्वदा देवभोगदाः। एवं नद्यः सप्त जाताः सदा पुण्यतमोदकाः। ऊरुन्वत्या वशिष्ठस्य विवाहे देवसन्निधौ" इति

नद्यादीनां रूपवर्णं यथा "नद्यश्च पर्वताः सर्वे हिरूपाश्च स्वभावतः। तोयं नदीनां रूपन्तु शरीरमपरन्तथा। स्थावरं पर्वतानान्तु रूपं कायस्तथाऽपरः। शुक्तीनाञ्च कम्बूनां तथैवान्तर्गता तनुः। बहिरस्थिस्वरूपन्तु सर्वदैव प्रवर्तते। एवं जलं स्थावरत्वं नदीपर्वतयोस्तथा। जलवर्षति कायस्तु सततं नोपलभ्यते। व्याप्याप्यते स्थावरेण शरीरं पर्वतस्य तु। तथा नदीनां कायस्तु तोयेनाप्याप्यते सदा। नदीनां कामरूपित्वं पर्वतानां तथैव च। जगत्स्थित्यै पुरा विष्णुः कल्पयामास यत्नतः। तोयहानौ नदीदुःखं जायते सततं द्विजाः!। विशीर्णे स्थावरे दुःखं जायते गिरिकायगम्" कालिकापु० २२अ०

नदीभेदे जलगुणा राजनिर्घण्टौ उक्ता यथा "सर्वा गुर्व्यो प्राङ्मुखी वाहिनी स्याद्यद्यौ पश्चादाहिनी निन्दिते। देशे देशे तद्गुणा सा विशेषाच्चैषा धत्ते गौरवं लाघवञ्च। प्रायो बहुवहा गुर्व्यो लघ्व्यः शीघ्रवहाः स्मृताः। नद्यः पाषाणसिकतावाहिन्यो विमलोदकाः। हिमवत्प्रभवा याश्च जलं तासामृतोपमम्। विन्ध्यात् प्राची प्राच्यवाची प्रतीची या चोदीची स्यान्नदी सा क्रमेण। वातारोधं श्लेष्मपित्तार्त्तिकोपं पित्तोद्रेकं पथ्यपाकञ्च धत्ते। पारिपात्रभवा याश्च विन्ध्याख्यप्रभवाश्च याः। शिरोरुग्रोगकुष्ठानां ता हेतुः क्लीबदस्य च"। "वनस्पतीनां सरसां नदीनाम्" भट्टिः।

**नदीकदम्ब** पु० नद्या इव कदम्बो जलसमूहोऽत्र। १महाश्रावणिकायां राजनि० ६त०। २नदीसमूहे न०।

**नदीकान्त** पु० ६त०। १समुद्रे नदी कान्ता यस्य। २हिज्जलहृक्षे तस्य तत्पतीपत्नीत्वेन तत्प्रियत्वात् तथात्वम्। ३सिन्धुवारे च मेदि० ४जम्बूवृक्षे ५काकजङ्घावृक्षे च स्त्री मेदि० ६ज्ञतायां स्त्री हेमच०।

**नदीकूलप्रिय** पु० नदीकूलं प्रियमस्य। जलवेतसे जटाध०।

**नदीज** पु० नद्याः तत्समीपे जायते जन-ड ७त०। १वर्ज्जुनवृक्षे रत्नमा०। २यावनाक्षरे ३हिज्जलवृक्षे राजनि०। ४स्रोतोऽञ्जने न० हेमच०। ५नदीजातमात्रे त्रि० ६भीष्मे पु० "नदीज! वृद्धे यवनारिजेतुः" भा०वि० २८अ०। "विदतुर्यमुक्तममशेषपरिषदि नदीजधर्मज्ञौ" माघः। ७अग्निमन्थवृक्षे स्त्री राजनि०८निम्बभेदे पु० राजनि०।

**नदीदोह** पु० नदीतरणार्थं दोहः शाक०त०। नदीतरणाय आतरूपेण देये दोहे दोहकर्मणि दुग्धे।

**नदीधर** पु० नदीं धरति ध-अच् ह्रस्व०। महीधरे गिरौ।

**नदीन** पु० ह्रस्व०। १समुद्रे त्रिका० "कविलासनतनदी नदीनः पर्वते परमपदलीनः प्रभवति" कर्पूरस्तव। २वरुणे च नशब्देन "सह सुपा" पा०स०। ३दीनभिन्ने त्रि०"रत्नैरत्नाकरत्वभावमितैर्नदीनः" उभयार्थे नैघण्टम्।

**नदीनिष्पाव** पु० नद्यां तत्समीपे जातः निष्पावः। नदीजे निष्पावरूपे धान्यभेदे राजनि०।

**नदपति** पु० ह्रस्व०।१समुद्रे २वरुणे च अप्पतिशब्दे ह्रस्वम् "अथ नदीपतिं मृच्छति अपां पतिरसीति" शत०ब्रा० ६।२।४।१० समुद्रोदकग्रहणेऽपौ "ध्रुवो मदुगुर्मृत्युरुक्षो नदीपतये" यजु० २४।३४ अश्वमेधे षोडशावकाशे आलभ्यपशुदेवोक्तौ। नदीशनदीनाथादयोऽप्यत्र

**नदीभव** न०नद्यां भवति भू-अच् ७त०। १सैन्धवे लवणभेदे हेमच०। २नदीजातमात्रे त्रि०।

**नदीमातृक** त्रि० नदी मातेव योनिकारणं। नदीजलसम्पन्नत्रीहिपादिते देशे अमरः।

**नदीमुख** न०नद्याः सङ्गमिव निःसरणमार्गः। १नदीरूपे समुद्रस्य ह्रस्वजलनिःसरणमार्गे "इन्द्रो नदीमुखेनेव प्रस्थानं सलिलाप्लवः" रघुः। २नदीनां जलनिर्गमद्वारे (वाड़ा) ख्याते पदार्थे च "इन्द्रलुप्तैर्वर्त्तयन्ति धान्यैर्यैस्तु नदीमुखैः" भा०स० ५०अ०। [शब्दमाला।

**नदीवङ्ग** पु० ह्रस्व०। नद्या वङ्गभावे (तीरे) ख्याते पदार्थे

**नदीवट** पु०नद्यां तत्समीपे जातो वटः। वटीहक्षे राजनि०

**नदीष्ण** त्रि० नद्यां स्नातं जानति ज्ञा-क "तिनदीभ्यां स्नातेः कौशले" पा० णत्वम्। नदीस्नानकुशले यस्यां यस्यां नद्यां यथावतरणीयं तज्ज्ञानयुक्ते पुरुषोत्तमः। "ततो नदीष्णान् पथिकान् गिरिस्थान्" भट्टिः "स्नानाविनस्तदिवसे नदीष्णान्" रघुः। [नद्यां अमरः।

**नदीसर्ज** पु० नद्या सृज्यतेऽसौ सृज-कर्मणि अण्। अर्ज्जुनद्रु त्रि० नह-बन्धने कर्मणि क्त। बद्धे "खर्जूरीकल्पनद्धानाम्" रघुः। [रज्ज्वाम् अमरः।

**नद्धी** स्त्री नह्यतेऽनया नह-करणे ड्रन् ङीप्। चर्मनिर्मितनद्यादि पु० जातार्थे ठक्प्रत्ययनिमित्ते शब्दगणे स च गणः पा० म० सू० उक्तो यथा

"नदी मही वाराणसी आवन्ती कौशाम्बी वनकोशाम्बी काशपरी काशफरी खादिरी पूर्वनगरी पाठा साया शाला दार्वा सेतकी(वडवाया द्वये)"। "नद्यादिभ्योढक्" पा० नाडेयः इत्यादि।

**नद्याम्र** पु० नद्या आम्र इव। समदिखाढ्ये राजनि०।

**नद्या(न्द्या)वर्त्तक** पु० ज्योतिषोक्ते यात्रायोगभेदे "धराशिगे बुधे लग्ने स्थिते वा सुरवन्दिते। नद्या(न्द्या) वर्त्तकयोगोऽयं यात्रारिष्टार्थसिद्धिदः"। अन्योऽपि "भूसुते खोदगे लाभे लग्नकुम्भगते यमे। नद्या(न्द्या)वर्त्तकयोगोऽयं रणे रिपुहरणक्षमः"। ज्योतिषम्

**नद्युत्सृष्ट** त्रि० नद्या उत्सृष्टं स्थानम्। (चड़ा) इति ख्याते नदीजलत्यक्तभूभागे। तत्र स्वामित्वं निरूपितं विवादचिन्तामणिरत्नकरादौ यथा

"नद्युत्सृष्टा राजदत्ता यस्य तस्यैव सा मही। अन्यथा न भवेद्ग्रामो नराणां राजदैविकः। जयोदयौ जीवनञ्च दैवराजवशाद्भुवाम्। तस्मात् सर्वेषु कार्येषु तत्कृतं न विचालयेत्" तेन यस्य भूमिरुत्सृष्टं तस्यैव तत्र स्वामित्वं नान्यस्येति बोध्यम्।

**ननन्द** स्त्री न नन्दति ज्ञातायामपि सेवायां न तुष्यति नन्द-अच् "सह सुपा" पा०स०। भर्तृभगिन्याम् (ननद) "पिता माता ननन्दा वा श्वश्रूर्भ्राता श्वशुरः। जामाता दुहिता देवा न लक्ष्मनाद्दमे दश" इत्युक्तेः अस्य सर्वनामस्थाने परे लक्ष्मन्नतुल्यत्वाभावात् न ह्रस्वः किन्तु गुणः। तेन ननन्दरौ ननन्दर इत्यादि। पृषो० दीर्घे ननान्दाप्यत्रार्थे "स्वस्रादौ श्वशुरे भव स्वस्रादौ श्वश्रां भव। ननान्दरि स्वस्रादौ भव स्वस्रादौ श्वश्रिदेवेषु" ऋ०१०।८५।३६

**नना** स्त्री न नमति नम-ड "सह सुपा" पा०स०। १वाक्ये निघण्टुः। नम-बा० डु। २मातरि १दुहितरि च स्त्री "उपन्न प्रथिषी नना" ऋ० ६।११२।२ "नना माता दुहिता वा नमनक्रियायोग्यत्वात्। माता खल्वपत्यं प्रति स्तनपानादिना नमनशीला भवति। दुहिता वा शुश्रूषार्थम्" भा०।

**ननु** अव्य०नुद-डु। १प्रश्ने २अवधारणे ३अनुनयायाम् ४विनये ५आमन्त्रणे च अमरः। ६अनुनये विश्वः। ७विनियोगे ८परकृतौ ९अधिकारे १०सम्भ्रमे च मेदि०। ११आक्षेपे प्रत्युक्तौ १२वाक्यारम्भे च हेमच०। तत्र प्रश्ने "ननु गमिष्ये इत्यादि। अवधारणे "उपपन्नं ननु शिवम्" रघुः उपपन्नमेव। "त्वया नियम्या ननु दिव्यचक्षुषा" रघुः "आमन्त्रणे (सम्बोधने) ननु मां प्रापय प्रत्युरन्तिकम्"

कुमा० (नतु हे वसन !) आचेपे "नतु प्रातह्निकभोजनस्य कुञ्जरशौचवत् दुःखानिवर्त्तकत्वे कथं तत्र प्रवृत्तिस्तत्राह" सा०प्र०भा०।

**ननुच** अव्य० नतु+च+समा० ह०। विरोधोक्तौ अमरः।

**नन्त्य** त्रि० नम-वा० कर्मणि त्य। नमनीये "यो नन्त्यान्यनमस्योजसोत" ऋ० १।२४।२ "नन्त्यानि नमनयोनि" भा०

**नन्द** पु० नन्द-भावे घञ्। १हर्षे आनन्दे २तदात्मके परमेश्वरे च "आनन्दो नन्दनो नन्दः" विष्णुसं०। "सर्वाभिरुपपत्तिभिः समृद्धो नन्दः" भा०। नन्दति मेघवर्षणात् नन्द-अच्। ३मेघे शब्दरत्ना०। ४क्षत्रियभेदे "नव नन्दा भविष्यन्ति चाणक्यो यान् हनिष्यति" स्कन्दपु०। "महानन्दिसुतो राजन्। शूद्रागर्भोद्भवो बली। महापद्मपतिः कश्चित् नन्दः क्षत्रविनाशकृत्। ततो नृपा भविष्यन्ति शूद्रप्राया ह्यधार्मिकाः। स एकच्छत्रां पृथिवीमनुल्लङ्घितशासनः। शासिष्यति महापद्मो द्वितीय इव भार्गवः। तस्य चाष्टौ भविष्यन्ति सुमाल्यप्रमुखाः सुताः। य इमां भोक्ष्यन्ति महीं राजानश्च शतं समाः। नव नन्दान् द्विजः कश्चित् प्रपन्नान्उद्धरिष्यति। तेषामभावे जगतीं मौर्य्या भोक्ष्यन्ति वै कलौ। स एव चन्द्रगुप्तं वै द्विजो राज्येऽभिषेक्ष्यति" भाग० १२।१।४ "नव नन्दान् नन्दं तत्पुत्रांश्चाष्टौ इत्येवं नव, प्रपन्नान् विश्वस्तान् विख्यातान् वा द्विजः कौटिल्यवात्स्यायनादिगोत्रोद्भवः चाणक्य उद्धरिष्यति उन्मूलयिष्यति" श्रीधरस्वामी विस्तरेण तत्कथा ह्यस्मत्कृतायां ह्यां। तेषां सपुत्राणां नवसंख्यत्वेन तत्तुल्यसंख्याके ९नवसंख्यायुक्ते च "नन्द त्रिषडलम्नभवर्त्तुलब्धया इनाङ्गपदं खभोऽग्रम्" नी०ता० ६कुमारानुचरभेदे "दण्डो मेघप्रवाहश्च तथा नन्दोपनन्दकौ" भा० श० ४६अ०। ७ब्रह्मदत्तभेदे "ब्रह्मदत्तौ चात्र विप्रौ द्वौ नन्दोपनन्दकौ" भा० द्रो० २२अ०। ८धृतराष्ट्रपुत्रभेदे "अर्थनामः पद्मनामस्तथा नन्दोपनन्दकौ" भा० आ० ६७ अ०। ९वसुदेवस्य मदिरायां जाते पुत्रभेदे "पौरवी रोहिणी भद्रा मदिरा रोचना इला। देवकीप्रसवाश्चासन् पत्न्य आनकदुन्दुभेः। "वसुदेवस्तु रोहिण्यां कृतादीनुदपादयत्। सुभद्रो भद्रबाहुश्च दुर्मदो भद्र एव च। पौरव्यास्तनया ह्येते भूताद्या द्वादशाभवन्। नन्दोपनन्दकृतक्रूराद्या मदिरात्मजाः" भाग० ९।२४।२४। १०क्रौञ्चद्वीपस्थ वर्षपर्वतभेदे "तेषां वर्षगिरयः षड्ढ षड्ढैव मध्यतोभिख्याताः। शुक्लो वर्द्धमानो भोजन उपवर्हणो नन्दो नन्दनः सर्वतो भद्र इति" भाग० ५।२०।१५। तद्वर्षवर्णने ११वेणुभेदे सङ्गीतदामोदरः यथा "महानन्दस्तथा नन्दो विजयोऽथ जयस्तथा। चत्वार उत्तमा वंशा मातङ्गमुनिसम्मताः। दशाङ्गुलो महानन्दो नन्द एकादशाङ्गुलः"। वसुनामक द्रोणावतारे व्रजस्थिते १२गोपभेदे "द्रोणो वसूनां प्रवरो धरया सह भार्यया। करिष्यमाण आदेशान् ब्रह्मणस्तस्य चैव ह। जातयोर्नौ महादेवे भुवि विश्वेश्वरे हरौ। भक्तिः स्यात् परमा लोके ययाञ्जोदुस्तरं तरेत्। अस्तित्युक्तः स एवेह व्रजे द्रोणो महायशाः। जज्ञे नन्द इति ख्यातो यशोदा सा धरा भवत्" भाग० १०।८अ० १३यक्षेश्वरानुचरभेदे "दण्डो मटहीतार्हणसादनोत्तमं यक्षेश्वरं विश्वसृजां परं गुरुम्। सुनन्दनन्दाद्यनुगैर्वृतं सदा स्मयन् प्रपेदे प्रयतः कृताञ्जलिः" भाग० ४।७।२२।

**नन्दक** पु०नन्दयति नन्द-ण्वुल्। १विद्याभये विष्णोः खड्गे अमरः "नाम्नापि तस्यैव स नन्दकोऽभूत्" माघः। २भेके त्रिका०। ३सन्तोषकारके ५कुलपालके च त्रि० स्वार्थे क। ६नन्दगोपे पु० ७नागभेदे "आर्यको नन्दकश्चैव तथा कलशपोतकौ" भा०उ० १०२अ०। नागोक्तौ ८अग्निमान्द्ये च "गान्धर्वमस्त्रं दयितमशिरत्रं च नन्दकम्" हरिवं० २२३अ०। १०कुमारानुचभेदे "रणोत्कटः प्रहासश्च श्वेतसिंहश्च नन्दकः" भा०स० ४६अ०। ११धार्त्तराष्ट्रपुत्रभेदे "नन्दको वाह्वशाली च तुङ्गखड्गो विकटस्तथा" भा०आ० १८६अ० तत्पुत्रोक्तौ।

**नन्दकि** नन्द-इन् वा कुक्। पिप्पल्यां शब्दच०।

**नन्दकिन्** पु० नन्दको विद्याभयोऽसिरस्यास्य इनि। विष्णौ "शङ्खभृत् नन्दकी चक्री शार्ङ्गधन्वा गदाधरः" विष्णुसं० "विद्याभयो नन्दकाख्योऽसिरस्यस्य" भा०। [ऋच०।

**नन्दगोपिता** स्त्री नन्दाय हर्षाय गोपिता। रात्र्यां ग०

**नन्दथु** पु० नन्द-अथुच्। आनन्दे अमरः। "यशोदा तस्य नन्दथुः" भट्टिः।

**नन्दन** पु० नन्दयति नन्दि-ल्यु। १सुते २दुहितरि स्त्री ३भेके पुंस्त्री शब्दरत्ना०। ४इन्द्रस्योद्याने न० "अभिज्ञास्यदपातानां क्रियन्ते नन्दनद्रुमाः" कुमा०। ५हर्षके त्रि०। ६विष्णौ पु० "आनन्दोनन्दनोनन्दः" विष्णुसं०। "एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्तीति" श्रुतेस्तस्य नन्दहेतुत्वान्नन्दनत्वम् "शिवतुरगैस्तु नन्दनमिदं नजौ भजौ रदयम्" छन्दो० उक्ते ७अष्टादशाक्षरपादके

ऋन्दोभेदे। "बभूव भावेषु दिवौपनन्दनः" रघुः रघुनन्दनः यदुनन्दन इत्यादि "पुरीमवस्कन्द लुनीहि नन्दनम्" माघः ८मसर्गादेवे "नन्दीश्वरश्च नन्दी च नन्दनो नन्दिवर्द्धनः" भा॰ अनु॰ १७अ॰ शिवसहस्रनामोक्तौ। ६कुमारानुचरभेदे "वर्द्धनं नन्दनञ्चैव सर्वविद्याविशारदौ। स्कन्दाय ददतः प्रीतावाग्निनौ भिषजां वरौ" भा॰ व॰ ४५अ॰। १०पर्वतभेदे "तीरे तु चन्द्रकुल्यस्य नन्दनो नाम वै गिरिः। तस्मिन् वसति यक्षस्तु कामाख्यासेवने रतः। न्यग्रोधवं समाभेदे सर्वदैवेश्वरो हरिः। सेवितुं शिवशेषाणीं सततं वर्तते नतः। चन्द्रकुल्यस्य तु गिरेर्नन्दनस्य तथा गिरेः। प्रतिदर्शं तथा चन्द्रं प्रदक्षिणयति त्रिधा। चन्द्रकुल्यजले स्नात्वा समारुह्य च नन्दनम्। आराध्य यक्षं लोकेशं महाफलमवाप्नुयात्" कालिकापु॰ ८१अ॰। ११षष्टिवर्षमध्ये षड्विंशतिमे वत्सरे। "सुभिक्षं क्षेममारोग्यं यस्मिं भवति शोभनम्। बहुक्षीरास्तथा गावो नन्दन्ते नन्दने प्रिये!" भविष्यपु॰।

**नन्दनज** न॰ नन्दनवने जायते जन-ड। १हरिचन्दने राजनि॰। २पर्वजातमात्रे त्रि॰ ३श्रीकृष्णे पु॰।

**नन्दनन्दन** पु॰ नन्दस्य नन्दनः आनन्दजनकः। श्रीकृष्णे वासुदेवे तस्य वासुदेवत्वेऽपि कंसभीत्या नन्दसुतां योगमायामानीय तत्स्थले रात्रौ निगूढतया कृष्णस्य स्थापनेन तस्य तत्पुत्राभिमानात् तन्नन्दनत्वम्। तत्कथा भाग॰ १०।३ अ॰ यथा "ततश्च शौरिर्भगवत्प्रचोदितः सुतं समादाय स सूतिकागृहात्। यदा बहिर्गन्तुमियेष तर्ह्यजा या योगमायाऽजनि नन्दजायया। तया हृतप्रत्ययसर्ववर्त्तिषु द्वाःस्थेषु पौरेषु च शायितेष्वथ। द्वारश्च सर्वाः पिहिता दुरत्यया बृहत्कपाटायसकीलशृङ्खलैः। कृष्णे वासुदेव आगते स्वयं व्यमीर्यन्त यथा तमो रवेः। ववर्ष पर्जन्य उपांशुगर्जितः शेषोऽन्वगाद्वारि निवारयन् फणैः। मघोनि वर्षत्यसकृद् यमानुजा गम्भीरतोयौघजवोर्मिफेनिला। भयानकावर्त्तशताकुला नदी मार्गं ददौ सिन्धुरिव श्रियः पतेः। नन्दव्रजं शौरिरुपेत्य तत्र तान् गोपान् प्रसुप्तानुपलभ्य निद्रया। शिशुं यशोदाशयने निधाय तत्-सुतां समादाय पुनर्गृहानगात्। देवक्याः शयने न्यस्य वसुदेवोऽथ दारिकाम्। प्रतिसस्थ प्रदोषौघमाये पूर्ववदावृतः। यशोदा नन्दपत्नी च जातं पुत्रमवुध्यत। न तच्छ्रुतं परिश्रान्ता निद्रयापगतस्मृतिः" नन्दपुत्रनन्दसुतादयोऽप्यत्र। २योगमायायां स्त्री।

**नन्दनन्दिनी** स्त्री ६त॰। दुर्गायां योगमायायां तच्छ्रुतेः यत्तत्तथा हरिवं॰ ५८अ॰ "तान्होवाच ततो निद्रां विष्णुः सत्यपराक्रमः। गच्छ निद्रे! मयोत्सृष्टा देवकीभवनान्तिकम्। इमान् प्राग्वेश्वरान् स्कन्ध षड्गर्भांश्चाम देहिनः। षट्सु गर्भेषु देवक्या योजयस्व यथाक्रमम्। जातेष्वेतेषु गर्भेषु नीतेषु च यमक्षयम्। कंसस्य विफले यत्ने देवक्याः सफले क्रमे। प्रसादं ते करिष्यामि मत्प्रभावसमं भुवि। येन सर्वस्य लोकस्य देवि! देवी भविष्यसि। सप्तमो देवकीगर्भो योऽयं सौम्यो ममाग्रजः। स संक्रामयितव्यस्ते सप्तमे मासि रोहिणीम्। सङ्कर्षणात्तु गर्भस्य स तु सङ्कर्षणो युवा। भविष्यत्यग्रजो भ्राता मम प्रीतांशुदर्शनः। पतितो देवकीगर्भः सप्तमोऽयं मयादितिः। अष्टमे भवि गर्भस्थे कंसो यत्नं करिष्यति। या तु सा नन्दगोपस्य वसुदेवानुजस्य वै। यशोदा नाम भद्रन्ते भार्या गोपकुलोद्वहा। तस्यास्तं नवमो गर्भः कुक्षेरस्याः भविष्यति। नवम्यामेव संजाता कृष्णपक्षस्य वै तिथौ। अर्द्धरात्रेऽभिजिते योगे निशावा यौवने स्थिते। अर्द्धरात्रे करिष्यामि गर्भमोक्षं यथासुखम्। अष्टमस्य तु मासस्य जातावायां ततः क्षमम्। प्राप्स्यावो गर्भव्यत्यासं प्राप्ते कंसस्य शासने। अहं यशोदां यास्यामि त्वं देवि! भज देवकीम्। आवयोर्गर्भव्यत्यासात् कंसो मन्यतु मूढताम्। ततस्त्वां स्कन्ध चरणे शिलायां निरहिष्यति। निरक्ष्यमाणा गगने स्थानं प्राप्स्यसि शाश्वतम्"।

**नन्दनमाला** स्त्री नित्यकर्म॰। मालाभेदे "भूप! नन्दनमालान्तु कुरुते कृष्णवेश्मनि। देवकन्यावृतैर्लेखैः सेव्यते सुरनायकैः"।

**नन्दन्त** पु॰ नन्दत्यनेन नन्द्-झच्। पुत्रे उज्ज्वलद॰।

**नन्दपाल** पु॰ नन्दं हर्षं पालयति पालि-अण् उप॰। वरुणे शब्दरत्ना॰। [लोपः। पुत्रे उणा॰।

**नन्दयन्त** पु॰ नन्दि-झच् णिलोपे अन्तपर्युदासान्न णि-

**नन्दा** स्त्री नन्दयति नन्दि-अच्। १दुर्गामूर्त्तिभेदे "यज्ञागतास्तथा जम्बुद्वीपे स्थाप्य हिमे गिरौ। संस्थास्य नन्दिता यस्मात्तस्मान्नन्दा तु सा भवेत्" वराहपु॰ "नन्दते सुरलोकेषु नन्दने वसतेऽथ वा। हिमाचले महापुण्ये नन्दा देवी ततः स्मृता" देवीपु॰। २खड्गिशरे (नँदा) ख्याते पदार्थे पञ्चयोः प्रतिपदेकादशीरूपे ३तिथिभेदे च मेदि॰। "नन्दा भद्रा जया रिक्ता पूर्णा च प्रतिपद्

क्रमात्" ज्यो॰त॰ "नन्दामन्दमहीजकाव्यदिवसे" ज्यो॰त॰ नवाद्ये कालवर्जने। "खादित्यभौमयोर्नन्दा" ज्यो॰त॰ पापयोगोक्तौ। ४ननान्दरि शब्दर॰। ५सम्मदि शब्दार्थचि॰ ६संक्रान्तिभेदे "स्थिरे जीववारे तु नन्देति संज्ञा तदा विप्रवर्गः सुखी मासमेकम्" स॰चि॰। रोहिण्युत्तरात्रयं स्थिरं तस्य गुरुवारयोगे रविसंक्रान्तिः सा विप्राणां सुखाय। अत्र वारनक्षत्रोभययोगे घोरादिसंक्रान्तीनां फलं सम्पूर्णं केवलवारवशेन केवलनक्षत्रवशेनापि घोरादिसंज्ञाः सिद्ध्यन्ति तत्र फलं न सम्पूर्णम्। उक्तञ्च निर्णयामृते रत्नमालायाञ्च "घोरा रवौ ध्वाङ्क्षगते द्युतौ च संक्रान्तिरारे च महोदरी स्यात्। मन्दाकिनी भे च गुरौ च नन्दा भित्रा कवौ राक्षसिकार्कपुत्रे" "उपक्षिप्रचरैर्भैस्तु ध्रुवमिश्रर्क्षदारुभैः। क्षुद्रैः संक्रान्तिरर्कस्य घोराद्याः क्रमशो मताः" इति। ७नन्दाश्रमतीर्थे धर्मपुत्रदर्भस्य च पत्न्याञ्च "नन्दा तु भार्या दर्भस्य यासु लोकाः प्रतिष्ठिताः" भा॰ आ॰ ६६ अ॰। [२योगमायायां स्त्री।

**नन्दात्मज** पु॰ष॰त॰। १श्रीकृष्णे वासुदेवे यशोदागर्भजातायां

**नन्दापुराण** नन्दां देवीमधिकृत्य प्रवृत्तम्। नान्दे उपपुराणभेदे "तृतीयं नान्दसंज्ञितं कुमारेण तु भाषितम्" कूर्मपु॰ उपपुराणोक्तौ। नन्दामधिकृत्य कृतो ग्रन्थः। अण्। नान्दम् "नन्दाया यत् माहात्म्यं कार्त्तिकेन तु भाषितम्। नन्दापुराणं तल्लोके नन्दाख्यमिति कीर्त्यते" मत्स्यपु॰। [तद्योलूकाश्रमे शुभे" भा॰ व॰ १८७ अ॰।

**नन्दाश्रम** न॰न॰ ष॰त॰। तीर्थभेदे "नन्दाश्रमे महाराज! नन्दि पु॰नन्द्-इन्। १विष्णौ परमेश्वरे "ऋचः साङ्गाः यजूंषि नन्दो नन्दिर्ज्योतिर्गणेश्वरः" विष्णुसं॰ परमानन्दविषयत्वात्तस्य नन्दित्वम् भावे स्थितम्। २नन्दिकेश्वरे महादेवपार्श्वचरे च। ३द्यूताक्षे पु॰न॰ मेदि॰। ४गन्धर्वभेदे "युगपत्तृषयः काण्वं नन्दिस्तिलरवत्सया" भा॰आ॰१२१ अ॰गन्धर्वोक्तौ। ५महादेवे "नन्दिर्नन्दिश्वरो हरः" भा॰ अनु॰१७अ॰ शिवसहस्रनामोक्तौ। भावे इन्। ६आनन्दे "कौशल्यानन्दिवर्द्धनो रामः" महानाटकम्। आनन्दे स्त्रीत्वमपि। "अतो मे भूयसी नन्दिर्दैवमनुपश्यसि" भा॰उ॰१३४अ॰। तत्र वा ङीप्। नन्दीड्यः

**नन्दिक** पु॰नन्दो हेतुतयाऽस्यास्य ठन्। १नन्दीड्ये शब्दर॰ नन्दि+स्वार्थे क। २आनन्दे। ३इन्द्रक्रीडास्थाने ४वल्लिद्धरे च (नाँदा) शब्दर॰ नन्दा+स्वार्थे क स्त्रियां टाप् इत्त्वम्। प्रतिपदादिनन्दातिथौ स्त्री "कन्यासिंहे रवौ शुक्ल पक्षे नन्दिकामारभ्य नन्दिकाम्" ति॰त॰

**नन्दिकावर्त्त** पु॰ मणिभेदे। "कुरुवकदलाग्रा वज्रं वैदूर्यं नन्दिकावर्त्ते" ह॰सं॰२६अ॰ सहार्थे ततीया।

**नन्दिकुण्ड** न॰ नन्दिकृतं कुण्डम्। तीर्थभेदे "कालोदकं नन्दिकुण्डं तथा चोत्तरमानसम्। अभ्येत्य योजनशताद् ध्रुवश्चा विप्रसज्यते" भा॰अनु॰ २५अ॰।

**नन्दिकेश्वर** ष॰नन्दि+स्वार्थे क नन्दिक ईश्वर इव। १शिवपार्श्वचरे नन्दिनि २तेन प्रोक्ते शिवधर्माख्ये उपपुराणभेदे "चतुर्थं शिवधर्माख्यं साक्षान्नन्दीशभाषितम्" कूर्मपु॰। उपपुराणोक्तौ "नन्दिकेश्वरयुग्मञ्च नन्दिकेश्वरभाषितम्" इति तत्र पाठान्तरम्।

**नन्दिग्राम** पु॰ ग्रामभेदे रामस्य वनवासे यत्र भरतेन तत्पादुके सटङ्कीत्वा राज्यं कृतं यथाह भा॰व॰ २७६ अ॰ "विसर्जितः सः (भरतः) रामेण पितुर्वचनकारिणा। नन्दिग्रामेऽकरोद्राज्यं पुरःकृत्वास्य पादुके" स च इदानीं (दौलतावाद) इति प्रसिद्धः। "नन्दिग्रामगतस्यास्य राज्यं न्यासमिवाभुनक्" रघुः।

**नन्दिघोष** पु॰ नन्दिः हर्षजनको घोषोऽस्य। १अर्जुनरथे कर्म॰। २आनन्दयुक्तघोषे च मेदि॰। बहु॰। ३हर्षजनकघोषयुक्तमात्रे त्रि॰। "अष्टादशे यो दिवसे प्राश्नीयादेकभोजनम्। सदा द्वादश मासान् वै स्वर्गलोकान् स पश्यति। रथैः स नन्दिघोषैश्च पूजितः सोऽनुगम्यते" भा॰ अनु॰ १०७ अ॰।

**नन्दितरु** पु॰ नित्यक॰। धवतरौ भावप्र॰।

**नन्दितूर्य्य** न॰ नन्दिप्रियं तूर्यम्। वाद्यभेदे "नन्दितूर्य्यौघवादान्न तुष्टुवुश्च जनार्दनम्" हरिवं॰ ६॰ अ॰।

**नन्दिन्** त्रि॰ नन्दते नन्द्-णिनि। १हर्षयुक्ते २शालङ्कायने शिवादिपुत्रे च शिवद्वारपाले पु॰ ३तन्निभेदे नन्दीश्वरशब्दे दृश्यम्। स च शालङ्कायनसुनिपुत्रः यथा "अन्यञ्च ते प्रवक्ष्यामि परं गुह्यं वसुन्धरे!। तपतस्तस्य तु सुनेरीश्वरेण सखं सुतम्। तं प्राप्स्यामि परं भावं ज्ञात्वा देवो महेश्वरः। सुन्दरन्तु परं रूपं कृत्वा दृष्टिसुखावहम्। शालङ्कायनपुत्रत्वं योगमायासुपाश्रितः। प्राप्तोऽपि तं न जानाति दृष्टिं मार्गमास्थितम्। मायायोगबलोपेतस्त्रयो वै गुणपाश्रिताः। रूपवान् गुणवांश्चैव वपुषादित्यसन्निभः। सत्यं न शक्यते ज्ञातं तस्यैवाराधने स्थितः। अथ नन्दी महस्राह महादेवा-

त्वया सुनिम्। उत्तिष्ठ सुनिशार्दूल! सफलस्ते मनोरथः। त्वद्दिधाङ्गाज्जातोऽस्मि पुत्रस्ते शाधि मां प्रभो!। त्वया तपः समारब्धमीश्वरेण समं सुतम्। प्राप्स्यामीति ततो मह्यं सदृशोऽन्यो न कश्चन। विधार्य्येति तवाहं वै जातोऽस्मि स्वयमेव हि" वराहपु०। स एव कल्पान्तरे शिवांशजः शिलादसुनेः पुत्रः। यथा "जजाप रुद्रमनिशं यत्र नन्दी महागणः। प्रीतस्तस्य महादेवो देव्या सह पिनाकधृक्। दत्त्वा वात्सल्यमानन्दं स्वयुवस्तुनमेव च। बभूवधिः स धर्मात्मा शिलादो नाम धर्मवित्। आराधयन् महादेवं पुत्रार्थं दृषभध्वजम्। तस्य वर्षसहस्रान्ते तप्यमानस्य विश्वकृत्। मूर्त्तः सोमोऽथ विश्वतो वरदोऽस्मीत्यभाषत। स वव्रे वरमीशानं वरेण्यं गिरिजापतिम्। अयोनिजं मृत्युहीनं त्वया चैवोमया समम्। तथास्त्वित्याह भगवान् देव्या सह महेश्वरः। पश्यतस्तस्य विप्रर्षेरन्तर्धानं गतो विभुः। ततो विवृधुः खां भूमिं शिलादो धर्मवित्तमः। चकर्ष लाङ्गलेनोर्वीं भित्त्वाऽऽसक्षत शोभनः। संवर्त्तकानलप्रख्यः कुमारः प्रहसन्निव। रूपलावण्यसम्पन्नस्तेजसा भासयन् दिशम्। कुमारतुल्योऽप्रतिमो मेघगम्भीरया गिरा। शिलादं तात तातेति प्राह नन्दी पुनःपुनः। तं दृष्ट्वा नन्दिनं जातं शिलादः परिषस्वजे। मुनिभ्यो दर्शयामास ये तदाश्रमवासिनः" कूर्मपु०४०अ०। "ततोऽष्टहासगतोऽथ नन्दी" कुमा०। २शिवगणविशेषे। स च त्रिविधः यथा "आद्यः कनकनन्दी च गिरिकाख्यो द्वितीयकः। सोमनन्दी तृतीयस्तु विज्ञेया नन्दिनस्त्रयः" वह्निपु०। ३गर्दभाण्डहृदे ५धवहृदे च मेदि०। ६विष्णौ च "भगवान् भगहा नन्दी वनमाली हलायुधः" विष्णुस० आनन्दीति पाठान्तरम्।

नन्दिनी स्त्री नन्द-णिनि ङीप्। १दुर्गायां २गङ्गायां ३नन्दतरि ४वसिष्ठधेन्वाञ्च मेदि०। ५रेणुकागर्भजातायां राजनि०। ६कन्यायां च "नन्दगोपस्य नन्दिनी" हरिवं० वसिष्ठधेनुश्च सुरभिकन्या। "सुतां तदीयां सुरभेः कृत्वा प्रतिनिधिं शुचिः। आराधय सपत्नीकः प्रीता कामदुघा हि सा। इति वादिन एवास्य होतुराहुतिसाधनम्। अनिन्द्या नन्दिनी नाम धेनुराहृते वनात्" रघुः। "इह नन्दिनीसजसैर्युतयुक्तैः" छन्दोरत्नटी० उक्ते ७त्रयोदशाक्षरपादके वर्णवृत्तभेदे वसिष्ठधेन्वा प्रभावो रामा० बालका० उक्तो यथा "युक्तःपरमहर्षेश्च वशिष्ठमिदमब्रवीत्। मया शतसहस्रे च दीयतां भवता मम। एवमुक्तस्तु भगवान् वशिष्ठो मुनिसत्तमः। विश्वामित्रेण धर्मात्मा प्रत्युवाच महीपतिम्। कारणैर्बहुभी राजन् दत्ता नन्दिनी तव। कामधेनुं वशिष्ठोऽसौ न त्यजति यदा मुनिः। ततोऽस्य भवतां राजा विश्वामित्रस्तदाहरत्। तस्याश्चुम्बारवाज्जाताः काम्बोजा रविसन्निभाः। ऊधसस्त्वभिसंजाताः पह्लवाः शस्त्रपाणयः। योनिदेशाच्च यवनाः शकृद्देशात्तथा शकाः। रोमकूपेषु म्लेच्छाश्च तथा राम! किरातकाः। तैस्तद्विसृष्टं सैन्यं विश्वामित्रस्य तत्क्षणात्" ष्ट्याडिमातरि च।

नन्दिनीतनय पु० ६त०। आड़िसुनौ हेमा०। आड़िश्च उपवर्षसुनेः शिष्यभेदः तत्कथा ३कथत्कथयां दृश्या। ततो दिङ्मात्रमत्र प्रदर्श्यते। "नन्दराजराज्यकाले उपवर्षे पण्डितस्य कात्यायनापरपर्य्यायो वररुचिर्व्याडिः पाणिनिरिति त्रयो जन्माज्ञाता बभूवुः। तेषु पाणिनिरल्पबुद्धितया सत्रब्रह्मचारिभिर्वादे पराजितो निर्वेदमापन्नो महादेवमाराध्य तत्सकाशादधीत्य च कृतविद्यस्तत् प्रसादात् सूत्रपाठगणपाठधातुपाठलिङ्गानुशासनात्मकं चतुर्धा विभक्तं व्याकरणमसृ विदधे। अथ तद्दुष्पन्नकौशलमुपलभ्य वररुचिना तदवशिष्टांशपरिपूरणेन संक्षेपार्थविवरणरूपं वार्त्तिकं चक्रे। व्याड़िना च तत्तद्ग्रन्थेषु न्यायप्रदर्शनार्थं सङ्ग्रहश्लोकात्मकः संग्रहाभिधो ग्रन्थो निरमायि"। स च कोषविशेषकर्त्ता। नन्दिनीसुतादयोऽत्र।

नन्दिपुराण न० नन्दिना प्रोक्तं पुराणम्। उपपुराणभेदे नन्दिकेश्वरग्रन्थे ग्रन्थम्।

नन्दि(न्दी)मुख पुंस्त्री पक्षिभेदे स्त्रियां ङीप्। तल्लक्षणं "स्थूला कठोरा दृक्ता च यस्याश्चञ्चूपरि स्थिता। गुटिका चक्षुषश्चैव ज्ञेया नन्दि(न्दी)मुखीति सा" पुंस्त्वेऽपि तथा लक्षणम्। "नन्दिमुखसखानि मनुराजतिभिः कीलैरवबद्धानि" सुश्रुतः। नन्द्यामु आनन्दे सुखमस्याः ङीप् दीर्घमध्यः। २तन्त्रायां हेमच० ३महादेवे पु० "नन्दीसुखः भीमसुखः सुमुखो दुर्मुखोऽसुखः" भा०शा० २८६ अ०।

नन्दिवर्द्धन पु० नन्दिमानन्दं वर्द्धयति वृध-णिच-ल्यु। १शिवे पु० २पद्मान्ते च मेदि०। ३गिरौ मल्लि०। आनन्दवर्द्धनमात्रे त्रिलादौ त्रि०।

**नन्दिवारलक** पुंस्त्री शाखट्टे मत्स्यभेदे स्त्रियां ङीष्। "तिमितिमिङ्गिलकुलिशपाकमत्स्यनिवारक नन्दिवारलकमकरगर्गरकचन्द्रकमङ्गामीनराजीवप्रभृतयः शाखट्टाः" सुश्रुतः।

**नन्दि(न्दी)वृक्ष** पु० ६त०। मनोज्ञहेतौ कोङ्कणदेशप्रसिद्धे सुगन्धिवृक्षभेदे। "नन्दीवृक्षो लघुः स्वादुस्त्रिदोषघ्नस्तुवरः स्मृतः। कटुपाकरसो याही विषपित्तकफास्रनुत्" राजनि०। २अश्वत्थाकारे क्षीरयुक्ते (वँद)ख्याते वृक्षभेदे ३गान्धीराख्यवृक्षे शब्दार्थ०। ४मेघवृक्षीवृक्षे रत्नमा० ५ख्यातीवृक्षे भावप्र०

**नन्दिवेग** पु० कलियुगीये पुरुषाधमभेदे "समेष्व नन्दिवेगानामिष्यते कुलपांसनाः। युगान्ते कृष्ण! संभूताः कलेषु पुरुषाधमाः" भा०व० ७३ अ०।

**नन्दिषेण** पु० ब्रह्मदत्ते कुमारानुचरभेदे। "तस्मै ब्रह्मा ददौ प्रीतो वह्निनो वातवंहसः। कामवीर्यधरान् सिद्धान् महापारिषदान् प्रभुः। नन्दिषेणं लोहितार्क्षं घण्टाकर्णञ्च सम्मतम्। चतुर्थमनुचरं ख्यातं कुसुदमालिनम्" भा०श० ४६ अ०।

**नन्दीश** पु० ६त०। १शिवे हेमच०। नन्दी इव इव। २शिवपार्श्वचराधिपभेदे। ३तालभेदे स च "सिंहनन्दननन्दीशचन्द्रविम्बहितीयकाः" इत्युद्दिश्य सङ्कीर्तनं लक्षितो यथा "गोलयुगौलघुः प्रुतस्ताले नन्दीश्वरे मताः"।

**नन्दीश्वर** पु० ६त०। १शिवे २तालभेदे सङ्कीर्तदा०। ३शिवगणाधिपभेदे पु० तस्य तथात्वकथा च वराहपु० उक्ता यथा "ततस्त्रेतायुगे काले नन्दी नाम महामुनिः। आराधयिषुः शर्वं तपस्तेपे सुदारुणम्। ततस्तु भगवान् प्रीतस्तस्मै विप्राय शङ्करः। उवाच च वचः साक्षात्तमृषिं वरदः प्रभुः। वरान् वृणीष्व विप्रेन्द्र! यानिच्छसि महामुने!। तांस्ते सर्वान् प्रदास्यामि दुर्लभानपि मानुषैः!। इत्युक्तोऽसौ भगवता शर्वेण मुनिपुङ्गवः। प्रोवाच वरदं देवं प्रहृष्टेनान्तरात्मना। यदि प्रीतोऽसि भगवन्! यदनुग्रहतया मम। यदुपाद्यो ह्यहं देव! त्वयावश्यं सुरार्चित!। यथाऽनन्या भवेद्भक्तिस्त्वयि नित्यं महेश्वर!। तथाहं भक्तिमिच्छामि सर्वभूताश्रये त्वयि। एतत्तु वचनं श्रुत्वा ननृदिनः स महेश्वरः। प्रहसन्नुवाच तं प्रीत्या ततो मधुरया गिरा। भवूपधारी भगवान् स्वयमेव महेश्वरः। भविष्यसि न सन्देहो देवदानवपूजितः। अनेनैव शरीरेण जरामरणवर्जितः। दुष्प्राप्यैवमवाप्या ते दैवैर्गाणेश्वरी गतिः। पार्श्वदानां वरिष्ठश्च मामकानां द्विजोत्तम!। नन्दीश्वर इति ख्यातो भविष्यसि न संशयः। यद्य प्रभृति देवाग्र्य! देवकार्येषु सर्वतः। त्वं प्रभुर्भविता लोके मत्प्रसादान्महेश्वर!। त्वामेवाभ्यर्चयिष्यन्ति सर्वभूतानि सर्वतः। मत्तः समभिवाञ्छन्तः प्रसादं पार्श्वदाधिप!। यस्त्वां द्वेष्टि स मां द्वेष्टि यस्त्वामनु स मामनु। नावयोरन्तरं किञ्चिदग्न्यर्चिषोरिव। हारे तु दक्षिणे नित्यं त्वया स्थेयं गणाधिप!। वामेन विभुना चापि महाकालेन सर्वदा" वराहपु०।

**नन्दीसरस्** न० इन्द्रसरोवरे शब्दमा०।

**नन्द्य** नन्द् + आनन्दे कण्ड्वादेराकृतिगणत्वात् यक् भा०पर० सेट्। नन्दति आनन्दी(न्दी)त्।

**नन्द्यादि** पु० ल्युप्रत्ययान्ततया पा०ग०सू०पठिते शब्दगणे यथा "नन्दनः वाजनः मदनः दूषणः साधनः वर्द्धनः शोभनः रोचनः (सङ्कितपिदमः संज्ञायाम्)। सूदनः तपनः दमनः जल्पनः रमणः दर्पणः संक्रन्दनः सङ्कर्षणः संकर्षणः जनार्दनः यवनः मधुसूदनः विभीषणः लवणः चित्तविलासनः कुसुदमनः शत्रुदमनः।

**नन्द्यावर्त्त** पु० नन्दी आवर्त्तो यत्र। "नन्द्यावर्त्तमलिन्दैः शाखाकृद्धां प्रदक्षिणानगतैः। द्वारं पश्चिममस्मिन् विहाय शेषाणि कार्याणि" बृ०सं०५३अ०उक्ते १गृहभेदे भरतधृतसाङ्गवाक्ये तु तस्मान्यथा लक्षणमुक्तं यथा "दक्षिणानुगतालिन्दत्रयं यत् पश्चिमासक्तम्। पूजनीयोत्तरोच्छ्रायं नन्द्यावर्त्तं वदन्ति तत्"। तेन पश्चिमद्वारशून्यत्वे विकल्पः। २तगरवृक्षे त्रिका०। ३मत्स्यभेदे राजवल्लभः। ४व्यात्ययोगभेदे नन्द्यावर्त्तकशब्दे दृश्यम्। "क्षत्रियकान् वर्द्धमानांश्च नन्द्यावर्त्तांश्च काञ्चनान्" भा०द्रो०८२अ० दक्षिदन्तस्य ५तदाकारचक्रभेदे च "दन्तस्य मूलपरिधिं द्विरायतं प्रोच्छ्रयं कक्षवेक्षणम्" इत्युपक्रमे "श्रीवत्सवर्द्धमानचक्रध्वजचामरातपत्रेषु। क्षेत्रे दृष्टेष्वारोग्यविजयधनवृद्धिसौख्यानि। प्रहरणसङ्घेषु जयो नन्द्यावर्त्ते" प्रनष्टदेशाग्निः" बृ०सं० ६४अ०

**नपराजित्** पु० न पराजीयते परा+जि-कर्मणि क्विप् नञ्शब्देन "सह सुपा" पा०स०। महादेवे "विलोहिताय धूम्राय व्याध्याय नपराजिते" भा०द्रो० ८०अ०।

**नपात्** त्रि० न। पाति पा-रक्षणे शतृ नञ्तत्पुरुषादिना पा० नञः प्रकृतिभावः। १अरक्षके "नपातो दुर्वहस्य ये"

ऋ०८६५।१२ "नपातो अरक्षसः" भा० नपात् अक्षतः इति सि० कौ० तेन खादौ नपानृ नपानौ इत्यादि रूपम् । न पातयति पाति–क्विप् । २अपातके च अस्य नपात् नपातौ नपातः इति भेदः । तनूनपात् तनूरक्षकः । ३पुत्रे अपत्ये निरु० । तस्य प्रस्रावनरकनिरासकत्वेन पतनाभावहेतुत्वात् तथात्वम् । "मनोर्नपातो अपसो दधन्विरे" ऋ०३।६०।२ "मनोः नपातः प्रजाः" माधवः "ऋतीषां नपादवधीतायं यजमानः" यजु० २१।६१ "हे ऋतीषां नपात् प्रजः" वेददी० ।

**नपात** पु० नास्ति पातो यस्य । देवयाने पथि "अवित्सि नपातं विक्रमणं च विष्णोः" यजु० १९।५६ "वेवेष्टि विष्णुः तस्य विष्णोः व्यापनशीलस्य यज्ञस्य "यज्ञो वै विष्णुरिति" श्रुतेः तस्य नपातं विक्रमणं च अवित्सि वेद्मि । नास्ति पातो यस्य स नपातो देवयानपथः यस्य गतानां पातो नास्ति, विविधं क्रमणं गमनागमनं यस्य स विक्रमणः पितृयानपथः यस्य गतानां पुनर्भोगान्ते पतनम् । यज्ञस्वन्धिनौ देवयानपितृयानौ पन्थानौ वेत्सीत्यर्थः"वेददी०

**नपुंसक** पु०न० न स्त्रीपुंसौ नञ्समासादित्वादि पा० स्त्रीपुंसयोः पुंसकभावः नि० नञः प्रकृतिभावश्च । क्लीबे क्लीबशब्दे २२४६पृ० दृश्यम् । "नपुंसको भवतीति" महाभाष्यप्रयोगात् अस्य पुंस्त्वमपि । लिङ्गस्य शब्दगतत्वेऽपि शब्दार्थे तद्व्यवहारस्तु अभेदारोपात् तदेतत् शब्दार्थरत्नेऽस्माभिः समर्थितं यथा

"लिङ्गत्वञ्च प्राकृतगुणगतावस्थात्मकोधर्म एव तद्विशेषश्च पुंनपुंसकत्वादिः । तथा हि सर्वेषां त्रिगुणप्रकृतिकार्यतया शब्दानामपि तथात्वेन गुणगतविशेषाच्छब्देषु विशेष इति कल्पते । स च विशेषः शास्त्रे दृत्यभिधीयते । विज्ञतसत्त्वादीनां तुल्यरूपेषावस्थानात् नपुंसकत्वं, सत्त्वाधिक्ये पुंस्त्वम्, रजआधिक्ये स्त्रीत्वमिति । एवञ्च लिङ्गस्य शब्दधर्मत्वेऽपि शब्देन सहार्थाभेदारोपात् अस्ति बाधके अर्थेऽपि साक्षात् तत्पारतन्त्र्येण वा सर्वत्र तस्य विशेषणत्वम् शाब्दबोधे शब्दभानस्येष्टत्वाच्च शब्दस्य नामार्थतावत् तद्गतलिङ्गस्यापि नामार्थतौचित्यात् "न सोऽस्ति प्रत्ययोलोके यः शब्दानुगमादृते" इति हर्य्युक्तेः "शब्दोऽपि यदि भेदेन विवक्षा स्यात्तदा तथा । नोचेत् स्त्रीत्वादिभिः सिद्धोऽप्यसावर्थेऽवभासते" इति हर्य्युक्तेश्च शब्दानां तदर्थतावगतेः । तथा प्रातिपदिकार्थः । अभेदविवक्षायां तु स्त्रीत्वादिभिरेव सिद्धः ज्ञातः सन् अर्थे प्रकारतया भासते इति तदर्थः । युक्तञ्चैतत् लिङ्गः शब्द इति व्यवहारात् "स्वमोर्नपुंसकादिति" पा० सूत्रे शब्दस्यैव नपुंसकत्वव्यपदेशात् दारादित्वादौ पुंस्त्वान्वयव्यवहाराच्च लिङ्गस्य शब्दधर्मत्वमन्वयैतेषु लिङ्गानन्वयापत्त्या व्यवहारसूत्रनिर्देशासङ्गत्यापत्तेश्च । तथा अर्थभेदाच्छब्दभेदवत् लिङ्गभेदादपि शब्दभेद इति कल्पते प्रागुक्तधर्मविशेषरूपभेदकसद्भावात् । उक्तञ्च भाष्ये "एकार्थे शब्दान्यत्वादृष्टं लिङ्गान्यत्वमिति" । एवञ्च तटादिशब्दानामनेकलिङ्गत्वव्यवहारः समानापूर्वीकत्वेनैव । वस्तुतस्तेषां भिन्नानामेव भिन्नलिङ्गत्वमिति दिक् । अर्थरूपनपुंसकत्वोत्पत्तौ कारणं शा०ति०उक्तं यथा "विन्दुरेको विशेषु गर्भसमयात्मा क्रमादधौ । रजोऽधिको भवेन्नारी भवेत्तोऽधिकः पुमान् । समतायां तु नपुंसकमिति स्मृतम्" । "सुखनपुंसकस्य" पा० "नपुंसकमनपुंसकेनेत्यादि" पा० तत्र पुंसि "नैव स्त्री न पुमानेष न चैवायं नपुंसकः" श्वेताश्व० । क्लीबे "न वामनाः कुब्जकुब्जा न खञ्जाः नाम्नो जडः स्त्री न नपुंसकञ्च" भा०या०८२अ० ।

**नपुंसक** पु०न० न पुमान् अर्थे न नपुंसकभावः । क्लीबे "हतास्म्यहं कृतानेन नपुंसा वीरमानिना" भाग० ६।१४।२०

**नप्तृ** न० न पतत्यनेन न+पत–तृच् नप्तृनेष्टृत्वादि० पा०नि० । १पौत्रे २दौहित्रे च (नाति) हेमच० । "पुत्रेण लोकान् जयति पौत्रेणानन्त्यमश्नुते" इति "दौहित्रोऽपि श्राद्धकर्मैनं सन्तारयति पौत्रवत्" मनूक्तेश्च तयोः उद्धारकत्वात् नप्तृत्वम् । "यदि नात्मनि पुत्रेषु न चेत् पुत्रेषु नप्तृषु । नत्वेव तु कृतोऽधर्मः कर्त्तुर्भवति निष्फलः" मनुः । ३कन्यापुत्रयोः कन्यायां स्त्री अमरः ङीप् ।

**नप्तृका** स्त्री नप्तृ–संज्ञायां कन् । विष्किरे शुद्धारकारिणीति प्रसिद्धे पक्षिभेदे "श्यामतित्तिरिकपिञ्जलवर्त्तीरवर्त्तिकावर्त्तकनप्तृकायातीक" इत्याद्युपक्रमे विष्किरा लघवः शीतमधुराः कषाया दोषशमनाश्च" सुश्रु० ।

**नभ** हिंसायां निघण्टुः भ्वा०आत्म० सक० सेट् । नभते अनभिष्ट नेभे । नभ हिंसे इत्यस्य क्षीरदेशत्वात् सतिनिमित्ते अत्वम् नाक्षीति भेदः । तत्र धातौ आर्धधातुक इत्यणादम् तस्य अनुदात्तेत्त्वेन आत्मनेपदित्वात् ।

**नभ** त्रि०नभ–हिंसायां पचा०अच् । १हिंसके २आवणे मासि पु० शब्दर० । तस्य हिंसा कीटादिहिंसकत्वात् तथात्वम् । २आकाशे न० नभोऽवशब्दे दृश्यम् । हिंसितसर्वप्राणिनां तेनैव गमनात्तस्य तथात्वम् । चाक्षुषमन्वन्तरे ४सप्तर्षिभेदे

"मनुर्नभो विवस्वांश्च हरिवं० ७अ०चाक्षुषमन्वन्तरोक्तौ। स्वारोचिषमनोः ५पुत्रभेदे "प्रथितश्च नभश्च नभ ऊर्जश्चथैव च" हरिवं० ७अ० स्वारोचिषमन्वन्तरोक्तौ। रामवंश्ये राजभेदे "निधन्वस नभः पुत्रो नभः पुत्रो नभस्वत" हरिवं० रामवंश्योक्तौ।

**नभःक्रान्तिन्** पु० नभः क्रान्तमनेन इनि। सिंहे शब्दमा०

**नभःप्राण** पु० नभसः प्राण इव। पवने त्रिका०।

**नभःसद्** पु० नभसि सीदति सद्-क्विप् ७त०। १देवे २खगादौ च। वा विसर्गस्य सत्वे नभस्सदुभयत्र।

**नभःसरित्** स्त्री ६त०। गङ्गायां त्रिका० वा विसर्गस्य सत्वे नभस्सरिदत्र।

**नभःस्थल** पु० नभःस्थलमिव यस्य। महादेवे "ऊर्द्धरेता ऊर्द्धलिङ्ग ऊर्द्धगायी नभःस्थलः" भा०अनु०१७अ० शिवनामोक्तौ। अरूपरे खरि वा विसर्गलोपे नभस्थलोऽत्र।

**नभःस्थित** त्रि०७त०। १गगनस्थिते तारापक्षादौ २नरकभेदे हेमच०। वा विसर्गलोपे नभस्थितोऽत्र।

**नभःस्पृश्** त्रि० नभःस्पृशति स्पृश-क्विन्। गगनस्पर्शिनि। वा विसर्गलोपे नभस्पृगत्रार्थे। क्विन्नन्तत्वात् पदत्वे कुत्वम्। नभःस्पृक्। "भवन्ति व्यथिता सर्व्वाः कीर्त्तयश्च नभस्पृशः" काशीख० क। नभःस्पृशोऽत्र। "नभःस्पृग्भैर्महाघोरैः परिक्षिप्तं महावनम्" भा० द्रो०५अ०

**नभग** पु०वैवस्वतमनोः १पुत्रभेदे "इक्ष्वाकोर्नभगश्चैव धृष्टः शर्यातिरेव च" भा०८।१३२ वैवस्वतवंशोक्तौ। २गगनगे त्रि० नास्तिभगो यस्य। ३भाग्यहीने त्रि०।

**नभनु** त्रि०नभ-हिंसायां बा०अनु। १हिंसके वेदे स्त्रियामङ्। "नभनू प्रायुवो नभन्यः" ऋ०४।१६।३। नभन्यः हिंसिकाः भन-बा० अनु प्रथो०। २शब्दकारके उदके पु० निघण्टुः "पर्वतस्य नभनूरच्युवुः" ऋ० ६।५६।७ "नभनून् भक्षते शब्दकर्मणः नभ्राडितिवत् नभनवः उदकानि" भा० दीपिकाः २नद्यां स्त्री निघण्टुः नभन्या इति तत्र पाठान्तरं "प्रायुवो नभन्यः" ऋ०४।१६।७ बहुवचनान्तः।

**नभन्य** त्रि० नभ-हिंसायां कनिन् नञि हिंसायां साधु यत्, नभसि स्थितो वा यत् प्रथो०। १व्याकाशभवे २हिंसके च। "यावत् सोम नभन्यं यथा वेरचीमं तदाहधानं स्वर्यत" ऋ० १।१७१।१ "हे इन्द्र! नभन्यं नभस्यं नभसि भवं नभोव्यापिनं हिंसकं वा राक्षसादिकम्। नभति वधकर्मा "नभति वर्दतीति वधकर्मसु गणनात्" भा०।

**नभश्चक्षुस्** न० नभसश्चक्षुरिव प्रकाशकत्वात्। सूर्ये शब्दमा०।

**नभश्चमस** पु० नभसश्चमस इव। १चन्द्रे २चित्रापुष्पे ३इन्द्रलोके च मेदि०।

**नभश्चर** त्रि० नभसि चरति चर-ट। गगनचारिणि १खगे २देवे गन्धर्वग्रहादौ। ३नभःस्थायिमात्रे च "निकामतप्ता हिविधेन वह्निना नभश्चरेणोन्नसंभृतेन च" कुमा० "नभश्चरैर्गीतयशाः स लेभे" व्यये३मे वा श्रुतभे विलग्ने चैकोऽपि पापश्च नभश्चराख्यम् ज्योतिषम्।

**नभस्** न० नह्यते मेघैः नह-बन्धने "नहेर्भश्च" उषा०असुन् भश्चान्तादेशः। १गगने "ओमित्युक्त्वतोऽथ शार्ङ्गिणं च इति व्याकृत्य वाचं नभसश्चिक्षुत्सतिर्ते" भाघः। २श्रावणे मासि पु०अमरः। बाहुलकेन मेघसम्बन्धात्तस्य तथात्वम्। "नभोनभस्यमम्बस्मिन् तद्द्वयोः" मेदि० "नभाश्च नभस्यश्च वार्षिकावृतू" यजु० १४।१५। "नभोनभस्ययोर्द्वन्द्विसवयद्वयान्तरे" रघुः। ३मेघे अमरः नभस्शब्दे दृश्यम्। ४उदके निघण्टुः। ५प्राणे ६वर्षे ७पतङ्गपक्षे पु० मेदि० ८पक्षितयौर्ये शब्दर० ९लग्नतोदयमस्थाने ज्यो०

**नभस** पु० नभ-शब्दे असच्। १शब्दाश्रये गगने। दशमभन्वन्तरीये २सप्तर्षिभेदे "ऋक्षिरा नभसः सप्तः सप्तैव परमर्षयः" हरिवं० ७अ० दशमभन्वन्तरोक्तौ।

**नभसङ्गम** पुंस्त्री नभसं गगनं गच्छति गम-खच् मुम् च। खगे अमरः। स्त्रियां जातित्वात् ङीष्।

**नभस्काय** पु० नभो भवते भय-गतौ अच् वेदे अयस्कायादि० न पदत्वम्। आदित्ये "ऋतोपस्तरथं नभस्कायम्" ऋ०८। ६८।५ "नभस्कायमादित्यम्" भा०। लोके तु नभोभव इत्येव नभोगे त्रि०।

**नभस्य** पु० नभसे मेघाय उदकाय वा साधु यत्। १भाद्रपदमासे नभःशब्दे उदा०। "प्रथमा च द्वितीया च नभस्ये मासि निन्दिता" वसिष्ठः। "अथ नभस्य इव त्रिदशायुषम्" रघुः। २स्वारोचिषमनोः पुत्रभेदे "प्रथितश्च नभश्च नभ ऊर्जश्चथैव च" हरिवं०७अ० तत्पुत्रोक्तौ नभसि गगने भवः यत्। ३गगनभवे त्रि०।

**नभस्वत्** पु० नभः साधनत्वेनास्त्यस्य मतुप् मस्य वः। पवने अमरः। "आकाशाद्वायुः" इति श्रुतेः वायोराकाशहेतुकत्वात् तथात्वम्। "निवसन्ति मरीचं विदधुर्विलोकिता नभस्वतस्तं कुसुमेषु केतवः" नैष० "नभस्वानिव दक्षिणः" रघुः। २ऋनद्धांनस्य पक्षस्य स्त्री ङीप्। "ऋनद्धांनो नभस्वत्यां हविर्द्धानमविन्दत" भाग०४।२४।६

**नभाक्ष** पु०न० भाति भा-पिनाका० आक। १तमसि चक्षु-

ङद०। २राहौ च तस्यच्छादकरूपत्वेन तथात्वम्। ततः शिवा० अपत्ये अण्। नाभाक तदपत्ये पुंस्त्री०।

**नभोग** त्रि० नभोगच्छति गम–ड। १नभश्चरे खगदेवग्रहादौ २खम्नतोदृशभागे १दृशमभन्वन्तरीये सप्तर्षिभेदे नभसशब्दे दृश्यम्।

**नभोगज** पु० नभसि गज इव। मेघे त्रिका०।

**नभोगति** स्त्री ७त०। १गगनगतौ नभसि गतिरस्य। २खगादौ त्रि० [तद्गणोक्तौ।

**नभोद** पु० विश्वदेवभेदे "उष्णीनाभो नभोदश्च" हरिवं०७अ०

**नभोदुह** पु० नभसि दुहति दुह–क। १मेघे शब्दरत्ना०। तस्य नभसि पयोनिःसारकत्वेन तथात्वम्।

**नभोद्वीप** पु० नभसि द्वीप इव। मेघे शब्दमा०।

**नभोधूम** पु० नभसि धूम इव। मेघे शब्दमाला।

**नभोनदी** स्त्री ६त०। स्वर्गगङ्गायाम्। [स्वर्वै ज्ञेयच०।

**नभोमणि** पु० नभसि मणिरिव प्रकाशकत्वात्। सूर्य्ये

**नभोमण्डल** न० नभोमण्डलमिव। गगनमण्डले "नैतद्भो मण्डलमम्बुराशेः" सा०द० "यच्च यावद्भोमण्डलं सङ्घद्यावापृथिव्योर्मण्डलाभ्यां कात्स्न्र्येन सङ्घ भुङ्क्षीतम्" भाग० ५।२२।८।

**नभोमण्डलदीप** पु० नभोमण्डले दीप इव रात्रौ प्रकाशकत्वात्। चन्द्रे "नभोमण्डलदीपाय शिरोरत्नाय धूर्जटेः। कलाभिर्वर्द्धमानाय नमश्चन्द्राय चारवे" ति०त०

**नभोऽम्बु** पु० स्त्री नभसि अम्बु पिबति पा–क। चातकखगे हेमच०। स्त्रियां जातित्वात् ङीष्।

**नभोरजस्** न० नभसि रज इव दृश्यावरकत्वात्। अन्धकारे

**नभोरूप** त्रि० नभसो रूपमारोपितं रूपमिव रूपमस्य। नीलवर्णयुक्ते पश्चादौ "अप्रत्यक्षेऽपि चाकाशे बालरत्नमलिनतादृश्यन्ति" शा०भा० "खनीखनीलिमा" नैष० उक्तेः गगनस्यारोपितरूपवत्त्वेन तत्तुल्यरूपत्वात् श्यामश्चाखिन्नवर्णयुक्तस्य तथात्वम्। "नभोरूपाः पार्जन्याः" यजु०२४।६०। "नभोवर्णा नीलवर्णाः" वेददी०। [त्रिका०

**नभोरेणु** स्त्री नभसि रेणुरिव आवरकत्वात्। कुज्झटिकायां

**नभोलय** पु० नभसि लीयते ली–अच् ७त०। १धूमे शब्दरत्ना० २गगनलीनमात्रे त्रि०।

**नभोवीथी** स्त्री नभसि वीथीव। आकाशस्थे वीथीरूपे पथि। "यच्च यावताङ्गेन नभोवीथ्याः प्रचरति तं कालमयनमाचक्षते" भाग० ५।२२।८।

**नभौकस्** त्रि० नभ आकाशम् ओकः स्थानमस्य। अन्तरिक्षचरे खगादौ "अन्ये च विविधा जीवा जलस्थलनभौकसः। यद्दर्शनेतवत्तारास्तडित:स्तनयित्नवः" भाग० २।६।१५

**नभ्य** त्रि० नाभये रथचक्रावयवभेदावहितम् तामर्हति वा गवादि० यत् "नाभिनभ्य" पा० स० नभादेशः। रथादिचक्रावयवर्हिते १तैलादौ २तदर्हे च "तदेतन्नभ्यं वदयमात्मा" शत० ब्रा० १४।४।३।२२ "तदेव रथचक्रदृष्टान्तेन स्पष्टयति नाभिचक्रपिण्डिका नाभ्यै हितं नाभिमर्हतीति वा नभ्यम् तदेतल्लोके प्रसिद्धं चक्रपिण्डिकास्थानीयम्, किं तत् यदयमात्मा योऽयं शरीरम्" भा०। ३चक्रे ४रथचक्रानुगुणे चक्रने च। "नभ्योऽन्तः नभ्यसञ्जनं रथचक्रनाभावेवेदम्" सि०कौ०। "नभ्योऽन्त इति सञ्जिहो रथाङ्गावयवो नाभिस्तदनुप्रविष्टः काष्ठविशेषोऽन्तः स च तदनुगुणत्वात् नाभये हितः। अञ्जनं तैलाभ्यङ्गः तदपि स्नेहमयत्वात् नाभये हितम्" मनो०। शब्दकल्पद्रुमे नभ्यशब्दस्य नभःप्रकृतिकत्वेन साधनमन्यार्थपरत्वकथनञ्च निर्मूलम्। "पञ्चादुत्तरवेदेष्विष्टिषु प्रकृतिषु सत्या वा नभ्यस्य अभिमन्त्रयतेऽत्र रमेवामिति" कात्या०श्रौ०८।४।५ "मध्यमं चक्रस्य फलकं नभ्यम् "नाभिर्नभं चेति" प्रत्ययसंनियोगेन नाभेर्नभभावः नभ्ये तिष्ठतो नभ्यस्थे मध्यमे च फलके स्थापयेदित्यर्थः" कर्कः।

**नभ्राज्** पु० न भ्राजति भ्राज–क्विप् नञ्भ्राड्नपात्" इत्यादिना पा०नञः प्रकृतिभावः। मेघे हेमच०पदत्वे प्रत्यहत्वे

**नमत** त्रि० नम–अतच्। प्रह्वे १नम्रे २नटे च १धूमे उणा०। कर्मणि अतच्। ४प्रभौ उणादिकोषः।

**नमयिष्णु** त्रि० नम–स्वार्थे णिच् वा० इष्णुच्। नमनशीले "स्थिरा चिन्नमयिष्णवः" ऋ०८।२०।१ "नमयिष्णवः नमनशीलाः" भा०।

**नमस्** अव्य० नम–भावे असुन् खरादि०। नमने १स्वापकर्मबोधकव्यापारे २त्यागे स्वस्वत्वध्वंसानुकूलव्यापारभेदे। पुष्पं विष्णवे नम इत्यादौ विष्णुद्देश्यकमन्त्रकरणकत्यागविषयः पुष्पमित्येवं बोधः यथाह शब्दशक्तिप्रकाशिकायाम्

"पुष्पमिदं विष्णवे नम इत्यस्य विष्णुद्देश्यक मन्त्रकरणत्यागस्य कर्मेदं पुष्पमित्यर्थस्य चतुर्थ्या प्रीत्युद्देश्यकत्वं तदिच्छाधीनत्वरूपं नमःपदार्थे मन्त्रकरणत्यागे बोध्यते प्रकृत्यर्थस्य च विष्णोः प्रीतौ तदिच्छायां वान्वयः। ब्राह्मणायेदं गवादित्यागस्य मन्त्रकरणत्वे प्रमाणाभावात् गौर्ब्राह्मणाय नम इत्यादिकोन प्रयोगः।

ब्राह्मणेभ्यो नमोनित्यमित्यादौ तु नमःपदार्थौ नतिरेवेति तत्र विषयत्वं चतुर्थ्यां बोध्यते। पुष्पमिदं परमात्मने नम इत्यादौ परमात्मनः प्रीत्यसत्त्वेऽपि तत्प्रीतित्वप्रकारकेच्छासम्बन्धात् तत्प्रीत्युद्देश्यकत्वाप्रसिद्धिः"। नम्यते कर्मणि घञ्। २यज्ञे ४यज्ञे च निघण्टुः नमोऽधःशब्दे दृश्यम्। साद्यादा० उप०स०। नमस्करोति नमस्कृत्य। अत्र क्षधातोरेव नमनार्थता नमश्शब्दस्तु तदर्थद्योतकः तेन नारायणं नमस्कृत्येत्यादौ द्वितीया उपपदविभक्तेः कारकविभक्तिर्गरीयसी" इति न्यायात् नमसोवाचकत्वे नमस्कृत्य ब्राह्मणेभ्य इत्यादौ नमःशब्दयोगे चतुर्थी। "नमः स्वस्तीत्यादि" पा० सूत्रे त्यागार्थकनमनार्थकयोरुभयोर्ग्रहणम्। ३यज्ञे च न० "यज्ञो वै नमः" इति श्रुतेः।

**नमस** त्रि० नम-असच्। अतिशुष्के उज्ज्वट०।

**नमसान** त्रि० नामधा० नमस-वा० आनच् चक्षोपयलोपौ। नमस्कारयुक्ते "यशस्विनं नमसाना विधेम" यजु०६।२८।२

**नमसि(स्ति)त** नामधा० नमस-कर्मणि क्त वा यलोपः। कृतनमस्कारे अमरः।

**नमस्कार** पु० नमस्+कृ-घञ्। १क्षापकवर्णबोधकव्यापारे करशिरःसंयोगादौ २विषभेदे शब्दच०। नमस्कारे अधिकारिविशेषादिकं नानास्थानात् प्रदर्श्यते। अभिवादवेदित्वतुल्यौ शङ्खः "नाप्रयतायाप्रयतश्च" इति शु०त०। "स्त्रियो नमस्या ब्रह्मश्च वयसा पत्युरेव ताः" इति स्मृत्यर्थसारः। "देवं विप्रं गुरुं दृष्ट्वा न नमेद्यस्तु सम्भ्रमात्। स कालसूत्रं व्रजति यावच्चन्द्रदिवाकरौ। ब्राह्मणश्च गुरुं दृष्ट्वा न नमेद्यो नराधमः। यावज्जीवनपर्य्यन्तमशुचिर्यवनो भवेत्" इति ब्रह्मवै० जन्मख० "देवतायतनं दृष्ट्वा दृष्ट्वा तु दक्षिणत्वचा। नमस्कारं न कुर्य्याद्यः प्रायश्चित्ती भवेन्नरः। सभायां यज्ञशालायां देवतायतनेषु च। प्रत्यक्षन्तु नमस्कारो हन्ति पुण्यं पुराकृतम्। उपविश्य नमेत् मूढो दीर्घायुर्ब्राह्मणो वदेत्। स मूढो नरकं याति ब्राह्मणो यात्यधोगतिम्। दूरस्थं जलमध्यस्थं धावन्तं मदगर्वितम्। क्रोधवन्तं विजानीयात् नमस्कारञ्च वर्जयेत्। पुष्पहस्तो वारिहस्तस्तैलाभ्यङ्गी जलस्थितः। आमोऽकर्त्ता नमस्कर्त्ता उभयोर्नरकं भवेत्" कर्मलोचनम्। "मातुः पितुः कनीयांसं न नमेद्वयसाधिकः। नमस्कुर्य्याद् गुरोः पत्नीं भ्रातृजायां विमातरम्" यमः। "अभिवादयतः पूर्वमाशिषं न प्रयच्छति। यद्दुष्कृतं भवेत्तस्य तच्छङ्खागं प्रपद्यते। स्वस्तीति ब्राह्मणे ब्रूयात् आयुष्मानिति राजनि। वर्द्धतामिति वैश्ये तु सूद्रे त्वारोग्यमेव च" म०त०। "गुरुपत्नी तु युवती नाभिवाद्येह पादयोः। पूर्णषोड़शवर्षेण गुणदोषौ विजानता" मनुः। "कुर्वीत वन्दनं भूयो भगोवोऽस्मिति ब्रुवन्। विप्रोष्य पादग्रहणमन्वहञ्चाभिवादनम्। गुरुदारेषु कुर्वीत सतां धर्ममनुस्मरन्। अभिवादनशीलः स्याच्नित्यं वृद्धेषु धर्मतः। असावहञ्चो नामेति सम्यक् प्रणतिपूर्वकम्। आयुरारोग्यसिद्ध्यर्थं तन्द्रादि परिवर्जितः। आयुष्मान् भव सौम्येति वाच्यो विप्रोऽभिवादने। अकारश्चास्य नाम्नोऽन्ते वाच्यः पूर्वाक्षरप्लुतः। यो न वेत्त्यभिवादस्य द्विजः प्रत्यभिवादनम्। नाभिवाद्यः स विदुषा यथा शूद्रस्तथैव सः। व्यत्यस्तपाणिना कार्यं प्रणामं चरणं गुरोः। सव्येन सव्यः स्पृष्टव्यो दक्षिणेन तु दक्षिणः। लौकिकं वैदिकञ्चापि तथाध्यात्मिकमेव वा। आददीत यतो ज्ञानं तं पूर्वमभिवादयेत्। ब्राह्मणान् कुशलं पृच्छेत् क्षत्रबन्धूननामयम्। वैश्यं क्षेमं समागम्य शूद्रमारोग्यमेव तु" मनुः। अभिवादनीयाश्च "उपाध्यायः पिता ज्येष्ठो भ्राता चैव महीपतिः। मातुलः श्वशुरश्चाता मातामहपितामहौ। बन्धु ज्येष्ठः पितृव्यश्च पुंस्येते गुरवः स्मृताः। माता मातामही गुर्वी पितृभार्यातथा स्वसा। श्वश्रूः पितामही ज्येष्ठा धात्री च गुरवः स्त्रियाम्। इत्युक्तो गुरुवर्गोऽयं पितृतो मातृतो द्विजाः। अनुवर्त्तनमेतेषां मनोवाक्कायकर्मभिः। गुरून् दृष्ट्वा समुत्तिष्ठेदभिवाद्य कृताञ्जलिः" इति कूर्मपु० ११अ०। अधिकं नतिशब्दे दृश्यम्। "अयमेव नमस्कारो भूम्यादिप्रतिपत्तिभिः। प्रणाम इति विज्ञेयः स पूर्वं प्रतिपादितः" कालिकापु०७०अ०। रात्रौ तन्निषेधो यथा "रात्रौ नैव नमस्कुर्य्यात्तेनाशीरभिचारिका। अतः प्रातः पदं दत्त्वा प्रयोक्तव्ये च ते उभे" भट्टभारते।

**नमस्कारी** स्त्री नमस्कारः तदङ्काङ्कितरिव पत्रम् अस्त्यस्याः अच् गौरा० ङीष्। लज्जालुवृक्षे अमरः। तस्याः नमस्काराङ्काङ्कितरूपपत्रकत्वात् तथात्वम्।

**नमस्य** नामधा०नमस्करोति "नमस्तोपवरिवः" इत्यादि क्यच् पूजायाम् भ्वा० पर० सक० सेट्। नमस्यति अनमसी-(स्ती)त्। कर्मणि नमस्यते "द्विजैः क्वचिन्नमस्ये" "तेऽनमस्यं च भङ्गुरम्" "नो नमस्यन्ति ते बन्धून्" भट्टिः।

**नमस्य** त्रि॰ नामधातुः नमस्-कर्मणि यत् अल्लोपयल्लोपौ। पूज्ये। "ब्रह्मन्नतिथिर्नमस्यः" कठोप॰।

**नमस्या** स्त्री नमस्-भावे क्य। पूजायाम्

**नमस्यु** त्रि॰ क्यजन्तनमस्-"क्याच्छन्दसि" पा॰ उ। १नमस्करणशीले "स इदने नमस्युभिर्वचस्यते" ऋ॰१।५५।४। पुरवंश्ये २रूपभेदे "जनमेजयोऽभूत् पुरोः प्रचिन्वांस्ततस्ततश्चतः। प्रवीरोऽथ" नमस्युर्वै भाग॰९।२०।३ तत्र नमस्युरिति पाठान्तरं हरिवंशे २१अ॰ "प्रचिन्वतः प्रवीरोऽभूत्तमस्युस्तस्य चात्मजः" इत्युक्तेः।

**नमित** त्रि॰ नम-क्त्वा क्तः। नामिते नतीकृते "सुधीः को वा कौपीरपि नमितमूर्द्धा न पिबति" विदग्धमाधवः।

**नमी** पु॰ नम-बा॰ ई वातप्रमीवत्। ऋषिभेदे "प्रब्रह्मभीं साय्यं सप्तमम्" ऋ॰ ६।२०"नमीं तत्संज्ञकमृषिम्" भा॰ "प्र मे नमीं साय्यम् दधे भुजे" ऋ॰ १०।४८ ६"एतेन वै नमी साय्योवैदेहो राजाङ्गसा स्वर्गं लोकमैत्" षड्विंश ब्रा॰ २५।१०।१७

**नमुचि** पु॰ न मुञ्चति मुच-इन् नञ्माडिद्या पा॰नञ्जः प्रकृतिभावः। १कन्दर्पे दनोः पुत्रे २असुरभेदे मेदि॰। चत्वारिंशद्दनोः पुत्रा इत्युपक्रमे "शंवरो नमुचिश्चैव पुलोमा चेति विश्रुतः" भा॰आ॰६०अ॰। "कश्यपस्य दनुर्नाम भार्यासोदुद्विजसत्तम!। तस्यान्तु द्वौ सुतावास्तां सङ्घाताद् बलाधिकौ। ज्येष्ठः शुम्भः इति ख्यातो निशुम्भश्चापरोऽसुरः। तृतीयो नमुचिर्नाम महाबलसमन्वितः" वामनपु॰ ५२अ॰।

**नमुचिद्विष्** पु॰नमुचिं द्विष्टवान् द्विष-भूते क्विप् ह्रस्वः। इन्द्रे नमुचिसूदनशब्दे दृश्यम्। "विस्मृत्य चक्रे नमुचिद्विषा बली" माघः।

**नमुचिसूदन** पु॰ नमुचिं सूदयति छिनत्ति सूदि-ल्यु। इन्द्रे अमरः। तेन तस्य सूदनकथा भा॰ व॰ ४७अ॰। "नमुचिर्वासवाद्भीतः सूर्यरश्मिं समाविशत्। तेनेन्द्रः सख्यमकरोत् समयञ्चेदमब्रवीत्। न त्वार्द्रेण च शुष्केण न रात्रौ नापि चाह्नि। अभिधास्यसुरश्रेष्ठ! मत्तो! मत्तेन ते भये। एवं च कृत्वा समयं दृढा नीहारमोदरः। चिच्छेदास्य शिरो राजन्वज्रेणेन वासवः। तच्छिरो नमुचेरिन्द्रं पृष्ठतः समनिन्दात्। भो मित्र दुष्ट! पापेति ब्रुवाणं यत्समनिन्दात्" नमुचिसूदनं प्रस्तावोक्तम्।

**नमुर** पु॰ नम-बा॰ उर। नमुचौ असुरे "भूयाद्विन्द्रो नमुरात् भूयानिन्द्राभि मत्युभ्यः" ऋ॰ १२।४।४६

**नमेरु** पु॰ नम-बा॰एरु। १सुरपुन्नागे विश्वः २रुद्राक्षे इति केचित् "गया नमेरुप्रसवावतंसाः" "प्राग्वेषु संसक्तनमेरुशाखम्" कुमा॰ "विशृङ्खलैर्नमेरूणां छायासख्याय सैनिकाः" रघुः।

**नमोगुरु** पु॰ नमः नमस्कारविषये गुरुः। ब्राह्मणे शब्दर॰। ब्राह्मणानां सर्ववर्णनमस्कृतया गुरुत्वात् तथात्वम्।

**नमोवाक** पु॰ वच-भावे घञ् ह्रस्व॰, नमस्काराय उच्यते कर्मणि घञ् वा। २नमोवचने नमस्कारार्थं कथनीये त्रि॰ "इदं कविभ्यो पूर्वेभ्यो नमोवाकं प्रशास्महे" उत्तरच॰। "नमोवाके प्रस्थिते अध्वरे" ऋ॰ ८।३५।२२ "नमस्काराय प्रोच्यते स नमोवाकः तस्मिन्नध्वरे" भा॰

**नमोऽधस्** पु॰ धृष-भावे सम्प॰ क्विप नमसोऽन्नस्य हव्यवहनं यस्मात् ह्रस्व॰। यज्ञे "अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते। आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः" गीतायां यज्ञस्यान्नहेतुत्वेनोक्तेस्तस्य तथात्वम्। "आनो यज्ञं नमोऽधसम्" ऋ॰ २।४२।२ "नमोऽधस् नमसोऽन्नस्य वहनं यज्ञम्"

**नम्** गतौ भ्वा॰ पर॰ सक॰ सेट्। नम्बति अनम्बीत् ननम्ब अयोपदेशत्वात् सति निमित्ते न णत्वम्। प्रणम्बति।

**नम्य** त्रि॰ नम-यवर्णान्तत्वात् कर्मणि यत् न णत्वम्। नमनीये

**नम्र** त्रि॰ नम-र। १नते निम्नताप्राप्ते २विनयान्विते च शब्दार्थचि॰। "श्लोकनम्रा सनाभ्याम्" मेघ॰। "अभूच्च नम्रः प्रणिपातशिक्षया" रघुः।

**नम्रक** पु॰ नम्र इव कायति के-क। १वेतसवृक्षे भावप्र॰। स्वार्थे क। २नमनकर्त्तरि त्रि॰स्त्रियां ङीप् अत इत्वम्

**नय** गतौ भ्वा॰ आत्म॰ सक॰ सेट्। नयते अनयिष्ट। नेये

**नय** पु॰ नी-भावे अच्। १नीतौ अमरः। "विप्रमोऽपि विगाहते नयः ततितीर्घुः पयसामिवाशयः" किरा॰।२द्यूतभेदे मेदि॰। ३नैगमादौ हेमच॰। नयति संसारपारं भक्तम् नी-कर्त्तरि अच्। ४विष्णौ "रामोविरामोविरजा मार्गो नेयो नयोऽनयः" विष्णुसं॰। नैगमादिव सिद्धान्तादिः "एवं न्यायनयैरुपपत्तीयमुक्तं निमित्तहेतुत्वम्" "तत्रापि परमाणौ स्यात् प्राको वैशेषिके नये" भाषा॰। ५न्याये हेतौ च त्रि॰ शब्दच॰ ततः आकर्षा॰ कुत्सनाद्यर्थे वुन्। नयक नीतिकुशले त्रि॰।

**नयन** न॰नीयते बुद्धिवृत्तिः स्वसंयुक्तविषयान् अनेन नी-करणे

ल्युट्। १नेत्रे अमरः। तस्य दुष्टिहेतुः क्षसंयोगिविषय-प्रापकत्वात् तथात्वम्। "दैविधम्ने नयनसुभगं खे भवन्तं बलाकाः" मेघ०। "अथ नयनसमुत्थं ज्योतिरत्रेरिव द्यौः" रघुः अस्य खाङ्गत्वेऽपि बहुच्कत्वात् उपसर्ज-नत्वे स्त्रियां न ङीष्। "दयिता दयितानना म्बुजं दर-शोन्मुखयना निरीक्षते" रघुवंश० भावे ल्युट्। २प्रापणे ३यापने च "नयनं पारिजातस्य द्वारकां मम रोचते" हरिवं०१२९ "कालस्य नयने युक्ताः सोमपत्न्यः शुचि-व्रताः" भा०आ०६६अ० "कालस्य नयने युक्ता यमस्य पुरुषाश्च ये" भा०स० ८अ०।

**नयनाभिघात** पु० ६त०। सुश्रुतोक्ते नयनाभिहननरूपे रोगभेदे यथोक्तम् "अथातो नयनाभिघातप्रतिषेधं व्या-ख्यास्यामः। अभ्याहते तु नयने बहुधा नराणां संरम्भरागतमसाच्च बलाच्च धीमान्। नस्यप्रसेकपरि-षेचनतर्पणाद्यमुक्तं पुनः श्लेष्मजपित्तजमूर्ध्वपथ्यम्। दृष्टिप्रसादजननं विधिमाशु कुर्यात्तृप्तिस्त्रिधैर्हिमैव मधुरैश्च तथा प्रयोगैः। खेदाग्निधूमभयशोकरजाभिघातैरभ्या-हतावपि नयौ भिषक् चिकित्सेत्। यद्दीर्यते नयन एष विधिस्तदूर्ध्वं सन्देरितो भवति दोषभवेक्ष कार्यः। अभ्याहतं नयनमीषदथास्र वाप्यसंखेदितं भवति तच्च-क्षुजं त्रयेण। साध्यं त्रतं पटलमेकतमे तु तस्मिंस्त्रीणि त्रतानि पटलानि विवर्जयेत्तु। स्यात्पिच्छिलञ्च नयनं क्लति चाप्यतच्च तत्तु त्रतदक्च भवेत्तु याप्यम्। विस्रोषदूषितनुरागमसत्प्रदर्शि साध्यं यथास्थितमनाबि-लदर्शनञ्च। प्राग्रोपरोधवननत्रवकखरोषैरुन्नम्यमाणु नयनं बहिरप्रविष्टम्। नेत्रे विसर्पिणि विधिर्विहितः पुरस्ताद्व्यिं छिनं शिरसि वार्ध्यवसेचनञ्च। षट्सप्रति-र्नयनजा व इमे प्रदिष्टा रोगा भवन्त्यसकृतां सकृताच्च तेभ्यः। सन्धिप्रकोपकफमारुतपित्तरक्तैर्बाह्याश्चिवर्त्म भव एव कृकूणकोऽन्यः। अद्मानि नेत्रमतिकण्डुमथाधिकूट-नासालताटमपि तेन शिरुः स नित्यम्। सूर्यप्रभां न सहते स्रवति प्रडूढं तस्माच्छरेद्रुधिरमाशु विनिर्हरेच्च। स्नौद्रावुतैव कटुभिः प्रतिसारयेत्तु माहुः शिरोरभिहि-तञ्च विधिं विदध्यात्"।

**नयनाभिराम** पु० नयनमभिरमयति अभि+रम-णिच्-अण् नयनयोरभिरामो यस्मात् वा। १चन्द्रे "आयुः क्षयञ्च कुरुते नयनाभिरामः" वैद्यकिकल्पफलोक्तौ ज्योतिर्विशिष्टः। २नेत्रानुरागकारके प्रियभाषे त्रि०।

**नयनी** स्त्री नी-करणे ल्युट् ङीप्। नेत्रकनिकायां शब्दचि०

**नयनोत्सव** पु० नयनयोरुत्सवो यस्मात्। १दीपे शब्दर०। तस्यालोकेन हि नेत्रस्य दर्शनयोग्यत्वम् "मृच्छाति चक्षुःसम्बन्धादालोकोद्भूतरूपयोः" भाषा० आलोकसम्ब-न्धेन नयनस्य विषयग्राहित्वोक्तेः। २नेत्रोत्सवकारि-भावे त्रि०।

**नयनोपान्त** पु० ६त०। अपाङ्गे राजनि०।

**नयनौषध** न० ६त०। सुश्रुतोक्ते क्षेमचं०। [त्रिका०।

**नयपीठी** स्त्री नयस्य पीठीव। (अक्ष) द्यूताङ्गे अष्टकोष्ठे

**नयवर्त्म** ६त०। नीतेर्मार्गे षाड्गुण्यप्रयोगे षट् गुणाश्च "सन्धिर्विग्रहयानानि संस्थाश्चय दमस्तथा। द्वैधीभावश्च विज्ञेयाः षड्गुणा नीतिवेदिनाम्" नीतिसा०।

**नयविशारद** त्रि० ७त०। नीतिशास्त्रानुसारेण षाड्गुण्य-प्रयोगाभिज्ञे "षाड्गुण्यविधितत्त्वज्ञो दैवभाषाविशा-रदः। सान्धिविग्रहिकः कार्यो राज्ञा नयविशारदः" मात्स्ये ८९अ०।

**नर** पुंस्त्री० न-नये अच्। १मनुष्ये जातित्वात् स्त्रियां नारी-त्वेऽपि "पुंसि यशसि तोये च नराणां पुरुषलक्षणम्"। "नराणाञ्च नराधिपः" गीता "नरतीति नरः प्रोक्तः परमात्मा सनातनः" व्यासोक्तेः २परमात्मनि "नरा-ख्यानि तत्त्वानि नाराणीति विदुर्बुधाः" वेदमन्त्रम् "आपो नारा इति प्रोक्ता आपो वै नरसूनवः" मनुः। "जङ्घा नारायणो नरः" विष्णुसं०। ३पुंसि राजनि०। ४देवभेदे "ततस्तदमृतं देवो विष्णुरादाय वीर्य्यवान्। जहार दानवेन्द्रेभ्यो नरेण सहितः प्रभुः। एवं सुरासुरे युद्धे वर्त्तमाने महाभये। नरनारायणौ देवौ समा-जग्मतुराहवम्" भा० आ०१९अ०खारोहिहारके ५अङ्के विष्कम्भकः ६नरदेवस्यावतारे अर्जुने मेदि०।

"नरनारायणौ यौ तौ पुराणाद्यमिसत्तमौ। ताविमा-वतुजानीहि कृष्णौ केशवनञ्जयौ। विख्यातौ त्रिषु लोकेषु नरनारायणावृषी। कार्य्यार्थमवतीर्णौ तौ पृथ्वीं पुण्यप्रतिश्रयाम्। यत्र ब्रह्मं सुरैर्दृष्टमृषिभिर्वा महा-त्मभिः। तदाश्रमपदं पुण्यं बदरीनाम विश्रुतम्। स निवासोऽभवद्विप्र! विष्णोर्जिष्णोस्तथैव च। यतः प्रवहते गङ्गा सिद्धचारणसेविता। तौ मन्नियोगाद्वनञ्जयौ! क्षितौ जातौ महाद्युती। भूमेर्भारावतरणं महावीर्यौ करिष्यतः" भा०व० ४७अ०"तेषां मनश्च तेजश्चाप्यदाना दिवौजसा। पूर्वदेवौ अतिक्रान्तौ नरनारायणावृषी।

हृष्टस्मृतिस्तु पप्रच्छ ब्रह्माणं कावितामिति । भवन्तं नोपतिष्ठेते तौ नः शंस पितामह !" ब्रह्मोवाच "यावेतौ पृथिवीं द्यां च भासयन्तौ तपस्विनौ । ज्वलन्तौ रोचमानौ च व्याख्यातीतौ महाबलौ । नरनारायणावेतौ लोकालोकं समास्थितौ । अर्जितौ स्वेन तपसा महासत्त्व पराक्रमौ । एतौ हि कर्मणा लोकं नन्दयामासतुर्ध्रुवम् । द्विधा भूतौ महाप्राज्ञौ विद्धि ब्रह्मनृ परन्तपौ । असुराणां विनाशाय देवगन्धर्वपूजितौ" वैशम्पायन उवाच "जगाम शक्रस्तच्छ्रुत्वा यत्र तौ तेपतुस्तपः । सार्द्धं देवगणैः सर्वैर्हृष्टस्तिपुरोगमैः । तदा देवासुरे युद्धे भवे जाते दिवौकसाम् । अयाचत महात्मानौ नरनारायणौ वरम् । तावब्रूतां हृषीकेति तदा भरतसत्तम !। अथ तावब्रवीच्छक्रः सख्यं नः क्रियतामिति । ततस्तौ शक्रमब्रूतां करिष्यावो यदिच्छसि । ताभ्यान्तु सहितः शक्रो विजिग्ये दैत्यदानवान् । नर इन्द्रस्य संग्रामे हत्वा शत्रून् परन्तपः । पौलोमान् कालकञ्जांश्च सहस्राणि शतानि च । एवमेतौ महावीर्यौ तौ पश्यत समागतौ । वासुदेवार्जुनौ वीरौ समेतौ महारथौ । नरनारायणौ देवौ पूर्वदेवाविति श्रुतिः । अजेयौ मानुषे लोके सेन्द्रैरपि सुरासुरैः । एष नारायणः कृष्णः फाल्गुनश्च नरः स्मृतः । नारायणो नरश्चैव सत्त्वमेकं द्विधा कृतम् । एतौ हि कर्मणा लोकानभ्यतीत्याऽवस्थितौ ध्रुवौ" भा० उ० ४८अ०। ७धान्यकूपरत्वे मेदि०। ८शङ्खौ ज्ञायाव्यवहारोपयोगिकौडिकभेदे "ज्ञायाङ्कृते तु नरदीपतलान्तरस्थे शङ्खौ भवेन्नरयुते खलु दीपकोऽयम्" लीला०। ज्ञायाव्यवहारशब्दे दृश्यम् लीला० उक्ते रत्नमिश्रव्यवहारे ९रत्नमिश्रव्यवहारिनरशब्दायाञ्च "नरश्चदानोनितरत्नभेदैरिष्टे हृते स्युः खलु मौल्यसङ्ख्याः" लीला०। नरत्वस्य दुर्लभता विष्णु० उक्ता नरकभोगोत्तरं ततद्योनिभ्रमणानन्तरं सम्प्रप्तं पुराण० दर्शिता यथा

"पापेन हि ध्रुवं यान्ति नरकेषु नराः स्वयम् । यः करोति नरः पापं तस्मात्सा ध्रुवमप्रियः । पापस्य हि फलं दुःखं तद्भोक्तव्यमिहात्मना । कथं ते पापनिरता नरा रात्रिषु शेरते । मरणान्तरिते येषां नरके तीव्रयातनाः । एवं क्षिप्ता विशुद्धाश्च सावशेषेण कर्मणा । ततः क्षितिं समासाद्य पुनर्जायन्ति देहिनः । स्थावरा विविधाकाराः कृमिपक्षिमृगादिभेदतः । तत्रानुभूय दुःखानि जायन्ते कीटयोनिषु । निष्क्रान्ताः कीटयोनिभ्यस्ततो जायन्ति पक्षिणः । संक्षिप्ता, पक्षिभावेन भवन्ति हृष्टजातिषु । मार्गदुःखमतिक्रम्य जायन्ते पशुयोनिषु । क्रमाद्गोयोनिमासाद्य पुनर्जायन्ति मानुषाः । एवं योनिषु सर्वासु परिभ्रम्य क्रमेण तु । कान्तारवशायान्ति मानुष्यमतिदुर्लभम् । व्युत्क्रमेणापि मानुष्यं प्राप्यते पुण्यगौरवात् । विचित्रा गतयः प्रोक्ताः कर्मणां गुरुलाघवात् । मानुष्यं यः समासाद्य स्वर्गमोक्षप्रसाधकम् । इयोर्न साधयत्येकं स शोचत्यति चिरम् । देवासुराणां सर्वेषां मानुष्यमतिदुर्लभम् । तत् संप्राप्य तथा कुर्यात् न गच्छेन्नरकं यथा । स्वर्गापवर्गलाभाय यदि नास्ति मतिर्नृणाम् । सर्वस्य मूलं मानुष्यं तद्यत्नादनुपालय । धर्ममूलेन मानुष्यं लब्ध्वा सर्वार्थसाधकम् । मानुषत्वे च विप्रत्वं यदि प्राप्नोति दुर्लभम् । न करोत्यात्मनः श्रेयः कोऽन्योऽस्मादस्त्यचेतनः" ।

"नरत्वं दुर्लभं लोके विद्या तत्र सुदुर्लभा" वा० द० अग्निपु०

**नरक** पु० नरति नयति पापिलोकं पापानुरूपभोगायात्र न–नये आधारे बा० वुन् । पापभोगस्थाने तच्च तथात्वञ्च विस्तरेण विष्णु पु० शिवधर्मोत्तरे च वर्णितं तदेव पुराणस० प्रदर्शितं तच्च कर्मविपाकशब्दे १७४५ पृष्ठादौ दर्शितम् । पापभेदेन नरकभेदप्राप्तिश्च पाद्मे उत्त० ख० ४८अ० यथा "कूटसाक्षी तथाऽसम्यक् पक्षपातेन यो वदेत् । यश्चान्यदन्नतं वक्ति स नरो याति रौरवम् । भ्रूणहा पुरुषार्त्तां च गोघ्नश्च सुनिसत्तमः !। यान्ति ते नरके रौद्रे यश्चोच्छ्वासनिरोधकः । सुरापो ब्रह्महा कृत्तां सुवर्णस्य च स्तेयकरे । प्रयाति नरके यश्च तैः संसर्गमुपैति वै । राजन्य वैश्यहा तात ! तथैव गुरुतल्पगः । तप्तकुम्भे स्वकृतभोगी भवति राजसटांश्च यः । माध्वीविक्रयकद्वध्यपालः केशरिविक्रयी । तप्तलौहे तु पच्यन्ते यश्च भक्षं परित्यजेत्" । (केशरी यथा:) "क्षुधां सुतायापि गत्वा महाज्वाले निपात्यते । अवमन्ता गुरूणां यो यश्चाक्रोष्टा नराधमः । वेददूषयिता यश्च वेदविक्रायकश्च यः । अग्न्यागामी यश्च स्यात्ते यान्त्यशिवनं द्विज । चौरो विमोहे पतति मर्य्यादादूषकस्तथा । देवद्विजपितॄन् हेठा रत्नदूषयिता च यः । स याति कृमिभक्षे वै कृमीणे च दुरिष्टकृत् । पितृदेवातिथीन् यस्तु पर्य्यश्नाति नराधमः । शाकामक्षे स वाल्मुके शरकर्त्ता च रोधके । (पर्य्यश्नाति परित्यज्य आदौ भुङ्क्ते) "करोति कर्षिनो

वस्तु यस्तु खड्गादिक्षुरः । प्रयान्ति ते विशसने नरके भृशदारुणे । असत्प्रतिग्रहीतारो नरके यान्त्यधोमुखे । अयाज्ययाजकस्तत्र तथा नक्षत्रसूचकः । वेगी पूयवहश्चैको याति मिष्टान्नभुङ्नरः । ( वेगी साहसकारी ) (पुत्रादीन् वर्जयित्वा एक एव मिष्टान्नभुक) "लाक्षामांस रसानाञ्च तिलानां लवणस्य च । विक्रेता ब्राह्मणो याति तमेव नरकं द्विज ! । मार्जारकुक्कुटच्छागान् श्ववराहविहङ्गमान् । पालयन्नरकं याति तमेव द्विजसत्तम ! । रङ्गोपजीवी कैवर्त्तः कुण्डाशी गरदस्तथा । सूची माक्षिकवैव पर्वकारी च यो द्विजः" । (पत्नी जीवति जाराज्जातः कुण्डः तदन्नभोजी कुण्डाशी माक्षिकिको मक्षिकोपजीवी "यद्वा मक्षिकीत्युच्यते भार्य्या भर्त्रोपार्जितं धनम् । उपजीवति यस्तस्याः स वै माक्षिकिकः स्मृतः"इति स्मृतिः। पर्वकारी धनादिलोभेन पर्वसु अमावस्यादिक्रियाप्रवर्त्तकः) "अगारदाही सिलन्नः शाकुनिर्व्रात्ययाजकः । रुधिराक्तैः पतत्येते सोमं विक्रीणते च ये । मधुहा ग्रामहन्ता च याति वैतरणीं नरः । रेतःपानादिकर्त्तारो मर्य्यादाभेदिनश्च ये । ते क्रव्ये यान्त्यशौचाश्च कृष्णाजीविनश्च ये । असिपत्रवनं याति वनच्छेदी ह्यवैव यः । सौरभिको मृगव्याधो वह्निज्वाले पतन्ति वै । यान्त्येते द्विज ! तत्रैव यथापापेषु वह्निदः । व्रतेषु लोपको यश्च स्नात्रमादिच्युतश्च यः । सन्ध्ययातनामध्ये पततस्तावुभावपि । दिवास्वप्नेषु स्वपन्ति ये नरा ब्रह्मचारिणः । पुत्रैरध्यापिता ये च ते पतन्ति शुभोजने । एते चान्ये च नरकाः पतयोऽथ सहस्रशः । येषु दुष्कृतकर्माणः पच्यन्ते यातनागताः । यथैव पापान्येतानि तथान्यानि सहस्रशः । भुञ्जन्ते यानि पुरुषैर्नरकान्तरगोचरैः । वर्णाश्रमविरुद्धञ्च कर्म कुर्वन्ति ये नराः । कर्मणा मनसा वाचा निरयेषु पतन्ति ते । अधःशिरोभिर्भ्रश्यन्ते नारकैर्दिवि देवताः । देवाद्याधोमुखान् सर्वानधः पश्यन्ति नारकान् । स्थावराः क्रमयोज्ज्ञाश्च पक्षिणः पशवो नराः । धार्मिकाश्चिदशाश्चाहमोक्षिणश्च यथाक्रमम् । सहस्रभागप्रथमा हितीयानुक्रमात्तया । सर्वे ह्येते महाभाग ! यावन्मुक्तिसमाश्रयाः । यावन्तो जन्तवः स्वर्गे तावतो नरकौकसः । पापकृद्याति नरकं प्रायश्चित्तपराङ्मुखः" इति विष्णुपु० हितीयांशे ६अ० । तत्रैव "कथ्यन्ते विविधाः कर्मणां विविधा गतीः । ताः शृणुष्व महाराज ! याः श्रुत्वा मोक्षमाप्नुयात् । परवित्तं परापत्यं कलत्रं पारकस्य यः । हरते बुद्धिमोहेन सोऽन्धे क्रव्ये वशङ्गतः । कालपाशेन सम्बद्धो यमदूतैर्महाबलैः । तामिस्रे पात्यते तावत् यावत् वर्षसहस्रकम् । तत्र ताडनसङ्घातैः कुर्वन्ति यमकिङ्कराः । पापभोगेन सम्मुक्तस्ततो योनिन्तु शौकरीम् । तत्र भुक्त्वा महादुःखं मानुषत्वं गमिष्यति । रोगादिचिह्नितं तत्र दुर्यशोपापकर्मकम् । भूतद्रोहं विधायैवं केवलं स्वकुटुम्बकम् । पुष्णाति पापनिरतः सोऽन्धतामिस्रके पतेत् । ये नरा इह जन्तूनां वधं कुर्वन्ति वै मृषा । ते रौरवे निपात्यन्ते श्वादनै रुरुभिर्वृतः । यः स्वोदरार्थं भूतानां वधमाचरति स्वकुटम् । महारौरवसंज्ञे तु पात्यते स यमाज्ञया । यो वै निजन्तु जनकं ब्राह्मणं द्वेष्टि पापकृत् । कालसूत्रे महादुष्टे सोऽयतामिस्रके पतेत् । यावन्ति पशुरोमाणि मर्त्यां द्वेषं करोति यः । तावद्वर्षसहस्राणि पच्यते यमकिङ्करैः । यो भूमौ भूपतिर्भूत्वा दण्डायोग्यन्तु दण्डयेत् । करोति ब्राह्मणस्यापि देहदण्डं विलोलुपः । स शूकरसहस्रैर्दुष्टैः पीड्यते यमकिङ्करैः । पश्चाद्दुष्टासु योनीषु जायते पापभुक्तये । ब्राह्मणानां मर्त्यां ये तु द्रव्यं वित्तं तथाऽस्वकम् । हरन्ति वा गृह्णते मोहाद्भुञ्जन्ति सबलाद्धराः । ते परत्राऽन्धकूपे च पात्यन्ते च महार्हिताः । योऽर्थं स्वयमपाकृत्य मधुकृद्वाऽपि मोलुपः । न देवाय न सुहृदे ददाति रसनातुरः । स पतत्येव नरके क्षुन्मिभोजनसंज्ञके । अनापदि नरो यस्तु हिरण्यादीनपाहरेत् । ब्रह्मस्वं वा महादुष्टः सन्ध्ये नरके पचेत् । यः स्वदेहं प्रपुष्णाति नान्यं जानाति मूढधीः । मनसा कल्पितं द्रव्यं विदुषे यो ददाति न । स प्रमाद्धरकं याति यावदिन्द्राश्चतुर्दश । पश्चाद्दुष्टासु योनीषु जायते वर्षशूकरः । दानानि बाढवे दत्त्वा पुनः शुद्धो भविष्यति । वचोदत्तं मनोदत्तमिति साधू वदेत् यदि । कल्पन्ते पितरस्तस्य नरकाय मृतसृक्काः । वचोदत्तं मनोदत्तं दत्तं पाखिकुशोदकम् । एतद्दत्तमदत्तं चेत् जिह्वास्तत्पाटयेद् यमः । स याच्यते तैलतप्ते कुम्भीपाकेऽतिदारुणे । ये नगम्यां स्त्रियं भोक्तुं योषिद्भावाच्च कामयेत् । तं तया किङ्कराः शूर्म्याः परिवङ्क्ष्य कुर्वते । ये बलादेतमर्य्यादां लुम्पन्ति स्वबलोद्धताः । ते वैतरण्यां पतिता मांसशोणितभक्षकाः । इयन्तीं यः स्त्रियं हत्वा तया गार्हस्थ्यमाचरेत् । पूयोदे निय-

तत्रैव महादुःखसमन्वितः। ये दम्भानाश्रयन्ते वै धूर्त्ता लोकस्य वञ्चने। वैश्ये नरके मूढाः पतन्ति यमताडिताः। ये सवर्णां स्त्रियं मूढाः पाययन्ति खरेतसम्। रेतःकुल्यासु ते यान्ति रेतःपानेषु तत्पराः। ये चौरा वञ्चिदा दुष्टा नरदा ग्रामलुण्ठकाः। खारमेयादने ते वै यान्त्यन्ते पातकान्विताः। कूटसाक्ष्यं वदत्यज्ञो पुरुषः पापसम्भृतः। परकीयन्तु द्रव्यं यो हरति प्रसभं बली। सोऽवीचिनरके घोरे स्रवाभक्षः पतत्यधः। तत्र दुःखं महद्भुङ्क्ते पापिष्ठां योनिमाव्रजेत्। यो नरो रसनास्वादात् सुरां पिबति मूढधीः। तस्यापयन्ति लोकस्य रसं धर्मस्य किल्बिषाः। यो गुरुन्नवमन्येत स्वविद्याचारदर्पितः। स मृतः पात्यते घोरे संस्रकेऽधोमुखः पुमान्। विश्वासघातं कुर्वन्ति ये नरा धर्मनिष्कृताः। भूजम्भोते तु नरके पात्यन्ते वह्नियातनाः। यैर्न श्रुता रामकथा न परोपकृतिः कृता। तेषां सर्वाणि दुःखानि भवन्ति नरकान्तरे। अथ यत्र सुखं भूयस्तत्र स्वर्ग इतीर्यते। ये दुःखिनो रोगयुता नरकादागतास्तु वै" २असुरभेदे पु० स च वराहेण रसातलाद्यां पृथ्व्याहृतत्वादितः स एव च वसिष्ठशापेन द्वापरयुगे स्वपितृमेधेन कृष्णेन निसूदितः। कालिकापुराणे २६ अध्यायावधि ४१अध्याये तत्कथा विस्तरेण दृश्या। कालिकापुराणशब्दे ०२०।५८ पृ० संक्षेपतस्तत्कथा दर्शिता।

**नरककुण्ड** न० यातनास्थानभेदे "यम उवाच नरकाणाञ्च कुण्डानि सन्ति नानाविधानि च। नानापुराणभेदेन नामभेदानि तानि च। भयङ्कराणि घोराणि शृणु वत्स! कृतस्मितानि च। षड्शीतिश्च कुण्डानि संयमन्यान्च सन्ति च। निबोध तेषां नामानि प्रसिद्धानि श्रुतौ स्मृतौ" इति ब्रह्मवैवर्ते प्रकृतिख० २७।२८ अ०।

नरकभेदकुण्डानि पापभेदात् तत्र गामिनः

१ वह्निकुण्डम्—कटुवाचा बान्धवोत्पीडकः।
२ तप्तकुण्डम्—ब्राह्मणातिथिभोजनाप्रदायी।
३ क्षारकुण्डम्—निषिद्धदिने वस्त्रे क्षारसंयोजकः।
४ विट्कुण्डम्—ब्रह्मस्वापहारकः।
५ मूत्रकुण्डम्—परतडागं खनित्वोत्सर्जकः।
६ श्लेष्मकुण्डम्—एकाकी मिष्टभोजी।
७ रक्तकुण्डम्—पितृमातृसुतभार्य्याद्युपोषकः।
८ दृष्टिकाकुण्डम्—अतिथिं दृष्ट्वा वक्रचक्षुःकारी।
९ वसाकुण्डम्—विप्राय प्रतिश्रुत्य तद्दत्तमनन्यत्वे दाता।
१० शुक्रकुण्डम्—परस्त्रीगामी नरः परदारगामिनी च स्त्री।
११ अस्थिकुण्डम्—गुर्वादिताडकस्तद्रक्तस्रावकश्च।
१२ अश्रुकुण्डम्—हरिसङ्कीर्तनेरुदन्नायद्दृग्दमक्लोपहारकश्च।
१३ गात्रमलकुण्डम्—यत्रदगुद्वर्त्तिचित्तः खलताकारी च।
१४ कर्णविट्कुण्डम्—बधिरोपहासकृत्।
१५ मज्जकुण्डम्—लोभात् स्वभोजनार्थं जीवहन्ता।
१६ मांसकुण्डम्—कर्षलोभात् कन्याविक्रेता।
१७ नखकुण्डम्
१८ लोमकुण्डम्
} श्राद्धोपवासादिषु संयमत्यागी।
१९ केशकुण्डम्—सकेशपार्श्वयज्ञोपवीतिकुशार्पकः।
२० अस्थिकुण्डम्—विष्णुपदे पितृपिण्डादाता।
२१ ताम्रकुण्डम्—गुर्वीशैलगामी।
२२ लौहकुण्डम्—कृतघ्नाताडवीरयोरन्नभोजी।
२३ तीक्ष्णकण्टककुण्डम्—कटुवाचा स्वामितर्जिका स्त्री।
२४ विषकुण्डम्—विषेण जीवहन्ता।
२५ धर्मकुण्डम्—स्वधर्महत्त्वेन देवद्रव्यस्वामी।
२६ तप्तशूराकुण्डम्—शूद्रान्नभोजी।
२७ प्रतप्ततैलकुण्डम्—दग्धेन हतताडकः।
२८ क्लेदकुण्डम्—कुलस्त्रीदर्शनेजीवहन्ता।
२९ कृमिकुण्डम्—श्यामांसमत्स्यमुम्बिप्रो हरेरनैवेद्यभुक् च।
३० पूयकुण्डम्—शूद्रयाजी तस्य श्राद्धभुक् तच्छवदाही च।
३१ सर्पकुण्डम्—श्रीलक्ष्मणपदचिह्नमस्तकस्य सर्पस्य हन्ता।
३२ मशककुण्डम्—विधिं हित्वा क्षुद्रजन्तुहन्ता।
३३ दंशकुण्डम्—विधिं हित्वा जीवहन्ता।
३४ मक्षिककुण्डम्—मक्षिकां हत्वा मधुपायी।
३५ वज्रदंष्ट्रकुण्डम्—अदत्त्वाविप्रयोर्दण्डकृत् नृपः।
३६ वृश्चिककुण्डम्—अर्थलोभात् प्रजादण्डकृत् नृपः।
३७ मरकुण्डम्
३८ शूलकुण्डम्
३९ खड्गकुण्डम्
} शस्त्रधारी धावकः सन्ध्याहरिभक्तिहीनश्च ब्राह्मणः।
४० गोलकुण्डम्—अत्यदोषेण कारायां प्रजाबन्धनकृत् नृपः।
४१ नक्रकुण्डम्—जलाद्युत्सितनक्रादिहन्ता।
४२ कामकुण्डम्—कामेन परस्त्रीवक्षःशोषणकृद्दृढा।
४३ सङ्घातकुण्डम्—सर्वचौरः।
४४ बालकुण्डम्—ताम्रलौहचौरः।
४५ वज्रकुण्डम्—भूदेवदेवद्रव्यलोचौरः।
४६ तप्तपाषाणकुण्डम्—देवद्विजगोरौप्यगोवस्त्राणां चौरः।
४७ तीक्ष्णपाषाणकुण्डम्—देवद्विजयोःपितृदत्तांशपात्रचौरः।

४८ चाण्डालकुण्डम्—नेष्यान्नभुक् तद्वृत्तिजीवी च।
४९ मसीकुण्डम्—म्लेच्छसेवी मसीजीवी च ब्राह्मणः।
५० चूर्णकुण्डम्—देवद्विजयोः शस्त्रताम्बूलासनचौरः।
५१ चक्रकुण्डम्—विप्रद्रव्यं हृत्वा चक्रकारी।
५२ वक्रकुण्डम्—विप्रभार्य्ययोर्वक्रताचारी।
५३ कूर्मकुण्डम्—हरिशयने कूर्ममांसभुक् ब्राह्मणः।
५४ श्वाकाकुण्डम्
५५ भक्षकुण्डम्
} देवद्विजयोर्हृततैलादिहृत्।
५६ दण्डकुण्डम्—देवद्विजयोर्वालीगन्धतैलद्रव्याणामपहर्त्ता
५७ तप्तगूथीकुण्डम्—बलक्षतत्वादिना परभूमिहरः।
५८ असिपत्रकुण्डम्—खड्गलोभात् खड्गेन नरघाती।
५९ क्षुरधारकुण्डम्—ग्रामनगरादिदाहकारी।
६० क्षयीरुग्रकुण्डम्—परकर्षे सुखं दत्त्वा परनिन्दकः परदोषोद्घोषी वेदब्राह्मणनिन्दकश्च।
६१ गोधासुखकुण्डम्—सद्मं भित्त्वा वस्तुगोक्षामभेत्रचौरः।
६२ नक्रसुखकुण्डम्—सामान्यद्रव्यचौरः।
६३ गजदंशकुण्डम्—गजतुरगनरचौरः।
६४ गोमुखकुण्डम्—गोर्जलपानवारकः।
कुम्भीपाककुण्डम्—गोस्त्रीभिक्षुभ्रूणब्रह्मक्षत्राङ्गस्थानामी दीक्षाविवाह्यक्षीणस्त्रीर्थप्रतिपाक्षी ग्रामयाजी देवतः शूद्रसूपकारी कुम्भीपतिश्च।
६६ कालसूत्रकुण्डम्—नेष्यान्नभुक् तत्संसर्गी च।
६७ अवटोदकुण्डम्—कुलटादिषण्ढवेश्याग्रामी द्विजः।
६८ अरुन्तुदकुण्डम्—चन्द्रसूर्य्यग्रहणे निमित्तकाले भोजी।
६९ पांशुभोजकुण्डम्—एकस्मै वाक्प्रदत्तकन्यायां दोषं विना अन्यस्मै दाता।
७० पाशवेष्टकुण्डम्—दत्तापहारी।
७१ शूलप्रोतकुण्डम्—अमन्त्रा शिवलिङ्गपूजकः।
७२ प्रकम्पनकुण्डम्—विप्रदण्डकृत् तत्कम्पकृद्भयदायी च।
७३ पलङ्कासुखकुण्डम्—सकोपवदना स्वामिनि कटुवादिनी।
७४ कूपकुण्डम्—शूद्रभोग्या ब्राह्मणी।
७५ वेदनकुण्डम्—पञ्चषट्पङ्क्तमनात् वेश्या।
७६ दण्डताडनकुण्डम्—सप्ताष्टपुंगमनात् रण्डा।
७७ जालबद्धकुण्डम्—अष्टाधिकपुंगमनात् महावेश्या।
७८ दैहचूर्णकुण्डम्—पुंद्वयगमनात् कुलटा।
७९ दलनकुण्डम्—चतुःपुंगमनात् स्वैरिणी दासी च।
८० शोषणकुण्डम्—त्रिपुंगमनात् धृष्टा पुंश्चली।
८१ कपटकुण्डम्—सवर्णपरदारगामी।
८२ सर्पकुण्डम्—ब्राह्मणीगमनकारको क्षत्रियोवैश्यश्च।
८३ ज्वालासुखकुण्डम्—करे तुलसीगङ्गाजलदेवस्थिताय धृत्वा प्रतिज्ञातत्तदपालको मिथ्यासपथी मित्रद्रोही विश्वासघाती मिथ्यासाक्षदश्च।
८४ जिह्मकुण्डम्—नित्यक्रियाहीनो देवयजनेऽनास्तिकोमन्त्रोपहासी च।
८५ धूमान्धकुण्डम्—देवविप्रयोर्धनहारी।
८६ नागवेष्टनकुण्डम्—वैद्यदैवज्ञवृत्तिहारी वाणिज्योऽन्यापारी रसादिविक्रयी च ब्राह्मणः"।

**नरकजित्** पुं० नरकमसुरभेदं जयति क जि–भूते क्विप् ६त०। वासुदेवे श्रीकृष्णे "नैर्ऋतो नरको नाम ब्रह्मणो वरदर्पितः। अदित्याः कुण्डले मोक्षाज्जहार दितिनन्दनः। देवानां विग्रहे नित्यमजेयोयाच्च स वर्त्तते। तव चैवान्तरप्रेक्षी जहि तं पापपूरुषम्। अयं त्वां गरुडस्तत्र प्रापयिष्यति सामगः। कामरूपोऽतितेजस्वी वैनतेयो ऽनरीक्षणः। अवध्यः सर्वभूतानां भौमः स नरकोऽसुरः। निहत्यैनं तं पापं क्षिप्रमागन्तुमर्हसि। इत्युक्तः पुष्करीकाक्षो देवराजेन केशवः। प्रतिजग्मे महाबाहुर्नरकस्य निबर्हणम्" इत्युपक्रम्य तयोर्युद्धवर्णनानन्तरम् "सङ्क्रुद्धो योधयामास नरकं मधुसूदनः। अथोपचक्रुषक्रं च प्रदीप्तैनाकरोद्द्विधा। चक्रद्विधाकृतं तस्य शरीरमपतद्भुवि। विभक्तं क्रकचेनेव शिरः कृष्णं द्विधाकृतम्। क्षणमासाद्य देवेशं जगामास्तमिवांशुमान्। चक्रोत्क्षिप्तनिकृत्ताङ्गसक्तं पतितं रथे। वज्रेणेव विनिर्भिन्नं यथा मेरिकपर्वतम्। भूमिस्तु पतितं पुत्रं निरीक्ष्यादाव कुण्डले। उपातिष्ठत गोविन्दं वचनञ्चेदमब्रवीत्। दत्तस्त्वयैव गोविन्द! त्वयैव विनिपातितः। यदेच्छसि तथा क्रीड़ बालक्रीड़नकैरिव। इमे ते कुण्डले देव! प्रभां तस्यातुपाल्यं हरिवं० १२२अ० तद्वधकथा

**नरकदेवता** स्त्री नरकस्याधिष्ठात्री देवता। निर्ऋतौ शब्दर०

**नरकपाल** न० ६त०। मृतनरस्य शीर्षरूपे अस्थिभेदे "नरकपालं शुचि प्राह्यकूर्म्मवत् तस्य शुचित्वानुमानं वचनादागमविरोधात् अप्रमाणम् इति" मथुरानाथः। तच्च आगमः "मनुष्यं पूरीषास्थि निर्मृतं ह्यशुचि स्मृतम्। नारं स्पृष्ट्वा तु सस्नेहं सचेलोजलमाविशेत्" मनुवचनम्

**नरकभूमि** स्त्री नरकस्य दुःखभेदस्य भोगयोग्या भूमिः। यमालयस्थायां दुष्कर्मणां दुःखभोगार्थं भूमौ। तत्र हेमच० अधोधोगर्त्तमानाः दर्शिताः "धनोदधिधनवात

तनुघातनभःस्थिताः। रत्नशर्करावालुकापङ्कधूमतमःप्रभाः। महातमःप्रभा चेत्यधोधोनरकभूमयः"।

**नरकमुक्त** पु० नरकान्मुक्तः। नरकान्मुक्ते "कपयश्चरणाः कपूयां योनिमापद्येरन्" स्मृतिः अनुशयशब्दे १८८पृ० दृश्यम्। गारुडे २२६अ० ततो शुक्लानां पापविशेषात् योनिभेदप्राप्तिरुक्ता यथा

"नरकात् प्रतिमुक्तस्तु पापयोनिषु जायते। पतितात् प्रतिसङ्क्रान्त खरयोनिं व्रजेद्बुधः। नरकात् प्रतिमुक्तस्तु कृमिर्भवति पातकी। उपाध्याये व्यलीकन्तु कृत्वा त्वा भवति द्विजः। तज्जायां मनसा वाञ्छंस्तद्दुष्टं वापयंश्चयम्। गर्दभो जायते जन्तुर्भिक्षुस्त्वेवापमानकृत्। मलोवितरमाक्रुश्य शारिका संप्रजायते। पितरौ पीडयित्वा तु कच्छपत्वञ्च जायते। भर्तुः पिण्डसुपाश्नन् यो स्त्रित्वा अन्यानि च सेवेत्। सोऽपि सोऽपमापन्नो जायते वानरो मृतः। न्यासापहर्त्ता नरकात् विमुक्तो जायते कृमिः, असूयकश्च नरकान्मुक्तो भवति राक्षसः। विद्यासङ्कर्त्ता च नरो मीनयोनौ प्रजायते। यवधान्यानि हृत्वा तु जायते मूषिको मृतः। परदारानिमर्शेन्तु हतो घोरोऽभिजायते। स्वाहाभार्यांप्रसङ्क्तत्वे कोकिलो जायते नरः। गुर्वादिभार्यागमनाच्छूकरो जायते नरः। यज्ञदानविवाहानां विघ्नकर्त्ता भवेत् कृमिः। देवतापितृविप्राणामदत्त्वा योऽन्नमश्नुते। प्रसक्तो नरकादापि वायसः स प्रजायते। ब्रह्मोज्झनावमानाच्च क्रौञ्चयोनौ प्रजायते। गुरुञ्च आह्वयीं गत्वा कृमियोनौ प्रजायते। तस्यामपत्यमुत्पाद्य काष्ठान्तः कीटको भवेत्। ततश्च कृमिकः कीटः पतङ्गो दधिसत्तमा। अपत्यं पुरुषं हत्वा नरः संजायते खरः। कृमिः क्षीरवहर्त्ता च वाक्यहन्ता प्रजायते। भोजनं चोरयित्वा तु मक्षिका जायते नरः। हृत्वाग्न्यर्थं काष्ठभारमग्निहृच्चैव मूषिकः। हृतं हृत्वा च नकुलः काको मद्गुरसामिषम्। मधु हृत्वा नरो दंशः पूपं हृत्वा पिपीलकः। घृतो हृत्वा तु पापात्मा वायसः संप्रजायते। हृते कांस्ये च हारीतः कपोतो वा प्रजायते। हृत्वा तु काञ्चनं भाण्डं कृमियोनौ प्रजायते। कार्पासिके हृते क्रौञ्चो वह्निहर्त्ता बकस्तथा। मद्गुरो वर्धकिं हृत्वा ग्राकं पलञ्च जायते। जीवञ्जीवकतां याति रक्तवस्त्रापहारकः। कृच्छ्रान्दुरिः शुभान् गन्धान् गंधं हृत्वा मृगो भवेत्। वस्त्रः क्षीरापहरणे काष्ठहृत् काष्ठकीटकः। घृताप-हृद्धरिद्रस्तु पङ्कुर्यवापहृद्धरः। शाकहर्त्ता च हारीतः क्षीरहर्त्ता च चातकः। मद्यहृत् नरकान् गत्वा रौरवादीन् सुदारुणान्। तृणगुल्मलतावल्लीवृक्षसार तरुतां व्रजेत्। एष एव क्रमो दृष्टो गोहृत्यादिहारिणाम्। विद्यापहारी मूकश्च गत्वा च नरकान् बहून्। अग्निमिद्धेऽग्नौ च हुते मन्दाग्निः संप्रजायते। परनिन्दाकृतघ्नत्वं परमर्मावघातनम्। नैष्ठुर्यं निर्दयत्वञ्च परदारोपसेवनम्। परस्वहरणाऽशौचं देवतानाञ्च कुत्सनम्। निष्फला वञ्चनं नृणां कार्पण्यञ्च नृणां बुधः। उपलक्षणादिज्ञानीयात् शुक्लानां नरकादनु" प्रसङ्गात् स्वर्गादागतलक्षणं तत्रैव यथा "दयाभूतेषु संवादः परलोकं प्रति क्रिया। सत्यं भूतहिता चोक्तिर्वेदमामाण्य दर्शनम्। गुरुदेवर्षिपूजा च केवलं साधुसङ्गमः। सत्क्रियाध्यसनं मैत्री स्वर्गिणां लक्षणं विदुः। अष्टाङ्गयोगविज्ञानात् प्राप्नोत्यात्यन्तिकं लयम्"। अधिकं कर्मविपाक शब्दे १७४२पृ० दृश्यम्।

**नरकस्थ** त्रि० नरके तद्भूमौ तिष्ठति स्था-क ७त०। १नरकभूमौ स्थिते २वैतरणीनद्यां स्थो शेमच०।

**नरकान्तक** पु० ६त०। विष्णौ नरकजिच्छब्दे दृश्यम्।

**नरकामय** पु० नरक आमय इव यस्य। १प्रेते शब्दरत्ना०। नरक आमय इव कर्म०। २नरकरूपे रोगे च।

**नरकीलक** पु०नरेषु कीलक इव सन्धितत्वात्। शुक्रे शेमच०

**नरकेशरिन्** पु० नर एव केशरी। १नरसिंहे नरसिंहशब्दे दृश्यम्। नरः केशरीव शूरत्वात्। २मानवश्रेष्ठे च।

**नरगण** पु०१नक्षत्रभेदे उपयमशब्दे १२५०पृ० दृश्यम्। ६त० २नरसमूहे च। [२भेदे न० उपादि०।

**नरङ्ग** पु० नृ-अङ्गच्। वरण्डे (नारङ्गा) वृक्षभेदे १अमरभेदे

**नरट** न०नलट+अच् रः। नलटे ततः किंवरा० तदस्य पण्यमित्यर्थे ठञ्। नरटिक तद्विक्रेतरि त्रि०।

**नरदेव** पु० नरो देव इव। नृपे। "दृष्टं देवं नरदेव सम्भवः" रघुः। "भूमिदेवनरदेवसङ्गमे" माघः।

**नरद्विष्** पु० नरान् द्वेष्टि द्विष-क्विप्। राक्षसे "ब्रह्मास्त्रं तेन मूर्द्धानमदध्वं सञ्चरद्विषः" भट्टिः।

**नरनगर** न० नरप्रधानं नगरम् पूर्वपदात् संज्ञायां णत्वे प्राप्ते चुम्बादि० न णत्वम्। नगरभेदे

**नरनारायणौ** द्वि० व०। नरश्च नारायणश्च। ऋषिभेदयोः तयोः सम्भवकथा "तदा दंशायघातेन नरसिंहं महाबलम्। हरिभो भगवान् भक्तौ द्विधा सर्व्वे चकार ह।

नरसिंहे विधा भूते नरभागेष तस्य तु । नर एव सतत्-त्वो दिव्यरूपी महानृषिः । तस्य पञ्चात्मभागेन नारा-यण इति श्रुतः । अभवत् स महातेजा तनिरूपी जनार्दनः । नरो नारायणश्चोभौ सृष्टिहेतु महामती । ययोः प्रभावो दुर्ज्ञेयः शास्त्रे वेदतपःसु च" कालिकापु० ३९अ० ।

एतच्च वाराहकल्पे । अन्यकल्पे तु तौ धर्मस्य पुत्रौ यथोक्तं भाग०२।६अ०"धर्मस्य दक्षदुहितर्यजनिष्ट सुतौ नारायणो नर इति स्वतपःप्रभावौ" । स्वायम्भुवे मन्वन्तरे धर्मस्य चतुर्षु पुत्रेषु तौ च हौ यथा "नारायणो हि विश्वात्मा चतुर्मूर्त्तिः सनातनः । धर्मात्मजः सम्ब-भूव पितैव मेऽभ्यभाषत । कृते युगे महाराज ! पुरा स्वायम्भवेऽन्तरे । नरोनारायणश्चैव हरिःश कृष्णः स्वयम्भुवः । तेषां नारायणनरौ तपस्तेपतुरव्ययौ । वदर्याश्रममासाद्य शकटे कनकामये" भा०शा०३३६अ० ।

नरन्धि पु० नरो धीयन्ते आरोप्यन्ते अस्मिन् धा-आधारे कि उपस० पृषो० सम् । संसारे महीधरः नरन्धिशब्दे दृश्यम् ।

नरन्धिष पु० विष्णौ "विष्णुर्नरन्धिषः प्रोच्यमानः" यजु०८।५५ "विष्णुर्नरन्धिषो भवति नरो धीयन्ते आरोप्यन्ते य-स्मिन् स नरन्धिः संसारः तं स्यति नाशयति नरन्धिषः संसारसंहर्त्ता विष्णुः यद्वा रध-हिंसायाम् रध्यति हिनस्ति रन्धिषः हत्वा नरन्धिषो जगत्पालकः" महीधरः । उभयत्र पृषो० ।

नरपति पु० इत० । नृपे शब्दर० । "नरपतिकुलभूत्यै गर्भ-माधत्त राज्ञी" रघुः । नरेश्वरनरनाथनरनायकनरेशाद-योऽत्र । "नरनाथ ! न जानीमस्त्वत्प्रिया यद्भविष्यति" भाग०४।२६।१५।

नरपतिजयचर्य्या स्त्री नरपतीनां राज्ञां जयस्य चर्य्या । खरोदयमूलके अन्यभेदे चक्रशब्दे तदाख्यं भूरि दर्शितम् ।

नरपशु पु०नरः नरइव पशुमितस०।१मानवाधमे २पुंरूपे पशौ च "विप्रबद्धोनरपशवोव उपासते विभूतीर्न परं त्वाम् । तेषामाशिष रैश ! तदनु विनश्यन्ति यथा राजकुलम्" भाग० ६।१६।२६ नृपशादयोऽप्यत्र भवत्र । "याश्च स्त्रियो नृपशून् खादन्ति" भाग० ५।२६।२८ [नृपे ।

नरपाल पु० नरान् पालयति पाल-णिच्-ण्वुल् । मानवरक्षके

नरपुङ्गव पु० नरः पुङ्गव इव शूरत्वात् । नरश्रेष्ठे "शैव्यश्च नरपुङ्गवः" गीता ।

नरप्रिय त्रि० इत० । १मनुष्यप्रीतिदे वस्तुमात्रे २नीलवृक्षे पु० राजनि० । [भूमिरप्यत्र भवत्र शब्दर० ।

नरभू स्त्री इत० । १भारतवर्षे २नराणामुत्पत्तौ च । नर-

नरमानिनी स्त्री नरं मन्यते मन-णिनि ङीप् । श्लाघायुक्त स्त्रियां नार्य्यां त्रिका०ण्वुल् । नरमानिका तत्रार्थे शब्दर०

नरमाला स्त्री नराणां तन्मुण्डानां माला । नरमुण्डरचित मालायां "विचित्रखट्वाङ्गधरा नरमालाविभूषणा" देवीमा०

नरमालिनी स्त्री नरस्येव माला केशमाला सखेऽस्यस्याः इनि ङीप् । श्लाघायुक्तवदनायां १नार्य्यां त्रेमच०।२नर-मुण्डमालावत्यां स्त्रियां च ।

नरमेध पु० नरा मिध्यन्ते हिंस्यन्ते यत्र मिध-आधारे घञ् इत० । पुरुषमेधाख्ये यज्ञभेदे स च यज्ञः यजु० ३०।२१ अध्यायवेदर्शितः तत्राधिकार्यादिकम् ३०अध्याये वेददीपे उक्तं यथा "ब्राह्मणराजन्ययोरतिष्ठाकामयोः पुरुषमेधसंज्ञको यज्ञो भवति । सर्वभूतान्यतिक्रम्य-स्थानमतिष्ठा । चैत्रशुक्लदशम्यामारम्भः । अत्र त्रयो-विंशतिर्दीक्षा भवन्ति द्वादशोपसदः पञ्चसुत्या इति चत्वा-रिंशद्भिर्दिनैः सिध्यति । अत्र यूपैकादशिनी भवति एका-दशाग्नीषोमीयाः पशवो भवन्ति तेषां च प्रतियूपं मध्यमे वा यूपे यथेष्टं नियोजनम् । आज्येन सकृद्-गृहीतेन देव सवितिरिति प्रत्यृचं तिस्र आहुतीराहव-नीये जुहोति" । देवताभेदेन तत्तन्मन्त्रपशुभेदाश्च "ब्रह्मणे ब्राह्मणमित्यादिना" अध्यायसमाप्तिपर्य्यन्ते-नोक्ताः अष्टाचत्वारिंशत्सङ्ख्काश्च ब्राह्मणादयो ब्रह्मा-द्याष्टाचत्वारिंशद्देवत्याः पशवः "स एतं पुरुषमेधं पञ्चरात्रं यज्ञक्रतुमहरहरुत्तमाहरत्तेनायजत तेनेहात्व-तिष्ठत् सर्वाणि भूतानीदं सर्वमभवदतितिष्ठति सर्वाणि भूतानीदं सर्वं भवति य एवं विद्वान् पुरुषमेधेन यजते यो वैतदेवं वेद । तस्य त्रयोविंशतिर्दीक्षाः । द्वाद-शोपसदः पञ्चसुत्याः स एष चत्वारिंशद्वात्रः संदीक्षोप-सत्कः" शत० ब्रा० १३।६।१।२। अत्र पञ्चरात्रत्वोक्तिः पञ्चसुत्याभिप्रायेणेति न विरोधः । "त्रिंशदग्नीनहं ब्रह्म-न्नयजं यज्ञ नित्यदा । अष्टाभिः सर्वमेधैश्च नरमेधैश्चसप्तभिः" भा०अनु०।०।३अ० "राजसूयाश्वमेधौ च सर्वमेधश्च भारत ! । नरमेधश्च नृपते ! त्वमाहर युधिष्ठिर !" भा०आश्व० ३अ०। १८०३पृ० कलिशब्दे दर्शितेन हृद्-धारदीयवचनेन नरमेधश्च कलौ "दीर्घकालं ब्रह्मचर्य्यं नरमेधाश्वमेधकाविघ्नेन" निषेधेऽपि कलियुगोत्पन्न

युधिष्ठिरं प्रति नरमेधाहरणे नियोजनं तु न विरुध्यते हरेःस्वर्गारोहानन्तरमेव कलेः प्रवर्त्तनेन प्रवृत्त्यवगमात् ततः प्राक्काले यथाविधानं सर्वे धर्मा व्यवस्थिता इत्यवगमाच्च तदूर्द्ध्वमेव कलेः प्रबलत्वात् कृष्णचारदीयादाशुक्लकल्किवर्त्तस्यावकाश इत्यवधेयम्। भूमौ श्रीकृष्णस्थितिपर्य्यन्तं कलेः प्रादुर्भावाभावश्च भागवते उक्तः तच्च वाक्यं कल्किशब्दे १७८५ पृ० दर्शितम्। अतो युधिष्ठिरादीनां नरमेधान्नमेधमहाप्रस्थानादिकं न विरुध्यते

**नरमन्य** पु० आत्मानं नरं मन्यते नृ+मन-खश् मुम् एकाचोऽमन्वत् कार्यम्। आत्मानं कृतया मन्यमाने।

**नरयन्त्र** न०छायाद्वारा कालसाधके द्वादशाङ्गुलकीलरूप शङ्कुयन्त्रे "नरयन्त्रं तथा साधु दिने च विमले रवौ। छायासंसाधनैः प्रोक्तं कालसाधकमुत्तमम्" सू०सि० "विमले मेघादिव्यवधानरूपमलेन रहिते सूर्य्ये एतद्रूपे दिने। चकार एवकारार्थकेन साध्वदिनव्यवच्छेदः। नरयन्त्रं द्वादशाङ्गुलशङ्कुयन्त्रं तथा घटीयन्त्रवत् कालसाधकं साधु शुद्धं रात्रौ नेत्यर्थसिद्धम्। नन्वेवं शङ्कोश्छायासाधकत्वं न कालसाधकत्वं तेन तस्य कथं यन्त्रत्वं कालसाधकवस्तुनो यन्त्रत्वप्रतिपादनादित्यत आह। छायासंसाधनैरिति। इदं शङ्करूपनरयन्त्रं छायायाः सम्यक्सूक्ष्मत्वेन साधनैरवगमैः कृत्वा कालसाधनं दिनगतादिकालस्य कारणत्वमम्। अन्ययन्त्रेभ्योऽस्यास्थिरन्नरत्वातिश्रेष्ठम्। तथा च छायासाधकत्वेनैव छायाद्वारा शङ्कोः कालसाधकत्वमिति न यन्त्रत्वव्याघातः। अतएव साध्वदिने रात्रौ चेदमनुपयुक्तम्। नरस्य छायायन्त्रोपलक्षणत्वात् यद्विधत्वकाश्यपि तथेति बोध्यम्" रङ्ग०। "शमतलमस्तकपरिधिर्यमसिद्धोदन्तिदन्तलः शङ्कुः। तच्छायातः प्रोक्तं ज्ञानं दिग्देशकालानाम्" सि०शि०। शङ्कोः कालज्ञानसाधनत्वम्।

**नरयान** न० नरवाह्यं यानम् (बग्घोयारि) प्रभृतौ यानभेदे "नरयानेन तु ज्येष्ठः पिता पार्थस्य भारत!। अयतो धर्मराजस्य शाम्भारीसहितो ययौ" भा० आ० २७७०। नरवाहन,नरवाह्ययोऽत्र।

**नरलोक** पु० नराधिष्ठितो लोकः भुवनम्। १पृथिवीलोके नर एव लोकः। २मानवरूपे जने च "आहूतलोकान् नरलोकपालान्" रघुः "तथा तवामी नरलोकवीरा विशन्ति वक्त्राण्यभितो ज्वलन्ति" गीता।

**नरवाहन** पु०नरो वाहनं यस्य। १कुबेरे २नरयानवाह्ये त्रि०

"धनदो नरवाहनसम्मदः" रघुः "मणिष्वामोत्तम वसुः कुबेरो नरवाहनः" हरिवं०३५अ०। ३नरवाह्ये याने न०।

**नरविष्वण** त्रि० नरं विष्वणति हिनस्ति वि+स्वन-अच् मुम्।।नरहिंसके २राक्षसे पुंस्त्री विका०। स्त्रियां ङीष्।

**नरव्याघ्र** पु० नरो व्याघ्र इव उपमितस०। श्रेष्ठमानवे।

**नरशृङ्ग** न० ६त०। अलीके पदार्थे शशस्य शृङ्गादिवत् शृङ्गे प्रमीयत्वस्यैव नरीयत्वस्याध्यभावादयोग्यत्वेन अख्यातीकार्यत्वम् योग्यताभावादेवात्र शाब्दबोध इति बोध्यम्।

**नरसिंह** पु० नरश्चासौ सिंहः नरश्च सिंहश्चाकारोऽस्य अच् वा। अर्द्धनराकारे अर्द्धसिंहाकारे १भगवच्छरीरभेदे तादृशशरीरस्यरूपे कारणञ्च हरिवं०४१अ० उक्तं यथा "हिरण्यकशिपुरुवाच "न देवासुरगन्धर्वा न यक्षोरगराक्षसाः। न मानुषाः पिशाचा वा निहन्युर्मां कदञ्चन। अयोनिजेन मां क्रुद्धाः सर्वलोकपितामह!। अमेयवरदत्तेन वरेण हतो मया। न शस्त्रेण न चास्त्रेण गिरिणा पादपेन वा। न शुष्केण न चार्द्रेण स्याच्च चास्त्रेण मे वधः। न सर्वेऽप्यव पातालेऽनाकाशे नावनिस्थले। न चाभ्यन्तररात्रौ न बाह्यन्यत्र मे वधः। याचिष्यन्तीरेवमेवं सम्यक्प्रवरणम्। यो मां नाशयितुं शक्तः स मे स्यादुर्भविष्यति" तथा वरप्राप्तौ हिरण्यकशिपुना जगतां निर्मोहने कृते तद्वधाय दैवैः प्रार्थितो भगवान् नरसिंहरूपेणावततार यथाह तत्रैवाध्याये

"एवमुक्ता स भगवान् विसृज्य त्रिदिवौकसः। वधं संकल्पयामास हिरण्यकशिपोः प्रभुः। सोऽचिरेणैव कालेन हिमवत्पार्श्वमागतः। किं तु रूपं समास्थाय निहन्त्रेनं महासुरम्। यत् सिद्धिकरमाशु स्याद्वधस्य विबुधद्विषः। अचुत्पन्नमतश्चक्रे सोत्पन्नो रूपमीदृशम्। नारसिंहमनाधृष्यं दैत्यदानवरक्षसाम्। सङ्घायन्तु मङ्घावाङ्कर्जघाङ्कोङ्कारमेव च। अथोङ्कारसङ्घायो वै भगवान् विष्णुरच्युतः। हिरण्यकशिपोः स्थानं जगाम प्रभुरीश्वरः। तेजसा भास्कराकारः कान्त्या चन्द्र इवापरः। नरस्य कृत्वार्द्धतनुं सिंहस्यार्द्धतनुं तथा। नारसिंहेन वपुषा पाणिं संस्पृश्य पाणिना। ततोऽपश्यत विस्तीर्णां दिव्यां रत्नां मनोरमाम्"। ततस्तद्वधकथा "यदि दास्यसभिमतान् वरान् मे वरदोत्तम!। भूतेभ्यस्त्वद्विसृष्टेभ्यो मृत्युर्मा भून्मम प्रभो!। नान्तर्बहिर्दिवा नक्तमन्यस्मादपि चायुधैः। न भूमौ नाम्बरे मृत्युर्न

नरैर्न मृगैरपि । असुभिर्योऽसुमद्भिर्वा सुरासुरमहोरगैः । अप्रतिद्वन्द्वतां युद्धे ऐश्वर्यञ्च देहिनाम्" भाग० ७।२।२४ एवं प्रार्थितवरप्राप्तौ सभायां हिरण्यात्कश्यपे विष्णौ द्वेषात् तद्भक्तेऽपि प्रह्लादेऽतीव द्वेषेण तेन विरुद्धमाचरितम्। अनन्तरं च तेनोक्तः प्रह्लादः सर्वत्र विष्णोः स्थायित्वं प्रतिजज्ञे तेन स्तम्भेऽपि तत्सत्त्वमुक्तवान्। तच्छ्रुत्वा तेन स्तम्भताडने कृते तत्र प्रह्लादकथां सत्यां चिकीर्षुः भगवान् नरसिंहरूपेण प्रादुर्बभूव यथाह

"सत्यं विधातुं निजभृत्यभाषितं व्याप्तिञ्च भूतेष्वखिलेषु चात्मनः। अदृश्यतात्यद्भुतरूपमुद्वहन् स्तम्भे सभायां न मृगं न मानुषम्। स सत्यमेवं परितोषितुं सुरं नृलोकनाथं नरलोकचित्रमहो किमेतद्भृगेन्द्ररूपम्। श्रीमांसमानस्य सतस्तितोऽमतो नृसिंहरूपं तदहं भयानकम्। प्रतप्तचामीकरचण्डलोचनं स्फुरत्सटाकेशरजृम्भितानम्। करालदंष्ट्रं करवालचञ्चलचुरान्तजिह्वं भ्रकुटीमुखोल्बणम्। सटोर्ध्वकम्पं गिरिकन्दराद्भुतव्यात्ताननाभं हनुभेदभीषणम्। दिविस्पृगत्कायतदीर्घवीरशोभोरुबाहोस्खलमध्यमध्यम्। चन्द्रांशुगौरैरसृगुल्लसत्तनूरुहैर्विष्वगुजानीकशतं नखायुधम्। तं प्रेक्ष्य तेजः प्रतपन्तमग्निरनल्पधिर्हृदुपर्यधोहरिः। ज्ञात्वाऽऽहृतं खरसतृप्तलोल्यं निमीलिताक्षं जगदे ऽग्रजस्यः। विधत्स्व स्फुरन्तं वहणातुरं हरिर्व्यालो ग्रथाखुं कुलिशक्षतत्वचम्। हार्यूरुमायात्ददार लीलया नखैर्यथाहिं गरुडो महाविषम्" भाग० ७।८अ०। "द्वारि सभायां नान्तर्न बहिः" अतं ऊरौ निपात्य न भूमौ नाम्बरे। नखैर्न च द्वाभ्यामसुभिरसुमद्भिर्वा। एवं हिरण्यकशिपुपरिहाराय सायमिति द्रष्टव्यम्" श्रीधरस्वामी। नरसिंहत्वं च तदीयदेहवृत्तिजातिभेदः यथोक्तं सि०सु० "अथवा भेदावदन्यावयविभावद्वृत्तिद्रव्यत्वव्याप्यव्याप्यजातिमत्त्वं तत् (शरीरत्वम्) मानुषत्वदैवत्वजातिमादाय लक्षणसमन्वयः। न च नृसिंहशरीरे कथं लक्षणसमन्वयः तत्र नृसिंहत्वस्यैकव्यक्तिवृत्तितया देवत्वस्येव जातित्वाभावात् अतीवतेजसशरीरवृत्तितया देवत्वस्य जातित्वाभावादिति वाच्यं कल्पभेदेन नृसिंहशरीरस्य नानात्वेन नृसिंहत्वजात्या लक्षणसमन्वयात्"। नरः सिंह इव। २मानवश्रेष्ठे नरहरिर्नृसिंहादयोऽप्यत्र।

**नरसिंहपुराणम्** न० नरसिंहोपपुराणनामकं पुराणम्। उपपुराणभेदे "पाद्मे पुराणे यत्प्रोक्तं नरसिंहोपवर्णनम्। तच्चाष्टादशसाहस्रं नारसिंहमिहोच्यते" मत्स्यपु० नरसिंहमधिकृत्य कृतो ग्रन्थः अण् नारसिंहमित्यर्थः। "आद्यं सनत्कुमारोक्तं नारसिंहमतःपरम्" कूर्मपुरा० उपपुराणोक्तौ।

**नरसिंहमूर्त्तिदान** न० ६त०। कालिकापुराणोक्ते स्वर्णादिरचितनृसिंहमूर्त्तिदाने तद्विधानं हेमा०दा०कालिपु०यथा "नृसिंहं वाथ रौक्मन्तु कृत्वा चतुर्भुजं विभुम्। ताम्रपात्रे प्रतिष्ठाप्य रौप्यदंष्ट्रे प्रकल्पयेत्। चक्षुषी पद्मरागेण नखानां विद्रुमास्तथा। पुष्परागं भ्रुवोर्दद्यात् कर्णयोर्हीरकावुभौ" नृसिंहरूपन्तु विष्णुधर्मोत्तरे "कार्य्यस्तु भगवान् विष्णुर्नरसिंहवपुर्धरः। पीनस्कन्धकटिग्रीवक्षयमध्यः कृशोदरः। सिंहासनो (सिंहास्यः) नृदेहस्थ नीलवासाः प्रभान्वितः। आजीढस्थानसंस्थानः सर्वाभरणभूषणः। ज्वालमालाकुलमुखोज्वलत्केशरमण्डलः। हिरण्यकशिपोर्वक्षःपाटयन्नखरैः खरैः। देवजानुगतः कार्य्यो हिरण्यकशिपुस्तथा। देवश्च शङ्खचक्राभ्यां भूमितोर्द्ध्वकरद्वयः" इति। "राजवर्त्म च वैदूर्यं इन्द्रनीलं सुमस्तके। कृत्वा रूपमिदं रम्यं तत्साम्यं मधुना बुधः। पूरयेत् खण्डमिश्रेण तत्र देवं घृतेनमेतु। नक्तयुक्तेन संकृत्वा आसने विनिवेशयेत्। नैवेद्यं कल्पयेदग्रं भक्ष्यभोज्यादिभिर्विधैः। वितानोपरिसंयुक्तं पुष्पदामभिरर्चयेत्। गन्धदीपैस्तथा धूपैर्जागरं चाऽत्र कारयेत्। कृत्वा समस्तमेतत्तु हरये पूर्ववद्दिशेत्। यत्किञ्चित् प्राग्विनिर्दिष्टं कुर्यात् सर्वमिहापि तत्"। प्राग्विनिर्दिष्टमिति वैष्णवमन्त्रेण पूजनं मूलमन्त्रेण अष्टोत्तरशतं तिलाज्यहोमः द्वादशभ्यो ब्राह्मणेभ्यः सदक्षिणमन्नदानमिति। "कार्त्तिक्यां वाथ वैशाख्यामाश्रित्य द्वादशीमथ। कृत्वा विधिमिमं सम्यक् नूनं तत्फलमश्नुते। घरण्यां वाथ संग्रामे तस्करैर्दृष्टिभिर्हते। न भयं जायते तस्य सकृदुच्चरितेऽपि यः। विदार्य्य चापदोघोराः धनमायुः प्रयच्छति। सन्ततिं चैव रूपञ्च सौभाग्यञ्च मनोरथान्। एवं भवति यत्पुण्यं नृसिंहाख्यतिदानतः। तेन विष्णोः पदं प्राप्य तत्र क्रीडन्ति देहिनः। एतत् श्रुत्वा महत् पुण्यं सर्वपापैः प्रमुच्यते। धनमायुर्विवर्द्धेत आवकस्य विशेषतः। श्रावके दक्षिणां दद्याद्भक्त्या चाऽभिभूतये"

**नरस्कन्ध** पु०नर+समूहे स्कन्ध। नरसमूहे एवं मनुष्यस्कन्धादयोऽप्यत्रार्थे।

**नराङ्क** पु० नरमङ्कयति चु० अङ्क-अण्। १मेढ्रे २वरखड्के (नारङ्ग) वृक्षभेदे मेदि०।

**नराची** स्त्री नरमिवाचिनोति रोमभिरिव कण्टकैः चा+चि-ड गौरा०ङीष्। १अमूलायां कण्टकिन्यां (फणी मनसा) वृक्षभेदे "यां ते चक्रुरमूलायां वल्गं वा नराच्याम्" ऋग्० ५।३१।४। ततः अर्करा०स्वार्थे अण्। नाराच तत्रार्थे। २शौरेर्भार्यायाभेदे च "सुतनूच नराची च शौरेराद्यां परिग्रहौ। पौण्ड्रच कपिलश्चैव वसुदेवस्य तौ सुतौ। नराच्यां कपिलो जज्ञे पौण्ड्रच सुतनूसुतः। तयोर्नरोऽभवत् पौण्ड्रः कपिलश्च वनं ययौ" हरिवं० १६२अ०।

**नरा(च)ज** पु० षोडशाक्षरपादके वृत्तभेदे "भुजङ्गराजभाषितं प्रकीर्णशास्त्रसागरे लघौ गुरौ निरन्तरे सतीह षोडशाक्षरे। प्रतापतापनिर्जितप्रभाकरप्रकाश! हे प्रवृत्तवृत्तराजकं नराज(च)मेव मन्महे"।

**नराधम** पु० नरेषु अधमः। विवेकादिशून्यतयापकृष्टे मानवे "अज्ञानोपहितो बाल्ये यौवने वनिताहृतः। शेषे कलत्रचिन्तार्त्तः किं करोति नराधमः"।

**नराधिप** पु० वृत० । ऋषे "नराणाञ्च नराधिपः" गीता। नराधिपत्वादयोऽप्यत्र।

**नरान्तक** पु० अनयन्ति अनि-खुल् वृत०। मानुषनाशके रावणात्मजे १राक्षसभेदे "रक्षःपतिस्तदवलोक्य निकुम्भकुम्भधूम्राक्षदुर्मुखसुरान्तनरान्तकादीन्" भाग० ६।१०। १८। २नरनाशकमात्रे त्रि०।

**नरायण** पु०नरा अयनमस्य। विष्णौ "नराणामयनं यस्मात् तेन नरायणः स्मृतः" ब्रह्मवै०पु०। नरस्य परमात्मनोऽपत्यं नडा० फक् संज्ञापूर्वकविधेरनित्यत्वान्न वृद्धिः। तत्रार्षे

**नराश** पु० नरमश्नाति अश-भोजने अण् उप०स०। राक्षसे "यावद्धरार्थेन रिपुः शवाशान्" भट्टिः।

**नराशंस** पु० १यज्ञे २अग्नौ च। "नराशंस मङ्गिरानमिल्लुचमधिलक्ष्य निरु० ८।२ उक्तं यथा "नराशंसो यज्ञ इति कात्थक्यः। नरा अस्मिन्नासीनाः शंसन्ति, अग्निरिति शाकपूणिर्नरैः प्रशस्तो भवति"। तेनोभयनिरुक्तेः उभयार्थता "देव इन्द्रो नराशंसस्त्रिवरूथः" यजु० २१।५५ "नराशंसो देवोऽनुयाजरूपी यज्ञः" वेददी० "नराशंसो अग्ने" यजु०२७।१२ "नराशंसः नरैर्ऋत्विग्भिराशंस्यते स्तूयते नराशंसः अग्निः" वेददी०।

आ+शंस-भावे घञ् वृत०। २नराणामाशंसने पु० "लुप्तां नराशंसाय प्रजा वै नराः" शत०ब्रा०१।५।१।२० "यज्ञा सर्वेऽपि नराः शंसन्ति तथाविधशंसनाय प्रियाभिति" भाष्यम् अस्य वनस्पत्या० युगपत् उभयपदे प्रकृतिस्वरः।

**नरासन** नराकारे आसनभेदे तत्त्वभेदादिकं रुद्रयामलोक्तं यथा "अथ नरासनं वक्ष्ये षोडशादिप्रकारकम्। येन साधनमात्रेण योगी भवति साधकः। प्रकाराः षोडश प्रोक्ताः सत्कुलैर्मुनिभिस्तले। एकमासात् भवेत् कल्पो द्विमासे द्रुतकल्पकम्। त्रिमासे योगकल्पः स्यात् चतुर्मासे स्थिराशयः। पञ्चमासे सूक्ष्मकल्पः षण्मासे विवेकधीः। सप्तमासे ज्ञानयुक्तो भावको भवति ध्रुवम्। अष्टमे मन्त्रसंयुक्तो जितेन्द्रियकलेवरः। नवमे सिद्धिमिलनो दशमे चक्रभेदवान्। एकादशे महावीरो द्वादशे खेचरो भवेत्। इति योगासनज्ञो योगी भवति साधकः। नरासनं यः करोति स सिद्धो नात्र संशयः। अधोमुखं महादेव! नरासनस्य साधने। करणीयं साधकाग्र्यैः योगशास्त्रार्थसम्मतैः" रुद्रया०।

**नरिष्ठा** स्त्री पुरुषमेधे भयङ्करपशूपाकरणनोद्देश्ये देवताभेदे "नरिष्ठायै भीमकम्" यजु० ३०।६

**नरिष्यन्त** पु० वैवस्वतमनोः पुत्रभेदे "नेदं धृष्णुं नरिष्यन्तं नाभागेक्ष्वाकुमेव च" भा०आ० ७५अ०। "इक्ष्वाकुर्नभगश्चैव धृष्णुः शर्य्यातिरेव च। नरिष्यन्तोऽथ नाभागः सप्तमोऽरिष्ट उच्यते" भाग० ८।१३।१

**नरी** स्त्री नरस्य पत्नी ङीष्। मानवपत्न्यां लटा०। तच्छाति स्त्रियां तु नारीत्येव।

**नरेन्द्र** पु०नर इन्द्र इव। १नृपे २विष्णुवैद्ये च मेदि०। "नरेन्द्रकन्यास्वयमाप्य सत्पतिम्" रघुः "सुनियता नरेन्द्रेण फणीन्द्रा इव शत्रवः" माघः श्यश्छादिनिवारकवैद्यभेदे "तेषु कश्चिन्नरेन्द्राभिमानी मां निवर्त्य सुश्रातस्त्वमस्मच्छाना-दिभिरोपक्रम्याक्षतार्थः" दशकु०मा०। "सा च द्वारिका यद्येव केनचिदधिष्ठिता न तिष्ठत्यधो नरान्तरस्य यास्यति च नरेन्द्रसार्थसंपर्कवशेन तद्विराकरिष्यन्नरेन्द्रो नचाचि सिद्धिरिति" दशकु०मा०। ४एकविंशत्यक्षरपादके वृत्तभेदे "चामररत्नरज्जुवरपरिगतविप्रगणाङ्कितशोभः पाणिविराजिपुष्पयुगविरचितकङ्कणसङ्कुलगन्धः। चारु सुवर्णकुण्डलयुगलकृतिरोचिरकङ्कृतवर्णः पिङ्गलपक्षगेय इति निगदति राजति वृत्तनरेन्द्रः"। नरेश-नरेश्वरादयोऽपि ऋषे। [गुरुचि नैषधटीकाश्रिका।

**नरेन्द्राभ** पु० नरेन्द्र इवाभाति काशेषु आ+भा-क। काश

**नरोत्तम** पु० नरेषूत्तमः। १पुरुषोत्तमे नारायणे २नरश्रेष्ठे च "सभाजो भङ्गकारात्तु नागेयश्च नरोत्तमौ। जज्ञाते गुणसम्पन्नौ विश्रुतौ रूपसम्पदा" हरिवं० ३९ अ० २क्षत्रकुले जाततत्त्वे पुरुषे यथा "यः स्वकात् परतो वेह जातनिर्वेद आत्मवान्। हृदि कृत्वा हरिं गेहात् प्रव्रजेत् स नरोत्तमः"। स्वकात् स्वतएव, परतः परोपदेशाज्जातवैराग्यः" भट्टार्थचि०।

**नकुटक** पु० नरस्य कुटकमिव प्रभो०। नासायां हेमच०।

**नर्त्त** त्रि० नृत्यति नृत-घञ्वा० कच्। १नृत्यकर्त्तरि "नृत्यप्रियो नित्यनर्त्तो नर्त्तकः सर्वलालसः" भा०अनु०१७अ०। नृत-भावे घञ्। २नर्त्तने पु० ततः छेदा० निष्पन्नार्थे ठञ्। नार्त्तिक अभीक्ष्णनर्त्तनार्हे त्रि०।

**नर्त्तक** त्रि० नृत्यति नृत-गात्रविक्षेपे "शिल्पिनि ष्वुन्" पा० कर्त्तरि ष्वुन्। जीविकार्थं गात्रविक्षेपभेदनृत्यकारके "भुकुंचश्च भ्रुकुंसश्च भ्रकुंसश्चेति नर्त्तकः" अमरः। स्त्रियां स्वित्वात् ङीष्। "रङ्गाय दर्शयित्वा निवर्त्तते नर्त्तकी यथा नृत्यात्" सा०का०"नर्त्तकीवत् प्रवृत्तस्य निवृत्तिश्चारितार्थ्यात्" सा०सू०। २शिवे पु०नर्त्तशब्दे दृश्यम्। ३सङ्कीर्ण जातिभाले पुंस्त्री० "वेश्यायां रङ्गकाज्जातो नर्त्तको गायको भवेत्" उशनाः। नर्त्तयति नृत-णिच् ण्वुल्। ४अङ्गुल्यादेर्वाद्यके। "तर्कोविचारः सन्देहात् भ्रूगिरोऽङ्गुलिनर्त्तकः" सा०द०। नृत-घञ्वा०अच् संज्ञायां कन्। ५नखरहिते पोटगले ६चारखे ७केवडे च शब्दरत्ना० ८गजे ९वृक्षे हेम०। १०अरेणौ हलिन्यां स्त्री मेदि० ११नखिकानामगन्धद्रव्ये स्त्री राजनि०। नृत्यकर्त्तृलक्षणं सङ्गीतशास्त्रोक्तं यथा "यादृशं नृत्यपात्रं स्यात्तादृशं वोच्यते तादृशम्। नृत्यस्य धारणात् पात्रं नर्त्तकः परिकीर्त्तितः" "अस्मन्मुखप्रलापी च सदा भ्रुकुटितत्परः। हास्यप्रहासचतुरो वाचालो नृत्यकोविदः"।

**नर्त्तन** न० नृत-भावे ल्युट्। १अङ्गविक्षेपभेदे नृत्ये पूर्वपदस्थे निमित्ते सति उत्तरपदस्यास्य चुम्बा० न षत्वम् परिनर्त्तनम्। वर्जयेदित्यनुवृत्तौ "कामं क्रोधञ्च लोभञ्च नर्त्तनं गीतिवादनम्" स्नातकव्रतोक्तौ मनुः। णिच्-भावे ल्युट्। २अङ्गुल्यादेर्वादने च

**नर्त्तनप्रिय** पु०नर्त्तनं प्रियमस्य। १शिवे २नृत्यप्रियमात्रे त्रि०

**नर्त्तनशाला** स्त्री ६त०। (नाचघर) नृत्यगृहे "यैषा नर्त्तनशालेह मत्स्यराजाय कारिता" भा०वि० २२अ० नर्त्तनगृहादयोऽप्यत्र।

**नर्त्तित** त्रि० नृत-णिच् कर्मणि क्त। ज्ञाततात्पर्ये चालिते "सचलितनर्त्तितवामपादपद्मा" माघः।

**नर्त्तु** पु० नृत-उण्। खड्गधारायां स्त्रियां नर्त्तकीवत् ङीष्।

**नर्द** शब्दे चक० गतौ सक० भ्वा० पर० सेट्। नर्दति अनर्दीत् ननर्द। "उदपानाच्च नर्दन्ति यथा गोवृषभास्तथा" भा०उ० १४२अ०। "ते नर्दमाना इव कालमेघाः" भा० आ० १९२ अ० ताच्छील्ये चानश्। "अनर्दिपुः कपि व्याघ्राः"। "विदाङ्चकार चौताच्छः स रिपुं खे ननर्द च" भट्टिः प्राद्युपसर्गपूर्वकस्तु तत्तदुपसर्गोद्यत्यार्थयुक्ते शब्दे अर्थोपदेशत्वात् सति निमित्ते न षत्वम् प्रनर्दति।

**नर्दटक** न० "यदि भवतो नजौ भजजलागुरुर्नर्दटकम्" छन्दोम० उक्तलक्षणे सप्तदशाक्षरपादके छन्दोभेदे।

**नर्दन** न० नर्द-भावे ल्युट्। शब्दे "नर्दनं रुगपक्षिषाम्" ह०सं० ४६अ०।

**नर्दिन्** त्रि० नर्दति शब्दायते नर्द-णिनि। १शब्दकारके विकल्पके। पाले समिता० सप्तस्थान लुक् गेहेनर्दी।

**नर्व** गतौ भ्वा०पर०सक० सेट्। नर्वति अनर्वीत् ननर्व। अर्थोपदेशत्वात् सति निमित्ते न षत्वम्। प्रनर्वति।

**नर्म** पु० न-मन्। पुरुषमेधीयानभ्यपन्यूह्येषु देवभेदे "नर्माय रेभम्" यजु० ३०।६ "नर्माय पुंचलूम्" ३०।२

**नर्मकील** पु० नर्मणः परिहासस्य कील इव बन्धनस्थानत्वात्। पत्यौ भर्त्तरि त्रिका०।

**नर्मट** पु० नर्म-अटन् प्रभो०। १खर्परे २स्वर्वे च हारा०।

**नर्मठ** पु०नर्मणि कुशलः नर्मन्+अठन्। १नर्मकुशले २शिल्पिनि आरे ३परिहासके शब्दर० ४चिबुके चुचुके च शब्दार्थ०

**नर्मद** त्रि० नर्म ददाति दा-क ६त०। १क्रीडासचिवे मेदि०। २पुत्रकायां हेमच०। ३नदीभेदे स्त्री मेदि०। सा च नदी कलिङ्गदेशस्य पश्चाद्देशे स्थिता अमरकण्टकपर्वतसन्निकटा यथाह मत्स्यपु० १८९ अध्यायावधि १९०अ० वर्णने तत्कथा दिङ्मात्रमत्र दर्श्यते।

"मार्कण्डेय उवाच नर्मदा सरितां श्रेष्ठा सर्वपापप्रणाशिनी। तारयेत् सर्वभूतानि स्थावराणि चराणि च। नर्मदायास्तु माहात्म्यं पुराणे यन्मया श्रुतम्। तदेतद्वि महाराज! तत्त्वं कथयामि ते। पुण्या कनखले गङ्गा कुरुक्षेत्रे सरस्वती। ग्रामे वा यदि वाऽरण्ये पुण्या सर्वत्र नर्मदा। त्रिभिः सारस्वतं तोयं सप्ताहेन तु यामुनम्। सद्यः पुनाति गाङ्गेयं दर्शनादेव नार्मदम्। कलिङ्गदेशे पश्चात्तु पर्वतेऽमरकण्टके। पुण्ये

च त्रिषु लोकेषु रमणीया मनोरमा। सदैवासुरगन्धर्वा ऋषयश्च तपोधनाः। तपस्तप्त्वा महाराज! सिद्धिञ्च परमाद्भुताः। तत्र स्नात्वा नरो राजन्नियमस्थो जितेन्द्रियः। उपोष्य रजनीमेकां कुलानां तारयेच्छतम्। जलेश्वरे नरः स्नात्वा पिण्डं दत्त्वा यथाविधि। पितरस्तस्य तृप्यन्ति यावदाभूतसंप्लवम्। पर्वतस्य समन्तात्तु रुद्रकोटिः प्रतिष्ठिता। स्नात्वा यः कुरुते चार्चां गन्धमाल्यानुलेपनैः। प्रीतस्तस्य भवेच्छर्वो रुद्रकोटिर्न संशयः। पश्चिमे पर्वतस्थान्ते स्वयं देवो महेश्वरः। तत्र स्नात्वा शुचिर्भूत्वा ब्रह्मचारी जितेन्द्रियः। पितृकार्यञ्च कुर्वीत विधिवद्धितेन्द्रियः। तिलोदकेन तत्रैव तर्पयेत् पितृदेवताः। आसप्तमं कुलं तस्य स्वर्गे मोदेत पाण्डव!। षष्टिवर्षसहस्राणि स्वर्गलोके महीयते। अप्सरोगणसंकीर्णे सिद्धचारणसेविते। दिव्यगन्धानुलिप्तश्च दिव्याभरणभूषितः। ततः स्वर्गात्परिभ्रष्टो जायते विपुले कुले। धनवान् दानशीलश्च धार्मिकश्चैव जायते। पुनः स्मरति तत्तीर्थं गमनं तत्र रोचते। कुलानि तारयेत् सप्त रुद्रलोकं स गच्छति। योजनानां शतं साग्रं श्रूयते वरिवृत्तमा। विस्तारेण तु राजेन्द्र! योजनद्वयमायता। षष्टिस्तीर्थसहस्राणि षष्टिः कोट्यस्तथैव च। सर्वं तस्य समन्तात्तु लिङ्गतेऽमरकण्टके"।

**नर्मदासम्भव** न० नर्मदायां सम्भवति सम्-भू-अच्। नार्मदे बाणलिङ्गभेदे तल्लक्षणादिकन्तु वायवीयसंहितायां देवीं प्रति शिववाक्ये "प्रवक्ष्यं नार्मदं लिङ्गं पक्वजम्बुफलाकृति। मधुवर्णं तथा शुक्लं नीलं मरकतप्रभम्। हंसडिम्बाकृति पुनः स्थापनायां प्रशस्यते। स्वयं संभवते लिङ्गं गिरितो नर्मदाजले। पुरा बाणासुरेणाङ्गं प्रार्थितो नर्मदातटे। अध्यवात्सं गिरौ तत्र लिङ्गरूपी महेश्वरः। बाणलिङ्गमपि ख्यातमतोऽन्यत्रागतीतले। अन्येषां कोटिलिङ्गानां पूजने यत् फलं भवेत्। तत् फलं लभते मर्त्यो बाणलिङ्गैकपूजनात्"। तथा "ताम्बो वा स्फाटिको स्वार्थी पाषाणो राजतो तथा। वैदिको च प्रकर्त्तव्या तत्र संस्थाप्य पूजयेत्। प्रत्यहं योऽर्चयेल्लिङ्गं नार्मदं भक्तिभावतः। ऐहिकं किं फलं तस्य सन्निहस्थ करे स्थिता" नर्मदेयग्रन्थे तत्तीरस्थपाषाणमात्रस्य शिवलिङ्गरूपित्वं लक्ष्यते। प्रसङ्गात्तस्य लक्षणपरीक्षादिकमुच्यते वीरमित्रोदयधृतकालोत्तरे "बाणलिङ्गं तथा ज्ञेयं भुक्तिमुक्तिप्रदायकम्। उत्पत्तिं बाणलिङ्गस्य लक्षणं वदतः शृणु। नर्मदादेविकायोश्च गङ्गायमुनयोस्तथा। सन्ति पुण्यानदीनाञ्च बाणलिङ्गानि सप्तसु!। इन्द्रादिपूजितान्यत्र तल्लिङ्गैर्विहितानि च। सदा सन्निहितस्तत्र शिवः सर्वार्थदायकः। इन्द्रलिङ्गानि तान्याहुः साक्षान्मोक्षार्थप्रदानि च"

स्यान्नेदं तल्लक्षणिनिमभवा भक्तिसाच्छितम्। इदं लिङ्गवरं स्याप्य तेजसाधिपतिर्भवेत्" "दण्डाकारं भवेद् याम्यमथवा रसनाकृति। यदुक्तं यच्च तेनैव निर्घिक्तं घ्रायते तदा। निर्घिक्तं निघनत्वेन क्रियते स्थापितेन तु" "राक्षसं षड्नखदंशं ज्ञानयोगफलप्रदम्। कर्कशादिग्रलिप्तन्तु कुण्डकुक्षियुतं तथा। राक्षसं निर्घृतेर्लिङ्गं गार्हस्थ्ये न सुखप्रदम्" "वारुणं वर्तुलाकारं पाशाङ्कं चाब्जवर्चसम्। वृद्धिःसुखादेः स्रवस्य संभोगाग्रन्तु मध्यमे" "क्षणं धूम्रं च वायव्यं ध्वजगं ध्वजभङ्गयम्। मलजेस्थापितं तस्य न्यूनन्यूनमितस्ततः"

"चतुर्वर्णमयं वापि वैष्णवं घ्रायतेऽथवा। वैष्णवं शङ्खचक्राङ्कगदाब्जादिविभूषितम्। श्रीवत्सं कौस्तुभाङ्कञ्च सर्वसिद्धासनाङ्कितम्। वैनतेयसमाङ्कं वा तथा विष्णुपदाङ्कितम्। वैष्णवं नाम तत्प्रोक्तं सर्वैश्वर्यफलप्रदम्" "शालग्रामादिसंस्थन्तु यथाङ्कं श्रीविवर्द्धनम्। पद्माङ्कं स्वस्तिकाङ्कं वा श्रीवत्साङ्कं विभूतये" इत्यादिदृष्टतल्लक्षणकाण्डे नारद उवाच "अथ वक्ष्यामि ते विप्र चिह्नमेकादशं (पूर्वोक्तदशामेत्यया एकादशम्) परम्। श्रवणाद्यस्य पापानि नाशमायान्ति तत्क्षणात्। मधुपिङ्गलवर्णाभं क्षणकृष्णशिलायुतम्। स्वयम्भुलिङ्गमाख्यातं सर्वसिद्धैर्निषेवितम्। नानावर्णसमाकीर्णं जटाशूलसमन्वितम्। स्वल्पोन्नयाङ्गयं२ लिङ्गं सुरासुरनमस्कृतम्। दीर्घाकारं शुभ्रवर्णं कृष्णबिन्दुसमन्वितम्। नीलकण्ठं३ समाख्यातं लिङ्गं पूज्यं सुरासुरैः। शुक्लाभं शुक्लकेशञ्च नेत्रत्रयसमन्वितम्। त्रिलोचनं४ महादेवं सर्वपापप्रमोदनम्। व्यक्तलिङ्गं जटाजूटं कृष्णाभं स्थूलविग्रहम्। कालाग्निरुद्र५माख्यातं सर्वसत्वैर्निषेवितम्। मधुपिङ्गलवर्णाभं श्वेतयज्ञोपवीतिनम्। श्वेतपद्मसमासीनं चन्द्ररेखाविभूषितम्। नन्दयाक्षसमायुक्तं त्रिपुरारिं६ समाह्वयम्। शुक्लाभं पिङ्गलजटं सप्तमालाधरं परम्। त्रिशूलधरमीशानं७ लिङ्गं सर्वार्थसाधनम्। त्रिशूलडमरुधरं शुभ्रकान्तिं भागतः। कर्णनारीश्वराङ्गानंदसर्वदेवैरभीष्टदम्। देवद्रुमयं कान्तं स्थूलदीर्घं सुलक्षणम्। महाकालं८ समाख्यातं

धर्मकामार्थमोक्षदम्। एतत्तु कथितं तुभ्यं लिङ्गचिह्नं मयेरितः। एतेनैव कृतार्थः स्यात् बहुभिः किंतु सुव्रत!" वीरमित्रोदयधृतकालोत्तरे "उत्ताङ्गं श्रेयसे योज्यं शीर्षमन्त्रं विवर्जयेत्। यमवर्णन्तु वह्निं यमाङ्गं वा कमण्डलुम्। दण्डाङ्गं खलचिह्नं वा ब्रह्मघ्नान्वितं मतम्। शशिवर्णं महाकालं नन्दीशं पद्मरागवत्। पद्मरागनिभं सर्वं महाभं लिङ्गपूजितम्। मौक्तिकाभं नीलनिभं रुद्रादित्यैः प्रपूजितम्। वसुदैः सेन्द्रयज्ञेशं शुक्लवैर्यातुधानकैः। नानावर्णमयं नीलं यशाङ्गमखण्डलप्रभम्" "रत्नेतल्लक्षणं प्रोक्तं परीक्ष्य तत्त्वकोविदैः। निःसप्तपञ्चवारं वा तुलासाम्यं न जायते। तदा वाणं समाख्यातं श्रेयं पाषाणसम्भवम्"। तुलाकरणन्तु तण्डुलेन अपरत्नादिषु तण्डुला यद्यधिकाः सुखदा तल्लिङ्गं स्फटिकां पुण्यम् लिङ्गभेदधिकं तदोदासीनैः पुण्यमिति किंवदन्ती। हेमाद्रिधृतलक्षणकाण्डे सूतसंहितायान्तु "सप्तकृत्वस्तुलारूढं दृश्यमेति न हीयते। वाणलिङ्गमिति ख्यातं श्रेयं नार्मदसञ्ज्ञते। त्रिपञ्च वारं यस्यैव तुलासाम्यं न जायते। तदा वाणं समाख्यातं श्रेयं पाषाणसम्भवम्"। वीरमित्रोदये "नद्यां वा प्रच्छिन्नेद्भूयो यदा तदुपलभ्यते। वाणलिङ्गं तदा विद्धि न्यूनं सुखविवर्द्धनम्"। वाणशब्दव्युत्पत्तिरपि तत्रैव "अथ वाणं समाख्यातं यथा वक्ष्ये तथादितः। वाणः सदा शिवो देवो वाणोबाणासुरोऽपि च। तेन यस्मात् कृतं तस्माद्वाणलिङ्गसदाकृतम्। सदा सन्निहितस्तत्र शिवः सर्वार्थदायकः। कृतप्रतिष्ठं तल्लिङ्गं वाणाख्येन शिवेन च। पङ्कजस्य फलाकारं कृष्णस्य समाकृति" पङ्कजफलं पद्मबीजम् "पङ्कजम्बुफलाकारं कृष्णटाङ्कसमाकृति" इति हेमाद्रिधृतलक्षणकाण्डे पाठः। "भुक्तिमुक्तिप्रदश्चैव वाणलिङ्गसदाकृतम्"।

सूतसंहितायाम् "संस्थाप्य श्रीवाणलिङ्गं रत्नकोटि गुणं भवेत्। रसलिङ्गे ततो वाणात् फलं कोटिगुणं स्मृतम्। गुणांस्तु रसलिङ्गस्य वक्तुं शक्नोति शङ्करी। सिद्धयो रसलिङ्गे स्युरष्टसिद्धाद्याः समंस्थिताः"। केदारखण्डे "रत्नधातुमयान्येव लिङ्गानि कथितान्यपि। पवित्राण्येव पुण्यानि सर्वकामप्रदानि च। एतेषामपि सर्वेषां काश्मीरं हि विशिष्यते। काश्मीरादपि लिङ्गाच्च वाणलिङ्गं विशिष्यते। वाणलिङ्गात् परं नान्यत् पवित्रमिह दृश्यते। ऐहिकामुष्मिकं सर्वं पूजाकर्त्तुः प्रयच्छति"। निम्बलिङ्गमाह तत्रैव "कर्कशे वाणलिङ्गे तु पुत्रदारक्षयो भवेत्। चिपिटे पूजिते तस्मिन् गृहभङ्गो भवेद्ध्रुवम्। एकपार्श्वस्थिते येतुपुत्रदारधनक्षयः। शिरसि स्फुटिते वाणे व्याधिर्मरणमेव च। छिद्रलिङ्गेऽर्चिते वाणे विदेशगमनं भवेत्। लिङ्गे च कर्षितां दृष्ट्वा व्याधिमान् जायते पुमान्। क्षुद्भयतविनाशे तु गोधनानां क्षयो भवेत्"। हेमाद्रिधृतम् "तीक्ष्णाग्रं वक्रशीर्षञ्च व्रणलिङ्गं विवर्जयेत्। अतिस्थूलं चातिह्रस्वं खल्वं वा भूषणान्वितम्। गृही विवर्जयेत्तादृक् तद्धि मोक्षार्थमीरितम्" वीरमित्रोदये "अर्थदं कपिलं लिङ्गं घनाभं मोक्षकाङ्क्षिणाम्। मधुवत् कपिलं स्थूलं गृही नैवार्चयेत् क्वचित्। पूजितव्यं स्फटस्थेन वर्षेण अमरोपमम्। तत्पीठमपीठं वा मन्त्रसंस्कारवर्जितम्। सिद्धिमुक्तिप्रदं लिङ्गं सर्वप्रासादपीठगम्" सूतसंहितायां भैरववाक्यम् "वाणासुरः पुरा भद्रे! शिवस्यातीव वल्लभः। जितक्रोधोऽन्तरत्नज्ञ शिवपूजाविधौ रतः। विधिज्ञो नियमज्ञश्च शिवभक्तो जयान्वितः। दिने दिने स्वयं कृत्वा लिङ्गं स्वाभाव्यपूजयत्। एवं वर्षशतं देवि! दिव्यमानेनापूजयत्। तदा तद्भक्तिसुलभः प्रत्यक्षः शङ्करोऽभवत्" शङ्कर उवाच तुष्टोऽहं तव हे वाण! वरं ब्रूहि किमिच्छसि। शङ्करस्य वचः श्रुत्वा वाणोवचनमब्रवीत्। यदि तुष्टोऽसि हे नाथ! मह्यं त्वं मन्दभागिने। लिङ्गोऽहं तव देवेश! लिङ्गं कृत्वा दिने दिने। तत्तल्लक्षणसंसिद्धलक्षणं शास्त्रनिर्मितम्। शास्त्रार्थो दुर्लभो देव! सिद्धयार्थस्य दुर्लभः। तस्मात्त्वं यदि मे तुष्टो लिङ्गं देहि सुलक्षणम्। सर्वकामफलार्थञ्च सर्वसत्वानुकम्पनम्। सर्वेषाञ्च हितार्थाय प्रसादं कुरु शङ्कर!। इत्येवं वचनं तस्य शिवः परमकारणम्। श्रुत्वा कैलासमूर्द्धभ्यः शङ्करेण विनिर्मिताः। लिङ्गानां कोटिसंख्याश्च तथा चैव चतुर्दश। सिद्धलिङ्गं तदा तत्तत्सर्वं सदोदयं स्वयम्। शास्त्रोक्तैर्वं सुसम्पूर्णं वाणस्य च समर्पितम्। अक्षयफलदं वाणः स्थाप्यमानञ्च नित्यशः। संपूज्य वाणः सद्भावं कृत्वा प्रणयनन्तदा। तद्भावं शङ्करं नीत्वा नूनं चिन्तयते शुचिः। अक्षयां यदि संसिद्धिं स्थाप्यमानं दिने दिने। कृत्वानां सिद्धिहेतुर्थं वाणस्थाने सुसंस्थिते। लिङ्गानां कालिकागत्तें संस्थितास्तु त्रिकोटयः। श्रीशैले कोटयस्तिस्रः कोट्येका कन्यकाश्रमे। माहेश्वरे च कोटिस्तु कन्यातीर्थे तु को-

टिका। माहेन्द्रे चैव नेपाले एकैका कोटिरेव च। वाणाङ्कार्थं कृतं लिङ्गं वाणलिङ्गमतः स्मृतम्। वाणो वा शिव इत्युक्तस्तत्कृतं वाणमुच्यते। तस्मात्तेषु प्रदेशेषु पुण्यस्थानेषु तेषु वा। स्थितं तच्छिवसद्भावं शिवसान्निध्यमिति विपश्चिद्भिः। हेमाद्रौ तदान्तरितलक्षणसङ्ग्रहेऽपि "स्वयम्भुलिङ्गवत् वाणलिङ्गं भुक्तिमुक्तिफलप्रदे" "सहस्रफलमन्यस्माद् यथास्थापनपूजने। श्रीशैले कालिकागर्त्ते लिङ्गाद्रौ कन्यकाश्रमे। कन्यातीर्थे वने शैले माहेन्द्रे वा सुरेश्वरे। स्थितानि वाणलिङ्गानि शिवेनैव कृतानि तु" सिद्धान्तशेखरे वाणलिङ्गान्यधिकृत्य "तदानेकप्रकारं स्यादन्यवर्णमपीठकम्। सूक्ष्ममूर्त्तिविहीनञ्च वाणं तत् पृथुवाणकम्" वाणलिङ्गेष्वावाहनादि न कर्त्तव्यं तदुक्तं भविष्ये "वाणलिङ्गानि राजेन्द्र! स्थितानि भुवनत्रये। न प्रतिष्ठा न संस्कारस्तेषामावाहनं न चेति"। रौद्रलिङ्गलक्षणं वीरमित्रोदयधृते "नदीप्रसङ्गवं रौद्रमन्योन्यस्य विघर्षणात्। नदीवेगात् समं स्निग्धं सङ्घातं रौद्रमुच्यते" लक्षणसङ्ग्रहेऽपि "सरित्प्रवाहसंस्थानं वाणलिङ्गसमाकृति। तदन्यदपि बोद्धव्यं रौद्रलिङ्गं सुखावहम्। नदीसारनर्मदायां वाणलिङ्गसमाकृति। तदन्यदपि बोद्धव्यं लिङ्गं रौद्रं भविष्यति"। रौद्रलिङ्गं तथा ख्यातं वाणलिङ्गसमाकृति। श्वेतं रक्तं तथा पीतं कृष्णं विप्रादिपूजितम्। स्वभावात् कृष्णवर्णं वा सर्वजातिषु सिद्धिदम्। नर्मदासम्भवं रौद्रं वाणलिङ्गवदीरितमिति"। अधिकं नर्मदेशशब्दे द्रष्टव्यम्।

**नर्मदेश्व** न० नर्मदया स्थापित इशो यत्र। काशीस्थे शिवलिङ्गभेदे तदाविर्भवकथा काशीख० ९२ अ० यथा "निशम्येति विधेर्वाक्यं नर्मदा सरिदुत्तमा। भातर्वरं परित्यज्य प्राप्ता वाराणसीं पुरीम्। सर्वेभ्योऽपि हि पुण्येभ्यः काश्यां लिङ्गे प्रतिष्ठिते। अपरा न वसुहिता कैश्चित् श्रेयस्करी क्रिया। अथ सा नर्मदा पुण्या विधिपूर्वं प्रतिष्ठितम्। अघात् पिशिम्मिलातीर्थं त्रिपिष्टपसमीपतः। ततः शम्भुः प्रसन्नोऽभूत् तस्यै नद्यै शुभानने। वरं ब्रूहीश सुभगे! यत्तुभ्यं रोचतेऽनघे!। सरिद्वरा निशम्येति रेवा प्राह महेश्वरम्। किं वरेणेह देवेश! स्वयं त्वच्छेन धूर्जटे!। निर्द्वन्द्वा त्वत्पदद्वन्द्वे भक्तिरस्तु ममेश्वर!। श्रुत्वेति नितरान्तुष्टो रेवागिरसतत्तमाम्। प्रोवाच च सरित्श्रेष्ठे! त्वयोक्तं यत्तथास्तु तत्। स्वद्वाप्य पुण्यनिलये वितरामि वरान्तरम्। यावत्तोऽद्यदः सन्ति तव रोधसि नर्मदे। तावत्तो लिङ्गरूपिणस्तो भविष्यन्ति वरान्मम। अन्यच्च ते वरं दद्यां तमप्याकर्ण्यतोत्तमम्। इष्ट्वाश्वं यच्च तपसां राशिभिः परमार्थतः। सद्यः पापहरा गङ्गा सप्ताहेन कलिन्दजा। तत्रैहा सरस्वती रेवे! त्वन्तु दर्शनमात्रतः। अपरं च वरं दद्यां नर्मदे! दर्शनाधिके। भवत्या स्थापितं लिङ्गं नर्मदेश्वरसंज्ञितम्। एतल्लिङ्गं महापुण्यं मुक्तिं दास्यति शाश्वतीम्। अस्य लिङ्गस्य ये भक्तास्तान् दृष्ट्वा यमनन्दनः। प्रणमिष्यति यत्नेन महाश्चर्योभिधत्तये। सन्ति लिङ्गान्यनेकानि काश्यां देवि! पदेपदे। परं हि नर्मदेशस्य महिमा कोऽपि चाद्भुतः। इत्युक्ता देवदेवेश स्तस्मिन् लिङ्गे लयं ययौ। नर्मदापि प्रहृष्टाऽऽसीत् पावित्र्यं प्राप्य चाद्भुतम्। स्वदेशं च परिप्राप्ता दृष्टिसाक्षात्कारिणी"।

**नर्मन्** न० नृ-मनिन्। परिहासे अमरः। "न नर्मयुक्तं वचनं हिनस्ति" भा०आ० १८२अ० "नर्मपूर्वमनुद्भूत संस्थितः" रघुः। "सहृत्प्रयुक्ता इव नर्मवादाः" कामं० "त्रिदिनमिह न भिन्द्यादुब्रह्मचर्यं न चाक्षा। हृदयमनतुरुध्य स्वेच्छया नर्म कुर्य्यात्" मल्लिनाथधृतकामशास्त्रम् "माधुर्यं नर्मविज्ञानं वाग्मिता चेति तद्गुणाः" दूतीलक्षणे सा० द०।

**नर्मरा** स्त्री नर्मन्+अस्त्यर्थे रः। १दर्या २सङ्कायां ३सरस्वत्यां ४निष्कलाख्यायाञ्च मेदि०।

**नर्मवत्** त्रि० नर्म अस्त्यस्य मतुप् मस्य वः। नर्मयुक्ते स्त्रियां ङीप्। सा च १नायिकाभेदे तदाख्यायिकारूपे २रासक नाटकभेदे सा० द० "तत्र सन्निहितवती यथा नर्मवती"।

**नर्मसचिव** पु० नर्मणः सचिवः। परीहाससहाये "न नर्मसचिवैः सार्द्धं किञ्चिदप्यप्रियं वदेत्" कामन्दक० "न नर्मसचिव्यमकारि नेन्दुना" माघः।

**नर्य्य** त्रि० नृभ्योहितं यत्। १मनुष्यहिते "नृणां नर्य्यो नृतमः शचीवान्" ऋ०१०।२९।१ "नर्य्यो नृभ्यो हितः" भा०"चतुष्पदे नर्य्याय द्विपदे" यजु०१।२१।१ नरस्यापत्यम् बा० यत्। २मनुष्यमात्रे च "अपो नर्य्याः सुजातः" निरु० ११।२६ धृतास्यचमधिस्योक्तं "मनुष्यः नृभ्योहितो नर्य्यः" "क्रोतौ यत्तत् सुरेतसमप्रभं नर्य्यापसम्" यजु० २१।२८ "नर्य्यं नरहितमपः कर्म यस्येति" वेददी०।

**नल** पु० नल-अच्। १दग्धभेदे पोटगले अमरः। "नलस्तु मधुरस्निग्धः कषायः कफरक्तजित्। दग्धो

कृदक्षियोन्यर्त्तिदाहपित्तविसर्पजित्" भावप्र० तद्गुणाः। "जरठच्छेदा नलघन्वयः" सा०द०। २सूर्य्यवंश्ये नृप-भेदे "रामस्य तनयो जज्ञे कुश इत्यभिविश्रुतः" इत्युपक्रमे "निषधस्य नलः पुत्रो नभः पुत्रो नलस्य तु" इति "युधनः सुतश्चैव ततो जज्ञे नलो नृपः। एष नाम स धर्मात्मा नलपुत्रो बभूव तु"। "नलौ द्वावेव विख्यातौ पुराणे भरतर्षभ!। वीरसेनात्मजश्चैकः यश्चेक्ष्वाकुकुलोद्भवः" हरिवं० १५अ० "नलौ द्वावेव विख्यातौ वंशे कश्यपसम्भवे। वीरसेन सुतश्चैवधश्च नराधिपः। एते वैवस्वते वंशे राजानो भूरिदक्षिणाः" मत्स्यपु० १२अ०। एवं वीरसेनस्य सूर्य्यवंशप्रत्वे स्थितेऽपि नैषधचरिते "क्षिप्राभुवंशस्य करीरमेव मामिति" उक्तेः चन्द्रवंशत्वम् तेन "आसीद्राजा नलोनाम वीरसेनसुतो नृप!" इति भा०व०५२अ० उक्तो वीरसेनः सूर्य्यवंश्यात् भिन्नएव भा०व० ६०अ० तत्पुत्र नलस्य इन्द्रसेनाख्यपुत्र इत्युक्तं सूर्य्यवंश्ययोर्नलयोस्तु पुत्रनामनी भिन्ने हरिवं०१५अ० इति नास्य सूर्य्यवंश्यता भा०व०५२अध्यायधि ७९अ० पर्य्यन्तो नलोपाख्यानं दृश्यम्। ततः संक्षिप्य दिङ्मात्रमत्र तच्चरितं प्रदर्श्यते। पुरा किल वीरसेनसुतः निषधदेशाधिपो नलनामा आसीत्। स च कलिप्रवेशात् पाशाक्षदुर्व्यसनितया पुष्करेण भ्रात्रा सह द्यूतदेवनात् सर्वस्वमहारयत्। अथ स द्यूतराज्यो दमयन्त्या सह वनं जगाम। तत्र महाकष्टमनुभवन् दमयन्तीं व्यसनासहिष्णुं मन्यमानश्च रात्रौ सुप्तां तां परित्यज्य पलायाञ्चक्रे। दमयन्ती तु प्रबुध्य बहु विलप्य पथिकसार्थेन सह भ्रात्रालयं गताऽपि नृपचिह्नतया भ्रात्रालयाऽप्रत्यभिज्ञातैव तत्सदनवास। अथ भीमादेशेन तदन्वेषणाय प्रेरिता दूतविशेषमेदेन तां दमयन्तीं ज्ञात्वा भीमाय न्यवेदयन्। ततस्तां ततः स्वगृहमानाय भीमो नलान्वेषणाय दूतान् प्रजिघाय। नलोऽपि तत्समये वनस्थे सङ्कटापन्नं कर्कोटनागं सङ्कटादुज्जहार। अथ प्रत्युपकारार्थया नागस्तद्देहस्थं कलिं तापयित्वा तस्य पदे दंशं तेन तस्य विषज्वालया तद्देहस्थः कलिरेव नितान्तसन्तापितः। नलस्तु तेन रूपान्तरमात्रमापः। स्वेच्छया पुनः स्वदेहप्राप्तिर्भविष्यतीति नागेन तस्मै वरे दत्ते तदुपदेशेन ऋतुपर्णस्य नृपस्य बाहुकतया प्रविश्य अश्वसारथ्यं चकार। अथ भैमीदूतेन तस्य वचनविशेषेण नलत्वं सम्भाव्य दमयन्तीं प्रति निवेदिते सा तेन सह पुनः स्वयंवरमिषेण दूतेन ऋतुपर्णमाजुहाव। तस्माच्चाक्षनैपुण्यं पथि दृष्ट्वा तन्नैपुण्यं शिक्षितुमिच्छुः तस्मै स्वकीयाक्षहृदयज्ञानदानविनिमयं चक्रे। अथ नलस्य तस्मादक्षज्ञानमात्रादेव देहात् कर्कोटकविषदग्धः कलिर्निर्ययौ। अथ कुण्डिनपुरे आगते दमयन्ती परिवर्त्तितरूपमपि नलं पाकादिकौशलेन तं नलं निश्चिकाय। अथ तेन रूपान्तरपरिवर्त्तनेन स्वरूपे सट्टीते भैम्याः सह मेलने जाते नितान्तं भीमसुतोऽथ नलं च प्रेषयामास निषधदेशम्। स च स्वदेशमागत्य स्वभ्रातारं पुष्करं देवनायाजुहाव। विदिताक्षज्ञानतया तं जिगाय च। इत्थं द्यूतहारितराज्योऽपि पुनर्लब्धराज्योऽभूदिति। "नलः सितच्छत्रितकीर्त्तिमण्डलः" "दष्टेऽपि तस्मिन् नलनामनि क्षते" नैष०। "कर्कोटस्य नागस्य दमयन्त्या नलस्य च। ऋतुपर्णस्य राज्ञश्च कीर्त्तनं कलिनाशनम्" भा०व० नलोपाख्याने। "पुण्यश्लोको नलोराजा पुण्यश्लोको युधिष्ठिरः" प्रातःस्मरणीयकीर्त्तने। ३पितृदेवभेदे कव्यवाडग्नौ १८३४ पृ० दृश्यम्। विश्वकर्म्मणः पुत्रे रामायणप्रसिद्धे वानरभेदे

"रामस्य वरदानाच्च शिरः पत्न्या बभूव ह। तस्मिन् दत्ते तदा कृत्वी ससृजुः सरितां पतिः। राघवं सर्वभाम्भस्त्वभिदं वचनमब्रवीत्। अयं सोम्य! नलोनाम तनयो विश्वकर्म्मणः। पित्रा दत्तवरः श्रीमान् प्रीतिमान् विश्वकर्म्मणः। एष सेतुं नलोलोके करोतु मयि वानरः। तमहं धारयिष्यामि यथा ह्येष पिता तथा। एवमुक्तो दधिमुखः ससृजाय नलस्ततः। अब्रवीद्वानरश्रेष्ठो वाक्यं रामो महाबलम्। अहं सेतुं करिष्यामि विस्तीर्णं सागरान्तरे। पितुः सामर्थ्यमासाद्य तत्त्वमाह नलो दधिः"। "मम मातुर्वरो दत्तो मन्दरे विश्वकर्म्मणा। मया तु सदृशः पुत्रस्तव देवि! भविष्यति। औरसस्य सुतोऽहं सदृशो विश्वकर्म्मणा। न चायङ्गमनुज्ञोः प्रभावान्नो गुणान्। समर्थश्चाप्यहं सेतुं कर्त्तुं वै वरुणालये। तस्मादद्यैव बध्नन्तु सेतुं वानरपुङ्गवाः" रामा०लङ्का०२२अ०। नलसेतुशब्देऽधिकं दृश्यम्। ५पद्मे न० राजनि०। [शब्दार्थे हेमच०।

**नलक** न० नल इव कायति कै-क। शाखास्थि नडक-

**नलकानन** पु० नलप्रधानं काननमत्र। १देशभेदे "क्षि-

ङ्किकाः कुलस्त्रीवेष सौहृदाः नलकानना:" भा०भी० ६अ० जनपदोक्तौ। ६त०। नलानां २वने च न०।

नलकिनी स्त्री नलकं नलाकारमस्ति विद्यतेऽत्र इनि ङीप्। जङ्घायां हेमच०।

नलकील पु० नल एव कीलोऽत्र। जातत्वि हेमच०।

नलकूवर पु० कुवेरसुते "यक्षराज्ञा कुवेरेण वरा लब्धाश्च पुष्कलाः। धनाधिपत्यं सख्यञ्च रुद्रेणामिततेजसा। सुरत्वं लोकपालत्वं सुतत्वञ्च नलकूबरम्" भा०व० ४८अ०। स च नारदशापेन व्रजे स्थावरतां प्राप्तः कृष्णेन पुनर्देवत्वमासादितः। तत्कथा भाग० १०स्कन्धे यथा "कृष्णस्तु यदुकुलेषु व्यपायां मातरि प्रभुः। ऋद्धाशोदर्जुनौ पूर्वं गुह्यकौ धनदात्मजौ"। "नारदशापेन वृक्षतां प्राप्तौ सदात्। नलकूबरमणिग्रीवाविति ख्यातौ श्रियान्वितौ" ६अ० "वृक्षत्वातुचरौ भूत्वा सुदप्तौ धनदात्मजौ। कैलासोपवने रम्ये मन्दाकिन्यां मदोत्कटौ। वारुणीं मदिरां पीत्वा मदाघूर्णितलोचनौ। स्त्रीजनैरनुगायद्भिश्चेरतुः पुष्पिते वने। अलं प्रविश्य गङ्गायामम्भोजवनराजिषु। चिक्रीडतुर्युवतिभिर्गजाविव करेणुभिः। यदृच्छया च देवर्षिर्भगवांस्तत्र कौरव!। अपश्यन्नारदो देवौ श्रीमाणौ समबुध्यत। तं दृष्ट्वा व्रीडिता देव्यो विवस्त्रा शापशङ्किताः। वासांसि पर्य्यधुः शीघ्रं विवस्त्रौ नैव गुह्यकौ" "यदिमौ लोकपालस्य सुतौ भूतौ तमःश्रुतौ। न विजानीतः सुदुर्मदौ। अत इतः स्थावरतां स्थातां नैवं यथा पुनः। स्मृतिः स्यात् मत्प्रसादेन तत्रापि मदनुग्रहात्। वासुदेवस्य सान्निध्यं लब्धा दिव्यशरच्छते। वृत्ते स्वर्लोकतां भूयो लब्धभक्ती भविष्यतः" १०अ०

नलद न० नलं जलमत्र दीयते दो-खण्डने क। १उशीरे (वेणारमूल) उशीरशब्दे १२०६पृ० तद्गुणा उक्ताः २पुष्परसे ३जटामांसाच्च मेदि० "करिष्यां सदृशे धनदादनदा" किरा० "नलदेनानुलिम्पन्ति" "नलदमाला प्रतिसुञ्चन्ति" आश्व०श्रौ०६।१०।२।४। तत्प्रत्ययस्य किच्चरा० ङ्। ४नलदिक तद्विक्रेतरि त्रि० स्त्रियां ङीप्। नलं ददाति दा-क। ५नलदातरि त्रि० "स्यादस्या नलदं विना न दहने तापस्य कोऽपि क्षमः" नैषध०। रुद्राक्षनृपस्य धनाख्यां जाते ६कन्याभेदे स्त्री "धनदा चैव राजेन्द्र! नलदा सुरसापि च" हरिवं० २१अ० तत्कन्योक्तौ।

नलपट्टिका स्त्री नलनिर्मिता पट्टिकेव। (दरमा) ख्याते पदार्थे हारा०। [अमरः।

नलमीन पु० नलः नलाश्रयः मीनः। (चिङ्गडी) मत्स्यभेदे

नलसेतु पु० नलवानरकृतः सेतुः श०त०। समुद्रोपरि नलवानरकृते सेतौ "अस्ति तत्र नलोनाम वानरः शिल्पिसम्मतः। त्वष्टुर्देवस्य तनयो बलवान् विश्वकर्मणः। स यत् काष्ठं तृणं वापि शिलां वा क्षेप्स्यते भवि। सर्वं तद्वारयिष्यामि स ते सेतुर्भविष्यति। इत्युक्त्वान्तर्हिते तस्मिन् रामो नलमवाच ह। कुरु सेतुं समुद्रे त्वं यन्मोक्षसि मतो मम। तेनोपायेन काकुत्स्थः सेतुबन्धमकारयत्। दशयोजनविस्तारमायतं शतयोजनम्। नलसेतुरिति ख्यातो योऽद्यापि प्रथितो भुवि" भा०व० २८२अ०।

नलिका स्त्री नलः तद्रूपाकारोऽस्त्यस्याः ठन्। १नाड्यां(नली) इति ख्याते सुगन्धिद्रव्यभेदे उत्तरपथप्रसिद्धे (पँठारी) प्रसिद्धे प्रवालाङ्कुरौ २वज्रभेदे च "नलिका विद्रुमलताकपोतचरचा नटी। धमन्यङ्कुतकेशी च निर्मज्जा शुषिरा नली। नलिका शीतला लघ्वी चक्षुष्या कफपित्तहृत्। लघ्वङ्गकरीषातृष्णाक्लमकण्डूज्वरापहा" भावप्र०। "काशाः कुशा वा नलिका नलो वा" ह०सं० ५४अ०। दण्डार्थशब्दे द्रव्यम्। तन्तुवायानां वयनसाधने २द्रव्यभेदे (नली) ३तदाकारे अस्त्रे च।

नलित पु०नल-क्त। (नालता)शाकभेदे द्रव्यगुणाभिधानम्। "मधुरो नलितः पित्तनाशकः शुक्रवर्द्धकः" तद्गुणोक्तिः

नलिन न० नल-क्ते इनन्। १पद्मे २जले ३नौलिकायां हेमच०४सारसखगे पुंस्त्री०अमरः। ५कृष्णपाकफले प्राचीनामलके (पानि कामला) पु० अल्पच० "नलिनं नलिनं विदधती वसतीमस्मृतीं तदीक्षते" नैषः "नलिनाभवक्त्रः" रघुः।

नलिनी स्त्री नडाः (नाडाः) सन्त्यत्र पुष्करा० इनि ङीप् डस्य नः। १पद्मिन्यां "आकोशकोकषदतां दधते नलिन्यः" माघः। २पद्मयुक्तदेशे ३कमलाकरे ४नदीभाग्रे मेदि०। नलानां नलयुक्तानां समूहः खञ्। इनि। पद्मसमूहे ५नलिकायां राजनि०। ६नारिकेले त्रिका० "नलिनीवाम्बुसम्पत्त्या वृद्धया श्रीः परिपास्यते" कामन्द० "ततोऽविदूरे नलिनीं प्रभूतकमलोत्पलाम्। सीताङ्गस्पर्शदाक्षार्त्तः परमां रामः समासदत्" भा०व०२७८अ०। "एषा सा दृश्यते पम्पा नलिनी चित्रकानना" रामा०

६।१०८अ० "प्रयाता नन्दनस्येव नलिनी सरितां वरा" हरिवं०६५अ०"नलिनी सेतुबन्धना"कुमा०। ७व्योमनद्याम् सा च "ब्रह्मलोकादपक्रान्ता सप्तधा प्रतिपद्यते। वक्षोऽसारा नलिनी पावनी च सरस्वती। जम्बूनदी च सीता च गङ्गा सिन्धुश्च सप्तमी" भा०भी० ६अ० उक्ता पद्मदशाक्षरपादके टक्कन्दोभेदे "सगणैः शिवबाणैर्मितैर्गदिता नलिनी" ह०र०टी०। तल्लक्षणञ्च०।

**नलिनीखण्ड** न० नलिनीनां समूहः कमला० समूहे खण्डच्। पद्मिनीसमूहे।

**नलिनीनन्दन** न० नलिन्या नन्दयति नन्दि-ल्यु ३त०। देवोद्यानभेदे "वनं चैत्ररथं दिव्यं नलिनीनन्दनं वनम्। यो विनाशितवान् क्रोधात् देवोद्यानानि वीर्यवान्" रामा० आरण्य० २६

**नलिनीरुह** न०नलिन्यां रोहति रुह-क। कमले राजनि०

**नलिनेशय** पु० नलिने ब्रह्मनाभिकमले शेते-शी-अच् अलुक्स०। विष्णौ।

**नली** स्त्री नल-अच् गौरा० ङीष्। १मनःशिलायां विश्वः २नलिकायां भावप्र०। [शिवलिङ्गभेदे शिवपु०।

**नलेश्वर** पु०न० नलेन स्थापित ईश्वरो यत्र। नलस्थापिते

**नलोत्तम** पु० नलेषु उत्तमः। देवनले राजनि०।

**नलोदय** पु० कालिदासकृते काव्यभेदे

**नलोपाख्यान** न० नलस्योपाख्यानं यत्र। भारतवनपर्वान्तर्गते अवान्तरपर्वभेदे "नलोपाख्यानमेव" भा०आ०१अ०। तच्च नलशब्दे दृश्यम्।

**नल्य** त्रि० नलस्यादूरदेशादि० अण्। य। नलस्यादूरदेशादौ

**नल्व** पु०नल-वा०व। चतुःशतहस्तमिते अमरः शतहस्तमिते काव्यः "रावणस्य शरीरन्तु पञ्चनल्वान्तुविस्तृतम्" रामा०लङ्का०८२।३२ श्लो० "नल्वमात्रपरीणाहो वनच्छायो वनस्पतिः" भा०आ० १६४अ०।

**नल्ववर्त्मगा** स्त्री नल्वमितं वर्त्म गच्छति गम-ड। १काकाक्षीलतायां शब्दच० २तन्मितपथगामिनि त्रि०।

**नव** पु०नु-स्तवे भावे अप्। १स्तवे मेदि०कर्मणि अप्। २नूतने त्रि० अमरः ३रत्नपुनर्नवायाम् पु० राजनि० "नवाम्बुभिर्भूरिविलम्बिभिर्घनाः" रघु० "नवं नवं प्रीतिरहो करोति" "नवानधोधोदृषतः पयोधरान्" माघः ४उशीनरस्यपुत्रभेदे पु० ५तत्कन्यायां स्त्री "उशीनरस्य पत्न्यस्तु पञ्च राजर्षिसत्तमाः। नृगा कृमिर्नवा दर्वा पञ्चमी च दृषद्वती। उशीनरस्य पुत्रास्तु पञ्च तासु कृतोद्वहाः। तपसा चैव महता जाता वृद्धस्य चात्मजाः। नृगायास्तु नृगः पुत्रः कन्या कृमिरजायत। नवायास्तु नवः पुत्रो दर्वायाः सुव्रतोऽभवत्। दृषद्वत्यास्तु संजज्ञे शिबिरौशीनरो नृपः" हरिवं० २१अ०।

**नवक** न० नवावयवयवः संख्यायाः कन्। १नवसंख्यायाम् नवपरिमाणमस्य। २नवसंख्यान्विते त्रि० नवनवकशब्दे वक्ष्यमाणदर्शितानीव नवनवकान्युद्धृत्य कार्यो०ख० ४०अ० दृश्यं नवकसङ्ख्या यथा

"एतद्भवानाह्नवकं श्रुत्वा श्रियमवाप्नुयात्। अन्यच्च नवकं वक्ष्मि सर्वेषां स्वर्गमार्गदम्। सत्यं शौचमहिंसा च ह्रीनिग्रहौ दया दमः। ब्रह्मचर्यं इन्द्रियाक्षोभः सर्वेषां धर्मसाधनम्। अभयञ्च नवमिं श्रुतां स्वर्गमार्गप्रदीपिकाम्। सतामभिमतां पुण्यां सत्पुरुषो नावसीदति"। "इति वीरादकः प्रोक्तः स्वयम्भाद्यगणोद्भवः। आगन्तुकेन सहितो नवकः परिकीर्त्यते" भा०व०२२७अ० कानिचित् नवकानि सा०ति० उक्तानि यथा

"सुस्थिता नवधा नित्या सृष्टे मन्त्रं नवार्णकम्। नवकं शक्तितत्त्वानां तत्त्वरूपा महेश्वरी। नवकं पीठशक्तीनां ह्रङ्कारादीन् रवानपि। माणिक्यादीनि रत्नानि नववर्णयुतानि च। नवकं प्राणदूतीनां मण्डलं नवकं शुभम्। यदृच्छयावाप्तकं लोके सर्वमस्या उदाहृतिं"। तत्र शक्तितत्त्वनवकं तत्रैव प्रथमपटले "सच्चिदानन्दविभवात् सकलात् परमेश्वरात्। आसीच्छक्तिस्ततो नादो नादाद्विन्दुसमुद्भवः। परशक्तिमयः साक्षात् त्रिधासौ भिद्यते पुनः" नादविन्दूनां प्रत्येकं त्रिधाभेदात् नवसंख्या। तेषां भेदाश्च तत्रैवोक्ता यथा "विन्दुर्नादो बीजमिति तस्य भेदाः समीरिताः। विन्दुः शिवात्मको बीजं शक्तिर्नादस्तयोर्मिथः। समवायः समाख्यातः सर्वागमविशारदैः। रौद्री विन्दोश्चतो नादात् ब्रह्मा बीजादजायत। वामा तास्याः सुतस्मात् रुद्रब्रह्मरमाधिपाः। विघ्नानेशात्क्रियात्मानो वह्नीन्दुर्कस्वरूपिणः। भिद्यमानात् पराद्विन्दोरव्यक्तात्मा रवोऽभवत्"। पीठशक्तीनां नवकं तत्तन्मन्त्रभेदे तत्तत्प्रकरणे तत्रोक्तम्। ह्रङ्कारादिरस्य नवकमलङ्कारे प्रसिद्धं नवरत्नशब्दे दृश्यम्। रत्ननवकं नवरत्नशब्दे दृश्यम् तच्च ६पटले तत्रैवोक्तम्। वर्णानां नवकम् अकचट तप यशङ्खानां नवकं ७पटले तत्रोक्तम्। मण्डलनवकं तत्रैव ८पटले "चतुरस्रां भुवं भित्त्वा कोष्ठानां नवकं लिखेत्। पूर्वकोष्ठादिषु लिखेत् सप्तवर्गां

नतक्रमात्। लघ्वीशे मध्यकोष्ठे खरयुग्मक्रमाल्लिखेत्" इत्युक्तम्। माणवटुतीनां नवकं २२पटले तत्रोक्तं दृश्यम्।

**नवकारिका** स्त्री नवं करोति क-ण्वुल्। १नवोढायां स्त्रियां शब्दमा० कर्म०। २नूतनायां कारिकायां च। कारिका क्रिया कर्म०। ३नूतनत्वे च।

**नवकालिका** स्त्री नवकं नूतनमनति अच-भूषणे ण्वुल्। नवीने क्षारा० अभिधानात् स्त्रीत्वम्।

**नवग्रह** पु० कर्म० संज्ञात्वात् न द्विगुः। "सूर्यचन्द्रौ मङ्गलश्च बुधश्चापि बृहस्पतिः। शुक्रः शनैश्चरो राहुः केतवश्च नव ग्रहाः" इत्युक्तेषु नवसु ग्रहेषु खगोलशब्दे तत्कक्षादिमानमुक्तं तद्भगणादिमानमत्रोच्यते।

रवेः "योजनानां सहस्राणि भास्करस्य रथो नव। दैर्घाद्दण्डस्तथैवास्य द्विगुणो मुनिसत्तम!। सार्द्धकोटिस्तथा सप्त नियुतान्यधिकानि वै। योजनानान्तु तस्यापि चक्रं यत्र प्रतिष्ठितम्। चत्वारिंशत् सहस्राणि द्वितीयोऽक्षो व्यवस्थितः। पञ्चान्यानि तु सार्द्धानि मुनेनस्य महामते!। यत्प्रमाणश्च तयोः प्रमाणं तद्गुणार्द्धयोः। तुल्योऽक्षतद्गुणार्द्धेन ध्रुवाधारो रथश्च वै। द्वितीयेऽक्षे तु तच्चक्रं संस्थितं मानसाचले। ऋचश्च सप्त छन्दांसि तेषां नामानि मे शृणु। गायत्री च बृहत्युष्णिग्जगती त्रिष्टुबेव च। अनुष्टुप् पङ्क्तिरित्युक्ताश्छन्दांसि हरयो रवेः। स रथोऽधिष्ठितो देवैरादित्यैर्ऋषिभिस्तथा। गन्धर्वैरप्सरोभिश्च यामचीवर्षराक्षसैः। स्तुवन्ति तनयः सूर्यं गन्धर्वैर्गीयते पुरः। नृत्यन्त्योऽप्सरसो यान्ति सूर्यस्यानु निशाचराः। यजन्ति पन्नगाः यज्ञैः क्रियतेऽभीशुसंग्रहः। बालखिल्यास्तथैवैनं परिवार्य समासते। सोऽयं सप्तगणः सूर्यमण्डले मुनिसत्तम। स्थितोष्णवारिशीतानां हेतुत्वं समुपागतः"।

इन्दोः "रथश्चित्रकः सोमस्य कुन्दाभास्तस्य वाजिनः। वामदक्षिणतो युक्ताः दश तेन चरत्यसौ"।

बुधस्य "वाय्वग्निद्रव्यसम्भूतो रथश्चन्द्रसुतस्य च। पिशङ्गैस्तुरगैर्युक्तः सोऽष्टाभिर्वायुवेगिभिः। सप्तरश्मिः सप्तकर्णो युक्तोऽभूत्सप्तभिर्हयैः"।

शुक्रस्य "सोपासङ्गपताकस्तु शुक्रस्यापि रथो महान्। अष्टाश्वः काञ्चनः श्रीमान्"। [वङ्गिसम्भवैः"।

कुजस्य "भौमस्यापि रथो महान्। पद्मरागास्तथैवास्य संयुक्तो

शुरोः "अष्टाभिः काञ्चननिभैर्वाजिभिः काञ्चने रथे। तिष्ठत्यरति वै वर्षं राशौ राशौ बृहस्पतिः"।

शनेः "आकाशसम्भवैरश्वैः शबलैः छन्दसं युतम्। समारुह्य शनैर्याति मन्दगामी शनैश्चरः"।

राहोः "खर्भानोस्तुरगाश्चष्टौ भङ्गाभा धूसरं रथम्। सकृद्युक्तास्तु मैत्रेय! वहन्त्यविरतं सदा। आदित्यादिः सुतो राहुः सोमं गच्छति पर्वसु। आदित्यमेति सोमाच्च पुनः सौरेषु पर्वसु"।

केतोः "तथा केतुरथस्याश्वा अष्टौ ते वातरंहसः। धूम्रवर्णाभा वाचारसन्निभास्याः। एते मया यहाणां वै तवाख्याता रथा नव" विष्णुपु०।

तन्त्रोक्ते नवविधे स्नानादौ अभिषे २नवग्रहभेदे यहशब्दे २७३५ पृ० दृश्यम्। तेषामुत्पत्त्यादिकं उत्तरखण्डे तत्रोक्तं यथा

"अथातो यहोत्पत्तिमध्यायं व्याख्यास्यामः। नव स्कन्दादयः प्रोक्ता बालानां ये ग्रमे यहाः। श्रीमतो दिव्यवपुषो नारीपुरुषविग्रहाः। एते गुहस्य रक्षार्थं शक्तिकोमाग्निसूनिभिः। सृष्टाः शरवणस्थस्य रक्षितस्वाक्षतेजसा। स्त्रीविग्रहा यहा ये तु नानारूपा सवेरिताः। शङ्कोमाशक्तिकानान्तु ते भागा राजसा मताः। नैगमेयस्तु पार्वत्या सृष्टो मेषाननो यहः। कुमारधारी देवस्य गुहस्याक्षसमः सखा। स्कन्दापस्मारसंज्ञो यः सोऽग्निनाग्निसमद्युतिः। स च स्कन्दग्रहो नाम विशाख इति चोच्यते। स्कन्दः सृष्टो भगवता देवेन त्रिपुरारिणा। बिभर्त्ति चापरां संज्ञां कुमार इति स यहः। बालक्रीडाधरो योऽयं देवो रुद्राग्निसम्भवः। मिथ्याचारेषु भगवान् स्वयं नैव प्रवर्त्तते। कुमारः स्कन्दसामान्यादत्र केचिदपण्डिताः। यद्भूलीलाप्रविज्ञाना ब्रुवते देहचिन्तकाः। ततो भगवति स्कन्दे सुरसेनापतौ कृते। उपतस्थुर्यहाः सर्वे दीप्तशक्तिधरं गुहम्। ऊचुः प्राञ्जलयश्चैनं इति नः संविधत्स्व वै। तेषामर्थे ततः स्कन्दः शिवं देवमचोदयत्। ततो यहांस्तानुवाच भगवान् भगनेत्रहृत्। तिर्यग्योनिं मानुषत्वं दैवत्वं त्रितयं जगत्। परस्परोपकारेण वर्त्तते धार्य्यतेऽपि च। देवा मनुष्यान् पीषन्ति तैर्यग्योनींस्तथैव च। वर्त्तमानैर्यथाकालं शीतवर्षौषधादिभिः। इज्याङ्गविनमस्कारजपहोमव्रतादिभिः। नराः सम्यक् प्रयुञ्जैश्च पीषन्ति त्रिदिवेश्वरान्। भागधेयं विभक्तञ्च शेषं किञ्चिच्च विद्यते। तदुद्धारं सुरा हव्यिर्भोक्ष्येव भविष्यति। कुरुध्वं शेषु नेच्छन्ते

देवाः पितर एव च। ब्राह्मणाः साधवश्चैव गुरवोऽतिदयस्तथा। निष्टताचारशौचेषु परपाकोपभोजिषु। उच्छन्नवह्निभिक्षेषु भिक्षकांक्षोपभोजिषु। मृष्टेषु तेषु ये बालास्तान् मृष्टीध्वमशङ्किताः। तत्र वो विपुला हृत्तिः पूजा चैव भविष्यति। एवं यहाः सप्तत्यन्ना बालान् मृष्टान्नि चाश्नतः। यहोपसृष्टा बालास्तु दुश्चिकित्स्यतमा मताः। वैकल्यं मरणं चापि ध्रुवं स्कन्दग्रहे मतम्। स्कन्दग्रहोऽत्युग्रतमः सर्वेष्वेव यतः स्मृतः। अन्यो वा सर्वरूपस्तु न साध्यो यह उच्यते"।

अथ रव्यादिग्रहाणां स्वरूपादि बृहज्जातकोक्तं प्रदर्श्यते "कालात्मा दिनकृन्मनस्तुहिनगुः सत्वं कुजो भ्रो वचो जीवो ज्ञानसुखे सितश्च मदनो दुःखं दिनेशात्मजः। राजानौ रविशीतगू क्षितिसुतो नेता कुमारो बुधः क्षरिदानवपूजितश्च सचिवौ प्रेष्यः सहस्रांशुजः" बृहज्जा०। "कालस्यात्मा कालात्मा दिनकृत् सूर्यः। तस्यैव तुहिनगुश्चन्द्रोमनः तुहिनेन हिमेन सदृशः शीतलागावोरश्मयो यस्य स तुहिनगुः। सत्वं कुजो भौमः सत्वस्य तत्त्वं "अधिकारकरं सत्वं व्यसनाभ्युदयागमे" सत्वशब्दोऽत्र शौर्यपर्यायः तत्र सिंहादीनामस्ति तथा च एकाक्षिनि वनवासिन्यराजलक्षणात्तीतशास्त्रे। सत्वस्थिते सूगयतौ राजेति गिरः परिपठन्ति। उत्कृष्टतरस्वभाव इत्यर्थः [भ्रो बुधो वचो गोः जीवो बृहस्पतिः ज्ञानसुखे ज्ञानञ्च सुखञ्च ज्ञानसुखे। सितः शुक्रो मदनः कामः। दिनेशो दिनेशः सूर्यः तस्यात्मजः पुत्रः शनैश्चरो दुःखम्। अत्र कालपुरुषस्य कालस्य सर्वगतस्य प्रदर्शनार्थम्। अत्र न केवलं कालपुरुषस्य मेषाद्याराशयः शिरःप्रभृत्यङ्गविभागेन स्थिताः यावदादित्यादयश्चाऽत्र विभागेन सर्वस्य जगतः स्थिताः। प्रयोजनम् पीडितैर्पहैर्देवतोऽपि तदङ्गभावात्प्रपीडनं कर्तव्यम् पुष्टैः पुष्टिरिति। न केवलं यावत् जन्मनि बलवद्भिर्पहैरेत एव भावा आत्मादयः शुभा भवन्ति दुर्बलैर्दुर्बलाः किन्तु सौरस्य विपरीतम् तथा च सारावल्याम् "आत्मादयो गगनगैर्बलिभिर्बलवत्तराः। दुर्बलैर्दुर्बला ज्ञेया विपरीतं शनेः स्मृतमिति" राजानावित्यादि रविरादित्यः शीतगुश्चन्द्रः एतौ राजानौ नृपौ। क्षितिर्भूमिरस्याः सुतः पुत्रोऽङ्गारकः स नेता सेनापतिः। बुधः कुमारो युवराजः राजपुत्र इति केचित्। स्फरिर्दृहस्पतिः दानवपूजितः शुक्रः च एतौ सचिवौ मन्त्रिणौ। सहस्रांशुः सूर्यस्याज्ञातः शनैश्चरः स प्रेष्यो दासः। ननु जगत्यानयनकरणे शनैश्चरः प्रेष्यः किमत्रोच्यते प्रेष्योऽपि स्वकर्मणां पालक एव। प्रयोजनम् जन्मनि प्रश्नकाले बलवानुपचयस्थो यहो भवति तदुक्तो राजादिकस्य कार्यसाधनको भवति अन्यथा हानिकरः" "रक्तश्यामो भास्करो गौर इन्दुर्नीलुश्चाङ्गारकगौरश्च शुक्रः। दूर्वाश्यामोज्ञो गुरुर्गौरगात्रः श्यामः शुक्रो भास्करिः कृष्णदेहः। वर्णैस्ताम्रसिताऽतिरक्तहरितव्याप्तैतविचित्रासितावक्रस्वस्वनिजकेशवेन्द्वर्कचिकाः स्वर्वादिनाथाः क्रमात्। प्राग्द्वारविशुक्लोहिततमःसौरेन्दुवित्सूरयः पीतेन्द्वर्कमहीसुतार्कतनयाःपापा बुधस्तैर्युतः। बुधस्तयसुतौ नपुंसकाख्यौ शशिशुक्रौ युवती नराश्च शेषाः" शिखिभूखपयोमरुद्गणानां वह्निनो भूमिसुतादयः क्रमेण:"

**नवग्व** त्रि० नवभिर्मासैर्गच्छति गम–उषा० ङ्वु। नवभिर्मासैरवाप्रफलतया उच्यते। "सेनामयातयन्त क्षितयो नवग्वाः" ऋ० ।।३३।६ "सप्तमासोनानां मध्ये ये नवभिर्मासैरवाप्रफला उच्यितास्तेषां नवग्वा इति संज्ञा" भा० २नवीनगतियुते च "अङ्गिरसो न पितरो नवग्वाः" इमास्तचमधिकृत्य निरु० ।।।१६। उक्तं "नवग्वा नवीन गतयः"।

**नवचत्वारिंशत्** स्त्री नवाधिका चत्वारिंशत्। ।नवपञ्चाशत्संख्यायां २तदन्विते च। ततःपूरणे डट्। नवचत्वारिंश तत्पूरणे त्रि०। स्त्रियां ङीप्। तदर्थे तमप्। नवचत्वारिंशत्तम तत्पूरणे त्रि०।

**नवच्छात्र** पु० कर्म०। प्रथमाध्ययनप्रवृत्ते त्रिका०।

**नवच्छिद्र** न० नव छिद्राणि यत्र। देहे देहस्य नवद्वारवत्त्वात् तथात्वम्। नवद्वारशब्दे दृश्यम्।

**नवज्वर** पु० कर्म०। तरुणज्वरे "तरुणं तु ज्वरं पूर्वं लङ्घनेन जयं नयेत्। यामदोषमविज्ञाय लङ्घयेत्तु यथा विधि" भावप्र०। [२नवतिसङ्ख्यापूरणे त्रि०-नवतिशब्दे दृश्यम्

**नवत** पु० नू–अतच्। ।कुबेरे करिभूषणार्थे कम्बले हेमच०।

**नवतन्तु** पु० कर्म०। ।नवीने तन्तौ। बहु०। २तद्युक्ते पटे च ३विश्वामित्रपुत्रभेदे "नवतन्तुर्बकनखः समनोवतिरेव च" भा०आनु० ४अ० तत्पुत्रोक्तौ।

**नवति(ती)** स्त्री नव दशतः परिमाणमस्य "षड्विंशतीत्यादिना" पा० नि० वा ङीप्। (नब्बुद) ।संख्यायां २तत्सङ्ख्यान्विते च "द्वित्वं त्रितीयो नवतिं नवाधिकाम्" दुर्गः "वीप्सास्वो नवतेः काय्यः षष्टेः त्रिवी यतस्य तु"

महः। ततः पूरणे डट्। नवत नवड्ह्यापूरणे त्रि॰ स्त्रियां ङीप्। पूरणे तमप्। नवतितम तद्ह्यापूरणे त्रि॰।

**नवतिका** स्त्री नवाय नूतनत्वाय तेकति तिक—गतौ क। इत्वम्। नवतिकायां टारा॰। स्वार्थे क। २नवतिसंख्यायाञ्च।

**नवदण्डक** न॰ नवो दण्डोऽत्र कप्। राज्ञां ज्ञवभेदे "मनोहरं च कनकदण्डं च नवदण्डकम्। ज्ञत्रं तु त्रिविधं ज्ञेयं त्रिविधानां महीभुजाम्" युक्तिकल्पतरुः।

**नवदश** पु॰ नव च दश च संख्याऽस्य डट्। ज्ञनविंशतिसंख्यायुक्ते "प्रतूर्तिरष्टादशकपो नवदशः" यजु॰१४।२२ "तपोरूपो नवदशः स्तोमः यद्वा संवत्सरस्तपः शीतोष्णवर्षैस्तपतीति स नवदशः द्वादश मासाः षड्ऋतवः संवत्सर इति तद्रूपोऽसि" वेददी॰। "य एव नवदशस्तोमस्तदुपदधात्यथो संवत्सरोवाव तपो नवदशस्तस्य द्वादश मासाःषड्ऋतवः संवत्सर एव तपो नवदशस्तद्यत्तमाद्व तपति तदेव तद्रूपम्" शत॰ब्रा॰ ८।४।१।१४

**नवदशन्** त्रि॰ नवाधिका दश। (ज्ञनिश) १संख्यायां २तत्संख्यायुक्ते च। च अमरः।

**नवदल** न॰ कर्म॰। १नवीने पत्रे पद्मकेशरान्विल्वे २पत्रे

**नवदीधिति** पु॰ नव दीधितयोऽस्य। मङ्गलग्रहे जटा॰।

**नवदुर्गा** स्त्री नवसंख्यिता दुर्गा कर्म॰ संज्ञात्वात् न ह्रियुः। देवीनवके "प्रथमं शैलपुत्री च द्वितीयं ब्रह्मचारिणी। तृतीयं चन्द्रघण्टेति कूष्माण्डेति चतुर्थकम्। पञ्चमं स्कन्दमातेति षष्ठं कात्यायनीति च। सप्तमं कालरात्रिश्च महागौरीति चाष्टमम्। नवमं सिद्धिदा प्रोक्ता नव दुर्गाः प्रकीर्त्तिताः। उक्तान्येतानि नामानि ब्रह्मणैव महात्मना" ब्रह्मवै॰पु॰। "नवदुर्गे गुणाश्रिते" दुर्गोपनिषत्। "पत्रिके नवदुर्गे त्वं महादेवि! मनोरमे!" नन्दिकेश्वरपुरा॰।

**नवदोला** स्त्री कर्म॰। नवीनदोलायाम्। प्रथमं तदारोहण दिनादि समयप्रदीपे उक्तं यथा "उपेन्दुमूलाग्निधिवाग्निवर्जं शस्तेन्दुतारातिथिलग्नयोगे। विष्टिव्यतीपातं यमाहृवर्जं दोलाधिकारोहणमाद्यमिष्टम्"।

**नवद्वार** न॰ नव द्वाराण्येव चित्तदृत्त्यादेर्बहिर्गमनसाधनत्वात् यत्र। देहे तत्र नवभिर्द्वारैश्चित्तादेर्बहिर्गमनात्तस्य तथात्वम्। तथा हि द्वे श्रोत्रे द्वे चक्षुषी द्वे नासिके च सप्तमेकमिति शीर्षस्थानि सप्त, द्वे पायूपस्थे अधःस्थे इति नवच्छिद्ररूपाणि द्वाराणि देहे सन्ति। "नवद्वारे पुरे देही हंसो लेलायते बहिः" श्वेताश्व॰ ३।१८। "नवद्वारे गिरिसि सप्त द्वाराणि हे अवाची यत्र तत्र पुरे देही विज्ञानात्मा भूत्वा कार्यकारणोपाधिः सन् हंसः परमात्मा कल्पविद्यात्मकं कार्यमिति। लेलायते चलति बहिर्विषयग्रहणाय" भा॰। देहरन्ध्राणां नवसंख्यकत्वात् रज्जुगवाक्ष लक्षितलक्षणया नवसंख्याबोधकत्वम्।

**नवधा** अव्य॰ नवन्+प्रकारे धाच्। नवप्रकारे "तृप्तिर्नवधाऽष्टधा सिद्धिः" भा॰का॰। "नवधा गुणिता क्रिया" भा॰ति॰

**नवधातु** पु॰ नवसंख्यिता धातवः। नवप्रकारे धातुभेदे "हेमतारारजागाश्च ताम्ररङ्गे च तीक्ष्णकम्। कांस्यकं कान्तलोहञ्च धातवो नव कीर्त्तिताः" शब्दार्थचि॰।

**नवन्** त्रि॰ ब॰व॰। नञ—ञ्नविन् वा॰ गुणः। १संख्याभेदे (नव) संख्यायां २तद्युक्ते च।

**नवनवक** न॰ नवसंख्यितं नवकम्। दशसंख्यितोक्ते ज्ञातव्ये एकाङ्गीतिपदार्थे

"सुधा नव सदृक्षस्थे ग्रहेषानि नवैव तु। तथैव नवकर्माणि विकर्माणि तथा नव। प्रच्छन्नानि नवान्यानि प्रकाश्यानि तथा नव। सप्तकानि नवान्यानि निष्कानि नवैव तु। अदेवानि नवान्यानि वस्तुजातानि सर्वदा। नवका नव निर्दिष्टा सदृक्षोन्नतिकारकाः। सुधा वक्ष्यानि वक्ष्यामि विशिष्टे सदृमागते। मनश्चक्षुर्वचं वाचं सौख्यं दद्याच्चतुष्टयम्। अभ्युत्थानमधिक्षामश्च पृच्छाऽऽपप्रियान्वितः। उपासनमनुव्रज्या कार्य्याण्येतानि यत्नतः। देवद्वानानि चान्यानि भूमिरापस्तृणानि च। पादशौचं तथाभ्यङ्ग आश्रयः शयनन्तथा। विशिष्टाद्यं यथाशक्ति नाख्यानन्तु सदृशे वसेत्। सप्तकं चार्थिने देयमेतान्यपि सदा सदृशे। सन्ध्या स्नानं जपो होमः स्वाध्यायो देवतार्चनम्। वैश्वदेवं तथातिथ्यमेतत्सुकृतमुच्यते। पितृदेवमनुष्याणां दीनानाश्रितपक्षिणाम्। मातापितृगुरूणाञ्च संविभागो यथार्हतः। एतानि नव कर्माणि विकर्माणि तथा पुनः। अनृतं पारदार्य्यञ्च तथाऽभक्ष्यस्य भक्षणम्। अगम्यागमनापेयपानं स्तेयञ्च हिंसनम्। अशौचकर्माचरणं आर्त्तधर्मबहिष्कृतम्। नवैतानि विकर्माणि तानि सर्वाणि वर्जयेत्। आयुर्वित्तं सदृच्छिद्रं मन्त्रमैथुनभेषजम्। तपोदानावमानौ च नव गोप्यानि यत्नतः। प्रायोम्यस्तपणद्विज दानाध्ययनविक्रयाः। कन्यादानं इषोत्सर्गोरहःपापमकृत्सनम्। प्रकाश्यानि नवैतानि सदृक्षाश्चनिषेवता। माता-

पितृगुरौ मित्रे विनीते चोपकारिणि । दीनानाथविशिष्टेभ्यो दत्तन्तु सफलं भवेत् । धूर्त्ते वन्दिनि मन्दे च कुवैद्ये कितवे शठे । चाटुचारणचौरेभ्यो दत्तं भवति निष्फलम् । सामान्यं याचितं न्यास आधिर्दारास्तथैव तद्धनम् । क्रमायातन्तु निक्षेपः सर्वस्वङ्गान्यवे सति । आपत्स्वपि न देयानि नव वस्तूनि सर्वदा । यो ददाति स मूढात्मा प्रायश्चित्तीयते नरः । नवनवकेत्तारमनुज्ञानपरं नरम् । इह लोके परे च श्रीः स्वर्गस्थञ्च न मुञ्चति" ।

**नवनवति** स्त्री नवाधिका नवतिः । १एकोनशतसंख्यायां १तदयुते च ।

**नवनाडीचक्र** न० २८१६पृ० चक्रशब्दोक्ते चक्रभेदे ।

**नवनी** स्त्री नवं नीयते नी–ड गौरा० ङीष् । नवनीते "कैवर्त्तकीनां नवनीनां परतरं सदा । खड्डुकानां शर्करायां खल्लिकानाञ्च यत्नतः" ब्रह्मवै० ब्रह्मख० ३५ अ० ।

**नवनीत** न० नवं नीयते ऽच नी–क्त । (माखन) पयःसार भेदे तद्गुणादि यथा "नवनीतं पुनः सद्यस्कं लघु सुकुमारं मधुरं कषायमीषदम्लं शीतलं मेध्यं दीपनं हृद्यं संग्राहि पित्तासृग्हरं ह्रस्वमग्निदाहि वयस्थास्थानस्थानामौऽर्दितापहं गुरुकफमेदोविवर्द्धनं बलकरं दृंहणं श्रोपन्नं विशेषतो बालानां प्रशस्यते । चीरोत्थं पुनर्नवनीतमुत्तमत्वे हं माधुर्ययुक्तमतिशीतं सौकुमार्यकरं चक्षुष्यं संग्राहि रक्तपित्तनेत्ररोगहरं प्रसादनञ्च" ।

तत्र नवनीतस्य नामानि गुणाश्च भावप्र० उक्ता यथा "अत्यच्छं सरजं हैयङ्गवीनं नवनीतकम् । नवनीतं हितं गव्यं हृद्यं वर्ण्यबलाग्निकृत् । संग्राहि वातपित्तास्रकृच्छ्रयामौऽर्दितक्षयहृत् । तद्धितं बालवृद्धे विशेषादक्षतं स्त्रियोः । माक्षिकस्य गुणाः "नवनीतं मक्षिकाक्षु वातश्लेष्मकरं गुरु । दाहपित्तश्रमहरं मेदःशुक्रविवर्द्धनम्" । अजस्य नवनीतस्य गुणाः "दुग्धोत्थं नवनीतं तु चक्षुष्यं रक्तपित्तहृत् । हृद्यं बल्यमतिस्निग्धं मधुरं ग्राहि शीतलम्" । सद्यः सद्यृतनवनीतगुणाः "नवनीतन्तु सद्यस्कं स्वादु ग्राहि स्निग्धं लघु । मेध्यं किञ्चित् कषायान्तमीषत्तक्रांशसंक्रमात्" । चिरन्तननवनीतगुणाः "सञ्चारकटुकाक्षत्वाच्छर्द्यर्शःकुष्ठकारकम् । क्षेत्रजं गुरु मेदस्यं नवनीतं चिरन्तनम्" ।

राजनि० गव्यादिनवनीतगुणा उक्ता यथा "गव्यन्तु नवनीतं स्यात् क्षयकासाग्निरोगहृत् । कफ-नाशि च बल्यञ्च दीपनं परिकीर्त्तितम् । आविकं नवनीतन्तु स्निग्धं लघु समीरितम् । योनिशूले कफे वाते गुदशूले स्थितञ्च तत् । ऐडकं नवनीतन्तु क्लिष्टगन्धं सुधीतलम् । पुष्टिस्त्रीक्षकरं मेधाविनाशि गुरु सम्मतम् । मन्दाग्निदीपनं तत्तु भिषग्भिः परिकीर्त्तितम्" । हस्तिनीनवनीतन्तु कषायं शीतलं लघु । तिक्तं विष्टम्भि तत् कृमि जन्तुपित्तकफक्षयीत् । घोटकीनवनीतन्तु कषायं कफवातहृत् । चक्षुष्यञ्चक्षुष्यकटुकमीषदातापहारकम् । गर्दभीनवनीतञ्च कषायं कफवातहृत् । पाके लघु दीपनञ्च बल्यं मूत्रस्य दोषहृत् । औष्ट्रं तु नवनीतं च पाके शीतं प्रकीर्त्तितम् । व्रणकृमिकफार्शांसि वातस्य च विनाशनम् । मानवीनवनीतञ्च पाके लघु रुचिप्रदम् । चक्षुष्यं दीपनं श्रेयं सर्वरोगविनाशनम्" । "शीतं रुच्यं नवोद्भूतं सुमधुरं ह्रस्यञ्च वातापहं कासघ्नं क्रमिनाशनं कफहरं संग्राहि गुणापहम् । बल्यं पुष्टिकरं तृप्तिश्रमनं सन्तापविच्छेदनम् चक्षुष्यं श्रमहारितर्पणकरं दध्युद्भवं पित्तजित्" ।

**नवनीतक** न० नवनीतात् जायते वा० वुन् । १घृते राजनि० स्वार्थे क । २नवनीते नवनीतशब्दे उदा० उदाहृतम् ।

**नवनीतधेनु** स्त्री दानार्थकल्पितायां नवनीतमय्यां धेन्वां तद्दानविधिः वराहपु० उक्तो यथा "नवनीतमयीं धेनुं दृष्ट्वा राजन् प्रयत्नतः । यां श्रुत्वा सर्वपापेभ्यो मुच्यते नात्र संशयः । गोमयेनानुलिप्तायां भूमौ गोचर्मसंस्तृतः । कृष्णचर्म मृगस्यैव तस्योपरि च धारयेत् । कुम्भन्तु नवनीतस्य प्रस्थमात्रस्य धारयेत् । वत्सं चतुर्थमासञ्च तस्या उत्तरतो न्यसेत् । कृत्वा विधानेन च राजसिंह ! सुवर्णशृङ्गी रुक्मखुरी च कार्य्यौ । नेत्रे च तस्या मणिमौक्तिकैस्तु कृत्वा तथास्यञ्च सुवर्णजिह्वाम् । कोशौ च पुष्पैश्च फलैश्च दन्ताः प्रकल्प्याः साक्षात्तु सितैश्च सूत्रैः । नवनीतस्यौ राजन्निजपादौ प्रकल्पयेत् । ताम्रपृष्ठौ कांस्यदोहां दर्भरोमसमन्विताम् । सुवर्णशृङ्गीं रौप्यखुरां पल्लवस्रग्समन्विताम् । चतुर्भिस्तिलपात्रैस्तु संयुतां सर्वतोदिशम् । आच्छाद्य वस्त्रयुग्मेन गन्धपुष्पैरलंकृताम् । द्विजे दीयां प्रज्वाल्य ब्राह्मणाय निवेदयेत् । वेदवेदाङ्गविदुषे आहिताग्निजितात्मने । अन्वाहार्य एव जप्याः सर्वधेनुषु ये स्मृताः । पुरा देवासुरैः सर्वैः सागरस्य तु मन्थने । उत्पन्नं दिव्यममृतं नवनीतमिदं शुभम् । आप्यायनञ्च भूतानां नवनीत !

नमोस्तु ते। एवमुक्त्वार्घ्यं तां दद्याद्ब्राह्मणाय कुटुम्बिने। धेनुञ्च दत्त्वा सुखदां शोपधानां नवेदृष्टकृम् विप्रवर्यस्य भूयः। कृत्विग्भ्यमेवं वरमन्त्रोपमुक्ता तिष्ठेत्प्रकृं धेनुदत्तस्य विप्रः। वः प्रयच्छति तां धेनुं दीयमानां नरोत्तम!। सर्वपापविनिर्मुक्तः शिवसायुज्यतां व्रजेत्। पितृभिः पूर्वजैः सार्द्धं भविष्यञ्चि मानवः। विष्णुलोकं व्रजत्याशु यावदाहूतसंप्लवम्। य इदं शृणु याद्भक्त्या श्रावयेदापि मानवः। सर्वपापविशुद्धात्मा विष्णुलोके महीयते"।

**नवपञ्चम** पु० नव च नवमं च पञ्चमश्च यत्र योगे। वरकन्ययोः विवाहाङ्गे राशिकूटभेदे। वरराशेः कन्याराश्यपेक्षया कन्याराशेश्च वरराश्यपेक्षया नवमत्वे पञ्चमत्वे वाऽयं योगः। उपयमशब्दे १२५१पृ० दृश्यम्। "पाणिग्रहोयदि भवेन्नवपञ्चमर्क्षे सन्मानहानिमहतां मुनयो वदन्ति" ज्योति०त०।

**नवपत्रिका** स्त्री नवसंख्यका पत्रिका। नवसु कदल्यादिषु "कदली दाडिमी धान्यं हरिद्रा मानकं कचुः। विल्वाशोकौ जयन्ती च विज्ञेया नवपत्रिकाः" दुर्गोत्सवपूजापद्धतिः। तत्प्रवेशः ति०त० निर्णीतो यथा ज्योतिषे "पूर्वाह्णे नवपत्रिका शुभकरी सर्वार्थसिद्धिप्रदा आरोग्यं धनदा करोति विजयं षष्ठ्यां प्रवेशे शुभा। मध्याह्ने जनपीड़नक्षयकरी संग्रामघोरावहा सायाह्ने वधबन्धनादिकलहं सर्पेक्षतं सर्वदा। सप्तम्यामसमाप्तायां यदि विशति गृहं पत्रिका श्रीफलाढ्या राज्ञः सम्राड्राज्यं जनसुखमखिलं हन्ति मूलानुरोधात्। तस्मात् सूर्योदयस्थां नरपतिशुभदां सप्तमीं प्राप्य देवीम् भूपालो वेशयेत्तां सकलजनहितां राजसर्षं विहाय"। राजसर्षं मूला। "पत्रीप्रवेशनं रात्रौ विसर्गं वा करोति यः। तस्य राज्यविनाशः स्याद्राजाऽप्यधिकतो भवेत्"।

**नवपद** न० आत्माऽऽत्मतत्त्वभेदे "प्रथमसप्तनयरामकलत्रितय मद्रिगण्डेन सह दण्डमिति पदानि विप्रमाणि सन्ति। समपदे च षट्पञ्चसप्तप्रकृतिकमेतदात्तु एवं पञ्चपदानि कृत्वोद्धारमन्त्रे देयानि। भुजगराजपिङ्गलभणित नवपदमेतदवेहि"।

**नवपाठक** पु० पूर्वकालैकेति या० कर्म० उभयोरपि विशेषणयोरपि एतस्य विशेष्यत्वे प्राप्ते पाठकस्यैव विशेष्यत्वनियमेन परनिपातः। नवीनाध्यापके त्रि०कौ०।

**नवप्राशन** न० नवस्य नवान्नस्य प्राशनम्। नवान्नभोजने धारस्करमन्त्रम् नवान्नशब्दे दृश्यम्।

**नवफलिका** स्त्री नवं फलं यस्याः कप्। क्वापि जात इक्षवम्। इक्षुरजस्वलायां नार्यां २नव्यमात्रे च मेदि०।

**नवव(ब)धू** स्त्री कर्म०। नूतनपरिणीतायां स्त्रियां तस्याः पितृगृहात् भर्तृगृहागमनं नवबधूगमनं तत्र विहित नक्षत्रादि ज्यो०त० उक्तं यथा

दीपिकायां "स्त्रीपुष्यत्रालिघटाजसंयुतरवौ काले विशुद्धे भगुं संलग्ने प्रतिलोमगं शुभदिने यात्राप्रवेशोचिते। लग्नाच्चस्तु निरंशकं नववधूयात्राप्रवेशौ पतिः कुर्यादेकपुरादिषु प्रतिभगोर्नेच्छन्ति दोषं बुधाः। मैत्रागारे कुचकुसुमयोः सम्भवो वा यदि स्यात् कालः शुद्धो न भवति यदा सम्मुखो वापि शुक्रः। मेषे कुम्भे ऽलिनि च न भवेत् भास्करश्चेत्तथापि स्वामी भर्ट्टेऽहनि नववधूं वेशयेन्नान्हिकं क्षिम्। भर्तुर्गोचरशोभने दिनपतौ नास्तंगते भार्गवे लग्नं क्षीटघटाजगे शुभदिने पक्षे च कृष्णेतरे। स्थित्वा च प्रतिलोमगौ बुधसितौ जीवस्य शुद्धौ तथा चानीता गुणशालिनी नववधूर्निर्योज्झवा मोदते। एकग्रामे चतुःशाले दुर्भिक्षे राष्ट्रविप्लवे। पतिना नीयमानायाः पुरः शुक्रो न दुष्यति"। तथा "काष्ठपेषु वशिष्ठेषु भृग्वादित्याङ्गिरःसुच। मरद्वाजेषु वात्स्येषु प्रतिशुक्रो न दोष भाक्"। दिरागमनशब्दे ऽधिकं दृश्यम्। अत्र विशेषः सङ्ग्र० पी० धा० उक्तो यथा "समाद्रिपञ्चाङ्गुदिने विवाहाद्वधूप्रवेशोऽष्टदिनान्तराले। शुभः परस्माद्दिवसाद्दशादिनेऽप्यवर्षात्परतो यथेष्टम्"। "ध्रुवक्षिमन्दुश्रोत्रवसुमूलमघानिले। वधूप्रवेशः सन्नेष्टो रिक्तारार्के बुधे परैः" स० चि०।

"तत्र वधूप्रवेशोनाम नूतनपरिणीतायाः कन्यायाः प्रथमतः करिष्यमाणो भर्तृगृहप्रवेशो वधूप्रवेशशब्दवाच्यः। समाद्रीति विवाहाद्दिवसादारभ्याष्टदिनानि षोड़शदिनानि तेषामन्तराले समाद्रिपञ्चाङ्गुदिने समदिनानि द्वितीयचतुर्थषष्ठाष्टमदशमद्वादशचतुर्दशषोड़शसंख्यकानि विषमसंख्ये सप्तमपञ्चमनवमदिनानि तेषु वधूप्रवेशः कर्त्तव्यो नूतनपरिणीतायाः कन्यायाः भर्तृगृहप्रवेशः शुभः शुभफलप्रदः। यदाह नारदः "आरभ्योद्वाहदिवसात् भर्तृ वाप्यष्टमे दिने। वधूप्रवेशः सम्प्रोक्तो दशमेऽपि समे दिने"। वसादीनां समत्वादेव पक्षेऽपि पुनस्तदुक्तिरतिप्रायत्वसूचनार्थम्। ज्योतिर्निबन्धे तु विशेषः "वधूप्रवेशनं कार्य्यं

पञ्चमे सप्तमे दिने। नवमे च शुभे वारे सुलग्ने शशिनोबले" इति। परस्तात् प्रतिबन्धवशात् षोड़शदिनाभ्यन्तरे यदि वधूप्रवेशो न जातस्तदा तदनन्तरं विषमाब्दमासदिने विषमवर्षे प्रथमतृतीयपञ्चमवर्षे विषममासे विवाहमासात् प्रथमतृतीयपञ्चमसप्तमनवमैकादशमासेषु विषमदिनानि सप्तदशादीनि तेषु वधूप्रवेशः शुभः। तत्रापि यदि प्रतिबन्धवशात्कालातिक्रमः पञ्चवर्षात्परो जातस्तदा पञ्चवर्षादनन्तरं यथेष्टं वर्षादिनियमो नास्ति किन्तु दोषरहिते काले वधूप्रवेशो विधेयः। तदुक्तं संग्रहे "विवाहमारभ्य वधूप्रवेशो युग्मे दिने षोड़शवासरान्तः। ऊर्द्धं ततोऽब्देऽयुजि पञ्चमात्तं पुनः परस्तान्नियमो न चास्ति"। अब्दादेऽयुजीति पदच्छेदो द्रष्टव्यः। तदुक्तं विवाहपटले "वधूप्रवेशः प्रथमेऽब्द वर्षे तथा तृतीयेऽथ पञ्चमे वा। सूर्येन्दुदेवेज्यबलेन कार्य्यात् पुंसो सुनिर्णीतम थाह सत्यमिति"। समवर्षे दोषकरत्वाच्च यदाह धर्मशास्त्रे नारदः "समे वर्षे समे मासे यदि नारीमृतं व्रजेत्। आयुष्यं हरते भर्तुः सा नारी भरणं व्रजेदिति"। युग्मवत्सरनिषेधः पञ्चवर्षात् प्राग्ज्ञेयो न पश्चात्तदाद्यस्य प्रागभिधानात्। अथ वधूप्रवेशे नक्षत्रादि ध्रुवेति। ध्रुवाणि रोहिण्युत्तरात्रयं च त्रिष्वपि चित्रानीपुष्यहस्ताः क्षुद्राणि चित्रानुराधारेवती मृगः। श्रोत्रं श्रवणः वसुर्धनिष्ठा मूलं प्रविद्धम्। अश्विनः स्वाती एषु भेषु वधूप्रवेशः सत् शुभफलदः। रिक्तादिषु नेष्टः न शुभः अर्थात् रिक्तान्यासु तिथिषु अर्कारार्भामन्दवारेषु च वधूप्रवेशः प्रशस्त इत्यर्थः। उक्तञ्च व्यवहारतत्त्वे "पौष्णात् कराच्च श्रवणाच्च युग्मे हस्तत्रये मूलमृगोत्तरासु। पुष्ये च मैत्रे च वधूप्रवेशो रिक्तेतरे व्यर्ककुजे च शस्तः" इति। कर्म रोहिणी। वृषे परैरिति अन्यैः शिष्टैर्बुधवारे वधूप्रवेशो नेष्यते। कश्चिद्देशे शिष्टाचारो यद्बुधवारे वधूप्रवेशो न विधीयते इति। केचित्तत्र हेतुमपि वर्णयन्ति यद्बुधो नपुंसक इति तच्चिन्त्यं शनेरपि नपुंसकत्वात्तस्यापि निषेधो वाच्यः स्यात्" पी० धा०। विवाहानन्तरं जेषु चित्रासप्तेषु प्रथमं भर्त्रादिगृहे निवासे फलम् तत्रैवोक्तं यथा

"ज्यैष्ठे पतिज्येष्ठमघाधिजे पतिं हस्तादिमे भर्तृगृहे वधूः शुचौ। स्वातौ सदस्थे श्वशुरं त्वये तनुं तातं मघौ तातगृहे पितृगृहे तिष्ठन्ती तातं पितरं हन्ति" इ० चि०।

"विवाहतो विवाहादनन्तरं भर्तृगृहे स्थिता आदिमे प्रथमे ज्यैष्ठे मासि तिष्ठन्ती वधूः पतिज्येष्ठं भर्तृज्येष्ठभ्रातरं हन्ति। एवमादिमेऽधिके मासि स्थिता वधूः पतिं भर्तारं हन्ति। आदिमे शुचावाषाढे स्वश्रूं भर्तुः जननीं हन्ति। आदिमे पौषे श्वशुरं भर्तुः पितरं हन्ति आदिमे त्वये त्वयमासे भर्तृगृहे तिष्ठन्ती तनुं निजशरीरं हन्ति म्रियत इत्यर्थः। तथादिमे मघौ चैत्रे तातगृहे पितृगृहे तिष्ठन्ती तातं पितरं हन्ती त्यर्थः। यदि कन्यायाः पित्राद्यभावस्तदा तत्तन्मासे तत्तद्गेहावस्थितौ सत्यामपि न कोपि दोष इत्यर्थः। उक्तञ्च मुहूर्तमार्त्तण्डे "उद्वाहात् प्रथमे शुचौ यदि वसेत् भर्तृगृहे कन्यका हन्यात्तज्जननीं त्वये निजतनुं ज्यैष्ठे पतिज्येष्ठकम्। पौषे च श्वशुरं पतिं च मघिने चैत्रे स्वपित्राद्वये तिष्ठन्ती पितरं निहन्ति न भवं तेषामभावे भवेदिति"। मघिनेऽधिकमासे तथाच्यवस्था विवाहानन्तरं ज्यैष्ठाषाढपौषाधिकमासत्रयमासेषु भर्तृगृहे न स्थातव्यम्। चैत्रे मासि पितृगृहे न स्थातव्यं किन्तु भर्तृगृहे एव स्थातव्यमिति फलितोऽर्थः। तदुक्तं ज्योतिर्निबन्धे "विवाहात् प्रथमे पौषे आषाढे मासि मासके। न सा भर्तृगृहे तिष्ठेच्चैत्रे पितृगृहे तथा"। आषाढो ज्यैष्ठोपलक्षकः। अधिमासः त्वयमासोपलक्षकः त्वय प्रमाणं प्राग्वदिति" पी० धा०।

**नवभाग** पु० राशेर्नवमो भागः। त्रिंशांशकात्मकस्य राशेः नवमे भागे ३।२० विंशतिकलाधिकभागत्रयरूपे भागे नवांशशब्दे विदृतिः। २नवमे भागमात्रे च।

**नवम** त्रि० नवानां पूरणः नान्तत्वात् डटि मः। नवसङ्ख्यापूरणे। १तस्मादधिनवमरात्रौ २तद्भावे च तद्भावश्च तस्मादिहाद्यभावोक्तदिशावसेयः। स्त्रियां ङीप्। "नवमी तुहिनप्रभा" पताकासन्निवेशे कृष्णोद्योतः। "अर्यमृषो नवमी" "पुष्णो नवमी" यजु० २५।४।५ नवमी पञ्चतिरश्यदेवत्या पूष्णदेवत्या च तदर्थः। चन्द्रस्य स्वस्मिन् सूर्यस्थिरयप्रवेशयोर्मध्यायां नवमकलात्मिकायां तदुपलक्षितकालरूपायां वा ४तिथौ। उभयदिने तत्प्राप्तौ कस्याः कर्मयोग्यतेति सन्देहे तन्निर्णय उक्तः कालमा० यथा "अथ नवमी निर्णीयते। सा च विधिनिषेधरूपाभ्यामन्यव्यतिरेकाभ्यां पूर्वविद्धैव ग्राह्या। तत्र विधिश्च युग्मादिशास्त्रे "वसुरन्ध्रयोरिति" पठ्यते। पद्मपुराणेऽपि "अष्टम्या नवमी विद्धा नवम्या चाष्टमी युता। सर्व-

नारीश्वरप्रायो समाप्ताष्टेश्वरी तिथिः"। भविष्यत्पुराणे द्वादशीकल्पेऽपि "नवम्या सह कार्य्या स्यादष्टमी नवमी तथेति"। निषेधस्तु पद्मपुराणेऽभिहितः "न कार्य्या नवमी तात! दशम्या तु कदाचनेति"। एवं नवमी भविष्यत्पुराणोक्तव्रतादौ द्रष्टव्या। "वस्तु कृष्णनवम्याः पूर्वविद्धत्वेऽपि शुक्लनवमी परविद्धाऽस्तु। "शुक्लपक्षे तिथिर्यद्वा यस्यामभ्युदितो रविरिति" वचनात् नैवम् पूर्वोक्तेषु वचनेषु दशमीविद्धायाः साधारणनिषेधात्। ननु तस्य निषेधस्य सामान्यरूपत्वात् शुक्लपक्षे सङ्कोचोऽस्तिति चेत् न सङ्कोचहेतोर्भवतोदाहृतस्यापि समान्यरूपत्वात्। पक्षयोरुभयोरपि पूर्वविद्धैव ग्राह्या। रामनवमी तु "चैत्रशुक्ला तु नवमी पुनर्वसुयुता यदि। सैव मध्याह्नयोगेन महापुण्यतमा भवेत्। नवमी चाष्टमीविद्धा त्याज्या विष्णुपरायणैः। उपोष्यं नवम्यां वै दशम्यां पारणं भवेदिति" वचनादष्टमीविद्धा सनक्षत्रापि नोपोष्या" इति भेदः। "सा चाष्टमीयुता ग्राह्या पुण्यात्। भविष्ये "मासैश्चतुर्भिर्वत्स पुण्यं विधिनाऽऽपूज्य चण्डिकाम्। तत्फलं लभते वीर! नवम्यां कार्त्तिकस्य च। तथा "नवम्यां नव वर्षाणि राजन् पिष्टामनो भवेत्। तस्य दत्ता भवेद्गौरी सर्वकामप्रदा शुभा" "आश्वे मासि तु या शुक्ला नवमी लोकपूजिता। महानन्देति सा प्रोक्ता सदानन्दकरी नृणाम्। स्नानं दानं तपो होमो देवार्चनमुपोषणम्। सर्वं तदक्षयं याति यदस्यां क्रियते नरैः" ति० त०।

**नवमल्लिका** स्त्री नवा स्तुत्या मल्लिका कर्म०। नवमालिकायाम् पुष्पप्रधाने वृक्षभेदे (नोयालि) शब्दरत्ना० तस्याः पुष्पेऽपि "पुष्पे जातिप्रभेदाः स्युर्लिङ्गाः" इत्युक्तेः स्त्रीत्वम्। "उपययौ विदग्धनवमल्लिकाः" माघः नवमल्लीत्यत्र

**नवमालिका** स्त्री नवा स्तुत्या मालिका। (नोयालि) ख्याते वृक्षभेदे नवमल्लिकावृक्षे अमरः। "वासन्ती" नेवारी इति लोके तस्याम्। तद्गुणाः "नेपाली कथिता तज्ज्ञैः सुगन्धा नवमालिका। वासन्ती शीतला लघ्वी तिक्ता दोषत्रयापहा" भावप्र०। २द्वादशाक्षरपादके छन्दोभेदे च "दृङ् नवमालिका नजभयैः स्यात्" छ०र०।

**नवयज्ञ** पु० नवशस्यनिमित्तो यज्ञः। नवान्ननिमित्ते यज्ञे आश्वायनशब्दे ६२२पृ० दृश्यम् "अरडसन्नयोः केचिदवयवं प्रचक्षते। धान्यपाकवयवादन्ये श्यामाको वनिनः स्मृतः" कर्मप्रदीपे काल्या०। वनिनः वानप्रस्थस्य।

**नवयोनिन्यास** पु० तन्त्रसारे निवयोक्ते न्यासभेदे "नवयोन्यात्मकं न्यासं कुर्याद्दोषैस्त्रिभिः क्रमात्। कर्णयोरिषुके भ्रूवो गण्डयोर्वदने पुनः। नेत्रयोर्नसि विन्यसेदंसयोर्जठरे पुनः। ततः कूर्परयोः कृत्वा जानुनोर्जङ्घयोरपि। पादयोर्युगदेशे च पार्श्वयोरुदराम्बुजे। स्तनयोः कण्ठदेशे च तोयि बीजानि विन्यसेत्"।

**नवयौवन** न० नवं यौवनम्। २अभिनवे यौवने "नवयौवनसम्पन्नां सर्वाभरणभूषिताम्" दुर्गाध्यानम्। नवं यौवनं यस्याः। २अभिनवयौवनवत्यां स्त्रियां स्त्री टाप्।

**नवरत्न** न० नवसंख्यितं रत्नम्। नवविधे माणिक्यादिरत्ने तानि च कर्मभेदे भिन्नानि यथा "सत्ताश्चाणिक्यवैदूर्यगोमेदान् वज्रविद्रुमौ। पद्मरागं मरकतं नीलञ्चेति यथाक्रमम्" इति तन्त्रसारः। नवग्रहदोषशान्त्यै धार्य्याणि नव रत्नानि यथा "वैदूर्यं धारयेत् सूर्ये स्फटिकं शशलाञ्छने। माणिक्यं पद्मरागं च भौमाङ्गजे। हरौ हेम्नां बुधौ वज्रं गुरौ नीलं विदुर्बुधाः। राहौ गोमेदकं धार्यं केतौ मरकतन्तथा।" दीपिका। २विक्रमादित्यराजसभास्थनवसंख्यकपण्डिते च यथा "धन्वन्तरिक्षपणकामरसिंहशङ्कुवेतालभट्टघटकर्परकालिदासाः। ख्यातो वराहमिहिरो नृपतेः सभायां रत्नानि वै वररुचिर्नव विक्रमस्य" ज्योतिर्विदा०

**नवरस** पु० नवसंख्यितो रसः। अलङ्कारोक्ते शृङ्गारादिके रत्यादिस्थायिनवभावके नवविधे रसे "रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयं तथा। जुगुप्सा विस्मयश्चेमे नवमौ प्रोक्ताः शमोऽपि च" स्थायिभावात्मके "शृङ्गारहास्यकरुणरौद्रवीरभयानकाः। बीभत्साद्भुतसंज्ञौ चेत्यष्टौ रसाः शान्तसहा मताः" सा०द०। पृथक्करणम् "अष्टौ नाट्ये रसाः स्मृताः" इत्युक्तेः नाट्ये अष्टविधत्वम् "निर्वेदस्थायिभावोऽपि शान्तोऽपि नवमो रसः" इत्युक्तेः काव्ये नवविधत्वमिति सूचनाय। प्रबोधचन्द्रोदयनाटके शान्तरसवर्णनं भारतादिशास्त्रविरुद्धम्। "नवरसरुचिरा भारती कवेर्जयति" काव्यप्र०।

**नवरात्र** त्रि० नवभिः रात्रिभिर्निर्वृत्तं तद्वितार्थे छिगुः "द्विगोर्वृगनपत्ये" तद्धितस्य ठको लुक् अचःसमा०। नवभी रात्रिभिस्तदुपलक्षितैर्दिनैर्वा निर्वृत्ते याज्ञा० "नवरात्रावत्तारः" काल्या०श्रौ० ४।२।१४ "नवरात्रे त्रिकृत्वः" काल्या०श्रौ० २।५।१९। नवरात्रसाध्ये २व्रतभेदे तद्विधानकालतिथ्यादि त्रि० शि० उक्तं यथा

"अथाश्विनशुक्लप्रतिपदि नवरात्रारम्भः। तत्रिर्णयः भार्गवार्चनदीपिकायां देवीपुराणे सुमेधा उवाच "शृणु राजन्! प्रवक्ष्यामि चण्डिकापूजनक्रमम्। आश्विनस्य सिते पक्षे प्रतिपत्सुशुभे दिने" इत्युपक्रम्योक्तम्। "शुद्धे तिथौ प्रकर्त्तव्यं प्रतिपत्तोर्ध्वगामिनी। आद्यास्तु नाडिकास्त्यक्त्वा षोडश द्वादशापि वा। अपराह्णे च कर्त्तव्यं शुद्धत्वतिथाङ्गिभिः"। इदं चापराह्णयोगिन्याः प्राशस्त्यं द्वितीयदिने प्रतिपदोऽभावे ज्ञेयम्। तथा च तत्रैव देवीपुराणे डामरतन्त्रे च देवीवचः "अमायुक्ता न कर्त्तव्या प्रतिपत् पूजने मम। सङ्कल्पमात्रा कर्त्तव्या द्वितीयादिगुणान्विता। आद्याः षोडश नाडीस्तु त्यक्त्वा यः कुरुते नरः। कलशस्थापने तस्य हानिरिष्टं जायते ध्रुवम्"। मार्कण्डेय देवीपुराणयोः "पूर्वविद्धा तु या शुद्धा भवेत् प्रतिपदाश्विनी। नवरात्रव्रतं तस्यां न कार्यं शुभमिच्छता। देशभङ्गो भवेत्तस्य दुर्भिक्षं चोपजायते। नन्दायां दर्शयुक्तायां यत्र स्यान्मम पूजनमिति"। स्कान्देऽपि "प्रतिपद्याश्विने मासि या शुद्धा शुभदा भवेत्। भाद्रपद्दर्शविद्धा तया युक्ता न शस्यते। विरुद्धफलदा सा हि पुत्रदारभयावहेति"। तथा "वर्जनीया प्रयत्नेन अमायुक्ता तु पार्थिव!। द्वितीयादिगुणैर्युक्ता प्रतिपत् सर्वकामदा"। तथा देवीपुराणे "यो मां पूजयते नित्यं द्वितीयादिगुणान्विताम्। प्रतिपच्चारदीं ज्ञात्वा सोऽश्नुते सुखमव्ययम्। क्रियते चेदमायुक्ता प्रतिपत् स्थापने मम। तस्य शापायुतं दत्त्वा भस्मसेयं करोम्यहम्। अयत्नात् कुरुते यस्तु कलशस्थापनं मम। तस्य सम्पद्विनाशः स्याल्लक्ष्मीः पुत्रो विनश्यति। अमायुक्ता न कर्त्तव्या प्रतिपच्चण्डिकार्चने। धनार्थिभिर्विशेषेण वंशच्छान्निच जायते। न दर्शकलया युक्ता प्रतिपच्चण्डिकार्चने। उदये द्विमुहूर्त्तापि ग्राह्या षोडशगामिनी" इति देवीपुराणे "या चाश्वयुजि मासेस्यात् प्रथितद्वयसान्विता। शुद्धा ममार्चनं तस्यां शतयज्ञफलप्रदम्"। रुद्रयामले "अमायुक्ता सदा चैव प्रतिपच्चण्डिका मता। तत्र चेत् स्थापयेत्कुम्भं दुर्भिक्षं जायते ध्रुवम्। प्रतिपत् सद्वितीया तु कुम्भारोपणकर्मणि" इति। यद्यपि रुद्रयामलं डामरं च निर्मूलं तथाप्यविरोधात् प्रचाराच्च तद्वचनानि लिख्यन्ते। तिथितत्त्वे देवीपुराणेऽपि "प्रातरारभ्येहेवीं प्रातरेव प्रवेशयेत्। प्रातःप्रातश्च संपूज्य प्रातरेव विसर्जयेत्"। तत्रैव "यत्काले क्रियते या च वार्षिकी। सा कार्योदयगामिन्यां न तत्तिथियुग्मता"। तथा "कुङ्कुमोपसंयुक्तां वर्जयेत् प्रतिपत्तिथिम्। राज्यनाशाय सा प्रोक्ता निन्दिता चाद्यपूजने" इति। एषु वचनेषु कलशस्थापनप्रकरणात् तदेव प्रथमदिने निषिद्धं न तूपवासादि तस्य "प्रतिपदाद्यमावास्येति युग्मवाक्यात्। "शुद्धा स्यात् प्रतिपत्तिथिः प्रथमतः" इति दीपिकोक्तेः "शुद्धपक्षे दर्शविद्धेति" माधवोक्तेश्च पूर्वदिने ग्राह्यत्वे बाधे मानाभावादिति केचित्। वस्तुतस्तु पूर्वोक्तवाक्येषु चण्डिकार्चनपूजाप्रकरणादुपवासादेराकृष्टत्वात् प्रधानदेवीपूजादावपि परेति युक्तम्। कलशस्थापनप्रकरणं तूपलक्षणम्। अतएव देवलः "व्रतोपवासनियमे घटिकैकापि या भवेत्। सा तिथिस्तद्दिने पूज्या विपरीता तु पैतृके" इति। अत्र घटिका सङ्कल्प इति गौडाः। यदा तु पूर्वदिने सम्पूर्णा शुद्धा च भूत्वा परदिने वर्द्धते तदा सम्पूर्णत्वादसाधोगामाभावाच्च पूर्ववेव यानि च द्वितीयायोगनिषेधकानि वचनानि केचित् पठन्ति तान्यपि शुद्धाधिकनिषेधपराणि परदिने प्रतिपदोऽल्पत्वेन दर्शयुतापि पूर्ववद्ग्राह्या तदाह नन्दः "तिथिः शरीरं तिथिरेव कारणं तिथिः प्रमाणं तिथिरेव साधनमिति" यानि त्वमायुक्ता प्रकर्त्तव्येत्यादीनि चण्डिकप्रयोगे वचनानि तानि कुमतत्वे सत्येतद्विषयाणि। अत्रेदं तत्त्वम्। पूर्वोक्तवाक्यानां सर्वेषां हेमाद्र्याद्यखिलतत्त्वेन निर्मूलत्वात्तेषामनिर्णयत्वात्तुल्यैः सामान्यनिर्णयात् पूर्ववत्प्राप्तावपि गौडनिबन्धेषु विशेषेण निर्णयादौदयिकी ग्राह्या तत्रापि घटिकैकेत्यस्य द्विमुहूर्त्तस्तुतित्वोक्तेर्द्विमुहूर्त्ता ग्राह्या "उदिते दैवतं भाना"दित्यत्र "द्विमुहूर्त्ता त्रिरङ्गेति" चौदयिक्या द्विमुहूर्त्तत्वनियमात् तेन उदये द्विमुहूर्त्तापीत्याद्यनुसारोऽपि "सङ्कल्पमात्रा कर्त्तव्येति" द्विमुहूर्त्तस्तुतिः। अन्यथा द्विमुहूर्त्तविधिवैयर्थ्यात्। केचित्तु सङ्कल्पमात्रेति वचनात्ततो न्यूनत्वे परा नेत्याहुः गौडा अप्येवम्। अत्र देवीपूजैव प्रधानम् उपवासादि त्वङ्गम् "अष्टम्यां च नवम्यां च जगन्मातरमम्बिकाम्। पूजयित्वाश्विने मासि विशोको जायते नरः" इति हेमाद्रौ भविष्ये तथा एव कलशसम्बन्धात् "नवमीतिथिपर्यन्तं दृष्ट्वा पूजाजपादिकमिति" तत्रैव देवीपुराणात्। "यत्काले क्रियते पूजा क्रियते या च वार्षिकी" इति मार्कण्डेयपुरा-

यात्र पूर्ववचनादष्टमीपूजैव प्रधानमन्यत् सर्वमङ्गमिति गौड़ाः। एकाङ्गपक्षोऽपि कालिकापुराणे "यस्त्वेकस्यामष्टम्यां नवम्यामथ साधकः। पूजयेद्दरदां देवीं महाविभवविस्तरैः" इति। तत्त्वं तु राजसूयेऽश्वमेधैः समप्रधानायाः संहितायां अष्टमीवेधेनैवान्नादाद्यकामं प्रातर्वेदित्वैकत्वान्नवम्यां विधानाच्च यथा फलार्थैरग्निहोत्रैः प्रयोगस्तथा नवरात्रमध्यस्थायां अष्टम्यां नवम्यां वा फलार्थः पृथक्प्रयोगः। रूपनारायणधृतदेवीपुराणे "महानवम्यां पूजेयं सर्वकामप्रदायिका। सर्वेषु सर्ववर्षेषु तव भक्त्या प्रकीर्त्तिता। लभ्यतेप्रीति यशो राज्य पुत्रायुर्नवमम्यदः"। सा च काम्या नित्या च "एवमन्यैरपि तथा देव्याः कार्यं प्रपूजनम्। विभूतिमतुलां लब्धुं चतुर्वर्गप्रदायकम्" इति "यो मोहादेव वाऽज्ञत्वाद्देवीं दुर्गां महोत्सवैः। न पूजयति दम्भाद्वा हेमादाय्यत्र भैरव!। कृत्वा भगवती तस्य कामानिष्टान्निहन्ति वै" इति कालिकापुराणेऽकरणे निन्दाश्रुतेः "वर्षे वर्षे विधातव्यं स्थापनञ्च विसर्जनम्" इति तिथितत्त्वे देवीपुराणाच्च। अतोपवासादिकञ्च हेमाद्रौ भविष्ये "एवं च विन्ध्यवासिन्या नवरात्रोपवासतः। एकभक्तेन नक्तेन तथैवायाचितेन च। पूजनीया जनैर्देवी स्नाने स्नाने पुरे पुरे। स्टष्टे स्टष्टे भक्तिपरैर्यामेयामे नवे नवे। स्नातैः प्रहर्षितैर्हृष्टैर्नरैश्चैवोत्तमैर्वरैः। वैश्यैः शूद्रैर्भक्तियुक्तैश्चैवोच्चैरन्यैश्च मानवैः" इति यत्तु रूपनारायणीये भविष्ये "एवं नानास्त्रैरगणैः पूज्यते सर्वदम्बुभिरिति" तन्नामसप्तशतीपरम्। "विना मन्त्रैस्तामसी स्यात् किरातानान्तु सम्मतेति" तत्रैवोक्तेः। अदनरत्ने देवीपुराणेऽपि "कन्यासंस्थे रवौ शक्र! शुक्लामारभ्य नन्दिकाम्। नवम्यां हवनं वैकाशी नक्तभोगी वाग्यतो वायुभुक्। भूमौ शयीत चाप्यत्र कुमारीर्भोजयेन्नरः। वस्त्रालङ्कारदानैश्च मन्त्रोच्चाराः प्रतिवासरम्। बलिञ्च मन्त्रवद्दद्यादोदनं मांसमाषवत्। त्रिकालं पूजयेद्देवीं जपस्तोत्रपरायणः" इति नन्दिका प्रतिपत्तिथिरिति मैथिलाः। षष्ठीति गौड़ाः। तच्च पूजनं रात्रौ कार्यम् "आश्विने मासि मेघान्ते महिषासुरमर्दिनीम्। निशासु पूजयेद्भक्त्या षोपवासादिकः क्रमात्" इति देवीपुराणात् संग्रहेऽपि "आश्विने मासि मेघान्ते प्रतिपद्दा तिथिर्भवेत्। तस्यां नक्तं प्रकुर्वीत रात्रौ देवीं च पूजयेत्। रात्रिरूपा यतो देवी दिवारूपो महेश्वरः। रात्रिव्रतमिदं देवि! सर्वपापप्रणाशनम्। सर्वकामप्रदं नृणां सर्वशत्रुनिबर्हणम्। रात्रिव्रतमिदं तस्य रात्रौ कर्त्तव्यतेष्यते। नक्तव्रतमिदं यस्मादन्यथा नरके गतिः" इत्यादिवचनाच्च रात्रिव्रतत्वमेवाभिप्रेत्य माधवेनोक्तम् तस्य नक्तव्रतत्वादिति। नन्वेवं रात्रिभोजनात्। "नन्वासिचाश्वयुजे शुक्ले नवरात्रे विशेषवत्। संपूज्य नवदुर्गाञ्च नक्तं कुर्यात् समाहितः। नवरात्राभिधं कर्म नक्तव्रतमिदं स्मृतम्"। आरम्भे नवरात्रस्येत्यादि स्कान्दात् माधवोक्तेश्च नक्तमेव प्रधानमिति चेत् नवरात्रोपवासत इत्यादेरनुपपत्तेः तेन पाक्षिकनक्तानुवादोऽयं नित्यानित्यसंयोगविरोधात् नक्तस्निग्धोदे दृश्यः पक्षे प्राप्तस्य दृश्यानुवादोऽयमित्यत्रेन्द्रियकामक्षोमेऽनुवादो घटते नित्यवदनुवादायोगादित्युक्तं वार्त्तिके, तथाप्यत्रापि। तेनात्र तद्दिने पुण्यात् फलमिति ज्ञेयम्। नन्वेवं रात्रेः कर्मकालत्वे तद्व्याप्तिनी पूर्वैव प्रतिपत् ग्राह्यात् मैवम् न्यायतः प्राप्तावपि पूर्वोक्तवचनैर्बाधात् यथा पूर्वेद्युः कर्मकालव्यापिनीमपि त्यक्त्वा खल्वपि परैव रामनवमीति प्रागुक्तम् यथा वा निशीथे सतीमपि पूर्वां जन्माष्टमीं त्यक्त्वा रोहिणीयुक्ता परैवेति माधवेनोक्तम् तथात्रापि। वस्तुतस्तु रात्रेः कर्मकालत्ववचसां हेमाद्र्याद्यविचनात् समूलत्वं विस्पष्टमेव त्रिकालं पूजयेदित्यादिपूर्वविरोधाच्च। माधवोक्तिस्तु पाक्षिकनक्तानुवाद इत्युक्तम्। तस्मात् सर्वपक्षेषु परैव प्रतिपदिति स्थितम्। अत्र केचित्तु नवरात्रशब्दो नवाहोरात्रपरः "दर्शो समाप्तिरष्टम्याम्" इत्यत्र प्रतिपत्तिथि। प्रारम्भो नवचण्ड्यास्तु नवरात्रमतोऽर्थवत्" इति देवीपुराणादित्याहुः। तच्च क्षयाहद्वयोत्थं नाधिकत्वापत्तेः अत्र मूलाभावाच्च तेन तिथिवाच्येवायं तदुक्तम् "तिथिद्वयं तिथित्रासे नवरात्रमपार्थकम्। अहरात्रे न दोषोऽयं नवरात्रं तिथित्रये" इति। स च नवरात्रशब्दः क्वचिद्व्रतया कर्मवाची यथा। प्रारम्भो नवरात्रस्येत्यत्रेति दिक्"

**नवराष्ट्र** न० औशीनरनद्यप्त्र देशभेदे "नवस्य नवराष्ट्रस्य क्रमेसु क्रमिका पुरी" हरिवं० २१अ०। तच्च दक्षिणदिक्स्थं "नवराष्ट्रञ्च निर्जित्य कुन्तिभोजसपाद्रवत्" भा० स० ३०अ० सहदेवदक्षिणदिग्विजये।

**नवर्च** न० नव+ऋचो यत्र ऋच् समा०। नवभिर्ऋग्भिर्युते सूक्तभेदे। नव च ता ऋचश्चेति ऋच् समा०। नवसु ऋग्भेदेषु "नवर्चेभ्यः स्वाहा" ऋग्० १८।२२६

**नवलक्षण** न० नवभिर्लक्षणम्। विश्वसर्गस्थितिप्रलया

यामन्यतमस्य तत्तदुपादानगोचरापरोक्षज्ञानंचिकीर्षाकृतिमत्त्वानामन्यतमरूपेषु नवसु पारमेश्वरेषु लक्षणेषु तदेतत् वेदा०प० समर्थितं यथा

"प्रलये च जगज्जन्मादिकारणत्वम् (तटस्थ लक्षणम्) अत्र जगत्पदेन कार्यजातं विवक्षितम्। कारणत्वञ्च कर्तृत्वम् अतोऽविद्यादौ नातिव्याप्तिः। कर्तृत्वञ्च तत्तदुपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमत्त्वम्। ईश्वरस्य तावदुपादानगोचरापरोक्षज्ञानसद्भावे च "यः सर्वज्ञः सर्ववित् यस्य ज्ञानमयं तपः। तस्मादेतद् ब्रह्म नाम रूपमन्नञ्च जायते" इत्यादि श्रुतिर्मानम्। तादृशचिकीर्षासद्भावे च "सोऽकामयत बहु स्यां प्रजायेति" श्रुतिर्मानम्। तादृशकृतौ च "तन्मनोऽकुरुतेत्यादि" वाक्यम्। ज्ञानेच्छाकृतीनामन्यतमगर्भं लक्षणमिदं विवक्षितम् अन्यथा व्यर्थविशेषणापत्तेः। अतएव जन्मस्थितिध्वंसानामन्यतमस्यैव लक्षणे प्रवेशः। एवञ्च लक्षणानि नव सम्पद्यन्ते ब्रह्मणो जगज्जन्मादिकारणत्वे च "यतोवा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत्प्रयन्त्यभिसंविशन्तीत्यादि" श्रुतिर्मानम्। "जन्माद्यस्य यतोऽन्वयादितरतश्चार्थेष्वभिज्ञः स्वराट् तेने ब्रह्म हृदा य आदिकवये मुह्यन्ति यत् सूरयः" भाग०।१।१।१ श्लोकस्य प्रतिपाद्यार्थसंग्राहकः श्रीधरस्वामिकृतः श्लोको यथा "विश्वसर्गविसर्गादिनवलक्षणलक्षितम्। श्रीकृष्णाख्यं परं धाम जगद्धाम नमामि तत्"।

**नववरिका** स्त्री नवो वरोऽस्याः ठन्। नवोढायां स्त्रियाम्।

**नववर्ष** पु०न० नवमितं वर्षम्। १भारतादिषु नवसु वर्षेषु। इष—भावे घञ् कर्म०। २नूतनवर्षे पु०।

**नववल्लभ** न० नवानां नवीनानां वल्लभम्। १दाक्षायणीरुचि शब्दार्थचि०। २नव्यजनप्रिये त्रि०

**नववस्त्र** न० कर्म०। अनाहृते नूतने वस्त्रे

**नववास्तु** पु०नवं वास्तु यस्य। राजर्षिभेदे "अग्निर्नय नवास्त्वं इन्द्रद्रुग्धं तुर्वीतिम्" ऋ० ।।२६।।८ "नवं वास्तु यस्यासौ नववास्तुः" वा छन्दसीत्यनुवृत्तेः अग्नि पूर्वरूपत्वाभावे यण्। नववास्तुनामकं इन्द्रद्रुग्धनामकं तुर्वीतिनामकं च राजर्षीन् नय इत्यन्वयः" भा०।

**नवविंशति** स्त्री नवाधिका विंशतिः। १नवाधिकविंशतिसंख्यायां २तद्युते च "नवविंशत्याऽस्तुवत" यजु० १४।२१ "करपादाङ्गुलयोविंशतिः नव छिद्ररूपाः प्राणास्तैरस्तुवत" वेददी० "दश हस्ताङ्गुलयो दश पादा नव प्राणाः अतः" आ० ८।४।२।१७। ततः पूरणे डट्। नवविंश तत्संख्यापूरणे त्रि० स्त्रियां ङीप्।

**नवविध** त्रि० नव विधायस्य। नवप्रकारे नवविधपापानि च विष्णुना दर्शितानि यथा "अतिपातका महापातकाऽनुपातकोपपातकेषु४ प्रवर्त्तते। जातिभ्रंशकरेषु५ सङ्करीकरणेषु६ अपात्रीकरणेषु७ मलावहेषु८ प्रकीर्णकेषु९"। प्राय०वि० तद्विवरणं द्रष्टव्यम्।

**नवव्यूह** पु० नव व्यूहा अस्य। विष्णौ तस्य अष्टसु पद्मदलेषु प्रद्युम्नादिरूपतया केसरस्थाने मध्ये वासुदेवरूपतया च नवव्यूहत्वात् तथात्वम्। तदर्चनप्रकारः वह्निपु० उक्तो यथा "नवव्यूहार्चनं वक्ष्ये नारदाय हरीरितम्। मण्डलेऽर्चयेन्मध्ये यं बीजं वासुदेवकम्। यां सङ्कर्षणं तत्र वह्नौ यां प्रद्युम्नं च दक्षिणे। अनिरुद्धं नैर्ऋते तु नारायणन्तु पश्चिमे। तद्वद्ब्रह्माणमनिले ह्रूं विष्णुं यौं ऐशिकम्। उत्तरे तु वराहञ्च ह्रैं वामनमेव च"

**नवशक्ति** स्त्री नवसंख्यिता शक्तिः। सा०ति० उक्ते शक्तिनवके नवकशब्दे दृश्यम् काचित् नवविधा शक्तिः तन्त्रसारे उक्ता यथा "प्रभा माया जया सूक्ष्मा विशुद्धानन्दिनी पुनः। सुप्रभा विजया सर्वसिद्धिदा नव शक्तयः"।

**नवशस्य** न० कर्म०। नूतने शस्ये।

**नवशस्येष्टि** स्त्री नवशस्यनिमित्ता इष्टिः। आग्निकर्त्तव्ये नवशस्यनिमित्तके इष्टिभेदे "शस्यान्ते नवशस्येष्टा"। "नानिष्ट्वा नवशस्येष्ट्या पशुना चाग्निमान् द्विजः" मनुः

**नवशायक** पु० नवविधः शायक इव। पराशरसंहितोक्ते नवविधे (नवशाक) ख्याते सङ्कीर्णजातिभेदे "गोपोमाली तथा तैली तन्त्री मोदकवारुजी। कुलालः कर्मकारश्च नापितो नवशायकः"।

**नवश्राद्ध** न० प्रेतोद्देश्यके मरणाहाद्दिनमदिवसे कर्त्तव्ये श्राद्धभेदे तद्विधानादि निर्णयसिन्धौ यथा

"अथ नवश्राद्धं पृथ्वीचन्द्रोदयेऽङ्गिराः "प्रथमेऽह्नि तृतीये च पञ्चमे सप्तमे तथा। नवमैकादशे चैव तत्त्वश्राद्धमुच्यते" शिवस्वामी "नव श्राद्धानि पञ्चाङ्गरात्रलायनशाखिनः। आपस्तम्बाः पृथक्त्वाद्धर्विभाषा वितरेषु हि" पक्षे ऐकादशाहिकं विना "मरणाहाद्दिनमेषु दिनेष्वेकैकं नवश्राद्धं कुर्यादानवमाद्यदि नवमे विच्छिद्येतैकादशे तत्कुर्यादिति" मदनरत्ने बौधायनोक्तेः। भविष्ये "नवसप्त दिवसं रात्रां नवश्राद्धान्यनुक्रमात्। आद्यन्तयोर्द्वयोर्योस्तु पृथक्त्वाद्धर्मदर्शयः" हेमाद्रौ हरवंशिकः "अनुक्त्वा

द्वादशाहस्य कल्पा तरति दुष्कृतम्" अतः पक्षेऽपि । एतान्येव विषमश्राद्धानीत्युच्यते नागरखण्डे तु "पञ्चमे सप्तमे तद्वदष्टमे नवमे तथा । दशमैकादशे चैव नवश्राद्धानि तानि च" इत्युक्तं कात्यायनस्तु "चतुर्थे पञ्चमे चैव नवमैकादशे तथा । यदत्र दीयते जन्तोस्तच्चनवश्राद्धमुच्यते" । प्रथमे सप्तमे चैवेत्याद्यपाठे व्यासे पाठः । बह्वृचानान्तु "नवश्राद्धं दशाहानि नवभिश्चन्तु षड्दिनैः" इत्युक्तं नारायणभट्टौ दीपिकायां "अथ तनुयादादौ चतुर्थे दिने श्राद्धं पञ्चमसप्तमाष्टनवदिनेषु । युग्मे द्विजः प्रथमे ऽह्नि तृतीयेऽह्नि पञ्चसप्तनवस्वपि द्वौ द्वौ पिण्डौ प्रदातव्यौ शेषेष्वेकैकन्तु विन्यसेत् । एको विषमश्राद्धेऽवयवपिण्डस्त्वेक इति तौ द्वावित्यर्थः । अत्र शाखाभेदात् व्यवस्था । अपरार्के भविष्ये "नवश्राद्धं त्रिप्रकल्पञ्च प्रथमासं मासिकानि च । न करोति ततोयस्तु तस्याघः पितरोमताः" "नवश्राद्धं त्रिपिण्डत्वं श्राद्धान्यपि च षोडश । पृथक् नैव तु कार्याणि संविभक्तधनेष्वपि" इति मिताक्षराधृतदक्षः । व्यासः "जातकर्मान्यकर्माणि नवश्राद्धं तथैव च" इत्युपक्रम्य । "मलमासेऽपि कार्याणि नित्यं नैमित्तिकं तथा" "नवश्राद्धे यदुच्छिष्टं मृते पर्युषितञ्च यत् । दम्पत्योर्भुञ्जतोश्चिष्टं न भुञ्जीत कदाचन" मिताक्षराधृतव्यासः । नवश्राद्धञ्च याज्ञिताग्निविषयं यतश्च यमः "चतुर्थे पञ्चमे चैव नवमैकादशे तथा । यदत्र दीयते जन्तोस्तच्चनवश्राद्धमिष्यते । ऋग्यजुःसामवेदानां त्रयाणाञ्चैव पारगः । त्रिणाचिकेतस्त्रिसुपर्णः पञ्चाग्निस्त्रिसुपर्णकः । षडङ्गवित् त्रिसौपर्णः षडाधानश्चितस्तथा । त्रिणाचिकेतः पञ्चाग्निः त्रिसुपर्णः षडङ्गवित् । ज्येष्ठसामगः । अयुग्मान् भोजयेद्विप्रांस्तच्चनवश्राद्धमिष्यते । नवमे पञ्चमे श्राद्धं प्रेतोपकारार्थं नावश्यकम् तच्चनवश्राद्धसंज्ञा एतद्द्रव्यषट्के प्रायश्चित्तविशेषविधानार्थम् याज्ञिताग्नेरग्निसञ्चयनादर्वाक् श्राद्धान्तरमस्तीति च दर्शितम्" प्रा० वि० ।

**नवषष्टि** स्त्री नवाधिका षष्टिः मा० त० । १जनसम्मितिसंख्यायां २ततत्संख्यान्विते च ततः पूरणे डट् नवषट् ततपूरणे त्रि० । एवं स्त्रियां ङीप् । ततपूरणे तमप् नवषष्टितम त्रि० । नवसप्तति नवाशीतिप्रभृतयो नवाधिकतत्तत्संख्यायां ततपूरणे तदुते च । ततपूरणे डट् तमप् च नवाधिकतत्तत्संख्या पूरणे त्रि० ।

**नवसप्तदश** पु० नव च सप्तदश च कर्म० । अतिरात्रयागभेदे "अभिजुवं सर्वस्तोमनवसप्तदशावतिरात्रौ" कात्या० श्रौ० २४।२ ६ "प्रजातिकामस्य नवसप्तदशः" तलव २२।२।४ नवसप्तदशः प्रजातिकामस्य" आप० श्रौ० १०।१।२ "नवसप्तदशोनास एकाहः तेन प्रजातिकामो प्रजातिः प्रजासम्पत्तिकां कामयमानः यजेत" नारा० ६० ।

**नवसार** पु० "नवसारो भवेच्छुद्धचूर्णतोयैर्विपाचितः । दोषावस्थेषु यत्नेन भिषग्भिर्योगसिद्धये" इति वैद्यचन्द्रिकोक्ते चूर्णतोयाभ्यां दोषावस्थेषु पाचिते क्वाथभेदे नवसादरमत्यत्र । "प्रतिश्यायेषु शिरसः पीडने नवसादरम्" वैद्यचन्द्रिका ।

**नवसू** स्त्री नवं सूते सू-क्विप् । अभिनवप्रसवायां स्त्रियां गोप्रभृतौ "अस्तं नवस्व इव स्मत्" ऋ० ४।३४।५ "नवस्वः नवप्रसवा गाव इव" भा० ।

**नवसूति(का)** स्त्री नवा सूतिः प्रसवो यस्या वा कप् । इत्यमरः २नवप्रसवायां स्त्रियाञ्च । नवप्रसूतिरत्र "नवप्रसूतिर्वरट्टा तपस्विनी" नैष० ।

**नवांश** पु० नवमोऽंशः । त्रिंशांशकरूपराशेर्नवमे भागे स च एकैकराशे ३।२० विंशतिकलाधिकांशत्वरूपः । राशिभेदे राशिभेदस्थैकैकांशादिकं ज्यो० उक्तं यथा "मेषाद्यामकरादाच्च तुलाद्याः कर्कटादवः । एषाञ्चवांशा राशीनां क्रांशाः वर्गोत्तमा स्मृताः" यथा मेषे प्रथमनवांशो मेषस्य, द्वितीयांशो वृषस्य, तृतीयांशो मिथुनस्य, चतुर्थांशः कर्कटस्य, पञ्चमांशः सिंहस्य, षष्ठांशः कन्यायाः सप्तमांशस्तुलायाः, अष्टमांशो वृश्चिकस्य, नवमांशो धनुषः । एवं वृषे प्रथमांशो मकरस्य१ कुम्भस्य२ मीनस्य३ मेषस्य४ वृषस्य५ मिथुनस्य६ कर्कटस्य७ सिंहस्य८ कन्यायाः९ । तथा मिथुने तुलायाः१ वृश्चिकस्य२ धनुषः३ मकरस्य४ कुम्भस्य५ मीनस्य६ मेषस्य७ वृषस्य८ मिथुनस्य९ । एवं कर्के कर्कस्य१ सिंहस्य२ कन्यायाः३ तुलायाः४ वृश्चिकस्य५ धनुषः६ मकरस्य७ कुम्भस्य८ मीनस्य९ । एवं सिंहे मेषाद्याः९ कन्यायां मकराद्याः९ तुलायां तुलाद्याः९ । वृश्चिके कर्कटाद्याः९ । एवमेव धनुषि मेषाद्याः९ । मकरे मकराद्याः९ । कुम्भे तुलाद्याः९ । मीने कर्काद्याः९ क्रमान्नवांशा ज्ञेयाः उक्तञ्च "मेषे नवांशा मेषाद्याः वृषे च मकरादिकाः । मिथुने च तुलाद्याःस्युः कर्कटे कर्कटादिकाः" इति ।

**नवाङ्ग** त्रि० नवविधमङ्गं यस्य । नवविधाङ्गयुक्ते चक्रदत्तोक्ते क्वाथभेदे पु० "संसृष्टदोषेषु हितं संसृष्टस्य पाचनम् । [विश्वास्तावद्भूनिम्बैः पञ्चमूलीसमन्वितैः । कृतःक्वाथो हन्याशु शतपित्तोद्भवं ज्वरम्" । २कर्कटशृङ्ग्यां स्त्री टाप् । ३युवत्यां स्त्री ङीप् ।

"नवाङ्गो ह्यरङ्गीदगङ्गी करोतु" जगन्नाथपण्डितः

**नवान्न** न० कर्म० । नूतनान्ने तत् प्राथमतयाऽस्त्यस्मिन् अच् । नवान्नागमकाले तन्निमित्तकश्राद्धादिकं श्राद्धविवेके उक्तं यथा विष्णुधर्मोत्तरे "व्रीहिपाके च कर्त्तव्यं यवपाके च पार्थिव ! । नवावाप्तौ महाराज ! विनाश्राद्धं न भक्षयेत् । पौर्णमासी तथा माघी श्रावणी च नरोत्तम ! । भौषद्यामतीतायां तथा कृष्णा त्रयोदशी । एतांस्तु श्राद्धकालान् वै नित्यानाह प्रजापतिः" । व्रीहिः शरत्पक्वधान्यं तत्रैव व्रीहिशब्दस्य रूढत्वात् । अन्यथा व्रीह्युपचारे श्यामाकनिमिधिविधानदर्शनं पृथगुपादानञ्च नोपपद्येत यथा छन्दोगपरिशिष्टे कात्यायनः "यथोक्तवस्तुसम्पत्तौ श्राद्धं तदनुकारि यत् । यवानामिव गोधूमा व्रीहीणामिव श्यामयः" । "व्रीहयः श्यामयोरुद्धा गोधूमाः वर्षपञ्चिकाः" । यवाद्यौषधयः सद्य विपदोन्नन्ति धारिताः" । वामनपुराणे "हविषा संस्कृता ये तु यवगोधूमश्यामयः । तिलमुद्गादयोमाषा व्रीहयश्च प्रिया हरेः" अतएव कामधेनुतन्त्रे आश्विनमासीयतिथिकृत्ये नवान्नश्राद्धविषयं ब्रह्मपुराणवचनं लिखितं यथा "शुक्लपक्षे नवं धान्यं पक्वं ज्ञात्वा शुभोदयम् । गच्छेत् चैत्री विधानेन गीतवाद्यपुरःसरम्" इत्यभिधाय "तेन देवान् पितॄंश्चैव तर्पयेदर्चयेत्तथा" इत्यस्यादेव वचनात् शुक्लपक्ष एवैतत् श्राद्धम् । इत्थञ्च व्रीहियाकनिमित्तं श्राद्धं न स्यादिति चेन्न स्यादेव नवान्नागमनिमित्तन्तु तत् स्यादेवेति ब्रूमः"

स्मा० त० रघु० उक्तं यथा

अथ नवान्नश्राद्धम् । ज्ञाततपः "नवोदके नवान्ने च मृष्टप्रक्षालने तथा । पितरः सृष्टयन्नमक्षकास्तु मघासु च" । नवोदके वर्षोपक्रमे । आर्द्रास्थरवाविति यावत् "आर्द्रादितो विशाखान्तं रविचारेण वर्षति" इति ज्योतिर्वचनात् रविचारेण रविगत्या । "प्राड्टकाले समायाते रौद्र ऋक्षगते रवौ । नाड्योर्वेधसमायोगे जलयोगं वदाम्यहम्" इति रुद्रयामलाच्च । रौद्रमार्द्रा । नवान्ने नवान्नागमे अत्र "नक्षत्रमृक्षपीड़ासु दुष्टस्वप्नावलोकने । ऋक्षाण्याद्यानि कुर्वीत नवश्यागमे तथा" इति विष्णुपुराणाद्ब्रह्मयामलतरवचनेषु नवान्नश्रुतेर्नवान्नागमस्यैव निमित्तत्व लाघवात् । अमावास्यान्तिस्रोऽष्टका माघी भौषद्यूर्द्ध्वं कृष्णत्रयोदशी व्रीहिनवान्नौ च "एतांस्तु श्राद्धकालान् वै नित्यानाह प्रजापतिः । श्राद्धमेतेष्वकुर्वाणो नरकं प्रतिपद्यते" इति विष्णुवचनं नवान्नागमश्राद्धस्यैव व्रीहियवोभयप्राप्तिविषयकत्वेन विधायकं यवाद्यौषध्यन्यव्युदासाय । श्यामिधान्यस्य तु प्राप्तिः । "अरहसन्नयोः केचिन्नवयज्ञं प्रचक्षते । धान्यपाकवशादन्ये श्यामाको वनिनः स्मृतः" इति छन्दोगपरिशिष्टे व्रीह्यप्राप्त्या नवशब्देन श्यामिधानादुपचारतुल्यन्यायात् श्राद्धेऽपि तथा कल्पनात् । "इक्षिके शुक्लपक्षे तु नवान्नं यक्षते बुधैः । अपरे क्रियमाणं हि धनुष्येव कृतं भवेत् । धनुषि यत् कृतं श्राद्धं सूर्यनेत्रास्तु राशिषु । पितरस्तत्र भुञ्जन्ति नवान्नामिषकाङ्क्षिणः" इति वराहवचनाच्च । श्यामाको व्रीहिविशेषः । वनी वानप्रस्थः । अपरे कृष्णपक्षे धनुषि धनुःस्थार्के । "पौषे चैत्रे कृष्णपक्षे नवान्नं नाचरेद्बुधः । भवेच्छ्राद्धान्तरे रोगी पितृणां नोपतिष्ठते" इति भोजराजवचनैकवाक्यत्वात् । एवञ्च सौरपौषवत् चैत्रोऽपि सौर एव ग्राह्यत्वात् । अत्र धनुर्मीनपर्य्युदासात् यवश्राद्धसख्यकालपर्य्यन्तं माघफाल्गुनवैशाखेष्वपि नवान्नश्राद्धं कार्यम् "एवमागामियागीयसख्यकालादधस्तनः । सकालादुत्तरो गौणः कालः पूर्वस्य कर्मणः । यदागामिक्रियासख्यकालसाध्यन्तरालवत् । 'गौणकालत्वमिच्छन्ति केचित् प्राक्तनकर्मणि' इतिहरिहरपद्धतौ तथादर्शनात् । अधस्तनः इत्थञ्चाश्वे व्यवहारः । अन्तरालवत् मध्यकालस्यैव । वस्तुतस्तु उत्तरक्रियासख्यकालं विना उत्तरक्रियाकरणपूर्वकाल एव पूर्वक्रिया कर्त्तव्या । "संस्कारा अतिपत्तेरनु सकालाश्चेत् कथञ्चन । कुर्वीत तदेव कुर्यात् ये तूपनयनादयः" इति छन्दोगपरिशिष्टात् संस्कारातिपाते तथा व्यवहारात् । अतएव श्राद्धविवेकेऽपि धनुषः पर्य्युदासान्नाचादिरिति सामान्यत उक्तम् । एवं यवश्राद्धमपि हरिशयनात् पूर्वं कर्त्तव्यम् "नवान्नं नैव नन्दायां न च सुप्ते जनार्दने । न कृष्णपक्षे धनुषि तुलायां नैव कारयेत्" इति ज्योतिर्वचनात् "न च सुप्ते जनार्दने" इति आश्विनशुक्लपक्षेतरम् आश्विनाधिकारे "शुक्लपक्षे नवं धान्यं पक्वं ज्ञात्वा शुभोदयम् । गच्छेत् चैत्री विधानेन गीतवाद्यपुरःसरम्" इत्यभिधाय "तेन देवान् पितॄंश्चैव तर्पयेदर्चयेत्तथा" इति ब्रह्मपुराणात् । सूनोनेता प्राप्कोयासां रात्रीणामिति व्युत्पत्त्या नवतान्नेतरित्यनेनाजूविधानात् तत्पदं सिद्धम् । ततश्च सूनुरिः-

पूर्वार्द्धेन हस्तिकर्णेये राजद्वारस्थात् चत्वारिंशद्दण्डाधिकावशिष्टषड्द्वारालयो ह्यगनेत्रा इति। यथोक्तं ज्योतिषे "ज्येष्ठाशेषार्द्धने सूर्ये ह्यगनेत्रानिशालये। नवाच्चैभोजनं श्राद्धं जन्मचन्द्रे तिथौ न च" अत्र जन्मतिथिनिषेधात् तथा "जन्मर्क्षतारं स्तिवासरञ्च" इति जन्मर्क्षनिषेधाच्च "नन्दायां भार्गवदिने त्रयोदश्यां त्रिजन्मनि" इत्यत्र त्रिजन्मपदं जन्मचन्द्रतिथिनक्षत्रविकपरं परवचने त्रिजन्मान्वित इत्यत्रापि तथा "सूर्ये चैव विशाखगे करतिथौ पापे त्रिजन्मान्विते। नन्दामन्दमहीजकाव्यदिवसे पौष्णे मघौ कार्त्तिके। भेषूद्याद्विगिवेषु विष्णुशयने क्षणे शशिन्यष्टमे श्राद्धं भोजनकं नवाच्चविहितं पुत्रार्थनाशपदम्"। सूर्ये चैव विशाखगे मार्गशीर्षेच्च विंशतिदण्डाधिकाषष्ठदिनत्रयावस्थिते सूर्ये। करतिथौ त्रयोदश्यां पापे षष्ठसतारात्रये नन्दा प्रतिपत् षष्ठी एकादशी मन्दः शनिः महीजो मङ्गलः काव्यः शुक्रः। उद्यगणः पूर्वोत्तरयमत्रयमरणः अश्विरेवत्यो शिव श्राद्धौ। भोजराजः "श्राद्धे विष्णुहस्तौ शशधरे मार्त्तण्डपौष्णादितौ मैत्रे चित्रविशाखवायुधनभे मूलाश्विवह्नौ तथा। भद्रे वारुण मूलके शुभदिने श्राद्धं नवं प्रस्तुते नन्दाभार्गवभूमिजेषु न भवेत् श्राद्धं नवाच्चोद्भवम्"। श्राद्धादयः रोहिणीश्रवण पुष्य मृगशिरो हस्त रेवती पुनर्वसु अनुराधा चित्रा विशाखा स्वाती धनिष्ठा मूलाश्विनी लक्षिका ज्येष्ठा अतभिमाः। नवान्नश्राद्धे मूलाऽलक्षिकाज्येष्ठाविधानात्तत्क्षेपमलक्षणप्राप्ते "ज्येष्ठा लक्षिका ज्येष्ठा मूलाद्यपदद्वेषु च। शुभौमदिने रिक्ततिथौ नाद्यान्नवौदनम्" इति श्राद्धेषाभोजिमात्रपरम् अन्नपदः पूर्वभाद्रपदः। चन्द्रतारादाशुद्धौ प्रतीकारमाह देवलः "कर्म कुर्य्याद् कदाचाग्रे चन्द्रादियोगने बुधः। शुक्लकाले त्विदं सर्वं नार्त्तः कालमपेक्षते। चन्द्रे च यद्यं नवच्च तारे तिथावभद्रे सितवस्तुवांच। धान्यञ्च दद्यात् करचर्षारे योगे तिलान् हेममथिञ्च कन्ये"। अत्रमविहितमन्नं राजमार्त्तण्डे तारादोषात् नवपरिमाणमाह "एकत्रिपञ्चसप्त द्विजाय दद्यात् पलानि नवस्य क्रमशो जन्मनि विपदिप्रत्यरिमरणाक्षतारकासु"। एवन्तु सौकिकैर्भोगैः श्राद्धरक्षिद्विमासकम्। लोककल्पितयं श्रेयं ज्योतिर्विदैः स्मृतिसम्मतम्" वामनपुराणाच्च "विप्रयो स्मृतिघातात्च वेदन्येदुर्नीतिसम्भवाः। ते नामक्षरणाद्विष्णोर्नार्यं यान्ति महाजनः" विष्णुधर्मोत्तरे "सर्वशुभानां परिमोक्षकारि संपूजनं देववरस्य विष्णोः" इति ब्रह्मपुराणे "प्राश्नीयात् दधिसंयुक्तं नवं विप्राभिमन्त्रितम्" अभिमन्त्रितम् "मन्त्रानादेशे गायत्री" इति वचनाद्गायत्या। स्मृतिः "स्मृत्वा ब्राह्मणानुज्ञां सदधिप्राश्येद्यवम्" अत्र ब्रीह्यभावे शालिना, नूतनाभावे पुरातनेनापि श्राद्धादिकमाह मदभाष्ये स्मृतिः "स्मृत्वमेधी व्रीहियवाभ्यां शरद्यग्रयणयोर्यजेत। श्यामाकैर्वैनवे वर्षेषु आपत्कल्पे ह्यन्येन पुरातनैर्वेति"। स्मृत्वमेधीति मेध्यमेधाहिंसयोः मेध्य स्मृत्वमे चेत्यत्र चकारेण पूर्वगणस्य मेधाहिंसयोरनुवृत्तेः तेन मेध्य हिंसार्थः तेन स्मृतिनिमित्तेन ज्ञातायाः "पशुस्मृत्वास्मृत्यस्य चुल्लीपेषण्युपस्करः। कण्डनी चोदकुम्भश्च बध्यते याश्च वाहयन्" इति मनूक्तायाः पशुस्मृत्यरूपहिंसायाः कारी स्मृत्वमेधी स्मृत्यस्य इत्यर्थः। स्रुदयन्ति प्राणैर्वियोजयन्तीति स्रूना प्राणिवधस्थानानि चुल्लीपाकस्थानं पेषणी दृषदुपलादिः उपस्करः स्मृत्यसम्मार्जन्यादि कण्डनी मूषलोदूखलादि वाश्च एताः स्रूना वाहयन् स्मृत्यकर्मे योजयन् वध्यते पापेन सम्बध्यते इत्यर्थः। श्राद्धचिन्तामणावप्येवम्। प्रेतमातापितृकस्य पुरातनधान्याभावे नवेनैव वैश्वदेवं कृत्वा नवञ्च ब्राह्मणेभ्यो दत्वा ब्राह्मणानुज्ञां स्मृत्वा भोजनादिकं कर्त्तव्यमाह रेणुकाचार्य्यनव्यवहारमतस्तु स्मृतिः "दत्त्वैवं ब्राह्मणेभ्यश्च हुत्वा पा वैश्वदेविकम्। अन्योनवान्नमश्नीयादिति बौधायनोऽब्रवीत्"। अन्यः श्राद्धकरणासमर्थः श्राद्धानधिकारी च। अतएव विधवया नवमेकोद्दिष्टे दीयते भुज्यते चेति"।

**नवायस** न० नवमाया आयसा यत्र। सुश्रुतोक्ते लौहचूर्णभेदे "त्रिफला चित्रकत्रिकटुविडङ्गसुस्तानां नवभागस्तावन्मात्रश्च लोहायश्चूर्णस्य तत्सर्वमेकध्यं कृत्वा यथायोगं मात्रां सर्पिर्मधुभ्यां संयुक्तोपयुञ्जीत। एतन्नवायसमेतेन जाठर्य्यं न भवति सप्तोऽग्निराप्यायते दुर्नामशोफपाण्डुकुष्ठरोगाविपाककासश्वासप्रमेहाश्च न भवन्ति"

**नवार्चिस्** पु० नव अर्चींषि यस्य। अङ्गिरसे शाराः० कर्म०। नवायां शेखावाच्च।

**नवासिका** स्त्री मात्राष्टभेदे "लोलनावश्चाम्बुधेर्विलोकः" "तद्युगलाद्या नवासिका स्यात्" छन्दः० "तद्युगलात् चन्द्रयुद्विद्यात् अष्टमात्रात् उपरीत्यर्थः। यदि जगणो मध्यगुरुः नगणश्चन्द्रः स्यात् तदा नवासिका स्यात्" तदर्थः।

नवाह पु० कर्म० टच् समा० । १अभिनवे दिने प्रतिपत्तिथौ । नवभिरहोभिर्निर्वृत्तः ठञ् तस्य लुक् अच् समा० । नवदिवसाध्ये २यागादौ । ३गवामयनाङ्गे नवरात्रसाध्य यागभेदे च पु० । "अभिजित् त्रयः स्तरसामानः४ दिवाकीर्त्यं सप्तः५ (विष्णुवान्) त्रयः स्तरसामानोऽ विश्वजित्६ इति नवरात्रः इति नवरात्रो विधातव्यः । अङ्गेभ्यो विष्णुवानं एकं पृष्ठं च कृत्वा अभिजिदनुष्ठेयः तत्त्रयः स्तरसामानः ततो विष्णुवानिति" ताण्ड्य० ४।५।१ भाष्ये स्थितम् ।

नविष्टि स्त्री त्रि० नवा इष्टिः वेदे शक० । अभिनवे इष्टिभेदे यागे "वज्रिन्त्सपत्नो नविष्टौ" ऋ० ८।२।१७ "नविष्टौ अभिनवये यागे" भा० ।

नविष्ठ त्रि० अतिशयेन नविता स्तोता इष्ठन् इष्ठोस्तोपः । १अतिशयस्तोतरि "विप्रा नविष्ठया" ऋ०१।८२।२ "नविष्ठया नवितृतमया मती मत्या स्तुत्या" भा० स्तुत्यभूतायां अपि स्तुत्याः कर्तृत्वविवक्षया कर्तरि इष्ठन् । अतिशयेन नवः नूतनः इष्ठन् । २नव्यतमे त्रि० ।

नवीन त्रि० नव+स्वार्थे ख नवस्य नूः स्तोर्गुणः । नव्ये "गदाधरविनिर्मिता विविधदुर्गतर्काटवीनवीनपदवी सदं वितनुतां सतां धीमताम्" वादे गदाधरः ।

नवीयस् त्रि० नव+अतिशये-ईयसुन् । नवतमे "प्रतरं नवीयः" ऋ०१०।८६।१ "नवीयो नवतरम्" भा० स्त्रियां ङीप् नवशब्दस्य स्तुत्यादयर्थत्वे २अतिशयेन स्तुत्ये च "नू नव्यसे नवीयसे सूक्ताय" ऋ०८।६।८ "नवीयसेऽतिस्तुत्याय" भा० ।

नवेदस् त्रि० न विपरीतं वेत्ति विद-असुन् वर्णाडित्वादिना नञः प्रकृतिभावः । विपरीतज्ञानशून्ये मेधाविनि यथा श्रुतं तथैव ज्ञानवति "नवेदसा विमुवाम्" ऋ०१।२३।१

नवोढा स्त्री नवमूढा । १नूतनपरिणीतायां स्त्रियां २नायिकाभेदे "लज्जाभरपराधीनरतिर्नवोढा" इति लक्षयित्वा "बलात्कृता पार्श्वं सखमतुखं नैव कुरुते धुनाना मूर्द्धानं क्षिपति वदनं चुम्बनविधौ । हृदि न्यस्तं हस्तं क्षिपति गमनारोपितमना नवोढा वोढारं रमयति च सन्तापयति च" रसमञ्जर्यामुदाहृतम् ।

नवोदक न० नवं पतितमुत्थितं वा उदकम् । १नवजाते उत्थिते उदके २गगनादभिनवपतिते जले च तस्यापेयत्वादिकं प्रा०त० निरूपितं यथा

हारीतः "सप्तरात्रकृतम्बूकयङ्गुशुक्तिपर्दकान् । पीत्वा नवोदकञ्चैव पक्षगन्धेन शुध्यति" । नवोदकं नवखातजलं वर्षोदकञ्च तथा ब्रह्मपुराणम् "नवखातजलं गावो महिष्यश्छागयोनयः । शुध्यन्ति दिवसैरेव दशभिर्नात्र संशयः" मिताक्षराधृता स्मृतिः "काले नवोदकं शुद्धं न पातव्यन्तु तत् क्वचित् । अकाले तु दशाहं स्यात् पीत्वा नाद्यादहर्निशम्" काले वर्षाकाले । यमः "स्नानमाचमनं दानं देवतापितृतर्पणम् । नूतोदकेन कुर्वीत तथा मेघादिनिःसृतैः" । पानादीतरत्र अर्थादौ च कविवंशः । "अमोघमम्भोविसृजन्ति मेघाः पूतं पवित्रं पवनैः सुगन्धि" । नवोदकनिमित्तं च पार्वणं श्राद्धं नित्यं, तद्विधानादि ति० त० उक्तं यथा

यातातपः "नवोदके नवान्ने च सद्यःप्रच्छादने सदा । पितरः सृजन्त्यन्नमष्टकासु मघासु च । तस्माद्यात् सदोद्युक्तो विद्वत्तु ब्राह्मणेषु च" अत्र सदेति अवश्यात् अस्य नित्यत्वम् । नवोदके वर्षोपक्रमे आर्द्रांगते रवाविति यावत् । "आर्द्रादितो विशाखान्तं रविचारेण वर्षति" इति नव्यवर्द्धमानधृतात् "प्रावृट्काले समायाते रौद्रे ऋक्षगते रवौ । नाडीवेधसमायोगे जलयोगं वदाम्यहम्" इति बृहज्जाबालाच्च । रौद्रमार्द्रा नवोदकश्राद्धञ्च सावकाशत्वात् त्रयोदश्यादिषु निषेधमाह दीपिकायाम् "त्रयोदशीं जन्मदिनञ्च नन्दां जन्मर्क्षतारां सितवासरञ्च । व्रतञ्च हरीज्येन्दुकरान्वयैत्र ध्रुवेषु च श्राद्धविधानमिष्टम्" । सितवासरं शुक्रवारं ऋक्षं राशिः हर्यादयः श्रवणपुष्यमृगशिरोहस्तारेवत्यनुराधा उत्तरात्रितयरोहिण्यः । अन्यपक्षे चेन्नवोदकश्राद्धावसरदोषयोः श्राद्धोत्तरत्वात् सिद्धिः" । [त्रि० नवोद्धृत न० नवश्चासौ उद्धृतम् । १नवनीते अमरः । २भूतलोद्धृतमात्रे

नव्य त्रि० नु-स्तुतौ यत् । १स्तुत्ये नव+स्वार्थे यत् नूरादेश ओर्गुणः २नवीने अमरः । ३रक्षणवर्द्धनयोग्यायां पु० राजनि० । भावे यत् । ४स्तुतौ न० । [नङ्गेयोपाध्यायसुतः ।

नव्यवर्द्धमान पु० स्मृतिनिबन्धकारभेदे वर्द्धमानश्च पुराणः

नश् त्रि० नश-क्विप् । १नाशप्रतियोगिनि । भावे क्विप् २नाशे स्त्री । तुदा० अनि पदान्ते च वा ष पक्षे षढगकाः यथाविधानम् । नक्ष् नट् ङ् ।

नशाक पुंस्त्री नश-आक । काकभेदे उणादिकोषः ।

नश्यत्प्रसूतिका स्त्री नश्यन्ती प्रसूतिर्यस्याः कप् । मृतवत्सायां स्त्रियां हेमच० ।

नश्वर त्रि० नश-क्वरप् । नाशप्रतियोगिनि अवश्यंनाश-

ग्रीवे अयाश्वते "वदन्ति विश्वं कवयः यन्नरम्" माग० ५।१८५ स्त्रियां ङीप्।

**नष्ट** त्रि० नश-क्त। १नाशप्राप्तियोगिनि २तिरोहिते अदर्शनं गते ३दुष्टाशये च। भावे क्त। ४नाशे ५अदर्शने च न० "नष्टं वर्षशतेनैतुष्वगच्छनाभावादपाम्" भा० द० "ध्रुवाणि तस्य नश्यन्ति अध्रुवं नष्टमेव च" हितो०

**नष्टचन्द्र** पु० नष्टः दुष्टचन्द्रः। सौरभाद्रमासे उभयपक्षीय चतुर्थ्यांतिथौ चन्द्रे तस्य तद्दिवसे दुष्टत्वकारणं ब्रह्मवै०पु० ८० अ० उक्तं यथा

"नष्टचन्द्रो न द्रष्टव्य भाद्रे मासि सिताधिते। चतुर्थ्यांतिथौ दुष्टः प्रतिषिद्धो मनीषिभिः। चन्द्रतारापरिच्छेदं कलङ्कमतिदुष्करम्। तस्मै ददाति हे नन्द! कामतो यदि पश्यति। अकामतो नरो दृष्ट्वा चन्द्रं पूतं जलं पिबेत्। तदण्डो भवेत् सद्यो निष्कलङ्की मङ्गीतले। सिंहः प्रसेनमवधीत् सिंहो जाम्बवता हतः। सुकुमारक! मा रोदीस्तव ह्येष स्यमन्तकः। इति मन्त्रेण पूतञ्च जलं साधु पिबेद्भुवम्" इत्युपक्रमे "दृष्ट्वा तस्याश्च (तारायाः) सर्व्वाङ्गमनङ्गबाणपीडितः। भाद्रे चतुर्थ्यांचन्द्रश्च जहारा चेतनां व्रजन्। ज्ञानं क्षणेन संप्राप्य रथस्थो रविको बली। रथमारोहयामास करे धृत्वा च तारकाम्। कामोन्मत्तः कामिनीनां समाश्लिष्य चुचुम्ब सः" "यस्मात्तस्मिन् दिने वत्स! पापदृष्टो युगे युगे। मया भुक्तं क्षीयते कर्म कल्पकोटिशतैरपि। अवश्यमेव भोक्तव्यं कृतं कर्म शुभाशुभम्। देहस्यागेन हे वत्स! कर्मभोगो न नश्यति। प्रायश्चित्तात् सन्दृष्टो ह्यात्मैव भविष्यति। तारापहरणं वत्स! कलङ्कचन्द्रखण्डने। मुनिशप्तं विलम्बश्च भविष्यति युगे युगे"।

**नष्टचेष्टता** स्त्री नष्टा चेष्टा यस्य तस्य भावः तल्। १दुर्बलोकादिभिः सकलचेष्टानाशे २प्रलये अमरः ३सात्त्विकभावभेदे मूर्च्छायामित्यन्ये।

**नष्टजातक** न० नष्टं न ज्ञातं जातं जन्म जन्माधानकालो यत्र कप्। जन्माधानकालयोरपरिज्ञाने प्रश्नलग्नादिना जन्मकालज्ञानार्थे उपायभेदे स च दृष्टजातके २५अ० उक्तो यथा

"अथ नष्टजातकाध्यायप्रारम्भः "आधानजन्मापरिबोधकाले संपृच्छतो जन्म वदेद्विलग्नात्। पूर्वापराह्णे भवनस्य विद्वान्नावुदग्दक्षिणगे प्रसूतिम्" १ द० जा० "एवमाधानजन्मकालयोरपरिबोधे अज्ञाने सति संपृच्छतः प्रष्टुः विलग्नात् प्रश्नलग्नाच्चन्द्रं वदेद्ब्रूयात् येन लग्नेन प्रष्टा पृच्छति तस्य यदि पूर्वाह्णे प्रथमहोरा भवति तदा प्रष्टुः भानावादित्ये उदग्गते उत्तरायणस्थे जन्म वक्तव्यम्। मकरादिराशिषट्कस्थे जात इत्यर्थः। अथ लग्नस्यापराह्णे द्वितीया होरा भवति तदा भानौ दक्षिणगते दक्षिणायनस्थे जन्म वक्तव्यम्। कर्कटादिराशिषट्कस्थे जात इत्यर्थः। तथा च "आधानजन्मनी यस्य न विज्ञायेत देहिनः। जन्म संपृच्छतस्तस्य प्रश्नलग्नात् विनिर्दिशेत्"। अथ वर्षज्ञानमाह लग्नत्रिकोणेषिति भट्टो०। "लग्नत्रिकोणेषु गुरुक्षिभागैर्विलग्न वर्षाणि वयोनुमानात्। सौम्योर्कलग्ने कथितास्तु शेषैरन्यायनर्क्षोदयरर्कचारात्" २मू० "त्रिभागैः द्वेष्काणैः लग्नत्रिकोणेषु प्रथमपञ्चमनवमस्थानेषु गुरुः जीवो ज्ञेयः तद्यथा प्रश्नलग्नस्य यदि प्रथमद्रेष्काणो भवति तदा यस्य लग्नराशिः तत्स्थे गुरौ जन्म वक्तव्यम्। अथ लग्नस्य द्वितीयोद्रेष्काणस्तदा लग्नाद्यः पञ्चमो राशिस्तत्स्थे गुरौ जन्म वक्तव्यम्। अथ यदि लग्नस्य तृतीय द्रेष्काणस्तदा लग्नाद्यो नवमोराशिस्तत्स्थे गुरौ जन्मवक्तव्यम्। एवं क्षेपाच्चिन्तयम्। स्वयान्येषां मतम्। यथा प्रश्नलग्नस्य यदा प्रथमद्रेष्काणोदयो भवति तदा लग्नराशितो यावत्संख्ये राशौ दृष्टस्तिष्ठति तावत्संख्यानि प्रष्टुः वर्षाणि वक्तव्यानि। अथ लग्ने द्वितीयोद्रेष्काणस्तदा लग्नात् पञ्चमराशितो यावत्संख्ये राशौ दृष्टस्तिष्ठति तावत्संख्यानि प्रष्टुः वर्षाणि वक्तव्यानि। अथ लग्नस्य तृतीयोद्रेष्काणो भवति तदा लग्नाद्यवमराशितो यावत्संख्ये राशौ दृष्टस्तिष्ठति तावत्संख्यानि प्रष्टुः वर्षाणि वक्तव्यानि। एतद्व्याख्यानं न शोभनं पूर्वमेव व्याख्यानं श्रेयः यस्माद्यवनेश्वरः 'द्रेष्काणक्रमे लग्नस्थे राशौ गुरुर्विलग्नाद्यदि कोणगोऽभूत। सद्वत्सरेत् तद्भवनक्रमेण खाद्वारमादवदुदग्गते प्रसक्षा" यद्यप्यत्र सामान्येनोक्तं दृष्टस्थेरवस्थानं तथा च द्वादशभागक्रमेण प्रतिराशौ सञ्चार्यः। तद्यथा यदि प्रश्नलग्नस्य प्रथमद्वादशभागोदयो भवति तदा लग्नस्थे जीवे जातः द्वितीयद्वादशभागश्चेत्तदा लग्नाद्वे द्वितीये गुरौ जातः एवं तृतीयादिद्वादशभागोदये तृतीयादिषु स्थानेषु जातम्। विलग्नं वर्षाणि वयोनुमानादेवं दृष्टस्थेरवस्थानं ज्ञात्वा तस्य एवं वयोनुमानात्तस्थितिं शरीरमनेन वर्षाणि विलग्नं वयःप्रमाणं वृद्धा द्वादशद्व

द्वादशसु वर्षेषु विकल्पना कार्या। किमिच्छन्नेव भगण-परिवर्त्तं ज्ञातराशेः ह्रस्वतेरवस्थानमभूदत द्वितीय उत तृतीयादिषु एवं तस्मात्तिथमवेक्ष्य वयोनुमानं वक्तव्यम्। यत्र द्वादशसु वर्षेषु भ्रान्तिर्भवति तत्र पुरुषलक्षणोक्तेन दशाविभागेन द्वादशवार्षिकीं दशां चेत्तेषु परिकल्प्य तत्तद्वेलाङ्गसंस्थाहर्क्षज्ञानं तथा च पुरुषलक्षणे पठ्यते "पादौ शुक्रकौ प्रथमं प्रदिष्टं जङ्घे द्वितीयं तु बृहज्जानुयुग्मे। मेढ्रोरुषुक्काच्च ततस्तृतीयं नाभिं कटिं चेति चतुर्थमाहुः। उदरं कथयन्ति पञ्चमं हृदयं षष्ठमथ स्तनान्वितम्। अथ सप्तमंसजत्रुकौ कथयन्त्यष्टममोष्ठकन्धरे। नवमं नयने च बान्धवौ सुललाटं दशमं शिरस्तथा। शुभेष्वशुभं दशाफलं चरणाद्येषु शुभेषु शोभनमिति" किं तत्र विंशत्यधिकं वर्षशतं यस्य जन्मनोऽतीतं तस्य नष्टजातकवर्षज्ञानोपाय एव नास्ति। एवं वर्षेषु ज्ञातेषु ऋतुज्ञानमाह शीघ्रोऽर्कलग्नं इति येन लग्नेन प्रष्टा पृच्छति तत्र चेदर्कः सूर्यः स्थितस्तद्रेष्काणो वा लग्ने तदा शीघ्रे जात इति वक्तव्यम्। कथितास्तु शेषैरिति शेषैरन्यैश्चन्द्रादिभिर्यैर्लग्नैः ऋतुः पूर्वमेव कथित उक्तः द्रेष्काणैः शिशिरादय इत्यादिना पन्नगोक्तः। तत्र यदा मन्दैरोलग्ने भवति तद्रेष्काणो वा तदा शिशिरे जात इति वक्तव्यम्। एवं शुक्रे लग्नगते तद्रेष्काणो वा तदा वसन्ते जातः एवं भौमे शीघ्रे। एवमेव अन्द्रे लग्नगते तद्रेष्काणो वा वर्षासु, बुधे शरदि, जीवे हेमन्त इति। यदा बहवो लग्नगताः भवन्ति तदा तेषां मध्ये यो बलवान् तदुक्तौ जात इति वक्तव्यम्। अथ न कश्चिद् यदि लग्नगतो भवति तदा तस्य सम्बन्धी द्रेष्काणोदयो भवति तदा तदुक्तौ जात इत्येवं वक्तव्यम्। अन्यावनतोन्नतरर्कचारादिति अन्यस्मिन्नयनेऽस्मिन्नतावर्कचारादतः अन्यस्मिन्नयने तदयना सम्भवेदुत्तरस्थो भवति तदर्कचारवशेन वक्तव्यम् एतदुक्तं भवति सौरेण मानेन ऋतुर्वक्तव्यः न तु चान्द्रेण यथा शिशिरे जाते मकरकुम्भयोरन्यतमे राशौ सूर्यस्यावस्थानं ज्ञेयम् एवं शेषराशिष्वप्यूह्यम् अनेन लौकिकचान्द्रमासो निराकृतो भवतीति" भट्टो०।

"चन्द्रशीघ्राः परिवर्तनीयाः शुक्रारमन्दैरयने विलोमे। द्रेष्काणभागे प्रथमे तु पूर्वो मासोऽनुपातात्तु तिथिर्विकल्प्यः" श्मू०।

"अथायने विलोमे सूक्ष्मपरिज्ञानादनुपरिज्ञानं मासपरिज्ञानं चेन्द्रवज्रयाह चन्द्रशैति। अयने विलोमे सति चन्द्रशीघ्राः शुक्रारमन्दैः परिवर्त्तनीयाः शशिबुधगुरवः सितभौमशनैश्चरैः अयनव्यत्यये प्राप्ते सति परिवर्त्तनीयाः व्यत्ययेन अवस्थायाः एतदुक्तं भवति यदुत्तरायणे ज्ञाते प्रावृट्कालो ज्ञातस्तदा वसन्ते जात इति वक्तव्यम् चन्द्राच्छुक्रेणात्र परिवर्तितः। अथोत्तरायणे शरदि प्राप्तायां शीघ्रे जातः। दक्षिणायने शीघ्रे ज्ञाते शरदि जातः। अथ बुधो रविभौमयोरपवर्त्तितो। रविभौमौ बुधेन च। उत्तरायणे हेमन्ते ज्ञाते शिशिरे जातः दक्षिणायने शिशिरे प्राप्ते हेमन्ते जातः इति वक्तव्यम् अत्र जीवमन्दौ परस्परमपवर्त्तितौ एवकृतौ ज्ञाते मासज्ञानमाह द्रेष्काणभाग इति प्रश्नलग्ने यो द्रेष्काणो वर्त्तते तस्य च द्रेष्काणस्य यदि प्रथमभागो वर्त्तते तदा ज्ञातर्तौ प्रथमे मासि जातः इति वक्तव्यम् अथ लग्ने द्रेष्काणस्य द्वितीयो भागो वर्त्तते तदा ज्ञातर्तौ द्वितीये मासि जातः तृतीयद्रेष्काणे द्वौ विभागौ पूर्वापरौ अत्रापि सर्वावस्थानतएव मासज्ञानम्। तिथिज्ञानार्थमाह। अनुपातात्तु तिथिर्विकल्प्यः अनुपातात् त्रैराशिकात् तिथिर्विकल्प्यो विकल्पनीयः लग्नस्य षट्त्रिंशाः यतानि द्रेष्काणः द्रेष्काणेन च ज्ञातर्तोः ऋतुज्ञानं तद्गतत्रिंशाः यतत्रयं त्रिंशाश्चतत्रयेण मासज्ञानम् अनानुपातात् तिथिर्विंशाद्यवकेनैकेको ज्ञेयः एवं च तिथिरादित्यभागा एवमादित्यराशयो भागा ज्ञेयाः मासा राशयस्तिथयो भागाः यस्मिंश्च तिथौ ज्ञातवर्षे यथाप्रदर्शितादित्यो भवति तस्मिन् तिथौ तस्य जन्म इति वक्तव्यम्" भट्टो०।

अथ चन्द्रमानतिथिज्ञानोपायमिन्द्रवज्रयाह।

"अत्रापि होरापटवो द्विजेन्द्राः सूर्यांशतुल्यां तिथिसंहरन्ति। राशियुगंशेषु विलोमजन्म मार्गेण वेद्याः क्रमशो विकल्प्याः" श्मू०।

"अत्रापीति अत्राब्दे तिथिज्ञाने द्विजेन्द्रा सनयो होरा शास्त्रज्ञाः सूर्यांशतुल्यां स्वांशज्ञाने स्फुटार्कभागसमां तिथिसंहरन्ति कथयन्ति प्रश्नकाले तात्कालिकेनादित्येन यावन्तो भागा मुक्तास्तावन्तः शुक्लप्रतिपत्प्रभृतितिथयो व्यतीताः। अत्र चान्द्रमाने मकरमासे ज्ञाते माघमासो ज्ञेयः एवमन्यत्रापि मासकल्पना कार्या। तथा च मयोक्तः "पृच्छाकाले रविणा यावन्तोंशाः स्फुटेन सम्मुक्ताः। राशेस्तावत्तिथयः स्युः शुक्लादावर्क-

मासस्य" एवं दिने ज्ञाते किमयं रात्रौ जातो दिवा वेति तदर्थमाह रात्रिद्युसंज्ञेति रात्रिद्युसंज्ञा पूर्वं व्याख्याताः सोजाश्विकर्किमिथुना इत्यादिना। तत्र प्रश्नकाले यदि रात्रिसंज्ञो लग्नो भवति तदा तस्य विलोमतो दिवाजन्म वक्तव्यम् अथ द्युसंज्ञो लग्नो भवति तदा रात्रौ जन्म वक्तव्यम्। एवं दिनरात्रिविभागे ज्ञाते वेलाज्ञानमाह भागैश्च वेलाः क्रमशो विकल्प्याः यस्मिन् दिने पुरुषस्य जन्मज्ञानं तस्मिन् दिने सूर्यादिलोऽपि ज्ञातः ततस्तस्य पुरुषस्य यदि दिवाजन्म तदा तस्मादादित्याह्नि प्रमाणं कार्यम् अथ रात्रौ जन्म तदा रात्रिप्रमाणं तत्र प्रश्नलग्नस्य तस्मिन् काले यावन्तस्वका भुक्तास्तैरनुपातः कार्यः यदि पुरुषस्य दिवाजन्म तदा दिनप्रमाणेन यदा रात्रौ रात्रिप्रमाणेन तत्कालस्थभुक्तचक्राणां गणनां कृत्वा तस्यैव लग्नस्य स्वदेशराश्युदयप्रमाणेन भागमपहृत्यावाप्तां वेलां तावता कालेन गतेन दिनस्य रात्रेर्वा जन्म वक्तव्यम्। एवं लग्नभागैः क्रमशः परिपाट्या वेलाः समयाः विकल्प्या विकल्पनीयाः" भट्टो०।

"केचिच्चर्काक्ष्युमिताच्चर्क्षाच्छुक्लान्तसंज्ञं कथयन्ति मासम्। लग्नस्थितोक्तसमीर्यमुक्तं सम्योच्यतेऽक्षाब्धिभनादिभिर्वा" ५भू०।

"अथान्तरेण मासज्ञानमिन्द्रवज्रयाह केचिदिति केचिदाचार्याः यमाद्भाक्ष्युमिताच्चन्द्रयुक्ताच्चर्क्षाच्छुक्लान्तसंज्ञं मासं कथयन्ति प्रश्नकाले यस्मिन्नवांशके नवमेऽंशे चन्द्रमा भवति तमपि नवांशकं त्रिधा परिकल्प्य तस्मिन्नवांशके नवमेंऽशे चन्द्रमा व्यवस्थित इति चन्द्रनवांशकगतं नक्षत्रमन्वेष्यम्। तत्रत्यशुक्लान्तसंज्ञके मासि तस्य जन्म वक्तव्यम् अत्र यस्य नक्षत्रस्य शुक्लान्तसंज्ञो मासो भवति तस्य दृक्सूतिचारोक्तविधिना शुक्लान्तसंज्ञो मासः परिकल्प्यः तल्लोकम् "नक्षत्रेण सहोदयमस्तं वा येन याति सुरमन्त्री। तत्संज्ञं वक्तव्यम् वर्षं मासं क्रमेणैव। वर्षाणि कार्त्तिकादीन्यम्बेयाङ्घ्रयाद्योज्यानि क्रमशस्त्रिभन्तु पञ्चमसप्तान्त्यमन्त्यं च यदर्क्षमिति" तत्र चन्द्रमा यदि द्वयनवांशके तत्रवांशकसप्तकस्थावांश्भवति तदा कार्त्तिके मासि जात इति वक्तव्यम्। अथ द्वयनवांशकस्थोर्क्षं भवति मिथुननवांशके तत्रवांशकषट्कस्थावांश्यदा चन्द्रमा भवति तदा मार्गशीर्षे मासि जात इति वक्तव्यम्। अथ मिथुनवांशके तत्रवांशषट्कस्थोर्क्षं कर्कटनवांशके तत्रवांशकपञ्चकस्थावांश्यदा चन्द्रमा भवति तदा पौषे मासि जात इति वक्तव्यम् अथ कर्कटे तत्रवांशकपञ्चकस्थोर्क्षं सिंहनवांशके तत्रवांशकचतुष्टयस्थावांश्यदा चन्द्रमा भवति तदा माघे मासि जन्म इति वक्तव्यम्। अथ सिंहनवांशके तत्रवांशकचतुष्टयस्थोर्क्षं कन्यानवांशके तत्रवांशकत्रयस्थावांश्यदा चन्द्रमा भवति तदा फाल्गुने मासि जात इति वक्तव्यम्। अथ कन्यानवांशकत्रयस्थोर्क्षं तुलानवांशके तत्रवांशकषट्कस्थावांश्यदा चन्द्रमा भवति तदा चैत्रे मासि जात इति वक्तव्यम् अथ तुलानवांशके तत्रवांशकषट्कस्थोर्क्षं वृश्चिकनवांशके तत्रवांशकपञ्चकस्थावांश्यदा चन्द्रमा भवति तदा वैशाखे मासि जात इति वक्तव्यम् अथ वृश्चिके तत्रवांशकपञ्चकस्थोर्क्षं धनिनवांशके तत्रवांशकचतुष्टयस्थावांश्यदा चन्द्रमा भवति तदा ज्यैष्ठे मासि जात इत्यवगन्तव्यम्। अथ धनिनवांशके तत्रवांशकचतुष्टयस्थोर्क्षं मकरनवांशकत्रयस्थावांश्यदा चन्द्रमा भवति तदा आषाढे मासि जात इति वक्तव्यम्। अथ मकरनवांशके तत्रवांशकत्रयस्थोर्क्षं कुम्भनवांशके तत्रवांशकत्रयस्थावांश्यदा चन्द्रमा भवति तदा श्रावणे मासि जात इति वक्तव्यम्। अथ कुम्भनवांशके तत्रवांशकत्रयस्थोर्क्षं मीननवांशे तत्रवांशपञ्चकस्थावांश्यदा चन्द्रमा भवति तदा भाद्रपदे मासि जात इति वक्तव्यम् अथ मीननवांशके तत्रवांशकपञ्चकस्थोर्क्षं मेषनवांशे तत्रवांशषट्कत्रयस्थावांश्यदा चन्द्रमा भवति तदाश्वयुजि मासि जात इति वक्तव्यम्। अथ मेषनवांशके तत्रवांशाष्टकस्थोर्क्षं यदि चन्द्रमा भवति तदा कार्त्तिके मासि जात इत्यवगन्तव्यम्। यस्मिन् कृत्तिका रोहिणी च कार्त्तिकः कृत्तिरार्द्रा च मार्गशीर्षः पुनर्वसुः पुष्यश्च पौषः" श्लेषा मघा च माघः। पूर्वफाल्गुन्युत्तरफाल्गुनी फल्गुश्च फाल्गुनः। चित्रा स्वाती च चैत्रः। विशाखा चानुराधा च वैशाखः। ज्येष्ठामूले ज्यैष्ठः। पूर्वाषाढोत्तराषाढा चाषाढः। श्रवणं धनिष्ठा च श्रावणः। शतभिषक्पूर्वभाद्रपदोत्तरभाद्रपदाश्च भाद्रपदः। रेवत्यश्विनीभरण्यश्चाश्वयुजः। यदाहुक्तम् "त्रिभन्तु पञ्चमसप्तान्त्यमन्त्यं च यदर्क्षमिति। एवं शुक्लान्तस्य मासस्य शुक्लान्तयदृक्षेणैतत्प्रतिपादयति यस्मिन्वा शुक्लपक्षान्ते येन नक्षत्रेण युक्तश्चन्द्रस्तस्मिंतोमासो वक्तव्यः यथा कार्तिकशुक्लपक्षान्ते कृत्तिकारोहिणीभ्यामन्यतमेन युतश्चन्द्रमा भवति तेन कार्तिकोमास उच्यते एवमन्येषामपि योज्यते। तदेतदुच्यते

एतदुक्तं भवति न शुक्लान्नोभासः कृष्णान्त एव तथा च यवनेश्वरः "मासे तु शुक्लप्रतिपत्प्रभृत्ते पूर्वे शशी-मध्यक्षोदयस्थः"। तथा च "यद्राशिसंस्थे शीतांशुः प्रथ काले नवांशके। स्वितस्तद्राशिगः पूर्वो यस्मिन् भवति चन्द्रमाः। जन्ममासः स निर्दिष्टः पुरुषस्य तु पृच्छतः। कृष्णपक्षात्मिको मासो ज्ञेयोऽत्र तु विपश्चिता"। लग्नत्रिकोणेत्यादि लग्नस्थ प्रश्नलग्नस्थ त्रिकोणयोश्च नवमपञ्चमयोर्मध्याद्यत्तत्कालसुत्तमेन प्रधानवीर्येण बलेन युक्तस्तद्वं राशिः प्रोच्यते कथ्यते तस्मिन् राशौ गते चन्द्रमसि जात इति वक्तव्यम्। तथा च "यवनेश्वरः क्षीरादिवीर्याधिकलग्नभाजि स्थानं त्रिकोणे शशिनो विधाय"। कृष्णलग्नादिभिर्या कालाङ्कानोत्पन्नेन प्रदर्शि-तोदयः कालपुरुषस्याङ्गविभागस्तदाद्यलग्नाद्यानेन विधिना स्पृष्टः स्पृशतः यदेव कालपुरुषस्याङ्गं स्पृशति तत्स्थे चन्द्रमसि जात इति वक्तव्यम् आदिग्रहणात् प्रागुक्त-सत्त्वदर्शनग्रन्थे स्पष्टीते" भट्टो०। "यावान् गतः शीत-करो विलग्नाज्जन्मादेस्तावति जन्मराशिः। मीनोदये मीनयुगं प्रदिष्टं भक्षाङ्कताकारकतैव चिन्त्यम्" ६मू०। "अथ प्रकारान्तरेण जन्मस्थराशिज्ञानमिन्द्रवज्रयाह यावा-नित्यादि विलग्नात् पृच्छालग्नाच्छीतकरचन्द्रो यावान् गतो यावति राशौ व्यवस्थितस्तस्माद्यावति राशिः तत्स्थे चन्द्रमसि जात इति वक्तव्यम्। मीनोदये यदि मीनल-ग्नगतो भवति तदा मीनयुगमेव प्रदिष्टमुक्तम् मीनस्थ-चन्द्रमा इति वक्तव्यम् ननु दर्शितविधिना राशिरनेकप्र-कारो यत्र प्राप्तो भिन्नरूपस्तत्र को वक्तव्य इत्याशङ्क्याह भक्षाङ्कताकारकतैरिति यस्य राशेः सम्बन्धि भक्षयितव्यं तस्मिन् काले क्षिप्यमाणीयते तदाकारश्च कश्चिद्दृश्यते यथा मार्जारादिदर्शने सिंहो महिषादिदर्शने हय इत्यादि अथ वा राश्युक्तरूपपुरुषस्य दष्ट्याद्य वा कृतेन यस्य राशिसदृशप्राणिनो कृतं शब्दः क्रियते तत्स्थे चन्द्रमसि जात इति वक्तव्यम्" भट्टो०। "क्षीरानवांश-प्रतिमं विलग्नं लग्नाद्भविष्यति च दृक्काणे। तस्मादृक्षे-त्तावति वा विलग्नं प्रष्टुः प्रश्नतावितीति शास्त्रमाह"७मू० "एवं जन्मराशौ ज्ञाते लग्नज्ञानमिन्द्रवज्रयाह क्षीरेति क्षीरायां प्रश्नलग्ने यस्य राशेर्नवांशकस्तत्कालं वर्त्तते तस्मात्तावति तमं तत्प्रतिमलग्नमेवांशकराशिं तस्य जन्मलग्नं वक्तव्यम्। अथवा लग्नाद्यन्द्रेक्काणादारभ्य रविः सूर्यो यावति यावत्संख्ये द्रेक्काणे व्यवस्थितस्तस्माद्यन्नादारभ्य तावति राशौ लग्नगते तस्य जन्म वक्तव्यम्। यत्र च द्वादशभ्योऽधिके द्वेक्काणे द्वादशकमपास्य संख्यानिर्देशः चतुर्विंशतेरधिके चतुर्विंशतिमपास्य शेषं वदेत् एवं शास्त्रमाह शास्त्रं कथयति न स्वमनीषयोक्तमित्थे तत्प्रतिपादयति शास्त्रपदेनैतत्प्रतिपाद्यते। उक्तञ्च "पृच्छालग्ननवांशस्थ यो राशिः संख्यया समः। तस्मिन् लग्नगते राशौ प्रष्टुर्जन्म विनिर्दिशेत्"। पृच्छतस्तावत्सं-ख्योपगते लग्नाद्दृक्काणे दिनकृत् ततः प्रश्नलग्नात्ता-वत्संख्ये गते लग्नराशौ जन्म वक्तव्यम्" भट्टो०। "जन्मा-दिशेल्लग्नगते वीर्यगे वा छायाङ्कलग्नोऽर्कहतेऽवशिष्टम्। छायोनसम्प्रोक्षितनिघ्नतां भक्षाच्छायाङ्कात्तोदयं प्रदिष्टम्" ८मू०। "अथ प्रकारान्तरेण लग्नानयनमिन्द्रवज्रयाह जन्मादिशेदिति लग्ने यद्वे जन्मादिशेत् प्रश्नलग्ने यो यद्वो व्यवस्थितस्तं तात्कालिकं कृत्वा विप्रापिण्डीकार्यम् अथ बहवो लग्नगता भवन्ति तदा तेषां यो बलवान् तं तात्कालिकं कृत्वा विप्रापिण्डीकार्यं ततः सकल समायामवनौ द्वादशाङ्गुलेन शङ्कुना तात्कालिकानि छायाङ्गुलानि स्पष्टीकृत्य तैरङ्गुलैरेकं यद्वं दर्शितकाले विप्रापिण्डीकृतं गृह्णीयेत् अथ वा सर्वग्रहेभ्यो यो बल-वान् ग्रहस्तं तात्कालिकं कृत्वा विप्रापिण्डं कृत्वा छायाङ्गुलाङ्कितं चार्कशुद्धं कारयेत् द्वादशभिर्विभजेत्तत् यावत्तत्रावशिष्टं तावत्संख्यो मेषादेरारभ्य यो राशि-र्भवति तस्मिन् राशौ लग्नगते तस्य जन्म वक्तव्यम्। अथ प्रकारान्तरेणाह आसीनेत्यादि आसीन उपविष्टो यदा प्रष्टा पृच्छति तदा लग्नाद्यच्छायास्थानं सप्तमराशिस्त-स्मिन् लग्नगते तस्य जन्म वक्तव्यम्। अथ सुप्तः सुप्तोऽत्र शयनपतितोऽभिहितः जातनिद्रस्य प्रश्नाभावात्। तत्र पतितो यदा पृच्छति तदा लग्नाद्यत् सुखस्थानं चतुर्थराशि-स्तस्मिन् लग्नगते तस्य जन्म वक्तव्यम्। अथोत्थितः पृच्छति तदा तस्माल्लग्नाद्दशमो राशिस्तस्मिन् लग्नगते तस्य जन्म वक्तव्यम्। अथ शयनादासनाच्च नोत्थितः किन्तु उत्ति-ष्ठन् पृच्छति तदोदयलग्नराशौ तस्मिन्नेव जन्म वक्तव्यम्। उक्तञ्च "उत्तिष्ठतो विलग्नात्प्रष्टुः सुप्तस्य वस्तुलग्नाच्च। उपविष्टस्यास्तमये व्रजतोमेषूरणस्थानादिति" भट्टो०। "गोसिंहौ जितभाहतौ क्रियतुले कन्याझषौ च क्र-मात् संवर्ग्यौ दशकाष्टसप्तविषयैः शेषाः खसंख्यागुणाः। जीवारास्फुजिदैन्द्रवाः प्रथमवच्छेषाश्चरा-दयः सौम्यवत् राशीनां नियतो विधिर्यदुदितैः कार्यो च तद्गर्णाः"

ह्मू०। "अथ प्रकारान्तरेण सर्वमेव नष्टजातकं वक्ष्ये ततः प्रश्नकाले तात्कालिकं लग्नं कृत्वा लिप्तापिण्डीकार्यम् ततस्तस्य लिप्तापिण्डीकृतस्य गुणकारविज्ञानार्थं भार्गवविक्रीडितेनाह गोसिंहादिति गोसिंहादयो राशयो यथाक्रमं दशादिभिर्गुणकारैः संवर्ग्या गुणनीयाः तद्यथा गोसिंहौ दृषसिंहौ दशभिः१०र्गुण्येत् दृषलग्नं लिप्तापिण्डीकृतं दशभिर्गुण्येत्। एवं सिंहं दशभिरेव। जितुमाटभौ मिथुनहरिकौ लग्नगतावष्टभिर्गुण्येत्। क्रियतुले मेषतुले एतौ सप्तभिर्गुण्येत्। कन्यामृगौ कन्यामकरौ एतौ लग्नगतौ विषयैः षड्भिर्गुण्येत्। एवमेते यथाक्रमं संवर्ग्या गुणनीयाः मेषा चतुरा राशयः स्वसंख्यागुणा आलीवसंख्यया गुणनीयाः तत्र मेषादिगणनया चतुर्थं कर्कटमिति चतुर्भिर्गुण्येत् एवं षण्णिवं नवभिः९ कुम्भमेकादशभिः११ एवं मीनं द्वादशभिः१२। एवं तावल्लग्नं स्वगुणकारेणावश्यमेव गुणयेत् दशकाष्टसप्तविषयैः ततस्तत्र यदि षड्गो भवति तदा षड्गुणकारेणावश्यमेव गुणयेत् तत्र षड्गुणकारविधिः जीवा राक्षसुलिदैन्द्वाः प्रथमवह्नयकाष्टसप्तविषयैरिति जीवे गुरौ लग्नगते तमेव लग्नं स्वगुणकारैराहृतं दशभिर्गुण्येत् धारे भौमे लग्नगते अष्टभिः, आक्षसुलिक्षुक्राः तस्मिन् लग्नगते सप्तभिः, ऐन्द्वे बुधे षड्भिः, मेषा रविशशिसौराश्च ये सौम्यवत् बुधवद्वा षड्भिर्गुणनीया इत्यर्थः। एवं तात्कालिकं लग्नम् अवश्यं राशिगुणकारेण गुणयेत् ततः स षड्गोक्तगुणकारैरपि तत्र च यदा षड्गो भवति तदा षड्गुणकारेण गुणयेत्। यदा बहवो षड्गा भवन्ति तदा सर्वेषां गुणकारैर्गुणयेत् एवं च तद्गुणितमेकान्ते स्थापयेत्" भट्टो०।

"सप्ताहृतं लिप्तनभाजितमेषस्थं दत्त्वाथ वा नव विशोध्य नवाथ वा क्षात्। एवं कलत्रसहजात्मजशत्रुभेभ्यः प्रष्टुर्वदेदुदयराशियमेन तेषाम्" १०मू०। "अथ नष्टज्ञानयनं वक्ष्यन्तिलकेनाह सप्ताहृतमिति सप्ताहृतं सप्तभिर्गुण्येत् दत्त्वाथ वेति ततस्तत्र नव देयाः शोध्या वा न किञ्चिद्वा देया इत्युच्यते यदि स चरराशिर्लग्नगतो भवति तदा नव देयाः स्थिरे न देया नापि शोध्याः, द्विःस्वभावे विलग्ने नव शोध्याः एवं केचिदाचक्षते वयं पुनर्ब्रूमः यदि प्रश्नलग्ने प्रथमोद्रेष्काणो भवति तदा न देयाः, द्वितीये न देया नापि शोध्याः, तृतीये नव शोध्याः एवं कृत्वा तस्य राशेरिष्टघनेन सप्तविंशत्या भागमपहृत्यावाप्तं त्वाल्पं तत्र यावत्संख्योऽङ्कोऽवशेषो भवति तावत्संख्यमश्विन्यादितो यच्चत्रं तच्चत्रं तस्य प्रष्टुर्वक्तव्यम्। केचित् वदन्ति तथास्थितस्य राशेः सप्तविंशत्याभागमपहृत्यावशेषाङ्कनवकदानेन विशोधनेन वा यथास्थितेनाङ्केन संवाद उत्पद्यते तथा नक्षत्रं वक्तव्यम् एवमित्यादि कलत्रसहजात्मजशत्रुभेभ्य इति भार्याभ्रातृपुत्ररिपुषु नष्टजातकं यदा पृच्छति तदा तद्भेभ्यस्त्रयोदशभ्यः एवं प्रष्टुः पृच्छकस्य वदेद्ब्रूयात् तमेवोदयराशिं परिकल्पयेदित्यर्थः। एतदुक्तं भवति यदि पुरुषः स्वपत्न्या नक्षत्रं पृच्छति तदा तात्कालिके लग्ने राशिषट्कं देयम्। अथ भ्रातुः पृच्छति तदा राशिदशकं देयमथ पुत्रस्य पृच्छति तदा राशिचतुष्कं देयमथ शत्रोः पृच्छति तदा राशिपञ्चकं देयम्। एवं कृत्वा यद्भवति तदेवोदयराशिं प्रकल्प्य तद्गुणकारेण गुणयेत् तत्स्थषड्गुणकारेण च ततस्तत्र प्राग्वद्वज्रकदानविशोधने कृत्वा सप्तविंशत्याभागमपहृत्यावशेषाङ्कसमं यस्य प्रष्टा पृच्छति तस्य नक्षत्रं वक्तव्यम्। एतदप्युपलक्षणार्थमेव, त्रिराशिसङ्कितात्तात्कालिकाल्लग्नात् मित्रस्य वक्तव्यम्। एतन्नक्षत्रानयनमप्युपलक्षणमेवं सकलमपि नष्टजातकं वक्ष्यम्" भट्टो०। "वर्षर्तुमासतिथयोऽनिशं ह्युडूनि वेलोदयर्क्षनवभागविकल्पनाः स्युः। भूयो दशादिगुणितात् स्वविकल्पभक्ताद्दर्क्षादयो नवकदानविशोधनाभ्याम्" ११मू०।

"अथ वर्षादानयनं वसन्ततिलकेनाह वर्षर्तुमासेति वर्षादीनि सर्वाण्यपि स्वविकल्पेन भागे हृते यथा पाठक्रमेणानयितव्यानि तद्यथा तात्कालिकं लग्नं लिप्तापिण्डीकृतं राशिगुणकाराहृतं षड्संयुक्तं चेद्यड्गुणकाराहृतमपि यदैकान्ते स्थापितं तत्पुनरपि दशादिगुणं कार्यम्। एतदुक्तं भवति स राशिः स्थानचतुष्टये धार्यः एकत्र दशगुणोऽन्यत्र द्वितीयेऽष्टगुणोऽन्यत्र तृतीये सप्तगुणः चतुर्थे षड्गुणः कार्यः यत उक्तम्। भूयो दशादिगुणितात् भूयः पुनरपि दशकाष्टसप्तविषयैर्गुणनीयाः ततस्तस्मिन् राशिचतुष्टये प्राग्वद्वज्रकदानविशोधने कृत्वा स्वविकल्पैर्भागमपहृत्यावाप्तं वर्षादयो ज्ञेयाः" भट्टो०।

"विषेयादशकेष्ववृदा ऋतमासास्तथैव च। षष्टेष्वपि मासाद्याः स्थिरयश्च तथा स्मृताः" १२मू०। "अथ न ज्ञायते लक्षाद्राशेः कल्पानयनं कार्यं तदनुष्टुप्पद्यत्रयेणाह विषेयादशकेष्ववृदा इति अत्र बहुवचनं बहुधोपयोगि-

त्वात् ज्ञातम् । यदुक्तं खविकलभक्ताद्यर्कोदयलग्नाख्या-यते एते चत्वारो राशयः स्थापितास्तेषां नवकदान-विशोधनं कृत्वा कर्मयोग्याः सर्वे भवन्ति ततो दशगुणस्य पृथक्स्थस्य परमायुषा विंशत्यधिकेन वर्षशतेन भाग-मपहृत्य योऽङ्कोऽवशिष्यते तदङ्कसमं तस्य वर्षसंख्याङ्कं वर्त्तते तस्यैव षड्भिर्भागमपहृत्य ऋतुसंख्यया तस्य यो-ऽङ्कोऽवशिष्यते तदङ्कसमे शिशिरादारभ्यर्त्तौ जात इति वक्तव्यम् । तस्यैव तु माससंख्यया द्वाभ्यां भागमपहृत्य यद्येकोऽवशिष्यते तदा चात्तौ प्रथमे मासि जात इति वक्तव्यम् । अथ न्यूनमवशिष्यते तदा द्वितीये मासि जातः । एवं कृत्वा दशगुणः कर्मयोग्यो राशिरपास्तः यस्य विंशत्यधिकाब्दैर्यतादप्यधिकं जन्मनोऽतीतं तस्य नष्टजातकज्ञानोपाय एव नास्ति । यस्तेषित्यादि यो-ऽसावष्टतो राशिस्तस्य पृथक्स्थस्य कर्मयोग्यस्य पञ्च-संख्यया द्वाभ्यां भागमपहृत्य यद्येकोऽवशिष्यते तदा शुक्लपक्षे जात इति वक्तव्यम् । न किञ्चिदवशिष्यते तदा कृष्णपक्षे । तस्यैव तिथिसंख्यया पञ्चदशभिर्भागमपहृत्य योऽङ्कोऽवशिष्यते तदङ्कसमाने तिथौ जात इति वक्तव्यम् एवं कृत्वाष्टगुणः कर्मयोग्यो राशिरपास्तः" भट्टो० ।

"दिवारात्रिप्रवृत्तिञ्च नक्षत्रानयनं तथा । सप्तवेदेषु वर्णेषु नित्यमेवोपलक्षयेत्" १२मू० । "दिवेत्यादि योऽसौ सप्तहृतो राशिस्तस्य ग्राम्यदेव नवकदानविशोधने कृत्वा तत्कर्मयोग्यं राशिं स्थापयेत् तस्य दिवारात्रिसंख्यया द्वाभ्यां भागमपहृत्य यद्येकोऽवशिष्यते तदा दिवसे जातो ज्ञेय न किञ्चिदवशिष्यते तदा रात्रौ जात इति वक्तव्यम् । योऽसौ सप्तहृतो राशिस्तस्य नक्षत्रसंख्यया सप्तविंशत्या-भागमपहृत्य योऽङ्कोऽवशिष्यते तदङ्कसंख्ये नक्षत्रेऽश्वि-न्यादित आरभ्य जातनक्षत्रमिति वक्तव्यम् । अस्य कर्मयो-पुनरभिधानं नक्षत्रानयनस्य बाहुल्योपयोगित्वात्" भट्टो० । "वेलामथ विलग्नञ्च होरामंशकमेव च । पञ्चवेषु विजानीयाज्जातकसिद्धये" १४मू० । "वेलेत्यादि यस्मिन् दिने पुरुषस्य जन्मज्ञानं तस्मिन्नहर्मानार्धं घटिकादिकं कर्त्तव्यं रात्रौ चेत्तदा रात्रिप्रमाणार्धं ततः पञ्चगुणस्य राशेस्तेन दिनप्रमाणेन रात्रिप्रमाणेन भागमपहृत्य योऽङ्कोऽवशि-ष्यते तस्मिन् काले दिनगते रात्रिगते वा तस्य जन्म वक्तव्यम् । अथ विलग्नमित्यादि अथ शब्दः पादपूर-णार्थं काले ज्ञाते राश्यादिलग्नं कर्त्तव्यं ततस्तस्य होराद्रेक्काणनवांशदृग्दशांशत्रिंशांशभागाः कर्त्तव्याः तात्कालिका यद्वाच कर्त्तव्याः ततो यथाभिप्रेतेन वि-धिना दशान्तर्दशाष्टकवर्गादेरभिप्रेतस्य फलस्य निर्देशः कार्यः एवं नष्टजातकं साधयेत्" भट्टो० ।

"संस्कारनाममात्रादिगुणाच्चायाङ्कजैः समायुक्ता । शेषं त्रिनवकभक्तं नक्षत्रं तद्वनिष्ठादि" १५मू० "अथ प्रकारा न्तरेण नक्षत्रानयनमार्यार्द्धाह संस्कारनामेति संस्कारेण नाम संस्कारनाम तस्य मात्राः संस्कारेणामतस्य नाम्नो मात्राः संस्कारनाममात्राः संस्कारपदघटनैतत्प्रतिपादितं भवति संस्कारेण यत्पुरुषस्य नामकृतं तस्य मात्रा याह्याः नाम्नश्च कस्यचित् कृतनामादेः मात्रायेह ग्रहणे । ऋक्ष-सर्क्षमात्रिकः ऋक्ष मात्रिकः इत्यनया स्थित्वा ताः संस्का-रनाममात्राः संदृश्य द्विगुणीकार्याः ततस्तात्कालिकानि शङ्कुच्छायाङ्कानि गृहीत्वा ताद्विगुणमात्रास्तैरङ्कैः संयुक्ताः कार्याः एवं कृते यद्भवति तस्य त्रिनवकेन सप्त-विंशत्यागमपहृत्य यः शेषो भवति तदङ्कसमं तस्य धनिष्ठादित आरभ्य नक्षत्रं वक्तव्यम्" भट्टो० ।

"द्वित्रिचतुर्दशदशतिथि सप्तत्रिगुणानवाष्टचैन्द्राद्याः । पञ्च-दशघ्नास्त्रिगुणान्विताश्च धनिष्ठादि" १६मू० । "अथ नक्षत्रानयनं प्रकारान्तरेणार्धार्याह । द्वित्रिचतुर्दशेति पूर्वाभिमुखो यदा प्रष्टा पृच्छति तदा द्वयोरङ्काः स्थाप्याः अपाग्नेयाभिमुखस्तदा त्रयाणाम् । अथ दक्षिणाभि-मुखस्तदा चतुर्दशानाम् अथ नैर्ऋत्यभिमुखस्तदा दशानाम् अथ पश्चिमाभिमुखस्तदा तिथिसंख्यानां पञ्चदशानाम् अथ वायव्याभिमुखस्तदा सप्तत्रिगुणायाः एकविंशतेः । उत्तराभिमुखस्तदा नवानाम् ऐशान्याभिमुखस्तदाष्टानां तद्यथा एवं दिगभिमुखप्रष्टृवशेनाङ्कं गृहीत्वा ततः पञ्च-दशगुणः कार्यः ततस्तस्मिन् प्रदेशे यावन्तः पुरुषास्तदभि-मुखाः स्थितास्तत्संख्ययान्वितो युक्तः कार्यः एवं कृते यद्भवति तस्य सप्तविंशत्या भागमपहृत्य योऽङ्कोऽवशिष्यते तदङ्कसमं तस्य धनिष्ठाद्यारभ्य नक्षत्रं वक्तव्यम्" भट्टो० । "इति नष्टजातकमिदं बहुप्रकारं मया विनिर्दिष्टम् । यान्मतः सच्चिन्त्यैः परीक्ष्य यत्नाद्यथा भवति" १७मू० "इतिशब्दः उपसंहारे मया वराहमिहिराचार्येण नष्टजातकं बहुप्रकारं बहुभेदं विनिर्दिष्टमुक्तमिदम् । अतोऽस्माद्धेतोः सच्चिन्त्यैः शोभनसच्चालैः प्राज्ञं यत्नात्परीक्ष्य विचार्य यथा येन प्रकारेण संवदति सत्य-रूपं तथा प्राह्यमिति येन प्रकारेण संवदति तथा गृहीतव्यमित्यर्थः बहुभिरागमैर्मया विचार्य पराशर-

वशिष्ठयवनसत्यमधित्यादीनां मतानि आलोक्य कृतं तदेव भूयो निर्मलगुणनिधुवबुद्ध्या विचार्य संवादेन कार्यं येन स्फुटसिद्धोऽसौ संपद्यते" भट्टो०।

**नष्टमार्गण** न० नष्टस्यादर्शनं गतस्य मार्गणम्। अदर्शनगतस्यान्वेषणे। [भावमूल्ये शाब्दादौ।

**नष्टबीज** त्रि० नष्टं बीजं बीजभावो यस्य। निष्फले बीज-

**नष्टाग्नि** पु० नष्टो लुप्तः प्रमादादस्यादिना अग्निः वैतानिकोऽग्निर्यस्य। प्रमादादिना लुप्ताग्निके द्विजे।

**नष्टाग्निसूत्र** न० नष्टस्य चोरेणापहृतस्याग्नेः साधनं सूत्रं चिह्नम्। अपहृतद्रव्यस्य ज्ञानसाधने चिह्नभेदे लोप्रे। (वामाल)। [कल्पशब्दे २।६२ पृ० दृश्यम्।

**नष्टेन्दुकला** स्त्री नष्टा इन्दुकला यस्याम् कृष्णामावस्यामरः।

**नस** गतौ भ्वा०आत्म०सक०सेट् वेदनिघण्टुः। नसते शनसिष्ट कौटिल्येऽयं धोपदेशः स च सति निमित्ते षत्वं भजते। संक्षेपे च "स मोदते नसते साधते गिरा" ऋ० ६।७१।३ "नसते यज्ञादिषु संक्षिप्तो भवति" भा०।

**नस** व्याप्तौ भ्वा० पर० सक० सेट् निघण्टुः नशदित्यत्र नसदिति माधवसम्मतः पाठः। नसति अनात्(न)सीत्। ननास नेसतुः "सुरभिष्ठमं नरां नसन्त" ऋ०१।१८६।७ "नसन्त व्याप्नुवन्ति नसतिर्व्याप्तिकर्मेति" माधवः "धर्मणो नसीमहि" ऋ०२।१६।८ नसीमहि व्याप्नुयामेति छान्दसः प्रयोगः।

**नस्** स्त्री नस-क्विप्। नासिकायाम् "अविनौ मेषो नसि वीर्यम्" यजु० १९।१० "नसि नासिकायाम्" वेददी० नासिकाशब्दस्य सप्तम्येकवचनरूपमित्यन्ये।

**नसत्त** न०न+सद-क्त नसत्तनिषत्तेत्यादिना नत्वाभावः नि० सद्मनिष्ठे "नसत्तमञ्जसा" सि०कौ० धृता श्रुतिः।

**नसा** स्त्री नस्-इवन्तत्वात् वा टाप्। नासिकायां त्रिका० "विनसा कृतवान्यथा" भट्टिः।

**नस्त** पु० नस-संज्ञायां त। १नासिकायां शब्दमाला। नासिकायै हितः वा०त नसादेशश्च। नासिकायां हिते २वैद्यकोक्ते पञ्चविधे नस्ये न०। नस्यशब्दे सुश्रुतवाक्ये तेषां लक्षणानि दृश्यानि। नासिकायाः ३छिद्रे स्त्री "नस्ताभेदवदाहाभ्यां कर्णदाहास्थिभेदनैः। अतिदाहाति वाहाभ्यां वधे चान्द्रायणं चरेत्" स्मृतिः।

**नस्तस्** अव्य० नासिका+विभक्त्यर्थे तसिल् "नस् नासिकाया यत्तच्छब्देषु" नसादेशः। नासिकायामित्यादार्थे "नस्तः कर्म्मणि शब्दने पानाभ्यङ्गाञ्जनेषु च" सुश्रुतः "य यत् नस्तोऽभवत् ततः सिंहः समभवत्" शत०ब्रा०५।५।४ "नस्तः प्राणा दिवं श्रोत्रात्" याज्ञ०

**नस्तित** त्रि० नस्ता नासाच्छिद्रं जातोऽस्य तारः इतच्। कृतनासाच्छिद्रे रज्वाद्यूतनासिके बलीवर्दे अमरः। (नाकफोड़ा)। [वर्दे रभसाद्यः।

**नस्तोत** पु० नस्तायां नासास्वरज्ञायां जातः। नस्तोते बली-

**नस्य** त्रि०नासिकायै हितं तत्र भवो वा यत् नसादेशः। १नासिकाभवे २तद्धिते च २सुश्रुतोक्ते नासिकाच्छिद्रे क्रियाभेदे यथा "नस्यस्यातः प्रवक्ष्यामि विधिं निरवशेषतः। औषधौषधसिद्धो वा स्नेहो नासिकाभ्यां दीयत इति नस्यं तद्द्विविधं शिरोविरेचनं स्नेहनञ्च तद्द्विविधमपि पञ्चधा। तत्राद्यं नस्यं शिरोविरेचनं प्रतिमर्शोऽवपीड़ः प्रधमनञ्च तेषु नस्यं प्रधानं शिरोविरेचनञ्च नस्यविकल्पः प्रतिमर्शः शिरोविरेचनविकल्पोऽवपीड़ः प्रधमनञ्च। ततो नस्यशब्दः पञ्चधा निपातितः। तत्र यः स्नेहनार्थं मूर्द्धशिरसां शोधनस्नेहनार्थं बलजननार्थं दृष्टिप्रसादजननार्थं वा स्नेहो विधीयते तस्मिन्नेवेयिको नस्यशब्दः। तत्तु नस्यं देयं बाताभिभूते शिरसि दग्धेऽभ्यक्तसुप्तपतिताक्षकर्णशूलकर्णस्रावेऽतिमिरस्वरोपघातनासारोगास्यशोषवाक्सङ्काकालजवलीपलितप्रादुर्भावेष्वाक्षयप्रबोधेषु वातपैत्तिकेषु सुखरोगेष्वन्येषु च वातपित्तहरद्रव्यसिद्धेन स्नेहेनेति। शिरोविरेचनं श्लेष्माभिष्यन्दाप्रतालुकण्ठशिरसामरोचकशिरोगौरवशूलपीनसार्द्धावभेदकक्लमप्रतिश्यायापस्मारगन्धाज्ञानेष्वन्येषु चोर्द्ध जत्रुगतेषु कफजेषु विकारेषु शिरोविरेचनद्रव्यसिद्धेन वा स्नेहेनेति। तत्रैतद्द्विविधमभुक्तवतोऽह्नि पूर्वाह्णे क्षीरोगिणां मध्याह्ने पित्तरोगिणामपराह्णे वातरोगिणाम्। अथ प्रदाय शिरोविरेचनीयाय दग्धाद्यधूमपानाभ्यां विशुद्धस्रोतसे पाचितापरिक्लिन्नस्विन्नललाटोत्क्लेशलाटप्रदेशाय वातातपरजोहीनवेश्मन्युत्तानशायिने प्रसारितकरचरणाय किञ्चित् प्रविलम्बितशिरसे वस्त्राच्छादितनेत्राय वामहस्तप्रदेशिन्यपीडितनासापुटाय विशुद्धस्रोतसि दक्षिणहस्तेन स्नेहसम्पादितप्रं रजतसुवर्णनाभसत्पात्रशुक्तीनामन्यतमस्थं शुक्त्या पिचुना वा सुखोष्णं स्नेहमद्भुतमात्रिश्चेद्द्रव्यविच्छिद्यधारं यथा नेत्रे न प्राप्नोति। स्नेहेऽवच्छिद्यमाने तु शिरो नैव प्रकम्पयेत्। न कूजेच्च प्रभाषेत न छद्यात्र क्षवेत्तथा। एतैर्हि विकृतः स्नेहो न सम्यक्प्रतिपद्यते। ततः कालप्रतिक्षा-

यशिरोऽक्षिगदसम्भवः" तस्य प्रमाणमष्टौ बिन्दवः प्रदेशिनीपर्वोदरयनिःसृताः प्रथममात्रा, द्वितीया शुक्ति, तृतीया पाणिशुक्तिरित्येतास्तिस्रो मात्रा यथाबलं प्रयोज्याः। स्नेहनस्यं नचोपगिलेत्किञ्चिदपि। "मृद्भाटकमभिघ्राण्य निरेति वदनाद्यथा। कफोत्क्लेशभयाच्चैव निष्ठीवेदविधारयन्" इति च पुनरपि संक्षेद्य गण्डकपोलादीन्मृदुमासेवेत भोजयेच्चैनमभिष्यन्दि ततोऽस्याचारिकमादिशेत्। रजोधूमस्नेहातपमद्यद्रवपानशिरःस्नानातिवातक्रोधादीनि च परिहरेत्। तस्य योगायोगानां विज्ञानं भवति। "लाघवं शिरसो योगे सुखस्वप्नप्रबोधनम्। विकारोपशमः शुद्धिरिन्द्रियाणां मनःसुखम्। कफप्रसेकः शिरसो गुरुतेन्द्रियविभ्रमः। लक्षणं मूर्ध्नि स्निग्धे रूक्षं तत्रावचारयेत्। अयोगे चैव वैगुण्यमिन्द्रियाणाञ्च रूक्षता। रोगाणाञ्चिरञ्च तत्रेदं भूयो नस्यं प्रयोजयेत्। चत्वारो बिन्दवः षड्वा तथाष्टौ वा यथाबलम्। शिरोविरेकस्नेहस्य प्रमाणमभिनिर्दिशेत्। नस्ये त्रीण्युपदिष्टानि लक्षणानि प्रयोगतः। शुद्धहीनातिसंज्ञानि विशेषाच्छास्त्रचिन्तकैः। लाघवं शिरसः शुद्धिः स्रोतसां व्याधिनिर्जयः। चित्तेन्द्रियप्रसादश्च शिरसः शुद्धिलक्षणम्। कण्डूपदेहौ गुरुता स्रोतसाङ्गक्लमस्तवः। मूर्ध्नि स्नेहविशुद्धे तु लक्षणं परिकीर्त्तितम्। मन्दलुङ्गागमो वातवृद्धिरिन्द्रियविभ्रमः। शून्यता शिरसश्चापि मूर्ध्नि गाढविरेचिते। हीनातिशुद्धे शिरसि कफवातान्नमाचरेत्। सम्यग्विशुद्धे शिरसि सर्पिर्नस्यं निषेवयेत्। एकान्तरं द्व्यन्तरं वा सप्ताहं वा पुनः पुनः। एकविंशतिरात्रं वा यावद्वा साधु मन्यते। मारुतेनाभिभूतस्य वात्यन्तं यस्य देहिनः। द्विकालञ्चापि दातव्यं नस्यं तस्य विजानता"। अवपीडस्तु शिरोविरेचनवदभिष्यन्दसंदृष्टविसंज्ञेभ्यो दद्याच्छिरोविरेचनद्रव्याणामन्यतममवपीड्यावसिच्य चेतोविकारजमिविषाभिपन्नानां चूर्णं विदध्यात्। शर्करेक्षुरसक्षीरदधिमांसरसानामन्यतमं क्षीणानां शोणितपित्ते च विदध्यात्। "लघुदुर्बलभीरूणां सुकुमारस्त्रियोषिताम्। मृदाः स्नेहाः शिरःशुद्ध्यै कल्ककल्पेभ्यो यथाहितः"। नस्यदाने परिहर्त्तव्यो भुक्तवानयतपिंतोऽत्यर्थतरुणप्रतिश्यायी गर्भिणी पीतस्नेहोदकमद्यद्रवीजीर्णी दत्तवस्तिः क्षुद्रो मरार्त्तस्तृषितः शोकाभिभूतः श्रान्तो बालो वृद्धो वेगावरोधितः शिरःस्नातुकामश्चेति। अनार्त्तश्चाप्यं नस्यधूमौ परिहरेत्। तत्र क्षीणातिमात्रातिशीतोष्णसङ्क्षाप्रदानातिप्रविलम्बितशिरस उच्छिङ्कतो विचलतोऽभ्यवहरतो वा प्रतिषिद्धप्रदानाच्च व्यापदो भवन्ति तत्प्रोद्धारादयो दोषनिमित्ताः क्षयजाश्च। भवतश्चात्र "नस्ये शिरोविरेके च व्यापदो द्विविधाः स्मृताः। दोषोत्क्लेशनिमित्तांस्तु जयेच्छमनशोधनैः। क्षय क्षयनिमित्तांस्तु यथास्वं हंहणं हितम्"। प्रतिमर्शश्चतुर्ष्वस्य कालेष्वादेयः। तद्यथा तत्क्षोत्थितेन प्रक्षालितदन्तेन स्नस्नाग्निर्गच्छता व्यायामव्यवायाध्वपरिश्रान्तेन मूत्रोच्चारकवलाञ्जनान्नेऽभुक्तवता क्षुर्दितवता दिवास्वप्नोत्थितेन सायञ्चेति। तत्र तत्क्षोत्थितेनासेवितः१ प्रतिमर्शो रात्रावुपचितनासास्रोतोगतं मलमुपहन्ति मनःप्रसादञ्च करोति। प्रक्षालितदन्तेनासेवितो२ दन्तानां दृढतां वदनसौगन्ध्यं चापादयति। स्नस्नाग्निर्गच्छतासेवितो३ नासास्रोतसः क्लिन्नतया रजोधूमो वा नाबाधते। व्यायामसैथुनाध्वपरिश्रान्तेनासेवितः४।५।६ श्रमहरुपहन्ति। मूत्रोच्चारान्ते ७।८ चासेवितो दृष्टेर्बुद्धेश्च मलमपनयति। कवलाञ्जनान्ते ९।१० सेवितो दृष्टिं प्रसादयति। अभुक्तवता सेवितः११ स्रोतसां विशुद्धिं लघुतां चापादयति। वान्तेनासेवितः१२ स्रोतोविबन्धं क्लेष्माणमपोहत्र भक्तकाङ्क्षामापादयति। दिवास्वप्नोत्थितेनासेवितो१३ निद्रायेवं गुरुत्वं मलं चापोहत्र चित्तैकाग्र्यं जनयति। सायं चासेवितः१४ सुखनिद्राप्रबोधौ चेति। "हंहदुच्छ्वसितः स्नेहो यावद्वक्त्रं प्रपद्यते। नस्ये निषिक्तं तं विद्यात्प्रतिमर्शं प्रमाणतः। नस्येन रोगाः शाम्यन्ति नराणामूर्ध्वजत्रुजाः। इन्द्रियाणां च वैमल्यं छन्दोदास्यं सुगन्धि च। इतदन्तशिरोग्रीवास्कन्धवक्षूरसां बलम्। वलीपलितखालित्यव्यङ्गानां चाप्यसम्भवः। तैलं१ कफे सवाते स्यात्क्षीरं पवने सवासृ२। दद्यात्सर्पिः३ सदा पित्ते मज्जानं४ च समारुते। चतुर्विधस्य स्नेहस्य विधिरेव प्रकीर्त्तितः। स्नेहस्यानाविरोधित्वात्तेषु तैलं विधीयते"।

**नस्योत** त्रि॰ आ+वे–क्त ओतः नसि ओतः अलुक्स॰। नासिकायां ततच्छिद्रायां रज्ज्ववबद्धे बलीवर्दे "नस्योतः स्रज इव प्रोतो नस्योत इव गोतृपः" भा॰द॰ १०अ॰।

**नह** अव्य॰। न च ह च। प्रत्यारम्भे।

**नहि** अव्य॰ न च हि च चादि॰। निषेधे "नह्यस्मिन् युज्यते कर्म किञ्चिदामौद्भिवन्धनात्" मनुः।

**नहुष** पु॰ नह–उष। १महद्रथभेदे "नहुषश्चाङ्गतिश्चैव

चारित्रं ब्रह्मपन्नगम्" हरिवं० २०३अ०। २चन्द्रवंश्ये नृपभेदे "त्रयोः पुत्रास्तथा पञ्च सर्वे वीरा महारथाः। स्वर्भानुतनयायाञ्च प्रभायां जज्ञिरे नृप!। नहुषः प्रथमं जज्ञे वृद्धशर्मा ततःपरम्" २८अ०। स चागस्त्यशापाद् सर्पतामाप्तः युधिष्ठिरेण तस्माद्मोचितः तत्कथा भा०व० १८१अ० "अहं हि दिवि दिव्येन विमानेन चरन् पुरा। अभिमानेन मत्तः सन् कञ्चिन्नान्यमचिन्तयम्। ब्रह्मर्षिदेवगन्धर्वयक्षराक्षसपन्नगाः। करान्मम प्रयच्छन्ति सर्वे लोकनिवासिनः। चक्षुषा यं प्रपश्यामि प्राणिनं पृथिवीपते!। तस्य तेजोहराम्याशु तद्धि दृष्टेर्बलं मम। ब्रह्मर्षीणां सहस्रं हि वाहते शिबिकां मम। स मामपनयो राजन्! भ्रंशयामास वै श्रियः। तत्र त्वगस्त्यः पादेन वहन् स्पृष्टो मया मुनिः। अगस्त्येन ततोऽस्म्युक्तो ध्वंस सर्पेति वै रुषा। ततस्तस्याहिमानायप्रात् प्रच्युतस्तुतक्षणः। प्रपतन् ददृशे त्वानं व्यालीभूतमधोमुखम्। ययाचन्तमहं विप्रं शापस्यान्तो भवेदिति। प्रसादात् संप्रकृष्टस्य भगवन्! वक्तुमर्हसि। ततः स मामुवाचेदं प्रपतन्तं कृपान्वितः। युधिष्ठिरो धर्मराजः शापात्त्वां मोचयिष्यति। अभिमानस्य घोरस्य पापस्य च नराधिप!। फले क्षीणे महाराज! फलं पुण्यमवाप्स्यसि" "नहुषो नाम राजाऽहमासं पूर्वमवानघ!। प्रथितः पञ्चमः सोमादायोः पुत्रो नराधिप!। क्रतुभिस्तपसा चैव स्वाध्यायेन दमेन च। त्रैलोक्यैश्वर्यमत्युग्रं प्राप्तोऽहं विक्रमेण च। तदैश्वर्यं समासाद्य दर्पो मामगमत्तदा। सहस्रं हि द्विजातीनामुवाह शिबिकां मम। ऐश्वर्यमदमत्तोऽहमवमत्य ततो द्विजान्। दृष्टमगस्त्येन दशामानीतः पृथिवीपते!। न तु मामजहात् प्रज्ञा यावदद्येति पार्थिव!। तस्येवानुग्रहाद्राजन्नगस्त्यस्य महात्मनः" १८०अ०। नहाति सर्वाणि भूतानि मायया कर्तरि उष। २परमेश्वरे "शिखण्डी नहुषो वृषः" विष्णुस०। नह्यते मायया कर्मणि उष। ४मनुष्ये भा० उषि नहुष इति मनुष्ये निघण्टुः। "आदौ विश्वा नहुषयाणि जाता" ऋ०१।८८।२ "नहुषा मनुष्रसम्बन्धीनि" भा०। "नहुषः खररोमा च शेषवासुकितक्षकाः" इति विक्रमादित्यकोशोक्ते ५नागराजभेदे च।

नहुषाख्य पु०न० नहुषं श्रेष्ठपर्वतमाख्याति ख्या+ख्या-क। तीरपुष्पे राजनि०।

नहुषात्मज पु० ६त०। ययातिनृपे "ययातिर्नहुषात्मजः" भारते भूरिप्रयोगः। [चक्राः"।

ना अव्य० नञ्-डा०टा। निषेधे "समानोना निषेधयो-

नाक पु० न कमकं दुःखं तद्रहिते यत्र नञ्बाडित्वा० नि० प्रकृतिभावः। १स्वर्गे अमरः। "यत्र दुःखेन संभिन्नं न च ग्रस्तमनन्तरम्। अभिलाषोपनीतं च तत् सुखं स्वःपदास्पदम्" स्मृतौ हि स्वर्गस्य दुःखभूयस्त्वसङ्गम्। दुःखराहित्येन २सुखकरे त्रि०। "वैश्वानरः प्रत्यथा नाकमारुहद् दिवः पृष्ठे" तारुण्यब्रा० १।७।६ "नाकं दुःखराहित्येन सुखकरं रथम्" भा०। ३नभसि निघण्टुः स्वर्गान्तरिक्षसाधारण्यनामत्व तस्य कीर्त्तनात्। ४राजभेदे पु० "नव नागास्तु भोक्ष्यन्ति पुरीं चम्पावतीं नृपाः। मथुरां च पुरीं रम्यां नागाः भोक्ष्यन्ति सप्त वै" वामनपु०।

नाकचर पु०नाके स्वर्गे नभसि वा चरति चर-ट। १गगनचरे देवे यक्षादौ च २पितृदेवभेदे। "नाकौकसां नाकचराः पितरो लोकविश्रुताः" भा० स०११अ०

नाकनाथ पु० ६त०। इन्द्रे त्रिका०। नाकनायकादयोऽप्यत्र "नाकनायकपुरोहितो यदा" ज्योति०। "नाकनायकनिकेतनमाप" नैष०।

नाकवनिता स्त्री ६त०। अप्सरःसु।

नाकसद् पु० नाके सीदति-सद क्विप्। १देवे "सन्तर्पयो नाकसदां वरेण्यः" भट्टिः।

नाकिन् पु० नाकः वासस्थानत्वेनास्त्यस्य इनि। देवे हेमच०। "सदनान्तु दुरत्यय नाकिनामपि" "मन्यसेऽरिवधः श्रेयान् प्रीतये नाकिनामपि" माघः। [२सुनिभेदे मेदि०।

नाकु पु०नम-उ नाक्यादेशः। १वल्मीके २पर्वते च अमरः

नाकुल पु०नकुलस्य गोत्रापत्यम् "अश्वघ्न्यनडुच्चिकुरुभ्यः" पा० गोत्रे अण् न तु दञ्। १नकुलस्य गोत्रापत्ये। नकुल इव मर्करादित्वार्थे अण्। २नकुलसदृशे च। नकुलेन दष्टा तेन पीता वा अण् ङीप्। ३कुक्कुटीकन्दे ४राज्ञायां ५चविकायाञ्च स्त्री मेदि०। ६यवतिक्तायां ७श्वेतकण्टकार्य्यां टकन्दभेदे च स्त्री राजनि०। "नाकुली तुवरा तिक्ता कटुकोष्णा विनाशयेत्। श्लेष्मिलतादक्षिकासु विषज्वरकृमिव्रणान्" भावप्रकाशे धृतवाक्यम्।

नाकुलक त्रि० नकुलो भक्तिरस्य "गोत्रचरणवेभ्यो वुञ्छ-मिति" पा० वुञ्। नकुलभक्तिके मनुष्यादौ।

नाकुलि पु० नकुलस्येदम् अपत्यं वा अत इञ् गोत्रे

तु अपेव। नक्षत्रसम्बन्धिनि २तदपत्ये च "शतानीकस्तु नाक्षत्रिः" भा०आ० ६३अ०।

**नाक्षत्र** न०नक्षत्राणामिदम् अण्। तद्घटितचक्रस्य परिवर्त्तनात्मके कालरूपे १दिनभेदे तच्चिंशद्दिनात्मके सर्वनक्षत्र परिवर्त्तनात्मके च २मासभेदे च "नाडीषट्का तु नाक्षत्र महोरात्रं प्रकीर्त्तितम्" सू०सि०। "घटीनां षट्काहोरात्रं नाक्षत्रमुक्तम्। तुकारादहोरात्रस्य नाक्षत्रत्वोक्त्योक्तषष्ट्या अपि नाक्षत्रत्वमुक्तम्। एतत् षष्टिघटीभिर्भचक्रपरिवर्त्तनात्" रङ्ग०। "भचक्रभ्रमणं नित्यं नाक्षत्रं दिनमुच्यते" सू०सि०। "नित्यं प्रत्यहं भचक्रभ्रमणं नाक्षत्रमहस्य प्रवाहवायुजुतं परिभ्रमः। नाक्षत्रं नक्षत्रसम्बन्धि नाक्षत्रमासदिनं मानज्ञैः कथ्यते" रङ्ग०। स च मासो द्विविधः। सप्तविंशतिनक्षत्रपरिवर्त्तनात्मक एकः यथा "सर्वर्क्षपरिवर्त्तेन नाक्षत्र इह घोच्यते" इति "सर्वनक्षत्रभुक्त्या तु नाक्षत्रमास इष्यते" इति च अस्य प्रयोजनम्। "नक्षत्रचक्राणयनानि चेन्दोर्भांशेन कुर्याद्भगणात्मकेन"। सप्तविंशतिनक्षत्रात्मकेन जन्मनक्षत्रे शनिभौमवारयोगे मनोदुःखदानम् यथोक्तं दीपिकायाम् "जन्मर्क्षे यदि स्यातां वारौ भौमशनैश्चरौ। स मासः कल्मषो नाम मनोदुःखप्रदायकः" इति। द्वितीयः षष्टिदण्डात्मकनक्षत्रभोगकालरूपदिनत्रिंशदात्मकः यथोक्तं सूर्यसिद्धान्ते "नाडीषष्ट्या तु नाक्षत्रमहोरात्रं प्रचक्षते। तत्त्रिंशता भवेन्मासः सावनोऽर्कोदयैस्तथा" अस्य प्रयोजनमायुर्गणनायाम् यथा "आयुर्दाये हृतं प्राप्तैर्नाक्षत्रं घटिनाडिकमिति" मङ्गत०।

**नाक्षत्रिक** त्रि० नक्षत्रादागतः ठञ्। १नक्षत्रतःप्राप्ते नक्षत्रनिमित्ते स्त्रियां ङीष्। सा च यत्रार्थां २दशाभेदे "सत्ये चन्द्रदशा चैव त्रेतायां रविसौरिका। द्वापरे बोगिनी चैव कलौ नाक्षत्रिकी दशा" भट्टोत्पलधृतवाक्यम् सा च दशा "षट्त्रिंशत्स दशा ज्ञेया इत्यादिका उक्ता दशाशब्दे अष्टोत्तरदशाप्रकरणे २४८५पृ० दृश्या।

**नाग** न० नगे पर्वते भवः अण् न गच्छति अगः न अगो वा। १वङ्गे २सीसके ३तिथ्यङ्गकरणभेदे च मेदि० करणशब्दे १६८० पृष्ठे दृश्यम्। सीसके पुंस्त्वमपीति वैद्यकम्। अस्योत्पत्तिर्भावप्र० दर्शिता यथा "दृष्ट्वा भोगिसुतां रम्यां वासुकिस्तु हसोच यत्। वीर्य्यं जातस्ततो नागः सर्वरोगापहो नृणाम्। सीसं वङ्गमुभं ज्ञेयं विशेषान्नागभस्मकम्"। "नागस्तु नागभस्मतुल्यबलं ददाति व्याधिं विनाशयति जीवनमातनोति। वह्निं प्रदीपयति कामबलं करोति मृत्युञ्च नाशयति सन्ततसेवितः सः"। भावप्र० पाकक्षीणयोर्वङ्गसीसयोर्दोषो यथा "पाकेन क्षीणौ किल वङ्गनागौ कुष्ठानि गुल्मांश्च तथातिकष्टान्। कण्डूप्रमेहानलमान्द्यशोथभगन्दरादीन् कुरुतः प्रभुक्तौ"। नागभस्मप्रकारो यथा "ताम्बूलरसंसिक्तं शिलायेपात् पुनःपुनः। हालिंशद्भिः पुटैर्नागो निरुत्थं भस्म जायते"। प्रकारान्तरेण यथा "अम्लत्वचिञ्चात्वक्चूर्णं चतुर्थांशेन निःक्षिपेत्। मृत्पात्रे विद्रुतो नागो लौहदव्यां च चालितः। यामैकेन भवेद्भस्म तत्तुल्या क्षान्नःशिखा। काञ्जिकेन समं पिष्ट्वा पचेद् दृढपुटेन च। क्षाङ्गेरीतं पुनः पिष्ट्वा शिलायां काञ्जिकेन च। पुनः पुटशराभ्यामेवं सप्तभिः पुटैः मृतिः। नागः सिन्दूरवर्णाभो म्रियते सर्वकार्यकृत्। सतिक्तमधुरो नागो मृतो भवति भस्मसात्। आयुः कीर्तिं वीर्यवृद्धिं करोति सेवनात् सदा। रोगान् हन्ति मृतो नागो वङ्गवद्गुणकारकः" ४सर्गे ५हस्तिनि ६मेघे ७नागकेशरे ८पद्मागे ९नागदन्तिके १०सर्पके ११देहस्थेऽनिलभेदे च पु० १२क्रूराकारे त्रि०। मेदि० "ङकारे नाग इत्युक्तो नीलजीमूतसन्निभः" सा० ति० टीका पदार्थादर्शे। अत्र नागशब्दस्य सर्पगजजातिवाचकत्वे विलिङ्गत्वम्। तत्र जातिवाचकत्वात् स्त्रियां ङीष्। जानपदादिलक्षणे स्वौजसमौट्छष्टाभ्यामित्यत्र प्रयोगे स्त्रियां ङीष्। दीर्घगुणयोगादन्यत्र प्रयोगे स्त्रियां टाप् इति भेदः। १२देवभेदे १४ताम्बूलां च पु० भरतः। मनुष्याकारः फणाछत्रयुक्तः कर्कोटादिर्नागः देवयोनिभेदः। तेषामुत्पत्त्यादिकं वराहपु० उक्तं यथा "सृजता ब्रह्मणा सृष्टिं मरीचिः सूतिकारणम्। प्रथमं मनसा ध्यातस्तस्य पुत्रस्तु कश्यपः। तस्य दाक्षायणी भार्य्या कद्रूर्नाम सुचिस्मिता। मारीचो जनयामास तस्यां पुत्रान् महाबलान्। अनन्तं वासुकिञ्चैव कम्बलञ्च महाबलम्। कर्कोटकञ्च राजेन्द्र! पद्मं चान्यं सरीसृपम्। महापद्मं तथा शङ्खं कुलिकञ्चापराजितम्। एते कश्यपदायादाः प्रधानाः परिकीर्त्तिताः। एतेषान्तु प्रसूत्या तु सदापूरितं जगत्। कुटिला क्षीणकर्णाश्च क्षोभोत्पत्तिविशेषणाः। दृष्ट्वा संदष्टमनुजान् भक्षं कुर्युः क्षणाद्ध्रुवम्" एवं प्रजानाशे ब्रह्मणादेशात् ते पातालस्थानं जग्मुः यथाह तत्रैव

"यद्दं करोमि वो नागाः समयं मनुजैः सह। तदेक मनसः सर्वे शृणुध्वं मम शासनम्। पातालं वितलञ्चैव सुतलाख्यं तलीयकम्। दत्तं वै वसुकामानां मद्दं तत्र गमिष्यथ। तत्र भोगान् बहुविधान् भुञ्जध्वं मम शासनात्। तिष्ठध्वं सप्तमं यावद्दालप्रलयतः पुनःपुनः। ततो वैवस्वतस्यादौ काश्यपेया भविष्यथ। दायादाः सर्व देवानां सुपर्णस्य च धीमतः। तदा प्रभृतिवः सर्पा भोक्ष्यते चित्रभानुना। भवतां नैव दोषोऽयं भविष्यति न संशयः। ये वै क्रूरा भोगिनो दुर्विनीतास्तेषामन्तो भविता नान्यथैतत्। कालं प्राप्य भवध्वं दशध्वं तथा परान् चापक्रतोमनुष्यान्। मन्त्रौषधैर्गारुड मण्डलैश्च बुद्धैर्दृष्टा मानवा वे चरन्ति। तेषां भीतैर्वर्त्तितव्यं न चान्या चिन्ता कार्या चान्यथा वो विनाशः। इतीरिते ब्रह्मणा ते भुजङ्गा जग्मुःस्थानं ख्यातलाख्यं हि सर्वे। तस्युर्भोगान् भुञ्जमानाः समर्थान् रसातले लीलया संस्थिताश्च। एवं शापं ते तु लब्ध्वा प्रसादञ्च चतुर्थांशात्। तस्युः पातालनिलये सुदितेनान्तरात्मना। एतत् सर्वञ्च पञ्चम्यां तेषां जातं महात्मनाम्। अतस्त्वियं तिथिर्धन्या सर्वपापहरी शुभा। एतस्यां संयतो यस्तु बन्धून्तु परिवर्जयेत्। चौरेभ्य श्चापवेद्यागांसस्य यास्यन्ति मित्रताम्"। नागाश्च प्राधान्येन भा॰आ॰३५अ॰ दर्शिता ततएवावसेयाः। तेषां केषाञ्चित् जनमेजयस्य सर्पसत्रे नाशो भविष्यतीति माहात्म्यकथा भा॰आ॰ २०अ॰ "ततः पुत्रमदृष्ट्वन्तु कद्रूर्जिह्वां विकीर्य्यती। आङ्गयामास च तदा बाला भूत्वाऽञ्जनप्रभाः। आविशध्वं हयं क्षिप्रं दासी न स्यामहं यथा। नाभ्यपद्यन्त ये वाक्यं तान् शशाप भुजङ्गमान्। सर्पसत्रे वर्त्तमाने पावको वः प्रधक्ष्यति। जनमेजयस्य राजर्षेः पारक्षितस्य धीमतः। शापमेनन्तु शुश्राव स्वयमेव पितामहः। अतिक्रूरं मयुत्सृष्टं कद्रूा दैवादतीव हि। सार्द्धं दैवगणैः सर्वैर्नाशं तामन्वमोदत। बहुत्वं प्रेक्ष्य सर्पाणां प्रजानां हितकाम्यया। तिस्रोवैविमा ह्येते दन्दशूकाः महाबलाः। तेषां तीक्ष्णविषत्वाद्धि प्रजानाञ्च हिताय च। युक्तं मात्राकृतं तेषां परपीडोपसर्पिणाम्। अन्येषामपि सत्त्वानां नित्यं दोषपरास्तु ये। तेषां प्राणान्तिको दण्डो दैवेन विनिपात्यते। एवं सर्वाण्यभूद्दैवैस्तु पुत्र कद्रूश्च तां तदा। आङ्गय कश्यपं देव एदं वचनमब्रवीत्। यदेते दन्दशूकाश्च सर्पा जातास्त्वयाऽनघ। विषोल्बणा महाभोगा मात्रा शप्ताः परन्तप। तत्र मन्युस्त्वया तात न कर्त्तव्यः कथञ्चन। दृष्टं पुरातनं ह्येतद्यत् सर्पविनाशनम्। इत्युक्त्वा सुदितदेवं प्रसाद्य प्रजापतिम्। प्रादादिमन्तरीं विद्यां कश्यपाय महात्मने!" कम्बलाश्वतरनागयोः सरस्वत्या मानवरप्राप्तिर्यथा "एवं स्तुता तदा देवी विष्णोर्जिह्वा सरस्वती। प्रत्युवाच महात्मानं नागमन्तरं ततः" सरस्त्युवाच "वरन्ते कम्बलं भ्रातः प्रयच्छाम्युरगाधिप!। तदुच्यतां प्रदास्यामि यत्ते मनसि वर्त्तते"। अश्वतर उवाच 'सहायं देहि देवि! त्वं पूर्वं कम्बलमेव मे। समस्वरबन्धुसख्योः संप्रयच्छ च' सरस्त्युवाच "सप्तस्वरा ग्रामरागाः सप्त पन्नगसत्तम। गीतकानि च सप्तैव तावत्यश्चापि मूर्च्छनाः। तानाश्चैकोनपञ्चाशत्तथा ग्रामत्रयञ्च यत्। एतत् सर्वं भवान् गाता कम्बलश्चैव ते सखा। भ्राजते मत्प्रसादेन भुजङ्गेन्द्र! परन्तथा। चतुर्विधं ददे तालं त्रिःप्रकारं लयत्रयम्। अतित्रयं तथातोद्यं मया दत्तं चतुर्विधम्। एतद्भवान् मत्प्रसादात् पन्नगेन्द्रापरञ्च यत्। अक्षान्तर्गतमापन्नं स्वरब्रह्मनयोश्च यत्। तदशेषं मया दत्तं भवतः कम्बलस्य च। यथा नान्यस्य भूलोके पाताले वापि पन्नग!। प्रभवेतारौ भवन्तौ च सर्वस्यास्य भविष्यतः। पाताले देवलोके च भूलोके चैव पन्नगौ। इत्युक्त्वा सा तदा देवी सर्वजिह्वा सरस्वती। जगामादर्शनं सद्यो नागस्य कमलेक्षणा" मार्कण्डेयपुराणम्। "नागैरिवालूनशटं सुगेन्द्रम्" किरा॰ "अधिनागं प्रजविनोविकृष्यत्पिच्छचारवः" "नागं पुनर्दुष्टसरीसृपोल्बणम्" माघः। १६अध्यायान्तरे

**नागकन्द** पु॰ कृष्णकन्दे राजनि॰। [त्रिका॰।

**नागकन्यका** स्त्री हृत॰। सर्पजातिस्त्रियां भोगिन्यां

**नागकर्ण** पु॰ नागस्य गजस्य कर्णः तदाकारः पत्रेऽस्य। १एरण्डे राजनि॰ हृत॰। २कृष्णकर्णे च। [भावप्र॰।

**नागकिञ्जल्क** पु॰ नागस्येव किञ्जल्कोऽस्य। नागकेसरे

**नागकुमारिका** स्त्री नागस्य कुमारीव कन्। १गुडूच्यां २मञ्जिष्ठायां च राजनि॰।

**नागकेसर** पु॰ नागस्येव केसरोऽस्य। स्वनामख्याते पुष्पप्रधाने वृक्षभेदे अमरः (नागेश्वरचाँपा) भावप्र॰ तत्रामगुणा उक्ता यथा "नागपुष्पः स्मृतो नागः केसरो नागकेसरः। चाम्पेयो नागकिञ्जल्कः कथितः कामुना-

ङयः। नागपुष्पं कषायोष्णं रूक्षं वातप्रकोपनम्। खरकण्डूत्रमास्रेदकृमिदौर्गन्ध्यकुष्ठवीसर्पकफपित्तविषापहम्" । त्रिजातकं नागकेसरसंयुक्तं चतुर्जातकं भवति यथा "त्वगेलापत्रकैसुक्ष्मैश्चित्रकगन्धि त्रिजातकम्। नागकेसरसंयुक्तं चतुर्जातकमुच्यते। तद्वृष्यं रोचकं रूक्षं तीक्ष्णोष्णं सुखगन्धकृत्। लघु-पित्ताग्निकृद्धृद्यं कफवातविषापहम्" भावप्र०।

**नागगन्धा** स्त्री नागस्य गन्ध इव गन्धोऽस्याः वा न ङीष्-समा०। नाकुलीकन्दे राजनि०। [राजनि०।

**नागगर्भ** न० नागः सीसकं गर्भो जन्महेतुर्यस्य। सिन्दूरे

**नागचूड** पु० नागः सर्पः चूडायां यस्य। शिवे महादेवे

**नागच्छत्रा** स्त्री नागस्य फणेव छत्रं छादनं पत्रे यस्य। नागदन्तीवृक्षे राजनि०।

**नागज** न० नागात् सीसकात् जायते जन-ड। १सिन्दूरे २वङ्गे हेमच०। ३सर्पजन्यजातमात्रे त्रि०।

**नागजिह्वा** स्त्री नागस्य सर्पस्य जिह्वेवाकारोऽस्य। १अनन्तमूले। २शारिवौषधौ च रत्नमाला।

**नागजिह्विका** स्त्री नागस्य हस्तिनो जिह्वेव रक्तता यस्याः कप्। मनःशिलायाम् अमरः। [भेदे।

**नागजीवन** न० नागेन सीसकेन जीवनं यस्य। वङ्गे धातु-

**नागदत्त** पु० धृतराष्ट्रकुलभेदे "आदित्यकेतुर्वह्वाशी नागदत्तातुवाविनौ" भा० प० ६७अ०।

**नागदन्त** पु० नागस्य हस्तिनो दन्त इवाकारोऽस्यास्य अच्। स्टङ्गभित्तिनिर्मिते काष्ठादिमये हस्तिदन्ताकारे (दाबड़ा) (दाँतिया) ख्याते १पदार्थभेदे अमरः हेम०। २गजदन्ते च मेदि०। स्वार्थे क तत्रार्थे अमरः। "शबरवसतिरिव खवलम्बितशाखामरनागदन्तधवलष्टङ्काः" काद०। "हो-पिघर्मौवनद्धश्च नागदन्तस्तदूर्ध्वगः" भा०शा० ६७अ०।

**नागदन्तिका** स्त्री नागस्य सर्पस्य दन्त इव विभाधारः पत्रं यस्याः कप् अपि अत इत्त्वम्। (विजाति) इचिकाख्यां रत्नमाला।

**नागदन्ती** स्त्री नागस्य गजस्य दन्त इव फलाद्याकारे यस्याः ङीष्। (हातिशुँड़ा) ख्याते १श्वीवृक्षिण्याम्। २कुम्भाख्योषधौ च मेदि०। "अर्कोलर्कैरक्षहय नागदन्ती-त्यादि" अर्कादिगणोक्तौ सुश्रुतः।

**नागदमनी** स्त्री नागो दम्यतेऽनया दम-ल्युट् ङीप्। १क्षुपभेदे "विल्वो वा नागदमनी बलासोटा विषापहा। नागपुष्पी नागपत्रा महायोगेश्वरीति च। बलासोटा कटुस्तिक्ता लघुः पित्तकफापहा। मूलरुक्छत्रणानुत्थो नाशयेच्छालगर्दभम्। सर्वपक्षप्रशमनी निःशेषविष-नाशिनी। जयं सर्वत्र कुरुते धनदा सुमतिप्रदा" भावप्र०

**नागदलोपम** पु० नागस्य ताम्बूल्याः दलमुपमा यत्र। पद्मपत्रे रत्नमाला। [शब्दच०।

**नागद्रु** पु० नागाकारः द्रुः (सिज्) वृक्षे शमनद्रुग्धायाम्

**नागद्वीप** पु० नागप्रधानो द्वीपः श०त०। द्वीपभेदे "पार्श्वे शशस्य हे वर्षे वङ्गे ये दक्षिणोत्तरे। वर्षौ तु नागद्वीपस्य कश्यपद्वीपएव च। ताम्रपर्णी त्रिता राजन् श्रीमान् मलयपर्वतः" भा०भी० ९अ०।

**नागनक्षत्र** न० नागाधिष्ठितं नक्षत्रम्। अश्लेषानक्षत्रे नागदैवतादयोऽध्यत्र "नागदैवतमश्लेषे" ति०त०

**नागनामन्** पु० नागान् नामयति नामि-कनिन्। हस्तिषां नैघण्टुप्रकाशिका।

**नागनायक** त्रि० ६त०। १प्रधाननागे "अनन्तो वासुकिः पद्मो महापद्मोऽपि तक्षकः। कर्कोटः कुलिकः शङ्ख इत्यष्टौ नागनायकाः" त्रिका० नामव्यादयोऽध्यत्र। नाग-शब्दे उदा०। नागः नायकोऽस्य। २अश्लेषानक्षत्रे न०।

**नागनियूँह** पु० नाग इव नियूँहः। नागदन्तशब्दार्थे जटा०

**नागपञ्चमी** स्त्री नागपूजार्हा पञ्चमी। श्रावणशुक्ल-पञ्चम्यां तत्र नागानां पूजाविधानात् तस्यास्तथात्वम्। देवीपुराणे "शुक्ले श्रावणमासे तु पञ्चम्यां भवनाङ्गने। पूजयेत् मनसादेवीं क्षुद्रोविटपसंस्थिताम्। पद्मनाभे गते यस्यां देवैः सर्वैरनन्तरम्। पञ्चम्यामर्चिते पद्मे सस्तिष्ठति पन्नगी"। मनसादेवीं विषहरीम्। क्षुद्रो विल्वतरुः। देवैरिति कर्त्तरि तृतीया। "देवीं संपूज्य नत्वा च न सर्पभयमाप्नुयात्। पञ्चम्यां पूजयेन्नागान-नन्ताद्यान् महोरगान्। क्षीरं सर्पिस्तु नैवेद्यं देयं सर्पविषापहम्"। गारुडे "अनन्तं वासुकिं शङ्खं पद्मं कम्बलमेव च। तथा कर्कोटकं नागं धृतराष्ट्रञ्च शङ्खकम्। कालियं तक्षकञ्चापि पिङ्गलं मणिभद्रकम्। यजेत्तानर्चिताञ्नागान् दष्टस्त्रो दिवं व्रजेत्"।

**नागपति** पु० ६त०। शेषादेषु अष्टसु १नागेषु २गजपतौ ऐरावते च। [भावप्र०। ३वृक्षभेदे राजनि०।

**नागपत्रा** स्त्री नागस्येव पत्रं यस्याः। १नागदन्त्यां

**नागपद** पु० "पादौ खञ्जे तथा हस्ते त्रिपेद्विङ्गं भगे लघु। वामवेत् कारको नारौ वन्द्यो नागपदो मतः" रतिमञ्जर्युक्ते १रतिबन्धभेदे। ६त०। २हस्तिपदे न०

नागपाश्र पु०नागः पाश इव । १वरुणस्यायुधभेदे "बाहुं द-यावर्त्तनात्तु नागपाश इति स्मृतः । ब्रह्मपन्थिमथो दद्यात् नागपाशमथापि वा" स्मामोक्ते २बन्धभेदे "वेष्टितं नागपाशेन भ्रुकुटीभीषणाननम्" इति दुर्गाध्यानम्।

नागपाशक पु० "खलक्काहवमध्यस्थां कृत्वाभ्यां धारयन् कुचौ । रज्जुभिःग्रथितः कामी बन्धोऽयं नागपाशकः" रतिमञ्जर्युक्ते १रतिबन्धभेदे । स्वार्थे क । २नागपाशे च

नागपुर न०ह्रस्व० १पातालेऽस्तिनागनामके२पुरभेदे तन्नाम-कारणं यथा "जटाजूटात् पपातोर्द्धं मेरोस्तस्मात्ततोऽगमत् । दैवैः परिवृता गङ्गा हेमकूटञ्च पर्वतम्। मन्दरञ्चैव कैलासं हिमवन्तञ्च पर्वतम् । तामादायान्तु रोधाय खलीलो नाम दानवः । पार्वतं रूपमास्थाय वर्षीयान्तु शतैर्द्विजाः । ततो भगीरथो राजा धारयामास कौशिकम् । स तुष्टः प्रददौ नागं वासुकिं तं भगीरथः । समारुह्यागमत्तत्र यत्र रुद्धा भगीरथी । तेन नागेन तं दैत्यं संविदार्य्य हस्तिकृतः । ततथा तं समाधाय मूर्द्धन्यैरावतो गजः । गृहीतस्तं समारोप्य स यावद्रा-मसाङ्गयम्" वह्निपुराणे तस्य हस्तिनापुरस्य नामान्तरं "ततस्तं प्रतिजग्राह राजा नागपुराधिपः" (पाण्डुः) भा० स्वा० ११३अ० ।

नागपुष्प पु० नागः तदुदानगन्धयुक्तं पुष्पं यस्य । १तुङ्गाम-वृक्षे २नागकेसरे ३चम्पके च मेदि० । ४नागदन्त्यां स्त्री भावप्र० ङीष् । [फलं यस्याः । कुम्भाख्यां राजनि० ।

नागपुष्पफला स्त्री नागस्य नागकेसरस्य पुष्पमिव पुष्पं

नागपुष्पिका स्त्री नागस्य पुष्पमिव पुष्पं यस्याः कप् कापि अत इत्त्वम् । स्वर्णपुष्पिकायां राजनि० ।

नागफल पु० नागः सर्प इव दीर्घं फलमस्य । घटीलभेदे (धुन्दुल) राजनि० । [अच्छत्यच्छे हेमच० ।

नागबन्धु पु० नागस्य हस्तिनो बन्धुरिव तत्तोषकत्वात् ।

नागबल पु० नागानां हस्तिनामयुतस्य बलं यस्य । १भीमे त्रिका० । २हस्तितुल्यबलयुक्ते त्रि० । भीमस्य तथा बलप्राप्तिकथा भा० स्वा० १२८ अ० । "यदि नागेन्द्र ! तुष्टोऽसि किमस्य धनञ्जयैः । रक्ष्यिष्येते कुमारोऽयं त्वयि प्रीते महाबलः । बलं नागसहस्रस्य यस्मिन् कुक्षौ प्रतिष्ठितम् । यावत् पिबति बालोऽयं तावदक्षौ प्रदीयताम् । एवमस्त्विति तं नागं वासुकिः प्रत्यभाषत । ततो भीमस्तदा नागैः कृतस्वस्त्ययनः शुचिः । प्राङ्मुखश्चोपविष्टः स रसं पिबति पाण्डवः । एकोच्छ्वासात्ततः कुक्षं पिबति स्म महाबलः । एव-मष्टौ स कुक्षीन् जग्मिवत् पाण्डुनन्दनः । ततस्तु भ-यने दिव्ये नागदत्ते महाभुजः । शयेत भीमसेनस्तु यथाभुखमरिन्दम !" "ततोऽष्टमे तु दिवसे प्रत्यबुध्यत पाण्डवः । तस्मिंस्तदा रसे जीर्णे सोऽप्रमेयबलो बली । तं दृष्ट्वा प्रत्यबुध्यन्त पाण्डवं ते भुजङ्गमाः । सान्त्वयामासुरव्यग्रा वचनं चेदमब्रुवन् । यस्ते पीतो महाबाहो ! रसोऽयं वीर्यसम्भृतः । तस्माद्बागायुतबलो रसेऽष्टमो भविष्यसि" भा०आ० १२८अ० । नागस्येव बलं यस्याः । (गोरक्षचाकुलिया) २लताभेदे स्त्री "ना-गबलाफलतिन्दुकसदनफलमधूकमक्षिकाः" ह०सं० ५७अ०

नागबलाहृत न० चक्रदत्तोक्ते घृतभेदे "पादशेषे जल-द्रोणे पचेन्नागबलाहृताम् । तेन क्वाथेन तुल्यांशं घृतं क्षीरञ्च साधयेत् । पलार्द्धकैर्वातिबलाबलागोक्षुर-नैर्वा । प्रपौण्डरीकाद्यैर्मधुरैः पियालकपिकच्छुभिः । क-ण्डसन्धानितामीक्ष्मेदायुग्मत्रिकण्टकैः । सृष्टाक्षविश्वा-लूकशृङ्गाटकशेरुकैः । एतन्नागबलासर्पीरुक्तपित्तक्षय-क्षयम् । श्लीपदार्शःश्मकं हन्यात् बलपुष्टिकरं परम् । बल्यमोजस्यमायुष्यं वलीपलितनाशनम् । उपयुञ्जीत षण्मासान् वृद्धोऽपि तरुणायते"। [२०५७पृ० दृश्यम् ।

नागभगिनी स्त्री ह्रस्व० वासुकेर्भगिन्यां जरत्कारौ तच्छब्दे

नागभूषण पु० नागो भूषणमस्य । महादेवे

नागमल्ल पु० नागेषु मल्लः । ऐरावते शब्दच० ।

नागमाढ स्त्री नागस्य हस्तिनां मातेव मूषकत्वात् । १मनःशि-लायां शब्दर० । २मनसादेव्यान्तु त्रिका०तस्याः सर्पद्वारा नागरक्षकत्वात् तथात्वम् । अगस्त्यकथायन्तु २५०७पृ० दृश्यम् । [१हस्तिमारके२केशरिणि पु० त्रिका० ।

नागमार त्रि० नागं मारयति मृ-णिच्-अण् उप०स० ।

नागयष्टि स्त्री नागाधिष्ठानं यष्टिः । तडागादौ आरोप्ये वास्त्वादिकाष्ठमये नागविशेषाधिष्ठानरूपे स्तम्भभेदे (रङ्काठ) तद्विधानं तदधिष्ठातृनागनामप्रापणं च जलाशयोत्सर्गे उक्तं यथा तत्रैव "नागानागश्च नामानि लिखितानि पृथक् पृथक् । ततः कुम्भे च निःक्षिप्य गायत्र्या च विलोडयेत् । उद्धरेत् पत्रिका-मेकां तत्र यो नाम्नि उद्धरेद्बल ! स वै जलाधिपः स्मृतः । तं वै संपूज्य गन्धाद्यैर्दद्याद् क्षीरञ्च पायसम्" । पलाशप्राग्भव । योगीश्वरस्तवच-नात् । "यस्माद्यो नागनामानस्य पत्रे क्षत्वा तु

यन्नतः" तानि च गारुडे। "अनन्तो वासुकिः पद्मो महापद्मोऽथ तक्षकः। कुलीरः कर्कटः शङ्खो घटौ नागाः प्रकीर्त्तिताः" ततश्च अनन्तवासुकिकर्कोटकपद्ममहापद्मतक्षककुलीराणां नामान्याद्यपत्रे लिखित्वा कर्णिकामध्ये लिखित्वा गायत्र्या गोमूत्रेण वा "छन्दसामङ्गानीति" रघुनाथधृतमन्त्रेणाष्टोत्तरं यस्य नामोल्लिखति तं घटां समावाह्यानेन नागेन यस्य जलाशयस्य रक्षा कर्त्तव्येति ब्राह्मणान् श्रावयेत्। हयशीर्षे "वैल्वकं वारुणञ्चैव पुन्नागं नागकेसरम्। बकुलं चम्पकञ्चैव विल्वञ्चैवाथ खादिरम्। एतेषामेव दारूणां नागयष्टिः प्रकीर्त्तिता। सवक्त्रकोटरं कृत्वा तस्मात् कुर्य्यात् यथेप्सितम्"। तथा च हरिस्मृतिः "मूलचक्राङ्कितं कृत्वा स्थापयित्वा जलाशये। द्वादशाङ्गुलमानन्तु वाप्यां चक्रं प्रकल्पयेत्। षोडशं पुष्करिण्यान्तु विंशतिन्तु सरोवरे। सागरे हस्तमात्रन्तु लौहं ताम्रञ्च पैत्तलम्। चक्रञ्च विविधं प्रोक्तं कुर्य्यात्तेषां यथेप्सितम्"।

स्वार्थे क तत्रार्थे त्रिका०।

**नागर** त्रि० नगरे भवः अण्। १विदग्धे २नगरोद्भवे च मेदि० स्त्रियां ङीप्। अगं राति रा-क न अगः नगन्द्रेण(सङ्घ सुपा)पा०स०। ३देवरे पु०त्रिका०। ५नागरङ्गे (नारङ्गा नेबु) जम्बीरभेदे पु०शब्दरत्ना०। ६गुडत्वचां न० अमरः। ७मुस्तामेदे (नागरुथा) न० ८रतिबन्धभेदे त्रिका०। १०देशभेदे तद्देशीये ब्राह्मणभेदे नागराब्राह्मणाः स्त्रि०कौ० नागरखण्डशब्दे दृश्यम् तद्देशे प्रथम प्रचलिते १२अक्षरभेदे न० "वयस्या नागरासङ्गादङ्गानां वृत्ति वेदनाम्" वैद्यकम् नगराय हितम् अण्। १३नगरहिते च "धनुर्वेदश्च सत्रं वै यन्त्रशस्त्रञ्च नागरम्" भा० स० ५अ०"यन्त्राख्यान्नेवौषधबलेन सोमकांस्तदधोक्षप्रक्षेपकाणि कोष्ठमयानि भाषायां नालशब्दाभिधेयानि तेषां सत्रं सूचकं शास्त्रं नागरं नगरस्थितम्" नीलक० "यः पलाशैरतिपरिमलोद्गारिभिर्नागरोद्याम्" मेघ० १४पौराणे यदुयुद्धभेदे यदुयुद्धशब्दे २।३७४।दृश्यम्।

**नागरक** त्रि० नगरे भवः कुत्सितः प्रवीणो वा "नगरात् कुत्सनप्रावीण्ययोः" पा० वुञ्। कुत्सने १चौरे प्रवीणे २अभिज्ञे च "अकुत्सनादौ तु अणेव नागरा ब्राह्मणाः" स्त्रि०कौ० ३रतिबन्धभेदे "अधोमूलोपरि स्थित्वा योषिदूरुद्वयं रमेत्। योषां धृत्वा कराभ्याञ्च बन्धो नागरकोमतः" तद्भवार्थम् नागर+स्वार्थे क। ४नागरशब्दार्थे

**नागरक्त** न० नागरक्तं रक्तम् शोणितवर्णचूर्णम्। सिन्दूरे हेमच०। तस्य शोणवर्णरञ्जितचूर्णरक्तवर्णत्वात् तथात्वम्

**नागरखण्ड** न० स्कन्दपुराणान्तर्गते स्वनामख्याते खण्डभेदे तत्प्रतिपाद्यविषयाश्च ब्रह्मद्वारदीपे उक्ता यथा "अतः परं नागराख्यः खण्डः षष्ठोऽभिधीयते। शिवोत्पत्तिसमाख्यानं हरिचन्द्रकथा शुभा। विश्वामित्रस्य माहात्म्यं त्रिशङ्कुस्वर्गतिस्तथा। घाटकेश्वरमाहात्म्यं बलासुरवधस्तथा। नागबिल्वं यज्ञतीर्थं अचलेश्वरवर्णनम्। चमत्कारपुराख्यानं चमत्कारकरं परम्। गयशीर्षं बालशाखं बालमण्डं सुगोपयम्। विष्णुपादञ्च गोकर्णं युगरूपं समाश्रयः। सिद्धेश्वरं नागसरः सप्तार्षेयं शुभस्तकम्। भूधरं नलेश्वञ्च भैमं दुर्वैरमर्कटम्। शार्ङ्गिणं सोमनाथञ्च दौर्गमानर्जलेश्वरम्। जमदग्निवधाख्यानं नैःक्षत्रियकथानकम्। रामह्रदं नागपुरं जडविष्णुञ्च यज्ञभूः। क्षीरादिशिवाकञ्च सतीपरिणयस्तथा। बालखिल्यञ्च यागेयं बालखिल्यञ्च गारुडम्। उच्छोषापः सप्तर्षिवः सोमप्रासादमेव च। अम्बाह्वं पाटकाख्यम् आग्नेयं ब्रह्मकुण्डकम्। गोसहं गोदयद्राख्यं बलापालेश्वरी तथा। भानैश्चरं राजवापी रामेशो लक्ष्मणेश्वरः। कुबेराख्यं जवेशाख्यं शिवं सर्वोत्तमोत्तमम्। षष्टषष्टिसमाख्यानं दमयन्त्या स्त्रीजातकम्। ततोऽम्बा रेवती चात्र भद्रिकातीर्थसञ्ज्ञकम्। शेषकुरी च केदारं शुक्रतीर्थं क्षारकम्। सत्यसन्धेश्वराख्यानं तथा कर्णोत्पला कथा। जटेश्वरं वाग्यज्ञाख्यं गौर्य्यं गाणेशमेव च। ततो वास्तुपदाख्यानम् अजामङ्कथानकम्। सौभाग्यात्मुक्तमूलेशं धर्मराजकथानकम्। मिताक्षेश्वराख्यानं गाणपत्यत्रयं ततः। जावालिचरितञ्चैव मकरेशकथा ततः। कालेश्वर्यम्बकाख्यानं कुण्डमाप्तेश्वरस्तथा। पुण्यादित्यं रोहितास्यं नागरोत्पत्तिकीर्त्तनम्। भार्गवं चरितं चैव विश्वामित्रं ततः परम्। सारस्वतं पैप्पलादं कंसारीशञ्च पैतृकम्। ब्रह्मणो यज्ञचरितं सावित्र्याख्यानसंयुतम्। रैवतं भर्तृयज्ञाख्यं तुलसीतीर्थनिरीक्षणम्। कौरवं घाटकेशाख्यं प्रभासक्षेत्रकत्रयम्। पौष्करं नैमिषं धर्म्मारण्यप्रस्तिवं श्रुतम्। वाराणसी द्वारकाख्याऽवन्त्याख्येति पुरीत्रयम्। इन्द्रावनं खाण्डवाख्यं सदैताख्यं वनत्रयम्। कक्षः शालस्तथा नन्दो ग्रामत्रयमनुत्तमम्। ऋषिपुत्रपितृसंज्ञतीर्थत्रयसहदा-

कृतम्। अर्बुदौ रैवतश्चैव पर्वतत्रयसत्तमम्। नदीनां त्रितयं गङ्गा नर्मदा च सरस्वती। सार्द्धकोटि त्रयफलमेकैकस्मात् कीर्त्तितम्। कुपिका शङ्खतीर्थञ्च नागरकं वासमण्डनम्। कपाटकेशं क्षेत्रफलमदं प्रोक्तं चतुष्टयम्। शाम्बादित्यं चाङ्गल्यं वौधिरिसमाख्यकम्। जलाशयविचत्वारिंशं अमूल्यशयनं व्रतम्। सङ्गमेशं शिवरात्रिसुवासुकप्रदानकम्। पृथ्वीदानं वासकेशं कपालमोचनेश्वरम्। पापविघ्नं साम्बलैङ्गं युगमानादिकीर्त्तनम्। दानमाहात्म्यकथनं द्वादशादित्य कीर्त्तनम्। इत्येष नागरः खण्डः प्रभासाख्योऽधुनोच्यते"

**नागरघन** पु० नागरमेव घनः कर्पूरसाधनम्। (नागरसघा) सस्याभेदे राजनि०।

**नागरङ्ग** पु० नागस्य नागभस्य सिन्दूरस्येव रङ्गोऽस्य कर्त्ता। (नारेङ्गा) जम्बीरभेदे अमरः। तत् फलगुणा यथा "नागरङ्गन्तु सुरभि विपाके गुरु दुर्जरम्। अत्यम्लमीषन्मधुरं हृद्यं वातविनाशनम्। तत्केसरन्तु रुच्यं स्यात् वातघ्नारि निगद्यते"।

**नागरमर्दिन्** त्रि० नागरं मर्द्नाति मृद्-णिनि। नागरमर्दके ततः बाह्वा० अपत्यादौ ठञ्। नागरमर्दिनि तदपत्यादौ।

**नागरमुस्ता** स्त्री नगरे भवा अण् ङीप् नागरी कर्म०। (नागरसघा) सस्याभेदे राजनि०। "तिक्ता नागरमुस्ता स्यात् कषाया शीतला लघुः। कफपित्तज्वरहरी तृष्णादाहरुचि प्रणुत्। अतिसारामयहरी भिषग्भिः परिकीर्त्तिता" राजनि०।

**नागराज** पु० ष० त० टच्समा०। १शेषे नागे "अथस्तात्नागराजाय सोमायोर्द्धां दिशं ददौ" हरिवं० २६५अ०। २छन्दोऽलङ्कारके पिङ्गलनागे च।

**नागराद्यचूर्ण** न० शार्ङ्गधरोक्ते चूर्णभेदे "श्रीफलत्रयाट्टूषकस्य नागरचूर्णेन मिश्रितः सगुडः। मक्षीगदमत्युग्रं तक्रभुजाशीलितो जयति। जम्बूदाडिमभृङ्गाटपाठाकट्वटपल्लवैः। पक्वं पर्युषितं वाऽपि विल्वं सगुडनागरम्। हन्ति सर्वानतीसारान् मक्षीमतिदुस्तरान्। नागरातिविषामुस्तकाथः क्षौद्रसमायुतः। चूर्णं पिङ्गलवटकं वातमक्षण्यान्त इतानि च। नागरातिविषामुस्तं धातकी सरसाञ्जनम्। वत्सकत्वक्फलं विल्वं पाठा कटुकरोहिणीम्। पिबेत् समांशं तच्चूर्णं क्षौद्रं तण्डुलाम्बुना। मैत्तिके मक्षीदोषे रक्तं यत्नोपपादयेत्। अर्शांस्यच गुदे शूलं जयेच्चैव प्रवाहिकाम्। नागराद्यभिदं चूर्णं कण्ठादेव्य भाषितम्। शीतकषायमानेन तण्डुलोदकल्पना। जेऽयदशुषतोयेन प्राङ्मक्षण्डुलभावनाम्"।

**नागराङ्ग** न० नागरेति खाङ्गा यस्य। शुण्ठ्याम् राजनि०।

**नागरी** स्त्री नागेभ्यो राति ददाति रा-क-गौरा० ङीप्। १स्नुहीवृक्षे शब्दच० तस्यां नागपञ्चमीशब्दे नागपूजनस्योक्तत्वात्तस्यास्तथात्वम्। नगरे भवः अण् ङीप्। २विदग्धायां नार्य्याञ्च "कन्याभीरीं वरत्र स वर्षं संहतो नागरीभिः" रघुवंशः।

**नागरीट** पु० नागरीमेटति इट-गतौ क। १भिक्षुके २जारे ३नागरीकृतसङ्गलब्धनौ च शब्दार्थ०।

**नागरुक** पु० नागरङ्गे जम्बीरभेदे शब्दरत्ना०। (राजनि०।

**नागरेणु** पु० नागस्य सीसकस्य रेणुः। सीसकसम्भवे सिन्दूरे

**नागरैयक** त्रि० नगर्य्यां भवः कच्प्रा०ठक्। नगर्य्यां भवे

**नागरोत्था** स्त्री नागरादुत्तिष्ठति उद्+स्था-क। (नागरसघा) ख्याते सस्याभेदे राजनि०।

**नागर्य्य** न० नागरस्य भावः गुरो०यक्। नागरभावे विदग्धत्वे

**नागलक्षण** क्ली०। नागानां भेदादिज्ञापके चिह्नभेदे ऋद्धि-शब्दे ५८१ पृ० तल्लक्षणादिकं सुश्रुतोक्तं दर्शितम्। अग्निपुराणोक्तं गोमयाङ्कितचक्रलक्षणादिकमत्र प्रदर्श्यते तच्च तत्र २८२अ० उक्तं यथा

"अस्निग्धवाच नामादयोऽथ भावादि दंशस्थानानि कर्म च। सूतकं दष्टचेष्टेति सम्यग्लक्षणमुच्यते। गोमयाङ्कितचक्राख्याः कर्कटोऽजो मकाम्बुजः। मकुपालश्च कलिक इत्यष्टौ नामवर्णकाः। दशाष्टषट्त्रिगुणशतमूर्द्धान्तिनौ क्रमात्। विप्रो नृपौ विशौ शूद्रौ द्वौ द्वौ नागेषु कीर्त्तितौ। तदन्वयाः पञ्चशतं तेभ्यो जाता असंख्यकाः। मणिमण्डलिराजीलवातपित्तकफाह्वयाः। व्यन्तरा दोषभिन्नास्ते सर्पा दर्वीकराः स्मृताः। रथाङ्गाङ्गलच्छत्रलक्षिकाङ्कुशधारिणः। गोनसा मन्दगा दीर्घा मण्डलैर्विविधैश्चिताः। राजिलाचित्रिताः स्निग्धास्तिर्यमूर्द्धसु राजिभिः। व्यन्तरा भिन्नचिह्नाश्च भूवर्णान्नेकवायवः। चतुर्विधास्ते षड्विंशभेदाः षोडश गोनसाः। त्रयोदश च राजीला व्यन्तरा एकविंशतिः। वेदशुक्लाक्षे जायन्ते सर्पास्ते व्यन्तराः स्मृताः। खाषाडादित्रिभागैः खाङ्गौ मासचतुष्टये। अण्डकानां शते द्वे च चत्वारिंशत् प्रसूयते। सर्पा यस्मिन् स्मृतौ तान्तु विना

स्त्रीपुंसकात्। उन्मीलतेऽक्षि सप्ताहात् कृच्छे-मासाद्वेदवह्निः। द्वादशाहात् सुरोधः स्यात् दलाः स्युः सूर्यदर्शनात्। द्वात्रिंशत्, दिनविंशत्या चतसृष्वेषु दंष्ट्रिकाः। करालो भयरो कालरात्री च यमदूतिका। एतास्ताः सविषा दंष्ट्रा वामदक्षिणपार्श्वगाः। षण्मासान्मुच्यते कृत्वा जीवेत् षष्टिसमाहयम्।२०। नागाः सूर्यादिवारेशाः सप्त चक्रा दिवा निशि। खेषां षट् प्रतिवारेषु कुलिकः सर्वसन्धिषु। मङ्गेन वा महाजेन रुद्र तस्योदयोऽथ वा। हयोर्वा नाडिकामन्त्रमन्त्रकं कुलिकोदयः। दुष्टः स कालः सर्वत्र सर्पदंशे विशेषतः। कृत्तिका भरणी स्वाती मूलं पूर्वत्रयाश्विनी। विशाखार्द्रा मघाश्लेषा चित्रा श्रवणरोहिणी। इत्ता मन्दकुजौ वारौ पञ्चमी चाष्टमी तिथिः। षष्ठी रिक्ता शिवा निन्द्या पञ्चदशी चतुर्दशी। सन्ध्याचतुष्टयं दुष्टं दग्धयोगाश्च राशयः। एकद्वित्रयो दंशा दष्टविद्धे क्षणिकतम्। चतुर्दंशभवगुप्तं स्याद्गमेवं चतुर्विधम्। त्रयो ह्येकचता दंशा वेदना रुधिरोल्बणा। नक्रनक्राकृतिकूर्माभा दंशाश्च यमचोदिताः। दाही पिपीलिकास्पर्शी कण्टयोद्वरजान्वितः। सतोदो पन्थितो दंशः सविषो न्यस्तनिर्विषः। देवालये शून्यगृहे वल्मीकोद्यानकोटरे। रथ्यावन्यौ श्मशाने च नद्याश्च सिन्धुसङ्गमे। द्वीपे चतुष्पथे सौधे गृहेऽजे पर्वतायतः। बिल्वद्वारे जीर्णकूपे जीर्णवेश्मनि कुड्यके। शिथुश्लेष्मातकाक्षेषु जम्बूडुम्बरकेषु च। वटे च जीर्णप्राकारे स्वाम्रकृतकजलाशये। तालौ शङ्खे गले मूर्ध्नि चिबुके नाभिपादयोः। दंशोऽशुभः शुभो दूतः पुष्पहस्तः शुचाक् शुधीः। सिन्धुवर्णसमानश्च शुक्लवस्त्रोऽमलः शुचिः। सपदारगतः शस्त्री प्रमादी भूमतेऽग्रगः। विवर्णवासाः पाशादिहस्तो मद्यदवर्षभाक्। शुष्ककाष्ठाश्रितः खिन्नस्खलाक्षकरांशुकः। आर्द्रवासाः क्षणरक्तपुष्पयुक्तशिरोरुहः। कृष्णदंष्टी नखच्छेदी गुदस्थक् पादलेखकः। क्षेत्रलुप्ती तृणच्छेदी दुष्टा दूताश्चैकशः। द्रङ्ग्या वा वक्त्रेद्वेधा यदि दूतस्य चालनः। आभ्यां हाभ्यां पुरुषाभ्यान् विद्यात्स्त्रीपुंसकान्। दूतः सृजति यद्वालं तस्मिन् दंशस्तदाहरेत्। दूताङ्घ्रिचलनं दुष्टसत्त्वितिर्निश्चला शुभा। जीवपार्श्वे शुभो दूतो दुष्टोऽन्यत्र समागतः। जीवो गतागतैर्दुष्टः शुभो दूतनिवेदने। दूतस्य वाक् प्रदुष्टा सा पूर्वोक्तार्द्धनिन्दिता। विनष्टौ-स्तस्य वाक्यान्तैर्विषनिर्विषकालता। आद्यैः स्वरैश्च कादीश वर्गैर्भिन्नविपिर्द्विधा। स्वरजो वह्निभान्वर्णैः इति ज्ञेया च मातृका। वातास्नीन्द्रजलात्मानो वर्गेषु च चतुष्टयम्। नपुंसकाः पञ्चमाः स्युः स्वराः शक्राम्बुयोनयः। दुष्टो दूतस्य वाक्पादौ वातास्नो मध्यमो हरिः। प्रशस्ता वाक्या वर्णा अतिदुष्टा नपुंसकाः। प्रस्थाने मङ्गलं वाक्यं गर्जितं मेघहस्तिनोः। प्रदक्षिणं फले इक्षे वामस्य च रुतं जितम्। शुभा गीतादिशब्दाः स्युरोदयं स्यादसिद्धये। अनर्थगीरथाक्रन्दो दक्षिणे विरुतं च्युतम्। वेश्या च्युतो नृपः कन्या गौर्दन्ती तुरङ्गजौ। क्षीराज्यदधिशङ्खाम्बु छत्रं भेरी फलं सुराः। तच्छुत्वा क्षेम रुग्यत्र सिद्धयेऽभिमुखा अमी। सकाशः सानलः कार्ष्णिनाम्बरभावभृत्। नक्षत्रघटको गोभायुग्मप्रोलूककपर्दिकाः। तैलं कपालकार्पासा निषेधा भक्ष नष्टये। विषरोगाश्च सप्त क्षुधातोर्धात्वन्तराप्तितः। विषदंशो ललाटं यात्यतोनेत्रं ततो मुखम्। आस्याच्च चरणौ नाभौ धातून् प्राप्नोति हि क्रमात्"।

**नागलता** स्त्री नाग इव लता। १पुंसोलिङ्गे लिङ्गनागाकारा लता। २नागदीर्घायां २ताम्बूल्याञ्च।

**नागलोक** पु० ६त०। नागाधिष्ठिते लोके पाताले नागशब्दे तेषां पातालस्थितिकारणं दर्शितम्। पातालावस्थानभेदादि पुराणसर्वस्वे विष्णुपुराणादुक्तं यथा "पराशर उवाच विस्तार एष कथितः पृथिव्या भवतो मया। सप्रतिस्तु महाख्यानि द्विजोच्छ्वासोऽपि कथ्यते। दशसाहस्रमेकैकं पातालं मुनिसत्तम!। सुतलं वितलञ्चैव तलञ्च गभस्तिमत्। महातलमतलञ्चापि पातालञ्चापि सत्तम!। भूमयो यत्र दैत्येय! वरप्रासादशोभिताः। तेषु दानवदैतेयजातयः सतसंघशः। निवसन्ति महानागजातयश्च महाशने!" ब्रह्माण्डे "प्रथमेऽस्मिंस्तले ख्यातमसुरेन्द्रस्य मन्दिरम्। नक्षत्रदैवतोष महानादस्य चानघ!। पुरञ्च शङ्कुकर्णस्य कबन्धस्य च मन्दिरम्। किंविषयस्य च पुरं प्रहृष्टजनसङ्कुलम्। राक्षसस्य च भीमस्य शुक्रदन्तस्य चालयः। लोहिताक्षस्य कुविन्दानां नगरं चापदस्य च। धनञ्जयस्य सदनं नागेन्द्रस्य महात्मनः। कालियस्य च नागस्य नगरं कक्षसस्य च। एवं पुरसहस्राणि नागदानवरक्षसाम्। श्रेयांसि प्रथमे चैव क्षणभौमे तले द्विज!। द्वितीयेऽस्मिंस्तले श्रेयं दैत्येन्द्रस्य सुरक्षयः। महाजम्भस्य च तथा

नगरं प्रथमस्य च। कपर्दीश्च कृष्णस्य निर्जं तस्य च मन्दिरम्। शङ्खाख्यस्य च दैत्यस्य नगरं गोमुखस्य च। राजसस्य च नीलस्य मेघस्य कृपकस्य च। पुरञ्च कृष्णपादस्य महोष्णीषस्य चालयः। कम्बलस्य च नागस्य पुरमन्यतरस्य च। कद्रुपुत्रस्य च पुरं तक्षकस्य महात्मनः। एवं पुरसहस्राणि नागदानवरक्षसाम्। द्वितीयेऽस्मिंस्तले विप्राः पातालभौमे न संशयः। तृतीये तु तले ख्यातं प्रह्लादस्य महात्मनः। चतुर्थादस्य च पुरं पुरमग्निमुखस्य च। तारकाख्यस्य च पुरं पुरं त्रिशिरसस्तथा। शिखिसारस्य च पुरं कूटपुटजनाकुलम्। ह्यवनस्य च विप्रेयं राक्षसस्य च मन्दिरम्। मन्दरस्योरगपतेर्विशालस्य च मन्दिरम्। एवं पुरसहस्राणि नागदानवरक्षसाम्। तृतीयेऽस्मिंस्तले ज्ञेयं रक्षभौमे न संशयः। तस्मादपि दैत्यसिंहस्य कालनेमेः पुरं महत्। तथालम्बस्य च पुरं नगरं कुञ्जरस्य च। राक्षसेन्द्रस्य च पुरं शुम्भस्येवेन्द्रविस्तरम्। सङ्कुस्य कोकनासस्य हयकर्णस्य चालयः। बहुयोजनसाहस्रं बहुपक्षिगणाकुलम्। नगरं वैनतेयस्य चतुर्थेऽस्मिन्रसातले। पञ्चमे शर्कराभौमे बहुयोजनविस्तृतम्। विरोचनस्य नगरं दैत्यसिंहस्य वामतः। व्यायताक्षान्निजिह्वस्य हिरण्याक्षस्य चालयः। पुरञ्च विद्युज्जिह्वस्य राक्षसेन्द्रस्य धीमतः। महामेघस्य च पुरं रक्षसो देवविद्विषः। किर्मीरस्य च नागस्य स्वस्तिकस्य जयस्य च। एवं पुरसहस्राणि नागदानवरक्षसाम्। पञ्चमेऽस्मिंस्तले ज्ञेयं शर्करानिलये तथा। षष्ठे तले केशरिणो दैत्येन्द्रस्य पुरं श्रुतम्। सुपर्णेषः पुलोमस्य नगरं महिषस्य च। राक्षसेन्द्रस्य च पुरं चक्रोधस्य महात्मनः। तस्मात्ते सुरसापुत्राः शतशीर्षाः सदा युतः। महेन्द्रस्य सखा श्रीमान् वासुकिर्नाम नागराट्। एवं पुरसहस्राणि नागदानवरक्षसाम्। षष्ठे तलेऽस्मिन् ख्यातानि शिलाभौमे रसातले। सप्तमे तु तले ज्ञेयं पाताले पूर्वपश्चिमे। पुरं बलेः प्रहर्षितं नरनारीगणायुतम्। सुरराजोविवैः पर्णसदृशैर्देवशत्रुभिः। सुकुलेन्द्रस्य दैत्यस्य तत्रैव नगरं महत्। अनेकैर्दितिपुत्राणां वसुदीर्घैर्महासुरैः। तत्रैव नागनगरैर्ब्रह्मद्विर्मैर्महात्मभिः। दैत्यानां दानवानाञ्च वसुदीर्घैर्महासुरैः। उदीर्णैः राक्षसावासैरनेकैश्च समाकुलम्। खर्लोकादपि रम्याणि पातालानीति नारदः। प्राह स्वर्गसमानध्ये पातालेभ्यो गतो दिवि। यान्नादकारिणः शुभ्रा मणयो यत्र सुप्रभाः। नागानरणभूषाश्च पातालं तेन तत्समम्। दैत्यदारिद्र्यरहितैरितश्चेतश्च शोभिते। पाताले कस्य न प्रीतिर्विस्मयश्चापि जायते। दिवार्करश्मयो यत्र प्रभां तन्वन्ति नातपम्। शशिनश्च न शीताय निशि द्योताय केवलम्। भक्ष्यभोज्य महापानसुदिते रात्रिभोगिभिः। यत्र न ज्ञायते कालो गतोऽपि दयितादिभिः। वनानि नद्यो रम्याणि सरांसि कमलानि च। पुंस्कोकिलादिनादाश्च मनोज्ञास्यम्बराणि च। भूषणान्यतिरम्याणि गन्धाद्यङ्गानुलेपनम्। वेणुवीणाक्षदक्षानासुदितैर्नादितानि च। एतान्यन्यानि चोदारभोगभोग्यानि दानवैः। दैत्योरगैश्च भुज्यन्ते पातालान्तरगोचरैः। पातालानामधस्ताच्च विष्णोर्या तामसी तनुः। शेषाख्या तद्गुणान् वक्तुं न शक्ता दैत्यदानवाः। योऽनन्तः पठ्यते सिद्धैर्देवर्षिभूषितैः। सहस्रशिरसा व्याप्तः खस्तिकामलभूषणः। फणामणिसहस्रेण यश्च विद्योतयन् दिशः। सर्वान् करोति निर्दीप्तान् हिताय जगतोऽसुरान्। मदाघूर्णितनेत्रोऽसौ यः सदैवैककुण्डलः। किरीटी रत्नवरो भाति साग्निः श्वेत इवाचलराट्। नीलवासा मदोत्सिक्तः श्वेतहारोपशोभितः। साभ्रे गङ्गाप्रपातोऽसौ कैलासाद्रिरिवोच्छ्रितः। लाङ्गलास्त्रहस्ताग्रो विभ्रन्मूषलमुत्तमम्। उपास्यते स्वयं कान्त्या यो वारुण्या च मूर्त्तया। कल्पान्ते यस्य वक्त्रेभ्यो विषानलशिखोज्ज्वलः। सङ्कर्षणात्मको रुद्रो निर्गच्छति जगत्क्षयम्। सप्तसप्तपृथिवी भूतसंघेश्चितिमण्डलम्। आस्ते पातालमूलस्थः शेषोऽशेषसुरार्चितः। तस्य वीर्यं प्रभावश्च स्वरूपं रूपमेव च। न हि वर्णयितुं शक्यं शक्तो वा त्रिदशैरपि। यस्यैषा सकला पृथ्वी फणामणिशिखाह्वया। आस्ते कुसुममालेव कस्तद्वीर्यं वदिष्यति। यदा विजृम्भतेऽनन्तो मदाघूर्णितलोचनः। तदा चलति भूरेषा सान्द्रतोयाम्बिकानना। यदा तु पर्वणि गजः खेदाज्जानयते शिरः। सपर्वतवना नाम तदेयं चलति क्षितिः। गन्धर्वाप्सरसः सिद्धाः किन्नरोरगचारणाः। नान्तं गुणानां गच्छन्ति तेनानन्तोऽयमुच्यते। यस्य नागवधूहस्तैर्लेपितं हरिचन्दनम्। स्वनिश्वासानिलायासं याति दिक्पटवासताम्। यमामनन्ति देवर्षिगर्गनौञ्जायनादयः। भगवान् सकलस्यैव निमित्तं घटितं फलम्। तेनेयं नागवर्येण शिरसा विधृता मही। बिभर्त्ति माला

लोकानां सदेवासुरमानुषाम्" नागभुवनादयोऽत्र ।

**नागवर्त्मन्** पु॰तीर्थभेदे "ततः प्रायाद्बलो राजन् ! दक्षिणेन सरस्वतीम् । गत्वा चैवं महाबाहुर्नातिदूरे महायशाः । धर्मात्मा नागवर्त्मानं तीर्थमागममच्युतः । यत्र पन्नग राजस्य वासुकेः सन्निवेशनम् । महाद्युतेर्महाराज ! बहुभिः पन्नगैर्वृतम् । ऋषीणां हि सहस्राणि तत्र नित्यं चतुर्दश । यत्र देवाः समागम्य वासुकिं पन्नगोत्तमम् । सर्वे पन्नगराजानमध्यषिञ्चन् यथाविधि । पन्नगेभ्यो भयं तत्र विद्यते न च गौरव ! । तत्रापि विधिवद्दत्त्वा विप्रेभ्यो रत्नसञ्चयान्" भा॰श॰ ३८अ॰।

**नागवल्लरी** स्त्री नाग इव दीर्घा वल्लरी । ताम्बूलीलतायां भावप्र॰ ।

**नागवल्ली** स्त्री नाग इव दीर्घा वल्ली । ताम्बूलवल्ल्याम् अमरः । सा च देशभेदात् स्निग्धकाभेदेन नानाकारगुणा यथोक्तं राजनि॰ "एकाग्रेषा देशभेदात्स्निग्धविशेषान्नानाकारं याति कावे गुणे च" रत्नप्रकाशे

"श्रीवाटी मधुरा तीक्ष्णा वातपित्तकफापहा । रसाढ्या सुरसा रूक्षा विपाके गिरिरा स्मृता । स्वादुवाटी कटुकास्तिक्ता तीक्ष्णा तथोष्णा सुखपाककृत्तमा । विदाह पित्तास्रविकोपनी च विष्टम्भदा वातनिबर्हणी च । सप्रभी मधुरा तीक्ष्णा कटुरूक्षा च पाचनी । गुल्मोदराध्मानहरी रुचिह्रीपनी परा" चन्यच्च "गुहागरे सप्रसिरा प्रसिद्धा तत्पर्णचूर्णातिरसातिरूक्षा । सुगन्धि तीक्ष्णा मधुरातिहृद्या सन्दीपनी पुंस्त्वकरी च वल्ली" "नाम्ना वाम्बरा सतीक्ष्णमधुरा रूक्षा हिमा दाहनुत् पित्तोद्रेककरी सुदीपनकरी बल्या सुखामोदिनी । स्त्रीसौभाग्यविवर्द्धिनी मदकरी क्षेया सदा वल्लभा गुल्माध्मानविबन्धजिच्च कथिता सा भालवे ढुलिना । चन्द्रिपुष्पिका नाम कषायोष्णा कटुस्मृता । मलापकर्षी कण्ठस्य पित्तहृद्दाहनाशिनी । हैवर्णीया कटुस्तीक्ष्णा हृद्या दीपदला च सा । कफवातहरी रूक्षा कटुदीपन पाचनी" स्वार्थे क । नागवल्लिकाऽप्यत्र "पर्णमूले भवेद्व्याधिः पर्णाग्रे पापसम्भवः । जीर्णपर्णे हरेदायुः शिरा बुद्धिप्रणाशिनी" आह्निक॰ ।

**नागवारिक** पु॰ नागस्य गजस्य सर्पस्य वा वारो वारणं प्रयोजनमस्य ठक् । १हस्तिपालके २गरुडे ३मयूरे ४राजकुञ्जरे ५यूथस्थगजराजे च मेदि॰ ।

**नागवि(बिल)** न॰ तीर्थभेदे नागरखण्डशब्दे दृश्यम् ।

**नागवीट** पु॰नाग इव वेटति वि+वट-क । टाकुरे(डाकरा) त्रिका॰ ।

**नागवीथी** स्त्री आकाशमण्डलस्थे उत्तरदिक्स्थे अश्विन्यादित्रयघटितनक्षत्रवयान्तर्गते मार्गभेदे

वियति हि मध्यमोत्तरदक्षिणमार्गत्रयमस्ति तत्र प्रत्येकं वीथीत्रयेण त्रिधा भिद्यते । तथा हि तिसृभिस्त्रिभिरश्विन्यादिनक्षत्रैर्नागवीथी मृगवीथी ऐरावती चेत्युत्तरमार्गे वीथीत्रयम् "वर्षयङ्काद्यां भान्येव स्यानानि द्विजसत्तमाः । स्यात् जारद्वयं मध्ये तथैरावतसत्तरम्" "वैश्वानरं दक्षिणतो निर्दिष्टमिह तत्त्वतः । अश्विनी भरणिका याम्या नागवीथीति शब्दिता" विष्णुपु॰ जरद्गवशब्दे ३५८पृ॰ दृश्यम् । २कश्यपपत्नीभेदे च "नागवीथी च यामिन्याम्" ब्रह्म॰प्र॰ २अ॰ ।

**नागवृक्ष** पु॰ नागाख्यो वृक्षः । नागकेसरवृक्षे शब्दार्थचि॰ ।

**नागव्रत** पु॰ नागानां व्रतमत्र । पर्वतभेदे "जगाम सह पत्नीभ्यां ततो नागव्रतं गिरिम्" भा॰आ॰१६६अ॰ ।

**नागशुण्डी** स्त्री नागस्य शुण्डस्येवाकारोऽस्यस्य शिखायाम् अच् गौरा॰ ङीप् । शुण्डीफलनामके वृक्षे राजनि॰ ।

**नागसम्भव** न॰ नागात् सीसकात् सम्भवति सम्+भू-अच् ६त॰ । सिन्दूरे अमरः ।

**नागसम्भूत** न॰नागात् सीसात् वासुक्यादितो वा सम्भूतम् ६त॰ सीससम्भवे १सिन्दूरे वासुक्यादिशिरस्के वर्षणःपतिते २शुक्लाफलभेदे च "तक्षकवासुकिकुलजाः कामगमा वै च पन्नगास्तेषाम् । स्निग्धानीलद्युतयो भवन्ति शुक्लाः फणस्थाने । यस्योऽवनिप्रदेशे रजतमये भाजने स्थिते च यदि । वर्षति देवोऽकस्मात् तज्ज्ञेयं नागसम्भूतम् । अपहरति विषमलक्ष्मीं जपयति शत्रून्यशो विकाशयति । भोजङ्गं कपतीनां धृतमक्षतार्थं विजयदं च" बृ॰स॰८।अ॰

**नागसरस्** न॰ तीर्थभेदे नागरखण्डशब्दे दृश्यम् ।

**नागसाह्वय** न॰ नागेन हस्तिना समानः आह्वयो यस्य । हस्तिनापुरे "जगाम तच्छनैर्नगरं नागसाह्वयम्" भा॰आ॰१३अ॰ । [शोभनायां शोरक्षामी ।

**नागसुगन्धा** स्त्री नागस्य सर्पस्येव सुगन्धोऽस्याः । भुजङ्गा-

**नागस्तोक** न॰ नागस्य तद्विषस्य स्तोकमत्र कप् । वत्सनाभविषे राजनि॰ । [द्वे च राजनि॰ ।

**नागस्तोता** स्त्री नाग इव स्तोता । १नागदन्तीवृक्षे २दन्ती-

**नागहनु** पु॰नागस्य हस्तिनो हनुरिव । नखीनामगन्धद्रव्ये राजनि॰ ।

**नागहन्त्री** स्त्री नागान् सर्पान् हन्ति हन् क्विप् ङीप् । १वन्याकर्कख्याम् राजनि० । २सर्पगजयोर्हन्तरि त्रि० ।

**नागाख्य** पु० नागेति आख्या यस्य । नागकेसरे त्रिका० ।

**नागाह्वला** स्त्री नागख्याह्वलति वाल । नागवल्लौ लटाधरः ।

**नागाञ्जना** स्त्री नागख्याञ्जनं यत्र । १नागयक्ष्यां २कक्षिन्याञ्च मेदि० । [रधिपमात्रे च । नागाधिराजादयोऽप्यत्र ।

**नागाधिप** पु० ६त० । १धनन्ते नागे ३मेरौ च० । २गजसर्पयो०

**नागानन** पु० नागस्येवाननमस्य । गजानने गणेशे ।

**नागान्तक** ६त० । १गरुडे क्रमेण सर्पगजयोरन्तके २मयूरे ३सिंहे च । [नाटकभेदे ।

**नागानन्द** पु० नागानामानन्दो यस्मात् यत्र । श्रीहर्षप्रणीते

**नागारति** पु०नागस्य सर्पस्यारातिः १वन्याकर्कख्याम् राजनि० २सिंहे ३गरुडे ४मयूरे च । नागारिप्रभृतयोऽप्येषु ।

**नागार्जुनीय** पु० नागश्च अर्जुनश्च तौ अधिकृत्य कृतोग्रन्थः "तेन क्रीतः" पा० छ । नागार्जुनाधिकारेण कृते काव्यभेदे तस्याख्यायिकात्वात् वा लुक् । नागार्जुन तत्रार्थे ।

**नागालावू** स्त्री नागः नागकुम्भ इवालाबूः । गजकुम्भाकारायां तुम्बवाम् राजनि० । [२मयूरे ३सिंहे च ।

**नागाशन** न० नागान् अश्नाति अश्-ल्यु । गरुडे हारा० ।

**नागाह्व** पु० नागेन युक्ताह्वा यस्य । हस्तिनापुरे । नागाह्वादयोऽप्यत्र त्रिका० । [वल्लभायाम् राजनि० ।

**नागाह्वा** स्त्री नागं नागकेसरमाह्वयते आह्वते वा+ह्वे-क । टाप् ।

**नागिन्** पु० नागो भूषणत्वेनास्त्यस्य इनि । सर्वभूषणे शिवे "नागोपवीतिनं नग्नं नागिनमस्त्रिवर्चसम्" हरिवं० २७६ अ० ।

**नागेन्द्र** पु० नाग इन्द्र इव श्रेष्ठत्वात् उपमितस० । १ऐरावते २शेषादिनागे च । "नागेन्द्रहस्तस्त्वचि कर्कशत्वात्" कुमा० । "कृष्णेन नागेन्द्रमिवेन्द्रवाहनम्" माघः ।

**नागेश** पु० ६त० । १धनन्ते शेषनागे । याज्ञिनिव्याकरणभाष्यविवरणादिग्रन्थकारके २विद्वद्भेदे "नागेशभट्टपादुते लघुशब्देन्दुशेखरम्" । ३शिवलिङ्गभेदे न० नागेश्वरोऽप्यत्र विष्णुपु० उक्ते तन्निकटस्थे ४तीर्थभेदे न० ।

**नागोदर(र)** न०नाग इवोदरं यस्मात् ब्रह्मो०वा रस्य लोपः । उदरव्याधौ हेमच० । रात्रं तत्रार्थे हारा० । सुश्रुतोक्ते २गर्भिण्या गर्भोपद्रवभेदे च "शुक्रशोणितं वायुर्नाभि प्रपद्यमवक्रान्तजीवमाप्याययत्युदरं तत्कदाचिदृयदक्ष्यो-पमानं नैगमेषाप्यहृतमिति भाषन्ते । तमेव कदाचित् प्रवीयमानं नागोदरमित्याहुस्तत्रापि क्षीरवत् प्रतीकारः"

**नागोद्भेद** न०सरस्वतीनदीप्रकाशस्थानभेदरूपे तीर्थभेदे "गच्छन्नर्हिता यत्र भेदभेदे सरस्वती । चमसे च शिवोद्भेदे नागोद्भेदे च दृश्यते । नागोद्भेदे नरः स्नात्वा नागलोकमवाप्नुयात्" भा० व० ८२अ० ।

**नाचिक** पु० विश्वामित्रपुत्रभेदे "वराचिनर्नाचिकश्चैव" भा० अनु० ४अ० विश्वामित्रपुत्रोक्तौ ।

**नाचिकेत** पु० नचिकेतशब्दार्थे १धनञ्जये २ऋषिभेदे ३तदुपाख्याने च । त्रिकाण्डे नाचिकेतुरिति पाठः लिपिकरप्रमादजातः नाचिकेत इत्येव पाठः शुद्धादिसंवादी । नाचिकेतोपाख्यानञ्च भा०अनु० ७१अ० आदौ दृश्यम् ।

**नाचीन** पु० दक्षिणस्थे १दिग्भेदे २तत्तद्रूपे च "नाचीनानर्जुकांश्चैव" भा०स०३०अ० सहदेवदक्षिणदिग्विजये ।

**नाट** पु० नट-घञ् । १नृत्ते २कर्णाटदेशे च शब्दरत्ना०

**नाटक** त्रि०नट-ण्वुल् । १नर्त्तके स्त्रियां टाप् । कामाख्या पर्वतान्तिकस्थे २पर्वतभेदे । "ऐशान्यां नाटके शैले शङ्करस्य महात्मनः । नित्यं वसति तत्रैव यक्षदर्पोना तु पार्वती" कालिकापु० । १श्रव्यकाव्यरूपे रूपकभेदे न० । तल्लक्षणादिकं सा०द० उक्तं यथा

"नाटकमथ प्रकरणम् भाणव्यायोगसमवकारडिमाः । ईहामृगाङ्कवीथ्यः प्रहसनमिति रूपकाण्यि दश । किञ्च, "नाटिका त्रोटकं गोष्ठी सट्टकं नाट्यरासकम् । प्रस्थानोल्लाप्यकाव्यानि प्रेङ्खणं रासकं तथा । संलापकं श्रीगदितं शिल्पकञ्च विलासिका । दुर्मल्लिका प्रकरणी हल्लीशो भाणिकेति च । अष्टादश प्राहुरुपरूपकाण्यि जगीषिणः । विना विशेषं सर्वेषां लक्ष्म नाटकवन्मतम् । सर्वेषां प्रकरणादिरूपकाणां नाटिकादुपरूपकाणाञ्च । तत्र । "नाटकं ख्यातवृत्तं स्यात् पञ्चसन्धिसमन्वितम् । विलासर्द्धादिगुणवद्दुःखजं नानाविभूतिभिः । सुखदुःखसमुद्भूति नानारसनिरन्तरम् । पञ्चादिका दशपरास्तत्राङ्काः परिकीर्त्तिताः । प्रख्यातवंशो राजर्षिर्धीरोदात्तः प्रतापवान् । दिव्योऽथ दिव्यादिव्यो वा सुखयाञ्चायको मतः । एक एव भवेदङ्गी शृङ्गारो वीर एव वा । अङ्गमन्ये रसाः सर्वे कार्य्यनिर्वहणेऽङ्गिनम् । चत्वारः पञ्च वा मुख्याः कार्य्यव्याप्तपृथक्फलाः । गोपुच्छाग्रसमाप्तन्तु बन्धनं तस्य कीर्त्तितम्" । "देवतीनां मनुष्याणां राज्ञां लोके महात्मनाम् । पूर्ववृत्तानुचरितं प्रख्यातोदात्तनायकम् । प्रवेशकविष्कम्भादिभिः सन्धिभिरन्वितम् । इतिहासकथोद्भूतं सुखदुःखदशै-

र्युतम्। षट्पञ्चदशसप्ताष्टनवाङ्कैरङ्कभूषितम्। नाना-विलासलीलाभिः सर्वसिद्धिभिरन्वितम्। नानाभाव रसैराढ्यं नाटकं सूरयो विदुः। किञ्चिदङ्गविहीनन्तु न त्याज्यं नाटकं क्वचित्। आरम्भश्च प्रयत्नश्च प्राप्तिः सम्भव एव च। नियता च फलप्राप्तिः फलयोगस्तथा परः। इत्यवस्थापञ्चकं स्यात् नाटके कार्यवस्तुनः। संस्कृतं प्राकृतं भूतभाषाप्रश्नंशिका गिरः। नाटके नियताः प्रोक्ता एता भाषा रसाश्रया। भाषाविभाषा-भेदेन प्राकृतन्तु चतुर्दश। मागध्यावन्तिका प्राच्या शौरसेन्यर्द्धमागधी। वाह्लीका दाक्षिणात्याच भाषाः सप्त च प्राकृते। शकाराभीरचाण्डालशवरद्रविडौड्रजाः। वानौकसी विजातीनां विभाषाः सप्त कीर्त्तिताः। कैकेयी शौरसेनी च काञ्ची पाञ्चालमागधी। द्राविडी प्राच्यु-देशी च भूतभाषाः प्रकीर्त्तिताः। वैदर्भी मागधी नाटी काम्बोजी चोपनागरी। पाञ्चाली षड्पभ्रंश-भाषाः क्षुद्रेशभेदतः। देवतादर्शनान्नत्व कर्त्तव्यं नाटकं बुधैः। राजर्षिदर्शनान्नं वा तेऽपि देवैः समा मताः"। उदाहरणम् "मुरारिकेरनर्घराघवं भवभूते-रुत्तरचरितं कालिदासस्याभिज्ञानशकुन्तलञ्च सङ्कीर्तदा०।

तच्च यथा कर्त्तव्यं नाटकादिविभागसङ्ज्ञा अग्निपु० ३३७अ० तथा निरूपितं यथा

"सामान्यञ्च विशेषश्च लक्षणस्य द्वयी गतिः। सामान्यं सर्वविषयं शेषः क्वापि प्रवर्त्तते। पूर्वरङ्गे निष्टत्ते द्वौ देशकालावुभावपि। रसभावविभावानुभावा अभिनय-स्तथा। अङ्कः स्थितिश्च सामान्यं सर्वत्रैवोपसर्पणात्। विशेषोऽवसरे वाच्यः सामान्यं पूर्वमुच्यते। त्रिवर्ग-साधनञ्चाटयमित्याङ्कः करणञ्च यत्। इतिकर्त्तव्यता तस्य पूर्वरङ्गो यथाविधि। नान्दीमुखानि द्वात्रिंश-दङ्गानि पूर्वरङ्गके। देवतानां नमस्कारो गुरूणामपि च स्तुतिः। सोमब्राह्मणभूपादीनामाशीर्वादादि गीयते। नान्द्यन्ते सूत्रधारोऽसौ रूपकेषु निबध्यते। गुरुपूर्वक्रमं वंशप्रशंसा पौरुषं कवेः। सम्बन्धार्थौ च काव्यस्य पञ्चै-तानेव निर्दिशेत्। नटी विदूषको वापि पारिपार्श्विक एव वा। सहिताः सूत्रधारेण संलापं यत्र कुर्वते। चित्रैर्वाक्यैः स्वकार्य्योत्थैः प्रस्तुताक्षेपिभिर्मिथः। आमुखं तत्तु विज्ञेयं बुधैः प्रस्तावनापि सा। प्रवृत्तकं कथोद्घातः प्रयोगातिशयस्तथा। आमुखस्य त्रयो भेदा बीजांशेष्वपि-लायते। काव्यं प्रवृत्तमाश्रित्य सूत्रदृश्यत्व वर्णयेत्। तदाश्रयच्च पात्रस्य प्रवेशस्तत् प्रवृत्तकम्। सूत्रधारस्य वाक्यं वा यत्र वाक्यार्थमेव वा। गृहीत्वा प्रविशेत् पात्रं कथोद्घातः स उच्यते। प्रयोगेषु प्रयोगन्तु सूत्र-दृश्यत्व वर्णयेत्। ततश्च प्रविशेत् पात्रं प्रयोगातिशयो हि सः। शरीरं नाटकादीनामितिवृत्तं प्रचक्षते। सिद्धसत्प्रेक्षितङ्चेति तस्य भेदावुभौ स्मृतौ। सिद्धमागम-दृष्टञ्च श्रुतसत्प्रेक्षितं कवेः। बीजं बिन्दुः पताका च प्रकरी कार्य्यमेव च। अर्थप्रकृतयः पञ्च पञ्च चेष्टा अपि क्रमात्। प्रारम्भश्च प्रयत्नश्च प्राप्तिः सम्भव एव च। नियता च फलप्राप्तिः फलयोगश्च पञ्चमः। मुखं प्रति-मुखं गर्भो विमर्शश्च तथैव च। तथा निर्वहणञ्चेति क्रमात् पञ्चैव सन्धयः। अल्पमात्रं समुद्दिष्टं बहुधा यत् प्रसर्पति। फलावसानं यच्चैव बीजं तदभिधीयते। यत्र बीजसमुत्पत्तिर्नानार्थरससम्भवा। काव्ये शरीरानु-गतं तन्मुखं परिकीर्त्तितम्। दृष्टस्यार्थस्य रचना इत्तान्त-स्यानुपक्षयः। रागप्राप्तिः प्रयोगस्य गुह्यानाञ्चैव गूहन-म्। आश्चर्य्यवदभिख्यातं प्रकाशानां प्रकाशनम्। अङ्गहीनं नरो यद्वत् श्रेष्ठं काव्यमेव च। देशकालौ विना किञ्चिन्नेतिवृत्तं प्रवर्त्तते। अतस्तयोरुपादान-नियमात् पदमुच्यते। देशेषु भारतं वर्षं कालेऽत-युगत्रयम्। मर्त्ये तास्यां प्रधानत्वं सुखदुःखोदयः क्वचित्। सर्गे सर्गादिवार्त्ता च प्रसङ्गानी न दुष्यति"।

**नाटकलक्षण** न० नाटकस्य दशविधरूपकस्य लक्षणम्। सा०द० चक्रे षट्त्रिंशल्लक्षिते नाटकस्य लक्षणे यथा "षट्त्रिंशल्लक्षणान्यत्र नाट्यालङ्कृतयस्तथाऽष्टौ। त्रय-स्त्रिंशत् प्रयोज्यानि वीथ्यङ्गानि त्रयोदश। लास्याङ्गानि दश यथालाभं रसव्यपेक्षया" इत्युद्दिश्य "भूषणाक्षरसं-घातौ शोभोदाहरणं तथा। हेतुसंशयदृष्टान्तास्तुल्यतर्कः पदोच्चयः। निदर्शनाभिप्रायौ च प्राप्तिर्विचार एव च। दिष्टोपदिष्टे च गुणातिपातातिशयौ तथा। विशेषण-निरुक्ती च सिद्धिर्भविष्यतौ। दाक्षिण्यानुनयौ माला उत्पत्तिगर्हणे तथा। पृच्छा प्रसिद्धिः सारूप्यं संक्षेपो गुणकीर्त्तनम्। क्षेपो मनोरथोऽनुक्तसिद्धिः प्रियव-चनक्रिया। लक्षणानि" इति विभज्य क्रमेणलक्षितानि यथा "गुणैः सालङ्कारैर्योगस्तु भूषणम्। वर्णनाऽक्षर-संघातश्चित्रार्थैरक्षरैर्मितैः। सिद्धैर्यैः सभं यत्र प्रसि-द्धोऽर्थः प्रकाश्यते। स्निग्धलक्षणचित्रार्था सा शोभेत्यभि-धीयते। यत्र तत्सार्थयुक्तेन वाक्येनाभिप्रदर्शनात्।

साध्यतेऽभिमतवार्थस्तदुदाहरणं४ मतम्। हेतुर्वाक्यं समासोक्तमिष्टलक्षेतदर्शनात्। संशयो५ ज्ञाततत्त्वस्य वाक्ये स्याद्दर्शिनश्चयः। दृष्टान्तो७ यस्तु पक्षार्थसाधनाय निदर्शनम्। तुल्यतर्कोऽद यदर्थेन तर्कः प्रकृतसाधिना। सम्बन्धोऽर्थान्तरूपो यः पदानां स पदोच्चयः८। यत्रार्थानां प्रसिद्धानां क्रियते परिकीर्त्तनम्। परपक्षव्युदासार्थं तच्चिदर्शनः०मुच्यते। अभिप्राय११ स्तु साहस्याद्द्वयर्थस्य कल्पना। प्राप्तिः१२ केनचिदंशेन किञ्चिद्यत्रानुभीयते। विचारो१३ युक्तवाक्यैर्यदप्रत्यक्षार्थसाधनम्। देशकालस्वरूपेषु वर्णना दिट्ट१४मुच्यते। उपदिष्टं१५ मनोहारि वाक्यं शास्त्रानुसारतः। गुणातिपातः१६ कार्यं यद्विपरीतं गुणान् प्रति। यः सामान्यगुणोद्रेकः स गुणातिशयो१७ मतः। अर्थान् सिद्धान् बहूनुक्त्वा विशेषोक्तिर्विशेषणम्१८। पूर्वसिद्धार्थकथनं निरुक्ति१९रिति कीर्त्तितम्। बहूनां कीर्त्तनं सिद्धि२०रभिप्रेतार्थसिद्धये। इन्द्रादीनां भवेद्भङ्गो२१ वाच्यादन्यतरद्वचः। विचारस्यान्यथाभावः सन्देहात्तु विपर्य्ययः२२। दाक्षिण्यं२३ चेष्टया वाचा परचित्तानुवर्त्तनम्। वाक्यैः स्निग्धैरनुनयो२४ भवेदर्थस्य साधनम्। माला२५ स्याद्यदभीष्टार्थं नैकार्थप्रतिपादनम्। अर्थापत्ति२६र्यदन्यार्थोऽर्थान्तरोक्तेः प्रतीयते। दूषणोद्घोषणायां तु भर्त्सना गर्हणं२७ तु तत्। अभ्यर्थनापरैर्वाक्यैः पृच्छा२८ऽर्थान्वेषणं२९ मतम्। प्रसिद्धि३०र्लोकसिद्धार्थैरुत्तमैरधसाधनम्। सारूप्य३१ मभिभूतस्य सारूप्यात् लोभवर्त्तनम्। संक्षेपो३२ यत्तु संक्षेपादात्मनार्थं प्रयुज्यते। गुणानां कीर्त्तनं यत्तु तदेव गुणकीर्त्तनम्३३। स लेशो३४भगवते वाक्यं यत् साहस्र पुरःसरम्। मनोरथ३५स्त्वभिप्रायस्तोक्तिर्भङ्ग्यन्तरेण यत्। विशेषार्थोऽतिप्रसादेऽनुक्तसिद्धि३६रुदीर्यते। स्यात्प्रमाणयितुं पूज्यं प्रियोक्ति३७र्हर्षभाषणम्"।

**नाटकीय** त्रि॰ नाटके भवः तत्र वर्त्तते वा "छ्वाछः" पा॰ छ। नाटके वर्त्तमे पदार्थे "पूर्वरङ्गः प्रसङ्गाय नाटकीयस्य वस्तुनः" भाषः। [ज्ञ। (तरङ्गज्ञ) ख्याते नटापनये त्रिका॰।

**नाटास्त्र(ङ्ग)** पु॰नटानां प्रियः अण् नाटः अश्वो(ङ्गो)रसो॰

**नाटार** पुंस्त्री नङ्या अपत्यम् वा वारक्। नङ्या अपत्ये

**नाटिका** स्त्री दृश्यकाव्यभेदे तल्लक्षणं यथा "नाटिका कल्पितवृत्ता स्यात् स्त्रीप्राया चतुरङ्किका। प्रख्यातो धीरललितनायकोन्वयः। स्यादन्तःपुरसम्बन्धा सङ्गीतव्याकृताश्च वा। नवानुरागा कन्यात्र नायिका रूपयौवनजा। सम्भवन्त्येत नेतास्यां दैव्याद्यासेन सङ्गतः। दैवी पुनर्भवेज्ज्येष्ठा प्रगल्भा रूपयौवनजा। पदे पदे मानवती तदयः सङ्गमो द्वयोः। वृत्तिः स्यात् कैशिकी बहुविमर्शैः सन्धयः पुनः"। इयमेवंलक्षणायिकयोः। यथा रत्नावल्यां विष्कम्भकाङ्कादि साः॰द॰। सङ्गीतदामोदरेऽत्र कविभिर्विशेष उक्तस्तत्रैव द्रष्टव्यः।

**नाटित** त्रि॰ चु॰ नट—क्त। नटताभिनये भावे क्त २अभिनये स्वार्थे क। नाटितक नटलक्षे।

**नाटेय** पुंस्त्री नङ्या अपत्यम् क्षुद्रत्वेऽपि ढकोऽभावपक्षे स्त्रीभ्योढक् पा॰ ढक्। नङ्या अपत्ये

**नाटेर** पुंस्त्री नङ्या अपत्यं क्षुद्राभ्यो वा ढक्। नङ्या अपत्ये

**नाट्य** न॰ नटस्य इदं कर्म्म "अन्द्योगौक्थिकेत्यादिना" पा॰ यञ्। १नटकर्म्मे नृत्यगीतवाद्यात्मके २काव्ये वाक्यार्थाभिनये च तत्फलादिकं सङ्गीतद्दा॰ उक्तं यथा

"देवर्षिचरितापाश्रपूर्वचरितान्यालोक्य धर्मादयस्तत् स्वावाञ्चितभूमिकाभिनयने स्यादर्थसिद्धिः परा। सङ्गीतायुतचित्तवृत्तिचतुरस्यावश्यं भवत्यङ्गना ज्ञानं शास्त्ररसेक्षणं चेति कथितं नाट्यं चतुर्वर्गदम्। यो यस्य दयितो भावः स तं नाट्ये निरीक्षते। अतः सर्वमनोहारि नाट्यं कस्य न रञ्जकम्"। नाट्योत्पत्तिर्यथा "ब्रह्मानुश्रूयते ब्रह्मा भक्तेष्वाभ्यर्थितः पुरा। चकारादरयुग्वेदेभ्यो नाट्यवेदन्तु पञ्चमम्। उपवेदोऽत्र वेदाश्च चत्वारः कथिताः श्रुतौ। तत्रोपवेदो गान्धर्वः शिवेनोक्तः स्वयम्भुवे। तेनापि भरतायोक्तस्तेन सर्वं प्रचारितः। शिवाज्ञयोनिभरतास्तस्मादस्य प्रयोजकाः"। नाट्यारम्भसङ्कल्पादिनिरूपणाय धौ॰धा॰ वसिष्ठ आह "त्रिकोणराशिस्थगुरुभ्रविष्टाङ्कसेन्द्रवारीश्वरपौष्णभेषु। सङ्गीतवाद्यादिसमस्तकर्म कार्यं विभौमार्कजवासरेषु"। श्रीपतिरपि "कृष्णः पुष्यो वासवं चानुराधा चन्द्रेज्या पौष्णं वारुणं चोत्तराश्च। पूर्वाचार्यैः कीर्त्तितश्चन्द्रवर्त्ती नृत्तारम्भे शोभनोऽयं भवर्गः"। काश्यपः "शुक्लसंस्थे वृषे चन्द्रे बुधराशौ तु वीक्षिते। शुभयुक्तैश्चतुर्थस्थैर्नाट्यारम्भः प्रशस्यते"। अतएव रत्नमालायाम् "वृषे विलग्ने शशिनि शुराशौ शुभवीक्षिते। त्रिद्युनकस्थैः शुभैर्नाट्यारम्भः सद्भिरिष्यते"।

**नाट्यधर्मिका** स्त्री नाट्यस्य धर्मोऽस्यत्र क्रियायाम् ठन्। "सङ्गीतं प्रेक्षणार्थेऽस्मिन् शास्त्रोक्ते नाट्यधर्मिका" हेमचन्द्रोक्ते दर्शनार्थे शास्त्रोक्ते तौर्य्यत्रिकरूपे नटकर्म्मे

**नाट्यप्रिय** पु० नाट्यं प्रियमस्य। शिवे महादेवे त्रेमच०।

**नाट्यभाषा** स्त्री नाट्ये प्रयोक्तव्या पात्रभेदेन भाषा। नाटके प्रयोक्तव्ये पात्रभेदेन भाषाभेदे साच सङ्गीतदा० उक्ता नाटकशब्दे दर्शिता विशेषस्तु सा०द० उक्तो यथा "पुरुषाणामनीचानां संस्कृतं स्यात् कृतात्मनाम्। शौरसेनी प्रयोक्तव्या तादृशीनाञ्च योषिताम्। आसामेव तु गाथासु महाराष्ट्रीं प्रयोजयेत्। अनीचा नागधी भाषा राजान्तःपुरचारिणाम्। चेटानां राजपुत्राणां श्रेष्ठिनां चार्द्धमागधी। प्राच्या विदूषकादीनां धूर्त्तानां स्यादवन्तिका। योधनागरिकादीनां दाक्षिणात्या हि दीव्यताम्। शकाराणां शकादीनां शाकारीं सम्प्रयोजयेत्। बाह्लीकभाषा दिव्यानां द्राविड़ी द्रविड़ादिषु। आभीरेषु तथाऽभीरी चाण्डालादी पुक्कसादिषु। आभीरी शाबरी चापि काष्ठपत्रोपजीविषु। तथैवाङ्गारकारादौ पैशाची स्यात् पिशाचवाक्। चेटीनामप्यनीचानामपि स्यात् शौरसेनिका। बालानां षण्ढकानाञ्च नीचपक्षविचारिणाम्। उक्तानामाप्तरूपाणां सैव स्यात् संस्कृतं क्वचित्। ऐश्वर्य्येण प्रमत्तस्य दारिद्र्योपहतस्य च। भिक्षुबन्धकरादीनां प्राकृतं सम्प्रयोजयेत्। संस्कृतं सम्प्रयोक्तव्यं क्षत्रिणीभूतमात्मनि च। देवीमन्त्रिसुतावेश्यास्वपि कैश्चित्तदोदितम्। यद्देशं नीचपात्राणां तद्देशं तस्य भाषितम्। कार्य्यतश्चोत्तमादीनां कार्य्यो भाषाविपर्य्ययः। योषित्सखीवाक्येष्वाकितवाप्सरसां तथा। वैदग्ध्यार्थं प्रदातव्यं संस्कृतं चान्तरान्तरा"। नाटकभाषाऽत्र।

**नाट्यरासक** न० दृश्यकाव्यरूपरूपकभेदे तल्लक्षणं सा०द० उक्तं यथा "नाट्यरासकमेकाङ्कं बहुताललयस्थिति। उदात्तनायकं तद्वत् पीठमर्दोपनायकम्। स्फोटकैकत्र वस्त्वङ्कारो नारी वासकसज्जिका। सुखनिर्वहणे सन्धी लास्याङ्गानि दशापि च। केचित् प्रतिमुखं सन्धिमिह नेच्छन्ति केवलम्"। "तत्र सन्धिद्वयवती यथा नर्मवती। सन्धित्रयवती यथा विलासवती"।

**नाट्यशाला** स्त्री ६त०। नाट्यस्य नाट्यार्थं शाला। (नाटमन्दिर) देवप्रासादसमीपस्थे गृहे "नाट्यशाला च कर्त्तव्या द्वारदेशसमाश्रया" मत्स्यपु०।

**नाट्याङ्ग** न० ६त०। सा०द०उक्ते दशविधे नाट्यस्याङ्गे यथा "गेयपदं स्थितपाठ्यमासीनं पुष्पगण्डिका। प्रच्छेदकस्त्रिगूढञ्च सैन्धवाख्यं त्रिगूढकम्। उत्तमोत्तमकस्याथ दुक्तप्रत्युक्तमेव च। शाखे दशविधे ह्येतदङ्गजातं मनीषिभिः। तन्त्रीभाण्डं पुरस्कृत्योपविष्टस्याऽसने पुरः। शुष्कं गानं गेयपदं स्थितपाठ्यं तदुच्यते। मदनोत्तापिता यत्र पठति प्राकृतं स्थिता। निश्चिन्तोद्धरचित्तं शोकचिन्तान्विताऽथवा। सुप्रसारितगात्रं यदासीदासीनमेव तु। नातोद्यमिश्रितं गेयं छन्दांसि विविधानि च। स्त्रीपुंसयोर्विपर्य्यासचेष्टितं पुष्पगण्डिका॥ अन्याऽङ्गं पतिं मत्वा प्रेम विच्छेदयन्त्यना। शीघ्रापुरःसरं गानं स्त्रियाः प्रच्छेदको मतः। स्त्रीवेशधारिणां पुंसां नाट्यं स्वस्य त्रिगूढकम्। कथन भ्रष्टसङ्केतः सुव्यक्तकरणान्वितः। प्राकृतं वचनं यत्र तत्सैन्धवं विदुः। चतुरस्रपदं गीतं सुखप्रतिमुखान्वितम्। त्रिगूढंद रसभावाद्यत्तमोत्तमकं पुनः। कोपप्रसादजमधिक्षेपयुक्तं रसोत्तरम्। हावहेलान्वितं चित्रश्लोकबन्धमनोहरम्। उक्तिप्रत्युक्तिसंयुक्तं सोपालम्भमनीकवत्। विलासान्वितगीतार्थमुक्तप्रत्युक्तमुच्यते"।

**नाट्यालङ्कार** पु० सा० द० उक्ते षट्त्रिंशद्विधे नाट्यालङ्कारभेदे यथा

"आशीराक्रन्दकपटाक्षमागर्वोद्यमाश्रयाः। उत्प्रासनं स्फोटनाक्षोभणवाक्तापोपपत्तयः। आशंसाध्यवसायौ च विसर्पोक्षेपसंज्ञितौ। उक्तेजनं परीवादो नीतिरर्थविशेषणम्। प्रोक्षाहननञ्च साक्षाद्यमभिमानोऽनुवर्त्तनम्। उत्कीर्त्तनं तथा याच्ञा परीहारो निवेदनम्। प्रवर्त्तनाख्यानयुक्तिप्रहर्षाश्चोपदेशनम्। इति नाट्यालङ्कृतयो नाट्यभूषणहेतवः" इत्युद्दिश्य। आशीरिष्टजनाशंसाऽऽक्रन्दः२ प्रलपितं शुचा। कपटं३ मायया यत्र रूपमन्यद्विभाव्यते। अक्षमा४ सा परिभवः स्वस्योऽपि नाभिसह्यते। गर्वो५ऽवलेपजं वाक्यं कार्य्यारम्भ उद्यमः६। यत्नः कृतवत्कार्य्यहेतोराशय७ उच्यते। उत्प्रासनं८ स्फूर्त्तिकरो योऽसाधौ साधुमानिनि। आक्षेपो रभसोत्पत्तावस्तुनो वा स्फुटस्य९ तु वा। अक्षिप्तेपवचःकारी क्षोभः१० प्रोक्तः स एव तु। प्रोक्तावधीरितार्थस्य पश्चात्तापः११ स एव तु। उपपत्तिः१२ र्मता हेतोरुपन्यासोऽर्थसिद्धये। आशंसनं स्यादाशंसा१३ प्रतिपाद्यव्यवसायकः१४। विसर्पो१५ यत्नमारब्धं कर्मानिष्टफलप्रदम्। कार्य्यप्रयत्नसङ्क्षोभः१६ उक्तेजना१७ वितीर्य्यते। स्वकार्य्यसिद्धयेऽन्यस्य प्रेरणाय कठोरवाक्। भर्त्सना तु परीवादः१८ नीतिः१९ शास्त्रेण वर्त्तनम्। उक्तस्यार्थस्य

यत्तु स्वादुत्कीर्त्तनमनेकधा । उपालम्भस्तरूपेण तत् स्वादवविशेषणम्२० । प्रोत्साहनं२१ स्वादुस्वाहुगिरा कस्यापि योजनम् । साक्षाय्यं२२ सङ्कटे यत्स्यात् साहकूल्यं परस्य च । अभिमानः२३ स एव स्यात् प्रश्रयादवर्त्तनम्२७ । अनुवृत्तिः भूतकार्य्याख्यानस्तुतीर्त्तनं२८ मतम् । याच्ञा२९ तु क्वापि याच्ञा या स्वयं दूतसखेन वा । परीहार३० इति प्रोक्तः कृतापुचितमार्जनम् । अवधीरितकर्त्तव्यकथनन्तु निवेदनम्३१ प्रवर्त्तनं३२न्तु कार्यस्य यत्स्यात् साधुप्रवर्त्तनम् । आख्यानं३३ पूर्ववृत्तोक्तिर्युक्ति३४रर्थावधारणम् । प्रहर्षः३५ प्रमदाधिक्यं शिल्पा स्वादुपदेशनम्३६" लक्षितानि ।

**नाट्योक्ति** स्त्री नाट्ये उक्तिर्विशेषोक्तिः । लौकिकप्रसिद्धार्थकथनव्यतिरेण नाट्ये पदार्थान्तराधायकत्वं नाट्ये श्रेयस्त्वा च सा०द० निर्णीता यथा

"अश्राव्यं खलु यद्वस्तु तदिह स्वगतं मतम् । सर्वश्राव्यं प्रकाशं२ स्यात्तद्वयेदपवारितम्३ । रहस्यन्तु यदन्यस्य परावृत्य प्रकाश्यते । त्रिपताकरेखान्यानपवार्यान्तरा कथा । अन्योन्यामन्त्रणं यत्स्याज्जनान्ते तज्जनान्तिकम्४ । किं ब्रवीतीति यन्नाट्ये विना पात्रं प्रयुज्यते । स्वत्वेवातुक्तमप्यर्थं तत्स्वादाकाशभाषितम्५ । दत्तां सिद्धास्त्र सेनास्त्र वेश्यानां नाम दर्शयेत् । दत्तप्रावारिण वणिजां चेटचेटीश्चया पुनः । वस्त्रादिषु वयर्थेषु वस्तुनो नाम यद्भवेत् । नाम कार्यं नाटकस्य गर्भितार्थप्रकाशकम् । नायिकानायकाख्यानां संज्ञाप्रकरणादिषु । नाटिकासट्टकादीनां नायिकाभिर्विशेषणम् । प्रायेण यत्र्नकः सापिर्मेमैः स्थाने प्रयुज्यते । राजा स्वामीति देवेति भर्त्रेभट्टेति चार्यमैः । राजर्षिभिर्व्वयस्येति तथा विदूषकेण च । राजन्नित्यग्निमित्रैश्च सोऽपत्यप्रत्ययेन च । स्वेच्छया नामभिर्विप्रैर्विप्र आर्येति चेतरैः । वयस्येत्यय वा नाम्ना वाच्यो राज्ञा विदूषकः । वाच्यौ नटीसूत्रधारावार्य्यनाम्ना परस्परम् । सूत्रधारो भवेदार्य इति वै पारिपार्श्विकः । सूत्रधारो पारिपेति रङ्गे रत्नधरैः कृताः । वयस्येत्युत्तमैर्हीनो मध्यैरार्येति चाधमैः । भगवन्निति वक्तव्याः सर्वैर्देवर्षिचिह्निनः । वदेद्राज्ञीस्त्र चेटीस्त्र भवतीति विदूषकः । आयुष्मन् रचितं कृतो वदेत् तातेति चेतरः । वत्स पुत्रक तातेति नाम्ना गोत्रेण वा सुतः । शिष्योऽन्तेवासी वक्तव्योऽमात्य आर्येति चाधमैः । विप्रैरयमसावार्येति सचिवेति च मन्यते । साधो इति तपस्वी च प्रधानश्चोच्यते बुधैः । अस्मदीयाभिधः पूज्यः शिष्यादौर्वैनिगद्यते । उपाध्यायेति चाचार्यो भट्टाराजेति भूपतिः । स्वामीति युवराजस्तु कुमारो भर्त्तदारकः । सौम्य भद्रसखेत्येवमधमैस्तु कुमारकः । वाच्या प्रकृतिभीराज्ञः कुमारी भर्त्तदारिका । पतिर्यथा तथा वाच्या ज्येष्ठमध्याधमैस्त्रियः । हलेति सदृशी प्रेष्या हञ्जे वेश्यार्जका तथा । कुट्टिन्यम्बेत्यनुगतैः पूज्या च जरतीजनैः । सामन्तश्चैव पात्रस्था वाच्याः स्वसमयागतैः । अकादयश्च समाख्या भद्रदत्तादिनामभिः । यस्य यत्कर्म शिल्पं वा विद्या वा जातिरेव वा । तेनैव नाम्ना वाच्योऽसौ श्रेयान्यत्र यथोचितम्" । "अमरे तु वासुराचार्यस्तु भारिभः" वासुरधिकः पठितः ।

**नाड** पु० नाल+अस्त्र ड । नालशब्दार्थे अमरः ।

**नाडपित्** न० कल्पाश्रमे "अकुलत्था नाडपित्यप्सुरा भरतं दधे" शत०ब्रा० १३।५।४।१२ "नाडपिति स्थाने कल्पाश्रमे" भा० । [सा०ति० नाडीशब्दे दृश्यम् ।

**नाडि** स्त्री नल-इन् । नाड्याम् "कुक्षः खुः षण्ड नाडयः"

**नाडिक** न० नाड्यां स्थितं ठक् । कालयाके भावप्र०तत्र स्त्री त्वमपि "अस्त्रस्थं नाडिकाशाकं वार्त्ताकुं पूतिकां तथा । भक्षयन् पतितस्तु स्यादपि वेदान्तगो द्विजः" ति०त० अत्र नाडिकाशाकमिति पाठान्तरम् श्वेतकलभीति तट्टीकायां रघुनन्दनः ।

**नाडिका** स्त्री नाडी+स्वार्थे क । नाडीशब्दार्थे

**नाडिकेल** पु० नारिकेल+रस्य डः । नारिकेले भरतः ।

**नाडिचीर** न०नाडी चीरमिव । इनस्यां २निर्वेष्टने शारा० ।

**नाडिन्धम** त्रि० नाडीं नाडीं धमति धमा-खश् मुम्च । १स्वर्णकारे अमरः । उच्चनीचाधिरोहणात् तद्धर्मकर्मनिःशाकैर्नाडीं धमनं धमति धमा-खश् । उच्चनीचाधिरोहणेन २स्वर्णकारके त्रि० "कथं नाडिन्धमान् सामान्" भट्टिः । [पानकर्त्तरि ।

**नाडिन्धय** त्रि० नाडीं धयति धे-खश् मुम् मुम्च । नाडी-

**नाडिपत्र** न० नाडिप्रधानं पत्रमस्य । नाडीचे शाकभेदे

**नाडी** स्त्री पु० नल-नञ्चे ङीष् नस्य डः । पु० नड-भावे अच् वा गौरा० ङीष् । शिरायां कायस्थशिराखरूपभेदादिकं भावप्र० उक्तं यथा

"अस्य शिराभाः सन्धिबन्धनकारिण्यो दोषधातु-

वहाः सिराः। नाभ्यां सर्वा निबद्धास्ताःप्रतन्वन्ति समन्ततः। शरीरं सकलञ्चैतत् सिराभिः पोष्यते सदा। प्रणालीभिरिवारामाः कुल्याभिः क्षेत्रधान्यवत्"। अत्र प्रणालीभिः कुल्याभिरिति दृष्टान्तद्वयं स्थूलसूक्ष्म सिराभेदात्। "प्रसारणाकुञ्चनादिक्रियाभिः सततं तनौ। सिरा एवोपकुर्वन्ति ताः स्थूलाः सप्त शतानि तु। यथा द्रुमदले साक्षात् दृश्यन्ते प्रततास्सिराः"। तथैव "नाभिस्थाः प्राणिनां प्राणाः प्राणाग्नाभिरुपाश्रिता। सिराभिराहृता नाभिस्सकलनाभिरिवारकैः"। तद्यथा तासां खलु स्थूलसिराः चत्वारिंशत् तासां दश वातवहाः दश पित्तवहाः दश श्लेष्मवहाः दश रक्तवहाः। तासां खलु वातवहानां वातस्थानगतानां सप्तशतप्रतिशतानि१७५ भवन्ति। तावत्य१७५ एव पित्तवहाः पित्तस्थानगताः। श्लेष्मवहाः तावत्य१७५ श्लेष्मस्थानगता रक्तवहास्तावत्य१७५ यकृत्प्लीहगता एवं सिराः सप्तशतानि भवन्ति। तत्र वातवहाः एकस्मिन् सक्थ्नि पञ्च विंशतिः एतेनेतरसक्थ्नि२५ बाहू च व्याख्यातौ (५०)। विशेषतः कोष्ठे चतस्रिंशत् तासां श्रोण्यां गुदमेढ्रादिश्रिता अष्टौ। द्वे द्वे पार्श्वयोः४। पृष्ठे तावत्य ६ एवोदरे दश वक्षसि एवं (२४)। एकचत्वारिंशद् जत्रुच ऊर्ध्वम् तासां चतुर्दश १४ ग्रीवायां ४ चतस्रः कर्णयोः ८ नव जिह्वायां ६ षट् नासिकायां ८ अष्टौ नेत्रयोः (४१)। एवं वातवहानां सप्तशतप्रतिशतं१७५ भवन्ति। एवं विभागः पित्तवहानामपि विशेषतस्तु पित्तवहा नेत्रयोर्दश १० कर्णयोर्द्वे २ एवं रक्तवहा श्लेष्मवहास्तु षोडश १६ ग्रीवायां कर्णयो र्द्वे एवं सिराणां सप्तशतानि व्याख्यातानि। "क्रियाणामप्रतीघातममोहं बुद्धिकर्मणाम्। करोत्यन्यान् गुणांश्चापि खाः सिराः पवनश्चरन्"। क्रियाणां प्रसारणाकुञ्चनादीनाम्। अमोहं बुद्धिकर्मणाम् बुद्धीन्द्रियाणां मनसो बुद्धेश्च स्वे स्वे विषये ज्ञानं न करोतीत्यर्थः। अन्यान् गुणान् रसादिव्यापनद्वारा शरीरपोषणादीन्। "यदा तु कुपितो वायुः खाः सिराः प्रतिपद्यते। तदास्य विविधा रोगा जायन्ते वातसम्भवाः। म्लानिष्णुतामरुचिमग्निदीप्तिमरोगताम्। करोत्यन्यान् गुणांश्चापि पित्तमात्मसिराश्चरन्" अरोगतां मैत्तिकरोगानुत्पत्तिं करोति। अन्यान् गुणान् मेधाबुद्धिदर्शनशक्त्यादीन्। "यदा तु कुपितं पित्तं सेवते खवहाः सिराः। तदास्य विविधा रोगा जायन्ते पित्तसम्भवाः। क्षेत्रभङ्गेषु सन्धीनां स्थैर्यं बलमरोगताम्। करोत्यन्यान् गुणांश्चापि बलासः खाः सिराश्चरन्"। अरोगतां श्लैष्मिकरोगानुत्पत्तिम् अन्यान् गुणान् बलपुष्ट्यादीन्। "यदा तु कुपितः श्लेष्मा खाः सिराः प्रतिपद्यते। तदास्य विविधा रोगा जायन्ते श्लेष्मसम्भवाः। धातूनां पूरणं सम्यक् सन्धिस्थानमसंशयम्। खसिरास्तु चरन्नित्यं कुर्याच्चान्यान् गुणानपि" अन्यान् गुणान् बलपुष्ट्यादीन्। "यदा तु कुपितं रक्तं सेवते खवहाः सिराः। तदास्य विविधा रोगा जायन्ते रक्तसम्भवाः। तत्रारुषा वातवहाः पूर्यन्ते वायुना सिराः। पित्तदुष्टाश्च नीलाश्च शीता गौर्यः सिराः कफात्। अस्रग्धरास्तु ता रक्ताः सुखलात्युष्णशीतलाः"। वाग्भट० नाडीसंख्या अन्यत्रैवोक्ता। कायशब्दे १६१०पृ० द्रष्टव्या। पदार्थादर्शे च "पूर्वोक्तायाः सुषुम्णाया मध्यस्थायाः खलोचने। नाभिभूतकण्ठतालुभ्रू मध्यपर्व सप्तधाः। अधोसप्तधाः सिराः काश्चिद् काश्चिदूर्द्धं तथासताः। सिरास्तिर्यग्गताश्चाथ तत्र सप्तशताधिकाः। नाड्योऽर्द्धचतुःसङ्ख्याताः प्रधानाः सप्तदीरिताः। नाड्य सर्वासु बलवान् प्राणो नादः समन्ततः"। संस्थितः सर्वदेहाल्" इति तत्रापि दशनाडीनां प्राधान्येनोत्कीर्त्तनं सा०ति० यथा "नाडीर्दश विदुस्तासु खल्वाख्याश्चः प्रकीर्त्तिताः। इडा पाने तयोर्मध्ये सुषुम्णा पिङ्गलाऽपरे। मध्ये तासपि नाडी खादग्निषोमसरूपिणी। गान्धारी हस्तिजिह्वा च सप्तलालङ्कुहा तथा। यशस्विनी शङ्खिनी च कुहूः स्युः सप्त नाडयः। नाड्योनन्ताः सन्तत्या सुषुम्णापञ्चपर्वसु"। रोगविशेषज्ञानार्थं नाडीपरीक्षा आयु०उक्ता यथा अथ नाडीपरीक्षामाह। "पुंसो दक्षिणहस्तस्य स्त्रियो वामकरस्य तु। अङ्गुष्ठमूलगां नाडीं परीक्षेत भिषग्वरः। अङ्गुलीभिस्तु तिसृभिर्नाडीमवस्थितः स्पृशेत्। तत्रैतया सुखं दुःखं जानीयात्कुशलोऽखिलम्। सद्यःस्नातस्य सुस्थस्य भुक्तपीतवतोऽचिनः। व्यायामक्षान्तदेहस्य सम्यक् नाडी न बुध्यते। वातेऽधिके भवेन्नाडी प्रव्यक्ता तर्जनीतले। पित्ते व्यक्ता मध्यमायां कफे तर्जनीमध्यमामध्ये वातपित्ताधिके स्फुटा। अनामिकायां तर्जन्यां व्यक्ता वातकफे भवेत्। मध्यमानामिकामध्ये स्फुटा पित्तकफेऽधिके। अङ्गुष्ठ

तितदेऽपि स्यात्प्रव्यक्ता सन्निपाततः। वाताद्रक्तगतिः स्पर्शे पित्तादुष्णत्व गामिनी। कफात्मन्दगतिश्चैवा सन्निपातादतिद्रुता। वक्रसर्पसमत्व चलति धमनी वातपित्ततः। वहेद्रक्तत्व मन्दत्व वातश्लेष्माधिकत्वतः। उष्णत्व मन्दत्वयुता नाडी पित्तकफेऽधिके। कामात् क्रोधाद्भवेद्वा क्षीणा चिन्ताभयद्रुता। स्खलत्या स्खलत्या च लेखा सा कृन्ति स्थानच्युता तथा। अतिक्षीणा च शीता च प्राणान् कृन्ति न संशयः। ज्वरकोपेन धमनी शोषणा वेगवती भवेत्। मन्दाग्नेः क्षीण धातोश्च सैव मन्दतरा मता। चपला क्षुधितस्य स्यात् तृप्तस्य भवति स्थिरा। सुप्तिनोऽपि स्थिरा श्लेष्मा तथा बलवतो मता"। अत्र विशेषो नाड़ीप्रकाशे

"सार्द्धत्रिकोटयो नाड्यो हि स्थूलाः सूक्ष्माश्च देहिनाम्। नाभिकन्दनिबद्धास्तास्तिर्यगूर्द्धमधः स्थिताः। द्विसप्ततिः सहस्राणि तासां स्थूलाः प्रकीर्त्तिताः। देहे धमन्यो धन्यास्ताः पञ्चेन्द्रियगुणावहाः। तासान्तु सूक्ष्मरूपाणि शतानि सप्त सप्ततिः। वैरसज्जदसरं वह्निः। आयायते वपुरिदं हि नरामलीलामयः खवह्निरिव सिन्धुगतैः सहस्रैः। आपादतः प्रततगात्रमशेषमेषामा मस्तकादपि च नाभिपुरःस्थितेन। एतत् सहस्रकृत एव चर्म च येन नद्धं कायं नरामिह सिराशतसप्तकेन। सप्तशतानां मध्ये चतुरधिका विंशतिः स्थूलास्तासाम्। एका परीक्षणीया दक्षिणकरचरणविन्यस्ता। "तिर्यक्कुक्षौ देहिनां नाभिदेशे वामे वक्रं तस्य पुच्छन्तु याम्ये। ऊर्ध्वं भागे हस्तपादौ च वामौ तस्याधस्तात् संस्थितौ दक्षिणौ तौ। वक्रे नाडीहयं तस्य पुच्छे नाडीहयं तथा। पद्म पद्म करे पादे वामदक्षिणभागयोः। वामे भागे स्थिया योज्या नाडी पुंसस्तु दक्षिणे। इति प्रोक्तो मया देवि! सर्वदेहेषु देहिनाम्"। नपुंसकस्य तु स्त्रीपुंसयोरन्यतराकारप्रकटतामपेक्ष्य परीक्षा। साध्यन्तु न खादेव। प्रकृतिस्थता। "कफस्य हृदया मूले धमनी जीवसाक्षिणी। तस्या गतिवशाद्विद्यात् सुखं दुःखञ्च देहिनाम्। वातं पित्तं कफं द्वन्द्वं सन्निपातन्तथैव च। साध्यासाध्यविवेकञ्च सर्वं नाडी प्रकाशयेत्। प्रातःकृतसमाचारः कृताचारपरिग्रहम्। सुखासीनः सुखासीनं परीक्षेतसुपाचरेत्। सद्यः स्नातस्य भुक्तस्य चक्षुष्मातपसेविनः। व्यायामाक्रान्तदेहस्य सम्यङ् नाडी न बुध्यते। तैलाभ्यङ्के च क्षुण्णे च तथा च भोजनान्तरे। तथा न ज्ञायते नाडी यथा दुर्गतरा नदी। वातो च वहते वातो मध्ये पित्तं तथैव च। अन्ते च वहते श्लेष्मा नाडिकात्रयलक्षणम्। भूमता गमनप्राया स्वच्छा स्वास्थ्यमयी स्थिरा। प्रातःस्निग्धमयी नाडी मध्याह्ने चोष्णतान्विता। सायाह्ने धावमाना च चिराद्रोगविवर्जिता। वाताद्रक्तगता नाडी चपला पित्तवाहिनी। स्थिरा श्लेष्मवती श्लेष्मा मिश्रिते मिश्रिता भवेत्। सर्पजलौकादिगतिं वदन्ति विबुधाः प्रभञ्जनेन नाडीम्। पित्ते च काकलावकमेकादिगतिं विदुः सुधियः। राजहंसमयूराणां पारावतकपोतयोः। कुक्कुटादिगतिं धत्ते धमनी कफसंहता। सर्वे सर्पगतिं नाडीं सर्वे भेकगतिं तथा। वातपित्तद्वयोद्भूतां प्रवदन्ति विचक्षणाः। भुजगादिगतिश्चैव राजहंसगतिं स्थिराम्। वातश्लेष्मसमुद्भूतां भाषन्ते तद्विदो जनाः। मण्डूकादिगतिं नाडीं मयूरादिगतिं तथा। पित्तश्लेष्मसमुद्भूतां प्रवदन्ति महाधियः"।

"द्वावतित्तिरिवार्त्तीकगमनं सन्निपाततः। कदाचिन्मन्दगा नाडी कदाचिच्छीघगा भवेत्। त्रिदोषप्रभवे रोगे विज्ञेया हि भिषग्वरैः। यदा यं धातुमाप्नोति तदा नाडी तथा गतिः। तथाहि सुखसाध्यत्वं नाडीज्ञानेन बुध्यते"। "नाडी यदा कालगतिस्वभावां प्रकोपशान्त्यादिभिरेव भूयः"। "मन्दं मन्दं शिथिलशिथिलं व्याकुलाव्याकुलं वा स्खलित्वा स्खलित्वा वहति धमनी याति नाशञ्च सद्यः। नित्यं स्थानात् स्खलति पुनरप्यकुलिं संसृजेद्वा भावैरेवं बहुविधविधैः सन्निपातादसाध्या। महातापेऽपि शीतत्वं शीतत्वे तापिता सिरा। नानाविधगतिर्यस्य तस्य मृत्युर्न संशयः। त्रिदोषे स्पन्दते नाडी मृत्युकालेऽपि निश्चला। पूर्वं पित्तगतिं प्रभञ्जनगतिं श्लेष्माथमाविभ्रतीम् सन्तानक्रमयुक्तं सुबिदधतीं चक्राधिरूढामिव। तीव्रत्वं दधतीं कदापिगतिकां सूक्ष्मत्वमात्मन्वतीं न साध्यां धमनीं वदन्ति सुधियो नाडीगतिज्ञानिनः। यान्युक्ता च स्थिरात्मना या चेयं सांसवाहिनी। या च सूक्ष्मा च वक्रा च तामसाध्यां विदुर्बुधाः। भारप्रवाहमूर्च्छाभयशोकप्रसक्तकारचाद्राड़ो। संमूर्च्छितापि गाढं पुनरपि सा जीवितं धत्ते। पातितः सन्धितो भेदी नष्टमुक्तश्च यो नरः। याप्यते विज्ञवस्तस्य न किञ्चिन्मृत्युकाः

रत्वम्"। अन्यत्रापि। "तथा भूताभिषङ्गेऽपि त्रिदोष-वदुपस्थिता। समं वा वहते नाडी तथा च न क्रमं गता। अपस्थानुगं रोगाङ्का नाडी तत्सन्निपातवत्। स्वस्थानस्थाने शोके च क्षिप्रावस्थे च निर्दोषाः। भवन्ति निश्चला नाड्यो न किञ्चित् तत्र दूषणमिति"। अन्ये त्वाहुः "तोयवातकफैर्दुष्टं पित्तं वहति दारुणम्। पित्तस्थानं विजानीयात् भेषजं तस्य कारयेदिति"। अत्र कश्चित् "स्वस्थानच्यवनं यावद्गमनाय नोपजायते। तावच्चिकित्सासत्त्वेऽपि नाड्याध्यत्वमिति स्थितिरिति"। प्रसङ्गात् नाडीनिर्णयमाह "भुजगाभुजगाकारा नाडी देहस्य संक्रमात्। विशीर्णा क्षीणतां याति नाशान्ते मरणं भवेत्। क्षणाद्गच्छति वेगेन शान्तां लभते क्षणात्। सप्ताहान्मरणं तस्य यदङ्गं शोषवर्जितम्। क्षिप्रवहिगदा नाडी ज्वरदाहेन तापिनाम्। त्रिदोषजन्यभजतां तदा स्वल्पदिनत्वात्। निरीक्ष्या दक्षिणे पादे तदा चैषा विशेषतः। सुखे नाडी वहेच्चित्रं ततस्तु दिनतृतीयकम्। गतिन्तु अमरस्येव वहेदेकदिनेन तु। क्रमेण स्पन्दते नित्यं पुनर्जंगति चाङ्गुलौ। मध्ये द्वादशमानां स्वल्पभवति निश्चितम्"। दक्षिण इति पुंसः। स्त्रियास्तु वाम एव तज्ज्ञेति। "स्त्रिया नाडी सुखे यस्य विद्युद्द्योतिरिवेक्ष्यते। दिनैकं जीवितं तस्य द्वितीये म्रियते ध्रुवम्। स्वस्थानविच्युता नाडी यदा वहति वा न वा। ज्वाला च हृदये तीव्रा तदा ज्वालावधि स्थितिः। चक्रपक्षे नाडीनां सान्निपातिकरूपेण भवन्ति सर्ववेदनाः"। ज्वररूपमाह। "ज्वरकोपे च धमनी सोष्णा वेगवती भवेत्। स्निग्धा पित्तादते नास्ति ज्वरो नास्त्युष्णा विना। उष्णा वेगधरा नाडी ज्वरकोपे प्रजायते"। अन्यत्र च "ज्वरे च वक्रा धावन्ती तथाच मरुतः ध्रुवे। रसस्थाने निशिप्रातः तप्ता दीपशिखा यथा"। तत्रापि विशेषमाह "क्षीणा स्निग्धा स्थिरा मन्दा नाडी सङ्ग्रहणाजा। रूक्षा च कठिना शीघ्रा स्पन्दते तीव्रमारुते। द्रुता च सरला शीघ्रा दीर्घा पित्तज्वरे भवेत्। शीघ्रमाहननं नाड्याः काठिन्याच्च बला तथा। मलाजीर्णेनातितरां सस्पन्दत्व प्रकीर्तितम्। नाडी तन्तुसमा मन्दा शीतला श्लेष्मदोषजा"। स्पन्दमानाच "चञ्चला तरला स्थूलकठिना वातपित्तजा। दैन्यं दर्शयते रूक्षा मन्दा स्यात् श्लेष्मवातजा। निरन्तरं खरं रूक्षं मन्दश्लेष्मातिवातलम्। दग्धातभवे तस्य नाडी स्यात् पित्तसन्निभा। रूक्षा शीता स्थिरा नाडी पित्तश्लेष्मसमुद्भवा"। "मध्ये करे वहेन्नाडी यदि सन्तर्पिता ध्रुवम्। तदा न्यूनं मनुष्यस्य रुधिरा पूरिता मलाः"। आगन्तुकरूपभेदमाह "भूतज्वरे सैक द्रुतातिवेगा धावन्ति नाड्यो हि यथाम्बुवेगाः"। तथा "ऐकाहिके न क्वचन प्रदूरे क्षणान्तगा सा विषमज्वरेषु। द्वितीयके वापि तृतीयवर्त्मं गच्छन्ति तप्ता अमिवत् क्रमेण"। अन्यत्रापि "उष्णा वेगधरा नाडी ज्वरकोपे प्रजायते। वह्निमक्रोधकामेषु भयचिन्ताश्रमेषु च। भवेत् क्षीणगतिर्नाडी ज्ञातव्या वैद्यसत्तमैः"। "व्यायामे श्रमणे चैव चिन्तायां श्रमशोकतः। नानाप्रभावगमना शिरा गच्छति विज्वरे"। अजीर्णरूपमाह "अजीर्णे तु भवेन्नाडी कठिना परितोऽतता। प्रसन्ना च द्रुता गुप्ता त्वरिता च प्रवर्त्तते"। तत्र विशेषमाह "पक्वाजीर्णे पुष्टिहीना मन्दं मन्दं वहेच्चाडा। अस्वस्थपूर्णा भवेत् कोष्णा गुर्वी सामा गरीयसी। नाड्या भक्षितद्रव्यज्ञानम् यथा "पुष्टिस्तैलगुडाहारे मांसे च लगुडाकृतिः। क्षीरे च स्निग्धतावेगा मधुरे भेकवद्गतिः। रम्भागुडवटाहारे रूक्षगुरुकादिभोजने। वातपित्तार्त्तिरूपेण नाडी वहति निष्क्रमम्"। नाड्या पीतरसज्ञानम् "मधुरे वर्द्धिसमना तिक्ते स्याद्भूयता मतिः। अम्ले कोष्णा द्रुवगतिः कटुके भङ्गसन्निभा। कषाये कठिना स्थाना लवणे सरला द्रुता। एवं द्विदित्रियोगे नानाधर्मवती शिरा"। तथा "द्रवैः कठिना नाडी कोमला कठिनाशने। द्रवद्रव्यस्य काठिन्ये कोमला कठिनापि च। द्वौद्वौ पृथग्ग्रन्थिरेव पित्ते पुष्टैव जायते"। अग्निमान्द्यधातुत्रयलिङ्गम् "मन्दाग्नेः क्षीणधातोश्च नाडी मन्दतरा भवेत्" तद्भङ्गम् "क्षीणधातौ च मन्दाग्नौ नाडी क्षीणतमा ध्रुवम्"। तथा "मन्देऽग्नौ क्षीणतां याति नाडी हंसाकृतिस्तदेति"। अन्ये तु "आमाशये पुष्टिविवर्द्धनेन भवन्ति नाड्योऽन्नभुजाभिधत्ताः। आहारमान्द्यादुपवासतो वा तत्रैव नाड्यो भुजगायमानाः"। प्रसङ्गाद्दीप्ताग्निज्ञानमाह "क्षुधी भवति दीप्ताग्नेः करे मण्डूकसंप्लवा। तस्याग्नेर्मन्दता देहे त्वच वा यकृच्छीहदे"। तथा "भेदेन ज्ञाना यकृच्छीहदेन निर्वीर्यरूपा त्वतिसारभेदे। पित्तस्त्रिक्ताग्नां प्लवगा कदाचिदामातिसारे प्लुतजा जडा च"।

अथ विस्रूचिका ज्ञानम्। "निरोधो मूत्रशकृतोर्विड्-यदे वितराश्रिताः। विस्रूचिकाभिभूते च भवन्ति भेकवत्क्रमाः"। प्रसङ्गादानाहमूत्रशकृज्ज्ञानमाह "आनाहे मूत्रशकृते च भवेन्नाडीगरिष्ठता"। मूत्रज्ञानमाह "वातेन मूत्रेण मरुत्प्रवेन सदैव वक्ता हि सिरा वहन्ति। ज्वालामयी पित्तविचेष्टितेन साध्या न मूत्रे न च मूढरूपा"। अथ प्रमेहज्ञानम्। "प्रमेहे पन्थि-रूपा सा सुतप्ता त्वामदूषणे"। विषविदग्धशुक्र-ज्ञानमाह "उत्पित्तरूपा विषरोहिकायां विदग्ध शुक्रेण च वक्ररूपा। अत्यर्थवातेन अधःक्षुरन्नी उत्तानभेदिन्यसमाग्निकाले"। शुक्रे विशेषमाह क्वचित् "शुक्रेण कम्बोऽथ पराक्रमेण पारावतस्येव गतिं करोति" अथ भगन्दरज्ञानम् "ग्रन्थार्थं कठिने देहे प्रयाति पैत्तिकं क्रमम्। भगन्दरात्मरूपेण नाडीव्रणनिवेदने। प्रयाति वातिकं रूपं नाडी पावकरूपिणी"। अथ बालादिज्ञानम् "बालस्य अल्पाभिहतस्य अल्पोर्वंगाव-रोधाद्विलितस्य भूयः। गतिं विधत्ते धमनी गजेन्द्र-वराहमानेव कफोल्बणेन। रोगादिकमपि रक्तादि-ज्ञानक्रमेण ज्ञातव्यम्। "क्वचित् प्रकरणोद्भेदात् क्वचि-दौचित्यमात्रतः। क्वचित् देशात् क्वचित् कालात् सङ्कीर्ण मदनिर्णयः"। नाडीपरिचयज्ञानं प्रायशो नैव दृश्यते। तेन धात्र्यात् मयोक्तं वस्तु समाधेयमस्तमैः"।

"मातस्तु खलु रसरक्तायां नाड्यां गर्भनाभिनाड़ी प्रतिबद्धा" सुश्रु० "प्राग् नाड़ीच्छेदनात् पुंसो जातकर्म विधीयते" इति स्मृतिः "शतं चैका च हृदयस्य नाड्यः" श्रुतिः "प्रहृत्ता हृदयात् सर्वाः तिर्य्यगूर्द्धमधस्तथा। दशप्राणप्रचोदिताः" भा०व० ३१२अ०। २ब्रह्मान्तरे २गण्डदूर्वायाम् कङ्कचर्य्यायाञ्च घटीरूपे दण्डात्मके ३समयभेदे च मेदि०। "दशगुर्वक्षरः प्राणः षड्भिः प्राणैर्विनाड़िका। तत्षष्ट्या तु भवे-न्नाड़ी" सू०सि०। तत्कालज्ञाने यन्त्रादिकं घटीशब्दे दर्शितम्। "त्रियामां रजनीं प्राहुस्तस्त्र्याद्यन्तचतुष्टयम्। नाड़ीनां तदभे सन्ध्ये दिवसाद्यन्तसंज्ञिते" ति०त०। नक्षत्रविशेषज्ञापके ६नाड्याकारे रेखाभेदे उपयमशब्दे नाड़ीकूटनिरूपणे १२५४पृ० दृश्यम्। "एकराशाद्या-दियोगे च नाड़ीदोषो न विद्यते" ज्यो०त० "अश्वि-न्यादिखेचक्रं सपौचारं त्रिनाड़िकम्" ज्यो०त०। चक्रशब्दे ग्रहनाड़ीनिर्णये २८४६ पृ० दृश्यम् "आर्द्रा-दिकं लिखेच्चक्रं मृगान्तञ्च त्रिनाड़िकम्" "एकना-ड़ीस्थिषण्यानि यत्र स्युर्वरकन्ययोः" तत्रैव। खरोदये षड्नाड़ीचक्रनवनाड़ीचक्रयोस्तु चक्रशब्दे दर्शितयो-रपि रेखाविशेषस्यैव नाड़ीशब्दार्थत्वम्। सिराबोध-कस्य नाड़ीशब्दस्य खाङ्गवाचकत्वात् "नीडीतन्त्र्योः खाङ्गे" पा० बहु० न कप्। बद्धनाड़िः कायः। अखाङ्गत्वे तु कप्। घटिनाड़ीको दिवसः। ६प्रश्ना-ख्याञ्च "सौरीभिरिव नाड़ीभिरन्वताख्याभिरन्वयः" रघुः नाके ग्राकादीनां (डाटा) खाते ७व्ययवयभेदे च।

**नाडीक** पु० नाड्या कायति प्रकाशते कै-क। (पाटशाक) काण्डप्रधाने शाकभेदे षट्शाके "नाड़ीको रक्तपित्तघ्नो विष्टम्भी वातकोपनः" भावप्र०।

**नाडीकलापक** पु० नाड़ीनां नाड्यानां कलापः संघोऽत्र कप्। सपौंचीखतायां भावप्रका०।

**नाडीकूट** न०नाड्या रेखाभेदेन कूटं नक्षत्रकूटं ज्ञाप्यं यत्र। उपयमशब्ददर्शिते १२५४ पृ० विवाहाद्यङ्गे नाड़ीचक्रस्य चिन्तनक्षत्रसमूहे।

**नाडीकेल** पु० नारिकेल+पृषो०। नारिकेले शब्दर०।

**नाडीच** पु० नाड्या चीयते चि-वा० कर्मणि ड इत०। (नालिता) शाकभेदे चुचुके "नाड़ीचशाकं द्विविधं तिक्तं मधुरमेव च। रक्तपित्तहरं तिक्तं कफमिश्रहरं-नाशनम्। मधुरं पित्तघ्नं शीतं विष्टम्भि कफवातकृत्" राजवल्लभः।

**नाडीचक्र** न० नाड़ीनां चक्रमिव बन्धनस्थानम्। नाभिम-ण्डलस्थे। चक्रभेदे "नाभिमण्डलमासाद्य कूर्मपृष्ठा-मिव स्थितम्। नाडीचक्रमिह प्राहुस्तत्राब्दाः सप्त-धृताः" रेखाविशेषेण नक्षत्रभेदज्ञापके २चक्रभेदे उपयम-शब्दे १२५४ पृ० दृश्यम्।

**नाडीचरण** पुंस्त्री नाड़ी नालमिव चरणौ यस्य। खम-माले त्रिका० स्त्रियां जातित्वात् ङीष्।

**नाडीजङ्घ** पुंस्त्री नाडीव नालमिव जङ्घाऽस्य। १काके त्रिका० २वकभेदे। स च द्विविधस्तत्र इन्द्रद्युम्नसरसि स्थितश्चिर-जीवी एकः। यथोक्तं भा०व० १८८अ० "अस्ति खल्वि-न्द्रद्युम्नं नाम सरस्तस्मिन्नाडीजङ्घोनाम वकः प्रतिवसति सोऽयमत्रचिरजाततरस्तं पृच्छेति" तत्रैव कश्यपात्मजः राजधर्माख्यः। तत्कथा "ततोऽस्तं भास्करे याते सन्ध्या-काल उपस्थिते। आजगाम स्वभवनं ब्रह्मलोकात् खगोत्तमः। नाड़ीजङ्घ इति ख्यातो दयितो ब्रह्मणः

सखा। वकराजो महाप्राज्ञः कणप्रपक्षात्समभवः। राजधर्मेति विख्यातो बभूवाप्रतिमो भुवि। देवकन्यासुतः श्रीमान् विद्वान् देवसमप्रभः। महाभरणसम्पन्नो भूषयैरर्कसन्निभैः। भूषितः सर्वगात्रेषु देवगर्भः श्रिया ज्वलन्" भा०शा० १६८अ०। २सुनिभेदे "नाडीजङ्घः सरसुरसुनिर्वक्ति दृष्टेरकालौ मासवेतौ न शुभफलदौ पौषमासौ न शेषान्" मत्तमा०त०।

**नाडीतरङ्ग** पु० नाडी नाना तरङ्ग इव यत्र। १कोकोले २छिण्डके ३रक्तछिण्डके च मेदि०।

**नाडीतिक्त** पु० नाड्या तिक्तः। नेपालनिम्बे राजनि०।

**नाडीदेह** पु० नाडीसारो देहोऽस्य। अतिलये भृङ्गिणि शिवस्य द्वारपालभेदे।

**नाडीनक्षत्र** नाड्यां षड्नाड़ीचक्रनवनाड़ीचक्रयोः स्थितं नक्षत्रम्। नाडीज्ञापकरेवत्यादिनक्षत्रभेदे। २८।६पृ० चक्रशब्दे षड्नडयादिचक्रनिरूपणे दृश्यम्।

**नाडीयन्त्र** न० नाड़ीव नाडीव यन्त्रम्। सुश्रुतोक्ते शल्योद्धारणार्थे विंशतिविधे यन्त्रभेदे "तत्र मनःशरीरबाधाकराणि शल्यानि तेषामाहरणोपाया यन्त्राणि। तानि षट्प्रकाराणि तद्यथा स्वस्तिकयन्त्राणि, सन्दंशयन्त्राणि तालयन्त्राणि, नाड़ीयन्त्राणि, शलाकायन्त्राणि, उपयन्त्राणि चेति" इत्युपक्रमे "विंशतिर्नाडयः"। "नाड़ीयन्त्राणामनेकप्रकाराणामनेकप्रयोजनान्येकतोमुखान्युभयतोमुखानि च तानि स्रोतोगतशल्योद्धरणार्थं रोगदर्शनार्थमाचूषणार्थं क्रियासौकार्यार्थं चेति तानि स्रोतोद्वारपरिणाहानि यथायोगपरिणाहदीर्घाणि च" सुश्रु०

**नाडीवलय** न० नाड्या घटिकायाः ज्ञानार्थं वलयं वलयाकारं यन्त्रम्। सि०शि० उक्ते खम्बादिज्ञानार्थे नाडीरूपकालज्ञानोपाये यन्त्रभेदे

"अपहृते कुजलग्ने लग्नं चाधो खगोलनलिकान्तः। भूस्थं ध्रुवयष्टिस्थं चक्रं यष्ट्या निगोदवैद्याङ्गम्। व्यक्तैर्वेष्टीभायामुदयेऽर्कं न्यस्य नाडिका ज्ञेयाः। दृष्टच्छायास्थानैरेव लग्नं प्रभायां च। केनचिदाधारेण ध्रुवाभिमुखकीलकेऽत्र स्थिते। अथ वा कीलच्छायातलमध्ये स्थूलेता नाड्याः" सू०। "अत्र द्वादशवर्षमितप्रमाणं चक्राकारं समं नेम्यां घटिघटिकाङ्कं यन्त्रं खगोलमध्यस्थायां ध्रुवयष्टौ पृथ्वीमध्यस्थाने प्रोतं कार्यम्। तथा स्रोदयप्रमाणैर्मेषादिराशिभिरसमैरुभयपार्श्वयोः षड्भिश्च च बुद्धिमताङ्कनीयम्। तैश्चोदयैर्विलोमैरङ्गम्। मेषात् पश्चिमतो दृश्ये वृषात् पश्चिमतो मिथुनम् इत्यादि। स चाङ्कनप्रकारः सर्वतोभद्रयन्त्रे मया पठितः। "स्थितौ चक्रभागैस्तदन्तर्घटीभिः स्वदेशोदयैश्चाङ्कवेदस्य पार्श्वम्। प्रतिस्रोदयं स्वाग्निभिः३० खेन्द्रभागैस्त्रिभागाभिधैर्दादशांशैः३।१०।खांशैः३।२०। त्रिभागैः०।दिभागैः५।त्रधा सस्वनाद्यैः प्रयत्नेन षड्वर्गमेवं विभज्य"। एवं यन्त्रं कृत्वा यस्मिन् दिने तेन कालज्ञानं तस्मिन् दिने यावानौदयिको रविस्तद्भुक्तान् राशीन् मेषादेरुक्त्वा भुज्यमानराशेर्भागान् खेटभागेषु दत्त्वाग्रे रविचिह्नं कार्यम्। तस्मिन् दिन उदयकाले यष्टिच्छाया या पश्चिमतो गता तस्यां छायायां रविचिह्नं यथा भवति तथा यन्त्रं स्थिरं कार्यम्। ततोऽनन्तरं रविर्यथा यथोपरि याति तथा तथा छायाऽधो गच्छति। छायार्कचिह्नयोर्मध्ये या घटिकाच्छा दिनगता ज्ञेयाः। तथा यष्टिच्छायायां यो राशिर्यं च ज्ञेयांशाश्चलग्नं ज्ञेयम्। स च षड्वर्गः। अथ वा किं खगोलान्तःस्थेन यष्टिप्रोतेन, चक्रान्तरिष्टप्रमाणं कीलकं प्रोतं कृत्वा स कीलको ध्रुवाभिमुखो यथा भवति तथा केनचिदाधारेण चक्रं स्थिरं कार्यम्। तथा कृते इष्टकाले कीलच्छाया यत्र लगति तस्य यन्त्राधश्चक्रस्य च मध्ये नतनाड़िका ज्ञेयाः" प्रभिदा०।

**नाडीविग्रह** पु० नाड़ीमात्रसारः विग्रहो देहोऽस्य। शिवानुचरभेदे अतिलये भृङ्गिणि हेमच०।

**नाडीव्रण** पु०न० नाड़ीव व्रणम्। माधवकरोक्ते व्रणभेदे (नाडीचा) "यः शोथमामसिति पक्वसमेवेतऽन्तो यो वा व्रणं प्रचूरपूयमसाधुवृत्तः। अभ्यन्तरं प्रविशति प्रविदार्य तस्य स्थानानि पूर्वविहितानि ततः सपूयः। तस्मात्तिमात्रगमनाद्गतिरित्यृते तु नाडीव वहति तेन मता तु नाडी"। वातादिदोषभेदेन तस्य रूपाणि यथा "दोषैस्त्रिभिर्भवति सा पृथगेकशश्च संसर्गजैरपि च शल्यनिमित्ततोऽन्या। तत्रानिलात् परुषसूक्ष्मसखी सफेनानुविद्धमधिकं स्रवति सपासु। पित्तात्तृषाज्वरकरी परिदाहयुक्ता पीतं स्रवत्यधिकसूक्ष्मतनुः सुतापि। श्लेष्मा कफादुबहुघनार्जनपिच्छिलाढ्या काम्या सकण्डूरुरुजा रजनीप्रकाशा। दाहज्वरश्वसनमूर्च्छनवक्त्रशोषा यस्यां भवन्त्यभिहितानि च लक्षणानि। तामादिशेत् पवनपित्तकफप्रकोपाद् घोरामसृग्वयकरीमिव कालरात्रिम्। दोषद्वयाभिहतलक्षणदर्शनेन तिस्रो गतीर्व्यतिकरप्रभवास्तु विद्यात्"। शल्यनिमित्तलक्षणं यथा

"नष्टं कथञ्चिदनुमार्गसदीरितेषु स्थानेषु शल्यमचिरेण गतिं करोति। सा फेनिलं मथितमक्षमसृग्विमिश्रसुष्णं करोति सहसा सरुजञ्च नित्यम्"। असाध्यलक्षणसाध्ययोर्लक्षणं यथा "नाडी त्रिदोषप्रभवा न सिध्येत् शेषाचतस्रः खलु यत्नसाध्याः"।

**नाडीग्राक** पु० नाडीप्रधानः ग्राकः। नाडीके (पाटशाक)

**नाडीग्रोषणतैल** न० चक्रदत्तोक्ते तैलभेदे "षटपाकविधिसिद्धस्त्रिविड्जातगोखरकः। रसः सतैलस्त्रिगुणः कर्णस्रावहरः परः। जम्बूकस्य तु मांसेन कटुतैलं विपाचयेत्। तस्य पूरणमात्रेण कर्णनाडी प्रशाम्यति। निशागन्धपले पक्वं कटुतैलं पलाष्टकम्। धूस्तूरपत्रजरसे कर्णनाडीजिदुत्तमम्"।

**नाडीस्वरसञ्चार** पु०७त०। नाडीभेदे वायोः वहननिरूपे गतिभेदे। देहमध्ये वामभागस्थायाम् इड़ायां श्वासादिक्रमेण सञ्चारे चन्द्रोदयः, दक्षस्थायां पिङ्गलायां तथा वहने सूर्योदयः इत्येतत् स्वरोदयपन्थे प्रसिद्धम्। तस्य शुभाशुभफलादिकं कालविशेषनियमञ्च प्रदर्श्यते यद्यामले "आदौ चन्द्रः सिते पक्षे भास्करस्तु सितेतरे। प्रतिपत्क्रमतोऽहानि त्रीणि त्रीणि तयोदयत्वयम्"। त्रिपुरासारसमुच्चये तु स्वभावाद्भावध्रुवमाह यथा "आरभ्य दर्शं प्रथमाद्देति वामे ध्रुवे त्रीणि दिनानि देवः। वामेतरे त्रीणि ततो दिनानि पूर्णा तिथिं यावदथैवमेवम्। एकस्य पञ्चस्य विपर्ययेण रोगाभिभूतिर्भवतीह पुंसाम्। पञ्चद्वये बन्धुसुहृद्विपत्तिः पञ्चत्रये व्यत्ययतो क्षतिः स्यात्" ब्रह्मयामले "चन्द्रोदये यदा सूर्यचन्द्रः सूर्योदये यदा। अशुभं क्षानिरुद्देगः, शुभं सर्वं निवारयेत्"। चन्द्रोदये वामनाड्यां वायुगमननिरूपितसमये एवं सूर्योदये दक्षिणनाड्यां वायुगमननिरूपितसमये। कर्मविशेषे नासिकयोर्वायोः प्रवेशनिर्गमाभ्याञ्च शुभत्वमपि तत्रैव "यात्राकाले विवाहे च वह्नेश्चक्रारचारणे। शुभकर्मसु सर्वेषु प्रवेशे च शशी शुभः। विषवह्न्युतयुद्धेषु स्नानभोजनमैथुने। व्यवहारे भये भद्रे भानुनाड़ी प्रशस्यते। मोहनं शान्तिकञ्चैव दिव्यौषधिरसायनम्। विद्यारम्भः स्थिरं कार्यं कर्तव्यञ्च निशाकरे। दूरयुद्धे जयी चन्द्रः समासन्ने दिवाकरः। वहन्नाडीपदे चैव यात्रा भवति सिद्धिदा"। यस्यां नासिकायां प्राणवायोर्गतिर्भवति तद्देशोत्पादप्रसारणपूर्विका यात्रा सिद्धिदा भवतीत्यर्थः "शयने च प्रबुद्धे वा युवत्यालिङ्गनेऽपि वा। यः सूर्येण पिबेच्चन्द्रं स भवेन्मकरध्वजः"। सूर्येण दक्षिणनासिकास्थप्राणवायुना, चन्द्रं वामनासिकागतप्राणवायुं पिबति तत्सङ्गकाले स्त्रीयनिःश्वासमतिनिविष्टः सन्नाकर्षयति तत्फलं तत्रैव "चन्द्रचारो विषं हन्ति सूर्यो वाजायशं नयेत्। सुषुम्णायां भवेन्मोक्ष एको देवस्त्रिधा मतः। भुक्तमात्रेण मन्दाग्नौ स्त्रीषां वश्ये ऽथ कर्मणि। शयनं सूर्यवाहेन कर्त्तव्यं सर्वदा बुधैः। शान्ते शोके विवादे च ज्वरिते मूर्च्छिते तथा। सज्जनस्यापि बोधार्थं चन्द्रचारं प्रवाहयेत्"। भुक्तमात्रादौ वामपार्श्वेन, शान्तादिषु दक्षिणपार्श्वेन शयनं कार्यमिति तात्पर्यम्। चतुर्दिक्षु दुर्गमध्यस्थान्यतरस्थानमाश्रित्य यदि दूतः पृच्छति तदा कस्यां नाड्यां वायुगतिः शुभेत्याह "अर्द्धवामागतो दूतो चेद्यो वामपथस्थितः। पृष्ठे दत्ते तथाधस्तात् सूर्यवाहगतो मतः। पूर्णनाडीगतो दूतो यत् पृच्छति शुभाशुभम्। तत्सर्वं सिद्धिमाप्नोति शून्ये शून्यं न संशयः। आदौ शून्यगतः पृच्छेद् पश्चात् पूर्णो विशेद् यदि। तदा सर्वार्थसिद्धिः स्यादिति जानीहि निश्चितम्"। इदानीं प्राणवायोः प्रवेशनिर्गमाभ्यां विशेषमाह "प्रवेशकाले यद्भूतो वाञ्छति स्वप्रयोजनम्। तत्सर्वं सिद्धिमाप्नोति निर्गमे नास्ति सुन्दरम्"। कर्मविशेषे नाडीविशेषगतिमाह "मारणं मोहनं स्तम्भं विद्वेषोच्चाटनं तथा। प्रेरणाकर्मणश्चोभं भानुनाड्युदये कुरु। शान्तिकं पौष्टिकं क्षेमं दिव्यौषधिरसायनम्। योगाभ्यासादिकमपि कर्तव्यानि निशाकरे"। त्रिपुरासारसमुच्चये "भूतानामुदयं द्वयोरपि बुधः संलक्ष्येत् पञ्चयोस्तत्त्वादौ यद्यथोदयं निश्चितधीर्प्राणस्य दक्षस्मृशि। दैवेऽधस्मृशि वारिणोऽग्नितवहस्योर्ध्वं गतिर्योदयं तिर्यक्संस्मृशि मारुतस्य परितः पृष्ठे सदर्द्धक्रमः" देवे प्राणवायौ। फलं यामले "पृथ्वीजले शुभे तत्त्वे तेजोमिश्रफलोदयम्। क्षानिरुल्बणकरौ पुंसामुभयौ व्योममारुतौ" कर्मविशेषे भूतोदयफलं त्रिपुरासारे "वज्रस्तम्भनयोः प्रशस्त उदयो भूमेर्जलस्योदयः शस्तः शान्तिकपौष्टिकादिषु शुभो वह्नाय वह्नेः पुनः। शत्रोर्मारणदारणादिकरणे उच्चाटनोच्छेदयोर्वायोः शान्तिकनिर्विषीकरणयोर्व्योम्नो हितोदयः। कियत्कालमेकनाडीगतो वायुर्भवति तत्रापि पञ्चभूतोदयः क्रमेण चैव इत्यपेक्षायां नाड़ीगतिकालं स्नानक्रमेण भूतोदयञ्चाह यामले "एकैकस्य कलाः पञ्च क्रमेणैवोदयन्ति ताः। पृथि-

व्यापस्तथा तेजो वायुराकाशमेव च । मध्ये पृथ्वी त्वधश्चाप ऊर्द्धं वहति चानलः । तिर्यग्वायुप्रवाहश्च नभो वहति संक्रमे"। प्रपञ्चसारेऽपि "पुटयोरुभयोश्च दक्षसंस्था पृथिवी तोयमधःक्रमशातूर्द्धम्। पवनस्तथ पार्श्वगोऽपि मध्ये गगनं भूतगतिस्तनुद्भवेयम्" तत्रापि बाह्याद्यवस्थाभेदमाह रुद्रजामले उत्तरखण्डे एकादशपटले "स्वकीयनासिकायन्तु पञ्चमं परिकीर्तितम् । यन्नासापुटमध्ये तु वायुर्भवति भैरव !। तन्नासापवनमध्ये तु भावाभावं विचारयेत् । आकाशं वायुरूपं हि तैजसं वारुणं प्रभो !। पार्थिवं क्रमयोगेन बाह्यास्यादि क्रमेण तु । वामोदये शुभा वामा दक्षिणे पुरुषः शुभः । वायूनां गमनं ज्ञेयं गगनावधिरेव च । केवलं मध्यदेशे तु गमनं पवनस्य च । तदाकाशं विजानीयाद्बाह्यभावं प्रकीर्त्तितम् । तिर्यग्गतिस्तु नासाग्रे वायोरुदयमेव च । केवलं भ्रमणं ज्ञेयं सर्वमङ्गलमेव च । किशोरं तद्विजानीयादायौ तिर्यग्गतौ विभो !। केवलार्द्धनासिकाग्रे वायुर्गच्छति दण्डवत् । तत्तेजसं विजानीयात्तेजसा बलवान् भवेत् । यौवनं तद्विजानीयात् कर्मसिद्धिर्भवेद्ध्रुवम् । यदा व्याप्य गच्छतोऽ नासापुटमनाकुलम्। जलोदयं विजानीयात् तदाप्यामोऽहमेव च। तद्वृद्धगतभावस्तु विलम्बोऽधिकश्चेष्टया । प्राप्नोति परमां प्रीतिं बाह्यार्थोदयोऽखम्। यद्यधोगच्छति क्षिप्रं क्षितिर्दुर्भगोचरम्। यदा करोति प्राग् बालं तदारोग्याद्बलोदयः । पृथिव्या चरतं भागं रोगार्त्तं परिपीड़ितम्। अस्तमितं महादेव । अतुलोमविलोमतः । अवनोगच्छति क्षिप्रं वामदक्षिणभेदतः । वामनासापुटं याति पृथिवी जलमेव च । यदा फलाफलं दातुमुदिताकुलमण्डले । तयोर्वै वायवी यक्षिः फलभागं तदा लभेत्" । अवस्थाभेदे तत्फलकथनं तत्रैव "यद्येवं वामभागे तु बालायाः प्रश्नकर्मणि । यदि तत्र पुमान् प्रश्नं करोति वामगामिनी। तदा रोगमवाप्नोति कार्यार्थी न भवेद्ध्रुवम् । यदि वायूदयो वामे दक्षिणे पुरुषः स्थितः । तदा कृषिफलमाप्नोति द्रव्यागमनदुर्लभम् । अकस्माद्द्रव्यहानिः स्यान्नानोगतफलापहम् । शङ्खदुन्दुविषादश्च भिन्ने भिन्नोदयात् शुभम्। केवलं वरुणस्यैव पुरुषो दक्षिणे शुभः । अशुभं पृथिवीदत्ते भेदोऽयं नरदुर्लभः । यदोदयं दक्षिणे च वायोस्तेजसएव च । आकाशञ्च विजानीयात् शुभाशुभफलं प्रभो !। यदि भाग्यवशादेव वायोर्मन्दा गतिर्भवेत् । दक्षनासा मध्यदेशे तदा वामोदयं शुभम् । तदा वामे विचारश्च वायुतेजःस्वरस्य च । ज्ञात्वोदयं विजानीयान्निजे हानिः स्वरे भयम् । एवं स्वभुवनागारे यदि गच्छति वायवी । तस्मिन् काले पुमान् वामदक्षभागस्थसम्मुखः । तदा कन्यादानफलं यथा प्राप्नोति मानवः । तदा वायुप्रसादेन प्राप्नोति धनसुत्तमम् । देशान्तरात् शुभा वार्त्ता चायाति पुत्रसम्पदः" इति स्त्रीपुंसभेदेन फलकथनं स्वरोदये "गुरुशुक्रबुधेन्दूनां वासरे वामनाडिकाः । सिद्ध्यन्ति सर्वकार्येषु कृष्णपक्षे विशेषतः । अर्काङ्गारकशौराणां वासरे दक्षनाड़िका । स्यात्तथा चिरकालेन शुक्ले नैवोदयःस्थितः । क्रमादेकैकनाड्यास्तु तत्त्वानां प्रथमुद्भवः । अहोरात्रस्य मध्ये तु त्रेया द्वादश संक्रमाः । वृषकर्कटकन्यालिमृगमीननिशाकरे । मेषे सिंहे च धनुषि तुलायां मिथुने घटे । उदयो दक्षिणे ज्ञेयः शुभाशुभविनिर्णयः" । वारादिभेदेन नाड़ीविशेषफलकथनम् । "तिथेः पूर्वोत्तरे चन्द्रोभानुः पश्चिमदक्षिणे । दक्षनाड्याः प्रवाहे तु न गच्छेदुत्तरपश्चिमे" इति नाड़ीविशेषेण दिग्गतिः । "वामचारप्रवाहे तु न गच्छेत् पूर्व उत्तरे । परिपन्थी भवेत्तस्य मतोऽसौ न निवर्त्तते । तस्मादत्र न गन्तव्यं बुधैः सर्वेप्सितेप्सुभिः । तदा तत्र तु सङ्घाते मृत्युरेव न संशयः" इति वङ्गाड़ीलोकस्य दिग्विशेषगमननिन्दा । "शुक्लपक्षे द्वितीयायामर्के वहति चन्द्रमाः । प्रदग्धाते महाँल्लाभः पुंसः सौख्यं प्रजायते । सूर्योदये यदा सूर्य्यचन्द्रे चन्द्रोदयो भवेत् । सिध्यन्ति सर्वकार्याणि दिवारात्रिगतान्यपि" स्वरनाड़ीफलकथनम् "चन्द्रकार्ये यदा सूर्यः सूर्यचन्द्रोदये भवेत् । उद्वेगः कलहो हानिः शुभं सर्वं निवारयेत्" इति विपरीतनिन्दा "सूर्यस्य वाहे प्रवदन्ति लाभं प्रकाशने युद्धमनःस्थिरत्वं । शशिन युक्तस्य तु शीतरश्मेः प्रवाहकाले फलमन्यदस्मात् । यदा मृत्युपक्षे तु विपरीतोदयो भवेत् । चन्द्रस्थाने स्थिते चार्के रविस्थाने च चन्द्रमाः । प्रथमे मानसोद्वेगं धनहानिं द्वितीयके । तृतीये गमनं विद्यादिष्टनाशं चतुर्थके । पञ्चमे राज्यविभवं षष्ठे सर्वार्थनाशनम् । सप्तमे व्याधिदुःखानि अष्टमे मृत्युमृच्छति" इति दिनभेदेन विपरीतफलम् "कालत्रयं विनाऽनिष्टो विपरीतः यदा भवेत् । तदा दुष्टफलं प्रोक्तं किञ्चिन्मूलेऽतियोजनम् । प्रातर्मध्याह्नयोश्चन्द्रः सायं-

काले दिवाकरः। तदा नित्यं जयं लाभं विपरीतन्तु दुःखदम्" इति कालभेदेन फलम् "वामे वा दक्षिणे वापि यत्राप्याक्रम्यते स्वरः। कृत्वा तत्पदमादाञ्च यात्रा भवति सिद्धिदा" इति यद्यद्घाडीकस्य यात्राफलम्।

**नाडीस्नेह** पु० नाड्यामेव स्नेहोऽस्य। नाडीमात्रसारे अति क्लमे शिवद्वारपाले भङ्गिणि शब्दर०।

**नाडीहिङ्गु** पु० नाडीप्रधानो हिङ्गुः। हिङ्गुभेदे राजनि०।

**नाणक** त्रि० न व्यक्तः कुत्सितः नञ्शब्देन "सह सुपा" स०। १कुत्सितभिन्ने २सद्वाचिङ्कितनिष्कादौ "तुलाशासनमानानां कूटकृद्व्याणकस्य च। एभिश्च व्यवहर्त्ता यः स दाप्योदण्डसत्तमम्" याज्ञ०।

**नाथ** दने (उपतापे) प० आशिषि आत्म० ऐश्वर्य्यदर्शने च पर० भ्वा०सक० सेट् नाथति दुनोति दैन्यं याचते इत्यर्थः नाथते आशंसते इत्यर्थः। अनाथीत् अनाथिष्ट। अनाथिषे अदित् अननाथत्। नाथः। अधोपदेशत्वात् सति निमित्ते न षत्वम् प्रनाथति। याचने "सन्तुष्टमिष्टानि तमिष्टदेवं नाथन्ति के नाम न लोकनाथम्" नैष० "आशिषि नाथः" पा० आशीर्वादे एवात्मनेपदविधानात् उपतापयाचनादौ परस्मैपदित्वम् अतएव काव्यप्र० "दीनं त्वामनुनाथते कृपयुगम्" इति च्युतसंस्कृतिदोषे उदाहृत्योक्तं यद्वा अत्र अनुनाथते इति। सर्पिषो नाथते इत्यादावशिष्यत्वेन नाथतेरात्मनेपदं विहितम्। "आशिषि नाथः" इति सू० अत्र तु याचनमर्थः तस्मात् "दीनं त्वामनुनाथति स्तनयुगमिति" पठनीयम्।

**नाथ** पु० नाथ ऐश्वर्ये घञ्। स्वामिनि ईश्वरे हेमच०। "अनर्घ्यमर्घ्यं च तमर्हति नाथः" कुमा० "त्रिलोकनाथेन सतां मघवद्विधः" रघुः।

**नाथवत्** त्रि० नाथ+अस्त्यर्थे मतुप् मस्य वः। वराधीने अमरः स्त्रियां ङीप्। "विष्णुना श्रीरिवेन्द्रेण भर्त्रा नाथवती सती" रामा० सुन्द० १७अ० "याः स्म ता लोकनाथेन नाथवत्यः पुराऽभवन्" भा०औ०५अ०

**नाथहरि** पु० नाथं हरति स्थानान्तरं नयति हृ-इन्। पशौ त्रि०कौ०।

**नाद** पु० नद-घञ्। १शब्दे अमरः। २अनुस्वारवदुच्चार्य्ये अर्द्धचन्द्राकृतिवर्णभेदे ३ब्रह्मरूपघोषभेदे वर्णविशेषव्यञ्जके वाह्यप्रयत्नभेदे "कण्ठमध्ये तु घोषाः स्युः संवृता नादभागिनः" पा०शिक्षा "सच्चिदानन्दविभवात् सकलात् परमेश्वरात्। आसीच्छक्तिस्ततो नादस्तस्माद्विन्दुसमुद्भवः। नादो विन्दुश्च बीजञ्च सृष्ट्य त्रिविधो मतः। भिद्यमानात् पराद्विन्दोरुभयात्मारवोऽभवत्। स रवः स्तुतिसम्भ्रमः शब्द ब्रह्माऽभवत् परम्" शार०ति०। "तत्र सत्वप्रविष्टा चित् शक्तिशब्दवाच्या परमाकाशावस्था सैव सत्वप्रविष्टा रजोऽनुविद्धा नादशब्दवाच्या अव्यक्तावस्था" पदार्थदर्शः। "नाभेरूर्द्धं हृदि स्थानात् मारुतः प्राणसंज्ञकः। नदति ब्रह्मरन्ध्रान्ते तेन नादः प्रकीर्त्तितः" "आकाशाग्निमरुज्जातो नाभेरूर्द्धं सतश्चरन्। सूक्ष्मोऽतिव्यक्तभावाति यः स नाद इतीरितः। स च प्राणिभवोऽप्राणिभवश्चोभयसम्भवः। आद्यः कायभवो वीणादिभवस्तु द्वितीयकः। तृतीयोऽपि च वंशादिभव इत्थं त्रिधा मतः। यदुक्तं ब्रह्मणः स्थानं ब्रह्मग्रन्थिश्च यो मतः। तन्मध्ये संस्थितः प्राणः प्राणादग्निसमुद्भवः। यन्निमारुतसंयोगान्नादः समुपजायते। न नादेन विना गीतं न नादेन विना स्वरः। न नादेन विना रागस्तस्मान्नादात्मकं जगत्। न नादेन विना ज्ञानं न नादेन विना शिवः। नादं रूपं परं ज्योतिर्नादरूपी परं हरिः" सङ्गीतदा० ५स्रोतसि निघण्टुः। ६शब्दाभिव्यञ्जके कर्णशष्कुलीसंयोगविभागे गवरक्षामी "नादस्तद्विपरा" जै०१।१।१७सू० "यच्चैतत् बहुभिर्भेरीभाषणैः शब्दसञ्चारयद्भिर्नृभिः शब्दः उपलभ्यते। तेन प्रतिपुरुषं शब्दावयवप्रचय इति मन्यते नैवं निरवयवोहि शब्दः अवयवभेदानवगमात् निरवयवत्वाच्च महत्त्वानुपपत्तिः अतो न वर्द्धते शब्दः। कर्णशष्कुलीसंयुक्तस्य सर्वां नेभिं व्याप्नुवद्भिः संयोगविभागैर्नैरन्तर्येण च अनेकयोपलब्धात् महान् इव अवयववान् इवोपलभ्यते, संयोगविभागाः नैरन्तर्येण क्रियमाणाः शब्दमभिव्यञ्जयन्तो नादशब्दवाच्याः। तेन नादकृता वृद्धिः न शब्दस्येति" शवरभा०।

**नादमुद्रा** स्त्री "तर्जनीभ्यां तथाकृष्य दक्षिणा नादमुद्रिका" तन्त्रसारोक्ते मुद्राभेदे।

**नादवत्** पु० नादो बाह्यप्रयत्नभेद उच्चारणे साधनतयाऽस्यास्य मतुप् मस्य वः। १नादरूपबाह्यप्रयत्नोच्चार्य्यवर्णे द्वितीयवर्णादौ "घोषवतो नादवतो महाप्राणस्य" सि०कौ० २शब्दयुक्ते च। [२वर्णभेदे च।

**नादविन्दु** पु० उपनिषद्भेदे १उपनिषच्छब्दे पु० दृश्यम्।

**नादिन्** त्रि० नद-णिनि। १शब्दकारिणि स्त्रियां ङीप्। "प्रमथ्यमानावर्णवीरनादिनी" रघुः कालञ्जरे गिरौ

जातेषु जातिकरेषु सप्तसु क्षणेषु सप्तमे २क्षणे पु०। गुरोर्गां कृत्वा पिण्डश्राद्धं कृतवतां गर्भशिशूनां व्याधादि जन्मप्राप्ति कथा कृविषं० २१अ० दृश्या। तेषां दशार्धे व्याधजन्मानन्तरं कालञ्जरे गिरौ मृगजन्मप्राप्तानां संज्ञा यथा "उन्मुखो निम्नविन्यस्तः स्तब्धकर्णो विलोचनः। पण्डितो वक्त्रो नादी नामतस्तेऽमवन्मृगाः"। २नादयुक्ते त्रि०

**नादेय** त्रि० नद्या इदं तत्र भवो वा नद्या नदस्य वा ढक्। १नद्याः सम्बन्धिनि २तत्र भवे च "नद्या नदस्य वा नीरं नादेयमिति कीर्त्तितम्। नादेयस्तदकं रूक्षं वातलं लघु दीपनम्। अनभिष्यन्दि विशदं कटुकं कफपित्तनुत्" भावप्र०। ३सैन्धवलवणे न० रत्नमा०। ४सौवीराञ्जने न० राजनि०। ५काशदृक्षे हृवानीरवृक्षे पु० राजनि०। ७अम्बुवेतसे ८भूमिलम्बूकायां ९वैजयन्तिकायां स्त्री ङीप् अमरः। १०नागरङ्गलम्बां ११व्यङ्गे स्त्री ङीप् मेदिनी। १२अग्निमन्थवृक्षे १३काकलम्बूवृक्षे च स्त्री राजनि०। न आदेयम् अदेयं वा १४अव्याप्ते १५देये च त्रि० "नादेयं नादेयं धरदि वसने च नादेयम्" वैद्यकम् धरदि नादेयं न व्याप्तमित्यर्थः। वसने तु न अदेयं देयमित्यर्थः।

**नादेश्वर** न० काशीस्थे शिवलिङ्गभेदे "नादेश्वरं समभ्यर्च्य कैः कैर्नापि सुचिन्तितम्। तस्मात् काश्यां प्रयत्नेन सेव्यो नादेश्वरो ह्यसिः" काशीख० १२अ०।

**नाद्य** त्रि० नद्यां भवः "नद्यादिभ्योऽक" वार्त्तिका "पाद्यो नदीभ्यां ह्यण्" पा० वेदे ह्यण्। नदीभवे "चक्रोदधीत नाद्यो गिरोमे" ऋ०२।३५।१ "याश्च कृष्या याश्च नाद्याः सञ्जग्रिया आपः" तैत्ति०३।१।२।४

**नाध** नाधार्त्ते भ्वा० आ०सक० सेट्। नाधते अनाधिष्ट ननाधे नाधितुं चङि अननाधत् त। अयं धोपदेशोऽपीत्यन्ये तेन सति निमित्ते षत्वम्। कविकल्पद्रुमेऽस्योभयथा कीर्त्तनादस्य उभयविधत्वम् "रोदसी नाधसी द्वतौ" ऋ० १०।३५।५ "याष्ट याच्ञौतापैश्वर्यादौ नाधसी याचमाने" भा०।

**नाना** अव्य०न+नाञ्। १विनार्थे "नाना नारीर्निष्फला लोकयात्रा" न नाना शब्दुना रामात्" सुबोधम्। २अनेकार्थे "नानाविधं देहभृतां समाजम्" "स्तोकेन सन्तुष्यति नानेव पश्यति" श्रुतिः "बहुषु चैवजातानां नानाख्यासु निबोधत"। "प्रकाशरूपकाकोशां नानापक्षोपजीविनाम्" मनुः।

**नानाकन्द** पु० नाना कन्दोऽस्य। १पिण्डालौ राजनि०। २बहुमूलयुक्ते त्रि०।

**नानाध्वनि** पु० ईत०। काहलवीणादिशब्दे हारा०।

**नानान्द्र** पु०ननान्दुरपत्यम् विदा० अञ्। ननान्दुरपत्ये ततः यूनि फरिता० फक्। नानान्द्रायण ननान्दुर्यूनि अपत्ये।

**नानारूप** न० कर्म०। १बहुविधे रूपे "नानारूपवती मता" भाषा० नाना रूपाणि यस्य। २बहुप्रकारे त्रि० "नानारूपाणि आयन्ते बीजानीह स्वभावतः" मनुः।

**नानार्थ** त्रि० नाना अर्था यस्य। १अनेकार्थे अव्ययादिशब्दे "नानार्थाः केऽपि कान्तादिवर्गैकैवात्र कीर्त्तिताः" अमरः नानार्थशब्दानाञ्च यत्र शक्यतावच्छेदकतायां बाधकं तत्र शक्तिः बहूनां बाधके निगमनाविरहेण सर्वत्रैव शक्तिः अन्यत्र लक्षणा। तत्रापि अनेकार्थस्य शब्दस्य सर्वत्र तात्पर्य्यज्ञानेन सर्वेषां पदार्थानां युगपदुपस्थितावपि संयोगादिना कस्यचिदर्थस्य शाब्दबोध इत्येवंप्रकारेणात्र अन्यार्थोपस्थितावेव संयोगादेः प्रतिबन्धकत्वमित्यर्थे। तदेतत् रसगङ्गाधरे व्यक्तीकृतम्। अधिकं अनेकार्थशब्दे १८१ पृ० दृश्यम्। २नानाप्रयोजनयुक्ते त्रि० कर्म०। ३बहुप्रयोजने पु०।

**नानावर्ण** त्रि० नानावर्णा रूपाणि यस्य। चित्रवर्णयुक्ते "उल्का मन्त्रविनार्थं नानावर्णचनाच भवमतुत्तमम्" हरि०सं०५अ०। कर्म०। २ब्राह्मणादिवर्णचतुष्टये च।

**नानाविध** त्रि० नाना विधाः प्रकारा अस्य। बहुप्रकारे "नानाविधैरुपायैरुपकारिण्यनुपकारिणः पुंसः" सां०का० "नानाविधानां द्रव्याणां गुणैः ह्यणुत निर्णयम्" मनुः

**नान्तरीयक** न० न अन्तरा विना भवः अन्तरा+छ अव्ययस्य टिलोपः ततः स्वार्थे क। अविनाभूते तद्भावे तद्भावरूपव्याप्तियुते "अभिधेयाविनाभूतप्रतीतिर्लक्षणोच्यते" कारिकाव्या० "अभिधाभावः सम्बन्धभावं न तु नान्तरीयकत्वम्" काव्यप्र०। व्याकृतञ्चेदं महेश्वरेण "नान्तरीयकत्वं तदभावे तदभावरूपा व्याप्तिः"। "प्रतिबन्धकाभावे नान्तरीयका अर्थोत्पत्तिः" मञ्जन्यायवादार्थः।

**नान्द** न० नम-घञ् दृढिव। स्तोत्रे उणादिकोषः। संक्षिप्तसारे नान्दमित्येव पाठः शब्दकल्पद्रुमे नान्देति पाठकल्पनम् लिपिकरप्रमादपाठमाशोक्येति बोध्यम्।

**नान्दिकर** पु० नान्दीं करोति क-ट ईत० "ऊद्रापोः संज्ञाछन्दसोः" पा० हुस्वः। नाटके नान्दीपाठकरे सूत्रधारे

**नान्दी** स्त्री नन्दन्ति देवा अत्र नन्द-घञ् पृषो०दीर्घः ङीप्।

१सत्सङ्गौ २नाटकस्यादौ मङ्गलार्थे पाठ्ये श्लोकादौ "आशीर्वचनसंयुक्ता स्तुतिर्देवस्य वा पुनः। देवद्विजनृपादीनां तस्मान्नान्दीति सा स्मृता"। नाटके विघ्नविघातायादौ नान्दी कार्या यदाह भरतः "यद्यप्यङ्गानि भूयांसि पूर्वरङ्गस्य नाटके। तथाप्यवश्यं कर्त्तव्या नान्दी विघ्नोपशान्तये। देवद्विजनृपादीनामाशीर्वादपरायणा। नन्दन्ति देवतायस्मात्तस्मान्नान्दी प्रकीर्तिता" अन्यच्च "देवद्विजनृपादीनामाशीर्वचनपूर्विका। नान्दी कार्या बुधैर्वेत्रास्त्रमस्कारेण संयुता। गङ्गा नागपतिः सोमः सुधानन्दाजयाश्रियः। एभिर्नामपदैः कार्या नान्दी धीराभिरङ्किता। प्रशस्तपदविन्यासा चन्द्रसङ्कीर्त्तनान्विता। आशीर्वादपरा नान्दी योज्ञेयं मङ्गलात्मिका। काचिदृग्पदा नान्दी काचिदष्टपदा तथा। सूत्रधारः पठेन्नान्दीं मध्यमस्वरमाश्रितः"। सा०द० अन्यथा तूक्तं यथा "यन्नाट्यवस्तुनः पूर्वं रङ्गविघ्नोपशान्तये। क्रियतेऽवश्यं प्रकुर्वन्ति पूर्वरङ्गः स उच्यते। प्रस्तावनादिकान्यत्वङ्गान्यस्य भूयांसि यद्यपि। तथाप्यवश्यं कर्त्तव्या नान्दी विघ्नोपशान्तये" "आशीर्वचनसंयुक्ता नित्यं यस्मात् प्रयुज्यते। देवद्विजनृपादीनां तस्मान्नान्दीति संज्ञिता। मङ्गल्यशङ्खचन्द्राब्जकोकैरवसंनिभा। पदैर्युक्ता द्वादशभिरष्टाभिर्वा पदैरुत" । अष्टपदा यथा। अनर्घ्यराघवे "निष्प्रत्यूहमिलत्यादि" द्वादशपदा यथा मम तातपादानां पुष्पमालायाम्। "शिरसिधृतसुरापगे शरारावरुचस्तुखेन्दुरुचिर्गिरीन्द्रपुत्री। अथ चरणयुगानते सकान्ते क्षितसरसा भवतोऽस्तु भूतिहेतुः"। एवमन्यत्र। "एतन्नान्दीति" कस्यचिन्मतानुसारेणोक्तम्। वस्तुतस्तु "पूर्वरङ्गस्य रङ्गद्वाराभिधानमङ्गमिति" उच्यते। यदुक्तम्। "यस्मादभिनयो ह्यत्र प्रायस्यादवतार्यते। रङ्गद्वारमतो ह्येतत् पात्रङ्गाभिनयात्मकमिति" उक्तप्रकारायाश्च नान्द्या रङ्गद्वारात् प्रथमं नटैरेव कर्त्तव्यतया न सूत्रधारेण निर्देशः कृतः। कालिदासादिमहाकविप्रबन्धेषु च "वेदान्तेषु यमाहुरेकपुरुषं व्याप्य स्थितं रोदसी यस्मिन्नीश्वर इत्यनन्यविषयः शब्दो यथाक्षरः। अन्तर्यश्च मुमुक्षुभिर्नियमितप्राणादिभिर्मृग्यते स स्थाणुः स्थिरभक्तियोगसुलभो निःश्रेयसायास्तु वः" एवमादिषु नान्दीलक्षणायोगात्। उक्तञ्च "रङ्गद्वारमारभ्य कविः कुर्य्यादिति"। अतएव प्राक्तनपुस्तकेषु "नान्द्यन्ते सूत्रधार" इत्यनन्तरमेव "वेदान्तेत्यादि" श्लोकलिखनं दृश्यते। यच्च पश्चात् "नान्द्यन्ते सूत्रधार" इति लिखनं तस्यायमभिप्रायः "नान्द्यन्ते सूत्रधार इदं प्रयोजितवान् इतः प्रभृति मया नाटकसूपादीयते इति कवेरभिप्रायः सूचितः इति"। इत्यौ "ते तु नान्दीसखा नान्दी यत्सङ्गिरिति कथ्यते" इति ब्रह्मपुराणम् "नान्दीसखे विवाहे च प्रपितामहपूर्वकम्" इति सम्बन्धविवेकपरिगृहीतवचनम्। "नान्दीसखे पुत्रादिसन्ततिसाधनरूपे विवाहे विशेषणं तु विवाहादेः पुत्रादिलाभविशेषप्रापनाय नान्दीसखपदस्य श्राद्धपरत्वे अनेकवचनाप्राप्तिपूर्वकाभिलाषस्य बाधापत्तेः" सं०त० रघुनन्दनः।

**नान्दीक** पु० नान्द्यै कायति कै-क। १तोरणवृक्षे त्रिका० २नान्दीसखश्राद्धे नान्दीसखशब्दे दृश्यम्।

**नान्दीकर** त्रि० ६त०। १नान्दीश्लोकादिपाठकरे २नान्दीवादिनि च अमरः।

**नान्दी(न्दि)घोष** पु०नान्द्यै घोषः वा तुरुः। भेर्यादिशब्दे

**नान्दीपट** पु० नान्द्याः तदर्थः पटः। कूपादिसखबन्धनवस्त्रे धीनाढे हेमच०।

**नान्दीपुर** न०नान्द्यै पूः अच्समा०। अमराक्ते पुरभेदे ततः पुरान्तत्वात् भवार्थे वुञ्। नान्दीपुरक तत्र भवे त्रि०।

**नान्दीमुख** न० नान्द्या तदर्थं मुखम्। १तद्विश्राद्धे श्राद्धभेदे नान्द्यै सखं यस्य। २पित्रादौ ३मात्रादौ स्त्री ङीष्। जीवत्पित्रादिकस्य ४तद्वत्प्रपितामहादौ च त्रि०। ५सत्सङ्गेः साधने विवाहादौ "नान्दीसखे विवाहे च" नान्दीशब्ददर्शितवाक्ये स०त० लिखनं दृश्यम्। अथ नान्दीश्राद्धाधिकारस्वरूपादि निर्ण०सि० दर्शितं यथा अथ तद्विश्राद्धम् तन्निमित्तं एथ्वीचन्द्रोदये ब्राह्मे "जन्मन्यथोपनयने विवाहे पुत्रकन्ययोः। पितृन्नान्दीसखान्नाम तर्पयेद्विधिपूर्वकम्। देवव्रतेषु चाधानयज्ञपुंसवनेषु च। नवान्नभोजने स्नाने जटायाः प्रथमार्तवे। देवारामतडागादिप्रतिष्ठासत्त्रयेषु च। राज्ञाभिषेके बालान्नभोजने तद्विसंज्ञकात्। वनस्थाद्याश्रमं गच्छन् पूर्वेद्युः सद्य एव वा। पितॄन् पूर्वोक्तविधिना तर्पयेत् कर्मसिद्धये" विष्णुपुराणे "यज्ञोद्वाहप्रतिष्ठासु मेखलाबन्धमोचयोः। पुत्रजन्मव्रतोद्यमें तद्विश्राद्धं समाचरेत्" तत्रैव "नामकर्मण्यथ बालानां चूडाकर्मादिके तथा" इत्यृक्षेनिष्क्रमान्नप्राशनयोर्न श्राद्धमिति मैथिलाः तत्र पूर्वोक्तविरोधात् नानिष्टेति विरोधात् "सुतोत्पत्तौ तथा श्राद्धे अन्नप्राशनिके तथा" इति राजमार्त्तण्डाच्च

बह्वृचकारिकायाम् "आद्याभ्युदयिकं श्राद्धं वृद्धिपूर्त्तेषु कर्मसु। पुंसःसवनसीमन्तजातोपनयनेष्विह। विवाहे चानलाधेयप्रतिष्ठौतकर्मणि। इदं श्राद्धं प्रकुर्वन्ति द्विजा वृद्धिनिमित्तकम्। अन्यैः षोडशसंस्कारश्राद्धवदिष्यतेऽपि। वाद्याद्युद्यापनादौ तु कुर्युः पूर्त्तनिमित्तकम्"। बोपदेवकालदर्शौ "सीमन्तव्रतचौलनामकरणान्नप्राशनोपायनस्नानाधानविवाहयज्ञतनयोत्पत्तिप्रतिष्ठासु च। पुंसत्वावसथप्रवेशनसुताद्यास्यावलोकाश्रमस्वीकारक्षितिपाभिषेकदयिताद्यर्थौ च नान्दीमुखम्" यत्तु कामधेनौ "जलाशयप्रतिष्ठायां वृषोत्सर्गादिकर्मसु। वत्सराभ्यन्तरे पित्रोर्मृष्योत्सर्गकर्मणि। वृद्धिश्राद्धं न कुर्वीत तदन्यत्र समाचरेत्" इति तत्र जलाशये वृद्धिश्राद्धस्य निषेधो न तु कर्माङ्गत्वेति केचित्। अन्ये तस्य निर्मूलतामाहुः। श्राद्धकौमुद्यां निर्णयामृते च मात्स्ये "अन्नप्राशे च सीमन्ते पुत्रोत्पत्तिनिमित्तके। पुंसवे च निषेके च नवश्राद्धं प्रचक्षते। देवव्रतव्रतादीनां प्रतिष्ठायां विशेषतः। तीर्थयात्राव्रतोद्यापे वृद्धिश्राद्धं प्रकीर्तितम्"। इदं चावश्यकं "वृद्धौ न तर्पिता ये वै पितरो मातृमेधिभिः। तद्दोषफलं श्रेयसासुरो विधिरेव सः" इति मातातपोक्तेः। अत्र श्राद्धत्रयं पराशर आह "मातृश्राद्धं तु पूर्वं स्यात् पितृणां तदनन्तरम्। ततो मातामहानां च वृद्धौ श्राद्धत्रयं स्मृतम्"। तत्कालमाह पृथ्वीचन्द्रोदये मार्कण्डेयः "मातृश्राद्धं तु पूर्वेद्युः कर्माहनि तु पैतृकम्। मातामहं चोत्तरेद्युर्वृद्धौ श्राद्धत्रयं स्मृतम्"। अत्राश्वयुजौ स एव "पृथक् दिनेष्वशक्तश्चेदेकस्मिन् पूर्ववासरे। श्राद्धत्रयं प्रकुर्वीत वैश्वदेवं तु तान्त्रिकमिति" वृद्धमनुरपि "अनाशे भिन्नकालानां नान्दीश्राद्धत्रयं वुधः। पूर्वेद्युर्वै प्रकुर्वीत पूर्वाह्णे मातृपूर्वकम्"। अत्र "मातृतस्तु पूर्वेद्युरुदङ्मुखरक्षेत्रिति" स्मृत्यपरिगृहीत्वाद्व्यवस्था ज्ञेया। तत्र मातरेव "पार्वणं चापराह्णे तु मातर्द्विनिमित्तकमिति" माता तपोक्तेः अत्र प्रातः शब्दः श्राद्धप्रकरपरः "प्रकरोऽप्यर्थसंयुक्तः मातरित्यभिधीयते" इति मार्कण्डेयोक्तेरिति पृथ्वीचन्द्रः। इदं च पुत्रजन्मातिरिक्तविषयम्। तदाहात्रिः "पूर्वाह्णे वै भवेद्वृद्धिर्यदा जन्मनिमित्तकम्। पुत्रजन्मनि कुर्वीत श्राद्धं तात्कालिकं बुधः" इति एतदनियतनिमित्तपरम् "नियतेषु निमित्तेषु प्रातर्द्विनिमित्तकम्। तेषामनियतत्वे तु तदानन्त्यं निगद्यते" इति कौशाच्छते:। आधानाङ्गं नान्दीश्राद्धं त्वपराह्ण एव "श्यामश्राद्धं तु पूर्वाह्णे सिद्धान्नेन तु मध्यतः। पार्वणं चापराह्णे तु वृद्धिश्राद्धं तथाग्निकम्" इति निर्णयामृते गालवोक्तेः "नान्दीमुखाङ्गयं प्रातरावृद्धिकं त्वपराह्णतः" इति विष्णूक्तेश्च। इदं च मातृपितृमातामहादिकमेव नवदैवत्यं कार्यम्। तत्र मातामहाः सपत्नीकाः "वृद्धप्रमातामहप्रमातामहमातामहानां सपत्नीकानामिति" पृथ्वीचन्द्रोदये गारुडे मद्यरूपेण पाठात्। हेमाद्रौ शङ्खः "नान्दीमुखे सव्यवत् संकीर्त्यौ वैश्वदेविके" वृद्धपराशरः "नान्दीमुखेभ्यो देवेभ्यः प्रदक्षिणकुशासनम्। पितृभ्यस्तन्मुखेभ्यश्च प्रदक्षिणमिति श्रुतिः" यत्तु वृद्धवसिष्ठः "नान्दीमुखे विवाहे च प्रपितामहपूर्वकम्। नामसंकीर्त्तनेद्विद्वानन्यत्र पितृपूर्वकम्"। यच्च स्मृत्यर्थसारे "वृद्धशरव्यासु पितरो वृद्धिश्राद्धेषु भुञ्जते"। इति यच्च गारुडे व्युत्क्रमप्रतिपादनं तच्च शाखान्तरविषयम्। "पितृभ्यः पितामहेभ्यः प्रपितामहेभ्यः" इति बह्वृचपरिशिष्टे कात्यायनेन चानुलोम्यास्नानात् पृथ्वीचन्द्रोदयेऽप्येवम्। यत्तु केचित् वृद्धिपदं पित्रादिषु प्रयुञ्जते तच्च "अनन्ताह्वृद्धशब्दानामरूपाणामगोत्रिणाम्। अनाम्नामतिलाद्यैश्च नान्दीश्राद्धं तु सत्यवदिति" पृथ्वीचन्द्रोदये संग्रहोक्तेः न च निषेधादेव विधिः कल्पतरु इति वाच्यं षोडशदोश्राद्धे प्रपितामहात् परेषां वृद्धपित्रादीनां देवतात्वान्नान्दीश्राद्धत्वसाध्येनेहापि तत्प्राप्तौ निषेधात् गोत्रनामादिनिषेधस्तु "शुभार्थी प्रथमान्तेन वृद्धौ संकल्पमाचरेत्" इत्युपक्रम्यानन्ताह्वृद्धशब्दानामित्युक्तेः संकल्पश्राद्धपरः सपिण्डके तु सर्वं भवतीति प्रयोगपारिजातः। "गोत्रनामभिरामन्त्र्य पितृभ्योऽर्घ्यं प्रदापयेदिति" छन्दोगपरिशिष्टे तद्विधानात् यत्तु ब्राह्मे "पिता पितामहश्चैव तथैव प्रपितामहः। त्रयो ह्यमुष्मा ह्येते पितरः परिकीर्त्तिताः। तेभ्यः पूर्वतरा ये च प्रजावन्तः सुखे स्थिताः। ते तु नान्दीमुखा नान्दी सद्भिरिति कथ्यते" इति यच्च मार्कण्डेयपुराणे "ये प्रपितामहादूर्द्धं ते तु नान्दीमुखाः स्मृताः" इति तच्चौवत्सित्रादित्रिकर्तृकवृद्धिश्राद्धविषयम्। तेन तत्रेदमावश्यकम्। यत्तु विष्णुः "पितरि पितामहे प्रपितामहे च जीवति नैव कुर्यादिति" तद्यौदिविषयमिति कल्पतरुः। मदनपारिजातोऽप्येवम्। हेमाद्रिस्तु "नान्दीमुखानां श्राद्धं तु कन्यारात्रिगते रवौ। पौर्णमास्यां तु कर्त्तव्यं वराह-

वचनं यवेति" प्रोष्ठपदीश्राद्धैकवाक्यत्वात् तत्रैव पूर्वेषां देवतात्वमित्याह। अत्र सत्यवसु विश्वे देवाविलुक्तं प्राग्वत्। यत्तु शातातपः "मातुः श्राद्धं तु युग्मैः स्यादेवं श्राद्धमुखैः पृथगिति" तद्भिन्नप्रयोगमात्रश्राद्धपरम्। यच्च मार्कण्डेयपुराणे "विश्वदेवविहीनं तु केचिदिच्छन्ति मानवाः" इति तद्भिन्नप्रयोगमातृश्राद्धे विश्वदेवविकल्पार्थं प्रयोगैक्ये तु देवनियम इति हेमाद्रिः। एतच्च मातृपूजापूर्वकं कार्यम्। "अकृत्वा मातृयागं तु यः श्राद्धं परिवेषयेत्। तस्य क्रोधसमाविष्टा हिंसामिच्छन्ति मातरः" इति शातातपोक्तेः कौमैरपि "पुष्पैर्धूपैः सनैवेद्यैर्गन्धाद्यैर्मूलमन्त्रैरपि। पूजयित्वा मातृगणं कुर्याच्छ्राद्धत्रयं बुधः" इति छन्दोगपरिशिष्टे "कर्मादिषु तु सर्वेषु मातरः सगणाधिपाः। पूजनीयाः प्रयत्नेन पूजिताः पूजयन्ति ताः" प्रतिमासु च शुद्धासु लिखितासु वा पटादिषु अपि वाऽक्षतपुञ्जेषु नैवेद्यैश्च पृथग्विधैः। कुड्यकुम्भां वसोर्धारां सप्तधारां घृतेन तु। कारयेत् पञ्चधारां वा नातिनीचां न चोच्छ्रिताम्। आयुष्यादि च शान्त्यर्थं जप्त्वा तत्र समाहितः। षड्भ्यः पितृभ्यस्तदनु श्राद्धदानमुपक्रमेत्"। अत्र सर्वैरिति षड्वचनात् षड्वयत्र तद्विकारेष्वपि नित्यं श्राद्धम्। "नान्दीश्राद्धे तु पितृन् श्राद्धे कर्म किञ्चित् समाचरेदिति" शातातपोक्तेः। दर्शं च वसोर्धारा तच्छाखीयानां नियतान्वेषां त्वनियता। वह्निर्वा खण्डहोक्तमित्युक्तेः करणे त्वभ्युदयः "यन्नान्दीमुखं स्वशाखायाम्" इत्युक्तेः आयुष्यादि "आनो भद्रा इत्यादीनि। षड्भ्य इति मात्रादिविकोपलक्षणमिति पृथ्वीचन्द्रोदयः। छन्दोगानां षड्दैवत्यमन्येषां नवदैवत्यमित्याचार्कः। मम तु मतं कोकिलमतानुसारिणां मातृमातामहीप्रमातामह्यो इति मात्रा सहैव मातामहश्राद्धकरणात् तद्विषयमिदं षड्भ्य इति। मातरस्तु तत्रैवोक्ताः "गौरी पद्मा शची मेधा सावित्री विजया जया। देवसेना स्वधा स्वाहा मातरो लोकमातरः।"

चन्द्रिकायां चतुर्विंशतिमते त्वन्या उक्ताः "तिस्रः पूज्याः पितुः पक्षे तिस्रो मातामहे तथा। इत्येता मातरः प्रोक्ताः पितुर्मातुः सहाष्टमी" आसां जीवने मत्स्यपूजनम्। मृतानां त्वक्षतपुञ्जेष्विति हेमाद्रिः "ब्रह्माण्याद्यास्तथा सप्त दुर्गाक्षेत्रगणाधिपान्। वृद्धादौ पूजयित्वा तु यथाम्नान्दीमुखान् पितॄन्। मातृपूर्वान् पितॄन् पूज्य ततो मातामहानपि। मातामह्यश्च तेभ्यो दद्युर्दद्युः पितामहाः" इति। अत्र वृद्धदैवतस्य देशाचाराद्व्यवस्था। ब्रह्माण्याद्यास्तु "ब्राह्मी माहेश्वरी चैव कौमारी वैष्णवी तथा। वाराही च तथेन्द्राणी चामुण्डा सप्त मातरः" इत्यपरार्के उक्ताः। अत्र चौशनसादीनां यौगपद्ये तन्त्रतोक्ता छन्दोगपरिशिष्टे "सगणाः क्रियमाणानां मातृभ्यः पूजनं सदा। सदैव भवेच्छ्राद्धादौ न पृथगादिषु" मातृभ्य इति षष्ठ्यर्थे चतुर्थी। सगणः एकानेकतन्त्राणां संस्कारैक्येकदिने एकदेशकालकर्मैक्यादित्यर्थः। तथा "अमलद्यानि कर्माणि क्रियेरन् कर्मकारिभिः। प्रतिप्रयोगं नैव सुमतिरः सगणाधिपाः" कर्माङ्गत्वेऽपि कुत्र श्राद्धं कार्यं कुत्र नेत्युक्तं तत्रैव "आधाने षोडशैवोक्ते वैश्वदेवे तथैव च। बलिकर्मणि दर्शे च पूर्णमासे तथैव च। नवश्राद्धे च यच्छ्राद्धं वदन्त्येवं मनीषिणः। एकमेव भवेच्छ्राद्धमेतेषु न पृथक् पृथक्" एतेषु प्रतिप्रयोगं नावर्त्तते किन्त्वादौ, एतद्भिन्ने सोमयागादौ प्रतिप्रयोगमावर्त्तते एव श्राद्धमित्यर्थः। क्वचिदादावपि निषेधमाह स एव "नाष्टकासु भवेच्छ्राद्धं न श्राद्धे श्राद्धमिष्यते। न सोध्यन्तीजातकर्मप्रोषितागतकर्मसु"। "विवाहादिः कर्मगणोक्त उक्तो गर्भाधानं शुद्धयो यस्य चान्ते। विवाहादावेकमेवात्र कुर्याच्छ्राद्धं नादौ कर्मणः कर्मणः स्यात्" सोध्यन्ता आसन्नप्रसवायाः "सोध्यानीमभ्युक्षेत्युक्तं कर्म। कात्यायनोक्तस्य श्राद्धस्य पाकस्य प्राधान्यात्तस्य च "जातश्राद्धे न दद्यात्तु पक्वान्नं श्राद्धसंज्ञितम्। नैमित्तिकं तु दातव्यं जातकर्मणि नान्दीश्राद्धमित्याचार्कः "आमान्नेन वा कार्यमित्यपि" तेनैवोक्तम्। गौडास्तु जातकर्मण्येव निषेधः पुत्रजन्मनिमित्तकं तु कार्यमेव "जन्मन्यथोपनयने" इत्युक्तेः "नैमित्तिकमथो यच्छ्राद्धमभ्युदयात्मकम्। पुत्रजन्मनि तत्कार्यं जातकर्मसमं नरैरिति" मार्कण्डेयपुराणाच्चेत्याहुः। क्वचित्तायां श्राद्धविवेके चैवम्। एतेन जातकर्मणि कालान्तरे श्राद्धनिषेधो न पुत्रजन्मदिने इति वाचस्पतिमतं परास्तम्। अत्र निषेककाले इति वचनात् गर्भाधाने न निषेधः "निषेककाले होमे च सीमन्तोन्नयने तथा। श्रेयं पुंसवने श्राद्धं कर्माङ्गं विधिवत्कृतम्" इति पारस्करः। प्रोषितेति "प्रोष्यैत्य स्टहानुपतिष्ठते पुत्रं दृष्ट्वा जपतीति" विहितं कर्म विवाहादिगर्भाधानान्तो यो स्टहप्रवेशचतुर्थीकर्मादिकर्मसमूह उक्तः स्वकारेण तत्रापि प्रतिकर्म नेत्यर्थः। अन्येऽपि हेत्वभियोगादयोऽपवादविषयास्तत्रैव

दैवाङ्गे चमत्कारात्तदुच्यते । अत्राधिकारिणः विष्णुपुराणे "जातस्य जातकर्मादि क्रियाकाण्डमशेषतः । पिता पुत्रस्य कुर्वीत श्राद्धं चाभ्युदयात्मकम्" । अत्र केचित् जीवत्पितृक एवाग्नेरेव दर्शश्राद्धेऽधिकारः न तु निरग्नेः "न जीवत्पितृकः कुर्याच्छ्राद्धमग्निमृते द्विजः । येभ्य एव पिता दद्यात्तेभ्यः कुर्वीत साग्निकः । पितामहेऽप्येवमेव कुर्याज्जीवति साग्निकः । साग्निकोऽपि न कुर्वीत जीवति प्रपितामहे" इति चन्द्रिकायां शुभलक्षेरित्याद्युक्तः प्रयोगपरिजातेऽप्यनाहिताग्निर्न कुर्यादितीदं व्याख्यातम् । तत्र "अनग्निकोऽपि कुर्वीत जन्मादौ दर्शकर्मणि । येभ्यएव पिता दद्यात्तानेवोद्दिश्य तर्पयेत्" इति हारीतोक्तेः सौमन्तवन्तु न दर्शश्राद्धपरमित्युक्तं मदनरत्ने श्राद्धपदं पिण्डपितृयज्ञपरमिति पृथ्वीचन्द्रोदयः । निर्णयाख्ये तु हारीतीयेऽनग्निको नाहिताग्निरभिप्रेतः पूर्ववचने तु साग्निः औताग्निः आर्त्ताग्निरुच्यते तेनोभयाग्निहीनस्य नेत्युक्तं तत्र पूर्वोक्तादिशा गतिसम्भवेऽनग्निपदस्य आर्त्ताग्निपरत्वे मानाभावात् वक्ष्यमाणनित्यानित्यसंयोगविरोधात् "पितरो जनकस्येच्छा यावद्व्रतमनाहितम् । समाहितव्रतः पश्चात्स्वान् यजेत पितामहान्" इति पृथ्वीचन्द्रोदये यमवचनविरोधाच्च अपरार्केऽपि यमावर्त्तने ब्रह्मचारी स्वयमेव नान्दीश्राद्धं कुर्यादित्याह यतः पूर्वमेव साधु सोपदेशोऽप्येवमाह । यत्तु मृतं जीवत्पितुः पुत्रनामकर्मादौ न दर्शश्राद्धम् । हारीतीये जन्मादावित्यादिशब्देन तत्प्राप्तावपि "उद्वाहे पुत्रजनने पितिष्ट्यां सौमिके मखे । तीर्थे श्राद्धेच यायाते मृते जीवतः पितुरिति" मैत्रपरिशिष्टे उद्वाह एव तस्योपसंहारात् एवं यत्र तु संस्कारादिपदं तदप्युद्वाहादिपरमेवेति, तत्र उद्वाहपदस्य स्वविवाहपरत्वस्यापि संभवात् पुत्रविवाहपरत्वे मानाभावात् "नामकर्मणि बालानां चूडाकर्मादिके तथा" इत्यादिभिर्नित्यश्राद्धस्य चौलाद्यङ्गत्वावगतौ नित्यानित्यसंयोगविरोधाच्च अतो जन्मादाविति सर्वसंस्कारसंग्रहः तथा च कात्यायनः "स्वपितृभ्यः पिता दद्यात् सुतसंस्कारकर्मसु । पिण्डानोदाहनात्तेषां तस्याभावे तु तत्क्रमात्" । सुतानां चौलादिसंस्कारेषु पिता स्वपितृभ्यः पिण्डान् श्राद्धम् "पिण्डदोऽंशहरश्चैषामिति" दर्शनात् ओद्वहनादिवाहपर्यन्तं दद्यात् विवाहस्य प्रथमः "नान्दीश्राद्धं पिता कुर्यादाद्ये पाणिग्रहे सुधीः । अत उर्ध्वं प्रकुर्वीत स्वयमेव तु नान्दिकम्" इति स्मृतेः तस्य पितृरभावे तत्क्रमात् "असंस्कृतास्तु संस्कार्या भ्रातृभिः पूर्वसंस्कृतैः" इति यः कर्मक्रमः तेन क्रमेण ज्येष्ठभ्रात्रादिर्दद्यादिति चन्द्रिकादयः हेमाद्रिस्तु "तस्य पितृरभावे यः पितृव्यमातुलादिः संस्कुर्यात्स तत्क्रमात् संस्कार्यपितृक्रमाद्दद्यात् न तु स्वपितृभ्य इति" व्याचख्यौ । समावर्त्तनस्यापि विवाहप्राक्कालीनसुतसंस्कारत्वात्पितैव नान्दीश्राद्धं कुर्यात् तदभावे ज्येष्ठभ्रात्रादि तदभावे स्वयमेव कुर्यात् उपनयनेन कर्माधिकारस्य जातत्वात् एवमाद्यविवाहेऽपीति पृथ्वीचन्द्रोदयचन्द्रिकादयः मदनरत्नेऽप्येवम् । यदा तु पितरि सन्यस्ते प्रोषिते पतिते वा धर्मार्थं तत्पुत्रभिन्नः संस्कुर्यात्तदा संस्कार्यपितुः पित्रादिभ्यो दद्यात् "पितरोजनकस्येच्छा यावद्व्रतमनाहितम् । समाहितव्रतः पश्चात् स्वान् यजेत पितामहान्" इति पृथ्वीचन्द्रोदये यमोक्तेः । जीवत्पितृकस्य विशेषमाह कात्यायनः "द्वौ तीर्थे च सन्यस्ते ताते च पतिते सति । येभ्यएव पिता दद्यात्तेभ्यो दद्यात् स्वयं सुतः" इति । यत्र बहूनां पितृणां मध्ये जीवत्पिता सुतसंस्कारेषु मातृभातामहयोः कुर्यात् तस्यां जीवन्त्यां मातामहस्यैवेति" तत्तच्छाखीयानामेवेति दिक् । सुतितत्त्वादिगौडपक्षेषु जीवन्मातृकः पितामहादिभ्यो दद्यात् "जीवन्मति दद्याद्वा प्रेतायाद्योदके द्विजः" इति कात्यायनोक्तेः "जीवे तस्मिन् सुताः कुर्युः पितामहा सदैव तु । तस्यां चैव तु जीवन्त्यां तस्याः स्वभूति निश्चयः" इति हारीतोक्तेश्चेत्युक्तम् । तस्मिन् मृते । दाक्षिणात्यास्तु पूर्वोक्तं सपिण्डीकरणादिविषयम् "जीवेत्तु यदि वर्षादूर्ध्वं वर्षान्तु परिवत्सरेत्" इति वचनात्तद्वर्षस्य शेष एवेत्याहुः । यत्तु चन्द्रिकायां पारस्करः "निषेकाद्ये सोमे च सीमन्तोन्नयने तथा । पुंसवने श्राद्धं कर्माङ्गं दर्शवच्च तत्" इति तत्र सर्वाधानादौ कर्माङ्गमूतं जातकर्मादावुक्तन्तु दर्शश्राद्धं पृथगेव विधित्वयपेक्षयम् । गौडनिबन्धे मातृके "अन्नप्राशे च सीमन्ते पुंसोत्पत्तिनिमित्तके । पुंसवे च निषेके च नवश्राद्धप्रवेशने । वेदव्रतव्रजादीनां प्रतिष्ठायां तथैव च । तीर्थयात्राद्यशोत्सर्गे दर्शश्राद्धं प्रकीर्त्तितम्" मार्विनिमित्तानामङ्गत्वे दर्शशब्दस्तदर्थातिदेशार्थ इति गौडाः "अन्ये तु निषेकादौ कर्माङ्गदर्शश्राद्धयोः समुच्चयमाहुः नान्दीश्राद्धेऽन्वयाद्गुणा । अस्मेतिकर्त्तव्यता पृथ्वीचन्द्रोदये वृद्धपराशरः "आसप्तमात् मातृपक्षात् मद्धिकाकुलयोरपि ।

वैतत्काः पाटलावा वा देया माता न लोहिता" श्राद्धे मातानिषेधस्यायमपवादः। तथा "हवेषमूषधैश्चैव चाण्डालैस्तथा नरैः। कुक्कुराद्यैस्तथा क्लैब्यैरन्त्यैराक्रुष्टैः सह। स्त्रियोऽपि क्षुत्तृषा भूता नीतव्याद्यादिदूषिताः"। हेमाद्रौ ब्रह्मखण्डे "कृतस्नाने च दूर्वाः क्षुर्मङ्गलस्नानमिष्टवर्वे"। कृषा अपि वह्नौ। छन्दोगपरिशिष्टे "मातरामन्त्रितान् विप्रान् युग्मानुभयतस्तथा"। उभयतः दैवे पित्र्ये च वैश्वदेवे द्वौ विप्रौ पित्रादीनामेकैकस्य द्वौ द्वाविति विंशतिः। त्रिके वा द्वौ द्वाविंशतिर्विप्राः। अत्र विप्राभावे स्त्रियोऽपि भोज्या इत्याश्वायनें उक्तत्वात्। "मातृश्राद्धे तु विप्राद्यालाभे पूजयेदपि। पतिपुत्रान्वितामन्यां योषितोऽपौ कुलोद्भवाः। मातृत्रिके च तत्रः मातामहीत्रिके चैत्यपौ" इति हेमाद्रिः। "अत्र पित्र्ये प्राङ्मुखाविप्राः प्राग्वे पित्र्ये चतुरस्रं मण्डलमिति, जयन्तः" हेमाद्रौ ब्राह्मे "विप्रान् प्रदक्षिणावर्त्तं प्राङ्मुखानुपवेशयेत्"। छन्दोगपरिशिष्टे "गोत्रनामभिरामन्त्र्य पितृभ्योऽर्घ्यं प्रदापयेत्। नात्रापसव्यकरणं न पित्र्यं तीर्थमिष्यते। व्यत्ययोत्तरकरान् युग्मान् कराप्याग्यपवित्रकान्। कृत्वार्घ्यं सव्यदातव्यं नैकैकस्यात्र दीयते" पित्रादेर्द्वौ द्वौ विप्रौ तयोर्दक्षिणकरौ संयोज्य प्रथमोपवेशितविप्रकरोपरि तन्त्रेण द्वयोरर्घ्यं दद्यादित्यर्थः। बहुत्वकारिकायां तु "दत्ताघ्यादेकदेशः स्यादर्घ्यदानं प्रतिद्विजम्। श्राद्धसिद्धिरपि मन्त्रस्य प्रतिब्राह्मणभिद्यते। प्रतिद्विजं पृथक्कुर्यात्त्रिरीक्षेत्तुमन्त्रवत्" इत्युक्तम् "मधु मधिति यत्रास्य विजपोऽभिरतिमिच्छताम्। गायत्र्यनन्तरं तत्र मधुमन्त्रविवर्जितम्। नक्षत्रेषु तथेदत्र कदाचित् पितृरुक्तकम्" तथा "सम्मज्जन्तिति तृप्तास्य प्रश्नस्थाने विधीयते। सुसम्मज्जन्तिति प्रोक्ते मेघमन्त्रं निवेदयेत्। अक्षय्योदकदानस्य अर्घ्यदानवदिष्यते। मन्त्रैव नियतं कुर्यात्र चतुर्थी कदाचन"। छन्दोदये ब्राह्मे "पठेच्छुनिरुक्तं तु यत्रि रुक्तं शुभं तथा। मान्दोरुक्तान् पितॄन् मन्त्रा ब्राह्मणेन समाचरेत्" तथा "शाल्यन्नं दधि मधूक्तं यदन्नाद्यं यथोक्तया। मिश्रीकृत्य तु चतुरः पिण्डान् श्रीरुक्तसंज्ञितान्। दद्यान्नान्दीरुक्तेभ्यस्तत्र पितृभ्यो विधिपूर्वकम्। ब्राह्मणानुक्तमूलानि यथोक्तं च विनियोजयेत्। तान्येव दक्षिणार्थन्तु दद्यादित्येषु सर्वदा"। तत्रैव चतुर्विंशतिमते "द्वौ द्वौ ब्राह्मणदैवे त्रिरुक्तावेकैकशो विनियोजयेत्। एकं मात्रा परं तूष्णीं दद्यात्तिस्रान् पृथक् पृथक्"। वसिष्ठः "प्राङ्मुखो दैवतीर्थेन प्राक्कुशेषु कृतेषु च। दत्त्वा पिण्डान् कुर्वीत पिण्डपात्रमधोमुखम्"। "नान्दीमुखेभ्यः पितृभ्यः श्राद्धेति वा पिण्डदानमन्त्रः"। इति इत्तिः। अत्र पिण्डाः अताक्षता इत्युक्तम्। तत्रैव भविष्ये "पिण्डनिर्वपणं कुर्याच्च वा कुर्याद्विचक्षणः। इद्विश्राद्धे महाबाहो! कुलधर्मानवेक्ष्य तु" आश्वलेयः "अग्नौ करणमर्घ्यं च वाहनं चावनेजनम्। पिण्डश्राद्धे प्रकुर्वीत पिण्डहीने निवर्त्तते" तेनात्र भोजनस्यैव प्रधानत्वादि विप्रस्य दमनं तदा तस्यैव पार्श्वस्य पुनराद्वत्तिरिति सिद्धम्। इद्विश्राद्धस्य भूतविषयं यथा पुत्रजन्मनिमित्तं मातृनिमित्तं च यथा विवाहादिनिमित्तमिति भेदः इति श्राद्धतत्त्व रघु० धृतम्। तद्विधानञ्च छन्दोगपरिशिष्टादौ दृश्यम्। इत्यतदंशाचरणादयो छन्दोभेदे स्त्री "चतुरश्रमिदं यदि वौ तौ च नान्दीमुखौ नौ" छन्दोम० तल्लक्षणञ्च।

**नान्दीवादिन्** पु० नान्दीं वदति वद-णिनि। १नान्दीश्लोकपाठके इत्यर्थे २भेर्यादिवादके च।

**नान्दीश्राद्ध** पु० नान्दीनिमित्तं नान्द्यर्थं वा श्राद्धम्। इद्विश्राद्धे नान्दीमुखशब्दे उदा०।

**नापित** पुंस्त्री शूद्रायां क्षत्रियात् जाते १सङ्कीर्णजातिभेदे पट्टिकायां कुवेरिण्यो जाते २सङ्कीर्णजातिभेदे च। "आर्द्रिकं कुलमित्रं च गोपालो दासनापितौ। एते शूद्रेषु भोज्यान्ना यश्चात्मानं निवेदयेत्" मनुः। "सच्छूद्रौ गोपनापितौ" "नराणां नापितो धूर्त्तः"। "ग्रामकामस्य गोपालं वनकामस्य नापितम्" भा०श०३२अ०। "नटी कापालिनी वेश्या कुट्टनी नापितात्मजा" कुट्ट नायिकोक्तौ तन्त्रम्। तस्य इत्तिः क्षुरकर्म। "उपोषितस्य व्रतिनः क्षुरकर्मणि नापितैः। श्मश्रुलोमनखानि स्युर्यावत् तैलं न संस्पृशेत्" स्मृतिः। स्त्रियां त्वात्वे ङीष्। नापितानि तद्भार्य्यायां पुंस्त्री० पचे ष्यञ् नापित्य तत्कर्मणि पुंस्त्री०।

**नापितशाला** स्त्री ६त०। क्षौरगृहे त्रिका०।

**नाभ्** स्त्री नभ-णिच्-क्विप्। नभनो बाधिकायां भोजस्य दीप्तौ "चतस्रो नाभो निहिताः" ऋ०८।७३।६। नाभो नभनो बाधिकाः भोजस्य दीप्तयः सायणः" भा०।

**नाभ** पु० "सुतात् अमीरथो अभ्ये तस्य नाभोऽभवत् सुतः" भाग०९।६।१२ उक्ते सूर्यवंशे नृपभेदे।

नाभक न० नह-ण्वुल्। वनतिक्ते वृक्षे राजनि०।
नाभस पु० १२च०ष्टङ्ज्ञातकोक्ते लग्नतः तत्तत्स्थानभेदस्थित षड्भेदेन बोधभेदे ते च तत्र तत्राख्यायाम् दृश्याः। ज्ञातकपद्धतौ तु ततः संख्योक्ताक्षोऽत्र दर्शने यथा "चरादिसंस्थैर्निखिलैर्यवैः स्यात् योगस्तु रज्जुः सर्वं२ बल२च। भाता३ शुभैः पापखगैश्च सर्पः५ केन्द्रस्थितैः खलमते दलौ तौ। समीपकेन्द्रद्वयगैर्गदाख्यः शत्रुस्थगैः स्याच्छकटो७ऽथ पक्षौ८। स्याद्युस्थितैः, पद्मसनन्दलं स्थितैस्तु ग्रहाटहकमामनन्ति। धनारिकर्मसंस्थितैस्तृतीयसप्तलाभगैः। तुरीयरन्ध्रारिपफगैस्त्रिधा वृषः१० प्रकीर्त्तितः। लग्नात्खगाः सौम्यखगाः खवल्लोः पापा यदा स्युः कुलिशं११ विलोमात्। यवो१२ऽथ मिश्राः कमलं१३ यदा ते केन्द्रात् परे तत्परतोऽथ वापी१४। लग्नादिकेन्द्रात् खलपर्वसंस्थेषु चतुर्षु भेषु ग्रहदन्ति योगान्। यूपेषुयष्टी१५।१६।१७रपि दग्धाष्टमर्क्षस्थानेषु नौकूटकत्रचापान्१८।१९।२०।२१।२२। अर्कात्चन्द्रात्पुरं२२ केन्द्रवाह्यातः सप्तकैर्यर्क्षैः। तस्मादेकान्तरे भद्रमे शक्र२४मर्यादपांनिधिः२५। आश्रयाश्रितजा योगा उक्ताः संख्याभवा अथ। गोल१ युग्म२त्रिशूलानि३ केदारः४ पाश५दामकौ६। वीणे७लेकचयस्थानस्थितैः खेटैर्विधाय तान्। यवयवौ न योगौ स्तः पूर्वोक्तत्वादिहोदितौ। क्रूरो रूपाढ्योऽटनो दुःखभावो रन्ध्रौ प्राग्लोभवेदन्यदेशे। नानास्थानैः संयुतः कर्मयुक्तो राजेष्टः स्याच्छकटे२ भूरिपुत्रः। नवे३ऽतिनैपुण्ययुतो धनी स्याद्दूनाधिकाङ्गश्च धनी खवल्लोः। खजि४ प्रवक्तो बहुभोगभोगे सर्वे५ऽतिदुःखी विषमोऽतिदीनः। यज्वा नानाशास्त्रयोगातिविज्ञो नित्योद्युक्तो द्रव्ययुक् स्याद्दामे६। रोगार्त्तः स्यात् खन्दनेनोपलीवी निःस्वो मूर्खो मित्रहीनो रथाख्ये७। योगे विद्वत्क्षेट मनुजोऽतिदुःखी दुष्टोऽटनः स्यात् कलिलश्चनिःस्वः। ग्रहाटके८ स्याद्दयायुतेष्टः सुखी सुभार्यः कलत्रप्रियश्च। कूपे१० दरिद्रः कृषिकारकः स्यात् प्रेष्यः सदुःखी बहुभोजनश्च। यष्टे११ऽतिदुःखी वयसस्तु मध्ये शूरः सदृपः सुभगः सुवक्षिट्। यवे१२ व्रतो१३मङ्गलतत्परश्च दाता च मध्ये वयसः सुखाढ्यः। पद्मे१४ चिरायुर्नृपतिर्यशस्वी गुणी धनी कीर्त्तिसमन्वितश्च। वाप्यां१५ चिरार्द्धसुखभाक् निधिज्ञ सतप्तो नैलोत्सवैस्तु चकितो मनुजो न दाता। यूपे१६ व्रती नियमवत् बहुसत्यशौचस्त्यागात्मवान् नरवरोऽपि च यायजूकः। वाणे१७ऽतिसुप्रधिक्षतः शरलक्ष्यिको मांसाशनश्च क्षमयाधनयुक्कुशिल्पः। शक्त्यां१८ धनेन रहितो विकलोऽतिदुःखी नीचोऽलसो बधपरः पुरुषश्चिरायुः। दण्डा१९ज्ञातः पुत्रदारधनहीनो जनोज्झितः। निर्धो दुःखितो नीचः प्रेष्यश्च मनुजो भवेत्। नौयोगा२०ऽजयशस्वसुखः कृषोऽतिकीर्त्तिर्भृशो धनाश्रयधनो बलिनोऽतिलुब्धः। कूटे२१ शठः कृपणवत्सनयोऽतिपापो निःस्वो वनाचलगडेषु कृताधिकारः। छत्रे२२ दयाधीक्षजनाश्रयः स्याद्दीर्घायुरादात्यसुखी कृपेटः। धनुष्कर्त्ते२३ शूरतरः सुखी स्यादादात्यनयोर्युग्रधिपश्च शौरः। चन्द्रार्द्ध२४ऽजयशस्वसुखः सुभगः सुखान्नभोगी नराधिपसमश्च बली धनाढ्यः। चक्राब्धये२५ नृपतिचक्रकिरीटरत्नप्रभाभासुराङ्घ्रियुगलो मनुजाधिनाथः। बहुरत्नार्थयुक्तः स्याद्भोगी पुत्रजनान्वितः। साधुर्वारिधियोगे२६ऽथ स्थिरवैभवसंयुतः। योगे गोले सत्यसामर्थ्यविद्याहीनो नीतिः सर्वकालं प्रवासी। युग्मे२ निःस्वोऽतिवपाश्वयुतो युक्तायुक्तज्ञानहीनान्नरः स्यात्। योगे त्रिशूले३ विघ्नश्च शूरः क्रूरः सतो ज्ञातरुचिर्नरः स्यात्। केदार४जातः कृषिकर्मकर्त्ता बहुप्रयोज्यः सुखितश्च सत्य। पाशे५ विशीलो बहुभृत्यवान्सुबंधुप्रपञ्चो बहुमायकश्च। दाम्नि६ श्रयुक्तः पशुनायकः स्यात् सेवोपकारी च वदान्यधीरः। वीणायोगे७ गीतज्ञत्वप्रियः स्यात् कीर्त्या युक्तः शोभकः स्याद्दनाम्। एते योगाः सर्वकालं विचिन्त्या वीर्यात् खेटानां प्रपूर्णा अपूर्णाः"।

नाभाक पु० ऋषौ "ऋषिर्नाभाको ब्रह्मर्षिः" निरु०१०।५ "नाभाकस्य प्रशस्तिभिः" ऋ० ८।४३।२ "नाभाकस्य ऋषेः" मा०।

नाभाग पु० वैवस्वतमनोः १पुत्रभेदे "ऐक्ष्वाकुश्चैव नाभागः" हरिवं० १० अ०। वैवस्वतमनोःपुत्रोक्तौ। भगीरथसुतस्रुतस्यपाञ्जले २स्रुतभेदे "भगीरथसुतो राजा श्रुत इत्यभिविश्रुतः। नाभागस्तु श्रुतस्यासीत् पुत्रः परमधार्मिकः। अम्बरीषस्तु नाभागिः सिन्धुद्वीपपिताऽभवत्" हरिवं० १५ अ०।

नाभागारिष्ट पु० वैवस्वतमनोः पुत्रभेदे "नारिष्टप्रांशुपशश्च नाभागारिष्टसप्तमाः" हरिवं० १०अ० तत्पुत्रोक्तौ

नाभि पु० नह-इञ् मत्वान्नादेशः। १ऋषिभेदे २शुक्लबन्धे ३चक्रमध्यांशे रथचक्रस्यपिण्डाम्। ४आग्नीध्रसुतपुत्रभेदे ५तत्प्रजासु वर्षभेदे च "तस्माद्वै वः आजनाभं ब

राजवर आग्नीध्रोनाभिकिंपुरुषहरिवर्षेलावृतरम्यकहिरण्मयकुरुभद्राश्वकेतुमालसंज्ञान्नव पुत्रानजनयत्। आग्नीध्रसुतात्तु नाभेरतुपदादीत्पत्तिक्रमेणैव संहनन बलोपेताः पित्रा विभक्ता आत्मतुल्यनामानि यथाभागं जम्बुद्वीपवर्षाणि बिभेजुः" भाग०५।२।२१ "नाभिरपत्य कामोऽजया मेरुदेव्या भगवन्तं यज्ञपुरुषमवहितात्माऽयजत" ५।२।१ भारतवर्षस्यैव जम्बुद्वीपवर्षमध्यस्थितत्वात् नाभिसंज्ञा नाभिवर्षशब्दे वक्तव्यकारणान्तरात्र तथा वा। ६प्राग्भक्ते (नाद) पुंस्त्री मेदि० स्त्रियां ङीप् वा। ७उदरावर्त्ते (गोँड) राजनि०। क्षुधुमृष्यान्तर्गते नाभिख्याने च मणिपूरं चक्रं यथाह तन्त्रसारे "तदूर्द्ध नाभिदेशे तु मणिपूरं सहाप्रभम्। मेघाभं विद्युदाभञ्च वह्नितेजोमयं ततः। मणिवद्भासितं तत्तु पद्मं मणिपूरं तथोच्यते। दशभिश्च दलैर्युक्तं डादिफान्ताक्षरान्वितम्। शिवेनाधिष्ठितं पद्मं विश्वालोकनकारणम्" इति। ८स्वगनाभिजाते क्लीवमदे मेदि०। "प्राप्ननाभिनदमज्जनमासु" माघः "प्राप्ननाभिरुदेति" पाठः छन्दोमञ्जरीसम्मतः। पुंस्त्वे "सप्तच्छदसदपङ्कजकोषकोमलैरुपाहितश्रीरुपनीवि नाभिभिः" किरा०। श्वेतद्रव्ये "उपमतोऽपि हि मद्गुजनाभितामु" रघुः सोमधारास्रावणार्थं दशापवित्रस्य मध्ये आबध्यमानायां ऊर्णायु च। "अधूव पवित्रसदनद्दशमवाङ् नाभि वितनुषुः" ताण्ड्य० ब्रा०१।२।७ भाष्यधृतब्राह्मणयोः सूत्रम्। संज्ञायामेतदनङ् कच् समा०। पद्मनाभः हिरण्यनाभ इत्यादि।

**नाभिकण्टक** पुं० नाभेः कण्टक इव। (गोँड) नाभेरावर्त्तभेदे शब्दर०। [जनि०।

**नाभिका** स्त्री नाभिरिव कायति कै-क। कटभीवृक्षे रा०

**नाभिगुलक** पुं० नाभौ गुलक इव। (गोँड) इति ख्याते नाभेरावर्त्तभेदे त्रिका०। [चँभेदे जटाधरः।

**नाभिगोलक** पुं० नाभौ गोलक इव। (गोँड) नाभेराव-

**नाभिज** पुं० नाभौ विष्णोर्नाभौ जायते जन-ड। चतुर्मुखे ब्रह्मणि त्रिका०। तस्य विष्णोर्नाभिकमलजातत्वात्तथात्वम्। नाभिजन्मादयोऽप्यत्र हेमच०।

**नाभिनाडी** स्त्री नाभेर्नाड़ी। नाभौ स्थितायां नाड्यां स्त्रियां नाडीभेदे "नाभेस्तु रसवाहायां नाड्यां गर्भनाभिनाड़ी प्रतिबद्धा" सुश्रु०।

**नाभिनाल** न० स्त्री नाभिस्थितं नालम्। नाभिस्थिते नाडे "नाभिनालस्य वालिनी" इत्युपाध्यानम् "तदङ्गुष्ठाच्युत नाभिनाला" रघुः।

**नाभिभू** पुं० नाभौ विष्णुनाभौ भवति भू-क्विप् ७त०। चतुर्मुखे ब्रह्मणि नाभिभवादयोऽप्यत्र।

**नाभिवर्द्धन** न० नाभेस्तत्स्थनाडीवर्द्धनं छेदनम्। नाड़ी छेदने "प्राङ्नाभिवर्द्धनात् पुंसो जातकर्म विधीयते" संस्कारतत्त्वे धृतमनुवचनम्। संहितायान्तु नाडीवर्द्धनादित्येव पाठः।

**नाभिवर्ष** पुं० नाभेराग्नीध्रस्यपुत्रस्य वर्षः। जम्बुद्वीपस्थे नववर्षमध्ये वर्षभेदे नाभिशब्दे उक्तम् तस्य नाभिसंज्ञकत्वेऽपि पश्चात् तत्कुलजभरतनाम्ना तत् ख्यातं तथाहि ऋषिवृषु० ३०अ० नाभिपुत्रस्य ऋषभस्य पुत्रो भरतस्तेन चिरं पालितत्वादस्य भारतवर्षेति संज्ञोक्ता। नाभिवर्षस्य भारतवर्षनामता दर्शिता ऋषभशब्दे १४५।१पृ० उक्ता। अतएव विष्णुपु०"नाभिश्च प्रथमं वर्षमिलृपक्रमे नव वर्षाणि उक्ता "भारतस्यास्य वर्षस्य नव भेदान्निशामय" इति। नाभिवर्षस्यैव भारतवर्षत्वेन उक्तिः।

**नाभिल** त्रि० नाभिरस्यास्ति अर्शा० अच्। दीर्घनाभियुक्ते

**नाभिसम्बन्ध** पुं० नाभेरेकत्र गर्भजातनाड्या सम्बन्धः। स्वनाभितायां गोत्रसम्बन्धे सपिण्डानां श्लोकत्र गर्भे जायमानतया नाडीसम्बन्धत्वम्। "अशुते च ततः शोको नाभिसम्बन्धसम्भवः" भट्टिः।

**नाभ्य** त्रि० नाभये हितः शरीरावयवत्वात् यत् "नाभेर्नभ-ञ्जेति" पा०न० नभादेशस्तु दृढ न तस्य नभादियता सन्नियोगशिष्टत्वात् रथचक्रावयवार्थत्वे एव नभादेशो नेष्ट। १नाभये हिते २नाभिसम्बन्धिनि च ३नभ्रादेवे पुं० "नमो नाभाय नाभ्याय नमः कटकटाय च" भा०शा०२८अ०

**नाम** अव्य० नाम्यते नामि-ड। १कोपे २उपगमे ३प्राकाश्ये ४सम्भावनायां ५कुत्सने च अमरः।

तत्र कोपे "नमापि नाम दयानस्य परैरभिभवः"। उपगमः साङ्गयोङ्गीकारः "एवं नामास्तु"। प्राकाश्ये "हिमालयो नाम नगाधिराजः"। हिमालयः प्राकाश्येनातिप्रसिद्ध इत्यर्थः। सम्भावनायां "दृष्ट नाम सीता भविष्यति"। कुत्सने "कोनामायं सविस्तरदवे स्नापमेवं विधत्ते"। तट्टीकायां भरतः। ५विष्णवे हरिवंशे ७विष्णुसे च मेदि०। विष्णवे "अन्योनाम गिरिमारोहति" शब्दलोके च "अहश्च भीतोनामावमुतः" दशकु०। मिथ्याभीत इत्यर्थः।

**नामकरण** न० नाम्नः करणं यत्र। संस्कारभेदे तत्र तत्कालादिनिरूपणं ज्यो० त० यथा "एकादशे द्वादशे वाऽहनि पिता नाम कुर्यादिति" श्रुतिः। एकादशे इति सूत्रः कल्पः "समवेतञ्च चेषायोगादिति" न्यायात् एतच्च परपरप्रशस्ततरतमकालोदितकर्मेतरकर्मपरम्। गोभिलः "जननाद्दशरात्रे व्युष्टे शतरात्रे संवत्सरे वा नामधेयकरणमिति"। व्युष्टे गते। गर्गः "आदौ घोषवदक्षरं अवसानाध्ये पुनः स्थापयेदन्ते दीर्घविसर्जनीयरहितं नाम प्रयत्नात् कृतम्"। "ऋक्षे तिथ्यकरात्रिसौम्यवसुभे चित्रानुराधोत्तरपौष्ण हादितिरोहिणीषु शुभकृत् पुंसां समैरक्षरैः" दीपिकाक्षरसात् स्वातीशतभिषाश्रवणा अत्र पाह्याः। गोभिलसम्मतं पूर्वार्द्धम् देवनामकम्" तेन नारायणजनार्दनादि नाम कुर्यात्। यत्तु नामकरणम् कुलदेवतानक्षत्राभिसम्बन्धं पिता नाम कुर्यादन्यो वा कुलवृद्धः" इति कल्पतरुधृतयज्ञविश्वितवचनेनाभिवादनीयं नामधेयं कल्पयित्वा "देवताश्रयं नक्षत्राश्रयं गोत्राश्रयमन्यद्वयम्" इति गोभिलसूत्रेणोपनयनकाले च नक्षत्राभिसम्बन्धेन नामाधिधानं तत् शतपदचक्रानुसारात् स्वनक्षत्रपदानुसारात् श्रेयम्। पाह्यास्यानां तथैव व्यवहारः। यत्र तु न तथा कृतम्। तत्र नामाक्षरानुसारेनक्षत्रादपि फलं श्रेयम्। यत्र कुलवृद्ध इति दर्शनात् संस्कारान्तरे तथैव व्यवहारः। मनुः "स्त्रीणां सुखोद्यमक्रूरं विस्पष्टार्थं मनोहरम्। मङ्गल्यं दीर्घवर्णान्तमाशीर्वादाभिधानवत्"। गोभिलः "अयुग्दान्तं स्त्रीणामिति"। यथा यशोदा वसुदेवादि। नारायणपङ्कतौ। "नामकरणं स्थिरलग्ने केन्द्रपञ्चनवमस्थितसौम्ये। लग्नायष्टसमधिष्ठित धामे जीवशुक्रगणिसौम्यदिनेषु" ज्यो० त०। विष्णुपु० "ततश्च नाम कुर्वीत पितैव दशमेऽहनि। देवपूर्वं नराख्यं हि शर्मवर्मादिसंयुतम्" इति। नरमाचष्टे इति नराख्यं नरनाम देवात् पूर्वं तच्च विशिष्टं शर्मयुतम्। "शर्मा देवश्च विप्रस्य वर्मा त्राता च भूभुजः। भूतिर्दत्तश्च वैश्यस्य दासः शूद्रस्य कारयेत्" इति वचने वसुशब्दोपलक्ष्येः "शर्मान्तं ब्राह्मणस्य स्यात्" इति भातातपीयेन शर्मान्तता च। गोभिलः "अयुग्दान्तं स्त्रीणाम्। अयुग्माक्षरं दान्तं यथा यशोदा इत्यादि। "देवं गुरुं गुरुस्थानं चेत्रं चेत्राधिदेवताम् सिद्धं सिद्धाधिकारांश्च श्रीपूर्वं वसुदीरयेत्" इति राघवभट्टधृतप्रयोगसारदर्शनात् स्वर्गगामित्वादिना सिद्धः अधिकारो येषां नराणामित्यनेन जीवतां श्रीशब्दादित्वं नाम्नो न मृतानां तथेति शिष्टाचारः" संस्कारत०। अत्र भट्टाभाष्यं यथा दशम्यां वाग्विकाः पठन्ति। "दशम्युत्तरकालं पुत्रस्य जातस्य नाम विदध्यात् घोषवदाद्यन्तरन्तस्थमहद्वं त्रिपुरुषानुकमनरप्रतिष्ठितं तद्धि प्रतिष्ठितं भवति द्व्यक्षरं चतुरक्षरं वा नाम "कृतं कुर्यात्र तद्धितमिति"। नचान्तरेण व्याकरणं कृतसन्धिता वा शक्या विज्ञातुमिति"। "दशम्या उत्तर इति पञ्चमीति योगविभागात् समासः। ततः कालशब्देन षष्ठ्यन्तेन क्रियाविशेषणं चैतत्। दशदिनान्वाशौचं भवतीति दशम्युत्तरकालमित्युक्तम्। यद्यपि स्मृतिकाराः पठन्ति दशम्यां पुत्रस्येति तैरपि दशम्यामिति सामीपिकमधिकरणं व्याख्येयम्। घोषवन्तो ये वर्णाः शिक्षायां प्रदर्शितास्तदादि। अनरन्तस्थमिति। मध्ये यरलवा यस्य तदित्यर्थः। त्रिपुरुषानुकमिति। नामकरणे योऽधिकारी पिता तस्य ये त्रयः पुरुषास्तानुकायत्वमिधत्त इति त्रिपुरुषानुकम् अन्येषामपि दृश्यत इति दीर्घ" इति कैयटः।

**नामग्राह** त्रि० नाम–ग्रहाति ग्रह–अच् उप० स०। १नामग्राहके। भावे घञ्। २नामग्रहणे पु० "दैवेनसात् पित्रात्र नामग्राहात्" मनु० १०।१।१२।

**नामग्राहम्** अव्य० नाम+ग्रह–"नाम्न्यादिशिग्रहोः" पा० णमुल्। नाम गृहीत्वेत्यर्थे "नामग्राहमरोदीत् सा भ्रातरौ रावणान्तिके" भट्टिः "नामग्रहणविशिष्टस्य रोदनक्रियाया व्याप्यमित्वाद्रुदिरिह सकर्मकः" जयम०।

**नामद्वादशी** स्त्री द्वयोर्दशनां समाहारः द्वादशी ह्रस्वः। १गौर्यादिनाम्नां १२द्वादशके तन्नाम्ना देव्युद्देश्यकव्रतभेदे च तानि नामानि च "गौरी काली उमा भद्रा दुर्गा कान्तिः सरस्वती। सप्तैता वैष्णवी लक्ष्मीः शिवा नारायणी क्रमात्। मार्गशीर्षादितोमासारभ्य पूर्वोक्तं सप्तमे फलम्" देवीपु०। पूर्वोक्तं फलं मार्गादिद्वादशमासेषु क्रमात्-एतद्व्रतफलम्।

**नामधातु** पु० नामपूर्वको धातुः। सुबन्तनामप्रकृतिके प्रत्ययान्तधातुभेदे पुत्रकाम्यादौ धातौ आत्मनः पुत्रमिच्छतीति वाक्ये द्वितीयान्तपुत्रनामः काम्यच् तत्परे विभक्तिलोपे तदन्तस्य प्रत्ययान्तत्वात् धातुसंज्ञा।

**नामधारक** त्रि० नामनामं धरति न तदर्थं करोति धृ–ण्वुल्। नाममात्रधारके विहितक्रियावर्जिते विप्रादौ "अत ऊर्द्ध्वन्तु ये विप्राः केवलं नामधारकाः। परिभवं

न तेषां वै सङ्कल्पगुणितेष्वपि। यथा काष्ठमयो हस्ती यथा चर्ममयो मृगः। ब्राह्मणास्तनधीयानास्त्रयस्ते नामधारकाः" पराशरः। "यथा काष्ठमयो हस्ती यथा चर्ममयो मृगः। यश्च विप्रोऽनधीयानस्त्रयस्ते नाम बिभ्रति" मनुः।

**नामधेय** न० नामन्+स्वार्थे धेय। नामशब्दार्थे "नामधेयानि पृच्छन्तौ वन्यानां मार्गशाखिनाम्"। नामधेयं गुरुश्चक्रे जगत्प्रथममङ्गलम्" रघुः "नामधेयं दशम्यान्तु द्वादश्यां वाथ कारयेत्" मनुः "वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्" छा०उप०

**नामन्** न० ख्यायते अभ्यस्यते नम्यतेऽभिधीयतेऽर्थोऽनेन वा ख्या–नम–वा। "नामन्सीमन्व्योमादिना" नि०। १वाचकशब्दे २संज्ञायाञ्च। नमति ख्याप्यातार्थं प्रति स्वार्थविशेषणत्वेन नम–नि०। क्रियां प्रति विशेषणतापन्नार्थके प्रातिपदिकरूपे १शब्दभेदे "चत्वारि पदजातानि नामाख्याते चोपसर्गनिपाताश्च तानीमानि भवन्ति तत्तैतन्नामाख्यातयोर्लक्षणं प्रदिशन्ति भावप्रधानमाख्यातं सत्वप्रधानानि नामानि" निरु० १।१

एतल्लक्षणभेदादिकं शब्द०प्र० उक्तं यथा "निरुक्ता प्रकृतिर्द्वेधा नामधातुप्रभेदतः। यत् प्रातिपदिकं प्रोक्तं नञ्शब्दो नातिरिच्यते" "रूढ्यञ्च लक्षकञ्चैव योगरूढ्यञ्च यौगिकम्। तच्चतुर्धा परैरूढ्यौगिकं मन्यतेऽधिकम्। रूढं सङ्केतमात्रं स्यात् संज्ञेति कीर्त्यते। नैमित्तिकी पारिभाषिकौपाधिकापि तद्विदा। जातिद्रव्यगुणस्वन्द्वैर्भेदैः सङ्केतवत्तया। जातिशब्दादिभेदेन चातुर्विध्यं परे जगुः। जात्यवच्छिन्नसङ्केतवती नैमित्तिकी मता। जातिमात्रे हि सङ्केताद्रूढ्भेदं सुदुष्करम्। उभयाद्वस्तुधर्मेण संज्ञा स्यात् पारिभाषिकी। औपाधिकी त्वनुगतोपाधिना वा प्रवर्त्तते। यद्वाऽऽधुनिकसङ्केतशास्त्रित्वात् पारिभाषिकम्। जात्या नैमित्तिकं गुणौपाधिकस्वपाधिना"। प्रकारान्तरेण तच्च पञ्चविधं यथा "उणादयन्तं कृदन्तञ्च तद्धितान्तं समासजम्। शब्दानुकरणञ्चैव नाम पञ्चविधं स्मृतम्"। "सर्वाण्येतानि नामानि परस्य ब्रह्मणोऽनघ!। सर्वान् कामानवाप्नोति समाराध्य जगद्गुरुम्। तन्नामत्वेन गोविन्दमिमं तद्वाक्यमन्यथा। नान्यथा। तन्नामो वाञ्छितान् कामान् यदवाप्नोति मानवः" विष्णुधर्मवचनम्। कलौ परमेश्वरनामकीर्त्तनादेव श्रेयःप्राप्तिः "हरेर्नाम हरेर्नामैव केवलम्। कलौ नास्त्येव नास्त्येव नास्त्येव गतिरन्यथा" अधिकं कलिशब्दे १७८७पृ० उक्तम्। हरेरित्यनुवादेन देवीभागवते हरिनाम्नः १।च० देव्यानाम्नः कीर्त्तनस्यापि कलौ श्रेयस्करत्वाभिधानात् यथा "न सन्त्यघानि तावन्ति यावती शक्तिरस्ति हि। नाम्नि देव्याः पापदाहे तस्माद्भीतिः कुतो नृप!। अवशेनापि यन्नाम कीर्त्तयेत्कीर्त्तनं यदि। किं किं ददाति तज्ज्ञातुं समर्थो न हरादयः। प्रायश्चित्तन्तु पापानां श्रीदेवीनामसंस्मृतिः। तस्मात् कलिभयाद्राजन् पुण्यक्षेत्रे वसन्नरः। निरन्तरं परास्वाया नामसंस्मरणं चरेत्"। "उपस्थितेयं कल्याणी नाम्नि कीर्त्तित एव यत्" रघुः। ४चदङ्के निरुक्तेः। चैत्रमैत्रादिसंज्ञायाः सर्वत्र पतपदचक्रानुसारेण कृतायाः जन्मनामता प्रसिद्धनाम तु ततोऽन्यदेव तत्र मन्त्रयज्ञादौ नाम्नो यथा यज्ञं तच्चिरूपितं तन्नामसारे यथा

नामयज्ञप्रकारमाह पिङ्गलामते "प्रसिद्धं यद्भवेन्नाम किं वास्य जन्म नामयत्। यतीनां पुण्यपातेन गुरुणा यत् कृतं भवेत्। लोकप्रसिद्धमथ वा माता पिता च यत् कृतम्" यामले। "सुप्तो जागर्त्ति येनाशौ दूरस्थञ्च प्रभाषते। यदत्यन्तमनस्कोऽपि तन्नाम प्राह्यमत्र तत्"। सनत्कुमारीये "पितृमातृकृतं नाम त्यक्त्वा गर्भादिदेवकान्। श्रीवर्षञ्च ततो विद्वान् चक्रेषु योजयेत् क्रमात्"।

**नामनामिक** पु० नाम्नि नामः नमनं प्रह्वता यस्यस्य ठन्। परमेश्वरे "जितमानसिक! नामनामिक!" भा०शा०३ ४०अ० विष्णुनामोक्तौ।

**नाममात्र** त्रि० नाम संज्ञैव मात्रा यस्य। स्ववीर्यहीने संज्ञाधारिमात्रे "यथा काकवयाः प्रोक्ता यथाऽरण्ये मयास्त्रियाः। नाममात्रा न सिद्धौ हि धनहीनास्तथा नराः" पञ्चत०।

**नाममाला** स्त्री हृत०। कोषभेदे

**नाममुद्रा** स्त्री नामाक्षरस्य मुद्रा यत्र। अङ्गुलीयकभेदे यत्र नामाक्षराणि अङ्कितानि सन्ति तादृशे मुद्राभेदे

**नामयज्ञ** पु० नाममात्रेण यज्ञः नामप्रसिद्धये वा यज्ञः। दम्भतो ख्यातिलाभाय वा कृते यज्ञे यथोक्तं "ख्यातिदम्भाविताक्षाश्च धनमानमदान्विताः। यजन्ते नामयज्ञैस्ते दम्भेनाविधिपूर्वकम्" गीता "नाममात्रेण ये यज्ञास्ते नामयज्ञा यदा दीक्षितः सोमयाजीत्येवमादिनाममात्रप्रसिद्धये ये यज्ञास्ते नामयज्ञास्तैः" श्रीधरः।

**नामलिङ्ग** न० नाम च लिङ्गं च ते नाम्नो वा लिङ्गम् । १शब्दलिङ्गयोः २शब्दभेदस्य लिङ्गभेदे च "नामलिङ्गानुशासनम्" अमरः । लिङ्गञ्च शब्दशब्दप्र० निरूपितं यथा "स्त्रीलिङ्गमपि पुंलिङ्गं क्लीवलिङ्गमिति त्रिधा । शब्दसंस्कारसिद्ध्यर्थं भाषया नाम भिद्यते" स्त्रीलिङ्गं पुंलिङ्गं नपुंसकलिङ्गमित्यपि त्रिधा नाम भिद्यते तत्र स्त्रीलिङ्गत्वादिकं न स्त्रीत्वादिवाचकत्वं तटः तटी तटमित्यादौ प्रकृत्यर्थस्य तटादेः स्त्रीत्वाद्यवगतावयोग्यतापत्तेः । परन्तु स्त्रीलिङ्गत्वादिना परिभाषितत्वमात्रं परिभाषायाः प्रयोजनत्वेन पदसंस्कारः सोऽपि तट इत्यादौ पुंस्त्वेन सुवादिसद्भावः । तटीत्वादौ स्त्रीत्वेन ङीवादिप्रत्ययः तटमित्यादौ क्लीवत्वेन सुवादेर्लुगादिरिति दुन्दुभौ सुवर्णे इत्यादौ तु शब्दसंस्कारस्यैव फलमर्थविशेषस्य लाभो न स्यात् दुन्दुभिरिदं सुवर्णमित्यादितोऽन्वयाशीतिरत्तिकापरिमितस्वर्णादेरवगमः । यत्र च सम्यदादिशब्दे स्त्रीलिङ्गत्वादिप्रयुक्तो नास्ति संस्कारस्य विशेषस्तात्पर्यभेदेन तत्राकाङ्क्षे शोभनादिपदे एवास्ति विशेष्यपदानां विशेष्यपदलिङ्गप्राप्तित्वस्य विना बाधकं नियमात् । यत्तु तटादिकं द्रव्यमिव तद्गतं स्त्रीत्वादिकं पदार्थान्तरमपि तटादिपदस्यार्थः प्रत्ययानान्तु तद्गुणकतामात्रमिति वैयाकरणैरुक्तं तन्न युक्तं तटादिपदेभ्यष्टाप्त्वादिनेव प्रत्ययान्तरेण स्त्रीत्वादिना तटादेरननुभवेन तादृशपदार्थान्तरे प्रमाणाभावात् न त्रिषा वेदसूत्रेरेदित्वादौ च टाबादिना प्रत्ययेनैव स्वार्थस्य योन्यादिसत्त्वलक्षणस्त्रीत्वस्य प्रकृत्यर्थेऽनुभवनात् न प्राप्नि प्राप्नुयाद्दायं न विप्रोऽध्ययनं त्यजेत्" इत्यादावपि सुप्राप्नुप्राप्यां सुब्भ्यामेवोपस्थितं विलक्षणसंस्थानरूपं नपुंसकत्वं प्राप्निनि पुंस्त्वञ्च विप्रेऽनुभूयते" । [स्ते हेमच० ।

**नामशेष** त्रि० नाममात्रं शेषोऽस्य । कथामात्रशेषे देहान्तरे

**नामसंग्रह** पु०नाम्नां शब्दभेदानां संग्रहः । नाम्नामर्थवत्तया पर्यायशब्देन एकत्र कीर्त्तने ७त०।२तदाधारे अभिधाने च

**नामाख्यातिक** पु० नाम च आख्यातञ्च (तत्प्रतिपादके) तयोर्व्याख्यानो ग्रन्थः नामाख्यात+ठञ् । नामाख्यातप्रतिपादकग्रन्थयोर्व्याख्याने ग्रन्थे

**नामाङ्क** त्रि० नाम नामाक्षरमेवाङ्को यत्र । नामाक्षरेणाङ्किते "नामाङ्कदानाङ्कितकेतुयष्टिम्" रघुः ।

**नामादेयम्** अव्य० नाम आदिश्य नामन्+आ+दिश-यत्+ । नाम आदिश्येत्यर्थे ।

**नामानुशासन** न०अनुशिष्यते अर्थविशेषवत्तया ज्ञाप्यतेऽनेन अनु+शास-करणे ल्युट् । शब्दानामर्थविशेषज्ञापके अभिधाने कोषे । तेन हि इमे शब्दा एतदर्थे इत्तिमन्त इति प्रतिपाद्यते इति तस्य तथात्वम् ।

**नामापराध** पु० नाम्नि तद्विषये अपराधः । भगवदादिनामादिषु अवज्ञादिरूपे अपराधे नामापराधाश्च केचित् पाद्मोत्तरख० १०२ अ० दर्शिता यथा

"सतां निन्दा नाम्नां परममपराधं वितनुते यतः ख्यातिं यातस्तदुपहसते गर्हयति च । तथा विष्णोरिदं य इह सुधनामादि सकलं धिया भिन्नं पश्येत् स खलु हरिनामाहितकरः । गुरोरवज्ञा श्रुतिशास्त्रनिन्दनं तथार्थवादो हरिनाम्नि कल्पनम् । नाम्नां बलाद्यस्य हि पापबुद्धिर्न विद्यते तस्य शठस्य शुद्धिः । दिवौकसां गुरोः पित्रोर्भूसुराणाञ्च गर्हणम् । नामापराधं यत्तत् स्यादैश्वर्यवतां तथा नृणाम् । गोऽश्वत्वतुल्यधीर्यावन्नैर्ऋतिं तावदिन्दति नारद !। नामापराधो न भवेन्नामगोविन्दवैभवात् ।

**नास्य** पु० नास्ति अश्वः कर्षणादिजन्यप्राणिहिंसा यत्र नञ्-ब्रह्मेन समासः । अकृष्टपच्ये स्वयंजाते व्रीह्यौ

"अथ मित्राय सत्याय नास्यानां चरुं निर्वपति तदेनं मित्र एव सत्यो ब्रह्मणे सुवत्यथ यन्नास्यानां भवति वरुणो वा एता ओषधयो याः कृष्टे जायन्ते अथैते मैत्रा यन्नास्यास्तस्मान्नास्यानां भवति" शत०ब्रा०५।३३।८

"नास्या नाम अकृष्टपच्याः स्वयंजाता व्रीहयः कृष्टेनोत्पन्ना ओषधयो वरुणाः कर्षणादिजन्यहिंसासम्बन्धात्" भा० ।

**नाय** त्रि० नी-कर्त्तरि घ । १नेतरि २उपाये "नायः कोऽस्य स येन स्यां पतार्हं विगतज्वरः" भट्टिः । भावे घञ् । ३नीतौ नयने पु० "यात यूयं यमस्यायं दिशं नायेन दक्षिणाम्" भट्टिः ।

**नायक** त्रि० नी-ण्वुल् । १प्रापके २प्रभौ ३श्रेष्ठे ४प्रधाने हारमध्यमणौ च पु०मेदि० ५आद्यसरिके सेनापतौ स्त्रिका० ६शृङ्गारालम्बने च । "स च त्रिविधः पतिरूपपतिर्वैशिकश्चेति । तत्र विधिवत् पाणिग्राहकः पतिः । अनुकूल दक्षिणधृष्टशठभेदात् पतिश्चतुर्धा । सार्वकालिकपराङ्मुखापराङ्मुखत्वे सति सर्वकालमनुरक्तोऽनुकूलः । सकलनायिकाविषयसमसक्तजातरागो दक्षिणः । भूयो निःशङ्कः कृतदोषोऽपि भूयो निवारितोऽपि भूयः प्रणयपरायणो

धृष्टः। कामिनीविषयकपटपटुः शठः। आचारहानि हेतुः पतिरूपपतिः। वञ्चकवेश्याभोगोपरसिको वैशिकः। त्रिविधोऽपि उत्तममध्यमाधमभेदात् पुनस्त्रिविधः। दयिताभूयःप्रकोपेऽपि उपचारपरायण उत्तमः। प्रियायाः यः प्रकोपमनुरागं वा न प्रकटयति चेष्टया मनोभावं गच्छति च मध्यमः। भवत्यपाङ्ग्याभूम्यः कामक्रीड़ायामलतलत्वाल्लत्वविचारोऽधमः। मानी चतुरश्च शठ एवान्तर्भवति। वाक्चेष्टाभ्यङ्गप्रसाधनचतुरः। प्रोषितश्च पतिरूपपतिर्वैशिकश्च भवति। अनभिज्ञनायकोनायकाभास एव। तेषान्तु नर्मसचिवपीठमर्द्दविटचेटकविदूषकभेदाच्चतुर्धा सङ्गायाः। कुपितस्त्रीप्रसादकः पीठमर्दः। नर्मसचिवोऽयमेव। कामतन्त्रकलाकोविदो विटः। सुवचनचतुरश्चेटकः। अङ्गादिवैकल्यवेषहासकारी विदूषकः। तेषामष्ट सात्विकानुभावा यथा। स्वेदस्तम्भोऽथ रोमाञ्चः स्वरभङ्गोऽथ वेपथुः। वैवर्ण्यमश्रु प्रलयाविति सात्विका अष्टौ। तेषां दशावस्था यथा "अभिलाषस्तथा चिन्ता स्मृतिश्च गुणकीर्त्तनम्। उद्वेगश्च प्रलापश्च उन्मादो व्याधिरेव च। जड़ता निधनान्येव दशावस्थाः प्रकीर्त्तिताः" इति रसमञ्जरी। साहि० अन्यथाभेदा दर्शिता यथा। "आलम्बनं नायकादिस्तमालम्ब्य रसोद्गमात्" तत्र नायकः। "त्यागी कृती कुलीनः सुश्रीको रूपयौवनोन्माही। दक्षोऽनुरक्तलोकस्तेजोवैदग्ध्यप्रश्रयवान् नेता। धीरोदात्तो धीरोद्धतस्तथा धीरललितश्च। धीरप्रशान्त इत्यसङ्ख्यः प्रथमं चतुर्भेदः। अविकत्थनः क्षमावानतिगम्भीरो महासत्वः। क्षेयान् निगूढमानो धीरोदात्तो दृढ़व्रतः कथितः। मायापरः प्रच्छन्नपापोऽहङ्कारदर्पभूयिष्ठः। आत्मश्लाघानिरतो धीरैर्धीरोद्धतः कथितः। निश्चिन्तो बहुरागी कलापरो धीरललितः स्यात्। सामान्यगुणैर्भूयान् द्विजादिको धीरप्रशान्तः स्यात्। एभिर्द्विविधैरुक्तलक्षणैर्विभिन्नभेदोऽपि। एषु त्वनेकमहिलासु समरागो दक्षिणः कथितः। ज्ञातागा अपि निःशङ्कसख्यिंतोऽपि न लज्जितः। दृष्टोऽपोऽपि मिथ्यावाक् कथितो धृष्टनायकः। अनुकूल एकनिरतः शठोऽयमेकत्र वल्लभावो यः। दर्शितबहिरनुरागो विप्रियमन्यत्र गूढमाचरति। एषान्तु त्रैविध्यात् सर्वेषामुत्तममध्याधमत्वेन। उक्ता नायकभेदाश्चत्वारिंशत्तथाऽष्टौ च" तत्र प्रभौ "तव वरद! करो तु सुप्रातमङ्गलमयं नायकः" भावः शक्तिसम्पन्ने श्रेष्ठे चारमध्यमधौ च "यातव्यपार्श्वपार्श्वादिभावाभावमधिकद्युतिः। एकार्थतन्तुगोतायां नायको नायकायते" भावः "रामोऽरिः करी मूर्खो भ्रातुः कर्त्ता च चन्द्रमाः। तस्विवान् भगवानात्मा दशैते नृषि नायकाः"।

**नायकाधिप** पु० ६त०। स्वामिनि शब्दरत्ना०।

**नायिका** स्त्री नी-ण्वुल् टाप इत्त्वम्। १प्रापिकायां स्त्रियां २शृङ्गाररसालम्बनभूतायां स्त्रियां च तद्भेदादि साहि० उक्तं यथा

"अथ नायिका त्रिविधा स्वाऽन्या साधारणस्त्रीति। नायकसामान्यगुणैर्भवति यथासम्भवैर्युक्ता। विनयार्जवादियुक्ता स्वकर्मपरा पतिव्रता स्त्रीया। साऽपि कथिता त्रिविधा मुग्धा मध्या प्रगल्भेति। प्रथमावतीर्णयौवनभरविकारा रतौ वामा। कथिता मृदुरुपचारे समधिकलज्जावती मुग्धा। मध्या विचित्ररतिरा प्रहृष्टरतियौवना। ईषत्प्रगल्भवचना मध्यमव्रीडिता मता। प्रगल्भा गाढ़तारूण्या समस्तरतकोविदा। भावोन्नता दरव्रीड़ा प्रगल्भाऽऽक्रान्तनायका। ते धीरा धीरमध्या च धीराधीरेति षड्विधे। प्रियं रोषप्रसवकोक्त्या मध्याधीरा दहेद्भृशम्। धीराधीरा तु रुदितैरधीरा परुषोक्तिभिः। प्रगल्भा यदि धीरा स्याच्चकोक्तिस्तदा। उदास्ते सुरते तत्र दर्शयन्त्यादरान् बहिः। धीराधीरा तु रोक्तुरुक्तभाषितैः खेदयेदसून्। तर्जयेत्ताड़येदन्या प्रत्येकं ता अपि द्विधा। कनिष्ठज्येष्ठरूपत्वान्नायक प्रथमं प्रति। मध्याप्रगल्भयोर्भेदात्षडादय कीर्त्तिताः। मुग्धा त्वेकैव तेन स्युः स्त्रीयाभेदाश्चयोदश। परकीया द्विधा प्रोक्ता परोढा कन्यका तथा। यात्रादिनिरताऽन्योढा कुलटा गणिकतापा। कन्या स्वजातो प्रथमा सलज्जा नवयौवना। धीरा कलाप्रगल्भा स्यादेषा सामान्यनायिका। निर्गुणानपि न द्वेष्टि न रज्यति सुखिष्वपि। वित्तमात्रं समालोक्य सा रागं दर्शयेद् बहिः। कामयन्तीमतमपि परित्यक्ष्यधनं नरम्। मात्रा निरुद्धाऽन्यवेदेषा पुनःसम्भोगकाङ्क्षया। तस्करा पण्यकामूर्खाः सुरतप्राप्तधनास्तथा। स्निग्धेनस्वल्पकामाद्या आसां प्रायेण वल्लभाः। एषापि मदनावस्था काऽपि सत्यानुरागिणी। रक्तायां वा विरक्तायां रतमस्यां सुदुर्लभम्। अवस्थाभिर्भवन्त्यष्टावेताः षोड़शभेदिताः। स्वाधीनभर्तृका तद्वत् खण्डिताऽथाभिसारिका। कल-

ष्टान्तरिता विप्रलब्धा प्रोषितभर्तृका। अन्या वासक-सज्जा स्वादिरुत्कण्ठिता तथा। कान्तोरतिगुणाक्षिप्तो न जहाति यदन्तिकम्। विचित्रविभ्रमासक्ता सा स्यात् स्वाधीनभर्तृका। पार्श्वमेति प्रियो यस्या अन्यसम्भोग-चिह्नितः। सा खण्डितेति कथिता धीरैरीर्ष्याकषायिता। अभिसारयते कान्तं या मन्मथवशंवदा। स्वयं वाऽभिसरत्येषा धीरैरुक्ताऽभिसारिका। चाटु-कारमपि प्राणनाथं रोषादपास्य या। पश्चात्तापमवाप्नोति कलहान्तरिता तु सा। प्रियः कृत्वापि सङ्केतं यस्या नायाति सन्निधिम्। विप्रलब्धा तु सा ज्ञेया नितान्तमवमानिता। नानाकार्यवशाद् यस्या दूरदेशं गतः पतिः। सा मनोभवदुःखार्त्ता भवेत् प्रोषितभर्तृका। कुरुते मण्डनं यस्याः सज्जिते वासवेश्मनि। सा तु वासकसज्जा स्यादि-तप्रियसङ्गमा। आगन्तुं कृतचित्तोऽपि दैवाद्यायाति यत्प्रियः। तदनागमदुःखार्त्ता विरहोत्कण्ठिता तु सा। इति साष्टाविंशतिभेदस्तत्तन्मध्यमाधमरूपतः। चतुर-धिकाशीतियुतं शतत्रयं नायिकाभेदानां स्यात्। २देव्याः शक्तिभेदे "ततोऽष्ट नायिका देव्याः यत्नतः परि-पूजयेत्। उग्रचण्डां प्रचण्डां च चण्डोग्रां चण्डनायिकाम्। अतिचण्डां च चामुण्डां चण्डां चण्डवतीं तथा" ब्रह्मवै०प्रकृतिख० ६०अ०। ३कस्तूरीभेदे "चूर्णी-कृतिस्तु चरिका तिलका तिलामा कौलत्थबीजसदृशी च कुलत्थिकाख्या। स्यूना ततः कियदियं किल पिण्डिका स्यात्तस्याश्च किञ्चिदधिकापि च नायिकैषा" राजनि०।

**नार** त्रि० नरस्येदम् अण्। १नरसम्बन्धिनि २परमात्मसम्ब-न्धिनि च "नारं सृष्ट्वा तु सङ्केतं सचेलं जलमाविशेत्" स्मृतिः नरशब्दे उदा० दृश्यम्। ३जले "आपो नारा इति प्रोक्ताः आपो वै नरसूनवः" मनुः। आर्ष-त्वात् ङीपोऽभावः। क्वचित् स्त्रियां ङीष् च नारी इत्येव। ४तत्त्वे वाच्ये च मेदि०। नराणां समूहः अण्। ५नरसमूहे न०।

**नारक** पु० नरक एव प्रज्ञा० अण्। १नरके। नरको भोग्यत-याऽस्यास्ति अण्। २नरकस्थे प्राणिनि त्रि० अमरः।

**नारकिन्** त्रि०नरको भोग्यतयाऽस्यास्ति इनि। नरकभोगिनि "परेण विहितं कर्म स्वकर्मेति यदेव यः। स उच्यते ब्रह्मघाती महानारकिनारकी" हरिवंशपु०।

**नारकीट** पु० नारकीव एटति रट-गतौ क। १यज्ञकीटे नारे मनुष्यसमूहे कीट इव। २खदत्ताशाकुनरि च मेदि०

**नारङ्ग** न० नारं गच्छति वा०ड सप्त० नारमिवाङ्गं यस्य वा अङ्ग०। १गजरे (गाँजर) राजनि०। २विप्रवीरसे ३यमजप्राणिनि ४विटे। न नरङ्गो यत्र। ५फलप्रधान-वृक्षविशेषे पु० मेदि० (नारङ्गी) ६नागरङ्गे अम्लीरभेदे "नारङ्गं मधुरास्थं स्यात् रोचनं वातनाशनम्। अपरं त्वम्लमत्युष्णं दुर्जरं वातपित्तकृत्" राजवल्लभः। "नारङ्गजेसरमपाक्तवीजपूरं बोऽभ्राति खण्डमरिचो-द्भवचूर्णमिश्रम्। अन्नं गले विशति तस्य नरस्य जीर्णं संदष्टमाशु इव राहुगलेन चन्द्रः"।

**नारङ्गचोरिणी** स्त्री नारङ्गमिश्रिता चोरिणी। चोरि-काभेदे "छित्वा नारङ्गमध्यां वै पचेत् सर्पिषि तापिते। तत्र खण्डं विनिःक्षिप्य पक्वं मत्वाऽवतारयेत्। शीतीभूते विनिःक्षिप्य मात्रयार्द्धं हृतं पयः। नारङ्गचोरिणी-ह्येषा सुगन्धिसुरभीकृता। विदग्धिनी हरेद्वातं पित्तञ्च गुरुपाचिका" वैद्यार्थचि०धृतवाक्यम्। [ वैद्यार्थचि०।

**नारङ्गवर्णक** न० नारङ्गस्येव वर्णोऽस्य कप्। कङ्कुमे

**नारद** पु० नरस्य धर्म्यम् "नराड्ढेति वक्तव्यम्" इत्यञ् नारं ददाति दा-क। १देवर्षिवरे सुनिभेदे तद्धामनिरूपि-र्बहुधा दर्शिता यथा "नारं पानीयमित्युक्तं तत्पितृभ्यः सदा ददौ। ददाति तेन ते नाम नारदेति भविष्यति" इत्यागमः। नारदेन पुराकल्पाश्रितः स्वजन्मवृत्तान्तो व्यासं प्रति भाग०१।५।६अ० उक्तो यथा

"अहं पुराऽतीतभवेऽभवं मुने! दास्याश्च कस्याश्चन वेदवादिनाम्। निरूपितो बालक एव योगिनां शुश्रू-षणे प्रावृषि निर्विविक्षताम्। ते मय्यपेताखिलचापलेऽ-र्भके दान्तेऽधृतक्रीडनकेऽनुवर्त्तिनि। चक्रुः कृपां यद्यपि तुल्यदर्शनाः शुश्रूषमाणे मुनयोऽल्पभाषिणि" इत्युपक्रमे तेभ्यो मुनिभ्यो विगतज्ञानस्य आत्मनो दास-संज्ञा अनन्यभक्त्या परमेश्वरोपासने कृते भगवतः पार्ष-देन जन्मान्तरे तव पारमेश्वरूपदर्शनं भविष्यतीति आत्मानं प्रति उपदेशं वर्णयित्वाऽन्ये स्वस्य जन्मान्तरं वर्णितं यथा "एवं कृष्णमतेर्ब्रह्मन्नासक्तस्यात्मजादिषु। कालः प्रादुरभूत् काले तडित् सौदामनी यथा। प्रयु-ज्यमाने मयि तां शुद्धां भागवतीं तनुम्। आरब्धक-र्मनिर्वाणो न्यपतत् पाञ्चभौतिकः। कल्पान्त इदमा-दाय शयानेऽम्भस्युदन्वतः। शिशयिषोरनुप्राणं विवेशा-नरन्धं विभोः। सहस्रयुगपर्य्यन्त उत्थायेदं ससर्ज्जतः। मरीचिमिश्रा ऋषयः प्राणेभ्योऽहञ्च जज्ञिरे। अन्तर्-

स्थित्य लोकांस्त्रीन् पर्य्येत्यस्खलितव्रतः। अतएव ब्रह्मविष्णोरविघातगतिः क्वचित्। देवदत्तामिमां वीणां स्वरब्रह्मविभूषिताम्। मूर्च्छयित्वा हरिकथां गायमानश्चराम्यहम्" । कश्यपात्पत्तनारदवीर्येण तस्य कल्पभेदे शुद्धागर्भजातकथा ब्रह्मवै०प्र०ख० २।२२अ० यथा "कान्यकुब्जे च देशे च कुमिलो गोपराजकः। कलावती तस्य पत्नी वन्ध्या चापि पतिव्रता। स्वामिदोषेण, सा सन्ध्याकाले च भर्तुरात्तया। उपस्थितं वने घोरे नारदं काश्यपं मुनिम्। क्रोधमानञ्च श्रीकृष्णं ज्वलन्तं ब्रह्मवर्चसा। तस्यौ सुवेषं कृत्वा सा ध्यानान्तञ्च मुनेः पुरः। उवाच विनयेनैव कृत्वा च श्रीहरिं हृदि। गोपिकाहं द्विजश्रेष्ठ! कुमिलस्य च कामिनी। पुत्रार्थिनी भागताहं त्वत्सूनुं भर्तुराज्ञया। वीर्याधानं कुरु मयि स्त्री नोपेक्ष्या ह्युपस्थिता। तेजीयसां न दोषाय वह्नेः सर्वभुजो यथा। इत्युक्तवचनं श्रुत्वा चुकोप मुनिपुङ्गवः। कुमिलो तत् पुरस्तस्यौ शुष्ककण्ठौष्ठतालुका। एतस्मिन्नन्तरे तेन यथा गच्छति मेनका। तथा कृतस्मयं दृष्ट्वा मुनेर्वीर्यं पपात ह। कृतस्नाता च कुमिली कृत्वा तद्वचनं सदा। सा पिप्पलेहे साध्वी च सुषाव तनयं वरम्। तप्तकाञ्चनवर्णाभं ज्वलन्तं ब्रह्मतेजसा। अनाद्यवस्थायोगे च काले बालो बभूव ह। नारं ददौ जन्मकाले तेनायं नारदाभिधः। ददाति नारं ज्ञानञ्च बालकेभ्यश्च बालकः। जातिस्मरो महाज्ञानी तेनायं नारदाभिधः। वीर्येण नारदस्यैव बभूव बालको मुने!! मुनीन्द्रस्य वरेणैव तेनायं नारदाभिधः। कल्पान्तरे ब्रह्मकण्ठाद्बभूवुर्ये नरा नराः। नरान्दधौ ततः कण्ठञ्च तेन तस्मान्नरदः स्मृतः। ततो बभूव बालश्च नारदात् कण्ठदेशतः। ततो ब्रह्मा नाम चक्रे नारद इति मङ्गलम्" आदिनारदश्च ब्रह्मणो ललाटाज्जातः यथोक्तं हरिवं० २१०अ० "ललाटमध्यादस्रष्टुर्जज्ञे नारदं प्रियवियद्दृशम्। सनत्कुमारं मूर्द्धभ्यो महायोगी पितामहः"। तस्य दक्षशापकथा "नष्टेषु सर्वलोकेषु दक्षः क्रुद्धोऽब्रवीद्दृढः। नारद नाशमेहीति गर्भवासं वसेति च हरिवं०२७०। तस्माद्दुर्निवं चक्रमस्य दक्षस्यापात् यथा "तांस्तथापि नष्टान् विज्ञाय पुत्रान् दक्षः प्रजापतिः। क्रोधं चक्रे महाभाग! नारदं स शशाप च" स च शापः "तस्माल्लोकेषु ते मूढ! न भवेद्भ्रमतः पदम्" भाग० ६।५।४१ स च भागवतावतारभेदः यथाह भाग० ११२।८ "तृतीयमृषिसर्गं वै देवर्षित्वमुपेत्य सः। तन्त्रं सात्वतमाचष्ट नैष्कर्म्यं कर्मणां यतम्"। तस्य स्वरूपं यथा "ज्वलितात्मप्रतीकाशो बालार्कसदृशेक्षणः। सव्यापदक्षं विपुलं जटामण्डलसंवृतम्। चन्द्रांशुशुक्लं वसने वसानो रुक्मभूषणः। वीणां गृहीत्वा मधुरां कक्षासक्तां सखीमिव। कृष्णाजिनोत्तरासङ्गो हेमयज्ञोपवीतवान्। दण्डी कमण्डलुधरः साक्षाच्छक्र इवापरः। मेत्ता जगति गुह्यानां विद्याधां गुह्योपमः। महर्षिर्विश्वदृक्चक्षुर्विद्वान् गान्धर्ववेदवित्। वैरञ्चेलिङ्गिको विप्रो ब्राह्मः कल्पिरिवापरः। देवगन्धर्वलोकानामादिवक्ता मुनिः परः। गाता चतुर्णां वेदानामुद्गाता प्रथमस्त्रिणाम्। स नारदोऽथ विप्रर्षिर्ब्रह्मलोकचरोऽव्ययः" हरिवं० ५५अ०। २विश्वामित्रपुत्रभेदे "लोहाढ्यो नारदश्चैव तथा कूर्चाग्रजः स्मृतः" भा०अनु०४अ०। विश्वामित्रपुत्रोक्तौ। स्वायम्भुवमन्वन्तरे ३प्रजापतिभेदे "अहं प्रजाः सिसृक्षुस्तु तपस्तप्त्वा सुदुश्चरम्। पतीन् प्रजानामसृजं महर्षीनादितो दश। मरीचिमत्र्यङ्गिरसौ पुलस्त्यं पुलहं क्रतुम्। प्रचेतसं वसिष्ठञ्च भृगुं नारदमेव च" स्वायम्भुवमनूक्तौ। कश्यपस्य मुनिपत्न्यां जाते ४गन्धर्वभेदे "कपिः पञ्चदशस्त्वेषां नारदश्चैव षोडशः। इत्येते देवगन्धर्वा मौनेयाः परिकीर्तिताः" भा०आ० ६५अ०।

**नारदपञ्चरात्र** न० नारदोक्ते पञ्चरात्रे तन्त्रभेदे तत्र प्रतिपाद्यविषयाश्च दिङ्मात्रमत्रोच्यन्ते। अभिगमनमुपादानमिज्या स्वाध्यायो योग इति पञ्चविधमुपासनं तत्राभिगमनं नाम देवतास्थानमार्गस्य संमार्जनोपलेपनादि। उपादानं नाम गन्धपुष्पादिपूजासाधनसम्पादनम्। इज्या नाम देवता पूजनम्। स्वाध्यायो नाम ऋचामनुसन्धानपूर्वको मन्त्रजपो वैष्णवसूक्तस्तोत्रपाठो नामसंकीर्त्तनं तत्त्वप्रतिपादकशास्त्राभ्यासश्च। योगो नाम देवतानुसन्धानम्। अन्यत् तत्र द्रष्टव्यम्।

**नारदशिक्षा** स्त्री नारदोक्ते वर्णोच्चारणशिक्षाभेदे

**नारदीय** न० नारदस्येदम् "इदमाद्यः" पा० वेदव्यासोक्ते नारदं प्रति सनकाद्युपदेशात्मके महापुराणभेदे तत्प्रतिपाद्यविषयाश्च दृष्टस्तारदीये ६६अ० उक्ता यथा श्रीब्रह्मोवाच। "शृणु विप्र! प्रवक्ष्यामि पुराणं नारदीयकम्। पञ्चविंशतिसाहस्रं दृष्टं चित्रकथाश्रयम्। सूतशौनकसंवादः सृष्टिसंक्षेपवर्णनम्। नानाधर्मकथाः पुण्याः प्रहृत्ते सप्तदाकृताः। प्राग्भागे प्रथमे पादे सन-

केन महात्मना। द्वितीये मोक्षधर्माख्ये मोक्षोपायनिरूपणम्। वेदाङ्गानाञ्च कथनं शुकोत्पत्तिश्च विस्तरात्। सनन्दनेन गदिता नारदाय महात्मने। महातन्त्रे बहुविधं पशुपाशविमोचणम्। मन्त्राणां शोधनं दीक्षा मन्त्रोद्धारश्च पूजनम्। प्रयोगाः कवचं नामसहस्रं स्तोत्रमेव च। सर्वेषामेव विष्णूनां शिवशक्त्योरनुक्रमात्। सनत्कुमारसहिना नारदाय तृतीयके। पुराणलक्षणञ्चैव प्रमाणं दानमेव च। पृथक् पृथक् बहुविधं दानकालपुरःसरम्। चैत्रादिसर्वमासेषु तिथीनाञ्च पृथक् पृथक्। प्रोक्तं प्रतिपदादीनां व्रतं सर्वार्थसाधनम्। सनातनेन सहिना नारदाय चतुर्थके। पूर्वभागोऽयमुदितो हरिदाख्यानसंयुतः। अस्योत्तरे विभागे तु अत्र एकादशीव्रते। वशिष्ठेनाथ संवादो माम्धातुः परिकीर्त्तितः। रुक्माङ्गदकथा पुण्या मोहिन्याश्चोत्पत्तिकर्म च। वसुधायाश्च मोहिन्यै प्रदानाद्वरणक्रिया। मङ्गलाकथा पुण्यतमा गवायात्रानुकीर्त्तनम्। काश्या माहात्म्यमतुलं पुरुषोत्तमवर्णनम्। यात्राविधानं क्षेत्रस्य वङ्गाख्यानसमन्वितम्। प्रयागस्यापि माहात्म्यं कुरुक्षेत्रस्य तत्परम्। हरिद्वारस्य चाख्यानं कामोदाख्यानकं तथा। बदरीतीर्थमाहात्म्यं कामाख्यायास्तथैव च। प्रभासस्य च माहात्म्यं पुराख्यानकं ततः। गौतमाख्यानकं पश्चाद् वेदपादतपस्ततः। गोकर्णक्षेत्रमाहात्म्यं चक्राख्यानकं तथा। सेतुमाहात्म्यकथनं तर्पणादीश्वरस्य च। अवन्त्याश्चैव माहात्म्यं मथुरायास्ततःपरम्। वृन्दावनस्य महिमा यशोश्चैक्ष्वाकिके गतिः। मोहिनीचरितं पश्चादेवं वै नारदीयकम्। यः शृणोति नरो भक्त्या श्रावयेद्वा समाहितः। स याति ब्रह्मणो धाम नात्र कार्य्या विचारणा। यस्त्वेतद्दिव्यं पूर्णायां धेनूनां शतमुत्तमम्। प्रदद्याद्द्विजवर्य्याय स तेनोभोक्तमेव च। यश्चानुक्रमणीमेतां नारदीयस्य वर्णयेत्। शृणुयाद्वैकचित्तेन सोऽपि स्वर्गगतिं लभेत्"। [चरिताख्याने उपपुराणभेदे

**नारसिंह** न० नरसिंहमधिकृत्य कृतो ग्रन्थः अण्। नरसिंह-

**नारा** स्त्री नरस्येयमण् वा० ङीषोऽभावः। जले शब्दर०।

"आपो नारा इति प्रोक्ता आपो वै नरसूनवः" मनुः।

**नाराच** पु० नरान् आचामति आ+चम-ड खार्थे अण्, नारं नरसमूहमाचामति आ+चम-ड वा। सर्वलौहमये बाणे अमरः। "तत्र नाराचदुर्दिनम्" रघुः नाडीकयन्त्रे दृश्यम्' कुपित मदनस्योत्तप्तनाराचलीलाम्' माघः "दृढ़ ननरचतुष्कसङ्कटन्तु नाराचमाचक्षते" उक्ते छन्दोभेदे न०

**नाराचिका** स्त्री नाराचस्तदाकारोऽस्त्यस्याः ठन्। नाराचाकृतियुक्ते स्वर्णकारादीनां तोलनार्थे यन्त्रभेदे (निकति) शब्दर० अस्त्यर्थे अण् ङीष्। नाराचीत्यपि तत्रार्थे। अस्त्यर्थे ङीपि तु अस्ले नाराचे स्त्री।

**नारायण** पु० नानाविधा निरुक्तिः अनुपदं वक्ष्यते तदनुसारेण व्युत्पत्तिः। १विष्णौ परमात्मनि "अङ्गुनारायणो नरः" विष्णुस०। भाष्ये अस्य व्युत्पत्तिर्दर्शिता यथा "नर आत्मा ततो जातान्याकाशादीनि नाराणि तानि कार्य्याणि अयते कारणात्मना व्याप्नुते नारायणः "यच्च किञ्चिज्जगत् सर्वं दृश्यते श्रूयतेऽपि वा। अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः" इति मन्त्रवर्णात् "नराख्यातानि तत्त्वानि नाराणीति विदुर्बुधाः। तान्येवायनं यस्य तेन नारायणः स्मृतः" इति महाभारते। अयनत्वात् प्रलय इति वा "यत् प्रयन्त्यभि संविशन्तीति" श्रुतेः "आपो नारा इति प्रोक्ता आपो वै नरसूनवः। ता यदस्यायनं पूर्वं तेन नारायणः स्मृतः" मनुः। ब्रह्मवै० ज०ख० १०६अ० अन्यथा निरुक्तिर्दर्शिता यथा "साङ्ख्यशक्तिवचनो नारेति च विदुर्बुधाः। यो देवोऽयनं तस्य स च नारायणः स्मृतः। नाराश्च स्मृतयः शास्त्राण्ययनं गमनं स्मृतम्। यतो हि गमनं तेषां सोऽयं नारायणः स्मृतः। नारञ्च मोक्षणं पुण्यमयनं ज्ञानमीप्सितम्। तयोर्ज्ञानं भवेद् यस्मात् सोऽयं नारायणः स्मृतः"। "नारायणेति शब्दोऽस्ति वागस्ति वशवर्त्तिनी। तथापि नरके मूढाः पतन्तीह किमद्भुतम्"। महाभारतम्। नरस्यापत्यम् नडा०फक्। २नरस्यापत्ये पु० स्त्री० २यजामिलपुत्रभेदे "कान्यकुब्जे द्विजः कश्चिदासीपतिरजामिलः। नाम्ना सदाचारो दान्तः संसर्गदूषितः। तस्य प्रवयसः पुत्रादश तेषान्तु योऽवरः। बालो नारायणो नाम्ना पित्रोश्च दयितो भृशम्। दूरे क्रीड़नकासक्तं पुत्रं नारायणाह्वयम्। म्रियमाणस्य सचतो हरिकीर्त्तनम्। भर्त्तर्नाम महाराज! पार्षदाः सहसाऽपतन्। विकर्षतोन्मुर्दयाद्वासीपतिमजामिलम्" भाग० ६।१अ०। नारायणक्षेत्रम् षण्। ४नारायणसम्बन्धि सैन्यभेदे "मल्लैश्चनलतुल्यानां गोपानामर्बुदं महत्। नारायणा इति ख्याताः सर्वसंग्रामयोधिनः" भा०उ० ७अ०

६धर्मपुत्रविभेदे नरशब्दे दृश्यम्। तथबोधोक्ते ६तैलभेदे न० तच्च त्रिविधं स्वल्पं हस्वमहत्त्वेतिभेदात्। तेषां पाकद्रव्यादि क्रमेण तत्रोक्तं तच्च

सुश्रुत "विल्वाग्निमन्थश्योनाकपाटलाशारिमट्टकाः। प्रसारण्यश्वगन्धा च हस्ती कण्टकारिका। बला चातिबला चैव वृश्चिवा सप्तपर्णिका। एषां दश पलान् भागान् चतुर्द्रोणेऽम्भसः पचेत्। पादशेषं परिस्राव्य तैलपात्रे प्रदापयेत्। शतपुष्पा देवदारु मांसी शैलेयकं वचा। चन्दनं तगरं कुष्ठमेलापर्णीचतुष्टयम्। रास्ना दुरगगन्धा च सैन्धवं सप्तनर्णवम्। एषां दिपलिकान् भागान् क्षेपयित्वा विनिःक्षिपेत्। शतावरीरसञ्चैव तैलतुल्यं प्रदापयेत्। आजं वा यदि वा गव्यं क्षीरं दत्त्वा चतुर्गुणम्। पाने वस्तौ तथाभ्यङ्गे भोज्ये चैव प्रयुज्यते। अश्वो वा वातसम्भग्नो गजो वा यदि वा नरः। पङ्गुकः पीठसर्पी च तैलेनानेन सिध्यति। अधोभागे च ये वाताः शिरोमध्यगताश्च ये। दन्तमूले हनुसन्धौ मन्यास्तम्भे गलग्रहे। बद्धं गुदति चैवाङ्गं गतिर्यस्य च विह्वला। क्षीणेन्द्रिया नष्टशुक्रा ज्वरक्षीणाश्च ये नराः। बधिराः शब्दजिह्वाश्च मन्दमेधस एव च। अल्पप्रजा च या नारी वा च गर्भं न विन्दति। वातार्त्तौ हृदयौ वेगमन्यद्वद्धिव दारुणा। एतत् तैलवरं तेषां स्वल्पं नारायणं स्मृतमिति"

हृस्वतः "शतावरी चांशुमती वृश्चिपर्णी यठी बला। एरण्डस्य च मूलानि हस्वाः पूतिकस्य च। गवेधुकस्य मूलानि तथा सहचरस्य च। एषां दशपलान् भागान् जलद्रोणे विपाचयेत्। पादशेषं रसे पूते तत्र तैलं समावपेत्। पुनर्षभावचाद्यारुशताह्वाचन्दनागुरु। शैलेयं तगरं कुष्ठमेलामांसीक्षिरावला। अश्वगन्धा-सैन्धवं रास्नापलाद्यानि च क्षेपयेत्। गव्याजपयसः प्रस्थौ द्वौ द्वावत्र प्रदापयेत्। शतावरीरसप्रस्थं तैलप्रस्थं विपाचयेत्। अस्य तैलस्य विज्ञेयं वीर्यं शतः परम्। वातानां वातभग्नानां कुब्जराणां तथा नृणाम्। तैलमेतत् प्रयोक्तव्यं सर्ववातनिवारणम्। आयुष्मांश्च नरः सोत्था निश्चयेन दृढो भवेत्। गर्भमश्नुतरी विन्देत् क्रिम्युमौतुषी तथा। हनुस्तम्भं पार्श्वशूलञ्च तथैवार्द्धावभेदकम्। अपचिं गण्डमालाञ्च वातरक्तं हनुग्रहम्। कामलां पाण्डुरोगञ्च अक्षिरोगानि नाशयेत्। तैलमेतद् भगवता विष्णुना परिकीर्तितम्। नारायणमिति

स्मृतं वातान्तकरणं शुभमिति"। हृस्वसारीयघृतैलम्। भैषतः "विल्वाग्निमन्था हस्ती श्वदंष्ट्रा श्योनाकपाटलाशालपर्णिभिरुद्धृतम्। चुक्रा कठिल्लातिबलाग्निमन्थं मूलानि चैषां सरलायुतानाम्। मूलं विदद्यादथ पाटलीयं प्रस्थे क्रमेणेषां प्रवदन्ति तज्ज्ञाः। सपादप्रस्थं विधिनोद्धृतस्य द्रोणैरपामष्टभिरेव पक्वा। पादावशेषेण रसेन तेन तैलाढकाभ्यां सममेव दुग्धम्। क्षीरस्य मांसद्रवमेव तुल्यमेकत्र सम्यक् विपचेत् सुबुद्धिः। दद्याद्रसञ्चैव शतावरीणां तैलेन तुल्यं पुनरेव तत्र। रास्नाश्वगन्धादुमदारुकाणां पर्णीं चतस्रो गुरुदेसराणि। विम्बूत्पलांसीरजनीद्वयञ्च शैलेयकं चन्दनपुष्कराणि। एला सवल्ली तगरार्द्धपत्रं कृष्णाष्टवर्गांस्तु वचायवानम्। स्त्रीक्षेयशीरकचीरकाख्यमेभिः समस्तैर्द्विपलप्रमाणैः। कर्पूरकाश्मीरजमागरुत्वचानां दद्यात् सुगन्धाय वदन्ति केचित्। प्रस्वेददौर्गन्ध्यनिवारणार्थं चूर्णीकृतानाम् द्विपलप्रमाणम्। आलोड्य सम्यग्विधिवद्विपक्वं नारायणं नाम महत्तु तैलम्। सर्वैः प्रकारैर्विधिवत् प्रयोज्यमस्य पुंसां पवनार्दितानाम्। ये पङ्गवः पीठविसर्पणाश्च एकाङ्गहीनार्द्दितवेपमानाः। बाधिर्यमूकत्वयपीड़िताश्च मन्याहनुस्तम्भशिरोग्रहार्त्ताः। एतैर्नरास्ते बलवीर्ययुक्ताः संसेव्य तैलं सहसा भवन्ति। वन्ध्या च नारी लभते च पुत्रं वीरोपमं सर्वगुणोपपन्नम्। शाखाश्रिते कोष्ठगते च वाते हृदो विधेयं पवनार्दितानाम्। जिह्वानिले दन्तगते च शूले कौम्भादकौजज्वरकर्शितानाम्। प्राप्नोति लक्ष्मीं प्रमदाप्रियत्वं लोकेश्वरं चापि भवेद्युवेव। देवासुरे युद्धवरे सभीक्ष्य स्वाध्यस्य भग्नानसुरैः सुरांश्च। नारायणेनापि हृदं हृषार्थं समामृतैलं विहितन्तु तेषाम्"।

**नारायणचेल** न० ६त०। नारायणस्वामिके गङ्गातटक्षेत्रभेदे "प्रयागमवधिं कृत्वा यावद्वत्सचतुष्टयम्। तत्र नारायणः स्वामी नान्यः स्वामी कथञ्चन" ब्रह्मपु०। अत्र च वर्ज्यमुक्तं हरिवंशे पु० ४५अ०।

"अत्र किञ्चिन्न दद्याच्च यावात्पाताय दुष्यति। अत्र प्रतिग्रहे राजन्! विक्रीता जायते भवेत्। विक्रीतायाञ्च जायायां विक्रीतः स्यात्तनार्द्दनः। जनार्द्दने च विक्रीते विक्रीतं भुवनत्रयम्। लोकेऽपि न त्रायते तस्मात्तं विसम्बन्धप्रसङ्गतः"। तत्र कर्त्तव्यानि यथा "दीयात्तु देवपूजायां तथा गङ्गातटे चरेत्। शुष्कवासः पिधायात्र सावित्रीजपमाचरेत्। आत्मनस्तर्पणञ्चैव परोपकारकर्म

च। परोक्षेऽपि मनसा त्यक्तद्रव्यस्य दापनम्। स्तवपाठश्च मौनञ्च नीचालापविवर्जनम्। केवलं वारिपानञ्च कर्त्तव्यं ब्रह्मभावतः। एतानि किल कर्माणि चैत्रे नारायणे चरेत्"।

**नारायणतीर्थ** न० तीर्थभेदे शिवपु०।

**नारायणप्रिय** पु० ईत०। १शिवे २पीतचन्दने नैघण्टुप्रका०।

**नारायणबलि** पु० नारायणसंज्ञिय देयो बलिः। दुर्मरणमृतानामौर्द्धदेहिकक्रियासम्प्रदानतायोग्यत्वार्थं नारायणादिपञ्चदेवतोद्देशेन देये बलिभेदे तस्य निमित्तञ्च आत्मघातिनृशब्दे ६६०पृ० उक्तं तद्विधानं निर्णयसिन्धावुक्तं यथा

"नारायणबलिस्तु हेमाद्र्याद्यनुसारेणोच्यते तत्रादौ क्रियानिबन्धे गारुडे तर्पणसङ्कल्पः "कार्य्यं पुरुषसूक्तेन मन्त्रैर्वा वैष्णवैरपि। दक्षिणाभिमुखो भूत्वा प्रेतं विष्णुमिति स्मरेत्। अनादिनिधनो देवः शङ्खचक्रगदाधरः। अक्षय्यः पुण्डरीकाक्षः प्रेतमोक्षप्रदो भवेति"। शुक्लैकादश्यां देशकालौ संकीर्त्यास्मत्पितुरस्यात्मनश्च दुर्मरणात्मघातजदोषनाशार्थम् और्द्धदेहिकसम्प्रदानत्वयोग्यतासिध्यर्थं नारायणबलिं करिष्ये इति सङ्कल्प्य ब्रह्माणं विष्णुं शिवं यमं प्रेतञ्च पञ्चकुम्भेषु स्थापयेत् "विष्णुः सर्वमयः कार्यो रुद्रस्त्र्यम्बकयज्ञया। ब्रह्मा रौप्यमयस्तत्र यमो लोहमयो भवेत्। प्रेतोदर्भमयः कार्य्य इति देवप्रकल्पनेति" गारुडोक्तास्वर्णेषु वा प्रतिमासु षोडशोपचारैः पुरुषसूक्तेनाभ्यर्च्यामिं प्रतिष्ठाप्य चरुं पुरुषसूक्तेन प्रत्यृचं नारायणायेदमिति श्रुत्वा देवानामग्नये दक्षिणापदमेषु विष्णुरूपं प्रेतं स्मरन् नामगोत्राभ्यां मधुघृततिलयुतान् दश पिण्डान् यज्ञोपवीत्यवासकगोत्रासकशर्मन्त ! प्रेत। विष्णुरूपाय ते पिण्ड उपतिष्ठतामिति दत्त्वा पुरुषसूक्तेनाभिमन्त्र्य तेनैव पञ्चोदकेनाभिषिच्याभ्यर्च्यासकशर्माणमसकगोत्रं विष्णुरूपं प्रेतं तर्पयामीति पुरुषसूक्तेन प्रत्यृचं तर्पयित्वा एवमामात्रं ब्रह्मादिपञ्चभ्यो दद्यात् मन्त्रस्तु "ब्रह्मविष्णुरुद्रादेवा यमश्चैव सकिङ्करः। बलिं गृह्णीत्वा कुर्वन्तु प्रेतस्य च शुभां गतिम्"। भिताक्षरायान्तु होमवत्यादि नोक्तम्। ततः प्रतिदैवतं त्रिविधं फलं शर्करामधुघृतदत्तानि च निवेद्य पिण्डानभ्यर्च्य नद्यां क्षिप्त्वा रात्रौ नव सप्त पञ्च वा विप्रान्निमन्त्र्योपोषितो जागरं कृत्वा श्वोभूते पुनर्विष्णुं ब्रह्माणं रुद्रं यमं संपूज्यैकोद्दिष्टविधिना श्राद्धपञ्चकं करिष्ये इत्युक्त्वा विष्णुयमब्रह्मरुद्रप्रेतान् स्मरन् विप्रानुपवेश्य प्रेतस्थाने चैकं विष्णुं स्मरन् पाद्यावाहनार्घ्ययुतं तृप्तिमन्त्रान्तं कृत्वोद्धेखनादि कृत्वाग्नेयेषु विष्णवे ब्रह्मणे शिवाय यमाय सपरिवाराय चतुरः पिण्डान् दत्त्वा प्रेतनामगोत्रे स्मृत्वा विष्णुनाम्ना पञ्चमं दत्त्वाभ्यर्च्यांचान्तेभ्यो दक्षिणां दत्त्वैकं प्रेतं स्मृत्वा विप्रेभ्यः सन्तोष्य विप्रैः प्रेतायेदं तिलोदकमुपतिष्ठतामिति तिलसहितं दापयित्वा भुञ्जीतेति। अत्र विशेषान्तरं च अनन्तभट्टकृतान्येष्टिपद्धतौ द्रष्टव्यम्"।

**नारायणसरस्** न० ईत०। तीर्थभेदे। "तेऽपि (यवनाद्याः) पित्रा समादिष्टाः प्रजासर्गे धृतव्रताः। नारायणसरो जग्मुर्यत्र सिद्धाः सपूर्वजाः" भाग० ६।५।२१

**नारायणाश्रम** न० ईत०। तीर्थभेदे "वाराणसी मधुपुरी पम्पा बिन्दुसरस्तथा। नारायणाश्रमो नन्दा सीतारामाश्रमादयः" भाग० ७।१४।२६

**नारायणी** स्त्री नारायणस्येयम् अण् ङीप्। नारायणस्य १यज्ञे २लक्ष्म्यां ३दुर्गायाञ्च तद्विरूपिः "यशसा तेजसा रूपैर्नारायणसमा गुणैः। शक्तिर्नारायणस्येयं तेन नारायणी स्मृता" ब्रह्मवै० प्र०ख० ४५अ०। "नारायणाङ्गभूता तेन तुल्या च तेजसा। तथा तस्य शरीरस्था तेन नारायणी स्मृता" ब्रह्मख० २७अ०। नारस्य जीवसंघस्य जलस्य वा अयनी स्थानभूता। "जलायना नराधारा सप्तद्वयनाऽपि वा। नारायणी समाख्याता नरनारीप्रवर्त्तिका। वसत्यद्दा सर्वेषु भूतेष्वन्तर्हिताऽयतः। देव्या व्याप्तमिदं सर्वं जगत् स्थावरजङ्गमम्" देवीपु०। ४शतावर्य्यां हेमच०। ५सङ्कल्पसिद्धायां च। "सर्वस्वार्त्तिहरे देवि! नारायणि! नमोऽस्तुते" देवीभा०

**नारायणीय** त्रि० नारायणस्येदम् "ढक्छः" पा० छ। १नारायणसम्बन्धिनि २तदुपाख्याने। तच्चोपाख्यानं नारदनारायणर्षिसंवादरूपं भा०शा०३३६अ० अध्यायादधि "नारदस्य च संवादमेनारायणस्य च" इत्युपक्रमे "नारायणीयमाख्यानमेतत्ते कथितं तव" इत्यन्तेन ३४८ अध्यायान्तेन दर्शितम्। ३ततत्प्रतिपाद्कोपनिषद्भेदे च उपनिषच्छब्दे दृश्यम्। [१२२३ पृ०दृश्यम्।

**नारायणोपनिषद्** स्त्री ईत०। उपनिषद्भेदे उपनिषच्छब्दे

**नाराशंस** पु० नरैराशंस्यते आ+शंसु-कर्मणि घञ् नराशंसाः पितरः तेषामयम् अण्। नाराशंसानां पितॄणां सोमपानसाधने १चमसे "ते नाराशंसा

श्वाविश्वदेवात्" कात्या०श्रौ० ८।२।८ "ते चमसा नाराशंससंज्ञाभवन्ति" कर्कः "आप्यायितांश्चमसान् खादयन्ति ते नाराशंसा भवन्ति" आश्व०श्रौ० ५।६।२०। नाराशंसा भवन्ति इत्यर्थः अन्वर्थसंज्ञेयं नाराशंसा नाम तव ! पितृगणा जमाः सोमाः काव्याश्चेति तेषामनुसवनं यथासङ्ख्येनाप्यायितानां चमसानां देवता भवन्तीति नाराशंसाश्चमसा भवन्ति" नारायण०। २तद्देवतासु पितृषु "अथ यदि नाराशंसेषु यज्ञः किञ्चिदापद्यते पितृभ्यः नाराशंसेभ्यः इति अनुवचनात् पितरोऽपि तर्हि नाराशंसाः" शत०ब्रा०१२।६।२२। ३पितृचमसस्थसोमे च "मनो त्वा हविषाहे नाराशंसेन सोमेन" ऋ०१०।६७।२ "नाराशंसेन चमसगतेन सोमेन। नरैः प्रशस्ते इति नराशंसाः पितरः तेषां चमसानां सम्बन्धमेव सोमः। तथाविधेन सोमेन" भा०। ४मन्त्रभेदे "येन नराः प्रशस्ते स नाराशंसोमन्त्रः" निरु० ८।६ स च ऋग्देवत्यः यथाह "वाकोवाक्यं पुराणञ्च नाराशंसांश्च गाथिकाः" याज्ञ० व्याख्याने "नाराशंसान् ऋग्देवत्यान्" मिता०।

**नारिकेल** पु० नल-इण् नालिः केन वायुना जलेन वा इलति चलति इल-क कर्म० रत्नयोरैक्यम्। खनामख्यातेऽहक्षे अमरः। नालिकेरोऽपि तत्रार्थे शब्दरत्ना०। "नारिकेलफलं शीतं दुर्जरं वस्तिशोधनम्। विष्टम्भि दुर्हृदयं बल्यं वातपित्तास्रदाहनुत्। विशेषतः कोमलं नारिकेलं निहन्ति पित्तज्वरमूत्रदोषान्। तदेव जीर्णं गुरु पित्तकारि विदाहि विष्टम्भि मतं भिषग्भिः" नवस्य जलसुधाः। "तस्माच्छीतलं हृद्यं दीपनं शुक्रलं लघु। पिपासा पित्तजित् स्वादु वस्तिशुद्धिकरं परम्"। तस्य भक्षिष्यसुधाः "नारिकेलस्य तालस्य खार्जूरस्य गिरीन्यपि। कषायस्निग्धमधुरं हृद्यानि गुरूणि च" भावप्र०। "बालस्य नारिकेलस्य जलं प्रायो विरेचनम्" इति राजवल्लभः। कांस्यपात्रे तत् जलं मद्यतुल्यं यथाह "नारिकेलोदकं कांस्ये ताम्रपात्रे स्थितं मधु। मद्यञ्च ताम्रपात्रस्थं मद्यतुल्यं इतं विना" इति कर्मलोचनम्। तस्येदमण्। २तदीये त्रि० "नारिकेलाद्यं तत्र भावत्रयं च यथः यथुः" रघुः। षष्ठ्यां तद्धितनिषेधः "नारिकेले च मूर्खता" तिथितत्त्व। तिथिभेदेऽभक्ष्योक्तौ "कोजागरव्रतौ तदुदकपानं कार्यं यथाह "नारिकेलोदकं पीत्वा कोजागर्त्तिं यदीक्षते" तिथितत्त्व कोजागरशब्दे दृश्यम्।

**नारिकेलचीरी** स्त्री चीरिकाभेदे "नारिकेलं तनूकृत्य क्षिप्त्वा पयसि गोः क्षिपेत्। सितागव्याज्यसंयुक्तं तत् पचेन्मृदुनाग्निना। नारिकेलोद्भवा चीरी स्निग्धा शीतातिपुष्टिदा। गुर्वी सुमधुरा हृद्या रक्तपित्तानिलापहा" भावप्र०।

**नारी** स्त्री नरजातिः स्त्री ङ्+नर+वा जातौ ङीष् नि०। १नरजातिस्त्रियां तद्भेदा रतिमञ्जर्यामुक्ता यथा "पद्मिनी चित्रिणी चैव शङ्खिनी हस्तिनी तथा। अतस्तो जातयो नार्यां रतौ शेया विशेषतः" अन्यत्रापि त्रिधा "स्त्रीणितस्त्रिविधा ब्रह्मन् मद्विधां मूढचेतसाम्। साध्वी भोग्या च कुलटा ताः सर्वाः स्वार्थतत्पराः। परलोकभयात् साध्वी तत्रेह यशसेऽर्थतः। कामक्लेशाच्च कुरुते भर्तुः सेवाञ्च सन्ततम्। भोग्या भोगार्थिनी प्रायः कामक्लेशेऽप्य केवलम्। कुरुते पतिसेवाञ्च न च भोगादृते क्वचित्। वञ्चनाहङ्कारसम्भोगं क्षिप्त्वाहङ्कारसत्तमम्। यावत् प्राप्नोति सा भोग्या तावच्च वशगा प्रिया। कुलाङ्गारसमा नारी कुलटा कुलनाशिनी। कपटात् कुरुते सेवां स्वामिनो न च भक्तितः। सदा पुंयोगमार्गं सुमनसा सदनातुरा। आहाराद्धिकं जारं प्रार्थयन्ती नवं नवम्। जारार्थे स्वपतिं तात ! हन्तुमिच्छति पुंश्चली। तस्यां यो विश्वमेनूढो जीवन्तं तस्य निष्फलम्। कथिता योषितः सर्वा उत्तमाधमनध्यमाः। स्वात्मारामा विजानन्ति मनसा ता न पण्डिताः" ब्रह्मवै०ब्रह्म०ख० २३अ०। गुरुत्वपादके छन्दोभेदे "यो नारी" ह०र०

**नारीकवच** पु० सूर्यवंश्ये अश्मकस्य पुत्रे मूलकापरपर्य्याये नृपभेदे "अश्मकान्मूलको जज्ञे यः स्त्रीभिः परिरक्षितः। नारीकवच इत्युक्तो निःक्षत्रे मूलकोऽभवत्" भाग० ९।८।१२ "स्त्रीभिः संवेष्ट्य परशुरामतः परिरक्षितः। अतो नारीकवच इत्युक्तः निःक्षत्रे सति क्षत्रवंशस्य मूलमभवत् अतो मूलक इति चोक्तः" श्रीधरः।

**नारीकेल** पु० नारिकेल+पृषो०। नारिकेलशब्दार्थे शब्दरत्ना० गौरा० ङीष्। नारीकेलीत्यत्र स्त्री शब्दरत्ना०।

**नारीच** न० नाडीच+पृषो०। (नाचिता) शाकभेदे राजवल्ल०

**नारीतरङ्गक** पु० नारीं तरङ्गयति तरङ्ग+अतौ णिच् ण्वुल्। नाडीचित्तचञ्चलकारके जारे णिङ्गे शब्दमा०

**नारीतीर्थ** न० तीर्थभेदे भा०आ० २२६।२७अ० तदाविर्भवकथा दृश्या "स्त्रीणि इत्यादि तीर्थानि ततः प्रभृति

सैव इ। नारीतीर्थानि नाम्नेह ख्यातिं यास्यन्ति सर्वतः। पुण्यानि च भविष्यन्ति पावनानि मनीषिणाम्" यत्र मन्दाकिनीपद्मोत्पलरजः विप्रयोगेन याज्ञवल्क्यां प्राप्ता अर्जुनेन शोचिताः यतस्तत्तीर्थंनारीतीर्थत्वेन ख्यातम्।

नारीदूषण न० ष०त०। "पानं दुर्जनसंसर्गः पत्या च विरहोऽटनम्। स्वप्नोऽन्यगेहवासश्च नारीणां दूषणानि षट्" मनूक्ते स्त्रीणां दोषभेदे। पानं सुरापानम्।

नारीमुख पु० नाडी मुखं प्रधानं यत्र। द०सं० १४अ० कूर्मविभागे नैर्ऋत्यासन्ने देशभेदे "वडवामुखकारवाम्बष कपिलनारीमुखानन्तान्"।

नारीष्ट त्रि० इत०। १नारीप्रिये २मल्लिकायां स्त्री राजनि०।

नारीष्ठ त्रि० नार्यां तदाश्रयत्वे तिष्ठति स्था-क षत्वम्। गन्धर्वभेदे "गन्धर्वाभ्यां नारीष्ठाभ्यां मङ्गाङ्गाङ्गेभ्यां स्वाहा" सां० श्रौ० ४।१०।७

नारेय पु० सत्राजितपुत्रभङ्गकारस्य पुत्रभेदे "सभाजो भङ्गकारात्तु नारेयश्च नरोत्तमौ। जज्ञाते सुपयस्यन्तौ" हरिवं० ३८ अ०।

नार्य्य पु०न-नरात् नरश्रिते नर्य्यं तस्येदं यत् वा। नरश्रितसम्बन्धिनि यज्ञे निघण्टुः "नार्य्यस्य दक्षिणा" ऋ०८।४।२९। [ष्ठम् च। नारङ्गे जम्बीरभेदे हेमच०।

नार्य्यङ्ग पु० नार्य्यां नरश्रितसम्बन्धिनं गच्छति गम-ड

नार्य्यतिक्त पु० नित्यकर्म०। किराततिक्ते नैषधटुप्रकाशिका तस्य नरश्रितत्वात् तिक्तत्वाच्च तथात्वम्।

नाल क्ली न०नल-बन्धे घञ्। १काण्डे २पद्मादिदण्डे हेमच० "नालाग्रलग्नाग्रभुजो भजामः" नैष० "कचित् कराभ्यासपगूढनालम्" रघुः "तवोरुपर्य्यावतनालदण्डः" कुमा० नल-घञ्। ३जलनिर्गमे जलादेः प्रवाहे पु० "यथा तोयाग्निनालोत्थं यन्त्रनाडादिभिः शनैः" मार्कण्डेयपु०।

नालम्बी स्त्री शिवस्य पीठायाम् हेमच०।

नालवंश पु० नालं वंश इव। नले तृणभेदे राजनि०।

नालि(ली) स्त्री नल-णिच् इन् वा ङीप्। १नाड्यां दण्डे २शिरायां ३पद्मादिदण्डे ४शाकभेदे च हिरुपकोषः।

नालिक पु० नलमेव नालमस्त्यस्य ठन्। १पद्मे शब्दरत्ना०। २अक्षिप्ते पु० स्त्री० त्रिका० नाला+स्वार्थे क। नालिका नालायां स्त्री नालिताख्याके शब्दच०। चर्मकषायां स्त्री जटाध०। इक्षिकर्षतेधनिकायां स्त्री शब्दर०। "राजाः सदलंकरतलशोभनालिका" भाषः। श्वेतकलम्ब्यां कल्पतरुः "कुलम्बं नालिकाशाकमिति" त्रि०त० पाठान्तरम्।

नालिकेर पु० नल-वा० इण् केन वायुना ईर्य्यते ईर-घञ् कर्म०। नारिकेले तच्छब्दे दृश्यम्। तस्य खण्डपाकविधिश्चादि वैद्यके उक्तं यथा "कूष्माण्डं नालिकेरस्य खण्डं दध्नि पेषितम्। गुडखण्डस्य कुड़वं गव्यक्षीरे चतुर्गुणे। आलोड्य नालिकेरस्य जले खण्डमिलना पचेत्। धान्यकं पिप्पलीं शुण्ठीं चातुर्जातं त्वचूर्णितम्। दाप्य प्रमाणं प्रत्येकं शीतीभूते क्षिपेद्बुधः। नालिकेरस्य खण्डोऽयं पुंस्त्वनिद्रावलप्रदः। अस्रपित्तं क्षयं कासं शूलं च परिणामजम्। नाशयेदुरक्षपित्तञ्च शुक्रं दाहानलो यथा"। अत्र एतत्पक्वेन कूष्माण्डखण्डनालिकेरस्य भर्जनं विधेयमिति सम्प्रदायः। द०सं० १४अ० कूर्मविभागे आग्नेयांशस्थे २देशभेदे "डयनालिकेरचर्मद्वीपेत्यादि" तदाख्यम्। पृषो० रस्य लः। नालिकेलोऽप्यत्र।

नालिता स्त्री नल-णिच्-क्त। नारीचक्षुरोक्षसुखके पक्षिभाके खनामख्याते शाकभेदे शब्दर०।

नाली स्त्री नालि+वा ङीप्। १शाककडम्बे (डाँटा) ख्याते पदार्थभेदि०। "नालेन रहिता नाली सुखिन्ना सुदि-पीडिता। हते तप्ते परिक्षिप्ता चिञ्चिणीपलसंयुता। नाली सरा लघुः शीता पित्तघ्नी कफवातला। सक्त शोककरी प्रोक्ता क्षिप्ता शोथक्रिया मता" शब्दार्थचि०। २इक्षिकर्णवेधन्यास्म् ३दण्डाख्यकलाके घड्यास् त्रिका०। ४पद्मे शब्दर०। ५पद्मदण्डे ६प्रणाल्याम् ७वाद्यविशेषे शब्दार्थचि०।

नालीक पु०नाल्या कायति कै-क। सुखभासे सौरभसंयुक्ते अनस्थिदले १शरभेदे २शल्याङ्गे ३पद्मसमूहे च न०मेदि० ४शस्त्रे विश्वः "कर्णिनालीकनाराचास्तैलधौतो महारथाः" भा०व० ६१अ० ५नारिकेलकषण्डयोः "तस्मै न ग्रहीत नम्रो नालीकं विध्वादुव्रती" स्मृतिः "कासुकानिव नालीकांश्चिक्षेपतः सहसाऽस्त्रवित्" माघः। ततः पुष्करा० इनि। नालीकिनी तत्समूहे स्त्री।

नालीघटी स्त्री नाड्या दण्डकालस्य बोधनायां घटी इव ङीष्। घटीवादनपात्रभेदे स्त्री शब्दार्थचि०।

नालीप पु० कदम्बके नैषधटुप्रकाशिका। [शब्दार्थे

नालीव्रण पु०न० नाड्यां तत्र व्रणः+डस्य लः। नाडीव्रणनाल्य त्रि०नलस्यादूरदेशादौ सङ्घाभा०गत्र। नलस्यादूरदेशादौ

नावयन्त्रिक पु० नवयन्त्रस्य तत्प्रतिपादकग्रन्थस्य ज्ञाख्यानो

पन्थः ठञ्। नवयन्त्रप्रतिपादकग्रन्थव्याख्याने १ग्रन्थे नवयन्त्रो वर्त्ततेऽस्मिन् काले तम इति वा ठञ्। २नवयन्त्रविधानयोग्ये काले च।

**नाविक** पु० नावा तरति "नौद्व्यचष्ठन्" पा० ठन्। १नावा तारिणि। नौरूपस्य वाह्यतया ग्रीष्मा० पक्षे ठन्। नौपृष्ठस्थदण्डचालनेन नौकाचालके २कर्णधारे "मरुद्वातसमुद्भूतामपरीक्षितनाविकाम्। अन्यनौप्रतिबद्धां यानोपेयात्मावमात्ररामू" काम०नी० "नाविकपुरुषे न विश्वासः"। "अख्यातिरिति ते कृष्ण! मम्नानौर्नाविके त्वयि" इति च उद्भटः।

**नाविन्** त्रि०नौरूपस्य ग्रीष्मा० पक्षे इनि। नाविके स्वामी।

**नावोपजीवन** पु० नावा उपजीवनमस्य अर्थे अनुकम्प०। १नौचालनोपजीविजातिभेदे "निषादो मद्गुरं सूते दासं नावोपजीवनम्" भा०आनु० ४८अ०सङ्करजात्युक्तौ।

**नाव्य** त्रि०नावा तार्य्यं यत् "वाल्लोपि प्रत्यये" पा०आवादेशः। १नौकयातार्य्ये देशे २नौतार्य्यनद्यादौ च "नाव्याः सुप्रतराः नदीः" रघुः। नवस्य भावः यञ्। ३नूतनत्वे न०

**नाव्युदक** न० नावि स्थितमुदकं नावि अग्निहोत्रसमाप्तिं यावदुदकम्। १नौकास्थिते जले अग्निहोत्रार्थमग्निप्रक्षणे कृते जलमात्रे च "तयोर्जलयोराहृताग्निना पाननिषेधः कात्या०श्रौ० ४।१०।१५ उक्तो यथा "अन्धतातिव्यधनोदपूतिदावाधानबीजपक्वनाव्युदकानि वर्जयेत्" सू० नाव्युदकम् नौशब्देन "नौर्वा एषा यज्ञस्य यदग्निहोत्रमिति" श्रुतेरग्निहोत्रमुच्यते तेन अग्निहोत्रार्थमुद्धरणे कृते तत्समाप्तिं यावत् उदकपानं न कुर्य्यादित्यर्थः। अथ वा नावि नौकायां यदुदकम् तस्य पानं न कुर्य्यादिति मानवे "या अन्तर्नाव्याः सुवं तासामाचामेच्च क्षिप्तं दार्वादध्यादिति"। यजमान आधानानन्तरमेतानि यावज्जीवं वर्जयेत्" कर्क०।

**नाश** पु० नश–भावे घञ्। १ध्वंसे निधने २अदर्शने ३पलायने ४अनुपलम्भे च मेदि०। ध्वंसस्य जन्याभावः इति नैयायिकाः अतीतावस्थेति सांख्याः "नाशः कारणलयः" सा०सू० "लीङ् श्लेषणे इत्यनुशासनात् लयः सूक्ष्मतया कारणेऽवस्थितिभागः सएवातीतावस्थाख्यो नाश इत्युच्यते" प्र०प०भा०। आत्यन्तिकनाशस्य कारणेन सह नाशः इति भेदः "विभेदजनकेऽज्ञाने नाशमात्यन्तिकं गते" संक्षेप० "अधिष्ठानावशेषो हि नाशः कल्पितवस्तुनः" वेदा०प० "क्षतित्राणात् वुद्धिनाशो वुद्धिनाशात् प्रणश्यति" गीता।

**नाशन** त्रि० नाशयति नश–णिच् ल्यु। नाशके "त्रिविधं नरकस्येदं द्वारं नाशनमात्मनः" गीता। स्त्रियां ङीप् नाशको ऽन्यत्र "ये परस्वापहर्त्तारः परस्वानाञ्च नाशकाः" भा० अनु० २३अ०।

**नाष्टिक** त्रि०नष्टं द्रव्यं स्वामित्वेनार्हति वा० ठञ्। १नष्टद्रव्यार्हे तत्स्वामिनि। "अथ मूलनाशार्थं प्रकाश क्रयशोधितः। अदण्ड्यो मुच्यते राज्ञा नाष्टिको लभते धनम्" इति मनुः "यदि स्वं नैव कुरुते ज्ञातिभिर्नाष्टिको धनम्। प्रसङ्गविनिवृत्त्यर्थं चोरवद्दण्डमर्हति" मी०मि० व्यासः। प्रसङ्गः चोरत्वसंशयः।

**नाष्ट्र** त्रि० नश+ष्ट्रन्–ट्रन्। नाशके स्त्रियां टाप् गौरादि गणे मातामहीशब्दस्योपलक्षणात् धितां ङीष् अनित्य इति ष्ट्रन्येऽपि स्त्रियां न ङीष्। "स्तुर्यो मा दिवाभ्यो नाष्ट्राभ्यः पातु" तैत्तिरीय० ब्रा० १।४।२ "पित्राभ्यो मा नाष्ट्राभ्यःपात्वि" यजु० २०।१२

**नासत्य** पु० द्वि०व०। नास्ति असत्यं यस्य नञ्सुभ्यादित्यादिना पा० नञः प्रकृतिभावः। अश्विनीकुमारयोः अमरः। "नासत्याभ्यां वयति वपुः" यजु० १९।८२ अश्विनीकुमारौ च द्वौ नासत्यदस्रनामानौ यथाह "देवौ तस्यामजायेतामश्विनौ भिषजां वरौ। नासत्यश्चैव दस्रश्च स्मृतौ द्वावश्विनाविति" हरिवं० ६अ०। तेनास्य प्रत्येकाभिप्रायत्वे एकवचनान्तताप्यविरुद्धा तथाप्रयोगात्। निरुक्तकारस्तु ६।१३ "तौ अध्वर उशतो यक्षमन्ने सुष्टी देवमं नासत्या पुरन्धिम्" इमामृचमधिकृत्य नासत्यशब्दस्य निरुक्तिभेदा नाह। सत्यावेव नासत्यावित्यौर्णवाभः। सत्यस्य २प्रणेतारावित्याग्रायणः, नासिकाप्रभवौ बभूवतुरिति वा"। तयोर्नासाभवत्वं च ऋग्भाष्यभूमिकायां ३५८पृ० द्रष्टव्यम्।

**नासमौजस्** पु० भलन्दनवंशस्य कम्बलवर्हिषः पुत्रभेदे "असमौजाः श्रुतस्य नासमौजाश्च तावुभौ" हरिवं०३८अ० तत्पुत्रोक्तौ।

**नासा** स्त्री नास–शब्दे भावे घ। १शब्दे वा० करणे घ। २नासिकायां ३गन्धग्राहकेन्द्रियभेदे च। द्वारोपस्थित काष्ठे (भनकाठ) (कपाटि) ख्याते ४पदार्थे अमरः ५वासकवृक्षे राजनि० तत्पुष्पस्य नासाकृतित्वात्तस्य तथात्वम्। नासायाः शुभाशुभलक्षणं गारुडे उक्तं यथा "शुकनासः सुखी स्यात्र शुकनासेऽतिजीवनम्। छिन्नायरूपनासः स्यादगम्यागमने रतः। दीर्घनासे च सौभाग्यं चौरे आकुञ्चितेन्द्रियः। स्त्रीमूत्रसुविपिटनास

ऋजुर्नाम्यतां भवेत्। अल्पच्छिद्रा सुघटा च अवक्रा च न्यपेक्षरे। क्रूरे दक्षिणवक्रा स्याद्वनितां च चुतं सलतं इति गरुडपु०।

**नासागतरोग** पु० सुश्रुतोक्ते नासागतव्याधिभेदे यथा "अथातो नासागतरोगविज्ञानीयमध्यायं व्याख्यास्यामः। अथ नासः१ पूतिनस्यं२ नासापाक३स्तथैव च। तथा-शोणितपित्तं४श्च पूयशोणितमेव च। अवभुद्ध्यं५ शपथु-दीर्घो६ नासानाह७ः८ परिस्रवः९०। नासाशोषे११ सहिता दशैकधेरिता गदाः। चत्वार्यशीतिः चत्वारः शोफाः सप्तार्बुदानि च। प्रतिश्यायाच्च ये पञ्च वक्ष्यन्ते सचिकित्सिताः। एकत्रिंशन्निदानास्ते तु नासा-रोगाः प्रकीर्त्तिताः। घ्रायते यस्य विधूयते च पाच्यते क्लिद्यति चापि नासा। न वेत्ति यो गन्ध-रसांश्च जन्तुर्जुष्टं व्यश्नेत्तमपीनसेन१। तज्जानिलश्लेष्म-प्रभवं विकारं ब्रूयात्प्रतिश्यायसमानलिङ्गम्। दोषैर्विदग्धैर्गलतालुमूले संवाहितो यस्य समीरणस्तु। निरेति पूतिर्मुखनासिकाभ्यां तं पूतिनस्यं२ प्रवदन्ति रोगम्। प्राक्शोणितं पित्तमरूंषि कुर्याद्यस्मिन्विकारे बलवांश्च पाकः। तं नासिकापाक३मिति व्यवस्येद्विद्रधेदोषावपि यत्र दृष्टौ। चतुर्विधं द्विप्रभवं द्विमार्गं वक्ष्यामि भूयः खलु रक्तपित्तम्४। दोषैर्विदग्धैरथ वापि अन्तर्ललाटदेशेऽभिहतस्य तैस्तु। नासा स्रवेत् पूयमसृग्विमिश्रं तं पूयरक्तं५ प्रवदन्ति रोगम्। प्राक्शोणिते सम्प्रदुष्टे यस्मान्नासो नासिकया निरेति। कफानुयातो बहुशः सशब्दं रोगमाहुः स्रवथुं६ विशिष्टाः। तीक्ष्णोपयोगादतिजिघ्रतो वा भावान् क-टून्कर्कशरीक्षणाद्वा। क्षवादिभिर्वा तरुणास्थिमर्मण्य-घ्राटिते यः स्रवथुर्निरेति। घ्रायते नासिकयैव यस्य सान्द्रो विदग्धो स्रवथः कफस्तु। प्राक्सञ्चितो मूर्ध्नि च पित्तजन्यं तं भ्रंशथुं७ व्याधिसदाहरन्ति। प्राणे भृशं दाहसमन्विते तु विनिःसरेद्धूम इवेह वायुः। नासा प्रदीप्तेव च यस्य जन्तोर्व्याधिन्तु तं दीप्तसदाहरन्ति। कफाहतो वायुरुदानसंज्ञो यदा खमार्गं विगुणः स्थितः स्यात्। प्राणं द्रुणोतीव तदा स रोगो नासाप्रतीनाह८ इति प्रदिष्टः। अजस्रमश्रुं सलिलप्रकाशं यस्याविवर्णं स्रवतीह१० नासा। रात्रौ विशेषेण हि तं नासापरि स्रावमिति व्यवस्येत्। घ्रायन्ति स्रेष्मणि मारुतेन पित्तेन गाढं परिशोषिते च। सशब्दसिध्मं मुखनासिकाक्षाद्यस्य नासापरिशोष११ उक्तः। दोषैस्त्रिभिस्तैः पृथगेकशश्च ब्रूयात्तथार्शांसि तथैव शोफान्। घ्राणाक्ष्णि सिद्धान्तमवेक्ष्य वापि सर्वात्मकं सन्निपतन्तमार्तं तु। रोगः प्रतिश्याय इव प्रदिष्टः स वक्ष्यते पञ्चविधः पुरस्तात्। शोफाश्च शोफविज्ञाने नासास्रोतोव्यवस्थिताः। निदाने-ऽर्शांसि निर्दिष्टान्येवं तानि विभावयेत्"। [त्रिका०।

**नासाच्छिद्रा** स्त्री नासा छिद्रा यस्याः ङीप्। पुर्णिकाख्ये

**नासादारु** न० नासार्थं दारु। दारोर्ह्रस्वे काष्ठे (झन-काठ) (कपाति) अमरः।

**नासालु** पु०नासायै नासिकाशब्दाय अलति पर्य्याप्नोति अल-उण्। कट्फलवृक्षे शब्दच० नासायां तत्फलचूर्णयोगे हि नासिकाशब्दो भवतीति तस्य तथात्वम्।

**नासावंश** पु० नासा तन्मध्यभागोवंश इव उन्नतात्। नासा-पुटस्यमध्यभागे। [काण्डीरवतायां राजनि०।

**नासासंवेदन** पु० नासा संविद्यतेऽनेन सम्+विद-ल्युट्।

**नासिकन्धम** त्रि० नासिकां धमति नासिका+धा-खश् समु छुलच। नासिकां शब्दायमानां कुर्वति नासिकया शब्दकारके।

**नासिन्धय** त्रि० नासिकां तत्स्थजलं धयति नासिका+धे-खश् समु छुलच। नासिकास्थजलपायके नासिकया जलपायके।

**नासिका** स्त्री नास-शब्दे ण्वुल्। १घ्राणेन्द्रिये २तदाधार-गोलके नासाशब्दार्थे। अस्य यसादौ मत्वे च नसा-देशः। नसः नसा नोभ्याम् नस्सिमित्यादि। [भरा०।

**नासिकामल** पु०ष०त०। नासास्थिते मले शिङ्घाणे (शिकनी)

**नासिक्य** त्रि०नासिका+चतुरर्थ्यां यद्वा यो०य। १नासिका-समीपादौ। स्वार्थे यञ्। २नासिकायाम्। भवार्थे शरी-रावयवत्वात् यत्। ३नासिकाभवे त्रि०४अश्विनीकुमारयोः पु० द्वि०व० ज्ञेयच०। ५दक्षिणदेशभेदे "कर्णाटमहाटवि-चिलकूटनासिक्यकोङ्कणगिरिः" बृ०सं० १४अ० दक्षिणस्यदे-शोक्तौ। स्वार्थे क। नासिक्यक नासायां शब्दभा०।

**नासीर** न० नासाय शब्दाय ईरेते ईर-क। १अपेसरसैन्ये त्रिका० २अपेसरमात्रे त्रि० शब्दर० "नखस्य नासीर-गते विनेतुः" नैष०।

**नास्ति** अव्य० अस्तीति विनष्टिप्रतिरूपकमव्ययं "सदसतो" पा० नञ्सहेन स०। अविद्यमानतायां सत्त्वाभावे यथा नास्तीश्वरः "अस्ति नास्ति न जानाति" इति चाषवाक्यः

**नास्तिक** त्रि० नास्ति परलोकस्तत्साधनमदृष्टं तत्साध्येश्वरो

वा इति मतिरस्य उन् । १परलोकाभाववादिनि २तत्साधनादृष्टाभाववादिनि ३तत्साक्षिण ईश्वरस्यासत्त्ववादिनि च चार्वाकादौ चार्वाकादिश्चार्वाकः माध्यमिकः योगाचारः सौत्रान्तिकः वैभाषिकः दिगम्बरश्चेत षड्विधः । "अतिमात्रोक्षितभीरनास्तिकः" माघः ।

**नास्तिकता** स्त्री नास्तिकस्य भावः तल् । मिथ्यादृष्टौ परलोकाद्यभावज्ञानस्य मिथ्यात्वात् "प्रज्ञानात्मात्मकोमोहस्तया धर्मार्थनाशकः । तस्मान्नास्तिकता चैव दुराचारश्च जायते' भा॰शा॰ १२३अ॰ ।

**नास्तिक्य** न॰ नास्तिकस्य भावः ष्यञ् । नास्तिकतायाम् "नास्तिक्यं वेदनिन्दाश्च देवतानाञ्च कुत्सनम्" मनुः ।

**नास्तिद** पु॰ आस्तिदशब्दे यत्न॰ ।

**नास्तिवाद** पु॰नास्ति परलोकादिरिति वादः । नास्तिकतायाम् "नास्तिवादार्थशास्त्रं हि धर्मविद्वेषणं परम्" हरिवं॰ २८अ॰ ।

**नास्य** न॰ नासायां भवम् शरीरावयवत्वात् यत् । १बलीवर्दे नासाबन्धनरज्वाम् "छिन्ननासे भग्नयुगे तिर्य्यक्प्रतिसखागते" मनुः । नासा+षष्ठ्यर्थां यत् । २नासासन्निकृष्टादौ त्रि॰ "मनुष्यान् खपुषो दृष्ट्वा नास्यघ्राणं चकार यः" हरिवं॰ २१७अ॰ नासाघ्राणसन्निकृष्टस्थघ्राणमित्यर्थः ।

**नाह** पु॰ नह-बन्धने भावे घञ् । १बन्धने २कूटे च मेदि॰ ।

**नाहल** पु॰ म्लेच्छजातिभेदे शेषभ॰ ।

**नाहुष(षि)** पु॰ नहुषस्यापत्यं वा॰ अण् यत्र इञ् वा । नहुषस्यापत्ये यज्ञातौ । "ययातिर्नाहुषः सम्राडासीत् सत्यपराक्रमः" भा॰आ॰ ७५अ॰ ।

**नि** अव्य॰ नी-वा॰ डि प्रादिः उपसर्गः । १संज्ञे २अधोभावे न्यग्भावे ३श्रेष्ठे ४आदेये ५निश्चये ६कौशले ७बन्धने ८व्यवहारे ९समीपे १०दर्शने ११उपरमे १२आश्रये च शब्दरत्नमहोदधिः उदाहृतं च तत्रैव क्रमशस्तेषूदाहरणेषु १निकरो मधूनां, २निपतितः । ३निष्टङ्कीतं ४निदेशितं, ५निश्चिते ६निपुणः ७निबन्धः ८निषीतसूदकम् । ९निकटः १०निदर्शनं ११निद्रालुः १२निलयः । १३संज्ञायां १४श्रेष्ठे १५दाने १६मोक्षे १७विन्यासे च मेदि॰ । १८निश्चये १९निश्चये दुर्गादासः ।

**निःक्षेप** पु॰ निर्-(नि)सा क्षिप-भावे घञ् । १अर्पणे (गच्छितराखा) अष्टादशविवादान्तर्गते २विवादभेदे । स च वीरमि॰ विस्तरेण दर्शितो यथा

"अथ निः(नि)क्षेपाख्यव्यवहारपदम् । तत्र निः(नि)क्षेपो नाम स्वद्रव्यस्य विश्वासेन परहस्तान्तरे स्थापनम् । तथा च नारदः "स्वद्रव्यं यत्र विश्वस्यान्निः(नि)क्षिप्यत्वविशङ्कितः । निः(नि)क्षेपो नाम तत्प्रोक्तं व्यवहारपदं बुधैरिति" अत्र न्यासोपनिध्योरतिव्याप्तिस्तयोर्लक्षणत्वान्निः(नि)क्षेप एव । याज्ञवल्क्यासमक्षं समर्पितो न्यास इत्युच्यते । अतएव हारीतः "राजचौरादिकलयाद्दायादानां च वञ्चनात् । स्थाप्यतेऽन्यस्य हस्ते द्रव्यं न्यासः स परिकीर्त्तितः" इति । अयमेवागन्तुद्रव्यस्थापने उपनिधिरित्युच्यते । तथा च नारदः "असङ्ख्यातमविज्ञातं सत्तद्रं यत्क्षिपीयते । तज्ज्ञानीयादुपनिधिं निः(नि)क्षेपकुशलं विदुरिति" । असङ्ख्यातम् अनाख्यातम् अविज्ञातम् अदर्शितम् । अतएव हारीतः "असमक्षं व्यवस्थितमसङ्ख्यातमदर्शितम् । सद्रङ्गितञ्च यद्द्रव्यं तदौपनिधिकं स्मृतमिति" व्यवस्थितं करण्डकादौ प्रक्षिप्य पिधितम् । अतएव याज्ञवल्क्यः "वासनस्थमविज्ञातं हस्तेऽन्यस्य यदर्प्यते । द्रव्यन्तदौपनिधिकं प्रतिदेयन्तथैव तदिति" वासनं द्रव्याधारकरण्डकादि तत्स्थं वासनस्थम् । हस्तपक्षस्यसपक्षणम् । अतएव नारदः "निः(नि)क्षिप्यते परहस्ते तदौपनिधिकं स्मृतमिति" । तथा चायमेतेषामपभेदः । याज्ञवल्क्यसमक्षं गणयित्वा स्थापितं निः(नि)क्षेपः । मुद्रयाभिनोऽसमक्षं गणितं वा तत्क्षिप्यते एतद्दातव्यमित्युक्त्वाऽन्यस्य तत्पुत्रादेर्हस्ते दत्तं न्यासः । सद्रङ्गितमसमक्षमगणितं स्थापितमुपनिधिरिति । निः(नि)क्षेपादीनां स्थापनप्रकारमाह मनुः "कुलजे वृत्तसम्पन्ने धर्म्मज्ञे सत्यवादिनि । महापक्षे धनिन्यार्य्ये निः(नि)क्षेपं निः(नि)क्षिपेद्बुधः" इति । महापक्षे बहुतरबन्धुयुक्ते । निः(नि)क्षेपस्यहस्तसपक्षणम् । हरिहस्तिः "स्थानं मुद्रस्तु तद्वर्णं विधानस्तु गुणस्तथा । सत्यं शौचं वस्त्वज्ञानं परीक्ष्य स्थापयेन्निधिमिति" निधिरूपनिधिः । एतदप्युपलक्षणम् । निः(नि)क्षेपादीनां रक्षणं कथं कर्त्तव्यं याज्ञवल्क्येत्याह हारीतः "सप्ताहिकं रक्षोदत्तं द्विविधं तदुदाहृतम् । पुत्रवत्परिपाल्यं तद्विनश्यत्यन्यथेक्षणे" इति । याज्ञवल्क्यः फलमपाजयितुर्दोषञ्चाह "ददतो यद्भवेत् पुण्यं क्षेमकृद्याम्यरादिकम् । तत् स्यात्फलमतो न्यासो यथैव मरणागतः । भर्त्तुर्द्रोहं यथा नार्याः पुंसः पुत्रस्य दुष्टधीः । दोषो भवेत्तथा न्यासे मार्गितोऽयाचिते न्यासम् । न्याय-

द्रव्यं न मृष्टोवाक्षाग्रस्तयगस्करः। मृष्टीतं पाल-
वेदृयज्ञात् सङ्ख्याचितमर्पयेदिति" न्यासपदृष्यसपलक्ष-
णम्। तेन फलरत्नादिकं निःक्षेपादित्रयसाधार-
णमिति मन्तव्यम्। दैवराजोपघाते याचकस्य न दोष
इत्याह बृहस्पतिः "दैवराजोपघातेन यदि तन्नाशमाप्नु-
यात्। यद्गीतद्रव्यसहितं न तद्दोषोऽत्र विद्यते" इति।
यद्गीतुरिति शेषः उभयेच्छादिद्रव्यदोषाभावादिति भावः।
यद्गीतद्रव्यसहितमित्युपेक्षाभावनिश्चयायोक्तम्। तेन क-
थञ्चिन्निः(नि)क्षिप्तमात्रस्य विनाशे प्रमाणान्तराद्युपेक्षाभावे
निश्चिते यद्गीतुर्दोषो न विद्यते इति मन्तव्यम्। दैव-
राजयदृष्यसमर्पणनिमित्तोपलक्षणार्थम्। अतएव
कात्यायनः "राजदैविकचौरैर्वा निः(नि)क्षिप्तं यत्र
नाशितम्। यद्गीतः सह भाण्डेन दातुर्नष्टमदुष्यते"
इति। भाण्डेन अर्थेन। नारदोऽपि "यद्गीतः
सह योऽर्थेन नष्ट एव स दायिनः। दैवराजकृते तद्वत्
चेत्क्षिप्तकारितमिति" तद्वदितिपदेनैकरूपमेयमन्य-
दुपमानमित्यवगम्यते। तेनैवं योजना यद्गीतुरर्थेन सह
यो नष्टः स दायिन एव एवन्दैवराजकृते यो नष्टः सोऽपि
दायिन एव नष्ट इति दैवपदृष्यलक्षणोपलक्षणम्। अत-
एव याज्ञवल्क्यः "न दाप्योपहृतन्तन्तु राजदैविकत-
स्करैरिति" दैविकपदस्यार्थो विहतो भवति "चौरैर्हृ-
तञ्छलेनोटमग्निना दग्धमेव वा। न दद्याद्यदि तत्तस्य
न संहरति किञ्चनेति"। यदि तत्तस्मिन्निः(नि)क्षेपादल-
मपि धनन्न संहरति न मृह्णाति तर्हि न दद्यादित्यर्थः।
तथा च स एव "मृतद्रे नाम्न्यात्किञ्चिद्यदि तत्तस्य
संहरेदिति" क्वचित् केनचिद्धेतुना नष्टमपि यद्गीता
मूल्यद्वारेण न दाप्य इत्याह कात्यायनः "ज्ञात्वा
द्रव्यविशेषन्तु दाता यत्र विनिः(नि)क्षिपेत्। सर्वोपाय-
विनाशेऽपि यद्गीता नैव दाप्यते" इति। निः(नि)-
क्षेपयद्गीतारं प्रत्याह कात्यायनः। "निः(नि)क्षिप्तं
यस्य यत्किञ्चित् तत्प्रयत्नेन पालयेत्। दैवराजकृतादन्यो
विनाशस्तस्य कीर्त्यते" इति। यस्य पार्श्वे यत् स्था-
पितन्तेनावहितेन रक्षणीयम्। यतो दैवराजकृता-
दन्यो विनाशस्तस्य याचकस्य दोषेण कृतत्वेन कीर्त्यते
इत्यर्थः। न केवलन्दुष्कीर्त्तिरेव तस्य किन्तु विनाशे
जाते वस्तुगत्या दोषो वस्तूपहानिश्चेत्याह स एव
"यस्य दोषेण यत्किञ्चिद्विनश्येत क्षिपेत वा। तद्द्रव्यं
क्षोदयेद्दाप्यो दैवराजकृताहिनेति"। दोषः उभयेच्छादि-
त्यत्र। बृहस्पतिरपि "भेदेनोपेक्षया न्यासं यद्गीता
यदि नाशयेत्। याच्यमानो न दद्याद्वा दाप्यस्तत्क्षोद-
यमर्पयेदिति" कात्यायनोऽपि "न्यासादिकं परद्रव्यं प्रम-
थितस्तेपेक्षितम्। अज्ञाननाशितञ्चैव येन दाप्यः स एव
तदिति" अत्र विशेषमाहद्रव्यासकात्यायनौ "भक्षिते
क्षोदयेद्दाप्यः समर्पाप्य उपेक्षिते। किञ्चिदूनं प्रदाप्यः
स्याद्द्रव्यमज्ञाननाशितमिति" किञ्चिदूनत्वपदांशन्यू-
नमिति मिताक्षरायाम्। याचनानन्तरमदत्तस्य पश्चाद्दै-
वराजकृतेऽपि विनाशे तन्मूल्यमात्रं दातव्यमित्याह व्यासः
"याचनानन्तरं नाशे दैवराजकृतेऽपि सः। यद्गीता
प्रतिदाप्यः स्यान्मूल्यमात्रन्तु संशयः" इति। प्रत्यर्पण-
विलम्बमात्रापराधे सद्विगुणदानस्यान्याय्यत्वात्। राज्ञे
च तन्मूल्यं दण्डो देय इत्याह नारदः "याच्यमानस्तु
यो दातुर्निः(नि)क्षेपन्न प्रयच्छति। दण्ड्यः स राज्ञो
भवति नष्टे दाप्यश्च तत्समामिति" नष्टे दैवतो राजतो
वेति शेषः। याज्ञवल्क्योऽपि "भ्रंशयेन्नार्पितेऽदत्ते
दाप्यो दण्डञ्च तत्समामिति"। नार्पिते याचितेऽदत्ते
सति यदि भ्रंशो दैवराजकृतो नाशो भवति तथापि
तद्द्रव्यं मूल्यपरिकल्पनेन। "धनिने याचको दाप्यो-
दण्डो राज्ञे च तत्समम्"। तत्समं दण्डमित्यर्थः।
यः पुनःस्यापकानतुज्ञया निः(नि)क्षेपमुपभुङ्क्ते तस्य
दण्डमाह नारदः "यत्तार्थं साधयेत्तेन निः(नि)क्षेपे
त्वनतुज्ञया। तत्रापि दण्ड्यः स भवेत्तच्च क्षोदयमावहे-
दिति" दण्डश्च साधितद्रव्यानुसारेण। याज्ञवल्क्योऽपि
"आजीवनं क्षेपणया दण्ड्यो दाप्यस्तथापि क्षोदयमिति"
आजीवनं भोगसङ्कर्षप्रयोगादिना उपजीवनं क्षेपणया
स्वाम्यनतुज्ञया। इदञ्चप्रमाणमाह कात्यायनः। "निः-
(नि)क्षेपं इदञ्चिरेण्य क्रयविक्रयमेव च। याच्यमानं न
चेद्दद्याद्दण्डं पञ्चकं शतमिति"। निः(नि)क्षेपकर्त्तार-
मित्याह विष्णुः "निः(नि)क्षेपापहारी इदञ्चिरण्यन्तस्य
धनिनस्य दाप्यः"। अस्य दण्डमाह मनुः "निः(नि)-
क्षेपस्यापहर्त्तारं तत्समन्दापयेद्दमम्। तथोपनिधिकर्त्तार-
मविशेषेण पार्थिवः" निः(नि)क्षेपापह्नवे कर्त्तव्यमाह
व्यासः "निः(नि)क्षेपञ्चिकीर्षुते यस्तु नरो बन्धुबला-
न्वितः। साक्षिभिर्वाथ द्रव्येण विभाव्य प्रतिदाप्यते"
दण्डमाह बृहस्पतिः "मृतीत्वापह्नुते यत्र साक्षिभिः
शपथेन वा। विभाव्य दापयेद्राजा तत्समं विनयन्तथेति"
विनयं दण्डम्। अस्याक्षिनिः(नि)क्षेपादौ स्यापकस्या-

ऋतवादित्वे साक्षिभ्यो यथास्थितमर्थमवगम्य दण्डनीयः स राज्ञेत्याह मनुः "निः(नि)क्षेपो यः कृतो येन यावांश्च कुलसन्निधौ। तावानेव स विप्रेयो विब्रुवन् दण्डमर्हतीति" कुलं साक्षिसङ्घम्। ऋषाक्षिके त्याह हरीतः "रहोदत्ते निधौ यत्र विवादः प्रजायते। विभावकत्वात् दिव्यतुभयोरपि च ऋतमिति" उभयोर्मध्ये एकस्येत्यर्थः उभयपक्षे "दृष्ट्वा वान्यतरः कुर्यादिव्यमेव पक्षे यथा स्यादिति। यहीतस्यापक्नवेऽनृतवादित्वे दण्डमाह मनुः "निः(नि)क्षेपस्यापहर्तारमनिः(नि)क्षेप्तारमेव च। सर्वैरुपायैरन्विच्छेत्तत्पणैश्चैव वैदिकैः। यो निः(नि)क्षेपं नार्पयति यश्चानिः(नि)क्षिप्य याचते। उभौ तौ चोरवच्छास्यौ दाप्यौ वा तत्समं दममिति" चोरवच्छास्यौ चोरवद्दण्ड्यौ चोरवद्दण्डेन दण्डयितव्यावित्यर्थः। दण्डस्य प्रमाणमाह दममिति। अत्रैवपुराणे। यत्तु "यो निः(नि)क्षेपं नार्पयति यश्चानिः(नि)क्षिप्य याचते। तावुभौ चोरवच्छास्यौ दाप्यौ च द्विगुणं दममिति" द्विगुणो दण्ड उक्तः स दुर्वृत्तविषयो ब्राह्मणातिरिक्तविषयो वा अन्यथा समदण्डप्रतिपादकमनुवचनविरोधः स्यादिति। निः(नि)क्षिप्तं द्रव्यमकाले ददतो द्विगुणोदण्ड उक्त्वाह कात्यायनः "याचितस्तूपनिधिः काले कालहीनन्तु वर्जयेत्। कालहीने ददद्दण्डं द्विगुणञ्च प्रदापयेदिति" याचितः निः(नि)क्षेपकारिणेति शेषः यद्वयादनुपनिधिरन्यस्य हस्ते न्यस्तस्तद्व्यतीते काले न याचेत इत्यर्थः। अव्यतीते काले स्वयमेव नायाचितमर्पयेदयम् "सकृदाचितमर्पयेदिति" हरीतस्मरणात्। तस्मिन्नेव वर्त्तमाने स्वयमेवायाचितन्दीयमानं कालहीनन्तु दानन्दोषेणैवेति तद्ददतोऽपि दण्डोयुक्तः। प्राड्विवाकं प्रत्याह मनुः "यो निः(नि)क्षिप्तं याच्यमानो निः(नि)क्षेप्तुं न प्रयच्छति। स याच्यः प्राड्विवाकेन तन्निः(नि)क्षेप्तुरसन्निधौ। स यदि प्रतिपद्येत यथान्यस्त यथार्पितम्। न तत्र विद्यते किञ्चित् यत्परेणाभियुज्यते" इति। यदा तु न प्रतिपद्येत तदा राजानं प्रत्याह स एव "तेषां न दद्याद्यदि तु तद्विरणं यथाविधि। हरन्निक्षेप्तुं दाप्यः स्यादिति धर्मस्य धारणा। निःक्षिप्तस्य धनस्यैव प्रीत्योपनिहितस्य च। राजा विनिर्णयं कुर्यादक्षिक्षन्यासधारिणमिति" तेषां मध्येऽभियोक्तृणाम्। इदं द्विगुणम्। निक्षेप्तुं दण्डयित्वा अक्षिक्षन् ऋतादयन्। निः(नि)क्षेप्तारं प्रत्याह हरीतः "स्थापितं येन विधिना येन यस्य यथाविधि। तथैव तस्य तद्देयं न देयं प्रत्यनन्तरे" इति। स्थापितेतरस्य यस्य स्थापितद्रव्यस्वाम्यमस्ति स इह प्रत्यनन्तर उच्यत इति स्मृतिचन्द्रिकायां, प्रत्यनन्तरे पुत्रादाविति कल्पतरौ। स्थापकं प्रत्याह मनुः "यो यथा निः(नि)क्षेपेद्धस्ते यमर्थं यस्य मानवः। स तथैव ग्रहीतव्यो यथा दायस्तथा ग्रहः। मिथोदायः कृतो येन ग्रहीतो मिथ एव वा। मिथ एव प्रदातव्यो यथा दायस्तथा ग्रहः। मृते नाशनुयात् किञ्चिद्यदि तस्मात्तु संहरेदिति" दायो दानं स्थापनमिति यावत्। ग्रहोग्रहं मिथः अन्योन्यमेव एतदुक्तम्भवति यथार्पितं स्थापितम् साक्षिसमक्षं ग्रहीतव्यम्। रहसि स्थापितं रहस्येवेति। यत्तु सङ्ग्रामसङ्कटे निःक्षेपेण मूषकादिनोपहृते निः(नि)क्षेपं स्थापयित्वा न किञ्चिद्दद्यान्नाप्नुयात्। यदि तत्कारिः(नि)क्षेपात् प्रतिसङ्कारकरणादिना न संहरेत्किञ्चिदित्यर्थः। स्थापयितुमशक्ते प्रत्यनन्तरे तद्देयमित्याह स एव "स्वयमेव तु यो दद्यान्मृतस्य प्रत्यनन्तरे। न स राज्ञाऽभियोक्तव्यो न निःक्षेप्तुश्च बन्धुभिरिति" अनेन वचनेन वयोभङ्गात्रा स्थापके मृते प्रत्यनन्तरे प्रत्यर्पणं याचनेन कार्यमित्युक्तम्। स्वयमेव याचनमन्तरेणेत्यर्थः। याचनमन्तरेण दानमयादिकालापाये मन्तव्यम् अन्यथा दोषापत्तेः। प्रत्यनन्तर बन्धुत्वे तु नैकस्मिन् प्रत्यनन्तरे देयं किन्तु सर्वप्रत्यनन्तरसन्निधाविति न निःक्षेप्तुबन्धुभिरभियोक्तव्य इत्यनेन सूचयाम्बभूव। यदा तु याचकः स्वयमेव न ददाति तदा प्रत्यनन्तरकर्त्तव्यमाह स एव। "याचितेनैव चान्विच्छेत्तमर्थं प्रीतिपूर्वकम्। विचार्य्य तस्य वा हस्तं साक्ष्येव परिसाधयेदिति" अन्विच्छेत् अवधारयेत्परिसाधनं याचकसकाशादादानन्दुर्याचकहस्तं विचार्य्य स तद्धस्तयाचकविषये साक्ष्येव कार्य्यं न भयादिप्रदर्शनेन। दुर्वृत्तयाचकविषये तु बलादानप्रकरणोक्तेन भयादिप्रदर्शनाद्युपायान्तरेण बलादिना कार्य्यमित्यस्यादेव वचनादवगम्यते। तथा सद्वृत्ते विप्रतिपन्ने भूतानुसारेण साक्षिद्वितयसत्त्वे साक्ष्याद्यभावे प्रत्यनन्तरादिना साधयेत्। दुर्वृत्ते तु विप्रतिपन्ने बलादिना परिहरेदिति चास्यादेव वचनादवगम्यते। सद्वृत्ते बलादिप्रयोगवच्छपथेन शोधनस्यायुक्तित्वात्। याचके तु मृते पश्चाद्दत्तीनं निःक्षेपादि जायते तेनैव स्थापके प्रत्यनन्तरे

वा प्रत्यपंणीयमित्यतिस्थूलत्वात् क्षतिकारैरुपेक्षितमित्यक्षादानप्रकारवदुच्यते यदि याचकोऽसौ स्वयं न ददाति तदा स्थापकः प्रत्यर्पणकारो वा पूर्वोक्तमार्गेणान्विच्छेत् सम्मतिपत्रं पूर्वोक्तेन प्रकारेण परिपठ्य साधयेदित्येतदपि क्षतिकारैरुपेक्षितं ज्ञातुं शक्यत्वादिति। "इवीषु निः(नि)क्षेप इवार्पितं हयम्" कुमा०।

**निःप्रभ** त्रि० निर्गता प्रभा यस्य "प्रादिभ्यो धातुजस्य वाच्योत्तरपदलोपः" वार्त्ति०। मतुप्शब्दलोपः वा विसर्गस्य सत्वम्, १प्रभाशून्ये पक्षे सत्वे निष्प्रभ इत्यपि तत्रार्थे

**निःभ्रम** पु० निर्गतः भ्रमात् "निरादयः क्रान्ताद्यर्थे पञ्चम्याः" वार्त्ति० निरा० ५त०। १क्रोधे त्रिका० पक्षे सत्वम्।

**निःभ्रलाक** त्रि० निर्गतः भ्रलाकायाः निर्गता भ्रलाका यस्मात् वा। १निर्जने रङ्कवि अमरः। "अरण्ये निःभ्रलाके वा मन्त्रवेदविभावितः" मनुः वा सत्वम्।

**निःभ्रख्या** स्त्री निर्गतं भ्रख्यं यस्याः ५ब०। १दन्तीडचे राजनि० तल्लवने हि शीघ्रं भ्रख्यं निर्गच्छति। २भ्रख्यवत्प्रतिबन्धकरहिते त्रि० "निःभ्रख्यसत्त्वजेयं जीवितम्" दशकु० पक्षे सत्वम्। [२अपगुन्यमात्रे त्रि०। वा सत्वम्

**निःभ्रूक** पु० निर्गतः भ्रूकोऽस्मात्। १सद्यशाली राजनि०

**निःभ्रेष** त्रि० निर्गतः भ्रेषो यस्य। समस्ते सकले "निःभ्रेष च्युतचन्दनं स्तनतटं निर्लक्षरागोऽधरः" काव्यप्र० वा सत्वम्। निष्भ्रेष तत्रार्थे [पक्षे सत्वम्।

**निःभ्रोध्य** त्रि० निर्गतं भ्रोध्यमस्मात्। निर्मले स्वच्छे अमरः।

**निःभ्रयणी** स्त्री निश्चितं भ्रीयतेऽनया श्रि-करणे ल्युट् ङीप्। काष्ठमयसोपाने शब्दरत्ना० वा सत्वम्। "निःश्रि-इनि ङीप्। निश्रिणिरौलयत्र शब्दर०।

**निःश्रेणि** स्त्री निश्चिता श्रेणिरत्र। काष्ठसोपाने अमरः। वा सत्वम्। "चक्रे त्रिदिवनिःश्रेणिः सरयूरनुवासिनाम्" रघुः।

**निःश्रेयस** न० नितरामं श्रेयः नि० अच् समा०। १मोक्षे २मङ्गले ३विज्ञाने ४भङ्गौ ५अनुभावे च शब्दरत्ना०। "पश्यितो ह्यर्थलक्ष्येषु निःश्रेयसकरं वचः" भा०स० १६८लो०"तपो विद्या च विप्रस्य निःश्रेयसकरं परम्" मनुः। नितरां श्रेयो यस्मात् अच् समा०। ६गङ्गरे पु० मेदि० वा सत्वम्। निष्श्रेयस तत्रार्थे

**निःश्वास** पु० निरे+श्वस-भावे घञ्। प्राणवायोर्नासया बहिर्निःसरणे "इमलीफेनपीतस्य निःश्वासोपहतस्य च" मनुः। वा सत्वम्। निष्श्वास तत्रार्थे

**निःषम** अव्य० निर् सम+तिङन्तवा०स० समामा० सत्वम्। निन्दायाम् अमरः।

**निःषन्धि** त्रि०निष्क्रान्तः सन्धेः सन्धिरित्यस्मात् निरादिव० समामा० सत्वम्। १सन्धिशून्ये २खण्डे त्रिका० वा सत्वम्।

**निःषामन्** त्रि० निष्क्रान्तः साम्नः निरा० समामा० सत्वम्। सामरहिते वा सत्वम्।

**निःसम्पात** पु० निर्गतः सम्पातो यत्र प्रादि० बहु०। गमनशून्ये १निर्जीवे त्रिका० वा सत्वम्। २गतिशून्ये च "आकाशमपि बाणौघैर्निःसम्पातं विधीयताम्" हरिवं० ६६अ०।

**निःसंशय** त्रि० निर्गतः संशयोऽस्मात् प्रा०ब०। सन्देहशून्ये "क्षते निःसंशये पापे न भुञ्जीतानुपस्थितः" प्रा०त०। पक्षे सत्वम्। निःसन्देहोऽप्यत्र।

**निःसङ्ग** त्रि० निर्गतः सङ्गो यस्मात् प्रा० बहु०। सङ्गरहिते सङ्गश्च क्लेदः फलाभिसन्धिश्च "निःसङ्गता सक्तिपदं यतीनाम्" विष्णुपु० "वेदोक्तमेव कुर्वाणो निःसङ्गोऽर्पितमीश्वरे" भक्त०त० धृत भाग०११ स्कन्धवचनम्।

**निःसरण** न०निर्+सृ-भावे ल्युट्। १निर्गमे करणे ल्युट्। २सृदृादिसूत्रे ३मरणे ४निर्वाणे ५उपाये च हेमच०। "दुःखनिःसरणं वेद सर्वज्ञः स सुखी भवेत्" भा०शा० २१५अ० वा सत्वम्।

**निःसार** पु० निर्गतः सारो यस्मात्। १शाखोटकवृक्षे (सेंकोडा) २क्षोनाकभेदे राजनि० ३साररहिते त्रि०। "मानुष्ये कदलीस्तम्भनिःसारे सारमार्गणम्" शु०त० "जगत् सर्वन्तु निःसारमनित्यं दुःखभाजनम्" वाक्यिकाधृ० २७अ०। ४कदल्यां स्त्री वा सत्वम्।

**निःसारण** न० निर्+सृ-णिच् ल्युट्। १बहिष्करणे स्वार्थे णिच् करणे ल्युट् वा। २सृदृादिसूत्रे ३निःसरणे च शब्दर० वा सत्वम्। [जटाधरः।

**निःसारित** त्रि० निर्+सृ-णिच् कर्मणि क्त। बहिष्कृते

**निःसीम(न्)** निर्गता सीमा यस्मात् निरादि०बहु०। सीमारहिते अवधिशून्ये "निःसीमानन्दमासीदुपनिषदुपमा तत्परीभूय भूयः" नैष० "अहह महतां निःसीमानश्चरितविभूतयः" भार० र०अत्र ङापोऽभावपक्षे नान्तत्वात् स्त्रियां वा टाप् अनन्तत्वात् न ङीप् इति भेदः। वा सत्वम्

**निःस्नेह** त्रि० निर्गतः स्नेहो यस्य प्रादि० बहु०। स्नेहशून्ये स्नेहश्च तैलादिद्रव्यं प्रीतिश्च। "निःस्नेहं कीटसञ्चितम्" स्मृतिः "ये प्रतिग्रहनिःस्नेहास्ते नराः स्वर्गवासिनः" भा०अनु० २३अ०। २अतसां स्त्री त्रिका० तस्य

निष्कांशितस्नेहत्वात् तथात्वम् । वा विसर्गस्य सत्वम् ।
निःस्नेहफला स्त्री निःस्नेहं फलं यस्याः । श्वेतकण्ट-
कार्य्यां राजनि० । [अपि निष्प्रेहोऽभवत्" रघुः ।
निःस्पृह त्रि०निर्गता स्पृहाऽस्य । आशाशून्ये "त्रिदिवस्थे-
निःस्राव पु०निर्+स्रु–घञ् । अवयवे राजनि स्थापितो यो-
ऽर्घः प्रत्यहं तेन विक्रयः । क्रयो वा, निस्रावलक्षात्
बणिजां लाभलक्षं स्यात्" याज्ञ० "निःस्रावः अवयवः"
मिता० ।
निःस्राव पु०निःस्रवति निर्+स्रु–घ । (माड)(फेन) १भक्त-
रसे हेमच० भावे घञ् । २व्यये "वह्वादानोऽल्पनिःस्रावः
ख्यातः पूजितदैवतः" कामन्द० ।
निःस्व त्रि० निर्गतं स्वमस्य प्रा०ब० । १दरिद्रे "गृधोलूकारौ
विरूपौ च वक्रौ पादौ शिरालकौ । संकुष्कौ पाण्डु-
रनखौ निःस्वस्य विरलाङ्गुली" गरुड़पु० । २धनरहिते
३ज्ञातिरहिते च ।
निःस्वभाव त्रि० निर्गतः स्वभावो यस्य प्रा०ब० । स्वभाव-
शून्ये । बौद्धमते वस्तुमात्रस्य निःस्वभावत्वम् यथोक्तं
लङ्कावतारे "बुद्धा विविच्यमानानां स्वभावो नावधा-
र्यते । अतो निरभिलप्यास्ते निःस्वभावाच्च दर्शिताः"
(ते पदार्थाः)
निकच अव्य० कचस्य समीपम् सामीप्येऽव्ययी० । पश्चिमापर-
वन्निसमीपे "चित्रं परिच्छित्तमीहक्षिये निकचे"
कात्या०श्रौ०१८।२।१ "पश्चिमापरसन्निः कचस्तस्य समीपं
निकचम्" वेददी० । अव्ययीभावे अदन्तात् सप्तम्या
वा न लुक् ।
निकट त्रि० निवहम् निवह्यार्थात् नेः "सम्मोदव" पा०
चात् कटच् । आसन्ने सम्बद्धे । "अदूरे गम्यतां
किञ्चिन्निकटं सरः" पञ्चत० ।
निकर पु० निक+भावादौ अप् । १समूहे अमरः । २सारे
३न्यायदत्तधने ४निधौ च मेदि० "निर्यन्दिनीरनिकरेण
कृताभिषेका" माघः ।
निकर्षण न०निर्गतं कर्षणमस्मात् प्रा०ब० । १कर्षणरहिते भू-
भागे २स्पष्टादिपरिच्छित्तदेशे सन्धिदेशे ३पुरग्रामादुबहि-
र्भागस्थविहारभूमौ कर्षणशून्यत्वात् तथोक्तत्वात्तम् ।
निकष(स) पु० नि+कष(ष)–घञ् निकष(ष)त्यनेन करणे वो
वा । १कषणे २कषपाषाणे च (कष्टीपाथर) अमरः ।
"निकषे हेमरेखेव श्रीरासीद्वपाविनी" रघुः कर्मणि
च । ३परीक्षार्थं कषणकर्मणेहमादौ त्रि० "यदा निर्गुण
माप्नोति ध्यानं मनसि पूर्वजम् । तदा प्रज्ञायते ब्रह्म
निकषं निकषे यथा" भा०शा० २०५अ० ४शाणे अक्षा-
दितोलतासाधनास्त्रे अमरः ।
निकषा अव्य० नि+कष–क्विप् वा । १निकटे अमरः ।
"विलङ्घ्य लङ्कां निकषा चकाशति" माघः निकषायोगे
शेषार्थे द्वितीया २मध्ये च मेदि० । ३राक्षसमातरि स्त्री
निकषात्मज पु० ६त० । राक्षसे अमरः ।
निकषोपल पु० कर्म० । १शाणे (कष्टी) २प्रस्तरभेदे च ।
निकाम न० नि+कम–घञ् अभिधानात् क्लीवता । १दृष्टा-
तिक्रमे २पर्य्याप्ते ३क्षतिशये च अमरः । "निकामतप्ता
द्विविधेन वह्निना" कुमा० "नित्यं हरेः सन्निहिता
निकामम्" माघः ।
निकामन् त्रि० नि+कम वा० मनिन् । नितरां कामुके
"सिषक्ति स्वलमानानि कामभिः" ऋ०१०।९२।६। "निका-
मभिः नितरामभिलाषुकैः" भा० ।
निकाय पु० नि+चि–घञ् कुत्वम् । १निवासे २सजातीय-
प्राणिसङ्घे ३सङ्घे ४परमात्मनि मेदि० "तथा देवनिका
यानां शेषत्वाच्च दिवौकसाम्" भा०आ० १२३अ० । "तस्य
सर्वनिकायेषु निर्भरेषु गुहासु च" रामा०४।४४।२१
निकाय्य पु० नि+चि–ण्यत् कुत्वम् । गृहे अमरः ।
"न प्रकाश्यः जनः कश्चित् निकाय्यं तेऽधितिष्ठति"
भट्टिः ।
निकार पु० नि+कृ–कृ–वा भावे घञ् । १भारवे २परिभवे
अमरः "राज्ञां निकारे सहसा प्रवृत्तः" भा०आ०
१८६अ० । "निकारोऽन्ये पदाङ्गनमङ्गे भोक्तरि निध-
नम्" शब्दर० ३भर्त्सने च ४धान्यादेरूर्द्ध्वं पर्णे
अमरः । ५खलीकारे मल्लमा० ।
निकारण न० नि+कृ–णिच्–ल्युट् । १भारवे २वधे अमरः
निकाल्य त्रि० नि+कल–ण्यत् । चालनीये त्रिका० ।
निकाश्य पु०नि+काश–घञ् । १प्रकाशे २समीपे च । तुल्यार्थे
अस्य निभादित्वात् नित्यस० वा दीर्घश्च । "उवाच पु-
रोन्दुनिकाशवक्त्राम्" हरिवं १५४ अ० "आकर्णसङ्घटित-
मस्तु विकाशिकाशनीकाशमाप समतां सितचामरस्य"
माघः । माघस्येदस्य न पृथक्प्रयोगः ।
निकाष पु० नि+कष–भावे घञ् । सम्यक्षणे कषणे
"तेजोभिः कषकनिकाषराजिलौकैः" किरा० ।
निकास पु०नि+काश–घञ् । प्रकाशे नीकाशशब्दार्थे माघस्ये
भरतः निभादित्वात् नास्य पृथक्प्रयोगः ।

**निकुञ्चकर्णि** अव्य० निकुञ्चौ सङ्कुचौ कर्णौ यत्र द्वि० दण्डत्रा० ङीप्समा० । सङ्कुचकर्णके

**निकुञ्चक** पु० नि+कुच–ण्वुल् । १कुडवपादे प्रस्थतपरिमाणे अमरः २खारीभेदे जलवेतसे भावप्र० ।

**निकुञ्ज** पु०न० नितरां कौ जायते जन–ड पृषो० । लतादिपिहितोदरे कुञ्जे "कपिकुलसुपयाति क्लान्तमद्रेर्निकुञ्जम्" ऋतुस० ।

**निकुञ्जिकाम्बा** स्त्री निकुञ्जसत्पत्तिस्थानत्वेनाम्बा ठत् कर्म० । कुञ्जवद्वर्त्या श्रीफलतुल्यगुणायां लतायाम् राजनि० ।

**निकुम्भ** पु० नि+कुभि–क्विप् । १दन्तीवृक्षे २कुम्भकर्णराक्षसपुत्रभेदे च मेदि० । "स कुम्भश्च निकुम्भश्च कुम्भकर्णात्मजावुभौ" रामा० लङ्का० ७५।४६श्लो० । ३दानवभेदे "निचन्द्रश्च निकुम्भश्च कपटः कपटस्त्रिया" भा०आ० ७५ अ० । प्रह्लादस्य ४पुत्रभेदे "प्रह्लादस्य त्रयः पुत्राः ख्याताः सर्वत्र भारत ! । विरोचनश्च कुम्भश्च निकुम्भश्चेति भारत !" भा०आ० ६०अ० । ५इर्य्यश्वस्य पुत्रे "इर्य्यश्वस्य निकुम्भोऽभूत् जालधर्मरतः सदा" हरिवं० १२अ० । ६विश्वदेवभेदे "विश्वदेवाश्च विश्वायां धर्मोज्ञाता इति श्रुतिः" इत्युपक्रमे "विश्वायस्तपसोर्यौ निकुम्भश्च महायशाः" हरिवं० २०४ अ० । तत्र निकुम्भ इत्यत्र विष्कुम्भ इति पाठान्तरम् । ७कुरुसेनाधिपालर्गते रूपभेदे "दुःशासनो निकुम्भश्च कुण्डभेदी पराक्रमी" भा०द्रो०१५६अ० । ८कुमारानुचरभेदे "सङ्कुकर्णो निकुम्भश्च पद्मः कुमुद एव च" भा०श०७६अ० तत्सेनाध्यक्षौ । ९राक्षसभेदे शिवानुचरभेदे "पार्श्वे तिष्ठन्तमाहूय निकुम्भमिदमब्रवीत् । राक्षसेश ! पुरीं सद्यो गत्वा सूच्यां वाराणसीं कुरु" हरिवं० २६अ० "अवेहि मां किङ्करमष्टमूर्त्तेः कुम्भोदरं नाम निकुम्भमित्रम्" रघुः १०दन्तीवृक्षे स्त्री गौरा० ङीष् वा राजनि० ।

**निकुम्भाख्यबीज** न० निकुम्भं दन्तिकाष्ठबीजमाख्याति ख्यात्रीबीजेन ख्या+ख्या–क । जयपाले राजनि० ।

**निकुम्भित** न० नि+कुभि–क्त । न्यक्करणभेदे "करणानान्तु सर्वेषां सामान्यं लक्षणञ्चिदम् । पार्श्वो वामकरो यच्चः स्थितोऽन्यः पुरतोऽनुगः । पादाभ्यां करणं श्रेयं यतस्तोत्तरं मतम्" इत्युपक्रमे "निकुम्भितं पार्श्वक्रान्तमतिक्रान्तं विवर्त्तनम्" सङ्गीतदा० ।

**निकुम्भिला** स्त्री लङ्कायाः पश्चिमभागस्थायां १गुहायां २ततस्त्रदेव्याञ्च "मानुषं मांसमाक्षाद्य प्रन्दत्यामो निकुम्भिलाम्" रामा०सु०२४।४५ "निकुम्भिला नाम लङ्कायाः पश्चिमभागवर्त्तिनी भद्रकाली तां तत्समीपं गत्वा प्रन्दत्यामः" इति तट्टीका । "तेन वीरेण तपसा वरदानात् स्वयम्भुवः । अस्त्रं ब्रह्मशिरः प्राप्तं कामगाश्च तुरङ्गमाः । स एष किल सैन्येन प्राप्तः किल निकुम्भिलाम् । यद्युत्तिष्ठेत् कृतं कर्म कृतान्त सर्वांश्च विद्धि नः। निकुम्भिलासंप्राप्तमलक्षतास्त्रं च यो रिपुः" रामा०लङ्का०८५।११श्लो०

**निकुरम्ब** न०नि+कुर–शब्दे बा० अम्बच् । समूहे अमरः । "अनिलतरलकिसलयनिकरेण करेण लतानिकुरम्ब" गीतगोविन्दम् ।

**निकुलीनिका** स्त्री निपाते "गतागतं प्रतिगतं चुलीव निकुलीनिकाः" भा०क० ४६अ० । "निकुलीनिकाः निपाताः" नीलकण्ठः ।

**निकूल** पु० नरमेधाङ्गे षष्ठयूपे पशुभेदालम्भोद्देश्ये देवभेदे "उत्कूलनिकूलाभ्यन्विन्दम्" यजु० ३०।१४।

**निकृत** त्रि०नि+कृ–क्त । १पराभूते २दूरीकृते ३शठे अमरः । ४पतिते ५नीचे च मेदि० ।

**निकृति** स्त्री नि+कृ–भावे क्तिन् । १भर्त्सने २क्लेशे ३शाठ्ये मेदि० ४दैन्ये शब्दरत्ना० "निकृतिपरेषु परेषु भूरिधाम्नः" किरा० "निकृत्या कामये नाहं सुखान्यृत धनानि वा" भा०व० २०३ श्लो० । ५पृथिव्यां निघण्टुः । साध्यायां धर्मस्य पुत्रे ६वसुभेदे "धर्मस्य तनयो वायुमष्टमं निकृतिं वसुम् । धर्मस्यापत्यमित्येवं साध्यायां वै व्यजायत" हरिवं० २०४अ० । [अमरः ।

**निकृष्ट** त्रि० नि+कृष–क्त । अधमे जात्याचारादिनिन्दिते

**निकेचाय** पु० नि+चि–यङ् लुक्–चञ् "आदेच उपदेशे" इति त्वे च कः इति वक्तव्ये आदेरित्युक्तिर्यङ्लुक्यादेरेव चि०कौ०उक्तेः आदेः चस्य कः । गोमयादीनां पुनःपुनः राशीकरणे

**निकेत** पु० नि+कित–निवासे आधारे घञ् । १गृहे निकेतने भरतः । "निकेतः श्रूयते पुण्यो यत्र विश्रवसो मुनेः" भा०व० ८६अ० ।

**निकेतन** न० नि+कित–निवासे आधारे ल्युट् । १गृहे अमरः "अरक्षेज्जनियमश्च इज्यामूलकेतनः" मनुः । कर्मणि ल्युट् । २पलाण्डौ पु० शब्दच० ।

**निकोचक** पु० नि+कुच–शब्दे वुन् । अङ्कोटे अमरः अच् निकोच-तत्रार्थे "निकुचपिचु निकोचशोरमाषप्रभृतीनि

पित्तरोगकृमिरोगाश्मशर्करोष्णानि गुल्मे च हितः।

**निकोठक** पु० नि+कुठि-वुन् पृषो० नलोपः। अङ्कोठवृक्षे भरतः।

**निक्रमण** न० नितरां क्रमते यत्र नि+क्रम-आधारे ल्युट्। स्थाने "निक्रमणं निषदनं निवर्त्तनं यच्च पट्टीग्रमर्वतः" ऋ० १६२।४ "निक्रमणं स्थानम्" भा०।

**निक्वण** पु० नि+क्वण-शब्दे "क्वणो वीणायाम्" पा० पक्षे घञ्। वीणायाः शब्दे अमरः।

**निक्वाण** पु० क्वण-शब्दे पक्षे घञ्। वीणादेः शब्दे अमरः

**निक्षा** स्त्री निक्ष-क्विप्। निक्षायां (निकी) स्थाते क्षुद्रयूके उणादिकोषः।

**निक्षुभा** स्त्री नि+क्षुभ-क। १सूर्यपत्न्यां २ब्राह्मण्यां च हेमा० ब्र०ख० भविष्यपु० "निक्षुभार्कव्रतं भानोः सदा प्रीतिविवर्द्धनम्" इत्युपक्रमे "निक्षुभा सूर्यपत्नी तया सहितोऽर्कः निक्षुभार्कः" तत्र व्याख्या, "निक्षुभा ब्राह्मणी स्त्री वा वाचकोऽर्कः प्रकीर्त्तितः" तत्रैव भविष्यपु०।

**निक्षिप्त** त्रि०नि+क्षिप-क्त। १त्यक्ते अटा०२क्षतनिःक्षेपदूष्ये च

**निक्षेप** पु० नि+क्षिप-घञ्। १निःक्षेपशब्दार्थे निःक्षेपशब्दे दृश्यम्। २शिक्षिकृते संस्कारार्थे द्रव्यादेरर्पणे च

**निखर्व** पु०१अयुतकोटिसंख्यायां २ततसंख्येये च "खर्वदमज्ञं खर्वनिखर्वमहापद्मशङ्ववस्तस्मात्" लीला० नितरां खर्वः ३वामने त्रि० हेमच०।

**निखर्वट** पु० रावणसैन्यगतराक्षसभेदे "विरूपाक्षेण सुग्रीवस्तारेण च निखर्वटः" भा०व० २८४अ०।

**निखात** त्रि० नि+खन-क्त। खनित्वाऽऽरोपिते "अष्टादशद्वीपनिखातयूपाः" रघुः।

**निखिल** त्रि० निष्टक्तं खिलं शेषो यस्मात्। सकले समग्रे अमरः। "सर्वं तु समवेक्ष्येदं निखिलं ज्ञानचक्षुषा" मनुः।

**निगड** पु०न०। नि+गल-घञ् लस्य डः। १श्रृङ्खलायाम् (बेड़ी)। निष्टक्तो गडः शेचनमस्मात् कठिनत्वात्। २कोष्ठभये वृत्तिपादबन्धने चन्दुके अमरः। "संसारे संनिबद्धानां निगडस्फोटकर्त्तरि" ब्रह्मवै०पु० "बद्धापराधि परितो निगडान्यलावीत्" माघः। ३बद्धे त्रि० "बद्धस्य निगडस्य च" मनुः "निगडः निगडितः" कुल्लू०। लस्य नडः। निगलः तत्रार्थे हेमच०।

**निगडित** त्रि०निगडो जातोऽस्य तारः इतच्। १बद्धे संयते

**निगण** पु० निगरस्य+पृषो०। १क्षोमपूमे त्रिका०।

**निगद** पु० नि+गद-घञ्। १भाषणे २शब्दमात्रे च अमरः। "यद्दुष्टमविज्ञातं निगदेनैव शब्द्यते" ऋ० भाष्यधृतमन्त्रः। "निगदस्तु जनैर्वेद्यः" आगमोक्ते ३जपे च। कर्मणि घञ्। उच्चैर्जप्ये ४मन्त्रे च "य एवात्र मन्त्रो यो निगदः" शत०ब्रा० ११।२।१६।

**निगम** पु० निगम्यतेऽत्र अनेन वा नि+गम-घञ्। १वेदभेदे तत्र भवः यत्। २वाणिजे ३कटभेदे ४वणिक्पथे च हेमः। ५निश्चये ६अध्वनि पर्य्यायवचनेन वेदार्थबोधके ७न्यायभेदे हेमच० न्यायमतसिद्धे पञ्चावयवन्यायमध्ये चरमावयवे निगमनशब्दे दृश्यम्। ८न्यायशास्त्रे ९तन्त्रभेदे १०वेदे च। "निगमकल्पतरोर्गलितं फलम्" भाग० १।१।३

"आद्यं नैघण्टुकं काण्डं द्वितीयं नैगमं तथा" ऋ०षडङ्गधिकायाम् "निगमशब्दो वेदवाची यास्केन तत्र तत्रापि निगमो भवतीत्येवं वेदवाक्यानामवतारितत्वात् तस्मिन् निगम एव प्रायेण वर्त्तमानानां शब्दानां चतुर्थाध्यायरूपे द्वितीयस्मिन् काण्डे उपदिष्टत्वात्तस्य काण्डस्य नैगमत्वम्" ऋग्वेदभाष्ये माधवः।

**निगमन** न० निगम्यतेऽनेन करणे ल्युट्। १न्यायस्य चरमावयवे। निगमनलक्षणं गौ०सू० उक्तं यथा

"हेत्वपदेशात् प्रतिज्ञायाः पुनर्वचनं निगमनम्" गौ०सू० "साधर्म्योक्ते वैधर्म्योक्ते वा यथोदाहरणसंश्लिष्यते तस्मादुत्पत्तिधर्मकत्वादनित्यः शब्दः इति निगमनम् निगम्यतेऽनेनेति प्रतिज्ञाहेत्वुदाहरणोपनया एकत्रेति निगमनम् निगम्यते समर्थ्यते सम्बोध्यते तत्र साधर्म्योक्ते तावद्धेतौ वाक्यम् अनित्यः शब्दः इति प्रतिज्ञा, उत्पत्तिधर्मकत्वादिति हेतुः। उत्पत्तिधर्मकं स्थाल्यादिद्रव्यमनित्यमित्युदाहरणम्। तथा चोत्पत्तिधर्मकः शब्द इत्युपनयः तस्मादुत्पत्तिधर्मकत्वादनित्यः शब्द इति निगमनम् वैधर्म्योक्तेऽपि अनित्यः शब्द उत्पत्तिधर्मकत्वात् यदुत्पत्तिधर्मकमात्मादि द्रव्यं नित्यं दृष्टम् न च तथाऽनुत्पत्तिधर्मकः शब्दः तस्मादुत्पत्तिधर्मकत्वादनित्यः शब्द इति" भाष्यम्।

तत्सूत्रं दृष्टौ तु अन्यथा व्याख्यातम्।

"हेतोर्व्याप्तिविशिष्टपक्षधर्मस्य यदुपदेशः कथनं प्रतिज्ञायाः प्रतिज्ञार्थस्य साध्यविशिष्टपक्षस्य वचनं निगमनं तथा च व्याप्तिविशिष्टपक्षधर्महेतुकथनपूर्वकसाध्यविशिष्टपक्षप्रदर्शकः व्याप्यपक्षधर्महेतुसाध्यसाध्यविशिष्ट-

पक्षबोधकत्वादशबोधको वान्यावावयवो निगमनम् इति" खनु०चिन्ता० तल्लक्षणं यथा

"उपनयानन्तरं निगमनं तद्व्यतिरिक्तेतिकिञ्चिपरामर्शप्रयोजकशब्दज्ञानकारणव्याप्यपक्षताधीप्रयुक्तसाध्यधीजनकं वाक्यम्" ।

प्रतिकूलप्रमाणाभावस्तच्चके २प्रतिज्ञोपसंहारवचने तस्मात् तथेति वचने यथा "असदृदनुचिन्तितानामव्याकृततरनिजोपदेशानाम् । प्रामाण्यपरमसीम्नां निगमनमिदमेव निखिलनिगमानाम्" वेदान्तप्र० ।

**निगरण** न० नि+गृ–ल्युट् । गरणस्य यमनस्य प्रतिरूपव्यापारे १भक्षणे मेदि० । निगीर्यतेऽनेन करणे ल्युट् । २मन्त्रे शु०मेदि० । ३हेमधुमे शब्दरत्ना० रस्य लः । निगलनमत्र ।

**निगा(ग)ल** पु० नि+गृ–घञ् खप् वा रस्य लः । १भक्षणे करणे घञ् । २अन्नगलदेशे अमरः "घण्टागलसमीपस्थो निगालः कीर्त्तितो बुधैः" अश्वशास्त्रम् । [शब्दार्थचि०।

**निगालवत्** पु० निगाल+अस्त्यर्थे मतुप् मस्य वः । अन्ने

**निगीर्ण** त्रि० नि+गृ–क्त । १भक्षिते २अन्तर्भावित च "विप्रविप्रारोप्यमाणेऽन्तःक्षते–निगीर्णे अन्यस्मिन्नारोपविप्रे" काव्यप्र० ।

**निगु** पु० निगृह्यते ज्ञायते पदार्थोऽनेन नि+गृह वा डु रस्योपध । १मनसि त्रिका० । २मले ३मूले ४चित्तकर्मणि च संक्षिप्तसारोद्धादिवृत्तिः ।

**निगुत्** त्रि० नि+गु–शब्दे क्विप् तुक् । मयादिना अव्यक्तशब्दकारके "प्रत्यङ्गोवन्तु निगुतः" ऋ०१०।१२८।६

**निगूढ** त्रि० नि+गुह–क्त । १गुप्ते २अनुद्भूते पु० हेमच० "तुराजेव निगूढमन्त्रसाधनकथितविप्रहः" काद० ।

**नियन्त्रण** न० नि+यन्त्र–भावे ल्युट् । सारथे हेमच० ।

**नियह** पु० नि+यह–अप् । १भर्त्सने २शीभावाम् ३बन्धने ४अनुग्रहाभावे ५चित्तिक्षायां निग्रहे प्रवृत्तस्य इतिरस्कारे ७भारथे प्रवृत्तिवारणाय दरोधे च निरोधरूपयोगेन अभ्यासवैराग्याभ्यां दमनयोनिरोधे "निग्रहानुग्रहे शक्तः प्रभुरित्यभिधीयते" । "तस्याहं निग्रहं मन्ये वायोरिव सुदुष्करम्" गीता । १०परमेश्वरे पु० "प्रग्रहो निग्रहो व्यग्रः" विष्णुसं० । "सर्वं प्रकर्षेण निगृह्णातीति निग्रहः" भा० ।

**निग्रहस्थान** न० गौतमोक्ते वादिनोनिग्रहास्पदे वाक्यभेदे तल्लक्षणं यथा

"विप्रतिपत्तिरप्रतिपत्तिश्च निग्रहस्थानम्" गौ० सू० "क्रमप्राप्तं निग्रहस्थानमुदाहरति । निग्रहस्य स्वीकारस्य स्थानं तच्च विप्रतिपत्तिरप्रतिपत्तिश्च विप्रतिपत्तिर्विरुद्धा प्रतिपत्तिरप्रतिपत्तिः प्रकृतात्तानं यद्यथे-तदन्यतरत् परनिष्ठं नोद्भावयितुमर्हं प्रतिज्ञाहान्यादेर्निग्रहस्थानत्वात्तदुपपत्तिश्च तथापि विप्रतिपत्त्यप्रतिपत्त्यन्यतरोद्भावकधर्मत्वं तदर्थः उद्देश्यानुगुणसम्यग्ज्ञानाभावविशिष्टत्वं प्रतिज्ञाहान्याद्यन्यतमत्वं वा लक्षणमित्यपि वदन्ति" इतिः । निग्रहस्थानानि द्वाविंशतिः यथा "प्रतिज्ञाहानिः१ प्रतिज्ञान्तरम्२ प्रतिज्ञाविरोधः३ प्रतिज्ञासंन्यासो४ हेत्वन्तरम्५ अर्थान्तरं६ निरर्थक७मविज्ञातार्थम्८ अपार्थक९मप्राप्तकाल१० न्यून११मधिकं१२ पुनरुक्त१३मननुभाषण१४मज्ञानम्१५ अप्रतिभा१६विक्षेपो१७ मतानुज्ञा१८पर्यनुयोज्योपेक्षणं१९ निरनुयोज्यानुयोगो२०ऽपसिद्धान्तो२१ हेत्वाभासाश्च२२ गौ०सू०उक्तानि । [ग्रामे ।

**निग्राह** पु० नि+यह–घञ् । खनिष्टे ते भूवादित्वेवं रूपे

**निघ** पु० निर्विशेषेण हन्यते हन–क नि० । समविस्तारदेर्ध्ये तुल्यारोहपरिणाहे पदार्थे अमरः । निघा निघतरुच्छन्नैः"भट्टिः "निघो निमितम्" पा०निमितमिव समारोहपरिणाहाभ्यां मितं निमितमित्युच्यते" जयम० ।

**निघण्टिका** स्त्री कन्दभेदे राजनि० ।

**निघण्टु** पु०नि+घटि–उ । पर्य्यायनाम्नामेकार्थकथनाय संयूहे कोषाभिधानादौ तच्च ऋग्वेदभाष्योपक्रमे उक्तं यथा "आद्यं नैघण्टुकं काण्डं द्वितीयं नैगमं तथा" अस्यार्थः एकार्थवाचिनां पर्य्यायशब्दानां समूहो यत्र प्रायेणोपदिश्यते तत्र निघण्टुशब्दः प्रसिद्धः । तादृशेऽमरसिंहवैजयन्तीहलायुधादिषु दृश्य निघण्टव इति व्यवहारात् । एवमत्रापि पर्य्यायशब्दसङ्कलोपदेशादाद्यकाण्डस्य नैघण्टुकत्वम् । तस्मिन् काण्डे त्रयोऽध्यायाः । तेषु प्रथमे पृथिव्यादिलोकदिक्कालादिद्रव्यविषयाणि नामानि, द्वितीये मनुष्यगतद्रव्यादिद्रव्यविषयाणि, तृतीये तदुभयद्रव्यगततत्तद्वस्तुसत्त्वादिधर्मविषयाणि" ।

**निघर्ष** पु० नि+घृष–भावे घञ् । घर्षणे (घसा) "तरुशाखान्त निघर्षजोऽनलः"किरा० ल्युट् । निघर्षणमत्र न० । यथा हि कनकं शुद्धं तापच्छेदनिघर्षणैः" भा०शा० १२२ ५७श्लो० ।

**निघस** पु० नि+घद+अप् घसादेशः । भोजने अमरः ।

निघात पु० नि+हन–भावे घञ्। १आहनने अन्यस्वरेण २अन्यस्वरहनने उदात्तादिहननपूर्वके अनुदात्तकरणे च कर्मणि घञ्। अनुदात्ते १स्वरे "समानवाक्ये निघातयुग्दटक्षदादेशाः" वार्त्ति०। "उदात्तादिहननपूर्वकमनुदात्तकरणं निघातः" मनोरमा। "ज्ञानिघातकठिनाङ्घ्रिचर्चौ" रघुः। [घातिन्यास् उणादिकोषः।

निघाति पु० निहन्यतेऽनया निहन्–इञ् कुत्वञ्च। लोह-

निघृष्व त्रि० नि+हृष-कनु निपा०। १खुरे २तन्मार्जने च उज्ज्वल० कर्मणि कनु। २तुल्ये निघण्टुः।

निघ्न त्रि०निहन्यते नि+हन–घञर्थे क। १अधोने अमरः। नियम्यत्वात् तस्य तथात्वम् "निघ्नस्य मे भर्तृनिदेशरौक्षम्" रघुः। २आहते १पूरिते च "स्याद्योऽन्त्यवर्गो द्विधुखान्त्यनिघ्नः" लीला० "घनहीदृशनिघ्नाद्य लभते यत्फलं बुधैः" सूर्यसि०। सूर्यवंश्ये ४अनरण्यसुते नृपभेदे पु०। "अनरण्यसुतो निघ्नो निघ्नपुत्रो बभूवतुः" हरिवं०१७अ०। अनभिहतपुत्रे ५नृपभेदे च "अनभिहतसुतो निघ्नो निघ्नस्य तु बभूवतुः" हरिवं० १९अ०। [दध्नम्।

निचन्द्र पु० दानवभेदे "निचन्द्रश्च निकुम्भश्च" निकुम्भशब्दे

निचय पु० नि+चि–भावे अच्। १समूहे २अवयवादीनां समूहत्वे ३निश्चये च मेदिनी। "षण्मासनिचयो वा स्यात् समानिचय एव वा" मनुः कर्मणि अच्। ४निचीयमाने अवयवादिना वर्द्धमाने "सर्वे क्षवाना निचयाः पतनान्ताः समुच्छ्रयाः" भा०स्त्री० २अ०। श्रेण्या० ऋतादिना चुप्रत्ययेन त०स०। निचयक्रत निचयीक्रते त्रि०।

निचयक त्रि० निचये कुशलः आकर्षा० कनु। निश्चये कुशले

निचाय पु० नि+चि–परिमाणाख्यायां घञ्। राशीक्रते धान्यादौ "एकसप्तकुडनिचायः यत्र राश्येकत्वेन समुदायिनां परिच्छित्तिर्गम्यते" सि०कौ०।

निचि पु० नि+चि– बा० डि। गोकर्णशिरोदेशे रभसः।

निचिकी स्त्री निचिना कायति शोभते के–क गौरा० ङीष्। उत्तमायां गवि नैचिक्यास् शब्दार्थचि०।

निचित त्रि० नि+चि–क्त। १व्याप्ते २पूरिते ३सङ्कीर्णे ४निर्मिते च हेमच०। ५नदीभेदे स्त्री "कौशिकीं निचितां कृत्वा निचितां लोहितारिणीम्" भा०भी० ६अ०।

निचिर न० नितरां चिरः प्रा०स०। १अत्यन्तचिरकाले २तद्वति त्रि० "प्रस्तु ज्योतां निचिराभ्याम्" ऋ०६।१२६।१

निचुम्पुण पु० निचमनेन पूर्यते नीचैरञ्चिनु क्वणन्ति दधतीति वा पृषो०। १सक्तुदे २अवभृथे च "सक्तुद्रोऽपि निचुम्पुण उच्यते निचमेन पूर्यते। अवभृथोऽपि निचुम्पुण उच्यते नीचैरञ्चिनु क्वणन्ति नीचैर्दधतीति वा। नीचं क्वणोतीति वा" निरु०५।१८। "अवभृथो निचुम्पुणो भवति" तद्भूता श्रुतिः "अवभृथ! निचुम्पुण निचेरुरसि निचुम्पुणः" यजु० २।४८ "निचुम्पुण चुप मन्दायां गतौ नितरां चोपति मन्दं गच्छति निचुम्पुणः। उणप्रत्ययो नुमागमश्च। यद्वा नीचैरञ्चिनु क्वणन्ति नीचशब्देन कर्म कुर्वन्त्यवभृथो निचुम्पुणः। "वोपसूपधप्रणभ्यूषेत्यादिना नीचैः शब्दोपपदात् क्वणतेः कप्रत्ययान्तो निपातः धातोः पुम्भाव उपपदस्य निचुम्भावश्च निपातितः। तत्रा विधावभृथ! यद्यपि त्वं निचेरुरसि नितरां चरतीति निचेरुः। नितरां गमनशीलोऽसि तथापत्र निचुम्पुणो भव मन्दगमनो भव" वेददी०।

निचुल पु० नि+चुल–क। १छिन्नलतायां अमरः। २वेतसवृक्षे राजनि०। "स्थानादस्मात् सरसनिचुलादुत्पतोदङ्मुखः खम्" मेघ०।

निचुलक न० नि+चुल–बा०कनु। १योधादेयोद्धातिसङ्घाते निचोलके हारा०। २कञ्चिकामात्रे पुंस्त्री शब्दार्थचि०।

निचेय त्रि० नि+चि–यत्। आचीयमाने स्त्रियां टाप्। आङि तु स्त्रियां भाषायां वा० ङीन्। आनिचेयी

निचेरु पु० नि+चर–उनु बा० आदेरेङ्। नितरां चरत्यर्थे "अवभृथ निचुम्पुण निचेरुरसि निचुम्पुणः" यजु०२।४८

निचोल पु०नि+चुल–अच्। १प्रच्छदपटे येन शय्यादि प्रच्छाद्यते तस्मिन् अमरः २दोलिकाद्यावरणवस्त्रे ३स्त्रीप्रियानपटे च हेमच०। "शीतलय शीतनिचोलम्" शीतगो०

निचोलक पु० निचोल इव कायति के–क। १योधादेयोद्धातिसङ्घाते कूर्पासे हेमच०। [त्रिका०।

निच्छवि पु० निकृष्टा छविरत्र। (त्रिहोत्) तीरभुक्तदेशे

निच्छिवि पु० ब्राह्मात् क्षत्रियात्स्वर्णायास्तत्पत्ने जातिभेदे "झल्लोमल्लश्च राजन्याद् व्रात्याद् निच्छिविरेव च" मनुः

निज त्रि० नितरां जायते नि+जन–ड। १स्वकीये २नित्ये च अमरः। "सेनागजेन सचितस्य निजप्रस्रवैः" माघः। ३स्वाभाविके "स्वाम्यं यस्य निजम्" न्याय लीला०।

निजघास पु० पार्वत्या रोषसंभूते गणभेदे "निजघासो वसवश्चैव स्यूणाकर्णः प्रशोषणः" हरिवं० १६८अ०।

निजघ्नि त्रि० नि+हन–क्विप् दित्वम्। नितरां हननशीले "अया निजघ्निरोदसा" ऋ०८।५३।२।

निजधृति स्त्री शाकद्वीपस्थे १नदीभेदे तदुपक्रमे "एतेषां

स्वर्गमर्त्यादागिरयो नद्यः सप्त सप्तैव" द्रव्युक्ता "अनघा आयुर्वा उभयदृष्टिरपराजिता पञ्चपदी सङ्कसुतिर्निजष्टतिरिति" भाग०५।२०।१६। उक्तम्। निजा दृष्टिरस्य। २स्वभावतो धैर्यान्विते त्रि०। [न वः। निजिघान्।

**निजि** त्रि० निज-शुद्धौ कि। शुद्धिमति। अतोयवा० मस्य

**निटल** पु० नि+टल-अच्। कपाले भालस्थले शब्दार्थकल्पतरुः "राजा निटलतले चुम्बितनिजचरणाम्बुजैः" दशकु०।

**निटलाक्ष** पु० निटले भाले अक्षि अस्य अच्स०। शिवे शब्दार्थकल्प० "रोषरूक्षेण निटलाक्षेण दूरीकृतचेतने मकरचेतने" दशकुमा०।

**निडीन** न० नीचैर्डीनम्। मध्यमाक्षयं वा डीङ् वा अधःपतन रूपे खगगतिभेदे खगगतिशब्दे २४१४ पृ० दृश्यम्।

**निण्डिका** स्त्री सतीलायां (तेओयाडा) कलायभेदे शब्दच०।

**निण्य** त्रि० अन्तर्हिते निघण्टुः "निण्यः संनद्धो मनसा चरामि" ऋ०१।१६४।२७

**नितत्नी** स्त्री ओषधिभेदे "द्यौ दैव्यामधिजाता पृथिव्यामोषधे !। तां त्वा नितत्नि ! केभ्यः" अथ० ६।१२६।१

**नितम्ब** पु० नि+तम्ब-अच्, निश्चितं तम्यते काम्यते कामुकैः नितरां ताम्यति सुरतमर्दात् तम-घञ् व वा। स्त्रीणां मेखात् १कटितटे अमरः २स्कन्धे शृङ्गे ४कक्षा अधोभागे कटके (पर्वतवसतिस्थाने) ५कटिमात्रे च मेदि०। "तरुण्यालिङ्गितः कण्ठे नितम्बस्थानमाश्रितः। शुरुणां सन्निधानेऽपि कः क्रूजति सङ्कटेऽङ्गः" विदग्ध० "नितम्बमिव मेदिन्याः सक्तांशुकमलङ्घयत्" रघुः "गिरेर्नितम्बे महता विभिन्नम्" भट्टिः "सेव्यो नितम्बः किल भूधराणां विद्याधिनानीम्" सा०द०।

**नितम्बिन्** त्रि० नितम्ब+अस्त्यर्थे इनि। १नितम्बयुक्ते "मेखलासुषमदैर्नितम्बिभिः" रघुः। प्राशस्त्ये इनि। २प्रशस्तनितम्बयुक्तायां स्त्रियां स्त्री ङीप्। "नितम्बिनीमिच्छसि सङ्गलब्धाम्" कुमा०।

**नितम्भू** पु० ऋषिभेदे "नितम्भूर्भवनो धौम्यः शतानन्दोऽकृतव्रणः" भा०अनु०२६अ० नानर्षिकथने

**नितराम्** अव्य०नि+तरप् आम्। १सुतरामित्यर्थे २अतिशये च "सुतरां तुदन्ति चेतो नितरां विषादिनाम्" ऋतुस० "तेभ्यो नितरां विरतिः" वेदा०।

**नितल** न० निश्चितं तलमधोभागः प्रा०स०। पातालभेदे शब्दरत्ना० "सुतलं वितलञ्चैव नितलञ्च गभस्तिमत्। महातलञ्चापि पातालञ्चापि सप्तमम्" पुराणस० विष्णु०।

**नितान्त** न०नितान्यति क्त नि+तम-क्त। १एकान्ते २अत्यन्ते अमरः। "निद्राविनोदिननितान्तरतिक्लमाणाम्" किरा० "नितान्तदीर्घैर्जनिता तपोभिः" कुमा०।

**नित्य** त्रि० नियमेन नियतं वा भवं नि+ष्यञ्। १सततेऽमरः। अक्षरक्षः क्रियमाणत्वेन २विधिबोधिते ३प्रत्यवायसाधनाभावप्रतियोगिनि कर्मणि यथा अक्षरक्षः सन्ध्यामुपासीतेति अत्र सन्ध्याभावे प्रत्यवायसाधनत्वबोधः। ४अविच्छिन्नपरम्परावति च यथा वर्षा नित्याः। ५उत्पत्तिविनाशरहिते ६शाश्वते कालत्रयस्थे वस्तुनि च त्रि० ७अनुदृष्टे पु० राजनि०। शास्त्रबोधितसदातनकर्त्तव्यताके च नित्यं तद्बोधकं ति०त० समाप्तौक्तं यथा "नित्यं१ सदा२ यावदायु३र्न कदाचिदतिक्रमेत्४। उभेत्यातिक्रमे दोषश्रुतेरत्यागदर्शनात्। फलाश्रुतेर्निषेधस्य च तन्नित्यमिह कीर्त्तितम्"। अत्र पूर्वार्द्धोक्तार्थकशब्दाः स्वान्वितपदार्थस्य नित्यत्वबोधकाः। उत्तरश्लोकबोध्यार्थास्तु परस्परया नित्यतासमर्पका इति भेदः "तस्मादहिनृ सदायुक्तो नित्यं स्यादात्मवान् द्विजः" "विद्यायुरुभयं तदैव नित्या वृत्तिः स्वयोनिषु" मनुः नित्यत्वञ्च ध्वंसाप्रतियोगित्वे सति प्रागभावाप्रतियोगित्वम् तेन उत्पत्तिविनाशशून्यत्वात् कालत्रयस्थत्वं गम्यते।

**नित्यकर्मन्** न०कर्म०। विहिते कर्मभेदे "नित्यं नैमित्तिकञ्चैव नित्यनैमित्तिकन्तथा। सङ्कल्पस्य त्रिधा कर्म तन्निबोधत पुत्रक !। पञ्चयज्ञादिकं नित्यं यदेतत् कथितं तव। नैमित्तिकं तथा चान्यत् पुत्रजन्मक्रियादिकम्। नित्यनैमित्तिकं ज्ञेयं पर्वश्राद्धादि पण्डितैः" आ०त० मार्क०पु० तत्त्यागे दोषो यथा "नित्यानां कर्मणां विप्र ! तस्य त्यागे रहर्निशम्। अकुर्वन् विहितं कर्म याति पतति तद्दिने। प्रायश्चित्तेन महता शुद्धिमाप्नोत्यनापदि। पञ्च नित्यक्रियास्थानैः कर्त्ता मैत्रेय ! मानवः। संवत्सरं क्रियास्थानिर्यस्य पुंसोऽभिजायते। तस्यावलोकनात् सूर्य्यो निरीक्ष्यः साधुभिः सदा। सृष्टे स्नानं सचेलस्य शुद्धिहेतुर्मनीषिणे !। पुंसो भवति तस्योक्ता न शुद्धिः पापकर्मणः" इति विष्णुपु०। शतादौ नित्यकर्मकरणनिषेधो यथा "जानुदघ्नं शतजले जाते नित्यकर्म न चाचरेत्। शतजले च सप्तत्यां चुरकर्मणि मैथुने। धूमोद्गारे तथा वान्तौ नित्यं कर्माणि संत्यजेत्। द्रव्ये भुक्ते त्वजीर्णे च नैव भुक्ता च किञ्चन। कर्म कुर्यात्तरो नित्यं शतजले

मृतके तथा। पत्नं पुष्पञ्च ताम्बूलं भेषजत्वेन कल्पितम्। कषादिपिण्याकान्नञ्च फलं भुक्त्वा न चाचरेत्। जलेष्वापि नरश्चेत् भोजनाङ्गे प्रजायते। नित्यक्रिया निवर्त्तेत सह नैमित्तिकैः सदा। जलौकामूढ़पादञ्च लिंगखड्गपदादिकम्। कामाद्यर्थेन संस्पृश्य नित्यकर्माणि संत्यजेत्। विशेषतः शिवापूजां प्रमीत पितको द्विजः। यावदुत्सरपर्य्यन्तं मनसापि न चाचरेत्। भङ्गानुबन्धिपाते तु काम्यं किञ्चिन्न चाचरेत्। आत्विज्यं ब्रह्मयज्ञञ्च श्राद्धं दैवयुतञ्च यत्। गुरुमाशिष्य विप्रञ्च प्रकल्पैव च पाणिना। न कुर्य्यान्नित्यकर्माणि रेतःपाते च भैरव!" कालि०पु० ५४ अ०।

नित्यकर्मणि यथकाङ्गवैगुण्येऽपि फलनिष्पत्तिर्भवतीति काल्पा० त्रौ० ३।२।१८ सूत्रे याज्ञिकदेवतसंघटे च व्यवस्थापितं यथा

"अथेदं विचार्यते द्विप्रकारं कर्म नित्यं काम्यञ्च तत्र नित्यं प्रकृत्येदं विचार्यते। किं सर्वाङ्गोपेतं कर्त्तव्यम् उत यावन्त्यङ्गानि कर्तुं शक्नोति तावद्भिरङ्गैरुपेतमिति। किं तावत् प्राप्तम् सर्वाङ्गोपेतमेव कर्त्तव्यमिति कुतः भावनांशस्य कर्मभावस्य सर्वैरङ्गैः परिपूरणेन सर्वाङ्गोपेतमेव कर्त्तव्यमित्येवं प्राप्ते आह "विगुणे फलनिर्वृत्तिरङ्गप्रधानभेदात्" सू०। "नित्ये कर्मणि यन्निरोक्षदर्शं पूर्णमासादिके प्रत्यवायपरिहाररूपस्य फलस्य निष्पत्तिर्भवत्येव। अङ्गप्रधानभेदात् यतोऽङ्गानि च प्रधानानि च भिन्नानि नित्येषु चेतिकर्त्तव्यता नास्ति अपूर्वाभावात् अपूर्वप्रयुक्ता कृतिकर्त्तव्यता सा च तस्मिन्नसति न भवितुमर्हति कथमपूर्वाभावः?। फलाभावात् कालान्तरभाविफलसिद्ध्यर्थं ह्यपूर्वं कल्प्यम्। तच्चासति फले कल्पयितुं न शक्यते तस्मान्नित्येषु यागस्यैव भाव्यत्वम् न फलस्य। तस्मात् पौर्णमासाममावास्यायां वान्निसंहित्य इरोडाग्रयणग्रह्य इत्येतावदुपदिश्यते तेन इष्टार्थानि यान्यङ्गानि संनिपत्योपकारकाणि यैर्विना प्रधानभूतयागनिष्पत्तिर्न भवति अन्यथानुपपत्त्या तावद्भिरुपेतं प्रधानं कर्त्तव्यम् नाङ्गानि अङ्गान्यन्तं तु काम्यप्रयोगार्थम् अतोऽग्निकाग्नेरोडाश्यमादरणीयम् अन्यदङ्गजातमदृष्टार्थं नादरणीयमिति। कथं तर्हीदिये निष्फले पुरुषस्य प्रवृत्तिरिति? चेत् उच्यते प्रत्यवायानुत्पत्त्यर्थं प्रवृत्तिर्न तु फलार्थं विहिताकरणादि प्रत्यवायः श्रूयते "अकुर्वन्विहितं कर्म प्रायश्चित्तीयते नरः" इति (मनुना)। अतो नित्यकर्मणो निष्फलत्वादपूर्वाभावादितिकर्त्तव्यता नास्तीति क्षीणाङ्गस्यैव प्रयोग इति केचित् सिद्धान्तिभाङ्मः। तदेतदोपपद्यते कथंभावमतो हि तिस्र आकाङ्क्षा जायते किं, केन, कथमिति तत्र कथमितीतिकर्त्तव्यताकाङ्क्षा नित्येऽप्यस्ति तस्मादत्राप्यस्तीतिकर्त्तव्यता। सत्यम् अस्त्येवेष्टाप्याकाङ्क्षायाः समानपदोपात्तेन यागेनैव पूरयात्तस्त्विदं त्वयोगिन्येनेतिकर्त्तव्यता कथमाकाङ्क्षया स्पृश्यते न त्वदृष्टोपयोगि प्रयाजाद्यङ्गम् अदृष्टस्य साध्यस्याभावादिति चेत् न यागस्य ह्यतोऽपुरुषार्थत्वेन प्रवृत्त्यन्यथानुपपत्त्या समानपदोपात्तं यागस्तत्सम्बन्धं सर्वेषामभिमतस्य प्रत्यवाय परिहारस्येह भाव्यतया कल्पनात्। ननु चेत् सर्वेषामभिमतः स्वर्गः किमिति न कल्प्यते, तस्य शरीरारम्भहेतुतया भोक्तृविरोधित्वेन सकलजनाभिप्रेतत्वात् प्रत्यवायपरिहारस्तु तैरपीष्यत एव कथं? तस्मिन् पापे एतज्जन्मोपार्जिते भवान्तरोपार्जिते वा स्थिते सति तदुपभोगहेतुभूतशरीरारम्भावश्यम्भावेन भोक्तृभावात् अतो भोक्तार्थिनाप्यवश्यं पापक्षय एषितव्य एव समीहित फलाय, इतरथाऽप्रक्षीणे पापे फलाप्राप्तेः। तस्मान्नित्यानि कर्माणि पापक्षयोपायत्वेन चोद्यमानानीतिकर्त्तव्यता मपेक्षन्त एव। धर्मशास्त्रेषु च यथैवाकरणे प्रत्यवायः श्रुतः तथैव करणादपि पापक्षयः श्रूयते "पूर्वां सन्ध्यां जपंस्तिष्ठन्नैशमेनो व्यपोहति (मनुः) इत्यादिभिः "नित्यनैमित्तिकैरेव कुर्वाणो दुरितक्षयमिति च"। तस्मान्नित्येऽप्यस्त्येव प्रत्यवायपरिहाररूपं फलम्। तस्मान्नित्यान्यपि कर्माणि सर्वाभिमतस्य तस्य पापक्षयोपायत्वेन चोद्यमानानीतिकर्त्तव्यताभपेक्षन्त एव। ततश्च सर्वाङ्गोपेतानामनुष्ठानं कस्यचिदपि सर्वदा कर्तुं न शक्नोति जीवनादिनिमित्ते च तानि विधीयन्ते निमित्तस्य चैतदेव रूपं यत्तस्मिन् सति नैमित्तिकमवश्यं कर्त्तव्यम्। तेन यावज्जीवं कर्त्तव्यम्। तेन यथा श्रुत्यादिभ्यः प्रबोध्यते तत्रावश्यमन्यतरस्मिन्नुद्गातव्ये निमित्ते सति नैमित्तिकस्य कर्त्तव्यं प्रधानवाक्ये श्रूयते तदादि कस्यचिदङ्गस्यानुरोधेन सति निमित्ते नैमित्तिकं न क्रियते ततः प्रधानवाक्यविरोधः स्यात् प्रधानमात्रं श्रुत्वा निमित्ते विधीयते अङ्गानि तु तदर्थतया प्रकरणेन स्मृत्यन्तैः अतस्तानि प्रधानवाक्यगतावश्यकत्वानुरोधेन यथाशक्त्यनुष्ठेयानि इतरथा प्रधानस्यावश्यकर्त्तव्यत्वं श्रुतं

क्षीयेत तस्मात् प्रधानाविरोधेनाङ्गानि यथाशक्त्युपसंहर्तव्यानि। नन्वेवं क्षीनाङ्गादपि प्रधानात् फलसिद्धेरभ्युपगमात् समर्थोऽप्यङ्गानि परित्यजतीति चेन्न। यत्तस्य कामतोऽङ्गे त्यज्यमाने वैगुण्यं स्यादेव अङ्गोपदेशं निमित्तं वाक्योचित्योभयानुरोधेन यावन्त्यङ्गानि कर्तुं शक्नोति तावद्विरुपेतं प्रधानमेनः क्षपयतीति शास्त्रार्थोऽवधार्यते तावतैव शास्त्रवशात् फलनिष्पत्तिः इति साधूक्तम् "विगुणे फलनिर्वृत्तिरङ्गप्रधानभेदादिति"। एतच्च प्रयोगविध्यनुक्तोत्थेष्वङ्गेष्वुच्यते यद्धि कुर्यादित्युच्यते तत् यथाशक्तीत्युपबोध्यते। यानि तु स्वभावसिद्धानि विध्यन्तरसिद्धानि वोपजीव्यन्ते यथा लोके धनार्जनादि वेदेऽपि काम्यो विद्याग्नयश्च तेषां स्वरूपेष्वेवाधिकारिविशेषत्वम्। द्रव्यवान् विद्यावानग्निमानिति। एतदुक्तं भवति अङ्गं हि विधिबलादुपादीयते निमित्तानुरोधाद्वा त्यज्यते उभयानुपपत्तौ वा यत्तं प्रत्युपादीयते अयत्तं प्रति त्यज्यत इति नान्या गतिरस्ति तत्रोभयानुपपत्तौ युक्तो यदि सम्भवति सम्भवत्युपादेयेष्वङ्गेषु यथाशक्ति व्रीहीन् सम्पादयेत् यथाशक्त्यवहन्त्यादिति आहवनीयादिस्वरूपं तु नानेन विधिनोपादीयते तस्मादग्निमान् विद्यावान् द्रव्यवान् जीवंश्च यजेतेत्येवमाश्रीयते यतो विद्याग्निकालाद्यपरित्यागेनान्येषामङ्गानां यथाशक्त्युत्सर्गः सिद्धम्। तथाचोक्तं तन्त्ररत्ने "यानि प्रयोगविधिना कर्तृत्वादेयत्वेनाङ्गानि चोद्यन्ते तेषामेव यत्तिपरिमितत्वम् यावन्ति यत्तुवाक्तावन्ति कुर्यादिति यानि तु विध्यन्तरप्रयुक्तानि स्वयं सिद्धानि वाक्यत्वेन स्पृश्यन्ते तानि स्वरूपत एवाधिकारिविशेषत्वम् यथाग्न्यादीनि तेषामुपादानस्य प्रयोगविधिनानुपादानाच्च यावच्छक्तीत्युपबन्धः सम्भवति किन्तु तदपेक्षो विधिस्तदलमेवाधिकरोति तेन सपत्नीकस्यार्थस्य (वेदस्य)व्याख्यानोपात्तसंस्कारविशिष्टस्याग्निमतो विद्यावतः प्रदोषादिकालसंयोगिनोऽधिकारो नान्यस्येति। एवं चाप्रतिसमाधेयाङ्गवैकल्येऽप्यग्न्यादिमानधिक्रियतेव आधानं तु न कुर्यात्तस्यानैमित्तिकत्वादिति"। "प्रायश्चित्तविधानाच्च"सू०। "प्रायश्चित्तविधानादप्येवं कल्प्यते यद्विगुणेऽपि फलनिर्वृत्तिर्भवतीति। यदि च विगुणात् फलं न स्यात्तर्हि प्रायश्चित्तं न विदधीत नहि निष्फलाङ्गैः कृत्यमस्ति अस्ति च विधानम् तस्माद्विगुणादपि फलं भवतीति। येषां मते नित्येषु फलाभावेनापूर्वाभावात्तदर्थैनिकर्तव्यताभावेन निमित्तभेदने जाते वैगुण्यात्तत्परिहारायापरं क्षीणाप्यङ्गं भिन्ने जुहोतीत्यादिकमनुपपन्नं न क्रियत एव। पक्षान्तरे कस्यचिन्नित्यकर्तव्यतायां भेदने जातेऽपि नास्ति वैगुण्यम् गुणहानिर्हि वैगुण्यम् असति गुणे कस्य हानिः स्यात् ततश्चाप्तुपक्ष एव प्रायश्चित्तविधानसपक्षमिति"। "तथा च दृष्टम्"सू०। "नित्यं कर्म यथा कथञ्चित् श्रुताङ्गपरित्यागेनापि यथाशक्त्यङ्गोपेतमनुष्ठातव्यत्वेन श्रुतौ दृष्टम्। तथा हि "यत्पयो न स्यात् केन जुहुया इति श्रीक्षियवाग्भ्यामित्यादि न वा इदं तर्हि किं च मासीदयैतदद्भुत सत्यं श्रद्धायाम्"इत्यत्रैव मन्त्रे। तथा "तदेव यावत्क्षीरक्च होतव्यमिति" शाखान्तराच्च तस्माद्विगुणेऽपि नित्ये प्रत्यवायपरिहाररूपं फलं भवति अतएवोक्तं कर्काचार्यैः "उपात्तदुरितक्षयो वा उत्पत्स्यमानदुरितप्रतिबन्धो वा भवत्येवेति"। "नित्यकर्मांगत्वारब्धे अनारब्धे वा प्रतिनिधिर्भवति अवश्यकर्तव्यतया यथाशक्तिप्रयोगस्य व्यवस्थापितत्वात् इति"चान्यत्र तथोक्तम्। "काम्ये प्रतिनिधिर्नास्ति नित्ये नैमित्तिके हि सः" इत्युक्तेश्च तत्र प्रतिनिधिरस्ति। "नित्यं नैमित्तिकं काम्यं त्रिविधं स्नानमिष्यते" ब्रह्मपु०

**नित्यचौर** न०-अवधेर्यादिच्छेदने "चूडोदिते तिथावह्ने बुधेज्ये दिवसे नरः। नित्यचौरं प्रकुर्वीत जन्ममासे न तु क्वचित्" ज्योतिषसारः। अधिकं क्षुरकर्मन् शब्दे २२८६ पृ०३अ पृष्ठम्

**नित्यगति** पु० नित्यं गतिरस्य। सदागतौ वायौ हेमच०। "यथा वायुर्नित्यगतिर्जलदान् यतयोऽम्बरे" भा०स०४६अ० नित्यगमनादयोऽप्यत्र।

**नित्यदा** अव्य० नित्य+दाच् स्वरादि। सर्वदेत्यर्थे "त्वमग्ने सर्वभूतानामन्तरस्सि नित्यदा" भा०आ० ६अ०।

**नित्यदान** न० नित्यं प्रत्यहं कर्त्तव्यं दानम्। प्रत्यहकर्त्तव्ये दाने "नित्यं नैमित्तिकं काम्यं त्रिविधं दानमिष्यते। अहन्यहनि यत् विप्र! दीयतेऽनुपकारिणे। अनुद्दिश्य फलं तत् स्यात् ब्राह्मणस्य तु नित्यकम्" गरुड़पु०।

**नित्यनैमित्तिक** न० कर्म०। नित्यत्वनैमित्तिकत्वयुक्ते कर्मभेदे पर्वश्राद्धादौ "नित्यनैमित्तिकं चैव पर्वश्राद्धादि पण्डितैः" श्राद्धत० मार्कण्डेयपु०। प्रायश्चित्तेऽपि तथात्वम्। अवश्यकर्त्तव्यत्वेन नित्यत्वं यावन्निश्चयवता कर्त्तव्यत्वेन नैमित्तिकत्वं यथाह प्रा०त० रघुनन्दनः "प्रायश्चित्तस्य नित्यत्वेनाङ्गवैकल्येऽपि फलसिद्धिः। तथा

च प्रायश्चित्तस्य नैमित्तिकत्वं नित्यत्वञ्च मिताक्षरादाह "नैमित्तिकोऽयं प्रायश्चित्ताधिकारः। अत्र चार्थवादावगतपापक्षयेऽपि जातेष्टिन्यायेन साध्यतया श्रौक्रियते। न च दुरितपरिक्षयेणैवानुष्ठीयते एतावता काम्याधिकारमात्रशङ्का कार्या यस्मात् "चरितव्यमतो नित्यं प्रायश्चित्तं विशुद्धये। निन्द्यैश्च वचनैर्युक्ता जायन्तेऽनिष्कृते नरः" इति मनुवचनेऽकरणे दोषश्रवणेनावश्यकतावगमात्। तथा च याज्ञवल्क्यः "प्रायश्चित्तमकुर्वाणाः पापेषु निरता नराः। अपवृत्तापिनः सर्वान्नरकान् यान्ति दारुणान्"। प्रायश्चित्तमकुर्वाणा दुःखाङ्गरकान् प्राप्नुवन्ति"।

**नित्यप्रलय** पु० नित्यः प्राकृतिकः प्रलयः। सुषुप्तौ "चतुर्विधस्तु प्रलयो नित्यो यः प्राणिनां क्षयः। सदा विनाशो जातानाम्" अग्निपु०३६७अ० स च प्रलयश्चातुर्विध्यमुक्त्वा वेदान्तपरिभाषायां विहितो यथा "स च चतुर्विधः नित्यः प्राकृतो नैमित्तिक आत्यन्तिक इति। तत्र नित्यप्रलयः सुषुप्तिः तस्याः सकलकार्यप्रलयरूपत्वात् धर्माधर्मपूर्वसंस्काराधारत्वाच्च तदा कारणानावश्यकं, तेन सुप्तोत्थितस्य न सुखदुःखाद्यनुपपत्तिः न वा स्मरणानुपपत्तिः। न च सुषुप्तावन्तःकरणस्यापि विनाशे तदधीनप्राणनादिक्रियानुपपत्तिः, वस्तुतः श्वासाद्यभावेऽपि तदुपलब्धेः पुरुषान्तरविभ्रममात्रत्वात् सुप्तशरीरोपलम्भवत्। नचैवं सुषुप्तस्य परेतादविशेषः सुषुप्तस्य हि सिक्तशरीरं संस्काराधीना तत्रैव वर्त्तते परेतस्य तु लोकान्तरे इति वैलक्षण्यात्। यद्वा अन्तःकरणस्य द्वे शक्ती ज्ञानशक्तिः क्रियाशक्तिश्चेति तत्र ज्ञानशक्तिविशिष्टान्तःकरणस्य सुषुप्तौ विनाशः न तु क्रियाशक्तिविशिष्टस्येति प्राचीनाद्यवस्थानमविरुद्धम्। "यदा सुप्तः स्वप्नं न कञ्चन पश्यत्यथास्मिन् प्राण एवैकधा भवति तदैनं वाक् सर्वैर्नामभिः सहाप्येति तता सौम्य! तदा सम्पन्नो भवति स्वमपीतो भवतीत्यादि" श्रुतिरुक्तसुषुप्तौ मानम्"।

**नित्यमुक्त** पु० नित्यं मुक्तः। बद्धत्वेऽपि बन्धशून्ये परमात्मनि "अयं देवो नचान्योऽस्मि—इत्युपक्रमे नित्यमुक्तस्वभाववान्" भा०त०। "नित्यमुक्तत्वम्"। सां०सू०

**नित्ययज्ञ** पु० कर्म०। फलयोगं विना जीवनादिमात्रनिमित्तेन विहिते यथाकथञ्चित् प्रतिनिध्यादिना अनुष्ठेये अग्निहोत्रादौ यज्ञे। [स्त्री तिका०।

**नित्ययौवन** त्रि०नित्यं यौवनमस्य। १स्थिरयौवने २द्रौपद्यां

**नित्यवैकुण्ठ** पु० मत्तलोकस्थे विष्णोः स्थानभेदे "अर्द्धं नभसि संविष्टो नित्यवैकुण्ठएव च। अस्माकाशसमो नित्यो विष्णुतत्त्वन्द्रविम्बवत्। इश्वरेच्छासमुद्भूतो निर्लेपश्च निराश्रयः। आकाशवत् सुविस्तारमामूलस्तम्भनिर्मितः। तत्र नारायणः श्रीमान् वनमाली चतुर्भुजः। लक्ष्मीः सरस्वती गङ्गा तुलसी पतिरीश्वरः। सनन्दनन्दकसुदर्शनादिभिरन्वितः। सर्वैश्वः सर्वसिद्धीशो भक्तानुग्रहकारकः" ब्रह्मवै०पु० प्र०ख०१५अ०।

**नित्यसत्त्वस्थ** त्रि० नित्यमचलं यत् सत्त्वं धैर्य्यं गुणभेदो वा तत्र तिष्ठति स्था—क। १नित्यधैर्य्यावलम्बिनि २रजस्तमसी अभिभूय सदा सत्त्वगुणावलम्बिनि च। "नित्यसत्त्वस्थो निर्योगक्षेमः आत्मवान्" गीता।

**नित्यसम** पु० मी० स्वतोक्ते जात्युत्तरभेदे नित्यानित्यकार्य्यसमादीनां विभज्य "नित्यमनित्यभावादनित्ये नित्यत्वोपपत्तेः नित्यसमः" इति लक्षितम् जातिशब्दे २१०४पृ०दृश्यम्

**नित्यसमास** पु० कर्म०। व्याकरणोक्ते समस्तसमानपदावस्थदरक्षितविग्रहवाक्यरक्षिते समासभेदे

**नित्यहोम** पु० नित्यं प्रत्यहं कर्त्तव्यो होमः। द्विजैः प्रत्यहं कर्त्तव्ये होमे। स च होमः "यावज्जीवमग्निहोत्रं जुहोति" इति श्रुत्युक्तः विष्णुसंहितोक्तोऽन्यविधो यथा "अथाग्निं परिसमूह्य पर्युक्ष्य परिस्तीर्य परिधिन्य सर्वतः पाकादपसृत्य जुहुयात्। वासुदेवाय सङ्कर्षणाय प्रद्युम्नायानिरुद्धाय पुरुषाय सत्याय्याच्युताय वासुदेवाय। अग्नये सोमाय मित्राय वरुणाय इन्द्राग्नीभ्यां विश्वेभ्यो देवेभ्यः प्रजापतये धन्वन्तरये वास्तोष्पतये अग्नये स्विष्टकृते च"। "वैश्वदेवस्य सिद्धस्य स्थालीपाकस्य होमौ विधिपूर्वकम्। होमं कुर्याद्देवताभ्यो ब्राह्मणो होमभक्तकम्। अग्नेः सोमस्य चैवादौ तयोश्चैव समस्तयोः। विश्वेभ्यश्चैव देवेभ्यो धन्वन्तरय एव च। कुह्वै चैवानुमत्यै च प्रजापतय एव च। सह द्यावापृथिवीभ्यश्च तथा स्विष्टकृतेऽन्ततः" मनूक्तविधिरन्यविधः शाखाभेदात् व्यवस्था।

**नित्या** स्त्री १दैव्याः शक्तिभेदे तदधिकारेणैव नित्यातन्त्रं प्रवृत्तं तज्ज्ञानमन्त्रादिकं तन्त्रसारे दृश्यम्। २मनसादेव्यां शब्दरत्ना०।

**नित्यानध्याय** पु० सर्वथा वर्जनीयवेदपाठकालादौ "द्वावेव वर्जयेन्नित्यमनध्यायौ प्रयत्नतः। स्वाध्यायभूमिशुद्धात्मानं चाशुचिं द्विजः" इति "दर्भास्तित्यमनध्यायान-

घोयानो विवर्जयेत्" इति मनुना प्रदर्शितोऽनध्यायभेदः अनध्यायशब्दे १४६५ पृ० दृश्यम्।

**नित्यानित्यवस्तुविवेक** पु० नित्यञ्च अनित्यञ्च नित्यानित्ये ते च ते वस्तुनी च नित्यानित्यवस्तुनी नित्यानित्यवस्तुनोर्विवेकः पृथक्त्वज्ञानता। ब्रह्मैव नित्यं वस्तु ततोऽन्यदखिलमनित्यमिति विवेचने। "ब्रह्म सत्यं जगन्मिथ्येत्येवं रूपो विनिश्चयः। सोऽयं नित्यानित्यवस्तुविवेकः समुदाहृतः" शब्दार्थचि० धृतवाक्यम्। अयञ्च ब्रह्मविद्यायाम् अधिकारप्रयोजकः।

**नित्यानित्यसंयोगविरोध** पु० नित्यत्वस्यानित्यत्वस्य एकत्र संयोगे सम्बन्धे विरोधः। एकत्र धर्मिणि नित्यत्वस्यानित्यत्वस्य च सम्बन्धरूपे भावाभावयोरेकत्र योगरूपे विरोधे। संयोगपृथक्त्वन्यायविधयातिरिक्त एवास्य विरोधस्य दूषकतेत्याकारे दृश्यम्।

**नित्याभियुक्त** त्रि० नित्यमभि सततात् युक्तः योगे व्याप्तः। देहयात्रामात्रार्थं प्रयतमाने इतरत्यागाशक्ते योगिनि

**निद** न० निद्-क वा० नलोपः। १निन्दे शब्दच० २निन्दके त्रि० "अर्धन् निदाय विश्वेभिरग्निम्" ऋ०६।१२।६ "निदाया निन्द्यायाः" भा०। [पुंस्त्री० शब्दच०।

**निदग्ध** त्रि० निष्टप्तो दग्धुरस्य प्रा०व०। १दग्धुरहिते २अनुष्णे

**निदर्शन** न०नि+दृश-ल्युट्। १उदाहरणे दृष्टान्ते "आत्मा ह्याकाशवज्जीवैर्घटाकाशैरिवोदितम्। घटादिवच्च संघातैर्नाशात्तावेतच्चिदर्शनमिति"। यदा मन्दबुद्धिप्रतिपिपादयिषया स्वात्मनो ज्ञातिरुच्यते जीवादीनां तदा ज्ञातुरुपलभ्यमानायामेतच्चिदर्शनं दृष्टान्तो यथोदितं आकाशवदित्यादीनि भाष्यम्" शब्दार्थचि०। २अर्थालङ्कारभेदे स्त्री टाप्। अर्थालङ्कारशब्दे २६६५ पृ० दृश्यम्।

**निदाघ** पु० निशरां दहतेऽत्र नि+दह-आधारे घञ् न्यङ्क्वादि० कुत्वम्। १उष्णे २घर्मे ३घर्मकाले ज्यैष्ठाषाढमासयोः ४घर्मजले च मेदि०। ऋतुसंहारे १म सर्गे निदाघकाले वर्ण्याः पदार्था भङ्ग्या प्रदर्शितास्तत्रैव दृश्याः। पुंस्त्वपक्षे ऋभुपत्नीजाते ५ऋषिभेदे पु०।

**निदाघकर** पु० निदाघ उष्णः करः अस्य। १सूर्ये ज्ञारा० निदाघधामादयोऽत्र "निदाघधामानिलवाधिदोषितम्" माघः। २अर्कवृक्षे च

**निदाघकाल** पु० निदाघस्य कालः। १ग्रीष्मर्तौ ज्यैष्ठाषाढमासयोः "दिनान्तरेष्वेष्वभ्युपयानमन्त्रयो निदाघकालः समुपागतः प्रिये!" ऋतुसं०।

**निदाल** त्रि० नि+दो-दृच्। निरोधके "चरन्तमेनमुपतिष्ठ निदातारम्" ऋ० ८।७२।५ "निदातारं निरोधकम्" भा०।

**निदान** न०नितरामसाधारणतया दयते कार्यम् नि+दैप् शोधने ल्युट्। १आदिकारणे अमरः २कारणमात्रे ३बन्धदामनि निहत्त दानम् प्रा०स० ४कारणत्वे च मेदि० नि+दै शुद्धौ भावे ल्युट्। ५शुद्धौ हेमच०। ६रोगनिर्णये त्रिका० ७रोगहेतौ। "निदानं पूर्वरूपाणि रूपाण्युपशयस्तथा। सम्प्राप्तिश्चेति विज्ञानं रोगाणां पञ्चधा स्मृतम्। निमित्तहेत्वायतनप्रत्ययोत्थानकारणैः। निदानमाहुः पर्यायैः प्राग्रूपं येन लक्ष्यते" इति माधवकरः स्मृते निदानप्रकरणे तद्भेदादिकं दृश्यम्। "निदानमिच्छाकृतकस्य बन्धनं" रघुः।

**निदिग्ध** त्रि० नि+दिह-क्त। १उपचिते २लेपनादिना वर्द्धिते च ३एकायां स्त्री शब्दच०। ततः संज्ञायां कन् कापि अत इत्त्वम्। निदिग्धिका कण्डकारिकायां स्त्री अमरः।

**निदिग्धिकादिक्वाथ** पु० चक्रदत्तोक्ते क्वाथभेदे "निदिग्धिकानागरकासृतानां क्वाथं पिबेत्तृभिश्चितपिप्पलीकम्। जीर्णज्वरारोचककासमूलश्वासाग्निमान्द्यार्दितपीनसेषु। कृच्छ्रेऽङ्गमर्दे प्रायः सायन्नेनोपयुज्यते"

**निदिध्यास** पु० नि+ध्या-सन्-भावे घञ्। श्रवणमननज्ञातस्य एकतानतासाध्ये निरन्तरचिन्तने। भावे ल्युट् निदिध्यासन तत्रार्थे न०। तल्लक्षणादि यथा "निरन्तरं विचारो यः श्रुतार्थस्य गुरोर्न वात्। तन्निदिध्यासनं मोक्षं तत्रैकाग्र्येण लभ्यते। अनात्मन्यखिलेचित्ते रुचिरात्मनि चेद्भवेत्। पुष्पपुङ्खेन शुद्धं तच्चित्तमैकाग्र्यमर्कति"। विजातीयदेहादिप्रत्ययरहितादितीयवस्तुनि सजातीयप्रत्ययप्रवाहे। विजातीयप्रत्ययानन्तरितेन सजातीयप्रत्ययप्रवाहेण श्रवणमननफलभूतेनात्मचिन्तने। निदिध्यासनं च विचारविशेषात्मकम्। स च विचारविशेषोऽध्यात्मात्मतत्त्वज्ञानरूपं निदिध्यासनम्। "ताभ्यां निर्विचिकित्सेऽर्थे चेतसः स्थापितस्य यत्। एकतानत्वमेतद्धि निदिध्यासनमुच्यते"। ताभ्यां श्रवणमननाभ्याम्। ४अपरायत्तबोधे। "अपरायत्तबोधो हि निदिध्यासनमुच्यते" इति वार्त्तिकोक्तेः "तस्य वेदान्तवेद्यस्य निदिध्यासनतो विना" काशीख० २०अ०। "श्रुते मतगुणं विद्यात् मननं मननादपि। निदिध्यासं लक्षगुणमनन्तं निर्विकल्पकम्" विवेकचू०।

**निदेश** पु० नि+दिश–घञ्। १शासने २आज्ञायां २कथने अमरः ४निकटे ५भाजने च मेदिनिः "प्राप्तस्य तु शयानस्य निदेशे चैव तिष्ठतः" मनुः "निर्देशात् स्वर्गिणः पितुः" रघुः।

**निदेशिन्** त्रि० नि+दिश–णिनि। १आज्ञाकारके स्त्रियां ङीप्। सा च २दिशि काशायां राजनि०।

**निद्रा** स्त्री नि+द्रा–भावे क। १शयने स्वप्ने। निद्रा च कालाग्निरुद्रपत्नी यथा "कालाग्निरुद्रपत्नी च निद्रा सा सिद्धयोगिनी। सर्वलोकाः समाच्छन्ना यया योगेन रात्रिषु" इति। रात्रिषु योगेन सम्बन्धेन। २तत्त्वाप्रतिबोधे। ३अभावप्रत्ययालम्बनायां वृत्तौ चतसृणां वृत्तीनामभावस्य प्रत्ययः कारणं तमोगुणस्तदालम्बनावृत्तिरेव निद्रा न तु ज्ञानाद्यभावमात्रम्। सत्त्वरजसमयविरोधिन्यां तमोगुणालम्बनायां ४वृत्तौ। "निद्राभिमानिनी काली तामसी शक्तिरिष्यते। यदा तु मनसि क्लान्ते कर्मात्मानः क्लमान्विताः। विषयेभ्यो निवर्त्तन्ते तदा स्वपिति मानवः"। कर्मात्मानः उभयविधानीन्द्रियाणि "सुखं स्वपित्यहरहर्व्याधितश्च यो नरः। यावज्जीवञ्च यो भुङ्क्ते यस्तु दारैर्न वञ्चितः। कुतो निद्रा दरिद्रस्य परमेश्वरकस्य च। परनारीप्रसक्तस्य परद्रव्यहरस्य च" निद्रा च मेधा नाडीसंयोगरूपेति नैयायिका चित्तवृत्तिभेद इति योगाचार्या यथा "वृत्तयः पञ्चतय्यः क्लिष्टाऽक्लिष्टाः" "प्रमाणविपर्ययविकल्पनिद्रास्मृतयः पा०सू० वृत्तीः पञ्चधा विभज्य "अभावप्रत्ययालम्बना वृत्तिर्निद्रा" सू० निद्रावृत्तिर्लक्षिताऽसा च सत्त्वबोधे प्रत्यवमर्शात्प्रत्ययविशेषः कथं? सुखमहमस्वाप्सं प्रसन्नं मे मनः प्रज्ञां मे विशदीकरोति। दुःखमहमस्वाप्सं स्त्यानं मे मनोऽसमञ्जनवस्थितम्। गाढं मूढोऽहमस्वाप्सं सुष्वपि मे गात्राणि क्लान्तं मे चित्तमसत्सम्प्रतिष्ठितमिव तिष्ठतीति। स चायं प्रबुद्धस्य प्रत्यवमर्शो न स्यात् यदि प्रत्ययानुभवे तदाश्रिताः स्मृतयश्च तद्विषया न स्युः। तस्मात्प्रत्ययविशेषो निद्रा। सा च समाधावितरप्रत्ययवन्निरोद्धव्येति" भा० "अधिकृतं हि वृत्तिपदमनुवादकं प्रमाणविपर्यविकल्पस्मृतीनां वृत्तित्वं प्रतिपरीक्षकाणामविप्रतिपत्तेरतस्तदनूद्यते विशेषविधानाय निद्रायास्तु वृत्तित्वे परीक्षकाणां विप्रतिपत्तेरिति वृत्तित्वं विधेयम्। न च प्रकृतमनुवादकं विधानाय कल्पत इति पुनर्वृत्तिपदग्रहणम् जाग्रत्स्वप्नवृत्तीनामभावस्य प्रत्ययः कारणं वृद्धिसत्त्वाच्छादकं तमस्तदेवालम्बनं विषयो यस्याः सा तथोक्ता वृत्तिर्निद्रा। वृद्धिसत्त्वे हि त्रिगुणे यदा सत्त्वरजसी अभिभूय समस्तकार्यावरकमाविरस्ति तमस्तदा बुद्धेर्विषयाकारपरिणामाभावाद्वृत्ततमोमयोः बुद्धिभवदुध्यमानः पुरुषः सुषुप्तोऽन्तःसंज्ञ इत्युच्यते। कस्मात्पुनर्निरुद्धकैवल्ययोरिव वृत्त्यभाव एव न निर्दिश्यत आह। सा च सम्भवोधे प्रत्यवमर्शोपपत्तिकात् स्मरणात्प्रत्ययविशेषः। कथं? यदा हि सत्त्वसचिवतम आविरस्ति तदेदृशः प्रत्यवमर्श उत्प्रोत्थितस्य भवति। सुखमहमस्वाप्सम्प्रसन्नं मनः प्रज्ञां मे विशदीकरोति स्वच्छीकरोति इति यदा तु रजःसचिवतमः आविरस्ति तदेदृशः प्रत्यवमर्श इत्याह। दुःखमहमस्वाप्सं स्त्यानम् अकर्मण्यं मे मनः कस्मात् यतो भ्रमत्यनवस्थितम्। नितान्ताभिभूतरजः सत्त्वे तमःसचिवे स्वापे प्रबुद्धस्य प्रत्यवमर्शमाह। गाढं मूढोऽहमस्वाप्सं सुष्वपि मे गात्राणि क्लान्तं मे चित्तमसत्सम्प्रतिष्ठितमिव तिष्ठतीति। साध्यव्यतिरेके हेतुव्यतिरेकमाह। स चायमिति। प्रबुद्धस्य प्रबुद्धमात्रस्य तदाश्रिताश्चेति बोधकाले प्रत्ययानुदयभावे कारणानुभव इत्यर्थः। ननु प्रमाणादयो व्युत्थानचित्ताधिकरणा निरुध्यन्तां समाधिप्रतिपक्षत्वान्निद्रायास्त्वेकाग्रवृत्तिवृत्त्या कथं समाधिप्रतिपक्षतेत्यत आह। स च समाधाविति। एकाग्रवृत्त्यापि तामसत्वेन निद्रा सबीजनिर्बीजसमाधिप्रतिपक्ष इति यापि निरोद्धव्येत्यर्थः" विवरणम्। इयञ्च वेदान्तिभिः सुषुप्तिरित्यभिधीयते।

**निद्राण** त्रि० नि+द्रा–क्त नः। निद्रायुक्ते अमरः।

**निद्रालु** त्रि० नि+द्रा–श्नाः्र्थे आलुच्। निद्राशीले अमरः। "अङ्गानि निद्रालुसविस्रमाणि" रघुः। [ब्रह्मा०]

**निद्रावृक्ष** पु० निद्राया इव दृक्षयत्वात्। अन्धकारे शब्दमाला।

**निद्रासंजनन** न० निद्रां संजनयति सम्–जन णिच्–ल्यु। ज्योष्णिकायां वृक्षे शब्दमाला। कफधातोर्निद्राजनकत्वं वैद्यके प्रसिद्धम्।

**निधन** पु०न०। निधीयतेऽत्र नि+धा–ल्युट्। १मरणे अमरः। तस्यतः २अष्टमस्थाने तत्र मरणस्य चिन्तनात्तस्य तथात्वम्। ३खजन्मनक्षत्रावधिकेषु सप्तमेऽष्टमनवमेषु नक्षत्रेषु "निधने तिलकाञ्चनम्" ज्यो० त०। "क गन्तासि भ्रातः। कृतघ्नकृतयो वत्स धनिनः। किमर्थं

प्राणानां स्थितिमनुविधातुं क्षममपि । धनैर्याचञ्जाभिश्चै-नंतु परिभवोऽभ्यर्थनफलम् निकारोऽपे पद्याइनम-हुइ भोक्तारि निधनमिति" शान्तिय० । पञ्चावयवस्य सप्तावयवस्य वा वाक्योऽन्तिमे ४वयवे च तस्य यस्य कस्यचित्साध्यः अन्तिमभागरूपम् उद्गाहप्रस्तोहप्रति-हर्त्तृभिः मिलितैर्गयद्भेयम् । "ऋतुषु पञ्चविधं सामोपासीत वसन्तो हिङ्कारः ग्रीष्मः प्रस्तावः वर्षा उद्गीथः शरत् प्रतिहारो हेमन्तो निधनम्" "वाचि सप्तविधं सामोपासीत यत्किञ्चित् वाचो हुमिति स हिङ्कारः यत्प्रेति स प्रस्तावो यदेति स आदिः यदुदिति स उ-द्गीथः यत्प्रतीति स प्रतिहारः यदुपेति स उपद्रवः यन्नीति तन्निधनम्" छा०उ० निहतं धनं यस्मात् । ६दरिद्रे त्रि० "निधनता सर्वापदामास्पदम्" मृच्छकटिकम्

**निधनवत्** त्रि० निधन+अस्त्यर्थे मतुप् मस्य वः । १मरण-युक्ते निधनावयवयुक्ते २साम्नि न० "षड्क्रमै निधन-वत् । निधनवत साम्नावयवम्" यजु०१३।५८ "निधनवत्-साम" वेददी० ।

**निधा** स्त्री निधीयते धार्यते वस्त्वनेनानया नि+धा-क । १पात्रसमूहे "निधा पात्रा भवति यन्निधीयते" निरु० ४।२ "चतुर्हस्तसंख्यपात्राणि निधयेव वहान्" ऋ० १०। ७१।११ "निधा पात्रा पात्रसमूहरूपया वहान्" भा० भावे क । २निधाने ३अर्थपात्रे च ।

**निधान** न० नि+धा-भावे ल्युट् । १स्थापने निधीयतेऽत्र । २आधारे आश्रये "निधानमूगतं सर्वं सद्यः समधिगच्छति" आगमः । ३क्षयस्थाने "एतस्मानावतारार्थां निधानं बीजमव्ययम्" भाग०१।३।६। ४निधिशब्दार्थे । ५वज्रप्रकाशे वि०कौ० निमूलशब्दे उदाहृतम् । "नेरनिधाने" पा० "नि-धानकुम्भस्य यथैव दुर्गतः" रघुः "कृत्वा निधानं पादेन गोऽर्थमिच्छति भिक्षया" काशीख०३६अ०। ततः ब्रह्मा० चतुर्थ्यां क । निधानक तत्सदृशतटदेशादौ ।

**निधि** पु० नि+धा-आधारे कि । १वस्तुन आधारे "निधिः स्तुतीनां धनसम्पदामिव" माघः "तदित्थमेतस्य निधेः कलानाम्" नैष० । अन्ननिधिः सुवर्णनिधिरित्यादि २नवसंख्यानामसमन्वृन्दे ३समुद्रे राजनि० ४विष्णौ परेश्वरे तस्य सर्वाधारत्वात् तथात्वम् । "सर्वः शर्वः शिवः स्थाणुर्भूतादिर्निधिरव्ययः" विष्णुस० "प्रलयेऽस्मिन् सर्वं निधीयते इति निधिः" भा० ५मूलतात्पातालस्वामिकध-नादौ नितान्त० निधिविषये विधिभेदस्तन्त्रोक्तो यथा

"अधुना भूमौ चिरनिखातस्य सर्वसाधेर्निधिशब्दवाच्य-स्याधिगमे विधिमाह "राजा लब्ध्वा निधिं दद्यात् द्विजे-भ्योऽर्द्धं द्विजः पुनः । विज्ञानशेषमादद्यात् सर्वस्वामी प्रभुर्यतः । इतरेण निधौ लब्धे राजा षष्ठांशमाहरेत् । अनिवेदितविज्ञातोदाण्डस्तं दण्डमेव च" याज्ञ० । यत्र लक्षं निधिं राजा लब्ध्वार्द्धं ब्राह्मणेभ्यो दत्त्वा शेषं कोषे निवेशयेत् । ब्राह्मणस्तु विद्वान् श्रुताध्ययनसम्पन्नः सदाचारो यदि निधिं लभेत तदा सर्वमेव गृह्णीयात् । यस्मादसौ सर्वस्य जगतः प्रभुः । इतरेण तु राजविद्वद्-ब्राह्मणव्यतिरिक्तेनाविद्वद्ब्राह्मणक्षत्रियादिना निधौ लब्धे राजा षष्ठांशमधिगन्तुं दत्त्वा शेषं निधिं स्वयमा-हरेत् यथाह वसिष्ठः "अप्रज्ञायमानं वित्तं योऽधि-गच्छेत् राजा तद्धरेदधिगन्तुं षष्ठमंशं प्रदद्यात्" इति । गौतमोऽपि "निध्यधिगमो राजधनं न ब्राह्मणस्याभि-रूपस्याब्राह्मणोऽध्याख्याता षष्ठमंशं लभेतेत्येके" इति । अनिवेदित इति कर्त्तरि निष्ठा । अनिवेदितज्ञाता विज्ञातश्च राज्ञा" इत्यनिवेदितविज्ञातः । यः कश्चिन्निधिं लब्ध्वा राज्ञे न निवेदितवान् विज्ञातश्च राज्ञा, स सर्वं निधिं दाण्डोदण्डश्च यद्भूपेक्षया । अथ निधेरपि स्वा-म्यागम्य रूपसङ्ख्यादिभिः स्वत्वं भावयति तदा तस्मै राजा निधिं दत्त्वा षष्ठं द्वादशं वांशं स्वयमाहरेत्" यथाह मनुः "ममायमिति यो ब्रूयान्निधिं सत्येन मानवः । तस्माद्दीप्तं षड्भागं राजा द्वादशमेव वेति" । अथवि-कल्पस्तु वर्षकालाद्यपेक्षया वेदितव्यः"। ३महापद्मादि-रत्नविशेषे शेषधौ स च नवविधः "महापद्मश्च पद्मश्च शङ्खो मकरकच्छपौ । मुकुन्दकुन्दनीलाश्च खर्वश्च निध-यो नव" इति शब्दार्थवः खर्वनिधानामष्टानामेव निधित्वं तल्लक्षणञ्च मार्कण्डेयपु० ६०अ०उक्तं यथा

"मार्कण्डेय उवाच । पद्मिनी नाम या विद्या लक्ष्मीस्तस्याश्च देवता । तदाधाराश्च निधयस्तान् मे निगदतः शृणु । तत्र पद्ममहापद्मौ तथा मकरकच्छपौ । मुकुन्दकुन्दौ नीलश्च शङ्खश्चैवाष्टमो निधिः । सप्तौ ह्यौ भवन्त्येते सङ्ख्यः सप्त भवन्त्यमी । एते ह्यष्टौ समाख्याता निधयस्तव क्रोष्टुके !। एभिरालोकितं चित्तं मानुषस्य महात्मने !। यादृक् स्वरूपं भवति तन्मे निगदतः शृणु । पद्मो नाम निधिः पूर्वः स यस्य भवति द्विज !। स तस्य तत्सुतानां च तत्पुत्राणां च नान्यतः । दाक्षिण्यसारः पुरुषस्तेन चाधिष्ठितो भवेत् । सत्याचारो

महाभागोयतोऽसौ वालिको निधिः। सुवर्णरूप्यता-
म्रादिधातूनां च परिग्रहम्। करोत्यतितरां सोऽपि
तेषां च क्रयविक्रयम्। करोति च तथा यत्नान् दक्षि-
णाश्च प्रयच्छति। तस्मादयति कामांश्च सर्वानेव यथा-
क्रमम्। सभादेवनिकेतांश्च स कारयति तत्नाः ॥
सत्वाधारो निधिश्चान्यो महापद्म इति स्मृतः। सत्व-
प्रधानो भवति तेन चाधिष्ठितो नरः। करोति पद्म-
रागादिरत्नानाञ्च परिग्रहम्। स मौक्तिकप्रवालानां
तेषां च क्रयविक्रयम्। ददाति योगमीशेभ्यस्तेषामा-
वसथांस्तथा। स करोति च तच्छीलः स्वयमेव च जा-
यते। तत्प्रसक्तास्तथाशीलाः पुत्रपौत्रक्रमेण च।
एवंविधात्मकः सम्राट् स पुरुषांश्च न सञ्चति। महापद्मस्तु
विप्राणां यत्नार्थमुपजायते २। तामसो मकरो नाम
निधिस्तेनावलोकितः। पुरुषोऽथ तमःप्रायः क्षयी-
लोऽपि हि जायते। वाणखड्गर्ष्टिधनुषां चर्मणाञ्च
परिग्रहम्। दंशनानाञ्च कुरुते याति मैत्रीञ्च राजभिः।
ददाति शौर्यवत्तीनां भूभुजां ये च तत्प्रियाः। क्रय-
विक्रयशस्त्राणां नान्यत्र प्रीतिमेति च। एकस्यैव भव-
त्येष नरस्य न सुतानुगः। द्यूतार्थं दस्युतो नाशं
संग्रामे वापि स व्रजेत् ३। कच्छपाख्यो निधिर्योऽन्यो
नरस्तेनाभिवीक्षितः। तमःप्रधानो भवति यतोऽसौ
तामसो निधिः। व्यवहारान् न विदैव पण्यजातं
करोति च। क्रियाः सा निखिलाश्चैव न विद्यन्ति
कस्यचित्। समस्तानि यथाकूपे निमज्जन्ति हि क-
च्छपाः। तथावष्टभ्य वित्तानि तिष्ठत्याकुलमानसः। न
ददाति न वा भुङ्क्ते तद्विनाशभयाकुलः। निधानरक्षां
कुरुते निधिः सोऽप्येकपुरुषः ४। रजोगुणमयश्चान्यो
मुकुन्दो नाम यो निधिः। नरोऽवलोकितस्तेन तद्वशो
भवति द्विज!। वीणावेणुमृदङ्गादिगीतवाद्यपरिग्रहम्।
करोति गायतां वित्तं नृत्यतां च प्रयच्छति। वन्दिमा-
गधस्तुतानां विटानां स्तवपाठिनाम्। ददात्यकृपणं
भोगान् भुङ्क्ते तैस्तु समं द्विज!। कुलटासु रतिश्चास्य
भवत्यन्यैव तद्विधैः। प्रयाति सङ्गमेकं च स निधिर्भजते
नरम् ५। रजःसत्त्वमयश्चान्यः कुन्दोनाम महानिधिः।
उपैति क्षममधिकं नरस्तेनावलोकितः। समस्तधातु-
रत्नानां पण्यधान्यादिकस्य च। परिग्रहं करोत्येष तथैव
क्रयविक्रयम्। आधारः सजनानां चाप्यागताभ्यागतस्य
च। सहते नापमानोक्तिं स्वल्पामपि महामुने!।
स्त्रीयमानश्च महतीं प्रीतिं बध्नाति यच्छति। यं यस्मि-
न्नति वै कामं महत्त्वमुपयाति च। बहवो मार्या भव-
न्त्यस्य सुतिमत्योऽतिशोभनाः। तद्वत्ये सप्त नरान् निधिः
कुन्दोऽनुवर्त्तते। प्रवर्द्धमानोऽनुनरमष्टभागेन सत्तम!।
दीर्घायुश्चैव सर्वेषां पुरुषाणां प्रयच्छति। बन्धूनामेव
भरणं ये च दूरादुपागताः। तेषां करोति वै कुन्दः पर-
लोकेन चादृतः। भवत्यस्य न च क्षेत्रः सङ्ग्रामेषु
जायते। पूर्वमित्रैश्च मैथिल्यं प्रीतिमन्यैः करोति च ६।
तथैव सत्वतमयो यो विमर्त्ति महानिधिः। निधिः स
नीलस्तत्सङ्गी नरस्तच्छीलभाग्भवेत्। वस्त्रकर्पासधान्यादि
फलपुष्पपरिग्रहम्। सस्यानि विष्णुमद्यानां शुक्लादीनां
तथा मुने!। क्षारादीनां करोत्येष यत्नान्यच्चास्य
सत्तमम्। क्रयविक्रयमप्येषां नान्यत्र रमते मनः।
तडागानां पुष्करिण्यादीनां तथाऽऽरामान् करोति च।
वस्त्रञ्च सरितां तद्वत्सेतूंश्चारोपयते नरः। अनुलेपन
पुष्पादिभोगभोक्ताऽपि जायते। त्रिपुरस्यापि निधि-
र्नीलो नामेह जायते ७। रजस्तमोमयश्चान्यः शङ्ख
संज्ञो हि यो निधिः। तेनापि नीयते विप्र! सङ्घचित्वं
निधीश्वरः। एकस्यैव भवत्येष नरं नान्यमुपैति च।
यस्य शङ्खो निधिस्तस्य स्वरूपं क्रोष्टुके! शृणु। एष
एवात्मना सिद्धस्तं भुङ्क्ते तथाऽम्बरम्। कदन्नभुक्परि-
जनो न च शोभनवस्त्रभृत्। न ददाति सुहृद्भार्यां
सुतपुत्रबन्धुषादिषु। स्वपोष्यपरः शङ्खो नरो भवति
सर्वदा ८। इत्येते निधयः ख्याता नराणामर्थदेवताः।
सिद्धावलोकिता सिद्धस्वभावफलदायिनः। अयाख्यात
स्वभावस्तु भवत्येकविलोकनात्। सर्वेषामाधिपत्ये च
श्रीरेषा द्विज! पद्मिनी"। अथर्वशीर्षस्थभूतपाठयुते
ऽथर्ववेदे च। निधिगोपशब्दे ऽ यत्नम्।

**निधिगोप** पु० निधिरथर्वशीर्षस्थभूतपाठो वेदस्तं गोपायति
गुप-अण् उप०। ऋचूचाने "अथ यदेवाहमुवीत तेन
ऋषिभ्य ऋणं जायते। तदेभ्य एतत् करोति अथर्वाणं
निधिगोपं छन्दोचानमाहुः" शत०ब्रा० १।७।२।२

**निधिनाथ** पु० ६त०। कुबेरे त्रिका० निधीशादयोऽप्यत्र।

**निधुवन** न० नितरां धुवनं कम्पादिचालनमत्र। मैथुने
।सुरतलीलायाम् अमरः। "विधुवनविनोदेन च मनुम्"
कर्पूरस्तवः "नवनिधुवनलीलाः कौतुकेनाभिवीक्ष्य"
माघः। नितरां धुवनम्। २अत्यन्तकम्पने च

**निधेय** त्रि० नि+धा-यत्। स्वार्थे स्त्रियां टाप्। "श्रीश

पद्मालया देवि ! निधेया वैष्णवोरसि" हरिवं० ६८अ० आङि तु गार्ङरवा० स्त्रियां ङीन् । आनिधेयी

**निध्यान** न० नि+ध्यै–भावे ल्युट् । निर्वर्णने दर्शने अमरः

**निध्रुव** पु० गोत्रप्रवर्त्तकर्षिप्रवरर्षिभेदे "निध्रुवाणां काश्यपावत्सारनैध्रुवेति" आश्व०श्रौ० १२।१४।७ गोत्रप्रवरोक्तौ

**निध्रुवि** त्रि० नितरां ध्रुवति ध्रु–स्थैर्ये कि । नितरां स्थैर्यान्विते । "यो मर्त्येषु निध्रुविर्ऋतावा" ऋ०७।२।१

**निध्वान** पु० नि+ध्वन–भावे घञ् । शब्दमात्रे शब्दरत्ना०।

**निनङ्गु** त्रि० नष्टुमिच्छुः नश–घनु–उ तुम् । अदर्शनं प्राप्तुमिच्छौ "अविस्रसश्च वस्तूनां निनङ्गुर्विक्रमं षड्डः" भट्टिः ।

**निनद** पु०नि+नद–भावे अप् । १शब्दे अमरः २रवतुल्यशब्दे शब्दार्थचि० "उच्चचार निनदोऽम्भसि तस्याः" रघुः।

**निनयन** न० नि+नी–ल्युट् । १निष्पादने "नाभिव्याहारयेत् ब्रह्म स्वधानिनयनादृते" मनुः "निनयनं निष्पादनम्" कुल्लू० । २परासेचने च निपूर्वकस्य नयतेः परिषेकार्थत्वात् तथात्वम् । "बर्हिषि पूर्णपात्रं निनयेत्" आश्व० श्रौ० सू० १।१०।२३ "निनयेत् सिञ्चेदित्यर्थः नारा० "एषोऽवभृथः" ४सू० "यदिदं पूर्णपात्रनिनयनं एषोऽस्य कर्मणोऽवभृथो भवति" नारा० "उदकं चमसं निनयेयुः" द्राह्या०सू० "निनयेयुः परासिञ्चेयुः" ताण्ड्य० ब्रा०भा०

**निनर्त्तयत्** त्रि० देवश्रवस उद्धवस्य पुत्रभेदे "निनर्त्तयन्नुं यन्नुं देवश्रवाव्यजायत" हरिवं० ३५अ०

**निनर्द** पु० नि+नर्द–भावे घञ् । वेदशब्दोच्चारणभेदे । तत्प्रकारः आश्व० श्रौ० ८।३।६ "हतीयेषु पादेष्वादितो यदक्षरं तदनुदात्तोकृत्य ब्रूयात् । एतदुक्तं भवति हतीयेषु प्रथममादित इत्यर्थः । आदितो यद्वे अक्षरे तयोः पूर्वमनुदात्तं तस्मात् परं द्वितीयम् उदात्तं यथा भवेत् तथा निनर्देत् नितरां ब्रूयादित्यर्थः । तदेवमुच्चारणं निनर्दशब्देनोच्यत इत्यर्थः" नारा० "तस्योत्तमावर्जं हतीयेषु न्यूङ्खो निनर्दश्च" ७।११।६ "तस्य खलस्य याः पुरस्तात् प्रागुत्तमाया अक्षरसामां हतीयेषु पादेषु न्यूङ्खो निनर्दश्च कर्त्तव्यः । उक्तमपि न्यूङ्खनिनर्दरहिता अस्तव्येव" नारा० "खरादिरन्त ओकारश्चतुर्निनर्दः" ११अ० हतीयेषु पादेषु निनर्द उक्तः । तेषु कस्मिन् प्रदेश इत्युच्यते । पादान्ते । खरादिः खरो वाटिप्रदेश इत्यर्थः स चौकारश्चतुष्कृत्वो वक्तव्यः स निनर्दः इत्युच्यते" नारा० ।

**निनाद** नि+नद–पचे घञ् । शब्दमात्रे अमरः "व्यानिनादमथ मुञ्चती तयोः" रघुः ।

**निनाह्य** पु० नीचैर्नाह्यः भूमौ निखननीयः नि+नह–कर्मणि यत् । भूमौ नीचैः खननीये १अधिके २अहा घटे च "अस्तमितवेत् निनाह्यात् पुरेजानवेत्" कात्या० श्रौ०८।६।५८ "निनाह्यात् अधिकात्" संग्रहः "यदि पुरेजानः स्यात् निनाह्यात् मट्टीयात्" शत०ब्रा० १।६।२।८ "निनाह्यात् खण्डस्थितप्रभृतघटादेः" भा० ।

**निनित्सु** पु० निन्दितुमिच्छुः निन्दि–सन–उ वेदे नि० निन्दितुमिच्छौ "आरे तं शंसं कृणुहि निनित्सोः" ऋ० ७।२५।२ लोके तु निनिन्दिषु तत्रार्थे ।

**निन्दक** त्रि० निन्द–ण्वुल् । गर्हाकारके निन्दाकारके "परीवादात् खरो भवति श्वा वै भवति निन्दकः" मनुः

**निन्दतल** पु० निन्द–कर्मणि घञ् निन्दः निन्द्यं तलमस्य । निन्दितवृक्षे शब्दर०

**निन्दन** न० निन्दि–भावे ल्युट् । गर्हणे शब्दरत्ना०।

**निन्दा** स्त्री निन्दि–भावे अ । अविद्यमानदोषाभिधाने १गर्हणे "वेदनिन्दारतान् मर्त्यान् देवनिन्दारतांस्तथा । द्विजनिन्दारतांश्चैव मनसापि न चिन्तयेत् । न चात्मानं प्रशंसेदा परनिन्दाञ्च वर्जयेत् । वेदनिन्दां देवनिन्दां प्रयत्नेन विवर्जयेत्" कौर्म्म० १५अ० । २अनिष्टसाधनत्वबोधनद्वारा विध्यर्थप्रशंसावचने च "न हि निन्दा निन्द्यं निन्दितुं प्रवर्त्तते अपि तु विधेयं स्तोतुम्" न्याय० ।

**निन्दार्थवाद** पु० निन्दारूपोऽर्थवादः । मीमांसकोक्तौ अर्थवादभेदे अर्थवादशब्दे ३६८ पृ० दृश्यम् उदाहरणान्तरं लौगाक्षिभास्करेण दर्शितं यथा "तत्र निन्दार्थवादो यथा "असत्यं वा एतद् यदक्षन्नोमम् अक्षन्नं हि रजतं यो बर्हिषि ददाति पुराम्ने संवत्सराद्गृहे रदन्ति"

**निन्दास्तुति** स्त्री निन्दया स्तुतिः । व्याजेन निन्दाद्वारा स्तुतौ अलङ्कारशब्दे व्याजस्तुत्यलङ्कारे ४०५पृ० दृश्यम् ।

**निन्दित** त्रि० निन्द–क्त । १गर्हिते २धिक्कृते जटा० "विहितस्याननुष्ठानात् निन्दितस्य च सेवनात्" याज्ञ० । निन्दितञ्च शास्त्रलोकयोर्गर्हितम् । तत्र शास्त्रे निन्दितं ब्रह्मप्रतिग्रहादि लोकगर्हितमतिभोजनादि ।

"अस्वर्ग्यं लोकविद्विष्टं तस्मात् तत् परिवर्जयेत्" मनुः "यद्यपि शिष्टं लोकविरुद्धं नाचरणीयं नाचरणीयमिति" मिताक्षराधृतवचनम् । [वत्सरायां हेमच० ।

**निन्दु** स्त्री निन्द्यतेऽग्नयस्त्रेनासौ निन्दि–कर्मणि उ । स्रुत-

निप इ० न० नितरां पिबत्यनेन नि+पा–करणे घञर्थे क। १कलसे अमरः नीप+पृषो०। २कदम्बवृक्षे शब्दच०।

निपक्षति स्त्री नीचा पक्षतिः प्रा०स०। अक्षस्य दक्षिणपार्श्वस्थास्थां त्रयोदशानां मध्ये द्वितीये अस्थि वेददी०"ऋग्नेः पक्षतिवामोः निपक्षतिः" "इन्द्राग्न्योः पक्षतिः सरस्वत्यै निपक्षतिः" यजु० २५।४४।४५ "पक्षस्य पार्श्वस्य भवभूतानि अस्थीनि वङ्क्रियशब्दवाच्यानि पक्षतिशब्देनोच्यन्ते तानि च प्रतिपार्श्वं त्रयोदश भवन्ति "षड्विंशतिरस्य वङ्क्रयः" इति कौषीत०ब्रा० १०।३ श्रुतेः तेषां क्रमेण देवता। अग्नेः पक्षतिः प्रथमं दक्षिणपार्श्वास्थि, वायोर्निपक्षतिः नीचा पक्षतिः निपक्षतिः द्वितीयं दक्षिणपार्श्वास्थि" "एवं द्वितीयं वामपार्श्वास्थि सरस्वत्या इति च" वेददी०। [अमरः

निप(पा)ठ इ० नि+पठ–भावे घञ् पक्षे घञ् वा। पाठे

निपठितिन् त्रि०निपठितमनेन इष्टा०कर्त्तरि इनि। कृतपाठे

निपत्यरोहिणी स्त्री निपत्य रोहिणी रोहितवर्णा स्त्री मयू०। निपत्यरोहितवर्णायां स्त्रियाम्

निपत्या स्त्री निपत्यस्याम् नि+पत–आधारे क्यप् नि०। १पिच्छिलभूमौ २युद्धभूमौ च।

निपरण्य न० निश्चितं परणं प्रीतिः नि+(निश्चये) पॄ–प्रीतौ भावे ल्युट् वा। प्रीत्यभावे तद्विरुद्धेच "निपरण्यात् पुत्रकं ततस्त्रायते"इति पुत्रशब्दे निरुक्तिः नितरां प्रीतौ २प्रीणने च"निपरणं प्रियेण तीर्णेन"आश्व०औ०२।६।१५

निपलाश त्रि०निपतितं पलाशं यस्य प्रा०ब०। निपतितपत्रे वृक्षे "साहस्रे निपलाशमिवोवाद" शत० ब्रा० २। २।३।२०

निपाक इ० नितरां पाकः प्रा०स०। अतिशयपाके शब्दर०।

निपात इ० नि+पत–भावे घञ्। १पतने २क्षतौ त्रिका० ३अधःपतने च "पयोधरोन्नेधनिपातचूर्णिताः" कुमा० "क च निशितनिपाता वसुधारा: शरास्त्वे" भट्ट०। निपतन्ति अवयववर्णविनाशादिना अन्यथा निष्पद्यन्ते नि+पत–कर्त्तरि घञ्ता०ष। वर्णागमादिना अन्यथोत्पद्यमाने खलपिण्डादौ ४शब्दभेदे। वर्णागमादिप्रकारश्च कथ्यते "वर्णागमो वर्णविपर्ययश्च द्वौ चापरौ वर्णविकारनाशौ। धातोस्तदर्थातिशयेन योगस्तदुच्यते पञ्चविधं निरुक्तम्"। "अन्तेहर्णागमात् हंसः सिंहो वर्णविपर्ययात्। मूढोत्रा वर्णविकृते वर्णनाशे पृषोदरम्" निपतन्त्यर्थेषु उच्चावचेषु नि+पत–कर्त्तरि घञ्ता०ष। नानाविधार्थेषु उक्त्वा स्वार्थबोधकतया पतनशीले चादौ ५शब्दभेदे "तद्यान्येतानि चत्वारि पदजातानि नामाख्याते उपसर्गनिपाताश्चेति" विभज्य अथ निपाता उच्चावचेष्वर्थेषु निपतन्तीति उपमार्थे वा कर्मोपसंग्रहार्थे पदपूरणार्थे वा" विरुक्तकारः। ते च "प्राग्रीश्वराच्चिपाताः" "चादयोऽसत्त्वे" "प्रादयश्च" इत्यादिषु पा० सूत्रेषु पठिताः निपातसंज्ञाः भवन्ति। उपसर्गातिरिक्तनिपातानां च द्योतकत्ववाचकत्वोभयस्वीकारः "अव्ययविभक्तीति" पा० सू० भाष्ये स्थितः। उपसर्गाश्चान्तद्योतकत्वमेवेति "गतिर्गताविति" पा०सू०भाष्ये स्थितम्। उपसर्गशब्दे १२२५पृ० वैयाकरणमतसिद्धार्थबोधकता उक्ता नैयायिकमते तद्यथा "निपातं लक्षयति। स्वार्थे शब्दान्तरार्थस्य तादात्म्येनान्वयाद्यमः। सुबाद्यन्यो निपातोऽसौ विविधस्वादिभेदतः। यः शब्दः केवले वाक्यस्वार्थे शब्दान्तरार्थस्य तादात्म्येनान्वयबोधं प्रत्यसमर्थः सुबादिप्रत्ययेभ्यः प्रत्येकं भिन्नः स तादृशार्थभेदेनान्वयबोधं प्रति योग्यः। न हि कृतमनुभूतश्चेत्यादितः कस्मादपि कृतः सत्त्वस्य इत्यादिरनुभवः किन्तु कृतानुभूतयोः सत्त्वस्य इत्यादिरेव। लोकं पचति इत्यादौ धातुरपि स्वार्थे नामार्थस्य तादात्म्यं बोधयंस्तत्समर्थ एव प्रत्ययस्तु सुबादिरेव। यः शब्द इत्यादौ नामार्थस्वाभेदसाकाङ्क्षकारादिः स्वपरत्वान्न निपातः किन्तु नामैव। इरन्दरमस्तौ तु नाम्नि निपातव्यपदेशः सूत्रानिष्पाद्यत्वप्रयुक्तो भ्रान्तः। कार्त्तिक्यादौ यत्र दानं तदत्यन्तविनिश्चितम्"इत्यादौ न केवले नञर्थे यदर्थस्य तादात्म्येनान्वयः किन्तु दानाद्यवच्छिन्ने। स्वर्दिवा नक्तमाद्यव्ययमपि नामैव न तु निपातः शोभनं स्वरित्यादौ तदर्थे नामार्थस्य तादात्म्येनान्वयात्। प्रादयस्तूपसर्गा न स्वार्थकाः स्वार्थकाश्चेत् निपाता अपि"।

निपातन न० नि+पत–णिच् ल्युट्। १भारखे "परिचर्यं चलत्यस्मिन्निपातने"रघुः। २अधोनयने ३पातने च"अवश्यं चरेत् कृच्छ्रमतिकृच्छ्रं निपातने" मनुः निपातने दन्तपातने" मा०त०निपात्यतेऽनेन करणे ल्युट्। ४अलक्षानुसारेणानुत्पद्यमानशब्दसाधनोपाये"यद्यत्र योनानुत्पन्नं तत्सर्वं निपातनात् सिद्धम्" भट्टभाष्यम्। सर्वनामसंज्ञाशू० "निपातनात् सत्त्वाभावः" "निपातनमर्थे जातीयकमेव अविशेषेण सत्त्वशब्दा विशेषेण निपातनं

क्रियते तत्र व्यक्तमाचार्यस्याभिप्रायो गम्यते इदं न भवतीति" भट्टभाष्यम् ।

**निपाद** त्रि० निकृष्टो न्यग्भूतो वा पादो यत्र । निम्नप्रदेशे "भवन्त्युद्गतो निपादाः" ऋ० ५।८३।७ "उद्गत उन्नतप्रदेशाः निपादा न्यग्भूतदेशाः" भा० ।

**निपान** न० निपीयतेऽस्मिन् नि+पा--आधारे ल्युट् । कूपसमीपस्थे १जलाशये कूपोद्धृतजलाधारे कूपादिसमीपे पशूनां पानार्थमुदकाधारे अमरः। करणे ल्युट् । २गोदोहनपात्रे त्रिका० । ३खातादिषु च "परकीयनिपानेषु न स्नायाच्च कदाचन । निपानकर्त्तुः स्नात्वा च दुष्कृतांशेन लिप्यते" मनुः "गाहन्तां महिषा निपानसलिलम्" यजु० । भावे क्त । ४निःशेषपाने

**निपीडन** नि+पीड–भावे ल्युट् । नितरां पीडने पीडियुच् । तत्रार्थे स्त्री "कृत्वा दीननिपीडनां निजजने वक्त्रे वचोविग्रहम्" सा०द० । [कृतनिष्पीडने ।

**निपीडित** त्रि०नितरां पीडितः नि+पीड–क्त । (निंगडान)

**निपुण** त्रि० नि+पुष–क । १प्रवीणे क्रियासु दक्षे "शिल्पोपचारयुक्ताश्च निपुणाः पण्ययोषितः" मनुः । "शक्तिर्निपुणता लोकशास्त्रकाव्याद्यवेक्षणात्" काव्यप्र० २सूक्ष्मे "शुभं वचो मम परं निपुणं विभाव्य" रघुनाथः । श्रेयआदि० अभूततद्भावेऽर्थे कृत्यादिना स० । निपुणकृत निपुणोक्ते "साधु निपुणाभ्यामार्याभ्यां सम्प्रधार्यते" मा० एतद्योगे षष्ठ्यां गम्यमानायां सप्तमी मातरि निपुणः । प्रत्यादियोगे तु न, मातरं प्रति निपुणः" सि०कौ० ।

**निपुर** पु०निकृष्टं पूर्यते पॄ--कर्मणि क्विप् । लिङ्गदेहे सूक्ष्मशरीरे "परा पुरो निपुरो ये भवन्ति" यजु० २।१० "निपुरः सूक्ष्मदेहात्" वेददी० । तत्साधितत्वादिना सूक्ष्मरूपेण पुरत्वेन तत्पूरकत्वञ्च निकृष्टत्वात् तथात्वम् 'अन्नमयितं त्रेधा विधीयते तस्य यः स्थविष्ठो धातुस्तत्पुरीषं यो मध्यमस्तन्मांसं योऽणिष्ठस्तन्मनः' छा० उ० इत्यादिश्रुत्या मनसः सूक्ष्मदेहान्तर्गतस्य सूक्ष्मभूतेनात्मप्रवेशेन उपचीयमानत्वात् निकृष्टपूरकमेवं प्राणादीनामपि तदन्तर्गतानां तथात्वं तत्रोक्तमतो निपुरदेहस्य तथात्वम् ।

**निफला** स्त्री निष्टप्तं फलं यस्याः । ज्योतिष्मतीलतायाम् राजनि० ।

**निबन्ध** पु०नि+बन्ध-घञ् । १कालविशेषे देयत्वेन प्रतिश्रुते वस्तुनि "दद्यात् भूमिं निबन्धं वा कृत्वा लेख्यञ्च लेखयेत्" "निबन्धो द्रव्यमेव वा" याज्ञ० २संपदृप्रत्ययभेदे मूलरोपरूपे ३रोगभेदे ४बन्धने च हेमच०"निबन्धायाऽऽसुरी मता" गीता । निबध्नाति कोशम् अच् । ५निम्बवृक्षे जटाध० । तत्सेवने हि कोष्ठरोधो भवति ।

**निबन्धन** न० निबध्यतेऽनेनास्य वा ल्युट् । १हेतौ हेमच० । २रज्जायाञ्चन्द्रोनिबन्धनोर्द्धभागे च अमरः । भावे ल्युट् । ३बन्धने ४पन्थे च "अनुत्सूत्रपदन्यासा सद्वृत्तिः सन्निबन्धना" माघः । ततः अस्त्यादि० चतुरर्थ्यां क । निबन्धनक तत्समीपस्थदेशादौ त्रि० । निबध्यते अनया करणे ल्युट् । ५निबन्धसाधने स्त्रियां ङीप् । "विषयवती वा प्रवृत्तिरुत्पन्ना मनसः स्थितिनिबन्धनी" पात०भ०

**निब(ब)र्हण** न० नि+(ब)र्ह–ल्युट् । मारणे "निबर्हणं धर्मधनैर्विगर्हितं विचिन्त्य वित्तासजुषां द्विषामपि" नैष० । अन्तस्थमध्यमित्येके

**निभ** त्रि०नि+भा–क । १नितरां भासमाने २सदृशे च साहश्येऽस्य नित्यस० न पृथक् प्रयोगः । "प्रफुल्लताम्रिकनिभैरभीषुभिः" "सुखेन पूर्णेन्दुनिभस्त्रिलोचना" माघः "प्रज्वलन्तो निभाद्यन्तः स वा प्रलय उच्यते" शब्दर० ।

**निभालन** न० नि+भु–भल–निरूपणे भावे ल्युट् । दर्शने त्रिका० । [भवेन हि निश्चलं भवतीति तस्य तथात्वम् ।

**निभृत** त्रि० निश्चलं भूतः । अत्यन्तभीते राजनि० । अत्यन्त-

**निभृयप** पु० निभृय नितरां भूत्वा मत्स्यादिरूपेणावतीर्य पाति पा–क । विष्णौ "विष्णवे निभृयपाय साधा" यजु० २२।२० ।

**निभृत** त्रि० नि+भृ–क्त । १धृते २विनीते ३निश्चले ४एकाग्रे ५गुप्ते ६निर्जने अत्यायोपस्थिते च यद्धातुवृत्ति०"नभसा निभृतेन्दुना तुलाम्" रघुः "मधुकराङ्गनया सङ्गरन्नदध्वनिभृता निभृताक्षरसञ्जने" माघः ।

**निमग्न** त्रि० नितरां मग्नः नि+मस्ज–क्त । जलादौ नितरां निविष्टे "निमग्नेनाप्यन्तर्मननजलधेरन्नरुदरम्" रसगङ्गाधरः । निमग्नस्यादूरदेशादि० वराड्ढा० क । नैमग्नक निमग्नस्यादूरदेशादौ त्रि० ।

**निमज्जथु** पु० नि+मस्ज–भावे अथुच् । निमज्जने "तस्मे कान्तारैः सार्द्धं मन्येऽहं धिङ्निमज्जथुम्" भट्टिः ।

**निमज्जन** न० नि+मस्ज–भावे ल्युट् । जलादावगाहने स्नाने "इहनिमज्जनसुपैति सुधायाम्" नैष० ।

**निमन्त्रण** न० नि+मन्त्र–भावे ल्युट् । आवश्यकश्राद्धभोजनादौ प्रवर्त्तने । "विधिनिमन्त्रणामन्त्रणाधीष्टसंप्रश्न प्रार्थनासु सिङ्" पा०"यस्याकरणे प्रत्यवायस्तन्निमन्त्रणम्"

द्वि०कौ०। तथा च प्रत्यवायप्रयोजकाभावप्रतियोगि निमन्त्रणम्। "ब्राह्मणप्रातिवेश्यानामेतदेवा निमन्त्रणे" याज्ञ० "निमन्त्रणार्थं दूतांश्च प्रेषयामास शीघ्रगान्" भा०व० २५५अ०। श्राद्धनिमन्त्रणप्रकारादि निमन्त्रितस्य नियमादि च नि०सि० निरूपितं यथा चन्द्रिकायां मात्स्ये "पठन्निमन्त्र्य नियमान् श्रावयेत् पैतृकान् बुधः। अक्रोधनैः शौचपरैः सततं ब्रह्मचारिभिः। भवितव्यं भवद्भिश्च मया च श्राद्धकारिणा" यत्तु मनुः "सर्वायासविनिर्मुक्तैः कामक्रोधविवर्जितैः। भवितव्यं भवद्भिर्नः श्वोभूते श्राद्धकर्मणीति" तत्पूर्वेद्युर्निमन्त्रणपरं न तदङ्गः। तत्रैव देवलः "असम्भवे परेद्युर्वा ब्राह्मणांस्त्रीन्निमन्त्रयेत्। यज्ञातीनसमानार्षानसमानाद्यक्षितः"। कात्यायनः "अनिन्द्यैर्नामभिर्तो नापक्रामेत् केतनं स्वकम्"। अथ श्राद्धकर्तृभोक्तृनियमाः तत्र निमन्त्रितविप्रत्यागेऽपराह्णे यमः "केतनं कारयित्वा तु योऽतिपातयति द्विजम्। ब्रह्महत्यामवाप्नोति शूद्रयोनौ च जायते। आमन्त्र्य ब्राह्मणं यस्तु यथान्यायं न पूजयेत्। अतिक्रुद्धास्तु घोरान्तिर्यग्योनिषु जायते"। प्रमदात्यागे हारीतः "प्रमादाद्विस्मृतं ज्ञात्वा प्रसादैनं प्रयत्नतः। तर्पयित्वा यथान्यायं सर्वं तत् फलमश्नुते"। प्रमदाभावे तु नारायणः "एकस्मिन्नपि प्राप्ते ब्राह्मणो नियतः शुचिः। यतियान्द्रायणं कृत्वा तस्मात् पापात् प्रमुच्यते" यमः "आमन्त्रितस्तु यो विप्रो भोक्तुमन्यत्र गच्छति। नरकार्यां शतं गत्वा चाण्डालेष्वभिजायते"। तत्रैव देवलः "पूर्वं निमन्त्रितोऽन्येन कुर्यादन्यप्रतिग्रहम्। भुक्ताहारोऽथ वा भुङ्क्ते सुकृतं तस्य नश्यति"। यदि विप्रो विलम्बेत तदोक्तमादित्यपुराणे "आमन्त्रितश्चिरं नैव कुर्याद्विप्रः कदाचन। देवतानां पितृणाञ्च दातुरन्नस्य चैव हि। चिरकारी भवेद्रोही पच्यते नरकाग्निना"। पृथ्वीचन्द्रोदये यमः "निमन्त्रितस्तु यो विप्रो श्राद्धान्नं याति दुर्मतिः। भवन्ति पितरस्तस्य तं मासं पांशुभोजनाः। आमन्त्रितस्तु यः श्राद्धे हिंसां वै कुरुते द्विजः। पितरस्तस्य तं मासं भवन्ति रुधिराशनाः। आमन्त्रितस्तु यो विप्रो भारतल्पं व्रते द्विजः। पितरस्तस्य तं मासं भवन्ति खेदभोजनाः। निमन्त्रितस्तु यो विप्रः प्रकुर्यात् कलहं यदि। पितरस्तस्य तं मासं भवन्ति मलभोजनाः"। ब्रह्मः "निमन्त्रितस्तु यः श्राद्धे मैथुनं सेवते द्विजः। श्राद्धं दत्त्वा च भुक्त्वा च युक्तः स्यान्नरकेतनम्"। कृतापि मैथुनं निषिद्धम् "ऋतुकाले नियुक्तो वा नैव गच्छेत् स्त्रियं क्वचित्। तत्र गच्छन्व्रजाप्नोति ह्यनिष्टानि फलानि तु" इति तत्रैव माधवीये च हेमाद्रौ वृद्धमनूक्तेः "श्राद्धं करिष्यन् कृत्वा वा भुक्त्वा वापि निमन्त्रितः। उपोष्य च तथा भुक्त्वा नोपेयाच्च कृतावपि। भोक्ष्यन् करिष्यन् श्वः श्राद्धं पूर्वरात्रौ प्रयत्नतः। व्यवायं भोजनञ्चापि कृतावपि विवर्जयेत्" इति तत्रैवाश्वलायनोक्तेश्च। विप्रानेश्वरेण तु श्राद्धे कृते गच्छतोऽपि न दोष इत्युक्तम् तत्त्वगतिकत्वे श्रेयम्। हरीतः "दिनियं ब्रह्मचारी स्याच्छ्राद्धलब्धैर्द्विजैः सह। अन्यथा वर्त्तमानौ तु स्यातां निरयगामिनौ। पुनर्भोजनमध्वानं भाराध्ययनमैथुनम्। श्राद्धकृच्छ्राद्धभुक् चैव सर्वमेतद्विवर्जयेत्। स्वाध्यायं कलहञ्चैव दिवास्वापं तथैव च"। यत्तु श्राद्धकाण्डिकायां पुराणसमुच्चये "कृत्वा तु रुधिरस्रावं न विद्वान् श्राद्धमाचरेत्। एकं द्वे त्रीणि वा विद्वान् दिनानि परिवर्जयेत्" इति तन्मूलम्। पृथ्वीचन्द्रोदये यमः "पुनर्भोजनमध्वानं भाराध्ययनमैथुनम्। सन्ध्यां प्रतिग्रहं होमं श्राद्धभोक्ताऽष्ट वर्जयेत्"। सन्ध्यानिषेधः प्रायश्चित्तात् पूर्वं ज्ञेयः यथाह योगना "दशजप्यः पिबेदापो गायत्र्या श्राद्धभुक् द्विजः। ततः सन्ध्यासुपासीत जपेच्च जुह्वादपि"। गौड़ास्तु "सायं सन्ध्यां परान्नञ्च क्षेदनञ्च वनस्पतेः। अमावस्यां न कुर्वीत रात्रिभोजनमेव च। द्यूतञ्च कलहञ्चैव सायंसन्ध्यां दिवाशयम्। श्राद्धकर्त्ता च भोक्ता च पुनर्भुक्तिञ्च वर्जयेत्" कामधेनौ वराहादयुक्तेः श्राद्धकर्तुरपि सायंसन्ध्यानिषेधमाहुः मिश्रास्तु निर्मूलमाहुः। होमनिषेधस्तु स्वयंहोमविषयः "क्षतके च प्रवासे च अयज्ञो श्राद्धभोजने। एवमादिनिमित्तेषु हापयेच्च तु हापयेत्" इति छन्दोगपरिशिष्टात्। तत्रैवादित्यपुराणे "निमन्त्रितस्तु न श्राद्धे कुर्याद्वाय्यादिताडनम्"। चन्द्रिकायां प्रचेताः "श्राद्धभुक् प्रातरुत्थाय प्रकुर्याद्दन्तधावनम्। श्राद्धकर्त्ता न कुर्वीत दन्तानां धावनं बुधः" हेमाद्रौ जाबालिः "दन्तधावनताम्बूले तैलाभ्यङ्गमभोजनम्। स्त्रीसेवाधपराः स्नानं श्राद्धकृत् सप्त वर्जयेत्"। विष्णुरहस्ये "श्राद्धोपवासदिवसे खादित्वा दन्तधावनम्। गायत्र्या शतधा सम्यूतमम्बु प्राश्य विशुध्यति। पुनर्भोजनमध्वानं या नप्राया मैथुनम्। दानप्रतिग्रहौ होमं श्राद्धभुक्

त्वष्टं वर्जयेत्"। "निमन्त्रयेत पूर्वेद्युर्ब्राह्मणानात्मवान् शुचिः। तैश्चापि संयतैर्भाव्यम् मनोवाक्कायकर्मभिः" याज्ञ०"पूर्वेद्युरपरेद्युर्वा श्राद्धकर्मण्युपस्थिते। निमन्त्रयेत त्वावरान् सम्यक् विप्रान् यथोदितान् मनुः। "पूर्वेद्युर्नि-वेदनम् वेदनं परेद्युर्हितीयं, तृतीयमामन्त्रणम्" आप-स्तम्बः "निवेदनं त्रीमया श्राद्धं कर्त्तव्यं तत्र भवन्तो निमन्त्रणीया इत्येवंरूपं निवेदनम्। द्वितीयं वेदनं त्वामहं निमन्त्रये इत्यनेन निमन्त्रणम्। त्वयि श्राद्धमहं करिष्ये" इति तृतीयमनुवादरूपम्" श्रा०त० रघु०

**निमय** पु० नि+मि-अच्। परिवर्त्तने द्रव्यान्तरदानेन द्रव्या-न्तरपरिग्रहरूपे विनिमये तत्र अविक्रेयद्रव्याणां विनि-मयेनैव परिग्रहः कर्त्तव्यं यथा भा०शा० ७८अ० "रसा-रसैर्विनातव्या नत्वेव लवणं रसैः। कृताकृतेन तिलाधान्येन तत्समाः"। अविक्रेयाणि अपण्यशब्दे २२४पृ० दर्शितानि।

**निमान** न०निमीयतेऽनेन नि+मा-ल्युट्। भूम्नि "संख्या-वाणुष्ठ निमाने मयट्" पा० "निमानं भूम्नम्" सि०कौ०।

**निमि** पु०अत्रिवंश्ये १दत्तात्रेयपुत्रे "क्षायमुवोऽत्रिः कौरव्य! परमर्षिः प्रतापवान्। तस्य वंशे महाराज! दत्तात्रेय इति श्रुतः। दत्तात्रेयस्य पुत्रोऽभूच्छ्रिमाँस्तु तपोधनः" भा०अनु० ६१अ०। २कौरववंश्ये भाविनृपभेदे "दण्ड-पाणिर्निमिश्चस्य क्षेमको कविता ततः। क्षेमकं प्राप्य राजानं संस्थां प्राप्स्यति वै कलौ" भाग० ६।२२।६। द्वापरयुगीये असुरांशभेदे "असुप्रपातने चैव निमिर्दै-त्यश्च दानवौ" हरिवं० १६१अ०। ४इक्ष्वाकुवंश्ये नृपभेदे "आसीद्राजा निमिर्नाम इक्ष्वाकूणां महात्मनाम्। पुत्रो द्वादशमो वीर्य्ये धर्मे च परिनिष्ठितः" रामा०उ०५५ स० तस्य वसिष्ठशापेन विदेहप्राप्तिकथा "यज्ञान्तमन्यं कृतवान् भामवज्ञाय पार्थिव!। चेतनेन विनाभूतो देहस्तो पार्थिवैष्यति"। तत्कर्म्मणि तस्य सर्वभूतानां नेत्रेषु निमेषरूपतया स्थितिकथा "सुप्रीताश्च सुराः सर्वे निमे-षं तत्सदाऽब्रुवन्। वरं वरय राजर्षे! कृते चेतो निरूप्यताम्। एवमुक्तः सुरैः सर्वैर्निमेषं तत्सदाऽब्रवीत्। नेत्रेषु सर्वभूतानां वसेयं सुरसत्तमाः!। वाढमित्येव वि-बुधा निमेषं तत्सदाऽब्रुवन्। नेत्रेषु सर्वभूतानां वायु भूतश्चरिष्यसि। तत्कृते निमिषिष्यन्ति चक्षूंषि पृथि-वीपते!। वायुभूतेन चरता विश्रमार्थं मुहूर्त्तकः" ५इक्ष्वाकुवंश्ये राजभेदे "निमिर्जनक इत्येते वैदेहा मोक्षकाङ्क्षिणः" भा०शा० ३१८अ०। ६निमिनिक्षे नैमित्तिकं निमित्तनिमि-त्तादागतम्। ७शब्दे च शब्दार्थेचि० स्वार्थे क तत्रार्थे संज्ञायां कन्। निमित्तक घुम्बने शब्दमाला।

**निमित** त्रि० नि+मि-क्त। समदीर्घविस्तारपरिमाणयुक्ते निघण्टुशब्दे दृश्यम्।

**निमित्त** न० नि+मिद-क्त। "अनात्मनेपदनिमित्ते" पा सूत्रनिर्देशान्न न दस्य नः। १हेतौ २चिह्ने च अमरः "निमित्तेषु च सर्वेषु शास्त्रमत्तो च भवेन्नरः" स्मृतिः "मयैव पूर्वं निहता धार्त्तराष्ट्राः निमित्तमात्रं भव सव्यसाचिन्!" गीता "अतः कालं प्रवक्ष्यामि निमित्तं कर्मणामिह" ति० त० भविष्यपु० "मासपक्षतिथीनाञ्च निमित्तानाञ्च सर्वशः। उल्लेखनमकुर्वाणो न तत्र फल-भाग् भवेत्" ति०त० भविष्यपु०। ब्रह्मखण्डे "निमित्तानि च संवन्ति शुभाशुभफलोदयम्" "निमित्तं मनश्चक्षुरा-दिग्रहणौ" कलापचक्रम्। शुभाशुभसूचके ३शकुने "निमित्तानि च पश्यामि विपरीतानि केशव!" गीता ४फले उद्देश्ये "निमित्तात् कर्मयोगे" वार्त्ति० निमित्त-मिह फलम्। ५निमित्तनिमित्ते नैमित्तिकं निमित्तनिमि-त्तादागतम्। ६शब्दे च शब्दार्थेचि० स्वार्थे क तत्रार्थे संज्ञायां कन्। निमित्तक घुम्बने शब्दमाला।

**निमित्तकारण** न० कर्म०। नैयायिकमते समवायिकारणाऽ-समवायिकारणभिन्नकारणे तथाहि घटादौ मृत्तिकादि समवायि कारणम् कपालद्वयसंयोगोऽसमवायिकार-णम्। कुलालचक्रदण्डसलिलसूत्रादि निमित्तकारणम्। एवमन्यत्र यथायथमूह्यम्।

**निमित्तकृत्** त्रि० निमित्तं शकुनं कृतेन करोति कृ-क्विप् तुक्। रवेण दुष्टादुष्टशकुनकारके काके राजनि०। तस्य रवेण शकुनसूचकत्वात् तथात्वम्। काकरुतशब्दे १८३३ पृ० दृश्यम्।

**निमित्तवध** पु० निमित्तेन रोधादिहेतुना वधः। रोधादि-निमित्ते १गवादेर्वधे तत्र प्रायश्चित्तादि प्रा०त०उक्तं यथा "रोधादिनिमित्तकप्रायश्चित्तम्। तत्राङ्गिराः "रोधने बन्धने चापि योजने च गवां हतः। उत्पाद्य मरणं वापि निमित्ती तत्र लिप्यते। पादक्षुरेरोधवधे द्वौ पादौ बन्धने चरेत्। योजने पादहीनं स्याच्चरेत् सर्वं निपातने"। निमित्ती लिप्यत इति यथाकथञ्चित् मरण-निमित्तत्वारम्भेण "यो मूलं चारभते तस्मिन् फले विशेषः" इत्यापस्तम्बवचनात् पापविशेषेण लिप्यते तद्विशेषात् प्रायश्चित्तविशेषमाह पादक्षुरेदित्यादि। रोधः स्रोतसाः गोराकारप्रचारनिर्गमविरोधः। बन्धन-मयत्नबन्धनमकालबन्धनञ्च। योजनं हलशकटादौ

वोजनं तत्रातिवाहादिनेति शेषः । अत्रैव विषये व्यासः "प्राजापत्यद्वयं गोहत्याप्रायश्चित्तं रोधनबन्धनयोश्च-वधे पादश्चा नखानि क्षोमाणि शिखावर्जं सक्थिं वपनं त्रिपवर्षं गवानुगमनं सुप्तशयनं सुमङ्गलपूर्वाणि दण्डाञ्जु चारयेत् व्रतान्ते ब्राह्मणभोजनमिति"। रोधन-बन्धनयोश्चवध इत्यादेरयमर्थः रोधनिमित्तकवधे प्राजा-पत्यस्य पादः प्रायश्चित्तं नखच्छेदनमात्रम्। बन्धन-निमित्तवधे प्राजापत्यस्य द्वौ पादौ नखानां क्षोमाच्च छेदनम्। क्षोमनिमित्ते च वधे प्राजापत्यपादत्रयं नखक्षोमशिखावर्जक्षेशच्छेदनञ्च। दण्डादिप्रहारवधे सम्पूर्णं प्राजापत्यम् नखक्षोमक्षेशशिखाच्छेदनञ्च इति। एतद्विषय एव सिताक्षरोद्धृतं संवर्त्तवचनं तदैकवाक्य-त्वात् तद्यथा "पादेऽङ्गक्षोमवपनं द्विपादे श्मश्रुणोऽपि च। त्रिपादे च शिखावर्जं सक्थिनी निपातने"। अत्र प्राजापत्यस्य पादादित्वे किं मानमिति चेत्। पराशर-वचनम् "रोधने तु चरेत् पादं बन्धने चार्द्धमेव हि। योजने पादहीनं स्यात् प्राजापत्यं निपातने"। "अङ्गभङ्गानताडने" इति वार्द्धत्वात्। दण्डोऽत्र हस्त-प्रमाणो ग्राह्यः। तदधिके तु द्विगुणप्रायश्चित्तविधानात्। यथा अङ्गिराः "अङ्गुष्ठमात्रः स्त्रीत्वेन बाहुमात्रः प्रमाणतः। सार्द्धं च सपलाशश्च दण्ड इत्यभिधीयते"। "अस्मादूर्द्धं प्रहारेण यदि गां विनिपातयेत्। द्विगुणन्तु भवेत्तस्य प्रायश्चित्तमिति स्थितिः"। सपलाशः सपत्रः। एतद्वचनविषय एव व्यासोक्तप्राजापत्यद्वयमिति एतन्मा-न्मानतः यथा हारीतः "पादहरेत् रोधवधे अङ्गार्द्धं बन्धघातने। अतिवाहे च पादोनं अङ्गभङ्गानताडने"। अत्रानङ्ग क्षोणायामक्षोणत्वभ्रमः। क्षेशच्छेदने तु प्रायिकमरणं ज्ञात्वा प्रकृतस्य चान्द्रायणपादादिकम्। यथा हारीतः "नासाच्छेदनदाहेषु कर्णच्छेदनबन्धने। अतिदोहातिवाहाभ्यां अङ्गं चान्द्रायणं चरेत्" इत्येति शेषः। अङ्गं व्रतं तेन चान्द्रायणव्रतमित्यर्थः। इति मूलपाणिमहामहोपाध्यायाः। भवदेवभट्टैस्तु निपातने कूपावटादिषु इति व्याख्यातं तदपि युक्तं अन्यथा तत्र पातजनकभयादिदर्शकस्य प्रायश्चित्तस्यानभ्य-वसायापत्तेः। "यस्तादिना तु कृत्वा गां मानवं व्रतमाचरेत्। रोधादिना त्वङ्गिरसमापन्नस्योक्तमेव चेति" इत्यस्युक्तं तत्र प्रथमादिपदानृषिदोहनगुरुविप्राम्बा-दीनां प्रायिकमरणयुक्तानां ग्रहणम्। रोधादिनेति यथा कथञ्चिन्निमित्तमात्रस्य, बन्धादेरिति मूलपाणिव्याख्या-नान्तरञ्च। तच्चाङ्गिपातनपरम् उभयपरम्। एतच्च रात्रौ रक्षणार्थं रोधबन्धनव्यतिरिक्तविषयम्। "सायं संयम-नार्थन्तु न दुग्धे रोधबन्धयोः" इति अङ्गिरोवचनात् बन्धने मिताक्षरायां विशेषमाह व्यासः "न नारि-केलैर्न च माषतालैर्नापि क्षौद्रेण च बन्धयेद्गवः। एतेषु गावो न हि बन्धनीया बद्धा तु तिष्ठेत् परगृं स्पृहीत्वा। कृशैः कामेन बध्नीयात् स्थाने दोषविवर्जिते"। निमित्तनृशब्दे वक्ष्यमाणे मन्वुत्पादनद्वारा २हनने च।

**निमित्तविद्** त्रि॰ निमित्तं शकुनं शुभाशुभसूचकं लक्षणं वेत्ति विद्–क्विप्। निमित्तज्ञे दैवज्ञे शेषच॰ निमि-त्तात्तादयोऽध्याय। "निमित्तज्ञस्तपोधनः" रघुः।

**निमित्तिन्** त्रि॰ निमित्तमस्यास्ति इति। निमित्तयुक्ते ।कार्ये प्रा॰वि॰उक्ते २वधकर्त्तृभेदे च यथा "कर्त्ता च पञ्चविधः कर्त्ता प्रयोजकोऽनुमन्ता अनुपाहकोनिमित्ती चेति"। निमित्तिनमाह विष्णुः "अन्यादेव स्पृहीतस्तो न्याय-मर्थयते तु यः। यस्तद्विप्रं त्यजेत् प्राणांस्तमाहुर्ब्रह्म-घातकम्" तच्चधं प्रा॰वि॰ उक्तं "उद्देश्यत्वे सति हन्तुर्मन्वुत्पादको निमित्तो" इति मन्वुत्पादने निमि-त्तमाह तत्रैव उद्वहा॰ "गोभूद्विरण्यहरणे स्त्रीषण्ढ-त्वकृतेऽपि च। यस्तद्विप्रं त्यजेत्प्राणांस्तमाहुर्ब्रह्म-घातकम्" इत्यत्रातिः "प्रातिभिक्यकृतार्थं स्तुतच-मार्थमेव च। यस्तद्विप्रं त्यजेत् प्राणांस्तमाहुर्ब्रह्मघा-तकम्। गोभूद्विरण्यहरणे स्त्रीणां चेत्यस्य च। यस्तद्विप्रं त्यजेत् प्राणांस्तमाहुर्ब्रह्मघातकम्। गुर्वर्थं पितृमात्रर्थमात्मार्थमथ वा पुनः। यस्तद्विप्रं त्यजेत् प्राणां-स्तमाहुर्ब्रह्मघातकम्" इत्यत्रिवचनमिति ज्ञात्वा पठितम् "आक्रोशितस्ताडितो वा धनैर्वा परिपीडितः। यस्त-द्विप्रं त्यजेत् प्राणांस्तमाहुर्ब्रह्मघातकम्" अत्रोद्दि-श्येति सर्वत्र कीर्त्तनात् उद्देशाभावे निमित्ततामा-त्रेण वधित्वं नास्ति अर्थादिहरणाक्रोशनताड-नादीनां मन्युकारणानामुपपातकत्वादेतेषामभावे धनाद्यर्थं हठारोहणादिना ये म्रियन्ते ( यदि मह्यं धनं न दास्यसि तदा हठारोहणेन मरिष्यामीति ) तत्र कीर्त्तनमात्रेण निमित्तवधो नास्ति तथा च पठन्ति "अकस्मिन यः कश्चित् द्विजः प्राणान् परि-त्यजेत्। तस्यैव तद्भवेत् पापं न तु यं परिकी-र्त्तयेत्" अकस्मिन्नेति याक्रुतादिसकलापराधसम्-

ऽभावपरं यच्च "सम्बन्धेन विना देव ! शुष्कवादेन कोपितः" इति भविष्यपुराणवचनं वार्षिकप्रायश्चित्तविधायकं तत् वाक्कृतेतरापराधसम्बन्धाभावपरं "शुष्कवादेन कोपितः" इत्यभिधानात्। एवं यत्राक्रोशनादौ पश्चात्कृते नापराधः तत्रापि न वधः यथा हरिस्मृतिः "आक्रुष्टस्तु यदाक्रोशंस्ताडितः प्रतिताडयन्। हत्वा ततोऽधिनश्चैव नापराधी भवेन्नरः"। यत्राक्रोशिततादनादौ कृते यत्र पुत्रशिष्यादिर्म्रियते तत्रापि वधो नास्त्येव यथा भविष्यपुराणे "पुत्रः शिष्यश्चया भार्या शासितश्चेद्विनश्यति। न शास्ता तत्र दोषेण लिप्यते देवसत्तम!। अशास्त्रीयताडनादौ भवत्येव यथा मनुः। "पुत्रः शिष्यश्चया भार्या दासी दासस्तु पञ्चमः। प्राप्नुयुरपराधान्ताद्याः शूरज्ज्वा वेणुदलेन वा। अधस्तान्नु प्रहर्त्तव्यं नोत्तमाङ्गे कदाचन। अतोऽन्यथा तु प्रहरन् शौरस्याप्नोति किल्बिषम्"। एवञ्च विहितदण्डाचरणे शास्त्रीयकरणपक्षे क्रियमाणे यदि म्रियते तदापि वधो नास्त्येव दण्डादिशास्त्रविरोधान्निषेधाप्रवृत्तेः। वधनिमित्तिनस्तु प्रायश्चित्तं तत्रोक्तं यथा

"निमित्तिनस्तु वचनात् त्रैवार्षिकं सम्वत्सरं, असम्बन्धे वार्षिकं यथा भविष्ये "असम्बन्धं यदा विप्रो हत्वात्मानं स्मृतो गुरुः!। निर्गुणः सहसा क्रोधादुद्दिश्यैकादितो विभो!। त्रैवार्षिकं व्रतं कुर्यात् ब्रह्मचर्य्यं चरन् वने"। सम्बन्धशब्दोऽत्र धनसम्बन्धपरः। ताडनादिना तिरस्कारेऽपि त्रैवार्षिकमाह स एव "तिरस्कृतो यदा विप्रो निर्गुणो म्रियतेऽनघ!। सनिमित्तं यदा विप्रस्तदेदं शुद्धये चरेत्। त्रैवार्षिकं ब्रह्मचर्य्यं कृत्वा शुध्येत विप्रराट्"। धनताडनादिसम्बन्धाभावे वाक्कलहमात्रेण स्मृते वार्षिकमाह स एव "यस्तद्विप्रं द्विजो हन्यात् ब्राह्मणं स्वयमेव हि। आत्मानं सहसा क्रोधात्तस्य किञ्चु भवेदिदम्। सम्बन्धेन विना देव! शुष्कवादेन कोपितः। केशाकृष्टनखादीनां कृत्वा वै वपनं गुरुः!। ब्रह्मचर्य्यं चरन् वीर! वर्षैकेन शुध्यति" एतच्चित्तवैकारण्याभावेऽर्थलोभादिना स्मृते प्रायश्चित्ताभाव इति प्रागुक्तम्" प्रा०वि०।

**निमिष** पु० नि+क्तटा० मिष–भावे घञ्। १चक्षुर्निमीलनरूपे व्यापारे तदुपलक्षिते "शुष्के नरे शुष्कपीने यावत् स्यन्दति लोचनम्" इति मनूक्ते २कालभेदे "त्रुटस्तत्त्रिंशता निमिषो" अमरः। निमिषत्यस्मात् नि+मिष–अपादाने घञ्। ३परमेश्वरे "निमिषोऽनिमिषः स्रग्वी वाचस्पतिरुदारधीः" विष्णुस० स्तुतौ उक्ते नेत्रव्यापारोचिते ४रोगभेदे "अर्बुदं निमिषञ्चापि" इत्यादिना विभज्य स च तत्र लक्षितो यथा "निमेषणीः शिरा वायुः प्रविष्टो वर्त्मसंश्रयाः। चालयेदनिवर्त्तीनि निमिषः सगदो मतः"।

**निमिषित** न० नि+मिष–क्त। नेत्रव्यापारभेदे पक्ष्माकुञ्चने

**निमीलन** न० नि+मील–भावे ल्युट्। १नेत्रनिमेषरूपव्यापारे २पक्ष्मसङ्कोचने आधारे ल्युट्। ३मरणे हेमच०। ४अविकाशे "अग्राह्य च भवेत् पश्चादेवं वापि निमीलनात्" सु०शि०।

**निमीला** स्त्री नि+मील–भावे अ। १नेत्रसङ्कोचे करणे च। २निद्रायां प्रमीलायाम् स्वार्थे क। निमीलिका तत्रार्थे निमीलयति स्वरूपम् निमील–णिच् ण्वुल्। व्याजे स्त्री यङ्लुगन्ते०।

**निमीश्वर** पु०अतीतायामुत्सर्पिण्यां जाते जिनेश्वरभेदे हेमच०

**निमूल** त्रि० निष्क्रान्तं मूलं यस्य प्रा०ब०। १मूलरहिते। तदुपपदे "निर्मूलसमूलयोः कषः" पा०णमुल्। निर्मूलकाषं कषति। नि+मूल–क। २प्रकाशने च तत्र "नेरनिधाने" पा० नेःपरस्य मूलस्यालोदात्तता "निधानमप्रकाशता ततोऽन्यदनिधानं प्रकाशनमित्यर्थः तदर्थं मूलान्तस्यालोदात्तत्वमित्युक्तेरस्य प्रकाशनार्थता। [२परिवर्त्ते न०।

**निमेय** त्रि०नि+माङ्–भावे यत्। १परिवर्त्तनीये भावे यत्।

**निमेष** पु० नि+मिष–भावे घञ्। नेत्रस्य अन्तरूपे व्यापारे नेत्रपक्ष्मणोः स्वाभाविकोन्मेषस्य विरोधिव्यापारे नरस्याक्षिमविकाशान्तरं १पक्ष्माकुञ्चने। तदुपलक्षिते २कालभेदे च "द्वौ निमेषौ त्रुटिर्नाम ते त्रुटी तु लवः स्मृतः" अग्निपु० "निमेषा दश चाष्टौ च काष्ठास्त्रिंशत्तु ताः कला। त्रिंशत् कला मुहूर्त्तः स्यात्" मनुः। "योऽक्ष्णोर्निमेषस्य खरामशंभागः स तत्परस्तत्क्षतभाग उक्तः। त्रुटिर्निमेषैर्दशभिश्चतुर्भिः काष्ठा तत्त्रिंशता सद्गणकैः कलोक्ता" सि०शि०। "योऽक्ष्णोर्मौलनयोः पक्ष्मपातः स निमेषो स यावताकालेन निष्पाद्यते तावान् कालोऽपि निमेषशब्देनोच्यते उपचारात्" प्रभि०। "निमेषनाद्वधूय तद्व्यायाम्" "पपौ निमेषालसपक्ष्मपङ्क्तिः" रघुः। स्वार्थे क निमेषक तत्रार्थे ४अविकाशे च

**निमेषकृत्** स्त्री निमेषं करोति कृ–क्विप् तुक् ह्रस्वः। तडिति शब्दमात्रा तस्याः निमेषकालेन (स्वल्पकालेन) निमीलन तुल्याधिकालयुक्तत्व तु तथात्वम्।

निमेषणी स्त्री निमिषत्यनया नि+मिष–करणे ल्युट् ङीप्। नेत्रवर्त्मान्विते निमेषसाधने शिराभेदे निमिषशब्दे दृश्यम्

निमेषरुच् पु० निमेषं तत्कालं व्याप्य रोचते रुच–क्विप्। खद्योते त्रिका० निमेषद्युदादयोऽप्यत्र तस्य स्वल्पकालभासद्योतनात् तथात्वम्।

निम्न त्रि० नि+म्ना–क। १नीचे २गभीरे (नावाल)अमरः। "पयश्च निम्नाभिमुखं प्रतीपयेत्" कुमा० "आपो न निम्नैरुदभिर्जिगत्नवः" ऋ० १०।७८।५ "प्रयाति निम्नाभिमुखं नवोदकम्" ऋतुसं० इत्यादिषु ततोवेदनाव्याप्ते २चिह्नभेदे शब्दार्थचि०।

निम्नगा स्त्री निम्नं गच्छति गम–ड। १नदीयाम् २नीचगामिनि त्रि० "अतुरोदितेव करुणेन पतिव्रता विदुतेन वत्सलतयेव निम्नगाः" माघः "उदधेरिव निम्नगागतेरभवस्तस्य विमानना क्वचित्" रघुः।

निम्ब पु० निबि–सेचने अच् ववयोरैक्यात् मः।(निम्ब) ख्याते वृक्षे अमरः "निम्बः शीतो लघुर्पाकी कटुपाकोऽग्निवातहृत्। कफहृद्वः क्रमत्रट् कासज्वरारुचिक्रिमिप्रणुत्। निम्बपत्रं स्मृतं नेत्र्यं क्रिमिपित्तविषप्रणुत्। वातलं कटुपाकञ्च सर्वरोगकफप्रणुत्। निम्बं फलं रसे तिक्तं पाके तु कटु भेदनम्। स्निग्धं वातघ्नं कृमिघ्नं शुक्रमार्गःक्रमिमेहहृत्"। निम्बशाकगुणाः "निम्बस्य कोमलदलानि घृतसंसृष्टान्याज्ये क्षिप्तेक्षदत्त सैन्धवतक्रयुक्तान्। शालीयतण्डुलकृतान् दृढ रामठेन चाचारितान् ददति रोचनमेव जेतृ"। "करञ्जनिम्बजम्बीफलं क्रमिकुष्ठप्रमेहजित्। निम्बतैलन्तु कृमिघ्नं तिक्तं क्रमिहरम् परम्" इति राजवल्लभः। "मक्षरं निम्बपत्रञ्च योऽत्ति मेषगते रवौ। अतिरोषान्वितस्यस्य तस्यकः किं करिष्यति" ति०त०। पक्षां तिथौ तद्भक्षणनिषेधो यथा "कलङ्की जायते विप्रो तिर्यग्योनिञ्च निम्बके" ति०त०। तिथिभेदे वल्लीभौ। निम्बक स्वार्थे क।

निम्बतरु पु० निम्ब इव तत्संज्ञको वा तरुः। १मन्दारवृक्षे अमरः। २निम्बसंज्ञके तरौ च। [राजनि०।

निम्बबीज पु०निम्बस्य बीजमिव बीजं यस्य। राजादनीवृक्षे

निम्बू स्त्री निबि–सेचने ऊ ववयोरैक्यात् मः। (जामजीनेबु) अम्लीरभेदे ततः स्वार्थे क, वा ह्रस्वः अभिधानात् ह्रस्वम्। निम्बुक निम्बूक तत्रार्थे पु०। तस्य फलम् अण् तस्य लुपि। तत्फले न० "निम्बूकमम्ल वातघ्नं दीपनं पाचनं लघु। निम्बुकं क्रमिकमूहनाशनं तीक्ष्णमम्लमुदरव्यपोहनम्। वातपित्तकफमूर्छाघ्ने हितं कण्ठहृद्विरोचनम् परम्। त्रिदोषवह्निश्रमवातरोगनिपीडितानां विप्रविह्वलानाम्। मलयजे बङ्गदेशे प्रदेयं विस्फुलिङ्गायां सनयो वदन्ति"भावप्र०। "भागैकं निम्बुकं तोयं षड्भागं शर्करोदकम्। लवङ्गमरिचोन्मिश्रं पानकं पानकोत्तमम्। निम्बूफलभवं पानमत्यन्तं वातनाशनम्। वह्निदीप्तिकरं रुच्यं समस्ताहारपाचकम्" राजनि०।

निम्लोच पु०नि+म्लुच–भावे घञ्। अस्तगमने "अस्तमुपयि निम्लोचे" भाग०१।२।८। भावे ल्युट् निम्लोचन तत्रार्थे न० आधारे ल्युट् ङीप् सप्तम्यन्तस्थाने द्वितीयान्ते स्त्री। "पश्चाद् वाहर्षी निम्लोचनीं नाम" भाग०५।२१।१५

निम्लोचि पु० यदुवंश्ये भजमानस्यपुत्रभेदे "भजमानस्य निम्लोचिः किंकाणो द्वाविमावेव च" भाग० ९।२४।५

नियत त्रि० नि+यम–क्त नितरां यतते यत–अच् वा। १संयते २नियमकारिणि ३नियमयुते "नियमो यमश्च नियतं सतिं यथा" माघः। कर्मणि क्त। ४व्रतनियमे च। "प्रत्येकं नियतं कालमात्मनो व्रतमादिशेत्। प्रायश्चित्तमुपाशीनो वाग्यतश्चिन्तयेत् स्मृशेत्" प्रा०त० शङ्खलिखितौ। "पाणिपक्षिका मन्त्रा नियतं दारलक्षणम्" उद्वा०त०मनुः। "अन्यथाविद्विशून्यश्च नियता पूर्ववर्त्तिता" भाषा०।

नियताग्नि स्त्री नियता नित्या अग्निः। सा० द० उक्ते नाथे प्रारब्धकार्य्यश्च अवस्थाभेदे अवस्था विभज्य "अपायाभावतः प्राप्तिर्नियताग्निर्विनिश्चिता" अपायाभावाच्चिरैरेवान्यफलप्राप्तिर्नियताग्निः। यथा रत्नावल्याम् "राजा देवीप्रसादनं लब्धा मात्यमतोपायं पश्यामीति" देवीलक्षणापायस्य प्रसादनेन निवारणान्नियतफलप्राप्तिः सूचिता" सा०द०।

नियति स्त्री नियम्यतेऽनया नि+यम–करणे क्तिन्। १भाग्ये दैवे अमरः "नियतिं लोक एवानुरुध्यते" किरा०। "आसादितस्य तपसा नियतेर्नियोगात्" माघः "नियतिप्रतिनियमरहिताम्" काव्यप्र०। २ईश्वरेच्छाभेदे अविद्यायाम्। "महामायेत्यविद्येति नियतिर्मोहनीति च। प्रकृतिर्वासनेत्येव तवेच्छाऽनन्त! गीयते"पुराणान्तरम्। करणे क्तिच् ङीप्। दुर्गायां देव्यां स्त्री "क्षतिः संरक्षणाद्देवी नियती च नियामतः" देवीपु०।

नियन्तृ त्रि० नि+यम–तृच्। १नियमकारिणि यागादौ स्त्रियां ङीप्। २अश्वनियमकारिणि सारथौ पु० अमरः

"रेखामात्रमपि क्षुण्णादामनोर्वर्त्मनः परम्। न व्यतीयुः प्रजास्तस्य नियन्तुर्नेमिवृत्तयः" रघुः। २परमेश्वरे पु० "अपराजितः सर्वसहोनियन्ता नियमोऽयमः" विष्णुस०।

**नियन्त्रण** न० नि+यन्त्रि-ल्युट्। प्रतिबन्धदूरीकरणे एकत्रस्थापनार्थव्यापारभेदे "अनेकार्थस्य शब्दस्य संयोगाद्यैर्नियन्त्रिते। एकार्थेऽन्यधीहेतुः" सा०द०। भावे युच्। नियन्त्रणापि तत्रार्थे स्त्री।

**नियन्त्रित** त्रि० नि+यन्त्रि-क्त। १कृतनियमने २प्रतिबन्धादिना एकत्रस्थापिते "अनेकार्थस्य शब्दस्य संयोगाद्यैर्नियन्त्रिते। एकार्थेऽन्यधीहेतुः" सा०द०।

**नियम** पु०नि+यम-घञ् वा कुत्वम्। १प्रतिज्ञायाम् अङ्गीकारे अमरः। २नित्ये ३आगन्तुकसाधनकर्मरूपे व्रते ४नियन्त्रणायां ५निश्चये मेदि० पा०सू० उक्ते ६योगाङ्गभेदे "यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधयोऽष्टावङ्गानि" सूत्रे उद्दिश्य "शौचसन्तोषतपःस्वाध्यायेश्वरप्रणिधानानि नियमाः" सू० विभज्योक्तं "तत्र शौचं मृज्जलादिजनितं मेध्याभ्यवहरणादि च बाह्यमाभ्यन्तरं चित्तमलानामाचालनम्। सन्तोषः सन्तिक्षितसाधनादधिकस्यानुपादित्सा। तपो द्वन्द्वसहनं हन्तश्च जिघ्रत्सापिपासे शीतोष्णे स्थानासने काष्ठमौनाकारमौने च व्रतानि चैवं यथायोगं चान्द्रायणसान्तपनादीनि। स्वाध्यायो मोक्षशास्त्राणामध्ययनं प्रणवजपो वा ईश्वरप्रणिधानं तस्मिन् परमगुरौ सर्वकर्मार्पणं "यथाभिमतध्यानाद्वा" यत्रेदमुक्तं ततः प्रत्यक्चेतनाधिगमोऽप्यन्तरायाभावश्चेति" भा० "शौचादिनियमान् व्याचष्टे शौचमिति। आदिशब्देन गोमयादयो गृह्यन्ते। गोमूत्रयावकादि मेध्यं तच्चाभ्यवहरणादि आदिशब्दात् स्नानपरिमार्जनक्षालनियमादयो ग्राह्या मेध्याभ्यवहरणादिजनितमिति वक्तव्ये मेध्याभ्यवहरणादि चेत्युक्तं कार्ये कारणत्वोपचारात्। चित्तमलाः यदभ्यासादवसादनयो मनःशौचम् प्राणयात्रामात्रहेतोरभ्यधिकस्यानुपादित्सा सन्तोषः प्रायेण स्त्रीकरणपरित्यागादिति विशेषः। काष्ठमौनमित्युक्तेनापि स्वाभिप्रायप्रकाशनम् स्ववचनमाकारमौनम्। परिक्षीणवितर्कजाल इति वितर्का वक्ष्यमाणाः संशयविपर्ययौ चेति एतावता सूत्राभिसन्धिरुक्तः। एते च यमनियमाः विष्णुपुराणे उक्ताः "ब्रह्मचर्यमहिंसां च सत्यास्तेयापरिग्रहम्। सेवेत योगी निष्कामो योग्यतां स्वमनो नयन्। स्वाध्यायशौचसन्तोषं तपांसि नियतात्मवान्। कुर्वीत ब्रह्मणि तथा परस्मिन् प्रवणं मनः। एते यमाः सनियमाः पञ्च पञ्च प्रकीर्तिताः। विशिष्टफलदाः काम्या निष्कामास्तु विमुक्तिदाः" विष्णुस०। सर्वदर्शनसंग्रहे पातञ्जलदर्शनप्रसङ्गे स्वाध्यायशब्देन प्रणवजपवत् तान्त्रिकमन्त्रजपोऽप्युच्यते इत्युक्तम्।

"नियमाः पञ्च सत्याद्या बाह्याभ्यन्तरं द्विधा। शौचं तुष्टिश्च सन्तोषस्तपश्चेन्द्रियनिग्रहः। ज्ञानं नौनोपवासेज्याः स्वाध्यायोपस्थनिग्रहः। तपोऽक्रोधो गुरौ भक्तिः शौचञ्च नियमाः स्मृताः। यमाः पञ्चाथ नियमाः शौचं द्विविधमीरितम्। सन्तोषस्तपसां जप्यं वासुदेवार्चनं दमः" गारुडपु० "तपः सन्तोष आस्तिक्यं दानं देवस्य पूजनम्। सिद्धान्तश्रवणञ्चैव ह्रीर्मतिश्च जपो हुतम्। दशैते नियमाः प्रोक्ता योगशास्त्रविशारदैः" तन्त्रसारः। ७विधिभेदे तद्वाचकादि शौनाचिभास्करेणोक्तं यथा

"विधिरत्यन्तमप्राप्तौ नियमः पाक्षिके सति। तत्र चान्यत्र च प्राप्तौ परिसंख्येति गीयते" श्लोकार्थः। प्रमाणान्तरेणाप्राप्तस्य प्रापकोविधिरपूर्वविधिः। यजेत स्वर्गकाम इत्यादि स्वर्गार्थकयागस्य प्रमाणान्तरेणाप्राप्तस्यानेन विधानात्। पक्षे प्राप्तस्य प्रापकोविधिर्नियमविधिः यथा व्रीहीनवहन्तीत्यादिः। कथमस्य पक्षेऽप्राप्तेः प्रापकत्वमिति चेत् इत्थम् अनेन हि अवघातस्य वैदध्यार्थत्वं न प्रतिपाद्यते अन्ययव्यतिरेकसिद्धात् किन्तु नियमः स चाप्राप्तांशपूरणं वैदध्यस्य हि ज्ञानोपायसाध्यत्वादवघातं परित्यज्योपायान्तरं यदा गृहीतुमारभ्यते तदावघातस्याप्राप्तत्वेन तद्विधानमप्राप्तांशपूरणमेवानेन विधिना क्रियते। अतश्च नियमविधावप्राप्तांशपूरणात्मको नियम एव वाक्यार्थः पक्षेऽप्राप्तावघात विधानमिति यावत्"। मिताक्षरोक्तं विशेषोदाहरणादिश्रुतकालशब्दे १३१७पृ० दर्शितं तत्र दृश्यम्। नियमे च इतरसंवलने न दोषः। परिसंख्यायां दोष इति भेदः। पाक्षिके सतीत्यादिकारिकां व्याख्याय उदाहरणं परिसंख्यातो भेदश्च विधिरूपत्वे दर्शितो यथा "नियमः पाक्षिके सतीति विधिं विना प्रवृत्तेः पाक्षिकत्वे सतीत्यर्थः प्रवृत्तिनियमे सतीति यावत् तथाच तद्गोचरप्रवृत्तिनियमनिर्वाहको विधिस्तन्नियमविधिरिति

फलितम्। ताडयत्यावघातादिविधिः व्रीहीनवहन्तीति विधिं विना पुरोडाशनिष्पादकव्रीहिवैहत्यद्वारा यागोपकारकेऽवघाते इतरपरोक्षारेण नखदलनादावपि प्रवृत्तिप्रसङ्गात्तत्रावघाते प्रवृत्तिनियमो न स्यादिति ताडये विधेः प्रवृत्तिनियमनिर्वाहकत्वं यागोपकारके व्रीहिवैहत्येऽवघाताधीनत्वनियमस्ताडयविधितो यद्यपि दुर्लभः नियमस्यापदार्थत्वादप्राप्तार्थत्वाच्च तथापि ताडयविधितो व्रीह्यवघातत्वेन नियोगसाधनताऽवगमात् यागजन्यपरमापूर्वस्य तदवघातरूपकारकं विनापि निष्पत्तिप्रतिसन्धानेन तत्र नियतप्रवृत्तिनिर्वाहः। तत्र चान्यत्र चेति यत्रोद्देश्ये यस्य विधानं तदन्यस्मिन्नपि तत्सम्बन्धस्य तस्मिन् वा तदन्यसम्बन्धस्य प्रवृत्तेः प्रसङ्गाविशेषः। ताडयत्र प्रसङ्गप्रवृत्तिविरोधिविधिः परिसंख्याविधिरित्यर्थः तत्र "इमामगृभ्नन् रशनामृतस्येत्यश्वाभिधानीमादत्ते" इति। तत्रेमामित्यादिमन्त्रस्य [illegible] परिसंख्या यद्यपि मन्त्रस्य विनियोगो विहितः कल्प्यते तथाप्य तदादानकालेऽपि अध्वर्युपाठप्राप्ता तत्रापि तदन्यसम्बन्धः स्यात् अतोऽयं विधिः अध्वर्यवरशनायां एतन्मन्त्रविनियोगलाभे निराकाङ्क्षतया गर्दभरशनायां न तद्विनियोगलाभइति वैयर्थ्यं न तदाचरणमिति एतद्विधेर्विधेयस्येतरोद्देश्यसम्बन्धप्रसङ्गप्रवृत्तिविरोधिता। अथ व्रीहीनवहन्तीति नियमविधिदर्शितपरिसंख्याविध्योः को विशेषः नियमविधेरपि परिसंख्यावदितरनिवृत्तिफलकत्वात् नियमविध्यभावे पुरोडाशद्वारा यागोपकारकवैहत्याद्यर्थिनोऽवघातेतरतदुपाये प्रवृत्तिप्रसङ्गेः। यदि चावघातनियमविधेरवघातप्रवृत्तिनियमफलकत्वं परिसंख्यातो विशेषः इमामगृभ्नन् रशनामित्यादि परिसंख्याया अध्वर्यवादाने मन्त्रपाठप्रवृत्तिनियमस्य मन्त्रलिङ्गेन मन्त्रस्यासाधारण्येनोपकारकतावोधनादेव निर्वाहात्तस्याः प्रवृत्तिनियमानुपपादकत्वादिति विभाव्यते तदा खलु परिसंख्याया नियमानन्तर्भावः नियमस्तु परिसंख्यावानन्तर्भवेत् परिसंख्याफलस्य तत्सामान्यस्य तत्सामान्यस्य इतरनिवृत्तेरर्थतः सम्भवेऽपि तत्र तत्तात्पर्यानुपगमात् नियतप्रवृत्तावेव तत्तात्पर्यात् न चोपायान्तरनिवृत्तावपि नियमतोऽवघातप्रवृत्त्युपपत्तेर्निवृत्तावेव तत्तात्पर्यं न तु नियतप्रवृत्तावित्येव किं नोपपेत इति वाच्यम् अवघातविधिनाऽवघातस्यासाधारण्येन यागोपकारकत्वबोधनेऽपि अवघातमात्रेण वैहत्यनिर्वाहप्रतिसन्धाने अन्योपायसंवलनेनाप्यवघातप्रवृत्तिसम्भवादवघातविधेरितरनिवर्त्तकत्वायोगेन तस्येतरनिवृत्तौ तात्पर्यासम्भवात्। एवम् अतो भार्यांसमेयादित्यादिनियमो न तु परिसंख्या दोषश्रवणादिति सर्वसिद्धान्तोऽपि व्याहन्येत स्वार्थमन्तरेणैवानिष्टानुवन्धिभार्यागमने ऋतुकालव्याप्तिबोधात् तदेकवाक्यतया परिसंख्याफलस्येतरकाले भार्यागमननिवृत्तिनिर्वाहाच्छियमाणावश्यकत्वात्। न च ऋतावनभिगमने प्रत्यवायश्रुतेः ऋतुकालाभिगमस्यावश्यकत्वे तदतात्पर्यमावश्यकमिति नियम इति वाच्यम्। अन्यतावनभिगमस्यापि "इन्द्रियार्थेषु सर्वेषु न प्रसज्येत कामतः" इत्यादिना निषेधात्तदेकवाक्यतया परिसंख्याया एवोचित्यात् इति चेन्न येन रूपेण उद्देश्यता तदन्यरूपव्यापकता उद्देश्यविधेयभावमर्यादातो न लभ्यते इति यत्र यत्रान्यत्वात् भुङ्क्ते इत्यादावुद्देश्यविधेयेषु भक्षणस्वत्वादौ भक्षकाद्यभेदान्वयबोधे रूपभेदेन अत्र परिसंख्यायां कार्यैक्यादविरोधस्यैव वाधोनैरर्थक्यात्। मीमांसापरिभाषायान्तु "यो विधिः यत्रे प्राप्तमर्थं नियमयति स नियमविधिः यथा व्रीहीनवहन्तीति। एतद्विध्यभावे दर्शपूर्णमासाविषु व्रीहिभूत्पत्तिवाक्यावगतपुरोडाशोपयोगि तण्डुलनिष्पत्त्यङ्गत्व वैहत्यप्रकार्यायावहननस्य कदाचित्तण्डविदलनमपि प्राप्नुयादिति तस्मिन् पक्षेऽवहननस्य प्राप्तप्रभावात् कार्यान्वयोपपत्तेरवहननस्य पाक्षिकी प्राप्तिः स्यात् सत्यस्मिन् विधौ अवहननेनैव वैहत्यं कार्यमिति नियमे सति विदलनं सर्वात्मना निवर्त्तत इति नियमविधिरयम्। न च वैहत्यस्य नखविदलनेनापि सम्भवादवहननस्य नियमो व्यर्थः प्रयोजनाभावादिति वाच्यम् अवघातेनैव वैहत्यप्रकरणे किञ्चिदङ्गं जन्यते इत्यङ्गत्वाङ्गीकारात् नियमेनाङ्गकार्यावाप्तेरप्यङ्गत्वोपपत्तेः। तच्चापूर्वं यागोत्पत्त्यपूर्वद्वारा फलापूर्वे उपयुज्यते तेन नियमापूर्वाभावे फलापूर्वमेवनोत्पद्यत इति कल्पनाच्छियमाणापूर्वस्य न वैयर्थ्यम्। एवं व्रीहियोमादिनियमविधिषु बोध्यम्"। अधिकं विधिरसायनग्रन्थे द्रष्टव्यम्। कविताधर्थनियमभेदाः यथा "धर्मोद्देश्य सदर्थे तच्छियमोऽत्र प्रदर्श्यते। भूर्जत्वगृष्टिमत्त्वेन मतयेऽत्रैव चन्दनम्। सामान्यधर्मेण भौलूक्यं अत्रान्यः-

CENTRAL ARCHAEOLOGICAL LIBRARY New Delhi

Col-
N 3/10/76

Archaeological Library,
19788
Call No. R Sa 4K/Tar.
Author— Taranatha Tarkavaschaspati
Title— Vachaspatya Vol:3

"A book that is shut is but a block"

CENTRAL ARCHAEOLOGICAL LIBRARY
GOVT. OF INDIA
Department of Archaeology
NEW DELHI.

Please help us to keep the book clean and moving.